प्रकाशक

प्रो. वेम्पटि कुटुम्ब शास्त्री

कुलपति

राष्ट्रिय सस्कृत संस्थान

मानित विश्वविद्यालय

(मानवससाधन विकास मत्रालय, भारत सरकार के अधीन)

५६-५७, इन्स्टीट्यूशनल एरिया,

जनक पुरी, नई दिल्ली-११००५८

योजनासमन्यायक

प्रो. आर. देवनाथन्

प्राचार्य, दिल्ली परिसर

डॉ. प्रकाशपाण्डेय

सहायकनिदेशक (शोध एव प्रकाशन)

मूल्यम् : १४९० ०० रुप्यकाणि (५ भागो का सेट)

प्रथम पुनः मुद्रित सस्करणम् : १९८७

द्वितीय पुनः मुद्रित सस्करणम् : २००२

तृतीय पुनः मुद्रित सस्करणम् : २००६

मुद्रकः

नाग पब्लिशर्स

११ए/यू ए जवाहर नगर,

दिल्ली-११०००७ (भारत)

शब्दकल्पद्रुमः।

द्वितीयकाण्डम्।

क, ककारः। (वर्णस्य स्वरूपग्रहणाय कारः।) स तु व्यञ्जनप्रथमवर्णः। अस्योच्चारणस्थानं कण्ठः। इति व्याकरणम्॥ (तथा चोक्तम् "तुल्यास्यप्रयत्नं सवर्णम्"। १। १। ९। सिद्धान्तकौमुद्याम्। "अकुहविसर्जनीयानां कण्ठः"॥ इति॥ *॥) (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—

"वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो मात्रा साक्षात् सरस्वती॥
कुण्डली चाङ्कुशाकारा मध्यशून्यं सदाशिवः।
कदम्बगोलकाकारं ककारं भावयेत् सुधीः"॥

इति वर्णोद्धारतन्त्रम्॥ *॥ तस्य नामानि यथा,—

"कः क्रोधीशो महाकाली कामदेवप्रकाशकः।
कपाली तैजसः शान्तिर्वासुदेवो जयानलः॥
चक्री प्रजापतिः सृष्टिर्दक्षान्यो विशाम्पतिः।
अनन्तः पार्थिवो बिन्दुर्व्यापिनी परमात्मकः॥
वर्गाद्यश्च सुखी ब्रह्मा सखाद्योऽम्भः शिवो जलम्।
माहेश्वरी तुला पुष्पा मङ्गलस्वरणं करः॥
मित्रा कामेश्वरी मुख्यः कामरूपो गजेन्द्रकः।
गोपुरं रमणो रक्तकुसुमा परमात्मकः"॥

इति तन्त्रशास्त्रम्॥

"अधुना सम्प्रवक्ष्यामि ककारतत्त्वमुत्तमम्।
रहस्यं परमाश्चर्यं त्रैलोक्यानाञ्च सम्पृणु॥
वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो मात्रा साक्षात् सरस्वती॥
कुण्डली चाङ्कुशाकारा मध्ये शून्यः सदाशिवः।
जवायावकसंकाशा वामरेखा वरानने।॥
शरच्चन्द्रप्रतीकाशा दक्षरेखा च मूर्त्तिमान्।
अधोरेखा वरारोहे। महामरकतद्युतिः॥
शङ्खकुन्दसमा कीर्त्तिर्मात्रा साक्षात् सरस्वती।
कुण्डली चाङ्कुशा या तु कोटिविद्युल्लताकृतिः॥
कोटिचन्द्रप्रतीकाशो मध्ये शून्यः सदाशिवः।
शून्यगर्भे स्थिता काली कैवल्यपददायिनी॥
ककाराज्जायते सर्व्वं कामं कैवल्यमेव च।
अर्थश्च जायते देवि। तथा धर्म्मश्च नान्यथा॥
ककारः सर्व्ववर्णानां मूलप्रकृतिरेव च।

ककारः कामदा कामरूपिणी स्फुरदव्यया॥
कामनीया महेशानि। स्वयं प्रकृतिसुन्दरी।
माता सा सर्व्वदेवानां कैवल्यपददायिनी॥
ऊर्द्ध्वकोणे स्थिता कामा ब्रह्मशक्तिरितीरिता।
वामकोणे स्थिता ज्येष्ठा विष्णुशक्तिरितीरिता॥
दक्षकोणे स्थिता बिन्दू रौद्री संहाररूपिणी।
ज्ञानात्मा स तु चार्व्वङ्गि। कलाचतुष्टयात्मकः॥
इच्छाशक्तिर्भवेद्ब्रह्मा विष्णुश्च ज्ञानशक्तिमान्।
क्रियाशक्तिर्भवेद्रुद्रः सर्व्वं प्रकृतिमूर्त्तिमान्॥
आत्मविद्या शिवस्तत्र सदा मन्त्रः प्रतिष्ठितः।
आसनं त्रिपुरादेव्याः ककारः पञ्चदेवतम्॥
ईश्वरो यस्तु देवेशि। त्रिकोणे तस्य संस्थितिः।
त्रिकोणमेतत् कथितं योनिमण्डलमुत्तमम्॥
केवलं प्रपदे यस्याः कामिनी सा प्रकीर्त्तिता।
केवलं प्रपदे यस्या कामिनी सा प्रकीर्त्तिता।
ॐ जवायावकसिन्दूरसदृशीं कामिनीं परम्॥
चतुर्भुजां त्रिनेत्राञ्च बाहुवल्लीविराजिताम्।
कदम्बकोरकाकारस्तनद्वयविभूषिताम्॥
रत्नकङ्कणकेयूरमङ्गदैरुपशोभिताम्।
रत्नहारैः पुष्पहारैः शोभितां परमेश्वरीम्॥
एवं हि कामिनीं ध्यात्वा ककारं दशधा जपेत्।
प्रफुल्लश्च ततो ध्यात्वा जपस्य फलभाग्भवेत्॥
एतत्ते कथितं देवि। ककारतत्त्वमुत्तमम्"॥

इति कामधेनुतन्त्रम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमे। "कथुरादि किन्तु वा"। एतेन गणात् क संख्याने गणयति कथत् क वाक्यप्रबन्धे कथयति इत्यादि स्यात्॥)

कं, क्ली, (कायति शब्दो निर्गच्छति यतः यस्मिन् सतीत्यर्थः सशिङ्खवदनस्य शिरोऽन्तर्वर्त्तित्वात्। यद्वा कायति वर्णात्मकं ध्वन्यात्मकं वा शब्दं करोति जीवः यस्मिन् सतीति यावत्॥ कै शब्दे "अन्येभ्योऽपि दृश्यते" ड। ३। २। १०१।) शिरः॥ (यथा, तन्त्रसारे। "हाभ्यामोष्ठौ दिरुन्म्य चैकेन ताडयेत्करम्। मुख-घ्राण-नेत्र-श्रोत्र-नाभ्युरस्क भुजौ क्रमात्"॥ अत्र कं शिरः इति तट्टीका॥ कायति शब्दायते स्रोतोवेगेनालोडनेन वेति यावत्।) जलम्॥

(यथा, भागवते ६। १। ४२।
"सूर्य्योऽग्निः खं मरुद्गावः सोमः सन्ध्याहनी दिशः।
कं कुः कालो धर्म्म इति ह्येते दैह्यस्य साक्षिणः"॥
कं कुः कालो धर्म्म इति ह्येते दैह्यस्य साक्षिणः"॥ कायन्ति आनन्दोत्सवध्वनिं कुर्व्वन्ति यस्मिन् समागते उपस्थिते इत्यर्थः गृहिण इति शेषः। आनन्दध्वनेस्तु सुखानुवर्त्तित्वात्।) सुखम्। इति मेदिनी॥

(यथा, छान्दोग्योपनिषदि। ४। १०। ५।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत् प्राणो ब्रह्म कञ्च तु खञ्च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च हास्मै तदाकाशञ्चोचुः"॥ "तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्यग्नय ऊचुः। यद्वाव यदेव वयं कमवोचाम तदेव खमाकाशम्। इत्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजातसुखान्निवर्त्तितं स्यान्नीलेनेव विशेष्यमाणमुत्पलं रक्तादिभ्यः॥ यदेव खमाकाशमवोचाम तदेव च कं सुखमिति जानीहि एवञ्च सुखेन विशेष्यमाणं खं भौतिकादचेतनात् खान्निवर्त्तितं स्यान्नीलोत्पलवदेव"॥ इति भाष्यम्॥ कचते दीप्यते मस्तकोपरि शोभते इति भावः। यद्वा कच्यते बध्यते संयम्यते कराभ्याम्। कच् बन्धने ड।) केशः॥ इति धरणी॥

क, पुं, (कचति दीप्यते स्वेन ज्योतिषा ज्योतिर्म्मयत्वात् कच्+ड।) ब्रह्मा (यथा, भागवते। ३। १२। ५१।
"एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा।
कस्य रूपमभूद्‌द्वेधा यत्कायमभिचक्षते"॥) विष्णुः। (यथा महाभारते। १३। विष्णोः सहस्रनामकथने। १४९। ९१।
"एको नैकः सवः कः किं यत् तत्पदमनुत्तमम्"॥) प्रजापतिः। यथा भागवते। ८। ५। ३९।
'छिन्धि च्छन्दोमयो मेध्यत कः
प्रसीदतां नः स महाविभूतिः'॥) दक्षः। (यथा भागवते। ९। १०। १०॥
"अग्नेऽद्भुतैर्वपुषाऽक्षमतोऽपण्ठो

मारीचमास्तु विशिखेन यथा कसुग्र" ॥) कामदेवः ॥ अग्निः ॥ वायुः ॥ यमः ॥ सूर्य्यः ॥ आत्मा ॥ राजा ॥ ग्रन्थिः ॥ मयूरः ॥ इति मेदिनी ॥ मनः ॥ शरीरम् ॥ कालः ॥ धनम् ॥ शब्दः ॥ इत्यनेकार्थ-कोषः ॥ प्रकाशः ॥ इत्येकाक्षरकोषः ॥

कः, त्रि, सर्व्वनाम । इति विश्वः । के कि इति भाषा ॥ (यथा विष्णुपुराणे । १ । १७ । २० ।
"तस्यते परमात्मानं तात ! कः केन शास्यते" ॥)

कंसः, पुं क्ली, कसः ॥ पानपात्रम् । इत्यमरटीका ॥

कंस, क्ली पुं, (कामयति काम्यते वा अनेन पातुमितिविग्रहे । "हलश्चेदिदनिकमीति" स । उणा । ३ । ६२ ।) मद्यादिपानपात्रम् । तत्पर्य्यायः । पानभाजनम् २ । इत्यमरः ॥ २ । ९ । ३२ । कशम् ३ । कांस्यम् ४ । इति तट्टीका । तैजसद्रव्यम् । स्वर्णरजतादिनिर्म्मितपात्रमात्रम् । मानविशेषः तत्तु आढ़कपरिमाणम् । इति मेदिनी ॥ (चतुःषष्टिपलात्मकाढ़करूपम् । यथा भावप्रकाशे ।
"शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ।
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढ़कः ।
भाजनं कांसपात्रञ्च चतुःषष्टिपलश्च सः" ॥
ताम्रवङ्गमिश्रितधातुविशेषः । काँसा इति भाषा । तत्पर्य्यायः । कांस्यम् २ । कंसास्थि ३ । ताम्रार्द्धम् ४ । इति त्रिकाण्डशेषः ॥ (वर्त्तुलाकारयज्ञियपात्रभेदः । यथा शतपथब्राह्मणे । १४ । ९ । ३ । १ ।
"औडुम्बरे कंसे चमसे वा" ।)

कंस, पुं, (कामयति मिथ्यादिवन्धुवर्गान् अभिभूय पापात्मकं राज्यविषयादिभोगं च । कम् + स । यद्वा कंसते शास्ति शत्रून् कंस शासने इत्यस्मात् स ।) विष्णुद्वेष्टसुरविशेषः । इति हेमचन्द्रः ॥ स तु मथुरादेशराजा । यदुवंशीयोग्रसेनराजपुत्त्रः । श्रीकृष्णमातुलः । तेन वधं प्राप्तः । (एतद्विवरणं भागवते । १० । ४४ अध्याये विशेषेण द्रष्टव्यम् ॥ कंसनामकारणं हरिवंशे यथा,
"कंस त्वमिति यच्चाह तयोक्तो मत्तकाशिनि ।
कंससमाद्रिपुध्वंसी तव पुत्त्रो भविष्यति" ॥
अतएव कंसधातुनिष्पन्नत्वमेव प्रशस्यते ॥)

कंसक, क्ली, (काम्यतेऽनेन चक्षुर्दृष्ट्यादिकमितिशेषः । कम् + स । ततो जातौ संज्ञायां वा कन् ।) चक्षुरौषधधातुविशेषः । स तु पुष्पकासीसप्रभेदः । तत्पर्य्यायः । पुष्पकासीसम् २ । नयनौषधम् ३ । इति हेमचन्द्रः ॥

कंसकारः, पु, स्त्री, (कंसं तन्मयपात्रादिकं करोति यः । कंस + कृ + "कर्म्मण्यण्" । ३ । २ । १ । केचित्तु ताच्छील्यप्रकारमिच्छन्त्यत्र ।) जातिविशेषः । काँसारि इति भाषा ॥ तस्योत्पत्तिर्यथा ।
"वैश्यायां ब्राह्मणाज्जातः अम्बष्ठो गान्धिको वणिक् ।
कंसकारशङ्खकारौ ब्राह्मणात् सम्बभूवतुः" ॥
इति ब्रह्मवैवर्त्तपुराणम् ॥ अपि च ।
"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्त्राश्च षडेते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षडेते शिल्पिनो नराः" ॥

इति ब्रह्मवैवर्त्तपुराणम् ॥

कंसजित्, पुं, (कंसं जयति जितवान् वा कंस + जि + कर्त्तरि क्विप् ।) श्रीकृष्णः । इति हलायुधः ॥

कंसवती, स्त्री, (कंसः शासनशक्तिरस्त्यस्याः । कंस + मतुप् मस्य वत्वम् । यद्वा कंसं भ्रातृत्वेनास्त्यस्याः ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च । (यथा भागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)

कंसहा, [न्] पुं, (कंसं हन्ति हतवान् वा । कंस + हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

कंसा, स्त्री, (कंस + टाप् ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च ।
(यथा भागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)

कंसारातिः, पुं, (कंसस्य अरातिः ।) विष्णुः । इत्यमरः ॥ १ । १ । २१ ॥

कंसारि, पुं, (कंसस्य अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा राजतरङ्गिण्याम् । १ । ५९ ।
"साहाय्यकार्थमाहूतो जरासन्धेन बन्धुना ।
स रुरोध कंसारेर्मथुरां पृथुभिर्बलैः" ॥)

कंसास्थि, स्त्री, (कंसस्य अस्थि । अस्थि रूपमित्यर्थः ।) कांस्यधातुः । इति त्रिकाण्डशेषः ॥

कंसोद्भवा, स्त्री, (कंसात् तैजसधातुविशेषसम्बन्धात् उद्भवति या । यद्वा कंसाया निर्झरिण्याः उद्भवा कंसायां उद्भवो यस्या वा । कंस + उत् + भू + अच् । कंसं इव शुभत्वात् उद्भवतीति केचित् ।) सुगन्धिमृत्तिकाविशेषः । तत्पर्य्यायः । आढ़की २ तुवरी ३ काक्षी ४ मृत्तालका ५ सौराष्ट्री ६ पार्व्वती ७ कालिका ८ पर्पटी ९ सती १० । इति हेमचन्द्रः ॥

कक इ ञ गमने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) इ कर्म्मणि कङ्क्यते । ञ कङ्कते । इति दुर्गादासः ॥

कक ङ इच्छायाम् । गर्व्वे । चापले । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-अक-च-सेट् ।) इच्छेह तृष्णा । चापलं चञ्चलीभावः । ङ ककते काकः । सतृष्णश्चञ्चलो वा स्यादित्यर्थः । गर्व्वः केश्चिन्न पठ्यते । इति दुर्गादासः ॥

ककन्द, पुं, (ककः गर्व्वश्चापल्यं वा भवत्यस्मात् । कक + अन्दच् । यद्वा ककं गर्व्वं चापल्यं तृष्णां वा ददातीति । कक् + दा + डः ।) स्वर्णः । इत्युणादिकोषः ॥

ककुञ्जल, पु स्त्री, (कं जलं कूजयति आह्वयते याचते इति यावत् । क + कूज + अलच् । पृषोदरादित्वात् नुम् ह्रस्वश्च ।) चातकपक्षी । इति राजवल्लभः ॥

ककुत्, [द्] स्त्री, (कं सुखं कावयति शब्दयस्य औत्सुक्य मापयतीति यावत् । वृषाणां हि ककुत् मर्द्दनमस्य सुखकरत्वमिति भावः । ककुद्दीनवृषपालने दरिद्रता इति स्मरणात् । क + कु + क्विप् + पृषोदरादित्वात् ह्रस्वः तुगागमश्च ।) वृषाङ्गविशेषः । माँडेर झुँट् इति भाषा । (यथा, अथर्व्ववेदे । ६ । ८६ । ३ । "सम्राडस्य सुराणां ककुन्मनुष्याणाम् । देवानामर्द्धभागसि त्वमेको वृषो भव" ॥ स्कन्धभागः ॥
यथा, भागवते ५ । २५ । ७ । "ध्यायमानः सुरासुरोरगसिद्धगन्धर्व्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्त्ति" ॥) ध्वजः । वरः । इति मेदिनी ॥ (यथा, ऋग्वेदे । ८ । ४४ । १६ ।
"अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्या अयम्" ॥)

ककुत्स्थ, पुं, (वृषरूपधरस्य देवेन्द्रस्य ककुदि तिष्ठति यः सः । ककुत् + स्था + कः ।) सूर्य्यवंशीयराजविशेषः । स तु अयोध्याधिपतिः । (पुरञ्जयनामायः ।) शशादराजपुत्त्रः । इक्ष्वाकुराजपौत्त्रश्च ॥ (येन चासौ ककुत्स्थनामासीत् तत्कथा हरिवंशे ऐलोत्पत्तौ । ११ । १९—२० ।
"शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान् ।
इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान् ॥
पूर्व्वं देवासुरे युद्धे ककुत्स्थस्तेन स स्मृतः ।
अनेनास्तु ककुत्स्थस्य पृथुरानेनसः स्मृतः" ॥
तथा च महाभारते १ । १ । २२९ ।
"पुरुः कुरुर्यदुः शूरो विश्वगश्वो महाद्युतिः ।
अणुहो युवनाश्वश्च ककुत्स्थो विक्रमी रघुः" ॥)
स्कन्धदेशस्थिते त्रि ॥)

ककुदः, पुं स्त्री, (कं सुखं उत्कर्षं वा कौति प्रकाशयति धातूनामनेकार्थत्वात् कुधातुरत्र प्रकाशनार्थः अन्तर्णीतणर्थश्च । कु + क्विप् तुक् च पृषोदरादित्वात् तस्य दः । यद्वा कस्य सुखस्य शरीरस्य वा कुं भूमिं मूलं आकरमिति यावत् ददातीति । ककु + दा + कः । यद्वा "ककुदस्यावस्थायां लोपः" । ५ । ४ । १४६ । अर्द्धर्चादि-गण । २ । ४ । ३१ ।) प्राधान्यम् । (यथा अथर्व्ववेदे । १० । १० । १९ ।
"ऊर्द्ध्वो विन्दुरुदचरद् ब्रह्मणः ककुदादधि" ।
रघुश्च । ६ । ७१ ॥
"इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः" ॥)
राजचिह्नम् । तत्तु श्वेतच्छत्रादि । (यथा रघुः । ३ । ७० ।
"अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम्" ॥)
वृषाङ्गम् । झुँट इति भाषा । इत्यमरः ॥ ३ । ३ । ९१ ॥ (यथा महाभारते । १३ । १४ । २९६—२९९ ।
"वृषस्कन्धधरं साक्षात् क्षीरोदमिव सागरम् ।
तप्तपुच्छं महाकायं मधुपिङ्गललोचनम् ॥

वज्रसारमयैः प्रकृष्टैर्निष्टप्तकनकप्रभैः ।
सुतीक्ष्णैर्मुद्गराकारैस्त्विरन्तमिवावनिम् ॥
जाम्बूनदेन दाम्ना च सर्व्वतः समलङ्कृतम् ।
सुवक्त्रखुरनासञ्च सुकर्णं सुकटीतटम् ॥
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ।
ककुदं तस्य चाभाति स्कन्धमापूर्य्य धिष्ठितम्” ॥)
पर्व्वताग्रभागः । इति अमरटीकायां स्वामी ॥

ककुद्मान् [त्] पुं, (ककुदस्यास्तीति । मतुप् इति “मादुपधायाश्च मतोर्वोऽयवादिभ्यः” । ८।२।९ । न मस्य वकारत्वम् ।) वृषः । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । ५६ ।
“तुषारसंघातशिला खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्” ॥)
पर्व्वतः । इत्यमरटीकायां स्वामी ॥
(यथा, विष्णुपुराणे २ । ४ । २७ ।
“ककुद्मान् पर्व्वतवरः सरिन्नामानि मे शृणु” ॥)
ऋषभौषधम् । इति राजनिर्घण्टः ॥ अत्र क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् वतुप्राप्तौ मतुप्रत्ययः ॥ इति मुग्धबोधमतम् ॥ (ऊर्म्मिः । यथा, यजुर्व्वेदे । ९ । ६ ।
“ऊर्म्मिं प्रसूर्त्तिं ककुद्मान्” ॥)

ककुद्मती, स्त्री, (ककुदिव वृषस्कन्धवत् अतिशयितो मांसपिण्डः अस्त्यस्याम् । मतुप् । यवादित्वात् न मस्य वत्वं स्त्रियां ङीप् ।) कटिः । इत्यमरः ॥ २।६ । ७४ । पाछा इति भाषा ॥

ककुन्दरं, क्ली, (कस्य शरीरस्य कुं भूमिं नितम्बस्थजविशेषं दृणातीति । ककु + दॄ + खच् मुम् च ।) कुकुन्दरम् । नितम्बस्थकूपकद्वयम् । इत्यमरटीकायां रमानाथः राजनिर्घण्टश्च ॥ (यथाह, याज्ञवल्क्यः । ३ । ९६ ।
“कनीनिके चाक्षिकूटे शष्कुलीकर्णपत्रकौ ।
कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे” ॥
“सक्तविभक्तचतुरस्रः ककुन्दरविभागशोभी
रथाङ्गाकारसंस्थितश्च नितम्बभागः” ।
इति दशकुमारे ॥)

ककुप्, [भ्] स्त्री, (कं वातं स्कुभ्नाति विस्तारयति या । स्कुभ इति सौत्रः । क्विप् । पृषोदरादित्वात् सलोपः ।) दिक् । इत्यमरः ॥ १ । ३ । १ । प्रवेणी । शोभा । चम्पकमाला । इति मेदिनी ॥ शास्त्रम् । इति विश्वः ॥

ककुभ, स्त्री, (कं सुखं आनन्दं स्कुभ्नाति विस्तारयति या पृषोदरादित्वात् सलोपः ।) रागिणीविशेषः । तस्या नामान्तरम् । कुञ्जः । तस्या लक्षणम् ।
“पीतं वसाना वसनं सुकेशी
वने रुदन्ती पिकनादरूना ।
विलोकयन्ती ककुभोऽतिभीता
मूर्त्तिः प्रदिष्टा ककुभस्तथेयम्” ॥
इति सङ्गीतदामोदरः ॥ (दिक् । यथा,
भागवते । २ । ७ । २५ ।
“वक्षःस्थलस्पर्शरुग्नमहेन्द्रवाहदन्तैर्विडम्बितककुभ ऊढहासम्” ॥ दक्षकन्या । सैव धर्म्मपत्नी । यथा तत्रैव । ६ । ६ । ४ ।
“भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती” ॥)

ककुभः, पुं, (कस्य वातस्य कुं भूमिः स्थानं प्रकाशरूपविशेष इति यावत् भात्यस्मात् । ककु + भा + कः । यद्वा कं वातं स्कुभ्नाति विस्तारयति । क + स्कुभ + कः + पृषोदरादित्वात् सलोपः ॥) अर्ज्जुनवृक्षः । (यथा, चक्रपाणिदत्तकृतसंग्रहे ॥
“गोधूमककुभचूर्णं छागपयोगव्यसर्पिषा पक्वम् ।
मधुशर्करासमेतं शमयति हृद्रोगमुद्धतं पुंसाम् ॥
मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत् ।
हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥
रसायनं परं बल्यं वातजिन्मासयोजितम् ।
संवत्सरप्रयोगेन जीवेद् वर्षशतं नरः” ॥)
वीणाङ्गम् । तत्पर्य्यायः । प्रसेवकः २ । इत्यमरः ॥ १ । ७ । ७ ॥ वीणाप्रान्तवक्रकाष्ठम् । दण्डाधः शब्दगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणाच्छाद्य दीयते तदित्यन्ये । वीणास्थितालावुफले इत्यपरे । इति भरतः ॥ रागविशेषः । इति मेदिनी ॥ (शिवः । यथा महाभारते १३ । शिवसहस्रनामकीर्त्तने १७ । १३० ।
“हर्य्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात्” ॥)

ककुभा, स्त्री, (केन आदित्येन कुत्सितानि भानि नक्षत्राण्यस्याम् । टावन्तोऽपीति कश्चित् तन्न । व्यधिकरणबहुव्रीहिप्रसङ्गात् ।) दिक् । इत्यमरटीकायां रायमुकुटः ॥ (केन सूर्य्येण दिनप्रकाशेनेति भावः कुत्सिता भाति । भा दीप्तौ । इति धातोः सुपीति कः । भिदाद्यङ् वा । रात्रावेवास्या माधुर्य्यस्याधिक्यमिति तात्पर्य्यार्थः ।) रागिणीविशेषः । इति हलायुधः ॥

ककुभादनी, स्त्री, (ककुभः अर्ज्जुन इव अद्यतेऽसौ तुल्यगुणत्वात् । ककुभ + अद + कर्म्मणि ल्युट् + स्त्रियां ङीप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कक्क हासे । इति कविकल्पद्रुमः ॥ (भ्वा–पर–अकं–सेट् ।) कोपधः । कक्कति । इति दुर्गादासः ॥

कक्कोलः, पुं स्त्री, (ककते गच्छति दिशि प्रकाशते इत्यर्थः ततः क्विप् कक्कोलति संस्त्यायति कुलधातोर्ज्वलादित्वात् णः । कक् चासौ कोलश्चेति ।
“पूगकक्कोलकर्पूरलवङ्गसुमनःफलैरित्युक्तेः” ।)
सुगन्धिद्रव्यविशेषः । काँकला इति भाषा । अस्य गुणाः । कटुत्वम् । हृद्यत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥ (यथा रामायणे ३ काण्डे ।
“वनानि च सुरम्याणि कक्कोलानां त्वचस्य च” ॥)

कक्कोलकं, क्ली, (कक्कोलस्य + इदमर्थे स्वार्थे वा कन् । शाल्मलिद्वीपान्तर्गतसप्तमवर्षपर्व्वतः । तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम्” ॥) गन्धद्रव्यविशेषः । काँकला इति ख्यातम् । तत्पर्य्यायः कोलकम् २ कोषफलम् ३ । इत्यमरः ॥ व्रतफलम् ४ कटुकफलम् ५ द्वेष्यम् ६ स्थूलमरिचम् ७ कक्कोलम् ८ माधवोचितम् ९ कालम् १० कटफलम् ११ मरिचम् १२ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वक्त्रजाड्यहरत्वम् । दीपनत्वम् । पाचनत्वम् । रुचिकारित्वम् । कफवातरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥
(“कक्कोलकं लवङ्गञ्च तिक्तं कटुकफापहम् ।
लघूष्णतापहं वक्त्रक्लेददौर्गन्ध्यनाशनम्” ॥
इति सुश्रुतः ॥)

कक्ख हासे । इति कविकल्पद्रुमः ॥ (भ्वां–परं–अकं–सेट् ।) कोपधः । कक्खति । इति दुर्गादासः ॥

कक्खटः, त्रि, (कक्खति हसति यः ॥ प्रफुल्लमुखो जनः । इति व्युत्पत्त्यर्थः । अन्यत्तु रूढ्यर्थः । कक्ख अटन् । अथवा कक्खं प्रसन्नभावं अटति अद्यति कर्कशान्तर्वर्त्तित्वात् कक्ख + अट् + अच् । यद्वा कठिण्या वर्त्तते तदा कक्खति रुष्ट्या प्रकाशयति वर्णान् । अन्तर्णिजर्थः ।) कठिनः । इत्यमरः ॥

कक्खटपत्रकः, पुं, (कक्खटानि प्रकाशान्वितानि पत्राणि यस्य । कप् ।) वृक्षविशेषः । पाट इति भाषा । तत्पर्य्यायः । पट्टः २ वाजशलः ३ शाणिः ४ चिमः ५ । इति शब्दमाला ॥

कक्खटी, स्त्री, (कक्खति भूकर्षणेन प्रकाशयति वर्णान् । अत्राप्यन्तर्णिच् शकादिभ्योऽटन् गौरादित्वात् ङीष् ।) खटिका । खड़ी इति भाषा । तत्पर्य्यायः । वर्णलेखा २ कठिनी ३ खटी ४ । इति त्रिकाण्डशेषः ॥

कक्षः, पुं, (कषतीति । कष् हिंसायां “वृतॄवदिहनिकमिकषिभ्यः सः” । उणा ३ । ६२ । इति सः ।) बाहुमूलम् । इत्यमरः । २ । ६ । ७९ ॥ काँक् वगल् इति च भाषा ॥
(यथा, महाभारते ४ । ६ । १ ।
“वैदूर्य्यरूपान् प्रतिमुच्य काञ्चनान्
अक्षान् स कक्षे परिगृह्य वाससा” ॥)
तृणम् । वीरुत् । इत्यमरः ॥ ३ । ३ । २१८ ।
(यथा, मनुः ७ । ११० ।
“यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति” ॥
“यथा क्षेत्रे धान्यतृणादिकयोः सहोत्पन्नयोरपि धान्यानि लवनकर्त्ता रक्षति तृणादिकञ्चोद्धरति”। इति तट्टीकायां कुल्लूकभट्टः ॥) शुष्कतृणम् । इति धरणी ॥ (यथा, माघे । २ । ४२ ।
“प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्” ॥)
कच्छः । (यथा महाभारते । १ । वारणावतागमने । १४६ । २२ ॥
“कक्षघ्नः शिशिरघ्नश्च महाकक्षे विलौकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति” ॥
विलौकसो महाकक्षे वृहत्कच्छे इत्यर्थः ॥) शुष्कवनम् । पापम् । इति हेमचन्द्रः ॥ अरण्यम् । इति रुद्रः ॥ (यथा महाभारते १ । खाण्डवदहनपर्व्वणि । २२१ । ३ ।
“अयमग्निर्दहन् कक्षमित आयाति भीषणः” ॥)
भित्तिः । पार्श्वः । इति भरतधृताजयः ॥
(यथा, रामायणे । ५ । ५ । २५ ।
“तस्य वानरसिंहस्य प्लवमानस्य सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव गर्ज्जति” ॥)

कक्षरुहा, स्त्री, (कक्षे कच्छे जलप्राये रोहति इति । कक्ष + रुह + क । अस्या अनूपजातत्वात् तथात्वम् ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

कच्छा, स्त्री, (कच्छ दिंशादौ + स टाप् च) हस्ति-रज्जुः । काञ्ची । गेहप्रकोष्ठक ।
(यथा, भागवते ९ । १५ । २७ ।
"तस्मिन्नतीव गुणय सम्पन्नजामाता
कच्छा सामागयधनाश्च मातालाम्" ।)
भित्ति । शाम्बम् । रथभाग । कामागोपधिमा-
सनम् । परिधानवस्त्रस्य पश्चाद् निहितायम् ।
उद्ग्राहिणी । इति हेमचन्द्र ॥ (काछा कोंचा
आंचिल इत्यादि भाषा । यथाह गोभिलाः ।
"परिधानात् वहिः कच्छा निबद्धा ह्यासुरी भवेत्" ।)
"वामे पृष्ठे तथा नाभौ कच्छात्रयमुदाहृतम् ।
एभिः कच्छैः परीधत्ते यो विप्र स शुचि स्मृत" ॥
इति स्मृति ॥
स्पर्द्धापदम् । इति मेदिनी कक्षा । रज्जुः । हस्ति-
मध्यदेशबन्धनरज्जुः । इत्यमरटीकायां भरत ॥
क्षुद्ररोगविशेष । तस्य लक्षणं यथा,—
"बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपसम्भूतां कक्षाभिख्यां विनिर्दिशेत्" ॥
इति माधवकर ॥ तच्चिकित्सा यथा,—
"कक्षाया गन्धनाम्न्याश्च चिकित्सेत् चिकित्सक ।
पैत्तिकस्य विसर्पस्य क्रियया पूर्वमुक्तया" ॥
इति भावप्रकाश ॥

कच्छापट, पु, (कच्छाकार इतिरज्जुतुल्य पटोप-
स्तम्भ) कौपीनम् । इति धनञ्जय ॥ (कच्छायां
स्थप्रकोष्ठकस्य पट इति विग्रहे मध्यभिन्नित
पट ।)

कच्छावान्, [त्] पु, (कच्छा सर्व्वगतानि सान्द्र सा
विद्यते यस्य । कच्छा + मतुप् मस्य व ।) मुनि-
विशेष । इति हेमचन्द्र ॥

कच्छावेक्षक, पु, (कक्षाया अवेक्षक यद्वा कक्षा
वनोपवनादिक राजान्तःपुर वा अवेक्षते इति ।
अव + ईक्ष् + ण्वुल् ।) शुद्धान्तपाल । उद्यान-
पाल । रङ्गाजीव । कवि । विट । साक्षी ।
इति मेदिनी ॥

कच्छोत्था, स्त्री, (कच्छात् जलप्रायदेशात् उत्तिष्ठति
जायते या । कच्छ + उत् + स्था + क टाप् च ।)
भद्रमुस्ता । इति राजनिर्घण्ट ॥

कक्ष्य, क्ली, (कक्षायै साम्याय भवम् । कक्षा + यत् ।)
सम्यक्सामग्र्यकटोरा । इति मिताक्षरा । मिश्रिर
वाटी इति भाषा ॥ (त्रि, कक्षापूरक । यथा,
ऋग्वेदे ५ । ४४ । ११ ।
"प्रेम आसामदिति कक्ष्यो मदो-
विश्ववारस्य यजतस्य मायिन" ॥)

कक्ष्या, स्त्री, (कक्षे भवा । कक्षा + शरीरावयवात्
+ यत् टाप् च ।) कक्षरज्जु । काछदडी इति
ख्याता । चर्म्मरज्जु । इत्यन्ये । इति भरत ॥
गजमध्यबन्धनचर्म्मरज्जु । इति सारसुन्दरी ॥ तत्-
पर्य्याय । चूषा २ वरत्रा ३ । इत्यमर ॥ २।८।४२।
वृषा ४ दृष्या ५ दूष्या ६ कच्छा ७ । इति तट्टीका ।
हर्म्म्यादिप्रकोष्ठ । राजगृहादेर्वेष्टनावच्छिन्नो
देश । (महल इति भाषा । यथा रामायणे । २ ।
२० । ११ ।
"प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श स ।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृतान्" ॥)
काञ्ची । इत्यमर ॥ ३।३।१५७ । सादृश्यमिति
स्वामी ॥ (यथा, कुमारे ७ । ७० ।
"क्वाचित् पूर्णं क्षणमनेन
कक्ष्याभागाम्बिदिपतेर्विवेश" ॥)
सादृश्यम् । उद्योग । अङ्गुलिका । उत्तरीय
वस्त्रम् । इति हेमचन्द्र ॥ गुञ्जा । इति शब्द-
रत्नावली ॥

कख र ग हास । इति कविकल्पद्रुम ॥ (भ्वा पर
-अक सेट ।) रदित् घटादिः इति गोयीचन्द्र ।
पाणिनीयमते तु रदित्त्व न तेन अकखीत् अका-
खीत् इति स्यात् ।) स कखयति न काखयीत् ।
इति दुर्गादास ॥

कख्या, स्त्री, (कखति उपगतार प्रकाशते गौणते ।
कख् + यत् + स्त्रियां टाप् ।) कक्षा । हर्म्म्यादि-
प्रकोष्ठ । इति शब्दरत्नावली ॥

कग र ग क्रियाद्य । क्रियासामान्ये । इति कविकल्प-
द्रुम । (भ्वा पर-सक-अक च सेट् । घटादि
रदित् इति गोयीचन्द्र । मेदित् इति पाणिनिः ।
अकगीत् अकागीत् ।) तेन स कगयति । न
अकगीत् । क्रियामात्रे । कगति लोकः गच्छती-
त्यर्थ । इति दुर्गादास ॥

कङ्क , पु, (कङ्कते उद्गच्छति इति । ककि गतौ । पच
+ अच् + इदित्त्वात् नुम् ।) पक्षिविशेष । काँक इति
भाषा । तत्पर्य्याय । लोहपृष्ठ २ । इत्यमर २।५।
१९ ॥ सदंशवदन ३ रणाल ४ रक्तालपुत्रक ५ कूर ६
आमिषप्रिय ७ । इति राजनिर्घण्ट ॥ कर्कट ८
कालपुष्ट ९ क्षिकार १० लोहपृष्ठक ११ । इति
जटाधर ॥ दीर्घपाद १२ दीर्घपात् १३ । इति
शब्दरत्नावली ॥ (यथा भागवते ३ । १० । २१ ।
"कङ्कगृध्रवटश्येनभासभासकवर्हिण " ।) यम ।
क्षत्रविट् । इति मेदिनी ॥ युधिष्ठिरराज । इति
त्रिकाण्डशेष ॥ (यथा, महाभारते । ४ । ६ । १४ ।
"प्रदतपस्तु मे जानपदा समागता
कङ्को यथाह विषये प्रभुस्तथा" ॥
शाल्मलिद्वीपान्तर्गतवर्षपर्वत । तद्विव-
रणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम् ।
क्षत्रिय । इति शब्दमाला ॥ कपातरम्भाता । स
तु उग्रसेनपुत्र । (यथा, भागवते ९ । २४ । २४ ।
"कंस सुनामा न्यग्रोध कङ्क शङ्कु सुहूस्तथा" ॥)
महाराजपूत । इति राजनिर्घण्ट ॥

कङ्कट , पु, (क देह कटति आवृणोतीति । क + कट
+ अच् । अथवा ककि लौल्ये इति कङ्कते लगेन
नाशतां याति अचिरस्थायित्वात् ककि + अटन् ।)
(कवच । इत्युणादिकोष ॥ प्रतिसस्कृतेनामरस्य ॥
(यथा, रघु । ७ । ५९ । "सर्व्वायुधैः कङ्कटभेदि-
भिश्च" ॥)

कङ्कटक , पु, (कङ्कट + स्वार्थे कन् ।) सन्नाह ।
इत्यमर । २ । ८ । ६४ । साँजोया इति भाषा ॥

कङ्कणा स्त्री, (क सुभ कणतीति । क + कण शब्दे +
कर्त्तरि अच्-पृषोदरादित्वात् साधुम् ।) स्वनाम-
ख्यातिभूषणाभरणम् । तत्पर्य्याय । करभूषणम्० ॥
इत्यमर । २ । ६ । १०८ ॥ कांशुकम् ३ । इति
शब्दरत्नावली ॥ (यथा, भागवते ६ । १६ । ३० ।
"स्फुरन्मणीन्द्र किलिवामल स्फुरत्
किरीटकेयूरकटित्रकङ्कणम्" ॥)
हस्तसूत्रम् । मण्डनम् । शेखरम् । इति विश्व ॥

कङ्कणी, स्त्री, (ककि गतौ घञ् कङ्क तस्मिन् अणति
अण शब्दे तत अच् गौरादित्वात् ङीष् । शक-
न्ध्वादित्वम् नास्ति । यद्वा कं सुख कणति इति
कण + पचाद्यच् ।) किङ्किणी । क्षुद्रघण्टिका ।
इत्यमरटीकायां भरत ॥

कङ्कणीका, स्त्री, (कङ्कणते पुन पुन कणति । कण
शब्दे अस्माद् यङ्लुगन्तात् "चञ्चिक कङ्कण च" ॥
४ । १८ । उणा इति ईकन् धातोः कङ्कणा-
देशश्च ।) क्षुद्रघण्टिका । इति सिद्धान्तकौमुद्या-
मुणादिवृत्ति ॥

कङ्कतं, क्ली, (कङ्कते शिरोमलं प्राप्नोतीति । ककि
गतौ + अतच् ।) कङ्कतिका । इत्यमरटीकाया
भरत ॥ चिरुणी इति ख्यातम् ॥

कङ्कत , पु, (कङ्कते भूमिं भित्त्वा उद्गच्छति झटिति
जात गच्छति वा । ककि गतौ इति धातोः अतच् ।)
वृक्ष । इत्युणादिकोष ॥ (केशप्रसाधनी कङ्कती ।
चिरुणी इति भाषा । यथा, अथर्व्ववेदे १४ । २ ।
६८ । "हविर्न कङ्कतः शतदन्त य । अपास्याः
केशं मलमपशीर्षण्यम् लिखात्" ॥ अन्यविष-
जालिविशेष । यथा, ऋग्वेदे । १ । १९१ । १ ।
"कङ्कतो न कङ्कतोऽथो सतीनकङ्कत " ॥)

कङ्कतिका, स्त्री. (कङ्कते मूर्द्धजेन सम्बन्ध गच्छतीति ।
ककि गतौ बाहुलकादतच् । गौरादित्वात् ङीष्
स्वार्थे कन् केश इति ह्रस्व । यद्वा कस्य शिरसो-
ऽङ्क । शकन्ध्वादित्वात् सन्धि । कङ्क तु अतति
तत क्वुन् । तत इत्व टाप् च ।) केशप्रसाधनार्थ-
काष्ठादिनिर्म्मितद्रव्यम् । चिरुणी काँकुइ इत्यादि
भाषा । तत्पर्य्याय । प्रसाधनी २ । इत्यमर । २ ।
१९० ॥ कङ्कती ३ कङ्कतम् ४ प्रसाधनम् ५ । इति
तट्टीका । केशमार्जनम् ६ । इति जटाधर ॥ फणी
७ फणिका ८ फलि ९ । इति शब्दरत्नावली ॥
अस्य गुणा । धूलीजन्तुमलकण्डुशिरोरोगनाशि-
त्वम् । कान्तिकेशवृद्धिकेशप्रसन्नताकारित्वञ्च । इति
राजवल्लभ । नागवला । इति वैद्यकम् ॥

कङ्कती, स्त्री, (कङ्कते शिरोरुह प्राप्नोति । ककि
गतौ + बाहुलकादतच् गौरादित्वात् ङीष् ।)
कङ्कतिका । इत्यमरटीकायां भरत ॥

कङ्कत्रोट, पु, (कङ्कात् पक्षिविशेषात् आत्मान
त्राति । कङ्क + त्रा + अटन् पृषोदरादित्वात्
साधु । यद्वा कङ्कवत् त्रोटयति कङ्क + त्रुट् +
णिच् + कर्त्तर्य्यच् ।) मत्स्यविशेष । काँकिला
इति भाषा । तत्पर्य्याय । जलव्याघ्र २ । इति
त्रिकाण्डशेष ॥

कङ्कत्रोटि , पुं, (कङ्कस्य त्रोटिरिव त्रोटिश्चञ्चुर्यस्य ।)
मत्स्यविशेष । काँकिला इति भाषा । तत्पर्य्याय ।
जलशूकि २ । इति जटाधर ॥

कङ्कपत्र', पु, (कङ्कस्य पक्षिविशेषस्य पत्रमेव पत्र पक्षो यस्य ।) वाणविशेष । इति हलायुध ॥ (यथा रामायणे ६ । २८ । ४ ।
"विव्यधुर्घोररूपास्ते कङ्कपत्रैरजिह्मगैः" ॥
कङ्कस्य पक्षिविशेषस्य पत्रम् । यथा,
"नखप्रभाभूषितकङ्कपत्रे" ॥ रघु' २ । ३१ ॥)

कङ्कमाला, स्त्री, (कङ्कं चापल्यं करचापल्यं मलते धारयति । ककि चापल्ये + घञ् । कङ्क + मल धृतौ । मलधातौ उपपदे कर्म्मण्यण् टाप् च ।) करतालीवाद्यम् । इति शब्दरत्नावली ॥

कङ्कमुख, पु, (कङ्कस्य मुखमिव मुखं यस्य ।) सन्दंश । इति हेमचन्द्र' ॥ साँडाशि इति भाषा । (क्ली, नाल्योद्धरणार्थं यन्त्रभेद । स तु अस्थिविनष्ट-शल्योद्धरणार्थमुपदिश्यते ॥) अस्य प्रशंसा यथा,
"निर्व्वर्त्तते साध्ववगाहते च
शल्यं प्रगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वत कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वविकारि चैव" ॥ सुश्रुते ॥
(त्रि, यथा रामायणे ६ । ७९ । ६६ ॥
"व्याघ्र-सिंहमुखान् बाणान् काककङ्कमुखानपि" ॥)

कङ्कर, स्त्री, (क जलं कीर्य्यतेऽत्र । क + कॄ आधारे अप् ।) तक्रम् । इति हेमचन्द्र ॥

कङ्कर, त्रि, (क सुखं किरति क्षिपतीति । क + कॄ + अच् ।) कुत्सित । इति हेमचन्द्र ॥

कङ्कलोल, पु, (कङ्क इव लोलं लस्य र ।) मिकोचकवृक्ष । इति शब्दचन्द्रिका ॥ काँकरोल इति ख्याता लता च ॥

कङ्कलोड्य, क्ली, (कङ्क इव लोड्यते आलोड्यते । इति कङ्क + लोड् + ण्यत् ।) अङ्कलोड्यम् । चटिश्विता चिञ्चोडमूल इति च भाषा । अस्य गुणा । गुरुत्वम् । अजीर्णकारित्वम् । शीतलत्वञ्च । इति कश्चिद्राजवल्लभ ॥

कङ्कशत्रु, पु, (कङ्कस्य शत्रु । पृश्निपर्ण्यास्तु कङ्क-नाशकत्वमाकुः अत अस्य तथात्वम् ।) पृश्निपर्णी । इति शब्दचन्द्रिका ॥

कङ्कशाय, पु, (कङ्क इव शेते । शीङ् + ण ।) कुक्कुर । इति शब्दमाला ॥

कङ्का, स्त्री, (कङ्कते चापल्यं गच्छति या पिता-द्यादरवशात् । ककि + अच् ।) उग्रसेनराजकन्या । सा तु वसुदेवानुजपत्नी । (यथा, श्रीभागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रिय" ॥)
गोशीर्षचन्दनम् । तद्यथा ।
"गोशीर्षं चन्दनं कृष्णताम्रमुत्पलगन्धिकम् ।
कङ्का" इत्यादि शब्दमाला ॥

कङ्काल, पु, (क सुखं शिरो वा कालयति क्षिपतीति क + कालि + अच् ।) शरीरास्थि । इत्यमर' । २ । ६ । ६९ ॥ समुदितशरीरास्थिसंघात-स्नायुमांसरहित । इति भरत ॥ तत्पर्य्याय । करङ्क २ अस्थिपञ्जर' ३ । इति वैद्यकम् ॥ (यथा, सुन्दोपसुन्दोपाख्याने २ । २४ । "अस्थिकङ्काल-सङ्कीर्णा भूर्बभूव" ॥)

कङ्कालमाली, [न्] पु, (कङ्कालानां माला अस्ति अस्य ब्रीह्यादित्वादिनि ।) महादेव । इति शब्द-रत्नावली ॥

कङ्कु, पु, (कङ्कते औद्धत्यं लौल्यं वा प्राप्नोतीति । ककि गतौ + उन् ।) उग्रसेनपुत्त्र । स तु कंसा-सुरभ्राता । (यथा, श्रीभागवते ९ । २४ । २४ ॥
("कंस सुनामा न्यग्रोध कङ्क" कङ्कु" सुह्रस्तथा" ॥)
क्वचित् शङ्कुरितिपाठ ।) कङ्गुधान्यम् । इति द्वि-रूपकोष' ॥

कङ्कुष्ठं, क्ली, (कङ्कु तृणविशेष तस्य समीपे तिष्ठति । कङ्कु + स्था + क + षत्वम् ।) पर्व्वतीयमृत्तिकावि-शेष । तत्पर्य्याय । कालकुष्ठम् २ विरङ्गम् ३ रङ्गदायकम् ४ रेचकम् ५ पुलकम् ६ शोधकम् ७ कालपालकम् ८ । तद्द्विधा रजताभं स्वर्णाभञ्च । अस्य गुणा । कटुत्वम् । उष्णत्वम् । कफवातव्रण शूलनाशित्वम् । रेचकत्वञ्च । इति राजनिर्घण्ट ॥ अपिच ।
"पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिमम् ।
श्यामं पीतं लघु त्यक्तसत्त्वं नेष्टं हि रेणुकम्" ॥
(इदन्तु हिमालयशिखरे जायते । यदुक्तं -
"हिमवत् पादशिखरे कङ्कुष्ठमुपजायते ।
तत्रैकं नालिकाख्यं स्यात्तदन्यं रेणुकं स्मृतम्" ॥
"कङ्कुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् ।
कृमिशोथोदराध्मानगुल्मानाहकफापहम्" ॥)

कङ्केर, पु, (कङ्कते भक्षणाय लौल्यं गच्छति । ककि + एरु ।) काकविशेष । तत्पर्य्याय । दारवलि-भुक् २ । इति त्रिकाण्डशेष' ॥

कङ्केलि, पु, (क सुखं तस्मै केलिं यत्र ।) अशोक-वृक्ष । इति राजनिर्घण्ट ॥

कङ्केल्ल, पु, (ककि + एल्लप्रत्यय ।) वास्तूकम् । इति शब्दमाला ॥

कङ्केल्लि, पु, (कङ्क + बाहुलकात् एल्लि पृषोदरादि-त्वात् लत्व ।) अशोकवृक्ष । इति त्रिकाण्डशेष' ॥

कङ्खं, क्ली, (कं सुखं खलत्यनेन । खल + बाहुलकात् ड ।) भोग' । इति शब्दमाला ॥ (क + खं । ब्रह्म । यथा छान्दोग्योपनिषदि ४ । १० । ५ ।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सहोवाच विजानाम्यहं यत्प्राणो ब्रह्म कञ्च तु खञ्च न विजाना-मीति ते होचुर्यदेव कं तदेव खं यदेव खं तदेव क-मिति प्राणञ्च हास्मै तदाकाशञ्चोचु" ॥)

कङ्गु', स्त्री, (कं सुखं अङ्गति अङ्गयति वा अगि गतौ + ण्यन्तादस्मात् मृगय्वादित्वात् कु' शक-न्ध्वादित्वात् अकारस्य लोपश्च ।) पीततण्डुला । काङ्गनि इति भाषा । तत्पर्य्याय । प्रियङ्गु २ । इत्यमर ॥ २ । ९ । २० । कङ्गू ३ प्रियङ्गु ४ । इति तट्टीका ॥ (तथाचोक्तम् ।
"स्त्रिया कङ्गुप्रियङ्गू द्वे कृष्णरक्तसितास्तथा ।
पीता चतुर्व्विधा कङ्गुस्तासां पीता वरा स्मृता" ॥)

कङ्गुका, स्त्री, (कं सुखं अङ्गयति प्रापयति ज्ञापयति वा । अगि गतौ ण्यन्तात् मृगय्वादित्वात् कु इदित्वात् नुम् शकन्ध्वादित्वात् अलोपे सन्धि । स्वार्थे कन् ततष्टाप् ।) कङ्गु । अस्य गुणा' । धातुशोषणत्वम् । पित्तश्लेष्मनाशित्वम् । रूक्षत्वम् । वायुवर्द्धकत्वम् । पुष्टिकारित्वम् । गुरुत्वम् । भग्न-सन्धानकारित्वञ्च । इति राजवल्लभ ॥

कङ्गुनी, स्त्री, (कङ्गवा नीयते कङ्गुशब्देन ज्ञायते इत्यर्थ । कङ्गु + नी + बाहुलकात् कर्म्मणि ड । गौरादित्वात् ङीष् ।) धान्यविशेष । काङ्गनि इति भाषा । तत्पर्य्याय । प्रियङ्गु २ कङ्गु ३ चीनक' ४ पीततण्डुल ५ अत्यन्तसुकुमार ६ । अस्या गुणा' । मधुरत्वम् । रुचिकारित्वम् । कषायत्वम् । स्वादुत्वम् । शीतलत्वम् । वातकारि-त्वम् । पित्तदाहनाशित्वम् । रूक्षत्वम् । भग्नास्थि-बन्धकारित्वञ्च । इति राजनिर्घण्ट' ॥

कङ्गुनीपत्रा, स्त्री, (कङ्गुन्या' पत्रमिव पत्रमस्या' ।) पण्यान्धाख्यम् । इति राजनिर्घण्ट ॥

कङ्गुल, पु, (कङ्गु' जाति गृह्णाति अनेन कङ्गु + ला + बाहुलकात् घञर्थे करणे क ।) पाणि । इति शब्दचन्द्रिका ॥

कच रवे । इति कविकल्पद्रुम ॥ (भ्वा-पर-अकं-सेट् ।) कचति । रव शब्द । इति दुर्गादास ॥

कच इ बन्धे । लिपि । इति कविकल्पद्रुम ॥ (भ्वा-पर बन्धे सक दीप्तौ अक-इदित्-सेट् ।) इ कञ्चति । इति दुर्गादास ॥

कच ड बन्धे । लिपि । इति कविकल्पद्रुम' ॥ (भ्वा-आत्म बन्धे सक दीप्तौ अक-सेट् ।) ड कचते कचते । लिट् दीप्ति । इति दुर्गादास ॥

कच, पु, (कचते शोभते शिरसीति । कच् + पचा-द्यच् । कच्यते बध्यते इति कच बन्धे + कर्म्मणि अप् वा ।) केश । इत्यमर ॥ २ । ६ । ९५ ॥ (यथा, महाभारते १ । १२८ । १९ ॥)
"कचेषु च निगृह्णैतान् निविहत्य बलाद्बली ।
चकर्ष क्रोशतो भूमौ घृष्टजानुशिरोंसकान्" ॥)
बृहस्पतिपुत्त्र । (कचते दीप्यते तपस्तेजसेति कच + दीप्तौ + पचाद्यच् । पुरा किल सुरासुर-संग्रामे असुराणां यानेव देवा निजघ्नुस्तानसुर-गुरुरुशना सञ्जीवनीविद्यया पुनर्जीवयामास । सुरगुरुर्बृहस्पति पुनस्तद्विद्यानभिज्ञतया सुरान् रणनिहतान् जीवयितु न शशाक । तद्दर्शनभीता देवा गुरुपुत्त्रं कचमुपागम्य अर्थाभिर्वाग्भि सन्तोष्य तं सञ्जीवनीलाभाय शुक्रसकाशं प्रेरया-मासु' । कचो ऽपि सुरकार्य्यसिद्धये गुरुत्वेनाङ्गी कृत्य निरत भक्त्या परिचर्य्यया च काव्यं परितो-षयन् ब्रह्मचर्य्यमालम्ब्याधीतवान् । क्रूरप्रकृतयो दैत्या खलु कचाभिसन्धिं विज्ञाय तं वारद्वय निहत्यापि यदा पूर्णकामा नासन् तदा भूयोऽपि तन्मांसादिकं लवणं कृत्वा शुक्रमेव सुरयासह भोजयामासु शुक्रस्तु स्वदुहितुर्देवयान्याः सस्नेह-निर्व्वन्धातिशयेन स्वोदरगतं कचं सञ्जीवनीविद्यां प्रदायाजीवयत् । तत प्राप्तजीवं कृतार्थञ्च कचो-ऽतीवहृष्टचित्तया देवयान्या पतित्वेन अनुरुद्धो-ऽपि सम्बन्धानुरोधात् नैव स्वीचकार । मुनरा गोऽथपरतन्त्रया तया निष्फलविद्यो भवेत्यभि-

प्रसङ्गेनापि त्वमपि क्षत्रियभार्य्या भविष्यसीति प्रभा देवयानी । एतद्विवरणं सविस्तरं महाभारतीयसम्भवपर्व्वणि १ । ७६ अध्याये द्रष्टव्यम् ॥) बन्धः । शुष्कव्रणः । इति मेदिनी ॥ मेघः । इति शब्दमाला ॥

कचकूजं, स्त्री, (कचस्य जलकोलाहलरवस्य अकूजनम् । शकन्ध्वादित्वात् सन्धिः ।) विक्रयस्थानम् । तत्पर्य्यायः । निर्म्मुट २ पण्याजिरम् ३ । इति त्रिकाण्डशेषः ॥

कचकूल, पु, (कच्यते बध्यते वेलया अथवा कचते आत्मानं वेलाभूमिं न लङ्घयतीति यावत् बाहुलकात् अकूलच् ।) समुद्र । इति त्रिकाण्डशेषः ॥

कचपं, स्त्री, (कचते शोभते । “उषिकटिदशिकचिखजिभ्य कपन्” इति उणां ।३।१४२। कच + कपन् ।) तृणम् । शाकपत्रम् । इत्युणादिकोषः ॥

कचपक्ष, पु, (कचानां केशानां पक्ष समूहः ।) केशसमूहः । इत्यमरः ।२।६।९८ ॥

कचपाश, पुं, (कचानां केशानां पाशः समूहः ।) केशसमूहः । इत्यमरः ।२।६।९८॥

कचमाल, पु, (कच कचवत् वर्णं मलते धारयतीति । कच + मल + कर्म्मण्यण् ।) धूम । इति हारावली ॥ खतमाल इति च पाठः ॥

कचरिपुफला, स्त्री, (कचस्य रिपु फलमस्याः ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

कचहस्त, पु, (कचानां हस्त समूहः ।) केशसमूहः । इत्यमरः ।२।६।९८ ॥

कचा, स्त्री, (कच्यते बध्यते लौहशृङ्खलादिभिरिति यद्वा कचते शोभते राजगृहे इति ।) कच + अच् + टाप् ।) हस्तिनी इति मेदिनी ॥ शोभा । इति शब्दरत्नावली ॥

कचाकु, त्रि, (कच इव अकति वक्रं गच्छति । अक + उन् ।) दुराधर्षम् । दुःशीलम् । इति मेदिनी ॥

कचाकु, पु, (कच इव कचनिर्म्मितवेणीवत् अकति कौटिल्य यथा तथा गच्छतीति अक + उन् ।) सर्पः । इति मेदिनी ॥

कचाटुरः, पु, (कचवदटति मेघवत् शून्ये विहरतीति । कच + अट् + उरच् ।) पक्षिविशेषः । डाक् इति भाषा । तत्पर्य्यायः । शितिकण्ठ २ दात्यूह ३ काकमद्गु ४ । इति त्रिकाण्डशेषः ॥

कचामोद, क्ली, (कच आमोदयतीति-आ-मुद-णिच्-अच् ।) बालकम् । इति राजनिर्घण्टः ॥ बाला इति भाषा ।

कचुः, स्त्री, (कचते शोभते । कच् + उन् ।) कची । स्वनामख्यातगुल्म । इति पुराणम् ॥ मूलशाकविशेष । यथा,—

“कदली दाडिमी धान्यं हरिद्रा मानकं कचु ।
बिल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिका” ॥

इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥

कचट, स्त्री, (कु कुत्सितं चटतीति । चट + अच् । बाहुलकात् कोः कत् । कुत्सितम् ।) जलपिप्पली । इति वैद्यकम् ॥

कचरं, त्रि, (कु कुत्सितं चरतीति । कु + चर + अच् कोः कदादेशः । अथवा चरेट् ।) मलिनम् । इत्यमरः । ३।१।५५ । कुत्सितम् । इति मेदिनी ॥

कचरं, क्ली, (कु कुत्सितं चर्य्यते आचर्य्यते यत् यद्वा केन जलेन चर्य्यते व्यवह्रियते यत् पृषोदरादित्वात् चकारस्य द्वित्वम् ।) तक्र । इति मेदिनी ॥

कच्चित्, अ, (कच् चित् अनयो समाहारः । कोः कदादेशः । अथवा काम्यते इति कद चीयते निश्चीयते यस्मात् । कम + विच् । चि + क्विप् तत पृषोदरादित्वात् मस्य दकारत्वम् ।) कामप्रवेदनम् । इष्टपरिप्रश्न । इत्यमरः । ३ । ४ । १ । यथा, “कच्चित् जीवति मे तातः” ॥ (तथा, रघु । ५।५। “आपद्यते न व्ययमन्तरायैः
कच्चिन्महर्षे स्त्रिविधं तपस्तत्” ॥)

कच्छः, पु, (केन जलेन छृणाति दीप्यते छाद्यते वा, उच्छृदिर् दीप्तिदेवनयो छृद् वा अन्येष्वपि इति डः । क जलं छ्यति परिच्छिनत्ति इति वा, छो छेदने + आतोऽनुपसर्गे कः” । ३।२।३। इति क ।) अनूपप्रायस्थानम् । इत्यमरः ।२।१।१० । काछाड् इति भाषा । (यथा, किराते १२ । ५४ ।

“कच्छान्ते सुरसरितो निधाय सेना-
मन्वीत स कतिपयै किरातवर्य्यैः” ॥)

सिन्धूनां सरसाञ्च प्रान्तभाग । इति मधु ॥ जलाशयप्रान्तदेशः । इति रमानाथः । नदीपर्व्वतादिसमीपम् । इति सारः ॥ (यथा महाभारते । १ सम्भवपर्व्वणि शाकुन्तले ७० । १६ । “नदीकच्छोद्भवं कान्तमुच्छ्रितध्वजसन्निभम्” ॥) तुन्नवृक्ष । इत्यमरः । २।४।१२८ तुंद इति भाषा । परिधानाञ्चलम् । इत्यमरमेदिनीकरौ ॥ काछा कोंचा कोंछा इतिभाषा । शेषस्य पर्य्यायः । कच्छा २ कच्छा ३ कच्छोटिका ४ । इति हेमचन्द्र ॥ कच्छटिका ५ कच्छाटिका ६ । इति शब्दरत्नावली ॥ नौकाङ्गम् । इति हेमचन्द्र ॥ (देशविशेष । यथोक्तञ्च ।

“गणेश्वरात् पूर्व्वभागे समुद्रादुत्तरे शिवे ।
कच्छदेशः समाख्यातस्तन्मे श्रीशक्तिसङ्गमे” ॥)

कच्छ, त्रि, (केन जलेन छृणाति दीप्यते इति । छृद् + बाहुलकात् डः ।) जलप्रान्त । इति नामार्थे अमरः ॥

कच्छटिका, स्त्री, (कच्छ कच्छस्थल अटति प्राप्नोति शकन्ध्वादित्वात् अलोपे सन्धि । अट् अच् संज्ञाया कन् अत इत्वं च । यद्वा कच्छेन पश्चाद्भागस्थवस्त्रानलविशेषेण अट्यते प्राप्यते ज्ञायते वा अट् कर्म्मणि अच् । ततः कन् इत्वं च ।) कच्छ । इति शब्दरत्नावली । काछा इति भाषा ॥

कच्छपः, पुं, (कच्छ आत्मनो मुखसम्पुट पाति स हि किञ्चिद्दृष्ट्वा शरीरे एव मुखसम्पुट प्रवेशयति सम्पुटे हि कच्छशब्द प्रसिद्धः । यद्वा कच्छे अनूपदेशे पाति आत्मानं रक्षतीति । कच्छ + पा + कर्त्तरि डः ।) स्वनामख्यातजलजन्तु । काछिम् इति भाषा । तत्पर्य्यायः । कूर्म्म २ कमठ ३ । इत्यमर ॥ १ । १० । २१ । गूढाङ्गः ४ धरणीधरः ५ कच्छेष्ट ६ पल्वलावास ७ कठिनपृष्ठक ८ । मत्स्यसमः ९ क्रोडाङ्गः १० । इति शब्दरत्नावली । पञ्चनखः ११ गुह्यः १२ पीवरः १३ जलगुल्म १४ । इति जटाधरः । अस्य मांसगुणाः ।

वातहरत्वम् । शुक्रस्त्रिकारित्वम् । चक्षुर्हितत्वम् । बलवर्द्धनत्वम् । मेधास्मृतिकारित्वम् । पथ्यत्वम् । शोषदोषनाशित्वञ्च ॥ तस्य चर्म्म पित्तनाशकम् । पाद कफहारक । अण्ड स्वादु वाजीकरञ्च ॥ (अवतारविशेष । यथा भागवते ८।७।१०।

“सुरासुरेन्द्रैर्भुजवीर्य्यवेपित
परिभ्रमन्त गिरिमङ्ग पृष्ठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेय ” ॥)

नन्दीवृक्ष । इति राजनिर्घण्टः । कुबेरस्य निधिविशेष । मल्लस्य बन्धविशेष । इति मेदिनी ॥ मदिरायन्त्रविशेष । इति शब्दचन्द्रिका ॥ (ऋषिविशेष स तु विश्वामित्रपुत्र ॥ यथा हरिवंशे २७ । ४७—५० ॥

“विश्वामित्रस्य पुत्रास्तु देवराजादयः स्मृता ।
विख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु ॥
देवश्रवा कतिश्चैव यस्मात् कात्यायना स्मृता ।
शालावत्यां हिरण्याक्षो जज्ञे रेणौ तु रेणुमान् ॥
साङ्कृतिर्गालवश्चैव मुद्गलश्चेति विश्रुता ।
मधुच्छन्दादयश्चैव देवलश्च तथाष्टक ॥
कच्छप पूरितश्चैव विश्वामित्रस्य वै सुता ।
तेषां ख्यातानि गोत्राणि कौशिकानां महात्मना” ॥
नागविशेष । यथा महाभारते १ । १२३ । ६८ ।
“कर्कोटकोऽथ सर्पश्च वासुकिश्च भुजङ्गम ।
कच्छपश्चाथ कुण्डश्च तक्षकश्च महोरग ” ॥)

कच्छपिका, स्त्री, (कच्छेन पातीति कच्छ + पा + ड + स्वार्थे कन् । अत इत्व टाप् च । कफवाताभ्यां जातानि कच्छप इव पञ्च षट् वा दारुणानि उन्नतानि यस्यां सञ्ज्ञायां कन् टापि इत्व च ।) क्षुद्ररोगविशेष । तस्य लक्षणम् ।

“ग्रथिता पञ्च वा षड्वा दारुणा कच्छपोन्नता ।
कफानिलाभ्या पिडका ज्ञेया कच्छपिका बुधै” ॥
प्रमेहोपेक्षया जातदशपिडकान्तर्गतपिडकाविशेष । तस्य लक्षणम् ।
“सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः” ।

इति सुश्रुतः ॥

(“अवगाढार्त्तिनिस्तोदा महावास्तुपरिग्रहा ।
श्लक्ष्णा कच्छपपृष्ठाभा पिडका कच्छपी मता” ॥
इति चरकः ॥ चिकित्सा तु कच्छपीशब्दे द्रष्टव्या ॥)

कच्छपी, स्त्री, (कच्छ कच्छेन वा पाति । पा + सुपीति कः । ३ । २ । ४ । अथवा कच्छेन पिबति । अत्र तु नापोष्ठक न पिबते सुराशीध्योरिति वचनात् जातेरिति ङीष् । ४ । १ । ६३ ।) कूर्म्मी । तत्पर्य्यायः । कुलि २ दुलि ३ कमठी ४ । वीणाविशेष । सा तु सरस्वतीवीणा । इत्यमरः ॥ ३।३।१२१ । क्षुद्ररोगविशेष । इति मेदिनी । कच्छपिकारोग । तच्चिकित्सा यथा,

“कच्छपीं स्वेदयेत् पूर्व्वं तत एभिः प्रलेपयेत् ।
कच्छीकृतैर्निशाकुष्ठसितातालकदारुभिः ॥

ता मक्षा साधयेच्छीघ्रं भिषग्व्रणचिकित्सया” ॥

इति भावप्रकाशः ॥

कच्छुरुहा, स्त्री, (कच्छे रोहति या। कच्छ + रुह् + इगुपधेति कः। ३।१।१३५। स्त्रियां टाप् च।) दूर्व्वा। इति जटाधरः ॥

कच्छा, स्त्री, (कचं पश्चात्प्रदेशं छादयतीति। छद् + णिच् + ड. पृषोदरादित्वात् ह्रस्वः। टाप् च। कचश्छाद्यतेऽनया वा।) परिधानापराञ्चलम्। इति हेमचन्द्रः ॥ चीरिका। झिँझी पोका इति भाषा। वाराही। इति मेदिनी ॥

कच्छाटिका, स्त्री, (कच्छ एव बाहुलकात् अटन् ततः स्वार्थे कन् टाप् च।) कच्छटिका। इति शब्दरत्नावली ॥

कच्छु, स्त्री, (कषति देहं। कष हिंसायां + “कषश्छश्चेति” १।८६। उणां ऊ छान्तादेशश्च।) पृषोदरादित्वात् वा ह्रस्वः। रोगविशेषः। तस्य लक्षणम्।

“सूक्ष्मा बह्व्यः पिडकाः स्राववत्यः
पामेत्युक्ताः कण्डूमत्यः सदाहाः।
सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरुग्रास्फिचोश्च” ॥

इति निदानम् ॥ तच्चिकित्सा यथा।

“अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम्।
नाशयेत् सार्षपं तैलं पामाकच्छुविचर्च्चिकाम्” ॥

इति अर्कतैलम् ॥१॥

“मनःशिलाल कासीस गन्धाश्मा सिन्धुजन्म च।
स्वर्णक्षीरी शिलाभेदी शुण्ठी कुष्ठश्च मागधी ॥
भाङ्गजीरकयोरश्च दद्रुघ्नः क्रमिहानलः।
दन्ती निम्बदलश्चैभिः पृथक् कर्षमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम्।
अर्कक्षीरस्नुहीदुग्धेन पृथक् पलमितेन च ॥
गोमूत्रस्याढकेनापि शनैर्म्मृद्वग्निना पचेत्।
अभ्यङ्गेन हरेदेतत् कच्छुं दुःसाध्यतामपि ॥
पामानञ्च तथा कण्डूं त्वग्व्याधिविधिरामयान्।
कच्छुराक्षसनामेदं तैलं हारीतभाषितम्” ॥

कच्छुराक्षसनाम तैलम् ॥२॥ इति भावप्रकाशः ॥

(“अवल्गुजं कासमर्दं चक्रमर्दं निशायुतम्।
माणिमन्थेन तुल्यांशं मस्तुकाञ्जिकपेषितम्।
कच्छुं कण्डूं जयन्त्युग्रां सिद्ध एष प्रयोगराट् ॥
कोमलं सिद्धार्थदलं सनिशं सुरभिजलेन पिष्टम्।
दिवसत्रयेण नियतं क्षपयति कच्छुं विलेपनतः।
हरिद्राकल्कसंयुक्तं गोमूत्रस्य पलद्वयम्।
पिबेन्नरः कामचारी कच्छुपामाविनाशनम् ॥
शोथपाण्ड्वामयहरी गुल्ममेहकफापहा।
कच्छुपामाहरी चैव पथ्या गोमूत्रसाधिता ॥*॥
स्वरसेऽपि च दूर्व्वायाः पचेत्तैलं चतुर्गुणम्।
कच्छुर्विचर्च्चिका-पामा अभ्यङ्गादेव नाशयेत्” ॥

इति दूर्व्वाद्यं तैलम् ॥ * ॥

“सोमराजी हरिद्रे द्वे सर्षपारग्वधं गदम्।
करञ्जबीजैडगजं गर्भं दत्त्वा विपाचयेत् ॥
तैलं सर्षपसम्भूतं नाडीदुष्टव्रणापहम्।
अनेनाशु प्रणश्यन्ति कुष्ठान्यष्टादशैव तु ॥
नीलिकापि पुरोयङ्गगम्भीरं वातशोणितम्।
कण्डूकच्छुप्रशमनं कच्छुपामा विनाशनम्” ॥

इति सोमराजीतैलम् ॥ * ॥

इति चक्रपाणिकृतसंग्रहः ॥)

कच्छुघ्नी, स्त्री, (कच्छुं हन्ति या। कच्छु + हन् + टक् + ङीप्।) पटोलः। हपुषाभेदः। इति राजनिर्घण्टः ॥

कच्छुर, त्रि, (कच्छूरस्यास्य। “कच्छ्वा ह्रस्वत्वञ्चेति” र। फस्तस्य। पा। ५। २। १०७। वार्त्तिके।) कच्छुरोगयुक्तः। खोसरोगी इति भाषा। तत्पर्य्यायः। पामनः २। इत्यमरः ॥ २। ६। ५८ पुंश्चलः। इति मेदिनी ॥

कच्छुरा, स्त्री, (कच्छुं कण्डूरोगं राति ददातीति। आत इति कः। टाप् च। पृषोदरादित्वात् ह्रस्व पूर्व्वस्य। यद्वा कच्छूः साध्यत्वेनास्ति अस्याः ह्रस्वश्चेति केषाञ्चिन्मतम्।) शूकशिम्बी। शटी। दुरालभा। इति मेदिनी ॥ यवासः। इति राजनिर्घण्टः ॥ ग्राहिण्यीश्च। इति रत्नमाला ॥ छो रुइ इति भाषा ॥

कच्छूः, स्त्री, (कषति छिनत्ति देहं “कषेश्छश्च”। इति ऊ। १।८६। उणां।) रोगविशेषः। खोस पाँचड़ा इति भाषा। तत्पर्य्यायः। पाम २ पामा ३ विचर्च्चिका ४। इत्यमरः ॥ २। ६। ५६ ॥

कच्छूमती, स्त्री, (कच्छूः साधनत्वेनास्त्यस्याः अस्त्यर्थे मतुप् ततो ङीप्।) शूकशिम्बी। इति शब्दचन्द्रिका ॥

कच्छोटिका, स्त्री, (कच्छ + अटन् वा कन्। अत इत्वं टाप् च। पृषोदरादित्वात् ओकारादेशः।) कच्छः। इति हेमचन्द्रः। काछा इति भाषा ॥

कच्छोर, स्त्री, (केन शिरसा शरीरेण वा कुर्य्यते लिप्यते इति। क + छुर लेपे + कर्म्मणि घञ्।) शटी। इति रत्नमाला ॥

कच्वी, स्त्री, (कचते दीप्यते शोभते। कच् उन्। ततः कचुशब्दात् ङीप्।) कन्दविशेषः। कचु इति ख्याता। तत्पर्य्यायः। वितण्डा २। इति जटाधरः ॥ अस्या गुणाः। भेदकत्वम्। गुरुत्वम्। कटुत्वम्। आमवायुपित्तकारित्वम्। पिच्छिलत्वञ्च। इति राजवल्लभः ॥

(“कच्वी सरा गुरुः सामवातकृत् कटुपित्तला” ॥

इति वैद्यकद्रव्यगुणे ॥) कचु इति हिन्दीभाषा ॥

“महिषासुरयुद्धेषु कच्वीरूपासि सुव्रते।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे” ॥

इति शारदीयदुर्गार्च्चापद्धतिः ॥

कज, इ रुहे। जन्मनि। सौत्रधातुरयम्। इति कविकल्पद्रुमः ॥ इ कञ्जारः। रुहो जन्म। क्वाद्धौ कमावे इति भावे कः। इति दुर्गादासः ॥

कज, क्ली, (के जले जायते जातं वा। जन + कर्त्तरि + डः।) कमलम्। इति राजनिर्घण्टः ॥

कज्जल, क्ली, (कुकुत्सितं जलं यस्मात् सुषमयि जलसंयोगात् स्ववर्णतां नयतीति यावत् यद्वा कुत्सितं ऊर्द्धगं चक्षुषोर्जलं दूरीभूतं भवत्यस्मात्। कोः कदादेशः।) अञ्जनम्। इति हेमचन्द्रः ॥ काजल इति भाषा। तत्पर्य्यायः। लोचकः २। इति त्रिकाण्डशेषः ॥

(“तत साकारयद्भूरि चेटीभिः कुण्डकस्थितम्। कस्तूरिकादिसंयुक्तं कज्जलं तैलमिश्रितम्” ॥

इति कथासरित्सागरे। ४। ४७ ॥ तथा, भागवते ६। २। २७।

“धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम्” ॥)

कज्जल, पुं, (कत् कुत्सितं यथा तथा जालयति आच्छादयति आतपादिकं। यद्वा कुत्सितमपि लतागुल्मादिकञ्चेति यावत् जालयति जीवयति वर्षणेनेतिशेषः। कु + जल् + णिच् अच् ततो ह्रस्वः।) मेघः। इति शब्दमाला ॥

कज्जलध्वजः, पुं, (कज्जलं ध्वज इव यस्य।) दीपः। इति त्रिकाण्डशेषः ॥

कज्जलरोचक, पुं स्त्री, (कज्जलं रोचयति। दीपेनोद्भासयति। कज्जल + रुच् + णिच् ततोऽच् स्वार्थे कन्। ण्वुल् वा।) दीपाधारः। पिलसुज् देरको इत्यादि भाषा। तत्पर्य्यायः। कौमुदीवृक्षः २ दीपवृक्षः ३ शिखातरुः ४ दीपध्वजः ५। इति जटाधरः ॥ ज्योतिर्वृक्षः ६। इति त्रिकाण्डशेषः ॥

कज्जली, स्त्री, (कुकुत्सितं जलति जीवतीति। जल + टक् ङीप् च कोः कद्। यद्वा कुत्सितं रोगयुक्तम् जालयति आरोग्यं नयति। जल + णिच् + अच् गौरादित्वात् ङीष् ह्रस्वश्च। यद्वा कज्जलमिवाचरतीति कद् + जल् + क्विप् + अच् ङीष् च।) मत्स्यविशेषः। तत्पर्य्यायः। कज्जला २ अनन्ता ३ इति शब्दरत्नावली ॥ मिश्रितरसगन्धकम्। (यथा

“गन्धकेन रसं प्राज्ञः सुदृढं मर्द्दयेद्भिषक्।
कज्जलाभो यथा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः।
असौ रोगचयं हन्यादनुपानस्य योगतः” ॥

इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

कज्वल क्ली, (कं ऊर्द्धगतं चक्षुषोर्जलं चक्षुरोगविशेषः ज्वालयति शोषयति नाशयतीति यावत्। ज्वल + णिच् + अच् ह्रस्वश्च।) कज्जलम्। इति त्रिकाण्डशेषः ॥

कञ्चटं, क्ली, (कञ्चते दीप्यते लतादामादिभिः शोभते इति भावः। कचि + अटच्।) जलजशाकविशेषः। काँचड़ादाम इति भाषा। तत्पर्य्यायः। जलभूः २ लाङ्गली ३। इति शब्दचन्द्रिका ॥ शारदी ४ तोयपिप्पली ५ शकुलादनी ६। इति रत्नमाला जलतण्डुलीयम् ७। इति भावप्रकाशः ॥ तस्य गुणाः। श्लेष्मकारित्वम्। धारकत्वम्। हिमत्वम्। पित्तरक्तनाशित्वम्। लघुत्वञ्च। इति राजवल्लभः ॥ अपि च। तिक्तत्वम्। वायुहरत्वञ्च। इति भावप्रकाशः ॥

कञ्चुड, पुं, (कञ्चते बध्नाति मध्यगतं मनुष्यादिजीवम्। कचिधातोरडन् बाहुलकात् इदित्वान्नुम्। कञ्चते शोभते वा।) कञ्चटप्रभेदः। तत्पर्य्यायः। कञ्चटः २ काचः ३ चक्रमर्द्दः ४ अम्बुजः ५। इति शब्दचन्द्रिका ॥

कञ्चार, पुं, (कचेर्भावे घञ् काचं प्रकाशं तं ऋच्छति प्राप्नोतीति ऋ + कर्म्मण्यण्। अथवा कं पृथ्वीं चारयति चालयति यद्वा कं जलं चारयति निजरश्मिभिरितिशेषः। कचि + णिच् अच्। कर्म्मणि उपपदे अण् वा।) सूर्य्यः। इति जटाधरः ॥

कञ्चिका, स्त्री, (कच्यते वेणौ प्रकाश्यते। कचि + ण्वुल् स्त्रियां टाप् इत्वञ्च।) वेणुशाखा। कञ्ची इति भाषा। तत्पर्य्यायः। कुञ्चिका २ त्वग्गुः ३। इति शब्दचन्द्रिका॥ चुद्रस्फोटः। इति वैद्यकम्॥

कञ्चुकः, पुं, (कच्यते आमुच्यात् सफणमुखपर्य्यन्त अभितो दीप्यते प्रकाश्यते शोभते वा कच्यते आवृणोति शत्रुनिक्षिप्तशस्त्रादिनिवारणाय। कचि + बाहुलकादुकन्।) सर्पत्वक्। सापेर खोलोस इति भाषा। तत्पर्य्यायः। निर्म्मोकः २। (यथा पञ्चतन्त्रे। १। ६९।
"भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः।
सुदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव" ॥)
भटादेर्श्चोलाकृतिसन्नाहः। साँजोया इति भाषा। तत्पर्य्यायः। वारबाणः २ बाणवारः ३। इत्यमरभरतौ॥ (तथा हि रामायणे ६।९९।२३।
"कञ्चुकोष्णीषिणस्तत्र वेत्रझर्झरपाणयः।
उत्सारयन्तः सहसा समन्तात्परिचक्रमुः" ॥)
चोलकम्। काँचलि इति भाषा। तत्पर्य्यायः। चोलः २ कञ्चुलिका ३ कूर्पासकः ४ अङ्गिका ५। वर्द्धापकग्रहीताङ्गस्थितवस्त्रम्। इति हेमचन्द्रः॥ (यथाऽमरुशतके ८१।
"सख्यः किं करवाणि यान्ति
शतधा यत् कञ्चुके सन्धयः" ॥)
वस्त्रम्। इत्युणादिकोषः॥ (यथा भागवते ८।७।१५।
"देवांश्च तच्छ्वासशिखाहतप्रभान्
धूम्राम्बरस्रग्वरकञ्चुकाननान्" ॥)

कञ्चुकालु, पुं, (कञ्चुकोऽस्त्यस्य। कञ्चुक + आलुच्।) सर्पः। इति शब्दचन्द्रिका॥

कञ्चुकी, [न्] पुं, (कञ्चुकोऽस्यास्तीति। कञ्चुक + अस्त्यर्थे इनि।) महल्लस्वाभ्यः। अन्तःपुराध्यक्षः। स तु वहिःसञ्चरन्तीनां पुरस्त्रीणां प्रेक्षकपुरुषान्तरवारणाय राज्ञा स्त्र्यागारे यो वेत्रधरो नियुक्तः। तत्पर्य्यायः। सौविदल्लः २ स्थापत्यः ३ सौविदः ४। इत्यमरः॥ २।८।८॥ (यथा रत्नावलीनाटिकायां २ अङ्के।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तःकञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः"॥
अस्य लक्षणमुक्तं भरतेन।
"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्व्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते" ॥)
यवः। चणकः। सर्पः। इति राजनिर्घण्टः॥ षिङ्गः। जोङ्कद्रुमः। इति मेदिनी॥

कञ्चुकी, स्त्री, (कञ्चयति शरीरकान्त्यादिकं प्रकाशयति रोगादिकमुपशमयति वा। कञ्च णिच् बाहुलकादुकन् गौरादित्वात् ङीष् जातिवाचकत्वात् ङीप् वा।) औषधिभेदः। इति मेदिनी॥ क्षीरीशाकः। इति रत्नमाला॥

कञ्चुलिका, स्त्री, (कञ्चते हृदयाद्यङ्गान्याप्नोतीति। कचि + उलच् + स्वार्थे कन् गौरादित्वात् ङीष् ह्रस्वः। टाप् च।) कञ्चुकः। स्त्रीणामङ्गरक्षिणी। इति हेमचन्द्रः॥ काँचुलि इति भाषा॥ (यथा अमरुशतके। २३। "त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीम्।)

कञ्जं, क्ली, (कम् क्षीरोदधौ जायते सागरस्यापि जलमयत्वात् तदपि इति सूच्यते। कम् जले जातम्। जने कर्त्तरि डः।) अमृतम्। पद्मम्। इति मेदिनी॥ (यथा, भागवते। ८। ६। ३।
"विरिञ्चो भगवान् दृष्ट्वा सह शर्व्वेण तां तनुम्।
स्वच्छामरकतश्यामां कञ्जगर्भारुणेक्षणाम्" ॥)

कञ्ज, पुं, (कम् के जले शिरसि च जायते। जनेर्डः।) ब्रह्मा। केशः। इति मेदिनी॥

कञ्जकः, पुं, (कञ्जते मनुष्यवत् प्रायेणोच्चारयितुं शक्नोतीति। कजि + कर्त्तरि ण्वुल्।) पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जजः, पुं, (कञ्जात् विष्णोर्नाभिपद्मात् जातः। जन + कर्त्तरि डः।) ब्रह्मा। इति शब्दरत्नावली॥

कञ्जनः, पुं, (कं सुखं जनयतीति। कम् + जनि + अण्।) कन्दर्पः। इति त्रिकाण्डशेषः॥ पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जरः, पुं, (कं जलं एकार्णवस्थसलिलं जरयति शोषयति। कम् व्याप्तिं रश्मिभिराकर्षति। कजि + अरन्।) ब्रह्मा। सूर्य्यः। उदरम्। हस्ती। इत्युणादिकोषः॥

कञ्जलः, पुं, (कञ्जते उपदिष्टविषयं पठितुं शक्नोति। कजि + कलच्।) मदनपक्षी। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जारः, पुं, (कम् जलं भुक्तरसादिकं जारयति। कम् + जन् जारयति शोषयति रश्मिभिः। कम् एकार्णवस्थप्रलयसलिलं जारयति योगबलेन नाशयति। कं जलं जारयति शोषयति शुण्डेनेतिशेषः। कम् + जॄ + णिच् + अण्। यद्वा "कञ्जिमृजिभ्यां चित्"। इति आरन्। उणा ३।१३७।) जठरम्। सूर्य्यः। विरिञ्चिः। वारणः। मुनिः। इति मेदिनी॥ (मयूरः। व्यञ्जनम्। इत्युणादिकोषः॥ ४।१३७॥ कम् जलं सागरं जारयति शोषयति गण्डूषीकृत्य योगबलेन इति विग्रहे अगस्त्यमुनिः॥)

कञ्जिका, स्त्री, (कञ्जते तरसा भूमिं भित्त्वा उत्पद्यते। कजि + कर्त्तरि + ण्वुल् + टाप् इत्वञ्च।) ब्राह्मणयष्टिकावृक्षः। इति शब्दरत्नावली॥ वामनहाटी इति भाषा॥

कट गत्या। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) कटति। इति दुर्गादासः॥

कट इ गत्या। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्-इदित्। इ-कण्टते। इति दुर्गादासः॥

कट ई गत्या। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्। कटति अकटीत् अकाटीत् चकाट। ई कट्टः इति दुर्गादासः॥

कट ए वृत्तौ। वृषि। वृतिरावरणम्। वृट् वर्षणम्। (भ्वा-पर-सक-अक च सेट्।) कटति। एदित् अकटीत् चकाट।) ए अकटीत् पटो गात्रम्। कटति मेघः। इति दुर्गादासः॥

कटः, पुं, (कटति मदवारि वर्षति यः। कट वर्षणे-कर्त्तर्य्यच्।) हस्तिगण्डस्थलम्। "कण्डूयमानेन कटं कदाचित् वन्यद्विपेनोन्मथिता त्वगस्य"। इति रघुः। २।३७।) कटिदेशः। तत्पार्श्वश्च। किलिञ्जकः। इत्यमरः॥ मादुर् दरमा इत्यादि भाषा। काशादिरचितरज्जुः येन कुसूलं वेष्ट्यते। कुसूलञ्च मराचि इति टीकान्तरम्॥ तृणरचितटाटी इतिख्यात इत्यन्ये। इति वट्टीकायां भरतः॥
(यथा भागवते। १।३।१८।
"चतुर्द्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्ज्जितम्।
ददार करजैर्व्वक्षस्येरकां कटकृद्यथा" ॥)
अतिशयः। शरः। समयः। इति मेदिनी॥ तृणम्। इति धरणी॥ (यथा मनुः २। २०४।
"गोऽश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च" ॥
"कटेषु तृणादिनिर्म्मितेषु" इति कुल्लूकभट्टः॥)
शवः। शवरथः। औषधी। श्मशानम्। इति हेमचन्द्रः॥ तच्चितकाष्ठम्। तक्ता इति भाषा। इति शब्दरत्नावली॥ (यथा,—रामायणे। २। ५६। २१।
"तां निष्ठितां बद्धकटां दृष्ट्वा रामः सुदर्शनाम्।
सुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत्" ॥
"बद्धकटां बद्धकवाटाम्" इति तट्टीका॥ स्वनामप्रसिद्धराक्षसः। यथा,—रामायणे। ५। १२। १३।
"शुकनासस्य वक्रस्य कटस्य विकटस्य च।
रक्तसो लोमशस्यस्य दष्ट्राणञ्चखर्वयोः" ॥)

कट, त्रि, (कटयति प्रकाशयति क्रियामितिशेषः। कट् + णिच् + अच्।) क्रियाकारः। इति हेमचन्द्रः॥

कटकः, पुं क्ली, (कटति वर्षति अस्मिन् मेघ इति। यद्वा कथ्यते निर्गम्यते अस्मात् निर्झरिण्यादिभिः "कृञादिभ्यः संज्ञायां वुन्"। ५। ३५। उणा इति वुन्।) पर्व्वतमध्यभागः। तत्पर्य्यायः। नितम्बः २। इत्यमरः॥ २। ३। ५॥ मेखला ३ इति भरतः॥ (यथा रघुः। १६। ३१। "मार्गैषिणी सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना" ॥) वलयः। चक्रम्। इत्यमरः॥ २। ६। १०७। हस्तिदन्तमण्डनम्। सामुद्रलवणम्। राजधानी। इति मेदिनी॥ नगरी। इति शब्दरत्नावली॥ सेना। इति हेमचन्द्रः॥ (यथा हितोपदेशे १। ३३२। "स च दिग्विजयक्रमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्त्तते" ॥) सानुः। पर्व्वतस्य समभूभागः। इति विश्वः॥
("गिरिकूटेषु दुर्गेषु नानाजनपदेषु च।
जनाकीर्णेषु देशेषु कटकेषु परेषु च" ॥
इति महाभारतम् ४। २४। १२।)

कटकी, [न्] पुं, (कटकोऽस्त्यस्य अस्त्यर्थे इनिः।) पर्व्वतः। इति त्रिकाण्डशेषः॥

कटकोलः, पुं, (कटति वर्षति स्रवति इति। कट् + अच्। कटस्य निष्ठीवनरूपजलस्य कोलः घनीभावो यत्र। कुल सङ्ख्याने अधिकरणे घञ्।) निष्ठीवनपात्रम्। इति त्रिकाण्डशेषः॥ पिकदानी इति भाषा॥

("स्यादाचामनक प्रोरुढः कटकोलः पतद्ग्रहः"।)

कटखादक, त्रि, (कट तृणादिकं सर्व्वमपि खादति इत्यर्थः। कट्+खाद्+ण्वुल्। सर्व्वभक्षम्।) खादकम्। भक्षकम्। इति मेदिनी॥

कटखादक, पुं, (कटस्य आवरणस्य खं मध्यस्थितच्छिद्र अत्ति। कट+ख+अद्+ण्वुल्।) काचकलस। काक। जम्बूक। इति मेदिनी॥ (कटं शव खादतीति व्युत्पत्त्या शवखादके त्रि।)

कटङ्कट, पुं, (कटं शवं कटति ज्वालया आवृणोतीति। कट+कट्+बाहुलकात् खच्।) अग्नि। यथा,—

"कटङ्कटाय भीमाय नमः पशुपताय च।
अघोरघोररूपाय घोरघोरतराय च"॥

इति वह्निपुराणे अग्निस्तवनामाध्याय॥

कटङ्कटेरी, स्त्री, (कटङ्कट वह्निज सुवर्ण तत्कान्तिमितिशेषः ईरयति प्रापयति ज्ञापयति वात्मान सुवर्णकान्तितुल्यपीतवर्णत्वात्। कटङ्कट+ईर गतौ+अण्। ङीप् गौरादित्वात् ङीष् वा।) हरिद्रा। इति त्रिकाण्डशेष॥ दारुहरिद्रा। इति रत्नमाला॥

कटप्रू, पु, (कटे श्मशाने प्रवते। कटं कटेन वा प्रवते। प्रुङ् गतौ क्विप् निपातनात् दीर्घ। पा। ३। २। १७। "क्विव्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वा दीर्घोऽसम्प्रसारणञ्च"।) उणा २। ५७।) महादेव। राक्षस। विद्याधर। अक्षदेवन। इति मेदिनी। कीट। इति सिद्धान्तकौमुद्यामुणादिवृत्ति॥

कटभङ्ग पु, (कटाना शस्याना ओषधीनामितियावत् हस्तेन भङ्ग छेदनम्। कटस्य सैन्यसंघस्य भङ्गः यस्मात् हेतो सैन्यभङ्गस्तु राजमरणहेतुरेव।) शस्याना हस्तच्छेदः। हात दिया शस्य छिँडा कुड़न इत्यादि भाषा। नृपात्यय। राजविनाश। इति मेदिनी॥

कटभी, स्त्री, (कटवद् भाति। कट+भा+ड। गौरादित्वात् ङीष्।) ज्योतिष्मती लता। इत्यमरः। २। ४। १५०॥ नया फटिकी इति भाषा। अपराजिता। वृक्षभेद। तत्पर्य्याय। नाभिका २ शौण्डी ३ पाटली ४ किणिही ५ मधुरेणु ६ क्षुद्रश्यामा ७ कैडर्य्य ८ श्यामला ९। अस्या गुणा। कटुत्वम्। उष्णत्वम्। गुल्मविषाध्मानशूलदोषनाशित्वम्। वातकफाजीर्णरोगशमताकारित्वम्। श्वेता चेत् गुणयुक्तत्वञ्च। "तत्फल तद्गुणं ज्ञेय विशेषात् कफशुक्रकृत्"। इति राजनिर्घण्ट॥ (यथा भावप्रकाशे।

"कटभी तु प्रमेहार्शोनाडीव्रणविषक्रिमीन्।
हन्त्युष्णा कफकुष्ठघ्नी कटुरुक्षा च कीर्त्तिता"॥)

वृक्षभेदः। काँटाशिरीष इति ख्यात। इति रत्नमाला॥

कटमालिनी, स्त्री, (कटानां किण्वाद्योषधीनां माला साधनत्वेनास्ति अस्याः अस्त्यर्थे इनि ततो ङीप्। मदिरामादकतायास्तु किण्वाद्योषधीगणप्रभवत्वात्। "मद्यादौ किण्वशक्तिवत्"। इति चार्व्वाकदर्शने १ अध्याय।) मदिरा। इति शब्दमाला॥

कटम्ब, पुं, (कटतीति "कृकदिकडिकटिभ्योऽम्बच्"। उणा। ४। ८२। इति अम्बच् धातूनामनेकार्थत्वात् अत्र वादनेऽपि।) वाद्यभेदः। (कट्यते आव्रियते शत्रुरनेनेति करणे अम्बच्।) बाण। इत्युणादिकोष॥

कटम्बरा, स्त्री, (कट गुणातिशयम् वृणोति धारयतीति। वृ+अच्+टाप् च।) कटुकी। इत्यमरः। २। ४। ८५॥ कटम्भरा इति च पाठ॥

कटम्भर, पुं, (कटं गुणातिशय बिभर्त्ति। भृ+धारणपोषणयो संज्ञाया भृतॄवृजिधारिसहितपिदमीति खच् मुम् च पा ३। २। ४६।) श्योनाकवृक्षः। इति राजनिर्घण्ट॥ कटभीवृक्षः। इति वैद्यकम्॥

कटम्भरा, स्त्री, (कटं बिभर्त्ति या। भृ+खच् मुम् टाप् च।) राजबला। इत्यमरः। २। ४। १५३॥ प्रसारणी। गन्धभादालिया इति भाषा। रोहिणी। कट्की इति भाषा। हस्तिनी। कलम्बिका। गोला। वर्षाभू। मूर्व्वा। इति मेदिनी॥

कटव्रण, पुं, (कट उत्कटो व्रणो युद्धकण्डुरस्य।) भीमसेनः। इति त्रिकाण्डशेष॥

कटशर्करा, स्त्री, (कट नल मिष्टरसत्वात् शर्करेव यस्या।) गाङ्गेष्टीलता। इति हारावली॥ नाटा इति ख्याता।

कटाकु पुं, (कटति कृच्छ्रेण जीविका निर्व्वाहयति॥ कट् कृच्छ्रजीवने "कटिकषिभ्या काकु" उणा ३। ७७। इति काकु।) पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्ति॥

कटाक्ष, पु, (कटावतिशयितौ अक्षिणी यत्र, कट+अक्षिन्+षच्। यद्वा कटं गण्डं अक्षति व्याप्नोति। अक्षु व्याप्तौ+अच् कर्म्मण्यण् वा।) अपाङ्गदर्शनम्। आड्चके देखन इति भाषा। इत्यमर। २। ६। ९४॥ (यथा, मेघदूते ३७। "आमोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्"॥)

कटायनं, क्ली, (कटस्य खनामख्यातासनस्य अयन उत्पत्तिस्थानम्।) वीरणम्। इति शब्दरत्नावली॥

कटार, पुं, (कट कन्दर्पमद ऋच्छति। कट+ऋ+अण्।) नागर। कामी। इति शब्दमाला।

कटाह, पु, (कट उत्तापादिक आहन्ति निवारयतीति। कट्+आ+हन्+ड।) कूर्म्मकर्पर॥ द्वीपप्रभेदः। (कट कटुगन्धादिकं आहन्ति तैलादिकटुगन्ध आहन्यतेऽत्र वा।) तैलादिपाकपात्रम्। (कटं शत्रुं आहन्त्यसौ जायमानविषाणाग्रमहिषीशावक। इति मेदिनी॥ (कटः पापी आहन्यतेयत्र।) नरक। इति हारावली॥ कर्व्वूर। इति जटाधर॥ कूप। इति शब्दरत्नावली॥ (यथा सिद्धान्तकौमुद्याम्। ५। १। ५२। "प्रस्थं सम्भवति प्रास्थिक कटाहः"॥)

कटि, पु, स्त्री, (कट्यते वस्त्रादिना म्रियतेऽसौ सर्व्वधातुभ्य इन् इति कट्+इन्।) शरीरावयवविशेषः। काँकाल इति भाषा। तत्पर्य्याय। कट २ श्रोणिफलकं ३ श्रोणी ४ ककुद्मती ५। इत्यमरः। २। ६। ७४॥ श्रोणिफलम् ६ कटी ७ श्रोणिः ८। इति तट्टीका॥ कलत्रम् ९ कटीरम् १० काञ्चीपदम् ११। इति हेमचन्द्र। करभ १२। इति जटाधर॥ अत्र पूर्व्वद्वयं कटिपार्श्व। इति भरत॥ (यथा, भागवते। ३। १५। २०।

"येषा बृहत् कटितटाः स्मितशोभिमुख्यः"।
कृष्णात्मना न रज आदधुरुत्स्मयाद्यैः"॥)

कटित्रं, क्ली, (कटिं त्रायते इति। कटि+त्रै+क।) रसना। कटिवस्त्रम्। कटिवर्म्म। इति मेदिनीकरहेमचन्द्रौ॥ (यथा भागवते। ६। १६। ३०।

"मृणालगौरं शितिवासस स्फुरत्-
किरीटकेयूरकटित्रकङ्कणम्"।)

कटिप्रोथ, पु, (प्रोथतीति प्रोथृ+पर्य्याप्तौ पुसीति घ। कट्या प्रोथः मांसपिण्ड।) कटिदेशस्थमांसपिण्डम्। गुदपुला पोदेर पेलो इति भाषा। तत्पर्य्याय। स्फिक् २। इत्यमर। २। ६। ३५॥ पूलक ३ कटीप्रोथः ४। इति रमसः॥ कटिः ५ प्रोथ ६। इति केचित्॥ पूलः ७। इति भरतः॥

कटिरोहक, पु, (कटिं हस्तिपश्चाद्भागं रोहतीति। कटि+रुह्+ण्वुल्।) हस्तिपश्चाद्भागरोहकः। इति शब्दमाला॥

कटिल्लक, पु, (कटति लताया प्रकाशते उत्पद्यते वा। कट+बाहुलकादिल्लप्रत्यय। ततः स्वार्थे कन्।) कारवेल्लः। इत्यमर। करला इति भाषा॥

कटिशीर्षक, पु, (कटि शीर्षमिव। सञ्ज्ञाया कन्।) कटिदेश। इति हलायुधः॥

कटिशूल, पु, (कटिस्थ शूल शूलरोगः।) कटिदेशस्थशूलरोग। तस्यौषधं यथा।

"रजनीकदलीक्षारलेप सिध्मविनाशनः।
कुष्ठस्य भागमेकन्तु पथ्याभागद्वयं तथा॥
उष्णोदकेन सपीत्वा कटिशूलविनाशनम्"।
इति गारुडे १८८ अध्याय॥
("गुडूच्यारग्वधश्चैव क्वाथमेषा विपाचयेत्।
शुण्ठीचूर्णेन सयुक्तं पिबेज्जङ्घाकटिग्रहे"॥
इति शार्ङ्गधर॥)

कटिशृङ्खला, स्त्री, (कट्या धार्य्या शृङ्खला। यद्वा कट्या शृङ्खला।) चितिका। कटिधार्य्यक्षुद्रघण्टिका। इति हारावली॥

कटिसूत्र, क्ली, (कट्या धार्य्य सूत्रम्। शाकपार्थिवादित्वात् मध्यपदलोप।) कट्यलङ्कारविशेष। इति हलायुध। चन्द्रहार गोट् इत्यादि भाषा॥ (यथा, भागवते। ५। ३। ४। "स्फुटकिरणप्रवरमणिमयमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इव"॥)

कटी, [न्] पु, (कट गण्डस्थल शाश्वत्येनास्यास्तीति अस्त्यर्थे इनि।) हस्ती। इति त्रिकाण्डशेष॥

कटी, स्त्री (कट्यते ःकटुरसेषु म्रक्षतेऽसौ। कट्यते आव्रियते वस्त्रादिना। सर्व्वधातुभ्य इन्। कटात् श्रोणिवचन इति गौरादिषु पाठाद् वा ङीष्। पा ४। १। ४१।) पिप्पली। श्रोणिदेश। [इति मेदिनी॥ (यथा, महाभारते। १। वकवधपर्व्वणि १६४। २७।

"सव्येन च कटीदेशे गृह्य वाससि पाण्डव ।
तमच्यो द्विगुणं चक्रे रुवन्तं भैरवं रवम्" ॥)

कटीतलः, पु, (कट्याः तलमास्पदमस्य । अस्य कटिदेशे धारणप्रसिद्धेस्तथात्वम् ।) न्युब्जखड्गः । इति त्रिकाण्डशेषः । बाँका खाँड़ा इति भाषा ॥

कटीरं, क्ली, (कट्यते आश्रियतेऽसौ वाससेति शेषः । कट् + "कृशृपृकटिपटिशौटिभ्य ईरन्" । उणा । ४ । ३० ॥ इति ईरन् ।) कटिः । इति हेमचन्द्रः ॥

कटीरः, पु, (कट्यते आश्रियतेऽसौ अथवा कट्यते गम्यते अनेन । कर्म्मणि करणे वा ईरन् । उणा । ४ । ३० ।) जघनम् । कन्दरः । इत्युणादिकोषः ॥ कटिः । इति जटाधरः ॥

कटीरकः, पु, (कटीर एव स्वार्थे संज्ञायां वा कन् ।) नितम्बः । इति त्रिकाण्डशेषः ॥

कटु, स्त्री, (कटति सदाचारमावृणोतीति । कट् + उन् ।) अकार्य्यम् । इत्यमरः । ३ । ३ । ३५ ॥ दूषणम् । इति विश्वः ॥

कटुः, पु, (कटति तीक्ष्णतया रसनां मुखं वा आवृणोति यद्वा कटति वर्षति चक्षुर्मुखनासादिभ्यो जलं स्रावयतीति । कट् + उन् । "कटिवटिभ्यां च" । उणा । १ । ९ ।) रसविशेषः इत्यमरः । १ । ५ । ९ । झाल इति भाषा ॥ अस्य गुणाः कण्ठजदोषशोथमन्दाग्निश्वित्ररोगनाशित्वम् । अस्य बहुसेवने क्षयदातृत्वम् । वीर्य्यबलापहत्वञ्च । इति राजनिर्घण्टः ॥ अपि च । आरोग्यपित्ताग्निवायुकारित्वम् । कृमिकण्डुविषरोगस्तनदुग्धमेदःस्थौल्यनाशित्वम् । लघुत्वम् । अतिशयभक्षणे श्रमस्थैर्य्यतालुशोषातिदाहकारित्वञ्च । इति राजवल्लभः ॥ (तथा चोक्तम् । भावप्रकाशे ।

"कटू रूक्षं स्तन्यमेदःश्लेष्मकण्डूविषापहः ।
वातपित्तकृदाग्नेयः शोषी पाचनरोचकृत्" ॥

अस्य लक्षणं यथाह वाभटः ॥

"उद्वेजयति जिह्वाग्रं कुर्व्वंश्चिमिचिमां कटुः ।
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च" ।

गुणकर्म्माणि च यथा, तत्रैव ।

"कटुर्गलामयोदर्द्दकुष्ठालसकशोफजित् ।
व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः ॥
दीपनः पाचनो रुच्यः शोधनोऽन्नस्य कर्षणः ।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥
कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम् ।
मूर्च्छामाकुञ्चनं कम्पं कटीपृष्ठादिषु व्यथाम्" ॥ * ॥

कटुको रसो वक्त्रं शोधयति अग्निं दीपयति, भुक्तं शोषयति, घ्राणमास्रावयति, चक्षुर्विरेचयति, स्फुटीकरोतीन्द्रियाणि अलसकश्वयथूपचयोदर्द्दाभिष्यन्द-स्नेह-स्वेद-क्लेदमलानुपहन्ति, रोचयत्यशनं, कण्डूर्विनाशयति, व्रणानवसादयति, क्रिमीन् हिनस्ति, मांसं विलिखति, शोणितसङ्घातं भिनत्ति, बन्धांश्छिनत्ति, मार्गान् विवृणोति, श्लेष्माणं शमयति, लघुरुष्णो रूक्षश्च ॥ स एवगुणोऽप्येक एवात्यर्थमुपयुज्यमानो विपाकप्रभावात् पौरुषमुपहन्ति, रसवीर्य्यप्रभावान्मोहयति, ग्लापयति, सादयति, कर्षयति, मूर्च्छयति, नमयति, तमयति, भ्रमयति, कण्ठं परिदहति शरीरतापमुपजनयति, बलं क्षिणोति, तृष्णां जनयति, वाय्वग्निगुणबाहुल्यात् भ्रम-मद-दवथु-कम्प-तोद-भेदैश्चरण-भुज-पार्श्व-पृष्ठप्रभृतिषु मारुतजान् विकारानुपजनयति ॥ इति चरकः ।) चम्पकवृक्षः । इति शब्दचन्द्रिका ॥ चीनकर्पूरः । पटोलः । कट्वीलता । इति राजनिर्घण्टः ॥

कटु, स्त्री, (कट्यते कटुत्वेनास्वाद्यते इति । कट् + उ ।) कटुकी । इत्यमरः ॥ प्रियङ्गुवृक्षः । राजिका । इति विश्वमेदिन्यौ ॥

कटु, त्रि, (कटति परलक्ष्मीदर्शनेन लघुतां गच्छतीति । कट् + उः ।) मत्सरः । तीक्ष्णः । इत्यमरः । ३।३।२५ ॥ (यथा, महाभारते १ । पौष्यपर्व्वणि ३ । ५५ । "क्षारतिक्तकटुरूक्षोष्णतीक्ष्णविपाकैः सचक्षुष्युपहतोऽन्धो बभूव" ।) कटुरसयुक्तः । (यथा, भागवते । ३ । २६ । ४२ ।

"कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा ।
भौतिकानां विकारेण रस एको विभिद्यते" ।)

सुगन्धिः । इति मेदिनी ॥ (यथा, रघुः । ५ । ४८ ।

"सा च्छदच्छीरकटुप्रवाह-
मसह्यमाघ्राय मदं तदीयम्" ॥)

अप्रियः । इति त्रिकाण्डशेषः ॥ (यथा, रघुः ९ । ८५ ।

"इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः" ॥)

दुर्गन्धः । इत्यमरटीकायां स्वामी ॥

कटुकं, क्ली, (कटुकानां कटुरसानां त्रयं कटौ संज्ञायां कन् ।) त्रिकटु । इति मेदिनी ॥ तत्तु शुण्ठी पिप्पली मरिचञ्च ॥ (कटु एव । स्वार्थे कन् । इति विग्रहे वाच्यलिङ्गं । अप्रियम् । यथा, महाभारते । २ । अनुद्यूतपर्व्वणि ७७ । १६ ।

"दुर्य्योधनस्य कर्णस्य कटुकान्यभ्यभाषताम् ।
इति सर्व्वमिदं राजन्नाकुलं प्रतिभाति मे" ॥)

कटुकः, पु, (कटुरेव कटुकः स्वार्थे कन् ।) कटुरसः । (यथा, सुश्रुते "यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुको रसः" ॥) पटोलः । इति राजनिर्घण्टः ॥ सुगन्धितृणम् । इति शब्दरत्नावली ॥ कुटजवृक्षः । अर्कवृक्षः । इति शब्दचन्द्रिका ॥ राजसर्षपः । इति हारावली ॥

कटुकन्दः, पु, (कटुः कन्दो मूलमस्य ।) शिग्रुवृक्षः । आर्द्रकम् । लशुनम् । इति मेदिनी ॥

कटुकफलं, क्ली, (कटुकं फलमस्य ।) कक्कोलकम् । इति राजनिर्घण्टः ॥

कटुका, स्त्री, (कटु + संज्ञायां कन् । स्त्रियां टाप् ।) क्षुद्रचक्षुवृक्षः । वृक्षविशेषः । कट्की इति भाषा । तत्पर्य्यायः । जननी २ तिक्ता ३ रोहिणी ४ तिक्तरोहिणी ५ चक्राङ्गी ६ मत्स्यपित्ता ७ वकुला ८ । शकुलादनी ९ मादनी १० शतपर्व्वा ११ द्विजाङ्गी १२ मलभेदिनी १३ अशोकरोहिणी १४ कृष्णा १५ कृष्णभेदी १६ महौषधी १७ कट्वी १८ अञ्जनी १९ काण्डरुहा २० कटु २१ कटुरोहिणी २२ केदारकटुका २३ अरिष्टा २४ मार्मघ्नी २५ । इति राजनिर्घण्टः ॥ कटम्भरा २६ कटुम्भरा २७ अशोका २८ । इत्यमरः तट्टीका च ॥ (अस्य गुणाः ।

"कटुका कटुका पाके तिक्ता रूक्षा हिमा लघुः ।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ॥
इति शब्दार्थचिन्तामणिधृतवैद्यकवचनम् ॥)

अतिकटुत्वम् । तिक्तत्वम् । शीतत्वम् । पित्तरक्तदाहबलाशारोचकश्वासज्वरनाशित्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ सारकत्वम् । रूक्षत्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥ ताम्बूली । इति शब्दचन्द्रिका ॥ कुलिकवृक्षः । इति रत्नमाला ॥

कटुकालाबुः पुं, (कटुका अलाबुः ।) कटुतुम्बी । इति रत्नमाला ॥ तितलाउ इति भाषा ॥

कटुकी, स्त्री, (कटु + स्वार्थे कन् । गौरादित्वात् ङीष् ।) कटुका । इति मेदिनीशब्दरत्नावल्यौ । कट्की इति भाषा ॥ (अस्या गुणाः ।

"कटुकी तु सरा रूक्षा कफपित्तज्वरापहा" ।
इति वैद्यकद्रव्यगुणग्रन्थे ॥
"कट्वी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः ।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ।
प्रमेहश्वासकासास्रदाहकुष्ठक्रिमिप्रणुत्" ॥
इति भावप्रकाशः ॥)

कटुकीटकः, पु, (कटुः तीक्ष्णः दशनेन दुःखप्रदत्वात् कीटः । ततः स्वार्थे कन् ।) मशकः । इति जटाधरः ॥

कटुक्वाणः, पु, (कटुः कर्कशः क्वाणः क्वणनं शब्दो यस्य ।) टिट्टिभपक्षी । इति हेमचन्द्रः ॥

कटुग्रन्थि, क्ली, (कटुस्तीव्रो ग्रन्थिर्मूलमस्य ।) पिप्पलीमूलम् । शुण्ठी । इति राजनिर्घण्टः ॥

कटुचातुर्जातकं, क्ली, (चतुर्भ्यो जातकं ततः स्वार्थे अण् ततः कर्म्मधारयः ।) एलात्वक्पत्रकमरिचात्मकचतुष्कम् । इति राजनिर्घण्टः ॥

कटुच्छदः, पु, (कटुश्छदः पत्रं यस्य ।) तगरवृक्षः । इति शब्दरत्नावली ॥

कटुतिक्तकः, पु, (कटुश्चासौ तिक्तश्चेति । अल्पार्थे कन् ।) शणवृक्षः । इति राजनिर्घण्टः ॥ भूनिम्बः । इति वैद्यकम् ॥

कटुतिक्तका, स्त्री, (विपाके कटु स्वादे तिक्ता । स्वार्थे कन् । अत इत्वम् ।) कटुतुम्बी । इति शब्दरत्नावली ॥

कटुतुण्डी, स्त्री, (कटु तीव्रं तुण्डमस्याः ।) लताप्रभेदः । कटुतराइ इतिख्याता । तत्पर्य्यायः । तिक्ततुण्डी २ तिक्ताख्या ३ कटुका ४ कटुतुण्डिका ५ विम्बा ६ ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कफवान्तिविषारोचकरक्तपित्तनाशित्वम् । सदा पथ्यत्वम् । रेचनत्वञ्च । इति राजनिर्घण्टः ॥

कटुतुम्बी, स्त्री, (कटुश्चासौ तुम्बी चेति ।) लताविशेषः । तितलाउ इति भाषा । तत्पर्य्यायः । इक्ष्वाकुः २ । इत्यमरः । २ । ४ । १५६ ॥ कटुकालाबुः ३ नृपात्मजा ४ । इति रत्नमाला ॥ कटुतिक्तिका ५ । इति शब्दरत्नावली ॥ कटुफला ६

तुम्बिनी ७ कटुतुम्बिनी ८ इक्ष्वाकुफला ९ राजपुत्त्री १० तिक्तबीजा ११ तुम्बिका १२ ॥ अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । वान्तिकारित्वम् । श्वासवातकासशोथव्रणशूलविषनाशित्वम् । शोधनत्वञ्च । इति राजनिर्घण्टः ॥ पाण्डुक्रिमिकफवायुनाशित्वम् । लघुपाकित्वञ्च । इति राजवल्लभः ॥ ("कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत्" ॥)

कटुत्रयं, क्ली, (कटूनां कटुरसानां त्रयम् ।) त्रिकटु । इति राजनिर्घण्टः ॥ (अस्य गुणाः । "त्र्यं त्रिकटुकं जयेत् । स्थौल्याग्निसदन-श्वास-कास-श्लीपद-पीनसान्" ॥ इति वाभटः ॥)

कटुदला, स्त्री, (कटु दलं पत्रं यस्याः ।) कर्कटी । इति राजनिर्घण्टः । काँकुड़ इति भाषा ॥

कटुनिष्पावः पु, (कटुश्चासौ निष्पावश्चेति ।) नदीनिष्पावधान्यम् । इति राजनिर्घण्टः ॥

कटुपत्रः, पु, (कटु तीव्रं पत्रं यस्य ।) पर्पटः । सितार्जकः । इति राजनिर्घण्टः ॥

कटुपत्रिका, स्त्री, (कटु पत्रं यस्याः । ततः कप् । अत इत्वं टाप् च ।) कारीवृक्षः । इति राजनिर्घण्टः ॥

कटुफलः, पु, (कटु फलं यस्य । अस्य पत्रस्यतिक्तत्वेपि फले कटुपाकत्वात् ।) पटोलः । इति राजनिर्घण्टः ॥

कटुफला, स्त्री, (कटु फलं यस्याः ।) श्रीवल्लीवृक्षः । इति राजनिर्घण्टः ॥

कटुभङ्गः, पु, (कटुः एकैकदेशभङ्गश्च यस्य ।) शुण्ठी । इति त्रिकाण्डशेषः ॥

कटुभद्रं क्ली, (कट्वपि भद्रं सेवनेन हितजनकम् ।) शुण्ठी । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति केचित् ॥

कटुमञ्जरिका, स्त्री, (कटुः तीक्ष्णा मञ्जरी अस्ति अस्याः । अच् गौरादित्वात् ङीष् सञ्ज्ञायां कन् टाप् पूर्व्वह्रस्वत्वञ्च ।) अपामार्गः । इति राजनिर्घण्टः ॥

कटुमोदं, क्ली, (कटुरेव मोदः गन्धो यस्य तत् ।) जवादिनामसुगन्धिद्रव्यम् । इति राजनिर्घण्टः ॥

कटुरं, क्ली, (कटति मन्थनेन रसान्तरं गुणान्तरं वा वर्षतीति । कट+उरन् । यद्वा कथ्यते प्रकाश्यते मन्थनात् रसान्तरेण गुणान्तरेण च प्रकाश्यते इति ।) तक्रम् । इति जटाधरः ॥ कट्वरं इत्यपि पाठः ॥

कटुरवः, पु, (कटुः कर्णाप्रियो रवः ध्वनिर्यस्य ।) मण्डूकः । इति राजनिर्घण्टः ॥

कटुरोहिणी, स्त्री, (कटुश्चासौ कट्वी चासौ वा रोहिणी चेति । केचित्तु कटुः सती रोहतीति+ रुह+णिनि ततो ङीप् ।) कटुकी । इत्यमरः । २।४।८५ ॥

कटुवार्त्ताकी, स्त्री, (कटुः कट्वी वार्त्ताकी ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

कटुवीजा, स्त्री, (कटु वीजं यस्याः ।) पिप्पली । इति राजनिर्घण्टः ॥

कटुशृङ्गाटं क्ली, (कटूना शृङ्गाय प्राधान्याय अलति पर्य्याप्नोतीति । अल+अच् ।) गौरसुवर्णशाकम् । इति राजनिर्घण्टः ॥

कटुस्नेहः, पु, (कटुः तीक्ष्णः स्नेहः रसविशेषो यस्य ।) सर्षपः । इति त्रिकाण्डशेषः ॥ गौरसर्षपः । इति राजनिर्घण्टः ॥

कटूत्कटं, क्ली, (कटुषु उत्कटम् ।) आर्द्रकम् । इति रत्नमाला ॥

कटूत्कटका, स्त्री, (कटुषु उत्कटम् । ततः संज्ञायां कन् ।) शुण्ठी । इति राजनिर्घण्टः ॥

कटोर, स्त्री, (कथ्यते दृश्यते निषिच्यते वा भक्ष्यद्रव्यं यत्र । कट+अधिकरणे ओलच् । रलयोरैक्यात् लस्य रत्वम् ।) पात्रविशेषः । कटोरा इति भाषा । यथा,—मेरुतन्त्रे पञ्चमप्रकाशे ॥ * ॥

"म्लकर्पटे संयुतकाचकूप्या
दत्त्वा मुखं लोहपलोहसूत्रैः ।
निष्कासितो धूमरसस्तु तस्य
सौगन्धिके काचकटोरके च" ॥

किञ्च ।

"रम्यान्नं देवकीदत्तं पात्रे काञ्चननिर्म्मिते ।
कटोरायां चतुःषष्टि पात्रस्त्वोभयतः स्थिता" ॥

इति जैमिनिभारते आश्वमेधिके पर्व्वणि ९अध्यायः ॥

कटोरा, स्त्री, (कथ्यते दृश्यते दीयते स्थाप्यते वा भक्ष्यद्रव्यादिकमस्याम् । कट+ओलच् । लस्य रत्वम् ।) स्वनामख्यातपात्रम् । इति ब्रह्मवैवर्त्तपुराणम् । वाटि इति भाषा ॥

कटोलः, पु, (कटति सदाचारं मिष्टाद्यन्नरसञ्च आवृणोतीति । "कपिगतिगण्डिकटिपटिभ्य ओलच्" । उणा १ । ६७ । इति ओलच् ।) चण्डालः । इत्युणादिकोषः ॥ कटुरसः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कटोलवीणा, स्त्री, (कटोलस्य चाण्डालस्य वीणा वाद्ययन्त्रविशेषः ।) वीणाविशेषः । इति शब्दरत्नावली । कोन्दुडा इति ख्याता ॥

कट्फलः, पु, (कटति कटुतया अन्यरसमावृणोतीति । कट+क्विप् । कट् फलं यस्य सः ।) स्वनामख्यातफलवृक्षविशेषः । कायफल इति भाषा । तत्पर्य्यायः । श्रीपर्णिका २ कुमुदिका ३ कुम्भी ४ कैटर्य्य ५ । इत्यमरः २ । ४ । ४० ॥ सोमवल्कः ६ सोमवृक्षः ७ रोहिणी ८ । इति रत्नमाला ॥ छायागर्भः ९ प्रचेतसी १० भद्रावती ११ महाकुम्भी १२ रामसेनकः १३ कुमुदा १४ उग्रगन्धा १५ भद्रा १६ रञ्जनकः १७ लघुकाश्मर्य्यः १८ श्रीपर्णी १९ काफलः २० पर्यषः २१ कुमुदी २२ । इति शब्दरत्नावली ॥ अपि च ।

"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥
कट्फलस्तुवरस्तिक्तः कटुर्व्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ठामयारुची" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कासश्वासज्वरशोथदाहनाशित्वम् । रुचिकारित्वम् । मुखरोगशमप्रदत्वञ्च । इति राजनिर्घण्टः ॥ कफरोगनाशित्वम् । इति राजवल्लभः ॥ ("कट्फलं कफरोगघ्नं कासश्वासज्वरापहं" ॥ इति वैद्यकद्रव्यगुणः ॥)

कटफला, स्त्री, (कटति इति । कट+क्विप् तदेव फलमस्याः ।) गम्भारीवृक्षः । इति रत्नमाला ॥ बृहती । काकमाची । देवदाली । वार्त्ताकी । मृगेर्व्वारुः । इति राजनिर्घण्टः ॥

कट्वङ्गः, पु, (कटु अङ्गमस्य ।) श्योनाकवृक्षः । इत्यमरः । २।४।५६ ॥ कटूनि उग्राणि वीर्य्यव्यञ्जकानि अङ्गानि यस्य ।) दिलीपराजः । इति त्रिकाण्डशेषः ॥

कट्वरं, क्ली, (कटति वर्षति रसान्तरम् । "छित्वरच्छत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः" उणा ३ । १ । इति कट+ष्वरच् । निपातनात् साधु ।) दधिसरः । इति रत्नमाला ॥ व्यञ्जनम् । इत्युणादिकोषः ॥ तक्रम् । यथा ।

"दध्नः ससारकस्यात्र तक्रं कट्वरमुच्यते" ।

इति चक्रपाणिदत्तसंग्रहे ॥

("सुवर्च्चिका-नागर-कुष्ठ-मूर्व्वा
लाक्षा-निशा-लोहितयष्टिकाभिः ।
तैलं ज्वरे षड्गुणतक्रसिद्ध-
मभ्यञ्जनाच्छीतविदाहनुत् स्यात्" ॥

इति षट्कट्वरं तैलम् ॥)

कट्वी, स्त्री, (कथ्यते कटुरसतया खाद्यते अनुभूयते वा । कट्+उन् । ततः स्त्रियां ङीप् । वोतो गुणवचनादिति ङीष् वा । पा । ४ । १ । ४४ ।) कटुका । लताविशेषः । तत्पर्य्यायः । कटुकवल्ली २ सुकाष्ठा ३ काष्ठवल्लिका ४ सुवल्ली ५ मधुवल्ली ६ पशुमोहनिका ७ कटुः ८ ॥ अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । कफश्वासनानाज्वरहारित्वम् । रुचिकारित्वम् । राजयक्ष्मनिवारणत्वञ्च । इति राजनिर्घण्टः ॥ (कटुकाशब्देऽस्या गुणादयो व्याख्याताः ॥)

कठ इ कि आध्याने । उत्कण्ठापूर्व्वकस्मरणे इति कविकल्पद्रुमः ॥ (चुरा-पक्षे भ्वा-परं-सकं-सेट्-इदित् ।) इ कर्म्मणि कण्ठ्यते । कि कण्ठयति । आध्यानं स्मृ स औत्क्ये इत्यत्र व्याख्यातम् । इति दुर्गादासः ॥

कठ तद्भने । तद्भनं दुःखेन जीवनम् । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) कठति दीनः । इति दुर्गादासः ॥

कठ इ ङ आध्याने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट्-इदित् ।) इ कर्म्मणि कण्ठ्यते । ङ कर्त्तरि कण्ठते । "रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते" । इति दुर्गादासः ॥

कठः, पुं, (कठेन प्रोक्तमधीते यः । कठशाखां अभिजानाति वा "कठचरकात् लुक्" । इति लुक् । ४।३।१०७ ।) मुनिविशेषः । कठशाखाध्ययनकर्त्ता कठशाखाज्ञः । (यथा महाभारते । १ । मौषले ८ । २४ ।

"उद्दालकः कठश्चैव श्वेतश्चैव महायशाः" ॥

ऋक्भेदः । स्वरः ।

("कठो मुनौ तदाख्यातवेदाध्येतरि यो स्वरे" ।)

इति हेमचन्द्रः ॥ ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (उपनिषद्विशेषः । यदुक्तं मुक्तिकोपनिषदि ।

"ईशा-केन कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरि" ॥)

कठमर्द्द, पु, (कठं कष्टजीवनं मर्द्दातीति। कठ मर्द्द + अण्।) शिव। इति त्रिकाण्डशेषः ॥

कठर, त्रि, (कठ + अरन्।) कठिन। इति जटाधरः ॥

कठशाखा, स्त्री, (यजुर्वेदान्तर्गता कठेन प्रोक्ता शाखा।) यजुर्व्वेदस्य शाखाविशेषः। एतद्विवरणं वेदशब्दे द्रष्टव्यम् ॥

कठाह्वक, पु, (कठं कठिनमाह्वन्तीति। आ + ह्वे + ड। कठाह्वं तादृशं कं शिरो यस्य।) दात्यूहपक्षी। इति शब्दरत्नावली ॥

कठिञ्जर, पु, (कठि कठिनं जरयति। जॄष् वयोहानौ तस्मात् अण्। पृषोदरादित्वात् साधु। यद्वा जॄ + णिच् + बाहुलकात् + खच् मुम् च।) तुलसीवृक्ष। तत्पर्य्यायः। पर्णासः २ कुठेरकः ३। इत्यमरः। २। ४। ७८ ॥ ("लोणिका-जातुकपर्णिका-पत्तूर-जीवक-सुवर्च्चला-कुरुवक कठिञ्जर-कुन्तलिका-कुरण्टिकाप्रभृतीनि"॥ इति सुश्रुते द्रष्टव्यम् ॥)

कठिन, त्रि, (कठ + इनन्। उणादिमते तु इनच्। "बहुलमन्यत्रापि"। उणा। २। ४। ६।) कठरम्। तत्पर्य्यायः। कक्खटम् २ क्रूरम् ३ कठोरम् ४ निष्ठुरम् ५ दृढम् ६ जठरम् ७ मूर्त्तिमत् ८ मूर्त्तम् ९। इत्यमरः। ३। १। ७६ ॥ खक्खटम् १० कठोलम् ११ जरठम् १२। इति तट्टीका ॥ कर्क्करम् १३ काठरम् १४। इति जटाधरः ॥ काठरम् १५ कमठायितम् १६। इति शब्दरत्नावली ॥ सत्यम्। इति मेदिनी ॥ ("उन्मूलयस्य कठिनान् नृपान् वायुरिव द्रुमान्"। कथासरित्सागरे १९। ८९ ॥ तथा कुमारे ४। ५। "न विदीर्य्ये कठिना खलु स्त्रियः" ॥ अपि च "भक्ष्यास्वातिकठिनान् दन्तरोगी विवर्ज्जयेत्"। सुश्रुते ॥)

कठिन, क्ली, स्त्री, (कठ + "बहुलमन्यत्रापि"। उणा २।४९। इति इनच्।) स्थाली। इति मेदिनीशब्दरत्नावल्यौ ॥

कठिनपृष्ठक, पु, (कठिनं पृष्ठकमस्य। पृष्ठ स्वार्थे संज्ञायां वा कन्।) कच्छपः। इति राजनिर्घण्टः ॥

कठिना, स्त्री, (कठ + इनच्। स्त्रियां टाप्।) गुडशर्क्करा। इति विश्वमेदिन्यौ ॥

कठिनिका, स्त्री, (कठ + इनच् + गौरादित्वात् ङीष् स्वार्थे कन्। टापि ह्रस्वः।) कठिनी। इति हारावली। खडी इति भाषा ॥

कठिनी, स्त्री, (कठिन + गौरादित्वात् ङीष्।) खड़िका। इति मेदिनी। खडी इति भाषा ॥ तत्पर्य्यायः। पाकशुक्ला २ अभिलाधातुः ३ कक्खटी ४ खटी ५ खड़ी ६ वर्णलेखिका ७। इति रत्नमाला ॥ धातूपलः ८ कठिनिका ९। इति हारावली ॥ (तथा च हितोपदेशे १। १८। "गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य। तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम" ॥)

कठिल्ल, पु, (कठति भोजने दुःखं उद्वेगं वा जनयति। अतीवतिक्तत्वात् तथात्वं। कठ शोके इति धातोर्बाहुलकादिल्लप्रत्ययः।) कारवेल्लः। इत्युणादिकोषः। करला इति भाषा ॥ (वाभटे शाकवर्गाणां मध्ये गणितम् ॥ यथा,— "कठिल्लं केम्बुकं शीतं स कोषातकं कर्क्कशम्। तिक्तं पाके कटुग्राहि वातलं कफपित्तजित्" ॥)

कठिल्लक, पु, (कठिल्ल + स्वार्थे कन्।) कारवेल्लः। पुनर्नवा। तुलसी। इति त्रिकाण्डशेषः ॥

कठी, स्त्री, (कठेन प्रोक्तमधीते या शाखाध्येतृवाचित्वेन जातित्वात् ङीष्। कठप्रोक्तमधीयाना इत्यर्थः।) ब्राह्मणी। इति जटाधरः ॥

कठेर, पु, (कठति कृच्छ्रेण जीवति जीविकां निर्व्वाहयति। "पतिकठिकुठिगडिगुडिदंशिभ्य एरक्"। उणा। १। ५९ इति एरक्।) दुःखजीवी। दरिद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कठोर, त्रि, (कठति पारुष्यमाचरति। "कठिचकिभ्यामोरन्" उणा १।६५। इति कठ + ओरन् ॥) कठिन। इत्यमरः। ३। १। ७६ ॥ (यथा, भागवते ३। १९। १५।

"प्रत्युद्धरोष स कठोरमुष्टिना
नदन् प्रहृत्यान्तरधीयतासुरः" ॥

दारुणः। तथाहि भागवते। ५। १३। ३। "कठोरदंष्ट्रैर्मशकैरुपद्रुत" ॥ अतिविस्तृतः। तत्रैव ६। १२। २। "युगान्ताग्निकठोरजिह्व" ॥ पूर्णः। तथाहि।

"स तप्तकार्त्तस्वरभास्वराम्बर
कठोरताराधिपलाञ्छनच्छविः"।

इति माघ। १। २० ॥ "कठोरताराधिपस्य पूर्णेन्दोः" इति तट्टीकायां मल्लिनाथः ॥)

कठोल, त्रि, (कठ + ओलच् "कपिगतिगण्डिकटिपटिभ्य ओलच्" उणा ।१। ६७।) कठोर। इत्यमरटीकायां नीलकण्ठः ॥

कड इ ङ न दर्पे। हर्षे इत्यर्थः। इति कविकल्पद्रुमटीकायां दुर्गादासः। (भ्वा-आत्म-अक-सेट्-पक्षे उभ-इदित्।) इ कर्म्मणि कण्ड्यते। ङ कण्डते कण्डते। ऊ कण्डते मनो हृष्टं स्यादित्यर्थः। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो ञकारः। अनेकार्थत्वात् तुषापनयने च। (भ्वा-आत्म-सक।) "कण्डते तण्डुलं लोकः"। इति दुर्गादासः ॥

कड श मदने। दर्पे। इति कविकल्पद्रुमः ॥ (तुदा-पर-सक-दर्पे अक-सेट्।) श कडती कडन्ती। प्राञ्चस्तु वेदे तुषावयवभेदार्थं भ्वादावप्येव पठन्ति। तथा च। "कड मद इति धातुः पठ्यते भूतुदाद्योः कड़ति कडति रूपं तुल्यमेव द्वयोः स्यात्। तदुभयगणपाठे किं फलं नेति वाच्यं स्वरकृत इह भेदः शप्शयोरस्ति यस्मात्" इति। स्वरकृत इति उदात्तानुदात्तस्वरितविशिष्टस्वरकृतकषमुल्विधिस्वरकृत इत्यर्थः। इति दुर्गादासः ॥

कड इ क भेदे। रक्षणे। इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट्-इदित्।) इ कण्डयति। इति दुर्गादासः ॥

कड, त्रि, (कड़ति माद्यतीति। कड़ मदे + पचाद्यच्।) मूर्खः। इति हलायुधः ॥

कडङ्ग, क्ली, (कड्यते अद्यते इति। कड अदने + अच् संज्ञायां कन्। कर्म्मणि अप् स्वार्थे संज्ञायां वा कन्।) लवणविशेषः। करकच इति भाषा ॥ तत्पर्य्यायः। सामुद्रम् २ त्रिकूटम् ३। इति रत्नमाला ॥ अस्य गुणाः सामुद्रशब्दे द्रष्टव्याः ॥

कडङ्ग, पु, (कडं मादकताशक्तिं गमयति जनयति वा कडात् गमेर्डः। अन्तर्भूतो ण्यन्तो वा।) सुराविशेषः। इत्युणादिकोषः ॥

कडङ्गर, पु, (कडात् भक्षणीयतण्डुलादेः सकाशात् गीर्य्यते क्षिप्यते दूरीक्रियते इति भावः। कड + गिरते कर्म्मणि खच्। यद्वा कडं भक्षणीयशस्यादि गिरति उद्गिरति आत्मनः सकाशात्। गॄ + अच्।) बुष इत्यमरः। २। ९। २२। आगड़ा इति भाषा ॥

("नीवारपाकादि कडङ्गरीयै-
रामृश्यते जानपदैर्न कश्चित्"।

इति रघु। ५। ९। कडङ्गरं बुषम् अर्हन्तीति कडङ्गरीया इति तट्टीकायां मल्लिनाथः ॥)

कडत्र, क्ली, (गड्यते सिच्यतेऽत्र जलादिकम्। गड़ + अत्रन् गडेरादेश्च कः।) पात्रविशेषः। इति उणादिकोषः ॥ (गड्यते सिच्यतेऽनेन। गड़ + सेचने "गडेरादेश्च कः" उणाम्। ३। १०६। इति अत्रन् प्रत्ययः डलयोरेकत्वस्मरणात् कलत्रम् ॥

कडम्ब, पुं, (कड + "कृकदिकडिकटिभ्योऽम्बच्" उणाम्। ४। ८२। इति कड्धातोरम्बच्प्रत्ययः।) शाकनाडिका। डाँटा इति भाषा ॥ तत्पर्य्यायः। कलम्ब २। इत्यमरः। २। ९। ३५ ॥ कोणम्। प्रान्तभागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (कलम्बशब्दे विशेषो ज्ञेयः ॥)

कडम्बी, स्त्री, (कडम्बः कलम्बो भूयसा विद्यते अस्याः। इति अर्शआदित्वात् अच् तत गौरादित्वात् ङीष्।) कलम्बीशाकम्। इति शब्दरत्नावली ॥ (कलम्बीशब्दे गुणादयोऽस्या वक्तव्याः ॥)

कडार, पुं, (गड। सेचने इति + "गडेः कड् च"। उणाम्। ३। १३५। इति आरन् कड़ादेशश्च धातोः।) पिङ्गलवर्णः। तद्वर्णयुक्ते त्रि। इत्यमरः। १। ५। १६ ॥ (यथा माघे। ५। ३।

"सविद्युदम्बरविकाशि चमूसमुत्थं
पृथ्वीरजः करभकण्ठकडारमाशाः" ॥)

कडारस्तृणवह्निवत् इत्यन्ये इति भरतः ॥ दासः। इति मेदिनी ॥

कडितुल, पुं, (कट्या तुला तोलनं ग्रहणं यस्य पृषोदरादित्वात् टस्य डः।) खड्गः। इति शब्दरत्नावली ॥

कडु कार्कश्ये। इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट्।) टवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे कड्। कडुति मदमत्ततयाः कार्कश्यं स्यादित्यर्थः। इति दुर्गादासः ॥

कण क्वण आर्त्तस्वरे। इति कविकल्पद्रुमः ॥ (भ्वा-

पर-अकं-सेट्।) अः अचीकणत् अचकाणत्। कणति भीतः। इति दुर्गादासः॥

कण, म गतौ। इति कविकल्पद्रुमः। (भ्वा-पर-सक्-सेट्-घटादि।) म कणयति। इति दुर्गादासः॥

कण, क निमीलने। इति कविकल्पद्रुमः॥ (चुरा-पर-सक-सेट्।) निमीलनं पक्ष्मावरणम्। क काणयति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः। इति दुर्गादासः॥

कणः, पु, (कणति अतिसूक्ष्मत्वं गच्छति। कण+पचाद्यच्।) अतिसूक्ष्मः। ("आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः"।
इति शान्तिशतकम् ५॥) धान्यांशः। इत्यमरः।
३।१।६२॥ (यथा, मनुः।११।९२।
"कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि"॥)
तस्य स्त्रीलिङ्गे कणा कणिका। वनजीरकः।
इति राजनिर्घण्टः॥

कणगुग्गुलुः, पु, (कणश्चासौ गुग्गुलुश्चेति।) गुग्गुलुप्रभेदः। तत्पर्य्यायः। गन्धराजः २ स्वर्णकणः ३ सुवर्णः ४ कनकः ५ वंशपीतः ६ सुरभिः ७ पलङ्कषः ८॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वातशूलगुल्मोदराध्मानकफनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

कणजीरः, पु, (कणश्चासौ जीरश्चेति नित्यकर्म्मधारयः।) श्वेतजीरकः। इति राजनिर्घण्टः। (श्वेतजीरकशब्देऽस्य गुणा ज्ञेयाः॥)

कणजीरकं, क्ली, (कणं क्षुद्रं जीरकम्। कणजीर+स्वार्थे कन्।) क्षुद्रजीरकम्। तत्पर्य्यायः। ह्रस्वगन्धि २ सुगन्धम् ३। इति रत्नमाला शब्दचन्द्रिका च॥

कणभक्षकः, पु, (कणान् भक्षयति भक्षति वा। कण+भक्ष+ण्वुल्।) मारिटपक्षी। इति राजनिर्घण्टः॥

कणलाभः, पु, (कणानां लाभो यस्मात् सः। पेषणसाधनयन्त्रविशेषः स सादृश्येनास्त्यस्य। अर्श-आदिभ्यः अच्।) आवर्त्तः। इति त्रिकाण्डशेषः। जलेर घूर्णा इति भाषा॥

कणा, स्त्री, (कण+स्त्रियां टाप्।) जीरकम्। कुम्भीरमक्षिका। पिप्पली। इति मेदिनी॥
("द्राक्षा कणा पञ्चमूलं त्वचाख्यञ्च पचेज्जले।
तेन क्षीरं शृतं शीतं पिबेत् समधुशर्करम्"॥
इति पित्तकासचिकित्सायां वाभटेनोक्तम्॥)
श्वेतजीरकम्। इति राजनिर्घण्टः॥ ("कणा स्याद्दीर्घजीरकः"॥ इति भावप्रकाशः॥) अल्पम्। यथा,—
"कदलीफलमध्यस्थं कणामात्रमपक्वकम्"।
इति तिथ्यादितत्त्वम्॥

कणाटीनः, पु, (कणाय अटतीति। कण+अट+इनन् दीर्घत्वञ्च पृषोदरादित्वात्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥

कणाटीरः, पु, (कणाय अटति। कण+अट+ईरन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणाटीरकः, पु, (कणाटीर+स्वार्थे कन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणादः, पु, (कणान् अत्ति भक्षयति। कण अद+कर्म्मणि उपपदे अण्।) स्वनामख्यातमुनिविशेषः। तत्पर्य्यायः। काश्यपः २। इति त्रिकाण्डशेषः॥ स च वैशेषिकदर्शनकर्त्ता। स्वर्णकारः। कलादो रुक्मकारकः इत्यमरोपरि कणादः इत्यपि पाठः। इति सारसुन्दरी॥

कणिकः, पु, (कण एव इति स्वार्थे कन् अत इत्वम्।) कणः। शत्रुः। नीराजनविधिः। इति सारस्वतः॥ शुष्कगोधूमचूर्णम्। इति राजनिर्घण्टः॥ (कणः विद्यतेऽस्य अस्त्यर्थे ठन्। स्वार्थे ठन् वा। "गामेरभूत् स्वकणिकाद् वटवन्महात्मा" इति भागवतम्।७।९।३३॥ धृतराष्ट्रमन्त्रिविशेषः। यथा महाभारते।१। सम्भवपर्व्वणि १४१।२।
"तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम्।
कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः"॥)

कणिका, स्त्री, (कणाः सन्त्यस्याः। "अत इनिठनाविति ठन्" ५।२।११५। कणति स्थूलरूपात् क्रमशो गच्छति अत्यन्तसूक्ष्मतां प्राप्नोति इत्यर्थः। पचाद्यच् स्वार्थे कन् अत इत्वं टाप् च।) अत्यन्तसूक्ष्मवस्तु। अग्निमन्थवृक्षः। इति मेदिनी॥ कणाः। तण्डुलविशेषः। इत्यमरटीकायां रायमुकुटः॥ (जलादीनां सूक्ष्मांशः। यथा, मेघदूते ९९।
"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्"॥)

कणितं, क्ली, (कण आर्त्तनादे+भावे क्त।) पीडितानां शब्दः। इति हेमचन्द्रः॥

कणिशं, क्ली, (कणो विद्यतेऽस्य इति इनि तं श्यति। कणिन्+शो+क। यद्वा कणिनः शेरतेऽस्मिन्। कणिन्+शी+ड। कणाः सन्त्यस्य इत्यमरटीका मतम्।) शस्यमञ्जरी। इत्यमरः।२।९।२१। धान्यादिर शिष इति भाषा॥

कणी, स्त्री, (कण+स्त्रियां ङीप् गौरादित्वात् ङीष् वा।) कणिका। इत्यमरटीकायां भरतः॥

कणीकः, त्रि, (कण+ईकन्।) अल्पम्। इत्युणादिकोषः॥

कणीयः, [स्] त्रि, (कण+ईयसुन्।) अत्यल्पम्। इत्यमरः॥ कनिष्ठम्। इति तट्टीका॥ (यथा हठयोगदीपिकायाम्।२।१२। "कणीयसि भवेत् स्वेदः कम्पो भवति मध्यमे"॥)

कणेरः पु, (कण+एरप्रत्ययः।) कर्णिकारवृक्षः। इत्युणादिकोषः॥

कणेरा, स्त्री, (कण+एरच् टाप् च।) वेश्या। हस्तिनी। इत्युणादिकोषः॥

कणेरुः स्त्री, (कण+एरु।) वेश्या। करिणी। कर्णिकारवृक्षे पु। इति मेदिनी॥

कण्टकः, पु, क्ली, (कण्टति इति कटि ण्वुल्। उणादौ मा २।४।३१।) क्षुद्रशत्रुः। (यथा विष्णुपुराणे १।१९।३१। "प्रमादः कथ्यतां सम्यक् तथा कण्टकशोधने") गात्रादस्थि। नेयादिद्वारादिदोषोक्ति। रोमाञ्चः। द्रुमाङ्गम्। इति मेदिनी॥ काँटा इति भाषा॥ (तथा चोक्तं चाणक्यशतके २२।
"उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत्।
पादलग्नं करस्थेन कण्टकेनेव कण्टकम्"॥)
केन्द्रम्। इति दीपिका॥

कण्टकः, पु, (कटि+ण्वुल्।) सूच्यग्रम्। क्षुद्रशत्रुः। (यथा, मनुः।९।२५२।
"सम्यङ्निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः।
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम्"॥)
लोमहर्षः। इत्यमरः ३।५।३२॥ कर्म्मस्थानम्। दोषः। इति जटाधरः॥ मकरः। इति विश्वः॥ वेणुः। इति हेमचन्द्रः॥ (लोकोपद्रवकारी। यथा, भागवते।३।१८।२३।
"अन्वेषन्नप्रतिरथो लोकानटति कण्टकः"॥)

कण्टकद्रुमः, पु, (कण्टकप्रधानो द्रुमः। कण्टकैराचितो द्रुमो वा।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (यथा मृच्छकटिके।१४०।४।
"किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकद्रुमाः"॥
"दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः"।
इति भागवतम्।७।५।१७॥ शाल्मलीशब्दे विशेषोऽस्य ज्ञेयः॥)

कण्टकप्रावृता, स्त्री, (कण्टकैः प्रावृता व्याप्ता। कण्टक+प्र+आ+वृ+कर्म्मणि क्त+टाप्।) गृहकन्या। इति राजनिर्घण्टः। घृतकुमारी इति भाषा॥

कण्टकफलः पु, (कण्टकैराचितं व्याप्तं फलं यस्य। शाकपार्थिववादिवत् मध्यपदलोपी समासः।) पनसवृक्षः। इत्यमरटीकायां भरतः॥ गोक्षुरवृक्षः। इति रत्नमाला॥ (अस्य गुणादयः कण्टकफलशब्दे ज्ञेयाः॥)

कण्टकवृन्ताकी, स्त्री, (कण्टकाचिता वृन्ताकी। शाकपार्थिवादित्वात् मध्यपदलोपश्च।) वार्त्ताकी। इति राजनिर्घण्टः॥

कण्टकश्रेणी, स्त्री, (कण्टकानां श्रेणिर्यत्र। श्रेणी यस्या वा।) कण्टकारी। इति शब्दचन्द्रिका॥

कण्टकागारः, पु, (कण्टका आगारो यस्य। यद्वा कण्टकं आगिरति। आ+गॄ+अच्।) सरटजन्तुः। इति राजनिर्घण्टः॥

कण्टकाढ्यः, पु, (कण्टकैराढ्यः।) कुलकवृक्षः। इति राजनिर्घण्टः॥

कण्टकारिका, स्त्री, (कण्टकान् ऋच्छति गच्छति वा कण्टक+ऋ+कर्त्तरि+ण्वुल्। स्त्रियां टाप् इत्वञ्च। यद्वा कण्टकं ऋच्छति+ऋ कर्म्मण्यण् तत कन् च तत प्राग्वत्। तन्मते तु अदि शत अभीतत्वादित्वात् नुक्।) स्वनामख्यातक्षुपवृक्षः। तत्पर्य्यायः। निदिग्धिका २ स्पृशी ३ व्याघ्री ४ बृहती ५ प्रचोदनी ६ कुली ७ क्षुद्रा ८ दुःस्पर्शा ९ राष्ट्रिका १०। इत्यमरः॥ धनाशान्ता ११ अटाकी १२ सिंही १३ धावनिका १४। इति रत्नमाला॥ कण्टकारी १५ कण्टकिनी १६ दुष्प्रधर्षिणी १७ निदिग्धा १८ धावनी १९ क्षुद्रकण्टिका २० बहुकण्टा २१ क्षुद्रकण्टा २२ कण्टा-

लिका २३ चित्रफला २४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। श्वास-कास-प्रतिश्याय-दोष-कफ-वात-ज्वर-नाशित्वञ्च। इति राजनिर्घण्टः॥ तृष्णानाशित्वम्। इति राजवल्लभः॥ तस्याः फलगुणाः। पित्तकफकण्डूकुष्ठकृमिनाशित्वम्। लघुत्वम्। उष्णत्वम्। कटुत्वम्। तिक्तत्वञ्च। इति राजनिर्घण्टराजवल्लभौ॥

("मुस्तामृतामलक्यश्च नागरं कण्टकारिका।
कषायचूर्णान्वितं क्वाथकथा मधुसमन्वितम्।
एकाह्निकं वा वेलाया ज्वरजातं व्यपोहति"॥

इति हारीते ॥*॥ अस्या विशेषस्तु कण्टकारीशब्दे ज्ञातव्यः॥)

कण्टकारी, स्त्री, (कण्टकं ऋच्छति। कण्टक + ऋ + अण् + ङीप् च।) कण्टकारिकावृक्षः। इति राजनिर्घण्टः॥ शाल्मलीवृक्षः। इति जटाधरः॥ विकङ्कतवृक्षः। इति शब्दरत्नावली वँइचि इति भाषा॥ तत्पर्य्यायगुणाः।

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्टालिका कण्टकिनी धावनी बृहती तथा"॥

उभे च बृहत्यौ। यदाह शाश्वतः॥

"क्षुद्राया क्षुद्रभण्टाकी बृहतीति निगद्यते।
श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका॥
गर्भदा चन्द्रमा चन्द्रा चन्द्रपुष्पा प्रियङ्करी।
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः॥
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान्।
निहन्ति पीनसं पार्श्वपीडाकृमिहृदामयान्॥
तयोः फलं कटु रसे पाके च कटुकं भवेत्।
शुक्रस्य रेचनं भेदि तिक्तं पित्ताग्निकृल्लघु॥
हन्यात् कफमरुत्कण्डूकासमेदकृमिज्वरान्।
तद्वत् प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी"॥

इति भावप्रकाशः॥ (शब्दार्थचिन्तामणिधृतवैद्यकम्। यथा,

"कण्टकारी कण्टकिनी तथा स्वादुश्च शुक्लता।
चक्षुष्या क्षतशोषघ्नी ग्राहिणी ज्वरदाहनुत्।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित्"॥
"कण्टकार्य्यमृताभार्गी नागरेन्द्रयवासकम्।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी॥
कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम्।
दाहतृष्णारुचिच्छर्द्दिकासहृत् पार्श्वशूलनुत्"॥

इति वैद्यकचक्रपाणिसंग्रहः॥

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम्।
पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत्॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः।
मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकम्॥
भार्गी रास्ना शठी चैव शर्करा पलविंशतिः।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः॥
पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम्।
चतुष्पलं तु गाक्षीर्य्याः पिप्पलीनां चतुष्पलम्॥
क्षिप्त्वा निदध्यात् सुदृढे मृण्मये भाजने शुभे।
लेहोऽयं हन्ति हिक्कार्त्तिश्वासकासानशेषतः"॥

कण्टकार्य्यवलेहः॥*॥ इति च शार्ङ्गधरः॥)

कण्टकालः, पुं, (कण्टकैः कण्टकाकीर्णफलैः अलति शोभते। कण्टक + अल् + अच्। कण्टं कण्डकाकारं फलं कालयति वा। कल् + अण्।) पनसवृक्षः। इति शब्दचन्द्रिका॥

कण्टकालुकः, पुं, (कण्टकैरलति पर्य्याप्नोति कण्टकालयति वा कण्टक + अल् + उकञ्।) यवासवृक्षः। इति राजनिर्घण्टः॥ (यवास-शब्देऽस्य गुणादयो बोद्धव्याः॥)

कण्डकाशनः, पुं, (कण्टकं अश्नातीति। कण्टक + अश ग् भोजने + कर्त्तरि + ल्युः।) उष्ट्रः। इति त्रिकाण्डशेषः॥

कण्टकाष्ठीलः, पुं, (कण्टकाः अष्ठीलेव यस्य।) मत्स्यविशेषः। तत्पर्य्यायः। कुलिशः २। इति त्रिकाण्डशेषः॥

कण्डकिनी, स्त्री, (कण्डकाः सन्त्यस्याः। इनिः। ङीप् च।) वार्त्ताकी। शोणझिण्टी। मधुखर्ज्जूरी। इति राजनिर्घण्टः॥

कण्टकिफलः, पुं, (कण्टकि कण्टकयुक्तं फलं यस्य।) वृक्षविशेषः। काँटाल इति भाषा। तत्पर्य्यायः। पनसः २। इत्यमरः। २।४।६१॥ पलसः ३ कण्टकीफलः ४ कण्टकफलः ५। इति तट्टीका॥ महासर्ज्जः ६ फलिनः ७ फलवृक्षकः ८ स्थूलः ९ कण्टाफलः १० मूलफलदः ११ अपुष्पफलदः १२ पूतफलः १३ चम्पकोषः १४ चम्पालुः १५ रसालः १६ मृदङ्गफलः १७ पानसः १८। इति शब्दरत्नावली॥ अस्य गुणाः कण्टाफलशब्दे पनसशब्दे च द्रष्टव्याः॥ समष्ठिलवृक्षः। इति राजनिर्घण्टः॥

कण्टकितः, पुं, (कण्टकोऽस्त्यस्य। कण्टक + अस्त्यर्थे इलच्।) वंशविशेषः। इति शब्दचन्द्रिका। वेउँवाँश इति भाषा॥

कण्टकिलता, स्त्री, (कण्टकिनी चासौ लता चेति।) त्रपुषी। इति राजनिर्घण्टः। शसा इति भाषा॥ (त्रपुषीशब्दे विशेषोऽस्या द्रष्टव्यः॥)

कण्टकी, [न्] पुं, (कण्टकोऽस्त्यस्य अस्त्यर्थे इनिः।) मत्स्यः। इति शब्दरत्नावली॥ खदिरवृक्षः। इति शब्दमाला॥ मदनवृक्षः। इति रत्नमाला॥ गोक्षुरवृक्षः। वंशः। वदरवृक्षः। इति राजनिर्घण्टः॥ (यथा, महाभारते १। शाकुन्तले ७०।७।
"नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी"॥)

कण्टकी, स्त्री, (कण्टक + अर्श आदित्वात् अच् गौरादित्वात् ङीष्।) वार्त्ताकीविशेषः। काँटा वेगुन् इति भाषा। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। रक्तपित्तप्रकोपणत्वम्। कण्डूकच्छुहरत्वम्। दोषघ्नत्वञ्च। इति राजवल्लभः॥

कण्टकीद्रुमः, पुं, (कण्टकी द्रुमः। पृषोदरादित्वात् दीर्घः।) खदिरवृक्षः। इति रत्नमाला॥ (खदिरशब्दे विशेषो वक्तव्यः॥ कण्डकी एव द्रुमः। वार्त्ताकीवृक्षः॥)

कण्टकीफलः, पुं, (कण्टकि कण्टकाचितं फलमस्य। पृषोदरात् साधुः।) कण्टकिफलः। इत्यमरटीकायां भरतः॥ काँटाल इति भाषा॥

कण्टकुरण्टः, पुं, (कण्टं कण्टकप्रधानं कुरण्टं।) झिण्टी। इति राजनिर्घण्टः॥ (झिण्टीशब्देऽस्य विशेषो ज्ञेयः॥)

कण्टतनुः, स्त्री, (कण्टा कण्टकान्विता तनुर्यस्याः।) बृहती इति राजनिर्घण्टः॥ (एषा हि तिक्ता कटुका। इति वैद्यकद्रव्यगुणः॥)

कण्टदला, स्त्री, (कण्टं कण्टकाचितं दलं यस्याः। शाकपार्थिवादित्वात् मध्यपदलोपः।) केतकी। इति राजनिर्घण्टः॥

कण्टपत्रः, पुं, (कण्टं कण्टकान्वितं पत्रं यस्य।) विकङ्कतवृक्षः। इति शब्दमाला। वँइचि इति भाषा॥

कण्टपत्रफला, स्त्री, (कण्टं कण्टकान्वितं पत्रं फलञ्च यस्याः। कण्डकान्विते पत्रफलेऽस्य वा।) ब्रह्मदण्डीवृक्षः। इति राजनिर्घण्टः॥

कण्टपादः, पुं, (कण्टं कण्टकान्वितः पादो मूलं यस्य।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

कण्ठफलः, पुं, (कण्टं कण्टकान्वितं फलं यस्य।) क्षुद्रगोक्षुरः। पनसः। धुस्तूरः। लताकरञ्जः। इति राजनिर्घण्टः॥ तेजःफलः। एरण्डः। इति केचित्॥

कण्टफला, स्त्री, (कण्टं कण्टकाकीर्णं फलं यस्याः।) देवदालीलता। इति राजनिर्घण्टः॥ (देवदालीशब्दे ऽस्या गुणादयो ज्ञेयाः॥)

कण्टलः, पुं, (कण्टः अस्त्यस्य। मत्वर्थे अलच्। यद्वा कण्टेन कण्टकेन अलति पर्य्याप्नोति शोभते वा। कण्ट + अल् + अच्। शकन्ध्वादिवत् अस्य लोपः।) वृक्षविशेषः। वावला इति भाषा। तत्पर्य्यायः। वावलः २ स्वर्णपुष्पः ३ सूक्ष्मपत्रः ४। इति शब्दचन्द्रिका॥

कण्टवल्ली, स्त्री, (कण्टा कण्टकान्विता वल्ली।) श्रीवल्लीवृक्षः। इति राजनिर्घण्टः॥

कण्टवृक्षः, पुं, (कण्टप्रधानः कण्टकमयः कण्टकबहुलो वा वृक्षः। मध्यपदलोपी।) तेजःफलवृक्षः। इति राजनिर्घण्टः॥

कण्टाफलः, पुं, (कटि + भावे + अच्। कण्टा कण्टकमयवेष्टनं तदुपलक्षितं फलमस्य।) पनसवृक्षः। इति शब्दमाला। काँटाल इति भाषा॥ अस्य पक्वफलगुणाः। सुमधुरत्वम्। रक्तवर्द्धकत्वम्। स्निग्धत्वम्। शीतलत्वम्। दुर्ज्जरत्वम्। वायुपित्तनाशित्वम्। श्लेष्मशुक्रबलप्रदत्वञ्च। इति राजवल्लभः॥ पिच्छिलत्वम्। गुरुत्वम्। हृद्यत्वम्। भ्रमदाहविशोषनाशित्वम्। रुचिकारित्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः॥*॥ तद्बीजगुणाः। रक्तपित्तनाशित्वम्। स्वादुत्वम्। पक्वतुल्यगुणत्वञ्च। इति राजवल्लभः॥ ईषत् कषायत्वम्। मधुरत्वम्। रुचिवायुवृद्धिकारित्वम्। गुरुत्वम्। त्वग्दोषतत्फलविकारनाशित्वञ्च। इति राजनिर्घण्टः॥*॥ तस्यापक्वस्य गुणाः। कषायत्वम्। स्वादुत्वम्। वायुकारित्वम्। इति राजवल्लभः॥ शीतलत्वञ्च॥*॥ एतद्युक्तस्य तस्य गुणाः॥ स्निग्धत्वम्। हृद्यत्वम्। बलप्रदत्वम्। छर्द्दिनाशित्वम्। अचक्षुष्यत्वम्। शुक्रकारित्वम्। वातपित्तनाशित्वञ्च॥ तन्मज्जगुणाः। शुक्रकारित्वम्। वातपित्तकफनाशित्वम् च॥ विशेषात् पनसं वर्ज्यं

"गुल्मिभिर्मन्दवह्निभिः" ॥ इति राजनिर्घण्टः ॥ (अन्यत्सर्व्वं पनसशब्दे द्रष्टव्यम् ॥)

कण्ठार्त्तगला, स्त्री, (कण्ठा कण्ठयुक्ता आर्त्तगला ॥ आर्त्तः क्षीणः गलदेशो यस्याः ।) नीलझिण्टी । इति राजनिर्घण्टः ।(नीलझिण्टीशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कण्टालुः,पु, (कण्टाय कण्टकाय अलति पर्य्याप्नोति । कण्ट+अल+उन् ।) वङ्गः । वृहती । वार्त्ताकी । वर्व्वूरः । इति राजनिर्घण्टः ॥

कण्टाह्वयं, क्ली, (कण्टं कण्टकमाह्वयते स्पर्द्धते । कण्ट+आ+ह्वे+क ।) पद्मकन्दः । इति राजनिर्घण्टः ॥

कण्टी, [न्] पु, (कण्टः कण्टकः अस्त्यस्य । अस्त्यर्थे इनिः ।) कलायः । अपामार्गः । खदिरः । गोक्षुरः । इति राजनिर्घण्टः ॥

कण्ठः, पु, (कठि+अच्+इदित्वात् नुम् ।) मदनवृक्षः । इति मेदिनी ॥ होमकुण्डाद्वहिरङ्गुलिपरिमितस्थानम् । यथा,—

"खातादाह्येऽङ्गुलं कण्ठं सर्व्वकुण्डेष्वयं विधिः" ॥

इति तिथ्यादितत्त्वम् ॥ (कणशब्दे "कणेष्ठ" । इति ठः । उणा० १ । १०५ ।) ग्रीवापूर्व्वभागः ॥ तत्पर्य्यायः । गलः २ । इत्यमरः । २ । ६ । ८८ ॥ (यथा, शाकुन्तले । १म अङ्के ।

"विकचसरसिजायाः स्तोकनिर्म्मुक्तकण्ठं
निजमिवकमलिन्याः कर्कशं वृन्तजालम्" ॥)

अत्र विशुद्धनामषोडशदलपद्ममस्ति । यथा,—

"तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
स्वरैः षोडशभिर्युक्तं धूमवर्णं महाप्रभम् ॥
विशुद्धपद्ममाख्यातमाकाशाख्यं महाद्भुतम्" ॥

इति गौतमतन्त्रम् ॥ निकटः । ध्वनिः । इति मेदिनी ॥

कण्ठकूणिका, स्त्री, (कण्ठ इव कण्ठध्वनिरिव कूणयतीति । कण्ठ+कूण+ण्वुल् । टापि अत इत्वञ्च वीणायाः कण्ठतुल्यस्वरध्वनिरितिप्रसिद्धेः ।) वीणा । इति हेमचन्द्रः ॥

कण्ठतलासिका, स्त्री, (कण्ठतले अश्वानां कण्ठदेशे आस्ते इति । कण्ठ+आस+ण्वुल्+टापि अत इत्वञ्च ।) अश्वग्रीवावेष्टकरज्जुचर्म्मादि । इति शब्दमाला ॥

कण्ठनीडकः, पु, (कण्ठे निकटस्थे नीडे शवून् दृष्ट्वा कायति शब्दायते । कण्ठ+कै+कः । यद्वा कण्ठे प्रासादवृक्षादीनां शिरोभागे नीडं यस्य+कप् ।) चिल्लपक्षी । इति त्रिकाण्डशेषः । चिल् इति भाषा ॥

कण्ठनीलकः, पु, (कण्ठं धारकस्य काष्ठादिकमूर्द्धस्थानं नीलयति स्वशिखाकज्वलेन नीलवर्णं करोतीति । कण्ठ+नील+णिच्+ण्वुल् । अथवा कण्ठे शिखाग्रभागे नीलवर्णोऽस्य कप् ।) उल्का । इति शब्दमाला । मसाल इति भाषा ॥

कण्ठपाशकः,पु, (कण्ठे पाश इव कायति प्रकाशते । कण्ठपाश+कै+क ।) हस्तिगलवेष्टकरज्जुः । इति शब्दमाला ॥

कण्ठभूषा, स्त्री, (भूष्यतेऽनया इति भूषा । कण्ठस्य भूषा ।) ग्रीवालङ्कारः । तत्पर्य्यायः । ग्रैवेयकम् २ । इत्यमरः । २ । ६ । १०४ ॥ ग्रैवेयम् ३ ग्रैवम् ४ । इति शब्दरत्नावली ॥ रुचकः ५ निष्कम् ६ । इति जटाधरः ॥

कण्ठमणिः, पु, (कण्ठे कण्ठस्थले धारणीयो मणिः । कण्ठस्य मणिर्वा ।) गलदेशधारणीयमणिः । तत्पर्य्यायः । काकलम् २ । इति त्रिकाण्डशेषः ॥

कण्ठ्य, त्रि, (कण्ठे+भव । शरीरावयवत्वात् यत् । ६ । १ । २१३ ।) कण्ठोद्भवशब्दादिः । इति व्याकरणम् ॥ "अकुहविसर्ज्जनीयानां कण्ठः" । पा० १ । १ । ६ वार्त्तिके ॥)

कण्ठाग्निः, पु, (कण्ठे कण्ठाभ्यन्तरे अग्निः पाचनरूपाग्निर्यस्य ।) पक्षी । इति त्रिकाण्डशेषः ॥

कण्ठालः, पु, (कठि+आलच् ।) शूरणः । युद्धम् । नौका । खनित्रम् । इति विश्वः ॥ क्रमेलकः । गोणीप्रभेदः । इति मेदिनी ॥

कण्ठाला, स्त्री, (कठि+आलच्+टाप् ।) जालगोणीका । इति त्रिकाण्डशेषो मेदिनी च ॥

कण्ठिका, स्त्री, (कण्ठो भूष्यतयास्त्यस्याः । कण्ठ+ठन् टाप् च । यद्वा कण्ठयति कण्ठं भूषयति या । कठि+णिच्+ण्वुल्+टाप् अत इत्वञ्च ।) कण्ठाभरणम् । इति हेमचन्द्रः ॥ एकनरी कण्ठी इति भाषा ॥

कण्ठी, स्त्री, (कण्ठ+अल्पार्थे ङीष् ।) अश्वकण्ठवेष्टनरज्जुचर्म्मादि । इति शब्दमाला ॥ गलः । इत्यमरटीकायां भरतः ॥

कण्ठीरवः, पु, (कण्ठेन रवो यस्य ।) सिंहः । इति त्रिकाण्डशेषः ॥ पारावतः । इति राजनिर्घण्टः ॥ मत्तहस्ती । इति सारस्वतः ॥

कण्ठीरवी, स्त्री, (कण्ठीरव+गौरादित्वात् जातौ वा ङीष् ।) वासकवृक्षः । इति राजनिर्घण्टः ॥

कण्ठेकालः, पु, (कण्ठे+कालः क्षीरोदमथनोद्भवविषपाननिदर्शनरूपनीलवर्णो यस्य । सप्तम्या अलुक् ।) महादेवः । इति त्रिकाण्डशेषः ॥ (कण्ठे जीवानां कण्ठदेशे कालः कालस्वरूपेण वर्त्तते । यद्वा कण्ठदेशपर्य्यन्तं आक्रम्य तमःप्रधाना माया अस्त्यस्य । परमात्मनः मायाशवलितत्रिपादत्वात् तथात्वम् । एष सर्व्वज्ञः सर्व्वान्तर्यामीश्वरः । एतस्मात् पादत्रयादन्यत् तुरीयं निष्कलं निरुपाधिकं शिवपादमस्ति ॥ यथा, माण्डुक्योपनिषदि ।

"सर्व्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्" ॥ २ ॥

"जागरितस्थानो वहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् वैश्वानरः प्रथमः पादः" ॥३॥

"स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः" ॥ ४॥

"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः" ॥ ५ ॥

"एष सर्व्वेश्वरः एष सर्व्वज्ञ एषोऽन्तर्य्याम्येष योनिः सर्व्वस्य प्रभवाप्ययौ हि भूतानाम्" ॥ ६ ॥

"नान्तःप्रज्ञं न वहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" ॥ ७ ॥)

कण्डनं, क्ली, (कडि+भावे ल्युट् ।) उदूखलादिना तण्डुलादेर्निर्मलीकरणम् । इति हेमचन्द्रः । काँडान इति भाषा ॥

कण्डनी, स्त्री, (कण्ड्यते तुषादिरपनीयतेऽनया । कडि+करणे ल्युट् । ङीप् च ।) उदूखलम् । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ३ । ६८ ।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करम् ।
कण्डनीचोदकुम्भश्च वध्यते यास्तुवाहयन्" ॥)

कण्डरा, स्त्री, (कडि+अरन् टाप् च ।) महास्नायुः । महानाडी । इति हेमचन्द्रः ॥

("महत्यः स्नायवः प्रोक्ताः कण्डरास्तास्तु षोडश ।
प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् ॥
चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः ।
ग्रीवायामपि तावत्यस्तावत्यः पृष्ठसङ्गताः" ॥

"तत्र पादहस्तगतानां कण्डराणां नखाः प्ररोहाः ग्रीवानिबन्धनानामधोभागगतानां प्ररोहो मेढ्रं पृष्ठनिबन्धनानां प्ररोहो नितम्बमूर्द्धोरुवक्षोंऽसस्तनपिण्डः" ॥ इति भावप्रकाशः ॥

"तलं प्रत्यङ्गुलीनां या कण्डरा वाह्यपृष्ठतः ।
वाह्वोः कर्म्मक्षयकरी विश्वचीति हि सोच्यते" ॥

इति च सुश्रुतः ॥)

कण्डुः, स्त्री, (कण्डते शरीरं मायति अस्मात् उणादित्वात् । यद्वा कण्डयति कण्डुयुक्तं करोति शरीरम् । कडि+मदे । "मृगय्वादयश्च" । उणा० १ । ३८ । इति कु ।) कण्डूः । इति रायमुकुटः ॥ (पु ऋषिविशेषः । (यथा, विष्णुपुराणे १ । १५ । ११ ।

"कण्डुर्नाम मुनिः पूर्व्वमासीद्वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः" ॥

तद्विवरणं तत्रैव १मांशे १५ अध्याये द्रष्टव्यम् ।)

कण्डुरः, पु, (कण्डूं राति ददातीति । "आतोऽनुपसर्गे कः" । ३ । २ । ३ । पृषोदरादित्वात् ह्रस्वः ।) कारवेल्लकलता । कुन्दरुत्यम् । इति राजनिर्घण्टः ॥

कण्डुरा,स्त्री,कण्डुं राति । कण्डू+रा+क । ह्रस्वश्च । ततष्टाप् ।) कपिकच्छुः । अत्यम्लपर्णी । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्दे विशेषोऽस्या वक्तव्यः ॥

कण्डूः, स्त्री (कण्डूय+सम्पदादित्वात् क्विप् अलोपयलोपौ ।) रोगविशेषः । चुल्कानि खोस् इत्यादि भाषा । (यथा, भागवते । २ । ७ । १३ ।

"पृष्ठेन कच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रिपरिवर्त्तकषाणकण्डूः" ॥)

तत्पर्य्यायः । खर्ज्जूः २ कण्डूया ३ । इत्यमरः । २ । ६ । ५३ ॥ कण्डूतिः ४ । इति तट्टीका ॥ कण्डूयनम् ५ । इति राजनिर्घण्टः ॥

तच्चिकित्सा यथा,—

"दूर्व्वानिशायुतो लेपः कण्डूपामाविनाशनः ।
कृमिदद्रुहरश्चैव शीतपित्तहरः स्मृतः ॥
रजन्यो पञ्चमूल्यौ च पटोलं मूलिकं तथा ।
त्रिफलायुक्तं चैव सम्प्राप्तं तथा ॥
पथ्यावस्तकपित्तं चैव भावे श्लेष्मणे कृते ।
निम्बपत्रैः कृता लेपः पिडका नाशयेत् तथा ॥
निम्बपत्रैः कृता लेपः प्रति पद् पत्रम् ।
सर्षपादि प्रलिप्यामि कार्यमेकान्तं भवतीति ॥
कण्डूविस्फोटदद्रूणां नाशनं परमौषधम् ।
शतधौतघृताभ्यासो दोषो भवति नान्यथा ॥
शीतपित्तोदर्दकोठानां नाशनादेव नाशयेत् ।
इन्द्रियाणामतः स्तः कण्डूना परमौषधम्" ।
इति भगन्दराधिकारः ॥ २ ॥
"अमृतवृषपटोलं मुस्तकं सप्तपर्णं
खदिरमसितवेत्रं निम्बपत्रं हरिद्रे ।
विविधविषविसर्पान् कुष्ठविस्फोटकण्डू-
रपनयति मसूरी शीतपित्तज्वरं च" ॥
इति पञ्चतिक्तादि ॥ ३ ॥ इति भावप्रकाशः ॥
("लिखा ते कोठपिडका कण्डूमतान् प्रकृर्व्वते" ।
इति वाभटः ॥ ४ ॥ "पञ्चनिम्बदलतमात्रा-
मामलक्लिमकुटजसर्षपमधुकदारुशङ्खिरामृताभीति
दन्तीमानि कण्डूघ्नानि भवन्ति" । इति चरकः ।)

कण्डूकरी, स्त्री, (कण्डूं करोति इति । कण्डू + कृ + ट ।
स्त्रियां ङीप् ।) अजशृङ्गीलता । इति शब्द-
चन्द्रिका ॥

कण्डूघ्न, पुं, (कण्डूं हन्ति । कण्डू + हन् + टक् ।)
आरग्वधः । गौरसर्षपः । इति राजनिर्घण्टः ।

कण्डूति, स्त्री, (कण्ड्वय + भावे क्तिन् । यलोपय-
लोपौ ।) कण्डूः । इति भरतधृतामरमाला । चुलकनि
इति भाषा ॥ ("राज्ञा वषट्कारैर्या स निर्दिष्टे सुर-
तोत्सवे । स्वकण्डूमासरश्रद्धतिम् गात्रमर्यादे-
यया धने" ॥ इति राजतरङ्गिण्याम् । ५ । २८६ ।)

कण्डूयन, क्ली, (कण्ड्वय + भावे ल्युट् ।) कण्डूः । इति
हलायुधः ॥ (यथा, भागवते । ७ । ९ । ४५ ।
"यन्मैथुनादि गृहमेधिसुखं हि तुच्छं
कण्डूयनेन करयोरिव दुःखदुःखम्" ॥)

कण्डूया, स्त्री (कण्डू + "कण्ड्वादिभ्यो यक्" ३ । १ । २७ ।
यप्रत्ययात् स्त्रियां टाप् च ।) कण्डूः । इत्यमरः ।
२ । ६ । ५३ ॥

कण्डूरा, स्त्री, (कण्डूं राति । कण्डू + रा + क । टाप् ।)
लताविशेषः । आलकुशी इति भाषा । तत्पर्य्यायः ।
आत्मगुप्ता २ अजडा ३ अव्यण्डा ४ प्रावृषायणी ५
ऋष्यप्रोक्ता ६ शूकशिम्बिः ७ कपिकच्छुः ८
मर्कटी ९ । इत्यमरः । २ । ४ । ९ ॥ अजहा १०
अव्यण्डा ११ कण्डूरा १२ शूकशिम्बी १३ शूका-
शिम्बा १४ कपिकच्छू १५ । इति तट्टीका ॥ मर्क-
टभ १६ स्वगुप्ता १७ । इति रत्नकोषः ॥

कण्डूल, पुं, (कण्डू + अस्त्यर्थे + लच् । कण्डूतिकारक-
त्वात् तथात्वम् ।) शूरणः । इति राजनिर्घण्टः ॥
कण्डूयुक्ते त्रि ॥

कण्डोल, पुं, (कडि + बाहुलकात् ओलच् ।) नल-
वंशादिरचितधान्यादिस्थापनपात्रम् । डोल् इति
भाषा । तत्पर्य्यायः । पिटः २ । इत्यमरः ।
२ । ९ । २६ ॥ पिटकः ३ पेटकः ४ । इति
भरतः । उष्ट्रः । इत्युणादिकोषः ॥

कण्डोलक, पुं, (कडि + बाहुलकादोलच् । स्वार्थे-
कन् ।) कण्डोलः । इति शब्दरत्नावली ॥

कण्डोलवीणा, स्त्री (कण्डोले इव वीणा । कण्डोलस्य
वीणा वा ।) चाण्डालवीणा । कैन्दरा इति ख्याता ।
तत्पर्य्यायः । चाण्डालिका २ चण्डालवल्लकी ३ ।
इत्यमरः । २ । १० । १७ ॥ चण्डालिका ४ कटोलवीणा
५ । इति भरतः ॥

कण्डोषी, स्त्री, (कण्डोषेण दाहकारी अस्त्यस्याः । अर्श
आदित्वात् अच् + गौरादित्वात् ङीष् ।) कण्डो-
षीरा । इति शब्दरत्नावली ॥

कण्ड्रोल, पुं, (कण्डूनामोषः प्रयोगस्थानं शुष्ककीट-
स्पर्शे कण्ड्वोपलमिति पर्य्यालोचितमानम् ।) शुक-
कीट । इति शब्दचन्द्रिका ॥ शुंयापोका इति
भाषा ॥

कण, स्त्री, (कणते कषीदाते इति । कण + इन् ।)
धान्यम् । इति मेदिनी ॥

कण्व, पुं, (कण + क्वन् ।) मुनिविशेषः । इति
मेदिनी ॥ स तु पुरुवंशजातप्रतिरथनामराजस्य
पुत्रः । यथा,—
"सुमतिर्धृतेयोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ।
तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः" ॥
इति श्रीभागवते । ९ । २० । ६ ॥ (अयम् ऋषिभेदः ।
अयमेव मुनिराट्वंसेन यजुर्व्वेदीयकाण्वशाखा प्र-
णीता । यथा, यजुर्व्वेदे १० । ०४ ।
"धामस्य कण्वोऽदुहत् प्रपीनां
सहस्रधारां पयसा महीं गाम्" ॥
तथा, भारते ३ । १२ । ६ । ७४ ।
"यजुर्भिस्त्वकरोच्छाखा दशपञ्चभिरेविभुः ।
सहस्रांशुसमाना काण्वमाध्यन्दिनादयः" ॥
अयन्तु काश्यपवंशोद्भवः शकुन्तलायाः प्रतिपालक
पिता । यथा, महाभारते १ । शाकुन्तले । ७० । ९० ।
"महर्षि काश्यप प्रकृष्य कण्वं तपोधनम्" ॥
एतस्य सविस्तरन्तु तत्रैव ७२ अध्याये द्रष्टव्यम् ।
अयमेव गोत्रप्रवर्त्तकः । ऋग्वेदे १ । ४४—५०
सूक्तेषु ऋषिगोत्रप्रवर्त्तक कण्वव्वृत्तान्तमवधेयम् ॥
कणय इत्यस्यार्थः कणय सुखमयं तत्त्वविद्याप्र-
भावात् नास्य संसारजन्यसुखमयं नहि तत्त्व-
ज्ञानिनां क्वचित् संसारासक्तिः अविद्याधर्म्मा-
भावादिति नीलकण्ठः । विद्या क्रियाकुशलः
मेधावी च । इति ऋग्वेदभाष्ये दयानन्दः ॥
स्वनामाख्याततीर्थविशेषः । यथा, महाभारते ।
३ । ८२ । ४४ ।
"कण्वाश्रमं ततो गच्छेत् श्रीजुष्टं लोकपूजितम् ।
धर्म्मारण्यं हि तत्पुण्यमाद्यञ्च भरतर्षभ" ॥)

कत, पुं, मुनिविशेषः । इत्युणादिकोषः ॥ (अयन्तु
विश्वामित्रपुत्रानामेकतमः । कं जलं शुद्धं तनोति
क + तन + ड ।) कतकवृक्षः । इति राज-
निर्घण्टः ॥

कतक, पुं, (तक् + हासे + बाहुलकात् । कस्य
जलस्य तकं हासो प्रकाशः प्रसाद इति यावत्
यस्मात् ।) वृक्षविशेषः । निर्म्मली इति भाषा ।
तत्पर्य्यायः । अम्बुप्रसादः २ कतः ३ तिक्तफलः ४
...५ छेदनीयः ६ गुच्छफलः ७ वनफलं ८ ति-
क्तमरिचः ९ । यथा गुणाः । कटुत्वम् । तिक्तत्वम् ।
उष्णत्वम् । चक्षुर्हितत्वम् । वातकफशिलम् । शर्म्म-
र्गीयत्वपदोषनाशित्वम् । तस्य बीजं अम्बुप्रसाद-
नम् । इति राजनिर्घण्टः । (यथा, मनुः । ६ । ६७ ।
"फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति" ॥
"यथा प्रसादि कतकद्भुतकं तत्फलञ्च तत् ।
नयनस्य मलं येन पश्चान्निर्म्मलता करम् ।
वातश्लेष्मापहं शीतं मधुरं तुवरं गुरु" ॥
इति भावप्रकाशः ।)

कतम्, पुं, (क जलं तनोति प्रसन्नं सम्पादयति ।
क + तन् + ड । तादृशः सम्मतस्य ।) कतकवृक्षः ।
इति राजनिर्घण्टः ॥

कतमाल, पुं, (तम + घञ् क्रम । कस्य जलस्य तमाय
प्रतिरोधाय अलति पर्य्याप्नोति । क + तम + अल
+ अच् ।) अग्निः । इति शब्दमाला ॥ कतमाल
मतमालश्च पाठः ॥

कति, त्रि, (का संख्या किं परिमाणं वा यस्य ।
"किमः संख्यापरिमाणे डति" ५ । २ । ४१ ।
इति डति ।) कियत्परिमाणम् । इति व्याकरणम् ॥
कत इति भाषा । (यथा, अथर्व्ववेदे १० । २ । ३ ।
"कति देवाः कतमे त आसन् य उरोग्रीवाश्चिक्युः
पुरुषस्य कतिस्तनौ व्यदधुः कः कफोडौ कति-
स्कन्धान् कतिपृष्टीरचिन्वन्" ॥ पुं । विश्वामि-
त्रस्य पुत्राणामेकतमः । यदवंशोद्भूत सुमन्तुः
कात्यायनर्षिः ।)

कतिपय, त्रि, (किम् + डति कति अयच् तुक् च ।)
कति । इति व्याकरणम् । कतकगुलि इति भाषा ।
(यथा, मेघदूते २५ ।
"सम्पत्स्यन्ते कतिपयदिनस्थायिहंसादशार्णाः" ॥)

कतृण, स्त्री, (कत् कुत्सितं तृणं इति । अत्र कद् स्वार्थे
को कदादेशः "तृणे च जातौ" । ६ । ३ । १०३ ।)
सुगन्धितृणविशेषः । रामकर्पूर इति ख्यातम् ।
तत्पर्य्यायः । पौरम् २ सौगन्धिकम् ३ ध्यामं ४ देव-
जग्धकम् ५ रौहिषम् ६ । इत्यमरः । २ । ४ । १६६ ॥
सुगन्धम् ७ सुगन्धितम् ८ सुशीतलम् ९ । इति
रत्नमाला ॥ रौहिषतृणम् १० कत्तृणम् ११
भूतिः १२ भूतिकम् १३ श्यामकम् १४ ध्यामकम्
१५ पूतिः १६ मुद्गलम् १७ देवगन्धकम् १८ ।
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कफश्लेष्म-
वात्यादिदोषबालग्रहविनाशित्वञ्च । इति राज-
निर्घण्टः ॥ (तुवरत्वम् । हृत्कण्ठव्याधिपित्तास्र-
शूलकासज्वरनाशित्वञ्च । इति भावप्रकाशः ॥)
इन्द्रि । इति मेदिनी ॥ घाकुशिया इति भाषा ।

कत्तोय, स्त्री (कु कुत्सितं तोयं यत्र ।) मद्यम् । इति
त्रिकाण्डशेषः ॥

कत्थ, ङ श्लाघे । इति कविकल्पद्रुमः ॥ (भ्वा—आत्मं
सक—सेट् । क्वचित् अक च ।) दन्त्यवर्गाद्युपधः ।

श्लाघा प्रशंसा । ङ कत्थते गुणिनं गुणी । इति दुर्गादास ॥

कत्र, त् क शैथिल्ये । इति कविकल्पद्रुम ॥ (चुरा–पर–अक–सेट् ।) कत्रयति कत्रापयति । इति दुर्गादास ॥

कत्सवर, क्ली, (कद् वैकल्ये+स । कत्स विकलता तया व्रियते शिर एवान्त करणस्थानं स्कन्धस्य शिरो-ऽन्तवर्त्तित्वात् तथात्वम् । कत्स+वृ+अप ।) स्कन्ध । इति शब्दचन्द्रिका ॥

कथ, व् क वाक्यप्रबन्धे । इति कविकल्पद्रुम ॥ (चुरा–परं–सक–सेट् ।) कथयति । इति दुर्गादास ॥ ("हन्त । ते कथयिष्यामि सेतिहासं पुरातनम्" । इति भागवतम् ॥)

कथं व्य, कथम् । किं प्रकारम् । इति व्याकरणम् ॥ (यथा, मनु ५ । २ ।
"कथ मृत्यु प्रभवति वेदशास्त्रविदा प्रभो" । ॥)

कथक, त्रि, (कथयति य । कथ+कर्त्तरि ण्वुल् ।) वक्ता । कथोपजीवी । नाटकवर्णनकर्त्ता । तत्पर्य्याय । एकनट २ कथाप्राण ३ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । २१५ । ३ ।
"कथकाश्चापरे राजन् श्रमणाश्च वनौकस" ॥
ग्रन्थकर्तृविशेष । (यथा, अनुमानचिन्तामणि ।
"वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधि-सद्भाव्य" ॥)

कथङ्कथिक, त्रि, (कथ कथमिति प्रष्टृत्वेनास्त्यस्य इति । कथकथ+बाहुलकात् ठन् ततष्टिलोप ।) प्रष्टा । प्रश्नकर्त्ता । इति त्रिकाण्डशेषभूरिप्रयोगौ ॥

कथङ्कथिकता, स्त्री, (कथङ्कथिक+भावे तल् ।) पृच्छा । प्रश्न । इति हेमचन्द्र ॥

कथन, क्ली, (कथ्यते इति । कथत्क वाक्यप्रबन्धे । भावे+ल्युट् ।) कथा । इति हलायुध ॥ कहन इति भाषा । (यथा पञ्चतन्त्रे १ । १३ ।
"मिथ्याक्रमकथनं कूटतुलामानम्" ॥)

कथम्, व्य, (कस्मिन् प्रकारे इति प्रकारार्थे+"किमश्चेति" ।५।३।२५। थमु· कादेशश्च ।) हर्ष । गर्हा । प्रकारार्थ । सम्भ्रम । प्रश्न । सम्भावना । इति मेदिनी ॥ (यथा शाकुन्तले १ अङ्के
"कथमिदानीमात्मान निवेदयामि
कथ वा आत्मापहार करोमि" ॥)

कथा, स्त्री, (कथ+"चितिपूजिकथिकुम्बिचर्चिश्चेति" । ३ । ३ । १०५ । अङ् । टाप् च ।) प्रबन्धकल्पना । इत्यमर । १ । ६ । ६ । प्रबन्धेन कल्पना अथवा प्रबन्धस्य अभिधेयस्य कल्पना स्वय रचना इति सारसुन्दरी ॥ "प्रबन्धस्य कल्पना रचना बह्वन्तरास्तोकसत्या" । इति भरत ॥
"प्रबन्धकल्पना स्तोकसत्या प्राज्ञा कथा विदु ।
परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्" ॥
इति कोलाहलाचार्य्य ॥ ("नैयायिकमते हि नानावक्तृकपूर्व्वपक्षसिद्धान्तवान् वाक्यसन्दर्भ" । यथा, मनु । ३ । २३१ ।
"यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सर ।
ब्रह्मोद्याश्च कथा कुर्य्यात्पितृणामेतदीप्सितम्" ॥
वार्त्ता । वाक्यम् । यथा, रघु । ८ । ४३ ।
"अभितप्तमयोऽपि मार्द्दव
भजते कैव कथा शरीरिषु" ॥
विवरणम् । यथा, रामायणे । १ । ८ । ६ ।
"सनत्कुमारो भगवान् पुरा कथितवान् कथाम् ।
भविष्यं विदुषा मध्ये तव पुत्त्रसमुद्भवम्" ॥)

कथाप्रसङ्ग, त्रि, (कथाया प्रसङ्गो यस्य ।) जन्पाक । इति शब्दरत्नावली ("तेन सह नानाकथाप्रसङ्गेनावस्थित" ॥ इति हितोपदेश ॥) वातूल । विषवैद्य । इति मेदिनी । (किराताऽर्ज्जुनीये । १ । २४ । "कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताऽखण्डलसूनुविक्रम" ॥ वार्त्ता । गोष्ठीवचनम् । उक्तञ्च कथासरित्सागरे २२ । १८१ ।
"मिथ कथाप्रसङ्गेन विवाद किल चक्रतु" ॥)

कथाप्राण, त्रि, (कथया प्राणिति जीवति कथा श्रावयित्वैव जीवनोपाय करोतीत्यर्थ । प्र+अण्+अच् । यद्वा कथाया प्राणा जीवनोपाया यस्य ।) कथक । स तु नाटकवक्ता । इति शब्दरत्नावली ॥

कथित, त्रि, (कथ्यतेऽसौ । कथ+कर्म्मणि+क्त ।) उक्त । (यथा, श्रीभागवतम् । १० । १ । १ ।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययो" ॥
कथ+भावे क्त । कथनम् । यथा रघु । ११ । १० ।
"पूर्व्ववृत्तकथितै पुराविद
सानुज पितृसखस्य राघव" ॥)

कद, इ रोदने । आह्वाने । वैक्लव्ये । इति कविकल्पद्रुम ॥ (भ्वा–परं–सकं अक च–सेट्–इदित् ।) इ कर्म्मणि कन्द्यते । इति दुर्गादास ॥

कद, ष म ङ वैक्लव्ये । विक्लवीभावे । इति कविकल्पद्रुम । (भ्वादि–आत्मं–अकं–सेट्–घटादि ।) ष कदा । म कदयति । ङ कदते । इति दुर्गादास ॥

कद, पु, (क जलं ददाति । क+दा+क ।) मेघ । इति शब्दरत्नावली ॥

कदक, पु, (कद मेघ इव कायति प्रकाशते उपरिभागे । कद+कै+क ।) वितानम् । इति हेमचन्द्र ॥ चाँदोया इति भाषा ॥

कदक्षर, क्ली, (कुत्सितं अक्षरं । को कदादेश ।) कुत्सितवर्ण ॥

कदध्वा, [न्] पु, (कुत्सितोऽध्वा । कुगतीति समास । को कत् तत्पुरुषेचेति कादादेश ।) निन्दितपथः । तत्पर्य्याय । व्यध्व २ दुरध्व ३ विपथ ४ कापथ ५ । इत्यमर २ । १ । १६ ॥

कदन, क्ली, (कदयति दु ख वैक्लव्यं वा प्राप्नोत्यनेन कद्यते दु खप्राप्यतेऽनेन वा । कद्+णिच्+करणे ल्युट् । घटादित्वात् न वृद्धि । कद्यते इति भावे ल्युट् । कद्यते आहन्यते विक्लवीक्रियते निहन्यते वा यत्र । अधिकरणे णिच् ल्युट् यद्वा कद्यते म्रियते यत्र ।) पापम् । (यथा, भागवते ७।६।१६ ।
"त्रस्तोऽस्म्यह कृपणवत्सल ! दु सहोग्रससारचक्रकदनात् ग्रसता प्रणीत" ॥)
मर्द्द । (यथा, रामायणे । ६ । २८ । २० ।
"क्रोधेन कदन चक्रे वानराणा युयुत्सताम्" ॥)
युद्धम् । इति मेदिनी ॥ (यथा, भागवते ।७।२।१३।
"इति ते भर्तृनिर्द्देशमादाय शिरसादृता ।
तथा प्रजाना कदन विदधु कदनप्रिया" ॥)
मारणम् । इति भूरिप्रयोग जटाधरश्च ॥

कदन्न क्ली, (कुत्सितं अन्न । को कदादेशश्च ।) कुत्सितान्नम् । इति व्याकरणम् ॥ (यथा, भागवते ।५ । ९ । ८ । "मिष्ट कदन्न वा अभ्यवहरति पर नेन्द्रियप्रीतिनिमित्तम्" ॥
"हविर्विना हरिर्याति विना पीठेन माधव ।
कदन्नै पुण्डरीकाक्ष प्रहारेण धनञ्जय" ॥ इत्युद्भट ॥)

कदम्ब, क्ली, ("कृकादिकडिकटिभ्योऽम्बच्" । उणा । ४ । ८२ । इति कद्+अम्बच् ।) निकुरम्बम् । समूह । इति मेदिनी ॥

कदम्ब, पु, (कद्यते दर्शनात् विरहिणा चित्तवैक्लव्य जायतेऽनेन । कद्+करणे अम्बच् ।) वृक्षविशेष । कदम् इति भाषा । तत्पर्य्याय । नीप २ प्रियक ३ हलिप्रिय ४ । इत्यमर ।२ । ४ । ८९ ॥ कादम्ब ५ । इति तट्टीका ॥ षट्पदेष्ट ६ प्रावृषेण्य ७ हरिप्रिय ८ । इति रत्नमाला ॥ वृत्तपुष्प ९ सुरभि १० ललनाप्रिय ११ कादम्बर्य्य १२ सीधुपुष्प १३ महाढ्य १४ कर्णपूरक १५ । अस्य गुणा । तिक्तत्वम् । कटुत्वम् । कषायत्वम् । वातपित्तकफार्त्तिनाशित्वम् । शीतलत्वम् । शुक्रवर्द्धनत्वञ्च । इति राजनिर्घण्ट ॥ (यथा भावप्रकाशे ।
"कदम्बो मधुर शीतो कषायो लवणो गुरु ।
सरो विष्टम्भकृद्रूक्ष कफस्तन्यानिलप्रद" ॥
तथा च सुश्रुत ।
"गरदोषहर नीप प्राचीनामलक तथा" ॥)
अत्र नीपहलिप्रियौ धाराकदम्बवाचिनावपि कदम्बसाम्यात् पठितौ । यथा साह ॥
"नीपो महाकदम्ब स्याद्धाराकदम्ब इत्यपि ।
द्वितीयोऽल्पप्रसरश्च वृत्तपुष्प कादम्बक" ॥
इत्यस्य भेद । तथा रत्नेऽपि । हारिद्रस्तु रजोवक । यथामरटीकाया भरत ॥
"धूलीकदम्बको धारा कदम्ब षट्पदप्रिय ॥
वृत्तपुष्प केशराढ्य प्रावृषेण्य कदम्बक ।
नीपो महाकदम्बोऽपि तथा बहुफलो मत" ॥
(यथा, —साहित्यदर्पणम् । "य कौमारहर स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभय प्रौढा कदम्बानिला" ॥ कविभिस्तु प्रायशो वर्षाकाले एव अस्य वर्णन क्रियते । माघे रैवतकपर्व्वतवर्णने द्रष्टव्यम् ॥*॥) सर्षप । इति मेदिनी ॥ देवताडवृक्षम् । इति रत्नमाला ॥ (क प्रजापत्यधिष्ठातृक शौपस्थेन्द्रिय दमयति इति व्युत्पत्त्या जितेन्द्रियतत्त्वज्ञानी । कद कदन विनाश वाति गच्छति प्रलये इति शेष । इति व्युत्पत्त्या जगत् । यथा,—
"स एव सौम्य नित्य राजते मूले विश्व कदम्बस्य परमो वै पुरुष आत्मा" ॥ इति श्रुतौ ॥)

कदम्बक, क्ली, (कदम्ब+सञ्ज्ञाया कन् ।) समूह । इत्यमर । २ । ५ । ४० ॥ (यथा, शाकुन्तले २ अङ्के । "गाहन्ता महिषा निपानसलिल शृङ्गै-

मुष्कताडितं छायावद्धकदम्बकं म्टगकुल रोमन्थमभ्यस्यतु” ॥)

कदम्बक, पु, (कदम्ब इव कायति प्रकाशते । हरिद्रा पीतवर्णत्वात् कदम्बकोरकोपरिस्थितसूक्ष्माग्रतुल्यफलत्वाच्च सर्षपस्यापि तथात्वम् । कन्दे तु कदम्ब एव स्वार्थे कन् ।) सर्षप । हरिद्रु । इति राजनिर्घण्टः ॥ कदम्बवृक्ष । इति शब्दरत्नावली ॥

कदम्बद, पु, (कदम्ब कदम्बस्योपरिस्थ सूक्ष्माग्र इव दीयतेऽसौ । कदम्ब+दो खण्डने+कर्म्मणि +घञर्थे क । सर्षपस्य कदम्बकोरकोपरिस्थसूक्ष्माग्रतुल्यफलत्वात् तथात्वम् ।) सर्षप । इति शब्दचन्द्रिका ॥

कदम्बपुष्पा, स्त्री, (कदम्बस्येव पुष्पमस्यस्या । अर्श आदित्वात् अच् ततष्टाप् ।) मुण्डितिकावृक्ष । इति रत्नमाला । मुण्डिरी इति भाषा ॥ (विशेषोऽस्या मुण्डितिकाशब्दे ज्ञातव्य ॥)

कदम्बपुष्पी, स्त्री, (कदम्बपुष्पमिव पुष्पमस्या । कदम्बपुष्प+ङीप् ।) महाश्रावणिकावृक्ष । इति राजनिर्घण्ट शब्दचन्द्रिका च । मुण्डिरी इति भाषा ॥

कदम्बी, स्त्री, (कद्+करणे अम्बच् गौरादित्वात् ङीष् ।) देवदालीलता । इति राजनिर्घण्ट ॥ (देवदालीशब्दे गुणादयोऽस्या ज्ञातव्या ॥)

कदर, क्ली, (क जल दृणाति,दारयति नाशयतीत्यर्थ । क+दृ+अच् ।) पायसभेद । इति शब्दमाला ॥

कदर, पु, (क जल दृणाति श्लेष्मणा सह्तजल नाशयतीत्यर्थ । क+दृ+अच् ।) श्वेतखदिर । काँटा वावला इति भाषा । तत्पर्य्याय । सोमवल्क २ । इत्यमर ।२।४।४०॥ ब्रह्मशल्य ३ खदिरोपम ४ । इति रत्नमाला ॥ (श्वेतसार ५। खदिर ६। सोमवल्कल ७। इति भावप्रकाश ॥

गुणानाह तत्रैव ।

“कदरो विशदो वर्ण्यो मुखरोगकफास्रजित्” ॥

व्यवहारो यथा, चरके ।

“तिन्दुकपियालवदरकदरखदिरसप्तपर्णाश्वकर्णार्ज्जुनासनारिमेदा इति दशेमान्युदर्दप्रशमनानि भवन्ति” ॥) क्रकच । करात् इति भाषा ॥ व्याधिभेद । इति मेदिनी ॥ कडा जामुडा इति भाषा॥ तस्य लक्षणम् । यथा निदाने ।

“शर्करोन्मथिते पादे क्षते वा कण्टकादित ।
ग्रन्थि कोलवदुत्पन्नो जायते कदरस्तु स ” ॥
(“शर्करोन्मथिते पादे क्षते वा कण्टकादिभि ।
मेदोरक्तानुगैश्चैव दोषैर्वा जायते त्वचाम्॥
सकोल कठिनो ग्रन्थिर्निम्नमध्योन्नतोपि वा ।
कोलमात्र सरुक्स्रावी जायते कदरस्तु स ”॥

इति सुश्रुत ।) तच्चिकित्सा यथा भावप्रकाशे ॥

“दहेत् कदरमुद्धृत्य तैलेन दहनेन वा” ॥

अङ्कुश । इति हारावली ॥

कदर्य्य, त्रि, (कुत्सितोऽर्य्य स्वामी ॥ कुगतीतिसमास ।) क्षुद्र । कृपण । इत्यमर । ३।१।४८॥

“आत्मान धर्म्मकृत्यञ्च पुत्त्रदाराश्च पीडयन् ।
यो लोभात् सञ्चिनोत्यर्थान् स कदर्य्य इति स्मृत ”॥

इति स्मृति ॥ (तथा, छान्दोग्योपनिषदि। ५।११। ५। “तेभ्योऽप्राप्तेभ्य पृथगर्हाणि कारयाञ्चकार सहप्रात सञ्जिहान उवाच नमेस्तेनो जनपदे न कदर्य्यो न मद्यपो नानाहिताग्नि र्नाविद्वानिति” ॥)

कदल, पु, (कद+वृषादित्वात् कलच् ।) कदलीवृक्षः । पृश्नीलता । इति मेदिनी ॥ (यथा, अमरुशतके । ९५ ।

“ऊरुद्वय म्टगदृश कदलस्य काण्डौ
मध्यञ्च वेदिरतुल स्तनयुग्ममस्याः” ॥)

कदलक, पु, (कदल+स्वार्थे कन् ।) कदलीवृक्ष । इति शब्दरत्नावली ॥

कदला, स्त्री, (कदल+टाप् ।) पृश्नी । चाकुलिया इति भाषा । डिम्बिका । शाल्मलीवृक्ष । इति मेदिनी ॥

कदली, स्त्री, (कदल+गौरादित्वात् ङीष् । यद्वा काय जलाय दल्यते त्वगस्य गौरादित्वात् ङीष् ।) स्वनामप्रसिद्धौषधिविशेष । कला इति भाषा । तत्पर्य्याय । वारणवुसा २ रम्भा ३ मोचा ४ अंशुमत्फला ५ काष्ठीला ६ । इत्यमर ॥ कदल ७ वारणवुषा ८ वारवुषा ९ । इति तट्टीका ॥ सुफला १० सुकुमारा ११ सकृत्फला १२ गुच्छफला १३ हस्तिविषाणी १४ गुच्छदन्तिका १५ नि सारा १६ राजेष्टा १७ बालकप्रिया १८ ऊरुस्तम्भा १९ भानुफला २० वनलक्ष्मी २१ । कदलक २२ मोचक २३ रोचक २४ लोचक २५ वारवुषा २६ । इति शब्दरत्नावली ॥ वारणवल्लभा २७ चर्म्मण्वती २८ । इति जटाधर ॥ (यथा, महाभारते २ । द्रुतपर्व्वणि ६६ । १२ ।

“कदलीषण्डसदृश सर्व्वलक्षणसयुतम् ।
गजहस्तप्रतीकाश वज्रप्रतिमगौरवम्” ॥)

अस्या पक्वफलगुणा । कषायत्वम् । मधुरत्वम् । शीतलत्वम् । पित्तास्रविमर्द्दनत्वम् । गुरुतरत्वम् । मन्दानले अपथ्यत्वम् । सद्य शुक्रविवर्द्धनत्वम् । क्लमतृष्णाहरत्वम् । कान्तिदातृत्वम् । दीप्ताग्नौ सुखदत्वम् । कफामयकरत्वम् । सन्तर्पणत्वम् । दुर्ज्जरत्वञ्च ॥*॥ (यथा हारीते ।

“हृद्य मनोज्ञ कफवृद्धिकारि
शीतञ्च सन्तर्पणमेव बल्यम् ।
रक्त सपित्त श्वसनञ्च दाह
रम्भाफलञ्चापि नरस्य हन्ति ॥
अपक्वक ग्राहि च शीतलञ्च
कषायक वातकफ करोति ।
विष्टम्भि बल्य गुरु दुर्ज्जरञ्च
आरण्यरम्भाफलमेव तद्वत्” ॥)

मोचकगुणा । हृद्यत्वम् । कफक्रिमिनाशित्वम् । कुष्ठप्लीहज्वरहरत्वम् । अग्निदीपनत्वम् । वस्तिशोधनत्वञ्च ॥ * ॥

(“मोचाफल स्वादु शीत विष्टम्भि कफनुद्गुरु ।
स्निग्ध पित्तास्रतृड्दाहक्षतक्षयसमीरजित् ॥
पक्व स्वादु हिम पाके स्वादु वृष्यञ्च वृंहणम् ।
क्षुत्तृष्णानेत्रगदहृन्मेहघ्नं रुचिमासकृत्” ॥

इति भावप्रकाश ॥ कदली पुष्पगुणाश्चाह ॥

“कदल्या कुसुम स्निग्ध मधुरन्तुवर गुरु ।
वातपित्तहर शीत रक्तपित्तक्षयप्रणुत्” ॥)

अस्या मूलगुणा । बलकारित्वम् । वातपित्तनाशित्वम् । गुरुत्वञ्च ॥ * ॥

“माणिक्यमर्त्यामृतचम्पकाद्या
भेदा कदल्या बहवोऽपि सन्ति ।
उक्ता गुणास्तेष्वधिका भवन्ति
निर्दोषता स्याल्लघुता च तेषाम्” ॥

इति राजनिर्घण्ट ॥*॥ चम्पकाख्यकदलीफलगुणा । वातपित्तहरत्वम् । गुरुत्वम् । शुक्रवृद्धिकारित्वम् । अतिशीतलत्वम् । रसे पाके मधुरत्वञ्च । दुग्धदधितक्रतालयुक्तं कदल दुर्ज्जरम् । इति राजवल्लभ ॥*॥ हरिणविशेष । पताका । इति मेदिनी ॥ करिवैजयन्ती । इति हलायुधः ॥ हातिर उपरेर निशान इति भाषा ॥

कदा, व्य, (किम्+काले दा । “सर्व्वैकान्यकियत्तद काले दा” । ५ । ३ । १५ ।) कस्मिन् काले । इति व्याकरणम् ॥ कवे कखन इति भाषा ॥ (यथा, ऋग्वेदे १ । ८४ । ८ । “कदा न शुश्रवद्गिर इन्द्रो अङ्ग” ॥ तथा हितोपदेशे । १ । १२२ ।

“जातिद्रव्यबलानाञ्च साम्यमेषा मया सह ।
मत्प्रभुत्वफल ब्रूहि कदा किन्तद्भविष्यति” ॥)

कदाकार, पु, (कुत्सित आकार । नैवात्र बहुव्रीहि निषिद्धत्वात् । यथा, “को कत्तत्पुरुषेऽचि” । ६ । ३ । १०१ ।) कुत्सिताकार ॥ (कुत्सिताकारविशिष्टे, त्रि ॥)

कदाख्य,क्ली, (कुत्सिता आख्या नाम यस्य ।) कुष्ठवृक्षः । कुड इति भाषा । तत्पर्य्यायः । कौवेरम् २ दुष्टम् ३ व्याप्यम् ४ । इति शब्दचन्द्रिका ॥

कदाचन, व्य, (कदा+अनिर्द्धारिते चनप्रत्यय ।) कस्मिन् काले । इति व्याकरणम् । कोन समये इति भाषा । (यथा, मनु । २ । ५८ ।

“ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्या वा न पित्र्येण कदाचन” ॥)

कदाचित्, व्य, (कदा+अनिर्द्धारिते चित् ।) कस्मिंश्चित् काले । तत्पर्य्याय । जातु २ । इत्यमर । ३ । ४ । ४ ॥ कर्हिचित् ३ । इति हेमचन्द्रः ॥ (यथा, मनु । ४ । ७४ ।

“नाक्षै क्रीडेत् कदाचित्तु स्वय नोपानहौ हरेत् ।
शयनस्थो न भुञ्जीत न पाणिस्थ नचासने” ॥)

कदुष्ण, क्ली, (कु ईषत् उष्ण ईषदर्थे कोः “कवञ्चोष्णे” ६ । ३ । १०७ । चकारात् । कदादेशः ।) ईषदुष्णम् । तत्पर्य्याय । कोष्णम् २ कवोष्णम् ३ मन्दोष्णम् ४ । (यथा भट्टि । ३ । १८ ।

“ससीतयोराघवयोरधीयन्
श्वसन् कदुष्ण पुरमाविवेश” ॥)

तद्वति त्रि । इत्यमर । १ । ४ । ३५ ॥

कद्द कार्कश्ये । (भ्वा–पर–अक–सेट् ।) तवर्गतृतीयोपध । क्विपि सयोगान्तलोपे कद् इति । कद्दुति यद्यमृणाल कर्कश स्यादित्यर्थ । इति दुर्गादासः ॥

कद्रथ, पुं, (कुत्सितः रथः । को कदादेश । “रथवदयोश्च” । ६ । ३ । १०२ ।) कुत्सितरथ । इति व्याकरणम् ॥ (यथा, भट्टि ५ । १०२ ।

"युधिकद्रथवह्नीम वमञ्च ध्वजशालिनम्" ॥)

कद्रु, पु, (कद्+रु ।) पिङ्गलवर्णः । तद्वति त्रि । इत्यमरः । १ । ५ । १६ ॥

कद्रुः, स्त्री, (कद्+रु । यद्वा मृगय्वादित्वात् साधुः ।) नागमाता । इति मेदिनी ॥ सा तु दक्षकन्या कश्यपपत्नी च । इति पुराणम् ॥ (यथा, रामायणम् । ३ । २० । २९ ।
"रोहिण्या जज्ञिरे गावो गन्धर्व्या वाजिनस्तथा ।
सुरसाऽजनयन्नागान् राम ! कद्रुश्च पन्नगान्" ॥)

कद्रुपुत्त्र, पु, (कद्रोः पुत्त्रः ।) नागः । इति शब्दचन्द्रिका ॥

कद्रुसुतः, पु, (कद्रोः सुतः ।) नागः । तत्पर्य्यायः । काद्रवेयः २ । इति शब्दरत्नावली ॥ कश्रुकालुः ३ कद्रुपुत्त्रः ४ । इति शब्दचन्द्रिका ॥

कद्वदः, त्रि, (कुत्सितं वदतीति यः । वदे पचाद्यच् । कुत्सितं वद इति वा "रथवदयोश्च" । ६ । २ । १०२ । इति कदादेशः ।) कुत्सितवक्ता । तत्पर्य्यायः । गर्ह्यवादी २ । इत्यमरः । ३ । १ । ३७ ॥ दुर्व्वाक् ३ । अतिकुत्सितः । इति हेमचन्द्रः ॥ (यथा, भट्टिः ६ । ७५ ।
"सर्व्वं त्वदधिताधीनं सुव्यक्तं रामणीयकम् ।
येन जातं प्रियापाये कद्वदं हंसकोकिलम्" ॥)

कन, ई जि प्रीतौ । गतौ । द्युतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सक च-सेट् ईदित् ।) ई जि कान्तोऽस्मि । इति दुर्गादासः ॥

कनकं, क्ली, (कनति दीप्यते इति । कनी दीप्तौ + क्वुनादिभ्यो वुन् ।) स्वर्णम् । इत्यमरः । २ । ९ । ९४ ॥ (यथा, मेघदूते । २ ।
"तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः" ॥)

कनक, पु, (कनति दीप्यते यः । कनी दीप्तौ + क्वुनादिभ्यो वुन् ।) पलाशवृक्षः । नागकेशरवृक्षः । धुस्तूरवृक्षः । (यथा, इन्द्रजालतन्त्रे ।
"कपालं मानुषं गृह्य कनकस्य फलानि च" ॥)
काञ्चनालवृक्षः । कालीयवृक्षः । चम्पकवृक्षः । इति मेदिनी ॥ कासमर्द्दवृक्षः । कणगुग्गुलुवृक्षः । इति राजनिर्घण्टः ॥ जाढ्यालवः । इति शब्दमाला ॥ (शिवः । यथा, महाभारते । १३ । १७ । ९२ ।
"उपकारः प्रियः सर्व्वः कनकः काञ्चनच्छविः" ॥
यदुवंशीयस्य दुर्द्दमस्य पुत्त्रः । यथा, हरिवंशे ३३ । ६ ।
"दुर्द्दमस्य सुतो धीमान् कनको नाम नामतः" ॥)

कनकक्षारः, पु, (कनकस्य द्रावणार्थं क्षारः ।) टङ्कणः । इति राजनिर्घण्टः । सोहागा इति भाषा ॥ (टङ्कणशब्देऽस्य गुणा व्याख्येयाः ॥)

कणकदण्डक, क्ली, (कनकस्य कनकनिर्म्मितो वा दण्डः यत्र । कप् स्वार्थे कन् वा ।) राजच्छत्रम् । इति त्रिकाण्डशेषः ॥

कनकपलः, पु, (कनकस्य कार्षचतुष्टयरूपपलं तत्परिमाणम् ।) पलपरिमाणम् । तत्तु सुवर्णादिपरिमाणकषोडशमाषकम् । तत्पर्य्यायः । कुरुविस्तः २ । इति हारावली ॥ (कनकमिव पलं मांसमस्य इति व्युत्पत्त्या मत्स्यविशेषः ॥)

कनकप्रभा, स्त्री, (कनकस्य प्रभेव प्रभा यस्याः ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (स्वनामख्यातो ज्वरातीसाररोगस्यौषधविशेषो यथा ।
"सुवर्णबीजं मरिचं विराल-
मदं कणा टङ्कणकं विषञ्च ।
गन्धं जयाह्वस्त्रिदिनं विमर्द्य
गुञ्जा प्रमाणा वटिका विधेया ॥
रक्तातिसारग्रहणीज्वराग्नि-
मान्द्यादि हन्यात् कनकप्रभेयम् ।
दध्योदनं भोज्यमनुष्णवारि-
मांसं भवेत्तित्तिरिलावकानाम्" ॥
इति वैद्यकरसेन्द्रसारसंग्रहः ॥ * ॥)

कनकप्रसवा, स्त्री, (कनकवत् प्रसवः पुष्पं यस्याः ।) स्वर्णकेतकी । इति राजनिर्घण्टः ॥

कनकरम्भा, स्त्री, (कनकवर्णवत् रम्भा । यद्वा कनकवर्णफलिनी रम्भा ।) सुवर्णकदली । इति राजनिर्घण्टः ॥

कनकरसः पु, (कनकवर्णो रसः ।) हरितालम् । इति राजनिर्घण्टः ॥ ("कतमोऽयं पूर्व्वापरसमुद्रावगाढः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते" । इति शाकुन्तले ७ अङ्के ॥)

कनकलोद्भवः, पु, (कनति दीप्यते इति । कना दीप्ता कला अवयवः तया उद्भवतीति । कनकला + उद् + भू + अच् ।) रालः । इति राजनिर्घण्टः । धुना इति भाषा ॥

कनकाचलः, पु, (कनकमयो अचलः पर्व्वतः ।) अस्ताचलः । सुमेरुपर्व्वतः । इति सिद्धान्तशिरोमणिः ॥ दानविशेषः । इति स्मृतिः ॥ (अस्य परिमाणमुक्तं ब्रह्माण्डपुराणे यथा,—
"अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् ।
यस्य प्रसादाद्भवनं विरिञ्चेर्य्याति मानवः ॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः ।
तदर्द्धेनाधरस्तद्वत् अल्पवित्तोऽपि शक्तितः ॥
दद्यादेकपलादूर्द्ध्वं यथा शक्त्या विमत्सरः ।
धान्यपर्व्वतवत् सर्व्वं विदध्यात् विधिमुत्तमम् ।
विष्कम्भशैलास्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत्" ॥)

कनकाध्यक्षः, पु, (कनकस्य रक्षणे अध्यक्षः मध्यपदलोपः ।) सुवर्णरक्षकः । तत्पर्य्यायः । भौरिकः २ । इत्यमरः । २ । ८ । ७ ॥

कनकारकः, पु, (कनकं दीप्तस्वर्णदीप्तिमिव सर्व्वतो ऋच्छति व्याप्नोतीति । कनक + ऋ + अण् । स्वार्थे + कन् ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥ (कोविदारशब्देऽस्य गुणादिकं ज्ञातव्यम् ॥)

कनकालुका, स्त्री, (कनकनिर्म्मितं आलु । सलिलाद्याधारपात्रविशेषः संज्ञायां कन् टाप् च ।) स्वर्णकलसः । तत्पर्य्यायः । भृङ्गारः २ । इत्यमरः । २ । ८ । ३२ ॥

कनकाह्वं, क्ली, (कनकस्याह्वा नाम यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥ (नागकेशरशब्देऽस्य विशेषो द्रष्टव्यः ॥)

कनकाह्वयः, पु, (कनकं आह्वयोऽस्य । कनकमाह्वयते स्पर्द्धते वा । कनक + आ + ह्वे + क ।) धुस्तूरवृक्षः । इत्यमरः । २ । ४ । ७७ ॥ नागकेशरवृक्षः । इति शब्दचन्द्रिका ॥

कननं, त्रि, (कन् + युच् ।) काणः । इति हेमचन्द्रः ॥

कनिष्ठ, त्रि, (अतिशयेन युवा अल्पो वा । इष्ठन् । कनादेशश्च ।) अतियुवा । अल्पः । पश्चाज्जातः । तत्पर्य्यायः । जघन्यजः २ यवीयान् ३ अवरजः ४ अनुजः ५ । इत्यमरः । २ । ६ । ४३ ॥ कनीयान् ६ कन्यसः ७ यविष्ठः ८ । इति तट्टीकासारसुन्दरी ॥ (यथा, मनुः । ९ । ११३ ।
"ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् ।
येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम्" ॥
शिवः । यथा, महाभारते । १३ । १७ । १३१ ।
"पवित्रं त्रिककुन्मन्त्रं कनिष्ठः कृष्णपिङ्गलः" ॥)

कनिष्ठकं, क्ली, (कनिष्ठमिव कायति प्रकाशते । कनिष्ठ + कै + क ।) शृकतृणम् । इति राजनिर्घण्टः ॥

कनिष्ठा, स्त्री, (कनिष्ठ + ङीषादिकं बाधित्वा अजादित्वात् टाप् ।) दुर्बलाङ्गुलिः । इत्यमरमेदिनीकरौ ॥ कडे आङ्गुल इति भाषा । (यथा, रामायणे ३ । ५१ । ७ ।
"कनिष्ठायामप्यकुल्या भ्रातुर्मम स राक्षसः ।
दुःखकर्त्तुमपर्य्याप्तो देवि ! कस्माद्विषीदसि" ॥)
धीरादिरितिद्वधा द्विधाभेदान्तर्गतनायिकाविशेषः । अस्या लक्षणम् । परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा । इति रसमञ्जरी ॥ (त्रि, मनुः ९ । १२२ ॥
पुत्त्रः कनिष्ठो ज्येष्ठायां कनिष्ठायाश्च पूर्व्वजः" ।
"यदि प्रथमोढाया कनीयान् पुत्त्रो जातः पश्चादूढायाश्च ज्येष्ठः" ॥ इति कुल्लूकभट्टः ॥)

कनी, स्त्री, (कन + अच् + गौरादित्वात् ङीष् ।) कन्या । इति हेमचन्द्रः ॥

कनीचि, स्त्री, (कन् + बाहुलकात् ईचि प्रत्ययः । पृषोदरादित्वात् दीर्घश्च ।) गुञ्जा । इति शब्दरत्नावली ॥ कुँच इति भाषा ॥ पुष्पयुक्तलता । शकटः । इत्युणादिकोषः ॥ मूर्द्धन्यणमध्योऽपि पाठः ॥

कनीनिका, स्त्री, (कन् + ईन । संज्ञायां कन् । ततष्टाप् + अत इत्वम् ।) चक्षुस्तारा । कनिष्ठाङ्गुलिः । इति मेदिनी ॥

कनीनी, स्त्री, (कन् + ईन् ततो ङीष् ।) कनिष्ठाङ्गुलिः । इत्यमरटीका ॥

कनीयस, क्ली, (कन् दीप्तौ + अच् । कनः सूर्य्यस्तस्येदम् । कन + छ कनीयम् । तद्रूपत्वेन सीयते अवसीयते इति । सो + घञर्थे कर्म्मणि कः । सूर्य्यदेवाधिष्ठातृकलमिति तात्स्योक्तिः ।) ताम्रम् । इति हेमचन्द्रः ॥

कनीयान्, [स्] त्रि, (अयमनयोरतिशयेन युवा अल्पो वा इत्यर्थे ईयसुन् । ततः कनादेशः ।) अनुजः । अतियुवा । अत्यल्पः । इति मेदिनी ॥ (यथा, ऋग्वेदे । ४ । २४ । ९ । "स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्र वाणम्" ॥
"मातुः पितुः कनीयांसं न नमेद्वयसाऽधिकः ।
प्रणमेच्च गुरोः पत्नीं ज्येष्ठभार्य्यां विमातरम्" ॥
इति स्मृतिः ॥)

कन्तुः पुं, ("कश्चम्भागा वभयुस्त्वितुतयस इति तु" । ५ । २ । १३८ । कम् + तु । कामयते इति कमु कान्तौ । कमिगमिभ्यामादिना कुप्रत्यये तुकि सिद्ध- । "कमिमनिजनिगाभायाहिभ्यश्च" । उणा ।) कामदेवः । इति त्रिकाण्डशेषः ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ । इति उज्ज्वलदत्तः । कं सुखं अस्यास्तीति सुखी जनः ॥)

स्त्री, (कम् + बाहुलकात् थन् + टाप् ।) । इति स्त्रीलिङ्गसंग्रहे अमरः ॥ काँथा इति भाषा । (यथा, यतिपञ्चके २ । "कन्थामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः" ॥) मृण्मयभित्तिः । इति मेदिनी । काँथ् इति भाषा ॥ उशीनराख्यजनपदप्रसिद्धग्रामाणां नामसु विषयभूतेषु षष्ठ्यन्तात् परा कन्था क्लीबे स्यात् । यथा सौसमीनां कन्था सौसमिकन्थम् । आङ्गीनां कन्था आङ्गिकन्थम् । इत्यमरटीकायां भरतः ॥

कन्थारी, स्त्री, (कम् + आरन् । पृषोदरादित्वात् थुक् गौरादित्वात् ङीष् ।) वृक्षविशेषः । तत्पर्य्यायः । कन्थरी २ कन्था ३ दुर्द्धर्षा ४ तीक्ष्णकण्टका ५ तीक्ष्णगन्धा ६ क्रूरगन्धा ७ दुष्प्रवेशा ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातशोथरक्तग्रन्थिज्वरनाशित्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

कन्द, क्ली पुं, (कन्दयति जिह्वाया वैक्लव्यं जनयति रोदयति वा भक्षयन्तं जनम् । कदि + णिच् + अच् । यद्वा कन्द्यते कन्द इति नाम्ना ख्यायते । कदि + कर्म्मणि + घञ् ।) शूरणः । शस्यमूलम् । इति मेदिनी ॥ रसुनम् । इति राजनिर्घण्टः ॥ (यथा, महाभारते १३ । १४ । ११९ ॥
"वने निवसता नित्यं कन्दमूलफलाशिनाम्" ॥
यथा च, शान्तिशतके । २ । २० ।
"शीतं निर्झरवारिपानमशनं कन्दः सहाया मृगाः" ॥
शूरणशब्देऽस्य विशेषो ज्ञेयः ॥)

कन्द, पुं, (कं जलं ददातीति । क + दा + क । कन्दति कन्दयति कन्द्यते वा । कदि आह्वाने रोदने च । अच् घञ् वा ।) मेघः । इति मेदिनी ॥ योनिरोगविशेषः । तस्य निदानलक्षणे । यथा,—
"दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा ॥
पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
उत्पद्यते यदा योनौ नाम्ना कन्दस्तु योनिजः" ॥
स चतुर्विधः । वातिकः १ पैत्तिकः २ श्लैष्मिकः ३ सान्निपातिकश्च ४ । एषां यथाक्रमं लक्षणानि ।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तम् ॥
नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् ।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः ।
सन्निपातात्मकोऽसाध्यः शेषाः कृच्छ्रप्रसाधनाः" ॥
इति माधवकरः ॥ (अस्य चिकित्सामाह प्रकाशः ॥
"गैरिकाम्रास्थि जन्तुघ्न रजन्यञ्जनकट्फलैः ।
पूरयेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः ॥
त्रिफलायाः कषायेण सक्षौद्रेण च सेचयेत् ।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते" ॥
अन्यत्सर्व्वं योनिशब्दे द्रष्टव्यम् ॥)

कन्दगुडूची, स्त्री, (कन्दोद्भवा गुडूची । शाकपार्थिवादिवत् समासः । मध्यपदलोपश्च ।) गुडूचीविशेषः । तत्पर्य्यायः । कन्दोद्भवा २ कन्दामृता ३ वक्रच्छिन्ना ४ बहुरुहा ५ पिण्डालुः ६ कन्दरोहिणी ७ । इति राजनिर्घण्टः ॥

कन्दट, क्ली, (कदि + अटन् ।) श्वेतोत्पलम् । इति शब्दरत्नावली । सादा सुँदि इति भाषा ॥

कन्दफला, स्त्री, (कन्दात् कन्दमारभ्य वा फलं यस्याः ।) क्षुद्रकारवेल्ली । इति राजनिर्घण्टः ॥

कन्दबहुला, स्त्री, (कन्दादारभ्य कन्देन कन्देषु बहुला वा ।) त्रिपर्णिका । इति राजनिर्घण्टः ॥

कन्दमूल, क्ली, (कन्द एव कन्दरूपं वा मूलं यस्य ।) मूलकम् । इति राजनिर्घण्टः ॥ (मूलकशब्देऽस्य गुणा वक्तव्याः ॥)

कन्दर, क्ली, (केन जलेन दीर्य्यते । दॄ + विदारे + कर्म्मणि अप् । कं जलं मेघजनितं दृणाति नाशयतीति वा । दॄ + अच् ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ (आर्द्रकशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कन्दर, पुं स्त्री, (केन जलेन दीर्य्यते विदीर्य्यतेऽसौ । दॄ + कर्म्मणि अप् ।) गुहा । इति मेदिनी ॥ "निह्रादी चेन्मुरज इव ते कन्दरेषु ध्वनिः स्यात्" । इति मेघदूते ५८ ॥) कृत्रिमोऽकृत्रिमो वा समलो निर्म्मलो वा गृहाकारो गिरिनितम्बदेशः । इति भरतः ॥ तत्पर्य्यायः । दरी २ कन्दरा ३ इत्यमरः । २ । ३ । ६ ॥ कन्दरी ४ । इति पञ्जिका ॥ दरः ५ । इति स्वामी ॥ (यथा, भागवते । ४ । ६ । ११ ।
"नानाऽमलप्रस्रवणैर्नानाकन्दरसानुभिः" ॥)

कन्दर, पुं, (कं मातङ्गशिरो दीर्य्यतेऽनेन । दॄ + करणे अप् ।) अङ्कुशः । इति मेदिनी ॥

कन्दरा, स्त्री, (कन्दर + टाप् ।) गुहा । इत्यमरः । २ । ३ । ६ ॥

कन्दराकर, पुं, (कन्दरस्य आकरः ।) पर्व्वतः । इति हारावली ॥

कन्दराल, पुं, (कन्दराय अङ्कुराय अलतीति । कन्दर + अल + अच् ॥) गर्द्दभाण्डवृक्षः । प्लक्षवृक्षः । इति मेदिनी ॥ आखोटवृक्षः । इति राजनिर्घण्टः ॥

कन्दरालक, पुं, (कन्दराल एव स्वार्थे कन् ।) प्लक्षवृक्षः । इति शब्दरत्नावली ॥ (प्लक्षशब्दे विशेषोऽस्य ज्ञातव्यः ॥)

कन्दरी, स्त्री, गुहा । इत्यमरः । २ । ३ ।

कन्दरोद्भवा, स्त्री, [illegible] + उद् + भू + अच् [illegible] इति राजनि[illegible]

कन्दर्प, पुं, ([illegible] यस्मात् । यद्वा [illegible] क [illegible] २१५

"साहन्त्वामभिषेकार्थमवतीर्य्य समुद्रगाम् ।
दृष्ट्वैव पुरुषव्याघ्र । कन्दर्पेणाभिमूर्च्छिता" ॥)
ध्रुवकभेदः । यथा,— सङ्गीतदामोदरे ॥
"त्रयोविंशतिवर्णाङ्घ्रिर्भवेत् कन्दर्पसंज्ञकः ।
वीरे वा करुणे वा स्यात् खण्डताले विधीयते" ॥

कन्दर्पकूप, पुं, (कन्दर्पस्य कूप इव ।) योनिः । इति जटाधरः ॥

कन्दर्पजीव, पुं, (कन्दर्पं जीवयति परिवर्द्धयतीति । कन्दर्प + जीव + अच् ।) कामवृद्धिनामक्षुपः । इति राजनिर्घण्टः ॥

कन्दर्पमुषल, पुं, (कन्दर्पस्य मुषल इव ।) लिङ्गम् । इति त्रिकाण्डशेषः ॥

कन्दर्पशृङ्खल, पुं, (कन्दर्पः शृङ्खलं यत्र । यद्वा कन्दर्पाय शृङ्खलः ।) शृङ्गारबन्धविशेषः । तस्य लक्षणम् । यथा रतिमञ्जरी ।
"नारी पदद्वयं स्थाप्य कान्तस्योरुद्वयोपरि ।
कटिं दोलयेदाशु बन्धः कन्दर्पशृङ्खलः" ॥

कन्दल, त्रि, (कदि + अलच् ।) कपालः । उपरागः । नवाङ्कुरः । कलध्वनिः । इति मेदिनी ॥ अपवादः । इति शब्दरत्नावली ॥ (कदलीविशेषः । यथा, अमरुशतके ४८ । "प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोबिन्दवः" ॥)

कन्दल, पुं, (कदि + अलच् ।) कनकम् । युद्धम् । वायासः । इति धरणी ॥

कन्दलता, स्त्री, (कन्दप्रधाना लता ।) मालाकन्दः । इति राजनिर्घण्टः ॥

कन्दली, स्त्री, (कन्दल + गौरादित्वात् ङीष् ।) मृगविशेषः । यस्य चर्म्म व्यवह्रियते । गुल्मप्रभेदः । (यथा, मेघदूते २१ ।
"आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्" ॥)
कदली । इति मेदिनी ॥ (यथा, विक्रमोर्व्वश्याम् । ७८ ।
"आरक्तराजिभिरियं कुसुमैर्नवकन्दलीसलिलगर्भैः" । इति ॥)
पताका । इति त्रिकाण्डशेषः ॥ पद्मबीजम् । इति राजनिर्घण्टः ॥

कन्दलीकुसुम, क्ली, (कन्दल्या इव कुसुममस्य ।) शिलीन्ध्रम् । इति जटाधरः ॥

कन्दवर्द्धन, पुं, (कन्देन वर्द्धते इति । वृध् + ल्यु ।) शूरणः । इति राजनिर्घण्टः ॥ (शूरणशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

कन्दवल्ली, स्त्री, (कन्दाकारा + वल्ली ।) बन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

कन्दशूरण, पुं, (कन्देषु शूरणः श्रेष्ठः ।) ओलः । इति राजनिर्घण्टः ॥ (ओलशब्देऽस्य गुणादयो व्याख्याताः ॥)

कन्दसञ्ज्ञ, स्त्री, (कन्द इति सञ्ज्ञा यस्य कन्दनाम्ना सञ्ज्ञायते वा ।) योनिरक्तरोगविशेषः । तत्पर्य्यायः । योन्यर्शः २ । इति त्रिकाण्डशेषः ॥ तस्य [illegible] कन्दशब्दे द्रष्टव्यम् ॥
[illegible] (कन्दानां सारो यत्र ।) नन्दनवनम् ।
[illegible] ॥ [राजनिर्घण्टः ॥
[illegible] न आढ्य ।) धरणीकन्दः । इति

कन्दार्हं, पु, (कन्देषु अर्हः आदरणीयः ।) सूरणः । इति राजनिर्घण्टः ॥

कन्दालु, पु, (कन्दमय आलु ।) काष्ठालु । धरणीकन्दः । विषघ्निका । इति राजनिर्घण्टः ॥

कन्दिरी, स्त्री, (कन्द + इरच् + गौरादित्वात् ङीष् ।) लज्जालुवृक्षः । इति वैद्यकम् ॥ (लज्जालुशब्दे विशेषोऽस्या ज्ञातव्यः ॥)

कन्दी, [न्] पु, (कन्दोऽस्त्यस्य । अस्त्यर्थे इनिः ।) सूरणः । इति राजनिर्घण्टः ॥

कन्दुः, पु स्त्री, (स्कन्दति शोषयति जलादिकं स्कन्दे सलोपश्चेत्युः ।) लौहमयपाकपात्रम् । ताओया इति लोहता इति च भाषा । तत्पर्य्यायः । स्वेदनी २ । इत्यमरः । २ । ९ । ३० ॥

कन्दुक, पु, (कं सुखं ददातीति । कम् + दा + मितद्र्वादित्वात् डुः संज्ञायां कन् ।) गेण्डुकः । इत्यमरः । २ । ७ । १३८ ॥ गेंड इति भाषा ॥ (यथा, कुमारे । १ । २९ । "सा कन्दुकैः कृत्रिमपुत्रकैश्च" ॥)

कन्दुपक्क, क्ली, (कन्दौ पक्कम् ।) जलोपसेकं विना केवलपात्रे यत् वह्निना पक्कं भ्रष्टतण्डुलादि । यथा,—

"कन्दुपक्कानि तैलेन पायसं दधि शक्तव ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि" ॥

इति तिथ्यादितत्त्वे कूर्म्मपुराणम् ॥

कन्दोट, क्ली, (कदि + ओटन् ।) नीलोत्पलम् । इति शब्दरत्नावली ॥

कन्दोटः, पु, (कदि + ओटन् ।) शुक्लोत्पलम् । इति शब्दरत्नावली ॥

कन्दोत, पु, (कन्दे मूले उतः । कन्द + वेञ् + क्त ।) कुमुदम् । इति त्रिकाण्डशेषः ॥

कन्धः, पु, (कं जलं दधाति धारयति । क + धा + क ।) मेघः । इति शब्दरत्नावली ॥

कन्धर, पु, (कं जलं धरति धारयति वा । कम् + धृ + अच् ।) मेघः । इति मेदिनी ॥ मारिषश्च । इति राजनिर्घण्टः ॥ (कं शिरो धरतीति ।) ग्रीवा । इत्यमरटीकासारसुन्दरी ॥ (भागवते ६ । १२ । ३३ ।

• "वज्रस्तु तत्कन्धरमाशु वेगः
कृन्तन्समन्तात् परिवर्त्तमानः" ॥)

कन्धरा, स्त्री, (कं शिरो धरतीति । कम् + धृ + अच् + टाप् ।) ग्रीवा इत्यमरः । २ । ६ । ८८ ॥ (यथा, याज्ञवल्क्ये । २ । २२३ ।

"कन्धरा बाहुसक्थ्नां च भङ्क्ते मध्यमसाहसः" ॥)

कन्धिः, स्त्री, (कं शिरः समुद्रपक्षे जलं ध्रियते यत्र । धृ + अधिकरणे + कि ।) ग्रीवा । समुद्रे पु । इति राजनिर्घण्टः ॥

कन्नं, क्ली, (कन्यते प्राप्यते दुःखमनेन । कन गत्या + करणे क्त ।) पातकम् । मूर्च्छा । इति शब्दमाला ॥ कश्मलमिति च पाठः ॥

कन्यका, स्त्री, (कन्या + अज्ञातादौ कन् पूर्व्वह्रस्वश्च ।) कुमारी । इति त्रिकाण्डशेषः ॥ यथा ।

"अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्धं रजस्वला" ॥

इति [illegible] ॥ परकीयनायिकाविशेषः । यथा ।

"अप्रकटपरपुरुषानुरागा परकीया । सा च द्विविधा परोढा कन्यका च । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुप्तैव सकला चेष्टा" । इति रसमञ्जरी ॥

कन्यकाजात, पु स्त्री, (कन्यकाया अनूढाया जातः । कन्यका + जन + कर्त्तरि क्त ।) अविवाहितापुत्रः । तत्पर्य्यायः । कानीनः २ । इत्यमरः । २ । ६ । १३७ ॥ (यथाह याज्ञवल्क्यः । १२ । १३२ ।

"कानीनः कन्यकाजातो मातामहसुतो मतः" ॥

कर्णः । स तु अनूढाया कुन्त्या जातः ॥)

कन्यकापति, पु, (कन्यकाया पतिः ।) जामाता । इति शब्दरत्नावली ॥

कन्यस, पु, (कन + अघ्न्यादित्वात् । ४ । १११ । उणा । निपातनात् कन्यः । कन्यत्वेन काम्यत्वेन सीयते अवसीयते इति । कन्य + सो + वजर्थे कः ।) कनिष्ठभ्राता । इत्यमरटीकासारसुन्दरी ॥ (यथा रामायणम् । ५ । ३३ । १० ।

"रामस्य कन्यसो भ्राता सुमित्रा येन सुप्रजा" ॥)

कन्यसा, स्त्री, (कन्यस + टाप् ।) कनिष्ठभगिनी । इत्यमरटीका ॥

कन्या, स्त्री, (कन् दीप्तौ + अघ्न्यादित्वात् यक् इत्युणादौ ४ । १११ । कन्यायाः कनीन् चेति निर्द्देशात् पाणिनिमतानुसारेण न ङीष् अतष्टाप् ।) कुमारी । इत्यमरः ॥ २ । ६ । ८ । सा तु दशमवर्षीया । इति स्मृतिः ॥ (यथा महाभारते वनपर्व्वणि ।

"यस्मात् कामयते सर्व्वान् कमेर्धातोश्च भाविनि ।
तस्मात् कन्येह सुश्रोणि ! स्वतन्त्रा वरवर्णिनि !" ॥)

नारी । ओषधीविशेषः । घृतकुमारी इति ख्याता । इति मेदिनी ॥ यथा सुश्रुते निदानस्थाने ॥

("कान्तैर्द्वादशभिः पत्रैर्म्मयूराङ्गरुहोपमैः ।
कन्दजा काञ्चनक्षीरी कन्या नाम महौषधी" ॥

"शोषघ्नी कासहा कन्या" ॥ इति वैद्यकद्रव्यगुणः ॥ विशेषगुणादयोऽस्या घृतकुमारीशब्दे द्रष्टव्याः ॥) स्थूलैला । वाराहीकन्दः । वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥ • ॥ मेषादिद्वादशराश्यन्तर्गतषष्ठराशिः । सा तु उत्तरफल्गुनीशेषपादत्रयहस्तासमुदाययुक्ताचित्राप्रथमार्द्धेन भवति । तदधिष्ठातृदेवतायाः स्वरूपं यथा । जले नौकास्थशस्याग्निधारिणी स्त्री । इति दीपिका ॥ अपि च । नीलकण्ठीजातके ॥

"पाण्डुर्द्विपात् स्त्रीदिनतुर्यमाश्च-
निशाबलस्त्रीतसमोदयश्च ।
कन्यार्द्धशब्दा शुभभूम्मिचैश्य-
रूक्षाल्पसङ्गप्रसवा शुभा च" ॥ * ॥

मतान्तरे सा तु शीर्षोदया । दिनबला । पिङ्गलवर्णा । दक्षिणदिक्स्वामिनी । वायुप्रकृतिः । शीतलस्वभावा । शुद्रभूमिचरा । वैश्यवर्णा । रूक्षा । त्रयाङ्गा । खट्वछन्दा । अल्पसन्ताना । अल्पपुत्रका च ॥ * ॥ तत्र जातफलम् । "वेदशास्त्रे श्रद्धावान् स्वानरोषे खेदितः भार्य्यायाः सदा विरसश्च" । इति ज्योतिषम् ॥ * ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् । यथा कोष्ठीप्रदीपे ॥

"युवतिगे शशिनि प्रमदाजन-
प्रबलकेलिविलासकुतूहली ।
विमलशीलयुता जननोत्सवे
सुविधिना विधिना सहितः पुमान्" ॥ * ॥

तस्या उदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं दशदण्डाधिकपञ्चपलाङ्गुलप्रमे देशे वर्त्तमानोनविंशायनांशे ऊनत्रिंशत्पलाधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ * ॥ तत्र जातफलम् ।

"कन्यालग्नोद्भवो मर्त्यो नानाशास्त्रविशारदः ।
सौभाग्यगुणसम्पन्नः सुन्दरः सुरतप्रियः" ॥

इति कोष्ठीप्रदीपः ॥ * ॥ सुता । तस्या विवाहं विनान्यसंस्कारकर्म्मणि वृद्धिश्राद्धनिषेधो यथा,—

"कन्याया निष्क्रमो नास्ति वृद्धिश्राद्धं न विद्यते ।
नामान्नप्राशनं चूडा कुर्य्यात् स्त्रीणाममन्त्रकम्" ॥

"जातकर्म्मादिचूडान्तं कुमार्य्यास्त्वप्यमन्त्रकम् ।
कर्त्तव्यं पञ्चभिर्व्वर्षैरेकं निष्क्रमणं विना" ॥

इति च महानिर्व्वाणतन्त्रे नवमोल्लासः ॥

(तीर्थविशेषः । यथा महाभारते ३ । ८३ । १०४ ।

'ततो गच्छेत धर्म्मज्ञ ! कन्यातीर्थमनुत्तमम् ।
कन्यातीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्" ॥)

कन्याका, स्त्री, (कन्यैव इति स्वार्थे कन् अनुक्तापुंस्कत्वात् न ह्रस्वः ।) कुमारी । इति शब्दरत्नावली ॥

कन्याकुब्जः, पु, (कन्या कुब्जा यत्र देशे सः । वायुना हि अस्मिन् देशे कन्या कुब्जीकृता अतोऽस्य तथात्वम् ।) कान्यकुब्जदेशः । इति हेमचन्द्रः ॥ (यथा, महाभारते । वनपर्व्वणि ॥

"कन्याकुब्जेऽपिबत्सोममिन्द्रेण सह कौशिकः" ॥

वायुना हि अस्मिन् देशे पुरा कन्याः कुब्जीकृताः । तद्विवरणमुच्यते । पुरा किल कुशनाभो राजर्षिः घृताच्यां कन्याशतं जनयामास । रूपयौवनसम्पन्नास्तास्तु कदाचित् उद्यानभूमिमागम्य परयानन्दसन्तत्या चिक्रीडुः । अथ सर्व्वगो वायुस्तास्सर्व्वाः क्रीडन्तीरवलोक्य कामशरपीडितोऽब्रवीत् । अहं व कामये, भवत्यो मे भार्य्या भवन्तु । अथ ता अङ्गनास्तस्य तद्वचनं श्रुत्वा उच्चैर्विहस्य तमब्रुवन् भो वायो । त्वं भूतानामन्तश्चरसि तत्कथमस्माकं मनोभावं न वेत्सि । वयं किल कुशनाभसुताः कथं पितरं कामतः समतिक्रम्य स्वयं वरमभिलषामः । पिता हि अस्मान् यस्मै दास्यति स नो भर्त्ता भविष्यतीति । अत स्वच्छन्दतया खलु भवन्नियोगं कर्त्तुमशक्ता वयम् । वायुस्तु तासामेतद्वचनमाकर्ण्य कोपसमन्वितः स्वतेजसा तासां शरीरेषु प्रविश्य मध्ये बभञ्ज । ततः प्रभृति देशोऽयं कन्याकुब्ज इत्येव ख्यातः ॥ अस्य विस्तृतिस्तु रामायणे आदिकाण्डे ३५ अध्याये द्रष्टव्या ॥ अयन्तु काशीनदीतटे स्थितः । अधुना कुशस्थल इत्याख्यया प्रसिद्धः । इति कनिङ्हामेनोक्तम् ॥ अस्य समीपे जाह्नवीप्रवहमाना वर्त्तते । इति महाभारते अनुशासनपर्व्व ॥)

कन्याट, पु, (कन्या अटति अत्र । कन्या + अट + अधिकरणे घञ् ।) वासगृहम् । इति त्रिकाण्डशेषः ॥

कन्यादान, क्लो, (कन्याया दान वराय सम्प्रदानम् ।) वराय कन्यासम्प्रदानम् । तद्दानफलादि यथा ।

यम उवाच ।

"कन्या ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
ब्रह्मदेया द्विजश्रेष्ठ । ब्रह्मलोकं व्रजन्ति ते ॥
कन्यादानन्तु सर्व्वेषा दानानामुत्तम स्मृतम्" ॥*॥

तदग्रहणे दशकुलत्यागो यथा,—

"महान्त्यपि समृद्धानि गोऽजाविधनधान्यत ।
स्त्रीसम्बन्धे दशेमानि कुलानि परिवर्जयेत् ॥
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ।
क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥
यस्यास्तु न भवेत् भ्राता न च विज्ञायते पिता ।
नोपयच्छेत ता प्राज्ञ पुत्त्रिकाधर्म्मशङ्कया" ॥*॥

ततोऽष्टप्रकारविवाहानन्तरम् ।

"कन्या ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
विवाहकाले संप्राप्ते यथोक्ते सदृशे वरे ।
क्रमात् क्रम क्रतुशतमनुपूर्व्वं लभन्ति ते ॥
श्रुत्वा कन्याप्रदानन्तु पितर प्रपितामहा ।
विमुक्ता सर्व्वपापेभ्यो ब्रह्मलोक व्रजन्ति ते ॥
ब्राह्मेण तु विवाहेन यस्तु कन्या प्रयच्छति ।
ब्रह्मलोक व्रजेच्छीघ्र ब्रह्माद्यै पूजित सुरै ॥
दिव्येन तु विवाहेन यस्तु कन्या प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति ॥
गान्धर्व्वेण विवाहेन यस्तु कन्या प्रयच्छति ।
गन्धर्व्वलोकमासाद्य क्रीडते देववच्चिरम् ॥
शुल्केन दत्त्वा य कन्या ता पश्चात् सम्प्रगर्व्वयेत् ।
स किन्नरैश्च गन्धर्व्वैं क्रीडते कालमक्षयम् ॥
न मन्यु कारयेत्तासा पूज्याश्च सतत गृहे ।
ब्रह्मदेया विशेषेण ब्राह्मभोज्या सदा भवेत् ॥
कन्याया ब्रह्मदेयायामभुञ्जन् सुखमश्नुते ।
अथ भुञ्जति यो मोहात् भुक्त्वा स नरक व्रजेत् ॥
अप्रजायाश्च कन्याया न भुञ्जीयात् कदाचन ।
दौहित्रस्य मुख दृष्ट्वा किमर्थमनुशोचसि ॥
महासत्वसमाकीर्णान्नास्ति ते नरकाद्भयम् ।
तीर्णस्त्व सर्व्वदु खेभ्य पर स्वर्गमवाप्स्यसि ॥
दौहित्रस्य तु दानेन नन्दन्ति पितर सदा ।
यत्किञ्चित् कुरुते दान तदानन्त्याय कल्प्यते ॥
मातापितुश्च विज्ञेय तच्छुभस्याभिगामिन ।
मातु पितुर्हिरण्यस्य दौहित्रोऽर्द्धमवाप्नुते ॥
दत्त्वा कन्या न शोचेत क्षुधिता मुदिता तथा ।
मग्ना दु खाभिभूता वा तथैव कृपणा कृशाम् ।
कुर्य्यान्मन्यु नचैवास्या आगताश्चापि पोषयेत् ॥
यद्भूतमर्थयेत् किञ्चित् सर्व्व तत् प्रतिपादयेत् ।
अप्रयच्छन् पतेत् ब्रह्मन् । नरके नात्र सशय" ॥*॥
"शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ।
न शुष्यन्ति च यत्रैव निर्दहन्त्यप्रपूजिता ॥
तस्मादेता समभ्यर्च्या भूषणाच्छादनाशनै ।
भूतिकामैर्नरैर्नित्य सुतयुक्तास्तु सर्व्वदा ॥
स्वस्रा स्नुषास्तथा पूज्या श्राद्धे चैवोत्सवेषु च ।
यस्मिन्नेव कुले नित्य कल्याणि तत्र वै ध्रुवम् ॥
इह कीर्त्तिर्भवेत् स्वर्गे परत्र द्विजसत्तम ॥
तिलराशि कृतो यावत् दिवाकरसम कृत ॥
वर्षान्ति गृह्यमानस्तु तिल एको भवेद् यदा ।
सोऽक्षय लभते तावत् ब्रह्मलोक सनातनम् ॥
शतगव्याः प्रमाणेन सहते रोमसञ्चये । •
विशीर्य्यते तु वा लोक वर्षे पूर्णे सुताप्रद ।
तावत् स्वर्गं लभेत् सोऽपि यावल्लोमस्य सञ्चयः ॥
महीदातुश्च गोदातु कन्यादातुस्त्रयो रथा ।
कन्यादात्रनुगा पश्चात्सम यान्ति त्रयो रथा ॥
कन्यादान दरिद्रस्य यो ददाति सुसत्कृते ।
पूर्व्व धर्म्ममवाप्नोति यथावत् विधिकल्पितम् ।
तस्मात्कन्या प्रयत्नेन दातव्या श्रेय इच्छता" ॥

इत्याद्ये वह्निपुराणे कन्यादाननामाध्याय ॥

कन्यापति, पु, (कन्याया पति ।) जामाता । इति जटाधर ॥

कन्यापाल, पु, (कन्याप्रधान पाल । पालाख्य-वणिगिति यावत् ।) पालवणिक् । शूद्रजातिविशेष । इति त्रिकाण्डशेष ॥

कन्याराम, पु, बुद्धभेद । इति त्रिकाण्डशेष ॥

कन्यिका, स्त्री, (कन्या एव स्वार्थे कन् टाप् अत-इत्वम् ।) कन्यका । इति शब्दरत्नावली ॥

कन्युष, क्ली, (कन+इन् । कन्या दीप्त्या कान्त्या तेजसा वा ओषति इव । कनि+उष्+क ।) हस्तपुच्छ । इति हारावली । हातेर पोँछा इति भाषा ॥

कप चलने । सौत्रधातुरय । इति कविकल्पद्रुम ॥ (भ्वा—पर—अक—सेट् ।) कपोल । इति दुर्गादास ॥ • •

कप इ ङ सञ्चलने । इति कविकल्पद्रुम ॥ (भ्वा-आत्म-अक-सेट्-इदित् ।) इ कर्म्मणि कम्प्यते ॥ ङ कम्पते वायुना वृक्ष । इति दुर्गादास ॥

कपट, पु, क्ली, (पटतीति पट । पट्+अच् । कस्य सतो ब्रह्मणोऽपि पट आवरक । यद्वा कप+अटन् ।) अयथार्थव्यवहार । प्रतारणा । तत्पर्य्याय । व्याज २ दम्भ ३ उपधि ४ छद्म ५ कैतवम् ६ । इत्यमर । १ । ७ । ३० ॥ कूटम् ७ कल्कम् ८ छलम् ९ मिषम् १० कैरवम् ११ । इति शब्दरत्नावली ॥ ("नरेन्द्रसिंह । कपट न वोढुं त्वमिहार्हसि" । इति महाभारते १ । ७४ । १०१ ॥ दनुपुत्त्र । यथा महाभारते १ । ६५ । २५ ।

"निचन्द्रश्च निकुम्भश्च कुपट कपटस्तथा ।
एते ख्याता दनोर्वंशे दानवा परिकीर्त्तिता" ॥)

कपटिक, त्रि, (कपट विद्यतेऽस्मिन् अस्त्यस्य वा । कपट+मत्वर्थे+ठन् ।) कपटविशिष्ट । इति शब्दरत्नावली ॥

कपटिनी, स्त्री, (कपटिन्+गौरादित्वात् ङीष् ।) चोडानामगन्धद्रव्यम् । इति राजनिर्घण्ट ॥

कपटी, स्त्री, (कप+अटन् । गौरादित्वात् ङीष् ।) परिमाणविशेष । इति शब्दरत्नावली । एक आँकाड् इति भाषा ॥

कपटी, [न्] त्रि, (कपटोऽस्त्यस्य अस्मिन् वा अस्त्यर्थे +इनि ।) कपटविशिष्ट । कपटधारी । इति शब्दरत्नावली ॥

कपटेश्वरी, स्त्री, (कमिव शुभ्र पट वसन तत्तुल्य फल इष्टे+प्रेरयतीति । कपट+ईश्+करप्+स्त्रिया ङीप् ।) श्वेतकण्टकारी । इति राजनिर्घण्ट ॥

कपर्द, पु, (पर्व्व पूरणे+सम्पदादित्वात् भावे क्विप् । "रात् लोप" । ६ । ४ । २१ । इति वलोपे पर् पूर्त्ति । केन सुखेन जलेन वा पर पूर्त्ति ददातीति । क+पर्+दा+सुपीति योगविभागात् क । कस्य गङ्गाजलस्य परा पूरणेन दापयति शुध्यति वा । क+पर्+दैप् शोधने "आतोऽनुपसर्गे क" । ३ । २ । ३ । इति क ।) शिवजटा । इत्यमर । १ । १ । ३७ ॥ (यथा काशिखण्डे । २९ । ४४ ।

"कमनीयजलाकम्रा कपर्द्दिसुकपर्दगा" ॥)

वराटक । इति मेदिनी ॥ ("पञ्चभि कपर्द्द पणिका नाम द्यूतमस्ति" । इति पा २ । १ । १० । सूत्रस्य सरला टीका ।)

कपर्दक, पु, (कपर्द+कन् ।) शिवस्य जटाजूट । वराटक । इति मेदिनी । कडि इति भाषा ॥ ('यद्यहमिम शक्तुशराव विक्रीय दश कपर्द्दकान् प्राप्नोमि" ॥ इति हितोपदेश ॥) शेषस्य पर्य्याय । वराट २ कपर्द ३ वराटिका ४ चराचर ५ चर ६ वर्ज्य ७ बालक्रीडक ८ । अस्य गुणा । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कर्णशूलव्रणगुल्मशूलनेत्रदोषनाशित्वञ्च ॥ तस्य भेदा । सुवर्णवर्णा सिंही १ धूम्रवर्णा व्याघ्री २ पीतपृष्ठासितोदरा मृगी ३ श्वेतवर्णा हंसी ४ नातिदीर्घिका विदन्ता ५ । इति राजनिर्घण्टः ॥ (वराटकशब्देऽस्य गुणादयो व्याख्येया ॥)

कपर्द्दी, [न्] पु, (कपर्द्दो जटाजूटोऽस्त्यस्य । इनिः ।) शिव । इत्यमर । १ । १ । ३४ ॥ (यथा, महाभारते १३ । १७ । ४५ ।

"अजश्च मृगरूपश्च गन्धधारी कपर्द्द्यपि" ॥
"कपर्द्दी कैलास करिवरमयोऽय कुलिशभृत्" ।

इति कालिदास ॥

यथा, ऋग्वेदे । १० । १०२ । ८ ।

"शुनमष्ट्रा व्यचरद् कपर्द्दी" ॥)

कपाट, त्रि, (क वायु मस्तक वा पाटयतीति । पट-गतौ+णिच्+कर्म्मणि उपपदे अण् ।) स्वनामख्यातद्वाराच्छादककाष्ठफलकविशेष । तत्पर्य्यायः । अररम् २ । इत्यमर । २ । २ । १७ ॥ कवाट ३ कपाटी ४ कवाटी ५ अररी ६ अररि ७ । इति तट्टीका ॥ द्वारकण्टकम् ८ असारम् ९ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । जतुगृहवासे । १४८ । १७ ।

"चक्रे च वेश्मनस्तस्य मध्ये नातिमहाबिलम् ।
कपाटयुक्तमज्ञात सम भूम्याश्च भारत" ॥

क शिर इत्युपलक्षणेन मनुष्यादीना ग्रहणमिति बोध्यम् । क वात वा पाटयति वारयति गृहद्वारदेशे आरणोतीत्यर्थ । मनुष्यवातादीना गति रुणद्धि वा । क+पट्+णिच्+अण् । यथा,

"द्वाराणि समुपावृत्य कपाटान्यवघट्टयन्" ।

इति रामायणम् ।

कपाल, पुं क्ली, (क मस्तकं पालयतीति। क + पालि + अण्। यद्वा कम्पते य। कपि चलने + "तमि विशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्" उणा १। ११७। इति कालन्। कपिनिर्देशाद् नलोपः।) शिरोऽस्थि। माथार खुलि इति भाषा। तत्पर्य्यायः। कर्परः इत्यमरः। २। ६। ६८॥ (यथाह याज्ञवल्क्यः। ३। ८०।
"द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा"॥) घटादेः खण्डम्। खापरा खोला इत्यादि भाषा॥ (यथा, भाषापरिच्छेदे। ११।
"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः। तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः"॥) समूहः। इति मेदिनी॥ (मृण्मयकर्परादिभिक्षापात्रम्। यथा, मनुः। ६। ४४।
"कपालं वृक्षमूलानि कुचेलमसहायता। समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्"॥) पुरोडाशः। यथा शतपथब्राह्मणे।
"कपालानि चोपदधातिपुरोडाशं चाधिश्रयति"॥) कुष्ठरोगविशेषः। इति हेमचन्द्रः॥ तस्य लक्षणम्। यथा, माधवकरः॥
"कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु। कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम्"॥

कपालनालिका, स्त्री, (कपालस्य सूत्रसम्बस्य नालिका।) तर्कुः। इति त्रिकाण्डशेषः॥ टेको इति भाषा॥

कपालभृत्, पुं, (कपालं भिक्षापात्रं ब्रह्मकपालं वा बिभर्त्ति धारयति। कपाल + भृ + क्विप् तुक् च।) शिवः। इत्यमरः। १। १। ३४॥

कपालिका, स्त्री, (कपाल + कन् + टाप्।) दन्तरोगविशेषः। तस्य लक्षणम्।
"कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा। कपालिकेति पठिता सदा दन्तविनाशिनी"॥ इति माधवकरः॥ तस्याश्चिकित्सा दन्तरोगशब्दे द्रष्टव्या॥ (घटकपालिका। यथा, विष्णुपुराणे। २। १२। ४१।
"मृद्वीघटत्व घटत कपालिका कपालिकाचूर्णरजस्ततोऽणुः। जनैः स्वकर्म्मस्तिमितात्मनिश्चयै- र्भाल्यते ब्रूहि किमत्र वस्तु"॥)

कपालिनी, स्त्री, (कपालोऽस्त्यस्याः। कपाल + इनि + स्त्रियां ङीप्।) दुर्गा। इति हेमचन्द्रः॥

कपाली, [न्] पुं, (कपालोऽस्त्यस्य। कपाल + इनि।) महादेवः। इति हलायुधः॥ स्वनामख्यातजातिविशेषः। स तु ब्राह्मणकन्यायां धीवराज्जातः। इति पराशरपद्धतिः॥ (त्रि, कपालविशिष्टः। यथा, कुमारे। ५। ७८।
"कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्त्तेरवधार्य्यते वपुः"॥
"नटी कपालिनी वेश्या कुलटा नापिताङ्गना"॥ इति च तन्त्रम्॥ योगिविशेषः। यथा, हठयोगदीपिकायाम्। १। ७।
"कपाली विन्दुनाथश्च काकचण्डीश्वराह्वय"॥)

कपि, पुं, (कम्पते य सदा। कपिचलने। "कुण्डिकम्प्योर्नलोपश्च" उणा। ४। १४३। इ प्रत्ययः।) वानरः। इत्यमरः। २। ५। ३॥ (यथा, मनुः। ११। १५४॥
"विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः। प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणञ्चरेत्"॥) सिह्लकः। मधुसूदनः। इति मेदिनी॥ (यथा, महाभारते १३। १४९। १०९।
"सनात्सनातनतमः कपिलः कपिरव्ययः"॥) धात्रिका। इति शब्दमाला॥ करञ्जभेदः। इति शब्दचन्द्रिका॥ (कादुदकात् पृथ्वीं पाति इति। वराहः। रक्तचन्दनम्। सिह्लकम्। तद्वर्णवति त्रि॥)

कपिकच्छुः, स्त्री, (कपीनामपि कच्छुर्यस्याः कण्डूहेतुत्वात्।) वृक्षविशेषः। आलकुशी इति भाषा। केवाँच इति हिन्दीभाषा। तत्पर्य्यायः। आत्मगुप्ता २ जडा ३ अव्यण्डा ४ कण्डूरा ५ प्रावृषायणी ६ ऋष्यप्रोक्ता ७ शूकशिम्बिः ८ मर्कटी ९। इत्यमरः। २। ४। ८७॥ स्वगुप्ता १० अजहा ११ कण्डुरा १२ प्रावृषायिणी १३ प्रावृषा १४ शूकशिम्बी १५ शूकशिम्बा १६ कपिकच्छू १७। इति भरतः॥ स्वयगुप्ता १८ महर्षभी १९ लाङ्गली २० कुण्डली २१ चण्डा २२ दुरभिग्रहा २३ कपिरोमफला २४ गुप्ता २५ दुष्पर्शा २६ अजडा २७ प्रावृषेण्या २८ वदरी २९ गुरु ३० आर्षभी ३१ शिम्बी ३२ वराहिका ३३ तीक्ष्णा ३४ रोमालुः ३५ वनशूकरी ३६ कौशरोमा ३७ रोमवल्ली ३८। शूकशिम्बि ३९ वानरी ४० कपीकच्छुः ४१ शुकपिण्डी ४२ शूकपिण्डी ४३ कपिप्रभा ४४। इति शब्दरत्नावली॥ अस्या गुणाः। स्वादुरसत्वम्। शुक्रवृद्धिकारित्वम्। वातक्षयपित्तास्रविक्षतव्रणनाशित्वम्। शीतलत्वञ्च। तस्या बीजगुणौ। वातशमनत्वम्। परमवाजीकरत्वञ्च। इति राजनिर्घण्टः॥ (शूकशिम्बीशब्देऽस्या विशेषश्च ज्ञेयः॥)

कपिकच्छुफलोपमा, स्त्री, (कपिकच्छुफलस्य उपमा यस्याः।) जतुकालता। इति राजनिर्घण्टः॥

कपिकच्छुरा, स्त्री, (कपिभ्यः कच्छुं कण्डूं राति ददाति। कपिकच्छु + रा + क।) कपिकच्छुः। इति शब्दमाला॥ (यथा, गारुडे १९७ अध्याये।
"शरपुङ्खशारिका पर्णी गुडूची कपिकच्छुरा। एषां दशपलान् भागान् क्वाथयेत् सलिलेऽमले"॥)

कपिकन्दुक, क्ली, (कपि + कदि + उक। अतोलोपः। कस्य शिरस कपिकन्दुकं अस्थि। यद्वा कपि परमात्मा विष्णुः कन्दति क्रीडति यत्र तत्तथं अस्थि।) शिरोऽस्थि। इति शब्दचन्द्रिका। माथार खुलि इति भाषा॥

कपिका, स्त्री, (कपिरिव कायति यद्वा वराहवत् नीलवर्णतया प्रकाशते शोभते वा। एकदेशसाम्यात् तथात्वम्।) नीलसिन्दुवारवृक्षः। इति राजनिर्घण्टः॥ (नीलसिन्दुवारशब्देऽस्या गुणादयो व्याख्येयाः॥)

कपिकोलि, पुं, (कपीनां प्रियः कोलिः।) कोलिविशेषः। इति रत्नमाला। शेयाकुल इति भाषा॥

कपिचूडा, स्त्री, (कपीनां चूडा इव। आम्रातकमुकुलस्य कपिचूडातुल्यत्वात्।) आम्रातकवृक्षः। इति राजनिर्घण्टः। (आम्रातकशब्दे विशेषोऽस्या ज्ञेयः॥)

कपिचूत, पुं, (कपीनां चूत इव अत्यन्तप्रियत्वात्।) आम्रातकवृक्षः। इति त्रिकाण्डशेषः॥

कपिज, पुं, (कपेः शिलायाः जायते। जन् + ड। कपितैलम्॥) तुरुष्कः। इति राजनिर्घण्टः। शिलारस इति भाषा॥

कपिजङ्घिका, स्त्री, (कपेः वानरस्य जङ्घा इव जङ्घा यस्याः। संज्ञायां कन्। कपिसदृशजङ्घायाः दैर्घ्यात् इत्येवम्।) तैलपिपीलिका। इति राजनिर्घण्टः॥

कपिञ्जल, पुं, (कपिरिव जवते वेगेन गच्छति यद्वा कम् श्रुतिसुखदं शब्दम् पिञ्जयति कपिवत् पिञ्जलो वा। ईषत्पिङ्गलवर्णो हरितालवर्णो वा। पृषोदरादित्वात् साधुः।) चातकपक्षी। तन्मांसगुणाः। लघुत्वम्। शीतलत्वम्। कफरक्तपित्तनाशित्वम्। अग्निदाहत्वञ्च। इति राजवल्लभः॥ पक्षिविशेषः। तत्पर्य्यायः। तेजलः २॥ तस्य मांस शुक्रवृद्धिकरम्। इति राजनिर्घण्टः॥ तित्तिरिपक्षी। इति त्रिकाण्डशेषः॥ (यथा,—
"कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः। कपिञ्जल इति ख्यातो लोके कपिशतित्तिरः"॥ इति भावप्रकाशः॥
"पित्तश्लेष्मविकारेषु सरक्तेषु कपिञ्जलाः। मन्दवातेषु शस्यन्ते शैत्यमाधुर्य्यलाघवात्"॥ इति चरकः। तथा सुश्रुतश्च।
"रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः। कफोत्थेषु च रोगेषु मन्दवाते च शस्यते"॥ ऋषिकुमारभेदः। अयन्तु श्वेतकेतुपुत्रस्य पुण्डरीकस्य बन्धुः। यथा कादम्बर्य्यां महाश्वेतोपाख्याने। "सखे! कपिञ्जल! किं मामन्यथा सम्भावयसि"॥)

कपितैल, क्ली, (कपिभिर्वानरैः शिलायां विदारणात् सम्पादितं यत् तैलम्।) तुरुष्कनामगन्धद्रव्यम्। इति भावप्रकाशः॥ (तथाचोक्तम्।
"सिह्लकस्तु तुरुष्कः स्याद्यतो यवनदेशजः। कपितैलञ्च सङ्ख्यातं तथा च कपिनामकः"॥)

कपित्थ, पुं, (कपि तिष्ठति फलप्रियत्वात् लोभात् वा यत्र। कपि + स्था + कः। पृषोदरादित्वात् सलोपे साधुः।) वृक्षविशेषः। कतवेल इति भाषा। तत्पर्य्यायः। दधित्थ २ ग्राही ३ मन्मथ ४ दधिफल ५ पुष्पफल ६ दन्तशठ ७। इत्यमरः २। ४। २१॥ कपित्थ ८। इति भरतः॥ मालूरः ९ मङ्गल्य १० नीलमल्लिका ११ ग्राहिफलः १२ चिरपाकी १३ ग्रन्थिफल १४ कुचफल १५ कपीष्ट १६ गन्धफल १७ दन्तफल १८ करभवल्लभ १९ काठिन्यफल २० करञ्जफलक २१। अस्यामफलगुणाः। अम्लत्वम्। उष्णत्वम्। कफनाशित्वम्। ग्राहित्वम्। वायुवर्द्धकत्वम्। कण्ठरोगजिह्वाधिकजडताकारित्वम्। त्रिदोषवर्द्धकत्वम्। विषहरत्वम्। रोचकत्वञ्च। तत्पक्वफलगुणाः। दोषत्रयहरत्वम्। मधुराम्लरसत्वम्।

गुरुत्वम्। श्वासवमिश्रमक्लमहरत्वम्। हिक्कापनोदत्वमत्वम्। ग्राहित्वम्। रुचिप्रदत्वम्। तत सर्व्वदा सेव्यम्। इति राजनिर्घण्टः ॥
"कपित्थमामं कण्ठघ्नं विषघ्नं ग्राहि वातलम्।
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्" ॥
इति राजवल्लभः ॥ (तथा च चरके ॥
"कपित्थं विषकण्ठघ्नमामं सग्राहि वातलम् ॥
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्।
परिपक्वं सदोषघ्नं विषघ्नं ग्राहि गुर्व्वपि" ॥
"कुशद्वीपेश्वरस्य राज्ञो ज्योतिष्मतस्सप्तकस्य सप्तपुत्त्राणामेकतमः। तद्वर्षमपि तन्नाम्ना ख्यातम्। तद्विवरणन्तु विष्णुपुराणे २ यांशे ४ अध्याये द्रष्टव्यम्")

कपित्थत्वक्, स्त्री, (कपित्थस्य मालूरस्य त्वगिव त्वग् यस्य।) एलवालुकम्। इति राजनिर्घण्टः ॥ (एलवालुकशब्देऽस्य विशेषगुणा ज्ञातव्याः ॥)

कपित्थपर्णी, स्त्री, (कपित्थस्य पर्णमिव पर्णं पत्त्रं यस्याः। कपित्थपर्ण+गौरादित्वात् ङीष्।) वृक्षविशेषः। कपित्थानीति ख्याता। तत्पर्य्यायः। विरजा २ सुरसा ३ चित्रपत्त्रिका ४। इति रत्नमाला ॥

कपित्थास्य, पु, (कपित्थवत् कपित्थफलवत् वर्त्तुलाकारं आस्यं मुखं यस्य।) वानरविशेषः। तत्पर्य्यायः। गोलाङ्गूलः २ दधिशोणः ३ नगाटनः ४। इति त्रिकाण्डशेषः ॥

कपिध्वज, पु, (कपिर्हनूमान् ध्वजे यस्य सः। प्रतिज्ञापालनपरतन्त्रेण महावीरेण हनूमताधिष्ठितध्वजत्वात् वानरलाञ्छनध्वजत्वाद्वा तथात्वम्।) अर्ज्जुनः। इति त्रिकाण्डशेषः ॥
(यथा गीतायाम्। १। २०।
"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः" ॥)

कपिनामा, [न्] पु, (कपेर्नामेव नाम यस्य।) सिह्लकः। इति रत्नमाला ॥ (स्वार्थे कन् प्रत्ययेनास्य पर्य्यायमुक्तं भावप्रकाशे यथा,—
"कपितैलञ्च सख्यातं तथा च कपिनामकः" ॥)

कपिपिप्पली, स्त्री, (कपिः कपिवत् रक्तवर्णा पिप्पलीव रक्तवर्णपिप्पलीतुल्येति यावत्।) रक्तापामार्गः। इति वैद्यकम् ॥ सूर्य्यावर्त्तवृक्षः। इति रत्नमाला ॥

कपिप्रभा, स्त्री, (कपिष्वपि प्रभा निजप्रभूतगुणप्रसारणं यस्याः। कपीनामपि कण्डूयनादस्याः तथात्वम्।) कपिकच्छुः। इति शब्दरत्नावली ॥

कपिप्रभु, पु, (कपीनां हनूमदादीनां प्रभुः नियन्ता।) रघुनाथः। इति शब्दरत्नावली ॥ (वानरराजः बाली सुग्रीवश्च ॥)

कपिप्रिय, पु, (कपीनां प्रियः।) आम्रातकः। इति राजनिर्घण्टः ॥ कपित्थः। इति जटाधरः ॥

कपिरथ, पु, (कपिर्हनूमान् रथ इव वहनकारी वाहनं वा यस्य।) श्रीरामः। इति शब्दरत्नावली ॥ (कपिः महावीरः हनूमान् रथे यस्य इति व्युत्पत्त्या कपिलाञ्छितध्वजः अर्ज्जुनः ॥)

कपिल पु, (कमु कान्तौ "कमे पश्च"। उणां १। ५६। इलच्। पश्चान्तादेशः।) मुनिविशेषः। स तु ज्ञानभक्तिसांख्ययोगप्रचारार्थमवतारः। कर्द्दमप्रजापतेरौरसाद्देवहूतिगर्भजातः। इति श्रीभागवतम् ॥ (यथा गीतायां १०। २६।
"गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलो मुनिः" ॥
सगरराजसन्ततिध्वंसकारी त्वसातलस्थः कपिलो मुनिः केषाञ्चिन्मते साङ्ख्ययोगप्रचारकर्त्ता न। अयन्तु अपरः कश्चित् स्वनामख्यातो मुनिः। एतदर्थे प्रमाणं यथा, रघुः ३। ५०।
"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः" ॥)
अग्निः। कुक्कुरः। इति हेमचन्द्रः ॥ सिह्लकनामगन्धद्रव्यम्। इति रत्नमाला ॥ पिङ्गलवर्णः। तद्युक्ते त्रि। इत्यमरः। १। ५। १६—१९ ॥ नीलपीतः। कपिलः। इति रभसः ॥ "कपिलो रोचनाभ्रविरित्यन्ये"। इति भरतः ॥ (यथा, महाभारते ३। ३। २४।
"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः" ॥
महादेवः। यथा तत्रैव १३। १७। ९७।
"कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः" ॥
विष्णुः। यथा तत्रैव १३। १४९। १०९।
"सनात्सनातनतमः कपिलः कपिरव्ययः" ॥
नागविशेषः। यथा, हरिवंशे ३। ११४।
"शङ्खश्च शङ्खपालश्च कपिलो वामनस्तथा" ॥
दानवभेदः। यथा तत्रैव ३। ८२।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा" ॥)

कपिलद्युति, पु, (कपिला रक्ता पिङ्गलवर्णा वा द्युतिः यस्य।) सूर्य्यः। इति शब्दचन्द्रिका ॥

कपिलद्राक्षा, स्त्री, (कपिला द्राक्षा।) द्राक्षाविशेषः। तत्पर्य्यायः। मृद्वीका २ गोस्तनी ३ कपिलफला ४ अमृतरसा ५ दीर्घफला ६ मधुवल्ली ७ मधुफला ८ मधुली ९ हरिता १० हारहारा ११ सुफला १२ मृद्वी १३ हिमोत्तरा १४ पथिका १५ हैमवती १६ शतवीर्य्या १७ काश्मरी १८। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। हृद्यत्वम्। मदहर्षदातृत्वम्। दाहमूर्च्छाज्वरश्वासतृष्णाहृल्लासनाशित्वञ्च। इति राजनिर्घण्टः ॥ (मृद्वीकाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कपिलद्रुमः, पु, (कपिलः कपिलवर्णो द्रुमः।) काक्षीनामसुगन्धिकाष्ठम्। इति शब्दचन्द्रिका ॥

कपिलधारा, स्त्री, (कपिलानां धारा इव दुग्धधारासदृशी शुद्धा धारा यस्याः। यद्वा कपिलानां दुग्धधाराभिः सम्भूता निर्म्मला धारा यस्याः। सञ्ज्ञायां ङ्यापोरिति पाणिनिसूत्रानुसारेण ह्रस्वः।) स्वर्णदी। तीर्थभेदः। इति हेमचन्द्रः ॥

कपिलशिंशपा, स्त्री, (कपिला रक्तपीतमिश्रितवर्णा शिंशपा।) शिंशपावृक्षविशेषः। तत्पर्य्यायः। कपिला २ पीता ३ सारिणी ४ कपिलाक्षी ५ भस्मगर्भा ६ कुशिंशपा ७। अस्या गुणाः। तिक्तत्वम्। शीतवीर्य्यत्वम्। आमयवातपित्तज्वरच्छर्द्दिहिक्कानाशित्वञ्च इति राजनिर्घण्टः ॥

कपिला, स्त्री, (कपिलो वर्णोऽस्त्यस्याः अर्श आद्यच्। टाप् च।) पुण्डरीकनामदिग्गजपत्नी। इत्यमरः। १। ३। ४ ॥ भस्मगर्भा शिंशपा। रेणुकानामगन्धद्रव्यम्। इत्यमरः। २। ६३—१२० ॥ (यथाह राजवल्लभः।
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा।
भस्मगन्धा पाण्डुपुत्त्री स्मृता कौन्ती हरेणुका" ॥
अस्या गुणादिकं रेणुकाशब्दे द्रष्टव्यम् ॥) गोविशेषः ॥ इति हेमचन्द्रः ॥ सा तु स्वर्णवर्णा। इति पुराणम् ॥ (यथा, महाभारते ३। ८४। ८२।
"कपिला सहवत्सा वै पर्व्वते विचरत्युत" ॥
दक्षकन्या। यथा, महाभारते १। ६५। १२ ॥
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः" ॥
कपिलवर्णयोगात्। अनुदात्तत्वाभावात् वर्णादिति न ङीप्।) गृहकन्या। शिंशपा। राजरीतिः इति राजनिर्घण्टः ॥ नदीविशेषः। यथा,—
"कज्जला चलशैलात्तु पूर्व्वस्मिन् शुम्भपर्व्वते।
शच्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः ॥
तत्पूर्व्वस्या महादेवी नदी कपिलसञ्ज्ञिता।
तस्यां स्नात्वा नरो गङ्गास्नानजं फलमाप्नुयात्" ॥
इति कालिकापुराणे ८२ अध्यायः ॥ (तीर्थविशेषः। यथा, महाभारते ३। ८३। ४५।
"कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः।
तत्र स्नात्वार्च्चयित्वा च पितॄन् स्वान् दैवतान्यपि।
कपिलानां सहस्रस्य फलं विन्दति मानवः" ॥
कपिलानां पयस्विनीधेनूनाम् इत्यर्थः ॥ पिङ्गलवर्णा। यथा, विष्णुपुराणे २यांशे। ४। ३१।
"कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्" ॥
कपिला कन्या नोपयन्तव्या यदुक्तं मनुना ३। ८।
"नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्" ॥)

कपिलाक्षी, स्त्री, (कपिलं अक्षि तद्वत् पुष्पं यस्याः।) मृगेर्व्वारुः। कपिलशिंशपा। इति राजनिर्घण्टः ॥

कपिलाश्व, पु, (कपिलाः कपिलवर्णाः अश्वाः यस्य।) इन्द्रः। इति त्रिकाण्डशेषः ॥

कपिलोमफला, स्त्री, (कपिलोमस्वपि फलति कण्डूप्रदानाय प्रभवति या।) कपिकच्छूः। इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्देऽस्या गुणा ज्ञेयाः ॥)

कपिलोमा, स्त्री, (कपिलोमवत् लोमशञ्जरी यस्याः।) रेणुका। इति राजनिर्घण्टः ॥ (विस्तृतिस्तु रेणुकाशब्दे द्रष्टव्या ॥)

कपिलोह, क्ली, (कपिरिव कपिवर्णतुल्यं लोहम्।) पित्तलम्। इति हेमचन्द्रः ॥ (पित्तलशब्देऽस्य गुणा ज्ञातव्याः ॥)

कपिल्लिका, स्त्री, (कपिवर्णा वल्लिका। पृषोदरादित्वात् वलोपे साधुः।) गजपिप्पली। इति रत्नमाला ॥ (गजपिप्पलीशब्देऽस्या गुणा ज्ञेयाः ॥)

कपिवक्त्र, (कपेर्वानरस्य वक्त्रमिव वक्त्रं यस्य भागिनेयपर्व्वतमुनिशापप्रभावात् मातुलस्य देवर्षेस्तथात्वम्।) नारदः। इति त्रिकाण्डशेषः ॥ (यथा हि नारदस्य कपिवक्त्रत्वं जातम् तदुच्यते।
पुरा किल मातुलभागिनेयौ द्वावृषिसत्तमौ नारदपर्व्वतौ मानुषेषु सम्प्रीत्या विहर्त्तुकामौ देवलोकादिहागतवन्तौ। आगत्य च सृञ्जय राजानमभ्येत्य तद्राज्ये ऊषतुः। आसीच्च

किञ्जानयोः समयः शुभमशुभं वा हृदि जातं सङ्कल्पं परस्परेण कथनीयमिति। अथ कदाचित् राजा तावभ्युपेत्य स्वसुतां तदाराधनाय नियोजितवान्। अथ गच्छति काले नारदस्तु कन्दर्पबाणवशगः राजदुहितरि मनो निदधे। धर्म्मविदपि नारदः व्रीडमानः तीव्रमिदं मनोभावं भागिनेयाय न शशंस। भागिनेयः पर्व्वतस्तु इङ्गितादिभिर्मातुलं कामार्त्तं वीक्ष्य समयभङ्गादतिक्रुद्धः "इयं नृपसुता तव भार्य्या भविष्यति त्वमपि वानरमूर्त्तिधरोऽत्र विचरिष्यसि" इति तं शशाप। एतच्छापात् खलु नारदो वानरमुख आसीत् इति पौराणिकी कथा अत्र अनुसन्धेया॥ विस्तृतिस्तु महाभारते शान्तिपर्व्वणि ३० अध्याये द्रष्टव्या॥)

कपिवल्ली, स्त्री, (कपिरिव कपिलोमवत्स्पर्शा वल्ली।) गजपिप्पली। इत्यमरः। १।५।१६॥

कपिशः पुं, (कपि वर्णविशेषः अस्त्यस्य कपिनामास्त्यस्ति वा लोमादित्वात् शः।) श्यावः। कृष्णपीतमिश्रितवर्णः। तद्युक्ते त्रि। इत्यमरः १।५।१६॥ (यथा, रघुः १२।२८।
"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः"॥
सर्व्ववर्णमयत्वात् शिवः। यथा, महाभारते १३। शिवसहस्रनामकीर्त्तने १७। ९७।
"कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः"॥)
सिह्लकनाम गन्धद्रव्यम्। इति मेदिनी॥

कपिशाञ्जन, पुं, (कपिशं अञ्जनं कपिशयुक्तं अञ्जनं वा यस्य। अञ्जनस्य कृष्णवर्णतया तस्य श्वेतवर्णत्वाच्च एवमुच्यते।) शिवः। इति त्रिकाण्डशेषः॥

कपिशापुत्त्रः पुं, (कपिशाया मदोन्मत्ताया पिशाच्या पुत्त्रः।) पिशाचः। इति शब्दमाला॥

कपिशी, स्त्री, (कपिशः इति वर्णवाचितया ङीष्।) माधवी। मदिरा। इति मेदिनी जटाधरश्च॥ (हलायुधमतेऽस्य क्लीवत्वमपि दृश्यते॥)

कपिशीका, स्त्री, (कपिश + स्वार्थे बाहुलकात् ईकन् टाप् च।) मदिरा। इति त्रिकाण्डशेषः॥

कपिशीर्षं, क्ली, (कपीनां प्रियस्थानं शीर्षं वृक्षप्राकारादीनां शिरोदेश एव कपिप्रियत्वात् प्रसिद्धं। शाकपार्थिवादित्वात् समासः।) प्राकाराग्रम्। तत्पर्य्यायः॥ खोडकशीर्षकम् २ कपिशीर्षम् ३। इति त्रिकाण्डशेषः॥

कपिशीर्षकं, क्ली, (कपीनां शीर्षवर्णवत् कायति प्रकाशते। कै + क।) हिङ्गुलम्। इति शब्दचन्द्रिका॥ (हिङ्गुलशब्देऽस्य गुणादयो व्याख्येयाः॥)

कपिकच्छुः, पुं, (कपिकच्छुरिति सञ्ज्ञाया वा दीर्घः।) कपिकच्छुः। इति शब्दरत्नावली॥

कपीज्यः, पुं, (कपिभिर्वानरैरतिप्रियत्वात् इज्यते पूज्यते। कपि + यज् + क्यप्।) क्षीरिकावृक्षः। इति जटाधरः॥ (रामचन्द्रः। इति व्युत्पत्त्यर्थः॥)

कपीतः, पुं, (कं जलं तत्तुल्यश्वेतवर्णं अपि इतः प्राप्तः अपेरल्लोपः। यद्वा कपिभिरितः प्रियत्वेन प्राप्तः।) श्वेतवृक्षादयः। इति रत्नमाला॥

कपीतनः, पुं, (कपीनां ईं लक्ष्मीं तनोति विस्तारयतीति। कपि + ई + तन् + पचाद्यच्। कपीनां कपेर्वर्णस्य वा तनः। अन्येषामपीति। ६।३।१३७। दीर्घः।) आम्रातकवृक्षः। गर्द्दभाण्डवृक्षः। शिरीषवृक्षः। इत्यमरः। २।४।२७॥ अश्वत्थवृक्षः। इति मेदिनी। गुवाकवृक्षः। बिल्ववृक्षः। इति शब्दरत्नावली॥ (आम्रातकशब्दे शिरीषशब्दे अश्वत्थशब्दे बिल्वशब्दे चास्य गुणादयो ज्ञातव्याः॥)

कपीन्द्रः, पुं, (कपिश्चासौ इन्द्रश्चेति कपिरिन्द्र इव इति वा।) हनूमान्। इति शब्दरत्नावली॥ (कपीनां वानराणामिन्द्रः। सुग्रीवः। वाली। इति रामायणम्॥ विष्णुः। यथा, महाभारते। १३। विष्णुसहस्रनामकीर्त्तने १४९। ६६।
"शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः"॥)

कपीष्टः, पुं, (कपीनां इष्टः प्रियः।) राजादनीवृक्षः। कपित्थः। इति राजनिर्घण्टः॥ (कपित्थशब्देऽस्य गुणादय उक्ताः॥)

कपोतः, पुं, (को वायुः पोतः नौरिवास्य। यद्वा कवर्णे + "कवेरोतच् पश्च"। उणा। १।६३। इति ओतच् + वस्य पश्च।) गृहकपोतः। पायरा इति भाषा। तत्पर्य्यायः। कलरवः २ पारावतः ३। इत्यमरः। २।५।१४॥ पारापतः ४ छेद्यः ५ रक्तलोचनः ६। इति रभसः॥ गृहकुक्कुटः ७। यथा,—
"मार्ज्जाररक्षिते दुःखं यादृशं गृहकुक्कुटे"।
इति प्रयोगात् इति सारसुन्दरी॥
(यथा, रामायणे। ५।९१।४।
"श्रूयते हि कपोतेन शत्रुः शरणमागतः।
अर्च्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः"॥)
वनकपोतः। घुघु इति भाषा। तत्पर्य्यायः। चित्रकण्ठः २। इति मेदिनी॥ कोकदेवः ३ धूसरः ४ धूम्रलोचनः ५ दहनः ६ अग्निसहायः ७ भीषणः ८ गृहनाशनः ९। तन्मांसगुणाः। वीर्य्यबलवृद्धिकारित्वम्। स्वादुत्वम्। कफपित्तास्रनाशित्वञ्च। इति राजनिर्घण्टः॥ मधुरत्वम्। शीतलत्वम्। कषायत्वम्। वातपित्तनाशित्वम्। सार्षपतैलभर्जनेन विरुद्धत्वञ्च। इति राजवल्लभः॥
(अस्य गुणान्तरं यथा,—
"पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः।
संग्राही शीतलस्तज्ज्ञैः कथितो वीर्य्यवर्द्धनः"॥
इति भावप्रकाशः॥
"कपोतो बृंहणो वल्यो वातपित्तविनाशनः।
तन्मेषः शुक्रजननो हितो वृष्यो रुचिप्रदः"॥
इति हारीतः॥ कपोतविशेषस्य गुणाः॥ यथा,—
"गुरुः सलवणः काणकपोतः सर्व्वदोषकृत्"॥
इति वाभटः॥
"कषायमधुरः शीतो रक्तपित्तनिवर्हणः।
विपाके मधुरश्चैव कपोतो गृहवासिनः॥ १॥
तेभ्यो लघुतराः किञ्चित् कपोता वनवासिनः।
शीताः संग्राहिणश्चैव स्वल्पं मूत्रकराश्च ते"॥ २॥
इति चरकः॥
"सर्व्वदोषहरस्तेषां भेदाशी मलदूषकः।
कषायस्वादुलवणो गुरुः काणकपोतकः"॥
इति सुश्रुतः॥)

कपोतकं, क्ली, (कपोत इव कपोतवर्णवत्कायति प्रकाशते। कै + क।) सौवीराञ्जनम्। इति राजनिर्घण्टः॥

कपोतचरणा, स्त्री, (कपोतचरण इव चरणाकारोऽस्त्यस्याः।) नलीनामगन्धद्रव्यम्। इति जटाधरः॥

कपोतपालिका, स्त्री, (पालयति इति। पाल + ण्वुल्। कपोतानां पालिका कपोतान् पालयति इति वा कर्म्मणि।) विटङ्कः। सौधादिप्रान्तकाष्ठादिरचितपक्षिस्थानम्। इत्यमरः। २।२।१५॥ पायराद खोप इति भाषा॥

कपोतपाली, स्त्री, (कपोतान् पालयति इति। पाल कर्म्मणि अण् ङीप् च। केचित्तु पाल + अच् गौरादित्वात् ङीष्।) कपोतपालिका। इति हलायुधः॥ (यथा माघे ३।५१।
"चिक्रंसया कृत्रिमपत्रिपङ्क्तेः
कपोतपालीषु निकेतनानाम्"॥)

कपोतवङ्का, स्त्री, (कपोतो वङ्क्यते प्रतार्य्यतेऽनया। वकि + करणे घञ् कुत्वं टाप् च।) ब्राह्मीवृक्षः। इति राजनिर्घण्टः॥ (यथा सुश्रुते।
"कपोतवङ्कामूलं हि पिबेदम्लसुरादिभिः"॥)

कपोतवर्णी, स्त्री, (कपोतस्य वर्ण इव वर्णो यस्याः गौरादित्वात् ङीष्।) सूक्ष्मैला। इति राजनिर्घण्टः॥ (सूक्ष्मैलाशब्देऽस्या विशेषो ज्ञेयः॥)

कपोतवाणा, स्त्री, (कपोतपाद इव ये वाणाः तदाकारोऽस्याः।) नलिकानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कपोतसारं, क्ली, (कपोतः कपोतवर्ण इव सारः कृष्णवर्णो यत्र।) स्रोतोऽञ्जनम्। इति राजनिर्घण्टः॥

कपोताङ्घ्रिः, स्त्री, (कपोतस्य अङ्घ्रिरिव।) नलीनामगन्धद्रव्यम्। इत्यमरः। २।४।१२१॥

कपोताभः, पुं, (कपोतस्य आभा इव आभाऽस्य।) कपोतवर्णः। इति हेमचन्द्रः॥ (मूषिकभेदः।
"मूषिकस्य कपोताभस्यैवाष्टादश स्मृताः"।
इति सुश्रुतः॥)

कपोतारिः, पुं, (कपोतानां अरिः शत्रुः।) श्येनपक्षी। इति शब्दरत्नावली॥

कपोलः, पुं, (कम्पते "कपिगडि कटिपटिभ्य ओलच्"। उणा १।६७। इति ओलच् कपि इति निर्द्देशात् नलोपः। कं सुखं पोलतीति वा पुलमहत्त्वे कर्म्मणि अण्।) वक्त्रतिर्य्यक्सन्निधिभागः। गाल इति भाषा। तत्पर्य्यायः। गण्डः २। इत्यमरः। २।६।९०॥ गल्लः ३। इति राजनिर्घण्टः॥ (यथा रघुः। ४।६८।
"तत्र हूणावरोधानां भर्त्तृषु व्यक्तविक्रमम्।
कपोलपाटलादेशि बभूव रघुचेष्टितम्"॥)

कफः, पुं, (केन जलेन फलति इति। फल निष्पत्तौ "अन्येष्वपि" ३।२।१०१। इति डः। के शिरसि फलति वा प्राग्वत्।) शरीरस्थधातुविशेषः। तत्पर्य्यायः। श्लेष्मा २ सघातः ३ सौम्यधातुः ४

घन ५ बली ६ । अस्य गुणाः । गुरुत्वम् । सन्धिविश्लेषकारित्वम् । मृदुत्वम् । प्रमर्द्दनत्वम् । स्निग्धत्वम् । कटुत्वम् । शीतत्वम् । जडताकारित्वम् । शुक्लत्वम् । शीते वसन्ते निशामुखे पूर्व्वाह्णे भुक्ते च प्रकोपगत्वम् । इति राजनिर्घण्टः ॥ * ॥ अस्य प्रकोपहेतुः । "गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मणः सम्प्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते" ॥ * ॥ तस्य कर्म्माणि । "स्तैमित्यं मधुरास्यता शिशिरता शौक्ल्यं प्रसेको मलप्राचुर्य्यं स्थिरता रसस्य लवणः कण्डूरतिस्वप्नता । आलस्यं चिरकारिता कठिनता शोथारुचिस्निग्धता तन्द्रात्यल्पप्रदेहकासगुरुता एताः कफोत्था रुजः" ॥ * ॥

अस्य प्रशमताकारणम् ।

"गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः ।
श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः" ॥
"रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनस्त्रीसेवाध्वनियुद्धजागरजलक्रीडाप्रदाघातनम् ।
धूमाः शृङ्गशिरोविरेकवमनस्वेदोपनाहादिकं पानाहारविहारभेषजमिदं श्लेष्मामगमुग्रं जयेत्" ॥

स च पञ्चविधो यथा,—

"अवलम्बक इत्येकः क्लेदकः श्लेषकोऽपरः ।
बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः" ॥ * ॥

एतेषां लक्षणानि यथा,—

"कफधाम्नान्तु शेषाणां यत्करोत्यवलम्बनम् ।
ततोऽवलम्बकाख्योऽसौ श्लेष्मा प्राप्नोत्युरः स्थितः ॥ १ ॥
आमाशयाश्रितः सोऽन्नक्लेदनात् क्लेदकः स्मृतः ॥ २ ॥
श्लेषकः श्लेषणात् सन्धेः स च सन्धौ व्यवस्थितः ॥ ३ ॥
रसनावस्थितस्त्वेष बोधको रसबोधनात् ॥ ४ ॥
शिरसि प्रस्थितस्त्वासौ तर्पको नेत्रतर्पणात् ॥ ५ ॥ * ॥

अस्य स्थानानि ।

"उरःकण्ठशिरःक्लोमपर्व्वाण्यामाशयो रसः ।
मेदो घ्राणञ्च जिह्वा च कफस्थानमुरः परम्" ॥ * ॥

(सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्य्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मणानुग्रहं करोति । इति तु प्रकारभेदेनास्य कार्य्यमुक्तम् ॥ अतः परमस्य क्षीणलक्षणमाह ।

श्लेष्मक्षये रूक्षतान्तर्दाह आमाशयेतराशयशिरसां शून्यता सन्धिशैथिल्यं तृष्णा दौर्ब्बल्यं प्रजागरणञ्च । तत्र स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः ॥ अतः परमस्यातिवृद्धौ यल्लक्षणं तदाह ॥

श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्य्यं गौरवमवसादस्तन्द्रानिद्रासन्ध्यस्थिविश्लेषश्च ॥)

तत्प्रकृतिकस्य लक्षणम् ।

"गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः ।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः" ॥ * ॥

(अपरञ्च यथाह हारीतः ।

"सुस्निग्धवर्णः सितनेत्रदीप्तः
श्यामः सुकेशो न च दीर्घरोमा ।
गम्भीरशब्दः श्रुतशास्त्रनिद्रा-
तन्द्राप्रियस्तिक्तकटूष्णभोजी ॥
सुमांरुषः स्निग्धरसप्रियश्च
संगीतवाद्योऽतिसहिष्णुचित्तः ।
व्यायामशीलो रतलालसोऽसौ
भवेत् कफात्मप्रकृतिर्मनुष्यः ॥
शुक्लाक्षः स्थिरकुटिलातिनीलकेशो
लक्ष्मीवान् जलदमृदङ्गसिंहघोषः ।
सुप्तः सन् सकमलहंसचक्रवाकान्
सम्पश्येदपि च जलाशयान् मनोज्ञान् ॥
रक्तान्तनेत्रः सुविभक्तगात्रः
स्निग्धच्छविः सत्त्वगुणोपपन्नः ।
क्लेशक्षमो मानयिता गुरूणां
ज्ञेयो बलासप्रकृतिर्मनुष्यः ॥
दृढशास्त्रमतिः स्थिरमित्रधनः
परिगण्य चिरात् प्रददाति बहु ।
परिनिश्चितवाक्यपदः सततं
गुरुमानकरश्च भवेत् स सदा ॥
ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः ।
तार्क्ष्यहंससमानूकाः श्लेष्मप्रकृतयो नराः" ॥

इति सुश्रुतश्च ॥

श्लेष्मस्थानान्यत ऊर्द्ध्वं वक्ष्यामः । तत्रामाशयः पित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्ध्वगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्व्विधस्याहारस्याधारः । स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखजरश्च भवति ।

"माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च ।
आमाशये सम्भवति श्लेष्मा मधुरशीतलः" ॥

स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति । उरस्थस्त्रिकसन्धारणमात्मवीर्य्येणान्नरससहितेन हृदयावलम्बनं करोति । जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते । शिरस्थः स्नेहसन्तर्पणाधिकृतत्वादिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति । सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिसंश्लेषात् सर्व्वसन्ध्यनुग्रहं करोति ॥ भवति चात्र ।

"श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च ।
मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः" ॥)

तस्याविकृतस्य कर्म्म ।

"स्नेहो बन्धः स्थिरत्वञ्च गौरवं वृषता बलम् ।
क्षमा धृतिरलोभश्च कफकर्म्माविकारजम्" ॥ * ॥

इति सुखबोधः ॥ फेन । यथा अब्धिकफ इत्यादि ॥

कफकूर्च्चिका, स्त्री, (कफं कूर्चति विकृतं करोतीति । कफ + कूर्च + विकारे + ण्वुल् + टाप् इत्वञ्च ।) लाला । लाल् थुतु सिकनि इत्यादि भाषा ॥ तत्पर्य्यायः । सृणीका २ स्यन्दिनी ३ लाला ४ आस्यासवः ५ । इति हेमचन्द्रः ॥

कफघ्नी, स्त्री, (कफं कफविकृतिं हन्तीति । कफ + हन् + टक् + ङीप् ।) क्षुपभेदः । इति राजनिर्घण्टः ॥ (यथा, राजनिर्घण्टे शताह्वादिवर्गे चतुर्थः ।

"श्रीहस्तशुर्विंषघ्नी च कफघ्नी चापराजिता" ॥)

कफणि, पुं, स्त्री, (केन सुखेन फणति अनायासेन सङ्कोचविकोचनत्वं प्राप्नोति स्फुरति वा । फण गतौ, स्फुर सञ्चलने इति वा धातोः इन् पृषोदरादित्वात् साधुः ।) कफोणिः । इति हेमचन्द्रः ॥

कफवर्द्धन, पुं, (कफं कफजनितं विकारं वर्द्धयतीति । कफ + वृध् + णिच् + ल्यु ।) पिण्डीतगरवृक्षः । इति त्रिकाण्डशेषः ॥ श्लेष्मवृद्धिकारके त्रि । इति वैद्यकम् ॥ (दिवास्वप्नाव्यायामालसमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवनैषधोत्कटमाषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाबिसमृणालकशेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते ॥

"सशीतैः शीतकाले च वसन्ते च विशेषतः ।
पूर्व्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति" ॥

इति सुश्रुतः ॥)

कफविरोधि, क्ली, (कफं विशेषेण रुणद्धीति । कफ + वि + रुध् + णिनि ।) मरिचम् । इति राजनिर्घण्टः ॥ (श्लेष्मनाशके, त्रि । मरिचशब्देऽस्य गुणा ज्ञेयाः ॥)

कफान्तक, पुं, (कफस्य अन्तकः नाशकः । यद्वा । कफम् अन्तयतीति । कफ + अन्त + करोत्यर्थे णिच् + ण्वुल् ।) वर्व्वुरवृक्षः । इति राजनिर्घण्टः ॥ (अस्य गुणादिकं वर्व्वूरशब्दे द्रष्टव्यम् ॥ कफनाशके, त्रि ।)

कफारि पुं, (कफस्य अरिः दमयितेत्यर्थः ।) शुण्ठी । इति राजनिर्घण्टः ॥ (श्लेष्मनाशके, त्रि । शुण्ठीशब्देऽस्य विशेषो ज्ञेयः ॥)

कफी, [न्] त्रि, (कफोऽस्त्यस्य । कफ + अस्त्यर्थे । "द्वन्द्वोपतापेति" । ५ । २ । १२८ । इनिः ।) श्लेष्मयुक्तः । तत्पर्य्यायः । श्लेष्मलः २ श्लेष्मणः ३ । इत्यमरः । २ । ६ । ६० ॥ गजे पुं । इति सारस्वतः ॥

कफेलू, त्रि, (कफं लाति आदत्ते इति । कफ + ला आदाने + "अन्दू–दृन्फू–जम्बू–कम्बू–कफेलू–कर्कन्धू–दिधिषू" । उणा १ । ९५ । इति कूप्रत्ययान्तो निपातितः ।) कफयुक्तः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पुं, श्लेष्मातकवृक्षः ।

"कफेलूः श्लेष्मातकतरौ पुंसीति रूपमञ्जरी" ।

इति "उज्ज्वलदत्तधृतवचनात्" । १ । ९५ ॥)

कफोणि, पुं, (कं सुखं स्फोरयति । स्फुर स्फुरणे सञ्चलने च ण्यन्तात् अच् इः । अथवा केन सुखेन फणति स्फुरतीति वा । स्फुर, फण वा + इन् उभयतः पृषोदरादित्वात् साधुः ।) भुजमध्यग्रन्थिः । कनुइ इति भाषा ॥ तत्पर्य्यायः । कूर्परः २ । इत्यमरः । २ । ६ । ८० ॥ (कूर्परशब्देऽस्य विशेषो ज्ञेयः ॥)

कब, ऋ ङ स्तुतौ । वर्णे । इति कविकल्पद्रुमः । (भ्वा-आत्म-सक-सेट्-ऋदित् ।) वर्णः शुक्लादिक्रिया । ऋ अचकाबत् । ङ कबते कविर्विष्णुम् । कबते प्रतिमां चित्रकारः । इति दुर्गादासः ॥

कबन्धं, क्ली, (कस्य प्राणवायोः बन्धः आश्रयः । जलपानमेव प्राणधारणकारणम् । कदापि प्राणस्थितिः जलं विना नैव स्यात् । यथा, श्रुतिः ।

"पञ्चदशाहानि साऽशी काममप पिबापोमय प्राणो न पिबतस्ते विच्छेत्स्यते" ।) जलम् । इत्यमर । १ । १० । ४ ॥ (यथा, ऋग्वेदे ५ । ८५ । ३ ॥
"नीचीनवार वरुण कबन्धं प्रससर्ज रोदसी अन्तरीक्षम्" ॥)

कबन्ध पु, (कं सुख बध्यते रुध्यतेऽस्मात् । क + बन्ध + घञ् ।) राहु । रक्षोविशेष । (यथा, रघु १२ । ५७ ।
"बधनिर्द्धूतशापस्य कबन्धस्योपदेशत ।
मुमूर्च्छ सख्य रामस्य समानव्यसने हरौ" ॥
अस्य विवरणादिकमुच्यते । पुरा किल दनुनामा कश्चिद्दानव उग्रेण तपसा पितामहं सन्तोषयन् दीर्घमायु प्राप्तवान् । प्राप्तदीर्घायुरतिगर्व्व सुरराजेन सह योद्धुं सुरपुरमगच्छत् । शक्रस्तु रणभूमिगत प्रमुक्तेन वज्रेणास्य सक्थिनी शिरश्च शरीरमध्ये प्रावेशयत् । न त्वसौ पितामहवरप्रभावतया प्राणान् मुमोच । अथ स एव विहतविग्रहोऽनाहारादितया क्लिश्यमानो बहुधा याचमान सुरपति प्रसादयामास । इन्द्रस्तु प्रसन्नो योजनमायतौ बाहू तीक्ष्णदंष्ट्रञ्च वदनमस्मै वक्षसि प्रादात् । तदा प्रभृत्येवासौ वने विचरन् सुदीर्घबाहुभ्या वनजादीन् प्राणिनो गृहीत्वा भक्षयन् विचचार । अथ गच्छति काले दशरथात्मजो राम ससीतालक्ष्मण पितृसत्यपालनार्थं वने भ्रमन्नमुना कबन्धेन सम्प्राप्त । प्रभूतबलशालिनानेन गृहीतोऽपि राम स्वखड्गेनैन व्यापादयामास । अथ रामहस्तनाशात् प्राप्तशापमोचनसमयोऽय कबन्ध विकृतरूप विहाय दिव्यमूर्त्तिधर स्वर्लोक ययौ । इति वाल्मीकियरामायणमतम् । महाभारतमते तु अय विश्वावसुनामा गन्धर्व्व आसीत् ब्राह्मणशापेन राक्षसयोनि प्राप्तवान् । यदुक्त तत्रैव ३ । २७८ । ४२ ।
"तस्याचचक्षे गन्धर्व्वो विश्वावसुरहं नृप ।
प्राप्तो ब्राह्मणशापेन योनि राक्षससेविताम्" ॥)
उदरम् । इति मेदिनी ॥ (केन वायुना बध्यते संबध्यते वा । धूमकेतु । प्रवहवायुनोपचीयमानत्वात् तथात्व तस्य च लोकसुखनाशकत्व प्रसिद्धम् ॥)

कबन्ध, पु, क्ली, (केन प्राणवायुना पुनर्बध्यते सम्बध्यते मस्तकहीनस्यापि दैवेन प्राणावेशात् जीवतो नरस्येव क्रियाकारित्वशक्तित्वात्तथात्वम् । क + बन्ध + घञ् ।) क्रियायुक्तापमूर्द्धकलेवरम् । इत्यमर २ । ८ । ११८ ॥ यथा, मार्कण्डेये ८२ । ६३ ।
"कबन्धाश्छिन्नशिरस खड्गशक्त्यृष्टिपाणय" ॥
अपि च । "नागानामयुत तुरङ्गनियुत सार्द्ध रथाना शत पत्तीना दशकोटयो निपतिता एक कबन्धो रणे । तादृक्कोटिकबन्धनर्त्तनविधौ खेलञ्चलत् खे शिरस्तेषा कोटिनिपातने रघुपते कोदण्डघण्टारव" ॥ इति प्राचीना ॥

कबित्थ, पु, (कपयस्तिष्ठन्त्यत्र । "सुपिस्थ" इति क । पृषोदरादित्वात् साधु ।) कपित्थवृक्ष । इत्यमरटीका ॥ कणित्थ । इत्यमरमालायां पाठ ॥

कबिल, पु, (कद्वर्णे + इलच् ।) कपिलवर्ण । इति भरतो द्विरूपकोषश्च ॥

कम, उ क ङ स्पृहि । इति कविकल्पद्रुमः ॥ (चुरा-आत्मं-सकं-सेट् ।) उ कमित्वा कान्त्वा । क ङ कामयते । अन्यैर्भ्वादौ पठ्यमानस्याप्यस्य कित्करण कम ऋत इत्यादिना विहितस्य ञिङो ज्ञापनार्थं तेन अरे ञिङोऽप्राप्तिपक्षे अचकमत । चकमे कमिता इत्यादि सिद्धम् । इति दुर्गादास ॥

कम, उ ङ कान्तौ । इति मुग्धबोधव्याकरणम् । (भ्वा-आत्म-अक-सेट् ॥)

कम्, व्य (कमुकान्तौ णिङभावे विच् ।) जलम् । शिर । सुखम् । मङ्गलम् । पादपूरणम् । इति शब्दरत्नावली ॥ (यथा ऋग्वेदे । १ । १२३ । ११ ॥
"सुसंकाशा मातृमृष्टेव योषा विस्तन्वं कृणुषे दृशे कम्" । "अत्र कमिति पादपूरणे अथवा कमिति सुखवचनं सुख यथा भवतीति" भाष्यम् ॥)

कमठ, क्ली, (कम + 'कमेरठ" । उणा १ । १०२ । इति + अठ ।) भाण्डभेद । तत्तु मुनीना जलपात्रम् । इति मेदिनी ॥

कमठ, पु, (के जले मठति वसतीति । क + मठ वासे + पचाद्यच् ।) कच्छप । इत्यमर । १ । १० । २१ ॥ (यथा महानाटके ।
"कमठपृष्ठकठोरमिद धनु-
र्मधुरमूर्त्तिरसौ रघुनन्दन" ॥
मकठात्कामठ मास रामठेन समन्वितम् ।
यदि सर्पि समायुक्त का सुधा वसुधातले" ॥
इत्युद्भट ॥ * ॥ गुणादयोऽस्य कच्छपशब्दे ज्ञातव्या ॥ भगवद्विष्णोर्द्वितीयावतार । यथा हठयोगदीपिकायाम् । १ । १० ।
"अशेषतापतप्ताना समाश्रयमठो हठ ।
अशेषयोगयुक्तानामाधारकमठो हठ" ॥)
वश । इति शब्दरत्नावली ॥ दैत्यविशेष । स्रुनिभाजनम् । इति हेमचन्द्र ॥ शल्लकी इति धरणी ॥ (नृपविशेष । यथा महाभारते । २ । ४ । २२ ।
"कक्षसेन क्षितिपति क्षेमकश्चापराजित ।
काम्बोजराज कमठ कम्पनश्च महाबल" ॥)

कमठी, स्त्री, (कमठ + पुयोगादिति जातेरिति वा ङीष् प्रत्यय ।) कच्छपी । इत्यमर । १ । १० । २४ ॥ (यथा शान्तिशतके ४ । १३ ।
"इदानीमह्नाक जठरकमठीपृष्ठकठिना-
मनोवृत्तिस्तत् किं व्यसनिविमुखेव क्षपयसि" ॥)

कमण्डलु, पु, क्ली, (कस्य प्रजापते जलस्य वा मण्ड सार तं लाति आदत्ते । ला + मितद्र्वादित्वात् डु ।) सन्न्यासिना मृत्काष्ठादिमयपात्रम् । तत्पर्य्याय । कुण्डी २ । इत्यमर ७ । २ । ४६ ॥ करक ३ । (यथा मनु २ । ६४ ॥
"मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवित्" ॥)
प्लक्षवृक्ष । इति मेदिनी ॥

कमण्डलुतरु, पु, (कमण्डल्वाकारफलः ।) प्लक्षवृक्ष । इति रत्नमाला ॥

कमन, त्रि, (कम + णिङभावे युच् । अनुदात्तश्चेति कमेर्युच् वा ।) कामुकम् । अभिरूपम् । इति मेदिनी ॥ (यथा भागवते १ । ९ । ३३ ।
"त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने" ॥)

कमन, पु, (काम्यतेऽनेन । कमे + करणे + युच् ।) काम । अशोकवृक्ष । इति मेदिनी । ब्रह्मा ॥ इति हेमचन्द्र ॥

कमनच्छद, पु, (कमन कमनीय छद पक्षो यस्य ।) कङ्कपक्षी । इति हेमचन्द्र ॥

कमनीय, त्रि, (काम्यते यत् कमे कर्म्मणि अनीयर् ।) कामनायोग्यम् । तत्पर्य्याय । चारु २ हारि ३ रुचिरम् ४ मनोहरम् ५ वल्गु ६ कान्तम् ७ अभिरामम् ८ बन्धुरम् ९ वामम् १० रुच्यम् ११ सुषमम् १२ शोभनम् १३ मञ्जु १४ मञ्जुलम् १५ मनोरमम् १६ साधु १७ रम्यम् १८ मनोज्ञम् १९ पेशलम् २० हृद्यम् २१ सुन्दरम् २२ काम्यम् २३ कम्रम् २४ सौम्यम् २५ मधुरम् २६ प्रियम् २७ । इति हेमचन्द्र ॥ (यथा, कुमारे १ । ३७ ।
"आरोपित यद्गिरिशेन पश्चात्
अनन्यनारीकमनीयमङ्कम्" ॥)

कमन्ध, क्ली, (कम् शिर अन्ध शून्यं यस्य ।) कबन्धम् । (कमं कान्ति जीवन वा दधाति विदधातीति । कम + धा + ड । पृषोदरादित्वात् साधु ।) जलम् । इत्यमरटीकाया रायमुकुट ॥

कमर, त्रि, (कामयते इति । कम् + "अर्त्ति-कमिभ्रमीति" उणा ३ । १३२ । अरश्चित् ।) कामी । इत्युणादिकोष ॥

कमल, क्ली, (कमे णिङ् भावे वृषादित्वात् कलच् । कम् जल अलति अलङ्करोति वा । अल् + अच् । अन्तर्णिजन्तो वा ।) जलजपुष्पविशेष । तत्पर्य्याय । पद्मम् २ पाथोजम् ३ नलम् ४ नलिनम् ५ अम्भोजम् ६ अम्बुजन्म ७ अम्बुजम् ८ श्री ९ अम्बुरुहम् १० अम्बुपद्मम् ११ सुजलम् १२ अम्भोरुहम् १३ सारसम् १४ पङ्कजम् १५ सरसीरुहम् १६ कुटपम् १७ पाथोरुहम् १८ पुष्करम् १९ वार्जम् २० तामरसम् २१ कुशेशयम् २२ कञ्जम् २३ कजम् २४ अरविन्दम् २५ शतपत्रम् २६ विसकुसुमम् २७ सहस्रपत्रम् २८ महोत्पलम् २९ वारिरुहम् ३० सरसिजम् ३१ सलिलजम् ३२ पङ्केरुहम् ३३ राजीवम् ३४ । (यथा रघु । ३ । ३६ ।
"अगाच्छदशेन गुणाभिलाषिणी
नवावतार कमलादिवोत्पलम्" ॥)
अस्य गुणा शीतलत्वम् । स्वादुत्वम् । रक्तपित्तभ्रमार्त्तिनाशित्वम् । सुगन्धित्वम् । भ्रान्तिसन्तापशान्तिपरमतृप्तिकारित्वञ्च । इति राजनिर्घण्ट ॥
(तथाच भावप्रकाश ।
"कमल शीतल वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥
विशेषत सित पद्म पुण्डरीकमिति स्मृतम् ।
रक्त कोकनद ज्ञेय नीलमिन्दीवर स्मृतम् ॥
धवल कमल शीतं मधुर कफपित्तजित् ।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्" ॥)

जलम् । ताम्रम् । क्लोम । औषधम् । इति मेदिनी ॥ सारसपक्षी । इत्यमरः ।२।१०।४० ॥

कमलः, पुं, (कमे + कलच् । यद्वा को वायुः तस्य अम गतिः त लाति आदत्ते । क + अम + ला + कः ।) मृगविशेषः । इति मेदिनी ॥ ध्रुवकभेद । यथा, सङ्गीतदामोदर ॥
"उक्तो मलयतालेन लघुमध्ये स्फुरेद्ध्रुवः ।
सप्तदशाक्षरैर्युक्तः कमलोऽयं भयानके" ॥

कमला, स्त्री, (काम्यतेऽसौ कामे वृषादित्वात् कलच् कमल अस्त्यस्याः इति वा । अर्श + आद्यच् । टाप् च ।) लक्ष्मी । ("कमला श्रीर्हरिप्रिया" इत्यमरः । १ । १ । २८ ।) वरस्त्री । इति मेदिनी ॥ स्वनामख्यातनिम्बुक । कमलालेवु इति भाषा । यथा,—
"रम्भाफल तिन्तिडीक कमला नागरङ्गकम् ।
फलान्येतानि भोज्यानि रम्योऽन्यानि विवर्ज्जयेत्" ॥
इति तन्त्रसारे पुरश्चरणप्रकरणम् ॥
(छन्दोविशेष । यथा, वृत्तरत्नाकरे ।
"द्विगुणनगणसहित सगण इह हि विहित ।
फणिपतिमतिविमला द्वितिय भवति कमलेति" ॥
नर्त्तकीविशेष । यथा राजतरङ्गिण्याम् ४ । ४२४ ।
"नर्त्तकी कमला नाम कान्तिमन्त ददर्श तम् ।
असामान्याकृतेः पुंस सा ददर्श सविस्मया" ॥
पुरीविशेष । यथा तत्रैव ४ । ४८३ ।
"राजा मङ्गाणपुरवत् चक्रे विपुलकेशवम् ।
कमला सा स्वनाम्नापि कमलाख्य पुर व्यधात्" ॥
गङ्गा । यथा काशीखण्डे २९ । ४४ ।
"कमला कल्पलतिका काली कलुषवैरिणी" ॥)

कमलासन, पु, (कमलमासनमस्य । विष्णोर्नाभिपद्मजातत्वात् तथात्वम् ।) ब्रह्मा । इत्यमर । १ । १ । १७ ॥ (यथा भागवते ५।२० । ३० । "यस्मिन् वृहत्पुष्कर ज्वलनशिखामलकनकपत्रायुतायुत भगवत कमलासनस्याध्यासन परिकल्पितम्" ॥ स्त्री, कमलाया लक्ष्म्या असन क्षेपण दानमित्यर्थः । यथा, शम्भुविरचिते राजेन्द्रकर्णपूरे ५३ । "तात्पर्य्य कमलासने विचरति गौरिङ्गिते पालिता" ॥ "कमलाया लक्ष्म्या असने क्षेपणे याचकेभ्यो दाने इत्यर्थः । अथच कमलरूपे विष्टरे ब्रह्मणि पद्मासनत्वात्" । इति तट्टीका ॥)

कमलिनी, स्त्री, (कमलानि सन्त्यत्र । पुष्करादिभ्यो देशे इति इनि ।) पद्मिनी । (यथा रघु ९ । २७ ।
"अभियपु सरसो मधुसम्भृता कमलिनीमलिनीरपतत्रिण" ॥) पद्माकर । इति शब्दरत्नावली ॥ (गङ्गा यथा काशीखण्डे २९ । ४० ।
"कुमुदती कमलिनी कान्तिः कल्पितदायिनी" ॥)

कमलोत्तर, क्ली, (कमलमिव उत्तर । यद्वा कमलादुत्तर उत्कृष्टमिव ।) कुसुम्भपुष्पम् । इत्यमरः । २ । ९ । १०६ ॥

कमा, स्त्री, (कम णिङभावे बाहुलकात् स्त्रिया भावे अ । टाप् ।) शोभा । इति राजनिर्घण्ट ॥

कमिता, [ऋ] त्रि, (कम + णिङभावे तृच् ।) कामुक । इत्यमरः । ३ । १ । २३ ॥

कम्प, पु, (कपि चलने + भावे घञ् ।) गात्रादिचलनम् । तत्पर्य्याय । वेपथुः २ । इत्यमरः १ । ७ । ३८ ॥ वेपनम् ३ वेप ४ कम्पनम् ५ । इति राजनिर्घण्ट ॥ (यथा विक्रमोर्व्वश्याम् । "मुञ्चति न तावदस्या भयकम्प कुसुमकोमल हृदयम्" । "न कम्पो वायुना विना" । इति वैद्यकम् ॥)

कम्पन, त्रि, (कपि चलनशब्दार्थादिति युच् ।) कम्पयुक्त । काँपुने इति भाषा । तत्पर्य्याय । चलनम् २ कम्प्रम् ३ चलम् ४ लोलम् ५ चलाचलम् ६ चञ्चलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १० । इत्यमर । ३ । १ । ७४ ॥ चपलम् ११ चटुलम् १२ । इति तट्टीका ॥
(यथा महाभारते १३ । १४ । ७२ ।
"हिरण्यकशिपुर्योऽभूद्दानवो मेरुकम्पन" ॥
यथा सिद्धान्तकौमुद्याम् ॥ "कम्पा कम्पना शाखा" । पा ३।२ । १५३ । कपि + भावे + ल्युट् ।) कम्पे क्ली । इति मेदिनी ॥

कम्पन, पु, (कम्पयति वेपथुयुक्त करोति शिशिरेणेति यावत् कपि + णिच् + युच् । ल्युर्वा ।) शिशिरऋतुः । इति राजनिर्घण्ट ॥
(नृपविशेष । यथा महाभारते २ । ४ । २२ ।
"काम्बोजराज कमठ कम्पनश्च महाबल ।
सतत कम्पयामास यवनानेक एव य" ॥)

कम्पलक्ष्मा, [न्] पु, (कम्प चलन लक्ष्म लक्षण यस्य ।) वायु । इति शब्दरत्नावली ॥

कम्पाक, पु, (कम्पया चलनेन कायति प्रकाशते इति । कम्प + कै + क ।) वायु । इति हेमचन्द्र ॥

कम्पित, क्ली, (कपि + भावे + क्त ।) चलनम् । तत्पर्य्याय । कम्पनम् २ कम्प ३ वेपनम् ४ वेपथु ५ । इति शब्दरत्नावली ॥ (कपि + कर्त्तरि + क्त ।) कम्पयुक्ते त्रि ॥ (यथा रघु । २ । १३ ।
"प्रस्रवणधारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी" ॥)

कम्पिल्ल, पु, (कम्प + इलच् ।) रोचनी । कमलागुँडि इति भाषा । तस्य रूपान्तराणि काम्पिल्लः । कम्पिल्ल । कम्पील । कम्पिल्य । इत्यमरटीकायां मुकुटादय ॥

कम्पिल्लक, पु, (कम्पिल्ल + स्वार्थे + कन् ।) वृक्षविशेष । कमिला इति देशान्तरभाषा । तत्पर्य्यायः । रक्ताङ्ग २ रेची ३ रेचनक ४ रञ्जकः ५ लोहिताङ्ग ६ कम्पिल्ल ७ रक्तचूर्णक ८ । तस्य गुणा । विरेचकत्वम् । कटुत्वम् । उष्णत्वम् । व्रणकफकासजन्तुकृमिनाशित्वम् । लघुत्वञ्च । इति राजनिर्घण्ट ॥ (अस्य तैलगुणा । तुम्बीकोशाम्लदन्तीद्रवन्तीश्यामासप्तला नीलिकाकम्पिल्लकशङ्खिनी स्वेदाः स्निग्धकटुककषाया अधोभागदोषहरा क्रिमिकफकुष्ठानिलहरा दुष्टव्रणविशोधनाश्च ॥ इति सुश्रुत ॥)

कम्प्रः, त्रि, (कपि + नमि-कम्पीति रः ।) कम्पयुक्त । कम्पान्वित । इत्यमर । ३ । १ । ७४ ॥ (यथा नैषधे । १ । १४२ ।
"सुताः कमाहूय चिराय चूत्कृते-
विधाय कम्प्राणि मुखानि क प्रति" ॥)

कम्ब, गतौ । इति कविकल्पद्रुम ॥ (भ्वा०-पर०-सक०-सेट् ।) कम्बति । इति दुर्गादासः ॥

कम्बर, पु, (कम्ब + अरन् ।) चित्रवर्ण । कर्बुरवर्णः । तद्वति त्रि । इति शब्दरत्नावली ॥

कम्बल, क्ली, (कम्यते । इति कमु कान्तौ + कमेर्बुक् चेति कल । कम्बगतौ वृषादित्वात् कलच् वा ।) जलम् । इति शब्दरत्नावली ॥

कम्बल, पु, (वा कुत्सित शिरो वा क सलिल वा बलते बल सवरणे सञ्चारणे च अच् । यद्वा कम्ब + गतौ इति धातौ वृषादित्वात् कलच् ।) स्वनामख्यातमेषादिलोमरचितवस्त्रासनादि । तत्पर्य्याय । रल्लक २ । इत्यमर । २ । ६ । ११६ ॥ वेशक ३ रोमयोनि ४ रेणुका ५ । इति शब्दरत्नावली ॥ प्रावार ६ । इति जटाधर ॥
(यथा महाभारते ३ । ३ । ५१ ।
"न तथा सुखयत्यग्निर्न प्रावारा न कम्बला ।
शीतवातार्दित लोक यथा तव मरीचय" ॥)
नागराज । सास्ना । प्रावार । कृमिः । इत्यमर । ३ । ३ । १९३ । मेदिनी च ॥ उत्तरासङ्ग । इति मेदिनी ॥ मृगविशेष । इति जटाधर ॥
(नागभेदौ । अनयोरेकः अधस्तात् पाताले वासुकिप्रमुखो निवसति अपरस्तु वरुणदेवसभासु । यथाक्रम उदाहरणे द्रष्टव्ये ।
यथा, भागवते ५ । २४ । ३१ ।
"ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति" ॥
यथा महाभारते । २ । ९ । ९ ।
"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ" ॥
कम्बलाद्यधिष्ठितप्रयागान्तर्वर्त्तितीर्थविशेष ।
यथा, महाभारते ।३। तीर्थयात्रापर्व्वणि ८५।७५ ।
"प्रयाग सप्रतिष्ठान कम्बलाश्वतरौ तथा ।
तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः" ॥

कम्बलिवाह्यक, क्ली, (कम्बल सास्ना अस्ति एषाम् इति इनि । कम्बलिभिर्बलीवर्दैरुह्यते । वह + कर्म्मणि ण्यत् स्वार्थे सज्ञायां वा कन् ।) वृषवहनीयशकटम् । तत्पर्य्यायः । गन्त्री २ । इत्यमरः । २ । ८ । ५२ ॥ गान्त्री ३ । इति तट्टीका ॥

कम्बि, स्त्री, (कमु + बाहुलकात् + विन् । यद्वा कम्बति प्राप्नोति जानाति वा अन्नादि अनया । कम्ब + करणे इन् ।) दर्व्वि । इत्यमरः । २।९।३४ हाता इति भाषा ॥ इति मेदिनी । वंशाङ्गः । बाँशेर पाव् इति भाषा ॥

कम्बु, पु क्ली, (कमु + अजादयश्चेति निपातनात् । साधु । कमु + उन् बुक् चेति वा ।) शङ्ख । इत्यमरः ।१।१०।२३॥ (यथा भागवते ।४।७ । २० ।
"कम्बुलचक्रशरचापगदासिचर्म्म-
व्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः" ॥)

कम्बु, पु, (कम्ब गतौ इति मृगय्वादित्वात् उन् वुगागमो वा । निपातनात् वा साधु ॥) वलयम् ।

(यथा महाभारते ३ । २३२ । ४४ ।
"शतं दासीसहस्राणि कौन्तेयस्य महात्मनः ।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः" ॥)
शम्बूकः । हस्ती । इत्यमरः ।३।३।१३३। मेदिनी च ॥ कर्व्वुरवर्णः । ग्रीवा । नलकम् । इति हेमचन्द्रः । फाँपा हाड इति भाषा ॥

कम्बुका, स्त्री, (कम्बुरिव कायति शोभते प्रकाशते वा । कै + कः टाप् च ।) अश्वगन्धावृक्षः । इति रत्नमाला । (गुणादयोऽस्या अश्वगन्धाशब्दे ज्ञेयाः ॥)

कम्बुकाष्ठा, स्त्री, (कम्बु चित्रवर्णं काष्ठं यस्याः ।) अश्वगन्धावृक्षः । इति राजनिर्घण्टः ॥

कम्बुग्रीवा, स्त्री, (कम्बुवत् रेखात्रयशोभिता ग्रीवा ।) कम्ब्वाकृतिरेखात्रययुक्तग्रीवा । इत्यमरः ।२।६।८८॥ (कम्बुः शङ्खस्तद्वत् रेखात्रययुक्ता ग्रीवा यस्येति विग्रहे वाच्यलिङ्गः । यथा महाभारते । १ । १५३ । १८ ।
"कम्बुग्रीव पुष्कराक्षो भर्त्ता युक्तो भवेन्मम" ॥)

कम्बुपुष्पी, स्त्री, (कम्बुः शङ्खः तद्वत् शुक्लं पुष्पं यस्याः ।) शङ्खपुष्पीवृक्षः । इति राजनिर्घण्टः । (शङ्खपुष्पीशब्देऽस्या गुणा व्याख्येयाः ॥)

कम्बुमालिनी, स्त्री, (कम्बुतुल्यपुष्पाणां माला समूहः अस्ति अस्याः ।) शङ्खपुष्पी । इति राजनिर्घण्टः ॥

कम्बोजः, पुं, (कम्ब + ओजः ।) शङ्खविशेषः । देशभेदः । (यथा तन्त्रशास्त्रम् ।
"पञ्चनदं समारभ्य म्लेच्छाद्दक्षिणपूर्व्वतः ।
कम्बोजदेशो देवेशि ! वाजिराशिपरायणः" ॥)
हस्तिप्रभेदः । इति मेदिनी ॥ (तद्देशवासिनि त्रि ॥)

कम्ब्वातायी, [न्] पुं, (कम्बुः शङ्खः स इव आतायी । शङ्खतुल्यशुक्लपूर्व्वकायत्वात्तथात्वम् ।) शङ्खचिल्लः । इति महाभारतम् ॥

कम्भारी, स्त्री, (कं जलं बिभर्त्ति धारयतीति । डु भृञ् धारणपोषणयोः + कर्म्मण्यण् + ङीप् गौरादित्वात् ङीष् वा ।) गम्भारीवृक्षः । इति शब्दमालाराजनिर्घण्टौ । (गम्भारीशब्देऽस्या गुणादयो वक्तव्याः ॥)

कम्भु, स्त्री, (कं जलं तत्तुल्यं शैत्यं बिभर्त्ति । भृ + डु ।) उशीरम् । इति राजनिर्घण्टः ॥

कम्रः, त्रि, (कामयतीति । कम् + नमिकम्पीति रः । ३ । २ । १६७ ।) कामुकः । मैथुनेच्छाविशिष्टः । इत्यमरः । ३ । १ । २४ ॥
(स्त्री, गङ्गा । यथा काशीखण्डे २९ । ४४ ।
"कमनीयजला कम्रा कपर्दिसुकपर्दगा" ॥
जह्नुं प्रतीपं शान्तनुं कामितवती कम्रा कामुका ॥ इति तट्टीका ॥ काम्यतेऽसौ इति ।)
कमनीयम् । यथा,—
"लोला दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमामामुखेन विवर्त्तिता वलिमता मध्येन कम्रस्तनी" ।
इति शाकुन्तले १ अङ्के ॥

कयस्था, स्त्री, (को वायुः स इव वेगेन याति चयवा कं जलं तस्य स्रोत इव याति । क + या + ड । तत्र तिष्ठति । स्था + कः टाप् च ।) वयस्था । इत्यमरटीकायां स्वामी ॥ काकोली इति ख्याता ॥

करः, पुं, (कं सुखं राति ददातीति । रा + कः ।) राजस्वम् । खाजाना इति पारस्यभाषा । तत्पर्य्यायः । भागधेयः २ बलिः ३ । इत्यमरः ।२।८।२७॥ कारः ४ । इति तट्टीका ॥ प्रत्यायः ५ । इति मेदिनी ॥ * ॥
अथ राज्ञा करग्रहणप्रकारः । क्रयविक्रयादिना लाभादीन् सम्प्रेक्ष्य राज्ञा करो ग्रहीतव्यः ।
यथा, मनुः । ७ । १२७-१३२ ।
"क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् ।
योगक्षेमञ्च सम्प्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणाम् ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्" ॥*॥
राज्ञा राज्यात् वार्षिकं करोऽल्पाल्पं कृत्वा ग्रहीतव्यः । यथा,—
"यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः" ॥
मूलादधिकयोः पशुहिरण्ययोः पञ्चाशद्भागरूपः करो ग्राह्यः ॥ धान्यानां भूम्युत्कर्षापेक्षया कर्षकाणां क्लेशलाघवगौरवापेक्षया च षष्ठोऽष्टमो द्वादशो वा भागो राज्ञा ग्रहीतव्यः ।
यथा,—
"पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा" ॥*॥
द्रुमांसमधुसर्पिरादीनां
षड्भागो लाभात् ग्रहणीयः । यथा,—
"आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च ॥
पत्रशाकतृणानाञ्च चर्म्मणां वैदलस्य च ।
मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च" ॥*॥
अतिक्षीणधनोऽपि राजा
श्रोत्रियब्राह्मणात् करं न गृह्णीयात् । यथा,—
"म्रियमाणोऽप्याददीत न राजा श्रोत्रियात् करम् ।
न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन्" ॥*॥
(कीर्य्यते विक्षिप्यतेऽसौ कर्म्मणि + अप् । हस्तकरिशुण्डयोस्तु करणेऽपि अप् ॥) वर्षोपलः । किरणः । (यथा रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः पटुर्दिनकरः करैस्तापयते जगत्" ॥)
हस्तः । (अमरः । ३ । ३ । १६३ ॥) हस्तिशुण्डः । इति मेदिनी ॥ (यथा, महाभारते ३ । ११ । २८ ।
"एवन्तु ब्रुवतस्तस्य मैत्रेयस्य विशाम्पते ।
ऊरू गजकराकारौ करेणाभिजघान सः" ॥)
कर्म्मोपपदे कर्त्तृवाचकः । यथा । सुखकरः इत्यादि ॥
(यथा, रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः पटुर्दिनकरः करैस्तापयते जगत् ।
प्रतिलोमश्च ते वायुस्त्वत्पराभवलक्षणम्" ॥)

करका, स्त्री पुं, (किरति विक्षिपति जलं अस्मात् करोति जलमत्र वा । कॄ + वा कृ "कृञादिभ्यः संज्ञायां वुन्" । उणा ५ । ३५ । इति वुन् ।) करङ्कः । कमण्डलुः । इति मेदिनी ॥
(यथा, मनुः । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्येन धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च" ॥)

करकः, पुं, (करोति वाय्वादिजनितदोषाभावं कृणोति फलपत्रादिभिः वायुपित्तादिदोषं नाशयति वा कृञ् हिंसायां "कृञादिभ्यः संज्ञायां वुन्" । उणा ५ । ३५ । इति वुन् ।) दाडिमवृक्षः । राजकरः । पक्षिविशेषः । लट्टाकरञ्जवृक्षः । इति हेमचन्द्रः ॥ पलाशवृक्षः । इति हारावली ॥ कोविदारवृक्षः । वकुलवृक्षः । करीरवृक्षः । नारिकेलास्थि । इति राजनिर्घण्टः । माला इति भाषा ॥ (यथा, रामायणे ५ । १४ । ४८ ।
"हिरण्मयैश्च करकैर्भाजनैः स्फाटिकैरपि" ॥)

करकच्छपिका, स्त्री, (कच्छपस्य आकृतिरस्त्यस्याः ठन् । करे स्थिता कच्छपिका कच्छपाकारमुद्रा ।) कूर्म्ममुद्रा । यथा,—कालिकापुराणे ५६ अध्यायः ॥
"करकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः" ॥

करकण्टकः, पुं, (करे हस्ते कण्टक इव ।) नखः । इति त्रिकाण्डशेषः ॥

करका, स्त्री पुं, (कृणोति हिनस्ति आम्रादिफलम् । "कृञादिभ्यो वुन्" । वुनन्तात् टापि क्षिपकादित्वात् प्रत्ययस्थादिति इत्वं न किरति क्षिपति जलं वा ।) मेघभवशिला । शिल इति भाषा । तत्पर्य्यायः । वर्षोपलः २ । इत्यमरः । १ । ३ । १२ ॥ मेघोपलः ३ । इति मेदिनी ॥ वीजोदकम् ४ घनकफः ५ मेघास्थि ६ वार्द्धरः ७ करः ८ कारकः ९ । इति शब्दरत्नावली ॥ राधरङ्गः १० धाराङ्कुरः ११ । इति जटाधरः ॥ मेदिन्यां राधरङ्गः इति पाठः ॥ (यथा मेघदूते ५६ ।
"तान्कुर्व्वीयास्तुमुलकरकावृष्टिहासावकीर्णान्" ॥)

करकाम्भः, [स्] पुं, (करकावत् शीतलं अम्भो जलं यत्र ।) नारिकेलवृक्षः । इति त्रिकाण्डशेषः ॥

करग्रहः, पुं, (करः इयं मम भार्य्या इति प्रतिज्ञया गृह्यतेऽत्र वरेणेति यावत् । ग्रह + अधिकरणे अप् ।) विवाहः । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशती । ६०३ ।
"सा गुणमयी स्वभावस्वच्छा सुतनुः करग्रहायत्ता ।
भ्रमिता वङ्कमन्त्रविदा भवता काश्मीरमालव" ॥)
करग्रहणञ्च ॥ (यथा, आर्य्यासप्तशती । ६२९ ।
"सकरग्रहं सरुदितं
साक्षेपं सनखमुष्टि सजिगीषम्" ॥)

करग्रहारम्भः, पुं, (करग्रहस्य करादानस्य आरम्भः प्रजाभ्यः ।) राज्ञा प्रजाभ्यो नववर्षीयकरस्य प्रथमादानम् । तद्दिनं पुण्याह इति ख्यातम् । तस्यापभाषा पुण्या । तस्य शुभदिननिरूपणम् यथा,—
"तीक्ष्णोग्रवक्रीतरभेषु लग्ने
शीर्षोदये भानुदिने शुभाहे ।
कुर्य्यादनुक्तानि समीहितानि
दारग्रहारम्भमपि प्रजाभ्यः" ॥
इति ज्योतिषम् ॥ अस्यार्थः । अश्लेषार्द्राज्येष्ठामूलापूर्व्वफल्गुनीपूर्व्वाषाढापूर्व्वभाद्रपदभरणीकृत्तिकाभिन्ननक्षत्रेषु । मिथुनसिंहकन्यातुलावृश्चिककुम्भमीनलग्नेषु । रविसोमबुधवृहस्पतिशुक्रवारेषु करग्रहारम्भः कर्त्तव्यः ॥

करघर्षणः, पुं, (कराभ्यां घृष्यतेऽसौ । कर + घृष् +

कर्म्मणि ल्युट् ।) दधिमन्थनदण्डः । तत्पर्य्याय । वैशाख २ दधिचार ३ तर्क्कारी ४ । इति हारावली ॥ हस्तघर्षणे स्त्री ॥

करघर्षी, [न्] पु, (कराभ्यां करयोर्वा घर्षः घर्षणम् अस्ति अस्यास्मिन् वा ।करघर्ष + इनि ।) मन्थानदण्डः । इति शब्दमाला ॥

करङ्क, पुं, (कस्य रङ्क इव ।) मस्तकम् । (कीर्य्यते जलमत्र इति कर । कॄ + अप् । जलहीन अङ्को गर्भो यस्य शकन्ध्वादित्वात् अलोपे साधुः ।) अशस्यनारिकेलफलास्थि । इति मेदिनी । नारिकेलेर खोल इति भाषा ॥ शरीरास्थि । इति हेमचन्द्रः ॥ इक्षुभेद । इति राजनिर्घण्ट ॥ (पात्रविशेष । यथा, "ताम्बूलकरङ्कवाहिनी" इति कादम्बरी ॥)

करङ्कशालि, पु, (करङ्क इति नाम्ना शालते शोभते इति । करङ्क + शाल + इन् ।) करङ्कनामेक्षुः । इति राजनिर्घण्टः ॥

करच्छद, पु, (करवत् आवरणकारी छदो यस्य ।) शाखोटवृक्षः । शेओडा इतिभाषा ॥ इति भावप्रकाश । (अस्य गुणादिकं शाखोटशब्दे द्रष्टव्यम् ॥)

करच्छदा, स्त्री, (कर इव किरण इव लोहितवर्णं छदं पुष्पं यस्याः । कर इव आवरकश्छदो वा यस्याः ।) सिन्दूरपुष्पीवृक्षः । इति राजनिर्घण्टः ॥

करज, क्ली, (करे जायते इति । कर + जन् + ड । व्याघ्रनखवदस्याकृतेस्तथात्वम् ।) व्याघ्रनखनामगन्धद्रव्यम् । इत्यमर ।२।४।१२९॥ (नवमीशब्देऽस्य गुणा वक्तव्याः ॥)

करज, पु, (कं सुखं जलं वा रञ्जयतीति । रञ्जि कर्म्मण्यण् ।) करञ्जवृक्षः । ("करञ्जक स्यात् करजः पञ्चपूर्वी फलाशनः" । इति शब्दरत्नावली ॥ करे जायते इति । जन + ड ।) नख । इति मेदिनी ॥ (यथा, मनु । ४ । ७० ।

"न मृल्लोष्टञ्च मृद्नीयान्न छिन्द्यात् करजैस्तृणम्" ॥)

करजाख्य, पु, (करजस्याख्या एव आख्या यस्य ।) नखीनामगन्धद्रव्यम् । इति रत्नमाला ॥

करञ्चोडि, पु, हस्तञ्चोडिवृक्षः । इति राजनिर्घण्टः ॥ (केचित् करञ्जोडिरिति वदन्ति ॥)

करञ्ज, पु,(कं सुखं शिरो जलं वा रञ्जयतीति । क + रञ्ज + णिच् + अण् ।) स्वनामख्यातवृक्षविशेष । करमचा इति भाषा । तत्पर्य्यायभेदौ यथा,—

"करञ्जकः स्यात् करजः पञ्चपूर्वी फलाशनः ।
अङ्गारमञ्जी षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ।
करञ्जभेदास्त्वत्वारो विज्ञेया लोकतस्त्विमे" ॥

इति शब्दरत्नावली ॥ अपि च ।

"चिरविल्वो नक्तमालः करजश्च करञ्जकः ।
सोमवल्कः कलिङ्गस्तु पूतिकः कलिकारकः ॥
प्रकीर्य्यः पूतिकरजः पत्तिका सुमना अपि ।
करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी" ॥

इति जटाधरः ॥ स बहुविध । तत्र इरकरञ्जपर्य्याय । नक्तमाल २ पूतिक ३ चिरविल्वक ४ पूतिपर्ण ५ वृद्धफल ६ रोचन ७ । इति राजनिर्घण्टः ॥ चिरविल्व ८ करज ९ करञ्जक १० । इत्यमर ।२।४।४७॥ चिरिविल्व ११ । इति तट्टीका ॥ उदकीर्य्य १२ । इति रत्नमाला ॥*॥ अस्य फलगुणा । कटुत्वम् । उष्णत्वम् । चक्षुर्हितत्वम् । वातनाशित्वञ्च । इति राजनिर्घण्टः ॥ वातकफमेहव्रणकृमिकुष्ठनाशित्वञ्च ॥*॥ तत्पत्त्रगुणाः । कफवातार्शःकृमिशोथनाशित्वम् । भेदकत्वम् । पाके कटुत्वम् । वीर्य्योष्णत्वम् । पित्तवर्द्धकत्वम् । लघुत्वञ्च । इति भावप्रकाश ॥*॥ तत्तैलगुणाः । अतिस्निग्धत्वम् । वातनाशित्वम् । स्थिरदीप्तिदातृत्वम् । नयनामयवातरोगकुष्ठकण्डूविसूचिकानाशित्वम् । तीक्ष्णत्वम् । उष्णत्वम् । लेपेन नानाविधचर्म्मदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ किटिभत्वम् । कृमिनाशित्वम् । रक्तपित्तदोषकारित्वञ्च । इति राजवल्लभ ॥*॥ अथ नाटाकरञ्जपर्य्याय । प्रकीर्य्य १ पूतिकरञ्ज २ पूतिक ३ कलिकारक ४ । इत्यमर ।२।४।४८॥ पूतीकरञ्ज ५ सकण्टक ६ । इति रत्नमाला ॥*॥ षड्ग्रन्थ । काँटाकरञ्ज गाँटिया करञ्ज इति भाषा ॥*॥ मर्कटी । माकडाकरञ्ज इति भाषा ॥*॥ अङ्गारवल्लरी । इत्यमरभरतौ विषकरञ्ज इति भाषा ॥*॥ अथ अम्लकरञ्जपर्य्याय ॥ करमर्द्दी १ वनेक्षुद्रा २ कराम्ल ३ करमर्द्दक ४ । इति रत्नमाला ॥ क्षुद्रपाकफल ५ अविग्न ६ सुषेण ७ । इत्यमर ।२।४।६७॥ अस्य फलगुणा । पिपासानाशित्वम् । रुचिपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभ ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ करमर्द्दकशब्दे द्रष्टव्यौ ॥

(यथा, महाभारते ३ । २२९ । ३५ ।

"मादमानाश्च या माता करञ्जनिलया हि सा ।
वरदा सा हि सौम्या च नित्य भूतानुकम्पिनी ।
करञ्जे ता नमस्यन्ति तस्मात् पुत्त्रार्थिनो नराः" ॥

किरति विक्षिपति धार्म्मिकानिति । कॄ विक्षेपे + बाहुलकादौणादिकोऽञ्जन्प्रत्यय । धर्म्मद्वेष्टरि, त्रि । यथा ऋग्वेदे । १ । ५३ । ८ ।

"त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्त्तनी" ॥)

करञ्जक, पु, (करञ्ज + स्वार्थे कन् ।) करञ्जवृक्षः । इत्यमर ।२।४।४७॥ भृङ्गराजवृक्षः । इति जटाधर ॥ (यथा महाभारते । १३ ।१२८ । ८ ।

"यस्तु संवत्सरं पूर्णं दद्याद्दीपं करञ्जके ।
सुवर्च्चलामूलहस्तः प्रजास्तस्य विवर्द्धते" ।)

करञ्जफलक, पु, (करञ्जफलमिव फलं यस्य । तत स्वार्थे कन् । करञ्जफलमिव कायते इति वा । कै + क ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥

करट, पु, (कं कुत्सितं रटति शब्दं करोतीति । रट शब्दे + पचाद्यच् ।) काकः । (यथा गङ्गास्तोत्रे ।

"वरमिह गङ्गातीरे सरटः करटः ।" इति ॥

किरति विक्षिपति मदवारि इति । कॄ + अटन् ।) हस्तिगण्डः । इत्यमर ।३।३।३४॥ (यथा महाभारते । ३ । २७७ द्रौपदीहरणपर्व्वणि ३९ ।

"कथं हि भिन्नकरट पद्मिनं वनगोचरम् ।
उपस्थाय महानागं करेणुः शूकरं स्पृशेत्" ॥)

कुसुम्भवृक्षः । निन्द्यजीवन । एकादशाहादिश्राद्धम् । दुर्द्दुरूढः । नास्तिक इति यावत् । (अयं तु क्षत्त्रियभेदाभिप्रायेणोक्तः । यथा च महाभारते ६ । ९ । ६२ ।

"मालवा वल्लवाश्चैव तथैवापरवर्त्तकाः ।
कुलिन्दाः कालदाश्चैव दण्डकाः करटास्तथा" ॥)

वाद्यविशेष । इति मेदिनी ॥

करटक, पु, (करट + स्वार्थे कन् ।) काकः । इति शब्दरत्नावली ॥ (विष्णुशर्म्मनाम्ना सिद्धस्य मन्त्रिपुत्त्रविशेष शृगाल । यथा हितोपदेशे २।२५ ।

"स च तथाविधः करटकदमनकाभ्यां तन्मन्त्रिपुत्त्राभ्यां शृगालाभ्यां दृष्टः" ॥ स्तेयशास्त्रप्रवर्त्तकः कर्णीसुतः । यथा कादम्बरीटीका ।

"कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः" ॥)

करटा, स्त्री, (करट + "अजाद्यतष्टाप्" ।४।१।४ इति टाप् ।) दुःखदोह्या गवी । इति हेमचन्द्रः ॥

करटी, [न्] पु स्त्री, (करट मदस्रवणशीलगण्डः प्राशस्त्येन अस्ति अस्य । करट + इनि ।) हस्ती । इति हेमचन्द्रः ॥ (यथा, लङ्केश्वरविरचितशिवस्तुतौ । ४ ।

"कपर्द्दिनि कुमुदतीरमणखण्डचूडामणौ
कटीतटपटीभवत्करटिचर्म्मणि ब्रह्मणि ॥)

करटु, पु, (कृ + अटु ।) पक्षिविशेषः । इति हेमचन्द्रः । करकटिया इति भाषा ॥

करण, क्ली, (क्रियतेऽनेन । कृ + करणे + ल्युट् ।) साधकतमम् । इत्यमर ।३।३।५४॥ तत्तु षट्कारकान्तर्गतकारकविशेष । तस्य लक्षणम् ।

"क्रियायाः साध्यायाः बहूनां कारणानां मध्ये कारणान्तरव्यवधानाभावे यद्वस्तु क्रियानिष्पत्तिकारणं विवक्षितं तस्मिन् करणत्वं प्रकीर्त्तितम् । तेन दात्रेण धान्यं लुनातीत्यत्र हस्तादेः कारणत्वेऽपि दात्रस्यैव करणत्वं विवक्षितम् ॥ तथाचोक्तम् ।

"कारणव्यवधानेऽपि क्रिया निष्पत्तिकारणम् ।
यद्वै विवक्षितं तेषु करणत्वं प्रकीर्त्तितम्" ॥

इति मुग्धबोधटीकायां दुर्गादास ॥*॥ तिथ्यर्द्धपरिमितववादिकादशमेकाकालविशेष । तेषां नामानि । वव १ वालव २ कौलव ३ तैतिल ४ गर ५ वणिज ६ विष्टि ७ शकुनि ८ चतुष्पद ९ किन्तुघ्न १० नाग ११ । तेषां यथाक्रमेणाधिष्ठातृदेवाः । इन्द्र १ कमलज २ मित्र ३ अर्य्यमा ४ भू ५ श्री ६ यम ७ कलि ८ वृष ९ फणी १० मारुत ११ । एकैकस्मिन् तिथौ द्वे द्वे करणे भवतः । तेषां ववादयः सप्त अष्टावृत्त्या शुक्लप्रतिपच्छेषार्द्धमारभ्य कृष्णचतुर्द्दशीप्रथमार्द्धपर्य्यन्तं भवन्ति । शेषास्त्वत्वारः कृष्णचतुर्द्दशीशेषार्द्धादिशुक्लप्रतिपत्प्रथमार्द्धपूर्य्यन्तं नियमेन भवन्ति अतो ध्रुवाणि करणानि । पूर्व्वे सप्ताध्रुवाणि ॥ तेषामानयनक्रमो यथा ।

"तिथिर्द्विघ्ना करोनाग्निशिष्टाकरणमादिमे ।
परे दले तु सैकं तत्करणं ववपूर्व्वकम्" ॥

इति ज्योतिषम् ॥*॥ देहम् । गात्रम् । इन्द्रि-

यम् । इत्यमरः । ३ । ३ । ५४ ॥ (यथा गीतायाम् १८ । १४ ।
"अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम्" ॥)
हेतुः । कर्म्म । हस्तलेपः । नृत्यप्रभेदः । गीतविशेषः । (तले व्यवस्थापकस्ताडनविशेषः ।
यदुक्तं राजकन्दर्पेण ।
"नृत्यवादित्रगीतानां प्रयोगवशभेदिना ।
संस्थानं ताडनं रोधः करणानि प्रचक्षते" ॥
अस्य प्रमाणं यथा कुमारे ६ । ४० ।
"शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्ज्जितसन्दिग्धाः करणैर्मुरजस्वनाः" ॥)
क्रियाभेदः । सवेशनम् । कायस्थः । इति मेदिनी ॥
कायस्थसंहतिः ॥ वर्णानां स्पष्टतादिः । योगिनामासनादिः । क्षतादिः । इति हेमचन्द्रः ॥ (सर्व्वेषामादिकारणत्वात् विष्णुः । यथा, महाभारते १३ । १४९ । ५४ ।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः" ॥
लेख्यपत्रसाक्षिदिव्यादि । यथा मनुः ८ । ४१ ।
"अर्थेऽपव्ययमानन्तु करणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः" ॥
भावे ल्युट् । कृतिः । यथा रामायणे ४ । १७ । ५६ ॥
"धर्म्मतः प्रेषकरणे प्रतीच्छिष्यामहे वयम्" ॥)
करणः, पुं, शूद्राविश्ययोर्जातजातिविशेषः । इत्यमरः । २ । १० । २ ॥ अयं लिखनवृत्तिः कायस्थ इति ख्यातः । इति भरतः ॥ यथा,—
"शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः" ।
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥ * ॥
अपि च ।
"कायस्थे साधने क्लीवं पुंसि शूद्राविशोः सुते" ।
इति करणशब्दार्थे मेदिनी ॥ * ॥ अन्यच्च ।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खसद्रविड एव च" ॥
इति मानवे १० । २२ ॥ झल्लोमल्लश्चेति । "क्षत्त्रियात् व्रात्यात् सवर्णायां झल्लमल्लनिच्छिविनटकरणखसद्रविडाख्या जायन्ते । एतान्यप्येकस्यैव नामानि" । इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥
तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्द्ध्नि कीटस्त्रिजन्मकम् ।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः ॥
तमः कुण्डे वर्षशतं स्थित्वा स्वर्णवणिक् भवेत् ।
जन्मैकञ्च दुराचारो जन्मैकं करणो भवेत् ॥
विश्वैकलिपिकर्त्ता च भव्यदातुर्धनं हरेत् ॥
कायस्थेनोदरस्थेन मातुर्म्मांसं न खादितम् ।
तत्र नास्ति कृपा तस्य दन्ताभावेन केवलम् ॥
स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर ।
नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले ॥
हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम् ।
शतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ ॥
सबुद्धिः शिवयुक्तिश्च शास्त्रज्ञो धर्म्ममानसः ।
न विश्वसेत्तेषु तात स्वात्मकल्याणहेतवे" ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
करणत्राणं, क्ली, (करणं ज्ञानकर्म्मादिरूपं इन्द्रियं त्रायतेऽनेन । करण + त्रै + करणे + ल्युट् । मस्तकस्य प्रधानकरणैकादशस्य मनसः स्थलत्वात् । करणैर्हस्तादिकर्म्मेन्द्रियादिभिः त्रायते वा इति कर्म्मणि ल्युट् ।) मस्तकम् । इति हेमचन्द्रः ॥
करणीयं, त्रि, (कर्त्तुमुचितं कर्त्तुमर्हं वा । कृ + अनीयर् ।) कर्त्तव्यम् । कार्य्यम् । इति व्याकरणम् ॥
(यथा रामायणे ३ । १४ । १० ।
"मया किं करणीयञ्च इत्युक्ते द्विजसन्निधौ ।
सर्व्वैरेव च तैरार्त्तैर्वाणिय समुदाहृता" ॥)
करण्डः, पुं, (कृञ् + "कृशृभृवृञ्" । इत्यण्डन् । उणां । १ । १२८ ।) मधुकोषः । मौचाक् इति भाषा ।
असिः । कारण्डवपक्षी । दलाढकम् । इति मेदिनी हेमचन्द्रश्च ॥ वंशादिरचितभाण्डविशेषः समुद्गश्च । इत्यमरः । ३ । ५ । १८ ॥ साजि झाँपि इत्यादि भाषा । (यथा भागवते ५ । १४ । ४ । "एवमेव गृहाश्रमः कर्म्मक्षेत्रं यस्मिन् न हि कर्म्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः" ॥)
करण्डी, [न्] पुं (करण्डस्येव आकारोऽस्यास्तीति । करण्ड + इनि ।) मत्स्यः । इति त्रिकाण्डशेषः ।
(मत्स्यशब्देऽस्य गुणादिकथनं ज्ञेयम् ॥)
करतलं, पुं, (करस्य हस्तस्य तलं ।) हस्ततलः । हातेर तेलो इति भाषा । (यथा । जयदेवः । १ । ४५ ॥
"करतलतालतरलवलयावलिकलितकलस्वनवंशे"
अपि च । यथा, श्रीभागवते । ८ । ७ । ४२ ॥
"ततः करतलीकृत्य व्यापि हालाहलं विषम् ।
अभक्षयन्महादेवः कृपया भूतभावनः" ॥)
करतालं, क्ली, (कराभ्यां हस्ताभ्यां दीयमानस्तालो यत्र ।) वाद्यविशेषः । यथा,—
"शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम् ।
दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत्" ॥
झल्लकः कांस्यनिर्म्मितकरतालकम् । इति तिथ्यादितत्त्वे रघुनन्दनभट्टाचार्य्येण व्याख्यातम् ॥
करताली, स्त्री, (करताल + गौरादित्वात् ङीष् ।) वाद्यविशेषः । करतास खरताल इति ख्याता । तत्पर्य्यायः । कर्द्धिः २ । इति त्रिकाण्डशेषः ॥ करतलध्वनिः । तथा च । "यथा न स्यादालीकपटकरतालीपटुरवः" । इति उद्भटः ॥
करतोया, स्त्री, (करात् शङ्करस्य हस्तात् च्युतं तोयं जलं अस्ति यत्र । अर्श आद्यच् ।) स्वनामख्यातउत्तरदेशस्थनदीविशेषः । तत्पर्य्यायः । सदानीरा २ । इत्यमरः । १ । १० । ३३ ॥ सदानीरवहा ३ । इति शब्दरत्नावली ॥ * ॥ गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात्करस्य तोयं विद्यतेऽत्र इति करतोया । श्रावणे एतद्वर्ज्जं सर्व्वा नद्यो रजस्वला इयं तु न रजस्वला अतएव सदा सर्व्वदा नीरमस्या इति सदानीरा । तथा च स्मृतिः ।
"अथादौ कर्कटे देवी त्र्यहं गङ्गा रजस्वला ।
सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी" ॥
इत्यमरटीकायां भरतः ॥ (इयं हि तीर्थविशेषः । यथा महाभारते ३ । तीर्थयात्रापर्व्वणि । ८५ । ३ ॥
"करतोयां समासाद्य त्रिरात्रोपोषितो नरः ।
अश्वमेधमवाप्नोति प्रजापतिकृतो विधिः" ॥)
करद्रुमः, पुं, (किरति शाखाः सर्व्वतः यः । स चासौ द्रुमश्चेति ।) कारस्करवृक्षः । इति राजनिर्घण्टः ॥
करपत्रं, क्ली, (करेण करात् वा पततीति । पत + "सर्व्वधातुभ्यः ष्ट्रन्" इति ष्ट्रन् ।) क्रकचः । इत्यमरः । २ । १० । ३५ ॥ करात् इति भाषा । (करौ पत्त्रमिव नौरिव यत्र ।) जलक्रीडा । इति जटाधरः ॥
करपत्रवान्, [त्] पुं, (करपत्राकारपत्रमस्ति यस्मिन् मतुप् मस्य वः ।) तालवृक्षः । इति शब्दचन्द्रिका ॥
करपत्रिका, स्त्री, (करौ पत्रं नौरिव यस्याः । पत्र + कप् + टाप् + अत इत्वम् ।) जलक्रीडा । इति जटाधरः ॥
करपर्णः, पुं, (करो हस्तः तद्वत्पर्णं यस्य ।) भिण्डावृक्षः । रक्तैरण्डः । इति राजनिर्घण्टः ॥ (एरण्डशब्देऽस्य विशेष उक्तः ॥)
करपल्लवः, पुं, (करस्य पल्लव इव ।) अङ्गुलिः । यथा, मार्कण्डेये ८४ । २६ ।
"करपल्लवसङ्गीनि तैरस्मानुच्च सर्व्वतः" ॥
करपात्रं, क्ली, (करः पात्रमिव यत्र ।) जलक्रीडा । इति हारावली ॥
करपालः, पुं, (करं पालयति रक्षति । पाल + कर्म्मण्यण् ।) खड्गः । इत्यमरः । २ । ८ । ८९ ॥
करपालिका, स्त्री, (करपाल + ण्वुल् + टाप् अत इत्वम् ।) ह्रस्वगदाकारहस्तदण्डः । सोँटा इति ख्यातः । इति भरतः ॥ एकधारास्त्रम् । इति स्वामी । तत्पर्य्यायः । ईली २ । इत्यमरः । २ । ८ । ९१ ॥ इली ३ इलिः ४ करवालिका ५ । इति तट्टीका ॥
करबालः, पुं, (करस्य बालः पुत्र इव । नखस्य करजातत्वात् तथात्वम् ।) नखम् । इति शब्दमाला ॥
(करं वलति संवृणोति वल + अण् ।) खड्गः । इत्यमरटीकायां भरतादयः । करवाल इति भाषा ।
(यथा, गीतगोविन्दे । १ । १० ॥
"म्लेच्छनिवहनिधने कलयसि करवालम्" ॥)
करवालिका, स्त्री, (करं + वल + ण्वुल् + टाप् + अत इत्वम् ।) करपालिका । इत्यमरटीकायां रायमुकुटादयः ॥
करभः, पुं, (कृणाति कीर्य्यतेऽनेन वा । कृञ् हिंसायां कॄ विक्षेपे वा "कॄशॄशलिकलिगर्द्दिभ्योऽभच्" । उणां । ३ । १२२ । इति अभच् । करे भाति शोभते इति वा । भा + क ।) मणिबन्धावधिकनिष्ठापर्य्यन्तं करस्य वहिर्भागः । (यथा, रघुः । ६ । ८३ ।
"धात्री कराभ्यां करभोपमोरुः" ॥)
उष्ट्रशिशुः । इत्यमरः ॥ २ । ९ । ७५ ।
करिशावकः । इत्यमरटीकासारसुन्दरी ॥ (यथा भागवते ८ । २ । २२ ।
"सघर्म्मतप्तः करिभिः करेणुभिर्वृतोमदच्युत्करभैरनुद्रुतः" ॥)
उष्ट्रः । इति मेदिनी ॥ नखनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ कटिः । इति जटाधरः ॥
करभकाण्डिका, स्त्री, (करभप्रियं काण्डमस्याः ।

करभकाण्ड + कप् + अत इत्वम् ।) उष्ट्रकाण्डी-वृक्षः । इति राजनिर्घण्टः ॥

करभप्रिया, स्त्री, (करभस्य करिशावकस्य उष्ट्रस्य वा प्रिया ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभवल्लभ, पुं, (करभस्य हस्तिशावस्य वल्लभः प्रियः ।) कपित्थवृक्षः । पीलुवृक्षः । इति राजनिर्घण्टः ॥

करभादनी, स्त्री, (करभेन उष्ट्रेण अद्यतेऽसौ । अद् + कर्म्मणि ल्युट् । ततो + ङीप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभी, [न्] पुं, (कर इव भाति करभः शुण्डः स अस्यास्ति । करभ + इनि । यद्वा करभः हस्ता-वयवविशेषः सोऽस्य शुण्डावच्छेदे अस्तीति इनि ।) हस्ती । इति राजनिर्घण्टः ॥

करभी, स्त्री, (करभ + ङीप् ।) उष्ट्री । तत्पर्य्यायः । वामी २ । इति जटाधरः ॥

करभीर, पुं, (करभिणः हस्तिनः ईरयति प्रेरयति मृत्युमुखम् । करभि + ईर् + अण् ।) सिंहः । इति शब्दरत्नावली ॥

करभूषण, क्ली, (करयोर्भूषणम् ।) कङ्कणम् । इत्यमरः ।२।६।१०८॥ हस्ताभरणमात्रञ्च ॥

करमट्ट, पुं, (करं करिशुण्डमपि अट्टति तुच्छी-करोति । अस्य सरलकाण्डत्वात् तथात्वम् । अट्ट अनादरे + खसुम् प्रत्ययः ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥ (गुवाकशब्देऽस्य गुणा द्रष्टव्याः ॥)

करमरी, [न्] पुं, (किरति क्षिपति अत्र दण्डान् इति करः कारागारः । कृ + अधिकरणे अप् । तस्मिन् करे मरः मरणं मृत्युवत् यातना यस्य बाहुलकात् इनि । तत्र म्रियते वा ।) वन्दी । इति त्रिकाण्डशेषः । कयेदी इति भाषा ॥

करमर्द्द, पुं, (करं मृद्नातीति । करकण्डूप्रदत्वात् । मृद क्षोदे + कर्म्मण्यण् । करेण मृद्यते इति कर्म्मणि अप् वा ।) करमर्द्दकवृक्षः । इति शब्दरत्नावली ॥ (यथा भावप्रकाशे,—अस्य गुणा उक्ताः ।
"लघुदीर्घफलाभ्यान्तु करमर्द्दद्वयं मतम् ।
करमर्द्दद्वयं त्वाममम्लं गुरु तृषाहरम् ॥
उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम् ।
तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ॥
करमर्द्दः सुषेणः स्यात् कृष्णपाकफलस्तथा ।
तस्माल्लघुफलायास्तु सा ज्ञेया करमर्द्दिका ॥)

करमर्द्दक, पुं, (कर + मृद + ण्वुल् । करमर्द्द एव स्वार्थे कन् इति वा ।) वृक्षविशेषः । इत्यमर-टीकासारसुन्दरी । पाणि आमला इति भाषा ॥ इति रत्नमालाराजनिर्घण्टादयः । करौन्दा इति करम्चा इति च भाषा ॥ तत्पर्य्यायः । कृष्णपाक-फलः २ अविग्नः ३ सुषेणः ४ । इत्यमरः ।२।४।६७॥ कृष्णपाकः ५ पाकफलः ६ कृष्णफलः ७ पाककृष्ण-फलः ८ कृष्णफलपाकः ९ पाककृष्णः १० फल-कृष्णः ११ पाकफलकृष्णः १२ वनालयः १३ वला-लकः १४ कराम्लकः १५ वोलः १६ वग्नः १७ आ-विग्नः १८ । इति तट्टीकायां भरतः ॥ करमर्द्दी १९ वनेक्षुद्रा २० कराम्लः २१ । इति रत्नमाला ॥ करमर्द्दः २२ पाणिमर्द्दः २३ । तद्बालफलगुणाः । तिक्तत्वम् । अम्लत्वम् । दीपनत्वम् । दाहदाढ्यत्वञ्च । तत्पक्वफलगुणाः । त्रिदोषशमनत्वम् । अरुचि-विषनाशित्वञ्च । इति राजनिर्घण्टः ॥ पिपासा-नाशित्वम् । अम्लत्वम् । रुचिपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (यथा, वाभटः ।
"गुरूष्णवीर्य्यं वातघ्नं सरञ्च करमर्द्दकम्" ॥)

करमर्द्दी, स्त्री, (करं मृद्नातीति । कर + मृद + अण् ङीप् ।) करमर्द्दकवृक्षः । इति रत्नमाला ॥

करमाल, पुं, (करः करिशुण्डः तदाकारा माला समूहः यस्य मेघस्य धूमस्य वा क्रमशः करि-शुण्डवत् प्रसरत्वात् तथात्वम् ।) खतमालः । धूमः । इति हेमचन्द्रः ॥

करमाला, स्त्री, (कराङ्गुलीभिर्मालयेव जपनात् कर-रूपा माला । कराङ्गुल्यः मालेव वा ।) करपर्व्व-रूपमाला । यथा,
"अनामिकात्रयं पर्व्व कनिष्ठात्रितयं तथा ।
तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता" ॥
इति मुण्डमालातन्त्रे सामान्यविषयम् ॥ * ॥
"तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्" ॥
इति शिवरहस्योयः शक्तिभिन्नविषयम् ॥ * ॥
"अनामामूलमारभ्य कनिष्ठादिक्रमेण तु ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु सञ्जपेत्" ॥
इति सनत्कुमारसंहितावचनं शक्तीतरेषामष्ट-वारविषयम् ॥ * ॥
"अनामिकात्रयं पर्व्व कनिष्ठा च त्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्विका ॥
करमाला समाख्याता आरभ्यानामिकान्तरात् ।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्" ॥
इति शक्तिविषये मुण्डमालातन्त्रम् ॥ * ॥ तथा ।
"अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्य्यन्तं जपेदष्टसु पर्व्वसु" ॥
इदमपि शक्तिविषये अष्टवारपरम् । इति श्यामारहस्यम् ॥

करमुक्त, क्ली, (करेण सुदृढं धृत्वा शत्रुं प्रति मुच्यते । कर + मुच् + कर्म्मणि क्त ।) अस्त्रविशेषः । इति हलायुधः । वरछी भाला इत्यादि भाषा ॥

करम्ब, पुं, (कृञ् करणे + "कृकदि कडीत्यम्बच्" । उणा । ४ । ८२ ।) करम्भः । इत्यमरटीकायां नीलकण्ठः ॥ मिश्रिते त्रि । इति हेमचन्द्रः ॥

करम्बित, त्रि, (करम्बः मिश्रणं जातोऽस्य । करम्ब + इतच् ।) मिश्रितः । खचितः । इति त्रिकाण्डशेषः ॥ ("ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे" ॥ इति गीतगोविन्दे । १ । २ ॥)

करम्भ, पुं, (केन जलेन रभ्यते मिश्रीक्रियते । रभि-धातोरनेकार्थत्वात् "अकर्त्तरि चेति" घञ् ।३।३। १९। रभेरशब्लिटोः ।७।१।६३। इति नुम् ।) दधिमिश्रितशक्तुः । इत्यमरः ।२।९।४८॥ (यथा शतपथब्राह्मणे ।२।५।२।४।
"अणुमानिव यवान् कृत्वा तानीषदीवोपतप्य तेषां करम्भपात्राणि कुर्व्वन्ति" ॥ उदमन्थः । यथा, यजुर्व्वेदे १९ । २१ ।
"धानाः करम्भः सक्तवः परिवापः पयोदधि" ।
"करम्भः उदमन्थः । इति वेददीधितिः ॥
भृष्टयवमात्रम् । यथा मनुः १२ । ७६ ।
"करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" ।
करम्भवालुकातापान् करम्भैर्यवैः सह भृष्टा या वालुका तद्वत्तप्तवालुकादीन् इत्यर्थः ॥ मिश्रगन्धः । यथा भागवते ३ । २६ । ४५ ।
"करम्भपूतिसौरभ्यशान्तोदग्रादिभिः पृथक् ।
द्रव्यावयववैषम्याद् गन्ध एको विभिद्यते" ॥)

करम्भक, क्ली, (करम्भ एव स्वार्थे कन् ।) करम्भः । दधिसक्तवः । तत्पर्य्यायः । कर्कसारम् २ । इति हारावली ॥

करम्भा, स्त्री, (केन जलेन रभ्यते सिच्यते इति । अथवा केन वायुना रभ्यते मिश्रीक्रियते नानागन्धो यस्याः । रभेर्नानार्थत्वात् क + रभ + घञ् + नुम् टाप् च ।) शतावरी । प्रियङ्गुवृक्षः । इति राजनिर्घण्टः ॥ (स्वनामख्याता कलिङ्गदेशोत्पन्ना रमणी । सा तु पूरुवंशीयस्याक्रोधनस्य पत्नी । यथा महाभारते १ । ९५ । २२ ।
"अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे । तस्यामस्य जज्ञे देवातिथिः" ॥)

कररुहः, पुं, (करे रोहति कराङ्गुलीभ्य उत्पद्यते इत्यर्थः । कर + रुह + "इगुपधेति" । ३ । १ । १३४ । कः ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ (यथा आर्य्यासप्तशती ३७ । "अस्याः कररुह-खण्डितकाण्ड-पटप्रकटनिर्गता दृष्टिः" ॥)

करर्द्धि, स्त्री, (करस्य ऋद्धिः करेण ऋद्धिर्यस्य वा । करसम्पत् ।) करताली । इति त्रिकाण्डशेषः ॥

करवालिका, स्त्री, (करं वलते । वल हिंसादानयोः अण् । करेण वाल्यते वा । णिजन्तादच इः ततः कन् + टाप् च ।) करपालिका । इत्यमरटीकायां भरतः ॥

करवी, स्त्री, (कस्य वायोः रवो यत्र । गौरादित्वात् ङीष् ।) कवरी । हिङ्गुपत्रम् । इति शब्दचन्द्रिका ॥

करवीर, पुं, (करं वीरयति । वीर + विक्रान्तौ + कर्म्मण्यण् ।) खड्गः । दैत्यविशेषः । इति मेदिनी ॥ श्मशानम् । इति हेमचन्द्रः ॥ ब्रह्मावर्त्ते दृषद्वती-नदीतीरे चन्द्रशेखरराजपुरम् । इति कालिका-पुराणे ४६ अध्यायः ॥ (पर्व्वतविशेषः । यथा, भागवते ५।१६।२८ ।
"एवमपरेण पवनपारियात्रौ
दक्षिणेन कैलासकरवीरौ प्रागायतौ" ॥
नागविशेषः । यथा, महाभारते १ । ३५ । १२ ।
"करवीरः पुष्पदंष्ट्रो विल्वको विल्वपाण्डरः" ॥)
वृक्षविशेषः । करवी इति भाषा ॥
(यथा रामायणे ३ । १७ । १० ।
"दाडिमान् करवीरांश्च अशोकांस्तिलकांस्तथा" ॥)
तत्पर्य्यायः । प्रतिहासः २ शतप्रासः ३ चण्डातः ४ हयमारकः ५ । इत्यमरः ।२।४।७६ ॥ प्रतीहास

६ । इति तट्टीका ॥ अश्वघ्न ७ हयारि ८ अश्वमारक ९ शीतकुम्भ १० तुरङ्गारि ११ । इति रत्नमाला ॥ अश्वहा १२ वीर १३ हयमार १४ हयघ्न १५ शतकुन्द १६ अश्वरोधक १७ वीरक १८ कुन्द १९ शकुन्द २० श्वेतपुष्पक २१ अश्वान्तक २२ नखराह्व २३ अश्वनाशन २४ स्थलकुमुद २५ दिव्यपुष्प २६ हरिप्रिय २७ गौरीपुष्प २८ सिद्धपुष्प २९ । अस्य गुणा । कटुत्वम् । तीक्ष्णत्वम् । कुष्ठकण्डूतिनाशित्वम् । व्रणार्त्तिविषविस्फोटकशमनत्वम् । अश्वमृतिप्रदत्वञ्च । इति राजनिर्घण्ट ॥ (श्वेतरक्तभेदेन यथा,—

"करवीर श्वेतपुष्प शीतकुम्भोऽश्वमारक ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥
करवीरद्वय तिक्त कषाय कटुकञ्च तत् ।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् ।
वीर्य्योष्णं क्रिमिकण्डूघ्न भक्षित विषवन्मतम्" ॥

इति भावप्रकाश ॥ नागविशेष । इति भारतम् ॥)

करवीरक, पु, (करवीर इव कायति प्रकाशते । कै + क । कर वीरयतीति । कर + वीर विक्रान्तौ + ण्वुल् ।) अर्ज्जुनवृक्ष । इति राजनिर्घण्ट ॥ खड्ग । इति शब्दमाला ॥ (करवीर एव स्वार्थे कन् ।) करवीर । विषभेद । स तु करवीरस्य मूलम् । इति हेमचन्द्र ॥

करवीरकन्दसञ्ज्ञ, पु, (करवीरकन्दसञ्ज्ञया सञ्ज्ञा यस्य । करवीरकन्द इति सञ्ज्ञा यस्य वा ।) तैलकन्द । इति राजनिर्घण्ट ॥

करवीरभुजा, स्त्री, (करवीरस्य भुज इव शाखावत् भुज शाखाऽस्या ।) आढकीवृक्षः । इति राजनिर्घण्ट ॥ अरहर इति भाषा ॥

करवीरी, स्त्री, (किरति क्षिपति राक्षसासुरादीन् इति । कॄ + अप् । करः तादृश वीर पुत्रो यस्या । यद्वा क सुख राति ददातीति क + रा + कः । सुखप्रद वीरपुत्रो यस्या ।) अदिति । श्रेष्ठगवी । पुत्त्रवती । इति मेदिनी ॥

करशाखा, स्त्री, (करस्य शाखा इव ।) अङ्गुली । इत्यमर । २ । ६ । ८१ ॥ तासा परिमाण यथा ।

"अष्टभिस्तैर्भवेत् ज्येष्ठ मध्यम सप्तभिर्यवै ।
कन्यस षड्भिरुद्दिष्टमङ्गुल मुनिसत्तम ॥
मानन्तु पार्श्वेन । षड्यवा पार्श्वसम्मिता । इति कात्यायनदर्शनात्" । इति तिथ्यादितत्त्वम् ॥

तत्पर्य्यायः । अग्रुव १ अव्य २ क्षिप ३ विश ४ शर्य्या ५ रशना ६ धीतय ७ अपर्य्य ८ विप ९ कक्ष्या १० अवनय ११ हरित १२ स्वसार १३ जामय १४ सनाभय १५ योक्त्राणि १६ योजनानि १७ धुर १८ शाखा १९ अभीशव २० दीधितय २१ गभस्तय २२ । इति द्वाविंशतिरङ्गुलिनामानि । इति वेदनिघण्टौ २ अध्याय ॥

करशीकर, पु, (करात् करिशुण्डात् निःसृत शीकर । करस्य गजशुण्डस्य शीकरो वा ।) हस्तिशुण्डनिर्गतजलकणा । तत्पर्य्याय । वमथुः २ । इत्यमर । २ । ८ । ३७ ॥ (यथा रघु । ७ । ४८ ।

"उद्यन्तमग्निं शमयाम्बभूवु-
र्गजा विविग्ना करशीकरेण" ॥)

करशूक, पुं, (करस्य शूक सूक्ष्माग्र इव सूच्यग्र इव वा ।) नख । इति त्रिकाण्डशेष ॥

करहाट, पु, (करेण किरणेन सूर्य्यस्येति यावत् हाट्यते दीप्यते इति । हट् + णिच् + कर्म्मणि घञ् ।) पद्ममूलम् । मदनवृक्षः । इति मेदिनी ॥ महापिण्डीतरु । इति राजनिर्घण्ट ॥

करहाटक, पु, (करहाट एव इति स्वार्थे कन् । कर हाटयतीति ण्वुल् वा ।) मदनवृक्ष । इत्यमर । २ । ४ । ५२ ॥ हस्तोयस्वर्णे स्त्री ॥

करामर्द्द, पु, (कर आमृद्नातीति । कर + आ + मृद् + अण् ।) करमर्द्दवृक्ष । इति शब्दरत्नावली ॥ करम्चा इति भाषा ॥

काराम्बुक, पु, (कीर्य्यते क्षिप्यते । कॄ + कर्म्मणि अप् । करं अम्बु यस्मात् कप् ।) कृष्णपाकफलवृक्ष । इति शब्दचन्द्रिका भरतधृतवाचस्पतिश्च ॥ पाणि आमला इति भाषा ॥

काराम्लक, पु, (कीर्य्यते इति कर कीर्य्यमाण अम्ल यत । अम्ल + कप् ।) करमर्द्दकवृक्ष । इति राजनिर्घण्ट ॥

करायिका, स्त्री, (करानिव आचरति उड्डीनादिकाले करवल्लम्बमानत्वात्तथात्त्वम् । कर + आचारे क्यङ् । ततो + ण्वुल् + टाप् च ।) बलाकापक्षी । क्षुद्रबक । इति भूरिप्रयोग ॥

करारोट, पु, (करे आरोटते दीप्यते । आ + रुट् + अच् ।) अङ्गुरीयकम् । इति त्रिकाण्डशेष ॥

कराल, स्त्री, (कराय चक्षुरोगादिनाशाय अलति पर्य्याप्नोतीति । अल् + अच् ।) कृष्णकुठेरकः । इति मेदिनी ॥ काल तुलसी इति भाषा ॥

कराल, पु, (करं आलाति गृह्णाति । आ + ला + क । कराय क्षेपाय अलति पर्य्याप्नोति वा ।) सर्ज्जरसयुक्ततैलम् । इति मेदिनी ॥ गर्जनतेल इति भाषा ॥ तैले घृते वा पक्ववेसवारः । इति पाकराजेश्वर ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथा,

"तप्तस्नेहे पचेत् पूर्व्व वेसवारकसञ्ज्ञकम् ।
पाकप्रापितसौरभ्य कराल सूदकैर्मतम्" ॥

गन्धर्व्वभेद ॥ यथा, महाभारते । १ । १२३ । ५४ ।

"सद्वा बृहद्वा बृहक करालश्च महामना" ॥)

कराल, त्रि, (कराय क्षेपाय भयप्रदर्शनाय अलति पर्य्याप्नोति ।) दन्तुर । दँतो इति भाषा ॥ (यथा,

"कराल वदना घोरा मुक्तकेशी चतुर्भुजा" ।

इति चामुण्डाध्यानम् ॥) तुङ्ग । उच्च इति भाषा ॥ भीषण । इति मेदिनी ॥ भयानक इति यावत् ॥ (यथा, रघु । १२ । ९८ ।

"तद्योम्नि शतधा भिन्न ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालफणमण्डलम्" ॥)

करालक, पु, (कराल एव स्वार्थे कन् । कृरालवत् कायति वा ।) कृष्णतुलसी । इति रत्नमाला ॥ करालशब्दार्थश्चात्र ॥

करालत्रिपुटा, स्त्री, (करालानि त्रीणि पुटानि यस्या ।) लङ्काधान्यम् । इति राजनिर्घण्ट ॥

कराला, स्त्री, (करालनाम्ना नाम यस्या ।) शारिवा । अनन्तमूल इति ख्याता । इति रत्नमाला ॥ (शारिवाशब्दे अस्या गुणा व्याख्येया ॥)

करालिक, पु, (कराणा करसदृशशाखाना आलि श्रेणिर्यत्र । कप् ।) वृक्ष । इति हेमचन्द्र ॥

कराली, स्त्री, (कराल + गौरादित्वात् ङीष् ।) अग्ने सप्तजिह्वान्तर्गतजिह्वाविशेष । इति जटाधर ॥ (यथा मुण्डकोपनिषदि । १ । २ । ४ ।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरूपी च देवी
लेलायमाना इति सप्त जिह्वा" ॥)

करिकणावल्ली, स्त्री, (करिकणाया इव वल्ली ।) चविकावृक्ष । इति राजनिर्घण्ट । चइ इति भाषा ॥ (चविकाशब्देऽस्या विशेषो ज्ञेय ॥)

करिकुसुम्भ, पु, (करीति नागकेशर तद्वत् कुसुम्भ ।) नागकेशरचूर्णकम् । इति हारावली ॥

करिगर्ज्जित, क्ली, (करिणा गर्ज्जित गर्ज्जन । करि + गर्ज्ज + भावे क्त ।) हस्तिगर्जनम् । तत्पर्य्याय । बृंहितम् २ । इत्यमर । २ । ८ । १०७ ॥

करिज, पु, (करिणो जायते इति । करि + जन् + कर्त्तरि ड ।) हस्तिशिशु । इति शब्दमाला ॥

करिणी, स्त्री, (करिन् + स्त्रिया ङीप् ।) हस्तिनी । तत्पर्य्याय । धेनुका २ वशा ३ । इत्यमर । २ । ८ । ३६ ॥ करेणू ४ करेणु ५ करेणुका ६ रेणुका ७ वासिता ८ वासा ९ हस्तिनी १० । इति शब्दरत्नावली ॥ कटम्भरा ११ पुष्करिणी १२ कचा १३ गणिका १४ गजयोषित् १५ । इति जटाधर ॥ पद्मिनी १६ इत्यमरटीका ॥ (यथा भागवते । ४ । ९ । ५३ ।

"आरोप्य करिणीं हृष्ट स्तूयमानोऽविशत्पुरम्" ॥)

करिदारक, पु, (करिण दृणाति छिनत्ति दारयतीत्यर्थ । दॄ विदारे + ण्वुल् ।) सिंह । इति शब्दरत्नावली ॥

करिपत्र, क्ली, (करिण कर्णवत् पत्र यस्य ।) तालीशपत्रम् । इति राजनिर्घण्ट ॥

करिपिप्पली, स्त्री, (करिसञ्ज्ञया सञ्ज्ञा यस्या पिप्पल्या सा । करिनामिका पिप्पली ।) गजपिप्पली । इत्यमर । २ । ४ । ९७ ॥

करिपोत, पु, (करिण पोत शिशु ।) करिशावक । इति हलायुध । २ । ६९ ॥

करिबन्ध, पु, (करी बध्यते रुध्यतेऽत्र । यद्वा करिणं हस्तिन बध्नाति अत्र । बन्ध + अधिकरणे घञ् ।) हस्तिबन्धनस्तम्भ । तत्पर्य्याय । आरलि २ । इति हारावली ॥

करिमाचल, पु, (मच शाठ्यदम्भयो रितिधातो भावे घञ् । करिणि हस्तिवधविषये माचं शाठ्यं लाति गृह्णातीति । ला + क ।) सिंह । इति त्रिकाण्डशेष ॥

करिमुख, पु, (करिणो मुखमिव मुखं यस्य ।) गणेश । इति त्रिकाण्डशेष ॥

करिर, पु, क्ली, (कॄ + इरन् ।) करीर । इति शब्दरत्नावली ॥

करिशावकः, पुं, (करिणः शावकः शिशुः ।) हस्ति-शिशुः । तत्पर्य्यायः । कलभः २ । करभ इत्यपि पाठः । इत्यमरः । २ । ८ । ३५ ॥ करिपोतः ३ । इति हलायुधः ॥ करिजः ४ । इति शब्दमाला ॥ विक्कः ५ । धिक्कः ६ । यथा, शब्दरत्नावली ॥

"यावत् पञ्चाब्दमेतस्मिन् करभः कलभोऽपि च ।
विक्कधिक्कौ तथा स्त्री तु करभी कलभीत्यपि" ॥

करी, [न्] पुं, (करः शुण्डः अस्यास्तीति इनि ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा भागवते । ८ । २ । २२ ।

"स घर्म्मतप्तः करिभिः करेणुभि-
र्वृतो मदच्युत्कलभैरनुद्रुतः" ॥)

करीरः, पुंस्त्री, (किरति विक्षिपति स्वदेहजावर-णादीनिति । "कॄशॄपॄकटिपटिशौटिभ्य ईरन्" । उणां । ४ । ३० । इति ईरन् ।) वंशाङ्कुरः । इत्यमरः । ३ । ३ । १७३ ॥ वाँशेर कोँड़ा इति भाषा ॥ (यथा, माघे ४ । १४ ।

"रत्नैः पुनर्यत्र रुचा रुचस्ता-
मानिन्यिरे वंशकरीरनीलैः" ॥

"वंशशब्दस्याम्लानताहेतोरलूनतायाः प्रतिपत्त्य-र्थत्वादपौनरुक्त्यम् ॥ अतएवैकार्थपदमप्रयोज्यमि-त्युक्त्वा करिकलभकर्णावतंसादिषु प्रतिपत्तिविशे-षकरेषु न दोष इत्याह वामनः" ॥ इति तट्टी-कायां मल्लिनाथः ॥)

अस्य गुणाः । श्लेष्मनाशित्वम् । कषायत्वम् । दाह-जनकत्वञ्च । इति राजवल्लभः ॥ (यथाह वाभटः ।

"करीरमाध्मानकरं कषायस्वादुतिक्तकम्" ॥
"वेणोः करीराः कफला मधुरा रसपाकतः ।
विदाहिनो वातकराः सकषाया विरूक्षणाः" ॥

इति सुश्रुतः ॥)

करीरः, पुं, (कीर्य्यते क्षिप्यते जलमत्र "कॄशॄपॄक-टीति" ईरन् । उणां । ४ । ३० ।) घटः । इति मेदिनी ॥ (कीर्य्यते दूरे निक्षिप्यते दूरतस्त्यज्यते कण्टकादिभयादिति यावत् ।) मरुभूमिज उष्ट्र-प्रियकण्टकिवृक्षः । करील इति भाषा । तत्-पर्य्यायः । क्रकरः २ ग्रन्थिलः ३ । इत्यमरः । २ । ४ । ७७ ॥ क्रकचः ४ । इति तट्टीका ॥ निष्पत्रिका ५ करिरः ६ गूढ़पत्रः ७ करकः ८ तीक्ष्णकण्टकः ९ । अस्य गुणाः । (यथा भावप्रकाशे ।

"करीरः कटुकस्तिक्तः स्वेद्युष्णो भेदनः स्मृतः ।
दुर्नामकफवातामगरशोथव्रणप्रणुत्" ॥)

आध्मानकारित्वम् । कषायत्वम् । कटुत्वम् । उष्ण-त्वम् । अतिशयकफकारित्वम् । श्वासानिलारो-चकसर्व्वशूलविच्छर्दिखर्जूव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

करीरा, स्त्री, (करिर + "अजाद्यतष्टाप्" । ४ । १ । ४ । इति टाप् ।) चीरिका । झिँझि पोका इति भाषा ॥ हस्तिदन्तमूलम् । इत्यादिकोषः ॥

करीरिका, स्त्री, (करीरमिवाकृतिरस्त्यस्याः । करीर + ठन् + टाप् च ।) हस्तिदन्तमूलम् । इति त्रि-काण्डशेषः ॥

करीरी, स्त्री, (कॄ + ईरन् + गौरादित्वात् ङीष् ।) चीरिका । हस्तिदन्तमूलम् । इति मेदिनी ॥

करीषः, पुं स्त्री, (कीर्य्यते विक्षिप्यते इति । "कॄतॄ-भ्यामीषन्" । उणां ४ । २६ । इति कॄ + ईषन् ।) शुष्कगोमयम् । इत्यमरः । २ । ९ । ५१ ॥ घुँटे इति भाषा । तत्पर्य्यायः । गोमयशिः २ कृशः ३ । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । १०० । ७ ।

"ददर्श च वने तस्मिन् महतः सञ्चयान् कृतान् ।
मृगाणां महिषीणाञ्च करीषैः शीतकारणात्" ॥)

करीषाग्निः, पुं, (करीषे करीषस्थितो वा अग्निः ।) शुष्कगोमयवह्निः । घुँटेर आगुन इति भाषा । तत्पर्य्यायः । कारणः २ । इति त्रिकाण्डशेषः ॥

करुणः, पुं, (करोति मनः आनुकूल्याय । कृ + "कॄ-वृदारिभ्य उनन्" । उणां । ३ । ५३ । इति उनन् ।) वृक्षविशेषः । करुणा लेवुर गाछ इति भाषा । तत्फलगुणाः । कफवाय्वामभेदोनाशित्वम् । पित्त-प्रकोपकत्वञ्च । इति राजवल्लभः ॥ बुद्धभेदः । इति त्रिकाण्डशेषः ॥ शृङ्गाराद्यष्टरसान्तर्गतद्वितीय-रसः । इत्यमरः । १ । ७ । १७ ॥ तस्य लक्षणादि ।

"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥
अनुभावा दैवनिन्दा भूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च ॥
निर्व्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।
विषादजड़तोन्मादचिन्ताद्या व्यभिचारिणः ॥
शोच्यं विनष्टबन्धुप्रभृति । यथा राघवविलासे ।
विपिने क्व जटानिबन्धनं
तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटना विधेः स्फुटं
ननु खड्गेन शिरीषकर्त्तनम् ॥

अत्र रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावपि उदाहार्य्यम् ॥ परिपोषस्तु महाभारते स्त्रीपर्व्वणि बोद्धव्यः" । इति साहित्यदर्पणे ३ । १९९ ॥ (सर्व्व-जीवेषु दयावान् । यथा भागवते । ३ । २७ । ८ ।

"यदृच्छयोपलब्धेन सन्तुष्टो मितभुक् मुनिः ।
विविक्तशरणः शान्तो मैत्रः करुण आत्मवान्" ॥)

करुणमल्ली, स्त्री, (करुणा करुणाया अर्हा मल्ली ।) नवमल्लिका । इति शब्दचन्द्रिका ॥

करुणविप्रलम्भः, पुं, (करुणयुक्तो विप्रलम्भः ।) पूर्व्व-रागादिचतुर्भेदविप्रलम्भशृङ्गारमध्ये विप्रलम्भवि-शेषः । अस्य लक्षणम् । यथा साहित्यदर्पणे ३ परिच्छेदे १९३ ।

"यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः" ॥

यथा, कादम्बर्य्याम् । "पुण्डरीकमहाश्वेतावृत्तान्ते पुनरलभ्ये शरीरान्तरे वा लभ्ये करुणाख्य एव रसः ॥ किञ्चात्राकाशसरस्वतीभाषानन्तरमेव शृङ्गारः । सङ्गमप्रत्याशायां रतेरुद्भावात् प्रथ-मन्तु करुण एवेत्यभियुक्ता मन्यन्ते यच्चात्र सङ्गम-प्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेद एवेति केचिदाहुः तदन्ये मरण-रूपविशेषसम्भवात्तद्भिन्नमपि मन्यन्ते" ॥

करुणा, स्त्री, ("कॄवृदारिभ्य उनन्" । उणां । ३ । ५३ । इति कृ + उनन् । टाप् च ।) परदुःखप्रहा-णेच्छा । तत्पर्य्यायः । कारुण्यम् २ घृणा ३ कृपा ४ दया ५ अनुकम्पा ६ अनुक्रोशः ७ । इत्य-मरः । १ । ७ । १ ॥ शूकः ८ । इति हेमचन्द्रः ॥ (यथा रघुः ८ । ६७ ।

"करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम्" ॥

गङ्गानामविशेषः । यथा काशीखण्डे २९ । ४३ ।

"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥

करुणा दयास्वरूपा । इति तट्टीका ॥)

करुणापरः, त्रि, (करुणा परा यस्य करुणायां परः अनुरागी वा ।) दयापरः । तत्पर्य्यायः । दयालुः २ कृपालुः ३ सूरतः ४ । इति हेमचन्द्रः ॥

करुणी, स्त्री, (कृ + उनन् + ङीप् ।) पुष्पवृक्षविशेषः । ककरखिरणि इति कोङ्कणे प्रसिद्धा । तत्पर्य्यायः । ग्रीष्मपुष्पी २ रक्तपुष्पी ३ चारिणी ४ राजप्रिया ५ राजपुष्पी ६ सूक्ष्मा ७ ब्रह्मचारिणी ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफ-मारुताध्मानविषविच्छर्दिजन्तूर्द्ध्वश्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥

करेटः, पुं, (करे कराङ्गुलीषु अटति उत्पद्यते इति अट् + अच् अलुक्समासः ।) नखः । इति त्रिका-ण्डशेषः ॥

करेटव्या, स्त्री, (करे अटं अटनं व्ययतीति । व्ये + डः ततष्टाप् ।) धनच्छूपक्षी । इति त्रिकाण्डशेषः ॥

करेटुः, पुं, (के जले वायौ वा रेटतीति । रेटृ भाषण-याचनयोः + मृगय्वादित्वात् कुः ।) पक्षिविशेषः । करकटिया इति भाषा । तत्पर्य्यायः । कर्करेटुः २ । इत्यमरः । २ । ५ । १९ ॥ करटुः ३ कर्कराटुकः ४ । इति हेमचन्द्रः ॥

करेणुः, पुं, ("कृहृभ्यामेणुः" । उणां । २ । १ । इति कृ + एणुः । के मस्तके रेणुः पांशुर्यस्य वा । मस्तके शुण्डाकृष्टधूलीनिक्षेपणात् तथात्वम् ।) हस्ती । इत्यमरः । ३ । ३ । ५२ ॥ (यथा माघे १२ । ५ ।

"उत्क्षिप्तगात्रः स्म विडम्बयन्नभः
समुत्पतिष्यन्तमगेन्द्रमुच्चकैः ।
आकुञ्चितप्रोहनिरूपितक्रमं
करेणुरारोहयते निषादिनम्" ॥)

कर्णिकारवृक्षः । इति विश्वः ॥

करेणुः, स्त्री, (कृ + एणु ।) हस्तिनी । इत्यमरः । ३ । ३ । ५२ ॥ (यथा रामायणे २ । ४० । २९ ।

"शुश्रुवे चाग्रतः स्त्रीणां रुदतीनां महास्वनः ।
यथा नादः करेणूनां बद्धे महति कुञ्जरे" ॥

अस्या दुग्धगुणा यथोक्ताः सुश्रुते ।

"हस्तिन्याः [दुग्धं] मधुरं वृष्यं कषायानुरसं गुरु ।
स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम्" ॥)

करेणुभूः, पुं, (करेणौ करेणुविषये भवति हस्ति-शास्त्रप्रवर्त्तनाय प्रभवतीत्यर्थः । भू + क्विप् ।) पाल-काप्यमुनिः । इति हेमचन्द्रः ॥

करेणुसुतः, पुं, (करेणुशाख्लकरणाय उत्पन्नः सुतः ।) मुनिविशेषः । इति त्रिकाण्डशेषः ॥ (करेणोः सुतः । इति व्युत्पत्त्या करभः ॥)

करेणूः, पुं स्त्री, (कृ+एनू ।) हस्ती । हस्तिनी । इत्यमरटीकायां रायमुकुटः ॥

करेन्दुकः, पुं, (करेण रश्मिना दीप्त्या इति यावत् इन्दुरिव कायति शोभते । कै+कः ।) भूतृणम् । इति राजनिर्घण्टः ॥ (भूतृणशब्देऽस्य गुणादयो ज्ञेयाः ॥)

करेवरः, पुं, (कीर्य्यते क्षिप्यते भाषया कपिभिरिति यावत् करः तस्मिन् म्रियते उत्पद्यते ।) तुरुष्कः । इति राजनिर्घण्टः ॥ शिलारस इति भाषा ॥

करोट, क्ली, (कः वायुः अन्तर्वायुः । रोटते प्रतिहन्ति के मस्तके रोटते दीप्यते वा । रुट्+अच् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ॥

करोटिः, स्त्री, (केन वायुना अन्तर्वायुना रुध्यते प्रतिहन्यते । के शिरसि रोटते दीप्यते शोभते वा । रुट्+इन् ।) शिरोऽस्थि । इत्यमरः । २ । ६ । ६९ ॥ माथार खुलि इति भाषा ॥

करोटी, स्त्री, (करोट+गौरादित्वात् ङीष् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ॥

कर्क, हासे । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अकं-सेट् ।) कर्कति । इति दुर्गादासः ॥

कर्कः, पुं, (करोति आदिष्टं पालयति "कृदाधारार्चिकलिभ्यः कः" । उणा ३ । ४० । इति कः । बहुलवचनान्न ककारस्येत् संज्ञा ।) शुक्लाश्वः । इत्यमरः । २ । ८ । ४६ ॥ कुलीरः । दर्पणः । (क्रियतेऽसौ) घटः । कर्कटराशिः । (कृणोति हिनस्ति) अग्निः । इति हेमचन्द्रः शब्दरत्नावली च ॥ कर्कटवृक्षः । इति राजनिर्घण्टः ॥

कर्कचिर्भिटी, स्त्री, (कर्कवत् कर्करूपा चिर्भिटी वा । कर्कवर्णा वा चिर्भिटी ।) चिर्भिटा । कर्कटीभेदः । इति राजनिर्घण्टः ॥

कर्कटः, पुं, (कर्क+अटन् प्रत्ययः ।) वृक्षविशेषः । तत्पर्य्यायः । कर्कः २ क्षुद्रधात्री ३ क्षुद्रामलकसंज्ञः ४ कर्कफलम् ५ ॥ * ॥ जलजन्तुविशेषः । काँकडा इति भाषा । तत्पर्य्यायः । कर्कटकः २ कुलीरः ३ कुलीरकः ४ सदंशकः ५ पङ्कवासः ६ तिर्य्यग्गामी ७ । (यथाह आर्य्यासप्तशती । ३२२ । "अयमुद्गृहीतवडिशः कर्कट इव मर्कटः पुरतः" ॥) अस्य गुणाः । स्पष्टविण्मूत्रत्वम् । भग्नसन्धानत्वम् । वायुपित्तनाशित्वञ्च ॥ कृष्णकर्कटगुणाः । बलकारित्वम् । ईषदुष्णत्वम् । अनिलापहत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ पक्षिविशेषः । इति मेदिनी करकटिया इति भाषा ॥ पद्मकन्दः । तुम्बी । इति जटाधरः ॥ * ॥ मेषादिद्वादशराश्यन्तर्गतचतुर्थराशिः । स तु पुनर्व्वसुशेषपादेन सह पुष्याश्लेषाभ्यां भवति । अस्य देवता कुलीराकृतिः । स तु पृष्ठोदयः । श्वेतवर्णः । कफप्रकृतिः । स्निग्धः । जलचरः । विप्रवर्णः । उत्तरदिक्स्वामी । बहुस्त्रीसङ्गः । बहुसन्तानश्च । अत्र जातस्य फलम् । कपटमनस्त्वं मृदुभाषित्वं मलिनत्वं अप्रवासित्वं अग्रगामित्वञ्च । इति ज्योतिषम् ॥ * ॥

जन्मकालीनचन्द्राश्रिततद्राशिफलम् ।

"श्रुतकलामलनिर्म्मलवृत्तयः
सुकृशगन्धजलाशयकेलयः ।
क्षितिजनराश्च कुलीरगते विधौ
वसुमतः सुमतोऽर्थिलब्धयः" ॥

इति कोष्ठीप्रदीपः ॥ ० ॥ तस्योदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं यथा । दशव्यङ्गुलाधिकपञ्चाङ्गुलप्रभे कलिकाताख्यदेशे वर्त्तमानोनविंशायनांशः चत्वारिंशदधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ तत्र जातफलम् ।

"कर्किलग्ने समुत्पन्नो भोगी सर्व्वजनप्रियः ॥
मिष्टान्नपानभोगी च जायते स्वजनप्रियः" ॥

इति कोष्ठीप्रदीपः ॥ (नागविशेषः । यथा पुराणम् ।

"अनन्तो वासुकी पद्मो महापद्मस्तु तक्षकः ।
कुलीरः कर्कटः शङ्खस्त्वष्टौ नागाः प्रकीर्त्तिताः" ॥)

कर्कटकः, पुं, (कर्कट एव स्वार्थे कन् ।) कुलीरः ॥ इत्यमरः । १ । १० । २१ ॥ (यथाह सुश्रुतः ।

"कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः ।
शुक्लः सन्धानकृत् सृष्ट-विण्मूत्रोऽनिलपित्तहा" ॥)

कर्कटशृङ्गिका, स्त्री, (कर्कटतुल्यं शृङ्गं अस्याः कर्कटशृङ्गीव स्वार्थे कन् ततष्टापि ह्रस्वम् ।) कर्कटशृङ्गीवृक्षः । इति शब्दरत्नावली ॥

("नीलोत्पलं मृणालञ्च यष्टी कर्कटशृङ्गिका ।
गोक्षीरेश्च द्वितीये च पीत्वा शाम्यति वेदना" ॥

इति इन्द्रजाले गर्भस्रावचिकित्सा ॥)

कर्कटशृङ्गी, स्त्री, (कर्कटस्य शृङ्गमिव दशकमिवेत्यर्थः शृङ्गमग्रभागो यस्याः ।) वृक्षविशेषः । काँकडाशिङ्गी इति भाषा । तत्पर्य्यायः । कर्कटाख्या २ महाघोषा ३ शृङ्गी ४ कुलीरशृङ्गी ५ चक्राङ्गी ६ कुलिङ्गी ७ कासनाशिनी ८ । इति रत्नमाला ॥ घोषा ९ वनमूर्द्धजा १० चक्रा ११ शिखरी १२ कर्कटाङ्गा १३ कर्कटी १४ विषाणिका १५ कौलीरा १६ चन्द्रास्पदा १७ वक्राङ्गा १८ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वायुहिक्कातिसारकासश्वासपित्तास्रनाशित्वञ्च । इति राजनिर्घण्टः ॥

कर्कटाख्या, स्त्री (कर्कटस्याख्येव आख्याऽस्याः ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कर्कटाह्वः, पुं, (कर्कटं आह्वयते स्पर्द्धते कण्टकमयत्वात् । आ+ह्वे+कः । कर्कट इति नाम्ना आह्वयते वा ।) बिल्ववृक्षः । इति राजनिर्घण्टः ॥

कर्कटाह्वा, स्त्री, (कर्कटाह्व+टाप् ।) कर्कटशृङ्गीवृक्षः । इति वैद्यकम् ॥

कर्कटि, स्त्री, (करं कटति प्राप्नोति । कटः+"सर्व्वधातुभ्य इन्" । उणा ४ । ११७ । इति इन् । कर्कं परिणामे शुक्लतां अटति गच्छति वा कर्क+अट्+इन् । शकन्ध्वादिवत् अकारलोपे साधुः ।) कर्कटी । इति शब्दरत्नावली । काँकुड इति भाषा ॥

कर्कटिनी, स्त्री, (कर्कटाकारः अस्त्यस्याः । कर्कट+इन् ततो ङीप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

कर्कटी, स्त्री, (कर्कं कण्टकं अटति गच्छति । कर्क+अट्+इन् । शकन्ध्वादित्वात् साधुः ततो ङीष् । करं कटति वा कटेः इन् ततो ङीष् ।) शाल्मलिफलम् । इति मेदिनी ॥ घटः । इति शब्दरत्नावली ॥ देवदालीलता । कर्कटशृङ्गीवृक्षः । एर्व्वारुः । बड काँकुड् इति भाषा । घोटिकावृक्षः । फललताविशेषः । काँकुड् इति भाषा ॥ तत्पर्य्यायः । कटुदली २ छर्द्दापनिका ३ पीनसा ४ मूत्रफला ५ त्रपुषा ६ हस्तिपर्णी ७ लोमशकाण्डा ८ मूत्रला ९ बहुकन्दा १० । इति राजनिर्घण्टः ॥ कर्कटाह्वः ११ शान्तनुः १२ । इति रत्नमाला ॥ चिर्भटी १३ वालुकी १४ एर्व्वारुः १५ त्रपुषी १६ । इति हेमचन्द्रः ॥ अस्या गुणाः । मधुरत्वम् । शीतत्वम् । तिक्तायास्तु रक्तपित्तनाशित्वम् । कफदोषकारित्वञ्च । पक्वायास्तु मूत्ररोधार्त्तिनाशित्वम् । इति राजनिर्घण्टः ॥ (यथा च भावप्रकाशे ।

"कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा आमा पक्वा तृष्णाग्निपित्तकृत्" ।

अस्याः पाकप्रकारस्तु ।

"त्वग्वीजरहिता प्रौढा गुलिकाकारखण्डिता ।
तलिता सुघृते तप्ते कर्कटी वाऽवलेहिता ॥
विपाण्डुखण्डं घृतदुग्धसार्द्धं
विभावितं वल्लजशर्कराभ्याम् ।
कृतैलवासञ्च कटुष्णमेतत्
प्रतिक्षणं रोचनमातनोति ॥)

कर्कटुः, पुं, (कर्क निपातनात् साधुः । कर्कट+मृगय्वादित्वात् कुः वा ।) करेटुपक्षी । इति शब्दरत्नावली ॥ करकटिया इति भाषा ॥

कर्कन्धुः, पुं स्त्री, (कर्कं कण्टकं दधातीति । धा+निपातनात् कुः नुम् च ।) कोलिवृक्षः । इत्यमरटीकायां स्वामी ॥ (वदरीफलम् । अस्य पर्य्यायगुणा यथा, भावप्रकाशस्य पूर्व्वखण्डे १ मभागे ॥

"पुंसि स्त्रियाञ्च कर्कन्धुर्वदरी कोलमित्यपि ।
फेनिलं कुवलं घोण्टा सौवीरं वदरं महत् ।
अजप्रिया कुहा कोली विषमोभयकण्टका" ॥

तत्र वदरविशेषाणां लक्षणानि गुणाश्च ।

"पच्यमानं सुमधुरं सौवीरं वदरं महत् ।
सौवीरं वदरं शीतं भेदनं गुरुशीतलम् ॥
वृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते ॥
कोलन्तु वदरं ग्राहि रुच्यमुष्णञ्च वातलम् ।
कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥
कर्कन्धुः क्षुद्रवदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रवदरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यग्निकृत्सर्व्वं लघु तृष्णाक्लमास्रजित्" ॥

क्वचित् क्लीवेऽपि दृश्यते यथा,

"कर्कन्धुकोलवदरमामं पित्तकफावहम् ।
पक्वं पित्तानिलहरं स्निग्धं समधुरं सरम् ॥
पुरातनं तृट्शमनं श्रमघ्नं दीपनं लघु ।
सौवीरं वदरं स्निग्धं मधुरं वातपित्तजित्" ॥

इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥)

न्धू, पुं स्त्री, (कर्कं कण्टकं दधातीति । धा + "अन्दूदृम्भूजम्बूकम्बूकफेलुकर्कन्धूदिधिषु" । उणा० १ । ९५ । इति कू निपातनात् साधु ।) बदरीवृक्षः । इत्यमरः । २ । ४ । ३६ ॥ (यथा भागवते । ३ । ३१ । २ ।
"कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्" ॥
कर्कन्धूशब्देऽस्या विवरणं ज्ञेयम् ॥)

कर्कर, त्रि, (कर्क + अरन् ।) कठिनम् । इति मेदिनी ॥

कर्करः, स्त्री, (कर्क चूर्णनकत्वेन हास्यवत् शुभ्रताप्रकाशं रातीति । कर्क + रा + क ।) चूर्णनकक्षुद्रपाषाणखण्डम् । तत्पर्य्यायः । चूर्णखण्डम् २ । इति हारावली । काँकर घुटिं इत्यादि भाषा ॥ ("किन्नोवर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते" ॥ इति अमरुशतके ७ ॥)

कर्करः, पुं, (कर्कं हासं प्रतिबिम्बप्रकाशं राति । रा + क । कर्क + अरन् वा ।) दर्पणः । इति मेदिनी ॥ (नागभेदः । इति भारते १ । ३५ । १६ ॥)

कर्कराङ्ग, पुं, (कर्करतुल्यं अङ्गं यस्य ।) कालकण्ठपक्षी । इति शब्दमाला ॥

कर्कराटु, पुं, (कर्कं हासं रटति प्रकटयतीव । रट + कु । कुन् वा । णिजन्तात् कुर्वा ।) कटाक्षः । इति जटाधरः ॥

कर्कराटुक, पुं, (कर्कं कठिनं कर्कशमित्यर्थः रटति रौतीति रट + उकञ् ।) कर्करेटुपक्षी । इति शब्दरत्नावली । करकटिया इति भाषा ॥

कर्करान्धुक, पुं, (कर्करः कठोरः अन्धुः । अत्यन्तान्धकारतया दुर्दर्शत्वात् । संज्ञायां कन् ।) अन्धकूपः इति त्रिकाण्डशेषः ॥

कर्करालः, पुं स्त्री, (कर्करः रूक्षतया कठिनोऽपि अलति पर्य्याप्नोति । अल + अच् ।) चूर्णकुन्तलः । इति हेमचन्द्रः ॥

कर्करी, स्त्री, (कर्कं हासं हास्यप्रकाशवत् निर्म्मलसलिलं रातीति । रा + कः + गौरादित्वात् ङीष् ।) अल्पवारिधानिका । झारी इति भाषा । तत्पर्य्यायः । आलुः २ गलन्तिका ३ । इत्यमरः । २ । ९ । ३१ ॥ अलुः ४ आरुः ५ । इति तट्टीका ॥

कर्करीका, स्त्री, (कर्करी + स्वार्थे कन् ह्रस्वो न ।) कर्करी । इत्युणादिकोषः ॥

कर्करेट, स्त्री, (कर्कं कर्कं इतिशब्दं गलेहस्तमाधाय दूरीकुरु इत्याकारं रेटते यत्र । रेट् + अधिकरणे घञ् ।) गलेहस्ताधानम् । गलाटिपि इति भाषा । तत्पर्य्यायः । अर्द्धचन्द्रम् २ अङ्गुलितोग्यम् ३ । इति हारावली ॥

कर्करेटु, पुं, (कर्कं कर्केतिशब्दं वा रेटते भाषते रौति इत्यर्थः । रेट् भाषणे याचने च + मृगय्वादित्वात् साधु ।) करेटुपक्षी । इत्यमरः । २ । ५ । १९ । करकटिया इति भाषा ॥

कर्कश, पुं, (कर्कशब्दात् मत्वर्थे लोमादित्वात् शः ।) काम्पिल्यवृक्षः । इत्यमरः । २ । ४ । १४६ । गुंडा रोचनी इति भाषा ॥ (व्यवहारोऽस्य यथा, चरके विमाने ८ अध्याये ॥ "कर्कोटकवार्त्ताकुकर्कशकाकमाचीकारवल्लीत्यादिषु" ॥) कासमर्दः । इक्षुः । (कृणोति हिनस्ति शत्रुं कृञ् हिंसायां + अन्येभ्योऽपीति विच् । कशति कशशब्दे इति पचाद्यच् कर् चासौ कशश्चेति । करे कशति वा ।) खड्गः ॥ इति हेमचन्द्रः ॥

कर्कश, त्रि, (कर्कात् लोमादित्वात् शः । तत प्राग्वत् कृञादिधातोर्निष्पादितार्थे च ।) साहसिकः । कठोरः । (यथा भागवते । ३ । १७ । ११ ।
"खराश्च कर्कशैः क्षत्त खुरैर्घ्नन्तो धरातलम्" ॥)
अमसृणः । (यथा रघौ । ३ । ४५ ।
"हरे कुमारोऽपि कुमारविक्रम
सुरद्विपास्फालनकर्कशाङ्गुलौ" ॥)
दुष्पर्शः । इत्यमरः । ३ । ३ । २१९ ॥ क्रूरः । निर्दयः । इति मेदिनी ॥ (यथा रामायणे । ५ । ४९ । ५ ।
"तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः" ॥)
कृपणः । इति विश्वः ॥

कर्कशच्छद, पुं, (कर्कशः छदः पत्रं यस्य ।) पटोलः । इति शब्दमाला ॥ शाकोटवृक्षः । शेओडा इति भाषा । इति त्रिकाण्डशेषः ॥

कर्कशच्छदा, स्त्री, (कर्कशः अमसृणश्छदो यस्याः ।) कोशातकी । झिङ्गा इति भाषा । दग्धारुहः । इति राजनिर्घण्टः ॥ (झिङ्गाकेऽस्या विवरणं ज्ञातव्यम् ॥)

कर्कशदल, पुं, (कर्कशं दलं पत्रं यस्य ।) पटोलः । इति रत्नमाला ॥

कर्कशदला, स्त्री, (कर्कशं दलं यस्याः ।) दग्धारुहः । इति राजनिर्घण्टः । कोशातकी । झिङ्गा इति भाषा ॥

कर्कशवाक्य, क्ली, (कर्कशं च तत् वाक्यञ्चेति ।) निष्ठुरवचनम् । परुषा वाक् । इति शब्दरत्नावली ॥

कर्कशा, स्त्री, (कर्कशब्दात् लोमादित्वात् शः ततः टाप् च ।) वृश्चिकालीवृक्षः । इति राजनिर्घण्टः ॥

कर्कशिका, स्त्री, (कर्कशा + संज्ञायां कन् ततष्टाप् अत इत्वम् ।) वनकोलिः । इति रत्नमाला ॥

कर्कसार, स्त्री, (कर्कं कर्कशं कठिनो वा सक्त्वादिः सारो यत्र ।) करम्भकम् । दधिसक्तु । इति हारावली ॥

कर्कारु, पुं, (कर्कं हास्यवत् शौक्ल्यं ऋच्छति प्राप्नोतीति । कर्क + ऋ + बाहुलकात् उण् ।) कुष्माण्डः । इत्यमरः । २ । ४ । १५५ ॥ (अस्य पर्य्यायो गुणाश्च यथा,—
"कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता ।
कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः ॥
पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ मे भागे ॥ एर्व्वारुयोगेनास्य गुणभेदोऽपि दृश्यते । तथाच सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"एर्व्वारुकं सकर्कारु सम्पक्वं कफवातकृत् ।
सक्षारं मधुरं रुच्यं दीपनं नातिपित्तलम्" ॥)

कर्कारुक, पुं, (कर्कं हासं भोजने हितकारित्वात् स्वादुत्वाच्च आनन्दं अर्पयतीति । कर्क + ऋ + णिच् + उकञ् । कर्कं हासं हितजनकत्वात् आह्लादकरत्वम् ऋच्छति वा ।) कालिङ्गवृक्षः । इति हारावली ॥ (तत्फलगुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"त्रपुसैर्व्वारुकर्कारुकशीर्णवृन्तप्रभृतीनि ।
गुरुविष्टम्भिशीतानि स्वादूनि कफकृन्ति च ॥
स्रष्टमूत्रपुरीषाणि सक्षारमधुराणि च" ॥)

कर्कि, पुं, (कर्क + इन् ।) कर्कटराशिः । इति ज्योतिषम् ॥

कर्केतन, क्ली पुं, (कर्कं हास्यादौ तनोतीति । कर्क + तन् + अच् । सप्तम्या अलुक् ।) रत्नविशेषः । तदुत्पत्त्यादि यथा, गारुडे ७५ अध्याये ॥

सूत उवाच ।

"वायुर्नखान् दैत्यपतेर्गृहीत्वा
चिक्षेप सम्यक् वनेषु हृष्टः ।
तत प्रसूतं पवनोपपन्नं
कर्केतनं पूज्यतमं पृथिव्याम् ॥
वर्णेन तद्रुधिरसोममधुप्रकाश-
माताम्रपीतदहनोज्ज्वलितं विभाति ।
नीलं पुनः श्वलसितं परुषं विभिन्नं
व्याध्यादिदोषकरणेन न तद्विभाति ॥
स्निग्धा विशुद्धाः समरागिणश्च
आपीतवर्णा गुरवो विचित्राः ।
त्रासव्रणव्याधिविवर्जिताश्च
कर्केतनास्ते परमाः पवित्राः ॥
पत्रेण काञ्चनमयेन तु वेष्टयित्वा
हस्ते गलेऽथ हृतमेतदतिप्रकाशम् ।
रोगप्रणाशनकरं कलिनाशनञ्च
आयुष्करं कुलकरञ्च सुखप्रदञ्च ॥
सर्व्वविधं बहुगुणं मणिमावहन्ति
कर्केतनं शुभमलं हृतये नरा ये ।
ते पूजिता बहुधना बहुबान्धवाश्च
नित्योज्ज्वलाः प्रमुदिता अपि ते भवन्ति ॥
एकोऽपनद्धं विमलाकुलनीलभासः
प्रम्लानरागलुलिता कलुषा विरूपाः ।
तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णाः
कर्केतनस्य सदृशं वपुरुद्वहन्ति ॥
कर्केतनं यदि परीक्षितवर्णरूपं
प्रत्ययमास्वरदिवाकरसप्रकाशम् ।
तस्योत्तमस्य मणिशास्त्रविदा महिम्ना
तुल्यन्तुमूल्यमुदितं तुलितस्य काय्यम्" ॥

हस्ते गलेऽथ हृतमेतदतिप्रकाशमित्यत्र तत्र यदा ऊर्व्वहे भवति प्रकाशमिति पुस्तकान्तरे पाठः ॥

कर्कोट, पुं, (कर्क + ओटप्रत्ययः ।) नागराजविशेषः । इति त्रिकाण्डशेषः ॥

कर्कोटक, पुं, (कर्कं कण्टकमयत्वात् कठोरं अटति प्राप्नोति वक्ररूपतया कायति प्रकाशते । पृषोदरादित्वात् ओकारादेशे साधुः ।) बिल्ववृक्षः । (कर्कोट + संज्ञायां कन् ।) कद्रुपुत्रनागराजविशेषः । इति मेदिनी ॥ (यथा, महाभारते । १ । आस्तीके । ३५ । ५ ।
"ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" ॥)

वृत्त'। इति राजनिर्घण्ट ॥ फललताविशेष ॥ काँकरोल इति भाषा। तत्पर्य्याय । किलासघ्न २ तिक्तपत्र' ३ सुगन्धक' ४। इति हेमचन्द्र ॥ अस्य गुणा । शुक्रकफपित्तनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभ' ॥ ("तद्वत् कर्कोटकं प्रोक्तम्" ॥ इति सुश्रुते। सूत्रे। ४६ अध्याये ॥ विशेषस्त्वास्यैर्व्वारुकशब्दे प्रदर्शित ॥)

कर्कोटकी, स्त्री, (कर्कोटक+गौरादित्वात् ङीष्।) पीतघोषा वृत्त । इति रत्नमाला ॥ (अस्या पर्य्यायमाह चरक कल्पे ४ अध्याये ।
"कर्कोटकी कटुफला महाजालिनिरेव च ।
धामार्गवस्य पर्य्याया राजकोशातकी यथा" ॥
विशेषविवरणमस्या धामार्गवशब्दे ज्ञातव्यम् ॥ फललताविशेष । काँकुड़ इति भाषा ॥ एतद्फलगुणपाकादि उक्तं वैद्यके। यथा,—
"कर्कोटकी फलं कुष्ठहृल्लासारुचिनाशनम् ।
श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम् ॥
ईषद्विभिन्नमरिचै परिपूर्णगर्भं
तैलेन रञ्जितससैन्धवपातयोगम् ।
वाह्लीकयुक्तपयसा विहिताभिषेकं
कर्कोटकीफलमिदं रुचिकृत्तरुण्यम्" ॥)

कर्कोटिका, स्त्री, (कर्कोट+स्वार्थे कन् तत टाप् अत इत्वञ्च।) कर्कोटक'। काँकरोल इति भाषा। तत्पर्य्याय । कुष्माण्डी २ कर्कोटी ३। तत्फलम् कारवेल्लकतुल्यगुणम् । इति राजनिर्घण्ट ॥

कर्च्चरिका, स्त्री, क सुख यथा तथा चर्य्यते उपयुज्यते यद्वा क जलं चुर्य्यते शून्यीक्रियतेऽत्र । क+चर्+वा चुर्+पृषोदरात् रेफादेशे कनादिभि साधु ।) पिष्टकविशेष । इति पाकराजेश्वर । कचुरी इति भाषा ॥

कर्च्चूर, क्ली, (कर्व्व+खर्ज्जूरादित्वात् ऊर' । पृषोदरादित्वात् जकारस्य चकारे साधु ।) कर्व्वुरम्। स्वर्णम् । कच्चुरमपिपाठ' । इत्यमरटीका ॥

कर्च्चूर, पु, (कर्व्व+ऊर । पृषोदरादित्वात् साधु ।) वृत्तविशेष' । कचूर इति भाषा । तत्पर्य्याय' । द्राविड २ कार्श्य' ३ दुर्लभ ४ गन्धमूलक ५ वेधमुख्य' ६ गन्धसार ७ जटाल ८ । अस्य गुणा' । कटुत्वम् । तिक्तत्वम् । उष्णत्वम्। कफकासगलगण्डादिदोषनाशित्वम् । मुखवैशद्यजननत्वञ्च। इति राजनिर्घण्ट ॥ (यथा चरके सूत्रे २७ अध्याये ।
"रोचनो दीपनो हृद्य' सुगन्धिस्त्वग्विवर्ज्जित ।
कर्च्चूर' कफवातघ्न श्वासहिक्कार्शसां हित" ॥)

कर्च्चूरक', पु, (कर्च्चूरं स्वर्णमिव कायति प्रकाशते। कर्च्चूर+कै+क' । कर्च्चूर+स्वार्थे कन् वा।) कर्व्वूरक । इत्यमरटीकायां स्वामी। काँचा हलुद इति भाषा ॥

कर्ज्ज पीडे । इति कविकल्पद्रुम ॥ (भ्वा–परं–सक–सेट्।) कर्ज्जति। इति दुर्गादास' ॥

कर्ण व् क भिदि । इति कविकल्पद्रुम' ॥ (अदन्तचुरां–परं–सक–सेट्।) कर्णयति कर्णापयति। आङ्पूर्व्वोऽयं श्रवणे । देवाकर्णय येन येन सहसा

यद्यत् समासादितमिति । उपसर्गास्तत्तदर्थानां द्योतका एव न तु वाचका'। केवलधातोरनेकार्थत्वेऽवश्यवक्तव्ये उपसर्गपूर्व्वस्याप्यन्यार्थो धातोरेव कल्प्यते लाघवात् । क्वचिदुपसर्गा धात्वर्थमेवानुवर्त्तन्ते। तथा च ।
"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते ।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा" ॥
इति विस्तरवृत्ति ॥ क्रमेणोदाहरणानि। आदत्ते गृह्णातीत्यर्थ'। प्रसूयतेऽत्र प्रसव एव धात्वर्थ'। प्रशब्दस्तमेवार्थं द्योतयति। प्रणमति प्रकर्षेण नमतीत्यर्थ'। केचित्तु अनर्थकोऽन्य' प्रयुज्यते। इति चतुर्थचरणं पठन्ति तच्चिन्त्यम्। इति दुर्गादास ॥

कर्ण', पु, (कीर्य्यते क्षिप्यते । शब्दो वायुना यत्र । किरति शब्दग्रहणेन मनसि सुखं क्षिपति ददातीत्यर्थ । कॄ विक्षेपे+"कॄवृजसीति" नन् निच्च । उणा ३। १० । यद्वा कर्ण्यते आकर्ण्यते अनेन । कर्ण+करणे अप्।) श्रवणेन्द्रियम्। काण इति भाषा । तत्पर्य्याय । शब्दग्रह' २ श्रोत्रम् ३ श्रुति ४ श्रवणम् ५ श्रव ६ । इत्यमर' । २ । ६ । ६४ ॥ श्रोत्रम् ७। इति तट्टीका॥ वचोग्रह ८। इति राजनिर्घण्ट ॥
(यथा रघ' । १ । ६ ।
"तद्गुणै कर्णमागत्य चापलाय प्रचोदिता" ॥)
कर्णस्तु श्रवणेन्द्रियस्य गोलकं स्थानम्। तत्र श्रोत्रमिन्द्रियम् । तत्तु कर्णशष्कुल्यवच्छिन्ननभोभाग' । तस्य देवता दिक् । विषय शब्द । इति श्रीभागवतम् ॥ युधिष्ठिराग्रज । स तु कुन्त्या कन्याकाले सूर्य्यौरसजात । एतेन कानीन इत्याख्ययापि प्रसिद्ध' । अस्य जन्मादिविवरणन्तु महाभारते १। १११ अध्याये द्रष्टव्यं॥ तत्पर्य्याय'। राधेय' २ वसुषेण ३ अर्कनन्दन' ४ घटोत्कचान्तक' ५ चाम्पेश' ६ सूतपुत्रक ७। इति त्रिकाण्डशेष ॥ चाम्पाधिप ८ अङ्गराट् ९ राधासुत १० अर्कतनय ११। इति हेमचन्द्र ॥ अङ्गाधिप १२। इति भूरिप्रयोग ॥ (यथा महाभारते । १ । सम्भवपर्व्वणि १११ । ३१ ।
"प्राङ्नाम तस्य कथित वसुषेण इति क्षितौ ।
कर्णो वैकर्त्तनश्चैव कर्म्मणा तेन सोऽभवत्" ॥
अय हि दातृणामग्रगण्य । अस्य किमपि नादेयमासीत्। अन्यैरभेद्य सहजमपि स्वदेहकवच शरीरात् समुत्कृत्य ब्राह्मणरूपधारिणे याचमानाय इन्द्राय दत्तवान् तथा उपोषितं द्विजरूपधारिणं विष्णुं स्वपुत्त्रमांसेन प्रीणयामास। एतद्विवरणन्तु जैमिनिभारते सुव्यक्तमस्त्येव। अय परशुरामशिष्यो महावीर्य्यो भारतयुद्धे दुर्य्योधनपक्षावलम्बी आसीत्। अष्टादशदिवसव्यापि भारतसंग्रामे भीष्मदेव सेनापतिपदमधिरुह्य दशाह यावत् युद्धमकरोत् । तत शरशय्यां गते तस्मिन् द्रोणश्चतुर्द्दिनानि अयुध्यत । एतस्मिन्नेव समयेऽयं कर्णोऽपि स्वसेनाबलमादाय पाण्डवै' सह युयुधे। ततो गतजीविते द्रोणे सैनापत्यमधिरूढोऽसौ दिवसद्वयं वियुध्य कृष्णसहायेना-

र्ज्जुनेन निहत आसीत् ॥) सुवर्णालिवृत्त' । इति मेदिनी ॥ (धृतराष्ट्रशतपुत्रेषु एक' पुत्र' । यथा महाभारते १ । ११७ । ३ ।
"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णं कर्ण एव च" ।
नौकाया क्षेपणीविशेष' । (दाँड इति भाषा ॥ यथा रामायणे ६ । २३ । ३० ।
"हतप्रवीरा विध्वस्ता निरुत्साहा निरुद्यमा ।
सेना भवति संग्रामे हतकर्णेव नौर्जले" ॥
कर्ण अस्त्यस्य प्राशस्त्येन । अर्श आद्यच् । दीर्घकर्णे त्रि, यथा यजुर्व्वेदे । २ । ४ । ४० ।
"खड्गो वैश्वदेव श्वाकृष्णा कर्णो गर्द्दभ" ॥)

कर्णकण्डु', पु, (कर्णस्य कर्णे वा जातो कण्डु' ।) कर्णरोगविशेष' । तस्य निदानम् । "मारुत' कफसंयुक्त' कर्णकण्डुं करोति च" । इति माधवकर' ॥
("कफेन कण्डु प्रचितेन कर्णयो-
र्भृशं भवेत् स्रोतसि कर्णसंज्ञिते" ॥
इति सुश्रुते उत्तरतन्त्रे २० अध्याये ॥
चिकित्सास्य यथा ।
"विधिश्च कफहृत्सर्व्वं कर्णकण्डुमपोहति" ॥
इति तत्रैवोत्तरतन्त्रे २१ अध्याये ॥)

कर्णकीटी, स्त्री, (कर्णस्थित कर्णस्य भेदक क्षुद्र कीटी कीटविशेष' । यद्वा कर्णयति भिनत्ति तादृशी कीटी। कर्ण+अच् । स्वल्प कीट' कीटी स्वल्पार्थे ङीष् तत' कर्म्मधारय' ।) कीटविशेष' । काणकोटारी केर्णाइ इत्यादि भाषा। तत्पर्य्याय' । कर्णजलौका २ शतपदी ३। इतिहेमचन्द्र' ॥ चित्राङ्गी ४ । इति राजनिर्घण्ट' ॥ पृथिका ५ कर्णदुन्दुभि ६ । इति शब्दमाला ॥

कर्णक्ष्वेड', पु, (कर्णस्य कर्णे जात क्ष्वेडो वा।) कर्णरोगविशेष' । (तस्य लक्षणम् ।
"वायु' पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनम् ।
करोति कर्णयो क्ष्वेडं कर्णक्ष्वेड स उच्यते" ॥
इति माधवकर ॥ कर्णरोगशब्देऽस्यापि विस्तृतसनिदानचिकित्सितादिकं ज्ञेयम् ॥)

कर्णगूथ, क्ली, (कर्णस्य कर्णे स्थितं कर्णजातं वा गूथं मलम् ।) कर्णमलम् । इति हारावली । काणेर खलि इति भाषा ॥

कर्णगूथक , पु, (कर्णगूथ+सञ्ज्ञायां कन् । कर्णगूथमिव कायति वा । कै+क ।) कर्णरोगविशेष' । तस्य निदानम् । यथाह माधवकर ।
"पित्तोष्मशोषित श्लेष्मा जायते कर्णगूथक" ॥
("विशोषिते श्लेष्मणि पित्ततेजसा
न्टणां भवेत् स्रोतसि कर्णगूथक" ॥
इति सुश्रुते उत्तरतन्त्रे २० अध्याये ॥
चिकित्सास्य वैद्यकचक्रपाणिसंग्रहे ॥ यथा,
"क्लेदयित्वा तु तैलेन स्वेदेन प्रविलाप्य च ।
शोधयेत् कर्णगूथन्तु भिषक् सम्यक् शलाकया" ॥)

कर्णजलूका, स्त्री, (कर्णस्य कर्णे वा जलूका इव ।) कर्णकीटी । इति शब्दरत्नावली ॥

कर्णजलौका, स्त्री, (कर्णे जलौकेव ।) शतपदी । इत्यमर' । २ । ५ । १३ ॥

कर्णजलौका', [स्] स्त्री, (कर्णे जलौका इव ।) कर्ण-

जलौका । इत्यमरटीकायां भरतः ॥

कर्णजाहं, क्ली, (कर्णस्य मूलम् । "तस्य पाकमूले" ५ । २ । २४ इत्यादिना जाहच् ।) कर्णमूलम् । इति व्याकरणम् ॥

कर्णजित्, पुं, (कर्णं जितवान् । कर्ण + जि + क्विप् भूते वर्त्तमाने च इति भूते क्विप् तुगागमश्च ।) अर्ज्जुनः । इति हेमचन्द्रः ॥

कर्णदर्पणः, पुं, (कर्णे दर्पण इव ।) ताडङ्कनामकर्णभूषणम् । इति त्रिकाण्डशेषः । कानतड्का इति भाषा ॥

कर्णदुन्दुभि, स्त्री, (कर्णे कर्णाभ्यन्तरे प्रविश्य ध्वनिजनकतया दुन्दुभिरिव ।) कर्णकीटी । इति शब्दमाला ॥

कर्णधारः, पुं, (कर्णं धरति धारयति वा । कर्ण + धृ + "कर्म्मण्यण्" ३ । २ । १ । इति अण् ण्यन्तादच् वा ।) नाविकः । इत्यमरः । १ । १० । १२ ॥ काण्डारि माजि इत्यादि भाषा ॥ (यथा हितोपदेशे । ३ । ४ ।

"यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा ।

अकर्णधारा जलधौ विप्लवेतेह नौरिव" ॥)

कर्णपाली, स्त्री, (कर्णं पालयति स्वीयौज्ज्वल्येन अतीव शोभां सम्पादयतीति । कर्ण + पाल + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) कर्णान्दूः । इति हारावली । काणबाला इति भाषा ॥

कर्णपिशाची, स्त्री, (कर्णं स्वरूपं पिनष्टीति । कर्ण + पिश् + क्विप् । कर्णपिट् अज्ञानं तदाचयति नाशयति स्वरूपदर्शनेन । ततः आ + चि + णिच् अच् ङीष् च ।) देवीविशेषः । तन्मन्त्रादि यदुक्तं तन्त्रान्तरे ।

"कर्णस्येच्छणलोहितो वकगतोऽनन्तस्थिकारो वदातीतानागतशब्दयुक्तभुवनेशी वह्निजायान्विता ।

ताराद्यो मनुरेष लक्षजपतो व्यासेन संसेवितः सार्व्वज्ञं लभतेऽचिरेण नियतं पैशाचिकी मन्त्रितः" ॥

अस्यार्थः । कर्णः स्वरूपः । ईक्षणः आदौ ईक्षणः इकारः । तद्युक्तो लोहितः पकारः । वकः शकारः । स अनन्तयुक्तः आकारयुक्तः । चि स्वरूपम् । वदातीतानागतः स्वरूपम् । ततो ह्रीं स्वाहा । एतेन ॐ कर्णपिशाचि वदातीतानागतं ह्रीं स्वाहा ॥ * ॥ मन्त्रान्तरम् ।

"काद्युग्मं कालिके च ठद्वयं युग्मं तथैव च ।

पिङ्ग पिशाचि स्वाहेति न्यपार्णं कथितं प्रिये" ॥

काद्य काद्य कालिके ठः ठः पिङ्ग पिशाचि स्वाहा ॥ * ॥ ध्यानं यथा ।

"कृष्णां रक्तविलोचनां त्रिनयनां खर्व्वाञ्च लम्बोदरीं बन्धूकारुणजिह्विकां वरवराभीयुक्करामुन्मुखीम् ।

धूम्रार्च्चिर्जटिलां कपालविलसत्पाणिद्वयां चञ्चलां सर्व्वज्ञां शवहृत्कृताधिवसतीं पैशाचिकीं तां नुमः" ॥

अथ पूजा ।

"निशायामर्द्धरात्रौ च हृदि न्यस्य पिशाचिकीम् ।

दग्धमीनं बलिं दत्त्वा रात्रौ सम्पूज्य सञ्जपेत्" ॥

ओम् कर्णपिशाचि दग्धमीनबलिं ठः ठः मम सिद्धिं कुरु कुरु स्वाहेति दग्धमीनं बलिं दद्यात् ।

"रक्तचन्दनबन्धूकजवापुष्पादिकञ्च यत् ।

अमृतं कुरु देवेशि स्वाहेति प्रोक्षयेज्जले" ॥

पूर्व्वाह्णे किञ्चिज्जल्पा मध्याह्ने एकभक्ता निरामिषभुक्ता रात्रावपि तत् सख्य जपेत् । अन्यत् किञ्चिन्न भोक्तव्यं ताम्बूलादिकं विना । जपस्य दशांश तर्पणम् । ओम् कर्णपिशाचीं तर्पयामि ह्रीं स्वाहा । एवं क्रमेण लक्षमेकं पुरश्चरणं कृत्वा दशांशं होमयेत् । तदभावे दशांश तर्पणं कृत्वा वरं प्रार्थयेत् । मूलं रक्तचन्दनेन लिखित्वा यन्त्रोपरि इष्टदेवतां पूजयेत् ॥ * ॥

अथ सिद्धिलक्षणमुच्यते । गगने हुङ्कारादिश्रवणदीर्घाग्निशिखारूपसन्दर्शनात् सिद्धिर्भविष्यतीति ज्ञात्वा तथाविधमाचरेत् ॥ * ॥

मन्त्रान्तरम् । "प्रणवं माया कर्णपिशाचि मे कर्णे कथय हुं फट् स्वाहा" । इति प्रदीपतैलं पादयोर्दत्त्वा रात्रौ लक्षं जपेत् । ततः सर्व्वज्ञो भवति । नास्याः पूजा ध्यानम् ॥ * ॥ तथा तारं कामवीजं जयादेवी स्वाहा । अस्या अपि ऋष्यादिन्यासादेरभावः । पूर्व्वं लक्षं जप्त्वा गृहगोधिकां निपात्य तदुपरि जयादेवीं यथाशक्ति सम्पूज्य तावत् जपेत् यावत् सा जीवति । ततः सिध्यति । सिद्धिस्तु मानसादिप्रश्ने कृते सा आयाति ततस्तस्याः पृष्ठे सर्व्वं भूतभविष्यदादिकं पश्यति । इति कृष्णानन्दकृततन्त्रसारः ॥

कर्णपुष्पः, पुं, (कर्णवत् कर्णाकृति पुष्पं यस्य । यद्वा कर्णभूषणार्हं पुष्पं यस्य ।) मोरटलता । इति राजनिर्घण्टः ॥

कर्णपूः, [र्] स्त्री, (कर्णस्य सूर्य्यौरसजातस्य कुन्त्याः प्रथमपुत्रस्य पूः पुरम् ।) कर्णराजपुरम् । तत्पर्य्यायः । चम्पा २ मालिनी ३ लोमपादपूः ४ । इति हेमचन्द्रः ॥

कर्णपूरः, पुं, (कर्णं पूरयति अलङ्करोतीति । कर्ण + पूर् + उपपदे कर्म्मण्यण् इति अण् ।) शिरीषवृक्षः । नीलोत्पलम् । अवतंसः । इति मेदिनी ॥ (यथा, अमरुशतके १ ।

"ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-

प्रेङ्खन्नखांशुचयसम्वलितोऽम्बिकायाः ।

त्वां पातु मञ्जरितपल्लवकर्णपूर-

लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः" ॥)

अशोकवृक्षः । इति राजनिर्घण्टः ॥

कर्णपूरकः, पुं, (कर्णं पूरयति अवतंसयति । कर्ण + पूर + ण्वुल् । यद्वा कर्णपूरः स्वार्थे कन् । शिरीषवृक्षः । नीलोत्पलम् । अशोकवृक्षः । एतेषां सर्व्वैरेव कुसुमैः कामिनीनां कर्णाभरणं स्यात् अतोऽस्य तथात्वम् ।) कदम्बवृक्षः । इति राजनिर्घण्टः ॥ (कदम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कर्णप्रतिनाहः, पुं, (कर्णे जातः प्रतिनाहः रोगविशेषः ।) कर्णरोगविशेषः । तस्य सम्प्राप्तिरूपे ।

"सकर्णगूथो द्रवतां यदा गतो

विलायितो घ्राणमुखं प्रपद्यते ।

तदा स कर्णप्रतिनाहसंज्ञितो

भवेद्विकारः शिरसोऽर्द्धभेदकृत्" ॥

इति माधवकरः ॥ (अस्य चिकित्सा यथा,—

"अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ।

ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत्" ।

इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारः ।)

कर्णफलः, पुं, (कर्णः फलमिव यस्य ।) मत्स्यविशेषः । कानकि माछ इति भाषा ॥ अस्य गुणः । अजीर्णरोगश्लेष्मकारित्वम् । इति राजवल्लभः ॥

कर्णमलं, क्ली, (कर्णस्य मलं गूथम् ।) कर्णजमलम् । तत्पर्य्यायः । कर्णगूथम् २ । इति हारावली ॥

कर्णमुकुरः, पुं, (कर्णे मुकुरः दर्पण इव ।) ताडङ्कनामकर्णभूषणम् । इति भूरिप्रयोगः ॥

कर्णमोटी, स्त्री, (कर्णं कर्णोपलक्षितरोगविशेषं मोटयति नाशयतीति । यद्वा कर्णं शरीरभेदिरोगविशेषं मोटयतीति । कर्ण + मुट् + इन् वा ङीप् ।) चामुण्डादेवी । इति हेमचन्द्रः ॥

कर्णरोगः, पुं, (कर्णस्य कर्णे गतः कर्णे जातो वा रोगः ।) श्रवणव्याधिः । यथा । अथ कर्णरोगाधिकारः ।

तत्र कर्णरोगाणां नामानि संख्याञ्चाह ।

"कर्णशूलं प्रणादश्च बाधिर्य्यं क्ष्वेड एव च ।

कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च ॥

प्रतिनाहो जन्तुकर्णौ विद्रधिर्द्विविधस्तथा ।

कर्णपाकः पूतिकर्णस्तथैवार्शश्चतुर्व्विधम् ॥

तथार्व्वुदं सप्तविधं शोफश्चापि चतुर्व्विधः ।

एते कर्णगता रोगा अष्टाविंशतिरीरिताः" ॥ * ॥

तेषु कर्णशूलस्य सम्प्राप्तिपूर्व्वकं लक्षणमाह ।

"समीरणः श्रोत्रगतोऽन्यथा चरन्

समन्ततः शूलमतीव कर्णयोः ।

करोति दोषैश्च यथास्वमावृतः

स कर्णशूलः कथितो दुराचरः" ॥

अन्यथाचरन् प्रतिलोमं चरन् । दोषैः पित्तकफरक्तैः । रक्तस्यापि रुजादिकर्त्तृत्वेन दोषसाम्यात् दोषत्वमेव । यथास्वं यथात्मीयनिदानं कुपितैः अथवा यथास्वमिति शूलविशेषणम् । दुराचरः दुरुपचरः मूर्च्छाद्युपद्रवयोगात् ॥ * ॥

कर्णशूलस्यासाध्यतां चाह ।

"मूर्च्छा दाहो ज्वरः कासः क्लमोऽथ वमथुस्तथा ।

उपद्रवाः कर्णशूले भवन्त्येते मरिष्यतः" ॥ * ॥

कर्णनादस्य लक्षणमाह ।

"कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वनान् ।

भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते" ॥ * ॥

बाधिर्य्यलक्षणमाह ।

"यदा शब्दवहो वायुः स्रोत आवृत्य तिष्ठति ।

शुद्धश्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते" ॥ * ॥

असाध्यबाधिर्य्यमाह ।

"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत्" ॥ * ॥

क्ष्वेडमाह ।

"वायुः पित्तादिभिर्युक्तो वेणुघोषसमस्वनम् ।

करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते" ॥

क्ष्वेडशब्दार्थं व्यनक्ति । वेणुघोषसमस्वनमिति । यत उक्तम् । क्ष्वेडनं वेणुघोषवदिति । ननु कर्णनादकर्णक्ष्वेडयोः को भेदः । उच्यते । कर्णनादे केवलेन वातेन जन्यते तत्र नानाशब्दांश्च शृणोति ।

कर्णक्ष्वेडस्तु पित्तादियुक्तेन वातेन जन्यते तत्र, नियमेन वेणुघोषमिव शृणोतीति भेदः ॥ * ॥

कर्णस्रावमाह ।

"शिरोऽभिघातादथवा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलार्दितः
स कर्णसंस्राव इति प्रकीर्त्तितः" ॥

पूयमित्युपलक्षणम् जलं रसञ्च स्रावयेत् ॥
श्रवणश्चान्दः पुलिङ्गोऽप्यस्ति ॥ * ॥ कर्णकण्डूमाह ।
"मारुतः कफसंयुक्तः कर्णे कण्डूं करोति हि" ॥ * ॥

कर्णगूथमाह ।

"पित्तोष्मशोषितः श्लेष्मा कुरुते कर्णगूथकम्" ॥
कर्णे गूथं यस्मात् स कर्णगूथव्याधिः ॥ * ॥

प्रतिनाहमाह ।

"स कर्णगूथो द्रवतां यदा गतो
विलायितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद्विकारः शिरसोऽर्द्धभेदकृत्" ॥

घ्राणञ्च मुखञ्च एकत्वं द्वन्द्वे । शिरसोऽर्द्धभेदकृत् अर्द्धावभेदकाख्यशिरोरोगकृत् ॥ * ॥

कृमिकर्णमाह ।

"यदा तु मूर्च्छन्त्यथवात्र जन्तवः
सृजन्त्यपत्यान्यथवापि मक्षिकाः ।
तदञ्जनत्वात् श्रवणो निरुध्यते
भिषग्भिराद्यैः कृमिकर्णको गदः" ॥

तदञ्जनत्वात् कृमिलक्षणत्वात् ॥ श्रवणो कृमिकर्णको गदो निरुध्यत इत्यन्वयः ॥ * ॥

पतङ्गादिषु कर्णप्रविष्टेषु लक्षणमाह ।

"पतङ्गाः शतपद्यश्च कर्णस्रोतः प्रविश्य हि ।
अरतिं व्याकुलत्वञ्च भृशं कुर्व्वन्ति वेदनाम् ॥
कर्णो निस्तुद्यते तस्य तथा फरफरायते ।
कीटे चरति रुक् तीव्रा निस्पन्दे मन्दवेदना" ॥

निस्पन्दे निश्चले ॥ * ॥ द्विविधकर्णविद्रधिमाह ।

"क्षताभिघातप्रभवस्तु विद्रधि-
र्भवेत्तथा दोषकृतोऽपरः पुनः ।
सरक्तपीतारुणमस्रमास्रवेत्
प्रतोदधूमायनदाहचोषवान्" ॥

क्षतप्रभवो घातप्रभवश्च तयोरप्यागन्तुजत्वादैक्यम् ॥ अस्रं आस्रावमित्यर्थः ॥ * ॥ कर्णपाकमाह ।

"कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत्" ।
कोथः पूतिभावः । क्लेद आर्द्रता ॥ * ॥

पूतिकर्णमाह ।

"कर्णविद्रधिपाकाद्वा सकर्णो वारिपूरणात् ।
पूयं स्रवति यत् पूति स ज्ञेयः पूतिकर्णकः" ॥ * ॥

कर्णस्रावाद्भेदार्थमाह ।

पूतन्ति नियमेन पूति यथा स्यादेव स्रवति ॥ * ॥
कर्णगतानां शोथार्ब्बुदार्शसां लक्षणान्याह ।
"कर्णशोथार्ब्बुदार्शांसि जानीयादुक्तलक्षणैः" ॥
कर्णशोथाश्च चत्वारो वातपित्तकफरक्तजाः ।
एवमर्शोऽपि चतुर्व्विधम् । अन्येषां शोथानामर्शसाञ्चासम्भव आधारप्रभावात् ॥ अर्ब्बुदं सप्तविधम् । वातपित्तकफरक्तमांसमेदःसिराजम् ॥

कर्णरोग

एते कर्णरोगा अष्टाविंशतिः सुश्रुतोक्ता उक्ताः ॥ * ॥
इदानीं चरकोक्तकर्णरोगचतुष्टयं वातपित्तकफसन्निपातकृतमाह । तत्र वातजमाह ।

"नादोऽतिरुक् कर्णमले तु शोषः
स्रावस्तनुश्चाश्रवणञ्च वातात्" ॥ * ॥

पित्तजमाह ।

"शोथः सरागो दरणं विदाहः
सपूतिपीतस्रवणञ्च पित्तात्" ॥ * ॥

कफजमाह ।

"वैश्रुत्यं कण्डूः स्थिरशोथशुक्ल-
स्निग्धस्रुतिः स्वल्परुजः कफाच्च" ॥
वैश्रुत्यं अन्यथा श्रवणम् ॥ * ॥

त्रिदोषजमाह ।

"सर्व्वाणि रूपाणि च सन्निपातात्
स्रावश्च तत्राधिकदोषवर्णः" ॥ * ॥

कर्णपाल्याः सकर्णावयवत्वात् तद्विकारमप्यत्रैवाह ।
तत्र सनिदानं परिपोटकलक्षणमाह ॥
"सौकुमार्य्यात् चिरोत्सृष्टे सहसैवातिवर्द्धिते ।
कर्णशोथो भवेत् पाल्यां सरुजः परिपोटवान् ॥
कृष्णारुणनिभः स्तब्धः सवातात् परिपोटकः" ॥ * ॥

उत्पातमाह ।

"गुर्व्वाभरणसंयोगात् ताडनात् घर्षणादपि ।
शोथः पाल्यां भवेत् स्रावो दाहपाकरुजान्वितः ॥
रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदः स्मृतः" ॥ * ॥

उन्मन्थकमाह ।

"कर्णं बलाद्वर्द्धयतः पाल्यां वायुः प्रकुप्यति ।
कफं संगृह्य कुरुते शोथस्तब्धमवेदनम् ॥
उन्मन्थकः सकण्डूको विकारः कफवातजः" ।
अवेदनं ईषद्वेदनम् ॥ * ॥ दुःखवर्द्धनमाह ।
"संवर्द्धमाने दुर्व्विद्धे कण्डूदाहरुजान्वितः ।
शोथो भवति पाकश्च त्रिदोषो दुःखवर्द्धनः" ॥
संवर्द्धमाने दुर्व्विद्धे कर्णे इति शेषः ॥ * ॥

परिलेहिनमाह ।

"कफासृक् कृमयः क्रुद्धाः सर्षपाभा विसारिणः ।
कुर्व्वन्ति पिडकाः पाल्यां कण्डूदाहसमन्विताम् ॥
कफासृक्कृमिसम्भूतः स विसर्पान्वितस्ततः ।
लिह्यात् सशष्कुलीं पालीं परिलेही स च स्मृतः" ॥
स पीडकात्मकः परिलेहिसञ्ज्ञो गदः । लिह्यात् निर्मांसीकुर्य्यात् ॥ * ॥

अथ कर्णरोगाणां चिकित्सा ।

"कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड एव च ॥
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम् ।
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कदुष्णं कर्णयोर्धार्य्यमेतत् स्याद्वेदनापहम्" ॥ १ ॥
"लशुनार्द्रकशिग्रूणां वारुण्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे" ॥
वारुणी वरुणः ॥ २ ॥
"अर्काङ्कुरानम्लपिष्टान् सतैलान् लवणान्वितान् ।
सन्निदध्यात् सुधाकाण्डे कोरिते म्लतयाहते ॥
पुटपाकक्रमस्विन्नं पीडयेदारसागमात् ।
सुखोष्णं तद्रसं कर्णे प्रक्षिपेच्छूलशान्तये" ॥ ३ ॥

"अर्कस्य पत्रं परिणामपीत-

कर्णरोग

माज्येन लिप्तं शिखियोगतप्तम् ।
आपीड्य तस्याम्बुसुखोष्णमेव
कर्णे निषिक्तं हरतेऽतिशूलम्" ॥ ४ ॥

"तीव्रशूलातुरे कर्णे सशब्दे क्लेदवाहिनि ।
छागमूत्रं प्रशंसन्ति कोष्णं सैन्धवसंयुतम् ॥ ५ ॥
तैलं श्योणाकमूलेन मन्देऽग्नौ विधिना शृतम् ।
हरेदाशु त्रिदोषोत्थं कर्णशूलं प्रपूरणात् ॥ ६ ॥
हिङ्गुसैन्धवशुण्ठीभिस्तैलं सार्षपसम्भवम् ।
विपक्वं हरतेऽवश्यं कर्णशूलं प्रपूरणात् ॥ ७ ॥
कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड एव च ।
पूरणं कटुतैलेन हितं वातघ्नमौषधम् ॥ ८ ॥
शिखरीक्षारजवारा तत्कृतकल्केन साधितं तैलम् ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः" ॥
शिखरी अपामार्गः ॥ ९ ॥
"गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ।
सजलञ्च सदुग्धञ्च तद्बाधिर्य्यहरं परम्" ॥
क्षीरमात्र ग्राह्यम् । बिल्वतैलम् ॥ १० ॥
"कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यकर्म्म कुर्व्वीत योगान् वैशेषिकानपि ॥ ११ ॥
स्वर्जिकाचूर्णसंयुक्तबीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥ १२ ॥
आम्रजम्बूप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥ १३ ॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ १४ ॥
सृष्टं रसाञ्जनं नार्य्याः क्षीरक्षौद्रेण संयुतम् ।
प्रशस्यते चिरोत्थे तत् सस्रावे पूतिकर्णके ॥ १५ ॥
कुष्ठहिङ्गुवचादारुशताह्वाविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम्" ॥
कुष्ठादितैलम् ॥ १६ ॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति" ॥
शम्बूकाद्यं तैलम् ॥ १७ ॥

"चूर्णेन गन्धकशिलारजनीभवेन
मुष्कप्रशकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाडीं जयेच्चिरभवामपि कर्णजाताम्" ॥

मुष्टि पलम् । निशा तैलम् ॥ १८ ॥
"कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥ १९ ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥ २० ॥
चिकित्सा कर्णशोथानां तथा कर्णार्शसामपि ।
कर्णार्ब्बुदानां कुर्व्वीत शोथार्शोऽर्ब्बुदवद्भिषक्" ॥ * ॥

अथ कर्णपालीविकाराणां चिकित्सा ।

"पालीसशोषणे कुर्य्यात् वातकर्णरुजक्रियाम् ।
स्वेदयेत्प्रयतस्ताञ्च स्विन्नां संवर्द्धयेत्तिलैः ॥ १ ॥
शतावरीवाजिगन्धापयस्यैरण्डबीजकैः ।
तैलं विपक्वं सक्षीरं पालीं संवर्द्धयेत् सुखम्" ॥
पयस्यात्र क्षीरकाकोली । शतावरीतैलम् ॥ २ ॥
"जीवनीयस्य कल्केन तैलं दुग्धेन पाचयेत् ।
चिकित्सेत्तेन तैलेन हताश्च परिपोटकम् ॥ ३ ॥
शीतलेपैर्जलौकाभिरुत्पातं समुपाचरेत् ॥ ४ ॥

कर्णरोग

हस्तिनीसुरसाभ्याञ्च गोधाकर्कटवसान्वितम् ।
तैलं विपक्वमभ्यङ्गादुन्मन्थं नाशयेद्ध्रुवम् ॥ ५ ॥
दुःखवर्द्धनकं सिक्ता जम्ब्वाम्रविल्वपत्रजैः ।
क्वाथैस्तैलेन सुस्निग्धं तच्चूर्णैश्चावधूनयेत् ॥
बहुशो गोमयैस्तप्तैः स्वेदितं परिलेपितम् ।
घनसारैः समाजिह्मेदजामूत्रेण कल्कितैः" ॥ ६ ॥
इति कर्णरोगाधिकारः । इति भावप्रकाशः ॥*॥
("प्रतिश्यायजलक्रीडाकर्णकण्डूयनैर्मरुत् ।
मिथ्यायोगेन शब्दस्य कुपितोऽन्यैश्च कोपनैः ॥
प्राप्य श्रोत्रशिराः कुर्य्याच्छूलं स्रोतसि वेगवत् ।
अर्द्धावभेदकं स्तम्भं शिशिरानभिनन्दनम् ॥
चिराच्च पाकं पक्वन्तु लसिकामल्पशः स्रवेत् ।
श्रोत्रं शून्यमकस्माच्च स्यात् सञ्चारविचारवत् ॥
शूलं पित्तात् सदाहोषा शीतेच्छाश्वयथुं ज्वरम् ।
आशुपाकं प्रपक्वाच्च स पीतलसिकास्रुतिः ॥
सा लसीकास्पृशेद्यद्यत्तत्तत्पाकमुपैति च ।
कफाच्छिरोहनुग्रीवा गौरवं मन्दता रुजः ॥
कण्डूः श्वयथुरुष्णेच्छा पाकात् श्वेतघनास्रुतिः ।
करोति श्रवणे शूलमभिघातादिदूषितम् ॥
रक्तं पित्तसमानार्त्तिं किञ्चिद्वाधिकलक्षणम् ।
शूलं समुदितैर्दोषैः सशोफज्वरतीव्ररुक् ॥
पर्य्यायादुष्णशीतेच्छ जायते श्रुतिजाड्यवत् ।
पक्वं सितासितारक्तघनपूयप्रवाहि च ॥
शब्दवाहिशिरासंस्थे शृणोति पवने मुहुः ।
नादानकस्माद्विविधान् कर्णनादं वदन्ति तम् ॥
श्लेष्मणानुगतो वायुर्नादो वा समुपेक्षितः ।
उच्चैः कृच्छ्राच्छ्रुतिं कुर्य्याद्बधिरत्वं क्रमेण च ॥
वातेन शोषितः श्लेष्मा स्रोतो लिम्पेत्ततो भवेत् ।
रुग्गौरवं पिधानञ्च सप्रतीनाहसञ्ज्ञितः ॥
कण्डूशोफौ कफात् श्रोत्रे स्थिरौ तत्सञ्ज्ञया स्मृतौ ।
कफो विदग्धः पित्तेन सरुजं नीरुजन्त्वपि ।
घनपूति बहुक्लेदं कुरुते पूतिकर्णकम् ।
वातादिदूषितं श्रोत्रं मांसासृक्क्लेदजा रुजम् ॥
खादन्तो जन्तवः कुर्य्युस्तीव्रां सक्रिमिकर्णकः ।
श्रोत्रकण्डूयनाज्जाते क्षते स्यात् पूर्व्वलक्षणः ॥
विद्रधिः पूर्व्ववच्चान्यः शोफोऽर्शोऽर्व्वुदमीरितम् ।
तेषु रुक् पूतिकर्णत्वं बधिरत्वञ्च बाधते ॥
गर्भेऽनिलात्सङ्कुचिता शष्कुली कुचिकर्णकः ।
एको नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः ॥
पिप्पली पिप्पलीमानः सन्निपाताद्विदारिका ।
सवर्णः सरुजस्तब्धः श्वयथुः स उपेक्षितः ॥
कटुतैलनिभं पक्वः स्रवेत् कृच्छ्रेण रोहति ।
सङ्कोचयति रूढा च सा ध्रुवं कर्णशष्कुलीम् ॥
शिरास्थः कुरुते वायुः पालीशोषं तदाह्वयम् ।
कृशा दृढा च तन्त्रीवत् पालीवातेन तन्त्रिका ॥
सुकुमारे चिरोत्सर्गात् सहसैव प्रवर्द्धिते ।
कर्णे शोफः सरुक् पाल्यामरुणः परिपोटवान् ॥
परिपोटः सपवनादुत्पातः पित्तशोणितात् ।
गुर्व्वाभरणभाराद्यैः श्यावो रुग्दाहपाकवान् ॥
श्वयथुः स्फोटपिटका रागोषाक्लेदसंयुतः ।
पाल्यां शोफोऽनिलकफात् सर्व्वतो निर्व्यथः स्थिरः ॥
स्तब्धः सवर्णः कण्डूमान् उन्मन्थो गल्लिरश्च सः ।

कर्णरोग

दुर्व्विद्धे वर्द्धिते कर्णे सकण्डूदाहपाकरुक् ॥
श्वयथुः सन्निपातोत्थः स नाम्ना दुःखवर्द्धनः ।
कफासृक्कृमिजाः सूक्ष्माः सकण्डूक्लेदवेदनाः ॥
लेह्याख्याः पिटिकास्ता हि लिह्युः पालीमुपेक्षिताः ।
पिप्पली सर्व्वजं शूलं विदारी कुचिकर्णकः ॥
एषामसाध्या याप्यैका तन्त्रिकान्यास्तु साधयेत् ।
पञ्चविंशतिरित्युक्ता कर्णरोगविभागतः" ॥
इत्युत्तरस्थाने सप्तदशेऽध्याये वाग्भटेनोक्तम् ॥*॥
अस्य चिकित्सा तेनोक्ताष्टादशेऽध्याये, यथा,—
"कर्णशूले पवनजे पिबेद्रात्रौ रसाशितः ।
वातघ्नसाधितं सर्पिः कर्णं स्विन्नञ्च पूरयेत् ॥
पत्राणां पृथगश्वत्थविल्वार्कैरण्डजन्मनाम् ।
तैलसिन्धूत्थदिग्धानां स्विन्नानां पुटपाकतः ॥
रसैः कवोष्णैस्तद्वच्च मूलकस्यारलोरपि ।
गणे वातहरेऽम्लेषु मूत्रेषु च विपाचितः ॥
महास्नेहो द्रुतं हन्ति सुतीव्रामपि वेदनाम् ।
महतः पञ्चमूलस्य काष्ठात् क्षौमेण वेष्टितात् ॥
तैलसिक्तात् प्रदीप्ताग्रात् स्नेहः सद्यो रुजापहः ।
योज्यश्चैवं भद्रकाष्ठात् कुष्ठात् काष्ठाच्च सारलात् ॥
वातव्याधिप्रतिश्याय विहितं हितमत्र च ।
वर्ज्जयेच्छिरसा स्नानं शीताम्बु पानमह्न्यपि ॥
पित्तशूले सितायुक्तं घृतस्निग्धं विरेचयेत् ।
द्राक्षायष्टिशृतं स्तन्यं शस्यते कर्णपूरणम् ॥
यष्ट्यनन्ताहिमोशीरकाकोलीरोध्रजीवकैः ।
मृणालविषमञ्जिष्ठासारिवाभिश्च साधयेत् ॥
यष्टीमधुरसप्रस्थं क्षीरद्विप्रस्थसंयुतम् ।
तैलस्य कुडवं नस्यपूरणाभ्यञ्जनैरिदम् ॥
निहन्ति शूलदाहोषाः केवलं क्षौद्रमेव वा ।
यष्ट्यादिभिश्च सघृतैः कर्णौ दिह्यात् समन्ततः ॥
वामयेत् पिप्पलीसिद्धसर्पिः स्निग्धं कफोद्भवे ।
धूमनावनगण्डूषस्वेदान् कुर्य्यात् कफापहान् ॥
लशुनार्द्रकशिग्रूणां सुरल्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥
अर्काङ्कुरानम्लपिष्टांस्तैलाक्तांल्लवणान्वितान् ।
सन्निधाय स्नुहीकाण्डे कोरिते तच्छदावृतान् ॥
स्वेदयेत् पुटपाकेन स रसः शूलजित्परम् ।
रसेन वीजपूरस्य कपित्थस्य च पूरयेत् ॥
शुक्तेन पूरयित्वा वा फेनेनान्ववचूर्णयेत् ।
अजाविमूत्रवंशत्वक् सिद्धं तैलञ्च पूरणम् ॥
सिद्धं वा सार्षपं तैलं हिङ्गुतुम्बुरुनागरैः ।
रक्तजे पित्तवत् कार्य्यं शिराञ्चाशु विमोक्षयेत् ॥
पक्वे पूयवहे कर्णे धूमगण्डूषनावनम् ।
युञ्ज्यान्नाडीविधानञ्च दुष्टव्रणहरञ्च यत् ॥
स्रोतः प्रमृज्य दिग्धन्तु द्वौ कालौ पिचुवर्त्तिभिः ।
पूरयेद्धूपयित्वा तु माक्षिकेण प्रपूरयेत् ॥
सुरसादिगणक्वाथफाणिताक्ताश्च योजयेत् ।
पिचुवर्त्तिस्सूक्ष्मैश्च तच्चूर्णैरवचूर्णयेत् ॥
शूलक्लेदगुरुत्वानां विधिरेषनिवर्त्तकः ।
प्रियङ्गुमधुकाम्बष्ठाधातक्युत्पलपर्णिभिः ॥
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन च ।
पचेत्तैलं तदास्रावं निगृह्णात्याशु पूरणात् ॥
नादबाधिर्य्ययोः कुर्य्याद्वातशूलोक्तमौषधम् ।

कर्णरोग

श्लेष्मानुबन्धे श्लेष्माणं प्रागजयेद्वमनादिभिः ॥
एरण्डशिग्रुवरुणमूलकात् पत्रजे रसे ।
चतुर्गुणे पचेत्तैलं क्षीरे चाष्टगुणोन्मिते ॥
यष्ट्याह्वक्षीरकाकोलीकल्कयुक्तं निहन्ति तत् ।
नादबाधिर्य्यशूलानि नावनाभ्यङ्गपूरणैः ॥
पक्वं प्रतिविषाहिङ्गुमिशित्वक्स्वर्जिकोषणैः ।
सशुक्तैः पूरणात्तैलं रुक्स्रावश्रुतिनादनुत् ॥
कर्णनादे हितं तैलं सर्षपोत्थञ्च पूरणे ।
शुष्कमूलकखण्डानां क्षारो हिङ्गुमहौषधम् ॥
शतपुष्पावचाकुष्ठदारुशिग्रुरसाञ्जनम् ।
सौवर्चलयवक्षारस्वर्जिकौद्भिदसैन्धवम् ॥
भूर्ज्जग्रन्थिविड् मुस्ता मधुशुक्तं चतुर्गुणम् ।
मातुलुङ्गरसस्तद्वत् कदलीस्वरसस्ततैः ॥
पक्वं तैलं जयत्याशु सुकृच्छ्रानपि पूरणात् ।
कण्डूं क्लेदञ्च बाधिर्य्यं पूतिकर्णञ्च रुक्कृमीन् ॥
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयेषु च ।
अथ सुप्ताविवस्यातां कर्णौ रक्तं हरेत्ततः ॥
सशोफक्लेदयोर्मन्दश्रुतेर्वमनमाचरेत् ।
बाधिर्य्यं वर्ज्जयेद्बालवृद्धयोश्चिरजञ्च यत् ॥
प्रतिनाहे परिक्लेद्य स्नेहस्वेदैर्विशोधयेत् ।
कर्णशोधनकेनानु कर्णौ तैलस्य पूरयेत् ॥
सशुक्तसैन्धवमधोर्मातुलुङ्गरसस्य वा ।
शोधनाद्रूक्षतोत्पत्तौ घृतमण्डस्य पूरणम् ॥
क्रमोऽयं मलपूर्णेऽपि कर्णे कण्ड्वां कफापहम् ।
नस्यादितद्वच्छोफेऽपि कट्वुष्णैश्चात्र लेपनम् ॥
कर्णस्रावोदितं कुर्य्यात् पूतिक्रिमिककर्णयोः ।
पूरणं कटुतैलेन विशेषात् कृमिकर्णके ॥
वमिपूर्व्वाहिता कर्णविद्रधौ विद्रधिक्रिया ।
पित्तोत्थकर्णशूलोक्तं कर्त्तव्यं क्षतविद्रधौ ॥
अर्शोऽर्व्वुदेषु नासावदामाकर्णविदारिका ।
कर्णविद्रधिवत्साध्या यथा दोषोदयेन च ॥
पालीशोषेऽनिलश्रोत्रशूलवन्नस्य लेपनम् ।
स्वेदञ्च कुर्य्यात् स्विन्नाञ्च पालीमुद्वर्त्तयेत्तिलैः ॥
प्रियालबीजयष्ट्याह्वहयगन्धायवान्वितैः ।
ततः पुष्टिकरैः स्नेहैरभ्यङ्गं नित्यमाचरेत् ॥
शतावरी वाजिगन्धा पयस्यैरण्डजीवकैः ।
तैलं विपक्वं सक्षीरं पालीनां पुष्टिकृत्परम् ॥
कल्केन जीवनीयेन तैलं पयसि पाचितम् ।
आनूपमांसक्वाथे च पालीपोषणवर्द्धनम् ॥
पालीं छित्त्वातिसंक्षीणां शेषां सन्धाय पोषयेत् ।
याप्यैव तन्त्रिकाख्यापि परिपाटेऽप्ययं विधिः ॥
उत्पाते शीतलैर्लेपो जलौको हृतशोणिते ।
जम्ब्वाम्रपल्लवबलायष्टीरोध्रतिलोत्पलैः ॥
सधान्याम्लैः समञ्जिष्ठैः सकदम्बैः ससारिवैः ।
सिद्धमभ्यञ्जनं तैलं विसर्पोक्तघृतानि च ॥
उन्मन्थेऽभ्यञ्जनं तैलं गोधाकर्कटवसान्वितम् ।
तालपत्राश्वगन्धार्कवाकुचीतिलसैन्धवैः ॥
सुरसालाङ्गलीभ्याञ्च सिद्धं तीक्ष्णञ्च नावनम् ।
दुर्व्विद्धेऽश्मन्तजम्ब्वाम्रपत्रक्वाथेन सेचितम् ॥
तेनैव पालीं स्वभ्यक्तां सुसूक्ष्मैरपि चूर्णयेत् ।
चूर्णैर्मधुकमञ्जिष्ठाप्रपुण्डाह्वनिशोद्भवैः ॥
लाक्षाविडङ्गसिद्धञ्च तैलमभ्यञ्जने हितम् ।

खिन्ना गोमयजे पिण्डैर्वंश्या परिलेहिकाम् ॥
विडङ्गसारैराखिमेदुरभीमूत्रकल्किते ।
कौटजेङ्गुदकारञ्जवीजशम्याकवल्कले ॥
अथवाभ्यञ्जने तैर्वा कटुतैलं विपाचयेत् ।
सनिम्बपत्रमरिचमदनैर्लेहिकाव्रणे ॥
छिन्नन्तु कर्णं शुद्धस्य बन्धमालोच्य यौगिकम् ।
शुद्धास्त्रं लागयेल्लग्ने सद्यश्छिन्ने विशोधनम् ॥
अथ ग्रथित्वा केशान्तं कृत्वा छेदनलेखनम् ।
निवेश्य सन्धिं सुषमं न निम्नं न समुन्नतम् ॥
अभ्यज्य मधुसर्पिर्भ्यां पिचुप्लोतावगुण्ठितम् ।
सूत्रेणागाढशिथिलं बद्धा चूर्णैरवाकिरन् ॥
शोणितस्थापनैर्व्रण्यमाचारश्चादिशेत्तत ।
सप्ताहादामतैलाक्तं शनैरपनयेत् पिचुम् ॥
सुरूढं जातरोमाणं श्लिष्टसन्धिसमस्थिरम् ।
सुवर्णाणं सुरागश्च शनैः कर्णं विवर्द्धयेत् ॥
जलशूकः स्वय गुप्ता रजन्यौ वृहतीद्वयम् ।
अश्वगन्धा बला हस्तिपिप्पली गौरसर्षपा ॥
मूल कोशातकाश्वघ्नरूपिका सप्तपर्णजम् ।
छुच्छुन्दरी कालमृता गृह मधुकरीकृतम् ॥
जन्तुका जलजन्मा च तथा शावरकन्दकम् ।
एभि कल्कै खर पक्व सतैल माहिष घृतम् ॥
हस्त्यश्वमूत्रेण परमभ्यङ्गात् कर्णवर्द्धनम् ।
अथ कुर्य्याद्वयस्थस्य छिन्ना शुद्धस्य नासिकाम् ॥
छिन्द्यान्नासासम पत्र तत्तुल्यञ्च कपोलतः ।
त्वङ्मांस नासिकासन्ने रक्षंस्तत्तनुता नयेत् ॥
सीव्येद्गण्ड तत सूच्या सेविन्या पिचुयुक्तया ।
नासाच्छेदे च लिखिते परिवर्त्त्योपरित्वचम् ॥
कपोलवन्ध सन्दध्यात् सीव्येन्नासाञ्च यत्नत ।
नाडीभ्यामुत्क्षिपेदन्त सुखोच्छ्वासप्रवृत्तये ॥
आमतैलेन सिक्त्वा तु पतङ्गमधुकाञ्जनैः ।
शोणितस्थापनैश्चान्यैः सुश्लक्ष्णैरवचूर्णयेत् ॥
ततो मधुघृताभ्यक्त बद्धाचारिकमादिशेत् ।
ज्ञात्वावस्थान्तर कुर्य्यात् सद्यो व्रणविधिन्तत ॥
छिन्द्यादूढेऽधिक मास नासोपान्ते च चर्म्मवत् ।
सीव्येत्ततश्च सुश्लक्ष्णं हीन सवर्द्धयेत् पुन ॥
निवेशिते यथान्यास सद्यश्छेदेऽप्यय विधि ।
नाड़ीयोगाद्विनौष्ठस्य नासासन्धानवद्विधि" ॥
इति वाभटे उत्तरस्थाने १८ अध्याय ॥ * ॥
"सामान्य कर्णरोगेषु घृतपान रसायनम् ।
अव्यायामो ऽशिर स्नानं ब्रह्मचर्य्यमकत्थनम् ॥
कर्णशूले प्रणादे च बाधिर्य्यक्ष्वेडयोरपि ।
चतुर्णामपि रोगाणां सामान्य भेषज विदु ॥
स्निग्धं वातहरै स्वेदैनर स्नेहविरेचितम् ।
नाड़ीस्वेदैरुपचरेत् पिण्डस्वेदैस्तथैव च ॥
विल्वैरण्डार्कवर्षाभूदधित्थोन्मत्तशिग्रुभि ।
वत्सगन्धाश्वगन्धाभ्यां तर्कारीयववेणुभि ॥
आरनाल शृतैरेभिर्नाडीस्वेद प्रयोजित ।
कफवातसमुत्थान कर्णशूल निरस्यति ॥
मीनकुक्कुटलावाना मासजै पयसापि वा ।
पिण्डैः स्वेदञ्च कुर्व्वीत कर्णशूलनिवारणम् ।
अश्वत्थपत्रखल्ल वा विधाय बहुपत्रकम् ।
तैलाक्तमङ्गारसम्पूर्णं निदध्याच्छ्रवणोपरि ॥
यत्तैलं च्यवते तस्मात् खल्लादङ्गारसाधितात् ।
तत्प्राप्त श्रवणस्रोत सद्यो गृह्णाति वेदनाम् ॥
क्षौमगुग्गुल्वगुरुभि सघृतैर्धूपयेच्च तम् ।
भक्तोपरि हित सर्पिर्वस्तिकर्म्म च पूजितम् ॥
निरन्नो निशि तत्सर्पि पीत्वोपरि पय पिबेत् ।
मूर्द्धवस्तिषु नस्ये च मस्तिष्के परिषेचने ॥
शतपाकं बलातैलं प्रशस्तञ्चापि भोजने ।
कण्टकारीमजाक्षीरे पक्त्वा क्षीरेण तेन च ॥
विपचेत् कुक्कुटवसा कर्णयोस्तत्प्रपूरणम् ।
तण्डुलीयकमूलानि फलमङ्कोठजन्तथा ॥
अहिस्राकेन्द्रकामूल सरल देवदारु च ।
लसुनं शृङ्गवेरञ्च तथा वशावलेखनम् ॥
कल्कैरेषां तथास्त्रैश्च पचेत् स्नेह चतुर्विधम् ।
वेदनाया प्रशान्त्यर्थं हितं तत्कर्णपूरणम् ॥
लसुनार्द्रकशिग्रूना सुरङ्ग्या मूलकस्य च ।
कदल्या स्वरस श्रेष्ठः कदुष्ण कर्णपूरणे ॥
शृङ्गवेररस क्षौद्र सैन्धव तैलमेव च ।
कदुष्णं कर्णयोर्देयमेतद्वा वेदनापहम् ॥
वशावलेखसयुक्ते मूत्रे चाजाविके भिषक् ।
सर्पि पचेत्तेन कर्णं पूरयेत् कर्णशूलिन ॥
महत पञ्चमूलस्य काण्डमष्टादशाङ्गुलम् ।
क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्तत ॥
यत्तैल च्यवते तेभ्यो घृतेभ्यो भाजनोपरि ।
ज्ञेय तद्दीपिकातैल सद्यो गृह्णाति वेदनाम् ॥
कुर्य्यादेव भद्रकाष्ठे कुष्ठे काष्ठे च सारले ।
मतिमान्दीपिकातैल कर्णशूलनिवर्हणम् ॥
अर्काङ्कुरानम्लपिष्टांस्तैलाक्तान् लवणान्वितान् ।
सन्निदध्यात् स्नुहीकाण्डे कोरिते तच्छदावृते ॥
पुटपाकक्रमस्विन्नान् पीडयेदारसागमात् ।
सुखोष्ण तद्रस कर्णे दापयेच्छूलशान्तये ॥
कपित्थमातुलुङ्गाम्लशृङ्गवेररसैः शुभैः ।
सुखोष्णैः पूरयेत् कर्णं तच्छूलविनिवृत्तये ॥
कर्णं कोष्णेन चुक्रेण पूरयेत् कर्णशूलिन ।
समुद्रफेनचूर्णेन युक्त्या वाप्यवचूर्णयेत् ॥
अष्टानामिह मूत्राणां मूत्रेणान्यतमेन वा ।
कोष्णेन पूरयेत् कर्णं कर्णशूलोपशान्तये ॥
मूत्रेष्वम्लेषु वातघ्ने गणे च क्वथिते भिषक् ।
पचेच्चतुर्व्विध स्नेह पूरण तच्चकर्णयो ॥
एता एव क्रिया कुर्य्यात् पित्तघ्नै पित्तसयुते ।
काकोल्यादौ दशक्षीर तिक्ताश्चात्र हित हवि ॥
क्षीरवृक्षप्रवालेषु मधुके चन्दने तथा ।
कल्कक्वाथे पर पक्व शर्करामधुकै सरै ॥
इङ्गुदीसर्षपस्नेहौ सकफे पूरणे हितौ ।
तिक्तौषधाना यूषाश्च स्वेदाश्च कफनाशना ॥
सुरसादौ कृत तैल पञ्चमूले महत्यपि ।
मातुलुङ्गरस शुक्त लसुनार्द्रकयो रस ॥
एकैक पूरणे पथ्यस्तैल तेष्वथवा कृतम् ।
तीक्ष्णा मूर्द्धविरेकाश्च कवलाश्चात्र पूजिता ॥
कर्णशूलविधि कृत्स्न पित्तघ्न शोणितावृते ।
शूलप्रणादबाधिर्य्यक्ष्वेडानान्तु प्रकीर्त्तितम् ॥
सामान्यतो विशेषेण बाधिर्य्ये पूरण शृणु ।
गवा मूत्रेण विल्वानि पिष्ट्वा तैल विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकविम्बीभिः सिद्धं वाजे पयस्यथ ॥
सिद्ध वा विल्वनिःक्वाथे शीतीभूत तदुद्धृतम् ।
पुन पचेद्दशक्षीर सितामधुकचन्दनै ॥
विल्वाम्बुगाढ यत्तैल बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते य प्रतिश्याये विधि सोऽप्यत्र पूजित ॥
वातव्याधिषु यश्चोक्तो विधि स च हितो भवेत् ।
कर्णस्रावे पूतिकर्णे तथैव क्रिमिकर्णके ॥
समान कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ।
शिरोविरेचनञ्चैव धूपनं पूरणन्तथा ॥
प्रमार्जनं धावनञ्च वीक्ष्य वीक्ष्यावचारयेत् ।
राजवृक्षादितो येन सुरसादिगणेन वा ॥
कर्णप्रक्षालन कार्य्यं चूर्णैरेषाञ्च पूरणम् ।
चूर्णं पञ्चकषायोत्थं कपित्थरसयोजितम् ॥
कर्णस्रावे प्रशसन्ति पूरण मधुना सह ।
सर्ज्जत्वक्चूर्णसयुक्त कार्पासीफलजो रस ॥
योजितो मधुना वापि कर्णस्रावे प्रशस्यते ।
लाक्षासर्ज्जरसौ वापि चूर्णितौ कर्णपूरणम् ॥
सशैवलमहावृक्षजम्बाम्रप्रसवायुतम् ।
कुलीरक्षौद्रमण्डूकी सिद्ध तैलञ्च पूजितम् ॥
तिन्दुकान्यभयारोध्रं समङ्गामलकं मधु ।
पूरणञ्चात्र पथ्य स्यात् कपित्थरसयोजितम् ॥
रसमाम्रकपित्थाना मधूकधवशालजम् ।
पूरणार्थं प्रशंसन्ति तैलं वा तैर्विपाचितम् ॥
प्रियङ्गुमधुकाम्बष्ठा धातकी शीतपर्णिभि ।
मञ्जिष्ठालोध्रलाक्षाभि कपित्थस्य रसेन वा ॥
पचेत्तैल तदास्रावमवगृह्णाति पूरणात् ।
वृष्ट रसाञ्जनं नार्य्या क्षीरेण क्षौद्रसयुतम् ॥
प्रशस्यते चिरोत्थेऽपि स्रावे पूतिकर्णके ।
निर्गुण्डीस्वरसे तैलं सिन्धुधूमरजोगुड ।
पूरण पूतिकर्णस्य शमनो मधुसयुत ।
कृमिकर्णकनाशार्थं क्रिमिघ्न योजयेद्विधिम् ॥
वार्त्ताकुधूमश्च हित सार्षपस्नेह एव च ।
क्रिमिघ्न हरितालेन गवा मूत्रयुतेन च ॥
गुग्गुलु कर्णदौर्गन्ध्ये धूपन श्रेष्ठमुच्यते ॥
छर्द्दनं धूमपानञ्च कवडस्य च धारणम् ।
कर्णक्ष्वेडे हितं तैल सार्षपञ्चैव पूरणम् ॥
विद्रधौ वापि कुर्व्वीत विद्रध्युक्त चिकित्सितम् ॥
प्रक्लेद्यधीमांस्तैलेन स्वेदेन प्रविलाप्य च ।
शोधयेत् कर्णविट्कान्तु भिषक् सम्यक् शलाकया ॥
नाडीस्वेदोऽथ वमन धूमो मूर्द्धविरेचनम् ।
विधिश्च कर्णहृत्सर्व्वं कर्णकण्डूमपोहति ॥
अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ।
ततोऽतिरिक्तशिरस क्रिया प्राप्ता समाचरेत् ॥
कर्णपाकस्य भेषज्य कुर्य्यात् पित्तविसर्पवत् ।
कर्णच्छिद्रे वर्त्तमान कीटं क्लेदमलादि वा ॥
शृङ्गेणापहरेद्धीमानथवापि शलाकया ।
शेषाणान्तु विकाराणा प्राक्चिकित्सितमीरितम्" ॥
इति सुश्रुते उत्तरतन्त्रे एकविंशतितमोऽध्याय ॥ * ॥
चिकित्सितस्थाने ४२ अध्याये सनिदानलक्षण-
चिकित्सितान्युक्तानि हारीतेन यथा,—
"सिक्थेन वा तोयविपूरणेन

मलेन वा चापि भवेद्रुजा च ।
उच्चावरोधाद्भवते तथापि
वातादिकैर्वा कुपितैस्तथापि ॥
संसर्गदोषैरपि सर्व्वदोषै
क्रिमिव्रणेनापि तथैव चान्या ।
सञ्जायते कर्णरुजा नरस्य
शृणोति तेनापि बहुस्वनांश्च ॥
नि स्वानमेघध्वनिदन्तशब्दान्
शूलं सदाहश्च शिरोव्यथा च ।
वेणुस्वनं वत्स । शृणोति सर्व्वं
पित्तेन तं विद्धि भिषग्वरिष्ठ ! ॥
तथा च मूर्च्छां प्रतनोति शब्दं
मेघस्वनं वा कफजे शृणोति ॥
क्रिमिदोषे स्रवेत् पूयं सरक्तं वापि सत्तम ! ।
तथा चैवाभिघातेन जायते तीव्रवेदना ॥
क्षतेन पूयं स्रवते बाल्याद्भवति चापर ।
तस्यापि लूतिदोषेण जायते कर्णजा रुजा ॥
न कर्णरोगे जलपूरणञ्च
न चूर्णमेतत् कथितं विधिज्ञैः ।
तैलं हितं स्वेदनमेव कर्णे
स वाष्पबिन्दुश्च हितो मतश्च ॥
समुद्रफेनं सिन्धूत्थं सूक्ष्मचूर्णञ्च कारयेत् ।
सौवीरकरसेनापि वातिके कर्णपूरणम् ॥
आर्द्रसौवीरकरसं शुण्ठीसैन्धवगुग्गुलुम् ।
माषकुल्माषतोयेन तैलं पक्वातिचोष्णकम् ।
तुम्बीरसञ्च धार्य्यं कर्णरोगे प्रशस्यते ॥
यष्टीमधुः कुष्ठमरिष्टपत्रं
निशाविशाला सुमनः प्रवाला ।
विपाचितं कर्णभये च शूले
स पैत्तिके वा घृतमेव शस्तम् ॥
ब्राह्मीरसं सैन्धवकं विडङ्गं
सभृङ्गराजस्य घृतेन युक्तम् ।
तथैव सौवीररसञ्च पथ्या
स्रुतञ्च वस्त्रं परिपूर्णमेतत् ॥
हितं भवेत्तत् श्रुतिपूरणाय
पूयं सरक्तं क्रिमिजं निहन्ति ॥
सर्व्वे प्रोक्ताः शिरोरोगास्तैलानि च घृतानि च ।
जात्याविकान् वा युञ्जीत शिरोरोगविदाम्वर ।
वातघ्नानि पथ्यानि विदाहीनि गुरूणि च”॥ *॥)

कर्णलतिका, स्त्री,(कर्णस्य लतिका लतेव ।) पालि । इति हेमचन्द्रः ॥ काणेर पाता इति भाषा ॥

कर्णवंश, पु, (कर्णं कर्णाकृतिं कर्णवत् सञ्चो वा वंशो यत्र ।) मञ्च । इति हारावली ॥

कर्णवर्ज्जित, पु, (कर्णेन श्रवणेन्द्रियेण वर्जितः हीनः । अस्य दर्शनेन्द्रियेणैव श्रोत्रकार्य्यकारित्वात् तथात्वम् ।) सर्पः । इति शब्दचन्द्रिका ॥ कर्णहीने त्रि ॥

कर्णवेध, पु, (कर्णयोः कर्णस्य वा वेधः वेधनम् ।) कर्णयोश्छिद्रकरणम् । काणवधान इति भाषा । तस्य विधिर्यथा । मदनरत्ने वशिष्ठश्रीधरौ ॥
“मासे षष्ठे सप्तमे वाष्टमे वा
वेध्यौ कर्णौ द्वादशे षोडशेऽह्नि ।
मध्येनाह्नः पूर्व्वभागे न रात्रौ
मलत्रे द्वे द्वे तिथी वर्ज्जयित्वा” ॥
अत्र जन्ममासो वर्ज्यः । ज्योतिर्निबन्धे गर्गः ।
“मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे ।
कर्णवेधं प्रशंसन्ति पुष्ट्यायुःश्रीविवृद्धये” ॥
मदनरत्ने ।
“प्रथमे सप्तमे मासि अष्टमे दशमेऽथवा ।
द्वादशे च तथा कुर्य्यात् कर्णवेधं शुभावहम्” ॥
हेमाद्रौ व्यासः ।
“कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने” ॥
श्रीधरः ।
“हरिहस्तकरचित्रासौम्यपौष्णोत्तराश्वि-
दितिवसुषु घटालीसिंहवर्ज्येषु लग्ने ।
शशिगुरुबुधकाव्यानां दिने पर्व्वरिक्ता-
रहिततिथिषु शुद्धे नैधने कर्णवेधः” ॥
मदनरत्ने बृहस्पतिः ।
“द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ।
द्वादशी पञ्चमी शस्ता तृतीया कर्णवेधने ॥
सौवर्णी राजपुत्त्रस्य राजती विप्रवैश्ययोः ।
शूद्रस्य चायसी सूची मध्यमाष्टाङ्गुलात्मिका” ॥
हेमाद्रौ देवलः ।
“कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः ।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः” ॥ शङ्खः ।
“अङ्गुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि ।
तस्मै श्राद्धं न दातव्यं दत्तञ्चेदासुरं भवेत्” ॥
इति निर्णयसिन्धुः । कर्णषट्कदोषनिवारणार्थं कर्णस्य वेधनम् । सोदरभ्रातॄणां संस्काराणाञ्च पौर्व्वापर्य्यक्रमः कर्णवेधस्यासंस्काररूपत्वात् न तथा नियमः । यथा,—
यद्यपत्यद्वयं तिष्ठेत् सम्भवोऽप्यपरस्य च ।
कर्णषट्कं विजानीयाद्दूषितं तत्त्रयस्य च ॥
इत्याशङ्क्य तयोर्म्मध्ये शुद्धिर्यस्याथ वत्सरे ।
कर्णवेधो हितस्तस्य तत्र ज्येष्ठविचारणा ॥
षट्कर्णोत्पत्तिमाशङ्क्य भानौ शुद्धासमेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत्” ॥
इति मलमासतत्त्वे माण्डव्यवचनम् ॥ अस्य कालनियमो यथा,—राजमार्त्तण्डे ।
‘न जन्ममासे न च चैत्रपौषे
न वर्षयुग्मे न हरौ प्रसुप्ते ।
रवौ च दुष्टे न च कृष्णपक्षे
न जन्मभे कर्णविधिः प्रशस्तः” ॥
तथा दीपिकायाम् ।
“नो जन्मेन्दुभमासदूष्यरविजभ्यासाहरिसुप्तेष्यते
शस्तेऽर्के लघुविष्णुयुग्मम्रदुभस्वात्युत्तरादित्यभे ।
सौम्येज्यास्यसितत्रिकोणकण्टकगते पापैस्त्रिलाभारिगे
रोगोऽब्दे श्रुतिवेध इज्यसितभे लग्ने तु काले शुभे ॥
अत्रापि तिथ्यङ्कादिविद्धम्रुक्षं वर्ज्जयेत् ॥
यथाह गर्गः ।
“कर्णवेधव्रते कुर्य्यादुदङ्मार्गस्थिते रवौ ।
दक्षिणायनस्थिते भानौ नैव कुर्य्यात् कथञ्चन” ॥
इति ज्योतिषतत्त्वम् ॥

कर्णवेधनी, स्त्री,(विध्यतेऽनया । विध+करणे ल्युट् । ततो ङीप् ।) कर्णवेधनास्त्रम् । इति त्रिकाण्डशेषः ॥

कर्णवेष्टक, स्त्री, (कर्णौ वेष्टयति । वेष्ट्+ण्वुल् ।) कुण्डलम् । इति हेमचन्द्रः ॥

कर्णवेष्टन, स्त्री, (कर्णौ वेष्ट्येतेऽनेन । वेष्ट्+करणे ल्युट् ।) कुण्डलम् । इत्यमरः । २ । ६ । १०३ ॥

कर्णशष्कुली, स्त्री, (कर्णयोः कर्णस्य वा शष्कुलीव ।) कर्णगोलकम् । तत्पर्य्यायः । वेष्टनम् २ । इति हेमचन्द्रः ॥

कर्णशूल, पु, (कर्णस्य शूलं शूलवत् यन्त्रणादायकः ।) कर्णरोगविशेषः । तस्यौषधं यथा,—
“हिङ्गुतुम्बुरुशुण्ठ्या च साध्यं तैलन्तु सार्षपम् ।
एतद्धि पूरणं श्रेष्ठं कर्णशूलापहं परम् ॥ १ ॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्व्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
कृमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥ २ ॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवं तथा ।
भुर्ज्जग्रन्थिं विडं मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्व्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य कृमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्ककृतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥ ३ ॥
प्रस्थे द्वे गण्डमालाना क्वाथयेत् द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ।
पुनर्णवा गोक्षुरकं सैन्धवं त्र्यूषणं वचा ॥
सरलं सुरदारुञ्च बृहती कण्टकारिका ।
नस्यपानाद्धरत्येव कर्णशूलं हनुग्रहम् ॥
बाधिर्य्यं सर्व्वरोगांश्च अभ्यङ्गाच्च महेश्वर !” ॥ ४ ॥
इति गारुडे १९८ अध्यायः ॥ (कर्णरोगशब्देऽस्य विवरणं ज्ञेयम् ॥)

कर्णस्राव, पु, (कर्णस्य कर्णयोर्वा स्रावः पूयशोणितादेर्निःस्रावणम् यत्र रोगे ।) कर्णरोगविशेषः । तस्य निदानसम्प्राप्तिरूपाणि ।
“शिरोऽभिघातादथवा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलार्द्दितः
स कर्णस्राव इति प्रकीर्त्तितः” ॥
इति माधवकरः ॥

कर्णस्फोटा, स्त्री, (कर्णस्य स्फोटेव स्फोटा विदारणं यस्याः ।) लताविशेषः । काणफाटा इति भाषा । तत्पर्य्यायः । श्रुतिस्फोटा २ त्रिपुटा ३ कृष्णतण्डुला ४ चित्रपर्णी ५ कोमलता ६ चन्द्रिका ७ अर्द्धचन्द्रिका ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । हिमत्वम् । सर्व्वविषग्रहभूतादिदोषसर्व्वव्याधिनाशित्वञ्च । इति राजनिर्घण्टः ॥

कर्णाटः, पु, (कर्णेषु अटति प्रभूतयशस्त्रिम एतद्देशस्थराज्ञो गुणादिकीर्त्तनेन सर्व्वेषां कर्णेषु

भ्रमतीति। कर्ण + अट् + अच्। शकन्ध्वादिवत् साधुः।) स्वनामख्यातदेशविशेषः। इति शब्दरत्नावली॥ यथा कर्णाटवर्णने राज्ञुक्तिः।
"अर्व्वाञ्चो यदि गद्यपद्यनिपुणाः सेतस्समत्कुर्व्वते तेषां मूर्द्धि ददामि वामचरणं कर्णाटराजप्रिया"॥
अयं देशः कूर्म्मविभागे दक्षिणस्यां दिशि वर्त्तते॥)

कर्णाटी, स्त्री, (कर्णाट + स्त्रियां ङीष्। पारिभाषिकोऽयं शब्दः।) रागिणीविशेषः। इति हलायुधः॥ सा तु मालवरागस्य पत्नी। इति सङ्गीतदामोदरः॥ हंसपदीवृक्षः। इति राजनिर्घण्टः॥

कर्णानुजः, पुं, (कर्णस्यानुजः कर्णमनुजातवानित्यर्थः। अनु + जन् + ड।) युधिष्ठिरराजः। इति त्रिकाण्डशेषः॥

कर्णान्दुः, स्त्री, (कर्णस्य आन्दुरिव।) कर्णपाली। कानतड्का इति भाषा। उत्क्षिप्तिका। इति हेमचन्द्रः। कानकडा इति ख्याता॥

कर्णान्दूः, स्त्री, कर्णान्दुः। कर्णपाली। इति हारावली॥

कर्णाभरणकः, पुं, (कर्णस्य आभरणमिव पुष्पैः कायति प्रकाशते। कै + क।) आरग्वधवृक्षः। इति राजनिर्घण्टः॥

कर्णारा, स्त्री, (अर्य्यते विध्यतेऽनया। कर्ण + ऋ + करणे घञ् टाप् च। धातूनामनेकार्थत्वात् ऋधातोरत्र वेधनार्थः।) कर्णवेधनी। इति त्रिकाण्डशेषः॥

कर्णारिः पुं, (कर्णस्य अरिः शत्रुः।) अर्ज्जुनः। इति पुराणम्॥ नदीसर्ज्जवृक्षः। इति राजनिर्घण्टः॥ आजन् इति भाषा॥

कर्णास्फालः, पुं, (कर्णयोरास्फालः आस्फालनम्।) झलझ्झला। हस्तिकर्णास्फालनम्। इति त्रिकाण्डशेषः॥

कर्णिका, स्त्री, (कर्ण + इकन् + टाप् च। यद्वा कर्ण + ण्वुल्। ततष्टाप् अत इत्वम्।) कर्णाभरणविशेषः। कानतड्का इति भाषा। तत्पर्य्यायः। तालपत्रम् २। इत्यमरः। २। ६। १०३॥ ताडङ्कः ३ दन्तपत्रम् ४। इति भरतः॥ करिहस्ताङ्गुलिः। करिणः शुण्डाग्रवर्त्त्यङ्गुल्याकृति। पद्मवीजकोषी। इत्यमरः। ३। ३। १५॥
(यथा भागवते। ३। ८। १६।
"तस्याः सचाम्भोरुहकर्णिकाया-
मवस्थितो लोकमपश्यमानः"॥)
करमध्याङ्गुलिः। शमुकादिच्छटाग्रः। इति मेदिनी। वोँटा इति भाषा॥ लेखनी। इति हारावली॥ अग्निमन्थवृक्षः। अजशृङ्गीवृक्षः। इति राजनिर्घण्टः॥ (अप्सरोभेदः। यथा, महाभारते १। १२३। ६१।
"मेनका सहजन्या च कर्णिका पुञ्जिकस्थला"॥
सेवती। गोलाबफुल इति भाषा।
"शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा। महाकुमारी गन्धाढ्या लक्षपुष्पातिमञ्जुला"॥
अस्या गुणा यथा,—
"शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः।
दोषत्रयास्रजिद्वर्ण्या तिक्ता कट्वी च पाचनी"॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥
योनिरोगविशेषः। यथा,
"अकाले वाहमानाया गर्भेण पिहितोऽनिलः।
कर्णिकां जनयेद्योनौ श्लेष्मरक्तेन मूर्च्छितः"॥
इति चरके चिकित्सास्थाने। ३० अध्याये॥)

कर्णिकाचलः, पुं, (कर्णिकायां स्थितः अचलः।) सुमेरुपर्व्वतः। इति हेमचन्द्रः॥ (अस्य विवरणं यथा भागवते। ५। १६। ७। "यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य"॥)

कर्णिकारः, पुं, (कर्णिं भेदनं करोतीति। कर्णि + कृ + कर्म्मण्यण्। उदरमलभेदकत्वात् अस्य तथात्वम्।) वृक्षविशेषः। कणियार इति भाषा॥ (यथा, महाभारते। १। सम्भवे। १२५। २।
"कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः"॥)
तत्पर्य्यायः। द्रुमोत्पलः २ परिव्याधः ३। इत्यमरः। २। ४। ६०॥ वृक्षोत्पलः ४। इति रत्नमाला॥ (यथा, महाभारते ३। २४। १७।
"तत्शालतालाम्रमधूकनीप-
कदम्बसर्ज्जार्ज्जुनकर्णिकारैः।
तमालयं पुष्पधरैरुपेतं
महावनं राष्ट्रपतिर्द्ददर्श"॥
कर्णिकारस्य पुष्पम्। "अवयवे च प्राण्योषधिवृक्षेभ्यः"। ४। ३। १३५। इति उत्पन्नस्य तद्धितस्य "पुष्पमूलेषु बहुलम्"। इति लुक्। तथा कुमारसम्भवे। ३। २८। "वर्णप्रकर्षे सति कर्णिकारम्"॥ कर्णिकारस्य कुसुममित्यर्थः॥) आरग्वधविशेषः। छोट सोनालु इति भाषा। तत्पर्य्यायः। राजतरुः २ प्रग्रहः ३ कृतमालकः ४ सुफलः ५ चक्रः ६ परिव्याधः ७ व्याधिरिपुः ८ पिण्डवीजकः ९ लघ्वारग्वधः १०। अस्य गुणाः। सारकत्वम्। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफशूलोदरक्रिमिमेहव्रणाशित्वम्। व्रणगुल्मनिवारणत्वञ्च। इति राजनिर्घण्टः॥

कर्णिकी, [न्] पुं, (कर्णिका हस्तिशुण्डाग्राङ्गुली अस्त्यस्य इति।) हस्ती। इति जटाधरः॥

कर्णी, [न्] पुं, (कर्णौ पक्षौ स्तः अस्य। पुरा किल पर्व्वतानां पक्षाः सन्ति इति पौराणिकी गाथा। "तुन्दादिभ्य इलच्"। ५। २। ११७। इति चकारादिनिः।) वर्षपर्व्वतसप्तकान्तर्गतपर्व्वतविशेषः। यथा।
"हिमवान् हेमकूटश्च निषधो मेरुरेव च।
चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः"॥
इति हारावली॥ वाणविशेषः। यथा।
"करोति कर्णिनो यत्तु यस्तु खड्गादिकन्नरः।
प्रयान्ति ते विशसने नरके भृशदारुणे"॥
इति विष्णुपुराणे २। ६। १६॥ कर्णिनो वाणविशेषान्। इति तट्टीका॥

कर्णीरथः, पुं, (कर्णः साध्या श्रवणक्रिया उपचारात् कर्णः। कर्णोऽस्यास्ति इति। कर्णी चासौ रथश्चेति शब्दमात्रेण रथो न वस्तुतः। यद्वा स्वामी स्यात् कर्णशब्देन स्कन्धो लक्ष्यते। सोऽस्त्यस्य वाहकत्वेन इनिः। कर्णी चासौ रथश्च। अन्येषामपीति दीर्घः।) प्रौढार्थनिर्म्मितखल्यरथः। पुरुषस्कन्धनीयमानरथः। इति भगीरथः॥ स्त्रीवहनार्थमुपरि वस्त्राच्छादितरथविशेषः। इति मञ्जरी॥ चतुर्दोल इति ख्यात इति शिष्टचरणाः॥ इति सारसुन्दरी॥ स्त्रीरत्नवहनार्थमुपरिवस्त्राच्छादितमनुष्यवाह्ययानविशेषः। इति भरतः॥ तत्पर्य्यायः। प्रवहणम् २ डयनम् ३। इत्यमरः। २। ८। ५२॥ प्रहरणम् ४ डयनम् ५। इति तट्टीका॥

कर्णीसुतः, पुं, (कर्ण्याः सुतः।) मूलदेवः। इति त्रिकाण्डशेषः॥ (यथा हारावली ३२।
"कर्णीसुतो मूलदेवो मूलभद्रः कलाङ्कुरः"॥
तथा च कादम्बरीटीकायाम्।
"कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः"॥)

कर्णेजपः, त्रि, (कर्णे जपति यः। जापादित्वात् स्तम्बकर्णयोरित्यच्। हलदन्तादित्यलुक्।) अप्रकाशेनानुचितप्रबोधकः। कर्णेलगित्वा परापकारं वदति यो जनः। ठक् इति ख्यातः। तत्पर्य्यायः। सूचकः २ पिशुनः ३ दुर्ज्जनः ४ खलः ५। इत्यमरः। ३। १। ४७॥ कर्णेजपादिद्वयं परापकारवादिनि। पिशुनादित्रयं परस्परभेदनशीले॥ कर्णेजपादिपञ्चकं सूचके इति केचित्॥ त्रयमिति केचित्। इति भरतः॥

कर्णेन्दुः पुं, (कर्णयोः कर्णे वा इन्दुरिव।) कर्णान्दुः। अर्द्धचन्द्राकृतिकर्णभूषणम्। इति शब्दरत्नावली॥

कर्त्त, त् क शैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरा—परं—अकं—सेट्।) रेफस्याधस्तकारः कर्त्तयति कर्त्तापयति धूलिर्व्वलेन। इति दुर्गादासः॥

कर्त्तः, पुं, (कर्त्त + भावे + अप्।) भेदः। यथा।
"संधृङ्ग नियम्य यतयो यमकर्त्तहेतिं
जह्युः स्वराडिव निपानखनित्रमिन्द्रः"॥
इति श्रीभागवते २। ७। ४८॥ "कर्त्तो भेदः तन्निरासो यत्कर्त्तः तत्र हेतिं साधनं जह्युः"। इति तट्टीकायां श्रीधरस्वामी॥ (कर्त्तयति शिथिलीकरोति भिनत्ति वा। कर्त्त + अच्। भेदके, त्रि॥)

कर्त्तनं, क्ली, (कृत् + भावे + ल्युट्।) छेदनम्। नारीणां सूत्रनिर्म्मितिः। इति मेदिनी। काट्ना काटा। इति भाषा॥

कर्त्तरी, स्त्री, (कृन्ततीति। कृति छेदने + बाहुलकादरप्रत्ययः ततो ङीष्। यद्वा कृत् + घञ्। कर्त्तं राततीति। "आतोनुपेति"। ३। २। ३। क। गौरादित्वात् ङीष्।) कृपाणी। इत्यमरः। २। १०। ३४॥ पत्रीकृतस्वर्णादि कर्त्तनास्त्रम्। काति इति ख्यातः॥ केशकर्त्तनिका। इति भरतः। काँचि इति भाषा। काटारी इति ख्याता च॥ (योगविशेषः। यथा, ज्योतिषशास्त्रे।
"क्रूरमध्यगतश्चन्द्रो लग्नं वा क्रूरमध्यगम्।
कर्त्तरी नाम योगोऽयं कन्या निधनकारकः"॥)

कर्त्तव्यं, क्ली, (कृ + तव्य।) करणीयम्। करणयोग्यम्। कार्य्यम्। इति व्याकरणम्॥

कर्त्तव्य, त्रि, (कर्त्तुं योग्यं कर्त्तुं उचितं वा। यद्वा

अवश्यं करणीयं यत् तत् कर्त्तव्यमिति स्मृतम् । कृ+योग्यार्थे तव्य ।) करणयोग्यः । यथा, हितोपदेशे ॥

"हीनसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रय ।
अजा सिंहप्रसादेन वने चरति निर्भयम्" ॥

कर्त्ता, [ऋ] त्रि, (करोति क्रियां निष्पादयतीति वा । करोति य कर्म्मेति शेष । कृ+कर्त्तरि तृच् ।) कारक । इति मेदिनी ॥ षट्कारकान्तर्गतकारकविशेष । वोपदेवेनास्य घसंज्ञा कृता । अत्र उक्तार्थे प्रथमा अनुक्तार्थे तृतीया विभक्तिर्भवति ॥ तस्य लक्षणम् । "क्रियानुकूलकृतिमत्त्वम्" । इति सारमञ्जरी ॥ "य करोति स " । इति सर्व्ववर्म्मा ॥ "कृत्याश्रय " । इति तार्किका ॥ "चेतनान्तरव्यापाराव्यवधानेन धात्वर्थनिष्पादकश्चेतनः कर्म्मकरणादिकारकचक्रप्रयोक्ता वा" । इति प्रायश्चित्तविवेक ॥ "क्रियामुख्यप्रयोजकौ कर्त्ता" । इति क्रमदीश्वरः ॥ स तु पञ्चविध । क्रियामुख्य १ हेतुकर्त्ता २ प्रयोजक ३ अनुमन्ता ४ ग्रहीता ५ । तथा च ।

"क्रियामुख्यो भवेत् कर्त्ता हेतुकर्त्ता प्रयोजक ।
अनुमन्ता ग्रहीता च कर्त्ता पञ्चविध स्मृत " ।

इति गोयीचन्द्रटीकाहृद्गोपालचक्रवर्त्ती ॥ स च त्रिविध । सात्त्विक १ राजस २ तामस ३ ।

सात्त्विको यथा,—

"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वित ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते" ॥

राजसो यथा,—

"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचि ।
हर्षशोकान्वित कर्त्ता राजस परिकीर्त्तित " ॥

तामसो यथा,—

"अयुक्तः प्राकृत स्तब्ध शठो नैष्कृतिकोऽलस ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते" ॥

इति श्रीभगवद्गीता । १८ । २६-२८ ॥

कर्त्ता, [ऋ] पु, (करोति सृजति चतुर्दशभुवनानि यः सर्व्वलोकस्रष्टेति यावत् । कृ+तृच् ।) परमेष्ठी । ब्रह्मा । इति मेदिनी ॥ क्रियानुकूलकृतिमान् । स च त्रिविध । यथा,—

"त्रिधैव ज्ञायते कर्त्ता विशेषेण प्रतिक्रियाम् ।
योग्यत्वप्रतिषिद्धत्वविशेषणपदान्वये " ॥

अस्यार्थ । क्रियां प्रति प्रकारत्रयेण कर्त्ता विज्ञायते तस्य विवरणम् । स्वाध्यायोऽध्येतव्य इत्यत्र योग्यत्वेन त्रैवर्णिक ॥ १ ॥ अहरहर्दद्यात् दीक्षितो न ददातीत्यत्र प्रतिषिद्धत्वेन दीक्षितेतरपर ॥ २ ॥ स्वर्गकामो यजेतेत्यत्र विशेषणपदान्वयेन स्वर्गकाम कर्त्ता ज्ञायते ॥ ३ ॥ * ॥

नित्ये निषेधे च यद्यत् साधन तदभावस्तदभावसाधन इत्यनुभवसिद्धा नित्याकरणा निषिद्धाचरणाञ्च प्रत्यवायसाधन शास्त्रावगत अतस्तदभावो नित्याचरणं निषिद्धाकरणञ्च प्रत्यवायाभावसाधनमिति प्रत्यवायपरिहारार्थी नियोज्योऽस्मेति तद्बोधकविशेषणपदाध्याहारादिति बोध्य ततश्चैव विधिवाक्यशाब्दधी । यथा, काम्ये स्वर्गकामो यजेतेत्यत्र स्वर्गकामस्य कर्त्तृत्वयागविषयकं कार्य्यम् । नित्ये अहरहः सन्ध्यामुपासीत इत्यत्र प्रत्यवायपरिहारार्थिन कर्तुं प्रत्यहं सन्ध्यावन्दनविषयकं कार्य्यम् । न कलञ्जं भक्षयेदित्यत्रापि प्रत्यवायपरिहारार्थिनं कर्तुं कलञ्जभक्षणाभावविषयकं कार्य्यमित्येव रूपा । इति धर्म्मदीपिका ॥ (महादेव । यथा, महाभारते । १३ । १७ । ६४ ।

"संग्रहो निग्रहः कर्त्ता सर्पचीरनिवासन " ॥

विश्वस्रष्टृत्वब्रह्मणोऽपि कर्तृत्वात् आदिकर्त्ता विष्णु ॥ यथा महाभारते १३ । १४९ । ४७ ।

"क्रोधहा क्रोधकृत् कर्त्ता विश्वबाहुर्महीधर "॥)

कर्त्तिका, स्त्री, (कृन्तति छिनत्तीति । कृत्+तृच् । स्वल्पार्थे कन् टाप् च ।) चर्म्मखड्ग । यथा,—

"हास्ययुक्तां त्रिनेत्राञ्च कपालकर्त्तिकाकराम्" ॥

इति तन्त्रसारे श्यामाध्यानम् ॥

कर्तृत्व, क्ली, (कर्तुर्भावः । कर्त्तृ+भावे त्वम् ।) कर्त्तृधर्म्म । यथा, श्रीभगवद्गीता । ५ । १३ ॥

"न कर्तृत्व न कर्म्माणि लोकस्य सृजति प्रभु " ॥

कर्त्त, त् क शैथिल्ये । इति कविकल्पद्रुम ॥ (अदन्त-चुरा-पर-अकं-सेट् ।) रेफद्वययुक्तत्सकार । कर्त्तयति कर्त्तापयति धूलिर्गतेन । इति दुर्गादासः ॥

कर्त्री, स्त्री, (करोति या कर्म्माणीतिशेष । कृ+तृच् +ङीप् च ।) कर्त्तरी । इति शब्दरत्नावली ॥ कारिका । इति मुग्धबोधव्याकरणम् ॥

कर्द्द, कुत्सितरवे । इति कविकल्पद्रुमं । (भ्वा-पर-अक-सेट् ।) उदरशब्दे । इति रमानाथ ॥ एकोऽर्थ । कर्द्दति काक । रमानाथस्तु कौक्षेकर्द्दतीति भट्टमल्लदर्शनादुदरसम्बन्धिशब्द एव अस्य प्रयोग इति मन्वान कर्द्दति शिशुरिति यदुदाजहार तद्धेयम् । यत्तन्मते कर्द्दत्युदरमित्येव स्यात् । इति दुर्गादास ॥

कर्द्द, पु, (कर्द्द+अच् ।) कर्द्दम । इति शब्दरत्नावली ॥ कादा इति भाषा ॥

कर्द्दट, पु, (कर्द्द कर्द्दम अटति कारणत्वेन प्राप्नोतीति । कर्द्द+अट्+अच् । शकन्ध्वादित्वात् अलोपे साधु ।) करहाट । पद्म । पद्माकर । इति मेदिनी ॥

कर्द्दनं, क्ली, (कर्द्दते इति । कर्द्द+भावे ल्युट् ।) उदरशब्द । इति हेमचन्द्रः । पेटेर डाका इति भाषा ॥

कर्द्दम, क्ली, (कर्द्द+"कलिकर्द्दिभ्योऽम " । उणा । ४ । ८४ इति अम ।) मांसम् । इति शब्दचन्द्रिका ॥

कर्द्दम, पु, (कर्द्द कुत्सितरवे+ "कलिकर्द्दिभ्योऽम " । उणा ४ । ८४ इति अम ।) कर्द्द । कादा इति भाषा । तत्पर्य्याय । निषद्वर २ जम्बाल ३ पङ्क ४ शाद ५ । इत्यमर । १ । १० । ९ ॥ (तथाहि याज्ञवल्क्ये । १ । १९७ ।

"रथ्याकर्द्दमतोयानि स्पृष्टान्यन्त्यश्ववायसै ।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च" ॥)

अस्य गुणाः । शीतलत्वम् । रूक्षत्वम् । विषरोगवेदनादाहशोथनाशित्वम् । व्रणशोधनरोपणत्वञ्च । इति राजवल्लभ ॥ ("कर्द्दमो दाहपित्तास्रशोथघ्न शीतल सरः" । इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥) स्वायम्भुवमन्वन्तरे प्रजापतिविशेष । स तु ब्रह्मणश्छायाया जात । तस्य भार्य्या स्वायम्भुवमनुकन्या देवहूति । पुत्र कपिलदेवः कन्या कलाद्या नव । इति श्रीभागवतम् । ३ । १२ । २७ ॥ पापम् । इत्युणादिकोष । ४ । ८४ ॥ छाया । यथा,—

"वेदेषु कर्द्दमः शब्दश्छायायां वर्त्तते स्फुटम् ।
बभूव कर्द्दमाद्ब्राह्मः कर्द्दमस्तेन कीर्त्तित " ॥

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्याय ॥ (नागविशेष । यथा महाभारते १ । ३५ । १६ ।

"कर्द्दमश्च महानागो नागश्च बहुमूलक " ॥)

कर्द्दमाटक, पु, (कर्द्दमो मलादि अट्यते निक्षिप्यते यत्र । कर्द्दम+अट्+अधिकरणे घञ् । तत कप् । यद्वा कर्द्दमस्य मलादे आटो निक्षेपोऽत्र । कर्द्दमे इव आटोगतिरत्रेति केचित् । तत कप् ।) विष्ठादिनिक्षेपस्थानम् । इति शब्दरत्नावली ॥

कर्म्मी, स्त्री, मुद्गरवल्ल । इति वैद्यकम् ॥

कर्पट, पु, (कीर्य्यते क्षिप्यते इति । कॄ+कर्म्मणि विच् । कर् चासौ पटश्चेति कर्म्मधारय । यद्वा करस्य पट । शकन्ध्वादित्वात् अलोपे साधु ।) मलिनत्वादिदुष्टजीर्णवस्त्रखण्डम् । नेकडा इति ख्याता । (यथा कथासरित्सागरे ४ । ६१ ।

"चीरखण्डैककर्पटः" ॥) तत्पर्य्यायः । नक्तक २ । इत्यमर । ३ । ५ । ३३ ॥ नक्तक ३ । इति भरत । पर्व्वतविशेष । यथा, कालिकापुराणे ८१ अध्यायः ।

"नीलशैलस्य पूर्व्वस्मिन् स्वरूप प्रतिपादितम् ।
नाभिमण्डलपूर्व्वस्या मसकूटस्य दक्षिणे ॥
पूर्व्वस्यां कर्पटो नाम पर्व्वतो यमरूपधृक् ।
तत्र याम्यशिला कृष्णा नीलाञ्जनसमप्रभा ॥
अधित्यकाया राजेन्द्र व्यामपञ्चसु विस्तृता ।
पूजयेत्तत्र शमनं माघो दण्ड सदैव य ॥
धत्ते तु प्राणिनां नित्य प्रायदण्डस्य साधनम् ।
कृष्णवर्णन्तु द्विभुज किरीटमुकुटोज्ज्वलम् ॥
दधतश्चासिपुत्रीञ्च वामपाणी सदैव हि ।
कृष्णवस्त्र स्थूलपद वह्निर्नि सृतदन्तकम् ॥
वरामयकर नित्य त्वया महिषवाहनम् ।
पूजयेत् परया भक्त्या याम्यवीजेन साधक ॥
उपान्त्यवर्गस्यादिर्यो वर्णो विन्दिन्दुसयुत ।
यमवीजमिति ख्यात यमस्य प्रीतिकारकम् ॥
अनेनैव तु मन्त्रेण शमन यस्तु पूजयेत् ।
कर्पटाख्येऽचलवरे नापमृत्युं समाप्नुयात्" ॥

कर्पटधारी, [न्] त्रि, (कर्पट धरति धारयति वा । कर्पट+धृ+णिनिः ।) मलिनजीर्णवस्त्रखण्डधारी । भिक्षुक । इति शब्दरत्नावली ॥

कर्पटिक, त्रि, (कर्पटोऽस्त्यस्य । कर्पट+अस्त्यर्थे ठन् ।) कर्पटधारी । इति शब्दरत्नावली ॥

कर्पटी, [न्] त्रि, (कर्पटोऽस्त्यस्य । कर्पट+इनि ।) भिक्षुकः । कर्पटधारी । इति शब्दरत्नावली ।

कर्पर, पुं, (कृप्+बाहुलकात् अरन् । लत्वाभावश्च ।) कपालः । इत्यमर । २ । ६ । ६८ ॥ मातार खुलि इति भाषा । शस्त्रभेद । कटाहः । इति मेदिनी ॥ उडुम्बर । इति शब्दचन्द्रिका ॥

कर्पराश', पु, (कर्परस्य अशः ।) शर्करा । इति शब्दरत्नावली । खोलाकुचि इति भाषा ॥

कर्पराल, पुं, (कर्पर इवालति पर्य्याप्नोति । कर्पर + अल् + अच् । कर्परं अलति इति केचित् । अल् + कर्म्मण्यण् ।) कन्दराल' । पर्व्वतजातपीलुवृक्ष । इत्यमरटीकायां रमानाथ' । आखरोट् इति भाषा ॥

कर्परिकातुत्थं, क्ली, (कर्पर्य्येव इति स्वार्थे कन् ततष्टाप् अत इत्वं कर्परिकेव तुत्थम् ।) तुत्थविशेष । कर्परी । इति हेमचन्द्र ॥

कर्परी, स्त्री, (कृप् + बाहुलकादरट् । लत्वाभावश्च । टित्त्वात् ङीप् । केचित्तु कृपधातोररन् प्रत्ययेन निष्पादितोऽयं तन्मते गौरादित्वात् ङीष् ।) क्वाथोद्भवं तुत्थम् । दारुहरिद्रार क्वाथेर तुतिया इति भाषा । तत्पर्य्याय' । दार्व्विका २ । इत्यमरः । २ । ९ । १०१ ॥ तुत्थाञ्जनम् । इति तट्टीकायां स्वामी ॥

कर्पास, पु क्ली, ("कृञः पासः" । उणा ५ । ४५ इति कृधातो' पास ।) कार्पास । इत्यमरटीका । कापास् इति भाषा ॥

कर्पासी, स्त्री, (कर्पास इति जातित्वात् गौरादित्वात् वा ङीष् ।) कार्पासी । इति भरतः ॥ कापासगाछ इति भाषा ॥

कर्पूर',पु,क्ली,(कृप् + "खर्जूरादित्वात्" उणा ४ । ९० । इति ऊर' ।) स्वनामख्यातसुगन्धिद्रव्यम् । काफुर इति पारस्य भाषा । कपूर् इति हिन्दी भाषा । (यथा,—राजेन्द्रकर्णपूरे ३३ ।
"कर्पूरैरिव पारदैरिव सुधास्यन्दैरिवाप्लाविते जाते हन्त ! दिवापि देव ! ककुभां गर्भे भवत्कीर्त्तिभि " ॥) तत्पर्य्याय' । घनसार २ चन्द्रसंज्ञः ३ सिताभ्रः ४ हिमवालुका ५ । इत्यमरः २ । ६ । १३० ॥ सिताभ' ६ । इति तट्टीका ॥ घनसारक ७ सितकर ८ शीत ९ शशाङ्क १० शिला ११ शीतांशु १२ हिमवालुक १३ हिमकर १४ शीतप्रभः १५ शाम्भव १६ शुभ्रांशु १७ स्फटिकाभ्रः १८ क्षारमल्लिका १९ ताराभ्र २० चन्द्रार्क्कः २१ चन्द्रः २२ लोकतुषार २३ गौर' २४ कुमुद' २५ इन्दु २६ हिमाह्वय २७ चन्द्रभस्म २८ वेधकः २९ रेणुसारक ३० । इति शब्दरत्नावली ॥ अस्य गुणाः । शिशिरत्वम् । तिक्तत्वम् । कटुत्वम् । श्लेष्मरक्तपित्ततृष्णाविदाहकण्ठास्यदोषोष्णरोगनाशित्वञ्च ॥
"कर्पूरो नूतनस्तिक्त' स्निग्धश्चोष्णास्रदाहहृत् । चिरस्थो दाहशोषघ्न' स धौतः शुभ्रकान्तिपर " ॥ इति राजनिर्घण्टः ॥
अपि च । पाके शीतलत्वम् । चक्षुर्हितकारित्वम् । पक्वकर्पूरादपक्वस्याधिकगुणत्वञ्च । इति राजवल्लभ ॥ तद्भेदा यथा । पोतास १ भीमसेन २ सितकरः ३ शङ्करावाससंज्ञः ४ पांशु ५ पिञ्ज ६ अब्दसार ७ हिमवालुकः ८ जूतिका ९ तुषारः १० हिम' ११ शीतलः १२ पत्रिकाख्यः १३ । इति राजनिर्घण्ट ॥
(तस्यादौ कर्पूरस्य नाम गुणाश्च ।
"कर्पूर' शीतलो वृष्यश्चक्षुष्यो लेखनो लघु' । सुरभिर्मधुरस्तिक्त' कफपित्तविषापह । दाहतृष्णास्यवैरस्यमेदो दौर्गन्ध्यनाशनः ॥ कर्पूरोद्विविध प्रोक्त पक्वापक्वप्रभेदत । पक्वात् कर्पूरत' प्राहुरपक्व गुणवत्तरम्" ॥ अथ चीनाककर्पूर । चीनेकपूर इति भाषा । "चीनाकसंज्ञ' कर्पूर' कफक्षयकरः स्मृत' । कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च स " ॥ इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे ॥ "सतिक्त सुरभि शीत' कर्पूरो लघुलेखन' । तृष्णाया मुखशोषे च वैरस्ये चापि पूजित " ॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कर्पूरक', पु, (कर्पूर इव कायति प्रकाशते शोभते वा । कर्पूर + कै + क ।) कर्च्चुरक । कर्चूरक । इति शब्दचन्द्रिका ॥

कर्पूरतिलक, पु, (कर्पूर इव शुक्ल तिलक ललाटचिह्न यस्य । स्वनामख्यातो हस्ती । यथा हितोपदेशे १ । ३४६ ।
"अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती" ॥) स्त्री, उमासखिभेद । जया । इति शब्दमाला ॥

कर्पूरतैल, क्ली, (कर्पूराज्जात तैल स्नेहः । कर्पूरस्य तैलमिव स्नेहो वा ।) कर्पूरस्नेह' । तत्पर्य्याय' । हिमतैलम् २ सुधांशुतैलम् ३ शीतांशुतैलम् ४ तुहिनांशुतैलम् ५ सितांशुतैलम् ६ । अस्य गुणा । कटुत्वम् । उष्णत्वम् । कफवातामयनाशित्वम् । दन्तदार्ढ्यपित्तकारित्वञ्च । इति राजनिर्घण्ट' ॥

कर्पूरनालिका, स्त्री, पक्वान्नविशेषः । कर्पूरनारि इति नेओयाला इति च ख्याता । यथा भावप्रकाश । "घृताढ्यया समितया कृत्वा लम्बपुटं तत' । लवङ्गोषणकर्पूरयुतया सितयान्वितम् ॥ पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका । संयावसदृशी ज्ञेया गुणै कर्पूरनालिका" ॥

कर्पूरमणि, पु, (कर्पूरवर्णो मणि ।) पाषाणभेद' । "कर्पूरमणिनामायं युक्त्या वातादिदोषनुत्" ॥ इति राजनिर्घण्ट' ॥

कर्फर, पुं, (कीर्य्यते क्षिप्यते इति कृ + विच् । कर् । फल्यते इति फल प्रतिविम्ब' । फल + क । लस्य र' । कीर्य्यमाण' फल प्रतिविम्ब यत्र । दर्पणे हि मुखादीनां प्रतिविम्बपतनात् तथा बोध्यते ।) दर्पण' । इति जटाधर ॥

कर्ब्ब गतौ । इति कविकल्पद्रुम' ॥ (भ्वां-परं-सकं-सेट् ।) रेफोपध । कर्व्वति । इति दुर्गादास' ॥

कर्व्वुदार, पु, (कर्व्वुरिव कर्व्वु सन् वा श्लेष्माणं मल वा दारयतीति । कर्व्वु + दृ + णिच् + अच् ।) कोविदारवृक्ष । इति शब्दमाला ॥ श्वेतकाञ्चन' । अस्य गुणौ । ग्राहित्वम् । रक्तपित्तरोगे विशेषेण पथ्यत्वञ्च । इति राजवल्लभ ॥ ("शणस्य कोविदारस्य कर्व्वुदारस्य शाल्मलेः । पुष्पं ग्राहि प्रशस्तञ्च रक्तपित्ते विशेषतः" ॥ इति चरके सूत्रस्थाने । २७ अध्याये ॥) नीलझिण्टी । इति शब्दचन्द्रिका ॥

कर्व्वुदारक', पु, (कर्व्वुदारवत् कायति । कै + क । यद्वा कर्व्वु सन् कर्व्वुरिव वा श्लेष्माणं कफ दारयति । दृ + णिच् + ण्वुल् ।) श्लेष्मान्तकवृक्ष' । इति राजनिर्घण्टः ॥

कर्व्वुर, क्ली, (कर्व्वति गर्व्वं यस्मात् यस्मिन् सति वा गर्व्वी भवति कर्व्वत्यनेन वा । कर्व्व दर्पे इति "मद्गुरादयश्च" उणा १ । ४२ । इति उरच् ।) स्वर्णम् । धुस्तूरवृक्ष' । इत्यमर' । २ । ९ । ९४ ॥ जलम् । इति मेदिनी ॥

कर्व्वुर, पु, (कर्व्वति हिनस्ति जीवम् । कर्व्व हिंसायां + "मद्गुरादयश्च" । उणा । १ । ४२ । इति उरच् ।) राक्षस । ("कर्व्वुर श्वेतरक्षसो" उणाम् । १ । ४२ । कर्व्वति नानावर्णतां गच्छति । कर्व्व गतौ + उरच् । उणा १ । ४२ ।) नानावर्ण । तत्पर्य्याय । चित्रम् २ किर्म्मीर' ३ कल्माष ४ शबल ५ एत ६ ॥ (यथा कुमारे । ४ । २७ ।
"इति चैनमुवाच दु खिता
सुहृद' पश्य वसन्त ! किं स्थितम् ।
तदिद कणशो विकीर्य्यते
पवनैर्भस्म कपोतकर्व्वुरम्" ॥)
तद्वति त्रि । इत्यमर' । १ । ६ । १७ ॥ शटी । इत्यमरटीका ॥ पापम् । इति मेदिनी ॥ नदीनिष्पावधान्यम् । इति राजनिर्घण्टः ॥

कर्व्वुरफल, पु, (कर्व्वुरं चित्रवर्णं फल यस्य ।) साकुरुण्डवृक्ष' । इति राजनिर्घण्ट' ॥

कर्व्वुरा, स्त्री, (कर्व्वुर + टाप् ।) कृष्णवृन्तावृक्ष । इति मेदिनी ॥ पायल इति भाषा ॥ वर्व्वरा । इति जटाधर ॥ वावुइ तुलसी इति भाषा ॥ (जलौकोजातिविशेष । "वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षि कर्व्वुरा" ॥ इति सुश्रुते । १३ अध्याये ॥)

कर्व्वुरी, स्त्री, (कर्व्वुर + गौरादित्वात् ङीष् ।) दुर्गा । इति त्रिकाण्डशेष ॥

कर्व्वूर, क्ली, (कर्व्वति गर्व्व प्राप्नोति यस्मात् कर्व्व दर्पे गतौ वा खर्ज्जूरादित्वात् ऊर' । उणां ४ । ९० । पृषोदरात् दीर्घो वा ।) स्वर्णम् । इति मेदिनी ॥ हरितालम् । इति त्रिकाण्डशेष' ॥

कर्व्वूर, पुं, (कर्व्वति गर्व्वति हिनस्ति वा । कर्व्व + ऊर ।) शटी । इत्यमर' । २ । ९ । ९४ ॥ राक्षस । इत्युणादिकोष' ॥ द्राविडक' । इति शब्दरत्नावली ॥ कांचहल्दि इति भाषा ॥

कर्व्वूरक , पु, (कर्व्वूर + स्वार्थे कन् ।) हरिद्राभकन्द । कांचहल्दि इति ख्यात' । इति भरतः ॥ कालहरिद्रा । इति सारसुन्दरी ॥ कर्पूरहरिद्रा । इति सारमञ्जरी ॥ आकवसन्त' । इति भगीरथः ॥ काञ्चिका हरिद्रेति ख्याता । इति टीकासर्व्वस्वम् ॥ हरिद्राभकचोरा इति ख्याता । इति मधुमाधवी ॥ तत्पर्य्याय । द्राविडक २ काल्पक ३ वेधमुख्यकः ४ । इत्यमर । २ । ४ । १३५ ॥ काल्पक' ५ इति टीका सर्व्वस्वम् ॥

कर्म्म, [न्] क्ली, (यत्क्रियते तत् । कृ + मनिन् । कर्त्तुं क्रियया यद्व्याप्यते तदा क्रियाव्याप्यं कर्म्मेति

केचित्। तत्तु मतभेदेन त्रिधा चतुर्धेति विभक्तिमुच्यते ।) षट्कारकान्तर्गतकारकविशेष । वोपदेवेनास्य ढ इति सञ्ज्ञा कृता। अत्र द्वितीया विभक्तिर्भवति। तस्मिन् उक्ते प्रथमा। तस्य लक्षणम्। "परसमवेतधात्वर्थजन्यफलशालित्व कर्म्मत्वम्"। इति सारमञ्जरी॥ "यत्क्रियते तत्"। इति प्रसिद्धम्। करोतेर्निखिलक्रियावाचकत्वात् कर्त्तुर्व्यापारैर्यत् साध्यते तदित्यर्थ । अतएव "क्रियाव्याप्यं कर्म्म"। इति क्रमदीश्वर । तच्चतुर्व्विधम् निर्व्वर्त्यम् १ यथा घट करोति पुत्त्र प्रसूते॥ विकार्य्यम् २ तच्च द्विविधम्। प्रकृतेरुच्छेदक प्रकृतेर्गुणान्तराधायकञ्च। आद्य यथा काष्ठ भस्म करोति। अन्त्यं यथा सुवर्ण कुण्डलं करोति।

यथा चोक्तं भर्त्तृहरिणा।

"यदसज्जायते पूर्व्वं जन्मना यत् प्रकाशते।
तन्निर्वर्त्त्यं विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थितम्॥
प्रकृत्युच्छेदसम्भूत विकार्य्यं काष्ठभस्मवत्।
अन्यद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्"॥

प्राप्यम् ३ यथा ग्रामं गच्छति चन्द्र पश्यतीत्यादि॥ अनीप्सितञ्च ४ यथा पाप त्यजति इत्यादि। इति कारके २ मुग्धबोधसूत्रस्य टीकाया दुर्गादास ॥ * ॥

सप्तपदार्थान्तर्गततृतीयपदार्थ । तत्तु पञ्चविधम्। यथा,—भाषापरिच्छेदे ६, ७।

"उत्क्षेपण ततोऽवक्षेपणमाकुञ्चन तथा।
प्रसारणञ्च गमन कर्म्माण्येतानि पञ्च च॥
भ्रमण रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते"॥

कुसुमाञ्जलिमते यागहिंसादि॥ तत्तु त्रिविधम्। सात्त्विकम् १ राजसम् २ तामसम् ३।

सात्त्विक यथा,

"नियत सङ्गरहितमरागद्वेषत कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते"॥

राजस यथा,—

"यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुन ।
क्रियते बहुलायास तद्राजसमुदाहृतम्"॥

तामसं यथा,—

"अनुबन्ध क्षय हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते"॥

इति श्रीभगवद्गीता। १८। २३-२५॥

लग्नात् दशमलग्नम्। इति ज्योतिषम्॥ क्रिया। इत्यमर॥ तच्च पञ्चविधम्। नित्यनैमित्तिककाम्यप्रायश्चित्तनिषिद्धभेदात्। तत्र आद्यानि चत्वारि धर्म्माणि। अन्त्य अधर्म्मम्। तच्च जन्मभेदात् चतुर्व्विधम् सञ्चित प्रारब्ध क्रियमाण भावि च। इति वेदान्तमतम्॥ * ॥

ब्राह्मणादीना स्वाभाविककर्म्माणि यथा।

"शमो दमस्तपः शौच क्षान्तिरार्जवमेव च।
ज्ञान विज्ञानमास्तिक्य ब्रह्मकर्म्म स्वभावजम्॥
शौर्य्यं तेजो धृतिर्दाक्ष्य युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षत्त्रकर्म्म स्वभावजम्॥
कृषिगोरक्ष्यवाणिज्य वैश्यकर्म्म स्वभावजम्।
परिचर्य्यात्मक कर्म्म शूद्रस्यापि स्वभावजम्"॥ * ॥

स्वकर्म्माभिरतस्य फल यथा।

"स्वे स्वे कर्म्मण्यभिरत संसिद्धि लभते नर ।
स्वकर्म्मनिरत सिद्धि यथा विन्दति तच्छृणु॥
यत प्रवृत्तिर्भूताना येन सर्व्वमिद ततम्।
स्वकर्म्मणा तमभ्यर्च्च्य सिद्धि विन्दति मानव ॥
श्रेयान् स्वधर्म्मो विगुण परधर्म्मात् स्वनुष्ठितात्।
स्वभावनियत कर्म्म कुर्व्वन्नाप्नोति किल्बिषम्॥
सहज कर्म्म कौन्तेय सदोषमपि न त्यजेत्।
सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृता॥
असक्तबुद्धि सर्व्वत्र जितात्मा विगतस्पृह ।
नैष्कर्म्म्यसिद्धि परमा सन्न्यासेनाधिगच्छति"॥

इयि श्रीभगवद्गीतायाम्। १८। ४२-४९॥

कर्म्मकर, त्रि, (कर्म्म करोति मूल्येन। डुकृञ् करणे+"कर्म्मणि भृतौ"। ३। २। २२। इति ट।) मूल्यं गृहीत्वा कर्म्मकारक। मजुर ठिकाचाकर इत्यादि भाषा। तत्पर्य्याय। भृतक २ भृतिभुक् ३ वैतनिक ४॥ वेतनोपजीवी। तत्पर्य्याय॥ भरण्यभुक् २। इत्यमर। ३।१।१९॥ कर्म्मण्यभुक् ३। इति तट्टीका॥ कर्म्मकर्त्तृमात्रञ्च॥ (यथा, मिताक्षराया नारद।
"शिष्यान्तेवासिभृतकास्तुर्य्यस्त्वधिकर्म्मकृत्। एते कर्म्मकरा ज्ञेया"॥)

कर्म्मकर, पु, (कृञ् हिंसाया+मन्। कर्म्म हिंसां करोतीति। कृ+हेत्वादौ ट। यद्वा, जीवकृत कर्म्माधिकृत्य करोति सुखदु खयोर्व्यवस्था निष्पादयति नरकस्वर्गादिव्यवस्था करोति वा। धर्म्माधर्म्मात्मक कर्म्म समीक्ष्य सर्व्वान् शास्तीत्यर्थ। कर्म्मफलानुसारेण पापात्मना दण्डप्रदानरूपहिंसायामधिकारित्वात् अस्य तथात्वम्।) यम। इति मेदिनी॥

कर्म्मकरी, स्त्री, (कर्म्म+कृ+ट। टित्त्वात्+ङीप्।) मूर्व्वा लता। विम्बिका लता। इति मेदिनी॥ दासी। इति शब्दरत्नावली॥
(यथा भागवते ३। २३। २७।
"वय कर्म्मकरीस्तुभ्य शाधि न करवाम किम्"॥)

कर्म्मकार, पु, (कर्म्म वेतन गृहीत्वा लोहादिभि खड्गकर्त्तरिकादिक करोति निर्म्मातीति। कर्म्म+कृ+उपपदे "कर्म्मण्यण्"। ३। २। १। इति अण्।) वर्णसङ्करविशेष। लौहकार। कामार इति भाषा। स तु शूद्राया विश्वकर्म्मणो जात। इति ब्रह्मवैवर्त्तपुराणम्॥ वृष। इति शब्दचन्द्रिका॥

कर्म्मकार, त्रि, (कर्म्म करोति भृतिम्वते। कर्म्म+कृ+अण्।) वेतन विना भारवहनादिकर्म्मकारक। वेगार इति भाषा॥ तत्पर्य्याय। कर्म्मक्रिय २। इत्यमर। ३। १। १९॥

कर्म्मकीलक, पु, (कर्म्मणा कीलका इव वस्त्रक्षालनरञ्जनादिना गृहस्थाना मानरक्षाकपाटकीलकस्वरूप।) रजक। इति त्रिकाण्डशेष॥

कर्म्मज, पु, (कर्म्मणो जात। विषयभोगवासनावशात् क्रमश मलिनायमानो वृत्तिभिर्जात इत्यर्थ। जन+ड।) कलियुग। इति शब्दरत्नावली॥ वटवृक्ष। इति जटाधर॥ क्रियाजन्ये त्रि। (यथा, मनु। १२। १०१।
"तथा दहति वेदज्ञः कर्म्मज दोषमात्मन"॥
कारणभेदेन रोगभेदो यथा।
"बहुभिरुपचारैस्तु येन यान्ति समन्तत ।
ते कर्म्मजा समुद्दिष्टा व्याधयो दारुणा पुन"॥
इति हारीते चिकित्सितस्थाने २ अध्याय॥)

कर्म्मजगुण, पु, (कर्म्मणो जायते यो गुण क्रियाहेतो जातो गुण इत्यर्थ।) क्रियाजन्यगुण। तद्यथा।
"संयोगश्च विभागश्च वेगश्चैते तु कर्म्मजा"॥
इति भाषापरिच्छेदे॥ ९७॥

कर्म्मठ, त्रि, (कर्म्मणि घटते इति। "कर्म्मणि घटोऽठच्"। ५। २। ३५। इति अठच्।) कर्म्मकुशल। यथा। भट्टि। १। ११।
"ज्ञाताशयस्तस्य ततो व्यतानीत्
स कर्म्मठ कर्म्मसुतानुबन्धम्"॥
प्रयत्नेन प्रारब्ध कर्म्म समापयति य। तत्पर्य्याय। कर्म्मशूर २। इत्यमर। ३। १। १८॥

कर्म्मण्य, त्रि, (कर्म्मणि साधु तत्र साधुरिति यत्। यद्वा कर्म्मणा सम्पादि।) कर्म्मयोग्य। क्रियार्ह। केजुया इति भाषा। कर्म्मणा भ्राजते इत्यर्थे यप्रत्यय। इति संक्षिप्तसारव्याकरणम्॥ (यथा, ऋग्वेदे १। ९१। २०। "सोमोवीर कर्म्मण्य ददाति"॥)

कर्म्मण्यभुक्, त्रि, (कर्म्मण्य वेतन भुङ्क्ते। भुज्+क्विप्।) भरण्यभुक्। वेतनोपजीवी। इत्यमरटीकायां स्वामी॥

कर्म्मण्या, स्त्री, (कर्म्मणा सम्पद्यते तत्र साधुरिति यत्। टाप् च।) वेतनम्। मूल्यम्। इत्यमरः। २। १०। ३८॥

कर्म्मन्दी, [न्] पुं, (कर्म्मन्देन भिक्षुसूत्रकारकेण स्वनामख्यातऋषिविशेषेण प्रोक्तं भिक्षुसूत्रमधीते य। कर्म्मन्द+इनि।) भिक्षु। सन्न्यासी। इत्यमर। २। ७। ४२॥

कर्म्मफल, क्ली, (कर्म्मणा जीवकृतशुभाशुभस्य शास्त्रविहितस्य निषिद्धस्य वा सुखदु खादिरूप फल परिणाम इत्यर्थ।) कर्म्मविपाक। (यथा, विष्णुपुराणे १। १९। ७१।
"समस्तकर्म्मभोक्ता च कर्म्मोपकरणानि च।
त्वमेव विष्णो! सर्व्वाणि सर्व्वकर्म्मफलञ्च यत्"॥
तथा च मनु। ११। २३१।
"एव सञ्चिन्त्य मनसा प्रेत्य कर्म्मफलोदयम्"॥)
कर्म्मरङ्गफलम्। इति मेदिनी॥ कामराङ्गा इति भाषा॥

कर्म्मभू, स्त्री, (कर्म्मणा कृषिकार्य्यस्य कर्म्मणि वा उचिता उपयोगिनी वा या भू।) कृष्टभूमि। तत्पर्य्याय। कर्म्मान्त २। इति हेमचन्द्रः॥ (आर्य्यावर्त्तदेश। यथा, विष्णुपुराणम्।
"तत्रापि भारत श्रेष्ठ जम्बुद्वीपे महामुने।।
यतो हि कर्म्मभूरेषा अतोऽन्या भोगभूमय"॥)

कर्म्मभूमि, स्त्री, (कर्म्मणा पुण्यात्मसम्पाद्ययज्ञादिरूपक्रियाया भूमिः।) आर्य्यावर्त्तदेश। इति

हेमचन्द्रः ॥ (भारतवर्षं यथा, विष्णुपुराणे २।३।१-२।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्" ॥
तथा च रामायणे २।१०९।२८। हेमा।
"कर्म्मभूमिमिमां प्राप्य कर्त्तव्यं कर्म्म यत् शुभम्"।)

कर्म्ममूल, क्ली, (कर्म्म यज्ञादिक्रियाजन्यं सत्कर्म्महेतुकं वा मूलं यस्य। कर्म्मणो मूलमिव मूलं यस्य वा।) कुशतृणम्। इति शब्दचन्द्रिका ॥

कर्म्मयुग, क्ली, (क्रिणाति हिनस्ति अन्योन्यं यत्र युगे। तत् कर्म्म। कृ हिंसायां + मनिन्प्रत्ययः। कर्म्म हिंसाप्रधानं युगं इति कर्म्मधारयः। कलेः हिंसाप्रधानत्वात् तथात्वम्।) कलियुगम्। इति त्रिकाण्डशेषः ॥

कर्म्मयोग, पु, (कर्म्मसु योगस्तत्कौशलम्।) चित्तशुद्धिजनकवैदिककर्म्म। यथा। निष्कामकर्म्मणात्मज्ञानमित्युक्तं यथा।
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते ॥
सोऽपि दुरितक्षयद्वारा न साक्षात्"। इति मलमासतत्त्वम् ॥ * ॥ तदनुष्ठानस्यावश्यकत्वं यथा।
श्रीभगवानुवाच ॥
"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन साङ्ख्यानां कर्म्मयोगेन योगिनाम् ॥
न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥
न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत्।
कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥
कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥
यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्ज्जुन।
कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥
नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥
यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः।
तदर्थं कर्म्म कौन्तेय। मुक्तसङ्गः समाचर ॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥
देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्द्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥
अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्म्मसमुद्भवः ॥
कर्म्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात् सर्व्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥
एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ। स जीवति ॥
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते ॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥
तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर।
असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुषः ॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि सम्पश्यन् कर्त्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि ॥
यदि ह्यहं न वर्त्तेयं जातु कर्म्मण्यतन्द्रितः।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ। सर्व्वशः ॥
उत्सीदेयुरिमे लोका न कुर्य्यां कर्म्म चेदहम्।
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ॥
सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत।
कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥
न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम्।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन् ॥
प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥
तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥
प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्म्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥
मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥
ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः ॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्व्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥
इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥
श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः"॥
इति श्रीभगवद्गीतायां कर्म्मयोगो नाम ३ अध्यायः ॥*॥ अन्यत् भगवन्मन्दिरादिकरणं वह्निपुराणे यमानुशासननामाध्याये द्रष्टव्यम् ॥

कर्म्मरङ्ग, पु, क्ली, (कर्म्मणे हिंसाक्रियायै तत्फलभक्षणकारिणां रोगादिजननक्रियायै इत्यर्थः रज्यते पर्य्याप्यते। कृ हिंसायां इति धातोः मनिन् प्रत्ययेन निष्पन्नत्वात् ततो कर्म्मन् + रन्ज + घञ्।) फलवृक्षविशेषः। कामराङ्गा इति भाषा ॥ (यथा, रामायणे। ३।१७।८। गो।
"सोमवृक्षान् कर्म्मरङ्गान् पियालांश्च क्वचित् क्वचित्"।)
तत्पर्य्यायः। शिरालः २ दन्तशठः ३ रुजाकरः ४। इति शब्दचन्द्रिका ॥ कर्म्मारः ५ कर्म्मरकः ६ पीतफलः ७ कर्म्मरः ८ मुद्गरकः ९ मुद्गरः १० धाराफलः ११ कर्म्मारकः १२। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातहारित्वम्। पित्तकारित्वञ्च। इति राजनिर्घण्टः ॥ तीक्ष्णत्वम्। कटुपाकित्वम्। श्लेष्मपित्तकारित्वञ्च। इति राजवल्लभः ॥ तत्पक्वफलगुणाः। मधुराम्लत्वम्। बलपुष्टिरुचिप्रदत्वञ्च। इति राजनिर्घण्टः ॥
("कर्म्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातहृत्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे ॥)

कर्म्मरी, स्त्री, (कर्म्म भेषज्योपयोगक्रियां राति ददाति। रा + कः। ततो गौरादित्वात् ङीष्।) वंशरोचना। इति राजनिर्घण्टः। (वंशरोचनाशब्देऽस्या विस्तृतिर्ज्ञातव्या ॥)

कर्म्मवज्र, पु, (कर्म्म श्रौतस्मार्त्ताद्यनुष्ठानं तच्च श्रुत्यादेरध्ययनमाचरणादिकं वा वज्रं वज्रतुल्यदृढं यस्य। द्विजेतरजाते श्रौतादिकर्म्मश्रुतिगोचराज्ञेयतादिहेतुकत्वात् वज्रवत् कठिनं प्रतिभातीति भावः।) शूद्रः। इति महाभारतम् ॥

कर्म्मवाटी, स्त्री, (कर्म्मणां शास्त्रोक्ततिथिनिमित्तीभूतक्रियाणां चन्द्रकलाक्रियाणां वा वाटीव। पुष्पवाटिका यथा पुष्पादेराधारस्तद्वदित्यर्थः। तिथीनां हि कर्म्मनिमित्ततया तथात्वम्।) तिथिः। इति हेमचन्द्रः ॥

कर्म्मविपाक, पु, (कर्म्मणः अधर्म्ममूलकस्य अशुभफलजनकस्येति यावत् विपाकः परिणामः। इह रोगादिभोगजनकदुःखमयपरिणामः। अमुत्र नरकभोगादिजनकदुःखमयपरिणामश्च।) अशुभकर्म्मजन्यफलस्य विपाकः। रोगादिरूपजन्मान्तरीयाशुभकर्म्मफलभोगः इति यावत्। तद्विवरणं यथा,—
"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते।
पतितात् प्रतिगृह्याथ खरयोनिं व्रजेद्बुधः ॥
नरकात् प्रतिमुक्तस्तु कृमिर्भवति याजकः।
उपाध्यायव्यलीकन्तु कृत्वा श्वा भवति द्विजः ॥
तज्जायां मनसा वाञ्छंस्तद्द्रव्यं वाप्यसंशयम्।
गर्द्दभो जायते जन्तुर्म्मित्रस्यैवापमानकृत् ॥
मातापितरमाक्रम्य शारिका सम्प्रजायते।
पितरौ पीडयित्वा तु कच्छपत्वञ्च गच्छति ॥
भर्त्तुः पिण्डमुपाश्नन् यो हित्वान्यानि निषेवयेत्।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः।
असूयकश्च नरकान्मुक्तो भवति राक्षसः ॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते।
यवधान्यानि हृत्वा तु जायते मूषिको मृतः ॥
परदाराभिमर्षात्तु वृको घोरोऽभिजायते।
भ्रातृभार्य्याप्रसङ्गेन कोकिलो जायते नरः ॥
गुर्व्वादिभार्य्यागमनात् शूकरो जायते नरः।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः ॥
देवतापितृविप्राणामदत्त्वा योऽन्नमश्नुते।
प्रमुक्तो नरकादापि वायसः स प्रजायते ॥
ज्येष्ठभ्रातृवमानाच्च क्रौञ्चयोनौ प्रजायते।
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत्।
कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा ॥
अशस्त्रं पुरुषं हत्वा नरः संजायते खरः।
कृमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते ॥

भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
हृत्वान्नञ्चैव मार्ज्जारस्तिलहृच्चैव मूषिकः ॥
घृतं हृत्वा च नकुलः काको मद्गुरमामिषम् ।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ॥
अपो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते ॥
हृत्वा तु काञ्चनं भाण्डं क्रमियोनौ प्रजायते ।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता बकस्तथा ॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते ।
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः ॥
छुछुन्दरिः शुभान् गन्धान् वशं हृत्वा शशो भवेत् ।
षण्ढः फलापहरणे काष्ठहृत् काष्ठकीटकः ॥
पुष्पापहृद्दरिद्रस्तु पङ्गुर्यानापहृन्नरः ।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ॥
गृहहृन्नरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत् ॥
एष एव क्रमो दृष्टो गोसुवर्णादिहारिणाम् ।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून् ॥
असमिद्धेऽग्नौ हुते च मन्दाग्निः सम्प्रजायते ।
परनिन्दा कृतघ्नत्वं परमर्म्मावघातनम् ॥
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ॥
निकृत्या वञ्चनं नॄणां कार्पण्यञ्च नृणां बुधः ।
उपलक्षणादि जानीयात् मुक्तानां नरकादनु ॥
दयाभूतेषु संवादः परलोकं प्रतिक्रिया ।

सत्यं हितार्थता चोक्तिर्वेदप्रामाण्यदर्शनम् ॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः ।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः ।
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं फलम्" ॥
इति गारुडे कर्म्मविपाकः २२९ अध्यायः ॥

शातातपप्रमुखभरतोक्तः पापरोगप्रायश्चित्तानां विवरणग्रन्थः । प्रायश्चित्तविहीनपापिना नरकान्ते प्रतिजन्म तत्पापसूचितरोगयुक्तं शरीरं भवति । नृणां दुष्कर्म्मजा रोगा जपदेवार्च्चनहोमदानादिभिः शमं यान्ति ॥*॥ महापातकजा रोगाः सप्तजन्मसु जायन्ते । तद्यथा—कुष्ठम् । राजयक्ष्मा । प्रमेहः । ग्रहणी । मूत्रकृच्छ्रम् । अश्मरी । कासः । अतीसारः । भगन्दरः । दुष्टव्रणः । गण्डमाला । पक्षाघातः । अक्षिनाशनम् । इत्यादयः । अत्र सम्पूर्णं प्रायश्चित्तम् ॥*॥ उपपापोद्भवा रोगाः पञ्चजन्मसु जायन्ते । तद्यथा—जलोदरम् । यकृत् । प्लीहा । शूलम् । व्रणः । श्वासः । जीर्णज्वरः । छर्द्दिः । भ्रमः । मोहः । गलग्रहः । रक्तार्ब्बुदम् । विसर्पः । इत्यादयः । अत्र अर्द्धं प्रायश्चित्तम् ॥*॥

पापसमुद्भवा रोगास्त्रिषु जन्मसु जायन्ते । तद्यथा—दण्डापतानकः । चित्रवपुः । कम्पः । विचर्च्चिका । वल्मीकः । पुण्डरीकम् । इत्यादयः । अत्र पादांशः प्रायश्चित्तम् ॥*॥ अतिपापात् अर्शः आद्याः रोगा भवन्ति अन्ये बहुधा रोगसङ्कराश्च ॥*॥ अथ दानादिषु साधारणविधिः ।

गोदाने सुशीला सवत्सा पयस्विनी गौः । वृषदाने शुक्लवस्त्रकाञ्चनसहितः शुभोऽनड्वान् । भूदाने दशनिवर्त्तनपरिमिता भूः । सुवर्णदाने शतनिष्कं स्वर्णं तदर्द्धार्द्धं वा । अश्वदाने उपस्करसहितः सुशीलाश्वः । महिषदाने स्वर्णायुधयुक्तमहिषी । गजमहादाने सुवर्णफलसहितगजः । देवार्च्चने लक्षोच्चावचपुष्पदानम् । ब्राह्मणभोजने सहस्रद्विजेभ्यो मिष्टान्नदानम् । रुद्रजपे लक्षसङ्ख्यकपुष्पकरणकत्र्यम्बकपूजनानन्तरं एकादशरुद्रजपः तद्दशांशसघृतगुग्गुलहोमः वरुणमन्त्रैरभिषेचनञ्च । धान्यदाने षष्ठिसङ्ख्यकखारी परिमितधान्यम् । वस्त्रदाने कर्पूरमिश्रितपट्टवस्त्रद्वयम् ॥*॥

अथ प्रायश्चित्तग्रहणानुष्ठानादि । दश पञ्चाष्ट चतुरो वा ब्राह्मणानुपवेश्य तेषामनुज्ञया प्रायश्चित्तमुपक्रम्य विष्णुं सम्पूज्य निजकाम्यया सङ्कल्प्य द्विजेभ्यो धेनुं शक्तितो दक्षिणाञ्च दत्त्वा तान् वस्त्रालङ्कारैरलङ्कृत्य दण्डप्रमाणेन प्रायश्चित्तं याचेत । तेषामनुज्ञया प्रायश्चित्तं यथाविधि कृत्वा परिपूर्णान् तान् यथाविधि अर्च्चयित्वा तेभ्योऽनुज्ञामाशिषञ्च प्रतिगृह्य ब्राह्मणान् भोजयित्वा बन्धुभिः सह भोक्तव्यम् । इति शातातपीयकर्म्मविपाकप्रथमाध्यायविवरणम् ॥*॥ जन्मान्तरीयमहापातकशेषचिह्नकुनखादिरोगाणां प्रायश्चित्तं पराकव्रतं महापातकादतिपातकस्य गुरुत्वात्तच्छेषजन्यगलत् कुष्ठरोगस्य प्रायश्चित्तं द्विगुणम् । इति स्मार्त्ताः ॥*॥

अथ शातातपोक्तहिंसास्तेयाऽगम्यागमनाऽगतिप्रायश्चित्तानि क्रमेण लिख्यन्ते ॥

पापी	रोगी	प्रायश्चित्तम्
१ अजाघाती	१ अधिकाङ्ग	१ विचित्रवस्त्रयुक्ता अजा दद्यात् ॥
२ अश्वहन्ता	२ वक्रतुण्ड	२ शतपलानि चन्दनानि दद्यात् ॥
३ उरभ्रघाती	३ पाण्डुरोगी	३ ब्राह्मणाय पलपरिमितकस्तूरिका दद्यात् ॥
४ उष्ट्रहन्ता	४ विकृतस्वर	४ कर्पूरकं फलं दद्यात् ॥
५ काकघाती	५ कर्णहीन	५ कृष्णा गा दद्यात् ॥
६ कारहन्ता	६ रूक्ष	६ शुक्लवर्णवृषभं दद्यात् ॥
७ खरहन्ता	७ खररोमा	७ कृष्णगुल्मिवत् प्रायश्चित्तं कुर्य्यात् ॥
८ गजघाती	८ सर्व्वकार्य्येष्वसिद्धार्थ	८ प्रासादं कारयित्वा गणेशप्रतिमां स्थापयेत् अथवा कुजत्यशार्के पूर्वेषु गणशान्तिपूर्व्वकं लक्षसंख्यकगणेशमन्त्रं जपेत् ॥
९ गोवध्या	९ कुष्ठी निर्व्वंशश्च ..	९ शतप्राजापत्यव्रतञ्चरित्वा ब्राह्मणाय भूमिं दक्षिणां दत्त्वा भारतं शृणुयात् ॥
१० गोवधी .	१० कुष्ठी ..	१० पञ्चपल्लवसंयुक्तपञ्चवर्णसमन्वितरक्तचन्दनलिप्ताङ्गरक्तपुष्पाम्बरान्वितैकरक्तकुम्भं दक्षिणस्यां दिशि संस्थाप्य तत्र तिलचूर्णपूरितताम्रपात्रं विन्यस्य तदुपरि निष्कमितसुवर्णनिर्म्मितयमदेवं पुरुषसूक्तमन्त्रेण सम्पूज्य पापं मे शाम्यतामिति प्रार्थयेत् । ततः सामविद् ब्राह्मणस्तत्र कलसे सामपारायणं कुर्य्यात् । ततो दशांशं सर्षपं दत्त्वा पात्रमाल्याभिषेचनं कुर्य्यात् । ततो "यमोऽपि महिषारूढो दण्डपाणिर्भयानकः । दक्षिणाशापतिर्देवो मम पापं व्यपोहतु" ॥ इति मन्त्रेण यजमानो यमं विसृज्य तं आचार्य्याय निवेद्य सद्भक्तिमाचरेत् ॥
११ तरक्षुहन्ता ...	११ केकरेक्षण	११ गुल्ममयीं धेनुं दद्यात् ॥

पापी	रोगी—	प्रायश्चित्तम्
१२ पितृहा	१२ चेतनाहीनः ...	१२ त्रिंशत् प्राजापत्यानि कृत्वा पलपरिमिता सुवर्णनाव कारयित्वा ताम्रपात्रे रूप्यमयं कुम्भं स्थापयित्वा निष्कपरिमितस्वर्णनिर्म्मितं विष्णुं पट्टवस्त्रेण सवेष्ट्य विधानतः पूजयेत्। तत् सर्व्वं ब्राह्मणाय दत्त्वा ब्राह्मणं विसर्जयेत्। अन्येभ्योऽपि विप्रेभ्यो भूयसीं दक्षिणां दद्यात् ॥
१३ बालघाती	१३ मृतवत्सः	१३ ब्राह्मणोद्वाहनं यथाविधि हरिवंशश्रवणञ्च कुर्य्यात्। महारुद्रजपान् कारयेत्। तद्दशांशेन अयुतसंख्यकदूर्व्वया च हुत्वा दक्षिणासहितनिष्कपरिमितैकादशस्वर्णानि विभानुसारत एकादशपलानि च दद्यात्। अन्यब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात्। ततः आचार्य्यो वरुणदैवतमन्त्रैर्दम्पती स्नापयेत्। यजमानः आचार्य्याय वस्त्रालङ्करणानि दद्यात् ॥
१४ ब्रह्महा	१४ पाण्डुकुष्ठी . ..	१४ यजमानश्चतुर्दिक्षु पञ्चपल्लवपञ्चवर्णसंयुक्तचतुरः कलसान् संस्थाप्य तन्मध्ये कुम्भोपरि रौप्यमष्टदलपद्मं विन्यस्य तदुपरि पलार्द्धार्द्धपरिमितसुवर्णनिर्म्मितदशहस्तं चतुर्म्मुखदेवं संन्यस्य प्रत्यहं त्रिकालं पुरुषसूक्तेन पूजयेत्। ततः पूर्व्वादिकुम्भेषु ब्रह्मचारिणो ब्राह्मणा ऋग्वेदप्रभृतीन् स्वस्ववेदान् शनैः पठेयुः। ततो मध्यकुम्भे तिलाक्तघृतहेममभिगृह्य शान्तिपुरःसरं दशांशेन होमं कुर्य्यात्। ततो ब्राह्मणो द्वादशाहेनेदं कर्म्म समाप्य तत्र पीठे यथाविधि यजमानमभिषिञ्चेत्। ततो यजमानो ब्राह्मणेभ्यो यथाशक्ति गोभूहेमतिलोदकानि दत्त्वा कुम्भादीन् आचार्य्याय निवेदयेत् ॥
१५ मातृहा	१५ मूकः	१५ चान्द्रायणव्रतं चरित्वा "सरस्वति जगन्मातः शब्दब्रह्मादिदेवते। दुष्कर्म्मकरणात् पापात् पाहि मां परमेश्वरि" ॥ इमं मन्त्रमुच्चार्य्य पलपरिमितसुवर्णसहितपुस्तकं ब्राह्मणाय दत्त्वा तं ब्राह्मणं विसर्ज्जयेत् ॥
१६ महिषीघाती .	१६ कृष्णगुल्मी	१६ निष्कत्रयपरिमितस्वर्णमयीं प्रकृतिं दद्यात् ॥
१७ मातृहा ..	१७ अन्धः	१७ पितृहवत् प्रायश्चित्तं कुर्य्यात् ॥
१८ मार्जारहा ...	१८ पीतपाणिः .	१८ निष्कमितस्वर्णनिर्म्मितं पारावतं दद्यात् ॥
१९ राजहा	१९ क्षयरोगी	१९ गोभूहिरण्यमिष्टान्नजलवस्त्राणि घृतधेनुं तिलधेनुञ्च दद्यात् ॥
२० वकघाती ..	२० दौर्गन्ध	२० शुक्लां गां दद्यात् ॥
२१ वैश्यहन्ता	२१ रक्तार्ब्बुदी	२१ चत्वारि प्राजापत्यव्रतानि चरित्वा सप्तधान्यानि उत्सृजेत् ॥
२२ शुकशारिकाघाती	२२ स्खलितवाक्	२२ ब्राह्मणाय सदक्षिणं सच्छास्त्रपुस्तकं दद्यात् ॥
२३ शूकरहन्ता	२३ दन्तुरः	२३ सदक्षिणं घृतकुम्भं दद्यात् ॥
२४ शूद्रहन्ता	२४ दण्डापतानकः .	२४ एकं प्राजापत्यव्रतञ्चरित्वा सदक्षिणैकधेनुं दद्यात् ॥
२५ शृगालहा	२५ विपादकः .	२५ खञ्जवत् प्रायश्चित्तं कुर्य्यात् ॥
२६ स्त्रीहन्ता .	२६ अतिसारी . .	२६ दशाश्वत्थवृक्षान् रोपयेत् शर्कराधेनुं दद्यात् शतं ब्राह्मणांश्च भोजयेत् ॥
२७ हरिणघाती .	२७ खञ्जः .	२७ पलपरिमितसुवर्णाश्वं दद्यात् ॥ * ॥ "हिंसाया निष्कृतिरियं ब्राह्मणे समुदाहृता। तदर्द्धार्द्धप्रमाणेन क्षत्त्रियादिष्वनुक्रमात्" ॥ इति शातातपोक्तकर्म्मविपाकद्वितीयाध्यायहिंसाप्रायश्चित्तविवरणम् ॥ * ॥

१ अभक्ष्यभोक्ता	१ कृमिकोदरः . .	१ भीमपञ्चकोपवासं कुर्य्यात् ॥
२ अस्पृश्यस्पृष्टान्नभोक्ता	२ कृमिलोदरः .	२ त्रिरात्रमुपवसेत् ॥
३ गर्भपातकर्त्ता .	३ यकृत्प्लीहजलोदररोगी	३ पलत्रयपरिमितसुवर्णरूप्यताम्रान्वितजलधेनुदानं कुर्य्यात् ॥
४ दावाग्निदः ..	४ रक्तातिसारी .	४ उदपानं वटवृक्षारोपणञ्च कुर्य्यात् ॥
५ दुष्टवाग्मी ..	५ खण्डितः . . .	५ दुग्धसमन्वितघटद्वयं पलद्वयपरिमितरूप्यञ्च द्विजातये दद्यात् ॥
६ मद्ये सति कदन्नदः	६ मन्दोदराग्निः .	६ प्राजापत्यत्रयं कृत्वा शतं द्विजान् भोजयेत् ॥
७ धूर्त्तः	७ अपस्मारी	७ ब्रह्मकूर्च्चमयीं धेनुं दत्त्वा सदक्षिणां गां दद्यात् ॥
८ परनिन्दावान्	८ खल्लीटः ..	८ काञ्चनसहितां धेनुं दद्यात् ॥
९ परान्नविघ्नकर्त्ता ..	९ अजीर्णी	९ यथाविधि लक्षहोमं कुर्य्यात् ॥
१० परोपतापी .	१० शूली . .	१० अन्नदानं रुद्रजपञ्च प्रकुर्व्वीत ॥
११ परोपहासकृत् .	११ काणः	११ सकाञ्चनां गां दद्यात् ॥
१२ पिशुनः	१२ श्वासकासी ..	१२ सहस्रपलसम्मितं घृतं दद्यात् ॥

पापी	रोगी	प्रायश्चित्तम्
१३ प्रतिमाभङ्गकारी ...	१३ अप्रतिष्ठ .	१३ वत्सरान्तपर्यन्तं प्रतिदिनं पञ्चगव्येन स्नानं कृत्वा यथोक्तविधिना सर्वां प्रतिमामुत्थाप्य सम्पूजितां विप्रेण संस्थापयेत् ।
१४ मद्यप	१४ रक्तपित्ती	१४ सर्पिषो घटं मधुनोऽर्द्धघटञ्च दद्यात् ।
१५ मार्गहा .	१५ पादरोगी . ..	१५ अश्वं दद्यात् ।
१६ रजस्वलादृष्टान्नभोक्ता	१६ कृमिकोदर .	१६ त्रिरात्रं गोमूत्रयावकं भुञ्जीत ।
१७ विषद ..	१७ हृद्रोगी ...	१७ दश पयस्विनीर्गा दद्यात् ।
१८ सभायां पक्षपाती .	१८ पक्षाघातवान्	१८ सत्यवर्त्तिने निष्कत्रयपरिमितं हेम दद्यात् ।
१९ सुरापः .. .	१९ श्यावदन्तः	१९ प्राजापत्यव्रतञ्चरित्वा सप्तधान्यपरिमिताः कर्षा दत्वा महारुद्रं जप्त्वा तद्दशांशं तिलैर्हुत्वा अब्ददैवतमन्त्रेणाभिषेकं कुर्य्यात् ।
२० सुरालये जले वा शकृन्मूत्रकारी ..	२० गुदरोगी ..	२० मासं व्याप्य सुरार्चनं गोदानं प्राजापत्यमेकञ्च कुर्य्यात् ।

इति शातातपीयकर्म्मविपाकस्तृतीयाध्यायप्रकीर्णप्रायश्चित्तविवरणम् । * ।

पापी	रोगी	प्रायश्चित्तम्
१ अगम्याभिगामी	१ मूत्रकृच्छ्री	१ कार्पाससमारोपितदोषत्रयादृष्टमतालकृतिन्यष्टिमितरन्मधेनु "सुरभी वैष्णवी माता मम पापं व्यपोहतु" इति मन्त्रमुच्चार्य्य दद्यात् ।
२ अन्ययोनिगामी	२ मूत्राघाती . .	२ मासं व्याप्य प्रतिदिनं सहस्रमल्लिकमलकर्कशादिस्नानं कुर्य्यात् । स्त्रीणामपि तत्तत्पुरुषसंसर्गात् प्रायश्चित्तम् ।
३ धान्यहारी ...	३ चीर्णदीप्ति	३ निष्कद्वयमर्द्धनिर्म्मिताश्विनीकुमारौ दद्यात् ।
४ इक्षुविकारहारी	४ उदरगुल्मवान्	४ गुडधेनुं प्रदद्यात् ।
५ ऊर्णाहारी . .	५ लोमश ..	५ कम्बलान्वितनिष्कमितमार्गनिर्म्मितवह्निमूर्त्तिं अर्चयित्वा ब्राह्मणाय दद्यात् ।
६ औषधापहर्त्ता .	६ सर्व्वाङ्गरोगी	६ मासं व्याप्य सूर्य्यार्घ्यं काञ्चनञ्च दद्यात् ।
७ कन्दमूलहारी	७ कृमपाणि .	७ यथाशक्ति देवगृहं उद्यानञ्च कुर्य्यात् ।
८ कांस्यहारी .	८ पुण्डरीकसमन्वितः	८ ब्राह्मणमभ्यर्च्य तस्मै शतपलं कांस्यं दद्यात् ।
९ गुरुजायाभिगामी .	९ मूत्रकृच्छ्री .	९ नीलमाल्यादिभूषितनीलवस्त्राच्छन्नघटं पश्चिमस्यां दिशि संस्थाप्य तदुपरि ताम्रपात्रे षट्निष्कसार्द्धनिर्म्मितवरुणं पुरुषसूक्तेन यजेत । सामवेदी ब्राह्मणश्च सामवेदमाचरेत् । विंशतिनिष्कमितसुवर्णयुक्तशिरा निष्पापोऽहमित्युच्चार्य्य ब्राह्मणाय दद्यात् । "यादसामधिपो देवो विश्वेषामधिपो वरः । संसारनौकर्णधारो वरुणः पावनोऽस्तु मे" । इति मन्त्रेण आचार्य्याय सर्व्ववस्तु दद्यात् ।
१० चाण्डालीगामी	१० हीनमज्ज	१० मातृगामिवत् प्रायश्चित्तं कुर्य्यात् ।
११ तपस्विनीप्रसङ्गी	११ प्रमेहगदी	११ मासं व्याप्य रुद्रं जपेत् यथाशक्ति काञ्चनञ्च दद्यात् ।
१२ तपस्विनीसङ्गमी	१२ अश्मरीगदी	१२ मधुधेनुं हिरण्यसहितशतद्रोणपरिमिततिलांश्च दद्यात् ।
१३ ताम्बूलहारी .	१३ श्वेतौष्ठ ..	१३ सदक्षिणं उत्तमविद्रुमञ्च दद्यात् ।
१४ ताम्रचौर ...	१४ औदुम्बरी . ..	१४ प्राजापत्यव्रतं शतपलपरिमितताम्रदानञ्च कुर्य्यात् ।
१५ तैलचौर ..	१५ कण्ड्वादिपीडित .	१५ उपोष्य विप्राय तैलघटद्वयं दद्यात् ।
१६ मधुहारी	१६ नेत्ररोगवान्	१६ उपोष्य विधिवद्घृतधेनुं दद्यात् ।
१७ दधिचौर ..	१७ मदवान् ..	१७ विप्राय दधिधेनुं दद्यात् ।
१८ दारुहारी ..	१८ छिन्नपाणि	१८ विदुषे पलद्वयपरिमितकुङ्कुमं दद्यात् ।
१९ दीक्षितस्त्रीप्रसङ्गी	१९ दुष्टरक्तादृक्रोगी	१९ प्राजापत्यद्वयं कुर्य्यात् ।
२० दुग्धहारी .	२० बहुमूत्रक . ..	२० ब्राह्मणाय यथाविधि दुग्धधेनुं दद्यात् ।
२१ देवहारी	२१ विविधज्वरी	२१ तत्र ज्वरे कर्णे रुद्रं जपेत् महाज्वरे महारुद्रं रौद्रज्वरे अतिरौद्रं वैष्णवज्वरे महारुद्रातिरौद्रौ च जपेत् ।
२२ नानाविधद्रव्यचौर	२२ ग्रहणीयुक्त	२२ शक्त्यनुसारेणान्नोदकवस्त्राणि हेम च दद्यात् ।
२३ पक्वान्नहारी . ..	२३ जिह्वारोगी .	२३ लक्षसंख्यकगायत्रीं जपेत् तिलकर्षाच्च तद्दशांशहोमञ्च कुर्य्यात् ।
२४ पट्टसूत्रहर्त्ता .	२४ विलोमा	२४ धेनुं दद्यात् ।
२५ पशुयोनिगामी ...	२५ मूत्राघाती . . .	२५ तिलपात्रद्वयं दद्यात् ।
२६ पितृव्यस्त्रीगन्ता .	२६ दक्षिणाक्षिव्ययी	२६ शक्तितः अजां दद्यात् ।
२७ पुत्रजायाभिगामी ...	२७ कृष्णकुष्ठी	२७ स्वसृगमनप्रायश्चित्तस्यार्द्धं हुताशतिलकर्षाकदशांशहोमञ्च कुर्य्यात् ।

पापी	रोगी	प्रायश्चित्तम्
२८ फलहारी	२८ व्रणिताङ्गुलि'	२८ द्विजातये अयुतसंख्यकनानाफल दद्यात् ॥
२९ भ्रातृजायाभिगामी	२९ गुल्मकुष्ठी	२९ स्वसुतागमनप्रायश्चित्तस्यार्द्ध घृताक्ततिलकरणकदशांशहोमञ्च कुर्य्यात् ॥
३० मधुचौर'	३० नेत्ररोगवान्	३० उपवासं कृत्वा मधुधेनु' दद्यात् ॥
३१ मातुलानीगन्ता	३१ पृष्ठकुब्ज	३१ कृष्णाजिन प्रदद्यात् ॥
३२ मातृगामी	३२ लिङ्गहीन	३२ उत्तरत कृष्णमाल्यादिभूषितकृष्णवस्त्रसमाच्छन्नकुम्भ विन्यस्य तदुपरि कांस्यपात्रे निष्कषट्कमितसुवर्णनिर्म्मितनरवाहनकुबेर पुरुषसूक्तेन यजेत्। अथर्व्ववेदविद्ब्राह्मण-स्तत्र अथर्व्वोक्तकर्म्म कुर्य्यात्। ब्राह्मणाय विंशतिनिष्कपरिमितसुवर्णनिर्म्मितपुत्रिका निष्पापोऽहमिति ब्रुवन् दद्यात्। "निधीनामधिपो देव शङ्करस्य प्रिय सखा। सौम्या-शाधिपति श्रीमान् मम पापं व्यपोहतु"॥ इति मन्त्रेण त कुबेर आचार्य्याय दद्यात् ॥
३३ मातृष्वसृगन्ता	३३ नानाङ्गे व्रणवान्	३३ दासदानं अगम्यागमनप्रायश्चित्तञ्च कुर्य्यात् ॥
३४ मृतभार्य्याभिगामी	३४ मृतभार्य्य	३४ एकब्राह्मण विवाहयेत् ॥
३५ रक्तवस्त्रप्रवालहारी	३५ रक्तवातवान्	३५ मणिरागसमन्विता सवत्सा महिषी दद्यात् ॥
३६ लौहहारी	३६ कर्व्बूराङ्ग'	३६ एकदिनमुपोष्य शतपललौह दद्यात् ॥
३७ वस्त्रहारी	३७ कुष्ठी	३७ निष्कमितहेमनिर्म्मितप्रजापति वस्त्रयुग्मञ्च दद्यात् ॥
३८ विद्यापुस्तकहारी	३८ मूक'	३८ ब्राह्मणाय सदक्षिण न्यायेतिहासं दद्यात् ॥
३९ विप्ररत्नापहारी	३९ अनपत्य'	३९ महारुद्रजपादिक कुर्य्यात् तद्दशांशपलाशसमिद्भिर्यथाविधि जुहुयात् मृतवत्सोक्त-सर्व्वकर्म्म च कुर्य्यात् ॥
४० विप्रहेमहृत्	४० कुलघ्न	४० चान्द्रायणत्रयानन्तरं सुवर्णशतं दद्यात् ॥
४१ शाकहारी	४१ नीललोचन	४१ ब्राह्मणाय महानीलमणिद्वय दद्यात् ॥
४२ शुक्तिहारी	४२ पाण्डुमूर्द्धज	४२ उपवासानन्तरं पलशतशुक्ति दद्यात् ॥
४३ सौगन्धिकहारी	४३ दुर्गन्धाङ्ग	४३ अग्नौ लक्षसंख्यकपद्मैर्होमं कुर्य्यात्॥
४४ सगोत्रस्त्रीप्रसङ्गी	४४ भगन्दररोगी	४४ महिषीं दद्यात् ॥
४५ सजातिस्त्रीगामी	४५ हृदयव्रणी	४५ प्राजापत्यद्वय कुर्य्यात् ॥
४६ स्वसुतागामी	४६ रक्तकुष्ठी	४६ पूर्व्वत पीतमाल्यादिभूषितपीतवस्त्रसमाच्छन्नकलस संस्थाप्य तस्योपरि स्वर्णपात्रं निष्कषट्कमितसुवर्णनिर्म्मितवासव पुरुषसूक्तेन यजेत्। तत्र ऋग्यजु सामानि समा-चरेत् ब्राह्मण सम्पूज्य निष्पापोऽहमिति ब्रुवन् तस्मै शतसुवर्णनिर्म्मितपुत्तिका दद्यात्। "देवानामधिपो देवो वज्री विष्णुनिकेतनः। शतयज्ञ सहस्राक्ष पाप मम निकृन्ततु"॥ इति मन्त्र' पठेत् ॥*॥ इति शातातपीयकर्म्मविपाके चतुर्थाध्यायोक्तस्तेयप्रायश्चित्तस्य तथा पञ्चमाध्या-योक्तागम्यागमनप्रायश्चित्तस्य च विवरणम् ॥*॥

पापयुक्त' —	मरणविशेषविशिष्ट —	और्द्ध्वदेहिकपूर्व्वकालीनतत्पुत्रादिकर्त्तव्यप्रायश्चित्तम् ।
१ अनध्यायेऽध्ययनकर्त्ता	१ विद्युदाहत	१ विद्यादान कुर्य्यात् ॥
२ असूयी	२ अस्पर्शसङ्गी मृत	२ वेदपारायण कुर्य्यात् ॥
३ कररत्ति	३ वृकहत· वृषहतः	३ यथाशक्ति काञ्चन दद्यात् ॥
४ कुमतिप्रद	४ विषहत'	४ क्षेत्रसयुता मेदिनीं दद्यात् ॥
५ कुमारीगन्ता	५ व्याघ्रादिहत·	५ परकन्या विवाहयेत् ॥
६ कृत्तवासाः निकृन्तनस्थ	६ कृमिहत·	६ द्विजाय गोधूमान्न दद्यात् ॥
७ क्रतुनिन्दक श्रुति-निन्दकोऽपि पाठ	७ शस्त्रहत	७ सदक्षिणा महिषीं दद्यात् ॥
८ गुरुघाती	८ शय्यामृत	८ निष्कमितसुवर्णनिर्म्मितपात्रस्थितविष्णवधिष्ठिततूलीसमन्वितशय्या दद्यात् ॥
९ दक्षिणाचौर	९ दवहत दारुहत	९ सदने सभा कुर्य्यात् ॥
१० मोघी	१० सस्कारहीनमृत·	१० कुमार' विवाहयेत् ॥
११ द्विजनिन्दाकर्त्ता	११ प्रस्तरहत	११ सवत्सा पयस्विनीं गा दद्यात् ॥
१२ द्विजवस्त्रहृत्	१२ अनपत्यमृत	१२ नवतिं कृच्छ्राणि चरेत् ॥

पापयुक्त —	मरणविशेषविशिष्ट —	और्द्ध्वदेहिकपूर्व्वकालीनपुत्त्रादिकर्त्तव्यप्रायश्चित्तम् ।
१३ निक्षेपहारक	१३ कुक्कुरहत	१३ अत्र प्रायश्चित्तस्यानुक्तत्वात् व्याघ्रादिहत इत्यत्रादिपददर्शनाच्च तत्रोक्तप्रायश्चित्त युक्तम् ॥
१४ न्यग्माशक	१४ गजहत	१४ चतुर्निष्कमितहेमगज दद्यात् ॥
१५ पशुहिंसकः	१५ चौरहत	१५ धेनुं दद्यात् ॥
१६ पाशिक	१६ अरण्ये शूकरहत	१६ कुक्कुरहतवत् ॥
१७ मत्सरी	१७ शौचहीनमृत	१७ द्विनिष्कस्वर्णजहरि दद्यात् ॥
१८ मद्यविक्रेता	१८ पतितमृत	१८ षोडशप्राजापत्यानि कुर्य्यात् ॥
१९ मित्रभेदी	१९ वैरिहत	१९ वृष दद्यात् ॥
२० मेदिनीचौर	२० भृगुपातहतः	२० धान्यपर्व्वत दद्यात् ॥
२१ यज्ञहानिकर्त्ता	२१ वह्निहत	२१ स्वशक्तित उपानह दद्यात् ॥
२२ राजकुमारघ्न	२२ राजहत	२२ हिरण्मयपुरुष दद्यात् ॥
२३ राजदन्तिहृत्	२३ वृक्षहत	२३ स्वर्णसंयुत सौवर्णवृक्ष दद्यात् ॥
२४ चौरहृत्	२४ अतीसारमृत	२४ संयतो लक्षसङ्ख्यकगायत्रीं जपेत् ॥
२५ विषद	२५ सर्पदष्ट	२५ नागबलिदान काञ्चनदानञ्च कुर्य्यात् ॥
२६ शङ्करद्रोही	२६ शृङ्गिहत	२६ वस्त्रसयुक्तवृषभ दद्यात् ॥
२७ शास्त्रहृत्	२७ वान्तमाश्रित्य मृत - अस्पृश्यस्पर्शनमृतश्च	२७ सच्छास्त्रपुस्तक दद्यात् ॥
२८ सूचक	२८ शकटहत	२८ उपस्करान्वित अश्वं दद्यात् ॥
२९ सेतुभेदी	२९ जलहत	२९ निष्कत्रयमितस्वर्णवरुण दद्यात् ॥
३० स्वदर्पकार्य्यकारक	३० शाकिन्यादिहत	३० यथोचितं रुद्र जपेत् ॥
३१ हिंस्रः	३१ उद्बन्धनमृत	३१ पयस्विनीं गा दद्यात् ॥
	३२ क्षयामृत	३२ निष्कत्रयमितं स्वर्णं दद्यात् ॥
	३३ कपिहत	३३ कनकनिर्म्मितकपि दद्यात् ॥
	३४ विसूचिकामृत	३४ शतं द्विजान् भोजयेत् ॥
	३५ कण्ठकवलमृत	३५ तिलधेनुं दद्यात् ॥
	३६ केशरोगमृत	३६ अष्टौ कृच्छ्रान् समाचरेत् ॥ * ॥

इति शातातपीयकर्म्मविपाके अगतीनां विशेषप्रायश्चित्तम् ॥ * ॥

अगतीनां साधारणप्रायश्चित्तम् ।

सफलसप्तधान्योपरि पञ्चपल्लवसर्व्वौषधियुक्त कृष्णावस्त्रसमाच्छन्नमकालमूल कलस संस्थाप्य तत्र महिषासनसंस्थित चतुर्भुज दण्डहस्त स्वर्णकुण्डल-सयुत निष्कपरिमित प्रेतरूपिण पुरुष संस्थाप्य पूजयेत् । प्रत्यह पुरुषसूक्तेन दुग्धेन तर्पयेत् तत्र कलसे षडङ्गरुद्र जपेत् । यमसूक्तेन यमपूजादिक आत्मविशुद्ध्यर्थं गायत्रीजप ग्रहशान्तिपूर्व्वकदशां-शतिलहोमञ्च कुर्य्यात् । अज्ञातगोत्रविप्राय सति-लमुदकं दद्यात् ।

"इम तिलमय पिण्ड मधुसर्पि समन्वितम् ।
ददामि तस्मै प्रेताय य पीडा कुरुते मम" ॥

इति मन्त्रेण मधुशर्करायुक्तप्रस्थमितकृष्णतिल-पिष्टपिण्ड प्रेतरूपाय दद्यात् । यजमान प्रेत-मुद्दिश्य तिलपात्रसयुतान् द्वादशकृष्णकलसान् विष्णुमुद्दिश्यैक कलसञ्च दद्यात् । वरायुधधर शुचिराचार्य्यं वरुणदैवतमन्त्रै कलसोदकैर्दम्पती अभिषिञ्चेत् । ततो यजमान आचार्य्याय दक्षिणा दद्यात् नारायणबलिञ्च कुर्य्यात् ॥ * ॥

"एव कृते विधानेन प्रकुर्य्यादौर्द्ध्वदेहिकम् ।
ततः प्रेतत्वनिर्म्मुक्ता पावितास्तर्पितास्तथा ॥
दद्यु पुत्त्रांश्च पौत्त्रांश्च आयुरारोग्यसम्पद" ॥

इति शातातपीयकर्म्मविपाकषष्ठाध्यायोक्ता-गतिप्रायश्चित्तविवरणम् ॥ * ॥

(मार्कण्डेयोक्ता कर्मविपाकाश्च । यथा, तत्रैव १५ अध्याये उक्ता ।

"पतितात् प्रतिगृह्यार्थं खरयोनिं व्रजेद्द्विज ।
नरकात् प्रतिमुक्तस्तु कृमिः पतितयाजक ॥
उपाध्यायव्यलीकन्तु कृत्वा श्वा भवति द्विज ।
तज्जाया मनसा वाञ्छन् तद्द्रव्य चाप्यसशयम् ॥
गर्द्दभो जायते जन्तुः पित्रोश्चाप्यवमानक ।
मातापितरावाक्रुश्य शारिका सम्प्रजायते ॥
भ्रातु पत्नावमन्ता च कपोतत्व प्रपद्यते ।
तामेव पीडयित्वा तु कच्छपत्व प्रपद्यते ॥
भर्तृपिण्डमुपाश्नन् यस्तदिष्ट न निषेवते ।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमि ।
असूयकश्च नरकात् मुक्तो भवति राक्षसः ॥
विश्वासहन्ता च नरो मीनयोनौ प्रजायते ।
धान्य यवांस्तिलान्माषान् कुलत्थान् सर्षपांश्चणान् ॥
कलायान् कलमान् मुद्गान् गोधूमानतसीस्तथा ।
शस्यान्यन्यानि वा हृत्वा मोहाज्जन्तुरचेतन ॥
सञ्जायते महावक्त्रो मूषिको बभ्रुसन्निभ ।
परदाराभिमर्षात्तु वृको घोरोऽभिजायते ॥
श्वा शृगालो बको गृध्रो व्याड़ः कङ्कस्तथा क्रमात् ।
भ्रातृभार्य्यांश्च दुर्ब्बुद्धिर्योधर्षयति पापकृत् ॥
पुंस्कोकिलत्वमाप्नोति स चापि नरकाच्च्युतः ॥
सखिभार्य्यां गुरोर्भार्य्यां राजभार्य्यांश्च पापकृत् ।
प्रधर्षैव हि कामात्मा शूकरो जायते नरः ॥
यज्ञदानविवाहाना विघ्नकर्त्ता भवेत् कृमि ॥
पुनर्द्दाता च कन्याया कृमिरेवोपजायते ॥
देवता पितृविप्राणामदत्त्वा योऽन्नमश्नुते ।
प्रमुक्तो नरकात् सोऽपि वायसः सम्प्रजायते ॥
ज्येष्ठ पितृसम वापि भ्रातर योऽवमन्यते ।
नरकात् सोऽपि विभ्रष्टः क्रौञ्चयोनौ प्रजायते ॥
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ।
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत् ।

शूकरः कृमिको मद्गुश्चण्डालश्च प्रजायते ॥
अकृतज्ञोऽधमः पुंसा विमुक्तो नरकान्नरः ।
कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा ।
मत्स्यस्तु वायसः कूर्म्मः पुक्कशो जायते ततः ॥
अशस्त्रं पुरुषं हत्वा नरः सञ्जायते खरः ॥
कृमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते ॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः ॥
तत्राप्यस्ति विशेषो वै भोजनस्य शृणुष्व तत् ।
हृत्वान्नन्तु स मार्ज्जारो जायते नरकाच्च्युतः ॥
तिलपिण्याकसम्मिश्रमन्नं हृत्वा तु मूषिकः ॥
घृतं हृत्वा तु नकुलः काको मद्गुरजामिषम् ॥
मत्स्यमांसापहृत् काकः श्येनो मार्गामिषापहृत् ।
वीचीकाकस्त्वपहृते लवणे दधनि कृमिः ॥
चोरयित्वा पयश्चापि बलाका सम्प्रजायते ॥
यस्तु चोरयते तैलं तैलपायी स जायते ॥
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ।
चोरयित्वा तु निष्पावान् जायते गृहगोलकः ॥
आसवञ्चोरयित्वा तु तित्तिरित्वमवाप्नुयात् ॥
अयो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो रूप्यभाजने ।
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ॥
पत्त्रोर्णं चोरयित्वा तु क्रकरत्वञ्च गच्छति ।
कोषकारश्च कौषेये हृते वस्त्रेऽभिजायते ॥
दुकूले शार्ङ्गिके पापो हृते चैवांशुके शुकः ।
तथैवाजाविकं हृत्वा वस्त्रं क्षौमञ्च जायते ॥
कार्पासिके हृते क्रौञ्चो वाल्कहर्त्ता बकस्तथा ।
मयूरो वर्णकान् हृत्वा शाकपत्त्रञ्च जायते ॥
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः ।
कुकुन्दरिः शुभान् गन्धान् वासो हृत्वा शशो भवेत् ॥
शण्ढः फलापहरणात् काष्ठस्य घुणकीटकः ।
पुष्पापहृद्दरिद्रश्च पङ्गुर्यानापहृन्नरः ॥
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ।
भूहर्त्ता नरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लीत्वक्सारतरुतां क्रमात् ।
प्राप्य क्षीणाल्पपापस्तु नरो भवति वै ततः ॥
कृमिः कीटः पतङ्गोऽथ पक्षी तोयचरो मृगः ।
गोत्वं प्राप्य च चण्डालपुक्कशादि जुगुप्सितम् ।
पङ्ग्वन्धो बधिरः कुष्ठी यक्ष्मणा च प्रपीडितः
मुखरोगाक्षिरोगैश्च गुदरोगैश्च बाध्यते ॥
अपस्मारी च भवति शूद्रत्वं च स गच्छति ॥
एष एव क्रमो दृष्टो गोसुवर्णापहारिणाम् ।
विद्यापहारिणस्तीव्रा निष्क्रयभ्रंशिनो गुरोः ॥
भार्यामन्यस्य पुरुषः पारक्यां प्रतिपादयन् ।
प्राप्नोति षण्डतां मूढो यातनाभ्यः परिच्युतः ॥
यः करोति नरो होममसमिद्धे विभावसौ ।
सोऽजीर्णव्याधिदुःखार्त्तो मन्दाग्निः सम्प्रजायते" ॥ * ॥
नागापुराणोक्तकर्म्मविपाकसंक्षेपमाह ।

१ । अकिञ्चनता । यः किल प्रभूतधनवानपि धर्म्मनिन्दको देवाग्निब्राह्मणदरिद्रेभ्यः किञ्चिदपि धनं न दत्तवान् । स तु आयुषोऽवसाने मृतो यमदूतैः प्रपीड़ितो लोलाख्यनरके, सर्व्ववस्तूनि पश्यन्नपि निराशः परमं दुःखमाप्नोति । ततो जन्मान्तरं परिगृह्याकिञ्चनत्वमासाद्य जीर्णवस्त्रधरः बहुना क्लेशेनापि स्वजीविका निष्पादयेत् ॥

२ । अपुत्त्रता बहुपुत्त्रता च । यस्तु गवीमुखात् भोजनीयद्रव्यं आहृत्य दूरतो विसर्जयेत् । स मन्वन्तरत्रयं निर्जने घोरे मरुप्रभृतिस्थले उषित्वा पुनर्जन्मान्तरं प्राप्य पुत्त्रविहीनो बहुपुत्त्रो वा भवेदिति ॥

३ । अर्शोरोगः । यः खलु पतिव्रतां धर्म्मनियतां ऋतुस्नातां पत्नीं नोपगच्छेत् । यश्च आत्महा भ्रूणहा गोहन्ता च स्यात् । स मृतः गाढान्धतमसावृतं तामिस्राख्यं नरकं गत्वा कर्म्मक्षयम् प्राप्य जन्मान्तरेण पुनर्मानुषयोनिमभिगम्य अर्शोरोगेणाक्रान्तो भवेदिति ॥

४ । अल्पायुःसन्तानता । यो हि तृषार्त्ता वारिपानरता गा निवारयति । अनेनैव पापेन तस्य अल्पायुषः सन्ताना भवेयुः ॥

५ । अश्मरीरोगः । यस्तु ऋतुस्नातां स्त्रियं क्रोधादप्रीत्या वा नोपगच्छति । स मृतः पूयशोणितसंमिश्रे नरके प्रपीडितः पुनर्मानुषत्वं प्राप्य अश्मरीरोगाक्रान्तो जायते इति ॥

६ । उन्मादरोगः । यस्तु ब्राह्मणा वैष्णव पितरौ द्विजादिकं मानार्हं नार्चयेत् परं निन्देत् स मृतः पुरीषाख्ये नरके अधःशिरा नाना दुःखभाक् भवेत् । ततः कर्म्मक्षये मानुषीं तनुमुपलभ्य उन्मादरोगवान् जायते । तथा येन च ब्राह्मणेषु गुरौ च दम्भाचारः कृतः तेभ्यः स्मृतिभ्रमकराणि द्रव्याणि च दत्तानि सोऽपि जन्मान्तरे उन्मादरोगवान् भवेदिति ॥

७ । कासः । कासस्तु पञ्चविधः । येन कर्म्मणा यद्रूपो भवेत्तदुच्यते । अतिकठोरैर्मिथ्यावाक्यैर्यस्तु लोकं पीडयेत् स पित्तप्रबलकेन कासेन पीडितो भवेत् । यो हि ब्राह्मणस्थानविनष्टकारी स वातकासेन पीडितो भवेत् । यस्तु जलाशयध्वंसकारी स श्लेष्मकासेन पीडितः स्यात् । यो हि ब्रह्म विष्णुं शिवञ्च भेदबुद्ध्या पश्यति स सन्निपातोत्थकासपीडितः स्यात् । यज्ञं विना पशुं हत्वा तन्मांसभक्षणकारी सर्व्वदोषोत्थकासेन गृह्यते । यदुक्तं तन्त्रे पुराणे च,—
"अयज्ञेन पशुं हत्वा भुङ्क्ते मांसन्तु यो नरः ।
सर्व्वदोषोत्थकासेन गृह्यते शृणु भूपते ।" ॥

८ । कुब्जत्वम् । यदुक्तं पुराणेषु ।
"देवताप्रतिमां दृष्ट्वा यस्तां नैवाभिवादयेत् ।
ब्राह्मणञ्च गुरुं श्रेष्ठं ब्रह्मचारितपस्विनम् ॥
श्मशाने जायते वृक्षः काकगृध्रोपसेवितः ॥
भुक्त्वा कालमशेषञ्च मानुषत्वमवाप्य सः ।
कुब्जत्वमश्नुते तस्मात् कर्म्मणो मानुषं ध्रुवम्" ॥

९ । गर्भस्रावः । या काचित् नारी हिंसापरतन्त्रा सती सपत्न्यादीनामन्यासां स्त्रीणां दुष्टौषधादिभिर्दुर्म्मन्त्रैर्वा गर्भं अपत्यानि च नाशयति सा नरकान्निर्मुक्ता पुनर्मानुषी योनिमासाद्य पुण्यान्तरेण ऐश्वर्य्यवत्यपि गर्भस्रावदुःखैः प्रपीडिता भवेत् ।

१० । गलगण्डः । यः खलु मोहाद् गुरुस्त्रीकण्ठदर्शनं कृतवान् । स मृतो यमकिङ्करैः निर्जले प्रान्तरे देशे दिव्यवर्षायुतत्रयं पात्यते । पुनर्जन्म समासाद्य च गलगण्डरोगाक्रान्तः सीदेत् ॥

११ । ग्रहणी । ये च धनलुब्धकाः प्रभूतधनसंग्रहं कृत्वा न यच्छन्ति न चाश्नन्ति न किमपि धर्म्मकार्य्यं कुर्व्वन्ति । तथा ये च परस्वापहारिणः तथा अदुष्टामपतितां भार्य्यां ये च यौवने परित्यजन्ति ते मृताः पूरीषाख्ये नरके कल्पकोटिशतं दग्धाः कर्म्मान्ते मानुषीं योनिमासाद्य ग्रहणीरोगाक्रान्ता अवसीदेयुः ॥

१२ । छिन्ननासिकता । श्रुतिस्मृतिकथाविघ्नकारी देवनिन्दको हि मृत्युं प्राप्य नैर्ऋते पश्चिमे भागे स्थितायां पिङ्गलेति नगर्य्यां पिशाचैः सह बहुकालमुषित्वा महाघोरं दुःखञ्च भुक्त्वा कर्म्मान्ते मानुषयोनिमासाद्य छिन्ननासिको जायते ॥

१३ । छिन्नहस्तता, छिन्नपादता च । यस्तु पितरौ गुरुं विनापराधतो वृद्धं वा ताडयेत् स मृतो यमलोके बहूनि कष्टान्यनुभूय छिन्नहस्तश्छिन्नपादो वा इह जायते ॥

१४ । जलोदरः । यदुक्तं पुराणेषु ।
"ब्रह्मविष्णुमहेशेषु भिन्नभावं करोति यः ।
गृह्यते स तु दुष्टात्मा जलोदररुजा ततः" ॥

१५ । दौर्भाग्यम् । येन च सर्व्वासु तृतीयासु वेलासु तैलस्पर्शः क्रियते स दुर्भगत्वमाप्नोतीति ॥

१६ । नेत्ररोगः । दीपहरणकर्त्ता परस्त्रीप्रेक्षकः कामतः पररतिदर्शनकारी च नेत्ररोगेणाक्रान्तो भवेत् ॥

१७ । पक्षरोगः । यो हि सशस्त्रः सन् शस्त्ररहितं पुरुषं हन्ति । स मूढः आयुःशेषे क्रकचाख्ये निरये उषित्वा महादुःखेन पच्यते । ततो रासभयोनौ ततः क्रमशो मृगव्याघ्रयोनौ सम्भूय शस्त्रेण हन्यते । ततः सारमेयो भूत्वा मत्स्ययोनौ जायते । ततो मानुषीं योनिमासाद्य अनेनैव रोगेण पीड्यते ॥

१८ । पाण्डुरोगः । यः खलु परभार्य्यारतः परस्त्रीरमणप्रियः स मृतो यमकिङ्करैः बहुधा दुःखं प्रापितः पुनः कर्म्मपाकेन मानुषीं योनिमासाद्य पाण्डुरोगेण लिप्यते ॥

१९ । प्रदरम् । या योषित् बुभुक्षितं पतिं त्यक्त्वा पत्यनुमतिं विना पूर्व्वं भुङ्क्ते सा मृता नरकं भुक्त्वा दशवर्षाणि वायसी ततः शुकी ततो मानुषी भूत्वा श्वेतप्रदरयुक्ता भवेत् ॥

२० । बन्ध्यता । येन जलपिपासुर्वत्सः प्रतिनिषिद्धः । यस्तु अदक्षिणं व्रतं करोति यो हि मिष्टफलादिकं प्राप्य देवायानिवेद्य भुङ्क्ते यः खलु मैथुनीभावमवलोक्य विघ्नं कुरुते ते सर्व्वे बन्ध्यत्वमाप्नुवन्तीति ॥

२१ । भगन्दररोगः । आचार्य्यभार्य्यागन्तारो नराधमा स्त्रीबालवृद्धधनापहारिणश्च मृत्युमधि

गम्य विण्मूत्राख्ये नरके बहुदुःखं प्राप्य जन्मान्तरे भगन्दररोगेणाक्रान्ता भवन्ति ॥

२२। मूत्रकृच्छ्रम्। येन मूत्रेण विधवागमनं मद्यपानं वा कृतम्। स मृतो नरकं प्राप्य कर्म्मान्ते शरीरनाशप्रकारिणा अनेन रोगेणाक्रान्तो भवेत्।

२३। मृतभार्य्यता। यस्तु ज्येष्ठं भ्रातरमतिक्रम्य उद्वहेत् स मृतभार्य्यो जायेत। यस्तु सप्तम्यां तैलं स्पृशति तस्य ज्येष्ठा भार्य्या विनश्यति ॥

२४। मेहः। यदुक्तं पुराणेषु
"मेहास्तु विंशतिः ख्याता पृथक्कर्म्मप्रभावजाः।
तेषां नामान्यहं वक्ष्ये क्रमादुत्पद्यते यतः ॥
मधुमेहः सान्द्रमेहः सुराशुक्रोदकस्तथा।
इक्षुः सिकतमेधुश्च सितमेहस्तथैव च ॥
फेनः क्षीरश्च नीलश्च हारिद्रः कालसञ्ज्ञकः।
वसारक्तश्च माञ्जिष्ठो मज्जाहारस्तथा गजः ॥
सद्वैद्यस्योपदेशेन ज्ञात्वा मेहान् पृथक् पृथक्।
नामानुसारतः पूर्व्वं कर्म्म ज्ञात्वा विधिश्चरन्।
पूर्व्वं मैथुनहृद्यस्तु शौकरीयोनिमाव्रजेत् ॥
तस्यान्ते मानुषीं प्राप्य जलमेहार्द्दितो भवेत् ॥
मातृगामी बलान्मोहात् मधुमेही भवेन्नरः।
रजकीगमनाच्चैव क्षारमेही प्रजायते ॥
सतीविपर्य्ययं कृत्वा सान्द्रमेहान्वितो भवेत्।
रोगिणीगमनान्मर्त्त्यो भवेन्माञ्जिष्ठमेहवान् ॥
मित्रस्त्री धर्षिता येन स भवेच्छुक्रमेहवान् ॥
चतुष्पदाभिगमने भवेत् सिकतमेहवान् ॥
स्वर्णहर्त्ता क्षीरमेही सितमेही सुरारतः।
कालमेही भवेत्सोऽपि पुण्यवत्याश्च धर्षणात् ॥
रजस्वलायां रतिकृद्रक्तमेहार्द्दितो भवेत्।
मज्जमेहयुतः सोऽपि योऽन्त्यजागमनञ्चरन् ॥
इक्षुमेहादिदुर्व्वृत्तो विधवागतिदोषतः।
ब्राह्मणीगमनाद्देही हस्तिमेहेन मेहति ॥
चाण्डालगमनासक्तो हरिद्राभञ्च मेहति ॥
गात्रजं येऽभिगच्छन्ति भगिनीञ्चात्मनः सुताम् ॥
श्वश्रूञ्चैवात्तसारक्ता भ्रातृभार्य्याञ्च मातुलीम्।
गुरुस्त्रीं राजपत्नीञ्च मित्रस्त्रीं वा कुटुम्बिनीम्।
मृता वैवस्वतपुरीं यान्ति भृत्यैः प्रपीडिताः ॥
साध्यन्ते तत्र दुर्वृत्ता यत्तु शृणु वदामि ते ॥
अङ्गारराशौ प्रक्षिप्य तान् दहन्ति यमाश्रया।
दूताश्च महतीं घोरां ज्वलन्तीमायसीं शिलाम्।
खादयन्ति च तान् पश्चात् नरके च क्षिपन्ति वै ॥
नरकान्ते पतन्तेऽपि मृता स्युः शूकरा भुवम् ॥
शूकराः पञ्चवर्षाणि दशवर्षाणि कुक्कुराः।
पिपीलिकास्त्वथो मासां वृश्चिकाश्चाब्दमात्रकम्।
भूत्वा प्रयान्ति योन्यन्तरे सकला विफलेन्द्रियाः ॥
तथाऽधर्म्मोद्भवं हत्वा ततो मानुषयोनिषु।
प्रमेहगदवन्तः स्युः प्राप्नुवन्ति न गोत्रजाम्" ॥

२५। श्लीपदरोगः। विप्रहन्ता न्यासापहर्त्ता ग्रहिस्वेदकारी पशुपीडको गुरुविरोधी गदो [illegible] भवेत् ॥

२६। [illegible]। [illegible]

[illegible]भवेत् ॥

२७। वेश्यात्वम्। या नारी मृते भर्त्तरि परपत्यभिलाषिणी सा मृता यमलोके तप्तं आयसं पुरुषमालिङ्गन्ती अतिघोरं नरकदुःखमनुभूय जन्मान्तरे वेश्या भूत्वा अशेषपुरुषैः रममाणा अशेषक्लेशमधिगच्छेत् ॥

२८। वैधव्यम्। या खलु यौवनेनातिगर्व्विता रमणी विरूपत्वात्स्वकीयं पतिं दिवा निन्दति रात्रौ शय्यां न भजते आज्ञा च रुष्टा भवति सा जन्मान्तरं प्राप्य वैधव्ययन्त्रणया पीडिता भवेत् ॥

२९। श्वासकासः। श्वासकासस्तु महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदात् पञ्चधा। १। यस्तु यज्ञमनासाद्य श्वासं निरुध्य पशुं हन्ति मोहात् तन्मांसादिकं भक्षयति स महाश्वासेन पीड्यते। २। पुराणकथासमये यस्तु अन्यवाक्यं वदेत् स ऊर्द्ध्वश्वासेन निगृह्यते। ३। निषिद्धदानग्रहणात् छिन्नश्वासयुतो भवेत्। ४। यो हि शास्त्रार्थं मृषा दूषयति स तमकश्वासैः पीड्यते। ५। पाकविघ्नतो हि जीवः क्षुद्रश्वासैर्युज्यते ॥

३०। हृद्रोगः। यस्तु लोभात् द्वेषाद्वा परपीडाप्रदायको भवेत् यस्तु प्रजानां मर्म्मव्यथां जनयेत् स मृतो दुर्व्वहं नरकमधिगम्य कर्म्मान्ते अतिदारुणैर्हृद्रोगैः पीडितो भवेदिति ॥ * ॥)

कर्म्मशील, त्रि, (कर्म्म शीलं कर्म्मकरणरूपस्वभावो यस्य। कर्म्म शीलयतीति वा।) यः फलनिरपेक्षः स्वभावतः कर्म्म करोति सः। तत्पर्य्यायः। कार्म्मः २। इत्यमरः। ३।१।१८॥

कर्म्मशूर, त्रि, (कर्म्मणि शूरः दक्षः।) कर्म्मठः। फलपर्य्यन्तकर्म्मसमापकः। इत्यमरः। ३।१।१८॥

कर्म्मसचिव, पुं, (कर्म्मणि कर्म्मसु वा सचिवः सहायः।) कर्म्मप्रयुक्तसचिवः। अध्यक्षाधिकृतादि। इत्यमरः। २।८।४॥

कर्म्मसन्न्यासिक, पुं, (कर्म्मणा सन्न्यासः स अस्त्यस्य इति ठन्।) यतिः। सन्न्यासी। इति हलायुधः। २।२३९॥

कर्म्मसाक्षी, [न्] पुं, (कर्म्मणां साक्षी। यद्वा कर्म्म साक्षात् पश्यति प्रत्यक्षं करोतीति।) सूर्य्यः। इति हेमचन्द्रः। (उक्तञ्च वैदिकक्रियापद्धतौ यथा,
"सूर्य्यः सोमो यमः कालो महाभूतानि पञ्च च।
एते शुभाशुभस्येह कर्म्मणो नव साक्षिणः" ॥
क्रियासाक्षात्कारिणि, त्रि। यथा,—महाभारते। १। ७४। २९।
"हृदि स्थितः कर्म्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति" ॥)

कर्म्मक्षम, त्रि, (कर्म्मणि कर्म्मसु वा क्षमः समर्थः।) कर्म्मकरणसमर्थः। तत्पर्य्यायः। अलङ्कर्म्मीणः २। इत्यमरः। ३।१।१८॥

कर्म्मान्त, पुं, (कर्म्मणां कृषिक्षेत्रकर्षणादिरूपक्रियाणां अन्तो यत्र। कर्म्मणां कृषिकार्य्यस्य सम्पन्नस्य धान्यादिसंग्रहरूपक्रियाया अन्तो यत्र वा।) कर्म्मभूः। कृष्टभूमिः। इति हेमचन्द्रः ॥
("अन्वस्य दन्तपेत्सेत कर्म्मान्तान् वाहनानि च" ॥ इति मनुः। ८। ४१९।)

कर्म्मार, पुं, (कर्म्म लौहनिर्म्माणादिकार्य्यं ऋच्छति गच्छति प्राप्नोति वा। कर्म्म + ऋ + अण्।) कर्म्मकारः। कामार इतिभाषा॥ (यथा, अथर्व्ववेदे। ३।५।६।
"ये धीवानो रथकाराः कर्म्मारा ये मनीषिणः" ॥
तथा, मनुः। ४। २१५।
"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च" ॥)
वंशः। बाँश इति ख्यातः। कर्म्मरङ्गः। इति राजनिर्घण्टः। कामराङ्गा इति भाषा॥

कर्म्मार्ह, पुं, (कर्म्म अर्हतीति। अर्ह + अण्।) पुरुषः। इति राजनिर्घण्टः। क्रियायोग्ये त्रि ॥

कर्म्मिष्ठ, त्रि, (अतिशयेन कर्म्म कर्त्तुं समर्थः कर्म्मी वा। कर्म्मन् + इष्ठन्। इनेर्लुक्।) क्रियावान्। अतिशयकर्म्मविशिष्टः। इति व्याकरणम् ॥

कर्म्मी, [न्] त्रि, (कर्म्मास्त्यस्य "व्रीह्यादिभ्यश्च"। ५।२।११६ इति इनिः।) कर्म्मविशिष्टः। ("यत्कर्म्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते" ॥ इति मुण्डकोपनिषदि। १। २।९। यथा च, भागवते १।३।८।
"तृतीयमृषिसर्गञ्च देवर्षित्वमुपेत्य सः।
तन्त्रं सात्वतमाचष्टे नैष्कर्म्म्यं कर्म्मिणां यतः" ॥)

कर्म्मीर, पुं, (कर्म्म + ईरन्।) किर्म्मीरवर्णः। इत्यमरटीका ॥

कर्म्मेन्द्रिय, क्ली, (कर्म्मणां गमनादिपञ्चविधक्रियाणां सम्पादनाय इन्द्रियं कर्म्मनिमित्तं इन्द्रियं वा।) कर्म्मनिष्पादकविषयिपञ्चकम्। यथा। वाक् १ पाणिः २ पादः ३ पायुः ४ उपस्थः ५। इति वेदान्तः ॥ (यथा च, मनुः। २।९१।
"बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वशः।
कर्म्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते" ॥)

कर्व्व दर्पे। इति कविकल्पद्रुमः ॥ (भ्वा-प-अक-सेट्।)

कर्व्व, पुं, (किरति विक्षिपति चित्तं विषयेषु। कॄ + "कृगृशॄद्भ्यो वः"। उणा। १।१५५। इति वः।) कामः। (कृणाति हिनस्तीति। कॄ + वः।) उन्दुरुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कर्व्वट, क्ली, (कर्व्वं सुन्दरत्वात् सर्व्वं अटति प्राप्नोतीति। शकन्ध्वादित्वात् अलोपे साधुः।) पुरम्। नगरम्। इति जटाधरः ॥

कर्व्वट, पुं क्ली, (कर्व्व + अटन्प्रत्ययः।) द्विशतग्राममध्ये मनोरमस्थानम्। ग्रामशतस्यजनाः क्रयविक्रयादिना सेवादिना वा येन ग्रामेण जीवन्ति स। इति केचित् ॥ चतुःशतग्रामः। इत्येके ॥ चतुःशतं ग्रहस्थानम्। इत्यपरे ॥ इत्यमरटीकायां भरतः ॥ चतुःशतग्रामसङ्ग्रहस्थानम्। इति सारसुन्दरी ॥ (तथा हि याज्ञवल्क्यः। २। १६०।
"धनुःशतं परीणाहो ग्रामक्षेत्रान्तरं भवेत्।
द्वे शते कर्व्वटस्य स्यात् नगरस्य चतुःशतम्" ॥
देशभेदः। यथा, महाभारते। २। ३०। २०।
"ताम्रलिप्तञ्च राजानं कर्व्वटाधिपतिं तथा।
सुह्मानामधिपञ्चैव ये च सागरवासिनः" ॥)

कर्व्वुर, पुं, (कृन्तति हिनस्ति प्राणिनः। किरति विक्षिपति जीवानिति वा। कॄ + "कृगॄशॄ[illegible]

तिभ्य' ऋरच्" । उणा । २ । १२३ । इति ऋरच् ।)
राक्षसः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
व्याघ्रः । इति मेदिनी ॥ (यथा, उणादिटीका
"कर्व्वुरो व्याघ्ररक्षसोः" । २ । १२३ ॥)
कर्व्वरी, स्त्री, (कर्व्वर + षित्वात् ङीष् ।) शिवा ।
इति विश्वमेदिन्यौ ॥ हिङ्गुपत्री । इति जटाधरः ॥
(व्याघ्री । राक्षसी । इत्युणादिवृत्तिः । २ । १२३ ॥)
कर्व्वुरः, पु, (कर्व्वति हिनस्ति सदर्पो भवति वा । कर्व्व
दर्पे हिंसायाञ्च । "मद्गुरादयश्चेति" + उरच् ।)
राक्षसः । इति शब्दार्णवः ॥ चित्रवर्णः । इत्यमरः ।
२ । ६ । ६४ ॥ शटी । इति भरतः ॥
कर्व्वूरः, पु, (कर्व्व + खर्ज्जूरादित्वात् ऊरः । उणा १ ।
९० ।) राक्षसः । शटी । इत्यमरः ॥ २ । ६ । ६४ ॥
कर्य्यः, पु, (कृष + यत् ।) कर्व्वूरः । इति राज-
निर्घण्टः । कचूर इति हिन्दीभाषा ॥
कर्षः, पु स्त्री, (कृष विलेखने यथायथञ्च । कर्म्मणि
करणे वा घञ् ।) षोडशमाषकपरिमाणम् ।
अशीतिरक्तिका । तत्पर्य्यायः । अक्षः २ । इत्य-
मरः । २ । ९ । ८६ ॥ वैद्यकमते तोलकद्वयम् ।
तत्पर्य्यायः । सुवर्णम् २ अक्षः ३ विडालपदकम्
४ पिचुः ५ पाणितलम् ६ उडुम्बरम् ७ तिन्दुकम्
८ कवडग्रहः ९ । इति परिभाषा ॥ दशमाषकः ।
इति राजनिर्घण्टः ॥
("कोलद्वयञ्च कर्षः स्यात् स प्रोक्तो पाणिमानिका।
अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्" ॥
इति शार्ङ्गधरे पूर्व्वखण्डे । १ अध्याये ॥)
कर्षः, पु, (कृष + भावे घञ् ।) कर्षणम् । इति
मेदिनी ॥ विभीतकवृक्षः । इति शब्दरत्नावली ॥
कर्षकः, त्रि, (कर्षति भूमिमिति । कृष + ण्वुल् ।)
कृषिजीवी । कृषाण इति भाषा ॥
("सुखमापतितं सेवेत् दुःखमापतितं सहेत् ।
कालप्राप्तमुपासीत शस्यानामिव कर्षकः" ॥
इति महाभारते । ३ । २५८ । १५ ॥)
तत्पर्य्यायः । क्षेत्राजीवः २ कृषिकः ३ कृषीवलः ४ ।
इत्यमरः । २ । ९ । ६ ॥ कार्षकः ५ । इति तट्टीका ॥
आकर्षणकर्त्ता च ॥
कर्षणं, क्ली, (कृष + भावे ल्युट् ।) कृषिकर्म्म । लाङ्ग-
लादिना भूम्यादिखननम् । इति हेमचन्द्रः । चास
इति भाषा ॥ आकर्षणम् । टानन् इति भाषा ॥
(शोषणम् । पीडनम् । यथा मनु ७ । ११२ ।
"शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा ।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्" ॥)
कर्षणि, स्त्री, (कृष + अनि ।) असती । इत्युणादि-
कोषः ॥
कर्षणी, स्त्री, (कर्षण + गौरादित्वात् ङीष् ।) क्षीरि-
णीवृक्षः । इति राजनिर्घण्टः ॥
कर्षफलः, पु, (कर्षः कर्षमात्रं फलं यस्य ।) विभी-
तकवृक्षः । इत्यमरः । २ । ४ । ५८ ॥ (अस्य
पर्य्याया यथा,—
"विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः" ॥
गुणाश्चास्य विभीतकशब्दे ज्ञेयाः । इति भावप्रका-
शस्य पूर्व्वखण्डे । १ भागे ॥)
कर्षफला, स्त्री, (कर्षफल + टाप् ।) आमलकीवृक्षः ।
इति रत्नमाला ॥ (आमलकीशब्देऽस्या गुणादिकं
ज्ञातव्यम् ॥)
कर्षार्द्धं, क्ली, (कर्षस्य अर्द्धम् ।) तोलकपरिमाणम् ।
इति वैद्यकपरिभाषा ॥ ("कर्षार्द्धं वा कणाशुण्ठ्यो" ।
"कर्षं कर्षार्द्धमथो पलं पलद्वयमथाकर्षस्य" ॥
इति वैद्यकचक्रपाणिसंग्रहज्वराधिकारकासाधि-
कारयोः ॥)
कर्षिणी, स्त्री, (कर्षति इति । कृष + णिनिस्ततो
ङीप् ।) क्षीरिणीवृक्षः । अश्वमुखबन्धनरज्जुस्थित-
लौहम् । तत्पर्य्यायः । खलीनः २ कवीयम् ३
कविका ४ । इति जटाधरः ॥ (त्रि, मनोहारी ।
यथा रघुः १९ । ११ ।
"घ्राणकान्तमधुगन्धकर्षिणी-
पानभूमिरचना प्रियासखः" ॥)
कर्षूः, पु, (कृष + "कृषिचमितनिधनिसर्जिखर्जिभ्य
ऊः" । उणा १ । ८२ । इति ऊः ।) वार्त्ता । करी-
षाग्निः । इत्यमरः । ३ । ३ । २२१ ॥ वार्त्ता अत्र
कृषिः । इति रमानाथः ॥ जीविका । इति भरतः ॥
कर्षूः, स्त्री, (कृष विलेखने + "कृषिचमितनीति"
ऊः उणा १ । ८२ ।) कुल्या । अल्पा कृत्रिमा
सरित् । इत्यमरः । ३ । ३ । २२१ ॥ नदीमात्रम् ।
इति रत्नकोषः ॥ इरखात । इति मेदिनी ॥
तद्यथा । चतुरङ्गुलपृथ्वीस्तावदन्तराः तथाध खाता
वितस्त्यायतास्तिस्रः कर्षूः कुर्य्यात् कर्षूसमीपे
अग्निचयमुपसमाधाय परिस्तीर्य्य तत्रैकैकस्मिन्ना-
हुतित्रयं जुहुयात् । इति श्राद्धविवेके प्रेतविष्णु-
सूत्रम् ॥
कर्हि, व्य, (किम् + "अनद्यतने र्हिलन्यतरस्याम्" ।
५ । ३ । २१ इति । र्हिल् कादेशः ।) कदा । कस्मिन्
काले । इति व्याकरणम् ॥ कखन कवे इति भाषा ॥
(यथा, ऋग्वेदे ६ । ३५ । २ ।
"कर्हिस्वित्तदिन्द्र यन्नृभिर्नॄन्वी-
रैर्वीरान् नीळयासे जयाजीन्" ॥)
कर्हिचित्, व्य, (कर्हि च चिच्चेति विग्रहः । पाणिनि-
मतानुसारेण भिन्नपदद्वयम् मुग्धबोधमते तु
"किम त्यन्ताचिच्चनौ" । इति चित् ।) कस्मि-
श्चित् काले । कोनकाले इति भाषा । तत्पर्य्यायः ।
जातु २ कदाचित् ३ । इति हेमचन्द्रः ॥ (यथा,
भागवते १० । ८४ । १३ ।
"यस्यात्मबुद्धिः कुणपे त्रिधातुके
स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचित्
जनेष्वभिज्ञेषु स एव गोखरः" ॥)
कल, ऋ क गतौ । सङ्ख्यायाम् । इति कविकल्पद्रुमः ॥
(अदन्तचुरा-परं-सकं-सेट् ।) अन्त्यस्वरादी-
र्घोपधः । कलयति कालं धीरः । इति दुर्गादासः ॥
कल, ङ सङ्ख्याने । इति कविकल्पद्रुमः ॥ (भ्वा-
आत्मं-सकं-अकं च-सेट् ।) ङ कलते दिवसं दक्षः
गणयतीत्यर्थः । शब्दे । इति दुर्गादासः ॥
कल, क नुदौ । इति कविकल्पद्रुमः ॥ (चुरा-पर-
सकं-सेट् ।) क कालयति । नुदिरिति नुद क्षेपे
प्रेरणे इत्यस्य औणादिकक्विप्प्रत्यये रूपम् । इति
दुर्गादासः ॥
कलं, क्ली, (कडति माद्यति अनेन । कड मदे + "हल-
श्च" । ३ । ३ । १२१ । इति घञ् । सञ्ज्ञापूर्व्वकत्वात्
वृद्ध्यभावः । डलयोरैक्यम् ।) शुक्रम् । इति
मेदिनी ॥ कोलिवृक्षः । इति शब्दचन्द्रिका ॥
कलः, पु, (कल + भावे घञ् वृद्ध्यभावः ।) मधुरास्फुट-
ध्वनिः । इत्यमरः । १ । ७ । २ ॥
("जगौ कलं वामदृशां मनोहरम्" ॥ इति
भागवतम् । १० । २९ । ३ ॥) सालवृक्षः । इति
राजनिर्घण्टः ॥
कलः, त्रि, (कलयति मान्द्यं नयति जाठराग्निम् । कल
+ णिच् + अच् । धातूनामनेकार्थत्वात् विशेषतः
कलिट्लिरित्युक्तेश्च तथात्वम् ।) अजीर्णः । इति
मेदिनी ॥ (अव्यक्तमधुरध्वनिः । यथा रघु । १ । ४१ ।
"सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ" ॥)
कलकः, पु, (कलते इति । कल + ण्वुल् । स्वार्थे कन्
वा ।) शकुलमत्स्यः । इति हेमचन्द्रः ॥ (शकुल-
शब्देऽस्य गुणादयोऽवगन्तव्याः ॥)
कलकण्ठः, पु, (कलप्रधानः कण्ठो यस्य ।) कलध्वनिः ।
हंसः । पारावतः । पिकः । इति मेदिनी ॥ (यथा,
राजेन्द्रकर्णपूरे ३ । "युष्माकं रतिकान्तकार्म्मुक-
लताज्ञोङ्कारकान्ते रुते, सोत्कण्ठं कलकण्ठकण्ठ-
कुहरोद्भूतेऽपि माभून्मनः" ॥)
कलकलः, पु, (कलादपि कलः । युगपत्समुत्थित-
बहुलशब्दानामेकीभूततया तुमुलत्वात्तथात्वम् ।
कलशब्दे + घञ् । वृद्ध्यभावः । यद्वा कलः प्रकारः
गुणवचनत्वात् प्रकारे द्वित्वम् ॥)
कोलाहलः । (यथा, गीतगोविन्दे । १ । ३८ ।
"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः" ॥)
सालनिर्य्यासः । इति मेदिनी ॥
कलघोषः, पु, (कलो मधुरो घोषो ध्वनिर्यस्य ।)
कोकिलः । इति शब्दरत्नावली ॥
कलङ्कः, पु, (कलयति इति । कल + क्विप् । कल्
चासौ अङ्कश्चेति ।) चिह्नम् । अपवादः ।
("उत्तमस्य विशेषेण कलङ्कोत्पादको जनः" ॥
इति कथासरित्सागरे । २४ । २०४ ॥) लौह-
मलम् । इति मेदिनी ॥
कलङ्कषः, पु, (करेण कषति हिनस्ति नाशयति वा ।
वाऽऽकलकात् खच् मुम् च रस्य लः कलेन गर्व्वेनेन
कषति वा ।) सिंहः । इति शब्दमाला ॥
कलङ्कषा, स्त्री, (कलङ्कष + टाप् ।) करताली । इति
शब्दरत्नावली ॥
कलङ्की, [न्] त्रि, (कलङ्कोऽस्त्यस्य । इनि ।) अप-
वादग्रस्तः । यथा,—तिथ्यादितत्त्वे ।
"कलङ्की जायते विन्ध्ये तिर्य्यग्योनिस्तु निम्नगे" ।
चिह्नयुक्तः । लौहमलविशिष्टः ॥ चन्द्रः ॥
कलङ्कुरः, पु, (कं जलं अङ्कुरयति गमयति भ्रामय-
तीत्यर्थः । कल गतौ + णिच् + उरच् ।) आवर्त्तः ।
जलभ्रमः । इति त्रिकाण्डशेषः ॥

कलञ्ज, पु, (कं सञ्जयति । सञ्जि + अण् ।) विषास्त्रहतमृगपक्षिणी । इति त्रिकाण्डशेषः ॥ ताम्रकूट । दोक्ता तामाक् इति भाषा । यथा । विष्णुसिद्धान्तसारावल्यां वैद्यके । अथ धूमपर्य्यायधूमपानगुणाः ।

"कलञ्जसंवेष्टनधूमपानात्
स्याद्दन्तशुद्धिर्मुखरोगहानिः ।
कफघ्नमामज्वरहानिदञ्च
गान्धर्व्वविद्याप्रवणैकसेव्यम्" ॥

कलट, क्ली, (कं जलं लटति आच्छादयति । अलट वोतीति वा । क + लट् + अच् ।) गृहाच्छादनम् । इति शब्दरत्नावली । चाल इति भाषा ॥ कुटलमिति च पाठः ॥

कलतूलिका, स्त्री, (कं सुखं विषयत्वेन लाति गृह्णातीति कलं । कलं कामं तूलयति निष्कर्षति पूरयति वा या । कल + तूल निष्कर्षे पूरणे वा ण्वुल् । टापि अत इत्वम् ।) इच्छावती । कामुका । तत्पर्य्यायः । वाञ्छिनी २ लञ्चिका ३ । इति त्रिकाण्डशेषः ॥

कलत्र, क्ली, (गड सेचने + "गडेरादेश्च कः" । उणा । ३ । १०६ । अत्रन् गकारस्य ककारश्च । डलयो रेकत्वस्मरणात् डस्य लः । यद्वा कलं त्रायते । त्रै + क । यद्वा कड्यते शिष्यते इति ।) कड–मासने बाहुलकात् अत्रन् । श्रोणि । भार्य्या । इत्यमरः । ३ । ३ । १७८ ॥ (यथा मेघदूते । ४० । "तां कस्याञ्चिद् भवनवलभौ सुप्तपारावतायां नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्र" ॥) राज्ञां दुर्गस्थानम् । इति हेमचन्द्रः ॥

कलधूत, क्ली, (कलेन अवयवेन धूतं शुद्धम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

कलधौत, क्ली, (कलेन अवयवेन धौतम् ।) स्वर्णम् । ("कन्येयं कलधौतकोमलरुचि कीर्त्तिस्तु नाते मता" । इति महानाटकम् ॥
महाभारते च ४ । गोहरणे ४० । ६ ।
"इमे च कस्य नाराचाः सहस्रं लोमवाहिनः ।
समन्तात्कलधौताग्रा उपासङ्गे हिरण्मये" ॥)
रजतम् । इति मेदिनी ॥ कलध्वनि । इति विश्वः ॥

कलध्वनि, पु, (कलः अस्फुटमधुरः ध्वनिर्यस्य ।) पारावतः । कोकिलः । मयूरः । इति मेदिनी ॥ मधुराव्यक्तशब्दः । इति कलशब्दार्थे अमरः । १ । ७ । २ ॥ (यथा महानिर्व्वाणतन्त्रे । १ । ३ । "अप्सरोगणसङ्गीतकलध्वनिनिनादिते" ॥)

कलन, क्ली, (कल्यते ज्ञायते दुष्यते वा । कल + ल्युट् ।) चिह्नम् । दोषः । इति हलायुधः ॥ (कल्यते शुक्रशोणिताभ्यामन्योन्य मिश्र्यते ।) गर्भे मिश्रित शुक्रशोणितम् ॥ यथा, भागवते । ३ । ३१ । २ ।
"कलनं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्" ॥
क्वचित् कलल इत्यपि पाठो दृश्यते । कलयति ज्ञापयत्यनेन । कल गतौ गत्यर्था ज्ञानार्थाश्च । कल + करणे ल्युट् । ज्ञानम् ॥)

कलनः, पु, (कं जलं लाति । अथ सन् नमति । क + ला + क ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

कलना, स्त्री, (कल + भावे युच् । टाप् च ।) वशीभूतत्वम् । वशता । यथा,—आनन्दलहर्य्याम् ।२६। "करारं यत् क्ष्वेडं कवलितवतः कालकलना" । कल्पना च ॥

कलन्दर, पु, (कलं शास्त्रविहितवाक्यं शिष्टाचारं वा दृणाति । कल + दॄ + खच् । मुम् च ।) वर्णसङ्करजातिविशेषः । स तु लेटात् तीवरकन्यायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कलन्दिका, स्त्री, (कं सुखं लाति विषयत्वेन इति । कलं कामं सर्व्वाभीष्टं ददाति । कल + दा + क । संज्ञायां कन् । ततष्टाप् अत इत्वं पृषोदरादित्वात् मुम् च ।) सर्व्वविद्या । इति हेमचन्द्रः ॥

कलम्बु, स्त्री, (कलायाः मात्रायाः अम्बुरिव । शकन्ध्वादित्वात् अलोपे साधुः ।) घोलीशाकः । इति राजनिर्घण्टः ॥

कलभ, पु, (कलेन करेण शुण्डेनेति यावत् भाति । कल + भा + क । यद्वा + कल गतौ "ऋषृशलिकलिगर्द्दिभ्योऽभच्" । उणा । ३ ।१२२ । इति । अभच् ।) करभः । हातिर छा इति भाषा । स तु पञ्चवर्षपर्य्यन्तम् । इति सुभूतिः ॥ तत्पर्य्यायः । करिशावकः २ । इत्यमरः । २ । ८ । ३५ ॥ दुर्द्दान्तः ३ व्यालः ४ । (यथा रघौ । ३ । ३२ ।
"महोक्षतां वत्सतरः स्पृशन्निव
द्विपेन्द्रभावं कलभः श्रयन्निव" ।)
धत्तूरवृक्षः । इति राजनिर्घण्टः ॥

कलभवल्लभ, पु, (कलभस्य हस्तिशावकस्य वल्लभः प्रियः ।) पीलुवृक्षः । इति राजनिर्घण्टः ॥

कलभी, स्त्री, (कं जलं आश्रयतया लभते । लभ + अच् । गौरादित्वात् ङीष् ।) चञ्चुवृक्षः । इति राजनिर्घण्टः ॥

कलम, पु, (कलते कलयति वा अक्षरं प्रकाशयति जनयति वा । कल + "कलिकर्द्दोरमः" । उणा । ४ । ८४ इति अम ।) स्वनामख्यातलिपिसाधनवस्तु । तत्पर्य्यायः । लेखनी २ वर्णतूली ३ अक्षरतूलिका ४ । इति जटाधरः ॥ स्वनामख्यातशालिधान्यविशेषः । (यथा, रघु । ४ । ३७ ।
"आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः" ॥)
अस्य गुणाः । रक्तदोषत्रिदोषनाशित्वम् । चक्षुर्हितकारित्वम् । कषायत्वञ्च । इति राजवल्लभः ।
"रक्तशालिर्महाशालिः कलमः षष्टिकोऽपरः" ।
इति हारीते प्रथमस्थाने १० अध्याये ॥
("शूकजेषु वरस्तत्र रक्तस्तृष्णात्रिदोषहा ॥
महांस्तस्यानुकलमस्तस्याप्यनु ततः परे" ॥
इति वाभटे सूत्रस्थाने ६ अध्याये ॥) चौरः । इति मेदिनी ॥

कलमोत्तम, पु, (कलमेभ्यः कलमेषु वा उत्तमः ।) गन्धशालिः । इति राजनिर्घण्टः ॥

कलम्ब, पु, (कल्यते क्षिप्यते शत्रुं प्रति । कलक्षेपे + अम्बच् ।) शरः । शाकनाडिका । इत्यमरः । २ । ८ । ८७ । कदम्बः । इति विश्वः ॥ ("कलम्बनालिका मार्षकुटिञ्जरकुसुम्भकम्" । इत्यादीनां समस्तिगुणा यथा,—
"शाकं गुरु च रूक्षञ्च प्रायो विष्टभ्य जीर्य्यति ।
मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम्" ॥
इति चरके सूत्रस्थाने २७ अध्याये ॥)

कलम्बक, पु, (कलम्ब + संज्ञायां कन् ।) धाराकदम्बः । इति राजनिर्घण्टः ॥

कलम्बिका, स्त्री, (कलम्बी एव स्वार्थे कन् टाप् च अत इत्वम् ।) कलम्बीशाकः । इति शब्दरत्नावली ॥ (यथा चक्रपाणिदत्तद्रव्यगुणे शाकवर्गे । "कलम्बिका गुरुर्वृष्या कषायास्तन्यवर्द्धिनी" ॥ कलम्बीव कायते प्रकाशते निधीयते वा । कलम्बी + कै + क । टाप् इत्वञ्च । सञ्ज्ञा हेतुत्वात् पृषोदरादित्वात् । ह्रस्व ।) ग्रीवापश्चान्नाडी । तत्पर्य्यायः । मन्या २ । इति हेमचन्द्रः ॥

कलम्बी, स्त्री, (के जले लम्बते । लबि स्रंसने + अच् ङीष् ।) जलजलताशाकविशेषः । कलमी इति भाषा । तत्पर्य्यायः । कडम्बी २ कलम्बूः ३ कलम्बिका ४ । इति शब्दरत्नावली ॥ अस्याः गुणाः । स्तन्यदुग्धशुक्रश्लेष्मकारित्वम् । मधुरत्वम् । कषायत्वम् । गुरुतरत्वञ्च । इति राजवल्लभः ॥

कलम्बुट, क्ली, (के जले लम्बते भासते । क + लम्ब + बाहुलकात् उटन् ।) हैयङ्गवीनम् । नवनीतम् । इति हारावली ॥

कलम्बू, स्त्री, (के जले लम्बते । लम्ब + बाहुलकात् ऊङ् ।) कलम्बीशाकः । इति शब्दरत्नावली ॥

कलरव, पु, (कलः मधुरास्फुटो रवः ध्वनिर्यस्य ।) कपोतः । पायरा इति भाषा । इत्यमरः । २ । ५ । १४ ॥ (यथा आर्य्यासप्तशती ५६७ । "शीर्णप्रासादोपरि जिगीषुरिव कलरवः क्वणति" ॥) कोकिलः । इति राजनिर्घण्टः ॥ (यथा, ब्रह्मपुराणे ५२ । ३४ । "कोकिलैः कलरवैश्च" ॥) मधुराव्यक्तध्वनिः । इति कलशब्दार्थे अमरः । (कलएव रवः । कर्म्मधारयः ॥ यथा कलाविलासे १ । ६ ।
"नवविसकिसलयकवलन-
कषायकलहंसकलरवो यत्र" ॥)

कलल, पुं क्ली, (कल्यते वेष्ट्यतेऽनेन । कल + वृषादिभ्यः कलच् ।) जरायुः । गर्भवेष्टनचर्म्म । इत्यमरः । २ । ६ । ३८ ॥
("ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम् ।
कललं जायते तस्या वर्जितं पैतृकैर्गुणैः" ॥
इति सुश्रुते शारीरस्थाने २ अध्याये ।)

कललज, पु, (कललमिव जायते । जन + डः ।) राल । इति राजनिर्घण्टः । धुना इति भाषा ।

कललजोद्भव, पु, (उद्भवत्यस्मात् उद्भवः । कललजस्य उद्भवः ।) सालवृक्षः । इति राजनिर्घण्टः ।

कलविङ्क, पु, (कलं मधुरास्फुटं वङ्कते रौति । वकि वा गतौ + अच् पृषोदरादित्वात् अत इत्वे साधु ।) चटकः । इत्यमरः । २ । ५ । १८ ।

(यथा, मनुः । ५ । १२ ।
"कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्" ॥)
कलिङ्ककाश्च । इति मेदिनी ॥ कलङ्क । श्वेत-
चामरः । इति सारस्वतः ॥ (त्वष्टृपुत्त्रविश्वरूपस्य
शिरोभेदः । पुरा किल कदाचित् ऐश्वर्य्यमत्तेन
सुरेश्वरेण यदा सभागतः सुराचार्य्यो गीष्पति-
रसम्मानितोऽन्तरधीयत । तदा ब्रह्मोपदिष्टैर-
सुरप्रपीडितैरमरैस्त्वाष्ट्रः विश्वरूपः पौरोहित्ये
वरयित्वा भूयः सन्नद्धैरसुरा बबाधिरे। विश्वरूपस्तु
मातामहकुलस्यापेक्षया परोक्षमसुरेभ्योऽपि
यज्ञभागं प्रददौ तदभिज्ञाय सुरपतिर्भीतः क्रुद्धश्च
विश्वरूपस्य शिरांस्यच्छिनत् । तस्य खलु त्वाष्ट्रस्य
कपिञ्जलः कलविङ्कस्तित्तिरिरिति त्रीणि शिरा-
स्यासन् तेषु सुरापायि शिरः एव कलविङ्कः इति
बोध्यम् । एतद्विवरणन्तु श्रीमद्भागवते ६ । ९ अ-
ध्याये सविस्तरं दर्शनीयम् ॥)

कलश, त्रि, (कलं मधुराव्यक्तशब्दं श्वयति जलपूरण-
समये प्राप्नोति । कल + श्वि गतौ + ड ।) जलाधार-
विशेषः । कलशी इति ख्यातः । (यथा, आर्य्या-
सप्तशती ६९० ।
"प्रहतो विदरयिष्यति जलकलश नीरलेखेव" ॥)
तत्पर्य्यायः । घटः २ कुटः ३ निपः ४ । इत्यमरः ।
२ । ९ । ३२ ॥ कलसः ५ कलसिः ६ कलसी ७
कलसम् ८ कलशिः ९ कलशी १० कलशम् ११ ।
इति तट्टीका ॥ कुम्भः १२ करीरः १३ । इति
हेमचन्द्रः । कलशावतीदीक्षाप्रकरणोक्तं तस्य परि-
माणं । यथा, तन्त्रसारे ।
"पञ्चाशदङ्गुलव्यामं उत्सेधं षोडशाङ्गुलं ।
कलशानां प्रमाणन्तु मुखमष्टाङ्गुलं स्मृतम् ॥
षट्त्रिंशदङ्गुलं कुम्भं विस्तारोन्नतिशालिनम् ।
षोडश द्वादश वापि ततो न्यूनं न कारयेत्" ॥

कलशि, स्त्री, (कलं शरीरमालिन्यं श्यति नाशयति ।
कल + शो + बाहुलकात् इन् । कं जलं लाति
आदत्ते तथा सती शीर्य्यते । कल + शॄ + डि ।)
पृश्निपर्णी । चाकुलिया इति भाषा । इत्यमरः ।
२ । ४ । ९३ ॥ (पृश्निपर्णीशब्देऽस्या गुणावली ज्ञा-
तव्या ॥) घटः । इत्यमरटीकायां रायमुकुटः ॥
यथा, माघे ११ । ८ ।
"कलशिमुदधिगुर्व्वीं वल्लवा लोडयन्ति" ॥)

कलशी, स्त्री, (कलशि कृदिकारान्तत्वात् वा ङीष् ।)
स्वनामख्यातजलपात्रम् । पृश्निपर्णी । इत्यमरटी-
कायां रायमुकुटः ॥

कलस', त्रि, (केन जलेन लसति शोभते । क +
लस् + अच् ।) कलशः । घटः । इति हेमचन्द्रः ॥
द्रोणपरिमाणे, पु । इति वैद्यकपरिभाषा ॥
("चतुर्भिराढकैर्द्रोणः कलसो नल्वणोऽर्म्मणः" ॥
इति शार्ङ्गधरे पूर्व्वखण्डे १ अध्याये ॥
"स एव कलसः ख्यातो घटस्तन्मानमेव च" ॥
इति चरके कल्पस्थाने १२ अध्याये ॥)

कलस, पु, (केन जलेन लसतीति । लस् + अच् ।)
कुम्भः । अस्योत्पत्त्यादिर्यथा,—
"सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः ।
पीयूषधारणार्थाय निर्म्मितो विश्वकर्म्मणा ॥
कला कलास्तु देवानामसितास्ता पृथक् पृथक् ।
यतः कृतास्तु कलसास्ततस्ते परिकीर्त्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत ।
गोह्योपगोह्यो मरुतो मयूखश्च तथापरः ॥
मनोहा कृषिभद्रश्च विजयस्तनुशोषकः ।
इन्द्रियघ्नोऽथ विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्भूप नव नामानि यानि तु ।
शृणु तान्यपराण्येव शान्तिदानि सदैव हि ॥
क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः ।
पवनाख्यो ततो द्वौ तु यजमानस्ततः परः ।
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ॥
सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः ।
विजयो नाम कलसो योऽसौ नवम उच्यते ॥
स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक् ।
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयं तथा ॥
यथा काष्ठास्थितः सम्यक् वामदेवादिनामतः ।
मण्डलस्य च मध्ये तु पञ्चवक्त्रघटं न्यसेत् ॥
क्षितीन्द्रं पूर्व्वतो न्यस्य पश्चिमे जलसम्भवम् ।
वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम् ॥
नैर्ऋत्ये यजमानन्तु ऐशान्यां कोषसम्भवम् ।
सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यस्यैव कलसांश्चैव तेषु चैतान् विचिन्तयेत् ।
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वे वेष्टयन्ति दिशो दश ।
कुक्षौ तु सागराः सप्त सप्तद्वीपाश्च संस्थिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ।
गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च ।
कलसे संस्थिताः सर्व्वे तेषु तानि विचिन्तयेत् ॥
रत्नानि सर्व्ववीजानि पुष्पाणि च फलानि च ॥
वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रस्फाटिकैः ।
सर्व्वधातुमयं विम्बं नागरोडुम्बरं तथा ॥
वीजपूरकजम्बीरकाम्राम्रातकदाडिमान् ।
यवशालिश्च नीवारगोधूमसितसर्षपम् ॥
कुङ्कुमागुरुकर्पूरमदनं रोचनं तथा ।
चन्दनञ्च तथा मांसीमेला कुष्ठं तथैव च ॥
कर्पूरपत्त्रचण्डश्च जलं निर्य्यासकाम्बुदम् ।
शैलेयं वदरं जातीपत्त्रपुष्पे तथैव च ॥
कालशाकं तथा एका देवीं पर्णकमेव च ।
वचा धात्री समञ्जिष्ठां तुरुष्कं मङ्गलाष्टकम् ॥
दूर्व्वां मोहनिकां भद्रां शतमूली शतावरीम् ।
पर्णानां शबलां क्षुद्रां सहदेवां गजाङ्कुशाम् ॥
पूर्णकोषा सिता पाठा गुञ्जा सरस्विकालसौ ।
व्यामकं गजदन्तञ्च शतपुष्पां पुनर्णवाम् ॥
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसन्मानिकां तथा ।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथा देवान् विधिं शम्भुं गदाधरम् ।
यथाक्रमं पूजयित्वा शम्भुं मुख्यतया यजेत् ॥
प्रासादेन तु मन्त्रेण शम्भुतन्त्रेण शङ्करम् ।
प्रधानं पूजयेन्मध्ये नानानैवेद्यवेदनैः ॥
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत् ।
पूर्व्ववद्वह्नि स्थापितेषु ग्रहाणां कलसेषु च ॥
नवग्रहान् पूजयेत्तु मातॄर्मातृघटेषु च ।
सर्व्वे देवा घटे पूज्या घटस्तेषां पृथक् पृथक् ॥
नवैव तत्र पूर्व्वोक्ताः स्मृता मुख्यतमा नृप ।
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ॥
यावकैः पायसैश्चापि यथासम्भवयोजितैः ।
पुष्पस्नानाय नृपतिः पूजयेत् सकलान् सुरान्" ॥
इति कालिकापुराणे पुष्याभिषेके ८७ अ-
ध्यायः ॥ ॥ अन्यत् धारकशब्दे द्रष्टव्यम् ॥

कलसि, पु, (केन जलेन लसतीति । क + लस् +
इन् ।) पृश्निपर्णी । इत्यमरटीका शब्दरत्नावली
च ॥ गर्गरी । इत्यमरटीका हारावली च ॥

कलसी, स्त्री, (कलस + स्त्रियां ङीप् ।) पृश्निपर्णी ।
इति शब्दरत्नावली ॥ (कलसी उद्धृतोद्राद्येत्यादि-
ख्यथा व्यवहारः ॥ इत्युत्तरतन्त्रे । ३९ अध्याये
सुश्रुतेनोक्तम् ॥) कलसः । इत्यमरटीका ॥ (स्वार्थे
कन्प्रत्ययेनोक्तं यथा, नैषधे । २ । ८ ।
"अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत" ॥)

कलसीसुतः, पु, (कलस्या जातः सुतः ।) अगस्त्य-
मुनिः । इत्यमरटीकायां वाचस्पतिः ॥

कलसोदधिः, पु, कलस इव उदधिः । मन्थनाधार-
त्वात् । समुद्रः । इति महाभारतम् ॥

कलहः, पु क्ली, (कलं कामं हन्त्यत्र । हन् + अधि-
करणे डः ।) विवादः । लडाइ झगडा इति
भाषा ॥ (यथा मनुः ४ । १२१ ।
"न विवादे न कलहे न सेनायां न सङ्गरे" ।)
तथा विष्णुपुराणे १ । मांशे ९ । १४५ ।
"अलक्ष्मी कलहाधारा न तेष्वास्ते कदाचन" ॥)
तत्पर्य्यायः । युद्धम् २ आयोधनम् ३ जन्यम् ४
प्रधनम् ५ प्रविदारणम् ६ मृधम् ७ आस्कन्द-
नम् ८ संख्यम् ९ समीकम् १० साम्परायिकम्
११ समरः १२ अनीकः १३ रणः १४ विग्रहः १५
सम्प्रहारः १६ अभिसम्पातः १७ कलिः १८ सं-
स्फोटः १९ संयुगः २० अभ्यामर्द्दः २१ समा-
घातः २२ संग्रामः २३ अभ्यागमः २४ आहवः २५
समुदायः २६ संयत् २७ समितिः २८ आजिः २९
समित् ३० युध् ३१ । इत्यमरः । २ । ८ । १०४ ॥
शमीकम् ३२ साम्परायकम् ३३ संस्फोटः ३४ ॥
युत् ३५ । इति तट्टीका ॥

कलहः, पु, (कल + हन् + "अन्येभ्योऽपीति" ३ ।
२ । १०१ । ड ।) वाटः । खड्गकोषः । भण्डनम् ।
इति मेदिनी ॥

कलहंसः, पु, (कलेन मधुरास्फुटध्वनिना विशिष्टो
हंसः । शाकपार्थिवादित्वात् मध्यपदलोपि समासः ।)
हंसविशेषः । वालिहाँस इति भाषा । तत्पर्य्यायः ।
कादम्बः २ । इत्यमरः । २ । ५ । २३ ॥ कलनादः
३ मरालकः ४ । इति राजनिर्घण्टः ॥ राजहंसः ।
(यथा भट्टिः । २ । १८ ।
"कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः" ॥)
नृपोत्तमः । इति विश्वमेदिन्यौ ॥ पताका । ब्रह्म ।
इति शब्दरत्नावली ॥ (यतिजगतोः वृत्ति । सा

च त्रयोदशाक्षरा। तल्लक्षणमुक्तं यथा, छन्दोमञ्जर्य्याम् ७।
"सजसा सगौ च कथित कलहंस"।
अस्योदाहरणमुक्तं तत्रैव। यथा,
"यमुनाविहारकुतुके कलहंसो
व्रजकामिनी कमलिनीकृतकेलि।
जनचित्तहारिकलकण्ठनिनाद
प्रमदं तनोतु तव नन्दतनूज"॥
सिंहनाद क्वापि॥)

कलहनाशन, पु, (कलहं नाशयतीति। कलह + नश + णिच् + ल्यु। अस्य कलहनाशकता कार्म्मणविद्यायां प्रसिद्धा।) पूतिकरञ्ज। इति शब्दमाला॥

कलहप्रिय, पु, (कलहः प्रियो यस्य।) नारद। इति महाभारतम्॥ (कलहप्रिये त्रि।) यथा गो॰ रामायणे ५।१७।२७।
"दुर्म्मुखी कपिला कृष्णा क्रोधना कलहप्रिया"॥)

कलहप्रिया, स्त्री, (कलहस्य कलहे वा प्रिया।) शारिकापक्षी। इति राजनिर्घण्टः॥

कलहान्तरिता, स्त्री, (कलहादन्तरिता पश्चात् परितापमापन्ना।) नायिकाभेद। अस्या लक्षणम्। पतिमवमन्य पश्चात् परितप्ता। अस्याः क्रिया। भ्रान्ति॰। सन्ताप। सम्मोह। निश्वास। ज्वरः। प्रलापादिः। इति रसमञ्जरी॥ (तथा च साहित्यदर्पणे ३।८६।
"चाटुकारमपि प्राणनाथ रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा"॥
उदाहरणमाह तत्रैव। "नो चाटुश्रवणं कृतं न च दृशा हारोऽन्तिके वीक्षित, कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरीकृता। पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया, पाणिभ्यामवरुध्य हन्त! सहसा कण्ठे कथं नार्पित'॥)

कला, स्त्री, (कलयति वृद्धितो धनं सङ्कलाति सञ्चिनोतीत्यर्थः। कल + अच् + टाप्।) मूलधनवृद्धि। सुद इति भाषा। शिल्पादि। (यथा रामायणे १।९।८।
"गीतवादित्रकुशला नृत्येषु कुशलास्तथा।
उपायज्ञा कलाभिज्ञास्तु वैशिके परिनिष्ठिता"॥)
अंशमात्रम्। चन्द्रस्य षोडशांश। (यथा, वक्रोक्तिपञ्चाशिकायाम्। "सालङ्कारतया त्वया मम कथं नेन्दो कला दृश्यते, पश्यामीन्दुकलां स्फुट पुनरिदं लक्ष्यारता नास्मि यत्"॥) कालमान। स तु त्रिंशत्काष्ठात्मक॰। इति मेदिनी॥ ("त्रिंशत् काष्ठा कला"। इति सुश्रुते सूत्रे ६ अ॥)
शरीरस्थांशविशेषो यथा,—
"मासास्रङ्मेदसा तिस्रो यकृत्प्लीह्नोश्चतुर्थिका।
पञ्चमी च तथान्त्राना षष्ठीचाग्निधरा मता।
रेतोधरा सप्तमी स्यादिति सप्तकला स्मृता"॥
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम्॥)
स्त्रीरज। नौका। कपट। इति विश्व। राशेस्त्रिंशद्भागोऽशस्तस्य षष्टिभाग। यथा,—
"विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते"॥
इति सूर्य्यसिद्धान्त॰॥ अथ शैवतन्त्रोक्तास्तु चतुःषष्टिकला लिख्यन्ते। गीतम् १ वाद्यम् २ नृत्यम् ३ नाट्यम् ४ आलेख्यम् ५ विशेषकच्छेद्यम् ६ तण्डुलकुसुमबलिविकाराः ७ पुष्पास्तरणम् ८ दशनवसनाङ्गरागा ९ मणिभूमिकाकर्म्म १० शयनरचनम् ११ उदकवाद्यम् १२ उदकघात १३ चित्रायोगा १४ माल्यग्रथनविकल्पा १५ शेखरापीडयोजनम् १६ नेपथ्ययोगा १७ कर्णपत्रभङ्गा १८ गन्धयुक्ति १९ भूषणयोजनम् २० ऐन्द्रजालम् २१ कौचुमारयोगा २२ हस्तलाघवम् २३ चित्रशाकापूपभक्ष्यविकारक्रिया २४ पानकरसरागासवयोजनम् २५ सूचीवापकर्म्माणि २६ सूत्रक्रीडा २७ प्रहेलिका २८ प्रतिमाला २९ दुर्व्वचकयोगा ३० पुस्तकवाचनम् ३१ नाटिकाख्यायिकादर्शनम् ३२ काव्यसमस्यापूरणम् ३३ पट्टिकावेत्रवाणविकल्पाः ३४ तर्क्कुकर्म्माणि ३५ तक्षणम् ३६ वास्तुविद्या ३७ रूप्यरत्नपरीक्षा ३८ धातुवाद ३९ मणिरागज्ञानम् ४० आकरज्ञानम् ४१ वृक्षायुर्व्वेदयोगा ४२ मेषकुक्कुटलावकयुद्धविधि॰ ४३ शुकशारिकाप्रलापनम् ४४ उत्सादनम् ४५ केशमार्ज्जनकौशलम् ४६ अक्षरमुष्टिकाकथनम् ४७ म्लेच्छितकविकल्पा ४८ देशभाषाज्ञानम् ४९ पुष्पशकटिकानिमित्तज्ञानम् ५० यन्त्रमातृका ५१ धारणमातृका ५२ सम्पाठ्यम् ५३ मानसीकाव्यक्रिया ५४ क्रियाविकल्पा॰ ५५ छलितकयोगा॰ ५६ अभिधानकोषच्छन्दोज्ञानम् ५७ वस्त्रगोपनानि ५८ द्यूतविशेष॰ ५९ आकर्षक्रीड़ा ६० बालकक्रीडनकानि ६१ वैनायिकीनां विद्यानां ज्ञानम् ६२ वैजयिकीनां विद्यानां ज्ञानम् ६३ वैतालिकीनां विद्यानां ज्ञानम् ६४। इति श्रीभागवतटीकायां श्रीधरस्वामी॥ क्वचित् पुस्तके सूचीवापकर्म्मसूत्रक्रीडा इत्येकं पदं तदुत्तरं वीणाडमरुकवाद्यानि वैतालिकीनामित्यत्र वैयासिकीनामिति च पाठ॥
(जिह्वा। यथा हठयोगप्रदीपिकायाम् ३।३७।
"कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत्"॥
"कला जिह्वा पराङ्मुखमास्यं यस्याः सा तथा तां प्रत्यङ्मुखीं कृत्वा तिसृणां नाडीनां पन्था॰ तस्मिन् कपालकुहरे संयोजयेत्"। इति तट्टीका॥ शिव। यथा महाभारते १३।१७।१४०।
'कला काष्ठा लवा मात्रा मुहूर्त्ताहः क्षपाः क्षणा'॥)

कलाकुल, क्ली, (कलया मायया व्याकुलयति व्याकुलयतीति। व्याकुलि इति नामधातो + अच्।) विषम्। इति राजनिर्घण्ट॥

कलाकेलि, पु, (कलाभिः केलि विलासो यस्य। कलासु केलिर्यस्य वा।) कामदेव। इति त्रिकाण्डशेष॥

कलाङ्कुर, पु, (कलानां अङ्कुरो यत्र।) सारसपक्षी। (स्तेयशास्त्रप्रवर्त्तककर्णीसुत।) कंसासुरः। इति त्रिकाण्डशेष॥

कलाचिका, स्त्री, (कलामञ्चति गच्छति प्राप्नोति वा। कला + अञ्च् + उपपदे कर्म्मण्यण्। तत स्वार्थे कन् ततष्टाप् अत इत्वञ्च।) प्रकोष्ठ। स तु कफोणेरधो मणिबन्धपर्य्यन्त। इति हेमचन्द्र॥

कलाची, स्त्री, (कला अञ्चति। कला + अञ्च् + अण्। गौरादित्वात् ङीष्।) कलाचिका। इति हारावली॥

कलाद, पु, (अलङ्कारनिर्म्माणाय गृहस्थै समर्पितानां स्वर्णादीनां कलां अंशं आदत्ते गृह्णाति। अलङ्कारनिर्म्माणहेतुना गृहस्थोपार्ज्जितधनांशं वा आदत्ते। आ + दा + क।) स्वर्णकार॰। इत्यमर।२।१०।८॥

कलानिधि, पु, (कला निधीयन्तेऽस्मिन्। कला + नि + धा + अधिकरणे कि।) चन्द्रः। इत्यमरः। १।३।१४॥ (यथाह कश्चित्।
"अहो महत्त्वं महतामपूर्व्वं
विपत्तिकालेऽपि परोपकार।
यथाऽस्य मध्ये पतितोऽपि राहोः
कलानिधिः पुण्यचयं ददाति"॥)

कलानुनादी, [न्] पु, (कलं अनुनदतीति। कल + अनु + नद + णिनि।) रोलम्ब। भ्रमरः। कलविङ्क। चटक। कपिञ्जल॰। चातक। इति मेदिनी॥

कलान्तर, क्ली, (अन्या कला अंश। सुप्सुपेति समास।) वृद्धि॰। लाभ। इति लीलावती॥ सुद इति भाषा। (चन्द्रस्य अन्या कला। यथा कुमारे १।२५।
"पुपोष लावण्यमयान् विशेषान्
ज्योत्स्नान्तराणीव कलान्तराणि"॥)

कलाप, पु, (कलां मात्रां आप्नोति। कला + आप् + "कर्म्मण्यण्"।३।२।१। इति अण्। यद्वा कला आप्यतेऽनेन "हलश्च"।३।३।१२१। इति घञ्।) समूह॰। (यथा भागवते ४।२४।६२।
"क्रियाकलापैरिदमेव योगिन
श्रद्धान्विता साधु यजन्ति सिद्धये"॥)
मयूरपिच्छ। (यथा, गो॰ रामायणे। ५।५२।१३
"सम्प्रदीप्तकलापाग्रा विप्रकीर्णास्तु बर्हिण"॥)
काञ्ची। भूषणम्। (यथा कुमारे। १।४२।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य"॥
"मुक्ताकलापस्य मुक्ताभूषणस्य"। इति मल्लिनाथः॥)
तूण॰। (यथा हरेः रामायणे २।५२।११।
"तत कलापान् सन्नह्य खड्गौ बद्ध्वा च धन्विनौ"॥)
चन्द्र। विदग्ध। व्याकरणविशेष॰। इति मेदिनी॥ (यथा, कथासरित्सागरे।
"अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति।
तद्वाहनकलापस्य नाम्ना कालापकं तथा"॥)
ग्रामविशेष। यथा, भागवते। ९।१२।६।
"देवापिर्योगमास्थाय कलापग्राममास्थित।
सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति"॥
(अस्त्रविशेष। यथा महाभारते ४।५।२८।
"खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान्।
विपाठान् क्षुरधारांश्च धनुर्भिर्निदधु सह"॥)

कलापक, पु, (कलाप + सञ्ज्ञायां कन्।) हस्तिकण्ठ

बन्ध' । इति हेमचन्द्रः ॥ (स्वार्थे कन् । कलापार्थः । स्त्री, यस्मिन् काले मयूरा कलापिनो भवन्ति स उपचारात् कलापी तत्र देयमृणम् । "कलाप्यश्वत्थयववुसाद्वुन्" । ४ । ३ । ४८ । ऋणविशेष । इति सिद्धान्तकौमुदी ॥ पद्यविशेषः । यथा, साहित्यदर्पणे ६ । ३४७ ।

"छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं स्मृतम्" ॥)

कलापिनी, स्त्री, (कलापश्चन्द्र अस्ति अस्याम् । कलाप + मत्वर्थे इनि + ततो ङीप् ।) रात्रि । नागरमुस्ता । इति राजनिर्घण्टः ॥

कलापी, [न्] पु, (कलापाः फलपत्रसमूहा सन्त्यस्मिन् । कलाप + इनि ।) प्लक्षवृक्षः । (कलापो बर्हः अस्ति अस्य इनि ।) मयूर । इति मेदिनी ॥ (यथा रघु. ६ । ९ ।

"पुरोपकण्ठोपवनाश्रयाणां
कलापिनामुद्धतनृत्यहेतौ" ॥)

कोकिलः । इति धरणी ॥ (त्रि, तूणवान् । कलापव्याकरणाध्यायी ॥)

कलापूर्णः, पु, (कलाभिः पूर्णः ।) चन्द्रः । इति शब्दचन्द्रिका ॥ (त्रि, कलापरिपूर्णः । यथा महाभारते । ४ । ६७ । १३ ।

"सदा भवान् फाल्गुनस्य गुणैरस्मान् विकत्थते ।
न चार्ज्जुन कलापूर्णो मम दुर्य्योधनस्य वा" ॥)

कलाभृत्, पु, (कला विभर्त्ति । कला + भृ + क्विप् । तुगागमश्च ।) चन्द्रः । इति हेमचन्द्रः ॥ (कला गीतादिकं विभर्त्तीति । गीतादिकलाभिज्ञे वाच्यलिङ्गत्वम् । यथा मनु २ । १३४ ॥

"दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् ।
त्र्यब्दपूर्व्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु" ॥)

कलामकः, पुं, (कलम + कनि पृषोदरात् साधुः ।) कलमधान्यम् । इति हेमचन्द्रः ॥ (कलमशब्देऽस्य विशेषो ज्ञातव्य ॥)

कलाम्बिका, स्त्री, (कला अये विकायते प्रयुज्यते अस्याम् । कला + वि + कै + क + टाप् । पृषोदरादित्वात् मुमि साधुः ।) ऋणाना प्रयोगः । ऋणदानम् । इति त्रिकाण्डशेषः ॥ धार देओया इति भाषा ॥

कलायः, पु, (कला अयते । "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शमीधान्यविशेषः । मटर वाँटुला इति भाषा । तत्पर्य्यायः । सतीलकः २ हरेणुः ३ खण्डिकः ४ । इत्यमरः । २ । ९ । १६ ॥ त्रिपुटः ५ अतिवर्त्तुलः ६ । इति रत्नमाला ॥ मुण्डचणकः ७ शमनः ८ नीलकः ९ कण्टी १० सतीलः ११ हरेणुकः १२ सतीनः १३ सतीनकः १४ । (यथा, माघः । १३ । २१ । "विकसत्कलायकुसुमासितद्युते" ॥) अस्य गुणाः । वातरुचिपुष्ट्यामदोषकारित्वम् । पित्तदाहकफनाशित्वम् । शीतलत्वम् । कषायत्वञ्च ॥ (अस्य पर्य्यायो गुणाश्च यथा, भावप्रकाशस्य पूर्व्वखण्डे धान्यवर्गे । "कलायो वर्त्तुलः प्रोक्तः सतिलश्च हरेणुकः । कलायो मधुरः स्वादुः पाके रूक्षश्च वातलः" ॥)

अस्य शाकगुणाः । मधुरत्वम् । पित्तश्लेष्महरत्वम् । गुरुत्वम् । कषायानुरसत्वम् । रूक्षत्वम् । मलभेदित्वम् । वायुकोपनत्वञ्च । इति राजनिर्घण्टः ॥ ("भेदनं मधुरं रूक्षं कषायमतिवातलम्" ॥ इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥)

कलायनः, पु, (कलानां नृत्यगीतादीनां अयनं प्राप्तिर्यत्र ।) नर्त्तकः । इति शब्दरत्नावली ॥

कलाया, स्त्री, (कलाय + स्त्रियां टाप् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ (गण्डदूर्व्वाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

कलालापः, पु, (कलं मधुरास्फुटं आलपतीति । कल + आ + लप् + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) भ्रमरः । इति राजनिर्घण्टः ॥ (मधुरालापकर्त्तरि त्रि ॥)

कलावती, स्त्री, (कला गान्धर्व्वकलाः सङ्गीतरागालापादयः सन्ति अस्याम् । कला + मतुप् मस्य वः स्त्रियां ङीप् ।) तुम्बुरुगन्धर्व्वस्य वीणा । इति हेमचन्द्रः ॥ (यथा माघस्य १ । १० श्लोकस्य टीकायां मल्लिनाथधृतवैजयन्तीवचनम् ।

"विश्वावसोस्तु वृहती तुम्बुरोस्तु कलावती ।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी" ॥

स्वनामख्याता द्रुमिलस्य राज्ञः पत्नी । यथा ब्रह्मवैवर्त्ते ब्रह्मखण्डे । २० । १२ ।

"कान्यकुब्जे च देशे च द्रुमिलो नाम राजकः ।
कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता" ॥)

श्रीराधामाता । सा तु वृषभानुपत्नी । इति ब्रह्मवैवर्त्तपुराणम् ॥ अप्सरोविशेषः । यथा रतिस्तव कलावतीति स्निग्धकाव्ये जयदेवः ।

(कला चतुःषष्टिकलाः विद्यन्ते यस्याः । गङ्गा । यथा, काशीखण्डे २९ । ४७ ।

"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥)

दीक्षाविशेषः । तस्याः क्रमो मन्त्रं विना लिख्यते । शिष्यः पूर्व्वमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । ततो गुरुं वृणुयात् । अथ गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कुर्य्यात् । तदर्घ्यजलेन द्वारमभ्युक्ष्य द्वारपूजां कुर्य्यात् । ततो दक्षिणपादपुरःसरं द्वारवामशाखां स्पृशन् दक्षिणाङ्गं सङ्कोचयन् मण्डपान्तः प्रविश्य नैर्ऋत्यां वास्तुपुरुषं ब्रह्माणञ्च सम्पूज्य देयमन्त्रेण दिव्यदृष्ट्यावलोकनेन दिव्यान् विघ्नानुत्सार्य्य अस्त्रमन्त्रेण जलेनान्तरीक्षगान् विघ्नानुत्सार्य्य वामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य्य सप्तधास्त्रमन्त्राभिमन्त्रितविकिरानादाय भूतनिवारणार्थमन्त्रेण तान् विकिरेत् । तत आसनशुद्धिं कृत्वा मन्त्रेण स्वस्तिकादिक्रमेणोपविशेत् । उपविश्य वा विघ्नानुत्सारयेत् । ततः पञ्चगव्येन मूलेन मण्डपं शोधयेत् । ततः स्वदक्षिणे पुष्पद्रव्याणि वामे सुवासिताम्बुपूर्णकुम्भं हस्तप्रक्षालनार्थं पात्रमेकं पृष्ठदेशे स्थापयेत् । सर्व्वदिक्षु घृतप्रदीपांश्च स्थापयित्वा पुटाञ्जलिर्भूत्वा वामे गुरुपरमगुरुपरात्परगुरून् प्रणम्य दक्षिणे गणेशं मध्ये स्वेष्टदेवताञ्च प्रणम्य अस्त्रमन्त्रेण गन्धपुष्पाभ्यां करौ संशोध्य ऊर्द्ध्वोर्द्ध्वतालत्रयं दत्त्वा छोटिकाभिर्दशदिग्बन्धनं कृत्वा वह्निबीजेन जलधारया वह्निप्राकारं विचिन्त्य भूतशुद्धिं कुर्य्यात् । ततो मातृकान्यासं प्राणायामं पीठन्यासं ऋष्यादिन्यासं मन्त्रन्यासं । ततो मुद्रां प्रदर्श्य ध्यानं मानसपूजां अर्घ्यस्थापनञ्च कुर्य्यात् । ततोऽर्घ्यपात्रात् किञ्चित् जलं प्रोक्षणीपात्रे निक्षिप्य तेनोदकेनात्मानं पूजोपकरणञ्च मूलेन त्रिरभ्युक्ष्य पीठमन्त्रेण शरीरे धर्म्मादीन् पूजयेत् । ततो हृत्पद्मस्य पूर्व्वादिकेशरेषु पीठशक्तीः संपूज्य मध्ये पीठमनुं यजेत । तत्र हृदये मूलदेवतां नैवेद्यं विना गन्धाद्यैः पूजयेत् । तत उत्तमाङ्गहृदयमूलाधारपादसर्व्वाङ्गेषु मूलेन पञ्चपुष्पाञ्जलीन् दत्त्वा यथाशक्ति मन्त्रं जप्त्वा जपं समर्पयेत् । सर्व्वमेतत् प्रोक्षणीपात्रस्थवारिणा विदध्यात् । तत प्रोक्षणस्तोयं विसृज्य पूर्व्ववदापूर्य्य वह्निमुखमारभेत । तत्र शारदोक्तसर्व्वतोभद्रमण्डलाद्यन्यतममण्डलं विधाय तत्र घटं संस्थाप्य मण्डलं संपूज्य शालिभिः कर्णिकामापूर्य्य तदुपरि तण्डुलानास्तीर्य्य तेषु दर्भानास्तीर्य्य विष्टरं पञ्चरत्नसयुक्तं तदुपरि न्यसेत् । ततो मण्डले पीठोक्तदेवता पूजयेत् । ततो मण्डले प्रादक्षिण्येन वह्नेर्दशकला विन्यस्य पूजयेत् । ततो हेमादिरचितं कुम्भं अस्त्रमन्त्रेण प्रक्षाल्य चन्दनागुरुकर्पूरैर्धूपयित्वा त्रिगुणतन्तुना संवेष्ट्य कुम्भं संपूज्य तत्र विष्टराञ्चतं नवरत्नानि च प्रक्षिप्य प्रणवमुच्चरन् कुम्भपीठयोरैक्यं विभाव्य पीठे स्थापयेत् । कुम्भे प्रादक्षिण्येन सूर्य्यस्य द्वादशकला विन्यस्य सम्पूजयेत् । ततः क्षीरिद्रुमकषायेण पलाशत्वग्भवेन वा तीर्थजलैर्व्वा सुवासितजलैर्व्वा आत्माभेदेन मातृका मन्त्रञ्च प्रतिलोमतो जपन् पूरयेत् कुम्भं देवताधिया । ततश्चन्द्रस्यामृतादिषोडशकला जले प्रादक्षिण्येन विचिन्त्य मन्त्रेण संपूज्य शङ्खान्तरं क्षीरिद्रुमकषायादिद्रव्येणापूर्य्य गन्धाष्टकं विलोड्य तस्मिन् जले सकलाः कलाः आवाह्य पूजयेत् । तत्रादौ वह्नेर्दशकलाः पूजयेत् । ततो मूलमन्त्रं प्रतिलोमेन जपन् मन्त्रस्य देवतां मनसा ध्यायन् आसां प्राणप्रतिष्ठां कृत्वा गन्धादिभिः पूजयेत् । ततः प्रत्येकेन पूजयेत् । ततः सूर्य्यस्य तपिन्यादिद्वादशकलाः आवाहनादिकं कृत्वा सम्पूज्य प्रत्येकं पूजयेत् । ततश्चन्द्रस्यामृतादिषोडशकला प्राणप्रतिष्ठादिकं कृत्वा सम्पूज्य प्रत्येकेन पूजयेत् । ततः पञ्चाशत्कलाः पूजयेत् । यथा सृष्ट्यादिकवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा पूर्व्ववत् संपूज्य प्रत्येकेन पूजयेत् । ततो जरादिटतवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा सम्पूज्य प्रत्येकेन पूजयेत् । ततस्तीक्ष्णादिपयवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा सम्पूज्य प्रत्येकेन पूजयेत् । ततः पीतादिषवर्गपञ्चकलाः (ष-स-ह-क्ष) प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततो निवृत्त्यादिस्वरवर्गषोडशकला प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् । शक्तश्चेत् प्रत्येकमावाह्य पाद्यादिभिः पूजयेत् ।

ततः कषात्मकं तत्शङ्खस्य क्वाथ कुम्भे निःक्षिपेत्। ततोऽश्वत्थपनसचूतपल्लवैरिन्द्रवल्लीवेष्टिते कल्पवृक्षबुद्ध्या कुम्भवक्त्रं पिधाय तस्मिन् वक्त्रे सफलाक्षत चषकं कल्पवृक्षफलबुद्ध्या स्थापयेत्। तत कुम्भ निर्म्मलेन क्षौमयुग्मेन सवेष्ट्य मूलेन कुम्भे मूर्त्तिं सङ्कल्प्य यथोक्तरूपेण देवता ध्यात्वा तस्यामावाहनादिक कृत्वा पूजयेत्। देवताङ्गे षडङ्गन्यास कृत्वा धेनुमुद्रापरमीकरणमुद्रे प्रदर्श्य प्राणप्रतिष्ठा कृत्वा षोडशोपचारादिभिः पूजयेत्। ततोऽष्टोत्तर सहस्र शत वा सजप्य जप समर्पयेत्। ततो मन्त्रस्य दशसंस्कारान् कृत्वा गुरु शिष्यमानीय मन्त्रेण शिष्यनेत्र वस्त्रेणाच्छाद्य शिष्याञ्जलि पुष्पै पूरयित्वा गुरु स्वयमेव मन्त्र जपन् कलसे देवताप्रीत्यै क्षिपेत्। ततो नेत्रबन्धन दूरीकृत्य दर्भास्तरे आसीन शिष्य स्वकृतपूजाक्रमाद्भूतशुद्ध्यादिक विधाय तत्तन्मन्त्रोक्तन्यासान् शिष्यस्य देहे कुर्य्यात्। कुम्भस्था देवता पुन पञ्चोपचारै सपूज्यालङ्कृत शिष्यमन्यस्मिन्नुपवेशयेत्। ततो मङ्गलाचारपूर्व्वक तत्कुम्भ समुद्धृत्य तन्मुखस्थान् सुरद्रुमरूपान् पल्लवान् शिष्यशिरसि निधाय मातृका मनसा जपन् मूलेन साधितैस्तोयैर्वशिष्ठसहितोक्ताभिषेकमन्त्रैस्तमभिषिञ्चेत्। शिष्योऽवशिष्टजलेनाचम्य वाससी परिधाय गुरो सन्निधावुपविशेत्। ततस्तामेव गुरुरात्मनो देवता शिष्यसङ्क्रान्ता तयोरैक्य विभाव्य गन्धादिभि पूजयेत्। ततो मन्त्रेण शिष्यस्य शिखा बद्ध्वा सरक्ष्य शिष्यशरीरे कलान्यास कुर्य्यात्। तत शिष्यशिरसि हस्त दत्त्वा अष्टोत्तरशत जप्त्वा अमुकमन्त्र तेऽह ददामीति शिष्यहस्ते जल दद्यात्। ददस्वेति शिष्यो ब्रूयात्। तत ऋष्यादियुक्त मन्त्र गुरुर्द्विजातीना दक्षिणकर्णे त्रि श्रावयेत् वामे सकृत्। स्त्रीशूद्राणा वामकर्णे त्रि श्रावयेत् दक्षिणे सकृत्। तत शिष्यो गुरुचरणे पतित एव तिष्ठेत्। ततो गुरुर्म्मन्त्रेण तमुत्थापयेत्। तत शिष्यो लब्धमन्त्रं अष्टोत्तरशत जपेत्। तत शिष्यः कुशतिलजलान्यादाय गुरवे दक्षिणा सुवर्णं काञ्चन वा दद्यात्। दीक्षाग्रहणसामग्रीश्च निवेदयेत्। अन्यांश्च ब्राह्मणान् परितोषयेत्। गुरु स्वशक्तिरक्षणार्थाय अष्टाधिक सहस्र शत वा मन्त्र जपेत्। ततः शिष्यो मिष्टान्नपानादिना ब्राह्मणान् परितोष्य स्वय भुञ्जीत। दीक्षादिवसे गुरुशिष्ययोरुपवासे दोष। इति तन्त्रसारोक्ता कलावतीदीक्षा समाप्ता ॥

कलाविकः, पु, (कल आविकायति विशेषेण रौतीति कल + आ + वि + कै + क।) कुक्कुट। इति त्रिकाण्डशेष ॥

कलाविकलः, पु, (कल मधुराव्यक्त आविकल रवो यस्य स। यद्वा कलया कामावेशेन विकल चञ्चलः।) चटक। इति शब्दरत्नावली ॥

कलाहक, पु, (कलमाहन्तीति। कल + आ + हन् + डः। सज्ञाया कन्।) काहलवाद्यम्। इति शब्दरत्नावली ॥

कलि, पु, (कलते कलेराश्रयत्वेन वर्त्तते इति। कल + "सर्व्वधातुभ्य इन्"। उणा ४। ११७। इति इन्।) विभीतकवृक्ष। (विभीतकस्य कलिद्रुमत्वकारणमुक्त यथा, वामने २७ अध्याये।

"इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्यय'।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवन ययौ" ॥

अस्य गुणादिक विभीतकशब्दे द्रष्टव्यम् ॥ * ॥ कलते स्पर्द्धते इति कल + "सर्व्वधातुभ्य इन्"। उणा-४।११७। इति इन्।) शूर। (कलन्ते स्पर्द्धमाना भाषन्तेऽस्मिन्निति। कल + "सर्व्वधातुभ्य इन्"। उणा ४। ११७। इति इन्।) विवाद'। (यथा, भागवते ९। ६। ४४।

"तासा कलिरभूद्भूयास्तदर्थेऽपोह्य सौहृदम्।
समानुरूपो नाय व इति तद्गतचेतसान्" ।)

युद्धम्। (कल्यते पापेषु निक्षिप्यते अनेन यद्वा कलयति पापेन जडयति कलुषित करोति। कल + इन्।) अन्त्ययुगम्। इति हेमचन्द्र ॥

तस्योत्पत्तिर्यथा।

"प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामह।
ससर्ज्ज घोर मलिन पृष्ठदेशात् सपातकम् ॥
सचाधर्म्म इति ख्यातस्तस्य वशानुकीर्त्तनात्।
श्रवणात् स्मरणाल्लोक सर्व्वपापै प्रमुच्यते ॥
अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना।
तस्या पुत्त्रोऽतितेजस्वी दम्भ परमकोपन ॥
स मायाया भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम्।
निकृति जनयामास तयो क्रोध सुतोऽभवत् ॥
स हिंसाया भगिन्यान्तु जनयामास तत्कलिम्।
वामहस्तधृतोपस्थ तैलाभ्यक्ताञ्जनप्रभम् ॥
काकोदर करालास्य लोलजिह्व भयानकम्।
पूतिगन्ध द्यूतमद्यस्त्रीसुवर्णकृताश्रयम् ॥
भगिन्यान्तु दुरुक्त्या स भय पुत्त्रञ्च कन्यकाम्।
मृत्युं सजनयामास तयोश्च निरयोऽभवत् ॥
यातनाया भगिन्यान्तु लोभपुत्त्रायुतायुतम्।
इत्थ कलिकुले जाता बहवो धर्म्मनिन्दका" ॥

इति कल्किपुराणे १ अध्याय ॥ * ॥

कलिधर्म्मो यथा।

"यदा सदानृत तन्द्रानिद्रा हिंसा विषादनम्।
शोकमोहभय दैन्य स कलिस्तु तदा स्मृत ॥
यस्मिन् जना कामिन स्यु शश्वत्कटुकभाषिण।
दस्युकृष्टा जनपदा वेदा पाषण्डदूषिता ॥
राजानश्च प्रजाभक्षा शिश्नोदरपरा द्विजा।
अव्रता वटवो ऽशौचा भिक्षवश्च कुटुम्बिन ॥
तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपा।
ह्रस्वकाया महाहारास्चौर्य्यमायोरुसाहसा ॥
त्यक्ष्यन्ति भृत्याश्च पति तापसास्त्वखिल व्रत।
शूद्रा प्रतिग्रहीष्यन्ति तपोवेशोपजीविन ॥
उद्विग्नाश्चानलङ्कारा पिशाचसदृशा प्रजा।
अस्नातभोजनेनाग्निदेवतातिथिपूजनम् ॥
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्।
स्त्रीपराश्च जना सर्व्वे शूद्रप्रायाश्च शौनक ॥
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रिय।
शिर'कण्डूयनपरा आज्ञा भेत्स्यन्ति सत्पते ॥
विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जना ॥
कलेर्द्दोषनिधेर्विप्र अस्ति ह्येको महान् गुण।
कीर्त्तनादेव कृष्णस्य मुक्तबन्ध पर व्रजेत् ॥
कृते यद्ध्यायतो विष्णुं त्रेताया यजत फलम्।
द्वापरे परिचर्य्याया कलौ तद्धरिकीर्त्तनात् ॥
तस्माद्ध्येयो हरिर्नित्य ध्येय पूज्यश्च शौनक" ॥

इति गारुडे युगधर्म्मे २२७ अध्याय' ॥

(माघिपूर्णिमाया शुक्रवारे कलियुगोत्पत्तिः।) तद्युगमानम्। द्वात्रिंशत्सहस्राधिकचतुर्लक्षवत्सरा (४३२०००)।

(आर्य्यभट्टमते ऽस्य १५७७९१७५० दिवसाः।
सूर्य्यसिद्धान्तमते १५७७९१७८२। ४८दिवसा'।
ज्योतिषसैद्धान्तिकमते च १५७७९१७८२ दिवसा।
अतो वर्षमानमार्य्यभट्टमते ३६५। १५। ३१। १५। दिवसा।
सूर्य्यसिद्धान्तमते ३६५।१५।३१।३१।२४। दिवसाः।
ज्योतिषसैद्धान्तिकमते च ३६५। १५। ३१। ३० दिवसा।)

तस्यातीताब्दा १८०९ शाकपर्य्यन्त ४९८८ ॥

(कलेस्त्रिपञ्चाशदधिकषट्शतमितेषु (६५३) वत्सरेषु गतेषु युधिष्ठिरादयो जाता। यदुक्त राजतरङ्गिण्या १। ५१।

"शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवा" ॥

ऋतुपञ्चशरद्विमितेषु (२५२६) युधिष्ठिराब्देषु कलेर्ग्रहसिन्धिन्दुनेत्रमितेषु (३१७९) वत्सरेषु गतेषु च महाविषुवसङ्क्रान्त्या शालिवाहनस्य राज्ञो जन्मदिनमारभ्य शकाब्द' प्रवर्त्तित। यदुक्त तत्रैव १। ५६।

"आसन् मघासु मुनय शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड् द्विपञ्चद्वियुत' शककालस्तस्य राज्यस्य" ॥ अयन्तु महाविषुवसङ्क्रान्तिमधिगम्य परिगणितो भवति ॥

कलेश्चतुश्चत्वारिंशदधिकत्रिसहस्रपरिमितेषु (३०४४) वत्सरेषु गतेषु चैत्रशुक्लप्रतिपदि उज्जयिनीपतेर्विक्रमादित्यस्य राज्यप्राप्तिकालमारभ्य सवत् इत्याख्यया प्रसिद्धो वत्सर' प्रचलित। अयन्तु चैत्रशुक्लप्रतिपत्तिथिमधिगम्य परिगणितो भवति ॥

कलेरेकोर्द्ध्वशताधिकत्रिसहस्रपरिमितेषु (३१०१) वत्सरेषु गतेषु प्रायशो सौरपौषस्य अष्टादशदिवसे यीशुख्रीष्टीयाब्द प्रचलित ॥

पञ्चनवत्यूर्द्ध्वषट्शताधिकत्रिसहस्रपरिमितेषु (३६९५) कलेरतीताब्देषु सप्तदशाधिकपञ्चशतमिते (५१७) च शकाब्दे प्रचलति भाद्रशुक्लद्वादश्या उत्कलदेशप्रचलितः विलायति इत्याख्यया प्रसिद्धो वत्सर प्रवर्त्तितः। अयन्तु भाद्रशुक्लद्वादशीमधिगम्य परिगणितो भवति ॥

त्रयोविंशत्यूर्द्ध्वसप्तशताधिकत्रिसहस्रपरिमितेषु (३७२३) कलेरतीताब्देषु पञ्चचत्वारिंशदधिकपञ्चशतमिते (५४५) च शकाब्दे प्रचलति ज्येष्ठस्य विंशतितमदिवसीय शुक्रवारात् महम्मदस्य मक्का

प्रस्थानकालमारभ्य "हिजरि" इति प्रसिद्धो हायनः प्रचलितः। अयन्तु चान्द्रमानेन परिगणितो भवति। अतः प्रायशः सौरसप्तनवतितमवर्षैरस्य शततमा वत्सरा भवेयुः॥

पञ्चाशीत्यूर्द्ध्वपञ्चशताधिकचतुःसहस्रपरिमितेषु कलेरतीताब्देषु (४५८५) सप्ताधिकचतुर्द्दशशतपरिमिते (१४०७) च शकाब्दे प्रचरति फाल्गुनीयोनविंशदिवसे शुक्रवारे पूर्णिमायां भगवांश्चैतन्यदेवः प्रादुर्बभूव। अस्य जन्मदिनमारभ्य चैतन्याब्दः प्रचलितः॥)

अस्मिन् युगे धर्म्मः एकपादः। अधर्म्मस्त्रिपादः। आयुः शतवर्षाणि। अवतारः श्रीकृष्णः। तद्युगशेषे पापिनां विनाशाय भगवद्दशमावतारः कल्किर्भविष्यति। तद्युगधर्म्मो यथा।

"कलौ तु धर्म्मपादानां तूर्य्यांशोऽधर्म्महेतुभिः।
एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति॥
तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः।
दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः"॥
"यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम्।
शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः॥
यस्मात् क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः।
कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः॥
दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः।
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः॥
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः।
तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः॥
ह्रस्वकाया महाहारा बह्वपत्या गतह्रियः।
शश्वत्कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः॥
पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः।
अनापद्यपि मंस्यन्ते वार्त्तां साधुजुगुप्सिताम्॥
पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम्।
भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः॥
पितॄन् भ्रातॄन् सुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः।
ननान्दृश्यालसम्वादा दीनाः स्त्रैणाः कलौ नराः॥
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः।
धर्म्मं वक्ष्यन्त्यधर्म्मज्ञा अधिरुह्योत्तमासनम्॥
नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्षिताः।
निरन्ने भूतले राजन्ननावृष्टिभयातुराः॥
वासोऽन्नपानशयनव्यवायस्नानभूषणैः।
हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः॥
कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः।
त्यक्ष्यन्ति हि प्रियान् प्राणान् हनिष्यन्ति स्वकानपि॥
न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि।
पुत्त्रान् भार्य्याश्च कुलजाः क्षुद्राः शिश्नोदरम्भराः॥
कलौ न राजन् जगतां परं गुरुं
त्रिलोकनाथानतपादपङ्कजम्।
प्रायेण मर्त्त्या भगवन्तमच्युतं
यक्ष्यन्ति पाषण्डविभिन्नचेतसः"॥ *॥

कलिकृतदोषविनाशोपायः। यथा,

"यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वा विवशो गृणन् पुमान्।
विमुक्तकर्म्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः॥
पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान्।
सर्व्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः॥
श्रुतः संकीर्त्तितो ध्यातः पूजितश्चादृतोऽपि वा।
नृणां क्षिणोति भगवान् हृत्स्थो जन्मायुताशुभम्॥
यथा हेम्नि स्थितो वह्निर्दुर्व्वर्णं हन्ति धातुजम्।
एवमात्मगतो विष्णुर्योगिनामशुभाशयम्॥
विद्यातपःप्राणनिरोधमैत्री-
तीर्थाभिषेकव्रतदानजप्यैः।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा
यथा हृदिस्थे भगवत्यनन्ते॥
तस्मात् सर्व्वात्मना राजन् हृदिस्थं कुरु केशवम्।
म्रियमाणो ह्यवहितस्ततो यासि परां गतिम्"॥
"कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्"॥

इति श्रीभागवते महापुराणे १२। ३ अध्यायः॥ *॥

तद्युगशेषधर्म्मा यथोक्तास्तत्रैव १२।१।३६ ४७।

"सौराष्ट्रावन्त्याभीराश्च शूरा अर्व्वुदमालवाः।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः॥
सिन्धोस्तटं चन्द्रभागां कान्तीं काश्मीरमण्डलम्।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्च्चसः॥
तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः।
एतेऽधर्म्मानृतपराः फल्गुदास्तीव्रमन्यवः॥
स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः।
उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः॥
असंस्कृताः क्रियाहीना रजसा तमसा वृताः।
प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः॥
तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः।
अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः"॥

तत्रैव १२।२।१-१६।

"ततश्चानुदिनं धर्म्मः सत्यं शौचं क्षमा दया।
कालेन बलिना राजन् नंक्ष्यत्यायुर्ब्बलं स्मृतिः॥
वित्तमेव कलौ नॄणां जन्माचारगुणोदयः।
धर्म्मन्यायव्यवस्थायां कारणं बलमेव हि॥
दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यवहारिके।
स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि॥
लिङ्गमेवाश्रमख्यातावन्योन्यापत्तिकारणम्।
अवृत्त्या न्यायदौर्ब्बल्यं पाण्डित्ये चापलं वचः॥
अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव हि।
स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम्॥
दूरे वार्य्ययनं तीर्थं लावण्ये केशधारणम्।
उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि॥
दाक्ष्ये कुटुम्बभरणं यशोऽर्थे धर्म्मसेवनम्।
एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले।
ब्रह्मविट्क्षत्त्रशूद्राणां यो बली भविता नृपः॥
प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्म्मभिः।
आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम्॥
शाकमूलामिषक्षौद्रफलपुष्पास्थिभोजनाः।
अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः॥
शीतवातातपप्रावृड्हिमैरन्योऽन्यतः प्रजाः।
क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया॥
त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम्॥
क्षीयमाणेषु देहेषु देहिनां कलिदोषतः।
वर्णाश्रमवतां धर्म्मे नष्टे वेदपथे नृणाम्॥
पाषण्डप्रचुरे धर्म्मे दस्युप्रायेषु राजसु।
चौर्य्यानृतवृथाहिंसानानावृत्तिषु वै नृषु॥
शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु।
गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु॥
अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु।
विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु॥
इत्थं कलौ गतप्राये जनेषु खरधर्म्मिषु।
धर्म्मत्राणाय सत्त्वेन भगवानवतरिष्यति"॥

(देवगन्धर्व्वविशेषः। स तु कश्यपात् दक्षकन्यायां मुनौ जातः। यथा, महाभारते १।६५।४४।

"तथा शालिशिरा राजन् पर्ज्जन्यश्च चतुर्द्दशः।
कलिः पञ्चदशस्तेषां नारदश्चैव षोडशः"॥

शिवः। यथा महाभारते।१३।१७।७८।

"दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः"॥)

कलिः, स्त्री, (कलयति ईषत्प्रकाशते उद्भिद्यते वा कल् + ततः इन्।) कलिका। इति मेदिनी॥

कलिकः, पुं, (कलो मन्द्रगम्भीरध्वनिरस्यास्ति। कल + मत्वर्थे ठन्।) क्रौञ्चपक्षी। इति शब्दरत्नावली॥

कलिका, स्त्री, (कलिरेव। स्वार्थे कन् टाप् च।) अस्फुटितपुष्पम्। तत्पर्य्यायः। कोरकः २। इत्यमरः।२।४।१६॥ कलिः ३ कली ४। कोरकम्। ५ इति तट्टीका॥ (यथा, साहित्यदर्पणे ३। १९८।

"मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः"॥)

वीणामूलम्। इति हेमचन्द्रः॥ पदसन्ततियुक्तरचनाविशेषः। तद्विवरणम् यथा,—

'स्युर्म्महाकलिकारम्भे श्लोकास्तु युगशः स्मृताः।
अन्यासां कलिकानान्तु भवन्त्येकैकशो हि ते॥
पूर्त्तौ द्वौ कलिकाभिस्तु विरुदास्तुल्यसङ्ख्यकाः"॥ *॥

कलिकालक्षणम्।

"कला नाम भवेत्तालनियता पदसन्ततिः।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः॥
कलिका चण्डवृत्ताख्या द्विगादिगणवृत्तका।
तथा त्रिभङ्गी वृत्ताख्या मध्या मिश्रा च केवला"॥

चण्डवृत्ते दशधा संयुक्तवर्णाः।

"अत्र संयुक्तवर्णानां नियमो दशधा च ते।
मधुरः श्लिष्टविश्लिष्टशिथिलक्कादिनस्त्वमी॥
भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दर्श्यन्ते स्फुटं यथा।
ह्रस्वान्मधुरसंयोगाः शङ्करांशुशकिङ्कराः॥
तस्मात्तु श्लिष्टसंयुक्ता दर्पकर्परसर्पवत्।
ततो विश्लिष्टसंयुक्ता भक्तकल्याणचित्सुखः॥
तथा शिथिलसंयुक्ताः पश्य कश्यप वश्यवत्।
प्रोक्ताः क्कादियुता मह्यं सह्यं गुह्यं प्रसह्यवत्॥
गर्हादीन् क्कादिसंयुक्तभेदान् केचित् समूचिरे।
दीर्घात्तु क्कादिकार्पासं वाल्यं वैश्यस्य वाह्यताम्"॥

कलापरिमाणमुक्तम्।

"अधिकाश्चेच्चतुःषष्टिर्न्यूना द्वादश ता कलाः।
एताभ्यो नाधिकाः कार्य्या न्यूनाश्चापि न पण्डितैः"॥

तत्र तावच्चण्डवृत्तकलिका द्विधा। नखो विशिखश्चेति भेदात्। तत्र रणादि-विंशतिभेदस्य नखस्येह वर्द्धितादयो नव भेदा गृहीताः।

"वर्द्धितं वीरभद्रश्च समग्रोऽच्युत उत्पलम्।
तुरङ्गः श्रीगुणरतिस्तथा मातङ्गखेलितम्।
तिलकश्चेति कलिका नखस्येहोदिता नव"॥ इत्युक्ते॥

अथ विशिखः। पद्मकुन्दचम्पकवञ्जुलभेदात् पञ्चविधः। तेष्वादिमं पद्मं पङ्केरुहसितकञ्जपाण्डूत्पलेन्दीवरारुणाम्भोरुहकह्लारभेदात् षड्विधम्। अन्तिमं वकुलन्तु भासुरमङ्गलभेदात् द्विविधमित्येकादशभेदो विशिखः।

"पङ्केरुहं सितकञ्जं तथा पाण्डूत्पलं परम्।
इन्दीवरारुणाम्भोजे कह्लारश्चेति षड्विधम्॥
इत्थं भेदेन कथितं पद्ममेव मनीषिभिः।
चम्पकं वञ्जुलं कुन्दं वकुलं द्विविधं तथा"॥

इति पञ्चविधस्यापि विशिखस्येशसङ्ख्यका इत्युक्ते। एवं चण्डवृत्तकलिका विंशतिधा गृहीता॥ *॥

अथ पञ्चधा दिगादिगणवृत्तकाककलिका मञ्जरीत्यभिहिता क्रमात् कोरकगुच्छकसफुल्लकुसुमगन्धाख्या। तस्याश्चात्र कोरकगुच्छकुसुमानि गृहीतानि। कोरको गुच्छकुसुमैर्मञ्जरी त्रिविधात्र त्वित्युक्ते। त्रिभङ्गी कलिका तु शिखरिण्यादिपूर्व्वा सोढा। तस्याश्चात्र दण्डकपूर्वा विदग्धपूर्व्वा च गृहीता। दण्डकाख्या विदग्धाख्या त्रिभङ्गीह द्विधा मतेत्युक्ते॥ *॥ अथ मिश्रकलिका तु कलिकागद्यसपृक्ता सप्तविभक्तिका वा। अच्युतमयी सर्व्वलघ्वी चेति द्विभेदा केवला चेत्यष्टौ। तदेव षड्भ्यो महाकलिकाभ्यो ऽष्टाविंशतिरिह कलिका गृहीता। रणादय एकादश नखभेदाः। सफुल्लगन्धौ मञ्जरीभेदौ। शिखरिण्यादयः त्रिभङ्गीभेदा मध्यकलिका च त्यक्ताश्चाखताधिक्यविरहात्। इति रूपगोस्वामिकृतगोविन्दविरुदावलीभाष्ये बलदेवविद्याभूषणः॥ (छन्दोभेदः। यदुक्तं वृत्तरत्नाकरे ४ अध्याये।

"प्रथममपरचरणसमुत्थ
अयति स यदि लघ्व।
इतरदितरगदितमपि यदि च तूर्य्यम्
चरणयुगलकमविकृतमपरमिति कलिका सा"॥

कला। यथोक्तं सिद्धान्तशिरोमणौ।

"तन्यन्ते कलिका यस्मात्तस्मात्तास्तिथयः स्मृताः"॥)

कलिकापूर्व्व, क्ली, (कलिकया अंशेन जन्य अपूर्व्वमदृष्टम्।) अङ्गप्रधानान्यतरबङ्कर्म्मसाध्यस्वर्गादिफलजनकापूर्व्वोत्पत्तौ तत्तत्प्रत्येककर्म्मजन्यमदृष्टम्। इति स्मृतिः॥

कलिकार, पु, (कलि चिचिकुचीतिशब्देन कलहं करोतीति। कलि+कृ+अण्।) धूम्याटपक्षी। पीतमस्तकपक्षी। (कलिं स्वदेहस्थकण्टकैरनिष्टं करोतीति।) पूतिकरञ्जः। इति मेदिनी॥

कलिकारक, पु, (कलिं कण्टकैरनिष्टं करोति। कलि+कृ+णिच्+ण्वुल्।) पूतिकरञ्जः। काँटाकरञ्ज नाटाकरञ्ज इति च भाषा। इत्यमरः। २। ४। ४८॥ (कलिं कलहं कारयति। कलि+कृ+णिच्+ण्वुल्।) नारदमुनिः। इति हेमचन्द्रः॥

कलिकारी, स्त्री, (कलिं गर्भपाताद्यनिष्टं करोतीति। कलि+कृ+अण्। जातित्वात् ङीष्।) उपविषभेदः। विषलाङ्गलीया इति भाषा। तत्पर्य्यायः। लाङ्गली २ हलिनी ३ गर्भपातनी ४ दीप्ता ५ विशल्या ६ अग्निमुखी ७ हली ८ नक्ता ९ इन्द्रपुष्पिका १० विद्युज्ज्वाला ११ अग्निजिह्वा १२ व्रणहृत् १३ पुष्पसौरभा १४ स्वर्णपुष्पा १५ वह्निशिखा १६। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वम्। गर्भान्तःशल्यनिष्कामकारित्वम्। सरसारित्वञ्च। इति राजनिर्घण्टः॥

कलिङ्ग, क्ली, (कलि+गम्+ड। निपातनात् साधुः।) इन्द्रयवम्॥ इत्यमरः। २। ४। ६७॥

कलिङ्ग, पु, (कलिं मूलिगन्धादिकं गच्छति प्राप्नोति कलि+गम्+ड। निपातनात् साधुः।) पूतिकरञ्जवृक्षः। (के मस्तके लिङ्गं पीतादिचिह्नमस्य।) धूम्याटपक्षी। देशविशेषः। इति हेमचन्द्रः॥ (स्वनामख्यातो नृपतिविशेषः। अस्य नामानुसारेणैव कलिङ्ग इति देशाख्या जाता। यदुक्तं महाभारते। १। १०४। ४९,५०।

"अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि॥
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः"॥)

मेदिनीमते जनपदार्थे पु भूम्नि। (यदुक्तं तत्रैव गन्तिके ३३।

"कलिङ्गः पूतिकरजे धूम्याटे भूम्नि नीवृति"॥

अस्य प्रमाणं यथा, गौ रामायणे। ४। ४०, २१।

"तत्र प्रकपुलिन्दांश्च कलिङ्गांश्चैव मार्गत"॥

तद्देशवासिमानवादयः। यथा, महाभारते। ३। ११४। ३।

"ततः समुद्रतीरेण जगाम वसुधाधिप।
भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत"॥)

कुटजवृक्षः। (अस्य पर्य्यायो यथा भावप्रकाशे पूर्व्वखण्डे १ भागे।

"उक्तं कुटजवीजन्तु यवमिन्द्रयवन्तथा।
कलिङ्गश्चापि कालिङ्गं तथा भद्रयवा अपि"॥

इन्द्रयवशब्देऽस्य गुणावली ज्ञेया॥

व्यवहारो यत्र तद्यथा।

"विल्वं कागपयः सिद्धं सितामोचरसान्वितम्।
कलिङ्गचूर्णसंयुक्तं रक्तातीसारनाशनम्"॥

इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥) शिरीषवृक्षः। प्लक्षवृक्षः। इति राजनिर्घण्टः॥

कलिङ्गक, पु, (कलिङ्ग+संज्ञायां कन्। कलिङ्ग इव कायति वा। कै+क।) इन्द्रयवम्। इति रत्नमाला॥ (यथा, वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।

"कलिङ्गकाः पटोलस्य पाठा कटुकरोहिणी"॥)

कलिङ्गा, स्त्री, (कं सुखं लिङ्गतीति। क+लिङ्ग+अच् टाप्।) नितम्बिनी। महिला। इति मेदिनीकरहेमचन्द्रौ॥ त्रिवृत्। इति शब्दचन्द्रिका। तेउडि इति भाषा॥

कलिञ्जः, पु, (कं वातं लञ्जति तिरस्करोति रोधनेनेति यावत्। क+लजि भर्त्सने+"कर्म्मण्यण्" ३। २। १। इति अण्। निपातनात् साधुः।) कटः। इति हेमचन्द्रः॥ चाँच् दरमा इत्यादि भाषा॥

कलित, त्रि, (कल्+कर्म्मणि क्त।) विदितम्। आप्तम्। इति मेदिनी॥ भेदितम्। गणितम्। इति शब्दरत्नावली॥ धृतम्। यथा,—

"करकलितकपालः कुण्डली दण्डपाणिः"। इति भैरवध्यानम्॥

(प्राप्तः। यथा आर्य्यासप्तशती ३५५।

"विशिख इव कलितकर्णः प्रविशति हृदयं न निःसरति"॥ भावे+क्त। ज्ञानम्॥)

कलिद्रुम, पु, (कलिना आश्रितो द्रुमः शाकपार्थिवादिवत् मध्यपदलोपः।) विभीतकवृक्षः। इत्यमरः। २। ४। ५८। वयडा इति भाषा॥ (अस्य पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे। १ भागे।

"विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु सः।
कलिद्रुमो भूतवासस्तथा कलियुगालयः"॥

विशेषविवरणमस्य विभीतकशब्दे ज्ञेयम्।)

कलिन्द, पु, (कलिं ददाति द्यति वा खच् मुम् च।) विभीतकवृक्षः। इति राजनिर्घण्टः॥ (विभीतकशब्देऽस्य विशेषो ज्ञातव्यः॥) सूर्य्यः। पर्व्वतविशेषः। यस्मात् यमुना निर्गता। इति कालिन्दीशब्दव्युत्पत्तौ भरतः॥ (यथा रघुः ६। ४८।

"कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥)

कलिन्दकन्या, स्त्री, (कलिन्दस्य पर्व्वतविशेषस्य कन्या तदुत्पन्नत्वात्।) यमुनानदी। इति राजनिर्घण्टः॥

("कलिन्दकन्यामथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥

इति रघुः। ६। ४८॥)

कलिन्दनन्दिनी, स्त्री, (कलिन्दं नन्दयति। कलिन्द+नन्द+णिनि ङीप् च। कलिन्दस्य नन्दिनी वा।) यमुनानदी। इति शब्दरत्नावली॥

कलिप्रिय, पु, (कलिः कलहः प्रियो यस्य।) नारदमुनिः। यथा। "कलिप्रियस्य प्रियशिष्यवर्गः"। इति रघुः॥ (कलेः प्रियः। दुष्टप्रकृतिकः।) वानरः। इति शब्दरत्नावली॥

कलिमारक, पुं, (कलीनां कलिकानां मारा यत्र। तस्य रः कप् संज्ञायां कन् वा। यद्वा कलिना स्वदेहस्थकण्टकाघातदुःखेन मारयतीति। कलि+मृ+णिच्+ण्वुल्।) कलिकारकः। इत्यमरटीकायां रमानाथः। २। ४। ४८॥

कलिमालकः, पुं, (कलीनां माला यत्र। कप् कलिना मारयति वा रस्य लः।) कलिकारकः। इति स्वामी इत्यमरटीकायां भरतः॥

कलिमाल्य, पुं, (कलीनां माल्यं यत्र।) पूतिकरञ्जः। इति राजनिर्घण्टः॥

र्मं, स्त्री, (कलिरेव युगम्। अग्ने' शिखा राहोः र इति वत् कलेर्युगं वा।) चतुर्थं युगम्। (यथा तु। १। ८५।
अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः'' ॥)
ष्योत्पत्त्यादि यथा। माघीपूर्णिमायां शुक्रवारे लियुगोत्पत्तिः। तत्र अवतारः कल्किः। पुण्य कपादम्॥ पापं त्रिपादम्। गङ्गा तीर्थम्। ज्ञयो निरमि'। अन्नगताः प्राणाः। सार्द्ध-हस्तपरिमितो मनुष्यदेहः। अष्टाधिकशत-र्षं परमायुः। भोजनपात्रस्य नियमो नास्ति। इति कलियुगस्य लक्षणम्॥ कलियुगाब्दाः ४३२००००। आदौ कलिराजा धर्म्मपुत्त्रो युधि-ष्ठिरः। हरिश्चन्द्र मुनिश्चन्द्र तेजशेखरः विक्र-मादित्यः विक्रमसेन लाउसेन बल्लालसेन देव-पाल भूपालः महीपालः। एते राजचक्रवर्त्तिनः॥
तन्माहात्म्यं यथा,—
धर्म्मः सङ्कुचितस्तपो विरहितं सत्यञ्च दूरं गतम्।
पीडा धर्म्महता दिशास्त्वक्षुभिता नारीवशा मानवाः'॥
तत्र तारकब्रह्मनाम।
''हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
हरे राम हरे राम राम राम हरे हरे''॥
इति केचित्॥
कलियुगाद्या, स्त्री, (कलियुगस्य आद्या आद्यतिथिः।) माघीपौर्णमासी। तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम्॥
कलिलं, त्रि, (कल्यते मिश्र्यते इति। ''सलिकलि'' उणा १। ५५। इति इलच्।) गहनम्। इत्यमरः। १। १। ८५॥ (यथा गीतायाम् २। ५२।
''यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति'' ॥)
मिश्रः। इत्युणादिकोषः॥ (यथा भागवते ६। २। ४६।
''न यत्पुनः कर्म्मसु सज्जते मनो
रजस्तमोभ्यां कलिलं ततोऽन्यथा'' ॥)
कलिवृक्षः, पु, (कलेराश्रयरूपो वृक्षः।) कलिद्रुमः। वहेड़कवृक्षः। इति हेमचन्द्रः॥
कली, स्त्री, (कल्+''सर्व्वधातुभ्य इन्'' ततो वा ङीप्।) कलिका। इत्यमरटीकायां भरतः॥
कलुषं, क्ली, (कं सुखं लुषति छिनत्ति। क+लुष्+कः। यद्वा कल्+''पृनहिकलिभ्य उषच्''। उणां ४। ७५। इति उषच्।) पापम्। इत्यमरः। १। ४। २८॥ (यथा शङ्कराचार्य्यकृतात्मबोधे ५।
''अज्ञानकलुषं जीवं ज्ञानाभ्यासादिनिर्म्मलम्।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्'' ॥
मालिन्यं यथा ऋतुसंहारे। ३। २३।
''विगतकलुषमम्भः श्यामशष्पा धरित्री।
विमलकिरणचन्द्रं व्योम ताराविचित्रम्'' ॥)
कलुषः, पु स्त्री, (कस्य जलस्य लुषः हिंसकः। आ-विलकारक इत्यर्थः। क+लुष्+क।) महिषः। इति राजनिर्घण्टः॥ (त्रि, यथा शकुन्तलायां ''कण्ठः स्तम्भितवाष्पवृत्तिकलुषः''॥ निन्दितः। यथा मनुः १। ५७।
''वर्णापेतमविज्ञातं नरं कलुषयोनिजम्'' ॥)

कलुषः, त्रि, (कल्+उषच्।) अनच्छः। आविलः। इत्यमरः। १। १०। १४॥ (''निर्मुक्तकलुषे नेत्रे'' इति सुश्रुते उत्तरतन्त्रे। ३१ अध्याये॥)
कलेवरं, क्ली, (कले शुक्रे वरं श्रेष्ठं देहोत्पत्तिहेतु-त्वात् पवित्रम्। सप्तम्या अलुक्।) शरीरम्। इत्यमरः। २। ६। ७०॥ (यथा गीतायाम्। ८। ६।
''यं यं वापि स्मरन् देही त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय! सदा तद्भावभावितः'' ॥)
कल्कः, पु क्ली, (कल् गतौ+''कृदाधारार्चि-कलिभ्यः कः''। उणा ३। ४०। इति कः।) घृततैलादिशेषः। (यथा याज्ञवल्क्ये। १। २७७।
''स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्व्वकम्।
गौरसर्षपकल्केन साज्येनोत्सादितस्य च'' ॥)
दम्भः। (यथा महाभारते १। १। २७१।
''तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः।
प्रसह्य वित्ताहरणं न कल्कः
तान्येव भावोपहतानि कल्कः'' ॥)
विभीतकवृक्षः। विष्ठा। किट्टम्। पापम्। इति मेदिनी॥ (यथा भागवते २। २। २४।
''विधूतकल्कोऽथ हरेरुदस्तात्
प्रयाति चक्रं नृप! शैशुमारम्'' ॥
यस्य कस्यचित् वस्तुनो चूर्णम्। यथा कुमारे। ७। ६।
''तां लोध्रकल्केन हृताङ्गतैला-
माश्यानकालेयकृताङ्गरागाम्'' ॥)
कर्णमलः। इति शब्दरत्नावली॥ तुरुष्कनाम-गन्धद्रव्यम्। इति राजनिर्घण्टः॥ घृततैलादि-पाके देयमौषधद्रव्यम्। तत्तु पञ्चकषायान्तर्गत दृषदि पेषितम्। अस्य पूर्णवीर्य्यं याममेकं तिष्ठति। यथा,—
''द्रव्यमात्रं शिलापिष्टं शुष्कं वा जलमिश्रितम्।
तदेव सूरिभिः पूर्व्वैः कल्क इत्यभिधीयते'' ॥
तत्पर्य्यायः। पिष्टः २ विनीयः ३। इति रत्नमाला॥ आवापः ४ प्रक्षेपः ५। इति वैद्यकपरिभाषा॥ (''द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्।
प्रक्षेपावापकल्कास्ते तन्मानं कर्षसम्मितम्॥
इति मध्यखण्डे। ५। १। शार्ङ्गधरेणोक्तम्॥
यस्तु क्षतेषूपयुज्यते सभूयः कल्क इति संज्ञां लभते निरुद्धालेपनसंज्ञस्तेनास्रावसंनिरोधो मृदुता पूतिमांसापकर्षणमन्तर्निर्दोषता व्रणशुद्धिश्च भवति''॥ इति सुश्रुते सूत्रस्थाने। १८ अध्याये॥)
शाठ्यम्। इति मोक्षधर्म्मटीकायां नीलकण्ठः॥
कल्कः, त्रि, (कलयति पापमाचरति। कल्+क।) पापाशयः। पापात्मा। इति मेदिनी॥
कल्कफलः, पु, (कल्कस्य विभीतकस्य फलमिव फलं यस्य अवयवसादृश्यात्।) दाड़िमवृक्षः। इति राजनिर्घण्टः॥ (दाड़िमशब्देऽस्य गुणादयो ज्ञा-तव्याः॥)
कल्कि, पु, (कल्कं पापं हार्य्यतया अस्ति अस्य। कल्क+इन्।) विष्णोर्दशमावतारः। स तु कलिशेषे पापात्मना विनाशाय सम्भलग्रामे

भविष्यति। यथा,—
''सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति'' ॥
तस्य कर्म्म यथा,—
''अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः।
असिनाऽसाधुदमनमष्टैश्वर्य्यगुणान्वितः॥
विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः।
नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति'' ॥
इति श्रीभागवतम्॥ तस्योत्पत्तिर्यथा,—
''स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम्।
तं श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत्॥
सम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभो कन्यायां त्वन्निदेशतः॥
चतुर्भिर्भ्रातृभिर्देव करिष्यामि कलिक्षयम्।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ॥
इयं मम प्रिया लक्ष्मीः सिंहले संभविष्यति।
वृहद्रथस्य भूपस्य कौमुद्यां कमलेक्षणा।
भार्य्यायां मम भार्य्यैषा पद्मा नाम्नी जनिष्यति॥
यात यूयं भुवं देवाः स्वांशावतरणे रताः॥
राजानौ मरुदेवापी स्थापयिष्याम्यहं भुवि।
पुनः कृतयुगं कृत्वा धर्म्मान् संस्थाप्य पूर्व्ववत्।
कलिव्यालं सन्निरस्य प्रयास्ये स्वालयं विभो॥
इत्युदीरितमाकर्ण्य ब्रह्मा देवगणैर्वृतः।
जगाम ब्रह्मसदनं देवाश्च त्रिदिवं ययुः॥
महीमांश्चास्य भगवान् निजजन्मकृतोद्यमः।
सम्भलग्रामविप्रर्षिमाविवेश परात्मकः॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम्।
ग्रहनक्षत्रराश्यादिसेवितश्रीपदाम्बुजम्॥
सरित् समुद्रा गिरयो लोकाः सस्थाणुजङ्गमाः।
सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ॥
बभूव सर्व्वसत्वानामानन्दो विविधाश्रयः।
नृत्यन्ति पितरो हृष्टास्तुष्टा देवा जगुर्यशः॥
चक्रुर्व्वाद्यादि गन्धर्व्वा ननृतुश्चाप्सरोगणाः।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः।
जातो ददृशतुः पुत्त्रं पितरौ हृष्टमानसौ॥
धात्री माता महाषष्ठी नाड़ीच्छेत्त्री तदाम्बिका।
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता॥
तस्य विष्णोरनन्तस्य वसुधाऽदात् पयः सुधाम्।
मातृका माङ्गल्यवचः कृष्णजन्मदिनेऽभवन्॥
ब्रह्मा तदुपधार्य्याशु स्वाशुगं प्राह सेवकम्।
याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय॥
चतुर्भुजमिदं रूपं देवानामपि दुर्ल्लभम्।
त्यक्त्वा मानुषवद्रूपं कुरु नाथ विचारितम्॥
इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्।
सशीतः प्राह तरसा ब्रह्मणो वचनादृतः।
तच्छ्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्।
तदा तत्पितरौ दृष्ट्वा विस्मयापन्नमानसौ॥
भ्रमसंस्कारवत्तत्र मेनाते तस्य मायया।
ततस्तु सम्भलग्रामे सोत्सवा जीवजातयः॥
मङ्गलाचारबहुला पापतापविवर्ज्जिताः।
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्॥
पूर्णकामा विप्रमुख्यानाहूयादाद्गवां शतम्।

हरेः कल्याणदाद्विष्णुयशा शुद्धेन चेतसा ॥
सामर्ग्यजुर्व्विद्भिरग्र्यैस्तन्नामकरणे रत ।
तदा राम कृपो व्यासो द्रौणिर्भिक्षु शरीरिणः ॥
समायाता हरिं द्रष्टुं बालकत्वमुपागतम् ।
तानागतान् समालोक्य चतुर सूर्य्यसन्निभान् ।
हृष्टरोमा द्विजवर पूजां चक्रे स ईश्वरान् ॥
पूजितास्ते स्वासनेषु सविष्टा स्वसुखाश्रया ।
हरि क्रोडगत तस्य ददृशु सत्त्वमूर्त्तय ॥
तं बालक नराकार विष्णु नत्वा मुनीश्वरा ।
कल्कि कल्कविनाशार्थमाविर्भूत विदुर्ब्बुधा ।
नामाकुर्व्वस्ततस्तस्य कल्किरित्यभिविश्रुतम् ॥
कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसा ।
तत स ववृधे तत्र सुमत्या परिपालित ॥
कालेनाल्पेन कंसारि शुक्लपक्षे यथा शशी ।
कल्केर्ज्येष्ठास्त्रय शूरा कविप्राज्ञसुमन्त्रका ॥
पितृमातृप्रियकरा गुरुविप्रप्रतिष्ठिता ।
कल्केरंशा पुरो जाता साधवो धर्म्मतत्परा ॥
गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रता ।
विशाखयूपभूपालपालितास्तापवर्ज्जिता ।
ब्राह्मणा कल्किमालोक्य परा प्रीतिमुपागता ॥
ततो विष्णुयशा पुत्र धीर सर्व्वगुणाकरम् ।
कल्कि कमलपत्राक्ष प्रोवाच पठनादृतम् ।
तात ते ब्रह्मसंस्कार यज्ञसूत्रमनुत्तमम् ।
सावित्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्कि-जन्मोपनयनम् २ अध्याय ॥

कल्की, [न्] पु, (कल्क पापं नाशकतया अस्ति अस्य । कल्क + इनि ।) कल्कि : भगवतो दशावतारेषु चरमोऽवतार । यथा पुराणे ।
"मत्स्य कूर्म्मो वराहश्च नरसिंहोऽथ वामन ।
रामो रामश्च रामश्च बुद्ध कल्की च ते दश" ॥
(अस्य जन्मादिविवरणन्तु कल्किशब्दे द्रष्टव्यम् ॥)

कल्प, पुं, (कल्प्यते विधीयते असौ । कृप् + कर्म्मणि घञ् ।) विधि । (यथा मनु ३ । १४७ ।
"एष वै प्रथम कल्प प्रदाने हव्यकव्ययो ।
अनुकल्पस्त्वय ज्ञेय सदा सद्भिरनुष्ठित " ॥
(कल्पयति सृष्टिं नाशं वा अत्र । कृप् + णिच + अधिकरणे घञ् ।) प्रलय ।
("युगानां सप्तति सैकामन्वन्तरमिहोच्यते" ।
"कृताब्दसंख्यस्तस्यान्ते सन्धि प्रोक्तो जलप्लव" ॥
"ससन्धयस्ते मनव कल्पे ज्ञेयाश्चतुर्दश ।
कृतप्रमाणकल्पादौ सन्धि पञ्चदशस्मृत " ॥
ते एकसप्ततियुगरूपा मनव स्वायम्भुवाद्या ससन्धय स्वस्वसन्धिसहिता कल्पकाले ज्ञातव्या । ससन्धिरूपाश्चतुर्द्दशमनुभि कल्पो भवेदित्यर्थ । इति सूर्य्यसिद्धान्तोक्तकल्पपरिमाणम् । अथाकालिकनैमित्तिकदैनन्दिनमहाप्रलयानां विस्तरस्तु तत्तच्छब्दे द्रष्टव्यम् ॥ * ॥
कल्पते स्वक्रियायै समर्थो भवत्यत्र । कृप् + अधिकरणे घञ् ।) ब्राह्म दिनम् । तत्तु दैवद्विसहस्रयुगम् । इत्यमर । १ । ४ । २१ ॥ (यथा विष्णुपुराणे १ अंशे १ । १२ ।
"कल्पान् कल्पविकल्पांश्च चतुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपञ्च युगधर्म्मांश्च कृत्स्नश " ॥)
त्रिंशत्कल्पैर्ब्रह्मण एको मासो भवति तेषा नामानि यथा । श्वेतवाराह १ नीललोहित २ वामदेव ३ गाथान्तर ४ रौरव ५ प्राण ६ बृहत्कल्प ७ कन्दर्प ८ सद्य ९ ईशान १० ध्यान ११ सारस्वत १२ उदान १३ गरुड १४ कौर्म्म १५ अयं ब्रह्मण पौर्णमासी । नारसिंह १६ समाधि १७ आग्नेय १८ विष्णुज १९ सौर २० सोमकल्प २१ भावन २२ सुप्रमाली २३ वैकुण्ठ २४ आर्च्चिष २५ वल्मीकल्प २६ वैराज २७ गौरीकल्प २८ माहेश्वर २९ पितृकल्प ३० अयं ब्रह्मणोऽमावास्या । इति क्रमसन्दर्भे प्रभासखण्डम् । एतादृशैर्द्वादशमासैर्ब्रह्मण सम्वत्सरो भवति । एवं वर्षशत ब्रह्मण आयु । तत्र पञ्चाशद्वर्षाणि व्यतीतानि एकपञ्चाशदारम्भे अधुना श्वेतवाराहकल्प । इति महाभारतम् ॥ (कल्पारम्भकालश्च ब्रह्मसिद्धान्ते उक्तस्तद्यथा,—
"चैत्रसितादेर्भानोर्वर्षयुगमासयुगकल्पा ।
सृष्ट्यादौ लङ्कायामिह प्रवृत्ता दिनैर्वैत्त !" ॥
चैत्रसितादेश्चैत्रशुक्लप्रतिपदमारभ्य इत्यर्थ । तथा च ब्रह्मपुराणम् ।
"चैत्रे मासि जगत् ब्रह्मा ससर्ज्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ।
प्रवर्त्तयामास तदा कालस्य गणनामपि" ॥
इति कालसामान्यगणनायास्तदारभ्य कथनात् ॥ एव चैत्रशुक्लप्रतिपदि कल्पारम्भेऽपि ।
"माघशुक्लतृतीयायां कृष्णाया फाल्गुनस्य च ।
पञ्चमी चैत्रमासीया यथैवाद्या तथा परा ।
शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी ।
नवमी मार्गशीर्षस्य सप्तैता संस्मराम्यहम् ।
कल्पनामादयो ह्येता दत्तस्याक्षयकारका" ॥
इति वराहवाक्यानि समूलानि चेत् तदा कल्पभेदादविरुद्धानि कल्पादित्वेन तत्तत् तिथिषु श्राद्धकर्त्तव्यतोपयोगिपारिभाषिकपरत्वेन वा समर्थनीयानि । अत एव सूर्य्यसिद्धान्ते उक्तम् । यथा—
"सुरासुराणामन्योन्यमहोरात्रविपर्य्ययात् ।
यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् ॥
मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम् ।
न तत्र द्युनिशोर्भेदो ब्राह्मकल्प प्रकीर्त्तित " ॥
इत्यादीना युगमन्वन्तरकल्पाना सौरत्वेन उक्ति । सौरमाणे च नियतयुगादिकालेषु अनियततिथिसम्भवेऽपि सर्व्वेषां कल्पानामादौ चैत्रसितादितिथिरेव नियता प्रागुक्तवचनप्रामाण्यात् । किन्तु प्रागुक्तमात्स्ये ब्राह्मकल्पाना चान्द्रत्वकथनात् तिथिभेदसम्भव । इति सूर्य्यसिद्धान्तवाक्य ग्रहसहीकरणोपयोगीत्यविरोध ।) विकल्प । कल्पवृक्ष । न्याय । शास्त्रविशेष । स तु वेदषडङ्गान्तर्गतो यागक्रियाप्रमुपदेशक । इति हेमचन्द्र । (यथा रघु १ । ९४ ।
"कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्" ।)
व्याकरणस्य प्रत्ययविशेष । स च स्याद्यन्तत्याद्यन्तपदाभ्यामीषदूनार्थे भवति । तत्र वाच्यलिङ्गत्वे यथा, ईषदूनो विद्वान् विद्वत्कल्प । ईषदूनं पचति पचतिकल्पम् । इति मुग्धबोधव्याकरणम् । (तथा महाभारते १ । १२६ । ५ ।
"ते परस्परमामन्त्र्य देवकल्पा महर्षय" ॥)

कल्पक, पु, (कल्पयति क्षौरकर्म्मादिना वेशादिकं रचयतीति । कृप् + णिच् + ण्वुल् ।) नापित । इति शब्दमाला ॥ कर्च्चूर । इति भावप्रकाश ॥ (कल्पयति गद्यपद्यादिकमुद्भाव्य रचयतीति वाक्यरचयिता । ग्रन्थकर्त्ता ॥)

कल्पन, क्ली, (कृप् + भावे ल्युट् ।) कृत्ति । छेदनम् । इति त्रिकाण्डशेष ॥

कल्पना, स्त्री, (कृप् + णिच् + भावे युच् टाप् ।) हस्तिसज्जना । नायकस्यारोहणार्थं गजसज्जीकरणम् । इत्यमर । २ । ८ । ४२ ॥ अनुमिति । इति न्यायशास्त्रम् ॥ रचना । यथा "प्रबन्ध कल्पना कथा" । इत्यमर । १ । ६ । ६ ॥

कल्पनी, स्त्री, (कल्पयति केशादीन् छिनत्ति अनया । कृप् छेदने + करणे ल्युट् । ततो ङीप् ।) कर्त्तनी । इति हेमचन्द्र ॥ काँचि इति भाषा ॥

कल्पपादप, पु, (कल्पयति सर्व्वकाम सम्पादयति । इति कल्प । स चासौ पादपश्चेति कर्म्मधारय ।) कल्पवृक्ष । यथा नैषधे । १ । १५ । "अभवन्न वक्रेऽल्पितकल्पपादप " ॥

कल्पपादपदान, क्ली, (कल्पपादपस्य सुवर्णनिर्मितपादपाकृतेर्दानम् ।) महादानविशेष । तद्विधानं यथा,
"कल्पपादपदानाख्यमत परमनुत्तमम् ।
महादान प्रवक्ष्यामि सर्व्वपातकनाशनम् ॥
पुण्यदिनमथासाद्य तुलापुरुषदानवत् ।
पुण्याहवाचन कृत्वा लोकेशावाहनन्तथा ॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ।
काञ्चन कारयेद्वृक्ष नानाफलसमन्वितम् ॥
नानाविहगवस्त्राणि भूषणानि च कारयेत् ।
शक्तितस्त्रिपलादूर्द्ध्वमासहस्राद् प्रकल्पयेत् ॥
अर्द्धकृप्तं सुवर्णस्य कारयेत् कल्पपादपम् ।
गुडप्रस्थोपरिष्टाच्च सितवस्त्रयुगान्वितम्" ॥
अर्द्धकृप्त यावदुपात्तसुवर्णसार्द्धेन निर्मितम् ।
"ब्रह्मविष्णुशिवोपेत पञ्चशाख सभास्करम् ।
कामदेवमधस्ताच्च सकलत्र प्रकल्पयेत् ॥
सन्तान पूर्व्वतस्तद्वत्तुरीयांशेन कल्पयेत् ।
मन्दार दक्षिणे पार्श्वे श्रिया सार्द्धं घृतोपरि" ॥
सन्तान पूर्व्वतस्तदिति गुडप्रस्थस्य सितवस्त्रयुगान्वितमित्यर्थ । कामदेवमधस्ताच्चेति सन्तानवृक्षस्याधस्तात् सकलत्र कामदेवं प्रकल्पयेदिति योजनम् । मन्दारादिष्वेकैकदेवतासम्बन्धश्रुते ॥
"पश्चिमे पारिजातन्तु सावित्र्या सह नीरके ।
सुरभीसयुत तद्वत्तिलेषु हरिचन्दनम् ॥
तीयांशेन कुर्व्वीत सौम्येन प्रबलयुतम् ।
कौशेयवस्त्रसयुक्तमिन्दुमास्यफलान्विताम्" ॥
तृतीयांशेन सन्तानघटनावस्थितसुवर्णतृतीयभागेन । सौम्येन उत्तरदिग्विभागेन ॥

"तथाष्टपूर्णकलसान् पादुकासनभाजनान् ।
दीपिकोपानहच्छत्रचामरासनसंयुतम्" ॥

पादुकासनभाजनान् पादुकासनभाजनसहितानित्यर्थः । आसनपदस्यात्र कलसावस्थानोचितासनपरम् । चामरासनसंयुतमिति पुनरासनपदश्रवणात् ।

"फलपङ्क्तियुतं तद्वदुपरिष्टाद्वितानकम् ।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥
होमाधिवासनान्ते तु स्नापितो वेदपुङ्गवैः ।
त्रिःप्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ॥
नमस्ते कल्पवृक्षाय चिन्तितार्थप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये ॥
यस्मात्त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्द्दिवाकरः ।
मूर्त्तामूर्त्तपरं वीजमतः पाहि सनातन ॥
त्वमेवामृतसर्व्वस्वमनन्तपुरुषोऽव्ययः ।
सन्तानाद्यैरुपेतः सन् पाहि संसारसागरात् ॥
एवमामन्त्र्य तं दद्याद्गुरवे कल्पपादपम् ।
चतुर्भ्यश्चापि ऋत्विग्भ्यः सन्तानादीनि कल्पयेत्" ॥

एतेन चत्वार ऋत्विजः कर्त्तव्याः । कुशमयाश्चत्वारो ब्राह्मणा इत्युक्तं सम्भवति ॥

"स्वल्पेष्वेकाग्निवत् कुर्य्यात् गुरुरेवाभिपूजितः ।
न वित्तशाठ्यं कुर्व्वीत न च विस्मयवान् भवेत्" ।

न च विस्मयवान् इदम्मया दत्तमिति नाहङ्कारवान् भवेदित्यर्थः ॥

"अनेन विधिना यस्तु महादानं निवेदयेत् ।
सर्व्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ॥
अप्सरोभिः परिवृतः सिद्धचारणकिन्नरैः ।
भूतान् भव्यांश्च मनुजांस्तारयेदात्मसम्मितान् ॥
स्तूयमानो दिवः पृष्ठे पुत्त्रपौत्त्रप्रपौत्त्रवान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ।
दिवि कल्पशतं तिष्ठेद्राजराजो भवेत्ततः ॥
नारायणबलोपेतो नारायणपरायणः ।
नारायणकथासक्तो नारायणपुरं व्रजेत् ॥
यो वा पठेत् कनककल्पतरुप्रदानं
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा ।
सोऽपीन्द्रलोकमधिगम्य सहाप्सरोभि-
र्मन्वन्तरं वसति पापविमुक्तदेहः" ॥ * ॥

अथ यजमानः समुपजातकल्पपादपमहादानदानेच्छुस्तुलापुरुषलिखितखड्गचर्म्ममयाच्छन्नसन्नाहतुलास्थाप्यहरिप्रतिमालङ्कारतुलाहस्तग्राह्यप्रतिमाऋत्विक्चतुष्टयवरणादिदक्षिणासामग्रीवर्ज्जं सर्व्वसम्भारम् अधिकत्वेन पलत्रयादूर्द्ध्वं सहस्रपलावधियथेष्टकाञ्चनमुपादाय तस्यार्द्धेन कल्पपादपमपरार्द्धेन समभागेन सन्तानमन्दारपारिभद्रहरिचन्दनमेव पञ्चतरून् पञ्चशाखान् सौवर्णनानाफलपक्षिसुवर्णनिर्म्मितानेकवसनाकारसहितान् केयूरकुण्डलाद्यभिमतालङ्कारभूषितान् एषामाच्छादनार्थं श्वेतवस्त्रयुगपञ्चकं तरूणामवस्थापनार्थं गुडप्रस्थद्वयं प्रत्येकं प्रस्थपरिमितान् पात्रस्थघृतजीरकतिलांश्च कल्पवृक्षाधःस्थापनार्थमभीष्टसुवर्णान्तरयन्त्रोत्खाटिता ब्रह्मविष्णुशिवभास्करप्रतिमा यथोक्तकमतरुचतुष्टयाधःस्थापनार्थमभिमतसुवर्णान्तरयन्त्रोत्खाटिताः सरतिकामदेवलक्ष्मीसावित्रीसुरभिप्रतिमाश्च कल्पतरुपार्श्वस्थापनार्थमष्टौ कुम्भान् तदधःस्थापनार्थं कुशादिनिर्म्मितासनाष्टकं कुम्भाच्छादनार्थं कौषेयवस्त्राष्टकं कुम्भपार्श्वस्थापनार्थमिक्षुदण्डाष्टकं पुष्पमालाष्टकसामग्रीं यथेष्टफलाष्टकं पादुकायुगाष्टकं कांस्यभाजनाष्टकञ्च कल्पतरुपार्श्वार्पणार्थं दीपिकोपानद्युगच्छत्रचामरासनाष्टादशधान्यानि च उत्पादयेत् । ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने यजमानगुर्व्वृत्विग्जापकास्तुलापुरुषवद्धविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्य्युः । ततोऽपरदिने यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादिमधुपर्कदानान्तं गोविन्दाद्यभ्यर्च्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म्म तुलापुरुषग्रन्थ अनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः कल्पतरुमानीय प्रधानवेद्यां लिखितचक्रमध्ये गुडप्रस्थं दत्त्वा तदुपरि स्थापयेयुः । ततस्तस्याधो गुडप्रस्थोपरि पङ्क्तिक्रमेण सुवर्णयन्त्रोत्खाटिता ब्रह्मविष्णुशिवभास्करप्रतिमाः स्थापयेयुः । तत्पूर्व्वतः अधःसमारोपितसरतिकामदेवप्रतिमा गुडप्रस्थोपरि सन्तानं कल्पतरुदक्षिणतः अधःसमारोपितलक्ष्मीप्रतिमा घृतप्रस्थोपरि मन्दारं कल्पतरोः पश्चिमतः अधःसमारोपितसावित्रीप्रतिमा जीरकप्रस्थोपरि पारिभद्रं कल्पतरूत्तरतः अधःसमारोपितसुरभिप्रतिमा तिलप्रस्थोपरि हरिचन्दनञ्चारोपयेयुः । सर्व्वांश्च वृक्षान् प्रत्येकं सितवस्त्रयुगेनाच्छादयेयुः । अष्टासु दिक्षु प्रत्येकं कौषेयवस्त्राच्छादितान् इक्षुदण्डफलान्वितान् माल्यालङ्कृतानष्टौ पूर्णकुम्भान् पार्श्वारोपितपादुकायुगभाजनानासनेष्वारोप्य कल्पतरुपार्श्वे पूर्व्वोक्तदीपिकाद्युपकरणमारोपयेयुः । ततो मङ्गलतूर्य्यगीतवन्दिघोषेषु सत्सु ऋत्विजः कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वालङ्कारः पुष्पाञ्जलिमादाय कल्पपादपं त्रिः प्रदक्षिणीकृत्य नमस्ते कल्पवृक्षायेत्यादि पाहि संसारसागरादित्यन्तमन्त्रान् पठित्वा पुष्पाञ्जलिनाभ्यर्च्च्य गुर्व्वृत्विग्भ्यो यथायथं दद्यात् ॥ ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यः अमुकामुकदेवशर्म्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तकल्पपादपमहादानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागव्यवस्थया एतं गुडप्रस्थारोपितसौवर्णब्रह्मविष्णुमहेश्वरभास्करप्रतिमासितवसनयुगान्वितगुडप्रस्थारोपितसौवर्णसरतिकामदेवप्रतिमासितवसनयुगान्वितसौवर्णसन्तानसहितं घृतप्रस्थारोपितसौवर्णलक्ष्मीप्रतिमासितवस्त्रयुगान्वितसौवर्णमन्दारसहितं जीरकप्रस्थारोपितसौवर्णसावित्रीप्रतिमासितवसनयुगलान्वितसौवर्णपारिभद्रसहितं तिलप्रस्थारोपितसौवर्णसुरभिप्रतिमासितवसनयुगान्वितसौवर्णहरिचन्दनसहितं कौषेयवस्त्रयुगवेष्टितग्रीवेक्षुमाल्यफलान्वितकुशासनपादुकायुगकांस्यभाजनयुतपूर्णकुम्भाष्टकदीपिकोपानद्युगच्छत्रचामरासनफलमाल्ययुतपञ्चवर्णवितानकाष्टादशधान्ययुतं कल्पपादपमहादानमहं ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यथायथं अमुकपादपोऽयं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो दक्षिणादानम् ।

ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामिमां यदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा प्रत्येकं तरून् मूलेषु स्पृशेयुः । ततो यजमानस्तुलापुरुषवत् जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनञ्च कुर्य्यात् । ततः कल्पपादपं गुरवे सन्तानादींश्चतुरो वृक्षान् ऋग्वेदादिक्रमेण चतुर्भ्य ऋत्विग्भ्यो निवेदयेत् । स्वल्पकल्पपादपदाने तु गुरुरेवैकाग्निवत् स्वगृह्योक्तविधिना सर्व्वं ब्रह्माण्डदानवत् कुर्य्यात् । इति कल्पपादपमहादानं समाप्तम् ॥ * ॥ इति महाराजाधिराजनिःशङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे महादानदानावर्त्तः ॥

कल्पलतादानं, क्ली, (महादानान्तर्गता सुवर्णकल्पिता लता तस्या दानम् ।) महादानविशेषः ॥

तस्य विधिर्यथा ।

"अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् ।
महाकल्पलतां नाम पातकौघविनाशनम् ॥
पुण्यान्तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनादिकम् ।
चामीकरमयीः कुर्य्याद्दशकल्पलताः शुभाः ॥
नानापुष्पफलोपेता नानांशुकविभूषिताः ।
विद्याधरसुपर्णानां मिथुनैरुपशोभिताः" ॥

सुपर्णानां किन्नराणाम् ॥

"हारानादित्सुभिः सिद्धैः फलानि च विहङ्गमैः ।
लोकपालानुसारिण्यः कर्त्तव्यास्तासु देवताः" ॥

लोकपालानुसारिण्य इति लोकपालसमानाकृतयः ॥

"ब्राह्मीमनन्तशक्तिञ्च लवणस्योपरि न्यसेत् ।
अधस्तात्तु तयोर्मध्ये महाखड्गधरे शुभे" ॥

पद्मशङ्खकरे इति क्वचित् पाठः ॥

"स्वर्णासनस्था माहेन्द्री पूर्व्वतः कुलिशायुधा ।
रजनीसंस्थिताग्नेयी स्रुवपाणिस्तथाचला" ॥

रजनी हरिद्रा ॥

"याम्या तु महिषारूढा गदिनी तण्डुलोपरि ।
नैर्ऋत्या नैर्ऋती स्थाप्या सखड्गा च घृतोपरि ॥
वारुणे वारुणी क्षीरे सर्पस्था नागपाशिनी ।
पताकिनी च वायव्ये मृगस्था शर्करोपरि ॥
सौम्या तिलेषु संस्थाप्या कौवेरदिशि संस्थिता ।
माहेश्वरी वृषगता नवनीते तु शूलिनी ॥

मौलिन्यो वरदास्तद्वत् कर्त्तव्या बालकान्विता ।
भक्त्या पञ्चपलादूर्द्ध्वमासहस्रात् प्रकल्पयेत्” ॥
मौलिन्यो मुकुटवत्यः । वरदा प्रसन्नमूर्त्तय । बालकान्विताः क्रोडनिहितपुत्रका । एतेन क्रोडनिविष्टवामकरधृतपुत्रका दक्षिणहस्तविधृत यथोक्तशस्त्रा प्रसन्नमूर्त्तयो बद्धमुकुटा एवाङ्गना घटनीया । अनुक्तवाहनानान्तु ब्राह्मणीयेयी नैर्ऋतीनान्तरालोकपालवाहनानि । लोकपालानुसारिण्य इति श्रुते । तेन हंसारूढा ब्राह्मी छागारूढाग्नेयी नरारूढा नैर्ऋती घटनीया । अनन्तस्य तु क्वचिदाहनादर्शनात् अनन्तशक्तिर्व्वाहनशून्यैव कर्त्तव्या ॥
“सर्व्वासामुपरिष्टाच्च पञ्चवर्णवितानकम् ।
धेनवो दशकुम्भाश्च वस्त्रयुग्मानि चैव हि ॥
मध्यमे द्वे तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च ।
ततो मङ्गलशब्देन स्नात शुक्लाम्बरो बुध ।
त्रि प्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत्” ॥
“नमो नम पापविनाशिनीभ्यो
ब्रह्माण्डलोकेश्वरपालनीभ्यः ।
आसम्मिताधिक्यफलप्रदाभ्यो
दिग्भ्यस्तथा कल्पलतावधूभ्य ॥
इति सकलदिगङ्गनाप्रदान
भवभयसूदनकारि य करोति ।
अभिमतफलदे स नाकलोके
वसति पितामहवत्सराणि विशत् ॥
पितृशतमथ तारयेद्भवाब्धे-
र्भवदुरितौघविघातशुद्धदेहम् ।
सुरपतिवनितासहस्रसख
परिवृतमप्सरसोद्भवाभिनन्द्यम् ॥
इति विधानमिद सदिगङ्गना
कनककल्पलताविनिवेदने ।
पठति य स्मरतीह तथेक्षते
स पदमेति पुरन्दरसेवितम्” ॥ ४ ॥
अथ यजमान समुपशान्तमहाकल्पलतामहादानदानेच्छ तुलापुरुषलिखित खड्गचर्म्मनवार्द्धक्य सन्नाहतुलापुरुषस्थापनीयहरिप्रतिमाभालङ्कारतुलाहस्तयाह्यप्रतिमावर्हि सर्व्वसम्भारमधिकत्वेन पलपञ्चकादूर्द्ध्वपलसहस्रावधियथेष्ट हेमनिर्म्मिता स्थानस्थानघटितविद्याधरकिन्नरमिथुनसिद्धगणा पल्लवाग्रनिर्म्मितयथेच्छाकृतिफलकुसुमफलग्रहशोभितपक्षिण्य सिद्धहस्तासक्तयथेच्छसङ्घमुक्ताहारसहिता नानाविधचित्रनेत्राम्बिवस्त्रोपशोभिता दशलता । तासामथ स्थापनार्थ यथेच्छहेमयन्त्रोत्खाटिता यथोक्तरूपा ब्राह्म्यादिदशप्रतिमा । तदारोपणार्थ लवणगुडहरिद्रातण्डुलघृतक्षीरशर्करातिलनवनीतानि । लतापार्श्वस्थापनार्थं धेनुदशक कुम्भदशकञ्च वस्त्रयुगदशकञ्चोत्पादयेत् । ततो यजमानस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने गुर्व्वृत्विग्यजमानशापकास्तुलापुरुषवद्धविष्यभोजनादिक कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने महाकल्पलतापद निवेश्य निवेदनं सङ्कल्पञ्च कुर्य्यु । अपरदिने च यजमानः पूर्व्ववद्गोविन्दाद्याराधनादिमधुपर्कदानान्त कर्म्म गोविन्दाद्यभ्यर्च्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने महाकल्पलतापदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानशापका उपवसेयु । अपरदिने ऋत्विग्यास्तुलापुरुषवदग्निस्थापनादि मध्यब्राह्मणवाचनान्त कर्म्म यथायथं कुर्य्यु । एवञ्च मध्यब्राह्मणवचनान्त कर्म्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम् । तत ऋत्विज प्रधानवेद्या लिखितचक्रोपरि लताना मध्ये पूर्व्वादिदिक्क्रमेणाष्टौ लता समारोप्य लतामण्डलमध्ये लताद्वयञ्चारोप्य तदधो लवण दत्त्वा तत्र ब्राह्मीमनन्तशक्तिञ्च आरोप्य पूर्व्वादिदिक्क्रमारोपिताष्टलताध क्रमेण गुडादिद्रव्याणि दत्त्वा तेषु क्रमात् कुलिशायुधादिशक्तिप्रतिमा समारोपयेयु । लतापार्श्वे दशधेनू पूर्णकुम्भदशक दशवस्त्रयुगानि च स्थापयेयु । ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयु । ततो यजमान शुक्लमाल्याम्बरधरो धृतसर्व्वालङ्कार पुष्पाञ्जलिमादाय लताः त्रि प्रदक्षिणीकृत्य नमो नम पापविनाशिनीभ्य इत्यादिमन्त्रेण पुष्पाञ्जलिनाभ्यर्च्च गुर्व्वृत्विग्भ्यो दद्यात् । तद्यथा । ॐ अद्या मुकामुकसगोत्रेभ्य अमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्म्मभ्यो युष्मभ्य मत्स्यपुराणोक्तकल्पलतामहादानदानफलप्राप्तिकामो ऽह मत्स्यपुराणोक्तभागव्यवस्थयैता लवणगुडहरिद्रातण्डुलघृतक्षीरशर्करातिलनवनीतार्पितकलधौतब्रह्मानन्तकुलिशायुधवह्निशमननिर्ऋतिवरुणवायुसोममहेश्वरशक्तिप्रतिमासहिता पञ्चवर्णवितानकधेनुदशक कुम्भवसनयुगदशकान्विता दशकल्पलता सम्प्रददे ॥ प्रतिग्रहीतार स्वस्तीत्युक्त्वा मात्रिर्ऩो पठेयु । ततो गुरु कल्पलतेय विष्णुदैवतेति ब्रूयात् । ऋत्विजस्तु प्रत्येक कल्पलतेय विष्णुदेवतेति ब्रूयु । ततो यथाशाख कामस्तुति पठेयु । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थ युष्मभ्यमह दक्षिणामिमा यदुत्पत्तियोग्या भूमिमेतानि च रत्नानि सम्प्रददे ॥ ब्राह्मणा स्वस्तीत्युक्त्वा कल्पलता स्पृशेयु । ततस्तुलापुरुषवज्ज्ञापकेभ्यो दक्षिणा दीनानाथादितर्पण ब्राह्मणवाचन त्वरया कल्पलताना यथायथ प्रतिपादनञ्च कुर्य्यात् । इति कल्पलतामहादान समाप्तम् । इति दानसागर ॥

कल्पवृक्ष , पु, कल्पस्य सङ्कल्पस्य दाता वृक्ष । कल्पस्थायी वृक्ष इति वा । इति सारसुन्दरी । देवतरु । इत्यमर । १ । १ । ५३ ॥ (यथा, दानसागरे ।
“नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये” ॥)

कल्पान्त , पु, (कल्पस्य अन्तो यत्र ।) ब्रह्मणो दिनान्त । प्रलय । इत्यमर । १ । ४ । २२ ॥ (यथा, गो रामायणे ३ । १० । ४ ।
“उपवासरतास्त्वेव जले कल्पान्तवासिन ” ॥)

कल्पितः, पु, (कल्प्यते सज्जीक्रियते असौ । कृप् + णिच् + कर्म्मणि क्त ।) सज्जितहस्ती । इति हेमचन्द्र ॥ रचिते त्रि ॥ (यथा, महानिर्व्वाणोक्तात्मज्ञाननिर्णये ।
“ब्रह्मादितृणपर्य्यन्त मायया कल्पित जगत् ।
सत्यमेक परं ब्रह्म विदित्वैवं सुखी भवेत्” ॥)

कल्मष, क्ली, (कर्म्म शुभकर्म्म स्यति नाशयति रस्य लत्वे षत्वे च पृषोदरादित्वात् साधु ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, मनुः १२ । २२ ।
“यामीस्ता यातना प्राप्य सजीवो वीतकल्मषः ।
तान्येव पञ्चभूतानि पुनरप्येति भागशः” ॥)
हस्तपुच्छम् । इति त्रिकाण्डशेष ॥ (मालिन्यम् । यथा, रामायणे २ । ३६ । २७ ।
“न हि कञ्चन पश्यामो राघवस्यागुण वयम् ।
दुर्लभोऽह्यस्य निरय शशाङ्कस्येव कल्मषम्” ॥)

कल्मष , पुं, (कर्म्म शुभकर्म्म स्यति नाशयति । कर्म्म + सो + क । रस्य ल सस्य षत्वञ्च निपातनात् ।) नरकविशेष । इति मेदिनी ॥ मलिने त्रि । इति जटाधर ॥

कल्माष , पु, (कलयति इति क्विप् कल् । माषयति समासा अभिभवति अन्यवर्णान् । मष् हिंसाया णिच् + अच् । कल् चासौ माषश्चेति ।) चित्रवर्णः । तद्वति त्रि । इत्यमर । १ । ६ । १७ ॥ कृष्णपाण्डुरवर्ण । कृष्णवर्ण । (कलं शुभकर्म्म माषयति हिनस्ति । कल + मष् + णिच् + अच् वा ।) राक्षस ॥ इति मेदिनी ॥ गन्धशालि । इति राजनिर्घण्ट ॥ (नागविशेष । यथा, महाभारते १ । ३५ । ७ ।
“नीलानीलौ तथा नागौ कल्माष शबलौ तथा” ॥)

कल्माषकण्ठ , पु, (कल्माष कृष्णवर्ण कण्ठो यस्य ।) शिव । इति हारावली ॥

कल्माषपादः, पु, (कल्माषौ शापजलप्रक्षेपणात् कृष्णवर्णौ पादौ यस्य ।) सौदासराज । इति श्रीभागवतम् ॥ (यथा, महाभारते १ । १७७ । १ ।
“कल्माषपाद इत्येव लोके राजा बभूव ह ।
इक्ष्वाकुवंशज पार्थ तेजसासदृशो भुवि” ॥)
अस्य यथा कल्माषपादत्व जात तदुच्यते । नलसखस्य ऋतुपर्णस्य वंशज सौदासनामा नृपति पुरा मृगया चरन् एक राक्षसमवधीत् । अस्य रक्षसो भ्राता तु वैरशोधन चिकीर्षु सूदरूपधरोऽस्य राज्ञो गृह प्रत्युवास । एकदा तु असौ राक्षस भोक्तुकामाय नृपते सौदासस्य गुरवे वशिष्ठाय नरामिष पक्त्वा ददौ । वशिष्ठस्तु तदभोज्य दृष्ट्वातिक्रुद्ध “राक्षसो भविष्यतीति” राजानमशपत् । राजा तु शापवृत्तान्त विदित्वा विनापराधेन प्रदत्त शापः इति विचिन्त्य जलमादाय गुरु प्रतिशप्तुं समुद्यत । एतस्मिन्नन्तरेऽस्य पत्नी मदयन्ती दृष्ट्वैवमकरणीयोद्यत पति निवारयामास । राजा तु तया निवारितः स्वपादयोः शापजल प्रक्षिप्तवान् । एतदारभ्याय पादयो कल्माषतां प्राप्तवान् ॥ अस्य अन्या विवृतिस्तु भागवते ९ । ९ अध्याये, तथा महाभारते १ । १७७ अध्याये द्रष्टव्या ।)

कल्य, क्ली, (कल्यते आगम्यते । कल गतौ + कर्म्मणि यत् । प्रत्यूष । इत्यमरः । १ । ४ । २ ॥ (यथा,

भागवते ४ । २४ । ७८ ।
"इद यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः ।
शृणुयाच्छ्रावयेन्मर्त्त्यो मुच्यते कर्म्मबन्धनैः" ॥
कलयति मिश्रतां सम्पादयतीति । अघ्न्यादित्वात्
यक् ।) मधु । इति हेमचन्द्रः ॥
कल्य', त्रि, (कलासु साधुः इति यत् ।) सज्ज' । (यथा,
महाभारते १ । ५ । ३ ।
कथयस्व कथामेतां कल्याः स्म श्रवणे तव" ॥)
निरामयः । इत्यमरः । ३ । ३ । १५९ ॥ वाक्श्रुति-
वर्जितः । दक्षः । कल्याणवचनम् । उपायवचनम् ।
इति मेदिनी ॥
कल्यजग्धि', स्त्री, (कल्ये प्रातर्जग्धिर्भोजनम् ।) प्रात-
राशः । प्रातर्भोजनम् । इति जटाधरः ॥
कल्यत्वं, क्ली, (कल्य + भावे "ता त्वम्" । इति त्वम्)
आरोग्यम् । इति जटाधरः ॥
कल्यपालः, पुं, (कल्य मधु मद्यमित्यर्थः पालयतीति ।
कल्य + पाल् + अण् ।) शौण्डिकः । इति हेमचन्द्रः ॥
कल्यपालक', पु, (कल्य पालयति । कल्य + पाल् +
ण्वुल् ।) शौण्डिक' । इति शब्दमाला ॥
कल्यवर्त्त', पु, (कल्ये प्रात वर्त्त्यते प्राप्यते गृह्यते
इति वा यद्वा वर्त्त्यते जीव्यते अनेन । वृत् + णिच्
+ कर्म्मणि करणे वा अप् ।) प्रातर्भोजनम् । इति
त्रिकाण्डशेषः ॥
कल्या, स्त्री, (कडयति मादयति । कडमदे णिच् अ-
घ्न्यादित्वात् यक् टाप् च । डस्य लत्वम् । कलयति
मादयति वा । कल् + णिच् + यक् टाप् च ।)
मद्यम् । इति मेदिनी ॥ शुभात्मिका वाणी । कल्याण-
वचनम् । इत्यमरः । १ । ६ । १८ ॥ हरीतकी ।
इति शब्दरत्नावली ॥
कल्याण, क्ली, (कल्ये प्रात अण्यते शब्द्यते इति ।
कल्य + अण् + "अकर्त्तरि चेति" ३ । ३ । १९ ।
घञ् ।) मङ्गलम् । (यथा, विष्णुपुराणे १ । १२ । १०२ ।
"स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि ।
सर्व्वकल्याणसयुक्तो दीर्घकालञ्च जीवति" ॥)
तत्पर्य्यायः । श्वः २ श्रेयसम् ३ शिवम् ४ भद्रम् ५
शुभम् ६ भावुकम् ७ भविकम् ८ भव्यम् ९ कुश-
लम् १० क्षेमम् ११ शस्तम् १२ । तद्युक्ते त्रि । इत्य-
मरः । १ । ४ । २५,२६ ॥ (यथा, मनु ८ । ३९२ ।
"प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" ॥)
स्वर्णम् । इति मेदिनीकरहेमचन्द्रौ ॥
कल्याणबीज, पु, (कल्याण बीजं यस्य ।) मसूरः ।
इति राजनिर्घण्टः ॥ (मसूरशब्दे विशेषोऽस्य
ज्ञेय ॥)
कल्याणिका, स्त्री, (कल्याण + संज्ञायां कन् तत
टाप् अत इत्वम् ।) मनःशिला । इति राज-
निर्घण्टः ॥ (मन शिलाशब्देऽस्या विवृतिर्ज्ञेया ॥)
कल्याणिनी, स्त्री, (कल्याणमस्यास्तीति इनि तत
स्त्रियां ङीप् ।) बला । इति राजनिर्घण्टः ॥
कल्याणविशिष्टे त्रि ॥
कल्याणी, स्त्री, (कल्याण + स्त्रियां ङीप् । माषपर्णी ।
गौ । इति राजनिर्घण्टः ॥ (यथा, रघु १ । ८७ ।
"उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत्" ॥

कल्याणवती । यथा महाभारते । ३ । ७४ । ५ ।
"दमयन्त्यपि कल्याणी प्रासादस्था ह्युपैक्षत" ॥)
कल्यापाल, पु, (कल्या मद्यं पालयतीति । कल्या +
पालि + अण् ।) शौण्डिकः । इति त्रिकाण्डशेषः ॥
काल्ल, ङ कूजने । शब्दे । अशब्दे । इति कविकल्प-
द्रुमः ॥ (भ्वा-आत्मं-अकं-सेट् ।) लदयान्तः । ङ
कल्लते लोक अव्यक्तशब्दं करोति शब्दं न
करोति वेत्यर्थः । कूजने इति चान्द्रा गौमरश्च ॥
शब्दमात्रे इति केचित् । अशब्दे इति कालापाः ।
इति दुर्गादासः ॥
कल्ल, त्रि, (कल्लते शब्दं न गृह्णाति इति । कल्ल +
अच् ।) बधिरः । इति त्रिकाण्डशेषः । काला
इति भाषा ॥
कल्लत्व,क्ली,(कल्लस्य भावः । कल्ल + त्वम् ।) स्वरभेदः ।
इति हेमचन्द्रः ॥ बधिरता च ॥
कल्लोल, पु, (कल्ल + बाहुलकात् ओलच । यद्वा
क जलं लोलं चपलं यस्मात् निपातनात् साधु ।)
महातरङ्गः । वड ढेउ इति भाषा । तत्पर्य्यायः ।
उल्लोल' २ । इत्यमरः । १ । १० । ६ ॥
("कालिन्दीजलकल्लोलकोलाहलकुतूहली" ॥
इत्युद्भटः ॥) हर्षः । शत्रौ त्रि । इति मेदिनी ॥
कव, क्ट ङ स्तुतौ । वर्णे । इति कविकल्पद्रुमः ।
(भ्वा-आत्मं-सकं-सेट् । क्टदित् ।) क्ट अचका-
वत् । ङ कवते । इति दुर्गादासः ॥
कवक, क्ली, (कवते आच्छादयति विस्तारयति वा ॥
कव् + अच् । संज्ञायां कन् ।) छत्राकम् । यथा,—
"देवतार्थं हवि शिग्रुं लोहितान् व्रश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकानि च" ॥
कवकानि छत्राकाराणि । वर्ज्जयेदिति प्रत्येक-
मभिसम्बध्यते । इति मिताक्षरायामाचाराध्यायः ॥
कवक, पु, (कव + अच् + संज्ञायां कन् ।) कवलं ।
ग्रासः । इति हेमचन्द्रः ॥
कवच, पु क्ली, (क देहं वञ्चति विपक्षास्त्राणि
वञ्चयित्वा रक्षति इति शेषः । क + वञ्च् + अच् ।
क वात वञ्चति वा अन्तर्णीर्थो वा । यद्वा कवते-
इति कुधातोरच् प्रत्यय इति केचित् इत्युणादि-
कोष ४२ । २ ।) सन्नाहः । साँजोया इति भाषा ।
(यथा, विष्णुपुराणे । १ । १३ । ४० ।
"शराश्च दिव्या नभस कवचञ्च पपात ह" ॥)
तत्पर्य्यायः । तनुत्रम् २ वर्म्म ३ दंशनम् ४ उरश्छद
५ कङ्कटक ६ जगर ७ । इत्यमरः । २ । ८ । ६४ ॥
दंसनम् ८ जागर ९ अजगर १० । इति तट्टीका ॥
कटक ११ योग १२ सन्नाह' १३ कञ्चुकः १४ ।
इति जटाधरः ॥ *॥ तस्य युक्तिर्यथा ।
खड्गादीनान्तु गणना पूर्व्वमेव निदर्शिता ।
अस्मात्मनैव निर्द्दिष्टकवचादिरपीष्यते ॥
तल्लक्षणं सगुणं प्रवक्ष्यामि निबोधत ।
काष्ठ चर्म्म च सकल चयमेतत्तु दुस्तरम् ॥
यथोत्तरं गुणयुतं तथा पूर्व्वन्तु निन्दितम् ।
शरीरावरकत्वन्तु लघुत्वं दृढता तथा ॥
दुर्भेद्यतेति कथितः कवचे गुणसंग्रहः ।
सच्छिद्रतातिगुरुता तनुता सुखभेद्यता ॥

कवचानां विनिर्दिष्टः समासाद्दोषसंग्रहः ।
अत्र वर्णा विनिर्दिष्टा क्रमादेव चतुर्व्विधः ॥
सितो रक्तस्तथा पीतः श्यामो ब्रह्मादिषु क्रमात् ।
केचित् कुर्व्वन्ति कुशलाः कवचं धातुसम्भवम् ॥
कनक रजत ताम्र लौह तेषु यथाक्रमम्" ॥
इति युक्तिकल्पतरुः ॥ *॥
"यथा शस्त्रप्रहाराणां कवच प्रति वारणम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणम्" ॥
इति मलमासतत्त्वम् ॥ लौहादिवर्म्मवत् अङ्गादि-
रक्षणार्थं देवतामन्त्रविग्रहम् । तत्तु पूजायां पाठ्यं
भूर्ज्जे विलिख्य कण्ठादौ धार्य्यञ्च । इति तन्त्रम् ॥
गर्द्दभाण्डवृक्षः । पटहवाद्यम् । इति मेदिनी ॥
कवचपत्र, क्ली, (कवचलेखनसाधनपत्रमिव पत्र
वल्कलं यस्य ।) भूर्ज्जपत्रम् । इति शब्दचन्द्रिका ॥
कवटी, स्त्री, (कौति शब्दायते इति । कु + अटन् +
गौरादित्वात् ङीष् ।) कवाट' । इति भरतो
द्विरूपकोषश्च ॥
कवयी, स्त्री, (कात् जलात् वयते गच्छति इति ।
क + वय् गतौ + इन् "कृदिकारान्तत्वात्" वा
ङीष् ।) मत्स्यविशेषः । कायी माछ इति भाषा ॥
तत्पर्य्यायः । क्रकचपृष्ठी २ । इति त्रिकाण्डशेषः ॥
अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । बलकारि-
त्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥
किञ्चित्पित्तकरीति केचित् ॥ ("कवय्य स्निग्ध-
मधुरा" । इति चक्रपाणिदत्तद्रव्यगुणे ॥)
कवर, त्रि, (के मस्तके वरं शोभमानत्वात् श्रेष्ठम् ।)
केशपाशः । इत्यमरटीका ॥ (यथा भागवते
५ । २ । ७ । "वल्गुस्पन्दनस्तनकलशकवरभार-
रशना देवीम्" ॥) संपृक्तम् । खचितम् । इति
हलायुधः ॥
कवर, पु क्ली, (क जल वृणोति । क + वृ + अच् ।)
लवणं । अम्लः । इति मेदिनी हेमचन्द्रश्च ॥ (कौ-
तीति । कुशब्दे + "कोरन्" । उणा ४ । १५४ ।
इति अरन् । पाठकः । इत्युज्ज्वलदत्तः ॥ कर्व्वुर-
वर्णः । इति हलायुधः । यथा, माघे ५ । १९ ।
"दृष्ट्वैव निर्ज्जितकलापभरामधस्ता-
द्व्याकीर्णमाल्यकवरां कवरीं तरुण्याः" ॥)
कवरकी, स्त्री, (कवरं केशपाशं किरति विक्षिपति
यत्र इति । कवर + कॄ + बाहुलकात् ड गौरा-
दित्वात् ङीष् । कारावासदुःखेन केशादिपारि-
पाट्याराहित्यात् तथात्वम् ।) कारागारबद्धः । इति
हारावली । कयेदी इति भाषा ॥
कवरा, स्त्री, (कवर + अजादित्वात् टाप् ।) स्वर-
पुष्पा । इति शब्दचन्द्रिका । वावुइ इति भाषा ॥
कवरी, स्त्री, (क शिर वृणोति आच्छादयति । क +
वृ + अच् + जानपदेत्यादिना ङीष् । कु + अरन्
ङीष् वा ।) केशविन्यासः । खुलेर खोपा टिकी
इति भाषा । तत्पर्य्यायः । केशवेश २ कवरः ३
केशगर्भक ४ । इति शब्दरत्नावली ॥
("गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशालम्" ॥
इति पदाङ्कदूते । १ ॥) वर्व्वरा । वावुइ इति

भाषा। कारवी। इत्यमरो मेदिनी च॥ छिक्केर पाता इति भाषा॥

कवलः, पुं, (केन जलेन वलते चलतीति। वल्+अच्।) ग्रासः। इत्यमरः। २। ९। ५४॥ ("त्रिकटुकमजमोदा सैन्धवं जीरके द्वे समधरणधृतानामष्टमो हिङ्गुभागः। प्रथमकवलभुक्तः सर्पिषा चूर्णमेतज्जनयति जठराग्निं वातरोगांश्च हन्ति"॥ इति वैद्यकचक्रपाणिसंग्रहे अग्निमान्द्याधिकारे। "ग्रसदन् कवलान्नागा गावो वत्सान् न पाययन्"। इति रामायणे। २। ४१। ९।) मत्स्यविशेषः। इति शब्दचन्द्रिका॥ बेले माछ इति भाषा॥

कवलितः, त्रि, (कवलं करोति। कवल+णिच्+कर्म्मणि क्तः।) भुक्तः। इति जटाधरः॥ ("शश्वत् कवलितानेकजीवम्"। इति कथासरित्सागरः। २६। १४२॥)

कवसः, पुं, (कौति कवते वा। कुशब्दे+"अतनीत्यादिना" उणा ४। २। असः।) कवचः। इत्युणादिकोषः॥

कवाटः, त्रि, (कुशब्दे+भावे घञ्। कवं शब्दं अटतीति। कव+अट्+अच्। यद्वा कः वातं वटति वृणोति वारयतीत्यर्थः कः+वट्+अण्।) कपाटः। इत्यमरटीकायां वाचस्पतिः॥ (यथा रामायणे २। ७१। ३७। "असंयतकवाटानि श्रीविहीनानि सर्व्वशः"॥)

कवाटवक्रः, स्त्री, (कवाटं वक्रं यस्मात्।) वृक्षविशेषः। कवाटवेट्टु इति भाषा। कवाडनेवुड़िया इति केचित्॥ तत्पर्य्यायः। वक्रायम् २ कपोतवक्रम् ३ अश्वजित् ४। इति रत्नमाला॥

कवाटी, स्त्री, (कवाट+अल्पार्थे+ङीप्।) कपाटम्। इत्यमरटीकायां भरतः॥

कवारं, क्ली, (कं जलं आश्रयत्वेन वृणोति। क+वृ+अण्।) पद्मम्। इति त्रिकाण्डशेषः॥

कविः, पुं, (कवते सर्व्वं जानाति सर्व्वं वर्णयति सर्व्वं सर्व्वतो गच्छति वा। कव् इन्। यद्वा कुशब्दे+"अच इः"। उणा ४। १३८। इति इः।) ब्रह्मा। इति हेमचन्द्रः॥ (अयमादिकविः यथा, "तेने ब्रह्म हृदा य आदिकवये" इति भागवते। १। १। १॥) वाल्मीकिमुनिः। (एकोऽभून्नलिनात् ततश्च पुलिनात् वल्मीकतश्चापरस्ते एव प्रथिता कवीन्द्रगुरवस्तेभ्यो नमस्कुर्म्महे"। इत्युद्भटः॥) शुक्राचार्य्यः। (यथा महाभारते १। ६६। ४२। "ब्रह्मणो हृदयं भित्त्वा निःसृतो भगवान् भृगुः। भृगोः पुत्त्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः"॥) सूर्य्यः। काव्यकर्त्ता। (यथा रघुः १। ३। "मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्"॥) खलीने स्त्री। इति मेदिनी॥ (विष्णुः। यथा महाभारते १३। १४९। ९७। "वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः"॥) कल्किदेवस्य ज्येष्ठभ्राता। यथा,— "कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः। तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः"॥ इति कल्किपुराणे २ अध्यायः॥ * ॥ अपि च। "विशाखयूपभूपालः प्रायात् साधुजनप्रियः। कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च सम्भले॥ कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम्। गार्ग्यभर्ग्यविशालैश्च ज्ञातिभिः परिवारितम्। विशाखयूपो ददृशे चन्द्रं तारागणैरिव"॥ इति तत्रैव ३ अध्यायः॥ * ॥ चौरयोद्धा। यथा। "अधस्थाने रवौ भङ्गो दुर्गं खड्गि प्रजायते। कविप्रवेशनं तत्र योधाघातश्च तत्र वै"॥ इति सर्व्वतोभद्रचक्रे ज्योतिस्तत्त्वम्॥

कविः, त्रि, (कवते श्लोकान् ग्रथते वर्णयति वा। कव्+इन्।) पण्डितः। इत्यमरः। २। ७। ५। (यथा मनुः २। १५१। "अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः"॥)

कविः, स्त्री, (कवति शब्दायते इति। कुशब्दे "अच इः"। उणा। ४। १३८ इति इः। अश्वमुखे शब्दायमानत्वात्तथात्वम्।) खलीनः। इति मेदिनी। लागाम् इति भाषा॥

कविकं, क्ली, (कवि+स्वार्थे कन्।) खलीनः। इति हलायुधः॥

कविका, स्त्री, (कवि+स्वार्थे कन् टाप् च।) खलीनः। इत्यमरः। २। ८। ४९॥ लागाम इति भाषा। केविकापुष्पम्। इति राजनिर्घण्टः॥ कवयी मत्स्यः। इति भावप्रकाशः॥ (अस्या गुणा यथा,— "कविका मधुरा स्निग्धा कफघ्नी रुचिकारिणी। किञ्चित् पित्तकरी वात-नाशिनी वह्निवर्द्धिनी"॥ इति च भावप्रकाशस्य पूर्व्वखण्डे मांसवर्गे॥)

कविज्येष्ठः, पुं, (कविषु ज्येष्ठः।) वाल्मीकिमुनिः। इति त्रिकाण्डशेषः॥

कविता, स्त्री, (कवेः रचयितुर्भावः तल्।) कवित्वम्। काव्यम्। यथा,— "कविता वनिता चापि स्वयाता सुखदायिनी"। इत्युद्भटः॥

कविवेदी, [न्] त्रि, (कविं कवित्वं वेत्ति। कवि+विद्+णिनि।) कविः। इति जटाधरः॥

कवियं, क्ली पुं, (कं सुखं अजति। क+अज्+क। अजस्थाने विः।) खलीनः। इति त्रिकाण्डशेषः॥

कविरामायणः, पुं, (कविना कवितया कविषु काव्येषु वा रामः अयनं आश्रयो यस्य।) वाल्मीकिमुनिः। इति शब्दरत्नावली॥

कविलासिका, स्त्री, (कं सुखं विलासयति उद्दीपयतीति। क+वि+लस्+णिच्+ण्वुल् टाप् अत इत्वम्।) वीणाविशेषः। इति शब्दरत्नावली॥

कविवाल्मीकिः, पुं, (कविश्चासौ वाल्मीकिश्चेति।) वाल्मीकिमुनिः। इति शब्दरत्नावली॥

कवी, स्त्री, (कवि वा ङीष्।) खलीनः। इति मेदिनी भरतश्च॥ [जटाधरः॥

कवीयं, क्ली, (कवि+स्वार्थे छः।) खलीनः। इति

कवेलं, क्ली, (कं जलं विलति स्तृणाति। क+विल्+अण्।) कुवलयम्। उत्पलम्। इति शब्दचन्द्रिका॥

कवोष्णं, क्ली, (कुत्सितं उष्णं ईषदुष्णं वा।) ईषदुष्णम्। (यथा रघुः १। ६७। "मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया। पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते"॥) तद्वति त्रि। इत्यमरः। १। ४। ३५॥

कव्यं, क्ली, (कूयते पितृभ्यः। पितृदेशेन दीयते यदन्नादिकम्। कु+"अचो यत्" ३। १। ९७। इति यत्।) पित्रन्नम्। पितृसम्प्रदानकान्नम्। इत्यमरः। २। ७। २४॥ (यथा, मनुः १। ९५। "यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः। कव्यानि चैव पितरः किम्भूतमधिकं ततः"॥ कव्यानि तु वेदतत्त्वविदे ब्राह्मणाय दातव्यानि अन्यथा तद्दानं निष्फलं स्यादित्युक्तं मनौ ३ अध्याये। "श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः। अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्॥ एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्। पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि॥ दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्। तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः॥ सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते। एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः॥ ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च। न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः॥ यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्। तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुडान्॥ ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे। तपःस्वाध्यायनिष्ठाश्च कर्म्मनिष्ठास्तथापरे॥ ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः। हव्यानि तु यथान्यायं सर्व्वेष्वेव चतुर्ष्वपि॥ एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः॥ मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम्। दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्॥ येस्तेनपतितक्लीवा ये च नास्तिकवृत्तयः। तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः"॥ इत्यादि। विस्तृतिस्तु तत्रैव द्रष्टव्या॥)

कव्यवालः, पुं, (कव्यं बल्यते दीयते अस्मै। कव्य+बल् दाने+सम्प्रदाने घञ्।) पितृगणविशेषः। इति त्रिकाण्डशेषः॥ (यथा, वायुपुराणे। "कव्यवालोऽनलः सोमो यमश्चैवार्य्यमा तथा। अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः"॥)

कश, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) कशति। इति दुर्गादासः॥

कशा, स्त्री, (कशति शब्दायते ताड़यति वा। कश्+करणस्य कर्त्तृत्वविवक्षया कर्त्तरि अच् टाप् च। ताड़्यत्यनया वा।) अश्वादिताड़नी। इत्यमरः। २। ८। ४१॥ कोड़ा चाबुक इति च भाषा॥ ("जघान कशया मोहात् सदा राक्षसवन्मुनिम्"॥ इति महाभारते। १। १७७। १०॥) मांसरोहिणी। इति भावप्रकाशः॥

कशार्हः, त्रि, (कशां अर्हति इति। कशा+अर्ह+

यत् ।) कशाघातयोग्य । कोडा मारिवार उपयुक्त इति भाषा । तत्पर्य्यायः । कश्यः २ । इत्यमरः । ३ । १ । ४४ ॥

कशिपुः, पुं, (कशति दुःखं कश्यते वा कशगतिशासनयोः । कश + मृगय्वादित्वात् निपातनात् साधुः ।) भक्तम् । आच्छादनम् । एकोक्त्यान्नवस्त्रे कशिपू इति द्विवचनान्तम् । इति मेदिनी ॥ (शय्या । यथा, भागवते २ । २ । ४ ।

"सत्यां क्षितौ किं कशिपोः प्रयासैः" ॥)

कशेरु, स्त्री पुं, (के देहे शीर्य्यते । क + शॄ + "केश्र एरू च वास्य" । उणां १ । ९० । इति उ एरुङ्चान्तादेशः ।) पृष्ठास्थि । पिठेर दाँडा इति भाषा । इति हलायुधः ॥ (पुंसि उदाहरणं ।

"किं कुर्व्वता वराहेण खाद्यन्ते हि कशेरवः" ।

इत्युद्भटिकाष्टतं चन्द्रवचनम् ।)

कशेरु, स्त्री, (कं जलं वातं वा शृणाति । क + शॄ + उणादित्वात् उः । एरुङ्चान्तादेशः ।) कशेरुका । केशुर इति भाषा । इति रत्नमाला ॥ राजनिर्घण्टे दन्त्यसकारवान् पुलिङ्गोऽप्ययं शब्दः ॥ ("कशेरु द्विविधं तत्तु महद्राजकशेरुकम् । मुस्ताकृतिलघुः स्यात् यत् तच्चिचोटमिति स्मृतम्" ॥ इति वैद्यकम् ॥)

कशेरुः, पुं, (क + शॄ + उ + एरुङ् ।) जम्बुद्वीपस्य खण्डविशेषः । इति शब्दमाला ॥

कशेरुकं, स्त्री, (कशेरु + स्वार्थे कन् ।) कन्दविशेषः । केशुर इति भाषा । अस्य गुणाः । गुरुत्वम् । विष्टम्भकारित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥ ("तरुटविसशालूककौञ्चादनकशेरुकम् । शृङ्गाटकं कलोड्याञ्च गुरु विष्टम्भि शीतलम्" ॥ इति चरके सूत्रस्थाने २७ अध्याये ॥)

कशेरुका, स्त्री, (कशेरु + स्वार्थे कन् टाप् च ।) पृष्ठास्थि । इति रत्नमाला । पिठेर दाँडा इति भाषा ।

कशेरूः, स्त्री, (क + शॄ + "केश्र एरूङ्चास्य" । उणां १ । ९० । इति ऊः । एरूङ्चान्तादेशः ।) कन्दविशेषः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ केशुर इति भाषा ।

कश्चन, व्य, (किम् + चन् इति मुग्धबोधमतम् । पाणिनिमते पृथक्पदमिति भेदः ।) कश्चित् । इति व्याकरणम् ॥ कोन । केह इति च भाषा । (यथा माघे १६ । १ ।

"दमघोषसुतेन कश्चन
प्रतिशिष्टः प्रतिभानवानथ" ॥)

कश्चित्, व्य (किम् + चित् । पाणिनिमते पृथक्पदम् ।) कश्चन । इति व्याकरणम् ॥ (यथा मेघदूते १ ।

"कश्चित्कान्ता विरहगुरुणा स्वाधिकारप्रमत्तः" ॥)

कश्मलं, स्त्री, (कश गतिशासनयोः + कल । "कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्" ॥ उणां १ । १०८ इति मुट् ।) मूर्च्छा । इत्यमरः । २ । ८ । १०९ । (मोहः । यथा, गीतायाम् २ । २ ।

"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्" ॥)

पापम् । इति शब्दमाला ॥ मलिने त्रि । इति हेमचन्द्रः ॥

कश्मीर, पुं, (कश + "कशेर्मुट् च । उणां ४ । ३० इति ईरन् मुट् च ।) काश्मीरदेशः । इति त्रिकाण्डशेषः ॥ (अस्य सीमादि यथा,—शक्तिसङ्गमतन्त्रे ७ पटले ।

"शारदामठमारभ्य कुङ्कुमादितटान्तकः ।
तावत् कश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" ॥)

कश्मीरजन्मा, [न्] पुं, (कश्मीरे काश्मीरदेशे जन्म यस्य ।) काश्मीरजन्मा । कुङ्कुमम् । इत्यमरटीकायां रायमुकुटः ॥

कश्य, स्त्री, (कशां अर्हतीति । कशा + दन्तादित्वात् । ५ । १ । ६६ । यत् ।) अश्वमध्यभागः । (कशति अनेन । कश + बाहुलकात् करणे यत् ।) मद्यम् । यथा,—मार्कण्डेयपुराणे १०४ । ३ ।

"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः ।
कश्यपस्तस्य पुत्त्रोऽभूत् कश्यपानात् स कश्यपः" ॥

कशार्हे त्रि । इत्यमरः । ३ । १ । ४४ ॥

कश्यपः, पुं, (कश्यं सोमरसादिजनितं मद्यं पिबतीति । कश्य + पा + क । अस्य नामनिरुक्तिर्यथा मार्कण्डेयपुराणे । १०४ । ३ ।

"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः ।
कश्यपस्तस्य पुत्त्रोऽभूत् कश्यपानात् स कश्यपः" ॥)

मुनिभेदः । कलागर्भजो मरीचिमुनेरौरसः पुत्त्रः । अस्य भार्य्या दक्षस्य सप्तदशकन्या । तासां तत्पुत्त्राणाञ्च नामानि यथा । अदितेर्द्देवाः १ दितेर्दैत्याः २ दनोर्दानवाः ३ काष्ठाया अश्वादयः ४ अरिष्टाया गन्धर्व्वाः ५ सुरसाया राक्षसाः ६ इलाया वृक्षाः ७ मुनेरप्सरोगणाः ८ क्रोधवशाया सर्पाः ९ ताम्रायाः श्येनगृध्रादयः १० सुरभेर्गोमहिष्याः ११ सरमायाः श्वापदाः १२ तिमेर्यादोगणाः १३ विनताया गरुडारुणौ १४ कद्रोर्नागाः १५ पतङ्ग्याः पतङ्गाः १६ यामिन्याः शलभाः १७ । इति श्रीभागवतम् ॥ * ॥ (मार्कण्डेयपुराणमते अस्य त्रयोदशभार्य्याः । यदुक्तं तत्रैव १०४ अध्याये । अदितिः १ दितिः २ दनुः ३ विनता ४ खसा ५ कद्रुः ६ मुनिः ७ क्रोधा ८ रिष्टा ९ इरा १० ताम्रा ११ इला १२ प्रधा १३ । महाभारतमतेऽपि अस्य त्रयोदश भार्य्याः । यदुक्तं तत्रैव १ । ६५ । ११—१३ ।

"मरीचेः कश्यपः पुत्त्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥
अदितिर्द्दितिर्द्दनुः काला दनायुः सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ।
कद्रुश्च मनुजव्याघ्र ! दक्षकन्यैव भारत" ! ॥

परमेश्वरस्यैव कश्यप इति नामास्ति । यथा,

"तेनैवेमाः सर्व्वाः प्रजा उत्पादितास्तस्मात् सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । कश्यप कस्मात् पश्यको भवतीति निरुक्त्या पश्यतीति पश्यः सर्व्वज्ञतया सकलं जगद्विजानातीति स पश्यः । पश्य एव निर्भ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जानातीत्यर्थः पश्यक इति । आद्यन्ताक्षरविपर्य्ययासिद्धेः सिंहः कृतेस्तर्कुरित्यादिवत् कश्यप इति ऋयवरट् इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्यति" ॥ इति दयानन्दकृताया वेदभाष्योपक्रमणिकायाः २९१ सङ्ख्यकपत्रे ॥ कश्यं अज्ञानं अविद्यामित्यर्थः । तत्पिबति शोषयति नाशयति । यद्वा कश्यं विज्ञानघनम् पाति रक्षति स्वात्मनीति । परब्रह्म । तथा च तायनिश्रुतिः २ । ११ ॥

"सा होवाच गान्धर्व्वी ऋर्षिं वै दुर्व्वाससं कोऽयं ब्रह्मन् ! वा एतस्य प्रजालोकस्य पालयिता भर्त्ता वा जगतः । स होवाच तत्त्ववित् प्रवरो महान् दुर्व्वासाः । तदेव ब्रह्म वा आत्मा एतस्य पाता हर्त्ता प्रजानां गोप्ता वावह कश्यपो ह योऽयमज्ञानभोक्ता गान्धर्व्वि" ॥

कच्छपः । तथा च शतपथब्राह्मणे—

"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद्यदकरोत्तस्मात् कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहु सर्व्वाः प्रजाः काश्यप्यः" ॥ यथा यजुर्व्वेदे २४ । ३७ ।

"अपामुद्रो मासाः कश्यपः" । "कश्यप कच्छपः" । इति वेददीधितिः ॥ कश्यं मद्यं पिबतीति । कश्य + पा + क । "सुरापः श्यावदन्तः स्यात्" । इति वचनात्तथात्वम् । श्यावदन्ते त्रि, यथा, कात्यायनश्रौतसूत्रे १० । २ । ३५ ।

"प्रस्तभेभ्यश्चान्यत् कण्वकश्यपयाचमानवर्ज्जम्" ॥) मृगविशेषः । इति मेदिनी ॥ मत्स्यभेदः । इति विश्वः ॥

कश्यपनन्दनः, पुं, (कश्यपस्य नन्दनः ।) गरुडः । इति हलायुधः ॥ (देवासुरादयोऽपि ॥)

कष वधे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) कषति । अग्रमुभयपदीति चतुर्भुजभुजभरौ ॥ रमानाथरामौ तु इमं परस्मैपदिनं मत्वा उभयपदिनं लाजव्यान्तं अन्यं मन्येते । इति दुर्गादासः ॥

कषः, पुं, (कषत्यत्र अनेन वा । कष् + अच् ।) कषपट्टिका । कष्टिपातर इति भाषा । तत्पर्य्यायः । शाणः २ निकषः ३ । इत्यमरः । २ । १० । ३२ ॥

कषणं, त्रि, (कष्यते विशाद्यते । कष् + कर्म्मणि ल्युट् ।) अपक्वः । इति शब्दचन्द्रिका ॥ (पुं, कषत्यत्र । अधिकरणे ल्युट् । निकषोपलम् । यथा, आर्य्यासप्तशती ४१८ ।

"भूषयता भजत सखि ! कषणविशुद्धस्य जातरूपस्य" ॥ भावे ल्युट् । स्त्री, कण्डूयनम् । यथा किराते ५ । ४७ ।

"कषणकम्पनिरस्तमहाहिभिः
क्षणविमत्तमतङ्गजवर्जिते" ॥

"इह द्रौ कषणेन कण्डूयणेन यः कम्पस्तेन निरस्ता महाहयो येभ्यस्तैः" ॥ इति तट्टीकायां मल्लिनाथः ॥)

कषा, स्त्री, (कष्यते ताड्यते अनया । कष् + बाहुलकात् करणे अप् । ततष्टाप् ।) कशा । इत्यमरटीकायां रमानाथः ॥ चावुक इति भाषा ॥ (यथा गोरा ह्रिं घके ६ । ३७ । ४१ ।

"उद्दान् हयान् खरान् नागान् जघ्ने दण्डकषाङ्कुशै"॥)
कषाकुः, पु, (कष् + आकु ।) सूर्य्यः । अग्निः । इत्युणादिकोषः ॥
कषाय, पु क्ली, (कषति कण्ठम् । कष् + आय ।) रसविशेषः । कषा इति भाषा । पृथिव्यनिलगुणबाहुल्यात्तस्योत्पत्तिः । इति शिवदासः ॥
(यथा, मनुः ११ । १५३ ।
"शुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः" ॥)
तत्पर्य्यायः । तुवरः २ तद्युक्ते त्रि । इत्यमरः । १ । ५ । ९ ॥ कुवरः ३ तूवरः ४ । इति तट्टीका ॥ अस्य गुणाः । व्रणादिरोपणत्वम् । ग्राहित्वम् । शोषणत्वम् । वायुकोपकारित्वञ्च । अतियुक्तस्य तस्य गुणाः । मलमूत्रग्रहाध्मानहृत्पीडाक्षेपणादिरोगकारित्वम् । अन्यच्च ।
"कषायः शोषणः स्तम्भी व्रणपाकार्त्तिनाशनः ।
कफशोणितवातघ्नो रूक्षः शीतो गुरुस्तथा" ॥
इति राजवल्लभः ॥ अपि च ।
"कषायनामा निरुणद्धि शोफं
वर्णान्तनोर्दीपनपाचनञ्च ।
सत्त्वापहोऽसौ शिथिलत्वकारी
निषेवितः पाण्डु करोति मात्रम्" ॥
इति राजनिर्घण्टः ॥ * ॥ पाचनादि । तस्य पूर्णवीर्य्यं याममेकं तिष्ठति । तत्पर्य्यायः । क्वाथः २ निर्य्यूहः ३ । स तु पञ्चविधो यथा । स्वरसः १ कल्कः २ क्वथितः ३ शीतः ४ फाण्टम् ५ । इति वैद्यकपरिभाषा ॥ * ॥
("जिह्वां कण्ठं ग्रसति नितरां ग्राहकश्चातिसारे
श्लेष्मव्याधेरुपशमकरः श्वासकासापहर्त्ता ।
हिक्कां शूलं हरति नितरां शोधनः स्याद्व्रणानां
प्रोक्तश्चायं समधिकगुणो नाम श्रेष्ठः कषायः" ॥
इति हारीते प्रथम स्थाने ७ अध्याये ॥
"कषायो जडयेज्जिह्वां कण्ठस्रोतो विबन्धकृत्" ॥
"कषायः पित्तकफहा गुरुरस्रविशोधनः ।
पीडनो रोपणः शीतः क्लेदमेदोविशोषणः ।
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः ॥
करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः ।
तृट्‌कार्श्यं पौरुषभ्रंशस्रोतोरोधमलग्रहान्" ॥
इति वाभटे सूत्रस्थाने १० अध्याये ॥
"कषायो रसः संशमनः संग्राही सन्धानकरः पीडनो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतो गुरुश्च ।
स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमान आस्यं शोषयति, हृदयं पीडयति, उदरमाध्मापयति, वाचं निगृह्णाति, स्रोतांस्यवबध्नाति, श्यावत्वमापादयति, पौंस्त्वमुपहन्ति, विष्टभ्य जरां गच्छति, वातमूत्रपुरीषाण्यवगृह्णाति, कर्षयति, ग्लापयति, तर्षयति, स्तम्भयति, खरविशदरूक्षत्वात् पक्षवध-ग्रहापतानकार्दितप्रभृतींश्च वातविकारानुपजनयतीति" ।
"वैशद्यस्तम्भजाड्यैर्यो रसनं योजयेद्रसः ।
बध्नातीव च यः कण्ठं कषायः स विकास्यपि" ॥
"पवनपृथिव्यतिरेकात् कषायः" ॥
इति चरके सूत्रस्थाने २६ अध्याये ॥)
निर्यासः । (यथा, महाभारते अनुशासनपर्व्वणि ।
"हृष्टो वटकषायेण अनुलिप्तः प्रियङ्गुणा ।
क्षीरेण षष्टिकान् भुक्त्वा सर्व्वपापैः प्रमुच्यते" ॥)
विलेपनम् । (यथा कुमारे ७ । १७ ।
"कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे" ॥
"लोध्रस्य वृक्षविशेषस्य कषायेण विलेपनेन" ॥
इति मल्लिनाथः ॥) अङ्गरागः । इति मेदिनी ॥
कषाय, पु, (कष् + आय ।) श्योणाकवृक्षः । इति धरणी ॥ रागः । इत्यमरटीकायां स्वामी ॥ (यथा छान्दोग्योपनिषदि ।
"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भे सर्व्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति" ।
"तस्मै मृदितकषायाय वार्क्षादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रञ्जनरूपत्वात् ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य तस्मै" । इति भाष्यम् ॥)
कलियुगम् । इत्यमरटीकासारसुन्दरी ॥ (निर्व्विकल्पसमाधेर्विघ्नभेदः । यथा, वेदान्तसारे समाधिकल्पे ८९ ।
"लयविक्षेपाभावेऽपि चित्तवृत्तेरागादिवासनया स्तब्धीभावात् अखण्डवस्त्वनवलम्बनम्" । तत्रानेकजन्माभ्यस्तवाह्याभ्यन्तररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं चित्तं कथञ्चित् श्रवणादिसाधनेनान्तर्मुखमपि चैतन्यग्रहणसामर्थ्याभावात् मध्य एव स्तब्धीभवति यथा राजदर्शनाय स्वगृहान्निर्गत्य, राजमन्दिरं प्रविष्टस्य कस्यचित् पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्तवाह्यविषयस्य अखण्डवस्तुग्रहणप्रवृत्तस्योद्बुद्धरागादिसंस्कारैः स्तब्धीभावादखण्डवस्त्वग्रहणं कषायः ॥)
कषाय, त्रि, (कष + आय ।) सुरभि । (यथा मेघदूते ३२ ।
"प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः" ॥)
लोहितः । इति मेदिनी ॥ (यथा कुमारे २ । ३२ ।
"चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज" ॥)
रक्तपीतमिश्रितवर्णः । इत्यमरटीकायां स्वामी ॥
धववृक्षः । इति राजनिर्घण्टः ॥
कषायकृत्, पु, (कषायं कषायरागं करोति इति । कषाय + कृ + क्विप् तुगागमश्च ॥) रक्तलोध्रः । इति जटाधरः ॥
कषाययावनालः, पु, (कषायः रक्तवर्णः यावनालः ।) तुवरयावनालधान्यम् । इति राजनिर्घण्टः ॥
कषाया, स्त्री, (कष + आय टाप् च ।) क्षुद्रदुरालभालता । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
'यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा" ।)
कषायितः, त्रि, (कषायो रक्तपीतवर्णादिर्जातोऽस्य । कषाय + तारकादित्वात् इतच् ।) कृतलोहितः । (यथा कुमारे ४ । ३४ ।
"अमुनैव कषायितस्तनी
सुभगेन प्रियगात्रभस्मना" ॥)
कषायी, [न्] पुं, (कषायो विद्यतेऽस्य । कषाय + इनिः ।) शालवृक्षः । इति जटाधरः ॥ लकुचवृक्षः । खर्ज्जूरीवृक्षः । इति राजनिर्घण्टः ॥
कषि, त्रि, (कषति हिनस्ति यः । कष + "खनिकषि" इत्यादिना इः । उणां ४ । १३९ ।) हिंसकः । इत्युणादिकोषः ॥
कषीका, स्त्री, (कषतीति । कष + "कषि दूषिभ्यां ईकन्" । उणां ४ । १६ । इति ईकन् + टाप् च ।) पक्षिजातिः । यदुक्तं उणादिकोषे ।
"कषीका पक्षिजातौ स्यात् दूषिका नेत्रयोर्मले" ।
कषेरुका, स्त्री, (कष + एरक् + तत उः । संज्ञायां कन् टाप् च ।) कशेरुका । पृष्ठास्थि । इत्यमरटीकायां रायमुकुटः ॥
कष्ट, क्ली, (कष्यते इति । कष् + भावे क्तः । "कृच्छ्रगहनयोः कषः" । ७ । २ । २२ । इति नेट् ।) पीडामात्रम् । तत्पर्य्यायः । पीडा २ बाधा ३ व्यथा ४ दुःखम् ५ अमानस्यम् ६ प्रसूतिजम् ७ कृच्छ्रम् ८ आभीलम् ९ । इत्यमरः । १ । ९ । ३ ॥ आबाधा १० वेदना ११ दुःखम् १२ आमानस्यम् १३ । इति तट्टीकायां भरतः ॥ कलाकलम् १४ । इति वाचस्पतिः ॥ अर्त्तिः १५ आर्त्तिः १६ पीडनम् १७ बाधनम् १८ आमनस्यम् १९ विबाधनम् २० विहेठनम् २१ विधानकम् २२ पीडितम् २३ । इति शब्दरत्नावली ॥ क्लाथः २४ अशर्म्म २५ । इति जटाधरः ॥ (यथा महानिर्व्वाणोक्तात्मज्ञाननिर्णये ।
"कुर्व्वाणः सततं कर्म्म कृत्वा कष्टशतान्यपि ।
तावन्न लभते मोक्षं यावज्ज्ञानं न जायते" ॥)
कष्टः, त्रि, (कष्यतेऽसौ । कष् + कर्म्मणि + क्तः ।) पीडायुक्तः । गहनः । इत्यमरमेदिनीकरौ ॥ (यथा मनुः १२ । ७८ ।
"बन्धनानि च कष्टानि परप्रेष्यत्वमेव च" ॥
अतिकष्टकरम् । विषादादौ प्रयोक्तव्यम् । यथा, महाभारते १ । १ । २१५ ।
"कष्टं युद्धे दशशेषाः श्रुता मे ।
त्रयोऽस्माकं पाण्डवानाञ्च सप्त" ॥)
कष्टकारकः, पु, (कष्टं करोति उत्पादयति बन्धकत्वात् । कष्ट + कृ + कर्म्मण्यण् । ततः कन् । कष्टं करोतीति । कृ + ण्वुल् वा । कष्टस्य कारको वा ।) संसारः । इति त्रिकाण्डशेषः ॥ पीडाकरे त्रि ॥
कष्टस्थान, क्ली, (कष्टं कष्टकरं स्थानम् ।) दुःखजनकस्थानम् । इति हारावली ॥
कस ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सकं-सेट्-ज्वलादि ।) ज कासः कसः । विपूर्व्वोऽयं प्रफुल्लीभावे । तथा च ।
"प्रफुल्लोत्फुल्लसंफुल्लव्याकोषविकचस्फुटाः ।
फुल्लश्चैते विकसिते" इत्यमरः । २ । ४ । ७-८ ।

विकसित पद्मजकलिका । इति दुर्गादास ॥

इ न ड ध्वसे । गतौ । इति कविकल्पद्रुम ॥ घाते च । (अदा-आत्मं-सकं-सेट् । इदित् ।) इ कस्यते । ल ड कस्ते हरि कंसम् । चकारात् गतौ च । घात इह ध्वसना । इति दुर्गादास ॥

त ल ड ध्वसे । गतौ । इति कविकल्पद्रुम ॥ (अदा-घाते च । आत्म-सक-सेट् ।) ल ड कास्ते हरि कसम् । चकारात् गतौ च । घात इह ध्वसना । इति दुर्गादास ॥

स, पु, (कसति विकसतीति । कस + अच् । कसति विकसति स्वर्गादिरत्र वा । कस + आधारे अच् ।) कष । इत्यमरटीकाया भरत ॥ कष्टिपातर इति भाषा । पूर्व्वोक्तधात्वर्थेऽप्यत्र ॥

(यथा नैषधे २ । ६९ ।

"कसमाषाणनिभे नभस्तले" ॥)

कसनोत्पाटन, पु, (उत्पाटयतीति उत्पाटन । उत् + पाटि + ल्यु । कसनस्य कासरोगस्य उत्पाटनः नाशक ।) वासकवृक्ष । इति शब्द-चन्द्रिका ॥

कशिपु, पु, (कशति शास्ति दु'खम् । कश गति-शासनयो निपातनात् सिद्धम् ।) कशिपु । अन्नम् । इति जटाधर ॥

कसेरु, पु, (क मृणातीति मृ गिहिंसाया बाऊलका दुप्रत्यये प्रकृतेरेरडादेश । निपातनात् शस्य सत्वम् ।) कशेरु । केशुर इति भाषा । तत्पर्य्याय । गुण्डकन्द २ क्षुद्रमुस्ता ३ कसेरुका ४ शूकरेष्ट ५ । सुगन्धि ६ सुकन्द ७ कसेरुक ८ । अस्य गुणा । कषायत्वम् । अल्पमधुरत्वम् । अतिकटुत्वम् । रक्त पित्तप्रशमनत्वम् । शीतत्वम् । दाहश्रमापहत्वञ्च । इति राजनिर्घण्ट ॥

कसेरुका, स्त्री, (कसेरुरेव । स्वार्थे कन् स्त्रियां टाप् ।) कसेरु । एकास्थि । इति राजनिर्घण्ट ॥

कस्तीर, क्ली, रङ्गम् । इति हेमचन्द्र ॥ (अस्य पर्य्यायो यथा,—वैद्यकरत्नमालायाम् ।

"रङ्ग वङ्गञ्च कस्तीर म्टदङ्ग पुत्नपिच्चठम्" ॥)

कस्तुरिका, स्त्री, (कसति गन्धोऽस्या दूरत । कस + ऊर । तुट् च । स्वार्थे कन् टाप् च पृषोदरादित्वात् साधु ।) कस्तूरी । इति भूरिप्रयोग ॥

कस्तूरिका, स्त्री, (कस्तूरी + स्वार्थे कन् टाप् पृषोदरादित्वात् साधु ।) कस्तूरी । इति रत्नमाला ॥ (यथा, माघे । ४ । ६१ ।

"कस्तूरिकाम्टगविमर्द्दसुगन्धिरेति" ॥

अस्या गुणादय कस्तूरीशब्दे ज्ञातव्या । वैद्यकरसेन्द्रसारसंग्रहे वृहज्ज्वरचूडामणिरसे अस्या प्रयोगो यथा "कस्तूरिकाविद्रुमरौप्यलौह" । इत्यादि ।)

कस्तूरी, स्त्री, (कसति गन्धोऽस्या । कस + खर्ज्जूरादित्वात् ऊर । ङीप् तुटि पृषोदरादित्वात् साधु ।) म्टगस्य नाभौजातसुगन्धिद्रव्यम् । तत्पर्य्याय । म्टगनाभि २ म्टगमद ३ । इत्यमर ।२।६।१२८। म्टग ४ म्टगी ५ नाभि ६ मद ७ । इति भरत ॥ वातामोद ८ योजनगन्धिका ९ । इति रभस ॥ मदनी १० गन्धकेलिका ११ वेधमुख्या १२ मार्जारी १३ सुभगा १४ बहुगन्धदा १५ सहस्रवेधी १६ श्यामा १७ कामान्धा १८ म्टगाङ्गजा १९ कुरङ्गनाभि २० ललिता २१ श्यामला २२ मोदिनी २३ कस्तूरिका २४ कस्तुरिका २५ नाभी २६ लता २७ योजनगन्धा २८ मार्गी २९ गन्धबोधिका ३० कालाङ्गी ३१ धूपसञ्चारी ३२ मिश्रा ३३ गन्धपिशाचिका ३४ इति शब्दरत्नावली ॥ अस्या गुणा । सुरभित्वम् । तिक्तत्वम् । चक्षुर्हितत्वम् । मुखरोगकिलासकफदौर्गन्ध्यवन्धालक्ष्मीमलापहत्वञ्च । इति राजनिर्घण्ट ॥ रक्तपित्तच्छर्द्दिनाशित्वम् । इति राजवल्लभ ॥ तद्भेदा । खरिका १ तिलका २ कुलत्था ३ पिण्डा ४ नायिका ५ । अपि च ।

"कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात् ।
नेपालेऽपि च काश्मीरे कामरूपेऽपि जायते ॥
कामरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत् ।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा स्मृता" ॥

इति राजनिर्घण्ट ॥ (अस्या पर्य्यायो गुणा उत्पत्तिश्च यथा,—भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"म्टगनाभिर्म्टगमद कथितस्तु सहस्रभित् ।
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता ॥
काश्मरीकपिलच्छाया कस्तूरी त्रिविधा स्मृता ।
कामरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत् ॥
कामरूपोद्भवा कृष्णा नेपाली नीलवर्णयुक् ।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा मता ॥
कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरु ।
कफवातविषच्छर्द्दिशीतदौर्गन्ध्यशोषहृत्" ॥)

कस्तूरीमल्लिका, स्त्री, (कस्तूरीगन्धयुक्ता मल्लिका ।) म्टगमदवासा । इति राजनिर्घण्ट ॥

कस्मल, क्ली, (कश गतिशासनयो + कल + सुट् च । निपातनात् शस्य स ।) कश्मलम् । मोह । इत्यमरटीकाया रायमुकुट ॥

कह्लार, क्ली, (कस्य जलस्य ह्वार इव के जले ह्लादते वा इति । क + ह्लाद + पचाद्यच् पृषोदरादित्वात् साधु ।) श्वेतोत्पलम् । सुँदि इति भाषा । तत्पर्य्याय । सौगन्धिकम् २ । इत्यमर १ । १० । ३६ ॥ (कत्तृणम् ३ । गन्धकञ्च ४ । इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ यथा, भागवते ४ । ६ । १८ ।

"कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभि" ॥)

तत्पुष्पगुणा । कषायत्वम् । मधुरत्वम् । शीतत्वम् । पित्तकफरक्तनाशित्वञ्च । इति राजवल्लभ ॥

कह्व, पु, (के जले ह्वयति शब्दायते स्पर्द्धते वा । क + ह्वे + क ।) वकपक्षी । इत्यमर ॥२।५।२२॥

कांसीय, क्ली, (कंसस्य विकार इति छ ।) कांस्यम् । इति राजनिर्घण्ट ॥

कांस्य, क्ली, (कंसाय पानपात्राय हित कंसीय तस्य विकारः इति । "कंसीयपरशव्ययोरिति" । ४।३। १६८ यञ् छस्य लुक् च । यद्वा कंसमेव इति स्वार्थे यञ् प्रत्यय ।) ताम्ररङ्गमिश्रितधातु । काँसा इति भाषा । तत्पर्य्याय । कंसम् २ कंसास्थि ३ ताम्रार्द्धम् ४ । इति त्रिकाण्डशेष ॥ सौराष्ट्रकम् ५ घोषम् ६ कांसीयम् ७ वह्निलोहकम् ८ दीप्तिलोहम् ९ घोरपुष्पम् १० दीप्तिकांस्यम् ११ कांस्यम् १२ । अस्य गुणा तिक्तत्वम् । उष्णत्वम् । चक्षुर्हितकारित्वम् । वातकफविकारनाशित्वम् । रूक्षत्वम् । कषायत्वम् रुचिकारित्वम् । लघुत्वम् । दीपनत्वम् । पाचनत्वम् । पथ्यत्वञ्च । इति राजनिर्घण्ट ॥ अम्लरसत्वम् । विशदत्वम् । लेखनत्वम् । सारकत्वम् । पित्तनाशित्वम् इति राजवल्लभ ॥ दृढदेहायुर्वृद्धिकारित्वम् । इति सुखबोध ॥

("उपधातुर्भवेत् कांस्य द्वयोस्तरणिरङ्गयो ।
कांस्यस्य तु गुणा ज्ञेया स्वयोनिसदृशा जनै ।
संयोगजप्रभावेण तस्यान्येऽपि गुणा स्मृता ॥
कांस्यङ्कषायन्तिक्तोष्णं लेखन विशद सरम् ।
गुरुनेत्रहित रूक्ष कफपित्तहरम्परम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)

तत्शोधनमारणमाह ।

"अनेनैव विधानेन कांस्य विड्गन्धलेपितम् ।
मारयेद्बुद्धिमान् वैद्यो म्टत भवति चूर्णवत्" ॥

अपरञ्च ।

"द्विक्षारं पञ्चलवणं सप्तधाम्लेन भावयेत् ।
कांस्यारकूटपत्राणि तेन कल्केन लेपयेत् ।
बद्ध्वा गजपुटे पश्चाच्छुद्धिमायाति नान्यथा" ॥

अन्यच्च ।

"ताम्रवच्छोधन कृत्वा ताम्रवन्मारयेद्बुध" ॥

अन्यच्च ।

"कज्जली तत्समा दत्त्वा मर्द्दयेन्निम्बुकद्रवै ।
एव पुटत्रयेणैव निरुत्थ भस्म जायते" ॥

इति सुखबोध ॥

कांस्यकार, पु, (कांस्य तत्पात्र करोतीति । कांस्य + कृ + अण् ।) कंसकार । इति जटाधर । काँसारि इति भाषा ॥

कांस्यनील, पु, (कांसेन कृत नील ।) अञ्जनभेद । नीलतुत्थम् । तत्पर्य्याय । मूषातुत्थम् २ हेमतारम् ३ वितुन्नकम् ४ इति हेमचन्द्र ॥ (कांस्योद्भवाञ्जनवन्नील इति विग्रहे वाच्यलिङ्गत्वम् । यथा, गो रामायणे ४ । ३९ । २३ ।

"कांस्यनीलो हरिर्नील कोटिभिर्दशभिर्वृत" ॥

क्वचित् काश्यनील इति पाठ ॥)

काक, क्ली, सुरतवन्ध । (काकस्य समूह इति सङ्घार्थे अण् ।) काकसमूह । इति मेदिनी ॥ (ईषत्क जलम् को कादेश । ईषज्जलम् । इति व्याकरणम् ॥)

काक, पु, (कायते शब्दायते । कै शब्दे "इणभीकापाशल्यतिमर्च्चिभ्य कन्" । उणा-३ । ४३ । इति कन् ।) स्वनामख्यातपक्षिविशेष । काग इति भाषा । तत्पर्य्याय । करट २ अरिष्ट ३ बलिपुष्ट ४ सकृत्प्रज ५ ध्वाङ्क्ष ६ आत्मघोष ७ परभृत् ८ बलिभुक् ९ वायस १० । इत्यमर ।२।५।२०॥ वातजव ११ बल १२ दीर्घायु १३ सूचक १४ कृष्ण १५ यामीण १६ पिशुन १७ काटखादक १८ द्विक १९ काग २० । इति

जटाधरः। काणः २१ धूलिजङ्घः २२ निमित्तकृत् २३ कौशिकारिः २४ चिरायुः २५ मुखरः २६ खरः २७ महालोलः २८ चिरञ्जीवी २९ चलाचलः ३० करटकः ३१ नागवीरकः ३२ गाढमैथुनः ३३ लुब्धाक्षः ३४ आवकः ३५ रतज्वरः ३६। इति शब्दरत्नावली ॥ * ॥ अस्य शाकुनं काकचरित्रम्। तद्यथा।

"अथोच्यते काककृतं रुतानां
मूर्द्धि स्थितं शाकुनभाषितानाम्।
अचिन्तितावेदितकार्य्यसिद्धिं
पूर्व्वादिकाष्ठाप्रहरक्रमेण ॥
ये ब्राह्मणक्षत्रियवैश्यशूद्रा
काका भवन्त्यन्त्यजपञ्चमास्ते।
वर्णाकृतिभ्यां ऋषिभाषिताभ्यां
सदाभियुक्तैरुपलक्षणीयाः ॥
दृढप्रमाणो गुरुदीर्घतुण्डो
दृढस्वरः कृष्णवपुः स विप्रः।
पिङ्गाक्षनीलाच्छविमिश्रवर्णः
स्यात् क्षत्रियस्तीव्ररवोऽतिशूरः ॥
यः पाण्डुनीलः सितनीलचञ्चु-
र्नात्यर्थरूढो रटितश्च वैश्यः।
भस्मच्छविर्भूरिककारशब्दः
शूद्रः कृशाङ्गश्चपलो निरूढः ॥
विरूढसूक्ष्मास्यतनुर्व्विशङ्को
यः कन्धरादीप्तनवं बिभर्त्ति।
स्थिरारवः स्थैर्य्यसमेतबुद्धिः
काकोऽन्त्यजातिः खलु पञ्चमोऽन्त्यः ॥
द्रोणाभिधः कृष्णवपुर्द्विजो यो
ग्राह्यः स काकः खलु मुख्यवृत्त्या।
तस्मादते ग्रामगतो निरीक्ष्य
श्वेतश्च निन्द्योऽद्भुतदर्शनोऽसौ ॥
विप्रः स्फुटे जल्पति पृच्छ्यमाने
न्यूनं ततः क्षत्रियजातिराङ्।
आख्यातिवैश्यस्त्वविवासनेन
ब्रवीति शूद्रो बलिदानलोभात् ॥
प्रश्नं कृतं जल्पति कृष्णवर्णः
सदा समस्तं विहगोऽन्त्यजातिः।
सद्यस्त्रिसप्ताहदशाहपक्षैः
पश्चापि काकाः फलदाः क्रमेण ॥
शान्ते प्रदीप्ते च रटन् विहङ्गः
शुभप्रदो दीप्तपराङ्मुखः सन्।
न क्वापि रौद्रो रटितः प्रशस्तः
सर्व्वत्र शान्तो मधुरश्च रक्तः ॥
दीप्तस्थितो यः परुषस्वरेण
विरौति दीप्ताभिमुखः स कार्य्यम्।
निष्पाद्य निर्नाशयते च सम्य-
ग्दीप्तोन्मुखः शान्तरवो हि सिद्ध्यै ॥
शान्तप्रदीप्ताभिमुखो विधाय
शब्दं प्रविश्याथ पुनः प्रदीप्तम्।
यो रौति काको मधुरस्वरेण
कृत्वा विरुद्धं स ददाति सिद्धिम् ॥
विधाय दीप्ताभिमुखो विरावं
ततः प्रशान्ताभिमुखो विरौति।
यो वायसोऽसौ विनिहन्त्यसम्यक्
कार्य्याणि सर्व्वाणि पुनः करोति ॥
सूर्य्योदये पूर्व्वदिशि प्रशस्त-
स्थाने स्थितो योऽभिमुखं विरौति।
नाशं रिपोश्चिन्तितकार्य्यसिद्धिं
स्त्रीरत्नलाभं स करोति काकः ॥
ध्वाङ्क्षः प्रभाते यदि वह्निभागे
विरौति तिष्ठन् रमणीयदेशे।
शत्रून् प्रणाशयत्यचिरादिशं च
प्रयाति योषित्समवाप्यते तत् ॥
एवं प्रभाते दिशि दक्षिणस्यां
काकः समावेदयतेऽतिदुःखम्।
रोगार्त्तिमृत्यु परुषस्वरेण
रम्येण चेष्टागमयोषिदाप्तिम् ॥
नैर्ऋत्यभागे यदि च प्रभाते
करोति काकः सहसा विरावम्।
क्रूरं ततः कर्म्म समभ्युपैति
दूतागमो मध्यमिका च सिद्धिः ॥
प्रातः प्रतीच्यां यदि रौति काको
ध्रुवं तदा वर्षति वारिवाहः।
स्त्रीवस्त्रभूभृत्पुरुषागमश्च
फलं फलेन सम तदा स्यात् ॥
ध्वाङ्क्षस्य शब्दे पवनालयस्थे
वस्त्रान्नयानाभिमतागमाः स्युः।
मार्गागमः प्राक्तनदर्शनाश्च
स्यादन्यदेशे गमनं स्वदेशात् ॥
दिश्युत्तरस्यां सुरवं प्रभाते
निरीक्षमाणो बलिभुङ्नराणाम्।
ददाति दुःखं भुजगाच्च भीतिं
दरिद्रतां नष्टधनेष्टलाभम् ॥
दिशीशवत्यां यदि रौति काकः
स्यागच्छतस्तद्वनितान्यजाती।
व्याधेर्निमित्तं प्रियवस्त्रलाभो
भवेत्तदा रोगवलेऽदसागम् ॥
ब्रह्मप्रदेशे स्थितवायसस्य
प्रभातकाले मधुरस्वरेण।
अभीप्सितार्थागमनं ध्रुवं स्यात्
स्वामिप्रसादो द्रविणस्य लाभः" ॥
इति वसन्तराजे दिक्प्रहरे सूर्य्योदयः ॥ * ॥
"पूर्व्वत्र यामे प्रथमे सशब्दः
काको भवेच्चिन्तितकार्य्यसिद्ध्यै।
अभीष्टलोकागमनं तथास्या-
न्नष्टार्थलाभो नियतं नराणाम् ॥
आग्नेयभागे यदि चाद्ययामे
स्त्रीलाभविद्वेषिवधौ भवेताम्।
कृतान्तभागे बलिभुग्विरावः
स्त्रीलाभसौख्यप्रियसङ्गकारी ॥
नैर्ऋत्यकोणे प्रिययोषिदाप्ति-
र्म्मिष्टाशनं सिध्यति चिन्तितोऽर्थः।
दिशि प्रतीच्यां विरुते भवेता-
मभ्यर्थनीयागमनाम्बुवृष्टी ॥
वायव्यकोणे करटः शुभं स्यात्
नृपप्रसादोऽध्वगदर्शनं च।
सौम्येऽथ भीस्तस्करशोकवार्त्ता
सौम्या च वार्त्ता धनलाभवार्त्ता ॥
ईशानदेशेऽभिमतेन शस-
त्यासौ हुताशाद्भयलोकसङ्गः।
ब्रह्मप्रदेशे सुखकामभोग-
सम्मानसम्पद्द्रविणाप्तसिद्धिः" ॥
इति प्रथमः प्रहरः ॥ * ॥
"प्राच्यां द्वितीये प्रहरे विरावैः
काकस्य कश्चित् पथिकोऽभ्युपैति।
चौराद्भयं व्याकुलता च बह्वी
जायेत काचिन्महती च शङ्का ॥
हुताशदेशे नियतं कलिः स्यात्
प्रियागमाकर्णनयोषिदाप्तिः।
याम्ये तु दृष्टिर्महती च भीतिः
प्रियस्य चेष्टस्य समागमः स्यात् ॥
रक्षोदिशि प्राणभयं तदा स्युः
स्त्रीभोज्यलाभाखिलरुक्प्रणाशाः।
भवेत् प्रतीच्यां प्रबलावलाप्ति-
र्योषागमो वृद्धिः कुवर्षणञ्च ॥
समीरभागे ध्वजचौरसङ्गो
दूतागमस्त्रीपिशिताम्बलाभः।
सौम्ये गणेष्टागमनं जयश्च
रम्ये रवे चौरभयं त्वरण्ये ॥
महेश्वराशाविरतश्च काक-
श्चौराभिसन्त्रासविरुद्धवार्त्ता।
ब्रवीति रूक्षैरटनैररूक्षैः
सदार्य्यगुर्व्वागमनं जयश्च ॥
ब्रह्मप्रदेशे प्रहरे द्वितीये
काकः सुशब्दो नृपतिप्रसादम्।
मिष्टान्नभोज्यञ्च ददाति पुंसां
करोत्यसौ चौरभयं कुशब्दः" ॥
इति द्वितीयप्रहरः ॥ * ॥
"ऐन्द्र्यां विरूढः प्रहरे तृतीये
वृद्धिं तथा चौरभयं ब्रवीति।
कृष्णस्तु राजागमनं जयञ्च
करोति यात्रां शुभकार्य्यसिद्धिम् ॥
अग्नेर्विभागेऽभिभयं कलिञ्च
विरुद्धवार्त्तां विफलां च यात्राम्।
भवेद्विरुद्धैर्ब्बलिभुग्विरावै-
र्जयादिवार्त्ता च भवेद्विशुद्धिः ॥
काकुत्स्थवाच्यां कुरुतेऽतितूर्णं
रोगं तथाप्तागमनं विहङ्गः।
क्षुद्राणि कार्य्याणि च यान्ति सिद्धिं
सर्व्वाणि तन्मुख्यतया नराणाम् ॥
क्रव्याददेशे जलदागमः स्या-
न्मिष्टान्नलाभो रिपवो न सन्ति।
शूद्रागमः स्वामिविरुद्धवार्त्ता
भवन्ति यात्रासु च कार्य्यनाशः ॥
स्यात् पश्चिमे नष्टधनस्य लाभो
दूराध्वयानं सुहृदागमश्च।

योषागमोऽभीष्टजयादिवार्त्ता
यात्रासु रम्ये रटितेऽर्थसिद्धि ॥
वातालये दुर्द्दिनमेव वार्त्ता
चौराभिनष्टार्थसमागमश्च ।
सन्तोषवार्त्ता वरयोषिदाप्ति-
र्यात्रा रवे स्यान्मधुरे प्रशस्ता ॥
यामे तृतीये विरुवन्त्युदीच्यां
कार्य्यार्थलाभो न्टपसेवकानाम् ।
भोज्यप्रवृद्धै शुभदा च वार्त्ता
प्रयाणकं वेश्यसमागमश्च ॥
दिश्यन्यकारे· कुरुते सुशब्द
भोज्यं जयं हानिकली कुशब्दम् ।
ब्रह्मप्रदेशे तिलतण्डुलाभ्या
भोज्य च ताम्बूलयुत ददाति" ॥
इति तृतीयप्रहर· ॥ * ॥
ऐन्द्या तुरीयप्रहरेऽर्थलाभो
भूमीशपूजाभयवृद्धिरोगा· ।
वह्नेर्व्विभागे भयरोगम्टत्यु
शिष्टागमो वायसरासितेन ॥
याम्ये रवे तस्करवैरिभीती
स्याता विशिष्टागमरोगम्टत्यु ।
स्याद् यातुधान्या महती प्रवृद्धि-
रभीष्टसिद्धि· पथि चौरयुद्धम् ॥
दिशि प्रतीच्या प्रहरे चतुर्थे
दिशातिरभ्येति ततोऽर्थलाभ ।
आयाति योषिद्दिजयाम्बुवृष्टि
सिद्धि· प्रयाणे न्टपतेर्व्वरश्च ॥
वायव्यभागे करटस्य शब्दै-
रायाति योषित् प्रियमानिनी या ।
ध्रुवं प्रवासो दिनसप्तकेन
शीघ्रागम स्यात् गमने कृते च ॥
कुवेरभागे पथिकोऽभ्युपैति
ताम्बूललाभ कुशलस्य वार्त्ता ।
वैश्याङ्गनाप्तिस्तुरगादिरूढ़ा
यात्राविरुद्धे म्रियते च रोगी ॥
स्थाणौ स्थितश्चेद् वलिभुग् विरौति
सवर्णवार्त्ता सरुजो विनाश ।
ब्रह्मप्रदेशे प्रहरे चतुर्थे
वार्त्ता भवेन्मध्यमिका च सिद्धिः" ॥
इति चतुर्थप्रहरः ॥ * ॥
"यद्भाषितं शाकुनिकैर्व्विमिश्र
शुभाशुभ दिक्प्रहरक्रमेण ।
तत्राशुभं यच्छति दीप्तशब्द
श्रेयस्कर· शान्तरवश्च काक ॥
रम्य रवं दीप्तदिशि प्रसर्पन्
शान्ता दिश भूरि फलं ददाति ।
तदेव तुच्छ वितरत्यसौ वै
दीप्तस्थित पश्यति दीप्तकाष्ठाम् ॥
यथोपदिष्ट फलमत्र दुष्ट
तथैव तद्दीप्तदिशि स्थित सन् ।
ध्वाङ्क्षोऽधिरूढो विरुवन् करोति
निरीक्षमाण· ककुभं प्रदीप्ताम् ॥
काक· प्रशान्ताभिमुखोऽतितुच्छ
दीप्ताश्रितो दुष्टफलं ददाति ।
शाखाश्रित· शान्तदिगीक्षणेन
रूक्षारवोऽल्प कथयत्यनिष्टम् ॥
शान्तस्वर शान्तककुप्प्रदेशे
तिष्ठन् प्रदीप्ता ककुभश्च पश्यन् ।
ददात्यभीष्टं फलमेवमल्प
दीप्ता स पश्यस्तु तदेव तूर्णम् ॥
आकारचेष्टारवभागविज्ञा-
श्चत्वारि काष्ठादिनयो क्रमेण ।
सदाभियुक्ताश्च निरूपयन्ति
यस्माच्च ते काकरुत मनुष्या" ॥
इति काकरुते दिक्चक्रप्रकरणम् ॥ * ॥
"वर्षाकालमधिकृत्य किञ्चन
प्रोच्यते वलिभुजो यथाक्रमात् ।
आलयाण्डकविचारसुन्दर
शाकुन सकलशाकुनोत्तमम् ॥
वैशाखमासे निरुपद्रवेषु
द्रुमेषु काकस्य शुभाय नीडम् ।
निन्द्येषु शुष्केषु सकण्टकेषु
द्रुमेषु दुर्भिक्षभयाय हेतु· ॥
प्रशस्तवृक्षे यदि पूर्व्वशाखा-
माश्रित्य काकेन कृत कुलायम् ।
तदृष्टिरिष्टाशकुनप्रमोदो
नीरोगता स्याद्विजयश्च राज्ञ ॥
आग्नेयशाखारचिते च नीडे
स्यादृष्टिरिष्टास्ति भय कलिश्च ।
दुर्भिक्षशस्त्रद्रवदेशभङ्गो
भवन्ति रोगाश्च चतुष्पदानाम् ॥
याम्यासु शाखासु च वायसेन
नीडे कृतेऽल्प जलपातमाहु ।
व्याधिप्रकोप मरणं समन्ता-
दन्नक्षय प्रभुविरोधिताश्च ॥
नैर्ऋत्यशाखारचिते च नीडे
यस्माच्छनैर्वर्षति वर्षकाले ।
पीडा न्टणा विड्वरचौरभीति-
दुर्भिक्षयुद्धानि भवन्त्यवश्यम् ॥
नीडे कृते पश्चिमवृक्षशाखा-
माश्रित्य काकै कथिता च वृष्टि· ।
नीरोगताक्षेमसुभिक्षवृद्धि-
सम्पत्प्रमोदाश्च भवन्ति लोके ॥
वायव्यशाखासु कृते च नीडे
प्रभूतवातात्यजलाश्च मेघा ।
स्युर्मूषिकोपद्रवशस्यनाश-
पक्षद्वयोद्वेगमहाविरोधा ॥
कौवेरशाखामधिकृत्य नीडे
कृते भवेत् प्रावृषि वृष्टिरिष्टा ।
भवन्ति च क्षेमसुभिक्षसौख्य-
नीरोगतावृद्धिसमृद्धयोऽस्मिन् ॥
ईशानशाखासु च वृष्टिरल्पा
वैरं प्रजानामुपसर्गदोष ।
स्याद्वान्यवाना कलहप्रवृत्ति-
र्म्मर्य्यादया हीयत एष लोक· ॥
वृक्षाग्रनीडे त्वतिवर्षकाले
मध्ये पुनर्मध्यमतोयमाह ।
तुच्छापि वृष्टिर्न प्रवत्यधस्तात्
स्फुटं दिशोक्ता न दिश· स्फुटत्वम् ॥
अवृष्टिरोगादिभयादिवृद्धि
विद्याच्च भूमौ वलिभुक्कुलाये ।
शुष्के च वृक्षे डमरान्ननाशौ
प्राकाररन्ध्रेषु भय प्रभूतम् ॥
निम्नप्रदेशे तरुकोटरे वा
वल्मीकरन्ध्रे व्रततिष्वपीह ।
काकस्य नीडे खगवृष्टिदोषै-
र्भवन्ति शून्या नियमेन देशा" ॥
इति वसन्तराजे काकरुतप्रकरणम् ॥ * ॥
अथकाकाण्डविचार ।
"एक भवेद्दारुणमग्निसंज्ञ
द्वितीयकं मारुतक तृतीयम् ।
ऐन्द्र तथा नाम चतुर्थमेव-
मण्डानि काक्या परिकीर्त्तितानि ॥
काक्या भवेद्दारुणमण्डकं चेत्
पृथ्वी तदा नन्दति सर्व्वशस्यै· ।
मन्दप्रवर्षोऽनलसञ्ज्ञकेऽण्डे
नोप्तस्य वीजस्य भवेत् प्ररोह· ॥
जातानि शस्यानि समीरणेऽण्डे
खादन्ति कीटा शलभा शुकाद्या· ।
क्षेम सुभिक्ष सुखिता धरित्री
स्यादैन्द्रजेऽण्डेऽभिमता च सिद्धि" ॥
इत्यण्डप्रकरणम् ॥ * ॥
"यात्रा निमित्तानि च कीर्त्तयाम·
सहस्रजाना शकुनानि तानि ।
विज्ञाय यानि प्रजहात्यनर्था-
नर्थांश्च सर्व्वान् कुरुतेऽध्वनीन ॥
भुङ्क्ष्व वलिं पक्षिषु मन्त्रपूत
त्व प्राणिषु प्राणिषि वर्षलक्षम् ।
गुप्तेन च स्त्री भजसे नमोऽस्तु
तुभ्य खगेन्द्राय सहस्रजाय ॥
विलोक्य काकं विनिवेद्य तस्मै
मन्त्रेण पूजा दधिभक्तयुक्ताम् ।
उदीर्य्य कार्य्यं निजमध्वगेन
विलोकनीयं शकुनं तदर्थम् ॥
वामेन शब्द मधुर विमुञ्चन्
व्रजश्चवामेन करोति काक· ।
सर्व्वार्थसिद्धिं पुनरागमञ्च
शुभप्रदेशे तु तदन्यरूप· ॥
प्रदक्षिणा संप्रविधाय मार्ग
वामेन काको विनिवर्त्ततेऽसौ ।
यातु करोतीप्सितकार्य्यसिद्धिं
क्षेमञ्च शीघ्र पुनरागमञ्च ॥
वामे कल रौत्यनुलोमयायी
यो वायसोऽसौ सकलार्थसिद्ध्यै ।
स्याता क्रमाद्दक्षिणवामशब्दौ
सिद्ध्यै विरुद्धौ विपरीतभूतौ ॥

पृष्ठे विरावं मधुरं विमुञ्च-
न्ननुव्रजश्चापि मतो हिताय ।
प्रायेण यातारमनुव्रजन्तः
सर्व्वेऽपि काकैः कथिता विहङ्गाः ॥
कृत्वा रवं च पुरतः प्रयाति
उपस्थितो यो मदमादधाति ।
कण्डूयते च स्वशिरोऽङ्घ्रिणासौ
पुंसां तदाभीष्टफलं ददाति ॥
स्तम्भे गजानां नियतं गजाप्ति
गजेऽधिरूढः पृथिवीपतित्वम् ।
तुरङ्गमे वाहनभूमिलाभं
करोति काको विजयं ध्वजेन ॥
प्रणष्टलाभं विजयं च यूपे
क्षिप्रं नदीरोधसि कार्य्यसिद्धिम् ।
पूर्णे घटेन्द्रे च धनाप्तिवृद्धि
ध्वाङ्क्षोऽधिरूढः कुरुते सशब्दः ॥
प्रासादधान्योच्चयहर्म्यपृष्ठ-
निष्पन्नशस्यावनिशाद्वलादौ ।
ध्वाङ्क्षोऽधिरूढो धनसाधनाय
रौति श्रियं यच्छति यत्नगात्र ॥
पृष्ठे पुरो वा यदि गोमयस्थो
तथा वटाद्येषु तरुष्वपीष्टः ।
स्थितो रुवन् भोजनपानमिष्ट-
विष्ठां च कुर्व्वन् वितरत्यवश्यम् ॥
अन्नाद्यविष्ठाफलमन्नपुष्प-
मत्स्यादिभिः पूर्णमुखः सदैव ।
सदृष्टमात्रोऽभिमतार्थसिद्धि-
मिष्टान्नभोज्याय सदैव काकः ॥
नारीशिरःपूर्णघटस्थितस्य
काकस्य शब्दैर्व्वनिताधनाप्तिः ॥
शय्याधिरूढस्य च तस्य शब्दैः
समागमः स्यात् सुजनेन सार्द्धम् ॥
गोपृष्ठदूर्व्वातृणगोमयेषु
तुङ्गानि सर्पन्नवनोक्षिताग्रे ।
आहारमन्यस्य तथा ददानो
ददाति भोज्यं बलिभुग्विचित्रम् ॥
धान्यं यवं वा दधि वापि चान्यं
विरौति पश्यन्निधिलाभकारी ।
करोति लाभं पुरतः स दृष्टो
यस्यास्ति वक्त्रे तृणमप्यशुष्कम् ॥
वृक्षेषु रम्याङ्कुरपत्रपुष्प-
च्छायाफलाढ्येषु सदात्मगस्य ।
शब्देन सिध्यन्त्यसकृन्नराणां
सदैव सर्व्वाणि समीहितानि ॥
प्रशान्तनादः शिखरे तरूणां
स्त्रीसङ्गसौख्यं करटोऽभिधत्ते ।
धान्यादिकूटेषु तथान्नलाभो
गोपृष्ठगो गोवनिताधनाप्तिम् ॥
क्षेमं विधत्ते करभस्य पृष्ठे
खरस्य पृष्ठेऽरिभयं वधञ्च ।
क्रोडस्य पृष्ठे वधमर्थलाभं
तस्यैव पृष्ठे घनकर्दमपङ्के ॥

सद्यो ज्वरं शोणितभस्मसंस्थो
श्मशानसंस्थो मरणं करोति ।
कार्य्यक्षतिं छिन्नघटस्य संस्थः
काकः करोति काष्ठमधिष्ठितश्च ॥
यो दक्षिणं स्पृशति दक्षिणेन
प्रयाति दक्षाभिमुखोऽभ्युपैति ।
यो याति पृष्ठे प्रतिलोमगत्या
कृताश्च पातयते स राज्यम् ॥
वामे रवो दक्षिणतस्तथा यः
सोऽनर्थहेतुर्व्वणिजोऽध्वगस्य ।
वामप्रदेशे प्रतिलोमयानं
विघ्नाय गामी स्वय एव तेन ॥
प्रयाति पृष्ठे यदि दक्षिणेन
कृतावक्तृदधिं पर स्यात् ।
मालीरथादि च यो गृहीत्वा
प्रदक्षिणं याति स सर्पभीत्यै ॥
गोपुच्छवल्मीकलतामादध्य
रुवन् भवेत् सर्पविलोकनाय ।
श्मशानदेऽङ्गारचितास्थिसंस्थ
काकः प्रकुर्व्वन् करचर्व्वणं च ॥
रुवन् पुरो हानिरुजौ करोति
मृत्युं पुनर्निम्नगपृष्ठभग्न ।
प्रसार्य्य शिरो वर्त्म च याति
सर्व्वत्र निन्द्यो बलिभोजनोऽसौ ॥
वामोऽप्यपसव्यगतश्च स्तुति वा
सताडयित्वा रसचर्म्मलब्धम् ।
चर्म्मास्थिभङ्गं ध्रुवमस्थिभङ्ग-
बन्धे वध स्वपति ग्रथ्यमान ॥
वामोऽपि रोगं कुरुते विशुष्के
सिक्तेऽपि वृक्षे कलिकार्य्यनाशी ।
पक्षौ विधुन्वन् विरुवंश्च रूक्षं
सकण्टके मृत्युमुपाददाति ॥
वधो भवेद्भूरुहभग्नशाखे
बन्धो लताभिः परिवेष्टिते स्यात् ।
रम्ये तरौ कण्टकयुक्तवृक्षे
सदा भवेतां कलिकार्य्यसिद्धी ॥
कन्नाधिरूढो न रवेण यायात्
प्रयाति चेत् स्यात् खलु रक्तपातः ।
अवस्करभूस्तृणकाष्ठकूप-
भस्मादिसंस्थो विनिहन्ति कार्य्यम् ॥
वस्त्रोदरत्राकचर्म्मकाष्ठ-
चर्म्मास्थिशीर्णाम्बरवल्कलानि ।
अङ्गाररक्तोत्पलकर्पराणि
दृष्टानि चेत् काकमुखे तदानीम् ॥
पुण्यक्षयं पापसमागमञ्च
मृत्युञ्च रोगसमुद्भवञ्च ।
बन्धो वध सर्व्वधनापहार
इत्यादिक स्यात् पथि मन्दिरे च ॥
ऊर्द्धाननश्चञ्चलपक्षयुग्म
काक कुनादो विदधाति मृत्युम् ।
छायायुधच्छत्रघटास्थियान-
वादित्रकाष्ठादिककुट्टकानि ॥

सङ्गोपितैकाङ्घ्रिरपेतविघ्नो
दीप्तस्वरो भास्करमीक्षते च ।
काष्ठादिकं कुट्टयतेऽथवा यो
युद्धाधिकारार्थकरः खगोऽसौ ॥
तुण्डेन पिच्छं विलिखन् रवेण
यो रौति गृध्रांश्च निरीक्षते खम् ।
एकेन पादेन तथोपविष्टो
भूते स बन्ध पुरतो जनस्य ।
विष्ठोमयौ न्यस्यति यस्य मूर्द्ध्नि
तस्याशनत्रासनकौ भवेताम् ।
यस्याश्रितश्मं विलिखत्यसौ तु
प्रयाति शीघ्रं नगरीं यमस्य ॥
मध्यप्रदेशे विरुवन् यियासोः
कलत्रदोषं जनयत्यवश्यम् ।
मनुष्यमातङ्गतुरङ्गमाणां
शिरोऽधिरूढो निधनाय तेषाम् ॥
नदीतटे वाथ रटन्नटव्यां
खरस्वरो व्याघ्रभयाय गन्तुः ।
नैवातुरः क्वापि मतो हिताय
न दृष्टचेष्टो वितनोति शान्तिम् ॥
यात्रोद्यमे मन्यवधाय काको
दृष्टो रथे साश्वस्थमस्तकेषु ।
आयाति यस्याभिमुखो वकस्य
युद्धोद्यमे तस्य पराभवः स्यात् ॥
सङ्ग्रामकाले कटके नृपस्य
काके प्रविष्टे पिशितं विनापि ।
सयुध्यमानैरपि समं स्या-
न्मदाहव सन्धिरयुध्यमाने ॥
चिह्नध्वजच्छत्रहताधिरोहे
समुद्धत शत्रुबल प्रपश्यन् ।
घातो भय जल्पति भूमिपानां
हतध्वनि चोरतरौ च काकः ॥
गतिस्वरौ वायससम्प्रयुक्तौ
प्राच्यां फलायोदितवैपरीत्यात् ।
एव जनोऽप्याचरति प्रभूतौ
यथोदितं तत्र तथागमार्थम् ॥
दिग्यामचक्रेऽपि शुभाशुभानि
फलानि यानि प्रतिपादितानि ।
प्रतिष्ठमानस्य भवन्ति यानि
तथाविधानीति वदन्ति तज्ज्ञाः" ॥

इति काकरुते यात्राप्रकरणम् ॥ * ॥

"ग्रामस्थितानां कथयन्ति काका-
श्चेष्टाविशेषेण शुभाशुभानि ।
प्रबोधिता प्राक्तनकर्म्मभिर्ये
तल्लक्षणाय क्रियते प्रयत्नः ॥
निष्कारणं सवलिता रुवन्तो
ग्रामेऽन्ननाशाय भवन्ति काकाः ।
रोधश्च चक्राकृतयो वदन्ति
सव्यापसव्यभ्रमणाद्भयञ्च ॥
विघातमाऊर्द्ध्वोऽद्धवर्गसंस्था
रात्रौ रुवन्तो जनताविनाशम् ।
लोकञ्च चञ्चूद्धरणप्रहारै-

स्तम्भयन्तं परचक्रवृद्धिम् ॥
यः स्नाति धूल्यान्तु विलोक्य रौति
वृष्टिं समाश्वसति वायसोऽसौ ।
जलस्थलप्राणिविपर्य्ययेण
वर्षासु वृष्टिं भयमन्यदा तु ॥
मध्ये दिने वेश्मनि यस्य काको
विरौति रौद्रं विधुनोति वाङ्गे ।
हरन्ति चौरा द्रविणानि तस्य
ध्रुव तथान्यो भवति प्रमाद ॥
रुवन्नदृष्टस्तृणपूर्णवक्त्रो
कृताश्रभीतिं करट करोति ।
स्यात् प्रस्थितस्याप्यथवा स्थितस्य
दुःखं प्रभूतं दिवसत्रयेण ॥
छायासु लाभं भुवि भूमिलाभ
विघ्नं जले यावणि कार्य्यनाशम् ।
करोति काको विरुवन्नरस्य
प्रास्थायिनः स्थानगतस्य वापि ॥
द्वारप्रदेशेरुधिरानुलिप्तो
विरौति काक शिशुनाशनाय ।
पक्षौ विधुन्वन् विरुवंश्च रूक्ष
शान्ते च दीप्ते भवने न शस्त ॥
भूयस्तथोर्द्धे प्रविधाय पक्षौ
काक कुनाद प्रलय करोति ।
क्रुद्धोऽधिरूढः करटान्तरञ्च
रोगेण मृत्युं कुरुते नराणाम् ॥
द्रव्ये हृते वापहृते खगेन
विनाशलाभावपि तादृशस्य ।
रुक्मस्य पीते रजतस्य शुक्ले
चौलस्य कार्पासमये भवेताम् ॥
प्रश्ने कृते रोगविनाशबुद्ध्या
हन्यास्तु रोग सुरव प्रदीप्ते ।
शान्ते प्रदेशे करटस्थिरेण
वल्यारवो रोगमपाकरोति ॥
प्रश्ने शुभे शान्तदिगाश्रयस्य
शान्तस्वरो य शुभमादधाति ।
यो वायसस्त शुभद वदन्ति
तद्व्यत्यये व्यत्ययहेतुरुक्त ॥
विरौति कुम्भे मणिकेऽथवा य
स गर्भवत्या सुतजन्महेतु ।
उड्डीयते कण्टकिनीश्च शाखा-
मादाय राजागमनाय काक ॥
अन्नादिविष्ठापिशितादिभिर्य
पूर्णाननोऽभीष्टफलप्रदोऽसौ ।
मन्त्रादिसिद्धौ वणिजादिलाभे
शक्तो विवाहादिविधौ च काकः ॥
इष्टार्थदोऽश्वादिकवाहनस्थ-
स्कन्धादिसंस्थस्तदवाप्तकारी ।
मध्वागमं जल्पति तोरणस्थो
इष्टार्थदो छत्रतरुस्थितस्य ॥
वायस कुलकुलध्वनि यदा
व्याहरेद्भवनसंमुखं तदा ।
अभ्युपैति पथिकस्तदा ध्वनि
सर्व्वकार्य्यशुभदं वदत्यसौ ॥
इद त्रिधोत्पातयुग पृथिव्या
महाभयं शाकुनिका वदन्ति ।
यद्वायसो मैथुनसन्निविष्टो
दृश्येत यद्वा धवल कदाचित् ॥
उद्वेगविद्वेषभयप्रवास-
धनक्षयव्याधिभयप्रहाण ।
वुद्धिप्रणाशाकुलताप्रवादा
न्तृणा भवन्त्यद्भुतदर्शनेन ॥
शमाय तत्सूचितदु खराशे
स्नानं वहिर्ग्रामतज्जणेव कुर्य्यात् ।
आत्मीयशक्त्या च सदक्षिणानि
द्विजाय दद्यात् वसनानि तानि ॥
नयेदह शेषमपुण्यहान्या
शयीत भूमावकृतान्नभक्त ।
हविष्यभोजी न भजेच्च नारीं
दिनानि सप्त त्रिगुणानि यावत् ॥
अकाकघातव्रतमादधीत
वलिं च दद्याद्बलिभोजनेभ्य ।
स्नात्वा प्रभाते विदधीत शान्ति
दद्यात् स्वशक्त्या द्रविण गुणिभ्य ॥
देशे तु यत्राद्भुतमेतदुग्र-
मालोक्यते तत्र समापतन्ति ।
अवृष्टिदुर्भिक्षभयोपसर्ग-
चौराग्निशत्रूद्भवधर्म्मनाशा ॥
कर्म्माणि तस्योपशमाय राजा
प्रवर्त्तयेत् शान्तिकपौष्टिकानि ।
अन्नाद्यगोभूमिवसूनि दद्यात्
युद्ध विदध्यान्न च यावदब्दम्” ॥
इति काकरुते स्थानस्थितप्रकरणं पञ्चमम् ॥ ॥

अथ स्वरविचार ।

“ककामिति क्षेमविधौ विराव
केकामितीष्टाशनयानहेतु ।
करोति कू कूमिति चार्थलाभ
कां कां ध्वनि काञ्चनलाभमाह ॥
कें केमिति स्त्रीवरयोषिदाप्त्यै
भोगाय का कामिति शब्दित स्यात् ।
अपत्यलाभ कु कु इत्यनेन
गन्तु फल केकव इत्यनेन ॥
क्रौं क्रौमितीद शुभलाभकारि
कु कु निनाद प्रियसङ्गमाय ।
क्रा क्रूमिति क्रामिति च त्रयोऽमी
क्रा क्रामिति द्वौ च रवौ रणाय ॥
क्रा क्रामिति क्रौमिति च दिरुक्त
क्रू क्रूमिति क्रौ कुकु कू इतीदम्
रुतं प्रदिष्टं मरणाय नृणा
गन्तु प्रणाशं कुरुते खगाख्य ॥
क्री क्रीमितीष्टार्थविनाशनाय
ज्वलज्वलेत्यग्निभयाय शब्द ।
कोकोति कोकाविति य कथञ्चिन्-
मुञ्चमुञ्च स्यात् स मतो वधाय ॥
स्यात् का इतीद विफल सदैव
मित्राप्तये स्यात् क इतीष्टशब्द ।
काका इतीद तु विघातकारि
करोति काको वदति स्वतुष्ट्यै ॥
आहारदोषाय च काकटीति
स्यादाकुल कुक्कुनिभ रणाय ।
केकेध्वनिष्काकुटि कि टिकीति
त्रयं त्विद स्यात् पुरदूषणाय ॥
यत् का इति त्रिस्तदनुस्वरेण
शब्दद्वय स्यान्महते रणाय ।
क्रामित्यय वाहननाशनञ्च
ददाति हर्षं कुकुकुर्व्वितीदम् ॥
यत्का इतीद विरुत सुदीर्घ-
कृतस्वरेणोच्चरित प्रमादात् ।
उत्साहहीन श्रमदैन्ययुक्त
स वायस कार्य्यविनाशनाय ॥
सामिष वकवकेति भोजये-
दारयेत् कलिकलीति रासनम् ।
अभ्युपैति खररूक्षभाषिते
प्रोषित शवशवारवे शव ॥
स्यात् कलि कवकवध्वनौ न्तृणा
जायते कणकणाध्वनौ ज्वर ।
आव्रजेत् कुलुकुलुध्वनौ प्रिय
सौदन कटकटध्वनौ दधि ॥
एव प्रकारा बहवोऽपरेऽपि
प्रशान्तदीप्तावलिभोजनानाम् ।
भवन्ति शब्दा खलु तेषु केचि-
दस्माभिरुक्ता खलु लक्षणीया” ॥
इति काकरुते स्वरप्रकरणं षष्ठम् ॥ ॥

“हित नरेभ्यो मुनिभि पुराणै-
र्ज्ञान यदुक्त बलिपिण्डयुक्त्या ।
तदुच्यते सम्प्रति येन काका
वदन्ति नित्य बलिलाभतुष्टा ॥
अदक्षिणस्या दिशि यत्र काकै-
र्युतो भवेत् क्षीरतरु प्रभूतौ ।
गत्वा निवृत्तेऽह्नि तत्र काका
निमन्त्रणीया बलिपिण्डभाज्ये ॥
प्रातस्तत क्षीरतरोरधस्ता-
द्विशोध्य लिप्येत् सह गोमयेन ।
भूमिप्रदेशे चतुरस्रमस्य
मध्येऽर्चयेत् ब्रह्मसुरारिभानून् ॥
इन्द्राग्निवैवस्वतयातुधान-
जलेशवायुद्रविणेशशम्भून् ।
अभ्यर्च्चयेदष्टसु दिक्षु भक्त्या
क्रमेण चाष्टावपि लोकपालान् ॥
नमोयुतैः स्वप्रणवैश्च सर्व्वा-
न्निजाभिधानैः प्रयतो मनुष्यः ।
अर्घासनालेपनपुष्पधूप-
नैवेद्यदीपाक्षतदक्षिणाभि ॥
आब्रह्मकाकान्तरुसन्निविष्टा-
नाध्याय तत्राह्वानमन्त्रयुक्त्या ।
ततस्तदर्द्धं बलिमाज्यसिक्त
मन्त्रेण दद्यात् दधिपिण्डयुक्तम्” ॥

मन्त्र । इन्द्राय यमाय वरुणाय धनदाय भूतवाय-
साय वलिं गृह्णातु मे स्वाहा ॥
"उदीर्य्य कार्य्यं स्वमथावस्त्य
तत प्रदेशे कारटस्य चेष्टा
स्पृष्टीक्षताङ्गानि शुभाशुभार्थं
समन्वयेन्निखिलपाणिपाद ॥
पूर्व्वेण खादन् सुखवित्तवृद्धिं
करोति वह्नेर्दिशि वह्निभीतिम् ।
काकोऽर्थनाशं दिशि दक्षिणस्या
नैर्ऋत्यगो दिग्वरकृत्यदिष्ट ॥
जलेशदेशेऽभिमतार्थसिद्धि-
र्व्वायोर्दिशीति प्रमवात्यवृष्टि ।
सौम्ये सुखारोग्यसमीहितार्थ-
मीशानदेशे वितरत्यभीष्टम् ॥
बलौ विलुप्ते कारट समन्तात्
कार्य्यं विमिश्रं परिभावनीयम् ।
बलिं विकीर्य्यापि न भक्षयन्ति
काकास्तदानीं भयदा भवन्ति ॥
क्षीरद्रुमारामचतुष्पदेषु
सरित्समीपे त्रिदशालयेषु ।
देयो वलिर्भूतदिनाष्टमीषु
कुल्माषदध्योदनतण्डुलाद्यैः" ॥
इति काकरुते पिण्डप्रकरणं सप्तमम् ॥ * ॥
"पिण्डत्रयस्याथ विधानमेत-
दाख्यायते यत् किल नारदाद्यैः ।
दृष्टं मुनीन्द्रैरशुभं शुभञ्च
यथावदस्मिन् कथयन्ति काकाः ॥
गत्वा शुभेऽह्नि प्रहरे चतुर्थे
देशेषु पूर्व्वप्रतिपादितेषु ।
नरेण पिण्डत्रयभोजनार्थं
काकाः प्रयत्नेन निमन्त्रणीयाः ॥
ततः प्रभाते ह्युपलिप्य भूमिं
तस्याञ्च पूर्व्वोदितमन्त्रयुक्त्या ।
ब्रह्माच्युतेशाप्यतिलोकपाला
काकाश्च पुरा क्रमतोऽर्च्चनीयाः ॥
दध्योदनाद्यैर्व्विहित प्रवेश्य
पिण्डत्रये मण्डलकस्य मध्ये ।
अभ्यर्च्चयेदक्षतपुष्पधूपै-
र्मनोहरैर्यत्नपरो मनुष्यः ॥
तेषु क्षिपेत् प्राग्दिगनुक्रमेण
पिण्डेषु हेमप्रथमे द्वितीये ।
रूप्यं तथा लौहलवं तृतीये
शेषञ्च कुर्य्याद्वलिपिण्डतुल्यम् ॥
त्रिः सप्तकृत्वो विनिवेश्य पिण्डे
पिण्डा निवेश्या बलिभोजनेभ्यः ।
मन्त्रोक्तमावाहनतोषितेभ्य
कार्य्यं विचार्य्यापसरेत्ततश्च" ॥
मन्त्र । ॐ छिवि टिमि विटि काकचाण्डालाय
स्वाहा । इति पिण्डाभिमन्त्रणार्थम् । ॐ ब्रह्मणे
विश्वाय काकचण्डालाय स्वाहा । काकाह्वानमन्त्रः ॥
"काकेन भुक्ते ससुवर्णपिण्डे
ज्ञेयं नरेणोत्तममात्मकार्य्यम् ।
भुक्ते सरूप्ये खलु मध्यमं स्याद्-
भुक्ते सलौहे त्वधमं प्रदिष्टम् ॥
विवादवाणिज्यविवाहवृष्टि-
क्षेमाश्च वित्तं कृषिभोगरोगाः ।
संग्रामसेवाल्पकार्य्यदेशा
इत्यादयोऽस्मिन् परिभावनीया ॥
चेष्टामवामां विदधाति याति
प्रदक्षिणं दक्षिणपक्षमुखे ।
ग्रीवां तथोच्चां कुरुते सशब्दः
स्थाने मनोज्ञे श्रयति द्रुमस्य ॥
एवंविधां यो विदधाति चेष्टां
पिण्डं समादाय शुभं खगोऽसौ ।
अभीष्टकार्य्यादधिकं करोति
चेष्टाविपर्य्यासतयान्यथात्वम् ॥
पिण्डं समादाय यदि प्रधानं
शान्तं दिशं गच्छति काकपक्षी ।
पूर्णं फलं तत् कुरुते नराणां
चिकीर्षिते वस्तुनि यत्र तत्र ॥
काको गृहीत्वा यदि मुख्यपिण्डं
प्रयाति दीप्तां ककुभं तदानीम् ।
अत्युत्तमं कार्य्यफलं प्रदर्श्य
ततः समस्तं विनिहन्त्यवश्यम् ॥
द्वितीयकं यद्यपहृत्य पिण्डं
मुड्डीयते शान्तदिगाश्रयेण ।
फलं तदानीं शुभदं नराणाम्
याप्यं खगो जल्पति कार्य्यजातम् ॥
काके समादाय जघन्यपिण्डं
याते प्रदीप्तां ककुभं वदन्ति ।
कार्य्यं जघन्यादधिकं जघन्यं
स्यान्मध्यमं मध्यमपिण्डभागे" ॥
इति वसन्तराजे पिण्डत्रयप्रकरणमष्टमम् ॥ * ॥
"महर्षयो वायसशाकुनस्य
वदन्ति सारादपि सारभूतम् ।
पिण्डाष्टकं यत्तदशेषमेत-
दाख्यायते कार्य्यविनिश्चयार्थम् ॥
शुभेऽह्नि काकानधिवास्य सायं
पिण्डाष्टकं भोक्तुमथ प्रभाते ।
तत्कालयोग्यानि समस्तवस्तू-
न्यादाय यायाद्बहिरप्रमत्तः ॥
एकान्तदेशे तरुपार्श्वभूमौ
मृद्गोमयाभ्यामुपलेपितायाम् ।
सत्पञ्चगव्येन समुक्षितायां
सौम्योपहारैरुपशोभितायाम् ॥
विधाय पूजां कुलदेवतानां
मध्ये ततोऽष्टस्वपि दिक्षु देयम् ।
भक्तेन सर्पिर्दधिमिश्रितेन
पिण्डाष्टकं प्राग्दिगनुक्रमेण ॥
पक्षीन्द्रवह्न्यन्तकराक्षसेन्द्रान्
विष्णुं विरिञ्चिं धनदं महेशम् ।
पूर्व्वादिकाष्ठाक्रमयोजितेषु
न्यसेत् क्रमादस्य पिण्डकेषु ॥
नमोऽन्तकैस्तान् प्रणवश्च सर्व्वां-
स्ततोऽर्च्चयेत्तन्निजनाममन्त्रैः ।
अर्घ्यासनालेपनपुष्पधूपै-
र्नैवेद्यदीपाद्यतदक्षिणाभिः ॥
अभ्यर्च्चितेभ्यो विधिनोदितेन
पिण्डाष्टकं तत् ददतु द्विजेभ्यः ।
मन्त्रेण सम्यक् निवेदनार्थं
कार्य्यं विचिन्त्यापसरेच्च किञ्चित्" ॥
अथ मन्त्र । ॐ नमः खगपतये गरुडाय
द्रोणाय पक्षिराजाय स्वाहा ॥
"द्रोणाढकसम पिण्डं गृहाण त्वमशङ्कितः ।
यथादृष्टं निमित्तं च कथयस्वाधमे स्फुटम् ॥
काकेन पिण्डे प्रथमे गृहीते
तिष्ठन् व्रजन् वापि भवेत् कृतार्थः ।
उद्वेगशोकौ विफलं प्रयाणे
हानिः कलिर्व्वा भवति द्वितीये ॥
याम्ये रुगापद्भयमत्र एव स्यु
पिण्डे चतुर्थे विजयो रणेषु ।
स्याद्दैवतेऽभीष्टमकष्टसाध्यं
भवेत् प्रवासो विफलश्च षष्ठे ॥
नास्तीह तन्निश्चयमेव कार्य्यं
भुक्ते न यत् सिध्यति सौम्यपिण्डे ।
सन्तापशोकौ विफला च यात्रा
पिण्डेऽष्टमे वायसभक्षिते च ॥
पिण्डं न गृह्णात्यथवा न भुङ्क्ते
चञ्च्वा नखैर्व्विक्षिपति द्विजो यः ।
कार्य्येषु सर्व्वेषु स न प्रशस्तो
ब्रवीति घोरं समरं स पुंसाम्" ॥
इति वसन्तराजे काकरुते पिण्डाष्टकप्रकरणं
नवमम् ॥ * ॥
"आद्यं पञ्चाशता द्वाभ्यां वृत्तैर्दिक्चक्रमीरितम् ।
काकालयपरीक्षा च द्वितीये दशभिस्त्रिभिः ॥
वृत्तैस्त्रिभिस्तृतीये च काकाण्डकनिरूपणम् ।
द्वाचत्वारिंशता वृत्तैर्यात्रा तुर्य्ये प्रकीर्त्तिता ॥
वृत्तानि विंशतिस्त्रीणि स्थानं स्थाप्ये च पञ्चमे ।
स्वरप्रकरणं षष्ठं वृत्तैर्द्वादशभिस्ततः ॥
एकादशभिराख्यानं बलिसंज्ञञ्च सप्तमम् ।
पिण्डत्रयविधानाय चतुर्द्दशभिरष्टमम् ॥
पिण्डाष्टकविधानाय नवमे यदुदाहृतम् ।
अन्यप्रकरणं तच्च वृत्तान्येकादशैव तु ॥
वसन्तराजशाकुने सदागमार्थशोभने ।
समस्तसत्वकौतुके विचारितोऽत्र वायसः" ॥ * ॥
समुदायेन १८१ वृत्तानि । इति वसन्तराजशाकु-
नान्तर्गतवायसशाकुननामककाकचरित्रं समाप्तम् ॥
काकमांसगुणाः । दोषक्षयपटुत्वम् । चक्षुर्हितत्वम् ।
दृष्यत्वम् । बलायुर्हितकारित्वम् । लघुत्वम्
दीपनत्वञ्च । इति राजनिर्घण्टः ॥
("काकः कोकिलशूकराश्च खरो
ह्यश्वादयो भक्षुकाः
व्यालाः सौरभयो वृकप्रभृतयो
ये चान्यजीवाः स्मृताः ।
मण्डूकाश्च सरीसृपादिकगणा
यूका कलिङ्गाश्च ये

कोकः सारसशारिका शुक इमे
भक्ष्या न शस्तास्तथा ॥
गृहचटकचकोरा काकजात्याश्च श्येना
पिकशुकविषदष्टभृङ्गदात्यूहकाल्का ।
जलकरटकपोता पोतकी खञ्जरीटा
कलविकमशकाद्या यूकपिङ्गादयोऽन्ये ॥
एते भक्ष्या नैव भक्ष्या न चेष्टा
ये चाप्यन्येऽज्ञातनामाण्डजाश्च ।
अन्ये चापि श्वापदा ये च निन्द्या-
स्ते चाखाद्या वर्ज्जिताश्चात्र सर्व्वे" ॥
इति हारीते प्रथमस्थाने । ११ अ ॥
"काककङ्कुररचाषभासशशघात्युलूकचिल्लिश्ये-
नगृध्रप्रभृतयः प्रसहा ॥
"एते सिंहादिभिः सर्व्वे समाना वायसादयः ।
रसवीर्य्यविपाकेषु विशेषाच्छोषिणे हिता" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अ ॥) पीठसर्पी ।
खोंडा इति भाषा ॥ द्वीपविशेषः ।परिमाणभेदः ।
वृक्षविशेषः । शिरोऽवक्षालनम् । इति हेमचन्द्र
मेदिनीकरौ ॥ तिलकः । अतिदृष्टः । इति शब्द-
रत्नावली ॥

काककङ्गुः, स्त्री, (काकप्रियः कङ्गुः ।) चीनकः । इति
हेमचन्द्रः ॥

काककला, स्त्री, (काकस्य कला अङ्गं जङ्घावयव
तद्वत् अङ्गं यस्याः ।) काकजङ्घावृक्षः । इति
जटाधरः ॥

काकघ्नी, स्त्री, (काकं हन्तीति । काक+हन्+ट
टित्वात् ङीप् ।) महाकरञ्जः । इति राज-
निर्घण्टः ॥

काकचिञ्चा, स्त्री, (काकवर्णा चञ्चा प्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली । कूँच् इति भाषा । (गुञ्जाशब्दे-
ऽस्या विवरणं बोद्धव्यम् ॥)

काकचिञ्चि, स्त्री, (काकवर्णा चञ्चा प्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली ॥

काकचिञ्ची, स्त्री, (काकचिञ्चि+वा ङीप् ।) गुञ्जा ।
इत्यमरः । २ । ४ । ९८ ॥ (अस्याः पर्य्यायो भाव-
प्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । यथा,—
"श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकानन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ॥
गुञ्जाशब्दे विवरणान्तरं ज्ञेयम् ॥)

काकच्छदः, पुं, (काकस्य छद पक्ष इव छदो यस्य ।)
खञ्जनपक्षी । इति शब्दरत्नावली ॥

काकच्छर्दिः, पुं, खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥
(खञ्जरीटशब्देऽस्य विवृतिर्ज्ञेया ॥)

काकजङ्घा, स्त्री, (काकस्य जङ्घेवाकृतिर्यस्याः ।)
स्वनामख्यातवृक्षविशेषः । केउया ठेङ्गा इति
भाषा । तत्पर्य्यायः । काकाङ्गी २ काकाची ३ काक-
नासिका ४ । इति शब्दरत्नावली ॥ लपीवम् । इति
रत्नमाला ॥ ध्वाङ्क्षजङ्घा ६ काकाङ्का ७ सुलोमशा
८ पारावतपदी ९ दासी १० नदीकान्ता ११ ।
अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कृमिव्रण-
कफवाधिर्य्यजीर्णजीर्णविषमज्वरनाशित्वञ्च । इति
राजनिर्घण्टः ॥
("काकजङ्घा बला श्यामा ब्रह्मदण्डी कृताञ्जलिः ।
पृश्निपर्णी त्वपामार्गस्तथा भृङ्गरजोऽष्टमः ॥
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः ।
रक्तसूत्रेण सम्वेष्ट्य बद्धमैकाहिकं जयेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥
मसीति लोके । अस्याः पर्य्याया गुणाश्च यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥
काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरपित्तास्रज्वरकण्डूविषक्रिमीन्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गुञ्जा । इति रत्नमाला ॥

काकजम्बुः, स्त्री, (काकवर्णा जम्बुः ।) भूमिजम्बुः ।
क्षुद्रजम्बुः । इति शब्दमाला । वनजाम् इति
भाषा ॥

काकजम्बूः, स्त्री, (कं जलं अकति आश्रयत्वेन गच्छ-
तीति । क+अक+अण्+टाप् च । काका
जम्बूः । यद्वा काकवर्णा जम्बूः ।) जम्बूप्रभेदः ।
तत्पर्य्यायः । काकफला २ नादेयी ३ काकवल्लभा
४ भृङ्गेष्टा ५ काकनीला ६ ध्वाङ्क्षजम्बूः ७ धन-
प्रिया ८ । अस्या गुणाः । कषायत्वम् । अम्लत्वम् ।
पाके मधुरत्वम् । गुरुत्वम् । दाहश्रमातिसार-
नाशित्वम् । वीर्य्यवृद्धिबलप्रदत्वञ्च । इति राज-
निर्घण्टः ॥

काकणा, स्त्री, (कु ईषत् कणति निमीलति इति ।
अच् काकणः गुञ्जाफलं तद्वदाकृतिरस्यास्तीति
अण्यारक्तचिह्नितत्वादस्य तथात्वम् ।) कुष्ठविशेषः ।
तस्य लक्षणम् । यथा,—
"यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥
इति माधवकरः ॥ ("काकणं तीव्रदाहरुक् ॥
पूर्व्वं रक्तञ्च कृष्णञ्च काकणन्तीफलोपमम् ।
कुष्ठलिङ्गैर्युतं सर्व्वैर्नैकवर्णं ततो भवेत् ॥
दोषभेदीयविहितैरादिशेल्लिङ्गकर्म्मभिः" ॥
इति वाभटे निदानस्थाने १४ अ ॥
"काकणन्तिका वर्णान्यादौ पश्चात् सर्व्वकुष्ठ-
लिङ्गसमन्वितानि पापीयसा सर्व्वकुष्ठलिङ्गसम्भवे
नानेकवर्णानि काकणानीति विद्यात् ।
इति निदानस्थाने ५ अ । चरकेणोक्तम् ।)

काकणन्तिका, स्त्री, (कु ईषत् कणन्ती निमीलन्ती ।
कन् निमीलने शतृ ङीप् कोः कादेशः । तत कन्
टाप् च पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
रत्नमाला । कुँच् इति भाषा ॥
("यत्काकणन्तिकावर्णमपाकं तीव्रवेदनम्" ।
इति चरके चिकित्सास्थाने ७ अः ॥)

काकतिक्ता, स्त्री, (काकमांसवत् तिक्ता इति मध्यपद-
लोपि समासः ।) काकचिञ्चा । इति रत्नमाला ।
कुँच् इति भाषा । (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

काकतिन्दुकः, पुं, (कं जलं अकति इत्यण् । काक
तिन्दुकः काकवर्णो वा तिन्दुकः काकप्रियस्तिन्दुको
वा ।) वृक्षविशेषः । माकडा केन्दु । माकडो
गाव् । काकतेंदु इति च भाषा । तत्पर्य्यायः । का-
केन्दुः २ कुलकः ३ काकपीलुकः ४ । इत्यमरः
। २ । ४ । ३९ ॥ काकपीलुः ५ काकाण्डः ६ काक-
स्फूर्ज्जः ७ काकाङ्कः ८ काकवीजकः ९ । अस्य
गुणाः । कषायत्वम् । अम्लत्वम् । गुरुत्वम् ।
वातविकारनाशित्वञ्च । पक्वस्य तस्य गुणाः ।
मधुरत्वम् । किञ्चित्कफकारित्वम् । वान्तिपित्त-
नाशित्वञ्च । इति राजनिर्घण्टः ॥ (काकाण्डशब्दे-
ऽस्य विवरणं ज्ञेयम् ॥)

काकतुण्डः, पुं, (काकतुण्डस्येव वर्णोऽस्त्यस्य । अर्श-
आदित्वात् अच् ।) कालागुरु । इति हेमचन्द्रः ॥

काकतुण्डिका, स्त्री, (काकतुण्डस्येव वर्णः फलाग्रेऽस्याः
इति ठन् । स्त्रियां टाप् च ।) काकचिञ्चा । गुञ्जा ।
इति हलायुधः ॥

काकतुण्डी, स्त्री, (काकं ईषद् खं तुण्डते नाशयतीति ।
तुडि ऊ वधे+अण् । गौरादित्वात् ङीष् ।)
राजरीतिः । राजपितल इति भाषा । इति राज-
निर्घण्टः ॥ (काकतुण्डस्येवाकृतिर्विद्यते ऽस्याः ।
अर्श आदित्वादच् । गौरादित्वात् ङीष् ।) वृक्ष-
विशेषः । कौआडोडी । इति हिन्दी भाषा ।
तत्पर्य्यायः । काकादनी २ काकपीलुः ३ काक-
शिम्बी ४ रक्तला ५ ध्वाङ्क्षादनी ६ वक्रशल्या ७
दुर्म्मोहा ८ वायसादनी ९ ध्वाङ्क्षनखी १० वायसी
११ काकदन्तिका १२ ध्वाङ्क्षदन्ती १३ । अस्या
गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । द्रव-
त्वम् । रसायनत्वम् । वातदोषहारित्वम् । रुचि-
कारित्वम् । पलितस्तम्भित्वञ्च । इति राज-
निर्घण्टः ॥

काकध्वजः, पुं, (काकमीषज्ज्वलं वासो ध्वज इवास्य ।)
वाडवाग्निः । इति त्रिकाण्डशेषः ॥

काकनामा, [न्] पुं, (काकस्य नाम नाम यस्य ।)
वकवृक्षः । इति रत्नमाला ॥ (काकशीर्षशब्दे-
ऽस्य विवरणं बोध्यम् ।)

काकनासः, पुं, (काकस्य नासाया वर्ण इव फले यस्य ।)
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

काकनासा, स्त्री, (काकस्य नासा इव फलमस्याः ।)
काकजङ्घावृक्षः । इति जटाधरः ॥ (अस्याः पर्य्याया
गुणाश्च यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"काकनासा तु काकाङ्गी काकतुण्डफला च सा ।
काकनासा कषायोष्णा कटुका रसपाकयोः ।
कफघ्नी वामनी तिक्ता शोथार्शःश्वित्रकुष्ठहृत्" ॥)

काकनासिका, स्त्री, (काकनासा ततः स्वार्थे कन्
टाप् अत इत्वम् ।) काकजङ्घावृक्षः । इत्यमरः ।
२ । ४ । ११८ ॥ रक्तत्रिवृत् । इति राजनिर्घण्टः ।

काकपक्षः, पुं, (काकस्य पक्ष इव आकारोऽस्त्यस्य ।
काकपक्ष+अच् ।) मस्तकपार्श्वद्वये केशरचना-
विशेषः । काकपाटा जुल्फी इति च भाषा ।

तत्पर्य्याय । शिखण्डक २ । इत्यमर । २ । ६ । ९९ ॥ शिखाण्डक ३ शिखण्ड ४ । इति तट्टीका ॥ (यथा, रघु । ११ । १ ।

"कौशिकेन स किल क्षितीश्वरो
राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचित-
स्तेजसा हि न वय समीक्ष्यते" ॥)

काकपद, पु, (बन्धस्य काकपदवदाकारवत्त्वात् काकपद इव आकृतिरस्त्यस्य ।) रतिबन्धविशेष तस्य लक्षणम् । यथा,—

"पादौ द्वौ स्कन्धयुगमस्थौ कृत्वा लिङ्ग भगे क्षिपु ।
कामयेत् कामुकीं कामी बन्ध काकपदो मत" ॥
इति रतिमञ्जरी ॥

काकपर्णी, स्त्री, (काक इव कृष्णा पर्णा यस्या । गौरादित्वात् ङीष् ।) मुद्गपर्णी । इति भावप्रकाश ॥ ("मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला । चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् । दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित्" ॥ इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

काकपीलु, पु, (काकप्रिय पीलु ।) काकतिन्दुक । काकतुण्डी । श्वेतगुञ्जा । इति राजनिर्घण्ट । (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकानन्ती च रक्तिका ।
काकादनी काकपीलु सा स्मृता काकवल्लरी" ॥
विशेषविवरणमस्य च गुञ्जाशब्दे ज्ञेयम् ॥)

काकपीलुक, पु, (काकपीलु + संज्ञाया कन् ।) काकतिन्दुकवृक्ष । इत्यमर । २ । ४ । ३९ । माकडाकेन्दु इति भाषा ॥

काकपुच्छ, पु, (काकस्य पुच्छ इव पुच्छो यस्य ।) कोकिल । इति शब्दरत्नावली ॥

काकपुष्ट, पु, (काकेन पुष्ट । कोकिलया हि निजाण्डस्फोटनाशक्ततया काकाण्ड तन्नीडात् निक्षिप्य तत्र स्वकीयाण्ड स्थापयित्वा काकद्वारा स्वापत्यपोषणात् अस्य तथात्वम् ।) कोकिल । इति त्रिकाण्डशेष ॥

काकपुष्प, स्त्री, (काकवत् कृष्ण पुष्पमस्य ।) गन्धपर्णम् । इति राजनिर्घण्ट ॥

काकफल, पु, (काकप्रिय फलमस्य ।) निम्बवृक्ष । इति राजनिर्घण्ट ॥ (निम्बशब्देऽस्य गुणादयो ज्ञातव्या ॥)

काकबलि, पु, (काकेभ्यो देयो बलिरन्नादिकम् ।) काकसम्प्रदानकान्नादि । तद्दानविधिर्य्यथा ।
ॐ यमद्वारावस्थितनानादिग्देशीयवायसेभ्यो नम ।
इति मायादिभिरभ्यर्च्य प्रार्थयेत् ।
"ॐ काक त्व यमदूतोऽसि गृहाण बलिमुत्तमम् ।
यमलोकगत प्रेत त्वमाप्यायितुमर्हसि ॥
ॐ काकाय काकपुत्राय वायसाय महात्मने ।
अत्र पिण्ड प्रयच्छामि कथ्यता धर्म्मराजनि" ॥
इति मृतकपिण्डदानान्ते हलायुध ॥ * ॥
बलिवैश्वदेवान्तर्गततद्विधिर्यथा,—
"ऐन्द्रवारुणवायव्या सौम्या वै नैर्ऋतास्तथा ।
वायसा प्रतिगृह्णन्तु भूमौ पिण्ड मयार्पितम्" ।
ॐ काकेभ्यो नम । इति दद्यात् तदुपरि अद्भि सिञ्चेत् । इत्याह्निकाचारतत्त्वम् ॥ * ॥
गयाया तद्विधिर्यथा,—
"बलि काकशिलायाञ्च,काकमोक्षणमोक्षद" ।
इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये ४ अध्याय ॥ तत्र तृतीयदिनकृत्ये काकबलिदान यथा,—
"तत काकबलि दत्त्वा पुन स्नान समाचरेत् ।
ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋतास्तथा ॥
वायसा प्रतिगृह्णन्तु भूमौ पिण्ड मयार्पितम्" ॥
इति श्रीवायुपुराणे ७ अध्याय ॥

काकभाण्डी, स्त्री, (काकस्य मुखोद्भवरसकारणस्य ईषज्जलस्य भाण्डी क्षुद्रभाण्डमिव । तत्फलभक्षणेन मुखात् ईषज्जलक्षरणात् अस्यास्तथात्वम् ।) महाकरञ्ज । इति राजनिर्घण्ट ॥

काकभीरु, पु, (काकात् भीरुर्भयशील ।) पेचक । इति त्रिकाण्डशेष ॥

काकमद्गु, पु, (काक इव कृष्णो मद्गुर्जलचरपक्षिविशेष ।) दात्यूहपक्षी । इति त्रिकाण्डशेष ॥ (डाउकपाखी इति भाषा ॥ यथा, महाभारते १३ । दानधर्म्मे संसारचक्रकथने १११ । १२१ ।
"घृत हृत्वा तु दुर्ब्बुद्धि काकमद्गु प्रजायते" ॥)

काकमर्द्द, पु, (काक मृद्नातीति । काक + मृद + अण् ।) महाकालवृक्ष । इति राजनिर्घण्ट ॥

काकमर्द्दक, पु, (काकमर्द्द + संज्ञाया कन् ।) महाकाललता । इति रत्नमाला । माकाल इति भाषा ॥

काकमाचिका, स्त्री, (काकमाची + स्वार्थे कन् ।) काकमाचीवृक्ष । इति शब्दरत्नावली ॥

काकमाची, स्त्री, (काकान् मच्यते अर्च्चयति फलदानेनेति । मचि + अण् + गौरादित्वात् ङीष् पृषोदरादित्वात् न लोप ।) क्षुद्रवृक्षविशेष । गुडकामाइ इति भाषा । तत्पर्य्याय । वायसी २ । इत्यमर । २ । ४ । १५१ ॥ ध्वाङ्क्षमाची ३ वायसाह्वा ४ सर्व्वतिक्ता ५ बहुफला ६ कटुफला ७ रसायनी ८ गुच्छफला ९ काकमाता १० स्वादुपाका ११ सुन्दरी १२ तिक्तिका १३ बहुतिक्ता १४ । अस्या गुणा । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफशूलार्शःशोथदोषकुष्ठकण्डूनाशित्वञ्च । इति राजनिर्घण्ट ॥ त्रिदोषशमताकारित्वम् । रुष्यत्वम् । रसायनत्वम् । नातिशीतलत्वम् । नात्युष्णत्वम् । हृद्यत्वम् । भेदकत्वञ्च । इति राजवल्लभ ॥ (तथाच भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥
"काकमाची त्रिदोषघ्नी स्निग्धोष्णास्वरशुक्रदा ॥
तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित् ।
कटुर्नेत्रहिता हिक्काच्छर्द्दिहृद्रोगनाशिनी" ॥)

काकमाता, स्त्री, (काकस्य मातेव पोषिका । काकस्य तत्फलप्रियत्वात् ।) काकमाची । इति राजनिर्घण्ट ॥ (काकमाचीशब्दे पर्य्यायगुणादिक मन्तव्य ॥)

काकमुद्गा, स्त्री, (काकेन ईषज्जलेन मुद गच्छतीति । काकमुद् + गम् + ड + टाप् ।) मुद्गपर्णीवृक्ष । इत्यमर । २ । ४ । ११३ ॥ मुगाणी इति भाषा ॥ (अस्या पर्य्यायो यथा,—
"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्यल्पिका सहा ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्या मुद्गपर्णीशब्दे ज्ञेया ॥)

काकयव, पु, (काकमीषज्जल यत्र तादृशो यव इव नीरसत्वात्, यद्वा काकवन्निर्गुणो यव ।) तण्डुलशून्यधान्यम् । आगडा इति भाषा ॥ ("यथा फला षण्डतिला यथा चर्म्ममया मृगाः । तथैव पाण्डवा सर्व्वे यथा काकयवा इव" ॥ इति महाभारते सभापर्व्व । तथा पञ्चतन्त्रे २ । ८५ ।
"यथा काकयवाः प्रोक्ता यथारण्यभवास्तिला ।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नरा" ॥)

काकरुहा, स्त्री, (काक इव रोहति मूलशून्यतया वृक्षाद्यवलम्बनेन जायते इति । काक + रुह + क । काकवत् परपुष्टतयास्यास्तथात्वम् । यद्वा काकपुरीषात् रोहति उत्पद्यते वृक्षोपरीत्यर्थ अतएव तत् संज्ञयाख्यायते ।) वन्दाकवृक्ष । इति त्रिकाण्डशेष ॥

काकरूक, पु, (कु कुत्सित करोतीति । कु + कृ + ऊक । को कादेश ।) स्त्रीजित । उलूक । दम्भ । दिगम्बरभीरुकनिर्धनेषु त्रि । इति हेमचन्द्र ॥

काकल, स्त्री, (ईषत्कलो यस्मात् । को कादेश ।) कण्ठमणि । इति त्रिकाण्डशेष ॥ (ग्रीवास्थोन्नतदेश । इति सुश्रुत ॥ टुँटि इति भाषा ।)

काकल, पु, (का इत्याकार कलो यस्य ।) द्रोणकाक । इति शब्दरत्नावली ॥

काकलक, पु, (काकल तत कन् पुल्लञ्च ।) कण्ठमणि । इति हेमचन्द्र ॥

काकलि, स्त्री, (कल् + इन् कलि । कु ईषत् कलि । को कादेश ।) सूक्ष्ममधुरास्फुटध्वनि । इत्यमरटीकाया भरत । ("कोकिलकाकलिकूजितकुञ्जम्" । इति शिष्टप्रयोग ॥)

काकली, स्त्री, (काकलि + कृदिकारान्तत्वात् वा ङीप् ।) सूक्ष्ममधुरास्फुटध्वनि । इत्यमर । १ । ७ । २ ॥ (यथा, गीतगोविन्दे । १ । ४ । ११ ।
"उन्मीलन् मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वरा ।
नीयन्ते पथिकै कथ कथमपि ध्यानावधानक्षण
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासरा" ॥)

काकलीद्राक्षा, स्त्री, (काकलीव सूक्ष्मा द्राक्षा ।) द्राक्षाप्रभेद । किस्मिस् इति ख्याता । तत्पर्य्याय । जम्बुका २ फलोत्तमा ३ लघुद्राक्षा ४ निर्बीजा ५ सुवृत्ता ६ रसाधिका ७ । तस्या गुणा । मधुरत्वम् । अम्लत्वम् । रसालत्वम् । रुचिकारित्वम् । शिशिरत्वम् । श्वासकासनाशित्वम् । जनवल्लभत्वञ्च । इति राजनिर्घण्ट ॥

काकलीरव, पुं, (काकली मधुरास्फुटो रवो यस्य ।) कोकिल । इति राजनिर्घण्ट ॥ (सूक्ष्ममधुरास्फुटध्वनौ तु कर्म्मधारय ॥)

काकवल्लरी, स्त्री, (काकप्रिया वल्लरी ।) स्वर्णवल्ली ।

इति राजनिर्घण्टः ॥

काकशीर्षं, पु, (काक शीर्षं अग्रेऽग्र। काकस्य तदग्रे वासयोग्यत्वात् ।) वकवृक्षः । इति जटाधरः ॥ (पर्य्यायोऽस्य यथा,—वैद्यकरत्नमालायाम् ।

"वकपुष्प काकशीर्षं स्थूलपुष्प शिवप्रिय ।

वसुक काकनामा च वसुहट्ट ख्मूरक" ॥)

काकस्फूर्ज्ज, पु, (काक स्फूर्ज्जति यत्र। काक+स्फूर्ज्ज+आधारे घञ् ।) काकतिन्दुकवृक्षः । इति राजनिर्घण्टः ॥

काका, स्त्री, (काकवदाकारोऽस्त्यस्या इति अच् ततष्टाप् ।) काकनासालता । काकोलीवृक्षः ॥ काकजङ्घावृक्षः । पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"काकजङ्घा नदी कान्ता काकतिक्ता सुलोमशा ।

पारावतपदी दासी काका चापि प्रकीर्त्तिता" ॥

गुणादयोऽस्याः काकजङ्घाशब्दे बोद्धव्याः ॥) रक्तिकालता । मलपूवृक्षः । काकमाचीवृक्षः । इति मेदिनी ॥

काकाङ्गा, स्त्री, (काकस्य अङ्गं जङ्घेवाकारो यस्याः वा ङीष् । पक्षे टाप् ।) काकाङ्गीवृक्षः । इत्यमरटीकायां रमानाथः ॥

काकाङ्गी, स्त्री, (काकस्य अङ्गं जङ्घा इव आकृतिर्यस्याः । ङीष् ।) काकजङ्घावृक्षः । इत्यमरः । २ । ४ । १८ ॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"काकनासा तु काकाङ्गी काकतुण्डफला च सा" ॥)

काकाञ्ची, स्त्री, (काक तज्जङ्घाकारं अञ्चति गच्छतीति । काक+अनृच्+अण्+ङीप् ।) काकजङ्घावृक्षः । इति शब्दरत्नावली ॥

काकाण्ड, पु, (काक्या अण्ड इव फलं यस्य । काकीशब्दस्य पुंवद्भाव ।) महानिम्बः । काकतिन्दुः । इति राजनिर्घण्टः ॥

("माषैः समानं फलमात्मगुप्त-

मुक्ताश्च काकाण्डफलन्तथैव" ॥

इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥ यस्मिन् यवङ्क्रियते तद्यथा,—

"काकाण्डसुरसगवाक्ष्या

पुनर्नवा वायसी शिरीषफलैः ।

उद्बुद्धविषज्वलम्बते

लेपौषधनस्यपानानि" ॥

इति चरके चिकित्सास्थाने । २५ अध्याये ॥)

काकाण्डा, स्त्री, (काकस्याण्डमिव वीजमस्याः ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकाण्डी, स्त्री, (काकाण्ड+गौरादित्वात् ङीष् ।) महाज्योतिष्मती लता । इति राजनिर्घण्टः ॥ (महाज्योतिष्मतीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

काकाण्डोला, स्त्री, (काकाण्डमीरति तत्सादृश्य वीजे प्राप्नोतीति । उर गतौ+अच् । रस्य लत्वम् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकादनी, स्त्री, (काकैरद्यते भुज्यतेऽसौ इति । काक+अद+कर्म्मणि ल्युट् ततो ङीप् च ।) गुञ्जा । इति शब्दरत्नावली ॥ श्वेतगुञ्जा । इति राजनिर्घण्टः ॥ वृक्षविशेषः । कालियाकडा इति भाषा । तत्पर्य्यायः । छिक्का २ गृध्रनखी ३ तुण्डी ४ काला ५ अङ्क्षिला ६ कटुका ७ पाणि ८ कापाल ९ कुलिक १० । इति रत्नमाला ॥ (अस्या व्यवहारो यत्र तद्यथा,—

"विकङ्कतारग्वधकाकगन्धी

काकादनीतापसवृक्षमूलैः ।

आलेपयेदेनम्" ॥

इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाद्यधिकारे ॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥

"श्वेता रक्तोच्चटा प्रोक्ता कृष्णाश्चापि सा स्मृता ।

रक्ता सा काकचिञ्ची स्यात् काकानन्तीच रक्तिका॥

काकादनी काकपीलु सा स्मृता काकवल्लरी" ॥)

काकायु, पु, (काकस्य आयुर्यस्मात् ।) स्वर्णवल्ली । इति राजनिर्घण्टः ॥

काकारि, पु, (काक अरिर्यस्य । काकस्यारिर्वा ।) पेचकः । इति हेमचन्द्रः ॥

काकाल, पु, (का इति शब्दं कलते रौति । का+कल+अण् ।) द्रोणकाकः । इति शब्दरत्नावली ॥

काकिणी, स्त्री, (ककलौल्ये। ककते गणनाकाले चञ्चली भवतीति । कक+णिनि+ङीप् । पृषोदरादित्वात् नस्य ण ।) पणचतुर्थांशः । पाँच गण्डा कडि इति भाषा ॥ यथाह लीलावती ।

"वराटकानां दशकद्वयं यत् सा काकिणी" ॥)

मानदण्डः । काठा नल इत्यादि भाषा । कृष्णला । कुँच इति भाषा । एकवराटी । एक कडा इति भाषा ।

("तस्मात्पणं काकिणीं वा फलं पुष्पमथापि वा । प्रदद्याद्दक्षिणां यज्ञे यथा स सफलो भवेत्" ॥ इति शुद्धितत्त्वे वृहस्पतिः ॥) उन्मानस्यांशकः । इति मेदिनी ॥

काकिनी, स्त्री, (ककलौल्ये। ककते गणनाकाले चञ्चली भवतीति । कक+णिनि+ङीप ।) काकिणी । इत्यमरटीकायां रायमुकुटः ॥ (यथा,—पञ्चतन्त्रे २ । १४ ।

"ईश्वरा भूरिदानेन यल्लभन्ते फलं किल ।

दरिद्रस्तच्च काकिन्या(ण्या)प्राप्नुयादिति न श्रुतिः" ॥)

काकिल, पु, (कु-ईषत् किरतीति । कु+कॄ+क । को कादेशः रस्य लत्वम् ।) काकलः । कण्ठमणिः । इति शब्दमाला ॥

काकु, स्त्री, (कक लौल्ये+उण् ।) शोकभयादिभिर्ध्वनिविकारः । इत्यमरः । १ । ६ । १२ ॥ (यथा, साहित्यदर्पणे । २ । २३ ।

"भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" । इति काकुं सम्यगीकृत्य उदाहरणं यथा, तत्रैव

'गुरुपरतन्त्रतया वत दूरतरं देशमुद्यतो गन्तुम् । अलिकुलकोकिलललिते नैष्यति सखि । सुरभिसमयेऽसौ ॥ नैष्यति, अपि तु एष्यति एवेति काका व्यज्यते" ॥) जिह्वा । इति त्रिकाण्डशेषः ॥

काकुत्स्थ, पु, (ककुत्स्थस्य नृपतेरपत्यम् । शिवादित्वात् ४ । १ । ११२ । अण् ।) श्रीरामचन्द्रः । इति रामायणम् ॥ (यथा, रघु १२ । ४६ ।

"असज्जनेन काकुत्स्थः प्रयुक्तामथ दूषणाम् ।

न चक्षमे शुभाचारः स दूषणमिवात्मनः" ॥

ककुत्स्थवंशोद्भवमात्रम् । अजराजार्थे यथा रघुवंशे ६ । २ ।

"काकुत्स्थमालोकयतां नृपाणां

मनो बभूवेन्दुमतीनिराशम्" ॥

दशरथार्थे यथा रामायणे ६ । १०५ । १ ।

"प्रतिप्रयाते काकुत्स्थे महेन्द्रः पाकशासनः" ॥

ककुत्स्थ एव स्वार्थे अण् । पुरा किल महोक्षरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा असुरान् जितवानतोऽस्य तथात्वम् ।) पुरञ्जयराजः । इति त्रिकाण्डशेषः ॥ (विवरणन्तु ककुत्स्थशब्दे द्रष्टव्यम् ॥)

काकुद, स्त्री, (काकु ददातीति । काकु+दा+क ।) तालु । इत्यमरः २ । ६ । ९१ ॥

काकेशु, पु, (काकमीषज्जलमत्र को कादेशः । तत कर्म्मधारय ।) खगण्ड । इति रत्नमाला त्रिकाण्डशेषश्च ॥ खागडा आक् इति भाषा ॥ काशः । इति राजनिर्घण्टः ॥

काकेन्दु, पु, (काकस्य इन्दुराह्लादकः ।) कुलकवृक्षः माकाडा केन्दु इति ख्यातः । इत्यमरः । २ । ४ । ३९ ॥

काकेष्ट, पु, (काकस्य इष्टः ।) निम्बवृक्षः । इति राजनिर्घण्टः ॥ (निम्बशब्देऽस्य गुणादयो ज्ञेयाः ॥)

काकोचिक, पु, (कु ईषत् कोची सङ्कोचो । कुच+णिन् स्वार्थे कन् । को कादेशः ।) काकोची मत्स्यः । इति हारावली ॥ काउची इति भाषा ॥

काकोची, स्त्री, (काकोच+ङीष् ।) काकोचिमत्स्यः । इति हारावली ॥

काकोडुम्बर, पु, (काकप्रिय उडुम्बर इति मध्यपदलोपी कर्म्मधारयः ।) काकोडुम्बरिका । इति शब्दरत्नावली । काकडुमुर इति भाषा ॥

काकोडुम्बरिका, स्त्री, (काकोडुम्बरस्तत स्वार्थे कन् टाप् च अत इत्वम् ।) वृक्षविशेषः । कोठडुमुरि डुमुरि इति च ख्याता । काकडुमुर इति भाषा । तत्पर्य्यायः । फल्गु २ मलपू ३ जघनेफला ४ । इत्यमरः । २ । ४ । ६१ ॥ मलयु ५ फल्गुफला ६ काकोडुम्बर ७ । इति शब्दरत्नावली ॥ फलवाटिका ८ बहुफला ९ । इति जटाधरः ॥ अस्या गुणाः । काकोदुम्बरिकाशब्दे द्रष्टव्याः ॥ (अस्या व्यवहारो यत्र तद्यथा,—वैद्यकचक्रपाणिसंग्रहे मुखरोगाधिकारे ।

'काकोडुम्बरिका गोजी पत्रैर्विस्रावयेद्भिषक् ।

क्षौद्रयुक्तैश्च लवणैः सर्व्वांश्च प्रतिसारयेत्" ॥)

काकोदर, पु, (कु कुत्सित आकृतिः । कु+अक वक्रगतौ+अच् । को कादेशः । काक कुटिलगतिकारि उदरं यस्य बहुव्रीहि ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥ (यथा, राघवपाण्डवीये ।

'य पूतनामारणलब्धकीर्त्ति-

काकोदरो येन विनीतदर्पः ।

यशोदयालङ्कृतमूर्त्तिरव्या-

न्नायो यदूनामथवा रघूणाम्' ॥)

काकोदुम्बरिका, स्त्री (काकप्रि॰ दुम्ब॰ वा उदुम्-

रिका।) काकोडुम्बरिका। काकडुमुरि इति भाषा। अस्याः पर्य्यायः। काकोदुम्बरिका २ खरपत्री ३ गम्भिका ४ जघनेफला? फल्गूदुम्बरिका ५ कुष्ठघ्नी ६ फल्गुवाटिका ७ अरण्यजी? ८ फल्गुनी ९ मलपू १० चित्रभेषजा ११ ध्वाङ्क्षनाशी १२। अस्या गुणाः। शीतलत्वम्। कषायत्वम्। व्रणनाशित्वम्। गर्भरक्षाहितत्वम्। स्तनदुग्धप्रदत्वञ्च। इति राजनिर्घण्टः॥

काकोल, क्ली, (काकयति शोषयति दुःखदत्वात्। कक लौल्ये + णिच् + ओल। काकेन उक्षायते भक्ष्यते अत्र वा आधारे घञर्थे क पृषोदरादित्वात् साधुः।) नरकविशेषः। इति मेदिनी॥ (यथा, मनुः॥
"महानरककाकोलं सञ्जीवनमहापथम्"॥)

काकोल, पुं क्ली, (कु कुत्सितं तीव्रतरं यथा स्यात् तथा कोलति पीडयति विकलीकरोति वाऽनेन करणे घञ्।) ध्यणवर्णस्थावरविषविशेषः। इत्यमरः। १। ८। १०॥
"काकोलमुग्रतेजः स्यात् कृष्णाच्छविमहाविषम्"।
इति वैद्यकम्॥ (अस्य पर्य्यायो यथा,—
"काकोलो गरलक्ष्वेडो वत्सनाभः प्रदीपनः।
शौल्किकेयो ब्रह्मपुत्रो विषं स्याद्गरलो विषः"॥
इति वैद्यकरत्नमाला॥)

काकोल, पुं, (कं जलमाकोलति सम्त्यायतीति। आ + कुल सम्त्याने + अण्।) कुलालः। (कक लौल्ये स्वार्थे णिच् + बाहुलकात् ओल।) द्रोणकाकः। इति मेदिनी। (यथा, मनुः ५। १४।
"बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम्।
मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्व्वशः"॥)
सर्पः। शूकरभेदः। इति शब्दरत्नावली॥ काकोली नामख्यातौषधिविशेषः। इति धरणी॥

काकोली, स्त्री, (काकोल + गौरादित्वात् ङीष्।) अष्टवर्गे प्रसिद्धौषधविशेषः। तत्पर्य्यायः। मधुरा २ काकी ३ कालिका ४ वायसोली ५ क्षीरा ६ ध्वाङ्क्षिका ७ वीरा ८ शुक्ला ९ धीरा १० मेदुरा ११ ध्वाङ्क्षोली १२ स्वादुमांसी १३ वयस्या १४ जीवनी १५ शुक्लक्षीरा १६ पयस्विनी १७। इति राजनिर्घण्टः॥ पयस्या १८ शीतपाकी १९। इति रत्नमाला॥ अस्या गुणाः। शीतलत्वम्। मधुरत्वम्। क्षयपित्तानिलास्रदाहज्वरनाशित्वम्। कफशुक्रवर्द्धकत्वञ्च। इति राजनिर्घण्टः॥
(क्षीरकाकोलीशब्दे चास्या विशेषविवरणं ज्ञातव्यम्॥ काकोल्यादिगणो यथा, "काकोली-क्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदा-महामेदाछिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्चेति"।
"काकोल्यादिरयं पित्तशोणितानिलनाशनः।
जीवनो वृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा"॥
इति सुश्रुते सूत्रस्थाने। ३८ अध्याये॥)

काकोलूकिका, स्त्री, (काकस्य उलूकस्य नित्यविरोधित्वात् द्वन्द्वः। ततो वैरे वुञ् स्त्रियां टाप् च।) काकोलूकयोर्वैरता। इति शब्दरत्नावली॥

काक्ष, इ काङ्क्षे। आकाङ्क्षायामिति यावत्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्-इदित्।) इ, काङ्क्षति धनं लोकः। नमध्यपाठेनैवेष्टसिद्धे इदनुबन्धो वेदेपूभावणार्थः। इति दुर्गादासः॥

काक्ष, पुं, (कु कुत्सितम् अक्षि अत्र। "का पथ्यक्षयोः" ६। ३। १०४। इति कोः कादेशः।) कटाक्षः। इति हेमचन्द्रः॥ (यथा, भट्टिः। ८। २४।
"आलालाभोन्मुखो दूरात् काक्षेणानादरेक्षितः"॥)

काक्षी, स्त्री, (कक्षे पार्श्वे भवः। "तत्र भवः"। ४। ३। ५३। इत्यण् ततो ङीप् च।) तुवरिका। अड्हर इति भाषा। सौराष्ट्रमृत्तिका। इति मेदिनी॥

काक्षीव, पुं, (कु ईषत् क्षीवयति। क्षीव + णिच् + अच्। कोः कादेशः।) शोभाञ्जनवृक्षः इत्यमरः। (गौतमात् शूद्रायामौशीनर्य्यां जातः पुत्त्रविशेषः। यथा महाभारते २ पर्व्वणि।
"शूद्रायां गौतमो यत्र महात्मा संशितव्रतः।
औशीनर्य्यामजनयत् काक्षीवाद्यान् सुतान्मुनिः"॥)

काक्षीवक, पुं, (काक्षीव + स्वार्थे कन्। यद्वा ईषत्-क्षीवयतीति। णवुल्।) शोभाञ्जनः। इति शब्दरत्नावली॥

काग पुं, (का इति शब्दं गायतीति। का + गै + क।) काकः। इति जटाधरः॥

कागद, क्ली, (कागं काकवर्णं मस्यादिर्दीयते अत्र इति। काग + दा + घञर्थे आधारे क। कस्य चित्तस्य आगदो विस्तारितभाषणं यत्र वा।) लेखनपत्रविशेषः। कागज इति आरवी भाषा। यथा,
"भूर्जे वा वसने रक्ते क्षौमे वा ताम्रपत्रके।
कागदे चाष्टगन्धेन पञ्चगन्धेन वा पुनः॥
त्रिगन्धेनाथवैकेन विलिख्य धारयेन्नरः।
पञ्च सप्तत्रिलोकैर्व्वा शोधितं कवचं शुभम्"॥
इति श्रीघनानन्ददासविरचितमन्त्रकल्पद्रुमे हनूमत्कवचम्॥

काङ्गा, स्त्री, (कुत्सितम् अङ्गं यस्याः। काङ्ग + टाप्।) वचा। इति शब्दचन्द्रिका॥

काच, क्ली, (कच्यते बध्यते अनेन इति। कच बन्धने + घञ् न कुत्वम्। तस्य बन्धनहेतुत्वात् तथात्वम्।) सिक्थकम्। मोम इति भाषा। (काचः क्षारमृत्तिकाऽस्त्यस्याकरत्वेन इति अच्।) काचलवणम्। इति राजनिर्घण्टः॥

काच, पुं, (कच दीप्तौ + णिच् + घञ्।) मृत्तिकाविशेषः। काँच इति भाषा। तत्पर्य्यायः। क्षारः २। इत्यमरः। २। ९। ९९॥ अस्य गुणाः। क्षाररसत्वम्। उष्णवीर्य्यत्वम्। अञ्जनात् दृष्टिकारित्वञ्च। इति राजवल्लभः॥ शिक्यम्। शिका इति भाषा॥ मणिविशेषः। (यथा,
"आकरे पद्मरागाणां जन्म काचमणेः कुतः"।
इत्युद्भटः॥) नेत्ररोगविशेषः। इति मेदिनी॥ तस्य लक्षणम्।
"अस्मिन्नपि तमोभूते नातिरूढे महागदे।
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः॥
निर्म्मलानि च तेजांसि भ्राजिष्णूनीव पश्यति।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः"॥
इति माधवकरः॥
("प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते।
तेनोर्द्ध्वमीक्षते नाधस्तनुचैलावृतोपमम्॥
यथावर्णञ्च रज्येत दृष्टिर्हीयेत च क्रमात्।
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः॥
लिङ्गनाशं मलः कुर्व्वन् छादयेद्दृष्टिमण्डलम्।
तत्र वातेन तिमिरे व्याविद्धमिव पश्यति॥
चलाविलारुणाभासं प्रसन्नञ्चेक्षते मुहुः।
जालानि केशान् मशकान् रश्मींश्चोपेक्षितेऽत्र च॥
काचीभूते दृगरुणा पश्यत्यास्यमनासिकम्।
चन्द्रदीपाद्यनेकत्वं वक्रमृज्वपि मन्यते॥
वृद्धः काचो दृशं कुर्य्याद्रजोधूमवृतामिव।
स्पष्टारुणाभा विस्तीर्णा सूक्ष्मा वा हतदर्शनाम्॥
सलिङ्गनाशो वाते तु सङ्कोचयति दृक्शिराः।
दृङ्मण्डलं विशत्यन्तर्गम्भीरा दृगसौ स्मृता॥
पित्तजे तिमिरे विद्युत् खद्योतोद्योतदीपितम्।
शिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति॥
काचे दृक् काचनीलाभा तादृगेव च पश्यति।
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च॥
भृङ्गनीला निरालोका दृक् स्निग्धा लिङ्गनाशतः।
दृष्टिः पित्तेन ह्रस्वाख्या सा ह्रस्वा ह्रस्वदर्शना॥
भवेत् पित्तविदग्धाख्या पीतापीताभदर्शना।
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति॥
शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम्।
काचे तु निष्प्रभेन्द्वर्कप्रदीपाद्यैरिवाचितम्॥
सिताभा सा च दृष्टिः स्याल्लिङ्गनाशे तु लक्ष्यते।
मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः॥
विन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः।
उष्णे सङ्कोचमायाति छायायां परिसर्पति॥
शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा।
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति।
काचेन रक्ता कृष्णा वा दृष्टिस्तादृक् च पश्यति"॥
इति वाभटे उत्तरस्थाने। १२ अध्याये॥
विस्तृतविवरणमस्य नेत्ररोगशब्दे ज्ञातव्यम्॥)

काचन, क्ली, (कच बन्धने + स्वार्थे णिच् + भावे ल्युट्।) पत्रनिबन्धनम्। इति त्रिकाण्डशेषः॥ काचेल इत्यपि पाठो दृष्टः॥ (मुग्धबोधमते "किमः सप्तम्यन्ताश्चि-चनौ" इति। का + चनप्रत्ययेन) स्त्रीलिङ्गकिम्-शब्दार्थे व्य। इति व्याकरणम्॥ (यथा, प्रबोध-चन्द्रोदये। "व्यूढा काचन कन्यका खलु मया तेनास्मि वाताधिकः"॥)

काचनक, क्ली, काच्यते लेखो निबध्यते येन (कच् + णिच् + ल्युट्। ततः स्वार्थे कन्।) पत्रनिबन्धनम्। इति हारावली॥

काचनकी, [न्] पुं, (काचनक + अस्त्यर्थे इनि।) लिपिः। तत्पर्य्यायः। वर्णदूतः २ स्वस्तिमुखः ३ लेखः ४ वाचिकहारकः ५ तालिकः ६। इति जटाधरः॥

काचभाजन, क्ली, (काचनिर्म्मितं भाजनम्।) काचपात्रम्। काँचेर वासन इति भाषा। तत्पर्य्यायः। शिङ्घाणम् २। इति त्रिकाण्डशेषः॥

चमलं, क्ली, (काचस्य क्षारमृत्तिकाया मलमिव ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचलवण, क्ली, (काचात् क्षारमृत्तिकाया जातं लवणम् ।) लवणविशेषः । कालालुण इति भाषा । तत्पर्य्यायः । नीलम् २ काचोद्भवम् ३ काचम् ४ नीलकम् ५ काचसम्भवम् ६ काचसौवर्च्चलम् ७ कृष्णलवणम् ८ पाकजम् ९ काचोत्थम् १० हृद्यगन्धम् ११ कालालवणम् १२ कुरुविन्दम् १३ काचमलम् १४ कृत्रिमम् १५ । अस्य गुणाः । रुचिकारित्वम् । ईषत्क्षारत्वम् । पित्तवृद्धिकारित्वम् । दाहदाहत्वम् । कफवातगुल्मशूलनाशित्वम् । अग्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥

काचसम्भव, क्ली, (सम्भवत्यस्मादिति सम्भवः । काचः क्षारमृत्तिका सम्भवः उत्पत्तिस्थानमस्य ।) काचलवणम् ॥ इति राजनिर्घण्टः ॥

काचसौवर्चल, क्ली, (काचस्थानिकं सौवर्च्चलं लवणम् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचस्थाली, स्त्री, (काचस्य क्षारस्य स्थालीव ।) फलेरुहावृक्षः । पारुल गाछ इति भाषा । इत्यमरः । २ । ४ । ५४ ॥ (अस्याः पर्य्यायो यथा—

"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुवेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ।
मुष्कको मोक्षको घण्टा पाटलि काष्ठपाटला" ॥
कालस्थालीत्यत्र काचस्थालीत्येके ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

गुणादयोऽस्याः पाटलिशब्दे ज्ञेयाः ॥ काचनिर्म्मिता स्थाली ।) काचपात्रम् ॥

काचिघः, पु, (कचते दीप्यते इति वाहुलकात् इन् । काचिं कान्तिं हन्ति गच्छति । हन गतौ + ड । पृषोदरादित्वात् हस्य घ ।) काञ्चनम् । छेमक्क । छिमडा । इति भाषा । मूषिकः । इति मेदिनी ॥

काचित्, अ (पाणिनिमते पदद्वयमेतत् । मुग्धबोधमते "किमःत्यन्ताच्चिच्चनौ" इति का + चित्प्रत्ययः ।) काचन । कापि स्त्री । इति व्याकरणम् । (यथा, पदाङ्कदूते २ ।

"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशालम्" ॥)

काचित, त्रि, (कच्यते बध्यतेऽसौ । कच् + णिच् + कर्म्मणि क्तः ।) शिक्यितम् । शिक्यारोपितवस्तु । इत्यमरः । ३ । १ । ८९ ॥ शिकाय तोला द्रव्य इति भाषा ॥

काचिम, पु, (काच बन्धे + णिच् + इमन् ।) देवकुलोद्भववृक्षः । तत्पर्य्यायः । भक्षरु २ । इति त्रिकाण्डशेषः ॥

काञ्चनं, क्ली, (काञ्चते दीप्यते इति । कचि ड दीप्तौ + ल्युः ।) स्वर्णम् । इत्यमरः । २ । ९ । ९५ ॥ (यथा मनुः । २ । २३९ ।

"अमिध्यादपि सद्वृत्तममेध्यादपि काञ्चनम्" ॥)

पद्मकेशरम् । इति मेदिनी ॥ धनम् । नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥ (भावे ल्युट् । दीप्तिः । काञ्चनमये त्रि, यथा, मनुः । ५ । ११२ ।

"निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" ॥)

काञ्चन, पु, (काञ्चते दीप्यते इति कर्त्तरि ल्युः ।) स्वनामख्यातपुष्पवृक्षविशेषः । रक्तश्वेतभेदेन स द्विविधः । आद्यस्य पर्य्यायः । रक्तपुष्पः २ कोविदारः ३ युग्मपत्रः ४ कुण्डलः ५ ॥ द्वितीयस्य पर्य्यायः । काञ्चनालः २ कर्व्वुदारः ३ पाकारिः ४ । इति रत्नमाला ॥ अस्य राजनिर्घण्टोक्तगुणपर्य्यायौ कोविदारशब्दे द्रष्टव्यौ ॥ ३ ॥ चम्पकः । नागकेशरः । उदुम्बरः । धुस्तूरः । इति मेदिनी ॥ (पुरूरवसो वंश उद्भवस्य भीमस्य पुत्त्रः । यथा, भागवते । ९ । १५ । ३ ।

"भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः" ॥)

काञ्चनकं, क्ली, (काञ्चन + संज्ञायां कन् ।) हरितालम् । इति राजनिर्घण्टः ॥

काञ्चनक, पु, (काञ्चन + स्वार्थे कन् ।) कोविदारवृक्षः । इति वैद्यकम् ॥ ("काञ्चनारः काञ्चनको गण्डारिः शोणपुष्पकः" । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्य कोविदारशब्दे ज्ञेयाः ॥)

काञ्चनकदली, स्त्री, (काञ्चनवर्णा कदली ।) सुवर्णकदली । इति राजनिर्घण्टः । चाँपाकला इति भाषा ॥

काञ्चनकारिणी, स्त्री, (काञ्चनं वक्रमूलेन बन्धनं करोति । काञ्चन + कृ + णिनि । स्त्रियां ङीप् ।) शतमूली । इति शब्दचन्द्रिका ॥ (शतावरीशब्दे ऽस्या विवरणं वोद्धव्यम् ॥)

काञ्चनक्षीरी, स्त्री, (काञ्चनमिव क्षीरमस्याः । गौरादित्वात् ङीष् । काञ्चनवृक्षस्य क्षीरमिव क्षीरमस्य वा ।) क्षीरिणीलता । इति राजनिर्घण्टः ॥

काञ्चनगिरिः, पुं, (काञ्चनमयो गिरिः । शाकपार्थिवादित्वात् समासः ।) सुमेरुपर्व्वतः । इति हेमचन्द्रः । (यथा भागवते । ५ । १६ । २८ ।

"जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरावष्टाभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः" ॥ दानाय कृतः सुवर्णपर्व्वतः ॥)

काञ्चनपुष्पक, क्ली, (काञ्चनमिव पीतं पुष्पं यस्य । काञ्चनपुष्प + कप् ।) आहुल्यवृक्षः । इति राजनिर्घण्टः ॥

काञ्चनपुष्पी, स्त्री, (काञ्चनमिव पुष्पं यस्याः ङीप् ।) गणिकारीवृक्षः । इति राजनिर्घण्टः ॥ (गणिकारिकाशब्दे ऽस्या विशेषो ज्ञातव्यः ॥)

काञ्चनार, पु, (काञ्चनं तद्वर्णं ऋच्छति पुष्पैः । काञ्चन + ऋ + अण् ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥ कचनार इति हिन्दी भाषा ॥ ("काञ्चनारः काञ्चनकः" इत्यादि पर्य्यायाः काञ्चनकशब्दे गुणाश्च कोविदारशब्दे ज्ञातव्याः ॥ व्यवह्रियते यत्र तद्यथा,—

"काञ्चनारत्वचः क्वाथः शुण्ठीचूर्णेन नाशयेत् ।
गण्डमालान्तथा क्वाथः क्षौद्रेण वरुणत्वचः" ॥
इति मध्यखण्डे २ य शार्ङ्गधरेणोक्तम् ॥)

काञ्चनाल, पु, (काञ्चनं काञ्चनवर्णं अलति । काञ्चन + अल + अण् ।) कोविदारवृक्षः । इति शब्दरत्नावली । (काञ्चनारशब्देऽस्य गुणादयो ज्ञेयाः ॥ अस्य विवृतिः कोविदारशब्दे द्रष्टव्या ।)

काञ्चनाह्वय, पु, (काञ्चनं स्वर्णं आह्वयते स्पर्द्धते स्वभावात् । आ + ह्वे + क । काञ्चनः इत्याह्वयो नाम यस्य वा ।) नागकेशरवृक्षः । इत्यमरः । २ । ४ । ६५ ॥

काञ्चनी, स्त्री, (काञ्चते दीप्यते अनया । करणे ल्युट् ङीप् ।) हरिद्रा । इति मेदिनी ॥ स्वर्णक्षीरीवृक्षः । गोरोचना । इति राजनिर्घण्टः ॥

काञ्चनीया, स्त्री, (काञ्चनाय हिता । काञ्चन + छ टाप् च ।) गोरोचना । इति राजनिर्घण्टः ॥

काञ्चि, स्त्री, (काञ्चते इति "सर्व्वधातुभ्य इन्" । उणा ४ । ११७ । इति इन् ।) काञ्ची । इत्युणादिकोषः ॥ (यथा आर्य्यासप्तशती ६९३ ।

"हृतकाञ्चिवल्लिबन्धोत्तरजघनादपरभोगभुक्तायाः ।
उल्लसति रोमराजिः स्तनशम्भोर्गरलरेखेव" ॥)

काञ्चिक, स्त्री, (काञ्चि + संज्ञायां कन् ।) काञ्चिकम् । इति हेमचन्द्रः ॥

काञ्ची, स्त्री, (काञ्चि, "कृदिकारादक्तिनः" वा ङीष् ।) स्त्रीकट्याभरणम् । चन्द्रहार गोट् इत्यादि भाषा । तत्पर्य्यायः ॥ मेखला २ सप्तकी ३ रसना ४ सारसनम् ५ । इत्यमरः । २ । ६ । १०८ ॥ काञ्चिः ६ रशना ७ कक्षा ८ कक्ष्या ९ सप्तका १० सारशनम् ११ रसनम् १२ बन्धनम् १३ । इति शब्दरत्नावली ॥

('वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः" ॥ इति मेघदूते । २० ॥) केचित्तु

"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका ।
रसना षोडश ज्ञेया कलापः पञ्चविंशकः" ॥

इति पठन्ति इह तन्मेदात् पर्य्यायता । इति तट्टीका ॥ मोक्षदपुरविशेषान्तर्गतपुरीविशेषः । इति मेदिनी ॥ (यदुक्तम् ।

"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः" ॥

इयं हि कूर्म्मविभागे दक्षिणस्यां दिशि स्थिते द्राविडदेशे वर्त्तते ॥) गुञ्जा । इति विश्वः ॥

काञ्चीपद, क्ली, (काञ्च्याः पदं स्थानम् ।) जघनम् । इति हलायुधहेमचन्द्रौ ॥

काञ्जिक, क्ली, (अन्ज + धात्वर्थनिर्द्देशे ण्वुल् + टाप् अत इत्वञ्च । अञ्जिका । कु कुत्सिता अञ्जिका व्यक्तिर्यस्य कोः कादेशः ।) वारिपर्य्युषितान्नाम्लजलम् । काँजी इति भाषा । तत्पर्य्यायः । आरनालकम् २ सौवीरम् ३ कुल्माषम् ४ अभिषुतम् ५ अवन्तिसोमम् ६ धान्याम्लम् ७ कुञ्जलम् ८ । इत्यमरः । २ । ९ । ३९ ॥ कुल्माषम् ९ कुल्माषाभिषुतम् १० काञ्चिकम् ११ काञ्जीकम् १२ काञ्जिका १३ कञ्जिकम् १४ काञ्जी १५ भक्तवारि १६ धान्यमूलम् १७ धान्ययोनिः १८ तुषाम्बु १९ । इति तट्टीका । महाम्लम् २०

महारसम् २१ । इति रत्नमाला ॥ तुषोदकम् २२ शुक्तम् २३ चुक्रम् २४ धातुघ्नम् २५ उन्नाहम् २६ रक्तोघ्नम् २७ कुण्डगोलकम् २८ सुवीराम्लम् २९ । इति हेमचन्द्रः ॥ वीरम् ३० अभिषवम् ३१ अवन्तिसारकम् ३२ । अस्य गुणाः । वातशोथपित्तज्वरदाहमूर्च्छाशूलाध्मानविबन्धनाशित्वम् ।

"काञ्जिकं दधि तैलन्तु वलीपलितनाशनम् ।
दाहकं गात्रशैथिल्यं बल्यं सन्तर्पणं परम्" ॥

मर्द्दनाच्च भक्षणात् । इति राजनिर्घण्टः ॥ अपि च । भेदकत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । पित्तरुचिवस्तिशुद्ध्यग्निवृद्धिकारित्वम् । स्पर्शे शीतलत्वम् । श्रमक्लमनाशित्वञ्च । पुरातनस्य तस्य गुणाः । हृत्पाण्डुकृमिरोगनाशित्वम् । अग्निवृद्धिकारित्वञ्च । इति राजवल्लभः ॥ * ॥

"कुल्माषधान्यमण्डेन चाभूत काञ्जिकं भवेत् ॥
यन्मस्त्वादिशुचौ भाण्डे स गुडक्षौद्रकाञ्जिकम् ।
धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते" ॥

इति वैद्यकपरिभाषा ॥

काञ्जिकवटक, पु, (काञ्जिकयोगेन कृतो वटकः ।) वटकविशेषः । काँजि वडा इति भाषा । तस्य पाककप्रकारो यथा —

"मृन्मयी नूतना धार्य्या कटुतैलेन लेपिता ।
निर्म्मलेनाम्बुनापूर्य्य तस्यास्तूर्णं विनिक्षिपेत् ।
राजिकाजीरलवणहिङ्गुशुण्ठीनिशाकृतम् ।
निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत् ॥
ततो दिनत्रयादूर्द्ध्वमम्ला स्युर्वटका ध्रुवम्" ॥

अस्य गुणाः ।

"काञ्जिकवटको रुच्यो वातहृत् श्लेष्मकारकः शीतः ।
दाहं शूलमजीर्णं हरते नेत्रामयेष्वहितः" ॥

इति भावप्रकाशः ॥

काञ्जिका, स्त्री, (कुत्सिता ईषदा अञ्जिका ।) जीवन्तीलता । पलाशीलता । इति राजनिर्घण्टः ॥

काञ्जी, स्त्री (कं जलं अनक्ति । क + अन्ज + कर्म्मणि + अण् । गौरादित्वात् ङीष् ।) महाद्रोणावृक्षः । इति राजनिर्घण्टः ॥ काञ्जिकम् । इत्यमरटीका ॥

("तुम्बीवीजं सौद्भिदस्तु काञ्जीपिष्टं गुडीत्रयम् ।
अर्शोहरं गुदस्थं स्याद्दधिमाहिषमश्नुतः" ॥

इति तु काञ्जिकार्थे ज्ञेयम् ॥ इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे ।)

काठ, पु, (काठ्यते तक्ष्यते इति । कठ + कर्म्मणि घञ् ।) पाषाणः । इति त्रिकाण्डशेषः ॥

काठिन्य, क्ली, (कठिनस्य भावः । कठिन + ष्यञ् ।) कठिनता । यथा । "सीते मा कुरु सम्भ्रमञ्च मृदुना काठिन्यमङ्गीकृतम्" । इत्युद्भटः ॥

(यथा च कुमारे । ६ । ७३ ।
"काठिन्यं स्थावरे काये भवता सर्व्वमर्पितम्" ॥)

काठिन्यफल, पु, (काठिन्यं फले यस्य ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥ (कपित्थशब्देऽस्य गुणादयो बोद्धव्याः ॥)

काण, पु, (कणति एकचक्षुर्निमीलतीति । कण सञ्ज्ञायां कर्त्तरि घञ् ।) काकः । इति मेदिनी ॥

काण त्रि, (कणति एकचक्षुषा पश्यति । कण + घञ् ।) एकचक्षुः । इति मेदिनी ॥ काणा इति भाषा । (यथा, मनुः । ३ । २४२ ।
"खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्" ॥)

काणूक, पु, (कणति शब्दायते । कण शब्दे + "उलूक शल्यूकसमुद्गुककणूकशम्बूका" । उणां ४ । ३९ । इत्यूकण् ।) काकः । इत्युणादिकोषः ॥

काणेड, स्त्री, (कणतीति । कण शब्दे + डः । बाहुलकात् दीर्घः ।) सन्धिविच्छिन्नकाण्डास्थि । यथा ।

"भग्नं समासाद्द्विविधं हुताश-
काण्डे च सन्धौ च हि तत्र सन्धौ ।
उत्पिष्टविश्लिष्टविवर्त्तितञ्च
तिर्य्यग्गतं क्षिप्तमधश्च षट् च" ॥

इति रोगविनिश्चयः ॥ सन्धिविच्छिन्नमेकाण्डमस्थि काण्डम् । काण्डेन च अल्पकायपाल्वलयतरुणानां चाना ग्रहणम् । तत्र भग्नं काण्डभग्नम् । इति तट्टीकायां मधुकोषः ॥

काण्ड, पु क्ली, (कणि दीप्तौ + समन्तात् ड । ञ्यादिभ्य कित् अनुनासिकस्येति दीर्घः ।) दण्डः । (यथा, कात्यायनश्रौतसूत्रे ८ । ७ । २७ ।
"एषता वरत्राकाण्डेनाहन्ति" ।
"वरत्राकाण्डेन वधदण्डेन" । इति कर्कः ॥) नालम् । वाणः । (यथा, महाभारते १३ । ५ । ३ ।
"विषये काशिराजस्य ग्रामान्निष्क्रम्य लुब्धकः ।
सविषं काण्डमादाय मृगयामास वै मृगम्" ॥)

शरवृक्षः । अर्व्वा । कुत्सितः । वर्गः । (वर्गस्य एकजातीयसमवायः । यथा, भागवते । ४ । २४ । ९ ।
"क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह" ॥)

परिच्छेदः । (यथा, अथर्व्ववेदे १२ । ३ । ४५ ।
"इदं पापमुत्तमं काण्डमस्य यस्माल्लोकात्परमेष्ठी समाप" ॥) अवसरः । प्रस्तावः । वारि । जलम् । इत्यमरः । ३ । ३ । ४३ ॥ (यथा, हे रामायणे २ । ८९ । १८ ।

"तान्तु गत्वा परं तीरमवरोप्य च तं जनम् ।
निवृत्ता काण्डचित्राणि क्रियन्ते दाशबन्धुभिः" ॥

"क्रीडार्थं काण्डचित्राणि काण्डे जले चित्राणि चित्रगमनानि लघुत्वात् क्रियन्ते स्रोतयर्थं" ॥

इति तट्टीका ॥) स्तम्बः । (यथा, अमरुशतके ९५ ।

"उरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यञ्च वेदिरतुलं स्तनयुग्ममस्याः" ॥)

तृणादिगुच्छः । (यथा, भट्टिः ५ । १८ ।
"दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला" ॥)

तरुस्कन्धः । गुँड़ि इति भाषा । (यथा, रामायणे ।
"वृक्षकाण्डमितो भाति" ॥ वृक्षाणां शाखा । यथा, मनुः १ । ४६ ।
"उद्भिज्जाः स्थावराः सर्व्वे वीजकाण्डप्ररोहिणः" ।
"केचित्काण्डात् शाखा एव रोपिता वृक्षतां यान्ति" ॥

इति तट्टीका ॥ वृन्दः । समूहः । रहः । निर्ज्जनस्थानम् । इति मेदिनी ॥ श्लाघा । इति हेमचन्द्रः ॥ पापीयान् । इति धरणिः ॥

काण्डकटुक, पु, (काण्डे स्तम्बे लतायामित्यर्थः कटुकः तिक्तः ।) कारवेल्लः । इति राजनिर्घण्टः ॥ (कारवेल्लशब्देऽस्य विवरणं ज्ञेयम् ॥)

काण्डकाण्डक, पु, (काण्डस्य शरवृक्षस्य काण्डमिव काण्डं यस्य । काण्डकाण्ड + कप् ।) काशतृणम् । इति राजनिर्घण्टः ॥

काण्डकार, स्त्री, (काण्डं स्कन्धं किरति दीर्घतया उत्क्षिपति । काण्ड + कॄ + अण् ।) गुवाकः । इति शब्दमाला ॥ (पुंसि तु काण्डं वाणं करोति इति काण्डकारः । वाणकारकः ॥)

काण्डकीलक, पु, (काण्डे स्कन्धे कीलकमिव यस्य । काण्डकील + कप् ।) लोध्रः । इति राजनिर्घण्टः । लोधकाठ इति भाषा ॥

काण्डगुण्ड, पु, (काण्डेन गुच्छेन गुण्डयति वेष्टयति भूमिम् । काण्ड + गुडि वेष्टने + अण् ।) गुण्डनामतृणम् । इति राजनिर्घण्टः ॥

काण्डगोचर, पु, (काण्डस्य वाणस्य गोचर इव गोचरो यस्य ।) नाराचः । लौहमयवाणः । इति त्रिकाण्डशेषः ॥

काण्डणी, स्त्री, (काण्डेन स्तम्बेन नीयतेऽसौ काण्डं नयति आत्मानं वा । काण्ड + नी + क्विप् । पृषोदरादित्वात् णत्वम् ।) सूक्ष्मपर्णलता । रामदूती इति ख्याता । इति शब्दचन्द्रिका ॥

काण्डतिक्त, पु, (काण्डे स्कन्धे तिक्तः ।) भूनिम्बः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"किराततिक्तः कैरातः कटुतिक्तः किराततः ।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणादयोऽस्य किराततिक्तशब्दे ज्ञेयाः ॥)

काण्डतिक्तक, पु, (काण्डतिक्त + स्वार्थे कन् ।) भूनिम्बवृक्षः । इति शब्दचन्द्रिका । चिराता इति भाषा ।

काण्डनील, पुं, (काण्डे स्कन्धे नीलः ।) लोध्रः । इति राजनिर्घण्टः ।

काण्डपट, पु, (काण्डे काष्ठादिनिर्म्मितस्तम्भे आवरकत्वात् स्थितः पटः ।) यवनी । तिरस्करिणी । इति हेमचन्द्रः । कानात् इति भाषा ॥

काण्डपुङ्खा, स्त्री, (काण्डस्य वाणस्य पुङ्ख इव पुङ्खो यस्याः ।) शरपुङ्खा । इति राजनिर्घण्टः ॥

काण्डपुष्प, क्ली, (काण्डात् स्कन्धं व्याप्य पुष्पं यस्याः ।) क्षुद्रसुगन्धिपुष्पविशेषः । इति शब्दचन्द्रिका । दोना इति भाषा ॥

काण्डपृष्ठ, स्त्री, (काण्डं तरुस्कन्ध इव स्थूलं पृष्ठं यस्य ।) कर्णधनुः । इति महाभारतम् ॥

काण्डपृष्ठ, त्रि, (काण्डं वाणं पृष्ठे यस्य ।) काण्डस्पृष्टः । शस्त्राजीवः । इत्यमरटीकायां स्वामी ॥

("स्त्रीपूर्व्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ ।
अजपा ब्राह्मणास्त्वेव श्राद्धे नार्हन्ति केतनम्" ॥

इति महाभारते । १३ । २३ । २२ ॥) वैश्यापतौ पुं । इति दानधर्म्मः ॥

काण्डवारिणी, स्त्री, (काण्डान् सग्रामापतितान् वाणान् स्मरणादेव निवारयतीति । काण्ड + वृ + णिच् + णिनि ।) दुर्गा । यथा,—

"महागजघटाटोपसयुगे शरवाजिनाम् ।
स्मरणाद्वारते वाणान् तेन सा काण्डवारिणी" ॥

इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः ॥

ण्डरुहा, स्त्री, (काण्डात् छिन्नस्कन्धात् रोहतीति। काण्ड + रुह + क टाप् च।) कटुकी। इति रत्नमाला॥ (अस्याः पर्य्यायो यथा,—
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ अस्या गुणाः कटुकाशब्दे ज्ञेयाः॥)

काण्डर्षि, पु, (काण्डस्य वेदविभागस्य ऋषि। यद्वा काण्डेषु एकजातीयक्रियादिसमवायेषु ऋषिर्विचारकः।) वेदकाण्डविशेषाध्यापकमुनिभेदः। स तु जैमिन्यादि। इति त्रिकाण्डशेषः॥ (जैमिनिस्तु पूर्व्वमीमांसाशास्त्रप्रणयनेन क्रियाकाण्डस्य विचारकः। तथा वेदव्यासः उत्तरमीमांसारूपवेदान्तशास्त्रप्रणयनेन ज्ञानकाण्डस्य विचारकः। इत्यादि सूरिभिर्निरुक्तम्॥)

काण्डवान्, [त्] त्रि, (काण्डः शरः प्रहरणतया अस्यास्ति इति। काण्ड + मतुप्। मस्य वः।) काण्डीरः। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥

काण्डसन्धि, पु, (काण्डस्य स्कन्धस्य सन्धि मेलनस्थानम्।) ग्रन्थि। इति राजनिर्घण्टः॥ माव् गाँट इति च भाषा॥

काण्डस्पृष्ट, त्रि, (स्पृष्टं गृहीतं काण्डं येन निष्ठान्तत्वात् परनिपातः।) काण्डपृष्ठ। शस्त्राजीवी। इत्यमरः। २। ८। ६७॥

काण्डहीनं, क्ली, (काण्डेन स्कन्धेन हीनम्।) भद्रमुस्तकम्। इति शब्दचन्द्रिका॥

काण्डिका, स्त्री, (काण्ड गुच्छः प्राशस्त्येन अस्ति अस्याः। काण्ड + ठन् + टाप्।) लङ्कानामकधान्यविशेषः। वालुकीनामकर्कटीभेद। इति राजनिर्घण्टः॥

काण्डीरः, त्रि, (काण्डः वाणः अस्त्यस्य। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। १११। इति ईरन्।) काण्डास्त्रवान्। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥ (यथा भट्टि ४। १०।
"काण्डीरः खाङ्गिकः शार्ङ्गी रचन् विप्रस्तनुत्रवान्"॥)

काण्डीरः, पु, (काण्डः स्कन्ध अस्यास्तीति। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। १११। इति ईरन्।) अपामार्गवृक्षः। लताप्रभेदः। काण्डवेल इति ख्यातः। तत्पर्य्यायः। काण्डकटुकः २ नासासंवेदनः ३ पटुः ४ अग्रकाण्डः ५ सोमवल्ली ६ कारवल्ली ७ सुकाण्डिका ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सारकत्वम्। दुष्टव्रणलूतागुल्मोदरप्लीहशूलमन्दाग्निनाशित्वञ्च। इति राजनिर्घण्टः॥

काण्डीरी, स्त्री, (काण्डीर + गौरादित्वात् ङीष्।) मञ्जिष्ठा। इति रत्नमाला॥ काण्डीरा इत्यपि पाठः॥ (मञ्जिष्ठाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

काण्डेक्षु, पुं, (काण्डे इक्षुरिव।) कोकिलाक्षवृक्षः। इत्यमरः। २। ४। १०४॥ कुलिया खाडा इति भाषा॥ (अस्य पर्य्यायाः। यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥
"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका"॥
गुणाऽस्य क्षुरकशब्दे ज्ञेयाः॥) काशतृणम्। इति राजनिर्घण्टः॥

काण्डेरी, स्त्री, (काण्ड वाणाकारः पुष्पं ईर्त्ते। काण्ड + ईर्द गतौ + अण्। गौरादेराकृतिगणत्वात् ङीष्।) नागदन्तीवृक्षः। इति रत्नमाला॥

काण्डेरुहा, स्त्री, (काण्डे रोहति इति क टाप्। सप्तम्या अलुक्।) कटुकी। इति रत्नमाला॥ (कटुकीशब्देऽस्या विशेषो बोध्यः॥)

कातर, त्रि, (कु कष्टेन तरतीति। कु + तॄ + अच्। कोः कादेशः।) व्यसनाकुलचित्तः। व्याकुलः। तत्पर्य्यायः। अधीरः २। इत्यमरः। ३। १। २६॥ (यथा रघुः ११। ७८।
"कातरोऽसि यदि वोद्गतार्च्चिषा
तर्ज्जित परशुधारया मम"॥)

कातरः, पु, (कं जलं आतरति। क + आ + तॄ + अच्।) कातलमत्स्यः। इति शब्दरत्नावली॥

कातल, पु, (कातर एव रस्य लः। अयं हि रोहितादिवत् न तेजस्वी अतोऽस्य तथात्वम्। यद्वा, कस्य जलस्य तलं स्पृश्यत्वेन न अस्ति अस्य। अर्श आदित्वादच्।) मत्स्यविशेषः। कात्ला इति भाषा। तस्य गुणाः। उष्णत्वम्। मधुरत्वम्। गुरुपाकित्वम्। त्रिदोषकारित्वञ्च। इति राजवल्लभः॥ (यथा, वैद्यके।
"कातलो मधुरस्त्वोष्णो गुरुपाकी त्रिदोषकृत्"॥)

कात्वगा, क्ली, (कुत्सित त्वगा यद्वा त्वगा वा। कोः कादेशः।) रोहितवृणम्। इति राजनिर्घण्टः॥

कात्य, पु, (कतस्य ऋषेर्गोत्रापत्यः। कत + "गर्गादिभ्यो यञ्"। ४।१।१०५। इति यञ्।) कात्यायनमुनिः। इति त्रिकाण्डशेषः॥

कात्यायन, पु, (कतस्य गोत्रापत्यम्। गर्गादित्वात् यञ् यञन्तत्वात् यनिष्फः।) धर्म्मशास्त्रकर्त्तमुनिविशेषः। (यथोक्तं याज्ञवल्क्ये १। ४। ५।
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥
वररुचि। इति मेदिनी॥

कात्यायनी, स्त्री, (कतस्यापत्यं स्त्री। "गर्गादिभ्यो यञ्"। ४। १। १०५। इति यञ्। "सर्व्वत्र लोहितादिकतन्तेभ्यः"। ४। १। १८। इति ष्फः। षित्वात् ङीष्।) दुर्गा। (यथा मार्कण्डेय ९१। २३।
"एतत्ते वदनं सौम्य लोचनत्रयभूषितम्।
पातु नः सर्व्वभूतेभ्यः कात्यायनि नमोऽस्तु ते"॥)
अर्द्धवृद्धा काषायवसना विधवा। इत्यमरः। २। ६। १७॥ (याज्ञवल्क्यमुनेः पत्नीरेका पत्नी। यदुक्तं बृहदारण्यकोपनिषदि। "याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः मैत्रेयी कात्यायनी च। तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी"॥ मत्या ङीष्। कात्यायनस्य ऋषेः पत्नी"॥)

कादम्बः, पु, (कदम्बे समूहे भवः। कदम्ब + अण्।) कलहंसः। वालि हाँस् इति भाषा। इत्यमरः। २। ५। २३। (यथा रघुः। १३। ५५।
"क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः"॥)
अस्य मांसस्य गुणाः। वायुरक्तपित्तनाशित्वम्। मेदकत्वम्। शुक्रकारित्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ (कदम्ब एव। स्वार्थे अण्।) कदम्बवृक्षः। इत्यमरटीकायां भरतः॥ (कदम्बस्येदमिति व्युत्पत्त्या अण्। कदम्बसम्बन्धिनि, त्रि। कदम्बकुसुमम्। यथा रघुः १३। २७।
"गन्धश्च धाराहतपल्वलानां
कादम्बमर्द्धोद्गतकेसरञ्च"॥)
वाणः। इति मेदिनी॥

कादम्बकः, पु, (कादम्ब + स्वार्थे कन्।) वाणः। इति हारावली॥

कादम्बरं, क्ली, (कादम्बम् कदम्बोद्भवं रसं लाति गृह्णातीति। कदम्ब + ला + क। लस्य रः।) कदम्बपुष्पोद्भवमद्यम्। इति मेदिनी॥
(यथा, माघे।
"निषेव्य मधुमाधवाः सरसमत्र कादम्बरम्"॥)
दधिसारः। इति हेमचन्द्रः॥ शीधुः। इति विश्वः॥ (इक्षुजातगुडादि। इति मल्लिनाथः॥)

कादम्बर, पु, (कादम्ब कदम्बरसवत् लाति गृह्णातीति। ला + कः। लस्य रश्च।) दध्यग्रम्। दधिसरः। इति मेदिनी॥

कादम्बरी, स्त्री, (कु कृष्णवर्णं नीलवर्णमित्यर्थं अम्बरं वस्त्रं यस्य। कोः कादेशः। कादम्बरो बलरामस्तस्य प्रिया। कादम्बर + अण्। ततः स्त्रियां ङीप्। यद्वा कदम्बे जातो रसः कादम्बः। "तत्र जातः"। ४। ३। २५। इत्यण्। कादम्बं राति ददातीति। रादाने + "आतोऽनुपसर्गे कः"। ३। २।३। इति कः। गौरादित्वात् ङीष्।) मदिरा। इति मेदिनी॥ (यथा,—
"कादम्बरीमदविघूर्णितलोचनस्य
युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम्"॥
इत्युद्भटः॥) कोकिला। सरस्वती। शारिकामत्त्रियी। इति मेदिनी॥ (वाणभट्टविरचितकाव्यविशेषः। स्वनायिकानाम्नैव प्रसिद्धोऽयं ग्रन्थः। इयं कादम्बरी तु वाणभट्टेनासमापिता पुनरस्य पुत्रेण समाप्तिं नीता॥ नायिकाविशेषः। सा तु तुम्बुरुप्रभृतीनां येषां गन्धर्व्वाणां ज्येष्ठस्य हंस इत्याख्यया प्रसिद्धस्य गन्धर्व्वस्य कन्या। अस्या जननी सोममयूखसम्भवाप्सरसां कुले जाता गौरीति नाम्ना प्रसिद्धा। अस्या अन्यदिवरणन्तु कादम्बर्य्यां द्रष्टव्यम्॥)

कादम्बरीवीजं, क्ली, (कादम्बर्य्यै वीजं आसवः।) सुरावीजम्। इति रत्नमाला॥

कादम्बर्य्यः, पु, (कादम्बर्य्यै हितः इति यत्।) कदम्बवृक्षः। इति जटाधरः॥

कादम्बा, स्त्री, (कादम्ब इव आचरति। कादम्ब + आचारे क्विप् + अच् + टाप्।) कदम्बपुष्पीवृक्षः।

इति शब्दचन्द्रिका ॥ मुक्किरी इति भाषा ॥

कादम्बिनी, स्त्री, (कादम्बाः कलहंसाः सन्ति यस्याः । कादम्ब + इनि ङीप् ।) मेघमाला । मेघश्रेणिः । इत्यमरः । १ । ३ । ८ ॥

कादाचित्कं, क्ली, कदाचिद्भवम् । इति मुग्धबोधव्याकरणम् ७ । १५ ॥ (यथा, साहित्यदर्पणे ३ । २७ ।
"यद्यपि रसाभिन्नतया पर्य्यालोचनायामपि न कार्य्यता तथापि तस्य कादाचित्कतया उपपादितेन कार्य्यत्वेन कार्य्यत्वमुपचर्य्यते" ।)

काद्रवेय, पु, (कद्र्वाः अपत्यं पुमान् । कद्रु + "स्त्रीभ्यो ढक्" । ४ । १ । १२० । इति ढक् । "ढे लोपोऽकद्र्वाः" । ६ । ४ । १४७ । इति उलोपः ।) सर्पः । नागः । इत्यमरः । १ । ८ । ४ ॥
(यथा, महाभारते १ । ६५ । ४१ ।
"शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्म्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः ॥" ।)

कानकं, क्ली, (कनकस्य फलमिव । तत्र भवं वा । कनक + अण् ।) जयपालबीजम् । तस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । गुरुत्वम् । कफवातादिनाशित्वं । इति राजवल्लभः ॥ (स्वर्णनिर्म्मितवस्तुनि त्रि । यथा ।
"सदस्य कानकमथ सिद्धं सदस्य निक्षिपेत् ।
ततो नायकस्य आभ्यां अभिनवं लोकम्" ।)

कानन, क्ली, (क ब्रह्म जलं वा आननं मुखमस्य । यद्वा काननयति दीपयति । कन दीप्तौ + णिच् + ल्युट् ।) वनम् । (यथा, मेघदूते ४४ ।
"क्रीतो यादृक् पश्चिममखिलाकाशं नीलकण्ठम्" ॥ कस्य ब्रह्मणः आननं मुखम् ।) ब्रह्मणो मुखम् । गृहम् । इति मेदिनी ॥

काननारिः, पु, (काननस्य अरिरिव । शमीवृक्षस्य काष्ठस्य सर्व्वकाननस्य दहनात् तथात्वम् ।) शमीवृक्षः । इति शब्दचन्द्रिका ॥ (अस्य गुणादयः शमीशब्दे बोद्धव्याः ॥)

कानीन, पु स्त्री, (कन्यायाः अनूढायाः जातः कन्याया जातो वा । कन्या + "कन्यायाः कनीन च" । ४ । १ । ११६ । इति अण् कनीनादेशश्च ।) अनूढापत्यम् । तत्पर्य्यायः । कन्यकाजातः २ । इत्यमरः । २ । ६ । २४ ॥ सा कन्या यद्यनूढा पितृगृहे एव तिष्ठति तदा तत्पुत्रो मातामहस्यैव यथा,—
"कानीनः कन्यकाजातो मातामहसुतो मतः" ॥
इति याज्ञवल्क्यः ॥ यद्यूढा तदा वोढुरेव यथा,—
"पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्" ॥
इति मनुः ॥ व्यासे कर्णे च पु । इति मेदिनी ॥

कान्त, क्ली, (कनते दीप्यते इति । कन + कर्त्तरि क्त ।) कुङ्कुमम् । इति राजनिर्घण्टः ॥ लौहविशेषः । तस्य लक्षणं यथा,—
"स्वादुर्यत्र भवेन्निम्बकल्को गविन्दिवोषितः ।
कान्तं तदुत्तमं यत्र रूप्येणावर्त्तितं मिलेत्" ॥
तस्य परीक्षा । यथा ।
पात्रे यस्मिन् विसरति जले तैलविन्दुर्न्निषिक्तो
हिङ्गुर्गन्धं विसृजति निजं रूक्षितं निम्बकल्कः ।

पाके दुग्धं भजति शिखराकारतां नैति भूमौ
कान्तं लौहं तदिदमुदितं लक्षणोक्तं न चान्यत् ॥
इति रामबोधः ॥ अपि च ।
"यत्पात्रे न प्रसरति जले तैलविन्दुर्न्निषिक्तो
हिङ्गुर्गन्धं त्यजति भजते कटुतां निम्बकल्कः ।
पाके दुग्धं भजति शिखराकारतां नैति भूमौ
कृष्णाङ्गः स्यात् सजलचणकः कान्तलौहं वदन्ति" ॥
इति वैद्यकम् ॥ (वैद्यकमतेऽस्य अयस्कान्तस्य गुणादयो यथा,—
"कान्तं गुल्मोदरार्शःकफपवनहरं रक्तपित्तापहं च ।
कुष्ठघ्नं श्वासकासक्षयविषमज्वरं हन्ति शूलं प्रमेहम् ।
मेदः कासं प्रमेहं हरति वलिपलितध्वंसनं वृष्यमुग्रम्" ॥)

कान्त, त्रि, (काम्यते इति । कम् + कर्म्मणि क्त "यस्य विभाषा" । ७ । २ । १५ । इति नेट् । अनुनासिकस्य क्विझलोः क्ङिति ।) मनोज्ञः । सुन्दरः । इत्यमरमेदिन्यादयः ॥ (यथा,
"अभिनवमपि मुग्धाप्ता मन्त्रकं कामरूप्य
न मनसि न निधापितुं सम्यग्जगादपाति" ।
इति शाकुन्तले १ अङ्के ।)

कान्त, पु, (कम् + क्त ।) श्रीकृष्णः । चन्द्रः । इति शब्दरत्नावली ॥ पतिः । (यथा मेघदूते । १०१ ।
"कान्तोदन्तः सुहृदुपगतः सङ्गमात् किञ्चिदूनः" ।)
चन्द्रकान्तमणिः । सूर्य्यकान्तमणिः । यथा । चन्द्रकान्तः सूर्य्यकान्तश्चन्द्रकान्तादयः । इति मेदिनी ॥ हिज्जलवृक्षः । वसन्तः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥ शिवः । यथा, तत्रैव १३ । १७ । १३४ ।
"गुरुः कान्तो निजः सर्गः पवित्रः सर्व्वपावनः" ॥
कार्त्तिकेयः । यथा, तत्रैव ३ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यवाग्भुवनेश्वरः" ॥)

कान्तपक्षी, [न्] पु, (कान्तस्य कार्त्तिकेयस्य पक्षी । मयूरस्य कार्त्तिकेयवाहनत्वात्तथात्वम् ।) मयूरः । इति शब्दचन्द्रिका ॥

कान्तपुष्प, पु, (कान्तानि मनोरमाणि पुष्पाण्यस्य ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥

कान्तलक, पु, (कान्त लाचते व्यासज्यते । कान्त + लक आस्वादने + घञर्थे क । यद्वा काम्यते इति "मति-बुद्धिपूजार्थेभ्यश्च क्त" । ३ । २ । १८८ । इति क्त । कान्त । तत् लातीति । ला + क । कान्त स्वार्थे लक् करोति ।) नन्दीवृक्षः । इत्यमरः । २ । ४ । २८ ॥ तुंद इति भाषा ॥

कान्तलौह, क्ली, (कान्तं लौहश्रेष्ठत्वात् कमनीयं लौहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥ (अस्य गुणादिकं कान्तशब्दे सम्यक् ॥ अस्य निरुत्थीकरणं यथा, ॥
"शुद्धस्य सुतराज्यस्य भागो भागद्वयं बलेः ।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्यकाद्रवैः ॥
यामद्वयं ततो गोलं स्थापयेत्ताम्रभाजने ।
आच्छाद्यैरण्डपत्रैश्च यामार्द्धेनोष्णतां व्रजेत् ॥
त्रिदिनं धान्यराशिस्थं ततस्तोमर्द्दयेद्दृढम् ।
रजकादरूपगलितं नीरे तरति हंसवत् ॥

तीक्ष्णं मुण्डं कान्तलौहं निरुत्थं जायते ध्रुवम्" ॥
"ततः कोटिगुणं प्रोक्तं कान्तलौहं महागुणम्" ।
इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे ॥)

कान्ता, स्त्री, (काम्यते असौ । कम् + णिङ् + कर्म्मणि क्त + टाप् ।) नारी । (यथा भ्रमराष्टके ६ ।
"झटिति प्रविश गेहं मा बहिस्तिष्ठ कान्ते ।
ग्रहणसमयवेला वर्त्तते शीतरश्मेः ।
तव मुखमकलङ्कं वीक्ष्य नूनं स राहु-
र्ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय" ॥) प्रियङ्गुवृक्षः । इति मेदिनी ॥ स्थूलसुगन्धी स्त्री । इत्यमरः । २ । ६ । ३ ॥
(तस्या यथा, काशीखण्डे ७९ । ४४ ।
"कूटस्था कनका कान्ता कूर्म्मयाना कलावती" ॥)
बृहदेला । रेणुका । नागरमुस्ता । इति राजनिर्घण्टः ॥

कान्ताङ्घ्रिदोहद, पु, (कान्तायाः अङ्घ्रिः चरणसम्पर्केण दोहदं पुष्पोद्गमो यस्य । "पादाघातादशोको विकसति" इति कविप्रौढोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कान्ताचरणदोहद, पु, (कान्ताचरणेन रमणीचरणस्पर्शेन दोहदं पुष्पोद्गमो यस्य । "पादाघातादशोको विकसति" । इति कविप्रौढोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति भूरिप्रयोगः ॥

कान्तायस, क्ली, (कान्त एव आयसम् । कान्तं कमनीयं आयसम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥

कान्तार, क्ली, (कस्य सुखस्य अन्तं ऋच्छति गच्छतीति । कान्त + ऋ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) उपसर्गादिः । (कान्तं मनोज्ञं ऋच्छति प्राप्नोतीति । कर्म्मण्यण् ।) काननम् । (यथा, रामायणे २ । २८ । ५ ।
"सीते विमुच्यतामेषा वनवासकृता मतिः ।
बहुदोषं हि कान्तारं वनमित्यभिधीयते" ॥)
पद्मविशेषः । इति हेमचन्द्रः ॥

कान्तार, पु, (कान्तं मनोज्ञं रसं ऋच्छति प्राप्नोति । कान्त + ऋ + अण् ।) इक्षुविशेषः । कतारे इति हिन्दी भाषा । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"कान्तारं तापसाविक्षुवंशकानुगुरुर्मतौ" ॥)
अस्य गुणाः । गुरुत्वम् । श्लेष्मवृद्धिकारित्वम् । सरत्वम् । सारकत्वञ्च । इति भावप्रकाशः ॥ कोविदारवृक्षः । वंशः । इति राजनिर्घण्टः ॥

कान्तार, पु, क्ली, (कस्य सुखस्य अन्तं ऋच्छति यत्र । हिंस्रसङ्कुलत्वात् । कान्त + ऋ + आधारे घञ् ।) महावनम् । (यथा, गौः रामायणे । ४ । ४३ । ११ ।
"कैकेयान् सिन्धुसौवीरान् कान्तारगिरयश्च ये ।
गिरिजालावृतां दुर्गां मार्गध्वं पश्चिमां दिशम्" ॥)
दुर्गमपथः । इत्यमरः । ३ । ३ । १७१ ॥ (उक्तञ्च—
"सिन्धुरस्कन्धकपोलमूलगलितं रक्ताक्तमुक्ताफलम् कान्तारे बदरीभ्रमाद्द्रुततमगाद्भिल्लस्य पत्नी मुदा" इति ।) बिलम् । छिद्रम् । इति मेदिनी ॥

तारक', पु, (कान्तार + स्वार्थे कन् । इक्षुविशेष' ।
इत्यमर' । २।४।१६३ ॥ काजले श्याक् इति भाषा ॥
तारी, स्त्री, (कान्तार + गौरादित्वात् ङीष् ।)
इक्षुभेद' । काजले श्याक् इति भाषा । अस्या
गुणा' । मधुरत्वम् । लघुत्वम् । क्षारसत्वम् ।
कफवातकारित्वञ्च । इति राजवल्लभः ॥
न्ति', स्त्री, (कमु कान्तौ कन् दीप्तौ वा + भावे
क्तिन् ।) दीप्तिः । तत्पर्य्यायः । शोभा २ द्युति ३
छवि' ४ । इत्यमर' ।१।३।१० ॥ सुभा ५ दीप्ति
६ मा ७ श्री' ८ भासा ९ भा' १० । इति शब्द-
रत्नावली ॥ अभिख्या ११ । इति जटाधर ॥ * ॥
(यथा, विष्णुपुराणे १ मांशे ८ । २३ ।
"शशाङ्कः श्रीधर' कान्ति श्रीस्तस्यैवानपायिनी"॥)
कान्तिकारकपर्य्याया यथा । रश्मि १ उषसि २
वेति ३ वेनति ४ वेसति ५ वाञ्छति ६ वष्टि ७
वनोति ७ जूषते ९ हर्यति १० श्याचके ११ उशिक्
१२ मन्यते १३ छन्तसत् १४ चाकनत् १५ चक-
मान' १६ कमति १७ कानिषत् १८ इत्यष्टादश-
कान्तिकर्म्माणः । इति वेदनिघण्टौ २ अध्याय ॥
स्त्रीशोभा । इति हेमचन्द्र ॥ (यथा साहित्यदर्पणे ।
"रूपयौवनलालित्यं भोगाद्यैरङ्गभूषणम् ।
शोभा प्रोक्ता सैव कान्तिर्मन्मथाप्यायिता द्युति"॥)
इच्छा । सुहार्थकमधातोर्भावे क्तिन् प्रत्यय ।
दुर्गा । यथा,—देवीपुराणे देवीनिरुक्तनाम ४५
अध्याये ॥
"कृतिः सिद्धिरिति ख्याता श्रिया सम्श्रयणाच्च या ।
लक्ष्मीर्वा ललना वापि क्रमात् सा कान्तिरुच्यते" ॥
(गङ्गा । यथा, काशीखण्डे गङ्गास्तोत्रे २९ । ४० ।
"कुमुद्वती कमलिनी कान्ति' कल्पितदायिनी" ॥
"कान्तिश्चन्द्रतेजोरूपा" । इति तट्टीका ॥)
कान्तिद, स्त्री,(कान्ति द्यति नाशयतीति । कान्ति + दो
+ क ।) पित्तम् । इति शब्दचन्द्रिका ॥ (कान्ति
ददातीति । कान्ति + दा + क' ।) शोभादायके त्रि ॥
कान्तिदा, स्त्री (कान्तिद + टाप् ।) वाकुचीवृक्ष ।
सोमराजी इति ख्याता । इति राजनिर्घण्ट ॥
कान्तिदायकं, क्ली, (कान्ति ददातीति । कान्ति + दा
+ ण्वुल् ।) कालीयकवृक्ष' । इति जटाधर' ॥ शो-
भादायके त्रि ॥
कान्दविकः, त्रि, (कन्दौ संस्कृतं कान्दवं । कन्दु + अण् ।
कान्दवं पण्यं अस्य "तदस्य पण्यम्" । ४ । ४ । ५१ ।
इति ठक् ।) आपूपिकः । पूपविक्रयकर्त्ता । इत्य-
मर' । २ । ९ । २८ ॥
कान्दिशीभूत', त्रि, (का दिशं गच्छामि इत्याकुलीभूत' ।
कान्दिश + भू + कर्त्तरि क्त' ।) भयेन पलायित ।
इति पुराणम् ॥
कान्दिशीक', त्रि, (का दिशं यामि इत्याह । तदा
हेति मा शब्दादिभ्य उपसङ्ख्यानमिति ठक् पृषो-
दरादित्वात् साधुः ।) भयद्रुत' । भयेन पलायित ।
इत्यमर' । ३ । १ । ४२ ॥
कान्यकुब्जं, क्ली, (कन्या' कुब्जा न्युब्जीकृता वायुना
यत्र । तत' स्वार्थे अण् ।) गङ्गातीरस्थपुरविशेष ।
कनौज इति भाषा । तत्पर्य्याय' । महोदयम्
२ कन्याकुब्जम् ३ गाधिपुरम् ४ कौशम् ५ कुश-
स्थलम् ६ । इति हेमचन्द्र ॥ (यथा, महाभारते
३ । ११५ । १९ ।
"एतस्मिन्नेव काले तु पृथिव्याः पृथिवीपति ।
कान्यकुब्जे महानासीत् पार्थिव सुमहाबल' ।
गाधीति विश्रुतो लोके वनवासं जगाम ह" ॥
एतद्पुरविवरणं कान्याकुब्जशब्दे द्रष्टव्यम् ॥)
कान्यजा, स्त्री, (कात् जलात् अन्यस्मिन् जायते ।
कान्य + जन + ड + टाप् ।) नलीनामगन्धद्रव्यम् ।
इति शब्दचन्द्रिका ॥
कापटिक', पु, (कपटेन चरति इति ठक् ।) छात्र ।
अन्यमर्म्मज्ञ । ("तत्र परमर्म्मज्ञ' प्रगल्भच्छात्र'
कपटव्यवहारित्वात् कापटिक' । त वृत्त्यर्थिन-
मर्थमानाभ्यामुपगृह्य रहसि राजा ब्रूयात् यस्य
दुर्वृत्त पश्यसि तत् तदानीमेव मयि वक्तव्यम् । इति
मनुसंहिताया ७ । १५४ । श्लोकस्य टीकाया कु-
ल्लूकभट्ट ।) शठे त्रि । इति मेदिनी ॥
कापट्य, क्ली, (कपटस्य कार्य्यं भावो वा । कपट
+ ष्यञ् ।) कपटता । शठता । कपटशब्दात्
भावार्थे ष्यप्रत्यय ॥ इति मुग्धबोधव्याकरणम् ।
कापथ', पु, (कुत्सितः पन्था । कु + पथिन् + अच् ।
"कापथ्यक्षयो" । ६ । ३ । १०४ । इति कादेश ।)
कुत्सितपथ' । तत्पर्य्याय' । व्यध्व २ दुरध्व ३
विपथ ४ कदध्वा ५ । इत्यमर' । २ । १ । १६ ॥
कुपथ' ६ असत्पथ' ७ कुत्सितवर्त्म ८ । इति
शब्दरत्नावली ॥ ("आस्थातुं कापथ दु'खं विष-
मम् बहुकण्टकम्" ॥ इति हि' रामायणे । २ ।
१०८ । ७ ॥)
कापाल, क्ली, (कपालमेव कापालस्येद वा । कपाल +
अण् ।) अष्टादशकुष्ठान्तर्गतवातिककुष्ठम् । इति
माधवकर ॥ अस्य निदान कपालशब्दे द्रष्टव्यम् ॥
कापाल, पु, (कपाल + अण् ।) कर्कटा । इति शब्द-
चन्द्रिका रत्नमाला च ॥ कालिया काडा इति
भाषा ॥
कापालिक, पु, (कपालेन नृकपालेन चरति अभ्य-
वहारादिक करोतीति । कपाल + ठक् ।) वर्ण-
सङ्करजातिविशेष' । इति तन्त्रसार ॥ कपालि
इति भाषा । वामाचारिविशेष । यथा,—
"अथ तीर्थकाराग्रणीः प्रतस्थे
कापालिकजालक विजेतुम्" ।
इति शङ्करविजय' ॥ (योगिविशेष । यथा हट-
योगदीपिकाया १ । ८ ।
"भानुकी नारदेवश्च खण्ड' कापालिकस्तथा" ॥
तत्सम्प्रदायस्य यथा तत्रैव ३ । ९६ ।
"निर्गच्छते शीतलमध्यधारा
कापालिके खण्डमते ऽमरोली" ॥
"कापालिकस्यायं कापालिकस्तस्मिन् कापालिके
खण्डकापालिकसम्प्रदाये इत्यर्थ"॥ इतितट्टीका ।)
कापाली, स्त्री, (कपाल + ङीष् ।) विडङ्गा । इति
राजनिर्घण्ट ॥ (शिवः । यथा महाभारते । १३ ।
१७ । १०२ ।
"अजैकपाच्च कापाली त्रिशङ्कुरजित शिव" ॥)
कापिल', पुं, (कपिलेन प्रोक्तं शास्त्रं वेत्ति अधीते वा
इति अण् ।) साङ्ख्यशास्त्रज्ञ । इति हेमचन्द्र' ॥
(कपिलमधिकृत्य कृतो ग्रन्थ' । अण् । कपिलाधि-
कारेण कृत उपपुराणभेद । यथा कूर्म्मपुराणे ।
"कापिलं मानवञ्चैव तथैवोशनसेरितम्" ॥)
पिङ्गलवर्णे । तद्वति त्रि । इत्यमरटीकाया भरत ॥
कापिशं, क्ली, (कापिशा माधवी तत्पुष्पमधूद्भवम् ।
कपिशा + अण् ।) मद्यम् । इति हेमचन्द्र ॥
कापिशायन, क्ली, (कपिशैव स्वार्थे अण् । तत्र जा-
तम् । "कापिश्या ष्फक्" । ४ । २ । ९९ । इति
ष्फक् ।) मद्यम् । इति जटाधर ॥ देवता । इति
धरणी ॥
कापिशेय ,पुं,(कपिशाया अपत्यम् । ढक् ।) पिशाच ।
इति त्रिकाण्डशेष' ॥
कापुरुष , पु, (कुत्सित पुरुष । "विभाषा पुरुषे" ।
६ । ३ । १०६ । इति कोः कादेश ।) कुपुरुष' ।
कुत्सितपुरुष । इति व्याकरणम् ॥ यथा हितो-
पदेशे ॥
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति" ॥
कापेय', त्रि, (कपेर्भाव कर्म्म वा । कपि + ढक् ।
कपिसम्बन्धी । इति हलायुध' ॥ (स्त्रिया प्रमाण
यथा, गो' रामायणे । ६ । १११ । १९ ।
"कच्चिन्न खलु कापेयी सैव ते चलचित्तता" ॥)
कापोत, क्ली, (कपोताना समूह । अण् ।) कपोत-
गण' । इत्यमर २ । ५ । ४७ । पायरार झाँक्
इति भाषा ॥ (कपोतस्येदम् । "तस्येदम्" । ४ ।
३ । १२० । इत्यण् । यथा भागवते । ९ । १८ । २५ ॥
"दुर्मना भगवान् काव्य पौरहित्यं विगर्हयन् ।
स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात्" ॥
कापोतीं कपोतसम्बन्धिनीं वृत्तिं परस्य त्यक्तमुपजीवित्व-
मित्यर्थः ॥) सौवीराञ्जनम् । इति राजनिर्घण्ट ॥
कापोत , पु, (कपोत + अण् ।) सर्जिकाक्षार' ।
इत्यमर' । २ । ९ । १०९ ॥ रुचक' । इति मेदिनी ।
कपोताभवर्णे । तद्वति त्रि । इति हेमचन्द्र ॥
कापोताञ्जनं, क्ली, (कापोतस्य तत् अञ्जनञ्चेति ।)
सौवीराञ्जनम् । स्रोतोञ्जनम् । इत्यमर' । २।९।१०० ॥
काप्यकरः, पु, (कुत्सित आप्यं काप्यं पाप करोतीति ।
काप्य + कृ + ताच्छील्यादौ ट ।) स्वय कृतं पापं
चित्ते आधाय य' कथयति स । इति शब्दरत्ना-
वली ॥
काप्यकार , पु, (काप्य करोतीति । काप्य + कृ + अण् ।
चित्ते पापं आधाय य शंसति स' । इति त्रिका-
ण्डशेष' ॥ स्वपापवक्ता । इति शब्दरत्नावली ॥
काफल', पु, (कुत्सितं फलं यस्य । कोः कादेश' ।)
कट्फल' । इति शब्दरत्नावली ॥
काम, व्य, अभ्यनुज्ञा । इति विश्व' ॥
कामं, क्ली, (कामाय हितम् । काम + अण् ।) रेतः ।
निकाम । काम्यम् । इति मेदिनी ॥ वाढम् । अनु-
मति' । इति हेमचन्द्र ॥ (यथा माघे २ । ४३ ।
"मनागनभ्यावृत्त्या वा कामं क्षाम्यतु य' क्षमी)" ॥
काम' पुं, (काम्यते असौ कर्म्मणि घञ् ।) कोस्य

इच्छा । इति हेमचन्द्रः ॥ (यथा मनुः २ । ९४ ।
"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥)
कामस्तु ब्रह्मणो हृदयाज्जातः । यथा ।
"हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात्" ।
इति श्रीभागवतम् ॥ (काम्यते इति । कर्म्मणि घञ्
वरः । यथा रघुः २ । ६५ ।
"सन्तानकामाय तथेति कामं
राज्ञे प्रतिश्रुत्य पयस्विनी सा" ॥
कामं वरं प्रतिश्रुत्य प्रतिज्ञाय इत्यर्थः ॥ मल्लिनाथः ।
यथा तत्रैव ३ । ६७ ।
"तथेति कामं प्रतिशुश्रुवान्
रघोर्यथागतं मातलिसारथिर्ययौ" ॥
महादेवः । यथा महाभारते । १३ । १७ । ७२ ।
"गजकर्णो गणपतिर्दिग्वासाः काम एव च" ॥
विष्णुः । यथा तत्रैव १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)
बलदेवः । इति शब्दरत्नावली ॥ महाराजचूतः ।
इति राजनिर्घण्टः ॥ कामदेवः । (यथा कुमारे
३ । ६४ ।
"कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निमुखं विविक्षुः" ॥)
स तु श्रीकृष्णपुत्रः । तत्पर्य्यायः । मदनः २ मन्मथः
३ मारः ४ प्रद्युम्नः ५ मीनकेतनः ६ कन्दर्पः ७
दर्पकः ८ अनङ्गः ९ पञ्चशरः १० स्मरः ११ शम्बरारिः १२ मनसिजः १३ कुसुमेषुः १४ अनन्यजः
१५ पुष्पधन्वा १६ रतिपतिः १७ मकरध्वजः १८
आत्मभूः १९ ब्रह्मसूः २० विश्वकेतुः २१ । इत्यमरः
१ । १ । २६-२८ ॥ स तु पञ्चाशद्विधो यथा ।
कामः १ कामदः २ कान्तः ३ कान्तिमान् ४
कामगः ५ कामचारः ६ कामी ७ कामुकः ८
कामवर्द्धनः ९ वामः १० रमः ११ रमणः १२
रतिनाथः १३ रतिप्रियः १४ रात्रिनाथः १५
रमाकान्तः १६ रममाणः १७ निशाचरः १८
नन्दकः १९ नन्दनः २० नन्दी २१ नन्दयिता २२
पञ्चबाणः २३ रतिसखः २४ पुष्पधन्वा २५ महाधनुः २६ भ्रामणः २७ भ्रमणः २८ भ्रममाणः २९
भ्रमोऽपरः ३० भ्रान्तः ३१ भ्रामकः ३२ भृङ्गः ३३
भ्रान्तचारः ३४ भ्रमावहः ३५ मोहनः ३६
मोहकः ३७ मोहः ३८ मोहवर्द्धनः ३९ मदनः
४० मन्मथः ४१ मातङ्गः ४२ भृङ्गनायकः ४३
गायनः ४४ गीतिजः ४५ नर्त्तकः ४६ खेलकः ४७
उन्मत्तोन्मत्तकः ४८ विलासः ४९ लोभवर्द्धनः ५० ॥
"दाडिमीकुसुमाभाश्च वामाङ्के शक्तिसंयुताः ।
सौम्या रक्ताम्बराः सर्व्वे पुष्पबाणेक्षुकार्म्मुकाः ॥
विभागाः सर्व्वभूषाढ्याः कामाः पञ्चाशदीरिताः" ।
इति शारदातिलकटीकायां राघवभट्टः ॥ तेषामेकपञ्चाशत्शक्तयो रतिशब्दे द्रष्टव्याः ॥ * ॥
तस्य स्थानानि यथा ।
"पादे गुल्फे तथोरौ च भगे नाभौ कुचे हृदि ।
कक्षे कण्ठे च चोष्ठे च गण्डे नेत्रे श्रुतावपि ।
ललाटे शीर्षकेशेषु कामस्थानं तिथिक्रमात् ॥

दर्शे पैशा शिरसि नाभौ मुखे कर्णे विपर्य्ययः ।
पादाङ्गुष्ठे प्रतिपदि द्वितीयायां तु गुल्फके ।
ऊरुदेशे तृतीयायां चतुर्थ्यां भगसंस्थिता ।
नाभिस्थाने च पञ्चम्यां षष्ठ्यान्तु कुचमण्डले ।
सप्तम्यां हृदये चैव अष्टम्यां कक्षसंस्थिता ।
नवम्यां कण्ठदेशे च दशम्यां चोष्ठसंस्थिता ।
एकादश्यां गण्डदेशे द्वादश्यां नयने तथा ।
श्रवणे च त्रयोदश्यां चतुर्दश्यां ललाटके ।
पौर्णमास्यां शिरोभागे ज्ञातव्य इति क्रमात् ।
यत्र स्थाने वसेत् कामस्तत्र [illegible] ।
तस्योद्दीपनकर्त्तव्यं ज्ञात्वा रतिकर्म्मणि" ॥
इति ज्ञानदीपिका ॥ [illegible]
[illegible]
[illegible] कालिकापुराणे मार्कण्डेय उवाच ।
"महापि तपसा सन्ध्या दृष्टा पूर्व्वं प्रजापतिः ।
कामादप्यु अत्यर्थं [illegible] ।
[illegible] रामादौ [illegible] ।
[illegible] ।
मर्त्त्यं [illegible] ।
कालादप्यु [illegible] ।
[illegible] ।
दृष्ट्वा सन्ध्या [illegible] ।
ततस्तु [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
उत्पन्नमात्रा सा सद्य [illegible] ।
[illegible] ।
दृष्ट्वा [illegible] ।
नमापि [illegible] ।
देव दृष्ट्वा [illegible] ।
पञ्चमैरस्य [illegible] ।
यत्र शशाप कुपितः शम्भोरग्रे पितामह ।
समीक्षित [illegible] साम्प्रतम् ।
यस्मा पिता भ्राता [illegible] ।
दृष्ट्वा चक्रे स्पृहा तस्मान्न कापि पापकृत् ।
समापि कामभावोऽभूद्यस्मात् समीक्ष्य तान् ॥
पत्याविव सर्व्वे ताते सर्व्वेषु सहजेष्वपि ।
करिष्याम्यस्य पापस्य प्रायश्चित्तमहं स्वयम् ॥
आत्मानमग्नौ होष्यामि वेदमार्गानुसारतः ।
किन्त्वेकां स्थापयिष्यामि मर्य्यादामिह भूतले ॥
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः ।
एतदर्थमहं कृत्वा तप परमदारुणम् ॥
मर्य्यादा स्थापयित्वैव पश्चात् त्यक्ष्यामि जीवितम् ।
यस्मिन् शरीरे पित्रा मे ह्यभिलाषः स्वयं कृतः ॥
भ्रातृभिस्तेन कायेन किञ्चिन्नास्ति प्रयोजनम् ।
येन स्वेन शरीरेण तातेऽपि सहजे स्वके ॥
उद्भावितः कामभावो न तत् सुकृतसाधनम् ।
इति सञ्चिन्त्य मनसा सन्ध्या शैलवरं ततः ।
जगाम चन्द्रभागाख्यं चन्द्रभागा यतः स्रुता ॥

यथा स [illegible] नामधिष्ठित [illegible]
[illegible] ।
[illegible]
[illegible] सम्यक्" ॥
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
मार्कण्डेय उवाच ।
"अथ तस्याः शरीरन्तु [illegible] ।
[illegible] गृहीत्वा [illegible] ।
[illegible] तदा ।
[illegible] पौराणं [illegible]" ।
श्रीभगवानुवाच ।
"[illegible] भवन्त पञ्चैव वै ।
[illegible] शुभे [illegible] ॥
[illegible] कार्यं [illegible] ।
[illegible] भवं मे [illegible] मम ब्रत" ॥
सन्ध्योवाच ।
"यदि देव प्रसन्नोऽसि मयका मम संप्रति ।
[illegible] मम विधीयताम् ॥
उत्पन्नमात्रा देवेश प्राणिनोऽस्मिन् भुवनत्रये ।
न भवन्तु क्रमेणैव सकामाः सम्भवन्तु वै" ॥
श्रीभगवानुवाच ।
"प्रथमं शैशवो भाग कौमाराख्यो द्वितीयकः ।
तृतीयो यौवनो भाग चतुर्थं वार्द्धकं तथा ॥
तृतीयेऽथ वयःप्राप्ते वयोभागे शरीरिणः ।
सकामाः स्युर्द्वितीयान्ते भविष्यन्ति क्वचित् क्वचित् ।
तपसा तव मर्य्यादा जगति स्थापिता मया ।
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः" ।
इत्यादि कालिकापुराणे २२ अध्यायः ॥ * ॥
अभिलाषः । तस्य रजोगुणादुत्पत्तिर्यथा,—
"काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्" ॥
इति श्रीभगवद्गीतायां ३ । ३७ ॥
कामकला, स्त्री, (कामस्य कला प्रिया ।) रतिः ।
कामदेवपत्नी । इति शब्दरत्नावली ॥ चन्द्रस्य या
षोडशकलास्ता एव कामकला ॥
कामकूटः, पुं, (काम एव कूटः प्रधानं यस्य ।) वेश्याप्रियः । वेश्याविभ्रमः । इति मेदिनी ॥
कामकेलिः, त्रि, (कामे तदनुकरणे केलिर्यस्य ।)
विटः । इति त्रिकाण्डशेषः ॥ (कामनिमित्ता
केलिः ।) सुरते पुं । इति हेमचन्द्रः ॥
कामखड्गदला, स्त्री, (कामं कमनीयं खड्ग इव दलं
पत्रं यस्याः ।) स्वर्णकेतकी । इति राजनिर्घण्टः ॥
कामगामी, [न्] त्रि, (कामं यथेष्टं योनिविचारमकुर्व्वन्नेव वा गच्छतीति । काम + गम + णिनि ।)
कामङ्गामी । स्वेच्छागमनशीलः । इत्यमरटीका ॥
कामगुणः, पुं, (कामकृतो गुणः ।) रागः । विषयः
आभोगः । इति मेदिनी ॥
कामङ्गामी, [न्] त्रि, (कामं यथेच्छं गमनशीलः ।
सुपीति णिनि । काममव्ययम् ।) स्वेच्छागमनशीलः । तत्पर्य्यायः । अनुकामीनः २ । इत्यमरः ॥
२ । ८ । ७६ ॥
कामचारी, [न्] त्रि, (कामेन स्वेच्छया चरति ।

कामधे
कामधे

काम+चर+णिनि ।) कामुकः । (यथा
"पुरन्दरं च जानीते परस्त्रीकामचारिणम्" ॥
इति महाभारतम् ॥) स्वच्छन्दः ॥ कलविङ्कः । इति मेदिनी ॥

कामचारी, [न्] पुं, (कामेन इच्छानुसारेण चरति विहरति । काम+चर+णिनि ।) गरुडः । इति शब्दरत्नावली ॥

कामजानः, पुं, (कामं जनयति कुहूध्वनिना । काम+जन+णिच्+अच् । निपातनात् न ह्रस्वः । यद्वा कामजं कन्दर्पभावं आनयति । कामज+आ+नी+ड ।) कोकिलः । इति शब्दरत्नावली ॥ कामजनि इति च पाठः ॥

कामतालः, पुं, (कामं तालयति प्रतिष्ठापयति । काम+तलप्रतिष्ठायां+णिच्+अण् ।) कोकिलः । इति त्रिकाण्डशेषः ॥

कामदः, त्रि, (कामं अभिलाषं ददाति । काम+दा+कः ।) कामदाता । अभिलाषदः । इति मेदिनी ॥ (यथा हेः रामायणे २ । ३३ । ७ ।
"ऐश्वर्य्यस्य रसज्ञः सन् कामानाश्चैव कामदः" ॥
कामं कामस्य रूपं स्वसौन्दर्य्येण द्यति अवखण्डयतीति । यद्वा कामं मदनं द्यति नाशयतीति । ऊर्द्ध्वरेतस्त्वादस्य तथात्वम् । काम+दो+क । कार्त्तिकेयः । यथा, महाभारते ३ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यवाग्भुवनेश्वरः" ॥)

कामदा, स्त्री, (कामं अभीष्टं ददाति या । काम+दा+कः+टाप् ।) कामधेनुः । इति मेदिनी ॥

कामदुघा, स्त्री, (कामं दोग्धि । काम+दुह+"इगुपधज्ञाप्रीकिरः कः" । ३ । १ । १३५ । इति कः । ततष्टाप् ।) कामधेनुः । इति मुग्धबोधव्याकरणम् ॥ (यथा, भागवते १ । १० । ४ ।
"कामं ववर्ष पर्ज्जन्यः सर्व्वकामदुघा मही" ॥)

कामदूतिका, स्त्री, (कामस्य उद्दीपकत्वात् दूतिकेव ।) नागदन्तीवृक्षः । इति रत्नमाला ॥

कामदूती, स्त्री, (कामस्य दूतीव कामोद्दीपकत्वात् ।) पाटलावृक्षः । इति शब्दरत्नावली ॥

कामधरः, पुं, (कामरूपं कामस्य सञ्ज्ञां वा धरति धारयति वा । काम+धृ+अच् ।) कामरूपस्य मत्स्यध्वजपर्व्वतस्थसरोवरः । यथा,—
"मणिकूटाचलात् पूर्व्वं मत्स्यध्वजकुलाचलः ।
निर्दग्धो यत्र मदनो हरनेत्राग्निना पुनः ॥
शरीरं प्राप्य तपसा समाराध्य वृषध्वजम् ।
तत्र मत्स्यस्वरूपस्तु कामदेवेन संस्थितः ॥
अधित्यकायां पृथिवीं वीक्ष्यमाणः समन्ततः ।
तदा तु शाश्वती नाम तत्रास्ते दक्षिणास्रवा ॥
सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः ।
शाश्वत्यां विधिवत् स्नात्वा पीत्वा कामधराम्भसि ॥
विमुक्तपापः शुद्धात्मा शिवलोके महीयते" ॥
इति श्रीकालिकापुराणे ८१ अध्यायः ॥

कामधेनुः, स्त्री, (कामप्रतिपादिका धेनुः ।) स्वनामख्यातगौः । तस्या उत्पत्तिर्यथा,—
"दक्षस्य तनया याभूत् सुरभिर्नाम नामतः ।
गवां माता महाभागा सर्व्वलोकोपकारिणी" ॥
तस्यान्तु तनया जज्ञे काश्यपात्तु प्रजापतेः ।
नाम्ना सा रोहिणी शुभ्रा सर्व्वकामदुघा नृणाम् ॥
तस्यां जज्ञे शूरसेनाद्वसोरतितपोज्ज्वलात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता" ॥
"तस्यां जज्ञे शुनःशेफान्मुनेरतितपोज्ज्वलात्" ।
इति पुस्तकान्तरे पाठः ॥
"सा सिताभ्रप्रतीकाशा चतुर्व्वेदचतुष्पदा ।
स्तनैश्चतुर्भिर्धर्म्मार्थकामाप्रसवकारिणी" ॥ ✓ ॥
तस्या गर्भे शिववाहनवृषोत्पत्तिर्यथा,—
"सा स्वयम्भुशरीरात्तु कालेन महता सती ।
निर्म्मलं यौवनं कामधेनुराप मनोहरम् ॥
तां चरन्तीं मेरुपृष्ठे चारुरूपां मनोहराम् ।
ददर्श स तु वेतालः कामुकश्चाभ्यपद्यत ॥
तं कामुकन्तु वेतालं विदित्वा कामधेनुका ।
पशुधर्म्मात् स्वयं भेजे तं पुत्त्रं शशिभृत्कृतः ॥
सोऽवाप तस्याः परममामोदं शङ्करात्मजः ।
सा चापि परमं तस्मिन् मदनात् प्रतिहर्षिता ॥
तयोः प्रवृत्ते सुरते तस्या गर्भोऽभवत्तदा ।
काले प्राप्ते तु सुसुवे कामधेनुर्म्महावृषम् ॥
सोऽचिरेणैव कालेन सुमहान् वृषभोऽभवत् ।
महाककुदसंयुक्तश्चारुशृङ्गदयान्वितः ॥
उत्क्षिप्तविचलत्कर्णयुगलो दीर्घवालधिः ।
ककुदेन च शृङ्गाभ्यां कर्णाभ्यां स सिताभ्रवत् ॥
विचरन् ददृशे देवैः शृङ्गैरिव हिमाचलः ।
वेतालस्त्वकरोत्तस्य नाम भृङ्ग इति द्विजाः ! ॥
स तु भृङ्गो ज्ञानशाली समाराधयदीश्वरम् ।
सोऽपि तुष्टो वरं तस्मै ददाविष्टं महेश्वरः ॥
तमेव वाहनं चक्रे कृत्वा देवतनुं वृषम् ।
स चिरायुश्च बलवान् पृथिवीधरणक्षमः ॥
भृङ्गो नाम महातेजा केतुश्चाप्यभवत् पतेः ।
भृङ्गोऽभूद्वाहनो यस्माच्छङ्करस्य महात्मनः ॥
अतो भृङ्गिरिति ख्यातिं स च प्राप महेश्वरात्" ॥
इति श्रीकालिकापुराणे ९१ अध्यायः ॥ * ॥
अभीष्टप्रदा धेनुः । तद्दानफलं यथा,—
"वर्णा हरे सर्व्व एव पवित्र-
स्तत्रापि वर्षे शरदेव शुद्धा ।
तस्यां शुभः कार्त्तिको नाम मास-
स्तत्रापि पुण्यो हि बभूव दर्शः ॥
यस्यां हरेर्दैत्यभयाद्विमुक्ता
उरःस्थलं प्राप्य सुखं सुप्रीते ।
लक्ष्मीः पुराद्यापि विनिर्म्मिता वै
कामप्रदा धेनव एव यत्र ॥
अहर्मुखे यत्र दिने समस्ता
सुधेनवो भूमितले भ्रमन्ति ।
गृहे न यस्मिन् कथयन्ति लीना
हानिं त्वयस्तत्र च प्रत्ययो मे ॥
तस्मात्त्वमत्रैव च कामधेनुं
दद्याः समुद्दिश्य तु केशवस्य ।
विप्राय वै सर्व्वगुणोपपन्ना
कृत्वा व्रतं कृष्णमतो हरेस्तु ॥
सम्यक् प्रदत्तैस्तु गवां सहस्रैः
सवत्सवस्त्रैः सहितैश्च हैमैः ।
काले फलं यल्लभते मनुष्यो
न कामधेनोश्च समं द्विजेभ्यः ॥
कन्यारथानां करिवाजियुक्तैः
शतैः सहस्रैः सततं द्विजेभ्यः ।
दत्तैः फलं यल्लभते मनुष्यः
समं तथा स्यान्नतु कामधेनोः" ॥ * ॥
तद्भेदाः तद्दानविधिश्च यथा,—
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा ।
निर्गता मथ्यमानेऽब्धौ उष स्नानं शुभप्रदम् ॥
तत्र स्नात्वा समभ्यर्च्य धेनुं पूज्य प्रयत्नतः ।
गोदानफलमाप्नोति नरो विगतकल्मषः ॥
एकादश्यामुपोष्याथ नरो दिनचतुष्टयम् ।
घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा ॥
नक्ताशी गोरसैर्हव्यैः पूजयेन्मधुसूदनम् ।
गन्धपुष्पैः सुनैवेद्यैर्वस्त्राभरणकुण्डलैः ॥
शङ्खासिचक्रोद्यतशार्ङ्गविष्णो-
र्गदाब्जहस्तस्य तु शार्ङ्गपाणेः ।
अर्घं प्रयच्छामि जनार्द्दनस्य
श्रिया युतस्यापि धराधरस्य ॥
श्रियः पतिं श्रीधरमेव कान्तं
श्रिया सखायं हि श्रियोऽधिमूलम् ।
नमाम्यहं श्रीधरं श्रीनिवासं
समर्च्चितो मे प्रददातु कामान् ॥
एवं पूज्य विधानेन श्रिया युक्तैस्तु नामभिः ।
पृथक् जागरणं कुर्य्यात् श्रिया सार्द्धं जगत्पतेः ॥
या देवी भार्गवं भेजे कुलं सर्व्वैश्च पूजिता ।
आयातु सा गृहं नन्दा सुप्रीता वरदा मम ॥
याङ्गिरसञ्च सा देवी सुनन्दा प्रत्युपस्थिता ।
आयातु मे गृहे सा तु सुप्रीता वरदा सती ॥
सुरभी या भरद्वाजं कामधेनुः सुकामदा ।
सदामवद्गृहं सात्र ममायातु सुरार्च्चिता ॥
सुशीला काश्यपं या तु भेजे सर्व्वत्र कामदा ।
सा मे भवतु सुप्रीता कामधेनुर्गृहे सदा ॥
सुमना या वशिष्ठन्तु सम्प्राप्य मुमुदे शुभा ।
सा मे गृहं सदायातु कामदा देवपूजिता ॥
एवं पूज्य विधानेन प्रभाते विमले शुभे ।
शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः ॥
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनसुसंस्कृते ॥
तिलप्रस्थेन चाकीर्णे चतुःस्वर्णविभूषिते ।
क्षौमवस्त्रान्विते शुभ्रे मध्वाज्यपात्रसंयुते ॥
शुभवस्त्रैः समाच्छाद्य सर्व्वरत्नैरलङ्कृताम् ।
सुवर्णशृङ्गीं सुखुरां चतुःस्तनीं मनोरमाम् ॥
क्षीराब्धिपयसोपेतां धेनुं मन्त्रैः प्रपूजयेत् ।
या धेनुः सर्व्वदेवानां ऋषीणां भावितात्मनाम् ॥
क्षीराब्धेर्निर्गता या च सा मे भवतु सुस्थिरा ।
एतत्क्षीराभिषेकञ्च कृत्वा विष्णोः प्रयत्नतः ॥
समभ्यर्च्य यथान्यायं गन्धपुष्पादिभिः क्रमात् ।
गावो ममाग्रतः सन्तु गावः पार्श्वे च पृष्ठतः ॥
गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम् ।
प्राङ्मुखोदङ्मुखो वापि सितयज्ञोपवीतिनीम् ॥
इमां त्वं प्रतिगृह्णीष्व देवदेव ! जगत्पते ! ।

"महामारं कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते" ॥)
अनुमति । प्रकामम् । असूया । अनुगमनम् ।
इति मेदिनीकरहेमचन्द्रौ ॥

काममह, पु, (कामस्य महः उत्सवो यत्र ।) चैत्री पूर्णिमा । इति त्रिकाण्डशेषः ॥

कामयिता, [ऋ] त्रि, (कामयते । कम् + णिच् + तृच् ।) कामुकः । इत्यमरः । ३ । १ । २४ ॥

कामरूप, पु, (मूलप्रकृतिर्भगवती कामरूपिणी सती यत्र देशे विराजमाना स देशस्तन्नाम्ना एव उच्यते ।) स्वनामख्यातदेशः । तत्पर्य्यायः । प्राग्ज्योतिषः २ । इति त्रिकाण्डशेषः ॥ तत्र कामगिरौ योनिपीठे कामाख्या देवी वर्त्तते । यथा ।
"योनिपीठं कामगिरौ कामाख्या तत्र देवता" ।
"सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे" ॥
इति तन्त्रचूड़ामणौ पीठमाला ॥ (अयं हि गणेशगिरिशिखरस्थो देशः । यदुक्तं तन्त्रे ।
"कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम् ।
कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि" ॥
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतं यावत् ॥
अयं खलु वङ्गदेशस्य ईशानभागे आसामप्रदेशस्य पश्चिमभागे वर्त्तते ॥)

कामरूप, त्रि, (कामं काम्यं मनोहरं रूपं यस्य ।) मनोज्ञरूपः । स्वेच्छारूपः । (यथा महाभारते । १ । सुपर्णस्तुतौ २३ । ६ ।
"कामरूप कामगम कामवीर्य्य विहङ्गम" ॥)
तथा च । मेघदूते ६ ।
"जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः" ॥

कामरूपिणी, स्त्री, (कामं मनोज्ञं रूपं अस्त्यस्याः । कामरूप + इनि + ङीप् ।) अश्वगन्धावृक्षः । इति राजनिर्घण्टः ॥

कामरूपी, [न्] पु, (कामं कमनीयं रूपमस्यास्तीति । कामरूप + इनि ।) विद्याधरः । इति त्रिकाण्डशेषः ॥ जाहकजन्तुः । इति राजनिर्घण्टः ॥ (कामेन स्वेच्छया रूपं धार्य्यत्वेनास्त्यस्य इनि ।) मनोज्ञरूपिणि स्वेच्छारूपिणि च त्रि । यथा,—
"सर्व्वमाशु विचेतव्यं हरिभिः कामरूपिभिः" ॥
इति रामायणम् ॥

कामरेखा, स्त्री, (कामाना कामव्यापाराणां रेखा चिह्नं यस्याः राजिर्वा यत्र ।) वेश्या । इति शब्दमाला ॥

कामल, पुं, स्त्री, (कम + णिच् + कलच् ।) रोगविशेषः । काँवोल कामला इति च प्रसिद्धिः । इति मेदिनी ॥ तस्य निदानरूपमाह यथा,—
"पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते" ॥
तस्य लक्षणम् ।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः ।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ।
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः ।
कामला बहुपित्तैषा कोष्ठशाखाश्रया मता ।
कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला" ।
तस्यारिष्टलक्षणम् ।
"कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ।
सरक्ताक्षिमुखच्छर्द्दिविण्मूत्रो यश्च ताम्यति ॥
दाहारुचितृडानाहतन्द्रामोहसमन्वितः ।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली" ॥
इति माधवकरः ॥

कामल, पु, (कामयते अभीष्टमस्मिन् । कम + अधिकरणे + कलच् ।) वसन्तकालः । मरुभूमिः । (कामं लाति गृह्णातीति । काम + ला + क ।) कामुके त्रि इति मेदिनी ॥

कामलता, स्त्री, (कामस्य लतेव ।) शिश्नः । इति हेमचन्द्रः ॥

कामला, स्त्री पु, (कामल + टाप् ।) स्वनामख्यातरोगः । अथ पाण्डुरोगभेदस्य कामलाया निदानपूर्व्विकां संप्राप्तिमाह ।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते" ॥
पित्तलं कटु । दग्ध्वा सदूष्य । रोगाय कामलारूपाय । पाण्डुरोगिण इत्यतिशयितपित्तलसेवया कामला भवति । नायं नियमः । किन्तु कामला स्वतन्त्रापि भवति । यथा राजयक्ष्मा कासाद्युपेक्षिताद्भवति । नायं नियमः । किन्तु राजयक्ष्मा स्वतन्त्रापि भवति । तद्वदेषापि ॥ • ॥
कामलाया लक्षणमाह ।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः ।
पीतरक्तशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ।
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः" ॥
हारिद्रं हरिद्रावर्णम् । पीतरक्तशकृन्मूत्रः । पीते रक्ते वा शकृन्मूत्रे यस्य सः । भेकवर्णः हरिद्भेकवर्णः । तस्या भेदावाह । "कामला बहुपित्तैषा कोष्ठशाखाश्रया मता" । एषा कोष्ठाश्रया अपरा शाखाश्रया । तत्र कोष्ठकामलामाह । "कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला" । कालान्तरात् खरीभूता अतिरूक्षीकृतसर्व्वधातुः । कुम्भकामला कोष्ठकामलेत्यर्थः । सा कृच्छ्रा कष्टसाध्या ॥ • ॥ कुम्भकामलिनोऽरिष्टलक्षणमाह ।
"कर्षरोचकहृल्लासज्वरक्लमनिपीडितः ।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली" ॥
उभयोरपि कामलयोररिष्टलक्षणमाह ।
"कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ।
सरक्ताक्षिमुखच्छर्द्दिविण्मूत्रो यश्च ताम्यति ॥
दाहारुचितृडानाहतन्द्रामोहसमन्वितः ।
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान् विपद्यते" ॥
अथ कामलाचिकित्सा ।
"निफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः ।
प्रातर्माक्षिकसंयुक्तः शीलितः कामलापहः ॥
अञ्जने कामलार्त्तानां द्रोणीपुष्पीरसो हितः ।
गुडूचीपत्रकल्कं वा पिबेत्तक्रेण कामली ॥
धात्रीलौहरजोव्योषनिशाक्षौद्राज्यशर्कराः ।
लीढा निवारयन्त्याशु कामलामुद्धतामपि ॥
कुम्भाख्यकामलायान्तु हितः कामलिको विधिः ।
गोमूत्रेण पिबेत् कुम्भकामलावान् शिलाजतु ।
दग्ध्वाक्षकाष्ठैर्मलमायसन्तु
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्णलीढं मधुनाचिरेण
कुम्भाह्वयं पाण्डुगदं निहन्ति" ॥
इति भावप्रकाशः ॥ • ॥
"मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम्" ॥
इति गारुडे १८७ अध्यायः ॥
"तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम् ।
कामलादिहरं प्रोक्तं मुखरोगहरं तथा" ॥
इति तत्रैव १८८ अध्यायः ॥

कामवती, स्त्री, (कामः कमनीयता अस्त्यस्याः । काम + मतुप् । मस्य वः । ङीप् च ।) दारुहरिद्रा । इति राजनिर्घण्टः । (कामः कन्दर्पभावः अस्त्यस्याः । मैथुनानुरागयुक्ता स्त्री । यथा महाभारते १ । शान्तनूपाख्याने ९७ । ५ ।
"त्यागः कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितः" ॥)

कामवल्लभ, पुं, (कामं कमनीयः स्पृहणीय इत्यर्थः अत एव वल्लभः प्रियः । यद्वा कामस्य कन्दर्पस्य वल्लभः । कन्दर्पप्रियवसन्तकालोद्भवत्वात् तथात्वम् ।) आम्रः । इति राजनिर्घण्टः ॥

कामवल्लभा, स्त्री, (कामस्य कन्दर्पस्य वल्लभा प्रिया । कामोद्दीपकत्वात् तथात्वम् ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥

कामवृद्धि, पु, (कामस्य वृद्धिर्यस्मात् ।) क्षुपविशेषः । कामज इति कर्णाटके प्रसिद्धः । तत्पर्य्यायः । स्मरवृद्धिमघः २ मनोजवृद्धिः ३ मदनायुधः ४ कन्दर्पजीवः ५ जितेन्द्रियाह्वः ६ कामैकजीवः ७ जीवसंज्ञः ८ । अस्य गुणाः । मधुरत्वम् । बलवर्द्धनत्वम् । कामवृद्ध्यधिकारित्वम् । बह्वेन्द्रियवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥

कामवृन्ता, स्त्री, (कामं कमनीयं वृन्तं यस्याः ।) पाटलावृक्षः । इति शब्दमाला ॥

कामवृक्ष, पु, (कामं यथेच्छं वीजाद्यनपेक्षतया उत्पन्नो वृक्षः ।) वन्दाकः । इति राजनिर्घण्टः ॥

कामशर, पु, (कामस्य कन्दर्पस्य शर इव कामोद्दीपकत्वात् ।) आम्रः । इति राजनिर्घण्टः ॥

कामसख, पु, (कामस्य सखा । "राजाहःसखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) वसन्तकालः । इति राजनिर्घण्टः ॥

कामसुत, पु, (कामस्य सुतः ।) अनिरुद्धः । इति हेमचन्द्रः ॥

कामाख्या, स्त्री, (कामयते भक्ताना कामं पूरयति यदा भक्ति काष्ठे कान्तेऽगाँ इति कामा । कामा आख्या यस्याः ।) देवीविशेषः । तन्नाम [illegible] यथा ।
शिव उवाच ।
"कामार्थमागता यस्मान्मया सार्द्धं महागिरौ ।
काम्या [illegible] देवि [illegible] ।
[illegible]
[illegible] ॥
तत्रैव [illegible] यथा,—
[illegible]

अष्टकां दक्षतनयां भार्य्यार्थेऽप वृधूवराम् ॥
सा मेऽभूत् प्रेयसी भार्य्या प्रदाय समय पितु ।
अनिष्टकारी त्वचेत् स्याः प्राणास्त्यक्ष्ये सदा त्वचम्॥
ततो यज्ञे समस्तन्तु स च यज्ञे चराचरम् ।
न मा नापि सतीं यज्ञे तदनिष्टात्मृता तु सा ॥
ततो मोहसमापन्नस्तामादाय स्वतामहम् ।
प्राप्तः पीठवरं तन्तु भ्रममाणा इतस्ततः ॥
तस्यास्त्वङ्गानि पर्य्यायात् पतितानि यतो यतः ।
तत्तत् पुण्यतमं जातं योगनिद्राप्रभावतः ॥
तस्मिंस्तु कुब्जिकापीठे सत्यास्तद्योनिमण्डलम् ।
पतितं तत्र सा देवी महामाया व्यलीयत ॥
लीनायां योगनिद्रायां मयि पर्व्वतरूपिणि ।
स नीलवर्णः शैलोऽभूत् पतिते योनिमण्डले ॥
स तु शैलो महातुङ्ग पातालतलमाविशत् ।
तस्या आक्रमणाद्गाढं ततस्त द्रुहिणोऽभ्ययात् ॥
स तु पूर्व्वं ब्रह्मशक्तिशिलां धर्त्तुं चतुर्मुख ।
शैलरूपोऽभवत्तेन शैलरूपेण मामधात् ॥
ब्रह्मा पर्व्वतरूपेण मयि पर्व्वतरूपिणि ।
ससक्तोऽधोऽगमद्गाढमाक्रान्तो मायया विधेः ॥
ततो वराहः संसक्तो मयि मां स तु माधव ।
शैलरूप शैलरूप धर्त्तुं समुपचक्रमे ॥
सोऽप्यधोऽयान्मया सार्द्धं तदा पर्व्वतरूपिणा ।
आक्रम्य देवीं पृथिवीं स्थितो भुवि निखातक ॥
शत शत योजनाना तुङ्गमासीद्गिरित्रयम् ।
तदाक्रान्तं महादेव्या सर्व्वमेव ह्यधोगतम् ॥
क्रोशमात्रे स्थित तुङ्ग चैव तन्नितयस्य तु ।
एका समस्तजगतां प्रकृति सा यतस्ततः ॥
ब्रह्मविष्णुशिवैर्देवैर्धृता सा जगतां प्रसूः ।
तत्र पूर्व्वो ब्रह्मशैल श्वेत इत्युच्यते बुधैः ॥
मद्रूपधारी शैलस्तु नील इत्युच्यते तथा ।
स तु मध्यगत शैलस्त्रिकोणोदूखलाकृति ॥
विभ्राजमान सतत मध्ये ब्रह्मवराहयोः ।
वराह शैलरूपो य स चित्र इति कथ्यते ॥
स सर्व्वेषां स्थित पश्चात् दीर्घः सर्व्वेभ्य एव तु ।
ऐशान्यां योऽभवत् कूर्म्म शैलरूपो महाद्युति ॥
मणिकर्णः स नाम्ना तु ख्यातो देवौघसेवित ।
योऽनन्तरूप शैलस्तु वायव्यां समवस्थित ॥
मणिपर्व्वतसञ्ज्ञोऽसौ पर्व्वतो माधवप्रिय ।
महामायागिरिर्यस्तु नैर्ऋत्यां समवस्थित ॥
स गन्धमादनो नाम्ना सर्व्वदा शङ्करप्रिय ।
वराहपृष्ठभवने यत्र च्छिन्नौ महासुरौ ॥
हरिणा तत्र सञ्जातः पाण्डुनाथ इति स्मृत ।
ब्रह्मशक्तिशिलायास्तु पूर्व्वभागे तु माधव ॥
यस्तु पर्व्वतरूपोऽह स तु भस्माचलाह्वय ।
एवं पुण्यतमे पीठे कुब्जिकापीठसञ्ज्ञके ॥
नीलकूटे मया सार्द्धं देवी रहसि संस्थिता ।
सत्यास्तु पतितं तत्र विशीर्णं योनिमण्डलम् ॥
शिलात्वमगमत् शैले कामाख्या तत्र संस्थिता ।
संस्पृश्य तां शिलां मर्त्यो ह्यमर्त्यत्वमवाप्नुयात् ॥
अमर्त्यो ब्रह्मसदनं तत्स्थो मोक्षमवाप्नुयात् ।
तस्याः शिलाया माहात्म्यं यत्र कामेश्वरी स्थिता ॥
अद्भुतं यस्य शुद्ध्यै तु लोह भस्म भवेद्रुतम् ।

सा चापि मत्यहं तत्र पञ्चमूर्त्तिधरा भवेत् ॥
मोक्षार्थं सर्व्वलोकानां ममापि प्रीतये शिवा ।
अथ पञ्चमुखेनाहं पञ्चभागे व्यवस्थितः ॥
ईशान पूर्व्वभागस्थ कामेश्वर्य्याः प्रधानत ।
ऐशान्यां वै तत्पुरुषो ह्यघोरस्तस्य सन्निधौ ॥
सद्योजातोऽथ वायव्यां वामदेवस्तु सङ्गतः ।
देव्याश्चापि नरश्रेष्ठ पञ्चरूपाणि भैरव ॥
शृणु वेताल ! गुह्यानि देवैरपि सदैव हि ।
कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा ॥
सारदाथ महोत्साहा कामरूपगुणैर्युता ।
मयि लिङ्गत्वमापन्ने शिलायां योनिमण्डले ॥
सर्व्वे शिलात्वमगमन् शैलरूपाश्च निर्जराः ।
यथाहं लिङ्गरूपेण रेमे वै सह कान्तया ॥
शिलारूपप्रतिच्छन्नास्तदा सर्व्वास्तु देवता ।
शिलारूपप्रतिच्छन्ना शैले शैले व्यवस्थिता ॥
रमन्ते च स्वरूपेण नित्यं रहसि सङ्गता ।
ब्रह्मविष्णुरहश्चात्र दिक्पाला सर्व्व एव ते ॥
अन्येऽप्यत्र स्थिता देवाः सानुकूला सदा मयि ।
उपासितु तदा देवीं कामाख्यां कामरूपिणीम् ॥
नीलशैलस्त्रिकोणस्तु मध्ये लिङ्ग सदाशिव ।
तन्मध्ये मण्डलं चारु षट्त्रिंशत्कोणसमन्वितम् ॥
गुहा मनोभवा तत्र मनोभवविनिर्म्मिता ।
योनिस्तस्यां शिलायान्तु शिलारूपा मनोहरा ॥
वितस्तिमात्रविस्तीर्णा एकविंशाङ्गुलायता ।
क्रमसूक्ष्मविनिर्म्माणमस्तशैलानुगामिनी ॥
सिन्दूरकुङ्कुमारक्ता सर्व्वकामप्रदायिनी ।
तस्या योनौ पञ्चरूपा नित्यं तिष्ठति कामिनी ॥
महामाया जगद्धात्री मूलभूता सनातनी ।
तत्राष्टौ योगिनीर्नित्य मूलभूता सनातनी ॥
पूर्व्वोक्ता शैलपुत्राद्या स्थिता देव्या समन्ततः ।
तासान्तु पीठनामानि शृणु चैकत्र भैरव ! ॥
गुप्तकामा च श्रीकामा तथा च विन्ध्यवासिनी ।
कोटीश्वरी धनस्था तु पाददुर्गा तथापरा ॥
दीर्घेश्वरी क्रमादेव प्रकटा भुवनेश्वरी ।
स्वयोगिन्य पीठनाम्ना ख्याता अष्टौ च देवता ॥
सर्व्वतीर्थानि चैकत्र जलरूपाणि भैरव ! ।
स्थितानि नाम्ना सौभाग्या वरेण्या प्राणिपुण्यदा ॥
विष्णुस्तु तीरे तस्या स नाम्ना कमल इत्युत ।
कामुकायास्तु वटुकः कामाख्याभ्यर्णसंस्थित ॥
लक्ष्मी सरस्वती देव्यौ देव्या अङ्के व्यवस्थिते ।
ललिताख्याऽभवल्लक्ष्मीर्मातङ्गी तु सरस्वती ॥
गणाध्यक्ष पूर्व्वभागे तस्य शैलस्य संस्थित ।
सिद्ध स नाम्ना विख्यातो द्वारि देव्या प्रिय सुत ॥
कल्पवृक्ष कल्पवल्ली तिन्तिडी चापराजिता ।
भूतास्तस्मिन्महाशैले स्थिते देव्या धृतप्रिये ॥
वराह पाण्डुनाथाख्य स्थितस्तत्र हरिर्यतः ।
जघने शिरसी कृत्वा जघान मधुकैटभौ ॥
तस्यासन्ने ब्रह्मकुण्ड ब्रह्मणा निर्म्मितं पुरा ।
ईशानाख्यं शिरोरत्न तत् सिद्धेश्वरसञ्ज्ञकम् ॥
शिलारूप सिद्धकुण्ड मध्यस्थ विद्धि भैरव ! ।
तस्यासन्न गयाक्षेत्र क्षेत्र वाराणसी तथा ॥
योनिमण्डलसङ्काश कुण्ड भूत्वा व्यवस्थितम् ।

तत्रैवामृतकुण्डन्तु सुधामयप्रपूरितम् ॥
मम प्रियार्थं श्रेष्ठा स्थापितं सह निर्जरैः ।
वामदेवाह्वय शीर्षं श्रीकामेश्वरसंज्ञकम् ॥
कामकुण्डं महापुण्यं तस्यासन्ने व्यवस्थितम् ।
केदारसंज्ञक क्षेत्र मध्यस्थं सिद्धकामयोः ॥
दीर्घ चतुर्दशव्याम मायाक्षेत्राह्वय तु तत् ।
तस्यासन्ने शैलपत्नी गुप्तकामाह्वया तु सा ॥
गुप्तकुण्डस्य मध्यस्था कामेशस्याश्च सङ्गता ।
कामेश्वरशिलासक्ता कामाख्यासंस्थिता सदा ॥
पूर्व्वभागेन संसक्ता योनेस्तु परभागतः ।
कामकामाख्ययोर्म्मध्ये कालरात्रिर्व्यवस्थिता ॥
पीठे दीर्घेश्वरी नाम्ना सीमाभागे प्रचण्डिका ।
कामाख्या प्रस्तरप्रान्ते कुष्माण्डी नाम योगिनी ॥
पीठे कोटीश्वरी नाम्ना योनिरूपेण संस्थिता ।
यथाघोराह्वय शीर्षं तत् कामाख्यास्तु दक्षिणे ॥
पीठे भैरवनामा तु गीयते परमार्थिभि ।
चामुण्डाभैरवी नाम्ना भैरवासन्नसंस्थिता ॥
नायिका कामदा भक्तेः चण्डमुण्डविनाशिनी ।
कामाभैरवयोर्म्मध्ये मम देवी सुरापगा ॥
स्थिताय सर्व्वगतां देव्यास्तु प्रीतये स्थिता ।
सद्योजाताह्वय शीर्षं पीठे त्वाम्रातकेश्वरम् ॥
भैरवाख्ये गह्वरे तु स्थित देवर्षिसेवितम् ।
विद्धि तत्रैव दुर्गाख्या नायिका योगरूपिणीम् ॥
सिद्धकामेश्वरी नाम्ना ख्याता देवेषु नित्यशः ।
अजीर्णाख्य सच्छायो वृक्षस्तत्र तु संस्थित ॥
आम्रातक कल्पवृक्ष कल्पवल्लीसमन्वित ।
पीठे तु सिद्धगङ्गाख्या स्वयं गङ्गा समुत्थिता ॥
आम्रातकस्य निकटे मम प्रीतिविवृद्धये ।
पुष्करारण्यन्तु तत् क्षेत्र पीठे त्वाम्रातकाह्वयम् ॥
ऐशान्या तत्पुरुषाख्य मम शीर्षं व्यवस्थितम् ।
भुवनेश्वरनाम्ना तु पीठे ख्यातश्च भैरव ! ॥
गह्वरं भुवनेशस्य भुवनानन्दसञ्ज्ञकम् ।
तस्यासन्ने तु सुरभि शिलारूपेण संस्थिता ॥
कामधेनुरिति ख्याता पीठे कामप्रदायिनी ।
योऽसौ शरभमूर्त्तिर्मे मध्यखण्ड प्रचण्डक ॥
महाभैरवनामाभूत् कोटिलिङ्गाह्वयस्तु स ।
मूर्त्तिभि पञ्चभि पञ्चभागेषु समवास्थित ॥
अह पश्चादतिप्रीत्या भैरवाख्य स्थितोऽधरे ।
महागौरी तु या देवी योगिनी सिद्धरूपिणी ॥
सा ब्रह्मपर्व्वते चास्ते शिलारूपेण चोर्द्धत ।
अतीवरूपसम्पन्ना नाम्ना सा भुवनेश्वरी ॥
यत्र ब्रह्मा तु संसक्तो मयि पर्व्वतरूपिणि ।
कल्पवल्ली तु तत्रास्ते नाम्ना सा त्वपराजिता ॥
कामधेनोरदूरस्था पूर्व्वभागे महेश्वरी ।
श्रीकामाख्या योनिरूपा चण्डिका सा तु योगिनी ॥
आग्नेय्यां विद्धि तां सस्था सर्व्वकामप्रदा शुभाम् ।
योगिनी चण्डघण्टाख्या पीठेऽभूत् विन्ध्यवासिनी ॥
योगिनी स्कन्दमाता तत्पीठेऽभूद्वनवासिनी ।
कात्यायनी पीठनाम्ना पाददुर्गेति गद्यते ॥
नैर्ऋत्यां नीलशैलस्य प्रान्ते सा संस्थिता शिवा ।
योऽसौ नन्दी मम तनु स तु वानराख्यरूपधृक् ॥
संस्थित पश्चिमद्वारि हनूमान् पीठनामतः" ॥"

श्रीऔर्व्व उवाच ।
त तस्य वच' श्रुत्वा शम्भोरमिततेजस ।
ास्तु पप्रच्छ वेतालोऽपि समुत्सुक" ॥
श्रीवेतालभैरवावूचतु' ।
त, पीठक्रमस्तात देव्या' पूजाक्रमन्तत' ।
तुमिच्छामि मूर्त्तीना पञ्चानामपि शङ्कर । ॥
पाणि पञ्चमूर्त्तीना मन्त्राणि च समन्तत ।
ा यन्त्राणि तन्त्राणि वद नौ वृषभध्वज ।" ॥
ईश्वर उवाच ।
ृणु वक्ष्यामि वेताल मन्त्र तन्त्रं पृथक् पृथक् ।
ामाख्यापञ्चमूर्त्तीना रूप कल्पञ्च भैरव । ॥
ामस्थं काममध्यस्थ कामदेवपुटीकृतम् ।
ामेन कमयेत् कामी काम कामे नियोजयेत् ॥
येकन्तु व्यञ्जनं ब्रह्म म पर शान्त उच्यते ।
थमं क्रमत कुर्य्यात् तत्संसक्तं सुधामयम् ॥
जापतिस्तथा शक्रवीजसस्थादिसंयुतम् ।
चन्द्रार्द्धसहित वीज कामाख्याया' प्रचक्ष्यते ॥
इद धर्म्मप्रदं काममोक्षार्थाना प्रदायकम् ।
इद रहस्यं परममन्यत्र तु सुदुर्लभम् ॥
श्रोत्रेणेदं यः शृणुयाद्दुरुवक्त्रान्नरोत्तम' ।
स कामानखिलान् प्राप्य शिवलोके महीयते ॥*॥
"श्रुतिसकलितसार देवकण्ठौघहार
सकलकलुषहारि श्रीधरामर्त्यकारि ।
सुनयशुभयशोभिर्योजयेद्यत्तु गोभि-
स्तदिह शिवसमस्तं विप्रधर्म्माङ्कितास्तम् ॥
नयनकलितकारि ध्यानिना दत्तपारि
प्रणयसुनयसंस्थ देवसत्यादिकस्थम् ।
परमपदविशीर्णं शुद्धदौर्भाग्यजीर्णं
शृणु शिवपदरूप कामदेव्या' स्वरूपम् ॥
श्रवणगमनमात्रान्मार्गितं यस्य नाम
प्रभवति बहुभूत्यै नीतिमार्गैकधाम ।
सुरगणगणसघा कुण्डली यस्य शक्ति-
स्तदिह परमरूप चिन्तनीयं हतीशः ॥
रविशशियुतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलजिह्वा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रशस्ता
प्रणतसुरवरेशा सिद्धकामेश्वरी सा ॥
अरुणकमलसस्था रक्तपद्मासनस्था
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शवहृदि पृथुतुङ्गस्तन्ययुग्मा मनोज्ञा
शिशुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवक्त्रा सुकेशी
दलितकरकदन्ता सामिचन्द्रावनम्रा ।
मनसिजदृशदिस्था योनिमुद्रा लसन्ती
पवनचलनशक्ता सश्रुतस्थानभागा ॥
चिन्त्या चैव विद्युदग्निप्रकाशा
धर्म्मार्थाद्यै साधिता वाञ्छितार्थैः ।
कल्प तन्त्र पट्टिणिवद सम्यगर्थं
वेतालत्व भैरवत्व प्रतिष्ठम् ॥
तस्मिन्नाद्यं मण्डल विद्धि पश्चात्
कार्य्यं तद्वै चन्दनै पुष्पगन्धैः ।
तत्पर्य्याणे लेखने पूर्व्वमुक्तौ
देवीतन्त्रे सोऽत्र पूर्व्वं विधेय " ॥
इति श्रीकालिकापुराणे ६१ अध्याय' ॥

कामाग्निसन्दीपनमोदकं, क्ली, (सन्दीप्यते अनेनेति सन्दीपनम् । कामाग्नीना सन्दीपनमुद्दीपकम् । कामाग्निसन्दीपनञ्च तत् मोदकञ्चेति ।) औषधविशेष' । यथा,—
"कर्षो रसो गन्धकमभ्रकञ्च
द्विक्षारचित्रे लवणानि पञ्च ।
शटी यमानीद्वयकीटहारि
तालीशपत्राण्यपर ।द्विकर्षम् ॥
जीर चतुर्ज्जातलवङ्गजाती-
फलञ्च कर्षत्रयमेवमन्यत् ।
सदद्धदारं कटुकत्रयञ्च
तथा चतु कर्षमित निबोध ॥
धन्याकयष्टीमधुक कशेरु-
कर्षा पृथक् पञ्च वरी विदारी ।
वरेभकणोभवलात्मगुप्ता-
वीज तथा गोक्षुरवीजयुक्तम् ॥
सवीजपत्रेन्द्ररज समान-
समासिता क्षौद्रघृतञ्च तुल्यम् ।
कर्षैकमिन्दोरथमोदक तत्
कामाग्निसन्दीपनमेतदुक्तम्" ॥*॥
"वृष्य तत मरतर सतत न दृष्ट-
मेन निषेव्य मनुज प्रमदासहस्रम् ।
गच्छन्न लिङ्गशिथिलत्वमवाप्नुयाञ्च
नागाधिप विजयते बलत प्रमत्त ॥
कान्त्या कृताशनमपि स्मरतो मयूरान्
वाह यथेन नयनेन महाविहङ्गम् ।
वातानशीतिमथपित्तगदं समग्रं
श्लेष्मोत्थविंशतिरुज परमग्निमान्द्यम् ॥
दुर्नामकामलभगन्दरपाण्डुरोग-
मेहातिसारकृमिहृद्ग्रहणीप्रदोषान् ।
कासज्वरश्वसनपीनसपार्श्वशूल-
शूलास्रपित्तसहिताश्चिरजान् समस्तान् ॥
हत्वा गदानपि च तत् पुनरपत्यकारि
सर्व्वर्त्तुपथ्यमथ सर्व्वसुखप्रदायि ।
वृष्य वलीपलितहारि रसायन स्यात्
श्रीमूलदेवकथितं परम प्रशस्तम्" ॥
इति भैषज्यरत्नावली ॥

कामाङ्कुश, पु, (कामे कामोद्दीपने अङ्कुश इव । नखाघातेन कामोद्दीपनादस्य तथात्वम् ।) नख । इति त्रिकाण्डशेष ॥ (कामस्य अङ्कुश इव ।) शिश्न । इति जटाधर ॥

कामाङ्ग, पुं, (काम कामोद्दीपक अङ्गं मुकुलं यस्य ।) आम्रवृक्ष । इति जटाधर' ॥

कामातुर',त्रि, (कामेन आतुर ।) कामार्त्त । यथा ।
"अर्थोलाघवमुज्झितो निपतन कामातुरो लाञ्छनम्" ॥ इति नवरत्नमध्ये धन्वन्तरिः ॥

कामान्ध, पु, (कामेन अन्धयति निजध्वनिजनितमन्मथोद्दीपनेन हतज्ञान करोतीति । काम + अन्ध + णिच् + अच् ।) कोकिल । इति राजनिर्घण्ट ॥ (कामेन अन्ध' । स्मरान्ध । कामवेगेन कर्त्तव्यताज्ञानशून्य' ॥)

कामान्धा, स्त्री, (कामं यथेष्टं अन्धयति । अन्ध + णिच् + अच् + टाप् ।) कस्तूरी । इति राजनिर्घण्टः । (स्मरेण अन्धा । कर्त्तव्यज्ञानशून्या । प्रगल्भानायिकाविशेष । यथा, साहित्यदर्पणे ३ । ७० ।
"स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका" ॥
अस्या उदाहरणं यथा तत्रैव ।
"धन्यासि या कथयसि प्रियसङ्गमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्य शपामि यदि किञ्चिदपि स्मरामि" ॥)

कामायु [स्] पु, (काम यथेष्टं आयुर्यस्य ।) गरुडः । इति त्रिकाण्डशेष' ॥

कामायुध', पु, (कामस्य आयुधमिव मुकुले आकारोऽस्ति अस्य । अर्श आदित्वात् अच् ।) महाराजचूत' । आम्र । इति राजनिर्घण्टः ॥ कामदेवास्त्रे क्ली ॥

कामारण्यं क्ली, (कामं मनोहरं अरण्यम् ।) मनोज्ञवनम् । इति शब्दमाला ॥
(कामस्य अरण्यमिति विग्रहे कन्दर्पवनम् ॥)

कामारि , पु, (कामस्य अरि' ।) विटमाक्षिकधातुः । इति हेमचन्द्र' ॥ महादेव' कन्दर्पनाशकत्वात् ॥

कामार्त्त , त्रि, (कामेन ऋत' ।) कामपीडितः । कामातुर । यथा, मेघदूते ५ ।
"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" ॥

कामालु , पु, (काम यथेष्टं अलति पुष्पविकाशेन पर्य्याप्नोतीति । अल पर्य्याप्तौ + उण् ।) रक्तकाञ्चनवृक्ष' । इति शब्दचन्द्रिका ॥

कामावसायिता, स्त्री, (कामेन स्वेच्छया अवसाययति सर्व्वाणि अविद्यावासनाजालानि । काम + अव + सो + णिच् णिनि ततो भावार्थे तल् ।) कामान् स्वेच्छया अवसाययितु शीलमस्य कामावसायी तस्य भाव । इति सारसुन्दरी ॥ शिवस्याणिमाद्यष्टधैश्वर्य्यान्तर्गतैश्वर्य्यविशेष । इत्यमरः शब्दरत्नावली च ॥ सा तु सत्यसङ्कल्पता ॥ (अष्टैश्वर्य्याणि यथा,
"अणिमा लघिमा व्याप्ति' प्राकाम्यं गरिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" ॥)

कामावसायित्वं, क्ली (कामावसायिनो भाव । त्वप्रत्यय ।) कामावसायिता । इति हेमचन्द्र' ॥

कामि , पु, (कामयते इति । कम् + णिच् + इण् ।) कामुक । रत्या स्त्री । इति मेदिनी ॥

कामिक , पु, (काम अस्त्यस्य ठन् ।) कारण्डवपक्षी । इति शब्दरत्नावली ॥ (कामेन निर्वृत्तम् । ठञ् । कामनिर्वृत्तकर्म्मणि क्ली । यथा, महाभारते अनुशासनपर्व्वणि ।
"देवतास्तस्य तुष्यन्ति कामिकं तस्य सिध्यति" ॥)

कामिनी, स्त्री, (अतिशयेन काम' अस्या अस्ति इति । काम + इनि + ङीप् ।) अतिशयकामयुक्ता नारी । इत्यमर । २ । ६ । ३ ॥ (यथा, मनु ८ । ११२ ।
"कामिनीषु विवाहेषु गवाम्भक्ष्ये तथेन्धने ।

ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्” ॥)
भीरुस्त्री। वन्दा। इति मेदिनी ॥ दारुहरिद्रा।
मदिरा। स्त्रीसामान्यम्। इति राजनिर्घण्टः ॥
(यथा, आर्य्यासप्तशती २७०।
“कर्णे इव कामिनीनां न शोभते निर्भरः प्रेमा”॥)

कामिनीशः, पुं, (कामिन्याः कामिनीप्रियाञ्जनस्य ईशः तत्साधनत्वात्।) शोभाञ्जनवृक्षः। इति शब्दचन्द्रिका ॥

कामी, [न्] पुं, (अतिशयेन कामयते। कम + णिच + णिनि।) चक्रवाकः। पारावतः। कामुकः। इति मेदिनी ॥ (यथा, मेघदूते। ७४।
“सभ्रूभङ्गं प्रहितनयनैः कामिलक्ष्येष्वमोघैः” ॥)
चटकः। इति शब्दरत्नावली ॥ चन्द्रः। इति त्रिकाण्डशेषः ॥ ऋषभौषधिः। सारसपक्षी। इति राजनिर्घण्टः ॥ (सर्व्वकामवत्त्वात् विष्णुः। यथा, महाभारते १३। १४९। ८३।
“कामदेवः कामपालः कामी कान्तः कृतागमः” ॥)

कामीजः, पुं, (काममनुगच्छति इति खः। पृषोदरादित्वात् साधुः।) रामगुवाकः। इति त्रिकाण्डशेषः ॥ (कामीन इत्यपि दृश्यते ॥)

कामुकः, त्रि, (कामयते इति। “लषपतपदेत्यादिना” । ३। २। १५४। उकञ्।) कामी। तत्पर्य्यायः। कमिता २ अनुकः ३ कम्रः ४ कामयिता ५ अभीकः ६ कमनः ७ कामनः ८ अभिकः ९। इत्यमरः। ३। १। २०। (यथा, भागवते ९। २३। १७।
“दुष्मन्तः स पुनर्भेजे स्ववंशं राज्यकामुकः” ॥)

कामुकः, पुं, (कम + उकञ्।) अशोकवृक्षः। अतिमुक्तकलता। इति मेदिनी ॥ चटकः। इति राजनिर्घण्टः ॥

कामुककान्ता, स्त्री, (कामुकानां कान्ता प्रिया।) अतिमुक्तकलता। इति राजनिर्घण्टः ॥

कामुका, स्त्री, (कम + उकञ् + स्त्रियां टाप्। न ङीप्।) धनादीच्छाविशिष्टा। तत्पर्य्यायः। इच्छावती २। इत्यमरः। २। ६। ९॥

कामुकी, स्त्री, (कम + उकञ् + “जानपदकुण्डेति” । ४। १। ४२। ङीष्।) मैथुनेच्छावती। तत्पर्य्यायः। वृषस्यन्ती २। इत्यमरः। २। ६। ९ ॥ (यथा, नैषधे १९। २४।
“अनिशमवदत्यागादेनं जनः खलु कामुकी
सुभगमभिधास्यत्युद्दामापराङ्मुखवदावदः” ॥)

कामेश्वरी, स्त्री, (काम्यन्ते इति कामाः विषयास्तेषां भोग्यानां प्रदायित्वेन ईश्वरी।) कामाख्यापञ्चमूर्त्त्यन्तर्गतमूर्त्तिविशेषः। यथा,—
“देव्यास्त्वापि नरश्रेष्ठ। पञ्च रूपाणि भैरव।।
शृणु वेताल। गुह्यानि देवैरपि सदैव हि ॥
कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा।
सारदाथ महोत्साहा कामरूपगुणैर्युता” ॥
इति कालिकापुराणे ६१ अध्यायः ॥ * ॥
अस्या मन्त्रो यथा, श्रीभगवानुवाच।
“देव्याः कामेश्वरीं मूर्त्तिं शृणु वक्ष्यामि भैरव।।
यस्याश्चिन्तनमात्रेण साधको लभते प्रियान् ॥
तन्त्रं तस्याः प्रथमतस्ततोऽनुध्यानगोचरम्।
ततः पूजाक्रमं वक्ष्ये क्रमाद्वेतालभैरव। ॥
प्रजापतिस्ततो वह्निरिन्द्रबीजं ततः परम् ॥
चूडाचन्द्रार्द्धसहितं चतुर्थस्वरसंयुतम्।
इदं कामेश्वरीमन्त्रं सर्व्वकामार्थसाधनम्” ॥ * ॥
तस्या ध्यानं यथा,—
“रूपन्तु चिन्तयेद्देव्याः कामेश्वर्य्या मनोहरम्।
प्रभिन्नाञ्जनसङ्काशां नीलस्निग्धशिरोरुहाम् ॥
षड्वक्त्रां द्वादशभुजां अष्टादशविलोचनाम्।
प्रत्येकं षट्सु शीर्षेषु चन्द्रार्द्धकृतशेखराम्।
मणिमुक्तादिमाणिक्यरत्नां मालामुरःस्थले।
कण्ठे च बिभ्रतीं नित्यं सर्व्वालङ्कारमण्डिताम् ॥
पुस्तकं सिद्धसूत्रञ्च पञ्चबाणवरं तथा।
खड्गं शक्तिञ्च शूलञ्च बिभ्रतीं दक्षिणे करे ॥
अक्षमालां महापद्मं कोदण्डञ्चाभयं तथा।
चर्म्म पश्चात् पिनाकञ्च बिभ्रतीं वामपाणिभिः ॥
शुक्लं रक्तञ्च पीतञ्च हरितं श्याममेव च।
विचित्रं क्रमतः शीर्षं ऐशान्यां पूर्व्वमेव च ॥
दक्षिणं पश्चिमञ्चैव तथैवोत्तरशीर्षकम्।
मध्यञ्चेति महाभाग। क्रमात् शीर्षाणि वर्णत ॥
शुक्लं माहेश्वरीवक्त्रं कामाख्यारक्तमुच्यते।
त्रिपुरापीतसङ्काशं सारदाहरितं तथा ॥
कृष्णं कामेश्वरीवक्त्रं चण्डायाश्चित्रमिष्यते।
धम्मिल्लसंयतकचं प्रतिशीर्षं प्रकीर्त्तितम्।
सिंहोपरिसितप्रेतं तस्मिंल्लोहितपङ्कजम्।
कामेश्वरी स्थिता तत्र ईषत्प्रहसितानना ॥
विचित्रांशुकसम्वीता व्याघ्रचर्म्माम्बरा तथा।
एवं कामेश्वरीं ध्यायेद्धर्म्मकामार्थसिद्धये” ॥
इत्यादि कालिकापुराणे ६२ अध्यायः ॥

कामोदकं, क्ली, (कामेन स्वेच्छया दत्तं उदकम्।) मृतोद्देशे स्वेच्छया दत्तोदकम्। इति मिताक्षरा ॥

कामोदा, स्त्री, (कुत्सितो मोदो आमोदो यस्याः। सहृदयमनोहरत्वाभावात्।) रागिणीविशेषः। इति हलायुधः ॥

काम्पिलः, पुं, (कम्पिलः नदीविशेषः तस्य अदूरे भवः अण्।) काम्पिल्यदेशः। इति शब्दरत्नावली ॥ (अयन्तु पाञ्चालस्य दक्षिणांशे वर्त्तते। इति हरिवंशः ॥)

काम्पिल्यः, पुं, (कम्पिल + जातार्थे ष्यञ्।) गुण्डारोचनीनामसुगन्धिद्रव्यम्। इत्यमरटीकायां भरतः ॥ (कम्पिलाया अदूरे भवः इति सङ्काशादित्वात् ण्यः।) उत्तरदेशविशेषः। इति शब्दरत्नावली ॥ (यथा, महाभारते। १। १३९। ६८।
“माकन्दीमथ गङ्गायास्तीरे जनपदायुताम्।
सोऽध्यवात्सीत् दीनमनाः काम्पिल्यञ्च पुरोत्तमम्।
दक्षिणांश्चापि पाञ्चालान् यावच्चर्म्मण्वती नदी” ॥)

काम्पिल्लः, पुं, (काम्पिल + अण् निपातनात् साधुः।) गुण्डारोचनी। कमलागुँडी इति भाषा। इत्यमरः। २। ४। १४६ ॥ तस्य रूपान्तराणि कम्पिल्लः। कम्पीलः। कम्पिलः। काम्पिल्यः। इति भरतः ॥

काम्पिल्लका, स्त्री, (काम्पिल्ल + स्वार्थे कन् टाप् च।) काम्पिल्लः। इति हारावली ॥ (क्वचित् क्लीवेऽपि दृश्यते। यथा सुश्रुते सूत्रस्थाने ४५ अः।
“चूर्णं काम्पिल्लकं वापि तत्पीतं गुटिकाकृतम्”।)

काम्पीलः, पुं, (काम्पिल + अण् निपातनात् साधुः।) काम्पिल्लः। इति शब्दरत्नावली ॥ (“देवीं काम्पीलवासिनीम्”। इति यजुर्व्वेदे ॥)

काम्पीलकः पुं, (काम्पील + स्वार्थे कन्।) काम्पिल्लः। इति रत्नमाला ॥

काम्बलः, पुं, (कम्बलेनावृतः। कम्बल + अण्।) कम्बलावृतरथः। इत्यमरः। २। ८। ५४ ॥

काम्बविकः, पुं, (कम्बुः शङ्खः भूषणत्वेन शिल्पमस्य ठक्।) शङ्खकारः। इत्यमरः। २। १०। ८। शाँखारी इति भाषा ॥

काम्बुका, स्त्री, (कुत्सितं अम्बु यस्याः कप्। कोः कादेशः।) अश्वगन्धा। इति रत्नमाला ॥

काम्बोजः, पुं, (कम्बोजदेशे भवः इति। अण्।) कम्बोजदेशजघोटकः। इत्यमरः। २। ८। ४५ ॥ सोमवल्कः। पुन्नागवृक्षः। इति मेदिनी ॥ (कम्बोजः अभिजनो यस्य सिन्ध्वादित्वात् अण्।) म्लेच्छजातिविशेषः। स तु यवनतुल्यः सगरराजेनास्य सर्व्वशिरोमुण्डनं कृतम्। यथा। हरिवंशे।
“अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानां तथैव च”।

काम्बोजी, स्त्री (कम्बोजेषु भवः कच्छादित्वात् अण् ङीप्।) माषपर्णी। माषाणी इति भाषा। इत्यमरः २।४।१३८ ॥ वल्कखदिरः। इति मेदिनी ॥ पापिड़ि खएर इति भाषा ॥ गुञ्जा। कुँच इति भाषा। वाकुची। हाकुच् इति भाषा। इति राजनिर्घण्टः ॥

काम्यं, त्रि, (काम्यते इति। कम् + णिङ् + कर्म्मणि यत्।) कमनीयम्। सुन्दरम्। इति हेमचन्द्रः। (“काम्यानां स्वफलार्थञ्च दोषघातार्थमेव च।
अतः काम्यं नैमित्तिकं प्रायश्चित्तमिति स्थितिः”।
इति जाबालः ॥) कामनायुक्तव्यक्तिः। कर्त्तव्यकर्म्म। यथा, मुग्धबोधटीकायां रामतर्कवागीशधृता स्मृतिः
“यत् किञ्चित् फलमुद्दिश्य यज्ञदानजपादिकम्।
क्रियते कायिकं यच्च तत्काम्यं परिकीर्त्तितम्” ॥

काम्यदानं, क्ली, (काम्यञ्च तत् दानञ्चेति।) कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनो दानं कामनया वा दानम्। इति भरतः ॥ तत्पर्य्यायः। प्रवारणम् २। इत्यमरः। ३। २। ३ ॥ (यथा, गरुडपुराणे।
“अपत्यविजयैश्वर्य्यस्वर्गार्थं यत्प्रदीयते।
दानं तत् काम्यमाख्यातं ऋषिभिर्धर्म्मचिन्तकैः”॥)

कायं, क्ली, मनुष्यतीर्थम्। इति मेदिनी ॥ (कः प्रजापतिर्देवतास्य। “कस्येत्”। ४। २। २५। इत्यण् इदन्तादेशश्च ततः आदिवृद्धिः।) प्राजापत्यतीर्थम्। तत्तु स्वल्पाङ्गुल्योर्मूलम्। कनिष्ठानामिकयोरधोभागः इति यावत्। इत्यमरभरतौ ॥ (यथा मनुः २। ५९।
“अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते।
कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ॥)

कायः, पुं, (को ब्रह्मास्य देवता “कस्येत्”। ४। २।

कायस्थः
कायस्थः

। इत्यण् । इदन्तादेशश्च । यस्येतिलोपान् पर-
दादिवृद्धि कदैवतम् । स तु ब्राह्मतीर्थम् ।
ायति प्रकाशते इति अच् ।) मूर्त्तिः ।
काय सन्निहितापायः सम्पद पदमापदाम् ।
गागमा सायगमा सर्व्वमुत्पादि भङ्गुरम्” ॥
ति हितोपदेशे ॥) संघः । लक्ष्यः । स्वभावः ।
ति मेदिनी ॥ प्राजापत्यविवाहः । इति स्मृतिः ॥
यथा मनुः ३ । ३८ ।
“आर्षोढाजः सुतस्त्रींस्त्रीन्
षट् षट् कायोढजः सुतः” ॥)
स्य लक्षणं उद्वाहशब्दे द्रष्टव्यम् ॥ मूलधनम् ।
यथा,—नारद ।
कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका” ॥
यमान, स्त्री, (कायस्य मानमिव मानमस्य ।) तृण-
कुटीरः । इति त्रिकाण्डशेषः ॥
यवलन, स्त्री, (कायो वल्यते आच्छाद्यते अनेन ।
वलसंवृतौ करणे ल्युट् ।) कवचम् । इति हारा-
वली । ७३ ॥
ायस्थः, पुं, (कायेषु सर्व्वभूतशरीरेषु अन्तर्यामि-
तया तिष्ठतीति । काय + स्था + कः ।) पर
मात्मा । (यथा उत्तरगीतायाम् ।
“कायस्थोऽपि न कायस्थः कायस्थोऽपि न जायते ।
कायस्थोऽपि न भुञ्जानः कायस्थोऽपि न बध्यते” ॥
काये ब्रह्मकाये तिष्ठतीति । काय + स्था + कः ।)
नरजातिविशेषः । इति मेदिनी ॥ तत्पर्य्यायः ।
कूटकृत् २ पञ्जीकारः ३ । इति त्रिकाण्डशेषः ॥
करणः ४ पञ्जिकारकः ५ । इति जटाधरः ॥
तस्योत्पत्त्यादिर्यथा* ।

श्रीहर उवाच ।
“भूयस्तेऽहं प्रवक्ष्यामि वगलेति मनूत्तमम् ।
यस्य ग्रहणमात्रेण कायस्थो विप्रसेवकः ॥
पार्व्वत्युवाच ।
अतीव चित्रं शम्भो । त्वमुक्तवानावयोरयम् ।
शूद्रात् कनीयसी जातिरभवद्विप्रसेवक ॥
श्रोष्याम्यादौ हि कायस्थवृत्तान्तं ब्रूहि विस्तरात् ।
कायस्थः क्षत्त्रविट्शूद्रान्तते विप्रार्च्चकः कथम् ॥
केन प्रकारेण च वा वगलेति गृहीतवान् ।
ततश्च सिद्धविद्याया वगलाया वरेश्वर ।॥
श्रोष्यामि महिमानञ्च साधन त्वत्त एव हि ॥
हर उवाच ।
ब्रह्मपादाशतो जन्म चात कायस्थनामभृत् ।
ककारं ब्राह्मणं विद्यादाकार नित्यसंज्ञकम् ॥
आयन्तु निकटं ज्ञेय तत्र काये हि तिष्ठति ।
कायस्थोऽत समाख्यातो मसीशः प्रोक्तवांश्च यम् ॥
जीवेत्तणे भृगुपदे जन्मत्वात् शोमना धिय ।
शठश्च शूरता किञ्चिदनेकप्रतिपालकृत् ॥
जन्मावधि द्विजार्च्चाया मतिरेव निरन्तरम् ।
कुशासनादि सकल गृहीत्वा मस्तकोपरि ॥
अनुगच्छामि सततमिति चिन्तामना सदा ।
शठत्वाच्चतुरत्वाच्च विप्रसेवामनुत्तमाम् ॥
वाञ्छत्येव मसीश स सदोद्वेगीतिमावहन् ।
ब्राह्मणं हीश्वरं ज्ञात्वा भक्त्या स्तौति पुटाञ्जलिः ॥
यं य गच्छति विप्रश्च मसीशस्तानुगच्छति ।
नद्यादौ गत्वा चेद्विप्र स्नात्वा कुर्य्यात्तपोऽपि च ॥
यावत्तावच्च तिष्ठेत् स क्षुधया पीडितोऽपि च ।
तथापि नासन शाति शिरे धर्त्तुं, द्विजोऽपि च ।

मसीशाशादीक्षिताय क्षत्त्रवैश्योपमाय च ।
अशूद्रायेति वोढुं न ददात्येवासनादिकम् ॥
पार्व्वत्युवाच ।
चित्रं ब्रवीषि हे नाथ कायस्थोऽशूद्र एव किम् ।
जाने शूद्रकनिष्ठं तं शूद्रतुल्यः कथ स न ॥
क्षत्रवैश्योपमो ह्युक्तस्त्वयेश कथमीश्वर ।॥
हर उवाच ।
ब्रह्मपादाशतः शूद्रमसीशौ द्वौ बभूवतुः ।
शूद्रात् परः कनिष्ठः स जातः कालि । ऋतश्च तत् ॥
किन्तु सामादिवेदान् हि क्षत्त्रो विट् शूद्र एव हि ।
गृहीतवान्न तत् किञ्चिन्मसीशोऽलसतः शिवे ।॥
अतो यज्ञोपवीती न ते हि यज्ञोपवीतिनः ।
एते स्युर्वैदिकाचारा मसीशो हि स्वभावतः ॥
मस्या सह तु लेखन्या सर्व्वं लेखितुमीश्वरः ।
लेखितुं नैव शक्नोति वैदिकं किञ्चितं किल ॥
अतो हृदि विचार्य्याथ खेदेन विप्रमीश्वरम् ।
ज्ञात्वा भक्त्यानुगच्छेद्धि यत्र याति धरासुरः ॥
कृतत्रेताद्वापरेषु गतेष्वपि मसीशक ।
तदपि त्यक्तवान्नैव दृढा भक्ति द्विजेषु च ॥
ततो हि कृपया विप्र कायस्थमनुगृह्य हि ।
सालसं प्राददद्विद्या वगलेति तव प्रिये । ॥
यतो दीक्षामात्रमेव पवित्रः कार्य्यसिद्धिता ।
ततः कुशासनादींश्च वोढुं प्रादात् शिरोपरि ॥
एवं प्रकारेण कालि । विप्राणामनुगः कलौ ॥
कायस्थाः कालिके । देवि । पुनस्तद्विभवं शृणु ।
कलिप्रथमतो राजा क्षत्त्रियाणां महाबलः ।
सुयज्ञनामा गोमेधमखमारब्धवान् प्रिये ॥
आहूतवांश्च सर्व्वान् स चतुर्योजनमध्यतः ।

* कायस्थोत्पत्त्यादौ मन्यकृता राज्ञा यानि प्रमाणानि
सङ्गृहीतानि तदितराण्यधुना प्राप्तानि । कतिपयप्रशस्तप्रा-
माणप्रमाणान्युद्धृतानीति । तद् यथा,—
“एवं ध्यानस्थितस्यास्य सर्व्वकायाद्विनिर्गतः ।
दिव्यरूपः पुमान् हस्ते मसीपात्रञ्च लेखनीम् ॥
चित्रगुप्त इति ख्यातो धर्म्मराजसमीपतः ।
प्राणिनां सदसत्कर्म्मलेख्याय स निरूपितः ।
ब्रह्मणातीन्द्रियज्ञानी देवाग्न्योर्यज्ञभुक् स वै ।
भोजनाच्च सदा तस्मादाहुतिर्दीयते द्विजैः ॥
ब्रह्मकायोद्भवो यस्मात् कायस्थो वर्ण उच्यते ।
नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै” ॥
इति पद्मपुराणे सृष्टिखण्डम् ॥ * ॥
दत्तात्रेय उवाच ।
“विकालज्ञं महाप्राज्ञं पुलस्त्यमुनिपुङ्गवम् ।
उपसङ्गम्य पप्रच्छ भीष्मः शस्त्रभृताम्बरः ॥
चतुर्णामपि वर्णानामाश्रमाणां तथैव च ।
सम्भवः सङ्करादीनां श्रुतो विस्तरतो मया ॥
कायस्थोत्पत्तयो लोकेऽज्ञातास्चैव महामुने ।
भूय एव महाप्राज्ञ । श्रोतुमिच्छामि तत्त्वतः ॥
वैष्णवा दानशीलाश्च पितृयज्ञपरायणाः ।
क्षत्रिय सर्व्वशास्त्रेषु काव्यालङ्कारबोधकाः ॥
पोष्टारो निजवर्गाणां ब्राह्मणानां विशेषतः ।
तानहं श्रोतुमिच्छामि कथयस्व महामुने ॥
एतस्य समर्थं विप्र । वक्तुमर्हस्यशेषतः ।
इति श्रुत्वा मुनिश्रेष्ठः, गाङ्गेय । शृणु तत्त्वतः ॥
पुलस्त्य उवाच ।
अथ गाङ्गेय । वक्ष्यामि कायस्थोत्पत्तिकारणम् ।
न श्रुतं यत् त्वया पूर्ब्बं तन्मे कथयतः शृणु ॥
येनेदं सकलं विश्वं स्थावरं जङ्गमं तथा ।
उत्पाद्य पाल्यते भूयो निधनाय प्रकल्पते ॥
अव्यक्तः पुरुषः शान्तो ब्रह्मा लोकपितामहः ।
यथाऽसृजत् पुरा विश्वं कथयामि तव प्रभो” ॥
‘मुखतोऽस्य द्विजा जाता बाहुभ्यां क्षत्त्रियास्तथा ।
ऊरुभ्याञ्च तथा वैश्याः पद्भ्यां शूद्राः समुद्भवाः ॥
द्विचतुःषट्पदादींश्च प्लवङ्गमसरीसृपान् ।
एककालेऽसृजत् सर्व्वं चन्द्रसूर्य्यग्रहांस्तथा ॥
एवं बहुविधानेन विश्वमुत्पाद्य भारत ।
उवाच तं सुतं ज्येष्ठं काश्यपं चातितेजसम् ॥
प्रतियत्नेन भो पुत्त्र जगत् पालय सुव्रत ।
इत्याज्ञाप्य सुतं ज्येष्ठं ऋषिसम्भवहेतुकम् ॥
ततस्तु ब्रह्मणा तेन यत् कृतं तन्निबोध मे” ॥
“दशवर्षसहस्राणि दशवर्षशतानि च ।
समाधिस्थोऽभवत् प्राणान् संयम्य शान्तमानसः ॥
ततः समाहितमतेर्यद्भूतं तद्वदामि वै ।
मच्छरीरान्महाबाहुः श्यामः कमललोचनः ॥
कम्बुग्रीवो गूढशिराः पूर्णचन्द्रनिभाननः ।
लेखनीच्छेदनीहस्तो मसीभाजनसंयुतः ॥
निःसृत्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ।
उत्तमः सुविचित्राङ्गः ध्यानस्तिमितलोचनः ॥
त्यक्त्वा समाधिं गाङ्गेय । स ददर्श पितामहः ।
अधोऽर्ध्वसन्निरीक्ष्याथ पुरुषं सामतः स्थितः ॥
नामधेयं हि मे तात । वक्तुमर्हस्यतः परम् ।
यथोचितञ्च यत् कार्य्यं तत् त्वं मामनुशासय” ॥
पुलस्त्य उवाच ।
‘इत्याकर्ण्य ततो ब्रह्मा पुरुषं स्वशरीरजम् ।
प्रहस्य प्रत्युवाचेदमानन्दितमतिः पुनः ॥
स्थिरचित्तं समाधाय ध्यानस्थमतिसुन्दरम् ।
मच्छरीरात् समुद्भूतस्तस्मात् कायस्थसंज्ञकः ॥
चित्रगुप्तेति नाम्ना वै ख्यातो भुवि भविष्यसि ।
धर्म्माधर्म्मविवेकार्थं धर्म्मराजपुरे सदा ॥
स्थितिर्भवतु ते वत्स । ममाज्ञां प्राप्य निश्चलाम् ।
क्षत्त्रवर्णोचितो धर्म्मः पालनीयो यथाविधि ॥
प्रजाः सृजस्व भोः पुत्त्र भुवि भारसमन्विताः ।
तस्मै दत्त्वा वरं ब्रह्मा तत्रैवान्तरधीयत” ॥
पुलस्त्य उवाच ।
‘चित्रगुप्तान्वये जाताः शृणु तान् कथयामि ते ।
श्रीमद्दा नागरा गौराः श्रीवत्सश्चैव माथुराः ॥
अहिफणाः सौरसेनाः शैवसेनास्तथैव च ।
वर्णावर्णद्वयश्चैव अम्बष्ठाश्चाश्च सत्तम ॥
शृणु तेषाञ्च कर्म्माणि कुरुवंशविवर्द्धन ।
पुत्त्रान् वै स्थापयामास चित्रगुप्तो महीतले ॥
धर्म्माधर्म्मविवेकज्ञश्चित्रगुप्तो महामतिः ।
भूस्थान् बोधयामास सर्व्वसाधनमुत्तमम् ॥
पूजनं देवतानाञ्च पितॄणां यज्ञसाधनम् ।
वर्णानां ब्राह्मणानाञ्च सर्व्वदातिथिसेवनम् ॥
प्रजाभ्यः करमादाय धर्म्माधर्म्मविलोकनम् ।
कर्त्तव्यं हि प्रयत्नेन पुत्त्राः स्वर्गस्य काम्यया ॥
या माया प्रकृतिः शक्तिश्चण्डी चण्डप्रमर्द्दिनी ।
तस्यास्तु पूजनं कार्य्यं सिद्धिं प्राप्य दिवं गताः ॥
स्वर्गाधिकारमासाद्य यतो यज्ञभुजः सदा ।
भवद्भिः सा सदा पूज्या ध्यातव्या सफलादिभिः ॥
भवन्ती सिद्धिदा नित्यं पुत्त्रदा सा तु चण्डिका ।

कायस्थः
कायस्थः

ब्राह्मणान् भ्रान्तिवशत' केवलं सुतपसं विना ॥
प्राप्ताकामद्द्विजान् यातो दृष्ट्वा सुतपस' प्रिया ।
धव तिरस्कृतवती यथैतच्छृणु कालिके । ॥
हे स्वामिंस्त्वा नृपो मूर्ख मत्वा नाहूतवान् मखे ।
केवलं तव पाण्डित्य मत्समीपे न शोभते ॥

सुतपा उवाच ।

कान्ते ! ब्रवीमि विप्राणां यत् कर्त्तव्यं शृणुष्व तत् ।
याचामात्र वह्न्नन्न काङ्क्षितव्य न चाधिकम् ॥
विद्वांश्चेद्विद्या दातव्या क्वापि नानार्ज्जव चरेत् ।
मूर्खश्चेत् केवला सन्ध्या सदोपास्या प्रयत्नत ॥
प्रिये तेन च वक्तव्यमृतमेवाप्रियन्त्वपि ।
विप्रेण सतत कार्य्यं वैद्यमागमिकञ्च तत् ॥
ऋतौ गच्छेच्च स्वां कान्तां मुदा कालञ्च पातयेत् ।
काशीं कालादिकं वापि जपेद्विप्रो निरन्तरम् ॥
स्वय स्वभावतो नृणां च्छत्रादीनां शिव वच ।
वक्तव्य चेन्न गृह्णन्ति विप्रहानिर्न तत्क्षति ॥

ब्राह्मण्युवाच ।

सुमानुषत्व ते कान्त ! सुविप्रत्व धव ! त्वयि ।
तिष्ठत्वेव चिर विप्र तेऽन्तौ मे मरण शिवम् ।
कास्यकङ्कणवलयौ सङ्गिनौ मे मृतावधि ॥

सुतपा उवाच ।

प्रिये ते ह्यधुना तीव्र धनान्त करण सदा ।
विना निमन्त्रितेनापि गत्वा चानीयते धनम् ॥
इत्युक्त्वा सुतपा कान्ता गत्वा राजसभा प्रिये ! ।
रान्त सुयज्ञ वरण प्रोवाच नृपति द्विज ॥
रे सुयज्ञ ! विनाह्वानैरगच्छ ते सभामहम् ।
विप्राणां वरण राजन् ! क्षत्रियाणां तथैव च ॥
कृत तदपि नाहं रे त्वया दृष्ट स्वचक्षुषा ।

भ्रष्टो भवतु ते यज्ञ श्रीश्च यातु स्थलान्तरम् ॥
क्रुधैतदुक्त्वा सुतपास्ततो नृपसद स्थलात् ।
विप्रो नि सृतवान् राजा भीतेन मनसाब्रवीत् ॥
हे पुरोहित ! हे विप्र ! हेऽङ्गिरोऽसौ गत स कः ।
रे इत्युक्त्वा सभामध्ये वृत्तान्त वद विस्तरात् ॥
नृपाज्ञया क्षत्रियार्थं पट्टादिवस्त्रसङ्कुलम् ।
स्वर्णाङ्गुरीयकमपि चानेतु गतवान् हि य ।
कोषमन्दिरमालोक्य राजान्तिकमथागत ॥
इत्यब्रवीच्च राजान चित्रन्ते कोषमन्दिरे ।
किञ्चिच्च वस्तु दृष्ट न दृष्ट भस्मतृणादिकम् ॥
श्रुत्वैतत् विस्मितो राजाऽब्रवीच्चैतत् पुरोहितम् ।
हे पुरोहित ! विप्र ! त्वं कारणं यत्त्वभूच्च तत् ॥
कोऽपराधोऽस्ति मे विप्र कथ शस्त्रा गत प्रभो ! ।
कोषमन्दिरसपातसंवाद दत्तवानयम् ॥
कोषे नास्ति धन किञ्चित् सर्व्वं भस्मतृणादिकम् ।
श्रुत्वैतदङ्गिरा ब्रूते सुतपा यत्र तत्पट ॥
ततो दुर्गं स राजा च तूर्णं स्वर्णकुठारकम् ।
गले बद्ध्वा द्विजकुलैर्गतवान् सुतपोऽन्तिकम् ॥
अङ्गिरादिद्विजा सर्व्वे तत्राद्य सुतपोद्विजम् ।
स्तुतिश्चक्रु स राजा च दूरस्थो भक्तितोऽस्तवीत् ॥

अङ्गिर प्रभृतय ऊचु ।

धरामरवर ! प्राज्ञ ! नो वरस्त्व धरातले ।
राज्ञ शिव नो मान त्वद्याचामह उमेशहृत् । ॥
देवस्त्व देवताज्ञस्त्व पण्डितानाञ्च पण्डित ।
दयालो ! नो दयस्व ज्ञ ! नमस्ते वरतो वर ! ॥
ब्रह्म ब्रह्मज्ञ एव त्व ब्राह्मणेश्वर मानद ! ।
राज्ञ शिव नो मान त्वद्याचामह उमेशहृत्" ॥

सुयज्ञराज उवाच ।

हे नाथ ! हे धरेशेश ! धर्म्मकर्म्मविधायक ॥
वर्णेश्वर ! नमस्तुभ्य वन्दे ते चरणाम्बुजम् ॥
हे ब्रह्मण्यदेव ! हे नाथ हे धरामर हे प्रभो ! ।
कृपा कुरु नमस्तुभ' प्रणमामि पद तव ।
नाह जानामि ते पूजा नाहं जानामि ते स्तुतिम् ॥
नाह जानामि ते ध्यानं मूढ मा कृपया दय ॥

सुतपा उवाच ।

किमर्थं स्तुथ हे विप्रा' किमर्थं स्तौषि हे नृप ! ।
गच्छ यात मखं गत्वं सुखेन सफल कुरु ॥
श्रुत्वेति सुतपोवाक्यं सुयज्ञ सुखमानस ।
कृताञ्जलिपटो राजा चाब्रवीदिदमुत्तमम् ॥

राजोवाच ।

निमन्त्रणन्तु विप्रेन्द्र ! भोज्यञ्च सकलोत्तमम् ।
गृहाणापराधसाहस्र क्षमस्व मे कृपा कुरु ॥
अपराधसहस्राणि कृतवानहमव्यय ! ।
गृह्ण महाजनौ मुद्रामयुता मा कृपां कुरु ॥
मत्सभास्था द्विजा ह्येते प्रोचु पाण्डित्यमद्भुतम् ।
गुणाश्च ते बहुविधान् श्रुत्वाह सुखमानस ॥
क्षमस्व नाथ ! मे दोषमेक प्रश्नोत्तर वद ।
मत्सभास्थो बुध कोऽपि न ब्रवीति विदाम्बर ! ॥
आगच्छति कलिर्घोरस्तत्र के भक्तितो द्विजान् ।
अर्च्चिष्यन्तीति श्रुत्वा मे वरञ्च मरणं शिवम् ॥
श्रुत्वैतत् सुतपा विप्रोऽब्रवीच्च सदयो नृपम् ॥

सुतपा उवाच ।

हे सुयज्ञ नृपश्रेष्ठ ! ब्राह्मणातिप्रियो नृपः ।
पश्यैतान् विप्रभृत्यास्त्वमासनादिशिरोधृतान् ॥
एतद्घोरकलावेते भविष्यन्ति द्विजार्चका ।
जात्या मसीशा' कायस्था ब्राह्मणेश्वरमानसाः ॥

तथाचोक्ता सुरापेया यानपेया द्विजातिभि ॥
वैष्णव धर्ममाश्रित्य मद्वाक्य प्रतिपालय ।
कर्त्तव्य हि प्रयत्नेन लोकद्वयहिताय वै ॥
अनुशिष्य सुतानेव चित्रगुप्तो दिव ययौ ।
धर्मराजस्याधिकारी चित्रगुप्तो बभूव ह ॥
स्वय भीष्म ! ममात्मजा' कायस्था ये प्रकीर्त्तिता ।
ये श्रुतास्ते मया ख्याता सवाद शृणु तत्पर ॥
अद्य ते कथयिष्यामि विचित्र परमाद्भुतम् ।
प्रभाव चित्रगुप्तस्य समुद्भूत यथा पुन " ॥

पुलस्त्य उवाच ।

'सौदासो नाम राजाभूत् समस्ते क्षितिमण्डले ।
सदा पापरत' सोऽथ धर्माधर्म न विन्दति ॥
स यथा स्वर्गमासाद्य लेभे पुण्यफल शृणु ।
सर्व्वपापी दुराचार' सर्वधर्मविवर्जित ॥
राजनीतिगत धर्म न जानाति कथञ्चन ।
आतिथ्यजयकर्माणि तत्तत्साधनमुत्तमम् ॥
न कर्त्तव्य द्विजै क्वापि मयाज्ञप्तैर्महीतले ।
एवमाज्ञप्तवांल्लोके दैवपित्र्यकर्मणि ॥
परित्यज्य स्वक देश ततो देशान्तरं ययौ ।
ये केचिद्वसति चक्रुर्लोकेषु ब्राह्मणादिषु ॥
तत प्रभृति गाङ्गेय ! न यज्ञहवन क्वचित्" ॥
"न कोऽपि कुरुते भीष्म ! पुण्य तत्र निषेवितम् ।
गृहीत्वा ब्राह्मणादिभ्य कर कर्मविदूषक ॥
अहो धर्मभृता श्रेष्ठ शृणु कर्म विपाकजम् ॥
कालेनान्येन गाङ्गेय सौदासो विचरन् महीम् ।
कार्त्तिके शुक्लपक्षे च द्वितीया सोमभा तिथि' ।
तस्यां कार्य्यञ्च कायस्थैश्चित्रगुप्तस्य पूजनम् ॥

महतीभक्तिभावेन धूपदीपादिभिस्तथा ॥
दैवयोगात्तथायात सौदास' पर्य्यटन्महीम् ।
श्रद्धायुक्तशरीरेण दृष्ट्वा च पूजन तत' ।
कृत्वा सुपूजन तत्र चित्रगुप्तस्य भक्तित ॥
गतपापोऽभवत् सद्य सौदासोऽसौ महीपति ।
चित्रगुप्तप्रभावेण गतो लोकं सुरालयम् ॥
इदं विचित्रमाहात्म्यं चित्रगुप्तप्रभावजम् ।
कथित नृपशार्दूल ! किमन्यत् श्रोतुमिच्छसि ॥
इत्याकर्ण्य ततो भीष्म' प्रत्युवाच मुनि तत' ।
विधिना केन तत्रापि पूजा कार्य्या महामुने ' ॥
को मन्त्र' को विधिस्तत्र सर्व्वं तद्वद मे प्रभो ।
यामासाद्य मुनिश्रेष्ठ ! सौदास' स्वर्गमाप्तवान ॥

पुलस्त्य उवाच।

चित्रगुप्तस्य पूजाया विधान कथयाम्यहम् ।
नैवेद्यैर्घृतपक्वैश्च यथाकालोद्भवै फलै ॥
गन्धपुष्पोपहारैश्च धूपदीपै समासत ।
चित्रगुप्तञ्च सपूज्य श्रद्धाभक्तिसमन्वित ॥
नवकुम्भ समानीय पानीयपरिपूरितम् ।
शर्करापूरित कृत्वा पात्र तस्योपरि न्यसेत् ॥
पूजान्ते च प्रयत्नेन दातव्यञ्च द्विजन्मने ।
ब्राह्मणान भोजयेत्तत्र कायस्थानपि मन्त्रवित् ॥
मसीभाजनसयुक्त' सदा चरसि भूतले ।
लेखनीच्छेदनीहस्तचित्रगुप्त ! नमोऽस्तु ते ॥
चित्रगुप्त नमस्तुभ्य नमस्ते धर्मरूपिणे ।
तेषां त्वं पालका नित्य नम' शान्ति प्रयच्छ मे ॥
मन्त्रेणानेन राजेन्द्र चित्रगुप्तस्य पूजनम् ।
एव संपूज्य विधिवत् सौदासो भक्तिभावत' ॥

अचिरात् पापसमुक्तो राज्य कृत्वा मृतो नृप' ।
नीतोऽसौ यमदूतैश्च यमलोकं भयानकम् ॥
चित्रगुप्तमदाश्च्छद्धर्मराजोऽपि भारत ! ॥

धर्मराज उवाच ।

सौदासोऽसौ दुराचार पापकर्मसदारत' ।
यानि कानि च पापानि राजासौ कृतवान भुवि ॥
दृष्टोऽसौ यमराजेन धर्माधर्मविशारद' ।
धर्मराज तत' प्राह चित्रगुप्तो महामति' ॥
विपाक धर्मज ज्ञात्वा स प्रहस्याब्रवीदिदम् ॥

चित्रगुप्त उवाच ।

जानेऽह पापकर्मासौ राजायं विदित' सदा ।
त्वत्प्रसादादह सौरे ! पूज्योऽस्मि वसुधातले ॥
त्वया दत्त वर स्वाम भक्तोऽय सदा प्रिय' ।
इति ज्ञात्वा वदाम्यत्र राजापापोऽस्ति मे मति ॥
पूजां चकार राजासौ दृष्ट्वा पूजाञ्च मामकीम् ।
अतस्तुष्टोऽस्मि हे देव ! यातु विष्णुपद नृप ॥
यमेनाज्ञापितो राजा वैष्णव पदमाप्तवान् ।
ये चान्ये पूजयिष्यन्ति चित्रगुप्त महीतले ॥
कायस्था' पापनिर्मुक्ता यास्यन्ति परमां गतिम् ।
तस्मात् त्वमपि गाङ्गेय ! पूजां कुरु विधानत' ॥

दत्तात्रेय उवाच ।

मुनेर्वचनमाकर्ण्य भीष्म प्रयतमानस' ।
चकार पूजन तत्र चित्रगुप्तस्य तत्पर' ॥
कार्त्तिके शुक्लपक्षे तु द्वितीयायाञ्च भारत ! ।
यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत् ॥
अतो यमद्वितीयेति सञ्ज्ञा लोके बभूव ह ।
तेनैव भगिनीहस्ते भोक्तव्य पुष्टिवर्द्धनम् ॥

कायस्थः

कायस्थः

शाविद्योपासकाश्च गुणात क्षत्रियोपमा ।
कलौ हि क्षत्रियाभावात् वैश्याभावाच्च सुव्रत ॥
एते मक्त्या भविष्यन्ति विप्रमानसहिष्णव ।
विप्रप्रिया विप्रभक्ता विप्रमानप्रदा यत ॥
महाविद्याप्रितश्चैते त्वयकर्म्मकृत कलौ ।
मत्या एवेश इत्यस्मात् मसीशोऽसौ निगद्यते ॥
ब्रह्मणो विप्रमूर्त्तेस्तु पादांशे सम्भवन्ति तत् ।
कायस्था इति संज्ञाः स्यु सुयज्ञैषा शिवा मति ॥
श्रुत्वैतत् सकल राजा वृत्तान्तं सुतपोमुखात् ।
प्रेमाश्रुभिर्न्नैत्यकारी कृताञ्जलिपुटोऽब्रवीत् ॥
राजोवाच ।
इतः परस्येऽहश्चेत् म्रिये तदपि मच्छिवम् ।
श्रुत यत्तव जातीना क्षत्रहीनकलौ सुखम् ॥
ततो ऽतितुष्ट सुतपा उवाच मधुरं स्पम् ।
सुयज्ञ ! सुमतिस्त्वं हि त्वत्तो विप्रप्रियो न हि ॥
मानेन ब्राह्मणाना हि वरञ्च मरण नये ॥
सुयज्ञोवाच ।
हे नाथ सुतपो विप्र ! श्रुतं त्वन्मेऽङ्गत्वन्मुखात् ।
कृपया प्रणु तत् सव्व ते जातेर्म्महिमानम् ॥
ब्राह्मणो ब्रह्म जानाति नान्यजातिरिति श्रुति ।
ब्रह्मज्ञानी सदा विप्रो न चेद्ब्राह्मणसंज्ञक ॥
विना प्रयुक्तिं यो विप्र उपकारी स्वयं भवेत् ।
आशीः करोति ब्रूते च क्षत्रादीना शिववच ॥
स एव साक्षाद्धूर्जति विप्राणा जातिलक्षणम् ।
ब्राह्मणाज्ञावचो ये न गृह्णन्ति पालयन्ति च ॥
गुर्व्वाज्ञालङ्घन पाप स्पृशेत्तेषा शरीरत ।
पित्रेति सकलं चोक्ता ते च सन्दिग्धमानस ॥
वशीकारादि सकल सृष्टिस्थितिलयश्च यत् ।
शक्नुवन्ति हि कर्त्तुं ते विप्रा पित्रेति चोक्तसु ॥
विनायासैर्मुदा यो यत् विप्राय शक्तितो ददत् ।
मुदा तदेव गृह्णाति विप्राणामिति लक्षणम् ॥
केषामपि न कापत्य कुरुते ब्राह्मण क्वचित् ।
विनापराधैर्न शपेदिति तज्जातिलक्षणम् ॥
हिंस्रे भवति हिंस्र स शठे शाठ्य समाचरेत् ।

आर्जवञ्चेन्द्रियग्रामान् स्ववशे स्थापयेच्चिरम् ॥
दयालुश्च सदा विप्र इति पुत्र हृदि स्मरन् ।
भीत्या भक्त्या सदा मूर्ध्यः पितेति ब्रूतवांश्च मे ॥
कटूक्त्या यदि गृह्णाति हृदा दु खेन राति चेत् ।
तदिप्रो दु ख भजते दातुर्नैव शिव क्वचित् ॥
वित्तशाठ्यं गृहशाठ्य कार्य्यं नोभयत क्वचित् ।
इत्यप्यात्मज विप्राच्च श्रुतं शासनसम्मतम् ॥
शृणु पुत्र प्रवक्ष्यामि सावधान समाचर ।
घ्नन्त बङ्गशपन्त वा नैव द्रुह्यति भूसुरम् ॥
सुतपो नाथ मे पित्रा यद्यदुक्त तदुक्तवान् ।
त्वयापि ब्राह्मणा ब्रह्म यथारुचि तथा कुरु ॥
श्रुत्वैतत् सुतपा विप्र उवाच परमादरम् ।
राजन् वर वृणु वृणु यत्ते मनसि वाञ्छितम् ॥
सुयज्ञ उवाच ।
कृषे ! वरेण ते नैक उपकार इहाधुना ।
यज्ञे समाप्ते मे मस्तच्छेत्ता रामो भविष्यति ॥
सुतपा उवाच ।
यज्ञ समाप्य सुखत प्रगच्छेर्विन्ध्यनैर्ऋतिम् ।
तत्र वै स्वर्णदानद्या मध्ये द्वीपोऽस्ति सुन्दर ॥
द्वादशक्रोशमानो हि तद्गत्वा वसति कुरु ।
यदा परशुरामस्ते कश्चिच्छेत्ता भविष्यति ॥
भविष्यति च काण स नय ते वाञ्छित वरम् ।
तत पुत्र कृते राजन् जम्बूद्वीपेश्वरो भवान् ॥
भविष्यतीति त्व वीजरूपेण तिष्ठ तत्र हि ।
वरं ते वाञ्छित गृह्ण तुष्टोऽहं भक्तितस्तव ॥
इहत परतो यद्यत् परमानन्द मुत्तमम् ॥
सुयज्ञराजोवाच ।
नाथ ! नाहं वर याचे याचे केवलमङ्घ्रि ते ।
चिर मम मतिस्तिष्ठेदिति देहि वरोत्तमम् ॥
तेऽङ्घ्री पवित्रे परमे सर्व्वत्र सुखदे किल ।
तदेवास्तु इति प्रोच्य सुतपा गतवान् गृहम् ॥
राजापि च मख कृत्वा विप्रेभ्यो दक्षिणा ददत् ।
परिवारयुतोऽगच्छद्द्वीपे काञ्चनदान्तरे ॥
वसति वरत प्राप्ता चतुर्दिक्षु जलाप्लुताम् ।

अत्रस्था प्रापटन् विप्राः पण्डिता स्वस्ववासभूम् ॥
एको मसीशः सर्व्वाख्य सर्व्वाणीहृदयदिशात् ।
कुलप्रदीपः स्त्रीयाना जातीना पूतनास्पृह ॥
वगलेति महाविद्या गृहीत्वा साधयन् मुदा ।
सर्व्वाणीहृदयाख्यस्य पण्डितस्य प्रसादत ॥
वरं याचितवान् भक्त्या त्रिलोकाधिपति गुरो ।
कृपया कुरु मा नाथ ! त्वमेव वगला मम ॥
गुरुस्त्वपि वरं दत्तो राज्य भुक्त्वा पुनर्भवन् ।
त्रिलोकाधिपतिर्भूय मुदा तत्र सुखिष्यसि ॥
गुर्व्वाज्ञया मसीश स राज्यभोगी दिवार्चित ।
विहाय देह भूयश्च त्रिधारूपो बभूव ह ॥
चित्रगुप्तश्चित्रसेनश्चित्राङ्गद इति त्रय ।
स्वर्गे मर्त्ये च पाताले राजते चिरमुत्तम ॥
चित्रगुप्तो महाविद्या प्राप्य कुल्लाख्यविप्रत ।
पुत्रान् याचितवान्नैव गुरोर्देवलमावहन् ॥
यमान्तिस्थो बभूवापि स्वर्म्मर्त्याधोविवेचक ।
चिरं शुभाशुभ कर्म्म विविच्य शमनान्तिके ॥
यद्वदेत् सकलाण तु तदेवाभोजयेत् यम ।
चित्रसेनो महाविद्या वगलेति गुरोर्नयन् ॥
जप्त्वा सतोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यत ।
राज्य चकार मुदयुक्तश्चित्राङ्गद अधोगत ॥
अधोगतस्य हेतु त्व वगले शृणु कालिके ! ।
वगलेति मनुं प्राप्य विप्रोऽस्मि इति वाञ्छया ॥
तपश्चकार पञ्चाब्द नान्न किञ्चित् गृहीतवान् ।
फलमूलादिक किञ्चित् सायमत्ति यथा मिलेत् ॥
विहाय विप्रस्य गुरोरपि पूजाञ्च पार्व्वति ! ।
जपेन्नित्य हि वगलामन्यविप्रञ्च नेच्छयन् ॥
ज्ञात्वेति ब्राह्मणाः सर्व्वे ऊचुश्चित्राङ्गदं क्रुधा ।
वचो हि मधुर किञ्चित् प्रियाद्भक्ताच्च सुन्दरि ! ॥
रे चित्राङ्गद ! त्वञ्च वत्स विप्रत्वमिच्छसि ।
कदाप्युपानन्मस्तस्थो नैवेति न हि बुध्यसि ॥
वत्स ! शीघ्रमधो गच्छ चिर कुरु तपो मुदा ।
तत श्रुत्वेति शाप स भक्त्यातिशयमानस ॥
कृताञ्जलिपुटो ब्रूते चित्राङ्गद इतीश्वरि ! ॥

नित्यं यशस्यमायुष्यमर्व्वकामार्थसिद्धिदम् ।
दानानि दापयेद्यस्तु भगिन्यै च विशेषत ॥
काले तत्र च सपूज्य चित्रगुप्तञ्च लेखकम्
पिवैद्य चित्रपुष्पैश्च रक्तचन्दनमिश्रितै ॥
नैवेद्य दीयते तस्मै मोदक गुडमिश्रितम् ॥
भीष्मोक्तप्रार्थना यथा —
उत्पत्तौ प्रलये चैव भोग्ये दाने कृताकृतं ।
लेखकस्त्व सदा श्रीमाश्चित्रगुप्त नमोऽस्तुते ॥
श्रिया सह समुत्पन्न समुद्रमथनोद्भव ।
चित्रगुप्त महाबाहो ममाद्य वरदो भव ॥
चित्रगुप्तस्तु सन्तुष्टो भीष्माय च वर ददौ ।
मत्प्रसादान्महाबाहो मृत्युस्ते न भविष्यति ॥
स्मरिष्यसि यदा मृत्यु तदा मृत्युर्भविष्यति ।
इति तस्मै वरं दत्त्वा चित्रगुप्तो दिव ययौ ॥
अनेन विधिना यस्तु चित्रगुप्तस्य पूजनम् ।
करिष्यति महाबुद्धे तस्य पुण्यफल शृणु ॥
इहैव विपुलान् भोगान् भुक्त्वा सर्व्वान् मनोरथान् ।
अथच विष्णुलोकञ्च नरो याति न संशय ॥
चित्रगुप्तकथा दिव्या कायस्थोत्पत्तिसञ्ज्ञकाम् ।
भक्तियुक्तेन सततं ये शृण्वन्ति नरोत्तमा ॥
दीर्घायुषो भविष्यन्ति सर्व्वव्याधिविवर्जिता ।
सर्व्वे विष्णुपद यान्ति यत्र यान्ति तपोधना ॥
इति भविष्यपुराणे चित्रगुप्तकायस्थोत्पत्तिमाहात्म्यकथ समाप्ता ॥ * ॥
“एव हत्वार्ज्जुन राम सन्धाय निशितान् शरान ।
एक एव ययौ हन्तु सर्व्वानेवातुरान् नृपान ॥
केचित् गहनमाश्रित्य केचित् पातालमाविशन् ।
सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रम ययौ” ॥
“ततो राम समायातो दाल्भ्याश्रममनुत्तमम् ।
पूजितो मुनिना सद्य पाद्यार्घ्याचमनादिभि ॥
ददौ मध्याह्नसमये तस्मै भोजनमादरात् ।
रामस्तु याचयामास हृदिस्थ स्वमनोरथम् ॥
याचयामास रामाच्च काम दाल्भ्यो महामुनि ।
ततस्तौ परमप्रीतौ भोजन चक्रतुर्मुदा ॥
भोजनानन्तरं दाल्भ्य पप्रच्छ भार्गवं प्रति ।
यत्त्वया प्रार्थित देव तत् त्व शंसितुमर्हसि ॥
राम उवाच ।
तवाश्रमे महाभाग सगर्भा स्त्री समागता ।
चन्द्रसेनस्य राजर्ष क्षत्रियस्य महात्मन ॥
तन्मे त्व प्रार्थित देहि हिंसेय ता महामुने ।
ततो दाल्भ्य प्रत्युवाच ददामि तव वाञ्छितम् ॥
दाल्भ्य उवाच ।
स्त्रियो गर्भमम् बाल तन्मे त्व दातुमर्हसि ।
ततो रामोऽब्रवीद्दाल्भ्य यदर्थमहमागत ॥
क्षत्रियान्तकरश्चाह तत् त्व याचितवानसि ।
प्रार्थितश्च त्वया विप्र कायस्थो गर्भ उत्तम ॥
तस्मात् कायस्थ इत्याख्या भविष्यति शिशो शुभा ॥
एव रामो महाबाहुर्हित्वा त गर्भमुत्तमम् ।
निर्जगामाश्रमात् तस्मात् क्षत्रियान्तकर प्रभु ” ॥
“कायस्थ एष उत्पन्न क्षत्रिण्या क्षत्रियात्तत ।
रामाज्ञया स दाल्भ्येन क्षत्रधर्माद्बहिष्कृत ॥
कायस्थधर्मोऽस्मै दत्तश्चित्रगुप्तस्य य स्मृत ।
तद्गोत्रजाश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन् ॥
दाल्भ्योपदेशतस्ते वै धर्मिष्ठा सत्यवादिन ।
सदाचारपरा नित्य रता हरिहरार्चने ॥
देवविप्रपितॄणाञ्च अतिथीनाञ्च पूजका ” ॥
इति स्कान्दे रेणुकामाहात्म्यम् ॥ * ॥

चित्राङ्गद उवाच ।

"हे ब्राह्मणा हे गुरवो ! मामेवातिनिरागसम् ।
कथ शेपुर्भवन्तो हि विप्ररूपा ह ईश्वरा ॥
मुखाद्वो श्रुतवान् यद्यत्तद्धि का तत्समाचरन् ।
उपास्यो यत्तद्भवितु सर्व्वे ह्युद्योगिन स्युत ॥
जानेऽह ब्राह्मणो ब्रह्म स्वेच्छया विविधाकृति ।
नानालीलामाचरितु मानुषाकृतिरप्यभूत् ॥
तद्ब्रह्म ब्राह्मण जाने जाने तत् सर्व्वरूपधृक् ।
राजेति संज्ञाधारी क कि वा तच्च प्रजाभिधम् ॥
तदेव सकलस्थायि तदेव सर्व्वकर्त्तृ च ।
तदेव सर्व्वपाल्यं स्यात्तदेव सर्व्वहर्त्तृ च ॥
पुरूपं चैव स्त्रीरूप क्लीवरूपञ्च नान्यथा ।
आत्मा एवैकरूप तत् स्वमेवानेकमाकरोत् ॥
नानाप्रकारजीवादि चात्मनात्मानमेव हि ।
स्थावर जङ्गम विप्रास्तदेव नात्र सशय ॥
भवन्तो हीश्वरा सर्व्वे किमर्च्चयथ तत् कथम् ।
कथ चिन्तयथात्मान देवमर्च्चनकालत ॥
कलेन भूतशुद्ध्यादि कृत्वा देवा स्युरेव किम् ।
ईशोऽपि मानुषाकृत्या ईशत्वप्राप्तये पुन ॥
यद्युद्योगी भवेत्तत् कि मानुषोऽह न तच्चरे ।
अन्यायि न भवेद्ब्रह्म यूयमन्यायिन कथम् ॥
वगलापि च या जप्या सा च ब्राह्मण एव हि ।
कश्चिद्विशेषो भेदोऽपि वगलाया द्विजेऽपि न ॥
अतस्तद्भवितु विप्रा अहमप्येव तापस ।
गुर्व्वाज्ञा मे पुराभूच्च सर्व्व त्यक्त्वा जप कुरु ॥
अतोऽह सकल त्यक्त्वा केवला वगला जपे ।
वगलाया द्विजे नैव कश्चिद्भेदोऽस्ति शासने ॥
अतो विप्रोऽस्मीति काम कृतवान् जपकर्म्मणि ।
गुरौ विप्रे मनौ चापि देवे चात्मनि भूसुरा ॥
मसीशजाति किञ्चिच्च न विशेष विचिन्तयेत् ।
ब्राह्मणोऽप्यविशेषश्च तस्मिंस्तस्मिंश्च भूसुरा ॥
आत्मन्यात्मनि कीटेऽपि चेति वो जातिलक्षणम् ।
मूर्खोऽह यच्च श्रुतवान् प्रभवो ब्राह्मणास्यत ॥
तदाचरितवान् मे को दोषोऽस्ति वदत द्विजा ।
विनापराधतो विप्रा यूय वामनरूपत ॥
बलिश्चातिप्रिय भक्तमध प्रास्थापयन् यदि ।
अह कीटोऽत्र नाश्चर्य्य किमधो न पटे कथम् ॥
कृताञ्जलिपुटोऽह वस्वरण शतसख्यया ।
प्रणमे खगह विप्रा गच्छताहमध पटे ॥
अधोगच्छाम्यह तत्र किञ्चित् खेद करोमि न ।
वाञ्छयामीति चाज्ञा वो न लङ्घ्या भवतु क्वचित् ॥
इत्यादि श्रुत्वा हे कालि ! लज्जा प्राप्यातिखेदिता ।
ब्रुवन्ति चातिमधुर क्रन्दन्त इव ते द्विजा ॥
हे चित्राङ्गद ! हे विद्वन् ! दौर्व्वल्य त्यज वत्सक ! ।
दुश्चिन्ता कुरु मा तात भद्र ते कथयामि ते ॥
जनरुपोबलेनैव सर्व्व भवितुमर्हति ।
नार्हतीश विना तात ब्राह्मणो भवितु किल ॥
इतीश्वराज्ञा वेदेऽस्ति प्रतिजानीहि तत्त्वत ।
वर प्राप्नोति देवत्व ब्राह्मणत्व कदापि न ॥
यथामरत्वमीशेन विना क्वापि न शासने ।
मा दु खी त्वमधो गच्छ सुखेन वगला जप ॥
कलेदशसहस्राणि नागलोकेश्वरो भव ।

कायस्थः

ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि ॥
राज्य भुक्त्वा ततो नैव पुनरावर्त्तन तव ।
सदा वय तव शिव चिन्तयामो न भीं कुरु ॥
के जानन्तीदृश त्वा हि भक्तश्रेष्ठ विवेचकम् ।
शाप दारुणमाऊक्ष्वमधुना तन्न खण्डति ॥
तात गच्छ सुखं भुङ्क्ष्व नागलोकेऽपि विस्तरात् ।
तत आनन्दमनसा गतश्चित्राङ्गदस्तलम् ॥
स्वस्थान ब्राह्मणाश्चापि चागच्छन् लज्जितान्तरा ।
भूयो मसीशः सर्व्वोऽपि विप्रदासाभिधोऽभवत् ॥
विप्रप्रसादात् शूद्राणामपि श्रेष्ठो बभूव ह ।
वगलेति महामन्त्र सर्व्वेषा सर्व्वकामदम् ॥
केवलेन जपेनैव लक्षेण कालि ! सिध्यति ।
वशीकरणकर्म्मादि दशसाहस्रतो भवेत् ॥
अथ वक्ष्ये महेशानि ! वगलासाधन तव ।
वगलेति मनो सख्या पुरश्चरणकर्म्मणि ॥
लक्षेण मन्त्रसिद्धि स्यात् नास्त्यत्र युगसख्यकम् ।
ततो वश्यादि कर्त्तव्य दशसाहस्रसख्यया ॥
शरीरारोग्यतो वापि धनेच्छुश्चायुत जपेत् ।
कलावेतस्य हि मनो प्रभाव कि ब्रवीमि ते ॥
सहस्रमात्रहोमेन सर्व्वसिद्धिर्न चान्यथा ।
नास्त्यपेक्षा हि ऋष्यादे स्तुतिपाठादिकस्य वा ॥
स्तुतिर्व्वा कवच वापि ऋष्यादिन्यास एव वा ।
वगलेति स्वय सर्व्वं सिद्धविद्या इति प्रिये ! ॥
त्वयाद्यारूपया कालि ! स्वयमुक्त पुरैकदा ।
शरीरारोग्यतो देवि ! वैरिनिग्रहतोऽपि वा ॥
दिवा नक्तञ्च कर्त्तव्या सहस्रमानतो ऽति ।
केवलाऽऽतिमात्रेण रात्रावारोग्यता लभेत् ॥
वगले इति यो द्विस्त्राप्यक्षोच्चैर्येन वारयेत् ।
पथिस्था विघ्नदा सर्व्वे पलायन्ते तमीक्षिता ॥
भवेद्धि सफल कर्म्म वगलेति स्मरन् जन ।
वगलाजापिन दृष्ट्वा सर्व्वे भीतिमवाप्नुयु ॥
केवल पटलमिद पठन् शृण्वन् मनोरथम् ।
लभेत् कालि ! वपुस्त्यक्त्वा वगलाञ्च न सशय ॥
एषा विद्या मसीशेन सदोपास्या न सशय ।
ब्राह्मणे वगलायाञ्च चिन्तयेदेकरूपत ॥
विना प्रयुक्तिमपि च मसीश श्रावयेद्द्विजः ।
श्रावणाया धनाकाङ्क्षी न भवेद्ब्राह्मणोत्तम ॥
आलस्याद्वा प्रमादाद्वा श्रावयेन्न यदि द्विज ।
मसीशहत्याभागी स्याच्छ्रावयित्वा तव प्रिय ॥
ब्राह्मणोऽपि वरारोहे ! शृणुयात् भक्तितत्पर ।
निर्व्वाण लभते कालि ! निष्कामी कोऽपि चेत् पठेत् ।
एतदुक्तेऽपि कायस्थ शृणुयान्न यदि प्रिये ! ।
पटल काम्यदश्चाशु ब्रह्महत्याफल लभेत्" ॥
इति आचारनिर्णयतन्त्रे वासुदेवसम्मते हर-पार्व्वतीसवादे सप्तत्रिंशत्तम पटल ॥
"चाटचारणचौरेभ्यो वधवन्धभयादिभि ।
पीड्यमाना प्रजा रक्षेत् कायस्थेभ्यो विशेषत" ॥
इति वह्निपुराणे पाशुपतदानाध्याय ॥ * ॥

गौडदेशे तेषामागमनकारणम् । तत्रादौ मङ्गलाचरण यथा,—

"यस्माभूद्भूमिदेवो वदनसरसिजेयद्भुजेभूमिपालो
यस्योर्व्वोर्व्वैश्य एव द्विजभजनरतिर्यस्य शूद्र पदाब्जे ।

कायस्थः

दृष्ट्वा पातिष्यतीद जगदिति प्रकृतिर्य स्वयं पूरुषस्त
वन्देऽह देवदेव त्रिगुणमयवर सर्व्व लोकानुकम्पम्" ॥

अथ आदिशूरराजप्रशसा ।

"श्रीमद्राजादिशूरोऽभवदवनिपतिर्धर्म्मराजो व श्राब्ला सश्लोक सद्विचारैरदितिसुतपति स्वयंधासी दतथासीत् । प्रातापादित्यतप्ताखिलतिमिररिपु कान्त्वेषा महात्मा जित्वा बुद्धास्वकार स्वयमपि न्टपतिर्गौडराज्यान्निरस्तान्" ॥ * ॥ अथादिशूरस्य पात्र प्रति क्रतुघ्नब्राह्मणकुलीनशूद्रयो प्रश्नस्तस्योत्तरञ्च ।"पात्र पप्रच्छ पूत परमसुरपदद्वन्द्वपार्श्वकोऽसौ कासन्ते काश्यपीशा क्रतुहतिकुशला क्वापि शूद्रा कुलीना । पात्रस्तेषा मवोचत् परिचयमखिल भूपवाक्यात् द्विजास्ते कोलाञ्चस्था कुरङ्गा इव किल तपसा नैव केषामधीना ॥ कोलाञ्चस्य महीपति क्षितिभुजामेकप्रधानः प्रधी स्वेष्टे निष्ठमतिर्महाशयवर श्रीवीरसिंह स्वभूत् । तद्देशवासिन समाधि कृतिन मायाजिसहारिण सन्ति व्याससमा सभासद इतो गौडेन्द्रभूमीश्वरा" ॥ * ॥

अथ वीरसिंहं प्रति लिपिप्रेरणम् ।

"भूपोऽभूद्भवने स्वचेष्टितपर सद्भृत्यभार्य्यान्वितान्
भूदेवान् दृष्टवान् विचित्रलिखनैरानेतुकाम स्वयम् ।
पात्रेण प्रणयप्रमोदरचिता श्रीवीरसिंहे लिपि
गौडक्ष्मापतिरेव पुण्यसुमतिर्दूतेन प्रास्थापयत्" ॥ * ॥

अथ लिपिप्रकार ।

"सुकृतसुकृतसभा सर्व्वशास्त्रार्थदक्षा
क्षपितहतविपक्षा स्वस्तिवाक्या. श्रुतिज्ञा ।
सुभितसुगतवृन्दे गौडराज्ये मदीये
द्विजकुलवरजाता सानुकम्पा प्रयान्तु ॥
न्टपतिसुकृतिसार स्वीयवशावतारः
प्रबलबलविचारो वीरसिंहोऽतिवीर ।
मयि वरसखितास्ते भूमिदेवान् सशूद्रान्
पुनरपि मम गौड़े प्रापय त्व नितान्तम्" ॥ * ॥
अथ ब्राह्मणशूद्राणा गौडदेशे गमनेच्छा ।
"मुदा गन्तुकामाः पुरावासगौड़ा
समाहाय कोलाञ्चदेश क्षितीशम् ।
न्टपाज्ञाञ्च लब्ध्वा सदारादिभृत्या
महायोगिनस्ते बभूवु सशूद्रा" ॥ * ॥
अथादिशूरसमीपे ब्राह्मणप्रेरणम् ।
"महाराजराजादिशूरो महात्मा
त्वया वीरसिंहस्य मेऽस्त्वादिसख्यम् ।
तवाज्ञानुसाराद्धि प्रस्थापयामि
द्विजान् पञ्चगोत्रान् सदारादिभृत्यान्" ॥ * ॥

अथ ब्राह्मणाना गमनम् ।

"चलच्चञ्चलाश्वालियाना प्रधाना
वृहद्वृक्षश्मश्रुगुम्फातिशोभानलाभाः ।
क्रतुज्ञा श्रुतिज्ञाः प्रतिज्ञानसाध्या
सवर्म्माश्वशस्त्रा प्रयाता प्रयागम् ॥
तत स्नानदानादि कृत्वा च विप्राः
ययस्तेऽपि वाराणसीं पञ्चगोत्राः ।
ततो विश्वनाथ समालोक्य दर्शनैः
यशः प्राप्य तस्माद्ययाभू मिमाद्युः" ॥ * ॥

कायस्थः

अथ ब्राह्मणाना गौडराज्यप्रवेशो राजसमीपे आशिरर्थं गमनञ्च ।

"पितॄन् बान्धवास्तारयित्वा गयायां
गताः प्रासित गौडराज्येश्वराज्यम् ।
ततस्तेजसा ते दिशो भासयन्त
श्रुतिं व्याहृति भारतीं पाठयन्त ॥
ततो हस्तदूर्वाक्षता पञ्चगोत्रा
नृपस्याशिषं कर्तुमेव प्रतस्थुः ।
अमी यत्र मध्याह्नमार्त्तण्डतुल्या
द्विजा स्थापितास्ता' परश्रेयसञ्च" ॥ * ॥

अथैषां वेशं दृष्ट्वा राज्ञोऽवज्ञा तेषां शुष्कवृक्षे आशिषो निक्षेपश्च । "दृष्ट्वैव वेशमेषामवनिपति-रसौ भ्रान्तचित्तो द्विजानां तैरालाप न कृत्वा स्वगृहमपि ययौ गन्तुकामा पुनस्ते । बुद्धा भू-पालबुद्धिं क्षणमपि च बुधा' शुष्कवृक्षाशिषस्ते तद्धस्तात् प्राप्य दूर्वाक्षतमपि स वभौ शुष्कवृक्ष सुवृक्ष" ॥ * ॥ अथ राज्ञा ब्राह्मणाना प्रशान्तनं गोत्रनामप्रश्नञ्च ।

"सविस्मया वै गलबद्धवस्त्रा
भूपादयस्ते चरणारविन्दम् ।
पवित्रकीर्त्तिं भुवि भूसुराणा
श्रुत्वा च सेतु' सकला प्रणम्य ॥
क्षमध्वमस्माकमुचित्तवार
मूढात्मनाश्चापराध हि विप्रा ।
भो ब्रूत विप्रा किमु नाम गोत्र
ततश्च सर्व्वे गदितुं प्रवृत्ता" ॥ ॥

अथ पञ्चब्राह्मणाना परिचय ।

"अभूदन्वयवंशोद्भवो भट्टनारायणोऽयञ्च शाण्डिल्य-गोत्रे गरीयान् । तपस्वान् यशस्वान् दयावान् सुविद्वान् विवस्वानिवास्या सभायां विभाति ॥ श्रुतितत्त्वलदक्षविचारकरोऽवनिपालक काश्यप-गोत्रवर । क्रतुदक्षसम किल दक्षमहाशयो नाम इति भुवि भाति यति ॥ समस्तशास्त्रपण्डित-स्तथागतप्रखण्डित प्रचण्डसर्व्ववैरिदर्पगर्व्वखर्व्व-कारक । सावर्णगोत्रसम्भवोऽत्र भाति वेदगर्भकः छान्दड प्रभाति भूप वात्स्यगोत्रसम्भव ॥ यशः-सुधाकरोत्तपत्यपतिरुद्धयोषितानननाम्बुजे महा-तपस्तपोवशीकृतेन्द्रिय ॥ अय श्रीलहर्षोऽनिश दानहर्षो महर्षिर्यथास्या तपोभि प्रभाति । क्षि-तीन्द्र! क्षितौ यो भरद्वाजगोत्रेश्वरो विप्रवर्य्य प्रतापारिशौर्य्य" ॥ * ॥

अथ शूद्रपरिचयप्रश्न ।

"के यूय नाम कि वा कथयत क्षतिन स्वागता कापि देशात् ? कोलाञ्चात् पञ्चशूद्रा वयमपि नृपते । किङ्करा भूसुराणाम् । धन्या यूय पृथिव्या परिचयमखिलं ब्रूत भो विप्रभक्ता श्रुत्वोक्तिर्विप्रवर्य्या सकलपरिचय भूपतेरन्ति चैषाम् ॥ * ॥

अथ पञ्चशूद्राणा परिचय ।

"सुललालिङ्कताम्बर एष कृती
क्षितिदेवपदाम्बुजचारुरति ।
मकरन्द इति प्रतिभाति यति-
र्द्विजवन्द्यकुलोद्भवभट्टगति ॥

कायस्थः

न च घोषकुलाम्बुजभानुरयं
प्रथितेन्द्रयश सुरलोकवश ।
सतत नमुखी सुमतिश्च सुधी
शरदिन्दुपयोऽम्बुधिकुन्दयशा ॥
वसुधाधिपचक्रवर्त्तिनो
वसुतुल्या वसुवंशसम्भवा ।
वसुधाविदिता गुणार्णवै-
र्नियत ते जयिनो भवन्तु न ॥
दशरथो विदितो जगतीतले
दशरथप्रथित प्रथम कुले ।
दशदिशा जयिना यशसा जयी
विजयते विभवै' कुलमागतै ॥
यशस्विना यशोधर सदा हि सर्व्वसादर
प्रमत्तमत्तमत्तक्ष शरत्सुधांशुवद्यश ।
प्रतापतापनोत्तपद्द्विषालियोमिदालिको
विभाति मित्रवंशसिन्धुकान्तिदासचन्द्रक ॥
द्विजातिमालनार्यकोऽप्यमौ च हर्षसेवक ।
कुलाम्बुजप्रकाशको दयाम्भकारदीपक ॥
अथ गुहकुलोद्भवो दशरथाभिधानो महान्
कुलाम्बुजमधुव्रतो विविधपुण्यपुञ्जान्वित' ।
निशम्य गुहभाषित सकलसभ्यहास्य व्यभुत्
स वङ्गगमनोद्यतो विविधमानभक्तो यत ॥
अथश्च पुरुषोत्तम कुलभद्रयशान्त कृती
सुदत्तकुलसम्भवो निखिलशास्त्रविद्योत्तम ।
विलोकितुमिहागतो द्विजवरैश्च राज्य प्रभो'
चकार नृपति सत विनयहीनतो निष्कुलम्" ॥ * ॥

अथाष्टौ सिद्धमौलिका' ।

"गौडेऽस्मिं कीर्त्तिमन्तस्थिरवसतिकृता मौलिका ये हि सिद्धास्ते दत्ता सेनदासा करगुहसहिता पालिता सिंहदेवा । ये वापाद्याभिमुख्या स्थि-तिविनयजुष सप्ततिम्नि द्विपूर्वा ह्योडाद्या वीक्ष्य गाडा चरणगुणयुता मौलिकत्वेन साध्या" ॥ * ॥

अथ द्विसप्तति साध्यमौलिका' ।

"होड खर धर धर्म्मा णीवान आइच सोम पै सुर साम । भञ्जो विन्दो गुह वल लोध शर्म्मा वर्म्मा ऊह भुइ चन्द्र ॥ रुद्रो रक्षित राजादित्यो विष्णु नाग खिल मिल गूत । इन्द्रो शुम्र पालो भद्र धोमस्याङ्कुर बन्धुर नाथ ॥ शांइ हैमश्च मनो गगड़ो राहा राणा राङत साना दाहा दाना गण उपमाना । खाम छोमो धर वैश्योषो वीदस्तेज-स्वार्णव आश ॥ प्रक्तिर्भूतो ब्रह्म शान ध्योमो क्षेमो वर्द्धन रङ्ग । गुइ कीर्त्तिर्यश कुण्डुर्नन्दी शीलो धनुर्गुणा ॥ ॥ इति दक्षिणराढीयघटक-कारिका ॥ * ॥ * ॥ * ॥

अथ वङ्गजकुलाचार्यकारिका लिख्यन्ते ।

अथ शूद्रोत्पत्ति ।

तथा चाग्निपुराणोक्तजातिमालायाम् ।

"आदौ प्रजापतेर्जाता मुखाद्विप्रा' सदारका ।
बाहोश्च क्षत्रिया जाता उर्व्वोर्वैश्या विजज्ञिरे ॥
पादाच्छूद्रश्च सम्भूतस्त्रिवर्णस्य च सेवक ।
होमनामा सुतस्तस्य प्रदीपस्तस्य पुत्रक ॥
कायस्थस्तस्य पुत्रोऽभूद्बभूव लिपिकारक ।

कायस्थः

कायस्थस्य त्रय' पुत्रा विख्याता जगतीतले ॥
चित्रगुप्तश्चित्रसेनो विचित्रश्च तथैव च ।
चित्रगुप्तो गत स्वर्गे विचित्रो नागसन्निधौ ॥
चित्रसेन पृथिव्या वै इति शूद्र प्रचक्ष्यते" ॥ * ॥

अथ चित्रसेनादिस्रुतः ।

"वसुर्घोषो गुहो मित्रो दत्त' करण एव च ।
मृत्युञ्जयस्य सप्तैते चित्रसेनसुता भुवि ॥
करणस्य सुता जाता नागो नाथश्च दासक' ।
मृत्युञ्जयतनूद्भूता देव' सेनश्च पालित ?
सिंहश्चैव तथा ख्यातस्त्वैते पद्धतिकारका ।
एते पद्धतिकाराश्च मुनिभि कथिता पुरा" ॥ * ॥

अथ द्वादशशूद्रवंशजा' ।

"वसुर्घोषो गुहो मित्रो दत्तो नागश्च नायक ।
दासो देवस्तथा सेन पालित सिंह एव च ॥
एते द्वादशनामान प्रसिद्धा शूद्रवंशजा" ॥ * ॥

अथ सप्तशीति पद्धतिकारा ।

"मृत्युञ्जयवंशभूतो नित्यानन्दो नृपेश्वर ।
तस्यापि वंशसञ्जाता सप्तशीति प्रकीर्त्तिता' ॥
तेऽपि पद्धतिकाराश्च मुनिभि कथिता पुरा" ॥ * ॥

तेषा नामानि ।

कर्णो भद्रो धर्णो नन्दी पालश्चाङ्कुरदामक' ।
स्मारो धरणिहोडौ च वानश्चाइचसोमकौ ॥
पै सुर शोनकश्चैव भञ्जो विन्दुर्गुहस्तथा ।
वलश्च लोदकश्चैव शर्म्मा वर्म्मा च भूमिक ॥
ऊद्दश्च रुद्रकश्चैव चन्द्रो रक्षितराजकौ ।
आदित्यविष्णुगुप्ताश्च खिलश्च पीलकस्तथा ॥
चाग्निर्हैशश्च वन्दुश्च शान्तिश्च सुमनुस्तथा ।
गणकौ गाढकश्चैव राणाराङ्कतदाहकौ ॥
दाना गणश्च मानाश्च खामापद्मेसधारका ।
वैतोषवेदकाश्चन्दश्चार्णवश्चाप्यशक्तिक ॥
भूतो ब्रह्म नन्द स्तोमो वर्द्धनो क्षेमरङ्कको ।
भूति कीर्त्तिर्यश कुण्ड शीलश्चैव धनुर्गुणा ॥
टौडिर्भनोरितिश्चैव चाकिश्च नन्दनस्तथा ।
शामश्चाङ्कश्च पूश्चिश्च तेजको नाद एव च ॥
रोद्रक्रोमश्च छायिश्च टोषश्च दूतकस्तथा ।
एते पद्धतिकाराश्च सप्तशीति प्रकीर्त्तिता" ॥

एता सप्तशीतिपद्धतय द्वादशशूद्रपद्धतयश्च मि-लित्वा नवाधिकनवतिपद्धतयो भवन्ति ॥ एतेषा पु-रोहितगोत्रप्रवरेण गोत्रप्रवरत्वं मुनिभिरुक्तम् ॥ * ॥ अथ कान्यकुब्जात् पञ्चाना विप्राणा शूद्राणाञ्चा-गमनमाह देवीवर ।

"अम्बष्ठकुलसम्भूत आदिशूरो नृपेश्वर ।
राढगौडवरेन्द्राश्च वङ्गदेशस्तथैव च ॥
एतेषा नृपतिश्चैव सर्व्वभूमीश्वरो यथा ।
अमात्यैर्बान्धवैश्चैव मन्त्रिभिर्द्विजसत्तमै ॥
एतै सह महीपाल एकदा स निशालये ।
उपविष्टो द्विजान् प्रष्टुं धर्म्मशास्त्रपरायण ॥
केन यज्ञेन भगवत्प्रीतिर्भवति निश्चितम् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयध्व द्विजोत्तमा ॥
इति श्रुत्वा द्विजा सर्व्वे खर्व्वीकृतकलेवरा ।
कथयन्ति नृपाग्रे तु सर्व्वे विह्वलमानसा' ॥
केन केन विधानेन यज्ञो वा क्रियते बुधै ।

वयं सर्व्वं न जानीमो विधानं कीदृशं कृतौ ॥
इति तेषां वचः श्रुत्वा चिन्तायुक्तो महीपतिः ।
किं करोमि क्व गच्छामि विललाप पुनः पुनः ॥
कान्यकुब्जात् समानीतान् दूतेन द्विजपञ्चकान् ।
वेदशास्त्रेष्ववगतान् सर्व्वास्त्रे च विशारदान् ॥
गोयानारोहितान् विप्रान् खड्गचर्म्मादिभिर्युतान् ।
पत्तिवेशान् समालोक्य विषादो जायते हृदि ॥
अश्रद्धा जायते राज्ञ इति ज्ञात्वा द्विजोत्तमाः ।
आशीर्व्वादार्थनिर्म्माल्यं मल्लकाष्ठोपरि स्थितम् ॥
तदा काष्ठं सजीवं स्यात् फलपल्लवसंयुतम् ।
इति दृष्ट्वा नृपस्तस्मिन् कम्पान्वितकलेवरः ॥
स्तोत्रञ्च बहुधा तेषामकरोत् स नृपोत्तमः ।
आसनं पाद्यमानीय ददौ विनयपूर्व्वकम् ।
उपविष्टा द्विजाः पञ्च तथा च शूद्रपञ्चकाः ॥
राजस्ते कुशलं सर्व्वं प्रोचुश्चेत्यवदत् स तान् ।
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥
पूतञ्च भवनं जातं युष्माकं गमनं यतः ।
एवञ्च क्रियते स्तोत्रं पृष्टान्यत् शूद्रपञ्चके ॥
युष्माकं गोत्रमाख्या च किमर्थं वा द्विजैः सह ।
तत् सर्व्वं श्रोतुमिच्छामि ब्रूत भो शूद्रपुङ्गवाः ॥
इति राज्ञो वचः श्रुत्वा कथयन् नामगोत्रके ।
काश्यपे चैव गोत्रे च दक्षनामा महामतिः ॥
तस्य दासो गौतमस्य गोत्रे दशरथो वसुः ।
शाण्डिल्यगोत्रे सम्भूतो भट्टनारायणः कृती ॥
सौकालिनस्य दासोऽथ घोषः श्रीमकरन्दकः ।
भरद्वाजेषु विख्यातः श्रीहर्षो मुनिसत्तमः ॥
दासस्तस्य विराटाख्यो गुहकः काश्यपः स्मृतः ।
सावर्णगोत्रनिर्द्दिष्टो वेदगर्भमुनिस्त्वयम् ॥
तस्य दासो मित्रवंशो विश्वामित्रस्य गोत्रकः ।
कालिदास इति ख्यातः शूद्रवंशसमुद्भवः ॥
वात्स्यगोत्रेषु सम्भूतश्छान्दडस्येति सञ्ज्ञितः ।
मौद्गल्यगोत्रजो दत्तः पुरुषोत्तमसञ्ज्ञकः ॥
एतेषां रक्षणार्थाय आगतोऽस्मि तवालये ।
इति श्रुत्वा नृपस्तत्र मनसा हर्षमागतः ॥
विधानेनैव निर्व्वर्त्त्य क्रतुञ्च धर्म्मसञ्ज्ञितम् ।
ग्रामं सुवर्णं गाश्चैव वस्त्राणि विविधानि च ॥
दक्षिणार्थं द्विजातिभ्यः प्रददौ स नृपोत्तमः ।
अत्र देशे कृतावासाः सर्व्वे च द्विजशूद्रकाः ॥
बहवश्च प्रजा जाता नानादेशनिवासिनः" ॥ * ॥

अथ वल्लालकृतश्रेणिविभागः ।

"अथ वल्लालभूपश्च अम्बष्ठकुलनन्दनः ।
कुरुतेऽतिप्रयत्नेन कुलशास्त्रनिरूपणम् ॥
आदिशूरानीतविप्रान् शूद्रांश्चैव तथापरान् ।
एतेषां सन्ततीः सर्व्वा आनयत् स निजालये ॥
यत्र यत्र स्थिता विप्रास्तत्र ग्रामे निरोपिताः ।
श्रेणीद्वयन्तु निर्णीतं राढ़ीवारेन्द्रसञ्ज्ञितम् ॥
तथैव द्विविधं प्रोक्तं कुलञ्च सद्द्विजोत्तमे ।
शूद्रस्याथ चतस्रश्च नृपेण श्रेणयः कृताः ॥
उदग्दक्षिणराढ़ौ च वङ्गवारेन्द्रकौ तथा ।
इति चतस्रः सञ्ज्ञाः स्युस्तत्तद्देशनिवासनात् ॥
कुलं चतुर्व्विधं तेषां श्रेणीश्रेणीविशेषतः" ॥ * ॥

अथ वङ्गजकायस्थश्रेणिनिर्णयः ।

"तत्र वङ्गेषु ये शूद्रैर्निवासः क्रियतेऽधुना ।
तेषां निर्णयमाचक्षे कुलस्यैव विशेषतः ॥
वसुवंशे च मुख्यौ द्वौ नाम्ना लक्षणपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाकृती ॥
गुहे दशरथश्चैव मित्रे तारापतिस्तथा ।
दत्ते नारायणश्चैव एते च वङ्गजाः स्मृताः" ॥

अपरन्तु ।

"नागे दशरथश्चैव महानन्दस्तु नायकः ।
चन्द्रशेखरदासस्तु सेने गङ्गाधरस्तथा ॥
दामोदरकरः ख्यातो दामस्तूषापतिस्तथा ।
पालिते जनसञ्ज्ञः स्यात् चन्द्रे नारायणाख्यकः ॥
पाले श्याव' समाख्यातो राहावंशे च रायणकः ।
भद्रे दिगम्बरश्चैव धरे तु व्याससञ्ज्ञकः ॥
प्रभाकरस्तु नन्दी स्यात् केशवो देववंशजः ।
श्चीपतिरिति ख्यातः कुण्डवंशे प्रकीर्त्तितः ॥
सोमे वंशधरश्चैव सिंहे रत्नाकरस्तथा ।
नारायण' समाख्यातो रक्षिते च तथापरे ॥
वेदगर्भाङ्कुरश्चैव दैत्यारिर्विष्णुसञ्ज्ञकः ।
आढ्ये त्रिलोचनः ख्यातो नन्दने च उमापतिः ॥
एते वङ्गजनिर्द्दिष्टा वल्लालेन महात्मना ।
अन्येऽपि शूद्रा विख्यातास्तत्र देशनिवासिनः ॥
ते वङ्गजाः समाख्याताः करणेषु प्रतिष्ठिताः" ॥ * ॥

अथ वङ्गजकुलीनादिनिरूपणम् ।

'कुलीन इति सञ्ज्ञा स्यात् मध्यन्यस्तु तथापरः ।
महापात्रोऽचलश्चैव इति सञ्ज्ञाचतुष्टयम्" ॥

तद्यथा ।

"वसुर्घोषो गुहो मित्रो दत्तो नागश्च नाथकः ।
दासः सेनः करो दामः पालितश्चन्द्रपालकौ ॥
राहो भद्रो धरो नन्दी देवः कुण्डश्च सोमकः ।
रक्षिताङ्कुरसिंहाश्च विष्णुराढ्यश्च नन्दनः ॥
चत्वारोऽग्रास्त्रयो मध्या महापात्रा परे तथा ।
सप्तविंशति शूद्राणां वल्लालेन प्रशंसिताः" ॥ * ॥
इति कुलीनमध्यन्यमहापात्राः । अचलान् वक्ष्यामि ।
"होड़श्च आरकश्चैव धरणीवान एव च ।
आइच पैसुरश्चैव शानश्च मल्लविन्दुकौ ॥
गुहश्च वललोधौ च शर्म्मा वर्म्मा च भूमिकः ।
ऊइश्च रुद्रकश्चैव रायादित्यौ च पीलकः ॥
खिलश्च गुप्तचाम्पी च मन्युश्च शाम्भिसञ्ज्ञकः ।
हेशश्च सुमसुर्गण्डो राणाराऊतदाहकाः ॥
दानागणायमानाख्या खामः क्षेमश्च तोषकः ।
वैश्यापि घरवेदौ च भूतार्णवकत्रङ्घकाः ॥
एन्दश्च शक्तिसङ्गौ च क्षेमांशौ वर्द्धनस्तथा ।
हेमश्च मन्यकश्चैव भूञ्जिः कीर्त्तिश्च शीलकः ॥
धनुर्गुणो यशश्चैव मणोरीतिश्च दाड़िकः ।
चाकिश्च श्याम पूञ्जिश्च गण्डको नादकस्तथा ॥
रोहश्च होमकश्चैव चाशकश्च तथैव च ।
ढोलश्च दूतकश्चेति द्विसप्तत्यचला' स्मृताः" ॥
एतेषां प्रतिपुरुषक्रमेण कुलार्जनात् महापात्र-भावो जायते ॥ * ॥ इति वङ्गजघटकरामानन्द-शर्म्मकृतकुलदीपिका ॥

कायस्था, स्त्री, (कायस्तिष्ठत्यनया । काय + स्था + घञर्थे कः ।) हरीतकी । इति मेदिनी ॥ आमलकी । इति जटाधरः ॥ काकोली । इत्यमरटीकायां भरतः ॥ एलाद्वयम् । तुलसी । इति राजनिर्घण्टः ॥ कायस्थस्त्रीजातिः । कायस्थपत्नी कायस्थी ॥

कायिकः, त्रि, (कायेन निष्पादितं निष्पन्नो वा कायेन निर्वृत्त इति वा । काय + ठक् ।) शारीरिकः । कायनिष्पन्नः । यथा ।
"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्" ॥
इति तिथ्यादितत्त्वम् ॥ (स्त्री, शरीरसम्बन्धिनी चक्रवृद्धिः । यथा मनुः ८ । १५३ ।
"चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या" ॥)

कायिकावृद्धिः, स्त्री, (गोबलीवर्द्दादीनां कायपरिश्रमसाध्या या वृद्धिः ।) गवादिवलीवर्द्दादिकर्म्मयुता वृद्धिः । यथा ।
"दोह्यवाह्यकर्म्मयुता कायिका समुदाहृता" ॥
इति व्यासः ॥ मूलधनाविरोधिनी प्रत्यब्ददेयपणतदर्द्धादिरूपा वृद्धिः । यथा ।
"कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका" ।
इति नारदः ॥ हलायुधस्तु पणार्द्धाद्या इत्यत्र पणपाद्धेति पठित्वा पणस्य मूलधनस्य यावदवस्थानं तावत् शश्वत् वर्षसहस्रमपि उत्तमर्णेन या वाह्यते प्राप्यते सा कायिकेति व्याख्यातवान् तत्राद्या भोगलाभान्तर्गता अपरा च तद्भिन्ना इति मिश्राः । इति विवादार्णवसेतुः ॥

कारः, पुं, (कॄ हिंसायां + भावे घञ् ।) वधः । निश्चयः । (धातूनामनेकार्थत्वात् अत्र निश्चयार्थेऽपि ॥ कं सुखं ऋच्छत्यनेन । क + ऋ + करणे + घञ् ।) बलिः । यत्नः । यतिः । (कं सुखं निर्वृतिं ऋच्छतीति । क + ऋ + कर्त्तरि अण् ।) पतिः । इति शब्दरत्नावली ॥ (कं निष्यन्दजलम् ऋच्छतीति ।) तुषारशैलः । इति मेदिनीकरहेमचन्द्रौ ॥ कर्म्मोपपदे कर्त्तृवाचकः । यथा कर्म्मकारः स्वर्णकार इत्यादि । इति व्याकरणम् ॥ क्रिया । यथा करञ्च कार क्रिया । इति रामतर्कवागीशः ॥ (अक्षरान्ते तदक्षरवाचकः । यथा ककारः । मकारः । इत्यादि ॥)

कारकं, क्ली, (क्रियाभिरन्वितं इति । भाष्यमते तु करोति क्रियां निर्वर्त्तयतीति । कृ + कर्त्तरि ण्वुल् ।) क्रियानिमित्तं लोकतः सिद्धम् । इति दुर्गसिंहः ॥ फणिभाष्यमते पुं, यथा भवितुः स प्रयोजकः कारकः । तत्तु षड्विधम् । कर्म्म १ यथा रामं नमति । करणम् २ यथा नेत्रैः शिवो दृष्टः । कर्त्ता ३ यथा जनैः शिवो दृष्टः । सम्प्रदानम् ४ यथा हरिः सद्भ्यः सुखं ददातु । अपादानम् ५ यथा विभीषणः मदाद्भ्रष्टः । अधिकरणम् ६ यथा रेमे शरदि गोविन्दः । इति वोपदेवः ॥ वर्षोपलोद्भवं जलम् । इति राजनिर्घण्टः ॥

कारकः, त्रि, (करोति कर्म्मादिकम् । कृ + "ण्वुल्-तृचौ" । ३ । १ । १३३ । इति ण्वुल् ।) कर्त्ता । इति मेदिनी ॥ (यथा मनुः ७ । २०४ ।
"आदानमप्रियकरं दानञ्च प्रियकारकम्" ॥)

कारकुक्षीयः, पुं, (कारकुक्षि + छः ।) शाल्वदेशः ।

(तत्र भव' अण् बहुषु तस्य लुक् ।) तद्देशीयजने बहुवचनान्त' । इति हेमचन्द्रः ॥
कारणं, क्ली, (कार्य्यतेऽनेन । णिजन्तात् कृञो ल्युट् ।) येन विना यन्न भवति तत् । तत्पर्य्याय । हेतु' २ बीजम् ३ । इत्यमर । १ । ४ । २८ ॥ निमित्तम् ४ प्रत्ययः ५ । इति जटाधर' ॥ (यथा, विष्णु-पुराणे । १ । १७ । ३० ।
"यतः प्रधानपुरुषौ यतश्चैतत् चराचरम् ।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु" ॥)
कारणत्वमाह । अन्यथासिद्धिशून्यत्वे सति नियत-पूर्व्ववर्त्तित्वम् । तत्त्रिविधम् । समवायिकारणत्वम् १ असमवायिकारणत्वम् २ निमित्तकारणत्वम् ३ परमाणुपरिमाणभिन्नाना कारणत्वम् । इति भाषापरिच्छेद' । १६-१७ ॥ अणुपरिमाणन्तु न कस्यापि कारणम् । इति सिद्धान्तमुक्तावली (यथा, हेः रामायणे । १ । ६४ । ११ ।
"बहुभिः कारणैर्देव । विश्वामित्रो महामुनि' ।
लोभित' क्रोधितश्चैव तपसा चाभिवर्द्धते" ॥)
करणम् । (कृ वधे + स्वार्थे णिच् भावे ल्युट् ।) बध । इति मेदिनी ॥ (आदि' । मूलम् । यथा, मनुः । ११ । ८४ ।
"ब्राह्मणः सम्भवेनैव देवानामपि दैवतम् ।
प्रमाणश्चैव लोकस्य ब्रह्मात्रैव हि कारणम्" ॥
प्रमाणम् । यथा, मनु' । ८ । २०० ।
"सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित् ।
आगमः कारणं तत्र न सम्भोग इति स्थितिः" ॥)
इन्द्रियम् । (यथा, गीतायाम् । १३ । २० ।
"कार्य्यकारणकर्त्तृत्वे हेतु' प्रकृतिरुच्यते ।
पुरुष' सुखदुःखानां भोक्तृत्वे हेतुरुच्यते" ॥
"कार्य्यं शरीरं कारणानि सुखदुःखसाधनानी-न्द्रियाणि तेषां कर्त्तृत्वे तदाकारपरिणामे" ।
इति तट्टीकायां श्रीधरस्वामी ॥) देह' । (यथा, प्राबोधात्मबोधे । १३ ।
"अनाद्यविद्याऽनिर्व्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत्" ॥)
साधनम् । (करणमेव स्वार्थे अण् ।) कर्म्म । (यथा, चाणक्ये । २३ ।
"न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचित् रिपु' ।
कारणेन हि जानाति मित्राणि च रिपूंस्तथा" ॥)
कायस्थ' । (करणशब्देऽस्य विशेषो ज्ञेय ॥) वाद्य-प्रभेदः । गीतप्रभेद' । इति भरतधृतरत्नकोषः ॥ (आदिकारणत्वात् विष्णु । यथा महाभारते । १३ । १४९ । ५४ ।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुह" ॥
शिव' । यथा शङ्करकृते वेदसारशिवस्तवे ७ ।
"अजं शाश्वतं कारणं कारणानाम्
शिवं केवलं भासकं भासकानाम्" ॥)
कारणगुणोद्भवगुणः, पु, (कारणगुणः उद्भवो यस्य । स चासौ गुणश्चेति कर्म्मधारयः ।) कारणगुण-पूर्व्वकगुणः । तद्यथा । रूपम् १ रस' २ गन्ध' ३ अपाकजस्पर्शः ४ द्रवत्वम् ५ स्नेहः ६ वेगः ७ गुरु त्वम् ८ एकत्वम् ९ पृथक्त्वम् १० परिमाणम् ११

स्थितिस्थापकसंस्कार १२ । इति भाषा-परिच्छेदे । ९६ ॥
कारणशरीरं, क्ली, (कारणं अविद्या सैव शरी-रम् । "अज्ञानाद्यविद्याऽनिर्व्वचनीयं शरीरद्वयकारण-मात्रम् । सत्स्वरूपाज्ञानं यदस्ति तत्कारण-शरीरमित्याहुः ।) सत्त्वप्रधानमज्ञानम् । (किन्तु बीजावस्थाया सूक्ष्मत्वात् विषयव्यापाररहि-तस्यान्तःकरणस्य सुतरां सुखस्वरूपेणानुभूयतेऽसौ दशा ।) तत्पर्य्याय' । आनन्दमयकोष' २ सुषुप्ति ३ । (यदुक्तं वेदान्तसारे । १६ ।
"अस्यापीयमहङ्कारादिकारणत्वात् कारणश-रीरं आनन्दप्रचुरत्वात् कोषवदाच्छादकत्वाच्च आनन्दमयकोष सर्व्वोपरमत्वात् सुषुप्तिः अत एव स्थूलसूक्ष्मशरीरलयस्थानमितिचोच्यते" ॥ अत्र सुबोधिनी यथा ।
"प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वर-गतमूलप्रकृतिवत् सुषुप्तिकाले अहङ्कारादिशरी-रोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वं इन्द्रियतद्विषयाभावे व्यासङ्गा-भावादानन्दबाहुल्यादानन्दमयत्वं आच्छादकत्वा-त्कोषत्वञ्च युक्तमितिभाव । ननु स्थूलसूक्ष्मशरीर-लयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशङ्क्य पूर्व्ववत् सङ्गाभेद इति वक्तुं तत्र युक्तिमाह सर्व्वो-परमत्वादिति । पञ्चीकृतस्थूलशरीरस्य व्यावहारि-कस्य स्वाप्नप्रपञ्चस्य स्वकारणेऽज्ञाने लीनत्वात् सर्व्वोपरतिरित्यर्थः । तथा चोक्तम् ।
"लये फेनस्य तद्धर्म्मा द्रवाद्याः स्युस्तरङ्गके ।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा ॥
व्यवहारिकदेहस्य लयः स्यात् प्रतिभासिके ।
तल्लये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणि" ॥)
कारणा, स्त्री, (कृ हिंसायाम् । णिजन्तात् कृञो "ण्यासश्रन्थेति" । ३ । ३ । १०७ । युच् तत टाप् ।) यातना । गाढवेदना । इत्यमर' । १ । ९ । ३ ॥ नरकरुजा यमयातना । इति केचित् । इति भरतः ॥
कारणिकः, त्रि, (करणैः कारणैर्वा चरति । "चर-तीति" । ४ । ४ । ८ । ठक् ।) परीक्षक' । इत्य-मरः । ३ । १ । ७ ॥
कारणोत्तर, स्त्री, (कारणेन उत्तरम् ।) प्रत्यव-स्कन्दनम् । सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलरूप-कारणं ब्रूयात् तदा तदुत्तरम् । तत्त्रिविधम् । बलवत् १ तुल्यबलम् २ दुर्ब्बलम् ३ । आद्यं यथा मया त्वत्त शतं गृहीतमिति सत्यं किन्तु तत् परिशोधितम् । द्वितीयं यथा मदीयेयं भूमि क्रमागतत्वादिति वाद्युक्ते प्रतिवादिनोऽपि तथो त्तरम् । तृतीयं यथा ममेय भूमिः क्रमागतत्वात् इति वाद्युक्ते ममेयं भूमि' दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्तरम् । इति व्यवहारतत्त्वम् ॥
कारण्डव', पुं-स्त्री, (अमन्ताडड इति रमेर्ड । रुडः । ईषत् रण्ड' । "ईषदर्थे" ६ । ३ । १०५ । ईति को कादेशः । कारण्डं वाति । वा गतौ + "आतोनुपेति" । ३ । २ । ३ । क' । कारण्डसेद

कारण्डं तदाकारं वाति वा ।) हंसविशेष' इत्यमरः । २ । ५ । ३४ ॥ खडहाँस इति भाषा । (यथा ऋतुसंहारे । शरद्वर्णने ८ ।
"कारण्डवाननविघट्टितवीचिमाला
कादम्बसारसकुलाकुलतीरदेशा" ॥)
कारण्डव्यूह', पु, बुद्धभेद' । इति त्रिकाण्डशेषः । (बौद्धशास्त्रविशेष ॥)
कारन्धमी, [न्] पु, (कार एव कारस्तं धमतीति । ध्मा + इनि । पृषोदरादित्वात् साधु ।) कांस्यकार' । धातुवादरत इति मेदिनी ॥
कारम्भा, स्त्री, (ईषत् रम्भा । को' कादेश' ।) प्रिय-ङ्गुवृक्ष । इत्यमरः । २ । ४ । ५६ ॥
कारव, पु, (का इति रवो यस्य । कुत्सितो रवो यस्येति वा ।) काक' । इति त्रिकाण्डशेष ॥
कारवल्ली, स्त्री, (कारा इतस्ततो विक्षिप्ता वल्ली यस्याः । यद्वा कुत्सित आरो गतिर्यस्याः । सा चासौ वल्ली चेति ।) कारवेल्ल । काण्डीर । इति राजनिर्घण्ट ॥
कारवी, स्त्री, (कार वाति । वा + कः । के जलोप-लक्षितवर्षाकाले रवो यस्य । कारवः केकावरो मयूरस्तस्य पुच्छमिवाकारोऽस्त्यस्य अच् । यद्वा कृ हिंसायां स्वार्थे णिच् तत क्विप् । कारमवति । कर्म्म ण्यण् । गौरादित्वात् ङीष् ।) मधुरा । मौरी इति भाषा । दीप्यः । मयूरशिखा । रुद्रजटा इति भाषा । चोचयमानिका इति केचित् । सुषवी । केले जीरा इति भाषा । हिङ्गुपत्री । हिङ्ग्रे पाता इति भाषा । इत्यमरभरतौ ॥ क्षुद्रकारवेल्ली । इति राजनिर्घण्ट । छोट करला इति भाषा ॥
कारवेल्ल, स्त्री, (कार वेल्लति । वेल्ल चलने कर्म्म-ण्यण् । यद्वा कारेण वातगमनेन वेल्लति चलति गच्छति वा वेल्ल चलने अच् ।) कठिल्लकम् । करला इति भाषा । तत्पर्य्यायगुणाः ।
"कारवेल्लं कठिल्लं स्यात् कारवेल्ली ततो लघु ।
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम् ॥
ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत् ।
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः" ॥
इति भावप्रकाश' ॥ अमरे पुलिङ्गोऽयम् ॥
कारवेल्ल', पु, (कारेण वायुवत् गत्या वेल्लति चल-तीति । कार + वेल्ल + अच् ।) लताविशेष' । करला इति भाषा । तत्पर्य्याय' । कठिल्लकः २ सुषवी ३ । इत्यमरः । २ । ४ । १५४ ॥ सुषवी ४ सुशवी ५ । इति तट्टीका ॥ कण्डुरः ६ काण्डकटुकः ७ सुकाण्ड' ८ उग्रकाण्ड' ९ कठिल्लः १० नासा-संवेदन ११ पटुः १२ । इति राजनिर्घण्टः । तत्पुष्पगुणा । धारकत्वम् । रक्तपित्तरोगे समथ्य-त्वञ्च ॥ तत्फलगुणा । भ्रमककफपित्तनाशित्वम् । रुचिकरत्वञ्च । इति राजवल्लभ' ॥
कारवेल्लक', पु, (कारवेल्ल एव । स्वार्थे कन् ।) कार-वेल्लः । इति रत्नमाला ॥ (क्लीवत्वमपि दृश्यते । यथा सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"तद्वत् कर्कोटकं प्रोक्तं कारवेल्लकमेव च" ॥)
कारवेल्ली, स्त्री, (कारवेल्ल + अल्पार्थे ङीष् ।) क्षुद्र-

कारवेल्लम्। करेला इति हिन्दी भाषा। उच्छे इति वङ्गभाषा॥ (यदुक्तं पाकराजेश्वरे।
"कारवेल्लीफलं तक्रे स्वेदितं हिङ्गुमर्द्दितम्।
भर्ज्जितं नवनीतेन सैन्धवेन समन्वितम्॥
विदलितमुखमीषत् कारवेल्लीकठोरं
पुलकितमिव तैले साधितं रामठेन।
रचितमरिचचूर्णं सैन्धवेनातिपूर्णम्
सुललितरसमग्र्यं लोलतां मातनोति"॥
अन्यत् कारवेल्लशब्दे द्रष्टव्यम्॥)

कारमिहिका, स्त्री, (कारस्य तुषारशैलस्य मिहिका नीहार इव।) कर्पूरम्। इति राजनिर्घण्टः॥

कारस्कर, पु, (कारं वधं करोतीति। कृ+"कृञो-हेतुताच्छील्यानुलोम्येषु"। ३।२।२०। इति ट निपातनात् सुट्।) वृक्षविशेषः। तत्पर्य्यायः। किम्पाकः २ विषतिन्दुः ३ कारद्रुमः ४ रम्यफलः ५ कुपीलुः ६ कालकूटः ७। (यथा महाभारते २। द्यूतपर्व्वणि ४९। २१।
"आवर्ज्जिता इवाभान्ति नीपाश्चित्रकपौकुराः।
कारस्करा लोहजङ्घा युधिष्ठिरनिवेशने"॥)
अस्य गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। कुष्ठवातामयास्रकण्डूतिकफार्शोव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

कारस्काराटिका, स्त्री, (कारस्कार इव अटति। अट्+ण्वुल् टाप् अत इत्वञ्च।) कर्णजलौका। इति त्रिकाण्डशेषः॥ केर्ण्णा केनुइ इति च भाषा॥

कारा, स्त्री, (कीर्य्यते क्षिप्यते दण्डार्हो यस्याम्। कृ विक्षेपे भिदादित्वात् अङ्। "ऋदृशोऽङीति" ७।४।१६। गुणे दीर्घत्वं निपात्यते।) कारागारम्। तत्पर्य्यायः। बन्धनालयः २ इत्यमरः। २। ८। ११९॥ दूती। प्रसेवकः। सुवर्णकारिका। बन्धनम्। इति मेदिनी॥ पीडा। इति त्रिकाण्डशेषः॥

कारागार, क्ली, (कारैव आगारं कारायै बन्धनाय आगारं वा।) बन्धनगृहम्। यथा। "रिपुं कारागारं कलयति च तं केलिकलया"। इति तन्त्रसारे श्यामास्तोत्रम्॥

कारागुप्तः, त्रि, (काराया बन्धनागारे गुप्तः रुद्धः रक्षितो वा।) कारागारस्थः। इति हेमचन्द्रः। कयेदी इति भाषा॥

कारायिका, स्त्री, (कं जलं आराति आदत्ते प्रचरणस्थानतया इति यावत्। आ+रा+ण्वुल् टाप् इत्वञ्च।) बलाका। इति जटाधरः॥

कारावेश्म, [न्] क्ली, (कारैव कारायै वा वेश्म गृहम्।) कारागारम्। तत्पर्य्यायः। वधाङ्ककम् २। इति त्रिकाण्डशेषः॥

कारि, स्त्री, (क्रियतेऽसौ। कृ+"विभाषाख्यानपरिप्रश्नयोरिञ्च"। ३।३।११०। इति इञ्।) क्रिया। (यदुक्तं सिद्धान्तकौमुद्याम्। "त्वं कां कारिमकार्षीः। सर्व्वां कारिमकार्षम्"॥) करोतीति कृ कृञ् करणे। "कृञ उदीचां कारुषु" उणा। ४। १२८। इति इञ्।) शिल्पिनि त्रि। इति मेदिनी॥

कारिका, स्त्री, (धात्वर्थे निर्द्देशे करोतेर्ण्वुल् णित्त्वाद्वृद्धिः। यद्वा करोतीति ण्वुल् प्रत्ययस्थादिति इत्वम्।) नटस्त्री। कृतिः। विवरणश्लोकः। (यथा, महाभारते। २।११। ३३।
"नाटका विविधा काव्या कथाख्यायिककारिकाः"॥)
शिल्पम्। यातना। इति मेदिनी॥ वृद्धिः। इत्यमरटीकायां रमानाथः। सुद इति भाषा॥ स्वल्पाक्षरवृत्त्या बह्वर्थज्ञापिका कविता। यथा,—
"कारिका तु स्वल्पवृत्तौ बह्वोरर्थस्य सूचनी"।
इति हेमचन्द्रः॥

कारित, त्रि, (कृ+णिच्+कर्म्मणि क्तः।) कुर्व्वन् प्रेरितः। कराण इति भाषा। यथा, मार्कण्डेये। देवीमाहात्म्ये ८१। ६५।
"विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्"॥

कारिता, स्त्री, (कारित+टाप्।) ऋणिकेन या स्वकार्य्यसाधकतया अशीतितमभागद्विगुणतादितोऽधिका वृद्धिर्व्यवस्थापिता सा। अधिक सुद इति भाषा। यथा, विवादार्णवसेतौ कात्यायनः॥
"ऋणिकेन तु या वृद्धिरधिका सम्प्रकीर्त्तिता।
आपत्कालकृता नित्यं दातव्या सा तु कारिता"॥
(तथा च मनुः ८। १५३।
"नाति सम्वत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत्।
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या"॥)
तत्पर्य्यायः। कारिका २ कारितावृद्धिः ३। इति मिताक्षरा॥

कारी, स्त्री, (कृणाति हिनस्ति कण्टकैः। कृ हिंसायां+इञ् ततो ङीष्।) वृक्षविशेषः। कण्टकारी आकर्षकारीत्येषा द्विधा। तत्पर्य्यायः। कारिका २ कार्य्या ३ गिरिजा ४ कटुपत्रिका ५। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। पित्तनाशित्वम्। दीपनत्वम्। ग्राहित्वम्। रुचिकण्ठशोषकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

कारीष, क्ली, (करीषाणां समूहः। भिदादित्वात् अण्।) करीषसमूहः। इत्यमरः। ३। २। ४३॥ घुटेर राशि इति भाषा। (यथा, हरिवंशे।
"कारीषेषु प्रकृष्टेषु दीप्यमानेषु सर्व्वशः"॥

कारु, पु, (करोति इति। "कृवापाजिमीति"। उणां १। १। उण्।) विश्वकर्म्मा। इति मेदिनी॥ (भावे उण्।) शिल्पम्। इति हेमचन्द्रः॥

कारु, त्रि, (करोति इति। कृ+उण्। उणा। १। १।) कारकः। (यथा, भट्टिः ७। २८।
"राघवस्य ततः कार्य्यं कारुर्व्वानरपुङ्गवः।
सर्व्ववानरसेनानामाश्वागमनमादिशत्"॥)
शिल्पी। इति मेदिनी॥ (यथा, कूर्म्मपुराणे।
"कारयित्वा तु कर्म्माणि कारुं पश्चान्न वञ्चयेत्"॥)

कारुक, त्रि, (कारु+स्वार्थे कन्।) शिल्पी। (यथा मनुः। ४। २१९।
"कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति"॥)

कारुज, पु, (कं जलं आरुजति। आ+रुज+क।) करभः। फेनः। वल्मीकः। नागकेशरः। गैरिकम्॥ (कारोः कारुतो जायते। कारु+जन+डः।) शिल्पिनां चित्रम्। स्वयं जाततिलः। इति हेमचन्द्रः॥

कारुणिक, त्रि, (करुणा शीलमस्य। शीलमिति ठक्।) दयालुः। इत्यमरः। ३। १। १५॥ (यथा, रघुः। १५। ७१।
"कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम्"॥)

कारुण्डी, स्त्री, (कुत्सिता ईषत् वा रुण्डी मूर्द्धहीना इव।) जलौका। इति शब्दचन्द्रिका॥ कारुण्डिका इति च पाठः॥

कारुण्य, क्ली, (करुणः करुणावान्। तस्य भावः। करुणैव वा ष्यञ्।) करुणा। इत्यमरः। १। ७। १८॥ (यथा गो रामायणे १। २। १५।
"मुनेः शिष्यसहायस्य कारुण्यं समजायत"॥)

कारूषा, पुं, (करूषो अभिजन एषाम्। भर्गादित्वात् अण् बहुषु न तस्य लुक्।) करूषदेशवासिनः। तत्पर्य्यायः। वृद्धक्षत्राः २। इति हेमचन्द्रः॥ बहुवचनान्तोऽयं शब्दः॥ (यथा, विष्णुपुराणे २। ३। १६।
"कारूषा मालवाश्चैव पारियात्रनिवासिनः"॥)

कारोत्तम, पुं, (कारेण सुरागालनेन उत्तमः। मण्डस्य उत्तमतया तथात्वम्।) कारोत्तरः। इत्यमरटीकायां स्वामी॥

कारोत्तर, पुं, (कारेण सुरागालनक्रियया उत्तरति। उत्+तॄ+अच्।) सुराग्रभागः। तत्पर्य्यायः। सुरामण्डः २। इत्यमरः। २। १०। ४३॥ कूपः। इति हारावली॥

कार्कश्य, क्ली, (कर्कशस्य भावः। कर्कश+ष्यञ्।) कर्कशता। (यथा, अमरुशतके २४।
"कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते"॥)

कार्त्तवीर्य्य, पु, (कृतवीर्य्यस्य अपत्यं अण्।) चन्द्रवंशीयकृतवीर्य्यराजपुत्रः। तत्पर्य्यायः। हैहयः २ दोःसहस्रभृत् ३ अर्ज्जुनः ४। (यथा, भागवते ९। २३। २४।
"न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः।
यज्ञदानतपोयोगश्रुतवीर्य्यजयादिभिः"॥

अस्य खलु माहिष्मती नाम पुरी राजधान्यासीत्। भुजवीर्य्येणायं सप्तद्वीपां धरामजयत्। दत्तात्रेययोगात् बाहुसहस्रप्रभाववान्। दिग्विजये आगतो रावणोऽनेन पराजितो निगडे बद्धः पितामहेन पुलस्त्यमुनिना ततो मोचितः। अयन्तु जमदग्नेराश्रमं गत्वा बलात् सवत्सां होमधेनुं जहार। ततः क्रुद्धेन जामदग्न्येन सबलोऽभिहतोऽसौ कार्त्तवीर्य्यः। अथ वैरशुद्धिं चिकीर्षुभिर्दुरात्मभिः कार्त्तवीर्य्यपुत्त्रैरागत्य स्वाश्रमे ध्यानस्थो जमदग्निर्निपातितः। ततोऽनेन पितृवधामर्षात् जातक्रोधेन परशुरामेण सर्व्वे हैहया निपातिताः॥) जैनराजचक्रवर्त्तिविशेषः। तत्पर्य्यायः। सुभूमः २। इति हेमचन्द्रः॥

कार्त्तस्वर, क्ली, (कृतस्वरे आकरभेदे भवम् अण्। कृताः पठिताः स्वरा येन स कृतस्वरः सामगानकर्त्ता तस्मै दक्षिणात्वेन देयं वा। "शेषे"। ४। २

८२ इत्यत्र ।) स्वर्णम् । (यथा, माघे १ । २० ।
"स तप्तकार्त्तस्वरभास्वराम्बरः" ॥)
धुस्तूरः । इत्यमरः । २ । ४ । ७७ ॥

कार्त्तान्तिकः, पुं, (कृतान्तं वेत्ति । "क्रतूक्थादि-सूत्रान्ताट्ठक्" । ४ । २ । ६० । इति ठक् ।) ज्योतिर्व्वित् । दैवज्ञः । इत्यमरः । २ । ८ । १४ ॥

कार्त्तिकः, पुं, (कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे इति प्राग्दीव्यतीयः अण् ।) वैशाखादिद्वादशमासान्तर्गतसप्तममासः । कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । अयं तुलास्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपमुख्यचान्द्रः । सौरस्तु तुलाराशिस्थरविककालः । इति स्मृतिः ॥ तत्पर्य्यायः । बाहुलः २ ऊर्ज्जः ३ कार्त्तिकिकः ४ । इत्यमरः । १ । ४ । १७ ॥ कौमुदः ५ । इति शब्दरत्नावली ॥ * ॥

अथ कार्त्तिककृत्यम् ।

पद्मपुराणे ।

"तुलामकरमेषेषु प्रातःस्नानं विधीयते" ।
तत्र संकल्पः अरुणोदयकाले मज्जनं कृत्वाचम्य ॐ तत्सदद्य कार्त्तिके मासि अमुकपक्षे अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रः श्री अमुकदेवशर्म्मा श्रीविष्णुप्रीतिकामः प्रातःस्नानमहं करिष्ये इति सकल्प्य यथोक्तविधिना इतिकर्त्तव्यता विधाय—
"ॐ कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्द्दन ! ।
प्रीत्यर्थं तव देवेश ! दामोदर ! मया सह" ॥
इति स्नायात् । मया लक्ष्म्या । प्रतिदिनसकल्पे तु आरभ्य तुलास्थरविं यावत् प्रत्यहं इति न वक्तव्यम् । किन्तु मासीत्यनन्तरं तुलास्थरवावित्यधिकं वक्तव्यम् । चान्द्रस्नानवाक्यन्तु वैशाखकृत्ये अनुसन्धेयम् । तथा वायुपुराणे ।
"यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
कार्त्तिकं सकलं व्याप्य प्रातःस्नायी भवेन्नरः" ॥ * ॥

तथा च गारुडे ।

"गवामयुतदानेन यत् फलं लभते खग ! ।
तुलसीपत्रकैकेन तत् फलं कार्त्तिके स्मृतम्" ॥
ॐ अद्येत्यादि तुलसीपत्रैकैकसमसख्यायुतधेनुदानजन्यफलसमफलप्राप्तिकामः एतानि तुलसीपत्राणि श्रीविष्णवेऽहं ददे । इत्यभिलप्य एतानि तुलसीपत्राणि श्रीविष्णवे नमः । इत्यनेन दद्यात् ॥ * ॥

ब्रह्माण्डपुराणे ।

"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः ॥
ॐ दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥

लोलया लक्ष्म्या ।

"इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चाक्षयफलं लभेत्" ॥
स्नानवत् । ॐ अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा अक्षयदीपदानफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा आकाशे मण्डपे वापि श्रीविष्णवे दीपदानमहं करिष्ये । इति सकल्प्य दामोदरायेत्यादिना दद्यात् । द्वितीयादिदिने ॐ दामोदरायेत्यनेनेति विशेषः । विष्णुगृहे तु । ॐ अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्माग्निष्टोमसहस्रजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीविष्णुवेश्मनि श्रीविष्णवे दीपदानमहं करिष्ये । इति सकल्प्य ॐ दामोदरायेत्यादिना दद्यात् । द्वितीयादिदिने ॐ दामोदरायेत्यनेनेति विशेषः ॥ * ॥

हविष्यान्नादौ तु ब्रह्मपुराणे ।

"व्रतोपवासनियमैः कार्त्तिको यस्य गच्छति ।
देवो वैमानिको भूत्वा स याति परमं पदम्" ॥
तत्र अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा वैमानिकदेवत्वभवनपूर्व्वकपरमपदप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा हविष्येतरभोजननिवृत्तिमहं करिष्ये । इत्यादिवाक्ये विशेषः । एवं फलाहारादावपि ॥ * ॥ हविष्यद्रव्याणि च ।
"हैमन्तिकं सिताखिन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
तिन्तिडी जीरकञ्चैव नागरङ्गञ्च पिप्पली ॥
कदली लवली धात्री फलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्यान्नं विदुर्व्बुधाः" ॥
हैमन्तिकमित्यभिधायागस्त्यसंहितायाम् ।
"नारिकेलफलञ्चैव कदलीं लवलीन्तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकीम् ॥
व्रतान्तरप्रशस्तञ्च हविष्यं मन्वते बुधाः" ।
अत्र च आरब्धव्रतोपवासादौ फलजलादिभक्षणमप्याहतुरुद्योगपर्व्ववौधायनौ ।
"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम्" ॥ * ॥
फलाहारादावपि तुलसीराहित्ये दोषमाह ।
"तुलसीं विना या क्रियते न पूजा
स्नानं न तद्यत् तुलसीं विना कृतम् ।
भुक्तं न तद्यत् तुलसीविवर्ज्जितं
पीतं न तद्यत्तुलसीविवर्ज्जितम्" ॥ * ॥

नारदीये ।

"न मात्स्यं भक्षयेन्मासं न कौर्म्मं नान्यदेव हि ।
चण्डालो जायते राजन् कार्त्तिके मांसभक्षणात्" ॥

तथा च महाभारते ।

"कौमुदन्तु विशेषेण शुक्लपक्षे नराधिप ! ।
वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते" ॥
कौमुदं कार्त्तिकम् । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।
"एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं शीतलासु नदीषु च ।
वर्ज्जितव्या तथा हिंसा मांसभोजनमेव च" ॥
ततश्च मांसभोजननिषेधे कार्त्तिकमासतत्शुक्लपक्षतदेकादश्यादिपञ्चदिनानि शुक्लाशुक्लभेदात् पापतारतम्याद्वा निषिद्धानि ।
"कार्त्तिके शौकरं मांसं यस्तु भुञ्जीत दुर्म्मतिः ।
षष्टिवर्षसहस्राणि रौरवे परिपच्यते" ॥ अथ पटोलकदम्बवृन्ताककास्यसन्धितानि वर्ज्जयेत् ।
"पटोलानि कदम्बानि वृन्ताकसहितानि च ।
भुञ्जानः कार्त्तिके मासि यावदाहूतनारकी" ॥ * ॥
भूतचतुर्द्दशीकृत्यं तत्शब्दे द्रष्टव्यम् । तत्र दीपदाने विशेषो यथा,—
"ततः प्रदोषसमये दीपान्दद्यात् प्रयत्नतः ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ।
कूटागारेषु चैत्येषु गृहासु च नदीषु च" ॥

दीपदानमन्त्रः ।

"ॐ नमः पितृभ्यः प्रेतेभ्यो नमो धर्म्माय विष्णवे ।
नमो धर्म्माय रुद्राय कान्तारपतये नमः" ॥ * ॥
दीपान्विताकृत्यं तत्शब्दे द्रष्टव्यम् । तत्र विशेषो यथा । तत्र बालातुरवृद्धव्यतिरेकेण दिवा न भोक्तव्यम् । तत्र पार्व्वणश्राद्धं कृत्वा प्रदोषे प्राचीनावीती दक्षिणामुखो ज्वलदुल्काम् ।
"ॐ शस्त्राशस्त्रहतानाञ्च भूतानां भूतदर्शयोः ।
उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना" ॥
इत्यनेन गृह्णीयात् ।
"ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम्" ॥
इत्यनेन भूमौ स्थापयेत् ।
"ॐ यमलोकं परित्यज्य आगता ये महालये ।
उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते" ॥
इत्यनेन पितॄन् विसर्ज्जयेत् । यद्येवं पूर्व्वदिन एव प्रदोषव्यापिन्यमावास्या तदा पूर्व्वदिन एव श्राद्धमकृत्वापि उल्कादानं कर्त्तव्यम् । आचारात् पञ्चभूतोपाख्यानञ्च श्रोतव्यम् । उभयतः प्रदोषव्याप्तौ परदिन एव युग्मात् । उभयतः प्रदोषाप्राप्तावपि उल्कादानं परदिने पार्व्वणानुरोधात् । अत्रैव पूर्व्वदिने लक्ष्मीः रात्रौ पूज्या ।
"अमावस्या यदा रात्रौ दिवाभागे चतुर्द्दशी ।
पूजनीया तदा लक्ष्मीर्व्विज्ञेया सुखरात्रिका" ॥
इति वचनात् । लक्ष्मीपूजाविषयेऽप्येवं व्यवस्था । ततो गृहमध्ये उत्तराभिमुखो लक्ष्मीं पूजयेत् । ततः स्वस्तिवाचनपूर्व्वकं ॐ सूर्य्यः सोमः इति ॐ तद्विष्णोरिति च पठित्वा तिलपुष्पजलान्यादाय ॐ तत्सदित्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा परमविभूतिलाभकामो लक्ष्मीपूजनमहं करिष्ये । इति सकल्प्य शालग्रामे घटादिस्थजले वा भूतशुद्ध्यादिकं कृत्वा लक्ष्मीं पूजयेत् । तद्यथा । ॐ पाशाक्षमालिकाम्भोज इत्यादिना ध्यात्वा । ॐ भूर्भुवः स्वर्म्महालक्ष्मि ! इहागच्छ इत्याद्यावाह्य एतत्पाद्यं ॐ लक्ष्म्यै नमः । एवमर्घ्याचमनीयगन्धपुष्पधूपदीपनैवेद्यपुनराचमनीयताम्बूलादि प्रत्येकं दद्यात् ।
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ! ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्" ॥
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ।

ॐ विश्वरूपस्य भार्य्यासि पद्मे पद्मालये। शुभे!।
सर्व्वतः पाहि मां देवि महालक्ष्मि। नमोऽस्तु ते" ॥
तत। "सुखरात्र्यां प्रदोषे तु कुवेरं पूजयन्ति ये" ॥
इति रुद्रधरवचनात्। कुवेरमपि पाद्यादिभिः
पूजयेत्।
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः" ॥
इति पठित्वा। ॐ कुवेराय नमः इति त्रिः पूज-
येत्। ततो गृहादिषु दीपान्दद्यात्। तत्र मन्त्रः।
ॐ अग्निर्ज्योती रविर्ज्योतिश्चन्द्रज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम् ॥
ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुञ्जीत।
तत्र प्रत्यूषे भविष्योक्तं कर्म्म कर्त्तव्यम्। गोरोचना-
तिलकधारणं प्रदीपवन्दनं कृत्वा लक्ष्मीं त्रिः पूज-
येत् ॥ तत्र मन्त्रः।
"ॐ विश्वरूपस्य भार्य्यासि पद्मे पद्मालये। शुभे।।
महालक्ष्मि। नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रि। प्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु ॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
सम्वत्सरप्रिया या च सा ममास्तु सुमङ्गला ॥
माता त्वं सर्व्वलोकानां देवानां दृष्टिसम्भवा।
आख्याता भूतले देवि। सुखरात्रि। नमोऽस्तु ते" ॥
ॐ लक्ष्म्यै नमः इति त्रिः पूजयेत् ॥ अन्यत् सुख-
रात्रिशब्दे द्रष्टव्यम् ॥ * ॥

अथ द्यूतप्रतिपत्। तत्र प्रभाते अक्षक्रीडादिकं
कार्य्यम्। तत्र जयेवर्षं शुभम्। पराजये वर्षम-
शुभम्। ततः सङ्कल्प्य शालग्रामे जले वा एतत्
पाद्यं ॐ बलये नमः। इत्यादि सम्पूज्य।
"ॐ बलिराज। नमस्तुभ्यं विरोचनसुत प्रभो।।
भविष्येन्द्र सुराराते। पूजेयं प्रतिगृह्यताम्" ॥
अनेन पुष्पाञ्जलित्रयं दद्यात्।
"यो यो यादृग्भावेन तिष्ठत्यस्यां युधिष्ठिर।।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि" ॥

तथा।

"महापुण्या तिथिरियं बलिराज्यविवर्द्धिनी।
स्नानं दानं शतगुणं कार्त्तिकेऽस्यां तिथौ भवेत् ॥ * ॥

अथ भ्रातृद्वितीया। तत्राष्टधाविभक्तदिनपञ्चम-
यामार्द्धप्राप्ताया द्वितीयाया उभयदिने तथा
चेत्परदिने कृत्यं युग्मात्। ततः ॐ तत्सदि-
त्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा
स्वरक्षणकामो यमादिपूजनमहं करिष्ये। इति
सङ्कल्प्य शालग्रामे घटादिस्थजले वा पूजयेत्।
एतत् पाद्यं ॐ यमाय नमः। एवं क्रमेण सम्पूज्य।

"एह्येहि मार्त्तण्डज। पाशहस्त।
यमान्तकालोकधरामरेश।।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते" ॥

इदमर्घ्यं ॐ यमाय नमः ततः आचमनीयादिकं
दत्त्वा प्रणमेत्।
"ॐ धर्म्मराज। नमस्तुभ्यं नमस्ते यमुनाग्रज।।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्त्र। नमोऽस्तु ते"।

कार्त्तिकः

ततः ॐ चित्रगुप्ताय नमः। इत्यनेन पूजयेत्। ततः
ॐ यमदूतेभ्यो नमः। इत्यनेन पाद्यादिभिः
पूजयेत्। यमुनाञ्च पाद्यादिभिः सम्पूज्य प्रणमेत्।
"ॐ यमस्वसर्नमस्तेऽस्तु यमुने। लोकपूजिते।
वरदा भव मे नित्यं सूर्य्यपुत्त्रि। नमोऽस्तु ते" ॥
ततो भ्रातृभोजनकाले अन्नादिकं दत्त्वा भगिनी
पठेत्।
"भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम्।
प्रीतये यमराजस्य यमुनाया विशेषतः" ॥
ज्येष्ठा चेत् तवाग्रजाताहमिति वदेत्। ततः
पुष्टिकामो भ्राता भुञ्जीत। "यत्नेन भगिनीह-
स्तात् भोक्तव्यं पुष्टिवर्द्धनं" इति वचनात् ॥ * ॥

विष्णूत्थानं उत्थानैकादशीशब्दे द्रष्टव्यम्। तत्र
कार्त्तिकशुक्लैकादश्यादितिथिपञ्चके बकपञ्चकम्।
"बकोऽपि तत्र नाश्नीयान्मत्स्यञ्चैव कदाचन"।
इति वचनात् ॥ कार्त्तिक्यां गोदानादौ फलाधि-
क्यम्। "कार्त्तिक्यां गोप्रदो भवेत्"। इति वच-
नात्। इति कृत्यतत्त्वम् ॥ * ॥ * ॥ अपि च।
अथ कार्त्तिकव्रतनित्यता। स्कान्दे ब्रह्मनारदसंवादे।
"दुष्प्राप्यं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न हि।
धर्म्मं धर्म्मभृतां श्रेष्ठ। स मातृपितृघातकः ॥
अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम्।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः ॥
स ब्रह्महा स गोघ्नश्च स्वर्णस्तेयी सदानृती।
न करोति मुनिश्रेष्ठ। यो नरः कार्त्तिके व्रतम् ॥
विधवा च विशेषेण व्रतं यदि न कार्त्तिके।
करोति मुनिशार्दूल। नरकं याति सा ध्रुवम् ॥
व्रतन्तु कार्त्तिके मासि यदा न कुरुते गृही।
इष्टापूर्त्तं वृथा तस्य यावदाहूतनारकी ॥
सम्प्राप्ते कार्त्तिके मासे द्विजो व्रतपराङ्मुखः।
भवन्ति विमुखाः सर्व्वे तस्य देवाः सवासवाः ॥
इष्ट्वा च बहुभिर्यज्ञैः कृत्वा श्राद्धशतानि च।
स्वर्गं नाप्नोति विप्रेन्द्र। अकृत्वा कार्त्तिके व्रतम् ॥
यतिश्च विधवा चैव विशेषेण वनाश्रमी।
कार्त्तिके नरकं यान्ति अकृत्वा वैष्णवं व्रतम् ॥
वेदैरधीतैः किं तस्य पुराणपठनैश्च किम्।
कृतं यदि न विप्रेन्द्र। कार्त्तिके वैष्णवं व्रतम् ॥
जन्मप्रभृति यत्पुण्यं विधिवत्समुपार्ज्जितम्।
भस्मी भवति तत्सर्व्वमकृत्वा कार्त्तिके व्रतम् ॥
यद्दत्तञ्च परं जप्तं कृतञ्च सुमहत्तपः।
सर्व्वं विफलतामेति अकृत्वा कार्त्तिके व्रतम् ॥
सप्तजन्मार्ज्जितं पुण्यं वृथा भवति नारद।।
अकृत्वा कार्त्तिके मासि वैष्णवं व्रतमुत्तमम् ॥
पापभूतास्तु ते ज्ञेया लोके मर्त्त्या महामुने।।
वैष्णवाख्यं व्रतं यैस्तु न कृतं कार्त्तिके शुभम्" ॥

किञ्च।

"अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः।
जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद।" ॥

किञ्च।

"नियमेन विना चैव यो नयेत् कार्त्तिकं मुने।।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कुलाधमः" ॥

किञ्च।

कार्त्तिकः

"पिण्डदानं पितॄणाञ्च पितृपक्षे न वै कृतम्।
व्रतं न कार्त्तिके मासि श्रावण्यामृषितर्पणम् ॥
चैत्रे नान्दोलितो विष्णुर्म्माघस्नानं न सञ्जते।
न कृता महती पुष्ये श्रवणे रोहिण्यष्टमी ॥
सङ्गमे न कृता येन द्वादशी श्रवणान्विता।
कुत्र यास्यन्ति ते मूढा नाहं जानामि नारद।" ॥
पाद्मे च। श्रीशौनकादिमुनिगणसंवादे।
"मानुषं कर्म्मभूमौ यः कार्त्तिकं नयते मुधा
चिन्तामणिं करे प्राप्य क्षिपते कर्द्दमाम्बुनि ॥
नियमेन विना विप्रा कार्त्तिकं यः क्षिपेन्नरः।
कृष्णः पराङ्मुखस्तस्य यस्मादूर्ज्जोऽस्य वल्लभः" ॥ * ॥
तत्र विशेषेण स्नानदानादिसत्कर्म्मनित्यता।

स्कान्दे तत्रैव।

"येन दत्तं हुतं जप्तं न स्नानं न हरेर्व्रतम्।
न कृतं कार्त्तिके पुत्त्र। द्विजास्ते वै नराधमाः"।

किञ्च।

"येन दत्तं हुतं जप्तं कार्त्तिके न व्रतं कृतम्।
तेनात्मा हारितो नूनं न प्राप्तं प्रार्थितं फलम्"।

किञ्च।

"सम्प्राप्ते कार्त्तिके मासि ये रता न जनार्द्दने।
तेषां सौरिपुरे वासः पितृभिः सह नारद" ॥

किञ्च।

"कार्त्तिके नार्च्चितो यैस्तु भक्तिभावेन केशवः।
नरकं ते गमिष्यन्ति यमदूतैस्तु यन्त्रिताः ॥
जन्मकोटिसहस्रैस्तु मानुष्यं प्राप्य दुर्लभम्।
कार्त्तिके नार्च्चितो विष्णुर्हारितं तेन जन्म वै ॥
विष्णोः पूजा कथा विष्णोर्वैष्णवानाञ्च दर्शनम्।
न भवेत् कार्त्तिके यस्य हन्ति पुण्यं दशाब्दिकम्" ॥

अथ कार्त्तिकमाहात्म्यम्। स्कान्दे।

"कार्त्तिकस्य तु माहात्म्यं प्राक् सामान्येन लिख्यते।
ततो विशेषतस्तत्र कर्म्म देशादिभेदतः" ॥

अथ सामान्यतः स्कान्दे तत्रैव।

"कार्त्तिकस्य तु मासस्य कोट्यंशेनापि नार्हति।
सर्व्वतीर्थेषु यत् स्नानं सर्व्वदानेषु यत् फलम् ॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः।
एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले ॥
मेरुतुल्यसुवर्णानि सर्व्वदानानि चैकतः।
एकतः कार्त्तिको वत्स। सर्व्वदा केशवप्रियः ॥
यत् किञ्चित् क्रियते पुण्यं विष्णुमुद्दिश्य कार्त्तिके
तदक्षयं भवेत्सर्व्वं सत्योक्तं तव नारद। ॥
कार्त्तिकः खलु वै मासः सर्व्वमासेषु चोत्तमः।
पुण्यानां परमं पुण्यं पावनानाञ्च पावनम् ॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद।।
उदधीनाञ्च विप्रर्षे। क्षयो नैवोपपद्यते ॥
पुण्यं कार्त्तिकमासे तु यत् किञ्चित् क्रियते मुने।।
न तस्यास्ति क्षयो ब्रह्मन् पापस्याप्येवमेव च ॥
न कार्त्तिकसमो मासो न कृतेन समं युगम्।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् ॥
कार्त्तिकः प्रवरो मासो वैष्णवानां प्रियः सदा।
कार्त्तिकं सकलं यस्तु भक्त्या सेवेत वैष्णवः ॥
पितॄनुद्धरते सर्व्वान् नरकस्थान् महामुने" ।।

पाद्मे च तत्रैव।

"द्वादशस्वपि मासेषु कार्त्तिक कृष्णवल्लभः।
तस्मिन् सपूजितो विष्णुरल्पकैरप्युपायनैः॥
ददाति वैष्णवं लोकमित्येव निश्चितं मया।
यथा दामोदरो भक्तवत्सलो विदितो जनैः॥
तस्यायन्तादृशो मास स्वल्पमप्युरुकारक।
दुर्ल्लभो मानुषो देहो देहिना क्षणभङ्गुर॥
तत्रापि दुर्ल्लभ काल' कार्त्तिको हरिवल्लभ।
दीपेनापि हि यत्रासौ प्रीयते हरिरीश्वर॥
सुगतिञ्च ददात्येव परदीपप्रबोधनात्"॥*॥
अथ व्रतमाहात्म्य स्कान्दे तत्रैव।
"व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम्।
कार्त्तिके तु व्रतस्योक्तं फलं जन्मशतानुगम्॥
अक्रूरतीर्थे विप्रेन्द्र। कार्त्तिक्या समुपोष्य च।
स्नात्वा यत् फलमाप्नोति तत्कृत्वा वैष्णव व्रतम्॥
वाराणस्या कुरुक्षेत्रे नैमिषे पुष्करेऽर्व्बुदे।
गत्वा यत् फलमाप्नोति व्रतं कृत्वा तु कार्त्तिके॥
अनिष्ट्वा च सदा यज्ञैर्न कृत्वा पितृभि स्वधाम्।
व्रतेन कार्त्तिके मासि वैष्णवन्तु पद व्रजेत्॥
प्रवृत्तानाञ्च भक्ष्याणा कार्त्तिके नियमे कृते।
अवश्य कृष्णरूपत्व प्राप्यते मुक्तिद शुभम्"॥
किञ्च।
"ब्राह्मण' क्षत्त्रियो वैश्य' शूद्रो वा मुनिसत्तम।।
वियोनि न व्रजत्येव व्रत कृत्वा तु कार्त्तिके"॥
किञ्च।
"कार्त्तिके मुनिशार्दूल। स्वशक्त्या वैष्णवं व्रतम्।
य करोति यथोक्तन्तु मुक्तिस्तस्य करे स्थिता॥
सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते।
क्रियमाणे व्रते नृणा स्वल्पेऽपि स्यान्महाफलम्"॥*॥
अथ कर्म्मविशेषमाहात्म्यम्। स्कान्दे तत्रैव।
"दान दत्त हुत जप्त तपश्चैव तथा कृतम्।
तदक्षयफलं प्रोक्त कार्त्तिके च द्विजोत्तम"।॥
किञ्च।
"यत् किञ्चित् कार्त्तिके दत्त विष्णुमुद्दिश्य मानवैः।
तदक्षय लभ्यते वै अन्नदान विशेषत"॥
किञ्च।
"यस्तु सम्वत्सरं पूर्णमग्निहोत्रमुपासते।
कार्त्तिके स्वस्तिक कृत्वा सममेतन्न सशय॥
कार्त्तिके या करोत्येव केशवालयमण्डलम्।
स्वर्गस्था शोभते सा तु कपोती पक्षिणी यथा॥
य करोति नरो नित्य कार्त्तिके पत्रभोजनम्।
न स दुर्गतिमाप्नोति यावदिन्द्राश्चतुर्द्दश॥
जन्मप्रभृति यत्पाप मानवैश्च कृत भवेत्।
तत्सर्व्व नाशमाप्नोति ब्रह्मपत्रेषु भोजनात्॥
सर्व्वकामफल तस्य सर्व्वतीर्थफल लभेत्।
न वापि नरक पश्येत्ब्रह्मपत्रेषु भोजनात्॥
ब्रह्म चैष स्मृत साक्षात् पलाश सर्व्वकामद।
मध्यम वर्ज्जितं पत्रं शूद्रस्य मुनिसत्तम।॥
भुङ्क्तेनरकमाप्नोति यावदिन्द्राश्चतुर्द्दश।
तिलदान नदीस्नान सत्कथा साधुसेवनम्॥
भोजन ब्रह्मपत्रेष कार्त्तिके मुक्तिदायकम्।
जागरं कार्त्तिके मासि य करोत्यरुणोदये॥
दामोदराग्रे विप्रेन्द्र। गोसहस्रफल लभेत्।।
जागरं पश्चिमे यामे य करोति महामुने'॥
कार्त्तिके सन्निधौ विष्णोस्तत्पद करसस्थितम्।
साधुसेवा गवा ग्रास' कथा विष्णोरथार्च्चनम्।
जागर पश्चिमे यामे दुर्ल्लभ' कार्त्तिके कलौ"॥
किञ्च।
"जलधेनुसहस्रञ्च वृषसस्थे दिवाकरे।
तोयं दत्त्वा यदाप्नोति स्नानं कृत्वा तु कार्त्तिके॥
सन्निहत्या कुरुक्षेत्रे राहुग्रस्ते दिवाकरे।
सूर्य्यवारेण यत्स्नानं तदेकाहेन कार्त्तिके॥
पितृनुद्दिश्य यद्दत्तं कार्त्तिके कृष्णवल्लभे।
अन्नोदकं मुनिश्रेष्ठ। अक्षय जायते नृणाम्"॥*॥
किञ्च।
"गीतशास्त्रविनोदेन कार्त्तिकं यो नयेन्नर।
न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय।"॥
किञ्च।
"प्रदक्षिणञ्च य' कुर्य्यात् कार्त्तिके विष्णुसद्मनि।
पदे पदेऽश्वमेधस्य फलभागी भवेन्नर॥
गीत वाद्यञ्च नृत्यञ्च कार्त्तिके पुरतो हरे।
य करोति नरो भक्त्या लभते चाक्षयं फलम्॥
हरेर्नाम सहस्राख्यं गजेन्द्रस्य च मोक्षणम्।
कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते॥
कार्त्तिके पश्चिमे यामे स्तव गान करोति य।
वसते श्वेतद्वीपे तु पितृभि सह नारद।॥
नैवेद्यदानेन तु हरे कार्त्तिके यवसख्यया।
युगानि वसते स्वर्गे तावन्ति मुनिसत्तम।॥
अगुरुन्तु सकर्पूरं यो दहेत् केशवाग्रत।
कार्त्तिके तु मुनिश्रेष्ठ। युगान्ते न पुनर्भव"॥
किञ्च।
"नियमेन कथा विष्णोर्ये शृण्वन्ति च भाविता।
श्लोकार्द्धं श्लोकपाद वा कार्त्तिके गोशतं फलम्॥
सर्व्वधर्म्मान् परित्यज्य कार्त्तिके केशवाग्रत।
शास्त्रस्योच्चारणं पुण्य श्रोतव्यञ्च महामुने।॥
श्रेयसा लोभबुद्ध्या वा य करोति हरे कथाम्।
कार्त्तिके मुनिशार्दूल। कुलाना तारयेच्छतम्॥
नित्य शास्त्रविनोदेन कार्त्तिक य क्षिपेन्नर।
निर्द्दहेत् सर्व्वपापानि यज्ञायुतफल लभेत्॥
न तथा तुष्यते दानैर्न यज्ञैर्गोगजादिकैः।
यथाशास्त्रकथालापैः कार्त्तिके मधुसूदन॥
कार्त्तिके मुनिशार्दूल। य शृणोति हरे कथाम्।
स निस्तरति दुर्गाणि जन्मकोटिशतानि च॥
य पठेत् प्रयतो नित्य श्लोक भागवत मुने।।
अष्टादशपुराणाना कार्त्तिके फलमाप्नुयात्"॥
किञ्च।
"सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नर।
कार्त्तिके परया भक्त्या वैष्णवै' सह संवसेत्"॥
पाद्मे च तत्रैव।
"कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक्।
पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत्॥
स सर्व्वपातक हित्वा वैकुण्ठे हरिसन्निधौ।
मोदते विष्णुसदृशो भजनानन्दनिर्वृत"॥
किञ्च।
"कार्त्तिकं सकलं मास प्रात स्नायी जितेन्द्रिय।
जपन् हविष्यभुक् दान्त' सर्व्वपापै' प्रमुच्यते॥
कार्त्तिकन्तु नरो मास य कुर्य्यादेकभोजनम्।
शूरश्च बहुवीर्य्यश्च कीर्त्तिमाश्च स जायते"॥
किञ्च।
"पलाशपत्रभोजी च कार्त्तिके पुरुषो नर।
निष्पाप' स्यात्तु नैवेद्य हरेर्भुक्त्वा विमुच्यते॥
मध्यस्थमैश्वरं पत्र वर्जयेद्ब्राह्मणेतर:"।
किञ्च।
"अपराधसहस्राणि पातकानि महान्त्यपि।
क्षमतेऽस्य हरिर्द्देव' पूजित कार्त्तिके प्रभु॥
नैवेद्य पायस विष्णो प्रिय खण्ड घृतान्वितम्।
विभज्य तच्च भुञ्जानो यज्ञसाम्यं दिने दिने"॥
तत्रैव श्रीकृष्णसत्या सवादे।
"स्नान जागरण दीप तुलसीवनपालनम्।
कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तय॥
इत्थ दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते।
देवानामपि ते वन्द्या किर्यैराजन्मतत् कृतम्"॥*॥
तत्रैव कार्त्तिकव्रताङ्गानि।
"हरिजागरणं प्रात स्नानं तुलसिसेवनम्।
उद्यापनं दीपदान व्रतान्येतानि कार्त्तिके"॥
किञ्च।
"पञ्चभिर्व्रतकैरेभिः सम्पूर्णा कार्त्तिके व्रती।
फलमाप्नोति तत् प्रोक्त भुक्तिमुक्तिफलप्रदम्॥
विष्णो शिवस्य वा कुर्य्यादालये हरिजागरम्।
कुर्य्यादश्वत्थमूले वा तुलसीना वनेषु च॥
आपद्गतो यदाप्यम्भो न लभेत् सवनाय स।
व्याधितो वा पुन कुर्य्याद्विष्णोर्न्नामापमार्ज्जनम्॥
उद्यापनविधि कर्त्तुमशक्तो यो व्रते स्थित।
ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे॥
अशक्तो दीपदानस्य परदीपान् प्रबोधयेत्।
तेषा वा रक्षण कुर्य्याद्वातादिभ्य प्रयत्नत॥
अभावे तुलसीनाञ्च पूजयेद्वैष्णव द्विजम्।
सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणाना गवामपि॥
सेवा वा बोधिवटयोर्व्रतसम्पूर्णहेतवे"॥*॥
अथ दीपदानमाहात्म्यम्। स्कान्दे तत्रैव।
"कृत्वा कोटिसहस्राणि पातकानि बहून्यपि।
निमेषार्द्धेनदीपस्य विलय यान्ति कार्त्तिके"॥
किञ्च।
"शृणु दीपस्य माहात्म्य कार्त्तिके केशवप्रियम्।
दीपदानेन विप्रेन्द्र। न पुनर्जायते भुवि॥
रविग्रहे कुरुक्षेत्रे नर्म्मदाया शशिग्रहे।
तत् फल कोटिगुणितं दीपदानेन कार्त्तिके॥
घृतेन दीपको यस्य तिलतैलेन वा पुन।
ज्वलते मुनिशार्दूल। अश्वमेधेन तस्य किम्॥
मन्त्रहीन क्रियाहीन शौचहीन जनार्द्दने।
सर्व्वं सम्पूर्णता याति कार्त्तिके दीपदानत॥
तेनेष्टं क्रतुभि सर्व्वैं कृतं तीर्थावगाहनम्।
दीपदान कृत येन कार्त्तिके केशवाग्रतः॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले।
यावन्न ज्वलते ज्योति कार्त्तिके केशवाग्रत'॥
श्रूयते चापि पितृभिर्गाथा गीता पुरा द्विज।।
भविष्यति कुलेऽस्माक पितृभक्त सुतो भुवि॥

कार्त्तिके दीपदानेन यस्तोषयति केशवम् ।
मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः" ॥
किञ्च ।
"मेरुमन्दरमात्राणि कृत्वा पापान्यशेषतः ।
दह्यते नात्र सन्देहो दीपदानात्तु कार्त्तिके ॥
गृहे वायतने वापि दीपं दद्याच्च कार्त्तिके ।
पुरतो वासुदेवस्य महाफलविधायिनः ॥
स जातो मानुषो लोके स धन्यः स च कीर्त्तिमान् ।
प्रदत्तः कार्त्तिके मासि दीपो वै मधुहाग्रतः ॥
निमिषार्द्धार्द्धमात्रेण दीपदानेन कार्त्तिके ।
न तत् क्रतुशतैः प्राप्यं फलं तीर्थशतैरपि ॥
सर्व्वानुष्ठानहीनोऽपि सर्व्वपापरतोऽपि सन् ।
पूयते नात्र सन्देहो दीपं दत्त्वा तु कार्त्तिके ॥
तन्नास्ति पातकं किञ्चित् त्रिषु लोकेषु नारद ! ।
यन्न शोधयते दीपः कार्त्तिके केशवाग्रतः ॥
पुरतो वासुदेवस्य दीपं दत्त्वा तु कार्त्तिके ।
प्राप्नोति शाश्वतं स्थानं सर्व्वाबाधाविवर्ज्जितम् ॥
यः कुर्य्यात् कार्त्तिके मासि कर्पूरेण तु दीपकम् ।
द्वादश्याञ्च विशेषेण तस्य पुण्यं वदामि ते ॥
कुले तस्य प्रसूता ये ये भविष्यन्ति नारद ! ।
समतीताश्च ये केचिद् येषां सङ्ख्या न विद्यते ॥
क्रीडित्वा सुचिरं कालं देवलोके यदृच्छया ।
ते सर्व्वे मुक्तिमायान्ति प्रसादाच्चक्रपाणिनः" ॥
किञ्च ।
"घृतव्यालेन विप्रेन्द्र ! कार्त्तिके केशवालयम् ।
द्योतयेद् यो महाभाग ! पुनात्यासप्तमं कुलम् ॥
कार्त्तिके दीपदानन्तु कुर्य्याद् यो वैष्णवालये ।
धनं पुत्त्रो यशः कीर्त्तिर्भवेत्तस्य च सर्व्वदा ॥
यथा च मथनाद्वह्निः सर्व्वकाष्ठेषु दृश्यते ।
तथा च दृश्यते धर्म्मो दीपदाने न संशयः" ॥
किञ्च ।
"निर्द्धनेनापि विप्रेन्द्र ! कृत्वा चैवात्मविक्रयम् ।
कर्त्तव्यं दीपदानन्तु यावत् कार्त्तिकपूर्णिमा ॥
वैष्णवो न स मन्तव्यः सम्प्राप्ते कार्त्तिके मुने ! ।
यो न यच्छति मूढात्मा दीपं केशवसद्मनि" ॥
नारदीये श्रीरुक्माङ्गदमोहिनीसंवादे ।
"एकतः सर्व्वदानानि दीपदानानि चैकतः ।
कार्त्तिके न समं प्रोक्तं दीपदो ह्यधिकः स्मृतः" ॥
पाद्मे च तत्रैव ॥
"कार्त्तिके खण्डदीपं यो ददाति हरिसन्निधौ ।
दिव्यकान्तिविमानाग्रे रमते स हरेः पुरे" ॥ * ॥
अथ तत्र परदीपप्रबोधनमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"पितृपक्षेऽन्नदानेन ज्यैष्ठाषाढे च वारिणा ।
कार्त्तिके तत् फलं पुंसां परदीपप्रबोधनात् ॥
बोधनात् परदीपस्य वैष्णवानाञ्च सेवनात् ।
कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः ॥
दीयमानन्तु ये दीपं बोधयन्ति हरेर्गृहे ।
परेण नृपशार्दूल ! निस्तीर्णा यमयातना ॥
न तद्भवति विप्रेन्द्र ! इष्टेनापि महामखैः ।
कार्त्तिके यत् फलं प्रोक्तं परदीपप्रबोधनात् ॥
एकादश्यां परैर्दत्तं दीपं प्रज्वाल्य मूषिका ।
मानुष्यं दुर्ल्लभं प्राप्य परां गतिमवाप सा" ॥ * ॥
अथ शिखरदीपमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"यदा यदा भासयते दीपकः कलसोपरि ।
तदा तदा मुनिश्रेष्ठ ! द्रवते पापसञ्चयः ॥
यो ददाति द्विजातिभ्यो महीमुदधिमेखलाम् ।
हरेः शिखरदीपस्य कलां नार्हति षोडशीम् ॥
यो ददाति गवां कोटिं सवत्सां क्षीरसंयुताम् ।
हरेः शिखरदीपस्य कलां नार्हति षोडशीम् ॥
सर्व्वस्वदानं कुरुते वैष्णवानां महामुने ! ।
शिखरोपरि दीपस्य कलां नार्हति षोडशीम्" ॥
किञ्च ।
"यः करोति परं दीपं मूल्येनापि महासने ! ।
शिखरोपरि मध्ये च कुलानां तारयेच्छतम् ॥
विमानं ज्योतिषा दीप्तं ये निरीक्षन्ति कार्त्तिके ।
केशवस्य महाभक्त्या कुले तेषां न नारकी ॥
दिवि देवा निरीक्षन्ते विष्णुदीपप्रदं नरम् ।
कदा भविष्यत्यस्माकं सङ्गमः पुण्यकर्म्मणा ॥
कार्त्तिके कार्त्तिकीं यावत् प्रासादोपरि दीपकम् ।
यो ददाति मुनिश्रेष्ठ ! तस्येन्द्रत्वं न दुर्ल्लभम्" ॥ * ॥
अथ तत्र दीपमालामाहात्म्यम् ।
स्कान्दे तत्रैव ।
"दीपपङ्क्तेस्तु रचनां सबाह्याभ्यन्तरे हरेः ।
विष्णोर्विमाने कुरुते स नरः शङ्खचक्रधृक् ॥
दीपपङ्क्तेस्तु रचनां कुरुते केशवालये ।
तस्यालये प्रसूतानां लक्षाणां नरकं न हि ॥
विष्णोर्व्विमानं दीपाढ्यं सबाह्याभ्यन्तरे मुने ! ।
दीपोद्यतकरे मार्गे तेन प्राप्तं परं पदम्" ॥
भविष्ये च ।
"यः कुर्य्यात् कार्त्तिके मासि शोभनां दीपमालिकाम् ।
प्रबोधे चैव द्वादश्यामेकादश्यां विशेषतः ॥
सूर्य्यायुतप्रकाशस्तु तेजसा भासयन् दिशः ।
तेजोराशिविमानस्थो जगदुद्योतयन् त्विषा ॥
यावत्प्रदीपसङ्ख्या तु घृतेनापूर्य्य बोधिता ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते" ॥ * ॥
अथ आकाशादिदीपमाहात्म्यम् ।
पाद्मे तत्रैव ।
"उच्चैः प्रदीपमाकाशे यो दद्यात् कार्त्तिके नरः ।
सर्व्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
विष्णुकेशवमुद्दिश्य दीपं दद्यात्तु कार्त्तिके ।
आकाशस्थं जलस्थञ्च शृणु तस्यापि यत्फलम् ॥
धनं धान्यं समृद्धिञ्च पुत्त्रवानीश्वरो गृहे ।
लोचने च शुभे तस्य विद्वानपि च जायते" ॥
किञ्च ।
"विप्रवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥
चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ॥
दीपदानाद्धि सर्व्वत्र महाफलमवाप्नुयात्" ॥ * ॥
आकाशदीपदानमन्त्रः । तत्रैव ।
"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥
अथ देशविशेषे कार्त्तिकमाहात्म्यविशेषः ॥
पाद्मे तत्रैव ।
"यत्र कुत्रापि देशेऽपि कार्त्तिकः स्नानदानतः ।
अग्निहोत्रसमफलः पूजायाञ्च विशेषतः ॥
कुरुक्षेत्रे कोटिगुणो गङ्गायाञ्चापि तत्समः ।
ततोऽधिकः पुष्करे स्याद्द्वारकायाञ्च भार्गव ! ॥
कृष्णसालोक्यदो मासः पूजास्नानैश्च कार्त्तिकः ।
अन्याः पुर्य्यस्तत्समाना मुनयो मथुरां विना ॥
दामोदरत्वं हि हरेस्तत्रैवासीद्यतः किल ।
मथुरायां ततस्तूर्ज्जो वैकुण्ठप्रीतिवर्द्धनः ।
कार्त्तिको मथुरायां वै परमावधिरिष्यते ।
यथा माघे प्रयागः स्याद्वैशाखे जाह्नवी यथा ॥
कार्त्तिके माथुरं सेव्यं ततोत्कर्षः परो न हि ॥
मथुरायां नरैरूर्ज्जे स्नात्वा दामोदरोऽर्च्चितः ।
कृष्णरूपा हि ते ज्ञेया नात्र कार्य्या विचारणा ॥
दुर्ल्लभः कार्त्तिको विप्र ! मथुरायां नृणामिह ।
यत्रार्च्चितः स्वकं रूपं भक्तेभ्यः सम्प्रयच्छति ॥
भुक्तिं मुक्तिं हरिर्दद्यादर्च्चितोऽन्यत्र सेविनाम् ।
भक्तिञ्च न ददात्येष यतो वश्यकरी हरेः ॥
सा त्वञ्जसा हरेर्भक्तिर्लभ्यते कार्त्तिके नरैः ।
मथुरायां सकृदपि श्रीदामोदरपूजनात् ॥
मन्त्रद्रव्यविहीनञ्च विधिहीनञ्च पूजनम् ।
मन्यते कार्त्तिके देवो मथुरायां सदर्च्चनम् ॥
यस्य पापस्य युज्येत मरणान्ता हि निष्कृतिः ।
तच्छुद्ध्यर्थमिदं प्रोक्तं प्रायश्चित्तं सुनिश्चितम् ।
कार्त्तिके मथुरायां वै श्रीदामोदरपूजनम् ॥
कार्त्तिके मथुरायां वै पूजनाद्दर्शनं ध्रुवः ।
शीघ्रं सम्प्राप्तवान् बालो दुर्ल्लभं योगतत्परैः ॥
सुलभा मथुरा भूमौ प्रत्यब्दं कार्त्तिकस्तथा ।
तथापि संसरन्तीह नरा मूढा भवाम्बुधौ ॥
किं यज्ञैः किं तपोभिश्च तीर्थैरन्यैश्च सेवितैः ।
कार्त्तिके मथुरायाञ्चेदर्च्च्यते राधिकाप्रियः ॥
यानि सर्व्वाणि तीर्थानि नदा नद्यः सरांसि च ।
कार्त्तिके निवसन्त्यत्र माथुरे सर्व्वमण्डले ॥
कार्त्तिके जन्मसदने केशवस्य च ये नराः ।
सकृत्प्रविष्टाः श्रीकृष्णं ते यान्ति परमव्ययम् ॥
परोपहासमुद्दिश्य कार्त्तिके हरिपूजया ।
मथुरायां लभेद्भक्तिं किं पुनः श्रद्धया नरः" ॥ इति ॥
"इत्थं कार्त्तिककृत्यानि व्यक्तान्येव स्वतोऽभवन् ।
तत्र किञ्चिद्विशेषेण तद्विधिर्लिख्यतेऽधुना" ॥ * ॥
अथ कार्त्तिककृत्यविधिः । तत्रोपक्रमकालस्तत्र
श्रीकृष्णसत्यभामासंवादीयकार्त्तिकमाहात्म्ये ।
"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः ॥
नित्यं जागरणायान्ते यामे रात्रेः समुत्थितः ।
शुचिर्भूत्वा प्रबोध्याथ स्तोत्रैर्नीराजयेत् प्रभुम् ॥
निरूप्य वैष्णवान् धर्म्मान् वैष्णवैः सह हर्षितः ।
कृत्वा गीतादिकं प्रातर्देवं नीराजयेत् पुनः ॥
नद्यादौ च ततो गत्वाचम्य सङ्कल्पमाचरेत् ।
प्रभुं प्रार्थ्याथ तस्मै च दद्यादर्घ्यं यथाविधि ॥
तत्र सङ्कल्पमन्त्रः ।
"कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ।

"अमावास्या तृतीया च सा उपोष्या परान्विता" ॥
इति । चतुर्द्दशीविद्धानिषेधश्च निगमे ।
"भूतविद्धा त्वमावास्या निष्फला स्यात्तु यत्त्विदम्"।
स्कान्देऽपि ।
"भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुङ्गवैः" ॥
अथ शुक्लप्रतिपत्कृत्यम् । स्कान्दे ।
"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः ॥
श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः ।
शुक्लप्रतिपदि प्रातः कार्त्तिकेऽर्च्च्योऽत्र वैष्णवैः" ॥
"प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्"। इति
क्वचित् पाठः । तस्मात्तदिदं कर्म्म गोवर्द्धनप्राधा-
न्येन गोप्राधान्येन च ख्यातमप्येकमेव ज्ञेयम् ।
अत्र दिननिर्णयः । यदाह देवलः ।
"प्रतिपद्दर्शसंयोगे क्रीडनन्तु गवां मतम् ।
परविद्धान्तु यः कुर्य्यात् पुत्त्रदारधनक्षयः" ॥
निर्णयामृतधृतपुराणान्तरवचनम् ।
"या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ! ।
पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपते" ॥
ततः प्रातर्गोवर्द्धनं पूज्येति पूर्व्वाह्णतात्पर्य्यकम् ।
द्वितीयासमये तु सर्व्वथा निषिद्धम् ।
तत्रैव । तद्यथा ।
"नन्दायां दर्शने रक्षाबलिदानदशासु च ।
भद्रायां गोकुलक्रीडा देशनाशाय जायते" ॥
पुराणसमुच्चये तु सम्भावितचन्द्रोदयद्वितीयास-
योग एव निषिध्यते ।
"गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून् हन्ति सुरभीपूजकास्तथा" ॥
तदुदयसम्भावनञ्च निर्णयामृते निर्णीतम् ।
प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां
चन्द्रदर्शनं सम्भाव्यते । तदुक्तमग्न्याधानविषये
वृद्धशातातपेन ।
"द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी ।
अग्न्याधानं चतुर्द्दश्यां परतः सोमदर्शनात्" ॥ इति
अपराह्णश्च पञ्चधाविभक्तस्याह्नश्चतुर्थो भागः ।
ततश्च यत्र प्रतिपदि षण्मुहूर्त्तव्यापिनी द्वितीया
तत्र चन्द्रदर्शनसम्भावनमिति । अन्यदा तूत्तरैव
प्रतिपत्तत्र गृहीता । तथैव पुराणसमुच्चये ।
"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका ।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र चोच्यते" ॥
किञ्च । यदा पूर्णप्रतिपत् परत्र च निष्क्रामति
तदाप्युत्तरैव कार्य्या । यथोक्तं भविष्योत्तरे ।
"यथा द्वादशभिर्म्मासैर्म्मासो वृद्धो मलिम्लुचः ।
तथैवाहोरात्रिवृद्ध्या तिथिः प्रोक्तो मलिम्लुचः ॥
यथा मलिम्लुचः पूर्व्वो मासो दैवस्तथापरः ।
त्याज्या तिथिस्तथा पूर्व्वा ग्राह्या चैव तथोत्तरा" ॥
इति निर्णयामृतमतम् । किन्तु बह्वृचीन्यायेन
पूर्व्वैव मन्तुं शक्यते । तदत्रापि देवलादिवचनं
प्रामाण्यमस्तीति ॥ * ॥
अथ गोवर्द्धनपूजाविधिः । पाद्मे तत्रैव ।
"मथुरायां तथान्यत्र कृत्वा गोवर्द्धनं गिरिम् ।
गोमयेन महास्थूलं तत्र पूज्यो गिरिर्यथा ॥
मथुरायां तथा साक्षात् कृत्वा चैव प्रदक्षिणम् ।
वैष्णवं धाम सम्प्राप्य मोदते हरिसन्निधौ" ॥
पूजामन्त्रः ।
"गोवर्द्धनधराधार गोकुलत्राणकारक ! ।
विष्णुबाहुकृतोच्छ्राय गवां कोटिप्रदो भव" ॥ इति
गोपूजामन्त्रः । स्कान्दे तत्रैव ।
"लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थं मम पापं व्यपोहतु ॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्" ॥
अथ गोक्रीडा तत्रैव ।
"क्रीडापयेद्धावयेच्च गोमहिष्यादिकं ततः ।
वृषान् कर्षापयेद्गोपैरुक्तिप्रत्युक्तिवादनात्" ॥
पाद्मे च तत्रैव ।
"महिष्यादेस्तथा भूषा क्रीडनं वारणन्तथा" ।
तन्माहात्म्यञ्च तत्रैव ।
"एवं गोवर्द्धनं गावः पूजनीया विधानतः ।
गोवर्द्धनमखो रम्यः कृष्णसन्तोषकारकः" ॥ * ॥
अथ श्रीबलिदैत्यराजपूजा ।
"लिखित्वा श्रीबलिं पट्टे विन्ध्यावल्यान्वितं मुदा ।
प्रदोषे तत्प्रतिपदो भगवद्भक्तमर्च्चयेत्" ॥
तथा च स्कान्दे ।
"बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।
सर्व्वाभरणसम्पूर्णं विन्ध्यावल्या सहासितम् ॥
कुष्माण्डमयजम्भोरुमुरदानवसंवृतम् ।
सम्पूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् ॥
द्विभुजं दैत्यराजानं कारयित्वार्च्चयेन्नृप !" ।
तत्पूजाप्रकारणम् । पाद्मे तत्रैव ।
"यथार्त्तं देशमनेन विष्णवे
भीतेः स्वथावयसो महात्मना ।
दैत्येन तेनाथ कठोरचेष्टया
बद्धो बलिर्व्वामनमूर्त्तिना वत ॥
बद्धानीतोऽथ पातालं विमना खिन्नमानसः ।
नाभ्यसूयद्धरिं दैत्यस्त्यक्ताहममतः सुधीः ॥
तदोवाच हरिः प्रीतस्तस्मै दैत्याय मागदत् ॥
अश्रोत्रिये दत्तममन्त्रकं हुतं
जप्तं तथा व्यग्रधिया जनेन यत् ।
तथोर्ज्जशुक्लप्रतिपद्दिनेन तु
त्वामर्च्चयेत्तत्सुकृतं तवास्तु ॥
इति तस्मै वरो दत्तो हरिणा दितिजाय च ।
ततोऽवश्यं प्रपूज्योऽसौ बलिराजदिने मुदा ॥
कृष्णसान्निध्यतश्चापि पूजनीयः प्रयत्नतः" ॥ * ॥
अथ बलिपूजाविधिः । स्कान्दे तत्रैव ।
"गृहस्य मध्ये शालायां विशालायां ततोऽर्च्चयेत् ।
मातृभ्रातृजनैः सार्द्धं सन्तुष्टो बन्धुभिस्तथा ॥
कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकोत्पलैः ।
गन्धपुष्पादिनैवेद्यैरक्षतैर्गुडपूपकैः" ॥
तत्र पूजामन्त्रः ।
"बलिराज ! नमस्तुभ्यं विरोचनसुत प्रभो ! ।
भविष्येन्द्र सुराराते ! पूजेयं प्रतिगृह्यताम् ॥
दीपोत्सवैर्जनितसर्व्वजनप्रमोदैः
कुर्व्वन्ति ये सुमतयो बलिराजपूजाम् ।
दानोपभोगसुखवृद्धिशताकुलानां
नूनं प्रयाति सकलं प्रमुदैव वर्षम्" ॥
अथ यमद्वितीयाकृत्यम् । स्कान्दे पाद्मे च ।
"ऊर्ज्जे शुक्लद्वितीयायां मध्याह्ने यममर्च्चयेत् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति" ॥
किञ्च ।
"तस्यां निजगृहे विप्र ! न भोक्तव्यं ततो बुधैः ।
स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ।
सर्व्वा भगिन्यः सम्पूज्या अभावे प्रतिपन्नजाः" ॥
किञ्च ।
"यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिशयस्वकसौहृदेन ।
तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति वित्तसुभगं धनमुत्तमं सः" ॥ * ॥
अथ शुक्लाष्टमीकृत्यम् ।
पाद्मे तत्रैव कूर्म्मपुराणे च ।
"कार्त्तिके शुक्लपक्षे तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ।
तत्र कुर्य्याद्गवां पूजां गोग्रासं गोप्रदक्षिणम् ।
गवानुगमनं कार्य्यं सर्व्वान् कामानभीप्सता ॥"
प्रबोधनीकृत्यं तत्शब्दे द्रष्टव्यम् । इति श्रीगो-
पालभट्टविलिखिते लिखिते भगवद्भक्तिविलासे
श्रीदामोदरप्रियो नाम १६ षोडशविलासः ॥
तत्र जातस्य फलम् ।
"दक्षः क्रये विक्रयणे धनाढ्यः
स्याद्वावदूकोऽखिलकौशलज्ञः ।
यः कार्त्तिके कार्त्तिकरूपधारी
जातो भवेद्युद्धविशारदश्च" ॥
इति कोष्ठीप्रदीपः ॥ * ॥ वर्षविशेषः । स च कृत्ति-
कारोहिण्योरेकतरस्मिन् वृहस्पतेरुदयेऽकतर-
सम्बन्धे भवति । इति मलमासतत्त्वम् ॥ कार्त्तिकेयः
यथा,—ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
"दृष्ट्वा तान् कृत्तिकाः सर्व्वा भयविह्वलमानसाः ।
कार्त्तिकं कथयामासुर्ज्ज्वलन्तं ब्रह्मतेजसा" ॥

कार्त्तिकिकः, पुं, (कार्त्तिकी पौर्णमासी अस्मिन् मासे इति । "विभाषा फाल्गुनीश्रवणाकार्त्तिकी-चैत्रीभ्यः" । ४ । २ । २३ । इति ठक् ।) कार्त्तिकमासः । इत्यमरः । १ । ४ । १८ ॥

कार्त्तिकेयः, पुं, (कृत्तिकानामपत्यम् । "स्त्रीभ्यो ढक्" । ४ । १ । १२० । इति ढक् ।) शिवपुत्त्रः । यथा,—
"या बभूव रहःक्रीडा पार्व्वतीशिवयोः पुरा ।
दृष्टस्य च सुरैः शम्भोर्व्वीर्य्यं भूमौ पपात ह ॥
भूमिस्तदक्षिपत् वह्नौ वह्निश्च शरकानने ।
तत्त्व बाल कृत्तिकाभिरधुना गच्छ साम्प्रतम् ॥
तवाभिषेकं विष्णुश्च करिष्यति सुरैः सह ।
हनिष्यसि तारकाख्यं सर्व्वशस्त्रं लभिष्यसि ॥
पुत्त्रस्त्वं विश्वसंहर्त्तुस्त्वां गोप्तुमक्षमा इमाः ।
नाग्नि गोप्तुं यथाशक्ताः शुष्कवृक्षाः सकोटरे" ॥
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
स एव कल्पभेदे अग्निपुत्त्रः । यथा,—
"कुमारश्चाभवत् तत्र तरुणार्कसमद्युतिः ।

वह्निरेतोभव' श्रीमान् गङ्गाकुक्षिमरिप्लुतः ॥
त कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणा' ।
तदा क्षीरप्रदानार्थं कृत्तिका' संन्ययोजयन् ॥
ता क्षीरं तस्य देवस्य समयेन ददुस्तदा ।
स्यादस्माकमय पुत्त्र ख्यातो नाम्नेति राघव ॥
अन्योन्य पिवतस्तासां तनयस्य मुखानि षट् ।
समभूवन् महाबाहो । षण्मुखस्तेन विश्रुत ॥
ततस्ता देवता ऊचु' कार्त्तिकेय इति प्रभु' ।
पुत्त्रोऽयं जगति ख्यातो भविष्यति न संशयः" ॥
इति वाल्मीकीयरामायणम् ॥*॥ तत्पर्य्याय महा-
सेन २ शरजन्मा ३ षडानन ४ पार्व्वतीनन्दन' ५ स्कन्द' ६ सेनानी' ७ अग्निभू ८ गुह' ९ बाहुलेय' १० तारकजित् ११ विशाखः १२ शिखिवाहन १३ षाण्मातुर १४ शक्तिधर १५ कुमार १६ क्रौञ्चदारण'१७ । इत्यमर'।१।१।४१-४३॥ आग्नेय' १८ दीप्तकीर्त्ति १९ अनमेय' २० मयूरकेतु' २१ धर्म्मात्मा २२ भूतेश २३ महिषार्दन २४ कामजित् २५ कामदः २६ कान्त २७ सत्यवाक् २८ भुवनेश्वर २९ शिशु' ३० शीघ्र' ३१ शुचि' ३२ चण्डः ३३ दीप्तवर्ण ३४ शुभानन ३५ अमोघ ३६ अनघ' ३७ रौद्र' ३८ प्रिय' ३९ चन्द्रानन' ४० दीप्तशक्तिः ४१ प्रशान्तात्मा ४२ भद्रकृत् ४३ कूटमोहन ४४ षष्ठीप्रिय' ४५ पवित्र' ४६ मातृवत्सल' ४७ कन्याहर्त्ता ४८ विभक्त' ४९ स्वाहेय ५० रेवतीसुत ५१ प्रभु' ५२ नेता ५३ नैगमेय ५४ सुदुश्चर' ५५ सुव्रत' ५६ ललितः ५७ बालक्रीडनप्रिय ५८ खचारी ५९ ब्रह्मचारी ६० शूर' ६१ शरवणोद्भव' ६२ विश्वामित्रप्रिय' ६३ देवसेनाप्रिय ६४ वासुदेवप्रिय ६५ प्रियक ६६ इति वनपर्व्व ॥ गाङ्ग ६७ स्वामी ६८ द्वादशलोचन' ६९ । इतिजटाधर' ॥ सिद्धसेन' ७० शम्भुतनय ७१ देवसेनापति ७२ मातृचर्य्य ७३ कृकवाकुध्वज' ७४ महाबाहु' ७५ युद्धरङ्ग ७६ शिखिध्वज' ७७ । इति शब्दरत्नावली ॥ (पावकात्मज ७८ । रुद्रसूनु' ७९ । षट्शिरा' ८० । दितिजान्तक ८१ । इति महाभारतम् ॥ * ॥)
अस्य ध्यानम् । यथा ।
"कार्त्तिकेयं महाभाग मयूरोपरिसंस्थितम् ।
तप्तकाञ्चनवर्णाभं शक्तिहस्तं वरप्रदम् ॥
द्विभुज शत्रुहन्तारं नानालङ्कारभूषितम् ।
प्रसन्नवदनं देवं सर्व्वसेनासमावृतम्" ॥
इति कार्त्तिकेयपूजापद्धति' ॥
कार्त्तिकेयप्रसू, स्त्री, (कार्त्तिकेय प्रसूते या । प्र + सू + क्विप् । कार्त्तिकेयस्य प्रसूर्वा ।) दुर्गा । इति शब्दरत्नावली ॥
कार्त्तिकोत्सव, पु, (कार्त्तिक्या कार्त्तिकीपौर्णमास्या भव उत्सव । तत्सम्बन्धी तत्कर्त्तव्य उत्सवो वा ।) कौमुदी । कार्त्तिकी पूर्णिमा । इति त्रिकाण्डशेष ॥
कार्पट, पु, (कार्पट इव आकारोऽस्त्यस्य । कार्पट + अच् ।) जतु । जौ इति भाषा । कार्य्यी । इति हेमचन्द्र ॥ दरखारी उमेदोयार इत्यादि पारस्य-

भाषा ॥ (कर्पट एव । स्वार्थे अण् । जीर्णवस्त्रखण्डम् ॥)
कार्पटिक', पु, (कार्पटं अन्तस्तत्त्व वेत्ति इति कर्पटेन चरति इति वा । ठक् । कार्पटोऽस्त्यस्य वा ठन् ।) मर्म्मवेत्ता । इति त्रिकाण्डशेष' ॥ तीर्थसेवी । इति काशीखण्डम् ॥
("साय च तत्रैव वह्नि' सकुटुम्बस्तरोस्तले ।
समावसत् कार्पटिकै' सोऽन्यदेशागतैः सह" ॥
इति कथासरित्सागरे ॥)
कार्पण्य, क्ली, (कृपणस्य भाव । कृपण + ष्यञ् ।) कृपणता । तत्पर्य्याय । दैन्यम् २ । इति हेमचन्द्र ॥ (यथा, भगवद्गीतायाम् २ । ७ ।
"कार्पण्यदोषोपहतस्वभाव
पृच्छामि त्वां धर्म्मसंमूढचेता " ॥)
कार्पासः, पु, स्त्री,(कर्पास एव । स्वार्थे अण् ।) कार्पासवृक्षः । कापास इति भाषा ॥ (अस्य पत्रादिना सर्पदष्ट' पुरुषो नीरोगो भवति । इदानीं पत्रादीना व्यवहारक्रम उच्यते ।
दशनानन्तरमेव दष्टं पुरुषं सार्द्धद्वितोलकपरिमितः कार्पासपत्ररस पाययितव्य । अथ क्षतप्रदेशं विधौतं परिष्कृतञ्च विधाय तत्र पत्ररसः प्रदेय । क्षतस्थानोपरि च कार्पासपत्रैः प्रलेपो दातव्य' । एव कृतेऽपि यदि शरीरस्य कश्चिदश स्फीतो भवेत् तदा तत्रैव एतत्पत्ररसेन पेषयितव्यम् । आमुख्यात् प्रतिसपाददण्ड मेव कृते सर्पदष्ट' पुरुष सुस्थो भविष्यतीति निश्चय ॥)
कार्पास, त्रि, (कर्पास्या विकारे अवयवे वा अण् बिल्वादित्वात् वा ।) कार्पासजातवस्त्रादि । तत्पर्य्याय । फालम् २ बादरम् ३ । इत्यमर' । २ । ६ । १११ ॥ (यथा, महाभारते २ । ५० । २४ ।
"श्लक्ष्णं वस्त्रमकार्पासमाविकं मृदु चाजिनम्" ॥)
कार्पासधेनु', स्त्री, (दानार्थं कल्पिता कार्पासवस्त्रनिर्म्मिता धेनु ।) दानार्थकार्पासादिनिर्म्मितधेनु । यथा ।
होतोवाच ।
"अथात' संप्रवक्ष्यामि धेनुं कार्पासिकीं नृप ।
यत्प्रदानान्नरा यान्ति ऐन्द्रलोकमनुत्तमम् ॥
विषुवे त्वयने पुण्ये युगादिग्रहणे तथा ।
ग्रहपीडासु घोरासु दुःस्वप्नारिष्टदर्शने ॥
पुण्ये ह्यायतने राजन् शुचिदेशे गवा गणे ।
गोमयेनोपलिप्ताया दर्भानास्तीर्य्य वै तिलान् ॥
तन्मध्ये स्थापयेत् धेनु वस्त्रमाल्यानुलेपनै ।
नैवेद्यधूपदीपाद्यै पूजयेच्च विमत्सरः ॥
उत्तमा चतुर्भिर्भारैस्तदर्द्धेन तु मध्यमा ।
भारेण चाधमा प्रोक्ता वित्तशाठ्य विवर्जयेत् ॥
चतुर्थांशेन कृत्वा वै वत्सन्तु परिकल्पयेत् ।
कर्त्तव्या स्वर्णशृङ्गैस्तु रजतखुरसयुता ॥
नानाफलमया दन्ता रत्नगर्भसमन्विता ।
इत्येवं सर्व्वसंपूर्णं कृत्वा श्रद्धासमन्वित ॥
आवाहयेत्ता कार्पासधेनुं मन्त्रैर्द्विजातये ।
दद्यादथ दर्भपाणि' प्रयत' श्रद्धयान्वित ॥

पूर्व्वोक्तस्तु विधि' कार्य्यो दानमन्त्रपुर सरः" ॥
पूर्व्वोक्तविधि लवणधेनूक्तविधि ।
"यथा देवगणा सर्व्वस्त्वया हीनो न वर्त्तते ।
तथा मामुद्धरद्देवि । पाहि संसारसागरात्" ॥
इत्यादिवराहपुराणे श्वेतोपाख्याने कार्पासधेनुमाहात्म्यम् ॥
कार्पासनासिका, स्त्री, (कार्पासस्य नासिका इव ।) तर्कु । इति शब्दरत्नावली । टेको इति भाषा ॥
कार्पासिका, स्त्री, (कार्पासी + कन् । तत्ष्टाप् ।) कार्पासी । इति शब्दरत्नावली ॥ (त्रि, कार्पासाज्जात' । कार्पासनिर्म्मितम् । यथा गो रामायणे । ५ । ४९ । ५ ।
"अवेष्टयन्त लाङ्गूलं जीर्णै कार्पासिकै' पटै " ॥)
कार्पासी, स्त्री, (कार्पास + जातित्वात् ङीष् । यद्वा कर्पासोऽस्त्यस्याः प्रज्ञाद्यण् ततो ङीप् ।) कार्पासवृक्ष । कापास इति भाषा ॥ तत्पर्य्याय' । वदरा २ तुण्डिकेरी ३ समुद्रान्ता ४ । इत्यमर' । २ । ४ । ११६ ॥ पटद ५ । इति रत्नमाला ॥ सारिणी ६ चर्या ७ तूला ८ गुड ९ तुण्डकेरिका १० मरुद्भवा ११ पिचु १२ बादर १३ । अस्या गुणा । मधुरत्वम् । शीतत्वम् । स्तनदुग्धकारित्वम् । पित्तकफतृष्णादाहश्रमभ्रान्तिमूर्च्छानाशित्वम् । बलकारित्वञ्च । इति राजनिर्घण्ट ॥ तत्पत्त्रगुणा' । वायुनाशित्वम् । रक्तकारित्वम् । मूत्रवर्द्धकत्वम् । कर्णपिडिकानादपूयास्रावनाशित्वञ्च । तद्वीजगुणा । स्तन्यदत्वम् । वृष्यत्वम् । स्निग्धत्वम् । कफकारित्वम् । गुरुत्वञ्च । इति भावप्रकाश ॥
कार्म्म, त्रि, (कर्म्म शील अस्य । छत्रादित्वात् ण ।
"कार्म्मस्ताच्छील्ये" । ६ । ४ । १७२ । इति सूत्रानुसारेण निपातनात् टिलोप । फल मनपेक्ष्य कर्म्मसु प्रवृत्त' ।) कर्म्मशील । इत्यमर' । ३ । १ । १८ ॥
कार्म्मण, क्ली, (कर्म्मैव इति । कर्म्मन् + "तद्युक्तात् कर्म्मणोऽण्" । ५ । ४ । ३६ । इति अण् । कर्म्मणे हितमिति अण् वा ।) मूलकर्म्म । इत्यमर । ३ । २ । ४ ॥ ओषध्यादिमूलेन यत् चासनोच्चाटनस्तम्भनवशीकरणादिकर्म्म तत् । इति भरत' ॥ (यथा माघे । १० । ३७ ।
"चाटु चारुतकसम्भ्रमभासा
कार्म्मणत्वमगमन् रमणेषु" ॥
तथा च, काशीखण्डे ४५ । ९ ।
"काचित्कार्म्मणतत्त्वज्ञा काचित्मौक्तिकगुम्फिका" ॥)
मन्त्रतन्त्रादियोजनम् । (कर्म्म साधकत्वेन अस्त्यस्य इति अण् ।) कर्म्मठे त्रि । इति मेदिनी ॥
कार्म्मिक', त्रि, (कर्म्मणा चित्रकर्म्मणा निर्वृत्त' । इति ठक् ।) विचित्रवस्त्रादि । ("कार्म्मिकं कर्म्मणा चित्रेण निर्म्मित यत्र निष्पन्ने पटे चक्रस्वस्तिकादिक चित्रसूत्रै क्रियते तत्कार्म्मिकमित्युच्यते" ॥) इति मिताक्षरा । (तथा च याज्ञवल्क्य ।२।१८३।
"कार्म्मिके रोमबद्धे च त्रिंशद्भागक्षयो मतः" ॥)
कार्म्मुक स्त्री, (कर्म्मणे प्रभवतीति । "कर्म्मण

उकञ्" । ५ । १ । १०३ । इति उकञ् ।) धनुः । इत्यमरः । २ । ८ । ८३ । धनुक् इति भाषा । (यथा, माघे । ० । ६० ।

"कार्म्मुकेणेव गुणिना बाणः सन्धानमेष्यसि" ।)

कार्म्मुकः, पु, (कार्म्मुक धनुः साधनत्वेनास्त्यस्य इति अच् ।) वंशः । बाँश इति भाषा । (कर्म्मणि कार्य्याय प्रभवतीति । कर्म्मन् + उकञ् ।) धर्म्मदाने त्रि । इति मेदिनी । श्वेतखदिरः । विल्वः । मदा मिम्बः । इति राजनिर्घण्टः ।

कार्य्य, क्ली, (क्रियते यत् तत् । कृ + "विभाषा कृवृषोः" । ३ । १ । १२० । इति क्यपभावे "ऋहलोर्ण्यत्" । ३ । १ । १२४ । इति ण्यत् । ततो वृद्धिः ।) क्रियते यत् । इति व्याकरणम् । काज इति भाषा । ("कार्य्यन्तु तद्यस्याभिनिर्वृत्तिमभिसन्धाय प्रवर्त्तते कर्त्ता" । इति चरके विमानस्थाने । ८ अध्याये ।

तथा मनुः । ८ । २६६ ।

"आरभेत ततः कार्य्यं सञ्चिन्त्य गुरुलाघवम्" ॥ कर्त्तव्यम् । यथा तत्रैव । ३ । ८० ।

"आशासते कुटुम्बिन्यस्तेभ्यः कार्य्यं विजानता" ।) तत्प्रति कारणम् त्रिविधम् । समवायिकारणम् १ यथा घटकार्य्यं प्रति कपालम् । असमवायिकारणम् २ यथा घटकार्य्यं प्रति कपालसंयोगादि । निमित्तकारणम् ३ यथा घटं प्रति दण्डचक्रादि । इति तर्कशास्त्रम् ॥ हेतुः । प्रयोजनम् । इति मेदिनी ॥ ऋणादिविवादः यथा,—

"यस्मात् कार्य्यसमारम्भात् सिद्धिस्तेन विनिश्चितः ।

तस्मान्न लभते काममभियुक्तश्च पालभाक्" ॥

इति व्यवहारतत्त्वे कात्यायनः ॥

(तथा च मनुः । ८ । ४३ ।

"नोत्पादयेत् स्वयं कार्य्यं राजा नाप्यस्य पूरुषः" ॥) अपूर्व्वम् । यथा,—

"विधिप्रत्ययस्य कार्य्यं प्रकृतिमिति मीमांसकाः" ॥ व्याकरणमते व्यादेशप्रत्ययागमाः । इति दुर्गादासः ॥ (त्रि, करणीयम् । कर्त्तव्यम् । यथा मनुः । २ । २४८ ।

"सद्यपिरद्धक्रियायान्तु सतायामस्य चर्म्मतः ।

अनयैवावृता कार्य्यं पिण्डनिर्व्वपनं सुतैः" ॥)

कार्य्यकुशल, त्रि, (कार्य्ये कर्म्मणि कुशलः निपुणः ।) कर्म्मठः । इति भूरिप्रयोगः ॥

कार्य्यपुट, पु, (कार्य्या क्रियाया न पुटति । कार्य्य + पुट् संश्लेषणे + क ।) क्षपणः । उन्मत्तः । अनर्थकरः । इति विश्वमेदिन्यौ ॥

कार्य्यप्रद्वेष, पु, (कार्य्यं प्रद्वेष्टि अनेन । प्र + द्विष् + करणे घञ् ।) आलस्यम् । इति राजनिर्घण्टः ॥

कार्य्या, स्त्री, (कृ + ण्यत् । टाप् ।) कारीच्च । इति राजनिर्घण्टः ॥

कार्य्यी, [न्] पु, (कार्य्यं अस्त्यस्य इति इनि ।) यस्य निर्द्दिश्यते कार्य्यं सः । इति दुर्गादासः ॥ प्रार्थी । इति कार्पटशब्दार्थे हेमचन्द्रः । (यथा मनुः । ८ । २ ।

"विनीतवेशाभरणः पश्येत्कार्य्याणि कार्य्यिणाम्" ॥)

कार्म्मरी, स्त्री, (कृम् + स्वार्थे णिच् भावे मनिन् कार्म्मस् सास्ति । गौरादित्वात् ङीष् ।) काश्मरी । गम्भारीवृक्षः । इत्यमरटीकायां भरतः ॥

कार्श्य, पु, (कृश + स्वार्थे ष्यञ् ।) कार्श्यं । शालवृक्षः । इत्यमरटीकायां भरतः ॥ कचूर । लकुच । इति राजनिर्घण्टः ॥ (कृशस्य भावः । "वर्णदृढादिभ्यः ष्यञ्" ।५।१।१२३ । इति ष्यञ् ।) कृशतायां क्ली ॥ (यथा, नैषधे० ८१ ।

"सौभाग्यमेतत् समग्र । विरहावस्थया यत्तनुभ्यो कार्श्यं येन यमति विधिना स सर्वे तेषपात्र" ॥)

कार्षक, पु, (कर्षति इति । कृष + "कृषेर्वृद्धिश्चो दीर्घः" । उणा । ७ । ७० । इति क्वुन् । यद्वा कृषि शीलमस्य छत्रादित्वात् ण स्वार्थे कन् ।) कर्षक । इत्यमरटीकायां रायमुकुटः ॥

कार्षापण, पु क्ली, (कर्षस्यावः "तत्रोदय्" । ६ । ३ । ७० । इत्यत्र । त्रिष्वप्रयत्न परिभाषादि इत्यण् गोषदन्तावेरिति पो ।। कार्षेण कार्येण वा आपणः व्यवहारो यस्य । यद्वा कर्षेद् स्वार्थे वा अण् तेन आपण्यते । आ + पण + कर्म्मणि घ ।) कार्षिकः । षोड़शपणः । इति मेदिनी ॥ रूप्यकर्ष पुरःकार्षापणम् । "शिक नु रुक्मे षोड़श-पलमनुराये कार्षापणोऽष्टपणेन पनसि । तथा हि कार्ष्णायो वाससायो विकृतपञ्च । दे कार्ष्णेन तदरूत तिन्दो रूप्यमाषकः । इति मनुः । आद्ये कृतयुगे यत्र क्वचन शोऽष्टमासाः मन्यभिरत वाभिरता कृष्णमाणो स्वर्णकर्षस्य षोडशपणः तत सत्यम् । पुराणशब्दश्चास्य कार्षिकः पुराणश्च कार्षापणः इति पोषालितः । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ८ । १३६ ।

"कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः" ॥)

कार्षिक, पुं, (कर्ष + स्वार्थे ठञ् ।) कार्षापणः । इत्यमरः । २ । ९ । ८८ ॥ (यथा याज्ञवल्क्ये । १ । ३६५ ।

"निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः" ॥) कर्षः कर्षणं शीलमस्य । कर्ष + ठञ् ।) कर्षकः । इति हेमचन्द्रः । (कर्षस्येदम् । कर्ष + ठञ् । कर्षपरिमाणं पलचतुर्भागः । यद्वा परिमाणमस्य ठञ् । कर्षपरिमितद्रव्यम् । कर्षेण क्रीतं । ठञ् । कर्षक्रीतं ।)

कार्ष्णि, पु, (कृष्णस्यापत्यम् । अत इञ् ।) कामदेवः । इति त्रिकाण्डशेषः । (यथा हरिवंशे । १६३ । १९ ।

"तामापतन्तीं मायान्तु कार्ष्णिः कमललोचनः" ॥) गन्धर्व्वविशेषः । यथा महाभारते । १ । १२३ । ५३ ।

"युगपस्तृणपः कार्ष्णिर्नन्दिश्चित्ररथस्तथा" ॥)

कार्ष्णी, स्त्री, (कार्ष्णि + ङीप् ।) शतावरी । इति राजनिर्घण्टः ॥ (शतावरीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

कार्ष्ण्य, पु, (कृष्ण + "इगुपधेति" ३ । १ । १३५ । क । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) शालवृक्षः ॥ इत्यमरः । २ । ४ । ४४ ॥ (अस्य पर्य्यायो यथा । "शालस्तु सर्ज्जकार्ष्याश्वकर्णिकाशसम्बरः" । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

काल त् क कालोपदेशे । इति कविकल्पद्रुमः । (अदन्तचुरा-पर-सक-सेट् ।) यथा अचकालत् कालमियत्तया गणना । गणावलौ वेशेति कथितधातिरित्यर्थः । इति दुर्गादासः ॥

काल, स्त्री, (इयत् छत्वाय गाति अनवाति । का + गा धातुप कृलित्कद्दतया अवति वा । अच् + अच् । टाप् क्रादित्र ।) लोहम् । इति वाचस्पतिमिश्र टीकाया भरत ॥ कालीयकम् । इति राजनिर्घण्टः ॥ कालीयकम् । इति शब्दचन्द्रिका ॥

काल, पुं, (कलयति आयु । कल् संख्याने घञ् यद्वा कल प्रेरणे । यद्वा कालयति सर्व्वाणि भूतानि । कल् प्रेरणे ण्यन्तात् पचाद्यच् ।) क्षणदण्डमुहूर्त्तप्रहरदिनरात्रिपक्षमासायनवत्सरादि । इति दुर्गादासः ॥ तत्पर्य्याय । दिष्ट २ अनेहा ३ समय ४ इत्यमरः । १ । ४ । १ ॥ "जन्यानां जनकः कालो जगतामाश्रयो मतः । परापरत्वधीहेतुः क्षणादि स्यादुपाधितः" ॥ (यथा विष्णुपुराणे । १ । २ । १५ ।

"परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ।

व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम्" ॥) अस्य गुणाः । सङ्ख्या १ परिमितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ । इति भाषापरिच्छेदः ॥

"अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः ।

कलनात् सर्व्वभूतानां स कालः परिकीर्त्तितः" ॥

इति तिथ्यादितत्त्वम् ॥ ८ ॥

("कालस्त्रिविधो ज्ञेयोऽतीतोऽनागत एव च ।

वर्त्तमानस्तृतीयस्तु वक्ष्यामि शृणु लक्षणम् ॥

कालः कलयते लोकं कालः कलयते जगत् ।

कालः कलयते विश्वं तेन कालोऽभिधीयते ॥

कालस्य वशगाः सर्व्वे देवर्षिसिद्धकिन्नराः ।

कालो हि भगवान्देवः स साक्षात्परमेश्वरः ॥

सर्गपालनसंहर्त्ता स कालः सर्व्वतः समः ।

कालेन कल्प्यते विश्वं तेन कालोऽभिधीयते ।

येनोत्पद्यते जायते येन वै कल्प्यते कला ।

सोऽन्तको भवेत् कालो जगदुत्पत्तिकारकः ॥

स कालोऽपि प्रवृत्तेन प्रकर्षं वर्त्तमानके ।

सोऽपि प्रवर्त्तको ज्ञेयः कालः स्यात् प्रतिपालकः ॥

येन मृत्युवशं याति कृतं येन लयं भवेत् ।

संहर्त्ता सोऽपि विज्ञेयः कालः स्यात् कलनापरः ॥

कालः सृजति भूतानि कालः संहरते प्रजाः ।

कालः स्वपिति जागर्त्ति कालो हि दुरतिक्रमः ॥

काले देवा विनश्यन्ति काले चासुरपन्नगाः ।

नरेन्द्राः सर्व्वजीवाश्च काले सर्व्वं विनश्यति ॥

त्रिकालात् परतो ज्ञेयः आगन्तुर्गतचेष्टकः ।

तथा वर्षाहिमोष्णाख्या त्रय काला इमे मताः ॥

तथा वयोऽन्योऽपि ज्ञेया उदन्मध्यास्तरूपिणः ।

सूक्ष्मोऽपि सर्व्वगः स वै सूक्ष्मात् सूक्ष्मतरः शुभः" ॥

इति प्रथमस्थाने ४थ । हारीतेनोक्तम् ॥) यमः । (यथा रामायणे । ३ । ३५ । ४३ ।

"आपतन्तीञ्च तां दृष्ट्वा कालदण्डोपमां गदाम्" ॥) कृष्णवर्णः । कृष्णगुणवति त्रि । इत्यमरः । १ । ५ । १४,१६ । (यथा रामायणे । ६ । ६७ । २ ।

"उद्यतायुधनिस्त्रिंशे रथे च समलङ्कृते ।

कालाग्निसदृशं मङ्क्ष्वति स्थितं कालान्तकोपमम्" ॥) मृत्युः । (यथा भागवते । ९ । ९ । २ ।

"दिलीपस्तत्सुतस्तद्वद्गत्वा कालमेयिवान् ।
भगीरथस्तस्य पुत्त्रस्तेपे स सुमहत् तपः" ॥)
महाकालः । इति मेदिनी ॥ शनिः । इति दीपिका ॥ कासमर्द्दः । रक्तचित्रकः । राहुः । कोकिलः । इति राजनिर्घण्टः ॥ (सर्व्वकलनात् शिवः । यथा महाभारते । १३ । १७ । ४७ ।
"गजहा दैत्यहा कालो लोकधाता गुणाकरः" ॥
कालनियन्तृत्वात् विष्णुः । यथा महाभारते । १३ । १ । ४९ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः" ॥
पर्व्वतविशेषः । यथा रामायणे । ४ । ४४ । २१ ।
"ततो महाश्रमं गत्वा देवगन्धर्व्वसेवितम् ।
कालं नाम महाशैलं गमिष्यथ शिलोच्चयम्" ॥)

कालकं, क्ली, (काल + स्वार्थे कन् । यद्वा, कलयति नोदयति रक्तानि । कल नोदने + ण्वुल् ।) कालशाकम् । इति भावप्रकाशः ॥ (कालशाकशब्देऽस्य गुणादिकं बोध्यम् ।) यकृत् । इति हेमचन्द्रः ॥

कालकः, पु, (कालयतीति । कालक्षेपे + "ण्वुल्तृचौ" ३ । १ । १३३ इति ण्वुल् ।) जतुकः । इत्यमरः । २ । ४ । ४९ ॥ जडुः इति भाषा ॥ ("वर्णे चानित्ये" । "रक्ते" । "कालाच्च" । ५ । ४ । ३१, ३३ इति कन् । कालकः पटः । कालिका शाटी । कालकं मुखम् इति सिद्धान्तकौमुदी ॥) अलगर्द्दः सर्पः । इति शब्दरत्नावली ॥ (राक्षसविशेषः । यथा रामायणे ३ । २९ । ३० ।
"दुर्ज्जयः कालकाख्यश्च परुषः कालिकामुखः" ॥)

कालकटङ्कटः, पु, (कालरूपः कटङ्कटः ।) शिवः । कालकटङ्कटोऽपि पाठः । इति दानधर्म्मे शिवसहस्रनामसु पठितः ॥ (यथा, महाभारते १३ । शिवसहस्रनामकथने । १७ । ५७ ।
"वैणवी पणवी ताली खली कालकटङ्कटः" ॥)

कालकण्ठः, पु, (कालः कृष्णवर्णो नीलो वा कण्ठोऽस्य ।) शिवः । पीतसारः । मयूरः । खञ्जनः । कलविङ्कः । दात्यूहपक्षी । इति मेदिनी ॥

कालकण्ठकः, पु, (कालः कृष्णः कण्ठोऽस्य । ततः कप् स्वार्थे कन् वा ।) दात्यूहपक्षी । इत्यमरः । २ । ५ । २१ ॥ (दात्यूहशब्देऽस्य गुणपर्य्याया वक्तव्याः ॥)

कालकन्दकः, पु, (कालः कृष्णसर्पः कन्दति स्पर्द्धते यद्वा कालः सन् कन्दते वैकल्यं गच्छति । काल + कदि + अच् । स्वार्थे कन् ।) जलसर्पः । इति शब्दरत्नावली ॥

कालकर्णिका, स्त्री, (कालस्य कर्णिका इव ।) अलक्ष्मीः । इति हेमचन्द्रः ॥

कालकर्णी, स्त्री, (कालः कर्णोऽस्याः । अच् ततः स्त्रियां ङीप् ।) अलक्ष्मीः । इति शब्दरत्नावली ॥

कालका, स्त्री, (कालकेयाख्यासुराणां माता काला एव कन् । बाहुलकात् न इत्वम् ।) कालकेयनामाऽसुरगणमाता । इति जटाधरः ॥ (सा च वैश्वानरकन्या । यथा, भागवते ६ । ६ । ३२ ।
"वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ।
उपदानवी हयशिरा पुलोमा कालका तथा" ॥)

कालकीलः, पु, (कालः प्रकृतकालोपयुक्तः सन् प्रमङ्गादिकं कीलयति आच्छादयति नाशयति वा । काल + कील + अण् । कोलाहलस्य सत्यार्थादिनाशकत्वात् तथात्वम् ।) कोलाहलः । इति शब्दरत्नावली ॥

कालकुण्ठः, पु, (कालेन कालरूपिणा परमेश्वरेण कुण्ठ्यते असौ । कुण्ठ + कर्म्मणि घञ् ।) यमः । इति शब्दमाला ॥

कालकुष्ठं, क्ली, (कालात् कृष्णपर्व्वतात् कुष्यते निष्कृष्यते । कुष + कर्म्मणि क्त ।) पाङ्कुष्ठम् । पर्व्वतोत्पन्नमृत्तिकाविशेषः । इति राजनिर्घण्टः ॥

कालकूटं, क्ली, (कालं शिवमपि कूटयति अवसादयति यद्वा कालस्य मृत्योः कूटं घातोपायं समष्टिः दूत इव वा ।) बीजम् । विषम् । इति राजनिर्घण्टः ॥ (यथा, भागवते ८ । ६ । २५ ।
"न भेतव्यं कालकूटात् विषाज्जलधिसम्भवात्" ॥)

कालकूट, पु क्ली, (कालस्य मृत्योः कूटं छद्मकृत् इव ।) स्थावरविषभेदः । इत्यमरः । १ । ८ । १० । (यथा भागवते ३ । २ । २३ ।
"अहो वकी यं स्तनकालकूटं
जिघांसयाऽपाययदप्यसाध्वी" ॥
अस्य स्वरूपं यथा,—
"देवासुररणे देवैर्हतस्य पृथुमालिनः ।
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः ॥
निर्य्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः
सो हि क्षेत्रे शृङ्गवेरे कोङ्कणे मलये भवेत्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे शोधनमारणाधिकारे ॥ * ॥
देशविशेषः । यथा, महाभारते २ । २० । २६ ।
"कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजाङ्गलम् ।
रम्यं पद्मसरो गत्वा कालकूटमतीत्य च" ॥)

कालकूटकः, पु, (कालस्य कूटमिव कायति प्रकाशते । कै + क ।) कारस्करवृक्षः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १ । १२८ । ४४ ।
"ततो दुर्य्योधनः पापस्तद्भक्ष्ये कालकूटकम् ।
विषं प्रक्षेपयामास भीमसेनजिघांसया" ॥
कारस्करशब्देऽस्य गुणपर्य्याया ज्ञेयाः ॥)

कालकृत्, पु, (कालं करोतीति । कालस्य परिमाणं उदयास्ताभ्यां दण्डपलादिक्रमेण सम्पादयतीति । कृ + क्विप् तुगागमश्च ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥

कालकृतः, पु, (कालेन परमेश्वरेण कृतः सृष्टः । यद्वा कालं काष्ठाकलादिमानं कृतः कर्त्ता । कृ + कर्त्तरि + क्त ।) सूर्य्यः । इति शब्दरत्नावली ॥ कालजाते, त्रि । यथा, पुराणे,—
"सर्व्वं कालकृतं मन्ये कालो हि बलवत्तरः" ॥

कालखञ्जनं, क्ली, (कालेन कालान्तरेण खञ्जति विकृतिं गच्छतीति । काल + खजि + ल्युः ।) यकृत् । इति हेमचन्द्रः ॥

कालखण्डं, क्ली, (कालः कृष्णः खण्डः ।) यकृत् । दक्षिणकुक्षिस्थमांसखण्डम् । इत्यमरः । २ । ६ । ६६ ॥ (यकृत्शब्देऽस्य विशेषो ज्ञातव्यः ॥)

कालग्रन्थिः, पु, (कालस्य ग्रन्थिरिव ।) वत्सरः । इति त्रिकाण्डशेषः ॥

कालङ्कृतः, पु, (कृष्णितोऽपि अलङ्कृत इयदलङ्कृतो वा । को कादेशः ।) वृक्षविशेषः । कालकासुन्दे इति भाषा । तत्पर्य्यायः । अरिमर्द्दः २ कासमर्द्दः ३ कर्कशः ४ । इति रत्नमाला ॥

कालचक्रं, क्ली, (कालस्य कालगतेश्चक्रमिव ।) कालरूपचक्रम् । यथाह—हेमचन्द्रः ।
'कालो द्विविधोऽवसर्पिण्युत्सर्पिणीभेदतः ।
सागरकोटिकोटीनां विंशत्या स समाप्यते ॥
अवसर्पिण्यां षडरा उत्सर्पिण्यां त एव विपरीताः ।
एवं द्वादशभिररैर्विवर्त्तते कालचक्रमिदम्" ॥
ज्योतिश्चक्रविशेषः । यथा,—
"त्रिनाभिमति पञ्चारे षण्णेमिन्यक्षयात्मके ।
संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम्" ॥
इति विष्णुपुराणे २ । ८ । ४ । चक्रमेवोपासनार्थं विशिष्यन्नाह । त्रिनाभिमतीति । नाभिः स्तम्भः यत्राक्षः प्रोतः स च त्रिमेखलः । अक्षस्यात्र नाभित्वेनोपास्यत्वात् मेखलारूपास्तिस्रो नाभयः पूर्व्वाह्णमध्याह्नापराह्णास्तद्युक्ते । पञ्चारे पञ्च संवत्सरपरिवत्सरादयो वक्ष्यमाणा अराः शलाका यस्य स तस्मिन् । षण्णेमिनि षट् ऋतवो नेमयः प्रान्तवलयानि तद्वति । कालात्मकत्वादक्षयात्मके । संवत्सरमये संवत्सरावयवमासारम्भकत्वात् संवत्सरत्वेनोपास्यत्वाच्च तन्मयम् । तदुक्तं मात्स्ये ।
"अहस्त्रिनाभिः सूर्य्यस्य त्वेकचक्रस्य वै स्मृतम् ।
अराः संवत्सराः पञ्च नेम्यः षडृतवः स्मृताः" ॥
इति । तस्मिन् कालचक्रे कालोपलक्षणभूते कृत्स्नं ज्योतिश्चक्रं प्रतिष्ठितम् आश्रितम् । सूर्य्यगत्यधीनत्वात् कालचक्रफलस्य । इति तट्टीकायां श्रीधरस्वामी ॥ ('स एष निमेषादियुगपर्य्यन्तः कालश्चक्रवत् परिवर्त्तमानः कालचक्रमुच्यत इत्येके" ॥ इति सुश्रुते सूत्रस्थाने ६ अध्याये ॥)

कालज्ञः, पु, (कालं कालानुयायिकर्त्तव्यादिकं कालगतिं वा जानातीति । काल + ज्ञा + क ।) कुक्कुटः । इति राजनिर्घण्टः ॥ (कालज्ञातरि त्रि, यथा, मनुः ७ । २१७ ।
"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः" ॥)

कालञ्जरः, पु, (कालं जरयति । काल + जॄ + णिच् + अच् । बाहुलकात् मुम् ।) योगिचक्रमेलकम् । (कालं मृत्युं जरयतीति ।) भैरवः । (कालेन जीर्य्यति । जॄ + अच् ।) पर्व्वतविशेषः । इति मेदिनी ॥ (यथा, महाभारते ३ । तीर्थयात्रापर्व्वणि ८५ । ५६ ।
"अत्र कालञ्जरं नाम पर्व्वतं लोकविश्रुतम् ।
तत्र देवह्रदे स्नात्वा गोसहस्रफलं लभेत्" ॥)
देशविशेषः । इति धरणी ॥

कालञ्जरी, स्त्री, (कालं जरयति । काल + जॄ + णिच् + अच् । मृत्युञ्जयः तस्य पत्नी ङीप् ।) चण्डी । इति धरणी ॥ (स्वरमेव कालं जरयतीति व्युत्पत्त्या टाबेव ।) तदा कालञ्जरा इति रूपान्तरम् ॥

कालतालः, पु, (कालतायै कृष्णत्वात् अलति पर्य्याप्नोति । कालता + अल + अच् ।) तमालवृक्षः

इति राजनिर्घण्टः ॥ (अस्य गुणादिकन्तमालशब्दे ज्ञेयम् ॥)

कालधर्म्मः, पु, (कालस्य धर्म्मः । आयुषः परिणामकाले पञ्चत्वप्राप्तिरूपो धर्म्मः ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ समयस्य स्वभावः ॥ (यथा, रामायणे । २ । ७२ । ३७ ।
"कालधर्म्मपरिक्षिप्तः पाशैरिव महागजः" ॥)

कालनिर्य्यास, पु, (कालः कृष्णवर्णो निर्यासः ।) गुग्गुलुः । इति रत्नमाला ॥

कालनेमि, पु, (कालस्य मृत्योः नेमिरिव चक्रवत् ।) स्वनामख्यातराक्षसः । स च लङ्कापतेः रावणस्य मातुलः । यथा,—
"कालनेमिं दुराधर्षं रक्षःपरमदुर्जयम् ।
चतुरास्यं चतुर्हस्तमसङ्गनेत्रं भयावहम्" ॥
इति गौ रामायणे ६ । ८२ । ६४ ॥ दैत्यविशेषः । यथा,—श्रीभागवते ।
"आत्मानमिह सञ्जातं जानन् प्राग्विष्णुना हतम् ।
महासुरं कालनेमिं यदुभिः स व्यरुध्यत" ॥
स तु हिरण्यकशिपुपुत्त्रः । इति हरिवंशः ॥ (कालचक्रम् ॥)

कालनेमिरिपु, पुं, (कालनेमेः कालनेमिनाम्नकासुरस्य रिपुः हन्ता ।) विष्णुः । इति शब्दरत्नावली ॥ (कालनेमेः रावणमातुलस्य रिपुः हन्ता । हनूमान् । इति व्युत्पत्तिलब्धोऽर्थः ॥)

कालनेमिहा, [न्] पु, (कालनेमिं तन्नामानमसुरं हतवान् । हन् + क्विप् ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (यदुक्तं महाभारते १३ । १४९ । ८२ ।
"कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः" ॥
कालनेमिं स्वनामख्यातरावणमातुलं हतवानिति व्युत्पत्त्या हनूमान् ॥)

कालनेमी, [न्] पु, (कालस्येव नेमिरस्यस्य शीघ्रादेराकृतिगणत्वात् इनि ।) कालनेमिः । इति द्विरूपकोषः ॥

कालनेम्यरिः, पु, (कालनेमेः अरिः शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

कालपर्णः, पु, (कालं कृष्णं पर्णं पत्रं यस्य ।) तगरवृक्षः । इति शब्दरत्नावली ॥

कालपालक, क्ली, (कालं कृष्णवर्णं पालयति धारयतीति । काल + पाल + ण्वुल् ।) कङ्कुष्ठमृत्तिका । इति राजनिर्घण्टः ॥

कालपीलुक, पु, (कालः कृष्णः पीलुः । स्वार्थे कन् ।) कुपीलुः । इति भावप्रकाशः ॥ (गुणाः पर्य्यायाश्चास्य कुपीलुशब्दे बोद्धव्याः ॥)

कालपुरुषः पु, (कालः कालचक्रं पुरुष इव ।) यमसहायः । इति जटाधरः ॥ ज्योतिःशास्त्रम् । यथा
"किन्त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत् कदाचिदनृषिर्मनसापि पारम्" ॥
कालपुरुषः स चास्या नाम यस्यासौ तस्य ज्योतिःशास्त्रविस्तीर्णसमुद्रस्य । इति भट्टोत्पलः ॥ * ॥ नराणां शुभाशुभज्ञानार्थं जन्मलग्नादिद्वादशराशिकल्पितपुरुषाकारः । यथा,—
"शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसञ्ज्ञानि । ऊरू जानुकजङ्घेचरणाविति च राशयोऽजाद्याः" ॥ इति दीपिका ॥ * ॥ नराणां शुभाशुभज्ञानार्थं जन्मलग्नादिराशिद्रेक्काणघटितपुरुषाकारः । यथा, "कं दृक्श्रोत्रनसाकपोलहनवो वक्त्रञ्च होरादयस्ते कण्ठांसकबाहुपार्श्वहृदयक्रोडानि नाभिस्ततः । वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी जङ्घाङ्घ्री उभयत्र वाममुदितैर्द्रेक्काणभागैस्त्रिधा" ॥ इति "कालनरस्याङ्गे सदसद्ग्रहयोगतः । पुंसामपि तदङ्गेषु शुभाशुभफलं वदेत्" ॥ इति वृहज्जातकम् ॥

कालपृष्ठ, क्ली, (कालं कृष्णं पृष्ठं यस्य ।) कर्णधनुः । धनुर्मात्रम् । इति हेमचन्द्रः ॥

कालपृष्ठ, पु, (कालं कृष्णवर्णं पृष्ठं पृष्ठभागो यस्य ।) कङ्कपक्षी । मृगविशेषः । इति हेमचन्द्रः ॥

कालपेषी, स्त्री, (पिष्यतेऽसौ । पिष् + कर्म्मणि घञ् । पेषः । कालः पेषः । ततः स्त्रियां ङीप् ।) श्यामालता । इति रत्नमाला ॥ (अस्याः पर्य्याया यथा ॥
"कालपेषी महाश्यामा सुमद्रोत्पलशारिवा ।
दीर्घमूला च पालिन्दीमसूरविदला च सा" ॥)

कालप्रभात, क्ली, (कालं कृष्णं प्रभातं यत्र ।) शरदृतुः । शरत्कालः । इति त्रिकाण्डशेषः ॥

कालभाण्डिका, स्त्री, (कालभावे कृष्णप्रभावे खण्डति उपच्छेदति । खड़ि + ण्वुल् टाप् इत्वञ्च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

कालमान, पुं, (कालो मन्यते यः जनैरितिशेषः । काल + मन + कर्म्मणि घञ् ।) कृष्णार्ज्जकः । इति रत्नमाला ॥ कालतुलसी इति भाषा । राजनिर्घण्टे लान्तशब्दोऽयम् ॥ (लकारान्तस्यास्य व्यवहारो यत्र तद्यथा ॥ सुश्रुते सूत्रस्थाने । ३८ अः ॥
"सुरसा-श्वेतसुरसा-फणिज्झकार्ज्जक-भूस्तृण सुगन्धक सुमुख-कालमाल-कासमर्द-क्षवक-खरपुष्पा-विडङ्ग-कट्फल सुरसीत्यादयः, सुरसादिगणः ॥)

कालमुष्कक, पु, (कालो मुष्क इव कायति प्रकाशते । कै + क ।) घण्टापारलिवृक्षः । इति रत्नमाला ॥ (यस्मिन्नस्य व्यवहारस्तद्यथा,—
"प्रशस्तेऽहनि नक्षत्रे कृतमङ्गलपूर्व्वकम् ।
कालमुष्ककमाहृत्य दग्ध्वा भस्म समाहरेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे कुञ्चिकुठारनामकौषधे ॥)

कालमूल, पु, (कालं मूलं यस्य ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

कालमेशिका, स्त्री, (कालः मिश्यते कालोऽयमिति कथ्यते जनैरिति शेषः । मिश + कर्म्मणि घञ् गौरादित्वात् ङीष् ततः कन् टाप् ह्रस्वश्च ।) कालमेषिका । इत्यमरटीकायां रायमुकुटः ॥

कालमेशी, स्त्री, (कालमेश + ङीष्) कालमेषिका । इत्यमरटीकायां भरतः ॥

कालमेषिका, स्त्री, (कालं मिषति स्पर्द्धते स्वकान्त्येन । मिष + अण् । गौरादित्वात् ङीष् स्वार्थे कन् टाप् ह्रस्वश्च ।) मञ्जिष्ठा । कृष्णत्रिवृता । इत्यमरः २ । ४ । १०९ ॥ अस्याः पर्य्याया यथा,—
"त्रिवृत्श्यामार्द्धचन्द्रा च पालिन्दी च सुषेणिका ।
मसूरविदला कालकैषिका कालमेषिका" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥)

कालमेषी, स्त्री, (कालमेष + ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ९६ ॥ (अस्याः पर्य्यायो यथा,—
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च" ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे । गुणा स्वास्या वाकुचीशब्दे ज्ञेया ॥) मञ्जिष्ठा । इति शब्दरत्नावली ॥ त्रिवृत् । इति राजनिर्घण्टः ॥

कालरात्रिः, स्त्री, (कालः कालरूपा ब्रह्मैकदिने चतुर्द्दशमनूनामधिकारावसाने स्थितिसंहारहेतुभूता रात्रिः ।) रात्रिविशेषः । सा तु कालः संहारः । मरणं तदुपलक्षिता रात्रिः कल्पान्तरात्रिरित्यर्थः । इति देवीमाहात्म्यटीकायां विद्याविनोदः ॥ भीमरथी । इति हारावली ॥ दुर्गायाः शक्तिविशेषः । यथा,—
"सा दुर्गा शक्तिभिः सार्द्धं काशीं रक्षति सर्व्वतः ।
तां प्रयत्नेन सम्पूज्य कालरात्रिसुखा नरैः" ।
इति काशीखण्डम् ॥ (दीपावली । यथा,—
"दीपावली तु या प्रोक्ता कालरात्रिश्च सा मता" ।
इत्यागमवचनात् ।
क्रियायोग्यकालविशेषः । यदुक्तं दीपिकायाम् ।
"रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ॥
शनावाद्यं तथा चान्त्यं रात्रौ कालं विवर्जयेत्" ॥)

कालरुद्र, पु, (कालः कालरूपः सर्व्वसंहारको रुद्रः ।) कालाग्निरुद्रः । यथा, देवीपुराणे,—
"येषु न कालरुद्रस्य नानास्त्रीशतसङ्कुला ।
विचित्रहर्म्म्यविन्यासा कुतस्ते मेरुपृष्ठतः ॥
सा एव कालरुद्रस्य तनुरूपेण संस्थिता" ॥

काललवण, क्ली, (कालं कृष्णवर्णं लवणम् ।) विड्लवणम् । इति रत्नमाला ॥
("न काललवणे गन्धः सौवर्च्चलगुणाश्च ते" ॥
इति चरके सूत्रस्थाने २७ अः ॥)

काललोह, क्ली, (कालं कृष्णं लोहं आयसमित्यर्थः ।) कालायसम् । तिखा इति भाषा । तत्पर्य्यायः । कृष्णायसम् २ रुक्मम् ३ तीक्ष्णम् ४ । इति रत्नमाला । (कालायसशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कालवचन, क्ली, (कलयति उपसुनक्ति विषयं । कल + णिच् + अच् । काल्यते प्रेर्य्यतेऽसौ कालेन वा णिच् कर्म्मणि घञ् । कालं कायं तस्य वचनं आवरणम् । वच संवरणे + करणे ल्युट् ।) वर्म्म । इति त्रिकाण्डशेषः ॥ कायवचनमिति साधुपाठः ॥

कालवृन्त, पु, (कालं वृन्तं यस्य ।) कुलत्थवृक्षः । इति रत्नमाला ॥

कालवृन्ती, स्त्री, (कालवृन्त + गौरादित्वात् ङीष् ।) पाटलावृक्षः । इति राजनिर्घण्टः ॥

कालवेला, स्त्री, (कालस्य वेला ।) क्रियानर्हकालविशेषः । सा तु रव्यादिवारे कालस्य शनेर्यत्तद्यामार्द्धरूपवेला । यथा । रवौ दिवा पञ्चमयामार्द्धं नक्तं षष्ठयामार्द्धम् । सोमे दिवा द्वितीययामार्द्धं

नक्तं चतुर्थयामार्द्धम्। कुजे दिवा षष्ठयामार्द्धं नक्तं सप्तमयामार्द्धम्। बुधे दिवा तृतीय यामार्द्धं नक्तं सप्तमयामार्द्धम् ॥ गुरौ दिवा सप्तमयामार्द्धं नक्तं पञ्चमयामार्द्धम्। शुक्रे दिवा चतुर्थयामार्द्धं नक्तं तृतीययामार्द्धम्। शनौ दिवा प्रथमाष्टमयामार्द्धं नक्तं तदेव। इति दीपिका ॥

कालशाक, क्लीं, (कालं कृष्णं शाकम्।) स्वनामख्यातशाकम्। नरचा इति हिन्दी भाषा। तत्पर्य्यायः। नाडिकम् २ श्राद्धशाकम् ३ कालकम् ४। अस्य गुणाः। सारकत्वम्। रुचिवायुबलकारित्वम्। कफशोथरक्तपित्तनाशित्वम्। मेध्यत्वम्। हिमत्वञ्च। इति भावप्रकाशः ॥ तिक्तपूतिका। कुलत्थशाकं इति केचित्। अस्य गुणा। कटुत्वम्। अग्निदीपनत्वम्। गुरुत्वम्। शोथनाशित्वञ्च। इति राजवल्लभः ॥ (यथा च वाभटे सूत्रस्थाने। ६ अध्याये।

"वर्षाभ्वौ कालशाकञ्च सक्षारं कटुतिक्तकम्।
दीपनं भेदनं हन्ति गरशोफकफानिलान्" ॥)

कालशालि, पुं, (कालः कृष्णः शालिः उत्कृष्टधान्यविशेषः।) कृष्णशालि। इति राजनिर्घण्टः ॥

कालशेयं, क्ली, (कलश्यां भवम्। कलशी + ढक्।) कालसेयम्। घोलम्। इत्यमरटीकायां भरतः ॥

कालसंरोधः, पुं, (कालस्य संरोधः।) चिरकालावस्थानम्। इति मिताक्षरा ॥ यथा।

"न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः"।

इति याज्ञवल्क्यः ॥

कालसर्पः, पुं, (कालः कृष्णः सर्पः।) कृष्णसर्पः। तत्पर्य्यायः। अलगर्द्दः २ महाविषः ३। इति त्रिकाण्डशेषः ॥ (यथा काशीखण्डे १०० अध्याये।

"स दष्टः कालसर्पेण स दष्टो मृत्युना स्फुटम्।
स मुष्टस्तत्र दिवसे विश्वेशो यत्र नेक्षितः" ॥)

कालसारं, क्ली, (कालः सारः प्रधानं यस्य।) पीतचन्दनम्। इति भावप्रकाशः ॥ (कालीयकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

कालसारः, पुं, (कालः सारः प्रधानं यस्य।) स्वनामख्यातहरिणः। तत्पर्य्यायः। कृष्णसारः २। इति शब्दरत्नावली ॥

कालसूत्रं, क्ली, (कालस्य यमस्य बन्धनहेतुकाया सूत्रमिव।) नरकविशेषः। इत्यमरः। १। ८। २ ॥ तत्तु कुलालचक्रसूत्रच्छेदनरूपम्। इति मनुः ॥ (यथा मार्कण्डेये १४। ८९।

"कालसूत्रे तथाच्छेदमनेकाब्दैव यातनाः।
प्राप्य निष्कृतिमेतस्मात् न वेद्मि कथमेष्यति" ॥)

कालसेयं, क्ली, (कलस्यां भवम्। कलसी + ढक्।) घोलम्। इत्यमरः। २। ९। ५३ ॥

कालस्कन्धः, पुं, (कालः कृष्णः स्कन्धो यस्य।) तमालवृक्षः। तिन्दुकवृक्षः। जीवकद्रुमः। इति मेदिनी ॥ दुर्म्मखदिरः। उदुम्बरः। इति राजनिर्घण्टः ॥ (अस्य व्यवहारो यथा,—सुश्रुते सूत्रस्थाने। ३८ अध्याये सालसारादिवर्गे ॥

"सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीत्यादिषु" ॥)

काला, स्त्री, (कालो वर्णोऽस्त्यस्य अर्श आदित्वात् अच् टाप् च। अत्र वर्णस्याविवक्षाया जानपदेति न ङीष्। अर्श आद्यजन्तात् न ङीष् इत्यर्थः।) नीलिनी। कृष्णत्रिवृता। कृष्णजीरकः। इत्यमरः। २। ४। ९४ ॥ मञ्जिष्ठा इति मेदिनी ॥ कुलिकवृक्षः। कालियाकडा इति भाषा। इति रत्नमाला ॥ अश्वगन्धावृक्षः। इति राजनिर्घण्टः ॥ पाटलावृक्षः। इति भावप्रकाशः ॥ (दक्षकन्याविशेषः। सा तु कश्यपपत्नी। यथा महाभारते १। सम्भवपर्व्वणि ६५। १२।

"अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा" ॥)

कालागुरु, क्ली, (कालं कृष्णं अगुरु।) कृष्णागुरु। इत्यमरः। २। ६। १२७ ॥ (यथा रघुः ४। ८१।

"चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः" ॥

कृष्णागुरुशब्देऽस्य पर्य्यायः गुणाश्च ज्ञेयाः ॥)

कालाग्नि, पुं, (कालः सर्व्वसंहारकः अग्निः। प्रलयाग्निः। यथा महाभारते १। ५४। २५।

"ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम्।
नाशयिष्यामि माऽत्र त्वं भयं कार्षीः कथञ्चन" ॥

तदधिष्ठातृरुद्रदेवस्य प्रियत्वात् पञ्चमुखरुद्राक्षोऽपि कालाग्निनाम्नाख्यायते।) पञ्चमुखरुद्राक्षः। यथा स्कान्दे।

"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात्" ॥

इति तिथ्यादितत्त्वम् ॥

कालाग्निरुद्रः, पुं, (कालः संहारकः अग्निः सम्वर्त्ताग्निरित्यर्थः। तस्याधिष्ठाता रुद्रः। कालाग्निरिव रुद्रो वा।) संहारकारिरुद्रः। यथा। कालाग्निरुद्र ऋषिरित्यादि वैदिकसन्ध्यायां रुद्रोपस्थानम् ॥ * ॥ तद्विवरणं यथा,—

शक्र उवाच।

"भगवंस्तव वाक्यानां न तृप्तिर्भवते मम।
कालाग्निपार्थिवं मानं श्रोतुमिच्छामि तत्त्वतः" ॥

भगवानुवाच।

"न हि पार्थिवद्वीपेषु मेरुपृष्ठेऽपि वासव।।
भोगाह्लादकरा नृणां तथा पातालवासिषु ॥
येषु नः कालरुद्रस्य नानास्त्रीशतसङ्कुलाः।
विचित्रहर्म्म्यविन्यासा कुतस्ते मेरुपृष्ठतः ॥
सा एव कालरुद्रस्य तनुरूपेण संस्थिता।
सा पराशिवभावेन परमापददायिका ॥
तस्या यद्दुःसहं तेजो ब्रह्मादीनां क्षयकरम्।
तं विद्धि कालरुद्रेति सौम्यरूपं सदाशिवम् ॥
कालाग्निव्यसनं लक्षयोजनानां प्रमाणतः।
अर्द्धेनोच्छ्रयतस्तस्य पादाः पादेन वासव।॥
सिंहरूपा महाघोरा महाननाः महाबलाः।
कालाग्निरुद्ररूपो यो बहुरूपसमावृतः ॥
अनन्तपद्मरूपस्य धातारं कारणेश्वरः।
दारुणाग्निश्च रुद्रस्य यमहन्ता क्षमान्तकः ॥
लोहितः क्रूरतेजात्मा घनो दृष्टिर्बलाहकः।
विद्युतश्चलशीघ्रश्च प्रसन्नः शान्तसौम्यदृक् ॥
सर्व्वज्ञो विविधो बुद्धो द्युतिमान् दीप्तिसुप्रभः।
एते रुद्रा महात्मानः कालिकाशक्तिसंस्थिताः ॥
संहरन्ति समस्तेदं ब्रह्माद्यं सचराचरम्।
कालाग्निभुवनीशोऽयं बहुकोटिभिरावृतः ॥
तस्याः पुरस्य विस्तारः शतकोटिसुवर्त्तुला।
देवगन्धर्व्वसिद्धानां तत्र भोगाः सुदुर्लभाः ॥
पूर्व्वोत्तरपरा पश्चिमाय्योत्तरस्थिता परा।
अनलानिलपरा च नैरृतेशानगापरा ॥
एतेषां मध्यतो राजन् कालरुद्रस्तु शोभने।
पद्माकारैः पुरैः सर्व्वं कटकं तस्य संस्थितम् ॥
समन्तादेष्टितवनं प्राकाराट्टालगोपुरैः।
वज्रेन्द्रनीलवैदूर्य्यैः प्राकारैः सर्व्वतोऽन्वितम् ॥
कालाग्निनरकान्ते तु पुरं कालस्य संस्थितम्।
पञ्चाशल्लक्षविस्तारं समन्तात् परिवर्त्तुलम् ॥
जाम्बूनदमयैर्हैमैः खचितं रत्नधातुभिः ॥
प्रमदाजनसंजुष्टं नानावर्णसमावृतम् ॥
कामोन्मत्तप्रमत्तैश्च तद्भाति जनसंकुलम्।
कालस्य भुवनं दिव्यं वृत्ताकारं मनोहरम् ॥
वेष्टितं हेमप्राकारैर्योजनायुतमुच्छ्रितम्।
प्राकारावहिरण्डान्ते अन्तरं योजनायुतम् ॥
अग्निज्वालैश्च निविडैर्भयदैः किंशुकप्रभैः।
हरितालनिभा ज्वाला सिन्दूरगैरिकाप्रभा ॥
अत ऊर्द्ध्वं प्रजज्वाल वातोद्धूताग्निभास्वरा।
वीचितरङ्गकल्लोलज्वालामालाकुलाम्बरा ॥
प्रवृत्ताः प्रमाणेन योजनद्वयकोटयः।
अष्टानवतिलक्षाणि ज्वाला ऊर्द्ध्वन्ततः शिखा ॥
वज्रभूता सदा तप्ता तस्य तेजोनियामिका।
चत्वारि कोटिमानेन कारणेन तु स्थापिता ॥
तस्यार्द्धेन भवेत् किञ्चित् कोट्यश्चत्वारि वासव।।
एवं कालाग्निरुद्रस्य माहात्म्यं कीर्त्तितं मया ॥
श्रवणात् सर्व्वपापानि शाम्यन्ति कालजान्यपि" ॥

इत्याद्ये देवीपुराणे कालाग्निरुद्रपुरकथनम् ॥

(कृष्णयजुर्व्वेदगतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।

"कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमन्त्रिका" ॥

वटिकौषधविशेषः। यथा,—

"सूतकान्ताभ्रलौहानां भस्ममाक्षिकगन्धकम्।
भूधराख्ये पुटे पश्चाद्दिनैकं तद्विपाचयेत् ॥
दशमाशं विषं योज्य माषमात्रञ्च भक्षयेत्।
रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत्" ॥

कालाग्निरुद्रोरसः ॥

इति रसेन्द्रसारसंग्रहे वीसर्पाधिकारे ॥*॥)

कालाञ्जनी, स्त्री, (अज्यतेऽनया। अन्ज् + करणे ल्युट् + ङीप्। काली अञ्जनी ततः पुंवद्भावः।) क्षुपविशेषः। कालिकर्पसिकिनी इति ख्याता। तत्पर्य्यायः। अञ्जनी २ रेचनी ३ शिलाञ्जनी ४ नीलाञ्जनी ५ कृष्णाभा ६ काली ७ कृष्णाञ्जनी ८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। अमलत्वम्। कृमिशोधनत्वम्। अयानावर्त्तशमनत्वम्। जाठरामयनाशित्वञ्च। इति राजनिर्घण्टः ॥

कालानुनादी, [न्] पुं, (कल एव कालः अव्यक्तमधुर-

ध्वनिः। तं अनुनदतीति। अनु + नद + णिनि।) रोलम्बः। भ्रमर। कालविद्ध। घटा इति भाषा। कपिञ्जल। श्रावकपक्षी। इति मेदिनी॥

कालानुशारिवा, स्त्री, (कालेन कृष्णवर्णेन अनुसृता शारिवा।) तगरपादिकम्। तगरमूल इति भाषा। शीतलजटा। इति रत्नमाला। शीउली-छोप् इति भाषा॥ (तगरशब्दे ऽस्या गुणादयो बोध्या॥)

कालानुसारकं, क्ली, (काल कृष्णवर्णं मृगमदं अनुसरति गन्धेन। अनु + सृ + ण्वुल्।) तगरम्। इति राजनिर्घण्टः॥ पीतचन्दनम्। इति भावप्रकाश॥

कालानुसारि, पुं, (काल कृष्णवर्णं मृगमद अनुसरतीति। काल + अनु + सृ + इन्।) शैलेयम्। शैलजनामगन्धद्रव्यम्। इति शब्दरत्नावली॥

कालानुसार्य्य, क्ली, (कालेन मृगमदेनानुस्रियते। अनु + सृ गतौ + "ऋहलोर्ण्यत्" ।३।१।१२४। इति ण्यत्।) शैलेयम्। शैलज इति भाषा। कालीयकम्। कालीयानामपीतवर्णसुगन्धिकाष्ठम्। इत्यमर। २।४।१२२। शिंशपावृक्ष। इति मेदिनी। शिशु इति भाषा॥ तगरम्। इति भावप्रकाश॥

कालानुसार्य्यक, क्ली, (कालानुसार्य्य + कप्।) शैलेयम्। इति राजनिर्घण्टः॥

कालान्तरविष, पु, (कालान्तरे दशनादन्यस्मिन् काले विष विकृतिकारि यस्य।) मूषिकादि। इति हेमचन्द्र॥

कालाप, पु, (काल मृत्युराप्यते यस्मात्। काल + आप् + अपादाने घञ्।) सर्पभोग। राक्षस। इति धरणी॥ (कलाप स्वनामख्यात व्याकरण वेत्तीति। अण्।) कलापव्याकरणवेत्तरि त्रि। (ऋषिविशेष। यथा महाभारते। २।४।१७।

"कुक्कुरो वेणुजङ्घोऽथ कालाप कठ एव च।

मुनयो धर्म्मविद्वांसो धृतात्मानो जितेन्द्रिया"॥)

कालायस, क्ली, (कालञ्च तत् अयश्चेति। "अनोश्माय सरसा जातिसञ्ज्ञयो"। ५।४।९४। इति टच्।) लौहम्। इत्यमर।२।९।९८। (यथा, गो रामायणे। ५।४९।३२।

"ददर्श वीक्षमाणश्च परिघ तोरणाश्रयम्।

तमादाय महाबाहु कालायसमय दृढम्"॥

अस्य पर्य्याया यथा,—

"लौहोऽस्त्री शस्त्रक तीक्ष्ण पिण्ड कालायसायसी"।

अस्य सप्तदोषा यथा,—

"गुरुता दृढतोत्क्लेद कश्मल दाहकारिता।

अश्मदोष सदुर्गन्धो दोषा सप्तायसस्य तु"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कालिक,स्त्री, (काल कृष्णो वर्णोऽस्त्यस्य इति ठन्।) कृष्णचन्दनम्। तत्पर्य्याय। कालीयम् २ कालायकम् ३ हरिप्रियम् ४। इति शब्दचन्द्रिका॥ (काले भवम्। ठञ्। कालेन निर्वृत्त ठञ् वा।) सामयिके त्रि। (यथा, भाषापरिच्छेदे १२२।

"दैशिक कालिकश्चापि मूर्त्त एव तु दैशिकम्"॥)

कालिक, पु, (काले वर्षाकाले चरति ठञ्। के जले अलति पर्य्याप्नोति। अल् + बाहुलकात् इकन् वा।) क्रौञ्च। इति शब्दरत्नावली॥

कालिका, स्त्री, (कालो वर्णोऽस्त्यस्या इनिठनाविति ठन्। यद्वा, काल + जानपदात् ङीष् स्वार्थे कन् ह्रस्वश्च।) चण्डिकाभेद। काली। तन्नामकारणं यथा।

"सर्व्वे सुरगणा सेन्द्रास्ततो गत्वा हिमाचलम्।

गङ्गावतारनिकटे महामायाम् तुष्टुवु॥

अनेकसस्तुता देवी तदा सर्व्वामरोत्करै।

मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत॥

युष्माभिरमरैरत्र स्तूयते का च माविनो।

किमर्थमागता यूयं मातङ्गस्याश्रम प्रति।

एव ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषत।

समुद्भूताब्रवीद्देवी मा स्तुवन्ति सुरा इति॥

शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान्।

तस्मात्तयोर्व्वधायाह स्तूयेऽद्य सकलै सुरै॥

विनि सृताया देव्यान्तु मातङ्ग्या कायतस्तदा।

भिन्नाञ्जननिभा कृष्णा साभूत् गौरी क्षणादपि॥

कालिकाख्याऽभवत्सापि हिमाचलकृताश्रया।

तामुग्रतारा ऋषयो वदन्तीह मनीषिण।

उग्रादपि भयात्पाति यस्माद्भक्तान् सदाम्बिका॥

एतस्या प्रथम बीज कथित तन्त्रमेव च।

एषैवैकजटा ख्याता यस्मात्तस्या जटैकिका।

शृणुत चिन्तन चास्या सम्यग्वेतालभैरवौ॥

यथा ध्यात्वा महादेवीं भक्त प्राप्नोत्यभीप्सितम्।

चतुर्भुजा कृष्णवर्णा मुण्डमालाविभूषिताम्॥

खड्ग दक्षिणपाणिभ्या बिभ्रतीन्दीवर द्वय।

कर्त्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्॥

द्यां लिखन्तीं जटामेका बिभ्रतीं शिरसा स्वयम्।

मुण्डमालाधरा शीर्षे ग्रीवायामपि सर्व्वदा॥

वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम्।

कृष्णवस्त्रधरा कट्या व्याघ्राजिनसमन्विताम्॥

वामपाद शवहृदि सस्थाप्य दक्षिण पदम्।

विन्यस्य सिहपृष्ठे तु लेलिहानासव स्वयम्॥

साट्टहासमहाघोररावयुक्तातिभीषणा।

चिन्त्योग्रतारा सतत भक्तिमद्भि सुखेप्सुभि॥

एतस्या सप्रवक्ष्यामि या अष्टौ योगिनीस्तु ता।

महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च॥

घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी।

भैरवी चाष्टमी प्रोक्ता योगिनीस्ता प्रपूजयेत्"॥

इति कालिकापुराणे उत्तरतन्त्रे ६० अध्याय।

कार्षापणम्। वृश्चिकपत्रवृक्ष। क्रमदेयवस्तुमूल्यम्। धूसरी। नवमेघ। पटोलशाखा। रोमाली। मासी। काकी। शिवा। मेघावलि। इति मेदिनी॥ (यथा रघु ११।१५।

'ताडका चलकपालकुण्डला

कालिकेव निविडा बलाकिनी"॥)

स्वर्णदोष। इति जटाधर। क्षीरकीट। इति हारावली॥ मसी। इति शब्दरत्नावली॥ काकोली। श्यामापक्षी। इति राजनिर्घण्टः॥ प्रतिमासीया वृद्धि। यथा,—

"प्रतिमास स्रवति या वृद्धि सा कालिका मता"। इति विवादार्णवसेतौ नारद॥ सुरा। इति हेमचन्द्र॥ कुज्झटिका। इत्यमरटीकायां भरत॥ हिमाचलभवा त्रिशिरा हरीतकी। सा गन्धयोगकरणे प्रशस्ता। इति राजवल्लभ॥ (नदीविशेष। यथा महाभारते ३।८४।१४६।

"कालिकासङ्गमे स्नात्वा कौशिक्यारुणयोर्यत।

त्रिरात्रोपषितो विद्वान् सर्व्वपापै प्रमुच्यते"॥)

कालिकाव्रतं, क्ली, (कालिकाया प्रीतये यद्व्रतं विहितनियमादिकम्।) अमावास्याया स्नोकर्त्तव्यव्रतविशेष। यथा,—

युधिष्ठिर उवाच।

"कालिकाव्रतमाहात्म्य वद वेदविदाम्बर।

किमेतस्य फल देव को वा तद्विधिरेव च॥

कस्माद्व्रतमिद भूत मर्त्त्ये केन प्रकाशितम्।

तत्तत्सर्व्वं श्रोतुमिच्छामि तत्सर्व्व ब्रूहि केशव।"॥

श्रीकृष्ण उवाच।

"पुरा भविष्यशास्त्रेषु यदुक्त धर्म्मसहितम्।

तत्सर्व्व शृणु राजेन्द्र। कालिकाव्रतमुत्तमम्॥

स्वर्गे पुरन्दरस्यासीत्तस्यैव राजसद्मनि।

यद्वृत्तान्तमभूत्तत्र तच्छृणुष्व युधिष्ठिर।॥

सभाया सस्थितो राजा मृत्यासक्तो हि नित्यश।

दिनैकस्य च वृत्तान्त श्रुत्वा हृष्टो बभूव स॥

अत्यामोद समभ्येत्य पुष्पवल्लिरसुत्तदा।

पुरन्दर स्वय प्राप्य पारिजात गृहीतवान्॥

घ्रात्वा राज्ञा तदा पुष्प प्रदत्त तद्विशतये।

लज्जितो ब्राह्मण सोऽपि मानहीनोऽभवत्तदा॥

क्रोधेन महताविष्ट शशा कामसमन्वित।

त्वया विमृश्य चेन्द्राय शापो दत्त सुदारुण॥

व्याधालयेषु मार्ज्जारो द्वादशाब्द भविष्यसि।

तेन कर्म्मविपाकेन मद्युक्तो विचेतन॥

प्राप्तमार्ज्जारदेहोऽसौ राजा विपिनमाश्रित।

पत्नी तस्य च तत्रासीत् पत्यु सर्व्वाधिकारिणी॥

ततो व्याधगृहे राजा मार्ज्जारीभूय तिष्ठति।

तत पुरन्दरपुर राजशून्यमभूत्तदा॥

शची तु चिन्तयामास अन्नपान विहाय सा।

उपवास समाचर्य्य मासमेकन्तु तिष्ठति॥

ततो देवगणा सर्व्वे चिन्तया व्याकुलेन्द्रिया।

गत्वा तु राजभवन व्याकुला ता विलोक्य च॥

विमृश्य चामरा सर्व्वे शची वाक्यमुदाहरन्।

शचि। त्व राजजायासि कथमेतत् करोषि च।

मासमेकमनाहार कृत्वा तिष्ठसि सुव्रते।।

कि वा त्वदीप्सित देवि। सत्येन वद सङ्गिहते॥

तच्छ्रुत्वा तु तदा देवी कृताञ्जलिरभाषत।

यूयमेव जगन्नाथा सृष्टिस्थित्यन्तकारका॥

क गतो मम भर्त्ता च तन्न जानामि कथ्यताम्।

परिचिन्त्यामरा सर्व्वे ध्यानमास्थाय सस्थिता॥

मार्ज्जाररूपमास्थाय स्थीयते चान्यशाश्रमे।

तच्छ्रुत्वा राजपत्नी च वेपमाना मुहुर्मुहु॥

उवाच कुशल प्रश्न राजार्थ कि करोम्यहम्।

पत्युर्यथा विमोक्ष स्याद् सत् कुरुध्व सुधाशनाः॥

प्रत्यूचुस्तामरा सर्व्वे याहि त्व द्विजसन्निधिम्।

समाप्य मधुर प्रश्न द्विजसेवा समाचर।

द्विजगेह समागत्य द्विजसेवामराऽभवत्॥

स तस्याः प्रियकार्य्येण सन्तुष्टो द्विजसत्तम ।
हिंसाद्रोहविमुक्तस्य बलिहोमपरायणः ।
शान्तो दान्तः क्षमायुक्तः सदा मधुरभाषितः ॥
सर्व्वप्राणिहितार्थी च लोभमोहविवर्ज्जितः ।
जितेन्द्रियो जितक्रोधो वृद्धोऽसौ ब्राह्मणोत्तम ॥
राजपत्न्याः सुसेवाभिः प्रीतोऽसौ द्विजसत्तमः ।
प्रत्युवाच स तां प्रीत्या शचि । त्वं चातिदुर्ल्लभे ।
किं वा त्वदीप्सितं देवि । सत्येन वद पण्डिते” ॥
शच्युवाच ।
“पापं यदज्ञानतो भर्त्रा समस्तं कर्म्मणा कृतम् ।
तत् क्षमस्व महाभाग । रक्षस्व सुरपालकम् ॥
वासवस्तव शापेन मार्ज्जारत्वमुपागतः ।
इन्द्रो व्याधगृहे देव ! विद्यते हि न संशयः ।
पुरन्दरस्य शापान्तः केनोपायेन सिध्यति” ॥
ब्राह्मण उवाच ।
“शचि । त्वं पतिभक्तासि मद्वाक्यमवधारय ।
पतिव्रते । महाभागे । कालिकाव्रतमाचर ॥
दारुणं यत् कृतं तेन व्रतेनैव विमुच्यते ।
कोपात् शापो मया दत्तो तन्मोक्षं कुरु सुव्रते ।” ॥
शच्युवाच ।
“विधानं ब्रूहि मे ब्रह्मन् कालिकाया व्रतस्य च ।
तदा तव प्रसादेन करोमि तद्व्रतं द्विज ।” ॥
ब्राह्मण उवाच ।
“अश्वत्थतरुमूलेऽस्ति वटको नाम हिंसकः ।
तस्यैव भवनं गच्छ शापान्मोक्षं च कारय ॥
पत्नी सुभद्रा तस्यास्ति पतिशुश्रूषणे रता ।
तस्याः कुलव्रतं कर्म्म तत्परा भव शोभने ।
ततश्च प्राङ्मुखीभूय गता सा तस्य मन्दिरम् ॥
दृष्ट्वा व्याधः शचीं देवीं प्रत्युवाच सुभद्रिकाम् ।
आयान्तीयं शची देवी तस्याः सम्भाषणं कुरु ॥
इति तस्य वचः श्रुत्वा सुभद्रा हृष्टमानसा ।
तस्याः सम्भाषणार्थन्तु सुभद्रा चागता बहिः ।
ताञ्च दृष्ट्वा शचीं देवीं सार्घ्यपाद्यादिकं ददौ ॥
शचि । त्वं राजभार्य्यासि कस्मादागमनं तव ।
किं कार्य्यं कथय त्वं हि इत्युवाच शचीं प्रति ॥
प्रत्युवाच शची तान्तु भर्त्ता मे सुरपालकः ।
स च ब्राह्मणशापेन मार्ज्जारश्चाभवद्द्रुतम् ॥
क्व गतः प्राणनाथोऽसाविति चिन्तापरानिशम् ।
ज्ञात्वा केनाप्युपायेन प्राप्ता च भवतीगृहम् ॥
इत्युक्त्वा राजपत्न्या च दृष्टो मार्ज्जारकस्तदा ।
सा ज्ञात्वा तं प्रियं शक्रं चिन्तां प्राप्ता दुरत्ययाम् ॥
दृष्ट्वा मार्ज्जारतां प्राप्तं विलापाकुलेन्द्रिया ।
विलपन्तीं शचीं दृष्ट्वा सुभद्रा प्रत्युवाच ताम् ॥
पतिव्रते महाभागे । त्वमेव राजगेहिनी ।
त्वं दुःखेन विलिप्तासि सन्देहो नास्ति तत्र वै ॥
किञ्च तस्याप्युपायोऽस्ति कालिकाव्रतमाचर ।
अतिप्रत्यक्षरूपा सा अस्माकं कुलदेवता ॥
कालिका सा महादेवी शुभसन्ततिदायिनी ।
व्रतस्यास्य प्रभावेण साकल्यमुपजायते” ॥
शच्युवाच ।
“विधानं चास्य मे ब्रूहि कालिकाया व्रतस्य च ।
ममोपदिश्यतामेव तद्व्रतञ्च करोम्यहम् ॥

शुक्लकाले समारभ्य कृष्णपक्षे चतुर्द्दशीम् ॥
संकल्प्य विधिना पूर्व्वममावास्यां व्रतं चरेत् ।
समारभ्य गुणैकेन द्विगुणं परिशोधयेत् ॥
न रात्रौ भोजनं कार्य्यं वामहस्ते भुजिक्रिया ।
सिद्धमन्नं रात्रिकाले दग्धमीनञ्च सर्व्वदा ॥
वर्ज्जयेत् पिष्टकं किञ्चित् रक्तशाकस्य चाम्लकम् ।
द्विषट्का विप्रजायाश्च सधवां भोजयेत्ततः ॥
एवं क्रमेण कृत्वा तु कतिकालं नयेद्व्रतम् ।
ततः शुद्धदिने प्राप्ते भौमाह्नि मन्दवासरे ॥
यथाशक्त्युपचारैश्च पूजां कुर्य्याद्विधानतः ।
तथापराह्णकाले तु सन्ध्योपसमये तथा ॥
रात्रौ तु कदलीकाण्डे गृहं निर्म्माय प्राङ्गणे ।
तस्य मध्ये समारोप्य कालिकां पूजयेत् सदा ॥
पाद्यार्घ्याचमनीयैश्च गन्धपुष्पादिभिस्तथा ।
धूपैर्दिव्यप्रदीपैश्च नैवेद्यैर्विविधैस्तथा ॥
पिष्टकं चैव सिद्धान्नं व्यञ्जनं दग्धमीनकम् ।
निवेद्य सकलं देव्यै बलिं दत्त्वा प्रणम्य च ॥
तदन्नं व्यञ्जनं सर्व्वं नैवेद्यादिबलिं तथा ।
महारण्ये प्रदातव्यं कृत्वैतत् व्रतमुत्तमम् ॥
वैणवे कदलीमूले या कुर्य्यात् कालिकाव्रतम् ।
कार्य्यसिद्धिर्भवेत् तस्या भविता गतिरुत्तमा ॥
एतद्व्रतविधानन्तु कृत्वा सिद्धिर्भविष्यति ।
एतद्व्रतमिदं भद्रे कुरु गत्वा निजालयम् ॥
तस्यास्तद्वचनं श्रुत्वा सा शची हर्षमानसा ।
गृहमागत्य सा तस्या वार्षिकं व्रतमाचरत् ॥
गन्धपुष्पैर्धूपदीपैर्नैवेद्यैरुत्तमैस्तथा ।
कृत्वा चाश्ममयीं देवीं पूजयेत् भक्तिसंयुता ॥
नानासुगन्धिपुष्पाणि दिव्यरत्नाद्यलङ्कृतम् ।
सिद्धान्नं पायसञ्चैव शर्करान्वितपिष्टकम् ॥
अमृतायतद्भावश्च दीयते च प्रयत्नतः ।
लुलापच्छागमेषादिबलिं दत्त्वा प्रभूतकम् ॥
नानावाद्योद्यमैर्गीतैः प्रणिपत्य पुनः पुनः ।
कृताञ्जलिपुटा स्तोत्रं भक्तिनम्रा चकार सा ॥
तुष्टा प्राह महाकाली वरं वृणु शुभानने ।।
तत् श्रुत्वा राजपत्नी सा बभाषे च मुदान्विता ॥
मत्प्रभुराखुभुक् भूतस्तन्मोक्षं कुरु चेश्वरि ।।
वरं दत्त्वा हैमवती बभूवान्तर्हिता नृप ! ॥
द्वादशाब्दाच्च तत्शापान्मोचितो वत्सरे तदा ।
मार्ज्जाररूपं सन्त्यज्य स गतोऽन्तेऽमरावतीम् ॥
पुष्पवृष्टिश्च दुन्दुभ्या वाद्यं देवगणैः कृतम् ।
कालिकायाः प्रसादेन गतः शक्रो निजालयम् ॥
अनेनैव विधानेन या कुर्य्यात् कालिकाव्रतम् ।
सत्वरं कार्य्यसिद्धिः स्यात्तस्या अत्र न संशयः” ॥
इति भविष्यपुराणे कालिकाव्रतकथा समाप्ता ॥

कालिङ्गं, क्ली, (केन जलेन आलिङ्ग्यतेऽसौ । आ + लिगि + कर्म्मणि घञ् ।) फलविशेषः । तरमुज् इति ख्यातम् । तत्पर्य्यायः । कालिन्दकम् २ कृष्णवीजम् ३ फलवर्त्तुलम् ४ । अस्य गुणाः । शीतलत्वम् । ग्राहित्वम् । स्वादुपाकरसत्वम् । गुरुत्वम् । विष्टम्भित्वम् । स्यन्दित्वम् । दृक्शुक्रपित्तनाशित्वम् । कफवातकारित्वञ्च । पक्वस्य तस्य गुणाः । पित्तवृद्धिकारित्वम् । उष्णत्वम् । क्षारत्वम् । कफवातनाशित्वञ्च । तत्पत्रगुणौ । रुधिरस्थापनत्वम् । तिक्तत्वञ्च । इति पथ्यापथ्यविवेकः ॥

कालिङ्गः, पुं, (केन जलेनालिङ्ग्यते इति । क + आ + लिगि + कर्म्मणि घञ् ।) भूमिकर्कारुः । (कं जलमालिङ्गति । आ + लिगि + कर्म्मण्यण् ।) हस्ती । (कं वातं आलिङ्गति गृह्णाति अश्नाति इत्यर्थः ।) सर्पः । इति मेदिनी ॥ (कुत्सितं लिङ्गं अङ्गादिचिह्नं यस्येति कोः कादेशः ।) लौहभेदः । अस्य लक्षणम् । “कालिङ्गो लिङ्गवान् यः स्याद्घनः सूक्ष्माङ्को मतः” । इति सुखबोधः ॥ (कलिङ्गे भवः । अण् । कलिङ्गदेशोद्भवः । यथा महाभारते ८ । कर्णशल्यसंवादे ४५ । १४ ।
“कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः ।
कोसलाः काशयोऽङ्गाश्च कालिङ्गा मागधास्तथा” ॥
कलिङ्गदेशस्य राजा । अण् । कलिङ्गराजः । यथा रघुः ४ । ४० ।
“प्रतिजग्राह कालिङ्गः तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्व्वतः” ॥)

कालिङ्गिका, स्त्री, (कालिङ्ग + गौरादित्वात् ङीष् । स्वार्थे संज्ञायां वा कन् टाप् ह्रस्वश्च ।) त्रिवृत् । इति राजनिर्घण्टः ॥

कालिङ्गी, स्त्री, (कालिङ्ग + गौरादित्वात् ङीष् ।) राजकर्कटी । इति मेदिनी ॥ (कालिङ्गदेशोद्भवा । यथा महाभारते १ । ९५ । २२ ।
“अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे” ॥)

कालिदासः, पुं, (काल्याः दासः । संज्ञायां ह्रस्वः ।) स्वनामख्यातकविः । तत्पर्य्यायः । रघुकारः २ मेधारुद्रः ३ कोटिजित् ४ । इति त्रिकाण्डशेषः ॥ स तु रघुकुमारसम्भवश्रुतबोधमेघदूताभिज्ञानशकुन्तलनलोदयशृङ्गारतिलकादिग्रन्थकर्त्ता विक्रमादित्यराजसभास्थनवरत्नमध्ये सप्तमरत्नञ्च ॥ (यदुक्तम् ।
“धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य” ॥)

कालिदासकः, पुं, (कालिदास + स्वार्थे कन् ।) कालिदासः । इति शब्दरत्नावली ॥

कालिनी, स्त्री, (कालः शिवः अधिष्ठातृतया यद्वा कालः पुरुषाकारः आकाशस्थो लुब्धकः सन्निकृष्टत्वेन अस्त्यस्याः ।) आर्द्रानक्षत्रम् । इति हेमचन्द्रः ॥

कालिन्दकं, क्ली, (कालिं जलराशिं ददातीति । दा + कः । स्वार्थे कन् ।) कालिङ्गम् । इति राजनिर्घण्टः ॥

कालिन्दी, स्त्री, (कलिन्दाख्यपर्व्वते तत्सन्निहितदेशे वा जाता । कलिन्दात् निःसृता वा “तत्र भवः” । ४।३।५३ । इति अण् ततो ङीप् ।) यमुना नदी । इत्यमरः । १ । १० । ३२ ॥ (यथा रघुः १५ । २८ ।
“उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः ।
निर्म्ममे निर्म्ममोऽर्थेषु मथुरां मधुराकृतिः” ॥)
रक्तत्रिवृत् । इति राजनिर्घण्टः ॥

कालिन्दीकर्षणः, पुं, (कालिन्दीं कर्षति यः । कृष + कर्त्तरि ल्युः । कालिन्द्याः कर्षणो वा ।) बलदेवः । इति हलायुधः ॥

(कालिन्दीसङ्गमकथा हरिवंशे १०२ अध्याये उक्ता । तद्यथा,—

"रामस्तु यमुनामाह स्नातुमिच्छे महानदि ।
एहि मामभिगच्छस्व रूपिणी सागरङ्गमे ॥
सङ्कर्षणस्य मत्तोक्तां भारतीं परिभूय सा ।
नाभ्यवर्त्तत तं देशं स्त्रीस्वभावेन मोहिता ॥
ततश्चुक्रोध बलवान् रामो मदसमीरित ।
चकार स हलं हस्ते कर्षणाधोमुखं बली ॥
तस्यासुपरि मेदिन्यां पेतुस्तामरसस्रज ।
मुमुचुः पुष्पकोषैश्च पुष्परेणुमयं जलम् ॥
स हलेनानताग्रेण कूले गृह्य महानदीम् ।
चकर्ष यमुनां रामो व्युत्थितां वनितामिव ॥
सा विह्वलजलस्रोता ह्रदप्रस्थितसञ्चया ।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी ॥
लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी ।
सङ्कर्षणभयत्रस्ता योषेवाकुलतां गता ॥
पुलिनश्रोणिबिम्बोष्ठी मृदितैस्तोयताडितैः ।
फेनमेखलसूत्रैश्च वेगगाम्बुदगामिनी ॥
तरङ्गविषमापीडा चक्रवाकोन्मुखस्तनी ।
वेगगम्भीरवक्राङ्गी त्रस्तमीनविभूषणा ॥
सितहंसेक्षणापाङ्गी काशक्षौमोच्छ्रिताम्बरा ।
तीरजोद्धूतकेशान्ता जलस्खलितगामिनी ॥
लाङ्गलोल्लिखितापाङ्गी क्षुभिता सागरङ्गमा ।
मत्तेव कुटिला नारी राजमार्गेण गच्छती ॥
कृष्यते सा स्म वेगेन स्रोतःस्खलितगामिनी ।
[illegible]मार्गा नीतमार्गा सा येन वृन्दावनं वनम् ॥
[illegible]न्दावनस्य मध्येन सा नीता यमुना नदी ।
सेव्यमानेव खगैरन्विता तोयवासिभिः ॥
सा यदा समभिक्रान्ता नदी वृन्दावनं वनम् ।
तदा स्त्रीरूपिणी भूत्वा यमुना राममब्रवीत् ॥
प्रसीद नाथ ! भीतास्मि प्रतिलोमेन कर्म्मणा ।
विपरीतमिदं रूपं तोयस्य मम जायते ॥
असत्यहं नदीमध्ये रौहिणेय ! त्वया कृता ।
कर्षणेन महाबाहो स्वमार्गव्यभिचारिणी ॥
प्राप्तां मां सागरे नूनं सपत्न्यो वेगगर्व्विताः ।
फेनहासैर्हसिष्यन्ति तोयव्यावृत्तगामिनीम् ॥
प्रसादं कुरु मे वीर ! याचे त्वां कृष्णपूर्व्वज ! ।
सुप्रसन्नमना नित्यं भव त्वं सुरसत्तम ! ॥
कर्षणायुधकृष्टास्मि रोषोऽयं विनिवर्त्त्यताम् ॥
गच्छामि चरणौ मूर्द्ध्ना सर्व्वथा लाङ्गलायुध ! ।
मार्गमादिष्टमिच्छामि क्व गच्छामि महाभुज !" ॥)

कालिन्दीभेदनः, पुं, (कालिन्दीं भिनत्ति । भिद् + कर्त्तरि ल्यु । कालिन्द्या भेदनो वा ।) बलदेवः । इत्यमरः । १ । १ । २५ । ("कालिन्दीभेदनो हलीति" पुराणम् ॥)

कालिन्दीसूः, स्त्री, (सूते इति । सू + क्विप् । कालिन्द्याः यमुनायाः सूः माता प्रसवित्रीत्यर्थः । कालिन्दीं सूते सूतवती वा ।) सूर्य्यपत्नी । यमुनामाता । इति त्रिकाण्डशेषः ॥

कालिन्दीसोदरः, पुं, (कालिन्द्याः सोदरः सहोदरः ।) यमः । इति हेमचन्द्रः ॥

काली, स्त्री, (कालः कृष्णवर्णोऽस्त्यस्याः । काल + "जानपदकुण्डगोणस्थलभाजनागकालनीलेत्यादिना" । ४ । १ । ४२ । ङीष् ।) शान्तनुराजपत्नी । इति त्रिकाण्डशेषः ॥ (कालः शिवः । तस्य पत्नीति ङीष् ।) कालिका । अम्बिकाललाटनिष्क्रान्ता देवी । यथा,

"ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ।
कोपेन चास्या वदनं मसीवर्णमभूत्तदा ॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी" ॥

इति मार्कण्डेयपुराणे ८७ । ५ ॥ * ॥ अन्यच्च ।

"देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव ! ॥
समाप्तिसहितो दन्त्यः प्राक्त्यक्तस्मात् पुरःसरः ।
षष्ठस्वरामिबिन्द्विन्दुसहितो मादिरेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि वर्त्तते कामना यया ॥
नीलोत्पलदलश्यामा चतुर्ब्बाहुसमन्विता ।
खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म च पाशञ्च ऊर्द्ध्वाधो भावतः पुनः ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मवराम्बरा ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणानना ।
एषा ताराह्वया देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनीश्चाष्टौ पूजयेच्चिन्तयेदपि ।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विधायिका ॥
कराला शूलिनी चेति अष्टौ ताः परिकीर्त्तिताः ।
एषातिकामदा देवी साधकानां सदा ॥
एतस्याः सदृशी काचित् कामदा न हि विद्यते" ।

इति श्रीकालिकापुराणे उत्तरतन्त्रे ६० अध्यायः । क्षीरकीटः । मातृभेदः । उमा । नवमेघसमूहः । परीवादः । इति हेमचन्द्रः ॥ कालाञ्जनी । तुवरी । निरृतिः । रात्रिः । इति राजनिर्घण्टः ॥ अग्निशिखाभेदः । इति जटाधरः ॥ (यथा, मुण्डकोपनिषदि १ । २ । ४ ।

"कालीकराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरूपी च देवी
लेलायमाना इति सप्त जिह्वाः" ॥

वृश्चिकालीवृक्षः । इति रत्नमाला । (कालिया विछाटी इति भाषा ॥ लता । यथा वैद्यके ।

"सप्तपर्णस्तथा काली गुडूची पिचुमर्द्दकम्" ॥*॥

भीमसेनस्य पत्नीभेदः । यथा, भागवते ९ । २२ । ३१ ।

"युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ।
भीमसेनात् हिडिम्बायां, काल्यां सर्व्वगतस्ततः" ॥

मातृकाध्याने चामुण्डाशब्दे द्रष्टव्यम् । कालिकाया ध्यानं लिख्यते यथा,—

"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्ध्वकराम्बुजाम् ।
अभयं वरदञ्चैव दक्षिणोर्द्ध्वाधःपाणिकाम् ॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम् ॥
कर्णावतंसतानीतशवयुग्मभयानकाम् ।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ॥
शवानां करसङ्घातैः कृतकाञ्चीं हसन्मुखीम् ।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ॥
घोररावां महारौद्रीं श्मशानालयवासिनीम् ।
बालार्कमण्डलाकारलोचनत्रितयान्विताम् ॥
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम् ।
शवरूपमहादेवहृदयोपरिसंस्थिताम् ॥
शिवाभिर्घोररावाभिश्चतुर्द्दिक्षु समन्विताम् ।
महाकालेन च समं विपरीतरतातुराम् ॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम् ।
एवं सञ्चिन्तयेत् कालीं सर्व्वकामार्थसिद्धिदाम्" ॥

इति तन्त्रसारधृतकालतन्त्रम् ॥

(कालशक्त्या सर्व्वमिदं जगत् परिचालयति सैव काली प्रकीर्त्तिता यद्वा कालयति कलयति वा उत्पादयति पालयति प्रलये पुनरात्मन्येव विलापयतीति काली आद्या मूलप्रकृतिः महत्तत्वादेरुत्पत्तिलयादीनामाधारभूता । कलिदर्पकामधेनुरिति कलधातु बह्वर्थबोधिनी स्वरूपतः ब्रह्मणः सकाशात् नानाविधजगदिदंनिर्म्माणसमर्था बुद्धिरूपा ब्रह्मशक्तिरेव प्रकृतिः कालीति सञ्ज्ञया प्रकीर्त्त्यते । एतत् प्रबोधनाय समासतः कतिपयवचनान्यत्रोद्धृतानि यथायथं दर्शयामि । तथाहि ज्ञानसङ्कलिनीतन्त्रे । भागवते च ।

"सा माया पालिनी शक्तिः सृष्टिसंहारकारिणी ।
सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ॥
माया नाम महाभाग ! ययेदं निर्म्ममे विभुः" ।

एषैव पारमेश्वरी मूलशक्तिः दुर्व्वलाधिकारिणामुपासनासौकर्य्याय तन्त्रादिशास्त्रेषु कालीश्यामातारादिविविधनामरूपैः कल्पिता ॥

यथा,—

"या देवी सर्व्वभूतेषु विष्णुमायेति शब्दिता" ।
"चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगदिति" ॥

इति मार्कण्डेयपुराणीयदेवीमाहात्म्ये देवकृतदेव्याः स्तुतौ । ८५ । १२, ३४ । यथा च महानिर्व्वाणतन्त्रे ४र्थे उल्लासे । देवीं प्रति सदाशिवोक्तिः ।

"त्वं परा प्रकृतिः साक्षात् ब्रह्मणः परमात्मनः ।
महत्तत्त्वादिभूतान्तं त्वया सृष्टमिदं जगत् ॥
निमित्तमात्रं तद्ब्रह्म सर्व्वकारणकारणम् ।
तस्येच्छामात्रमालम्ब्य त्वं महायोगिनी परा ॥
करोषि पासि हंस्यन्ते जगदेतच्चराचरम् ।
कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः ।
महाकालस्य कलनात् त्वमाद्या कालिका परा ॥
कालत्वादादिभूतत्वादाद्या कालीति गीयते ॥
ध्यानन्तु द्विविधं प्रोक्तं स्वरूपारूपभेदतः ।
अरूपं तव यद्ध्यानमवाङ्मनसगोचरम् ॥
मनसो धारणार्थाय शीघ्रं स्वाभीष्टसिद्धये ।
सूक्ष्मध्यानप्रबोधाय स्थूलध्यानं वदामि ते ॥
अरूपायाः कालिकायाः कालमातुर्महाद्युते ।
गुणक्रियानुसारेण क्रियते रूपकल्पना" ॥

तस्या अरूपाया महाकाल्याः कथमेव रूप-

कल्पनादिकमिति जिज्ञासितवतीं पार्व्वतीं प्रति भगवतः शिवस्योत्तरदानं तत्रैव १३ उल्लासे ॥
"उपासकानां कार्य्याय पुरैव कथितं प्रिये ।।
गुणक्रियानुसारेण रूपं देव्याः प्रकल्पितम् ॥
श्वेतपीतादिको वर्णो यथा कृष्णे विलीयते ।
प्रविशन्ति तथा काल्यां सर्व्वभूतानि शैलजे ! ॥
अतस्तस्याः कालशक्तेर्निर्गुणाया निराकृतेः ।
हितायाः प्राप्तयोगानां वर्णः कृष्णो निरूपितः ॥
नित्यायाः कालरूपाया अव्ययायाः शिवात्मनः ।
अमृतत्वात् ललाटेऽस्याः शशिचिह्नं निरूपितम् ॥
शशिसूर्य्याग्निभिर्नित्यै रखिलं कालिकं जगत् ।
सम्पश्यति यतस्तस्मात् कल्पितं नयनत्रयम्" ॥
तस्याः स्थूलध्यानं यथा तत्रैव ५म उल्लासे ।
"मेघाङ्गीं शशिशेखरां त्रिनयनां रक्ताम्बरं बिभ्रतीं पाणिभ्यामभयं वरञ्च विलसद्रक्तारविन्द स्थिताम् ॥
मेघाङ्गीमिति वर्णनेनास्याः कृष्णवर्णत्वं सूचितं परं अरूपाया निराकृतेः कालशक्तेरेव ध्याना-लम्बनतया व्यापकत्वमिति यावत् ।
शशिशेखरेत्युक्त्या शशी चन्द्र जीवसमष्टिः सर्व्वजीवबीजस्वरूपो हिरण्यगर्भो ब्रह्मा एव चन्द्रनाम्नाख्यायते अतएवास्या देव्या ललाटे ऊर्द्ध-देशे इति निर्द्देशात् समस्तजडशक्तिभ्यः पृथक् कृत्वा जीवशक्तेरुत्कर्षं बोधयति यथा,—
"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ! ययेदं धार्य्यते जगत्" ॥
अतोऽस्या जीवशक्त्याधायकतया सैव परमात्म-रूपिणी चिदानन्दमयीति प्रबोध्यते । यदि च स्थानभेदे क्वचित् परब्रह्मणः सकाशादस्याः पार्थक्यं दृश्यते तत्तु केवलमज्ञानां क्रियाविशेषबोध-नायैव स्वरूपतः अभेदाद्दाहिकाशक्तिवत् सर्व्वत्रैव शास्त्रकृद्भिस्तयोरभेदः प्रतिपादितः । त्रिनयन-मित्युक्त्या सर्व्वज्योतिःपदार्थानां प्रधानभूता-श्चन्द्रसूर्य्याग्नयः प्रकाशशक्तेराधिक्यात् तैरेवास्या देव्या नयनत्रितयत्वेन प्रकल्पितं वस्तुतः सर्व्व-प्रकाशकानां सूर्य्यादीनां सैवान्तर्य्यामितयाधिष्ठा-त्रीदेवतात्मरूपिणीति बोध्यम् ॥
रक्ताम्बरं बिभ्रतीं इति सृष्टिकरणार्थं सैव परमा-त्मरूपिणी रजोगुणोद्रेकरूपमम्बरं वस्त्रं आवरण-शक्तिमिति भावः बिभ्रतीं धारिणीं । पाणिभ्या-मभयं वरञ्च इति भक्तसाधकानां रक्षार्थं कुशला-र्थञ्च वराभयदानरूपशक्तिद्वयस्य पाणिद्वयत्वेन कल्पितं रक्तारविन्दस्थितामिति रजोगुणसमुद्भू-तायाः इच्छाशक्तेरेवारविन्दत्वेन प्रकल्पनं कृतमिति बोध्यम् । अतः स्थूलध्यानादीनां यदिचापातत स्थूलदृष्ट्या नामरूपादिस्थूलजडभावो लक्ष्यते परं सर्व्वत्रैव तेषां सूक्ष्मार्थरूपपरमात्मन्येव गूढता-त्पर्य्यार्थः प्रतिफलत्येव विज्ञानद्भिरेव तत्सर्व्वतो-ज्ञातुं शक्यते । न ह्येतदस्माकं केवलं स्वकपोल-कल्पनामात्रं श्रीमद्भगवद्गीताप्रभृतिलतत्त्वशास-प्रतिपादकशास्त्रेषु विशेषतोनिश्चितं किञ्च प्रकृ-तिपुरुषयोरपि तत्तच्छास्त्रे भूयोभूयोऽविनश्वर-त्वमनादित्वं चाङ्गीकृतम् ।
"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपीत्यादि" ।
भूरिभूरि प्रमाणानि सन्ति बाहुल्यभिया नैवा स्माभिस्तान्युद्धृतानि ॥)

कालीकः, पुं, (कं जलं अलति पर्य्याप्नोति प्रभवती-त्यर्थः । अल + इकन् पृषोदरादित्वात् दीर्घः । यद्वा के जले + अलीकः मत्स्यलाभाय कपटशान्त-मूर्त्तिरिव ।) क्रौञ्चः । इति शब्दरत्नावली ॥

कालीची, स्त्री, (काल्या यमभगिन्या चीयतेऽत्र । चिञ् + बाहुलकात् अधिकरणे ड । गौरादि-त्वात् ङीष् ।) यमविचारभूमिः । इति त्रिकाण्ड-शेषः ॥

कालीतनयः, पुं, (काल्याः यमरूपायाः यमभगिन्याः यमलशक्तेर्वा तनय इव यमवाहनत्वात्तथात्वम् । यद्वा, कालीं इतः आप्तः सन् बलिदानाय आत्मानं नयति प्रापयति । नी + अच् । कालीं प्रति उद्दिश्य वा इतः प्राप्तः उपस्थितः इत्यर्थः आत्मनो नयः प्रापणं यस्य । महिषस्य कालीसन्निधाने बलिदानाय नीयमानतया तथात्वम् ।) महिषः । इति हेमचन्द्रः ॥

कालीयं, क्ली, (कालस्य कृष्णवर्णस्येदं कालस्थाने भवं वा "वृद्धाच्छः" । ४ । २ । ११४ । इति छः ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ (अस्य व्य-वहारो यथा, वैद्यकचक्रपाणिसंग्रहे एकादशश-तिकप्रसारणीतैले । "कालीयोत्पलपद्मकाक्षय-निशेत्यादि" ॥)

कालीयकं, क्ली, (कालीय + स्वार्थे कन् । कालीयमिव कायति वा । कै + क ।) कालिया इति ख्यात पीतवर्णसुगन्धिकाष्ठम् । इत्यमरटीकासारसुन्दरी॥ (यथा, महाभारते २ । ५१ । १० ।
"चन्दनागुरुकाष्ठानां भारान् कालीयकस्य च ।
चर्म्मरत्नसुवर्णानां गन्धानाञ्चैव राशयः" ॥)
तत्पर्य्यायः । जायकः २ कालानुसार्य्यं ३ । इत्यमरः । २ । ६ । १२६ ॥ जापकम् ४ । इति टीकासर्व्वस्वम् ॥ कालेयम् ५ वर्णकम् ६ कान्तिदायकम् ७ । इति भरतधृतव्याडिः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ पीत-तचन्दनशब्दे द्रष्टव्यौ ॥ कृष्णचन्दनम् । तत्पर्य्यायः । कालीयम् २ कालिकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ (अस्य व्यवहारो यत्र तद्यथा, "सालसाराज-कर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गोति निशचन्दनकुचन्दनशिंशपा शिरीषासनधवार्ज्जु-नतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति" ॥ इति सुश्रुते सूत्रस्थाने । ३८ अध्याय ॥)

कालीयकः, पुं, (कालीय + सञ्ज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इति शब्दरत्नावली ॥ (अस्य पर्य्याया यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्यापर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ॥
सैवकालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कालेयं, क्ली, (कं सुखं आलेयं आदेयं यस्मात् ।) कालियानामपीतवर्णसुगन्धिकाष्ठम् । इति व्याडिः रमानाथश्च ॥ (यथा, कुमारे ७ । ९ ।
"तां लोध्रकल्केन हृताङ्गतैला-
माश्यानकालेयकृताङ्गरागाम्" ॥
कलायै रक्तधारिण्यै हितं इति ढक् ।) काल-खण्डम् । यकृत् इति यावत् इति मेदिनी ॥

कालेयः, पुं, (कालाया अपत्यं ढक् ।) दैत्यभेदः । इति मेदिनी ॥ (यथा, महाभारते १ । ६५ । ३४ ।
"कालायाःप्रथिता पुत्त्राः कालकल्पाः प्रहारिणः ।
प्रविख्याता महावीर्य्या दानवेषु परन्तपाः ॥
विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च ।
क्रोधशत्रुस्तथैवान्यः कालेया इति विश्रुता" ॥)

कालेयकं, क्ली, (कालेय + स्वार्थे कन् ।) कालीयकम् । कालियानाम पीतवर्णसुगन्धिकाष्ठम् । इत्यमर-टीका ॥ ("मधुकरकुलकलङ्ककालीकृतकालेयक-कुसुमकुड्मलेषु" । इति कादम्बरी ॥)

कालेयकः, पुं, (कालेय + सञ्ज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इत्यमरः २।४।१०१ ॥ (यथा, सुश्रुते सूत्रस्थाने ३९ अध्यायः । "कालेयकागुरुतिल-पर्णी कुष्ठहरिद्रेति" ॥ कालीयकशब्देऽस्य विव-रणं ज्ञातव्यम् ॥ कलये विवादाय साधुः । कल + ढक् + संज्ञायां कन् । कुक्कुराणां हि अन्योन्य-कलहपरत्वं प्रसिद्धम् ।) कुक्कुरः । इति राज-निर्घण्टः ॥

काल्यः, पुं, (कल्ये विधौ भवः । "तत्र भवः" ४ । ३ । ५३ । इति अण् ।) हरिद्राविशेषः । काँचा हलुद इति भाषा । तत्पर्य्यायः । कर्व्वूरः २ द्राविड़कः ३ द्राविड़भूतिकः ४ । इति शब्दरत्नावली ॥

काल्यकः, पुं, (कल्ये विधौ भवः । "तत्र भवः" । ४।३।५३। इत्यणन्तात् संज्ञायां स्वार्थे वा कन् ।) कर्व्वूरकः । इत्यमरः २।४।१२५ ॥ काँचा हलुद इति भाषा ॥

काल्पनिकः, त्रि, (कल्पनायाः आगतः । ठञ् ।) कल्पनाभवः । कल्पितः । यथा । "रसः स्वाद्यते इति काल्पनिकं भेदमुरीकृत्य कर्म्मकर्त्तरि वा प्रयोगः" । इति साहित्यदर्पणम् ॥

काल्या, स्त्री, (कलयति चेष्टाम् । अघ्न्यादयश्चेति कलेर्यक् । ततः प्रज्ञाद्यण् ।) प्रत्यूषः । इति हेम-चन्द्रः ॥ (यथा हेः रामायणे २ । ३४ । ३४ ।
"तर्पितः सर्व्वकामैस्त्वञ्च काल्ये साधयिष्यसि" ॥)

काल्यकः, पुं, (काले साधुः । तत्र साधुरिति यत् । स्वार्थे कन् ।) काल्यकः । इति शब्दरत्नावली ॥

काल्या, स्त्री, (कालः प्राप्तोऽस्याः । कालाद्यत् । टाप् च ।) गर्भग्रहणप्राप्तकाला ऋतुमती गौः । तत्पर्य्यायः । उपसर्य्या २ । इत्यमरः । २ । ९ । ७० ॥ ("उपसर्य्या काल्या प्रजने" । इति पाणिनिः । ३ । १ । १०४ ॥)

कावचिकं, क्ली, (कवचिनां समूहः । "ठञ् कव-चिनश्च" । ४ । २ । ४१ । इति ठञ् ।) वर्म्मान्विता

गण । कवचधारियोद्रुरुमूर्दः । इत्यमरः । २ । ८ । ६६ ॥

कावार, क्ली, (क जलं आवृणोतीति । आ + वृ + अण् ।) शैवलं । इति त्रिकाण्डशेषः ॥

कावारी, स्त्री, (कावार + ङीष् ।) वृणादिच्छत्रम् । तत्पर्य्यायः । जङ्गमकुटी २ भ्रमत्कुटी ३ । इति त्रिकाण्डशेषः ॥

कावृकः, पु, (कुत्सितः वृक इव ईषत् वृक इव वा । कोः कादेशः ।) कुक्कुटः । चक्रवाकः । पीतमस्तकपक्षी । इति विश्वमेदिन्यौ ॥

कावेरं, क्ली, (कस्य सूर्य्यस्येव आ ईषत् वेर अङ्गं यस्य । ज्योतिर्म्मयत्वात् तथात्वम् ।) कुङ्कुमम् । इति जटाधरः ॥ (कुङ्कुमशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कावेरी, स्त्री, (कं जलमेव वेरं शरीरं । तस्येयम् । "तस्येदम्" । ४।३।१२० । इति अण् । ङीप् ।) नदीविशेषः । इत्यमरः । १ । १० । ३५ ॥ (यथा, महाभारते ३ । ८५ । २२ ।

"ततो गच्छेत कावेरीं वृतामप्सरसां गणैः ।
तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत्" ॥

इयं हि सह्याद्रेः मलयपर्व्वतस्य च सानुसन्निकटस्था । इति रघुः ॥ कुत्सितं अपवित्रं वेरं शरीरं यस्याः । कोः कादेशः ।) वेश्या । हरिद्रा ॥ इति मेदिनी ॥

काव्य, क्ली, (कवेरिदं कर्म्म भावो वा । ष्यञ् ।) ग्रन्थः । इति मेदिनी ॥ रसयुक्तवाक्यम् । यथा,—

"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः ।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः" ॥

एषां प्रत्येकं लक्षणानि लिख्यन्ते । तत्रादौ वाक्यलक्षणं यथा,—

"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" ॥

रसलक्षणं यथा,—

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्" ॥

दोषलक्षणं यथा,—

रसापकर्षका दोषास्ते पुनः पञ्चधा मताः ।
पदे तदंशे वाक्यार्थे सम्भवन्ति रसेऽपि यत्" ॥

गुणलक्षणं यथा,—

"रसस्याङ्गित्वमाप्तस्य धर्म्माः शौर्य्यादयो यथा ।
गुणा माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा" ॥

अलङ्कारलक्षणं यथा,—

"शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः ॥
रसादीनुपकुर्व्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्" ॥

रीतिलक्षणं यथा,—

"पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्व्विधा ।
वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा" ॥

इति साहित्यदर्पणम् ॥ * ॥ तत् काव्यं त्रिविधं ध्वनिगुणीभूतव्यङ्ग्यचित्रभेदेन । तत्राद्यस्य लक्षणम् ।

"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः" । द्वितीयस्य लक्षणम् ।

"अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्" ॥

तृतीयस्य लक्षणम् ।

"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्" ।

इति काव्यप्रकाशः ॥

"एतेषां विवरणानि तत्तच्छब्दे द्रष्टव्यानि" ॥

काव्यः, पुं, (कवेः भृगोरपत्यं पुमान् इति "कुर्व्वादिभ्यो ण्यः" ४ । १ । १५१ । इति ण्यः । यञ् इति केचित् ।) शुक्राचार्य्यः । इति मेदिनी ॥ (यथा, महाभारते १ । सम्भवपर्व्वणि ७६ । ६ ।

"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ।
पौरोहित्येन याज्यार्थे काव्यं तूशनसं परे" ॥

तामसमन्वन्तरीयऋषिविशेषः । यथा, मार्कण्डेये ७४ । ५९ ।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्" ॥)

काव्यचौर, पु, (काव्यस्य चौर इव । अन्यरचितकाव्यस्य स्वकीयत्वेन प्रख्यापकत्वात् तस्य तथात्वं बोध्यम् ।) चन्द्ररेणुः । इति त्रिकाण्डशेषः ॥

काव्या, स्त्री, (कवेर्वर्णने स्तुतिगाने च । बाहुलकादित्वात् ण्यत् । टाप् च । पूतनाया हि वाक्विलासविन्यासादिना नारीणां मनो मोहयित्वा ताभ्यो शिशूनां तत्र नाशकारितया तथात्वं बोध्यम् ।) पूतना । बुद्धिः । इति मेदिनी ॥

काश ऋ ङ द्युतौ । कविकल्पद्रुमः ॥ (भ्वा-आत्म-अकं-सेट् ।) ऋ अचकाशत् । ङ काशते चन्द्रः । दन्त्यान्त इति केचित् । इति दुर्गादासः ॥

काश य उ ऋ ङ द्युतौ । इति कविकल्पद्रुमः ॥ (दिवा-आत्म-अक-सेट् ।) य ङ काश्यते । उ काशित्वा काष्ट्वा । ऋ अचकाशत् । इति दुर्गादासः ॥

काशः, पु क्ली, (काशते दीप्यते शोभते इति यावत् । काशृ ङ दीप्तौ + पचाद्यच् ।) तृणभेदः । केशिया इति भाषा । इति मेदिनी ॥ (यथा रघुः ४ । १७ ।

"पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम्" ॥)

तत्पर्य्यायः ॥ इक्षुगन्धा २ पोटगलः ३ । इत्यमरः । २ । ४ । १६२ ॥ कासः ४ । इति भरतः ॥ काशी । ५ । इति मुकुटादयः ॥ काशा ६ । इति नयनानन्दः ॥ वायसेक्षुः ७ काण्डेक्षुः ८ अमरपुष्पकः ९ । इति रत्नमाला ॥ काशकः १० वनहासकः ११ । इति शब्दरत्नावली ॥ इक्षारिः १२ काकेक्षुः १३ इक्षुरः १४ इक्षुकाण्डः १५ शारदः १६ सितपुष्पकः १७ नादेयः १८ दर्भपत्रः १९ लेखनः २० काण्डकाण्डकः २१ कच्छलकारकः २२ । अस्य गुणाः । शिशिरत्वम् । गौल्यत्वम् । रुचिकारित्वम् । पित्तदाहनाशित्वम् । वृष्यबलशुक्रकारित्वम् । श्रमशोषकफापहत्वञ्च । इति राजनिर्घण्टः ॥ कण्ठकण्डूयनम् । इति शब्दरत्नावली ॥ तत्पर्य्यायगुणाः ।

"काशः काकेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा ।
इक्षालिकेक्षुगन्धा च तथा पोटगलः स्मृतः ॥
काशः स्यान्मधुरस्तिक्तः स्वादुपाके हिमः सरः ।
मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तजरोगजित्" ॥

इति भावप्रकाशः ॥

काशः, पु, (केन जलेन कफात्मकेन अश्यते व्याप्यतेऽत्र । क + अश + अधिकरणे घञ् ।) कासम् । इति शब्दरत्नावली ॥ स्वनामख्यातरोगविशेषः । काशी इति भाषा । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । क्षवथुः २ काशिका ३ । इति शब्दरत्नावली ॥ कासः ४ । इत्यमरः । २ । ४ । १६१ ॥ कासयति कुत्सितशब्दं कारयति कासः । कासृङ् कुशब्दे आन्तात् पचाद्यन् कासो दन्त्यान्तः । काशृ शब्दे इत्यस्मात् आन्तात् पचाद्यनि काशस्तालव्यान्तश्च । शालूरकाशपक्षकश्च इत्युष्मभेदे दन्त्यतालव्यान्तमध्ये पाठात् ।

"वाराणस्यां भवेत् काशी क्षवथौ ना तृणे स्त्रियाम्" ।

इति तालव्यान्तेषु रभसः । इति तट्टीकायां भरतः ॥ * ॥ तस्य निदानं यथा,—

धन्वन्तरिरुवाच ।

"आशुकारी यतः काशः स एवातः प्रवक्ष्यते ।
पञ्च काशाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ॥
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम् ।
तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः ॥
शूककर्णास्यकण्ठत्वं तत्राधो विहितोऽनिलः ।
ऊर्द्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च सञ्जन् ॥
शिरःस्रोतांसि सम्पूर्य्य ततोऽङ्गान्युत्क्षिपन्निव ।
क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पीड़यन् ॥
प्रवर्त्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः ।
हृत्पार्श्वोरःशिरःशूलमोहक्षोभस्वरक्षयान् ॥
करोति शुष्ककाशञ्च महावेगरुजा स्वनम् ।
सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्तोऽल्पतां व्रजेत् ॥
पित्तात्तु पीताक्षिकता तिक्तास्यत्वं ज्वरो भ्रमः ।
पित्तासृग्वमनं तृष्णा वैस्वर्य्यं धूमको मदः ॥
प्रततं काशवेगे च ज्योतिषामिव दर्शनम् ।
कफादुरोऽल्परुग्मूर्द्धहृदयं स्तिमितं गुरु ॥
कण्ठे प्रलेपवदनं पीनसच्छर्द्दरोचकाः ।
रोमहर्षघनस्निग्धश्लेष्मणश्च प्रवर्द्धनम् ॥
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ।
उरस्यन्तःक्षतो वायुः पित्तेनानुगतो बली ॥
कुपितः कुरुते काशं कफं तेन सशोणितम् ।
पीतश्यावञ्च शुष्कञ्च ग्रथितं क्वथितं बहु ॥
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ।
पारावत इवोत्कूजन् पार्श्वशूली ततोऽस्य च ॥
क्रमाद्वीर्य्यं रतं मांसं बलं वर्णश्च हीयते ।
क्षीणस्य सास्रमूत्रत्वं स्याच्च पृष्ठकटीग्रहः ॥
वायुप्रधाना कुपिता धातवो राजयक्ष्मणः ।
कुर्व्वन्ति यक्ष्मायतनैः काशं ष्ठीवेत् कफं ततः ॥
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ।
लुप्यते तुद्यत इव हृदयं पततीव च ॥
अकस्मादुष्णशीतेच्छा बह्वाशित्वं बलक्षयः ।
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता ॥
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च ।
इत्येष क्षयजः काशः क्षीणानां देहनाशनः ॥
याप्यो वा बलिनां तद्वत् क्षतजोऽपि नवौ च तौ ।
सिध्येतामपि सामर्थ्यात् साध्यादौ च पृथक्क्रमः ॥
मिश्रा याप्याश्च ये सर्व्वे जरसः स्थविरस्य च ।

काशश्वासक्षयच्छर्दिस्वरसादादयो गदाः ॥
भवन्त्युपेक्षया यस्मात् तस्मात्त त्वरया जयेत् ।
इति गारुडे काशरोगनिदानं १५४ अध्यायः ॥ * ॥

अथ काशस्य चिकित्सा ।

तत्र वातकाशस्य चिकित्सा ॥
"वास्तूको वायसीशाकं मूलकं सुनिषण्णकम् ।
स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौडिकाः ॥
दध्यारनालाम्लफलं प्रसन्नापानमेव च ।
शस्यते वातकाशेषु स्वाद्वम्ललवणानि च ॥
वायसी काकमाची कवई इति लोके । सुनिषण्णक सिनुयारि इति लोके शाकविशेषः । चाङ्गेरी-सदृशचतुष्पत्रा सजलदेशे भवति । चौपति इति लोके ॥
"ग्राम्यानूपोदकैः शालियवगोधूमषष्टिकान् ।
रसैर्म्माषात्मगुप्ताना यूषैर्व्वा भोजयेद्धितान्" ॥
ग्राम्यानूपोदकैः रसैरित्यन्वयः । आत्मगुप्ता किवाछ इति लोके ॥
"दशमूलीकृता काशश्वासहिक्कारुजापहा ।
यवागूर्दीपनी पथ्या वातरोगविनाशिनी ॥
रसः कर्क्कटकानां वा घृतभृष्टः सनागरः ।
वातकाशप्रशमनः शृङ्गिमत्स्यस्य वा पुनः" ॥ * ॥

अथ पित्तकाशस्य चिकित्सा ।

"कण्टकारीयुगद्राक्षावासाकर्चूरवालकैः ।
नागरेण च पिप्पल्या क्वथितं सलिलं पिबेत् ॥
शर्करामधुसंयुक्तं पित्तकाशहरं परम्" ॥ * ॥

अथ कफकाशस्य चिकित्सा ।

"पिप्पलीकट्फलशुण्ठीशृङ्गीभार्गीतथोषणम् ।
कारवी कण्टकारी च सिन्धुवारो यवानिका ॥
चित्रको वासकश्चैषां कषायं विधिवत् कृतम् ।
कफकाशविनाशाय पिबेत् क्षाररजोयुतम्" ॥
पिप्पल्यादिक्वाथः ॥ * ॥

अथ क्षतजकाशस्य चिकित्सा ।

"इक्षिक्षुरालिकापद्ममृणालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकाशनिवृत्तये" ॥
इक्षुरालिका इक्षुभेदः । चन्द्र इति लोके । पद्म पद्मकाष्ठम् । मृणाल विशम् । उत्पल कमलम् । चन्दनमत्र धवलम् पूर्णत्वात् । शृङ्गी कर्कटशृङ्गी । तुगाक्षीरी वंशलोचना । सा चेक्षोर्द्विगुणा ॥*॥ अथ क्षयकाशचिकित्सा । "चूर्णं काकुभमिष्टं वासकरसभावितं बहून् वारान् । मधुघृतसितोपलाभिर्लेह्यं क्षयकाशरक्तपित्तहरम्" ॥
काकुभ चूर्णं ककुभत्वक्चूर्णम् ॥ * ॥

अथ काशस्य सामान्यतश्चिकित्सा ।

"ताम्यमानस्य काशेन नासास्रावे स्वरे जडे ।
क्षवथौ गन्धनाशे च धूमपानं प्रयोजयेत् ॥
मनःशिलालमरिचमासीमुस्तेङ्गुदैः पिबेत् ।
धूमं चाच्छ च तस्यानु पयश्च सगुडं पिबेत् ॥
एष काशान् पृथक् द्वन्द्वसर्व्वदोषसमुद्भवान् ।
शतैरपि प्रयोगाणामसाध्यान् साधयेत् ध्रुवम्" ॥
आल हरितालम् । इङ्गुदमिह पुत्रजीवकफलम् ॥

"बदरीदलमालिप्तं शिलाया घर्म्मशोषितम् ।
तद्धूमपानं सक्षीरं महाकाशनिवारणम् ॥
कण्टकारिकृतक्वाथः सकृष्णः सर्व्वकाशहा ।
कण्टकार्य्याः कषायाश्च चूर्णं समधु काशहृत् ॥
लवङ्गजातीफलपिप्पलीनां
भागान् प्रकल्प्याक्षसमानमीषाम् ।
पलार्द्धमानं मरिचं प्रदेयं
पलानि चत्वारि महौषधस्य ॥
सितासमस्तेन समाप्य चूर्णं
रोगानिमानाशु बलान्निहन्ति ।
काशज्वरारोचकमेहगुल्म-
श्वासाग्निमान्द्यग्रहणीविकारान्" ॥
समशर्करचूर्णं वटिका वा ॥
"कुनटीसैन्धवव्योषविडङ्गामयहिङ्गुभिः ।
लेहः साज्यमधुः काशश्वासहिक्कानिवारणः" ॥*॥
"हरीतकीकणा शुण्ठी मरिचं गुडसंयुतम् ।
काशघ्नो मोदकः प्रोक्तः परं वह्नेः प्रदीपनः" ॥*॥
"कर्षं कर्षांशौ पलं पलद्वयं स्यात्ततोऽर्द्धकर्षश्च ।
मरिचस्य पिप्पलीनां दाडिमगुडयावशूकानाम्" ॥
सर्व्वौषधैरसाध्या काशा ये वैद्यनिर्म्मुक्ताः ।
अपि यूयं छर्द्दयता तेषामिदमौषधम्" ॥
पथ्यम् ॥ वङ्गसेनस्तु कर्षांश इति पाठे कर्षांश कर्षार्द्धमिति व्याचष्टे ॥
"मरिचं कर्षमात्रं स्यात् पिप्पली कर्षसम्मिता ।
अर्द्धकर्षो यवक्षारः कर्षयुग्मञ्च दाडिमम् ॥
एतच्चूर्णीकृतं युञ्ज्यादष्टकर्षगुडेन हि ।
शाणप्रमाणां गुटिकां कृत्वा वक्त्रे विधारयेत् ॥
अस्याः प्रभावात् सर्व्वेऽपि कासा यान्त्येव संक्षयम्" ॥
दाडिमं दाडिमफलवल्कलं ग्राह्यम् । मरिचादिवटिका ॥ * ॥
"समूलवल्कच्छदकण्टकार्य्या-
स्तुलां ततो द्रोणमितं जलञ्च ।
हरीतकीनां शतमेकपात्रे
विपच्य कुर्य्याच्चरणाम्बुशेषम् ॥
तस्मिन् कषाये तनुवस्त्रपूते
हरीतकीभिः सहितो गुडस्य ।
तुलां विनिक्षिप्य पचेत् सुपक्व-
मेतत् समुत्तार्य्य सुशीतले च ॥
पलं पलञ्चापि कटुत्रयस्य
तथा चतुर्जातपलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तत्र विमिश्रयेच्च ॥
प्रयुज्यमानो विधिनैष लेहो
यथाबलञ्चापि यथानलञ्च ।
वातात्मकं पित्तकृतं कफोत्थं
द्विदोषजातानपि च त्रिदोषम् ॥
क्षतोद्भवञ्च क्षयजञ्च काशं
श्वासञ्च हन्यात् सह पीनसेन ।
यक्ष्माणमेकादशमुग्ररूपं
हरीतकीयं भृगुणोपदिष्टा" ॥
पुष्परसो मधु । चतुर्जातं त्वगेलापत्रनागकेशराः ।
भृगुहरीतकी ॥ * ॥

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम् ।
पादशेषं गृहीत्वा च तत्र चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकः ॥
भार्गी रास्ना शटी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम् ।
चतुष्पलं तुगाक्षीर्य्याः पिप्पलीञ्च चतुष्पलाम् ॥
क्षिप्त्वा निदध्यात् सुदृढे मृण्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिकासश्वासानशेषतः" ॥
कण्टकार्य्यावलेहः । इति कासाधिकारः । इति भावप्रकाशः ॥ * ॥ अपि च ।
"हरीतकीकणा शुण्ठी मरिचं गुडसंयुतम् ।
काशघ्नो मोदकः प्रोक्तस्तृष्णारोचकनाशनः ॥
कण्टकारीगुडूचीभ्यां पृथक् त्रिंशत्पलाद्रसे ।
प्रस्थसिद्धो घृताद्वातकाशनुद्वह्निदीपनः" ॥
इति गारुडे १७४ अध्यायः ॥
"मनःशिला बलामूलं काकपर्णाश्च गुग्गुलुम् ।
जातिपत्रं कोलिपत्रं तथा चैव मनःशिला ॥
एभिश्चैव कृता वर्त्तिर्वदराशौ महेश्वर ! ।
धूमपानं काशहरं नात्र कार्य्या विचारणा" ॥
इति च गारुडे १९४ अध्यायः ॥
"कतकस्य फलं शङ्खं सैन्धवं त्र्यूषणं वचा ।
फेनोरसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला ।
एषा वर्त्तिर्हन्ति काशं तिमिरं पटलं यथा" ॥
इति तत्रैव १९८ अध्यायः ॥
"अभयामलकं द्राक्षा पिप्पली कण्टकारिका ।
शृङ्गं पुनर्नवा शुण्ठी जग्धा काशं निहन्ति वै" ॥
इति च तत्रैव १९९ अध्यायः ॥

काशकः, पुं, (काशते दीप्यते इति । काश + कर्त्तरि ण्वुल् ।) काशः । इति शब्दरत्नावली ॥ केश्या इति भाषा ॥

काशमर्द्दः, पुं, (काशं मृद्नाति उपशमयति नाशयति वा । मृद् + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) कासमर्द्दवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (कासमर्द्दशब्देऽस्य गुणाः पर्य्यायाश्च ज्ञेयाः ॥)

काशा, स्त्री, (काशते इति । काश + अच् + टाप् ।) काशतृणम् । इत्यमर-टीकायां भरतः ॥

काशाल्मलिः, स्त्री, (कुत्सिता शाल्मलिः । कोः कादेशः ।) कूटशाल्मलिः । इति जटाधरः ॥

काशिः, स्त्री, (काश् + "सर्व्वधातुभ्य इन्" । उणा ४ । ११७ । इति इन् ।) काशी । इत्युणादिकोषः ॥ (यथा हि रामायणे १ । १३ । २३ ।
"तथा काशिपतिं स्निग्धं सततं प्रियवादिनम् ।
सद्वृत्तं देवसङ्काशं स्वयमेवानयस्व हि" ॥)
काशिनगरोपलक्षिते जनपदे पुंभूम्नि ।
यथा महाभारते ६ । ९ । ४१ ।
"अत ऊर्द्ध जनपदान्निबोध गदतो मम" ।
"बोधा मद्रा कलिङ्गाश्च काशयो परकाशयः" ॥
सुष्ठि । इति निरुक्तिः । यथा ऋग्वेदे ७ । १०४ । ८ । "आप इव काशिना संगृभीतो असन्नस्त्वा-

नास्ति अस्या । अच् टाप् च इति केचित् ।)
अतिविषा । इति मेदिनी ॥ कपिलद्राक्षा । इति
राजनिर्घण्टः ॥
काश्मीरी, स्त्री, (काश्मीरदेशे भव । "तत्र भव" ।
४ । ३ । ५३ । इत्यण् । स्त्रियां ङीप् ।) गम्भारी ।
इति भावप्रकाशः ॥ (अस्याः पर्य्यायगुणा काश्म-
रीशब्दे ज्ञेयाः ॥)
काश्य, क्ली, (कुत्सितं आश्रयं यत्र । क जलं आश्रयं वा
यत्र । (मद्यम् । इति राजनिर्घण्टः ॥) नृपविशेषे पुं ।
यथा महाभारते १ । १०२ । ४९ ।
"अहत च्छयित्वारीन् सङ्ख्येऽसङ्ख्येयविक्रमः ।
आनयामास काश्यस्य सुता सागरगामुत" ॥)
काश्यप, क्ली, (काश्यं मद्यं पिबत्यत्र । पा + घञर्थे
क । मांसस्य हि मद्यपानाङ्गत्वेन प्रसिद्धत्वेनतथा-
त्वम् ।) मांसम् । इति हेमचन्द्रः ॥
काश्यप, पुं, (कश्यपस्य गोत्रापत्यम् । विदाद्यञ् ।)
कणादमुनिः । इति त्रिकाण्डशेषः ॥ मृगभेदः ॥
इति मेदिनी ॥ गोत्रविशेषः । तत्प्रवरान्तर्गत-
मुनिविशेषः । इति स्मृतिः ॥ कश्यपस्यापत्य-
मात्रञ्च ॥ (विभाण्डकमुन्यर्थे यथा, महाभारते
३ । १११ । २० ।
"स्वाध्यायवान् वृत्तसमाधियुक्तो
विभाण्डकः काश्यप प्रादुरासीत्" ॥*॥
स्वनामख्यातो द्विजविशेषः । अयं हि विष-
विद्यापारदर्शी । अस्य विवरणमुच्यते ।
यदा शमीकपुत्त्रेण शृङ्गिणा 'स कौरवाधम
सप्तमेऽहनि सर्पराजेन तक्षकेन दष्टो यमसदनं
गमिष्यतीति' शप्तः परीक्षित्, तदा राज्ञ एतच्छाप-
वृत्तान्तमाकर्ण्यासौ काश्यपो नाम ब्राह्मणो राजानं
परीक्षितं तक्षकविषात् रक्षितुं धनार्थी हस्तिना-
पुरमुद्दिश्य प्रस्थितः । गच्छन्तमेनं पथि तक्षको
दृष्टवानाह च को भवान् कुत्र वा गच्छति । अथ
तक्षकेनैवमुक्तोऽसौ काश्यपः सर्व्वं निवेदयामास ।
एवमुक्तवति तु काश्यपे तक्षकस्तस्य विद्याप्रभावं
दिदृक्षुः सम्मुखस्थमेकं न्यग्रोधं अदशत् । दष्टो
न्यग्रोधः प्रचण्डविषतेजसा क्षणात् प्रजज्वाल ।
एवम्भूतेऽसौ काश्यपः स्वविद्याप्रभावं विज्ञापयितु-
कामो न्यग्रोधभस्मकणामादाय तरसा मन्त्रबलेन
पुनर्नवमिव तं जीवयामास । अथ नागराजस्तत्क्षणं
गतदाप्लोक्य सविस्मयस्तस्मै प्रभूतधनं दत्त्वा
विसर्जयामास ॥ एतद्विवरणन्तु महाभारते १ ।
४३ । अध्याये द्रष्टव्यम् ।)
काश्यपि, पुं, (कश्यपस्यापत्यं बाह्वादित्वात् इञ् ।)
अरुणः । "काश्यपिर्गरुडाग्रजः" । इत्यमरः १।३।
३२ ॥ गरुडः । इति हेमचन्द्रः ॥ (महाभारते
१ पर्व्वणि तयोरुत्पत्तिविवरणम् । यथा,—
"एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा ।
विनता नाम कल्याणी पुत्त्रकामा यशस्विनी ॥
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः ।
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः ॥
आरम्भः सफलो देवि । भविता यस्त्वयेप्सितः ।
जनयिष्यसि पुत्त्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ।
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा" ॥)
काश्यपी, स्त्री, (कश्यपस्येयं । "तस्येदम्" । ४ । ३ ।
१२० । इत्यण् स्त्रियां ङीप् ।) पृथिवी । इत्य-
मरः । २ । १ । २ ॥
("अथागम्य महाराज । नमस्कृत्य च कश्यपम् ।
पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः" ॥
इति महाभारते ॥ दानधर्म्मे । १३ । १५४ । ७ ॥
प्रजा । एतद्विषयकप्रमाणं कूर्म्मशब्दे द्रष्टव्यम् ॥)
काश्यपेय, पुं, (कश्यपस्येयम् । कश्यप + अण् ङीप् च
काश्यपी कश्यपपत्नी अदितिः । तत्र भव इति
ढक् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (यथा,
"जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम्" ॥
इति सूर्य्यप्रणामः ॥ देवमात्रः । कश्यपीसुतत्वात् ॥)
काश्वरी, स्त्री, (काश + वनिप् "वनोरच" । ४ । १ । ७
इति ङीप् रश्च । जातौ ङीष् वा ।) का-
श्मरी । इति भरतो द्विरूपकोषश्च ॥
काष्ठ, क्ली, (काश्यते दीप्यते काश्यतेऽनेन वा । काश
+ "हनिकुषीत्यादिना" उणा । २ । २ । क्थन् ।
व्रश्चेति षत्वम् । तितुत्रेति नेट् ।) दारु । इत्यमरः ।
२ । ४ । १३ ॥ काठ इति भाषा । (उक्तञ्च ।
"संसारमतिशुष्कं यत् सुखिमध्ये समेष्यति ।
तत्काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवम्" ॥)
काष्ठक, क्ली, (काष्ठं सत्कायति । काष्ठ + कै + क
केचित्तु काष्ठं विद्यतेऽस्य नडादित्वात् छः कुक्
च बिल्वकादित्वात् छमात्रस्य लुक् । प्रशस्ताका-
ष्ठत्वात् अस्य तथात्वम् ।) अगुरु । इति राजनिर्घण्टः ॥
काष्ठकदली, स्त्री, (काष्ठवत् कठिना कदली ।)
कदलीभेदः । काटकला इति भाषा । तत्पर्य्यायः ।
सुकाष्ठा २ वनकदली ३ काष्ठिका ४ शिलारम्भा
५ दारुकदली ६ फलाढ्या ७ वनमोचा ८ अश्म-
कदली ९ । अस्या गुणाः । रुचिकारित्वम् । रक्त-
पित्तनाशित्वम् । हिमत्वम् । गुरुत्वम् । मन्दाग्नि-
जनकत्वम् । दुर्ज्जरत्वम् । मधुरत्वम् । हितत्वञ्च ।
इति राजनिर्घण्टः ॥
काष्ठकीट, पुं, (काष्ठे जातः कीटः । काष्ठलेखक
कीटो वा ।) घुणः । इति हेमचन्द्रः ॥
काष्ठकुट्ट, पुं, (काष्ठं कुट्टतीति । कुट्ट + अण् ।) पक्षि-
विशेषः । काठठोकरा इति भाषा । तत्पर्य्यायः ।
शतच्छदः २ । इति त्रिकाण्डशेषः ॥
काष्ठकुद्दाल, पुं, (कुं मलं उद्दालयति विदारयति
निपातनात् साधुः । काष्ठस्य कुद्दालः शाकेन
निर्म्मितः काष्ठमयः कुद्दालो वा ।) नौकादेर्मला-
पनयनार्थं काष्ठघटितकुद्दालः । तत्पर्य्यायः । अ-
वृभ्रि २ । इत्यमरः ॥
काष्ठजम्बू, स्त्री, (काष्ठप्रधाना जम्बूः ।) भूमिजम्बूः ।
इति राजनिर्घण्टः ॥
काष्ठतक्षक, पुं, (काष्ठं तक्षति । काष्ठ + तक्ष +
ण्वुल् ।) काष्ठतट् । इति शब्दरत्नावली ॥
काष्ठतट्, [ष] पुं, (काष्ठं तक्षति । तक्ष तनूकरणे
क्विप् ।) वर्णसङ्करजातिविशेषः । छुतार इति
भाषा । तत्पर्य्यायः । तक्षा २ वर्द्धकिः ३ त्वष्टा ४
रथकारः ५ । इत्यमरः । २ । १० । ९ ॥
काष्ठतन्तु, पुं, (काष्ठे तन्तुरिव विस्तृततयावस्थित-
त्वात् ।) काष्ठकृमिः । तत्पर्य्यायः । कोषकारः २ ।
इति हारावली ॥
काष्ठदारु, पुं, (काष्ठं दारुसञ्ज्ञकं काष्ठप्रधानो दारु-
रिति केचित् ।) देवकाष्ठम् । इति राजनिर्घण्टः ॥
काष्ठद्रु, पुं, (काष्ठप्रधानो द्रुर्वृक्षः ।) पलाशवृक्षः ।
इति राजनिर्घण्टः ॥
काष्ठधात्रीफल, क्ली, (काष्ठमिव शुष्कं धात्रीफलम् ।)
आमलकम् । इति राजनिर्घण्टः ॥
काष्ठपाटला, स्त्री, (काष्ठवत् कठिना पाटला ।)
सितपाटलिका । इति राजनिर्घण्टः ॥ (अस्याः
पर्य्याया यथा ॥ "अपरा सितपाटला सिता ।
मुष्कको मोक्षको घण्टा पाटलिः काष्ठपाटला" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे ॥)
काष्ठमठी, स्त्री, (काष्ठरचिता मठीव ।) चिता ।
इति त्रिकाण्डशेषः ॥
काष्ठमल्ल, पुं, (काष्ठं मल्लः वाहक इव यत्र ।) शव-
यानम् । इति हारावली ॥
काष्ठलेखक, पुं, (काष्ठं लिखति । कर्त्तनेन लेखना-
कारं करोतीति । लिख + ण्वुल् ।) घुणः । इति
हारावली ॥
काष्ठलोही, [न्] पुं, (काष्ठेन युक्तं लोहं विद्यते
यत्र । यद्वा काष्ठं च लोहं च ते स्तोऽत्र । इनि ।)
लौहयुक्तमुद्गरः । तत्पर्य्यायः । वातर्हिः २ । इति
त्रिकाण्डशेषः ॥
काष्ठवल्लिका, स्त्री, (काष्ठवत् शुष्का वल्लिका ।)
कटुका । इति वैद्यकम् ॥ (कटुकीशब्देऽस्या गुणा-
दयो बोद्धव्याः ॥)
काष्ठशारिवा, स्त्री, (काष्ठमिव शुष्का शारिवा ।)
शारिवा । इति राजनिर्घण्टः । अनन्तमूल इति
भाषा ॥
काष्ठा, स्त्री, (काशते प्रकाशते । काश् दीप्तौ ।
"हनिकुषिनीरमिकाशिभ्यः क्थन्" । उणा २।२।
इति क्थन् । व्रश्चेति षत्वं ततः टाप् ।) दिक् ।
(यथा, माघे ११ । १२ ।
"स्फुरति विशदमेषा पूर्व्वकाष्ठाङ्गनायाः" ॥)
स्थितिः । सीमा । उत्कर्षः । (यथा, कठश्रुतौ ।
"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" ॥
अष्टादशनिमेषात्मककालः । इत्यमरः । १ । ४ । ११ ।
(यथा मनुः १ । ६४ ।
"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला" ॥
विष्णुपुराणमते पञ्चदशनिमेषात्मकः कालः ।
यदुक्तं, तत्रैव १ । ३ । ७ ।
"काष्ठा पञ्चदश ख्याता निमेषा मुनिसत्तम ।" ॥)
दारुहरिद्रा । इति मेदिनी ॥ (कश्यपपत्नीभेदः ।
यथा, भागवते ६ । ६ । २५ ।
"अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला" ॥)
काष्ठाम्बुवाहिनी, स्त्री, (अम्बूनां जलानां वाहिनी

अम्बुवाहिनी । काष्ठेन निर्म्मिता काष्ठस्य वा अम्बुवाहिनी ।) काष्ठादिकृतच्छिन्नायतनौकाकृति जलसेचनी । सेँओत् इति भाषा । तत्पर्य्यायः । द्रोणी २ । इत्यमरः । १ । १० । ११ ॥

काष्ठील, पुं, (काष्ठिना इल्यते क्षिप्यते इति । काष्ठि + इल् क्षेपणे + कर्म्मणि घञ् ।) राजार्कः । इति राजनिर्घण्टः ॥

काष्ठीला, स्त्री, (कुत्सिता ईषद्वा अष्ठीलेव । कुत्सा-ष्ठीलेव इति वा ।) कदलीवृक्षः । इत्यमरः । २ । ४ । ११३ ॥

कास, ऋ ङ कुशब्दे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट्-ऋदित् ।) कुशब्द इह रोगहेतुककुत्सितशब्दः । ऋ अचकासत् । ङ कासते वृद्धः । इति दुर्गादासः ॥

कास, पुं, (कासतेऽनेन । कासृ शब्दकुत्सनयोः । "हलश्च" ३ । ३ । १२१ । इति घञ् ।) रोगविशेषः । काशी इति भाषा । तत्पर्य्यायः । क्षवथुः २ । इत्यमरः । २ । ६ । ५२ ॥ तस्य निदानं यथा,—

"धूमोपघाताद्रजसस्तथैव
व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वाच्च हि भोजनस्य
वेगावरोधात् क्षवथोस्तथैव" ॥

सम्प्राप्तिर्यथा । "प्राणो ह्युदानानुगतः प्रदुष्टः" ॥

लक्षणं यथा ।

"सम्भिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात् सहसा सदोषो
मनीषिभिः कास इति प्रदिष्टः" ॥

स च पञ्चविधो यथा,—

"पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्" ॥

तेषां पूर्व्वरूपं यथा,—

"पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते" ॥

वातिको यथा,—

"हृच्छङ्खमूर्द्धोदरपार्श्वशूली
क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव" ॥

पैत्तिको यथा,—

"उरोविदाहज्वरवक्त्रशोषै-
रभ्यर्दितस्तिक्तमुखस्तृषार्त्तः ।
पित्तेन पीतानि वमेत् कटूनि
कासेत् सपाण्डुः परिदह्यमानः" ॥

श्लैष्मिको यथा,—

"प्रलिप्यमानेन मुखेन सीदन्
शिरोरुजार्त्तः कफपूर्णदेहः ।
अभक्तरुग्गौरवसादयुक्तः
कासेद्भृशं सान्द्रकफः कफेन" ॥

क्षतजो यथा,—

"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः ।
रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् ॥
स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् ।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः ।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्" ॥

क्षयजो यथा,—

"विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् ।
घृणिनां शोचतां नॄणां व्यापन्नेऽग्नौ त्रयो मलाः ।
कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम् ॥
सगात्रशूलज्वरदाहमोहान्
प्राणक्षयञ्चोपलभेत कासी ॥
शुष्यन् विनिष्ठीवति दुर्बलस्तु
प्रक्षीणमांसो रुधिरं सपूयम् ।
तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं
चिकित्सितज्ञाः क्षयजं वदन्ति ॥
इत्येष क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ॥
नवौ कदाचित् सिध्येतामपि पादगुणान्वितौ ।
स्थविराणां जराकासः सर्व्वो याप्यः प्रकीर्त्तितः ।
त्रीन् पूर्व्वान् साधयेत् साध्यान् पथ्यैर्याप्यांस्तु यापयेत्" ॥ इति माधवकरः ॥ * ॥

("आशुकारी यतः कासस्तमेवातः प्रवक्ष्यति" ॥
अस्य प्राग्रूपसहितासम्प्राप्ती रूपाणि च यथा ॥
"तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः ॥
शूकपूर्णाभकण्ठत्वं, तत्राधो विहतोऽनिलः ।
ऊर्द्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च सञ्जन् ॥
शिरःस्रोतांसि संपूर्य्य ततोऽङ्गान्युत्क्षिपन्निव ।
क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पीडयन् ॥
प्रवर्त्तते सवक्त्रोऽथ भिन्नकांस्योपमध्वनिः ।
हेतुभेदात् प्रतीघातभेदो वायोः सरंहसः ॥
यद्रुजा शब्दवैषम्यं कासानां जायते ततः ।
कुपितो वातलैर्वातः शुष्कोरःकण्ठवक्त्रताम् ॥
हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान् ।
करोति शुष्कं कासञ्च महावेगरुजास्वनम् ॥
सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्त्वाल्पतां व्रजेत् ।
पित्तात् पीताक्षि कफता तिक्तास्यत्व ज्वरो भ्रमः ॥
पित्तासृग्वमनं तृष्णा वैस्वर्य्यं धूमको मदः ।
प्रततं कासवेगेन ज्योतिषामिव दर्शनम् ॥
कफादुरोऽल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु ।
कण्ठोपलेपः सदनं पीनसच्छर्द्द्यरोचकाः ॥
रोमहर्षोघनस्निग्धश्वेतश्लेष्मप्रवर्त्तनम् ।
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ॥
उरस्यन्तः क्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च ग्रथितं कुथितं बहु ।
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्वीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते ॥
क्षीणस्य सासृङ्मूत्रत्वं स्याच्च पृष्ठकटीग्रहः ।
वायुप्रधानाः कुपिता धातवो राजयक्ष्मिणः ॥
कुर्व्वन्ति यक्ष्मायतनैः कासं ष्ठीवेत् कफं ततः ।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ॥
लुच्यते इव पार्श्वे च हृदयं पततीव च ।
अकस्मादुष्णशीतेच्छा बह्वाशित्वं बलक्षयः ॥
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता ।
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च ॥
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
याप्यो वा बलिनां तद्वत् क्षतजोऽभिनवौ तु तौ ॥
सिध्येतामपि सानाथ्यात् साध्यादोषैः पृथक्त्रयः ।
मिश्रा याप्या द्वयात् सर्व्वे जरसा स्थविरस्य च ॥
कासाच्छ्वासक्षयच्छर्द्दिस्वरसादादयो गदाः ।
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत्" ॥
इति वाभटे निदानस्थाने । ३ अध्याये ॥ * ॥

अथ कासस्य चिकित्सा यथा ॥

"केवलानिलजं कासं स्नेहैरादावुपाचरेत् ।
वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः ॥
लेहैर्धूमैस्तथाभ्यङ्गस्वेदसेकावगाहनैः ।
वस्तिभिर्बद्धविड्वातं सपित्तन्तूर्द्धभक्तिकैः ॥
घृतं क्षीरैश्च सकफं जयेत् स्नेहविरेचनैः ।
गुडूचीकण्टकारीभ्यां पृथक्त्रिंशत्पलाद्रसे ॥
प्रस्थः सिद्धो घृताद्वातकासनुत् वह्निदीपनः ।
क्षाररास्नावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः ॥
द्विशाणैः सर्पिषः प्रस्थं पञ्चकोलयुतं पचेत् ॥
दशमूलस्य निर्य्यूहे पीतो मण्डानुपायिना ॥
सकासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत् ।
द्रोणेऽपां साधयेद्रास्नां दशमूलशतावरी ॥
पलोन्मितादिकुडवं कुलत्थं बदरं यवम् ।
तुलार्द्धञ्चाजमांसस्य तेन साध्यं घृताढकम् ॥
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत् ।
प्रयुक्तं वातरोगेषु पाननावनवस्तिभिः ॥
पञ्चकासान् शिरःकम्पं योनिवङ्क्षणवेदनाम् ।
सर्व्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्द्धानिलाञ्जयेत्" ॥ * ॥
"दुरालभां शृङ्गवेरं शठीं द्राक्षां सितोपलाम् ॥
लिह्यात् कर्कटशृङ्गीञ्च कासे तैलेन वातजे ।
दुस्पर्शां पिप्पलीं मुस्तां भार्गीं कर्कटकं शठीम् ॥
पुराणगुडतैलाभ्यां चूर्णितान्यवलेहयेत् ।
तद्वत् सकृष्णां शुण्ठीञ्च सभार्गीं तद्वदेव च ॥
पिबेच्च कृष्णां कोष्णेन सलिलेन ससैन्धवाम् ।
मस्तुना ससितां शुण्ठीं दध्ना वा कणरेणुकाम् ॥
पिबेद्वदरमज्जो वा मदिरां दधिमस्तुभिः ।
अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम् ॥
कासी सपीनसो धूमं स्नैहिकं विधिना पिबेत्" ।
"यवानीपिप्पलीबिल्वमध्यनागरचित्रकैः ।
रास्नाजाजीपृथक्पर्णीपलाशशठीपौष्करैः ॥
सिद्धां स्निग्धाम्ललवणां पेयामनिलजे पिबेत् ।
कटिहृत्पार्श्वकोष्ठार्त्तिश्वासहिक्काप्रणाशनीम्" ॥
"पित्तकासे तनुकफे त्रिवृतां मधुरैर्युताम् ।
युञ्ज्यादिरेकाययुतां घनश्लेष्मणि तिक्तकैः ॥
हृतदोषो हिमं स्वादु स्निग्धं संसर्ज्जनं भजेत् ।
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम् ॥
लेहः पैत्ते सिता धात्री क्षौद्रद्राक्षा हिमोत्पलैः ।
सकफे माव्दमरिच सघृत सानिले हितः ॥

सत इन्द्र वक्ता" ॥ "काशिना मुष्टिना" इति भाष्यम् ।) सूर्य्ये पु । इति मुग्धबोधव्याकरणम् ॥

काशिका, स्त्री, (काशि + स्वार्थे कन् टाप् । यद्वा काशयति ज्ञानं भक्तानां इति । काश + णिच् + ण्वुल् टाप् अत इत्वञ्च ।) काशी । इति शब्दरत्नावली ॥ (पारिभाषिककाशिकाया लक्षणमुक्तं यथा शङ्कराचार्य्येण ।

"मनोनिवृत्तिः परमोपशान्तिः
सा तीर्थवर्य्या मणिकर्णिका वै ।
ज्ञानप्रवाहा विमला हि गङ्गा
सा काशिकाऽहं निजबोधरूपः" ॥ * ॥

वामनकृता पाणिनिवृत्तिः ॥)

काशिकाप्रिय, पुं, (काशिका प्रिया यस्य । काशिकायाः प्रियो वा ।) दिवोदासः । इति शब्दरत्नावली ॥

काशिराजः, पुं, (काश्या राजा । "राजाहःसखिभ्यष्टच्" । ५ । ४ । ९१ इति टच् ।) वाराणसीराजः । तत्पर्य्यायः । धन्वन्तरिः २ दिवोदासः ३ सुधोद्भवः ४ । इति त्रिकाण्डशेषः ॥ (यदि च क्रमान्वयेन तत्र बहवो राजान आसन् । तथापि तत्स्थानाधिकारित्वात् यदा योऽधिकारी स एव काशिराज अतो नासाधुप्रयोग इति मन्यामहे ॥ "अथ खलु भगवन्तममरवरमृषिगणपरिवृतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः" ॥ इति सुश्रुते सूत्रस्थाने १ अः ॥)

काशी, स्त्री, (काशते शिवत्रिशूलोपरि । काशृङ् दीप्तौ + अच् गौरादित्वात् ङीष् । काश + इन् ङीप् वा । अथवा काशयति प्रकाशयतीदं सर्व्वं या । काश् + णिच् अच् गौरादित्वात् ङीष् ।) स्वनामख्याततीर्थम् । शिवपुरी । तत्पर्य्यायः । वाराणसी २ तीर्थराजी ३ तपःस्थली ४ । इति जटाधरः ॥ काशिका ५ । इति शब्दरत्नावली ॥ काशिः ६ । इत्युणादिकोषः ॥ अविमुक्तम् ७ आनन्दवनम् ८ आनन्दकाननम् ९ अपुनर्भवभूमिः १० रुद्रावासः ११ महाश्मशानम् १२ । तस्या उत्पत्तिर्यथा,—

"ततस्तदैकलेनापि स्वैरं विहरता मया ।
स्वविग्रहात् स्वयं सृष्टा स्वशरीरानपायिनी ॥
प्रधानं प्रकृतिं त्वां तु मायां गुणवतीं पराम् ।
बुद्धितत्त्वस्य जननीमाहुर्विकृतिवर्जिताम् ॥
युगपच्च त्वया शक्त्या साकं कालस्वरूपिणा ।
मयाद्य पुरुषेणैतत् क्षेत्रञ्चापि विनिर्म्मितम्" ॥

स्कन्द उवाच ।

सा शक्तिः प्रकृतिः प्रोक्ता स पुमानीश्वरः परः ।
ताभ्याञ्च रममाणाभ्यां तस्मिन् क्षेत्रे घटोद्भव ! ॥
परमानन्दरूपाभ्यां परमानन्दरूपिणि ! ।
पञ्चक्रोशपरीमाणे स्वपादतलनिर्म्मिते ॥
मुने प्रलयकालेऽपि न तत् क्षेत्रं कदाचन ।
विमुक्तं न शिवाभ्यां यदविमुक्तं ततो विदुः ॥
न यदा भूमिवलयं न यदापां समुद्भवः ।
तदा विहर्त्तुमीशेन क्षेत्रमेतत् विनिर्म्मितम् ॥

इति काशीखण्डम् ॥ तत्र कर्त्तव्ययात्राविधानं यथा,—

सूत उवाच ।

"यात्रापरिक्रमं ब्रूहि जनानां हितकाम्यया ।
यथावत् सिद्धिकामानां सत्यवत्याः सुतोत्तम ! ॥

व्यास उवाच ।

निशामय महाप्राज्ञ लोमहर्षण ! वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदा ॥
सचैलमादौ सुस्नाय चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तपस्विनः ॥
आदित्यं द्रौपदीं विष्णुं दण्डपाणिमहेश्वरम् ।
नमस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ॥
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैनन्दिनी विधातव्या महाफलमभीप्सुभिः" ॥ * ॥
"ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
द्विसप्तायतनानाञ्च कार्य्या यात्रा प्रयत्नतः ॥
कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रशुद्धिमभीप्सुभिः ॥
तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ॥
ओङ्कारं प्रथमं पश्येन्मत्स्योदर्य्यां कृतोदकः ।
त्रिविष्टपं महादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरं चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।
यस्तु क्षेत्रमुषित्वापि नैतां यात्रां समाचरेत् ॥
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचकाः" ॥ * ॥
"अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ॥
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः ।
दृश्यान्येतानि लिङ्गानि महापापोपशान्तये" ॥*॥
"अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः ॥
शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् ।
स्नानन्तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्लीनतीर्थे सुस्नातः पश्येत् स्वर्लीनमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भेशं तत्र तीर्थकृतोदकः ।
पञ्चचूड़ह्रदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ॥
शुक्रेश्वरं ततः पश्येत् तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा व्याघ्रेशं पूजयेत्ततः ॥
शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ॥
क्वचिन्न जायते भूयः संसारे दुःखसागरे ॥
समारभ्य प्रतिपदं यावत्कृष्णा चतुर्द्दशीम् ।
एतत्क्रमेण कर्त्तव्यान्येतदायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽप्यपिजायते" ॥*॥
"अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा ।
अग्नीध्रकुण्डे सुस्नातः पश्येदग्नीध्रमीश्वरम् ॥
उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् ।
आषाढ़ीशं ततो दृष्ट्वा भारभूतेश्वरं ततः ॥
लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ॥
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः" ॥ * ॥
"अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ।
शुक्लपक्षतृतीयायां या यात्रा विश्ववृद्धिका ।
गोप्रेक्ष्यतीर्थे सुस्नाय मुखनिर्मालिकां व्रजेत् ॥
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ।
सौभाग्यगौरी संपूज्या ज्ञानवाप्यां कृतोदकैः ।
ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितां पूजयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
मङ्गला च ततोऽभ्यर्च्या विन्दुतीर्थकृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ॥
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन् मुक्तिजन्मनि ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नेशितुः सदा ।
ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदे" ॥ * ॥
"भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि ॥
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवाष्टम्यां चण्डीयात्रा शुभावहा" ॥ * ॥
"अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातः स्नानं विधायादौ नत्वा पञ्च विनायकान् ॥
नमस्कृत्याथ विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ॥
गृहीत्वा नियमञ्चेति गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ॥
कम्बलाश्वतरौ नत्वा वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ ॥
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा नत्वागस्तीश्वरं ततः ।
कश्यपेशं नमस्कृत्य हरिकेशवनन्ततः ॥
वैद्यनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतड़ागञ्च दृष्ट्वा वै कीकशेश्वरम् ।
भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ॥
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलसेश्वरम् ॥
चन्द्रेशन्त्वथ वीरेशो विद्येशोऽग्नीश एव च ।
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः ॥
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् ।

वशिष्ठवामदेवौ च मूर्त्तिरूपधरावुभौ ॥
द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाथं करुणेशं ततो व्रजेत् ॥
त्रिसन्ध्येशो विशालाक्षी धर्म्मेशो विश्वबाहुका ।
आशाविनायकश्चाथ वृद्धादित्यस्ततः पुनः ॥
चतुर्व्वक्त्रेश्वरं लिङ्गं ब्राह्मेशस्तु ततः परम् ।
ततो मनःप्रकामेशं ईशानेशस्ततः परम् ॥
चण्डीचण्डेश्वरौ दृश्यौ भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजेशमर्च्चयेत् ॥
लाङ्गलीशस्ततोऽभ्यर्च्च्य ततस्तु नकुलीश्वरम् ।
परान्नेशमथो नत्वा परद्रव्येश्वरं ततः ॥
प्रतिग्रहेश्वरश्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्च्य ततश्चाप्सरसेश्वरम् ॥
गङ्गेशोऽर्च्चस्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥
दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत्ततः ।
वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥
विनायकांस्ततः पञ्च विश्वनाथं ततो व्रजेत् ।
ततो मौनं विसृज्याथ मन्त्रमेनमुदीरयेत् ॥
अन्तर्गृहस्य यात्रेयं यथावत् या मया कृता ।
न्यूनातिरिक्तया शम्भुः प्रीयतामनया विभुः ॥
इति मन्त्रं समुच्चार्य्य क्षणं वै मुक्तिमण्डपे ।
विश्राम्य यायात् भवनं निष्पाप पुण्यवान् नरः ”॥*
“संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः ।
काश्यां यात्रा प्रयत्नेन महापुण्यसमृद्धये ॥
नभस्यपक्षदश्याञ्च कुलस्तम्भं समर्च्चयेत् ।
दुःखरुद्रपिशाचत्वं न भवेद्यस्य पूजनात् ॥
श्रद्धापूर्व्वमिमा यात्रा कर्त्तव्या क्षेत्रवासिभिः ।
पर्व्वस्वपि विशेषेण कार्य्या यात्राश्च सर्व्वतः ॥
न वन्ध्यं दिवसं कुर्य्याद्विना यात्रां क्वचित् कृती ।
यात्राद्वयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम् ॥
आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुर्ध्रुवम् ।
यस्य वन्ध्यं दिनं यातं काश्यां निवसतः सतः ॥
निराशाः पितरस्तस्य तस्मिन्नेव दिने भवेत् ।
स दष्टः कालसर्पेण स दृष्टो मृत्युना स्फुटम् ॥
स मुष्टस्तत्र दिवसे विश्वेशो यत्र नेक्षितः ।
सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रा व्यधात् स च ॥
मणिकर्णान्तु यः स्नातो यो विश्वेशं निरैक्षत ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ॥
दृश्यो विश्वेश्वरो नित्यं स्नातव्या मणिकर्णिका” ॥
इति श्रीस्कान्दपुराणे काशीखण्डे १०० अध्यायः ॥

(चिच्छक्तिः । सुषुम्नाख्या नाडी च । अन्या नाडी चिद्भासया सम्यगाभासिता सती प्रकाशते अतएव इयं हि ब्रह्मप्रकाशरूपिणी चिन्मयी ज्ञानप्रकाशकतया अस्यास्तथात्वं वेदतन्त्रादि-ज्ञानप्रतिपादकशास्त्रे सुषुम्नाया एव ब्रह्मनाडीत्वं प्रतिपादितं तथा सर्व्वप्रकाशकतया चिच्छक्तेरेव स्वरूपकाशीत्वं विज्ञाप्यते यथा,—
“ययेदं काश्यते सर्व्वं सा काशी परिकीर्त्यते” ॥

यदि चिच्छक्तिरेव काश्याः स्वरूपार्थवाचिका तर्हि तस्या वाराणसीत्याख्याया कागतिरिति संशयश्चेत् ततोऽवधीयताम् ।

“तदिदं मन्ये देवानां देवयजनं सर्व्वेषां भूतानां ब्रह्मसदनं अत्र हि जन्तोः प्राणेषूत्क्रममाणस्य रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षी भवति तस्मादविमुक्तमेव निषेवेत अविमुक्तं न विमुञ्चेदेवमेवैतद्याज्ञवल्क्यः । अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं । य एषोऽनन्तोऽव्यक्त आत्मा कथमहमिमं विजानीयामिति सोऽविमुक्त उपास्य इति सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायामस्याञ्च प्रतिष्ठित इति का च वरणा भवति का चासिर्भवति । सर्व्वान् इन्द्रियकृतान् दोषान् वारयति तेन वरणा भवति सर्व्वाणि इन्द्रियकृतानि पापानि अस्यति तेनासिर्भवति कतमच्चास्य स्थानं भवति इति भ्रुवोर्घ्राणस्योभयसन्धिः स द्यौर्लोकस्य परस्य च सन्धिर्भवति । एवमेवैनं सन्धिं सन्ध्यां ब्रह्मविद उपासते कोऽसौ रुद्र इति रुद्रस्तापत्रयात्मकं संसारदुःखं तद्धेतुर्वा तत्सर्व्वं द्रावयति शरणागतानामुपासकानामिति अतएव चिच्छक्तिमयः सर्व्वज्ञः परमेश्वर एव रुद्रः । तथा हि “एको रुद्रो न द्वितीयायावतस्थु” ॥ इति श्रीश्रीमद्भगवत्पूज्यपादपरमहंसपरिव्राजकाचार्य्यसुरेश्वरसूरिप्रणीतकाशीमुक्तिविवेकः ॥)

काशत्वाम् । इत्यमरटीकायां भरतः ॥ (मुष्टिः । इति निरुक्तिः ॥)

काशी, [न्] त्रि, (काशोऽस्यास्ति इति । इनि । काशरोगयुक्तः । इति राजवल्लभः ॥ (काशते इति काश णिनिः । प्रकाशशीलः ॥)

काशीनाथः, पुं, (काश्या नाथः ।) शिवः । इति शब्दरत्नावली ॥ (यथा काशीखण्डे,—
“काशीनाथं समाश्रित्य कुतः कालभयं नृणाम्” ॥)

काशीराजः, पुं, (काश्याः काशीप्रदेशस्य राजा । “राजाहः सखिभ्यष्टच्” । ५ । ४ । ९१ । इति टच् ।) दिवोदासः । इति शब्दरत्नावली ॥ (अयं हि योगरूढ्यर्थः । यौगिकार्थेन तु सर्व्वस्मिन्नेव काशीदेशाधिकारिणि प्रयोगो दृश्यते । यथा गीतायाम् १ । ५ ।
“धृष्टकेतुश्चेकितानः काशीराजश्च वीर्य्यवान्” ॥)

काशीशं, क्ली, (कुत्सितं ईषत् वा शीशमिव । को कादेशः । काशि दीप्तिं इच्छे इति केचित् । ईश् + क ।) उपधातुविशेषः । हिराकसी इति भाषा । तत् द्विविधम् । धातुकाशीशम् १ । तत् हरिद्वर्णं लोहितञ्च । पुष्पकाशीशम् २ । तत्-शुक्लवर्णं कृष्णञ्च । इति रत्नमाला ॥
(अस्य पर्य्याया गुणाश्च यथा,—
“काशीशं धातुकाशीशं पांशुकाशीशमित्यपि ।
तदेव किञ्चित् पीतन्तु पुष्पकाशीशमुच्यते ॥
काशीशमम्लमुष्णञ्च तिक्तञ्च तुवरन्तथा ।
वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत् ॥
मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम्” ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) द्विदन्त्यसकारोऽपि पाठः ॥ (काशीदेशाधिपतौ शिवे च पुं ॥)

काश्मरी, स्त्री, (काशते इति । “अनेभ्योऽपि” । ३ । २ । ७५ । इति वनिप् “वनोरच” । ४ । १ । ७ । इति ङीब्रौ । पृषोदरात् वस्य मत्वम् ।) गम्भारीवृक्षः । इत्यमरः । २ । ४ । ३५ ॥ (अस्याः पर्य्याया यथा,—
“गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च” ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्या यथात्रैव ॥
“काश्मरी तु वरा तिक्ता वीर्य्योष्णा मधुरा गुरुः ।
दीपनी पाचनी मेध्या भेदिनी भ्रमशोषजित् ॥
दोषतृष्णाऽमशूलार्शोविषदाहज्वरापहा ।
तत्फलं वृंहणं वृष्यं गुरुकेश्यं रसायनम् ॥
वातपित्ततृषारक्तक्षयमूत्रविबन्धनुत् ।
स्वादु पाके हिमं स्निग्धं तुवराम्लं विशुद्धिकृत् ॥
हन्याद्दाहतृषावातरक्तपित्तक्षयान् तथा” ॥ * ॥
यथा, महाभारते ३ । १५८ । ४४ ।
“विल्वान् कपित्थान् जम्बूंश्च काश्मरीर्वदरीस्तथा” ॥)

काश्मर्य्यः, पुं, (काश्मरीति शब्दोऽस्त्यस्य अस्मिन् वा । अन्येभ्योपीति यप् । स्वार्थे ष्यञ् इति केचित् ।) गम्भारी । इत्यमरः । २ । ४ । ३६ ॥ क्लीवलिङ्गोऽप्ययम् । इति भरतः ॥
(“हृद्यं मूत्रविबन्धघ्नं पित्तास्रवातनाशनम् ।
केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते” ॥
इति सुश्रुते सूत्रस्थाने । ४६ अध्यायः ॥)

काश्मीरं, क्ली, (कश्मीरे काश्मीरे वा भवं “कच्छादिभ्यश्च” । ४ । २ । १३३ । इति अण् ।) पुष्करमूलम् । इत्यमरः । २ । ४ । १४५ ॥ टङ्कः । कुङ्कुमम् । इति मेदिनी ॥ (शोधनमस्य यथा,—
“काश्मीरश्चापि सर्पिषा” ॥
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥)

काश्मीरः, पुं, (कश्मीर एव स्वार्थे अण् । काश्मीर इति नाम्नाख्यायते वा ।) स्वनामख्यातदेशः । इति जटाधरः । (उक्तञ्च शक्तिसङ्गमतन्त्रे ।
“शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् ।
तावत्काश्मीरदेशः स्यात्पञ्चाशत्योजनात्मकः” ॥
अत्र कपिलेश्वरनामा महादेवो वर्त्तते शिवनामकीर्त्तने “काश्मीरे कपिलेश्वरः” ॥ इति वचनात् ॥ (यथा गो रामायणे ४ । ४३ । २२ ।
“काश्मीरमण्डलं चैव शमीपीलुवनानि च ।
पुराणि च सशैलानि विचिन्वन्तु वनौकसः” ॥
तद्देशवासिनि त्रि । यथा, महाभारते ६ । ९ । ५३ ।
‘काश्मीराः सिन्धुसौवीरा गन्धारा दर्शकास्तथा’ ॥)

काश्मीरजं, क्ली, (काश्मीरे जायते । जन + “सप्तम्यां जनेर्डः” । ३ । २ । ९७ । इति डः ।) कुष्ठम् । कुङ्कुमम् । इति मेदिनी ॥ पुष्करमूलम् । इति विश्वः ॥ (गुणा पर्य्यायाश्चास्य कुष्ठशब्दे कुङ्कुमशब्दे च ज्ञातव्याः ॥)

काश्मीरजन्म, [न्] क्ली, (काश्मीरे जन्म यस्य तत् ।) कुङ्कुमम् । इत्यमरः । २ । ६ । १२ ॥

काश्मीरा, स्त्री, (काश्मीरे भवा । “तत्र भवः” । ४ । ३ । ५३ । इत्यण् । काश्मीरदेश उत्पत्तिस्थानत्वे-

कासः
कासः

मृद्वीकार्द्धशतं त्रिंशत्पिप्पली शर्करापलम्।
लेहयेन्मधुना गोर्व्वा क्षीरपस्य शक्रदसम् ॥
त्वगेलाव्योषमृद्वीकापिप्पलीमूलपौष्करैः ।
लाजमुस्ता शठीरास्ना धात्रीफलविभीतकैः ॥
शर्कराक्षौद्रसर्पिर्भिर्लेहो हृद्रोगकासहा ।
मधुरैर्जाङ्गलरसैर्यवश्यामाककोद्रवाः ॥
मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिता ।
घनश्लेष्मणि लेहाश्च तिक्तकामधुसंयुताः ॥
शालय स्युस्तनुकफे षष्टिकाश्च रसादिभिः ।
शर्कराम्भोऽनुपानार्थं द्राक्षेक्षुस्वरसाः पयः ॥
काकोली बृहतीमेदाद्वयैः स वृषनागरैः ।
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत्" ॥
"पुनर्नवा शिवाटिका सरलकासमर्द्दामृता ।
पटोलबृहतीफणिज्जकरसैः पयः सयुतैः ॥
घृतं त्रिकटुना च सिद्धमुपयुज्य सञ्जायते ।
न कासविषमज्वरक्षयगुदाङ्कुरेभ्यो भयम्" ॥ * ॥
"दशमूलं स्वयङ्गुप्तां शङ्खपुष्पीं शठीं बलाम् ॥
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् ।
भार्गीं पुष्करमूलञ्च द्विपलांशान् यवाढकम् ॥
हरीतकीशतञ्चैकं जलेपञ्चाढके पचेत् ।
यवस्विन्ने कषायं तं पूतन्तच्चाभयाशतम् ॥
पचेद्गुडतुलां दत्त्वा कुडवञ्च पृथग्घृतात् ।
तैलात् सपिप्पलीचूर्णात् सिद्धशीते च माक्षिकात् ॥
लेहं द्वे चाभये नित्यमतः खादेद्रसायनात्।
तद्वलीपलितं हन्याद्वर्णायुर्बलवर्द्धनम् ॥
पञ्चकासान् क्षयं श्वासं सहिक्कं विषमज्वरम् ।
मेहगुल्मग्रहण्यर्शोहृद्रोगारुचिपीनसान् ॥
अगस्तिविहितं धन्यमिदं श्रेष्ठं रसायनम्" ॥
इति आगस्त्यरसायनम् ॥ * ॥
"विधिश्च यक्ष्मविहितो यथावस्थं क्षते हितः ॥
निवृत्ते क्षतदोषे तु कफे वृद्धे उरः शिरः ।
दाल्यते कासिनो यस्य सधूमानापिबेदिमान् ॥
द्विमेदा द्विबलायष्टीकल्कैः क्षौमे सुभाविते ।
वर्त्तिं कृत्वा पिबेद्धूमं जीवनीयघृतानुपः ॥
मनःशिला पलाशाजगन्धात्वक्क्षीरीनागरैः ।
तद्वदेवानुपानन्तु शर्करेक्षुगुडोदकम् ॥
पिष्ट्वा मनःशिलां तुल्यां मार्द्रया वटशुङ्गया ।
ससर्पिष्कं पिबेद्धूमं तित्तिरिप्रतिभोजनम् ॥
क्षयजे बृंहणं पूर्व्वं कुर्यादग्नेश्च वर्द्धनम् ।
बहुदोषाय सस्नेहं मृदुदद्याद्विरेचनम् ॥
शम्याकेन त्रिवृतया मृद्वीकारससंयुतया ।
तिल्वकस्य कषायेण विदारीस्वरसेन च ॥
सर्पिः सिद्धं पिबेद्युक्त्या क्षीणदेहो विशोधनम् ।
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान् ॥
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत् ।
विदारीभिः कदम्बैर्वा तालशस्यैश्च साधितम् ॥
घृतं पयश्च मूत्रस्य वैवर्ण्ये कृच्छ्रनिर्गमे ।
शूने सवेदने मेढ्रे पायौ सश्रोणिवङ्क्षणे ॥
घृतमण्डेन लघुनानुवास्यो मिश्रकेण वा ।
जाङ्गलैः प्रतिभुक्तस्य वर्त्तकाद्या बिलेशयाः ॥
क्रमशः प्रसहास्तद्वत् प्रयोज्याः पिशिताशिनः ।
औष्ण्यात्प्रमाथिभावाच्च स्रोतोभ्यश्च्यावयन्ति ते ॥
कफं शुद्धैश्च तैः पुष्टिं कुर्यात्सम्यग्वहन् रसः ।
चविकात्रिफलाभार्गीदशमूलैः सचित्रकैः ॥
कुलत्थपिप्पलीमूलपाठाकालयवैर्जले ।
शृतैर्नागरदुःस्पर्शापिप्पलीशठिपौष्करैः ॥
पिष्टैः कर्कटशृङ्ग्या च समैः सर्पिर्विपाचयेत् ।
सिद्धेऽस्मिंश्चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च ॥
दत्त्वा युक्त्या पिबेन्मात्रां क्षयकासनिपीडितः ।
कासमर्द्दाऽभयामुस्तापाठाकट्फलनागरैः ॥
पिप्पल्या कटुरोहिण्या काश्मर्य्या स्वरसेन च ।
अक्षमात्रैर्घृतप्रस्थं क्षीरद्राक्षारसाढके ॥
पचेच्छोषज्वरप्लीहसर्व्वकासहरं शिवम्" ॥ * ॥
"वृषव्याघ्रीगुडूचीनां पञ्चमूलपलाङ्कुरान् ॥
रसकल्कैर्घृतं पक्वं हन्ति कासज्वरारुची"।
"स्युर्दोषबद्धकण्ठोरःस्रोतसाञ्च विशुद्धये ॥
प्रस्थोन्मिते यवक्वाथे विंशतिं विजया पचेत् ।
स्विन्ना मृदित्वा तास्तस्मिन् पुराणात्षट्पलं गुडात् ॥
पिप्पल्या द्विपलं कर्षं मनोह्वाया रसाञ्जनात् ।
दत्त्वार्द्धाक्षं पचेद्भूयः स लेहः श्वासकासनुत्" ॥
"तद्वन्मरिचचूर्णं वा सघृतक्षौद्रशर्करम् ।
पथ्याशुण्ठी घनगुडैर्गुटिका धारयेन्मुखे ॥
सर्व्वेषु श्वासकासेषु केवलं वा विभीतकम् ।
पत्रकल्कं घृतभृष्टं तिल्वकस्य सशर्करम् ॥
पेयावोत्कारिकाच्छर्द्दितृट्कासामातिसारनुत् ।
कण्टकारीरसे सिद्धो मुद्गयूषः सुसंस्कृतः ॥
सगौरामलकः साम्लः सर्व्वकासभिषग्जितम् ॥
वातघ्नौषधनिःक्वाथे क्षीरं यूषान् रसानपि ।
वैष्किरान् प्रातुदान् वैलान् दापयेत् क्षयकासिने ॥
क्षतकासे च ये धूमाः सानुपानानि दर्शिताः ।
क्षयकासेऽपि ते योज्या वक्ष्यन्ते यच्च यक्ष्मणि ॥
बृंहणं दीपनञ्चाग्नेः स्रोतसाञ्च विशोधनम् ।
व्यत्यासात्क्षयकासिभ्यो बल्यं सर्व्वं प्रशस्यते ॥
सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः ।
यथादोषबलन्तस्य सन्निपातहितं हितम्" ॥
इति वाभटे चिकित्सास्थाने ३ अध्याये ॥ * ॥

अस्य सकारणसम्प्राप्तिः लक्षणं चिकित्सितञ्च यथा,—
"तपसा यशसा धृत्या धिया च परयान्वितः ।
आत्रेयः कासशान्त्यर्थं सिद्धं प्राह चिकित्सितम् ॥
वातादिभिस्त्रयो ये च क्षतजः क्षयजस्तथा ।
पञ्चैते स्युर्नृणां कासा वर्द्धमानाः क्षयप्रदाः" ॥
"अधः प्रतिहतो वायुरूर्द्ध्वस्रोतः समाश्रितः ।
उदानभावमापन्नः कण्ठे सक्तस्तथोरसि ॥
आविश्य शिरसः खानि सर्व्वाणि प्रतिपूरयन् ।
आभञ्जन्नाक्षिपन्देहं हनुमन्ये तथाक्षिणी ॥
नेत्रे पृष्ठमुरः पार्श्वे निर्भुज्य स्तम्भयंस्ततः ।
शुष्को वा सकफो वापि कसनात् कास उच्यते ।
प्रतिघातविशेषेण तस्य वायोः सरंहसः ॥
वेदनाशब्दवैषम्यं कासानामुपजायते ।
रूक्षशीतकषायाल्पप्रमितानशनं स्त्रियः ॥
वेगधारणमायासो वातकासप्रवर्त्तकाः ।
हृत्पार्श्वोरःशिरःशूलस्वरभेदकरो भृशम् ॥
शुष्कोरःकण्ठवक्त्रस्य हृष्टलोम्नः प्रताम्यतः ।
निर्घोषदीनस्तनतो दैन्यदौर्ब्बल्यक्षयमोहवान् ॥
शुष्ककासः कफं शुष्कं कृच्छ्रान्मुक्त्वाल्पतां व्रजेत् ।
स्निग्धाम्ललवणोष्णैश्च भुक्तमात्रे प्रशाम्यति ॥
ऊर्द्ध्ववातस्य जीर्णेऽन्ने वेगवान्मारुतो भवेत् ।
कट्वम्लोष्णविदाह्यम्लक्षाराणामतिसेवनम् ॥
पित्तकासकरं क्रोधः सन्तापश्चाग्निसूर्य्यजः ।
पीतनिष्ठीवनाक्षित्वं तिक्तास्यत्वं स्वरामयः ॥
उरो धूमायनं तृष्णा दाहो मोहोऽरुचिर्भ्रमः ।
प्रततं कासमानश्च ज्योतींषीव च पश्यति ।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके ॥
गुर्व्वभिष्यन्दिमधुरस्निग्धस्वप्नाविचेष्टनैः ।
वृद्धः श्लेष्मानिलं बद्ध्वा कफकासं करोति हि ॥
मन्दाग्नित्वारुचिच्छर्द्दिपीनसोत्क्लेशगौरवैः ।
लोमहर्षास्यमाधुर्य्यक्लेदसंसदनैर्युतम् ॥
बहुलं मधुरं स्निग्धं निष्ठीवति घनं कफम् ।
कासमानोऽप्यरुक्वक्षः सम्पूर्णमिव मन्यते" ॥
"दुर्गन्धं हरितं रक्तं ष्ठीवेत् पूयोपमं कफम् ।
स्थानादुत्कासमानश्च हृदयं मन्यते च्युतम् ॥
अकस्मादुष्णशीतार्त्तो बह्वाशी दुर्ब्बलः कृशः ।
स्निग्धाच्छमुखवर्णत्वक् श्रीमद्दर्शनलोचनः ॥
पाणिपादतलैः श्लक्ष्णैः सततासूयको घृणी ।
ज्वरो मिश्राकृतिस्तस्य पार्श्वरुक् पीनसोऽरुचिः ।
भिन्नसङ्घातवर्च्चस्त्वं स्वरभेदोऽनिमित्ततः ।
इत्येष क्षयजः कासः क्षीणानां देहनाशनः" ॥
"रूक्षस्यानिलजं कासमादौ स्नेहैरुपाचरेत् ।
सर्पिर्भिर्वस्तिभिः पेयायूषक्षीररसादिभिः ।
वातघ्नसिद्धैः स्नेहाद्यैर्धूमैर्लेहैश्च युक्तितः ॥
अभ्यङ्गैः परिषेकैश्च स्निग्धैः स्वेदैश्च बुद्धिमान् ।
वस्तिभिर्बद्धविड्वातं शुष्कोर्द्ध्वं चोर्द्ध्वभक्तिकैः ॥
घृतैः सपित्तं सकफं जयेत् स्नेहविरेचनैः" ।
"पिप्पली पिप्पलीमूलचव्यचित्रकनागरैः ।
धान्यपाठावचारास्नायष्ट्याह्वक्षारहिङ्गुभिः ।
कोलमात्रैर्घृतप्रस्थाद्दशमूली रसाढके ॥
सिद्धा चतुर्थिका पीत्वा पेयामण्डं पिबेदनु ।
तत्कासकासहृत्पार्श्वग्रहणीदोषगुल्मनुत्" ॥
"शूर्पपर्ण्यौ त्रिफला द्राक्षा काश्मर्य्याणि परूषकम् ।
द्वे पाटे सरलं व्याघ्रीं स्वगुप्ताचित्रकं शठीम् ।
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम् ।
त्रिकण्टकं विदारीञ्च पिष्ट्वा कर्षसमं घृतात् ॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत् ।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ॥
कामलार्शोऽनिलाष्ठीला क्षतशोषक्षयापहम् ।
त्र्यूषणं नाम विख्यातमेतद्घृतमनुत्तमम्" ॥
इति त्र्यूषणाद्यं घृतम् ॥ * ॥
"द्रोणेऽपां साधयेद्रास्नां दशमूलीं शतावरीम् ।
पणिकां माषिकां शाणं कुलत्थान् बदरान् यवान् ॥
तुलार्द्धञ्चाजमांसस्य पादशेषेण तेन च ।
घृताढकं समक्षीरं जीवनीयैः पलोन्मितैः ॥
सिद्धं तद्दशभिः कल्कैर्नस्यपानानुवासनैः ।
समीक्ष्य वातरोगेषु यथावस्थं प्रयोजयेत् ॥
पञ्च कासान् शिरःकम्पं शूलं वङ्क्षणयोनिजम् ।
सर्व्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्द्ध्वानिलान् जयेत्" ॥

"पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्कणम् ।
रास्ना विडङ्गं त्रिफला देवदारुकचित्रकम् ।
अमृता पद्मकं क्षौद्रं विषञ्चैव विचूर्णयेत् ।
द्विगुञ्जं वातकासार्त्तिः सेवयेदमृतार्णवम्" ॥
इति अमृतार्णवो रसः ॥ * ॥
"भस्मताम्राभ्रकान्तानां कासमत्तर्दयो रसैः ।
भृङ्गिनिर्वेतसाम्लेन दिनं मर्द्यं प्रयत्नतः ॥
निष्कार्द्धं पित्तकासार्त्तो भक्षयेच्च दिनत्रयम् ।
श्वासकासाग्निमान्द्यञ्च क्षयकासं निहन्त्यतिः" ॥
इति पित्तकासान्तको रसः ॥ * ॥
"सुशुद्धं पारदं गन्धं प्रत्येकं शुक्तिसम्मितम् ।
ततः कज्जलिकां कृत्वा मर्दयेच्च पृथक् पृथक् ॥
विश्वामित्रस्थश्योनाककाश्मर्य्यं पाटला बला ।
मुस्तं पुनर्नवा धात्री वृहतीदमपत्रकम् ॥
विदारी वङ्गपुष्पी च एषां कर्षरसैः पृथक् ।
सुवर्णं रजतं ताम्रं प्रत्येकं शाणमानकम् ॥
पलमात्रन्तु कृष्णाभ्रं तदर्द्धन्तु शिलाह्वयम् ।
जातीकोषफलं मांसी तालीशैला लवङ्गकम् ।
प्रत्येकं कोलमानन्तु वासानीरैर्विमर्दयेत् ।
शोषयित्वा ततः पश्चाद्विदारी रसमर्दितः ॥
त्रिगुञ्जां तां वटीं खादेत्पिप्पली मधुसंयुताम् ।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्म्मितः ॥
पञ्च कासान्निहन्त्याशु चिरकालसमुद्भवम् ।
राजयक्ष्माणमत्युग्रमित्यादि बहवो गुणाः" ॥
इति नित्योदयो रसः ॥ * ॥
"शुद्धं कृष्णाभ्रचूर्णं द्विपलपरिमितं
शाणमानं यदन्यत्
कर्पूरं जातिकोषं सजलमिभकृष्णा-
तेजपत्रं लवङ्गम् ।
मांसीतालीशचोचं गजकुसुमगद-
धातकीचेति तुल्यम्
पथ्याधात्री विभीतं त्रिकटुरपि पृथक्
त्वर्द्धशाणं द्विशाणम् ॥
एला जातीफलाख्यं क्षितितलविधिना
शुद्धगन्धस्य कोलम्
कोलार्द्धं पारदस्य प्रतिपदविहितं
पिष्टमेकत्र मिश्रम् ।
पाणीयेनैवकार्य्या परिणतचणक-
स्विन्नतुल्याश्च वट्यः
प्रातः खादाश्चतस्रस्तदनु खलु कियत्
शृङ्गवेरं सपर्णम् ॥
पाणीयं पीतमन्ते ध्रुवमपहरति
क्षिप्रमेतान् विकारान्
कोष्ठे दुष्टाग्निजातान् ज्वरमुदरगदं
राजयक्ष्माक्षतञ्च ।
कासं श्वासं सशोथं नयनपरिभवं
मेहमेदो विकारान्
छर्द्यादामानिलोत्थान् कफपवनकृतान्
पित्तरोगान् विशेषान् ॥
बल्योरुष्यश्च योगस्तरुणकरवरः
सर्व्वरोगप्रशस्तः
पथ्यं मांसैश्च यूषैर्दधिपरिलुलित-
गव्यदुग्धश्च भूयः ।
भोज्यो योज्यो यथेष्टं ललितललनया-
दीयमानो मुदा यत्
शृङ्गाराभ्रेणकामी युवतिजनशता
भोगयोगादतुष्टः ॥
वर्ज्ज्यं शाकाम्लमादौ न च कतिपयचित्-
स्वेच्छया भोज्यमानः" ॥
इति शृङ्गाराभ्रः ॥ * ॥
"जीर्णे सुवर्णं लौहं वा यद्यत्रैव प्रदीयते ।
तदायं सर्व्वरोगाणां सार्व्वभौमो न संशयः" ॥
इति सार्व्वभौमो रसः ॥ * ॥
"त्रिकटु त्रिफलाधान्यं चव्यं चित्रकसैन्धवम् ।
दिव्यौषधिहतञ्चापि सर्व्वतुल्यन्त्वयोरजः ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वामृतेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसैर्व्वापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं दोषत्रयसमुद्भवम् ।
वातिकं पैत्तिकञ्चैव गरदोषसमुद्भवम् ।
सरक्तमथवा रक्तं कासश्वाससमन्वितम् ॥
हृद्दाहभ्रमशूलघ्नी रुच्या वह्निप्रदीपनी ।
बलवर्णकरी वृष्या जीर्णज्वरविनाशिनी ॥
इयं चन्द्रामृता नाम्ना चन्द्रनाथेन निर्म्मिता ।
वासागुडूचिका भार्गी मुस्तकं कण्टकारिका ॥
भोजनान्ते प्रकर्त्तव्या वटिका कार्य्यसिद्धये" ॥
इति श्रीचन्द्रामृता वटी ॥ चन्द्रामृतं लौहमि-
त्यपि पाठः ॥ * ॥
"रसगन्धकलौहानां प्रत्येकं कार्षिकं क्षिपेत् ।
टङ्कणस्य पलं दत्त्वा मरिचस्य पलार्द्धकम् ॥
त्रिकटुत्रिफलाचव्यं धान्यजीरकसैन्धवम् ।
प्रत्येकं तोलकं ग्राह्यं छागीदुग्धेन पेषयेत् ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वामृतेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसेनापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं वातरक्तकफोद्भवम् ।
सरक्तमथवा रक्तं ज्वरश्वाससमन्वितम् ॥
हृच्छूलं पार्श्वशूलञ्च जीर्णज्वरविनाशनः ।
चन्द्रामृतरसो नाम चन्द्रनाथेन भाषितः" ॥
इति वृहच्चन्द्रामृतो रसः ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे कासरोगाधि-
कारे ॥ * ॥ * ॥
अथ कासपथ्यम् ॥
"स्वेदो विरेचनं छर्द्दिर्धूमपानं समाशनम् ।
शालिषष्टिकगोधूमश्यामाकयवकोद्रवाः ॥
आत्मगुप्ता माषमुद्गकुलत्थानां रसाः पृथक् ।
ग्राम्यौदकानूपधन्वमांसानि विविधानि च ॥
सुरा पुरातनं सर्पिश्छागञ्चापि पयो घृतम् ।
वास्तुकं वायसी शाकं वार्त्ताकुं बालमूलकम् ॥
कण्टकारी कासमर्द्दो जीवन्ती सुनिषण्णकम् ।
द्राक्षाबिम्बी मातुलुङ्गं पौष्करं वासकस्त्रुटिः ॥
गोमूत्रं शुनं पयः षोनं गुष्कारक्तं मधु ।
याजा दिवसनिद्रा च लघून्यन्नानि यानि च ॥
पथ्यमेतद्यथा दोषमुक्तं कासगदातुरे" ॥
अथापथ्यमाह ॥
"वस्तिं नस्यमसृङ्मोक्षं व्यायामं दन्तघर्षणम् ।
आतपं दुष्टपवनं रजोमार्गनिषेवणम् ॥
विष्टम्भीनि विदाहीनि रूक्षाणि विविधानि च ।
शकृन्मूत्रोद्गारकासवमिवेगनिधारणम् ॥
मत्स्यं कन्दं सर्षपञ्च तुम्बीफलमुपोदिकाम् ।
दुष्टाम्बु चान्नपानञ्च विरुद्धान्यशनानि च ॥
गुरुशीतञ्चान्नपानं कासरोगी परित्यजेत्" ॥
इति वैद्यकपथ्यापथ्यविधौ कासरोगाधिकारः ॥*॥)
काशव्रणम् । इत्यमरटीकायां भरतः ॥ शोभाञ्जनः ।
इति शब्दचन्द्रिका ॥

कासकन्द, पुं, (कासहेतुः कन्दः ।) कासालुः । इति राजनिर्घण्टः ॥

कासघ्नी, स्त्री, (कासं हन्ति । कास + हन् + टक् । स्त्रियां ङीप् ।) कण्टकारी । इति शब्दचन्द्रिका ॥ (कण्टकारीशब्देऽस्या गुणादिविवरणं ज्ञेयम् ॥)

कासजित्, स्त्री, (कासं जयतीति । कास + जि + क्विप् ।) भार्गी । इति राजनिर्घण्टः ॥

कासनाशिनी, स्त्री, (कासं नाशयतीति । कास + नश + णिच् + णिनि ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कासन्दीवटिका, स्त्री, (कासं द्यति नाशयतीति । दो + कः ततो ङीष् । कासन्दीं वटति वक्ति तन्नाम्ना प्रकाशते इत्यर्थः । वट् + ण्वुल् । टाप् अत इत्वम् । कासन्दीवटिका इति पारिभाषिक नाम्ना आख्यायते वा ।) वेसवारविशेषः । गोटा कासुन् इति भाषा । अस्या गुणाः । रुच्यत्वम् । वातश्लेष्मरोगनाशित्वम् । रुच्यग्निकारित्वम् । वायुमलानुलोमकारित्वञ्च । इति राजवल्लभः ॥

कासमर्द्दः, पुं, (कासं मृद्नाति । कास + मृद + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) पेषितजलमिश्रितवस्त्रगलितवेसवारः । इति पाकराजेश्वरः । कासुन्दी इति ख्यातः । गुल्मभेदः । इत्यमरभरतौ । काल कासुन्दा इति भाषा ॥ शेषस्य पर्य्यायः । अरिमर्द्दः २ कासारिः ३ कासमर्द्दनः ४ कालः ५ कनकः ६ जरणः ७ दीपनः ८ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । कफवातजीर्णकासपित्तनाशित्वम् । पाचकत्वम् । कण्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥ अग्निदीपनत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥ अस्य पत्रगुणाः । रुचिकारित्वम् । शुक्रवर्द्धकत्वम् । कासविषरक्तकफवातपित्तनाशित्वम् । मधुरत्वम् । पाचनत्वम् । कण्ठशोधनत्वम् । लघुत्वम् । विशेषतः कासहरत्वम् । ग्राहकत्वञ्च । इति राजनिर्घण्टः ॥

कासमर्द्दनः, पुं, (कासं मृद्नाति । कास + मृद + कर्त्तरि ल्युः । कासस्य मर्द्दनो वा ।) पटोलः । इति राजनिर्घण्टः ॥

कासरः, पुं, (के जले आसरति । आ + सृ + अच् । महिषस्य प्रायेण जलवासात्तथात्वम् ।) महिषः । इत्यमरः ।२।५।४॥ (यथा, आर्य्यासप्तशती ५२१ ।

"व्यारोपं मानिन्याश्लमोदिव कासरं कालमभूमे ।
वद्ममलि च नलिन्या प्रभातसन्ध्यापसारयति" ॥)

कासारः,पु, (कास + "तुषारादयश्च" उणा ३।१३९ इति व्यारन् प्रत्यय । कस्य जलस्य व्यासारो यत्र वा। व्यथवा कासं शब्द ऋच्छति प्राप्नोति जल-गमनपतनादिकाले। ऋ + "कर्म्मण्यण्" ।३।२।१। इति व्यण् ।) सपद्मो निष्पद्मो वा महाजलाशय । सरोवर । इत्यमरः।१।१०।२८॥ (यथा,— गीतगोविन्दे २।२०।
"दुराशोकस्तोकस्तवकनवकाशोकलतिका-
विकाश: कासारोपवनपवनोऽपि व्यथयति" ॥)

कासारि:, पु, (कासस्य व्यरि नाशक ।) कासमर्द्द । इति राजनिर्घण्ट ॥

कासालु, पु, (कासहेतु कासजनको वा व्यालु ।) कन्दविशेषः। कोकणदेशे प्रसिद्ध व्यालुविशेष । तत्पर्य्याय । कासकन्दः २ कन्दालु ३ व्यालुक ४ व्यालुः ५ विशालपत्र ६ पत्रालु ७। व्यस्य गुणा । उग्रत्वम् । कण्डुवातश्लेष्मामयारोचक-नाशित्वम् । स्वादुत्वम् । पथ्यत्वम् । व्यग्निदीपन-त्वञ्च । इति राजनिर्घण्ट ॥

कासीस,क्ली, (कासीं चुद्रकास स्यति-नाशयतीति । सो + क ।) उपधातुविशेष । हिराकसी इति भाषा । (यथा सुश्रुते सूत्रे ३९ व्यध्याये ।
"कासीसकटुरोहिण्योर्जातीकन्दहरिद्रयो " ॥)
तत्पर्य्याय । धातुकासीसम् २ खेचरम् ३ धातु-शेखरम् ४। इति हेमचन्द्र ॥ केसरम् ५ हंस-लोमशम् ६ शोधनम् ७ पांशुकासीसम् ८ शुभ्रम् ९। व्यस्य गुणा । कषायत्वम् । शिशिरत्वम् । विषकुष्ठकृमिखर्ज्जूनाशित्वम् । चच्चुर्हितत्वम् । कान्तिवर्द्धनत्वञ्च । इति राजनिर्घण्ट ॥ (विस्तृत-विवरणमस्य काशीशशब्दे ज्ञेयम् ॥)

कास्नू:, स्त्री, (काशति कुत्सितशब्द गच्छतीति । काश गतौ + "शिव् कशिपथते"।उणा १।८७। इति ऊ एपोदरादित्वात् सत्वम् ।) विकलवाक् । शक्तयस्त्रम् । इति मेदिनी॥ (कासते प्रकाशते इति कास् + ऊ ।) दीप्ति । भाषा । इति शब्दरत्ना-वली ॥ रोग । बुद्धि । इति हेमचन्द्र ॥

काहका, स्त्री, (काहला इति । एपोदरादित्वात् लस्य क ।) काहलावाद्यम् । इति द्विरूपकोष ॥

काहल, क्ली, (कुत्सित व्यस्पष्टमव्यक्त हल वाक्य ध्वनिर्वा यत्र । विलेखनार्थकस्यापि हलधातो-र्धातूनामनेकार्थत्वात् तथात्वम् ।) व्यव्यक्तवा-क्यम् । इति हेमचन्द्र ॥

काहल, पुं, (कुत्सित यथा स्यात् तथा हलति । लिखति नखैर्भूमिमिति शेष । हल + व्यच् । कोः कादेश ।) कुक्कुट । शब्दमात्रम् । इति मेदिनी ॥ विडाल । इति शब्दमाला ॥ वृहड्-ढक्का । तत्पर्य्याय । महानाद २ । इति हारा-वली ॥

काहल, त्रि, (केन जलेन व्यहल व्यस्पृष्ट ।) शुष्क । भृशम् । खल । इति मेदिनी ॥

काहला, स्त्री, (कुत्सितं व्यव्यक्त वा हलति शब्द करोति । हल + व्यच् टाप च ।) वाद्यभाण्डभेद । (ईषदपि न हल कुत्सित व्यङ्गं यस्या । को का-देश ।) व्यप्सरोविशेष । इति मेदिनी ॥

काहलापुष्प, पु, (काहलाकृतिरिव पुष्पमस्या ।) धुस्तूर । इति शब्दमाला ॥

काहली,स्त्री, (क सुख व्याहलति ददातीति । व्या + हल + इन् । ततो ङीप् ।) तरुणी । युवती । इति मेदिनी ॥

काहारक:, पु, (कुत्सित शिविकादिकमालम्ब्य जी वनयात्रामाहरति । व्या + हृ + ण्वुल् ।) शिवि कावाहकजाति । काहार इति वेहारा इति च भाषा । यथा,—
"तथा गारुडिका वीरा हरकर्म्मोपजीवका ।
व्याधा काहारका पुष्टा कृष्ण सवाहयन्ति ये"॥
इति जैमिनिभारते व्याश्वमेधिके पर्व्वणि १० व्य-ध्याय ॥

काही, स्त्री, (केन वायुना व्याहन्यते । व्या + हन् + ड ङीप् । यद्वा क सुख व्याहन्ति ददाति प्राप-यति । व्या + हन् + व्यन्तर्भावितण्यन्तात् ड । ङीप् च ।) कुटजवृत्त । इति राजनिर्घण्ट ॥

कि र लि ज्ञाने । इति कविकल्पद्रुम ॥ (ह्वादि-पर-सक-सेट् ।) र वैदिक । लि चिकेति । इति दुर्गादास ॥

कि, व्य, किम् । इति मेदिनी ॥ (यथा विष्णुपुराणे १ मांशे १७।२४।
"न केवलं तात । मम प्रजाना
स ब्रह्मभूतो भवतश्च विष्णु ।
धाता विधाता परमेश्वरश्च
प्रसीद कोप कुरुषे किमर्थम्" ॥)

कि, [म्] त्रि, जिज्ञासार्थम् । कि इति भाषा । सर्व्वनामकिम्शब्दस्य क्लीवलिङ्गे रूपमिदम् । इति व्याकरणम् ॥ व्यस्यार्थान्तराणि किम्शब्दे द्रष्ट-व्यानि ॥ (सर्व्वशब्दमयत्वात् विष्णु । यथा, महा-भारते १३।१४९।९१।
"एको नैकः सव क कि यत्तत्पदमनुत्तमम्" ॥)

किंवदन्ति, स्त्री, (कि + वद + भिच् ।) किंवदन्ती । इत्यमरटीकाया भरत ॥

किंवदन्ती,स्त्री,(किम् + वद + भिच् ङीप् च।) जन-श्रुति । सत्यमसत्य वा लोकवाद । इत्यमर । १।६।७॥ ("व्यस्ति किलैया किंवदन्ती व्यस्माक कुले कालरात्रिकल्पा विद्या नाम राक्षसी समु त्पत्स्यते" । इति प्रबोधचन्द्रोदयनाटकम् ॥)

किंवा, व्य, (किम् च वा च । इति द्वन्द्वसमास ।) विकल्प । व्यथवा । तत्पर्य्याय । उताहो २ यदि वा ३ यद्वा ४ नेति ५ । इति त्रिकाण्डशेष ॥

किंशारु, पु, (कि किञ्चित् कुत्सित वा शृणातीति शृ हिंसाया + "किञ्जरयो श्रिण"। उणा १।४। इति ञुण् ।) धान्यशूकम् । सुंगा इति भाषा । इत्यमर । २।९।२१ ॥ वाण । कङ्क पत्ती । इति मेदिनी ॥

किंशुक, पु, (किञ्चित् व्यवयवैकदेश शुक इव शुक तुण्डाभपुष्पत्वात् तथात्वमिति बोध्यम् ।) पलाश-वृत्त । इत्यमर । २।४।२९ ॥ (व्यस्य पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"पलाश किंशुक पर्णो यज्ञियो रक्तपुष्पक ।
त्तारश्रेष्ठो वातहरो ब्रह्मवृत्त समिद्वर" ॥
यथा गो रामायणे ६।६८।३१।
"तयो क्षतत्रणौ देहौ शुशुभाते महात्मनो ।
पुष्पिताविव निष्पत्रौ यथा शाल्मलिकिंशुकौ" ॥
तत्पुष्पादयोऽपि । यथा चाणक्ये ७।
"रूपयौवनसम्पन्ना विशालकुलसम्भवा ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुका " ॥)
विवरणमस्यान्यत् पलाशशब्दे ज्ञातव्यम् ॥ नन्दी वृत्त । इति राजनिर्घण्ट ॥

किंशुलुक, पु, (किंशुक + निपातनात् साधु ।) पलाशवृत्तविशेष । इति शब्दरत्नावली ॥

किकि, पु, (कक + इन् । एषोदरादित्वात् व्यादे-रित्वम् ।) किकीदिवि । इति शब्दमाला । नारिकेल । इति राजनिर्घण्ट ॥

किकिदिवि, प, (किकीति व्यस्फुटनादेन दीव्यतीति । दिव् + इन् ।) चाषपत्ती । इति शब्दमाला ॥

किकीदिव, पु, (किकीति व्यव्यक्तशब्देन दीव्यति । दिव + क ।) चाषपत्ती । इति शब्दमाला ॥

किकीदिवि, पु, (किकी इति व्यस्फुटनाद कुर्व्वन् दीव्यति । "कृविष्टिच्छिविस्थवि किकीदिवि" । उणा ४।५६ इति क्विन् निपातनात् सिद्धम् ।) स्वर्णचातक । सोणाचडा इति भाषा । नीलकण्ठ इति क्वचित् ख्यात । इति भरत ॥ तत्पर्य्याय । चाष २ । इत्यमर । २।५।१६॥ चास ३ किकीदीवि ४ । इति भरत ॥ किकी ५ दिवि ६ । इति स्वामी ॥ किकि ७ किकिदिव ८ किकिदीवि ९ । इति शब्दमाला ॥ किकीदिव १० स्वर्ण-चूड ११ इति जटाधर ॥

किकीदीवि, पु, (किकी इत्यव्यक्तशब्देन दीव्यति क्रीडति । निपातनात् दीर्घत्वे साधु ।) चाष-पत्ती । इति शब्दमाला ॥

किखि, स्त्री, (खदति हिनस्ति । खद् हिंसाया निपातनात् साधु ।) लघुशृगाल । इति हेम-चन्द्र ॥ खाँकशेयालि इति भाषा ॥

किखि:, पु, (किखिरिति कुत्सितशब्द करोति य ।) कपि । इति भूरिप्रयोग ॥

किङ्कर, त्रि, (किञ्चित् करोति । दिवाविभेत्यत्र कि यत्तद्बहुष्वित्यच् ।) दास । इत्यमर । २।१०। १७॥ (यदुक्त पुराणे ।
"विप्रस्य किङ्करो भूपो वैश्यो भूपस्य भूमिप ।।
सर्व्वेषां किङ्करा शूद्रा ब्राह्मणस्य विशेषत " ॥)

किङ्किणी, स्त्री, (किमपि किञ्चिद् वा कणति । कण शब्दे + इन् + ङीप् च। एषोदरात् साधु ।) कट्याभरणविशेष । घाघर इति भाषा । तत्प-र्य्याय । क्षुद्रघण्टिका २ । इत्यमर ।२।६।११०॥ घर्घरी ३ । इति भरत ॥ किङ्किणिका ४ कि ङ्किणि ५ । इति केचित् ॥ क्षुद्रघण्टी ६ प्रतिसरा ७ किङ्किणीका ८ कङ्कणिका ९ क्षुद्रिका १० । इति शब्दरत्नावली ॥ घर्घरी ११ । इति जटा-

धर । (यथा, महाभारते १३ । ५३ । ३१ ।
"किङ्किणीखननिर्घोषो युक्तस्तोरणकल्पने" ॥)
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

किङ्किर, क्ली, (किं कुत्सितं मदवारि किरति विक्षिपति । कॄ + क ।) गजकुम्भः । इति सारस्वतः ॥

किङ्किर, पुं, (किमपि अनिर्व्वचनीयं मधुरास्फुटं किरति रौति । किञ्चित् किरति क्षिपति चित्तं विरहिणां वा ।) कोकिलः । भ्रमरः । घोटकः । कामदेवः । इति सारस्वतः ॥

किङ्किरा, स्त्री, (किञ्चित् कुत्सितं वा किरति शरीरात् निःसरति । कि + कॄ + कः टाप् च ।) रक्तम् । इति सारस्वतः ॥

किङ्किरातः, पुं, (किङ्किरं रक्तवर्णत्वं अतति पुष्पकाले निरन्तरं प्राप्नोति । अत + अण् ।) अशोकवृक्षः । कामदेवः । शुकपक्षी । कोकिलः । इति सारस्वतः ॥ रक्ताम्लानः । राङ्गा झाँटी इति भाषा । इति जटाधरः ॥ पुष्पवृक्षविशेषः । तत्पर्य्यायः । हेमगौरः २ पीतकः ३ पीतभद्रकः ४ विप्रलोभी ५ पीताम्लानः ६ षट्पदानन्दः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । अग्निदीपनत्वम् । कफवायुकण्डुशोथरक्तत्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"किङ्किरातो हेमगौरः पीतकः पीतभद्रकः ।
किङ्किरातो हिमस्तिक्तः कषायश्च हरेदसौ ॥
कफपित्तपिपासास्रदाहशोषवमिक्रिमीन्" ॥
इति भावप्रकाशः ॥

किङ्किरालः, पुं, (किङ्किराय रक्तत्वाय अलति । पर्य्याप्नोति । अल + अच् । किङ्किरेण रक्तत्वेनालति वा ।) वर्व्वूरवृक्षः । इति वैद्यकम् ॥

किङ्किरी, [न्] पुं, (किङ्किरं रक्तवर्णफलमस्त्यस्मिन् अस्य वा । किङ्किर + इनि ।) विकङ्कतवृक्षः । इति जटाधरः ॥ वइँचि इति भाषा ॥ (विकङ्कतशब्देऽस्या गुणादिकं बोद्धव्यम् ॥)

किञ्च, व्य, (किम् च, च च । द्वन्द्वसमासः ।) आरम्भः । साकल्यम् । इति मेदिनी ॥ अवान्तरम् । इति जटाधरः ॥

किञ्चन, व्य, (किम् च चन च । मुग्धबोधमते तु "किमः क्यन्तात् चित् चनौ" । इति चनप्रत्ययः ।) असाकल्यम् । अकार्त्स्न्यम् । इत्यमरः । ३ । ४ । ३ ॥

किञ्चन, पुं, (किम् + चन् + अच् ।) हस्तिकर्णपलाशः । इति शब्दरत्नावली ॥

किञ्चित्, व्य, (किम् च चित् च पाणिनिमते पदद्वयम् । मुग्धबोधमते तु "किमः क्यन्तात् चिच्चनौ" । इति चित्प्रत्ययः ।) अल्पम् । तत्पर्य्यायः । ईषत् २ मनाक् ३ । असाकल्यम् । यथा । असाकल्ये तु चिच्चन । इत्यमरः । ३ । ४ । ६ ॥
(यथा विवेकचूडामणौ ११ ।
"चित्तस्य शुद्धये कर्म्म । न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किञ्चित् कर्म्मकोटिभिः" ॥)

किञ्चिलिकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प इति सौत्रधातुः । डः संज्ञायां कन् । पृषोदरात् उम स्थाने इत्वम् ।) किञ्चुलुकः । इत्यमरटीका ॥

किञ्चुलुकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प + डः + संज्ञायां कन् ।) कीटविशेषः । केँचो इति भाषा । तत्पर्य्यायः । महीलता २ गण्डूपदः ३ । इत्यमरः । १ । १० । २२ । ("वाह्या यूकाः प्रसिद्धाः स्युः किञ्चुलूकास्त्वथान्तराः" ॥ इति हारीते चिकित्सितस्थाने ५ अध्याये ॥)

किञ्ज, क्ली, (किञ्चिज्जलं यत्र । पृषोदरादित्वात् जलोपे साधु ।) किञ्जल्कम् । इति राजनिर्घण्टः ॥

किञ्जल, पुं, (किञ्चित् जलं यत्र ।) किञ्जल्कः । इति शब्दरत्नावली ॥

किञ्जल्क, क्ली, (किञ्चित् जलति । जल अपवारणे + बाहुलकात् क ।) नागकेशरपुष्पम् । पद्माभ्यन्तरस्य केशाकारं करहाटकवेष्टनम् । केसर इति ख्यातम् । (यथा, रघुः १५ । ५२ ।
"स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम् ।
ज्योतिष्कणाहतश्मश्रु कण्ठनालादपातयत्" ॥)
तत्पर्य्यायः । मकरन्दम् २ केशरम् ३ पद्मकेशरम् ४ किञ्जम् ५ पीतपरागम् ६ तुङ्गम् ७ चाम्पेयकम् ८ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कटुत्वम् । आस्यव्रणापहत्वम् । शिशिरत्वम् । तृष्णादाहविनाशित्वञ्च । इति राजनिर्घण्टः ।

किञ्जल्कः, पुं, (किम् + जल + बाहुलकात् कः ।) केशरः । इत्यमरः । १ । १० । ४० ॥ पद्मकेशरः । तत्पर्य्यायगुणाः ।
"किञ्जल्कः केशरः प्रोक्तश्चाम्पेयश्चापि स स्मृतः ।
किञ्जल्कः शीतलो रूक्षः कषायो ग्राहकोऽपि सः ॥
कफपित्ततृषादाहरक्तार्शोविषशोथजित्" ।
इति भावप्रकाशः । (वैद्यकपारिभाषिकग्रन्थे रक्तपित्ताधिकारे दूर्व्वाद्यतैले व्यवहारो यथा,—
"दूर्व्वासोत्पलकिञ्जल्कमञ्जिष्ठासैलवालुकाः" ॥)

किट गतौ । भयभीषयोः । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक अकञ्च-सेट् ।) भीषा सतो भयोत्पादना । केटति जनो याम्रो जनं भीषयतीत्यर्थः । इति दुर्गादासः ॥

किटिः, पुं, (केटति शत्रुं प्रति वेगेन गच्छति मस्तादीनुद्दिश्य गच्छति वा । किट्—गतौ इन् इगुपधात् कित् च ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किटिमः, पुं, (किटिरिव भाति । भा + क ।) केशकीटः । इति हेमचन्द्रः । उकुण इति भाषा ॥

किट्टं, क्ली, (केटति लौहादिधातुवयवात् निर्गच्छतीति । गत्यर्थेतिक्तः । आगमशास्त्रस्यानित्यत्वात् नेट् ।) मलः । इत्यमरः । ६ । २ । ६५ ॥
(यदुक्तं चिन्तामणौ ।
"ध्मायमानस्य लौहस्य मलं मण्डूरमुच्यते ।
यल्लौहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्" ॥
यस्य कस्यापि असारांशे । यथा,—)
"आहारस्य रसः सारः सारहीनो मलद्रवः ।
शिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात् ॥
शेषं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

किट्टवर्ज्जित, क्ली, (किट्टेन मलेन वर्ज्जितम् ।) शुक्रम् । इति हेमचन्द्रः ॥

किट्टालः, पुं, (किट्टेन मलेन अलति पर्य्याप्नोति । अल + अच् ।) ताम्रकलसः । लौहगूथकम् इति मेदिनी ॥

किणः, पुं, (कण् गतौ + अच् । पृषोदरादित्वात् अत इत्वम् ।) मांसग्रन्थिः । निर्घर्षणव्यथाचिह्नम् । इति कृत्यादिसंग्रहे अमरभरतौ । कड़ा इति भाषा ॥ (यथा, रघुवंशे । १६ । ८४ ।
"तदेतदाजानुविलम्बिना ते
ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमे-
रुपैतु योगं पुनरंसलेन" ॥
यथा च—वाभटे उत्तरस्थाने ३७ अध्याये ॥
"राजकोषातकी मूलं किणो वा मधितोद्भवः" ॥)
घुणः । इति हारावली ॥

किणिः, स्त्री, (किणाय तन्निवृत्तये प्रभवति । बाहुलकात् इन् ।) अपामार्गः । इति शब्दरत्नावली । (अपामार्गशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

किणिही, स्त्री, (किणः अस्त्यस्मिन् अस्य वा इति इनि । किणिनो व्रणान् हन्ति । हन् + ड गौरादित्वात् ङीष् ।) अपामार्गवृक्षः । इत्यमरः । २ । ४ । ८९ । (यथास्य व्यवहारस्तद्यथा,—
"रसः शिरीषात् किणिही पारिभद्रककेम्बुकात्" ॥
इति वाभटे चिकित्सास्थाने २१ अध्याये ॥
अस्याः पर्य्याया यथा,—
"अपामार्गस्तु शिखरी ह्यधः शल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

किण्वं, क्ली, (कण + "उल्वादयश्च" । उणां ४ । ९५ इति साधुः । यद्वा "अशूप्रुषि लटीति" । उणा १ । १५१ । इति क्वन् बहुलवचनादित्वम् ।) सुराबीजम् । (यथा, मनुः । ८ । ३२६ ।
"सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च" ॥)
पापम् । इति मेदिनी ॥

किण्वः, पुं, क्ली, (कण् + "अशूप्रुषीति" उणा १ । १५१ । इति क्वन् बहुलवचनादित्वम् ।) सुराबीजम् । इति वाचस्पतिरित्यमरटीकायां भरतः ॥

कित सम्प्रये । इच्छायाम् । वासे । आरोग्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सकञ्च-सेट् ।) विचिकित्सति मनः संशेते इत्यर्थः । आरोग्ये चिकित्सत्यातुरं वैद्यः । इच्छानिवासयोस्तु केततीति वोपदेवः ॥ तत्र तिवादयो न प्रयुज्यन्ते । इति रमानाथः ॥ इति न वनितामेवा हन्तु मनो विचिकित्सते । इति तु अन्तर्भूतण्यर्थतया कर्म्मकर्त्तरि सनन्तत्र्यय्वप्रत्यादिना यक्निषेधे सिद्धम् । इति दुर्गादासः ॥

कित र ञि मतौ । इति कविकल्पद्रुमः ॥ (ह्वादि-पर सक सेट् ।) र वैदिकः । ञि चिकेत्ति । इति दुर्गादासः ॥

कितवः, पुं, (कितं वायति कितेन वाति वा । कित + वा + क ।) अक्षदेवी । (यथा, मनुः । ३ । १५१ ।
"जटिलञ्चानधीयानं दुर्ब्बलं कितवं तथा ।

याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत्” ॥) धुस्तूरः । इत्यमरः । २ । ४ । ७७ ॥ (“कितवाङ्घ्रिपयोर्वीजं नागरं सहरीतकम् । चूर्णीकृत्यार्द्रकरसैः” ॥ इति वैद्यककषायसंग्रहे कासाधिकारे शाम्भरीगुडिकायाम् ।) मत्तः । वञ्चकः । इति मेदिनी ॥ (यथा, भागवते । ८ । २० । ३ ।
“स चाह वित्तलोभेन प्रत्याचष्टे कथं द्विजम् । प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा” ॥ धूर्त्तः । यथा, आर्य्यासप्तशती ३३ ।
“अस्थिरराग कितवो मानी चपलो विदूषकस्त्व-मसि । मम सख्या मतसि करे पश्यामि यथा ऋजुर्भवसि” ॥) खलः । इति शब्दरत्नावली ॥ (यथा महाभारते । १ । १ । १५६ ।
“यदाश्रौषं वाससा तत्र राज्ञिं
समाक्षिपत् कितवो मन्दबुद्धिः” ॥)
रोचननामगन्धद्रव्यम् । इति जटाधर राज-निर्घण्टश्च ॥

किन्तनु, पुं, (किं कुत्सिता तनुरस्य ।) चक्रपादः । इति त्रिकाण्डशेषः । माकड्सा इति भाषा ॥

किन्तमाम्, व्य, (कुत्सितार्थे किम् । बहूनां मध्ये एकस्य अतिशये तमप् । “किमेत्तिङव्ययेति” । ५ । ४ । ११ । इति आमुः ।) एषामेकतमम् । इति शब्दरत्नावली ॥ इदमेषामतिशयेन किम् । इति व्याकरणम् ॥

किन्तरा, व्य, (द्वयोर्मध्ये एकस्यातिशये तरप् आमुश्च ।) एतयोरेकतरम् । इति शब्दरत्नावली ॥ इदमनयो-रतिशयेन किम् । किम् शब्दोऽत्र कुत्सार्थः । अतिकुत्सितरूपमित्यर्थः । इति मुग्धबोध-टीकायां दुर्गादासः ॥

किन्तु, व्य, (किं च तु च इति द्वन्द्वसमासः ।) कि-म्पुनः । प्रागुक्तिविरुद्धार्थम् । यथा,—
“भृत्याभावे भवति मरणं किन्तु सम्भावितानाम्” । इति प्राचीनाः ॥

किन्तुघ्न, पुं, ववाद्येकादशकरणान्तर्गतशेषकरणम् । इति दीपिका ॥ तत्र जातफलम् ।
“मित्रामित्रे नैव किञ्चित् विशेषो
धर्म्माधर्म्मे तुल्यता मानवस्य ।
स्तोत्रे वादे सर्व्वदा प्रीतियुक्तः
किन्तुघ्नाख्ये यस्य सूनुः जनिः स्यात्” ॥
इति कोष्ठीप्रदीपः ॥

किन्धी, [न्] पुं, (किं कुत्सिता धीरस्यस्य । इति ।) अश्वः । इति त्रिकाण्डशेषः ॥

किन्नर, पुं स्त्री, (किं कुत्सितो नरः । अश्वमुखत्वा-त्तथात्वम् ।) स्वनामख्यातदेवयोनिः । स तु अश्वमुखत्वात् कुत्सितनरः स्वर्गगायकः तुम्बुरु-प्रभृतिः । तत्पर्य्यायः । किम्पुरुषः २ तुरङ्गवदनः ३ मयुः ४ । इत्यमरः । १ । १ । ७४ ॥ अश्वमुखः ५ गीतमोदी ६ हरिणनर्त्तकः ७ । इति शब्दरत्नावली ॥ (यथा,—
“राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा । यक्षाश्च मनुजव्याघ्र । पुत्रास्तस्य च धीमतः” ॥

इति महाभारते । १ । ६६ । ७ ॥) अर्हद्‌दुपासकविशेषः ॥ इति हेमचन्द्रः ॥

किन्नरेश, पुं, (किन्नराणां ईशो राजा ।) कुवेरः । इत्यमरः । १ । १ । ७२ ॥

किन्नरेश्वर, पुं, (किन्नराणां ईश्वरः ।) कुवेरः । इति हलायुधः ॥

किम्नु, व्य, (किं च नु च । इति द्वन्द्वसमासः ।) प्रश्नः ॥ (यथा हि रामायणे । २ । ७४ । ३ ।
“किन्नु तेऽदोषयद्राजा रामो वा भृशधार्म्मिकः । ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ” ॥) वितर्कः । (यथा शकुन्तलायां १ अङ्के ।
“किन्नु खलु यथा वयमस्यामेवमियमस्मान् प्रति स्यात्” ॥) स्थानम् । सादृश्यम् । कारणम् । इति जटाधरः ॥

किम्, व्य, (कु + बाहुलकात् डिम् ।) कुत्सा । (यथा गोः रामायणे । १ । २२ । २१ ।
“देवदानवगन्धर्व्वा यक्षाः पतगपन्नगाः । न शक्ता रावणं सोढुं किं पुनर्मानवा युधि” ॥) वितर्कः । (यथा, हितोपदेशे ।
“किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञा-स्यामि तावत्” ॥) निषेधः । प्रश्नः । इतिमेदिनी ॥

किम्, त्रि, क्षेपः । वितर्कः । निन्दा । परिप्रश्नः । इति मेदिनी ॥ (यथा, मनुः ११ । १९५ ।
“प्रणतं परिपृच्छेयुः साम्यं सौम्येच्छसीति किम्” ॥ किमपि अनिर्व्वचनीयम् । यथा, विष्णुपुराणे १ । १९ । ७५ ।
“तस्माच्च सूक्ष्मादिविशेषणानां
अगोचरे यत् परमात्मरूपम् ।
किमप्यचिन्त्यं तव रूपमस्ति
तस्मै नमस्ते पुरुषोत्तमाय” ॥)

किमिच्छक, पुं, (किमिच्छसीति प्रश्नेन दानार्थं का-यति शब्दायतेऽत्र । निपातनात् साधु ।) व्रत-विशेषः । तद्विवरणं यथा,—
मार्कण्डेय उवाच ।
“अथ साऽत्रीक्षितो माता वीरा वीरप्रजावती । पुत्रेऽहनि समाहूय प्राह पुत्रमवीक्षितम् ॥ पुत्राहमभ्यनुज्ञाता तव पित्रा महात्मना । उपवासं करिष्यामि दुष्करोऽयं किमिच्छकः ॥ स चायत्तस्तव पितुस्त्वया साध्यो मयापि वा । प्रतिज्ञाते त्वया पुत्र । ततस्तत्र यताम्यहम् ॥ द्रव्यस्यार्द्धं महाकोषात् तव दास्याम्यहं पितुः । धनं ते पितुरायत्तमनुज्ञातास्मि तेन च ॥ क्लेशसाध्यो ममायत्तः स हि श्रेयो भविष्यति । साध्यो भविष्यो यदि ते कश्चिद्धलपराक्रमैः ॥ स ते साध्योऽन्यथा वापि दुःखसाध्यो भविष्यति । तच्च प्रतिज्ञां कुरुषे यदि पुत्राद्य वै व्रते ॥ तदेतदहमारप्स्ये कथ्यतां यन्मतं तव ।
अवीक्षिदुवाच ।
वित्तं मे पितुरायत्तं ममेशत्वं न तत्र वै । यन्मच्छरीरनिष्पाद्यं तत् करिष्ये त्वयोदितम् ॥ किमिच्छकव्रतं मातर्निश्चिता भव निर्व्वृता । राज्ञा पित्राभ्यनुज्ञातं यदि वित्तेश्वरेण मे ॥

मार्कण्डेय उवाच ।
तत सा राजमहिषी तद्व्रतं समुपोषिता । यथोक्तं साऽकरोत् पूजां राजराजस्य सप्रता ॥ निधीनामप्यशेषाणां निधिपालगणस्य च । लक्ष्म्याश्च परया भक्त्या यतवाक्कायमानसा ॥ विविक्ते तु गृहस्यान्तस्य सोऽथ राजा करन्धमः । आसीन उक्तः सचिवैर्नीतिशास्त्रविशारदैः ॥
सचिवा ऊचुः ।
राजन् वयः परिणतं तवैव शासतो महीम् । एकस्ते तनयोऽवीक्षित् त्यक्तदारपरिग्रहः ॥ अपुत्रः स वने निष्ठां यदा भूप । गमिष्यति । तदारिपक्षं पृथिवी निश्चितं तव यास्यति ॥ वंशच्छेदस्ते भविता पितृपिण्डोदकक्षयः । एतन्महत्ते विवरं क्रिया हान्या भविष्यति ॥ तस्मात् कुरु तथा भूप । यथा ते तनयः पुनः । करोति सततं बुद्धिं पितॄणामुपकारिणीम् ॥
श्रीमार्कण्डेय उवाच ।
एतस्मिन्नन्तरे शब्दं शुश्राव जगतीपतिः । पुरोहितस्य वीरायाः गदतोऽर्थिजनं प्रति ॥ कः किमिच्छति दुःसाध्यं कस्य किं साध्यतामिति । करन्धमस्य महिषी किमिच्छकमुपोषिता । राजपुत्रोऽप्यवीक्षित्तु श्रुत्वा पौरोहितं वचः । प्रत्युवाचार्थिनः सर्व्वान् राजद्वारमुपागतान् ॥ मया साध्यं शरीरेण यस्य किञ्चित् ब्रवीतु सः । मम माता महाभागा किमिच्छकमुपोषिता ॥ शृण्वन्तु मेऽर्थिनः सर्व्वे प्रतिज्ञातं मयात्र च । किमिच्छथ ददाम्येष क्रियमाणे किमिच्छके ॥
मार्कण्डेय उवाच ।
ततो राजा निशम्यैतत् वाक्यं पुत्रमुखाच्च्युतम् । समुपेत्याब्रवीत् पुत्रमहमर्थी प्रयच्छ मे ॥
अवीक्षिदुवाच ।
दातव्यं यन्मया तात । भवते तद्ब्रवीहि माम् । कर्त्तव्यं दुष्करं वा ते साध्यं दुःसाध्यमेव च ॥
राजोवाच ।
यदि सत्यप्रतिज्ञस्त्वं ददासि च किमिच्छकम् । पौत्रस्य दर्शय मुखं ममोत्सङ्गगतस्य तत् ॥
अवीक्षिदुवाच ।
अहं तवैव तनयो ब्रह्मचर्य्यस्य मे नृप । । न मे पुत्रोऽस्ति पौत्रस्य दर्शयामि कथं मुखम् ॥
राजोवाच ।
पापाय ब्रह्मचर्य्यं ते यदिदं धार्य्यते त्वया । तस्मात्त्वं मोचयात्मानं मम पौत्रं प्रदर्शय ॥
अवीक्षिदुवाच ।
विरमास्मान्महाराज । यदन्यत्तत् समादिश । वैराग्येण मया त्यक्तः स्त्रीसम्भोगस्तथा रसः ॥
राजोवाच ।
बद्धभिर्युध्यमानस्य न दृष्टो वैरिभिर्जयः । तथापि यदि वैराग्यमुपैषि तदपत्रिहतः ॥ किं वा नो बहुनोक्तेन ब्रह्मचर्य्यं परित्यज । मातुस्त्वमिच्छया वक्त्रं पौत्रस्य मम दर्शय ॥
मार्कण्डेय उवाच ।
यदा स बहुशस्तेन प्रोक्तः पुत्रेण पार्थिवः ।

नान्यत् प्रार्थयते किञ्चित् तदा पुत्त्रोऽब्रवीत् पुनः ॥
दत्त्वा किमिच्छक तुभ्यं प्राप्तोऽहं तात । सङ्कटम् ।
तत् करिष्यामि निर्लज्जोभूयो दारपरिग्रहम् ॥
स्त्रिया समक्षं विजितः पतितो धरणीतले ।
स्त्रीपतिर्भविता भूयस्तातैतदतिदुष्करम् ॥
तथापि किं करोम्येष सत्यपाशवशङ्गतः ।
करिष्यामि यथात्थ त्वं मुच्यतां निजशासनम्” ॥
इति श्रीमार्कण्डेयपुराणे अवीक्षिच्चरितनामाध्यायः ॥

किमु, अव्य, (किम् च उच इति द्वन्द्वसमासः ।) सम्भावना । विमर्षः । इति मेदिनी ॥ (यथा,—
“निर्व्वाणदीपे किमु तैलदानं” इति शिष्टोक्तिः ॥)

किमुत, अव्य, (किम् च उत् च इति द्वन्द्वसमासः ।) प्रश्नः । वितर्कः । विकल्पः । अतिशयः । इति मेदिनी ॥

किम्पचः, त्रि, (किं कुत्सितं अतिथ्यादिभ्योऽप्रदाय केवलं स्वोदरमात्रपूरणायैव पचतीति । किम् + पच् + अच् ।) किम्पचानः । इत्यमरटीकायां रायमुकुटः ॥

किम्पचानः, त्रि, (किं कुत्सितं कस्मैचिदपि न दत्त्वा केवलं आत्मार्थं पचतीति । पच् + आनच् ।) कृपणः । इत्यमरः । ३ । १ । ४८ ॥

किम्पाकः, त्रि, (किं कथमपि पाकः शिक्षाप्रकारो यस्य ।) मूढशासितः । इति जटाधरः ॥

किम्पाकः, पुं, (कुत्सितः पाकः परिणामो यस्य ।) महाकालसता । इति रत्नमाला । माकाल इति भाषा ॥ (यथा, रामायणे २ । ६६ । ६ ।
“न लुब्धो बुध्यते दोषान् किम्पाकमिव भक्षयन्” ॥
महाकालशब्देऽस्य विवरणं बोद्धव्यम् ॥)

किम्पुरुषः, पुं, (कुत्सितः पुरुषः ।) किन्नरः । इत्यमरः । १ । १ । ७४ । (यथा, कुमारे १ । ३८ ।
“पुष्पासवाघूर्णितनेत्रशोभि
प्रियामुखं किम्पुरुषश्चुचुम्बे” ॥)
लोकभेदः । इति मेदिनी ॥ (अग्नीध्रस्य नवपुत्त्राणामेकः । यथा, विष्णुपुराणे २ । १ । १६, १९ ।
“जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ! ।
तस्य पुत्त्रा बभूवुस्ते प्रजापतिसमा नव ॥
नाभिः किम्पुरुषश्चैव हरिवर्ष इलावृतः ॥
“हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः” ॥
किम्पुरुष इति संज्ञा यस्य वर्षस्य ।) जम्बूद्वीपस्य नवखण्डान्तर्गतहिमाचलहेमकूटयोर्मध्यवर्त्ति वर्षम् । इति श्रीभागवतम् ॥ कुत्सितपुरुषः । इति व्युत्पत्तिलब्धोऽर्थः ॥

किम्पुरुषेश्वरः, पुं, (किम्पुरुषाणां ईश्वरः शास्ता राजा वा ।) कुवेरः । इति हेमचन्द्रः ॥

किम्पूरुषं, क्ली, (किम्पूरुष इत्याख्या यस्य वर्षस्य ।) किम्पुरुषवर्षम् । इति त्रिकाण्डशेषः ॥

किम्मरा, स्त्री, (किञ्चित् विमर्त्ति । किम् + मृ + अच् ।) नदीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कियत्, त्रि, किम्परिमाणमस्य (“किमिदम्भ्यां वो घः” । ५ । २ । ४० । इति वतुप् । किमः क्यादेशः । वस्य घ ।) कियत् परिमाणम् । कतो इति भाषा ॥
(“गन्तव्यमस्ति कियदित्यसकृद्‌ब्रुवाणा” ॥
इति साहित्यदर्पणम् ॥)

कियदेतिका, स्त्री, उत्साहः । उद्योगः । इति हेमचन्द्रः ॥

कियाहः, पुं, (कियान् रक्तवर्णो हयः । पृषोदरादित्वात् निपातनात् साधुः ।) रक्तवर्णघोटकः । इति हेमचन्द्रः ॥

किरः, पुं, (किरति विक्षिपति मलोपलक्षितस्थलम् । कॄ + कः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किरकः, पुं, (किरति लिखतीति । कॄ + ण्वुल् ।) लेखकः । इति त्रिकाण्डशेषः ॥

किरणः, पुं, (कीर्य्यन्ते विक्षिप्यन्ते रश्मयः अस्मात् “कॄपॄवृजिमन्दिनिधाञ्भ्यः क्युः” । उणा २ । ८१ । इति क्युः ।) सूर्य्यः । इति हेमचन्द्रः ॥ (कीर्य्यते परितः क्षिप्यतेऽसौ । कॄ + कर्म्मणि क्युः ।) सूर्य्यरश्मिरिति भरतरथमाधवौ ॥ चन्द्रसूर्य्ययोरश्मिरिति रायमुकुटः ॥ एतदसौ गभस्तिशब्दप्रयोगात् सामान्यरश्मिः । तथा च भट्टिः । १ । ६ ।
“ऊर्द्धस्फुरद्रत्नगभस्तिभिर्या” । इति मञ्जरी । इत्यमरटीकासारसुन्दरी ॥ तत्पर्य्यायः । अस्रः २ मयूखः ३ अंशुः ४ गभस्तिः ५ घृणिः ६ घृष्णिः ७ भानुः ८ करः ९ मरीचिः १० दीधितिः ११ । इत्यमरः । १ । ४ । ३३ ॥ त्विट् १२ द्युतिः १३ आभा १४ प्रभा १५ विभा १६ रुक् १७ रुचिः १८ भाः १९ छविः २० दीप्तिः २१ रश्मिः २२ अभीषुः २३ महः २४ ज्योतिः २५ सहः २६ रोचिः २७ शोचिः २८ त्विषा २९ पृश्निः ३० प्रकाशः ३१ आतपः ३२ द्योतः ३३ । इति शब्दरत्नावली ॥ पादः ३४ गोः ३५ वसुः ३६ हृषिः ३७ भामः ३८ अः ३९ लोकः ४० अर्चिः ४१ भासः ४२ वीचिः ४३ हेतिः ४४ धाम ४५ वर्चः ४६ सुषुम्नः ४७ तेजः ४८ ओजः ४९ । इति जटाधरः ॥
(यथा, रघुवंशे ५ । ७४ ।
“भवति विरलभक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेशोद्भेदशून्याः प्रदीपाः” ॥)

किरणमाली, [न्] पुं, (किरणानां माला अस्त्यस्य । किरणमाला + इनिः ।) सूर्य्यः । इति हारावली ॥

किरातः, पुं, (किरं अवस्करादेर्निक्षेपस्थानभूमिं अतति सततं अटतीति । अत + अण् । यद्वा किरं शूकरादिकं अतति हिनस्तीति । अच् ।) म्लेच्छभेदः । (निषादः । यथा, किराते १२ । ५५ ।
“कच्छान्ते सुरसरितो निधाय सेना-
मन्वीतः स कतिपयैः किरातवर्य्यैः” ॥)
भूनिम्बः । (यथा, शार्ङ्गधरे मध्यखण्डे २ अः । १७ श्लोके ।
“पर्पटाब्दामृताविश्वकिरातैः साधितं जलम् ।
पञ्चभद्रमिदं ज्ञेयं वातपित्तज्वरापहम्” ॥)
अल्पतनुः । इति मेदिनी ॥ घोटकरक्षकः । इति सारस्वतः ॥

किरातकः, पुं, (किरात एव । स्वार्थे कन् ।) भूनिम्बः । इति राजनिर्घण्टः ॥

किराततिक्तः, पुं, (किरातः भूनिम्बस्तद्वत् तिक्तः ।) वृक्षविशेषः । चिराता इति भाषा । तत्पर्य्यायः । भूनिम्बः २ अनार्य्यतिक्तः ३ । इत्यमरः । २ । ४ । १४३ ॥ कैरातम् ४ काण्डतिक्तकः ५ । इति रत्नमाला ॥ किरातकः ६ इति जटाधरः ॥ चिरतिक्तः ७ चिराततिक्तः ८ तिक्तकः ९ सुतिक्तकः १० । इति शब्दरत्नावली ॥ कटुतिक्तः ११ रामसेनकः १२ ॥ अस्य गुणाः । वायुवृद्धिकारित्वम् । रूक्षत्वम् । कफपित्तज्वरनाशित्वञ्च । इति राजवल्लभः ॥
“किरातकोऽन्यो नैपाल सार्द्धतिक्तो ज्वरान्तकः ।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ॥
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथतृषाकुष्ठज्वरव्रणक्रिमिप्रणुत्” ॥
इति भावप्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ भूनिम्बशब्दे द्रष्टव्यौ ॥
(“किराततिक्तममृता द्राक्षामामलकीं शठीम् ।
निष्क्वाथ्य पिबानिलजे क्वाथन्तं सगुडं पिबेत् ॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

किराताशी, [न्] पुं, (किरातान् निषादान् अश्नातीति । अश भोजने + णिनिः ।) गरुडः । इति शब्दरत्नावली ॥ (अस्य विवरणं यथा महाभारते १ । २८ अध्याये ।
“इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत् ।
गच्छाम्यमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुम् ॥
विनतोवाच ।
समुद्रकुक्षावेकान्ते निषादालयमुत्तमम् ।
निषादानां सहस्राणि तान् भुक्त्वाऽमृतमानय ।
न च ते ब्राह्मणं हन्तुं कार्य्या बुद्धिः कथञ्चन” ॥)

किरातिः, स्त्री, (किरेण समन्तात् जलक्षेपेण अतति गच्छतीति । अत + इन् ।) गङ्गा । इति जटाधरः ॥

किरातिनी, स्त्री, (किरातदेशः उत्पत्तिस्थानत्वेनास्त्यस्याः । इनिः । ङीप् ।) जटामांसी । इति शब्दरत्नावली ॥ (जटामांसीशब्देऽस्या गुणादिविषयो ज्ञेयः ॥)

किराती, स्त्री, (किराति + वा ङीष् ।) दुर्गा । गङ्गा कुट्टिनी । इति मेदिनी ॥ स्वर्गगङ्गा । इति शब्दमाला ॥

किरिः, पुं, (किरति समलभूमिम् । “कॄगॄशॄपॄकुटिभिदिच्छिदिभ्यः” । उणा ४ । १४२ । इति इप्रत्ययः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किरिटिः, स्त्री, (किरिणा शूकरेण टल्यते विक्लाव्यते । टल विक्लवे + डिः ।) हिन्तालफलम् । इति त्रिकाण्डशेषः ॥

किरीटः, पुं क्ली, (किरति कीर्य्यतेऽनेन वा । “कॄतॄकृपिभ्यः कीटन्” । उणा ४ । १८४ इति कीटन् ।) मुकुटः । इत्यमरः । २ । ६ । १०२ ॥

किरिटी, [न्] पुं, (किरीटोऽस्त्यस्य । किरीट + इनिः ।) अर्ज्जुनः । इति त्रिकाण्डशेषः ।
(यथा, महाभारते । ४ । ४२ । १७ ।
“पुरा शक्रेण मे दत्तं युध्यतो दानवर्षभैः ।
किरीटं मूर्द्धि सूर्य्याभं तेनाहुर्मां किरीटिनम्” ॥)
किरीटयुक्ते त्रि ॥ (यथा भगवद्गीतायां ११ । १७ ।
“किरीटिनं गदिनं चक्रिणञ्च तेजोराशिं सर्व्वतो

दीप्तिमन्तम् । यश्चासि त्वा दुर्निरीक्ष्यं समन्ताद्दी-
प्तानलार्कद्युतिमप्रमेयम्” ॥)

किर्म्मी, स्त्री, (कृ + कि + निपातनात् मुट् । ततो ङीष् ।) पलाशः । गृहम् । स्वर्णपुत्तलिका । इति मेदिनी ॥ लोहपुत्तलिका । इति विश्वः ॥

किर्म्मीरः, पुं, (कृ + गम्भीरादित्वात् ईरन् निपातनात् साधु ।) नागरङ्गवृक्षः । राक्षसविशेषः । (यथा महाभारते ३ । ११ । २२ ।
“प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम् ।
अहं बकस्य वै भ्राता किर्म्मीर इति विश्रुतः” ॥)
कर्व्वुरवर्णः । इति मेदिनी ॥ तद्वर्णयुक्ते त्रि । इत्यमरः । १ । ५ । १७ ॥

किर्म्मीरजित्, पुं, (किर्म्मीरं जितवान् । जि + भूते क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ (किर्म्मीरवधकथा महाभारते ३ । ११ अध्याये उक्ता । तद्यथा,—
“प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम् ।
अहं बकस्य वै भ्राता किर्म्मीर इति विश्रुतः ॥
वनेऽस्मिन् काम्यके शून्ये निवसामि गतज्वरः ।
युधि निर्जित्य पुरुषानाहारं नित्यमाचरन् ॥
के यूयमभिसंप्राप्ता भक्ष्यभूता ममान्तिकम् ।
युधि निर्जित्य वः सर्व्वान् भक्षयिष्ये गतज्वरः” ॥
वैशम्पायन उवाच ।
“युधिष्ठिरस्तु तच्छ्रुत्वा वचस्तस्य दुरात्मनः ।
आचचक्षे ततः सर्व्वं गोत्रनामादि भारत ।” ॥
“किर्म्मीरस्त्वब्रवीदेनं दिष्ट्या देवैरिदं मम ।
उपपादितमद्येह चिरकालान्मनोगतम् ॥
भीमसेनवधार्थं हि नित्यमभ्युद्यतायुधः ।
चरामि पृथिवीं कृत्स्नां नैनमासादयाम्यहम् ॥
सोऽयमासादितो दिष्ट्या भ्रातृहा काङ्क्षितश्चिरम् ।
अनेन हि मम भ्राता बको विनिहतः प्रियः ॥
वेत्रकीयगृहे राजन् ! ब्राह्मणच्छद्मरूपिणा ।
विद्याबलमुपाश्रित्य न ह्यस्त्यस्यौरसं बलम्” ॥
“यदि तेन पुरा मुक्तो भीमसेनो बकेन वै ।
अद्यैनं भक्षयिष्यामि पश्यतस्ते युधिष्ठिर ।” ॥
“एवमुक्तस्तु धर्म्मात्मा सत्यसन्धो युधिष्ठिरः ।
नैतदस्तीति सक्रुद्धो भर्त्सयामास राक्षसम् ॥
ततो भीमो महाबाहुरारुज्य तरसा द्रुमम् ।
दशव्याममथोद्विद्धं निष्पत्रमकरोत्तदा” ॥
“किर्म्मीरश्चापि सहसा वृक्षमुत्पाट्य पाण्डवम् ।
दण्डपाणिरिव क्रुद्धः समरे प्रत्यधावत” ॥
“तावन्योन्यं समाश्लिष्य प्रकर्षन्तौ परस्परम् ।
उभावपि चकाशेते प्रवृद्धौ वृषभाविव ॥
तयोरासीत्सुतुमुलः सम्प्रहारः सुदारुणः ।
नखदंष्ट्रायुधवतोर्व्याघ्रयोरिव दीप्तयोः” ॥
“तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा ।
शब्दः समभवद्घोरो वेणुस्फोटसमो युधि ॥
अथैनमाक्षिप्य बलाद्गृह्य मध्ये वृकोदरः ।
धूनयामास वेगेन वायुश्चण्ड इव द्रुमम् ॥
स भीमेन परामृष्टो दुर्ब्बलो बलिना रणे ।
व्यस्पन्दत यथा प्राणं विचकर्ष च पाण्डवम् ॥
तत एनं परिश्रान्तमुपलक्ष्य वृकोदरः ।
योक्त्रयामास बाहुभ्यां पशुं रसनया यथा ॥
विनदन्तं महानादं भिन्नभेरीस्वनं बली ।
भ्रामयामास सुचिरं विस्फुरन्तमचेतनम् ॥
तं विषीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः ।
प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत् ॥
आक्रम्य जघनं जानुना दृढम् ।) ...

अथ जर्ज्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम् ।
भूतले भ्रामयामास वाक्यं चेदमुवाच ह ॥
हिडिम्बबकयोः पाप ! न त्वमश्रुप्रमार्ज्जनम् ।
करिष्यसि गतश्चापि यमस्य सदनं प्रति ॥
इत्येवमुक्त्वा पुरुषप्रवीर-
स्तं राक्षसं क्रोधपरीतचेताः ।
विस्रस्तवस्त्राभरणं स्फुरन्त-
मुद्भ्रान्तचित्तं व्यसुमुत्ससर्ज्ज” ॥ * ॥)

किर्म्मीरत्वक् [च्] स्त्री, (किर्म्मीरा चित्रा त्वक् यस्य ।) नारङ्गवृक्षः । इति त्रिकाण्डशेषः ॥ (नारङ्गनागरङ्गशब्दयोरस्या गुणादयो बोध्याः ॥)

किर्म्मीरभित् [द्] पुं, (किर्म्मीरं राक्षसविशेषं भिन्नवान् । भिद + क्विप् भूते ।) भीमसेनः । इति भूरिप्रयोगः ॥ (अस्य विवरणं किर्म्मीरजित्-शब्दे द्रष्टव्यम् ॥)

किर्म्मीरसूदनः, पुं, (किर्म्मीरं सूदयति हन्तीति । सूद + णिच् + ल्युः । कर्त्तृविवक्षावशात् क्वचिद् भूतार्थे वा ।) भीमसेनः । इति हेमचन्द्रः ॥ (अस्य विवरणं किर्म्मीरजिच्छब्दे द्रष्टव्यम् ॥)

किल क नुदौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क केलयति । नुदिरिति णुद औश् प्रेरणे इत्यस्य औणादिककिप्रत्यये रूपम् । इति दुर्गादासः ॥

किल श श्वैत्ये । क्रीडे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट् ।) श किलति प्रासादः शिशुर्व्वा । केलिता । इति दुर्गादासः ॥

किल, व्य, (किल + क ।) वार्त्ता । सम्भाव्यम् । इत्यमरः । ३ । ३ । २५३ ॥ निश्चयः । इति तट्टीकासारसुन्दरी ॥ (यथा शाकुन्तले १माङ्के दुष्मन्तोक्तिः ।
“इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति” ॥)
अनुनयार्थम् इति मेदिनी ॥

किलकिञ्चितं, क्ली, (किल अलीकेन किं ईषत् चितं रचितम् ।) हावः । शृङ्गारभावजा क्रिया । इति जटाधरः ॥ तस्य लक्षणम् ।
यथा, अलङ्कारकौस्तुभे ।
“गर्व्वाऽभिलाषरुदितस्मितासूयाभयक्रुधाम् ।
सङ्करीकरणं यत् स्यादुच्यते किलकिञ्चितम्” ॥
(तथा च साहित्यदर्पणे ३ । १०९ ।
“स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्धर्षात्” ॥
उदाहरणं तत्रैव यथा,—
“पाणिरोधमविरोधितवाञ्छं
भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरु-
र्हारिशुष्करुदितञ्च सुखेऽपि” ॥)

किलकिला, स्त्री, (किल + क । प्रकारे वीप्सायां वा द्वित्वम् । स्त्रियां टाप् ।) हर्षध्वनिः । किलकिलशब्द इति यावत् । तत्पर्य्यायः । हर्षस्वनः २ । इति त्रिकाण्डशेषः ॥
(“आसीत् किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे” । इति महाभारते १ । ६९ । ६ ॥)

किलाटः, पुं, क्षीरविकृतिः । इति जटाधरः ॥ दधिकूर्च्चिकातक्रकूर्च्चिकयोः पिण्डः । अस्य गुणाः । शीतलत्वम् । स्निग्धत्वम् । गुरुत्वम् । गौल्यत्वम् । वृष्यत्वम् । पित्तापहत्वञ्च । इति राजनिर्घण्टः ॥
(“नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः” ॥ इति भावप्रकाशः । तथा चरके सूत्रस्थाने । २७ अध्याये ॥
“पीयूषो मोरटश्चैव किलाटा विविधाश्च ये ।
दीप्ताग्नीनामनिद्राणां सर्व्व एते सुखप्रदाः ॥
गुरवस्तर्पणा वृष्या वृंहणाः पवनापहाः” ॥
अस्योत्पत्तिविवरणं यथा भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ किलाटकः गिजिरी इति लोके ।
“अपक्वमेव यन्नष्टं क्षीरशाकं हि तत्पयः” ।
क्षीरशाकः तुषिभरा इति लोके ।
“दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
द्रवभावेन सहितं तक्रपिण्डः स उच्यते ॥
नष्टदुग्धभवं नीरं मोरटं प्रोक्तवानृषिः ।
पेयूषञ्च किलाटश्च क्षीरशाकं तथैव च ॥
तक्रपिण्डः इमे वृष्या वृंहणा बलवर्द्धनाः ।
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ॥
दीप्ताग्नीनां विनिद्राणां विदग्धे चाभिपूजिताः ।
मुखशोषतृषादाहरक्तपित्तज्वरप्रणुत्” ।)

किलाटी, स्त्री, (किलाट + गौरादित्वात् ङीष् ।) क्षीरविकृतिः । तत्पर्य्यायः । कूर्च्चिका २ । इति हेमचन्द्रः ॥ (कूर्च्चिकाशब्देऽस्या गुणपर्य्याया ज्ञातव्याः ॥)

किलाटी, [न्] पुं, (किलतीति । किल + क । अट + णिनि । ततः । किलश्चासौ अटी चेति कर्म्मधारयः । यद्वा किलमटतीति ।) वंशः । इति हारावली ॥ बाँश् इति भाषा ॥

किलासं, क्ली, (किल वर्णं अस्यति क्षिपति विकृतिं करोति इति यावत् । किल + अस + “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) रोगविशेषः । कुली इति भाषा । तत्पर्य्यायः । सिध्मा २ । इत्यमरः । २ । ६ । ५३ ॥ सिध्मम् ३ । इति भरतः ॥ त्वक्पुष्पम् ४ त्वक्पुष्पी ५ । इति हेमचन्द्रः ॥
(“कुष्ठैकसम्भवं श्वित्रं किलासं दारुणञ्च तत् ।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥
वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डु च क्रमाद्रक्तमांसमेदःसु चादिशेत् ।
वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥
अशुक्लरोमाबहुलमसंसृष्टं मिथो नवम् ।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्ज्यमतोऽन्यथा” ॥

कुक्कुटाहिः २। इति हेमचन्द्रः॥

कुक्कुटाहि, पुं, (कुक्कुट तद्वर्ण इव अहिः सर्पः।) कुक्कुटाभसर्पः। इति हेमचन्द्रः॥

कुक्कुटि, स्त्री, (कुक्कुट इव आचरति। आचारे क्विपि इन्।) दम्भचर्य्या। इति हेमचन्द्रः॥

कुक्कुटी, स्त्री, (कुक्कुटि+वा ङीप्।) अनृतचर्य्या। इति मेदिनी॥ ज्येष्ठी। इति शब्दरत्नावली॥ टिक्‌टिकि इति भाषा शाल्मलीवृक्षः। इति जटाधरः। (यथा, सुश्रुते उत्तरतन्त्रे। ६० अः।) "कुक्कुटी सर्पगन्धाश्च तथाकाणविषाणिके"॥ योषिद्विशेषः। इति चिन्तामणिः॥)

कुक्कुटीव्रत, क्ली, (कुक्कुटी इति संज्ञकं व्रतं नियमविशेषः।) भाद्रशुक्लसप्तमीकर्त्तव्यनियमविशेषः। तद्विवरणं ललितासप्तमीशब्दे द्रष्टव्यम्॥

कुक्कुभ, पुं, (कुक्कुशब्दं भाषते। भाष्+बाहुलकात् ड। यद्वा कुक् इत्यव्यक्तं कौति शब्दायते। कु+बाहुलकात् भक्।) पक्षिविशेषः। इत्यमरः। २।५।३५। पात्‌कुका इति भाषा॥

कुक्कुर क्ली, ग्रन्थिपर्णम्। इत्यमरः। २।४।१२२। गाँठियाला इति भाषा॥ (अस्य पर्य्याया यथा,— "स्थौणेयकं बर्हिवर्हं शुक्लाबर्हञ्च कुक्कुरम्। शीर्णरोम शुकञ्चापि शुकपुष्पं शुकच्छदम्"॥ इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥ गुणा अस्य स्थौणेयकशब्दे ज्ञेयाः।)

कुक्कुर, पुं, (कोकते आदत्ते इति। कुक्+क्विप्। कुक् यत्किञ्चिदपि स्फुरन्तं जनं दृष्ट्वा कुरति शब्दायते। कुर्+क।) जन्तुविशेषः। कुकुर इति भाषा॥ तत्पर्य्यायः। कौलेयकः २ सारमेयः ३ मृगदंशकः ४ शुनकः ५ भषकः ६ श्वा ७। इत्यमरः। २।१०।२१॥ कुक्कुरः ८ शुनः ९ शुनिः १० श्वानः ११। इति तट्टीका॥ भषणः १२ भसूकः १३ वक्रलाङ्गूलः १४ रुतारिः १५ रात्रिजागरः १६ कालेयकः १७ ग्राम्यमृगः १८ मृगारिः १९ शूरः २० शयालुः २१। इति राजनिर्घण्टः॥

तस्य गुणाः।

"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च षडेते च शुनो गुणाः"॥

इति चाणक्यम्॥ तस्य परीक्षा यथा।

"मृगयार्थं शाकुनार्थं कौतुकार्थिमहीक्षिता।
श्वानः पोष्यास्ततस्तेषामत्र वक्ष्यामि लक्षणम्॥
गुणजातिप्रभेदेन शुनो भेदो ह्यनेकधा"। तद्यथा।
"सात्त्विका राजसाश्चैव तामसाश्च त्रिधा मताः॥
अश्रान्ता अपरिक्षीणाः पवित्राः स्वल्पभोजिनः।
श्वानस्ते सात्त्विकाः प्रोक्ता दृश्यन्ते च क्वचित् क्वचित्॥१
क्रुद्धा बहुभुजो दीर्घा गुरुवक्षस्तनूदराः।
जाङ्गलस्था जाङ्घिकाश्च श्वानस्ते राजसा मताः॥२
अल्पश्रमेण ये श्रान्ता ललज्जिह्वा गुरूदराः।
श्वानस्ते तामसा ज्ञेयाः सन्ध्यावनसमाश्रयाः॥३
ब्रह्मादिजातिभेदेन चतुर्द्धा सर्व्व एव हि।
शुभ्रा दीर्घाः स्तब्धकर्णा लघुपुच्छास्तनूदराः॥
सुशुक्लखरदन्ताश्च श्वानस्ते ब्रह्मजातयः॥१
रक्ताङ्गास्तनुलोमानो ललत्कर्णास्तनूदराः।
दीर्घा दीर्घा नखरदाः श्वानस्ते क्षत्त्रजातयः।२
ये पीतवर्णा मृदवस्तनुलोमान एव च॥
क्रुद्धा क्रुद्धा ललज्जिह्वास्ते श्वानो वैश्यजातयः॥३
कृष्णवर्णास्तनुमुखा दीर्घरोमाण एव च॥
अक्रुद्धा श्रमयुक्ताश्च ते श्वानः शूद्रजातयः॥४
लघुप्रमाणास्तु गुरूदरा ये
येऽमेध्यभक्षा वक्रपुच्छकाश्च।
प्ररूढपुच्छा लघुसूक्ष्मदन्ता
स्तेषान्त्यजा कुक्कुरजातयः स्युः॥५॥
द्विजातिचिह्नसंसर्गात् द्विजातिः श्वा भयावहः।
लक्षणत्रयसम्बन्धात् त्रिजातिर्द्धननाशनः॥

भोजोऽपि।

द्विजातिर्व्वा त्रिजातिर्व्वा विजातिः श्वा महीभृताम्।
भयं धनक्षयं शोकं विदधाति यथाक्रमम्॥

इति भोजराजकृतयुक्तिकल्पतरुः॥ (मुनिविशेषः। यथा महाभारते। २। ४। १७।
"कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च।
मुनयो धर्म्मविद्वांसो धृतात्मानो जितेन्द्रियाः"॥)

कुक्कुरद्रु, पुं, (कुक्कुरः कुक्कुरगन्धोपलक्षितः द्रुर्वृक्षः।) वृक्षविशेषः। कुकुरशोंका इति भाषा। तत्पर्य्यायः। ताम्रचूडः २ सूक्ष्मपत्रः ३ मृदुच्छदः ४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। ज्वररक्तकफनाशित्वञ्च। इति मदनविनोदः॥
"तन्मूलमार्द्रं निक्षिप्तं वदने मुखशोषहृत्"।
इति भावप्रकाशः॥

कुक्कुरी, स्त्री, (कुक्कुर+स्त्रियां जातित्वात् ङीष्।) कुक्कुरस्त्री। कुत्ती इति भाषा। तत्पर्य्यायः। सरमा २ श्वानी ३ सारमेयी ४ शुनी ५ भषी ६। इति शब्दरत्नावली॥

कुक्कुवाक्, पुं, (कुक्कुरस्य वाक् शब्द इव शब्दोऽस्य।) सारङ्गमृगः। इति राजनिर्घण्टः॥

कुक्ष, पुं, (कुषनिष्कर्षे+"उन्दिगुधिकुषिभ्यश्च"। उणा ३। ६८। इति स क्विच्च।) कुक्षिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुक्षि, पुं, (कुषनिष्कर्षे+"प्लुषिकुषिशुषिभ्यः क्सिः"। उणा ३। १५५ इति क्सि।) उदरम्। इत्यमरः। २। ६। ७७॥ (यथा, महाभारते १। ७७। १३।
"यात्रोषित विशालाक्षि। त्वया चन्द्रनिभानने।
तत्राहमुषितो भद्रे कुक्षौ काव्यस्य भाविनि।"॥
दानवविशेषः। यथा महाभारते १। ६७। ५७।
"कुक्षिस्तु राजन् विख्यातो दानवानां महाबलः"॥)

कुक्षिम्भरि, त्रि, (कुक्षिं बिभर्त्तीति। भृ+खः+मुम् च।) आत्मम्भरिः। स्वोदरपूरकः। इत्यमरः ३। १। २१॥

कुक्षिरन्ध्र, पुं, (कुक्षौ रन्ध्रं छिद्रं यस्य।) नलः। इति निर्घण्टः।

कुङ्कुम, क्ली, (कुमकुम् इति शब्दोऽस्ति वाचकत्वेनास्य अर्श आद्यच्। यद्वा कुक्यते आदीयतेऽसौ। कुक आदाने उमक् निपातनात् मुम्।) स्वनामख्यातगन्धद्रव्यम्। कुमकुम् इति केशर इति भाषा। (यथा माघे ११। १४।
"कृतधवलिमभेदैः कुङ्कुमेनेव किञ्चित्।
मलयरुहरजोभिर्भूषयन् पश्चिमाशाम्"॥)
तत्पर्य्यायः। काश्मीरजन्म २ अग्निशिखम् ३ वरम् ४ वाह्लीकम् ५ पीतनम् ६ रक्तम् ७ सङ्कोचम् ८ पिशुनम् ९ धीरम् १० लोहितचन्दनम् ११। इत्यमरः। २। ६। १२४। चारु १२ वाह्लिकम् १३ वरवाह्लीकम् १४ रक्तचन्दनम् १५। इति तट्टीका॥ अग्निशेखरम् १६ असृक् १७ काश्मीरजम् १८ पीतकम् १९ काश्मीरम् २० रुधिरम् २१ शठम् २२ शोणितम् २३ घुसृणम् २४ वरेण्यम् २५ अरुणम् २६ कालेयकम् २७ जागुडम् २८ कान्तम् २९ वह्निशिखम् ३० केशरवरम् ३१ गौरम् ३२ केसरम् ३३ हरिचन्दनम् ३४ खलम् ३५ रजम् ३६ दीपकम् ३७ लोहितम् ३८ सौरभम् ३९ चन्दनम् ४०। इति शब्दरत्नावली॥ अस्य गुणाः। सुरभित्वम्। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कासवातकफकण्ठरोगमूर्द्धशूलविषदोषनाशित्वम्। रोचनत्वम्। तनुकान्तिकरत्वञ्च। इति राजनिर्घण्टः॥ रेचकत्वम् विवर्णताकण्डूनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वम्। शिरोरुग्व्रणजन्तुवमिव्यङ्गदोषत्रयापहत्वम्। वर्ण्यत्वञ्च। इति भावप्रकाशः॥ त्वग्दोषनाशित्वम्। इति रत्नावली तत्त्वचन्द्रिका च॥ देशभेदे तत् त्रिविधम्। यथा,—
"काश्मीरदेशजे क्षेत्रे कुङ्कुमम् यद्भवेद्धि तत्।
सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम्॥१॥
वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरं भवेत्।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम्॥२॥
कुङ्कुमं पारसीकेयं मधुगन्धि तदीरितम्।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम्"॥३॥
इति भावप्रकाशः॥

कुङ्कुनी, स्त्री, (कुङ्कुमवर्णोऽस्त्यस्याः। अच्। गौरादित्वात् ङीष्। तत पृषोदरादित्वात् साधु।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ (कुङ्कुमीति केचित्॥)

कुच, ज रोधपर्ककौटिल्यलेखने। इति कविकल्पद्रुमः॥ (भ्वां परं सकं, अकं च-सेट्-ज्वलां।) ज कोचः कुचः। रोध क्रियारोधः जडीभाव इत्यर्थः। अस्मिन्नर्थ एव प्रायो वर्त्तते। यस्मिन् प्रमुदिते राज्ञि तम सङ्कोचति क्षितौ। पर्कः सम्पर्कः। इति दुर्गादासः॥

कुच, शि सङ्कोचे। इति कविकल्पद्रुमः॥ (तुदां-पर-अकं,सेट्।) प्रायः सपूर्व्वस्य प्रयोगः। शि-सकुचति अकुचीत् चुकोच। इति दुर्गादासः॥

कुच, तारशब्दे। उच्चैःशब्द इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-पर-अक-सेट्।) कोचति ढक्का। भट्टमल्लस्तु तारे शब्दे च कोचति इति नानार्थे पठति। तन्मते तारः स्विक्कणता। कोचति कार्षी वणिक् चिक्कणयतीत्यर्थः। इति दुर्गादासः॥

कुच, पुं, (कुचति सङ्कुचतीति। कुच् सङ्कोचे। "इगुपधेति"। ३। १। १३५। क।) स्तनः। इत्यमरः। २। ६। ७७। (यथा गोः रामायणे। ५। १३। ५७।

"अन्या वक्षसि धान्यस्यात्तस्याश्चाप्यपराः कुचे।
उरःपार्श्वकटीपृष्ठमन्योन्यं समुपाश्रिता" ॥
स्त्रीणां यौवने कुचपरिवृद्धिर्भवति ।
यथाह भावप्रकाशे ।
"पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते ।
नेष्वा तदपि तारुण्ये पुष्टत्वात् व्यक्तिमेति हि ॥
कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा ।
रोमराज्यादयः पुंसां नारीणामपि यौवने ॥
जायते ऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च" ॥
व्याख्यानं यथा,—
"पुंसां रोमराजिश्मश्रुप्रभृतय
नारीणान्तु रोमराजी स्तनार्त्तवादयः" ॥)

कुचण्डिका, स्त्री, (कुत्सिता चण्डिका कोपना इव । विक्षतिकारितया तथात्वम् ।) मूर्व्वालता । इति शब्दचन्द्रिका ॥

कुचन्दनम्, क्ली, (कुत्सितं गन्धहीनतया यच्चन्दनं यद्वा कौ पृथिव्यां चन्दनमिव ।) रक्तचन्दनम् । इत्यमरः । २ । ६ । १३२ ॥ पत्राङ्गम् । वकम् काठ् इति भाषा । वृक्षभेदे । इति मेदिनी ॥ कुङ्कुमम् । इति शब्दचन्द्रिका । (अस्य पर्य्याया यथा,—वैद्यकरत्नमालायाम् ।
"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम्" ॥)

कुचफल, पुं, (कुच इव फलं यस्य । कुचसदृशत्वात्तथात्वम् ।) दाडिमवृक्षः । इति राजनिर्घण्टः ॥ (गुणपर्य्याया दाडिमशब्देऽस्य ज्ञातव्याः ॥)

कुचरः, त्रि, (कुत्सितं चरतीति । कु+चर्+अच् ।) कुवादः । परदोषकथनशीलः । इत्यमरः । ३ । १ । ३७ ॥ (दुर्गमदेशगन्ता । यथा, ऋग्वेदे ।१।१५४।२।
"प्र तद्विष्णुः स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः" ॥ कुस्थाने चरतीति । कान्तारादिपर्य्यटकः । कौ पृथ्व्यां चरतीति । भूमिचरः ॥ यथा महाभारते । १४ । ३८ । १३,१४ ।
"दृष्ट्वा त्वादित्यमुद्यन्तं कुचराणां भयं भवेत् ।
अध्वगाः परितप्येयुरुष्णातो दुःखभागिनः ॥
आदित्यः सत्यमुद्दिष्टः कुचरास्तु तथा तमः ।
परितापोऽध्वगानाञ्च राजसो गुण उच्यते" ॥)

कुचाग्रम्, क्ली, (कुचस्य कुचयोर्वा अग्रम् ।) स्तनाग्रभागः । तत्पर्य्यायः । चूचुकम् २ । इत्यमरः । २ । ६ । ७७ । चुचुकम् ३ । इति तट्टीका ॥

कुचाङ्गेरी, स्त्री, (कुत्सिता चाङ्गेरी ।) इति रत्नमाला ॥ चुक्रिका । चुकापालं इति भाषा ॥

कुचिकः, पुं स्त्री, (कुच+बाहुलकात् इकन् ।) मत्स्यविशेषः । इति त्रिकाण्डशेषः । कुँचिया इति भाषा ॥

कुचेलः, त्रि, (कुत्सितं चेलं वस्त्रं यस्य ।) कुवासाः । परिहितकुत्सितवस्त्रो जनः । इति मेदिनी ॥ (कुत्सितं चेलमिति विग्रहे । क्ली, जीर्णवस्त्रम् । यथा, मनुः ६ । ४४ ।
"कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥)

कुचेला, स्त्री, (कुचा सङ्कुचिता इला भूमिः निद्रा वा यस्याः ।) विद्धकर्णी । इति मेदिनी (यथा, भैषज्यरत्नावल्याम् ।
"कुचेला कुलका राचिर्मेघनामा च ग्रन्थिका" ॥
अस्याः पर्य्याया यथा ।
"अम्बष्ठाम्बष्ठकीपाठा कुचेला मायचेलिका ।
एकाष्ठीला वरा तिक्ता प्राचीनैकाशिवावुका" ॥
इति वैद्यकरत्नमालायाम् ॥)

कुचेली, स्त्री, (कुचेल+गौरादित्वात् ङीष् ।) अम्बष्ठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

कुच्छ, क्ली, (कोः पृथिव्याः दुःखं छ्यति दर्शनाघ्राणादिना लुनातीति । कु+छो+क ।) कुमुदम् । इति शब्दचन्द्रिका ॥ (कुमुदशब्देऽस्य गुणपर्य्याया बोद्धव्याः ॥)

कुज उ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) उ कोजित्वा कुक्त्वा । स्तेयं चौर्य्यम् । इति दुर्गादासः ॥

कुज, इ अव्यक्तशब्दे । इति चन्द्रः । (भ्वा-पर-अक-सेट्-इदित् ।) कुञ्जति कुञ्जरः । इति दुर्गादासः ॥

कुजः, पुं, (कौ पृथिव्यां जायते । कु+जन्+ड ।) मङ्गलग्रहः । (यथा, मङ्गलग्रहस्तुतौ । "अङ्गारकः कुजो भौमः" इति ।) नरकासुरः । (यथा,—
"तत्राहृतास्ता नरदेवकन्या
कुजेन दृष्ट्वा हरिमार्त्तबन्धुम्" ॥
श्रीमद्भागवते ३।३।८ ॥) वृक्षः । इति हेमचन्द्रः ॥

कुजम्भलः, त्रि, (कौ पृथिव्यां कौ वा जम्भः मृत्तिकादिखननेन सन्धिचौरः ।) चौरविशेषः । इति हारावली । सिँदेल चोर इति भाषा ॥

कुजम्भिलः, त्रि, (कुजम्भोऽस्यास्तीति । इलच् ।) कुजम्भलः । इति शब्दरत्नावली ॥

कुजा, स्त्री, (कुजाः पृथिवीजाः वृक्षाः आश्रयत्वेन सन्ति अस्या इति अच् ततष्टाप् । यथा,—
"कदली दाडिमी धान्यं हरिद्रा मानकं कचुः ।
बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका" ॥
इति मन्त्रोक्तनवपत्रिकासु "तव स्थानमिदं मर्त्त्ये" इत्यादि निर्द्देशेन चास्याः वृक्षाश्रयत्वात् तथात्वम् ।) कात्यायनी देवी । इति मेदिनी ॥ (कौ पृथिव्यां जायते । जन+ड टाप् च । सीता देवी भूमेस्तदुत्पत्तिकथा कालिकापुराणे ३७ अध्याये ।
"ततः पुरोधसं राजा गोतमं मुनिसत्तमम् ।
तत्पुत्रञ्च शतानन्दं पुरोधायाकरोन्मखम् ॥
द्वौ पुत्रौ तस्य सञ्जातौ यज्ञभूमौ परौ स्मृतौ ।
एका च दुहिता साध्वी भूम्यन्तरगता शुभा" ॥)

कुञ्जिशः, पुं, मत्स्यभेदः । अस्य गुणाः । मधुरत्वम् । हृद्यत्वम् । कषायत्वम् । दीपनत्वम् । बलकारित्वम् । स्निग्धत्वम् । गुरुत्वम् । ग्राहित्वम् । वाते हितत्वम् । रोचनत्वञ्च । इति राजनिर्घण्टः ॥

कुज्झटिः, स्त्री, (कोजति व्यपहरति सूर्य्यप्रकाशम् । कुज्+क्विप् न कुत्वम् । झट् सङ्घाते इन् । ततः कर्म्मधारयः ।) कुज्झटिका । कुया । कुयासा इति च भाषा । तत्पर्य्यायः । धूममहिषी २ रतान्ध्री ३ कुहेलिका ४ धूमिका ५ नमोरेणुः ६ । इति त्रिकाण्डशेषः । अस्य गुणाः । रूक्षत्वम् । तमोगुणप्रायत्वम् । कफपित्तकारित्वञ्च । इति राजवल्लभः ॥

कुज्झटिका, स्त्री, (कुज्झटि+स्वार्थे कन् टाप् ।) कुज्झटिः । इति शब्दरत्नावली ॥

कुज्झटी, स्त्री, (कुज्झटि+स्त्रियां वा ङीप् ।) कुज्झटिः । इति शब्दरत्नावली ॥

कुञ्चनं, क्ली, (कुञ्चति अनेन । कुन्च+करणे ल्युट् ।) नेत्ररोगविशेषः । तस्य लक्षणं यथा,—
"वाताद्या वर्त्मसङ्कोचं जनयन्ति यदा मलाः ।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः" ॥
इति माधवकरः ॥ (भावे ल्युट् । सङ्कोचः । यथा सुश्रुते ।
"कुर्य्यात् शिरोगतं मूलं शिरः कुञ्चनपूरणाम्" ॥)

कुञ्चफला, स्त्री, (कुञ्चं कुञ्चितं फलं यस्याः ।) कुष्माण्डी । इति राजनिर्घण्टः ॥

कुञ्चिः, पुं, (कुन्च+इन् ।) अष्टमुष्टिपरिमाणम् । यथा, स्मृतिः ॥
"अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" ॥

कुञ्चिका, स्त्री, (कुन्च+ण्वुल्+टाप् इत्वञ्च ।) गुञ्जा । कुँच इति भाषा । वंशशाखा । कञ्चि इति भाषा । इति शब्दचन्द्रिका ॥ कृष्णजीरकः । इति जटाधरः ॥
(अस्या व्यवहारो यथा मरिचाद्यचूर्णे ।
"मरिचः कुञ्चिकाम्बष्ठा वृक्षाम्लः कुडवः पृथक्" ॥
इत्यादिषु द्रष्टव्यम् । इति चरके चिकित्सास्थाने । १९ अः ॥) कूर्च्चिका । कुँजि चावि इति च भाषा । इति हेमचन्द्रः ॥ मेथिका । इति राजनिर्घण्टः ॥ मत्स्यभेदः । कुँचे इति भाषा । यथा । "कुञ्चिकयैव विस्माययति भाययति" । इति मुग्धबोधम् ॥

कुञ्चितः, त्रि, (कुन्च+क्त ।) वक्रम् । इत्यमरः । ३ । १ । ७१ ॥ (यथा, नैषधे ३ । १ ।
"आकुञ्चिताभ्यामथ पक्षतिभ्यां
नभोविभागात्तरसावतीर्य्य" ॥)
तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥

कुञ्जः, पुं क्ली, (कौ जायते जन+ड । पृषोदरादित्वात् मुमि साधुः ।) पर्व्वतादेर्लतापल्लवादिभिः समन्ताच्छादितगर्भो गह्वरादिदेशः । इति मधुप्रभृतयः ॥ उपरि चतुर्दिक्षु च लतादिभिराच्छादितस्य स्थानस्य मध्ये शून्यदेशः । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । निकुञ्जः । इत्यमरः । २ । ३ । ८ ॥ (यथा, पदाङ्कदूते १ ।
"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशालम् ।
अत्रैवास्ते मुररिपुरिति भ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुना मञ्जुकुञ्जं जगाम" ॥)
हनुः । हस्तिदन्तः । इति मेदिनी ॥

कुञ्जरः, पुं, (प्रशस्तः कुञ्जः हनुर्दन्तो वा अस्त्यस्य । कुञ्ज+"रप्रकरणे खमुखकुञ्जेभ्य उपसङ्ख्यानम्" । वार्त्तिक इति रः ।) हस्ती । (यथा, महाभारते ३ । द्वैतवनप्रवेशे २६ । १५ ।
"कुञ्जरस्येव सङ्ग्रामे परिगृह्याङ्कुशग्रहम्" ॥)
उत्तरपदे श्रेष्ठवाचकः । यथा पुरुषकुञ्जर इत्यादि । इत्यमरः । २ । ८ । ३४ ॥ (सर्पविशेषः । यथा, महाभारते । ३५ । १५ ।

"कुठरः कुञ्जरश्चैव तथा नाग प्रभाकरः" ।) केशः । इति मेदिनी ॥ देशभेदः । इति शब्दरत्नावली ॥ (पर्व्वतविशेषः ॥ यथा रामायणे ४ । ४१ । ५० ।

"तत्र शङ्खध्वजाकारः कुञ्जरो नाम पर्व्वतः ।
अगस्त्यभवनं तत्र निर्म्मितं विश्वकर्म्मणा" ॥)

कुञ्जरपिप्पली, स्त्री, (कुञ्जरनाम्नी पिप्पली ।) गजपिप्पली । इति शब्दमाला ॥ (गजपिप्पलीशब्देऽस्या विवृतिर्ज्ञेया ॥)

कुञ्जरक्षारमूल, क्ली, (कुञ्जरपिप्पल्या इव क्षारं उग्रं मूलमस्य ।) मूलकम् । इति राजनिर्घण्टः ॥

कुञ्जरा, स्त्री, (कुञ्जः हस्तिदन्त इव पुष्पं अस्त्यस्याः । रप्रत्यये अच् ततः अजादित्वात् टाप् ।) धातकी । धाइफुल इति भाषा । (अस्याः पर्य्याया यथा,—

"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्या धातकीशब्दे ज्ञातव्या ॥) पाटलावृक्षः । इति मेदिनी ॥ (कुञ्जर + टाप् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जरारातिः, पुं, (कुञ्जरस्य अरातिः शत्रुः ।) शरभः इति हेमचन्द्रः ॥ (सिंहः । इति व्युत्पत्तिलब्धोऽर्थः ।)

कुञ्जरालुक, क्ली, (कुञ्जरसञ्ज्ञकं आलुकम् ।) आलुकविशेषः । हस्त्यालु । इति शब्दचन्द्रिका ॥

कुञ्जराशन, पुं, (कुञ्जरेण अश्यते । अश भोजने + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इत्यमरः । २ । ४ । २० ॥ (अश्वत्थशब्देऽस्य विवरणं ज्ञेयम् ॥)

कुञ्जरी, स्त्री, (कुञ्जर + जातित्वात् ङीष् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जल, क्ली, (कुत्सितं जलमिव जलं यत्र । पृषोदरात् साधुः ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३९ ॥

कुञ्जवल्लरी, स्त्री, (कुञ्जाकृतिरिव कुञ्जाकारा वा वल्लरी ।) निकुञ्जिकाम्लावृक्षः । इति राजनिर्घण्टः ॥

कुञ्जिका, स्त्री, (कुन्ज + ण्वुल् + टाप् इत्वं च ।) कृष्णजीरकः । कुञ्चिका इति क्वचित् पाठः । इति जटाधरः ॥ निकुञ्जिकाम्लावृक्षः । इति राजनिर्घण्टः ॥

कुट इ वैकल्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सकं-सेट् । इदित् ।) पञ्चमस्वरी । इ कुण्ट्यते । वैकल्यमिह विकलीकरणम् । कुण्टति जनः शोकः । इति दुर्गादासः ॥

कुट शि कौटिल्ये । इति कविकल्पद्रुमः ॥ (तुदा-पर-अक सकञ्च-सेट् ।) शि कुटति अकुटीत् चुकोट कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इति दुर्गादासः ॥

कुट क ङ प्रतापने । इति कविकल्पद्रुमः ॥ (चुरा-आत्म-सक-सेट् ।) पञ्चमस्वरी । क ङ कोटयते । रिपोऽन्यैर्न मन्यते । इति दुर्गादासः ॥

कुट, पुं क्ली, (कुट + कः ।) कलशः । इत्यमरः । २ । ९ । ३२ ॥

कुट, पुं, (कुट् + कः ।) कोटः । इति मेदिनी । गड़ इत्यादि भाषा ॥ शिलाकुट्टः । पातरभाङ्गा हातुड़ी इति भाषा । वृक्षः । इति हेमचन्द्रः ॥ पर्व्वतः । इति हारावली ॥ (कुटिले त्रि, यथा, ऋग्वेदे १ । ४६ । ४ । "हविषाजारो अपां पिपर्त्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः" ॥)

कुटङ्कः, पुं, (कुटं गृहभूमिं टङ्कते आच्छाद्यतेऽनेन । कु + टकि आच्छादने । करणे घञ् ।) गृहाच्छादनम् । इति शब्दमाला ॥ चाल इति ख्यातः ॥

कुटङ्गकः, पुं, (कुटस्याङ्गमिव । शकन्ध्वादित्वात् साधुः ।) वृक्षलतागृहम् । छदिः । चाल इति भाषा । गृहभेदः । इत्यमरटीकायां मथुरेशः ॥ कुँड़े इति भाषा ॥

कुटच, पुं, (कुटे गिरौ चीयते उत्पद्यते । चि + डः ।) कुटजवृक्षः । इति शब्दचन्द्रिका ॥ (कुटजशब्दे गुणादयोऽस्य बोद्धव्याः ॥)

कुटज, पुं, (कुटे पर्व्वते जायते । जन् + ड ।) पुष्पवृक्षविशेषः । यस्य फलं इन्द्रयवः । कुड़ची इति भाषा ॥ (यथा, माघे ६ । २५ ।

"कुटजपुष्पपरागकणाः स्फुटं
विदधिरे दधिरेणुविडम्बनाम्" ॥)

तत्पर्य्यायः । शक्रः २ वत्सकः ३ गिरिमल्लिका ४ । इत्यमरः । २ । ४ । ६६ ॥ कौटजः ५ । इति तट्टीका ॥ वृक्षकः ६ शक्रपर्य्यायः ७ । इति रत्नमाला ॥ कुटजः ८ कोटी ९ कालिङ्गः १० मल्लिकापुष्पः ११ प्रावृष्यः १२ शक्रपादपः १३ वरतिक्तः १४ यवफलः १५ संग्राही १६ पाण्डुरद्रुमः १७ प्रावृषेण्यः १८ महागन्धः १९ पाण्डुरः २० । इति शब्दरत्नावली ॥ अपि च ।

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ।
कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । अतिसारनाशित्वञ्च । असितस्य तस्य गुणाः । रक्तपित्तत्वग्दोषार्शोनाशित्वम् । इति राजनिर्घण्टः ॥ कफनाशकत्वम् । इति राजवल्लभः ॥

("कुटजत्वक्कृतः क्वाथो घनीभूतः सुशीतलः ।
लेहितोऽतिविषायुक्तः सर्व्वातीसारनुद्भवेत्" ॥
"कुटजस्य पलं ग्राह्यमष्टभागजले शृतम् ।
तच्चैव विपचेद्भूयो दाड़िमोदकसंयुतम् ॥
यावद्दर्व्वीप्रलेपः स्यात् तमुपकल्पयेत् ।
तस्यार्द्धकर्षं तक्रेण पिबेदत्यतिसारवान् ॥
अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम्" ।

इति वैद्यकचक्रपाणिसंग्रहेऽतिसाराधिकारे ॥) अगस्त्यमुनिः । द्रोणाचार्य्यः । इति मेदिनी ॥

कुटन्नट, क्ली, (कुटन् वक्रीभवन् सन् नटति । नट स्पन्दने + पचाद्यच् ।) कैवर्त्तीमुस्तकम् । इत्यमरः । २ । ४ । १११ ॥ केउटिया मुता इति ख्यातम् । केसुर इति गौडोक्तिः । इति तट्टीका ॥

(अस्य व्यवहारो यत्र तद्यथा)

"पद्मकं चन्दनोशीरं पाठा मूर्व्वा कुटन्नटम्" ॥

इति वाभटे चिकित्सास्थाने १० अध्याये ।

अस्य पर्य्यायाः यथा ।

"कुटन्नटं परं वल्यं मुस्तामम्बु परीमलम्" ॥

इति वैद्यकरत्नमालायाम् ॥

कोसची मोथा । गुड़लजी इति च । इयन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृतिः ॥

पर्य्यायाश्च यथा ।

"कुटन्नटं दाशपुरं वानेयं परिपेलवम् ।
प्लवगोपुरगोनर्दकैवर्त्तीमुस्तकानि च ।
मुस्तावत् पेलवपुटं शुक्लाभं स्वादितुन्नकम्" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥ गुणाश्चास्य वितुन्नकशब्दे ज्ञातव्याः ॥)

कुटन्नट, पुं, (कुटन् सन् नटति । नट् + अच् ।) श्योनाकवृक्षः । इत्यमरः । २ । ४ । ५७ ॥

(अस्य पर्य्याया यथा ।

"श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः ।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ।
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ श्योनाकशब्देऽस्य गुणाश्च बोद्धव्याः ॥)

कुटप, पुं, (कुटात् विपज्जालात् पाति रक्षति । कुट + पा + क ।) मुनिः । निष्कुटः । गृहसमीपोपवनम् । (कुट + "उषिकुटिदलीति" । उणा ३ । १४२ । इति कपन् ।) मानभेदः । स तु कुड़वपरिमाणम् । इति हेमचन्द्रः ॥ कमले क्ली । इति राजनिर्घण्टः ॥

कुटर, स्त्री, (कुट + बाहुलकात् करन् ।) कुठरः मन्थानदण्डबन्धनस्तम्भः । इत्यमरटीकायां नीलकण्ठः ॥

कुटरु, पुं, (कुट + "कुटः किच्च" । उणा ४ । ८० । इत्यरु किच्च ।) वस्त्रगृहम् । इत्युणादिकोषः ॥ कानात् ताम्बु इति भाषा ॥

कुटरणा, स्त्री, (कुटेषु वृक्षेषु अरणा । शकन्ध्वादित्वात् साधुः ।) त्रिवृता । इति रत्नमाला ॥ तेउड़ी इति भाषा ॥

कुटल, क्ली, (कुटति आच्छादयत्यनेन । कुट् + करणे कलच् ।) पटलम् । इति हारावली ॥ चाल छाद इति भाषा ॥

कुटहारिका, स्त्री, (कुटं कलशं हरति जलाद्यानयनार्थं स्पृशति या । कुट + हृ + ण्वुल् टाप् इत्वं च ।) दासी । इति हेमचन्द्रः ॥

कुटि, स्त्री, (कुट्यते संक्षीयते हव्यादिभिः असौ । कुट् + "कृगॄशॄपॄकुटीति" । उणां ४ । १४२ । इति इः स च कित् ।) गृहम् । इत्यमरटीकायां भरतः ॥

कुटि, पुं, (कुट्यते छिद्यते ऽसौ । कुट छेदने + "कुटिकष्योर्नलोपश्च" । उणां ४ । १४३ । इति इः । स च कित् । धातोर्नलोपश्च ।) वृक्षः । इति शब्दरत्नावली ॥ शरीरम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्व्वतः । इत्युज्ज्वलदत्तः । ४ । १४३ ॥)

कुटिचरः, पुं, (कुटि कुटिलं जले चरतीति । कुटि +

घर+ट ।) भक्षशूकरः । इति शब्दरत्नावली ॥ शुशुक् इति भाषा ॥

कुटित, त्रि, (कुट कौटिल्ये जातमस्य । कुट्+इतच् किच ।) कुटिलम् । इत्यादिकोषः ॥

कुटिर, क्ली, (कुट्यते निर्म्मीयते यत् । कुट्+इरन् ।) कुटीरम् । लघुकुटी । इत्यमरटीकायां भरतः ॥

कुटिल, त्रि, (कुट् वक्रीभावे + बाहुलकात् इलच् ।) अनृजु । बाँका इति भाषा । तत्पर्य्यायः । अरालम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुञ्चितम् ६ नतम् ७ आविद्धम् ८ भुग्नम् ९ वेल्लितम् १० वक्रम् ११ । इत्यमरः । ३ । १ । ७१ ॥ भङ्गुरम् १२ । इति हेमचन्द्रः ॥ वेल्लु १३ विनतम् १४ उन्दुरम् १५ । इति शब्दरत्नावली ॥ (यथा, विष्णुपुराणे १ । ९ । २३ ।
"ज्वलज्जटाकलापस्य भ्रुकुटीकुटिलं मुखम् । निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयम्" ॥) तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"कालानुशारिवा वक्रं तगरं कुटिलं शठम् । महोरगं नतं जिह्मं दीनं तगरपादिकम्" ॥
इति वैद्यकरत्नमालायाम् ॥ क्ली, छन्दोभेदः ॥)

कुटिला, स्त्री, (कुटति वक्रं व्रजतीति । कुट्+इलच् +स्त्रियां टाप् ।) नदीविशेषः । इति मेदिनी ॥ सरस्वती नदी । स्पृक्कानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ (राधिकामर्द्दनगिनी ॥ त्रि, असरलम् ॥)

कुटी, स्त्री पु, (कुटि+वा ङीप् ।) कुटः । गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा मनुः । ११ । ७२ ।
"ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत्" ॥)

कुटी, स्त्री, कुम्भदासी । कुटिनी इति भाषा ॥ मुरानामगन्धद्रव्यम् । चित्रगुच्छः । इति मेदिनी ॥

कुटीचकः, पु, (कुट्या लोभेन पुत्रान्नेन चकते तृप्नोति । कुटी+चक्+अच् ।) पुत्रान्नजीवी । तत्पर्य्यायः । पुत्रान्नादः २ । इति त्रिकाण्डशेषः ॥ (कुट्यां पर्णकुटीरे चकते तृप्नोति वसतीति । सन्न्यासिभेदः । स च कर्म्मनिष्ठः । यथा—महाभारते १३ । १४ अध्याये ।
"चतुर्व्विधा भिक्षवस्ते कुटीचकबहूदकौ । हंसः परमहंसश्च यो यः पश्चात् स उत्तमः" ॥)

कुटीचरकः, पु, (कुट्यां चरति । कुटी+चर+टः स्वार्थे कन् ।) यतिविशेषः । इति यतिधर्म्मसंग्रहः ॥

कुटीर, पु, (कुटी+स्वल्पार्थे रः ।) क्षुद्रगृहम् । कुँड़े इति भाषा । तत्पर्य्यायः । स्वल्पवेश्म २ । इति जटाधरः ॥ (यथा, गीतगोविन्दे । १ । २८ ।
"ललित-लवङ्ग-लता-परिशीलन-कोमल-मलय-समीरे । मधुकर-निकर-करम्बित-कोकिल-कूजित-कुञ्ज-कुटीरे" ॥)

कुटुङ्गकः, पुं, (कुटुङ्ग+स्वार्थे कन् ।) वृक्षलतागृहम् । मिट । डोल इति भाषा । छदिः । चाल इति भाषा । इत्यमरटीकायां भरतः ॥ वृक्षलता । गृहभेदः । इत्यमरटीकासारसुन्दरी ॥ कुँड़े इति भाषा ॥

कुटुम्ब, क ङ धृत्याम् । इति कविकल्पद्रुमः । (चुरा-आत्मं-अकं-सेट् ।) ओष्ठवर्गशेषोपधः । क ङ कुटुम्बयते । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

कुटुम्बः, पु, (कुटुम्बयते पालयति । कुटुम्ब+अच् । यद्वा कुटुम्ब्यते पाल्यते सम्बध्यते वा । कुटुम्ब+कर्म्मणि घञ् ।) नाम । ज्ञाति । बान्धवः । सन्ततिः । इति शब्दरत्नावली ॥ पोष्यवर्गः । इत्यमरमाला ॥ (यथा, मनुः । ११ । २२ ॥
"तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः । श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत्" ॥)

कुटुम्बव्यापृतः, त्रि, (कुटुम्बभरणाय व्यापृतः नियुक्तः ।) कुटुम्बपोषणासक्तः । तत्पर्य्यायः । अभ्यागारिकः २ उपाधिः ३ । इत्यमरः । ३ । १ । ११ ॥ (कुटुम्बेन पुत्रदारादिपोष्यवर्गेण व्यापृतः संयुक्तः । बहुपरिवारविशिष्टः पुरुषः ॥)

कुटुम्बिनी, स्त्री, (कुटुम्बः अतिशयेन अस्त्यस्याः । अस्त्यर्थे इनि । ततो ङीप् ।) कुटुम्बविशिष्टा । पतिपुत्रदुहित्रादिमती प्रतिष्ठिता स्त्री । तत्पर्य्यायः । पुरन्ध्री २ । इत्यमरः । २ । ६ । ६ ॥ पुरन्ध्रिः ३ । इति भरतः ॥ पुरन्ध्रिका ४ । इति शब्दरत्नावली ॥ (यथा रघुवंशे । ८ । ८६ ।
"अपशोकमनाः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः" ॥) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पयस्या २ क्षीरिणी ३ जलकामुका ४ वक्रशल्या ५ दुराधर्षा ६ क्रूरकर्म्मा ७ सिरिशिटिका ८ शीता ९ प्रस्तरकुट्टवी १० शीतला ११ जलेरुहा १२ । अस्या गुणाः । मधुरत्वम् । ग्राहित्वम् । कफपित्तज्वरास्रदोषकण्डूनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

कुटुम्बी, [न्] पु, (कुटुम्बः अस्त्यस्य । अस्त्यर्थे इनि ।) गार्हस्थ्याश्रमविशिष्टः । तत्पर्य्यायः । गृही २ गृहमेधी ३ गृहस्थः ४ । इति जटाधरः ॥ (यथा, कुमारे । ६ । ८५ ।
"शैलः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत । प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः" ॥)

कुटुम्बी [न्], त्रि, (कुटुम्बः पोष्यवर्गोऽस्त्यस्य अस्त्यर्थे इनि ।) कृषकः । इति शब्दचन्द्रिका ॥ कुटुम्बविशिष्टश्च ॥

कुटुम्बौकः, [स्] क्ली, (कुटुम्बानां ज्ञातिबान्धवानां दारपुत्रादीनां ओकः वासस्थानम् ।) कुटुम्बवासस्थानम् । इति जटाधरः ॥

कुट्ट, क कुत्सायाम् । छिदि । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट् ।) क कुट्टयति । इति दुर्गादासः ॥

कुट्ट, क ङ प्रतापने । इति कविकल्पद्रुमः ॥ (चुरा-आत्म-सक-सेट् ।) पञ्चमस्वरी । टद्वयान्तः । क ङ कुट्टयते । एषोऽन्यैर्न मन्यते । इति दुर्गादासः ॥

कुट्टकः, पुं, (कुट्टकः भाज्यभाजकादिगणनं यत्र ।) अङ्कविशेषः । तस्य सूत्रं यथा,
"भाज्यो हारः क्षेपकश्चापवर्त्त्यः केनाप्यादौ संभवे कुट्टकार्थम् । येन च्छिन्नौ भाज्यहारौ न तेन क्षेपश्चैतद्दुष्टमुद्दिष्टमेव" ॥
उदाहरणं यथा ।
"एकविंशतियुतं शतद्वयं यद्गुणं गणक पञ्चषष्टियुक् । पञ्चवर्जितशतद्वयोद्धृतं शुद्धिमेति गुणकं वदाशु तम्" ॥
इति लीलावती ॥ (कुट्टयति उपलदन्तादिभिर्भिनत्ति छिनत्ति चूर्णयति वा । कुट्ट छेदे+ण्वुल् । छेदके, त्रि । यथा, याज्ञवल्क्यः । ३ । ४९ ।
"दन्तोलूखलिकः कालपक्काशी वाश्मकुट्टकः" ॥)

कुट्टन, क्ली, (कुट्टते इति । कुट्ट छेदने+भावे ल्युट् ।) छेदनम् । कोटा इति भाषा । कुत्सनम् । प्रतापनम् ॥

कुट्टनी, स्त्री, (कुट्टयति छिनत्ति नाशयति स्त्रीणां कुलमनया । कुट्ट+स्वार्थे णिच् ततः ल्युट् ङीप् । यद्वा कुट्ट्यते छिद्यते स्त्रीणां कुलं अनया । कुट्ट छेदने+करणे ल्युट् ङीप् च ।) पुरुषेण सह परस्त्रीयोगकर्त्री । कुटनी इति भाषा । तत्पर्य्यायः । शम्भली २ । इत्यमरः । २ । ६ । १९ ॥ कुटनी ३ सम्भली ४ । इति तट्टीका ॥ माधवी ५ रङ्गमाता ६ अर्ज्जुनी ७ । इति जटाधरः ॥ कुम्भदासी ८ गणेरुका ९ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । २४३ ।
"तदालिङ्गनमवलोक्य समीपवर्त्तिनी कुट्टन्यचिन्तयत्" ॥)

कुट्टमित, क्ली, स्त्रीणां दशधाशृङ्गारचेष्टान्तर्गतचेष्टाविशेषः । स्त्रीणां स्वाभाविकदशालङ्कारान्तर्गतमिदम् । इति हेमचन्द्रः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे । ३ । १११ ।
"केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् । प्राहुः कुट्टमितं नाम शिरःकरविधूननम्" ॥

कुट्टार, क्ली, (कुट्ट+आरन् ।) केवलम् । रतिः । इति मेदिनी ॥ कम्बलम् । इति विश्वः ॥

कुट्टारः, पु, (कुट्टते भिद्यते छन्द्यते वाऽस्मिन् पतनेनेति शेषः । कुट्ट+आरन् ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥

कुट्टिम, पु क्ली, (कुट्ट+भावे घञ् । तेन निर्वृत्तः निष्पन्नः इत्यर्थे इमप् ।) मणिभूः । इत्यमरटीकायां भरतः ॥ (यथा रघुः ११ । ९ ।
"मम्लतुर्न मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्त्तिनाविव" ॥)
सुधाघटितभूतलम् । इति सभूतिः ॥ कुटीरः । इति मथुरानाथः ॥ दाडिमवृक्षः । इति राजनिर्घण्टः ॥

कुट्टिहारिका, स्त्री, (कुट्टते यत् । कुट्ट+इन् । कुट्टिं मत्स्यमांसादिकं हरति । कुट्टि+हृ+ण्वुल् टाप् अत इत्वं च ।) दासी । इति हलायुधः ॥

कुट्टीर, पु, (कुट्टते ऽस्मिन् । कुट्ट+ईरन् ।) पर्व्वतः । इति हारावली ॥

कुड्मल, क्ली, (कुट्टते नारकिभ्यो यन्त्रणा दीयते यत्र । कुट+"वृषादित्वात्" । उणा १ । १०८ । इति कलच् तस्य मुट् च ।) नरकभेदः । इति मेदिनी ॥ यत्र

रज्जुभिः पीड़नम्। इति मनुः ॥

कुड्मल, पुं, क्ली, (कुटति ईषत् विकासोन्मुखीभवतीति। कुटि + "वृषादिभ्यश्चित्"। उणां १। १०८। इति कलच्।) विकासोन्मुखप्रौढ़कलिका। ईषद्विकसिता कलिका। तत्पर्य्यायः। मुकुल २। इत्यमरः ॥ कोष ३। इति जटाधरः ॥ (यथा, माघे। २। ७।
"द्योतितान्तः सभैः कुन्दकुड्मलाग्रदतः स्मितैः" ॥)

कुठ छिदि। सौत्रधातुरयम्। इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट्।) कुठेरः कुठारः कुठाकुः। इति दुर्गादासः ॥

कुठि इ खोटने। वैकल्ये। आलस्ये। इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट्-इदित्।) पञ्चमस्वरी। कर्म्मणि इ कुण्ठ्यते। वैकल्य विकलीभावः। आलस्य मन्दीभावः। कुण्ठति खञ्जः शोकार्त्तो वृद्धो वा। इति दुर्गादासः ॥

कुठ, पुं, (कुठ्यते छिद्यतेऽसौ। कुठ छेदने + कर्म्मणि घञर्थे क।) वृक्षः। इत्यमरः। २। ४। ५ ॥

कुठरः, पुं, [(कुट + बाहुलकात् करन्।) मन्थानदण्डबन्धनार्थस्तम्भः। तत्पर्य्यायः। दण्डविष्कम्भः २। इत्यमरः। २। ९। ७४ ॥ (नागविशेषः। (यथा, महाभारते १। ३५। १५।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः" ॥

कुठाकुः, पुं, (कोठति आहन्ति भिनत्ति काष्ठम्। कुठ छेदने + आकुन् किच्च।) पक्षिविशेषः। इत्युणादिकोषः। काठ्ठोकरा इति भाषा ॥

कुठाटङ्कः, पुं स्त्री, (कुठारष्टङ्क इव। पृषोदरादित्वात् रलोपे साधुः।) कुठारः। इति जटाधरः ॥

कुठार, पुं स्त्री, (कोठतीत्यनेन। कुठ + करणे आरन्।) अस्त्रविशेषः। कुड़ाल इति भाषा। तत्पर्य्यायः। स्वधितिः २ परशुः ३ परश्वधः ४। इत्यमरः। २। ८। ९२ ॥ कुठारी ५ पर्शुः ६ परस्वधः ७ पर्श्वधः ८। इति तट्टीका ॥ कुठाटङ्कः ९ द्रुघणः १०। इति जटाधरः ॥ (यथा, श्रीमद्भागवते ३। २५। १२।
"त त्वागताह शरणं शरण्य
स्वभृत्यसंसारतरोः कुठारम्" ॥)

कुठारः, पुं, (कुठ्यते छिद्यतेऽसौ। कुठ + कर्म्मणि आरन्।) वृक्षः। इति शब्दरत्नावली ॥

कुठारु, पुं, (कुठ + आरु।) वृक्षः। वानरः। इति मेदिनी। शस्त्रकारः। इति शब्दरत्नावली ॥

कुठिः, पुं, (कुठ + "कुठिकम्प्योर्नलोपश्च"। उणां ४। १४३। इति इन् किच्च।) पर्व्वतः। वृक्षः। इत्युणादिकोषः ॥

कुठिक, पुं, (कुठ + इकन् किच्च।) कुष्ठम्। इति हारावली। कुड़् इति भाषा ॥

कुठेर, पुं, (कुण्ठति तापयति वैकल्यं करोति वा। कुठि खोटने वैकल्ये आलस्ये च + "पतिकठिकुठीति"। उणां १। ५९। इति एरक् बाहुलकात् नुमोऽभावः।) अग्निः। इति शब्दमाला ॥ तुलसी। इत्युणादिकोषः ॥ अर्जकः। इति राजनिर्घण्टः ॥ वर्व्वरी इति ख्यातः।
(यथा, गो रामायणे ३। १७। १०।
"दाड़िमान् करवीरांश्च अशोकांस्तिलकांस्तथा।
अङ्कोटांश्च कुठेरांश्च नीलाशोकांश्च सर्व्वशः" ॥)

कुठेरक, पुं, (कुठेर इव कायति प्रकाशते। कै + क।) पर्णासः। इत्यमरः। २। ४। ७९ ॥ तुलसी इति ख्यातः। श्वेतच्छदः। इति शब्दचन्द्रिका ॥ श्वेततुलसी वाबुइ तुलसी इति च ख्यातः। (अस्य पर्य्याया।
"अर्ज्जकः श्वेतपर्णासो गन्धपुष्पः कुठेरकः"।
इति वैद्यकरत्नमालायाम्। वर्व्वरी। एतदर्थेऽस्य पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।
"वर्व्वरी तुवरीतुङ्गी खरपुष्पाजगन्धिका।
पर्णाशस्तत्र कृष्णे तु कठिञ्जककुठेरकौ" ॥
गुणाश्चास्य वर्व्वरीशब्दे ज्ञेया ॥) नन्दीवृक्षः। इति राजनिर्घण्टः ॥

कुठेरज, पुं, (कुठेर इव जायते। जन् + ड।) कुठेरकः। श्वेततुलसी। इति शब्दरत्नावली ॥

कुठेरु, पुं, (कुठ + एरुक्।) चामरवातः। चामरेर वातास इति भाषा। तत्पर्य्यायः। मश्वरः २। इति त्रिकाण्डशेषः ॥

कुड शि बाल्ये। अदने। इति कविकल्पद्रुमः ॥ (तुदा-पर-अक-सकञ्च-सेट्।) एतद्धात्वश्चत्वारः पञ्चमस्वरिणः। बाल्यमिह शिशुव्यापारः। शि कुडति अकुड़ीत् शिताभिः शिशुः। इति दुर्गादासः ॥

कुड़ इ वैकल्ये। इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। कुण्डति जन देवं विकलं करोतीत्यर्थः। इति दुर्गादासः ॥

कुड इ ङ दाहे। इति कविकल्पद्रुमः। (भ्वा-आत्म सक-सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। ङ कुण्डते इति दुर्गादासः ॥

कुड इ क रक्षे। इति कविकल्पद्रुमः ॥ (चुरा पर-सक-सेट् इदित्।) इ क कुण्डयति। इति दुर्गादासः ॥

कुड़पः, पुं, (कुड + कपन्।) कुडवपरिमाणम्। इत्यमरटीकायां स्वामी ॥

कुड़वः, पुं, (कुण्डति परिमाति अनेनास्मिन् वा। कुड + कवन्।) परिमाणविशेषः। (यथा, आर्य्यासप्तशत्याम्। १३०। "उपनीय कमलकुडवं कथयति समयस्मितस्य हलिक" ॥) स तु प्रस्थचतुर्थांशः। इति लीलावती ॥ वैद्यकमते चिप्रस्तयपरिमाणम्। द्वात्रिंशत्तोलकमिति यावत्। तत्पर्य्यायः। अञ्जलिः २ अष्टमानम् ३ शरावार्द्धम् ४। इति परिभाषा ॥ (यदुक्तं वैद्यकपरिभाषायाम् ॥
"रक्तिकादिषु मानेषु यावन्न कुडवो भवेत्।
शुष्कद्रवार्द्रयोश्चापि तुल्यमानं प्रकीर्त्तितम्" ॥
"प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः ॥
अष्टमानश्च स ज्ञेयः"। इति शार्ङ्गधरस्य पूर्व्वखण्डे। १ अः ॥)

कुडङ्गी, स्त्री, (कुडी क्षुद्रा अङ्गी कारवेल्ली।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः ॥

कुडिः, पुं, (कुण्ड्यते दह्यते इति। कुड़ि दाहे + इन्।) शरीरम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुड़िशः, पुं, (कुड्यते भक्ष्यतेऽसौ। कुड़ अदने + बाहुलकात् शः तत इट्।) मत्स्यविशेषः। कुड़चि माछ् इति भाषा। अस्य गुणाः। मधुरत्वम्। हृद्यत्वम्। कषायत्वम्। अग्निदीपनत्वम्। लघुत्वम्। स्निग्धत्वम्। वातरोगे पथ्यत्वम्। रोचनत्वम्। बलकोष्ठबन्धकारित्वञ्च। इति राजवल्लभः ॥

कुड्मल, पुं, (कुड बाल्ये + "वृषादिभ्यश्चित्"। उणां १। १०८। इति कलच् कुडेरपि। मुट् च।) कुड्मल। इत्यमरटीका सिद्धान्तकौमुदी च ॥

कुड्य, क्ली, (कुड़ि + तत्र साधुरिति यत्। कौतेरप्यादित्वात् यक् डुगागमश्च इत्युज्ज्वलदत्तादयः।) भित्तिः। भित् देयाल इत्यादि भाषा। इत्यमरः। २। २। ४ ॥ (यथा, महाभारते १। १४५। १०।
"सर्पिस्तैलवसाभिश्च लाक्षया चाप्यनल्पया।
मृत्तिका मिश्रयित्वा त्वं लेपं कुड्येषु दापय" ॥)
विलेपनम्। इति मेदिनी ॥ कौतूहलम्। इति शब्दरत्नावली ॥

कुड्यक, क्ली, (कुड्य + स्वार्थे कन्।) कुड्यम्। भित्तिः। इति शब्दरत्नावली ॥

कुड्यच्छेदी, [न्] पुं, (कुड्यं भित्तिं छिनत्ति विदारयतीति। कुड्य + छिद् + णिनि।) चौरविशेषः। इति शब्दरत्नावली ॥ सिंदेल चोर इति भाषा ॥

कुड्यच्छेद्य, क्ली, (कुड्यस्थित कुड्यस्य वा छेद्यम्।) खानिकम्। इति त्रिकाण्डशेषः। देयालेर गर्त्त इति भाषा ॥

कुड्यमत्सी, स्त्री, (कुड्ये मत्सी इव। मत्स्य + जातित्वात् ङीष् यलोपः।) गृहगोधिका। इति शब्दरत्नावली ॥

कुड्यमत्स्य, पुं, (कुड्ये मत्स्य इव।) गृहगोधिका। इति हेमचन्द्रः ॥

कुण व् क आमान्त्रे। मन्त्रे। इति कविकल्पद्रुमः ॥ (अदन्त चुरा पर-सक-सेट्।) ऋल्वो मूर्द्धन्योपधः। कुणयति। मन्त्रोऽभिमुखीकरणम्। गुणोक्तिरित्येके। इति दुर्गादासः ॥

कुण श उपकरणे। शब्दे। इति कविकल्पद्रुमः ॥ (तुदा-पर-सक-सेट्।) उपकरणं दानादिना पोषणम्। श कुणति दीनं दयालुः। कोकिला। इति दुर्गादासः ॥

कुणञ्जर, पुं, (कुणं सुस्वामादिकं जरयति। कुण + जॄ + बाहुलकात् खच्।) वृक्षविशेषः। वनवेतुया इति भाषा। तत्पर्य्यायः। कुणञ्जा २ कुणञ्जः ३ अरण्यवास्तूक ४। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। पाचनत्वम्। हितत्वञ्च। एतच्छाकगुणाः। त्रिदोषनाशित्वम् मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। ईषत्कषायत्वम्। सग्राहित्वम्। पित्तश्लेष्महरत्वम् लघुत्वञ्च। इति राजनिर्घण्टः ॥

कुणपः, पुं, (क्वणे + कपन् सम्प्रसारणञ्च।) शवम्। मृतशरीरम्। इत्यमरः। २। ८। ११८ ॥ (यथा, महाभारते १४। ६। २२ २३।
नारद उवाच।
"उन्मत्तवेश विभ्रत् स चंक्रमीति यथासुखम्
वाराणस्यां महाराज। दर्शनेप्सुर्महेश्वरम्।

तस्या दारं समादाय न्यसेथा कुणपं क्वचित् ।
स दृष्टा यो निवर्त्तेत स सम्बर्त्तो महीपते ।" ॥)
एतदर्थे नपुंसकलिङ्गोऽपीति नयनानन्दः ॥ पूतिगन्धिः । इति मेदिनी ॥ अस्त्रविशेषः । वडशा इति भाषा । इत्यमरटीकायां रायमुकुटः ॥ पूतिगन्धौ त्रिलिङ्गोऽपि यथा,—
"कुणपं मस्तुलुङ्गाभं सगन्धं क्षथितं बड्" ॥
इति माधवकरः ॥ (रोगविशेषः । यथा ॥ "कुणपश्चास्रपित्ताभ्याम्" । इति शार्ङ्गधरे मध्यखण्डे । १ अध्यायः ॥)

कुणपी, स्त्री, (कुणप + गौरादित्वात् ङीष् ।) विट्शारिका । इति मेदिनी ॥ गयेशालिक इति भाषा ॥

कुणाल, पु, (क्वण + "मीयुक्कणिभ्यामिति" उणा ३ । ७६ । इति । कालन् । सम्प्रसारणञ्च ।) देशभेदः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (अशोकराजपुत्रस्यैकः । स च मौर्य्यः ॥)

कुणिः पु, (कुण + इन् ।) तुन्नवृक्षः । इत्यमरमेदिनीकरौ ॥ तुंद इति भाषा । (शरीरस्य स्थानविशेषः ।
"कक्षाक्षमध्ये कक्षाधः कुणिलं तत्र जायते" ॥
इति वाभटे शारीरस्थाने ४ अध्याये ॥)

कुणिः, त्रि, (कुण + इन् ।) कुकरः । इति मेदिनी ॥ कोपा इति भाषा ॥ (यथा, सुश्रुते ।
"गर्भवातप्रकोपेण दोहदे चावमानिते ।
भवेत् कुब्जः कुणिः पङ्गुः" इति ॥)

कुणिन्दः, पु, (कुण शब्दे + "कुणिपुल्यो किन्दच्" । उणा ४ । ८५ । इति किन्दच् ।) शब्दः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुण्टकः, त्रि, (कुटि + ण्वुल् ।) स्थूलः । इति शब्दमाला । मोटा इति भाषा ॥

कुण्ठः, त्रि, (कुण्ठति क्रियासु मन्दीभूतो भवति । कुठि + अच् ।) क्रियासु मन्दः । अकर्म्मण्यः । इत्यमरः । २ । १ । १७ ॥
(यथा, शङ्करकविकृते विष्णुस्तोत्रे ३४ ।
"वैकुण्ठीये त्वत्कण्ठे वसतु मम मतिः कुण्ठभावं विहाय" ॥) मूर्खः । इति मेदिनी ॥

कुण्ठकः, त्रि, (कुण्ठति कुण्ठयति वा आत्मानं जडीभूतं करोति । कुठि + ण्वुल् ।) मूर्खः । इति शब्दमाला ॥

कुण्ठित, त्रि, (कुठि + कर्त्तरि क्त ।) सङ्कुचितः । यथा । "दशवदनसुजानां कुण्ठिता यत्र शक्तिः" ॥ इति महानाटकम् ॥

कुण्ड, क्ली, (कुणतीति । "अमन्तात् ड" । उणा १ । ११४ । इति ड ।) मानभेदः । (कुण्ड्यते रक्ष्यते जलं यत्र । कुडि + अधिकरणे अच् ।) देवजलाशयः । इति मेदिनी ॥ जलाधारविशेषः । चौवाचा इति भाषा ॥
तज्जलगुणाः । अग्निकरत्वम् । रूक्षत्वम् । मधुरत्वम् । कफघ्नत्वम् । इति राजनिर्घण्टः ॥ कमाजमकलम् । इति राजवल्लभः ॥ * ॥ (पात्रविशेषः । यथा, रघौ १ । ८४ ।
"सुत कोष्णेन कुण्डोध्नी मेध्येनावभृतादपि" ॥)
होमीयाग्न्यालयः । तत्तु प्रायशश्चतुर्हस्तमितं भवति तस्य विधिः । तत्र मत्स्यपुराणम् ।
"प्रागुदक्प्लवनां भूमिं कारयेद्यत्नतो नरः" ॥
प्रागुदक्प्लवना पूर्व्वनीचा उत्तरनीचा वा ॥
तत्र वशिष्ठपञ्चरात्रे विज्ञानललितायाञ्च ।
"सर्व्वाधिकारिकं कुण्डं चतुरस्रन्तु सर्व्वदम्" ।
चतुरस्रं चतुष्कोणम् ॥ भविष्योत्तरम् ।
"सहस्रे तथ होतव्ये कुर्य्यात् कुण्डं करात्मकम् ।
द्विहस्तमयुते तच्च लक्षहोमे चतुष्करम्" ॥
द्विहस्तादिके यामलः ।
"पूर्व्वपूर्व्वस्य कुण्डस्य कोणसूत्रेण निर्म्मितम् ।
उत्तरोत्तरकुण्डानां मानं तत्परिकीर्त्तितम्" ॥
पूर्व्वपूर्व्वस्य कुण्डस्य हस्तद्विहस्तादिमितस्य कोणसूत्रेण ईशानाग्निनैर्ऋतिकोणदत्तसूत्रेण परिमितं यन्मानं उत्तरोत्तरकुण्डानां तदेव पारिभाषिकं द्विहस्तादिमानं न तु प्रकृतहस्तद्वैगुण्यादिमितम् । तथात्वे द्विहस्तादिमितस्य चतुर्हस्तपरिमाणापत्तेः । क्षमकस्य भूमेः परिमाणवत् ॥
वशिष्ठपञ्चरात्रे ।
"यावान् कुण्डस्य विस्तारः खननं तावदिष्यते ।
हस्तैके मेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः ॥
कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः ।
चतुर्हस्ते तु कुण्डे ता वसुतर्कयुगाङ्गुलाः" ॥
मेखला ब्रह्मचारिमेखलावत् कुण्डवेष्टिता मृद्घटिताः । ताश्च खातदेशादाद्ये एकाङ्गुलरूपं काष्ठं परित्यज्य उच्छ्रायेण विस्तारेण चेत्यादिक्रमेण वेदाद्यङ्गुलाः । एतद्विपरीतास्तन्त्रान्तरोक्ता व्यवहारविरुद्धाः । वेदाश्चत्वारः अग्नयस्त्रयः नयने द्वे रसाः षट् गुणास्त्रयः वसुतर्कयुगानि अष्टषट्चत्वारि ॥ पिङ्गलामते ।
"खातादेकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत्" ॥
एककुण्डस्य पश्चिमदिक्कर्त्तव्यतामाह महादानिर्णये वशिष्ठपञ्चरात्रम् ।
"मुक्तौ मुक्तौ तथा पुष्टौ जीर्णोद्धारे तथैव च ।
सदा होमे सदा शान्तिके वारुणदिग्गतम्" ॥
शारदातिलके ।
"होतुरग्रे योनिरासामुपर्य्यश्वत्थपत्रवत् ।
मुष्टग्ररत्निकहस्तानां कुण्डानां योनिरीरिता ॥
षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशालिनी ।
एकाङ्गुलन्तु योन्यग्रं कुर्य्यादीषदधोमुखम् ॥
एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषु वर्द्धयेत् ।
यवद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत् ॥
स्थलादारभ्य नालं स्यायोन्या मध्ये सरन्ध्रकम्" ॥
आसां मेखलानां अश्वत्थपत्रवदित्यनेन चतुरङ्गुलविस्तृतमूलात् यथोक्तक्रमेण एकाङ्गुलान्तसङ्कुचितविस्तारा ॥ यामले ।
"नालमेखलयोर्मध्ये परिधिः स्थापनाय च ।
रन्ध्रं कुर्य्यात्तथा विद्वान् द्वितीयमेखलोपरि" ॥
परिधौ खादिन्यायानाह छन्दोगपरिशिष्टे ।
"बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः ।
त्रयो भवन्त्यशीर्णाग्रा एकेषान्तु चतुर्दिशम् ।
प्रागग्रावभितः पश्चादुदगग्रमथापरम् ।
न्यसेत् परिधिमन्यञ्चेदुदगग्रः स पूर्व्वतः" ॥
अन्यथा छिन्नरहिताः अभितोऽग्नेः पार्श्वद्वये दक्षिणत उत्तरतः पश्चात् पश्चिमे उदगग्रं उत्तराग्रम् ॥ त्रैलोक्यसारेऽपि ।
"कुम्भद्वयसमायुक्ता अश्वत्थदलवन्नता ।
अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यस्थितिर्यथा" ॥
कुम्भद्वयसमायुक्ता गजकुम्भाकारमूलदेशयुक्ता नता नम्रा अङ्गुष्ठमितमृद्घटितमेखलावेष्टनयुक्ता तथात्वे हस्तगलिताज्यस्थित्या कुण्डे तत्पातो भवतीत्यर्थः ॥ पञ्चरात्रे ।
"कल्पयेदन्तरे नाभिं कुण्डस्याम्बुजसन्निभाम् ।
मुष्ट्यरत्नीकहस्तानां नाभिस्तावदधिविस्तृता ॥
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत् ।
यवद्वयक्रमेणैव नाभिं पृथगुदारधीः ॥
नाभिक्षेत्रं त्रिधा कृत्वा मध्ये कुर्व्वीत कर्णिकाम् ।
बहिरंशद्वये नाष्टौ पत्राणि परिकल्पयेत्" ॥*॥
तत्र कुण्डस्य दोषानाह विश्वकर्म्मा ।
"खाताधिके भवेद्रोगी हीने धेनुधनक्षयः ।
वक्रकुण्डे च सन्तापो मरणं छिन्नमेखले ॥
मेखलारहिते शोको ह्यधिके वित्तसंक्षयः ।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम् ॥
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्जितम्" ॥
अत एव वशिष्ठसंहितायाम् ।
"तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम् ।
हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्म्मणि" ॥
इति तिथ्यादितत्त्वम् ॥

कुण्ड, क्ली स्त्री, (कुण्ड्यते रक्ष्यते भक्ष्यादि यस्मिन् । कुडि रक्षणे + अच् ।) स्थाली । इत्यमरभरतौ ।

कुण्डः, पु, (कुण्ड्यते दह्यते कुलं अनेन । कुडि-दाहे + करणे घञ् ।) अमृते भर्त्तरि जारजः । जीवति भर्त्तरि उपपतिजातः । इत्यमरः । २ । ६ । ३६ ॥ स्वामी बाँचिया थाकिते उपपतिजात विजन्म सन्तान इति भाषा ॥ (यथा मनुः ३ । १७४ ।
"पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः" ॥
सर्पविशेषः । यथा महाभारते । १ । १२३ । ६८ ।
"कालकपश्चाय कुण्डस्य तक्षकस्य महोरगः" ॥)

कुण्डकीटः, पु, (कुण्डे नरककुण्डे स्थितः कीट इव चार्व्वाकमतस्थत्वात् ।) चार्व्वाकवचनाभिज्ञपुरुषः । पतितब्राह्मणीपुत्त्रः ॥ (कुण्डे योनिकुण्डे कीट इव ।) दासीकामुकः । इति मेदिनी ॥

कुण्डगोलकं, क्ली, (कुण्डे पात्रविशेषे गोल गोलाकारं कं जलं यत्र ।) काञ्जिकम् । इति हेमचन्द्रः ॥ (काञ्जी इति भाषा ॥ * ॥ कुण्डश्च गोलकश्च इति द्वन्द्वेऽत्र कुण्डगोलकौ । यथा मनुः । ३ । १७४ ।
"परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ ।
पत्यौ जीवति कुण्डः स्यात् मृते भर्त्तरि गोलकः" ॥)

कुण्डङ्गः, पुं, (कुण्ड सदाकारं गच्छति । गम + बाहुलकात् ख डिच्च ।) कुञ्जम् । वृक्षच्छादितस्थानम् । इति हेमचन्द्रः ॥

कुण्डपाय्यः, पुं, (कुण्डैः चमसैः पीयतेऽत्र सोमः । कुण्ड + पा + अधिकरणे यत् युगागमश्च निपातने ।) क्रतुः । इति मुग्धबोधम् ॥

कुण्डलं, क्ली, (कुण्ड्यते रक्ष्यते इति कुडि रक्षायां +वृषादित्वात् कलच्। यद्वा कुण्ड तदाकारं लाति गृह्णातीति। ला+कः।) स्वनामख्यात कर्णभूषणम्। (यथा विष्णुध्याने।
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः
केयूरवान् कनककुण्डलवान् किरीटी" ॥)
तत्पर्य्यायः। कर्णवेष्टनम् २। इत्यमरः।२।६।१०३॥ पाशः। वलयः। इति मेदिनी॥ (पु, कौरव्यकुलज सर्पविशेषः। यथा महाभारते १।५७।१३।
"एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः।
बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्" ॥
पुंलिङ्गेऽस्य रक्ताकाञ्चनवाचकता उक्ता। यथा, वैद्यकरत्नमालायाम्।
"रक्तपुष्पः कोविदारो युग्मपत्रस्तु कुण्डलः" ॥)

कुण्डलिनी, स्त्री, (कुण्डलिन्+स्त्रियां ङीप्।) कुल-कुण्डलिनी शक्तिः। यथा,—
"ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्।
तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्॥
कोटिसौदामिनीभासां स्वयम्भूलिङ्गवेष्टिनीम्।
तामुत्थाप्य महादेवीं प्राणमन्त्रेण साधकः॥
उद्यद्दिनकरोद्योता यावच्छ्वासं दृढासनः।
अग्रेणाशुभशान्त्यर्थं समाहितमनाश्चिरम्।
तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत्" ॥
इति तन्त्रसारः ॥ * ॥
गुडूची। इति राजनिर्घण्टः॥ मिष्टान्नविशेषः। जिलिपी इति भाषा। तस्य पाकप्रकारो यथा।
"नूतनं घटमानीय तस्यान्तः कुशलो जनः।
प्रस्थार्द्धपरिमाणेन दध्यम्लं प्रलेपयेत्॥
द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम्।
घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्॥
आतपे स्थापयेत्तावद्यावद्याति तदम्लताम्।
तां सपक्वां घृताप्लीतां खितापाके तनुद्रवे॥
कर्पूरादिसुगन्धे च स्नपयित्वोद्धरेत्ततः" ॥
अस्या गुणाः।
"एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा।
धातुवृद्धिकरी वृष्या रुच्या चेन्द्रियतर्पणी" ॥
इति भावप्रकाशः॥

कुण्डली, स्त्री, (कुण्डल+जातौ ङीष्।) मिष्टान्न-विशेषः। जिलिपी इति भाषा। इति पाकराजेश्वरः॥ * ॥ कुलकुण्डलिनी शक्तिः। यथा,—
"त्रिकोणं तत्र विज्ञेयं शक्तिपीठं मनोहरम्।
तदङ्कुरे कामवायुर्जीवरूपोऽतिचञ्चलः॥
अधोमुखस्तत्र लिङ्गः स्वयम्भुस्तेन चाल्यते॥
नीवारशूकवत्तन्वी कुण्डली परदेवता॥
शङ्खतुल्यनिभा देवी सार्द्धत्रिवलयान्विता।
मुखेनाच्छाद्य ब्रह्मास्यं तया संवेष्टितः प्रभुः॥
डाकिनी तत्र वसति द्वारपाली सयष्टिका।
यः साधकोऽत्र रमते स दिव्यो नैव मानुषः" ॥
इति सम्मोहनतन्त्रम्॥ (अस्याः पर्य्याया यथा, हठयोगदीपिकायाम्। ३। १०४॥ कुटिलाङ्गी २ कुण्डलिनी ३ भुजङ्गी ४ शक्तिः ५ ईश्वरी ६ अरुन्धती ७॥) गुडूची। काञ्चनारः। इति मेदिनी। (अस्याः पर्य्याया यथा,—
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डलीताम्रपुष्पश्च अश्मन्तकः स्वल्पकेशरी" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)
कपिकच्छुः। सर्पिणीवृक्षः। इति राजनिर्घण्टः॥

कुण्डली, [न्] पु, (कुण्डलं अस्त्यस्य इति इनि। कुण्डलाकारेण स्थितेरस्य तथात्वम्।) सर्पः। इत्यमरः। १। ८। ७॥ वरुणः। (कुण्डलं कुण्डलवदाकारं शरीरे अस्त्यस्य।) मयूरः। इति मेदिनी॥ चित्रलमृगः। इत्यजयपालः। (विष्णुः। यथा, महाभारते १३। १४९। ११०।
"अतीन्द्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः" ॥)
कुण्डलयुक्ते, त्रि। इति मेदिनी। (यथा गो रामायणे। ३। ९। ११।
"इमे च पुरुषा दिव्या यान्त्यस्य रथमन्तिकात्।
परं शुभाः कुण्डलिनो युवानः खड्गपाणयः" ॥)

कुण्डाशी, [न्] त्रि, (कुण्ड योनिकुण्डं तदुपलक्षीकृत्य अश्नाति जीवनयात्रां यापयतीति। कुण्ड+अश्+णिनि।) भगभक्षकः। कोटना इति भाषा। इति महाभारते दानधर्म्मः। (कुण्डस्य जारजातस्य अन्नं अश्नातीति।) कुण्डान्नभोजी। तस्य नरको यथा,—
"रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा।
सूची माहिषिकश्चैव पर्व्वकारी च यो द्विजः॥
आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये" ॥
इति विष्णुपुराणे। २। ६। २०,२१॥ "रङ्गोपजीवी नटमल्लादिवृत्तिः। कैवर्त्तः धीवरवृत्तिः पत्यौ जीवति जाराज्जातः कुण्डः तदन्नभोजी कुण्डाशी। सूची पिशुनः। माहिषो महिषोपजीवी। यद्वा।
'महिषीत्युच्यते भार्य्या भगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः' ॥
इति स्मृतिप्रोक्तः। पर्व्वकारी धनादिलोभेन पर्व्वसु अमावस्यादिक्रियाप्रवर्त्तकः। पर्व्वगामीति पाठे पर्व्वसु स्त्रीगामी। शाकुनिः पक्षिजीवी। शुभनिमित्तशकुनोपजीवी वा। ग्रामयाजकः ग्रामार्थे यज्वा" इति तट्टीकायां श्रीधरस्वामी॥ (धृतराष्ट्रपुत्त्रः। यथा महाभारते।१।११७।१३।
"कुण्डाशी विरजाश्चैव दुःशला च शताधिका" ॥)

कुण्डिका, स्त्री, (कुण्ड+स्वार्थे कन् टाप् अत इत्वं च।) कमण्डलुः। इति हेमचन्द्रः॥ पिठरः। इति शब्दचन्द्रिका। कुंडि इति भाषा॥ (ताम्रकुण्डम्। स्थाली। सामवेदान्तर्गत उपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।
"अव्यक्तैकाक्षरं पूर्णा सूर्य्याक्ष्यध्यात्मकुण्डिका" ॥)

कुण्डिनं, क्ली, विदर्भनगरम्। इति हेमचन्द्रः। (यथा, हरिवंशे।
"कुण्डिने पुण्डरीकाक्ष! भोजपुत्त्रस्य शासनात्" ॥)

कुण्डिनः, पु, (कुडि रक्षायां दाहे च "बहुलमन्यत्रापि"। उणां। २। ४९। इति इनच्।) मुनिविशेषः। इत्युणादिकोषः। (यथा, आश्वलायने।
"कुण्डिनामा वाशिष्ठमैत्रावरुणकौण्डिन्येति" ॥
कुरुवंशीयस्पर्भेदः। स च धृतराष्ट्रस्य पुत्त्रः। यथा महाभारते १। ६७। ९६।
"हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः" ॥)

कुण्डी, स्त्री, (कुडि+इन्। ततो वा ङीप्। कुण्ड+संज्ञायां वा ङीष्।) कमण्डलुः। इत्यमरः। २। ७। ४९॥ स्थाली। इत्यमरटीकायां भरतः॥

कुण्डीरः पु (कुण्ड्यते दह्यते संसारानलसन्तापेन। कुडि+ईरन्।) मनुष्यः। (कुण्ड्यते रक्ष्यते दुर्व्वलो येन।) बलवति त्रि। इति धरणी॥

कु त् आस्तृतौ। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) कुतम्। इति दुर्गादासः॥ कुत् अपरस्यः कुतपः कालविशेषः। छात्ररचितखेदपाठश्च। इति केचित्॥

कुतः, [स्] व्य, प्रश्नः। पञ्चम्यर्थः। निह्नवः। इति विश्वः। (यथा, विष्णुपुराणे। १। १९। ३७।
"सर्व्वभूतात्मके तात! जगन्नाथे जगन्मये।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः" ॥)

कुतनुः, पु, (कुत्सिता तनुर्यस्य। पिङ्गलनेत्रत्वात् तथात्वम्।) कुबेरः। इति त्रिकाण्डशेषः॥ (त्रि, कुत्सितशरीरः। इति व्युत्पत्तिलब्धोऽर्थः॥)

कुतपः, पुं क्ली, अह्नोऽष्टमोऽंशः। दिवसस्याष्टमो मुहूर्त्तः। यथा,—
"अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः" ॥
इति श्राद्धतत्त्वे मत्स्यपुराणवचनम्॥ * ॥ पारिभाषिककुतपा यथा,—
"मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलः।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः।
अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः" ॥
इति मिताक्षरायामाचाराध्यायः॥ स च त्रिधादृण्डदिनमाने द्वितीयप्रहरशेषदण्डावधि तृतीयप्रहरप्रथमदण्डपर्य्यन्तकालः। इत्यमरः।२।७।३१॥ स तु एकोद्दिष्टश्राद्धारम्भकालः। यथा,—
"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्" ॥
इति श्राद्धतत्त्वम्॥
"दिवसस्याष्टमे भागे मन्दीभवति भास्करः।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम्" ॥
इति शातातपः॥ * ॥ दौहित्रः। वाद्यम्। छागलोमजकम्बलम्। कुशद्रव्यम्। इति मेदिनी॥

कुतपः, पु, (कुत्सितं पापं तपति कुं भूमिं तपति वा। तप+अच्। कुत्+कपन् वा।) सूर्य्यः। वैश्वानरः। द्विजन्मा। अतिथिः। गवैः। भागिनेयः। इति हेमचन्द्रः॥

कुतुकं, क्ली, (कुत्+बाहुलकात् उकञ्।) कौतुकम्। इत्यमरः। १। ७। ३१॥ (यथा, शुमानिकविहृतोपदेशशतके। १०२।
"कुतुकाय कोविदानां मूढमतीनां महोपकाराय।

निरमात्कविर्गुमानि शतोपदेशप्रबन्धममुम्” ॥)

कुतुप, क्ली पु, (कुतप+पृषोदरादित्वात् साधु ।) कुतपः । दिनस्याष्टममुहूर्त्तं । इति शब्दरत्नावली ॥

कुतुपः, पु, (ह्रस्वा कुतुः ततो डुप् च । तत पृषोदरात् अकारागमे साधुः ।) चर्म्मनिर्म्मिताल्पस्नेहपात्रम् । इत्यमरः । २ । ९ । ३३ ॥ छोट कुपो इति भाषा ॥

कुतूः, स्त्री, (कुत्सितं तन्यते । तन् बाहुलकात् कूः । टिलोपश्च ।) चर्म्मनिर्म्मितस्नेहपात्रम् । इत्यमरः । २ । ९ । ३३ ॥ मसक इति कुपो इति च भाषा ॥

कुतूणक, पु, (कु ईषत् तूणयति सङ्कोचयति चक्षुः य । कु+तूण सङ्कोचे+ण्वुल् ।) बालरोगविशेषः । स तु नेत्ररोगः । कतुया इति भाषा । तस्य लक्षणम् ॥

“कुतूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि ।
जायते तेन तन्नेत्रं कण्डूरञ्च स्रवेन्मुहुः ॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासावघर्षणम् ।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः” ॥

इति माधवकरः ॥ कुकूणक इत्यपि पाठः ॥ (यथा,—

“कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः ॥
स्यात्तेन शिशुरुच्छूनताम्राक्षो वीक्षणाक्षमः ।
स वर्त्मशूलपैच्छिल्यकर्णनासाक्षिमर्द्दनः” ॥

इत्युत्तरतन्त्रे ८ अध्याये वाभटेनोक्तम् ॥ * ॥

चिकित्सा यथा ॥

“शुण्ठी भृङ्गनिशाकल्कः पुटपाकः ससैन्धवः ।
कुकूणकेऽक्षिरोगेषु भद्रमाश्च्योतनं हितम् ॥
क्रिमिशालशिलादार्व्वी लाक्षाकाञ्जिकगैरिकैः ।
चूर्णाञ्जनं कुकूणे स्याच्छिशूनां पोथकीषु च ।
सुदर्शनामूलचूर्णादञ्जनं स्यात् कुकूणके” ॥

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)

कुतूहल, क्ली, (कुतूः चर्म्ममयतैलादिपात्रवत् अन्तर्हलति सोत्सुकं करोति । हल+अच् ।) अपूर्व्ववस्तुदिदृक्षाद्यतिशयः । तत्पर्य्यायः । कौतूहलम् २ कौतुकं ३ कुतुकम् ४ । इत्यमरः । १ । ७ । ३१ ॥ चित्रम् ५ । इति शब्दरत्नावली । (यथा, नैषधे । १ । ११९ ।

“प्रियावियोगादिधुरोऽपि निर्भरं
कुतूहलाक्रान्तमना मनागभूत्” ॥

नायिकालङ्कारविशेषः । तल्लक्षणं यथा साहित्यदर्पणे । ३ । ११९ ।

“रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम्” ॥)

कुतूहलः, त्रि, प्रशस्तः । अद्भुतः । इति हेमचन्द्रः ॥

कुतृणं, क्ली, (कुत्सितं तृणमिव ।) कुम्भी । इति हारावली । पाना इति भाषा ॥ (कुम्भिकाशब्देऽस्य विवृतिर्ज्ञेया ॥)

कुत्र, व्य, (“सप्तम्यास्त्रल्” । ५ । ३ । १० । इति त्रल् ।) कस्मिन् इति व्याकरणम् । कोथाय इति भाषा ॥ (यथा, महानाटके ।

“हा ! सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा” ॥)

कुत्रचित्, व्य, (कुत्र च चित् च इति द्वन्द्वसमासः । मुग्धबोधमते “किम क्त्यन्ताश्चिचनौ” । इति-चित् ।) कोनखाने इति भाषा । इति व्याकरणम् । (यथा महाभारते । ३ । १४२ । ५३ ।

“असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित् क्वचित्” ॥)

कुत्स ङ क ञ अवक्षेपे । इति कविकल्पद्रुमः ॥ चुरा-आत्म-उभय-सक-सेट् ।) पञ्चमस्वरी । दन्त्यवर्गाद्योपधः । अवक्षेपो निन्दा । ङ क, यो न कुत्सयते कुवस्त्रमिति हलायुधः ॥ ञ, कुत्सयति कुत्सयते । अयमात्मनेपदीत्यन्ये । कदाचित् परस्मैपदार्थो ऽङ्कारः । इति दुर्गादासः ॥

कुत्सन, क्ली, (कुत्स्+भावे ल्युट् ।) निन्दनम् । इति शब्दरत्नावली ॥ (यथा मनौ ४ । १६३ ।

“नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्” ॥

कुत्स्यते निन्द्यतेऽनेन । करणे ल्युट् । निन्दासाधनधर्म्मे । त्रि कुत्सायुक्ते ॥)

कुत्सला, स्त्री (कुत्सं क्रयविक्रययोर्निषिद्धतया निन्दा लाति । ला+कः+टाप् ।) नीलीवृक्षः । इति शब्दचन्द्रिका ॥

कुत्सा, स्त्री, (कुत्स् निन्दने+भावे अप्-टाप् च ।) कुत्सनम् । तत्पर्य्यायः । अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ निन्दा ९ गर्हणम् १० । इत्यमरः । १ । ६ । १३ ॥ गर्हा ११ निन्दनम् १२ कुत्सनम् १३ परिवादः १४ जुगुप्सनम् १५ अपक्रोशः १६ भर्त्सनम् १७ अपवादः १८ । इति शब्दरत्नावली ॥ उपरागः १९ अवध्वंसः २० घृणा २१ धिक् २२ सामि २३ । इति जटाधरः ॥

कुत्सित, क्ली, (कुत्स+कर्म्मणि क्त ।) कुष्ठनामौषधम् । इति राजनिर्घण्टः ॥ (कुड इति भाषा ॥)

कुत्सितः, त्रि, (कुत्स्+क्त ।) निन्दितः । तत्पर्य्यायः । निकृष्टः २ प्रतिकृष्टः ३ अर्व्वा ४ रेफः ५ याप्यः ६ । अवमः ७ अधमः ८ कुपूयः ९ अवद्यः १० खेटः ११ गर्ह्यः १२ अणकः १३ इत्यमरः । ३ । १ । ५४ ॥ रेपः १४ अरमः १५ आणकः १६ अमकः १७ । इति तट्टीका ॥ कुप्रियः १८ । इति जटाधरः ॥ आखेटः १९ रेपमः २० काण्डः २१ गर्हितः २२ अपकृष्टकः २३ । इति शब्दरत्नावली ॥

कुथ इ क्लेशे । वधे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सक-सेट् इदित् ।) पञ्चमस्वरी । इ कर्मणि कुन्थ्यते । क्लेश इह दुःखानुभवः । शीतार्त्तश्च न कुन्थतीति हलायुधः । इति दुर्गादासः ॥

कुथ य पूतित्वे । इति कविकल्पद्रुमः ॥ (दिवा-पर-अक-सेट् ।) पूतित्वं दुर्गन्धीभावः । य, कुथ्यति मीनो दुर्गन्धः स्यादित्यर्थः । चुकोथ । इति दुर्गादासः ॥

कुथः, पु स्त्री, (कुथ्यति अशोभा क्लेशं वा । कुथ इ हिंसायां अच् । आगमविधेरनित्यत्वात् न नुमागमः ।) गजपृष्ठस्थितचित्रकम्बलम् । हातिर पिठेर झुल इति भाषा । तत्पर्य्यायः । प्रवेणी २ आस्तरणम् ३ वर्णः ४ परिस्तोमः ५ । इत्यमरः । २ । ८ । ४२ ॥ प्रवेणिः ६ परिष्टोमः ७ कुथा ८ कुथम् ९ । इति तट्टीका ॥ वोलः १० आस्तरः ११ । इति शब्दरत्नावली ॥ (यथा शब्दार्थचिन्तामणौ ।

“कुथा कन्था समाख्याता कुथः स्यात् करिकम्बलम् ।
कुथः कुशः कुथः कीटः प्रातःस्नायी द्विजः कुथः” ॥

यथा महाभारते २ । ५१ । ३६ ।

“शतशश्च कुथांस्तत्र सिंहला समुपाहरन्” ॥)

कुथ, पु, (कुथ+अच् ।) कुशतृणम् । इत्यमरः । २ । ४ । १६६ ॥ (यथा हे रामायणे । २ । ३० । १४ ।

“शाद्वलेषु यदा शिश्ये वनान्ते वनगोचरा ।
कुथास्तरणतल्पेषु किं स्यात् सुखतरं ततः” ॥)

कुथोदरी, स्त्री, (कुथं हिंसात्मकमुदरं यस्याः सा ।) निकुम्भदुहिता । कुम्भकर्णपौत्री । सा च कल्कि-देवेन हता । यथा ।

मुनय ऊचुः ।

“शृणु विष्णुयशःपुत्त्र ! कुम्भकर्णात्मजात्मजा ।
कुथोदरीति विख्याता गगनार्द्धसमुत्थिता ॥
कोलकञ्जस्य महिषी विकञ्जजननी च सा ।
हिमालये शिरः कृत्वा पादौ च निषधाचले ॥
शेते स्तनं पाययन्ती विकञ्जं प्रस्नुतस्तनी ।
तस्या निश्वासवातेन विवशा वयमागताः ॥
दैवेनैव समानीताः प्राप्तास्तव पदाम्बुजम् ।
मुनयो रक्षणीयास्ते रक्षःसु च विपत्सु च ॥
इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः ।
सेनागणैः परिवृतो जगाम हिमवद्गिरिम्” ॥

इत्यादि ॥

“सा क्रुधोत्थाय सहसा ननर्द परमाद्भुतम् ।
तेन नादेन महता वित्रस्ताश्चाभवन् जनाः ।
निपेतुः सैनिकाः सर्व्वे मूर्च्छिता धरणीतले ॥
साः रथाश्च गजाश्चापि विवृतास्या भयानकाः ।
अथास प्रश्वासवातैः समानीय कुथोदरी ॥
सेनागणास्तदुदरं प्रविष्टाः कल्किना सह ।
यथर्क्षमुखवातेन प्रविशन्ति पिपीलिकाः ॥
तद्दृष्ट्वा देवगन्धर्व्वा हाहाकारं प्रचक्रिरे ।
तत्रस्था मुनयः शेपुर्जेपुश्चान्ये महर्षयः ॥
निपेतुरन्ये दुःखार्त्ता ब्राह्मणा ब्रह्मवादिनः ।
रुरुदुः पृष्ठयोधा ये जहृषुस्तन्निशाचराः ॥
जगतां कदनं दृष्ट्वा संस्मारात्मानमात्मना ।
कल्किः कमलपत्राक्षः सुरारातिनिसूदनः ॥
वाणाग्नि चेलचर्म्मभ्यां कम्बलैर्यानदारुभिः ।
प्रज्वाल्योदरमध्येन करवालं समाददे ॥
तेन खड्गेन महता कुक्षिं निर्भिद्य बन्धुभिः ।
वलिभिर्भ्रातृभिर्व्वीरैर्वृतः शस्त्रास्त्रपाणिभिः ॥
वहिर्ब्बभूव सर्व्वेशः कल्किः कल्कविनाशनः ।
सहस्राक्षो यथा वृत्रकुक्षिं दम्भोलिनेमिना ॥
योनिरन्ध्राद्गजरथास्तुरगाश्चाभवन् वहिः ।
नासिकाकर्णविवरात् केऽपि तस्या विनिर्गताः ॥
ते निर्गतास्ततस्तस्याः सैनिका रुधिरोक्षिताः ।
तां विव्यधुर्निःक्षिपन्तीं तरसा चरणौ करौ ॥
ममार सा भिन्नदेहा भिन्नकुक्षिशिरोधरा ।
नादयन्ती दिशो द्यां खं चूर्णयन्ती च पर्व्वतान्” ।

इति कल्किपुराणे १९ अध्यायः ॥

कुदाल, पु, (कुं भूमिं दालयति विदारयति । कु+

दल् विदारणे + णिच् + अण् ।) कुद्दालः । इत्यमरटीकायां रमानाथः ॥

कुद्दार, पुं, (कु पृथ्वीं दारयति विदारयति । कु + दृ + णिच् + कर्म्मण्यण् । पृषोदरात् साधुः ।) कुद्दालः । इति जटाधरः ॥ (काञ्चनवृक्षः । कृष्णमाषम् । भूविदारणेन समुत्थितत्वात् ॥)

कुद्दाल, पुं, (कु भूमिं दालयति । कु + दल् + णिच् + अण् । पृषोदरात् दित्वे साधुः ।) कोविदारवृक्षः । इत्यमरः ।२।४।२२॥ (यथास्य पर्य्याया ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डलीताम्रपुष्पश्च अश्मन्तकः स्वल्पकेशरी" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥ गुणाश्चास्य काञ्चनारशब्दे उक्ताः ॥) भूमिदारणास्त्रम् । इति मेदिनी ॥ कोदाल इति भाषा । (यथा महाभारते । ३ । १०७ । २३ ।
"समासाद्य विलं तच्चाप्यखनन् सगरात्मजाः ।
कुद्दालैर्ह्रेषुकैश्चैव समुद्रं यत्नमास्थिताः" ॥)

कुद्य, क्ली, (कुद् + क्यप् ।) कुड्यम् । भित्तिः । इत्यमरटीका ॥

कुद्र, इ क मिथ्योक्तौ । इति कविकल्पद्रुमः ॥ (चुरां-पर-सक-सेट् । इदित् ।) पञ्चमस्वरी । दन्त्यवर्ग-तृतीयोपधः । इ क कुन्द्रयति नीचः । मिथ्यां वदतीत्यर्थः । कुन्द्र इत्यनेनैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः । इति दुर्गादासः ॥

कुद्रङ्ग, पुं, (कुद्र मिथ्यैव कायते अनित्यत्वात् क्षणभङ्गुरत्वाच्च । कै + क । निपातनात् साधुः ।) गृह-विशेषः । मञ्चोपरिमण्डपः । तत्पर्य्यायः । उद्घाटः २ पिठरः ३ । इति त्रिकाण्डशेषः ॥

कुद्रङ्कः, पुं, (कु ईषत् उद्गतो रङ्कः रङ्कणं यत्र अनित्यत्वात् । कु + उत् + रङ्क + अधिकरणे घञ् । पृषोदरादित्वात् साधुः ।) मञ्चमण्डपः । इति हारावली ॥

कुद्रव, पुं, (कु भूमिं द्रावयति । कु + द्रु + अन्तर्णिच् अच् ।) कोद्रवः । इत्यमरटीकायां भरतः ॥ (कोदधान् इति भाषा ॥)

कुध्र, पुं, (कु पृथ्वीं भूमिं धारयति । कु + धृ + मूल-विभुजादित्वात् कः ।) पर्व्वतः । इति हलायुधः ॥ (यथा कालिदासोक्तौ ।
"वार्षारेदृष्टगधगद्धतोऽधिपतिः कुध्रेडुगजानिर्गणेड्
गोराड़ाकडुरःखरेडुडुतरग्रैवेयकश्चाडडम् ।
उग्रीकुडगरकाधिभिर्ल्लिप्टगिभेडार्मार्गिणाच्छच्छवि
स स्वादम्पुदम्बुदालिगलगदेवो मुदे वो मृड" ॥)

कुनख, पुं, (कुत्सितो नखो यत्र ।) क्षुद्ररोगविशेषः । तस्य लक्षणं यथा ।
"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम् ।
कुर्व्वाते दाहपाकौ च तं व्याधिं चिप्पमादिशेत् ।
तदेवापरिहार्य्यं दोषं परुषं कुनखं वदेत्" ॥
इति माधवकरः ॥

॥

"चिप ... नखप्रदः" ।

इति ... धिकारे ॥

त

"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः ।
भवेत्तु कुनखं विद्यात् कुलीनमिति संज्ञितम्" ॥
अयं हि रोगः जन्मान्तरीणसुवर्णापहरणाकृतप्रायश्चित्तस्य सुवर्णापहरणमहापातकस्य चिह्नरूपः । यथा विष्णुसंहितायाम् ।
"नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति । कुष्ठतिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा" ॥) कुत्सितनखयुक्ते, त्रि ॥

कुनखी [न्] त्रि, (कुनख इति ख्यातविश्रुतरोगो ऽस्यास्तीति ।) कुनखरोगयुक्तः । सङ्कुचितनखः । यथा । "सुवर्णहारी कुनखी । कुनखी श्यावदन्तश्च द्वादशरात्रं व्रतं चरित्वा तद्दन्तनखावुद्धरेयाताम्" । इति शुद्धितत्त्वम् ॥

कुनटः, पुं, (कुत्सितं नटतीति । कु + नट् + अच् ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (कुत्सितो नट इति विग्रहे नटाधमः ॥
श्योनाकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कुनटी, स्त्री, (कुनट + गौरादित्वात् ङीष् ।) मनःशिला । इत्यमरः ।२।९।१०८॥
(अस्याः पर्य्यायाः ॥
"मनःशिला मनोगुप्ता च नैपाली कुनटी शिला" ।
इति वैद्यकरत्नमालायाम् ॥
अन्यद्विवरणमस्य मनःशिलाशब्दे व्याख्येयम् ॥) धन्याकम् । इति राजनिर्घण्टः ॥
(पर्य्याया यथा ॥
"धान्यकं धानकं धान्यं धाना धानेयकन्तथा ।
कुनटी धेनुकाच्छत्रा कुस्तुम्बुरुवितुन्नकम्" ।
गुणाश्चास्य धन्याकशब्दे ज्ञातव्याः ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
नेपालदेशजमनःशिला । इति केचित् । इति भरतः ॥(कुत्सिता नर्त्तकी । अनिपुणा नर्त्तकी ॥)

कुनन्नी, [न्] पुं, (कुत्सितं ईषद् वा नन्नोऽस्यास्तीति इनिः ।) वकवृक्षः । इति त्रिकाण्डशेषः ॥

कुनाभिः, पुं, (ईषत् नाभिरिव आवर्त्तवत्त्वात् ।) वातमण्डली । इति त्रिकाण्डशेषः ॥ घूर्णवातास इति भाषा ॥ निधिः । इति हेमचन्द्रः ॥

कुनाशक, पुं,(ईषत् नाशयति स्पर्शनेन । कु + नश + णिच् + ण्वुल् ।) यवासः । इत्यमरः ।२।४।९१॥
(दुरालभा । आल्कुशीति भाषा ॥
अस्य पर्य्याया यथा ॥
"यासोऽपवासो दुस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे ॥)

कुनृच वक्रणे । सौक्ष्म्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सक-सेट् ।) पञ्चमस्वरी । वक्रणमिति वक्र इवाचरतीति क्वौ वक्रं करोतीति ण्वौ च रूपम् । तेन कुटिलीभावः कुटिलीकरणञ्च । सौक्ष्म्यमल्पीभावः अल्पीकरणञ्च । कुनृचति खड्गः कुटिलोऽल्पो वा स्यादित्यर्थः । कुनृचति खड्गं वायुः कुटिलमल्पं वा करोतीत्यर्थः । इति दुर्गादासः ॥

कुन्त, पुं, (कुं भूमिं उनत्ति क्लेदयति । कु शरीरं उनत्ति भेदयति दारयति वा धातूनामनेकार्थत्वात् उन्द + बाहुलकात् तः । शकन्ध्वादिवत् साधुः ।) गवेधुका । प्रासास्त्रम् । इति मेदिनी ॥ (भल्लास्त्रम् । भाला इति भाषा । यथा कथासरित्सागरे ।
"कुन्तदन्ता कथं कुर्य्यात् राक्षसीव हि सा शिवम्" ॥)
चण्डभावः । क्षुद्रजन्तुः । इति विश्वः ॥ क्षुद्रकीटः । उत्कुनम् । (उकुन् इति भाषा ॥)

कुन्तल, पुं, (कुन्तं उत्कुनं लाति गृह्णाति । ला + क ।) केशः । (यथा साहित्यदर्पणे ३।१२४।
"कापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्" ॥)
ह्रीवेरम् । इत्यमरः २ । ४ । ९५ ॥ चषकः । यवः । इति मेदिनी ॥ (कुन्तस्य अग्राकारमिव लाति ।) लाङ्गलः । इति विश्वः ॥ ध्रुवकभेदः । यथा,—
"वर्णैः षोड़शभिः कार्य्यः कुन्तलो लघुशेखरे ।
शृङ्गारे च रसे प्रोक्तमानन्दफलदायकः" ॥
इति सङ्गीतदामोदरः ॥ (दाक्षिणात्यजनपद-विशेषः । तदधिष्ठाता राजा च यथा महाभारते २ । राजसूयिकपर्व्वणि ३४ । ११ ।
"आकर्षः कुन्तलश्चैव मालवाश्चान्ध्रकास्तथा ।
द्राविडाः सिंहलाश्चैव राजा काश्मीरकस्तथा" ॥)

कुन्तलवर्द्धन, पुं, (कुन्तलान् केशान् सरसेन वर्द्धयति । वृध् + णिच् + ल्युः ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः ॥

कुन्तलाः, पुं, (कुन्ता अस्त्रविशेषा लीयन्ते गृह्यन्ते यत्र । ला + घञर्थे कः ।) देशविशेषः । बहुवचनान्तशब्दोऽयम् । इति मेदिनी ॥ (स च दाक्षिणात्यप्रदेश इत्युच्यते । यथा महाभारते ६।९।५९।
"भिल्लिका कुन्तलाश्चैव सौहृदा नलकाननाः ।
कौकुट्टकास्तथा चोलाः कोङ्कणा मालवा नराः" ॥)

कुन्तलिका, स्त्री, (कुन्तलस्य लाङ्गलस्येवाकार इव विद्यतेऽस्याः इति ठन् । टाप् अत इत्वञ्च ।) दध्यादिच्छेदनी । दइकाटा छुरी इति भाषा । तत्पर्य्यायः । पालिका २ । इति हारावली ॥
(बालानामौषधम् । यथा सुश्रुते ।
"कुन्तलिका कुरण्टिका प्रभृतीन्युपक्रम्य ॥
अस्या गुणास्तत्रैवोक्ताः ।
"स्वादुपाकरसाः शीताः कफघ्नाश्चातिपित्तलाः ।
लवणानुरसा रूक्षाः सक्षारा वातलाः सराः" ॥
स्वादुतिक्ता कुन्तलिका" ॥)

कुन्तलोशीर, क्ली, (कुन्तल इव उशीरम् ।) बालकम् । इति राजनिर्घण्टः ॥ बाला इति भाषा ॥

कुन्ती, स्त्री, (राज्ञा कुन्तिभोजेन बाल्यात् पालिता सती पृथा वसुदेवभगिनी कुन्तीति नाम्ना विख्याता । यथा, हरिवंशे ३४ । २३-२४ ।
"पृथा दुहितरं वव्रे कुन्तिस्तु कुरुनन्दन ।
शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ ॥
तस्मात्कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा" ॥)
पाण्डुराजभार्य्या । सा च शूरसेनराजकन्या पृथा

नाम्ना ख्याता। तत्पिता शूरसेनः तां राज्ञे कुन्तिभोजाय दत्तवान्। इयं हि कन्यावस्थायां मुनिदत्तविद्यापरीक्षार्थं मन्त्रमाहूतवात् सूर्य्यात् कर्णं प्रासोष्ट। विवाहात् परञ्च सा मृगीभूतस्य मुनेः शापात् स्त्रीसङ्गमवर्ज्जितस्य स्वामिनो महाराजपाण्डोराज्ञया धर्म्माद्युधिष्ठिरं पवनाद्भीमं इन्द्रादर्ज्जुनं सुषुवे। इति महाभारते १।१११ अध्याय॥ इयञ्च परमसाध्वीतया भगवद्वादरायणादिमहर्षिगणवरप्रभावेण प्रातःस्मरणीया रमणी। यदुक्तम्,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा।
पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्"॥)

गुग्गुलुवृक्षः। शल्लकी। इति विश्वमेदिन्यौ॥ ब्राह्मणी। इति जटाधरः॥

कुन्थ श क्लिषि। क्लिशि। इति कविकल्पद्रुमः॥ (क्र्या-पर-सक०-अक० च-सेट्।) पञ्चमस्वरी। क्लिशि दुःखानुभवे। श कुथ्नाति वुभुक्षार्त्तः। इति हलायुधः। चुकुन्थ। इति दुर्गादासः॥

कुन्थुः, पुं, (कुथ्नाति दुःखसहनक्षमो भवति। कुन्थ + उन्।) बौद्धविशेषः। जिनचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥

कुन्द, पुं क्ली, (कुं कुत्सितं दुर्गन्धादिजनितक्लेशं द्यति नाशयति। कु + दो छेदने + क। पृषोदरात् नुम्। यद्वा कौतीति। "कुन्दादयश्च"। उणां ४। ९८। इति निपातनात् सिद्धम्।) पुष्पवृक्षविशेषः। कुंदफुलेर गाछ इति भाषा। तत्पर्य्यायः। माध्यम् २। इत्यमरः। २। ४। ७३॥ शुक्लपुष्प ३। इति रत्नमाला॥ मकरन्दः ४ महामोदः ५ मनोहरः ६ मुक्तापुष्पः ७ सदापुष्पः ८ तारपुष्पः ९ अट्टहासकः १० दमनः ११ वनहासः १२ मनोज्ञः १३ वीरटम् १४ वरटम् १५। इति शब्दरत्नावली॥ (यथा, नवग्रहस्तोत्रे शुक्रस्तुतिः।

"ॐ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्।
सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्"॥)

अपि च। भावप्रकाशे।

"कुन्दन्तु कथितं माध्यं सदापुष्पञ्च तत् स्मृतम्।
कुन्दः शीतो लघुः श्लेष्मशिरोरुग्विषपित्तहृत्"॥

अस्य गुणाः। अतिमधुरत्वम्। शीतलत्वम्। कषायत्वम्। कैश्यभावनत्वम्। कफपित्तहरत्वम्। सारकत्वम्। दीपनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणौ। श्लेष्मकारित्वम्। ग्राहित्वञ्च। इति राजवल्लभः॥

कुन्द, पुं, कुन्दुरुनामगन्धद्रव्यम्। (अस्य पर्य्याया यथा।

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि"।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) भ्रमियन्त्रम्। कुंद इति भाषा। कुबेरस्य निधिविशेषः। इति मेदिनी॥ करवीरवृक्षः। इति राजनिर्घण्टः॥ (कुन्दपुष्पवर्ण इव श्वेततया सत्ययुगे हंसावतारत्वाच्च। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"॥

यद्वा कुं पृथ्वीं कश्यपाय दत्तवान्। दा + कः। द्वितीयाया अलुक्। परशुरामावतारे क्षत्त्रियहत्यापापशुद्ध्यर्थं मारीचाय अश्वमेधयज्ञे महादानस्य दक्षिणास्वरूपवसुन्धरादानादस्य तथात्वम्। तत्कथा यथा हरिवंशे।

"सर्व्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान्।
तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दन।
मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम्"॥)

कुन्दकः, पुं, (कुन्द + संज्ञायां कन्।) कुन्दुरुकः। इति राजनिर्घण्टः॥

कुन्दमः, पुं, (अनिष्टकारित्वात् कुत्सितं उन्दुरादिकं दमयति नाशयतीति। दम + णिच् + अच् पृषोदरात् मुमि साधुः। यद्वा कुन्देन मीयते प्रायेण शुभ्रवर्णत्वात्। कुन्द + मा + घञर्थे कः।) विडालः। इति त्रिकाण्डशेषः॥

कुन्दरः, पुं, (कुं भूमिं दारयति। अन्तर्भूतणिजर्थे दॄ + अच् पृषोदरात् मुमि साधुः।) तृणभेदः। कुन्दरा इति कलिङ्गे ख्यातः। तत्पर्य्यायः। कण्डुरः २ भिण्टी ३ दीर्घपत्रः ४ खरच्छदः ५ रसालः ६ क्षेत्रसम्भूतः ७ सुदृढः ८ मृगवल्लभः ९। अस्य मूलगुणाः। गौल्यत्वम्। शीतत्वम्। पित्तातिसारनाशित्वम्। गोधनानां प्रशस्तत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (कुन्दवत् निर्म्मलानि धर्म्मानुबन्धीनि फलानि राति ददाति। कुन्द + रा + क। यद्वा कुं पृथ्वीं, हिरण्याक्षदैत्यं हन्तुकामो भगवान् विष्णुः वराहरूपेण दारयति। दॄ + णिच् + अच् पृषोदरात् मुमि साधुः। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"॥)

कुन्दिनी, स्त्री, (कुन्दानां पद्मानां समूहः। खलादित्वात् इनि। स्त्रियां ङीप्।) पद्मिनी। पद्मसमूहः। इति त्रिकाण्डशेषः॥

कुन्दुः, स्त्री, (कुं भूमिं दृणातीति। कु + दॄ + बाहुलकात् डुः।) कुन्दुरुनामगन्धद्रव्यम्। इति शब्दमाला अमरटीका च॥ (कुन्दुरुशब्देऽस्या विवरणं ज्ञातव्यम्॥) मूषिके पुं। इति शब्दरत्नावली॥

कुन्दुरः, पुं, (कुं भूमिं दारयति। दॄ विदारे + उरन्।) कुन्दुरुनामगन्धद्रव्यम्। इत्यमरटीकायां भरतः॥

कुन्दुरुः, पुं, स्त्री, (कुं भूमिं उनत्ति। उन्द् + मृग्वादित्वात् निपातनात् साधुः।) स्वनामख्यातसुगन्धिद्रव्यम्। यस्य निर्यासो कुन्दुरुखोटि इति ख्यातिः। तत्पर्य्यायः। पालङ्का २ मुकुन्दः ३ कुन्दः ४। इत्यमरः। २। ४। १२१॥ पालङ्की ५ मुकुन्दुः ६ कुन्दुः ७ कुन्दुरः ८। इति तट्टीकायां भरतः॥ कुन्दुरुकः ९ सौराष्ट्रः १० शिखरी ११ कुन्दकः १२ तीक्ष्णः १३ गोपुरकः १४ बहुगन्धः १५ मालिन्दः १६ भीषणः १७ तीक्ष्णगन्धः १८ बली १९। इति जटाधरः॥ अपि च।

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि।
कुन्दुरुर्म्मधुरस्तिक्तस्तीक्ष्णस्त्वच्यः कटुर्हरेत्।
ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान्"॥

इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। कफपित्तार्त्तिदाहनाशित्वञ्च। अस्य पानलेपनयोर्गुणः। शिशिरत्वम्। प्रदरामयशान्तिकारित्वञ्च। इति राजनिर्घण्टः॥ अश्मरीरक्तोज्वरनाशित्वम्। इति राजवल्लभः॥ (अस्य व्यवहारो यथा वैद्यकचक्रपाणिसंग्रहे ऽष्टादशशतिकप्रसारणीतैले॥

"कर्पूरं कुन्दुरुनिशालवङ्गध्यामचन्दनम्"॥ * ॥)

कुन्दुरुकः, पुं, स्त्री, (कुन्दुरु + स्वार्थे कन्।) कुन्दुरुनामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

कुन्दुरुकी, स्त्री, (कुन्दुरुक + जातित्वात् ङीष्।) शल्लकीवृक्षः। इत्यमरः। २। ४। १२४॥

कुप इ कि स्तृतौ। इति कविकल्पद्रुमः॥ (चुरा-पर-सक०-सेट्-इदित्।) पञ्चमस्वरी। इ कुम्प्यते। कि कुम्पयति कुम्पति। स्तृतिराच्छादनम्। इति दुर्गादासः॥

कुप, क द्युतौ। इति कविकल्पद्रुमः॥ (चुरा पर-अक-सेट्।) क कोपयति। इति दुर्गादासः॥

कुप य इर् कोपे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्-इरित्।) कोपो नेत्रलौहित्यादिहेतुश्चित्तविकारः। य, कुप्यति माता शिशवे। इर्, अकुपत् अकोपीत्। अस्मात् पुषादित्वान्नित्य ङ इत्यन्ये। "कदाचित् कुप्यते माता नोदरस्था हरीतकी"। इति तु कुप्यतीति कुप् ततः स इवाचरति इति ङे साध्यम्। इति दुर्गादासः॥

कुपथ, पुं, कुत्सितः पन्थाः। (पाणिनिमते कापथ इति नित्यं स्यात्। वोपदेवमते तु "पथि पुरुषे वा"। इति सूत्रेण विभाषया कोः कादेशः।) कापथः। इति शब्दरत्नावली। (यथा, श्रीमद्भागवते ५। ६। १०। "स्वधर्म्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः प्रवर्त्तयिष्यति"॥

कुपथं सेव्यत्वेनास्त्यस्य। अर्श आदित्वात् अच्। कुपथगामिनि, त्रि। यथा महाभारते।१।६७।२९।

"कुपथस्तु महावीर्य्यः श्रीमान् राजन्! महासुरः।
सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः"॥)

कुपाणि, त्रि, (कुत्सितः पाणिर्यस्य।) वक्रहस्तः। इति जटाधरः। कोपा इति भाषा॥

कुपिनी, [न्] पुं, (कुपिनी मत्स्यधानी अस्यास्तीति। व्रीह्यादित्वात् इनि।) कैवर्त्तः॥ इति त्रिकाण्डशेषः। जालिया इति भाषा॥

कुपिनी, स्त्री, (कुम्प्यते रुध्यते मत्स्योऽत्र। कुप इ कि स्तृतौ अधिकरणे बाहुलकात् इनि। किञ्च ङीप् पृषोदरादित्वात् साधुः।) स्वल्पमत्स्यधानी। इति शब्दरत्नावली। खालुइ इति भाषा॥

कुपिन्द, पुं, (कुम्पयति विस्तारयति सूत्राणि। कुप इ कि स्तृतौ + "कुपेर्वा वश्च"। उणां ४। ८६। इति किन्दच्।) तन्तुवायः। इत्युणादिकोषः॥

कुपीलु, पुं, (कुत्सितः पीलुः।) कारस्कर इति तिन्दुकविशेषः। मधुरतेन्दु माकडाकेंदु इति च भाषा। तत्पर्य्यायः। [illegible] २ दीर्घपत्रकः ३ कुलकः

४ कालतिन्दुक ५ काकपीलुक ६ काकेन्दु ७ विषतिन्दु ८ मर्कटतिन्दुक ९। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। वातमदकारित्वम्। लघुत्वम्। व्यथाहरत्वम्। ग्राहित्वम्। कफपित्तास्त्रनाशित्वञ्च। इति भावप्रकाशः॥

कुपूय, त्रि, (कुत्सितं पूयते। पूयीङ् विसरणे + पचाद्यच्।) कुत्सितः। जात्याचारादिनिन्दितः। इत्यमरभरतौ॥

कुप्य, क्ली, (गुप्यते रक्ष्यते भयादिकमत्र। गुपू रक्षणे। "राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः"। ३। १। ११४। इति क्यबन्तो निपातितः। गुपेरादेः कत्वं च संज्ञायाम्।) स्वर्णरूप्यभिन्नधातु। इत्यमरः। २। ९। ९१॥ (यथा, महाभारते। १५। ६। ११।

"भूमिरल्पफला देया विपरीतस्य भारत!।
हिरण्यं कुप्यभूयिष्ठं मित्रं क्षीणमथो बलम्॥")

दस्ता इति ख्यातधातु। इत्यष्टधातुमध्ये वैद्यकम्॥

कुप्यशाला, स्त्री, (कुप्यानां स्वर्णरूप्याभ्यामन्येषां भाजनादीनां शाला गृहम्।) स्वर्णरूप्यभिन्नधातुपात्रादिनिर्म्माणादिगृहम्। काँसारिर दोकान इति भाषा। तत्पर्य्यायः। सन्धानी २। इति हेमचन्द्रः॥

कुप्रियः, त्रि, (कुत्सितं प्रीणातीति। कु + प्री + "इगुपधज्ञाप्रीकिरः कः"। ३। १। १३५। क।) जघन्यः। इति हलायुधः॥ (बहुव्रीहौ तु कुत्सितप्रियः।)

कुब इ कि स्तृतौ। इति कविकल्पद्रुमः। (चुरां पक्षे-भ्वा-पर-सक-सेट्।) पञ्चमस्वरी। इ कुम्ब्यते। कि कुम्बयति कुम्बति। स्तृतिराच्छादनम्। इति दुर्गादासः॥

कुबे(वे)र, पुं, (कुम्बतीति। कुब इ कि आच्छादने "कुम्बेर्नलोपश्च"। उणां १। ६०। इति एरक्। नलोपश्च। यद्वा कुत्सितं वेरं शरीरं यस्य। त्रिकुलनेत्रत्वात्तथात्वम्।) यक्षराजः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (स च विश्रवस ऋषेरिलविलायां जातः। स तु पितात् अष्टदन्तः केकराक्षश्च। यथा, वायुपुराणे।

"कुत्सायां कितिशब्दोऽयं शरीरं वेरमुच्यते।
कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः"॥

तथा काशीखण्डे देवीदत्तशापोक्तौ च।

"कुवेरो भव नाम्ना त्वं मम रूपेर्ष्यया सुत!"॥)

कुब्ज, त्रि, (कु ईषत् उब्ज आर्ज्जवमस्य। उब्ज आर्जवे घञ्। शकन्ध्वादिवदुलोपः।) गडुनोन्नतहृदयः। उन्नतपृष्ठश्च। कुंजा इति भाषा। तत्पर्य्यायः। गडु २ गडुल ३ इत्यमरः॥ न्युब्ज ४ गडुर ५ इति शब्दरत्नावली॥ तस्य लक्षणमाह।

"हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्।
क्रुद्धो वायुर्यदा कुर्य्यात्तदा तं कुब्जमादिशेत्"॥

इति माधवकरः॥ यदेत्युक्त्वा यदिवेति विकल्पार्थत्वेन न पुनरुक्तिदोषः। अन्तरायामं क्रोडनतो भवति वहिरायामं पृष्ठनतो भवति ताभ्यामस्य को भेदः। उच्यते। अन्तरायामवहिरायामयोः प्रकृतस्यैवान्तःशरीरस्य वहिःशरीरस्य चावनमनमत्र तु हृदय पृष्ठं वा शरीराद्बहिर्भवतीति भेदः॥ *॥

अथ चिकित्सा।

"वाह्यायामेऽन्तरायामे धनुस्तम्भे च कुब्जके।
योज्यं प्रसारिणीतैलं तेन तेषां शमो भवेत्॥
वातव्याधिषु सामान्या या क्रिया कथिता पुरा।
कर्त्तव्या एव ता सर्व्वास्तेषामेतद्विशेषतः"॥

इति भावप्रकाशः॥ (यथा, हरिवंशे ८३। ३४।

"तान्तु कुब्जा ददर्शैकां कृष्णोऽप्येनां पथि स्थिताम्।
शने सन्तोऽयामास कृष्णो लीलाविधानवित्"॥)

रोगविशेषस्यास्य चिकित्सार्थं वटिकौषधं यथा॥ *॥

"रसो गन्धो समौ शुद्धौ तालकश्चाभया तथा।
विषं व्योषञ्च कटुकी वोलशैवालकौ समौ"॥
"भृङ्गराजरसैर्मर्द्यं गुञ्जार्कक्षीरसैस्तथा।
गुञ्जाद्वयं प्रदातव्यं रसः कुब्जविनोदकः॥
आमवाताढ्यवातादीन् कटीशूलञ्च नाशयेत्।
अग्निञ्च कुरुते दीप्तं सौख्यानां नाशनं परम्"॥

कुब्जविनोदो रसः॥

इति वैद्यकरसेन्द्रसारसंग्रहे वातरोगाधिकारे॥ *॥)

कुब्ज, पुं, (कु ईषद् उब्ज आर्जवमस्य। शकन्ध्वादित्वात् साधुः।) अपामार्गः। इति राजनिर्घण्टः॥ खड्गः। इति शब्दमाला॥

कुब्जक, पुं, (कौ पृथिव्यां उब्जति। उब्ज + ण्वुल्। शकन्ध्वादित्वात् उलोपे साधुः।) पुष्पवृक्षविशेषः। कूजा इति ख्यातः। (यथा, शब्दार्थचिन्तामणिधृतनरसिंहपुराणे।

"चम्पकात् पुष्पशतकादशोकं पुष्पमुत्तमम्।
अशोकात् पुष्पसाहस्रात् सेवतीपुष्पमुत्तमम्।
सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पमुत्तमम्"॥)

तत्पर्य्यायः। भद्रतरणी २ वृत्तपुष्प ३ अतिकेशरः ४ महासहः ५ कण्टकाढ्य ६ खर्व्व ७ अलिकुलसङ्कुल ८ वारिकण्टक ९। इति त्रिकाण्डशेषः॥ अपि च।

"कुब्जको भद्रतरणिर्वृत्तपुष्पोऽतिकेशरः।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला"॥

राजनिर्घण्टे महासहेत्यादिशब्दाः पुंल्लिङ्गाः।

अस्य गुणाः।

"कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः।
त्रिदोषशमनो वृष्यः शीतवर्णश्च स स्मृतः"॥

इति भावप्रकाशः॥ सुरभित्वम्। रक्तपित्तकफनाशित्वञ्च। तत्पुष्पगुणाः। शीतलत्वम्। वर्णकारित्वम्। दाहवातपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥

कुब्जकण्टकः, पुं, (कुब्जः कण्टकोऽस्य।) श्वेतखदिरः। इति राजनिर्घण्टः॥

कुभ्र,(भ्र)क्ली,(कुबि आच्छादने + "स्फायितञ्चिवञ्चि-शकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्" इति ...) उणां २। २८। इति निपातनात् रन्।) वस्त्रम्। इत्युणादिकोषः॥ कुत्सम्। कुष्ठम्। तन्तु। शरणम्। शकटम्। इति सङ्क्षिप्तसारे उणादिवृत्तिः॥

कुमार, त क केलौ। इति कविकल्पद्रुमः॥ (अदन्त-चुरा पर-अक सेट्।) ऋस्वी। अचुकुमारत्। इति दुर्गादासः॥

कुमार, क्ली, (कुमारयति नन्दति यत्र यस्मिन् सतीत्यर्थः।) जात्यकाञ्चनम्। इति मेदिनी। खाँटि सोणा इति भाषा॥

कुमार, पुं, (कुत्सितो मारः कन्दर्पो यस्मात्।) कार्त्तिकेयः तदुत्पत्तिविवरणन्तु कार्त्तिकेयशब्दे द्रष्टव्यम्॥

(तथा महाभारते। १। ६६। २३-२४।

"अग्नेः पुत्त्रः कुमारस्तु श्रीमान् शरवणालयः।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
कीर्त्तिकाभ्युपपत्तेश्च कार्त्तिकेय इति स्मृतः"॥)

कौ पृथिव्यां मारयति दुष्टान्। कु + मृ + णिच् + अच्।) नाट्योक्तौ युवराजः। इत्यमरः॥ (राजकुमारः। यथा, रघौ ७। ६३।

"तत प्रियोपात्तरसेऽधरोष्ठे
निवेश्य दध्मौ जलजं कुमारः"॥)

शुकः। अश्ववारकः। (कुमारयति क्रीडतीति। कुमार-त क क्रीडने + अच्।) पञ्चवर्षीयबालकः। (यथा मनौ ७। १७५।

"कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम्"॥

"तस्यास्तु खल्वमरायाः प्रपतमार्ये खल्वेवमेव कर्म्माणि क्रियमाणे जातमात्रे एवैव कुमारस्य कार्य्याण्येतानि कर्म्माणि भवन्ति तद्यथा अश्मनो सङ्घट्टनं कर्णयोर्मूले शीतोदकेनोष्णोदकेन वा मुखपरिषेकः। तथा स क्लेशविहतान् प्राणान् पुनर्लभेत कृष्णकपालिका शूर्पेण चैनमभिनिष्पुनीयाद् यद्यचेष्टः स्यात् यावत् प्राणानां प्रत्यागमनं तत्तत् सर्व्वमेव कुर्य्युः। ततः प्रत्यागतप्राणं प्रकृतिभूतमभिसमीक्ष्य स्नानोदकग्रहणाभ्यामुपपादयेत्। अथास्य ताल्वोष्ठकण्ठजिह्वाप्रमार्जनमारभेत अङ्गुल्या सुपरिलिखितनखया सुप्रक्षालितोपधानकार्पासपिचुमत्या प्रथमं प्रमार्जितस्यास्य च शिरस्तालु कार्पासपिचुना स्नेहगर्भेण प्रतिच्छादयेत्। ततो ऽस्यानन्तरं कार्यं सैन्धवोपहितेन सर्पिषा प्रच्छर्दनम्"।

"दशम्यां निशायां सपुत्त्रास्त्री सर्व्वगन्धौषधैर्गौरसर्षप-लोध्रैश्च स्नाता लघ्वहतवस्त्रं परिधाय पवित्रेष्टलघुविचित्रभूषणवती संस्पृश्य मङ्गलान्युचितामर्च्चयित्वा च देवतां शिखिनः शुक्लवाससो ब्राह्मणान् स्वस्तिवाचयित्वा कुमारमहतेन शुचिवाससाच्छादयेत्। प्राक्शिरसमुदक्शिरसं वा संवेश्य देवतापूर्व्वं द्विजातिभ्यः प्रणमतीत्युक्त्वा कुमारस्य पिता द्वे नामनी कारयेत् नाक्षत्रिकं नामाभिप्रायिकञ्च"।

"कृते च नामकर्म्मणि कुमारं परीक्षितुमुपक्रमेदायुषः प्रमाणज्ञानहेतोः। तत्रेमान्यायुष्मतां कुमाराणां लक्षणानि भवन्ति तद्यथा—एकैकजा मृदवोऽल्पा स्निग्धाः सुबद्धमूलाः कृष्णाः केशाः प्रशस्यन्ते। स्थिरा बहुला त्वक् प्रकृत्या हतिसुसम्पन्नमशीषत्प्रमाणातिरिक्तमनुरूपमातपत्रनिभं शिरः

यत्रोपमं शिरः प्रशस्यते । व्यूढं दृढं समं सुश्लिष्टशङ्खसन्ध्यूर्द्धव्यञ्जनमुपचितं वलिनमर्द्धचन्द्राकृतिललाटं बहलौ विपुलसमपिठौ समौ नीचौ वृद्धौ पृष्ठतोऽवनतौ सुश्लिष्टकर्णपुटकौ महाच्छिद्रौ कर्णौ ईषत् प्रलम्बिन्यावसङ्गते समे संहते महत्यौ भ्रुवौ समे समाहितदर्शने व्यक्तभागविभागे बलवती तेजसोपपन्ने स्वाङ्गोपाङ्गे चक्षुषी । ऋज्वी महोच्छ्वासावंशसम्पन्नेषदवनताग्रा नासिका । महदृजु-सुनिविष्टदन्तमास्यम् । आयामविस्तरोपपन्ना श्लक्ष्णा तन्वी प्रकृतियुक्ता पाटलवर्णा जिह्वा । श्लक्ष्णं युक्तोपचयमुष्णोपपन्नं रक्तं तालु । महानदीनः स्निग्धोऽनुनादी गम्भीरसमुत्थो धीरस्वरः । नातिस्थूलौ नातिकृशौ विस्तारोपपन्नावास्यप्रच्छादनौ रक्तावोष्ठौ । महत्यौ हनुवृत्तौ । नातिमहती ग्रीवा । व्यूढमुपचितमुरो गूढं जत्रु पृष्ठवंशश्च । विप्रकृष्टान्तरौ स्तनौ, असंपातिनी स्थिरे पार्श्वे, वृत्तपरिपूर्णायतौ बाहू, सक्थिनी अङ्गुलयश्च । महदुपचितं पाणिपादम् । स्थिरावृत्ताः स्निग्धास्ताम्राः तुङ्गाः कूर्म्माकाराः करजाः, प्रदक्षिणावर्त्ता सोत्सङ्गा च नाभिः । नाभ्युरस्त्रिभागहीना समासमुपचितमांसा कटीवृत्तौ स्थिरोपचितमांसौ नात्युन्नतौ नात्यवनतौ स्फिचावनुपूर्व्ववृत्तौ उपचययुक्तावूरू । नात्युपचिते नात्यपचिते एणीपदे प्रगूढसिरास्थिसन्धी जङ्घे । नात्युपचितौ नात्यपचितौ गुल्फौ पूर्व्वोपदिष्टगुणौ पादौ कूर्म्माकारौ । प्रकृतियुक्तानि वात-मूत्र-पुरीषगुह्यानि तथा स्वप्नजागरणायासस्मितरुदितस्तनग्रहणानि । यच्च किञ्चिदन्यदपि अनुक्तमस्ति तदपि सर्व्वं प्रकृतिसम्पन्नमिष्टं विपरीतं पुनरनिष्टमिति दीर्घायुर्लक्षणानि” ॥ * ॥

अतोऽनन्तरं कुमारागारविधिमनुव्याख्यास्याम ॥

“वास्तुविद्याकुशलः प्रशस्तं रम्यतमस्कं निवातं प्रवातैकदेशं दृढमपगतश्वापदपशुदंष्ट्रिमूषिकापतङ्गं सुसविभक्तसलिलोदूखलमूत्रवर्च्चस्थानस्नानभूमिमहानसमृतुसुखं यथर्त्तुशयनासनास्तरणसम्पन्नं कुर्य्यात् । तथा सुविहितरक्षाविधानबलिमङ्गलहोमप्रायश्चित्तं शुचिवृद्धवैद्यानुरक्तजनसम्पूर्णमिति कुमारागारविधिः ।

शयनास्तरणप्रावरणानि कुमारस्य मृदुलघुशुचिसुगन्धीनि स्युः । स्वेदमलजन्तुमन्ति मूत्रपुरीषोपसृष्टानि च वर्ज्यानि स्युः ।

असति सम्भवेऽन्येषां तान्येव च सुप्रक्षालितोपधानानि सुधूपितानि सुशुद्धशुष्काण्युपयोगं गच्छेयुः ।

धूपनानि पुनर्वाससां शयनास्तरणप्रावरणानाञ्च यवसर्षपातसी-हिङ्गु-गुग्गुलुवचाचोरकवयःस्थागोलोमीजटिलापलङ्कषाशोकरोहिणीसर्पनिर्म्मोकानि घृतसम्प्रयुक्तानि स्युः ।

मणयश्च धारणीयाः कुमारस्य खड्गरुरुगवयवृषभाणां जीवतामेव दक्षिणेभ्यो विषाणेभ्योऽग्राणि गृहीतानि स्युः । मन्त्राद्याश्चौषधयो जीवकर्षभकौ यान्यप्यन्यानि ब्राह्मणाः प्रशंसेयुः ।

क्रीडनकानि खल्वस्य तु विचित्राणि घोषवन्त्यभिरामाणि अगुरूण्यतीक्ष्णाग्राणि अनास्यप्रवेशीनि अप्राणहराणि अवित्रासनानि स्युः ।

नह्यस्य वित्रासनं साधु तस्मात्तस्मिन् रुदत्यभुञ्जाने वान्यत्र विधेयतामगच्छति राक्षसपिशाचपूतनाद्यानां नामान्याह्वयता कुमारस्य वित्रासनार्थं नामग्रहणं न कार्य्यं स्यात् ।

यदि त्वातुर्य्यं किञ्चित् कुमारमागच्छेत् तत्प्रकृतिनिमित्तपूर्व्वरूपलिङ्गोपशयविशेषैस्तत्तोऽनुबुध्य सर्व्वविशेषानातुरौषध-देश-कालाश्रयानवेक्षमाणश्चिकित्सितुमारभेतैनं मधुरमृदुलघुसुरभिशीतसङ्करं कर्म्म प्रवर्त्तयन्नेव सात्म्याहि कुमारा भवन्ति तथा ते शर्म्म लभन्ते चिराय रोगत्वेऽरोगवृत्तमातिष्ठेत् देशकालात्मगुणविपर्य्ययेण वर्त्तमानः ।

क्रमेणासात्म्यानि परिवर्ज्योपयुञ्जानः सर्व्वाण्यहितानि वर्जयेत्तथा बलवर्णशरीरायुषां सम्पदमवाप्नोतीति ।

एवमेनं कुमारमायौवनप्राप्तेर्धर्म्मार्थकुशलागमनाच्चानुपालयेदिति पुत्राशिषां समृद्धिकरं कर्म्म व्याख्यातम् । तदाचरन् यथोक्तैर्विधिभिः पूजां यथेष्टं लभतेऽनसूयक इति” ॥

इति शारीरस्थानेऽष्टमेऽध्याये चरकेणोक्तम् ॥ * ॥

“अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्म्मणि कृते मधुसर्पिरनन्ताब्राह्मीरसेन सुवर्णचूर्णमङ्गुल्यनामिकया लेहयेत्ततो बलातैलेनाभ्यज्य क्षीरवृक्षकषायेण सर्व्वगन्धोदकेन वा रूप्यहेमप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादेशं यथा विभवञ्च ॥

क्षीराहाराय सर्पिः पाययेत् सिद्धार्थकवचामांसीपयस्यापामार्गशतावरीसारिवाब्राह्मीपिप्पलीहरिद्राकुष्ठसैन्धवसिद्धं क्षीरान्नमादाय मधुकवचा पिप्पली चित्रकत्रिफला सिद्धमन्नमादाय द्विपञ्चमूलीक्षीर-तगर-भद्रदारु-मरिच मधु-विडङ्ग-द्राक्षा-द्विब्राह्मी सिद्धम् । तेनारोग्यबलमेधायूंषि शिशोर्भवन्ति ॥

बालं पुनर्गात्रसुखं गृह्णीयात् नचैनं तर्जयेत् सहसा न प्रतिबोधयेत् वित्रासभयात् सहसा नापहरेदुत्क्षिपेद्वा वातादिविघातभयात् नोपवेशयेत् कौब्जभयात् नित्यञ्चैनमनुवर्त्तेत प्रियशतैरजिघांसुः । एवमनभिहतमनास्त्वभिवर्द्धते नित्यमुदग्रसत्त्व-सम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति । वातातपविद्युत्प्रभापादपलताशून्यागारनिम्नस्थानगृहच्छायादिभ्यो दुर्ग्रहोपसर्गतश्च बालं रक्षेत् ।

“नाशुचौ विसृजेद्बालं नाकाशे विषमे न च ।
नोष्ममारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा ।
दद्यादास्तन्यपर्य्याप्तेर्बालानां वीक्ष्य मात्रया ॥

यथमासञ्चैनमन्नं प्राशयेल्लघु हितञ्च । नित्यमवरोधरतश्च स्यात् कृतरक्ष उपसर्गभयात् । प्रयत्नतश्च ग्रहोपसर्गेभ्यो रक्ष्या बाला भवन्ति ॥

अथ कुमार उद्विजते त्रस्यति रोदिति नष्टसंज्ञो भवति नखदशनैर्धात्रीमात्मानञ्च परिणुदति दन्तान् खादति । कूजति जृम्भते भ्रुवौ विक्षिपत्यूर्द्ध्वं निरीक्षते फेनमुद्वमति सन्दष्टौष्ठः क्रूरो भिन्नामवर्च्चा दीनार्त्तस्वरो निशि जागर्त्ति दुर्ब्बलो म्लानाङ्गो मत्स्यच्छुच्छुन्दरिमत्कुणगन्धो यथा पुरा धात्र्याः स्तन्यमभिलषति तथा नाभिलषतीति सामान्येन ग्रहोपसृष्टलक्षणमुक्तं विस्तरेणोत्तरे वक्ष्यामः”॥

इति सुश्रुतेनोत्तरतन्त्रे १० अध्याये उक्तम् ॥)

वरुणवृक्षः । इति मेदिनी ॥ अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥ सिन्धुनदः । इति शब्दरत्नावली ॥ (सनकसनातनसनत्सनन्दा एते चत्वारोऽपि बाल्यत एव ब्रह्मचारित्वात् कुमारा इत्युच्यन्ते ॥ त इव ये च कौमारतो ब्रह्मचारिणस्तेऽपि विज्ञेयाः । यथा, मनौ । ५ । १५९ ।

“अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्” ॥

मङ्गलग्रहः । यथा, नवग्रहस्तोत्रे ।

“धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम्” ॥

शुक्तिमत्पर्व्वतोद्भूतऋषिकुल्याविशेषः ।
यथा, विष्णुपुराणे ।

“ऋषिकुल्या कुमाराद्याः शुक्तिमत्पादसम्भवाः”॥

शाकद्वीपाधिपतेः सप्तपुत्राणामेकः । तन्नाम्ना तद्वर्षस्यापि तथा संज्ञा ।
यथा, विष्णुपुराणे २ । ४ । ५९-६० ।

“शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः ।
सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः ॥
जलदश्च कुमारश्च सुकुमारो मनीचकः ।
कुसुमोदश्च मौदाकिः सप्तमश्च महाद्रुमः ॥
तत्संज्ञान्येव तत्रापि सप्तवर्षाण्यनुक्रमात्” ॥

मन्त्रविशेषः । यथा, तन्त्रसारधृतविश्वसारवचनम् ।

“कृतवीर्य्यस्य भीमस्य प्रध्वस्तो बालकः पुनः ।
कुमारश्च युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा” ॥

स्वरोदयोक्तबालचक्रस्थस्वरभेदः । बालोपद्रवकग्रहभेदः । यथा, सुश्रुते उत्तरतन्त्रे २७ अः ॥

“स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा ।
बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः” ॥

त्रि, सुन्दरः ॥)

कुमारकः, पुं, (कुमार + संज्ञायां स्वार्थे वा कन् ।) वरुणवृक्षः । इत्यमरः । २ । ४ । २५ ॥ बालकः ॥ इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १२८ । २२ ।

“प्रहारवेगाभिहता द्रुमा व्याघूर्णितास्तत ।
सफलाः प्रपतन्ति स्म द्रुतं स्रस्ताः कुमारकाः” ॥

राजकुमारः । यथा महाभारते । १ । १३३ । ७ ।

“ते तं दृष्ट्वा महात्मानमुपगम्य कुमारकाः ।
मनोत्साहक्रियात्मानो ब्राह्मणं पर्य्यवारयन्” ॥)

कौरव्यवंशोद्भवो नागविशेषः । यथा, महाभारते १ । आस्तीकपर्व्वणि ५७ । १३ ।

"एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः ।
बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्" ॥)

कुमारजीव, पु, (कुमारं जीवयतीति । जीव + णिच् + अण् ।) पुत्रञ्जीवकवृक्षः । इति रत्नमाला । जीयापुता इति भाषा ॥

कुमारपालः, पु, (कुमारं पालयति । पाल् + णिच् + अच् ।) शालिवाहनराजः । इति हेमचन्द्रः ॥ (शिशुपालके, त्रि ।)

कुमारभृत्या, स्त्री, (कुमारस्य गर्भस्य निर्व्विघ्नप्रसवार्थं गर्भचिकित्साकुशले भिषग्भिः धात्र्या वा भृत्या पालनम् ।) गर्भिण्याः परिचर्य्या । इति हारावली ॥ तत्पर्य्यायः । बालतन्त्रम् २ गर्भिण्यवेक्षणम् ३ । इति त्रिकाण्डशेषः ॥

(यथा, रघुः । ३ । १२ ।
"कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिराप्तैरथ गर्भभर्म्मणि ।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव" ॥)

कुमारयु, पुं, (कुमारं कौमारं याति । मितद्र्वादित्वात् कुः निपातनात् साधु ।) युवराजः । इत्युणादिकोषः ॥

कुमारवाही, [न्] पु, (कुमारं कार्त्तिकेयं वहति । वह + णिनि ।) मयूरः । इति शब्दरत्नावली ॥

कुमारसू, स्त्री, (कुमारं कार्त्तिकेयं सूते । सू + क्विप् ।) गङ्गा । इति हेमचन्द्रः ॥ दुर्गा । इति व्युत्पत्तिलभ्योऽर्थः ॥ (पुं वह्निः । यथा, महाभारते । २ । सहदेवदिग्विजये ३१ । ४३ ।
"वैश्वानरस्त्वं पिङ्गेश प्लवङ्गो भूरितेजसः ।
कुमारसूस्त्वं भगवान् रुद्रगर्भो हिरण्यकृत्" ॥)

कुमारिका, स्त्री, (कुमारयति आनन्देन क्रीडति । कुमार + णिच् + ण्वुल् + टाप् अत इत्वम् ।) कुमारी । इति शब्दरत्नावली ॥ नवमल्लिका । इति रत्नमाला ॥ भारतवर्षस्य खण्डविशेषः । यथा,—
"वर्षाव्यवस्थितिरिहैव कुमारिकाख्ये
शेषेषु चान्त्यजजना निवसन्ति सर्व्वे" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥ स्थूलैला । इति राजनिर्घण्टः ॥ (ओषधिविशेषः । घृतकुमारी इति ख्याता । अस्या व्यवहारो यथा त्रैलोक्यचिन्तामणिरसे द्रष्टव्यः ।
"खल्वे द्रवेणैव कुमारिकायाः" ।
इति रसेन्द्रसारसङ्ग्रहे वातव्याध्यधिकारे । नेत्रमण्डलस्थप्रतिविम्बविशेषः । यथा,—
"दृष्ट्वा यस्य विजानीयात् पन्नरूपां कुमारिकाम् ।
प्रतिच्छायामयीमक्ष्णो नैनमिच्छेच्चिकित्सितुम्" ॥
इति चरके इन्द्रियस्थाने ७ अध्याये ॥)

कुमारी, स्त्री, (कुमार + प्रथमवयोवचनत्वात् स्त्रियां ङीष् ।) द्वादशवर्षीया कन्या । यथा,—
"अष्टवर्षा भवेद्गौरी दशवर्षा च कन्यका ।
सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते" ॥
इति स्मृतौ भेदः । इह त्वभेदोपचारात् कन्या कुमारीत्यमरः ॥ इति भरतः ॥ आगमे तु कुमारीपूजने अजातपुष्पा चेत् तदा षोडशवर्षपर्य्यन्तवयस्का । तस्या वयोभेदेन नामभेदो । यथा,—
"एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती ।
त्रिवर्षा तु त्रिधामूर्त्तिश्चतुर्व्वर्षा तु कालिका ॥
सुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत् ।
सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका ॥
नवभिः कालसङ्कर्षा दशभिश्चापराजिता ।
एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी ॥
त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका ।
क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका मता ॥
एवं क्रमेण सम्पूज्या यावत् पुष्पं न जायते ।
पुष्पितापि च सम्पूज्या तत्पुष्पादानकर्म्मणि" ॥
तत्पूजाविधिर्यथा ।
"अथान्यत् साधनं वक्ष्ये महाचीनक्रमोद्भवम् ।
येनानुष्ठितमात्रेण शीघ्रं देवी प्रसीदति ॥
अष्टम्याञ्च चतुर्द्दश्यां कुह्वां वा रविसङ्क्रमे ।
कुमारीपूजनं कुर्य्याद्यथा विभवमात्मनः ॥
वस्त्रालङ्करणाद्यैश्च भक्ष्यैर्भोज्यैः सविस्तरैः ।
पञ्चतत्त्वादिभिः सम्यग्देवीबुद्ध्या सुसाधकः" ॥
इत्यन्नदाकल्पः ॥ * ॥ (स्वनामख्याता परीक्षित्पुत्रस्य भीमसेनस्य पत्नी । यथा,—महाभारते १ । पूरुवंशानुकीर्त्तने ९५ । ४३ ।
"भीमसेनः खलु कैकेयीमुपयेमे कुमारीं नाम तस्यामस्य जज्ञे प्रतिश्रवा नाम" ॥)
पार्व्वती । नवमल्लिका । नदीविशेषः । (इयं हि शाकद्वीपान्तर्गतसप्तनदीनामेका । यथा, विष्णुपुराणे २ । ४ । ६५ ।
"नद्यश्चात्र महापुण्याः सर्व्वपापभयापहाः ।
सुकुमारी कुमारी च नलिनीधेनुका च या" ॥)
सहा । घृतकुमारी इति ख्याता । अपराजिता । जम्बुद्वीपः । इति मेदिनी ॥ सीता । इति हेमचन्द्रः ॥ वन्ध्याकर्कोटकी । स्थूलैला । मोदिनीपुष्पम् । तरणीपुष्पम् । श्यामापक्षी । इति राजनिर्घण्टः ॥

कुमाल तृ क केलौ । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-पर-अक-सेट् ।) कृखी । अचुकुमालत् । इति दुर्गादासः ॥

कुमालक, पु, (कुमाल + सञ्ज्ञायां कन् । कुमाल तृक केलौ + ण्वुल् वा ।) सौवीरदेशः । इति हेमचन्द्रः ॥

कुमुत्, [द्] स्त्री, (कौ पृथिव्यां मोदते इति । कु + मुद + क्विप् ।) कुमुदम् । इति मेदिनी । हेला इति भाषा । रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥ (यथा, भागवते ३ । २३ । ३८ ।
"तस्मिन् उत्कचकुमुद्गणवानमीव्य
स्ताराभिरावृत इवोडुपतिर्नभस्यः" ॥)
कुमुदस्य कन्दविशेषः । शालुक इति यस्य ख्यातिः । अस्य पर्य्याया यथा,—
"कैरवं चन्द्रकान्तञ्च गर्दभं कुमुदं कुमुत्" ॥
इति वैद्यकरत्नमालायाम् ॥)

कुमुत् [द्] त्रि, (कुत्सिते विषये मुत् हर्षो यस्य कुत्सिता मुद् यस्य वा ।) कृपणः । इति मेदिनी ॥ अप्रीतः । इति शब्दरत्नावली ॥

कुमुद, क्ली, (कौ मोदते । मुद् "इगुपधेति" । ३ । १ । १३५ । कः ।) श्वेतोत्पलम् । हेला सुँदि इत्यादि भाषा ॥ (यथा, रामायणे ५ । ५५ । १ ।
"सचन्द्रकुमुदं रम्यं सार्कंकारण्डवं शुभम् ।
पुष्यश्रवणकादम्बमभ्रशैवलशाद्वलम्" ॥)
तत्पर्य्यायः । कैरवम् २ । इत्यमरः । १ । १० । ३७ । चन्द्रकान्तम् ३ गर्दभम् ४ कुमुत् ५ । इति रत्नमाला ॥ धवलोत्पलम् ६ कह्लारम् ७ शीतलकम् ८ शशिकान्तम् ९ इन्दुकमलम् १० चन्द्रिकाम्बुजम् ११ गन्धसोमम् १२ । इति शब्दरत्नावली ॥ अपि च ।
"श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं तथा ।
कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । शीतलत्वम् । स्वादुत्वम् । पाके तिक्तत्वम् । कफरक्तदोषदाहश्रमपित्तनाशित्वञ्च । इति राजनिर्घण्टः । रक्तपद्मम् । इति मेदिनी ॥ रूप्यम् ॥ इति हेमचन्द्रः ॥

कुमुद, पु, (कुत्सिते नैर्ऋतकोणे मोदते इति । कु + मुद + क ।) नैर्ऋतकोणस्थदिग्हस्ती । इत्यमरः । १ । ३ । ३ ॥ वानरविशेषः । (अयं खलु रामचन्द्रस्य सेनापतिवानराणां एकतमः । यथा, रामायणे । ६ । २ । २८ ।
"नाम्ना सङ्कोचनो नाम नानानगयुतो गिरिः ।
तत्र राज्यं प्रशास्त्येष कुमुदो नाम वानरः ।
योऽसौ शतसहस्राणि सहस्रं परिकर्षति" ॥)
नागविशेषः । (यथा, महाभारते । १ । ३५ । १५ ।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः ।
कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा" ॥)
दैत्यभेदः । सितोत्पलम् । इति हेमचन्द्रः ॥ कर्पूरः । इति राजनिर्घण्टः ॥ ध्रुवकभेदः । यथा,—
"एकाविंशतिवर्णाङ्घ्रिर्भवेत् शृङ्गाररके रसे ।
कुमुदोऽमोऽस्तदश्चैव ताले तुरगलीलके" ॥
इति सङ्गीतदामोदरः ॥ (कुं पृथ्वीं भूमिं वा मोदयति । अन्तर्भूतणिजन्तात् मुदः कः । विष्णुः । यथा, महाभारते । १३ । १४९ । ७६ ।
"शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः" ॥
विष्णुपार्षदः । यथा, भागवते । ८ । २१ । १० ।
"कुमुदः कुमुदाक्षश्च विश्वक्सेनः पतत्त्रिराट्" ॥
मेरोरुपष्टम्भगिरिविशेषः । स चायुतयोजनविस्तृतः । यथा, भागवते ५ । १६ । १२ ।
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इति । अयुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपकॢप्ताः" ॥ शाल्मलद्वीपान्तर्गतप्रथमपर्व्वतः । यथा, विष्णुपुराणे २ । ४ । २६ ।
"कुमुदश्चोन्नतश्चैव तृतीयश्च वलाहकः" ॥
आनूपजन्तुविशेषः । यथा,—
"हंससारसचक्राह्वा कुमुदाश्च कपिञ्जलाः ।

ल्यानुपाल्लेषु विज्ञेया श्लेष्मणा वातकोपना" ॥

इति हारीते प्रथमस्थाने ११ अध्याय ॥)

कुमुदबान्धवः, पु, (कुमुदस्य बान्धवः ।) चन्द्र । कर्पूर । इत्यमर । १ । ३ । १३ ॥

कुमुदवती, स्त्री, (कुमुदानि सन्त्यस्या इति । मतुप् मस्य व ङीप् ।) कुमुद्वती । कुमुदसमूह । इत्य मरटीकाया भरत ॥

कुमुदा, स्त्री, (कुत्सित मोदते । कु+मुद+क । टाप् च ।) कुम्भिका । पाना इति भाषा । गम्भारीवृक्ष । इति मेदिनीकरहेमचन्द्रौ ॥

(अस्या पर्य्याया यथा,—

"श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका ।

कुमुदा च सदा भद्रा कट्फला ह्यामन्तिका" ॥

इति वैद्यकरत्नमालायाम् ॥) श्राणपर्णीवृक्ष । धातकीवृक्ष । कट्फल । इति राजनिर्घण्ट ॥

कुमुदावास, पु, (कुमुदाना आवास । कुमुदानि आवसन्त्यत्र वा । आ+वस्+अधिकरणे घञ् ।) कुमुदप्रायदेश । इति हेमचन्द्र ॥

कुमुदिका, स्त्री, (कौ भूमौ मोदते इति । मुद+ कर्त्तरि ण्वुल् टाप् अत इत्वञ्च ।) कट्फल । इत्यमर । २ । ४ । ४० ॥ (अस्या पर्य्याया यथा,—

"कट्फल सोमवल्कश्च कैटर्य्य कुम्भिकापि च ।

श्रीपर्णिका कुमुदिका भद्राभद्रवतीति च" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्य कट्फलशब्दे व्यक्ता ॥)

कुमुदिनी, स्त्री, (कुमुदानि सन्त्यस्याम् । कुमुद+ इनि ङीप् ।) कुमुदयुक्तपुष्करिण्यादि । कुमुदसमूह । कुमुदलता । इति भरत ॥

(यथा भ्रमराष्टके । ७ ।

"अलिरसौ नलिनीवनवल्लभ

कुमुदिनी कुलकेलिकलारस ।

विधिवशेन विदेशमुपागत

कुटजपुष्परस बहु मन्यते" ॥)

तत्पर्य्याय । कुमुद्वती २ । इत्यमर । १ । १० । ३९ ॥ उत्पलिनी । इति राजनिर्घण्ट ॥ छोट सुँदि इति भाषा ॥

कुमुदिनीपति, पु, (कुमुदिन्या पति वल्लभ ।) चन्द्र । इति हेमचन्द्र ॥

कुमुदी, स्त्री, (कुमुद+स्त्रिया ङीष् ।) कट्फल । इति शब्दरत्नावली ॥

(अस्या गुणादय कट्फलशब्दे ज्ञातव्या ॥)

कुमुदेश, पु, (कुमुदाना ईश ।) चन्द्र । इति शब्दरत्नावली ॥

कुमुद्वती, स्त्री, (कुमुद + "कुमुदनडवेतसेभ्यो ड्मतुप्" । ४ । २ । ८७ । इति ड्मतुप् "मादुपधायाश्च" । ८ । २ । ९ । इति मस्य व । उगितश्चेति ङीप् ।) कुमुदिनी । इत्यमर । १ । १० । ३८ ॥

(यथा, भट्टिकाव्ये । २ । ६ ।

"प्रभातवाताहतिकम्पिताकृति

कुमुद्वतीरेणुपिशङ्गविग्रहम् ।

निरास भृङ्ग कुपितेव पद्मिनी

न मानिनीसंसहतेऽन्यसङ्गमम्" ॥

अस्या पर्य्याया यथा,—

"कुमुद्वती कैरविका तथा कुमुदिनीति च" ।

गुणाश्चास्या कुमुदिनीशब्दे ज्ञेया । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

कुमुदाख्यनागराजस्य यवीयसी स्वसा सा तु रामचन्द्रपुत्त्रस्य कुशस्य पत्नी ।

यथा, रघु १७ । ६ ।

"त स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।

अन्वगात् कुमुदानन्द शशाङ्कमिव कौमुदी" ॥

क्रौञ्चद्वीपान्तर्गताना सप्तनदीनामेका नदी ।

यथा, विष्णुपुराणे २ । ४ । ५५ ।

"गौरी कुमुद्वती चैव सन्ध्यारात्रिर्मनोजवा ।

क्षान्तिश्च पुण्डरीका च सप्तैता वर्षनिम्नगा" ॥)

कुमुद्वान्, त्रि, (कुमुद+"कुमुदनडवेतसेभ्य" । ४ । २ । ८७ । इति ड्मतुप् मस्य व ।) कुमुदबहुलदेश । इत्यमर । २ । १ । ९ ॥

(यथा रघुवंशे ४ । १९ ।

"हससश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।

विभूतयस्तदीयाना पर्य्यस्ता यशसामिव" ॥)

कुमोदक, पु, (कु पृथ्वीं मोदयति । कु+मुद+ णिच्+ण्वुल् । पृथिव्या भारावतरणादिलीलाकर्म्मभि सर्व्वेषामानन्दकारकत्वात् तस्य तथात्वम् ।) विष्णु । इति हेमचन्द्र ॥

कुम्प, त्रि, (कुम्पति कुम्पयति वा । कुपि वेष्ठने+ अच् इदित्वात् नुम् ।) बाहुकुण्ठ । इति जटाधर । कोणा इति भाषा ॥

कुम्बा, स्त्री, (कुबि वेष्टने+अच् टाप् च ।) सुगहनावृति । अस्पृश्यादिदर्शनवारणाय वेष्टनम् । इत्यमर । २ । ७ । १८ ॥ (यथा तैत्तिरीयसंहितायाम् । "तस्मिन्नुदीचीनकुम्बा शम्या निदधाति" ॥ तथा शङ्करकविकृते अम्बाष्टके । ७ ।

"कुम्बावतीसमविडम्बा गलेन नवतुम्बाभवीणाविधा श वाडलेयशशिबिम्बाभिराममुखसम्बाधितस्तनभरा" ॥ इति ॥)

कुम्भ, स्त्री, (कु भूमि उम्भति गन्धेन पूरयति । कु+ उनभ पूरणे+अच् । शकन्ध्वादित्वात् साधु ।) गुग्गुलु । इत्यमर । २ । ३ । १२४ ॥ त्रिवृत् । इति हेमचन्द्र ॥

कुम्भ, पु, (कु भूमि उम्भति जलेन । उनभ + अच् । शकन्ध्वादित्वात् साधु ।) घट । अस्य परिमाण कलसशब्दे द्रष्टव्यम् ॥ गजकुम्भ । हस्तिशिरस पिण्डद्वयम् । इत्यमर । २ । ३ । १३४ ॥

(यथा प्रसन्नराघवे,—"तैं कि मत्तकरीन्द्रकुम्भकुहरे नारोपणीया करा" ॥) कुम्भकर्णपुत्त्र ।

(यथा, गो रामायणे । ५ । ७९ । १५ ।

"सुतोऽय कुम्भकर्णस्य कुम्भ परमकोपन ।

अब्रवीत् परमक्रुद्धो रावण लोकरावणम्" ॥)

वेश्यापति । इति विश्वमेदिन्यौ ॥ समाधिविशेष । प्राणायामाङ्गकुम्भक इति यावत् । इति धरणी ॥

(प्रह्लादपुत्त्र । यथा महाभारते १ । ६५ । १९ ।

"प्रह्लादस्य त्रय पुत्त्रा ख्याता सर्व्वत्र भारत ।

विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ।" ॥

विष्णु । यथा महाभारते १३ । १४९ । ८१ ।

"अर्चिष्मानर्चित कुम्भो विशुद्धात्मा विशोधन" ॥)

द्रोणद्वयपरिमाणम् । ६४ सेर इति भाषा । तत्पर्य्याय । सूर्प २ । इति वैद्यकपरिभाषा ॥

मेषादिद्वादशराश्यन्तर्गतैकादशराशि । तस्य पर्य्याय । हृद्रोग २ । इति दीपिका ॥ स च धनिष्ठाशेषार्द्धसम्पूर्णशतभिषायुक्तपूर्व्वभाद्रपदा प्रथमपादत्रयेण भवति । अस्याधिष्ठात्री देवता कलसधारी पुरुष । स तु शीर्षोदय । चरणरहित । मध्यसन्तान । मध्यमस्त्रीसङ्ग । कर्व्वूरवर्ण । वनचारी । वायुराशि । स्निग्ध । उष्ण । अर्द्धस्वर । वातपित्तकफप्रकृति । शूद्रवर्ण । पश्चिमदिक्स्वामी । ह्रस्वाङ्ग । तत्र जातफलम् ॥

"मेधावी हस्तिघोटकधनेश्वरो दन्तपीडायुक्त स्नेहशून्य" । इति ज्योतिषम् । जन्मकालीनचन्द्राश्रिततद्राशिफलम् ।

"खलसततासहितोऽन्यसुतप्रिय

कुशलताकलितोऽतिविचक्षण ।

कलशगामिनि शीतकरे नर

सदसि सज्जनमानसरोचन" ॥

इति कोष्ठीप्रदीप ॥ तस्योदये तन्नामकलग्न भवति । तस्य गणितप्राप्तपरिमाण यथा । दशव्यङ्गुलाधिक पञ्चाङ्गुलप्रभे देशे वर्त्तमानेनविशायनाशे अष्टपञ्चाशत्पलाधिकत्रिदण्डा । इति ज्योतिषम् । तत्र जातफलम् ।

"कुम्भलग्ने समुद्भूतश्चलचित्तोऽतिसौहृद ।

परदाररतो नित्य सत्त्वकायो महासुखी" ॥

इति कोष्ठीप्रदीप ॥

कुम्भक, पु, (कुम्भ इव कायति प्रकाशते निश्चलत्वात् । कै+क । यद्वा कुम्भ+स्वार्थे क ।) दक्षिणहस्तेन नासापुटद्वय धृत्वा प्राणायामाङ्ग वायुस्तम्भनम् । इति तन्त्रम् ॥ (मातङ्गलयाश्वव-स्त्वादौ तु ।

"कुम्भक पूरको रेच प्राणायामस्त्रिलक्षण ।

पूरक पूरणा वायो कुम्भक स्थापन क्वचित् ॥

वह्निर्निःसारण तस्य रेचक परिकीर्त्तित ॥

दक्षिणे रेचयेद्वायु वामेन पूरितोदर ।

कुम्भेन धारयेन्नित्य प्राणायाम विदुर्बुधा ॥

अङ्गुष्ठेन पुट ग्राह्य नासया दक्षिण पुन ।

कनिष्ठानामिकाभ्याञ्च वाम प्राणस्य सग्रहे ॥

अङ्गुष्ठतर्जनीभ्यान्तु ऋग्वेदी सामगायन ।

अङ्गुष्ठानामिकाभ्यान्तु ग्राह्य सर्व्वैरथर्व्वभि" ॥)

(तथा च, हठयोगदीपिकायाम् । २ । ४३ ।

"तत्सिद्धये विधानज्ञाश्चित्रान् कुर्व्वन्ति कुम्भकान् ।

विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धिमाप्नुयात्" ॥

"तत्सिद्धये उन्मन्यवस्थासिद्धये" । इति तट्टीका ॥ अस्य भेदा यथा तत्रैव २ । ४४ ।

"सूर्य्यभेदनमुज्जायी सीत्कारी सीतली तथा ।

भस्त्रिकाभ्रामरीमूर्च्छा प्लाविनीत्यष्टकुम्भका" ॥

तथा पुनस्तत्रैव २ । ७१ ।

"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकं ।

सहितः केवलश्चेति कुम्भको द्विविधो मतः” ॥*॥)
कुम्भकारः, पुं, (कुम्भं करोति । कुम्भ + कृ + “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) जातिविशेषः । कुमोर इति भाषा । स तु शूद्रागर्भे विश्वकर्म्मौरसाज्जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । कुलालः २ । इत्यमरः । २ । १० । ६ ॥ चक्री ३ । इति जटाधरः ॥ (एतज्जातिविषये तु पुराणभेदेन मतभेदो दृश्यते । यथा ।
“वैश्यायां विप्रतश्चौरात् कुम्भकारः स उच्यते” ॥
“मालाकाराच्चर्म्मकार्य्यां कुम्भकारो व्यजायत” ॥
“पट्टीकाराच्च तैलिक्यां कुम्भकारो बभूव ह” ॥
इत्यादि बहुलमतमस्ति बाहुल्यभिया नास्माभिरुद्ध्रियते ॥) कुक्कुभपक्षी । इति हेमचन्द्रः ॥
कुम्भकारिका, स्त्री, (कुम्भस्येव कारः आकारो यस्याः । कुम्भकार + कप् + टाप् अत इत्वञ्च ।) कुलत्था । इति राजनिर्घण्टः ॥ (कुम्भं करोतीति । कुम्भ + कृ + ण्वुल् स्त्रियां टाप् अत इत्वम् । कुम्भकारस्त्री । इति व्युत्पत्तिलब्धोऽर्थः ।)
कुम्भकारी, स्त्री, (कुम्भस्येव कारः आकारो यस्याः । गौरादित्वात् ङीष् ।) कुलत्थाञ्जनम् । कुलत्थिका । इति राजनिर्घण्टः ॥ मनःशिला । इति जटाधरः ॥ (कुम्भकारस्य पत्नीति ङीष् ।) कुम्भकारभार्य्या ॥
कुम्भतुम्बी, स्त्री, (कुम्भ इव तुम्बी ।) अलाबुप्रभेदः । गोल लाउ इति भाषा । तत्पर्य्यायः । कुम्भालाबुः २ गोरक्षतुम्बी ३ गोरक्षी ४ नागालाबुः ५ घटाभिधा ६ घटालाबुः ७ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तश्वासकफास्रज्वरकाशनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥
कुम्भदासी, स्त्री, (कुम्भस्य वेश्यापतेर्दासी ।) कुट्टनी । इति शब्दरत्नावली ॥
कुम्भयोनिः, पुं, (कुम्भः योनिर्जन्मस्थानं यस्य ।) अगस्त्यमुनिः । (यथा रघुः ४ । २१ ।
“प्रससादोदयादम्भः कुम्भयोनेर्महौजसः” ॥)
वशिष्ठमुनिः । (एतयोर्मुनिसत्तमयोरुत्पत्तिविवरणं तु उर्व्वशीदर्शने कन्दर्पपीडितयोर्मित्रावरुणयोः स्खलितेनैकस्मिन् कुम्भे सङ्गतेन रेतसा यथा घटितं तथा तत् रामायणोत्तरकाण्डे ६६—६७ सर्गे विशेषतो द्रष्टव्यम् ॥) द्रोणाचार्य्यः । इति मेदिनी ॥ (अस्य उत्पत्तिकथा यथा महाभारते १ । १३१ । ६-१४ ।
“गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं शंसितव्रतः ॥
सोऽभिषेक्तुं ततो गङ्गां पूर्ब्बमेवागमन्नदीम् ।
महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा ॥
ददर्शाप्सरसं साक्षाद् घृताचीमाप्लुतामृषिः ।
रूपयौवनसम्पन्नां मदद्दप्तां मदालसाम् ॥
तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत ।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
ततोऽस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥
ततः समभवद्द्रोणः कलसे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः ॥)
द्रोणपुष्पीवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, अप्सरोविशेषः । यथा महाभारते । ३ । ४३ । ३० ।
“गोपाली सहजन्या च कुम्भयोनिः प्रजागरा ।
चित्रसेना चित्रलेखा सहा च मधुरस्वना” ॥)
कुम्भला, स्त्री, (कुम्भं कुम्भाकारं लाति आदत्ते । कुम्भ + ला आदाने + क टाप् च ।) मुण्डितिका । इति रत्नमाला ॥ मुण्डिरी इति भाषा ॥ (मुण्डीशब्दे विवृतिरस्या ज्ञेया ॥)
कुम्भवीजक, पुं, (कुम्भ इव वीजं यस्य । ततः स्वार्थे कः ।) रीठाकरञ्जः । इति राजनिर्घण्टः ॥
कुम्भशाला, स्त्री, (कुम्भाय कुम्भनिर्म्माणार्थं या शाला ।) कुम्भनिर्म्माणादिगृहम् । तत्पर्य्यायः । पाकपुटी २ । इति हेमचन्द्रः ॥
कुम्भसन्धि, पुं, (कुम्भयोः सन्धिर्मिलनम् ।) हस्तिकुम्भद्वयमध्यस्थानम् । तत्पर्य्यायः । वारस्तः २ । इति त्रिकाण्डशेषः ॥
कुम्भसम्भव, पुं, (कुम्भः सम्भव उत्पत्तिस्थानं यस्य ।) अगस्त्यमुनिः । इत्यमरः । १ । ३ । २० ॥
(यथा राजेन्द्रकर्णपूरे ७१ ।
“तद्युक्तं ननु कुम्भसम्भव ! भवत् प्रशारहस्तेन यत् याच्ञ याच्ञ तिरोदधन्निरवधिर्विन्ध्योऽपि वन्ध्यः कृतः” ॥ वशिष्ठः । द्रोणः । एतयोरपि कुम्भोत्पत्तेस्तथात्वम् । एतद्विवरणन्तु कुम्भयोनिशब्दे द्रष्टव्यम् ॥)
कुम्भा, स्त्री, (कुः कुत्सिततया निन्दितत्वया उम्भा पूर्त्तिर्देहादेर्भरणं यस्याः । शकन्ध्वादित्वात् साधुः ।) वेश्या । इति शब्दमाला ॥
कुम्भाण्ड, पुं, (कुम्भ इव अण्डं यस्य ।) वाणासुरस्यामात्यविशेषः । इति श्रीभागवतम् ॥
(यथा, हरिवंशे १७५ । १६३ ।
“कुम्भाण्डवचनैरेव दानवेन्द्रः प्रचोदितः ।
वाचं रूक्षामतिक्रुद्धः प्रोवाच वदताम्वरः” ॥
अयञ्च वाणपराजयान्ते श्रीकृष्णप्रसादात् तद्राज्यस्वामी बभूव ॥ यदुक्तं तत्रैव १८३ । २७—३८ ।
श्रीकृष्ण उवाच ।
“कुम्भाण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव सुव्रत ! ।
सुकृतन्ते विजानामि राष्ट्रिकोऽस्तु भवानिह ॥
सज्ञातिपक्षः सुसुखी निर्वृतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव ममाश्रयात्” ॥)
कुष्माण्डम् । कुष्माण्डीपर्य्याये कुम्भाण्डीदर्शनात् ॥
कुम्भाण्डी, स्त्री, (कुम्भाण्ड + स्त्रियां जातित्वात् ङीष् ।) कुष्माण्डी । इति राजनिर्घण्टः ॥
कुम्भिका, स्त्री, (कुः कुत्सितरूपेण उम्भति पूरयति आच्छादयति वारि पुष्करिण्यादेः । शकन्ध्वादित्वात् साधुः ।) जलजतृणविशेषः । पाना इति भाषा । तत्पर्य्यायः । वारिपर्णी २ । इत्यमरः । १ । १० । ३८ ॥ श्वेतपर्णा ३ अब्जकुम्भी ४ पानीयपृष्ठजः ५ । इति रत्नमाला ॥ आकाशमूली ६ कुतृणम् ७ जलवल्कलम् ८ । इति हारावली ॥ वारिमूली ९ खमूलिका १० पर्णी ११ पृश्नी १२ खमूली १३ खमूलि १४ वारिकर्णिका १५ । इति शब्दरत्नावली ॥ कुमुदा १६ दलाढ्कः १७ । इति जटाधरः ॥ अस्य गुणाः वारिपर्णीशब्दे द्रष्टव्याः । पाटलावृक्षः । द्रोणपुष्पी । इति राजनिर्घण्टः ॥ नेत्ररोगविशेषः । तस्य लक्षणं यथा,—
“वर्त्मान्ते पिड़काध्माता भिद्यन्ते च स्रवन्ति च ।
कुम्भीकवीजसदृशाः कुम्भिकाः सन्निपातजाः” ॥
इति माधवकरः ॥ (कुम्भा + स्वार्थे कन् टाप् इत्वञ्च ।) वेश्या । इति शब्दमाला । कट्फलम् । भावप्रकाशे अस्याः पर्य्याया यथा,—
“कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च” ॥
गुणाश्चास्याः कट्फलशब्दे बोद्धव्याः ॥)
कुम्भिनीवीज, क्ली, (कुम्भिन्या वीजम् ।) जयपालः । इति राजनिर्घण्टः ॥
कुम्भिपाकी, स्त्री, (कुम्भिना पाकोऽस्याः । गौरादित्वात् ङीष् ।) कट्फलः । इति भावप्रकाशः ॥
कुम्भिमद, पुं, (कुम्भोऽस्त्यस्य कुम्भी हस्ती तस्य मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥ (गन्धद्रव्यविशेषः ॥)
कुम्भिल, पुं, (कुम्भ + इलच् ।) चोरः । शालमत्स्यः । श्लोकार्थचौरः । श्यालः । इति हेमचन्द्रः ॥
कुम्भी, [न्] पुं, (कुम्भोऽस्यास्तीति । इनिः ।) हस्ती । कुम्भीरः । इति हेमचन्द्रः ॥ गुग्गुलुः । इति जटाधरः ॥ (अग्निप्रकृतिविषकीटविशेषः । यथा, “वाह्वकी पिच्चिटः कुम्भी” ॥ इति सुश्रुते कल्पस्थाने ८ अध्याये ॥)
कुम्भी, स्त्री, (कुम्भ + अल्पार्थे ङीप् । क्षुद्रकुम्भः ।) उखा पाटलावृक्षः । वारिपर्णी । कट्फलः । इति हेमचन्द्रः ॥ वृक्षविशेषः । कुम्भीपुष्प इति कोकणे प्रसिद्धा । तत्पर्य्यायः । रोमालुविटपी २ रोमशः ३ पर्पटद्रुमः ४ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । ग्राहित्वम् । वातकफापहत्वञ्च । दन्तीवृक्षः । इति राजनिर्घण्टः ॥
कुम्भीक, पुं, (कुम्भीव कायते प्रकाशते । कै + कः ।) पुन्नागवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते ।
“प्रियङ्गुसमङ्गाधावकीपुन्नागरक्तचन्दनचन्दनमोचरसरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूलाचेति” ॥) कुम्भिका । यथा,—
“दूर्व्वाकशेरुपूतीककुम्भीकश्रवशैवलम्” ।
इति चक्रपाणिदत्तः ॥ (क्लीवसगर्भविशेषः । यथा,
“पूरुषदोषात्तु पञ्चैव प्रोक्तास्तत्रेर्ष्यकः स्मृतः ।
आसेक्यश्चैव कुम्भीकः सुगन्धिषण्ड इति” ॥
इति शार्ङ्गधरेण पूर्ब्बखण्डे सप्तमेऽध्याये उक्तम् ॥
“स्वे गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते ।
कुम्भीकः स च विज्ञेयः” । इति सुश्रुते शारीरस्थाने २ अध्याये ॥)
कुम्भीनस, पुं, (कुम्भीव नसा नासा यस्य ।) क्रूरसर्पः । इति मेदिनी ॥ (वायुप्रकृतिकविषकीटविशेषः । यथा । “कुम्भीनसस्तुण्डिकेरी” ॥ इति सुश्रुते कल्पस्थाने ८ अध्याये उक्तम् ॥)
कुम्भीनसी, स्त्री, (कुम्भीनस + स्त्रियां ङीष् ।) लवणदानवमाता । इति मेदिनी ॥ (यथा, रामायणे । ७ । २० । १९ ।
“ज्ञातींस्तान् धर्षयित्वेमास्त्वया नीता वराङ्गना ।

स्तामतिक्रम्य मधुना राजन् कुम्भीनसी हृता” ॥)

कुम्भीपाकः, पुं, (कुम्भ्यां उखायां पाक इव पाको यत्र ।) नरकविशेषः । इति जटाधरः ॥ तत्पर्य्यायः । सम्प्रतापनः २ । इति मनुः ॥ “य इह पशून् पक्षिणो वा प्राणतो रन्धयति तं परत्र यमदूता-स्तप्ततैले रन्धयन्ति यत्र । इति श्रीभागवते । ५ । २६ । १३ ॥

कुम्भीरः, पुं, (कुम्भिनं हस्तिनमपि ईरयति । ईर + “कर्म्मण्यण्” । ३।२।१ ।) जलजन्तुविशेषः । कुमीर इति भाषा । तत्पर्य्यायः । नक्रः २ । इत्य-मरः ।१।१०।२१ ॥ कुम्भीलः ३ । इति तट्टीका ॥ गिलग्राहः ४ महाबलः ५ । इति राजनिर्घण्टः ॥ वार्म्मटः ६ अम्बकिरातः ७ अम्बुकण्टकः ८ । इति शब्दरत्नावली ॥

(यथा, महाभारते । १३ । १११ । ५८ ।
“गर्दभत्वन्तु सम्प्राप्य दशवर्षाणि जीवति ।
संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः” ॥)

कुम्भीरमक्षिका, स्त्री, (कुम्भीर इत्याख्या मक्षिका । यद्वा कुम्भीरोपपदयुक्ता मक्षिका ।) मक्षिका-विशेषः । कुमीरा पोका इति भाषा । तत्पर्य्यायः । कणा २ । इति हारावली ॥

कुम्भीलः, पुं, (कुम्भीर + रस्य लः ।) कुम्भीरः । इत्य-मरटीका ॥

कुम्भीवीजं, क्ली, (कुम्भ्या वीजम् ।) जयपालः । इति राजनिर्घण्टः ॥ (जयपालशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

कुर श शब्दे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अक-सेट् ।) श कुरति कोरिता । इति दुर्गादासः ॥

कुरका, स्त्री, (कुर् + क । कुरः शब्दः कायति प्रकाशतेऽस्मिन् । कै + क ।) सल्लकीवृक्षः । इति राजनिर्घण्टः ॥

कुरङ्करः, पुं, (कुरमित्यव्यक्तशब्दं करोति । कुरम् + कृ + ट ।) सारसपक्षी । इति हेमचन्द्रः ॥

कुरङ्कुरः, पुं, (कुर इत्यस्फुटशब्दं कुरति । कुर् + क ।) सारसपक्षी । इति हारावली ॥

कुरङ्गः पुं, (कौ पृथिव्यां भूमौ वा रङ्गति । रगि + अच् । यद्वा, “विडादिभ्यः कित्” । उणा १।१२० इति अङ्गच् बाहुलकात् उत्वं रपरत्वञ्च । कुरङ्ग-विहङ्गादयः सर्व्वे निपात्यन्ते । इति वा ।) हरिणः । इत्यमरः । २ । ५ । ८ ॥ कुतङ्गकोऽपि ॥

(यथा, भागवतटीकायां स्वामिना प्रोक्तम् ।
“कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च” ॥

अस्य गुणा यथा,—
“कुरङ्गो लघुर्बल्यः शीतलः पित्तहृद्गुरुः ।
मधुरो वातहृद्ग्राही किञ्चित्कफकरः स्मृतः” ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ * ॥

अस्य लक्षणं यथा,—
“न कृष्णो न च ताम्रश्च कुरङ्गः सोऽभिधीयते” ॥
इति सूत्रस्थाने षट्चत्वारिंशेऽध्याये सुश्रुते-नोक्तम् ॥)

कुरङ्गनयना, स्त्री, (कुरङ्गस्य नयने इव नयने यस्याः ।) मृगनयना नारी । इति राजनिर्घण्टः ॥ (उक्तञ्च, “किन्त्वेकायमुना कुरङ्गनयना नेत्राम्बुभिर्वर्द्धते” ॥)

कुरङ्गनाभिः, पुं, (कुरङ्गस्य नाभिः ।) कस्तूरी । इति राजनिर्घण्टः ॥ (कस्तूरीशब्देऽस्य गुणादयो बोद्धव्याः ॥)

कुरङ्गमः, पुं, (कौ भूमौ रङ्गं मिमीते । मा + ड ।) हरिणविशेषः । तत्पर्य्यायः । रुरुः २ ऋश्यः ३ रिश्यः ४ चारुलोचनः ५ । इति त्रिकाण्डशेषः ॥

कुरङ्गिका, स्त्री, (कौ रङ्गोऽस्या अस्तीति । ठन् टाप् च ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥

कुरचिल्लः, पुं, (कुरे शब्दे चिल्लति । चिल्ल शैथिल्ये + अच् ।) कर्कटः । इति हेमचन्द्रः ॥

कुरटः, पुं, (कुर् + अटन् कित्त । कु कुत्सितत्वेन रटति जीवति देहयात्रां सम्पादयति वा । रट + अच् ।) चर्म्मकारः । इति त्रिकाण्डशेषः ॥

कुरण्टकः, पुं, (कुर्य्यते शब्द्यते इति । कुर् + कर्म्मणि बाहुलकात् अण्टक् स्वार्थे कन् ।) पीताम्लानः । पीतझिण्टी । इति राजनिर्घण्टः ॥ (अस्य पर्य्याय-लक्षणगुणा यथा,—
“सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते ॥
कुरण्टकोऽत्र पीते स्यादरक्ते कुरवकः स्मृतः ।
नीले वाणादयोरुक्तो दासे आर्त्तगलश्च सः ॥
सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।
तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः” ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
“किंशुकः कफपित्तघ्नस्तद्वदेव कुरण्टकम्” ॥
इति सुश्रुते सूत्रस्थाने ४६ अः ॥ अत्रास्य नपुं-सकत्वं व्यज्यते ॥)

कुरण्डः, पुं, (कुर + अण्डक् ।) मुष्कवृद्धिरोगः । कोरण्ड इति भाषा । तत्पर्य्यायः । वृद्धिः २ अण्डवर्द्धनं ३ । इति हेमचन्द्रः ॥ तस्य सम्प्राप्ति-पूर्व्वकं लक्षणं यथा,—
“क्रुद्धोऽनूर्द्धगतिर्वायुः शोथशूलकरश्चरन् ।
मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः ॥
प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ।
दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा मतः ॥
मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् ।
वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक् ॥
पक्वोडुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान् ।
कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक् ॥
कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः ।
कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः ॥
मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः ।
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः ॥
मूत्रकृच्छ्रमधः स्यात्तु चालयन् फलकोषयोः ।
वातकोपिभिराहारैः शीततोयावगाहनैः ॥
धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः ।
क्षोभणैः क्षुभितस्तान्यैः क्षुद्रान्त्रावयवं यदा ॥
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् ।
कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा ॥
उपेक्ष्यमाणस्य च मुष्कवृद्धि-
माध्मानरुक्स्तम्भवतीं स वायुः ।
प्रपीडितोऽन्तः स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ॥
अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः” ॥
इति वृद्धिनिदानम् ॥ इति माधवकरः ॥ * ॥

तस्यौषधं यथा,—
“द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा ।
गण्डमाला हरेल्लेपात् कुरण्डं गलगण्डकम् ॥
रसाञ्जनं हरीतक्याश्चूर्णं तेनैव गुण्ठनात् ।
नश्येद्वै पुरुषव्याधिर्नात्र कार्य्या विचारणा” ॥
इति गारुडे १९० अध्यायः ॥ * ॥ अन्यच्च ।
“गव्यं घृतं सैन्धवसम्प्रयुक्तं
शम्बूकभाण्डे निहितं तदेव ।
सप्ताहमादित्यकरैर्व्विपक्वं
हन्यात् कुरण्डं चिरजं प्रवृद्धम्” ॥

गव्यघृत कर्ष १ । सैन्धव मा ४ । शम्बूकभाण्डे कृत्वा सप्तदिन यावत् रौद्रे भावयेत् तेन कुरण्ड म्रक्षणम् ॥
“सैन्धवञ्च घृताभ्यक्तं ताम्रभाजनमातपे ।
प्रतप्तमूर्णया घृष्टं तन्मलञ्च समाहरेत् ॥
कुरण्डं म्रक्षयेत्तेन स निर्व्विघ्नं दिवानिशम् ।
कुरण्डं तेन सहितं नाशयेत्याशु पुंगवः” ॥

ताम्रभाजने घृत सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमगुटिकया घृष्ट्वा मलग्रहं कृत्वा तेन म्रक्षयेत् ॥
“वङ्कवारस्य वीजञ्च पिष्ट्वा तण्डुलैः सह ।
कुरण्डं नाशयेद्वृद्धे लेपनान्नात्र संशयः ॥
घृतैर्नीलोत्पलं मूलं पिष्ट्वा लिम्पेत् कुरण्डकम् ।
अथवा लेपनं कुर्य्यात् गृहमण्डूकशोणितैः” ॥
इति भैषज्यरत्नावली ॥ * ॥ अपरञ्च ।
“गुग्गुलुं रुवुतैलं वा गोमूत्रेण पिबेन्नरः ।
वातवृद्धिं निहन्त्याशु चिरकालानुबन्धिनीम् ॥
सक्षीरं वा पिबेत्तैलं मासमेरण्डसम्भवम् ।
पुनर्नवायास्तैलं वा तैलं नारायणन्तथा ॥
पाने वस्तौ सर्व्वोक्तं पेयं वा दशकाम्भसा ।
चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलम् ॥
क्षीरपिष्टैः प्रदेहः स्याद्दाहशोथरुजापहः ।
पञ्चवल्कलकल्केन सघृतेन प्रलेपनम् ॥
सर्व्वं पित्तहरं कार्य्यं रक्ताने रक्तमोक्षणम् ।
श्लेष्मवृद्धिं तूष्णवीर्य्यैर्मूत्रपिष्टैः प्रलेपयेत् ॥
पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् ।
स्विन्नां मेदःसमुत्थान्तु लेपयेत् सुरसादिना ॥
शिरोविरेकद्रव्यैर्व्वा सुखोष्णैर्मूत्रसंयुतैः ।
सस्वेदं मूत्रप्रभवां वस्त्रपट्टेन वेष्टयेत् ॥
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्व्रीहिमुखेन वै ।
शङ्खोपरि च कर्णान्ते त्यक्त्वा सेवनिमादरात् ॥
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये ।
अङ्गुष्ठमध्ये त्वक् छित्वा दहेदङ्गविपर्य्यये ॥
[illegible]रखसागामुरसाधितः ।
[illegible] हन्त्याशु रुवुतैलेन मिश्रितः ॥
[illegible] पीत्वा बलासिद्धपयोऽन्वितम् ।
[illegible]पोपचितामन्त्रवृद्धिं जयेन्नरः ॥

हरीतकीं मूत्रसिद्धां सतैललवणान्विताम् ।
प्रातः प्रातश्च सेवेत कफवातामयापहाम् ॥
गोमूत्रसिद्धां रुवुतैलभृष्टां
हरीतकीं सैन्धवचूर्णयुक्ताम् ।
खादेन्नरः कोष्णजलानुपानां
निहन्ति वृद्धिं चिरजां प्रवृद्धाम् ॥
त्रिफलाक्वाथगोमूत्रं पिबेत् प्रातरतन्द्रितः ।
कफवातोद्भवं हन्ति श्वयथुं वृषणोत्थितम् ॥
सरलागुरुकुष्ठानि देवदारुमहौषधम् ।
मूत्रारनालसम्पिष्टं शोथघ्नं कफवातनुत् ॥
त्रिफलाक्वाथगोमूत्रं कल्कं मध्वासमुद्भवम् ।
कृष्णासैन्धवसंयुक्तो वृद्धिरोगहरः परः ॥
गव्यं घृतं सैन्धवसंप्रयुक्तं
शम्बूकभाण्डे निहितं प्रयत्नात् ।
सप्ताहमादित्यकरैर्विपक्वं
निहन्ति कुरण्डमतिप्रवृद्धम् ॥
ऐन्द्रीमूलभवं चूर्णं रुवुतैलेन मर्द्दितम् ।
त्र्यहाद्गोपयसा पीतं सर्व्ववृद्धिनिवारणम् ॥
रुदन्तीमूललिप्ता करटस्थूलचर्म्मणा ।
बद्धा वृद्धिः शमं याति चिरजापि न संशयः ॥
निपिष्टेनारनालेन रूपिकामूलवल्कलम् ।
लेपोऽण्डवृद्धिमरं हन्ति बद्धमूलमपि दृढम् ॥
वचासर्षपकल्केन लेपो वृद्धिविनाशनः ।
लज्जालम्बुषकाभ्यान्तु लेपो वृद्धिहरः परः” ॥ * ॥

“मूलं बिल्वकपित्थयोररलुकस्याग्नेर्बृहत्योर्द्वयो
श्यामापूतिकरञ्जशिग्रुकतरोर्बिल्वौषधाखुष्करम् ।
कृष्णाग्रन्थिकचव्यपञ्चलवणं क्षाराजमोदान्वितं
पीतं काञ्जिककोष्णतोयमथितैश्चूर्णीकृतं ब्रध्नजित् ॥
अवीक्षीरेण गोधूमकल्कः कुन्दुरुकस्य वा ।
प्रलेपनं सुखोष्णं स्याद् ब्रध्नशूलहरं परम् ॥
मत्स्याक्षे तु वै काकोदरे तच्च प्रवेशयेत् ।
ब्रध्नं मुहूर्त्तं मेधावी तत्क्षणादरुजो भवेत् ॥
अजाजी हवुषा कुष्ठं गोधूमं बदराणि च ।
काञ्जिकेन समं पिष्ट्वा कुर्य्याद्ब्रध्नप्रलेपनम् ॥
सैन्धवं मदनं कुष्ठं शताह्वां निचुलं वचाम् ॥
ह्रीवेरं मधुकं भार्गीं देवदारु सनागरम् ॥
कट्फलं पौष्करं मेदां चविकां चित्रकं शटीम् ।
विडङ्गातिविषे श्यामां रेणुकां नीलिनीं स्थिराम् ॥
बिल्वाजमोदां कृष्णाञ्च दन्तीं रास्नां प्रपिष्य च ।
साध्यमेरण्डजं तैलं तैलं वा कफवातनुत् ॥
ब्रध्नोदरार्त्तिगुल्मार्शःप्लीहमेहाढ्यमारुतान् ।
आनाहमश्मरीञ्चैव हन्यात्तदनुवासनात्” ॥
बृहत्सैन्धवाद्यं तैलम् ॥

“सौरेश्वरघृतं योज्यं ब्रध्नवृद्धिनिवृत्तये” ॥
इति ब्रध्नवृद्ध्यधिकारः । इति चक्रपाणिदत्तः ॥ * ॥

(अस्य सनिदानं पूर्ब्बरूपसहितं लक्षणं सम्प्राप्तिश्च यथा । “वातपित्तश्लेष्मशोणितमेदोमूत्रान्त्रनिमित्ताः सप्त वृद्धयः । तासां मूत्रान्त्रनिमित्ते वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यतमः ॥ अधःप्रकुपितोऽन्यतमो हि दोषः फलकोषवाहिनीरभिप्रपद्य धमनीः फलकोषयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते ॥ तासां भविष्यतीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः फलकोषशोफश्चेति ॥

तत्रानिलपरिपूर्णां वस्तिमिवाततां परुषामनिमित्तानिलरुजं वातवृद्धिमाचक्षते, पक्वोडुम्बरसङ्काशां ज्वरदाहोष्मवतीं चाशुसमुत्थानपाकां पित्तवृद्धिं कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्मवृद्धिं कृष्णस्फोटावृतां पित्तवृद्धिलिङ्गां रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिम् ॥ मूत्रसन्धारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा दृतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदना वृषणयोः श्वयथुं कोषयोश्चापादयति तां मूत्रवृद्धिं विद्यात् ॥ भारहरणबलवद्विग्रहवृक्षप्रपतनादिभिरायासविशेषैर्वायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्येतरस्य चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोषं प्रविश्य मुष्कशोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः शोफो भवति सशब्दमवपीडितश्चोर्द्ध्वमुपैति विमुक्तश्च पुनराध्मति तामन्त्रवृद्धिमसाध्यामाचक्षते” ॥ * ॥ इति सुश्रुते निदानस्थाने । १२ अध्याये ॥

चिकित्सतञ्चास्य यथा,—
“अन्त्रवृद्धिं विना षड् या वृद्धयस्तासु वर्जयेत् ।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ॥
अत्याशनञ्चङ्क्रमणमुपवासं गुरूणि च ।
तत्रादितो वातवृद्धौ त्रैवृतस्निग्धमातुरम् ॥
स्विन्नञ्चैव यथान्यायं पाययेत विरेचनम् ।
कोशाम्रतिल्वकैरण्डफलतैलानि वा नरम् ॥
सक्षीरं वा पिबेन्मासं तैलमेरण्डसम्भवम् ।
ततः कालेऽनिलघ्नानां क्वाथैः कल्कैश्च बुद्धिमान् ॥
निरूहयेन्निरूढञ्च भुक्तवन्तं रसौदनम् ॥
यष्टीमधुकसिद्धेन ततस्तैलेन योजयेत् ।
स्वेदप्रलेपनाद्यांश्च कुर्य्याच्च प्रदेहाश्चानिलापहान् ॥
विदग्धां पाचयित्वा वा सेवनीं परिवर्ज्जयेत् ॥
भिन्द्यात्ततः प्रभिन्नाया यथोक्तं क्रममाचरेत् ।
पित्तजायामपक्वायां पित्तग्रन्थिक्रमो हितः ॥
पक्वां वा भेदयेद्भिन्नां शोधयेत् क्षौद्रसर्पिषा ।
शुद्धायाञ्च भिषग्दद्यात् तैलं कल्कञ्च रोपणम् ॥
रक्तजायां जलौकोभिः शोणितं निर्हरेद्भिषक् ।
पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतम् ॥
पित्तग्रन्थिक्रमं कुर्य्यादामे पक्वे च सर्व्वदा ।
वृद्धिं कफात्मिकामुष्णैर्मूत्रपिष्टैः प्रलेपयेत् ॥
पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् ।
विम्लापनादृते वापि श्लेष्मग्रन्थिक्रमो हितः ।
पक्वायाञ्च विभिन्नायां तैलं शोधनमिष्यते ॥
सुमनारुष्कराङ्कोठसप्तपर्णेषु साधितम् ।
मेदःसमुत्थां संस्वेद्य लेपयेत् सुरसादिना ॥
शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः ।
स्विन्नाञ्चावेष्ट्य पट्टेन समाश्वास्य तु मानवम् ॥
रक्षेत् फले सेवनीञ्च वृद्धिपत्रेण दारयेत् ।
मेदस्ततः समुद्धृत्य दद्यात्कासीससैन्धवे ॥
बध्नीयाच्च यथोद्दिष्टं शुद्धे तैलञ्च दापयेत् ।
मनःशिलालवणाभ्यां सिद्धमारुष्करेण च ॥
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्व्रीहिमुखेन तु ॥
अथात्र विमुखां नाडीं दत्त्वा विस्रावयेद्भिषक् ।
मूत्रं नाडीमथोद्धृत्य स्थगिकाबन्धमाचरेत् ॥
शुद्धायां रोपणं दद्याद्वर्ज्जयेदन्त्रहेतुकीम् ।
अप्राप्तफलकोषायां वातवृद्धिक्रमो हितः ।
तत्र या वङ्क्षणस्था तां दहेदर्द्धेन्दुवक्रया ॥
सम्यग्मार्गावरोधार्थं कोषप्राप्तान्तु वर्जयेत् ।
त्वचं भित्त्वाङ्गुष्ठमध्ये दहेच्चाङ्गविपर्य्ययात् ॥
अनेनैव विधानेन वृद्धौ वातकफात्मिके ।
प्रदहेत् प्रयतः किन्तु स्नायुच्छेदोऽधिकस्तयोः ॥
शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम् ।
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये” ॥
इति सुश्रुते चिकित्सितस्थाने १९ अः ॥ * ॥) भावप्रकाशोक्तचिकित्सादि अन्त्रवृद्धिशब्दे द्रष्टव्यम् ॥ शाकवण्डवृक्षः । इति राजनिर्घण्टः ।

कुरण्टक, पुं, (कुर्य्यते शब्द्यते इति । कुर् + बाहुलकात् अण्टक् । पृषोदरात् साधुः । ततः स्वार्थे कन् ।) कुरण्टकवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (कुरण्टकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कुररः, पुं, (कुङ् शब्दे + “कुवः क्ररन्” । उणां ३ । १३३ । इति क्ररन् प्रत्ययः ।) कुररपक्षी । तत्पर्य्यायः । उत्क्रोशः २ । इत्यमरः । २ । ५ । २३ ॥ खरशब्दः ३ क्रौञ्चः ४ पक्षिचरः ५ खरः ६ । इति राजनिर्घण्टः ॥ (यथा महाभारते ३ नलोपाख्यानपर्व्वणि । ६४ । ११० ।
“प्रोद्घुष्टां क्रौञ्चकुररैश्चक्रवाकोपकूजिताम्” ॥
अयं जलचरान्तर्गतपक्षिविशेषः । यथा,—
“कुररबकमकरा कङ्कचटकपिकमद्गुसारसा ।
आडिदात्यूहहंसा जलकरटिकपिङ्गाटिट्टिभाद्या ।
जलेचरा विहङ्गास्ते भासकाः खञ्जरीटकाः ।
इत्येते जलजा जीवाः” ॥ इति हारीते प्रथमे स्थाने ११ अध्याये ॥)

कुरराङ्घ्रिः, पुं, (कुररस्य अङ्घ्रिरिव ।) देवसर्षपः । इति राजनिर्घण्टः ॥

कुररी, स्त्री, (कुरर + स्त्रियां जातित्वात् ङीष् ।) मेषी । इति हेमचन्द्रः ॥ कुररपक्षिस्त्री । इत्यमरः ॥ (यथा, महाभारते । १ । ६ । १२ ।
“ततो माममयञ्चक्रे क्रोशन्तीं कुररीमिव” ॥)

कुरलः, पुं, (कुररः इति रस्य लः ।) कुररपक्षी । चूर्णकुन्तलः । इति धरणी ॥

कुरवः, पुं, (कु ईषत् रवः गुञ्जनध्वनिर्मधुकराणां स्वल्पमधुतया यत्र ।) सितमन्दारः । इति राजनिर्घण्टः ॥ कुरवकः । रक्तझिण्टी । इति शब्दरत्नावली ॥ पीतझिण्टी । इति हेमचन्द्रः ॥ (कुत्सितो रवः इति कर्म्मधारयः ।) कुत्सितशब्दः ॥ (कुत्सितो रवो यस्य ।) कुत्सितशब्दयुक्ते त्रि ॥

कुरवकः, पुं, (कुरव + स्वार्थे कन् ।) रक्तम्लानः । रक्तझिण्टी । इति राजनिर्घण्टः ॥ (यथा राजे न्द्रकर्णपूरे ६५ ।
“किञ्चित्कुञ्चितकर्णोत्पलपुटः कयू मुञ्जगण्डयोः

भ्रम्याकम्पितकुड्मले कुरवके निर्वाप्य वन्यद्विपे "॥ तस्य पुष्पादिरपि । यथा कुमारटीकायां मल्लिनाथः । "आलोकित कुरवक कुरुते विकाशम्" ॥ अस्य पर्य्याया लक्षणञ्च यथा ॥
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते ।
कुरण्टकोऽत्र पीते स्यादक्ते कुरवकः स्मृतः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) कुत्सितरवे त्रि ॥

कुरस, पुं, (कुत्सितो रसो यत्र ।) मद्यभेदः । इति हारावली ॥ कर्म्मधारये कुत्सितरसः । बहुव्रीहौ कुत्सितरसयुक्ते त्रि ॥

कुरसा, स्त्री, (कुत्सित ईषत् वा रसो यस्याः ।) गोजिह्वा लता । इति शब्दचन्द्रिका ॥

कुराह, पु, कुलाह । ईषत्ताम्रः कृष्णजङ्घो घोटकः । इति हेमचन्द्रः ॥

कुरी, स्त्री, (कुं भूमिं राति ददाति । कु+रा+क । ततो गौरादित्वात् ङीष् ।) तृणधान्यभेदः । इति राजनिर्घण्टः ॥

कुरीरं, क्ली, ("कृञ उच्च" । उणा ४ । ३३ । इति ईरन् उकारादेशश्च ।) मैथुनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुरुः, पुं, (कृ+"कृग्रोरुच्च" । उणा १ । २५ । इति कुः उच्च ।) आग्नीध्रराजपुत्त्रः । स तु प्रियव्रतराजपौत्रः ।(स्वायम्भुवमनोः प्रपौत्त्रः उत्तरकुरुराज्य प्राप्तवांश्च । तत्पत्नी नदी च भद्रेति नाम्ना विश्रुता । यथा विष्णुपुराणे । २ । १ । १६-२२ ।
"जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ! ।
तस्य पुत्त्रा बभूवुस्ते प्रजापतिसमा नव ॥
नाभिः किम्पुरुषश्चैव हरिवर्ष इलावृतः ।
रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च ॥
केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत् ।
जम्बुद्वीपविभागांश्च तेषां विप्र ! निशामय ॥
पित्रा दत्तं हिमाह्वन्तु वर्षं नाभेस्तु दक्षिणम् ।
हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः ॥
तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ।
इलावृताय प्रददौ मेरुर्यत्र तु मध्यगः ॥
नीलाचलाश्रितं वर्षं रम्याय प्रददौ पिता ।
श्वेतं तदुत्तरं वर्षं पित्रा दत्तं हिरण्वते ॥
यदुत्तरं शृङ्गवतो वर्षं तत्कुरवे ददौ ।
मेरोः पूर्व्वेण यद्वर्षं भद्राश्वाय प्रदत्तवान्" ॥
वैवस्वतमनुवंश्यचन्द्रवंशीयराजविशेषः । स तु सम्बरणराजभार्य्यायां सूर्य्यकन्यायां तपत्यां जातः । अयमेव कुरुक्षेत्रपतिः । धार्त्तराष्ट्रपाण्डवानां पूर्व्वपुरुषः । यथा,—
"योऽजमीढ़सुतस्तस्य ऋक्षः सम्बरणस्ततः ।
तपत्यां सूर्य्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥
परीक्षित् सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः" ॥
इति श्रीभागवते । ९ । २२ । ४ ।) भक्तम् । देशविशेषः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति ज्योतिषम् ॥ तद्देशवासी । तत्र बहुवचनान्तः । (यथा गीतायाम् १ । २५ ।
"उवाच पार्थ ! पश्यैतान् समवेतान् कुरूनिति" ॥) कण्टकारिका । इति शब्दचन्द्रिका ॥

कुरुकन्दकं, क्ली, (कुरुः इव विस्तीर्णः कन्दो यस्य । कप् ।) मूलकम् । इति शब्दमाला ॥

कुरुक्षेत्रं, क्ली, (कुरुणा चन्द्रवंशोद्भवेन राजविशेषेण भूरितपसोपार्ज्जितं धर्म्मक्षेत्रनाम्ना प्रसिद्धं कुरुदेशान्तर्गतं क्षेत्रम् । शाकपार्थिववादित्वात् मध्यपदलोपः ।) देशविशेषः । तत्तु धर्म्मक्षेत्रम् । (किञ्चास्मिन्नेव क्षेत्रे क्षत्त्रियकुलारण्यकुठारेण भृगुवंशधुरन्धरेण भगवता जामदग्न्यरामेण क्षत्त्रियशोणितैः पञ्च ह्रदाः कृताः तदारभ्य च क्षेत्रमेतत् समन्तपञ्चकनाम्नोच्यते । नितरामेवात्र युध्यतां क्षत्त्रियाणां शरीरविसर्ज्जनेन पुण्यप्राचुर्य्यात् वैकुण्ठप्राप्तिः । तत एवात्र कुरुपाण्डवानां समहायुद्धं निर्व्वृत्तम् । एतद्विवरणं महाभारतीये १२ । ४८ अध्याये श्रीकृष्णयुधिष्ठिरसंवादे द्रष्टव्यम् । यथा भगवद्गीतायाम् १ । १ ।
"धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्व्वत सञ्जय !" ॥
एतत्क्षेत्रस्य सीमानिर्द्देशे बहूनि मतानि लभ्यन्ते दिङ्मात्रमुदाहृतमत्र । यथा, हेमचन्द्रः ।
"धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि" ॥
तथा त्रिकाण्डशेषेऽपि ।
"कुरुक्षेत्रं प्रयागञ्च हिमाद्रिं विन्ध्यमन्तरा" ॥
एष हि ब्रह्मर्षिदेशः । यथा, मनौ । २ । १९ ।
"कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः" ॥)

कुरुक्षेत्रयोगः, पु, एकस्मिन् सावनदिने तिथित्रयनक्षत्रत्रययोगत्रयाणाञ्च स्पर्शः । इति स्मृतिः ॥ कुरुक्षेत्रे मृत्युयोगः । यथा,—
"पञ्चग्रहयुते मृत्यौ जन्मसंस्थे बृहस्पतौ ।
सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेत्" ॥
इति जातकामृतसंग्रहे योगाध्यायः ॥

कुरुटः, पु, (कुत्सितं रोटते दीप्यते प्रतिहन्ति वा । रुट दीप्तौ प्रतिघातादिषु च+"इगुपधेति" ३ । १ । १३५ । कः ।)सितावरशाकः । इति राजनिर्घण्टः ॥

कुरुण्टः, पु, (कुत्सितं दुर्गन्धादिकं रुण्टति लुण्ठतीति । कु+रुटि स्तेये+अच् ।) पीतझिण्टी । पीताम्लानः । इति मेदिनी ॥ (कुरण्टकशब्देऽस्य विवृतिरुक्ता ॥)

कुरुण्टकः, पु, (कुरुण्ट+स्वार्थे कन् ।) पीताम्लानः । पीतझिण्टी । तत्पर्य्यायः । सहचरी २ सहचरः ३ । इत्यमरः । २ । ४ । ७५ ॥ सहाचरः ४ कुरण्टकः । इति भरतः ॥
("वीरः सहचरः पीतपुष्पो दासीकुरुण्टकः" ॥
इति वैद्यकरत्नमालायाम् । यत्रास्य व्यवहारस्तद्यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये आरग्वधादिवर्गे ॥ "आरग्वधमदनगोपघोण्टा कुटजपाठा कण्टकीपाटलामूर्व्वेन्द्रयवसप्तपर्णनिम्बकुरुण्टकदासीत्यादिषु द्रष्टव्यः ॥)

कुरुण्टी, स्त्री, (कु कुत्सितं रुण्टति स्वभासा । कु+रुटि+अच् । गौरादित्वात् ङीष् ।) दारुपुत्तलिका । इति मेदिनी ॥ (कु कुत्सितं पापं रुण्टति नाशयति ब्रह्मणा पत्युर्वा परिचर्य्यया ।) ब्राह्मणी । इति जटाधरः ॥

कुरुम्बं, क्ली, (कुर्+बाहुलकात् उम्बच् ।) कूलपालकम् । इति शब्दचन्द्रिका ॥ कमलालेवु इति भाषा ॥

कुरुम्बा, स्त्री, (कुरुम्ब+स्त्रियां टाप् ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥ (द्रोणपुष्पीशब्देऽस्या गुणादयो ज्ञेयाः ॥)

कुरुम्बिका, स्त्री, (कुरुम्बा+स्वार्थे कः टाप् इत्वञ्च ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥

कुरुम्बी, स्त्री, (कुरुम्ब+स्त्रियां गौरादित्वात् ङीष् ।) सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

कुरुराट्[ज्] पुं, (कुरुषु राजते । राज्+क्विप् ।) दुर्य्योधनः । इति त्रिकाण्डशेषः ॥

कुरुलः, पुं, (कुर्+उलक् ।) भालस्थितचूर्णकुन्तलः । तत्पर्य्यायः । भ्रमरकः २ भ्रमरालकः ३ । इति हेमचन्द्रः ॥

कुरुवकः, पु, (रौतीति रवो भ्रमरः । कुत्सितः स्वल्पमधुलाभात् विरक्तो रवो यत्र । स्वल्पमधुलाद्रस्य तथात्वम् ।) रक्तझिण्टी । रक्ताम्लानः । इत्यमरः । २।४।७४॥ पीतझिण्टी । इति हेमचन्द्रः ॥ (कुरवकशब्दे पीतझिण्टीशब्दे च अस्य विवृतिर्ज्ञातव्या ॥)

कुरुविन्दं, क्ली, (कुरून् विन्दति+विदिलाभे "अनुपसर्गात् लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च" । ३ । १ । १३८ । इति शः मुचादित्वात् नुम् च ।) काचलवणम् । माणिक्यम् । इति राजनिर्घण्टः ॥ कुरुविल्वरत्नम् । कुल्माषशस्यम् । इति मेदिनी ॥ (क्वचिदस्य पुलिङ्गत्वमपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ३६ः ।
"कासीससैन्धवं किण्वः कुरुविन्दो मनःशिला" ॥)

कुरुविन्दः, पु, (कुरु+विद्+शः नुम् च ।) मुस्तकम् । इत्यमरः । २ । ४ । १५९ ॥ माषः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकम् ।
कुरुविन्दस्य सञ्ज्ञातोऽपरः क्रोडकसेरुकः ।
भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कुरुविल्वः, पुं, (कुरुषु बिल्व इव ।) पद्मरागमणिः । इति त्रिकाण्डशेषः ॥

कुरुविल्वकः, पु, (कुरुविल्व+सञ्ज्ञायां कन् ।) कुल्माषः । वनकुलत्थिका । इति रत्नमाला ॥ (गुणाश्चास्य कुल्माषशब्दे ज्ञेयाः ॥)

कुरुविस्तः, पु, (कुरुषु विख्यातः विस्तः ।) स्वर्णपलम् । इत्यमरः । २ । ९ । ८६ ॥ चारि तोला सोणा । इति भाषा ॥

कुरूप्यं, क्ली, (कु ईषत् रूप्यमिव । रूप्यवत् शुभ्रत्वात्तथात्वम् ।) रङ्गम् । इति राजनिर्घण्टः ॥

कुर्कुरः, पुं स्त्री, (कुर् इत्यस्फुटं शब्दं कुरुति शब्दायते । कुर्+कुर्+कः ।) कुक्कुरः । इत्यमरटीकायां रायमुकुटः ॥

कुर्णजः, पु, कुलक्षणवृक्षः । इति राजनिर्घण्टः ॥

कुर्द्द ङ क्रीडायाम्। इति कविकल्पद्रुमः॥(भ्वां-आत्मं-अकं-सेट्।) पञ्चमस्वरी। दीर्घेण पृथक् पाठसामर्थ्यात् पूर्व्वस्य वनच्छतयीति दीर्घो न स्यात्। ङ कुर्द्दते। इति दुर्गादासः॥

कुर्द्दनं, क्ली, (कुर्द्द+भावे ल्युट्।) क्रीडा। इत्यमरटीकायां स्वामी॥

कुर्परः,पुं,(कुर्+क्विप् कुः। पिपर्त्ति। पृ+अच् परः। ततः कर्म्मधारयः।) कफोणिः। जानु। इति मेदिनीकरहेमचन्द्रौ॥ (कूर्परशब्देऽस्य विवरणं ज्ञातव्यम्॥)

कुर्पासः, पुं, (कुर्परे अस्यते आस्ते वा। अस्, आस् वा+घञ् ततः पृषोदरात् साधुः।) अर्द्धचोलकः। इति हारावली॥

कुर्पासकः, पुं, (कुर्पास+स्वार्थे कन्।) कञ्चुलिका। इत्यमरः॥ काँचुलि इति भाषा। (यथा रत्नावलीनाटके। "मनोज्ञकुर्पासकपीडितस्तना"॥)

कुर्व्वत्, त्रि, (करोति इति। कृ+शतृ।) कर्म्मकारः। भृत्यः। इति विश्वः॥

कुल ज बन्धौ। सहतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-क्वचित् सक सेट्। ज्वलादिः।) ज कोलः कुलः। कोलति कुलीनः सर्व्वेषां बन्धुः स्यादित्यर्थः। सहती राशीकरणमिति चतुर्भुजः॥ केचित्तु सहतिस्थाने सङ्ख्याने पठित्वा कोलति कुलालः गणयति इत्यर्थः इत्याहुः। सङ्ख्यानं पठित्वा सङ्ख्यानं उपचयः। इति रामः॥ अन्ये तु बन्धुषु ज्ञातिषु वर्त्तमानोऽयं अन्यत्रास्य न प्रयोगः। गडि गण्डे इतिवदित्याहुः। इति दुर्गादासः॥

कुलं, क्ली, (कुल्+ "इगुपधेति" ।३।१।१३५। कः।) वंशः। (यथा, रघौ।१६।८६।

"इत्यूचिवानुपहृताभरणः क्षितीशं
श्लाघ्यो भवान् स्वजन इत्यनुभाषितारम्।
संयोजयां विधिवदास समेतबन्धुः
कन्यामयेन कुमुदः कुलभूषणेन"॥

तस्य लक्षणं यथा, शिष्टोक्तौ।

"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम्।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम्"॥)

तन्नाशकारणं यथा।

"गोभिश्च दैवतैर्विप्रैः कृष्या राजोपसेवया।
कुलान्यकुलतां यान्ति यानि हीनानि सत्तम॥
कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण वै॥
अनृतात् पारदार्य्याच्च तथाऽभक्ष्यस्य भक्षणात्।
अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम्॥
अश्रोत्रियेषु वै दानां वृषलेषु तथैव च।
विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्"॥

इति कूर्म्मपुराणे उपरिभागे १५ अध्यायः॥ सजातीयगणः। इत्यमरः।२।७।१॥ (कुं भूमिं लाति गृह्णाति। ला+क।) जनपदः। गृहम्। (कौ भूमौ लीयते। अन्येभ्योऽपीति डः।) शरीरम्। इति मेदिनी॥ अग्रम्। इति महाभारतम्॥ (मध्यम-हलद्वयेन यावती भूमिः कृष्यते तावती भूमिः। यथा, मनुः।७।११९।

"दशी कुलन्तु भुञ्जीत विंशी पञ्चकुलानि च"॥)

कुलः, पुं, (कुल्+कः।) कुलिकः। शिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः॥

कुलकं, क्ली, (कौ भूमौ लीयते। कु+ली+डः। संज्ञायां कन्।) पटोललता। सम्बद्धश्लोकसमूहः। इति मेदिनी॥ (यथा, साहित्यदर्पणे ६।२८७।
"कलापकं चतुर्भिश्च तदूर्द्ध्वं कुलकं मतम्"॥
पटोलार्थे यथा,—"करीरं कुलकं नन्दी" इति वाभटे सूत्रस्थाने।६ अः। कुलकं पटोलभेदः। तित्पल्ला इति ख्यातम्॥ इति तट्टीका॥)

कुलकः, पुं, (कुल्+संज्ञायां कन्।) काकेन्दुः। इत्यमरः।२।४।३९॥ वल्मीकः। कुलश्रेष्ठः। इति मेदिनी॥ मरुवकवृक्षः। इति रत्नमाला॥ हरितसर्पः। इति राजनिर्घण्टः॥ कुपीलु। इति भावप्रकाशः॥ शिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः॥

कुलकर्कटी, स्त्री, (कुला कर्कटी इति नित्यकर्म्मधारयः।) चीनाकर्कटी। इति राजनिर्घण्टः॥

कुलकुण्डलिनी } स्त्री, (कुले कुलचक्रे पृथिवीतत्त्वरूपे मूलाधारे कुण्डलाकृतया सार्द्ध-
कुलकुण्डली }
त्रिवलयाकारेण स्वयम्भुलिङ्गं वेष्टयित्वा तिष्ठतीति। कुल+कुण्डलिन्+ङीप्। कुण्डल+ङीष्। यद्वा कौ पृथिवीतत्त्वाधारे मूलाधारे इत्यर्थः लीयते इति। कु+ली+अन्येभ्योऽपीति डः। ततः कर्म्मधारय।) मूलाधारपद्मस्थितशिवशक्तिविशेषः। यथा। पूर्णानन्दकृतषट्चक्रप्रकाशः।

"कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुटं
वाचः कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः।
श्वासोच्छ्वासविवर्त्तनेन जगतां जीवो यया धार्य्यते
सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावली"॥

कूजन्तीति। सा मूलाम्बुजगह्वर इत्यादि व्याख्यातम्। कीदृशी कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः कोमला कमनीयत्वविशिष्टा या काव्यबन्धरचना तस्याः भेदातिभेदक्रमैः भेदातिशयभेदक्रमैर्व्विशिष्टा वाचः मत्तालिमालास्फुटं मत्ता या अलिमाला भ्रमरसमूहस्तद्वदस्फुटं यथा स्यात् एवं मधुरं यथा स्यात् तथा कूजन्ती अव्यक्तमधुरध्वनिं कुर्व्वन्तीत्यर्थः। सा का इत्याकाङ्क्षायामाह यया कुलकुण्डलिन्या श्वासोच्छ्वासविवर्त्तनेन श्वासोच्छ्वासयोः परिवर्त्तनेन गमनागमनेन जगतां संसाराणां जीवः प्राणो धार्य्यते। पुनः कीदृशी प्रोद्दामदीप्तावली प्रकृष्टोत्तुङ्गदीप्तिश्रेणीस्वरूपा। तथा च मूलाधारपद्मे सर्पाकारसार्द्धत्रितयवेष्टनविशिष्टा विद्युत्समूहरूपा कुलकुण्डलिनी तिष्ठतीत्यर्थः। इति तट्टीका॥ *॥ अन्यत् चक्रशब्दे मूलाधारशब्दे षट्चक्रशब्दे च द्रष्टव्यम्॥

कुलक्कः, पुं, (कु+लक्क+भावे घञ्।) करतालो। तत्पर्य्यायः। तालमर्द्दलः २। इति हारावली॥

कुलच्छाया, स्त्री, (कुलस्य मूलस्य विस्तृतवल्लीजालस्य वा छाया यस्याः।) सूकशिम्बी। इति शब्दचन्द्रिका॥

कुलजः, पुं, (कुले सत्कुले जायते। जन्+डः।) कुलीनः। सत्कुलोद्भवः। इति शब्दरत्नावली॥ (यथा, मनुः ८।१७९।
"कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः"॥)

कुलञ्ज, पुं, (कुं पृथिवीं रञ्जयति। रञ्ज+णिच्+अण् रस्य लः।) कुलञ्जनवृक्षः। इति राजनिर्घण्टः॥

कुलञ्जनः, पुं, (कु+रञ्ज+णिच्+ल्युः। रस्य लः।) स्वनामख्यातवृक्षः। तत्पर्य्यायः। कुलीनः २ गन्धमूलः ३ कुलञ्जः ४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। दीपनत्वम्। मुखदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

कुलटा, स्त्री, (कुलात् व्यभिचारार्थं कुलान्तरं अटतीति। कुल+अट्+अच्। शकन्ध्वादित्वात् अलोपः।) व्यभिचारिणी। असती। (यथाह, आर्य्यासप्तशती ३९३।
"परपतिनिर्द्दयकुलटाशोषितशठ। नेर्षया न कोपेन। दग्धगमतोपतप्ता रोदिमि तव तानव वीक्ष्य"॥)
तत्पर्य्यायः। पुंश्चली २ धर्षिणी ३ बन्धकी ४ असती ५ इत्वरी ६ स्वैरिणी ७ पांशुला ८। इत्यमरः।२।६।१०॥ चर्षणी ९ पांसुला १०। इति तट्टीका॥ दुष्टा ११ दुष्टा १२ धर्षिता १३। इति शब्दरत्नावली॥ लञ्जा १४ निशाचरी १५ जया रण्डा १६। इति जटाधरः॥०॥ परकीयान्तर्गतनायिकाविशेषः। यथा,—

"एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः शैला शाद्वलमुद्वहन्ति न रुजन्त्येते पुनर्नायकान्। त्रैलोक्ये तरवः फलानि सुवते नैवारमन्ते जनान् धातः। कातरमालपामि कुलटाहेतोस्त्वया किं कृतम्"॥ इति रसमञ्जरी॥*॥ अस्या अन्नभोजनप्रायश्चित्तं प्रायश्चित्तशब्दे अभोज्यान्नभक्षणप्रकरणे द्रष्टव्यम्॥

कुलटी, स्त्री, (कुत्सितं रट्यते। रट भाषणे+घञर्थे कः। गौरादित्वात् ङीष् रस्य लः।) मनःशिला। इति रत्नमाला अमरटीका च॥ (अस्या गुणादयो मनःशिलाशब्दे बोद्धव्याः॥)

कुलतिथिः, स्त्री पुं, (कुला तिथिः।) चतुर्थ्यष्टमीद्वादशीचतुर्द्दश्यः। यथा, तन्त्रसारे।
"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्।
विषमास्त्वकुला सर्व्वे शेषाश्च तिथयः कुलाः"॥

कुलत्थः, पुं, (कुले भूमिलग्नः सन् तिष्ठति। कुल+स्था+कः। पृषोदरात् साधुः।) शस्यभेदः। कुलत्थकलाइ इति भाषा॥ (यथा, मार्कण्डेये।१५।७।
"धान्ययवांस्तिलान्माषान्कुलत्थान्सर्षपांस्तथा"॥)
तत्पर्य्यायः। कालवृन्तः २ ताम्रवृक्षः ३ कुलत्थिका ४। इति रत्नमाला॥ ताम्रवृन्तः ५। इति त्रिकाण्डशेषः॥ ताम्रबीजः ६ सितेतरः ७। इति राजनिर्घण्टः॥ अस्य गुणाः। कफवातगुल्मशुक्राश्मरीमेदःश्वासकासप्रमेहनाशित्वम्। रूक्षत्वम्। उष्णत्वम्। कटुत्वम्। ग्राहित्वञ्च। इति राजवल्लभः॥ कषायत्वम्। रूक्षत्वम्। रक्तपित्तकारित्वम्। व्रणनाशित्वञ्च। अस्य यूषगुणाः। वायु-

शर्कराश्मरीनाशित्वम् । इति राजनिर्घण्टः ॥
(अस्य अपरे पर्य्यायगुणा यथा,—
"कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ ।
कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् ।
लघुर्विदाही वीर्य्योष्णः श्वासकासकफानिलान् ॥
हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान् ।
स्वेदसंग्राहको मेदोज्वरक्रिमिहरः परः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ * ॥
"उष्णः कुलत्थो रसतः कषायः
कटुर्विपाके कफमारुतघ्नः ।
शुक्राश्मरीगुल्मनिषूदनश्च
सग्राहकः पीनसकासहारी ॥
आनाहमेदोगुदकीलहिक्का-
श्वासापहः शोणितपित्तकृच्च ।
कफस्य हन्ता नयनामयघ्नो
विशेषतो वन्यकुलत्थ उक्तः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥ * ॥)
कुलत्था, स्त्री, (कुलत्थ + स्त्रियां टाप् ।) वनकुलत्थः । तत्पर्य्यायः । दृक्प्रसादा २ अरण्यकुलत्थिका ३ कुलाली ४ लोचनहिता ५ चक्षुष्या ६ कुम्भकारिका ७ कुलत्थिका ८ । इति राजनिर्घण्टः ॥ कुल्माषः ९ कुलविल्वकः १० । इति रत्नमाला ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । अर्शःशूलगाशित्वम् । विबन्धाध्मानशमनत्वम् । चक्षुर्हितत्वम् । व्रणरोपणत्वञ्च । कुलत्थाञ्जनम् । अस्य पर्य्यायः पूर्व्ववत्तदधिकन्तु । कुम्भकारी १ प्रलापहा २ । अस्य गुणाः । चक्षुर्हितत्वम् । कषायत्वम् । कटुत्वम् । हिमत्वम् । विषविस्फोटकण्डूव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥
कुलत्थिका, स्त्री, (कुलत्था स्वार्थे संज्ञायां वा कन् अत इत्वम् ।) कुलत्थाकाराञ्जनप्रस्तरविशेषः । इत्यमरः ।२।९।१०२॥ अस्य गुणपर्य्यायौ कुलत्थाशब्दे द्रष्टव्यौ । वनकुलत्थः । इति राजनिर्घण्टः ॥
कुलधर्म्मः, पुं, (कुलस्य कुले वा आचरितो धर्म्मः ।) स्वजातीयधर्म्मः । कुलाचारः । यथा,—
"उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम" ॥
इति श्रीभगवद्गीतायाम् । १ । ४३ ॥
कुलधारकः, पुं, (कुलं धारयति रक्षति यः । कुल + धृ + णिच् + ण्वुल् ।) पुत्त्रः । इति त्रिकाण्डशेषः ॥
कुलनायिका, स्त्री, (कुले कुलाचारयजनकाले पूज्या या नायिका ।) मद्य-मकारयजने पूज्या स्त्री । यथा,—
'रक्तमाल्येन सम्बीतो रक्तपुष्पविभूषितः ।
पञ्चीकरणसङ्केतैः पूजयेत् कुलनायिकाम्" ॥
सा नवविधा यथा,—
"नटी कापालिनी वेश्या रजकी नापिताङ्गना ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः" ॥
इति तन्त्रसारः ॥
कुलनक्षत्रं, क्ली, (तन्त्रसारोक्तपारिभाषिककलनक्षत्रं कुलं तत्र तत्सम्बन्धि वा नक्षत्रम् ।) भरणीरोहिणी-

पुष्यमघोत्तरफल्गुनीचित्राविशाखाज्येष्ठापूर्व्वाषाढ़ाश्रवणोत्तरभाद्रपदः । यथा,—
"वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम् ।
कुलानि समधिष्ण्यानि शेषाणि चाकुलानि च" ॥
इति तन्त्रसारः ॥
कुलनाशः, पुं, (कुलं मूलमिव न अश्नाति । न + अश् + अच् । सुप्सुपेति समासः । उष्ट्रस्य हि उन्नतकन्धरत्वात् भूमिलग्नस्थामलकतया तथात्वम् ।) उष्ट्रः । इति हेमचन्द्रः ॥ (कुलस्य नाशः ध्वंसः ।) कुलध्वंसः ॥
कुलपतिः, पुं, (कुलस्य वंशस्य गोत्रस्य वा पतिः स्वामी ।) कुलस्वामी । गोत्रप्रधानः । कुलनाथः । यथा । "अथ सिन्धुसौवीरपतेरहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिविकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्धः" । इति श्रीभागवते ५ । १० । १ ॥ (कुलस्य छात्रवर्गस्य पतिः पालकः । अन्नदानपोषणपूर्व्वकं अध्यापको मुनिविशेषः । उक्तञ्च ।
"मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः" ॥)
कुलपत्रः, पुं, (कुलं भूलग्नं पत्रं पर्णमस्य ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥
कुलपालकं, क्ली, (कुलं समूहं पालयतीति । पालि + ण्वुल् । बहुफलोत्पत्तेस्तथात्वम् ।) कुरुम्बम् । कामलानेबु इति भाषा । इति शब्दचन्द्रिका ॥ (कुलं वंशं पालयति । पाल + णिच् + ण्वुल् ।) वंशप्रतिपालके, त्रि ॥
कुलपालिः, स्त्री, (कुलं पालयति या । पालि + इन् ।) कुलवती । इति शब्दमाला ॥
कुलपालिका, स्त्री, (कुलं पालयति । पालि + ण्वुल् टाप् इत्वम् । यद्वा कुलपालि + स्वार्थे कन् टाप् ।) कुलस्त्री । इत्यमरः । २ । ६ । ७ ॥
कुलभृत्या, स्त्री, (कुले वंशभवे भृत्या भरणम् । कुल + भृ + भावे क्यप् ।) गर्भिणीपर्य्युपासना । इति जटाधरः ॥ (कुलस्य भृत्या । वंशभरणम् ॥)
कुलम्भरः, पुं, (कुलं गृहं भरति हन्ति सन्धिकर्त्तनादिना इति । कुल + भृ + अच् । निपातनात् मुम् लस्य रः ।) कुलम्भलः । चौरः । इति हारावली ॥
कुलवर्णा, स्त्री, (कुलेषु भिषक्कुलेषु वर्णः वर्णनं गुणकथनं यस्याः ।) रक्तत्रिवृत् । इति राजनिर्घण्टः ॥
कुलवारः, पुं, (कुलसंज्ञाख्यया प्रसिद्धो वारः ।) मङ्गलशुक्रवारौ । यथा ।
"रविचन्द्रौ गुरुः सौरिश्चत्वारश्चाकुला इमे ।
भौमशुक्रौ कुलाख्यौ हि बुधवारः कुलाकुलः" ॥
इति तन्त्रसारः ॥
कुलविप्रः, पुं, (कुलपरम्परागतः कुलहिताय नियुक्तो वा विप्रः ।) कुलपुरोहितः । इत्यमरटीकायां स्वामी ॥
कुलश्रेष्ठी, [न्] त्रि, (कुलेषु शिल्पिकुलेषु श्रेष्ठी ।) शिल्पिकुलप्रधानः । तत्पर्य्यायः । कुलिकः २ । इत्यमरः । २ । १० । ५ ॥ कुलकः ३ कुलः ४ श्रेष्ठी ५ ।

इति तट्टीकायां भरतः ॥
कुलसम्भवः, पुं, (कुले कस्यचित् वंशे सम्भवः उत्पत्तिरस्य ।) यस्य कस्यचित् कुले जातः । तत्पर्य्यायः । बीज्यः २ । इत्यमरः । २ । ७ । २ ॥
कुलसौरभं, क्ली, (कुलं श्रेष्ठं सौरभं यस्य ।) मरुवकवृक्षः । इति शब्दमाला ॥
कुलस्त्री, स्त्री, (कुले कुलस्थिता स्त्री ।) कुलपालिका । अनन्यगामिनी कुलरक्षिका स्त्री । इत्यमरः । २ । ६ । ७ ॥ (तथा च चाणक्ये ।
"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः ।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः" ॥
कुले कुलचक्रे मूलाधारे विराजते या स्त्री । कुलकुण्डलिनीशक्तिः । यथा, कुलार्णवे ।
"कुलस्त्रीध्यानमात्रेण जीवन्मुक्तो भवेन्नरः" ॥)
कुलहण्डकः, पुं, (कुलाय संघाय हुण्डते । हुडि सघे + ण्वुल् । पृषोदरात् उकारलोपः ।) आवर्त्तः । इति हारावली ॥
कुलाकुलतिथिः, पुं स्त्री, (तन्त्रोक्तकुलाकुलनाम्ना प्रसिद्धा तिथिः ।) द्वितीयाषष्ठीदशम्यः । यथा ।
"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्" ॥
इति तन्त्रसारः ॥
कुलाकुलनक्षत्रं, क्ली, (तन्त्रोक्तकुलाकुलसंज्ञकं नक्षत्रम् ।) आर्द्रामूलाभिजिच्छतभिषानक्षत्राणि । यथा, तन्त्रसारे ॥
"वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्" ॥
कुलाकुलवारः, पुं, (तन्त्रोक्तकुलाकुलनामा वारः ।) बुधवारः । यथा, तन्त्रसारे ॥
"भौमशुक्रौ कुलाख्यौ हि बुधवारः कुलाकुलः" ॥
कुलाचलः, पुं, (कुलसंज्ञकः अचलः पर्व्वतः । शाकपार्थिवादिवत् मध्यपदलोपः ।) कुलपर्व्वतः । यथा ।
"अष्टकुलाचलसप्तसमुद्रा
ब्रह्मपुरन्दरदिनकररुद्राः ।
न त्वं नाहं नायं लोक-
स्तदपि किमर्थं क्रियते शोकः" ॥
इति मोहमुद्गरे ७ ॥ सप्तकुलपर्व्वता यथा ।
"सप्त येऽस्मिन् महापर्व्वा विश्रुताः कुलपर्व्वताः ।
माहेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ॥
विन्ध्यश्च पारिपात्रश्च इत्येते कुलपर्व्वताः" ॥
इति मात्स्ये ८५ अध्यायः ॥
कुलाचार्य्यः, पुं, (कुलस्य वंशस्य व्याख्याता वर्णनादौ गुणकीर्त्तनविषये वा आचार्य्यः ।) कुलज्ञः । कुलीनादीनां वंशव्याख्याकर्त्तृब्राह्मणः । अस्य विवरणं घटकशब्दे द्रष्टव्यम् ॥
कुलाटः, पुं, (कुलेन सङ्घेन अटतीति । अट + अच् ।) क्षुद्रमत्स्यभेदः । इति शब्दमाला ॥
कुलाद्रिः, पुं, (कुलनाम्ना ख्यातोऽद्रिरचलः ।) कुलाचलः । इति सिद्धान्तशिरोमणिः ॥
कुलाधारकः, पुं, (कुलस्य वंशस्य आधारकः प्रतिष्ठापकः ।) पुत्त्रः । इति शब्दरत्नावली ॥
कुलायः, क्ली, (कौ पृथिव्यां लायो लयो यस्य ।) शरीरम् । इति पुराणम् ॥
कुलायः, पुं, (कुलानां पक्षिसमूहानां अयः वास-

स्थानम् ।) नीडः । (यथा, माघे ।
"खगकुलायकुलायनिलायिताम्" ।)
स्थानमात्रम् । इति मेदिनी ॥

कुलायस्थ, पुं, (कुलाये नीडे तिष्ठति । स्था + क ।) पक्षी । इति शब्दचन्द्रिका ॥

कुलायिका, स्त्री, (कुलाय पक्षिवासस्थानं विद्यते ऽस्याम् । ठन् ।) पक्षिशाला । इति त्रिकाण्डशेषः ॥

कुलाल, पुं, (कुल घटादिनिर्म्माणोपयोगिमृदाद्युपादान आलाति सम्यगादत्ते । आ + ला + क । कुलं वंशं घटादिसमूहं वा अलति पर्य्याप्नोति वा अल् + कर्म्मण्यण् । कुल् + "तमिविशिविडीति" उणा १ । ११७ । इति कालन् वा ।) कुम्भकारः । इत्यमरः । २ । १० । ६ ॥ तस्योत्पत्तिर्यथा ।
"मालाकाराद् कर्म्मकार्य्यां कुम्भकारो व्यजायत" ॥
इति पराशरसंहिता ॥
"पट्टिकाराच्च तैलिक्यां कुम्भकारो बभूव ह" ॥
इति पराशरपद्धतिः ॥ ब्रह्मवैवर्त्तोक्ता च कुम्भकारशब्दे द्रष्टव्या ॥ कुक्कुभपक्षी । इति मेदिनी ॥

कुलाली, स्त्री, (कुलं पर्व्वतकुलं कषायकुलं वा अलति परिवर्द्धयति । अल् + अण् । ङीप् ।) कुलत्थाकाराञ्जनप्रस्तरविशेषः । कुलत्थाञ्जनमिति ख्याता । इत्यमरः । २ । ९ । १०२ ॥ अरण्यकुलत्थिका वनकुलत्थकलाइ इति भाषा । इति राजनिर्घण्टः ॥ (कुलाल + स्त्रियां ङीष् ।) कुलालभार्य्या ॥

कुलाह, पुं, (कुलं पालककुलं स्वकुलं वा आहन्ति । आ + हन् + ड ।) ईषत्पीतवर्णः कृष्णजानुर्घोटकः । इति हेमचन्द्रः ॥

कुलाहक पुं, (कुलाह + संज्ञायां कन् ।) कृकलासः । इति शब्दमाला ॥ वृक्षविशेषः । राङ्गा कुलेखाडा इति भाषा । अस्य गुणः । आमवात-वातरक्तरोगनाशित्वम् । इति राजवल्लभः ॥

कुलाहल, पुं, (कुलं आहलति स्पृशति स्पर्द्धते वा । आ + हल विलेखने + अच् ।) क्षुद्रवृक्षविशेषः । कोकसीमा इति भाषा । तत्पर्य्यायः । अलम्बुषः २ गोच्छाल ३ भूकदम्ब ४ । इति रत्नमाला ॥

कुलि, पुं, (कुल् + इन् किच्च ।) हस्तः । इति त्रिकाण्डशेषः ॥

कुलिः, स्त्री, (कुल् इन् किच्च ।) कण्टकारी । इति शब्दरत्नावली ॥

कुलिकः, त्रि, (कुलं अधीनतया प्रशस्ततया वा अस्त्यस्य । इति ठन् ।) शिल्पिकुलप्रधानः । इत्यमरः । २ । १० । ५ ॥ कुलसत्तमः इति मेदिनी ॥

कुलिकः, पुं, अष्टमहानागान्तर्गतनागविशेषः । (यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति" ॥
अस्य रूपमप्युक्तं हेमाद्रौ यथा ।
"कुलिकोऽर्द्धचन्द्रमौलिर्ज्वालाधूमसमप्रभः" ॥)
वृक्षविशेषः । इति मेदिनी ॥ केलेकाड़ा इति भाषा ॥

कुलिकवेला, स्त्री, रव्यादिवारेषु शुभकर्म्मसु निषिद्धकालविशेषः । यथा । रवौ सप्तमयामार्द्धम् सोमे षष्ठयामार्द्धम् । मङ्गले पञ्चमयामार्द्धम् । बुधे चतुर्थयामार्द्धम् । गुरौ तृतीययामार्द्धम् शुक्रे द्वितीययामार्द्धम् । शनौ प्रथमयामार्द्धम् । राघवभट्टमते तु पूर्व्वोक्तयामार्द्धानां दिवाशेषभागः । रात्रौ प्रथमभागः । इति ज्योतिषतत्त्वम् ॥

कुलिङ्गः, पुं, (कौ पृथिव्यां लिङ्गति गच्छतीति । कु + लिगि + अच् + इदित्वात् नुम् । यद्वा कुत्सितं श्यामवर्णं लिङ्गं वर्णो यस्य ।) पक्षिविशेषः । फिङ्गा इति भाषा । तत्पर्य्यायः । कलिङ्गः २ धूम्याटः ३ भिङ्गकः ४ । इति शब्दमाला ॥ भृङ्गः ५ । इत्यमरः ॥ अस्य मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । कफपित्तकारित्वञ्च । इति राजवल्लभः ॥

कुलिङ्गक, पुं, (कुलिङ्ग + स्वार्थे कन् ।) चटकपक्षी । इति हेमचन्द्रः ॥

कुलिङ्गाक्षी, स्त्री, (कुलिङ्गस्य अक्षिवत् फलं यस्य ।) पेटिकावृक्षः । इति रत्नमाला । पेटारी इति भाषा ॥

कुलिङ्गी, स्त्री, (कुलिङ्ग + स्त्रियां गौरादित्वात् ङीष् ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कुलिर, पुं, (कुल् + बाहुलकात् इरन् किच्च ।) कर्कटः । इति शब्दरत्नावली ॥

कुलिश, क्ली, पुं, (कुलौ हस्ते शेते अवतिष्ठते । कुल + शी + डः । यद्वा कुलिनः पर्व्वतान् श्यति दारयतीति । शो + ड । "आतोनुपसर्गे कः" । ३ । २ । ३ । इति को वा ।) वज्रम् । इत्यमरभरतौ ॥ (यथा, कुमारे । १ । २० ।
"कुट्टेऽपि पक्षच्छिदि वृत्रशत्रा-
ववेदनाज्ञं कुलिशक्षतानाम्" ॥)
कु ईषत् कुत्सितं वा लिशति । कु + लिश अल्पीभावे गतौ च + क ।) मत्स्यविशेषः । तत्पर्य्यायः । कण्टकाष्ठीलः २ । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः" ॥) कौ भूमौ लिशति अल्पीभवति कुभूमिं लिशति गच्छति कृशतया प्राप्नोति वा ।) अस्थिसंहारवृक्षः । इति रत्नमाला ॥

कुलिशनायक, पुं, (कुलिशवत् नायको यस्मिन् ।) शृङ्गारबन्धविशेषः । तस्य लक्षणम् ।
"स्त्रीपादद्वयमाक्रम्य विमुखुम्बितलिङ्गकः ।
योनिञ्च पीडयेत् कामी बन्धः कुलिशनायकः" ॥
इति रतिमञ्जरी ॥

कुलिशाङ्कुशा, स्त्री, (कुलिशेनाङ्कुशेन चैव निरुह्यते मनो यया । यद्वा कुलिशवत् दृढमङ्कुशं यस्याः ।) बौद्धानां विद्यादेवीविशेषः । इति हेमचन्द्रः ॥

कुलिशासन, पुं, (कुलिशं वज्रं तद्वत् दृढमासनमस्य ।) शाक्यमुनिः । इति त्रिकाण्डशेषः ॥

कुली, स्त्री, (कुलि + कृदिकारान्तत्वात् वा ङीष् ।) कण्टकारी । इत्यमरः । २ । ४ । ९४ ॥ पत्नीज्येष्ठभगिनी । इति हेमचन्द्रः ॥ वृहती । इति राजनिर्घण्टः ॥

कुलीन, पुं, (कुले प्रशस्तवंशे जातः । "कुलात् खः" । ४ । १ । १३९ । इति खः ।) श्रेष्ठघोटकः । तत्पर्य्यायः । आजानेयः २ । इत्यमरः ॥ आजानेयः ३ । इति तट्टीका ॥ खजानेयः ४ जात्यः ५ महाश्वः ६ । इति शब्दरत्नावली ॥ (तन्त्रशास्त्रोक्तकुलाचाररते स्थिते कौले ॥) उत्तमकुलोद्भवे, त्रि । तत्पर्य्यायः । महाकुलः २ आर्य्यः ३ सभ्यः ४ सज्जनः ५ साधुः ६ । इत्यमरः । २ । ७ । ३ ॥ * ॥ अथाधुनिककुलीनलक्षणम् । कुलमुत्कर्षविशेषवद्वंशः । इति सङ्केतम् । अथवा कुलधर्मम् । तस्यापत्यमित्यर्थे कुलशब्दादीनप्रत्ययेन कुलीन इति पदसिद्धिरिति केचित् । अर्थात् कुलीनशब्देन उत्कर्षविशेषवद्वंशजातकव्यक्तिरिति । तथा च लक्षणम् । उत्कर्षविशेषधर्मावच्छिन्नवंशजातकत्वे सति तद्धर्म्मवत्त्वं कुलीनत्वमिति । उत्कर्षविशेषस्तु नवधा गुणाः । ते च यथा ।
"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठाऽऽवृत्तिस्तपो दानं नवधा कुललक्षणम्" ॥
अत एव उत्कर्षविशेषात्मकनवधागुणविशिष्टत्वं कुलीनत्वम् । एतेन इदानीं साधारणसामान्यजनानां यदि नवधा गुणा वर्त्तन्ते तदा तेऽपि कुलीनाः स्युरिति । अनवच्छिन्नपर्य्यायत्वं कुलीनत्वम् । प्रमाणं यथा,—
"सपर्य्यायं समासाद्य दानग्रहणमुत्तमम् ।
कन्याऽभावे कुशत्यागं प्रतिज्ञा वा परस्परम्" ॥
तथा च ।
"कुलीनस्य सुतां लब्ध्वा कुलीनाय सुतां ददौ ।
पर्य्यायक्रमतश्चैव स एव कुलदीपकः" ॥
तथा च ।
"आदानञ्च प्रदानञ्च कुशत्यागस्तथैव च ।
प्रतिज्ञाघटकाग्रे च कुलकर्म्म चतुर्व्विधम्" ॥
इति कुलदीपिका ॥ * ॥ अथ वङ्गालभूमालङ्कृताः पञ्चगोत्रराढीयब्राह्मणस्य ग्रामविशिष्टस्य मुख्यगौणभेदेन द्वाविंशतिकुलीनाः यथा । शाण्डिल्यगोत्रे भट्टनारायणवंशज आदिवराहवन्द्यः स मुख्यः । रामगडगड निपकेशरकोशी गुंयी कुसुमी वटु दिर्घाटि वैकुण्ठपारियालः एते पञ्च गौणाः । काश्यपगोत्रे दक्षवंशजः मुखोचनचट्टः स मुख्यः । अगच्छड धीरगुड काकमीतभट्टी एते त्रयो गौणाः ॥ भरद्वाजगोत्रे श्रीहर्षवंशज धुरन्धरमुखटी स च मुख्यः । विनायकदिङ्गीसाँयी गन्धर्व्वरायी एतौ द्वौ गौणौ ॥ सावर्णगोत्रे वेदगर्भवंशज वीरप्रतगाङ्गुली सुधीरकुन्द एतौ द्वौ मुख्यौ । वीरसूदनघण्टेश्वरः स च गौणः ॥ वात्स्यगोत्रे छान्दड़वंशज सुरभिघोषवालः कविकाञ्जिलालः रविपूतितण्ड एते मुख्याः । मातुचौटखड़ो मनिकालुमहिन्त्या वनमालिपिप्पली एते गौणाः ॥ अधुना एषां मध्ये मुख्याः अष्टौ कुलीनाः गौणाश्चतुर्दशश्रोत्रियाः । अन्येऽपि सप्तगोत्राश्चलाः सप्तशिशश्रोत्रियाः सन्ति ॥ ततो बल्लालसेनेन मुख्यात्कुलीनो न विप्रविदुत्वा समीकरणकृतम् । तत्र एतेषां नानादोषदर्शनात् देवीवरेण

फुलिया खड़दह्वल्लवीसर्व्वानन्दी इत्याद्याः षट्-
त्रिंशन्मेला कृता। ततो भागयूथयाक इति
तेषां संज्ञा जाता कुलाचार्य्यग्रन्थात् ज्ञेयाः ॥*॥

अथ वारेन्द्रब्राह्मणकुलीना ।

"आदौ मैत्रस्ततो भीमो रुद्रः सन्यामिनिस्तथा ।
लाहिड़ि र्भादुड़ि साधुर्भादडाः पङ्क्तिपूरकाः" ॥

एषां नानादोषदर्शनात् कुलाचार्य्येण अष्टौ पटी
इति संज्ञा कृता। तद्यथा। निरावित्ता १ रोहिला
२ भूष्णा ३ आलेखानी ४ कुतलखानी ५ बेणी ६
जोनाली ७ भवानीपुर ८। एतेषां कुलाघातात्
काप इति संज्ञा जाता ॥*॥

अथ वैद्यस्यादिकुलीना ।

धन्वन्तरिगोत्रे विनायकसेन। मौद्गल्यगोत्रे चायु-
दास। काश्यपे कायुगुप्त। वल्लालेनैषां कुलं
महामध्यमकनिष्ठकुलभेदेन त्रिधा कृतम्। तत्र
महाकुलीना यथा। यथा। कृष्णसेनखान १ हरि-
हरसेनखान २ षष्ठीवरदास ३ गणपतिदास
४ दुर्ज्जयदास ५। अधुनैषां कुलस्य ह्रासवृद्धि-
भङ्गा न सन्ति ॥*॥

अथ दक्षिणराढीयकायस्थकुलीना ।

तत्रादिशूरराजेन कान्यकुब्जदेशादानीतैर्ब्राह्मण-
पञ्चकैः सह घोषवसुमित्रदत्तगुहाः पञ्चागता
आदिकुलीना यथा। सौकालीनगोत्रे मकरन्द-
घोष १। गौतमे दशरथवसु २। विश्वामित्रे
कालिदासमित्र ३। काश्यपगोत्रे दशरथगुह
स्वाहङ्कारादवमानितो वङ्गे गतः ४। भरद्वाज-
गोत्रे पुरुषोत्तमदत्त विनयहीनतो निष्कुल ५।
वङ्गजकुलाचार्य्यग्रन्थे स एव मौद्गल्यगोत्र ॥*॥

अथ वल्लालसेनकृतसमाजादय ।

तत्रादयस्य षष्ठ पुरुषयोर्निशापतिप्रभाकरघोष-
योर्वासस्थाने क्रमेण वालीआकनाख्यौ ग्रामौ।
द्वितीयस्य पञ्चमपुरुषयोः शुक्तिमुक्तिवस्वोर्वासस्थाने
क्रमेण वागाण्डिमाहिनगराख्यौ ग्रामौ। तृतीय
स्याष्टमपुरुषयोः धूँइ गुँइ मित्रयोर्वासस्थाने
क्रमेण वड़िशाटेकानामग्रामौ॥ अपरेऽष्टादश-
समाजास्तद्वस्थाना कुलाभावात् न लिखिता ॥*॥
तेषां कुलन्तु नवविधम्। मुख्य१। कनिष्ठ २
कृमाया ३ मध्यांश ४ तेओज ५ एतानि प्रधा-
नानि। कनिष्ठद्वितीयपुत्र ६ कृमायाद्वितीयपुत्र
७ मध्यांशद्वितीयपुत्र ८ तेओजद्वितीयपुत्र इति
च ९। नवरङ्गानुरोधात् कृमायाज्येष्ठपुत्रस्य
मध्यश्रेष्ठ इति संज्ञा जाता ॥*॥

अथ कुलानां विवरणम्। ||/'

मुख्यकुलीनस्य प्रथमपुत्रः पितृतुल्य द्वितीय
कनिष्ठनामकुलविशिष्ट तृतीयो मध्यांशनामकुल-
युक्त चतुर्थः तेओजनामकुलान्वितः पञ्चमादियाव-
त्पुत्रा मध्यांशद्वितीयपुत्रनामकुलयुक्ता भवन्ति ॥
कनिष्ठकुलीनस्य ज्येष्ठपुत्र कृमायानामकुलयुक्त
तस्य ज्येष्ठपुत्र मध्यश्रेष्ठनामकुलयुक्तः तस्य ज्येष्ठ-
पुत्र मध्यांशनामकुलविशिष्ट स एव अपरम-
ध्यांशवारभायामध्यांश इति संज्ञादययुक्त ॥*॥
एषां कर्म्मणा वृद्धिर्यथा। मुख्यकुलीनस्य द्वितीय-
तृतीयपुत्रयोः कुलस्य वाड़िमुख्य इति संज्ञा
चतुर्थपञ्चमषष्ठपुत्राणां कुलस्य वाड़िकनिष्ठ इति
संज्ञा सप्तमाष्टमनवमपुत्राणां कुलस्य वाड़िम-
ध्यांश इति संज्ञा दशमैकादशद्वादशपुत्राणां
कुलस्य वाड़ितेओज इति संज्ञा भवति॥ कनिष्ठ-
नामकुलीनस्य द्वितीयपुत्रस्य कुलस्य तेओज इति
संज्ञा भवति। मुख्यकुलीनस्य तृतीयपुत्रस्य
द्वितीयपुत्रस्य कुलस्य तेओज इति संज्ञा॥ मध्यां-
शद्वितीयपुत्र इति संज्ञं कुलं मुख्यकनिष्ठकृमाया-
मध्यश्रेष्ठमध्यांश इति कुलपञ्चकात् भवति ॥*॥
मुख्यकुलन्तु त्रिविधं यथा। प्रकृतम्१ सहजम् २
कोमलम् ३। आदौ भट्टसमाने षट् प्रकृतामुख्या
अभूवन्। ततस्तेषां द्वितीयतृतीयपुत्रयोः कुलस्य
वृद्धा क्रमेण सहजकोमल इति संज्ञा जाता।
प्रकृतमुख्यकुले दानग्रहणाभ्यां सहज इति संज्ञा
कोमलमुख्यकुले दानग्रहणाभ्यां कोमल इति
संज्ञा भवति। सहज सहजेन कोमल कोमले-
नापि कुलं कृत्वा तत्तद्भावापन्नौ भवतः॥ पितृकु-
लानुसारेण ज्येष्ठपुत्राणां कुलस्य जन्ममुख्यजन्म-
कनिष्ठादिसंज्ञा ॥*॥ प्रकृतमुख्यकुलस्य ह्रास-
वृद्धी न भवत। सहजमुख्यकुलस्य ह्रासवृद्धी
भवत। कोमलमुख्यकुलस्यापि ह्रासवृद्धी न
भवत। कनिष्ठकुलस्य मुख्यत्वं कृमायाकुलस्य
कनिष्ठत्व भवति। मध्यांशकुलस्य स्थिरतरत्वम्।
कनिष्ठद्वितीयपुत्र वाड़ितेओज इति संज्ञा
प्राप्नोति। मुख्यतृतीयपुत्रस्य द्वितीयपुत्र तेओज
इति संज्ञामपि प्राप्तुमर्हति। कृमायाद्वितीयपुत्र-
मध्यांशद्वितीयपुत्रयोः कुले ह्रासवृद्धी न स्तः।
सर्व्वे कुलीना कुलनाशात् वंशजभावापन्ना
भवन्ति ॥*॥ आदौ यदि पितृपर्य्यायाय अथवा
मौलिकाय कन्या दद्यात् तदानं प्रामाणिकसंज्ञ
भवति। पश्चात् कुलकर्म्मकर्त्तव्यम्। तद्यथा।
मुख्यस्य कन्यायाः प्रदाने तस्याः छेद संज्ञा षष्ठ-
कन्यावधि गरच्छेद इति संज्ञा भवति। अन्य-
कुलानां ज्येष्ठकन्यायाः प्रदाने तस्या आकृतिरिति
संज्ञा तदनन्तर यावत्कन्यानां प्रदाने तासां क्रमेण
प्रतिसारणी जघन्या इति संज्ञादय भवति॥
आत्मसमकुलीनाय आकृतिनामकन्यादाने कुलस्य
श्रेष्ठत्वम्। अनुजकन्याग्रहणे तु कुलह्रासो भवति।
मुख्यस्य गरच्छेद इति नाम्नीं कन्यां अन्यकुलीनस्य
प्रतिसारणीञ्च कन्यां मौलिको वंशजस्य ग्रहीतु-
मर्हति। उत्तममध्यमाधमकर्म्मभि शौर्य्यसमा-
वेशनिन्दा इति त्रयं कुलस्याशकर्म्म॥*॥ पूर्व्वं
विपर्य्यये विवाहो जात। पुरन्दरवसुनैषां त्रयो-
दशपर्य्यायावधिश्रेणीपर्य्यायबन्धपञ्चमकृतकुलोद्धरणे
कृते। यथा।

"विपर्य्यये कुलं नास्ति न कुलं रत्नपिण्डयोः"॥*॥

अथ मुख्येतरकुलीनानां षाण्डिदोषा।

"देवी गङ्गा तथा गौरी भैरवी मार्ज्जारी तथा।
वर्णायी षाण्डिदासी च सप्तैते कुलकण्टकाः"॥

अपि च।

"श्रीनाथी श्रीकरी विष्णुदासी हृदय एव च।
कन्दर्पी च सदानन्दी षडेते कुलकण्टकाः"॥
इति कुलाचार्य्यकारिका॥*॥

अथ मुख्यकुलीनस्य कार्य्यम्। स च आगच्छेद
अर्थादग्रिमां कन्यां आत्मतुल्याय द्वितीयां कनि-
ष्ठकुलीनाय तृतीयां कृमायानामकुलयुक्ताय चतुर्थीं
मध्यश्रेष्ठनामकुलविशिष्टाय अथवा मुख्यतृतीय-
पुत्रमध्यांशकुलीनाय पञ्चमीं तेओजनामकुल
युक्ताय दद्यात्। तदनन्तरजातानां गरच्छेद इति
संज्ञा ता मौलिकमध्यांशद्वितीयपुत्रमुख्यकुली-
नेभ्यो दातुमर्हति। स एवादौ मुख्यकुलीनस्या-
ग्रिमां कन्यां ततः कनिष्ठकुलीनस्य कन्यां ततो
मध्यांश इति नामकुलयुक्तस्य कन्यां ततो जन्म-
तेओज इतिनामकुलविशिष्टस्य कन्यां गृह्णी-
यात् ॥*॥ अथ कनिष्ठकुलीनस्य कार्य्यम्।
स प्रथमां कन्यां आत्मतुल्यकुलीनाय द्वितीयां
तेओज इति नामकुलयुक्ताय दद्यात्। मुख्यतृती-
यपुत्राय मध्यांशनामकुलयुक्ताय अथवा मुख्य-
द्वितीयपुत्राय कन्यां दातुमर्हति। मुख्यकुलीनस्य
द्वितीयां कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां
गृह्णीयात्। ततो मुख्यकुलीनस्य तृतीयपुत्रस्य
मध्यांशनामकुलयुक्तस्य कन्यां गृह्णीयात्॥*॥
अथ कृमायाकुलीनस्य कार्य्यम्। स मध्यांशनाम-
कुलविशिष्टाय प्रथमां कन्यां मध्यांश इतिकुल-
युक्तानुजाय अर्थात् वाड़ितेओजनामकुलविशि-
ष्टाय द्वितीयां दद्यात्। मुख्यकुलीनस्य तृतीय-
कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां
गृह्णीयात्॥*॥ अथ मुख्यतृतीयपुत्रस्य मध्यां-
शनामकुलीनस्य कार्य्यम्। स प्रथमकन्यां जन्मते-
ओजनामकुलविशिष्टाय द्वितीयां मध्यांशकुल-
विशिष्टस्य द्वितीयपुत्राय दद्यात्। कनिष्ठस्य
प्रथमां कन्यां ततस्तेओजकुलयुक्तस्य प्रथमां कन्यां
ततस्तेओजानुजकुलीनस्य प्रथमां कन्यां गृह्णीयात्
मुख्यस्य तृतीयकन्याग्रहणात् तस्य महत् कर्म्म॥*॥
अथ जन्मतेओजनामकुलीनस्य कार्य्यम्। स
प्रथमां कन्यां मुख्यकुलीनस्य चतुर्थपुत्राय अथवा
मध्यांशनामकुलविशिष्टस्य द्वितीयपुत्राय द्वितीयां
तेओजनामकुलविशिष्टस्य द्वितीयपुत्राय दद्यात्।
मुख्यकुलीनस्य पञ्चमकन्यां अथवा मध्यांशनामकु-
लीनस्य प्रथमकन्यां गृह्णीयात्॥*॥ अथ कनिष्ठ-
कुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्म-
तुल्याय अथवा तेओजनामकुलविशिष्टद्वितीय-
पुत्राय प्रथमां कन्यां दद्यात्। मुख्यचतुर्थपुत्र-
जन्मतेओजनामकुलयुक्तस्य प्रथमां अथवा कनि-
ष्ठनामकुलीनस्य द्वितीयां कन्यां गृह्णीयात्॥*॥
अथ कृमायानामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्।
स आत्मतुल्याय अथवा तेओजनामकुलविशिष्ट-
द्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेओज-
नामकुलविशिष्टस्य प्रथमां कन्यां अथवा कृमाया-
नामकुलयुक्तस्य द्वितीयां गृह्णीयात्॥*॥ अथ
मध्यांशनामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स
आत्मतुल्याय अथवा तेओजनामकुलविशिष्टस्य
द्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेओज-

नामकुलविशिष्टस्य प्रथमां अथवा अन्यकुलीनानां मध्यांशनामकुलविशिष्टस्य वा द्वितीया कन्यां गृह्णीयात् ॥ * ॥ अथ तेज्योगनामकुलीनस्य द्वितीयपुत्त्रस्य कार्य्यम् । स आत्मतुल्याय अथवा वंशजाय प्रथमा कन्यां दद्यात् । मध्यांशनाम कुलविशिष्टस्य द्वितीयपुत्त्रस्य प्रथमा कन्यां अथवा तेज्योगनामकुलविशिष्टस्य द्वितीया गृह्णीयात् ॥ * ॥ अथ मध्यश्रेष्ठनामकुलीनस्य कार्य्यम् । स मध्यश्रेष्ठपुत्त्रवारमायामध्यांशनामकुलीनाय प्रथमा मध्यांशकुलविशिष्टस्य द्वितीयपुत्त्राय तेज्योगनामकुलीनाय द्वितीया कन्या दद्यात् । मुख्यकुलीनस्य चतुर्थीं कन्यां अथवा कनिष्ठकुलीनस्य प्रथमा कन्या गृह्णीयात् । ततः तेज्योगनामकुलविशिष्टस्य प्रथमां कन्यां गृह्णीयात् । ततः तेज्योगानुजकुलीनस्य अग्रिमा कन्या गृह्णीयात् ॥ * ॥ अथ मध्यश्रेष्ठपुत्त्रवारमायामध्यांशनामकुलीनस्य कार्य्यम् । स तेज्योगनामकुलयुक्ताय प्रथमां कन्यां दद्यात् । कनिष्ठकुलविशिष्टस्य अथवा छभायानामकुलयुक्तस्य किम्वा मध्यश्रेष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् ॥ * ॥ अथ चतुस्त्रिंशदधिकसप्तदशशतशकाब्दे मत्पिता तावत्कुलीनकुलाचार्य्यमतेन मुख्यकुलीनस्य द्वितीयतृतीययोः कन्ययोः क्रमेण ग्रहणेन तदलाभे श्रोत्रियकुले दानेन समानकुले ग्रहणेन च कनिष्ठछभायानामकुलयोः पुरुषानुक्रमेण स्थिरतरत्व निर्णीतम् । तद्यथा,—

"कनिष्ठकुलवेश्मनि क्वचन केऽपि केऽपीच्छया
परेऽपि पुरुषत्रयादगमनेव दौच्छेयिकाम् ।
निषेधमिह नेच्छते कमपि तत्र षड्भाट्टजः
सुत पितृपदं कथं ननु ततो हि न प्राप्स्यति ॥
शाके चन्द्रपदत्रिसप्तवसुधागण्ये वरेण्ये तथा
पर्य्याये परिपूरिते हि विषमे धन्ये त्रयोविंशके ।
गोपीमोहनदेववंशतिलकेनापूर्व्वकं श्रीमता
निर्णीतं यदपीह तत्र घटकैः सर्व्वैः कुलीनैर्म्मतम् ॥

कनिष्ठषड्भाट्टकुलस्य सद्वत्
छान्दोयिकायामिदमेव मूलम् ।
आदानतः पित्र्यपदस्य लाभो
ज्येष्ठत्वभाव पुरुषक्रमेण ॥

छेयिकायामशक्तस्य दानस्वेव प्रभवं भवेत् ।
पर्य्यायस्य समानस्य ग्रहणादपि तिष्ठति ॥
श्रोत्रियं निन्दा समावेशस्त्रिविधोऽंशः कुलस्य वै ।
तस्य ध्वंसो न हि भवेद्यत्नतो रक्षितं स हि ॥
अत्र यद्यन्यथाभावो भवेदपि यथाविधि ।
क्रमागतेषु वर्गेषु तदा हानिर्भविष्यति ॥

सर्व्वैः कुलज्ञैश्च कुलीनवर्गै-
र्गोष्ठीपतीनां पुरतः सहर्षैः ।
इदं हि पत्रं लिखितं प्रयत्नात्
निर्णीत एष प्रचलिष्यतीति" ॥ * ॥

अथ वङ्गजकुलीनाः ।

"वसुवंशे च मुख्यौ द्वौ नाम्ना लक्ष्मणपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाशतौ ॥
दशरथो गुहश्चैव मित्रस्तारापतिस्तथा" ॥

एतेषामादिपुरुषनिर्णयो यथा । गौतमगोत्रे सर्व्वादौ दशरथवसुसुतौ कृष्णवसुपरमवसुकौ कृष्णवसुर्दक्षिणराढ़े स्यातस्तस्य सुतः भववसुः तत्सुत हंसवसुः तत्सुताः मुक्तिमुक्तवसुप्रभृतयः । अनङ्गारवसुः राढ़ात् वङ्गे गतः तस्य वङ्गे कुलहानिर्जाता तस्य सुतः मधुवसुः तत्सुतः गुणाकरवसुः तत्सुता अनन्तादयः । दशरथसुत परमवसुस्तत्सुतौ कृष्णवसुमूर्त्तवसुकौ वङ्गे स्यातौ । सौकालीनगोत्रे मकरन्दघोषसुतौ भवनाथघोषसुभाषितघोषौ भवनाथघोषो दक्षिणराढ़े स्यात सुभाषितघोषो वङ्गे स्यातः तस्य सुतश्चतुर्भुजघोष ॥ विश्वामित्रगोत्रे सर्व्वादौ कालिदासमित्रसुतौ अश्वपतिमित्रश्रीधरमित्रौ श्रीधरमित्रो दक्षिणराढ़े स्यात अश्वपतिमित्रो वङ्गे स्यातस्तस्य सुतस्तारापतिर्मित्र ॥ इति वङ्गकुलाचार्य्यग्रन्थः कुलदीपिका ॥

कुलीनकः, पुं, (कुलीन + संज्ञायां कन् ।) वनमुद्गः । इति हेमचन्द्रः ॥

कुलीनस, क्ली, (कौ लीनं भूलग्नं झषादिकं स्यतीति । सो + कः ।) जलम् । इति हेमचन्द्रः ॥

कुलीर, पुं, (कुल् सम्स्त्याने + ईरन् किच्च ।) कर्कटः । इत्यमरः । १ । १० । २१ ॥ काँकड़ा इति भाषा । ("अथ कुलीरप्रभृतयो जलजन्तवस्तमभ्युपेत्य प्रोचुः" । इति हितोपदेशः ॥) कर्कटराशिः इति ज्योतिषम् ॥

कुलीरशृङ्गी, स्त्री, (कुलीरावयव इव शृङ्गं यस्य । कुलीरशृङ्ग + गौरादित्वात् ङीष् ।) कर्कटशृङ्गीलता । इति रत्नमाला ॥

कुलीराद्, [द्] पुं, (कुलीरं अत्तीति । अद् + क्विप् । उत्पत्तिमात्रेणैवात्मप्रसूतिभक्षणादस्य तथात्वम् ।) कर्कटशिशुः । तत्पर्य्यायः । स्वेगविः २ । इति त्रिकाण्डशेषः ॥

कुलीशः, पुं क्ली, (कुलिश + पृषोदरात् दीर्घः ।) कुलिशम् । इत्यमरटीकासारसुन्दरी ॥

कुलुक, क्ली, (कुल् + बाहुलकात् उलच् किच्च निपातनात् लस्य कः ।) जिह्वामलम् । इति हेमचन्द्रः ॥

कुलुक्कगुञ्जा, स्त्री, (कौ भूमौ लुक्का गुप्ता गुञ्जा इव ।) उल्काग्निः । इति हारावली ॥

कुलेश्वर, पुं, (कुलस्य जगत्समूहस्य कुलचक्रस्य वा ईश्वरः ।) शिवः । (कुलस्य वंशस्य ईश्वरः नेता कर्त्ता वा ।) कुलपतिः । इति शब्दमाला ॥

कुलोत्कट, पुं, (कुले कुलेन वा उत्कटः उद्रिक्तः उग्रो वा ।) कुलीनाश्वः । इति शब्दचन्द्रिका ॥ उत्कट कुलोद्भवे त्रि ॥

कुल्फः, पुं क्ली, (कल सङ्ख्याने "कलिगलिभ्यां फगस्योच्च" । उणा ५ । २६ । इति फक् अस्य उच्च ।) रोगः । गुल्फे पुं इत्युणादिकोषः ॥ (यथा, ऋग्वेदे ७ । ५० । २ । "यद्विजामन्नपरुषि वन्दनं भुवदष्ठीवन्तौ परिकुल्फौ च देहत्" ॥)

कुल्मल, क्ली, (कुष् निष्कर्षे "कुषेर्लश्च" । उणां ४ । १०७ । इति कलन् लश्चान्तादेशः ।) पापम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा ऋग्वेदे २ । ३० । ३ ।

"तत्र मे गच्छताद्धव शल्य इव कुल्मलं यथा" ॥)

कुल्माष, क्ली, (कोलतीति । कुल् + क्विप् । ततः कुल् मलाभिश्रितजलं मस्यतीति । मसीय्यं परिणामे + अण् पृषोदरात् साधनम् ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३९ ॥

कुल्माष, पुं, (कोलति इति । कुल् + क्विप् । कुल् अर्द्धस्विन्नो माषोऽस्मिन् ।) यावकः । इत्यमरः । २ । ९ । १८ ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ॥

"कुल्माषा वातला रूक्षा गुरवो भिन्नवर्च्चसः" ॥)

बोरवधान्यम् । कुलत्थ इत्यन्ये । माषाकृतिपत्रः । काश्मीरेषु तुलसी इति स्यात इति सुभूतिः । इति भरतः ॥ राजमाष इत्यन्ये । इति नयनानन्द ॥ माषादिमिश्रमर्द्धस्विन्नमन्नम् । खिचड़ी इति ख्यातञ्च । इति सिंहादिसप्तटीकायां भरत ॥ पाचितमाषादिरिति नीम । इति सारसुन्दरी ॥ अर्द्धस्विन्नगोधूमचणकादयः । (यथा, शब्दार्थचिन्तामणौ ।

"अर्द्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः ।
कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः" ॥)

अस्य गुणाः । गुरुत्वम् । रूक्षत्वम् । वातकारित्वम् । मलभेदित्वञ्च । इति भावप्रकाशः ॥ रोगविशेषः । इति शब्दरत्नावली ॥ वनकुलत्थः । इति रत्नमाला ॥

कुल्माषाभिषुत, क्ली, (कुल्माषैर्यवादिभिरर्द्धस्विन्नैरभिषूयते स्म इति । अभि + षु + क्तः ।) काञ्जिकम् । इत्यमरटीकायां स्वामी ॥

कुल्मास, क्ली, (कोलतीति कुल् मलाभिश्रितजलम् । तत् मस्यति परिणमयतीति अण् ।) कुल्माषम् । इत्यमरटीकायां भरत ॥

कुल्य, क्ली, (कुल् बन्धे + क्यप् ।) अस्थि । इत्यमरः । २ । ६ । ६८ ॥ अष्टद्रोणपरिमाणम् । सूर्पम् । आमिषम् । इति मेदिनी ॥

कुल्यः, त्रि, (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यामिति" । ४ । १ । १४० । इति यत् । यद्वा कुले भवः कुलाय हितः कुले साधु वा दिगादित्वात् तत्र साधुरिति वा यत् ।) कुलोद्भवः । कुलहितः । (यथा, भागवते ७ । ६ । १२ ।

"गृहान् मनोज्ञोरुपरिच्छदांश्च
वृत्तींश्च कुल्याः पशुभृत्यवर्गान्" ॥)

मान्ये पुं इति । मेदिनी ।

कुल्या, स्त्री, (कुले प्राणिगणे साधु तत्र साधुरिति यत् ।) क्षुद्रा कृत्रिमा नदी । इत्यमरः । १ । १० । ३४ ॥ (यथा, शाकुन्तले १ माङ्के ।

"कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः" ॥)

पयःप्रणाली । पयनाला इति भाषा । जीवन्तिकौषधिः । नदीमात्रम् । इति मेदिनी ॥ (यथा, महाभारते ३ पर्व्वणि ।

"सैन्धवारण्यमासाद्य कुल्यानां कुरु दर्शनम्" ॥)

कुलस्त्री । इति हलायुधः ॥ स्थूलवार्त्ताकुः । इति रत्नमाला ॥

कुवं, क्ली, (कौ पृथिव्यां वलते मण्डलाकारपुष्पावयवेन सञ्चरतीव। वल सवरणे अन्येभ्योऽपीति ड। यद्वा कुं भूमिं वाति। कु+वा+क।) उत्पलम्। जलजपुष्पमात्रम्। इति हेमचन्द्रः॥

कुवकालुका, स्त्री, (कुवमिव कायते प्रकाशते। कुव+कै+कः। कुवका आलुका इव।) घोषीशाकम्। इति राजनिर्घण्टः॥

कुवङ्गं, क्ली, (कुत्सितं वङ्गमिव गुणैः।) सीसकम्। इति राजनिर्घण्टः॥

कुवच, त्रि, (कुत्सित वच यस्य।) कुवाद। परदोषकथनशीलः। इत्यमरः॥

कुवचक, स्त्री, (कु ईषत् वच हीरकमिव कायते। कै+कः।) वैक्रान्तमणिः। इति राजनिर्घण्टः॥

कुवर, पु, (कुत्सितं यथा स्यात् तथा व्रियते। वृ+अप्। यद्वा कुत्सितं रसं वृणोति गृह्णाति। कु+वृ+अच्।) तुवरः। इत्यमरटीकायां रायमुकुटः॥

कुवल, क्ली, (कौ वलते। वल्+पचाद्यच्।) उत्पलम्। मुक्ताफलम्। वदरीफलम्। इति मेदिनी॥

कुवलय, क्ली, (कौ पृथिव्या भूमेर्वा वलयमिव शोभाकारकत्वात्।) उत्पलम्। इत्यमरः। १।१०।३७॥ नीलोत्पलम्। इति राजनिर्घण्टः॥ (यथा,—मेघदूते ४६।
"ज्योतिर्लेखा वलयिगलितं यस्य वर्ह भवानी।
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति"॥)

कुवलयापीड, पु, (कुवलयं उत्पलं आ सम्यक् पीडयति। कुवलयं सर्व्वं भूवलयं आपीडयति वा आ+पीड्+अच्।)* कंसस्य हस्तिरूपो दैत्यविशेषः। इति श्रीभागवतम्॥ (यथा, हरिवंशे १०५। २६-२७।
"शकुनिं कैशिनञ्चैव यमलार्ज्जुनकावपि।
नागं कुवलयापीडं चानूरं मुष्टिकं तथा॥
कंसञ्च बलिनां श्रेष्ठं सगणं देवकीसुत।
निहत्य गोपवेशेन क्रीड़यामास केशव"॥
कुवलयं नीलोत्पलं आपीडः भूषणं यस्य इति व्युत्पत्त्या नीलोत्पलालङ्कृते जने॥)

कुवलयिनी, स्त्री, (कुवलयानां समूहः तत खलादित्वात् इनिः। यद्वा कुवलयानि सन्त्यस्यां इति इनिः ङीष्।) उत्पलिनी। इति राजनिर्घण्टः॥

कुवलाश्व, पु, (कौ पृथिव्यां वलते विचरणसमर्थो भवति यद्वा कुं भूमिं पृथिवीं वा वलते व्याप्नोतीव। वल्+अच्। कुवलः वेगगमनेन भुवलयभ्रमणक्षमः अश्वो यस्य।) धुन्धुमारराज। इति हेमचन्द्रः॥ (यथा, विष्णुपुराणे ४।२।१२। "आवस्त्य वृहदश्वस्तस्यापि कुवलाश्व योऽसावतङ्कस्य महर्षेरपकारिणं धुन्धुनामानमसुर वैष्णवेन तेजसाऽऽप्यायितः पुत्रसहस्रैरेकविंशतिभिः परिवृतो जघान धुन्धुमारसञ्ज्ञामवाप च"॥ अयमेव कुवलयाश्व इति नाम्नापि विश्रुतः॥)

कुवली, स्त्री, (कुवल+स्त्रियां गौरादित्वात् ङीष्।) कोलिवृक्षः। इति रत्नमाला॥

कुवादः, त्रि, (कुत्सितो वादः भाषणं यस्य।) कुवच परदोषकथनशील। इत्यमरः। ३।१।३७॥

कुवाङ्गन, पु, (कुत्सितं वङ्गतीति। कु+वङ्ग+उलच्।) उष्ट्रः। इति शब्दचन्द्रिका॥

कुविन्द, पु, (कुत्सितं भक्तादिमञ्चितसूत्रादिकं कुत्सितवृत्त्या वा जीविका विन्दतीति।) तन्तुवाय। स तु शूद्रागर्भे विश्वकर्मौरसजात। इति ब्रह्मवैवर्त्तपुराणम्॥

कुवृत्तिकृत्, पु, (कुवृत्ति ईषदावरणरूपं वरणं करोति कुत्सितैः कण्टकादिभिर्वा वृत्ति आवरणं करोति आत्मानमिति शेषः। कुवृत्ति+कृ+क्विप् तुगागमश्च।) यूतिक। इति शब्दचन्द्रिका॥ काँटा करञ्ज इति भाषा॥ (कुत्सिता वृत्तिं व्यवहारं करोतीति असद्व्यवहारकारी॥)

कुवेणी, स्त्री (कु ईषत् वेणान्ते गच्छन्ति मत्स्या अस्याम्। कु+वेण+इन्। ततः कृदिकारान्तादिति वा ङीप्।) मत्स्यधानी इत्यमर। १।१०। १६॥ खालुइ इति भाषा। कुत्सिता वेणी यस्या। निन्दितवेणी नारी च॥

कुवेर, पु, (कुत्सितं वेरं शरीरमस्य।) तथा च वायुमार्कण्डेयपुराणे।
"कुत्सायां क्विति शब्दोऽयं शरीरं वेरमुच्यते।
कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कित"॥
इत्यमरटीकायां भरतः॥ देवताविशेषः। स तु विश्रवोमुनेरिड़विड़ाभार्यायां जात। धनपत्योत्तरदिशां पतिश्च। इति श्रीभागवतम्॥ चित्ररथोऽस्योद्यानोऽस्य जातः। तत्पर्य्यायः। त्र्यम्बकसख २ यक्षराट् ३ गुह्यकेश्वर ४ मनुष्यधर्म्मा ५ धनद ६ राजराजः ७ धनाधिपः ८ किन्नरेश ९ वैश्रवण १० पौलस्त्य ११ नरवाहन १२ यक्ष १३ एकपिङ्ग १४ ऐलविल १५ श्रीद १६ पुण्यजनेश्वर १७। इत्यमर।१।१।७१—७३। हर्य्यक्ष १८ अलकाधिप १९। इति जटाधरः॥ * ॥ नन्दीवृक्ष। इति मेदिनी॥ अर्हदुपासकविशेष। इति हेमचन्द्र॥

कुवेर, त्रि, (कुत्सितं वेरं चेष्टा दानादिका गति र्वा यस्य।) मन्द। इति धरणी॥ (कुत्सितं वेरं शरीरं यस्य।) कुशरीरः। इति त्रिकाण्डशेषः॥

कुवेरक, पु, (कुवेर+सञ्ज्ञायां कन्।) नन्दीवृक्ष। इत्यमर।२।४।१२७॥

कुवेराक्षी, स्त्री, (कुवेरस्य अक्षीव पिङ्गलं पुष्पमस्याः।) पाटलावृक्षः। इत्यमर। २। ४। ५५॥ लताकरञ्ज। सितपाटलिकावृक्ष। इति राजनिर्घण्टः॥

कुवेराचल, पु, (कुवेरस्य अचलः।) कैलासपर्व्वत। इति त्रिकाण्डशेषः॥

कुवेराद्रि, पु, (कुवेरस्य अद्रिः पर्व्वत।) कैलासपर्व्वत। इति जटाधर॥

कुवेल, क्ली, (कुवेषु जलजपुष्पेषु मध्ये इं शोभां लाति गृह्णातीति। ला+क।) कुवलयम्। इति हेमचन्द्रः॥

कुश इ कि द्युतौ। इति कविकल्पद्रुम॥ (चुरा पक्षे भ्वां-परं-सक-सेट्-इदित्।) पञ्चमस्वरो। इ कुंश्यते। कि कुंशयति कुंशति। इति दुर्गादास॥

कुश य इर् श्लिषि। आलिङ्गन इति यावत्। इति कविकल्पद्रुमः॥ (दिवा-परं-सक-सेट्।) य कुश्यति वाला कान्तम्। इर् अकुशत् अकोशीत्। अस्मात् पुषादित्वान्नित्य ङ इत्यन्ये। इति दुर्गादास॥

कुशं, क्ली पु, (कु पापं श्यति नाशयति। कु+शो+ड। यद्वा कौ भूमौ शेते राजते शोभते इत्यर्थः।) स्वनामख्यातदृणम्। तत्पर्य्यायः। कुथः २ दर्भ ३ पवित्रम् ४। इत्यमर।२।४।१६६॥ याज्ञिकः ५ हृस्वगर्भ ६ वर्हिः ७ कुतुप ८। इति शब्दरत्नावली॥ अपि च।
"कुशो दर्भस्तथा वर्हिः सूच्यग्रो यज्ञ भूषणः।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च"॥
तस्योत्पत्तिर्यथा,—
"वर्हिष्मती नाम पुरी सर्व्वसम्पत्समन्विता।
न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वत॥
कुशकाशास्त एवासन् शश्वद्धरितवर्चसः।
ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे"॥
इति श्रीभागवतम्॥ अस्य गुणा।
"दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम्।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित्"॥
इति भावप्रकाश॥ * ॥ तस्य धारणविधिस्तत्प्रतिनिधिश्च यथा,—
"पूजाकाले सर्व्वदैव कुशहस्तो भवेच्छुचि।
तर्ज्जन्या रजतं धार्य्यं स्वर्णं धार्य्यमनामया॥
कुशकार्य्यंकरं यस्मान्न तु वन्या कुशा कुशा।
कुशेन रहिता पूजा विफला कथिता मया॥
नान्यस्य रजतं स्वर्णं धार्य्यं हि निजमङ्गले"॥
इति वरदातन्त्रे १ पटल॥ * ॥
सधवायास्तत्स्पर्शनिषेधो यथा,—
"न स्पृशेत्तिलदर्भांश्च सधवा तु कथञ्चन"॥
इति हलायुधकृतब्राह्मणसर्व्वस्वम्॥ अन्यत् दर्भशब्दे द्रष्टव्यम्॥

कुश, स्त्री, (कौ पृथिव्यां भूमौ शेते। भूलग्नत्वात् तथात्वम्।) जलम्। इति मेदिनी॥

कुश, पु, (कु पापं श्यति नाशयति विहितराजधर्म्मानुष्ठानेन। कु+शो+ड। अपरा व्युत्पत्तिर्यथा यथा, रामायणे।
"यस्तयो पूर्व्वजो जात स कुशैर्मन्त्रसत्कृते।
निर्म्मार्ज्जनीयस्तु तदा कुश इत्यस्य नाम तत्"॥)
रामसुत। (यथा, रघु १६। ७२।
"यत् कुम्भयोनेरधिगम्य राम
कुशाय राज्येन समं दिदेश।
तदस्य जैवाभरणं विहर्त्तु-
रज्ञातपातं सलिले ममज्ज"॥)
योक्त्रम्। इति मेदिनी॥ पुराणोक्तसप्तद्वीपेषु द्वीपभेदः। स तु घृतसमुद्रेणावृत। तत्र देवनिर्म्मितोऽमितुल्य कुशस्तम्बोऽस्ति। (अत कुशद्वीप इति सञ्ज्ञया विख्यात।) तदधिप प्रियव्रतराजपुत्रो हिरण्यरेता तद्द्वीपं विभज्य सप्त-

पुत्रेभ्यो दत्तवान्। तेषां नामानि यथा। वसु १ वसुदामः २ दृढरुचि ३ नाभिगुप्तः ४ स्तुत्यव्रत ५ विविक्तनामा ६ देवनामा ७। एषां वर्षेषु सप्त सीमागिरय। यथा। बभ्रु १ चतुःशृङ्ग २ कपिल ३ चित्रकूट ४ देवानीकः ५ ऊर्द्ध्वरोमा ६ द्रविण ७। सप्त नद्यश्च यथा। रसकुल्या १ मित्रविन्दा २ श्रुतविन्दा ३ देवगर्भा ४ घृतच्युता ५ मधु ६ माला ७। तत्र स्थिता कुशलकोविदाभियुक्तकुलकसञ्ज्ञाः क्रमेण ब्राह्मणक्षत्त्रियवैश्यशूद्रा भगवन्तमग्निरूपिणं आसां नदीनां पयोभिर्यजन्ते। इति श्रीभागवतम्॥ (विष्णुपुराणे तु एतद्वीपाधिपतेस्तत्पुत्राणां गिरीणां नदीनाञ्च नामान्तराणि दृश्यन्ते। यथा २। ४। ३६—४४।

"ज्योतिष्मतः कुशद्वीपे सप्त पुत्त्राः शृणुष्व तान्।
उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः॥
प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः।
तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः॥
तथैव देवगन्धर्व्वयक्षकिम्पुरुषादयः।
वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः॥
दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने।।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चानुक्रमोदिताः।
यथोक्तकर्म्मकर्त्तृत्वात् स्वाधिकारक्षयाय ते।
तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्द्दनम्॥
यजन्तः क्षपयन्त्युग्रमधिकारं फलप्रदम्।
विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा॥
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः।
वर्षाचलास्तु तत्रैते सप्तद्वीपे महामुने।॥
नद्यस्तु सप्त तासान्तु शृणु नामान्यनुक्रमात्।
धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा॥
विद्युदम्भा मही चान्या सर्व्वपापहरास्त्विमाः।
अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः॥
कुशद्वीपे कुशस्तम्बः सञ्ज्ञया तस्य तत् स्मृतम्।
तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः"॥)

कुश, त्रि, (कु कुत्सिते कर्म्मणि शेते अवतिष्ठते। कु+शी+क।) पापिष्ठः॥ (कुत्सिते मदशय्यायां शेते इति।) मत्तः। इति मेदिनी॥

कुशण्डिका, स्त्री, (कुशे कण्डिका इव। कुशकण्डिका पृषोदरात् कस्य लोपः।) सर्व्वहोमार्थाग्निसंस्कारक्रिया। तत्र सर्व्वेषामाहुतियुक्तकर्म्मणां कुशण्डिकासंस्कृताग्निसाध्यत्वात् सैव प्रथममभिधीयते। तत्र हस्तप्रमाणं चतुरस्रं स्थण्डिलं शर्कराङ्गारास्थिकेशतुषादिरहितं पूर्व्वोत्तरप्लवं समं वा छायामण्डपसहितं गोमयेनोपलिप्य स्नातः शुचिराचान्तः प्राङ्मुखः कुशसहितासनोपविष्टः कर्त्ता उत्तरस्यां दिश्यभ्युक्षणार्थं कुशकुसुमसहितजलपात्रं निधाय दक्षिणं जानु भूमौ पातयित्वा उत्तराग्रकुशोपरि सव्यहस्तप्रादेशमुत्तानं वह्निस्थापनपर्य्यन्तं भूमौ निधाय दक्षिणहस्तानामिकाङ्गुष्ठगृहीतकुशमूलेन स्थण्डिलदक्षिणप्रान्ते द्वादशाङ्गुलप्रमाणां प्राङ्मुखीं रेखामुल्लिख्य रेखेयं पृथ्वीदेवताका पीतवर्णा इति ध्यायेत्। तन्मूलतः प्रभृत्येकविंशत्यङ्गुलप्रमाणां उत्तराभिमुखीं रेखामुल्लिख्य रेखेयं अग्निदेवताका लोहितवर्णा इति ध्यायेत्। ततः प्रथमरेखायाः उत्तरतः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं प्रजापतिदेवताका कृष्णवर्णा इति ध्यायेत्। ततः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं इन्द्रदेवताका नीलवर्णा इति ध्यायेत्। ततोऽपि सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं सोमदेवताका शुक्लवर्णा इति ध्यायेत्। तत क्रमेण दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां रेखासूत्थरजो गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्द्देवता रेखासूत्थरजोनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यैशान्यां दिशि अरत्निमात्रान्तरिते देशे प्रक्षिपेत्। ततः पूर्व्वस्थापितजलेन रेखाभ्युक्षणं कृत्वा दक्षिणदिक्स्थकांस्यपात्रस्थाग्नेर्नवशरावस्थाग्नेर्व्वा ज्वलदिन्धनं गृहीत्वा प्रजापतिऋषिस्त्रिष्टुप्छन्दः अग्निर्द्देवताग्निनिरसने विनियोगः। ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। अनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽपरमग्निं गृहीत्वा प्रजापतिर्ऋषिर्बृहतीच्छन्दः प्रजापतिर्द्देवता अग्निस्थापने विनियोगः। ॐ भूर्भुवः स्वरोम्। इत्यनेनाग्निमात्माभिमुखं तृतीयरेखोपरि स्थापयेत्। ततो वामहस्तमुत्तोल्याञ्जलिं बद्ध्वा पठेत्। प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्द्देवताग्निस्थापने विनियोगः। ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्॥ ततोऽग्ने। त्वं विश्वरूपनामासि इति नाम कृत्वा ध्यात्वाऽऽवाह्य विश्वरूपनाम्ने अग्नये नमः इति पाद्यादिनाभ्यर्च्य। ॐ सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः। विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु॥ इति पठेत्॥ ततः प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा ब्रह्मस्थापनं कुर्य्यात्। समाग्रपञ्चाशत्कुशपत्ररचितं द्विर्दक्षिणावर्त्तमूर्द्ध्वमुखं दर्भवटुं अधीतवेदं ब्राह्मणं वा छत्रमुत्तरासङ्गं वा कमण्डलुं वा ब्रह्मत्वेन परिकल्प्य धारासहितमुदकपात्रं गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरत्निमात्रान्तरिते देशे पूर्व्वाभिमुखीं वारिधारां दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य पश्चिमाभिमुखोऽनुपविष्टस्तिष्ठेत्। वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्णकुशपत्रमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्द्देवता तृणनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽप उपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तराभिमुखीभूय आस्तीर्णकुशानद्भिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः अग्निर्द्देवता ब्रह्मोपवेशने विनियोगः। ॐ आवसोः सदने सीद इति। ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सीदामीति ब्रूयात्। अनेन कुशोपरि पूर्व्वाग्रं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अद्भिरभ्युक्ष्य कुशकुसुमै रर्च्चयेत्। ततस्तेनैव पथा प्रत्यागत्यासने पूर्व्वाभिमुख उपविष्टो भूमिजपादिकं कुर्य्यात्। यदि तु ब्रह्मत्वेनारोपितो ब्राह्मणः अयज्ञीयवाचं वदेत्तदा इमं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्री छन्दो विष्णुर्द्देवता अयज्ञीयवाग्वदननिमित्तजपे विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांशुले। इति जपेत्। कुशादिब्रह्मपक्षे तु कर्म्मकर्त्तुरेव ज्ञाताज्ञातावेक्षणादिब्रह्मकार्य्यकर्त्तृत्वादयज्ञीयवाग्वदननिमित्तं स एव जपेत्। यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा अस्मिन्नेव समये चरुं श्रपयित्वा तदुपरि घृतं दत्त्वा अग्नेरुत्तरतः कुशोपरि संस्थाप्य भूमिजपादिकं कुर्य्यात्। दक्षिणजानु भूमौ पातयित्वा दक्षिणहस्तोपरिभावेन अधोमुखौ हस्तौ भूमौ निधाय। परमेष्ठी ऋषिरनुष्टुप्छन्दोऽग्निर्द्देवता भूमिजपे विनियोगः। ॐ इदं भूमेर्भजामह इदं भद्रं सुमङ्गलम्। परा सपत्नान् बाधस्वान्येषां विन्दते धनम्। इति जप्त्वा रात्रौ चेत् कर्म्म तदा धनमितिस्थाने वस्विति प्रयोक्तव्यम्। ततो दक्षिणहस्तेन कुशान् गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन ऐशानादिकमनेन मन्त्रेण परिशोधयेत्। त्रयाणां मन्त्राणामृष्यादयः साधारणाः। कौत्सऋषिर्जगतीच्छन्दोऽग्निर्द्देवता एतस्य षडृचस्य यज्ञेऽग्न्यभिमाषते शस्ते परिसमूहने विनियोगः। ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयन्तव। ॐ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्व्वणा पर्व्वणा वयम्। जीवातवे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयन्तव। ॐ शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतं त्वमादित्यानावह तान् ह्युश्मस्यग्ने सख्ये मा रिषामा वयन्तव। ततस्तान् कुशान् ऐशान्यां दिशि प्रक्षिपेत्। ततोऽग्नेः पूर्व्वतः उत्तरान्ताद्दक्षिणान्तं यावत् उपमूललूनान् एकपत्रीकृतान् कुशान् अग्रेण मूलमाच्छादयन् वारत्रयमास्तरेत्। एवं दक्षिणस्यां पूर्व्वान्तात् पश्चिमान्तं यावत्। प्रतीच्याञ्च दक्षिणादुत्तरान्तं यावत्। एवमुत्तरस्यां पश्चिमान्तात् पूर्व्वान्तं यावत् क्रमेणास्तरेत्। ततो घृताक्तस्वस्तिकान् दशदिक्षु पूर्व्वादिक्रमेण दद्यात्। ॐ इन्द्राय लोकपालाय स्वाहा। एवं अग्नये इत्यादि। ततः प्रादेशद्वयप्रमाणां धवखदिरपलाशोडुम्बराणामन्यतमस्य विंशतिकाष्ठिकां मध्ये घृतस्रुवं दत्त्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात्। ततः स्तरणकुशादेव समाग्रकुशपत्रद्वयं गृहीत्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रच्छेदने विनियोगः। ॐ पवित्रे स्थो वैष्णव्यौ इति मन्त्रेण प्रादेशप्रमाणं कृत्वा कुशान्तरेण वेष्टयित्वा नखव्यतिरेकेण छित्त्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रमार्ज्जने विनियोगः। ॐ विष्णोर्म्मनसा पूते स्थः इत्यनेनाभ्युक्ष्य ताम्रादिपात्रे पवित्रमुत्तराग्र

निधाय तत्र होमार्थं घृतं निक्षिपेत्। ततस्तत्कुशपत्रद्वयमग्रे दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले च वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा दक्षिणहस्तोपरिभावेनाधोमुखव्यस्तपाणिः प्रजापतिर्ऋषिराज्यं देवता आज्योत्पवने विनियोगः। ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः स्वाहा। इत्यनेन कुशपत्रद्वयमध्येन घृतमग्नौ सकृज्जुहुयात्। तूष्णीं वारद्वयम्। ततस्तत्कुशपत्रद्वयमद्भिरभ्युक्ष्याग्नौ निःक्षिपेत्। ततस्तस्याज्यपात्रस्योदकेनानुमार्ज्जनमग्नेरुपरि निधानं उत्तरस्यां दिश्यवतारणं इत्थमेव वारत्रयं संस्कुर्य्यात् इत्याज्यसंस्कारः। ततो धवखदिरपलाशोडुम्बराणामन्यतमस्य अरत्निमात्रं अमिताङ्गुष्ठपर्व्वमितं नासारन्ध्रवन्मध्यस्थितमर्य्यादं स्रुवं इत्थमेव वारत्रयं संस्कुर्य्यादिति। स्रुवसंस्कारः। एवं स्रुक्प्रोक्षणादिकं संस्कुर्य्यात्। ततो दक्षिणजानु भूमौ पातयित्वा उदकाञ्जलिं गृहीत्वा प्रजापतिर्ऋषिरदितिर्द्देवता उदकाञ्जलिसेके विनियोगः। ॐ अदिते अनुमन्यस्व इत्यनेनाग्नेर्द्दक्षिणतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिरनुमतिर्द्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमते अनुमन्यस्व इत्यनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिः सरस्वती देवता उदकाञ्जलिसेके विनियोगः। ॐ सरस्वत्यनुमन्यस्व इत्यनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिः सविता देवता अग्निपर्य्युक्षणे विनियोगः। ॐ देव सवितः प्रसुवयज्ञं प्रसुवयज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु इत्यनेनोदकाञ्जलिना दक्षिणावर्त्तेनाग्निं वेष्टयेत्। ततो दक्षिणजानूत्थाप्य उपर्य्यधःस्थितदक्षिणवाममुष्टिभ्यां फलपुष्पकुशान् गृहीत्वा विरूपाक्षजपं कुर्य्यात्। परमेष्ठी ऋषी रुद्ररूपोऽग्निर्द्देवता विरूपाक्षजपे विनियोगः। ॐ भूर्भुवः स्वरोम् महान्तमात्मानं प्रपद्ये विरूपाक्षोऽसि दन्ताञ्जिस्तस्य ते शय्या पर्णे गृहान्तरीक्षे विमितं हिरण्मयं तद्देवानां हृदयान्ययस्मये कुम्भेऽन्तः सन्निहितानि तानि बलभृच्च बलसाच्च रक्षतोऽप्रमणी अनिमिषत्तः सत्यं यत्ते द्वादशपुत्रास्ते त्वा संवत्सरे संवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति त्वं देवेषु ब्राह्मणोऽस्म्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युपधावामि जपन्तं मा मा प्रतिजापीर्जुह्वन्तं मा मा प्रतिहौषीः कुर्व्वन्तं मा मा प्रतिकार्षीस्त्वां प्रपद्ये त्वया प्रसूत इदं कर्म्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्म उपपद्यतां समुद्रो मा विश्वव्यचा ब्रह्माऽनुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सह-

स्राक्षाय ब्रह्मणः पुत्राय नमः। इति जपित्वा गृहीतकुशान् प्रागुदीच्यां दिशि क्षिपेत्। फलपुष्पे ब्रह्मणे निवेदयेत्॥ * ॥ अथ काम्यकर्म्मार्थं कुशण्डिका तदा प्राणान् संयम्य प्रथमं पुटाञ्जलिः। ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्त्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा पश्चात् विरूपाक्षजपं कुर्य्यात्। इति सामवेदिनां सर्व्वसाधारणी कुशण्डिका समाप्ता। इति भवदेवभट्टः॥ * ॥ अन्यत् रघुनन्दनभट्टाचार्य्यकृतसंस्कारतत्त्वे द्रष्टव्यम्॥ यजुर्व्वेदिनां कुशण्डिका पशुपतिकृतदशकर्म्मपद्धतौ ऋग्वेदिनां कुशण्डिका कालेशिकृतदशकर्म्मपद्धतौ च द्रष्टव्या॥ * ॥ * ॥ अथ कुशण्डिकानन्तरं प्रकृतं कर्म्म कर्त्तव्यम्। तत्र प्रथमं प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्द्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिक्छन्दो वायुर्द्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः। ॐ स्वः स्वाहा। इति स्रुवेणाज्याहुतित्रयं दद्यात्। यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा आज्यतन्त्रोपक्रमविहितत्वात् महाव्याहृतिहोमस्य प्रथमं महाव्याहृतिहोमो न कर्त्तव्योऽन्ते तु कर्त्तव्य एव विहितत्वात्। ततः प्रकृतं कर्म्म समाप्य पुनर्महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा शाट्यायनहोमादिवामदेव्यगानान्तं उदीच्यं साधारणं कर्म्म करणीयम्। तदभिधीयते। तत्र प्रथमं ॐ अद्येत्यादि अत्रामुककर्म्मणि यत्किञ्चिद्वैगुण्यं जातं तद्दोषप्रशमनाय शाट्यायनहोममहं कुर्व्वीय इति सङ्कल्पं कृत्वा अग्ने त्वं विधुनामासि इति नाम कृत्वा सम्पूज्य पुनर्घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमञ्च पूर्व्ववत् कृत्वा प्रायश्चित्तहोमं कुर्य्यात्। प्रजापतिर्ऋषिरग्निर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नोऽग्न एनसे स्वाहा। प्रजापतिर्ऋषिर्व्विश्वेदेवा देवताः प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो विश्ववेदसे स्वाहा। प्रजापतिर्ऋषिर्व्विभावसुर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ यज्ञं पाहि विभावसो स्वाहा। प्रजापतिर्ऋषिः शतक्रतुर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ सर्व्वं पाहि शतक्रतो स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो अग्न एकया पाह्युत द्वितीयया पाहि गीर्भिस्तिसृभिरूर्ज्जांपते पाहि चतसृभिर्व्वसो स्वाहा। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पुनरूर्ज्जा निवर्त्तस्व पुनरग्न इषायुषा पुनर्नः पाह्यंहसः स्वाहा। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ सहर्ज्जा

निवर्त्तस्वाग्ने पिन्वस्व धारया विश्वप्स्न्या विश्वतस्परि स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ यच्चायदनाज्ञातं यज्ञस्य क्रियते मिथ अग्ने तदस्य कल्पय त्वं हि वेत्थ यथायथं स्वाहा। प्रजापतिर्ऋषिः पङ्क्तिच्छन्दः प्रजापतिर्द्देवता प्रायश्चित्तहोमे विनियोगः। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नोऽस्तु वयं स्याम पतयो रयीणां स्वाहा। ततः पूर्व्ववदेव महाव्याहृतिहोमं समित्प्रक्षेपञ्च। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्द्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिक्छन्दो वायुर्द्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः ॐ स्वः स्वाहा॥ * ॥

ततो नवग्रहहोमः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवा वाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्द्धा दिवः ककुत् पतिः पृथिव्या अयं अपां रेतांसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषसश्चित्रं राधोऽमर्त्य आदाशुषे जातवेदो वहा त्वमद्यां देवां उषर्बुधः स्वाहा। ॐ बृहस्पते परिदीया रथेन रक्षोहाऽमित्रां अपबाधमानः प्रभञ्जन् सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां स्वाहा। ॐ शुक्रन्तेऽन्यद्यजतन्तेऽन्यद्विषुरूपेऽहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावन् भद्रा ते पूषन्निह रातिरस्तु स्वाहा। ॐ शन्नो देवी रभीष्टये शन्नो भवन्तु पीतये। शंयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वाहा। ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्या अपेशसे समुषद्भिरजायथाः स्वाहा॥ * ॥ ततः इन्द्राद्यष्टलोकपालहोमं प्रत्यक्षदेवताहोमञ्च कृत्वा घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा उदकाञ्जलिसेकं कुर्य्यात्। प्रजापतिर्ऋषिः सविता देवताग्निपर्य्युक्षणे विनियोगः। ॐ देव सवितः प्रसुवयज्ञं प्रसुवयज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु। अनेनोदकाञ्जलिना दक्षिणावर्त्तेनाग्निं वेष्टयेत्। प्रजापतिर्ऋषिरदितिर्द्देवता उदकाञ्जलिसेके विनियोगः। ॐ अदितेऽन्वमंस्थाः अनेनाग्नेर्द्दक्षिणतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिर्ऋषिरनुमतिर्द्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमतेऽन्वमंस्थाः अनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिर्ऋषिः सरस्वती देवता उदकाञ्जलिसेके विनियोगः। ॐ सरस्वत्यन्वमंस्थाः। अनेनाग्नेरुत्तरत पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः उत्तानहस्तद्वयेन कतिपयास्तरणा-

कुशान् गृहीत्वा प्रजापतिर्ऋषिर्व्विष्णुर्देवता दर्भ-
स्तम्बाभ्यसने विनियोगः । ॐ पाशा छिद्रा मायन्तु
यय । अनेनाग्रैमध्यमूलानि छेदेनाभ्यजति सार-
त्रय मन्त्रस्य सारत्रयमेव पठनीय । ततस्तान्
कुशानद्भिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो गन्ध-
रूपोऽग्निर्देवता दर्भजुटिकाहोमे विनियोगः ।
ॐ यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा ।
पशूनस्माकं मा हिंसीरेतदस्तु हुतन्तव स्वाहा ।
अनेनाग्नौ क्षिपेत् । तत अग्ने त्वं सुमृडनामासीति
नाम कृत्वा गन्धमाल्ययवस्रवमापूर्णदर्व्वीमभ्यर्च्य
प्रजापतिर्ऋषिर्व्विराट्छन्द इन्द्रो देवता यज्ञसमा-
प्तस्य पूर्णहोमीयप्रयोगे विनियोग । ॐ पूर्णहोमं
यशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति
वरं वृणे यशसा भामि लोके स्वाहा । अनेन
पूर्णाहुतिं दद्यात् । ततो ब्रह्मणे पूर्णपात्रादि
दक्षिणां दत्त्वा होमदक्षिणां कुर्य्यात् । ततः प्र-
दक्षिणेन दक्षिणदेशं गत्वा प्रागायन्तिकुशा प्रत्या-
स्तृतासने पुनरुपविश्य कुशकुसुमसहितजलपात्रं
हस्ते निधाय महावामदेव्य ऋषिर्व्विराड्गाय-
त्रीछन्द इन्द्रो देवता शान्तिकर्म्मणि जपे विनि-
योगः । ॐ कया न चित्र आभुवदूती सदा
वृधः सखा कया सचिष्ठया वृता । ॐ कस्त्वा
सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढाचिदारुजे
वसु । ॐ अभीषुणः सखीनामविता जरितॄणां
शतम्भवास्यूतये । ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्ट-
नेमिः स्वस्ति नो वृहस्पतिर्दधातु ॥ "एतास्त्रयो
गीत्वा शान्तिं कुर्य्यात् । गानाशक्तौ एता एव
ऋचस्त्रिरावृत्त्या पठेदिति । ततो दक्षिणां दत्त्वा
अच्छिद्रावधारणं कुर्य्यात् । इति सर्व्वकर्म्मसा-
धारणमुदीच्य कर्म्म समाप्तम् ॥

कुशप, पुं, (कुश् श संश्लेषे + बाहुलकात् कपन् ।)
पानपात्रम् । इत्युणादिकोषः ॥

कुशपुष्प, क्ली, (कुशाकारं पुष्पमस्य ।) ग्रन्थिपर्णम् ।
इति रत्नमाला । गाँठियाला इति भाषा ॥

कुशल, क्ली, (कुश् + वृषादित्वात् कलन् । यद्वा कु
पापं तस्मात् शलति गच्छति दूरतः प्राप्नोतीत्यर्थः ।
कु + शल् + अच् ।) कल्याणम् । (यथा, रघु १।५८।
"प्रपच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः" ॥*॥
समागमे विहिते अभिवादनामवरवयस्कः स-
मानवयस्कमनभिवादकमपि ब्राह्मणं कुशलमिति
शब्दविशेषोच्चारणेनैव कल्याणमस्य पृच्छेत् । य-
दुक्तं मनौ २ । १२७ ।
"ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च" ॥)
पर्य्यायः पुण्यम् । (तद्वति, त्रि ।
यथा, गीतायाम् १८ । १० ।
"न द्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते" ॥
कौ पृथिव्यां शलति श्लाघां प्राप्नोतीति । शल
+ अच् ।) शिक्षिते, त्रि । इत्यमरः । ३ । १ ।
२०३ ॥ (यथा, मनु ८ । १५७ ।
"समुद्रयानकुशला देशकालार्थदर्शिनः ।

स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति" ॥)
कुशं लाति गृह्णाति । कुश + ला + क । कुश-
ग्राहकः । इति व्युत्पत्तिलब्धोऽर्थः ॥)

कुशलवौ, पुं, (पुष्पवतोरिव एकशाला तयोरेव
बोधकत्वम् द्वन्द्वसमासे तु कुशश्च लवश्च तौ कुशी-
लवौ मिथायवद्यादित्यादिवत् पृषोदरम् ।) एकयोषाः
रामपुत्रौ । इति हेमचन्द्रः ॥ तयोर्नामकारणं
यथा,—
"यस्तयोः प्रथमं जातः स कुशैर्मन्त्रसंस्कृतैः ।
निर्म्मार्ज्जनीयो नाम्ना हि भविता कुश इत्यसौ ॥
यश्चावरः स्यात्तोलवेन संयतः ।
निर्म्मार्ज्जनीयो वृद्धाभिर्नाम्ना स भविता लवः ॥
एवं कुशलवौ नाम्ना यमौ तौ सम्बभूवतुः ।
मत्कृतानामनामानौ ख्यातिमापद्यतां च तौ" ॥
इति रामायणम् ।

कुशलप्रश्न, पुं, (कुशलं शुभं प्रश्नः ।) कुशलजिज्ञासा ।
तत्पर्य्यायः । कौशली २ । इति त्रिकाण्डशेषः ॥

कुशली, स्त्री, (कुश इव शीयते । शी + ड गौरादि-
त्वात् ङीष् ।) अश्मन्तकवृक्षः । क्षुद्राम्लिका ।
इति वैद्यकम् ॥

कुशली, [न्] त्रि, (कुशलं अस्त्यस्य । कुशल + इनि ।)
मङ्गलान्वितः । (यथा, रघौ ५ । ४ ।
"अप्यग्रणीर्मन्त्रकृतामृषीणां
कुशाग्रबुद्धे ! कुशली गुरुस्ते" ॥)

कुशस्थल, क्ली, (कुशप्रधानं स्थलम् ।) कान्यकुब्ज-
देशः । इति हेमचन्द्रः ॥ (यथा, वेणीसंहारे ।
"कुशस्थलं वृकस्थलं माकन्दं वारणावतम् ।
देहि मे चतुरो ग्रामान् कञ्चिदेकञ्च पञ्चमम्" ॥)

कुशस्थली, स्त्री, (कुशस्थल + स्त्रियां ङीष् ।) द्वा-
रिका । इति जटाधरः ॥ (यथा,—महाभारते
२ । सभापर्व्वणि १४ । ४९ ।
"इति सञ्चिन्त्य सर्व्वे स्म प्रतीचीं दिशमाश्रिताः ।
कुशस्थलीं पुरीं रम्यां रैवतेनोपशोभिताम्" ॥
पुण्यैषा तु पुरा रैवतनाम्ना केनचित् नरपतिना
निर्म्मिता कालवशात् राक्षसैरुत्सादिता श्वापदा-
श्रयीभूताऽऽसीत् ततो देवप्रमुखैर्यादवैः सत्कृता
सती तेषामेव वासभूमिरासीत् ॥)

कुशा, स्त्री, (कुश् श संश्लेषे + क टाप् च ।) रज्जुः ।
इति मेदिनी । मधुकर्कटिका । इति शब्द-
चन्द्रिका ॥ वल्गा । इति हेमचन्द्रः ॥ (छन्दोगाः
स्तोत्रीयागणनार्थानौदुम्बरान् शङ्कून् कुशा इति
व्यवहरन्ति ॥ इति चिन्तामणिः ॥)

कुशाकर, पुं, (कुशैराकीर्य्यते समन्तात् अयेण
मूलाच्छादनेन वेष्ट्यतेऽत्र । आ + कॄ + अधिक-
रणे अप् । कुशकण्डिकासमये कुशैर्वेष्टनात् तथा-
त्वम् ।) अग्निः । इति शब्दमाला ॥ (कुशां रज्जुं
करोतीति व्युत्पत्त्या रज्जुकारकः ॥)

कुशाक्ष, पुं, (कुश इव सूक्ष्मं क्षुद्रमित्यर्थः अक्षि
यस्य । समासे अच् ।) वानरः । इति शब्दमाला ॥

कुशाग्रीयमतिः, त्रि, (कुशाग्रीया कुशाग्रवत्
सूक्ष्मा मतिर्यस्य ।) तीक्ष्णबुद्धिः । (यदुक्तं शिशौ ।
"वाक्यद्य भाष्यकारस्य कुशाग्रीयधियावभौ ।

नैव शब्दाम्बुधेः पारं किमन्यो जड़बुद्धयः" ॥)
तत्पर्य्यायः । सूक्ष्मदर्शी २ तत्त्वावधीः ३ प्रवुद्ध-
मतिः ४ । इति हेमचन्द्रः ॥ सूक्ष्मायां बुद्धौ कर्म्म-
धारयश्चात्र स्त्री ॥

कुशाग्नि, पुं, (कुश श्वासप्रदानार्थं एव अरणिः
यस्य ।) दुर्व्वासाः । इति त्रिकाण्डशेषः ॥

कुशाल्मलि, पुं, (कुत्सितः शाल्मलिः ।) रोहि-
तकः । इति राजनिर्घण्टः ॥

कुशिंशपा, स्त्री, (कुत्सिता शिंशपा ।) कपिलशिं-
शपा । इति राजनिर्घण्टः ॥

कुशिक, पुं, (कुश कुशसञ्ज्ञको महीपालो जनकत्वे-
नास्त्यस्य । कुश + ठन् ।) स्वनामख्यातनृपविशेषः
(स तु विश्वामित्रपितामहः गाधेः पिता । अ-
स्य विवरणन्तु महाभारते १३ । भीष्मयुधिष्ठिरसंवादे
५२ अध्यायमारभ्य द्रष्टव्यम् ।) फाल । सर्ज्जवृक्षः ।
विभीतकवृक्षः । इति हेमचन्द्रः ॥ अश्वकर्णवृक्षः
इति राजनिर्घण्टः ॥ तैलशेष । इति विश्व-
केकरे त्रि । इति शब्दमाला ॥

कुशित, त्रि, (कुश् + इतच् । यद्वा कुश संश्लेषे +
इट् च ।) जलमिश्रितम् । इत्युणादिकोषः ॥

कुशी, स्त्री, (कुश + अयोविकारार्थे "जानपदेति"
४ । १ । ४२ । इति ङीष् ।) फाल । इति मेदिनी ॥

कुशी, [न्] पुं, (कुशाः सन्त्यस्य । समाधियोगार्थं
अङ्गेषु कुशोत्क्षेपणत्वात्त्वम् ।) वाल्मीकिमुनिः ।
इति हेमचन्द्रः ॥ (कुशविशिष्टे, त्रि । यथा, महा-
भारते १३ । मेघवाहनोपाख्याने १४ । ३७१ ।
"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि ।
दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः" ॥)

कुशीद, क्ली, (कुसीद + पृषोदरात् सस्य शत्वम् ।)
वृद्धिजीविका । इत्यमरटीकायां भरतः ॥ रक्त-
चन्दनम् । इति मुकुटमालातन्त्रम् ॥

कुशीलव, पुं, (कुत्सितं शीलं अस्य इति कुशील ।
कुशतीतिशलनाद्यः अन्यत्रापि दृश्यते इति व ।
यद्वा कुशीलं वाति गच्छति प्राप्नोतीति यावत् ।
वा + क ।) चारणः । इत्यमरः । २ । १० । १२ ।
नटविशेषः । कथकादि । इत्यन्ये । देशान्तरे
कीर्त्तिं प्रचारयति यो नटः । इत्यन्ये । इति
भरतः ॥ (एते हि अपाङ्क्तेया हव्यकव्ययोर्वर्ज्ज्याः ।
यथा, मनुः ३ । १५५ ।
"कुशीलवोऽवकीर्णी च वृषलीपतिरेव च" ॥
कुशीलवत्वयर्थं नाट्यशास्त्रप्रचारकत्वात् वाल्मी-
किमुनिः ॥)

कुशीलवौ, पुं, (कुशश्च लवश्च तौ कुशीलवौ ।) एक-
योषायां रामपुत्रौ । इति हेमचन्द्रः ॥
(यथा, रामायणे ७ । १०७ सर्गे ।
"अभिषिच्य महात्मानावुभौ रामः कुशीलवौ" ॥)

कुशीवशः, पुं, (कुशीव कुशवान् सन् शेते समाधौ
अवतिष्ठते इति । शी + ड ।) वाल्मीकिमुनिः ।
इति त्रिकाण्डशेषः ॥

कुशूल, पुं, (कुसूल + पृषोदरात् शत्वम् ।) तुषानलः ।
इति जटाधरः ॥ धान्यागारम् । तत्पर्य्यायः । अन्न-
कोष्ठकः २ । इति हेमचन्द्रः ॥ कोष्ठागारम् ३

इति त्रिकाण्डशेषः ॥ (यथा, मनुः ४ । ७ ।
"कुशूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा" ॥)
कुशेशयं, क्ली, (कुशे जले शेते । कुश + शी + अच् । अलुक् समासः ।) पद्मम् । (यथा, रघु ६ । १८ ।
"कुशेशयाताम्रतलेन कश्चित् करेण रेखाध्वजलाञ्छनेन" ॥) सारसपक्षी । इत्यमरः । ३ । १० । ४० ॥
कुशेशयः, पुं, (कुशेशयं पद्ममिव आकृतिर्विद्यतेऽस्य । अर्श आद्यच् ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥ (कुशद्वीपस्थपर्व्वतविशेषः । इति विष्णुपुराणे ॥ २ । ४ । ३६ ॥)
कुष ग निष्कर्षे । इति कविकल्पद्रुमः । (क्र्या०-पर०-सक०-सेट् ।) ग कुष्णाति चुकोष । निष्कर्ष इयत्तापरिच्छेदः । तुलैरवकुष्णातीति वोपदेवः ॥ निष्कर्षोऽन्तःप्रकाशनमिति गोविन्दभट्टः ॥ "ततोऽकुष्णाद्दशग्रीवः क्रुद्धः प्रायान् वनौकसाम्" । इति भट्टौ अनेकार्थत्वान्निष्कोषणार्थः । इति दुर्गादासः ॥
कुषलः, त्रि, (कुष + बाहुलकात् कलच् ।) कुशलः । इत्यमरटीकायां भरतः ॥
कुषाकु, पुं, (कुष + "कठिकुषिभ्यां काकुः" । उणां ३ । ७७ । इति काकुः ।) कपिः । अग्निः । अर्कः । परोपतापिनि, त्रि । इति मेदिनी ॥
कुषितः, त्रि, (कुष् निष्कर्षे + क्त ।) जलमिश्रितः । इत्युणादिकोषः ॥
कुषीदं, क्ली, (कुसीद + पृषोदरात् षत्वम् ।) कुसीदम् । इत्यमरटीकायां भरतः ॥
कुष्ठं, क्ली, (कुष्णाति रोगम् । कुष + "हनि कुषीति" । उणां २ । २ । इति क्थन् ।) विषभेदः । इति हेमचन्द्रः ॥ औषधविशेषः । कुड़ इति भाषा । तत्पर्य्यायः । व्याधिः २ पारिभव्यम् ३ वाप्यम् ४ पाकलम् ५ उत्पलम् ६ । इत्यमरः । २ । ४ । १२६ ॥ आप्यम् ७ । इति तट्टीका ॥ अरणम् ८ । इति रत्नमाला ॥ रुजा ९ गदः १० आमयः ११ पारिभद्रकम् १२ रामम् १३ वाणीरजम् १४ पावनम् १५ कुत्सितम् १६ पद्मकम् १७ गदाह्वम् १८ गदाह्वयम् १९ कौबेरम् २० भास्वरम् २१ । इति शब्दरत्नावली ॥ काकलम् २२ नीरजम् २३ । इति जटाधरः ॥
"कुष्ठं रोगाह्वयं वाप्यं पारिभव्यं तथोत्पलम् ।
कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्पकासकुष्ठमरुत्कफान्" ॥ * ॥
अथ कुष्ठभेदपुष्करमूलम् ।
"उक्तं पुष्करमूलन्तु पुष्करं पौष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिदं जगुः ॥
पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलनुत्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । कफवायुकुष्ठरोगविसर्पविषकण्डूखर्ज्जूदद्रुनाशित्वम् । कान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ श्वासकासज्वरहिक्कानाशित्वम् । इति राजवल्लभः ॥ * ॥
स्वनामख्यातरोगः । कुट् इति भाषा । तत्पर्य्यायः

श्वित्रम् २ । इत्यमरः । २ । ४ । ५४ ॥ श्वेतम् ३ श्वेत्रम् ४ । इति तट्टीका ।
तस्य निदानपूर्व्विका सम्प्राप्तिर्यथा ।
"विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।
भजतामागतां छर्द्दिं वेगांश्चान्यान् प्रतिघ्नताम् ॥
व्यायाममतिसन्तापमतिभुक्त्वा निषेविणाम् ।
शीतोष्णलङ्घनाहारान् क्रमं मुक्त्वा निषेविणाम् ॥
घर्म्मश्रमभयार्त्तानां द्रुतं शीताम्बुसेविनाम् ।
अजीर्णाध्यशिनाञ्चैव पञ्चकर्म्मापचारिणाम् ॥
नवान्नदधिमत्स्यातिलवणाम्लनिषेविणाम् ।
माषमूलकपिष्टान्नतिलक्षीरगुडाशिनाम् ॥
व्यायामञ्चाप्यजीर्णेऽन्ने निद्राञ्च भजतां दिवा ।
विप्रान् गुरून् धर्षयतां पापं कर्म्म च कुर्व्वताम् ॥
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च ।
दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः ॥
अतः कुष्ठानि जायन्ते सप्त चैकादशैव तु ।
कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वैः समागतैः ॥
सर्व्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः" ॥ * ॥
तस्य पूर्व्वरूपं यथा ।
"अतिश्लक्ष्णः खरः स्पर्शः स्वेदास्वेदौ विवर्णता ।
दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिर्भ्रमः ॥
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः ।
रूढानामतिरूक्षत्वं निमित्तेऽल्पेऽपि कोपनम् ॥
रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्" ॥ * ॥
तच्च वातादिभेदेन अष्टादशप्रकारम् ।
तत्र सप्तमहाकुष्ठानि यथा ।
"कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु ।
कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम् ॥ १ ॥
सदाहरागकण्डूभिः परीतं रोमपिञ्जरम् ।
उडुम्बरफलाभासं कुष्ठमौडुम्बरं वदेत् ॥ २ ॥
श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम् ।
कृच्छ्रमन्योन्यसंयुक्तं कुष्ठं मण्डलमुच्यते ॥ ३ ॥
कर्कशं रक्तपर्य्यन्तमन्तः श्यावं सवेदनम् ।
यदृष्यजिह्वासंस्थानमृष्यजिह्वं तदुच्यते ॥ ४ ॥
सश्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं प्रचक्षते ॥ ५ ॥
श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति ।
प्रायश्चोरसि तत् सिध्ममलावुकुसुमोपमम् ॥ ६ ॥
यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥ ७ ॥
एकादशक्षुद्रकुष्ठानि यथा ।
"अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम् ।
तदेककुष्ठं चर्म्माख्यं बहलं हस्तिचर्म्मवत् ॥ १ ॥
श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम् ॥ २ ॥
वैपादिकं पाणिपादस्फुटितं तीव्रवेदनम् ॥ ३ ॥
कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम् ॥ ४ ॥
सकण्डूरागपिडकं दद्रुमण्डलमुद्गतम् ॥ ५ ॥
रक्तं सशूलं कण्डूमत् सस्फोटं यद्दलत्यपि ।
तच्चर्म्मदलमाख्यातं संस्पर्शासहमुच्यते ॥ ६ ॥
सूक्ष्मा बह्व्यः पिडकाः स्राववत्यः
पामेत्युक्ताः कण्डूमत्यः सदाहाः । ७ ॥
सैव स्फोटैस्तीव्रदाहैरुपेता

ज्ञेया पाण्यो कच्छुरुग्रास्फिचोश्च ॥ ८ ॥
स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः ॥ ९ ॥
रक्तं श्यावं सदाहार्त्ति शतारुः स्याद्बहुव्रणम् ॥ १० ॥
सकण्डुपिडका श्यावा बहुस्रावा विचर्च्चिका" ॥ ११ ॥
इति माधवकरः ॥
कुष्ठः, पुं, (कुष्णाति शरीरस्थशोणितं विकुरुते इति । निष्कर्षार्थकस्य कुषधातोरत्र विकारार्थत्वं बोध्यते धातूनामनेकार्थत्वात् । कुष निष्कर्षे + "हनिकुषीति" । उणां २ । २ । इति क्थन् ।)
स्वनामख्यातरोगः ।
तस्य निदानं पूर्व्वलिखितम् । औषधं यथा ।
"सर्व्वकुष्ठेषु वमनं रेचनं रक्तमोक्षणम् ।
वचावासापटोलानां निम्बस्य फलिनीत्वचः ॥
कषायो मधुना पीतो वान्तकृन्मदनान्वितः ।
विरेचनं प्रयोक्तव्यं त्रिवृद्दन्तीफलत्रिकैः ॥
मनःशिला मरीचानि तैलपाकं मयो हरेत् ।
सर्व्वकुष्ठानुलेपोऽयं शिवा पञ्चगुडोदनम् ॥
करञ्जैडगजौ कुष्ठं गोमूत्रेण प्रलेपयेत् ।
करवीरोद्वर्त्तनञ्च तैलाक्तस्य तु कुष्ठहृत् ॥
हरिद्रामलयं रास्ना गुडूच्येडगजस्तथा ।
आरग्वधः करञ्जश्च लेपः कुष्ठहरः परः ॥
मनःशिला विडङ्गानि वाकुची सर्षपस्तथा ।
करञ्जो मूत्रपिष्टोऽयं लेपः कुष्ठहरोऽर्कवत् ॥
विडङ्गैडगजाकुष्ठनिशासिन्धूत्थसर्षपैः ।
मूत्राम्लपिष्टो लेपोऽयं दद्रुकुष्ठविनाशनः ॥
प्रपुन्नाटकबीजानि धात्री सर्ज्जरसः स्नुही ।
सौवीरपिष्टं दद्रूणामेतदुद्वर्त्तनं परम् ॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत् ।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च ॥
उष्णा पीता वाकुची च कुष्ठजित् क्षीरभोजिनः ।
तिलाज्यत्रिफलाक्षौद्रव्योषभल्लातशर्करा ॥
वृष्यः सप्तसमो मेध्यः कुष्ठहा कामचारिणः ।
विडङ्गत्रिफलाकृष्णाचूर्णं लीढं समाक्षिकम् ॥
हन्ति कुष्ठं कृमीन्मेहनाडीव्रणभगन्दरान् ।
यः खादेदभयारिष्टामलकानि तथा निशाः ॥
स जयेत् सर्व्वकुष्ठानि मासादूर्द्ध्वं न संशयः ।
दह्यमानाच्युतः कुम्भे मूलगे खदिराङ्कुरः ॥
साक्षधात्रीरसक्षौद्रं हन्यात् कुष्ठं रसायनम् ।
धात्रीखदिरयोः क्वाथं पीत्वावल्गुजसंयुतम् ॥
शङ्खेन्दुधवलं श्वित्रं हन्ति तूर्णं न संशयः ।
पीत्वा भल्लातकं तैलं मासव्याधिं जयेन्नरः ॥
सेवितं खादिरं वारि पानाद्यैः कुष्ठजिद्भवेत् ।
वासा गुडूची त्रिफला पटोलञ्च करञ्जकम् ॥
निम्बासनं कृष्णवेत्रं क्वाथयस्तेन यद्युतम् ।
वज्रकं तद्धरेत् कुष्ठं शतं वर्षाणि जीवति ॥
सरसेन च दूर्व्वाया यथैकेन चतुर्गुणम् ।
कच्छुर्विचर्च्चिका पामा आमङ्काश्चैव नश्यति ॥
द्रुमत्वगर्ककुष्ठानि लवणानि च सूषकम् ।
गण्डीरिका चित्रकैस्तैलं कुष्ठमर्द्दादिनुत्" ॥
इति गारुडे १७५ अध्यायः ॥
"कुष्ठेन्द्रयवसिद्धार्थनिशा दूर्व्वा च कुष्ठजित्" ॥
इति तत्रैव १७६ अध्यायः ॥

धात्रीखदिरयोः क्वाथं पीत्वा च मधुसंयुतम् ।
शङ्खकुन्देन्दुधवलं जयेच्छ्वित्रं न संशयः ॥ ३७ ॥
धात्रीखदिरयोः क्वाथमवल्गुजरजोऽन्वितम् ।
पीत्वा शङ्खेन्दुकुन्दाभं हन्ति श्वित्रं न संशयः ॥३८॥

क्षारे सुदग्धे गजलिण्डजे च
गजस्य मूत्रेण परिस्रुते च ।
द्रोणप्रमाणं दशभागयुक्तं
दत्त्वा पचेत् वीजमवल्गुजस्य ॥
एतद्यदा चिक्कणतामुपैति
तदास्य सिद्धा गुडिका प्रकुर्य्यात् ।
श्वित्रं प्रलिम्पेदथ तेन घृष्टं
तदा प्रशत्याशु सवर्णभावम् ॥ ३९ ॥

श्वेतजयन्तीमूलं पीतं पिष्टं पयसैव ।
श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा॥४०॥
गुञ्जाफलाग्निचूर्णन्तु लेपितं श्वेतकुष्ठनुत् ।
शिलापामार्गभस्मापि लिप्तं श्वित्रं विनाशयेत् ॥
४१ ॥ ४२ ॥

एरण्डतुलसीवीजं वागुजी चक्रमर्दकम् ।
तिक्तकोषातकीवीजं कृष्णाश्लेठस्य वीजकम् ॥
गोमूत्रदधिदुग्धैश्च पचेदष्टाजमूत्रकैः ।
कल्कं दत्त्वा शिला काशी पथ्या कुष्ठं विडङ्गकम्॥
कटुतैलञ्च तल्लेपाद्दृष्ट्वा घृष्ट्वा विलेपने ।
पञ्चाननमिदं तैलं श्वेतकुष्ठकुलापहम्" ॥
कटुतैल श ४ क्वाथ्यएरण्डवीजादीनां मिलित्वा श
२ कल्कशिलाकाश्यादीनां मिलित्वा श १ ।
इति श्वित्रे पञ्चाननतैलम् ॥ ४३ ॥

"आरग्वधं धवं कुष्ठं हरितालं मनःशिला ।
रजनीद्वयसंयुक्तं पचेत्तैलं विधानवित् ॥
एतेनाभ्यञ्जनादेव क्षिप्रं श्वित्रं विनश्यति" ॥
तिलतैल श ४ मा श १६ कल्कमिलित श १ ।
इति आरग्वधाद्यं तैलम् ॥ ४४ ॥

"शुद्धसूतं समं गन्धं त्रिफला भृङ्गवागुजी ।
भल्लातकं तिलं कृष्णो निम्बवीजं समं समम् ।
मर्द्दयेद्भृङ्गजद्रावैः शोष्य पेष्य पुनः पुनः ॥
इत्थं कुर्य्यात्त्रिसप्ताहं रसः श्वेतारिको भवेत् ।
मध्वाज्यैर्निष्कमात्रन्तु खादेत् श्वेतं विनाशयेत्"॥
इति श्वेतारिः ॥ ४५ ॥

"पिबति सकटुतैलं गन्धपाषाणचूर्णं
रविकिरणसुतप्तः पामनो यः पलार्द्धम् ।
त्रिदिनतदनुसिक्तः क्षीरभोजी च शीघ्रं
भवति कनकदीप्तिः कामरूपी मनुष्यः" ॥ ४६ ॥

"तीव्रेण कुष्ठेन परीतदेहो
यः सोमराजीं नियमेन खादेत् ।
संवत्सरं कृष्णतिलद्वितीयां
स सोमराजीं वपुषाऽतिशेते ॥ ४७ ॥

धर्म्मसेवी कदुष्णेन वारिणा वागुजीं पिबेत् ।
क्षीरभोजी च सप्ताहात् कुष्ठी कुष्ठं व्यपोहति ॥४८॥
अवल्गुजवीजकर्षं पीत्वा कोष्णेन वारिणा ।
भोजनं सर्पिषा कार्यं सर्व्वकुष्ठविनाशनम् ॥ ४९ ॥
छिन्नाया स्वरसो वापि सेव्यमानो यथाबलम् ।
जीर्णे घृतेन भुञ्जीत मुद्गयूषौदनेन च ॥
अपि पूतिशरीरोऽपि दिव्यरूपी भवेन्नरः ॥ ५० ॥

यः खादेदभयारिष्टमरिष्टामलकानि वा ।
स जयेत् सर्व्वकुष्ठानि मासादूर्द्ध्वं न संशयः ॥५१॥५२॥

निम्बस्य पत्रं मूलानि सत्वक्पुष्पफलानि च ।
चूर्णितानि घृतक्षौद्रसंयुतानि दिने दिने ॥
लिह्यात् पिबेद्वा मूत्रेण सयक्षाम्बुदकेन वा ।
मदिरामलतोयेन पयसा वा यथाबलम् ॥
भुञ्जीत घृतयूषाद्यैः शाल्यन्नं पयसापि वा ।
सर्व्वकुष्ठविसर्पार्शोनाडीदुष्टव्रणानपि ॥
कामलाश्च गदानन्यांस्तथा पित्तकफास्रजान् ।
संवत्सरप्रयोगेण सर्व्ववर्ज्ज्यविवर्ज्जितः ॥
जयत्येतत् पञ्चनिम्बं रसायनमनुत्तमम्" ॥
इति पञ्चनिम्बम् ॥ ५३ ॥

"पुष्पकाले च पुष्पाणि फलकाले फलानि च ।
सचूर्णं पिचुमर्दस्य त्वङ्मूलानि दलानि च ॥
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफलाव्युषणं ब्राह्मी श्वदंष्ट्रारुष्करादिका ॥
विडङ्गसारवाराहीलौहचूर्णामृता समा ।
हरिद्राद्वयावल्गुजव्याधिघाता सशर्करा ॥
कुष्ठेन्द्रयवपाठाश्च कृत्वा चूर्णं सुसंयुतम् ।
खदिरासननिम्बानां घनक्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बञ्च मार्कवस्वरसेन च ।
स्निग्धशुद्धतनुर्धीमान् योजयेच्च शुभे दिने ॥
अधुना तिक्तहविषा खदिरासनवारिणा ।
सेव्यमुष्णाम्बुना वापि कोलवृद्ध्या पलं पिबेत् ॥
तिक्तहविषा वक्ष्यमाणपञ्चतिक्तघृतेन ॥
जीर्णे च भोजनं कार्यं स्निग्धं लघु हितञ्च यत् ॥

विचर्च्चिकोडुम्बरपुण्डरीक-
कपालदद्रूकिटिमालसादि ।
शतारुविस्फोटविसर्पपामा
कुष्ठप्रकोपं विविधं किलासम् ॥
भगन्दरं श्लीपदवातरक्तं
जडान्ध्यनाडीव्रणशीर्षरोगान् ।
सर्व्वप्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
स्थूलोदरः सिंहकृशोदरश्च
सुश्लिष्टसन्धिर्मधुनोपयोगात् ।
ममोपयोगादपि ये दशन्ति
सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतश्चन्द्रसमानकान्तिः" ॥
इति पञ्चनिम्बः ॥ ५४ ॥

"अमृतायाः पलशतं दशमूल्यास्तथा शतम् ।
पाठामूर्व्वावलाविक्ताद्दार्व्वीगन्धर्व्वहस्तकाः ॥
एषां दशपलान् भागान् विभीतक्याः शतं हरेत् ।
द्वे शते च हरीतक्या आमलक्यास्तथा शतम् ॥
जलद्रोणद्वये पक्त्वा अष्टभागावशेषितम् ।
प्रस्थं गुग्गुलुमाहृत्य प्रस्थार्द्धञ्च घृतं पचेत् ॥
पाकसिद्धौ प्रदातव्यं गुडूच्याः सत्त्वमेव च ।
पलद्वयं तथा शुण्ठ्याः पिप्पल्याश्च पलद्वयम् ॥
ततो मात्रां प्रयुञ्जीत ज्ञात्वा दोषबलाबलम् ।
अष्टादशसु कुष्ठेषु वातरक्तगदेषु च ॥
कामलामामवातञ्च अग्निमान्द्यं भगन्दरम् ।
पीनसञ्च प्रतिश्यायं प्लीहानमुदरं तथा ॥
एतान् रोगान्निहन्त्याशु भास्करस्तिमिरं यथा" ॥
अमृतागुग्गुलुः । अयं वातरक्ते प्रशस्तः ॥ ५५ ॥

"निम्बामृतावृषपटोलनिदिग्धिकानां
भागान् पृथग्दशपलान् विपचेद्घटेऽपाम् ।
अष्टांशशेषितरसेन सुनिश्चितेन
प्रस्थं घृतस्य विपचेत् पिचुभागकल्कैः ॥
पाठाविडङ्गसुरदारुगजोपकुल्या-
द्विक्षारनागरनिशामिषिचव्यकुष्ठैः ।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः ॥
मञ्जिष्ठयातिविषया वरया यमान्या
संशुद्धगुग्गुलुपलैरपि पञ्चसङ्ख्यैः ।
तत् सेवितं विधमति प्रबलं समीरं
सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥
नाडीव्रणार्व्वुदभगन्दरगण्डमाला-
जत्रूर्द्ध्वसर्व्वगदगुल्मगुदोत्थमेहान् ।
यक्ष्मारुचिश्वसनपीनसकासशोष-
हृत् पाण्डुरोगगलविद्रधिवातरक्तम्" ॥
इति पञ्चतिक्तघृतगुग्गुलुः ॥ ५६ ॥ * ॥

"श्वेतकरवीरमूलं विषाशकं साधितं गोमूत्रे ।
चर्म्मदलसिध्मपामाविस्फोटक्रिमिकिटिमजित्तैलम्"॥
तिलतैल ४ शेर, गोमूत्र १६ शेर, श्वेतकरवीर-
मूल ४ पल, विष ४ पल । करवीरतैलम् ॥ ५७ ॥

"मृतस्य कृष्णसर्पस्य शिरः पुच्छान्तवर्ज्जितम् ।
अन्तर्धूमं कृतं भस्म वागुजीतैलमिश्रितम् ।
एतेन मर्द्दनादेव गलत्कुष्ठं विनश्यति" ॥
इति कृष्णसर्पतैलम् ॥ ५८ ॥

"सूतकं गन्धकं कुष्ठं सप्तपर्णञ्च चित्रकम् ।
सिन्दूरञ्च रसोनञ्च हरितालमवल्गुजम् ॥
आरग्वधस्य वीजानि जीर्णताम्रं मनःशिला ।
प्रत्येकं कर्षमेतेषां कटुतैलं पलाष्टकम् ॥
साधयेत् सूर्य्यतापेन सर्व्वकुष्ठविनाशनम् ।
श्वित्रमौडुम्बरं कच्छूं मासवृद्धिं भगन्दरम् ॥
विचर्च्चिकाञ्च पामानं वातरक्तं सुदारुणम् ।
गम्भीरञ्च तथोत्तानं नाशयेत् यस्य भक्षणात् ॥
कुष्ठराक्षसनामेदं सवर्णकरणं परम् ।
अश्विभ्यां निर्म्मितं ह्येतत् लोकानुग्रहहेतवे" ॥
इति कुष्ठराक्षसतैलम् ॥ ५९ ॥

"सूतं गन्धं शिलां तालं काञ्जिकैर्मर्द्दयेद्दिनम् ।
तल्लिप्तवस्त्रवर्त्तीं तां तैलाक्तां ज्वालयेदधः ॥
स्थिते पात्रे पचेत्तैलं गृहीत्वा लेपयेत्ततः ।
कुष्ठस्थानं विशेषेण सर्व्वकुष्ठं हरत्यलम् ॥
इदं कालानलं तैलं वातकुष्ठे महौषधम्" ॥
"एषां समं काञ्जिकं सर्व्वेषां द्विगुणं तिलतैलम् ।
कल्कं वस्त्रे संलिप्य संशोष्य वर्त्तीं कुर्य्यात् तां
तैलाक्तां सन्दंशिकया ज्वालयित्वा उपरि तैलं
दत्त्वा ततः पतितं तैलं अधःपात्रे गृह्णीयात् ततः
कुष्ठस्थाने दद्यात्" ॥
इति कुष्ठकालानलतैलम् ॥ ६० ॥

"सिन्दूरामृततालगैरिकहलाजाजीगदव्यूषणै-
र्दन्त्याभागरसोनवाणदहनस्नुह्यर्कदुग्धैर्निशा ।

गुड़स्य तु तुला ताभ्यां कषाय विपचेत् भिषक् ॥
भल्लातकसहस्राणां मध्यान तत्र दापयेत् ।
त्रिकटुत्रिफलामुस्तसैन्धवाना पल पलम् ॥
दीपकस्य पलञ्चैव चातुर्ज्जात पलाग्निकम् ।
संचूर्ण्य प्रक्षिपेदत्र कन्दकञ्च चतु:पलम् ॥
स्निग्धभाण्डे विनिक्षिप्य स्थापयेत् कुशलो भिषक् ।
महाभल्लातको ह्येष महादेवेन निर्म्मितः ॥
जगतस्तु हितार्थाय जयेच्छीघ्र न संशय ।
श्वित्रमौड़म्बरं दद्रुमृष्यजिह्वं सकाकणम् ॥
पुण्डरीकञ्च चर्म्माख्य विस्फोट मण्डल तथा ।
कण्डू कपाल कण्डूञ्च पामान रविपादिकम् ॥
वातरक्तमुदावर्त्त पाण्डुरोग व्रणक्रिमीन् ।
अर्शांसि षट्प्रकाराणि कास श्वास भगन्दरम् ॥
सदाभ्यासेन पलितमामवात सुदुस्तरम् ।
अनुपाने प्रयोक्तव्यं छिन्नाक्वाथ पयोऽथवा ।
भोजने च सदा भोज्यमुष्णाद्यान्न विशेषत ” ॥
इति महाभल्लातकगुड ॥ ६९ ॥
“ऊतायसुखसशुद्धं पलमेक रसस्य वै ।
पल लौहस्य ताम्रस्य पर्णं भल्लातकस्य च ॥
गन्धकञ्च पलञ्चैकमभ्रकस्य च गुग्गुलो ।
हरीतकीविभीतक्योश्चूर्णं कर्षद्वय द्वयो ॥
धात्र्यासाधिकं तत्र धात्र्या पाणितलानि षट् ।
घृतं द्वादशगुणं लौहात् द्वात्रिंशत्त्रिफलाजलम् ॥
एक कृत्वा पचेत् पात्रे लौहे च विधिपूर्व्वकम् ।
पाकमेतस्य जानीयात् कुशलो लौहपाकवित् ॥
विबुद्धः प्रातरुत्थाय गुरुदेवद्विजार्च्चक ।
रक्तिकादिक्रमेणैव घृतभ्रामरमर्द्दितम् ॥
लौहे लौहस्य दण्डेन कुर्य्यादेतद्रसायनम् ।
अनुपानञ्च कुर्व्वीत नारिकेलोदक पयः ॥
सर्व्वकुष्ठहर श्रेष्ठं वलीपलितनाशनम् ।
पाण्डुमेहामवातघ्न वातरक्तरसायनम् ॥
क्रिमिशोथाश्मरीशूलदुर्नामवातरोगनुत् ।
क्षय हन्ति महाश्वासमत्यर्थं शुक्रवर्द्धनम् ।
अग्निसन्दीपन हृद्य कान्त्यायुर्बलवृद्धिकृत् ॥
विवर्ज्ज्य शाकाम्लमपि स्त्रियञ्च
सेव्यो रसो जाङ्गलजाविकानाम् ।
शाल्योदन मण्डिकमान्यमुद्ग-
क्षौद्र गुडः क्षीरमिह क्रियायाम् ॥
शालिञ्च गुर्व्वादिदलत्करञ्ज-
शिलाजतुक्षौमयुत पयस्य ।
सर्पिर्युत भक्षयतो विहङ्गान्
प्रपूर्य्यते दुर्बलदेहधातु ॥
छायास्य पञ्चस्य सिते तु पक्षे
त्रिपक्षरात्रेण यथा शशाङ्क” ॥
पाकलक्षण यथा,—
“वस्त्रे निष्पीडित सूक्ष्मे स्थूलतन्तौ घने दृढे ।
समुद्गं जायते यस्य न नि सरति सन्धिभि ।
न च शब्दायते वह्नौ तदा सिद्धि विनिर्द्दिशेत्” ॥
इति अमृताङ्करलौहम् ॥ ७० ॥
“गन्धकेन हत ताम्र दशभाग समुद्धरेत् ।
उषण पञ्चभाग स्यादमृतञ्च द्विभागिकम् ॥
दातव्यं कुष्ठिने सम्यगनुपानस्य योगत ।
गलिते स्फुटिते चैव विपुले मण्डले तथा ॥
विचर्च्चिकादद्रुपामासर्व्वकुष्ठप्रशान्तये” ॥
इति उदयभास्कर ॥ ७१ ॥
“तालकं वशपत्राख्यं कुष्माण्डसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दध्नाम्लेन तथैव च ॥
शोधयित्वा पुन शुष्कं चूर्णयेत् तण्डुलाकृतिः ।
तत शरावके यन्त्रे स्थापयेत् कुशलो भिषक् ॥
वदरीपत्रवोल्येन लेपनं कारयेत् तत ।
अहर्यामसमध पात्र तावज्ज्वाला प्रदीयते ॥
स्वाङ्गशीत समुद्धृत्य माणिक्याभो भवेद्रस ।
घृतचौद्रेण समर्द्य खादयेद्रक्तिकाद्वयम् ॥
सपूज्य देवदेवेशं कुष्ठरोगादिमुच्यते ।
स्फुटित गलित कुष्ठं वातरक्त भगन्दरम् ॥
नाडीव्रण व्रण दुष्टमुपदंश विचर्च्चिकाम् । [णान् ।
नासास्यसम्भवान् रोगान् क्षतान् हन्यात् सुदारु-
पुण्डरीकञ्च चर्म्माख्य विस्फोट मण्डलं तथा” ॥
इति रसमाणिक्यम् ॥ ७२ ॥
“कुष्माण्डत्रिफलातैलकन्याकाञ्जिकभावितम् ।
तालक तुल्यगन्ध स्यादर्द्धपारदमर्द्दितम् ॥
अजाक्षीरेण निम्बूककन्यातोयैर्द्दिनत्रयम् ।
प्रत्येक भावयेत् शुष्क चक्रिकाकारता गतम् ॥
विपचेत् हण्डिकामध्ये पलाशक्षारमध्यगम् ।
यामान् द्वादश शीतेऽस्मिन् प्रयोज्य रक्तिकाद्वयम् ॥
हन्त्यष्टादशकुष्ठानि रोमविध्वसन तथा ।
द्विविध वातरक्तञ्च नाडीदुष्टव्रणानि च” ॥
इति तालकेश्वरः ॥ ७३ ॥
“दद्रुघ्नवाणाङ्घ्रिरस दत्त्वा ताल सुचूर्णितम् ।
पुन पुनश्च समर्द्य शुष्क कृत्वा पुटे दहेत्” ॥
वाणाङ्घ्रिरस शरपुङ्खपत्ररसम् ॥
दृढस्थाल्या हृत क्षार पालाशश्चाप्युपर्य्यध ।
ततो ज्वाला प्रदातव्या दिनरात्रे मृत भवेत् ॥
शुक्लवर्णो यदा च स्यादग्नौ दत्ते न धूमकम् ।
तदा ज्ञात मृत ताल सर्व्वकुष्ठविनाशनम् ॥
गलत् कुष्ठ वातरक्त ताम्रवर्णञ्च मण्डलम् ।
शीतपित्तमहादद्रुकुच्छुन्दरविनाशनम् ।
पथ्य मसूरचणक मुद्गञ्च यथेच्छया” ॥
इति तालकेश्वर ॥ ७४ ॥ अतिदृष्टफलोऽयम् ।
“समर्द्य तालकं शुष्क वशपत्राख्यमुत्तमं ।
कुष्माण्डनीरे सम्भाव्य त्रिदिन शोधयेत् पुन ॥
घृतकन्याद्रवैर्भूयो भावयेच्च दिनत्रयम् ।
समर्द्य काञ्जिकेनैव दध्नाम्लेन विमर्द्दयेत् ॥
समर्द्य चूर्णसलिले रसे मौनर्नवे पुन ।
त्रिदिन मर्द्दयित्वा तु कारयेत् खटिकाकृतिम् ॥
स्थाल्या दृढतरायान्तु पलाशक्षारसञ्चयम् ।
उपर्य्यधस्तालकस्य क्षार दत्त्वा शरावके ॥
पिधाय लेपयेत् यत्नात् पूरयेत् क्षारसञ्चयम् ।
पुनरूर्द्ध्वं शरावेण लेपयेत्तत् दृढ़ ततः ॥
द्वात्रिंशद्यामपर्य्यन्त वह्निज्वाला प्रदीयते ।
एव सिद्धेन तालेन गन्धतुल्येन मेलयेत् ॥
दशोत्तुल्य जीर्णताम्रं वालुकायन्त्रग पचेत् ।
अय तालेश्वरो नाम रस परमदुर्लभ ॥
हन्त्यष्टादश कुष्ठानि वातशोणितनाशन ।
रक्तमण्डलमत्युग्र स्फुटित गलित तथा ॥
बहुरूप सर्व्वजात नाशयेदविकल्पत ।
दुष्टव्रणञ्च वीसर्प त्वग्दोषञ्च विनाशयेत् ॥
दृष्टो वारसहस्रञ्च रोगवारणकेशरी” ॥
इति महातालकेश्वर ॥ ७५ ॥
“कुष्माण्डत्रिफलातैलकन्याकाञ्जिकभावितम् ।
तालक तुल्यगन्ध स्यादर्द्धपारदमर्द्दितम् ॥
अजाक्षीरेण निम्बूककन्यातोयैर्द्दिनत्रयम् ।
प्रत्येक भावयेच्छुष्क चक्रिकाकारता गतम् ॥
विपचेत् हण्डिकामध्ये पलाशक्षारमध्यगम् ।
यामान् द्वादशशीतेऽस्मिन् प्रयोज्य रक्तिकाद्वयम् ।
हन्त्यष्टादश कुष्ठानि रोमविध्वसनादिकम्” ॥
इति तालकेश्वर ॥ ७६ ॥
इति गोविन्दविशारदकृतभैषज्यरत्नावल्यां कुष्ठ-
चिकित्सा समाप्ता ॥

कुष्ठकेतु, पु, (कुष्ठस्य नाशक केतुरिव ।) भूम्याहुल्य । इति राजनिर्घण्ट ॥

कुष्ठगन्धि, क्ली, (कुष्ठस्येव गन्धोऽस्य । समासे इच् ।) एलवालुकम् । इति राजनिर्घण्ट ॥

कुष्ठघ्न, पु, (कुष्ठ हन्ति इति । हन् + टक् ।) हितावली । इति राजनिर्घण्ट ॥

कुष्ठघ्नी, स्त्री, (कुष्ठघ्न + स्त्रियां टित्वात् ङीप् ।) काकोदुम्बरिका । इति राजनिर्घण्ट ॥
(वाकुची । अस्या पर्य्याया यथा ।
“अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमापूति फलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता” ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्या व्यवहारो यथा—
“कुटजार्क्कनिम्बन्वपतरुखदिरासनसप्तपर्णनिर्यूहे ।
सिद्धा मधु-घृतयुक्ता कुष्ठघ्नीर्भक्षयेदभया” ॥
इति वाभटे चिकित्सास्थाने १९ अध्याये ॥)

कुष्ठनाशन, पु, (कुष्ठ नाशयतीति । नश् + णिच् + ल्यु ।) वाराहीकन्द । गौरसर्षप । इति राजनिर्घण्ट । क्षीरीशवृक्ष । इति रत्नमाला ॥

कुष्ठनाशिनी, स्त्री, (कुष्ठ नाशयतीति । नश् + णिच् णिनि । स्त्रियां नान्तत्वात् ङीप् ।) सोमराजि । इति रत्नमाला ॥

कुष्ठल, क्ली, (कु कुत्सित स्थलम् । अम्बष्ठादित्वात् षत्वम् ।) कुत्सितस्थलम् । इति संक्षिप्तसारव्याकरणम् ॥

कुष्ठसूदन, पु, (कुष्ठ सूदयति नाशयतीति । सूदि + ल्यु ।) आरग्वध । इति राजनिर्घण्ट ॥
(आरग्वधशब्देऽस्य गुणपर्य्याया अस्य ज्ञातव्या ॥)

कुष्ठहन्ता, [ऋ] पु, (कुष्ठ हन्ति इति । कुष्ठ + हन् + तृच् ।) हस्तिकन्द । इति राजनिर्घण्ट ॥

कुष्ठहन्त्री, स्त्री, (कुष्ठहन्तृ + स्त्रियां ऋदन्तात् ङीप् ।) वाकुची । इति राजनिर्घण्ट । हाकुच इति भाषा ॥

कुष्ठहृत्, पु, (कुष्ठ हरतीति । कुष्ठ + हृ + क्विप् तुगागमश्च ।) खदिरवृक्ष । इति त्रिकाण्डशेष ॥

कुष्ठारि, पु, (कुष्ठस्य अरि शत्रु नाशक इत्यर्थ ।)

विट्खदिरः । इति शब्दचन्द्रिका ॥ पटोलः । आदित्यपत्रः । खदिरः । गन्धकः । इति राजनिर्घण्टः ॥

कुष्ठी, [न्] त्रि, (कुष्ठं अस्यास्तीति । कुष्ठ + इनि ।) कुष्ठरोगयुक्तः । (यथा, मनुः । ३ । ७ ।
"क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च" ॥)

कुष्मल, क्ली, (कुष् + "कुटिकुषिभ्यां क्मलन्" । उणा ४ । १८६ । इति क्मलन् ।) छेदनम् । विकशितम् । इत्युणादिकोषः ॥

कुष्माण्ड, पु स्त्री, शिवस्य गणदेवताभेदः । (यथा, विष्णुपुराणे । १ । १२ । १३ ।
"कुष्माण्डा विविधै रूपैः सहेन्द्रेण महामुने ।
समाधिभङ्गमत्यन्तमारब्धाः कर्तुमातुराः" ॥)
कूष्माण्डविशेषः इति मेदिनी ॥ (कुष्माण्डाकारत्वात् शिवगणकूष्माण्डयोस्तथात्वम् ॥ कु ईषत् उष्मा अण्डेषु वीजेषु यस्य ।) वृहत्फललताविशेषः । कुमड़ा इति कोहड़ा इति च भाषा । तत्पर्य्यायः । पुष्पावासः २ तिमिषः ३ ग्राम्यकर्कटी ४ । इति त्रिकाण्डशेषः ॥ कुष्माण्डकः ५ कर्कारुः ६ । इत्यमरः ॥ पुष्पफलः ७ । इति रत्नमाला ॥ कुष्माण्डी ८ कर्कोटिका ९ कुम्भाण्डी १० वृहत्फला ११ सुफला १२ कुम्भफला १३ नागपुष्पफला १४ शुनी १५ कूष्माण्डः १६ शिखिवर्द्धकः १७ । इति शब्दरत्नावली ॥ कूष्माण्डकः १८ । इत्यमरटीका ॥ अपि च ।
"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं वृहत्फलम् ।
कुष्माण्डं वृंहणं वृष्यं गुरु पित्तास्रवातनुत् ॥
बालं पित्तापहं शीतं मध्यमं कफकारकम् ।
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु ॥
वस्तिशुद्धिकरं चेतोरोगहृत् सर्व्वदोषजित्" ॥ * ॥
अथ कोहण्डी ।
"कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता ।
कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः ।
पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत्" ॥
इति भावप्रकाशः ॥ अस्य फलगुणाः । मूत्राघातप्रमेहकृच्छ्राश्मरीनाशित्वम् । विण्मूत्रग्लपनत्वम् । तृष्णार्त्तिशमनत्वम् । शीर्णाङ्गपुष्टिप्रदत्वम् । शुक्रवृद्धिकारित्वम् । स्वादुतरत्वम् । अरोचकहरत्वम् । बलकारित्वम् । पित्तापहत्वम् । वल्लीफलानां मध्ये प्रवरत्वञ्च । इति राजनिर्घण्टः ॥ तस्य बालफलगुणाः । पित्तहरत्वम् । मध्यमफलगुणौ । कफकारित्वम् । अतिगुरुपाकित्वम् ॥ पक्वफलगुणाः । लघुपाकित्वम् । उष्णत्वम् । क्षाररसत्वम् । अग्निदीपनत्वम् । वस्तिशोधनत्वम् । सर्व्वदोषनाशित्वम् । हृद्यत्वम् । चित्तविकारिणां पथ्यत्वञ्च ॥ अस्य नाडिकागुणाः । क्षाररसत्वम् । मधुरत्वम् । गुरुत्वम् । रूक्षत्वम् । रुचिकारित्वम् । वायुकफाश्मरीशर्कराराेगनाशित्वञ्च ॥ अस्य मज्जगुणाः । शुक्रकारित्वम् । पित्तनाशित्वम् । वस्तिशोधनत्वञ्च । इति राजवल्लभः ॥

कुष्माण्डक, पुं, (कुष्माण्ड + स्वार्थे कन् ।) कुष्माण्डः । इत्यमरः । २ । ४ । १५५ ॥ (यथा, भावप्रकाशे ।
"घृते तप्ते विनिःक्षिप्य खण्डान् कुष्माण्डसम्भवान् ।
वार्त्ताकुविधिना कुर्य्यात् प्रलेहतक्रादिकम् ॥
वेशवारान्वितस्तेन घृते सम्यक्प्रपूरकम् ।
कुष्माण्डकफलं सिद्धं विदुः सुस्वादु सुन्दरम्" ॥
नागविशेषः । यथा, महाभारते । १ । २५ । ११ ।
"नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः" ॥)

कुष्माण्डी, स्त्री, (कुष्माण्ड + स्त्रियां जातित्वात् ङीष् ।) उमा । (मसिना ।) अोमधी । इति हेमचन्द्रः ॥ कर्कारुः । इति राजनिर्घण्टः ॥ यागक्रियाविशेषः । इति शब्दरत्नावली ॥

कुस इ कि भासने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वा-पर-अक-सेट्-इदित् ।) पञ्चमस्वरी । इ कुंस्यते । कि कुंसयति कुंसति । भासनं दीप्तिः । इति दुर्गादासः ॥

कुस य इर् श्लिषि । इति कविकल्पद्रुमः ॥ (दिवा-पर-सक-सेट् ।) य, कुस्यति बाला कान्तम् । इर् अकुसत् अकोसीत् । अस्मात् पुषादित्वान्नित्य ङ इत्यन्ये । इति दुर्गादासः ॥

कुसल, क्ली, (कुस् + कलच् ।) कुशलम् । इत्यमरटीका ॥

कुसित, पुं, (कुस + "कुसेरुम्भोमेदेताः" । उणा ४ । १०६ । इति इत ।) जनपदः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुसिदायी, स्त्री, ("स्त्रीत्यर्थे "वृषाकप्यग्निकुसित-कुसिदानामुदात्तः" ।४।१।३७। इति प्रकृतेरैकारादेशो ङीप् च ।) कुसीदपत्नी । इति जटाधरः ॥

कुसिम्बी, स्त्री, (कौ पृथिव्यां शिम्बीति ख्याता । पृषोदरात् स ।) शिम्बी । इति राजनिर्घण्टः ॥
("कुसिम्बिवल्लीप्रभवास्तु शिम्बाः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कुसीद, क्ली, (कुस् + "कुसेरुम्भोमेदेताः" उणा । ४ । १०६ । इति ईदप्रत्ययः । इह सूत्रे तृतीयप्रत्ययो ह्रस्वादिर्दीर्घादिश्चेति तन्त्रेणोपात्तः । वृषाकप्यग्नीति सूत्रे ह्रस्व एवेति वृत्तिकारहरदत्तादयः । यद्वा कुत्सितं निकृष्टरूपवृद्धिदानेनेत्यर्थः सीदति अधोमर्णो यत्र । पृषोदरात् साधुः । यथा वृहस्पत्युक्तौ "कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते । चतुर्गुणं वाष्टगुणं कुसीदाख्यमतः स्मृतम्" ॥) ऋणादानजीविका । वृद्ध्याजीवनम् । सुद वाड़ि देओया इत्यादि भाषा । तत्पर्य्यायः । अर्थप्रयोगः २ वृद्धिजीविका ३ । इत्यमरः । २ । ९ । ४ ॥ यथा,—
"कुसीदकृषिवाणिज्यं प्रकुर्व्वीतास्वयङ्कृतम् ।
आपत्काले स्वयं कुर्व्वन्नैनसा युज्यते द्विजः ॥
बहवो वर्त्तनोपाया ऋषिभिः परिकीर्त्तिताः ।
सर्व्वेषामपि चैवैषां कुसीदमधिकं विदुः ॥
अनावृष्ट्या राजभयान्मूषिकाद्यैरुपद्रवैः ।
कृष्यादिके भवेद्बाधा सा कुसीदे न विद्यते ॥
शुक्लपक्षे तथा कृष्णे रजन्यां दिवसेऽपि वा ।
उष्णे वर्षति शीते वा वर्द्धनं न निवर्त्तते ॥
देशं गतानां या वृद्धिर्नानापण्योपजीविनाम् ।
कुसीदं सर्व्वतः सम्यक् सञ्चितस्यैव जायते ॥
लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत् ।
ते तुष्टास्तस्य तद्दोषं शमयन्ति न संशयः ॥
वणिक् कुसीदी दद्यात्तु वस्त्रं गां काञ्चनादिकम् ।
कर्षीबलोऽन्नपानानि यानशय्यासनानि च ॥
पण्येभ्यो विंशतिं दत्त्वा पशुस्वर्णादिकं शतम् ।
पादेनायस्य पारत्र्यं कुर्य्यात् सञ्चयमात्मवान् ॥
अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितम् ।
पादञ्च प्रार्थमायस्य मूलभूतं विवर्द्धयेत् ॥
विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः ।
वृत्तिर्भैक्षं कुसीदञ्च दश जीवनहेतवः" ॥
इति गारुडे २१५ अध्यायः ॥ * ॥ गौतमः ।
"कृषिगोरक्षवाणिज्यञ्चास्वयंकृतं कुसीदञ्चेति ।
कुसीदस्य पृथक् ग्रहणं स्वयंकृतस्याभ्यनुज्ञानार्थम्" ।
कुसीदं वृद्धिकर्म्मेति प्रदेशान्तरेऽभिधानात् इति कल्पतरुः ॥ वृहस्पतिः ।
"कुसीदं कृषिवाणिज्यं प्रकुर्व्वीतास्वयंकृतम् ।
आपत्काले स्वयं कुर्व्वन् नैनसा युज्यते द्विजः ॥
लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव भोजयेत् ।
ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः ॥
वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम् ।
कर्षीबलोऽन्नपानानि यानशय्यासनानि च ॥
पण्येभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं शतम् ॥
वणिक् कुसीददोषः स्यात् ब्राह्मणानाञ्च पूजनात् ।
राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम् ॥
त्रिंशद्भागञ्च विप्राणां कृषिं कृत्वा न दोषभाक्" ॥
तथा, मनुः ।
"अशीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शतात् ।
द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन् ॥
द्विकं शतञ्च गृह्णानो न भवत्यर्थकिल्विषी ।
शतकार्षापणे अशीतिभागं विंशति पणान्" ॥
द्विकं पुराणद्वयम् । एवंविधनियममतिक्रम्य अनापदि स्वयमन्यद्वारा वा यः स्वाच्छन्द्येन धनं हरति तस्यैव प्रायश्चित्तम् । आपदि तु स्वयंकरणे नियमातिक्रमे च न दोषः । इति प्रायश्चित्तविवेकः । इत्याह्निकाचारतत्त्वम् ॥ कुसीदिके त्रि । इति मेदिनी ॥

कुसीदायी, स्त्री, (कुसीदः कुसीदजीवी तस्य पत्नी । मुग्धबोधमते ईप् ऐङ् च । पाणिन्यादिमते तु कुसितकुसिदशब्दाभ्यां ह्रस्वमध्याभ्यामेव ङीप् ऐश्च इति विशेषः । तदा "वृषाकप्यग्निकुसितकुसिदानामुदात्तः" । ४ । १ । ३७ । इति प्रकृतेरैकारादेशो ङीप् च ।) कुसीदपत्नी । इति जटाधरः ॥

कुसीदिकः, त्रि, (कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत् प्रयच्छति । "कुसीददशैकादशात् ष्ठन्ष्ठचौ" । ४ । ४ । ३१ । इति ष्ठन् ।) वृद्धिजीवी । तत्पर्य्यायः । वार्द्धुषिकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४ । इत्यमरः । २ । ९ । ५ ॥ कुसीदः ५ । इति शब्दरत्नावली ॥ कुसीदी ६ । यथा, आह्निकतत्त्वे ॥
"वणिक् कुसीददोषः स्यात् ब्राह्मणानाञ्च पूजनात्" ।

कुसुम, क्ली, ("कुसेरुम्भोमेदेताः" । उणा ४ । १०६ । इति उमः । निपातनात् गुणाभावः ।) पुष्पम् । (यथा, ऋतुसंहारे वसन्तवर्णने ४ ।

"वापीजलाना मणिमेखलाना
शशाङ्कभासा प्रमदाजनाना ।
चूतद्रुमाणा कुसुमान्विताना
ददाति सौरभ्यमयं वसन्त" ॥

फलकुसुमविशेषाणां द्रव्यान्तरसुलभत्वादिसूचकत्वं दर्शितं यथा बृहत्संहितायां २९ अध्याये ।
"फलकुसुमसम्प्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम् । सुलभत्वं द्रव्याणां निष्पत्तिश्चापि शस्यानाम्" ॥
केन कस्य वृद्धिर्ज्ञेया तदाह ।
"शालेन कलमशालीरक्ताशोकेन रक्तशालिश्च ।
पाण्डूकः क्षीरिकया नीलाशोकेन सूकरकः ॥
न्यग्रोधेन तु यवकस्तिन्दुकवृद्ध्या च षष्टिको भवति ।
अश्वत्थेन ज्ञेया निष्पत्तिः सर्व्वशस्यानाम् ॥
जम्बूभिस्तिलमाषाः शिरीषवृद्ध्या च कङ्गुनिष्पत्तिः ।
गोधूमाश्च मधूकैर्यववृद्धिः सप्तपर्णेन ॥
अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदसनैः ।
बदरीभिश्च कुलत्थांश्चिरविल्वेनादिशेन्मुद्गान् ॥
अतसीवेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः ।
तिलकेन शङ्खमौक्तिकरजतान्यथ चेङ्गुदेन शणाः ॥
करिणश्च हस्तिकर्णैरादेश्या वाजिनोऽश्वकर्णेन ।
गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥
चम्पककुसुमैः कनकं विद्रुमसम्पच्च बन्धुजीवेन ।
कुरुवकवृद्ध्या वज्रं वैदूर्य्यं नन्दिकावर्त्तैः ॥
विद्याच्च सिन्धुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन ।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥
श्रेष्ठी सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुमुदैः ।
सौगन्धिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः ॥
आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम् ।
खदिरशमीभ्यां दुर्भिक्षमर्ज्जुनैः शोभना वृष्टिः ॥
पिचुमर्द्दनागकुसुमैः सुभिक्षमथ मारुतः कपित्थेन ।
निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥
दूर्व्वाकुशकुसुमाभ्यामिक्षुर्वह्निश्च कोविदारेण ।
श्यामालताभिवृद्ध्या बन्धक्यो वृद्धिमायान्ति" ॥)

फलम् । स्त्रीरजः । (यथा, ज्योतिषशास्त्रे ।
"यदा नार्य्याः पितुर्गेहे कुसुमस्तनसम्भवः" ।)
नेत्ररोगविशेषः । इति मेदिनी ॥

कुसुमपुर, क्ली, (कुसुमाख्यं पुरम् ।) पुरविशेषः । पाटना इति ख्यातम् । तत्पर्य्यायः । पाटलिपुत्त्रम् २ । इति हेमचन्द्रः ॥ (यथा, मुद्राराक्षसे २याङ्के । "सखे । विराधगुप्त । वर्णयेदानीं कुसुमपुरवृत्तान्तशेषम् अपि द्यमन्ते कुसुमपुरनिवासिनोऽस्मदुपजापं चन्द्रगुप्तप्रकृतयः" ॥)

कुसुममध्य, क्ली, (कुसुमं मध्ये अभ्यन्तरे यस्य ।) वृक्षविशेषः । इति शब्दचन्द्रिका । चालिता गाछ इति भाषा ॥

कुसुमाञ्जन, क्ली, (कुसुमाकारमञ्जनं शाकपार्थिवादिवत् समासः ।) कुसुमाकाररीतिमलसम्भवमञ्जनम् । तत्पर्य्यायः । पौष्पकम् २ रीतिपुष्पम् ३ पुष्पकेतु ४ । इत्यमरः । २ । ९ । १०२ । राजनिर्घण्टोक्तगुणपर्य्यायौ पुष्पाञ्जनशब्दे द्रष्टव्यौ ॥

कुसुमात्मक, क्ली, (कुसुममेवात्मा स्वरूपं यस्य । कप् ।) कुङ्कुमम् । इति हारावली ॥

कुसुमाधिप, पु, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिपः श्रेष्ठः ।) चम्पकवृक्षः । इति शब्दरत्नावली ॥ (चम्पकशब्देऽस्य विवृतिर्व्याख्येया ॥)

कुसुमाधिराट्, [ज्] पुं, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिराजते दूरव्यापिसुगन्धित्वात् । अधि + राज् + क्विप् ।) चम्पकवृक्षः । इति त्रिकाण्डशेषः ॥

कुसुमायुध, पु, (कुसुमानि आयुधानि अस्त्राणि अस्य ।) कामदेवः । इति शब्दरत्नावली ॥ (यथा, शाकुन्तले ३याङ्के ।
"भगवन् मन्मथ । कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत्" ॥ तथा, कुमारे च । ४ । ४० ।
"कुसुमायुधपत्नि ! दुर्लभ-
स्तव भर्त्ता न चिराद्भविष्यति" ॥ इति ॥)

कुसुमाल, पु, (कुसुमवत् लोभनीयं द्रव्यादिकम् आलाति सम्यक् अगोचरेणैव गृह्णाति । आ + ला + क ।) चौरः । इति हारावली ॥

कुसुमासव, क्ली, (कुसुमानां तद्रसानाम् आसवम् मद्यम् ।) मधु । इति राजनिर्घण्टः ॥

कुसुमेषु, पु, (कुसुमानि इषवो वाणा यस्य ।) कामदेवः । इत्यमरः । १ । १ । २७ ॥ (यथा, माघे । ८ । ७० ।
"स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासश्च प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः" ॥)

कुसुम्भ, क्ली, (कौ पृथिव्यां सुम्भति शोभते दीप्तिं प्राप्नोतीत्यर्थः । कु + सुभि + अच् इदित्वात् नुम् ।) स्वर्णम् । इति मेदिनी ॥ पुष्पविशेषः । कुसुमफुल इति भाषा ॥ (यथा, ऋतुसंहारे वसन्तवर्णने ६ ।
"कुसुम्भरागारुणितैर्दुकूलै-
र्नितम्बविम्बानि विलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरै-
रलङ्क्रियन्ते स्तनमण्डलानि" ॥)
तत्पर्य्यायः । कमलोत्तमम् २ वह्निशिखम् ३ महारजनम् ४ । इत्यमरः । २ । ६ । १०६ ॥ पावकम् ५ पीतम् ६ पद्मोत्तरम् ७ रक्तम् ८ लोहितम् ९ वस्त्ररञ्जनम् १० अग्निशिखम् ११ । अस्य शाकगुणाः । मधुरत्वम् । कटुत्वम् । उष्णत्वम् । विण्मूत्रदोषमदनाशित्वम् । दृष्टिप्रसादनत्वम् । रुचिप्रदत्वम् । अग्निदीप्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ रूक्षत्वम् । कफवायुनाशित्वम् । पित्तकारित्वञ्च । तत्तैलगुणाः । कटुत्वम् । उष्णत्वम् । त्रिदोषकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ क्रिमियक्ष्ममलनाशित्वम् । तेजोबलकारित्वञ्च । घर्षणेनास्य गुणाः । त्रिदोषकारित्वम् । पुष्टिबलक्षयकण्डूकारित्वञ्च । इति राजनिर्घण्टः ॥ (कुसुम्भशाकभक्षणे निषेधमाह तिथितत्त्वधृतोशनोवचने यथा,—
"कुसुम्भं नालिताशाकं वृन्ताकं पूतिकां तथा ।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः" ॥)

कुसुम्भ, पु, ("कुसेरुम्भोमेदेताः" । उणा । ४ । १०६ । इति उम्भ प्रत्ययः ।) कमण्डलुः । इत्यमरः । ३ । ३ । १३९ ॥ (यथा, मनौ । ६ । ५२ ।
"क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्" ॥)
महारजनवृक्षः । इति राजनिर्घण्टः ॥ (कुसुम फुल इति भाषा ॥ अस्य पर्य्याया यथा ।
"पद्मोत्तमविकाशः स्यात् कुसुम्भः शरटस्तथा" ॥
इति वैद्यकरत्नमालायाम् ॥ अस्य गुणाश्च यथा ।
"कटुर्विपाके कटुकः कफघ्नो
विदाहिभावादहितः कुसुम्भः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कुसूः, पु, (कुस् + कूप्रत्ययः ।) किम्पुलुकः । इति हेमचन्द्रः ॥

कुसूल, पु, (कुस् + कूलच् । यद्वा कुशूलः निपातनात् सत्वम् ।) कुशूलः । इति षट्शब्दार्थे भरतः ॥

कुसृति, स्त्री, (कुत्सिता सृतिः उपायः व्यवहारो वा ।) शाठ्यम् । इत्यमरः । १ । ७ । ३० । इन्द्रजालम् । इति हेमचन्द्रः । (कर्म्मधारये कुत्सितपथः । इति व्युत्पत्तिलब्धोऽर्थः ॥ कुत्सिता सृतिराचारो यस्येति विग्रहे, दुराचारे त्रि ।
यथा, भागवते ८ । २३ । ७ ।
"कस्मादयं कुसृतय खलयोनयस्ते
दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः" ॥)

कुस्तुभ, पु, (कु भुवं स्तुभ्नोति । स्तुन्भ + मूलादित्वात् कः ।) विष्णुः । इत्यमरटीकायां भरतादयः ॥ (समुद्रः । तस्येदम् अण् कौस्तुभम् इति शब्दार्थचिन्तामणिः ।)

कुस्तुम्बरी, स्त्री, (कुत्सिता तुम्बरी । पृषोदरात् सुट् साधुः ।) धन्याकम् । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"आर्द्रा कुस्तुम्बरी कुर्य्यात् स्वादुसौगन्ध्यहृद्यताम् ।
सा शुष्का मधुरा पाके स्निग्धा तृड्दाहनाशिनी" ॥)

कुस्तुम्बुरु, क्ली, (कुत्सितं तुम्बति अर्द्दयति यत् । तुबि अर्द्दने + बाहुलकात् उरुप्रत्ययः । जातिनिर्देशात् सुट् ।) धन्याकम् । इत्यमरः । २ । ९ । ३८ ॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ॥
"धन्याकं धान्यकं धान्यं कुस्तुम्बुरु धनीयकम् ।
धन्या कुस्तुम्बुरी धान्या वेषणोग्रा वितुन्नकम्" ॥)
(पु, यक्षविशेषः । यथा, महाभारते । २ । १० । १५ ।
"कुस्तुम्बुरुः पिशाचश्च गजकर्णो विशालकः ।
एते चान्ये च बहवो यक्षाः शतसहस्रशः" ॥)

कुस्म क ङ ईषद्धसने । इति कविकल्पद्रुमः ॥ (चुरां-आत्म-सक-सेट् ।) कुस्मेति च । (अत्र अक) क्रस्वी दन्त्योपधः । मतीच्छितं बुद्धिपूर्व्वकदर्शनम् । कुस्मित् कुत्सितमीषद्धास्यम् । क ङ, कुस्मयते जनः । बुद्ध्या पश्यति कुत्सितं स्मयते वेत्यर्थः । इति दुर्गादासः ॥

कुह् क ङ विस्मापने । इति कविकल्पद्रुमः ॥ (अदन्तचुरा-आत्म-सक-सेट् ।) ऋस्वी । विस्मापनमन्यतो विस्मयोत्पादनम् । ङ कुहयते । कुहकेनेन्द्रजालिको लोकं विस्मापयति इत्यर्थः । स्याता कुहयते विस्मापयते हेतुतो भयमिति भट्टमल्लदर्शनाद्विस्मापने इति पाठ इत्येके । इति दुर्गादासः ॥

कुह, व्य, ("वा ह च छन्दसि" । ५ । ३ । १३ ।

इति ह । "कु तिहो" । ७।२।१०४। इति किम कु ।) कुत्र । वैदिकप्रयोगोऽयम् । इति व्याकरणम् ॥ (यथा, ऋग्वेदे २ । १२ । ५ । "यं स्मा पृच्छन्ति कुह सेतिघोरमुतेमाहुर्नैषो अस्तीत्येनम्" ॥)

कुह, पु, (कुहयति विस्माययति ऐश्वर्य्यप्रभावेन य । कुह + णिच् + अच् ।) कुवेरः । इति हेमचन्द्रः ॥ (स्त्री, माया । कुहकम् । यथा, रामायणे २।१०९।२७। सन्तुष्टपञ्चवर्गोऽहं लोकयात्रां प्रवाहये । "अकुहः श्रद्दधानः सन् कार्य्याकार्य्यविचक्षणः" ॥)

कुहक, स्त्री, (कुह + "बहुलमन्यत्रापि" । उणा २ । ३७ इति क्वुन् ।) माया । (यथा, भागवते । १ । १ । १ ।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः । तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि" ॥) तत्पर्य्यायः । इन्द्रजालम् २ जालम् ३ कुहृतिः ४ । तद्युक्ते त्रि । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ व्यंसकः ४ दाण्डाजिनिकः ५ मायी ६ जालिकः ७ । इति हेमचन्द्रः ॥ दाम्भिकः । इत्युणादिकोषः । (सर्पविशेषः । यथा, विष्णुपुराणे १ । २१ । २८ ॥
"इत्युक्तास्तेन ते सर्पा कुहकास्तक्षकादयः । धर्मशक्त्या समस्तेषु गात्रेष्वतिविषोल्वणाः" ॥)

कुहकजीवी, [न्] त्रि, (कुहकेन इन्द्रजालविद्यया जीवति जीवनयात्रां सम्पादयतीति । कुहक + जीव् + णिनि ।) मायाजीवी । इति महाभारतम् ॥ वाजिकर इति भाषा ॥ (सर्पजीवि । इति व्युत्पत्तिलभ्योऽर्थः । साप्‌ड़े इति भाषा ॥)

कुहकस्वन, पु, (कुहकः विस्मापकः स्वनः शब्दोऽस्य ।) कुक्कुटपक्षी । इति हेमचन्द्रः ॥

कुहकस्वर, पु, (कुहकः विस्मापकः स्वरो यस्य ।) कुक्कुटः । इति हारावली ॥

कुहक्का, पु, तालभेदः । यथा, सङ्गीतदामोदरे ।
"द्रुतद्वन्द्वं लघुद्वन्द्वं ताले कुहक्कासञ्ज्ञके" ॥

कुहन, स्त्री, (कु ईषत् प्रयत्नेन हन्यते इति । हन् + कर्म्मणि अप् ।) मृद्भाण्डविशेषः । काचभाजनम् । (कुत्सिताचारेण हन्तीति । हन् + अच् ।) ईर्ष्यालौ त्रि । इति मेदिनी ॥

कुहन, पु, (कु पृथ्वीं भूमिं वा हन्ति खनतीत्यर्थः । हन् + अच् ।) मूषिकः । (कौ पृथिव्यां कुत्सितं वा हन्ति दशतीति । हन् + अच् ।) सर्पः । इति हेमचन्द्रः ॥

कुहना, स्त्री, (कुह + "ण्यासश्रन्थो युच्" । ३ । ३ । १०७ । इति युच् ।) दम्भचर्य्या । इति मेदिनी ॥ लोभान्मिथ्येर्य्यापथकल्पना । इत्यमरः । २ । ७ । ५३ ॥ अर्थलिप्सया मिथ्याचारभेदस्य सम्पादना । दम्भमात्रकृततध्यानमौनादिः । अर्थलिप्सया धर्म्मावचय इत्यन्ये । इति भरतः ॥

कुहनिका, स्त्री, (कुह + युच् स्वार्थे कः टाप् अत इत्वम् ।) कुहना । इति शब्दरत्नावली ॥

कुहर, स्त्री, (कु भूमिं हरतीति । कु + हृ + अच् ।) गह्वरम् । छिद्रम् । इति मेदिनी ॥ (यथा, प्रसन्नराघवे ।
"तैं किं मत्तकरीन्द्रकुम्भकुहरे नारोपणीया कराः" ॥) कर्णः कण्ठशब्दः । गलः । अन्तिकम् । इत्यजयपालः ॥

कुहर, पु, (कुह विस्मायने + क । कुहं विस्मायनं भयमित्यर्थः राति ददाति भयं जनयतीति भावः । रा + क ।) नागविशेषः । इति मेदिनी ॥

कुहरित, क्ली, (कुहरयति कण्ठशब्दं करोति । कुहर + क्वतौ णिच् + भावे क्त ।) पिकालापः । रतिध्वनिः । इति मेदिनी ॥ रटितम् । इति विश्वः ॥

कुहलि, पु, (कु + हलि + इन् ।) पूगपुष्पिका । इति त्रिकाण्डशेषः । पान इति भाषा ॥

कुहा, स्त्री, (कुह + क टाप् च ।) कटुकी । इति शब्दचन्द्रिका ॥
(वदरी ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्य वदरशब्दे ज्ञेयाः ॥)

कुहु, स्त्री, (कुह + मृगय्वादित्वात् कु ।) कुहू । इति हेमचन्द्रः ॥ (यथा, महाभारते ।
"कोकिलानां कुहुरवे सुखे श्रुतिमनोहरे" ॥)

कुहू, स्त्री, (कुह + बाहुलकात् कूप्रत्ययः ।) नष्टेन्दुकलामावास्या । इत्यमरः । १ । ४ । ९ ॥
(यथा, श्रुतौ । "द्वे ह वा अमावास्ये या पूर्व्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति" ॥
व्यक्तमाह कालमाधवीये व्यासः ।
"दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूर्मता" ॥
मतान्तरे तु ।
"तिथिच्छये सिनीवाली नष्टचन्द्रा कुहूर्मता । बाहुल्येपि कुहूर्ज्ञेया वेदवेदान्तवेदिभिः" ॥
तत्र श्राद्धाधिकारिभेदमाह । यथा, जावालिः ।
"अपराह्णद्वयाव्यापी यदि दर्शस्तिथिच्छये । आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता" ॥
आदिशब्दात् स्त्रीशूद्रयोरपि ग्रहणं यथाह हेमाद्रिः ।
"सिनीवाली द्विजैः कार्य्या साग्निकैः पितृकर्म्मणि । स्त्रीभिः शूद्रैः कुहूः कार्य्या तथा चानग्निकैर्द्विजैः" ॥
तदधिष्ठात्री देवपत्नी । यथा, निरुक्ते ।
"सिनीवाली कुहूरिति देवपत्न्याविति" ॥
सा च अङ्गिरसः सुता । यथाह भागवते ४ । १ । २९ ।
"श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः । सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा" ॥)
कोकिलालापः । इति मेदिनी ॥ (यथा, आर्य्यासप्तशती ६९० ।
"केनापि पिकानां कुहूः विस्तार्यते रः शब्दः" ॥)

कुहूकण्ठः, पु, (कुहूरिति शब्दः कण्ठे यस्य ।) कोकिलः । इति शब्दरत्नावली ॥

कुहूमुख, पु, (कुहूरिति शब्दः मुखे यस्य ।) कोकिलः । इति त्रिकाण्डशेषः ॥

कुहूरव, पुं, (कुहूरिति रवो यस्य ।) कोकिलः । इति राजनिर्घण्टः ॥ (यदुक्तम् ।
"पिक ! विधुस्तव हन्ति समं तमस्तमपि चन्द्रविरोधिकुहूरव" ॥)

कुहेल, स्त्री, (कुह + ऊलच्प्रत्ययः ।) सगर्त्तभूरन्ध्रम् । इति जटाधरः ॥

कुहेडिका, स्त्री, (कु ईषत् हेडति वेष्टते नेत्रसञ्चारोऽस्याम् । हेड् ङ वेष्टने + इन् ततः स्वार्थे कन् ततः टाप् ।) कुज्झटिका । इति भूरिप्रयोगः ॥

कुहेड़ी, स्त्री, (कु ईषत् हेडति वेष्टते नेत्रसञ्चारोऽस्याम् । हेड् वेष्टने + "सर्व्वधातुभ्य इन्" उणा ४ । ११७ । इति इन् । ततः कृदिकारान्तात् वा ङीष् ।) कुहेडिका । इति शब्दमाला ॥

कुहेलिका, स्त्री, (कु ईषत् हेडति वेष्टते नेत्रसञ्चारोऽस्याम् । हेडवेष्टने + इन् । ततः स्वार्थे कन् । टाप् । डस्य लत्वम् ।) कुज्झटिः । इति त्रिकाण्डशेषः ॥

कू ङि ङ आर्त्तस्वरे । इति कविकल्पद्रुमः ॥ (तुदा-आत्म-अक-सेट् ।) ङि ङ कुवते अकुविष्ट । इति दुर्गादासः ॥

कू ञ ग शब्दे । इति कविकल्पद्रुमः ॥ (क्र्या-उभ-अक-सेट् ।) ञ ग कूनाति कूनीते । कृत्वान्तोऽयमिति जैमिनिः । दन्त्यनोपधोऽपि । नकाररहितो कृत्वान्त इति रमानाथः । दीर्घान्त इति गोमरा । इति दुर्गादासः ॥

कू, स्त्री, (कूनाति शब्दायते इति । कू + क्विप् ।) पिशाची । इति शब्दमाला ॥

कूकुद, त्रि, (कू शब्दे भावे क्विप् । कुवः शब्दस्य कीर्त्तेरित्यर्थः कु भूमिं आस्पदस्वरूपामिति यावत् ददातीति । कूकु + दा + क ।) सत्कृत्यालङ्कृतां कन्यां यो ददाति सः । इत्यमरः । ३ । १ । १४ ॥

कूच, पु, (कु शब्दे "कुवश्चट् दीर्घश्च" । उणा ४ । ९९ । इति चट् दीर्घश्च ।) स्तनः । इत्युणादिकोषः ॥

कूचिका, स्त्री, (कूच + टित्वात् ङीप् । स्वार्थे कन् ।) तूलिका । इति हेमचन्द्रः ॥

कूज हिक्कने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) दीर्घी । हिक्कनमव्यक्तशब्दः । कूजति कोकिलः । इति दुर्गादासः ॥

कूजित, क्ली (कूज् + भावे क्तः ।) पक्षिध्वनिः । इति हेमचन्द्रः ॥ (यथा, गीतगोविन्दे १ । ४ । १ ।
"ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे । मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे" ॥)

कूट क ष अप्रसादाप्रदो । इति कविकल्पद्रुमः ॥ (चुरा आत्म अक सेट् ।) अप्रदा दानाभावः । क ष कूटयते खलः स्फुटमप्यर्थं प्रसन्नं न करोति । किञ्चिन्न ददाति वेत्यर्थः । इति दुर्गादासः ॥

कूट दु क दाहे । मन्त्रे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा-पर सक सेट् ।) दीर्घी । अचुकूटत् । इति दुर्गादासः ॥

कूटः, पु, (कूटयति दग्धीकरोति मायाप्रभावेन सामराधान् इति । कूट दाहे + क्विप् + अच् ।) अगस्त्यमुनिः । इति शब्दरत्नावली ॥

कूट, पु, स्त्री, (कूट्यते दातुं न शक्यते स्थावरत्वादिति। कूट अप्रदाने + कर्म्मणि घञ्।) गृहम्। इति शब्दरत्नावली॥

कूट, पुं, क्ली, (कूट् + घञ्।) निश्चलः। राशिः। (यथा, रामायणे।१।१४।१५।
"अन्नकूटाश्च दृश्यन्ते बहवः पर्व्वतोपमाः"॥)
लौहमुद्गरः॥ (यथा, भागवते।४।२५।८।
"एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव।
सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः"॥)
माया। (यथा, महाभारते वनपर्व्वणि।
"नैव धर्म्मेण तद्राज्यं नार्ज्जवेन न चौजसा।
अक्षकूटमधिष्ठाय हृतं दुर्य्योधनेन वै"॥)
पर्व्वतशृङ्गम्। (यथा, महाभारते आनुशासनिके।
"अश्मनामिव कूटानि धातुरक्तानि मेरते"॥)
तुच्छः। सीरावयवः। यन्त्रम्। फाँद इति भाषा। (यथा, रामायणे।
"वागुराभिश्च पाशैश्च कूटैश्च विविधैस्तथा"॥)
अनृतम्। इति मेदिनी॥ भग्नशृङ्गवृषः। इति हेमचन्द्रः॥ कैतवम्। इत्यमरः।३।३।३६॥ (यथा, भागवते।६।५।१०।
"वाचः कूटन्तु देवर्षेः स्वयं विमम्रशुर्धिया"॥
तद्वति त्रि। यथा, मनुः।७।९०।
"न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून्"॥
मिथ्याभूते त्रि। यथा, याज्ञवल्क्यः।
"द्विगुणां वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः"॥
पुरद्वारम्। यथा, महाभारते।४।५।१४।
"इयं कूटे मनुष्येन्द्र। गहने महती शमी।
भीमशाखा दुरारोहा श्मशानस्य समीपतः"॥
अत्र कूटशब्दस्तु टीकाकृन्मतभेदेन अर्थान्तरेऽपि वर्त्तते। अग्रभागमात्रम्। यथा, रामायणे।
"किरीटकूटैर्ज्वलितं महस्फार दीप्तकुण्डलम्"॥
भागवते च।३।१३।२९।
"सवप्रकूटाङ्घ्रिनिपातवेग-
विशीर्णकुक्षिः स्तनयन्नुदन्वान्।
उत्सृष्टदीर्घोर्म्मिभुजैरिवार्त्त-
श्चुक्रोश यज्ञेश्वर। पाहि मेति"॥)

कूटक, क्ली, (कूट् + सञ्ज्ञायां कन्।) फालम्। इत्यमरः।२।९।१३॥

कूटकः, पु, (कूट् + ण्वुल्।) कवरी। इति त्रिकाण्डशेषः॥ सुरामांसगन्धद्रव्यम्। इति शब्दमाला॥ (पर्व्वतविशेषः। यथा, भागवते।५।१९।१७।
"भारते ऽप्यस्मिन्वर्षे सरिच्छैलाः सन्ति बहवः"।
"त्रिकूट ऋषभ कूटक कौष्ठ सह्याः" इति॥)

कूटकृत्, पुं, (कूट करोतीति। कूट + कृ + क्विप् तुगागमश्च।) शिवः। कायस्थः। इति त्रिकाण्डशेषः। कितवे, त्रि। (तुलाकर्म्मणि कैतवकारी। यथा, याज्ञवल्क्यः।२।२४३।
"तुलाशासनमानानां कूटकृन्नाणकस्य च"॥)

कूटज, पुं, (कूटे पर्व्वते एव जायते। जन + ड।) कुटजवृक्षः। इति राजनिर्घण्टः॥ (कुटजशब्देऽस्य गुणादयो ज्ञेयाः॥)

कूटपूर्व्व, पुं, हस्तिनां त्रिदोषजज्वरः। इ- त्रिकाण्डशेषः॥ कूटपर्व्वोऽपि क्वचित्पाठः॥

कूटपालक, पु, (कूटं मृत्स्तोमं पालयतीति। पालि + ण्वुल्।) कुलालस्य पचनम्। कुमारेर पोयान् इति भाषा। पित्तज्वरः। इति हारावली॥

कूटयन्त्र, क्ली, (कूटं कैतववत् यन्त्रम्।) आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते तत्। फाँद इति भाषा। तत्पर्य्यायः। उन्माथः २। इत्यमरः।२।१०।२६॥

कूटशाल्मलि, पु, (कूटः शाल्मलिः।) शाल्मलिविशेषः। काण्टिमाला इति ख्यातः। कुत्सितशाल्मलिः अनृतशाल्मलिर्वा। इत्यन्ये। इति भरतः॥ तत्पर्य्यायः। रोचनः २। इत्यमरः।२।४।४७॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते। कूटशाल्मलिरिव इति व्युत्पत्त्या यमस्य गदायाः गौणी सञ्ज्ञा। यथा, रघौ १२।९५।
"अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत्"॥
नरकस्थकण्टकाचितलौहशाल्मलिवृक्षविशेषः। स च दुरारोहः। यथा, महाभारते १८।२।४।
"नादृश्यन्त च तास्तत्र यातनाः पापकर्म्मिणाम्।
नदी वैतरणी चैव कूटशाल्मलिना सह"॥)
राजनिर्घण्टोक्तगुणपर्य्यायौ रोहितकशब्दे द्रष्टव्यौ॥

कूटसंक्रान्ति, स्त्री, अर्द्धरात्रातीते सूर्य्यस्य राश्यन्तरगमनम्। यथा,—
"सङ्क्रान्तिर्द्विविधा यत्र पूर्व्वं तत्र परित्यजेत्।
कर्त्तव्यं कूटसङ्क्रान्त्या स्नानदानतपोव्रतम्॥
अर्द्धरात्रव्यतीते तु यदा सङ्क्रमते रविः।
सा ज्ञेया कूटसङ्क्रान्तिर्मुनिभिः परिकीर्त्तिता"॥
इति विद्यानिधिधृतज्योतिःसागरसारधृत वचनम्॥ * ॥ अपि च।
"अर्द्धरात्रे व्यतीते तु सङ्क्रान्तिर्यदहर्भवेत्।
पूर्व्वं व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः॥
इति भीमपराक्रमीयम्॥ स्नानदानयोरित्यत्र सप्तमीनिर्द्देशात् परदिवसीयस्नानदाननिमित्तक पूर्व्वदिने उपवाससंयमनरूपव्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम्॥

कूटस्थ, त्रि, (कूटे मायायां तिष्ठतीति। यद्वा, कूटवत् निर्व्विकारेण निश्चलः सन् तिष्ठतीति। कूट + स्था + क।) एकरूपतया यः कालव्यापी सः। इत्यमरः॥ (परमात्मा। यथा, पञ्चदश्यां ६।२२-२७।
"अधिष्ठानतया देहद्वयावच्छिन्नचेतनः।
कूटवन्निर्व्विकारेण स्थितः कूटस्थ उच्यते॥
कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिविम्बकः।
प्राणानां धारणाज्जीवः संसारेण स युज्यते॥
जलव्योम्ना घटाकाशो यथा सर्व्वस्तिरोहितः।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते॥
अयं जीवो न कूटस्थं विविनक्ति कदाचन।
अनादिरविवेकोऽयं मूलाविद्येति गम्यताम्॥
विक्षेपावृतिरूपाभ्यां द्विधाऽविद्या प्रकल्पिता।
न भाति नास्ति कूटस्थ इत्यापादनमावृतिः॥
अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते।
न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि"॥
कूटस्थचैतन्यस्य अविद्याध्यस्ततयैव जीवत्वं न तु स्वरूपतः नितरां तस्मादपि निरध्यस्तत्वात् निर्म्मलः सच्चिदानन्दस्वरूपावस्थः पुरुषोत्तमः परमात्मेत्युच्यते। यथा, गीतायां १५।१६-१७।
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य विभर्त्त्यव्यय ईश्वरः"॥)
एकेनैव स्वभावेन निरवधिकालस्य व्यापको यः आकाशादिः। इति भरतः॥ (कूटे भयावहे तिष्ठति यः। स्था + कः।) व्याघ्रनखः। इति राजनिर्घण्टः॥ (व्याघ्रनख इति भाषा॥)

कूटस्था, स्त्री, (कूटस्थ इव प्रकाशते यत्। अर्शआदेरच्।) व्याघ्रनखाख्यगन्धद्रव्यम्। इति जटाधरः॥

कूटसाक्षी, [न्] त्रि, (कूटः मायावी मिथ्यावादी कापटीत्यर्थः साक्षी।) मिथ्यासाक्षी इति व्यवहारतत्त्वम्॥ (याज्ञवल्क्ये कूटसाक्षिलक्षणम्। यथा,—
"द्विगुणां वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः"॥
ते तु गुरुदण्डार्हाः। अकृतप्रायश्चित्ता रौरवाख्य नरकं व्रजेयुः॥ यो हि जानन्नपि साक्ष्यं न ददाति स कूटसाक्षितुल्यः। तथा च तत्रैव।
"न ददाति तु यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि"॥)

कूटागार, क्ली, (कूटं आगारं गृहम्।) वड़भी। तत्पर्य्यायः। चन्द्रशालिका २। इति त्रिकाण्डशेषः॥ स्त्रीणां क्रीडागारम्। इत्यादिकाण्डटीका॥

कूटार्थभाषिता, स्त्री, (कूटार्थस्य दुर्भेद्यार्थस्य कल्पितार्थस्य वा या भाषिता।) प्रबन्धकल्पनाकथा। इति शब्दरत्नावली॥ रूपकथा इति भाषा॥

कूड़, शि घाने। भक्षे। इति कविकल्पद्रुमः। (तुदा-पर-अक-सकत्र-सेट्।) षळखरी। फलाभावेऽप्यस्य कूटादौ पाठः प्राचामनुरोधात्। प्राञ्चोऽपि डान्तप्रस्तावादिमं कूटादौ पठितवन्तः। शि, कूड़ती कूड़न्ती। घान्यं घनीभावः। कूड़ति दुग्धं वह्नियोगात्। कूड़त्यन्नं लोकः। इति दुर्गादासः॥

कूड्य, क्ली, (कूड़ति घनीभवति मृदादिना। कूड् + ण्यत्।) भित्तिः। इति शब्दरत्नावली॥ देयाल इति भाषा॥

कूण, त् क सङ्कोचे। इति कविकल्पद्रुमः॥ (अदन्तचुरा-पर-अक-सेट्।) दीर्घी। मूर्द्धन्योपधः। अचुकूणच्चक्षुः सङ्कुचितमभूदित्यर्थः। इति दुर्गादासः॥

कूण, क ङ सङ्कुचि। इति कविकल्पद्रुमः॥ (चुरा-आत्म-अक-सेट्।) षळखरी। क ङ, कूणयते चक्षुः सङ्कुचितं स्यादित्यर्थः। पद्ममस्वरीत्येके। इति दुर्गादासः॥

कूणि, त्रि, (कूणति कुञ्चितो भवति रोगादिभिरिति शेषः। कूण सङ्कोचे "सर्व्वधातुभ्य इन्"। उणा ४।११७। इति इन्।) कूणिः। रोगादिना

कुत्सितकर । इत्यमरटीकायां भरतः ॥

कूणिका, स्त्री, (कूण्+ण्वुल् टाप् अत इत्वञ्च ।) शृङ्गम् । वीणामूलस्थवंशशलाका । तत्पर्य्याय । कलिका २ । इति हेमचन्द्र ॥

कूदरः, पुं, (कुत्सित उदर यस्य । ऋतुदोषत पापोदरजातत्वात् तथात्वम् ।) जातिविशेषः । यथा,— ब्रह्मवैवर्त्तपुराणे ।

"ब्राह्मण्यामृषिवीर्य्येण ऋतौ प्रथमवासरे ।
कुत्सिते चोदरे जात कूदरस्तेन कीर्त्तित ॥
तदशौच विप्रतुल्य पतितो ह्यृतुदोषत ।
सद्यः कोटकसंसर्गादधमो जगतीतले" ॥

कूद्दाल, पुं, (कुद्दाल+पृषोदरात् दीर्घत्वे साधु ।) कुद्दालवृक्षः । इत्यमरटीकाया रमानाथ ॥

कूप,त् क दौर्ब्बल्ये । (अदन्तचुरा-पर-सक-सेट् ।) अय मक्षरी । इति त्रिलोचनः ॥ सप्तमस्वरी । इति कविकल्पद्रुमटीकायां दुर्गादास ॥

कूप', पुं, (कु ईषत् आपो यत्र । "ऋक्पूरित्य "। ५ । ४ । ७४ । ऊदनोरित्यत्र दीर्घनिर्द्देशादन्यत्रा-प्यूदिति वा । यद्वा कुपन्ति मण्डूका अत्र । "कुपु भ्याश्च"। उणा ३ । २७ इति पो दीर्घश्च ।) खनामख्यातो जलाधारः ॥ कूया इति पातूया इति च भाषा । तत्पर्य्याय' । अन्धु २ प्रहि ३ उदपानम् ४ । इत्यमरः । १ । १० । २६ ॥ अवट ५ कोट्टार ६ । इति जटाधर ॥ कात्त ७ कर्त्तः ८ वस्र ९ काट १० खातः ११ अवत १२ क्रिविः १३ सूदः १४ उत्सः १५ ऋश्यदात् १६ कारोतरात् १७ कुशेष १८ केवट १९ । इति वेदनिघण्टौ ३ अध्याये त्रयोदशकूपनामानि ॥ तस्य लक्षण यथा,—

"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलात्मक' ।
बद्धोऽबद्धः स कूप' स्यात्तदम्भ कौपमुच्यते" ॥

इति भावप्रकाश ॥ तज्जलगुणाः । वातकफनाशित्वम् । अग्निदीपनत्वम् । लघुत्वम् । पित्तवर्द्धनत्वम् । क्षारत्वम् । शीतकाले उष्णत्वम् । उष्णकाले शीतत्वम् । वसन्तकाले प्रशस्तत्वञ्च । इति राजवल्लभ ॥

("रूक्ष कफघ्न लवणात्मकञ्च
सन्दीपन पित्तकर लघूष्णम् ।
कूपोदक वातहर प्रदिष्ट
हित न शस्त शरदो वदन्ति" ॥

इति हारीते प्रथमस्थाने ७ अध्याये ॥
कूपादिकरणफलादिक जलाशयतत्त्वधृतादित्यपुराणवचनम् । यथा,—

"सेतुबन्धरता ये च तीर्थशौचरताश्च ये ।
तडागकूपकर्त्तारो मुच्यन्ते ते तृषाभयात्" ॥

विष्णौ च । "अथ कूपकर्त्तुस्तत्प्रवृत्ते पानीये दुष्कृतार्द्ध विनश्यति" । तत्प्रवृत्ते कृतकूपादुत्थिते । विष्णुधर्म्मोत्तरे च ।

"तडागकूपकर्त्तारस्तथा कन्याप्रदायिनः ।
छत्रोपानहदातारस्ते नराः स्वर्गगामिन" ॥

तथा, नन्दिकेश्वरपुराणे ।

"यो वापीमथवा कूप देशे तोयविवर्ज्जिते ।
खानयेत् स दिव याति विन्दौ विन्दौ शतं समा" ॥

तत्संस्कारकर्त्तुरपि फलमुच्यते विष्णौ । यथा,—

"कूपारामतडागेषु देवतायतनेषु च ।
पुनः संस्कारकर्त्ता च लभते मौलिक फलम्" ॥

पर जलशून्यदेशखनने एव प्रतिष्ठा न तु पङ्कोद्धारमात्रे । "अजले जलमुत्पाद्य" इति वचनात् ॥) गर्त्त । गुणवृक्ष । नदीमध्यस्थितो वृक्ष पर्व्वतो वा । इत्युणादिकोषः । कूपक । कूपा इति भाषा । मृत्पात्रम् । इति मेदिनी ॥

कूपक, पु, (कूपे गर्त्ते कायते प्रकाशते इति । कै+क ।) नौकागुणबन्धनस्तम्भ । इत्यमर । १ । १० । १२ । मास्तुल इति भाषा । तैलपात्रम् । कूपा इति भाषा । कुकुन्दरम् । उदपानम् । चिता । इति मेदिनी ॥ (शुष्कनद्यादौ जलार्थं कृतो गर्त्तः । इत्यमरः । १ । १० । १० ॥)

कूपाङ्ग', पु, (कूपाकार अङ्ग यस्मिन् ।) रोमाञ्चः । इति शब्दरत्नावली ॥ कूपाङ्कोऽपि पाठ' ॥

कूपार', पुं, (कु पृथिवीं पिपर्त्ति पूरयति । पॄ+अण् पृषोदरात् उकारस्य दीर्घ ।) अकूपार । इत्यमरटीका ॥ कूवारोऽपि पाठ ॥

कूपिका, स्त्री, (कूप+सज्ञाया कन् ततष्टाप् अत इत्वञ्च ।) अम्भोगतोपलम् । जलमध्यस्थितपर्व्वतादिः । इति मेदिनी ॥

कूपी, स्त्री, (कूप्+इन् ततो ङीप् ।) पात्रविशेषः । यथा, अजीर्णचिकित्सायां भावप्रकाशः ॥

"भावयेत् सप्तधात्वक्तचणकाम्लजलेन च ।
तत सशोष्य सपिष्य कूपीमध्ये निधापयेत्" ॥

कूम, क्ली, (को पृथिव्याः भूमेर्वा उमा कान्तिर्यस्मात् ।) सरोवरः । इति जटाधरः ॥

कूरः, पु, (वेञ् स्यूतौ+भावे क्विप् ऊ । कौ भूमौ ऊव वयन लाति स्वीकरोतीति । ला+क' । लस्य रः ।) भक्तम् । इति हलायुध ॥

कूर्च्चं, क्ली, (कुर्य्यते इति कुर् बाहुलकात् चट् निपातनात् दीर्घः ।) जलापकर्षार्थकेशादिमुष्टिः । कूँचि इति भाषा । यथा,—नरसिंहपुराणे ।

"तत समर्पयेत् कूर्च्चमुशीरादिविनिर्म्मितम् ।
जलापकर्षणार्थं श्रीमन्मूर्त्त्यङ्गसन्धितः" ॥

विष्णुधर्म्मोत्तरे च ।

"उशीरकूर्च्चक दत्त्वा सर्व्वपापै प्रमुच्यते ।
दत्त्वा गोवालज कूर्च्चं सर्व्वांस्तापान् व्यपोहति ।
दत्त्वा चामरज कूर्च्चं श्रियमाप्नोत्यनुत्तमाम्" ॥

इति श्रीहरिभक्तिविलासस्य ६ विलासे ४८ श्लोका ॥

कूर्च्चः, पुं क्ली, (कुर्+चट् निपातनात् दीर्घ ।) भ्रुवोर्मध्यम् । भ्रूद्वयमध्यस्थानम् । इत्यमरः । २ । ६ । ९२ ॥ मयूरपुच्छमुष्टिः । कुशमुष्टिः । इति हरिवंशे पुण्यकव्रतटीकायां नीलकण्ठ ॥ कठिनम् । श्मश्रु । कैतवम् । इति मेदिनी ॥ विकत्थनम् । दम्भ' । शिरोपरिभाग' । स तु अङ्गुष्ठाङ्गुलिमध्यस्य उपरिभाग' । इति हेमचन्द्रः ॥ ह्र बीजम् । इति तन्त्रम् ॥ (यथा, कर्पूरस्तवे "वर्गाद्य वह्निसंस्थ विधुरतिवलित तत्त्रय कूर्च्चयुग्मम्" ॥ तथा, भैरवतन्त्रे ।

"कालीबीजद्वय देवि । दीर्घं हूकारमेव च ।
शाम्भरी सा महाविद्या चामुण्डा कालिका स्मृता" ॥)

कूर्च्चं, पु, (कुर्+बाहुलकात् चट् निपातनात् दीर्घः ।) शीर्षम् । इति धरणी ॥

कूर्च्चशिर', [स्] क्ली, (कूर्च्चस्य शिरः इव शिरोऽस्य ।) अस्थिसन्ध । इति हेमचन्द्रः । गुड्मुड़ा इति भाषा ॥ ("गुल्फसन्धेरध उभयतः कूर्च्चशिरो नाम तत्र रुजा शोफो" ॥ "देहे कूर्च्चशिरांसि च" ॥ इति सुश्रुते शारीरस्थाने ६ अध्याये ॥)

कूर्च्चशीर्षः, पु, (कूर्च्चं श्मश्रु तद्वत् शीर्षं यस्य ।) जीवकवृक्षः । स तु अष्टवर्गमध्यपठितौषधि । इत्यमरः । २ । ४ । १४२ ॥ (जीवकशब्दे ऽस्य विवरण ज्ञातव्यम् ॥)

कूर्च्चशीर्षक, पुं, (कूर्च्चं श्मश्रु तद्वत् शीर्षं यस्य । कप् ।) जीवक' । इति राजनिर्घण्टः । (नारिकेलवृक्ष । इति चिन्तामणिः ॥)

कूर्च्चशेखर', पु, (कूर्च्चमिव शेखरमस्य ।) नारिकेल वृक्ष' । इति राजनिर्घण्टः ॥

कूर्च्चिका, स्त्री, (कूर्च्चाकारोऽस्त्यस्याः । कूर्च्च+ठन् ।) क्षीरविकृतिः । छोरसा इति भाषा । इत्यमर । २ । ९ । ४४ ॥ सा द्विधा यथा,—

"दध्ना सह च यत् पक्व क्षीर सा दधिकूर्च्चिका ।
तक्रेण पक्व यत् क्षीर सा भवेत्तक्रकूर्च्चिका" ॥

इति भरत ॥

("कूर्च्चिका विष्टता भग्ना गुरवो नातिपित्तलाः" ॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

सूचिका । सूँच इति भाषा । तूलिका । तुली इति भाषा । कुड्मल' । कुँड़ि इति भाषा । कुञ्चिका । कुँजि इति भाषा । इति हेमचन्द्रो मेदिनी च ॥

कूर्द्द ङ क्रीडायाम् । इति कविकल्पद्रुम । (भ्वा-आत्म-अक-सेट् ।) मक्षरी । ङ, कूर्द्दते । इति दुर्गादासः ॥

कूर्द्दन, क्ली, (कूर्द्द+भावे ल्युट् ।) क्रीडा । खेला । इत्यमर । १ । ७ । ३३ ॥

कूर्द्दनी, स्त्री, (कूर्द्दन्तेऽस्याम् । कूर्द्द+अधिकरणे ल्युट् ततो ङीप् ।) चैत्रीपूर्णिमा । सा तु कामदेवोत्सवतिथि' । इति त्रिकाण्डशेषः ॥

कूर्पं, क्ली, (कुर भाति । भा+कः ।) भ्रूद्वयमध्यस्थलम् । इति हेमचन्द्र' ॥

कूर्पर', पु, (कुर्परे शरीरे अवयवे कायति वा । वस् +अण् । पृषोदरात् साधुः मूर्द्धन्यश्च ।) कफोणिः । कारग्रावः । इति हेमचन्द्रः ॥ (अस्यार्थे कन् प्रत्ययेनापि उदाहरणं यथा, माघे । ९ । २१ ।

"प्रस्वेदवारिरुविशेषविषक्तमङ्गे
कूर्पासकं क्षतनखक्षतमुरिणमन्ती" ॥)

कूर्म्मः, पुं, (कुत्सितः ईषद् वा ऊर्म्मिः वेगो यस्य । के जले ऊर्म्मिर्यस्येति वा पृषोदरात् साधुः ।) जलजन्तुविशेष' । काछिम् इति भाषा ॥ (यथा, भगवद्गीतायाम् । २ । ५८ ।

"यदा संहरते चाय कूर्म्मोऽङ्गानीव सर्व्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता" ॥)

तत्पर्य्यायः । कच्छपः २ कमठः ३ दुली ४ मद

गुप्तः ५ पीवरः ६ कमठः ७ जलगुल्मः ८। इति जटाधरः ॥ अस्य मांसादिगुणपर्य्यायान्तरौ कच्छपशब्दे द्रष्टव्यौ ॥ * ॥ (तल्लक्षणं यथा,— वृहत्संहितायाम् ६४ अध्याये ।

"स्फटिकरजतवर्णो नीलराजीव चित्रः
कलशसदृशमूर्त्तिश्चारुवंशश्च कूर्म्मः ।
अरुणसमवपुर्व्वा सर्षपाकारचित्रः
सकलनृपमहत्त्वं मन्दिरस्थः करोति ॥
अञ्जनभृङ्गश्यामवपुर्वा बिन्दुविचित्रोऽव्यङ्गशरीरः ।
सर्पशिरा वा स्थूलगलो यः सोऽपि नृपाणां राष्ट्रविवृद्ध्यै ॥
वैदूर्य्यत्विट् स्थूलकण्ठस्त्रिकोणो
गूढच्छिद्रश्चारुवंशश्च शस्तः ।
क्रीडावाप्यां तोयपूर्णे मणौ वा
कार्य्यः कूर्म्मो मङ्गलार्थं नरेन्द्रैः" ॥

परमेश्वरः । यथाह ऋग्वेदभाष्योपक्रमणिकायां दयानन्दः ।
"परमेश्वरेणेदं सकलं जगत्क्रियते तस्मात् तस्य कूर्म्म इति संज्ञा" ॥ प्रजापतेरवतारविशेषः । यथा, शतपथब्राह्मणे । ७ । ५ । १ । ५ ।
"स यत् कूर्म्मो नाम एतद्वै रूपं कृत्वा प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद् यदकरोत् तस्मात् कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्य इति । स यः स कूर्म्मोऽसौ स आदित्यः" ॥ इति ॥ * ॥)

वाह्यवायुविशेषः । यथा,—
"उन्मीलने स्मृतः कूर्म्मो भिन्नाञ्जनसमप्रभः" ॥
इति शारदातिलकटीका ॥ * ॥ मुद्राविशेषः । यथा,—
"वामहस्तस्य तर्ज्जन्यां दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्ज्जन्या वामाङ्गुष्ठेन योजयेत् ॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पितृतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्य्याद्दक्षिणस्य करस्य च ॥
कूर्म्मपृष्ठसमं कुर्य्याद्दक्षपाणिञ्च सर्व्वतः ।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि" ॥
इति तन्त्रसारः ॥ * ॥ (आसनविशेषः । यथा हठयोगदीपिकायाम् । १ । २२ ।
"गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ।
कूर्म्मासनं भवेदेतदिति योगविदो विदुः" ॥)
सत्ययुगे समुद्रमन्थनकाले मन्दरपर्व्वतधारणाय कच्छपरूपधारिविष्णोरवतारविशेषः । यथा —
"क्षीरोदमध्ये भगवान् कूर्म्मरूपी स्वयं हरिः" ॥
इति पद्मपुराणम् ॥ अपि च ।
"विलोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः ।
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार" ॥
इति श्रीभागवतम् ॥ * ॥ ("काश्यपपत्न्यां कद्र्वां जातेषु सर्पेषु" । स च नागविशेषः । यथा, महाभारते । १ । ३५ । ११ ।
"शङ्खोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्म्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः" ॥)

कूर्म्मचक्रं, क्ली (कूर्म्माकारं चक्रम् । मध्यपदलोपी कर्म्मधारयः ।) ज्योतिषशास्त्रोक्तकच्छपाकारचक्रम् । तस्याकारो यथा,—
"प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदं यथाक्रमम्" ॥
तत्र नक्षत्रन्यासक्रमः ।
"मध्यप्रागग्नियाम्यादिकृत्तिकादित्रयत्रयैः ।
क्रूरवेधयुतैस्तैस्तु पीड्यन्ते तन्निवासिनः" ॥
तत्र वेधो यथा,—
"पूर्व्वापरे भवेद्वेधो वेधश्चोत्तरदक्षिणे ।
ऐशाने राक्षसे वेधो वेध आग्नेयमारुते ।
तारात्रयान्वितं तत्र सौरिं यत्नेन चिन्तयेत्" ॥
तत्र वेधादिजन्यदोषाः ।
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
स्वचक्रं परचक्रञ्च सप्तैते सम्भवन्ति च ॥
एवं देशस्य ग्रामस्य क्षेत्रनाम्नोऽर्क्षतो वदेत् ।
तथा च यत्र नक्षत्रे दिव्यपार्थिवनाभसाः ॥
दृश्यन्ते सुमहोत्पाताः सा दिशं तत्र पीडयेत् ।
सौरिर्बलाधिपो दुष्टः स्वल्पवीर्य्यः शुभावहः ॥
एकदा पीडयेद्यत्र भानुजः कूर्म्मपञ्चके ।
तत्र स्थाने महाविघ्नो जायते नात्र संशयः ॥
दुष्टस्थाने गते चन्द्रे कर्त्तव्यं शान्तिपौष्टिकम्" ॥
तच्चक्रमध्यस्था देशाः ।
"मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
पञ्चालशाल्वमाण्डव्यकुरुक्षेत्रगजाह्वयाः ॥
मरुनैमिषविन्ध्याद्रिपाण्ड्यघोषाः सयामुनाः ।
काश्ययोध्याप्रयागश्च गया वैदेहकादयः" ॥
तत्र पूर्व्वस्थदेशाः ।
"प्राच्यां मागधशोणौ च वारेन्द्रो गौडराढकाः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः" ॥
तत्राग्निकोणस्थदेशाः ।
"आग्नेय्यामङ्गवङ्गोपवङ्गत्रैपुरकोशलाः ।
कलिङ्गौड्रान्ध्रकिष्किन्धाविदर्भशबरादयः" ॥
तत्र दक्षिणस्थदेशाः ।
"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः ।
चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्कणाः ।
कावेरी ताम्रपर्णी च लङ्कात्रिकूटकादयः" ॥
तत्र नैरृतकोणस्थदेशाः ।
"नैरृते द्रविडानर्त्तमहाराष्ट्राश्च रैवतः ।
यवनः पह्लवः सिन्धुः पारसीकादयो मताः" ॥
तत्र पश्चिमस्थदेशाः ।
"पश्चिमे हैहयाऽस्ताद्रिम्लेच्छवासशकादयः" ॥
तत्र वायुकोणस्थदेशाः ।
"वायव्ये गुर्ज्जराटश्च नाटशालन्धरादयः" ॥
तत्र उत्तरस्थदेशाः ।
"उत्तरे चीननेपालक्षनकैकेयमन्दराः ।
गान्धारहिमवत्क्रौञ्चगन्धमादनमालवाः ।
कैलासमद्रकाश्मीरम्लेच्छदेशाः खसादयः" ॥
तत्रैशानकोणस्थदेशाः ।
"ऐशाने स्वर्णभौमश्च गङ्गाद्वारस्तु टङ्कणः ।
वाह्लीकब्रह्मपुरककीराता दरदादयः" ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥ जपयज्ञकर्म्मोक्तकमठाकारचक्रम् । तस्य लिखनक्रमः ।
"चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत् ।
पूर्व्वकोष्ठादि विलिखेत् सप्तवर्गाननुक्रमात् ॥
लक्षमीशे मध्यकोष्ठे स्वरान् युग्मक्रमाल्लिखेत् ।
दिक्षु पूर्व्वादितो यत्र क्षेत्राद्यक्षरसंस्थितिः ॥
मुखं तत्तस्य जानीयात् हस्तावुभयतः स्थितौ ॥
कोष्ठे कुक्षी उभे पादौ द्वे शिष्टं पुच्छमीरितम् ॥
क्रमेणानेन विभजेन्मध्यस्थमपि भागतः" ॥ * ॥
तस्याङ्गविशेषे स्थितस्य जपादौ गुणदोषाः यथा ।
"मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः ।
उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात् ॥
पुच्छस्थः पीड्यते मन्त्री बन्धनोच्चाटनादिभिः ।
कूर्म्मचक्रमिदं प्रोक्तं मन्त्रिणां सिद्धिदायकम्" ॥ * ॥
तदज्ञाने दोषो यथा, पिङ्गलायाम् ।
"कूर्म्मचक्रमविज्ञाय यः कुर्य्यात् जपयज्ञकम् ।
तस्य यज्ञफलं नास्ति सर्व्वानर्थाय कल्पते" ॥
इति तन्त्रसारः ॥ (तन्त्रोक्तग्रहणीयमन्त्रशुभादिसूचककूर्म्माकारचक्रविशेषः । तत्स्वरूपादि रुद्रयामले उक्तम् । यथा ।
"कूर्म्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम् ।
यज्ज्ञात्वा सर्व्वशास्त्रार्थं जानाति पण्डितोत्तमः ॥
अभेद्यं भेदकं चक्रं अष्टगुप्तादरपूर्व्वकम् ।
कूर्म्माकारं महाचक्रं चतुष्पादसमावृतम् ॥
तुण्डे स्वरान्, दक्षपादे कवर्गं, वामपादके ।
चवर्गं, कीर्त्तितं पश्चात् अध पादे टवर्गकम् ॥
तदधस्तु तवर्गं स्यादुदरे च पवर्गकम् ।
यवान्तं हृदये प्रोक्तं शहान्तं पृष्ठमध्यके ॥
लाङ्गूले शक्तिबीजञ्च ह्रकारं लिङ्गमध्यके ।
लिखित्वा गणयेन्मन्त्री चक्राकारं मनोहरम् ॥
स्वरे लाभः कवर्गे श्रीश्चवर्गश्च विवेकदः ।
टवर्गे राजपदवी तवर्गे धनवान् भवेत् ॥
उदरे सर्व्वनाशः स्यात् हृदये बहुदुःखभाक् ।
पृष्ठे च सर्व्वसन्तापः लाङ्गूले मरणं ध्रुवम् ॥
वैष्णवे पृष्ठदेशे तु दुःखञ्च वामपादके ।
विरुद्धद्वयलाभे तु न कुर्य्याच्चक्रचिन्तनम् ॥
विरुद्धैके धर्म्मनाशो युग्मदोषे च मारणम् ।
यत्र देवाक्षरश्चास्ति तत्र चेन्निजवर्णकम् ॥
विरुद्धञ्च त्यजेच्चक्रमन्यमन्त्रं विचारयेत् ।
पृथक् क्षोभे यदि भवेत् वर्णमाला महेश्वर ! ॥
यदि तत्सौख्यभावः स्यात् तत्सौख्यं नापि वर्ज्जयेत् ॥
विभिन्नगेहे दोषश्चेत् शुभमन्त्रञ्च संत्यजेत् ॥
इति ते कथितं देव ! दुःखादष्टफलप्रदम् ।
ये शोधयन्ति चक्रेऽस्मिं मन्त्रसिद्धिप्रदं शुभम्" ॥ * ॥
कूर्म्मरूपी विष्णुः केन रूपेण विराजते तत्संस्थानविवरणं मार्कण्डेयपुराणे ५८ अध्याये उक्तम् ॥ तद्यथा । क्रोष्टुकिरुवाच ।
"भगवन् ! कथितं सम्यक् भवता भारतं मम ।
सरितः पर्व्वता देशा ये च तत्र वसन्ति वै ॥
किन्तु कूर्म्मस्त्वया पूर्व्वं भारते भगवान् हरिः ।
कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः ॥
कथं स संस्थितो देवः कूर्म्मरूपी जनार्द्दनः ॥

शुभाशुभं मनुष्याणां व्यज्यते च ततः कथम् ।
यथामुखं यथापादस्तस्य तद्‌ब्रूह्यशेषतः ॥
मार्कण्डेय उवाच ।
प्राङ्‌मुखो भगवान् । देवः कूर्म्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदमिदं द्विज ! ॥
नवधा संस्थितान्यस्य नक्षत्राणि समन्ततः ।
विषयाश्च द्विजश्रेष्ठ ! ये सम्यक् तान्निबोध मे ॥
वेदमन्त्रा विमाण्डव्याः शाल्वनीपास्तथा शकाः ।
उज्जिहानास्तथा वत्स ! घोषसंख्यास्तथा खशाः ॥
मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाश्मकाः ॥
वैदेहकाः सपाञ्चालाः सङ्केताः कङ्कमारुताः ।
कालकोटिसपाषण्डाः पारियात्रनिवासिनः ॥
कापिङ्गलाः कुरुवाह्यास्तथैवोडुम्बरा जनाः ।
गजाह्वयाश्च कूर्म्मस्य जलमध्यनिवासिनः ॥
कृत्तिका रोहिणी सौम्या एतेषां मध्यवासिनाम् ।
नक्षत्रत्रितयं विप्र ! शुभाशुभविपाककम् ॥
वृषध्वजोऽञ्जनश्चैव जम्ब्वाख्यो मानवाचलः ।
शूर्पकर्णो व्याघ्रमुखः खर्म्मकः कर्व्वटाशनः ॥
तथा चन्द्रेश्वराश्चैव खशाश्च मगधास्तथा ।
गिरयो मैथिलाः शुभ्रास्तथा वदनदन्तुराः ॥
प्राग्ज्योतिषाः सलौहित्याः सामुद्राः पुरुषादकाः ।
पूर्णोत्कटो भद्रगौरस्तथोदयगिरिर्द्विज ! ॥
कषाया मेखलामुष्टास्ताम्रलिप्तैकपादपाः ।
वर्द्धमानाः कोशलाश्च मुखे कूर्म्मस्य संस्थिताः ॥
रौद्रः पुनर्व्वसुः पुष्यो नक्षत्रत्रितयं मुखे ।
पादे तु दक्षिणे देशाः क्रोष्टुके वदतः शृणु ॥
कलिङ्गवङ्गजठराः कोशला मूषिकास्तथा ।
चेदयश्चोर्द्धकर्णाश्च मत्स्याद्या विन्ध्यवासिनः ॥
विदर्भा नारिकेलाश्च धर्म्मद्वीपास्तथैलिकाः ।
व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रुधारिणः ॥
कैष्किन्ध्या हैमकूटाश्च निषधाः कटकस्थलाः ।
दशार्णा हारिका नग्ना निषादाः काकुलालकाः ॥
तथैव पर्णशवराः पादे वै पूर्व्वदक्षिणे ।
आश्लेषर्क्षं तथा पैत्र्यं फाल्गुन्यः प्रथमास्तथा ॥
नक्षत्रत्रितयं पादमाश्रितं पूर्व्वदक्षिणम् ।
लङ्का कालाजिनाश्चैव शैलिका निकटास्तथा ॥
महेन्द्रमलयाद्रौ च दर्दुरे च वसन्ति ये ।
कर्कोटकवने ये च भृगुकच्छाः सकोङ्कणाः ॥
सर्व्वाश्चैव तथाऽऽभीरा वेण्यास्तीरनिवासिनः ।
अवन्तयो दासपुरास्तथैवाकणिनो जनाः ॥
महाराष्ट्राः सकर्णाटा गोनर्द्दाश्चित्रकूटकाः ।
चोलाः कोलगिराश्चैव क्रौञ्चद्वीपजटाधराः ॥
कावेरी ऋष्यमूकस्था नासिक्याश्चैव ये जनाः ।
शङ्खशुक्त्यादिवैदूर्य्यशैलप्रान्तचराश्च ये ।
तथा वारिचराः कोलाः चर्म्मपट्टनिवासिनः ।
गणवाह्याः पराः कृष्णाद्वीपवासनिवासिनः ॥
सूर्य्याद्रौ कुमुदाद्रौ च ते वसन्ति तथा जनाः ।
औखावनाः सपिशिकास्तथा ये कर्म्मनायकाः ॥
दक्षिणाः कौरुषा ये च ऋषिकास्तापसाश्रमाः ॥
ऋषभाः सिंहलाश्चैव तथा काञ्चीनिवासिनः ।
तिलङ्गाः कुञ्जरदरी कच्छवासाश्च ये जनाः ।

ताम्रपर्णी तथा कुक्षिरिति कूर्म्मस्य दक्षिणः ।
फाल्गुन्यश्चोत्तरा हस्ता चित्रा चर्क्षत्रयं द्विज ! ॥
कूर्म्मस्य दक्षिणे कुक्षौ वाह्यपादस्तथापरम् ॥
काम्बोजाः पह्लवाश्चैव तथैव वडवामुखाः ।
तथा च सिन्धुसौवीरा सानर्त्ता वनितामुखाः ॥
द्रावणाः सार्गिगाः शूद्राः कर्णप्राधेयबर्व्वराः ।
किराताः पारदाः पाण्ड्यास्तथा पारशवाः कलाः ॥
धूर्त्तका हैमगिरिकाः सिन्धुकालकवैरताः ।
सौराष्ट्रा दरदाश्चैव द्राविडाश्च महार्णवाः ॥
एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ।
स्वात्यो विशाखा मैत्रञ्च नक्षत्रत्रयमेव च ॥
मणिमेघः क्षुराद्रिश्च खञ्जनोऽस्तगिरिस्तथा ।
अपरान्तिका हैहयाश्च शान्तिका विप्रशस्तकाः ॥
कोकङ्कणाः पञ्चदकाः वमना ह्यवरास्तथा ।
तारक्षुरा अङ्गतकाः शर्कराः शाल्मवेश्मकाः ॥
गुरुस्वराः फल्गुनका वेणुमत्याश्च ये जनाः ।
तथा फल्गुलुका घोरा गुरुहाश्च कलास्तथा ॥
एकेक्षणा वाजिकेशा दीर्घग्रीवाः सचूलिकाः ।
अश्वकेशास्तथा पुच्छे जनाः कूर्म्मस्य संस्थिताः ॥
ऐन्द्रमूलन्तथाषाढ़ा नक्षत्रत्रयमेव च ।
माण्डव्याश्चण्डखाराश्च अश्वकालनतास्तथा ॥
कुन्यतालडहाश्चैव स्त्रीवाह्या वालिकास्तथा ।
नृसिंहा वेणुमत्याश्च बलावस्थास्तथापरे ॥
धर्म्मबद्धास्तथालूका उरुकर्म्मस्थिता जनाः ।
वामपादे जनाः पार्श्वे स्थिताः कूर्म्मस्य भागुरे ॥
आषाढाश्रवणे चैव धनिष्ठा यत्र संस्थिता ।
कैलासो हिमवांश्चैव धनुष्मान् वसुमांस्तथा ॥
क्रौञ्चाः कुरुवकाश्चैव क्षुद्रवीणाश्च ये जनाः ।
रसालयाः सकैकेयाः भोगप्रस्थाः सयामुनाः ॥
अन्तर्द्वीपास्त्रिगर्त्ताश्च अग्नीज्याः सार्दना जनाः ।
तथैवाश्वमुखाः प्राप्ताश्चिविडाः केशधारिणः ॥
दासेरका वाटधानाः शवधानास्तथैव च ।
पुष्कलाधमकैराताः स्तथा तक्षशिलाश्रयाः ॥
अम्बाला मालवा मद्रा वेणुकाः सवदन्तिकाः ।
पिङ्गला मानकलहा हूणाः कोहलकास्तथा ॥
माण्डव्या भूतियुवकाः शातका हेमतारकाः ।
यशोमत्याः सगान्धाराः खरसागरराशयः ॥
यौधेया दासमेयाश्च राजन्याः श्यामकास्तथा ।
क्षेमधूर्त्ताश्च कूर्म्मस्य वामकुक्षिमुपाश्रिताः ॥
वारुणञ्चात्र नक्षत्रं तत्र प्रौष्ठपदाद्वयम् ।
येन किन्नरराज्यञ्च पशुपालं सकीचकम् ॥
काश्मीरकं तथा राष्ट्रमभिसारजनस्तथा ।
दवदाश्चङ्गनाश्चैव कुलटा वनराष्ट्रकाः ॥
सैरिष्ठा ब्रह्मपुरकास्तथैव वनवाह्यकाः ।
किरातकौशिकानन्दा जनाः पह्लवलोलगाः ॥
दार्व्वादा मरकाश्चैव कुरटाश्चान्नदारकाः ।
एकपादाः खशा घोषाः स्वर्गभौमानवद्यकाः ॥
तथा सयवना हिङ्गाश्चीरप्रावरणाश्च ये ।
त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम ! ॥
पूर्व्वोत्तरन्तु कूर्म्मस्य पादमेते समाश्रिताः ।
रैवत्याश्वाश्विदैवत्य याम्यञ्चर्क्षमिति त्रयम् ॥
तत्र पादे समाख्यातं पाकाय मुनिसत्तम ! ॥

देशेष्वेतेषु चैतानि नक्षत्राण्यपि वै द्विज ! ॥
एतत्पीडा अमी देशाः पीड्यन्ते ये क्रमोदिताः ।
यान्ति चाभ्युदयं विप्र ! ग्रहैः सम्यगवस्थितैः ।
यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्भावितो भयम् ।
तद्देशस्य मुनिश्रेष्ठ ! तदुत्कर्षे शुभागमः ।
प्रत्येकं देशसामान्यं नक्षत्रग्रहसम्भवम् ॥
भयं लोकस्य भवति शोभनं वा द्विजोत्तम ! ।
स्वर्क्षैरशोभनैर्जन्तो सामान्यमिति भीतिदम्
ग्रहैर्भवति पीडोत्थमल्पायासमशोभनम् ।
तथैव शोभनं पाको दुःस्थितैश्च तथा ग्रहैः ।
अन्योपकाराय नृणां देशर्क्षैश्चात्मनो बुधैः ।
द्रव्ये गोष्ठेऽथ भृत्येषु सुहृत्सु तनयेषु वा ।
भार्य्यायाञ्च ग्रहे दुःस्थे भयं पुण्यवतां नृणाम् ।
आत्मन्ययाल्पपुण्यानां सर्व्वत्रैवातिपापिनाम् ।
नैकत्रापि ह्यपापानां भयमस्ति कदाचन ।
दिग्देशजनसामान्यं नृपसामान्यमात्मजम् ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ।
परस्पराभिरक्षा च ग्रहादौ स्थेन जायते ।
एतेभ्य एव विप्रेन्द्र ! शुभहानिस्तथाशुभे ।
यदेतत् कूर्म्मसंस्थानं नक्षत्रेषु मयोदितम् ।
एतत् तु देशसामान्यमशुभं शुभमेव च ।
तस्मात् विज्ञाय देशर्क्षं ग्रहपीडान्तथात्मनः ।
कुर्व्वीत शान्तिं मेधावी लोकवादाश्च सत्तम ! ।
आकाशाद्देवतानाञ्च दैत्यादीनाञ्च दौर्हृदाः ।
पृथ्व्यां पतन्ति ते लोके लोकवादा इति श्रुताः
ता तथैव बुधः कुर्य्यात् लोकवादान्न हापयेत् ।
तेषान्तत्करणाच्छुभा युक्तो दुष्टागमक्षयः ।
शुभोदयं प्रहाणिञ्च पापानां द्विजसत्तम ! ।
प्रज्ञाहानिं प्रकुर्य्युस्ते द्रव्यादीनाञ्च कुर्व्वते ।
तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्तींश्च ग्रहपीडासु कारयेत् ।
अद्रोहानुपवासांश्च शस्तं चैत्यादिवन्दनम् ।
जपं होमं तथा दानं स्नानं क्रोधादिवर्जनम् ।
अद्रोहं सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ।
वर्जयेदसतीं वाचमतिवादांस्तथैव च ॥
ग्रहपूजाञ्च कुर्व्वीत सर्व्वपीडासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ! ॥
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यशेषतः ।
एष कूर्म्मो मया ख्यातो भारते भगवान् विभुः ।
नारायणो ह्यचिन्त्यात्मा यत्र सर्व्वं प्रतिष्ठितम् ।
तत्र देवाः स्थिताः सर्व्वे प्रतिनक्षत्रसम्भया ।
तथा मध्ये हुतवहः पृथ्वी सोमश्च वै द्विज ! ।
मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ ।
प्राग्दक्षिणे तथा पादे कर्किसिंहौ व्यवस्थितौ ।
सिंहकन्यातुलाश्चैव कुक्षौ राशित्रयं स्थितम् ।
तुलाथ वृश्चिकश्चोभौ पादे दक्षिणपश्चिमे ।
पृष्ठे च वृश्चिकेनैव सह धन्वी व्यवस्थितः ।
वायव्ये चास्य वै पादे धनुर्ग्राहादिकं त्रयम् ।
कुम्भमीनौ तथैवास्य उत्तरां कुक्षिमाश्रितौ ।
मीनमेषौ द्विजश्रेष्ठ ! पादे पूर्व्वोत्तरे स्थितौ ।
कूर्म्मे देशास्तथर्क्षाणि देशेष्वेतेषु वै द्विज ! ॥
राशयश्च तथर्क्षेषु ग्रहराशिष्ववस्थिताः ।

तस्मादग्रहर्क्षपीडासु देवपीडां विनिर्दिशेत् ॥
तत्र स्नात्वा प्रकुर्वीत दानहोमादिकं विधिम् ।
स एव वैष्णवः पादो ब्रह्मा मध्ये ग्रहस्य य" ॥ ॥
विष्णुः । स एव काश्यपसञ्ज्ञया परिकीर्त्त्यते तत्प्रमा-
णादिकं यथा,—शतपथब्राह्मणे । ७ । ५ । १ । ५ ।
"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत
यदसृजताकरोत् तद् यदकरोत् तस्मात् कूर्म्मः
कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः का-
श्यप्य" इति ॥ अत्र स्वामिदयानन्दकृतभाष्यम् ।
स यत् कूर्म्म इति । "परमेश्वरेणेदं सकलं जगत्
क्रियते तस्मात्तस्य कूर्म्म इति संज्ञा । कश्यपो वै
कूर्म्म इत्यनेन परमेश्वरस्यैव कश्यपनामास्ति ।
तेनैव इमाः सर्व्वाः प्रजा उत्पादितास्तस्मात्
सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । कश्यपः
कस्मात् पश्यको भवतीति निश्चयतया पश्यतीति
पश्यः सर्व्वज्ञतया सकलं जगत् विजानाति स पश्यः
पश्य एव निर्भ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जा-
नात्येव अतः पश्यक इति । आद्यन्ताक्षरविपर्य्यया-
सिद्धेः सिंहः कृतेस्तर्कुरित्यादिवत् कश्यप इति ह्य-
वरट् इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्य-
ति अतः सृष्टं विज्ञायते काश्यप्य प्रजा इति" ॥ ॥)

कूर्म्मपृष्ठं, क्ली, (कूर्म्मस्य पृष्ठमिव । कठोरत्वात् तथा-
त्वम् ।) अम्लानवृक्षः । इति शब्दचन्द्रिका ॥ कच्छ-
पस्य पृष्ठदेशः । (यथा, महाभारते ३ । ४६ । ११ ।
"गूढ़गुल्फशिरौ पादौ ताम्रायततलाङ्गुली ।
कूर्म्मपृष्ठोन्नतौ चापि शोभेते किङ्किणीकिणौ" ॥)

कूर्म्मपृष्ठक, क्ली, (कूर्म्मपृष्ठमिव कायते प्रकाशते
इति । कै + कः ।) शरावम् । इति शब्दचन्द्रिका ।
शरा इति भाषा ॥

कूर्म्मराज, पुं, (कूर्म्मरूपेण कूर्म्मेषु वा राजते य ।
राज + अच् ।) कच्छपराजः । तत्पर्य्यायः । अकू-
पारः २ परीवर्त्तः ३ । इति जटाधरः । तथाहि ।
"पृथ्वि ! स्थिरा भव भुजङ्गम ! धारयैनां
त्वं कूर्म्मराज ! तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षां
मार्य्यः करोतु हरकार्म्मुकमाततज्यम्" ॥
इति महानाटकम् ॥ स एवादिकच्छपः । यथा ।
"विलोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः ।
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार ॥
सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं
परिभ्रमन्तं गिरिमङ्ग ! पृष्ठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः" ॥
इति श्रीभागवते । ८ । ७ । ८,१० ॥

कूल, आवृतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-
सकं-सेट् ।) मधुस्वरी । कूलति वाटीं प्राचीरम् ।
इति दुर्गादासः ॥

कूलं, क्ली, (कूलति जलप्रवाहं आवृणोतीति । कूल्
+ अच् ।) नद्या जलसमीपस्थानम् ।
(यथा, रघुः । १६ । ३५ ।
"इत्यध्वनः कैश्चिदहोभिरन्ते
कूलं समासाद्य कुशः सरय्वाः" ॥)
तत्पर्य्यायः । रोधः २ तीरम् ३ प्रतीरम् ४ तटम्
५ तटः ६ तटी ७ । इत्यमरः । १ । १० । ७ ॥
रोधम् ८ । इति शब्दरत्नावली ॥ वेला ९ । इति
जटाधरः ॥ (कूल्यते आव्रियतेऽसौ । कूल + घञर्थे
क ।) स्तूपः । सैन्यपृष्ठम् । तडागः । इति विश्वः ॥

कूलक, क्ली, पुं, (कूल + स्वार्थे सञ्ज्ञायां वा कन् ।)
स्तूपः । इति मेदिनी । तीरम् । इति विश्वः ॥

कूलकः, पुं, (कूल + सञ्ज्ञायां कन् ।) कृमिपर्व्वतः ।
इति मेदिनी । उइर ढिपि इति भाषा ॥

कूलङ्कष, पुं, (कूलं तीरं कषति भिनत्तीति । कष् +
खश् मुम् च ।) समुद्रः । इति त्रिकाण्डशेषः ॥

कूलङ्कषा, स्त्री, (कूलङ्कष + टाप् ।) नदी । इति
हलायुधः ॥ (यथा, शाकुन्तले ५ माङ्के ।
"व्यपदेशमाविलयितुं समीहसे मां च नाम पात-
यितुम् । कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च" ॥)

कूलभू, स्त्री, (कूलस्य तीरस्य भूः भूमिः ।) तीर-
भूमिः । इति हेमचन्द्रः ॥

कूलवती, स्त्री, (कूलं तटं अस्त्यस्याः । अस्त्यर्थे
मतुप् मस्य वः । ततो ङीप् ।) नदी । इति राज-
निर्घण्टः ॥

कूलहुण्डक, पुं, (कूले तडागादौ हुण्डते संघीभव-
तीति । हुडि सङ्घे + ण्वुल् इदित्वात् नुम् च ।
पृषोदरात् उकारलोपः ।) जलावर्त्तः । इति
त्रिकाण्डशेषः ॥

कूवर, पुं, क्ली, (कू शब्दे + वरच् ।) युगन्धरः ।
यत्र रथस्य यूपकाष्ठमासज्यते तत्र । इत्यम-
रमेदिनीकरौ ॥ (यथा, रामायणे ३ । २८ । ३० ।
"हेमचन्द्रमसम्बाधं वैदूर्य्यमणिकूवरम्" ॥
रथमित्यर्थः ॥)

कूवरः, पुं, (कू + वरच् ।) कुब्जः । कुँजा इति
भाषा । मनोज्ञे, त्रि । इति मेदिनी ॥

कूवरी, स्त्री, (कूवर + गौरादित्वात् ङीष् ।) कम्ब-
लाच्छादितरथः । इति हलायुधः ॥

कूष्माण्डः, पुं, (कु ईषत् ऊष्मा अण्डेषु वीजेषु यस्य ।)
कर्कारुः । गणदेवताविशेषः । इति हेमचन्द्रः ॥
(कूष्माण्डाकारत्वात् शिवगणोऽपि तन्नाम्नाऽऽख्या-
यते । यथा, भागवते २ । ६ । ४२ । "अन्ये च ये
प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः" ॥
ऋषिविशेषः । यथा, याज्ञवल्क्यः ।
"कुष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः" ॥
यजुर्व्वेदिकमन्त्रविशेषः । यथा, मनुः ८ । १०६ ।
"कुष्माण्डैर्व्वापि जुहुयाद् घृतमग्नौ यथाविधि" ॥
"कुष्माण्डमन्त्रा यजुर्व्वेदिका यद्देवा देवहेलनमित्ये-
वमादयः । तैर्मन्त्रदेवताये घृतमग्नौ जुहुयात्" ।
इति तट्टीकायां कुल्लूकभट्टः ॥)

कूष्माण्डक, पुं, (कूष्माण्ड + स्वार्थे कन् ।) कूष्माण्डः ।
इत्यमरटीकायां स्वामी ॥

कूष्माण्डी, स्त्री, (कूष्माण्ड + गौरादित्वात् जातित्वात्
वा ङीष् ।) ओषधिः । अम्बिका । इति हेमचन्द्रः ॥
(अम्बिकायाश्च कूष्माण्डबलिप्रियत्वात् तथात्वम् ।
मन्त्रात्मकदेवतासु कृत्तु तु स्त्रियां ङीप् । यथा,
याज्ञवल्क्यः ।
'त्रिरात्रोपोषितो भूत्वा कूष्माण्डीभिर्घृतं शुचिः ।
सुरापः स्वर्णहारी च रुद्रजापी जले स्थितः" ॥
"त्रिरात्रमुपोषितः कूष्माण्डीभिर्यद्देवा देवहेडन-
मित्याद्याभिः कूष्माण्डदृष्टाभिरनुष्टुब्भिर्मन्त्रलिङ्ग-
देवताभिर्ऋग्भिश्चत्वारि शद्दृष्टताङ्गतीर्हुत्वा शुचि-
र्भवेत्" ॥ तथा, मिताक्षरायाम् । "अथ कूष्माण्डी-
भिर्जुहुयाद्योऽपूतमिवात्मानं मन्येत यदर्व्वाचीन-
मेनेभ्रूणहत्यायास्तस्मान्मुच्यते अयोनौ वा रेतः
सिक्त्वा अन्यत्र स्वप्नादिति" । वशिष्ठस्मृतौ च ।
"सर्व्ववेदपवित्राणि वक्ष्याम्यहमतः परम् ।
येषां जपैश्च होमैश्च पूयन्ते नात्र संशयः ॥
अघमर्षणं देवकृतं शुद्धवत्यस्तरत् समाः ।
कूष्माण्डाः पावमान्यश्च दुर्गासावित्र्येव च" ॥)

कूहना, स्त्री, (कुह + युच् । पृषोदरात् पूर्व्वदीर्घः ।)
कुहना । इति शब्दरत्नावली ॥

कूहा, स्त्री, (कु कुत्सितं ईषद्वा ऊह्यतेऽत्र । ऊह
वितर्के + अधिकरणे घञर्थे क । यद्वा कुहयति
मोहयति लोकान् । कुह + क पृषोदरादित्वाद्
दीर्घः ।) कुज्झटिका । इति शब्दरत्नावली ।
कुया इति भाषा ॥

कृ, ञ हतौ । इति कविकल्पद्रुमः ॥ (भ्वा-उभ-सकं-
अनिट् ।) ञ, करति करते । अथ केचित् न
मन्यते । इति दुर्गादासः ॥

कृ, ञ न वधे । इति कविकल्पद्रुमः ॥ (स्वा-उभ-सकं-
अनिट् ।) ञ न, कृणोति कृणुते । इति दुर्गादासः ॥

कृ, ञ द ह कृतौ । इति कविकल्पद्रुमः । (तना-उभं
-सकं-अनिट् ।) ञ द, करोति कुरुते । ह, कृत्रि-
मम् । अस्मादगुणे मकारोऽप्यगुणे वा वक्तव्य
इति वररुचिः । "तेन किं करोमि कथं कुर्मि
क्कानु गच्छामि माधव ! । दुर्य्योधनविहीनन्तु
शून्यं सर्व्वमिदं जगत्" ॥ इति दुर्गादासः ॥

क्रक, पुं, (कृ क्रक् ।) गलः । इति हेमचन्द्रः ॥

क्रकण, पुं, (क्र इति कणति शब्दं करोतीति । क्र +
कण शब्दे + अच् ।) क्रकरपक्षी । कयार इति
भाषा । इत्यमरः । २ । ५ । १९ । कृमिः । इति
हारावली ॥

क्रकर, पुं, (क्र करणं हच्छादिकार्य्यं करोतीति ।
क्र + ट ।) शिवः । इति त्रिकाण्डशेषः ॥ (क्र
इति क्षुतादिशब्दं करोतीति ।) शरीरवाय्वयव-
वाय्वन्तर्गतवायुविशेषः । यथा,—
"क्रकरस्तु क्षुते चैव जवाकुसुमसन्निभः" ।
इति शारदातिलकटीका ॥ क्रकचपक्षी । इति
शब्दरत्नावली ॥ चयकम् । करवीरवृक्षः । इति
राजनिर्घण्टः ॥

क्रकला, स्त्री, (क्रकाकारं गलदेशाकृतिं लातीति ।
ला + क टाप् च ।) पिप्पली । इति राजनिर्घण्टः ॥
(क्रक शोभितगलं लातीति । क्रकलासस्त्री । यथा
इन्द्रजालतन्त्रे ।
"सर्पदन्तं गृहीत्वा तु क्षुद्रकण्टकिकण्टकम् ।
क्रकलासकसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत्" ॥)

कृकलाशः, पु, (कृकं कण्ठं लासयति शोभायुक्तं करोति। कृक+लस+णिच्+अच्। पृषोदरात् तालव्यशकारः।) कृकलासः। इति त्रिकाण्डशेषः॥

कृकलासः, पुं, (कृकं कण्ठं लासयति शोभान्वितं करोतीति। कृक+लस+णिच् अच्।) जन्तुविशेषः। काँकलास् इति भाषा॥ (यथा, भागवते।८।१०।११।
"शिवाभिराखुभिः केचित् कृकलासैः शशैर्नरैः"।)
तत्पर्य्यायः। सरटः १। इत्यमरः।२।५।१२॥ वेदारः ३ कृकचपात् ४ दृष्याञ्चन ५ प्रतिसूर्य्यः ६। इति त्रिकाण्डशेषः॥ प्रतिसूर्य्यकशयानकः ७ स्थलिशः ८ काण्टकागारः ९ दुरारोहः १० द्रुमाश्रयः ११। इति राजनिर्घण्टः॥ (सूर्य्यवंशोद्भवो नृगनामको राजा ब्राह्मणगोहरणेन कृकलासत्वमवाप्तस्तद्विवरणं महाभारते १३। ७० अध्याये। उक्तं यथा,—
"अत्रैव कीर्त्त्यते सद्भिर्ब्राह्मणस्वाभिमर्षणे।
नृगेण सुमहत्कृच्छ्रं यदवाप्तं कुरूद्वह!॥
आदृश्यत महाकूपस्तृणवीरुत्समावृतः।
प्रयत्नं तत्र कुर्व्वाणास्तस्मात् कूपाज्जलार्थिनः॥
श्रमेण महता युक्तास्तस्मिंस्तोये सुसंवृते।
ददृशुस्ते महाकायं कृकलासमवस्थितम्॥
तस्य चोद्धरणे यत्नमकुर्व्वंस्ते सहस्रशः।
प्रग्रहैश्चर्म्मपट्टैश्च तं बद्ध्वा पर्व्वतोपमम्।
नाशक्नुवन् समुद्धर्त्तुं ततो जग्मुर्जनार्द्दनम्।
खमावृत्योदपानस्य कृकलासः स्थितो महान्।
तस्य नास्ति समुद्धर्त्तेत्येतत् कृष्णे न्यवेदयन्"॥)

कृकवाकुः, पु, (कृकेन गलेन वक्ति। "कृके वचः कश्च"। उणा १।६। इति कृकशब्दे उपपदे जुण् कश्चान्तादेशः।) कुक्कुटः। इत्यमरः।२।५।१७॥ (यथा, माघे ११।९। "अनुनयमगृहीत्वा व्याजसुप्ता पराची रतमथ कृकवाकोस्तारमाकर्ण्य काल्ये"॥) मयूरः। सरटः। इति मेदिनी॥

कृकवाकुध्वजः, पुं, (कृकवाकुः मयूरः ध्वजे रथध्वजे यस्य।) कार्त्तिकेयः। इति त्रिकाण्डशेषः॥

कृकाटिका, स्त्री, (कृकं कण्ठं अटति व्याप्नोति कण्ठं व्याप्नोतीति भावः। अट्+ण्वुल् टाप् अत इत्वं च।) घाटा। इत्यमरः।२।६।८८॥ घाड़ इति भाषा॥ (यथा, सुश्रुते "जत्रूर्द्ध्वं मर्म्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे कृकाटिके"।
"जानुकूर्परसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तकृकाटिकेति सन्धिमर्म्माणि"॥)

कृकूलासः, पुं, (कृकलास+पृषोदरात् दीर्घउकारः।) कृकलासः। इत्यमरटीका॥

कृच्छ्रं, क्ली, (कृन्तति सुखम्। कृति छेदने "कृतेश्छ्रक्रू च"। उणा।२।२१। इति रक् छश्चान्तादेशः।) कष्टम्। (यथा, मनुः ६।७८।
"नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते"॥
"सितोपला वा समयावशूका
कृच्छ्रेषु सर्व्वेष्वपि भेषजं स्यात्"।
"रेतोविघातप्रभवे तु कृच्छ्रे
समीक्ष्य दोषं प्रतिकर्म्म कुर्य्यात्"॥
इति चरके चिकित्सास्थाने २६ अध्याये॥)
तद्वति त्रि॥ कृन्तत्यनेन पापमिति। सान्तपनादिव्रतम्। इत्यमरः।२।७।४२॥ (यथा, याज्ञवल्क्ये।
"गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्।
जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्रं सान्तपनं चरन्"॥)
स्त्रलौ व्रते पुलिङ्गोऽप्ययम्॥ पापम्। इति मेदिनी॥ मूत्रकृच्छ्ररोगः। इति राजनिर्घण्टः॥
("हरीतकीगोक्षुरराजवृक्ष-
पाषाणभिद्धन्वयवासकानाम्।
क्वाथं पिबेन्माक्षिकसंप्रयुक्तम्॥"
इति वैद्यकचक्रपाणिसंग्रहे मूत्रकृच्छ्राधिकारे॥ व्यसनम्। यथा, रामायणे ४।१४।१४।
"अन्तं नोत्तापूर्व्वं मे चिरं कृच्छ्रेऽपि तिष्ठता।
धर्म्मलोभपरीतेन न च वध्ये कथञ्चन"॥)

कृच्छ्रातिकृच्छ्रः, पु, (कृच्छ्रात् कष्टादपि अतिकृच्छ्रः।) व्रतविशेषः। यथा, वशिष्ठः। "अब्भक्षस्तृतीयः कृच्छ्रातिकृच्छ्रो यावत् सकृदाददीत। यावदेकवारमुदकं हस्तेन ग्रहीतुं शक्नोति तावन्मात्रं दिवसेषु भक्षयित्वा त्र्यहमुपवासः कृच्छ्रातिकृच्छ्रः"॥ समन्तुः। यथा। "द्वादशरात्रं निराहारः स कृच्छ्रातिकृच्छ्रः"। एतत् कृच्छ्रातिकृच्छ्रद्वयं द्वादशाहसाध्यमशक्तविषयम्"॥ ब्रह्मपुराणम्।
"चरेत् कृच्छ्रातिकृच्छ्रञ्च पिबेत्तोयञ्च शीतलम्।
एकविंशतिरात्रन्तु कालेष्वेतेषु संयतः"॥
कालेष्विति प्रातःसायंमध्याह्नेष्वित्यर्थः। इति प्रायश्चित्तविवेकः॥ (यथा, मनुः ११।२०८।
"अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने।
कृच्छ्रातिकृच्छ्रौ कुर्व्वीत विप्रस्योत्पाद्य शोणितम्"॥)

कृच्छ्रारिः, पु, (कृच्छ्रस्य मूत्रकृच्छ्ररोगस्य कष्टस्य वा अरिर्नाशकः।) विम्बान्तरश्च। इति राजनिर्घण्टः॥

कृच्छ्रार्द्धः, पुं, (कृच्छ्रस्य अतीवक्लेशप्रदव्रतविशेषस्य अर्द्धः अंशविशेषः। दिनषट्कसाध्यत्वात्तथात्वम्।) दिनषट्कसाध्यव्रतविशेषः। यथा, आपस्तम्बः।
"सायं प्रातस्तथैकैकं दिनद्वयमयाचितम्।
दिनद्वयञ्च नाश्नीयात् कृच्छ्रार्द्धं सोऽभिधीयते"॥
इति प्रायश्चित्तविवेकः॥

कृणुः, पु, (करोति प्रतिमूर्त्त्यादिकम्। कृ+बाहुलकात् नु णत्वञ्च।) चित्रकरजातिः। इति त्रिकाण्डशेषः॥

कृत्, ई श प छिदि। इति कविकल्पद्रुमः॥ (तुदा-पर-सक-सेट्।) ई, कृत्तः। श प, कृन्तति। (यथा, हितोपदेशे,—
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति"॥)
श्वस्त्वृत्तदित्यादिसूत्रेण वेमत्वादेव निष्ठाया अनिमत्वे सिद्धे अस्य पूर्व्वस्य च ईदनुबन्धो नेम्-डीश्शीत्यस्य व्यभिचारसूचनार्थः। तेन धावुक् भवे मत्सीतादीनां धाविताः पात्र्यसार्था इत्यादि सिद्धमिति रमानाथः। मनित यतितं इत्यादि सिद्धमिति क्रमदीश्वरः। ईदित्वस्य समाप्तौ लुकि निष्ठायां इमनिषेधार्थं इति वैदिकपरीक्षक इति। किञ्चैतन्मते धावितादेः धावनं धावः धावोऽस्य जातः धावितः इत्यादि समाधानम्। "विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे" इत्यत्र निकृन्तन इति देवोक्तं निकृन्तं करोति इति प्रत्ययात् नन्द्यादित्वादने साध्यम्। इति दुर्गादासः॥

कृत्, ई ध वेष्टे। इति कविकल्पद्रुमः॥ (रुधा-पर-सक-सेट्। ईर्निष्ठायामनिट्।) ई, कृत्तः। कृणत्ति चकर्त्त। इति दुर्गादासः॥

कृतं, क्ली, (क्रियते सत्कर्म्मैवानुष्ठीयतेऽस्मिन् क्रियते सत्ये स्थाप्यते लोको यत्र। कृ+क्त।) सत्ययुगम्। (यथा, विष्णुपुराणे।२।१।॥
"कृतत्रेतादिसर्गेण युगाख्या ह्येकसप्ततिः"॥) पर्य्याप्तम्। इत्यमरः।३।३।७६॥ फलम्। इति हेमचन्द्रः॥ अलमर्थः। इति मेदिनी॥ (यथा,—शाकुन्तले १ माङ्के। "अथवा कृतं सन्देहेन"। पुं, वसुदेवस्य रोहिण्यां पत्न्यां जातः पुत्रविशेषः। यथा, भागवते ९।२४।४६।
"बलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम्।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्"॥)

कृतं, त्रि, (क्रियते विधीयते हन्यते निष्पाद्यते वा कृ+कर्म्मणि क्तः।) विहितम्। (यथा, वेणीसंहारे।
"कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकम्"॥) हिंसितम्। इति मेदिनी॥ निष्पादितम्। इति भरतटीकायां मथुरानाथः॥

कृतकं, क्ली, (कृत+संज्ञायां कन्।) विड्लवणम्। इत्यमरः॥ (अस्य पर्य्याया यथा,
"विड्म्याक्षञ्च कृतकं तथा द्राविड़मासुरम्"।
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥ कृन्ततीति कृती छेदने+"बहुलमन्यत्रापि"। उणा २।३७। इति कुन्। मिथ्या। इति ज्वलदत्तः॥ पु, वसुदेवस्य मदिरायां पत्न्यां जातः पुत्रविशेषः। यथा, भागवते ९।२४।४८।
"नन्दोपनन्दकृतकशूराद्या मदिरात्मजाः"।
त्रैलोक्यमेतत् कृतकमित्युच्यते कार्य्यत्वात्। यथा, विष्णुपुराणे।२।७।१९ २०।
"पादगम्यन्तु यत्किञ्चित् वस्त्वस्ति पृथिवीमयम्।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः।
भूमिसूर्य्यान्तरं यच्च सिद्धादिमुनिसेवितम्।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम!॥
ध्रुवसूर्य्यान्तरं यच्च नियुतानि चतुर्द्दश।
स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः।
त्रैलोक्यमेतत् कृतकं मैत्रेय! परिपठ्यते।
जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम्॥
कृताकृतकयोर्मध्ये महर्लोक इति स्मृतः।
शून्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति"।
अत्र व्याख्यायां श्रीमत्स्वामिपादैरुक्तम्।
यथा,—
"त्रैलोक्यं कृतकं प्रतिकल्पं कार्य्यत्वात्।

जनर्थोकादिविषयं कृतकं प्रतिकल्पमकार्य्यत्वात् ॥
महत्त्वाकस्य कृताकृतत्वे हेतुमाह सून्य इति” ॥)
कृतकः, त्रि, (कृन्तति खरूपम् । कृत् + कुन् । कारणाल्लात इत्यर्थः । कृत्रिमस्य स्वरूपाच्छादकत्वात् तथात्वम् ।) कृत्रिमः । इत्युणादिकोषः ॥
(यथा, महाभारते । ४ । २ । २६ ।
“एतेन विधिना छन्नः कृतकेन यथानल” ॥)
कृतकर्म्मा, [न्] त्रि, (कृतं कर्म्म येन सः ।) कार्य्यक्षम । तत्पर्य्यायः । प्रवीणः २ शिक्षितः ३ निष्णातः ४ निपुणः ५ दक्षः ६ कृतहस्तः ७ कृतमुखः ८ कुशलः ९ चतुरः १० अभिज्ञः ११ विज्ञः १२ वैज्ञानिकः १३ पटुः १४ छेकः १५ विदग्धः १६ । इति हेमचन्द्रः ॥ (यथा, महाभारते १।१५५।२६।
“अथवाप्यहमेवैनं हनिष्यामि वृकोदर ।
कृतकर्म्मा परिश्रान्तः साधु तावदुपारम” ॥
पु, विष्णुः । यथा, महाभारते १३ । १४९ । ९७ ।
“इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः” ॥)
कृतकृत्य, त्रि, (कृतं निष्पादितं कृत्यं कार्य्यं येन सः ।) निष्पन्नकर्म्मा । समाप्तकार्य्यः । यथा, माघे ।२।३२।
“कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम्” ॥
कृतकोटिः, पुं, (कृता विहिता कोटिः शास्त्राणां अन्तरर्थादिभेदने पूर्व्वपक्षविशेषो येन । यद्वा, कृता लब्धा कोटिः श्रेष्ठता येन । धातूनामनेकार्थत्वात् कृधातुरत्र प्राप्त्यर्थे युज्यते ।) काश्यपमुनिः । उपवर्षमुनिः । इति त्रिकाण्डशेषः ॥
कृतक्रिय, त्रि, (कृता क्रिया कार्य्यं येन सः ।) कृतकार्य्यः । यथा, मनुः । ५ । ९९ ।
“विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्त्रियो वाहनायुधम् ।
वैश्यः प्रतोदं रश्मीन् वा यष्टिं शूद्रः कृतक्रियः” ॥
कृतघ्नः, त्रि, (कृतं येन केनचिज्जनेन उपकृतं हन्ति नाशयति यः । अहङ्कारादिप्रयुक्तया दुष्टबुद्ध्या उपकृतस्यानङ्गीकारकत्वात् तथात्वम् ।) कृतहन्ता । अर्थात् येन केनचित्कृतस्य उपकारादेर्घातकः अस्वीकर्त्ता । नेमकहाराम इति पारस्य भाषा ॥ (यथा, मनुः ४ । २१४ ।
“पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा ।
शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च” ॥)
तस्य प्रायश्चित्ताभावो यथा,—
“ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः” ॥
स तु बहुविधो यथा,—
“भर्त्तृपिण्डापहर्त्ता च पितृपिण्डापहारकः ।
यस्मादन्नस्तीला विद्यास्तु दक्षिणां न प्रयच्छति ॥
पुन्नाम्नः स्त्रियस्तु यो द्वेष्टि यस्तु तान् घातयेन्नरः ।
कृतस्य दोषं वदति सकामान् न करोति यः ॥
न स्मरेच्च कृतं यस्तु आश्रमान् यस्तु दूषयेत् ।
सर्व्वांस्तान्मिमि साद्धं कृतघ्नानब्रवीन्मनुः” ॥
इति प्रायश्चित्ततत्त्वे स्कान्दपुराणवचनम् ॥
कृतच्छिद्रा, स्त्री, (कृतं छिद्रं यस्याम् ।) कोशातकीलता । इति राजनिर्घण्टः ॥
कृतज्ञः, त्रि, (कृतं उपकृतं जानाति स्वीकरोति यः । ज्ञा + कः ।) मर्य्यादी ।

(यथा, मनुः । ७।२०९–२१० ।
“धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टिप्रकृतिमेव च ।
अनुरक्तं स्थिरारम्भं लघुमित्रं प्रशस्यते ॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च ।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः” ॥)
कुक्कुरे, पु । इति मेदिनी ॥
(पु, विष्णुः । यथा, महाभारते १३ । १४९ । २२ ।
“अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्” ॥)
कृतत्रा, स्त्री, (कृतं त्रायते । कृत + त्रै + क ।) त्रायमाणा लता । इति राजनिर्घण्टः ॥
कृतदासः, पु, (कृतः विहितः कृतनियमो वा दासः ।) नारदोक्तपञ्चदशदासान्तर्गतदासविशेषः । स तु केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । इति क्रमसन्दर्भः ॥
कृतपुङ्खः, त्रि, (कृतः अभ्यस्तः पुङ्खः पुङ्खयुक्तो वाणो येन ।) वाणशिक्षाविचक्षणः । भाल तिरन्दाज इति भाषा । तत्पर्य्यायः । कृतहस्तः २ सुप्रयोगविशिखः ३ । इत्यमरः । २ । ८ । ६८ ॥
कृतपूर्व्वी, [न्] त्रि, (कृतं निष्पादितं पूर्व्वमनेन । कृतपूर्व्व + “सपूर्व्वाच्च” । ५ । २ । ८७ । इति इनि ।) पूर्व्वनिष्पन्नकर्म्मा । यथा । कृतपूर्व्वी कटम् । इति संक्षिप्तसारव्याकरणम् ॥
कृतफलं, स्त्री, (कृतं फलं अस्य ।) कक्कोलम् । इति राजनिर्घण्टः ॥
कृतफला, स्त्री, (कृतं फलं अस्याः ।) कोलशिम्बी इति राजनिर्घण्टः ॥
कृतमालः, पु, (कृता माला अस्य । मालावद्दुत्पन्नप्रसूनत्वादस्य तथात्वम् ।) आरग्वधवृक्षः । सोंदालि इति भाषा । इत्यमरः । २ । ४ । २४ ॥ कर्णिकारवृक्षः । स तु अल्पारग्वधः । इति राजनिर्घण्टः । छोट शोनालु इति भाषा ॥ (अस्य पर्य्याया यथा ।
“आरेवतो राजवृक्षः प्रग्रहश्च तुरङ्गकः ।
आरग्वधोऽथ शम्पाकः कृतमालः सुवर्णकः” ॥
इति वैद्यकरत्नमालायाम् ॥
चरके कल्पस्थाने ऽष्टमेऽध्याये ऽस्य पर्य्याया यथा ।
“आरग्वधो राजवृक्षः सम्पाकश्च तुरङ्गकः ।
प्रग्रहः कृतमालश्च कर्णिकारोऽवघातकः” ॥)
कृतमुख, त्रि, (कृतं सस्कृतं मुखं यस्य ।) कृतकर्म्मा । कृती । इत्यमरः । ३ । १ । ४ ॥
कृतलक्षण, त्रि, (कृतानि लक्षणानि अस्य ।) गुणैः प्रतीतः । शौर्य्यादिगुणैः ख्यातः । इत्यमरः । ३ । १ । १० ॥ (पु, सर्व्वलक्षणवत्त्वात् विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।
“अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः” ॥)
कृतवेतनः, त्रि, (कृतं विहितं वेतनं यस्य ।) वेतनेन नियुक्तदासादिः । इति स्मृतिः ॥
कृतवेधक, पुं, (कृतः वेधोऽस्य । ततः कप् ।) घोषातकी । इति रत्नमाला । श्वेतघोषा इति भाषा ॥
कृतवेधना, स्त्री, (कृतं वेधनं अस्याः ।) कोषातकीलता । इति राजनिर्घण्टः ॥
कृतश्रम, त्रि, (कृतः श्रमो यत्र ।) महोत्साहः । येन श्रमः कृतः सः । इति शब्दमाला ॥

कृतसापत्निका, स्त्री, (कृतं सापत्न्यं यस्याः । कप् टाप् ततः अत इत्वे य लोपः ।) कृतसपत्नीभावा । प्रथमविवाहिता स्त्री । तत्पर्य्यायः । अध्यूढा २ अधिविन्ना ३ । इत्यमरः । २ । ६ । ७ ॥ कृतसापत्नका ४ कृतसापत्नी ५ कृतसापत्नीका ६ । इति तट्टीकायां रमानाथः ॥
कृतहस्त, त्रि, (कृतः अभ्यस्तः हस्तः वाणादिनिक्षेपलाघवरूपा शिक्षा येन सः ।) कृतपुङ्खः । सुशिक्षितशरमोक्षयोधादि । इत्यमरः २ । ८ । ६८ ॥
(यथा, महाभारते । ४ । ५६ । २० ।
“अप्राप्तांश्चैव तान्पार्थश्चिच्छेद कृतहस्तवत्” ॥)
कृताञ्जलि, त्रि, कृतः अञ्जलिः येन सः । बद्धाञ्जलिः । यथा, छन्दोगपरिशिष्टे ।
“तदसंयुक्तपार्ष्णिर्व्वा एकपादर्द्धपादपि ।
कुर्य्यात्कृताञ्जलिर्व्वापि ऊर्द्ध्वबाहुरथापि वा” ॥
इति सूर्य्योपस्थाने आह्निकाचारतत्त्वम् ॥ (कृतः अञ्जलिरिव पत्रसङ्कोचो येन ।) ओषधिभेदे, पु । इति धरणी ॥
कृतान्त, पु, (कृतः अन्तः नाशः, शास्त्रनिर्णयः, विपर्य्ययो वा येन । यथायथं व्युत्पत्तिर्द्दर्शनीया ।) यमः । (यथा, गोः रामायणे । ५ । ३५ । ३ ।
“ऐश्वर्य्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ।
रज्ज्वेव पुरुषो बद्धा कृतान्तेनोपनीयते” ॥)
सिद्धान्तः । (यथा, भगवद्गीतायाम् । १४ । १३ ।
“पञ्चैमानि महाबाहो कारणानि निबोध मे ।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्व्वकर्म्मणाम्” ॥)
दैवम् । पूर्व्वदेहकृतं फलोन्मुखीभूतं शुभाशुभकर्म्म । अकुशलकर्म्म । इत्यमरः । ३ । ३ । ६४ ॥ शनिवारः । इति शब्दचन्द्रिका ॥ (यथा, तिथितत्त्वधृतज्योतिषवचने ।
“कृतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत्” ॥
यमदैवत्यभरणीनक्षत्रम् । तेन दिवसज्ञा ॥ अश्विः यमदहनेति वचनात् ॥)
कृतान्तजनक, पु, (कृतान्तस्य यमस्य जनकः जन्मदाता ।) सूर्य्यः । इति हेमचन्द्रः ॥
कृतान्ता, स्त्री, (कृतान्त + टाप् ।) रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥
कृतार्थ, त्रि, (कृतः निष्पादितः प्राप्तो वा अर्थः प्रयोजनं येन ।) कृतप्रयोजनः । कृतकार्य्यः । यथा, माघे । १ । ९ । “विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निवर्हितांहसा” ॥
कृतालय, पु, (कृते अन्यकृतगर्त्ते जलाशयादौ आलयः आश्रयो यस्य ।) भेकः । इति त्रिकाण्डशेषः ॥ (कृतः आलयः येन । कृतवासे, त्रि । यथा, रामायणे ।
“यत्र ते दयिता भार्य्या तनयाश्च कृतालयाः” ॥)
कृतावश्यक्रियक, त्रि, (कृता आवश्यक्रियका येन ।) वस्त्रादिना कृतपृष्ठजानुजङ्घादिबन्धः । इति कात्यायनः ॥ (यथा, आह्निकतत्त्वधृतकात्यायनवचने ।
“प्रौढपादो न कुर्व्वीत स्वाध्यायपितृतर्पणम् ।
आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा ।

कर्त्तरि कर्म्मणि क्ति स्यातव्यं स्थेयं ब्रह्म-
भूयम् ॥ ब्रह्महत्या इह भावे कृत्या । अस-
ञ्ज्ञायामित्येव सूर्य्योऽर्कं भिद्योद्ध्यौ नदौ । इत्यमर-
टीकायां भरतः ॥

कृत्या, स्त्री, (कृ+भावे क्यप् ।) क्रिया । यथा का
कृत्यामकार्षीः । देवता । यक्षदेवताविशेषः । इत्य-
मरभरतौ ॥ यथा, प्रह्लादचरिते ।
"कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम्" ॥
तस्या ध्यानं यथा,—
"क्रोधाज्ज्वलन्तीं ज्वलनं वमन्तीं
सृष्टिं दहन्तीं दितिजं ग्रसन्तीम् ।
भीमं नदन्तीं प्रणमामि कृत्यां
रौद्ररूपमाणां क्षुधयोग्रकालीम्" ॥ * ॥
आभिचारिकी क्रिया । यथा,—
"रोगकृत्याग्रहादीनां निरासः शान्तिरीरिता ।
वश्यं जनानां सर्व्वेषां विधेयत्वमुदीरितम्" ॥
इति षट्कर्म्मदीपिका ॥

कृत्रिम, क्ली, (कृ+क्त्रि मप् च ।) विड्लवणम् ।
इति मेदिनी । काचलवणम् । जवादिनामगन्ध-
द्रव्यम् । रसाञ्जनम् । इति राजनिर्घण्टः ॥

कृत्रिम, पु, सिह्लकः । (तुरुष्कनामगन्धद्रव्यविशेषः ।)
इति मेदिनी ॥ (कृ+"ड्वितः क्त्रिः" । कृत्या क्रियया
निर्वृत्त इति "क्त्रेर्मम् नित्यम् ।" इति मप् ।) द्वाद-
शविधपुत्रान्तर्गतपुत्रविशेषः । इति जटाधरः ।
(एतद्विषयकविवरणन्तु पुत्रशब्दे द्रष्टव्यम् ॥)

कृत्रिमः, त्रि, ("ड्वितः क्त्रिः" । ३ । ३ । ८८ । इति
क्त्रि । ततः कृत्या निर्वृत्तः । "क्त्रेर्मम् नित्यम्"
४ । ४ । २० । इति मप् ।) करणाज्जात । रचित ।
इति मेदिनी ॥ (यथा, रघौ १९ । ३७ ।
"प्रावृषि प्रमदबर्हिणेष्वभूत्
कृत्रिमाद्रिषु विहारविभ्रमः" ॥)

कृत्रिमक, पु, (कृत्रिम+स्वार्थे संज्ञायां वा कन् ।)
तुरुष्कनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

कृत्रिमधूपक, पु, (कृत्रिमः विविधसुगन्धिद्रव्यादि
कल्पितो धूपः । ततः स्वार्थे कन् ।) नानासुगन्धि-
द्रव्यकृतदशाङ्गादिधूपः । तत्पर्य्यायः वृकधूपः २ ।
इत्यमरः । २ । ६ । १२८ ॥

कृत्रिमपुत्रः, पुं, (कृत्रिमश्चासौ पुत्रश्चेति ।) द्वादश-
पुत्रमध्ये पुत्रविशेषः । तथा च मनुः ।
"सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः" ॥
अस्यार्थः । "यः पुनः समानजातीयं पित्रोःपार-
लौकिकश्राद्धादिकरणाकरणाभ्यां गुणदोषौ भवत
इत्येवमादिज्ञं पुत्रगुणैश्च मातापित्रोराराधनादि-
भिर्युक्तं पुत्रं कुर्य्यात् स कृत्रिमाख्यः पुत्रो बोध्यः" ।
इति कुल्लूकभट्टः ॥ पुत्तलिका । यथा । कुमारे । १ । २९ ।
"सा कन्दुकैः कृत्रिमपुत्रकैश्च
रेमे मुहुर्मध्यगता सखीनाम्" ॥

कृत्रिममित्रं, पुं, (कृत्रिमं मित्रं इति । पुंस्त्वं मिथ्या-
मत्वात् ।) रचितबन्धुः । इति स्मृतिः ॥

कृत्सं, क्ली, (कृन्तति कृत्यति वा । कृत् छेदे वेष्टने
च । "कृतिविशिभ्यः किच्" । उणां ३ । ६६ ।
इति स किच् ।) जलम् । इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः ॥ समुदायः । इत्युणादिकोषः ॥

कृत्स्नं, क्ली, (कृत्+क्स्न प्रत्ययः ।) जलम् । सर्व्वम् ।
(यथा, गीतायाम् । ११ । १३ ।
"तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा" ॥)
कुक्षिः । इति मेदिनी ॥

कृत्स्न, त्रि, (कृत्+"कृत्यसृभ्यां क्स्नः" । उणां ३ ।
१७ । इति क्स्नः ।) अशेष । समस्त । इत्यमरः ।
३ । १ । ६५ ॥ (यथा, मनुः २ । १६५ ।
"तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना" ॥)

कृदर, पु, (कृ+अच् । "कृदरादयश्च" । उणां ५ ।
४१ । इति साधुः ।) धान्यादिगृहम् । गोला इति
भाषा ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कृन्तत्र, क्ली, (कृन्तति इति । "कृतेर्नुम् चेति" । उणां
३ । १०९ । इति कत्रन् नुम् च ।) लाङ्गलम् । इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कृन्तन, क्ली, (कृत्यते इति । कृत्+भावे ल्युट् ।)
छेदनम् । यथा, कर्म्मलोचने नारदवचनम् ॥
"कृन्तनं नखकेशानां छेदनञ्च वनस्पतेः ।
शावाशौचे न कर्त्तव्यं पाठनं पठनन्तथा" ॥
(तथा च गीतगोविन्दे, १ । ३२ ।
"विगलितलज्जितजगदवलोकनतरुणकरुणकृतहा-
से । विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरि-
ताशे" ॥)

कृप, ऊ ङ व ऌ कल्पने । इति कविकल्पद्रुमः ॥
(भ्वा-आत्म-अक-सेट् ।) सप्तमस्वरी । कल्पनं
सामर्थ्यम् । ऊ, अकल्पिष्ट अक्लृप्त । ङ, कल्पते
कल्पष्टत्ववदिति हलायुधः ॥ व, कल्प्स्यति चिक्लृ-
प्सति । ऌ, अक्लृपत् । हृते तस्मिन् प्रियं श्रुत्वा
कल्पता प्रीतिं परां प्रभुरिति अनेकार्थत्वेऽन्तर्भूत-
ण्यर्थत्वात् जनयितेत्यर्थः । इति दुर्गादासः ॥

कृप, त्वा दौर्व्वल्ये । इति कविकल्पद्रुमः ॥ (अदन्त-
चुरां-पर-अकं-सेट् ।) सप्तमस्वरी । कृपयति ।
षष्ठस्वरीति त्रिलोचनः । इति दुर्गादासः ॥

कृप, कि युतौ । चित्रे । कल्पने । इति कविकल्पद्रुमः ॥
(चुरां मते भ्वा-पर-अक सकञ्च-सेट् ।) सप्तम-
स्वरी । कि कल्पयति कल्पति । कृपः कृपोऽक्ल-
पादाविति क्लृपादेशः । इति दुर्गादासः ॥

कृप, पु, (कृपा अस्त्यस्य पालनसाधनत्वेन । अर्श-
आदित्वात् अच् ।) कृपाचार्य्यः । स तु द्रोणाचार्य्य-
श्यालकः । इति मेदिनी ॥ तथा चोक्तम् ।
"गौतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः ।
अश्वत्थाम्नश्च जननी कृपश्चैव महाबलः" ॥
इति महाभारतम् ॥ (स तु गौतमवंशस्य शरद्वतः
पुत्रः राज्ञा शान्तनुना कृपया पालितः अतः कृप
इति नाम्ना प्रसिद्धः । सोऽसौ यावज्जीवं कौमार-
ब्रह्मचर्य्यमालम्ब्य कुरुबालकानामाचार्य्यत्वे भीष्मा-
दिभिर्नियोजितः । कुरुक्षेत्रयुद्धे दुर्य्योधनपक्षमा-
श्रित्य पाण्डवैः सह संग्रामं कृत्वा लोकक्षयकरे
तस्मिन् समरे अमरत्वात् न निहतः ॥ अस्य
उत्पत्तिविवरणन्तु महाभारते १ । १३० अध्याये
द्रष्टव्यम् ॥) व्यासः । इति धरणी । (राजर्षि-
विशेषः । यथा, ऋग्वेदे । ८ । ३ । १२ ।
"शग्धि यथा रुशमं श्यावकं कृपमिन्द्र । प्राव
स्वर्णरम्" । "रुशमं श्यावकं कृपं च एतन्नामका-
ख्यान् राजर्षीन् यथा प्रावः" । इति भाष्यम् ॥)

कृपण, त्रि, (कल्पते स्वल्पमपि दातुम् । कृप्+
बाहुलकात् क्युन् अत एव न लत्वम् ।) अदाता ।
(यथा, व्यासोक्तौ ।
"दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति" ॥)
तत्पर्य्यायः । कदर्य्यः २ किम्पचानः ३ मितम्पचः ४
क्षुद्रः ५ । इत्यमरः । ३ । १ । ४८ ॥ किम्पचः ६
अनमितम्पचः ७ । इति तट्टीका ॥ मन्दः ८
कीकटः ९ कुमुत् १० कीनाशः ११ । इति जटा-
धरः ॥ (यथा, पञ्चतन्त्रे । २ । ७५ ।
"दाता लघुरपि सेव्यो भवति न कृपणो महा-
नपि समृद्ध्या । कूपोऽन्तः स्वादुजलः प्रीत्यै लोकस्य
न समुद्रः" ॥ दीनः । यथा, हि रामायणे २ । ३२ । २८ ।
"ततः स पुरुषव्याघ्रस्तद्धनं सहलक्ष्मणः ।
द्विजेभ्यो बालवृद्धेभ्यः कृपणेभ्यो ह्यदापयत्" ॥
पारिभाषिककृपणमाह ॥ महाव्यसनप्राप्तो दीनः ।
यथा, रामायणे ४ । २१ । १९ ।
"आदितः कृशवृत्तिर्यः कृपणो न स राघव ! ।
महात्मा व्यसनं प्राप्तो दीनः कृपण उच्यते" ॥
यो हि अक्षरं ब्रह्म अविज्ञाय लोकान्तरगामी
भवति सः । यदुक्तं बृहदारण्यके याज्ञवल्क्यप्रक-
रणे । "यो वा एतदक्षरमविदित्वा गार्ग्यस्मा
ल्लोकात् प्रैति स कृपणः" इति ॥ दुहिता हि
कृपापात्रत्वात् कृपणम् । यदुक्तं मनौ ४ । १८५ ।
"भ्राता ज्येष्ठः समः पित्रा भार्य्या पुत्रः स्वका तनुः ।
छाया स्वोदासवर्गश्च दुहिता कृपणं परम्" ॥)
कुत्सितः । इति मेदिनी ॥

कृपणः, पुं, कृमिः । इति मेदिनी ॥

कृपा, स्त्री, (कृपेः सम्प्रसारणञ्चेति भिदादिपाठादङ्
टाप् च ।) करुणा । इत्यमरः । १ । ७ । १८ ॥
(यथा, महाभारते ।
"उवाच भीमं कल्याणी कृपान्वितमिदं वचः" ॥)

कृपाण, पु, (कृपां नुदति प्रेरयति दूरीकरोतीत्यर्थः ।
नुद प्रेरणे+अन्येभ्योऽपीति डः । पूर्व्वपदादिति
णत्वम् ।) खड्गः । इत्यमरः । २ । ८ । ८९ ॥
(यथा, कालिकापुराणे ।
"जघान दैत्यमतिरक्तलोचना
कृपाणपाशाङ्कुशशूलपट्टिशैः" ॥)

कृपाणकः, पुं, (कृपाण+स्वार्थे कन् ।) खड्गः । इति
हारावली ॥

कृपाणिका, स्त्री, (कृपाणक+स्त्रियां टाप् अत इत्वं
च ।) छुरिका । इति हेमचन्द्रः ॥

कृपाणी, स्त्री, (कृपाण+गौरादित्वात् ङीष् ।)
कर्त्तरी । इत्यमरः । २ । १० । ३४ ॥ छुरिका ।
इति मेदिनी ॥

कृपाद्वैतः, पुं, (कृपाया क्षमावितरणे वा अद्वैतः अद्वि-
तीयः ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥

कृपालुः, त्रि, (कृपां लाति आदत्ते । ला + डुः । यद्वा कृपाविद्यतेऽस्मिन् वा । कृपा + आलुच् ।) दयालुः । इत्यमरः । ३ । १ । १५ ॥ (यथा भागवते । ४ । १२ । ५१ । "कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते" ॥)

कृपी, स्त्री, (कृप + ङीष् ।) द्रोणाचार्य्यपत्नी । इति मेदिनी ॥ (यथा, महाभारते । १ । १३१ । २२ । "शारद्वतीं ततो भार्य्यां कृपीं द्रोणोऽन्वविन्दत" ॥ अस्या जन्मविवरणं यथा,— पुरा किल महर्षेर्गौतमस्य पुत्त्रः शरद्वान् नाम ऋषिः धनुर्व्वेदपरत्वात् विपुलेन तपसा च इन्द्रं सन्तापयामास । इन्द्रस्तु अस्य तपोविघ्नं चिकीर्षुर्जानपदीं नाम स्वर्व्वेश्यां प्राहिणोत् । अथ रूपयौवनाढ्यां तामवलोकयतस्तस्य सहसा रेतश्चस्कन्द तत्तु शरस्तम्बे स्थापितं सत् द्विधाऽभवत् । ततस्तस्मात् मिथुनं समजायत । तदैव राजा शान्तनुर्म्मृगयामागतः अपत्यमिथुनं समवलोक्य राजधानीमानीय संस्कारादिभिः संवर्द्धयामास । कृपया संवर्द्धनाच्च कृपः कृपीति तयोर्नाम चक्रे । सेयं कृपाचार्य्यस्य भगिनी । एषैव अश्वत्थाम्नो जननीत्यवगन्तव्या ॥)

कृपीट, क्ली, (कृप + "कृतृकृपिभ्यः कीटन्" । उणा ४ । १८४ । इति कीटन् । बाहुलकात् गत्वाभावः ।) उदरम् । जलम् । इति मेदिनी ॥ विपिनम् । इन्धनम् । इति शब्दरत्नावली ॥

कृपीटपालः, पुं, (कृपीटं जलं पालयतीति । पालि + अण् ।) केनिपातः । समुद्रः । इति मेदिनी । पवनः । इति शब्दरत्नावली ॥

कृपीटयोनिः, पुं, (कृपीटस्य जलस्य योनिः कारणम् । "वायोरग्निरग्नेरापः" इति श्रुतेस्तथात्वम् । यद्वा कृपीटं काष्ठं योनिरुत्पत्तिस्थानं यस्य ।) अग्निः । इत्यमरः । १ । १ । ५६ ॥

कृपीपतिः, पुं, (कृप्याः कृपभगिन्याः पतिर्भर्त्ता ।) द्रोणाचार्य्यः । इति शब्दमाला ॥

कृपीपुत्त्रः, पुं, (कृप्याः पुत्त्रः ।) अश्वत्थामा । इति भूरिप्रयोगः ॥

कृपीसुतः, पुं, (कृप्याः सुतः ।) अश्वत्थामा । इति त्रिकाण्डशेषः ॥

कृमिः पुं, (क्रामतीति । क्रमु पादविक्षेपे + "क्रमितमिशतिस्तम्भामत इच्च" । उणां ४ । १२१ । इति इन् "भ्रमेः सम्प्रसारणञ्च" इति अनुवृत्तेः सम्प्रसारणञ्च ।) कीटः । पोका इति भाषा । तत्पर्य्यायः । नीलाङ्गुः २ । इत्यमरः । २ । ५ । १३ । निलाङ्गुः ३ क्रिमिः ४ । इति तट्टीका ॥ पुलुः ५ । इति जटाधरः ॥ लाक्षा । क्रिमिः । खरः । इति विश्वमेदिन्यौ ॥ उदरजातकीटरोगः । तस्यौषधं यथा,—

"वदरीक्षारवीजन्तु गुडाज्येन समन्वितम् ।
अग्निना साधितं जग्ध्वा कृमीन् सर्व्वान् हरेत् स्त्रिया ॥"

इति गारुडे १९४ अध्यायः ॥

("क्रमयो द्विविधाः प्रोक्ता बाह्याभ्यन्तरसम्भवाः ।
बाह्या यूकाः प्रसिद्धाः स्युः लिक्षुलूक्षास्तथान्तराः ॥
सप्तधा हि भवेद्बाह्याः मलूधास्थान्तः समुद्भवाः ।
तेषां वक्ष्यामि संभूतिं बाह्यानाभ्यन्तरे नृणाम् ॥
रूक्षादतिमलात् स्वेदात् चिन्तया शोचनादपि ।
कफधातुसमुद्भूतास्तीक्ष्णा यूका भवन्ति हि ॥
यूका कृष्णा परा श्वेतास्तृतीयाश्चर्म्मणि स्थिता ।
सूक्ष्मातिविकटा रूक्षाश्चर्म्माभाश्चर्म्मयूकिका ।
चतुर्थी विन्दुकी नाम वर्त्तुला मूत्रसम्भवा ॥
मत्कुणाद्याश्च पञ्चम्यो बाह्योपद्रवकारिणः ।
यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी ॥
चर्म्मयूका नेत्रचर्म्मे सूक्ष्मे रोमणि यष्ठिका ।
उष्णद्रव्यनिषेवाच्च अजीर्णे मधुरद्रवात् ॥

रूक्षान्नगोधूमयवान्नपिष्ट-
गुडेन वा क्षीरविपर्य्ययेण ।
दिवाशयाने च सपिच्छलेन
घर्म्मेण पापोदकसेचनेन ॥
सञ्जायते तेन मलाशयेषु
कृमिव्रजः कोष्ठविकारकारि ॥

षड्विधास्ते समुद्दिष्टास्तेषां वक्ष्यामि लक्षणम् ।
कफकोष्ठे मलाधारे कोष्ठे सर्पन्ति सर्पवत् ॥
पृथुमण्डा भवन्त्येके केचित् किंशुकसन्निभाः ।
धान्याङ्कुरनिभाः केचित् केचित् सूक्ष्मास्तथाणव ॥
सूचीमुखाः परिज्ञेयास्त्वन्त्राणि खादयन्ति ते ।
वक्ष्यामि लक्षणं तेषां चिकित्साञ्च शृणुष्व मे ॥
ज्वरो हृद्रोगशूलं वा वमिरुत् क्लेदनं भ्रम ।
अरुचिर्वर्णवैवर्ण्यमतीसारं सफेनिलम् ॥
गर्ज्जनं जठरे चैव मन्दाग्निस्तस्य जायते ।
पिपासा पीतता नेत्रे किंशुकैः पीडितस्य च ॥
इति गण्डूपदलक्षणम् ॥ * ॥
सूचीवत्तुद्यतेऽन्त्राणि रक्तञ्चैवातिसार्य्यते ।
यकृद्वा भक्षयन्त्यन्ते रक्तं वा वमते भृशम् ॥
शोथो मुखेऽरुचिर्नाशो मन्दाग्निश्च वेपथुः ।
क्षुत्तृष्णा च ज्वरो ज्ञेयः सूचीमुखकृमीरुजाम् ॥
इति सूचीमुखलक्षणम् ॥ * ॥
ये च धान्याङ्कुरास्तेषां वक्ष्याम्यथ च लक्षणम् ।
मलाशयस्थाः कृमयो मलं जघ्नन्ति ते भृशम् ॥
तैस्तु सपीड्यते देहे विड्भेद मल्वता ।
क्लमश्चापि हृत्क्लेद कृमयो जनयन्ति ते ॥
हारीतः संशयापन्नः पादौ सम्पृक्ष्य पृच्छति ।
कथं देहे मनुष्यस्य मलमूत्रवसाशये ॥
सम्भवन्ति कफवादौ वर्द्धयन्ति कथं पुनः ।
कथं वा शीर्य्यअरसे नाभाहारावभक्षणे ॥
जायन्ते केन कृमयः सूक्ष्माधोमानिगोऽप्यथ ।
नानाऽऽमपक्वमध्याश्च दहते वा हुताशनः ॥
कथन्ते कृमयश्चान्ते न दह्यन्तेऽन्तराग्निना ।
एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः ॥
आत्रेय उवाच ।
शृणु पुत्त्र ! महाबाहो ! कृमिसम्भवकारणम् ।
विरुद्धाशनसे पुत्त्र ! रक्तञ्चैवास्य कुप्यति ॥
कफेनैकदिनं याति शुक्लेवाकारतां व्रजेत् ।
पञ्चभूतात्मके वायौ ते तु जाताः सचेतनाः ॥
कोष्ठाग्निना न दह्यन्ते न जीर्य्यन्ते रसानिति ।
विषे जातो यथा कीटो न विषेण मृतिं व्रजेत् ॥
तथा हुताशनोद्भूत न हुताशेन जीर्य्यति ।
भेषजं सम्प्रवक्ष्यामि येन तेऽपि मरन्ति वै ॥
पतन्ति वा नाशं यान्ति भेषजानि शृणुष्व मे ।

वचाऽजमोदा कृमिनित्यपाश-
वीजं शठी रामठकं त्रिवृच्च ।
उष्णोदके तत्परिपिष्य पेयं
पतन्ति शीघ्रं मलधातुकीटाः ॥
शठी यवानी पिचुमर्द्दपत्रान्
विडङ्गकृष्णातिविषा रसोनम् ।
सम्पिष्य मूत्रेण त्रिवृत्प्रयुक्तम्
विनाशनं सर्व्वकृमीरुजानाम् ॥

मरिच पिप्पलीमूलं विडङ्गशिग्रुयवानिकात्रिवृता ।
गोमूत्रेण तु पेयं पानं शीघ्रं कृमीन् हन्ति ॥

मुस्ता विशाला त्रिफला सुपर्णा
शिग्रुः सवाङ्क सलिलेन कल्का ।
पानं सकृष्णा कृमिशत्रुचूर्णं
विनाशनं सर्व्वकृमीरुजाञ्च" ॥

"मातुलुङ्गस्य मूलानि रसोनं कृमिजित्त्रिवृत् ।
अजमोदा निम्बपत्रं गोमूत्रेण तु पेषयेत् ॥
पानमेतत् प्रशंसन्ति कृमिदोषनिवारणम् ।
ज्वरप्रोक्तानि पथ्यानि कृमिदोषे प्रदापयेत् ॥
इति कृमिचिकित्सा" ॥ * ॥

इति महर्षात्रेयभाषिते हारीतोत्तरे कृमिचिकित्सा नाम पञ्चमोऽध्यायः ॥ * ॥

अस्य निदानपूर्व्वकसम्प्राप्तिचिकित्सितं यथा ।
"अजीर्णाध्यशनासात्म्यैर्विरुद्धमलिनाशनैः ।
अव्यायामदिवास्वप्नगुर्व्वतिस्निग्धशीतलैः ।
माषपिष्टान्नविदलविसशालूकशेरुकैः ॥
पर्णशाकसुरासूक्तदधिक्षीरगुडेक्षुभिः ।
पलालानूपपिशितपिण्याकपृथुकादिभिः ॥
स्वाद्वम्लद्रवपानैश्च श्लेष्मा पित्तञ्च कुप्यति ।
कृमीन् बहुविधाकारान् करोति विविधाश्रयान् ॥
आमपक्वाशयस्तेषां प्रसवः प्रायशः स्मृतः ।
विंशते कृमिजातीनां त्रिविधः सम्भवः स्मृतः ॥
पुरीषकफरक्तानि तेषां वक्ष्यामि लक्षणम् ।
अथवा वियवा किप्याश्चिप्या गण्डूपदास्तथा ।
चुरवो द्विमुखाश्चैव सप्तैवैते पुरीषजाः ॥
श्वेताः सूक्ष्मास्तुदन्त्येते गुदं प्रतिचरन्ति च ।
तेषामेवापरे पुच्छैः पृथवश्च भवन्ति हि ॥
शूलाग्निमान्द्यपाण्डुत्वविष्टम्भबलसंक्षयाः ।
प्रसेकारुचिहृद्रोगविड्भेदास्तु पुरीषजैः ॥
रक्ता गण्डूपदा दीर्घा गुदकण्डूनिपातिनः ।
शूलाटोपशकृद्भेदपक्तिनाशकराश्च ते ॥
दर्भपुष्पा महापुष्पाः प्रलूनाश्चिपिटास्तथा ।
पिपीलिका दारुणाश्च कफकोपसमुद्भवाः ॥
रोमशा रोममूर्द्धानः सपुच्छाः श्यावमण्डलाः ।
रूढधान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा ॥
मज्जादा नेत्रलेहारस्तालुश्रोत्रभुजस्तथा ।
शिरोहृद्रोगवमथुप्रतिश्यायकराश्च ते ॥
केशरोमनखादाश्च दन्तादाः किक्किशास्तथा ।
कुष्ठजाश्च परीसर्पा ज्ञेयाः शोणितसम्भवाः ॥
ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च पृथवस्तथा ।

रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते ॥
माषपिष्टान्नलवणगुड़शाकैः पुरीषजा ।
मांसमाषगुड़क्षीरदधिशुक्तैः कफोद्भवा ॥
विरुद्धा जीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ॥
ज्वरो विवर्णताशूलं हृद्रोगः सदनं भ्रमः ॥
भक्तद्वेषोऽतिसारश्च सञ्जातकृमिलक्षणम् ।
दृश्यास्त्रयोदशाद्यास्तु कृमीणां परिकीर्त्तिताः ॥
केशादायास्त्वदृश्यास्ते द्वावाद्यौ परिवर्ज्जयेत् ।
एषामन्यतमं ज्ञात्वा जिघांसुः शीघ्रमातुरम् ॥
सुरसादिविपक्वेन सर्पिषा वान्तमादितः ।
विरेचयेत्तीक्ष्णतरैर्योगैराखापयेच्च तम् ॥
यवकोलकुलत्थानां सुरसादेर्गणस्य च ।
विड़ङ्गस्नेहयुक्तेन क्वाथेन लवणेन च ॥
प्रत्यागते निरूहे तु नरं स्नातं सुखाम्बुना ।
युक्ताद् कृमिघ्नैरशनैस्ततः शीघ्रं भिषग्वरः ॥
स्नेहेनोक्तेन चैनन्तु योजयेत् स्नेहवस्तिना ।
ततः शिरीषकिणिही-रसं क्षौद्रयुतं पिबेत् ।
केयूकस्वरसं वापि पूर्व्ववत्तीक्ष्णभोजनः ॥
पलाशबीजस्वरसं कल्कं वा तण्डुलाम्बुना ।
पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत् ॥
पत्तूरस्वरसं वापि पिबेद्वा सुरसादिजम् ।
लिह्यादश्वशकृच्चूर्णं विड़ङ्गं वा समाक्षिकम् ॥
पत्रैर्मूषिकपर्ण्या वा सुपिष्टैः पिष्टमिश्रितैः ।
खादेत् पूपलिकान् पक्वान् धान्याम्लञ्च पिबेदनु ॥
सुरसादिगणे तैलं पक्वं वा पानमिष्यते ।
विड़ङ्गचूर्णं पिष्टानां तस्मिन् भक्ष्यन्तु कारयेत् ॥
तत्कषायप्रपीतानां तिलानां स्नेहमेव वा ।
शाविधः शतसत्त्वं सम्प्रहृतं सुभावितम् ॥
विड़ङ्गानां कषायेण त्रैफलेन तथैव च ॥
क्षौद्रेण लिह्यानु पिबेदसमामलकोद्भवम् ।
अद्यामया रसञ्चापि विधिरेषोऽप्यसामयि ॥
पूतीकस्वरसं वापि पिबेद्वा मधुना सह ।
पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम् ॥
सप्तरात्रं पिबेद्दुष्टं तक्रमथवा दधिमस्तुना ।
पुरीषजान् कफोत्थांश्च हन्यादेव कृमीन् भिषक् ॥
शिरोऽदृश्याश्च नासिकाद्धि संस्थिताश्च एवंविधान् ।
विशेषेणाश्मनैर्नस्यैरवपीड़ैश्च साधयेत् ॥
शतकसन्तुसकृत्तु सम्पुष्टं भावयेदिति । ।
निःक्वाथेन विड़ङ्गानां चूर्णं प्रथमनन्तु तत् ॥
अथ पूर्वान्यनेनैव विधिना योजयेद्भिषक् ।
पत्रशाकमपीन तैलञ्च नस्यं स्यात् सुरसादिके ॥
इत्यस्मुक्तविधिश्चापि विज्ञेयो रोमभोजिषु ।
दन्तादानां समुद्दिष्टं विधानं मुखरोगिकम् ॥
रक्तजानां समुद्दिष्टं कुर्य्यात् कुष्ठचिकित्सिते ।
सुरसादिन्तु सर्व्वेषु सर्व्वथैवोपयोजयेत् ॥
प्रयत्नतश्चिह्नकदुष्टं भोजनञ्च हितं भवेत् ।
कुष्ठत्वलाघवत्वरतं क्षीरपानञ्च पूजितम् ॥ * ॥
क्षीराणि मांसानि घृतानि चैव
दधीनि शाकानि च पर्व्ववन्ति ।
समाखतोऽम्लान् मधुरान् हिमांश्च
कृमीन् जिघांसुः परिवर्ज्जयेत्तु" ॥
इति सुश्रुत उत्तरतन्त्रे चतुःपञ्चाशत्तमोऽध्यायः ॥)

कृमिकण्टकं, क्ली, (कृमेः कृमिरोगस्य रोगे वा कण्टकमिव । तन्नाशकतया तथात्वम् ।) विड़ङ्गम् । चित्राङ्गः । उडुम्बरः । इति मेदिनी ॥
कृमिकोषोत्थ, त्रि, (कृमेः कृमिभिर्निर्म्मितो वा कोषः । शाकपार्थिववत् मध्यपदलोपः । तस्मात् उत्तिष्ठति उत्पद्यते । उत् + स्था + कः ।) कौषेयम् । इत्यमरः । २ । ६ । १११ । रेसमिकापड़ इति भाषा ॥
कृमिघ्नः, पु, (कृमिं हन्ति इति । हन् + टक् । "हन्तेरत् पूर्व्वस्य" । ८ । ४ । २२ । इति नियमात् न णत्वम् ।) विड़ङ्गः । इत्यमरः । २ । ४ । १०६ ॥ पलाण्डुः । कोलकन्दः । पारिभद्रः । भल्लातकः । इति राजनिर्घण्टः ॥ (विड़ङ्गहरिद्रा च । इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
कृमिघ्ना, स्त्री, (कृमिघ्न + अजादित्वात् टाप् ।) हरिद्रा । इति भावप्रकाशः ॥
कृमिघ्नी, स्त्री, (कृमिघ्न + टित्वात् ङीप् ।) धूम्रपत्रा । विड़ङ्गः । इति राजनिर्घण्टः ॥
कृमिजं, क्ली, (कृमिभ्यो जायते इति । अन्येभ्योपीति ड ।) अगुरु ॥ इत्यमरः । २ । ६ । १२६ ॥ (कृमिजातमात्रे, त्रि । यथा, पञ्चतन्त्रे । १ । १०२ ।
"कौषेयं कृमिजं सुवर्णमुपलाद्दूर्व्वापि गोरोमतः ।
पङ्कात्तामरसं शशाङ्कउदधेरिन्दीवरं गोमयात्" ॥
अस्य पर्य्याया यथा ।
"अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं कृमिजं वापि कृमिजग्धमनार्य्यकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्यागुरुशब्दे ज्ञातव्याः ॥)
कृमिजग्ध, क्ली, (कृमिभिर्जग्धं भुक्तम् । उपचारात् तज्जनिततया तथात्वम् ।) अगुरु । इति राजनिर्घण्टः ॥ ("कृमिजग्धमनार्य्यकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कृमिजा, स्त्री, (कृमिभ्यो जायते या । जन + ड टाप् च । लाक्षा ।) इति राजनिर्घण्टः ॥
(अस्य पर्य्याया यथा,—
"कीटजा कृमिजा लाक्षा जतुका च गवाधिका" ॥
इति वैद्यकरत्नमालायाम् ॥)
कृमिरिपु, पु, (कृमीणां रिपुर्नाशकः । तन्नाशकत्वात् तथात्वम् ।) विड़ङ्गः । इति शब्दरत्नावली ॥ (विड़ङ्गशब्देऽस्य विशेषो ज्ञेयः ॥)
कृमिला, स्त्री, (कृमीन् कृमिवत् सन्तानान् लाति आदत्ते । ला + क टाप् च ।) बहुप्रसूः । बहुसन्तानप्रसवा । इति हेमचन्द्रः ॥ कृमियुक्ते त्रि ॥
कृमिवृक्ष, पु, (कृमिप्रधानः कृमिमयो वा वृक्षः ।) कोषाम्रः । इति भावप्रकाशः ॥
(कोषाम्रशब्देऽस्य विवृतिर्ज्ञातव्या ॥)
कृमिशङ्खः, पु, (कृमिरिव जीवन् शङ्खः ।) जीवशङ्खः । तत्पर्य्यायः । क्षमिजलजः २ कृमिवारिरुहः ३ जन्तुकम्बुः ४ । अस्य गुणः । रसवीर्य्यादौ शङ्खसदृशत्वम् । इति राजनिर्घण्टः ॥
कृमिशुक्तिः, स्त्री, (कृमिरिव शुक्तिः ।) जलशुक्तिः । इति राजनिर्घण्टः ॥
कृमिशैलकः, पु, (कृमिनिर्म्मितः शैल इव । ततः स्वार्थे कन् ।) वल्मीकः । इति शब्दरत्नावली ॥
कृमीलकः, पुं, (कृमीन् ईरयति जनयतीति । ईर + एवुल् । रस्य लत्वम् ।) वनमुद्गः । इति राजनिर्घण्टः ॥
कृव, इ न कृतौ । हिंसे । इति कविकल्पद्रुमः ॥ (स्वा-पर-सकं-सेट् । इदित् ।) कृण्वी । न, कृणोति । इ, कर्म्मणि कृण्व्यते । इति दुर्गादासः ॥
कृवि, पुं, (क्रियते वस्त्रादिकमनेन । डु कृञ् करणे "कृविघृष्विच्छविस्थविकिकीदिविः" । उणा ४ । ५६ । इति क्विन् निपातनात् ।) वायुयन्त्रम् । इति उणादिवृत्तिः । ताँत इति भाषा ॥
कृश, इर् य कार्श्ये । इति कविकल्पद्रुमः ॥ (दिवा-पर-सकं-सेट् । इरित् ।) कार्श्यं कृशीकरणम् । इर्, अकृशत् अकर्शीत् । अस्मात् पुषादित्वान्नित्ये ङ इत्यन्ये । य, कृश्यति चन्द्रं कृष्णपक्षः । इति दुर्गादासः ॥
कृश, त्रि, (कृशधातोः क्तप्रत्यये "अनुपसर्गात् फुल्लक्षीबेति" ।८।२।५५। निपातनात् साधुः ।) अल्पः । (यथा, मनौ । ४ । १८४ ।
"आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः" ॥)
सूक्ष्मः । इत्यमरः । ३ । १ । ६१ ॥
(यथा, आर्य्यासप्तशत्यां । ४६५ ।
"राजसि कृशाङ्गि ! मङ्क्षुकलशी सरस्वारपङ्कवेनेव । तेनैव चुम्बितमुखी प्रथमाविर्भूतरागेण" ॥
"व्यायाममतिसौहित्यं क्षुत्पिपासामयौषधम् ।
कृशो न सहते तद्वदतिशीतोष्णमैथुनम् ॥
प्लीहा कासः क्षयः श्वासो गुल्मार्शांस्युदराणि च ।
कृशं प्रायोऽभिधावन्ति, रोगाश्च ग्रहणीगताः" ॥
"सततं व्याधितावेतावतिस्थूलकृशौ नरौ ।
सततञ्चोपचर्य्यौ हि कर्षणैर्बृंहणैरपि" ॥
"स्थौल्यकार्श्ये वरं कार्श्यं समोपकरणौ हितौ ।
यद्युभौ व्याधिरागच्छेत् स्थूलमेवाति पीड़येत्" ॥
इति चरके सूत्रस्थाने २१ अध्याये ॥
"कश्चिदन्यः कृशोऽतीव बलवान् दृश्यते सदा" ॥
तत्र हेतुमाह ।
"आधानसमये यस्य शुक्रभागोऽधिको भवेत् ।
मेदोभागस्तु हीनः स्यात् स कृशोऽपि महाबलः" ॥
यस्याधानसमये जनयितुः शुक्रस्याधिक्यं भवति ।
मेदसोऽल्पता तस्य लघसापि बहु बलमित्यर्थः ॥
अथ कार्श्यस्य चिकित्सा ।
"स्वप्नहर्षादि निमित्ते तु कृशे गुह्नीव मेदनम् ।
दृष्या बलाञ्चकृष्य तथा वाजीकरञ्च यत् ॥
भौलाश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
कृशस्य पुष्टिं वपुषो विधत्ते
बालस्य शस्यस्य यथाम्बुवृष्टिः ॥
अश्वगन्धस्य कल्केन क्वाथे तस्मिन् चतुर्गुणे पयस्यपि ।
सिद्धं तैलं कृशाङ्गानामभ्यङ्गाद्दङ्गपुष्टिदम्" ॥
इति अश्वगन्धातैलम् ॥ * ॥
इति भावप्रकाशस्य मध्यखण्डे तृतीयभागे कार्श्याधिकारे ॥) (अधमः । यथा, मनौ । ७ । १६५ ।

"क्षत्त्रियञ्चैव सर्पञ्च ब्राह्मणं वा बहुश्रुतम् ।
नावमन्येत वै भूष्णुः कृशानपि कदाचन" ॥
पु, सर्व्वाकारवत्त्वात् विष्णुः । यथा, महाभारते ।
१३ । १४९ । १०३ ।
"अणुर्वृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्" ॥
स्वनामख्यातो मुनिपुत्त्रः । स तु परीक्षिच्छाप-
प्रदातुः शृङ्गिणः सखा ।
यथा, महाभारते । १ । ४१ । २ ।
"स तं कृशमभिप्रेक्ष्य सूनृतां वाचमुत्सृजन् ।
अपृच्छत् कथं तात स मेऽद्य मृतधारकः" ॥
ऐरावतकुलोत्पन्नो नागविशेषः । यथा, तत्रैव ।
१ । आस्तीकपर्व्वणि । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम्" ॥)
कृशरः, पुं, (कृशम् अल्पमाशां रातीति । रा + क ।
कृशयोऽपि बलं राति वा ।) तुल्यतिलान्नम् । तत्प-
र्य्यायः । त्रिसरः २ । इति हेमचन्द्रः ॥
(यथा, मत्स्यपुराणे,—
"गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम् ।
यावकं कुजे दद्यात् क्षीरान्नं सोमसूनवे ।
दध्योदनञ्च जीवाय शुक्राय तु घृतौदनम् ।
शनैश्चराय कृशरमाजमांसञ्च राहवे ।
चित्रौदनञ्च केतुभ्यः सर्व्वभक्ष्यैः समर्च्चयेत्" ॥)
कृशरा, स्त्री, (कृशर + टाप् ।) तिलौदनम् । इति
हारावली ॥ द्विदलमिश्रितान्नम् । खिचडी इति
भाषा । यथा,—
"तण्डुला दालिसम्मिश्रा लवणार्द्रकहिङ्गुभिः ।
संयुक्ताः सलिले सिद्धाः कृशरा कथिता बुधैः" ॥
अस्या गुणाः । शुक्रबलकारित्वम् । गुरुत्वम् ।
पित्तकफप्रदत्वम् । दुर्ज्जरत्वम् । विष्टम्भमलमूत्र-
कारित्वञ्च । इति भावप्रकाशः ॥
("मांसेक्षुपिष्टकृशरा तिलशष्कुलीभिः" ।
इति माधवकरीयरोगविनिश्चयस्य कफशूलव्या-
ख्यानेविजयेनोक्तं यथा,—
"कृशरा तिलतण्डुलमाषयवागूः" ॥)
कृशला, स्त्री, (कृशं कार्श्यं लातीति । ला + क ।
टाप् ।) केशः । इति शब्दचन्द्रिका ॥
कृशशाखः, पुं, (कृशा क्षीणा शाखा यस्य ।) पर्पटः ।
इति राजनिर्घण्टः ॥
कृशाङ्गी, स्त्री, (कृशानि सूक्ष्माणि अङ्गानि यस्याः ।
स्वाङ्गत्वादित्वात् ङीष् ।) प्रियङ्गुवृक्षः । इति
शब्दचन्द्रिका ॥ सूक्ष्माङ्गविशिष्टे, त्रि । (यथा,—
आर्य्यासप्तशती । ४९५ ।
"राजसि कृशाङ्गि ! मङ्गलकलशी सहकारपल्ल-
वेनेव । तेनैव चुम्बितमुखी प्रथमाविर्भूतरागेण" ॥)
कृशानु, पुं, (कृशति तनूकरोति तृणकाष्ठादिवस्तु-
जातमिति । "कृतन्यृभ्योऽनि" । उणां ।४।२। इति
आनुक् ।) वह्निः । इत्यमरः । १ । १ । ५७ ॥
(यथा, रघुः । ७ । २४ ।
"प्रदक्षिणप्रक्रमणात् कृशानो-
रुदर्च्चिषस्तन्मिथुनं चकाशे" ॥)
चित्रकवृक्षः । इति राजनिर्घण्टः ॥

कृशानुरेताः, [स्] पुं, (कृशानौ अग्नौ रेतः निक्षिप्तं
तेजो यस्य ।) शिवः । इत्यमरः । १ । १ । ३५ ॥
(अस्य कृशानुरेतोनाम्नः कारणं कालिकापुराणे
४७ अध्याये द्रष्टव्यम् ॥)
कृशाश्वी, [न्] पु, (कृशाश्वेन धनुर्म्मारवश्यन्तर्पवि-
शेषेण प्रोक्तं नाट्यसूत्रादिकं अधीते वेत्ति वा
"कर्म्मन्दकृशाश्वादिनिः" । ४ । ३ । १११ । इति
इनिः ।) नटः । इत्यमरः । २ । १० । १२ ॥
कृशिका, स्त्री, (कृश इव कायतीति । कै + कः । टाप्
इत्वञ्च ।) आखुकर्णीलता । इति राजनिर्घण्टः ॥
कृष, औ आकर्षे । विलेखने । इति कविकल्प-
द्रुमः । (भ्वा-पर-सक-अनिट् ।) औ, अकार्क्षीत्
अकृक्षत् अक्राक्षीत् । आकर्षि आकर्षणे । क-
र्षन्ति तुरगा रथम् । इति दुर्गादासः ॥
(यथा, मनुः । ३ । ६६ ।
"मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ।
कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः" ॥
आखुकर्णीशब्देऽस्या विशेषो ज्ञेयः ॥)
कृष, औ ञ श आकर्षणे । विलेखने । इति कवि-
कल्पद्रुमः । (तुदां-उभ-सक-अनिट् ।) श ञ, कृ-
षति कृषते भूमिं कृषकः । औ, अकार्क्षीत् ।
अक्राक्षीत् अकृक्षत् । इति दुर्गादासः ।
कृषकः, त्रि, (कृषति भूमिं यः । "कृषेर्वृद्धिश्चो-
दीचाम्" । उणां ।२।३८। इति क्वुन् ।) कर्षकः ।
इति मेदिनी ॥
कृषकः, पु, (कृषति भूमिमनेन इति करणे क्वुन् ।)
फालः । इति मेदिनी ॥ वृषः । इति शब्दचन्द्रिका ॥
कृषाणुः, पुं, (कृष् + आनुक् । पृषोदरात् णत्वम् ।)
कृशानुः । इत्यमरटीका ॥
कृषिः, स्त्री, (कृष् विलेखने । "सर्व्वधातुभ्य इन्" ।
उणां ४ । ११७ । इति इन् । "इगुपधात् कित्" ।
उणां । ४ । ११९ । इति कित् ।) वैश्यवृत्ति-
विशेषः । कर्षणम् । चास इति भाषा । तत्प-
र्य्यायः । अनृतम् २ । इत्यमरः । २ । ९ । २ ।
प्रमृतम् ३ । इति जटाधरः ॥
(यथा, मेघदूते । १६ ।
"त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः" ॥)
कृषिकः, पु, (कृषत्यनेन "कृषिकृष्यो किकन्" ।
उणां । २ । ४० । इति किकन् ।) फालः । इत्य-
मरः । २ । ९ । ६ ॥ कर्षकः । इति केचित् ॥
कृषीवलः, त्रि, (कृषिरस्यास्ति वृत्तित्वेन इति "रज-
कृष्यासुतिपरिषदो वलच्" ५ । २ । ११२ । इति
वलच् । "वले" ६ । ३ । ११८ । इति दीर्घः ।)
कर्षकः । कृषिजीवी । इत्यमरः । २ । ९ । ६ ॥
(यथा, महाभारते । २ । ५ । ७७ ।
"कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा ।
त्वया वा पीड्यते राष्ट्रं कच्चित् तुष्टाः कृषीवलाः" ॥)
काकजङ्घावृक्षः । इति रत्नमाला ॥
कृष्करः, पु, (कृषं करोति सृष्टिस्थित्यादिकं
शक्तियोगात् सम्पादयतीति । कृष + कृ + टक् ।)
शिवः । इति त्रिकाण्डशेषः ॥

कृष्टं, त्रि, (कृष्यते यत् तत् । कृष् + कर्म्मणि क्तः ।)
कृष्टक्षेत्रम् । चसा क्षेत् इति भाषा । तत्पर्य्यायः ।
सीत्यम् २ हल्यम् ३ । इत्यमरः । २ । ९ । ८ ।
(यथा, मनौ । ११ । १४५ ।
"कृष्टजानामोषधीनां जातानाञ्च स्वयं वने" ।
भावे क्तः । कर्षणम् ॥)
कृष्टपच्यः, त्रि, (कृष्टे क्षेत्रे स्वयमेव पच्यते इति कर्म्म-
कर्त्तरि कृष्ट + पच् + "राजसूयसूर्य्यमृषोद्यरुच्य-
कुप्य-कृष्टपच्याव्यथ्याः" । ३ । १ । ११४ । इति
क्यबन्तो निपातितः ।) व्रीहिः । धान्यम् । इति
व्याकरणम् ॥ (यथा, भागवते । ७ । १२ । १८ ।
"न कृष्टपच्यमश्नीयादकृष्टञ्चाप्यकालतः" ॥)
कृष्टपाक्यः, त्रि, (कृष्टे पच्यते इति । कृष्ट + पच् + क-
र्म्मणि ण्यत् । "चजोः कु घिण्ण्यतोः" । ७ । ३ ।
५२ । इति चस्य कुत्वम् ।) कृष्टपच्यम् । इति व्याक-
रणम् ॥
कृष्टिः, पु, (कृषत्यन्तर्भुवं विद्याभ्यासादि-
भिरसौ । कृष् + कर्त्तरि क्तिच् बाहुलकात्
तिर्वा ।) पण्डितः । इत्यमरः । २ । ७ । ६ ॥
(यथा, ऋग्वेदे । ६ । १८ । २ । "स हद्देणुष्वसनो
मानुषीणामेकः कृष्टीनामभवत् सहावा" ॥)
कर्षणे, स्त्री । इति मेदिनी ॥ (कृष् + भावे क्तिन् ।
आकर्षणम् ॥ जनमात्रम् । इति निघण्टुः ।
यथा ऋग्वेदे । ८ । ६ । ४ । "विश्वा नमन्त कृष्टयः" ।
"कृष्टयः प्रजाः" । इति भाष्यम् ॥)
कृष्णा, स्त्री, ("कृषेर्वर्णे" । उणां ३ । ४ । इति नक्
ततो णत्वम् ।) मरिचम् । इत्यमरः । २ । ९ । ३६ ।
(अस्य पर्य्याया यथा,—
"मरिचं वेल्लजं कृष्णमूषणं धर्म्मपत्तनम्" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
गुणाश्चास्य मरिचशब्दे ज्ञातव्याः ॥)
लौहम् । इति जटाधरः ॥ नीलाञ्जनम् । इति
राजनिर्घण्टः ॥ कालागुरु । इति रत्नमाला ॥
कृष्णः, पु, (कर्षत्यरीन् महाप्रभावशक्त्या । यद्वा,
कर्षति आत्मसात् करोति आनन्दत्वेन परिण-
मयतीति मनो भक्तानाम् इति यावत् "कृषे-
र्वर्णे" । उणां । ३ । ४ । इति बाहुलकात् नक्
विनापि । णत्वञ्च । यद्वा, कर्षति धर्म्मान्
स्वकुक्षौ प्रलयकाले । "कर्षणात् कृष्णो रमणात्
रामो व्यापनात् विष्णुः" । इति श्रुते स्तथात्वम् ।
अपरा व्युत्पत्तिर्यथा —
"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यात् परं ब्रह्म कृष्ण इत्यभिधीयते" ।
इति श्रीधरस्वामी ॥ तथा च, महाभारते । ५ ।
यानसन्धिपर्व्वणि ७० । ५ ।
"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
कृष्णस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः" ॥)
भगवदवतारविशेषः । स च भूभारहरणार्थं द्वाप-
रयुगशेषे भाद्रकृष्णाष्टम्यां रोहिणीनक्षत्रे निशीथे
देवकीगर्भे आविर्भूतः । तस्य जन्मसमयो यथा,
"उच्चस्थाः शशिभौमचान्द्रिशनयो लग्नं वृषो
लाभगो जीवः सिंहतुलालिषु क्रमवशात् पूषो

सत्यभामा ३ कालिन्दी ४ मित्रविन्दा ५ नाग्नजिती ६ भद्रा ७ लक्ष्मणा ८ एताः प्रधानाः। अन्या अपि शताधिकषोडशसहस्राणि स्त्रियः। इति श्रीभागवतम् ॥ *॥ व्रजस्थितस्यास्य सखायश्चतुर्विधाः। तत्र किञ्चिद्वयसाधिकाः सुहृदो यथा। सुभद्रः १ मण्डलीभद्रः २ भद्रवर्द्धनः ३ गोभटः ४ यक्षेन्द्रभटः ५ भद्राङ्गः ६ वीरभद्रः ७ महागुणः ८ विजयः ९ बलभद्रः १० इत्याद्याः ॥ वयसा न्यूनाः सखायो यथा। विशालः १ वृषभः २ ओजस्वी ३ देवप्रस्थः ४ वरूथपः ५ मणिबन्धः ६ करन्धमः ७ इत्याद्याः ॥ वयसा तुल्याः प्रियसखायो यथा। श्रीदामा १ सुदामा २ वसुदामकः ३ किङ्किणी ४ स्तोककृष्णः ५ अंशुः ६ भद्रसेनः ७ विलासी ८ पुण्डरीकविटङ्काक्षः ९ कलविङ्कः १० इत्याद्याः ॥ पूर्व्वतः श्रेष्ठा आत्यन्तिकरहस्येषु युक्ताः भावविशेषविशिष्टाः प्रियनर्म्मसखायो यथा। सुबलः १ अर्ज्जुनः २ गन्धर्व्वः ३ वसन्तः ४ उज्ज्वलः ५ इत्याद्याः ॥ इति भक्तिरसामृतसिन्धुः ॥ *॥ वृन्दावनस्थितस्य अस्य सख्यः शतकोटयः। तत्र वेदमुनिदेवस्त्रियोऽपि कृष्णाराधनार्थं गोपाङ्गनारूपेण जाताः। व्रजे अस्य नित्यप्रिया यथा। राधा १ चन्द्रावली २ विशाखा ३ ललिता ४ श्यामा ५ पद्मा ६ शैव्या ७ भद्रिका ८ तारा ९ विचित्रा १० गोपाली ११ धनिष्ठा १२ पालिका १३ खञ्जनाक्षी १४ मनोरमा १५ मङ्गला १६ भला १७ लीला १८ कृष्णा १९ शारी २० विशारदा २१ तारावली २२ चकोराक्षी २३ शङ्करी २४ कुङ्कुमादयः २५। एतासां मध्ये विशाखा ललिता पद्मा शैव्या एतास्तस्य सख्यः। अन्या यूथाधिपाः। तासां मध्ये राधादयोऽष्टौ सुभगाः। आसां राधाचन्द्रावल्यौ श्रेष्ठे। अनयोरपि राधाधिका। इत्युज्ज्वलनीलमणिः ॥ *॥ अपि च। चन्द्रावली १ सुशीला २ तस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। शशिकला ३ अस्याः सहचर्य्यः षोडशसहस्राणि। चन्द्रमुखी ४ अस्याः सहचर्य्यः षोडशसहस्राणि। माधवी ५ अस्याः सहचर्य्यः एकादशसहस्राणि। कदम्बमाला ६ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। कुन्ती ७ अस्याः सहचर्य्यः दशसहस्राणि। यमुना ८ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। जाह्नवी ९ अस्याः सहचर्य्यः नवसहस्राणि। पद्ममुखी १० अस्याः सहचर्य्यः नवसहस्राणि। सावित्री ११ अस्याः सहचर्य्यः पञ्चदशसहस्राणि। सुधामुखी १२ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। शुभा १३ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। पद्मा १४ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। गौरी १५ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। सर्व्वमङ्गला १६ अस्याः सहचर्य्यः षोडशसहस्राणि। सरस्वती १७ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। भारती १८ अस्याः सहचर्य्यः दशसहस्राणि। अपर्णा १९ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। रतिः २० अस्याः सहचर्य्यः दशसहस्राणि। गङ्गा २१ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। अम्बिका २२ अस्याः सहचर्य्यः षोडशसहस्राणि। सती २३ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। नन्दिनी २४ अस्याः सहचर्य्यः दशसहस्राणि। सुन्दरी २५ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। कृष्णप्रिया २६ अस्याः सहचर्य्यः षोडशसहस्राणि। मधुमती २७ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। चम्पा २८ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। चन्दना २९ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि। इति ब्रह्मवैवर्त्तपुराणम् ॥*॥*॥ (महादेवः। यथा, महाभारते १३। १७। ४४।

"दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च" ॥)

व्यासः। (अयन्तु द्वैपायनः वासव्यां सत्यवत्यां महर्षेः पराशराज्जातः कृष्णवर्णत्वात् कृष्णकलावतीर्णत्वाद्वा कृष्ण इत्यभिधीयते।

यथा, महाभारते १। १०५। १४।

"यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः।
लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च" ॥)

अर्ज्जुनः। (अयन्तु तृतीयपाण्डवः। अस्य दशनामस्वन्यतमं नाम। यथा, महाभारते ४। ४२। २२।

"कृष्ण इत्येव दशमं नाम चक्रे पिता मम।
कृष्णावदातस्य सदा प्रियत्वाद्बालकस्य वै" ॥

कृष्णो वर्णोऽस्यास्तीति। गुणवचनेभ्यो मतुपो लुगिति लुक् ॥) कोकिलः। इति विश्वः ॥ काकः। इति मेदिनी ॥ करमर्दकः। इति शब्दरत्नावली ॥ वर्णविशेषः। कालवर्णः। तत्पर्य्यायः। नीलः १ असितः ३ श्यामः ४ कालः ५ श्यामलः ६ मेचकः ७ बहुलः ८ रामः ९ शितिः १०। इति जटाधरः ॥ तद्वति, त्रि। इत्यमरः ॥ (कर्षति पापानि शरणागतानां वाक्छलकात् कृषेर्नक् वर्णं विनापि णत्वञ्च। परब्रह्म। यथा, पौराणिकीगाथायाम्।

"कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते।
भस्मीभवन्ति राजेन्द्र। महापातककोटयः" ॥

चन्द्रह्रासकरप्रथमादिपञ्चादशकलाक्रियारूपप्रतिपदादिदर्शान्तात्मकपञ्चदशतिथ्यात्मकः कालभेदोऽर्द्धमासः। यथा, तिथितत्त्वे ३६।

"चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" ॥

कृष्णपक्षाभिमानिदेवताविशेषः। यथा, गीतायाम्।

"धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्"।

कृष्णसारमृगः। यथा, महाभारते १। १३०। १५।

"धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च" ॥

अशुभकर्म्म। वेदोक्तासुरविशेषः। अयन्तु इन्द्रेण सगणो निहतः। ऋषिविशेषः। अयन्तु ऋग्वेदस्य अष्टममण्डलस्य ८५—८७ सूक्तानि, तथा दशममण्डलस्य ४२—४४ सूक्तानि च प्रणिनाय ॥ अथर्व्ववेदान्तर्गतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि। "गोपालतापनकृष्णहयग्रीवदत्तात्रेयगारुडानामथर्व्ववेदगतानामेकत्रिंशत्सङ्ख्याकानां उपनिषदां भद्रं कर्णेभिरिति शान्तिः" ॥)

कृष्णकन्द, क्ली, (कृष्णः कृष्णवर्णः कन्दो यस्य।) रक्तोत्पलम्। इति त्रिकाण्डशेषः ॥

कृष्णकर्म्मा, [न्] त्रि, (कृष्णम् अशुभं कर्म्म यस्य) पापाचारयुक्तः। तत्पर्य्यायः। शिश्विदानः २। इत्यमरः। ३। १। ४६ ॥ (श्वेतितुमिच्छति श्वितावर्ण इत्यस्य श्वितेर्द्दंस्येत्यानच् दत्वं सनो लुक् च इति शिश्विदानः। केचित्तु अकृष्णकर्म्मा इति पठन्ति अकृष्णं मिथ्यापत्वात् शुक्लं कर्म्मास्य अकृष्णकर्म्मा शुक्लकर्म्मा इत्यर्थः। इति व्याचक्षते इति भरतः ॥

"शिश्विदानः कृष्णकर्म्मा शुक्लकर्म्मेति कस्यचित्"।

इति जटाधरः ॥ क्ली, व्रणानां कृष्णत्वसम्पादकक्रियाविशेषः। यथा, सुश्रुतोक्तौ "अथ व्रणस्योपक्रमा भवन्तीत्युपक्रम्य दारणकर्म्मक्षारकर्म्माग्निकर्म्म कृष्णकर्म्मपाण्डुकर्म्म"। इति ॥)

कृष्णकलि, स्त्री, (कृष्णस्य चूडा इव कलिः कलिका यस्याः।) स्वनामख्यातपुष्पवृक्षः। तस्य शाखा रक्तवर्णा पीयलाजवद्ग्रन्थियुक्ता पत्र दुमताम्बूलदलवद्भवति। तस्य पुष्पं श्वेतरक्तपीतपाटलवर्णमिलितपञ्चदलं षट्केशरमध्यं स्वल्पसद्गन्धयुक्तमपराह्णे प्रस्फुटति। तस्य बीजं कृष्णमरिचतुल्यं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति। तदुत्पत्तिस्तस्य मूलतो बीजतश्च। इति लोकप्रसिद्धम् ॥ अस्याः पिष्टपत्रमूलादिना व्रणस्फोटनं भवति इति वैद्यकम् ॥

कृष्णकाष्ठ, क्ली, (कृष्णं काष्ठं यस्य।) कालागुरु। इति राजनिर्घण्टः ॥ (अगुरुशब्देऽस्य विषयो ज्ञातव्यः ॥)

कृष्णकेलि, स्त्री, (कृष्णस्य केलिः क्रीडा यस्य चूडा इव पुष्पकलिका यस्याः।) स्वनामख्यातपुष्पवृक्षः। (अस्याः अन्यद्विवरणं कृष्णकलिशब्दे द्रष्टव्यम् ॥)

कृष्णकोहलः, पुं, (कृष्णकस्य कुत्सितकर्म्मणः ऊहं वितर्कं लाति गृह्णातीति। ला + कः।) द्यूतकृत्। इति त्रिकाण्डशेषः ॥

कृष्णगन्धा, स्त्री, (कृष्णः उग्रो गन्धो यस्याः।) शोभाञ्जनः। इति राजनिर्घण्टः ॥

("इमांस्त्रीनपरान् वृक्षानाहुर्येषां हितास्त्वचः।
पूतिकः कृष्णगन्धा च तिल्वकश्च तथातरुः ॥
विरेचने प्रयोक्तव्य पूतिकस्तिल्वकस्तथा।
कृष्णगन्धा परीसर्पे शोथेष्वर्शःसु चोच्यते" ॥

इति चरके सूत्रस्थाने १ अध्याये ॥

कृष्णगर्भः, पुं, (कृष्णः कृष्णवर्णो गर्भः अभ्यन्तरदेशो यस्य।) कट्फलः। इति राजनिर्घण्टः ॥

कृष्णचञ्चुकः, पुं, (कृष्णा चञ्चुरस्य। ततः कप्।) चणकः। इति राजनिर्घण्टः ॥

(चणकशब्दे विवरणमस्य ज्ञातव्यम् ॥)

कृष्णचतुर्द्दशी, स्त्री, (कृष्णा कृष्णपक्षसम्बन्धिनी चतुर्द्दशी।) कृष्णपक्षीयचतुर्द्दशी। तत्पर्य्यायः। भूतः २। इति त्रिकाण्डशेषः ॥

कृष्णचर, त्रि, (कृष्णस्य भूतपूर्व्वो गोः चरट्।) कृष्णस्य भूतपूर्व्वो गवादिः। इति मुग्धबोधम् ॥

कृष्णचूडा, स्त्री, (कृष्णस्य चूडेव पुष्पचूडा यस्याः।) स्वनामख्यातसकण्टकपुष्पवृक्षः। तस्य पत्र बक-

वृक्षदलवद्भवति । तस्य पुष्पं पीतरक्तवर्णं उपर्य्यधः स्थूलसूक्ष्मदशदलं दीर्घवृन्तं दशदीर्घकेशरमध्य ईषत्सद्गन्धयुक्तञ्च जायते । तत्फलं शिम्बीसदृशं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति । तदुत्पत्तिस्तस्य मूलतो बीजाच्च भवति इति लोकप्रसिद्धम् ॥

कृष्णचूडिका, स्त्री, (कृष्णा चूडा अग्रं यस्याः । ततः कप् ततष्टाप् अत इत्वञ्च ।) गुञ्जा । इति राजनिर्घण्टः ॥ (कुँच्फल इति भाषा ॥)

कृष्णचूर्णं, क्ली, (कृष्णस्य लोहस्य चूर्णम् । दग्धाल्लो-हाग्निःसृतकीट्टमित्यर्थः ।) लौहमलम् । इति राजनिर्घण्टः ॥

कृष्णजटा, स्त्री, (कृष्णा कृष्णवर्णा जटा यस्याः ।) जटामांसी । इति रत्नमाला ॥

कृष्णजीरकः, पुं, (कृष्णः कृष्णवर्णो जीरकः ।) कृष्ण-वर्णस्थूलजीरकः । केलेजीरा इति भाषा । तत्-पर्य्यायः । सुषवी २ कारवी ३ पृथ्वी ४ पृथुः ५ काला ६ उपकुञ्चिका ७ । इत्यमरः ॥ सुषवी ८ कुञ्चिका ९ । इति तट्टीकायां नयनानन्दः ॥ उपकुञ्चिः १० । इति रत्नमाला ॥ कृष्णा ११ जरणा १२ शाली १३ बहुगन्धा १४ । पृथुका १५ पृथिवी १६ भेषजम् १७ । इति शब्दरत्नावली ॥ अपि च ।

"कृष्णजीरं सुगन्धञ्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि ॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥
ज्वरघ्नं पाचनं बल्यं वृष्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफशोथजीर्णज्वरनाशित्वम् । रुचि-चक्षुर्हितकारित्वम् । ग्राहित्वञ्च । इति राज-निर्घण्टः ॥ स तु स्थूलसूक्ष्मभेदेन द्विधा ॥

कृष्णतण्डुला, स्त्री, (कृष्णास्तण्डुला बीजं यस्याः ।) कर्ण-स्फोटालता । इति राजनिर्घण्टः ॥

कृष्णताम्रं, क्ली, (कृष्णं ताम्रम् । "वर्णो वर्णेन" । २ । १ । ६९ । इति कर्म्मधारयः ।) गोशीर्षचन्दनम् । इति शब्दमाला ॥

कृष्णतारः, पुं, (कृष्णा तारा यस्य ।) हरिणः । इति राजनिर्घण्टः ॥

कृष्णत्रिवृता, स्त्री, (कृष्णा त्रिवृता ।) कृष्णवर्णा त्रिवृत् । काल तेउड़ी इति भाषा ॥ तत्पर्य्यायः । श्यामा २ पालिन्दी ३ कालमेषिका ४ काला ५ मसूरविदला ६ अर्द्धचन्द्रा ७ सुषेणिका ८ । इति जटाधरः ॥ (अस्या गुणा यथा,

कषायत्वम् । मधुरत्वम् । रूक्षत्वम् । विपाकेकटु-कत्वम् । कफपित्तप्रशमकारित्वम् । रूक्षत्वात् वात कोपनत्वञ्च ॥ इति चरके कल्पस्थाने ७ अध्याये ॥)

कृष्णदन्ता, स्त्री, (कृष्णाः कृष्णवर्णा दन्ताः शिखरदेशो यस्याः ।) काश्मरीवृक्षः । इति राजनिर्घण्टः ॥ (कृष्णदन्तविशिष्टे, त्रि । दन्तस्तु मद्यपानादिना कृष्णत्वं प्राप्नोति ॥)

कृष्णदेहः, पुं, (कृष्णः कृष्णवर्णो देहो यस्य ।) भ्रमरः । इति सारस्वतः ॥ कृष्णवर्णशरीरे, त्रि ॥

कृष्णद्वैपायनः, पुं, (द्वीपे भवः इत्यण् । यद्वा द्वीपः अयनं उत्पत्तिस्थानं यस्य । अश्वाद्यण् । कृष्णः स्वासौ द्वैपायनश्चेति ।) वेदव्यासः । इति त्रिकाण्ड-शेषः ॥ (यथा, महाभारते १ । १०५ । १२ ।

"ततस्तस्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन ! ।
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम्" ॥

अस्य यमुनाद्वीपोत्पत्तिकथा यथा तत्रैव १ । १०५ । ७—१४ ।

"धर्म्मयुक्तस्य धर्म्मार्थं पितुरासीत्तरी मम ।
सा कदाचिदहं तत्र गता प्रथमयौवने ॥
अथ धर्म्मविदां श्रेष्ठः परमर्षिः पराशरः ।
आजगाम तरीं धीमांस्तरिष्यन् यमुनां नदीम् ॥
स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा ।
सान्त्वपूर्व्वं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः ॥
तमहं शापभीता च पितुर्भीता च भारत ! ।
वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे ॥
अभिभूय स मां बालां तेजसा वशमानयत् ।
तमसा लोकमावृत्य नौगतामेव भारत ! ॥
मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः ।
तमपास्य शुभं गन्धमिमं प्रादात् स मे मुनिः ॥
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम् ।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि ॥
पाराशर्य्यो महायोगी स बभूव महानृषिः ।
कन्यापुत्त्रो मम पुरा द्वैपायन इति श्रुतः" ॥

अन्यत् विवरणादिकमस्य व्यासशब्दे द्रष्टव्यम् ॥)

कृष्णधत्तूरकः, पुं, (कृष्णवर्णो धत्तूरकः ।) कृष्णवर्ण-धुस्तूरः । कालधुतुरा इति भाषा । तत्पर्य्यायः । सिद्धः २ कनकः ३ सचिवः ४ शिवः ५ कृष्ण-पुष्पः ६ विषारातिः ७ क्रूरधूर्त्तः ८ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कान्तिकारित्वम् । व्रणा-र्त्तित्वग्दोषखर्ज्जुकण्डूतिज्वरभ्रमनाशित्वञ्च ॥ "सि-तनीलकृष्णलोहितपीतप्रसवाश्च सन्ति धत्तूराः । सामान्यगुणोपेतास्तेषु गुणाढ्यस्तु कृष्णकुसुमः स्यात्" ॥ इति राजनिर्घण्टः ॥

कृष्णपर्णी, स्त्री, (कृष्णवर्णानि पर्णानि यस्याः ।) कालतुलसी । इति रत्नमाला ॥

कृष्णपक्षः, पुं, (कृष्णस्तमसावृतश्चन्द्रक्षयात्मकः पक्षः ।) असितपक्षः । स तु प्रतिपदाद्यमावास्या-न्तानि पञ्चदश दिनानि । यथा, तिथ्यादितत्त्वम् ॥

"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि ।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षत्याद्यास्तु तिथयः क्रमात् पञ्चदश स्मृताः ।
दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्तास्तु शुक्लके" ॥

कृष्णपाकः, पुं, (पच्यतेऽसौ । पच + घञ् । पाकः फलम् । कृष्णः कृष्णवर्णः पाकः फलं यस्य ।) करमर्द्दः । इति शब्दरत्नावली ॥

कृष्णपाकफलः, पुं, (कृष्णपाकरूपं फलं यस्य ।) कर-मर्द्दकः । इत्यमरः । २ । ४ । ६७ ॥

कृष्णपिङ्गला, स्त्री, ("वर्णो वर्णेन" । २ । १ । ६९ । इति कर्म्मधारयः ।) दुर्गा । इति त्रिकाण्डशेषः ॥ (कृष्णपिङ्गलवर्णयुक्ते, त्रि ।

ॐ "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्द्धलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः" ॥)

कृष्णपिण्डीतकः, पुं, (कृष्णः पिण्डीतकः । नित्यकर्म्म-धारयः ।) वृक्षविशेषः । तत्पर्य्यायः । वराहः २ कृष्णपिण्डीरः ३ । इति रत्नमाला ॥

कृष्णपिण्डीरः, पुं, (कृष्णः पिण्डीरः ।) कृष्णपिण्डीत-कवृक्षः । इति रत्नमाला ॥

कृष्णपिपीली, स्त्री, (कृष्णा पिपीली ।) कृष्णवर्णपिपी-लिका । कालपिपीड़ा इति भाषा । तत्पर्य्यायः । स्थूला २ वृक्षवहा ३ । इति राजनिर्घण्टः ॥

कृष्णपुष्पः, पुं, (कृष्णं पुष्पं यस्य ।) कृष्णधत्तूरकः । इति राजनिर्घण्टः ॥ (कृष्णधत्तूरशब्देऽस्य पर्य्याया ज्ञेयाः ॥)

कृष्णपुष्पी, स्त्री, (कृष्णपुष्प + जातित्वात् ङीष् ।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

कृष्णफलः, पुं, (कृष्णम् उग्रं कुत्सितं वा फलं अस्य ।) करमर्द्दकः । इत्यमरटीकायां भरतः ॥

कृष्णफलपाकः, पुं, (कृष्णः फलरूपेण पाको यस्य ।) करमर्द्दकः । इति द्विरूपकोषः ॥

कृष्णफला, स्त्री, (कृष्णं फलं यस्याः ।) सोमराजी । इत्यमरः । २ । ४ । ९६ ॥ (कोलशिम्बी । आल्कुशी इति भाषा । छोट जाम इति भाषा । अस्याः पर्य्याया यथा ॥

"सूक्ष्मकृष्णफला जम्बूर्दीर्घपत्रा च मध्यमा" ॥

इति वैद्यकरत्नमालायाम् ॥ कोलशिम्बिः ॥ सुवरा शोण्डि इति भाषा ॥ अस्याः पर्य्यायाः । यथा,—

"कोलशिम्बिः कृष्णफला तथा पर्य्यङ्कपट्टिका" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णभूमः, पुं, (कृष्णा कृष्णवर्णा भूमिर्म्मृत्तिका यत्र देशे । समासे अच् ।) कृष्णवर्णमृत्तिकायुक्तो देशः । इति हेमचन्द्रः ॥

कृष्णभूमिजा, स्त्री, (कृष्णाया भूमेर्जायते इति । जन + ड । ततष्टाप् ।) गोमूत्रिकाटृणम् । इति राज-निर्घण्टः ॥

कृष्णभेदा, स्त्री, (कृष्णवर्णेन भेदश्छेदोऽस्याः ।) क-टुका । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा ॥

"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णभेदी, स्त्री, (कृष्णेन वर्णेन भेदोऽस्याः । गौरादि-त्वात् ङीष् ।) कटुकी । इत्यमरः । २ । ४ । ८६ ॥ (कटुकीशब्देऽस्या गुणपर्य्याया बोद्धव्याः ।)

कृष्णमुद्गः, पुं, (कृष्णः कृष्णवर्णो निकृष्टो वा मुद्गः वन-जातत्वात् ।) मुद्गविशेषः । कालमुग् इति भाषा । तत्पर्य्यायः । वासन्तः २ माधवः ३ सुराष्ट्रजः ४ । अस्य गुणाः । त्रिदोषदाहनाशित्वम् । मधुर-त्वम् । लघुत्वम् । दीपनत्वम् । पथ्यत्वम् । बल-

वीर्य्याङ्गपुष्टिदात्वञ्च । इति राजनिर्घण्टः ॥
(यथाह भावप्रकाशः ।
"मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः ।
स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ॥
मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा ।
श्वेतो रक्तश्च तेषान्तु पूर्व्वः पूर्व्वो लघुः स्मृतः ॥
सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः ।
चरकादिभिरप्युक्त एष एव गुणाधिकः" ॥)

कृष्णमूली, स्त्री, (कृष्णा मूलमस्याः । स्त्रियां ङीप् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

कृष्णमृत्, स्त्री, (कृष्णा मृत् मृत्तिका ।) कालमृत्तिका । तत्पर्य्यायः । श्यामभूमिः २ । अस्या गुणाः । क्षत-दाहास्रप्रदरश्लेष्मपित्तहरत्वम् । इति राजनिर्घण्टः ॥

कृष्णमृत्तिक, पुं, (कृष्णा मृत्तिका भूमिर्यत्र ।) कृष्णभूमः । इति हेमचन्द्रः ॥

कृष्णरुहा, स्त्री, (कृष्णा सती रोहतीति । रुह + कः ।) जतुका लता । इति राजनिर्घण्टः ॥

कृष्णरूप्य, त्रि, (कृष्णस्य भूतपूर्व्वा गौः भूतपूर्व्वो रूप्यः । कृष्णचरः । कृष्णस्य भूतपूर्व्वो गवादिः । इति मुग्धबोधव्याकरणम् ॥

कृष्णलक, पुं, (कृष्णो वर्णोऽस्त्यस्यार्द्धफले सिध्मादित्वात् लच् । ततः स्वार्थे कन् ।) गुञ्जा । परिमाणविशेषः । यथा, मनुः । ८ । १० ।
"पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥

कृष्णलवण, क्ली, (कृष्णं लवणम् ।) सौवर्च्चललवणम् । काचलवणम् । इति राजनिर्घण्टः ॥ (यथा, गारुडे १८४ अध्याये ।
"सैन्धवं कृष्णलवणं सौवीरं मत्स्यपित्तकम्" ॥
अस्य पर्य्याया यथा । वैद्यकरत्नमालायाम् ।
"रुचकं कृष्णलवणमक्षं सौवर्च्चलञ्च तत्" ॥)

कृष्णला, स्त्री, (कृष्णल + टाप् ।) गुञ्जा । इत्यमरः । २ । ४ । ९८ ॥ (क्ली, परिमाणविशेषः ।
यथा, मनुः । ८ । १३४ ।
"सर्षपाः षट् यवो मध्यस्त्रियवन्त्वेककृष्णलम् ।
पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥
अस्य टीकायां कुल्लूकभट्टेन यद्व्याख्यातं तद्यथा ।
"गौरसर्षपाः षट् मध्यो न स्थूलो नापि सूक्ष्मो यवो भवति । त्रिभिर्यवैः कृष्णलं रक्तिकेति प्रसिद्धं पञ्चभिः कृष्णलैर्माषाः षोडशमाषाः सुवर्णः स्यात्" ॥
अस्याः पर्य्याया यथा ।
"साकुरुण्डा कृष्णला गुञ्जा रक्तिका काकणन्तिका ।
काकादनी काकतिक्ता काकजङ्घा शिखण्डिनी" ॥
इति वैद्यकरत्नमालायाम् ॥)

कृष्णलोह, क्ली, (कृष्णं लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥
("त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलश्चेति" ॥ इति सुश्रुते सूत्रस्थाने । ३६ अध्याये ॥)

कृष्णलोहित, पुं, (कृष्णो लोहितश्च । "वर्णो वर्णेन" २ । १ । ६९ । इति समासः ।) कृष्णरक्तमिश्रवर्णः । धूम्रवर्णः । तद्वति त्रि । इत्यमरः २।५।१६ ॥

कृष्णवक्त्र, पुं, (कृष्णं कृष्णवर्णं वक्त्रं मुखं यस्य ।) वानरः । इति हलायुधः ॥

कृष्णवर्त्मा, [न्] पुं, (कृष्णं कृष्णवर्णं वर्त्म यस्य । वायुप्रसारितधूमपथाभ्यन्तर एव गतिरस्येति भावः ।) अग्निः । (यथा, महाभारते १ । ८५ । १२ ।
"हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ।) चित्रकवृक्षः । इत्यमरः ॥ (कृष्णम् अपवित्रं कर्म्म आचरणं यस्य ।) दुराचारः । राहुः । इति मेदिनी ॥ (कृष्णः वासुदेवः परब्रह्म इत्यर्थः वर्त्म गतिर्यस्य । ब्रह्मनिष्ठपुरुषः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कृष्णवल्ली, स्त्री, (कृष्णा वल्ली ।) कृष्णार्जकः । इति शब्दचन्द्रिका ॥ शारिवाविशेषः । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा ।
"कृष्णार्ज्जकः कृष्णवल्ली कालमालः करालकः" ॥
इति वैद्यकरत्नमालायाम् ॥)

कृष्णवल्लिका, स्त्री, (कृष्णा वल्लिका ।) जतुका लता । इति राजनिर्घण्टः ॥

कृष्णवर्व्वरक, पुं, (कृष्णः वर्व्वरकः ।) वर्व्वरवृक्षः । इति राजनिर्घण्टः ॥
(वर्व्वरशब्देऽस्य विवृतिर्ज्ञेया ॥)

कृष्णवानर, पुं, (कृष्णः वानरः ।) कालवानरः । तत्पर्य्यायः । गोलाङ्गूलः २ गौरास्यः ३ कपिः ४ कृष्णमुखः ५ । इति राजनिर्घण्टः ॥

कृष्णवीज, क्ली, (कृष्णं वीजं यस्य ।) कालिङ्गम् । इति राजनिर्घण्टः ॥ (कालिन्द तरवूज इति लोके । अस्य पर्य्याया गुणाश्च यथा ।
"कालिन्दः कृष्णवीजः स्यात् कालिङ्गश्च सुवर्त्तुलम् ।
कालिन्दं ग्राहि दृक्शुक्रपित्तघ्नं शीतलं गुरु ।
पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णवीजः, पुं, (कृष्णं उग्रं वीजं यस्य ।) रक्तशिग्रुवृक्षः । इति जटाधरः ॥

कृष्णवृन्ता, स्त्री, (कृष्णं वृन्तं अस्याः ।) पाटलावृक्षः । इत्यमरः । २।४।५५ ॥ (अस्याः पर्य्याया यथा ।
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुवेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता" ॥
इति च तस्य पूर्व्वखण्डे प्रथमे भागे ॥)
माषपर्णी । इति मेदिनी (अस्याः पर्य्याया यथा ।
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा ।
कृष्णवृन्ता च काम्बोजी पाण्डुलोमशपर्णिनी" ॥
इति वैद्यकरत्नमालायाम् ॥ * ॥ गम्भारीवृक्षः ।
अस्य पर्य्याया यथा ।
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकाऽपि च" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्याः पाटलामाषपर्णीगम्भारीशब्देषु व्याख्येयाः ॥)

कृष्णवृन्तिका, स्त्री, (कृष्णं वृन्तं अस्याः ततः संज्ञायां कन् ततष्टाप् अत इत्वञ्च ।) गम्भारीवृक्षः । पेटिकावृक्षः । इति रत्नमाला ॥

कृष्णशार, पुं, (कृष्णः शारः शवलश्च ।) कृष्णसारमृगः । इत्यमरटीकायां रमानाथः ॥

कृष्णशालि, पुं, (कृष्णः शालिर्धान्यविशेषः ।) कालधान इति भाषा । तत्पर्य्यायः । कालशालिः २ श्यामशालिः ३ सितेतरः ४ । अस्य गुणाः । त्रिदोषदाहनाशित्वम् । मधुरत्वम् । पुष्टिवीर्य्यवर्द्धनत्वम् । वर्णकान्तिबलकारित्वञ्च । इति राजनिर्घण्टः ॥

कृष्णशिग्रु, पुं, (कृष्णः रूक्षगुणयुक्तः शिग्रुः ।) शोभाञ्जनवृक्षः । इति राजनिर्घण्टः ॥

कृष्णशिम्बिका, स्त्री, (कृष्णा कृष्णवर्णा शिम्बिका कुत्सिता शिम्बिका वा ।) कृष्णवर्णशिम्बी । कालशिम इति भाषा । तत्पर्य्यायः । काकाक्षी २ । इति रत्नमाला ।
(अस्या गुणा शाम्भाशीशब्दे ज्ञातव्या ।
"सितासिता पीतकरक्तवर्णा
भवन्ति येऽनेकविधास्तु शिम्बाः ।
यथोदितास्ते गुणतः प्रधाना
ज्ञेया कटूष्णा रसपाकयोश्च" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कृष्णशृङ्ग, पुं, (कृष्णं शृङ्गं विषाणो यस्य ।) महिषः । इति हेमचन्द्रः ॥

कृष्णसख, पुं, कृष्णस्य सखा । ("राजाहःसखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) अर्ज्जुनः । इति मुग्धबोधव्याकरणम् ॥ (अर्ज्जुनवृक्षः ॥)

कृष्णसखी, स्त्री, (कृष्णस्य सखी । द्रौपदी । सा तु पञ्चपाण्डवमहिषी पञ्चालराजदुहिता । कृष्णस्य सखी सहचरी इव कृष्णवर्णत्वात् ।) जीरकः । इति शब्दचन्द्रिका ॥

कृष्णसर्षप, पुं, (कृष्णः कृष्णवर्णः सर्षपः ।) राजसर्षपः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।
"क्षवः क्षताभिजनकः क्षमिकृत् कृष्णसर्षपः" ॥
अस्य गुणाश्च ।
"अति तीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णसार, पुं, (कृष्णश्चासौ सारः शवलश्चेति ।) हरिणभेदः । इत्यमरः । २ । ४ । १० । कालसार इति भाषा ॥ (यथा, मनौ २ । २३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः" ॥)
अस्य मांसगुणाः । संग्राहित्वम् । रुचिबलकारित्वम् । ज्वरनाशित्वञ्च । इति राजवल्लभः ॥ स्नुहीवृक्षः । शिंशपावृक्षः । इति मेदिनी ॥ खदिरवृक्षः । इति शब्दरत्नावली ॥

कृष्णसारङ्ग पुं, कृष्णवर्णः सारङ्गो मृगः । कृष्णसारः ।
(यथा, कात्यायनश्रौतवचने । ७ । ९ । २१ ।
"कृष्णसारङ्गमेध्यमभावे लोहितसारङ्गम्" ।
तथा, शतपथब्राह्मणे । ३ । ३ । ४ । २१ । "कृष्णसारङ्गः स्यादित्याह यदि कृष्णसारङ्गं न विन्देत अथो अपि लोहितसारङ्गम्" । "कृष्णसारङ्गः श्यामशवल" । इति भाष्यम् । पक्षे परजन्तु ।
यथा, "कृष्णः नित्यनिर्व्वाणरूपः तदङ्गं तस्य

यदि चेत् न विन्देत लभेत तथो अपि तर्हि कोहितसारकं सगुणमाव उपासीत इत्यर्थः ॥)

कृष्णसारथिः, पुं, अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥ (कृष्णः सारथिः युद्धे सहायोऽस्य इति विग्रहे ।) पार्थः । (स तु तृतीयपाण्डवः । भारतीयमहायुद्धे पार्थप्रार्थनया श्रीकृष्णस्य तत्सारथ्याङ्गीकार । यथा, महाभारते । ५ । ७ । ३५-३८ ।

अर्ज्जुन उवाच ।

"भवान् समर्थस्तान् सर्व्वान् निहन्तुं नात्र संशयः ।
निहन्तुमहमप्येकः समर्थः पुरुषर्षभ ! ॥
भवांस्तु कीर्त्तिमान् लोके तद्यशस्त्वां गमिष्यति ।
यशसा चाहमप्यर्थी तस्मादसि मया वृतः ॥
सारथ्यन्तु त्वया कार्य्यं इति मे मानसं सदा ।
चिररात्रेप्सितं कामं तद्भवान् कर्त्तुमर्हति ॥

वासुदेव उवाच ।

उपपन्नमिदं पार्थ । यत् स्पर्द्धेया मया सह ।
सारथ्यं ते करिष्यामि कामः सम्पद्यतां तव" ॥)

कृष्णसारा, स्त्री, (कृष्णसार+अजादित्वात् टाप् ।) शिंशपावृक्षः । इति रत्नमाला ॥ (अस्याः पर्य्याया यथा,
"शिंशपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः ।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णस्कन्धः, पुं, (कृष्णः कृष्णवर्णः स्कन्धो यस्य ।) कालस्कन्धः । तमालवृक्षः । इत्यमरटीकायां भरतः ॥

कृष्णा, स्त्री, (कृषि नक् ताल ततः टाप् ।) द्रौपदी । (सा तु पञ्चपाण्डवमहिषी । कृष्णवर्णत्वादेव अस्या नाम तथा जातम् । यथा, महाभारते १ । १६८ । ४४ ।
"कृष्णेत्येवाभुवन् कृष्णा कृष्णाऽभूत् सा हि वर्णतः ।
तथा तज्जिमिथुनं यज्ञे द्रुपदस्य महामखे" ॥)
नीलीवृक्षः । पिप्पली । (अस्याः पर्य्याया यथा ।
"पिप्पली चपला शौण्डी वैदेही मागधी कणा ।
कृष्णोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला" ॥
इति वैद्यकरत्नमालायाम् ॥) द्राक्षा । इति मेदिनी ॥ शीघ्रपुनर्नवा । कृष्णजीरकः । गम्भारी । कटुका । सारिवाविशेषः । राजसर्षपः । इति राजनिर्घण्टः ॥ पर्पटी । इति भावप्रकाशः ॥ काकोली । सोमराजी । इति जटाधरः ॥ (द्वादशप्रकाराणां जलौकसां मध्ये सविषप्रकारीयजलौकोविशेषः । तस्य लक्षणं यथा ।
"वालाञ्जनचूर्णवर्णा पृथुशिरा कृष्णा" ॥
इति सुश्रुते सूत्रस्थाने १३ अध्याये ॥)

कृष्णागुरु, क्ली, (कृष्णा कृष्णवर्णं अगुरु ।) कृष्णवर्णसुगन्धिकाष्ठविशेषः । तत्पर्य्यायः । अगुरु २ प्रवरम् ३ विश्वरूपकम् ४ शीर्षम् ५ कालागुरु ६ कोसम् ७ वसुकम् ८ कृष्णकाष्ठम् ९ धूपार्हम् १० वक्तरम् ११ मिश्रवर्णम् १२ गन्धम् १३ । (यथा, भविष्यपुराणे आत्मतत्त्वोपदेशे ।
"विलिप्य कृष्णागुरुणा वाजपेयफलं लभेत्" ॥)
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । लेपे शीतलत्वम् । पाने पित्तहरत्वम् । केषाञ्चित् मते त्रिदोषघ्नत्वम् । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः । अथ अगुरु कृष्णागुरु ।
"अगुरुप्रवरं लोहं राजार्हं योङ्गजं तथा ।
वंशिकं कृमिजं चापि कृमिजग्धमनार्य्यकम् ।
अगुरूष्णं कटु लघ्वं तिक्तं तीक्ष्णञ्च पित्तलम् ॥
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ॥
कृष्णं गुणाधिकं तत्तु लौहवद्वारि मज्जति ।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः" ॥
इति भावप्रकाशः ॥

कृष्णाचल, पुं, (कृष्णस्य प्रिय अचलः पर्व्वतः । तद्वसतेस्तथात्वम् ।) रैवतपर्व्वतः । इति जटाधरः ॥ (अस्मिन्नेव गिरौ भगवतः कृष्णस्य द्वारकाधाम । इति पुराणप्रसिद्धम् ॥)

कृष्णाञ्जनी, स्त्री, (अज्यतेऽनया इति । अनज्+करणे ल्युट् ततो ङीप् । कृष्णा कृष्णवर्णा अञ्जनी ।) कालाञ्जनीवृक्षः । इति राजनिर्घण्टः ॥

कृष्णानदी, स्त्री, (कृष्णा इत्याख्याता नदी ।) नदीभेदः । तत्पर्य्यायः । कृष्णसमुद्भवा २ कृष्णवेण्णा ३ कृष्णगङ्गा ४ । (यथा, महाभारते ६ । ९ । ३३ ।
"सदा निरामया कृष्णा मन्दगा मन्दवाहिनीम्" ॥)
अस्य जलगुणाः । स्वच्छत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥

कृष्णाभा, स्त्री, (कृष्णा सती आभाति । आ+भा+कः । ततष्टाप् ।) कालाञ्जनी । इति राजनिर्घण्टः ॥

कृष्णामिषं, क्ली, (कृष्णं कृष्णेन इत्यर्थः आमिषति स्पर्द्धते वर्णेन । आ+मिष्+क ।) कृष्णायसम् । इति हेमचन्द्रः ॥

कृष्णायसं, क्ली, (कृष्णं काल आयसम् ।) स्वार्थे अण् ।) तत्पर्य्यायलौहम् । इति रत्नमाला ॥

कृष्णार्चिः, [स्] पुं, (कृष्णं कृष्णवर्णं अर्च्चिर्यस्य कृष्णवर्णधूमेन सह अर्च्चिर्यस्येति वा ।) अग्निः । इति भूरिप्रयोगः ॥

कृष्णार्जकः, पुं, (कृष्णः अर्जकः वमवर्व्वरः ।) कालतुलसी । तत्पर्य्यायः । कालमालः २ मालूकः ३ कृष्णमालुकः ४ कृष्णमल्लिका ५ गरघ्नः ६ वनवर्व्वरः ७ वर्व्वरी ८ जाति ९ ।
(अन्ये पर्य्याया यथा, वैद्यकरत्नमालायाम् ॥
"कृष्णार्ज्जकः कृष्णवल्ली कालमालः करालकः" ॥)
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयनेत्ररोगनाशित्वम् । रुचिसुखप्रसवकारित्वञ्च । इति राजनिर्घण्टः ॥

कृष्णालुः, पुं, (कृष्णः कृष्णवर्णः आलुः ।) नीलालुः । इति राजनिर्घण्टः ॥

कृष्णावासः, पुं, (आवसत्यस्मिन् इति । आ+वस्+अधिकरणे घञ् । कृष्णस्य आवासः आलयः ।) अश्वत्थवृक्षः । इति हेमचन्द्रः ॥ (रैवतपर्व्वतः ॥ इति भारतम् ॥ अश्वत्थशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कृष्णाश्रित , त्रि, (कृष्णं आश्रितः प्राप्ताश्रयः ।) यस्य आश्रयः कृष्णः सः । इति मुग्धबोधम् ॥

कृष्णिका, स्त्री, (कृष्णैव इति । कृष्णा+संज्ञायां कन् टाप् अत इत्वम् । यद्वा, कृष्णवर्णो भूम्नाऽस्त्यस्य इति ठन् टाप् च ।) राजिका । इत्यमरः । २ । ९ । १९ ॥ राइ सर्षां इति भाषा ॥
("कृष्णिका राजिकासुरी कुलको राजसर्षपः" ॥
इति वैद्यकरत्नमालायाम् ॥)
श्यामापक्षिणी । तस्या नामानि यथा,
"श्यामा वराही शकुनी कुमारी
दुर्गा च देवी घटिका तथोमा ।
त्वं पोतकी माण्डविका त्वमेव
त्वं कृष्णिका त्वमितपक्षिणी च ॥
त्वं ब्रह्मपुत्री शकुनैकदेवी
धनुर्द्धरी मांसमसूहमाता ।
प्रत्यक्षरूपा भगवत्यहोमा
नमोऽस्तु तुभ्यं कुरु मेऽर्थसिद्धिम्" ॥
इति वसन्तराजशाकुनम् ॥

कृष्णेक्षु, पुं, (कृष्णः कृष्णवर्णः इक्षुः ।) इक्षुभेदः । काजली आक् इति भाषा । तत्पर्य्यायः । श्यामेक्षु २ कोकिलेक्षुकः ३ कोकिलाक्षः ४ कान्तारकः ५ । इत्यमरः ॥ अस्य गुणाः । तिक्तत्वम् । पाके मधुरत्वम् । स्वादुत्वम् । सुस्वादुत्वम् । कटुत्वम् । रसाद्यत्वम् । त्रिदोषहारित्वम् । समवीर्य्यं वङ्गवीर्य्यसुवर्णादाढ्यत्वञ्च । इति राजनिर्घण्टः ॥ अस्य भावप्रकाशोक्तगुणाः कान्तारशब्दे द्रष्टव्याः ॥

कृष्णोदुम्बरिका, स्त्री, (कृष्णस्य काकस्य प्रिया उदुम्बरिका । यद्वा कृष्णा कृष्णवर्णा उदुम्बरिका ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

कृसर, पुं, (कृ हृ ञ् करणे+"कृधूमादिभ्यः कित्" । उणा ३ । ७३ । इति सरन् किच । बाहुलकात् न सत्वम् ।) कृशरः । इति जटाधरः ॥
(यथा, छन्दोगपरिशिष्टे—
"तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते" ॥
खिचुडी इति भाषा । यथा, च मनौ ५ । ७ ।
"वृथा कृसरसंयावं पायसापूपमेव च ।
अनुपाकृतमांसानि देवान्नानि हवींषि च" ॥)

कॄ, श विक्षेपे । इति कविकल्पद्रुमः ॥ (तुदा परसक-सेट् ।) श, किरति । अस्यापि निष्ठायां कीर्णं इति । सूत्राद्योदिदित्यत्र मूर्च्छवर्जनसामर्थ्यात् येन केनापि प्रकारेण रेफान्तान्निष्ठातस्य न इति व्याख्यानात् ऋदिरणाविति इरि उरि च कृते रान्तत्वात् निष्ठा तस्य न स्यात् । एवं गॄ श निगरणे इत्यादेरपि गीर्णं इत्यादि बोध्यम् । इति दुर्गादासः ॥

कॄ, ञ गि हिंसे । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-सक-सेट् ।) ञ गि, कृणाति कृणीते । कीर्णः किरिणिः । इति दुर्गादासः ॥

कॄ, क ङ विज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सक-सेट् ।) क ङ, कारयते । इति दुर्गादासः ॥

कॄत्, क शब्दे । इति कविकल्पद्रुमः ॥ (चुरां-पर-सकं-सेट् ।) दीर्घी । क, कीर्त्तयन्ति च

गोष्ठीषु दृष्टा ज्ञानप्रयोगाः। क्रीणादेशस्य नित्यत्वेऽपि कृतपाठः कीर्णादेशस्य व्यभिचारज्ञापनार्थं तेन व्यधीक्रतदिति सिद्धम्। इति दुर्गादासः॥

क्लृप्त, त्रि, कल्पनार्थकृपधातोः कर्म्मणि क्ते कृपादेशः। नियतः। कृतकल्पनः। कल्पनं सामर्थ्यं सदिविग्रहः। यथा, "अवशम्क्लृप्ताभि पर्व्वतस्यचलत्स्यादितयाऊर्म्मावच्छिन्नाधिकारगताय्याभिरेवोपपत्तौ"। इति जगदीशः। (यथा, मनौ। ११। २७।

"इष्टिं वैश्वानरीं नित्यं निर्व्वपेदब्दपर्य्यये।

क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे" ॥)

क्लृप्तकीला, स्त्री, (क्लृप्त कीलयति। कील्+ "कर्म्मण्यण्"। ३। २। १। इति अण्।) व्यवस्थापत्रम्। तत्पर्य्यायः। पट्टोलिका २। इति त्रिकाण्डशेषः॥

क्लृप्तधूप, पुं, (क्लृप्त कृत धूपो येन गन्धद्रव्यविशेषेण।) सिह्लकः। इति जटाधरः। (क्लृप्तश्चासौ धूपश्चेति विग्रहे कृत्रिमो धूपः॥)

क्लृप्तिक, त्रि, (क्लृप्त मूल्यदानेन सत्त्वं देयत्वेनास्त्यस्य। क्लृप्त + ठन्।) क्रीतः। इति हलायुधः॥

केकय, पुं, (केकयस्तदाख्यया प्रसिद्धः प्रदेशो राज्यत्वेनास्त्यस्य।) सूर्य्यवंशीयराजविशेषः। इति श्रीभागवतम्॥ (स तु केकयदेशाधीश्वरः दशरथश्वशुरश्च। यथा, रामायणे १। १२। २३।

"तथा केकयराजानं वृद्धं परमधार्म्मिकम्।

श्वशुरं राजसिंहस्य सपुत्त्रन्तमिहानय" ॥

जनपदवाचे तु बहुवचनान्तः। यथा, महाभारते। ६। जम्बूखण्डविनिर्म्माणपर्व्वणि ९। ४८।

"उपावृत्तानुपावृत्ताः सुराष्ट्राः केकयास्तथा" ॥)

केकयी, स्त्री, (केकयस्यापत्यं स्त्री। यद्यपि मानाभावात् केकयाज्जन्यजनकभावेऽपि पुंयोगः इति पुंयोगादाख्यायां ङीष्।) दशरथराजपत्नी। सा तु केकयराजपुत्त्री भरतमाता च। इति शब्दरत्नावली॥ (यथा, रामायणे।

"सत्कृत्य केकयीपुत्त्रं केकयो धनमादिशत्" ॥)

केकर, त्रि, (के शिरसि मूर्द्ध्नि इत्यर्थः करं नेत्रतारां शीलमस्य। "कृञो हेतुताच्छील्यानुलोम्येषु"। ३।२।२०। इति टः। "हलदन्तात् सप्तम्याः संज्ञायाम्" ।६।३।९। इत्यलुक्॥) वलीरः। इत्यमरः। २। ६। ४९॥ टेरा इति भाषा। (यथा, मनौ।

"पित्रा विवदमानश्च केकरो मद्यपस्तथा" ॥

चतुर्वर्णात्मकमन्त्रः॥ यथा, विश्वसारतन्त्रे। "चतुर्वर्णस्तु केकरः" ॥)

केका, स्त्री, (के मूर्द्ध्नि कायति। कै + कः टाप्। अलुक् समासः। यद्वा, अन्येभ्योऽपीति कर्म्मणि डः। "हलदन्तात् सप्तम्याः संज्ञायाम्"। ६। ३। ९। इत्यलुक्।) मयूरवाणी। इत्यमरः। २। ५। ३१॥ (यथा, रघौ १। ३९।

"षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः" ॥)

केकावल, पुं, (केका ध्वनिविशेषं वलते वृणातीति। केका + वल् + अच्। यद्वा, केका + अस्त्यर्थे साऊलकात् वलच् प्रत्ययः।) मयूरः। इति शब्दचन्द्रिका॥

केकी, [न्] पुं, (केका ध्वनिभेदः अस्यास्तीति। ब्रीह्यादित्वेति इनिः।) मयूरः। इत्यमरः। २। ५। ३०॥ (यथा, काशीखण्डे। ३। ७१।

"केकी केकां परित्यज्य मौनं तिष्ठति गह्वरात्।

चकोरश्चन्द्रिकाभोक्ता नाभ्रान्तमिवाश्रितः" ॥)

केकेयी, स्त्री, (केकयी पृषोदरात् एकारागमः।) केकयी। इति शब्दरत्नावली॥

केचन, अव्य, (पाणिनिमते पदद्वयम्। मुग्धबोधमते "किमः णचन्ताश्चिचनौ"। इति चनप्रत्ययः।) केचित्। इति व्याकरणम्॥

(यथा, पञ्चदश्यां। ९। ५९।

"पूर्व्वापरपरामर्शविकलास्तत्र केचन" ॥)

केचित्, अव्य, (पाणिनिमते पदद्वयम्। मुग्धबोधमते तु "किमः णचन्ताश्चिचनौ"। इति चित् प्रत्ययः।) केचन। इति व्याकरणम्। कोन व्यक्तिरा इति भाषा॥ (यथा, रामगीतायाम्। १४। "केचिद् वदन्तीति वितर्कवादिनः"। केचित्काशापकोविदाः। इति रामतर्कवागीशः॥)

केचुक, स्त्री, (कचु + स्वार्थे कन्। पृषोदरात् एत्वे साधु।) कचु। इति त्रिकाण्डशेषः॥

केणिका, स्त्री, (के शिरसि कुत्सितो वा अणकः सन् टाप् अत इत्वम्। स्वीत्वं लौकिकम्।) पटकुटी। इति हेमचन्द्रः॥ कानात् इति भाषा॥

केत, तृ क मन्त्रणे। निमन्त्रणे। इति कविकल्पद्रुमः॥ (अदन्तचुरां—पर-सक-सेट्। मन्त्रणे निमन्त्रणे। अचिकेतत्। निमन्त्रणं समयोद्धापनम्। इति दुर्गादासः॥

केतक, पुं, (कितनिवासे + ण्वुल्।) केतकीवृक्षः। इति त्रिकाण्डशेषः॥ (यथा, रघुः ९। १७।

"विनानिभीतिम्नमदन्तपत्र-

मापाण्डुरं केतकबर्हमन्यः" ॥

अस्य पर्य्याया गुणाश्च यथा,—

"केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः"।

"केतकः कटुकः स्वादुर्लघुस्तिक्तः कफापहः"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

केतकी, स्त्री, (केतक + गौरादित्वात् ङीष्।) पुष्पवृक्षविशेषः। केया इति भाषा॥

(यथा, भ्रमराष्टके। १।

"गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा

पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात" ॥)

तत्पर्य्यायः। सूचीपुष्पः २ हलीनः ३ जम्बुलः ४। इति रत्नमाला॥ केतकः ५ सूचिकापुष्पः ६ जम्बुकः ७ क्रकचच्छदः ८। इति भावप्रकाशः॥ तीक्ष्णपुष्पा ९ विफला १० धूलिपुष्पिका ११ मेध्या १२ कण्टदला १३ शिवद्विष्टा १४ नृपप्रिया १५ क्रकचा १६ दीर्घपत्रा १७ स्थिरगन्धा १८ गन्धपुष्पा १९ इन्दुकलिका २० दलपुष्पा २१ पांशुला २२। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। कफनाशित्वम्। कटुत्वम्। लघुत्वञ्च॥ तत्पुष्पगुणाः। वर्ण्यत्वम्। केशदौर्गन्ध्यनाशित्वञ्च॥ हैमाभायास्तस्या गुणाः। मदनोन्मादकत्वम्। हृद्यत्वम्। सौख्यकारित्वञ्च॥ तस्याः स्तनगुणाः। अति-

शिशिरत्वम्। कटुत्वम्। पित्तकफापहत्वम्। रसायनत्वम्। वर्णदेहदार्ढ्यकारित्वञ्च। इति राजनिर्घण्टः॥

केतन, क्ली, (कित् निवासादर्थेषु + कर्म्मभावकरणाधिकरण्यादिषु यथायथं ल्युट्।) ध्वजः। (यथा, रघुवंशे ९। ३९।

"अपतुषारतया विशदप्रभैः

सुरतसङ्गपरिश्रमनोदिभिः।

कुसुमचापमतेजयदंशुभि-

र्हिमकरो मकरोर्जितकेतनम्" ॥)

कार्य्यम्। निमन्त्रणम्। इत्यमरः। ३। ३। ११३।

(यथा, मनुः। ४। ११०।

"प्रतिगृह्य द्विजो विद्वान् एकोद्दिष्टस्य केतनम्।

त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके" ॥)

चिह्नम्। गृहम्। इति हेमचन्द्रः।

(यथा, रामायणे १। ७४। ८।

"स स धर्म्मपरो भूत्वा काश्यपाय वसुन्धराम्।

दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः" ॥)

स्थानम्। इति शब्दरत्नावली॥

(यथा, विष्णुपुराणे १। ११। ९।

"एतद्राजासनं सर्व्वभूभृत्संश्रयकेतनम्" ॥)

केतु, पुं, ग्रहचक्रान्तर्गतग्रहविशेषः। स तु राहोः शरीरम्। तत्पर्य्यायः। शिखी २। इति दीपिका॥ अयं पापग्रहः। यथा,—

"वर्द्धी नेन्द्वर्कसौरारा पापाः सौम्यास्तथापरे।

पापयुक्तो बुधः पापो राहुकेतू च पापदौ"॥ इति॥

अयन्तु जन्मराश्यपेक्षया षष्ठत्रिदशमैकादशस्थानस्थितश्चेत् शुभः। यथा,—

"केतूपग्रहभौममन्दगतयः षष्ठत्रिसंख्याः शुभा

स्वन्द्रार्कावपि ते च तौ च दशमौ चन्द्रः पुनः सप्तमः।

जीवः सप्तनवद्वियुग्मगतो युग्मेषु सोमात्मजः

शुक्रः षड्दशसप्तवर्जमितरे सर्व्वेऽप्युपान्त्ये शुभाः"।

इति॥ *॥ अस्य त्रिकोणोच्चस्वगृहशत्रुमित्रसमनीचा यथा,—

"सिंहस्त्रिकोणं धनुरुच्चसद्म

मीनो गृहं शुक्रशनी विपक्षौ।

सूर्य्यारचन्द्राः सुहृदः समानौ

जीवेन्दुजौ षट् शिखिनः पराशः"। इति।

"स्वोच्चाच्च सप्तमं नीचं प्राग्वद्भावैर्विनिर्द्दिशेत्"।

इति। *॥ अस्य रिष्टिर्यथा,—

"केतुर्यस्मिन्नृक्षेऽभ्युदितस्तस्मिन् प्रसूयते जन्तुः।

रौद्रे सर्पमुहूर्त्ते वा प्राणैः सत्यज्यते चाशु"।

इति च ज्योतिस्तत्त्वम्॥ *॥ अस्य दशाफलं केरलीनामग्रन्थे द्रष्टव्यम्॥ *॥ अथातः केतुचाराध्यायो व्याख्यायते। तत्रादावेवागमप्रदर्शनार्थमाह।

"गार्गीयं शिखिचारं पराशरमसितदेवलकृतञ्च।

अन्यांश्च बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः"।

गार्गीयं गर्गप्रोक्तं केतूनां चारं तद्वत् पराशरेण कृतं असितनामाचार्य्येण कृतं देवलविरचितं एतान् केतुचारान् अवलोक्य तथान्यानपि काश्यपवृद्धगर्गपुत्त्रनारदवज्रादिरचितान् बहून् दृष्ट्वा मया अयं

अनाकुलो निःसन्देहः केतुचारः क्रियते ॥ * ॥

अथोदयास्तमयलक्षणं आह ।

"दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् । दिव्यान्तरीक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्" ॥

अस्य केतोर्दर्शनं उदयः अस्तमयोऽदर्शनं गणितविधानेन ज्ञातुं न शक्यते । यस्मात् केतवस्त्रिविधास्त्रिप्रकाराः । दिवि आकाशे भवा दिव्याः । अन्तरीक्षे भवा आन्तरीक्षाः । ग्रहनक्षत्रस्थानं विहायान्यत्र आकाशे ये दृश्यन्ते ते आन्तरीक्षाः । भूमौ भवाः भौमाः । इति हेतोरुत्पातरूपत्वात् एषामुदयास्तमयौ न ज्ञायेते इति ॥ * ॥

अथ केतूनां दिव्यवर्ज्जितानां अन्येषां स्वरूपमाह ।

"अकृताशेऽनलरूपं यस्मिंस्तत्केतुरूपमेवोक्तम् ।
खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य" ॥

अकृताशे अनलवर्ज्जिते यस्मिन् देशे अनलरूपमग्निरूपं दृश्यते यत् तदेव केतुरूपमुक्तम् । किन्तु खद्योत इन्द्रगोपकः कृमिविशेषः । पिशाचालय यक्षस्थानम् । मणयश्चन्द्रकान्तप्रभृतयः । रत्नानि मरकतप्रभृतीनि । आदिग्रहणादन्यान्यपि काष्ठप्रभृतीनि तेजोरूपाणि एतान् त्यक्त्वा । यत एषां स्वभावादेवानलरूपमकृताशे दृश्यते अतो न तत् केतुरूपमिति ॥ * ॥

अथ दिव्यान्तरीक्षभौमानां केतूनां लक्षणमाह ।

"ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वान्तरीक्षास्ते ।
दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः" ॥

ध्वजश्चिह्नम् । शस्त्रमायुधादि । भवनं गृहम् । तरुर्वृक्षः । तुरगोऽश्वः । कुञ्जरो हस्ती । आदिग्रहणादन्येषु चतुष्पदेषु ये दृश्यन्ते ते आन्तरीक्षाः । दिव्या नक्षत्रस्थाः । अतोऽस्मादुक्तादन्यथा भूमौ ये दृश्यन्ते ते भौमाः । शिखिनः केतवः इति ॥ * ॥

अथ केतूनां सङ्ख्यानं मतान्तरेणाह ।

"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम्" ॥

एके पराशरादयः एकाधिकं शतं केतूनां कथयन्ति । तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोडश मृत्युनिश्वासजाः । द्वादशादित्यसम्भवाः । दश दक्षमखविजयने रुद्रक्रोधजाः । सप्त पैतामहाः । पञ्चदश ऋषेरौद्दालिकस्य पुत्राः । सप्तदश मरीचिकश्यपललाटजाः । पञ्च च प्रजापतिसहजाः । त्रयो विभावसुजाः । धूमोद्भवश्चैकः । चतुर्दश मथ्यमानेऽमृते सोमेन सह सम्भूताः । एकस्तु ब्रह्मकोपजः" इति ॥ * ॥ अपरे गर्गादयः सहस्रं केतूनां वदन्ति ।

तथा च गर्गः ।

"अनित्योदयचाराणामशुभानाञ्च दर्शनम् ।
आगन्तूनां सहस्रं स्यात् ग्रहाणां सन्निवेश मे" ॥

बहुरूपमेकमेवेति नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । तन्मते एक एव केतुस्तस्य बहूनि रूपाणि स एव दिव्यान्तरीक्षभौम इत्यर्थः ।

तथा च नारदः ।

"दिव्यान्तरीक्षभौमस्य एकः केतुः प्रकीर्त्तितः ।
शुभाशुभफलं लोके ददात्यस्तमयोदये" इति ॥ * ॥

एवं मतान्तराण्युक्त्वा स्वसिद्धान्तमाह ।

"यद्येको यदि बहवः किमनेन फलन्तु सर्व्वथा वाच्यम् । उदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैः" ॥

यद्येक एव केतुः यदि वा बहवः केतवः किमनेन । सर्व्वथा तेषामुदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैश्च शुभाशुभं फलं पुनर्वक्तव्यम् । उदयः कस्यां दिश्युदितः । अस्तमयः कस्यामेवास्तमितः । स्थानं यथा कस्मिन्नाकाशभागे कस्य नक्षत्रस्य वा समीपे उदितोऽस्तमितश्च । स्पर्शनं केन ग्रहो नक्षत्रं वा स्पृष्टम् । आधूपनं कोऽपि शिखयाभिधूपितः । वर्णाः सितरक्तपीतकृष्णादिकाः । एवमादिभिस्तस्य फलं वाच्यं तस्मादेको बहवो वा भवन्तु का नः क्षतिरिति ॥ * ॥

अथ केतुचारे येषां केतूनामभिदृष्टानां कियन्तं कालं यावत् फलपाको भवति तेषां फलपाकनियमार्थमाह ।

"यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः ।
मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः" ॥

दृश्यः केतुरिति सम्बध्यते । फलस्य पाकः फलपाकः । यः केतुर्यावन्त्यहानि दृश्यो भवति तस्य तावन्तो मासास्तस्य केतोस्तावतो मासान् फलपाको ब्रूयात् । यावत्सङ्ख्यकानि दिनानि दृष्टो भवति तत्तुल्यान् मासान् तस्य फलपाको वदेत् । मासैस्तु पुनरब्दान् संवत्सरान् ब्रूयात् । माससङ्ख्यादर्शने मासतुल्यानि वर्षाणि च वदेत् । यावत् सङ्ख्यान्मासान् दृश्यो भवति तावत्सङ्ख्यानि वर्षाणि तस्य फलपाको वदेत् । कस्मात् कालात् प्रभृतिरित्यत आह प्रथमात् पक्षत्रयात् परतः । सर्व्वेषां केतूनां दिनसाम्यत्वम् । यावन्ति दिनानि दृश्यः केतुस्तस्माद्दर्शनादूर्द्ध्वं प्रथमं पक्षत्रयं पञ्चचत्वारिंशद्दिनानि यावत् निष्फलानि तस्मात् पक्षत्रयात् परतः तावतो मासान् फलपाकः । अथ मासान् दृश्यते तदा तस्मादेव दर्शनात् परतः पक्षत्रयमतिक्रम्य मासतुल्यानि वर्षाणि वदेत् । प्रथमात् पक्षत्रयात् परतः तत्र पक्षत्रयं यावद्दिनसङ्ख्या गृह्यते । पक्षत्रयादूर्द्ध्वं यदा दृश्यते केतुस्तदा मासतुल्यानि वर्षाणि वदेत् । अत्र सन्देहव्युदासार्थं गर्गोक्तं नियमकमभिलिख्यते ।

तथा च गर्गः ।

"यावन्त्यहानि दृश्यः स्यात्तावन्मासान् फलं भवेत् ।
मासांस्तु यावद्दृश्येत तावतोऽब्दांस्तु वैकृतान् ॥
त्रिपक्षात् परतः कर्म्म पचेत्तस्य शुभाशुभम् ।
यद्दिष्टमुदिते केतौ फलं नेहादिशेद्बुधः" ॥

तथा वृद्धगर्गः ।

"यावतो दिवसांस्तिष्ठेत्तावन्मासान् विनिर्दिशेत् ।
त्रिपक्षात् परतश्चापि कर्म्म केतोः प्रपद्यते ॥
तस्मात् कालात् परं ब्रूयात् फलमस्य शुभाशुभम् ।
यद्दिष्टमुदये केतोः फलं नेहादिशेद्बुधः" ॥

यद्येवं तदा द्वितीयव्याख्यानमत्र न घटते प्रथमव्याख्यानमेव न्याय्य इति । यथा प्रथमात् पक्षत्रयात् परतः दर्शनादूर्द्ध्वं पक्षत्रयं यावन्निष्फलं पक्षत्रयात् परतः फलपाकस्य कालसङ्ख्या प्रवर्त्तते तस्मादुक्तं यद्दिष्टमुदये केतोः फलं नेहादिशेद्बुधः इति । यदुक्तं मासैरब्दांश्च वदेत् तदेकदेशेनापि प्रतिमासमेकद्वित्रिदिनदर्शनेन माससङ्ख्या लभ्यत एवेत्यर्थः । सर्व्वथा किमनेनास्माकमसद्विकल्पेन । दिवसैः पक्षत्रयात् परतो मासान् वदेत् । मासैस्तस्मादेव पक्षत्रयात् परतोऽब्दान् वदेत् । मासात् परतो दिनाधिक्यं दृष्ट्यनुपातवशात् वाच्यम् । यथा यदि दिनत्रिंशता वर्षं लभ्यते तद्दृष्ट्या दिनैकेन मासैकमिति ।

तथा च समाससंहितायाम् ।

"केचित् केतुसहस्रं शतमेकसमन्वितं वदन्त्येके ।
नारदमतमेकोऽयं त्रिस्थानसमुद्भवो विविधरूपः ॥
दिव्या ग्रहर्क्षजातास्तीव्रफलकरा भौमाः ।
प्राणिध्वजादितुङ्गेषु चान्तरीक्षा न चात्यशुभाः ॥
उदयास्तमयाधूपनसंयोगाकारमार्गदिक्पातैः ।
फलानि दिवसैर्म्मासान् मासैस्तु वर्षाणि सन्दिशेत् केतोः" ॥ * ॥

अथ शुभस्य केतोर्लक्षणमाह ।

"ह्रस्वतनुः प्रसन्नः स्निग्धः ऋजुरचिरसंस्थितः शुक्लः ।
उदितो वाप्यभिदृष्टः सुभिक्षसौख्यावहः केतुः" ॥

ऋजुरकुटिलः । अचिरसंस्थितः शीघ्रमेवादर्शनं याति । शुक्लः श्वेतः । उदितो वाप्यभिदृष्टः अथवोदित एवाभिदृष्टस्तस्मिंस्तु उदितमात्रे यदि दृष्टिर्भवति तदा शुभः । अन्यथा अशुभः ॥

अशुभस्य केतोर्लक्षणमाह ।

"उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः ।
इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा" ॥

ह्रस्वतनुः प्रसन्न इत्यस्मादुक्तात् यो विपरीतरूपः केतुरुत्पन्नः स धूमकेतुः । स च न शुभकरः पापं करोतीत्यर्थः । इन्द्रधनुःसदृशो न शुभकर एव । तथा द्विशिखस्त्रिशिखश्च विशेषतः पापफलदः ।

तथा च समाससंहितायाम् ।

"अचिरस्थितोऽभिदृष्टस्तनुः सितः स्निग्धमूर्त्तिरुदगुदितः । ह्रस्वतनुः प्रसन्नः केतुर्लोकस्य भवाय ॥
न शुभो विपरीतो विशेषतः शक्रचापसङ्काशः ।
द्वित्रिचतुश्चूलो वा दक्षिणसंस्थश्च मृत्युकरः" ॥ * ॥

अधुना केतुसहस्रलक्षणं विवक्षुस्तत्रादावेव रविजाः पञ्चविंशतिः केतवो भवन्ति । तेषां लक्षणमाह ।

"हारमणिहेमरूपाः किरणाख्याः पञ्चविंशतिः सशिखाः । प्रागपरदिशोर्दृश्या नृपतिविरोधावहा रविजाः" ॥

हारो मुक्ताहारः । मणयश्चन्द्रकान्तप्रभृतयः । हेम सुवर्णम् । तत्समानवर्णा ये केतवस्ते किरणाख्याः किरणसंज्ञाः । सशिखाः सचूलाः । ते च पञ्चविंशती रविजाः सूर्य्यसुताः प्रागपरयोश्च दिशोर्दृश्याः । प्राक् पूर्व्वस्यामपरस्यां पश्चिमायां दिशि दृश्यन्ते । एतेषां मध्यादेक एव दृश्यते न सर्व्वे युगपदिति । सर्व्वत्रेयं परिभाषा । ते च नृपतेः राज्ञो विरोधप्रदा अनिष्टा इत्यर्थः ।

तथा च गर्गः ।

"शुद्धस्फटिकसङ्काशा मृणालरजतप्रभाः ।

मुक्ताहारसवर्णाभा सशिखा पञ्चविंशतिः ।
किरणाख्या रवेः पुत्रा दृश्यन्ते प्राग्दिशि स्थिताः ।
तथा च परभागस्था नृपतेर्भयदाश्च ते" ॥ * ॥

अथाग्निपुत्रास्तावन्त आह ।

"शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः ।
आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिनो भयदाः" ॥

शुकपक्षी नीलपीतवर्णः । दहनोऽग्निः । बन्धुजीवकः पुष्पविशेषोऽतिलोहितः । लाक्षा वृक्षनिर्यासः । क्षतजं रक्तम् । तदुपमास्तत्तुल्यवर्णाः । ते च तावन्तः पञ्चविंशतिः आग्नेय्यां दिशि दृश्यन्ते। ते च हुताशसुता अग्निपुत्रा अग्निभयदाः ।

तथा च गर्गः ।

"नानावर्णाग्निसङ्काशा दीप्तिमन्तोऽपि चूलिनः ।
दहन्त्यग्निमिवाकाशात् सर्व्वज्योतिषगामिनः ॥
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः ।
आग्नेय्यां दिशि दृश्यन्ते पञ्चविंशाः प्रकीर्त्तिताः" ॥

अथ मृत्युसुतास्तावन्त एवाह ।

"वक्रशिखा मृत्युसुता रूक्षाः कृष्णाश्च तेऽपि तावन्तः ।
दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च" ॥

वक्रशिखा अस्पष्टचूडाः । ते च रूक्षाः अस्निग्धास्तेऽपि पञ्चविंशतिरेव । ते च मृत्योः पुत्रा दक्षिणस्यां दिशि दृश्यन्ते । ते च जनानां मरकम् आवेदयन्ति ।

तथा च गर्गः ॥

"कृष्णा रूक्षा वक्रशिखा दृश्यन्ते याम्यदिक्स्थिताः ।
पञ्चविंशा मृत्युसुताः प्रजाक्षयकराः स्मृताः" ॥

अथ भूपुत्रा द्वाविंशतिरेवाह ।

"दर्पणवृत्ताकारा विशिखाः किरणान्विता धरातनयाः । क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः" ॥ दर्पणवत् वृत्तः वर्त्तुल आकारो येषां ते विशिखा विचूला रश्मिसंयुक्ता भूमेः पुत्राः । ते च द्वाविंशतिरैशान्यां दृश्यन्ते । जलस्य तैलस्य च सदृशकान्तयः । एते दृष्टा दुर्भिक्षं ददति ॥

तथा च गर्गः ।

"समन्तवृत्ता विशिखा रश्मिभिः परिवारिताः ।
अम्बुतैलप्रतीकाशा द्वाविंशा भूसुताः स्मृताः ।
ऐशान्यां दिशि दृश्यन्ते दुर्भिक्षभयदाश्च ते" ॥ * ॥

अथ चन्द्रसुतास्त्रय आह । "शशिकिरणहिमरजतकुमुदकुन्दकुसुमोपमाः सुताः शशिनः । उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः" ॥ एते सौम्यायां दिशि दृश्यन्ते । ते च सुभिक्षं कुर्व्वन्ति ।

तथा च गर्गः ।

"चन्द्ररश्मिसवर्णाभा हिमकुन्देन्दुसप्रभाः ।
त्रयस्ते शशिनः पुत्राः सौम्याशास्थाः शुभावहाः" ॥

अथ ब्रह्मदण्डाख्यस्य लक्षणमाह ।

"ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः ।
अनियतदिक्सम्भवो विज्ञेयो ब्रह्मदण्डाख्यः" ॥

ब्रह्मपुत्र एक एव । स च त्रिचूडः । वर्णैः सितादिभिस्त्रिभिरुपलक्षितः । स तु ब्रह्मदण्डसञ्ज्ञो ज्ञेयः । अनियतायाम् अनिश्चितायां दिशि सम्भवः उत्पद्यते सर्व्वासु दिक्षु दृश्यते इत्यर्थः । स तु युगस्यान्तं करोति सर्व्वक्षयकरः इत्यर्थः ।

तथा च गर्गः ।

"एको ब्रह्मसुतः क्रूरस्त्रिवर्णस्त्रिशिखान्वितः ।
सर्व्वासामाशु दृश्यः स्यात् ब्रह्मदण्डः क्षयावहः" ॥

एकाधिकं शतं कथितं अन्यानि नवशतान्येकोनानि कथनीयानि इत्यत आह ।

"शतमभिहितमेकसमेतमेकाधिकाद्धतात् परतः ।
एकोनानि नवशतानि केतूनां स्पष्टैर्लक्षणैः कथयिष्ये" ॥

शतमभिहितमेकसमेतं एकेनाधिकं केतूनां शतमभिहितमुक्तम् । तस्मादेकाधिकाच्छतात् परतः एकोनानि एकेन विरहितानि नवशतानि केतूनां स्पष्टैर्व्यक्तैर्लक्षणैश्चिह्नैः कथयिष्ये ॥

अथ शुक्रपुत्रांश्चतुरशीतिसङ्ख्यानाह ।

"शुक्रसुता विसर्पका सौम्यैशान्योरुदयं यान्ति चतुरशीत्याख्याः । विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः" ॥ सौम्या उत्तरा । ऐशानी ईशानदिक् । तयोरुदयं दर्शनं गच्छन्ति । ते च विपुला विस्तीर्णाः सिताः शुक्लाः तारका येषाम् । स्निग्धा निर्म्मलदेहा ते च तीव्रफला अनिष्टफला इति ।

तथा च गर्गः ।

"स्थूलैकतारकाः श्वेता येहवन्तश्च सप्रभाः ।
अर्च्चिष्मन्तः प्रसन्नाश्च तीव्रेण च फलान्विताः ॥
एते विसर्पका नाम शुक्रपुत्राः पुरोदयाः ।
अशीतिश्चतुरश्चैव लोकक्षयकराः स्मृताः" ॥ * ॥

अथ षष्टिशनैश्चरपुत्रानाह ।

"स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः । अतिकष्टफला दृष्टाः सर्व्वत्रैते कनकसञ्ज्ञाः" ॥ ईदृशाः षष्टिः शनैश्चरपुत्राः कनककेतवः सर्व्वत्र सर्व्वासु दिक्षु दृष्टाः अत्यशुभफलाश्च ते ।

तथा च गर्गः ।

"सुस्निग्धा रश्मिसंयुक्ता द्विशिखाः सिततारकाः ।
षष्टिस्ते कनका घोराः शनैश्चरसुता ग्रहाः" ॥ * ॥

अथ गुरुसुताः पञ्चषष्टिराह ।

"विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः । षष्टिपञ्चभिरधिकाः स्निग्धा याम्याश्रिताः पापाः" ॥

पञ्चषष्टिः केतवो विकचा नाम वृहस्पतिपुत्राः । ते च सितः श्वेत एकस्तारको येषां चूडारहिताः । ते च दक्षिणस्यां दृश्यन्ते पापा अनिष्टफलदा इत्यर्थः ।

तथा च गर्गः ।

"स्निग्धाः शुक्लाः प्रसन्नाश्च महारूपाः प्रभान्विताः ।
एकतारा वपुष्मन्तो विशिखा रश्मिभिर्वृताः ॥
एते वृहस्पतेः पुत्राः प्रायशो दक्षिणाश्रयाः ।
नामतो विकचा घोराः पञ्चषष्टिर्भयावहाः" ॥

अथैकपञ्चाशद्बुधपुत्रानाह ।

"नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः ।
बुधजास्तस्करसञ्ज्ञाः पापफलास्त्वेकपञ्चाशत्" ॥

तस्करनामान एकपञ्चाशत् केतवो बुधस्य पुत्राः । नातिस्फुटाः अल्पदेहाः यथेष्टायां दिशि प्रभव उत्पत्तिर्येषां सर्व्वासु दिक्षु दृश्यन्त इत्यर्थः । ते चानिष्टफलाः ।

तथा च गर्गः ।

केतुः

"अरुन्धतिसमा व्यक्ताः केचिद्व्यक्ततारकाः ।
पाण्डुवर्णाः सुदीर्घाश्च सूक्ष्मा रश्मिभिरावृताः ।
एते बुधात्मजा ज्ञेयास्तस्कराख्या भयावहाः ।
एकाधिकास्ते पञ्चाशद्योऽप्यर्थहरा ग्रहाः" ॥ * ॥

अथ षष्टिभौमपुत्रानाह ।

"क्षतजानलानुरूपास्त्रिचूलताराः कुजात्मजाः षष्टिः । नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः" ॥ कौङ्कुमनामानः षष्टिः केतवो मङ्गलपुत्राः रक्तवह्निसदृशाः लोहिता इत्यर्थः । त्रिचूलाः त्रिशिखास्ताराः येषां ते च उत्तरस्यां दृश्यन्ते पापफलाश्च ।

तथा च गर्गः ।

"त्रिशिखाश्च त्रिताराश्च रक्तलोहितरश्मयः ।
प्रायशश्चोत्तरामाशां सेवन्ते नित्यमेव ते ॥
लोहिताङ्गात्मजा ज्ञेया ग्रहाः षष्टिः समासतः ।
नामतः कौङ्कुमा ज्ञेया राज्ञां क्षयकारकाः" ॥ * ॥

अथ त्रयस्त्रिंशद्राहुपुत्रानाह ।

"त्रिंशत् त्र्यधिका राहोस्ते तामसकीलका इति ख्याताः । रविशशिगा दृश्यन्ते तेषां फलमर्कचारोक्तम्" ॥

त्रयस्त्रिंशत् स्वर्भानुपुत्रास्ते च नामतः तामसकीलका इति प्रसिद्धाः । ते च अर्कचन्द्रमण्डले दृश्यन्ते तेषाञ्च फलं सूर्य्यचारे कथितं तामसकीलकसञ्ज्ञा राहुसुता इति ।

तथा च गर्गः ।

"कृष्णाभाः कृष्णपर्य्यन्ताः सङ्कुलाः कृष्णरश्मयः ।
राहुपुत्रास्त्रयस्त्रिंशत् कीलकाख्या विदारकाः ।
रविमण्डलगाश्चैते दृश्यन्ते चन्द्रगास्तथा" ।

तथा च पराशरः ।

"अपर्व्वण्येव दृश्यन्ते ह्यङ्गिरा काककीलकाः ।
रवेरिवाङ्गिरामध्ये ह्युभयोः काककीलकौ ।
अङ्गिरा सरणो वापि दृश्यते पुरुषाकृतिः ।
काकः काकाकृतिर्घोरस्त्रिकोणो वाथ लक्ष्यते ।
मण्डले कीलको मध्ये मण्डलस्याश्रितो ग्रहः ।
महाक्लेशविरोधाय यस्यर्क्षे तस्य मृत्यवे" इति ॥ * ॥

अथ विंशत्यधिकं शतमग्निपुत्रानाह ।

"विंशत्यधिकमन्यच्छतमग्नेर्विश्वरूपसञ्ज्ञानाम् ।
तीव्रानलभयदानां ज्वालामालाकुलतनूनाम्" ॥

अन्यत् अपरं शतं विंशत्यधिकं केतूनामग्नेः सुतानां विश्वरूपनाम्नां कीदृशानां ज्वालामालाभिराकुला व्याप्तास्तनवो मूर्त्तयो येषाम् । तथा तीव्रं घोरमग्निभयं ददति ।

तथा च गर्गः ।

"नानावर्णा हुताशाभा दीप्तिमन्तो विचूलिनः ।
दहन्त्यग्निमिवाकाशे सर्व्वज्योतिर्विगामिनः ।
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः ।
विंशं ग्रहशतं घोरं विश्वरूपेति विश्रुतम्" ॥ * ॥

अथ सप्तसप्ततिवायुपुत्रानाह ।

"श्यावारुणा वितारास्चामररूपा विकीर्णदीधितयः ।
अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः" ।

अरुणसञ्ज्ञा वायोः पुत्राः श्यावलोहितवर्णाः तारकवर्जिताश्चामररूपा वालव्यजनाकृतयः

व्याच्छिन्नरश्मय रूक्षा दुष्टफलप्रदा । अथ येषां दिङ्नियमो नास्ति तेऽनियतदर्शना सर्व्वास्वपि दिक्षु दृश्यन्ते ।

तथा च गर्गः ।

"अतारूपप्रतिमा श्यावरक्तासुवर्णिन ।
वातरूपा इवाभान्ति शुक्लाविस्तीर्णरश्मय ॥
सप्तसप्तति चैवान्ये वायो पुत्रा प्रचक्षते ।
लोकविध्वंसना रूक्षा नामतस्तसखा ग्रहा" ॥*॥

अथाष्टौ प्रजापतिसुता द्वे च शते चतुरधिके ब्रह्मणः पुत्रानाह ।

"तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ ।
द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्ताना ॥
अष्टौ केतवो गणका नाम प्रजापते, पुत्राः" ।

ते च ताराणा नक्षत्राणां पुञ्ज समूहस्तदाकारा । ते च अशुभदायिनः । तथा च । द्वे शते चतुरधिके केतूना ते च चतुरस्रसंज्ञा चतुरास्रतयस्ते च ब्रह्मणः पुत्राः पापफला एव ज्ञेया ते चाग्नेयदिग्भवाः । तथा च गर्गः ।

"तारापुञ्जप्रतीकाशा व्योममण्डलसस्थिता ।
प्राजापत्या ग्रहास्त्वष्टौ गणका भयवेदिन ॥
त्र्यस्राश्च चतुरस्रा वा सशिखा श्वेतरश्मय ।
द्वे शते चतुरस्रैव ब्रह्मजा भयदाश्च ते" ॥*॥

अथ द्वात्रिंशद्वरुणपुत्रानाह ।

"कङ्का नाम वरुणजा द्वात्रिंशत् गुल्मसंस्थाना ।
शशिवत्प्रभासमेतास्तीव्रफला केतव प्रोक्ता" ॥

ते वरुणपुत्रा वंशगुल्मवत् संस्थानमाकृतिर्येषां । गुल्म एकमूलजो लतासमूह । शशिवत् चन्द्रवत् प्रभया कान्त्या समेतास्ते च तीव्रफला कष्टफला प्रोक्ता कथितास्ते चानियतदिक्प्रभवा । तथा च गर्गः ।

"वंशगुल्मप्रतीकाशा महान्तः पूर्णरश्मय ।
काकतुण्डनिभैस्ताभि रश्मिभि केचिदावृता ॥
मयूखानुन्मृजन्तीव स्निग्धत्वात् सौम्यदर्शना ।
एते कष्टफलाः कङ्का द्वात्रिंशद्वारुणा ग्रहा" ॥*॥

अथ षण्णवतिकालपुत्रानाह ।

"षण्णवति कालसुताः कबन्धसंज्ञा कबन्धसस्थाना ।
पुण्ड्राऽभयप्रदा स्युर्व्विरूपताराश्च शिखिनः" ॥

कालपुत्रा कबन्धसस्थाना षण्णवति । कबन्धश्छिन्नशिर पुरुषस्तद्वत् सस्थानमाकृतिर्येषां ते च विरूपा अस्फुटास्तारका येषां ते शिखिन केतव पुण्ड्रा नाम जनपदास्तेषा श्रेयस्करा स्यु । अन्यत्र पुनर्भयदास्ते चानियतदिक्सम्भवा ।

तथा च गर्गः ।

"तारापुञ्जविरूपाश्च कबन्धाकृतिसस्थिता ।
पीतारुणा सवर्णाश्च भस्मकर्पूररश्मयः ॥
कालपुत्रा कबन्धाश्च नवतिः षट् प्रकीर्त्तिताः ।
लोकरोगकरा घोराः पुण्ड्राणामभयप्रदा" ॥*॥

अथ नवविदिक्पुत्राः सर्व्वेषाञ्च सङ्ख्यामन्येषाञ्च वक्ष्यामीत्येतदाह ।

"शुक्लविपुलैकतारा नवविदिशा केतव समुत्पन्नाः ।
एव केतुसहस्रं विशेषमेषामतो वक्ष्ये" ॥

विदिशां दिगन्तराणाञ्च नव केतव समुत्पन्नाः विदिक्पुत्रा इत्यर्थः । किम्भूता शुक्ला श्वेतवर्णा विपुलो विस्तीर्ण एकतारो येषां ते विदिक्केतवो दृश्यन्ते दृष्टाश्च पापफला ।

तथा च गर्गः ।

"शुक्लैकतारा विपुला विदिक्पुत्रा नवग्रहाः ।
विदिक्षु संस्थिता एव दृश्यन्ते भयदायका" ॥

एवं केतुसहस्रमिति । एवं केतूनां सहस्रं उक्त एषामेव विशेषलक्षण वक्ष्ये । एषा मध्यात् केचित् दृश्यन्ते न सर्व्व एव । तत्र ये दृश्यन्ते तेषा लक्षण वक्तुकामस्तत्रादावेव केतोर्लक्षणमाह ॥*॥

"उदगायतो महान् स्निग्धमूर्त्तिरपरोदयी वसा केतु । सद्य करोति मरक सुभिक्षमप्युत्तम कुरुते" ॥ उदगायत उत्तरस्यां दिश्यायतो दीर्घ महानतिस्थूल निर्म्मलतनुः अपरोदयी पश्चिमाया दिश्युदय याति । स च नाम्ना वसाकेतुर्दृष्ट सद्य एव तस्मिन्नहनि मरणं करोति । उत्तममपि प्रधानं सुभिक्षञ्च कुरुते ॥*॥

अथास्थिकेतो शस्त्राख्यस्य च लक्षणमाह ।

"तल्लक्षणोऽस्थिकेतु स तु रूक्ष क्षुद्भयावह प्रोक्त
स्निग्धस्तादृक् प्राच्या शस्त्राख्यो डमरमरकाय" ॥

तदित्यनेन वसाकेतो परामर्श । अस्थिकेतुश्च तल्लक्षणैर्व्वसाकेतुसदृशैर्युक्त । उदगायत इत्यादि किन्त्वयं विशेष स तु रूक्ष स्नेहरहितः दृष्टश्च क्षुद्भयावह कथितः । स्निग्धस्तादृगिति तादृग्वसाकेतुसदृशोऽन्य स्निग्धो निर्म्मलदेह प्राच्यां दृश्यते । स तु शस्त्रनामा केतुर्दृष्ट डमरं शस्त्रकलहं मरकञ्च करोति । तथा च पराशर ।

"एभिः षड्विंशतिरुदये फलमावेदयन्ति ।
तन्नामतो रूपतः फलत कालतोऽभिधास्याम" ॥

तत्र मार्त्तिकास्त्रय उदय यान्ति । एकैकशो वसास्थिशस्त्रकेतुर्व्वा । तत्र वसाकेतु स्निग्धो महानुदगायतशिखस्त्रिशद्वर्षशत प्रोष्य सप्तमे युगे पश्चिमोदित सद्यो मरकफल सौभिक्षकरः रूक्षोऽस्थिकेतुः सौभिक्षकरस्तुल्यप्रवासकालफल पूर्व्वेण स्निग्ध एव शस्त्रकेतूराजविरोधमरकफल समोदय ॥*॥

अथ कपालकेतोर्लक्षणमाह ।

"दृष्टोऽमावास्यायां कपालकेतु सधूम्ररश्मिशिख ।
प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकर" ॥

कपालकेतुर्नाम अमावस्याया दृश्यते पूर्व्वदिशि उदय याति । कीदृशः सधूम्रा रश्मिशिखा यस्य किरणकान्तिर्धूम्रवर्णेत्यर्थ । नभस आकाशस्य अर्द्धं यावद्विचरति । स च दुर्भिक्षमरकावर्षणरोगप्रद ।

तथा च पराशर ।

"अथादित्यजाना कपालकेतुरुदयते अमावास्याया पूर्व्वस्या दिशि सधूम्रार्च्चिशिखो नभसो विषयार्द्धचरो दृश्यते । पञ्चविंशवर्षशत प्रोष्य चौक्ष्य पद्मान् स्वतिर्यस्य कुमुदकेतोश्चारान्ते स दृष्ट एव । दुर्भिक्षानावृष्टिव्याधिभय प्रत्युपद्रवान् सृजति । यावतो दिवसान् दृश्यते तावन्मासान्मासे संवत्सरान् पञ्चप्रस्थ वर्षाधान्यस्यार्घं कृत्वा प्रजानामेकमुपयुङ्क्ते" ॥

अथ रौद्रकेतोर्लक्षणमाह ।

"प्राग्वैश्वानरमार्गे शूलाग्र श्यावरूक्षताम्रार्च्चि ।
नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफल" ॥

रौद्रनामा केतुः पूर्व्वस्या दिशि वैश्वानरमार्गे दहनवीथ्या दृश्यते । पूर्व्वाषाढोत्तराषाढयो समीप इत्यर्थ । कीदृश शूलाग्र शूलाकृतिरग्रं यस्य केतो स शूलाग्रः त्रिशिख इत्यर्थ । तस्यैव विशेषण श्यावरूक्षताम्रार्च्चि श्यावरूक्षं ताम्रं चार्च्चिस्तेजो यस्य स श्यावरूक्षताम्रार्च्चि । नभस आकाशस्य त्रिभागगमनशील । स च कपालकेतोः समफलः । एतदुक्त भवति क्षुन्मरकावृष्टिरोगकृत् । आचार्य्येण शुक्राचारे वैश्वानरमार्गं प्रदर्शित एव आषाढाद्य दहन इति ।

तथा च पराशर ।

"अथ दक्षयज्ञे रुद्रक्रोधोद्भव कालकेतुस्त्रीणि वर्षशतानि नव च मासान् प्रोष्य उदयते । पूर्व्वेण वैश्वानरमार्गे इत्यमृतमयस्य मणिकेतोश्चारान्ते श्यावरूक्षताम्रारुणा शूलाकारसदृशीं शिखां कृत्वा नभसस्त्रिभागचारी स शस्त्रभयरोगदुर्भिक्षावृष्टिमरकैर्यावन्मासान् दृश्यते तावद्वर्षाणि त्रिभागशेषा प्रजां कृत्वा" ॥ शारदधान्यस्याढकमर्घं कृत्वा चास्तं व्रजति ।

तथा च वृद्धगर्गः ।

"ज्येष्ठमूलमनुराधा या वीथी सम्प्रकीर्त्तिता ।
ताञ्च वीथीं समारुह्य केतुश्चेत् क्रीडते भृशम् ॥
दक्षिणाभिनता कृत्वा शिखां घोरां भयङ्कराम् ।
शूलाग्रसदृशीं तीक्ष्णां श्यावताम्रारुणप्रभाम् ॥
पूर्व्वेण उदितश्चैव नक्षत्राण्युपधूपयेत् ।
घोर प्रजासूत्सृजति फल मासे त्रयोदशे ॥
त्रिभाग नभसो गत्वा ततो गच्छत्यदर्शनम् ।
यावतो दिवसांस्तिष्ठेत् तावद्वर्षाणि तद्भयम् ॥
शस्त्राग्निभयरोगैश्च दुर्भिक्षमरकैर्हता ।
घूर्णमाना प्रजा सर्व्वा विद्रवन्ति दिशो दश" ॥*॥

अथ चलकेतोर्लक्षणमाह ।

"अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुलोच्छ्रितया । गच्छेद् यथोदक् तथा तथा दैर्घ्यमायाति ॥
सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव प्रतिनिवृत्त स्यात् । नभसोऽर्द्धमागमित्वा याम्येनास्तं समुपयाति ॥ हन्यात् प्रयागकूलाद् यावदवन्तीञ्च पुष्कराराण्यम् । उदगपि च देविकामपि भूयिष्ठ मध्यदेशाख्यम् ॥ अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षै । दश मासान् फलपाकोऽस्य कैश्चिदष्टादश प्रोक्त" ॥

अपरस्यामिति पश्चिमायां दिशि चलकेतुर्नामा केतुर्दृश्यते । स च कीदृशः याम्याया दिशि अग्र यस्या तया अङ्गुलप्रमाणोच्छ्रितया यथा येन प्रकारेण उदक् उत्तरस्या दिशि याति तथा तेनैव प्रकारेण दैर्घ्यं दीर्घता प्राप्नोति । सप्तमुनीन् वशिष्ठादीन् संस्पृश्य तथा ध्रुवं ध्रुवतारकं अभिजितञ्च गच्छन् संस्पृश्य तत प्रतिनिवृत्त प्रत्या-

गत' नभस आकाशस्य अर्द्धभागमित्वा गत्वा प्राप्य याम्येन दक्षिणस्यां दिशि अदर्शनं याति। स एव चलकेतुः प्रयागकूलादारभ्य यावदवन्तीं पुष्करारण्यनामस्थानं तावत् नाशयेत्। उदगपि चोत्तरस्यां दिश्यपि च यावत् देविकां नदीं तावद्धन्यात्। मध्यदेशाख्यं मध्यदेशं भूयिष्ठमतिशयेन हन्यात्। अन्यानपि च स देशानिति। स चलकेतुः अन्यान् अपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचित् नाशयति न सर्व्वत्र। अस्य केतोर्दशमासान् यावत् फलपाकः। अदर्शनात् त्रिपक्षात् परतो यावद्दश मासास्तावदशुभं फलं ददाति। केचिदन्यैर्गर्गादिभिरष्टादश मासान् यावत् फलपाकः प्रोक्तः। तथा च पराशरः।

"अथ पैतामहश्चलकेतुः पञ्चदशवर्षशतं प्रोष्य उदितः पश्चिमेनाङ्गुलिपर्व्वमात्रां शिखां दक्षिणाभिनतां कृत्वा चलकेतुश्चारान्ते नभसस्त्रिभागमनुचरन् यथा यथोत्तरां व्रजति तथा तथा शूलाग्राकारां शिखां दर्शयन् ब्राह्मं नक्षत्रमुपस्पृश्य मनाक् ध्रुवं ब्रह्मराशिं सप्तर्षीन् संस्पृश्य नभसोऽर्द्धमात्रं दक्षिणमनुपरिक्रम्य अस्तं व्रजति। स स्वर्गे दारुणकर्म्मा स्वर्गप्राप्तित्वादेव वक्रात्तमभिनिघ्नन्ति लोकमपि च। भूमिं कम्पयित्वा दश मासान् मध्यदेशे भूयिष्ठं जनपदमवशेषं कुरुते। तेष्वपि च क्वचिद् क्वचित् शस्त्रदुर्भिक्षमरकव्याधिभयैः क्लिश्यत्यष्टादशमासानिति॥

तथा च गर्गः।

"क्षुच्छस्त्रमरकव्याधिभयैः संपीडयेत् प्रजाः।
मासान् दश तथाष्टौ च चलकेतुः सुदारुणः"॥*॥

ततः श्वेतकेतोर्लक्षणमाह।

"प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च।
क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥
स्निग्धौ सुभिक्षशिवदौ अथाधिकं दृश्यते कनामा
यः। दशवर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम्॥

प्रागर्द्धरात्रदृश्य इति। श्वेतकेतुनामा केतुः प्राक् पूर्व्वस्यां दिशि अर्द्धरात्रकाले दृश्यते याम्याग्रो दक्षिणशिखः अन्यश्च द्वितीयः क इति कनामा केतुरपरे पश्चिमायां दिशि दृश्यते। युगाकृतिः युगसंस्थानाकारः तौ द्वावपि युगपत्तुल्यकाल सप्त दिवसान् दृश्येते। तौ च द्वावपि स्निग्धावति निर्म्मलौ दृष्टौ च सुभिक्षशिवदौ। अथ यः कनामा स यदि सप्तभ्योऽधिकं दृश्यते तदा शस्त्रप्रकोपजं सन्तापमुपतापं जनयति।

तथा च पराशरः।

"अथोद्दालकः श्वेतकेतुर्दशोत्तरं वर्षशतं प्रोष्य भटकेतोश्चारान्ते पूर्व्वस्यां दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यस्तेनैव सह द्वितीयः कः प्रजापतिपुत्रः। पश्चिमेकेन ग्रहकेतुर्यूपसंस्थायी युगपद्दृष्टस्तेन। ततस्तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीडयेते। क प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्य्यात्। तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः"॥

अथ श्वेतस्य लक्षणमाह।

"श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतिः। विनिवर्त्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते"॥

श्वेतनामा केतुः जटाकारो जटासदृशः श्यावः कृष्णवर्णः वियत्याकाशे त्रिभागं यावद्गच्छति ततोऽपसव्यं प्रदक्षिणं वाममार्गे निवर्त्तते इतीयांशावशेषाः प्रजाः कुरुते।

तथा च पराशरः।

"अथ काश्यपः श्वेतकेतुः पञ्चदशवर्षशतं प्रोष्योग्रः सोमसहजस्य वप्रकेतोश्चारान्ते श्यावरूक्षो नभसस्त्रिभागमाक्रम्यापसव्यं निवृत्योर्द्ध्वं प्रदक्षिणं जटाकारशिखः स यावन्मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेशे आर्य्यगणा नामदो नामोदीच्यैर्भूमिष्ठस्त्रिभागशेषां प्रजामवशेषयति"॥*॥

अथ रश्मिकेतोर्लक्षणमाह।

"आधूम्रयातिशिखया दर्शनमायाति कृत्तिकासंस्थः। ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते"॥

यः केतुराधूम्रवर्णया शिखयोपलक्षितस्तथा कृत्तिकासंस्थः कृत्तिकाना समीपे दर्शनं गच्छति स रश्मिकेतुः श्वेतकेतोः सदृशं फलं धत्ते।

तथा च पराशरः।

"अथ रश्मिकेतुर्विभावसुजः प्रोष्यवर्षशतमावर्त्तकेतोः। उदितश्चारान्ते कृत्तिकासु धूम्रकेतुः"॥*॥

ध्रुवकेतोर्लक्षणमाह।

"ध्रुवकेतुरनियतगतिः प्रमाणाकृतिर्भवति। विश्वक् दिव्यान्तरीक्षभौमो भवत्ययं स्निग्ध इष्टफलः॥
सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापि देशानाम्।
गृहिणामुपस्करेषु च विनाशिना दर्शनं याति"॥

ध्रुवेति। अनियता अनिश्चिता गतिर्गमनं प्रमाणं स्थूलसूक्ष्ममध्यभावमाकृतिः आकारो यस्य स तथाभूतः। स च विश्वक् समन्ततो भवति सर्व्वासु दिक्ष्वित्यर्थः। स च दिव्यान्तरीक्षभौमस्त्रिविधो भवति। क्वचिद्द्विविधो नानाकारो भवति। स च स्निग्धो निर्म्मलशरीरः इष्टफलः। एष च एव विधाता विनाशिना मुमूर्षूणां दर्शनमुदयं याति। नृपाणां विनाशिनां सेनाङ्गेषु सोपकरणेषु खलीनतोरणादिषु दर्शनं याति। देशानां विनाशिनां गृहवृक्षपर्व्वतेषु च दृश्यते। तथा गृहिणामुपस्करेषु उपस्करभाण्डेषु दर्व्वीशूर्पमार्ज्जन्यादिषु गृहतरुशैलेषु विनाशिनामेव दर्शनं याति।

तथा च पराशरः।

"अथानियतदिक्कालरूपवर्णप्रमाणसंस्थानो धूमकेतुः परा भविष्यतां देशानां राज्ञां जनपदानाञ्च दृश्यगृहपर्व्वतवेश्मध्वजपताकाशस्त्रवर्म्मायुधावरणयन्त्रागोष्ठपुरशयनासनभाण्डेषु च दृश्यते। स एव दिवि स्निग्धो विमलः प्रदक्षिणशिखो गजनागवीथीनामनुसरेण व्रजन् सुभिक्षक्षेमारोग्यं चावहति। दशैकविंशतिदिवसैर्विदश तथा वा दर्शनमिच्छन्ति मुनयो धूमकेतोस्तस्य

च प्रागुदयाग्निमित्तान्यष्टाधीनभवननमस्ते प्रभा मत्स्यप्रधूपम दिशां शीतोष्णविपर्य्यय इतिर्थ्यष्टि बाऊसम्भवश्च"॥*॥

अथ कुमुदकेतोर्लक्षणमाह।

"कुमुद इति कुमुदकान्तिर्व्वारुण्यां प्राक्शिखो निशामेकाम्। दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति"॥ कुमुद इति श्वेतवर्ण इत्यर्थः। पश्चिमायां प्राक्शिखः पूर्व्वाग्रो निशामेका दृश्यते। किलेत्यागमसूचने। स च दृष्टो दश वर्षाण्यतुलमसमं सुभिक्षं करोति। तथा च पराशरः। "अथाम्भसः कुमुदो मणिजलो भव पद्म आवर्त्तः सम्वर्त्तः शङ्खो हिमो रूक्षः कुष्ठिः फलो विसर्पणः शीतश्चेति। तत्र कुमुदकेतुर्व्वसाकेतोः सार्द्धसमाप्तौ वारुण्यां दर्शनमुपैति। गोक्षीरविमलस्निग्धप्रभा पूर्व्वेणाभिगता शिखा एकैकरात्रिचरः स दृष्ट एव सुभिक्षमुत्पादयति दश वर्षाणि प्रजानामविरोधञ्च। प्रतीच्यामाह मुख रोगारोचकप्रतिश्यायपाण्डुरोगज्वरे प्रजानां माधत इति"॥*॥

अथ मणिकेतोर्लक्षणमाह।

"सकृदेकयामदृश्यो सुसूक्ष्मतारः पश्चिमेन मणिकेतुः। ऋज्वी शिखाऽस्य शुक्ला स्तनोद्गता क्षीरधारेव॥ उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान्। प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्"॥ सकृदिति। मणिकेतुः स च पश्चिमायां दिशि सूक्ष्मतारोऽल्पतारकः सकृदेकमात्रमेकयामदृश्यः। यामशब्देन रात्रिचतुर्भागः। अस्य केतोर्ऋज्वी सरला शिखा चूडा श्वेतवर्णा दृश्यते। कीदृशी स्तनोत्था क्षीरधारेव स्तनात् निःसृता क्षीरधारा यथा दृश्यते तद्वत्तच्छिखा। उदयन्नेवेति। असौ केतुरुदयन्नेवोदितमात्र एव चतुरः सार्द्धानर्द्धेनाधिकान् मासान् सुभिक्षं क्षेममुत्पादयति। प्रायो बाहुल्येन क्षुद्रजन्तूनां नकुलादीनां प्रादुर्भावमुत्पत्तिं करोति।

तथा च पराशरः।

मणिकेतुरपि कपालकेतोरवसाने प्रतीच्यामुदय याति। स तु सूक्ष्मतारकः श्वेतवर्णया क्षीरप्रसेकया पूर्व्वाभिनतया शिखया शर्व्वर्य्यामेकयामदृश्यः। स उदयात् प्रभृति पञ्च मासान् क्षेमं सुभिक्षमुत्पादयति॥ क्षुद्रजन्तूनां प्रादुर्भावं करोत्यतिमात्रकालदृष्टः"॥*॥

अथ जलकेतोर्लक्षणमाह।

"जलकेतुरपि च पश्चात् स्निग्धः शिखयाऽपरेण चोन्नतया। नव मासान् सुभिक्षं करोति शान्तिं शान्तिञ्च लोकस्य"॥ पश्चात् पश्चिमायां दिशि दृश्यते अपरेण पश्चिमेन चोन्नतया उन्नतया शिखया युक्तः स च दृष्टः नवमासपर्य्यन्तं सुभिक्षं करोति लोकानामङ्गलकरश्च। तथा च पराशरः। "अथ जलकेतुः पैतामहः यस्य चलकेतोर्नवमासावशिष्टे कार्म्मणि जाते प्रवर्त्तयति। पश्चिमेनोदितः स्निग्ध सुनातोऽनुपश्चिमाभिनतः। स च शिखी नव मासान्तात् क्षेमसुभिक्षारोग्याणि प्रजाभ्यो धत्ते।

अन्ययशस्तताना चाशुमानां च्याघातयेति" ॥ * ॥

अथ भवकेतोर्लक्षणमाह ।

"भवकेतुरेकरात्रं दृश्य प्राक् सुसूक्ष्मतारक स्निग्ध । हरिलाङ्गूलोपमया प्रदक्षिणावर्त्तया शिखया ॥ यावदेव मुहूर्त्तान् दर्शनमायाति निर्दिशेन्मासान् । तावदतुल सुभिक्षं रूक्षे प्राणान्तिकान् रोगान्" ॥ भवकेतु पूर्व्वस्या दिशि एका निशा दृश्य सुसूक्ष्मोऽल्प तारको यस्य स्निग्धो निर्म्मलदेह शिखयोपलक्षित । कीदृशया हरि सिंहस्तस्य लाङ्गूलं पुच्छं तदुपमया तदाकारया प्रदक्षिणेनावर्त्तो यस्या तथाभूतया स च यावत्संख्यान् क्षणान् दृश्यते तावन्मासान् सम सुभिक्षं निर्दिशेत् यदि स्निग्धः । रूक्षे तु पुन प्राणान्तिकान् रोगान् वदेत् । तथा च पराशर । "अथ जलकेतो कर्म्मसमाप्ता धूमादय शीतार्त्ता अष्टौ प्रादुर्भवन्ति । तत्र त्रयोदशचतुर्दशाष्टादशवर्षान्तात् दृश्यते । सुभिक्षा क्षेम्या विपर्य्यया विपरीता क्षुद्रजन्तूनाञ्च वधाय तेषामष्टाना कर्म्मण्यतीते भवकेतुर्दृश्यते । पूर्व्वेणैकरात्रं यावत् कृत्तिकानामन्तरतो वा तत्प्रमाणया स्निग्धमारुण्यामया सिंहलाङ्गूलसंस्थानया प्रदक्षिणात्मया शिखयोदित । स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षाय ॥ रूक्ष प्राणहराणाञ्च रोगाणा प्रादुर्भावायेति" ॥ * ॥

अथ पद्मकेतोर्लक्षणमाह ।

"अपरेण पद्मकेतुर्मृणालगौरो भवेन्निशामेकाम् ।
सप्त करोति सुभिक्ष वर्षाण्यतिहर्षयुक्तानि" ॥

पद्मकेतु पश्चिमाया दिशि रात्रिमेका दृश्यते कीदृश मृणालवत् गौरः श्वेत इत्यर्थ । दृष्ट सप्तवर्षाणि अतिहर्षयुक्तानि सुभिक्ष करोति । तथा च पराशर ।

"सप्तवर्षाण्यत्युच्छ्रित हर्षमावहति जगत" ॥ * ॥

अथावर्त्तकेतोर्लक्षणमाह ।

"आवर्त्त इति निशार्द्धेऽसव्यशिखोऽरुणनिभोऽपरे स्निग्ध । यावत्क्षणान् स दृश्यस्तावन्मासान् सुभिक्षकर" ॥ निशार्द्धे पश्चिमायां दिशि दक्षिणादिशाश्रितशिख स्निग्धो निर्म्मलमूर्त्तिर्दृश्यते स तु यावत्संख्यान् मुहूर्त्तान् दृश्यते तावदेव मासान् सुभिक्ष करोति ।

तथा च पराशरः ।

'अथावर्त्तकेतु श्वेतकेतो कर्म्मण्यतीतेऽपरेऽर्द्धरात्रेऽसव्योदितारुणाभया प्रदक्षिणेन ताम्रया शिखयोदितः । स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् अतीव सुभिक्ष मित्यथ चोत्सव जगत्" ॥ * ॥

अथ सम्वर्त्तकेतोर्लक्षणमाह ।

"पश्चात् सन्ध्याकाले सम्वर्त्तो नाम धूम्रताम्रशिखः ।
नभस्त्रिभागमाक्रम्य समूलाग्रस्थितो रौद्र" ॥

यावत एव मुहूर्त्तान् दृश्यो वर्षाणि हन्ति तावन्ति । भूपाञ्च शस्त्रनिपातैरुदयर्क्षं चापि पीडयति" ॥ पश्चादिति । पश्चिमाया दिशि यावतो मुहूर्त्तान् दृश्यस्तावन्ति तत्संख्यानि वर्षाणि नाशयति तथा नृपान् सङ्ग्रामैर्घ्नन्ति । तथोदयर्क्षे यस्मिन्नक्षत्रे उदितो दृश्यते तच्च पीडयति । तथा च पराशर । अथ सम्वर्त्तको वर्षसहस्रमष्टोत्तरं प्रोष्य पश्चिमेनास्तं गते सवितरि सन्ध्याया दृश्यते तन्वी ताम्ररूपा शूलाभा धूमं विमुञ्चन्ती दारुणा शिखां कृत्वा नभस्त्रिभागमाक्रम्य यावन्मुहूर्त्तान् निशि तिष्ठति तावद्वर्षाणि हन्ति परस्परं शस्त्रौघमपि पार्थिवा । यानि नक्षत्राणि समाश्रयति यत्र वोदेति तानि दारुणतर पीडयति तदाश्रिताञ्च देशानिति" ।

तथा च गर्ग ।

"येषा नक्षत्रविषये रूक्ष स ज्वाललोहित ।
दृश्यते वक्रमूर्त्तिश्च तेषा विद्यात् महाभयम् ॥
अवर्षशस्त्रपारुष्यकोप दुर्भिक्षमेव च ।
कुर्य्यान्नृपतिपीडाञ्च स्वचक्रपरचक्रत ॥
यत्र तिष्ठति नक्षत्रे प्रवास यत्र गच्छति ।
धूपयेद्वा स्पृशेद्वापि हन्याद्देशास्तथाश्रयान् ॥
यस्याभिषेकनक्षत्र जन्मभ कर्म्मभ तथा ।
देशर्क्षं पीडयेद्वापि स शान्तिपरमो भवेत् ॥
स्निग्ध प्रसन्नो विमल प्रदक्षिणशिखस्तथा ।
दृश्यते येषु देशेषु शिव तेषु विनिर्द्दिशेत्" ॥

अथ शुभान् केतून् वर्ज्जयित्वाशुभाना नक्षत्रस्पर्शनाधूपनाद्दुष्टफल वक्ष्यामीत्याह ।

"ये शस्तास्तान् हित्वा केतुभिराधूपितेऽथवा स्पृष्टे ।
नक्षत्रे भवति वधो येषा राज्ञा प्रवक्ष्ये तान्" ॥

ये केतव शस्ता प्रशस्तफलास्तान् त्यक्त्वान्यै केतुभि नक्षत्रे धूपिते अथवा स्पृष्टे येषा नृपाणा वधो मरण भवति तान् नृपान् कथयिष्ये ताञ्चाधुनाह । "अश्विन्यामश्मकप भरणीषु किरातपार्थिव हन्यात् । बहुलासु कलिङ्गेश रोहिण्या शूरसेनापतिम्" ॥ अश्विन्यामभिधूपिताया स्पृष्टाया वा केतुना अश्मकानां जनानामधिपति नाशयेत् एवं सर्व्वत्र । अन्येष्वाह । "उशीनरमपि भाग्ये उज्जयनीपमार्य्यम्णे । सावित्रे दण्डकाधिपति मौञ्जे अभिकेशम् । मघाया अङ्गाधिपं पूर्व्वफल्गुन्या पाण्डुनाथम्" ॥ भाग्ये पूर्व्वफल्गुन्या उशीनरम् । आर्य्यम्णे उत्तरफल्गुन्या उज्जयनीपतिम् । सावित्रे हस्ताया दण्डकारण्यनाथम् । मौञ्जे अश्लेषायां अभिका जनास्तेषामीशम् ।

अन्येष्वाह ।

"चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत् ।
वाचा काश्मीरकाम्बोजौ नृपती प्राभञ्जने न स्तः" ॥

चित्रासु केतुनाभिधूपितासु स्पृष्टासु च कुरुक्षेत्राधिपस्य मरण वध केतूपघातश्च समादिशेत् । प्राभञ्जने स्वात्या काश्मीरकाम्बोजाधिपौ न स्त न भवतः । अन्येष्वाह । "इक्ष्वाकुरलकनाथश्च हन्यते यदि भवेद्विशाखासु । मैत्रे पुण्ड्राधिपति ज्येष्ठासु च सार्व्वभौमकान्यकुब्जाधिपवध" ॥ विशाखासु यदि केतूपघातो भवेत् तदा इक्ष्वाकुनाथोऽलकनाथश्च हन्यते । इक्ष्वाकवो जना । अलका नगरी । अनुराधाया पुण्ड्राधिपति हन्यात् । ज्येष्ठासु च सार्व्वभौमस्य राज्ञो वधः कान्यकुब्जाधिपस्य च वध । अन्येष्वाह । "मूले नृमद्रकपती जलदेवे काशिपो मरणमेति । यौधेयकार्ज्जुनायनशिविवैद्यान् वैश्वदेवे च" ॥ मूले केतुनाभिधूपिते स्पृष्टे वा नृपतिं मद्रकपतिं च हन्ति । जलदेवे पूर्व्वाषाढायां काशिपतिर्म्मरणमेति । वैश्वदेवे उत्तराषाढाया यौधेयक आर्ज्जुनायन शिवि वैद्य एतान्नृपतीन् हन्ति । अथान्येष्वप्याह । "हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वङ्गपम् । नैमिषनृपं किरातप श्रवणादिषु षट्सु षडिमान् क्रमश" ॥ षट्सु श्रवणादिषु हतेषु षडिमान्नृपान् क्रमश क्रमेण हन्यात् ॥ तद्यथा ।

श्रवणे हते कैकयनाथम् । धनिष्ठाया पञ्चनदाधिपतिम् । शतभिषायां सिंहलाधिपतिम् । प्राग्भाद्रपदाया वङ्गाधिपतिम् । उत्तरासु नैमिषनृपम् । रेवत्या किराताधिप हन्यात् ॥ * ॥

अथ केतोर्व्विशेषमाह ।

"उल्काभिताड़ितशिख शिखी शिव शिवतरोऽभिदृष्ट । अशुभः स एव चोलवङ्गसितहूणचीनानाम्" ॥ य शिखी केतु उल्कयाभिमुख्येन ताड़िता हता शिखा चूडा यस्य स शिव श्रेयस्कर योऽभिदृष्ट उदितमात्र एव दृष्ट स शिवतर अतिशयेन शुभप्रदः केतुरेव विधश्चोलाना वङ्गाना सिताना हूणाना चाशुभ । चोलाद्या सर्व्व एव जना ॥ * ॥

अन्यद्विशेषमाह ।

"नम्रा यत शिखिशिखाभिहता यतो वा-
थर्क्षं च संस्पृशति तत्कथिताश्च देशान् ।
दिव्यप्रभावनिहतान् स यथा गरुत्मान्
भुङ्क्ते गतो नरपति परभोगिभोगान्" ॥

यतो यस्या दिशि शिखिन शिखा केतुशिखा नम्रा वक्रा तत्र ये देशा यस्या वा गन्तुं प्रवृत्ता अथ यदि ऋक्ष नक्षत्र संस्पृशति तत्कथिताश्च देशान् यस्या दिशि शिखा नम्रा तत्र च ये देशा वक्ष्यमाणास्तास्तत्कथितान् नरपती राजा गतो भुङ्क्ते स्वीकरोति । कीदृशान् दिव्येनाप्रतिहतेन प्रभावेण पराक्रमेण निहतान् निर्ज्जितान् कीदृशान् परैरन्यैर्भोगिभिर्भुज्यन्ते भोगा ग्रामास्तान् कथं स राजा भुङ्क्ते यथा गरुत्मान् गरुड दिव्यप्रभावनिहतान् परभोगिभोगान् भुङ्क्ते परा उत्कृष्टा ये भोगिन सर्पास्तेषा भोगा शरीराण्यङ्गानि च तान् यथा येन प्रकारेण तथा ।

तथा च पराशर ।

"यस्या दिशि समुत्तिष्ठेत् ता दिश नाभियोजयेत् ।
यत शिखा यतो धूमस्ततो यायान्नराधिप ॥
प्रतिलोमो यतः केतुर्यया ध्यायति पार्थिव ।
सामान्यवाहनबलस्तन्नाशमधिगच्छति" ॥

इति भट्टोत्पलविरचितायां संहितावृत्तौ केतुचाराध्याय ॥ * ॥

अन्यच्च ।

"अनभावमिरूपं वा ध्वजशस्त्रगृहोपमम् ।
तुरङ्गगजरूपादिनानारूपाणि केतवः ॥
शतमेकोत्तरं व्योम्नि सहस्रमपरे विदु ।

केतुः

नानारूपमनेकञ्चाप्येकमेवाह नारदः ॥
दिव्या नक्षत्रगा भौमाः केतवस्त्रिविधा मताः ।
शुक्लो ह्रस्वतनुः स्निग्ध ऋजुश्चाचिरसंस्थितः ॥
उदितोऽप्यतिवृष्टिः स्यात् सुभिक्षसुखकृच्छिखी ।
विपरीतस्वरूपस्तु धूमकेतुर्न शोभनः ॥
इन्द्रायुधानुकारी च द्विचूडो वा त्रिचूडकः ।
श्वेतः शस्त्राकुलं कुर्याल्लोहितश्चाग्निजं भयम् ॥
क्षुद्भयं पीतकः कुर्यात् कृष्णो रोगमयोऽत्ययम् ।
शस्त्रयाकारो विनाशाय सुखाय मुषलाकृतिः ॥
दीर्घः स्थूलः सुखायैव ह्रस्वः स्थूलो विनाशकृत् ।
मणिवर्णसवर्णाभ्यां किरणाभ्यां शिखान्विताः ॥
प्राक् पश्चिमदिशोर्दृश्या नृपयुद्धाय तेऽर्कजाः ।
वह्निजाः शुक्लवर्णाश्च लाक्षाबन्धूकसन्निभाः ॥
आग्नेय्यां दिशि दृश्यन्ते ते च वह्निभयप्रदाः ।
कृष्णा वक्रशिखा रूक्षा मृत्युजाः पञ्चविंशतिः ॥
याम्यायां ते च दृश्यन्ते तथा मरकसूचकाः ।
आदर्शवृत्ताकृतयो विशिखाः क्षितिसम्भवाः ॥
साश्रवस्तैलतोयाभाः ऐशान्या क्षुद्भयप्रदाः ।
चन्द्रजा हिमकुन्देन्दुकुमुदाभाश्च तैलवत् ॥
जलाभाश्चोत्तरे दृश्याः केतवस्ते सुभिक्षदाः ।
त्रिवर्णस्त्रिशिखश्चैको ब्रह्मणोऽसौ युगान्तकृत् ॥
स चानियतदिक्संस्थो ब्रह्मदण्डः स उच्यते ।
अर्कजा वह्निजा याम्यास्त्रयस्ते तत्त्वसङ्ख्यया (२५) ॥
क्षितिजा शशिसङ्ख्याश्च(२२) त्रयोऽन्ये ब्रह्मणोऽप्ययम् ।
एकोत्तरशतं ह्येते सहस्रन्त्वथ वक्ष्यते ॥
शुक्राश्चतुरशीत्याख्या विपुलाः सिततारकाः ।
स्निग्धास्तीव्रफला ज्ञेयाः सप्रभा द्विशिखाः परे ॥
षष्टिः शनितनूद्भूतास्तेऽनिष्टफलप्रदाः ।
सर्वत्र कनकोद्दीप्ता विकचा नाम जीवजाः ॥
शितैकतारा विशिखा याता याम्याश्रितास्तु ते ।
नातिव्यक्ताः सूक्ष्मदीर्घाः शुक्ला बुधसमुद्भवाः ॥
पापदास्तस्कराख्यास्ते यथेष्टदिक्प्रभान्विताः ।
त्रिचूडतारा क्षतजा नानारूपाः कुजात्मजाः ॥
कौङ्कुमाख्या हि ते सौम्य दिक्स्थाः पापफलप्रदाः ।
त्रिशिखाश्च त्रितारश्च रक्तलोहितरश्मयः ॥
लोहिताङ्कात्मजा षष्टिः सङ्ग्रामभयकारकाः ।
तामसाः कीलकाख्याश्च राहुजाः सूर्यविम्बगाः ॥
दृष्टाः शुभफलास्ते च चन्द्रस्थाः पापदायिनः ।
कबन्धसंज्ञाश्चन्द्रस्थाश्चन्द्रेऽर्केऽप्यशुभप्रदाः ॥
कृष्णाभाः कृष्णपर्यन्ताः सकुलाः कृष्णरश्मयः ।
राहुपुत्रास्त्रयस्त्रिंशत् केतवश्चातिदारुणाः ॥
यत्रार्कविम्बे दृश्यन्ते अत्यन्तम्भूमिपतेः ।
स्वचक्रं परचक्रेण पीड्यते क्षुद्गुणान्वितम् ॥
अनीकस्तुल्यरूपा स्मपविशक्तयावहाः ।
भ्रातृ वा कृष्णशङ्कुर्वा कबन्धो वार्कमण्डले ॥
दृश्यते यत्र तत्राशु भूमिपालो विनश्यति ।
दण्डकीलकपीठाश्च दृश्यते सूर्यमण्डले ॥
दुर्भिक्षेतिभयव्याधिवह्निचौरादिपीडनम् ।
प्रजानाम् गर्दमानस्थान् यांश्चान्यान् मृगपक्षिणः ॥
आदित्यमण्डले दृष्टा देशभङ्गं विनिर्दिशेत् ।
मण्डलाभ्यन्तरस्थैश्च मध्यादेस्तेगपश्चिमिः ॥
परचक्रागमो वाच्यः प्रजानाशस्तथैव च ।

केतुः

यत्रार्कविम्बस्थ स्यात्ताग्न्यत्र प्रजाक्षय ॥
स्कन्धो दुर्भिक्षकृद्दाताप्यस्नापपनाशभयप्रदः ॥
सितरक्तहरिद्वर्णाविद्धो द्विशत्यदिशः ।
वह्निजा विश्वरूपाख्या ज्वालामालाकुलाः शतम् ॥
श्यामारुणा वितारश्च विकीर्णामरसन्निभाः ।
ताराप्रख्यनिभा रूक्षा वायुजाः सप्तसप्ततिः ॥
ब्रह्मणाश्चतुरस्रास्ते वेदाग्निशतद्वयम् ।
द्वात्रिंशद्रशशसनामा कङ्काख्या वरुणोद्भवाः ॥
प्रभाव्याः शशिवत्ते च ज्ञेयास्तीक्ष्णफलप्रदाः ।
विरूपतारास्त्रिशिखा वा शिखिनस्तेऽशुभप्रदाः ॥
सर्वदिक्प्रभवाः शुक्लाः केतवो भयदायिनः ।
एवं केतुसहस्रञ्च सविशेषश्च वक्ष्यते" ॥ * ॥
"उत्तरायणसंस्निग्धो महान् यश्चापरोदयी ।
करोति मरकं सद्यः सुभिक्षञ्च तथोत्तमम् ॥
रूक्षोऽग्निकेतुः पुच्छीर्य प्राच्यां स्निग्धोऽप्युपप्लव ।
कपालकेतुर्यो दर्शे सधूमांशुशिखो भवेत् ॥
प्रागर्द्धचारी नभस क्षुन्मारावृष्टिकारकः ।
प्रागग्निमार्गाच्छूलाग्रो रूक्षः श्यामलताम्रकः ॥
त्रिभागचारी नभसो रौद्राख्यः पूर्ववत् फलम् ।
अपरस्यां चलकेतुः शिखया दक्षिणाग्रया ॥
अङ्गुलोच्छ्राययया गच्छेदुत्तराशां यथा यथा ।
तथा दैर्घ्यं समायाति मुनीन् संस्पृश्य सप्त च ॥
ध्रुवं प्रतिनिवृत्तोऽभिजितञ्च नभसोऽर्द्धकम् ।
गत्वाऽस्तं याति याम्येन स प्रयागकुलावधिः ॥
अवन्तीं पुष्करारण्यं यावदन्याञ्चापरान् ।
देशान् क्वचित् क्वचिद्रोगदुर्भिक्षैः परिपीडितान् ॥
श्वेताख्यस्तु जटाकारो श्यामो व्योमत्रिभागगः ।
निवर्त्ततेऽपसव्येन त्रिभागी कुरुते प्रजाः ॥
आधूम्रशिखया दृश्यः कृत्तिकास्थितोऽपरः ।
रश्मिकेतुरिति ख्यातस्त्रिभागी कुरुते प्रजाः ॥
पश्चात् सन्ध्यासु सम्वर्त्तो धूमताम्रशिखो वियत् ।
त्र्यंशमाक्रम्य शूलाग्रावस्थितो रौद्रदर्शनः ॥
मुहूर्त्तान् यावतो दृश्यस्तावद्वर्षाणि हन्ति स ।
भूपशस्त्रनिपाताद्यैरुदयर्क्षं निपीडयेत्" ॥ * ॥
"चैत्रवैशाखयोर्मध्ये कौबेरांस्तु विनिर्दिशेत् ।
उच्छ्रितैर्यूपवेदीभिरवच्छिन्नैर्ध्वजतोरणैः ॥
हविर्धूमाकुला तत्र दृश्यते च वसुन्धरा ।
ज्यैष्ठे चैव तथाषाढे वायुपुत्रांश्च निर्दिशेत् ॥
वान्ति चैव तथा वाता महायुद्धं महाभयम् ।
श्रावणप्रौष्ठपदयोर्व्वारुणांस्तु विनिर्दिशेत् ॥
आरोहयन्ति ते मेघान् पृथ्वीं कुर्य्युर्व्वसुन्धराम् ।
धान्यं समर्घतां याति ईतयो न भवन्ति च ॥
आश्विने कार्त्तिके चैव सूर्य्यपुत्रान् विनिर्दिशेत् ।
ततो दहति तीव्रांशुः सर्व्वाणि दिवाकरः ॥
म्रियन्ते च तदा गावः श्वापदाश्च विशेषतः ।
मार्गशीर्षे च पौषे च वह्निपुत्रान् विनिर्दिशेत् ॥
प्रीष्म भवति दुर्भिक्षं हाहाभूतमचेतनम् ।
माघे च फाल्गुने चैव यमपुत्रान् विनिर्दिशेत् ॥
छर्द्दिज्वरातिसारैश्च व्याधिभिर्बाधिवेदना ॥ * ॥
कृत्तिका रोहिणी सौम्यं पृथिव्या मध्यमुच्यते ।
केतवो यत्र दृश्यन्ते आग्नेया दश पञ्च च ।
आग्नेयेषु च दृष्टेषु लोकानां सक्षयो भवेत् ॥

केतुः

गिरावैदिशाः प्रजाः सर्व्वा भवन्ति हि न संशयः ।
पुनर्व्वसुस्तथा पुष्यः पृथिव्याः पूर्वमुच्यते ॥
केतवो यत्र दृश्यन्ते रौद्रास्तेऽप्येकविंशतिः ।
यदा रौद्राः प्रदृश्यन्ते दुर्भिक्षं निर्द्दिशेत्तदा ॥
घूर्णन्ते च प्रजाः सर्व्वा मृत्युव्याधिरोगपीडिताः ।
अश्लेषामित्यभाग्यानि विशाखस्त्विथपूर्व्वतः ॥
केतवो यत्र दृश्यन्ते औद्दालकिसुता दश ।
सुभिक्षं क्षेममारोग्यं सुवृष्टिः शस्यसम्पदः ॥
आर्यमादीनि च त्रीणि विशाखन्तिनभागसः ।
केतवो यत्र दृश्यन्ते काश्यपेयाश्चतुर्दश ॥
अनावृष्टिभयं घोरं प्रजानामतिदारुणम् ।
स्वाती विशाखा मित्रञ्च भागो दक्षिणपश्चिमः ॥
केतवो यत्र दृश्यन्ते चत्वारो मृत्युसम्भवाः ।
दुर्भिक्षं मरकं घोरमनावृष्टिस्तथैव च ॥
उपद्रवश्च भूतानां तदा भवति दारुणः ।
ज्येष्ठा मूलमथाषाढा भाग उत्तरपश्चिमः ॥
केतवो यत्र दृश्यन्ते त्रयस्ते सोमसम्भवाः ।
सुभिक्षञ्च सुवृष्टिश्च मही यज्ञोत्सवाकुला ॥
उत्तरा श्रवणा चैव नक्षत्रं वसुदैवतम् ।
केतवो यत्र दृश्यन्ते माहेयाः पञ्चविंशतिः ॥
माहेयेषु च दृष्टेषु लोकानां सक्षयो ध्रुवम् ।
तदा राजसहस्राणां मही पिबति शोणितम् ॥
वारुणञ्चैव नक्षत्रं तथा भाद्रपदद्वयम् ।
केतवो यत्र दृश्यन्ते वारुणास्त्रय एव ते" ॥ * ॥
"ऊर्म्मिकेतुः श्वेतकेतुर्धूमकेतुस्तृतीयकः ।
ऊर्म्मिकेतुर्यदा दृश्येत्तदाप्युदकजं भयम् ॥
श्वेतकेतुर्यदा दृश्येत् श्वेतास्थि कुरुते महीम् ।
तदा मातृधनमांसानि भक्षयन्तीह मानुषाः ॥
क्षुद्भयार्त्तं जगत् कृत्स्नं चक्रवद्भ्रमते तदा ।
धूमकेतुर्यदा दृश्येत्तस्य वक्ष्यामि लक्षणम् ॥
स हन्ति शिखया योधान् राज्ञो मन्त्रिणां गणान् ।
रेवत्याश्वयुजञ्चैव नक्षत्रं यमदैवतम् ॥
केतवो यत्र दृश्यन्ते यमपुत्रास्त्रयोदश ।
यमपुत्रेषु दृष्टेषु लोकानां सक्षयो ध्रुवम् ॥
चतुर्विधानां भूतानां सक्षयो जायते महान्" ॥ * ॥
"अपरे विविधाः सन्ति दहनस्याद्विकेतवः ॥
न्यग्देशविनाशाय दुर्भिक्षभयदायकाः ।
कुमुदाभस्तु कुमुदो वारुण्यां प्राक्शिखो निशाम् ॥
एकां दृष्टः सुभिक्षाय दशवर्षाणि सौख्यदः ।
पश्चिमाभ्युदितश्चान्ये कुर्वन्ति प्रबलान् ज्वरान् ॥
पाण्डुरोगं प्रतिश्यायं मुखरोगमरोचकम् ।
क्षीरधारेव शुक्लाभा स्निग्धा सूक्ष्मतरा शिखा ॥
सकृद्दश्यमिकदृश्याश्चेते चतुर्म्मासं सुभिक्षदाः ।
जलकेतुस्तु यः पश्चात् शिखया नवया परे ।
सुभिक्षं कुरुते शान्तिं प्रजानां नवमासतः ।
भवकेतुस्त्वेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः ॥
दक्षिणावर्त्तशिखया हरिणामूललुब्धया ।
मुहूर्त्तान् यावतो दृश्यस्तावन्मासान् सुभिक्षदः ॥
स एव रूक्षो दृश्यश्चेद्रोगप्राणान्तकारकम् ।
पद्मकेतुर्मृणालाभो निशामेकां प्रदृश्यते ॥
सप्त मासान् सुभिक्षं स हर्षवर्षसुखदायकः ।
आवर्त्तः सव्यशिखयाश्याश्च निशार्द्धगः ॥

स्निग्धो यावदहानि दृश्यस्तावन्मासान् सुभिक्षद'।
ध्रुवकेतुरनियतगतिवर्णाकृतिर्भवेत् ॥
दिव्यान्तरीक्षभौमोऽयं स्निग्ध इष्टः स नान्यथा।
सेनाङ्गेषु महीन्द्राणां देशस्य गिरिशाखिषु॥
उपस्करेषु गेहिनां दृश्यते च विनाशकृत्।
हन्यादुल्का यदा गत्वं केतुर्व्वाप्युपधूपयेत् ॥
दुर्भिक्षं मरकश्चैव तदा जगति जायते ।
यदा तु भार्गवं प्राप्य धूमकेतुः प्रधूपयेत् ॥
तदा सैन्यानि वध्यन्ते यत्नोद्युक्ता नराधिपाः ।
यात्रागतास्च ये सार्था अस्तमन्तश्च ये जनाः ॥
तथा चारगणाः सर्व्वे भयमृच्छन्ति दारुणम् ।
यदा प्रधूपयेत् केतुः सप्तर्षीन् ध्रुवमेव च ॥
तदा लोकाः क्षयं यान्ति सलिलञ्चापि शुष्यति ।
धूमकेतुर्यदा राज्ञो दृश्यते विषये क्वचित् ॥
सराष्ट्रः सपुरो राजा क्षिप्रमेव प्रणश्यति ।
यावन्त्यहानि दृश्यन्ते तावन्मासान् फलप्रदः ॥
मासैरब्दान् विजानीयात् प्रथमे तु त्रिपक्षतः"॥*॥
"केतूत्पाते तु सर्व्वस्मिन् समये समुपस्थिते ॥
महाशान्तिं प्रकुर्व्वीत विविधां भूरिदक्षिणाम् ।
धनं वा सर्व्वमुत्सृज्य मृत्योर्मुच्येत बन्धनात् ॥
दद्याद्वा पृथिवीं सर्व्वां राजा शान्तिं नियच्छति।
अकस्मादृश्यते केतुरुदयेऽस्तमयेऽपि वा ॥
निहन्त्यन्तःपुरे राज्ञो ज्वरः पित्तोद्भवो भवेत् ।
दधिमधुघृताक्तानां पुष्पाणामयुतं ततः ॥
जुहुयादिन्द्रमौलस्य केतुं दद्याद्द्विजातये ।
भूषितं हेमरत्नाद्यैस्तत सम्पद्यते शुभम्" ॥
इति मधुरानाथविद्यालङ्कारकृतसमयामृते केतूत्पाता समाप्ताः॥ केतुगणः कुशद्वीपजात जैमिनिमुने सन्तानः मण्डकुलः धूम्रवर्णः गृध्रवाहनः शूद्रवर्णः विकृताननः सूर्य्याभिमुखः दण्ड धूम्रवसनः वरदः गदाधरश्च । तस्याधिदेवता चित्रगुप्तः प्रत्यधिदेवता ब्रह्मा । इति ग्रहयागतत्त्वम् ॥ अस्य स्वरूपं शनिराहुवत् । स च शिखावान् अनेकरूपः । इति जातकम् ॥ * ॥ रोगः । पताका । (यथा, रघौ ७ । ६५ ।
"सद्योविलिस्तेन शिलीमुखाग्रै-
र्निर्द्देमिता केतुषु पार्थिवानाम्" ॥)
उत्पातः । (यथा, मनुः ९ । ३८ ।
"उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च" ॥)
चिह्नम् । इति मेदिनी । (यथा, रघुः २ । ३३ ।
"वमार्थ्यगृह्य निगृहीतधेनु-
र्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन् विस्मितमात्मवृत्तौ
सिंहोरुसत्त्वं निजगाद सिंहः" ॥)
दीप्तिः । इति हेमचन्द्रः ॥ (सूर्य्यः । यथा, ऋग्वेदे १० । ८ । १ । "प्रकेतुना वृहता यात्यग्निः" । तत्रैव । ३ । ३४ । ४ "प्रारोचयत् मनवे केतुमह्नाम्" । रश्मिः । यथा, ॐ उदुत्य जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम्" ।)
केतुमः, पुं, (केतुरिव भातीति । भा + कः ।) मेघः । इति शब्दमाला ॥
केतुमालं, क्ली, जम्बुद्वीपस्य नवखण्डान्तर्गतखण्डविशेषः । इति त्रिकाण्डशेषः ॥ (क्वचित् पुंलिङ्गोऽपि दृश्यते । यथा, महाभारते ६ । ६ । ३२ ।
"मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीपते । ।
जम्बुखण्डे च तत्रैव महाजनपदो नृप" ॥
आग्नीध्रराजपुत्रः स्वायम्भुवमनोः प्रपौत्रश्च । यथा, भागवते ५ । २ । २० ।
"तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत्" ॥
स्त्री, नदी । यथा, महाभारते । ३ । ८६ । १४ ।
"तत पुण्यतमा राजन् । सततं तापसैर्युता ।
केतुमाला च मेध्या च गङ्गाद्वारञ्च भूमिप ।" ॥)
केतुरत्नं, क्ली, (केतौ रत्नं केतुभिः रश्मिभिः युक्तं वा रत्नम् ।) वैदूर्य्यमणिः । इति राजनिर्घण्टः ॥
केदरः, पुं, (के मस्तके दृणाति । दॄ + अच् । केन दीर्य्यते वा । दॄ + अप् कर्म्मणि ।) वृक्षविशेषः । इति लिङ्गादिसंग्रहे अमरः । टैरके त्रि । इति शब्दरत्नावली ॥
केदारः, पुं, (के जले दारः आदरो यस्य । यद्वा केन जलेन द्रियते आद्रियते इति । निपातनात् साधुः ।) क्षेत्रम् । क्षेत् इति भाषा । इत्यमरः । २ । ९ । ११ ॥ (यथा, मनौ ९ । ३८ ।
"भूमावप्येककेदारे कालोप्तानि कृषीवलैः ।
नानारूपाणि जायन्ते वीजानीह स्वभावतः" ॥
क्षेत्रस्थक्षुद्रजलाधारविशेषः । यथा, रामायणे ३ । २२ । १८ ।
"स्नप पिबति केदारे निश्वासाकुलितं पयः" ॥)
केदारजलगुणाः । मधुरत्वम् । विपाके गुरुत्वम् । दोषलत्वम् । "तदेव बद्धमुक्तन्तु विशेषाद्दोषदं भवेत्" । इति राजनिर्घण्टः ॥ (के मस्तके शिखरदेशे दारः प्रस्रवणादिकारणखरूपविदीर्णस्थानं यस्य ।) पर्व्वतविशेषः । (के मस्तके शिरः स्थितजटाभ्यन्तरे गङ्गारूपिणी दारा पत्नी यस्य सर्व्वत्र निपातनात् साधुः ।) शिवः । भूमिभेदः । आलवालम् । इति मेदिनी ॥ (भूमध्यस्थानविशेषः । यथा, हठयोगदीपिकायाम् । ३ । २४ ।
"कालपाशमहाबन्धविमोचनविचक्षणः ।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः" ॥
"केदारम्भ्रुवोर्मध्ये शिवस्थानं केदारशब्दवाच्यं तं मनः स्वान्तं प्रापयेत्" । इति तट्टीका ॥ तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । ६६ ।
"केदारे चैव राजेन्द्र ! कपिलस्य महात्मनः ।
ब्रह्माणमधिगत्वा च शुचिः प्रयतमानसः ।
सर्व्वपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते" ॥ * ॥
केदारपर्व्वतस्थलिङ्गभेदः । स तु लिङ्गमूर्त्त्या काश्यामाविर्भावात् तन्नाम्ना एवाख्यातः तद्विवरणं यथा, काशीखण्डे । ७७ अध्याये ।
श्रीपार्व्वत्युवाच ।
"नमस्ते देवदेवेश । प्रणमत्करुणानिधे ! ।
वद केदारमाहात्म्यं महानामनुकम्पया ॥
तस्मिन् लिङ्गे सदा प्रीतिस्तव काश्यामनुत्तमा ।
सद्भक्ताश्च जना नित्यं देवदेव ! महाधियः ॥

श्रीदेवदेव उवाच ।
शृणवपर्णेऽभिधास्यामि केदारेश्वरसंकथाम् ।
समाकर्ण्यापि या पापोऽप्यपापो जायते क्षणात् ।
केदारं यातुकामस्य पुंसो निश्चितचेतसः ।
आजन्मसञ्चितं पापं तत्क्षणादेव नश्यति ॥
गृहादविनिर्गते पुंसि केदारगतिनिश्चिते ।
जन्मद्वयार्ज्जितं पापं शरीरादपि निर्व्रजेत् ॥
मध्येमार्गं प्रपन्नस्य त्रिजन्मजनितं त्वघम् ।
देहगेहाद्विनिःसृत्य निराशं याति निश्वसत् ॥
सायं केदार केदार केदारेति त्रिरुच्चरन् ।
गेहेऽपि निवसन्नूनं यात्राफलमवाप्नुयात् ॥
दृष्ट्वा केदारशिखरं पीत्वा तत्रत्यमम्बु च ।
जन्मजन्मकृतात्पापात् मुच्यते नात्र संशयः ॥
हरपापह्रदे स्नात्वा केदारेशं प्रपूज्य च ।
कोटिजन्मार्ज्जितैनोभिर्मुच्यते नात्र संशयः ॥
सकृत्प्रणम्य केदारं हरपापकृतोदकः ।
स्थाप्य लिङ्गं हृदम्भोजे प्रान्ते मोक्षं गमिष्यति ॥
हरपापह्रदे श्राद्धं श्रद्धया यः करिष्यति ।
उद्धृत्य सप्त पुरुषान् स मे लोकं गमिष्यति ॥
पुरा रथन्तरे कल्पे यदभूदत्र तत् शृणु ।
अपर्णे दत्तकर्णा त्वं वर्णयामि तवाग्रतः ॥
एको ब्राह्मणदायादः उज्जयिन्या इहागतः ।
कृतोपनयनः पित्रा ब्रह्मचर्य्यव्रते स्थितः ॥
स्वर्णीं पाशुपतीं काशीं स विलोक्य समन्ततः ।
द्विजैः पाशुपतैः कीर्णां जटामुकुटमण्डितैः ॥
कृतलिङ्गसमैश्चैव भूतिभूषितवर्ष्मभिः ।
भिक्षाहृतान्नसन्तुष्टैः पुष्टैर्गङ्गोदकामृतैः ॥
बभूवानन्दितमना व्रतं जग्राह चोत्तमम् ।
हिरण्यगर्भादाचार्य्यान्महत्पाशुपताभिधम् ॥
स च शिष्यो वशिष्ठोऽभूत् सर्व्वपाशुपतोत्तमः
स्नात्वा ह्रदे हरपापे नित्यं प्रातः समुत्थितः ॥
विभूत्याहरहः स्नाति त्रिकालं लिङ्गमर्च्चयन् ।
नान्तरं स विजानाति शिवलिङ्गे गुरौ तथा॥
स द्वादशाब्ददेशीयो वशिष्ठो गुरुणा सह ।
ययौ केदारयात्रार्थं गिरिं गौरीगुरोर्गुरुम् ॥
यत्र गत्वा न शोचन्ति किञ्चित् संसारिणः क्वचित् ।
शम्भोदकं लिङ्गरूपं लिङ्गरूपत्वमागताः ।
असिधारं गिरिं प्राप्य वशिष्ठस्य तपस्विनः ॥
गुरुर्हिरण्यगर्भाख्यः पञ्चत्वमगमत् तदा ।
पश्यतां तापसानाञ्च विमाने सार्व्वकामिके ॥
आरोप्य तं पारिषदाः कैलासमनयन् मुदा ।
यस्तु केदारमुद्दिश्य गेहाद्दर्द्धपथेऽप्यहो ॥
अकातरस्त्यजेत् प्राणान् कैलासे स चिरं वसेत् ।
तदाश्चर्य्यं समालोक्य स वशिष्ठस्तपोधनः ॥
केदारमेव लिङ्गेषु बहुमंस्त सुनिश्चितम् ।
अथ स्नात्वा स केदारीं यात्रां वाराणसीमगात् ॥
अग्रहीन्नियमं चापि यथार्थं चाकरोत् पुनः ।
प्रतिचैत्रं सदा चैत्र्यां यावज्जीवमहं ध्रुवम् ॥
विलोकयिष्ये केदारं वसन् वाराणसीं पुरीम् ।
तेन यात्राः कृताः सम्यक् मठिरेकाधिका मुदा॥
आनन्दकानने नित्यं वसता ब्रह्मचारिणा ।
पुनर्यात्रां स वै चक्रे मधौ निकटवर्त्मनि ॥

परमोत्साहसन्तुष्टः पलिताकलितोऽप्यहम् ।
तपोधनैस्तस्मिन् शस्यमानैर्निवारितः ॥
कारुण्यपूर्णहृदयैरन्यैरपि च सज्जनैः ।
ततोऽपि न तदुत्साहभङ्गोऽभूद्दृढचेतसः ॥
मध्ये मार्गं मृतस्यापि गुरोरिव गतिर्मम ।
इति निश्चितचेतस्के वशिष्ठे तापसे शुचौ ॥
अभ्रमाम्नपरीपुष्टे तुष्टोऽहं चण्डिकेऽभवम् ।
स्वप्ने मया स सम्प्रोक्तो वशिष्ठस्तापसोत्तम ।
दृढव्रत । प्रसन्नोऽस्मि केदारं विद्धि मामिह ॥
अभीष्टञ्च वरं मत्तः प्रार्थयस्वाविचारितम् ।
इत्युक्तवत्यपि मयि स्वप्नो मिथ्येति सोऽब्रवीत् ॥
ततोऽपि स मया प्रोक्तः स्वप्नो मिथ्यास्तु चिन्त्यताम् ।
भवादृशामसिथ्यैव स्वाध्यायवशवर्त्तिनाम् ॥
वरं ब्रूहि प्रसन्नोऽस्मि स्वप्नशङ्कां त्यज द्विज ।
तव सत्त्ववतः किञ्चित् मयाऽदेयं न किञ्चन ॥
इत्युक्तं मे समाकर्ण्य वरयामास मामिति ।
शिष्यो हिरण्यगर्भस्य तपस्विजनसत्तम ॥
यदि प्रसन्नो देवेश । तदा मे सानुगा इमे ।
सर्व्वे त्वयानुग्राह्याः एष एव वरो मम ॥
देवि । तस्येदमाकर्ण्य परोपकृतिशालिनः ।
वचनं नितरां प्रीतस्तथेति तमुवाच ह ॥
पुनः परोपकरणात् तत्तपोद्विगुणीकृतम् ।
तेन पुण्येन स मया पुनः प्रोक्तो वरं वृणु ॥
स वशिष्ठो महाप्राज्ञो दृढपाशुपतव्रतः ।
देवि ! मे प्रार्थयामास हिमशैलादिह स्थितिम् ॥
ततस्तत्तपसा तुष्टः कथामाकर्ण्य तत्र हि ।
हिमशैले स्थितस्तत्र सर्व्वभावेन संस्थितः ॥
तत्र प्रभाते सञ्जाते सर्व्वेषां पश्यतामहम् ।
हिमाद्रेः प्रस्थितः प्राप्तः स्तूयमानः सुरर्षिभिः ॥
वशिष्ठं पुरतः कृत्वा सर्व्वसार्थसमायुतम् ।
हरपापह्रदे तीर्थे स्थितोऽहं तदनुग्रहात् ॥
मत्परिग्रहतः सर्व्वे हरपापे कृतोदकाः ।
आराध्य मामनेनैव वपुषा सिद्धिमागताः ॥
तदाप्रभृति लिङ्गेऽस्मिन् स्थितः साधकसिद्धये ।
अविमुक्ते परे क्षेत्रे कलिकाले विशेषतः ॥
तुषाराद्रिं समारुह्य केदारं वीक्ष्य यत् फलम् ।
तत् फलं सप्तगुणितं काश्यां केदारदर्शने ॥
गौरीकुण्डं यथा तत्र हंसतीर्थञ्च निर्म्मलम् ।
यथा मधुस्रवा गङ्गा काश्यां तदखिलं तथा ॥
इदं तीर्थं हरपापं सप्तजन्माघनाशनम् ।
गङ्गायां मिलितं पश्चाज्जन्मकोटिकृताघहम्” ॥

केदाराख्यपर्व्वतस्य तीर्थयात्रिभिः प्रायेण बदर्य्याश्रमात् सप्तदिनैः समागमनीयः ॥ *॥)

केदारकटुका, स्त्री, (केदारस्य क्षेत्रस्य कटुका इव ।) कटुका । इति राजनिर्घण्टः । कट्की इति भाषा ॥ (कटुकाशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

केदारज, क्ली, (केदारात् जायते इति । जन् + ड ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

केदारेश, पुं, (केदारः एतन्नामा पर्व्वतः तत्र य ईशः लिङ्गरूपी महादेवः । यद्वा, केदाराख्य ईशः ।) काशीस्थशिवविशेषः । यथा,—
“हरपापह्रदे स्नात्वा केदारेशं प्रपूज्य च ।
कोटिजन्मार्ज्जितैनोभिर्मुच्यते श्रद्धयान्वितः” ॥
इति स्कान्दे काशीखण्डे ७७ अध्यायः ॥

केदारेश्वर, पुं, (केदाराख्य ईश्वरः । केदारपर्व्वतस्य ईश्वरो वा ।) काशीस्थशिवविशेषः । यथा,—
“शृणु सपर्ण्णेऽभिधास्यामि केदारेश्वरसत्कथाम् ।
समाकर्ण्यापि यां पापोऽप्यपापो जायते क्षणात्” ॥
इति स्कान्दे काशीखण्डे ७७ अध्यायः ॥

केनारः, पुं, (के मूर्द्ध्नि नारः । अलुक्समासः ।) कुम्भिनरकः । इति हेमचन्द्रः । शिरः । कपोलः । सन्धिः । इति मेदिनी ॥

केनिपात, पुं, (के जले निपात्यतेऽसौ । नि + पत् + णिच् + अच् ।) अरित्रम् । इति शब्दरत्नावली ॥ हालि इति भाषा ॥

केनिपातकः, पुं, (केनिपात + स्वार्थे कन् ।) केनिपातः । इत्यमरः । १ । १० । १३ ॥

केन्दुः, पुं, (कु ईषत् इन्दुरिव । को कादेशः ।) तिन्दुकवृक्षः । इति शब्दरत्नावली ॥

केन्दुकः, पुं, (केन्दु + संज्ञायां कन् ।) गालववृक्षः । इति शब्दचन्द्रिका ॥ गाव इति भाषा ॥ तालविशेषः । यथा । “लघुद्वयं विरामान्ततालो केन्दुकसञ्ज्ञके” । लघुद्वयस्थाने द्रुतद्वयमिति च पाठः । अपरं नियमं विना । इति सङ्गीतदामोदरः ॥

केन्द्र, क्ली, लग्नम् । लग्नात् चतुर्थसप्तमदशमस्थानानि । तत्पर्य्यायः । कण्टकम् २ । यथा,—
“लग्नाम्बुद्यूनकर्म्माणि केन्द्रमुक्तञ्च कण्टकम् ।
चतुष्टयस्थानं खेटो बली लग्ने विशेषतः” ॥
इति नीलकण्ठकृतवर्षतन्त्राख्यजातकम् ॥ स्पष्टग्रहानयनार्थं शीघ्रमन्दसञ्ज्ञकाङ्कद्वयम् । यथा,—
“मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रं
चलोच्चं ग्रहाख्यं भवेच्छीघ्रकेन्द्रम्” ॥
इति भास्करीयसिद्धान्तशिरोमणौ स्पष्टाधिकारः ॥ ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्रात् विशोध्य च शिष्टं केन्द्रम् । इति सूर्य्यसिद्धान्तः ॥ गोलस्य मध्यस्थानम् । यथा,—
“वृत्तस्य मध्यं किल केन्द्रमुक्तम्
केन्द्रं ग्रहोच्चान्तरमुच्यतेऽतः ।
यतोऽन्तरे तावति तुङ्गदेशात्
शीघ्रोच्चवृत्तस्य सदैव केन्द्रम्” ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥ (यात्रायोगविशेषः । यथा, शब्दार्थचिन्तामणिधृतवचने ।
“आपोक्लिमगते चन्द्रे केन्द्रस्थे सुरपूजिते ।
योगः केन्द्र इति ख्यातो यातुरिष्टार्थसिद्धिदः” ॥
प्रान्तसीमा । यथा, योगशास्त्रे ।
“पृथिव्या उभयोः केन्द्रयोः स्थितौ द्वावेव योगिनौ ।
एकत्र सान्निध्यस्थितिवत् सन्निकर्षस्थिताविव वा अन्योन्यमालपतः” ॥)

केप, ऋ ङ गत्याम् । चाले । इति कविकल्पद्रुमः । (भ्वा आत्म सक-सेट्-ऋदित् ।) ङ, केपते । ऋ, अचिकेपत् । इति दुर्गादासः ॥

केमद्रुम, पुं, जन्मकालीनग्रहयोगविशेषः । यथा ।
“रविवर्ज्जं द्वादशगैरनफा चन्द्रात् द्वितीयगैः सुनफा ।
उभयस्थितैर्दुरधुरा केमद्रुमसञ्ज्ञितोऽन्यः” ॥
अनफादियोगः । सच्छील विषयसुखान्वित प्रभुख्यातियुक्तमनफायाम् । सुनफाया धीधनकीर्त्तियुक्तमात्मार्ज्जितैश्वर्य्यञ्च ॥ बहुभृत्यकुटुम्बारम्भ सुद्विग्नचित्तमपि दौरधुरे । मृतक दुःखिनमधनं जातं केमद्रुमे विद्यात् ॥ अनफादिफलम् । इति ज्योतिस्तत्त्वम् ॥ (केमद्रुमयोगे जातस्य फलं यथा, जातकपद्धतौ ।
“नृपतेर्वंशजातोऽपि केमद्रुमभवो नरः ।
मलिनो दुःखितो नीचो निःस्वो दासो भवेत् खलः” ॥
तद्भङ्गस्तु तत्रैव । “चन्द्रे केन्द्रगतेऽथवा ग्रहयुते सर्व्वैश्च दृष्टे विधौ सर्व्वैः कण्टकसंस्थितैर्ग्रहयुतैः केमद्रुमो नेष्यते । लग्नाद्वा विधौ वा वृद्धिस्थे शुभे सर्व्वं शुभं फलम् । द्वाभ्यां मध्ये तथैकेनाल्प चेन्नास्ति दरिद्रता” ॥)

केमुकः, पुं, (के शिरोवच्छेदे अमयतीति । अम् रोगे + उक प्रत्ययः ।) वृक्षविशेषः । केँउ इति भाषा । तत्पर्य्यायः । पेचुकः २ पेचुनी ३ पेचुः ४ पेचिका ५ दलसारिणी ६ केचुकः ७ । इति रत्नमाला ॥ तस्य मूलगुणाः । कफपित्तनाशित्वम् । रोचनत्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥ कटुत्वम् । पाके तिक्तत्वम् । ग्राहित्वम् । हिमत्वम् । लघुत्वम् । पाचनत्वम् । रूक्षत्वम् । ज्वरकुष्ठकासप्रमेहाखनाशित्वम् । वातलत्वम् । पटुत्वञ्च । इति भावप्रकाशः ॥ (एतत् फलं हविष्ये वर्ज्जनीयम् । क्ली, कन्दशाकविशेषः ॥)

केयूर, क्ली, (के बाहुशिरसि भूषणतां याति । या गत्यां + ऊरः । अलुक् समासः ।) अलङ्कारविशेषः । ताड इति भाषा । तत्पर्य्यायः । अङ्गदम् २ । इत्यमरः । २ । ६ । १०७ ॥ (यथा, महाभारते । ६ । ६० । २१ ।
“पादानां भूषणानाञ्च केयूराणाञ्च सर्व्वशः ।
राशयस्तत्र दृश्यन्ते भीष्मभीमसमागमे” ॥)

केयूरः, पुं, रतिबन्धविशेषः । यथा,—
“स्त्रीजङ्घे चैव सयोध्य दोर्भ्यामालिङ्ग्य सुन्दरीम् ।
कारयेत् स्थापनं कामी बन्धः केयूरसञ्ज्ञकः” ॥
इति स्मरदीपिका ॥ अपि च ।
“स्त्रीणां जङ्घान्तराविष्टो गाढमालिङ्ग्य सुन्दरीम् ।
कामयेद्विपुलं कामी बन्धः केयूरसञ्ज्ञकः” ॥
इति रतिमञ्जरी ॥

केरलः, पुं, देशभेदः । मालेबोयार इति भाषा । यथा । उग्राः केरलपर्य्यायाः । इति हेमचन्द्रः ॥ वेदयागानधिकारिश्मश्रुधारिम्लेच्छविशेषः । पुरैते क्षत्रिया आसन् सगरेणैषां धर्म्मो नाशितः वेशान्यत्वञ्च कृतम् । यथा,—
“निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना ।
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा ॥
कोलिसर्पा माहिषका दर्व्वाश्चोलाः सकेरलाः ।
सर्व्वे ते क्षत्रियास्तात ! धर्म्मस्तेषां निराकृतः” ॥
इति हरिवंशः । (तथा च रघुवंशे । ४ । ५४ ।
“भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः” ॥)

केरली, स्त्री, (केरल + गौरादित्वात् ङीष् ।)

ज्योतिर्ग्रन्थविशेषः। होरा। इति शब्दरत्नावली॥ (केरलज्योतिर्विद्यायाः सङ्केतविशेषो दिङ्मात्रं प्रदर्श्यते गर्गसंहितायां यथा,—
"वर्गवर्णप्रमाणाश्च सस्वरं ताडितं मिथः।
पिण्डसंख्या भवेत्तस्य यथाभागैस्तु कल्पना"॥
अस्यार्थः अ क च ट त प य श इत्यष्टौ वर्गाः एतैरेव प्रश्नादयो यथायथं साङ्केतिकक्रममालम्ब्य निरूप्यन्ते॥ केरलदेशोद्भवा स्त्री। यथा, राजेन्द्रकर्णपूरे। ६।
"चौडी चूडाभरणधरया कीर्णकर्णावतंसं कर्णाटीना मुषितमुरजी केरलीहारलीलः"॥)

केल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-गत्यर्थे सकं-सेट् ऋदित्।) ऋ, अचिकेलत्। चाल कम्पः। चाल कैश्चिन्न मन्यते। इति दुर्गादासः॥

केलक, पुं, (केल्+कर्त्तरि ण्वुल्।) खड्गधारादिनर्त्तकः। तत्पर्य्यायः। प्लवकः २। इति त्रिकाण्डशेषः॥

केलिः, पुं स्त्री, (केल्+इन्।) परीहासः। तत्पर्य्यायः। द्रवः २ क्रीडा ३ लीला ४ नर्म्म ५। इत्यमरः। १।७।३२॥ (नायिकालङ्कारविशेषः। यथा, एतल्लक्षणं साहित्यदर्पणे। ३।१२२।
"विहारे सह कान्तेन क्रीडितं केलिरुच्यते"॥
यथा, अमरुशतके। ४।
"मालत्या कुसुमेषु येन सततं केलिः कृता हेलया"॥)

केलिः, स्त्री, (केलति सदा गच्छतीति। "सर्व्वधातुभ्य इन्"। इति इन्।) पृथिवी। इति शब्दमाला॥

केलिक, पुं, (केलिर्विलासः प्रयोजनमस्य इति ठन्।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (विवृतिरस्याशोकशब्दे ज्ञेया॥)

केलिकला, स्त्री, (केलिरूपा कला। शाकपार्थिवादिवत् मध्यपदलोपिसमासः।) सरस्वतीवीणा। इति शब्दरत्नावली॥ (केलिः क्रीडा तस्याः कला अंशविशेषः। यथा, अमरुशतके। ७।
"अलिरसौ नलिनीवनवल्लभ कुमुदिनीकुलकेलिकलारसः"॥)

केलिकिल, पुं, (केलिना लीलया किलतीति। किल क्रीडायां+कः।) कुशाण्डकः। स तु शिववराणु-चरः। नाट्ये नायकवयस्यः। तत्पर्य्यायः। विदूषकः २ वासन्तिकः ३ वैहासिकः ४ प्रहासी ५ प्रीतिदः ६। इति हेमचन्द्रः॥ (केलिना परीहासेन किलतीति विग्रहे वाच्यलिङ्गः। यथा, हरिवंशे।
"स तु केलिकिलो विप्रो भेदशीलश्च नारदः"॥)

केलिकिला, स्त्री, (केलिना विहारेण किलतीति किल्+कः। ततः टाप्।) रतिः। सा तु कामदेवपत्नी। इति त्रिकाण्डशेषः॥

केलिकीर्णः, पुं, (केलिनिमित्तकैः पांशुभिः कीर्णः।) उष्ट्रः। इति हेमचन्द्रः॥

केलिकुञ्चिका, स्त्री, (केलीनां कुञ्चिका इव। श्यालिका। इति त्रिकाण्डशेषः। शाली इति भाषा॥

केलिकोषः, पुं, (केलीनां रहस्यानां क्रीडापरीहासादीनां वा कोष आधार इव।) नटः। इति शब्दरत्नावली॥

केलिनागरः, पुं, (केलिनिपुणः प्रधानको वा नागरः।) सम्भोगवान्। इति जटाधरः॥

केलिमुखः, पुं, (केलिः मुखं प्रधानमस्य।) परीहासः। इति त्रिकाण्डशेषः॥

केलिवृक्षः, पुं, (केलिनिमित्तको वृक्षः।) कदम्बविशेषः। इति शब्दरत्नावली॥ केलिकदम्ब इति ख्यातः॥

केलिसचिवः, पुं, (केलौ क्रीडाविषये सचिवः सहायः।) नर्म्मदः। क्रीडाविषयकमन्त्री। इति शब्दमाला॥

केव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्-ऋदित्।) ङ, केवते। ऋ, अचिकेवत्। इति दुर्गादासः॥

केवर्त्तः, पुं, (के जले वर्त्तते। वृत्+अच्। अलुक् समासः।) कैवर्त्तजातिः। इति द्विरूपकोषः॥ (वर्णोऽन्त्यजश्चायम्। यथा, ब्रह्मवैवर्त्तपुराणे।
"रजकश्चर्म्मकारश्च नटो वरुड एव च।
केवर्त्तो मेदभिल्लश्च सप्तैते चान्त्यजाः स्मृताः"॥)

केवलं, क्ली, (केव ङ सेवने+वृषादित्वात् कलच्। यद्वा, के शिरसि मूर्द्धावच्छेदे वलयति। वल्+अच्। अलुक् समासः।) निर्णीतम्। इत्यमरमेदिनीकरौ॥ ज्ञानभेदः। इति विश्वो हेमचन्द्रश्च॥ (साङ्ख्यकारिकायां यथा,—"अविपर्य्ययात् विशुद्धं केवलमुत्पद्यते ज्ञानम्"॥)
शुद्धम्। (यथा, रघौ २। ६३।
"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम्"॥)
कृत्स्नम्। (यथा, रघुवंशे १०। २९।
"केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि"॥)
असहायः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (अद्वितीयः। यथा, कुमारे ५। ८३।
"न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक्"॥)

केवलः, पुं, कुहनः। इति मेदिनी॥ (कुम्भकविशेषः। यथा, हठयोगदीपिकायाम्। २। ७१।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः।
सहितः केवलश्चेति कुम्भको द्विविधो मतः"॥)

केवलः, त्रि, एकः। (यथा, रघुवंशे। ११। १९।
"वाग्भिमन्त्रद्दशा लिपेसुधी
सा स्वकाननमुवं न केवलाम्।
विश्वपचयपराजयस्थिरा
रावणश्रियमपि व्यकम्पयत्"॥)
कृत्स्नः। इत्यमरमेदिनीकरौ। (यथा, रघौ।१०।२९।
"केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि"॥)

केवलज्ञानी, [न्] पुं, (केवलं शुद्धं ज्ञानं अस्यास्तीति। इनिः।) भूतार्हद्विशेषः। इति हेमचन्द्रः॥

केवलद्रव्य, क्ली,(केवलं द्रव्यम्।) मरिचम्। इति शब्दचन्द्रिका॥

केवली, स्त्री, (केवल+ङीप्।) ज्ञानभेदः। इति मेदिनी। ग्रन्थविशेषः। इति हेमचन्द्रः॥

केवली, [न्] पुं, (केवलं शुद्धं ज्ञानमस्यास्तीति। इनिः।) जैनविशेषः। इति हलायुधः॥

केविका, स्त्री, (केव गतिशासनयोः+ण्वुल्+टाप् अत इत्वम्।) पुष्पविशेषः। केवेर इति भाषा कोकणे प्रसिद्धा। तत्पर्य्यायः। कविका २ केवी ३ भृङ्गारिः ४ नृपवल्लभा ५ भृङ्गमारी ६ महागन्धा ७ राजकन्या ८ अलिवाहिनी ९। अस्या गुणाः। मधुरत्वम्। शीतलत्वम्। दाहपित्तश्रमवातश्लेष्मरोगपित्तच्छर्द्दिविनाशित्वञ्च। इति राजनिर्घण्टः॥

केशः, पुं, (के मस्तके शेते। शी+अच्। अलुक् समासः।) मज्जजातोपधातुविशेषः। चुल इति भाषा। स तु गर्भस्थबालकस्य षष्ठामिर्मासे जायते। इति सुखबोधः। (केशादयस्तु पितृतो जायन्ते। यथा, सुश्रुते शारीरस्थाने तृतीयेऽध्याये। "गर्भस्य केशश्मश्रुलोमास्थिनखदन्तसिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि"॥ भावप्रकाशे च।
"केशाः श्मश्रु च लोमानि नखा दन्ताः सिरास्तथा।
धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि"॥)
तत्पर्य्यायः। चिकुरः २ कुन्तलः ३ वालः ४ कचः ५ शिरोरुहः ६। इत्यमरः। २। ६। ९५॥ शिरसिजः ७ मूर्द्धजः ८ अस्रः ९ वृजिनः १०। इति जटाधरः॥ (रोगविशेषैस्तस्योत्पाटनानन्तरमुद्गमोपायास्। यथा,—
"वटावरोहकेशिन्योश्चूर्णेनादित्यपाचितम्।
गुडूचीस्वरसेतैलमभ्यङ्गात्केशरोहणम्"॥
इति आदित्यपाकगुडूचीतैलम्॥ *॥
"मधुकेन्दीवरमूर्व्वा तिलाज्यगोक्षीरभृङ्गलेपेन।
अचिरादुद्भवन्ति घनकेशाः दृढमूलायताश्च "॥
"चन्दनं मधुकं मूर्व्वा त्रिफला नीलमुत्पलम्।
कान्तावटप्ररोहश्च गुडूचीविषमेव च॥
लौहचूर्णं तथा केशी शारिवे द्वे तथैव च।
मार्कवस्वरसेनैव तैलं मृद्वग्निना पचेत्॥
शिरस्युत्पतिता केशा जायन्ते घनकुञ्चिताः।
दृढमूलाश्च स्निग्धाश्च तथा भ्रमरसन्निभाः॥
नस्येनाकालपलितं निहन्यात्तैलमुत्तमम्"॥
इति चन्दनाद्यं तैलम्॥ *॥
"तैलं सयष्टीमधुकैः क्षीरे धात्रीफले शृतम्।
नस्ये दत्तं जनयति केशान् श्मश्रूणि चाप्यथ"॥
पक्वावस्थापन्नस्यास्य कृष्णीकरणोपायो यथा,—
"त्रिफलाचूर्णसंयुक्तं लौहचूर्णं विनिक्षिपेत्।
ईषत्पक्वे नारिकेले भृङ्गराजरसान्विते॥
मासमेकन्तु निक्षिप्य सम्यग्गर्भात् समुद्धरेत्।
ततः शिरो मुण्डयित्वा लेपं दद्याद्भिषग्वरः॥
सम्वेष्ट्य कदलीपत्रैर्मोचयेत्सप्तमे दिने।
क्षालयेत्त्रिफलाक्वाथे क्षीरमांसवसाशिनः॥
कपालरञ्जनञ्चैव कृष्णीकरणमुत्तमम्"॥
"उत्पलं पयसा सार्द्धं मासं भूमौ निधापयेत्।
केशानां कृष्णकरणं स्नेहमेव विधीयते"॥

इति वैद्यकचक्रपाणिसंग्रहे उदररोगाधिकारे ॥) तत्समूहार्थवाचका शब्दा यथा,—
"बालाः स्युस्तत्परा पाशो रचनाभार उच्चय । हस्त पक्ष कलापस्य केशभूयस्त्ववाचकाः" ॥
इति हेमचन्द्रः ॥ कं (कस्य जलस्य ईशः ।) वरुणः । ह्रीवेरम् । इति मेदिनी ॥ (अस्य पर्य्याया यथा,—
"वाल ह्रीवेरवर्हिष्ठोदीच्य केशोऽम्बुनाम च" ॥
इति वैद्यकरत्नमालायाम् ॥) दैत्यविशेषः । इति हेमचन्द्रः ॥ (कस्य ब्रह्मणोऽपि ईशः । के जले शेते वा ।) विष्णुः । इति शब्दरत्नावली । (काशते प्रकाशते लोके लोकं काशयति वा । काश + अच् पृषोदरात् एत्वे साधु ।) सूर्य्याग्निप्रभृतिरश्मिः ।
"ब्रह्म-विष्णु-रुद्र सञ्ज्ञा शक्तयः केशसञ्ज्ञिताः" ॥
इति भागवतोक्ते परब्रह्मशक्तिः । ब्रह्मा ।
"केशो योनौ तथा भावे ह्यावयोरवयोरपि । सम्पटे पुरुषे चैव प्रमदायां विशेषत" ॥
"प्रजापतौ कचे चैव केशशब्दः प्रकीर्त्यते" ॥
इति महाभारतटीकायां नीलकण्ठः ॥)

केशकलापः, पुं, (केशानां कलापः समूहः ।) केशपाशः । केशसमूहः । इति हेमचन्द्रः ॥

केशकारः, पुं, (केशं केशवत् केशाकृतिं वा करोति आत्मानं केशाकारेण वर्द्धयति इति भावः । केश + कृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) इक्षुभेदः । करिया कुशियार इति हिन्दी भाषा । अस्य गुणाः । गुरुत्वम् । शीतलत्वम् । रक्तपित्तक्षयापहत्वञ्च । इति भावप्रकाशः ॥

केशगर्भकः, पुं, (केशो गर्भे अभ्यन्तरेऽस्य । कप् ।) कवरी । इति त्रिकाण्डशेषः ॥

केशघ्नं, क्ली, (केशं हन्ति नाशयतीति । हन् + टक् ।) इन्द्रलुप्तकम् । इति हेमचन्द्रः ॥

केशच्छित्, [द्] पुं, केशं छिनत्ति । छिद् + क्विप् ।) नापितः । इति शब्दमाला ॥

केशटः, पुं, (को ब्रह्मा ईशः महादेवः तौ अटतः गच्छतः प्रलये यं । महाप्रलये मूर्त्तिविशेषात् तथात्वम् । यद्वा ब्रह्मशिवाभ्यां अटति गच्छति य सः । तयोरात्मैकात्मत्वात् ।) विष्णुः । (केशेषु काशादिरूपाजातेषु अटति चरतीति । अट् + अच् । शकन्ध्वादित्वात् साधुः ।) छागः । (केशेषु मूर्द्धजेषु अटतीति । अट् + अच् शकन्ध्वादित्वात् अलोपे साधुः ।) ओकणः । इति मेदिनी । भ्राता । इति शब्दरत्नावली ॥ (केशेषु कामार्त्तपुरुषनारीषु अटति । अट् + अच् ।) कामदेवस्य शोषणवाणः । इति विश्वः । (केश इव प्रतिमासु नटनश्वादिषु च अटति स्वगात्मनेति यावत् ।) शोणकवृक्षः । इति त्रिकाण्डशेषः ॥

केशधृत्, पुं, (केशमिव धरति । धृ + क्विप् ।) भूतकेशनामवृक्षभेदः । इति शब्दचन्द्रिका ॥

केशनाम, [न्] क्ली, (केशनामैव नाम यस्य ।) वालम् । इत्यमरः ॥ वाला इति भाषा ॥

केशपक्षः, पुं, (केशानां पक्षः समूहः । माड्लकात् पक्षादेशो वा ।) केशपाशः इत्यमरः । २ । ६ । ९८ ॥ (यथा, महाभारते । ४ । ३६ । ४१ ।
"उत्तरन्तु प्रधावन्तमनुद्रुत्य धनञ्जयः । गत्वा शतपदं तूर्णं केशपक्षे परामृशत्" ॥)

केशपर्णी, स्त्री, (केश इव पर्णान्यस्य । जातित्वात् ङीष् ।) अपामार्गः । इति शब्दरत्नावली ॥

केशपाशः, पुं, (केशानां पाशः समूहः ।) केशसमूहः । यथा,—
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" ॥ इत्यमरः । २ । ६ । ९८ ॥ (यथा, कुमारे । १ । ४८ ।
"तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः" ॥)

केशपाशी, स्त्री, (केशपाश + स्वाङ्गात् ङीष् ।) शिरोमध्यस्थशिखा । चूडा । इत्यमरः । २ । ६ । ९७ ॥

केशभूः, पुं, (केशानां भूरुत्पत्तिस्थानम् ।) शिरः । इति राजनिर्घण्टः ॥

केशमथनी, स्त्री, (केशा मथ्यन्तेऽनया । मथ विलोडने + करणे ल्युट् ततो ङीप् । अस्याः कण्टकैः समीपं गन्तुः केशोत्पाटनात् तथात्वम् ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

केशमार्जकं, क्ली, (केशं मार्ष्टि । मृज् शोधने + कर्त्तरि ण्वुल् ।) कङ्कतिका । इति जटाधरः । चिरुणी इति भाषा ॥

केशमार्जनं, क्ली, (केशो मृज्यतेऽनेन । मृज् + करणे ल्युट् वृद्धिश्च ।) कङ्कतिका । इति हेमचन्द्रः । केशशुद्धिश्च । (भावे ल्युट् । केशशोधनक्रियामात्रम् ॥)

केशमुष्टिः, पुं, (केशानां मुष्टिरिव ।) विषमुष्टिवृक्षः । महानिम्बः । इति राजनिर्घण्टः ॥

केशरः, पुं क्ली, (के जले मस्तके शिरसि वा । सरतीति । सृ + अच् । पृषोदरात् शत्वम् । यद्वा केश इव केशाकारः अस्यास्तीति । केश + र ।) किञ्जल्कः । इत्यमरः । १ । १० । ४३ ॥

केशरः, पुं, (केश इव केशाकृतिपदार्थः अस्यास्तीति मत्वर्थीयो रः ।) नागकेशरवृक्षः । (यथा,—गीतगोविन्दे । १ । ३१ । "मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे" ॥ वकुलवृक्षः । (यथा, कुमारे । ३ । ५५ ।
"स्रस्तां नितम्बादवलम्बमाना
पुनः पुनः केशरदामकाञ्चीम्" ॥)
पुन्नागवृक्षः । (यथा, महाभारते । १ । १२५ । ३ ।
"पनसैर्लिकुचैः पूगैश्चम्पकैः पारिभद्रकैः । कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः" ॥)
सिंहजटा । इति मेदिनी ॥ (यथा, कादम्बर्य्याम् "मृगपतिरिव स्कन्धावलम्बितकेशरमालः" ॥) हिङ्गुवृक्षः । इत्यमरटीकायां भरतः ॥ नीपः । केलिकदम्ब इति भाषा । यथा, मेघदूते । २२ ।
"नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैः" ॥)

केशरञ्जनः, पुं, (केशान् रञ्जयति । रञ्ज + णिच् + ल्यु ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः । भीमराज इति भाषा ॥

केशराजः, पुं, (केशो राजतेऽनेन । राज + करणे घञ् ।) शाकभेदः । केशुरे इति भाषा । तत्पर्य्यायः । भृङ्गराजः २ भृङ्गः ३ पतङ्गः ४ मार्कवः ५ । इति रत्नमाला ॥ मार्कवः ६ । इत्यमरः ॥ नागमारः ७ पवनः ८ भृङ्गरोदरः ९ । इति त्रिकाण्डशेषः ॥ केशरञ्जनः १० केश्यः ११ । कुन्तलवर्द्धनः १२ । इति वैद्यकम् ॥ भृङ्गारकः १३ एकरजः १४ कारञ्जकः १५ भृङ्गरजः १६ भृङ्गारः १७ । इति जटाधरः ॥ अङ्गारकः १८ भृङ्गराजः १९ मकरः २० । इति शब्दरत्नावली ॥ अपि च ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहः ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । अग्निकारित्वम् । केशचक्षुर्हितत्वम् । पाण्डुकफापहत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥

केशरास्नः, पुं, (केशरे तदवच्छेदे अम्लरसो यस्य ।) मातुलुङ्गवृक्षः । इति जटाधरः ॥

केशरी,[न्]पुं,(केशराः सन्त्यस्य इति इनिः ।) सिंहः । इत्यमरः । १ । ५ । १ ॥ (यथा, रघुवंशे २ । २९ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केशरिणं ददर्श" ॥)
घोटकः । पुन्नागवृक्षः । नागकेशरवृक्षः । इति मेदिनी ॥ वीजपूरकवृक्षः । इति जटाधरः ॥

केशरुहा, स्त्री,(केश इव रोहति अच् । केशरुह + "इगुपधेति" । ३ । १ । १३५ । इति कः ।) महदन्तिकावृक्षः । इति राजनिर्घण्टः ॥

केशरूपा, स्त्री,(केशवद्रूपमस्याः ।) वन्दाकवृक्षः । इति राजनिर्घण्टः । (परगाछा इति भाषा ।)

केशवः, पुं, (को ब्रह्मा ईशः रुद्रः तौ आत्मनि स्वरूपे वयति प्रलये उपाधिरूपमूर्त्तिद्वयं मुक्त्वा एकमात्रपरमात्मस्वरूपेणावतिष्ठते इति । यथा, भागवते २ अध्याये चतुःश्लोक्याम् ।
"अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्" ॥
तथा, केशं केशिनं वाति हन्ति । केश + वा + क । यथा, हरिवंशे । ८० । ६६ ।
"यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु ।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि" ॥
यद्वा, के जले शववत् भातीति । प्रलयकाले क्षीरोदशायितया तथात्वम् । कश्च अश्च ईशश्च ते केशा ब्रह्मविष्णुरुद्राः नियम्यतया सन्त्यस्य । यद्वा, कश्च ईशश्च तौ केशौ पुत्रत्वेनास्य भवतो ऽस्य । "केशाद्वोऽन्यतरस्याम्" । ५ । २ । १०९ ।

इति वप्रत्ययः। अथवा वाति गच्छति तद्रूपतया। वा+क। स्वरूपतस्तेषां भेदाभावादपि वासुदेवे सर्व्वात्मनि परमेश्वरेऽस्य वृत्तिः। अतो विष्णुसहितायाम्।
"नरसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः" ॥
किञ्च।
"त्रिलोकात्मा त्रिलोकेश केशवः केशिहा हरिः"॥
पूज्यपादैर्भाष्यकृद्भिरपि केशवशब्दस्य निरुक्तिद्वयमवलम्ब्य नामद्वयं समर्थितं तयोराद्ये। अभिरूपाः केशा यस्य स केशवः। कश्च अश्च ईशश्च केशास्त्रिमूर्त्तयस्ते वशे वर्त्तन्ते यस्य स। केशिदानवहननाद्वा केशवः।
"यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्द्दन।
तस्मात् केशवनाम्ना त्वं लोके ज्ञेयो भविष्यसीति"॥
भागवतादिषु। द्वितीये। केशसंज्ञिताः सूर्य्यादिसङ्क्रान्ता अंशवः तद्वत्त्वेन केशवो वा।
"अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः।
सर्व्वज्ञाः केशवं तस्मात् प्राहुर्म्मां द्विजसत्तमाः"॥
इति महाभारतम्। "नय केशिनः"। इति श्रुतेश्च ब्रह्मविष्णुशिवाख्या हि शक्तयः केशसंज्ञिताः। "मत्केशा वसुधातले" इति भागवते च। यथा, हरिवंशोक्तौ,—
"को ब्रह्मेति समाख्यात ईशोऽहं सर्व्वदेहिनाम्।
आवां तवाङ्गसम्भूतौ तस्मात् केशवनामवान्"॥
तेनास्य बहुधा निरुक्तिः।) विष्णुः। इत्यमरः। १।१।१८॥ पुन्नागवृक्षः॥ (केशाः प्रशस्ताः सन्त्यस्य। "केशाद्वोऽन्यतरस्याम्"। ५।२।१०९। इति वः।) केशवति त्रि। इति मेदिनी॥ (जलसमूहवदेहे। यथा, विदग्धमुखमण्डनम्।
"केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः।
रुदन्ति पाण्डवाः सर्व्वे हा! हा! केशव! केशव!"॥
के जले शव पतितं दृष्ट्वा द्रोणः काकः हर्षं प्राप्तवान् पाण्डवाः शृगालाः रुदन्ति चीत्कारं कुर्व्वन्तीत्यर्थः॥)
केशवर्द्धिनी, स्त्री, (केशाः वर्द्धन्तेऽनया। केश+वृध+करणे ल्युट् टित्वात् ङीप्।) सहदेवीलता। इति राजनिर्घण्टः॥
केशवायुध, (केशवस्य विष्णोरायुधाकारं मुकुलमस्य।) आम्रवृक्षः। इति शब्दमाला। (केशवस्य विष्णोः आयुधं अस्त्रम्। इति विग्रहे पु, विष्णोरस्त्रे, क्ली॥)
केशवालय, पु, (केशवस्य आलयः वासस्थानम्।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥
केशवावासः,पुं, (आवसत्यस्मिन् इति। आ+वस्+अधिकरणे घञ्।) केशवस्य आवासः अश्वत्थवृक्षः। इति जटाधरः॥
केशवेश, पु, (केशस्य कुन्तलस्य वेशः बन्धनरूपवेण्यादिभिर्विन्यास इति यावत्।) कवरी। इत्यमरः॥चुलेरखोंपा इति भाषा। (यथा, आश्वलायनगृह्ये।१।१७।१७। "कुलधर्म्मं केशवेशान् कारयेत्"। "एकशिखस्त्रिशिखः पञ्चशिखो वा" इति बौधायनः। "पूर्व्वशिखः परशिखः" इति कुलधर्म्मः। "तेषु यो यस्य कुलधर्म्मः तेन तस्य केशसन्निवेशान् कारयेत्" इति नारायणोक्तिः॥)
केशहन्त्री, स्त्री, (केशस्य हन्त्री नाशिनी। यद्वा केशान् हन्ति या। केश+हन्+तृच् ततो ङीप्।) शमीवृक्षः॥ इति राजनिर्घण्टः॥
केशहस्तः, पु, (केशानां केशस्य वा हस्तः समूहः। हस्तादयश्च केशात् समूहार्थे।) केशसमूहः। इत्यमरः॥
केशाकेशि,क्ली, केशेषु केशेषु गृहीत्वा प्रवृत्तं युद्धम्। ("तत्र तेनेदमिति सरूपे"।२।२।२७। इति कर्म्मव्यतिहारे इच् समासे पूर्व्वदीर्घः।) अन्योन्यकेशग्रहणपूर्व्वकप्रवृत्तयुद्धम्। इति व्याकरणम्॥ चुलाचुलि इति भाषा।
(यथा, महाभारते। ३।२८३।२७।
"केशाकेश्यभवद्युद्धं रक्षसा वानरैः सह"॥)
केशारुहा,स्त्री,(केशा आरोहन्त्यनया। आ+रुह+करणे घञर्थे क।) सहदेवीलता। इति राजनिर्घण्टः॥
केशार्हा, स्त्री, (केशः केशवर्णं अर्हति इति। केश+अर्ह+"कर्म्मण्यण्"।३।२।१। इति अण्।) महानीली। इति राजनिर्घण्टः॥
केशिक, त्रि, (प्रशस्तः केशः अस्यास्तीति ठन्।) प्रशस्तकेशयुक्तः। इत्यमरः। २।६।४५॥
केशिका, स्त्री, (केशीव कायति प्रकाशते। केशिन्+कै+क।) शतावरी। इति राजनिर्घण्टः॥
केशिनिसूदनः, पु, (केशीत्याख्यः दानवः कंसासुरचरस्तं निसूदयति हन्ति। नि+सूद+कर्त्तरि ल्युः।) श्रीकृष्णः। (यथा, गीतायां १८।१।
"सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश! पृथक् केशिनिसूदन!"॥
केशिदानववधविवरणं हरिवंशे ८० अध्याये दृश्यम्।)
केशिनी, स्त्री, (केशाकाराः सन्त्यस्याः।)जटामांसी। इति राजनिर्घण्टः॥ चोरपुष्पी। प्रशस्तकेशविशिष्टा। इत्यमरः। २।६।४५॥
केशिसूदन, पु, (केशिनं तदाख्यया प्रसिद्धं दैत्यं सूदयतीति। केशिन्+सूद+कर्त्तरि ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (केशिदानववधविवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्॥)
केशिहा, [न्] पु, (केशिनं हतवान्। हन्+क्विप्) श्रीकृष्णः। इति हेमचन्द्रः॥
केशी, [न्] त्रि, (प्रशस्ताः केशाः सन्त्यस्य।) प्रशस्तकेशयुक्तः। इत्यमरः। २।६।४५॥
केशी, [न्] पुं, (केशः सर्व्वज्ञा शक्तिरस्यास्तीति।) विष्णुः। इति त्रिकाण्डशेषः॥ दैत्यभेदः। इति मेदिनी॥ (यथा, हरिवंशे। ८०।६५।
"यस्मात्त्वया हतः केशी तस्मात् मच्छासनं शृणु।
केशवो नाम नाम्ना वै ख्यातो लोके भविष्यसि"॥
केशाः केसराः सन्त्यस्य।) सिंहः। इति शब्दरत्नावली॥
केशी, स्त्री, (केश+स्त्रियां गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥ भूतकेशीवृक्षः॥ अजलोमावृक्षः। इति रत्नमाला॥
केशोच्चयः, पु, (केशानां उच्चयः समूहः।) केशसमूहः। इति हेमचन्द्रः॥
केश्य, क्ली, (केशाय हितं इति यत्।) कृष्णागुरु। भृङ्गराजे, पु। इति राजनिर्घण्टः॥ (केशहितकारके, त्रि॥)
केसर, क्ली, (के जले सरतीति। सृ+अच्।) हिङ्गुः इति हेमचन्द्रः॥ नागकेसरपुष्पम्। कासीसम्। स्वर्णम्। इति राजनिर्घण्टः॥
केसर, पुं, (के उच्चशिरोऽवच्छेदे उच्छ्रितदेशे इत्यर्थः सरति। सृ+अच्।) नागकेशरवृक्षः। तुरङ्गस्कन्धकेशः। (यथा, रघुवंशे। ४।६७।
"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान्"॥)
सिंहस्कन्धकेशः। (यथा, पञ्चतन्त्रे। १।२०४।
"व्याकीर्णकेसरकरालमुखा मृगेन्द्रा
नागाश्च भूरि मदराजि विराजमानाः"॥)
वकुलवृक्षः। (यथा, रघुवंशे। ९।३६।
"ललितविभ्रमबन्धविचक्षणं
सुरभिगन्धपराजितकेसरम्"॥)
पुन्नागवृक्षः। किञ्जल्कः। इति हेमचन्द्रः॥
केसर, पु क्ली, (के जले सरतीति। सृ+पचाद्यच्। हलदन्तादिति अलुक्समासः।) किञ्जल्कः। हिङ्गुनि, पु स्त्री। इति रभसः॥
केसरवरं, क्ली, (केसरेषु वरं श्रेष्ठं गुणाधिक्यात्। यद्वा, केसरेण किञ्जल्केन वृणोतीति। वृ+अच्।) कुङ्कुमम्। इति राजनिर्घण्टः॥
केसराम्ल, पु, (के जलनिमित्तकः सरः अम्लः तन्म? यो यस्य।) वीजपूरः। इति राजनिर्घण्टः॥
केसरिका, स्त्री, (के जले सरति खाद्यतया साधुकारितया वा। वुन्। अलुक्समासः। ततष्टाप् अत इत्वम्।) सहदेवीलता। इति राजनिर्घण्टः॥
केसरिसुत, पुं, (केसरी स्वनामख्यातो वानरभेदः तस्य सुतः पुत्त्रः।) हनूमान्। इति हेमचन्द्रः॥ (यथा, महाभारते ३।१४७।२७।
"अहं केसरिणः क्षेत्रे वायुना जगदायुना।
जातः कमलपत्राक्ष! हनूमान् नाम वानरः"॥)
केसरी, [न्] पु, (केसराः जटाः सन्त्यस्य। केसर+इनिः।) सिंहः। घोटकः। पुन्नागः। नागकेशरः। इति मेदिनी॥ रक्तशिग्रुः। इति राजनिर्घण्टः॥ वानरविशेषः। स तु हनूमत्पिता। (यथा, रामायणे। ७।४०।१९।
"सूर्य्यदत्तवरः स्वर्णः सुमेरुर्नाम पर्व्वतः।
यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता"॥)
कै, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-अनिट्।) कायति। एषामादन्तत्वेन दिवादौ पाठेऽभीष्टसिद्धौ भ्वादावैकारान्तत्वेन पाठो गणसूत्रमनित्यमिति ज्ञापयति। तेन अयधातोरात्मनेपदानित्यत्वं प्रयोगे लुकि च य्वोर्लोप इति यलोपे अयधातौ परे उपसर्गरेफो ल इति वक्तव्यात् पराशब्दस्य रेफस्य लकारे "एष कालः समुत्पन्नो य पलायति स जीवति" इति सिद्धम्। वैदेशूवारण्य-

कृष्णयजुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि । "कठवल्लीतैत्तिरीयकब्रह्मकैवल्यश्वेताश्वतरेत्युपक्रम्य कृष्णयजुर्व्वेदगतानां द्वात्रिंशत्संख्यकानामुपनिषदां सह्नावदवत्विति शान्तिः" ॥)

केशिक, क्ली, (केशानां समूहः । "केशाश्वाभ्यां यञ्छावन्यतरस्याम्" । ४ । २ । ४८ । इति पक्षे ठक् ।) केशसमूहः । इत्यमरः । २ । ६ । ९९ ॥

कशिक, पु, (केशेषु केशविन्यासादौ साधुः । केश + ठक् ।) शृङ्गाररसः । इति शब्दरत्नावली जटाधरश्च ॥

केशिकी, स्त्री, (कैशिक + स्त्रियां ङीप् ।) नाटकवृत्तिविशेषः । यथा । "भारती सात्वती कैशिक्या-रभट्यौ च वृत्तयः" ॥ इति हेमचन्द्रः ॥

कैशोर, क्ली, (किशोरस्य भावः । किशोर + अण् ।) किशोरावस्था । इति शब्दरत्नावली ॥ सा तु दशमवर्षोत्तरपञ्चदशवर्षावधिः । इति स्मृतिः ॥

कैश्य, क्ली, (केशानां समूहः । इति ष्यञ् ।) केशसमूहः । इत्यमरः । २ । ६ । ९९ ॥

कोकः, पु, (कोकते आदत्ते चन्द्रसुधामिति । कुक् आदाने + पचाद्यच् ।) चक्रवाकः । (यथा, गीतगोविन्दे ५ । १० । "कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना" ॥) वृकः । (यथा, रामायणे । ५ । २६ । ९ । "वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता" ॥) ज्येष्ठी । खर्ज्जूरीवृक्षः । भेकः । इति मेदिनी ॥ विष्णुः । इति त्रिकाण्डशेषः ॥

कोकड, पु, (कोकं कोकरवं वृकध्वनिवत् ध्वनिमित्यर्थः लाति गृह्णातीति । ला + क । लस्य डत्वम् ।) विलेशयमृगविशेषः । तत्पर्य्यायः । जविनः २ कोकवाचः ३ विलेशयः ४ चमरपुच्छः ५ लोमशः ६ धूम्रवर्णकः ७ । तन्मांसगुणः । श्वासानिलकासहरत्वम् । पित्तदाहकरत्वञ्च । इति राजनिर्घण्टः ॥

कोकदेव, पु, (कोकश्चक्रवाकः स इव दीव्यति क्रीडतीति । दिव् + अच् ।) कपोतः । इति राजनिर्घण्टः ॥

कोकनद, क्ली, (कोकान् चक्रवाकान् नदति नादयति वात्मविकासेन । कोक + नद + अन्तर्णिच् ततोऽच् मूलविभुजादित्वात् को वा ।) रक्तकुमुदम् । रक्तपद्मम् । इति मेदिनी ॥ (यथा, गीतगोविन्दे । १० । ५ । "नीलनलीनाभमपि तन्वि । तव लोचनं धारयति कोकनदरूपम्" ॥ अस्य पर्य्याया यथा,— "रक्तं कोकनदं पद्ममल्पमन्यद्दलोहितम्" ॥ इति वैद्यकरत्नमालायाम् ॥)

कोकनदच्छवि, पुं, (कोकनदस्य रक्तोत्पलस्य छविरिव छविर्द्दीप्तिर्यस्य ।) रक्तवर्णः । तद्वति त्रि । इत्यमरः ॥

कोकबन्धु, पु, (कोकयोः चक्रवाकयुगलयोर्दिवसप्रभया संयोगकारितया बन्धुरिव ।) सूर्य्यः । इति शब्दचन्द्रिका ॥

कोकाय, पुं, (कोकः खर्ज्जूरीवृक्षस्तद्वदग्रभागोऽस्य ।) समष्ठिलावृक्षः । इति राजनिर्घण्टः ॥

कोकाह, पु, (कोक इव आहन्ति वेगेन गच्छतीति । आ + हन् + ड ।) श्वेतघोटकः । तत्पर्य्यायः । कर्कः २ । इति हेमचन्द्रः ॥ क्वचित् पुस्तके काकाह इति पाठः ॥

कोकिल, पु, (कुक् आदाने + "सलिकल्यनिमहि भडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्" । उणां १ । ५५ । इति इलच् ।) स्वनामख्यातकृष्णवर्णमधुरस्वरपक्षी । (यथा, रामायणे । २ । ५२ । २ । "भास्करोदयकालोऽयं गता भगवती निशा । असौ सुकृष्णविहगः कोकिलस्तात । कूजति" ॥) तत्पर्य्यायः । वनप्रियः २ परभृतः ३ पिकः ४ । इत्यमरः । २ । ५ । १९ ॥ परपुष्टः ५ कालः ६ वसन्तदूतः ७ ताम्राक्षः ८ गन्धर्व्वः ९ मधुगायनः १० वासन्तः ११ कलकण्ठः १२ कामान्धः १३ काकलीरवः १४ कुहूरवः १५ अन्यपुष्टः १६ मत्तः १७ मदनपाठकः १८ । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—हारीते १ स्थाने ११ अध्याये । "कोकिलः श्लेष्मलो ज्ञेयः पित्तसंशमनस्तथा" ॥ मूषिककल्पान्तर्गतशुक्र-विष-जातीयविशेषः । तद्दंशनजनितलक्षणानि यथा,— "श्वयथुः कोकिलेनोग्रा ज्वरो दाहश्च दारुणः" ॥ इति सुश्रुतेन कल्पस्थाने षष्ठाध्याये उक्तम् ॥) अङ्गारः । इति त्रिकाण्डशेषः । (छन्दोविशेषः । इति वृत्तरत्नाकरः ॥)

कोकिलनयन, पु, (कोकिलस्य नयनमिव रक्तवर्णं पुष्पमस्य ।) कोकिलाक्षवृक्षः । इत्यमरटीकायां रमानाथः ॥ (कोकिलाक्षशब्देऽस्य विवृतिर्ज्ञेया ॥)

कोकिलाक्ष, प, (कोकिलस्याक्षीव रक्तं पुष्पमस्य । "अक्ष्णोऽदर्शनात्" । ५ । ४ । ७६ । इति अच् ।) क्षुपविशेषः । कुलियाखाडा इति भाषा । तालमखाना इति हिन्दी भाषा ॥ तत्पर्य्यायः । इक्षुगन्धा २ काण्डेक्षुः ३ इक्षुरः ४ क्षुरः ५ । इत्यमरः । २ । ४ । १०४ ॥ शृगाली ६ शृङ्खली ७ क्षुरकः ८ शृगालघण्टी ९ वज्रास्थि १० शृङ्खला ११ वज्रकण्टकः १२ इक्षुः १३ इक्षुरकः १४ वज्रः १५ शृङ्खलीका १६ पिकेक्षणा १७ पिच्छिला १८ । इति राजनिर्घण्टः ॥ श्वेतस्य तस्य पर्य्यायः । वीरतरुः २ त्रिक्षुरः ३ क्षुरकः ४ सुक्तपुष्पः ५ । रक्तस्य तस्य पर्य्यायः ॥ क्षत्रकः २ अतिच्छत्रः ३ । इति रत्नमाला ॥ सामान्यस्य तस्य गुणाः । आमवातवातरक्तरोगनाशित्वम् । इति राजवल्लभः ॥ मधुरत्वम् । शीतलत्वम् । पित्तातिसारनाशित्वम् । गुरुकफवलरुचिकारित्वम् । सन्तर्पणत्वञ्च । इति राजनिर्घण्टः ॥ (श्वेतकोकिलाक्षमूलं छागीदुग्धेन पिष्टं सत् भक्षितं क्षयरोगं नाशयेत् । यदुक्तं गारुडे १९२ अध्याये । "श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् । भिषमाहेन वै पीतं क्षयरोगं क्षयं नयेत्" ॥)

कोकिलाक्षक, पु, (कोकिलाक्ष + स्वार्थे कन् ।) कोकिलाक्षवृक्षः । इत्यमरटीकायां स्वामी ॥ (यस्मिन्नस्य व्यवहारस्तद्यथा,— "कोकिलाक्षकनिर्य्यूहः पीतस्तच्छाकभोजिना । कृपाभ्यास इव क्रोधं वातरक्तं नियच्छति" ॥ इति वाभटे चिकित्सास्थाने २२ अध्याये ॥)

कोकिलावास, पु, (आवसत्यस्मिन् इति । आ + वस् + अधिकरणे घञ् । कोकिलानां आवासः ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥

कोकिलेक्षु, पु, (कोकिल इव कृष्णवर्णः इक्षुः ।) कृष्णेक्षुः । इति राजनिर्घण्टः ॥

कोकिलेष्टा, स्त्री, (कोकिलस्य इष्टा प्रिया ।) महाजम्बूः । इति राजनिर्घण्टः ॥

कोकिलोत्सवः, पुं, (कोकिलानां उत्सवोऽत्र ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥

कोङ्कणा, स्त्री, (कोङ्कणे भव कोङ्कणदेशस्थे कम्मकारैः निर्म्मितमिति भावः । "तत्र भवः" । ४ । ३ । ५३ । इत्यण् तस्य लुक् ।) शस्त्रभेदः । इति हेमचन्द्रः ॥

कोङ्कण, पु, देशविशेषः । इति विश्वः । कोकण इति भाषा ॥ (यथा, आगमे । "अथाभ्यङ्कं समारभ्य कटिदेशस्य मध्यगे । समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः" ॥ देशोऽयं भूर्म्मविभागे दक्षिणस्यां दिशि वर्त्तते । यथा, महाभारते । ६ । ९ । ५९ । "अथापरे जनपदा दक्षिणा भरतर्षभ" ! । "कौकुट्टकास्तथा चोलाः कोङ्कणा मणवा नराः" ॥ क्वचिदेकवचनत्वमपि दृश्यते । यथा, स्मृतिसंग्रहे । "मालवे गौडदेशे च सिन्धुदेशे च कोङ्कणे । अत चूडा विवाहश्च वर्ज्जयेत् मकरे गुरौ" ॥)

कोङ्कणासुत, पु, (कोङ्कणे तदाख्यप्रदेशे भवा । अण् तस्य लुक् च । कोङ्कणा रेणुका तस्याः सुतः पुत्रः ।) परशुरामः । इति शब्दमाला ॥

कोच, पु, (कुच् + ज्वलादित्वात् कर्त्तरि णः ।) जातिविशेषः । स तु मांसच्छेदिगर्भे तीवरस्यौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कोजागर, पु, (को जागर्त्ति अस्यां पौर्णमासीनिशायां इति लक्ष्म्या देव्या उक्तिर्यत्र समये । पृषोदरात् साधुः ।) आश्विनी पूर्णिमा । तत्पर्य्यायः । शारदी २ द्यूतपूर्णिमा ३ शरत्पर्व्व ४ कौमुदी ५ । इति त्रिकाण्डशेषः ॥ अथ कोजागरकृत्यानि । तत्र ब्रह्मपुराणम् । "आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्णवात् । आयाति सेनया सार्द्धं कृत्वा युद्धं सदाऽक्षयम् ॥ तस्मात् तत्र नरैर्मार्गाः खगेन्द्रस्य समीपतः । शोधितव्याः प्रयत्नेन भूषितव्याश्च मण्डनैः ॥ पुष्पार्घ्यफलमूलौघसर्व्वपुष्पप्रकरैस्तथा । वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥ सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सवान्धवैः । दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥ स्त्रीबालवृद्धमूर्खैश्च भोक्तव्यं पूजिते सुरे । पूज्याश्च सकलं यत्नैस्तथा द्वारोर्द्धभित्तयः ॥ द्वारोपान्ते सदीमन्तु सम्पूज्यो हयवाहनः । यवाऽक्षतदलोपेतैःकपालैश्च समर्पितः ॥

संपूजितव्यः पूर्ब्बेन्दुं प्रयसा पायसेन च ।
नन्दं सभार्य्यं स्कन्दञ्च तथा नन्दीश्वरो मुनिः ॥
गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः ।
उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ॥
पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः ।
तत्र पूज्यो निकुम्भोऽपि समाविस्तिलतण्डुलैः ॥
सुगन्धिभिर्हृतोपेतैः कृशराद्यैश्च भूरिभिः ।
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ॥
वह्निपार्श्वगतैर्नेया दृष्ट्वा क्रीडा पृथग्विधा” ॥ * ॥
लिङ्गपुराणे यथा,—
“आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतं स्थिरम् ।
सुगन्धिर्निशि सद्वेशश्चाक्षैर्जागरणञ्चरेत् ॥
निशीथे वरदा लक्ष्मीः को जागर्त्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ॥
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्चयेत् ॥
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत्” ॥
इति तिथ्यादितत्त्वम् ॥ (अथ निशायां बन्धुभिरक्षैः क्रीडयित्वा लक्ष्मीप्रसादात् धनभाग्भवेत् । अक्षक्रीडानियमश्च चतुरङ्गशब्दे द्रष्टव्यः ॥)

कोट, पु, (कुट्यते प्रताप्यते शत्रुरत्र अनेन वा । दुर्गमाश्रित्य प्रबलविपक्षमपि प्रतापयितुं शक्यते इत्यर्थः । कुट प्रतापने + अधिकरणे करणे वा घञ् ।) दुर्गम् । इति कुटशब्दार्थे मेदिनी ॥ गड़ कोट्टा इति च भाषा ॥ (कुट् + भावे घञ् । कौटिल्यम् प्रतापनम् ॥)

कोटक, पु, (कुट् + कर्त्तरि ण्वुल् ।) गृहकारकः । घरामि इति भाषा । स तु कुम्भकार्य्यां गर्भे अट्टालिकाकारस्यौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कोटर, क्ली पु, (कोटं कौटिल्याकारं स्थानं गर्त्तमिति यावत् । रातीति । रा + क ।) वृक्षस्थितगह्वरम् । गाछेर खोंडल इति भाषा ॥ तत्पर्य्यायः । निष्कुहः २ । इत्यमरः । २ । ४ । १३ ॥ निर्गुढ़ः ३ कोटरः ४ । इति शब्दरत्नावली ॥ प्रान्तरम् ५ । तरुविवरम् ६ । इति जटाधरः ॥ (कोटशब्दात् चतुरर्थ्यां अश्मरादित्वात् र । पा, ४ । २ । ८० ॥ दुर्गसन्निहितदेशादौ, त्रि ॥)

कोटरावण, क्ली, (कोटरान्वितानां तरूणां वनम् । पूर्व्वपदात्संज्ञायामिति णत्वञ्च ।) सकोटरवृक्षयुक्तवनम् । इति मुग्धबोधटीकायां दुर्गादासः ॥

कोटरी, स्त्री, (कोटं कौटिल्यं रीणाति गच्छतीति । रीगतौ + क्विप् ।) नग्ना स्त्री । इत्यमरः । २ । ६ । १७ ॥ (कोटं कुटिलस्वभावं राक्षसासुरादिकं रीणाति हन्ति । री + क्विप् ।) चण्डिका ॥ इत्यमरटीका ॥

कोटवी, स्त्री, (कोटं कौटिल्यं निर्लज्जतां वाति गच्छतीति । कोट + वा गमनहिंसयोः “आतोऽनुपसर्गे कः” । ३ । २ । ३ । इति कः । ततो गौरादित्वात् ङीष् ।) विवस्त्रा स्त्री । इत्यमरटीका ॥ (कोटं दुर्गं दुर्गनामानमसुरं वाति नाशयतीति ।)
दुर्गा । इति धरणी ॥

कोटिः, स्त्री, (कोट्यते छिद्यतेऽनया । कुट छेदे । “सर्व्वधातुभ्य इन्” । उणा । ४ । ११७ । इति इन् । बाहुलकात् गुणः ।) अस्त्रादेः कोणः । (यथा, रघुवंशे । ७ । ४६ ।
“हृतान्यपि श्येननखाग्रकोटि-
व्यासक्तकेशानि चिरेण पेतुः” ॥)
उत्कर्षः । शतलक्षसंख्या । क्रोर इति भाषा ॥ (यदुक्तं अङ्कशास्त्रे ।
“एकं दश शतञ्चैव सहस्रमयुतन्तथा ।
लक्षञ्च नियुतञ्चैव कोटिरर्ब्बुदमेव च” ॥)
धनुरग्रम् । इत्यमरमेदिनीकरौ ॥ (यथा, महाभारते । १ । ४० । २२ ।
“तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासृजत् ।
समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत” ॥)
(रेखा । यथा, कुमारे । २ । २६ ।
“आवर्जितजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्द्धानः क्षतहुङ्कारशंसिनः” ॥)
वादविचारः । संशयनिर्णयाय पूर्व्वपक्षः । यथा,
गादाधरीसंशयहेतूक्तिः ।
“विप्रतिपत्तिवाक्यजन्यकोट्युपस्थितिः” ।
लीलावत्युक्तत्रिकोणादिक्षेत्रावयवरेखाभेदः । यथा,
“इष्टाद्बाहोर्यः स्यात् तत्स्पर्द्धिन्यां दिशीतरो बाहुः ।
त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः” ॥
सिद्धान्तशिरोमणुक्तत्रिप्रश्नाधिकारस्य तृतीयांशः । यथा,
“त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् स्यादयुग्युग्मसंज्ञा च तेषाम् । अयुग्मे पदे यातमेष्यन्तु युग्मे भुजस्तद्विहीनं त्रिभं कोटिरुक्ता” ॥ छायानिरूपणार्थं कल्प्यमानक्षेत्रावयवरेखाविशेषः । यथा, सिद्धान्तशिरोमणौ ।
“दिक्सूत्रसम्पातगतस्य शङ्कोः-
श्छायाग्रपूर्व्वापरसूत्रमध्यम् ।
दोर्दो प्रभा वर्गवियोगमूलं
कोटिर्नरात् प्रागपरा तत स्यात्” ॥ * ॥
“दिक्सम्पातस्थस्य शङ्कोर्भाग्रं यत्र पतति तस्य पूर्व्वापरसूत्रस्य च यदन्तरं स दोरित्युच्यते । दोश्छाययोर्वर्गान्तरपदं पूर्व्वापरा कोटिः” । इति ॥
चन्द्रस्य शृङ्गोन्नतिज्ञानार्थं क्षेत्रावयवविशेषः । यथा, तत्रैव “योऽधो नरो दिनकृतः स विधोः सदयशङ्क्वन्वितो मम मता खलु सैव कोटिः” ॥
अपि च अर्कस्य योऽसौ अधः शङ्कुः यस्य ऊर्द्ध्वशङ्कुना युक्तश्चेत् तर्ह्येव कोटिर्मतेति । यथा, तत्रैव ।
“यो रवेरधः शङ्कुरसौ विधोरूर्द्ध्वशङ्कुना युतः । सैव कोटिर्मम मता । अत्रोपपत्तिः । इन्द्वर्केन्द्वोर्याम्योत्तरभावेन यदन्तरं स भुजः । ऊर्द्ध्वाधोभावेन यदन्तरं सा कोटिः । सा चैव भवति । उदयेऽस्ते वा यदि शृङ्गोन्नतिस्तदारविशङ्कोरभावात् शशिशङ्कुरेव कोटिः । यदा निशि रवेरधः शङ्कुस्तदा स शङ्कुर्विधोरुदयशङ्कुना युतो यावान् तावत् तयोर्यथास्थयोः ऊर्द्ध्वाधरमन्तरं सैव कोटिरुचिता । यतो द्रष्टा पुरुषेणात्मनोऽवस्थानवशेन शशिनः शृङ्गसमुन्नतमवलोक्यम् । अतः खावस्थानसमसूत्रादूर्द्ध्वरूपिण्या कोट्या भवितव्यम् । भुजकोटिकर्णक्षेत्रं स्वयं दृष्टेरग्रतः आदर्शवत् सम्मुखं यथा भवति तथा कल्प्यम् ॥ किञ्च, उदयास्तसूत्रकल्पितक्षेत्रावयवविशेषः । तत्रैव यथा,—
“सूत्राद्दिवा शङ्कुतलं यमशं
याम्यां गतं हि युनिशं कुशोर्द्ध्वे ।
अधश्च सौम्या निशि सौम्यमस्मात्
सद्युक्तियुक्तं न्तलं निरुक्तम् ॥
सौम्याग्रकाग्रान्तृतलं हि याम्य
याम्याग्रकाग्रात् पुनरेव याम्यम् ।
तदन्तरैक्यं समवृत्तखेट-
मध्यांशजीवा भुवि बाहुमाहुः ।
दृग्ज्या श्रुति चाथ तयोस्तु कोटिं
पूर्व्वापरां वर्गवियोगमूलम्” ॥
“क्षितिजस्याहोरात्रवृत्तसम्पातयोर्बद्धं सूत्रमुदयास्तसूत्रम् । शङ्कुस्थानात् लम्बः शङ्कुः तस्य तलं उदयास्तसूत्रात् दक्षिणतो भवति । यतः क्षितिजादुपरि दक्षिणतोऽहोरात्रवृत्तं गतम् । अधस्तु उत्तरतो गतम् । अतो निशि उत्तरं न्तलम् । अथ भुज उच्यते । उत्तरगोलेऽग्रोत्तरं न्तलं याम्यम् । अतस्तेनोनाया बाहुर्भवति । बाहुर्नाम शङ्कुः प्राचि अपरसूत्रयोरन्तरम् । यदाऽग्रा शङ्कुतलाद्ऊना तदा तयोरन्तरं दक्षिणं शङ्कुतलं बाहुः स्यात् । एवं समवृत्तप्रवेशादुपरि दक्षिणगोले तु अग्रा याम्या शङ्कुतलं च याम्यं तयोर्योगे कृते बाहुः स्यात् रविसममण्डलयोरन्तरांशाना ज्या बाहुः । तत्र या दृग्ज्या स कर्णः । तयोर्वर्गान्तरपदं पूर्व्वापरा कोटिः” ॥)
पृक्का । इत्यमरः ॥ पिडिङ्ग शाक इति भाषा ॥

कोटिक, पु, (कोट्या बहुसंख्यया कायति प्रकाशते । कै + क ।) इन्द्रगोपनामकीटः । इति जटाधरः ॥

कोटिजित्, पु, (कोटिं पण्डितानां समूहं विचारपथे कोटिपरिमितं द्रव्यं वा जितवान् । कोटि + जि + क्विप् तुगागमश्च ।) कालिदासः । इति त्रिकाण्डशेषः ॥ (मेधावन् । इति शब्दार्थचिन्तामणिः ॥)

कोटिपात्र, पु, (कोटिरग्रभागः पात्रं यत्राकारमस्य । यद्वा, कोटिरग्रे पात्रे जलाग्रेऽस्य जलक्षेपणादिति भावः ।) केनिपातकः । इति हेमचन्द्रः ॥ केरोयाल इति भाषा ॥

कोटिर, पु, (कोटिं असंख्यां राति ददातीति । रा + क ।) इन्द्रः । नकुलः । शक्रगोपकाकीटः । इति मेदिनी ॥

कोटिवर्षं, क्ली, (कोटिसंख्यकानि अस्त्राणि उपस्थितान् शत्रून् प्रति वर्षयत्र । कोटि + वृष + अच् ।) बाणपुरम् । इति शब्दरत्नावली ॥

कोटिवर्षा, स्त्री, (कोटिभिरग्रभागैर्वर्षति मधु । कोटि + वृष् + अच् । स्त्रियां टाप् ।) पृक्का । इत्यमरः ॥ पिडिङ्ग शाक इति भाषा ॥

मेदार्थौ भ्यादौ पाठ इति केचित्। इति दुर्गादासः॥

कैकयी, स्त्री, (जनपदात् क्षत्रियात् अञ्। यद्वा, केकय + स्वार्थे अण्। कैकय + बाहुलकात् न यादे रियादेशः। तस्यापत्य स्त्री ङीप्।) केकयी। इति शब्दरत्नावली॥

कैकेयी, स्त्री, (केकेयः केकयराजः तस्यापत्य स्त्री ङीप्।) केकयी। सा तु केकयराजकन्या दशरथराजपत्नी च। इति शब्दरत्नावली॥ (यथा, रघौ १२।२।
"स कार्यमूलमागत्य रामे श्रीर्न्यस्यतामिति।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा"॥)

कैङ्कर्य्यं, क्ली, (किङ्करस्य भावः किङ्करस्येदं किङ्करस्य कर्म्म वा। किङ्कर + ष्यञ्।) किङ्करत्वम्। दासत्वम्॥ (यथा, भागवते। ३।२।२२।
"तत् तस्य कैङ्कर्य्यमलं भवान् नो
विग्लापयत्यङ्ग! यदुग्रसेनम्"॥)

कैटज, पु, (कुटज एव स्वार्थे अण् वृद्धि। पृषोदरात् औकारस्य ऐकारत्वम्।) कुटजवृक्षः। इति भावप्रकाशः॥

कैटभः, पु, स्वनामख्यातो दैत्यविशेषः॥ (अयन्तु विष्णोः कर्णमलोद्भूतयोरसुरयोरन्यतरः। पाद्मकल्पे जात सन् एकार्णवे योगनिद्रायां स्थितस्य भगवतो नाभिपद्मादाविर्भूतं ब्रह्मयोनिं ब्रह्माणं यदा हन्तुमुद्यतः तदा योगनिद्रां विहाय समुत्थितेन भगवता जघनोपरि समुत्थाप्य निहतोऽयं दुर्द्दान्तोऽसुरः।) यथा,— मार्कण्डेयपुराणम्।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ"॥
(एतस्योत्पत्त्यादिकं सविस्तरं हरिवंशे ५२ अध्याये द्रष्टव्यम्॥)

कैटभजित्, पु, (कैटभं स्वनामख्यातमसुरं जितवान्। जि + भूते क्विप्। तुगागमश्च।) विष्णुः। इत्यमरः॥ (अस्य विवरणं हरिवंशे ५२ अध्याये द्रष्टव्यम्॥)

कैटभहा, [न्] पु, (कैटभं स्वनामख्यातं महासुरं हन्ति हतवान् वा। हन् + क्विप् भूते।) विष्णुः। इति हेमचन्द्रः॥ (स च सर्व्वशक्तिर्भगवान् स्वरूपतो निर्गुणोऽपि सृष्ट्यादिकार्य्यसम्पादनार्थं गुणाधिष्ठातृत्वमभ्युपैति, तत्र तु यदा जीवादृष्टवशात् यद्यद्गुणोद्रेकात्मिका क्रियाशक्तिरुपतिष्ठते नितरां गुणाधिष्ठातृकतया भगवानपि तदा तत्तद्गुणोपयोगिक्रियावानिव प्रतिभाति। यत् देहाभिमानवतां जीवानामिव तस्य प्रकृतेश्चिद्गुणे मनो न ह्यासज्यते हृषीकेशत्वात् गुणानियन्तृत्वादित्यर्थः देहाभिमानराहित्याच्च। अत एव स कैटभजिन्मधुजिदित्याद्युपाधिकत्वेनोच्यते वस्तुतस्तु जीवैर्यत् किञ्चित् क्रियते तत् सर्व्वमेव गुणपरतन्त्रैरेवकृत एव। ईश्वरस्य तु सत्तया इव गुणा स्वाधीना सन्त तदाश्रयेव क्रिया उत्पादयन्ति सम्पादयन्ति च॥)

कैटभा, स्त्री, (कूटा गुणास्तत्कार्य्यं सृष्ट्यादिकं कैट। कूट + अण् वृद्धि पृषोदरात् औकारस्य ऐकारत्व। तेन तैर्वा भाति प्रकाशते या। भा + क्विप्।) दुर्गा। इति त्रिकाण्डशेषः॥

कैटभारि, पु, (कैटभस्य स्वनामख्यातस्यासुरभेदस्य अरिः शत्रुः। पक्षे कैटभस्य तमस अरिर्दमयिता। सगुणावस्थायामपि ईश्वरस्य विष्णोः सत्त्वगुणप्राधान्यात् तथात्वम्।) विष्णुः। इति हलायुधः॥

कैटभी, स्त्री, (कैटभ तदाख्यया प्रसिद्ध असुर प्रति हः हननक्रियारूपतेजः प्रकाशोऽस्याः।) यद्वा, कूट वम प्रधानभावमधिष्ठाय तामसी प्रकृतिरिति विश्रुता देवकार्य्यसाधनानुरोधात् तदत्तया भातीति। कूट + अणि वृद्धौ कौट पृषोदरात् औकारस्य ऐकारत्व कैट भा + क। ततो ङीप् कैटभी तामसीत्यर्थः॥) दुर्गा। इति त्रिकाण्डशेषः। (मधुकैटभभीतब्रह्मणस्तुत्या प्रसादिततया तामस्या विमोहितौ तौ दुर्द्दान्तावसुरौ विष्णुना निहतौ। यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ८१ अध्याये।
"एवं स्तुता तदा देवी तामसी तत्र वेधसा।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः"॥
इत्युपक्रम्य।
"समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः।
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः॥
तावप्यति बलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्"॥)

कैटभेश्वरी, स्त्री, (कैटभस्य कैटभपुर्य्या ईश्वरी कर्त्री। पक्षे कैटभस्य तमोगुणस्य ईश्वरी नियन्त्री।) दुर्गा। यथा।
"कैटभन्तु वशं कृत्वा गृहीता तत्पुरी यया।
तेन सा गीयते देवी पुराणे कैटभेश्वरी"॥
इति देवीपुराणे ४५ अध्यायः॥

कैटर्य्यः, पु, (किट् त्रासे + भावे घञ्। केट त्रास राति ददाति तिक्तादीनामातिशय्यात्। रा दाने + क। ततः स्वार्थे ष्यञ्।) कट्फलः। इत्यमरः। २।४।४०॥ निम्बः। महानिम्बः। इति रत्नमाला॥ मदनवृक्षः। इति राजनिर्घण्टः॥

कैडर्य्यः, पुं, (कैटर्य्य + पृषोदरात् डले साधुः।) कट्फलः। पूतिकरञ्जः। कटभीवृक्षः। इति राजनिर्घण्टः॥

कैतक, क्ली, (केतक्या इदं "तस्येदम्" ।४।३।१२०। इत्यण्) केतकीपुष्पम्। यथा। कैतकं तिक्तकटुकमिति राजवल्लभः॥

कैतव, क्ली, (कितव + स्वार्थे अण्।) कपट। (कितवस्य भावः कर्म्म वा। युवादित्वादण्।) द्यूत। इत्यमरः।२।१०।४५॥ वैदूर्य्यमणिः। इति राजनिर्घण्टः॥ (कितवस्य भावः। कपटता। यथा, भागवते १।१।२। "धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्"॥)

कैदार, क्ली, (केदाराणां क्षेत्राणां समूहः। इति अण्।) क्षेत्रसमूहः। इत्यमरटीकायां भरतः। (केदारे क्षेत्रे प्रयत्नेनानीतं यज्जलं तत्कैदारम्। तद्गुणादिकमुक्तं भावप्रकाशे यथा—
"केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम्।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरुदोषकृत्"॥)

कैदार, पु, (केदारे क्षेत्रे भवः इत्यण्।) शालिधान्यम्। इति राजनिर्घण्टः॥ (केदारसम्बन्धिनो ये ते कैदाराः इत्यर्थः। यथा, भावप्रकाशे।
"कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः।
कषाया अल्पवर्च्चस्का मेध्याश्चैव बलावहाः"॥)

कैदारक, क्ली, (केदाराणां समूहः केदारस्य इदं वा। केदार + वुञ्।) केदारसमूहः। क्षेत्रगणः। इत्यमरः। २।९।११॥

कैदारिक, क्ली, (केदाराणां समूहः केदारे भवं तस्येदं वा। केदार + ठञ्।) कैदारकम्। इत्यमरः। २।९।११॥

कैदार्य्य, क्ली, (केदाराणां समूहः। केदार + यञ्।) क्षेत्रम्। क्षेत्रसमूहः। इत्यमरः। २।९।११॥

कैमुतिकः, पु, (किमुत इत्यव्यय तस्मात् आगतः। ठक्।) न्यायविशेषः। यथा च छन्दोगपरिशिष्टम्।
"वेदाश्छन्दांसि सर्व्वाणि ब्रह्माद्याश्च दिवौकसः।
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः॥
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः।
पिपासूननुगच्छन्ति संहृष्टाः स्वशरीरिणः॥
समवायस्तु यत्रैषां तत्रान्ये बहवो मलाः।
नूनं सर्व्वं क्षयं यान्ति किमुतैकं नदीरजः"॥
इति प्रायश्चित्ततत्त्वम्॥

कैरव क्ली, (के जले रौति कलनादं करोतीति। रु + अच्। केरवः हंसः तत्प्रभवे ऽस्तीत्यण्। वस्य प्रियमित्यण्।) कुमुदम्। श्वेतोत्पलम्। इत्यमरः। १।१०।३७। (यथा, महाभारते १।१।८६।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।
नृबुद्धिकैरवाणाञ्च कृतमेतत् प्रकाशनम्"॥)

कैरवः, पु, (कुत्सितो रवो यस्य स एव स्वार्थे अण्। पृषोदरात् औकारस्य ऐकारत्वम्।) शत्रुः। कितवः। इति मेदिनी॥

कैरविणी, स्त्री, (कैरव पुष्करादित्वात् इनि। ततो ङीप्।) कुमुदिनी। इति शब्दरत्नावली॥ (कैरवाणि सन्त्यस्या इति इनि ङीप् च। कुमुदयुक्ता पुष्करिणी॥)

कैरवी, स्त्री, (कैरवस्य प्रिया इत्यण् ङीप् च।) चन्द्रिका। इति मेदिनी॥ मेथिका। इति राजनिर्घण्टः॥

कैरवी, [न्] पु, (कैरव प्रियत्वेन प्रकाश्यत्वेन वा अस्त्यस्य इति इनि।) चन्द्रः। इति शब्दमाला॥

कैराटक, पु, (किर पर्य्यन्तभूमि चरमावस्थां मृत्युदशामित्यर्थः अटति प्राप्नोति यस्मात्। किर + अट् + अच्। ततः स्वार्थे कन् अण् च।) स्थावरविषभेद। इति हेमचन्द्रः॥

कैरात, क्ली, (किराते पर्य्यन्तभूमौ भवं इत्यण् ।) भूनिम्बः । इति शब्दचन्द्रिका ॥ शम्बरचन्दनम् । इति राजनिर्घण्टः ॥

कैरातः, पुं, (किराते पर्य्यन्तभूमौ भवः । इत्यण् ।) भूनिम्बः । इति राजनिर्घण्टः ॥ (किरात इव शूरः इत्यर्थे अण् ।) बलवान् पुरुषः । तत्पर्य्यायः । दोर्ग्रहः २ क्षामः ३ । इति हारावली ॥ (किरातस्य वेश इव वेशो यस्य । अर्श आद्यच् तत स्वार्थे अण् । किरातवेशधारिणि, त्रि । यथा, महाभारते १ । २ । ५० ।

"ईश्वरार्ज्जुनयोर्युद्धं पर्व्वकैरातसंज्ञितम्" ॥

तथा, मनसाध्याने । "कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे" ॥)

कैराल, क्ली, (किरं पर्य्यन्तभूमिं अलति पर्य्याप्नोतीति । अल् + "कर्म्मण्यण्" इत्यण् । तत स्वार्थे अण् ।) विडङ्गम् इति वैद्यकम् ॥

कैराली, स्त्री, (कैराल + स्त्रियां गौरादित्वात् ङीष् ।) विडङ्गा । इति राजनिर्घण्टः ॥

कैलास, पुं, (के जले लासो लसनं दीप्तिरस्य । "हलदन्तात् सप्तम्याः" । ६ । ३ । ९ । इति अलुक् केलासः स्फटिकमणिः तद्वत् शुभ्रः इत्यण् । यद्वा, केलीनां समूहः । कैलं । "तस्य समूहः" । ४ । २ । ३७ । इत्यण् तद्धितः । कैलेनास्यतेऽत्र । आस् + अधिकरणे घञ् ।) स्वनामख्यातपर्व्वतः । इत्यमरः । १ । २ । ७४ ॥ स च शिवकुवेरयोः स्थानम् । तस्य परिमाणं यथा । "जठरदेवकूटौ मेरोः पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ" । इति श्रीभागवतम् ॥ (अयं हि बृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः ॥)

कैलासनिकेतन, पुं, (कैलासः निकेतनं यस्य ।) शिवः । इति कविकल्पलता ॥

कैलासौका, [स्] पुं, (कैलासः ओकः स्थानं आलयोऽस्य ।) कुवेरः । इति हेमचन्द्रः ॥

कैवर्त्त, पुं, (के जले वर्त्तते । वृत् + अच् अलुक् समासः । तत स्वार्थे अण् ।) स्वनामख्यातवर्णसङ्करजातिः । स तु वैश्यागर्भे क्षत्त्रियस्यौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । दासः २ धीवरः ३ । इत्यमरः । २।१०।१५ ॥ दाशेरकः ४ जालिकः ५ । इति जटाधरः ॥ (यथा, मनुः । १० । ३४ ।

"निषादो मार्गवं सूते दाशं नौकर्म्मजीविनम् । कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः" ॥

अस्य टीकायां कुल्लूकभट्टेन यदुक्तं तद्यथा । "ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तः प्रजातायामायोगव्यां मार्गवं दाशापरनामानं नौव्यवहारजीविनं जनयति । यमार्य्यावर्त्तदेशवासिनः कैवर्त्तशब्देन कीर्त्तयन्ति" ॥)

कैवर्त्तमुस्त, क्ली, (के जले जलयुक्तभूमौ वर्त्तते जायते इति केवर्त्तः तत स्वार्थे अण् । कैवर्त्तं च तत् मुस्तञ्चेति कर्म्मधारयः ।) कैवर्त्तमुस्तकम् । इति शब्दरत्नावली ॥

कैवर्त्तमुस्तकं, क्ली, (कैवर्त्तमुस्त + स्वार्थे कन् । यद्वा कैवर्त्तस्य प्रियं मुस्तकम् ।) कैवर्त्तीमुस्तकम् । इत्यमरटीकायां भरतः ॥

कैवर्त्तिका, स्त्री, (कैवर्त्ती जलस्था इव । इवार्थे कन् ततो ह्रस्वः ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । सुरङ्गा २ लता ३ वल्ली ४ दृढरुहा ५ रङ्गिणी ६ वक्लरङ्गा ७ सुभगा ८ । अस्या गुणाः । लघुत्वम् । रुच्यत्वम् । कषायत्वम् । कफकासश्वासमन्दाग्निदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

कैवर्त्तिमुस्तकं, क्ली, (कैवर्त्त्याः कैवर्त्तपत्न्याः प्रियं मुस्तकम् । संज्ञायां "ङ्यापोः" । ६ । ३ । ६३ । इति वा ह्रस्वः ।) कैवर्त्तीमुस्तकम् । इत्यमरटीका ॥

कैवर्त्ती, स्त्री, (के जले वर्त्तते इति । वृत् + अच् । केवर्त्ता जलस्था सा एव इति स्वार्थे अण् ततो ङीप् ।) परिपेलम् । इति वैद्यकम् ॥ कैवर्त्तपत्नी च ॥

कैवर्त्तीमुस्तक, क्ली, (कैवर्त्त्याः कैवर्त्तपत्न्याः प्रियं मुस्तकम् । संज्ञायां "ङ्यापोः" । ६ । ३ । ६३ । इति विकल्पे ह्रस्वविधेरत्र ह्रस्वाभावः ।) मुस्ताप्रभेदः । इति भरतः ॥ केओटमुता इति भाषा । केशुर इति नीचोक्तिः । केशुरिया मुथा । इति सारसुन्दरी ॥ तत्पर्य्यायः । कुटन्नटम् २ दशपुरम् ३ वानेयम् ४ परिपेलवम् ५ प्लवम् ६ गोपुरम् ७ गोनर्द्दम् ८ इत्यमरः । २ । ४ । १३१ ॥ दाशपुरम् ९ दाशपूरम् १० दशपुरम् ११ दशपूरम् १२ परिपेलम् १३ पारिपेलम् १४ कैवर्त्तमुस्तकम् १५ कैवर्त्तिमुस्तकम् १६ । इति तट्टीका ॥ वनसम्भवम् १७ । इति रत्नकोषः ॥ धान्यम् १८ शीतपुष्पम् १९ गोर्णबुभ्रकम् २० वन्यम् २१ सितपुष्पम् २२ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवायुव्रणदाहामशूलरक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ हिमत्वम् । तिक्तत्वम् । कषायत्वम् । कान्तिदत्वम् । पित्तविसर्पकुष्ठकण्डुविषनाशित्वञ्च । इदन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृतिः ॥ इति भावप्रकाशः ॥

कैवल, क्ली, (के शिरोऽवच्छेदे वलते संवृणोति केशादेरतिसौरभ्यकरणात् के जले वलते गुणाधिक्यात् वर्द्धते वा । वल + अच् तत स्वार्थे अण् ।) विडङ्गम् । इति रत्नमाला ॥ (केवलस्य भावः इति केवलशब्दात् ब्राह्मणादित्वात् ष्यञ् ॥)

कैवल्य, क्ली, (केवलस्य सर्व्वोपाधिवर्ज्जितस्य भावः इति । केवल + ष्यञ् ।) मुक्तिः । इत्यमरः । १।५।६ ॥ (तथा च पातञ्जले कैवल्यपादे ३ सूत्रं यथा,

"निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्" ॥

निमित्तं धर्म्मादि तत्प्रकृतीनामर्थान्तरपरिणामेन प्रयोजकं न हि कार्य्येण कारणं प्रवर्त्तते । वरणभेदस्तु ततः क्षेत्रिकवत् ततस्तस्मादनुष्ठीयमानाद्धर्म्मात् वरणमावरणकं अधर्म्मादि तस्यैव विरोधित्वात् भेदः क्षयः क्रियते तस्मिन् प्रतिबन्धे क्षीणे प्रकृतयः स्वयमभिमतकार्य्याय प्रभवन्ति । क्षेत्रिकवत् । यथा, क्षेत्रिकः कृषीवलः केदारात् केदारान्तरं जलं निनीषुर्जलप्रतिबन्धकावरणभेदमात्रं करोति । तस्मिन् भिन्ने जलं स्वयमेव प्रसरद्रूपं परिणामं गृह्णाति न तु जलप्रसरणे तस्य कश्चित् प्रयत्नः । फलतः यावत् योगादिप्रभावेण अधर्म्मावरणभेदो न भवेत् तावत् कुतस्तत्त्वज्ञानं किञ्च यावत्तत्त्वज्ञानप्रभावात् सर्व्वा वासना न क्षयं यान्ति तावत् वृथैव कैवल्याशेति ध्येयम् । तथा च तत्रैव । ११ ।

"हेतुफलाश्रयालम्बनैः सङ्गृहीतत्वादेषामभावे तदभावः" ॥

वासनानामनन्तरानुभवो हेतुस्तस्यानुभवस्य रागादयस्तेषामविद्येति साक्षात् पारम्पर्य्येण च हेतुः । फलं शरीरादि स्मृत्यादि च । आश्रयो बुद्धिरालम्बनं यदेवानुभवस्य तदेव वासनानामतस्तैर्हेतुफलाश्रयालम्बनैरनन्तानामपि वासनानां सङ्गृहीतत्वात्तेषां हेतूनामभावे ज्ञानयोगाभ्यां दग्धबीजकल्पत्वे विहिते निर्म्मूलत्वाच्च वासना प्ररोहं न यान्ति न वा कार्य्यमारभन्त इति तासामभावः ॥ अत्र भगवद्गीतायाम् । ४ । ३७ ।

"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन । ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा" ॥

अतएव सत्त्वादिषु गुणेषु कृतार्थेषु भोगापवर्गादिलक्षणेषु पुरुषार्थेषु समाप्तेषु कैवल्यमितीदं सारसिद्धान्तवाक्यम् । यथा, पातञ्जले । ३३ ।

"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" ।

समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्य परिणामस्य समाप्तौ विकारानुद्भव क्षणेषु यदि वा चिच्छक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेऽवस्थानं तत् कैवल्यमुच्यते । इत्थं सर्व्वेष्वेव दर्शनेष्वधिष्ठातृत्वं विहाय नान्यदात्मनोरूपमुपपद्यते । अधिष्ठातृत्वञ्च चिद्रूपत्वं तच्च जडात् वैलक्षण्यमेव चिद्रूपतया यदधितिष्ठति तदेव भोग्यतां नयति यच्च चेतनाधिष्ठितं तदेव सकलव्यापारयोग्यं भवति । एवञ्च सति नित्यत्वात् प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यमस्माभिरुक्तं तद्विहाय दर्शनान्तराणां नान्या गतिस्तस्मादिदमेव युक्तमुक्तं वृत्तिसारूप्यपरिहारेण स्वरूपे प्रतिष्ठा चितिशक्तेः कैवल्यम् । यथा,

"पुरुषस्य ज्ञातृत्वमुक्त्वा चित्तद्वारेण सकलव्यवहारनिष्पत्तिमुपपाद्यापुरुषसत्त्वे प्रमाणमुपदर्श्य कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोऽर्थानभिधाय शास्त्रान्तेऽप्येतदेव कैवल्यमित्युपपाद्य कैवल्यस्वरूपं निर्णीतम्" । परं जन्मौषधिमन्त्रसमाधिजन्यासु सिद्धिषु सतीष्वपि ज्ञानभक्त्यादियोगेन येन केनचिदुपायेन भगवदनुकम्पालाभ एव कैवल्योपायः । पातञ्जलदर्शनटीकाकृत् महाराजभोजाधीश्वरोऽप्येतद्दर्शितवान् कैवल्यपादस्य टीकायां मङ्गलाचरणं कृतवान् । यथा,—

"यदाश्रयैव कैवल्यं विनोपायैः प्रजायते । तमेकमजमीशानं चिदानन्दमयं स्तुमः" ॥

(अस्याः पर्य्याया यथा ।
"स्पृक्कासृक् ब्राह्मणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि" ॥
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्याः स्पृक्काशब्दे ज्ञेयाः ॥)

कोटिशः, पुं, (कोट्या अग्रेण श्यति नाशयति चूर्णीकरोतीत्यर्थः । कोटि + शो + कः ।) लोष्टभञ्जसाधनमुद्गरः ॥ इति भरतः ॥ मइ इति ख्यात इति केचित् । तत्पर्य्यायः । लोष्टभेदनः २ । इत्यमरः । २ । ९ । १२ ॥ लोष्टघ्नः ३ कोटीशः ४ । इति रत्नकोषः ॥ लोष्टभेदी ५ धरादारः ६ लोष्टभञ्जार्थमुद्गरः ७ । इति शब्दरत्नावली ॥ लोष्टघ्नः ८ । इति जटाधरः ॥ (कोटिरस्यास्तीति लोमादित्वात् शः । कोटियुक्ते, त्रि ॥ वासुकिवंशीय नागविशेषः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानसः पूर्णः शलः पालो हलीमकः" ॥)

कोटिशः, [स्] व्य, (कोटि + वारार्थे शस् ।) कोटि कोटि । इति व्याकरणम् ।
(यथा, रघौ । २ । ४९ ।
"गाः कोटिशः स्पर्शयता घटोध्नीः" ॥)

कोटी, स्त्री, (कुट् + "सर्व्वधातुभ्य इन्" । उणा० ४ । ११७ । इतीन् ततो वा ङीष् ।) खड्गादेरग्रभागः । इत्यमरटीका ॥ एकार्बुदम् । इति शब्दरत्नावली । कोटिसङ्ख्या । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ (यथा, महाभारते । ७ । जयद्रथवधपर्व्वणि । ८७ । ३० ।
"प्रतोदैश्चापकोटीभिर्हुङ्कारैः साधु वाहितैः ।
कशापार्ष्णिभिघातैश्च वाग्भिरुग्राभिरेव च" ॥)

कोटीरः, पुं, (कोटीमिः ईरयति प्रेरयति । कोटी + ईर् + णिच् अच् ।) जटा । इति त्रिकाण्डशेषः ॥ (यथा, आनन्दलहर्य्याम् । ३० ।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्" ॥)
किरीटम् । इति हेमचन्द्रः ॥

कोटीवर्षं, क्ली, (कोटीसङ्ख्यकानि बाणादस्त्राणि विपक्षान् प्रति वर्षन्ति अत्र । कोटी + वृष् + अप् ।) बाणपुरम् । इति त्रिकाण्डशेषः ॥ (इदानीं देवीकोट इत्याख्ययाख्यायते ॥)

कोटीवर्षा, स्त्री, (कोटीं कोटीर्वा वर्षति माधुर्य्यादिस्वादम् । वृष् + अच् + टाप् ।) कोटिवर्षा । इति शब्दरत्नावली । पिडिङ्ग शाक इति भाषा ॥

कोटीशः, पुं, (कोटीं लोष्टादीनां कोटीसङ्ख्या श्यति चूर्णयतीति । कोटी + शो + कः ।) कोटिशः । इत्यमरटीकायां भरतः ॥

कोट्टं, क्ली, (कुट्ट्यते विपक्षोऽस्मिन् अत्र वा । कुट्ट + अधिकरणे घञ् । निपातनात् गुणः ।) दुर्गम् । इति हेमचन्द्रः । केल्ला गड इत्यादि भाषा ॥

कोट्टः, पुं, (कुट्ट्यन्ते शत्रवोऽत्र । कुट्ट छेदे + घञ् । निपातनात् गुणः ।) दुर्गपुरम् । इति लिङ्गादिसंग्रहे अमरः ॥

कोट्टवी, स्त्री, दुर्गा । इति त्रिकाण्डशेषः ॥ नग्ना स्त्री । इति शब्दरत्नावली ॥ नग्नमुक्तकेशी नारी ।
"या स्ववासा मुक्तकेशी कोट्टवी नग्निका च सा" ॥
इति जटाधरः ॥ (कोट्टं कुट्टनं छेदनं अपुत्रस्येति यावत् वाति हिनस्ति निवारयतीत्यर्थः । यद्वा, कोट्टे कुट्टने संग्रामे स्वसुतस्य रक्षार्थं वाति गच्छतीति । कोट्ट + वा गमनहिंसयोः + कः गौरादित्वात् ङीष् ॥) नग्ना स्त्रीरूपिणी दुर्गा ।
"नग्नाता कोट्टवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया" ॥
इति भागवते । १० । ६३ । २० ॥
(बाणीय स्वयमाद्याशक्तिरूपिणी दुर्गा विल्वस्था नम्नावस्थोऽष्टमो भागः । यथा, हरिवंशे बाणयुद्धे १८२ अध्याये २२-७३ ।
"आविध्यमाने चक्रे तु कृष्णेनाप्रतिमौजसा ।
कुमाररक्षणार्थाय बिभ्रती सुतनुं तदा ॥
दिग्वासा देववचनात् प्रातिष्ठत्तत्र कोट्टवी ॥
लम्बा नाम महाभागा भागो देव्यास्तथाष्टमः ।
पिनाकनयनशक्तिस्तु सा च नग्ना स्थितान्तरे" ॥)

कोट्टवीपुरं, क्ली, (कोट्टव्याः पुरम् ।) बाणपुरम् । इति शब्दरत्नावली ॥

कोट्टारः, पुं, (कुट्ट + आरकप्रत्ययः । पृषोदरात् साधुः । कोट्टं कोटं दुर्गमित्यर्थः ऋच्छति प्राप्नोति । कोट्ट + ऋ + "कर्म्मण्यण्" । इति अण् ।) नागरः । कूपः । पुष्करिण्याः पाटकः । इति मेदिनी ॥ दुर्गपुरम् । इति लिङ्गादिसंग्रहटीकायां भरतः ॥

कोठः, पुं, (कुठि + अच् निपातनात् नलोपे साधुः ।) चक्राकारकुष्ठरोगः । तत्पर्य्यायः । मण्डलकम् २ । इत्यमरः । २ । ६ । ५४ ॥ दुश्चर्म्मा ३ त्वग्दोषः ४ चर्म्मदूषिका ५ । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथाह माधवकरः ।
"असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च ।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते" ॥
अन्यच्च । "वरटीदष्टसंकाशः कण्डूमान् लोहितोऽसकफपित्तात् । क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः" ॥ इति रक्षितः ॥
(अस्य चिकित्सा यथा, वैद्यकचक्रपाणिसंग्रहे शीतपित्तोदर्द्दाद्यधिकारे ।
"अग्निमन्थभवं मूलं पिष्टं पीतञ्च सर्पिषा ।
शीतपित्तोदर्द्दकोठान् सप्ताहादेव नाशयेत् ॥
उदर्द्दोक्ता क्रियाश्चापि कोठरोगे समाचरेत् ।
सर्पिः पीत्वा महातिक्तं कार्य्यं शोणितमोक्षणम्" ॥)

कोठरः, पुं, (कुण्ठ्यते छिद्यतेऽसौ । कुठ + अरप्रत्ययः ।) अङ्कोठवृक्षः । इति राजनिर्घण्टः ॥ आँकोड इति भाषा ॥

कोठरपुष्पी, स्त्री, (कोठरस्य पुष्पमिव पुष्पमस्याः । कोठरपुष्प + ङीष् ।) वृद्धदारकः । इति राजनिर्घण्टः ॥ (वृद्धदारकशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कोणः, पुं, (कुणति वादयत्यनेन कुणति वादयतीति वा । कुण शब्दे + करणे घञ् । कर्त्तरि + अच् वा ।) वीणादिवादनम् । भेरीप्रभृति यन्त्रवाद्यदण्ड । वाग काटी इति भाषा ॥ (यथा, रामायणे २ । ७१ । २९ ।
"भेरीमृदङ्गवीणानां कोणसंघट्टितः पुनः" ॥)
अस्त्रादेरग्रभागः । तत्पर्य्यायः । पालिः २ अश्रिः ३ कोटिः ४ । इत्यमरः । २ । ८ । ९३ ॥ (यथा, कादम्बर्य्याम् । "कनककोणैरभिहन्यमानः" ॥)
वाद्यप्रभेदः । गृहादेरेकदेशः । (यथा, कथासरित्सागरे । १९ । ३३ ।
"मध्यमस्याङ्गने तेन चत्वारः स्वर्णपूरिताः ।
कुम्भाश्चतुर्षु कोणेषु निगूढाः स्थापिता भुवि" ॥)
लगुडः । इति मेदिनी । मङ्गलग्रहः । इति हेमचन्द्रः ॥ शनिः । इति विश्वः ॥ द्वयोर्दिशोर्म्मध्यभागः । इति राजनिर्घण्टः ॥ अस्य विवरणं विदिक्शब्दे द्रष्टव्यम् ॥ (कोणमानम् । यथा, तन्त्रसारे ।
"विन्दुत्रिकोणवसुकोणदशारयुग्मम्" ॥)

कोणकुणः, पुं, (कोणे मत्कुणैकदेशभागे कुणति विचरतीति । कुण् + अच् ।) उत्कुणः । इति हेमचन्द्रः ॥ उकुण इति भाषा । (मत्कुणम् । छारपोका इति भाषा । खटमल इति हिन्दीभाषा ॥)

कोणिः, त्रि, (कुण + "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् बाहुलकात् गुणः ।) कुणिः । इत्यमरटीका ॥ कोणा इति भाषा ॥

कोथः, पुं, (कुथ्यते पूतित्वं गम्यते अनेन । कुथ् पूतित्वे + करणे घञ् ।) नेत्ररोगभेदः । कथो इति भाषा । (कुथ्यति गुदं क्लिश्नाति । कुथ् कर्त्तरि अच् । गुह्यक्षयकारकभगन्दररोगविशेषः । यथा, सुश्रुते ।
"मूढेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदा वगाढपुरीषोन्मिश्रमपानेनाधः प्रेरितं असम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तः कोथ उपजायते" । भावे घञ् । गलनम् । यथा, तत्रैव ।
"तस्मिन् क्षते पूयरुधिरावकीर्णमांसकोथे भूमाविव जलसिक्तायां कृमयो जायन्ते" ॥)
शटिते मथिते च त्रि । इति मेदिनीकरहेमचन्द्रौ ॥

कोदण्डं, क्ली, (कु शब्दे + विच् । कौ शब्दायमानो दण्डोऽस्य ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥
(यथा, भागवते ३ । २१ । ५२ ।
"विस्फूर्ज्जच्चण्डकोदण्डो रथेन त्रासयन्नघान्" ॥)

कोदण्डः, पुं, (कोदण्डं धनुः तत्सदृशमाकारो विद्यतेऽस्य । अर्श आदित्वादच् ।) भ्रूः । जनपदविशेषः । इति मेदिनी ॥

कोद्रवः, पुं, (कु + विच् । कौ सन् द्रवतीति । द्रु + अच् । द्रवः । कौ द्रव इति कर्म्मधारयः । केन वायुना द्रवति वा पृषोदरात् पूर्व्वस्य ओकारादेशे साधुः ।) धान्यविशेषः । कोदो इति भाषा । तत्पर्य्यायः । कोरदूषः २ । इत्यमरः । २ । ९ । १३ ॥ कुद्रवः ३ । इति तट्टीका ॥ कुद्दालः ४ मदनाग्रकः ५ कोर्द्दवः ६ कोरदुष्कः ७ । इति शब्दरत्नावली ॥

(यथा श्रुतौ। "अयज्ञिया वै कोद्रवाः" ॥) अपि च।
"कोद्रव कोरदूष स्यादुद्दालो वनकोद्रव।
कोद्रवो वातलो ग्राही हिम पित्तकफापहः।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्" ॥
इति भावप्रकाशः। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। अग्निना पथ्यकारकत्वम्। कफपित्तहरत्वम्। रूक्षत्वम्। मोहकारित्वम्। नूतनस्य तु गुरुत्वञ्च। इति राजनिर्घण्टः॥ परमग्राहित्वम्। वातलत्वम्। इति राजवल्लभः॥
कोपः, पु, (कुप्यते इति। कुप्+भावे घञ्।) क्रोधः। इत्यमरः।१।७।२६॥
(यथा, विष्णुपुराणे १।११।१३।
"तत्र कः कोपहेतुस्ते कश्च त्वा नाभिनन्दति" ॥)
कोपक्रम, क्ली, (उपक्रम्यते आरभ्यते यत् तत् उपक्रमं सृष्ट्यादिकम्। उप+क्रम्+कर्म्मणि घञ्। कस्य ब्रह्मण उपक्रमं सृष्टिः।) ब्रह्मणः सृष्टिः। इत्यमरटीकायां रायमुकुटः॥ (कोपेन क्रम्यते इति। यद्वा, कोपस्य क्रम उद्योगोऽस्य।)
कोपयुक्ते, त्रि॥
कोपनः, त्रि, (कुप्+युच्।) कोपविशिष्टः। इति जटाधरः॥ (यथा, महाभारते १।२८।१६।
"आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम्" ॥
पु, बलिवंशीयः कोपनो नामासुरः।
यथा, हरिवंशे। ४१।८४।
"शरभः शलभश्चैव कुपनः कोपनः क्रथः" ॥
क्ली, कुप्+णिच् भावे ल्युट्। दोषविकारकारकव्यापारविशेषकोपनिष्पादनम्। यथा, महाभारते अनुगीतायाम्।१४।१७।१३।
"स्वदोषकोपनाद्रोगं लभते मरणान्तिकम्।
अपि वोद्बन्धनादीनि परीतानि व्यवस्यति" ॥)
कोपनकः, पु, (कोपनः कोपशील इव कायति प्रकाशते। कै+क।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥
कोपना, स्त्री, (कुप्यतीति। कुप्+ताच्छील्ये युच्+टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २। इत्यमरः।२।६।४॥ चण्डी ३। इति जटाधरः॥ भीमा ४। इति शब्दरत्नावली॥ (यथा, कुमारे।३।८।
"कयासि कामिन् सुरतापराधात्
पादानतः कोपनयावधूतः।
तस्याः करिष्यामि दृढ़ानुतापं
प्रवालशय्याशरणं शरीरम्" ॥)
कोपलता, स्त्री, (कोपहेतुर्लता।) कर्णस्फोटालता। इति राजनिर्घण्टः॥
कोपी, [न्] त्रि, 'अवश्यं कुप्यति इति आवश्यके णिनिः।) क्रोधनः। इत्यमरः।३।१।३२॥ (यथा, मार्कण्डेये २८।२६।
"सर्व्वसङ्गपरित्यागो ब्रह्मचर्य्यमकोपिता।
यतेन्द्रियत्वमावासे नैकस्मिन् वसतिश्चिरम्" ॥)
जलपारावते, पु, । इति राजनिर्घण्टः॥
कोमलं, क्ली,(कौति शब्दायते वाय्वादियोगेन स्रोतोवेगेन वा। कु शब्दे वृषादित्वात् कलच् तस्य मुट् च। बाहुलकात् गुणः।) जलम्॥ इति मेदिनी॥
कोमल, त्रि, (कमु कान्तौ+बाहुलकात् कलच् अत उत्व गुणश्च॥) अकठिनः। नरम इति भाषा। तत्पर्य्यायः। सुकुमार २ मृदुल ३ मृदु ४। इत्यमर।३।१।७८। पेलव ५। इति जटाधर॥ मनोज्ञ। इति शब्दरत्नावली॥
(यथा, रघुः।९।३५।
"श्रुतिसुखभ्रमरस्वनगीतयः
कुसुमकोमलदन्तरुचो बभुः।
उपवनान्तलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः" ॥)
कोमलकं, क्ली, (कोमल+सञ्ज्ञायां कन्।) मृणालम्। इति शब्दचन्द्रिका॥ (स्वार्थे कन्। जलम्॥)
कोमला, स्त्री, (कोमल+स्त्रियां टाप्।) क्षीरिका। इति शब्दचन्द्रिका॥ (वृत्त्यनुप्रासघटकवृत्तिभेद। क्षीरिकाशब्देऽस्य विवरणं ज्ञेयम्॥)
कोमासिका, स्त्री, (कु ईषत् उमा अतसीव च स इव आस्ते। आस्+ण्वुल्+टाप् अत इत्वम्। को कादेशः।) जालिका। इति हारावली॥ फलेर जालि इति भाषा॥
कोयष्टिः, पु, (कं जलं यष्टिरिवास्य पृषोदरात् अत उत्वे गुणत्वे च साधुः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥ (यथा, मनौ।५।१२।
"प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्" ॥)
कोयष्टिकः, पु, (कोयष्टि+सञ्ज्ञायां कन्।) पक्षिभेदः। कोँडापक्षी इति भाषा। इत्यमरः।२।५।३५॥
कोरकः, पुं, (कुर सस्थाने+कर्त्तरि ण्वुल्। अस्य रत्वम्।) कलिका। इत्यमरः।२।४।१६॥
("कलिका कोरकः पुमान्" इत्यमरवाक्यं प्रायिकाभिप्रायेण इति बोध्यम्। यत "कोरकं कुड्मलेऽपि स्यात् कक्कोलकमृणालयोरिति" "कोरकोऽस्त्री कुड्मले स्यादिति" च विश्वमेदिनीकाराभ्यामुक्तम्॥)
कोरकं, पु क्ली, (कुल+ण्वुल्। लस्य रः।) मुकुलम्। (यथा, माघे।७।२६।
"मरुदवनिरुहां रजोवधूभ्यः
समुपहरन् विचकार कोरकाणि" ॥)
कक्कोलकम्। मृणालम्। इति मेदिनी॥ चोरनामगन्धद्रव्यम्। इति जटाधरः॥
कोरङ्गी, स्त्री, (कुरति कोरङ्गीत्याख्यां गच्छतीति कुर्+अङ्गच् गौरादित्वात् ङीष्।) सूक्ष्मैला। इत्यमर।२।४।१२५॥ (अस्याः पर्य्याया यथा,
"सूक्ष्मोपकुञ्चिका तुच्छा कोरङ्गी द्राविडी त्रुटिः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
पिप्पली। इति राजनिर्घण्टः॥
कोरदूषः, पु, (कोलं सस्थानं दूषयति। दूष्+णिच् "कर्म्मण्यण्"।३।२।१। इत्यण्। लस्य रत्वम्।) कोद्रवः। इत्यमरः।२।९।१६॥ (यथा, महाभारते।३।१९०।१८—१९।
"ईदृशो भविता लोको युगान्ते पर्य्युपस्थिते।
वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषकः।
भार्य्यामित्राश्च पुरुषा भविष्यन्ति युगक्षये" ॥
अस्य गुणा यथा,—
"स कोरदूषः श्यामाकः कषायमधुरो लघुः।
वातलः कफपित्तघ्नः शीतसंग्राहिशोषणः" ॥
इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम्॥)
कोलं, क्ली, (कुल् अच् गौरादित्वात् ङीष्। कोली तस्याः फलमित्यण् तस्य लुक् "लुक्तद्धितलुकि"।१।२।४९। इति ङीषो लुक्।) वदरीफलम्। तत्पर्य्यायः। कुवलम् २ फेनिलम् ३ सौवीरम् ४ वदरम् ५ घोण्टा ६। इत्यमरः।२।४।३६॥ पिच्छिलम् ७ स्वादुफलम् ८ वदरीफलम् ९। इति शब्दरत्नावली॥ कोकिलम् १०। इति जटाधरः॥ अपि च।
"पुंसि स्त्रियाञ्च कर्कन्धुर्वदरीकोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं वदरञ्च तत्॥
अजाप्रिया कुहा कोलिर्विषमो भयकण्टकः" ॥
अथ वदरविशेषाणां लक्षणानि गुणाश्च।
"पच्यमानं सुमधुरं सौवीरं वदरं महत्।
सौवीरं वदरं शीतं भेदनं गुरु शुक्रलम्॥
वृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम्।
सौवीराल्लघु संपक्कं मधुरं कोलमुच्यते॥
कोलन्तु वदरं दाहि रुच्यमुष्णञ्च वातहृत्।
कफपित्तकरं चापि गुरु सारकमीरितम्॥
कर्कन्धुः क्षुद्रवदरं कथितं पूर्व्वसूरिभिः।
अम्लं स्यात् क्षुद्रवदरं कषायं मधुरं मनाक्॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं भेदकृत् सर्व्वं लघु तृष्णाक्लमास्रजित्" ॥
इति भावप्रकाशः॥ वदरादिदयं शृगालकोली।
वदरीसदृशा घोण्टा शृगालकोलिः। यदुक्तम्।
"वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत्।
अटव्यामेव सा घोण्टा गोपघोण्टेति चोच्यते" ॥
इति सुभूतिः॥
"इस्तिकोलिर्गोपघोण्टा घोण्टा च वदरीच्छदा।
शृगालकोलिः कर्कन्धुः" इति। रत्नकोषः॥ केचित्तु कोलादित्रयं वदरीफले सौवीरादित्रयं शृगालकोलावित्याहुः॥ स्वामी तु "कर्कन्धुर्वदरी कोलिः घोण्टा कुवलफेनिलौ। सौवीरं वदरं कोलम्" ॥ इति पठति। तत्राद्यास्त्रयो वृक्षार्था अन्ये फलार्थाः घोण्टा तूभयसगिति व्याचष्टे। "सौवीरं वदरं कोलं वदरीणां फलं मतम्"। इति कोषान्तरञ्च। इति भरतः॥ * ॥ अस्य गुणाः। अम्लत्वम्। वायुकफनाशित्वञ्च॥ पक्कस्यास्य गुणाः। वायुपित्तनाशित्वम्। स्निग्धत्वम्। समधुरत्वम्। सारकत्वञ्च॥ शुष्कस्यास्य गुणाः। कफवायुनाशित्वम्। पित्तविरोधित्वञ्च॥ पुरातनस्यास्य गुणाः। श्रमतृष्णानाशित्वम्। स्निग्धत्वम्। लघुत्वञ्च॥ अस्य मज्जगुणाः। मधुरत्वम्। पित्ततृड्छर्द्दितृष्णानाशित्वञ्च। इति राजवल्लभः॥ * ॥ तोलकपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, चरके कल्पस्थाने १२ अः।
"प्राणौ द्वौ मध्यं विद्यात् कोलं वदरमेव च" ॥)
मरिचम्। इति राजनिर्घण्टः॥ चव्यम्। इति वैद्यकम्॥
कोलः, पु, (कोलति कामपि बाधां न मन्यैव शत्रुं प्रतिधावतीति। कुल्+अच्।) शूकरः। (कोलति स्रवते

इति।) प्लव। इत्यमरः।१।१०।११॥ भेला इत्यादि भाषा। अङ्कपालिः। शनिः। चित्रम्। चिता इति भाषा। (कोलन्ति आलिङ्गन्त्यङ्गान्यत्र। कुल+अधिकरणे हलश्चेति घञ्।) क्रोडम्। इति मेदिनी। देशविशेषः। इति शब्दरत्नावली॥ अस्त्रभेदः। इति धरणी॥ वर्णसङ्करजातिविशेषः। (यथा, हरिवंशे। ३२।१२३।

"पाण्ड्यस्य केरलस्यैव कोलस्यैव कोलस्य पार्थिव।। तेषां जनपदा स्फीताः पाण्ड्याश्चोला सकेरला"॥) स तु लेटात् तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ श्मश्रुधारिम्लेच्छजातिविशेषः। स च पूर्व्वं क्षत्त्रिय आसीत् सगरराजेनासौ वेदयागादावनधिकारी कृतः। एतद्विवरणं हरिवंशे १४ अध्याये द्रष्टव्यम्॥

(अयन्तु कोल यजातिवंशीयस्य राज्ञो दुष्मन्तस्य पौत्रेष्वन्यतमः॥ इदानीं पार्व्वत्य असभ्यजातिविशेषः। उत्कलदेशादुत्तरभागे ह्यस्य वसतिः। इयन्तु कोलजातिः सत्यप्रिया सरलप्रकृतिः आतिथ्यसत्कारप्रिया चेति उच्यते॥)

कोलक, क्ली, (कोल+सञ्ज्ञायां कन्। कुल्+क्वुनादित्वात् वुन् वा।) गन्धद्रव्यविशेषः। काँकला इति भाषा। मरिचम्। इत्यमरः।२।९।३६॥

कोलकः, पु, (कुल्+कर्त्तरि ण्वुल् शिल्पादित्वात् वुन् वा।) अङ्कोठवृक्षः। इति राजनिर्घण्टः॥ बकुलवृक्षः। इति जटाधरः॥

कोलकन्दः, पुं, (कोल इव कन्दोऽस्य।) महाकन्दविशेषः। तत्पर्य्यायः। कृमिघ्नः २ पलाशः ३ वस्त्रपलाशः ४ पुटालु ५ सुपुटः ६ पुटकन्दः ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कृमिदोषनाशित्वम्। वान्तिविच्छर्द्दिशमनत्वम्। विषदोषनिवारणत्वञ्च। इति राजनिर्घण्टः॥

कोलकर्कटिका, स्त्री, (कोल इव कर्कटिका।) मधुखर्ज्जूरिका। इति राजनिर्घण्टः॥

कोलदल, क्ली, (कोलं वदरीफलं तद्वत् दलमस्य।) नखीनामगन्धद्रव्यम्। इत्यमरः।२।४।१३०॥ (नखीशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कोलनाशिका, स्त्री, (कोलस्य शूकरस्य नाशिका नाशिनी। नश्+णिच्+ण्वुल् टाप् अत इत्वम्।) वह्निशीवृक्षः। इति हारावली॥

कोलपुच्छः, पु, (कोलस्य शूकरस्य पुच्छ इव पुच्छोऽस्य।) कङ्कपक्षी। इति हारावली॥

कोलमूल, क्ली, (कोलस्य वदरीफलस्य मूलवत् मूलमस्य। यद्वा, कोलं वदरीफलमिव मूलमस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥

कोलम्बक, पुं, (कुल्+बाहुलकात् अम्बच्। ततः सञ्ज्ञायां कन्।) वीणायाः कायः। इत्यमरः।१।७।७॥ स तु तन्त्रीदण्डादिसमुदायः शरीरम्। अलावुदण्डककुभसमुदायस्तन्त्रीहीन इत्यन्ये। इति भरतः॥

कोलवल्ली, स्त्री, (कोलो वराहः सलोमवत् वल्ली। ... तथात्वम्।) गजपिप्पली। इत्यमरः।२।४।९७॥ चव्यम्। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली। कपिवल्ली कोलवल्ली श्रेयसीवशिरश्च सा"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कोलशिम्बी, स्त्री, (कोलस्य शूकरस्य पादाकारा शिम्बिरस्याः। ततो वा ङीष्।) लताविशेषः। आलकुशी इति भाषा। तत्पर्य्यायः। कृतफला २ खड्गा ३ शूकरपादिका ४ काकाण्डोला ५ दधिपुष्पा ६ काकाण्डा ७ पर्य्यङ्कपादिका ८। अस्या गुणाः। वायुनाशित्वम्। गुरुत्वम्। उष्णत्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ (तत्पर्य्यायगुणा। यथा, भावप्रकाशे।

"कोलशिम्बी कृष्णफला तथा पर्य्यङ्कपालिका। कोलशिम्बी समीरघ्नी गुर्व्वी कफवातहृत्। शुक्राभिष्यन्दकृद्बल्या रुचिकृत् बद्धविड्गुरुः"॥)

कोला, स्त्री, (कुल्+ज्वलादित्वात् ण ततष्टाप्।) कोलिवृक्षः। इति शब्दरत्नावली॥ पिप्पली। (अस्याः पर्य्याया यथा,—

"पिप्पली चपला शौण्डी वैदेही मागधी कणा। कृष्णोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला"॥) चव्यम्। इति मेदिनी॥ (अस्याः पर्य्याया यथा,—

"चव्य तेजोवती कोला नाकुली च विकोषणा"॥ इति वैद्यकरत्नमालायाम्॥)

कोलाञ्च, पु, देशविशेषः। इति शब्दरत्नावली॥ तत्र पुरं कान्यकुब्जम्॥

कोलाहल, पु, (कोलं एकीभूताव्यक्तशब्दविशेषं आहलति आलिखतीति। हल विलेखने+अच्।) बहुविधदूरगाव्यक्तध्वनिः। तत्पर्य्यायः। कलकलः २। इत्यमरः।१।६।२५॥ कालकीलः ३। इति शब्दरत्नावली॥ (यथा, रामायणे।३।३१।४१।

"ततो हलहलाशब्दः पुनः कोलाहलो महान्। महान् राक्षसनादस्तु पुनस्तूर्य्यरवो महान्"॥)

कोलिः, पु स्त्री, (कुल्+"सर्व्वधातुभ्य इन्"। उणां ४।११७। इतीन्।) वृक्षविशेषः। कुलगाछ इति भाषा। तत्पर्य्यायः। कर्कन्धुः २ वदरी ३। इत्यमरः।२।४।३६॥ कर्कन्धूः ४ वदरः ५ कोली ६ कोला ७ कुवली ८। इति तट्टीकायां भरतः॥ कोलः ९। इति तट्टीका सारसुन्दरी॥ (यथा, गारुड़े १९४ अध्याये।

"जातीपत्रं कोलिपत्रं तथाचैव मनःशिला। एमिश्चैव कृता वर्त्तिर्वदरामो महेश्वर।। धूमपानं कासहरं नात्र कार्य्या विचारणा"॥)

कोली, स्त्री, (कोलति पीनत्वेन जायते वर्द्धते वा। कुल्+अच्+गौरादित्वात् ङीष्। यद्वा, कोलि+वा ङीष्।) कोलिवृक्षः इत्यमरटीकायां भरतः॥ (अस्याः पर्य्याया यथा,—

"पुंसि स्त्रियान्तु कर्कन्धुर्वदरी कोलमित्यपि। फेनिलं कुवलं घोण्टा सौवीरं वदरं महत्। अजप्रिया कुहा कोली विषमोभयकण्टका"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ न्यग्रोधादिगणे व्यवहारोऽस्य यथा,—

"कोली कादम्बविरला मधुकं मधूकम्"॥ इति सूत्रस्थाने पञ्चदशेऽध्याये वाभटेनोक्तम्॥)

कोल्या, स्त्री, (कोलमर्हतीति यत्।) पिप्पली। इति रत्नमाला॥

कोविद, त्रि, (कुड् शब्दे विच् कौ वेद न वेत्ति जानातीति। विद्+"इगुपधेति"।३।१।१३५। इति कः।) पण्डितः। इत्यमरः।२।७।५॥ (यथा, भागवते।१।१२।२९।

"इति राज्ञ उपादिश्य विप्रा जातककोविदाः। लब्धोपचितयः सर्व्वे प्रतिजग्मुः स्वकान् गृहान्"॥)

कोविदार, पुं, (कु भुवं विदृणाति विदारयति भूमिं विदार्य्योद्भवतीत्यर्थः। दृ+"कर्म्मण्यण्"।३।२।१। इति अण्। तत पृषोदरात् साधुः।) रक्तकाञ्चनवृक्षः। तत्पर्य्यायः। चमरिकः २ कुद्दालः ३ युगपत्रकः ४। इत्यमरः।२।४।२२॥ काञ्चनारः ५ काणकारकः ६ कान्तपुष्पः ७ करकः ८ कान्तारः ९ यमलच्छदः १० काञ्चनालः ११ ताम्रपुष्पः १२ कुदारः १३ रक्तकाञ्चनः १४। इति जटाधरः॥ विदलः १५। इति शब्दरत्नावली॥ अपि च।

"काञ्चनालः काञ्चनको गण्डारिः शोणपुष्पकः"॥ अथ कचनारभेदः।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः। कुण्डली ताम्रपुष्पश्चाश्मान्तकः स्वल्पकेशरी॥ काञ्चनालो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्। कृमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः॥ कोविदारोऽपि तद्वत्स्यात् तयोः पुष्पं लघु स्मृतम्। रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत्"॥ इति भावप्रकाशः। अस्य गुणाः। कषायत्वम्। संग्राहित्वम्। व्रणरोपणत्वम्॥ दीपनत्वम्। कफवातमूत्रकृच्छ्रनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणाः। धारकत्वम्। रुचिकारित्वम्। रक्तपित्तरोगे सुपथ्यत्वञ्च। इति राजवल्लभः॥ (यथा, पाकशास्त्रे।

"कोविदारकलिकातिकोमला
तक्रसिद्धविमलैलपाचिता।
हिङ्गुवासकसुवाससासिता
वेसवारजुलितातिकोमदा"॥

पारिजातः। हरिवंशे कोविदारस्य व्युत्पत्तिकथने एतद्विवृतिर्यथा।१२४।७०-७१।

"कोऽप्ययं दारयित्वाङ्गं रजानन्तो यतो जना। कोविदार इति ख्यातस्ततः स सुमहातरुः॥ मन्दारः कोविदारश्च पारिजातस्य नामभिः। स वृक्षो जायते दिव्यो यस्यैतत् कुसुमोत्तमम्"॥)

कोशः, पु, (कुश्यते संश्लिष्यते। कुश संश्लेषणे+घञ्कर्त्तरि चेति अधिकरणादौ घञ्।) अण्डम्। इति शब्दरत्नावली॥ कुष्यते आकृष्यते आयस्थानेभ्यः कोषः। कुष ग निष्कर्षे घञ् कोषो मूर्द्धन्यान्तः तालव्यान्तः इत्यन्ये। इति भरतः। कृताकृतं हेमरूप्यम्। तत्पर्य्यायः। हिरण्यम् २। इत्यमरः।२।९।९१॥ कृताकृतं हेम

ऽन्यच्च मिलितं प्रत्येकञ्च कोशादिद्वयवाच्यम् । क्षतमावर्त्तितं अक्षतमाकरोत्य मूर्गं घटिताघटितमिति स्वामी ॥ क्षतमाभरणीकृत अक्षत चूर्णादिरूपमाकरोत्यमिति केचित् । (व्याकरणविशेष । यथा, भागवते । २ । १ । ३४ ।

"अव्यक्तमाङ्हृदय मनश्च
स चन्द्रमाः सर्व्वविकारकोशः" ॥

मुकुलम् । यथा, रघौ । ३ । ८ ।

"तिरश्चकार भ्रमराभिलीनयो
सुजातयोः पङ्कजकोशयो श्रियम्" ॥)

कोशकार, पु, (कोशं करोति त्वक्पत्रादिभिरात्मानमाच्छादयति । कोश + कृ + अण् ।) इक्षु । इति शब्दरत्नावली ॥ मूर्द्धन्यमध्योऽप्ययम् ॥ (कोशं करोति स्वमुखलालारूपतन्तुभिरात्मानमावृणोतीति । कीटविशेष । गुटिपोका इति भाषा । यथा, भागवते । ६ । १ । ५२ ।

"कोशकार इवात्मानं कर्म्मणाच्छाद्य मुह्यति" ॥)

कोशफल, क्ली, (कोशे फलं बीजं यस्य ।) कक्कोलकम् । इत्यमरः । २ । ६ । १३० । (कक्कोलकशब्देऽस्य विवरणं ज्ञेयम् ॥)

कोशफला, स्त्री, (कोशे फलं यस्याः ।) महाकोशातकी । चपुषी । इति राजनिर्घण्टः ॥

कोशल, पु स्त्री, (कुश् + "वृषादिभ्यश्चित्" उणा । १ । १०८ । कस्य वाऽक्षत्वात् गुणः ।) अयोध्यानगरी । इति शब्दमाला उणादिकोषश्च । मूर्द्धन्यमध्योऽप्ययम् । (यथा, रामायणे । १ । ५ । ५ ।

"कोशलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्" ॥)

कोशलात्मजा, स्त्री, (कोशलस्य कोशलन्नपतेरात्मजा दुहिता ।) कौशल्या । सा तु श्रीराममाता दशरथराजपत्नी च । इति शब्दरत्नावली ॥

कोशलिक, क्ली, (कुशलाय कर्म्मणे हितजनककार्य्यसिद्ध्यर्थमिति भावः दीयते यत् । कुशल + ठक् निपातनात् पूर्व्वस्य ओकारत्वम् ।) उत्कोच । इति हेमचन्द्र । घुष इति भाषा । मूर्द्धन्यमध्योऽप्ययम् ॥

कोशाङ्क, क्ली, (कोश इव अङ्कमस्य ।) इत्कट । इति हारावली ॥ ओकड़ा इति भाषा ॥ मूर्द्धन्यमध्योऽप्ययम् ॥

कोशातक, पु, (कोशं प्रियं कोशं अतति गच्छति सातत्येन प्राप्नोतीति । अत + क्वुन् ।) कच । इति विश्वमेदिन्यौ ॥ (कोशं वेदान्तकमाकरमतति प्राप्नोतीति यास्के । यजुर्वेदीयशाखाविशेष । कठवल्ली उपनिषद् ॥)

कोशातकी, स्त्री, (कोशं अततीति । अत + क्वुन् । तत कोशातक + गौरादित्वात् ङीष् ।) पटोली । घोषक । इति मेदिनी ॥ फलशाकविशेष । झिङा इति भाषा । तत्पर्य्यायः । क्षतच्छिद्रा २ जालिनी ३ कृतवेधना ४ क्ष्वेडा ५ सुतिक्ता ६ धराशी ७ मृदङ्गफलिनी ८ कर्कशच्छदा ९ । अस्या गुणाः । शिशिरत्वम् । कटुत्वम् ॥ कषायत्वम् । पित्तवातकफनाशित्वम् । मलाध्मानविशोषनत्वञ्च । इति राजनिर्घण्टः ॥ मूर्द्धन्यमध्योऽप्ययम् । महाकोशातकी । राजकोशातकी । यथा ।

अथ नेनुया ।

"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥
महाकोशातकी स्निग्धा सरा पित्तानिलापहा" ॥

अथ वोरइ ।

"धामार्गवो पीतपुष्पो जालिनी कृतवेधना ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥
राजकोशातकी शीता मधुरा कफवातला ।
पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत्" ॥

इति भावप्रकाशः ॥ (अस्या गुणा यथा,—

"कोशातकी फलं स्वादु मधुरं वातपित्तनुत् ।
विपाके च कफं हन्ति ज्वरे शस्तं प्रदिश्यते" ॥

इति हारीते प्रथमस्थाने १० अध्याये ॥)

कोशातकी, [न्] पु, (कोशातकोऽस्यास्तीति । इनि ।) वाणिज्यम् । वणिक् । वाडवाग्नि । इति विश्व ॥

कोशाम्र, पु, (कोशे + आम्र इव फलमस्य ।) फलवृक्षविशेषः । कोशाम इति भाषा । तत्पर्य्यायः । कृमिवृक्षः २ सुकोशक ३ । इति भावप्रकाशः ॥ घनस्कन्धः ४ वनाम्र ५ जन्तुपादपः ६ क्षुद्राम्रः ७ रक्ताम्रः ८ लाक्षावृक्षः ९ सुरक्तकः १० । अस्य गुणाः । कुष्ठशोथास्रपित्तव्रणकफापहत्वम् । तत्फलगुणाः । ग्राहित्वम् । वातहृत्वम् । अम्लत्वम् । उष्णत्वम् । गुरुत्वम् । पित्तदत्वञ्च । इति भावप्रकाशः ॥ कफार्त्तिप्रदत्वम् । विदाहित्वम् विशोफकारित्वञ्च ॥ पक्वस्य तस्य गुणाः । मधुरत्वम् । अम्लत्वञ्च ॥ पह्नादियुक्तस्य तस्य गुणाः । दीपनत्वम् । रुचिपुष्टिबलकारित्वञ्च । तत्तैलस्य गुणाः । सारकत्वम् । कृमिकुष्ठव्रणापहत्वम् । अम्लमधुरत्वम् । बल्यत्वम् । पथ्यत्वम् । रोचनत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ (रोगविशेषेऽस्य व्यवहारो यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ॥

"कारञ्जं वा सार्षपं वा क्षतेषु
क्षेप्य तैलं शिग्रुकोशाम्रयोर्वा" ॥)

कोशिला, स्त्री, (कोशः कोश इव पदार्थो वा अस्या अस्तीति । कोश + पिच्छादित्वात् इलच् ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥

कोशी, स्त्री, (कुश् संश्लेषे + अच् गौरादित्वात् ङीष् ।) उपानत् । जुता मोजा इति च भाषा । तत्पर्य्यायः । पन्नद्धी २ पादविरजा ३ पादरक्षी ४ । इति हारावली ॥ शुचा । इति हेमचन्द्रः ॥ धान्यादिर शुंया इति भाषा ॥

कोष, पु स्त्री, (कुष्यन्ते आकृष्यन्ते धनपुष्पोत्पादकमधुमयपरागादयो यस्मिन् । कुष् ग निष्कर्षे + अजकर्त्तरि चेति अधिकरणे घञ् ।) कुड्मलः । कुंडि इति भाषा । खड्गपिधानम् । खाप इति भाषा । (यथा, महाभारते । ४ । ४० । १३-१५ ।

"कस्यायं विपुलः खड्गो गव्ये कोषे समर्पितः ।
हैमत्सरुरनाधृष्यो नैषधो भारसाधनः ॥
कस्य पाञ्चनखे कोषे शायको हेमविग्रहः ।
प्रमाणरूपसम्पन्नः पीन आकाशसन्निभः ॥
कस्य हेममये कोषे सुतप्ते पावकप्रभे ।
निस्त्रिंशोऽयं गुरुः पीतः शैक्ये परमनिर्व्रणः" ॥)

अर्थसमूहः । (यथा, रघौ । ५ । १ ।

"तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम्" ॥)

दिव्यम् । (यथा, राजतरङ्गिण्याम् । ५ । ३३५ ।

"ततो निक्षिप्य चरणं रक्ताक्ते मेषचर्म्मणि ।
कोषं चक्रतुरन्योऽन्यं सखड्गौ नृपडामरौ" ॥)

अण्डम् । कृताकृतहेमरूप्यम् । इत्यमरः । २ । ९ । ९१ । अस्य विवरणं ताम्रशब्दे द्रष्टव्यम् । पात्रम् । जातीकोष । जायफल इति भाषा । (जातीपत्री । जयित्री-अर्थे व्यवहारो । यथा, गर्भचिन्तामणिरसे ।

"रसं तालं तथा लौहं प्रत्येकं कर्षमात्रकम् ।
कर्षद्वयन्तथाचाभ्रं कर्पूरं वङ्गताम्रकम् ॥
जातीफलं तथा कोषं गोक्षुरञ्च शतावरीम् ।
बलातिबलयोर्मूलं प्रत्येकं तोलकं शुभम् ॥
वारिणा वटिका कार्य्या द्विगुञ्जा फलमानतः ।
सन्निपातं निहन्त्याशु क्षीणाश्चैव विशेषतः ॥
गर्भिण्या ज्वरदाहञ्च प्रदरं सूतिकामयम्" ॥

इति वैद्यकभैषज्यधन्वन्तरियशे स्त्रीरोगाधिकारे ॥) शब्दादिसंग्रहः । इति मेदिनी । (यथा, अमरकोषः ॥) भाण्डागारम् । पानपात्रचषकः । योनि । शिम्बा । इति हेमचन्द्रः ॥ पनसादिफलस्यान्तः । इति धरणी ॥ शब्दान्तरसंयोगे गोलकवाचकः । यथा सूत्रकोषः नेत्रकोष इत्यादि । इत्यमरटीकायां स्वामी ॥ धनसंहतिः । इति जटाधरः ॥ (यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ।

"कोषो बलञ्चापहृतं तत्रापि स्वपुरे ततः" ॥)

तत्सञ्चयगुणाः ।

"कोषो महीपतेर्जीवो न तु प्राणाः कथञ्चन ।
द्रव्यं हि राजा शूपस्य न शरीरमिति स्थितिः ॥
धर्म्महेतोः सुखार्थाय भृत्यानां भरणाय च ।
आपदर्थञ्च संरक्ष्यः कोषः कोषवता सदा ॥
धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते ।
नाधनस्य भवेद्धर्म्मः कामश्चैव कथञ्चन ॥
अधर्म्मान्न धनं कुर्य्यात्तद्धनं म्लायते परैः ।
स्वयं पापस्य पात्रं स्यात् सिंहो हस्तिवधादिव ॥
तादात्मिको मूलहरः कदर्य्यस्त्रिविधोऽर्थदः ।
उत्पन्नार्थव्ययकरो यो भविष्यद्धनाश्रया ॥
स तादात्मिक आख्यातः कल्याणी तस्य नायति ।
यः पित्राद्यर्ज्जितं वित्तमन्यायेन तु भक्षयेत् ॥
स मूलहर आख्यातस्तदुदर्कोऽपि पाप्मभः ।
स कदर्य्यस्तु भृत्यात्मपीडनैरर्थसञ्चयी ॥
तद्धनं राजदायादतस्करात्मा निधिर्भवेत् ।
भिक्षा च राजकोषस्य स्तोकस्तोकेन वर्द्धते ॥
अन्नमन्यत् धनश्चैव स्तोकस्तोकेन क्षीयते ।
कोषस्य साधनोपायो मुख्यं राष्ट्रमिति स्मृतम् ॥
भूगुर्जैर्वर्द्धते राष्ट्रं तद्रङ्गिर्णपवत्तता ।
राज्ञोपायेन सङ्ख्या ग्रामे ग्रामे प्रदीयताम् ॥
तेभ्यः कृषिकृतस्थायां पर्य्यन्द सर्व्वतान्वहम् ।
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा ॥
तथा कर्षेण कर्षेण दर्शनात् भूभृत्प्रदः ।

राजकोषातकी शीता मधुरा कफवातला ।
पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत्" ॥
अस्या व्यवहारो यत्र तद्यथा,—
"कोषातकीनां स्वरसेन नस्य
तुम्बरास्तु वा पिप्पलिसंयुतेन ।
तैलेन वारिष्टभवेन कुर्या-
द्वचोपकुल्ये सह माक्षिकेण" ॥
इति वैद्यकचक्रपाणिसंग्रहे गलगण्डाद्यधिकारे ॥)
ज्योत्स्निका । झिङ्गा इति भाषा । ज्योत्स्नावती रात्रि । इत्यमरभरतौ ॥ तालव्यमध्यापीयम् ॥

कोषाम्र, स्त्री, (कोषे आम्रफलमिव ।) फलविशेष । केष्योड़ा इति भाषा । अस्य गुणा । कफवायुनाशित्वम् । अग्निदीपनत्वम् । मलवद्धताकारित्वञ्च । इति राजवल्लभ ॥ (क्वचित् पुलिङ्गोऽपि दृश्यते । यथा, भावप्रकाशे ।
"कोषाम्र कुष्ठशोथास्रपित्तव्रणकफापह ।
तत्फल ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम् ।
पक्वन्तु दीपनं रुच्य लघूष्ण कफवातहृत्" ॥)
तालव्यमध्यमपीदम् ॥

कोषी, स्त्री, (कुष्+अच् । गौरादित्वात् ङीष् ।) पादुका । इति शब्दरत्नावली ॥ शुङ्गा । इति तालव्यान्ते हेमचन्द्रः ॥ शस्येर शुँया इति भाषा ॥

कोषी, [न्] पु,(कोषोऽस्यास्य इति इनिः ।) आम्रवृक्षः । इति शब्दमाला ॥

कोष्ठ,पु, (कुष् ग निष्कर्षे + "उषिकुषिगतिभ्यस्थन्" । उणा । २ । ४ । इति थन् ।) कुसूल । (यथा, महाभारते । २ । ५ । ६८ ।
"कच्चित् कोषस्य कोष्ठस्य वाहन द्वारमायुधम् ।
आयस्य कृतकल्याणैस्तव भक्तैरनुष्ठित " ॥)
गृहमध्यम् । (यथा, भागवते । ६ । १० । १७ ।
"सा वामरेन्द्रवलरुद्धविहारकोष्ठ-
श्रीद्वारगोपुरसदोभलभीविटङ्का ॥)
कुक्षिमध्यम् । यथा, वैद्यके ।
"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुक फुस्फुसश्च कोष्ठ इत्यभिधीयते" ॥
"कोष्ठ पुनरुच्यते महास्रोत शरीरमध्य महानिम्नमामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे सरोगमार्गं आभ्यन्तर " ॥ "वीसर्पश्वयथुगुल्मार्शो विद्रध्यादय कोष्ठमार्गानुसारिणो भवन्ति रोगा" ॥ इति चरके सूत्रस्थाने ११ अध्याये ॥ कोष्ठाङ्गानि यथा,—
"सप्तचाधारा रक्तस्यास्य क्रमात् परे ।
कफामपित्तपक्वानां वायोर्मूत्रस्य च स्मृता ॥
गर्भाशयोऽष्टम स्त्रीणा पित्तपक्वाशयान्तरे ।
कोष्ठाङ्गानि स्थितान्येषु हृदयं क्लोमफुस्फुषम्" ॥
इति च वाभटे शारीरस्थाने ३ अ ॥ पञ्चदश कोष्ठाङ्गानि तद्यथा, "नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधारश्चामाशयश्चेति पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपावहनञ्चेति" । इति च चरके शारीरस्थाने ७ अध्याये ॥
उदरम् । यथा, भागवते । ६ । १८ । ५३ ।
"पतिं भार्योपतिष्ठेत ध्यायेत् कोष्ठगतश्च तम्" ॥
नाभेरुपरिस्थितमणिपूरपद्मम् । यथा, तत्रैव । ४ । २३ । १४ ।
"संपीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयन् शनै ।
नाभ्या कोष्ठेष्ववस्थाप्य हृदुर:कण्ठशीर्षणि" ॥
प्राकार । यथा, भागवते । ४ । २८ । ५६ ।
"पञ्चारामं नवद्वारमेकपाल त्रिकोष्ठकम् ।
षट्कुलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम्" ॥
अत्र टीका चूर्णी त्रिकोष्ठकं त्रिप्राकारमित्याह ॥ तन्त्रोक्तमन्त्रदीक्षाप्रकरणे अकथहादिचक्रचतुःपार्श्वस्थितरेखाचतुष्कयुतस्थानभेद ॥) आत्मीये त्रि । इति मेदिनी ॥

कोष्णं, क्ली, (कु ईषत् उष्णम् । को कादेश ।) ईषदुष्णम् । तत्पर्याय । कवोष्णम् २ मन्दोष्णम् ३ कदुष्णम् ४ । तद्वति त्रि । इत्यमर । १ । ४ । ३५ ॥ (यथा, रघौ । १ । ८४ ।
"भुव कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।
प्रस्रवेणाभिवर्षन्ती वत्सालोकप्रवर्त्तिना" ॥)

कोहल, पु, (कोहयति विस्मापयतीति । कुहल विस्मापने + बाहुलकात् कलच् । पृषोदरात् गुणा ।) मद्यभेद । इति हेमचन्द्र ॥ (अस्य गुणा यथा,—
"त्रिदोषो भेदनश्चास्य कोहलो वदनप्रिय " ॥
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥ * ॥ कौ पृथिव्या पार्थिवकोलाहलेन सह हलति स्पर्द्धते पृषोदरात् ओल ।) वाद्यभेदः । नाट्यशास्त्रप्रवक्ता मुनिविशेष । इति मेदिनी ॥ (अयमेव सर्पसत्रे सदस्य आसीत् । यथा, महाभारते । १ । ५३ । ९ ।
"कोहलो देवशर्म्मा च मौद्गल्य समसौरभ" ॥)

कौकृत्यं, क्ली, (कुत्सितं अज्ञानजन्य कृत कार्य्यम् । तस्मात् भवमित्यण् ।) अनुताप ॥ (स्वार्थे अण् ।) अयुक्तकरणम् । इति मेदिनी ॥

कौक्कुटिक, पु, (कुक्कुटवद्दम्भेन विचरति । यद्वा, कुकुटीं माया कामच्छादिकां वा पादविक्षेपस्थानञ्च पश्यति इति । "सञ्ज्ञाया ललाटकुक्कुट्यौ पश्यति" । ४ । ४ । ४६ । इति ठक् ।) दाम्भिक । अदूरेरितेक्षण । कीटादिवधभीत्या सयतचक्षु पादनिक्षेपदेशदर्शी भिक्षु । इत्यमरभरतौ ॥ अदूरदर्शनशील । इति सारसुन्दरी ॥

कौक्कुटिकन्दल, पु, (कुक्कुटस्य वह्निस्फुलिङ्गस्याय इति इञ् कौक्कुटि । कौक्कुटिरिव कन्दल कपालो यस्य । अस्याग्निस्फुलिङ्गवत् चक्षुष्मत्त्वात् भोगादौ च स्फुलिङ्गवत् चाकचिक्यत्वात्तथात्वम् ।) सर्पविशेष । वोड़ासाप इति भाषा । तत्पर्याय । माण्डूप्य २ । इति त्रिकाण्डशेष ॥

कौक्षेयक, पु, (कुक्षौ कोषे तिष्ठति इति ढकञ् ।) खड्ग । इत्यमर । २ । ८ । ८९ ॥

कौङ्क , पु, (कोङ्क + स्वार्थे अण् ।) देशविशेष । इति शब्दरत्नावली ॥ कोकण इति ख्यात ॥

कौङ्किण:, पु, (कोङ्कण + स्वार्थे अण् । तत पृषोदरादित्वात् इकार ।) कोङ्कणदेश ॥ इति शब्दरत्नावली ॥

कौक्ष', पु, (कुक्ष एव स्वार्थे अण् । पृषोदरात् रलोप ।) क्रौञ्चपर्वत । इति त्रिकाण्डशेष ॥

कौञ्जायन , पु, (कुञ्जस्य पुमपत्यम् । "गोत्रे कुञ्जादिभ्यश्च फञ्" । ४ । १ । ९८ । इति फञ् ।) कुञ्जस्य पुत्रादि । इति । व्याकरणम् ॥

कौञ्जायनी, स्त्री, (कुञ्जस्यापत्य स्त्री । "गोत्रे कुञ्जादिभ्यश्च फञ्" । ४ । १ । ९८ । इति फञ् । तत स्त्रिया ङीष् ।) ब्राह्मणी । इति जटाधर ॥ कुञ्जस्य स्त्र्यपत्यम् । इति मुग्धबोधम् ॥

कौञ्जायन्य , पु, ("गोत्रे कुञ्जादिभ्यश्च फञ्" । ४ । १ । ९८ । इति फञ् । तत स्वार्थे ञ्य प्रत्यय ।) कुञ्जस्य पुमपत्यम् । इति मुग्धबोधम् ॥

कौट , पु, (कुटे गिरौ भव । "तत्र भव" । ४ । ३ । ५३ । इत्यण् ।) कुटजवृक्ष । इति भावप्रकाश ॥ (अस्य गुणादय कुटजशब्दे दर्शनीया ॥ कूटे मायाया भव अण् । कपटसाक्षी ॥ कुत्या वशीकृतमायाया भव इत्यण् । स्वाधीनतन्त्र ॥ इति व्युत्पत्तिलभ्योऽर्थ ॥)

कौटकिक , त्रि, (कूटमेव इति स्वार्थे कन् । कूटकं मास पण्यमस्य इति ठञ् ।) मांसिक । मांसविक्रेता । इति शब्दरत्नावली ॥

कौटज , पु, (कुटमेव कौट स्वार्थे अण् । तत्र जायते इति । "अन्येभ्योऽपीति" । जनेर्ड ।) कुटजवृक्ष । इत्यमरटीकाया रायमुकुट ॥ (अस्य गुणादय कुटजशब्दे ज्ञेया ॥)

कौटतक्ष , पु, (कौट स्वाधीन स चासौ तक्षाचेति कर्म्मधारय । "ग्रामकौटाभ्याञ्च तक्ष्ण" । ५ । ४ । ९५ । इति टच् ।) स्वकर्म्मजीवी स्वगृहस्थितोऽनधीनस्तक्षा । इत्यमर । २ । १० । ९ ॥ स्वाधीन कुदार इति भाषा ॥

कौटल्य , पु, (कुट घट त लान्ति कुटला कुलधान्या तेषामपत्य कौटल्य । गर्गादिर्यञ् ।) वात्स्यायनमुनि । इति हेमचन्द्र ॥

कौटसाक्षी, [न्] पु, कूटमेव कौट स्वार्थे अण् । तादृश साक्षी ।) मिथ्यासाक्षी इति मिताक्षरा ॥

कौटिक , त्रि, (कूटेन मृगादिबन्धनयन्त्रेण चरति । "चरति" । ४ । ४ । ८ । इति ठक् ।) मांसविक्रेता । कषाइ इति भाषा । तत्पर्याय । वैतसिक २ मांसिक ३ । इत्यमर । २ । १० । १४ ॥

कौटिलिक , पु, (कुटिलिका व्याधाना गतिविशेष कर्म्मारनिर्म्मितलोहास्त्रविशेषश्च । तया हरति मृगान् अङ्गारान् वा । "अण् कुटिलिकाया" । ४ । ४ । १८ । इत्यण् ।) व्याध । लौहकार । इति केचित् ॥

कौटिल्य, क्ली, (कुटिलस्य भाव इति ष्यञ् । चाणक्यमूलकम् । इति राजनिर्घण्ट ॥ कुटिलता । यथा । "कौटिल्य कचनिचये करचरणाधरतलेषु रागस्ते । काठिन्यं कुचयुगले तरलत्व नयनयोर्वसति" ॥ इति काव्यप्रकाश ॥

कौटुम्बिक , पु (कुटुम्बे कुटुम्बभरणे प्रसृत व्याप्त आसक्तो वा । कुटुम्ब + ठक् ।) कुटुम्बी । कुटुम्बविशिष्ट । कुटुम्बोऽस्यास्तीत्यर्थे णिकप्रत्यय । इति

मुग्धबोधमतम् ॥ (यथा, श्रीमद्भागवते ।५।१३।८।
"पदे पदेऽभ्यन्तरवह्निनार्द्दित
कौटुम्बिकः क्रुध्यति वै जनाय" ॥)

कौडविक, त्रि, (कुडवस्य वापः । "तस्य वापः" । ५ । १ । ४५ । इति ठञ् ।) कुडवपरिमितवीजवपनयोग्यक्षेत्रम् । इत्यमरटीकायां रायमुकुटः ॥

कौणप, पु, (कुणपस्थितधातुकं शरीरं शवो वा तं भक्षयितुं शीलमस्य । इत्यण् ।) राक्षसः । इत्यमरः । १ । १ । ६२ ॥ (यथा, महाभारते । १ । १७१ । १४ ।
"न कौणपाः शृङ्गिणो वा न च देवाश्चनखज" ॥
वासुकिवंशोद्भवः सर्पविशेषः । यथा, महाभारते । १ । ५७ । ५ ।
"पिच्छलः कौणपश्चक्रः कालवेगः प्रकालनः ।
हिरण्यबाहुः शरणः कक्षकः कालदन्तकः ।
एते वासुकिजा नागाः प्रविष्टा हव्यवाहने" ॥)

कौणपदन्त, पु, (कौणपस्य दन्ता इव दन्ता अस्य ।) भीष्मः । इति त्रिकाण्डशेषः ॥

कौण्डिन्य, पु, (कुण्डिनस्य स्वनामख्यातमुनिविशेषस्य गोत्रापत्यं इति । गर्गादित्वात् यञ् ।) कुण्डिनमुनिपुत्त्रः । तत्पर्य्यायः । विष्णुगुप्तः २ । इति त्रिकाण्डशेषः ॥

कौतुक, क्ली, (कुतुक + प्रज्ञादित्वात् स्वार्थे अण् । कुतुकस्य भाव इति युवादित्वात् अण् वा ।) कुतूहलम् इत्यमरः । १ । ७ । ३१ ॥ (यथा, राजतरङ्गिण्यां । ५ । ३६४ ।
"चक्रतुः कौतुकोद्ग्रीवां सभां चित्रार्पितामिव ॥)
अभिलाषः । (यथा, कथासरित्सागरे ।
"पश्यन्त्यास्तं नृपं तस्या लज्जाकौतुकयोर्दृशि ।
अभूदन्योन्यसंमर्द्दो रचयन्त्या गतागतम्" ॥)
उत्सवः । (यथा, भागवते । ४ । ३ । १३ ।
"कथं सुताया पितृगेहकौतुकं
निशम्य देहः सुरवर्य्य । नेङ्गते" ॥)
नर्म्म । हर्षः । (यथा, भागवते । १ । १७ । २५ ।
"इयञ्च भूर्भगवता न्यासितोरुभरा सती ।
श्रीमद्भिस्तत्पदन्यासैः सर्व्वतः कृतकौतुका" ॥)
परस्परायातमङ्गलम् । विवाहसूत्रम् । (यथा, कुमारे । ७ । २ ।
"वैवाहिकैः कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रीवर्गम्" ॥)
गीतादिभोगः । इति मेदिनी ॥ गीतादि । भोगकालः । इति हेमचन्द्रः ॥

कौतूहल, क्ली, (कुतूहलस्य भावः कर्म्म वा युवादित्वात् अण् । यद्वा, कुतूहलमेव इति प्रज्ञाद्यण् ।) कुतूहलम् । अपूर्व्ववस्तुदिदृक्षाद्यतिशयः । इत्यमरः । १ । ८ । ३१ । (यथा, मार्कण्डेये । ८ । १ ।
"भवद्भिरिदमाख्यातं यथाप्रश्नमनुक्रमात् ।
महत् कौतूहलं मेऽस्ति हरिश्चन्द्रकथां प्रति" ॥)

कौदालीक, पु, (कुं भूमिं दारयतीति । कुदारः । तेन आचरतीति ईकन् रलयोरैक्यात् रस्य लत्वम् ।) कुदालीकः ततः स्वार्थे अण् ।) वर्णसङ्करजातिविशेषः । स तु रजक्यां तीवराज्जातः ।

इति ब्रह्मवैवर्त्तपुराणम् ॥

कौद्रविक, क्ली, (कोद्रवः तत् निमित्तमस्य इति ठञ् ।) सौवर्च्चललवणम् । इति राजनिर्घण्टः ॥

कौद्रवीण, त्रि, (कुत्सितं यथा तथा द्रवति इति । पृषोदरात् सिद्धे कोद्रवः कुत्सितधान्यभेदः तस्य भवनं उत्पत्तिस्थानं । "धान्यानां भवने क्षेत्रे खञ्" । ५।२।१। इति खञ् ।) कोद्रवधान्योद्भवयोग्यक्षेत्रम् । इत्यमरः । २ । ९ । ८ । कोदोर क्षेत इति भाषा ॥

कौन्तिक, पुं, (कुन्तास्त्रेण प्रासेन युध्यते । कुन्तः प्रासः प्रहरणमस्येति वा । ठञ् ।) प्रासिकः । प्रासास्त्रधारी योद्धा । इत्यमरः । २ । ८ । ७० ॥

कौन्ती, स्त्री, (कुन्तिषु देशविशेषेषु भवा । "तत्रभवः" । ४ । ३ । ५३ । इति अण् । ततो ङीष् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२० ॥
(अस्याः पर्य्याया यथा,—
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्त्री स्मृता कौन्ती हरेणुका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥
पर्य्यायान्तरञ्च यथा,—
"हरेणु रेणुका कौन्ती ब्राह्मणी हैमगन्धिनी" ॥
इति वैद्यकरत्नमालायाम् । गुणाश्चास्या रेणुकाशब्दे बोद्धव्याः ॥)

कौन्तेय, पु, (कुन्त्या अपत्यं इति ढक् ।) कुन्तीपुत्त्रः । स तु युधिष्ठिरादिः । इति महाभारतम् । (यथा, भगवद्गीतायाम् । २ । ३ ।
"मा क्लैव्यं गच्छ कौन्तेय । नैतत्त्वय्युपपद्यते" ॥)
अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥

कौप, क्ली, (कूपे भवं कूपस्येदं वा इत्यण् ।) कूपोदकम् । अस्य गुणाः यथा,—
"कौपं पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु ।
तत् क्षारं कफवातघ्नं दीपनं पित्तकृत् परम्" ॥
इति भावप्रकाशः ॥ (सुश्रुतोक्ता गुणा यथा,—
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु" ॥
कौपसलिलसेवने कालनिर्द्देशः । यथा, तत्रैव ।
"वसन्ते कौपं प्रास्रवणं वा ग्रीष्मेप्येवम्" ॥)

कौपीन, क्ली, (कूपपतनमर्हतीति । "शालीनकौपीने अधृष्टाकार्य्ययोः" । ५ । २ । २० । इति साधु ।) पापम् । तत्साधनत्वात् तद्गोप्यत्वात् पुरुषलिङ्गमपि । तत्सम्बन्धात् तदाच्छादनमपि । इति सिद्धान्तकौमुदी ॥ अकार्य्यम् । गुह्यदेशः । इत्यमरः ॥ चीरम् । इति मेदिनी ॥ तत्तु मेखलाबद्धपरिधेयवस्त्रखण्डम् । कपिनी इति भाषा । तत्पर्य्यायः । कच्छा २ कच्छटिका ३ कक्षा ४ घटी ५ । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ७ । १३ । २ ।
"बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम्" ॥)

कौमोदकी, स्त्री, (कौमोदकी इति पृषोदरादित्वात् मस्य पत्वम् ।) कौमोदकी । इति भरतो द्विरूपकोषश्च ॥

कौमार, क्ली, (कुमारस्य कर्म्म भावो वा । वयोवचनत्वादञ् ।) कुमारावस्था ।
("जातः कुः पृथिवीं पद्भ्यां मारयेत् तत्कुमारकः ।
इति प्रमाणतो विद्धि कौमारं प्राग्भवाब्दतः" ॥

इत्युक्तावधिके "कौमारं पञ्चमावधि" । इत्यन्ते वयोवस्थाभेदे । सा तु जन्मावधिपञ्चमवर्षपर्य्यन्ता । इत्यर्थः ॥) तन्त्रमते षोडशवर्षपर्य्यन्ता । (यथा, भगवद्गीतायाम् । २ । १३ ।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति" ॥
पुं, कुमारस्य सनत्कुमारस्य इदं अण् सृष्टिभेदः । यथा, "कौमार आर्षं प्राजापत्यो मानव इत्यादि सर्गनामानि" । इति श्रीधरः । तथा च भागवते । १ । ३ । ६ ।
"स एव प्रथमं देवः कौमारं सर्गमाश्रितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्" ॥)
तद्वति पु, स्त्री । इति शब्दमाला ॥ अपूर्व्वपति कुमारीं पतिरुपपन्नः "कौमारापूर्व्ववचने । ४ । २ । १३ । इति द्वितीयान्तादुपयमनकर्त्तर्य्यण्प्रत्ययेन साधु ॥ अपूर्व्वपतिकुमारीपतिः । इति सिद्धान्तकौमुदी ॥)

कौमारी, स्त्री, मातृकाविशेषः । सा तु कार्त्तिकेयशक्तिः । इति शब्दमाला ॥ यथा,—
"कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी" ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये । ८१ । १६ ।
(अपूर्व्वपतिं कुमारी पतिमुपपन्ना । "कौमारापूर्व्ववचने" । ४ । २ । १३ । इति स्वार्थे अण् प्रत्ययेन साधु ततो ङीष् । अपूर्व्वभार्य्यकुमारपत्नी । यथा, भट्टौ । ७ । ९० ।
"उपलम्भागमपश्यन्त कौमारीं पततां्वर" ॥
पञ्चमवर्षीया बालिका । कौमारी अवस्था । यथा, भागवते । ३ । २ । २८ ।
"कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयो व्रजौकसाम्" ॥)
वाराहीकन्दः । इति राजनिर्घण्टः ॥

कौमुद, पु, (कौ पृथिव्यां मोदन्ते जना यस्मिन् । मुद + कः । सप्तम्या अलुक् ।) कार्त्तिकमासः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।
"एतैरन्यैश्च राजेन्द्र पुरा मांसं न भक्षितम् ।
शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुयुः ॥
कौमुदन्तु विशेषेण शुक्लपक्षं नराधिपः ।
वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते" ॥)

कौमुदिका, स्त्री, (कौमुदी + संज्ञायां कन् ततो ह्रस्वः टाप् च ।) उमासखीविशेषः । इति शब्दमाला ॥ (स्वार्थे कन् ह्रस्वः टाप् च । ज्योत्स्ना । त्रि, चतुरर्थ्यां कुमुदादित्वात् ठक् । कौमुदिकः । कुमुदाख्यपर्व्वतसन्निकृष्टदेशविशेषः ॥)

कौमुदी, स्त्री, (कुमुदस्य इयं प्रकाशकत्वात् "तस्येदं" । ४ । ३ । १२० । इत्यण् ततो ङीप् ।) ज्योत्स्ना । इत्यमरः । १ । ३ । १६ । (यथा, कुमारे । ४ । ३३ ।
"शशिना सह याति कौमुदी ॥
सह मेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि" ॥)
उत्सवः । इति धरणी । (यथा, महाभारते १३ पर्व्वणि ।

"अकालकौमुदीश्चैव चक्रतु सार्व्वकालिकीम्" ॥ कौमुदस्य कार्त्तिकमासस्य इयं "तस्येदम्" । ४ । ३ । १२० । इति अण् । ततो ङीप् । यदुक्तम् ।

"कुशब्देन मही ज्ञेया मुद हर्षे ततो द्वयम् ।
धातुज्ञैर्नियमैश्चैव तेन सा कौमुदी स्मृता" ॥)

कार्त्तिकोत्सवः । स तु कार्त्तिकीपूर्णिमायां कर्त्तव्यः । इति त्रिकाण्डशेषः । कार्त्तिकीपूर्णिमा ॥ आश्विनीपूर्णिमा । इति शब्दरत्नावली । (यथा,—

"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये" ॥

दीपोत्सवतिथिः । यथा, रघुप्रभृतिटीकाकृन्मल्लिनाथधृतभविष्योत्तरवचनम् ।

"कौ मोदन्ते जना यस्यां तेनासौ कौमुदी स्मृता" ॥

कुमुदान्येव कौमुदी । सुदी वा सालुक इति भाषा ॥)

कौमुदीचारः, पुं स्त्री, (कौमुद्या ज्योत्स्नायाः चारः प्राशस्त्यमत्र समये ।) कोजागरपूर्णिमा । इति त्रिकाण्डशेषः ॥

कौमुदीपतिः, पुं, (कौमुद्या ज्योत्स्नायाः पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

कौमुदीवृक्षः, पुं, (कौमुद्या इव प्रकाशिकायाः दीपशिखाया वृक्ष इवाधारः ।) दीपवृक्षः । इति धारावली ॥ दीपगाछ पिलसुज इत्यादि भाषा ॥

कौमोदकी, स्त्री, (कोः पृथिव्याः पालकत्वात् मोदकः । कुमोदको विष्णुः । तस्येयं इत्यण् ततो ङीप् ।) विष्णुगदा । इत्यमरः । १ । १ । ३० ॥ (यथा, भागवते । ८ । ४ । १९ ।

"श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम" ॥)

कौमोदी, स्त्री, (कुं पृथ्वीं मोदयति नन्दयतीति । कुमोदः विष्णुः तस्येयं इति अण् ततो ङीप् ।) विष्णुगदा । इति शब्दरत्नावली ॥

कौरवः, पुं स्त्री, (कुरोरपत्यमिति अण् । कुरोरयं इति कच्छादित्वादण् वा । कुरुराजसन्ततिः । इति महाभारतम् ॥ (यथा, महाभारते । १ । द्रुपदशासने १६८ । १६ ।

"तमुद्यत रथेनैकमाशुकारिणमाहवे ।
अनेकमिव सन्त्रासान्मेनिरे तत्र कौरवाः" ॥

कुरुसम्बन्धिदेशः । यथा, मेघदूते । ५० ।

"क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः" ॥

स्त्रियां ङीप् कौरवी कुरुसम्बन्धिनीत्यर्थः । यथा, महाभारते । १ । १६० १ । १५ ।

"द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः ।
शरजालेन महता मोहयन् कौरवीं चमूम्" ॥)

कौरव्यः, पुं, (कुरोरपत्यम् । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १५१ । इति ण्यः ।) कौरवः । (यथा, महाभारते । ३ । २३२ । ५५ ।

"अभिशापं निशायाश्च सहायाः क्षुत्पिपासयोः ।
काराधपत्या कौरव्यास्तुल्या रामिरहश्च मे" ॥

कौरव्याः ब्राह्मणाः कुरुसम्बन्धिनो ब्राह्मणा इत्यर्थः । क्षत्रिये तु । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १७२ । इति ण्ये कृते तद्राजस्य बहुषु तेनैवास्त्रियामिति बहुत्वे लुकि कुरव इति बोध्यम् ।

नागविशेषः । यथा, महाभारते । १ । ३५ । १२ १४ ।

"कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान् ।
विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्" ॥)

कौर्प्यः, पुं, वृश्चिकराशिः । यथा, दीपिकायाम् ।

"क्रियतावरिजित्तमकुलीरलेयपाथेयवृककौर्प्याख्याः ।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्" ॥)

कौलः, त्रि, (कुले सत्कुले भवः इत्यण् ।) सत्कुलोद्भवः । तत्पर्य्यायः । आन्वयिकः २ । इति त्रिकाण्डशेषः ॥ (कुले कुलाचारे रतः कुलं कुलतत्त्वं वेत्ति वा इत्यण् ।) दिव्यवीरपशुभावत्रयान्तर्गतदिव्यभावरतः । स तु ब्रह्मज्ञानी । तद्यथा,—

"दिव्यभावरतः कौलः सर्व्वत्र समदर्शनः" ॥

इति कुलार्णवतन्त्रम् ॥

"पशोर्वै क्षालक्रमन्त्रः पशुरेव न संशयः ।
वीराल्लब्धमनुर्व्वीरः कौलाच्च ब्रह्मविद्भवेत्" ॥ इति

महानीलतन्त्रम् ॥ (कुलमधिकृत्य कृतो ग्रन्थः । कुलाचारतत्त्वविधिप्रतिषेधोपदेशसाध्यसाधनव्यापारविशिष्टकुलोपनिषदादिग्रन्थविशेषः ॥)

कौलकेयः, त्रि, (कुले सत्कुले भवः इति ढक् कुक् च ।) सत्कुलोद्भवः । (कुलटाया अपत्यं इति ढक् । पृषोदरादित्वात् कश्च ।) असतीपुत्त्रे, पुं । इति शब्दरत्नावली ॥

कौलटिनेयः, पुं स्त्री, (कुलटाया अपत्यं । "कुलटाया वा" । ४ । १ । १२७ । इति । इनङ् । स्त्रीभ्यो ढक् ।) असतीपुत्त्रः । तत्पर्य्यायः । कौलटेयः २ । इत्यमरः ॥ कौलटेरः ३ । इति तट्टीकासारसुन्दरी । २ । ६ । २७ ॥ सती या भिक्षार्थं कुलानि गृहाणि अटति न तु जारार्थं सापि कुलटा तत्पुत्त्रोऽपि ॥

कौलटेयः, पुं, स्त्री, (कुलटाया असत्या अपत्यं इति ढक् ।) कौलटिनेयः । असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ (कुलानि गृहाणि भिक्षार्थं अटति या सती सापि कुलटा । तस्या अपत्येऽपि इति कश्चित् ॥ स्त्रियां ङीप् कौलटेयी ॥)

कौलटेरः, पुं स्त्री, (कुलानि गृहाणि व्यभिचारार्थं अटति सा कुलटा । तस्या असत्या अपत्यम् । "क्षुद्राभ्यो वा" । ४ । १ । १३१ । इति ढ्रक् ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ कौलटिनेयः । इति सारसुन्दरी । (कुलानि गृहाणि भिक्षार्थमटति या सती सापि कुलटा तस्या अपत्येऽपि । इति कश्चित् । स्त्रियां ङीप् कौलटेरी ॥)

कौलत्थीनं त्रि, (कुलत्थस्य कुलत्थाख्यकलायविशेषस्य भवनं क्षेत्रं वा इति । "धान्यानां भवने क्षेत्रे खञ्" । ५ । २ । १ । इति । खञ् ।) कुलत्थकलायोद्भवक्षेत्रम् । इत्यमरटीकायां भरतः ॥

कौलवं, पुं, ववाद्येकादशान्तर्गततृतीयकरणम् । तत्र जातस्य फलं यथा,—

"वाग्मी विनीतो नितरां स्वतन्त्रः
प्रागल्भ्ययुक्तो मनुजो महौजाः ।
सुसम्मतः स्याद्विदुषां कृतज्ञः
स्यात् कौलवाख्यं करणं प्रसूतौ" ॥

इति कोष्ठीप्रदीपः ॥

कौलिकः, पुं, (कुलं सूत्रार्थिकं वयति वस्त्रत्वेनावगमादिकं आचरतीति । ठक् ।) तन्तुवायः । इति शब्दमाला ॥ (कु कुत्सितं अवद्याचारं लातीति । कुलं दुःशीलं ततः स्वार्थे ठक् ।) पाषण्डः । इति त्रिकाण्डशेषः । (कुलादागतमिति ठक् ।) कुलपरम्परायाते, त्रि ॥ (यथा, पञ्चतन्त्रे ।

"वर्जयेत् कौलिकाचारं मित्रं प्राज्ञतरो नरः" ॥

कुले कुलागमे कुलतन्त्रे शिवोक्तशास्त्रे इति यावत् सिद्धः इति ठक् । कुलतन्त्रज्ञः ॥ कौलं कुलधर्मं प्रवर्त्तयति तत्त्वज्ञानं शिष्यपरम्परोपदेशेन विस्तारयति इति ठक् । कुलधर्म्मप्रवर्त्तकः शिवः ॥ कुलं कुलाचारः प्रयोजनमस्य इति ठक् । ब्रह्मतत्त्वज्ञः । यथा, श्रुतौ । "शान्तः कौलिकः" ॥)

कौलीनं, क्ली, (कौ पृथिव्यां लीनम् । भूलीनपदार्थानामिव एतेषामप्रकाशतया तथात्वम् ।) गुह्यम् । अन्यम् । कुकर्म्म । (कुलीनस्य भावः । युवादित्वादण् ।) कुलीनत्वम् । (यथा, रामायणे ।

"सदम्ब इव मर्य्यादा कौलीना नाभ्यवर्त्तत" ॥)

पश्वहिपक्षिणां युद्धम् । इति मेदिनी ॥ कौलेयकः । इति विश्वः ॥ (णौ भावे क्तः तस्य नत्वम् । लीनं लयः । कौ पृथिव्यां लीनं लयो यस्मात् । कुलीनं भूमिलयमर्हतीति अण् वा ।) लोकवादः । इत्यमरः । ३ । ३ । ११६ । (यथा, रघौ । १४ । ८४ ।

"कौलीनभीतेन गृहान्निरस्ता
न तेन वैदेहसुता मनस्तः" ॥

निन्दा । यथा, तत्रैव । १४ । ३६ ।

"कौलीनमात्माश्रयमाचचक्षे
तेभ्यः पुनश्चेदमुवाच वाक्यम्" ॥)

कौलीरा, स्त्री, (कुलीरः कर्कटः तच्छृङ्गाकारोऽस्त्यस्या इत्यण् । ततष्टाप् ।) कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (कर्कटशृङ्गीशब्देऽस्या विवृतिर्ज्ञेया ॥)

कौलेयः, त्रि, (कुले सत्कुले भवः इति वाङ्कलकात् ढक् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौलेयकः, पुं, (कुले भवः । "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । ४ । २ । ९६ । इति ढकञ् ।) कुक्कुरः । इत्यमरः । २ । १० । २१ ॥ (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यां यड्ढकञौ" । ४ । १ । १४० । इति ढकञ् ।) कुलीनः त्रि । इति मेदिनी ॥

कौल्माषीणं, त्रि, (कुल्माषाणां धान्यकुलत्थादीनां भवनं क्षेत्रं इति खञ् ।) कुल्माषधान्योद्भवक्षेत्रम् । इत्यमरटीकायां रायमुकुटः ॥

कौल्यः, त्रि, (कुले सत्कुले भवः वाङ्कलकात् यञ् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौवलं, क्ली, (कुवलमेव इति । प्रज्ञादित्वात् स्वार्थे अण् ।) कुवलम् । बोलिफलम् । इति भरतो द्विरूपकोषश्च ॥

कौवेरं, क्ली, (कुवेरो अधिष्ठात्री देवतास्य इत्यण् ।) कुष्ठम् । कुड् इति भाषा । इति शब्दचन्द्रिका ॥ (कुवेरस्य इदं इत्यण् ।) कुवेरसम्बन्धिनि तत्पर्य्याये त्रि । यथा, मार्कण्डेये । ७१ । ७ ।

जननी सिद्धसेनस्य उग्रचारी महातपा" ॥ कुशिकस्य गोत्रापत्य इति विग्रहः। कुशिकाख्यनरपते पौत्री गाधिराजस्य कन्या विश्वामित्रस्य भगिनी ऋचीकमुनिपत्नी। कुशिकवंशजातत्वात् तस्यास्तथात्वम् ॥) नदीविशेषः। इति मेदिनी ॥ (यथा, रामायणे। १। ३४। ६—११।

"स पिता मम काकुत्स्थ। गाधिः परमधार्म्मिकः।
कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन।॥
पूर्व्वजा भगिनी चापि मम राघव। सुव्रता।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥
सशरीरागता स्वर्गं भर्त्तारमनुवर्त्तिनी।
कौशिकी परमोदारा प्रवृत्ता च महा नदी ॥
दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता।
लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम ॥
ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखम्।
भगिन्या स्नेहसंयुक्तः कौशिक्या रघुनन्दन।॥
सा तु सत्यवती पुण्या सत्ये धर्म्मे प्रतिष्ठिता।
पतिव्रता महाभागा कौशिकी सरितां वरा" ॥
"कौशिकी सरिता श्रेष्ठा कुलोद्द्योतकरी तव" ॥ २१

असावेवेदानीं कुशी नदीति ख्याता। इयन्तु नेपालराज्यान्तर्गतायाः हिमवच्छाखायाः निःसृता सती १६६ क्रोशान्तं गता गङ्गया सङ्गता ॥)

कौशिक्योजः, पुं, (कौशिक्या इव तीव्र ओजो यस्य। पृषोदरात् सलोपः।) शाखोटवृक्षः। इति राजनिर्घण्टः। शाक्योड़ा इति भाषा ॥

कौशीतकी, स्त्री, (कुशितकस्यापत्यम्। ऋष्यण् ततो ङीप्।) अगस्त्यपत्नी। इति त्रिकाण्डशेषः ॥ (कुशीतकेनाधीता प्रणीता वा या शाखा सा कौशीतकी। स्वनामख्यातवेदान्तर्गतशाखाविशेषः ॥ (ऋग्वेदान्तर्गत उपनिषद्विशेषः। यदुक्तं मुक्तिकोपनिषदि।

'मैत्रायणी कौशी(षी)तकी वृहज्जाबालतापनी'॥)

कौशेय, त्रि, (कोशे भवम्। इति ढक्।) कृमिकोशोत्थवस्त्रादि। इत्यमरः। २। ६। १११ ॥ मूर्द्धन्यमध्यश्च ॥ (यथा, माघे। ८। ६।

"कौशेयं व्रजदपि गाढतामजस्रम्।
सस्रसे विगलितनीविनीरजाक्ष्याः" ॥)

कौषिकः, पुं, (कौशिक+पृषोदरात् षकारादेशः।) कौशिकः। इति मेदिनी ॥

कौषिकी, स्त्री, (कौशिकी+पृषोदरात् षकारादेशः।) कौशिकी। इति मेदिनी ॥ कालिकाकायकोषनिःसृतदेवीविशेषः। यथा,—

"कायकोषान्निःसृता या कालिकायास्तु भैरव।।
सा कौषिकीति विख्याता चारुरूपा मनोहरा।
निःसृता हृदयाद्देव्या रसनाग्रेण चण्डिका।
नैतस्याः सदृशी मूर्त्या चारुरूपेण विद्यते ॥
त्रिषु लोकेषु कान्त्या वा नास्यास्तुल्या भविष्यति।
योगनिद्रा महामाया या मूलप्रकृतिः स्मृता ॥
तस्याः प्राणस्वरूपेयं देवी सा कौषिकी स्मृता।
नेत्रवीजं तथैतस्या वीजन्तु परिकीर्त्तितम् ॥
तन्त्रमस्याः प्रवक्ष्यामि सर्व्वकामप्रदं शृणु।
समाप्ति नान्त्यदन्त्यस्तु षष्ठवर्गादिविन्दुना ॥
षष्ठस्वरेण सदृष्टो विन्दुना समलङ्कृतः।
कौषिकीतन्त्रमन्त्रोऽयं धर्म्मकामार्थदायकः ॥
एतस्याः सम्प्रवक्ष्यामि मूर्त्तिरूपञ्च भैरव।।
शृण्वेकमना भूत्वा जगदाह्लादकारकम् ॥
धम्मिल्लसयतकचा विधोश्चाधोमुखीं कलाम्।
केशान्ते तिलकस्योर्द्धे दधती सुमनोहरा ॥
मणिकुण्डलसंघृष्टगण्डा मुकुटमण्डिता।
सज्योतिः कर्णपूराभ्यां कर्णमापूर्य्य सङ्गता ॥
सुवर्णमणिमाणिक्यनागहारविराजिता।
सदा सुगन्धिभिः पुष्पैरम्लानैरतिसुन्दरी ॥
माला बिभर्त्ति ग्रीवायां रत्नकेयूरधारिणी।
मृणालायतवृत्तैस्तु वाहुभिः कोमलैः शुभैः ॥
राजन्ती कञ्चुकोपेतपीनोन्नतपयोधरा।
क्षीणमध्या पीतवस्त्रा त्रिवलीपरिभूषिता ॥
शूलं वज्रञ्च वाणञ्च खड्गं शक्तिं तथैव च।
दक्षिणैः पाणिभिर्देवी गृहीत्वातिविराजिता ॥
गदां घण्टाञ्च चापञ्च चर्म्म शङ्खं तथैव च।
ऊर्द्धादिक्रमतो देवी दधती वामपाणिभिः ॥
सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्म्मणि कौषिकी।
बिभ्रती रूपमतुलं सुरासुरमनोहरम् ॥
एतस्याः शृणु वत्स त्वं या पूज्या अष्टयोगिनीः।
ताः पूजितास्तु कुर्व्वन्ति चतुर्व्वर्गं नृणां सदा ॥
ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा ॥
नारसिंही तथैवैन्द्री शिवदूती तथाष्टमी।
एताः पूज्या महाभागा योगिनीः कामदायिनीः" ॥
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः ॥*॥

अन्यच्च।

"शरीरकोषतस्तस्याः समुद्भूताब्रवीच्छिवा।
स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ॥
देवैः समेतैः समरे निशुम्भेन पराजितैः।
शरीरकोषाद्यत्तस्याः पार्व्वत्या निःसृताम्बिका ॥
कौषिकीति समस्तेषु ततो लोकेषु गीयते" ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये ५ अध्यायः ॥

अपरा व्युत्पत्तिर्यथा,—

"अल्पेनैवोपकारेण यस्माल्लोके सुखप्रदा।
कौषेयधारणाद्वापि सुप्रसादाच्च कौषिकी" ॥
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥

कौषेय, त्रि, (कौशेय+पृषोदरात् षकारादेशः।) कृमिकोषोत्थवस्त्रादि। रेसमी कापड इति भाषा। इत्यमरटीकायां भरतः ॥ (यथा, मार्कण्डेयपुराणे। १५। २७।

"कोषकारस्तु कौषेये हृते वस्त्रेऽभिजायते" ॥)

कौसीद्य, क्ली, (कुत्सितं सीदति अस्मिन् इति। सीद्+शः। ततः स्वार्थे ष्यञ्।) आलस्यम्। तन्द्रा। इति हेमचन्द्रः। (कुसीदस्य कर्म्म भावो वा। इति ष्यञ्।) कुसीदत्वम् ॥

कौसुम, क्ली, (कुसुमेन निर्वृत्तम्। इत्यण्।) कुसुमाञ्जनम्। पुष्पाञ्जनम्। इति राजनिर्घण्टः ॥ (कुसुमस्येदम्। तस्येदमित्यण्। कुसुमसम्बन्धि वस्तुजातम्। कुसुमेषु भवम्। यथा, माघे। ७। ५७।

"विनयति सुदृशो दृशः परागं
प्रणयिनि। कौसुममाननानिलेन" ॥)

कौसुम्भ, पुं, (कुसुम्भ+स्वार्थे अण्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः ॥ (शाकविशेषः। यथा,—

"कौसुम्भं कोमलं शाकं कासमर्द्दविमर्द्दितम्।
पाचितं तप्तसृष्टे माणिमन्थविमिश्रितम्" ॥
इति शब्दार्थचिन्तामणिः ॥ कुसुम्भेन रक्तम्। "तेन रक्तं रागात्"। ४। २। १। इत्यण्।) कुसुम्भपुष्परागयुक्ते त्रि। इत्यमरटीकायां रायमुकुटः। (यथा, माघे।

"कौसुम्भं पृथुकुचकुम्भसङ्गिवासः" ॥
कुसुम्भस्येदं तस्येदमित्यण्। कुसुम्भसम्बन्धिवस्तुमात्रम्। यथा, माघे। ११। ५२।

"दिनकरकरसङ्गव्यक्तकौसुम्भकान्तिः" ॥)

कौसृतिक, त्रि, (कुसृत्या कुत्सितगत्या चरति इति। ठक्।) मायाकारः। इति जटाधरः ॥

कौस्तुभ, पुं, (कुं भुवं स्तुभ्नाति व्याप्नोति इति। कुस्तुभः सागरः तत्र भवः इत्यण्। यद्वा, कु भूमिः जगदित्यर्थः स्तुभते व्याप्नोति सर्व्वमाक्रम्य तिष्ठतीति भावः। कुस्तुभो विष्णुः तस्यायं मणिरित्यण्।) स्वनामख्यातो विष्णुवक्षःस्थो मणिः। इत्यमरः। १। १। ३० ॥ (यथा, भागवते। ८। ८। ५।

"कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः।
तस्मिन् हरिः स्पृहां चक्रे वक्षोऽलङ्करणे मणौ" ॥
"कौस्तुभस्तु महातेजाः कोटिसूर्य्यसमप्रभः।
इदं किमुत वक्तव्यं प्रदीपादीप्तिमानिति" ॥
इति भागवतामृतम् ॥ मुद्राविशेषः। यथा,—

"अनामाङ्गुष्ठसंलग्ना दक्षिणस्य कनिष्ठिका।
कनिष्ठयान्यया बद्धा तर्जन्या दक्षया तथा ॥
वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके।
अङ्गुष्ठमध्यमे भूयः संयोज्य सरला पराः।
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसञ्ज्ञिका" ॥
इति तन्त्रसारः ॥

कौस्तुभवक्षाः, [स्] पुं, (कौस्तुभः वक्षसि उरःस्थले यस्य।) विष्णुः। इति हारावली ॥

क्नथ, कि म वधे। इति कविकल्पद्रुमः। (चुरा पक्षे भ्वा-पर-सक-सेट्।) कि म, क्नथयति। इति दुर्गादासः ॥

क्नस, उ म य कृतौ। भासने। इति कविकल्पद्रुमः ॥ (दिवा-पर-अक-सेट्।) एष दन्त्यनकारयुक्तः। उ, क्नसित्वा क्नस्त्वा। म, क्नसयति कान्त्या जगत्पान्थः। य, क्नस्यति खलः कुटिलः स्यादित्यर्थः। कृतिरिह कौटिल्यम्। इति दुर्गादासः ॥

क्नस, इ कि भासने। इति कविकल्पद्रुमः ॥ (चुरा पक्षे भ्वा-पर-अक-सेट्।) इ, क्नंस्यते। कि, क्नंसयति क्नंसति। भासनं दीप्तिः। इति दुर्गादासः ॥


क्नूय, ई ङ दुर्गन्धे। चार्द्रत्वे। शब्दे। इति कविकल्पद्रुमः ॥ दन्त्यनकारयुक्तो दीर्घी। (भ्वा-आत्म-अक-सेट्-ईर्निष्ठायामनिट्।) तथा च। क्नूयी स्मायति ते विदेव य इमे सेविञ्च मेविस्तता। इति शार्दूलविक्रीडिते चण्डेश्वरः ॥ ई, क्नूतः। ङ,

क्रूयते मत्स्य दुर्गन्ध स्यादित्यर्थः । क्रूयते वस्त्रमम्भसा । इति दुर्गादास ॥


क्मर, कौटिल्ये । इति कविकल्पद्रुम ॥ (भ्वा-पर-अक-सेट् ।) ओष्ठवर्गशेषयुक्त । क्मरति खल कुटिल स्यादित्यर्थः । इति दुर्गादास ॥

क्रकच, पु स्त्री, ग्रन्थिलवृक्ष । इति मेदिनी ॥ (ज्योतिषोक्तयोगभेद । तस्य लक्षण यथा,—
"षष्ठ्यादितिथयो मन्दाद् विलोमक्रकच स्मृत" ॥
अस्य विवृतिर्यथा ।
"शनौ षष्ठी, शुक्रे सप्तमी, गुरौ अष्टमी, बुधे नवमी, भौमे दशमी, सोमे एकादशी, रवौ द्वादशी, एते योगा क्रकचाख्या विज्ञेया" । यथा, नारदोक्ति ।
"त्रयोदशस्युर्मिलने सख्ययोस्तिथिवारयो ।
क्रकचो नाम योगोऽय मङ्गलेष्वतिगर्हित" ॥*॥
क्र इति कृत्वा कचति शब्दायते । कच शब्दे + पचाद्यच् ।) करपत्रम् । काष्ठविदारणास्त्रविशेष । करात् इति भाषा । इत्यमर । १ । १० । ३५ ॥ (यथा, महाभारते ३ । २२ । ३४ ।
"मध्येन पाटयामास क्रकचो दार्व्विवोच्छ्रितम्" ॥)
"अथ क्रकचव्यवहारे करणसूत्र वृत्तम् । पिण्डयोगदलमग्रमूलयोर्दैर्घ्यसङ्गुणितमङ्गुलात्मकम् । दारुदारणपथै समाहृत षट्स्वरेष विहृत करात्मकम् ॥ उदाहरणम् ।
मूले नखाङ्गुलमितोऽथ नृपाङ्गुलोऽग्रे
पिण्ड शताङ्गुलमित किल यस्य दैर्घ्यम् ।
तद्दारुदारणपथेषु चतुर्षु कि स्या-
द्धस्तात्मक वद सखे गणित द्रुत मे ॥

न्यास



पिण्डयोगदलम् । १८ । दैर्घ्येण । १०० । सगुणितम् । १८०० । दारुदारणपथै । ४ । गुणितम् । ७२०० । षट्स्वरेषु । ५७६ । विहृत जात करात्मक गणितम् । २५/२ ॥ क्रकचान्तरे करणसूत्र सार्द्धवृत्तम् । छिद्यते तु यदि तिर्य्यगुक्तवत् पिण्डविस्तृतिहते फल तदा । इष्टिकाचितिदृषच्चितिखातक्राकचव्यवहृतौ खलु मूल्यम् । कर्म्मकारजनसम्मतिमत्या तन्मृदुत्वकठिनत्ववशेन ॥ उदाहरणम् ।
यद्विस्तृतिर्द्दन्तमिताङ्गुलानि
पिण्डस्तथा षोडश यत्र कोष्ठे ।
छेदेषु तिर्य्यङ्नवसु प्रचक्ष्व
कि स्यात् फल तत्र करात्मक मे ॥



विस्तृतिहति । ५१२ । दारुदारणमार्ग । ९ । घ्ना । ४६०८ । षट्स्वरेषु । ५७६ । विहृत जात फल हस्ता । ८ । इति लीलावत्या क्रकचव्यवहार ॥ * ॥

क्रकचच्छद, पु, (क्रकच करपत्रमिव च्छदा पत्राणि यस्य ।) केतकीवृक्ष । इति त्रिकाण्डशेष ॥

क्रकचपत्र, पु, (क्रकचवत् पत्र यस्य ।) शाकवृक्ष । इति राजनिर्घण्ट ॥ (केतकीवृक्ष ॥)

क्रकचपात्, [द्] पु, (क्रकच इव पादो यस्य । अन्त्यलोप ।) कृकलास । इति त्रिकाण्डशेष ॥

क्रकचपाद, पु, (क्रकचमिव पादो यस्य ।) कृकलास । इति हारावली ॥

क्रकचपृष्ठी, स्त्री, (क्रकचवत् पृष्ठ पृष्ठदेशो यस्या । इति ङीष् ।) कवयी मत्स्य । इति शब्दरत्नावली ॥

क्रकचा, स्त्री, (क्रकचस्तदाकारोऽस्त्यस्या । अर्श आदिभ्य अच् तत्तष्टाप् ।) केतकी इति रत्नमाला ॥

क्रकण, पु, (क्र इति कणति शब्दायते । कण शब्दे + अच् । जातित्वात् स्त्रिया ङीष् ।) पक्षिविशेषः । इत्यमर ॥ कयार इति भाषा ॥

क्रकर, पु, (क्र इति शब्द कर्त्तु शीलमस्य इति । कृ + ताच्छील्ये ट ।) करीरवृक्ष । उट्काटार इति भाषा । क्रकणपक्षी । इत्यमर । २ । ५ । १९ ॥ कयार इति करकरा इति च भाषा ॥ (यथा,— महाभारते १३ । १११ । १०३ ।
"पत्रोर्ण चोरयित्वा तु क्रकरत्व नियच्छति" ॥)
अस्य मासस्य गुणा । लघुत्वम् । हृद्यत्वम् । इति राजनिर्घण्ट ॥ (यथा, सुश्रुते ।
"चकोरकलविङ्कमयूरक्रकर इत्याद्युपक्रम्य
लावव क्रकरा हृद्यास्तथा चैवोपचक्रका" ॥
इत्यन्तेनोपसङ्कृता ॥) दीन । क्रकच । इति मेदिनी ॥

क्रतु, पु, (क्रियतेऽसौ इति । कृ + "कृञः कतु" । उणा १ । ७८ । इति कर्म्मणि कतु प्रत्यय ।) यज्ञ इत्यमर ॥ सप्तर्ष्यन्तर्गतब्रह्ममानसपुत्रमुनिविशेष । इति मेदिनी । अयन्तु ब्रह्मण कराज्जात । (यथा, महाभारते । १ । ६५ । १० ।
"ब्रह्मणो मानसा पुत्रा विदिता षण्महर्षय ।
मरीचिरत्र्यङ्गिरसौ पुलस्त्य पुलह क्रतु" ॥)
एतस्य भार्य्या प्रजापते कर्द्दमस्य कन्या क्रिया । पुत्रा षष्ठिसहस्रवालिखिल्याख्याङ्गुष्ठमात्रा ऋषय ।
(यथा,—भागवते । ४ । १ । ३८ ।
"क्रतोरपि क्रिया भार्य्या वालखिल्यानसूयत ।
ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा" ॥
विश्वेदेवविशेषः । यथा, हरिवंशे ।
आत्मार्थे चास्रजत्पुत्त्रान् लोककर्त्तॄन् पितामह ॥
विश्वे प्रजाना पतयो येभ्यो लोका विनिःसृता" ॥
तत उक्त "दक्ष मरीचिमत्रिञ्च पुलस्त्य पुलह क्रतु । वशिष्ठ गौतमञ्चैव भृगुमङ्गिरस मनुम्" । इत्याद्युपक्रम्य ।
"अथर्व्वभूता इत्येते ख्यातास्त्वेव महर्षय ।
त्रयोदशसुता येषा वशा वै सुप्रतिष्ठिता" ॥
जटाधरेण तु "विश्वेदेवा दशस्मृता" । इत्युक्त तत्कल्पभेदादविरुद्धम् ॥
यथा, शतपथब्राह्मणे १० । ६ । ३ । १ ।
"यावत् क्रतुरयमस्माल्लोकात् प्रेत्यैव क्रतुरमु लोक प्रेत्य सम्भवति" ॥
यूपसहित सोमसाध्यो यज्ञ । विष्णु । यथा, विष्णुसहितायाम् ।
"यज्ञ इज्यो महेज्यश्च क्रतु सत्र सता गति" ॥
अस्य भाष्य यथा,—
"अस्य सर्व्वयज्ञस्वरूपत्वात् यज्ञ यूपसहितो यज्ञ क्रतुरिति" । अतएव विष्णो सर्व्वयज्ञमयत्वात् यज्ञत्व क्रतुशब्दस्यापि यूपसहितयज्ञबोधकत्व प्रसिद्धम् ॥ तद्यागे शतपथब्राह्मणादावुल्लिखिता यूपविशेषा । यथा, तत्र सोमसाध्ययागाश्च त्रयः क्रतव । तथाहि श्रुतौ "त्रीन् क्रतूनन्वाहाग्नेयमुपसन्नमाश्विनम्" । सङ्कल्पः । स कल्पस्तु कामनाधीनश्चित्तवृत्तिविशेष । उक्तञ्च
"काम क्रतु कर्म्म जन्मेत्येवमेषा क्रमो भवेत्" ।
पुसो या विषयापेक्षा स काम इति भण्यते ।
स एव वर्द्धमानश्चेत् क्रतुत्व प्रतिपद्यते" ॥
रुचेरातिशय्यम् । यथा,—
"रुचेरतिशय काम्ये विषये क्रतुरीर्य्यते" ॥
स्तुत्यादिकर्म्म । यथा, ऋग्वेदे । ४ । २१ । १० ।
"पुरुहूत । क्रत्वा न स्वस्ति" । "क्रत्वा कर्म्मणा स्तुत्यादिहेतुना" । इति भाष्यम् ॥
प्रज्ञा । यथा, छान्दोग्योपनिषदि । "अथ खलु क्रतुमय पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति । तथेत प्रेत्य भवति स क्रतु कुर्व्वीत" ॥
अस्य भाष्य यथा,—
"कथमुपासीत । स क्रतु कुर्व्वीत क्रतुर्निश्चयोऽध्यवसायश्च एवमेव नान्यथेति अविचल प्रत्ययस्त क्रतु कुर्व्वीतोपासीत इत्यनेन व्यवहितेन सम्बन्ध । कि पुन क्रतुकरणेन कर्त्तव्य प्रयोजनम् ? कथ वा क्रतु कर्त्तव्य ? क्रतुकरण चाभिप्रेतार्थसाधन कथम् ? इत्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रन्थ । अथ खल्विति हेत्वर्थ । यस्मात् क्रतुमय क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीव । यथा क्रतुर्यादृश क्रतुरस्य सोऽय यथा क्रतुर्यथाऽध्यवसायो यादृङ्निश्चयोऽस्मिँल्लोके जीवन्निह पुरुषो भवति । तथेतोऽस्माद्देहात् प्रेत्य मृत्वा भवति । क्रत्वनुरूपफलात्मको भवतीत्यर्थ । एव ह्येतच्छास्त्रतो दृष्टम् । 'य य वापि स्मरन् भाव त्यजत्यन्ते कलेवरमित्यादि' । यत एव व्यवस्था शास्त्र

दृष्ट्वाऽत स एव जानन् क्रतु कुर्व्वीत यादृशं क्रतुं वक्ष्यामस्तम्। यत एव शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरूप फलमतः स कर्त्तव्य क्रतु"। आषाढमास। अस्मिन्नेव मासे चातुर्मास्यादियागप्राचुर्य्यात् तस्य तथात्वम्। यथा, यजुर्व्वेदे। १८। २८।

"वाजाय स्वाहा, प्रसवाय स्वाहा, अपिजाय स्वाहा, क्रतवे स्वाहा, वसवे स्वाहा"। इति।"क्रतवे यागरूपाय चातुर्मास्यादियागप्राचुर्य्यात् क्रतुराषाढ"॥ इति वेददीधिति॥ अश्वमेधयज्ञ। यथा, मनौ। ७। ७६।

"यजेत राजा क्रतुभिर्व्विविधैराप्तदक्षिणै।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च"॥)

क्रतुद्विट्, [ष्] पु, (क्रतु यज्ञ द्वेष्टीति। द्विष्+ "सत्सूद्विषेति"। ३। २। ६१। क्विप्।) असुर। इति त्रिकाण्डशेष॥

क्रतुद्रुक्, [ह्] पु, (क्रतवे यज्ञाय द्रुह्यति द्रोहमाचरतीति। द्रुह्+क्विप्।) असुर। इति जटाधर॥ अस्य रूपान्तराणि। क्रतुध्रुग्। क्रतुध्रुट्। क्रतुध्रुड्॥

क्रतुध्वंसी, [न्] पुं, (क्रतु दक्षयज्ञ ध्वंसयतीति। ध्वन्स्+णिनि। स्वजटोत्पादितवीरभद्रेण क्रतुध्वंसकारितत्वादस्य तथात्वम्।) शिव। इत्यमर॥ (यथाहि अनेन दक्षयज्ञध्वंस कृतस्तथा तद्विवरणमुच्यते। पुरा किल कोपपरवशो दक्ष वैरनिर्य्यातनाय शिवरहितयज्ञ चिकीर्षुस्तत्र सर्व्वान् देवान्देवब्रह्मर्षिप्रभृतीन् आहूतवान्। अथ मत्युर्मवस्यावमाननामसहमाना भवानी सती दाक्षायणी पितुर्दक्षस्य यज्ञ दिदृक्षुरनाहूताऽपि दक्षगृहं समाययौ। दक्षस्तु तां शिवां दृष्ट्वा मोहान्ध कालप्रेरित शिवनिन्दया सतीं तिरस्चकार। सा तु शिवनिन्दामाकर्ण्य समाधियोगाग्निना स्वशरीरं परितत्याज। एतच्छ्रुत्वा रुद्ररूपी देवदेव स्वजटात वीरभद्रमुत्पादयन् दक्षयज्ञक्षयमनैषीत्। एतद्विवरणन्तु काशीखण्डे ८८ अध्याये तथा श्रीमद्भागवतप्रभृतिग्रन्थे च विस्तरशो द्रष्टव्यम्॥)

क्रतुपशु, पु, (क्रतोरश्वमेधादेर्यज्ञस्य अङ्गविशेष पशु॥) अश्व। इति हारावली॥

क्रतुपुरुष, पु, (क्रतु यज्ञ तन्मय तदधिष्ठाता वा पुरुष।) विष्णु। इति त्रिकाण्डशेष॥ (अयं हि वराहरूपियज्ञपुरुष। यदुक्त भागवते। ३। १३। २१—२४।

"किमेतत्सौकरव्याज सत्त्व दिव्यमवस्थितम्।
अहोवताश्चर्य्यमिदं नासाया मे विनिःसृतम्॥
दृष्टोऽङ्गुष्ठशिरोमात्र क्षणाद् गण्डशिलासम।
अपिस्विद्भगवानेष यज्ञो मे खेदयन् मन॥
इति मीमासतस्तस्य ब्रह्मणा सह सूनुभि।
भगवान् यज्ञपुरुषो जगर्जाऽगेन्द्रसन्निभ॥
ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान्।
स्वगर्जितेन ककुभः प्रतिस्वनतया विभु"॥

अस्य रूपवर्णन यथा, तत्रैव। ३५—३८।

"रूप तवैतन्ननु दुष्कृतात्मना
दुर्दर्शनं देव। यदध्वरात्मकम्।
छन्दांसि यस्य त्वचि बर्हिरोम
स्वाज्य दृशि त्वङ्घ्रिषु चातुर्होत्रम्॥
स्रुक् तुण्ड आसीत् स्रुव ईश। नासयो-
रिडोदरे चमसा कर्णरन्ध्रे।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते
यच्चर्व्वणन्ते भगवन्नग्निहोत्रम्॥
दीक्षानुजन्मोपसदः शिरोधर
ते प्रायणीयोदयनीयदंष्ट्र।
जिह्वा प्रवर्ग्यस्तव शीर्षक क्रतो
सभ्यावसथ्यं चितयोऽसवो हि ते॥
सोमस्तु रेत सवनान्यवस्थिति
संस्थाविभेदास्तव देव। धातव।
सत्राणि सर्व्वाणि शरीरसन्धय-
स्त्व सर्व्वयज्ञक्रतुरिष्टिबन्धन"॥

अत्र श्रीधरस्वामिना यद्व्याख्यात तद्यथा,
"यज्ञात्मना प्रपश्यन्त स्तुवन्ति रूपमित्यादि चतुर्भि। छन्दांसि गायत्र्यादीनि यज्ञाङ्गभूतछन्द-आद्यनुवादेन भगवदवयवता विधीयते बर्हिः शब्दे दीर्घाभाव आर्ष। दृशि चक्षुषि चातुर्होत्र होत्रादिचतुष्टय कर्म्म। स्रुक् जुहू। तुण्डे मुखाग्रे। स्रुवो नासिकयो। इडा भक्षणपात्रं चमसा ग्रहाश्च सोमपात्राणि। प्राशित्र ब्रह्मभागपात्रम्। ग्रस्यतेऽनेनेति ग्रसन मुखान्तर्वर्त्तिच्छिद्र चर्व्वण भक्षणम्। दीक्षा दीक्षणीयेष्टिः अनुजन्म वारवार अभिव्यक्ति। उपसदस्तिस्र इष्टय शिरोधर ग्रीवा। प्रायणीया दीक्षानन्तरेष्टि। उदयनीया समाप्तीष्टि ते एव दंष्ट्रे यस्य। प्रवर्ग्यो महावीर प्रत्युपसदः पूर्व्वं क्रियते। सभ्यो होमरहितोऽग्नि। आवसथ्य औपासनाग्नि ततो द्वन्द्वैक्य क्रतुजपस्य शीर्षक शिर। चितय इष्टकाचयनानि अस्य असव प्राणा। प्रात सवनादीनि अवस्थितिरासन बाल्याद्यवस्था वा। अग्निष्टोमो ह्यत्यग्निष्टोम उक्थ्य षोडशी वाजपेयोऽतिरात्र आप्तोर्याम इति सप्तसंस्थाविभेदा सप्तलद्मासादिधातवः। सत्राणि द्वादशाहादीनि बहुयागसङ्घातरूपाणि असोमा यज्ञा ससोमा क्रतवस्तद्युपस्त्व इष्टिर्यजन अनुष्ठानञ्च तदेवबन्धनं यस्य स"॥)

क्रतुभुक्, [ज्] पुं, (क्रतौ यज्ञे देयं आज्यादिक भुङ्क्ते। क्रतु+भुज्+क्विप्।) देवता। इत्यमर। १। १। ८॥

क्रतुराज, पु, (क्रतुषु यज्ञेषु राजते इति। राज्+अच्। यद्वा, क्रतुना राजा। राजन्+टच्।) राजसूययज्ञ। इति शब्दरत्नावली॥ (क्रतुराट्। अश्वमेधयज्ञ। यथा, मनौ ११। २६०।

"यथाश्वमेध क्रतुराट् सर्व्वपापापनोदन।
तथाघमर्षणं सूक्त सर्व्वपापापनोदनम्"॥)

क्रतूत्तम, पु, (क्रतुषु यज्ञेषु उत्तम।) राजसूययज्ञ। इति त्रिकाण्डशेष॥

क्रथ, म वधे। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्। घटा। क्रथति। म, क्रथयति।)

क्रथ, क प्रतिहर्षे। इति कविकल्पद्रुम॥ (चुरा-पर-सक-सेट्।) रेफयुक्त। प्रतिहर्ष पुन पुनर्हर्षीकरणम्। क, क्रथयति शिशु लोक पुन पुनर्हर्षयति इत्यर्थ। इति दुर्गादास॥

क्रथ, कि वधे। इति कविकल्पद्रुम॥ (चुरा पक्षे भ्वा-पर-सक-सेट्।) रेफयुक्त। कि, क्राथयति क्रथति। इति दुर्गादास॥

क्रथ, कि म वधे। इति कविकल्पद्रुम॥ (चुरा पक्षे भ्वा-पर-सक-सेट्।) रेफयुक्त। पुन पाठात् पूर्व्वो न मित्। कि म, क्रथयति। इति दुर्गादास॥

क्रथन, क्ली, (क्रथ्यते इति। क्रथ् वधे+भावे ल्युट्।) मारणम्। इत्यमर। २। ८। ११५॥ (शुक्लागुरु। इति शब्दार्थचिन्तामणि॥ पु, दैवयोनिविशेष। यथा, महाभारते। १। ३२। १८।

"अश्वक्रन्देन वीरेण रेणुकेन च पक्षिराट्।
क्रथनेन च सूरेण तपनेन च खेचर॥
प्रहसेन च संग्राम चकार पुलिनेन च"॥

दानवविशेष। यथा, महाभारते। १। ६७। ५८।

"क्रथनस्तु महावीर्य्य श्रीमान् राजन् महासुर"॥)

क्रथनक, क्ली, (क्रथन+स्वार्थे कन्।) सितागुरु। इति शब्दचन्द्रिका॥ (पु, क्रथने दन्तकरणककाष्ठकच्छेदने प्रसृत कन्। उष्ट्र। इति पञ्चतन्त्रम्॥)

क्रद, इ रोदने। आह्वाने। इति कविकल्पद्रुम॥ (भ्वा-पर-अक-आह्वाने सक-सेट्। इदित्।) इ, क्रन्द्यते। ततोऽक्रन्दीद्दशग्रीव इति। क्रन्दति भर्त्तारमिवाभिपन्नम्। दुर्गादासमते तु षमङानुबन्धी। यथा, ष, क्रन्दा। म, क्रन्दयति। ङ, क्रन्दते। इति॥

क्रद, ष म ङ वैक्लव्यविकलत्वयो। इति कविकल्पद्रुम॥ (भ्वा-आत्म-अक-सेट्-घटा।) ष, क्रदा। म, क्रदयति। ङ, क्रदते। इति दुर्गादास॥

क्रन्द, क शब्दसातत्ये। इति कविकल्पद्रुम॥ (चुरा-पर-अक-सेट्।) रेफयुक्त। आ उपसर्गपूर्व्वक। क, आक्रन्दयति। शब्दसातत्य निरन्तरशब्दक्रिया। इति दुर्गादास॥

क्रन्दन, क्ली, (क्रदि+भावे ल्युट्।) शोकादिनाऽश्रुपतनम्। काँदन इति भाषा। तत्पर्य्याय। क्रन्दितम् २ रुदितम् ३ क्रुष्टम् ४ रोदनम् ५। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे ४। ३१।

"त भक्षितं मत्वा गद्गदस्ततारस्वरेण धिग्धिक् प्रलापपर कथञ्चिदपि न क्रन्दनात् विरराम"॥)

योधसंराव। आह्वानम्। इत्यमर। २। ८। १०७॥

क्रन्दन, पु, (क्रन्दनं रोदनमिव शब्दविशेष अस्यास्तीति अच्।) बिडाल। इति शब्दमाला॥

क्रन्दित, क्ली, (क्रदि+भावे क्त।) रोदनम्। इत्यमर। १। ७। ३५॥ आह्वानम्। इति मेदिनी॥ योधचीत्करणम्। इति शब्दरत्नावली॥

क्रप, ष म ङ कृपायाम्। इति कविकल्पद्रुम॥ (भ्वा-आत्म-अक-सेट्।) कृपा दया। ष, कृपा। भीमि चिन्तीति छे मनीषाद्या इति निपात-

कुर्व्वीत चैषां प्रत्यक्षमर्थसंस्थापनं नृपः” ॥

क्रयविक्रयानुशय, पुं, (क्रये विक्रये च क्रयविक्रययोर्वा अनुशयः पश्चात्तापः ।) अष्टादशविवादान्तर्गतविवादविशेषः । यथा ।

“वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः” ॥

अस्य विवरणम् । यथा, मनौ ।

“क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वा” ॥

क्रयविक्रयिकः, पुं, (क्रयविक्रयाभ्यां जीवतीति । “वस्नक्रयविक्रयात् ठन्” ।४।४।१३। इति ठन् ।) वणिक् । इत्यमरः ।२।९।७८॥

क्रयशीर्षं, स्त्री, (कपिशीर्ष+पृषोदरात् साधुः ।) कपिशीर्षम् । इति त्रिकाण्डशेषः ॥

क्रयारोहः, पुं, (आ+रुह+अधिकरणे घञ् । क्रयार्थं आरोहः समारोहोऽत्र ।) हट्टः । इति त्रिकाण्डशेषः ॥

क्रयिकः, पुं, (क्रयः प्रयोजनमस्यस्य इति ठन् ।) क्रेता । तत्पर्य्यायः । क्रायकः २ । इत्यमरः ॥ क्रयी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१३।

“धनेन क्रयिको हन्ति खादकश्चोपभोगतः” ॥

क्रयेण जीवतीति । “वस्नक्रयविक्रयात् ठन्” । ४ । ४ । १३ । इति व्यस्तादपि ठन् ।) क्रयजीवी । वणिक् । इत्यमरटीकायां भरतः ॥ (यथा, माघे ।

“पर्य्यापतत् क्रयिकलोकमगण्यपण्या” ॥)

क्रयी, [न्] त्रि, (क्रयोऽस्त्यस्य इति । क्रय+इनि ।) क्रयकर्त्ता । इति हेमचन्द्रः ॥

क्रय्य, त्रि, (डुक्रीञ् द्रव्यपर्य्यये+“अतो यत्” । ३ । १ । ९७ । “क्रय्यस्तदर्थे” ६ । १ । ८२ । इति साधुः ।) क्रये प्रसारितम् । क्रयनिमित्तं हट्टादौ न्यस्तं यत् द्रव्यम् । इत्यमरः ॥ (यथा, शतपथब्राह्मणे । ३ । ३ । ३ । १ । “क्रय्यस्ते सोमो राजा इति क्रय इत्याह सोमविक्रयी” ॥)

क्रव्य, क्ली, (क्लव+यत् । लस्य रत्वम् ।) मांसम् । इत्यमरः ॥ (यथा, भागवते । ४ । १८ । २४ ।

“क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ।
सुपर्णवत्सा विहगाश्चरं वाऽचरमेव च” ॥)

क्रव्यघातन, पुं, (क्रव्यस्य क्रव्यार्थं वा घात्यतेऽसौ । हन्+स्वार्थे णिच्+कर्म्मणि ल्युट् ।) मृगः । इति शब्दचन्द्रिका ॥

क्रव्यात्, [द्] पुं, (क्रव्यं मांसं अत्तीति । “क्रव्ये च विट्” । ३।२।६९। इति ।) राक्षसः । इत्यमरः ॥ मांसाशिनि त्रि । इति मेदिनी । (गृध्रादिमांसभुक्पक्षिविशेषस्यापि । यथा, रघौ । १५ । १६ ।

“धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ॥
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः” ॥

“शवानुपक्षे क्रव्यादो गृध्रादयः” । इति मल्लिनाथः । व्याघ्रादिहिंस्रपशुभेदः ।

यथा, मनुः ५ । १३१ ।

“श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ।
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः” ॥

“क्रव्याद्भिः व्याघ्रश्येनादिभिश्चेति” । कुल्लूकभट्टः ॥

ग्राम्यक्रव्यादो मार्ज्जारादयः ।

यथा, मनौ । ११ । १९९ ।

“श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च” ।

“ग्राम्यैः क्रव्याद्भिराममांसादैर्मार्ज्जारादिभिः” ।

इति कुल्लूकभट्टः ॥ गुरुपत्नीगामिना नरकभोगावसाने क्रव्यादां आममांसाशिनां योनिप्राप्तिर्भवति ।

यथा, तत्रैव । १२ । ५८ ।

“तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणामपि ।
क्रूरकर्म्मकृताञ्चैव शतशो गुरुतल्पगः” ॥

शवदाहकाग्निभेदः । यथा, शतपथब्राह्मणे । १ । २ । १ । ४ ।

“अपाग्ने ! अग्निमामादं जहि निष्क्रव्यादं सेध इत्यय वा आमाद् येनेदं मनुष्याः पक्त्वाऽश्नन्ति अथ येन पुरुषं दहन्ति स क्रव्याद् एतावेवैतदुभावतोऽपहन्ति” । “हे अग्ने ! गार्हपत्य ! आमादमग्निमपजहि परित्यज तथा,—

“क्रव्यादमग्निं निःसेध निःशेष दूरे गमय” ।

इति भाष्यम् ॥ ऋग्वेदे च । १० । १६ । १० ।

“योऽग्निः क्रव्यात् प्रविवेश वो गृहम्” ॥)

क्रव्याद, पुं, (क्रव्यं मांसमत्ति । अद उपपदे “कर्म्मण्यण्” । ३ । २ । १ । इति अण् । कृत्तं छिन्नं तदेव पुनर्व्विशेषेण कृत्तं पक्वञ्च भुङ्क्ते इति कृत्तविकृत्तपक्वशब्दस्य पृषोदरात् क्रव्यादेशः । इति काशिका ।) राक्षसः । इत्यमरः ॥ सिंहः । श्येनः । इति राजनिर्घण्टः ॥ शवभक्षकाग्निः । यथा,

“क्रव्यादो मृतभक्षणे” । इति तिथ्यादितत्त्वम् ॥

मांसाशिनि त्रि । इति धरणी ॥ (पुरा किल केनचिद्रक्षसाग्निमुखादियमेव सा भृगुभार्य्या पुलोमेति विदितेनैवापहृतायान्तस्याः पुलोमाया महर्षिर्भृगुरत्यन्ताऽमर्षमाहरन् त्वं सर्व्वभक्षो भविष्यसीति तस्मै वह्नये शापं प्रददौ तेन हि तस्य क्रव्यादत्वं प्रसिद्धम् । ततः शापेनापि तेनाग्निदेवेनात्मनः सर्व्वभक्षकत्वरूपशापं परिहर्त्तुंकामेन सर्व्वभक्षः सन्कथं देवादीनां मुखं भविष्यामीति चिन्तयता अग्निहोत्रेषु यज्ञसत्रक्रियासु च आत्मनः संहारश्चक्रे । पितामहस्तु देवादिभिरनुरुद्धो वह्निं स्वप्रभावमनुस्मारयन् कौशलेन हुतभागग्रहणस्वीकारमकारयत् । एतद्विवरणन्तु महाभारते । १ । ६—७ अध्याययोर्द्रष्टव्यम् । तद्यथा,

भृगुरुवाच ।

“केनासि रक्षसे तस्मै कथिता त्वं जिहीर्षते ।
न हि त्वां वेद तद्रक्षो मद्भार्य्यां चारुहासिनीम् ॥
तत्त्वमाख्याहि तं ह्यद्य शप्तुमिच्छाम्यहं रुषा ।
बिभेति को न शापान्मे कस्य चायं व्यतिक्रमः ॥

पुलोमोवाच ।

अग्निना भगवंस्तस्मै रक्षसेऽहं निवेदिता ।
ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव ॥
साहं तव सुतस्यास्य तेजसा परिमोक्षिता ।
भस्मीभूतन्तु तद्रक्षो मामुत्सृज्य पपात वै ॥

सूत उवाच ।

इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् ।
शशापाग्निमतिक्रुद्धः सर्व्वभक्षो भविष्यसि” ॥

“शप्तस्तु भृगुणा वह्निः क्रुद्धो वाक्यमथाब्रवीत् ।
किमिदं साहसं ब्रह्मन् कृतवानसि मां प्रति” ॥

“अमावास्याञ्च पितरः पौर्णमास्याञ्च देवताः ।
मन्मुखेनैव हूयन्ते भुञ्जते च हुतं हविः ॥
सर्व्वभक्षः कथं तेषां भविष्यामि मुखं त्वहम्” ॥

“चिन्तयित्वा ततो वह्निश्चक्रे संहारमात्मनः ।
द्विजानामग्निहोत्रेषु यज्ञसत्रक्रियासु च ॥
निरोङ्कारवषट्कारा: स्वधास्वाहाविवर्ज्जिताः ।
विनाग्निना प्रजाः सर्व्वास्तत आसन् सुदुःखिताः ॥
अथर्षयः समुद्विग्ना देवान् गत्वाब्रुवन् वचः ।
अग्निशापात्क्रियाभ्रंशाद् भ्रान्ता लोकास्त्रयोऽनघाः ।
विदध्वमत्र यत्कार्य्यं न स्यात् कालात्ययो यथा ।
अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य तु ॥
अग्नेरावेदयञ्छापं क्रियासंहारमेव च ।
भृगुणा वै महाभाग ! शप्तोऽग्निः कारणान्तरे ॥
कथं देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा ।
हुतभुक् सर्व्वभूतेषु सर्व्वभक्षत्वमेष्यति ॥
श्रुत्वा तु तद्वचस्तेषामग्निमाहूय विश्वकृत् ।
उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् ॥
लोकानामिह सर्व्वेषां त्वं कर्त्ता चान्त एव च ।
त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः ॥
स तथा कुरु लोकेश ! नोच्छिद्येरन् क्रिया यथा ।
कस्मादेवं विमूढस्त्वमीश्वरः सन् हुताशन ! ॥
त्वं पवित्रं सदा लोके सर्व्वलोकगतिश्च ह ।
न त्वं सर्व्वशरीरेण सर्व्वभक्षत्वमेष्यसि ॥
अपाने ह्यर्च्चिषो यास्ते सर्व्वं भोक्ष्यन्ति ताः शिखिन ! ।
क्रव्यादा च तनुर्य्या ते सा सर्व्वं भक्षयिष्यति ॥
यथा सूर्य्यांशुभिः स्पृष्टं सर्व्वं शुचि विभाव्यते ।
तथा त्वदर्च्चिर्निर्दग्धं सर्व्वं शुचि भविष्यति ॥
त्वमग्ने ! परमं तेजः स्वप्रभावाद्विनिर्गतम् ।
स्वतेजसैव तं शापं कुरु सत्यमृषेर्व्विभो ! ॥
देवानाञ्चात्मनो भागं गृहाण त्वं मुखे हुतम्” ।
“एवमस्त्विति तं वह्निः प्रत्युवाच पितामहम् ॥
जगाम शासनं कर्त्तुं देवस्य परमेष्ठिनः” ॥ * ॥

अतएव ऋङ्मन्त्रेण क्रव्यादाख्याग्नेः शान्तिकर्म्मादिष्वपसारणं जातवेदोऽग्नेरादानं प्रोक्तम् ।

यथा, ऋग्वेदे । १० । १६ । ९ ।

“क्रव्यादमग्निं प्रहिणोमि दूरं
यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा
देवेभ्यो हव्यं वहतु प्रजानन्” ॥

“क्रव्यं आमिषं अत्ति क्रव्यादः तं तीव्रमग्निं दूरं विप्रकृष्टे देशे प्रहिणोमि प्रगमयामि । रिप्रं पापं तस्य वाहः वोढ़ा यद्वा रिप्रं पापं वहति उपपदे “कर्म्मण्यण्” इति वह+अण् । सोऽग्निः यमराज्ञः यमो राजा येषां तान् यमराजकान् प्रदेशान् गच्छतु प्राप्नोतु । अथ शान्तिकर्म्मार्थं उपासने इतरः क्रव्यादादन्यः जातवेदा अग्निः इहैव देशे देवेभ्यः देवार्थं हव्यं वहतु” ॥ इति भाष्यम् ॥

क्रव्यं मांसं अत्ति । अद+उपपदे “कर्म्मण्यण्” । ३ । २ । १ । इत्यण् । रुरुनामाममांसाशिमृगभेदः ।

यथा, भागवते । ५ । २६ । ११ ।

“एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः” ॥)

क्रान्त, पुं, (क्रम्यते आक्रम्यते इति । क्रम + क्त ।) घोटकः । इति त्रिकाण्डशेषः ॥ (पादेन्द्रियम् । यथा, मनौ । १२ । १२१ ।
“मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्” ॥
“क्रान्ते पादेन्द्रिये विष्णुमिति” । कुल्लूकभट्टः ॥
भावे + क्त । क्ली, आरूढम् । क्रमणम् । यथा माघे ।
“क्रान्तं रुचा काञ्चनवप्रभाजा” ॥
यथा च शतपथब्राह्मणे ५ । ४ । २ । ६ ।
“विष्णोः क्रान्तमसीतीमे लोका विष्णो-र्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तम्” ॥)
आक्रान्ते त्रि ॥

क्रान्ता, स्त्री, (क्रम + कर्त्तरि क्त । स्त्रियां जातित्वेपि सयोगोपधत्वात् टाप् ।) बृहती । इति राजनिर्घण्टः ॥

क्रान्तिः, स्त्री, (क्रम + भावे क्तिन् ।) खगोलमध्य-वर्त्तिसूर्य्यगमनार्थतिर्य्यग्गोलरेखा । यथा,—
“अयनादयनं यावत् कक्षा तिर्य्यक् तथापरा ।
क्रान्तिसंज्ञा तया सूर्य्यः सदा पर्य्येति भासयन्” ॥
इति सूर्य्यसिद्धान्ते गोलाध्याये ॥ “नाडीमण्डलात् दक्षिणोत्तरं क्रान्तिमण्डलावधियदन्तरं तत्” । इति तट्टीकायां रङ्गनाथविदाम्वरः ॥ तत्पर्य्यायः । अपमण्डलम् २ अपवृत्तम् ३ अपक्रमः ४ अप-क्रान्तिः ५ । इति सूर्य्यसिद्धान्तः ॥ अपमः ६ । इति सिद्धान्तशिरोमणिः ॥ इष्टक्रान्त्यानयनक्रमो यथा,—
“परमापक्रमज्या च सप्तरन्ध्रगुणेन्दवः ।
तद्गुणाज्या त्रिजीवाप्ता तच्चापं क्रान्तिरुच्यते” ॥
इति सूर्य्यसिद्धान्तः ॥ * ॥ आक्रमः । इति हेम-चन्द्रः ॥ गतिः । गत्यर्थात् क्रमधातोर्भावे क्तिन्-प्रत्ययात् तथात्वम् ॥

क्रान्तिवलयः, पुं, (सूर्य्यसिद्धान्तोक्ता क्रान्तिरेव वलयं वृत्तम् ।) क्रान्तिमण्डलम् । विषुवद्वृत्तात् चतुर्विंशतिभागैर्दक्षिणे चोत्तरे यद्वृत्तं तत् । इति सिद्धान्तशिरोमणिः ॥

क्रान्तुः, पुं, (क्रामतीति । “क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्चेति” । उणां ५ । ४३ । इति तुन् वृद्धिश्च ।) पक्षी । इत्युणादिकोषः ॥

क्रायकः, पुं, (क्रीणाति इति । कर्त्तरि ण्वुल् ।) क्रेता । इत्यमरः ॥ क्रयजीवी । इत्यमरटीकायां भरतः ॥

क्रिमिः, पुं, (क्रमु पादविक्षेपे । “क्रमितमिशतिस्तम्भामत इच्च” । उणां ४ । १२१ । इति इन् कित् अत इच्च ।) कीटः । कृमयः । इत्यमरटीकायां भरतः ॥ रोगविशेषः । तस्य प्रकारो यथा,—
“क्रिमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः ।
बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ॥
नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः ।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः ।
द्विधा ते कोठपिडकाः कण्डूगण्डान् प्रकुर्व्वते ॥*॥

निदानम् यथा ।
“अजीर्णभोजी मधुराम्लनित्यो
द्रवप्रियः पिष्टगुडोपभोक्ता ।
व्यायामवर्जी च दिवाशयानो
विरुद्धभुक् संलभते क्रिमींश्च” ॥

पुरीषजनिदानं यथा,—
“मांसपिष्टान्नलवणगुडशाकैः पुरीषजाः” ॥ * ॥

कफजनिदानं यथा,—
“मांसमाषगुडक्षीरदधिशुक्तैः कफोद्भवाः” ॥

रक्तजनिदानं यथा,—
“विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि” ॥

अभ्यन्तरक्रिमिलक्षणं यथा,—
“ज्वरो विवर्णता शूलं हृद्रोगश्छर्द्दनं भ्रमः ।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम्” ॥

कफजरूपं यथा,—
“कफादामाशये जाता वृद्धाः सर्पन्ति सर्व्वतः ॥
पृथुब्रध्ननिभाः केचित् केचिद्गण्डूपदोपमाः ।
रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाणवः ॥
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ।
अन्त्रादा उदरावेष्टा हृदयादा महागुदाः ॥
चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्व्वते ।
हृल्लासमास्यस्रवणमविपाकमरोचकम् ॥
मूर्च्छाच्छर्द्दिज्वरानाहकार्श्यक्षवथुपीनसान्” ॥ * ॥

रक्तजरूपं यथा,—
“रक्तवाहिशिरास्थाना रक्तजा जन्तवोऽणवः ॥
अपादा वृत्तताम्राश्च सौक्ष्म्यात् केचिददर्शनाः ।
केशादा रोमविध्वंसा रोमद्वीपा उदुम्बराः ॥
षट् ते कुष्ठककर्म्माणः सहसौरसमातरः” ॥

विड्जरूपं यथा,—
“पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।
वृद्धास्ते स्युर्भवेयुश्च ते यदामाशयोन्मुखाः ।
तदास्योद्गारनिश्वासविड्गन्धानुविधायिनः ॥
पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः ।
ते पञ्च नाम्ना क्रिमयः ककेरुकमकेरुकाः ॥
सौसुरादाः सशूलाख्या लेलिहा जनयन्ति हि” ॥

विमार्गगक्रिमिलक्षणं यथा,—
“विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ।
रोमहर्षाग्निसदनगुदकण्डूर्विमार्गगाः” ॥
इति माधवकरः ॥

(अस्य सहेतुकलक्षणचिकित्सितानि यथा,—
“इह खल्वग्निवेश विंशतिविधाः क्रिमयः पूर्व्वमुक्ता नानाविधेन प्रविभागेनान्यत्र सहजेभ्यः । ते पुनः प्रकृतिभिर्भिद्यमानाश्चतुर्व्विधास्तद्यथा । पुरीषजाः श्लेष्मजाः शोणितजाः मलजाश्चेति । तत्र मलो बाह्यश्चाभ्यन्तरश्च । तत्र बाह्ये मले जातान् मलजान् सञ्चक्ष्महे, तेषां समुत्थानं मृजावर्ज्जनं, स्थानं केशश्मश्रुलोमपक्ष्मवासांसि, संस्थानमणवस्तिलाकृतयो बहुपादाः वर्णः कृष्णः शुक्लश्च, नामानि यूकाः पिपीलिकाश्चेति, प्रभावः कण्डूजननं कोठपिडकाभिनिर्व्वर्त्तनञ्च, चिकित्सितं त्वेषामपकर्षणं मलोपघातो मलकराणाञ्च भावानामनुपसेवनमिति । शोणितजानान्तु कुष्ठैः समानं समुत्थानं, स्थानं रक्तवाहिन्यो धमन्यः, संस्थानमणवो वृत्ताश्चापादाश्च सूक्ष्मत्वाच्चैके भवन्त्यदृश्याः, वर्णस्ताम्रः, नामानि केशादा लोमादा लोमद्वीपाः सौरसा औदुम्बरा जन्तुमातरश्चेति । प्रभावः केशश्मश्रुनखलोमापध्वंसो व्रणगतानाञ्च हर्षकण्डूतोदसंसर्पणान्यतिवृद्धानाञ्च त्वक्शिरास्नायु-मांसतरुणास्थिभक्षणमिति, चिकित्सितमप्येषां कुष्ठैः समानं तदुत्तरकालमुपदेक्ष्यते ।

श्लेष्मजाः क्षीरगुडतिलमत्स्यानूपमांस-पिष्टान्न-परमान्नकुसुम्भस्नेहाजीर्णपूतिक्लिन्नसङ्कीर्णविरुद्धासात्म्यभोजनसमुत्थानाः । तेषामाशयः स्थानं प्रवर्द्धमानास्तूर्द्ध्वमधो वा विसर्पन्ति, उभयतो वा । संस्थानवर्णविशेषास्तु श्वेताः पृथुब्रध्नसंस्थानाः केचित्, केचिद्वृत्तपरिणाहाः गण्डूपदाकृतयश्च श्वेतास्ताम्रावभासाः, केचिदणवो दीर्घास्तन्त्वाकृतयः श्वेताः । तेषां त्रिविधानां श्लेष्मनिमित्तानां क्रिमीणां नामानि, अन्त्रादा, उदरादा, हृदयादाश्चुरवो दर्भपुष्पाः, सौगन्धिकाः, महागुदाश्च इति । प्रभावो हृल्लासास्यसंस्रवणमरोचकाविपाकौ ज्वरो मूर्च्छाजृम्भाक्षवथुरानाहोऽङ्गमर्दः छर्द्दिः कार्श्यं पारुष्यमिति ।

पुरीषजास्तुल्यसमुत्थानाः श्लेष्मजैस्तेषां स्थानं पक्वाशयः । प्रवर्द्धमानास्त्वधो विसर्पन्ति । यस्य पुनरामाशयाभिमुखाः स्युस्तदनन्तरं तस्योद्गारनिश्वासाः पुरीषगन्धिनः स्युः । संस्थानवर्णविशेषास्तु सूक्ष्मवृत्तपरीणाहाः श्वेता दीर्घा ऊर्णांशुकसङ्काशाः केचित् केचित् पुनः स्थूलवृत्तपरीणाहाः श्यावनीलहरितपीताः । तेषां नामानि ककेरुकमकेरुकाः लेलिहाः सशूलकाः सौसुरादाश्चेति । प्रभावः पुरीषभेदः कार्श्यं पारुष्यं लोमहर्षाभिनिर्व्वर्त्तनञ्च । त एव चास्य गुदमुखं परितुदन्तः कण्डूञ्चोपजनयन्तो गुदमुखं पर्य्यासते । त एव जातहर्षा गुदान्निष्क्रमणमतिवेलं कुर्व्वन्ति ।

इत्येषः श्लेष्मजानां पुरीषजानाञ्च क्रिमीणां समुत्थानादिविशेषः । चिकित्सितन्तु खल्वेषां समासेनोपदिश्य पश्चाद्विस्तरेणोपदेक्ष्यते । तत्र सर्व्वक्रिमीणामपकर्षणमेवादितः कार्य्यम् । ततः प्रकृतिविघातोऽनन्तरं निदानोक्तानां भावानामनुपसेवनमिति ।

तत्रापकर्षणं हस्तेनाभिगृह्यापनयनमुपकरणवतानुपकरणेन वा । स्थानगतानान्तु क्रिमीणां भेषजेनापकर्षणं न्यायतश्चतुर्विधमिति । तद्यथा,—शिरोविरेचनं वमनं विरेचनमास्थापनमित्यपकर्षणविधिः ।

प्रकृतिविघातस्त्वेषां कटुतिक्तकषायक्षारोष्णानां द्रव्याणामुपयोगो यच्चान्यदपि किञ्चित् श्लेष्मपुरीषप्रत्यनीकभूतं तत्स्यादिति प्रकृतिविघातः ।

अनन्तरं निदानोक्तानां भावानामनुपसेवनम् । यदुक्तं निदानविधौ, तस्य वर्ज्जनं तथाविध

क्रिमिः
क्रिमिः

प्रायाणां चापरेषां द्रव्याणामिति लक्षणतश्चिकित्सितमनुव्याख्यातमेतदेव पुनर्विस्तरेणोपदेक्ष्यते।

अथैनं क्रिमिकोष्ठमातुरमग्रे षड्रात्रं सप्तरात्रं वा स्नेहस्वेदाभ्यामुपपाद्य श्वोभूते एनं संशोधनं पाययितास्मीति, क्षीरदधिगुडतिलमत्स्यानूपमांसपिष्टान्नपरमान्नकुसुम्भस्नेहसम्प्रयुक्तैर्भोज्यैः सायम्प्रातरुपपादयेत् समुदीरणार्थञ्चैव क्रिमीणाङ्कोष्ठाभिसरणार्थञ्च। भिषगथ व्युष्टायां रजन्यां सुखोषितं सुप्रजीर्णभक्तञ्चाज्ञायास्थापनवमनविरेचनैस्तदहरेवोपपादयेत्। उपपादनीयस्येत्यात् सर्व्वान् परीक्ष्य विशेषान् समीक्ष्य सम्यक्। अथाहरेति ब्रूयात्। मूलक-सर्षपलशुनक-रञ्ज-शिग्रु-खरपुष्पभूस्तृण-सुमुख-सुरस-कुठेरक-कण्डीर-कालमालपर्णासक्षवकफणिज्झकानि सर्व्वाण्यथवा यथालाभम्। तान्याहृतान्यभिसमीक्ष्य खण्डशश्छेदयित्वा प्रक्षाल्य पानीयेन सुप्रक्षालितायां स्थाल्यां समावाप्य गोमूत्रेणार्द्धोदकेनाभ्यासिच्य साधयेत्। सततमवघट्टयन् दर्व्व्या तमुपयुक्तभूयिष्ठेऽम्भसि। गतरसेष्वौषधेषु स्थालीमवतार्य सुपरिपूतं कषायं सुखोष्णं मदनफल-विडङ्गकल्कतैलोपहितं स्वर्जिकालवणमभ्यासिच्य वस्तौ विधिवदास्थापयेदेनम्"।

"मदनफलपिप्पलीकषायेणाञ्जलिमात्रेण त्रिवृत्कल्काक्षमात्रमालोड्य पातुमस्मै प्रयच्छेत्। तदस्य दोषमुभयतो निर्हरति साधु। एवमेव कल्पोक्तानि वमनविरेचनानि संसृज्य पाययेदेनं बुद्ध्या सर्व्वविशेषानवेक्षमाणः।

अथैनं सम्यग्विरिक्तं विज्ञायापराह्णे शैखरिककषायेण सुखोष्णेन परिषेचयेत्। तेनैव च कषायेण वाह्याभ्यन्तरान् सर्व्वोदकार्थान् कारयेत् शश्वत्। तदभावे वा कटुकतिक्तकषायाणामौषधानां क्वाथैर्मूत्रक्षारैर्वा परिषेचयेत्। परिषिक्तश्च एव निवातमागारमनुप्रवेश्य पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरसिद्धेन यवाग्वादिना क्रमेणोपक्रामयेत्। विलेप्याक्रमागतञ्चैनमनुवासयेत् विडङ्गतैलेनैकान्तरं द्विस्त्रिर्व्वा। यदि पुनरस्यातिप्रवृद्धान् शीर्षादीन् क्रिमीन् मन्येत, शिरस्येवाभिसर्पतः कदाचित्। ततः स्नेहस्वेदाभ्यामस्य शिर उपपाद्य, विरेचयेदपामार्गतण्डुलादिना शिरोविरेचनेन।

यस्त्वभ्यासार्थ्येविधिः प्रकृतिविघातोक्तः क्रिमीणां सोऽनुव्याख्यास्यते। मूषिकपर्णीं समूलाग्रप्रतानामपहृत्य खण्डशश्छेदयित्वा उदूखले क्षोदयित्वा पाणिभ्यां पीडयित्वा च रसं गृह्णीयात्। तेन रसेन लोहितशालितण्डुलपिष्टं समालोड्य पूपलिकां कृत्वा विधूमेष्वङ्गारेषूपकुड्य विडङ्गतैललवणोपहितां क्रिमिकोष्ठाय भक्षयितुमुपयच्छेत्। तदनन्तरमम्लकाञ्जिकमुदश्विद्वा पिप्पल्यादि पञ्चवर्गसंसृष्टं सलवणमनुपाययेत्"।

"अथाश्वशकृदाहृत्य महति किलिञ्जे प्रतीर्य्यातपे शोषयित्वोदूखले क्षोदयित्वा दृषदि पुनः सूक्ष्माणि चूर्णानि कारयित्वा विडङ्गकषायेण त्रिफलाकषायेण वा अष्टकृत्वो दशकृत्वो वा आतपे सुपरिभावितानि भावयित्वा दृषदि पुनः सूक्ष्माणि चूर्णानि कारयित्वा नवे कलसे समवाप्यानुगुप्तं निधापयेत्। तेषान्तु खलु चूर्णानां पाणितलं पूर्णं यावद्वा साधु मन्येत क्षौद्रेण संसृज्य क्रिमिकोष्ठाय लेढुम्प्रयच्छेत्॥

तथा भल्लातकास्थीन्याहार्य्य कलसप्रमाणेन सम्भोद्य स्नेहभाविते दृढे कलसे सूक्ष्मानेकच्छिद्रब्रध्ने मृदावलिप्ते समवाप्योडुपेन पिधाय भूमावाकण्ठं निखातस्य स्नेहभावितस्यैव दृढस्योपरि कुम्भस्यारोप्य समन्तात् गोमयैरुपचित्य दाहयेत्। स यदा जानीयात् साधु दग्धानि गोमयानि विगतस्नेहानि भल्लातकास्थीनीति ततस्तं कुम्भमुद्धारयेत्। अथ तस्मात् द्वितीयात् कुम्भात्तं स्नेहमादाय विडङ्गतण्डुलचूर्णैः स्नेहार्द्धमात्रैः प्रतिसंसृज्यातपे सर्व्वमहः स्थापयित्वा ततोऽस्मै मात्रां प्रयच्छेत् पानाय। तेन साधु विरिच्यते विरिक्तस्य चानुपूर्व्वी यथोक्ता"॥

"अथाहरेति ब्रूयात् शारदान्नवांस्तिलान् सम्पदुपेतानाहृत्य सुनिष्पूतान्निष्पूय सुशुद्धान् शोधयित्वा विडङ्गकषाये सुखोष्णे प्रक्षिप्य सुनिर्व्वापितान् निर्व्वापयेत् आदोषशमनात्। गतदोषानभिसमीक्ष्य सुप्रलूनान् प्रलुच्य पुनरेव सुनिष्पूतान्निष्पूय सुशुद्धान् शोधयित्वा विडङ्गकषायेण त्रिःसप्तकृत्वः सुपरिभावितान् भावयित्वातपे शोधयित्वोदूखले संक्षुद्य दृषदि पुनः श्लक्ष्णपिष्टान् कारयित्वा द्रोण्यामभ्यवधाय विडङ्गकषायेण मुहुर्मुहुरवसिञ्चन् पाणिमर्द्दं मर्द्दयेत्। तस्मिन् खलु प्रपीड्यमाने यत्तैलमुपदियात् तत्पाणिभ्यां पर्य्यादाय शुचौ दृढे कलसे समासिच्यानुगुप्तन्निधापयेत्। अथाहरेति ब्रूयात् तिल्वकोद्दालकयोर्द्वौ विल्वमात्रौ पिण्डौ श्लक्ष्णपिष्टौ विडङ्गकषायेण, ततोऽर्द्धमात्रौ श्यामात्रिवृतयोरर्द्धमात्रौ दन्तीद्रवन्त्योरतो अर्द्धमात्रौ चव्यचित्रकयोरित्येतत् सम्भारं विडङ्ग-कषायस्यार्द्धाढकमात्रेण प्रतिसंसृज्य ततस्तैलप्रस्थमावाप्य सर्व्वमालोड्य महति पर्य्योगे समासिच्याग्नावधिश्रित्य महत्यासने सुखोपविष्टः सर्व्वतः स्नेहमवलोकयन्नजस्रं मृद्वग्निना साधयेद्दर्व्व्या सततमवघट्टयन्। स यदा जानीयाद्विरमति शब्दः, प्रशाम्यति च फेणः, प्रसादमापद्यते स्नेहो यथास्वञ्च गन्धवर्णरसोत्पत्तिः संवर्त्तते, भैषजमङ्गुलिभ्यां मृद्यमानमनतिमृदुमनतिदारुणमनङ्गुलिग्राहि चेति। स कालस्तस्यावतारणाय। ततस्तमवतीर्य्य शीतीभूतं महता वाससा परिपूय शुचौ दृढे कलसे समासिच्य पिधानेन पिधाय शुक्लेन वस्त्रपट्टेनाच्छाद्य सूत्रेण सुबद्धं अनुगुप्तन्निधापयेत्। ततोऽस्मै मात्राम्प्रयच्छेत् पानाय। तेन साधु विरिच्यते। सम्यगपहृतदोषस्य चास्यानुपूर्व्वी यथोक्ता। ततश्चैनमनुवासयेदनुवासनकाले"॥

"इत्येतत् दयानां श्लेष्म-पुरीष-सम्भवानां क्रिमीणां समुत्थानस्थानसंस्थानवर्ण-नाम-प्रभाव-चिकित्सितविशेषा व्याख्याता सामान्यतः। विशेषतस्त्वल्पमात्रमास्थापनानुवासनानुलोमहरणभूयिष्ठं तेष्वौषधेषु पुरीषजानां क्रिमीणां चिकित्सितं कार्य्यं मात्राधिकं पुनः शिरोविरेचनवमनोपशमनभूयिष्ठं तेष्वौषधेषु श्लेष्मजानां क्रिमीणां चिकित्सितं कार्य्यम्। इत्येष क्रिमिघ्नो भेषजविधिरनुव्याख्यातो भवति"॥ इति चरके विमानस्थाने सप्तमोऽध्यायः॥ * ॥

"सूतं गन्धं मृतं लौहं मरिचं विषमेव च।
मुस्तकं त्रिफला शुण्ठी धातकी सरसाञ्जनम्॥
व्यूषणं मुस्तकं पाठा वालकं विल्वमेव च।
एतानि समभागानि स्वरसैर्भृङ्गजैस्तथा॥
वराटिका प्रमाणेन भक्षणाय विशेषतः।
क्रिमिरोगविनाशाय क्रिमिरोगविनाशनः"॥

इति क्रिमिरोगारिरसः॥ * ॥

"क्रमेण वृद्धं रसगन्धकाज-
मोदा विडङ्गं विषमुष्टिका च।
पलाशवीजञ्च विचूर्णमस्य
निष्कप्रमाणं मधुनावलीढम्॥
पिवेत् कषायं घनजं तदूर्द्ध्वं
रसोऽयमुक्तः क्रिमिमुद्गराख्यः।
क्रिमीन्निहन्यात् क्रिमिजांश्च रोगान्
सन्दीपयत्यग्निमयं चिरात्रात्"॥

इति क्रिमिमुद्गरो रसः॥

इति वैद्यकरसेन्द्रसारसंग्रहे क्रिमिरोगाधिकारे॥ * ॥

अथास्य पथ्यापथ्यविधिः। पथ्यानि यथा,—

"आस्थापनं कायशिरोविरेचनं
धूमः कफघ्नानि शरीरमार्ज्जना।
चिरन्तना वेणवरक्तशालयः
पटोलवेत्राग्ररसोनवास्तुकम्॥
ऊताशमन्दारदलानि सर्षपा
नवीनमोचं वृहतीफलान्यपि।
तिक्तानि नाली च दलानि मौषिकं
मांसं विडङ्गं पिचुमर्द्दपल्लवम्॥
पथ्या च तैलन्तिलसर्षपोद्भवं
सौवीरशुक्तञ्च तुषोदकं मधु।
पचेलिमं तालमरुष्करं गवां
मूत्रञ्च ताम्बूलसुराम्रगाण्डजम्॥
कोष्ठाणि मूत्राण्यपयांसि रामठं
क्षाराजमोदा खदिरश्च वत्सकम्।
जम्बीरनीरं सुषवी यमानिका
क्षाराः सुराह्वा गुरुशिंशपोद्भवाः॥
तिक्तः कषायः कटुको रसोऽप्ययं
वर्गो नराणां क्रिमिरोगिणां सुखः"॥ * ॥

अपथ्यानि यथा,—

"छर्दिञ्च तद्वेगविधारणञ्च
विरुद्धपानाशनवह्निनिद्राम्।
द्रवञ्च पिष्टान्नमणीयसञ्च
घृतानि माषान् दधिपत्रशाकम्॥
मांसं पयोऽम्लं मधुरं रसञ्च
क्रिमीन् जिघांसुः परिवर्ज्जयेच्च"॥

इति वैद्यकक्रिमिरोगपथ्यापथ्यविधिग्रन्थे ॥)

क्रिमिकण्टकं, क्ली, (क्रिमौ कण्टकमिव ।) कृमि-कण्टकम् । इति मेदिनी ॥

क्रिमिघ्नः, पुं, (क्रिमिं हन्ति नाशयतीति । “अमनुष्यकर्त्तृके च” । ३ । २ । ५३ । इति टक् । मूलविभुजादित्वात् सिद्धं । अत् पूर्व्वस्येति नियमान्न णत्वम् ।) कृमिघ्नं । विडङ्गः । इत्यमरटीकायां रमानाथः ॥ (क्रिमिरोगनाशकौषधविशेषः ।

“क्रिमिघ्नं किंशुकारिष्टवीजं सरसमस्तकम् ।
वल्लद्वयञ्चाखुपर्णीरसैः क्रिमिविनाशनः” ॥
इति क्रिमिघ्नो रसः ॥

इति वैद्यकरसेन्द्रसारसंग्रहे क्रिम्यधिकारे ॥)

क्रिमिघ्नी, स्त्री, (क्रिमिघ्न + टित्वात् स्त्रियां ङीप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

क्रिमिजं, क्ली. (क्रिमिभ्यः जायते इति । “अन्येष्वपि दृश्यते” ।३।२।१०१। इति ड ।) अगुरु । इत्यमरः ॥

क्रिमिजा, स्त्री, (क्रिमिज + स्त्रियां टाप् ।) लाक्षा । इति रत्नमाला ॥

क्रिमिशत्रुः, पुं, (क्रिमेः शत्रुरिव नाशकत्वात् ।) रक्तपुष्पकः । इति शब्दचन्द्रिका । पालितामादार इति भाषा ॥

क्रिमिशात्रव, पुं, (शत्रु + स्वार्थे अण् शात्रव । क्रिमेः शात्रव इव तन्नाशकत्वात् ।) विट्खदिरः । इति शब्दचन्द्रिका ॥

क्रिमिशैलः, पुं, (क्रिमिभिर्निर्म्मितः शैल इव ।) वल्मीकः । इति त्रिकाण्डशेषः ॥

क्रियः, पुं, (क्रिया ग्रहाणामाद्यगतिक्रिया विद्यतेऽत्र अर्श आदेरच् ।) मेषराशिः । इति दीपिका ॥

क्रिया, स्त्री, (क्रियते अनया असौ अस्मिन् इति वा । डु कृ ञ् करणे करणकर्म्माधिकरणादौ च यथायथं श प्रत्ययः । “रिङ् शयग्लिङ्क्षु” । ७ । ४ । २८ । इति रिङादेशः । “अचिश्नुधातुभ्रुवां य्वोरियङुवङौ” । ६ । ४ । ७७ । इति इयङ् ।) आरम्भः । निष्कृतिः । शिक्षा । पूजनम् । सम्प्रधारणम् । उपायः । कर्म्म । तन्नवविधम् । यथा,—

“आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः” ॥

इति भावप्रकाशः ॥ चेष्टा । चिकित्सा । इत्यमरः । ३ । ३ । १५६ ॥ कारणम् । इति हेमचन्द्रः ॥ श्राद्धम् । इत्यमरटीकायां स्वामी ॥ शौचम् । इति शब्दरत्नावली ॥ धात्वर्थः करोत्यर्थो वा । इति वैयाकरणाः ॥ क्रियाः साध्यरूपा वस्तुधर्म्माः पाकादयः एषु हि अधिश्रयणादयः अधश्रयणान्तादिः पूर्व्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः । इति साहित्यदर्पणम् ॥ चतुःप्रकारव्यवहारपादान्तर्गतव्यवहारपादविशेषः । सा द्विधा मानुषी दैविकी च । तत्राद्या साक्ष्यलेख्यानुमानभेदेन त्रिधा । द्वितीया घटाग्न्युदकविषकोषतण्डुलतप्तमाषकफालधर्म्मजभेदेन नवधा दिव्यानि । यथा,—

“द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी । तथा
साक्ष्यलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता ।
धटाद्या धर्म्मजान्ताश्च दैविकी नवधा स्मृता” ॥

इति व्यवहारतत्त्वे वृहस्पतिः ॥ (चिकित्साकार्य्यं यथा,—चरके सूत्रस्थाने १७ अध्याये ॥

“याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम् ॥
कथं शरीरे धातूनां वैषम्यं न भवेदिति ।
समानाञ्चानुबन्धः स्यादित्यर्थं क्रियते क्रिया” ॥
“यात्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्” ॥
शीते शीतप्रतीकार उष्णोचोष्णनिवारणम् ।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्” ॥

इति च सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

क्रियाकारः, पुं, (क्रियां शिक्षारम्भं करोतीति । कृ + उपपदे “कर्म्मण्यण्” ३ । २ । १ । इत्यण् ।) नवच्छात्रः । नूतन पडुया इति भाषा । इति त्रिकाण्डशेषः ॥ कर्म्मकर्त्तरि त्रि ॥

क्रियाद्वेषी, [न्] पुं, (क्रियां व्यवहाराङ्गसाधनं साक्षिलेख्यादिकं द्वेष्टि । द्विष् + णिनि ।) साक्ष्यलिखितभुक्तियुक्तिशपथद्वेष्टा । स च व्यवहारविषये पञ्चधा । हीनान्तर्गतहीनविशेषः । यथाह,—व्यवहारतत्त्वे नारदः ।

“अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः” ॥

(तल्लक्षणं यथा । वीरमित्रधृतकात्यायनवचने ।

“लेख्यञ्च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः ।
तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते” ॥)

कर्म्मद्वेष्टरि त्रि ॥

क्रियापादः, पुं, (क्रिया विवादसाधनं पाद इव ।) चतुष्पादव्यवहारान्तर्गततृतीयपादः । यथा,—

“पूर्व्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः” ॥

इति वृहस्पतिः ॥ स च साक्ष्यलिखितभुक्तियुक्तिशपथरूपः । इति व्यवहारतत्त्वम् ॥

क्रियाभ्युपगमः, पुं, (क्रियायाः कर्षणादिक्रियार्थं अभ्युपगमः स्वीकारः ।) परस्परक्रियास्वीकारः । द्वयोः पुरुषयोः कस्मिंश्चिद्विषये परस्पराङ्गीकारेण अनुमतिः । यथा,—

“क्रियाभ्युपगमात् क्षेत्रं वीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ वीजी क्षेत्रिक एव च” ॥

इति मनुः ॥ अस्यार्थः । “यदत्रापत्यं भविष्यति तदावयोरुभयोरेवेति नियम्यैवं क्षेत्रस्वामिना वीजवपनार्थं यद्वीजिने दीयते तस्यापत्यस्य लोके वीजिक्षेत्रिणौ द्वावपि भागिनौ दृष्टौ” । इति कुल्लूकभट्टः ॥ उपलक्षणमेतत् ॥

क्रियायोगः, पुं, (क्रियैव योगः योगः उपायः ।) देवाराधनतदालयादिकरणरूपपुण्यक्रिया । यथा,—

नारद उवाच ।

“क्रियायोगः कथं प्रोक्तस्त्वया मे प्रपितामह ! ।
तदहं श्रोतुमिच्छामि परं चास्य यथातथम् ॥

ब्रह्मोवाच ।

ज्ञानयोगस्तु योगस्य यस्तु साधनमात्मनः ।
यस्तु वाह्यार्थसंयोगः क्रियायोगः स उच्यते ॥
प्रधानं कारणं योगो मुक्तेर्मुनिवरोत्तम ! ।
क्रियायोगस्तु योगस्य परमं तात ! साधनम् ॥
यदेतद्भवता पृष्टं तदिहैकमनाः शृणु ।
येस्तु देवालयं विष्णोः शुभं दारुमयं कृतम् ॥
कारयेन्मृण्मयं वापि शृणु तस्य फलं मुने ! ।
अहन्यहनि योगेन यजतो यन्महाफलम् ॥
प्राप्नोति तत् फलं विष्णोर्यः कारयति मन्दिरम् ।
कुलानां शतमागामि समतीतं तथा शतम् ॥
कारयेद्भगवद्धाम नयत्यच्युतमन्दिरम् ।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ।
पतितं पतमानन्तु तथार्द्धपतितं तथा ॥
समुद्धृत्य हरेर्द्धाम द्विगुणं फलमाप्नुयात् ॥
“प्रतिमा लक्षणवतीं यः कुर्य्याच्चैव मानवः ॥
केशवस्य परं लोकमक्षयं प्रतिपद्यते ।
अनुज्ञातो मया राज्ये यमो राजाथ किङ्कराः ॥
केवलं ये जगद्धाममनन्तं समुपाश्रिताः ।
भवद्भिः परिहार्य्यास्ते तेषां नास्तीह संस्थितिः ॥
नम कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्दूतास्ते च त्याज्याः सुदूरतः ॥
दानं ददद्भिर्यैरुक्तमच्युतः प्रीयतामिति ।
श्रद्धापुरःसरैर्नित्यं ते च त्याज्याः सुदूरतः” ॥

इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनं नामाध्यायः ॥ तथा च पातञ्जले ।

“तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगाः” ॥)

क्रियावसन्नः, त्रि, (क्रियया अवसन्नः ।) साक्ष्यादिना प्राप्तपराजयः । यथा,—

“स्वयमभ्युपपन्नो हि स्वचर्य्यावसितोऽपि सन् ।
क्रियावसन्नो वादे तु परं सभ्यावधारणम्” ॥

इति व्यवहारतत्त्वम् ॥

क्रियावान्, [त्] त्रि, (क्रिया अस्यास्तीति मतुप् । मस्य वः ।) कर्म्मसूद्यतः । क्रियासु नियुक्तः । इत्यमरः । ३ । १ । १८ ॥ (यथा, भट्टिः । १ । १० ।

“पुत्त्रीयता तेन वराङ्गनाभि-
रानायि विद्वान् क्रतुषु क्रियावान्” ॥)

क्रियावादी, [न्] पुं, (क्रियां क्रियासाध्यं वदति । वद + णिनि ।) प्रमाणवादी । कार्य्यवादी । इति मिताक्षरा ॥ फरियादी इति पारस्यभाषा ॥

क्रियेन्द्रियं, क्ली, (क्रियायाः कर्म्मणः साधनं इन्द्रियम् ।) कर्म्मेन्द्रियम् । इति हेमचन्द्रः ॥ (तानि च पञ्चसंख्यकानि ज्ञानकर्म्मभेदेन दशसंख्यकानि च प्रसिद्धानि मनस्तु उभयात्मकं सर्व्वेषां प्रवर्त्तकम् । यथा मनौ ।

“श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थपाणिपादवाक् चैव दशमी स्मृता” ॥)

क्री, ञ श ग द्रव्यपर्य्यये । इति कविकल्पद्रुमः ॥ (क्र्या—उभं सकं-अनिट् ।) पर्य्यायः परीवर्त्तः । ञ, क्रीत्त्रिमम् । श ग, क्रीणाति क्रीणीते धान्यं धनेन लोकः । इति दुर्गादासः ॥

क्रीड्, ऋ खेले । इति कविकल्पद्रुमः ॥ (भ्वां-पर-अकं-सेट् ।) ऋ, अचिक्रीडत् । क्रीड़ति

वाल' शिशुभि । इति दुर्गादास ॥

क्रीड, पु, (क्रीड+भावे घञ् ।) परीहास । इति शब्दरत्नावली ॥

क्रीडनं, क्ली, (क्रीड+भावे ल्युट् ।) खेला । यथा ।

"बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि प्रश्रता
तातेकाननसेवनावधि कृपा सुग्रीवसख्यावधि" ।
इति महानाटकम् ॥

क्रीडा, स्त्री, (क्रीड+भावे अप् ततष्टाप् ।) परीहास । खेला । इत्यमर' । १ । ७ । ३३ ॥ (यथा, भागवते । २ । ३ । १५ ।

"स वै भागवतो राजा पाण्डवेयो महारथ ।
बालक्रीडनकै' क्रीडन् कृष्णक्रीडां य आददे" ॥)
अवस्थानम् । इति मेदिनी ॥

क्रीडाताल, पु, (क्रीडानामकस्ताल ।) तालप्रभेद' । यथा,—

"एक एव प्लुतो यत्र क्रीडाताल स कथ्यते ।
अपर नियम विना" । इति सङ्गीतदामोदर ॥

क्रीडारत्न, क्ली, (क्रीडाया क्रीडाया' वा रत्नमिव ।) रति । इति त्रिकाण्डशेषः ॥ [हलायुध ॥

क्रीडारथः, पु, (क्रीडायै रथ ।) क्रीडार्थरथः । इति

क्रीतः, पु, (क्री+कर्म्मणि क्त ।) क्रीतकपुत्त्र । स तु द्वादशविधपुत्त्रान्तर्गतपुत्त्रभेद । इति जटाधर ॥ (यथाह, याज्ञवल्क्य ।

"दद्यात् माता पिता वा यं स पुत्त्रो दत्तको भवेत् ।
क्रीतस्च ताभ्या विक्रीतः कृत्रिमः स्यात् स्वय कृत" ॥)
कृतक्रये त्रि । केना इति भाषा । यथा,—

"दीयमान न गृह्णाति क्रीत पण्यन्तु य क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छत " ॥
इति प्रायश्चित्ततत्त्वे नारद' ॥

क्रीतक, पु, (क्रीत+स्वार्थे कन् ।) क्रीतपुत्त्र । यथा, मनुः । ९ । १७४ ।

"क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा" ॥

क्रीतानुशय, पु, (क्रीते क्रये अनुशय पश्चात्ताप ।) द्रव्य क्रीत्वा पश्चादनुताप । यथा,—

"क्रीत्वा मूल्येन य पण्य क्रेता न बहु मन्यते ।
क्रीतानुशय इत्येतत् विवादपदमुच्यते" ॥
इति याज्ञवल्क्य ॥

क्रुङ्, [च] पुं स्त्री, (क्रुञ्चति वक्र यथा स्यात् तथा गच्छति । "ऋत्विग् दधृक् स्रगिति" । ३ । २ । ५९ । इति निपातनात् साधु' ।) क्रौञ्च' । इत्यमर' । २ । ५ । २२ ॥ कोँच् बक इति भाषा । (यथा, यजुर्वेदे १९ । ७३ ।

"अद्भ्य क्षीर व्यापिबत् क्रुङङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियम्" ।

"आङ्गिरस' अङ्गाना रस प्राणो यथा, क्रुङ् हंसो भूत्वा धिया प्रज्ञया अद्भ्य सकाशात् क्षीर दुग्ध व्यापिबत् पिबति सम्पृक्ताभ्या क्षीरोदकाभ्या क्षीरमेव एषः पिबतीति जातिस्वभाव" । इति भाष्यम् ।)

क्रुञ्च, पुं, (क्रुञ्च+अच् ।) क्रौञ्चपर्व्वत । इति हेमचन्द्र' ॥ (बकविशेष । यथा,यजुर्वेदे २४ । २२ ।

"वायवे बलाका इन्द्राग्निभ्या क्रुञ्चान्" ॥)

क्रुञ्चा, स्त्री, (क्रुञ्च+स्त्रिया सयोगोपधत्वात् टाप् ।) अजादित्वात् टाबित्येके । वीणाभेद । इति शब्दरत्नावली ॥

क्रुत्, [ध्] स्त्री, (क्रुध+सम्पदादित्वात् क्विप् भावे ।) क्रोध । इत्यमरहेमचन्द्रौ ॥ अस्या रूपान्तराणि । क्रुद् । क्रुत् क्रुद् । इति सक्षिप्तसारव्याकरणम् ॥

क्रुद्ध, त्रि, (क्रुध+कर्त्तरि क्त ।) क्रोधयुक्त । यथा ।

"योद्धुमभ्याययौ क्रुद्धो रक्तवीजो महासुर " ॥
इति देवीमाहात्म्यम् ॥ (भावे क्त ।) क्रोधे क्ली ॥

क्रुध, ल्ट य औ कोपे । इति कविकल्पद्रुम ॥ (दिवा-पर-अक-अनिट् ।) ल्ट, अक्रुधत् । य, क्रुध्यति लोक शिशवे । औ, क्रोद्धा । इति दुर्गादास ॥ * ॥ रेखते १ हेलते २ भामते ३ भृणीयते ४ भीणाति ५ मेयति ६ दोधति ७ वनष्यति ८ कम्पते ९ मोजते १० । इति दश क्रुध्यतिकर्म्माण । इति वेदनिघण्टौ २ अध्याय ॥

क्रुधा,स्त्री,(क्रुध्+क्विप् स्त्रिया हलन्तत्वात् वा टाप् ।) क्रोध' । इत्यमरटीकायां भरत ॥

क्रुन्च, गत्याम् । वक्रणे । इति कविकल्पद्रुम ॥ (भ्वा-पर-सक-अक च-सेट् ।)रेफयुक्तादि पञ्चमस्वरी । क्रुञ्चति । इति दुर्गादास' ॥

क्रुश, ग क्लिशि । क्लिशि । इति कविकल्पद्रुम ॥ (क्र्या-पर-अक-सेट् ।) पञ्चमस्वरी रेफयुक्त' । क्लिशि दु'खानुभवे । ग, क्रुश्नाति बुभुक्षार्त्त । इति हलायुध । चुक्रुश । इति दुर्गादास ॥

क्रुश, ज औ रोदे । ह्वतौ । इति कविकल्पद्रुम' ॥ (भ्वा परं-रोदने अक-आह्वाने सक-अनिट् ।) ज, क्रोश' क्रुशः । औ, अक्रुक्षत् । रोदोऽश्रुविमोचनम् । ह्वतिराह्वानम् । इति दुर्गादास ॥

क्रुश्वा, [न्] पु स्त्री, (क्रोशति रौतीति । क्रुश+"लीङ् क्रुशिरुसीति" । उणा ४ । ११३ । इति क्वनिप् ।) शृगाल । इति सिद्धान्तकौमुद्यामुणादिवृत्ति ॥

क्रुष्ट, क्ली, (क्रुश्+भावे क्त ।) रोदनम् । इत्यमर । १ । ७ । ३५ ॥ रावः । इति मेदिनी ॥

क्रूर, त्रि, (कृत् छेदने+"कृतेश्छक्रूच" । उणा २ । २१ । इति रक्प्रत्यय' धातो क्रूादेशश्च ।) परद्रोहकारी । (यथा, मेघदूते । १०७ ।

"क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्त " ॥)
निर्दय । तत्पर्य्याय । नृशस २ घातुक ३ पाप' ४ । (यथा, भागवते । ९ । १४ । ३७ ।

"स्त्रियो ह्यकरुणा क्रूरा दुर्मर्षा प्रियसाहसा " ॥
यथा, च कुमारे । २ । ४८ ।

"तस्मिन्नुपाया सर्व्वे न क्रूरे प्रतिहतक्रिया" ।
"क्रूरे घातुके" इति मल्लिनाथ ॥)
कठिन । इत्यमर । ३ । ३ । १९० ॥
(यथा, रघुवंशे । १२ । ४ ।

"तस्याभिषेकसम्भार कल्पित क्रूरनिश्चया" ॥)
घोर । इति मेदिनी ॥ (यथा, पञ्चतन्त्रे ३ । २५ ।

"क्रूरो लुब्धोऽलसोऽसत्य प्रमादी भीरुरस्थिर" ॥)
उष्ण । इति हेमचन्द्र ॥ प्रथमतृतीयपञ्चमसप्तमनवमैकादशराशयश्च । यथा,—

"ओजोऽथ युग्म विषम समश्च
क्रूरोऽथ सौम्य. पुरुषोऽङ्गना च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमश्च प्रदिष्टा" ॥
इति दीपिका ॥

क्रूर,पु, (कृन्ततीति । "कृतेश्छक्रूच" । उणा २ । २१ । इति रक् धातो क्रूादेशश्च ।) भूताङ्कुशवृक्ष । रक्तकरवीरवृक्ष' । श्येनपक्षी । कङ्कपक्षी । इति राजनिर्घण्ट ॥

क्रूरकर्म्मा, [न्] पु, (क्रूर कर्म्म यस्य ।) भयानककर्म्मकर्त्तरि त्रि ॥ (यथा, पञ्चतन्त्रे । १ । ७० ।

"दिजिह्वा क्रूरकर्म्माणो निष्टाच्छिद्रानुसारिण ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव" ॥)
कटुतुम्बिनीवृक्ष । इति राजनिर्घण्ट ॥ (अर्कपुष्पी । अस्या पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका" ॥)

क्रूरगन्धः,पु, (क्रूर उग्रो गन्धोऽस्य ।) गन्धक । इति राजनिर्घण्ट ॥

क्रूरगन्धा,स्त्री,(क्रूर उग्रो गन्ध एकदेशे ऽस्या । स्त्रियां टाप् ।) कन्थारीवृक्ष । इति राजनिर्घण्ट ॥

क्रूरदृक्, [श्] त्रि, (क्रूरा दृक् दृष्टिर्यस्य । क्रूर यथा स्यात् तथा पश्यति वा । दृश्+क्विन् ।) पिशुन । शनैश्चरे पु । इति मेदिनी ॥ (यथा,— ज्योतिषतत्त्वे । "आरोवक्र क्रूरदृक् चावनेय " ॥)

क्रूरधूर्त्तः पु, (क्रूर कृष्णवर्णतया धूर्त्त इव ।) कृष्णधत्तूरक' । इति राजनिर्घण्ट ॥ (कृष्णधत्तूरकशब्देऽस्य गुणपर्य्याया ज्ञातव्या ॥)

क्रूररावी, [न्] पु, (क्रूरं कर्कशं उग्रं वा रौतीति । रु+णिनि ।) द्रोणकाक । इति राजनिर्घण्टः ॥

क्रूरलोचन, पु, (क्रूरे लोचने क्रूर लोचन वा यस्य ।) शनि । इति हारावली ॥

क्रूरस्वर, त्रि, (क्रूर कर्कश स्वरोऽस्य ।) कर्कशध्वनियुक्त । यथा,—

"क्रूरस्वरा काकोलूकखरष्ट्रोष्ट्राश्वगर्दभा " ॥
इति कविकल्पलतायां द्वितीयस्तबके तृतीयकुसुमम् ॥

क्रूरा, स्त्री, (क्रूर+स्त्रियां जातित्वेऽपि न ङीष् अत टाप् ।) रक्तपुनर्नवा । इति राजनिर्घण्ट ॥

क्रूराकृति, पु, (क्रूरा आकृतिर्यस्य ।) रावण । इति शब्दमाला ॥ (कठोरमूर्त्तौ, त्रि ।)

क्रेणि, पु, (क्री+नि ।) क्रयणम् । इत्युणादिकोष' ।

क्रेतव्य, त्रि, (क्री+कर्म्मणि तव्यत् ।) क्रेयवस्तु । यथा,

"क्रेय क्रेतव्यमात्रके" । इत्यमर । २ । ९ । ८२ ॥

क्रेता, [ऋ] त्रि, (क्री +तृच् ।) क्रयकर्त्ता । यथा ।

"विक्रेतुर्दर्शनाच्छुद्धि' स्वामी द्रव्य नृपो दमम् ।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी" ॥
इति प्रायश्चित्ततत्त्वे याज्ञवल्क्य ॥

क्रेयं, त्रि, (क्री+कर्म्मणि यत् ।) क्रेतव्यमात्रकम् । इत्यमर । १ । ९ । ८१ ॥ किनिवार उपयुक्त द्रव्य इति भाषा ॥

"पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्ण्यपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशीर्धावनिर्गुहा" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्रोष्टेक्षु, पुं, (क्रोष्टोः प्रिय इक्षुः । पृषोदरात् उकारस्य अत्वे सन्धिः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

क्रोष्ट्री, स्त्री, (क्रोष्टु + "तृज्वत् क्रोष्टुः" । इति ऋदन्तात् स्त्रियां ङीप् ।) शृगालभूमिकुष्माण्ड । इत्यमरः । २ । ४ । ११० ॥
('विदारी स्वादुगन्धा च सा तु क्रोष्ट्री सिता स्मृता'॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) शृगालिका । कृष्णविदारी । लाङ्गली । इति मेदिनी ॥

क्रौञ्च, पुं, (क्रुञ्च + प्रज्ञाद्यण् स्वार्थे ।) पक्षिभेदः । कोँच बक इति भाषा । (यथा, रामायणे । १ । १ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥)
तत्पर्य्यायः । क्रुङ् २ क्रुञ्चः ३ क्रुञ्चा ४ क्रौञ्चा ५ । इत्यमरभरतौ ॥ कालिक ६ कालीक ७ कलिक ८ । इति शब्दरत्नावली ॥ (अस्य गुणा यथा,—
"क्रौञ्चो वृष्योऽतिरक्तपित्तघ्नोऽश्मरीं हन्ति नित्यशः ।
शोषमूर्च्छाहरो दीप्यो हन्ति कासमरोचकम्" ॥
इति हारीते प्रथमस्थाने ११ अध्याये ॥)
पर्व्वतविशेषः । इति मेदिनी ॥ (अयन्तु हिमवतः पौत्रः मैनाकस्य पुत्त्रः ।
यथा, हरिवंशे १८ । १३-१४ ।
"एतेषां मानसी कन्या मेना नाम महागिरेः ।
पत्नी हिमवतः श्रेष्ठा यस्या मैनाक उच्यते ॥
मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः ।
पर्व्वतप्रवरः श्रेष्ठो नानारत्नसमन्वितः" ॥)
कुररपक्षी । इति राजनिर्घण्टः ॥ द्वीपभेदः । स च दधिमण्डोदसमुद्रेणावृतः षोडशलक्षयोजनपरिमितः । (यथा, विष्णुपुराणे । २ । ४ । ५७ ५८ ।
"क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च ।
आवृतः सर्व्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥
दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः ।
क्रौञ्चद्वीपस्य विस्ताराद् द्विगुणेन महामुने !" ॥
तस्याधिपतिः प्रियव्रतराजपुत्त्रो घृतपृष्ठः ।
यथा, भागवते । ५ । २० । १८-२० ।
"तथा च वहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परीत उपक्लृप्तो वृतो यथा, कुशद्वीपो घृतोदेन । यस्मिन् क्रौञ्चो नाम पर्व्वतराजो द्वीपनामनिर्वर्त्तक आस्ते ॥ योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्त्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम" । दैत्यविशेषः । स च मयदानवपुत्त्रः । यथा, हरिवंशे । ४६ । २१—२४ ।
"तान्याशु हस्तग्रथिताश्छादितान् प्रीतकर्म्मणा ।
मयो ददर्श माया वै दानवानां महात्मनाम् ॥
स शिलाजालवितता गण्डशैलाट्टहासिनीम् ।
पादपोत्कटकूटाग्रा कन्दराकीर्णकाननाम् ॥
सिंहव्याघ्रगणाकीर्णा नदन्तीमिव यूथपैः ।
ईहामृगगणाकीर्णा पवनाघूर्णितद्रुमाम् ॥
निर्म्मिता स्वेन पुत्त्रेण क्रौञ्चेन दिविकामगाम् ।
प्रहृता पार्व्वतीं माया सद्मने दानवोत्तम" ॥
अयमेवासुरः क्रौञ्चद्वीपे क्रौञ्चपर्व्वते हिमकन्दरे भगवता स्कन्देन निहतः । यथा,—मृगेन्द्रसंहितायाम् ।
"क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हिमकन्दरे ।
स्कन्देन युद्ध्वा सुचिरं चित्रमायी सुमायिना ।
स शैलस्तस्य दैत्यस्य ख्यातश्चित्रेण कर्म्मणा ।
केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" ॥)
अर्हतां भ्रजः । राक्षसविशेषः । इति हेमचन्द्रः ॥

क्रौञ्चदारण, पुं, (क्रौञ्चं स्वनामख्यातपर्व्वतविशेषं दारयतीति । दृ + णिच् + ल्युः । क्रौञ्चस्य दारणः इति केचित् ।) कार्त्तिकेयः । इत्यमरः ।१।१।४३ ॥ अस्य क्रौञ्चदारणकथा महाभारते ३ । मार्कण्डेयसमस्यापर्व्वणि २२४ । ३१-३९ ।
"स तूत्थाय महाबाहुरुपसान्त्व्य च तान् जनान् ।
धनुर्विकृष्य व्यसृजद्बाणान् श्वेते महागिरौ ॥
बिभेद स शरैः शैलं क्रौञ्चं हिमवतः सुतम् ।
तेन हंसाश्च गृध्राश्च मेरुं गच्छन्ति पर्व्वतम् ॥
स विशीर्णोऽपतच्छैलो भृशमार्त्तस्वरान् रुवन् ।
तस्मिन्निपतिते त्वन्ये नेदुः शैला भृशं तदा ॥
स तं नादं भृशार्त्तानां श्रुत्वापि बलिनाम्वरः ।
न प्राव्यथदमेयात्मा शक्तिमुद्यम्य चानदत् ॥
सा तदा विमला शक्तिः क्षिप्ता तेन महात्मना ।
बिभेद शिखरं घोरं श्वेतस्य तरसा गिरेः ॥
स तेनाभिहतो दीर्णो गिरिः श्वेतोऽचलैः सह ।
उत्पपात महीं त्यक्त्वा भीतः स सुमहात्मनः" ॥
क्रौञ्चः असुरविशेषं दारयति नाशयतीति च । क्रौञ्चासुरवधकथा क्रौञ्चशब्दे द्रष्टव्या ॥)

क्रौञ्चा, स्त्री, (क्रौञ्च + टाप् ।) क्रौञ्चभार्य्या । कोँचवकी इति भाषा । इति जटाधरः ॥ (केचित्तु टावन्तं न मन्यन्ते ङीवन्तमेवेच्छन्ति । तथा च रामायणे १ । २ । १४ ।
"निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत्" ॥)

क्रौञ्चादन, क्ली, (अद्यते इति । अद + कर्म्मणि ल्युट् । क्रौञ्चस्य अदनं भक्ष्यम् ।) मृणालम् । घेञ्चुली । घेंचु इति भाषा । चिञ्चोटकः । इति मेदिनी । चेँचको इति भाषा । शोषस्य गुणाः । गुरुत्वम् । अश्मरीकारित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥ ("क्रौञ्चादनं घेञ्चुलिका" । इति वैद्यकरत्नमालायाम् ।) पिप्पली । इति शब्दरत्नावली ॥

क्रौञ्चादनी, स्त्री, (क्रौञ्चादन + ङीप् ।) पद्मवीजम् । इति राजनिर्घण्टः ॥

क्रौञ्चाराति, पुं, (क्रौञ्चस्य स्वनामख्यातस्य पर्व्वतस्य दैत्यस्य वा अरातिः शत्रुः ।) कार्त्तिकेयः । इति हलायुधः ॥

क्रौञ्चारि, पुं, (क्रौञ्चस्य अरिः ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥ परशुरामः । इति शब्दमाला ॥

क्रौशशतिक, पुं, (क्रोशशतं गच्छति । "क्रोशशतयोजनशतयोरुपसङ्ख्यानम्" । वार्त्ति ५ । १ । ७४ । इति ठञ् ।) शतक्रोशगमनकर्त्ता । इति व्याकरणम् ॥ (क्रोशशतादभिगमनमर्हतीति । "ततोऽभिगमनमर्हति" । इति ठञ् क्रोशशतादागन्ता भिक्षुः ॥)

क्लथ, कि म वधे । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-सकं-सेट् ।) अन्तःस्थतृतीययुक्तः । कि, क्लाथयति क्लथति । म, क्लथयति । इति दुर्गादासः ॥

क्लद, इ ञ ङ रुदि । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थतृतीययुक्तः । इ, कर्म्मणि क्लन्द्यते । ञ, क्लन्दति क्लन्दते । ङ, क्लन्दते । रुदि रोदने । इति दुर्गादासः ॥

क्लद, इ ष म ङ रोदने । आह्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं अकं-आह्वाने सकं-सेट् ।) इ, कर्म्मणि क्लन्द्यते । ष, क्लन्दा । म, क्लन्दयति । ङ, क्लन्दते । इति दुर्गादासः ॥

क्लद, ष म ङ वैक्लव्यविकलत्वयोः । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-अकं-सेट् ।) वैक्लव्यं विह्वलीभावः । ष, क्लदा । म, क्लदयति । ङ, क्लदते शोकार्त्तः । इति दुर्गादासः ॥

क्लम, उ भ इर् ग्लानौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् । उदित्वात् क्त्वावेट् ।) अन्तःस्थतृतीययुक्तः । उ, क्लमित्वा क्लान्त्वा । भ, क्लाम्यति । भ्वादिपक्षेऽपि शमादित्व "ष्ठिवुक्लमाचम" इति दीर्घशासनार्थम् । इर्, अक्लमत् अक्लमीत् । इति दुर्गादासः ॥

क्लम, ञि य भ ग्लानौ । इति कविकल्पद्रुमः ॥ (दिवां परं-अकं-सेट् ।) अन्तःस्थतृतीययुक्तः । ञि, क्लान्तोऽस्ति । य भ, क्लाम्यति । इति दुर्गादासः ॥

क्लम, पुं, (क्लम + भावे घञ् । "नोदात्तोपदेशस्येति" । ७ । ३ । ३४ । इति न वृद्धिः ।) आयासः । इत्यमरः । ३ । २ । १० ॥ (यथा, मनौ । ७ । २२५ ।
"तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥ अस्य लक्षणं यथा,—
"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्ज्जितः ।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः" ॥
इति सुश्रुतेन शारीरस्थाने चतुर्थाध्याये उक्तम् ॥)

क्लमथ, पुं, (क्लम + "शमादिभ्योऽथच् इति" अथच् ।) आयासः । इत्यमरः । ३ । २ । १० ॥

क्लव, ष म ङ भये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ष, क्लवा । म, क्लावयति । ङ, क्लवते । विक्लवन्ति दिवि ग्रहाः । इति पचादित्वादनि विक्लवा इवाचरन्तीति क्वौ साध्यम् । इति दुर्गादासः ॥

क्लान्त, त्रि, (क्लम + कर्त्तरि क्त ।) क्लान्तियुक्तः । श्रान्तः । यथाह, जयदेवः ।
"मदनकदनक्लान्त कान्ते ! प्रियस्तव वर्त्तते" ॥
(महाभारते च । ३ । ७३ । २७ ।
"विश्राम्यतामित्युवाच क्लान्तोऽसीति पुनः पुनः" ॥)

क्लिद, इ ञ ङ रुदि । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थतृतीययुक्तः ।

क्लीतकिकं, क्ली, (क्लीतकेन यष्टिमधुकया निर्व्वृत्तं इति ठञ्।) मद्यम्। इति शब्दचन्द्रिका॥ (विवरणमस्य मद्यशब्दे ज्ञातव्यम्॥)

क्लोम, [न्] क्ली, (क्लुङ् गतौ+मनिन्।) फुप्फुसम्। फोँफडा इति फुलफुरा इति च ख्यातम्। इति भरतः॥ तत्पर्य्यायः। तिलकम् २। इत्यमरः॥ २। ६। ६५॥ क्लोमम् ३ क्लोमम् ४। इति तट्टीका॥

"यकृत्प्लीहोर्मध्ये वक्षः तन्मध्ये हृदयं तत्पार्श्वे क्लोम पिपासास्थानम्"। इति वैद्यकम्॥

("उदकवहे द्वे तयोर्मूलं तालु क्लोम च"॥ इति सुश्रुते शारीरस्थाने नवमाध्यायः॥)

क्व, व्य, (कस्मिन्निति "किमोऽत्"। ५। ३। १२। इति अत् तत्र "क्वाति"। ७। २। १०५। इति क्वादेशः।) कुत्र। कोथा इति भाषा। इति व्याकरणम्॥ अत्यन्तासम्भावनाया पण्डितैः क्वद्वयं प्रयुज्यते। यथा, रघुः। १। २।

"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः"॥

क्वङ्गु, पु, (कु+अगि+उन्।) कङ्गु। इति हेमचन्द्रः॥

क्वचन, व्य, (पाणिनिमते पदद्वयमेतत्। मुग्धबोधमते तु "किम त्र्यन्ताच्चिचनौ"। इति चन।) क्वचित्। इति व्याकरणम्॥

क्वचित्, व्य, (पाणिनिमते पदद्वयम्। मुग्धबोधमते तु "किमः त्र्यन्ताच्चिचनौ"। इति चित्।) कस्मिंश्चित्। कुत्रचित्। कोनस्थाने इत्यादि भाषा। इति व्याकरणम्॥

(यथा, विष्णुपुराणे १। २२। ३८।

"हन्ति वा यत् क्वचित् किञ्चित् भूत स्थावरजङ्गमम्"॥)

क्वण, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा-पर-अक-सेट्।) वकारयुक्तः। क्वणति वीणा। इति दुर्गादासः॥

क्वणः, पुं, (क्वण्+भावे अप्।) कणाकणेति शब्दविशेषः। इत्यमरटीकायां सारसुन्दरी॥ वीणायाः शब्दः अन्यस्य च शब्दः। इति भरतः॥ तत्पर्य्यायः। निक्वाणः २ निक्वणः ३ क्वाणः ४ क्वणनम् ५। इत्यमरः। १। ७। २४॥

क्वणन, क्ली, (क्वण्+भावे ल्युट्।) क्वणः। इत्यमरः। १। ७। २४॥

क्वणन, पुं, (क्वणति इति। क्वण्+ल्यु।) हण्डिकासुतः। इति त्रिकाण्डशेषः॥ छोटहाँडी इति भाषा॥

क्वथ, ए ज निष्पचने। इति कविकल्पद्रुमः॥ (भ्वा-परं-सक-सेट्।) वकारयुक्तः। ए, अक्वथीत्। ज, क्वाथः क्वथः। क्वथति वैद्य औषधं निष्पचतीत्यर्थः। इति दुर्गादासः॥

क्वथित, त्रि, (क्वथ्यते स्म इति। क्वथ+कर्म्मणि क्त।) अतिपक्वव्यञ्जनदशमूलादि। तत्पर्य्यायः। निष्पक्व २। इत्यमरः। ३। १। ९५॥ कषायः ३ निर्य्यूहः ४ क्वाथ ५ शृत ६। इति वैद्यकपरिभाषा॥

क्वाणः, पुं, (क्वण्+भावे कर्म्मादिवाच्ये च यथायथं घञ्।) क्वणः। इत्यमरः। १। ७। २४॥

(यथा, राजेन्द्रकर्णपूरे १७॥

"सञ्जाते त्वयि हारिहारवलयक्वाणक्वणत्कङ्कणां चञ्चत्काञ्चनकाञ्चि सा भगवती नर्त्तिवाग्देवता"॥)

क्वाथः, पु, (क्वथ्+भावे घञ्।) दुःखम्। व्यसनम्। द्रव्यनिष्क्वाथः। इति हेमचन्द्रः॥ क्वाथ्यमानतोयं त्रिविधम्। पादावशेषम् १ अर्द्धावशेषम् २ त्रिपादावशेषञ्च ३। अस्य नाम पारिभाषिको-ष्णोदकम्। तत्र त्रिपादावशेषं वातनाशकम्। अर्द्धावशेषं पित्तनाशकम्। पादावशेषं कफनाशकम्। लघु अग्निवर्द्धकञ्च। तेषां मध्ये त्रिपादावशेषजलं हेमन्ते शिशिरे च प्रशस्तम्। वसन्ते पादावशेषजलं प्रशस्तम्। शरदि ग्रीष्मे च अर्द्धावशेषजलं प्रशस्तम्। वर्षायां अष्टमभागावशेषजलं प्रशस्तम्। तत्काले बहुदोषत्वात्। दिनपक्वजलं रात्रौ गुरु रात्रिपक्वजलं दिवा गुरु। इति राजवल्लभः॥ यथास्य करणप्रणाली॥

"पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत्।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम्॥
तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम्।
शृतः क्वाथः कषायश्च निर्य्यूहः स निगद्यते"॥

इति शार्ङ्गधरेण मध्यखण्डे द्वितीयाध्याये उक्तम्॥)

क्वाथोद्भव, क्ली, (क्वाथादुद्भवो यस्य। क्वाथाद् उद्भवतीति वा।) तुत्थाञ्जनम्। इत्यमरः। २। ९। १०२॥

क्ष्वेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वा-पर-अक-गतौ सक-सेट्।) वकारयुक्तः। ऋ, अचिक्ष्वेलत्। चाल कम्पः। चाल केचिन्न मन्यते। इति दुर्गादासः॥

क्ष, क्षकार। (अयन्तु ककारषकारयोगेन जातः। अतोऽस्य पृथक् वर्णत्वशङ्का नास्त्येव।) तन्त्रमते तु व्यञ्जनचतुस्त्रिंशवर्णः। अष्टमवर्गीयपञ्चमवर्णः। एकपञ्चाशन्मातृकावर्णानां चरमवर्णश्च। यथा,—

"पञ्चाशल्लिपिभिर्म्माला विहिता सर्व्वकर्म्मसु।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता॥
क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति गौतमीयतन्त्रम्॥ *॥

कण्ठदेशोद्भवोऽयम्। यथा,—

श्रीशिव उवाच।

"विशेषं कथयाम्यद्य प्रोच्चार्य्यां कण्ठतः स्वराः।
हृदयं जिह्वया मूर्द्धा हृदय जिह्वदन्तजम्।
मुखस्थानाद्वर्णो बाधा क्षकारः कण्ठघातजः"॥

इति वरदातन्त्रे १० पटलः॥ *॥

अस्य स्वरूपं यथा,—

"क्षकारं शृणु चार्व्वङ्गि! कुण्डलीत्रयसंयुतम्।
चतुर्व्वर्गमयं वर्णं पञ्चदेवमयं सदा।
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा॥
त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम्।
शरच्चन्द्रप्रतीकाशं हृदि भावय सुन्दरि!"॥

इति कामधेनुतन्त्रम्॥ *॥

अस्याभिधानानि यथा,—

"क्षः क्रोधात्मा मुकः कालो रुद्रः संवर्त्तकः परः।
नृसिंहो विद्युता माया महातेजा युगान्तकः॥
परात्मा क्रोधसंहारी वलान्तो मेरुवाचकः।
सर्व्वाङ्गः सागरः कामः संयोगान्त्यस्त्रिपूरकः॥
क्षेत्रपालो महाक्षोभो मातृकान्तानलः क्षयः।
मुखं कण्ठवहानन्ता कालजिह्वा गणेश्वरः।
छायापुरुषश्च सघातो मलयश्रीर्ललाटकः"॥

इति तन्त्रशास्त्रे वर्णाभिधानम्॥ *॥ अपि च।

"क्षकारो नरसिंहश्च मेरुः सम्वर्त्तकोऽपि च।
तव स्नेहान्मया देवि! कथितं मातृकाक्षरम्।
पर्य्यायैरपि विज्ञेयं न प्रकाश्यं कदाचन"॥

इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥ *॥

अस्य ध्यानं यथा,—

"चतुर्भुजां रक्तवर्णां शुक्लाम्बरविभूषिताम्।
रत्नालङ्कारसंयुक्तां वरदां पद्मलोचनाम्॥
ईषद्धास्यमुखीं लोलां रक्तचन्दनचर्च्चिताम्।
शरदाचीश्च चतुर्व्वर्गप्रदां सौम्यां मनोहराम्॥
गन्धर्व्वसिद्धदेवाद्यैर्ध्यातामाद्यां सुरेश्वरीम्।
एवं ध्यात्वा क्षकारन्तु तन्मन्त्रं दशधा जपेत्"॥

इति वर्णोद्धारतन्त्रम्॥ क्षकारस्य ककारषकारयोगजत्वेन केचित् पृथग्वर्णत्वेन न मन्यन्ते। तेषां मते तन्त्रोक्तैकपञ्चाशद्वर्णानुपपत्तिः तन्त्रशास्त्रे तस्य मेरुत्वेन गणनानुपपत्तिश्च भवति। अतः पृथङ्निर्दिश्यते इति केचित्। तथा च।

"षान्ताः स्युर्यद्यपि क्षान्ता वर्णानामनुरोधतः।
पृथक्क्रमेण कथ्यन्ते तथाप्येते समन्वयात्"॥

इति विश्वप्रकाशः॥ अपि च।

"अकारादिलकारान्ता वर्णाः पञ्चाशदीरिताः।
संयोगात् कषयोरेव क्षकारो मेरुरीरितः"॥

इति कृष्णानन्दधृततन्त्रशास्त्रम्॥

क्षः, पुं, (क्षयति लोकान् युगान्तकाले प्रलये सर्व्वाणि भूतानि महाकालोदरे प्रेरयतीति। क्षि क्षये+ड प्रत्ययः।) सम्वर्त्तः। (क्षिणोति हन्ति मनुष्यादिजीवानिति।) राक्षसः। (क्षिणोति हन्ति हिरण्यकशिप्वाद्यसुरानिति।) नरसिंहः। (क्षयति क्षिणोति वा भूतानि स्वकीयाग्निना इति।) विद्युत्। (क्षयति शस्यादुत्पत्त्या क्रमश इति। क्षि+ड।) क्षेत्रम्। क्षेत्रपालः। (क्षि क्षये+भावे ड।) नाशः। इति मुद्राङ्कितमेदिनी॥

क्षज, इ क तञ्चे। इति कविकल्पद्रुमः॥ (चुरा-पर-अक-सेट्।) तञ्चो दुःखेन जीवनम्। इ क, क्षञ्जयति दीनः। इति दुर्गादासः॥

क्षज, इ ष म ङ दानगत्योः। इति कविकल्पद्रुमः॥

क्षज, ष म ङ (भ्वा-आत्मं-सक-सेट्।) इ, क्षञ्जते। ष, क्षञ्जा। सेमक्षात् सरोरित्यनेनैवेष्टसिद्धौ अस्य मानुबन्धस्वरपर्य्यन्तघटादिभ्यो ङ इति प्राचीनमतानुरोधात्। म, अचक्षि अचाक्षि क्षञ्ज क्षज क्षाजं क्षाजम्। मानुबन्धबलात् अनुपधाया अपि दीर्घः। स्वमते तु अत्र दीर्घविधिरुपधा नापेक्षते। ङ, क्षञ्जते। ष, क्षजा। म, क्षजयति। ङ, क्षजयते। दा दानम्। इति दुर्गादासः॥

क्षण, द ष उ वधे। इति कविकल्पद्रुमः। (तना-उभं-सक-सेट्।) द ष, क्षणोति क्षणुते। उ,

जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ॥
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम् ।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः ॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ॥
प्रातः सशर्करं पेयो हिमो धान्याकसम्भवः ।
जयेत् तृष्णां तथा दाहं भवेत् स्रोतोविशोधनम् ॥
कमलं कमलं कुष्ठं लाजाश्च वटरोहकम् ।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥
तृष्णा प्रवृद्धा हन्त्येषा मुखशोषञ्च दारुणम् ।
क्षतोद्भवां रुग्विनिवारणेन
जयेत् क्षतानामसृजश्च पातैः ।
क्षयोत्थिता क्षीरजलं निहन्या-
न्मांसोदकं वा मधुकोदकं वा ॥
आमोद्भवां बिल्ववचायुतानां
जयेत् कषायैश्च दीपनानाम् ।
गुर्व्वन्नजामुल्लिखनैर्भयेच्च
क्षयं विना सर्व्वकृताञ्च तृष्णाम्" ।
उल्लिखने लेखनद्रव्ये । भिषग्भिर्भुक्ते या तृष्णा स्यात्ताञ्च गुडाम्बुना शमयेत् । अतिरोगकृशस्य नाना तृष्णा शमयेन्मर्यादामितश्च पय ॥ पयोऽत्र दुग्धम् ।
"मूर्च्छाच्छर्द्दितृष्णादाहस्त्रीमद्यभृशकर्षिताः ।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये ॥
साम्यान्नपानभैषज्यैस्तृष्णा तस्य जयेत यः ।
तस्या जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम् ॥
तृष्यन् पूर्व्वामयक्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् ।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते" ॥
इति तृष्णाधिकारः । इति भावप्रकाशः ॥

क्षतविध्वंसी, [न्] पु, (क्षतं व्रणं स्रवत्क्लिन्नपूयादिकं विध्वंसयतीति । वि + ध्वन्स + णिच् + णिनि ।) रुद्रदारुवृक्षः । इति शब्दचन्द्रिका ॥

क्षतव्रणः, पुं, (क्षतजन्यः व्रणः क्षतजो व्रणो वा ।) षट्प्रकारव्रणरोगान्तर्गतव्रणरोगविशेषः । इति भावप्रकाशः ॥ तद्विवरणं व्रणशब्दे द्रष्टव्यम् ॥

क्षतव्रतः, त्रि, (क्षतं भग्नं व्रतमस्य ।) ध्वस्तनियमः । तत्पर्य्यायः । अवकीर्णी २ । इत्यमरः ।२।७।५४ ॥ तथा च याज्ञवल्क्यः ।
"अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम् ।
गर्द्दभं पशुमालभ्य नैर्ऋतं स विशुद्ध्यति" ॥
इति प्रायश्चित्ततत्त्वम् ॥

क्षतहरः, क्ली, (क्षतं हरतीति । हृ + ट ।) अगुरु । इति शब्दचन्द्रिका ॥

क्षतिः, स्त्री, (क्षण + क्तिन् ।) अपचयः । क्षयः । (यथा, महाभारते । ३ । १७२ । १८ ।
"क्रियाणां न क्षतिः काचित् न रथस्य न मातले" ॥)
"जलमुचि वितरणविमुखे
का क्षतिरस्त्यखिलानामुपातृणाम् ।
केवलमेव सभङ्गी
चातकपक्षी कृतार्थयति" ॥
इत्युद्भटः ॥

क्षतोदरः, पुं, (क्षतं शर्करादिभिन्नं उदरमत्र रोगे । अथवा क्षतात् भुक्तात् जातं उदरं उदररोगविशेषो यत्र ।) उदररोगविशेषः । तस्य सामान्यरूपमाह ।
"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता ।
शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः ।
दाहस्तन्द्रा च सर्व्वेषु जठरेषु भवन्ति हि" ॥
सन्निकृष्टनिदानपूर्व्विकां सम्प्राप्तिमाह ।
"पृथक्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु" ॥
क्षतोदरमाह ।
"शल्यं तथान्नोपहितं यदन्न-
भुक्तं भिनत्त्यागतमन्यथा वा ।
तस्मात् स्रुतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः ॥
नाभेरधश्चोदरमेति वृद्धिं
निस्तुद्यते दाह्यति चातिमात्रम् ।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध" ॥
शल्यं कण्टकमत्स्यास्थि अन्नोपहितं अन्नमिश्रितं भुक्तं यत् अन्नं भिनत्ति तथा अन्यथा आगतं । भोजनं विना आगतं शस्त्रादि तदपि यदन्नं भिनत्ति एतद्वाक्यलक्षणम् । [illegible] यत्र भिनत्ति । यत उक्तं चरके ।
"शर्करातृणकाष्ठास्थिकण्टकैरन्नसंयुतैः ।
भिद्येतान्त्रं यदा भुक्तं जृम्भयात्यशनेन च" ॥ इति
तस्मात् भिन्नान्त्रात् । गुदतस्तु भूयः अनन्तात् सञ्जृत्य पुनर्गुदतः स्रवेदित्यर्थः । दाह्यति विनीर्यत इव । पदसिद्धिरार्षत्वात् । एतत् क्षतोदरं तन्त्रान्तरे परिस्राव्युदरं प्रदिष्टम् ॥
तस्य चिकित्सा ।
"शालिषष्टिकगोधूमयवनीवारभोजनम् ।
निरूहो रेचनं स्नेहः सर्व्वेषु जठरेषु च ॥
आनूपमौदकं मांसं शाकं पिष्टकृतं तिलाः ।
व्यायामाध्वदिवास्वप्नयानानि वर्ज्जयेत् ॥
तथात्युष्णलवणाम्लानि विदाहीनि गुरूणि च ।
नाद्यादन्नानि जठरे तोयपानञ्च वर्ज्जयेत् ॥
उदराणां मलाढ्यत्वात् वर्द्धयेत् शोधनं दिशम् ।
क्षीरैर्यैर्वाग्यवं तैलं पिबेन्मूत्रेण वा सह तु" ॥
इति भावप्रकाशः । (उदररोगशब्दे विशेषविवृतिरस्य ज्ञेया ।)

क्षत्ता, [ऋ] पु, (क्षद् संवृतौ । सौत्रधातुरयम् । "तृनृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ" । उणा० ।२।९४ । इति संज्ञायां तृच् स चानिट् ।) सारथिः । द्वाःस्थः । इत्यमरः । ३ । ३ । ६२ ॥ दासीपुत्त्रः । (यथा, महाभारते । १ । विदुरागमनपर्व्वणि । २०१ । १७ ।
"तत प्रीतमना क्षत्ता धृतराष्ट्रं विशाम्पते ! ।
उवाच दिष्ट्या कुरवो वर्द्धन्त इति विस्मितः" ॥)
नियुक्तः । भुजिष्यः । इति मेदिनी ॥ क्षत्रियायां शूद्राज्जातः । (यथा, मनुः । १० । १२ ।
"शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" ॥)
मत्स्यः । इति सङ्क्षिप्तसारोणादिवृत्तिः ।

क्षत्त्रं, क्ली, (क्षतः त्रायते इति । क्षत् + त्रै + क ।) शरीरम् । इत्युणादिकोषः । नगरम् । इति राजनिर्घण्टः । (क्षत्त्रियकुलम् । यथा, ऋग्वेदे । ५ । ६२ । ६ ।
"अक्रविहस्ता सुकृते परस्पा
यं त्रासाथे वरुणेळास्वन्तः ।
राजाना क्षत्रमहृणीयमाना
सहस्रस्थूणं बिभृथः सह द्वौ" ॥)

क्षत्त्रः, पुं, (क्षद + "गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः" । उणा० ४ । १६६ । इति त्रः ।) क्षत्त्रियः । इत्युणादिकोषः ॥ (यद्वा, क्षतः क्षतात् त्रायते इति । त्रै + क । यथा, रघुः । २ । ५३ ।
"क्षतात् किल त्रायत इत्युदग्रः
क्षत्त्रस्य शब्दो भुवनेषु रूढः" ।
"नाम्बकर्णादिवत् केवलरूढः किन्तु पङ्कजादिवत् योगरूढः" इत्यर्थः । इति मल्लिनाथः ॥)

क्षत्त्रबन्धुः, पु, (क्षत्त्रियस्य बन्धुरिव ।) निन्दितक्षत्त्रियः । इत्यमरटीका । (यथा, मार्कण्डेये । ८ । ७४ ।
"क्षत्त्रबन्धो ! नमेतां त्वं सद्दर्शी यज्ञदक्षिणाम् ।
मन्यसे यदि तत् क्षिप्रं पश्य त्वं मे बलं परम्" ॥
क्षत्त्रं गण्यं देहो वा बन्धुरिवास्य ।) क्षत्त्रमात्रम् । (यथा, मनुः । २ । ३८ ।
"आषोडशात् ब्राह्मणस्य सावित्री नातिवर्त्तते" ।
आद्वाविंशात् क्षत्त्रबन्धोराचतुर्विंशतेर्विशः ॥)

क्षत्त्रवृक्षः, पुं, (क्षत्त्रसंज्ञकः वृक्षः ।) मुचुकुन्दः । इति राजनिर्घण्टः । (पर्य्यायोऽस्य यथा,—
"मुचुकुन्दः क्षत्त्रवृक्षश्चित्रकः प्रतिविष्णुकः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्य मुचुकुन्दशब्दे ज्ञातव्याः ॥)

क्षत्त्रियः, पु, (क्षत्त्रे राष्ट्रे साधुः । क्षत्त्रस्यापत्यं वा । "क्षत्त्राद् घः" । ४ ।१ । १३८ । इति जातौ घः ।) क्षदति रक्षति जनान् क्षत्त्रः । क्षद संवृतौ सौत्र ततस्त्रःसरति च । क्षतात् त्रायते इति वे मनीषादित्वात् क्षतान्त्यलोपे वा क्षत्त्रः । क्षत्त्रो हितकारः । पुंनपुंसकयोः क्षत्त्रः । पतिर्म्ममे क्षत्त्रमशेषभूभृतः प्रभाभिरामो भर तस्य जिष्णुरिति राघवपाण्डवीये । क्षत्त्र एव क्षत्त्रियः स्वार्थे इयः । अपत्यार्थे इय इत्यन्ये । इति भरतः ॥ * ॥
ब्रह्मबाहुजवर्णविशेषः । छत्री इति भाषा । (यथा, मनुः । १ । ३१ ।
"लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ।
ब्राह्मणं क्षत्त्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्" ॥)
तत्पर्य्यायः । मूर्द्धाभिषिक्तः २ राजन्यः ३ बाहुजः ४ विराट् ५ । इत्यमरः ।२।८।१। क्षत्त्रं ६ द्विजलिङ्गी ७ राजा ८ नाभिः ९ । इति जटाधरः ॥ स्वधः १०

मूर्द्धकः ११। इति शब्दरत्नावली ॥ पार्थिवः १२ सार्व्वभौमः १३। इति राजनिर्घण्टः। ते च सूर्य्यचन्द्रवंशीयराजानः कलौ सहस्रवर्षपर्य्यन्तम् आसन् ततः महानन्दिसुतो नन्दः शूद्रायां समुत्पन्नः शतवर्षं राज्यं चकार तदन्ते चाणक्यनामा ब्राह्मणो नन्दं तत्पुत्रांश्च हत्वा मुरवंशजं चन्द्रगुप्तं राजानं कृतवान् कलौ नन्दान्तः क्षत्रियवंशः। इति श्रीभागवते १२ स्कन्धे १ अध्यायात् सङ्गृहीतम् ॥ * ॥ प्लक्षद्वीपे क्षत्रियस्य नाम पतङ्गः। शाल्मलद्वीपे वीर्य्यधरः। कुशद्वीपे कोविदः। क्रौञ्चद्वीपे ऋषभः। शाकद्वीपे सत्यव्रतः पुष्करद्वीपे सर्व्वे एकवर्णाः। अस्य शास्त्रनिरूपितधर्म्मास्त्रयः। अध्ययनं यजनं दानञ्च। प्रजारक्षणं जीविका। अस्याश्रमास्त्रयः। गार्हस्थ्यं ब्रह्मचर्य्यं वानप्रस्थञ्च। इति तत्रैव २० अध्यायादितः सङ्गृहीतम् ॥ * ॥ तल्लक्षणं यथा,—

"क्षात्रजं सेवते कर्म्म वेदाध्ययनसंयुतः।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते" ॥

तस्य धर्म्मो यथा,—

नारद उवाच।

"क्षत्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव।
दद्याद्राजा न याचेत यजेत न च याजयेत् ॥
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम् ॥
ये तु क्रतुभिरीजाना श्रुतवन्तश्च पार्थिवाः।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः ॥
अविक्षतशरीरो हि संग्रामाद्यो निवर्त्तते।
क्षत्रियस्य तु तत् कर्म्म नोभयन्त यशःप्रदम् ॥
क्षत्रियाणामयं धर्म्मो निर्णीतो मुनिभिः परः।
नास्य कृत्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात् ॥
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते।
तस्माद्राज्ञा महाराज! योद्धव्यं धर्म्मशीलिना ॥
प्रजाः स्वेषु च धर्म्मेषु स्थापयेत महीपतिः।
धर्म्माण्येव हि कर्म्माणि कारयेत् सततं प्रजाः ॥
परमां सिद्धिमाप्नोति नृपतिः परिपालनात्।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो राजन्य उच्यते" ॥

इति पाद्मे स्वर्गखण्डे २६ अध्यायः ॥ * ॥ अपि च।

"राजन्यानां करादानं विना वैवाहिकञ्च यः।
प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः ॥
युद्धे पलायनञ्चैव तथा कातरतार्थिषु।
अपालनं प्रजानाञ्च दाने धर्म्मे विरक्तता ॥
अनवेक्षा स्वराष्ट्रस्य ब्राह्मणानामनादरः।
अमात्यानामसम्मानं तेषां कर्म्मानवेक्षणम्।
भृत्यानाञ्च परीहासो निषिद्धः क्षत्रजन्मनाम्" ॥
"राजन्यस्तु महाराज! यथाश्रममवाप्नुयात्।
तत् शृणुष्व तवाख्यास्ये धर्म्मसंग्रहतत्परः ॥
वेदानधीत्य धर्म्मेण राजशास्त्राणि चानघ!।
सन्तानादीनि कर्म्माणि कृत्वा सोमं निषेव्य च ॥
पालयित्वा प्रजाः सर्व्वा धर्म्मेण जयताम्वर!।
राजसूयाश्वमेधादीन् मखानन्यांस्तथैव च ॥
आनयित्वा यथापाठं विप्रेभ्यो दत्तदक्षिणः।
संग्रामे विजयं प्राप्य तथाल्पं यदि वा बहु ॥
स्थापयित्वा प्रजापालं पुत्त्रं राज्ये च पार्थिव!।
अन्यगोत्रं प्रशस्तं वा क्षत्रियं क्षत्रियर्षभ! ॥
अर्च्चयित्वा पितॄन् सम्यक् पितृयज्ञैर्यथाविधि।
देवान् यज्ञैरृषीन् वेदैरर्च्चयित्वा प्रयत्नतः ॥
अन्तकाले च सम्प्राप्ते य इच्छेदाश्रमान्तरम्।
सोऽनुपूर्व्व्याश्रमान् राजन् गत्वा सिद्धिमवाप्नुयात् ॥
राजर्षित्वेन राजेन्द्र! भैक्षचर्य्याध्वसेवया।
अपेतगृहधर्म्मोऽपि चरेज्जीवितकाम्यया ॥
न चैतन्नैष्ठिकं कर्म्म त्रयाणां भूरिदक्षिणम्।
चतुर्णां राजशार्दूल! प्राहुराश्रमवासिनाम् ॥
बाह्वायत्तं क्षत्रियैर्मानवानां
लोकश्रेष्ठं धर्म्ममासेवमानैः।
सर्व्वे धर्म्माः सोपधर्म्मास्त्रयाणां
राज्ञो धर्म्मादिति वेदात् शृणोमि ॥
एवं धर्म्मान् राजधर्म्मेषु सर्व्वान्
सर्व्वावस्थं सम्प्रलीनान्निबोध।
अल्पाश्रमानल्पफलान् वदन्ति
धर्म्मानन्यान् वेदविदो मनुष्याः।
महाश्रमं बहुकल्याणरूपं
क्षात्रं धर्म्मं नेतरं प्राहुरार्य्याः।
सर्व्वे धर्म्मा राजधर्म्मप्रधानाः
सर्व्वे धर्म्माः पाल्यमानाश्चरन्ति ॥
सर्व्वत्यागो राजधर्म्मेषु राजं-
स्त्यागं धर्म्मञ्चाहुरग्र्यं पुराणम्।
मज्जेत्त्रयी दण्डनीतौ हतायां
सर्व्वे धर्म्माः प्रक्षयेयुर्व्विरुद्धाः ॥
सर्व्वे धर्म्माश्चाश्रमाणां हताः स्युः
क्षात्रे त्यक्ते राजधर्म्मे पुराणे।
सर्व्वे त्यागा राजधर्म्मेषु चोक्ताः
सर्व्वा विद्या राजधर्म्मेषु युक्ताः ॥
सर्व्वे लोका राजधर्म्मे प्रविष्टाः
यथा जीवाः प्राकृतैर्व्वध्यमानाः।
धर्म्माश्रितानामुपपीडनाय
एवं धर्म्मा राजधर्म्मैर्व्विमुक्ताः ॥
सञ्चिन्वन्ते नाद्रियन्ते स्वधर्म्मम् ॥
चातुराश्रम्यधर्म्माश्च यतिधर्म्माश्च पार्थिव!।
लोकवेदोत्तराश्चैव क्षात्रे धर्म्मे समाहिताः ॥
सर्व्वाण्येतानि धर्म्माणि क्षात्रे राजन्यसत्तम!।
अप्रत्यक्षं बहुद्वारं धर्म्ममाश्रमवासिनाम्।
क्षात्रेणैव हि धर्म्मेण प्रत्यक्षं क्रियते नृप!" ॥

इति पाद्मे स्वर्गखण्डे २८ अध्यायः ॥ * ॥ अपि च।

"द्विजार्च्चनं क्षत्रियाणां तथा नारायणार्च्चनम्।
राज्यानां पालनञ्चैव रणे निर्भयता तथा ॥
नित्यं दानं ब्राह्मणेभ्यः शरणागतरक्षणम्।
पुत्त्रतुल्यं प्रजानाञ्च दुःखिनां परिपालनम् ॥
शस्त्रास्त्राणाञ्च नैपुण्यं रणे सौन्दर्य्यमेव च।
तपश्च धर्म्मकृत्यञ्च यत्नतः कुरुते मुदा ॥
पण्डितं नीतिशास्त्रज्ञं नित्यञ्च परिपालयेत्।
नियोजयेत् सभामध्ये नित्यं सद्भिश्च संयुतः ॥
हस्त्यश्वरथपादातं सेनाङ्गञ्च चतुष्टयम्।
पालयेत् यत्नतो नित्यं यशस्वी च प्रतापवान् ॥
रणे निमन्त्रितश्चैव दाने न विमुखो भवेत्।
रणे यो वा त्यजेत् प्राणान् तस्य स्वर्गो यशस्करः" ॥

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥ * ॥

अथ सूर्य्यवंशीयक्षत्रियविवरणम्।

परमेश्वरात् ब्रह्मा जातः तस्य पुत्त्रो मरीचिस्तस्य काश्यपस्तस्य सूर्य्यस्तस्य वैवस्वतो मनुः। सत्ययुगे मनुरेव राजासीत्। त्रेतायुगे तस्य पुत्त्र इक्ष्वाकुः अयोध्याया राजा आसीत्। त्रेतायुगे अतिदीर्घायुषो राजानो बहुकालं राज्यं कृतवन्तः। द्वापरे ततः किञ्चित्-न्यूनायुषः। युगस्य प्रथमापेक्षया उत्तरोत्तरम् आयुषो ह्रासः। कलियुगे अल्पमेवायुः शेषे अत्यल्पं भविष्यति। तस्य पुत्त्रो विकुक्षिस्तस्य ककुत्स्थः तस्य अनेनाः तस्य पृथुः तस्य विश्वगन्धिः तस्य चन्द्रः तस्य युवनाश्वः तस्य श्रावः तस्य वृहदश्वः तस्य धुन्धुमारः तस्य दृढाश्वः तस्य हर्य्यश्वः तस्य निकुम्भः तस्य कृशाश्वः तस्य सेनजित् तस्य युवनाश्वस्तस्य मान्धाता चक्रवर्त्त्यभूत्। तस्य पुरुकुत्सः तस्य त्रसदस्युः तस्य अनरण्यः तस्य हर्य्यश्वः तस्य प्रारुणः तस्य त्रिबन्धनः तस्य सत्यव्रतः तस्य त्रिशङ्कुः तस्य हरिश्चन्द्रः यः राजसूयं कृतवान्। तस्य रोहितः तस्य हरितः तस्य चम्पः तस्य सुदेवः तस्य विजयः तस्य भरुकः तस्य वृकः तस्य बाहुकः तस्य सगरश्चक्रवर्त्ती। तस्य असमञ्जाः तस्य अंशुमान् तस्य भगीरथः। यस्तपः कृत्वा पृथिव्यां गङ्गामानीतवान्। तस्य श्रुतः तस्य नाभः तस्य सिन्धुद्वीपः तस्य अयुतायुः तस्य ऋतुपर्णः तस्य सौदासः तस्य अश्मकः तस्य मूलकः तस्य दशरथः तस्य ऐडविडिः तस्य विश्वसहः तस्य खट्टाङ्गश्चक्रवर्त्ती। तस्य दीर्घबाहुः तस्य रघुः तस्य अजः तस्य दशरथः। विष्णुः श्रीरामरूपेण तस्य पुत्त्रत्वं प्राप्तवान्। तस्यानुजाः भरतलक्ष्मणशत्रुघ्नाः। श्रीरामचरितं बहुविस्तीर्णं वाल्मीकिव्यासादिमुनिभिर्व्वर्णितम्। असौ त्रेताद्वापरयोः सन्धौ अवतीर्णः। एते खट्टाङ्गमारभ्य श्रीरामपर्य्यन्ताश्चक्रवर्त्तिनः। द्वापरस्य प्रथमे तस्य पुत्त्रः कुशो जातः। तस्य अतिथिः तस्य निषधः तस्य नभः तस्य पुण्डरीकः तस्य क्षेमधन्वा तस्य देवानीकः तस्य हीनः तस्य पारियात्रः तस्य बलस्थलः तस्य वज्रनाभः तस्य अर्कः तस्य सगणः तस्य विधृतिः तस्य हिरण्यनाभः तस्य पुष्यः तस्य ध्रुवसन्धिः तस्य सुदर्शनः तस्य अग्निवर्णः तस्य शीघ्रः तस्य मरुः यो योगसिद्धः सन् सुमेरुनिकटे कलापग्रामे आस्ते कलेरन्ते नष्टं सूर्य्यवंशं पुनर्भावयिष्यति। मरोः पुत्त्रः प्रसुश्रुतः तस्य सन्धिः तस्य अमर्षणः तस्य महस्वान् तस्य विश्वबाहुः तस्य प्रसेनजित् तस्य तक्षकः तस्य वृहद्बलः। असौ युधिष्ठिरस्य समकालीनः भारतयुद्धे अभिमन्युना हतः। तस्य वृहद्रणः तस्य उरुक्रियः तस्य वत्सवृद्धः तस्य प्रतिव्योमः तस्य भानुः तस्य दिवाकः तस्य सहदेवः तस्य वीरः तस्य वृहदश्वः तस्य भानुमान् तस्य प्रतीकाश्वः तस्य सुप्रतीकः तस्य मरुदेवः तस्य सुनक्षत्रः तस्य पुष्करः तस्य अन्तरीक्षः तस्य सुतपाः तस्य अमित्रजित्

कोलमात्रारसे तद्वत् क्षीराष्टगुणसाधितम् ।
कल्कैः कट्फलदार्व्वीत्वग्वत्सकत्वक्फलैर्घृतम् ॥
जीवकर्षभकौ वीरा जीवन्तीं नागरं शटीम् ।
चतस्रः पर्णिनीर्मेदे काकोल्यौ द्वे निदिग्धिके ॥
पुनर्नवे द्वे मधुकमात्मगुप्तां शतावरीम् ।
ऋद्धिं परूषकं भार्गीं मृद्वीकां वृहतीन्तथा ॥
शृङ्गाटकं तामलकीं पयस्यां पिप्पलीं बलाम् ।
वदराक्षोटखर्ज्जूरवातामाभिषुकाण्यपि ॥
फलानि चैवमाद्यानि कल्कान् कुर्व्वीत कार्षिकान् ।
धात्रीरसविदारीक्षुच्छागमांसरसं पयः ॥
कुर्य्यात् प्रस्थोन्मितं तेन घृतप्रस्थं विपाचयेत् ।
प्रस्थार्द्धं मधुनः शीते शर्कराद्धतुलान्तथा ॥
द्विकार्षिकाणि पत्रैला हेमत्वङ्मरिचानि च ।
चूर्णितानि विनीयास्माल्लिह्यान्मात्रां सदा नरः ॥
अमृतप्राशमित्येतन्नराणाममृतं घृतम् ।
सुधामृतरसं प्राश्यं क्षीरमांसरसाशिना ॥
नष्टशुक्रक्षतक्षीणदुर्व्वलव्याधिकर्षितान् ।
स्त्रीप्रसक्तान् कृशान् वर्णस्वरहीनांश्च वृंहयेत् ॥
कासहिक्काज्वरश्वासदाहतृष्णास्रपित्तनुत् ।
पुत्त्रदं वमिमूर्च्छाहृद्योनिमूत्रामयापहम्” ॥

इत्यमृतप्राशघृतम् ॥

“मधुकाष्टपलं द्राक्षा प्रस्थक्काथे घृतं पचेत् ।
पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले ॥
पृथगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत् ।
समं शक्तुक्षतक्षीणे रक्तगुल्मेषु तद्धितम्” ॥

इति शक्तुप्रयोगः ॥

“शक्तूनां वस्त्रपूतानां मन्थः क्षौद्रघृतान्वितम् ।
यावान्नसात्म्यो दीप्ताग्निः क्षतः क्षीणः पिवेन्नरः” ॥
“एका षोडशिका धान्याद्द्वि द्वेऽजाज्यजमोदयोः ।
ताभ्यां दाडिमवृक्षाम्लद्विर्द्विः सौवर्च्चलात् पलम् ॥
सुण्ठ्याः कर्षं दधित्थस्य मध्यात् पञ्च पलानि च ।
तच्चूर्णं षोडशपले शर्करायाः विमिश्रयेत् ॥
षाडवोऽयं प्रदेयः स्यादन्नपानेषु पूर्व्ववत्” ॥

इति षाडवः ॥

“यथोक्तं यक्ष्मिणां पथ्यं कासिनां रक्तपित्तिनाम् ।
तच्च कुर्य्यादपेक्ष्याग्निं व्याधिं सात्म्यं बलान्तथा” ॥
इति चरके चिकित्सास्थाने १९ अध्याये ।)

क्षतकासः, पुं, (क्षतज कासः । मध्यपदलोपी समासः ।) पञ्चविधकासरोगान्तर्गतकासरोगविशेषः । यथा,—
“पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे वलिनश्चोत्तरोत्तरम्” ॥
एषां पूर्व्वरूपमाह ।
“पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठेकण्डूश्च भोज्यानामवरोधश्च जायते” ॥
भोज्यानामवरोधः कवलगिलने कण्ठव्यथा ॥
अस्य निदानपूर्व्विकां सम्प्राप्तिमाह ।
“अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः ।
रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत्” ॥
अश्वगजयोर्निग्रहो दमनम् । लक्षणमाह ।
“स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् ।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिः तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः ।
पारावत इवाकूजेत् कासवेगात् क्षतो भवात्” ॥
कण्ठेनेत्युपलक्षणे तृतीया एवमुरसाऽपि ॥
तस्य चिकित्सा यथा,—
“इक्षिक्षुवालिकापद्ममृणालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकासनिवृत्तये” ॥
इक्षुवालिका इक्षुभेदः । चन्द्र इति लोके । पद्मं पद्मकाष्ठम् । मृणालं विसम् । उत्पलं कमलम् । चन्दनमत्र धवलं चूर्णत्वात् । शृङ्गी कर्कटशृङ्गी । तुगाक्षीरी वंशरोचना । सा चेक्षोर्द्विगुणा । इति भावप्रकाशः ॥
(“युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ॥
उरस्यन्तः क्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च ग्रथितं कुथितं बहु ।
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्वीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते” ॥
अस्य चिकित्सा यथा—
“उरस्यन्तः क्षते सद्यो लाक्षां क्षौद्रयुतां पिवेत् ।
क्षीरेण शालीन् जीर्णेऽद्यात् क्षीरेणैव सशर्करान् ।
पार्श्ववस्तिसरुक् चाल्पपित्ताग्निस्तां सुरायुताम् ।
भिन्नविट्कः समुस्तातिविषां पाठां सवत्सकाम् ॥
लाक्षां सर्पिर्मधूच्छिष्टं जीवनीयं गणं सितम् ।
त्वक्क्षीरीं सक्षितं क्षीरे पक्त्वा दीप्तानलः पिवेत् ॥
इक्षुवालिकाविषग्रन्थिपद्मकेशरचन्दनैः ।
शृतं पयो मधुयुतं सन्धानार्थं क्षती पिवेत् ॥
क्षतकासे च ये धूमाः सानुपाना निदर्शिताः” ।
इति वाभटे निदानस्थाने चिकित्सास्थाने च चतुर्थाध्याये ॥)

क्षतघ्नः, पुं, (क्षतं हन्ति नाशयतीति । हन् + “अमनुष्यकर्त्तृके च” । ३ । २ । ५३ । इति टक् ।) क्षुपविशेषः । इति शब्दचन्द्रिका ॥ कुकुरशोँखा इति भाषा ॥

क्षतघ्नी, स्त्री, (क्षतं हन्ति । हन् + “अमनुष्यकर्त्तृके च” । ३ । २ । ५३ । इति टक् स्त्रियां ङीप् ।) लाक्षा । यथा,—
“लाक्षा द्रुमामयो राक्षा रङ्गमाता पलङ्कषा ।
जतु क्षतघ्नी क्रमिजा यावालक्तौ तु तद्रसः” ॥
इति हेमचन्द्रः । क्षतघ्नापि पाठः ॥

क्षतजं, क्ली, (क्षतात् व्रणात् जायते उत्पद्यते इति । जन् + ड ।) रक्तम् । इत्यमरः । २ । ६ । ६४ ॥
(यथा, रघौ । ७ । ४३ ।
“स च्छिन्नमूलः क्षतजेन रेणु-
स्तस्योपरिष्टात् पवनावधूतः” ।)
पूयम् । इति शब्दचन्द्रिका ॥

क्षतजतृष्णा, स्त्री, (क्षतजा शस्त्रादिभिः क्षताज्जाता या तृष्णा पिपासा ।) शस्त्रादिक्षतयुक्तस्य पिपासा । तस्या निदानपूर्व्विकां सम्प्राप्तिमाह ।
“भयश्रमाभ्यां बलसंक्षयाद्वा
ऊर्द्ध्वं चितं पित्तविवर्द्धनैश्च ।
पित्तं सवातं कुपितं नराणां
तालुप्रपन्नं जनयेत् पिपासाम् ॥
स्रोतःस्वपांवाहिषु दूषितेषु
दोषैश्च तृट्सम्भवतीह जन्तोः ।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथान्यामसमुद्भवा च ॥
भक्तोद्भवा सप्तमिकेति तासां
निबोध लिङ्गान्यनुपूर्व्वशस्तु” ॥
नराणां चितं स्वस्थान एव सञ्चितं पित्तं सवातं कट्वम्लोष्णपित्तविवर्द्धनैः । कट्वम्लोष्णादिभिः कुपितं भयश्रमाभ्यां बलसंक्षयादुपवासादेश्च वातं कुपितं । तद्द्वयमूर्द्ध्वं प्रसरत् तालुप्रपन्नं सत् पिपासां जनयेत् । न केवलं तालुन्येव दूषिते तृतीया भवति । किन्तु जलवाहिस्रोतःस्वपि । अत आह स्रोतःस्वित्यादि नन्वत्र वहुवचनं न युक्तम् । यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते । उच्यते । तयोरेवानेकप्रतानयोगान्न दोषः । अपां वाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम् । यत आह चरकः । रसवाहिनीश्च धमनीर्जिह्वाहृदयगलतालुक्लोम च । संशोष्य नृणां देहेषु कुरुतः तृष्णामतिप्रबलौ पित्तानिलाविति ॥ संख्यामाह तिस्र इत्यादि ॥ तृष्णायाः सामान्यलक्षणमाह ।
“सततं यः पिवेत्तोयं न तृप्तिमधिगच्छति ।
मुहुः काङ्क्षति तोयन्तु तं तृष्णार्द्दितमादिशेत्” ॥
क्षतजामाह ।
“क्षतस्य रुक् शोणितनिर्गमाभ्यां
तृष्णा चतुर्थी क्षतजा मता तु” ।
क्षतस्य शस्त्रादिक्षतयुक्तस्य । रुक् पीडा ॥
अथ तृष्णायाश्चिकित्सा ॥
“वातघ्नमन्नपानं मृदु लघु शीतञ्च वाततृष्णायाम् ।
तृष्णायां पवनोत्थायां सगुडं दधि शस्यते ॥
स्वादु तिक्तं द्रवं शीतं पित्ततृष्णाहरं परम् ।
मुस्तपर्पटकोदीच्यधन्याकोशीरचन्दनैः ॥
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये” ॥
छत्रा धान्याकम् । कश्चित् धात्रीञ्च दद्यात् चन्दनमत्र धवलं दद्यात् । तस्यातितृष्णाहरत्वात् । शृतं अर्द्धपक्वमत्र कर्त्तव्यम् । षडङ्गपानम् ।
“लाजोदकं मधुयुतं शीतं गुडविमर्द्दितम् ।
काश्मरीशर्करायुक्तं पिवेत् तृष्णार्द्दितो नरः ॥
आस्तरणमार्द्रवासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां नियतम् ॥
गोस्तनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
न्नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ॥
वैशद्यञ्च नयत्यास्ये सन्दधाति मुखे जलम् ।
तृष्णादाहप्रशमनं मधुगण्डूषधारणम् ॥

तस्य वृहद्राज तस्य वर्हि तस्य कृतञ्जय तस्य रणञ्जय तस्य सञ्जयः तस्य शाक्य तस्य शुद्धोद तस्य लाङ्गल तस्य प्रसेनजित् तस्य क्षुद्रक तस्य सुमित्र । एते राजानः कलौ सहस्रवत्सरपर्य्यन्तं राज्यं कृतवन्तः । एतत्पर्य्यन्तं सूर्य्यवंशविश्रान्तिः पुनः सत्ययुगे सूर्य्यवंशोत्पत्तिर्भविष्यति । इति श्रीभागवतनवमस्कन्धमतम् ॥ चन्द्रवंशविवरणं चन्द्रवंशशब्दे द्रष्टव्यम्* ॥

क्षत्रिया, } स्त्री, (क्षत्रियाणां स्त्रीजातिः । "अ-
क्षत्रियाणी, } र्य्यक्षत्रियाभ्यां वा" । वार्त्तिं इति स्वार्थे आनुगभावे टाप् योपधत्वात् न ङीष् । पक्षे आनुगागमः ङीष् च ।) क्षत्रियस्त्रीजातिः । इत्यमरः ॥ (यथा, मनुः । ३ । ४४ ।
"शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया" ॥
दुर्गा । यथा, हरिवंशे विष्णुपर्व्वणि । ५८ । २३ ।
"निद्रा च सर्व्वभूतानां मोहनी क्षत्रिया तथा" ॥)

क्षत्रियी, स्त्री, (क्षत्रियस्य पत्नी इति । "पुयोगादाख्यायाम्" । ४ । १ । ४८ । इति ङीष् ।) क्षत्रियपत्नी । इत्यमरः । २ । ६ । १५ ॥

क्षद, सहृतौ । इति कविकल्पद्रुमः ॥ (सौत्र-आत्म-सक-सेट् ।) क्षत्ता । इति दुर्गादासः ॥
(यथा, ऐतरेयब्राह्मणे । १ । १५ । "तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वार्हत्युक्षाणं वा वेहतं वा क्षदन्त एवमेवास्मा एतत्" ॥)

क्षन्ता, [ऋ] त्रि, (क्षम् + कर्त्तरि तृच् ।) क्षमाशीलः । इत्यमरः । ३ । १ । ३१ ॥ अस्य पर्य्यायः सहिष्णुशब्दे द्रष्टव्यः ॥ (यथा, महाभारते । १३ । १०२ । ३१ ।
"ये क्षन्तारो नाभिजल्पन्ति चान्यान्
शक्तीभूताः सततं पुण्यशीलाः ।
तथाविधानामेष लोको महर्षे !
परं गन्ता धृतराष्ट्रो न तत्र" ॥)

क्षप, इ क शक्तौ । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट्-इदित् ।) शक्तिरिह क्षमा । इ क, क्षम्पयति दुःखं मुनिः । सहत इत्यर्थः । इति दुर्गादासः ॥

क्षप, त् क म क्षेपे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा-पर-सक-सेट् ।) म, अक्षपि अक्षापि क्षपं क्षपं क्षापं क्षापम् । मानुबन्धसामर्थ्यात् स्थानिवत्त्वाभावे दीर्घः । स्वमते तु अत्र दीर्घविधिरुपधा नापेक्षते । इति दुर्गादासः ॥

क्षपण, त्रि, (क्षपयति क्षिपति दूरीकरोति लज्जां इति । क्षप क्षेपे + कर्त्तरि ल्युः ।) निर्लज्जः । इति त्रिकाण्डशेषः ॥ (क्षपयति विषयरागं इति ।) बौद्धसन्न्यासी ॥ (भावे ल्युट् क्षपणम् । यथा, मनुः । ४ । २२२ ।
"भुक्त्वाऽतोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम्" ॥)

क्षपणक, पुं, (क्षप् + ल्युः । स्वार्थे कन् ।) बुद्धभेदः । इति जटाधरः ॥ सन्न्यासी । यथा । "एकः क्षपणकः शाकाहर्त्ता तत्र क्षपणकः दशशाकाशी । यत्र क्षपणकः दशशाकाशी तत्र क्षपणकः का शाकाशी" ॥ इत्युद्भटः ॥ (यथा च महाभारते । १ । ३ । १२४ ।
"सोऽपश्यदथ पथि नग्नं क्षपणकमागच्छन्तम्" ॥
विक्रमादित्यसभास्थनवरत्नानामेकः । यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः" ॥)

क्षपण्युः, पुं, (क्षप् + बाहुलकात् अन्युः ततो णत्वम् ।) अपराधः । इति शब्दमाला ॥

क्षपा, स्त्री, (क्षपयति वारयति चेष्टामिन्द्रियाणाम् । क्षप् + अच् ।) रात्रिः । (यथा, महाभारते । ३ । अरण्ययात्रापर्व्वणि । १ । ४३ ।
"राजानन्तु कुरुश्रेष्ठ ते हंसमधुरस्वराः ।
आश्वासयन्तो विप्राग्र्याः क्षपां सर्व्वां व्यनोदयन्" ॥)
हरिद्रा । इत्यमरः ॥

क्षपाकर, पुं, (क्षपां रात्रिं करोतीति । कृ + ट ।) चन्द्रः । कर्पूरः । इत्यमरः । ४ । ५३ । ७ ॥

क्षपाचर, पुं, (क्षपायां रजन्यां चरतीति । चर + ट ।) राक्षसः । (यथा, महाभारते । ३ । इन्द्रजिद्वधपर्व्वणि । २८८ । ३३ ।
*"निर्य्याणे स मतिं कृत्वा निधायासिं क्षपाचरः ।
आज्ञापयामास तदा रथो मे कल्प्यतामिति"* ॥)

क्षपाट, पुं, (क्षपायां अटतीति । अट् गतौ + अच् ।) राक्षसः । इति त्रिकाण्डशेषः । (यथा, भट्टिः २ । ३१ ।
"ततः क्षपाटैः पृथुपिङ्गलाक्षै-
र्ख प्रावृषेण्यैरिव चानशेऽर्के" ॥)

क्षपापति, पुं, (क्षपायाः रजन्याः पतिः ।) चन्द्रः । कर्पूरः । इति निशापतिशब्ददर्शनात् ॥

क्षम, उ इर् म य मर्षे । इति कविकल्पद्रुमः ॥ (दिवा-पर-सक-सेट् । उदित्वात् क्त्वावेट् ।) मर्षः सहनम् । उ, क्षमित्वा क्षान्त्वा । षष्ठस्वरानुबन्ध इत्येके । इ र, अक्षमत् अक्षमीत् । अस्मात् पुषादित्वान्नित्य ङ इत्यन्ये । म य, क्षाम्यति दोषं साधुः । इति दुर्गादासः ॥

क्षम, ऊ ङ ञि ष मर्षे । इति कविकल्पद्रुमः । (भ्वा-आत्म-सक-वेट् ।) ऊ, अक्षमिष्ट अक्षंस्त । ङ, क्षमते । ञि, क्षान्तोऽस्ति । ष, क्षमा । इति दुर्गादासः ॥

क्षम, क्ली, (क्षम् + पचाद्यच् ।) युक्तम् । इत्यमरः । ३ । ३ । १२२ ॥ (यथा, शाकुन्तले ५ अङ्के ।
"यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पुनरुत्कुलया त्वया ।
अथ तु वेत्सि शुचिव्रतमात्मनः
पतिगृहे तव दास्यमपि क्षमम्" ॥)

क्षम, त्रि, (क्षमते इति । क्षम् + अच् ।) शक्तः । हितः । इत्यमरः । ३ । ३ । १२२ ॥ आद्यस्य पर्य्यायः । सहः २ प्रभुष्णुः ३ । इति हेमचन्द्रः ॥
(यथा, शाकुन्तले १ माङ्के ।
*"इदं किलाव्याजमनोहरं वपु-
स्तपः क्षमं साधयितुं य इच्छति"* ॥

---

* क्षत्रियाणामन्यतराख्या कायस्थाः ।
यथा प्रथमतः—वेदानाम् आपस्तम्बशाखायाम् ।
"वाङ्कोच क्षत्रिया जाता कायस्था जगतीतले ।
चित्रगुप्तः स्थितः स्वर्गे विचित्रो भूमिमण्डले ॥
चैत्ररथः सुतस्तस्य यशस्वी कुलदीपकः ।
ऋषिवंशे समुद्भूतो गौतमो नाम सत्तम ।
तस्य शिष्यो महाप्राज्ञश्चित्रकूटाचलाधिपः" ॥

द्वितीयतः,—
माण्डव्यशापात् चित्रगुप्तस्य पुत्रचैत्ररथस्य क्षत्रियत्वगते पुनरुपनयनसंस्कारे कृते तेन क्षत्रियत्वं प्राप्तं यथा,—वेदान्ते प्रथमाध्याये तृतीयपादे ३५ । ३७ सूत्रे क्षत्रियत्वगते चोत्तरत्र चैत्ररथेन लिङ्गात् तदभावे निर्द्धारणे च प्रवृत्ते ॥

तृतीयतः,—
"नाम्ना त्वं चित्रगुप्तोऽसि मम कायादभूर्यतः ।
तस्मात् कायस्थविख्यातिर्लोके तव भविष्यति ॥
कायस्थः क्षत्रियो वर्णो न तु शूद्रः कदाचन ।
अतो भवेयुः संस्कारा गर्भाधानादिका दश ॥
गर्भाधानमृतौ कार्य्यं तृतीये मासि पुंस्क्रिया ।
मासाष्टमे स्यात् सीमन्तं उत्पत्तौ जातकर्म च ॥
शताहे नामकरणं पञ्चमे मासि निष्क्रमः ।
षष्ठेऽन्नप्राशनं मासि चूडा कार्य्या यथाकुलम् ॥
तथोपनयने भिक्षाब्रह्मचर्य्यव्रतादिकम् ।
वासो गुरुकुलेषु स्यात् स्वाध्यायाध्ययनं तथा ॥
कृत्वा तु मातृकापूजां वसोर्धारां विधाय च ।
आयुष्याणि च शान्त्यर्थं जपेदत्र समाहितः ॥
कुर्य्यान्नान्दीमुखं श्राद्धं दधिमध्वाज्यसंयुतम् ।
मम प्रधानसंस्काराः कार्य्या एष विधिः स्मृतः" ॥
इत्यादि विज्ञानतन्त्रे ॥

चतुर्थतः,—
कायप्रकाशो नाम्ना विद्यानगर्य्यधिपतिः सप्तवर्णज कायस्थ आसीत् । यथा,—
"विराटकायजो यश्च कायस्थ इति विश्रुतः ।
आर्य्याच्छन्दःप्रकाशात् तु आर्य्यावर्त्तः प्रमथ्यते ॥
अथ तु नवमस्तेषां द्वीपः सागरसंवृतः
योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरात्" ॥
इति मेरुतन्त्रे १९९ पटले ।

पञ्चमतः,—
"राजन् ! ब्रह्मकायसमुद्भूतः कायस्थो वर्मसंज्ञकः कलौ हि क्षत्रियः स चास्त्यधिकारी जपयज्ञेषु" ॥
इति शौनकसंहितायाम् माधवाचार्य्यधृतम् ॥

षष्ठतः,—
यदा पृथिवीं निःक्षत्रियकाले परशुरामस्य भयात् चन्द्रसेनस्य नृपतेर्भार्य्या मुनेर्दाल्भ्यस्याश्रयं गता तदा परशुराम उवाच ।
"तवाश्रमे महाभाग ! सगर्भा स्त्री समागता
चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः ॥
तन्मेऽत्र प्रार्थितं देहि हिंसेयं तां महामुने ! ।
ततो दाल्भ्यः प्रत्युवाच ददामि मनसेप्सितम् ॥
स्त्रियं गर्भसमं बालं तन्मे त्वं दातुमर्हसि ।
ततो रामोऽब्रवीद्दाल्भ्य यदर्थमहमागतः ॥
क्षत्रियान्तकरश्चाहं तत्त्वं याचितवानसि ।
प्रार्थितश्च त्वया विप्र ! कायस्थो गर्भ उत्तमः ॥
तस्मात् कायस्थ इत्याख्यो भविष्यति शिशुस्तव ।
एवं रामो महाबाहुर्हित्वा तं गर्भमुत्तमम् ॥
निर्जगामाश्रमात्तस्मात् क्षत्रियान्तकरः प्रभुः ।
कायस्थ एष उत्पन्नः क्षत्रिण्यां क्षत्रियात्ततः ॥
तद्गर्भजाश्च कायस्था धर्मिष्ठाः सत्यवादिनः ।
सदाचारपरा नित्यं रता हरिहरार्चने ॥
देवविप्रपितॄणाञ्च अतिथीनाञ्च पूजकाः" ॥
इति स्कन्दपुराणे रेणुकामाहात्म्ये परशुरामदाल्भ्यसंवादे ॥

रघौ च । ११ । ६ ।

"आशिष प्रयुयुजे न वाहिनी
सा हि रक्षणविधौ तयो क्षमा" ॥)

क्षमता, स्त्री, (क्षमस्य भाव इति । क्षम + तल् ।) योग्यता । सामर्थ्यम् । यथा,—

"श्रुतिर्द्वितीया क्षमता च लिङ्ग
वाक्य पदान्येव तु संहतानि ।
सा प्रक्रिया या करणस्य काङ्क्षा
स्थानं क्रमो योगबलं समाख्या" ॥

इति भट्टवार्त्तिकम् ॥ क्षमता अर्थप्रकाशनसामर्थ्यम् । यथा । बर्हिर्देवसदनं दामीत्यत्र दामीति पदस्य छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य आस्तृतदर्भप्रकाशनसामर्थ्यात् आस्तृतदर्भच्छेदने समुदायमन्त्रस्य नियोगोऽवगम्यते । इति धर्म्मदीपिका ॥

क्षमा, स्त्री, (क्षमते आत्मोपरि स्थितानां जीवानामपराध या । क्षम् अच् भित्वादङ् वा ततष्टाप् ।) क्षिति । (यथा, भट्टि । ३ । २२ ।

"विभूषणान्युन्मुमुचु क्षमाया
पेतुर्बभञ्जुर्वलयानि चैव" ॥)

क्षान्तिः । इत्यमर ।३।३।१२२॥ क्षमालक्षणम् । यथाह, बृहस्पति ।

"बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता" ॥

इत्येकादशीतत्त्वम् । अपि च ।

"आक्रुष्टोऽभिहतो यस्तु नाक्रोशेन्न हनेदपि ।
अदुष्टैर्वाङ्मनःकायैस्तितिक्षुस्य क्षमा स्मृता' ॥

इति मात्स्ये १२० अध्याय ॥ अन्यच्च ।

"विभागशील सतत क्षमायुक्तो दयात्मक ।
गृहस्थस्तु क्षमायुक्तो न गृहेण गृही भवेत् ॥
क्षमा दया च विज्ञान सत्यञ्चैव दम शम ।
अध्यात्मनित्यताज्ञानमेतद्ब्राह्मणलक्षणम् ॥
विशेषातिक्रमक्षेपहिंसाबन्धवधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्ज्जनं क्षमा" ॥

इति कौर्म्मे १४ अध्याय ॥ (अपरञ्च यथा, महाभारते । ३ । द्रौपदी-युधिष्ठिरसंवादे । २९ । ३५—।

"अत्राप्युदाहरन्तीमा गाथा नित्य क्षमावताम् ।
गीताः क्षमावता कृष्ण । काश्यपेन महात्मना ॥
क्षमा धर्म्मः क्षमा यज्ञः क्षमा वेदा क्षमा श्रुतम् ।
य एतदेव जानाति स सर्व्वं क्षन्तुमर्हति ॥
क्षमा ब्रह्म क्षमा सत्य क्षमा भूतञ्च भावि च ।
क्षमा तप क्षमा शौचं क्षमयेद धृत जगत् ॥
अतियज्ञविदा लोकान् क्षमिणः प्राप्नुवन्ति च ।
अतिब्रह्मविदा लोकानति चापि तपस्विनाम् ॥
अन्ये वै यजुषा लोका कर्म्मिणामपरे तथा ।
क्षमावतां ब्रह्मलोके लोका' परमपूजिताः ॥
क्षमा तेजस्विना तेज क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्य सत्यवता क्षमा यज्ञ क्षमा शम ॥
ता क्षमामीदृशीं कृष्ण । कथमस्मद्विधस्त्यजेत् ।
यस्या ब्रह्म च सत्यञ्च यज्ञा लोकाश्च धिष्ठिताः ॥
क्षन्तव्यमेव सतत पुरुषेण विजानता ।
यदा हि क्षमते सर्व्वं ब्रह्म सम्पद्यते तदा ॥
क्षमावतामय लोक परश्चैव क्षमावताम् ।
इह सम्मानमर्हन्ति परत्र च शुभा गतिम् ॥
येषा मन्युर्मनुष्याणा क्षमयाभिहत सदा ।
तेषा परतरे लोकास्तस्मात् क्षान्ति परा मता" ॥)

रात्रि । इति शब्दरत्नावली ॥*॥ दुर्गा । इत्यमरटीकायाम् मथुरानाथ ॥ तथा हि ।

"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते" ॥

इति दुर्गार्च्चातत्त्वम् ॥ अपि च ।

"क्षमा तु श्रीमुखे कार्य्या योगपट्टोत्तरीयका ।
पद्मासनकृताधारा वरदोद्यतपाणिनी ॥
शूलमेखलसयुक्ता प्रशान्ता योगसंस्थिता ।
सितपुष्पोपहारेण सितहोमेन सिद्धिदा" ॥

इति देवीपुराणे संवत्सरदेवताविंशतिविधिप्रथम ॥ खदिर । इति राजनिर्घण्ट ॥ गोपीविशेष । यथा । राधिकोवाच ।

"मया पूर्व्वञ्च त्व दृष्टो गोप्या च क्षमया सह ।
सुवेशयुक्तो मालावान् गन्धचन्दनसयुत ॥
रत्नभूषितया गन्धचन्दनोक्षितया तथा ।
सुखेन मूर्च्छितस्तल्पे पुष्पचन्दनसयुते ॥
श्लिष्टो निद्रितया सद्य सुखेन नवसङ्गमात् ।
मया प्रबोधिता सा च भवाश्च स्मरण कुरु ॥
गृहीत पीतवस्त्रन्ते मुरली च मनोहरा ।
वनमाला कौस्तुभञ्चाप्यमूल्य रत्नकुण्डलम् ॥
पश्चात् प्रदत्त प्रेम्णा च सखीना वचनाद्धरे ।
लज्जया कृष्णवर्णश्च तेनाप्यद्यापि पश्यतः ॥
क्षमा देह परित्यज्य लज्जया पृथिवीं गता ।
ततस्तस्या शरीरञ्च गुणश्रेष्ठ बभूव ह ॥
सविभज्य त्वया दत्त प्रेम्णा प्ररुदता पुरा ।
किञ्चिद्दत्त विष्णवे च वैष्णवेभ्यश्च किञ्चन ॥
धर्म्मिष्ठेभ्यश्च धर्म्माय दुर्व्वलेभ्यश्च किञ्चन ।
तपस्विभ्योऽपि देवेभ्य पण्डितेभ्यश्च किञ्चन ॥
एतत्ते कथित सर्व्वं कि भूय श्रोतुमिच्छसि" ॥

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ९ अध्याय ॥ * ॥

क्षमादंश, पु, (क्षमा पृथिवीं दंशतीति । दन्श + अच् । तीक्ष्णमूलत्वात् तथात्वम् ।) शिग्रु । इति राजनिर्घण्ट ॥

क्षमावान्, [त्] त्रि, (क्षमा विद्यते अस्य अस्मिन् वा इति मतुप् मस्य वत्वम् ।) क्षान्तियुक्त । यथा,

"एकः क्षमावता दोषो द्वितीयो नोपपद्यते ।
यदेन क्षमया युक्तमशक्त मन्यते जन" ॥

इति गारुडे ११४ अध्याय ॥

क्षमिता, [ऋ] त्रि, (क्षम् + तृच् ।) क्षमाशील । इत्यमर । ३ । १ । ३१ ॥

क्षमी, [न्] त्रि, (क्षम् + "शमीत्यष्टाभ्यो घिनुण्" । ३।२।१४१। इति घिनुण् ।) क्षमाशील । तत्पर्य्याय । सहिष्णु २ सहन ३ क्षन्ता ४ तितिक्षु ५ क्षमिता ६ । इत्यमर ।३।१।३१॥ क्षम ७ शक्त ८ सह ९ प्रभूष्णु १० । इति हेमचन्द्र ॥ (यथा, भागवते । ९ । १५ । ४० ।

"क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः" ॥)

क्षय, पु, (क्षि क्षये । "नन्दिग्रहिपचादिभ्य" ।३।१।१३४। इति अच् ।) नीतिवेदिना त्रिवर्गान्तर्गतप्रथमवर्ग । स तु राज्ञामष्टवर्गस्यापचय । यथा,—

"क्षय स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" ॥

इत्यमर ३।१।१३४ ॥ नीतिवेदिना नीतिशास्त्रज्ञाना क्षयादिभिस्त्रिवर्ग अन्येषान्तु धर्म्मकामार्थ पूर्व्वमुक्त । अष्टवर्गस्यापचय क्षय । तस्यैवोपचयो वृद्धि । तस्य नोपचयो नाप्यपचय स्थानम् । अष्टवर्गो यथा,—

"कृषिर्व्वणिक्पथो दुर्गं सेतुकुञ्जरबन्धनम् ।
कन्याकरबलादान सैन्यानाञ्च निवेशनम् ॥
अष्टवर्ग स्मृतो राज्ञा" । इति तट्टीकाया भरत ॥

लयः । तत्पर्य्याय । सम्वर्त्त २ प्रलय ३ कल्प ४ कल्पान्त ५ ॥ अपचय । तत्पर्य्याय । क्षिया २ ॥ निलय । तत्पर्य्याय गृहशब्दे द्रष्टव्य ॥ कासरोगविशेष । तत्पर्य्याय । यक्ष्मा २ शोष ३ । इत्यमर ॥ राजयक्ष्मा ४ रोगराज ५ गदाग्रणी ६ उष्मा ७ अतिरोग ८ रोगाधीशः ९ नृपामय १० । इति राजनिर्घण्ट ॥

(लक्षणानि चिकित्सितञ्च यथा,—

"शृणुत गुणगरिष्ठा व्याधिघोर नराणा
भवति रहितचेष्टो वातुल प्राणिना वै ।
चिरनिरयकरोऽय प्राकृते कर्म्मपाकैरिह परिभवकारी मानुषस्य क्षयोऽयम् ॥
देवाना प्रकरोति भङ्गमथवा भ्रूणस्य सम्पातन
गोपृथ्वीधरविप्रवालहननस्थावासविध्वंसनम् ।
योऽय स्थानविनाशनञ्च कुरुते स्त्रीणा वधो यो नरस्तस्यैवै गुरुकर्म्मभि क्षयगदो देहार्थहारी महान् ॥
देवाना दमतो धनञ्च दहतो भ्रूणप्रपातेऽपि च
देवत्व हरतो विषञ्च ददत आरामक निघ्नत ।
तेनासौ नियमेन सम्भवति वै नृणाञ्च तीव्रा रुजा
धातूना क्षयकारिणी च मनुजस्यात्मापहा दारुणा
क्षयो दशविधश्चैव विज्ञातव्यो भिषग्वरै ॥
श्रान्त्या भारादिषमशयनैर्दीर्घमार्गाक्रमैर्व्वा
भुक्तेर्दोषादतिशयरते सेवनाद्वै नरस्य ।
ज्वरेणातिक्रान्तो विषमशयनात् कूटनपरैः
जाता रोगा मनुजवपुष क्षीणता धनयन्ति ।
रोगाक्रान्तो विषमशयनात्तस्य मन्दज्वराद्वा ।
श्लेष्मा पित्त मरुदथशयनैर्याति देहक्षय वा ।
रसरक्तमासमेदश्चास्थिमज्जानि शुक्रत ॥
एव दशविधा ज्ञेया क्षया नृणा वपुःषु च ।
पुनश्च लक्षणान्येषां वक्ष्यते शृणु साम्प्रतम् ।
अतिखेदातिघर्म्मेण चिन्ताशोषभयादिना ॥
वाताद्यै सेवितैश्चापि जायते मारुतक्षय ।
तेन तन्द्राङ्गदाहश्च पिपासारुचिवेपथुः ॥
तम क्लमो भ्रमश्चैव भवेच्च मारुतक्षये ।
तस्मादिमानि सेव्यानि रसानि पललानि च ॥
रसोनादिककल्कञ्च सेवयेद्वातवर्द्धनम् ।
पित्तक्षयेऽग्निमान्द्यञ्च जायतेऽरुचिर्जाड्यता ॥
कासहृल्लासशोफश्च जायते मन्दचेष्टता ।
स्वेदाभ्यङ्गाग्नि पानानि दीपनानि प्रयोजयेत् ॥
जाङ्गलानि रसान्नानि सेवयेत् पित्तकृत्क्षये ।
व्यायामे च व्यवाये च रूक्षानाहारसेवनैः ॥

सन्तापक्रोधनैश्चापि जायते कफसत्क्षयः।
तेनदाहोऽथवा पाण्डुः शोषो निःश्वसनं भ्रमः ॥
विनिद्रता क्षुत् तृष्णा च स्त्रीसङ्गे नाभिनन्दति।
तस्य शीतान्नपानानि कन्दशाकादिकैरसैः ॥
आनूपैर्दधिदुग्धैर्वा सेवनं न समीहितम्।
त्रिभिर्दोषैः क्षयः प्राप्तस्तदा हि मरणं ध्रुवम् ॥
तस्य क्रिया प्रयोक्तव्या साधारणा महामते ! ॥
अथ धातुक्षयं वक्ष्ये हारीत ! शृणु साम्प्रतम्।
रसरक्तमांसमेदः प्रत्येकं क्षयलक्षणम् ॥
रसक्षयेऽतिशोषश्च मन्दाग्नित्वञ्च वेपथुः।
शिरोरुक् मन्दचेष्टत्वं जायते च क्लमो भ्रमः ॥
रक्तक्षये क्षयः पाण्डुर्मन्दचेष्टो भवेन्नरः।
श्वासनिष्ठीवनं शोषो मन्दाग्नित्वञ्च जायते ॥
मांसक्षयेऽतिकृशता चेष्टनञ्चाङ्गभङ्गता।
निद्रानाशोऽतिनिद्रास्य विसञ्ज्ञो लघुविक्रमः ॥
मेदःक्षये मन्दबलो विसञ्ज्ञता
चाङ्गस्य भङ्गो वमनं परूषता।
श्वासाग्निकासोऽरुचिताग्निमन्दता
विशेषकम्पो वपुषश्च शुष्कता ॥
अस्थिक्षये स्यात् अतिमन्दचेष्टता
मन्दश्च वीर्य्यं खलु मेदसः क्षये।
विसञ्ज्ञता स्यात् कृशता च कम्पनं
अङ्गस्य भङ्गो वमनं परूषता ॥
शोषश्च देहे सदनञ्च शोफिता
विकम्पनं शोषरुजा च जायते।
भिषग्वरस्तत् परिवेदलक्षणं
मज्जक्षये कम्पनमेव जायते ॥
भ्रमः क्लमः स्यादतिमन्दचेष्टः
शोफो निशाजागरणञ्च तन्द्रा ॥
मन्दज्वरः शोषसमो मनुष्ये
शुक्रक्षये चाल्पविचेष्टितानि।
रूक्षं भ्रमः कम्पनशोषरोधः
स्त्रीद्वेषितादीनि विरूपता च ॥
इदानीं सम्प्रवक्ष्यामि भेषजानि यथाक्रमम्।
स्नेहनं रूक्षणञ्चैव तथा विम्लापनं हितम्।
जाङ्गलानि च मांसानि भोजनानि च सेवयेत् ॥
गुडूची शृङ्गवेरञ्च यवानी क्वथितं जलम्।
मरिचैः क्वथितं दुग्धं पाने रात्रौ प्रशस्यते ॥
रसानां तेन वृद्धिः स्यात् शीघ्रं तस्माद्विमुच्यते ॥
रसानां वृद्धिकरणं गोधूमयवशालिभिः।
क्वथितानि भिषक्श्रेष्ठैर्जाङ्गलानि विशेषतः ॥
घृतदुग्धसिताक्षौद्रमरिचानि च पिप्पली।
पानं शस्तं मनुष्याणां रक्तवृद्धिकरं मतम्” ॥
इति रसरक्तवृद्धिकरम् ॥ * ॥
“आनूपानि च धान्यानि लघुनामानि कल्पयेत्।
कल्याश्च घृतदुग्धादीन् सेवयेन्मधुराणि च ॥
रसाश्च जाङ्गलानि स्युः सेवनार्थे भिषग्वर !।
सितोपलादिकं चूर्णं छागाक्षीरं सकोलकम् ॥
हितं पानं क्षये चैव कल्यमप्रातराशने”।
इति मांसमेदोवृद्धिकरम् ॥ * ॥
“घृतानि च सुपक्वानि क्षीराणि विविधानि च।
चन्दनानि च द्राक्षादि-चूर्णानि च भिषग्वर ! ॥
जाङ्गलानि च सर्व्वाणि सेवनीयानि पुत्रक !।
अम्लानि मधुराणीह सर्व्वाणि च प्रयोजयेत्” ॥
इत्यस्थिवृद्धिकरणम् ॥ * ॥
“शुक्रक्षये प्रपाकानि रसानि च विशेषतः।
नवनीतं तथा क्षीरं मधुराणि च सेवयेत् ॥
कर्कटी मूलपयसा विदारी कन्दशाल्मली।
सिताढ्यश्च हितं पानं शस्यन्ते मधुराणि च” ॥
इति शुक्रक्षयवृद्धिकरणम् ॥ * ॥
“बला विदारी लघुपञ्चमूली
क्षीरद्रुमत्वक् च ततः प्रयोज्या।
पुनर्नवा मेघतुगारजन्य
सञ्जीवनीयैर्मधुकैः समांशैः ॥
अक्षप्रमाणानि समानि तानि
सर्व्वाणि चैतान्यपि चूर्णयित्वा।
विमिश्रयेत् तत्र कणाशतानि
यवान्नगोधूमयवाश्च पिष्टा ॥
तुगासमांशा सिततण्डुलाना
पेयं तु शृङ्गाटकमिश्रितञ्च।
प्रकीर्णकार्द्धेन वियोजनीयं
सर्व्वांशकेनापि सिता प्रयोज्या ॥
विभावयेच्चामलकीरसेन
वारत्रयं गोपयसा विभाव्य।
ततोऽस्य सर्व्वं सह शर्करामि
घृतेन चैव पुनरेव भाव्यम्।
तं भक्षयेत् क्षौद्रयुतं पलार्द्धं
जीर्णे च भोज्यं कटुकाम्लवर्ज्यम् ॥
क्षीरं घृतं वा सितशर्करा वा
यवान्नगोधूमकशालिभक्षान्।
ज्ञात्वाग्निपाकं जठरे नरस्य
देयो विधिज्ञैः क्षयरोगशान्त्यै।
पथ्यक्षये श्रान्तचिराभिताप-
सम्पीडितानाञ्च तथाशिरोऽर्त्तौ ॥
“पित्तातुराणां रुधिरक्षयाणां
श्रमाध्वसम्पीडितकामलानाम्।
श्वासातुराणां मधुमेहिनाञ्च
क्षीणेन्द्रियाणां बलकारिशस्तम्” ॥
इति बलादिचूर्णम् ॥ * ॥
“पिप्पली वर्द्धमानन्तु ज्वरे जीर्णे प्रशस्यते।
मन्दाग्नौ पीतमेवाथ गुदजे वा तथा पुनः” ॥
इति पिप्पलीवर्द्धमानम् ॥ * ॥
“द्वे पले माक्षिकं धातुः साक्षकञ्च पुनर्नवा।
तुगा एला शालिपर्णी वासकञ्च दुरालभा ॥
चूर्णार्द्धेन समं योज्यं त्रिगन्धं मरिचानि च।
तालीशं मगधा चैव तदर्द्धेन शिलोद्भवम् ॥
शिलाभेदन्तदर्द्धेन सर्व्वञ्चैकत्र मिश्रयेत्।
समेन तिलचूर्णन्तु शर्करामि समायुतम् ॥
तेन क्षयो राजयक्ष्मा कामला च विनश्यति।
अपस्मारं जयत्याशु बलवीर्य्याधिको भवेत् ॥
शाम्यन्ति च महारोगाः शुक्राढ्यो जायते नरः” ॥
इति शिलाजतुचूर्णम् ॥ * ॥
“बलाश्वगन्धा बृहतीद्वयञ्च
पर्णीद्वयं गोक्षुरकं स्थिरा च।
पटोलनिम्बस्य दलानि मुस्तम्
सत्रायमाणा सदुरालभा च ॥
कृत्वा कषायञ्च पदावशेषं
पूते ततस्तूर्णमिदं प्रयुञ्ज्यात्।
द्राक्षा शठी पुष्करमूलधात्री
दुग्धं समं तामलकीकषायम् ॥
सर्पिः प्रयक्तं नवनीतकञ्च
सर्पिस्तदर्द्धेन वियोजनीयम्।
सिद्धं घृतं पानमथैव वस्तौ
नस्ये तथाभ्यञ्जनभोजने च ॥
स पाण्डुकाशक्षयकामलानाम्
राजक्षये क्षीणबलेन्द्रियाणाम्।
क्षतेषु शोफेषु व्रणेषु शस्तं
शिरोऽर्त्तिपार्श्वार्त्तिगुदामयघ्नम्” ॥
इति बलाद्यं घृतम् ॥ * ॥
“चन्दनं सरलं दारु पत्रैला बालकं शठी।
नलशैलेयकं एला पद्मकं नागकेशरम् ॥
कक्कोलकं सुरामांसी शैलेयं द्वे हरीतकी।
रेणुकात्वक् कुङ्कुमञ्च शारिवे द्वे निशागुरु ॥
बला द्राक्षा च नलिका कषायं सुपरिस्रुतम्।
तैलमस्तु तथा लाक्षा रसेन समभागिकम् ॥
मन्दाग्निना पचेत्तैलं सिद्धं पाने च वस्तिषु।
नस्ये चाभ्यञ्जने चैव योजयेत्तद्भिषग्वरः ॥
हन्ति पाण्डुं क्षयं कासं ग्रहघ्नं बलवर्णकृत्।
मन्दज्वरमपस्मारकुष्ठपामं हरेत् पुनः।
करोति बलपुष्टीश्च प्रज्ञायुर्बलवर्द्धनम् ॥
रूपसौभाग्यदं पुण्यं सर्व्वभूतयशस्करम्” ॥
इति चन्दनाद्यं तैलम् ॥
इति क्षयरोगचिकित्सा ॥ इति हारीते चिकित्सितस्थाने दशमेऽध्याये ॥ * ॥
“त्रिकटु त्रिफलैलाभिर्जातीफललवङ्गकैः।
नवभागोन्मितं तुल्यं लौहं मारदसिन्दुरम्।
मधुना क्षयरोगाणां हन्ताय क्षयकेशरी” ॥
इति क्षयकेशरी रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्माधिकारे ॥ *॥)
अस्य अन्यत् निदानादि यक्ष्मशब्दे द्रष्टव्यम्।
तस्यौषधान्तरं यथा,—
“श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम्।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत्” ॥
इति गारुडे १८३ अध्यायः ॥ (क्षयत्यस्मादनेन वा क्षि + क्षये + अच्। क्षयति विनाशयति इति। अन्तर्भूतणिच् ततोऽच्।) रोगमात्रम्। इति राजनिर्घण्टः ॥

क्षयतरुः, पुं, (क्षयस्य क्षयार्थं वा तरुः।) स्थाली वृक्षः। इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः।
“नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः।
स्थाली वृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः”।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

क्षयथुः, पुं, (क्षि + अथुच्।) कासः। इति हेमचन्द्रः ॥

क्षयनाशिनी, स्त्री, (क्षयं क्षयाख्यरोगं नाशयतीति। क्षय + नश् + णिच् + णिनि + ङीप्।) जीवन्ती वृक्षः। इति शब्दमाला ॥

(गुणादयोऽस्य जीवन्तीशब्दे ज्ञेयाः ॥)

क्षय्य, त्रि, (क्षेतुं शक्यम्। क्षि + "क्षय्यजय्यौ शक्यार्थे"।६।१।८१। इति यत्।) क्षयणीयम्। क्षयितव्यम्। क्षययोग्यम्। इति व्याकरणम् ॥ "क्षेतु नेतु योग्य क्षेय पाप जेय मन"। इति सिद्धान्तकौमुदी ॥ (यथा, महाभारते।
"अपवर्गे तु वैश्यस्य श्राद्धकर्म्मणि भारत।।
अक्षय्यमभिधातव्यम्" इति ॥)

क्षर, ज सञ्चलने। इति कविकल्पद्रुमः ॥ (भ्वा-परं-अक-सेट्। क्वचित् सकञ्च।) ज, क्षार क्षर। सञ्चलनमिह मोचन स्रवणञ्च। आद्यौ सकर्म्मक। "स्रोतोभिस्त्रिदशगजा मद क्षरन्त"। इति किराते।७।८॥ स्रवणे तु। क्षरत् क्षतजवत्तय। इति दुर्गादासः ॥

क्षर, क्ली, (क्षरति स्रवति वर्षति च। क्षर् + अच्।) जलम्। तथा च सत्यसावित्र्योपनिषदि।१।८।१०। "क्षरन्त्वविद्या ह्यमृत तु विद्या" ॥) मेघे पु। इति मेदिनी ॥

क्षर, पु, (क्षर् + अच्।) नश्वरवस्तु। यथा,—
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षर सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते" ॥
इति श्रीभगवद्गीतायाम्।१५।१७।
"क्षरश्चाक्षरश्चेति द्वाविमौ लोके प्रसिद्धौ। तावेवाह तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धे। कूटो राशि शिला राशि। पर्व्वत इव एकदेशेषु नश्यत्स्वपि निर्व्विकारतया तिष्ठतीति कुटस्थश्चेतनो भोक्ता स त्वक्षरः पुरुष उच्यते विवेकिभि"। इति तट्टीकाया श्रीधरस्वामी ॥ (तथा, महाभारते।१४। अनुगीतापर्व्वाध्याये।१७।१७।
"ततः सवेदन सद्यो जीव प्रच्यवते क्षरात्" ॥)

क्षरण, क्ली, (क्षर् + भावे ल्युट्।) मोचनम्। स्रवणम्। (यथा, रघु।१९।१९।
"सौध्यमेत्य गृहिणीपरिग्रहात्
नर्त्तकीष्वसुलभास तदपु।
वर्त्तते स्म सकथञ्चिदालिख-
न्नङ्गुलीक्षरणसन्नवर्त्तिका" ॥)

क्षरी, (न्) (क्षर क्षरण वर्षण अस्त्यस्मिन् काले क्षरोऽस्त्यस्य वा। क्षर् + इनि।) वर्षाकाल। इति हेमचन्द्र। क्षरणविशिष्टे त्रि ॥

क्षल, क शौचे। इति कविकल्पद्रुम। (चुरा पर-सक-सेट्।) शौचमिह शुद्धीकरणम्। क, क्षाल यति पात्र पयसा लोक। इति दुर्गादास ॥

क्षल, ज चाले। चये। इति कविकल्पद्रुम। (भ्वा-परं अक-सेट्।) ज, क्षाल क्षल। चाल कम्प। चयश्चयनम्। इति दुर्गादास ॥

क्षव, पु, (क्षु शब्दे क्षुते च + भावे अप्।) क्षुतम्। राजिका। इत्यमर ॥ कास ॥ इति शब्दरत्नावली। राजिकाभेद। तत्पर्य्याय। क्षुधाभिजनन २ चमलः ३ दीर्घशिम्बिक ४ सुकुमार ५ वृत्तबीज ६ मधुर ७ क्षवक ८। अस्य गुणा। कषायत्वम्। मधुरत्वम्। शीतलत्वम्। कफपित्तश्रमहरत्वम्। रुच्यत्वम्। रुच्यत्वम्। पवनाध्मानपुष्टिदत्वञ्च। इति राजनिर्घण्टः ॥

क्षवक, पुं, (क्षु + अप् + स्वार्थे कन्।) अपामार्ग। राजिका। भूताङ्कुश। इति राजनिर्घण्ट।
(व्यवहारोऽस्य यथा सुरसादिगणपाठे।
"क्षवकसरसिभार्गी कामुका काकमाची
कुलहलविषमुष्टी भूस्तृणो भूतकेशी" ॥
इति वाभटे सूत्रस्थाने १५ अध्याये ॥)

क्षवकृत्, स्त्री, (क्षव करोतीति। कृ + क्विप्।) छिक्कनी। इति भावप्रकाश ॥

क्षवथुः, पुं, (क्षु + अथुच्।) क्षुतम्। कास। इति मेदिनी। कण्ठकण्डूयनम्। इति शब्दरत्नावली ॥ (क्षवथुर्नाम रोगविशेष। तस्य सकारणसम्प्राप्तिकलक्षणानि यथा,—
"तीक्ष्णघ्राणोपयोगार्करश्मिसूत्रतृणादिभि।
वातकोपिभिरन्यैर्वा नासिका तरुणास्थनि ॥
विघट्टितेऽनिल क्रुद्धो रुद्ध शृङ्गाटकं व्रजेत्।
निवृत्त कुरुतेऽत्यर्थं क्षवथुं स भृश क्षव" ॥
इति वाभटे उत्तरस्थाने १९ अध्याये ॥
"घ्राणाश्रिते मर्म्मणि सप्रदुष्टे
यस्यानिलो नासिकया निरेति।
कफानुयातो बहुश सशब्द-
स्त रोगमाहु क्षवथुं विधिज्ञा ॥
तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान् कटूनर्कनिरीक्षणाद्वा।
सूत्रादिभिर्वा तरुणास्थिमर्म्म-
ण्युद्घाटिते य क्षवथुर्निरेति" ॥
इत्युत्तरतन्त्रे द्वाविंशेऽध्याये सुश्रुतेनोक्तम् ॥
चिकित्सा यथा।
"क्षेप्य नस्य मूर्द्धविरेचनीयै-
र्नाड्याचूर्णं क्षवथौ भ्रंशथौ च" ॥
इति चात्रैव २३ अध्याये तेनोक्तम् ॥ अस्य विधारणाज्जातो य स यथा,—
"भवन्ति गाढ क्षवथोर्विघाता-
च्छिरोऽक्षिनासाश्रवणेषु रोगा।
कण्ठास्यपूर्णत्वमतीवतोद
कूजश्च वायोरथवा प्रवृत्ति" ॥
इति चोत्तरतन्त्रे पञ्चपञ्चाशत्तमेऽध्याये च तेनोक्तम् ॥)

क्षवपत्रा, स्त्री, (क्षव क्षुतहेतु पत्र यस्या। एतत्पत्राघ्राणेन हि क्षुत जायते। अतस्तथात्वम्।) द्रोणपुष्पी। इति राजनिर्घण्ट ॥

क्षविका, स्त्री, (क्षव क्षुत साध्यतयाऽस्त्यस्य इति ठन् + टाप् च।) वृहतीभेद। तत्पर्य्याय। सर्पतनु २ पीततण्डुला ३ पुत्रप्रदा ४ बहुफला ५ गोधिनी ६। अस्या गुणा। "क्षविका वृहती तिक्ता कटुरुष्णा च तत्समा"। इति राजनिर्घण्ट ॥

क्षान्त, त्रि, (क्षम् + कर्त्तरि क्त।) सहनशील। तत्पर्य्याय। सोढ २। इत्यमर ॥ क्षमान्वित ३। इति शब्दरत्नावली ॥ तितिक्षित ४। इति जटाधर ॥ (यथा, हरिवंशे।२१।२१।
"निर्व्वैरो निर्व्वृत क्षान्तो निर्म्मन्यु क्षतिरेव च" ॥)

क्षान्ति, स्त्री, (क्षम + भावे क्तिन्।) सत्यपि सामर्थ्ये अपकारिणि अपकाराचिकीर्षा। इति देवीमाहात्म्यटीकाया नागभट्ट। तत्पर्य्याय। तितिक्षा २। इत्यमर ॥ सहिष्णुता ३ क्षमा ४। इति जटाधर ॥ (यथा, भगवद्गीतायाम् १८।४२।
"शमो दमस्तप शौच क्षान्तिरार्ज्जवमेव च" ॥)

क्षान्तु, त्रि, (क्षम् + "क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च"। उणा।५।४३। इति तुन् वृद्धिश्च।) क्षमाशील। तत्पर्य्याय। मर्षक २। इत्युणादिकोष ॥

क्षान्तु, पु, (क्षम् + तुन् वृद्धिश्च।) पिता। इति सङ्क्षिप्तसारोणादिवृत्ति ॥

क्षाम, त्रि, (क्षै + कर्त्तरि क्त। "क्षायो म"।८।२।५३। इति निष्ठा तस्य मत्वम्।) क्षीण। अबल। इति शब्दरत्नावली ॥ (यथा, भागवते ३।२१।४६।
"विद्योतमान वपुषा तपस्युग्रयुजा चिरम्।
नातिक्षाम भगवत स्निग्धापाङ्गावलोकनात्" ॥
स्त्रियां टाप्। यथा, मेघदूते।८९।
"आधिक्षामा विरहशयने सन्निषण्णैकपार्श्वाम्" ॥
सर्व्वरूपवत्त्वात् विष्णु। यथा, महाभारते।१३ विष्णुसहस्रनामकीर्त्तने।१४९।१०४।
"आश्रम श्रमण क्षाम सुपर्णो वायुवाहन" ॥)

क्षामवती } क्षामवतीष्टि } स्त्री, (क्षामं दोषक्षय साध्यतयाऽस्त्यस्या मतुप् मस्य वत्वम्। स्त्रिया ङीप्। पक्षे कर्म्मधारय।) यागविशेष।
यथा, भविष्ये।
"क्षामवत्यादिना यद्वत् कर्म्मणा पतनापते।।
दैवदोषादकरणे जाते दोषक्रदम्बके।
होमेनैकेन दोषाणा सर्व्वेषा क्षयमादिशेत् ॥
एवञ्च एकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीष्टि सर्व्वत्र दृष्टान्त"। इति प्रायश्चित्ततत्त्वम् ॥

क्षामास्य, क्ली, (क्षामस्य क्षयस्य आस्य स्थानम्।) कुपथ्यम्। यथा, शब्दचन्द्रिकायाम।
"अपथ्यमहित रोग्य क्षामास्य परिकीर्त्तितम्" ॥
पुस्तकान्तरे क्षमस्यमिति च पाठ ॥

क्षार, क्ली, (क्षरतीति। क्षर् सञ्चलने + "ज्वलितिकसन्तेभ्यो ण"।३।१।१४०। इति ज्वलादित्वात् ण।) विड्लवणम्। इति राजनिर्घण्ट ॥ यवक्षार। इति त्रिकाण्डशेष ॥

क्षार, पु, (क्षर् सञ्चलने + ज्वलादित्वात् ण ॥) रसविशेष। (यथा, पञ्चतन्त्रे।१।३१५।
"तातस्य कूपोऽयमिति ब्रुवाणा
क्षार जल कापुरुष पिबन्ति" ॥
अस्य गुणा यथा।
"क्षार क्लेद जनयति मुखे स्वादुरुष्णो विदाही
शूलश्लेष्मा रुचिभ्रष्टशल्यमामूत्रकृच्छ्रोषणश्च।
आनाह सञ्जनयति पुनर्वह्निसन्धुक्षण स्या-
देव प्रोक्त विदितगुणकै कोविदै क्षारवीर्य्यम्" ॥

इति हारीते प्रथमस्थाने ६ अध्याये ।) धूर्त्तः ।
लवणम् । (यथा, रामायणे । २ । ७३ । ३ ।
"दुःखे मे दुःखमकरोर्व्रणे क्षारमिवाददाः ।
राजानं प्रेतभावस्थं कृत्वा रामञ्च तापसम्" ॥)
काचः । भस्म । इति मेदिनी ॥ गुडः इति हेम-
चन्द्रः ॥ टङ्कणः । (अस्य पर्य्याया यथा,—
"सौभाग्यं टङ्कणः क्षारो धातुद्रावकमुच्यते" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सर्जिक्षारः । इति राजनिर्घण्टः ॥ * ॥

क्षारविशेषगुणाः ।

"पलाशधवपूतीककरञ्जपाटलादिजाः ।
क्षारास्तु पाचनाः सर्व्वे रक्तपित्तकराः सराः ।
गुल्मार्शःक्रिमिपुंस्त्वघ्नाः शर्कराश्मरिनाशनाः" ॥
इति राजवल्लभः ॥ (क्षारसामान्यगुणा यथा,—
"क्षारः सर्व्वश्च परमं तीक्ष्णोष्णः क्रिमिजिल्लघुः ।
पित्तासृग्दूषणः पाकी छेद्यहृद्यो विदारणः ।
अपथ्यः कटुलावण्याच्छुक्रौजःकेशचक्षुषाम्" ॥
इति सूत्रस्थाने षष्ठेऽध्याये वाग्भटेनोक्तम् ।)

क्षारकः, पुं, (क्षरतीति । क्षर् + ण्वुल् ।) अचिर-
जातफलम् । तत्पर्य्यायः । जालकम् २ । इत्यमरः ॥
जालि इति भाषा । पक्षिमत्स्यादिपिटकम् ।
खाँचा इति भाषा । इति मेदिनी ॥ रजकः ।
इति शब्दमाला ॥ (स्वार्थे कन् । क्षारः । यथा,
सुश्रुते ।
"तन्मालती क्षारकसैन्धवायुत
सदाञ्जनं स्यात्तिमिरेऽथ रागिणि" ।)

क्षारतैलं, क्ली, (क्षारयुतं क्षाराख्यं वा तैलम् ।) भक्ष-
तैलविशेषः । यथा,—
"शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवन्तथा ।
भुर्जग्रन्थिं विडं मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्व्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्कशतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम्" ॥
इति गारुडे १९८ अध्याये ॥

क्षारत्रयं, क्ली, (क्षाराणां त्रयम् ।) त्रिविधक्षारः ।
तद्यथा, राजनिर्घण्टे ।
"सर्जिकश्च यवक्षारः टङ्कणक्षारमेव च ।
क्षारत्रयञ्च त्रिक्षारं क्षारत्रितयमेव च" ॥
("सर्ज्जिका यावशूकश्च क्षारद्वयमुदाहृतम् ।
टङ्कणेन युतं तत्तु क्षारत्रयमुदीरितम् ।
मिलितन्तूक्तगुणकृद्विशेषाद् गुल्महृत् परम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षारदला, स्त्री, (क्षारो दलेषु पत्रेषु अस्याः । चन्द्र-
वास्तूकशाकविशेषः ।) चिल्ली । इति राजनिर्घण्टः ॥
(चिल्लीशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

क्षारदशकं, क्ली, (दशविधाः क्षाराः सन्त्र । कप् ।
क्षाराणां दशकमित्येके ।) दशविधक्षारः । यथा,—
"शिग्रुमूलकपलाशचुक्रिका
चित्रकार्द्रकसनिम्बसम्भवैः ।
इक्षुशेखरिकमोचिकोद्भवैः
क्षारपूर्व्वदशकं प्रकीर्त्तितम्" ॥
इति राजनिर्घण्टः ॥

क्षारद्रुः, पुं, (क्षारप्रधानको द्रुर्द्रुमः ।) घण्टापाटलि-
वृक्षः । इति रत्नमाला ॥ (घण्टापाटलिशब्दे-
ऽस्य गुणाः पर्य्यायाश्च ज्ञातव्याः ॥)

क्षारपत्रः, पुं, (क्षारः पत्रेषु यस्य ।) वास्तूकः । इति
राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"वास्तूकं वास्तुकञ्च स्यात् क्षारपत्रञ्च शाकराट्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणा-
श्चास्य वास्तूकशब्दे ज्ञातव्याः ॥)

क्षारपत्रकः, पुं, (क्षारपत्र + स्वार्थे कन् कप् वा ।)
वास्तूकः । इति हेमचन्द्रः ॥

क्षारभूमिः, पुं, (क्षारोत्पादनक्षमा भूमिः ।) लवण-
मृत्तिकादेशः । यथा,—
"जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः ।
किमाश्चर्य्यं क्षारभूमौ प्राणदा यमदूतिका" ॥
उद्भटः ॥ (क्षारस्य भूमिः स्थानम् ।) लवण-
भूम्यां स्त्री ॥

क्षारमध्यः, पुं, (क्षारो मध्येऽस्य ।) अपामार्गः । इति
रत्नमाला ॥ (अपामार्गशब्देऽस्य गुणादयो
व्याख्याताः ॥)

क्षारमृत्तिका, स्त्री, (क्षारयुक्ता मृत्तिका ।) लवण-
मृत्तिका । तत्पर्य्यायः । ऊषः २ । इत्यमरः ॥ ऊषं
३ । इति शब्दरत्नावली ॥

क्षारवृक्षः, पुं, (क्षारप्रधानको वृक्षः ।) मुष्ककः ।
इति राजनिर्घण्टः ॥

क्षारश्रेष्ठं, क्ली, (क्षारेषु श्रेष्ठम् ।) यवक्षारम् ।
इति राजनिर्घण्टः ॥

क्षारश्रेष्ठः, पुं, (क्षारः श्रेष्ठोऽत्र ।) पलाशः । मुष्ककः ।
इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा ।
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षारषट्कं, क्ली, (क्षाराणां षट्कम् ।) षड्विध-
क्षारः । यथा,—
"धारापामार्गकुटजजाङ्गलीतिलमुष्ककैः ।
क्षारैरेतैस्तु मिलितैः क्षारषट्कादयो गणः" ॥
इति राजनिर्घण्टः ॥

क्षारसिन्धुः, पुं, (क्षारैर्युक्तः क्षारप्रधानः सिन्धुर्वा ।)
लवणसमुद्रः । स तु जम्बुद्वीपस्य दक्षिणे शाक-
द्वीपस्य उत्तरे वर्त्तते । यथा,—
"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति" ॥
इति सिद्धान्तशिरोमणौ गोलाध्याये ॥

क्षारमेलकः, पुं, (क्षाराणां मेलः सङ्घः । ततः स्वार्थे
कन् ।) सर्व्वक्षारः । इति राजनिर्घण्टः ॥

क्षाराच्छं, क्ली, (क्षारेषु अच्छं निर्म्मलम् । समुद्र-
जातलवणस्य स्वच्छतया तथोक्तम् ।) सामुद्रलव-
णम् । इति हारावली ॥ (सामुद्रलवणशब्देऽस्य
गुणादिकं ज्ञेयम् ॥)

क्षाराष्टकं, क्ली, (क्षाराणां अष्टकम् ।) अष्टप्रकार-
क्षारः । तद्यथा,—
"पलाशवज्रिशिखरिचिञ्चार्कतिलनालजाः ।
यवजः स्वर्ज्जिका चेति क्षाराष्टकमुदाहृतम् ।
क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम्" ॥
इति भावप्रकाशः ॥

क्षारिका, स्त्री, (क्षर् + ण्वुल् + टाप् च । अत
इत्वम् ।) क्षुधा । इति हारावली ॥

क्षारितः, त्रि, (क्षर् + णिच् + कर्म्मणि क्तः ।) अ-
भिशस्तः । अपवादयुक्तः । इत्यमरः ॥ (यथा,
महाभारते २ । युधिष्ठिरनारदसंवादे । ५ ।
१०५ ।
"कच्चिदार्य्यो विशुद्धात्मा क्षारितश्चौरकर्म्मणि ।
अदृष्टशास्त्रकुशलैर्न लोभाद्बध्यते शुचिः" ॥)
स्रावितः । क्षारः । इति मेदिनी ॥

क्षारोदः, पुं, (क्षारः उदकं यस्मिन् । क्षारं उदकं
यस्य वा । उत्तरपदस्य चेत्युदकस्य उदादेशः ।)
लवणसमुद्रः । यथा, "क्षारोदेक्षुरसोद-सुरोद-
घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्तजलधयः
सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकशेन
यथानुपूर्व्वं सप्तस्वपि वहिर्द्वीपेषु पृथक् परित
उपकल्पिताः" । इति श्रीभागवते ५ स्कन्धे १ अः ॥

क्षालनं, क्ली, (क्षल् + णिच् + भावे ल्युट् ।) प्रक्षा-
लनम् । धौतकरणं यथा,—
"स्त्रीशूद्रौ वाथ नित्यांश्च क्षालनाच्च करौष्ठयोः" ॥
इति ब्रह्मपुराणम् । इत्याह्निकाचारतत्त्वम् ॥
(यथा च, मार्कण्डेयपुराणे । १६ । १६ ।
"श्लेष्ममूत्रपुरीषासृक्प्रवाहक्षालनेन च ।
रहश्चैवोपचारेण प्रियसम्भाषणेन च" ॥)

क्षालितः, त्रि, (क्षल् + णिच् + क्तः ।) कृतप्रक्षालनम् ।
तत्पर्य्यायः निर्णिक्तम् २ शोधितम् ३ मृष्टम् ४
धौतम् ५ । इति हेमचन्द्रः ॥ (यथा, माघे ।
१० । १४ ।
"अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्य्यम् ।
क्षालितन्नु शमितन्नु वधूनां
द्रावितन्नु हृदयम्मधुवारैः" ॥)

क्षि, क्षये ऐश्वर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-
सक, ऐश्वर्य्ये—अक-अनिट् ।) क्षयति पापम् ।
इति दुर्गादासः ॥

क्षि, न ग ष हिंसायाम् । इति कविकल्पद्रुमः ॥ (स्वा-
क्र्या च पर-सक-अनिट् ।) न, क्षिणोति । ग,
क्षिणाति । ष, क्षिया । (यथा, शान्तिशतके ५ ।
"धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं
ध्यायतामानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कम्

क्षिता । अस्माकन्तु मनोरथोपरचितप्रासाद-वापीतटक्रीडाकाननकेलिमण्डपयुषामायुः परं क्षीयते" । इति कर्म्मकर्त्तरि साध्यम् । इति दुर्गादासः ॥

क्षि, ग वासगत्योः । इति कविकल्पद्रुमः ॥ (तुदा-पर-अक-सकच-अनिट् ।) ग, क्षियति । इति दुर्गादासः ॥

क्षि, त्रि, (क्षि + बाहुलकात् डि ।) निवासः । गतिः । क्षयः । इति मेदिनी ॥

क्षिण, उ ञ वधे । इति कविकल्पद्रुमः ॥ (तना-उभं-सक-सेट्-उदित्त्वात् क्त्वा वेट् ।) उ ञ, क्षिणोति क्षिणुते । उ, क्षिणित्वा क्षित्वा । इति दुर्गादासः ॥

क्षित, त्रि, (क्षि + कर्म्मणि क्तः ।) क्षिसितः । क्षित कामो मया क्षिसित इत्यर्थः । इति मुग्धबोधटीकायां दुर्गादासः ॥

क्षितिः, स्त्री, (क्षियन्ति वसन्त्यस्याम् । क्षि + अधिकरणे क्तिन् ।) अस्या अपरा व्युत्पत्तिर्यथा,—
"महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ।
काश्यपी कश्यपस्येयमचला स्थिररूपतः" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ॥
पृथिवी । (यथा, मनौ ४ । २४१ ।
"मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति" ॥)
वासः । क्षयः । इत्यमरः । ३ । ३ । ७० ॥ कालभेदः । स तु प्रलयः । इति मेदिनी ॥ रोचनानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ * ॥

क्षितिकणः, पुं, (क्षितेः पृथिव्याः कणः ।) धूलिः । इति त्रिकाण्डशेषः ॥

क्षितिक्षमः, पुं, (क्षितिरिव क्षमते क्षिताविव क्षमाकारणीभूता शक्तिरस्मिन् वा ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥

क्षितिजं, क्ली, (क्षिति + जन् + ड ।) खगोले आकाशमध्यान्नवत्यंशान्तरे तिर्य्यग्वृत्तम् । यथा,—
"पूर्व्वापरं विरचयेत् सममण्डलाख्यं
याम्योत्तरञ्च विदिशोर्व्वलयद्वयञ्च ।
ऊर्द्ध्वाध एवमिह वृत्तचतुष्कमेत-
दावेष्ट्य तिर्य्यगपरं क्षितिजं तदर्द्धे" ॥
इति सिद्धान्तशिरोमणौ गोलबन्धाधिकारः ॥

क्षितिजः, पुं, (क्षितेर्जायते इति । जन् + ड ।) भूनागः । इति राजनिर्घण्टः । मङ्गलग्रहः । यथा,—
"परमैश्वर्य्यमतुलं नानाविधसुखाश्रयम् ।
करोति सोमपुत्रस्तु क्षितिजान्तर्दशागतः" ॥
इति ज्योतिस्तत्त्वम् ॥ भूजाते त्रि ॥

क्षितिजन्तुः, पुं, (क्षितौ क्षितेर्वा जन्तुरिव ।) भूनागः । इति राजनिर्घण्टः ॥

क्षितिधरः, पुं, (क्षितिं पृथ्वीं धरति धारयति वा । धृ धारि + वा अच् णिच्प्रत्यये पूर्व्वकस्य ।) पर्व्वतः । इति हलायुधः ॥ (यथा, कुमारे । ७ । ६४ ।
"अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण" ॥)
कूर्म्मवासुकिदिग्गजाश्च ॥

क्षितिनागः, पुं, (क्षितिजातो नागः । मध्यपदलोपी समासः ।) भूनागः । इति राजनिर्घण्टः ॥

क्षितिनाथः, पुं, (क्षितेः पृथिव्याः नाथः सहायः शास्ता इत्यर्थः ।) राजा । (क्षितिपतिदर्शनात् ॥)

क्षितिपः, पुं, (क्षितिं पातीति । पा + क ।) राजा । यथा,—"अथर्युनाथ क्षितिपः शुभंयु-
रूचे वचस्तापसकुञ्जरेण" ॥
इति भट्टौ । १ । २० ॥ (यथा च पञ्चतन्त्रे । २ । २४ ।
"यः सम्मानं सदा धत्ते भृत्यानां क्षितिपोऽधिकम् ।
वित्ताभावेऽपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित्" ॥)

क्षितिपतिः, पुं, (क्षितेः पतिः पालकः ।) राजा । यथा,—
"मूर्खोऽशान्तस्सपत्नी क्षितिपतिरलसो मत्सरो धर्म्महीनो दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः" । इति नवरत्ने । ६ । (तथा च रघु । ६ । ८६ ।
"प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतो वितानम्" ॥)

क्षितिपालः, पुं, (क्षितिं पालयतीति । पालि + "कर्म्मण्यण्" । ३ । २ । १ । इत्यण् ।) राजा । यथा, प्रबोधचन्द्रोदयनाटके १ अङ्के ।
"नीता क्षयं क्षितिभुजो नृपतेर्विपक्षा
रक्षावती क्षितिरभूत् प्रथितैरमात्यैः ।
साम्राज्यमस्य विहितं क्षितिपालमौलि-
मालार्च्चितं भुवि पयोनिधिमेखलायाम्" ॥
(तथा, रघुः । २ । ५१ ।
"एतावदुक्त्वा विरते मृगेन्द्रे
प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः
प्रीत्या तमेवार्थमभाषतेव" ॥)

क्षितिपालभाक्, [ज्] पुं, (क्षितिपालं भजते इति । भज् + क्विप् ।) राजा । यथा, भट्टौ ३ । २१ ।
"आसिष्ट नैकत्र शुचा व्यरंसीत्
कृताकृतेभ्यः क्षितिपालभाग्भ्यः ।
स चन्दनोशीरमृणालदिग्धः
शोकाग्निनागाद्द्युनिवासभूयम्" ॥

क्षितिपुत्त्रः, पुं, (क्षितेः पृथिव्याः पुत्त्रः ।) नरकराजः । (पुरा किल सिद्धेश्वरकपिलदेवकोपेन रसातलगतां भगवतीं क्षितिमुद्धर्त्तुं भगवान् विष्णुः वराहरूपेणावतीर्य्य सन् तत्र दुर्द्दान्तं दितिनन्दनं हिरण्याक्षं निपात्य रसातलात्तामुद्धृत्य तस्यामेव धरायां नरकनामानं पुत्त्रमुत्पादयामास ।) यथा,—
"स तीरे नदराजस्य लौहित्यस्य महात्मनः ।
ब्रह्मार्थेन समारभ्य तपस्समुपस्थितः ॥
स मानुषेण मानेन क्षितिपुत्त्रः शतं समाः ।
जलाहारव्रतेनैव समानर्च्च पितामहम् ॥
स तुष्टः शतवर्षान्ते ब्रह्मा लोकपितामहः ।
प्रत्यक्षीभूय नरकस्याग्रतः समुपस्थितः" ॥
इति कालिकापुराणे ३८ अध्यायः ॥ अन्यत् नरकशब्दे द्रष्टव्यम् ॥ (मङ्गलग्रहः । इति ज्योतिस्तत्त्वम् ॥)

क्षितिबदरी, स्त्री, (क्षितौ स्थिता सक्ता वा बदरी ।) भूबदरी । इति राजनिर्घण्टः ॥

क्षितिरुहः, पुं, (क्षितौ रोहतीति । रुह + क ।) वृक्षः । इति हेमचन्द्रः ॥ (यथा, विष्णुपुराणे । १ । १५ । ६ ।
"सन्धानं व करिष्यामि सह क्षितिरुहैरहम्" ॥)

क्षितिवर्द्धनः, पुं, (क्षितिं वर्द्धयति । वृध् + णिच् ल्युः ।) शवः । इति त्रिकाण्डशेषः ॥ भूमिवर्द्धके त्रि ॥

क्षितिव्युदासः, पुं, (क्षितिं व्युदस्यति । वि + उत् + अस् + घञ् ।) गर्त्तः । भाँडसी इति तहखाना इति च भाषा । इति केचित् ॥

क्षित्यदितिः, स्त्री, (क्षितौ अदितिः । देवमातुरदित्या पृथिव्यां देवकीरूपेणाविर्भावात्तथात्वम् ।) देवकी । इति त्रिकाण्डशेषः ॥ (एतद्विवरणं यथा,— हरिवंशे ५५ अध्याये ।
वैशम्पायन उवाच ।
"नारदस्य वचः श्रुत्वा सस्मितं मधुसूदनः ।
प्रत्युवाच शुभं वाक्यं देवानां प्रभुरीश्वरः ॥
त्रैलोक्यस्य हितार्थाय यन्मां वदसि नारद ! ।
तस्य सम्यक् प्रवृत्तस्य श्रूयतामुत्तरं वचः ॥
विदिता देहिनो जाता मयैते भुवि दानवाः ।
यां च यस्तनुमास्थाय दैत्यः पुष्यति विग्रहम् ॥
जानामि कंसं सम्भूतमुग्रसेनसुतं भुवि ।
केशिनञ्चैव जानामि दैत्यं तुरगरूपिणम् ॥
नागं कुवलयापीडं मल्लौ चाणूरमुष्टिकौ ।
अरिष्टञ्चैव जानामि दैत्यं वृषभरूपिणम् ॥
विदितो मे खरश्चैव प्रलम्बश्च महासुरः ।
सा च मे विदिता विप्र ! पूतना दुहिता बलेः ॥
कालियञ्चैव जानामि यमुनाह्रदगोचरम् ।
वैनतेयभयाद् यस्तु यमुनाह्रदमाविशत् ॥
विदितो मे जरासन्धः स्थितो मूर्द्ध्नि महीक्षिताम् ।
प्राग्ज्योतिषपुरे चापि नरकं साधु तर्कये ॥
मानुषे पार्थिवे लोके मानुषत्वमुपागतम् ।
बाणञ्च शोणितपुरे गुहप्रतिमतेजसम् ॥
दृप्तं बाहुसहस्रेण देवैरपि सुदुर्ज्जयम् ।
मय्यासक्तां च जानामि भारतीं महतीं धुरम् ॥
तच्च सर्व्वं विजानामि यथा यास्यन्ति ते नृपाः ।
क्षयो भुवि मया दृष्टः शक्रलोके च सत्क्रिया ॥
तेषां पुरुषदेहानामपरावृत्तिवर्त्तिनाम् ।
सम्प्रवेक्ष्याम्यहं योगमात्मनश्च परस्य च ॥
सम्प्राप्य मानुषं लोकं मानुषत्वमुपागतः ।
कंसादींस्तांश्च सर्व्वांश्च वधिष्यामि महासुरान् ॥
तेन तेन विधानेन येन यः शान्तिमेष्यति ।
अनुप्रविश्य योगेन तास्ता हि गतयो मया ॥
अमीषां हि सुरेन्द्राणां हन्तव्या रिपवो युधि ।
जगदर्थे कृतो योऽयमंशोत्सर्गो महात्मभिः ॥
सुरदेवर्षिगन्धर्व्वैरितश्चानुमते मम ।
विनिश्चयो हि प्रागेव नारदाय कृतो मया ॥
निवासं तत्र मे ब्रह्मा विदधातु पितामहः ।
यत्र देशे यथा जातो येन वेशेन वा वसन् ॥
तानहं समरे हन्यां तन्मे ब्रूहि पितामह ! ॥
ब्रह्मोवाच ।
नारायणेमं सिद्धार्थमुपायं शृणु मे विभो ! ।
भुवि यस्ते जनयिता जननी च भविष्यति ।

इति हारीते प्रथमस्थाने ६ अध्याये ।) धूर्त्तः । लवणम् । (यथा, रामायणे । २ । ७१ । ९ ।
"दुःखे मे दुःखमकरोर्व्रणे क्षारमिवाददाः ।
राजानं प्रेतभावस्थं कृत्वा रामञ्च तापसम्" ।)
काचः । भस्म । इति मेदिनी ॥ गुडः इति हेमचन्द्रः ॥ टङ्कणः । (अस्य पर्य्याया यथा,—
"सौभाग्यं टङ्कणं क्षारो धातुद्रावकमग्नितः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
सर्ज्जिक्षारः । इति राजनिर्घण्टः ॥ *॥

क्षारविशेषगुणाः ।

"पलाशयवपूतीकक्षारस्फाटकमादिमाः ।
क्षारास्तु पाचनाः सर्व्वे रक्तपित्तकरा मताः ।
गुल्मार्शःक्रिमिशूलघ्नाः प्रत्येकमश्मरीनाशनाः" ॥
इति राजवल्लभः ॥ (क्षारसामान्यगुणा यथा,—
"क्षारः सर्व्वश्च परमं तीक्ष्णोष्णः क्रिमिजिल्लघुः ।
पित्तासृग्दूषणः पाकी छेद्यहृद्यो विदारणः ।
अपथ्यः कटुलावण्याच्छुक्रौजःकेशचक्षुषाम्" ॥
इति सूत्रस्थाने षष्ठेऽध्याये वाग्भटेनोक्तम् ।)

क्षारक, पुं, (क्षरतीति । क्षर् + ण्वुल् ।) पक्षिमत्स्यादिपिटकम् । तत्पर्य्यायः । जालकम् २ । इत्यमरः ॥ झांका इति भाषा । खाँचा इति भाषा । इति मेदिनी ॥ रसकः । इति शब्दमाला ॥ (स्वार्थे कन् । क्षारः । यथा, सुश्रुते ।
"तस्मात्ततो क्षारकतैलवाक्यं
मदाञ्जनं स्यात्तिमिरेऽथ रागिणि" ।)

क्षारतैल, क्ली, (क्षारयुतं क्षारस्य वा तैलम् ।) पक्वतैलविशेषः । यथा,—
"शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुमहौषधम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवन्तथा ।
भूर्ज्जग्रन्थि बिडं मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसश्चैव कदलीरसमेव च ।
तैलमेभिर्व्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः स्थिताः ॥
क्षिप्रं विनाशमायान्ति शुभ्राश्च कर्णरोगिणः ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम्" ॥
इति गारुडे १९८ अध्यायः ॥

क्षारत्रय, क्ली, (क्षाराणां त्रयम् ।) त्रिविधक्षारः । तद्यथा, राजनिर्घण्टे ।
"सर्ज्जिकश्च यवक्षारं टङ्कणक्षारमेव च ।
क्षारत्रयञ्च त्रिक्षारं क्षारत्रितयमेव च" ॥
("सर्ज्जिका यावशूकश्च क्षारद्वयमुदाहृतम् ।
टङ्कणेन युतं तत्तु क्षारत्रयमुदीरितम् ।
मिलितं तत्तु गुणकृद्विशेषाद् गुल्महृत् परम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षारदला, स्त्री, (क्षाराः दलेषु पत्रेषु यस्याः । क्षुद्रवास्तूकशाकविशेषः ।) चिल्ली । इति राजनिर्घण्टः ॥ (चिल्लीशब्देऽस्या विवृतिर्ज्ञातव्या ।)

क्षारदशक, क्ली, (दशविधाः क्षाराः अत्र । कप् । क्षाराणां दशकमित्येके ।) दशविधक्षारः । यथा,—
"शिग्रुमूलकपलाशचुक्रिका
चित्रकार्द्रकनिम्बवासकाः ।
इक्षुशेरालिकमोचिकोद्भवो
क्षारपूर्व्वदशकं प्रकीर्त्तितम्" ॥
इति राजनिर्घण्टः ॥

क्षारद्रु, पुं, (क्षारप्रधानको द्रुमः ।) घण्टापाटलिवृक्षः । इति रत्नमाला ॥ (घण्टापाटलिशब्देऽस्य गुणाः पर्य्यायाश्च ज्ञातव्याः ।)

क्षारपत्र, पुं, (क्षारः पत्रेषु यस्य ।) वास्तूकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"वास्तूकं वास्तुकञ्च स्यात् क्षारपत्रञ्च शाकराट्" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्य वास्तूकशब्दे ज्ञातव्याः ।)

क्षारपत्रक, पुं, (क्षारपत्र + स्वार्थे कन् कप् वा ।) वास्तूकः । इति हेमचन्द्रः ॥

क्षारभूमि, स्त्री, (क्षारोत्पादनक्षमा भूमिः ।) लवणमृत्तिकादेशः । यथा,—
"शोषणं शोषणं हन्ति प्राणान् हन्ति शरीरतः ।
किमाश्चर्य्यं क्षारभूमौ पादुका यमदूतिका" ॥
इत्युद्भटः ॥ (क्षारस्य भूमिः स्थानम् ।) लवणभूमिः स्त्री ॥

क्षारमध्य, पुं, (क्षारो मध्येऽस्य ।) अपामार्गः । इति रत्नमाला ॥ (अपामार्गशब्दे ऽस्य गुणादयो ज्ञातव्याः ।)

क्षारमृत्तिका, स्त्री, (क्षारयुक्ता मृत्तिका ।) लवणमृत्तिका । तत्पर्य्यायः । ऊषः २ । इत्यमरः ॥ ऊषरः ३ । इति शब्दरत्नावली ॥

क्षारवृक्ष, पुं, (क्षारप्रधानको वृक्षः ।) मुष्ककः । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठ, क्ली, (क्षारेषु श्रेष्ठम् ।) यवक्षारम् । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठ, पुं, (क्षारः श्रेष्ठोऽस्य ।) पलाशः । मुष्ककः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा ।
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

क्षारषट्क, क्ली, (क्षाराणां षट्कम् ।) षड्विधक्षारः । यथा,—
"क्षारापामार्गकुटजपलाशतिलमुष्ककैः ।
क्षारैरेतैस्तु मिलितैः क्षारषट्कादयो गणः" ॥
इति राजनिर्घण्टः ॥

क्षारसिन्धु, पुं, (क्षारैर्युक्तः क्षारप्रधानः सिन्धुर्वा ।) लवणसमुद्रः । स तु जम्बुद्वीपस्य दक्षिणे शाकद्वीपस्य उत्तरे वर्त्तते । यथा,—
"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

क्षारमेलक, पुं, (क्षाराणां मेलः सङ्घः । ततः स्वार्थे कन् ।) सर्व्वक्षारः । इति राजनिर्घण्टः ॥

क्षाराच्छ, क्ली, (क्षारेषु अच्छं निर्म्मलम् । समुद्रजातलवणस्य स्वच्छतया तथोक्तम् ।) सामुद्रलवणम् । इति शब्दचन्द्रिका ॥ (सामुद्रलवणशब्दे ऽस्य गुणादिकं ज्ञेयम् ।)

क्षाराष्टक, क्ली, (क्षाराणां अष्टकम् ।) अष्टप्रकारक्षारः । तद्यथा, —
"पलाशवज्रिशिखरिचिञ्चार्कतिलनालजाः ।
यवजः स्वर्ज्जिका चेति क्षाराष्टकमुदाहृतम् ॥
क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम्" ।
इति भावप्रकाशः ॥

क्षारिका, स्त्री, (क्षर् + ण्वुल् + टाप् च । अत इत्वम् ।) क्षुधा । इति शब्दचन्द्रिका ॥

क्षारित, त्रि, (क्षर् + णिच् + कर्म्मणि क्त ।) अभिशप्तः । अपवादयुक्तः । इत्यमरः ॥ (यथा, महाभारते २ । युधिष्ठिरशकुनिसंवादे । ५ । १०५ ।
"वधिदार्य्यो विशुद्धात्मा क्षारितश्चौरकर्म्मणि ।
अदृष्टशास्त्रकुशलैर्न लोभाद्वध्यते शुचिः" ।)
स्राविता । क्षारः । इति मेदिनी ॥

क्षारोद, पुं, (क्षारं उदकं यस्मिन् । क्षारं उदकं यस्य वा । उत्तरपदस्य उदकस्य उदादेशः ।) लवणसमुद्रः । यथा, "क्षारोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्तजलधयः सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्व्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पिताः" । इति श्रीभागवते ५ स्कन्धे १ अः ।

क्षालन, क्ली, (क्षल् + णिच् + भावे ल्युट् ।) प्रक्षालनम् । धौतकरणं यथा,—
"क्षीरद्रुमो नाथ निम्बश्च क्षालनार्थं करोष्ठयोः" ।
इति गरुडपुराणम् । इत्याह्निकाचारतत्त्वम् ।
(यथा च, मार्कण्डेयपुराणे । १६ । १६ ।
"श्लेष्ममूत्रपुरीषाद्यक्प्रवाहक्षालनेन च ।
रहश्चैवोपचारेण प्रियसम्भाषणेन च" ।)

क्षालित, त्रि, (क्षल् + णिच् + क्त ।) कृतप्रक्षालनम् । तत्पर्य्यायः । निर्णिक्तम् २ शोधितम् ३ मृष्टम् ४ धौतम् ५ । इति हेमचन्द्रः ॥ (यथा, माघे । १० । १७ ।
"अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्य्यम् ।
क्षालितन्नु शमितन्नु वधूनां
द्रावितन्नु हृदयम्मधुवारैः" ॥)

क्षि, क्षयैश्वर्य्ययोः । इति कविकल्पद्रुमः । (भ्वा-पर-सक, ऐश्वर्य्ये—अक अनिट् ।) क्षयति पापम् । इति दुर्गादासः ॥

क्षि, न ग ष हिंसायाम् । इति कविकल्पद्रुमः । (स्वां क्र्यां च पर-सक-अनिट् ।) न, क्षिणोति । ग, क्षिणाति । ष, क्षिया । (यथा, शान्तिशतके ५ ।
"धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायतामानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमं

क्षिता । अस्माकन्तु मनोरथोपरचितप्रासादवापीतटक्रीडाकाननकेलिमण्डपयुगामायु पर क्षीयते" । इति कर्म्मकर्त्तरि साध्यम् । इति दुर्गादासः ॥

क्षि, श वासगत्योः । इति कविकल्पद्रुमः ॥ (तुदा-पर-अक-सक च-अनिट् ।) श, क्षियति । इति दुर्गादासः ॥

क्षि, त्रि, (क्षि+बाहुलकात् डिः ।) निवासः । गतिः । क्षयः । इति मेदिनी ॥

क्षिण, द उ वधे । इति कविकल्पद्रुमः ॥ (तना-उभं-सक-सेट्-उदित्त्वात् क्त्वा वेट् ।) द उ, क्षिणोति क्षिणुते । उ, क्षिणित्वा क्षित्वा । इति दुर्गादासः ॥

क्षित, त्रि, (क्षि+कर्म्मणि क्त ।) हिंसित । क्षित कामो मया हिंसित इत्यर्थः । इति मुग्धबोधटीकायां दुर्गादासः ॥

क्षितिः, स्त्री, (क्षियति वसन्त्यस्याम् । क्षि+अधिकरणे क्तिन् ।) अस्या अपरा व्युत्पत्तिर्यथा,—
"महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ।
काश्यपी कश्यपस्येयमचला स्थिररूपतः" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ॥
पृथिवी । (यथा, मनौ ४ । २४१ ।
"मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति" ।)
वासः । क्षयः । इत्यमरः । ३ । ३ । ७० ॥ कालभेदः । स तु प्रलयः । इति मेदिनी ॥ रोचनानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ * ॥

क्षितिकणः, पु, (क्षितेः पृथिव्याः कणः ।) धूलिः । इति त्रिकाण्डशेषः ॥

क्षितिक्षमः, पु, (क्षितिरिव क्षमते क्षिताविव क्षमाकारणीभूता शक्तिरस्मिन् वा ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥

क्षितिजं, क्ली, (क्षिति+जन्+ड ।) खगोले आकाशमध्यास्थवलयप्रान्तरे तिर्य्यग्वृत्तम् । यथा,—
"पूर्व्वापरं विरचयेत् सममण्डलाख्यं
याम्योत्तरञ्च विदिशोर्व्वलयद्वयञ्च ।
ऊर्द्धाध एवमिह वृत्तचतुष्कमेत-
दाबध्य तिर्य्यगपरं क्षितिजं तदर्द्धे" ॥
इति सिद्धान्तशिरोमणौ गोलबन्धाधिकारः ॥

क्षितिजः, पु, (क्षितेर्जायते इति । जन्+ड ।) भूनागः । इति राजनिर्घण्टः । मङ्गलग्रहः । यथा,—
"परमैश्वर्य्यमतुलं नानाविधसुखाश्रयम् ।
करोति सोमपुत्रस्तु क्षितिजान्तर्दशांगतः" ॥
इति ज्योतिस्तत्त्वम् ॥ भूजाते त्रि ॥

क्षितिजन्तुः, पु, (क्षितौ क्षितेर्वा जन्तुरिव ।) भूनागः । इति राजनिर्घण्टः ॥

क्षितिधरः, पु, (क्षितिं पृथ्वीं धरति धारयति वा । धृ धारि+वा अच् लिहादित्वात् पूर्व्ववत् ।) पर्व्वतः । इति हलायुधः ॥ (यथा, कुमारे । ७ । ६४ ।
"अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण" ।)

कूर्म्मवासुकिदिग्गजाश्च ॥

क्षितिनागः, पु, (क्षितिजातो नागः । मध्यपदलोपी समासः ।) भूनागः । इति राजनिर्घण्टः ॥

क्षितिनाथः, पु, (क्षितेः पृथिव्याः नाथः सहायः शास्ता इत्यर्थः ।) राजा । (क्षितिपतिदर्शनात् ॥)

क्षितिपः, पुं, (क्षितिं पातीति । पा+ड ।) राजा । यथा,—"अथाहयुनाथ क्षितिपं शुभंयु-
रूचे वचस्तापसकुञ्जरेण" ॥
इति भट्टौ । १ । २० ॥ (यथा च पञ्चतन्त्रे । २ । २४ ।
"यः सम्मानं सदा धत्ते भृत्यानां क्षितिपोऽधिकम् ।
वित्ताभावेऽपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित्" ॥)

क्षितिपतिः, पु, (क्षितेः पतिः पालकः ।) राजा । यथा,—
"मूर्खोऽशान्तस्तपस्वी क्षितिपतिरलसो मत्सरो धर्म्मशीलो दुःखो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः" । इति नवरत्ने । ६ । (तथा च रघुः । ६ । ८६ ।
"प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतो वितानम्" ॥)

क्षितिपालः, पु, (क्षितिं पालयतीति । पालि+"कर्म्मण्यण्" । ३ । २ । १ । इत्यण् ।) राजा । यथा, प्रबोधचन्द्रोदयनाटके १ अङ्के ।
"नीता क्षयं क्षितिभुजो नृपतेर्विपक्षा
रक्षावती क्षितिरभूत् प्रथितैरमात्यैः ।
साम्राज्यमस्य विहितं क्षितिपालमौलि-
मालार्च्चितं भुवि पयोनिधिमेखलायाम्" ॥
(तथा, रघुः । २ । ५१ ।
"एतावदुक्त्वा विरते मृगेन्द्रे
प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः
प्रीत्या तमेवार्थमभाषतेव" ॥)

क्षितिपालभाक्, [ज्] पु, (क्षितिपालं भजते इति । भज्+क्विप् ।) राजा । यथा, भट्टौ ३ । २१ ।
"आसिष्ट नैकत्र शुचा व्यरंसीत्
कृताकृतेभ्यः क्षितिपालभाग्भ्यः ।
स चन्दनोशीरमृणालदिग्धः
शोकाग्निनागाद्द्युनिवासभूयम्" ॥

क्षितिपुत्रः, पु, (क्षितेः पृथिव्याः पुत्रः ।) नरकासुरः । (पुरा किल सिद्धेश्वरकपिलदेवकोपेन रसातलगतां भगवतीं क्षितिमुद्धर्त्तुं भगवान् विष्णुः वराहरूपेणावतीर्णः सन् तत्र दृष्टान्ते दितिनन्दनं हिरण्याक्षं निपात्य रसातलात्तामुद्धृत्य तस्यामेव धरायां नरकनामानं पुत्रमुत्पादयामास ।) यथा,—
"स तीरे नदराजस्य लौहित्यस्य महात्मनः ।
ब्रह्मार्च्चनं समारभ्य तपस्तमुपस्थितः ।
स मानुषेण मानेन क्षितिपुत्रः शतं समाः ।
अम्बाहारव्रतेनैव समानर्च पितामहम् ।
स तुष्टः शतवर्षान्ते ब्रह्मा लोकपितामहः ।
प्रत्यक्षीभूय नरकस्याग्रतः समुपस्थितः" ॥
इति कालिकापुराणे ३८ अध्यायः ॥ अन्यत् नरकशब्दे द्रष्टव्यम् । (मङ्गलग्रहः । इति ज्योतिस्तत्त्वम् ।)

क्षितिबदरी, स्त्री, (क्षितौ स्थिता सक्ता वा बदरी ।) भूबदरी । इति राजनिर्घण्टः ॥

क्षितिरुहः, पु, (क्षितौ रोहतीति । रुह+क ।) वृक्षः । इति हेमचन्द्रः ॥ (यथा विष्णुपुराणे । १ । १५ । ६ ।
"सन्धानं च करिष्यामि सह क्षितिरुहैरहम्" ।)

क्षितिवर्द्धनः, पु, (क्षितिं वर्द्धयति । वृध्+णिच् ल्युः ।) शवः । इति त्रिकाण्डशेषः ॥ भूमिवर्द्धके त्रि ॥

क्षितिव्युदासः, पु, (क्षितिं व्युदस्यति । वि+उत्+अस्+अण् ।) गर्त्तः । भोंडसी इति तद्भाषा इति च भाषा । इति केचित् ॥

क्षित्यदितिः, स्त्री, (क्षितौ अदितिः । देवमातुरदित्याः पृथिव्या देवकीरूपेणाविर्भावात्तथात्वम् ।) देवकी । इति त्रिकाण्डशेषः ॥ (एतद्विवरणं यथा,— हरिवंशे ५५ अध्याये ।
वैशम्पायन उवाच ।
"नारदस्य वचः श्रुत्वा सस्मितं मधुसूदनः ।
प्रत्युवाच शुभं वाक्यं देवानां प्रभुरीश्वरः ॥
त्रैलोक्यस्य हितार्थाय यन्मां वदसि नारद ।
तस्य सम्यक् प्रवृत्तस्य श्रूयतामुत्तरं वचः ॥
विदिता देहिनो जाता मयैते भुवि दानवाः ।
यांश्च यस्मिन्समाश्रित्य देहाः पुष्यन्ति विग्रहम् ॥
जानामि कंसं सम्भूतमुग्रसेनसुतं भुवि ।
केशिनञ्चैव जानामि दैत्यं तुरगरूपिणम् ॥
नागं कुवलयापीडं मल्लौ चाणूरमुष्टिकौ ।
अरिष्टञ्चैव जानामि दैत्यं वृषभरूपिणम् ॥
विदितो मे खरश्चैव प्रलम्बश्च महासुरः ।
सा च मे विदिता विप्र ! पूतना दुहिता बलेः ॥
कालियञ्चैव जानामि यमुनाह्रदगोचरम् ।
वैनतेयभयाद्यस्तु यमुनाह्रदमाविशत् ॥
विदितो मे जरासन्धः स्थितो मूर्ध्नि महीक्षिताम् ।
प्राग्ज्योतिषपुरे चापि नरकं साधु तर्कये ॥
मानुषे पार्थिवे लोके मानुषत्वमुपागतम् ।
बाणञ्च शोणितपुरे गुहप्रतिमतेजसम् ॥
दृप्तं बाहुसहस्रेण देवैरपि सुदुर्ज्जयम् ।
मय्यासक्तां च जानामि भारतीं महतीं धुरम् ॥
तच्च सर्व्वं विजानामि यथा यास्यन्ति ते नृपाः ।
क्षयो भुवि मया दृष्टः शक्रलोके च सत्क्रिया ॥
तेषां पुरुषदेहानामपरावृत्तिवर्त्तिनाम् ।
सम्प्रवेशं करिष्यामि योगेनात्मनश्च परस्य च ॥
सम्प्राप्य मानुषं लोकं मानुषत्वमुपागतः ।
कंसादींस्तांश्च सर्व्वांश्च वधिष्यामि महासुरान् ।
तेन तेन विधानेन येन यः शान्तिमेष्यति ।
अनुप्रविश्य योगेन तास्ता हि गतयो मया ॥
अमीषां हि सुरेन्द्राणां हन्तव्या रिपवो युधि ।
जगत्यर्थे कृतो योऽयं सर्वैर्लोकैर्महात्मभिः ।
सुरदेवर्षिगन्धर्वैरितश्चानुमते मम ।
विनिश्चयो हि प्रागेव नारदायं कृतो मया ।
निवासं ननु मे ब्रह्मन् विदधातु पितामहः ।
यत्र देशे यथा जातो येन वेषेण वा वसन् ।
तानहं समरे हन्यां तन्मे ब्रूहि पितामह ॥
ब्रह्मोवाच ।
नारायणेमं सिद्धार्थमुपायं शृणु मे विभो ।
भुवि यस्ते जनयिता जननी च भविष्यति ।

यत्र त्वं च महाबाहो जातः कुलकरो भुवि।
यादवानां महद्वंशमखिलं धारयिष्यसि ॥
तांश्चासुरान् समुत्पाद्य वधं कृत्वात्मनो महत्।
स्थापयिष्यसि मर्य्यादां नृणां तन्मे निशामय ॥
पुरा हि कश्यपो विष्णो! वरुणस्य महात्मनः।
जहार यज्ञिया गा वै पयोदास्तु मखामखे ॥
अदितिः सुरभिश्चैव द्वे भार्य्ये कश्यपस्य तु।
प्रदीयमाना गास्तास्तु नैच्छेतां वरुणस्य च ॥
ततो मां वरुणोऽभ्येत्य प्रणम्य शिरसा नतः ॥
उवाच भगवन्! गावो गुरुणा मे हृता इति ॥
कृतकार्य्यो हि गास्तास्तु नानुजानाति मे गुरुः।
अन्ववर्त्तत भार्य्ये द्वे अदितिं सुरभिन्तथा ॥
मम ता ह्यक्षया गावो दिव्याः कामदुघाः प्रभो!।
चरन्ति सागरान् सर्व्वान् रक्षिताः स्वेन तेजसा ॥
कस्ता धर्षयितुं शक्तो मम गाः कश्यपादृते।
अक्षयं या क्षरन्त्यग्र्यं पयो देवामृतोपमम् ॥
प्रभुर्व्वा व्युत्थितो ब्रह्मन् गुरुर्व्वा यदि वेतरः।
त्वया नियम्याः सर्व्वे वै त्वं हि नः परमा गतिः ॥
यदि प्रभवतां दण्डो लोके कार्य्यमजानताम्।
न विद्यते लोकगुरो! न स्युर्वै लोकसेतवः ॥
यथा वास्तु तथा वास्तु कर्त्तव्यो भगवान् प्रभुः।
मम गावः प्रदीयन्तां ततो गन्तास्मि सागरम् ॥
आत्मा मम हि ता गावो या गावः सत्त्वमव्ययम्।
लोकानां त्वत्प्रवृत्तानामेकं गोब्राह्मणं स्मृतम् ॥
त्रातव्याः प्रथमं गावस्त्रातास्त्रायन्ति या द्विजान्।
गोब्राह्मणपरित्राणात् परित्रातं जगत् भवेत् ॥
इत्यम्बुपतिना प्रोक्तो वरुणेनाहमच्युत!।
गवां कारणतत्त्वज्ञः कश्यपे शापमुत्सृजम् ॥
येनांशेन हृता गावः कश्यपेन महात्मना।
स तेनांशेन तु मर्त्त्ये गत्वा गोपत्वमेष्यति ॥
या च सा सुरभिर्नाम अदितिश्च सुरारणी।
ते प्युभे तस्य भार्य्ये वै तेनैव सह यास्यतः।
स ताभ्यां सह गोपत्वे कश्यपो भुवि रंस्यते ॥
तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले ॥
गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः।
तत्रासौ गोष्वभिरतः कंसस्य करदायकः ॥
तस्य भार्य्याद्वयञ्चैव अदितिः सुरभिस्तथा।
देवकी रोहिणी चैव वसुदेवस्य धीमतः ॥
तत्रावतर लोकानां भवाय मधुसूदन!।
जयाशीर्व्वचनैस्त्वेते वर्द्धयन्ति दिवौकसः ॥
आत्मानमात्मना हि त्वमवतार्य्य महीतले।
देवकीं रोहिणीञ्चैव गर्भाभ्यां परितोषय" ॥)

क्षित्वा, [न्] पुं, (क्षि निवासगत्योः + "शीङ् क्रुशि रुहिजिक्षिदृषिभ्यः क्वनिप्"। उणां ४। ११३। इति क्वनिप् तुक् च।) वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

क्षिद्र, पुं, (क्षिद्+रक्।) रोगः। सूर्य्यः। विषाणम्। इति मल्लिप्रसारोणादिवृत्तिः ॥

क्षिप, य औ नुदि। इति कविकल्पद्रुमः ॥ (दिवा-पर-सक-अनिट्।) य, क्षिप्यति। औ, क्षेप्ता। इति दुर्गादासः ॥

क्षिप, श क औ नुदि। इति कविकल्पद्रुमः ॥ (तुदा उभ सक अनिट्।) नुदि प्रेरणे। श क, क्षिपति क्षिपते शरं योधः। औ, क्षेप्ता। इति दुर्गादासः ॥

क्षिप, पुं, (क्षिप+"इगुपधज्ञाप्रीकिरः कः"। ३। १। १३५। इति कः।) क्षेप्ता। क्षेपणम्। इति व्याकरणम् ॥

क्षिपकः, पुं, (क्षिप्+कः तत संज्ञायां कन्।) योद्धा। इत्युणादिकोषः ॥

क्षिपका, स्त्री, (क्षिप्+कन्+टाप् अतो नेत्वम्। "न यासयोः"। ७। ३। ४५। इत्यस्य वार्त्तिके "क्षिपकादीनाञ्च न"। इति कथनात्।) क्षेपणम्। इति व्याकरणम् ॥

क्षिपणा, स्त्री,(क्षिप्+क्युन् भावे किच्च।) क्षेपणम्। तत्पर्य्यायः। क्षिपा २। इति जटाधरः ॥

क्षिपणिः, पुं, (क्षिप्यते इति। क्षिप्+कर्म्मणि अनि।) अस्त्रम्। इत्युणादिकोषः ॥

क्षिपणिः, स्त्री, (क्षिप्यते असौ अनया वा। क्षिप्+कर्म्मणि करणे वा अनि।) क्षेपणी। नौकादण्डः। इत्यमरटीकायां भरतः ॥ जालविशेषः। मन्त्रः। अध्वर्युः। इति मल्लिप्रसारोणादिवृत्तिः ॥ (यथा, ऋग्वेदे। ४। ४१। ४।

"उतस्य वाजी क्षिपणिं तुरण्यति
ग्रीवायां बद्धो अपिकक्ष आसनि" ॥)

क्षिपणी, स्त्री, (क्षिप्+अनि ङीष्।) क्षिपणिः। इत्यमरटीकायां भरतः ॥

क्षिपणुः, पुं, (क्षिपति इति। क्षिप्+"अनुङ् नदेश्च"। उणां ३। ५२। इति अनुङ्।) वायुः। इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे। ४।५८।६।

"सम्यक् स्रवन्ति सरितो न धेना
अन्तर्हृदा मनसा पूयमानाः।
एते अर्षन्त्यूर्म्मयो घृतस्य
मृगा इव क्षिपणोरीषमाणाः" ॥)

क्षिपण्युः, पुं, (क्षिप्+"कन्युच् क्षिपेश्च"। उणां ३। ५१। इति कन्युच् प्रत्ययः।) वसन्तकालः। इत्युणादिकोषः ॥ देहः। सुरभौ त्रि। इति मेदिनी ॥

क्षिपा, स्त्री, (क्षिप्+"षिद्भिदादिभ्योऽङ्"। ३। ३। १०४। इत्यङ्। ततष्टाप्।) क्षेपणम्। इत्यमरः। ३। २। ११ ॥ रात्रिः। इति तट्टीकायां भरतः ॥

क्षिप्त, त्रि, (क्षिप्+कर्म्मणि क्तः।) मिश्रेमक्षतवन्तः। त्यक्तः। तत्पर्य्यायः। नुत्तः २ नुन्नः ३ अस्तः ४ निष्ठ्यूतः ५ विद्धः ६ ईरितः ७। इत्यमरः। ३। १। ८७ ॥ (उद्गीर्णः। यथा, माघे। ३। ७२।

"क्षिप्ता इवेन्दोः स रुचोऽधिवेलं
मुक्तावलीराकलयाञ्चकार" ॥

कर्त्तरि क्तः। पतितः। यथा, माघे १०। ७१।

"क्षिप्तमायतमदर्शयदुर्व्व्यां
काञ्चिदामजघनस्य महत्त्वम्" ॥

"रतेषु उर्व्व्यां क्षिप्तं पतितम्"। इति मल्लिनाथः ॥ हतः। यथा, माघे २। ५३।

"कैशरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः" ॥ अवज्ञातः। यथा, भागवते। २। १८। ४८।

"तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि"। विसृष्टः। यथा, मार्कण्डेये। ८८। १९।

"नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः। प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः" ॥) वायुग्रस्तः। क्षेपा इति भाषा। इति लोकप्रसिद्धः ॥

क्षिप्ता, स्त्री, (क्षिप्त+टाप्।) रात्रिः। इति हलायुधः ॥

क्षिप्नुः, त्रि, (क्षिप्+"त्रसिगृधिधृषिक्षिपेः क्नुः"। ३। २। १४०। इति क्नुप्रत्ययः।) निराकरिष्णुः। निराकरणशीलः। इत्यमरः। ३। १। ३०॥

क्षिप्र, क्ली, (क्षिप्+"स्फायितञ्चिवञ्चीति"। उणां २। १३। इति रक्।) शीघ्रम्। तद्युक्ते त्रि। इत्यमरः। १। १। ६८ ॥ (यथा, मनुः। ३। १७९। "विनाश्य व्रजति क्षिप्रमामपात्रमिवाम्भसि" ॥ मर्म्मविशेषः। यथा,—"तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं नाम मर्म्म तत्र विद्धस्याक्षेपकेण मरणम्" ॥ इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये ॥)

क्षिप्रपाकी, [न्] पुं, (क्षिप्रं पच्यतेऽनेन। क्षिप्रं पचति पाचयति वा। पच्+णिङन्तात् घिनुण्।) गर्द्दभाण्डवृक्षः। इति रत्नमाला ॥ (अतएव गर्द्दभाण्डशब्देऽस्य गुणपर्य्यायाः ॥) शीघ्रपाकविशिष्टे त्रि ॥

क्षिया, स्त्री, (क्षि क्षये+"षिद्भिदादिभ्योऽङ्"। ३। ३। १०४। इत्यङ्। टाप् च।) अपचयः। इत्यमरः। ३। २। ७॥

क्षिव, उ निरासे। इति कविकल्पद्रुमः ॥ (भ्वा-पर सक-सेट् उदित्वात् क्त्वावेट्।) ऋखौ। निरास इह फुत्कारः इति भट्टमल्लः। मुखेन श्लेष्मादेर्वमनमिति केचित्। पृथक् पाठात् पूर्व्वो भ्वादिः। क्षेवति। उ, क्षेवित्वा ष्ठ्यूत्वा। इति दुर्गादासः ॥

क्षिव, य उ निरासे। इति कविकल्पद्रुमः ॥ (दिवा पर सक सेट्। उदित्वात् क्त्वावेट्) ऋखौ। य, क्षीव्यति। उ, क्षेवित्वा ष्ठ्यूत्वा। इति दुर्गादासः ॥

क्षी, ञ हिंसे। इति कविकल्पद्रुमः ॥ (भ्वा-उभ सक अनिट्।) ञ, क्षयति क्षयते। इति दुर्गादासः ॥

क्षीज, हिक्काने। इति कविकल्पद्रुमः ॥ (भ्वा-पर अक-सेट्।) दीर्घी। हिक्कानमव्यक्तशब्दः। सखेदस्वैवाव्यक्तशब्दे क्षीजे प्रयोगः। इति रक्षितः। क्षीजति सखेदो जनः। इति दुर्गादासः ॥

क्षीजनं, क्ली, (क्षीज्+भावे ल्युट्।) कीचकानां नादः। इति हेमचन्द्रः ॥

क्षीणः, त्रि, (क्षि+क्तः। "निष्ठायामण्यदर्थे"। ६। ४। ६०। इति दीर्घः। "क्षियोदीर्घात्"। ८। २। ४६। इति निष्ठातस्य नः।) दुर्बलः। तत्पर्य्यायः। दुर्व्वलः २ कृशः ३ क्षामः ४ तनुः ५ छातः ६ तलिनः ७ अमांसः ८ पेलवः ९। इति हेमचन्द्रः ॥ (यथा, गीतायाम् ९। २१।

वर्ज्जयित्वा स्त्रिया स्तन्यमाममेव हि तद्धितम् ॥
धारोष्णं गुणवत् क्षीरं विपरीतमतोऽन्यथा ।
तदेवातिशृतं सर्व्वं गुरु वृंहणमुच्यते ॥
अनिष्टगन्धमम्लञ्च विवर्णं विरसञ्च यत् ।
वर्ज्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत् ॥
इति क्षीरवर्गः ॥

इति सूत्रस्थाने पञ्चचत्वारिंशत्तमे ऽध्याये सुश्रुतेनोक्तम् ॥ * ॥)
दुग्धधारास्नानफलम् । यथा, वराहपुराणे ।
"धेनुस्तनादिनिष्क्रान्ता धारा क्षीरस्य यो नरः ।
शिरसा प्रति गृह्णाति स पापेभ्यः प्रमुच्यते" ॥
क्षीरेण विष्णोः स्नाने फलम् । यथा,—
"येषु क्षीरवहा नद्यो ह्रदाः पायसकर्द्दमाः ।
तान् लोकान् पुरुषा यान्ति क्षीरस्नापयका हरेः ॥
आह्लादं निर्वृतिं स्वाम्यं आरोग्यं चानुरूपताम् ।
सप्तजन्मस्ववाप्नोति क्षीरस्नानपरो हरेः ॥
दध्यादीनां विकाराणां क्षीरं तु सम्भवो यथा ।
तथैवाशेषकामानां क्षीरस्नपनमुत्तमम् ॥
यथा च विमलं क्षीरं यथा निर्वृतिकारकम् ।
तथास्य विमलं ज्ञानं भविष्यति फलप्रदम् ॥
ग्रहानुकूलता पुष्टिं प्रियत्वञ्चाखिले जने ।
करोति भगवान् विष्णुः क्षीरस्नपनतोषितः ॥
सर्व्वोऽस्य स्निग्धतामेति दृश्यमाने प्रसीदति ।
सुतक्षीरेण देवेशे स्नापिते मधुसूदने" ॥
इत्याद्ये वह्निपुराणे क्रियायोगनामाध्याय ॥ ९ ॥
क्षीरपाकविधिर्यथा,—
"क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत्" ।
इति भावप्रकाशः ॥ रसविशेषः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ५२ । ६९ ।
"जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय ।
तत्क्षीरं राजपुत्त्राय गुहः क्षिप्रमुपाहरत्" ॥)

क्षीरकः, पुं, (क्षीरमिव कायति प्रकाशते । कै + क ।) क्षीरमोरटलता । इति रत्नमाला ॥

क्षीरकञ्चुकी, स्त्री, (क्षीरं क्षीरप्रधानं कञ्चुकं आवरणं तदिव त्वगस्याः ।) क्षीरीशवृक्षः । इति रत्नमाला ॥

क्षीरकण्ठः, पुं (क्षीरं कण्ठेऽस्य ।) बालकः । यथा,
"बालः पाकः शिशुर्डिम्भः पोतः शावः स्तनन्धयः ।
पृथुकोऽर्भोत्तानशयः क्षीरकण्ठः कुमारकः" ॥
इति हेमचन्द्रः ॥

क्षीरकण्ठकः, पुं, (क्षीरकण्ठ + स्वार्थे कन् ।) शिशुः । इति त्रिकाण्डशेषः ॥

क्षीरकन्दः, पुं, (क्षीरं कन्दे यस्य । क्षीरं क्षीरप्रधानं कन्दोऽस्य वा ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

क्षीरकन्दा, स्त्री, (क्षीरकन्द + टाप् ।) क्षीरवल्ली । कास भूमि कुष्माण्ड इति ख्यातः । यथा,—
"क्षीरवल्ली क्षीरकन्दा महाश्वेतर्क्षगन्धिका" ॥
इति जटाधरः ॥

क्षीरकाकोलिका, स्त्री, (क्षीरवत् शुभ्रा काकोली । ततः स्वार्थे संज्ञायां स्वल्पार्थे वा कन् टाप् पूर्व्वह्रस्वश्च ।) क्षीरकाकोली । इति शब्दचन्द्रिका ॥

क्षीरकाकोली, स्त्री, (क्षीरमिव शुभ्रा काकोली ।) अष्टवर्गे प्रसिद्धौषधिविशेषः । तत्पर्य्यायः । महावीरा २ सुकोली ३ पयस्विनी ४ । इति रत्नमाला ॥ क्षीरशुक्ला ५ पयस्या ६ क्षीरविषाणिका ७ जीववल्ली ८ जीवशुक्ला ९ । यथा, राजनिर्घण्टे ।
"रसवीर्य्यविपाकेषु काकोल्या सदृशी च सा" ॥
अथ काकोल्योरुत्पत्तिलक्षणनामगुणाः ।
"जायते क्षीरकाकोली महामेदोद्भवस्थले ।
यत्र स्यात् क्षीरकाकोली काकोली तत्र जायते ॥
पीवरी सदृशः कन्दः सक्षीरः प्रियगन्धवान् ।
सा प्रोक्ता क्षीरकाकोली काकोली लिङ्गमुच्यते ॥
यथा स्यात्क्षीरकाकोली काकोल्यपि तथा भवेत् ।
एषा किञ्चित् भवेत् कृष्णा भेदोऽयमुभयोरपि ।
काकोली वायसोली च वीरा कायस्थिका तथा ।
सा शुक्ला क्षीरकाकोली वयस्या क्षीरवल्लिका ॥
कथिता क्षीरिणी धीरा सुक्लाक्षीरा पयस्विनी ।
काकोलीयुगलं शीतं शुक्रलं मधुरं गुरु ।
वृंहणं वातदाहास्रपित्तशोषज्वरापहम्" ॥
काकोली क्षीरकाकोलीस्थाने अश्वगन्धामूलम् ।
इति भावप्रकाशः ॥ (शुक्रजननगणान्तर्गतौषधविशेषः । यथा । "जीवकर्षभककाकोली क्षीरकाकोली मुद्गपर्णी माषपर्णी मेदा वृद्धरुहा जटिला कुलिङ्गा इति दशेमानि शुक्रजननानि भवन्ति ॥ इति चरके सूत्रस्थाने ४ अध्याये ॥)

क्षीरकाण्डकः, पुं, (क्षीरयुक्तः काण्डः यस्य । ततः कप् ।) स्नुही । अर्कवृक्षः । इति राजनिर्घण्टः ॥

क्षीरकाष्ठा, स्त्री, (क्षीरमयं क्षीरप्रधानं वा काष्ठं यस्याः ।) वटीवृक्षः । इति राजनिर्घण्टः ॥

क्षीरकीटः, पुं, (क्षीरजातः कीटः क्षीरस्य कीटो वा ।) दुग्धजातकीटः । तत्पर्य्यायः । कालिका २ । इति हारावली ॥

क्षीरजं, क्ली, (क्षीराज्जायते । जन् + ड ।) दधि । इति राजनिर्घण्टो हेमचन्द्रश्च ॥ क्षीरजातद्रव्ये त्रि ॥ (दधिशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

क्षीरदलः, पुं, (क्षीरयुक्तं दलं यस्य क्षीरं दले यस्य वा ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥

क्षीरद्रुमः, पुं, (क्षीरप्रधानो द्रुमः ।) अश्वत्थः । इति राजनिर्घण्टः ॥

क्षीरधेनुः, स्त्री, (क्षीरेण निर्म्मिता धेनुः ।) दानार्थक्षीरनिर्म्मितधेनुः । यथा,—
होतोवाच ।
"क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप ।।
अनुलिप्ते महीपृष्ठे गोमयेन नृपोत्तम ॥
गोचर्म्ममात्रमानेन कुशानास्तीर्य्य सर्व्वतः ।
तत्रोपरि महाराज ! न्यसेत् कृष्णाजिनं बुधः ॥
तत्रोपरि कुण्डलिकां गोमयेन कृतामपि ।
क्षीरकुम्भं ततः स्थाप्य चतुर्थांशेन वत्सकम् ॥
सुवर्णमुखशृङ्गाणि चन्दनागुरुकाणि च ।
प्रशस्तपत्रश्रवणां तिलपात्रोपरि न्यसेत् ॥
मुखं गुडमयं तस्या जिह्वा शर्करया तथा ।
फलप्रशस्तदशना मुक्ताफलमयेक्षणाम् ॥
इक्षुपादा दर्भरोमा सितकम्बलकम्बलाम् ।
ताम्रपृष्ठीं कांस्यदोहां पट्टसूत्रमयीं तथा ॥
पुच्छञ्च नृपशार्दूल ! नवनीतमयस्तनीम् ।
स्वर्णशृङ्गीं रौप्यखुरां पञ्चरत्नसमन्विताम् ॥
चत्वारि तिलपात्राणि चतुर्दिक्ष्वपि स्थापयेत् ।
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्च्चयेत् ॥
धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत् ।
आच्छाद्याभरणं कृत्वा मुद्रिकाकर्णकुण्डले ।
पट्टकौपीनके छत्रं दत्त्वा दानं समर्पयेत् ॥
अनेनैव तु मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥
या धेनुः सर्व्वभूतानामित्यादि नरपुङ्गव ।।
आप्यायस्वेति मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥
यो गृह्णाति पठेन्मन्त्रं ग्राहको राजसत्तम ।।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥
एतां हि सहस्रेण शतेनाथ स्वशक्तितः ।
शतार्द्धमथवाप्यर्द्धं तदर्द्धञ्च यथेच्छया ॥
दत्त्वा धेनुं महाराज ! शृणु तस्यापि यत् फलम् ।
षष्टिवर्षसहस्राणि रुद्रलोके महीयते ॥
पितृपितामहैः सार्द्धं ब्रह्मणो भवनं व्रजेत् ।
दिव्यं विमानमारूढो दिव्यस्रगनुलेपनः ॥
क्रीडित्वा सुचिरं कालं विष्णुलोकं स गच्छति ।
द्वादशादित्यसङ्काशे विमाने परमाद्भुते ॥
गीतवादित्रनिर्घोषैरप्सरोगणसेविते ।
तत्रोष्य विष्णोः सौराज्यं विष्णुसायुज्यतां व्रजेत् ॥
य इदं श्रावयेद्राजन् पठेद्वा भक्तिभावितः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति" ॥
इति वाराहे श्वेतोपाख्याने क्षीरधेनुमाहात्म्यनामाध्यायः ॥

क्षीरनाशः, पुं, (क्षीरं नाशयतीति । नश् + णिच् "कर्म्मण्यण्" । ३ । २ । १ । इत्यण् ।) शाखोटवृक्षः । इति राजनिर्घण्टः ॥ (क्षीरस्य नाशः इति दुग्धक्षयश्च ॥)

क्षीरनीरं, क्ली, (क्षीरमिश्रं नीरमिव एकीभूतप्रयत्नात् तथात्वम् ।) आलिङ्गनम् । इति शब्दमाला ॥ (क्षीरञ्च नीरञ्च द्वयोः समाहारः ।) दुग्धजलञ्च ॥
(यथा, वेतालपञ्चविंशतौ । १२ । १८ ।
"क्षीरनीरसमं मित्रं प्रशंसन्ति विचक्षणाः ।
नीरं क्षीरयते तत्र वह्नौ तप्यति तत्पयः" ॥)

क्षीरपर्णी, [न्] पुं, (क्षीरयुक्तं पर्णं अस्यास्तीति । इनि ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्यार्कशब्दे बोद्धव्या ॥)

क्षीरपाणं, **क्षीरपानं**, क्ली, (पीयते इति । पा + भावे ल्युट् । क्षीरस्य पानम् । "वा भावकरणयोः" । ८ । ४ । १० । पाक्षिको णत्वम् ।) दुग्धपानम् । दुग्धपानयुक्तदेशे तत्कर्त्तरि च त्रि । यथा । देशे पानस्य । पूर्व्वपदस्थितषकाररेफऋवर्णेभ्यः परस्य पानस्य नस्य णः स्यात् देशे वाच्ये । पीयते यत्तत् पानं कर्म्मण्युट् । क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । सौवीरपाणा वाह्लीकाः । कषायपाणा गान्धाराः । उशीनरादि-

शब्दाना देशवाचित्वेऽपि तन्निवाससम्बन्धेन मनुष्येषु प्रवृत्तिः । अथवा क्षीरं पानं यत्र इति व्युत्पत्त्या देशो वाच्यः । भावकरणयोरन्टो वा । क्षीरपाणा क्षीरपानम् । क्षीरं पीयतेऽनयेति क्षीरपाणी क्षीरपानी पात्री । इति मुग्धबोधटीकायां दुर्गादासः ॥

क्षीरपायी, [न्] त्रि, (क्षीरं पिबति इति । "बहुलमाभीक्ष्ण्ये" । ३ । २ । ८१ । सुप्युपदे णिनिः ।) दुग्धपानकर्त्ता । यथा । "क्षीरपायीत्यादिकन्तु प्रकृत्यर्थावच्छिन्नप्रदन्तार्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य तत पानशीलत्वसामान्यस्याप्रत्ययात्" । इति शब्दशक्तिप्रकाशिका ॥

क्षीरमोरट, पु, (क्षीरवत् स्वाद्यः स्वादुर्वा मोरटः ।) लताभेदः । तत्पर्य्यायः । सितद्रुः २ मुटमः ३ क्षीरकः ४ । इति रत्नमाला । अन्यत् मोरटशब्दे द्रष्टव्यम् ॥

क्षीरवल्ली, स्त्री, (क्षीरयुक्ता क्षीरप्रधाना वा वल्ली ।) क्षीरविदारी । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायाः ।
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता ॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी ।
वाराहवदना गृष्टिर्वदरेत्यपि कथ्यते" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षीरविकृति, स्त्री, (क्षीरं विकृतिर्विकारोऽस्याः क्षीरवत् विकृतिर्निर्य्यासोऽस्या वा ।) कूर्च्चिका । इत्यमरः । २ । ९ । ४४ ॥ क्षीरसा इति भाषा ॥

क्षीरविदारिका, स्त्री, (क्षीरयुक्ता क्षीरवत् शुभ्रा वा विदारिका ।) क्षीरविदारी । इति शब्दरत्नावली ॥

क्षीरविदारी, स्त्री, (क्षीरवत् शुभ्रा क्षीरप्रचुरा वा विदारी ।) कृष्णभूमिकुष्माण्ड । तत्पर्य्यायः । महाश्वेता २ ऋक्षगन्धिका ३ । इत्यमरः । इक्षुवल्लरी ५ इक्षुवल्ली ६ क्षीरकन्दः ७ क्षीरवल्ली ८ पयस्विनी ९ क्षीरशुक्ला १० क्षीरलता ११ पयःकन्दा १२ पयोलता १३ पयोविदारिका १४ । अस्या गुणाः । मधुरत्वम् । अम्लत्वम् । कषायत्वम् । तिक्तत्वम् । पित्तशूल मूत्रमेहश्रमवनाशित्वञ्च । (विदारीशब्देऽस्या अपरे गुणा ज्ञेयाः ॥)
"क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालकः ।
विनालो रोगहर्त्ता स्यादयस्तम्भी सनालकः" ॥
इति राजनिर्घण्टः ॥

क्षीरविषाणिका, स्त्री, (क्षीरमिव शुभ्रः क्षीरयुक्तो वा विषाणः अग्रभागो यस्याः ततः कन् टाप् च ।) ऋषिकाली । क्षीरकाकोली । इति राजनिर्घण्टः ॥

क्षीरवृक्ष, पु, (क्षीरमयः क्षीरप्रधानो वा वृक्षः ।) उडुम्बरवृक्षः । इति जटाधरः ॥ क्षीरिका । इति भरतः ॥ राजादनी । इति राजनिर्घण्टः ॥ (यथा सुश्रुते २४ अध्याये चिकित्सास्थाने ।
"क्षीरवृक्षकषायैर्वा क्षीरेण च विमिश्रितैः" ॥
राजादन्यर्थे पर्य्याया यथा,—
"राजादनः क्षीरवृक्षः पालाशी वानरप्रियः" ॥
इति वैद्यकरत्नमालायाम् ॥)

क्षीरशर, पु, (क्षीरं दुग्धं शीर्य्यतेऽस्मात् यत्र वा । शॄ + अपादाने अधिकरणे वा अप् । क्षीरं शृणाति विकृतीकरोतीति । शॄ + कर्त्तरि अच् ।) दधियोगात् पक्वोष्णदुग्धजातः । छाना इति भाषा । तत्पर्य्यायः । आमिक्षा २ पयस्या ३ । इति हेमचन्द्रः ॥

क्षीरशीर्ष, पु, (क्षीरं शीर्षेऽस्य ।) श्रीवासः । इति राजनिर्घण्टः ॥

क्षीरशुक्ला, स्त्री, (क्षीरवत् शुभ्रा शुक्ला ।) क्षीरविदारी । क्षीरकाकोली । इति राजनिर्घण्टः ॥ (क्षीरविदारीशब्दे विवरणमस्या ज्ञेयम् ॥)

क्षीरशुक्ल, पु, (क्षीरवत् शुक्लः ।) जलकण्टकः । पानिफल इति भाषा । इति शब्दचन्द्रिका ॥ राजादनी । क्षीरणी इति भाषा । इति राजनिर्घण्टः ॥

क्षीरशुक्ला, स्त्री, (क्षीरमिव शुक्ला ।) शुक्लभूमिकुष्माण्डः । इत्यमरः । २ । ४ । ११० ॥
(यथास्याः पर्य्यायाः ।
"क्षीरशुक्ला विदारीक्षुविदारी च पलाशिका ।
प्रसिद्धो भूमिकुष्माण्डो विदारीकन्द इत्यपि" ॥
इति वैद्यकरत्नमालायाम् ॥
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता ।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी ।
वाराहवदना गृष्टिर्वदरेत्यपि कथ्यते" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"जीवकर्षभकौ मेदा श्रावणी कर्कटाह्वयम् ।
मुद्गमाषाख्यपर्ण्यौ च महतीं श्रावणीं तथा" ॥
काकोली क्षीरकाकोलीं छुद्रा छिन्नरुहान्तथा ।
क्षीरशुक्लापयस्याश्च यथ्याह्वं विधिना पिबेत् ।
वातपित्तहितान्येतान्यादीनि तु कफानिले" ॥
इति चरके कल्पस्थाने ७ अध्याये ॥)

क्षीरस, पु, (क्षीरं स्यतीति । सो + क ।) क्षीरसारः । इति राजनिर्घण्टः ॥

क्षीरसन्तानिका, स्त्री, (क्षीरस्य दुग्धस्य सन्तानिका इव ।) दुग्धविकारविशेषः । छाना इति नट्क्षीर इति च भाषा । अस्या गुणाः । "क्षीरसन्तानिका वृष्या स्निग्धा पित्तानिलापहा" । इति राजवल्लभः ॥

क्षीरसमुद्र, पु, (क्षीरतुल्यः स्वादुरसः क्षीरमयो वा समुद्रः ।) दुग्धसागरः । स तु श्वेतद्वीपे वर्त्तते । यथा । क्षीरसमुद्राय नमः श्वेतद्वीपाय नमः इत्यादि पीठन्यासप्रकरणे तन्त्रसारः ॥

क्षीरसागरसुता, स्त्री, (क्षीरसागरस्य क्षीरोदसमुद्रस्य सुता ।) लक्ष्मीः । इति कविकल्पलता ॥

क्षीरसार, पु, (क्षीरस्य दुग्धस्य सारः । यद्वा क्षीरं सरति प्राप्नोति कारणत्वेन इति । क्षीर + सृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) क्षीरविशेषः । मानिञ्जु इति हिन्दी भाषा । तत्पर्य्यायः । क्षीरसः २ । यथा,—
"ईषत्कृष्णसरं गौल्यं पिष्टं तर्पणं गुरु ।
पुष्टिं चैवाभिधा तस्य क्षीरसारस्तु क्षीरसः" ॥
इति राजनिर्घण्टः ॥

क्षीरस्फटिक, पु, (क्षीरवत् शुभ्रः स्फटिकः ।) क्षीरवर्णस्फटिकविशेषः । यथा,—
"सूर्य्यकान्तः सूर्य्यमणिः सूर्य्याश्मा दहनोपलः ।
चन्द्रकान्तश्चन्द्रमणिश्चान्द्रश्चन्द्रोपलश्च सः ॥
क्षीरतैलस्फटिकाभ्यामन्यौ खस्फटिकाविमौ" ॥
इति हेमचन्द्रः ॥

क्षीरस्रव पुं, (क्षीरस्य स्रवः कासोत्यस्रैषा इव । घणीभूतत्वात्तथात्वम् ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥

क्षीरा, स्त्री, (क्षीरवर्णोऽस्त्यस्या इति "अर्शआदिभ्योऽच्" । ५ । २ । १२७ । इत्यच् । ततष्टाप् ।) काकोली । इति राजनिर्घण्टः ॥ (काकोलीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

क्षीराब्धि, पु, (क्षीरमयोऽब्धिः क्षीरस्याब्धिर्वा ।) क्षीरसमुद्रः । इति शब्दरत्नावली ॥

क्षीराब्धिज, क्ली, (क्षीराब्धेः क्षीरोदसागरात् जायते इति । जन् + ड ।) सामुद्रलवणम् । मौक्तिकम् । इति मेदिनी ॥

क्षीराब्धिज, पु, (क्षीराब्धेर्जायते इति । जन् + डः ।) चन्द्रः । इति मेदिनी ॥

क्षीराब्धिजा, स्त्री, (क्षीराब्धिज + टाप् ।) लक्ष्मीः । इति मेदिनी ॥ (यथा, भागवते ८ । ८ । ८ ।
"ततश्चाविरभूत्साक्षात् श्रीरमा भगवत्परा ।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा" ॥)

क्षीराब्धितनया, स्त्री, (क्षीराब्धेः तनया कन्या ।) लक्ष्मीः । इत्यमरः । १ । १ । २९ ॥

क्षीराविका, स्त्री, (क्षीरं अवतीति । "कर्म्मण्यण्" । ततो ङीप् तत स्वार्थे कन् टापि पूर्व्वह्रस्वः ।) क्षीरावी । इति शब्दरत्नावली ॥

क्षीरावी, स्त्री, (क्षीरं अवतीति "कर्म्मण्यण्" । ३ । २ । १ । इत्यण् । ङीप् च ।) दुग्धिका । इत्यमरः । २।४।१०० ॥ तत्पर्य्यायः । ग्राहिणी २ कच्छुरा ३ ताम्रमूला ४ मरुद्भवा ५ । इति रत्नमाला ॥ द्वे क्षीरावि इति ख्यातायाम् । इयञ्च वकुलपत्रतुल्यपत्रा लताच्छेदे क्षीरं स्रवतीति सुभूतिः । तन्मते दुदिया काँगा इति ख्यातायामित्यनुमीयते । द्वे क्षीरकाकोल्यामिति स्वामी । क्षीरमवति रक्षति क्षीरावी अव रक्षे अण् ईप् । दुग्धमस्त्यस्या दुग्धिका विकारसबेति ठिकः । इति भरतः ॥ अन्यद्दुग्धिकाशब्दे द्रष्टव्यम् ॥

क्षीराह्व, पु, (क्षीरं आह्वयते स्पर्द्धते इति । ह्वे + क ।) सरलद्रुमः । इति त्रिकाण्डशेषः ॥

क्षीरिका, स्त्री, (क्षीरवत् स्वादोऽस्त्यस्य इति ठन् ।) क्षीरिवृक्षः । क्षीरखर्ज्जूर इति पिण्डखर्ज्जूर इति च केचित् । तत्पर्य्यायः । राजादनः २ फलाध्यक्षः ३ । इत्यमरः ।२।४।२५ ॥ राजातनः ४ राजादनम् ५ नृपादनम् ६ मधुरा ७ क्षीरवृक्षः ८ पलाशी ९ मर्कटप्रियः १० गुडस्कन्धः ११ क्षेत्रमणि १२ दृढपत्री १३ दृषा १४ मौलिकाख्यानी १५ । इति भरतधृतवाचस्पतिः ॥ क्षीरिवृक्षः १६ वानरप्रियः १७ । इति रत्नमाला ॥ राजन्यः १८ प्रियदर्शनः १९ दृढस्कन्धः २० कपीटः २१ । इति जटा

धरः ॥ वरादनम् २२ क्षीरी २३ क्षीरी [न्] २४ । इति शब्दरत्नावली ॥ अस्याः फलगुणाः ।
"क्षीरिकायाः फलं पक्वं गुरु विष्टम्भि शीतलम् ।
कषायं मधुरं साम्लं नातिवातप्रकोपणम्" ॥
इति राजवल्लभः ॥ अपि च ।
"क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित्" ॥
इति भावप्रकाशः ॥ अन्यत् राजादनीशब्दे द्रष्टव्यम् ॥ * ॥ परमान्नम् । इति राजनिर्घण्टः ॥ ("क्षीरिका मधुरा चैव फलवर्गे प्रकीर्त्तिता" ॥ इति हारीते प्रथमस्थाने १० अध्याये ॥ परमान्नार्थे पर्य्यायाः पाकप्रकारश्चाह्या यथा,—
"पायसः परमान्नं स्यात् क्षीरिकापि तदुच्यते ।
शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् पचेत् ॥
ते सिद्धाः क्षीरिका ख्याता ससिताज्यमृतोत्तमा" ॥
गुणाश्च यथा,—
"क्षीरिका दुर्ज्जरा प्रोक्ता वृंहणी बलवर्द्धिनी" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

क्षीरिणी, स्त्री, (क्षीरं क्षीरसदृशो निर्य्यासोऽस्त्यस्य इति इनि । ततः ङीप् ।) वृक्षविशेषः । तत्पर्य्यायः । काञ्चनक्षीरी २ कर्षणी ३ पटुकर्णिका ४ तिक्तदुग्धा ५ हैमवती ६ हिमदुग्धा ७ हिमावती ८ हिमाद्रिजा ९ पीतदुग्धा १० यवचिञ्चा ११ हिमोद्भवा १२ हैमी १३ हिमजा । १४ । अस्या गुणाः ।
"क्षीरिणी तिक्तशीता च रेचनी शोफतापनुत् ।
क्रिमिदोषकफघ्नी च पित्तज्वरहरा परा" ॥
इति राजनिर्घण्टः ॥ * ॥ वराहक्रान्ता । इति शब्दचन्द्रिका ॥ कुटुम्बिनी । काश्मरी । दुग्धिका । इति च राजनिर्घण्टः ॥
(व्यवहारोऽस्या यत्र तद्यथा ।
"तथा दन्तीद्रवन्त्योः स्यादश्वगन्धाजगन्धयोः ।
क्षीरिण्या नीलिकायाश्च तथैव च करञ्जयोः ॥
मसूरविदलायाश्च प्रत्यक् श्रेण्यास्तथैव च ।
विडङ्गार्द्धाः प्रकल्प्येन तद्वत् साध्यः घृतः पुनः ।
शङ्खिनी सप्तलाधात्री कषाये साधयेद्घृतम्" ॥
इति कल्पस्थाने ११ अध्याये चरकेणोक्तम् ॥)

क्षीरिवृक्षः, पुं, (क्षीरी क्षीरयुक्तो वृक्षः ।) क्षीरयुक्तपञ्चप्रकारवृक्षः । यथा,—
"न्यग्रोधोदुम्बराश्वत्थपारिशप्लक्षपादपाः ।
पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक्पञ्चवल्कलम्" ॥
केचित्तु पारिशस्थाने "शिरीषो वेतसः परे" । वदन्तीति शेषः । अस्य गुणाः ।
"क्षीरिवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः ।
रूक्षाः कषाया मेदोघ्ना विसर्पशयनाशनाः ।
शोथपित्तकफास्रघ्ना भग्नसन्धानकारकाः" ॥
एषां त्वग्गुणाः ।
"त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित्" ॥
तेषां पत्रगुणाः ।
"तेषां पत्रं हिमं ग्राहि कफवातास्रनुत्परम् ।
विष्टम्भाध्मानजित्तिक्तं कषायं लघु लेखनम्" ।
इति राजनिर्घण्टः ॥

क्षीरी, [न्] पुं, (क्षीरं क्षीरवन्निर्य्यासोऽस्त्यस्य, इनि ।) क्षीरिकावृक्षः । इति शब्दरत्नावली ॥ (अस्य व्यवहारो यथा, कनकतैले ।
"कनकक्षीरी शैला भार्गी दन्तीफलानि मूलञ्च ।
जातिफलानि प्रवालसर्षपलशुनविडङ्गकरञ्जत्वक् ॥
सप्तच्छदार्कपल्लवमूलत्वङ्निम्बचित्रकास्फोताः ।
गुञ्जैरण्डबृहतीमूलकसुरसार्ज्जकफलानि ॥
कुष्ठं पाठामुस्तं तुम्बुरुमूर्व्वा वचा षड्ग्रन्था ।
एडगजकुटजशिग्रुत्र्यूषणभल्लातकक्षववकाः ॥
हरितालमवाक्पुष्पी तुत्थं कम्पिल्लकोऽमृतासङ्गः ।
सौराष्ट्रिकाससीसं दार्व्वीत्वक्सर्ज्जिकालवणम् ॥
कल्कैरेतैस्तैलं करवीरकमूलकपल्लवकषाये ।
सार्षपमथवा तैलं गोमूत्रचतुर्गुणं साध्यम् ॥
स्थाप्य कटुकालाबूनि तत्सिद्धं तेनास्य मण्डलान्याशु ।
भिन्द्यात् क्षिप्रमभ्यङ्गात् क्रिमींश्च कण्डूं विनिहन्यात्" ॥
इति कनकतैलम् ॥ इति चरके चिकित्सास्थाने सप्तमेऽध्याये ॥
यथा, मनुः । ८ । २४६ ।
"सीमावृक्षांश्च कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्" ॥)
दुग्धिका । इति शब्दचन्द्रिका ॥ स्नुही । अर्कवृक्षः । राजादनी । दुग्धपाषाणः । वटः । प्लक्षः । (अस्य पर्य्याया यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) सोमलता । स्थालीवृक्षः । इति राजनिर्घण्टः ॥

क्षीरी, स्त्री, (क्षीर + अस्त्यर्थे अच् गौरादित्वात् ङीष् ।) क्षीरीवृक्षः । इति शब्दरत्नावली ॥ (पक्वान्नविशेषः । तस्य पाकप्रणाली यथा,—
"नारिकेलं जलान्नूतनं छिन्नं पयसि गो क्षिपेत् ।
सिता गव्याज्यसंयुक्तं ततश्चेन्मृदुनाग्निना" ॥
अस्या गुणाश्च ।
"नारीकेलोद्भवा क्षीरी स्निग्धाग्नीनातिपुष्टिदा ।
गुर्व्वी सुमधुरा वृष्या रक्तपित्तानिलापहा" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

क्षीरीशः, पुं, (क्षीरिणां क्षीरप्रधानानां वृक्षाणां ईशः श्रेष्ठः ।) क्षीरफकुर्व्वी । तत्पर्य्यायः । वरपर्णः २ खङ्कच्छदः ३ कुष्ठनाशनः ४ वल्यः ५ मूलकमूला ६ खसकन्धः ७ कञ्चुकी ८ । इति रत्नमाला ॥

क्षीरेयी, स्त्री, (क्षीर + बाहुलकात् ढञ् ततो ङीप् । यद्वा, क्षीरेण ईं शोभां यातीति । या + क गौरादित्वात् ङीष् ।) पायसम् । यथा,—
"क्षीरेयी पायसं प्रोक्तं परमान्नञ्च सूरिभिः" ॥
इति हलायुधः ॥

क्षीरोदः, पुं, (क्षीर + "उदकस्योदः संज्ञायाम्" । ६ । ३ । ५७ । "उत्तरपदस्य चेति वक्तव्यम्" । इति वार्त्तिकम् ।) दुग्धसमुद्रः । इत्यमरः । १ । १० । २ ॥ (यथा, महाभारते । १३ । १४ । ३५३ ।
"अक्षय्यं यौवनं तेऽस्तु तेजश्चैवानलोपमम् ।
क्षीरोदसागरश्चैव यत्र यत्रेच्छसि प्रियम्" ॥)
तस्य मन्थनं यथा,—

"मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ।
दानवैः सहिता भूत्वा मथध्वं क्षीरसागरम् ॥
अहञ्च तत्र साहाय्यं करिष्यामि दिवौकसः ।
भविष्यत्यमृतं तत्र तत्माद्बलवत्तराः ॥
भविष्यन्ति क्षणादेव अमृतस्य प्रभावतः ।
एते सर्व्वे महावीर्य्या मुख्याः प्रथवविक्रमाः ॥
इन्द्राद्यास्तु महोत्साहा ध्यानलब्धा महानदीन् ।
ततो हि दानवान् सेतु समर्था नात्र संशयः ॥
इत्युक्ता देवदेवेन देवाः सर्व्वे जगत्पतिम् ।
प्रणम्यागत्य निलयं सन्धिं कृत्वाथ दानवैः ॥
क्षीराब्धिमथने सर्व्वे चक्रुरुद्योगमुत्तमम् ।
वलिना चोद्धृतो राजन् मन्दराख्यो महागिरिः ॥
क्षीराब्धौ क्षेपितश्चैव तेनैकेन नृपोत्तम ।
सर्व्वौषधिश्च प्रक्षिप्ता देवैर्दैत्यैः पयोदधौ ॥
वासुकिश्च ततस्तत्र राजन् । नारायणाज्ञया ।
सर्व्वदेवहितार्थाय विष्णुश्च स्वयमागतः ॥
ततो विष्णुसमादेशात्तत्र सर्व्वे सुरासुराः ।
समेत्य मित्रभावेन क्षीराब्धेस्तटमाश्रिताः ॥
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वाथ वासुकिम् ।
ततो मथितुमारब्धा नृपते । तरसाऽमृतम् ॥
विष्णुना मुखभागे तु वासुकेर्दानवाः कृताः ।
देवास्तु पुच्छभागे तु मथनार्थं नियोजिताः ॥
एवन्तु मथ्यमानस्तु मन्दरोऽप्यविशद्वै ।
आधारेण विना राजन् दृष्ट्वा सहसा हरिः ॥
सर्व्वलोकहितार्थाय कूर्म्मरूपमधारयत् ।
आत्मानं सम्प्रवेश्याथ मन्दरस्य गिरेरधः ॥
प्रविश्य धृतवान् शैलं पृथग्रूपेण केशवः ।
उपर्य्याक्रान्तवान् शैलं पृथग्रूपेण केशवः ॥
चकर्ष नागराजानं देवैः सार्द्धं जनार्द्दनः ।
असुरै रूपरूपेण दैत्यमध्ये च केशवः ॥
ततस्ते तु त्वरायुक्ता ममन्थुः क्षीरसागरम् ।
यावच्छक्त्या नृपश्रेष्ठ । बलवन्तः सुरासुराः ॥
मथ्यमानात् ततस्तस्मात् क्षीराब्धेरभवन्नृप ।
कालकूटमिति ख्यातं विषमत्यन्तदुःसहम् ॥
तन्नागाः गरुडः सर्व्वे तच्छेषं शङ्करोऽग्रहीत् ।
नारायणाज्ञया तेन नीलकण्ठत्वमाप्नुयात् ॥
ऐरावतश्च नागेन्द्रो हयश्चोच्चैःश्रवाः पुनः ।
द्वितीयावर्त्तनाद्राजन्नुत्पन्नाविति नः श्रुतम् ॥
तृतीयावर्त्तनादप्सरोगणो जातः सुशोभनः ।
चतुर्थात् पारिजातश्च उत्पन्नः स महातरुः ॥
पञ्चमात् हिमगुस्तस्मात् उत्थितः क्षीरसागरात् ।
तं भवः शिरसा धत्ते नारी च स्वस्तिको नृप ॥
नानाविधानि रत्नानि दिव्यान्याभरणानि च ।
क्षीरोदधेस्तूत्थितानि गन्धर्व्वाश्च सहस्रशः ॥
एतान् दृष्ट्वा तदोत्पन्नान् नित्याश्चर्य्यसमन्विताः ।
अभवन् जातहर्षास्ते तत्र सर्व्वे सुरासुराः ॥
देवपक्षे ततो मेघाः सत्यं वर्षन्ति वृष्टिताः ।
कृष्णाज्ञया तु वायुस्तु सुखं वाति सुरान् प्रति ॥
विषनिश्वासवातेन वासुकेश्चार्त्ततापनात् ।
निस्तेजसोऽभवन् दैत्या निर्व्वीर्य्याश्च महामते ॥
ततः श्रीरुत्थिता तस्मात् क्षीरोदोऽकृतपङ्कजा ।
विभ्राजमाना राजेन्द्र । दिशः सर्व्वाः स्वतेजसा ॥

ततः क्षीरोदके स्नाता दिव्यवस्त्रैरलङ्कृता ।
दिव्यगन्धानुलेपैस्तु सुमनोभिः सुपूजिता ॥
देवपक्षं समासाद्य स्थिता क्षणमरिन्दम ।
हरिवक्षःस्थलं प्राप्ता ततः सा कमलालया ॥
ततोऽमृतघटं पूर्णं गृहीत्वा पयसोनिधेः ।
धन्वन्तरिः समुत्तस्थौ ततः प्रीताः सुरा नृप ॥
दैत्याः श्रिया परित्यक्ता दुःखितास्तत्र ते पुनः ।
आदायामृतघटं शीघ्रं ते च जग्मुर्यथेच्छया ॥
ततः स्त्रीरूपमकरोद्विष्णुर्दैत्यवञ्चनाय वै ।
आत्मानं नृपशार्दूल ! नार्य्या लक्षणसंयुतम् ॥
ततो जगाम भगवान् स्त्रीरूपेण सुरान् प्रति ।
दिव्यरूपान्तु तां दृष्ट्वा मोहितास्ते सुरद्विषः ॥
अमृतपूर्णं घटं भूमौ ऐमं संस्थाप्य सत्तम ।
कामेन पीडिता ह्यासन्नसुरास्तत्र तत्क्षणात् ॥
मोहयित्वा तु तानेवमसुरानवनीपते ।।
अमृतभाजनमादाय देवेभ्यः प्रददौ हरिः ॥
तत् पीत्वा तु ततो देवा देवदेवप्रसादतः ।
बलवन्तो महावीर्य्या रणे जग्मुर्महासुरान्" ॥
इति नृसिंहपुराणे ३६ अध्यायः ॥

क्षीरोदतनया, स्त्री, (क्षीरोदस्य क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति हेमचन्द्रः ॥ (अस्या उत्पत्तिकथा क्षीरोदशब्दे द्रष्टव्या ॥)

क्षीरोदतनयापतिः, पुं, (क्षीरोदतनयायाः लक्ष्म्याः पतिः ।) विष्णुः । इति कविकल्पलता ॥

क्षीरोदनन्दनः, पुं, (क्षीरोदस्य दुग्धसमुद्रस्य नन्दनः ।) चन्द्रः । इति शब्दरत्नावली ॥

क्षीव, ऋ ङ दर्पे । इति कविकल्पद्रुमः । (भ्वा-आत्म-अक सेट् ।) ऋ, अचिक्षीवत् । ङ, क्षीवते । इति दुर्गादासः ॥

क्षीव, निरासे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) निरास इह फुत्कारः । इति भट्टमल्लः ॥ मुखेन श्लेष्मादेर्व्वमनमिति केचित् । क्षीवत्यन्नं लोकः । इति दुर्गादासः ॥

क्षीवः, त्रि, (क्षीवृ ङ मदे + क्त । "अनुपसर्गात् फुल्लक्षीवेति" । ८ । २ । ५५ । तलोपो निपातनात् ।) सुरामत्तः । यथा । "मत्ते शौण्डोत्कटक्षीवाः" । इत्यमरः । २ । १० । २३ ॥ दन्त्योष्ठ्यवकारान्तोऽयम् ॥
(यथा, रामायणे । ५ । ६० । १२ ।
"उन्मत्तभूताः प्लवगा मधुपानप्रहर्षिताः ।
क्षीवाः कुर्व्वन्ति हास्यं च कलहांश्च तथाऽपरे" ।)

क्षु, टु क्षुते । इति कविकल्पद्रुमः ॥ (अदा पर-अक सेट् ।) क्षुतं हाँची इति ख्यातम् । टु, क्षवथुः । ल, क्षौति कर्णी । क्षुतक कामिनि ! चुक्षुवे मृगाक्ष्या । इति माघे । इति दुर्गादासः ॥

क्षुः, पुं, (क्षणोति हिनस्ति जीवान् इति । क्षण् हिंसायां + डु ।) सिंहः । इत्येकाक्षरकोषः ॥

क्षुणः, पुं, (क्षु + नक् ।) अरिष्टवृक्षः । यथा,—
"अरिष्टो वस्तिकर्म्माढ्यो वेणीव फेनिलः क्षुणः" ।
इति शब्दचन्द्रिका ॥ (अरिष्टशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

क्षुण्णः, त्रि, (क्षुद संपेषणे + कर्म्मणि क्त ।) प्रहृतम् । (अभ्यस्तम् । यथा, रघौ । १ । १७ ।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्" ॥
माघे च । १ । ३२ ।
"उदीर्णरागप्रतिरोधकं जनै-
रभीक्ष्णमक्षुण्णतयातिदुर्गमम् ।
उपेयुषो मोक्षपथं मनस्विन-
स्त्वमग्रभूमिर्निरपायसंश्रया" ॥)
चूर्णीकृतम् । इति जटाधरः ॥
(यथा, मार्कण्डेयपुराणे । ८३ । २४-२५ ।
"सोऽपि कोपान्महावीर्य्यः खुरक्षुण्णमहीतलः ।
शृङ्गाभ्यां पर्व्वतानुच्चांश्चिक्षेप च ननाद च ॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्य्यत" ॥)

क्षुत्, स्त्री, (क्षु शब्दे क्षुते च + सम्पदादित्वात् भावे क्विप् तुगागमश्च ।) क्षुतम् । इत्यमरः ।२।६।५२ । (धान्यविशेषः । टेधान इति लोके । अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
"क्षुतपुन्नो गोजिह्वा च गुन्द्रागुन्द्रा गवेधुका" ॥)

क्षुत्, [ध्] स्त्री, (क्षुध् + सम्पदादित्वात् भावे क्विप् ।) क्षुधा । इत्यमरः । २ । ९ । ५४ ॥
(यथा, मार्कण्डेयपुराणे । ८ । ३५ ।
"तात ! तात ! देह्यन्नमम्बाम्ब ! भोजनं दद ।
क्षुन्मे बलवती जाता जिह्वाग्रं शुष्यते तथा" ॥)

क्षुतं, क्ली, (क्षु शब्दे क्षुते च + भावे क्त ।) नासिकाभिघातजन्यशब्दवायुनिःसरणम् । हाँचौ इति भाषा । तत्पर्य्यायः । क्षुत् २ क्षवः ३ । इत्यमरः । २ । ६ । ५२ ॥ क्षुता ४ छिक्का ५ क्षवथुः ६ क्षुतः ७ । इति शब्दरत्नावली ॥ हच्छि ८ । इति जटाधरः ॥ * ॥ तस्य शकुनानि यथा,—
"अथ क्षुतास्य शकुनं क्रमेण
महाप्रभावं प्रतिभावयामः ।
नश्यन्ति यस्माच्छकुनाः समस्ता
मृगाधिनाथादिव वन्यसत्त्वाः ॥
सर्व्वस्य सर्व्वत्र च सर्व्वकालं
क्षुतं न कार्य्यं क्वचिदेव शस्तम् ।
यातुः क्षुते तेन न किञ्चिदेव
कुर्य्यात् क्षुतं प्राणहरञ्च गन्तुः ॥
निषेधमग्रेऽक्षिणि दक्षिणे च
धनक्षयं दक्षिणकर्णदेशे ।
तत् पृष्ठभागे कुरुतेऽर्थवृद्धिं
क्षुतं कदाचित् शुभमादधाति ॥
भोगाय वामश्रवणस्य पृष्ठे
कर्णे च वामे कथितं जयाय ।
सर्व्वार्थलाभाय च वामनेत्रे
जातं क्षुतं स्यात् क्रमशोऽष्टधैव ॥
क्रमान्निषेधं गमनस्य विघ्नं
क्षतिं समृद्धिं क्षुतमुग्ररोगम् ।
करोति रोगक्षयमर्थलाभं
दीप्तादिनाशश्च क्षुतं करोति ॥
प्राणस्य पुंसः परतोऽपरा स्यात्
पुनः पुनर्व्वा तत एव जातम् ।
वृद्धाच्छिशोर्व्वा कफतो हठाद्वा
जातं क्षुतं केऽपि वदन्ति सत्यम् ॥
आद्यन्तयोर्न स्वपने पठन्ति
क्षुतं प्रशंसन्ति न भोजनादौ
भवेत् कथञ्चिद्यदि भोजनान्ते
भवेत्तदाग्रे न हि भोज्यलाभः ॥
आदौ क्षुतञ्चेत् शकुनैस्ततः किं
जातानजातान् शकुनान्निहन्ति ।
क्षुतं क्षणेनात्र न मङ्गलोऽस्मिन्
प्रयोजने यत्नकृतेऽपि जातम् ॥
क्षुतं क्षणात्तद्विनिहन्त्यवश्यं
कार्य्यात्मकेनापि मनागपीदम् ॥
तस्मादुपेक्ष्यं न विचक्षणेन
क्षुतं यतस्तास्तु फलं विधत्ते" ॥
इति वसन्तराजशाकुने क्षुतप्रकरणं तृतीयम् ॥
अपि च ।
"छिक्कायां लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैरृत्ये शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम्" ॥
इति गारुडे ज्योतिश्चक्रे ६० अध्यायः ॥ * ॥
अन्यच्च । वर्षकृत्ये ।
"वित्तं प्रत्नगिः कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामभिभवं सुरद्विषि कलिर्लाभं समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं लक्षणे ॥
ज्येष्ठीगते क्षुतेऽप्येवमूचुः केचिच्च कोविदाः" ॥
इति ॥ * ॥ क्षुते जीवेति प्रयोगः कर्त्तव्यः । यथा, मदनपारिजातधृतम् ।
"जीवेति क्षुवतो ब्रूयात् जीवेत्युक्तान्यया सह" ॥
इति ॥ * ॥
"क्षुतोत्पतनजृम्भासु जीवोत्तिष्ठाङ्गलिध्वनिः ।
शत्रोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" ॥
इति च तिथ्यादितत्त्वम् ॥ * ॥ तस्य मङ्गलजनकत्वम् । यथा, दाक्षिणात्यास्तु ।
"आसने शयने दाने भोजने वस्त्रसंग्रहे ।
विवादे च विवाहे च क्षुतं सप्तसु शोभनम्" ॥
अन्यच्च विष्णोरित्यधिकृत्य विष्णुधर्म्मोत्तरम् ।
"नामसङ्कीर्त्तनं नित्यं क्षुतप्रस्खलितादिषु ।
वियोगं शीघ्रमाप्नोति सर्व्वानर्थैर्न संशयः" ॥
इति ॥ * ॥ असंवृतमुखस्य क्षुन्निषेधो यथा,—
विष्णुधर्म्मोत्तरे ।
"नासंवृतमुखः कुर्य्याद्धास्यं जृम्भां तथा क्षुतम्" ॥
इति ॥ * ॥ क्षुते आचमनं कर्त्तव्यं यथा । याज्ञवल्क्यः ।
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेत् वासोविपरिधाय च" ॥
इति ॥ * ॥ अशक्तौ स्मृतिः ।
"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्" ॥
इति च उद्वाहतत्त्वम् ॥ * ॥ बलिना सहात् क्षुतं भवति यथा,—
"क्रूरे दक्षिणवक्त्रा स्याद्बलिनाश्च क्षुतं सहात्" ।

सैव पामा। स्फोटैर्म्महद्भिः। स्रावो श्रोथो ॥६॥ दद्रूमाह।
"सकण्डूरागपिडकं दद्रूमण्डलमुद्गतम्" ॥
दद्रूमण्डल मण्डलरूपेणोत्पद्यते। उद्गतमुच्छूनम् ॥७॥ विस्फोटमाह। "स्फोटा श्यावारुणा भासा विस्फोटा स्युस्तनुत्वच ॥८॥ किटिभमाह। "श्याव किणखरस्पर्शं परुष किटिभं स्मृतम्"। किणखर-स्पर्शं किण शुष्कव्रणस्थान तद्वत् कार्कशस्पर्शम्। परुष रूक्षम् ॥९॥ अलसकमाह।
"कण्डूमद्भिः सरागैश्च गण्डैरलसकश्चितम्"।
गण्डैर्म्महापिडकाभिः। चित विचेष्टितम् ॥१०॥
शतारुषमाह।
"रक्त श्याव सदाहार्त्तिशतारु स्याद्बहुव्रणम्"॥११॥
अथ सप्तधातुगतानां कुष्ठानां लक्षणमाह। तत्र रसगतस्य लक्षणमाह।
"त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यञ्च जायते।
त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्त्तनम्" ॥
त्वक्शब्देनात्र रस उच्यते। धातुप्रस्तावात् त्वक्-स्वाप। त्वक्स्वाप स्पर्शाज्ञत्वम्। त्वक्स्वाप इत्या-दिक केचिदत्र रक्तगतस्य लिङ्ग मन्यन्ते ॥१॥
रुधिरगतमाह।
"कण्डूर्व्विपूयकश्चैव कुष्ठे शोणितसम्भवे" ॥
विपूय विशेषेण पूय ॥२॥ मांसगतमाह।
"बाहुल्य वक्त्रशोषश्च कार्कश्य पिडकोद्गम।
तोद स्फोटा स्थिरत्वञ्च कुष्ठे मांससमाश्रिते" ॥
बाहुल्य कुष्ठस्य पुष्टि। पिडकोद्गम क्षुद्रपिडको-द्गम। स्फोटा दृष्टपिडका। स्थिरत्वं अप्र-चारित्वम् ॥३॥ मेदोगतमाह।
"कौण्यं गतिक्षयोऽङ्गानां सम्भेद क्षतसर्पणम्।
मेदस्स्थानगते लिङ्ग प्रागुक्तानि तथैव च" ॥
कौण्य हस्तनाश। अङ्गानां सम्भेद अङ्गभङ्गः। क्षतसर्पण क्षतप्रसरणम्। प्रागुक्तानि रक्तमांस-गतलिङ्गानि ॥४॥ अस्थिमज्जगतमाह।
"नासाभङ्गोऽक्षिरोगश्च क्षतेषु कृमिसम्भवः।
स्वरोपघात पिडका भवेत् कुष्ठेऽस्थिमज्जगे" ॥५॥६॥
शुक्रगतमाह।
"दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयो।
यदपत्य तयोर्ज्जात ज्ञेयं तदपि कुष्ठितम्" ॥
दम्पत्यो स्त्रीपुरुषयोर्द्दुष्टशोणितशुक्रयोर्यदपत्य तयोर्ज्जातमिति ॥ ७ ॥ * ॥ ननु शुद्धशोणित-शुक्रयोरेव दम्पत्योर्गर्भसम्भवाद्दुष्टशोणितशुक्रयो कथमपत्योत्पत्ति। यत आह सुश्रुत।
"कामान्मिथुनसयोगे शुद्धशोणितशुक्रज।
गर्भ सञ्जायते नार्य्यां स जातो बाल उच्यते" ॥
इति। अन्यच्च। वातादिदुष्टरेतस प्रजोत्पादने न समर्था। इति। उच्यते। गर्भोऽत्र शुद्धो बोद्धव्य ॥ अशुद्धस्तु गर्भो दुष्टशोणितशुक्रयोरपि भवति पङ्गुजन्मान्धबधिरादीनां सम्भवात्। शोणितमत्रा-र्त्तवम्। कुष्ठित कुष्ठ सञ्जातमस्येति तारकादि-त्वादितच्। शुक्रार्त्तवगत कुष्ठमपत्येन व्यज्यते इति तात्पर्य्यम् ॥ * ॥ कुष्ठेषूल्बणवातादि दोष-लिङ्गमाह।
"खर श्यावारुणं रूक्ष वातकुष्ठ सवेदनम्।
पित्तात् प्रकुपित दाहरागस्रावान्वितं मतम् ॥
कफात् क्लेदि घनं स्निग्ध सकण्डू शैत्यगौरवम्।
द्विलिङ्ग द्वन्द्वज कुष्ठ त्रिलिङ्ग सान्निपातिकम्" ॥
खर कर्क्कशम्। श्यावारुणं श्याव चारुणञ्च। प्रकुपित क्लेदपूतियुक्तम्। क्लेदि आर्द्रतायुक्तम्। घन पुष्टम् ॥ * ॥ साध्यत्वादिकमाह।
"साध्यं त्वग्रक्तमांसस्थ वातश्लेष्माधिकञ्च यत्।
मेदोगं द्वन्द्वज याप्य वर्ज्य मज्जास्थिसश्रितम् ॥
कृमितृड्दाहमन्दाग्निसयुक्त यत्त्रिदोषजम्"।
वातश्लेष्माधिकञ्च यत् एतेन सिध्मैककुष्ठगजचर्म्म-विपादिकाकिटिभालसकानि साध्यानि। मज्जा प्रत्यासत्त्या शुक्रगतमप्यसाध्यम्। कृमितृडादयपि वर्ज्यमित्यन्वय ॥ * ॥ अरिष्टमाह।
"प्रभिन्न प्रस्रुताङ्गञ्च रक्तनेत्र हतस्वरम्।
पञ्चकर्म्मगुणातीत कुष्ठ हन्तीह कुष्ठिनम्" ॥
प्रभिन्नं विदीर्णम्। हतस्वर घर्घरस्वरम्। पञ्च कर्म्मगुणातीत असञ्जातवमनादिपञ्चकर्म्मगुणम् ॥ अथ स्वरूपविशेषाख्यात् कुष्ठभेदत्वात्रैव श्वित्रमाह।
"कुष्ठैकसम्भव श्वित्र किलासञ्चारुण भवेत्।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्" ॥
कुष्ठैकसम्भव कुष्ठेन सह एकतुल्य सम्भवो निदान यस्य तत् ॥ * ॥ श्वित्रस्य भेदानाह। किलास-ञ्चारुण भवेत्। श्वित्रमेव रक्तमांसाश्रयात् कि-लाससञ्ज्ञञ्च भवेदित्यर्थ ॥ * ॥ ननु कुष्ठस्य श्वित्रस्य च को भेद इत्यत आह। निर्द्दिष्टमपरि-स्रावीति। श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथ च त्रिधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफास्तेभ्य पृथग्भूतेभ्य उद्भवो यस्य तत्। अथ च त्रयो धातवो रक्तमांसमेदांसि स-श्रयोऽधिष्ठान यस्य तत्। कुष्ठ सान्निपातिक सर्व्वधातुगतञ्च भवतीति भेद ॥ * ॥
दोषभेदेन लक्षणभेदानाह।
"वातादूक्षारुण पित्तात्ताम्र कमलपत्रवत्।
सदाह रोमविध्वंसि कफाच्छ्वेत घन गुरु ॥
सकण्डूकं क्रमाद्रक्त मांसमेदःसु चादिशेत्।
वर्णेनैवेदृगुभय कुष्ठ तच्चोत्तरोत्तरम्" ॥
अरुणमीषल्लोहितम्। कमलपत्रवदित्यनेन मध्ये श्वेतमन्ते लोहित बोधयति। घनं पुष्टम्। क्रमा-द्रक्त मांसमेद सु चादिशेत्। तथा च चरक।
"अरुण रक्तगे वाते ताम्र पित्ते पलं गते।
श्वेतं श्लेष्मणि मेदःस्थे श्वित्र कुष्ठ पर परम्" ॥
उभय द्विविधमपि श्वित्र वर्णेन ईदृगेव अरुणा ताम्र श्वेतञ्च। दोषभेदात् द्विविध दोषज व्रण-जञ्च। तथा च भोजः ॥ श्वित्रन्तु द्विविध विद्या-द्दोषजं व्रणज तथा"। इति ॥ * ॥
श्वित्र साध्यमसाध्यञ्चाह।
"अशुक्लरोमाबहलमसंसृष्टमथो नवम्।
अनग्निदग्धज साध्यं श्वित्र वर्ज्यमतोऽन्यथा" ॥
अबहल तनु। अन्यच्च।
"गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्।
वर्ज्जनीय विशेषेण किलासं सिद्धिमिच्छता" ॥
गुह्य मेहनं भगञ्च। तलमत्र पादतलम्। सुश्रुते-नान्ते जातमिति सामान्यतो निर्द्दिष्टत्वात्। अ-चिरन्तन नवमपि ॥ * ॥ कुष्ठस्य ससर्गजत्वे प्रस-ङ्गेनान्यानपि संसर्गजान् रोगानाह।
"प्रसङ्गात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्।
एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ॥
कुष्ठ ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च सक्रामन्ति नरान्नरम्" ॥
प्रसङ्गात् प्रकर्षेण सङ्ग प्रसङ्गो मैथुनं तस्मात्। गात्रसस्पर्शात् तर्हि मैथुनादिति विशेषार्थम्। वस्त्रमाल्यानुलेपनात् एकस्मादेव। शोषो यक्ष्मा। औपसर्गिकरोगा शीतलादय ॥ * ॥ सकुष्ठस्य मृतस्य पुनर्जातस्यापि कुष्ठ भवतीत्याह।
"म्रियते यदि कुष्ठेन पुनर्जातस्य तद्भवेत्।
नातो निन्द्यतरो रोगो यथा कुष्ठं प्रकीर्त्तितम्" ॥
एतावता कुष्ठिना कुष्ठ सर्व्वथा प्रतिकरणीय न तदुपेक्षणीयम् ॥
अथ कुष्ठस्य चिकित्सा।
"वातोत्तरेषु सर्पिर्व्वमन श्लेष्मोत्तरेषु कुष्ठेषु।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनञ्चेष्टम्" ॥
"पथ्याकरञ्जसिद्धार्थनिशावल्गुजसैन्धवै।
विडङ्गसहितै पिष्टैर्लेपो मूत्रेण कुष्ठनुत्" ॥
अवल्गुज वकुचीति लोके। पथ्यादिर्लेप ॥ * ॥
"सोमराजीभव चूर्णं शृङ्गवेरसमन्वितम्।
उद्वर्त्तनमिद हन्ति कुष्ठे रागक्षतास्पदम्" ॥
सोमराजी वकुचीति लोके। सोमराज्युद्वर्त्तनम् ॥
"रसायन प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।
मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्त महर्षिभि ॥ * ॥
पुष्पकाले तु पुष्पाणि फलकाले फलानि च।
सग्राह्य पिचुमर्द्दस्य त्वङ्मूलानि दलानि च ॥
हिरण्यानि समाहृत्य भागिकानि प्रकल्पयेत्।
त्रिफला त्र्यूषण ब्राह्मी स्वदंष्ट्रारुष्करायस ॥
विडङ्गसारवाराहीलोहचूर्णामृता समा।
निशाद्वयावल्गुजकव्याधिघाता सशर्करा ॥
कुष्ठमिन्द्रयवा पाठा चूर्णमेषान्तु सयुतम्।
खदिरासननिम्बाना घनक्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बन्तु मार्कवस्य रसेन च।
स्निग्ध शुद्धतनुर्द्धीमान् योजयेत्तच्छुभे दिने ॥
मधुना तिक्तहविषा खदिरासनवारिणा।
लेह्यमुष्णाम्भसा वापि कोलवृद्ध्या पल भवेत् ॥
जीर्णे तस्मिन् समश्नीयाद् स्निग्ध लघुहितञ्च यत् ॥
विचर्च्चिकोदुम्बरपुण्डरीक-
कापालदद्रूकिटिभालसादि।
शतारुविस्फोटविसर्पमाला
कफप्रकोप त्रिविध किलासम् ॥
भगन्दरश्लीपदवातरक्त-
जडान्ध्यनाडीव्रणशीर्षरोगान्।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविष मूलविष निहन्ति ॥
स्थूलोदर सिंहकृशोदर स्यात्
सुश्लिष्टसन्धिर्म्मधुनोपयोगात्।
सदोषरोगादपि ये दग्धन्ति

सैव पामा । स्फोटैर्म्महद्भिः । स्फिचौ प्रोथौ ॥ ६ ॥
दद्रूमाह ।
"सकण्डूरागपिडकं दद्रूमण्डलमुद्गतम्" ॥
दद्रूमण्डलं मण्डलरूपेणोत्पद्यते । उद्गतमुच्चूनम्
॥ ७ ॥ विस्फोटमाह । "स्फोटाः श्यावारुणा भासा
विस्फोटाः स्युस्तनुत्वचः ॥ ८ ॥ किटिममाह । "श्याव
किणखरस्पर्शं परुषं किटिमं स्मृतम्" । किणखर-
स्पर्शं किणः शुष्कव्रणस्थानं तद्वत् कार्कश्यस्पर्शम् ॥
परुषं रूक्षम् ॥ ९ ॥ अलसकमाह ।
"कण्डूमद्भिः सरागैश्च गण्डैरलसकश्चितम्" ।
गण्डैर्महापिडकाभिः । चितं विचेष्टितम् ॥ १० ॥
शतारुषमाह ।
"रक्तं श्यावं सदाहार्त्तिशतारुः स्याद्बहुव्रणम्" ॥ ११ ॥
अथ सप्तधातुगतानां कुष्ठानां लक्षणमाह । तत्र
रसगतस्य लक्षणमाह ।
"त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यञ्च जायते ।
त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्त्तनम्" ॥
त्वक्शब्देनात्र रस उच्यते । धातुप्रस्तावात् त्वक्-
स्थाच्च । त्वक्स्वापः स्पर्शाज्ञत्वम् । त्वक्स्वाप इत्या-
दिकं केचिदत्र रक्तगतस्य लिङ्गं मन्यन्ते ॥ १ ॥
रुधिरगतमाह ।
"कण्डूर्व्विपूयकश्चैव कुष्ठे शोणितसम्भवे" ॥
विपूयं विशेषेण पूयं ॥ २ ॥ मांसगतमाह ।
"बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडकोद्गमः ।
तोदः स्फोटाः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते" ॥
बाहुल्यं कुष्ठस्य पुष्टिः । पिडकोद्गमः क्षुद्रपिडको-
द्गमः । स्फोटाः बृहत्पिडकाः । स्थिरत्वं अवि-
चारित्वम् ॥ ३ ॥ मेदोगतमाह ।
"कौण्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणम् ।
मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च" ॥
कौण्यं हस्तनाशः । अङ्गानां सम्भेदः अङ्गभङ्गः ।
क्षतसर्पणं क्षतप्रसरणम् । प्रागुक्तानि रक्तमांस-
गतलिङ्गानि ॥ ४ ॥ अस्थिमज्जगतमाह ।
"नासाभङ्गोऽक्षिरागश्च क्षतेषु क्रिमिसम्भवः ।
स्वरोपघातः पिडका भवेत् कुष्ठेऽस्थिमज्जगे" ॥ ५ ॥ ६ ॥
शुक्रगतमाह ।
"दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयोः ।
यदपत्यं तयोर्ज्जातं ज्ञेयं तदपि कुष्ठितम्" ॥
दम्पत्योः स्त्रीपुरुषयोर्दुष्टशोणितशुक्रयोर्यदपत्यं
तयोर्ज्जातमिति ॥ ८ ॥ * ॥ ननु शुद्धशोणित-
शुक्रयोरेव दम्पत्योर्गर्भसम्भवाद्दुष्टशोणितशुक्रयो
कथमपत्योत्पत्तिः । यत आह सुश्रुतः ।
"कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ।
गर्भः सञ्जायते नार्य्यां स जातो बाल उच्यते" ॥
इति । अन्यच्च । वातादिदुष्टरेतसः प्रजोत्पादने न
समर्थाः । इति । उच्यते । गर्भोऽत्र शुद्धो बोद्धव्यः ॥
अशुद्धस्तु गर्भो दुष्टशोणितशुक्रयोरपि भवति
पङ्कजन्मान्धबधिरादीनां सम्भवात् । शोणितमत्रा-
र्त्तवम् । कुष्ठितं कुष्ठं सञ्जातमस्येति तारकादि-
त्वादितच् । शुक्रार्त्तवगतं कुष्ठमयत्नेन व्यज्यते
इति तात्पर्य्यम् ॥ * ॥ कुष्ठेषूल्बणवातादि दोष-
लिङ्गमाह ।

"खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनम् ।
पित्तात् प्रकुपितं दाहरागस्रावान्वितं मतम् ॥
कफात् क्लेदि घनं स्निग्धं सकण्डू शैत्यगौरवम् ।
द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकम्" ॥
खरं कर्कशम् । श्यावारुणं श्यावं चारुणञ्च । प्रकु
पितं क्लेदपूतिबहुलम् । क्लेदि आर्द्रतायुक्तम् ।
घनं पुष्टम् ॥ * ॥ साध्यत्वादिकमाह ।
"साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकञ्च यत् ।
मेदोगं द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितम् ॥
क्रिमितृड्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम्" ।
वातश्लेष्माधिकञ्च यत् एतेन सिद्धैककुष्ठगजचर्म्म-
विपादिकाकिटिमालसकानि साध्यानि । मज्ज-
प्रत्यासत्त्या शुक्रगतमप्यसाध्यम् । क्रिमितृडादयपि
वर्ज्ज्यमित्यन्वय ॥ * ॥ अरिष्टमाह ।
"प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरम् ।
पञ्चकर्म्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्" ॥
प्रभिन्नं विदीर्णम् । हतस्वरं घर्घरस्वरम् । पञ्च-
कर्म्मगुणातीतं असञ्जातवमनादिपञ्चकर्म्मगुणम् ॥
अथ त्वग्दोषसाम्यात् कुष्ठभेदत्वाच्चात्रैव श्वित्रमाह ।
"कुष्ठैकसम्भवं श्वित्रं किलासं दारुणं भवेत् ।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्" ॥
कुष्ठैकसम्भवं कुष्ठेन सह एकस्तुल्यः सम्भवो
निदानं यस्य तत् ॥ * ॥ श्वित्रस्य भेदानाह । किलास-
दारुणं भवेत् । श्वित्रमेव रक्तमांसाश्रयात् कि-
लासमरुणञ्च भवेदित्यर्थः ॥ * ॥ ननु कुष्ठस्य
श्वित्रस्य च को भेद इत्यत आह । निर्द्दिष्टमपरि-
स्राविति । श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि
अथ च त्रिधातूद्भवसंश्रयमिति त्रयो धातवो
वातपित्तकफास्तेभ्यः पृथग्भूतेभ्य उद्भवो यस्य
तत् । अथ च त्रयो धातवो रक्तमांसमेदांसि स-
श्रयोऽधिष्ठानं यस्य तत् । कुष्ठं सान्निपातिकं
सर्व्वधातुगतञ्च भवतीति भेदः ॥ * ॥
दोषभेदेन लक्षणभेदानाह ।
"वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डुकं क्रमाद्रक्तमांसमेदःसु चादिशेत् ।
वर्णेनैवेदृगुभयं कुष्ठं तच्चोत्तरोत्तरम्" ॥
अरुणमीषल्लोहितम् । कमलपत्रवदित्यनेन मध्ये
श्वेतमन्ते लोहितं बोधयति । घनं पुष्टम् । क्रमा-
द्रक्तमांसमेदःसु चादिशेत् । तथा च चरकः ।
"अरुणं रक्तगे वाते ताम्रं पित्ते मलं गते ।
श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम्" ॥
उभयं द्विविधमपि श्वित्रं वर्णेन ईदृगेव अरुणं
ताम्रं श्वेतञ्च । दोषभेदात् द्विविधं दोषजं व्रण-
जञ्च । तथा च भोजः ॥ श्वित्रन्तु द्विविधं विद्या-
द्दोषजं व्रणजं तथा" । इति ॥ * ॥
श्वित्रं साध्यमसाध्यञ्चाह ।
"अशुक्लरोमाबहुलमसंसृष्टमथो नवम् ।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा" ॥
अबहुलं तनु । अन्यच्च ।
"गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम् ।
वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता" ॥

गुह्यं मेढ्रं भगञ्च । तलमत्र पादतलम् । सुश्रुते-
नान्ते जातमिति सामान्यतो निर्द्दिष्टत्वात् । अ-
चिरन्तनं नवमपि ॥ * ॥ कुष्ठस्य संसर्गजत्वे प्रस-
ङ्गेनान्यानपि संसर्गजान् रोगानाह ।
"प्रसङ्गात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात् ।
एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च ।
औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम्" ॥
प्रसङ्गात् प्रकर्षेण सङ्गः प्रसङ्गो मैथुनं तस्मात् ।
गात्रसंस्पर्शात् तर्हि मैथुनादिति विशेषार्थम् ।
वस्त्रमाल्यानुलेपनात् एकस्मादेव । शोषो यक्ष्मा ।
औपसर्गिकरोगाः शीतलादयः ॥ * ॥ सकुष्ठस्य
मृतस्य पुनर्जातस्यापि कुष्ठं भवतीत्याह ।
"म्रियते यदि कुष्ठेन पुनर्जातस्य तद्भवेत् ।
नातो निन्द्यतरो रोगो यथा कुष्ठं प्रकीर्त्तितम्" ॥
एतावता कुष्ठिना कुष्ठं सर्व्वथा प्रतिकरणीयं न
तदुपेक्षणीयम् ॥

अथ कुष्ठस्य चिकित्सा ।

"वातोत्तरेषु सर्पिर्व्वमनं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनञ्चेष्टम्" ॥
"पथ्याकरञ्जसिद्धार्थनिशावल्गुजसैन्धवैः ।
विडङ्गसहितैः पिष्टैर्लेपो मूत्रेण कुष्ठनुत्" ॥
अवल्गुजः वकुचीति लोके । पथ्यादिर्लेपः ॥ * ॥
"सोमराजीभवं चूर्णं शृङ्गवेरसमन्वितम् ।
उद्वर्त्तनमिदं हन्ति कुष्ठं रागक्षतास्रदम्" ॥
सोमराजी वकुचीति लोके । सोमराज्युद्वर्त्तनम् ॥
"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ।
मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः ॥ * ॥
पुष्पकाले तु पुष्पाणि फलकाले फलानि च ।
सगृह्य पिचुमर्द्दस्य त्वङ्मूलानि दलानि च ॥
हिरण्यानि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफला त्र्यूषणं ब्राह्मी स्वदंष्ट्रारुष्करान्वितम् ॥
विडङ्गसारवाराहीलौहचूर्णामृता समाः ।
निशाद्वयावल्गुजकव्याधिघाता सशर्करा ॥
कुष्ठमिन्द्रयवा पाठा चूर्णमेषान्तु संयुतम् ।
खदिरासननिम्बानां घनक्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बन्तु मार्कवस्य रसेन च ।
स्निग्धः शुद्धतनुर्द्धीमान् योजयेत्तच्छुभे दिने ॥
मधुना तिक्तहविषा खदिरासनवारिणा ।
लेह्यमुष्णाम्भसा वापि कोलवृद्ध्या पलं भवेत् ॥
जीर्णे तस्मिन् समश्नीयाद् स्निग्धं लघुहितञ्च यत् ॥
विचर्च्चिकोदुम्बरपुण्डरीक-
कपालदद्रूकिटिमालसादि ।
शतारुविस्फोटविसर्पमाला
कफप्रकोपं त्रिविधं किलासम् ॥
भगन्दरश्लीपदवातरक्त-
जडान्ध्यनाडीव्रणशीर्षरोगान् ।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
स्थूलोदरं सिंहकृशोदरं स्यात्
सुश्लिष्टसन्धिर्म्मधुनोपयोगात् ।
सदोषरोगादपि ये दशन्ति

दक्षिणावर्त्तेति नासाविशेषणम् । इति च गारुडे ६६ अध्यायः ॥

क्षुत, पु, (क्षु + क्त । अभिधानात् पुंस्त्वम् ।) क्षुतम् । इति शब्दरत्नावली ॥

क्षुतक, पु, (क्षुताय साधुरिति कन् स्वार्थे वा ।) राजिका । इति राजनिर्घण्टः ॥

क्षुता, स्त्री, (क्षुत + टाप् ।) क्षुतम् । इति शब्दरत्नावली ॥

क्षुताभिजनन, पुं, (क्षुतं अभिजनयति । अभि + जन् + णिच् + ल्यु ।) कृष्णसर्षपः । इत्यमरटीकायां स्वामी ॥

क्षुत्करी, स्त्री, (क्षुतं करोतीति । कृ + ट + ङीप् च ।) कट्फलिका । यथा, शब्दचन्द्रिकायाम् ।
"भुजङ्गघातिनी क्षुरि सर्पाक्षी क्षुत्करी स्पृहा" ॥

क्षुद, ऋ ध श्री इर् क्षुदि । इति कविकल्पद्रुमः ॥ (रुधा-उभ-सक-अनिट् ।) ऋ ध, क्षुणत्ति क्षुन्ते । श्री, क्षोत्ता । इर्, अक्षुदत् अक्षौत्सीत् । क्षुदि चूर्णीकरणे । इति दुर्गादासः ॥ (यथा, भट्टिः । १४ । ३३ ।
"मित्रघ्नस्य प्रचुक्षोद गदयाशु विभीषणः ।
सुग्रीव प्रघसं नेमे वज्रघ्नामन्तर्द्दं च" ॥)

क्षुद्, [ध्] स्त्री, (क्षुध् + सम्पदादित्वात् भावे क्विप् ।) क्षुधा । इत्यमरः ।२।९।५४॥ (विष्णुपुराणे ।१।५।३९ ।
"रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
ततः क्षुद् ब्रह्मणो जाता जज्ञे कोपस्तया ततः" ॥)

क्षुद, पु, (क्षुद + "इगुपधज्ञाप्रीकिरः कः" । ३ । १ । १३५ । इति कः ।) तण्डुलादिचूर्णम् । क्षुद इति भाषा ॥

क्षुद्र, पु, (क्षुदि + "स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदीति" । उणा ।२ ।१३ । इति रक् ।) तण्डुलावयवः । इति सङ्क्षिप्तसारोणादिवृत्तिः ॥ खुद । इति शब्दरत्नावली ॥ (मक्षिकाविशेषः । यदुक्तम् ।
"मक्षिका कपिला सूक्ष्मा क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत्" ॥)

क्षुद्र, त्रि, (क्षुद + "स्फायितञ्चीति" उणा । २ । १३ । इति रक् ।) कृपणः । अधमः । (यथा, कुमारे । १ । १२ ।
"क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव" ॥)
तुच्छः । यथा, गीतायाम् । २ । ३ ।
"क्षुद्रं हृदयदौर्ब्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ।" ॥)
क्रूरः । अल्पः । इत्यमरमेदिनीकरौ ॥ (यथा, महाभारते । ३ । आरण्यकाजगरपर्व्वणि । १० । २४ ।
"स भीमः स्मरन्नापि बलेन बलिनाम्बरः ।
जघान पशुमारेण व्याघ्रः क्षुद्रमृगं यथा" ॥)
दरिद्रः । इति हैमचन्द्रः ॥

क्षुद्रकण्टकारी स्त्री, (क्षुद्रा कण्टकारी ।) अग्निदमनी । इति राजनिर्घण्टः ॥

क्षुद्रघण्टी स्त्री, (क्षुद्रा घण्टा यस्याः । गौरादित्वात् ङीष् ।) बृहती । इति भावप्रकाशः । क्षुद्रघण्टारीति च पाठः ॥

क्षुद्रकम्बु, पु, (क्षुद्रश्चासौ कम्बुश्चेति ।) क्षुद्रशङ्खः । तत्पर्य्यायः । शङ्खनखः २ क्षुल्लकः ३ । इति हेमचन्द्रः ॥

क्षुद्रकारवेल्ली, स्त्री, (क्षुद्रा कारवेल्ली ।) कारवेल्लविशेषः । छोट करला इति भाषा । तत्पर्य्यायः । कुडङ्खी २ श्रीफलिका ३ पतिमञ्चफला ४ सुषवी ५ कारवी ६ बहुफला ७ क्षुद्रकारलिका ८ कन्दफला ९ । कन्दफलास्थाने कन्दलता इति च पाठः । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । रुचिकारित्वम् । दीपनत्वम् । रक्तानिलदोषकारित्वम् । पथ्यत्वञ्च । तत्फलस्याप्येते गुणाः ॥ तत्कन्दगुणाः । अर्शोनाशित्वम् । मलरोधविशोधनत्वम् । योनिनिर्गतदोषगर्भस्रावविषापहत्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रकारलिका, स्त्री, (क्षुद्रा कारलिका ।) क्षुद्रकारवेल्ली । इति राजनिर्घण्टः ॥

क्षुद्रकुलिश, पु, (क्षुद्रं कुलिशं वज्रमणिविशेषः । नित्यकर्म्मधारयः ।) वैक्रान्तमणिः । इति राजनिघण्टः ॥

क्षुद्रकुष्ठ, क्ली, (क्षुद्रं अल्पं कुष्ठम् ।) स्वल्पकुष्ठरोगः । तत्तु एकादशविधम् । यथा । क्षुद्रकुष्ठान्याह ।
"एककुष्ठं १ स्मृतं पूर्व्वं गजचर्म्म २ ततः परम् ।
ततश्चर्म्मदलं ३ प्रोक्तं ततश्चापि विचर्च्चिका ४ ॥
विपादिकाभिधा ५ सैव पामाकच्छू—६ ततः परा ।
ततो दद्रुश्च ७ विस्फोट ८ किटिभञ्च ९ ततः परम् ॥
ततश्चालसकं १० प्रोक्तं शतारुश्च ११ ततः परम् ।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः" ॥
ननु दद्रोः कथं क्षुद्रकुष्ठेषु गणना सुश्रुतेन महाकुष्ठेषूक्तत्वात् । उच्यते । असिता च गाढमूला दद्रुः सुश्रुते महाकुष्ठेषूक्ता असिततरा नवगाढमूला दद्रुः क्षुद्रकुष्ठमेव । एवं विधाया दद्रोश्चरकेण क्षुद्रकुष्ठेषु दर्शितत्वात् ॥ * ॥
कुष्ठानां त्रिदोषजत्वेनैकत्वे त्रिदोषस्योल्वणतया सप्तधात्वमाह ।
"सर्व्वेष्वपि त्रिदोषेषु व्यपदेशाधिकत्वतः ।
कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वैः समागतैः" ॥
सर्व्वेष्वपि कुष्ठेषु त्रिदोषजेषु सत्सु व्यपदेशाधिकत्वतः व्यपदेशः कापालादिसञ्ज्ञा तेषामष्टादशत्वरूपं यदधिकत्वं ततः कुष्ठानि सप्तधा । कैः दोषैः कथम्भूतैः पृथग्द्वन्द्वैः समागतैः । समागतैः सङ्गतैर्म्मिलितैरिति यावत् । अस्यायमर्थः ।
किमपि कुष्ठं वातोल्वणं किमपि पित्तोल्वणं किमपि कफोल्वणं किमपि वातपित्तोल्वणं किमपि वातश्लेष्मोल्वणं किमपि पित्तश्लेष्मोल्वणं किमपि त्रिदोषोल्वणमिति ॥ * ॥ पूर्व्वरूपमाह ।
"अतिश्लक्ष्णं खरस्पर्शं स्वेदास्वेदौ विवर्णता ।
दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिः श्रमः ॥
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः ।
रूढानामपि रूक्षत्वं निमित्तेऽल्पेऽपि कोपनम् ।
रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्" ॥
अतिश्लक्ष्णं अतिमृदु । अथवा खरं रूक्षं स्पर्शो वा स्पर्शः । स्वेदास्वेदौ घर्म्मादि सत्त्वप्राभावेऽपि स्वेदः । अथवा घर्म्मादिप्रसङ्गेऽपि स्वेदाभावः । त्वचि स्वापः स्पर्शाज्ञता । शीघ्रोत्पत्तिः शीघ्रा उत्पत्तिर्व्रणानामित्यन्वयः ॥ * ॥ सम्प्राप्तिपूर्व्वकं सामान्यलक्षणमाह ।
"शिराः प्रपद्य तिर्य्यक् च त्वग्लसीकासृगामिषम् ।
दूषयन्ति श्लथीकृत्य निश्चरन्तो बहिस्ततः ॥
त्वचः कुर्व्वन्ति वैवर्ण्यं दोषाः कुष्ठमुशन्ति तत्" ।
तिर्य्यक् तिर्य्यग्गताः शिराः प्रपद्येत्यन्वयः ॥ * ॥ येनोल्वणेन दोषेण यत् कुष्ठं समुत्पद्यते तदाह ।
"वातेन कुष्ठं कापालं पित्तेनौडुम्बरं कफात् ।
मण्डलाख्यं विचर्च्ची च ऋष्याख्यं वातपित्तजम् ॥
चर्म्मैककुष्ठकिटिभसिध्मालसविपादिकाः ।
वातश्लेष्मोद्भवाः पित्तकफात् दद्रुशतारुषी ॥
पुण्डरीकं सविस्फोटं पामा चर्म्मदलन्तथा ।
सर्व्वैरेवोल्वणैर्दोषैरुक्तः काकणकं बुधाः" ॥
विचर्च्ची च कफादित्यन्वयः ॥
"पुण्डरीकं सविस्फोटं पामा चर्म्मदलन्तथा" ॥
पित्तकफादित्यन्वयः ॥ * ॥ अथ क्षुद्रकुष्ठानां मध्ये एककुष्ठस्य लक्षणमाह ।
"अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम् ।
तदेव कुष्ठं चर्म्माख्यं बहुलं हस्तिचर्म्मवत्" ॥
महावास्तु महास्थानम् । मत्स्यशकलोपमं अत्र शकलशब्देन लक्षणया त्वगुच्यते । तेन अत्र मत्स्यसदृशं भवति । एककुष्ठमिति क्षुद्रकुष्ठेषु मुख्यत्वात् । ॥ * ॥ गजचर्म्माह ।
"चर्म्माख्यं बहुलं हस्तिचर्म्मवत् रूक्षं श्यावं च" ।
गजचर्म्माख्यं बहुलं स्थूलं हस्तिचर्म्मवत् रूक्षं श्यावञ्च ॥ २ ॥ चर्म्मदलमाह ।
"रक्तं सशूलं कण्डूमत् सस्फोटं दलयत्यपि ।
तच्चर्म्मदलमाख्यातं संस्पर्शासहमुच्यते" ॥
दलयत्यपि विदारयत्यपि चर्म्मेति शेषः ॥ * ॥

विचर्च्चिकामाह ।

"सकण्डूः पिडका श्यावा बहुस्रावा विचर्च्चिका"
पिडका क्षुद्रपिडका ॥ * ॥ ननु क्षुद्रकुष्ठानां कथमेकादशत्वम् । विपादिकया द्वादशत्वसम्भवात् उच्यते । विचर्च्चिकैव पादयोर्भवति विदारणयोगात् विपादिका तेन न सङ्ख्यातिरेकः । अतएव भोजः ।
"दाल्यते त्वक् खरा रूक्षा पाण्योर्ज्ञेया विचर्च्चिका ।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका" ।
दाल्यते विदार्य्यते । केचिद्विचर्च्चिकातो विपादिकां भिन्नमाहुः ।
"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम्" ।
पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत् ॥ ४ ॥ पामामाह ।
"सूक्ष्मा बह्व्यः स्राविवत्यः प्रदाहाः
पामेत्युक्ताः पिडकाः कण्डुमत्यः" ।
पिडकाः पीडयन्ति इति पिडकाः इति छिद्रादित्वान्निपात्यते ॥ ५ ॥
कच्छूमाह ।
"सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरुग्रा स्फिचोश्च" ।

सैव पामा। स्फोटैर्मैर्दृद्भिः। किचौ प्रोथौ॥६॥
दद्रूमाह।
"सकण्डूरागपिडकं दद्रूमण्डलमुद्गतम्"॥
दद्रूमण्डलं मण्डलरूपेणोत्पद्यते। उद्गतमुच्छूनम्॥७॥ विस्फोटमाह। "स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः॥८॥ किटिभमाह। "श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम्"। किणखरस्पर्शं किणः शुष्कव्रणस्थानं तद्वत् कर्कशस्पर्शम्। परुषं रूक्षम्॥९॥ अलसकमाह।
"कण्डूमद्भिः सरागैश्च गण्डैरलसकश्चितम्"।
गण्डैर्महापिडकाभिः। चितं विचेष्टितम्॥१०॥
शतारुषमाह।
"रक्तं श्यावं सदाहार्त्तिशतारुः स्याद्बहुव्रणम्"॥११॥
अथ सप्तधातुगतानां कुष्ठानां लक्षणमाह। तत्र रसगतस्य लक्षणमाह।
"त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यञ्च जायते।
त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्त्तनम्"॥
त्वक्शब्देनात्र रस उच्यते। धातुप्रस्तावात् त्वक्स्थाच। त्वक्स्वापः स्पर्शाज्ञत्वम्। त्वक्स्वाप इत्यादिकं केचिदत्र रक्तगतस्य लिङ्गं मन्यन्ते॥१॥
रुधिरगतमाह।
"कण्डूर्विपूयकश्चैव कुष्ठे शोणितसम्भवे"॥
विपूयं विशेषेण पूयं॥२॥ मांसगतमाह।
"बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडकोद्गमः।
तोदः स्फोटाः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते"॥
बाहुल्यं कुष्ठस्य पुष्टिः। पिडकोद्गमः क्षुद्रपिडकोद्गमः। स्फोटाः वृहत्पिडकाः। स्थिरत्वं अप्रचारित्वम्॥३॥ मेदोगतमाह।
"कौण्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणम्।
मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च"॥
कौण्यं हस्तनाशः। अङ्गानां सम्भेदः अङ्गभङ्गः। क्षतसर्पणं क्षतप्रसरणम्। प्रागुक्तानि रक्तमांसगतलिङ्गानि॥४॥ अस्थिमज्जगतमाह।
"नासाभङ्गोऽक्षिरागश्च क्षतेषु कृमिसम्भवः।
स्वरोपघातः पिडका भवेत् कुष्ठेऽस्थिमज्जगे"॥५।६॥
शुक्रगतमाह।
"दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयोः।
यदपत्यं तयोर्ज्जातं ज्ञेयं तदपि कुष्ठितम्"॥
दम्पत्योः स्त्रीपुरुषयोर्दुष्टशोणितशुक्रयोर्यदपत्यं तयोर्ज्जातमिति॥८॥*॥ ननु शुद्धशोणितशुक्रयोरेव दम्पत्योर्गर्भसम्भवाद्दुष्टशोणितशुक्रयोः कथमपत्योत्पत्तिः। यत आह सुश्रुतः।
"कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः।
गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते"॥
इति। अन्यच्च। वातादिदुष्टरेतसः प्रजोत्पादने न समर्थाः। इति। उच्यते। गर्भोऽत्र शुद्धो बोद्धव्यः॥ अशुद्धस्तु गर्भो दुष्टशोणितशुक्रयोरपि भवति पङ्गुजन्मान्धबधिरादीनां सम्भवात्। शोणितमत्रार्त्तवम्। कुष्ठितं कुष्ठं सञ्जातमस्येति तारकादित्वादितच्। शुक्रार्त्तवगतं कुष्ठमपत्येन अन्यते इति तात्पर्य्यम्॥*॥ कुष्ठेषूल्बणवातादि दोषलिङ्गमाह।

"खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनम्।
पित्तात् प्रकुपितं दाहरागस्रावान्वितं मतम्॥
कफात् क्लेदि घनं स्निग्धं सकण्डू शैत्यगौरवम्।
द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकम्"॥
खरं कर्कशम्। श्यावारुणं श्यावं चारुणञ्च। प्रकुपितं क्लेदपूतिमण्डलम्। क्लेदि आर्द्रतायुक्तम्। घनं पुष्टम्॥*॥ साध्यत्वादिकमाह।
"साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकञ्च यत्।
मेदोगं द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितम्॥
कृमितृड्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम्"।
वातश्लेष्माधिकञ्च यत् एतेन सिध्मैककुष्ठगजचर्म्मविपादिकाकिटिभालसकानि साध्यानि। मज्जप्रत्यासत्त्या शुक्रगतमप्यसाध्यम्। कृमितृड्दाहादयपि वर्ज्ज्यमित्यन्वयः॥*॥ अरिष्टमाह।
"प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरम्।
पञ्चकर्म्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्"॥
प्रभिन्नं विदीर्णम्। हतस्वरं घर्घरस्वरम्। पञ्चकर्म्मगुणातीतं असञ्जाताचमनादिपञ्चकर्म्मगुणम्॥
अथ त्वग्दृष्टिसाम्यात् कुष्ठभेदत्वाचात्रैव श्वित्रमाह।
"कुष्ठैकसम्भवं श्वित्रं किलासं दारुणं भवेत्।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्"॥
कुष्ठैकसम्भवं कुष्ठेन सह एकस्तुल्यः सम्भवो निदानं यस्य तत्॥*॥ श्वित्रस्य भेदानाह। किलासं दारुणं भवेत्। श्वित्रमेव रक्तमांसाश्रयात् किलाससंज्ञञ्च भवेदित्यर्थः॥*॥ ननु कुष्ठस्य श्वित्रस्य च को भेद इत्यत आह। निर्द्दिष्टमपरिस्रावीति। श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथ च त्रिधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफास्तेभ्यः पृथग्भूतेभ्य उद्भवो यस्य तत्। अथ च त्रयो धातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्। कुष्ठं सान्निपातिकं सर्व्वधातुगतञ्च भवतीति भेदः॥*॥
दोषभेदेन लक्षणभेदानाह।
"वातादूक्षारुणं पित्तात्ताम्रं कमलपत्रवत्।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु॥
सकण्डुकं क्रमाद्रक्तमांसमेदःसु चादिशेत्।
वर्णेनैवेदृगुभयं कुष्ठं तच्चोत्तरोत्तरम्"॥
अरुणमीषल्लोहितम्। कमलपत्रवदित्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति। घनं पुष्टम्। क्रमाद्रक्तमांसमेदःसु चादिशेत्। तथा च चरकः।
"अरुणं रक्तगे वाते ताम्रं पित्ते पलं गते।
श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम्"॥
उभयं द्विविधमपि श्वित्रं वर्णेन ईदृगेव अरुणं ताम्रं श्वेतञ्च। दोषभेदात् द्विविधं दोषजं व्रणजञ्च। तथा च भोजः॥ श्वित्रन्तु द्विविधं विद्यात् दोषजं व्रणजं तथा"। इति॥*॥
श्वित्रं साध्यमसाध्यञ्चाह।
"अशुक्लरोमाबहलमसंसृष्टमथो नवम्।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा"॥
अबहलं तनु। अन्यच्च।
"गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्।
वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता"॥

गुह्यं मेहनं भगञ्च। तलमत्र पादतलम्। सुश्रुतेनान्ते जातमिति सामान्यतो निर्द्दिष्टत्वात्। अचिरन्तनं नवमपि॥*॥ कुष्ठस्य संसर्गजत्वे प्रसङ्गेनान्यानपि संसर्गजान् रोगानाह।
"प्रसङ्गात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्।
एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम्"॥
प्रसङ्गात् प्रकर्षेण सङ्गः प्रसङ्गो मैथुनं तस्मात्। गात्रसंस्पर्शात् तर्हि मैथुनादिति विशेषार्थम्। वस्त्रमाल्यानुलेपनात् एकस्मादेव। शोषो यक्ष्मा। औपसर्गिकरोगाः शीतलादयः॥*॥ सकुष्ठस्य मृतस्य पुनर्जातस्यापि कुष्ठं भवतीत्याह।
"म्रियते यदि कुष्ठेन पुनर्ज्जातस्य तद्भवेत्।
नातो निन्द्यतरो रोगो यथा कुष्ठं प्रकीर्त्तितम्"॥
एतावता कुष्ठिना कुष्ठं सर्व्वथा प्रतिकरणीयं न तदुपेक्षणीयम्॥
अथ कुष्ठस्य चिकित्सा।
"वातोत्तरेषु सर्पिर्व्वमनं श्लेष्मोत्तरेषु कुष्ठेषु।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनञ्चेष्टम्"॥
"पथ्याकरञ्जसिद्धार्थनिशावल्गुजसैन्धवैः।
विडङ्गसहितैः पिष्टैर्लेपो मूत्रेण कुष्ठनुत्"॥
अवल्गुजः वकुचीति लोके। पथ्यादिर्लेपः॥*॥
"सोमराजीभवं चूर्णं शृङ्गवेरसमन्वितम्।
उद्वर्त्तनमिदं हन्ति कुष्ठे रागकृतास्पदम्"॥
सोमराजी वकुचीति लोके। सोमराज्युद्वर्त्तनम्॥
"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।
मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः॥*॥
पुष्पकाले तु पुष्पाणि फलकाले फलानि च।
संगृह्य पिचुमर्द्दस्य त्वङ्मूलानि दलानि च॥
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत्।
त्रिफला त्र्यूषणं ब्राह्मी श्वदंष्ट्रारुष्कराग्नयः॥
विडङ्गसारवाराहीलोहचूर्णामृताः समाः।
निशाद्वयावल्गुजकव्याधिघाताः सशर्कराः॥
कुष्ठमिन्द्रयवाः पाठा चूर्णमेषान्तु सङ्गतम्।
खदिरासननिम्बानां घनक्वाथेन भावयेत्॥
सप्तधा पञ्चनिम्बन्तु मार्कवस्य रसेन च।
स्निग्धः शुद्धतनुर्द्धीमान् योजयेत्तच्छुभे दिने॥
मधुना तिक्तहविषा खदिरासनवारिणा।
लेह्यमुष्णाम्भसा वापि कोलवृद्ध्या पलं भवेत्॥
जीर्णे तस्मिन् समश्नीयाद् स्निग्धं लघुहितञ्च यत्॥
विचर्च्चिकोदुम्बरपुण्डरीक-
कपालदद्रूकिटिभालसादि।
शतारुविस्फोटविसर्पमाला
कफप्रकोपं त्रिविधं किलासम्॥
भगन्दरश्लीपदवातरक्त-
जडान्ध्यनाडीव्रणशीर्षरोगान्।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति॥
स्थूलोदरः सिंहकृशोदरः स्यात्
सुश्लिष्टसन्धिर्मधुनोपयोगात्।
सदोषरोगादपि ये दशन्ति

मर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतश्चन्द्रसमानकान्तिः" ॥

अयमर्थः । निम्बस्य फल-पुष्प-त्वक्-पत्र-मूलानि सर्व्वाणि समुदितानि द्विगुणानि चूर्णितानि भृङ्गराजस्य रसेन सप्तवारान् भावयेत् । त्रिफलादीनि पाठान्तानि समुदितान्येकभागानि चूर्णितानि खदिरासननिम्बानां निविडक्वाथेन भावयेत् । तत सर्व्वमेकीकृत्य मध्वादिनावलिह्यात् । पञ्चनिम्बावलेह ॥ * ॥

"शशिलेखापलपला तावद्गिरिजस्य गुग्गुलोर्द्दश च ।
ताप्यस्य पलत्रितयं द्वे लोहस्यावगीकाया ॥
त्रिफलाकरञ्जपल्लवखदिरगुडूचीचित्रकद्वन्द्वस्य ।
मुस्ताविडङ्गरजनीकुटजत्वक्‌निम्बवह्निसनाका ॥
एते रचिता वटिका मधुघृतमिश्रा गिलेत् प्रातः ।
गोमूत्रेण च कुष्ठं नुदन्त्यसृग्वातमचिरेण ॥
श्वित्राणि पाण्डुरोगं विषमानुदरप्रमेहगुल्मांश्च ।
नाशयति वलीपलितं योगः स्वायम्भुवो नाम्ना" ।
शशिलेखा सोमराजी । गिरिजस्य शिलाजतु ताप्यस्य सुवर्णमाक्षिकस्य । आवगीका मुगडी इति लोके । स्वायम्भुवो गुग्गुलु ॥ * ॥

"चित्रकं त्रिफला व्योषमजाजी कारवी वचा ।
सैन्धवातिविषे कुष्ठं चव्यैलायवशूकजम् ॥
विडङ्गान्यजमोदा च मुस्ता चामरदारु च ।
यावन्त्येतानि सर्व्वाणि तावन्मात्रन्तु गुग्गुलुम् ॥
सङ्क्षुद्य सर्पिषा सार्द्धं गुटिकां कारयेद्भिषक् ।
प्रातर्भोजनकाले च खादेदग्निबलं यथा ॥
हन्त्यष्टादश कुष्ठानि क्रिमीन् दुष्टव्रणानि च ।
ग्रहण्यर्शोविकारांश्च मुखामयगलग्रहान् ॥
गृध्रसीमस्थिभग्नञ्च गुल्मञ्चापि नियच्छति ।
व्याधीन् कोष्ठगतांश्चापि जयेद्विष्णुरिवासुरान्' ॥
एकविंशतिको गुग्गुलु ॥ * ॥

"वातरक्ताधिकारोक्त एव कैशोरकाविधः ।
कुष्ठानां वातरक्तानां नाशाय परमौषधम्" ॥
कैशोरको गुग्गुलु ॥ * ॥

"भल्लातकं प्रस्थयुगं छित्त्वा द्रोणजले क्षिपेत् ।
प्रस्थद्वयं गुडूच्याश्च क्षुण्णं तत्राम्भसि क्षिपेत् ॥
चतुर्थांशावशेषन्तु कषायमवतारयेत् ।
वस्त्रपूते कषाये च वक्ष्यमाणानि निक्षिपेत् ॥
सरावमात्रं गोसर्पिर्गोदुग्धस्याढकं तथा ।
सितां प्रस्थमितां दद्यात् प्रस्थार्द्धं माक्षिकं क्षिपेत् ॥
सर्व्वाण्येकत्र भाण्डे तु पचेन्मृदग्निना शनैः ।
सर्व्वद्रव्ये घनीभूते पावकादवतारयेत् ॥
तत्र क्षेप्याणि चूर्णानि ब्रूमो विल्वमितान्यता ।
वाकुची चाथ दन्तुघ्नः पिचुमर्द्दो हरीतकी ॥
धात्री रात्रिश्च मञ्जिष्ठा मरिचं नागरं कणा ।
यवानी सैन्धवं मुस्तं त्वगेला नागकेशरम् ॥
पर्पटं पद्मकं वालमुशीरं चन्दनं तथा ।
गोक्षुरस्य च बीजानि कर्च्चूरो रक्तचन्दनम् ॥
पृथक् पलार्द्धमानानां चूर्णमेषामिह क्षिपेत् ।
पलमात्रमिदं प्रातः समश्नीयाज्जलेन हि ॥
नाशयेदवलेहोऽयं कुष्ठानि निखिलान्यपि ।
वातरक्तानि सर्व्वाणि सर्व्वाण्यर्शांसि सेवितः ॥
व्यायाममातपं वह्निमम्लं मासं दधि स्त्रियम् ।
तैलाभ्यङ्गं तथाध्वानं नरो भल्लातके त्यजेत्" ॥
इति अमृतभल्लातकावलेहः ॥ * ॥

"निम्बं गोपा गया कट्वी त्रायन्ती त्रिफला घनम् ।
पर्पटावल्गुजानन्ता वचा खदिरचन्दनम् ॥
पाठा शुण्ठी शटी भार्गी वासा भूनिम्बवत्सकम् ।
श्यामेन्द्रवारुणी मूर्व्वा विडङ्गेन्द्रयवानलम् ॥
हस्तिकर्णोऽमृता श्रेका पटोलं रजनीद्वयम् ।
कणागरुवधमसाकच्छ्यादेवोधटाफलम् ॥
मञ्जिष्ठा लाङ्गली रास्ना नक्तमालं पुनर्नवा ।
दन्ती विजयसारश्च भृङ्गराजं कुरण्टकम् ॥
अक्षोटकं च शाखोटं द्विपलांशं पृथक् पृथक् ।
गृहीयात्तानि सर्व्वाणि जलद्रोणे पचेच्छनैः ॥
अष्टभागावशेषन्तु कषायमवतारयेत् ।
विधाय वाससा पूतं स्थापयेद्भाजने दृढे ॥
भल्लातकसहस्राणि छित्त्वा त्रीण्यर्म्मणेऽम्भसि ।
पचेदष्टावशेषन्तु कषायमवतारयेत् ॥
तच्च वस्त्रेण सशोध्य द्वौ कषायौ विनिश्रयेत् ।
गुडस्य तु तुला दत्त्वा लेहवत् साधु साधयेत् ॥
भल्लातकसहस्राणि तत्र बीजानि विक्षिपेत् ।
त्रिकटु त्रिफला मुस्तं विडङ्गं चित्रकं तथा ॥
सैन्धवं चन्दनं कुष्ठं दीप्यकञ्च पलं पृथक् ।
सौगन्ध्यार्थं क्षिपेत्तत्र चातुर्जातं पलं पलम् ॥
महाभल्लातको ह्येष महादेवेन भाषितः ।
प्राणिनां हितकामाय जयेच्छीघ्रं प्रयोगतः ॥
श्वित्रमौडुम्बरं दद्रूमृष्यजिह्वं सकाकणम् ।
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं रक्तमण्डलम् ॥
कण्डूं कापालिकं कुष्ठं पामानञ्च विपादिकाम् ।
वातरक्तं षडर्शांसि पाण्डुरोगं व्रणं क्रिमीन् ॥
रक्तपित्तमुदावर्त्तं कासं श्वासं भगन्दरम् ।
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ॥
निर्यन्त्रणस्तु कथितो विहाराहारमैथुने ।
कुरुते परमां कान्तिं प्रदीप्तं जठरानलम् ॥
अनुपानं प्रयोक्तव्यं हिमतोयं पयोऽथवा ।
भोजने तु सदा त्याज्यमुष्णमन्नं विशेषतः" ॥

गोपा गां पातीति गोपा गोपकन्या श्वेत साउ इति लोके । यत आह निर्घण्टः । "शारिवाशारदास्फोटा गोपकन्या प्रतानिका" इति । तद्वाचको गोपीशब्दश्च । यत आह । गोपी श्यामा शारीवा स्यादनन्तोत्पलशारिवेत्यमरः ॥ गोपाङ्गना गोपवल्ली लताङ्गा काष्ठशारिवेति मदनपालः । अरलणा अतीस । अवल्गुज सोमराजी । अनन्ता दुरालभा । चन्दनं श्वेतम् । भार्ग्या अलाभे कण्टकारीमूलं गृह्णीयात् । श्यामा कृष्णा साउ । हस्तिकर्णा हथिकणा । श्रेका वकाइनि । नक्ताह्व छतिवन । कृष्णावेत्र जलवेतस । उच्चटाफलं आरक्तगुञ्जाफलम् । कुरण्टकः पीतपुष्पकटसरैया । दीप्यकं यवानी । महाभल्लातक ॥ * ॥

"मञ्जिष्ठा त्रिफला तिक्ता वचा दारु निशामृता ।
निम्बश्चैषां कृतः क्वाथः सर्व्वकुष्ठानि नाशयेत्" ॥
इति लघुमञ्जिष्ठादिक्वाथः ॥ * ॥

"मञ्जिष्ठा वाकुची चक्रमर्द्दश्च पिचुमर्द्दकः ।
हरीतकी हरिद्रा च धात्री वासा शतावरी ॥
बला नागबला यष्टीमधुकं चैरकोऽपि च ।
पटोलस्य लतोशीरं गुडूची रक्तचन्दनम् ॥
मञ्जिष्ठादिरयं क्वाथः कुष्ठानां नाशनः परः ।
वातरक्तस्य हर्त्ता च कण्डूमण्डलखण्डनः" ॥
इति मध्यममञ्जिष्ठादिक्वाथः ॥ * ॥

"मञ्जिष्ठा कुटजामृता घनवचाशुण्ठीहरिद्राद्वय
क्षुद्रारिष्टपटोलकुष्ठकटुकाभार्गीविडङ्गाग्निकम् ।
मूर्व्वादारुकलिङ्गभृङ्गमगधात्रायन्तिपाठावरी ।
गायत्रीत्रिफलाकिरातकमहानिम्बासनारग्वधम् ॥
श्यामावल्गुजचन्दनं वरुणकं दन्ती च शाखोटकं
वासा पर्पटशारिवा प्रतिविषानन्ता विशाला जलम् ।
मञ्जिष्ठादिरयं कषायमिति यः संसेवते तस्य तु
त्वग्दोषा ह्यचिरेण यान्ति विलयं कुष्ठानि चाष्टादश ।
नाशं गच्छति वातरक्तमखिलं नश्यन्ति रक्तामया
वीसर्पस्त्वचि शून्यता नयनजा रोगाः प्रशाम्यन्ति च" ।

अरिष्टं निम्बः । कलिङ्गमिन्द्रयवम् । भृङ्गं भृङ्गराजः । वरी शतावरी । गायत्री खदिरः । असनः विजयसारः । श्यामा प्रियङ्गुः । चन्दनमत्र रक्तग्राह्यम् । शारिवा साउ । अनन्ता दुरालभा । विशाला इन्द्रवारुणी । जलं नेत्रवाला ।

इति वृहन्मञ्जिष्ठादिक्वाथः ॥ * ॥

"मरिचं त्रिवृता मुस्ता हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥
विशाला करवीरश्च क्षीरमर्कसमुद्भवम् ।
गोमयस्य रसं कुर्य्यात् प्रत्येकं कर्षसम्मितम् ॥
विषस्यार्द्धपलं देयं तैलं प्रस्थमितं कटु ।
पचेच्चतुर्गुणे नीरे गोमूत्रे द्विगुणे तथा ॥
मरिचाद्यमिदं तैलमभ्यङ्गात् कुष्ठनाशनम् ।
एतस्याभ्यङ्गतः श्वित्रं विवर्णं त्वक् च याति भवेत् ॥
तैलमेतद् जयेत् कण्डूं पामां सिध्मां विचर्च्चिकाम् ।
पुण्डरीकं तथा दद्रुं शून्यतां नित्यसेविनाम्" ।
इति लघुमरिचाद्यं तैलम् ॥ * ॥

"मरिचं त्रिवृता दन्ती क्षीरमार्कं शकृद्रसः ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥
विशाला करवीरश्च हरितालं मनःशिला ।
चित्रकं लाङ्गली मुस्ता विडङ्गं चक्रमर्द्दकः ॥
शिरीषः कुटजो निम्बः सप्तपर्णोऽमृता स्नुही ।
सम्पाको नक्तमालश्च खदिरो वाकुची वचा ॥
ज्योतिष्मती च पलिका विषं द्विपलिकं भवेत् ।
आढकं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम् ॥
मृत्पात्रे लोहपात्रे वा शनैर्मृद्वग्निना पचेत् ।
मरिचाद्यमिदं तैलं महन्मुनिभिरीरितम् ॥
भिषगेतेन तैलेन म्रक्षयेत् कौष्ठिकान् व्रणान् ।
पामाविचर्च्चिकादद्रुकण्डूविस्फोटकानि च ॥
वली च पलितं छाया नीलं व्यङ्गं तथैव च ।
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्य्यञ्च जायते ॥
प्रथमे वयसि स्त्रीणां यासां नस्यं प्रदीयते ।
तासामपि जरां प्राप्य न स्यातां स्तनितौ स्तनौ ॥
बलीवर्द्दस्तुरङ्गो वा गजो वा वायुपीडितः ।
त्रिभिरभ्यञ्जनैरस्य भवेन्मारुतविक्रमः" ॥

त्रिभिः प्रलेपैरपि मण्डमूल
दद्रुश्च कुष्ठञ्च विनाशयन्ति ॥
कुठेरकः ममरी इति लोके।
लोके गण्डिरलकाख्या सिद्धार्थश्च स्नुहीक्षीरम्।
त्र्यमिति समभागं स्यादेषां द्विगुणस्तु दद्रुघ्नः ॥
अष्टगुणे गोतक्रे तानि प्रक्षतानि सन्दध्यात्।
दिवसत्रितयादूर्द्ध्वं सम्यङ्निष्पेषयेत्तानि ॥
वन्योपलेन घृष्ट्वा दद्रुमालेपयेत्तेन ॥
सप्ताहात्लेपोऽयं दद्रुमवश्यं विनाशयति" । * ॥
अथ श्वित्रस्य चिकित्सा ।
"विभीतकत्वङ्मलपूजटाना
क्वाथेन कृत्वा गुडसंयुतेन।
अवल्गुजं बीजमपाकरोति
श्वित्राणि कृष्णान्यपि पुण्डरीकम्" ॥
मलपूः काकोडुम्बरिका । अवल्गुजः सोमराजी ।
"कुडवावल्गुजबीजं हरितालं तच्चतुर्थांशम् ।
मनःशिला तालकार्द्धा गुञ्जाफलमग्निमूलञ्च ॥
मूत्रेण गवां पिष्टं सवर्णताकारकं श्वित्रस्य ।
श्वित्रकुष्ठं प्रजत्यस्त पत्रार्द्धेनाधिकेन वा ॥
गिरिकर्ण्या सितायाश्च मूलेन परिलेपितम्" ॥
गिरिकर्णी नीलापराजिता ॥
"क्वाथः सवाकुचीचूर्णो धात्रीखदिरसारयोः ।
शङ्खेन्दुकुन्दधवलं श्वित्रं ससेवितो हन्ति ॥
मथितेन पिबेत् चूर्णं काकोडुम्बर्य्यवल्गुजम् ।
तेनाक्तो घर्म्मसेवी स्यात्तक्राशी श्वित्रहृत् भवेत्" ॥
मथितं निर्ज्जलं विलोडितं दधि।
तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि।
"खदिरस्य पलान्यष्टौ सोमराज्याः पलद्वयम् ।
त्रिफला पिचुमर्द्दश्च दारु दार्व्वी च पर्पटी ॥
पृथक् पलांशमुद्धृत्य सिंहिकायाः पलद्वयम् ।
जलाढकद्वये साध्यं यावत् पादावशेषितम् ॥
क्वाथ्यमानश्च मृद्वग्नौ घृतप्रस्थं विपाचयेत् ।
चतुष्पलं सोमराज्याः खदिरस्य पलं तथा ॥
पटोलमूलं त्रिफला त्रायमाणा दुरालभाम् ।
कर्षार्द्धं कटुकं चापि कार्षिकं सूक्ष्मपेषितम् ॥
पलद्वयं कौशिकस्य शुद्धस्यात्र प्रदापयेत् ।
सिद्धं सर्पिरिदं श्वित्रं हन्यादभ्रं इवानलम् ॥
अष्टादशानां कुष्ठानां परमश्चैतदौषधम् ।
सोमराजीघृतं नाम निर्म्मितं ब्रह्मणा पुरा ॥
लोकानामुपकाराय श्वित्रकुष्ठादिरोगिणाम्" ॥
इति सोमराजीघृतम् ॥
"महौषधं महामेदा निम्बपत्राणि सर्षपाः ।
मनःशिला च सिन्दूरं पद्मचारिण्यवल्गुजम् ॥
हरिद्रे हरितालञ्च त्रिफला पीतगन्धकः ।
एतानि समभागानि विषार्द्धांशानि योजयेत् ॥
सर्पिषश्च पलान्यष्टौ देवदारुरसं शुभम् ।
द्विगुणं त्रिगुणं क्षीरं गोमूत्रञ्च चतुर्गुणम् ॥
ताम्रपात्रे तु संस्थाप्य शनैर्म्मृद्वग्निना पचेत् ।
चतुर्भागावशेषन्तु सकल्कमवतारयेत् ॥
अमी छिन्नन्तु निःशब्दं भस्मुक्तं विचक्षणः ।
अभ्यङ्गपानयोर्योगादाशु सर्व्वान् गदान् जयेत् ॥
अष्टादशानां कुष्ठानां दद्रूणां श्वित्रिणां तथा ।
दद्रुनाडीषु मर्त्यानां खाचिणां कीटिनां तथा ॥
अरुष्कस्रावपरीता ये ये च व्यक्तभिषक्क्रिया ।
सर्व्वग्रहवियुक्तानां शीर्णाङ्गानां विशेषतः ॥
सर्व्वधातुगते कुष्ठे पतितं भूशिरोरुहम् ।
घर्घरास्यक्षघोषाणां तथा सर्व्वाङ्गवातिनाम् ॥
पानेऽभ्यङ्गे तथा नस्ये वस्तिकर्म्मणि नित्यशः ।
सप्तरात्रप्रयोगेण सर्व्वकुष्ठानि नाशयेत् ॥
द्विसप्ताहप्रयोगेण पूर्णचन्द्रनिभाननः ।
मासकेशनखश्मश्रुर्भाति षोडशवर्षवत् ॥
अनङ्गसदृशः साक्षात् सर्व्वामयविनाशनः ।
एतत् घृतं महाश्रेष्ठं भार्गवेणावतारितम् ॥
मनुष्याणां हितार्थाय सर्व्वव्याधिहरं परम् ।
महामार्त्तण्डकमिदं घृतं सर्व्वामरार्च्चितम्" ॥
इति महामार्त्तण्डघृतम् ॥ * ॥ इति कुष्ठाधिकारः ॥ इति भावप्रकाशः ॥

क्षुद्रगोक्षुरकः, पुं, (क्षुद्रः गोक्षुरः । ततः स्वल्पार्थे कन् क्षुद्रगोक्षुर इव कायति इत्येके ।) गोक्षुरवृक्षभेदः । छोटा गोखुरु इति हरचिकार इति च हिन्दी भाषा । तत्पर्य्यायः । त्रिकण्टकः २ कण्टी ३ षडङ्गः ४ वङ्ककण्टकः ५ क्षुरः ६ गोकण्टकः ७ कण्टफलः ८ पलङ्कषा ९ क्षुद्रक्षुरः १० भक्षटकः ११ स्थलशृङ्गाटकः १२ वनशृङ्गाटकः १३ इक्षुगन्धः १४ स्वादुकण्टः १५ । अस्य गुणाः । सुशीतलत्वम् । बलप्रदत्वम् । मधुरत्वम् । वृष्यत्वम् । कृच्छ्राश्मरीमेहविदाहनाशित्वम् । रसायनत्वम् । तत्र बृहतो गुणोत्तरत्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रघण्टिका, स्त्री, (घण्टा अल्पार्थे कन् टाप् इत्वञ्च ततः क्षुद्रा घण्टिका इति कर्म्मधारयः ।) कट्यलङ्कारविशेषः । घाघर इति घुङ्गुर इति च भाषा ॥ तत्पर्य्यायः । किङ्किणी २ । इत्यमरः । २ । ६ । ११० ॥ क्षुद्रघण्टी ३ प्रतिसरा ४ किङ्किणीका ५ कङ्कणी ६ कङ्कणिका ७ क्षुद्रिका ८ । इति शब्दरत्नावली ॥ घर्घरी ९ । इति जटाधरः ॥ [इति राजनिर्घण्टः ॥

क्षुद्रघोली, स्त्री, (क्षुद्रा घोली ।) चिविल्लिकाक्षुपः ।

क्षुद्रचञ्चु, स्त्री, (क्षुद्रा चञ्चुः सा इवाकृतिरस्याः ।) क्षुपविशेषः । तत्पर्य्यायः । चञ्चु २ चञ्चू ३ शुनकचञ्चुका ४ त्वक्सारभेदिनी ५ क्षुद्रा ६ कटुका ७ कटुपत्रिका ८ । अस्या गुणाः । मधुरत्वम् । कटुत्वम् । उष्णत्वम् । कषायत्वम् । दीपनत्वम् । शूलगुल्मार्शोविबन्धनाशित्वञ्च । इति राजनिर्घण्टः ॥ स्वल्पोऽस्य ॥

क्षुद्रचन्दनं, क्ली, (क्षुद्रं चन्दनमिति नित्यकर्म्मधारयः ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

क्षुद्रचिर्भिटा, स्त्री, (क्षुद्रा चिर्भिटा ।) गोपालकर्कटी । इति राजनिर्घण्टः ॥ (क्षुद्रचिर्भिटीति च क्वचित् दृश्यते ॥)

क्षुद्रचूडः, पुं, (क्षुद्रा चूडा यस्य ।) पक्षिविशेषः । गोसालिक इति भाषा । यथा,—
"शवमस्तः क्षुद्रचूडो गूथलक्ष्य मालिकः" ॥
इति शब्दचन्द्रिका ॥

क्षुद्रजन्तुः, पुं, (क्षुद्रः जन्तुर्जीवभेदः ।) शतपदी । इति शब्दमाला ॥ स्वल्पप्राणिमात्रञ्च ॥ (आमलकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

क्षुद्रजातीफलं, क्ली, (क्षुद्रं जातीफलम् ।) आमलकम् । इति राजनिर्घण्टः ॥

क्षुद्रजीरः, पुं, (क्षुद्रः जीरः ।) स्वल्पजीरकः । इति शब्दचन्द्रिका । क्षुदिया जीरा इति भाषा ।

क्षुद्रजीवा, स्त्री, (क्षुद्रा जीवा कर्म्मधारयः ।) जीवन्ती । इति राजनिर्घण्टः ॥

क्षुद्रता, स्त्री, (क्षुद्रस्य भावः । क्षुद्र + तल् टाप् च ।) क्षुद्रत्वम् । इति व्याकरणम् ॥

क्षुद्रत्वं, क्ली, (क्षुद्रस्य भावः । क्षुद्र + त्वप्रत्ययः ।) अल्पता क्रूरता । अधमत्वम् । दरिद्रत्वम् ।

क्षुद्रतुलसी, स्त्री, (क्षुद्रा तुलसीति नित्यकर्म्मधारयः ।) अर्जकः । स तु वर्व्वरीभेदः । इति राजनिर्घण्टः ।

क्षुद्रदंशिका, स्त्री, (क्षुद्रा दंशिका ।) स्वल्पदंशकः । छोट डाँश इति भाषा । यथा,—
"पतङ्गिका पुत्तिका स्यात् दंशस्तु वनमक्षिका ।
शाचिका चाल्पतज्जातिर्दंशी स्यात् क्षुद्रदंशिका" ।
इति जटाधरः ॥

क्षुद्रदंशी, स्त्री, (दंश + ङीष् । क्षुद्रा दंशी ।) क्षुद्रदंशिका । इति जटाधरदर्शनात् ॥

क्षुद्रदुरालभा, स्त्री, (क्षुद्रा दुरालभा लताविशेषः ।) स्वल्पदुरालभावृक्षः । तत्पर्य्यायः । मरुस्था २ मरुसम्भवा ३ विशारदा ४ अजभक्ष्या ५ अजादनी ६ उष्ट्रभक्षिका ७ कषाया ८ फञ्जिका ९ ग्राहिणी १० करभप्रिया ११ करभादनिका १२ । अस्या गुणाः । शैत्यत्वम् । अम्लत्वम् । ज्वरकुष्ठश्वासकासभ्रमनाशित्वम् । पारदशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रदुःस्पर्शा, स्त्री, (दुःसहः स्पर्शो यस्याः दुःस्पर्शा । क्षुद्रा दुःस्पर्शा इति कर्म्मधारयः ।) अग्निदमनी । इति राजनिर्घण्टः ॥ (ज्ञेयास्या अग्निदमनीशब्दे विवृतिः ॥)

क्षुद्रधात्री, स्त्री, (क्षुद्रा धात्री ।) कर्कटवृक्षः । इति राजनिर्घण्टः ॥

क्षुद्रनासिकः, त्रि, (क्षुद्रा नासिका नासा यस्य ।) स्वल्पनासायुक्तः । तत्पर्य्यायः । नःक्षुद्रः २ । इति हेमचन्द्रः ॥

क्षुद्रपत्रा, स्त्री, (क्षुद्रं पत्रं पर्णं यस्याः । ततष्टाप् ।) चाङ्गेरी । इति हारावली ॥

क्षुद्रपत्री, स्त्री, (क्षुद्रं पत्रं यस्याः । ततो गौरादित्वात् ङीष् ।) वचा । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायाः ।
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका ।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षुद्रपनसः, पुं, (क्षुद्रश्चासौ पनसश्चेति कर्म्मधारयः ।)

लकुचः । इति राजनिर्घण्टः ॥ स्वल्पकण्टाफलश्च ॥ (पर्य्यायोऽस्य यथा,—
"लकुचः क्षुद्रपनसो लकुचो डहु इत्यपि" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षुद्रपर्णः पुं, (क्षुद्रं पर्णं पत्रं यस्य ।) अर्जकः । इति राजनिर्घण्टः ॥ सूक्ष्मपत्रे त्रि ॥ (विवरणमस्यार्ज्जक-शब्दे ज्ञातव्यम् ॥)

क्षुद्रपाषाणभेदा, स्त्री, (क्षुद्रा पाषाणभेदा इति नित्य-कर्म्मधारयः ।) क्षुपविशेषः । क्षुद्रपाषाणभेदी इति ख्याता । तत्पर्य्यायः । चतुष्पत्री २ पार्व्वती ३ नगभूः ४ अश्मकेतुः ५ गिरिभूः ६ कन्दरोद्भवा ७ शैलोद्भवा ८ गिरिजा ९ नगजा १० । अस्या गुणाः । व्रणकृच्छ्राश्मरीहरत्वम् । इति राज-निर्घण्टः ॥

क्षुद्रपिप्पली, स्त्री, (क्षुद्रा पिप्पली ।) वनपिप्पली । इति राजनिर्घण्टः ॥

क्षुद्रपोतिका, स्त्री, (क्षुद्रा पोतिका । नित्यकर्म्मधारयः ।) मूलपोती । इति राजनिर्घण्टः ॥

क्षुद्रफलक, पुं, (क्षुद्रं फलमस्य इति कप् ।) जीवन-वृक्षः । इति शब्दचन्द्रिका ॥

क्षुद्रफला, स्त्री, (क्षुद्रं फलं अस्याः इति टाप् ।) भूमि-जम्बुः । इति शब्दमाला । इन्द्रवारुणी । गोपाल-कर्कटी । कण्टकारी । अग्निदमनी । इति राज-निर्घण्टः ॥ ।

क्षुद्रबुद्धि, त्रि, (क्षुद्रा अल्पा अधमा क्रूरा वा बुद्धि-र्मतिर्यस्य ।) अल्पमतिः । क्रूरधीः । अधमचेतनः ।

क्षुद्रमुस्ता, स्त्री, (क्षुद्रा मुस्ता इति कर्म्मधारयः ।) कशेरु । इति राजनिर्घण्टः ॥ (कशेरुशब्देऽस्या गुणपर्य्याया ज्ञेयाः ॥)

क्षुद्ररोगः, पुं, (क्षुद्रः रोगः ।) स्वल्पव्याधिः । तस्य गणना यथा । पलितः १ इन्द्रलुप्तः २ दारुणकः ३ अरुंषिका ४ इरिवेल्लिका ५ पनसिका ६ पाषाणगर्द्दभः ७ मुखदूषिका ८ व्यङ्गः ९ नीलिका १० वल्मीकः ११ कक्षा १२ गन्धिनाम १३ अग्निरोहिणी १४ विदारिका १५ चिप्पः १६ परिवर्त्तिका १७ अवपाटिका १८ निरुद्ध-प्रकाशः १९ सन्निरुद्धगुदः २० वृषणकच्छूः २१ अहिपूतनः २२ गुदभ्रंशः २३ शूकरदंष्ट्रः २४ अनुशयी २५ अलसः २६ दारी २७ कदरः २८ तिलकालकः २९ मसकः ३० जतुमणिः ३१ न्यच्छः ३२ पद्मिनीकण्टकम् ३३ अजगल्लिका ३४ यव-प्रख्या ३५ अन्त्रालजी ३६ विवृता ३७ इन्द्रवृद्धा ३८ गर्द्दभिका ३९ जालगर्द्दभः ४० कच्छपी ४१ शर्कराऽर्ब्बुदः ४२ । एषां मध्ये येषां लक्षणचिकित्सा पूर्व्वं न लिखिता ते चात्र लिख्यन्ते ॥ * ॥

अथ अरुंषिकालक्षणमाह ।
"अरूंषि बहुवक्त्राणि बहुक्लेदीनि मूर्द्धनि ।
कफासृक्कृमिकोपेन तानि विद्यादरुंषिकाम्" ।
अरूंषि व्रणानि । अथारुंषिकायाश्चिकित्सा ।
"नीलोत्पलस्य किञ्जल्को धात्रीफलसमन्वितः ॥
यष्टीमधुयुतश्चास्य लेपाद्धन्यादरुंषिकाम् ।
त्रिफलाया रसो वह्नौ नार्कवोत्पलसारिवाः ।
सैन्धवं पक्वमेतैस्तु तैलं हन्यादरुंषिकाम्" ॥
इति त्रिफलाद्यं तैलम् ॥ * ॥

अथाग्निरोहिणीलक्षणमाह ।
"कक्षाभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥
सप्ताहात् द्वादशाहाद्वा पक्षाद्वा घ्नन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सान्निपातिकाम्" ॥
सप्ताहादित्यादि वातपित्तकफाधिकापेक्षया बो-द्धव्यम् । घ्नन्तीत्यनुपक्रान्ता । उपक्रान्तास्तु साध्या एव । चरकेणाग्निरोहिण्याश्चिकित्साया उक्तत्वात् ।

तस्याश्चिकित्सा ।
"पित्तवीसर्पविधिना साधयेदग्निरोहिणीम् ।
रोहिण्या लङ्घनं कुर्य्याद्रक्तमोक्षणरूक्षताम् ॥
शरीरस्य च संशुद्धिं तान्तु वृद्धा परित्यजेत्" ॥ * ॥

अथ विदारिकालक्षणमाह ।
"विदारिकन्दवद्वृत्तो कक्षावङ्क्षणसन्धिषु ।
रक्तो विदारिका विद्यात् सर्व्वजा सर्व्वलक्षणाम्" ॥
अत्र पिडकामिति विशेष्यपदमध्याहरणीयम् ॥

अथ तच्चिकित्सा ।
"विदारिकाया प्रथमं जलौकायोजनं हितम् ।
पाटनञ्च विपक्वाया ततो व्रणविधिः स्मृतः" ॥ * ॥

अथावपाटिकालक्षणमाह ।
"अल्पीयसीं यदा हर्षाद् बलाद्गच्छेत् स्त्रियं नरः ।
हस्ताभिघातादथवा चर्म्मण्युद्वर्त्तिते बलात् ॥
मर्द्दनात् पीडनाद्वापि शुक्रवेगविघाततः ।
यत्रावपाट्यते चर्म्म तां विद्यादवपाटिकाम् ॥
वातेन कर्कशा रूक्षा सूक्ष्मा श्यामा रुगन्विता ।
पित्तेन पीता रक्ता वा दाहतृष्णासमन्विता ॥
श्लेष्मणा कठिना स्निग्धा कण्डुमत्यल्पवेदना" ॥
अल्पीयः अल्पतरं योनिच्छिद्रं यस्यास्ताम् ।
अवपाट्यते विदार्य्यते ।

अथ तस्याश्चिकित्सा ।
"स्नेहस्वेदैरिमां वैद्यश्चिकित्सेदवपाटिकाम्" ॥

अथ सन्निरुद्धगुदस्य लक्षणमाह ।
"वेगसन्धारणाद्वायुर्विहतो गुदसंश्रितः ।
निरुणद्धि महास्रोतः सूक्ष्मं द्वारं करोति हि ॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेतं विद्यात् सुदुस्तरम्" ॥

अथ तस्य चिकित्सा ।
"सन्निरुद्धगुदे तैलैः सेको वातहरैर्हितः ।
तथा निरुद्धप्रकाशक्रियापि कथिता हिता" ॥

अथाजगल्लिकालक्षणमाह ।
"स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका" ॥
ग्रथिता गुम्फितेव । मुद्गसन्निभा मुद्गाकृतिः ॥

अथ तस्याश्चिकित्सा ।
"तत्राजगल्लिकामामां जलौकोभिरुपाचरेत् ।
शुक्तिसौराष्ट्रिकाक्षारकल्कैश्चालेपयेन्मुहुः ॥
कठिना क्षारयोगैश्च द्रावयेदजगल्लिकाम् ।
श्यामालाङ्गलिकामूर्व्वाकल्कैरपि विलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥

अथान्त्रालजीलक्षणमाह ।
"घनामवक्त्रां पिडकामुन्नतां परिमण्डलाम् ।
अन्त्रालजीमल्पपूयां तां विद्यात् कफवातजाम्" ॥
घनां कठिनाम् । परिमण्डलां वर्त्तुलाम् । अल्प-पूयां स्वल्पस्रावाम् ॥

अथ तस्याश्चिकित्सा ।
"अन्त्रालजीं यवप्रख्यां पूर्व्वं स्वेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥
इति भावप्रकाशे क्षुद्ररोगाधिकारः ॥
(अस्य सकारणलक्षणसम्प्राप्तिचिकित्सितानि यथा,—
"स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा ।
पिटिका कफवाताभ्यां बालानामजगल्लिका ॥
यवप्रख्या यवप्रख्या ताभ्यां मांसाश्रिता घना ।
अवक्त्रास्त्वालजीवृत्तास्तोकपूया घनोन्नताः ॥
ग्रन्थयः पञ्च वा षड् वा कच्छपी कच्छपोन्नता ।
कर्णस्योर्द्ध्वं समन्ताद्वा पिटिका कठिनोग्ररुक् ॥
शालूकाभा पनसिका शोफस्त्वल्परुजः स्थिरः ।
हनुसन्धिसमुद्भूतस्ताभ्यां पाषाणगर्द्दभः ॥
शाल्मलीकण्टकाकारा पिटिका सरुजो घना ।
मेदोगर्भा मुखे यूनां ताभ्याञ्च मुखदूषिकाः ॥
ते पद्मकण्टका ज्ञेया यैः पद्ममिव कण्टकैः ।
चीयते नीरुजैः श्वेतैः शरीरं कफवातजैः ॥
पित्तेन पिटिकावृत्ता पक्वोदुम्बरसन्निभा ।
महादाहज्वरकरी विवृता विवृतानना ॥
गात्रेष्वन्तश्च वक्त्रस्य दाहज्वररुजान्विताः ।
मसूरमाषास्तद्वर्णास्तत्सख्याः पिटिका घनाः ॥
ततः कष्टतराः स्फोटा विस्फोटाख्या महारुजाः ।
या पद्मकर्णिकाकारा पिटिका पिटिकान्विता ॥
सा विद्धा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी ।
मण्डला विपुलोत्सन्ना सरागपिटिकाचिता ॥
कक्षेति कक्षासन्नेषु प्रायो देशेषु सानिलात् ।
पित्ताद्भवन्ति पिटिकाः सूक्ष्मा लाजोपमा घनाः
तादृशी महती त्वेका गन्धनामेति कीर्त्तिता ।
घर्म्मस्वेदपरीतेऽङ्गे पिटिकाः सरुजो घनाः ॥
राजिकावर्णसंस्थानप्रमाणा राजिकाह्वयाः ।
दोषैः पित्तोल्वणैर्मन्दैर्विसर्पति विसर्पवत् ॥
शोफोऽपाकस्तनुस्ताम्रो ज्वरकृज्जालगर्द्दभः ।
मले पित्तोल्वणैः स्फोटा ज्वरिणो मांसदारुणाः ॥
कक्षाभागेषु जायन्ते येऽग्न्याभाः साग्निरोहिणी ।
मध्वाद्यात्सप्तरात्राद्वा पक्षाद्वा हन्ति जीवितम् ॥
त्रिलिङ्गा पिटिका वृत्ता जत्रूर्द्ध्वमिरिवेल्लिका ।
विदारी कन्दकठिना विदारी कक्षवङ्क्षणे ॥
मेदोऽनिलकफैर्ग्रन्थिः स्नायुमांसशिराश्रयैः ।
भिन्नो वसाज्यमध्वाभं स्रवेत्तत्रोल्वणोऽनिलः ॥
मांसं विशोष्य ग्रथितां शर्करामुपपादयेत् ॥
दुर्गन्धं रुधिरं क्लिन्नं नानावर्णं ततो मलाः ॥
तां स्रावयन्ति निचितां विद्यात्तच्छर्कराऽर्ब्बुदम् ।
पाणिपादतले सन्धौ जत्रूर्द्ध्वं वोपचीयते ॥
वल्मीकवच्छनैर्ग्रन्थिस्तद्वद्बह्वणुभिर्मुखैः ।
रुग्दाहकण्डूक्लेदाढ्यो वल्मीकोऽसौ समस्तजः ॥
शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।

ग्रन्थिः कोलवदुन्नतो जायते कदरन्तु तत् ॥
वेगसन्धारणाद्वायुरपानोऽपानसंश्रयम् ।
अणूकरोति वाह्यान्तर्मार्गमस्य ततः शकृत् ॥
कृच्छ्रान्निर्गच्छति व्याधिरयं रुद्धगुदस्तत ।
कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम् ॥
चिप्यमत्यल्परोगञ्च विद्यादुपनखञ्च तम् ।
कृष्णोऽभिघाताद्रूक्षश्च खरश्च कुनखो नख ॥
दुष्टकर्द्दमसंस्पर्शात् कण्डूक्लेदान्वितान्तरा ।
अङ्गुल्योऽलसमित्याहुस्तिलाभांस्तिलकालकान् ॥
कृष्णानवेदनांस्त्वक्स्थान् माषांस्तानेव चोन्नतान् ।
माषेभ्यस्तून्नततरांश्चर्म्मकीलान् सितासितान् ॥
तथाविधो जतुमणिः सहजो लोहितस्तु स ।
कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम् ॥
शोकक्रोधादिकुपिताद्वातपित्तान्मुखे तनु ।
श्यामलं मण्डलं व्यङ्गं वक्त्रादन्यत्र नीलिका ॥
परुषं परुषस्पर्शं व्यङ्गं श्यावञ्च मारुतात् ।
पित्तात्ताम्रान्तमानीलं श्वेतान्तं कण्डुमत् कफात् ॥
रक्ताद्रक्तान्तमाताम्रं शोषं चिमचिमायते ।
वायुनोदीरितः श्लेष्मा त्वचं प्राप्य विशुष्यति ॥
ततस्त्वग् जायते पाण्डुः क्रमेण च विचेतना ।
अल्पकण्डूरविक्लेदा सा प्रसुप्तिः प्रसुप्तित ॥
असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलान्यतिकण्डूनि रागवन्ति बहूनि च ॥
उत्कोठः सोऽनुबन्धस्तु कोठ इत्यभिधीयते ।
प्रोक्ता षट् त्रिंशदित्येते क्षुद्ररोगा विभागशः” ॥
इति वाभटे उत्तरस्थाने एकत्रिंशोऽध्याय ॥

अतोऽस्य प्रतिषेधो यथा,—
“विस्रावयेज्जलौकोभिरपक्वामजगल्लिकाम् ।
स्वेदयित्वा यवप्रख्यां विलयाय विलेपयेत् ॥
दारुकुष्ठमनोह्वालैरित्यापाषाणगर्द्दभात् ।
विधिस्तांश्चाचरेत् पक्वान् व्रणवत्साजगल्लिकान् ॥
रोध्रकुस्तुम्बरुवचाप्रलेपो मुखदूषिके ।
वटपल्लवयुक्ता वा नारिकेलोत्थशुक्तयः ॥
अशान्तौ वमनं नस्यं ललाटे च शिराव्यध ।
निम्बाम्बु वान्तो निम्बाम्बु साधितं पद्मकण्टके ॥
पिबेत् क्षौद्रान्वितं सर्पिर्निम्बारग्वधलेपनम् ।
विवृतादींस्तु शालान्तांश्चिकित्सेन्निरिवेल्लिकान् ॥
पित्तवीसर्पवत्तद्वत् प्रत्याख्यायाग्निरोहिणीम् ॥
विलङ्घनं रक्तविमोक्षणञ्च
विरूक्षणं कायविशोधनञ्च ।
धात्रीप्रयोगान् शिशिरप्रदेहान्
कुर्य्यात् सदा जालकगर्द्दभस्य ॥
विदारिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत् ।
मेदोऽर्व्वुदक्रियां कुर्य्यात् सुतरां शर्करार्व्वुदे ॥
प्रवृद्धं सुबहुच्छिद्रं सशोफं मर्म्मणि स्थितम् ।
वल्मीकं हस्तपादे च वर्ज्जयेदितरत् पुन ॥
शुद्धस्यास्रे हृते लिम्पेत् सपद्मारैवतामृतैः ।
श्यामाकुलत्थिकामूलदन्तीपल्लवसक्तुभिः ॥
पक्वे तु दुष्टमांसानि गतीः सर्व्वाश्च शोधयेत् ।
शस्त्रेण सम्यगनु च क्षारेण ज्वलनेन वा ॥
शस्त्रेणोत्कृत्य निःशेषं स्नेहेन कदरं दहेत् ।
निरुद्धमणिवत्कार्य्यं रुद्धपायोश्चिकित्सितम् ॥
चिप्यं शुद्ध्या जितोष्माणं साधयेच्छस्त्रकर्म्मणा ।
दुष्टं कुनखमप्येवं चरणावलसे पुन ॥
धान्याम्लसिक्तौ कासीसपटोलीरोचनातिलैः ।
सनिम्बपत्रैरालिम्पेद्दहेत्तु तिलकालकान् ॥
माषांश्च सूर्य्यकान्तेन क्षारेण यदि वाग्निना ।
तद्वदुत्कृत्य शस्त्रेण चर्म्मकीलजतूमणी ॥
लाञ्छनादित्रये कुर्य्याद् यथासन्नं सिराव्यधम् ।
लेपयेत् क्षीरपिष्टैश्च क्षीरिवृक्षत्वगङ्कुरैः ॥
व्यङ्गेषु चार्ज्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका ।
लेपः सनवनीता वा श्वेताश्वखुरजा मषी ॥
रक्तचन्दनमञ्जिष्ठाकुष्ठरोध्रप्रियङ्गव ।
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदा ॥
द्वे जीरके कृष्णतिलाः सर्षपाः पयसा सह ।
पिष्टाः कुर्व्वन्ति वक्त्रेन्दुमपास्तव्यङ्गलाञ्छनम् ॥
क्षीरपिष्टा घृतक्षौद्रयुक्ता वा भृष्टनिस्तुषाः ।
मसूराः क्षीरपिष्टा वा तीक्ष्णाः शाल्मलिकण्टकाः ॥
सगुडः कोलमज्जा वा शशासृक् क्षौद्रकल्कितम् ।
सप्ताहं मातुलुङ्गस्थं कुष्ठं वा मधुनान्वितम् ॥
पिष्टा वाच्छागपयसा सक्षौद्रा मौशलीजटा ।
गोरस्थिमुशलीमूलं युक्तं वा साज्यमाक्षिकम् ॥
जम्ब्वाम्रपल्लवामस्तु हरिद्रे द्वे नवो गुडः ।
लेपः सवर्णकृत् पिष्टं स्वरसेन च तिन्दुकम् ॥
उत्पलपत्रं तगरं प्रियङ्गुकालीयकं बदरमज्जा ।
इदमुद्वर्त्तनमास्यं करोति शतपत्रसङ्काशम् ॥
एभिरेवौषधैः पिष्टैर्मुखाभ्यङ्गाय साधयेत् ।
यथादोषर्त्तुकान् स्नेहान् मधुकक्वाथसंयुतैः ॥
यवान् सर्ज्जरसं रोध्रमुशीरं चन्दनं मधु ।
घृतं गुडञ्च गोमूत्रे पचेदादर्व्विलेपनात् ॥
तदभ्यङ्गाद्धन्त्याशु नीलिकाव्यङ्गदूषिकान् ।
मुखं करोति पद्माभं पादौ पद्मदलोपमौ ॥
कुङ्कुमोशीरकालीयलाक्षायष्ट्याह्वचन्दनम् ।
न्यग्रोधपादांस्तरुणान् पद्मकं पद्मकेशरम् ॥
सनीलोत्पलमञ्जिष्ठं पालिकं सलिलाढके ।
पक्त्वा पादावशेषेण तेन पिष्टैश्च कार्षिकैः ॥
लाक्षापत्तङ्गमञ्जिष्ठायष्टीमधुककुङ्कुमैः ।
अजाक्षीरद्विगुणितं तैलस्य कुडवं पचेत् ॥
नीलिकापलितव्यङ्गवलीतिलकदूषिकान् ।
हन्ति तन्नस्यमभ्यस्तं मुखोपचयवर्णकृत् ॥
मञ्जिष्ठा शवरोद्भवस्तु वरिकालाक्षा हरिद्रादयं
नेपालीहरितालकुङ्कुमगदागोरोचनागैरिकम् ।
पत्रं पाण्डुरटस्य चन्दनयुगं कालीयकं पारदं
पत्तङ्गं कनकत्वचं कमलजं वीजं तथा केसरम् ॥
सिक्थं तुत्थं पद्मकाद्योवसाज्यं
मज्जाक्षीरं क्षीरिवृक्षाम्बुपाभौ ।
सिद्धं सिद्धं व्यङ्गनील्यादिनाशि
वक्त्रच्छायामैन्दवीञ्चाशु धत्ते ॥
मार्कवस्वरसक्षीरतोयपिष्टानि नावने ।
प्रसुप्तौ वातकुष्ठोक्तं कुर्य्याद्दाहञ्च वह्निना ।
उत्कोठे कफपित्तोक्तं कोठे सर्व्वञ्च कौष्ठिकम्” ॥
इति वाभटे उत्तरतन्त्रे द्वात्रिंशोऽध्याय ॥
“समासेन चतुश्चत्वारिंशत् क्षुद्ररोगा भवन्ति ।
तद्यथा,—अजगल्लिका यवप्रख्याऽन्धालजी विवृता
कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाण-
गर्द्दभो जालगर्द्दभः कक्षा विस्फोटकोऽग्निरो-
हिणी चिप्यं कुनखोऽनुशयी विदारिका शर्करा-
र्व्वुदं पामा विचर्चिका रकसा पाददारिकाकदर-
मलसेन्द्रलुप्तौ दारुणकोऽरुंषिका पलितं मसू-
रिका यौवनपिडका पद्मिनीकण्टको जतुमणि-
र्म्मशकश्चर्म्मकीलस्तिलकालको न्यच्छं व्यङ्गं परि-
वर्त्तिकाऽवपाटिका निरुद्धप्रकाशः निरुद्धगुदो
ऽहिपूतनं वृषणकच्छूर्गुदभ्रंशश्चेति” ॥ इति सुश्रुते
निदानस्थाने त्रयोदशेऽध्याये ॥ अत्रोक्तचिकित्सा-
दिकं यथारोगं ज्ञेयम् ॥ * ॥

अस्य पथ्यापथ्यानि यथा,—
“क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु ।
दोषान् दूष्यानवस्थाश्च निरीक्ष्य मतिमान् भिषक् ।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः ।
यथादोषं यथादुष्टं यथावस्थञ्च कल्पयेत्” ॥
इति वैद्यकपथ्यापथ्यविधौ क्षुद्ररोगाधिकारः ॥

क्षुद्रवशा, स्त्री, (क्षुद्रा वशा ।) वराहक्रान्ता । इति केचित् ॥

क्षुद्रवर्व्वणा, स्त्री, (क्षुद्रा वर्व्वणा ।) वरटा । इति राजनिर्घण्टः ॥

क्षुद्रवल्ली, स्त्री, (क्षुद्रा वल्ली ।) मूलपोती । इति राजनिर्घण्टः

क्षुद्रवार्त्ताकी, स्त्री, (क्षुद्रा वार्त्ताकी ।) वृहती । इत्यमरः ॥

क्षुद्रवार्त्ताकिनी, स्त्री, (क्षुद्रा वार्त्ताकिनीति ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

क्षुद्रशङ्खः, पुं, (क्षुद्रः शङ्खः स्वल्पशङ्ख इति ।) जोङ्डा इति भाषा । तत्पर्य्यायः । शङ्खनखः २ । इत्यमरः । १ । १० । २३ ॥ शङ्खनकः ३ इति तट्टीका ॥ क्षुल्लकः ४ शम्बूकः ५ भमशङ्खकः ६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शूलहरत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रशर्करा, स्त्री, (क्षुद्रा शर्करा नित्यकर्म्मधारयः ।) यावनालशर्करा । इति राजनिर्घण्टः ॥

क्षुद्रशार्द्दूलः, पुं, (क्षुद्रः शार्द्दूलः । नित्यकर्म्मधारयः ।) चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

क्षुद्रशीर्षः, पुं, (क्षुद्रं शीर्षं यस्य ।) मयूरशिखावृक्षः । इति शब्दचन्द्रिका ॥

क्षुद्रशुक्तिः, स्त्री, (क्षुद्रा शुक्तिः । नित्यकर्म्मधारयः ।) जलशुक्तिः । इति राजनिर्घण्टः ॥

क्षुद्रश्यामा, स्त्री, (क्षुद्रा श्यामा ।) कटभी । इति राजनिर्घण्टः ॥ (कटभीशब्देऽस्या विवृतिर्ज्ञातव्या ।)

क्षुद्रश्लेष्मान्तकः, पुं, (श्लेष्मणः अन्तकः श्लेष्मान्तकः । क्षुद्रः श्लेष्मान्तकः ।) भूकर्व्वुदारकः । इति राजनिर्घण्टः ॥

क्षुद्रश्वासः, पुं, (क्षुद्रः अल्पः श्वासः ।) अल्पश्वासरोगः । यथा,—
“रूक्षनिमित्तमेव स्थौल्यं कार्श्यञ्च तत्र श्लेष्मलाहार-
सेविनोऽध्यशनशीलस्याव्यायामिनो दिवास्वप्न-
रतस्य चाम एवान्नरसो मधुरतरश्च शरीरमनु-
क्रामन्नतिस्नेहान्मेदो जनयति तदतिस्थौल्यमापा

दयति तं अतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्स्वप्न-स्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति”। इत्यादि सुश्रुते १६ अध्याय ॥

तस्य निदानादि यथा,—

“यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते ।
तैरेव कारणैः श्वासो घोरो भवति देहिनाम् ॥
विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ।
श्वासयत्यूर्द्ध्वगो भूत्वा तं श्वासं परिचक्षते ॥
क्षुद्रकस्तमकच्छिन्नो महानूर्द्ध्वश्च पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥
प्राग्रूपं तस्य हृत्पीडा भक्तद्वेषोऽरतिः परा ।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च ॥
किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते ।
निषण्णस्येति शान्तिश्च स क्षुद्र इति संज्ञितः” ॥

इति च सुश्रुते उत्तरतन्त्रे ५१ अध्यायः ॥

(“रूक्षायासोद्भवः कोष्ठे क्षुद्रवात उदीरयन् ।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः ॥
हिनस्ति न स गात्राणि न च दुःखो यथेतरे ।
न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥
नेन्द्रियाणां व्यथां नापि काञ्चिदुत्पादयेद्रुजम् ।
स साध्य उक्तो बलिनः सर्व्वे चाव्यक्तलक्षणाः” ॥

इति चरके चिकित्सास्थाने २१ अध्याये ॥)

क्षुद्रश्वेता, स्त्री, (क्षुद्रा श्वेता ।) अर्कादिगणान्तर्गत वृक्षविशेषः । यथा,—“अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणातापसवृक्षश्चेति ॥

अर्कादिको गणो ह्येष कफमेदोविषापहः ।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः” ॥

इति सुश्रुते ३८ अध्याय ॥

क्षुद्रसहा, स्त्री, (सह + अच् टाप् च । क्षुद्रा सहा कर्म्मधारयः क्षुद्रस्य सहेत्येके ।) मुद्गपर्णी । (अस्याः पर्य्याया यथा,—

“मुद्गपर्णी क्षुद्रसहा काममुद्गा सिंहपर्णिका ।
वन्या मार्ज्जारगन्धेति सूर्य्यपर्ण्यावुभे च ते” ॥

इति वैद्यकरत्नमालायाम् ॥ अस्या व्यवहारो यथा, वमनभेषजान्तर्गतकषायविशेषे । “सुमना सौमनस्यायिनी हरिद्रा दारुहरिद्रा वृश्चीरपुनर्नवा महासहा क्षुद्रसहा कषायैः” । इति चरके विमानस्थाने ८ अध्याये ॥) इन्द्रवारुणी । इति राजनिर्घण्टः ॥

क्षुद्रसुवर्णं, क्ली, (क्षुद्र सुवर्णम् । नित्यकर्म्मधारयः ।) रीतिः । इति राजनिर्घण्टः । (पित्तलम् ॥)

क्षुद्रहा, [न्] पुं, (क्षुद्रान् नीचान् क्रूरस्वभावान् हन्तीति । हन् + क्विप् ।) महादेवः । इति शिवसहस्रनामस्तोत्रम् । इति कश्चित् । महाभारतीयानुशासनपर्व्वणि शिवसहस्रनामसु एतन्नाम नास्ति । लिङ्गपुराणोक्तविष्णुकृतशिवसहस्रनामस्तोत्रे क्षयहा इति नाम वर्त्तते । यथा,—

“प्रशान्तबुद्धिरक्षुद्रः क्षयहा नित्यसुन्दरः ।
धैर्य्याग्रधूर्य्यो धात्रीशः साकल्यः शर्व्वरीपतिः” ॥

इति सहस्रनामसार ।

क्षुद्रहिङ्गुलिका, स्त्री, (क्षुद्रा हिङ्गुलिका नित्यकर्म्मधारय ।) कण्टकारी । इति शब्दचन्द्रिका ॥ (गुणादयोऽस्य कण्टकारीशब्दे बोद्धव्याः ॥)

क्षुद्रहिङ्गुली, स्त्री, (क्षुद्रा हिङ्गुली । नित्यकर्म्मधारय ।) कण्टकारी । इति शब्दचन्द्रिकायां क्षुद्रहिङ्गुलिकाशब्ददर्शनात् ॥

क्षुद्रा, स्त्री, (क्षुद् + “स्फायितञ्चिवञ्चिशकिक्षिपि क्षुदीति” । उणा । २ । १३ । इति रक् ततष्टाप् ।) व्यङ्गा । नटी । वेश्या । सरघा । कण्टकारिका । इत्यमरः । २ । ४ । ६४ ॥ (अस्याः पर्य्याया यथा,—

“अनाक्रान्ता स्पृही व्याघ्री महाकाली च निदिग्धिका ।
सिंही धामनिका क्षुद्रा बृहती कण्टकारिका” ॥

इति वैद्यकरत्नमालायाम् ॥

“कण्टकारी तु दुस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टालिका कण्टकिनी धावनी बृहती तथा” ॥

उभे च बृहत्यौ । यत आह सुश्रुतः ।

“क्षुद्रा या क्षुद्रभद्राख्या बृहतीति निगद्यते” ।

गुणास्त्वस्याः कण्टकारीशब्दे ज्ञातव्याः ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अस्या व्यवहारो यथा, पञ्चतिक्तकषाये ।

“क्षुद्रामृताभ्यां सहनागरेण
सपौष्करञ्चैव किराततिक्तम् ।
पिबेत्कषायन्त्विह पञ्च तिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम्” ॥

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥) चाङ्गेरिका । हिंस्रा । मक्षिकामात्रम् । इति हेमचन्द्रः ॥ बादरता । इति शब्दरत्नावली ॥ गवेधुका । इति रत्नमाला ॥

क्षुद्राग्निमन्थ, पु, (क्षुद्रः अग्निमन्थः ।) दशमूले प्रसिद्धवृक्षविशेषः । छोटा गणियारि इति हिन्दी-भाषा । तत्पर्य्यायः । वपनः २ विजया ३ गणिकारिका ४ अरणिः ५ लघुमन्थः ६ तेजोवृक्षः ७ तनुत्वचा ८ । अस्य गुणाः ।

“अग्निमन्थद्वयञ्चैव तुल्यं वीर्य्यरसादिषु ।
तत्प्रयोगानुसारेण योजयेत् स्वमनीषया” ॥

इति राजनिर्घण्टः ॥

क्षुद्राञ्जन, क्ली, (क्षुद्रं अञ्जनम् ।) चक्षूरोगस्यौषधविशेषः । यथा,—

“गोमूत्रपित्तमदिराशकृद्धात्रीरसे पचेत् ।
क्षुद्राञ्जनं रसे चान्यत् यकृतस्त्रैफलेऽपि वा ॥
सैन्धवोपहितं युक्त्याग्निहितं वेणुगह्वरे ॥
मेदो यकृद्धृतस्त्वाजं पिप्पल्यः सैन्धवं मधु ।
रसमामलकस्यापि पक्वं सम्यङ्निधापयेत् ॥
कोशे खदिरनिर्म्माणे तद्वत् क्षुद्राञ्जनं हितम्” ॥

इति सुश्रुते १८ अध्यायः ॥

क्षुद्राण्डमत्स्यसङ्घात, पु, (क्षुद्राणां अण्डमत्स्यानां अण्डात् अभिनवजातानां मत्स्यानामित्यर्थः सङ्घातः समूहः ।) पोताधानम् । इत्यमरः । १ । १० । १९ ॥ पोना इति भाषा ॥

क्षुद्रादिकषाय, पुं, (क्षुद्रा आदिर्यस्य स कषायः ।) कण्टकार्य्यादिकषायः । यथा,—

“क्षुद्रामृतानागरपुष्कराह्वयैः
कृतः कषायः कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुग्ज्वरे
ज्वरे त्रिदोषप्रभवेऽपि शस्यते” ॥

इति भैषज्यरत्नावली ॥

क्षुद्रान्त्र, क्ली, (क्षुद्रं अन्त्रं उदरस्थनाडीभेदः ।) हृदयस्थितसूक्ष्मान्त्रम् । यथा,—समाननाम्नः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानविशेषावाप्तौ युक्तिप्राचुर्य्याभिप्रायेण प्राणायतनानि प्रपञ्चयितुमाह ।

“वपा वसावहननं नाभिः क्लोम यकृत् प्लिहा ।
क्षुद्रान्त्रं वृक्कौ वस्तिः पुरीषाधानमेव च ॥
आमाशयोऽथ हृदयं स्थूलान्त्रं गुदमेव च ।
उदरञ्च गुदौ कौष्ठ्यौ विस्तारोऽयमुदाहृतः” ॥

वपा प्रसिद्धा । वसा मांसस्नेहः । नाभिः प्रसिद्धा । अवहननं पुप्फुसः । प्लीहा आयुर्व्वेदप्रसिद्धः । ते च मांसपिण्डाकारे सव्यकुक्षिगते । यकृत् कालिका । क्लोम मांसपिण्डः । ते च दक्षिणकुक्षिगते । क्षुद्रान्त्रं हृत्स्थान्त्रम् । वृक्कौ हृदयसमीपस्थौ मांसपिण्डौ । वस्तिर्मूत्राशयः । पुरीषाधानं पुरीषाशयः । आमाशयोऽपक्वान्नस्थानम् । हृदयं हृत्पुण्डरीकम् । स्थूलान्त्रगुदोदराणि प्रसिद्धानि । बाह्याद्गुदवलयादन्तर्गुदवलये द्वे । तौ च गुदौ कौष्ठ्यौ कोष्ठे नाभेरधःप्रदेशे भवौ । अयञ्च प्राणायतनस्य विस्तार उक्तः । पूर्व्वश्लोके तु सङ्क्षेपः । अतएव पूर्व्वश्लोकोक्तानां केषाञ्चिदिह पाठः । इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥ (“पञ्चदशकोष्ठाङ्गानि तद्यथा,—“नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधारश्चामाशयश्चेति पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपावहश्चेति” । इति चरके शारीरस्थाने ७ अध्याये ॥)

क्षुद्रापामार्ग, पु, (क्षुद्रः अपामार्गः । कर्म्मधारयः ।) रक्तापामार्गः । इति राजनिर्घण्टः ॥ (रक्तापामार्गशब्देऽस्य विवरणं ज्ञेयम् ॥)

क्षुद्रामलक, क्ली, (क्षुद्रं आमलकम् । नित्यकर्म्मधारयः ।) आमलकम् । इति राजनिर्घण्टः ॥ काठ आमला इति भाषा ॥

क्षुद्रामलकसंज्ञ, पु, (क्षुद्रामलकस्य संज्ञा यस्य ।) कर्क्कटवृक्षः । इति राजनिर्घण्टः ॥

क्षुद्राम्र, पुं, (क्षुद्रः आम्रः । नित्यकर्म्मधारयः ।) कोषाम्रः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।

“कोशाम्र उक्तः क्षुद्राम्रः कृमिवृक्षः सुकोशकः” ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणास्त्वस्य कोशाम्रशब्दे ज्ञेयाः ॥)

क्षुद्राम्लपनस, पु, (क्षुद्रः अम्लपनसः ।) लकुचः । इति त्रिकाण्डशेषः ॥ (लकुचशब्दे विवृतिरस्य व्याख्येया ॥)

क्षुद्राम्ला, स्त्री, (क्षुद्रा अम्ला ।) अम्ललोणिका । यथा,—

“क्षुद्रपत्रा च चाङ्गेरी क्षुद्राम्ला चाम्ललोणिका” ॥

इति हारावली । शशाण्डुली । इति राजनिर्घण्टः ॥

ग्रन्थिः कोलवदुत्सन्नो जायते कदरन्तु तत् ॥
वेगसन्धारणादायुरपानोऽपानसंश्रयम् ।
अणूकरोति वाह्यान्तर्मार्गमस्य ततः शकृत् ॥
कृच्छ्रान्निर्गच्छति व्याधिरयं सन्निरुद्धगुदस्तु तम् ।
कुर्य्यात् पित्तानिलौ पाकं नखमांसे सरुग्ज्वरम् ॥
चिप्यमक्षतरोगञ्च विद्यादुपनखञ्च तम् ।
कृष्णोऽभिघातादूक्षश्च खरश्च कुनखो नखः ॥
दुष्टकर्द्दमसंस्पर्शात् कण्डूक्लेदान्वितान्तराः ।
अङ्गुल्योऽलसमित्याहुस्तिलाभांस्तिलकालकान् ॥
कृष्णानवेदनांस्त्वक्स्थान् माषांस्तानेव चोन्नतान् ।
माषेभ्यस्तून्नततरांश्चर्म्मकीलान् सितासितान् ॥
तथाविधो जतुमणिः सहजो लोहितस्तु सः ।
कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम् ॥
शोकक्रोधादिकुपितादवातपित्तान्मुखे तनु ।
श्यामलं मण्डलं व्यङ्गं वक्त्रादन्यत्र नीलिका ॥
परुषं परुषस्पर्शं व्यङ्गं श्यावञ्च मारुतात् ।
पित्तात्ताम्रान्तमानीलं श्वेतान्तं कण्डुमत्कफात् ॥
रक्ताद्रक्तान्तमाताम्रं सोषं चिमचिमायते ।
वायुनोदीरितः श्लेष्मा त्वचं प्राप्य विशुष्यति ॥
ततस्त्वग् जायते पाण्डुः क्रमेण च विचेतना ।
अल्पकण्डूरविक्लेदा सा प्रसुप्तिः प्रसुप्तितः ॥
असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलान्यतिकण्डूनि रागवन्ति बहूनि च ॥
उत्कोठः सोऽनुबन्धस्तु कोठ इत्यभिधीयते ।
प्रोक्ता षट् त्रिंशदित्येते क्षुद्ररोगा विभागशः" ॥
इति वाभटे उत्तरस्थाने एकत्रिंशोऽध्यायः ॥

अथोऽस्य प्रतिषेधो यथा,—

"विस्रावयेज्जलौकोभिरपक्वामजगल्लिकाम् ।
स्वेदयित्वा यवप्रख्यां विलयाय विलेपयेत् ॥
दारुकुष्ठमनोह्वालैरित्थापाषाणगर्द्दभात् ।
विधिस्तांश्चाचरेत् पक्वान् व्रणवत्साजगल्लिकान् ॥
रोध्रकुस्तुम्बुरुवचाप्रलेपो मुखदूषिके ।
वटपल्लवयुक्ता वा नारिकेलोत्थशुक्तयः ॥
अशान्तौ वमनं नस्यं ललाटे च शिराव्यधः ।
निम्बाम्बु वान्तौ निम्बाम्बु साधितं पद्मकण्टके ॥
पिबेत् क्षौद्रान्वितं सर्पिर्निम्बारग्वधलेपनम् ।
विवृतादींस्तु जालान्तांश्चिकित्सेन्निरिवेल्लिकान् ॥
पित्तवीसर्पवत्तद्वत् प्रत्याख्यायाग्निरोहिणीम् ॥
विमर्द्दनं रक्तविमोक्षणञ्च
विरूक्षणं कायविशोधनञ्च ।
धात्रीप्रयोगान् शिशिरप्रदेहान्
कुर्य्यात् सदा जालकगर्द्दभस्य ॥
विदारिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत् ।
मेदोऽर्ब्बुदक्रियां कुर्य्यात् सुतरां शर्कराव्वुदे ॥
प्रवृद्धं सुबहुच्छिद्रं सशोफं मर्म्मणि स्थितम् ।
वल्मीकं हस्तपादे च वर्ज्जयेदितरत् पुनः ॥
शुद्धस्याखे हृते लिम्पेत् सपद्मारैवताम्रतैः ।
श्यामाकुलत्थिकामूलदन्तीपललसक्तुभिः ॥
पक्वे तु दुष्टमांसानि गतीः सर्व्वाश्च शोधयेत् ।
शस्त्रेण सम्यगनु च क्षारेण ज्वलनेन वा ॥
शस्त्रेणोत्कृत्य निःशेषं स्नेहेन कदरं दहेत् ।
निरुद्धमणिवत्कार्य्यं रुद्धपायोश्चिकित्सितम् ॥

चिप्यं शुद्धा शितोष्णाम्बु साधयेच्छस्त्रकर्म्मणा ।
दुष्टं कुनखमप्येवं चरणावलसे पुनः ॥
धान्याम्लसिक्तौ कासीसपटोलीरोचनातिलैः ।
सनिम्बपत्रैरालिम्पेद्दहेत्तु तिलकालकान् ॥
माषांश्च सूर्य्यकान्तेन क्षारेण यदि वाग्निना ।
तद्वदुत्कृत्य शस्त्रेण चर्म्मकीलजतुमणी ॥
लाञ्छनादित्रये कुर्य्याद् यथासन्नं सिराव्यधम् ।
लेपयेत् क्षीरपिष्टैश्च क्षीरिवृक्षत्वगङ्कुरैः ॥
व्यङ्गेषु चार्ज्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका ।
लेपः सनवनीतावा श्वेताश्वखुरजामषी ॥
रक्तचन्दनमञ्जिष्ठा कुष्ठरोध्रप्रियङ्गवः ।
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥
द्वे जीरके कृष्णतिलाः सर्षपाः पयसा सह ।
पिष्टाः कुर्व्वन्ति वक्त्रेन्दुमपास्तव्यङ्गलाञ्छनम् ॥
क्षीरपिष्टा घृतक्षौद्रयुक्ता वा भृष्टनिस्तुषाः ।
मसूराः क्षीरपिष्टा वा तीक्ष्णाः शाल्मलिकण्टकाः ॥
सगुड़ः कोलमज्जा वा शशासृक् क्षौद्रकल्कितः ।
सप्ताहं मातुलुङ्गस्थं कुष्ठं वा मधुनान्वितम् ॥
पिष्टा वाऽजापयसा सक्षौद्रा मौशलीजटा ।
गौरसिद्धशालीमूलं युक्तं वा साज्यमाक्षिकम् ॥
जम्ब्वाम्रपल्लवामस्तु हरिद्रे द्वे नवो गुडः ।
लेपः सवर्णकृत् पिष्टं खरसेन च तिन्दुकम् ॥
उत्पलपत्रं तगरं प्रियङ्गुकालीयकं बदरमज्जा ।
इदमुद्वर्त्तनमास्यं करोति शतपत्रसङ्काशम् ॥
एभिरेवौषधैः पिष्टैर्मुखाभ्यङ्गाय साधयेत् ।
यथादोषर्त्तुकान् स्नेहान् मधुकक्वाथसंयुते ॥
यवान् सर्ज्जरसं रोध्रमुशीरं चन्दनं मधु ।
घृतं गुडञ्च गोमूत्रे पचेदादर्व्विलेपनात् ॥
तदभ्यङ्गान्निहन्त्याशु नीलिकाव्यङ्गदूषिकान् ।
मुखं करोति पद्माभं पादौ पद्मदलोपमौ ॥
कुङ्कुमोशीरकालीयलाक्षायष्ट्याह्वचन्दनम् ।
न्यग्रोधपादांस्तरुणान् पद्मकं पद्मकेशरम् ॥
सनीलोत्पलमञ्जिष्ठं पालिकं सलिलाढके ।
पक्त्वा पादावशेषेण तेन पिष्टैश्च कार्षिकैः ॥
लाक्षापत्तङ्गमञ्जिष्ठा यष्टीमधुककुङ्कुमैः ।
अजाक्षीरद्विगुणितं तैलस्य कुड़वं पचेत् ॥
नीलिकापलितव्यङ्गवलीतिलकदूषिकान् ।
हन्ति तन्नस्यमभ्यक्तं मुखोपचयवर्णकृत् ॥
मञ्जिष्ठा शवरोद्भवस्तु वरिकालाक्षा हरिद्राद्वयं
नेपालीहरितालकुङ्कुमगदागोरोचनागैरिकम् ।
पत्रं पाण्डुरटस्य चन्दनयुगं कालीयकं पारदं
पत्तङ्गं कनकत्वचं कमलजं वीजं तथा केसरम् ॥
सिक्थं तुत्थं पद्मकाद्योवसाज्यं
मज्जाक्षीरं क्षीरिवृक्षाम्बुपाकौ ।
सिद्धं सिद्धं व्यङ्गनील्यादिनाशि
वक्त्रच्छायामैन्दवीञ्चाशु धत्ते ॥
मार्कवस्वरसक्षीरतोयपिष्टानि नावने ।
प्रशमो वातकुष्ठोक्तं कुर्य्याद्दाहञ्च वह्निना ।
उत्कोठे कफपित्तोक्तं कोठे सर्व्वञ्च कौष्ठिकम्" ॥
इति वाभट उत्तरतन्त्रे द्वात्रिंशोऽध्यायः ॥
"समासेन चतुश्चत्वारिंशत् क्षुद्ररोगा भवन्ति ।
तद्यथा,—अजगल्लिका यवप्रख्याऽन्धालजी विवृता कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाणगर्द्दभो जालगर्द्दभः कक्षा विस्फोटकोऽग्निरोहिणी चिप्यं कुनखोऽनुशयी विदारिका शर्कराऽर्ब्बुदं पामा विचर्च्चिका रकसा पाददारिकाकदरमलसेन्द्रलुप्तौ दारुणकोऽरुंषिका पलितं मसूरिका यौवनपिड़का पद्मिनीकण्टको जतुमणिर्म्मशकश्चर्म्मकीलस्तिलकालको न्यच्छं व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्धप्रकाशः निरुद्धगुदोऽहिपूतनं वृषणकच्छूर्गुदभ्रंशश्चेति" ॥ इति सुश्रुते निदानस्थाने त्रयोदशोऽध्यायः ॥ अस्योक्तचिकित्सादिकं यथारोगं ज्ञेयम् ॥ * ॥

अस्य पथ्यापथ्यानि यथा,—

"क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु ।
दोषान् दूष्यानवस्थाञ्च निरीक्ष्य मतिमान् भिषक् ।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः ।
यथादोषं यथादुष्टं यथावस्थञ्च कल्पयेत्" ॥
इति वैद्यकपथ्यापथ्यविधौ क्षुद्ररोगाधिकारः ॥)

क्षुद्रवशा, स्त्री, (क्षुद्रा वशा ।) वराहक्रान्ता । इति केचित् ॥

क्षुद्रवर्व्वणा, स्त्री, (क्षुद्रा वर्व्वणा ।) वरटा । इति राजनिर्घण्टः ॥

क्षुद्रवल्ली, स्त्री, (क्षुद्रा वल्ली ।) मूषपोती । इति राजनिर्घण्टः

क्षुद्रवार्त्ताकी, स्त्री, (क्षुद्रा वार्त्ताकी ।) वृहती । इत्यमरः ॥

क्षुद्रवार्त्ताकिनी, स्त्री, (क्षुद्रा वार्त्ताकिनीति ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

क्षुद्रशङ्खः, पुं, (क्षुद्रः शङ्खः स्वल्पशङ्खजातिः । जोङ्ङा इति भाषा । तत्पर्य्यायः । शङ्खनखः २ । इत्यमरः । १ । १० । २३ ॥ शङ्खनकः ३ इति तट्टीका ॥ क्षुल्लकः ४ शम्बूकः ५ भषशङ्खकः ६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शूलहरत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रशर्करा, स्त्री, (क्षुद्रा शर्करा नित्यकर्म्मधारयः ।) यावनालशर्करा । इति राजनिर्घण्टः ॥

क्षुद्रशार्दूलः, पु, (क्षुद्रः शार्दूलः । नित्यकर्म्मधारयः । चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

क्षुद्रशीर्षः, पुं, (क्षुद्रं शीर्षं यस्य ।) मयूरशिखावृक्षः इति शब्दचन्द्रिका ॥

क्षुद्रशुक्तिः, स्त्री, (क्षुद्रा शुक्तिः । नित्यकर्म्मधारयः । जलशुक्तिः । इति राजनिर्घण्टः ॥

क्षुद्रश्यामा, स्त्री, (क्षुद्रा श्यामा ।) कटभी । इति राजनिर्घण्टः ॥ (कटभीशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

क्षुद्रश्लेष्मान्तकः, पु, (श्लेष्मणः अन्तकः श्लेष्मान्तकः क्षुद्रः श्लेष्मान्तकः ।) भूकर्व्वुदारकः । इति राजनिर्घण्टः ॥

क्षुद्रश्वासः, पु, (क्षुद्रः अल्पः श्वासः ।) अल्पश्वासरोगः । यथा,—

"रसनिमित्तमेव स्थौल्यं कार्श्यञ्च तत्र श्लेष्मलाहारसेविनोऽध्यशनशीलस्याव्यायामिनो दिवास्वप्नरतस्य चाम एवान्नरसो मधुरतरश्च शरीरमनुक्रामन्नतिस्नेहान्मेदो जनयति तदतिस्थौल्यमापा-

दयति तं अतिस्थूलं क्षुद्रश्वासपिपासाक्षुद्वेपथुस्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति" । इत्यादि सुश्रुते १६ अध्याये ॥ तस्य निदानादि यथा,—

"यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते ।
तैरेव कारणैः श्वासो घोरो भवति देहिनाम् ॥
विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ।
श्वासयत्यूर्द्धगो भूत्वा तं श्वासं परिचक्षते ॥
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥
प्राग्रूपं तस्य हृत्पीडा भक्तद्वेषोऽरतिः परा ।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च ॥
किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते ।
निषसस्यैति शान्तिश्च स क्षुद्र इति सञ्ज्ञितः" ॥

इति च सुश्रुते उत्तरतन्त्रे ५१ अध्यायः ॥

("रूक्षायासोद्भवः कोष्ठे क्षुद्रवातः उदीरयन् ।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः ॥
हिनस्ति न स गात्राणि न च दुःखो यथेतरे ।
न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥
नेन्द्रियाणां व्यथां नापि काञ्चिदुत्पादयेद्रुजम् ।
स साध्य उक्तो बलिनः सर्व्वे चात्यक्तलक्षणाः" ॥

इति चरके चिकित्सास्थाने २१ अध्याये ॥)

क्षुद्रश्वेता, स्त्री, (क्षुद्रा श्वेता ।) अर्क्कादिगणान्तर्गतवृक्षविशेषः । यथा,—"अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणाप्सरसतापसवृक्षश्चेति ॥

अर्कादिको गणो ह्येष कफमेदोविषापहः ।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः" ॥

इति सुश्रुते ३८ अध्याये ॥

क्षुद्रसहा, स्त्री, (सह + अच् टाप् च । क्षुद्रा सहा कर्म्मधारयः क्षुद्रस्य सहेत्येके ।) मुद्गपर्णी । (अस्याः पर्य्याया यथा,—

"मुद्गपर्णी क्षुद्रसहा काममुद्गा सिम्बपर्णिका ।
वन्या मार्ज्जारगन्धेति सूर्य्यपर्ण्यावुभे च ते" ॥

इति वैद्यकरत्नमालायाम् ॥ अस्या व्यवहारो यथा, वमनभेषजान्तर्गतकषायविशेषे । "सुमना सौमनस्यायिनी हरिद्रा दारुहरिद्रा वृश्चीरपुनर्नवा महासहा क्षुद्रसहा कषायेषु" । इति चरके विमानस्थाने ८ अध्याये ॥) इन्द्रवारुणी । इति राजनिर्घण्टः ॥

क्षुद्रसुवर्णं, क्ली, (क्षुद्रं सुवर्णम् । नित्यकर्म्मधारयः ।) रीतिः । इति राजनिर्घण्टः । (पित्तलम् ॥)

क्षुद्रहा, [न्] पुं, (क्षुद्रान् नीचान् क्रूरस्वभावान् हन्तीति । हन् + क्विप् ।) महादेवः । इति शिवसहस्रनामस्तोत्रम् । इति कश्चित् । महाभारतीयानुशासनपर्व्वणि शिवसहस्रनामसु एतन्नाम नास्ति । लिङ्गपुराणोक्तविष्णुकृतशिवसहस्रनामस्तोत्रे क्षमहा इति नाम वर्त्तते । यथा,—

"प्रधानप्रभुरव्यक्तः क्षमहा नित्यसुन्दरः ।
वैर्य्याग्रधुर्य्यो धात्रीशः साकल्यः शर्व्वरीपतिः" ॥

इति त्वक्सारः ।

क्षुद्रहिङ्गुलिका, स्त्री, (क्षुद्रा हिङ्गुलिका नित्यकर्म्मधारयः ।) कण्टकारी । इति शब्दचन्द्रिका ॥ (गुणादयोऽस्याः कण्टकारीशब्दे बोद्धव्याः ॥)

क्षुद्रहिङ्गुली, स्त्री, (क्षुद्रा हिङ्गुली । नित्यकर्म्मधारयः ।) कण्टकारी । इति शब्दचन्द्रिकायां क्षुद्रहिङ्गुलिकाशब्ददर्शनात् ॥

क्षुद्रा, स्त्री, (क्षुद् + "स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदीति" । उणा । २ । १३ । इति रक् तवष्टाप् ।) व्यङ्गा । नटी । वेश्या । सरघा । कण्टकारिका । इत्यमरः । २ । ४ । ९४ ॥ (अस्याः पर्य्याया यथा,—

"अनाक्रान्ता स्पृक्षी व्याघ्री भण्टाकी च निदिग्धिका ।
सिंही धावनिका क्षुद्रा बृहती कण्टकारिका" ॥

इति वैद्यकरत्नमालायाम् ॥

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्ठालिका कण्टकिनी धावनी बृहती तथा" ॥

उभे च बृहत्यौ । यत आह सुश्रुतः ।

"क्षुद्रा या क्षुद्रभण्टाख्या बृहतीति निगद्यते" ।

गुणाश्चास्याः कण्टकारीशब्दे ज्ञातव्याः ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अस्या व्यवहारो यथा, पञ्चतिक्तकषाये ।

"क्षुद्रामृताभ्यां सहनागरेण
समौष्करश्चैव किरातत्तिक्तम् ।
पिबेत्कषायन्त्विह पञ्च तिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम्" ॥

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥) चाङ्गेरिका । हिंस्रा । मक्षिकामात्रम् । इति हेमचन्द्रः ॥ वादरवा । इति शब्दरत्नावली ॥ गवेधुका । इति रत्नमाला ॥

क्षुद्राग्निमन्थः, पुं, (क्षुद्रः अग्निमन्थः ।) दशमूले प्रसिद्धवृक्षविशेषः । छोटा गणियारि इति हिन्दीभाषा । तत्पर्य्यायः । तमनः २ विजया ३ गणिकारिका ४ अरणिः पुः लघुमन्थः ६ तेजोवृक्षः ७ तनुलघा ८ । अस्य गुणाः ।

"अग्निमन्थद्वयस्यैव तुल्यं वीर्य्यरसादिषु ।
तत्प्रयोगानुसारेण योजयेत् स्वमनीषया" ॥

इति राजनिर्घण्टः ॥

क्षुद्राञ्जनं, क्ली, (क्षुद्रम् अञ्जनम् ।) चक्षूरोगस्यौषधविशेषः । यथा,—

"गोमूत्रपित्तमदिराशकृद्धात्रीरसे पचेत् ।
क्षुद्राञ्जनं रसे चान्यत् यकृतश्चैकशेऽपि वा ॥
सैन्धवोपहितं युञ्ज्याच्छिरितं वेणुगह्वरे ॥
मेदो यकृद्दयतत्तामं पिप्पल्यः सैन्धवं मधु ।
रसमामलकञ्चापि पक्वं सम्यङ्निधापयेत् ॥
कोषे खदिरनिर्म्माणे तदवत् क्षुद्राञ्जनं हितम्" ॥

इति सुश्रुते १८ अध्याये ॥

क्षुद्राण्डमत्स्यसङ्घातः, पुं, (क्षुद्राणाम् अण्डमत्स्यानाम् अण्डात् अचिरनिर्गतानां मत्स्यानामित्यर्थः सङ्घातः समूहः ।) पोताधानम् । इत्यमरः । १ । १० । १९ ॥ पोना इति भाषा ॥

क्षुद्रादिकषायः, पुं, (क्षुद्रा आदिर्यस्य स कषायः ।) कण्टकार्य्यादिकषायः । यथा,—

"क्षुद्रामृतानागरपुष्कराह्वये
कृतः कषायः कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुग्ज्वरे
ज्वरे त्रिदोषप्रभवेऽपि शस्यते" ॥

इति भैषज्यरत्नावली ॥

क्षुद्रान्त्रं, क्ली, (क्षुद्रम् अन्त्रम् उदरस्थनाडीभेदः ।) हृदयस्थितसूक्ष्मान्त्रम् । यथा,—समाननाम्नः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानविशेषा वायो युक्तिप्राचुर्य्याभिप्रायेण प्राणायतनानि प्रपञ्चयितुमाह ।

"वपा वसावहनं नाभिः क्लोम यकृत् प्लीहा ।
क्षुद्रान्त्रं वृक्कौ वस्तिः पुरीषाधानमेव च ॥
प्राणाशयोऽथ हृदयं स्थूलान्त्रं गुदं एव च ।
उदरञ्च गुदौ कौष्ठौ विस्तारोऽयमुदाहृतः" ॥

वपा प्रसिद्धा । वसा मांसस्नेहः । नाभिः प्रसिद्धा । अवहनम् पुप्फुसः । प्लीहा आयुर्व्वेदप्रसिद्धः । ते च मांसपिण्डाकारे सव्यकुक्षिगते । यकृत् कालिका । क्लोम मांसपिण्डः । ते च दक्षिणकुक्षिगते । क्षुद्रान्त्रं हृत्स्थान्त्रम् । वृक्कौ हृदयसमीपस्थौ मांसपिण्डौ । वस्तिर्मूत्राशयः । पुरीषाधानं पुरीषाशयः । आमाशयोऽपक्वान्नस्थानम् । हृदयं हृत्पुण्डरीकम् । स्थूलान्त्रगुदोदराणि प्रसिद्धानि । वाह्यान्तर्वलयादन्तर्गुदवलये द्वे । तौ च गुदौ कौष्ठौ कोष्ठे नाभेरधःप्रदेशे भवौ । अयञ्च प्राणायतनस्य विस्तारः उक्तः । पूर्व्वश्लोके तु सङ्क्षेपः । अतएव पूर्व्वश्लोकोक्तानां केषाञ्चिदिह पाठः । इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥ ("पञ्चदशकोष्ठाङ्गानि तद्यथा,—"नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधारश्चामाशयश्चेति पक्वाशयश्चोत्तरगुदञ्चाधरगुदञ्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपावहनञ्चेति" । इति चरके शारीरस्थाने ७ अध्याये ॥)

क्षुद्रापामार्गः, पुं, (क्षुद्रः अपामार्गः । कर्म्मधारयः ।) रक्तापामार्गः । इति राजनिर्घण्टः ॥ (रक्तापामार्गशब्देऽस्य विवरणं ज्ञेयम् ॥)

क्षुद्रामलकं, क्ली, (क्षुद्रम् आमलकम् । नित्यकर्म्मधारयः ।) आमलकम् । इति राजनिर्घण्टः ॥ काठ आमला इति भाषा ॥

क्षुद्रामलकसंज्ञः, पुं, (क्षुद्रामलकस्य संज्ञा यस्य ।) कर्क्कटवृक्षः । इति राजनिर्घण्टः ॥

क्षुद्राम्रः, पुं, (क्षुद्रः आम्रः । नित्यकर्म्मधारयः ।) कोशाम्रः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।

"कोशाम्र उक्तः क्षुद्राम्रः कृमिवृक्षः सुकोशकः" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्य कोशाम्रशब्दे ज्ञेयाः ॥)

क्षुद्राम्लपनसः, पुं, (क्षुद्रः अम्लपनसः ।) लकुचः । इति त्रिकाण्डशेषः ॥ (लकुचशब्दे विवृतिरस्य व्याख्येया ॥)

क्षुद्राम्ला, स्त्री, (क्षुद्रा अम्ला ।) अम्ललोणिका । यथा,—

"क्षुद्रपत्रा च चाङ्गेरी क्षुद्राम्ला चाम्ललोणिका" ॥

इति हारावली । शणपुष्पी । इति राजनिर्घण्टः ॥

क्षुद्राम्लिका, स्त्री, (क्षुद्रा अम्लिका ।) वृक्षविशेषः । आववति इति आवला इति च हिन्दी भाषा ॥ तत्पर्य्यायः । चाङ्गेरी २ चुक्राम्ला ३ चुक्रिका ४ लोणाम्ला ५ चतुःपर्णी ६ लोणा ७ कोढा ८ अम्लपत्रिका ९ अम्लष्ठा १० अम्लवती ११ अम्ला १२ दन्तशठा १३ शाखाम्ला १४ अम्लपर्णी १५ । अस्या गुणाः । अम्लरसत्वम् । उष्णत्वम् । वह्निवर्द्धनत्वम् । रुचिकारित्वम् । ग्राहित्वम् । दोषदुर्णामकफनाशित्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रिका, स्त्री, (क्षुद्र + सञ्ज्ञायां कन् ततष्टाप् पूर्व्वात इत्वञ्च ।) दंशः । इति राजनिर्घण्टः ॥ (हिक्कारोगप्रकारभेदः । यथा,—
"विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधाविता" ॥
इत्युत्तरतन्त्रे पञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥)

क्षुद्रेङ्गुदी, स्त्री, (क्षुद्रा इङ्गुदी कर्म्मधारयः ।) यवासः । इति राजनिर्घण्टः ॥ (यवासशब्दे ज्ञातव्यमस्या विवरणम् ॥)

क्षुद्रेर्व्वारुः, पुं, (क्षुद्रा इर्व्वारुः कर्म्मधारयः ।) गोपालकर्कटी । इति राजनिर्घण्टः ॥

क्षुद्रोदुम्बरिका, स्त्री, (क्षुद्रा उदुम्बरिका ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

क्षुद्रोपोदकनाम्नी, स्त्री, (क्षुद्रा उपोदकनाम्नी ।) मूलपोती । इति राजनिर्घण्टः ॥

क्षुद्रोपोदकी, स्त्री, (क्षुद्रा उपोदकी ।) स्वल्पपूतिकाशाकः । तत्पर्य्यायः । सूक्ष्मपत्रा २ मत्स्याक्षी ३ । अस्या गुणाः । "रसवीर्य्यविपाकेषु सदृशी पूर्व्वया स्वयम्" । पूर्व्वया उपोदक्या । इति राजनिर्घण्टः ॥

क्षुद्रोलूकः, पुं, (क्षुद्र उलूक नित्यकर्म्मधारयः ।) हुडुकः । इति राजनिर्घण्टः ॥

क्षुध, क य औ क्षुदि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-अनिट् ।) क्षुद्बुभुक्षा । क, अक्षुधत् । य, क्षुध्यन् बुभुक्षितः । औ, क्षोद्धा । इति दुर्गादासः ॥

क्षुधा, स्त्री, (क्षुध् बुभुक्षायां सम्पदादित्वाद् क्विप् हलन्तत्वाद् वा टाप् ।) भोजनेच्छा । इति दुर्गादासः ॥ अभ्यवहारजिहीर्षा इति । "या देवी सर्व्वभूतेषु क्षुधारूपेण संस्थिता" । इति देवीमाहात्म्यटीकायां नागोजीभट्टः ॥ तत्पर्य्यायः । अशनाया २ बुभुक्षा ३ क्षुत् ४ । इत्यमरः शब्दरत्नावली च ॥ जिघत्सा ५ । इति जटाधरः ॥ * ॥ तत्कार्य्याणि यथा,—
"व्याधयो निर्जिताः सर्व्वे क्षुधया नृपसत्तम ! ।
कुष्ठकी मुकुटी खर्वी तथैवालङ्कृतो नरः ।
क्षुधार्त्तो न विराजेत प्रेतवत्तृषितो नृणाम् ॥
क्षीरत्नविविधान् भोगान् वस्त्राण्याभरणानि च ।
न चेच्छति नरः किञ्चित् क्षुधया कलुषीकृतः ॥
यथा भूमिगतं तोयं रविरश्मिभिः शुष्यति ।
शरीरस्थास्तथा धातुः शुष्यते जाठराग्निना ॥
न शृणोति न चाघ्राति चक्षुषा न च पश्यति ।
दह्यते वेपते मूढः शुष्यते च क्षुधार्द्दितः ॥
मूकत्वं बधिरत्वञ्च जरान्धत्वं पङ्गुताम् ।
रौद्रं मर्य्यादहीनत्वं क्षुधा सर्व्वं प्रवर्त्तते ॥
भगिनीं जननीं पुत्त्रं भार्य्यां दुहितरं तथा ।
भ्रातरं स्वजनं वापि क्षुधाविष्टो न विन्दति" ॥
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥

क्षुधाकुशल, पुं, (क्षुधायाः क्षुधोद्रेकविषये कुशलः निपुणः विशेषेण क्षुधोत्पादकः ।) विल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

क्षुधातुर, त्रि, (क्षुधा क्षुधया आतुरः ।) क्षुधापीडितः । यथा,—
"अर्थातुराणां न सुहृन्न बन्धुः
कामातुराणां न भयं न लज्जा ।
चिन्तातुराणां न सुखं न निद्रा
क्षुधातुराणां न बलं न तेजः" ॥
इति गारुडे ११६ अध्यायः ॥

क्षुधार्त्त, त्रि, (क्षुधया आर्त्तः ऋतौ वा इत्तीयातत्पुरुषे ऋतस्य वृद्धिः ।) क्षुत्पीडितः । यथा,—
"शीतार्त्तश्च क्षुधार्त्तश्च कम्पान्वितकलेवरः ।
जगामागारं तदा रात्रौ भुवो नीहारवारिणा" ॥
इति शिवरहस्ये शिवरात्रिव्रतकथा ॥ (यथा, च मनुः । १० । १०७ ।
"भरद्वाजः क्षुधार्त्तस्तु सपुत्त्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः" ॥)

क्षुधाभिजननम्, क्ली, (क्षुधां अभिजनयतीति । अभि + जन् + ल्युः ।) राजिका । इत्यमरः । २ । ९ । १९ ॥ क्षुधाजनकद्रव्यमात्रे त्रि ॥

क्षुधावती, स्त्री, (क्षुधाऽस्त्यस्यामिति । मतुप् मस्य वत्वम् ।) क्षुधाजनकौषधवटी । अजीर्णादिरोगनाशकगुटिका । यथा,—
"रसायो गन्धकाभ्रञ्च तुत्थञ्च त्रिफला वचा ।
यमानी शतपुष्पा च धन्विका जीरकद्वयम् ॥
प्रत्येकं पलमेषान्तु घट्टकञ्चूर्णमेव वा ।
माणकं ग्रन्थिकञ्चेन्द्रकेशराजसुदर्शनम् ॥
दण्डोत्पला चित्रदन्ती जामाहरकचन्दनम् ।
भृङ्गमामार्गकुलका मण्डूकश्च पलाङ्कम् ॥
आर्द्रकस्वरसेनाथ गुडिकां सम्प्रकल्पयेत् ।
बदरास्थिसमामेषां भक्षयित्वा पिबेदनु ॥
वारिमेकं जलचैव प्रातरुत्थाय मानवः ।
वटी क्षुधावती नाम सर्व्वाजीर्णविनाशिनी ॥
अग्निञ्च कुरुते दीप्तं भस्मकञ्च नियच्छति ।
अम्लपित्तञ्च शूलञ्च परिणामकृतञ्च यत् ॥
तत्सर्व्वं शमयत्याशु भास्करस्तिमिरं यथा ।
मधुरं वर्ज्जयेदत्र विशेषात् क्षीरशर्करे" ॥
इति भैषज्यरत्नावल्यामम्लपित्तचिकित्सा ॥ तस्याः खल्पवृहद्भेदौ तत्रैव द्रष्टव्यौ ॥ * ॥ क्षुधायुक्ते त्रि ।
(क्षुधाजनकापरौषधम् । यथा,—
"सप्त पञ्चचतुर्भागाः कृष्णाक्षारकटये ।
अयस्त्वयः पट्टनाश्च द्वौ द्वौ मरिचचित्रयोः ॥
गुडहीनवक्रयोर्द्वौ द्वावश्मयोगेन भावयेत् ।
वटीश्चोलप्रमाणेन कारयेद्भिषजां वरः ॥
आमशूलमम्लपित्तं पित्तशूलं विशेषतः ।
दुर्णामग्रहणीमुग्रां मनोऽर्त्तिं विनाशयेत् ॥
नाम्ना क्षुधावती ख्याता वह्निदेवेन निर्म्मिता ।
अस्याः प्रसादान्मन्दाग्निर्भवेद्भस्मको नरः" ॥
इति चिकित्सासारसंग्रहे मन्दाग्न्यधिकारे ॥)

क्षुधासागररसः, पुं, (क्षुधाया क्षुधाया वा सागररस इव क्षुधोद्रेकात् तथात्वम् ।) औषधविशेषः । यथा,—
"त्रिकटु त्रिफला चैव तथा लवणपञ्चकम् ।
क्षारत्रयं रसं गन्धं मागेकं पूर्व्ववद्विषम् ॥
गुञ्जामात्रां वटीं कुर्य्यात्लवङ्गैः पञ्चभिः सह ।
क्षुधासागरनामायं रसः सूर्य्येण निर्म्मितः" ॥
पूर्व्ववद्विषमित्यस्तत्वच्छुक्लभागवत् । तेनात्र विषस्य भागद्वयम् । इति भैषज्यरत्नावली ॥

क्षुधितः, त्रि, (क्षुध् + कर्त्तरि क्तः । यद्वा क्षुधा जाताऽस्य इति तारकादित्वादितच् प्रत्ययः ।) क्षुधान्वितः । तत्पर्य्यायः । बुभुक्षितः २ जिघत्सुः ३ अशनायितः ४ । इत्यमरः । ३ । १ । २० ॥

क्षुधुनः, पुं, (क्षुध बुभुक्षायां + "क्षुधिपिशिमिथिभ्यः कित्" । उणा । ३ । ४४ । इति उनन् स च कित् ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

क्षुप, सादे । इति कविकल्पद्रुमः ॥ (चौं-परं-अकं-सेट् ।) सौत्रधातुरयम् । क्षुपः । इति दुर्गादासः ॥

क्षुप, पुं, (क्षुप + "इगुपधेति कः" । ३ । १ । १३५ ।) ह्रस्वशाखाशिफः । क्षुद्रवृक्षः । इत्यमरः । २ । ४ । ८ ॥
(यथा, महाभारते । १ । १७२ । २८ ।
"तस्या रूपेण स गिरिर्वेषेण च विशेषतः ।
स सवृक्षक्षुपलतो हिरण्मय इवाभवत्" ॥)
श्रीकृष्णात् सत्यभामायां जातपुत्रविशेषः । यथा,
"जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षुपः ।
रोहितो दीप्तिमांश्चैव ताम्रजाद्यो जलान्तकः ।
भानुर्भीमरिका चैव ताम्रपक्षा जलन्धमा ।
चतस्रो जज्ञिरे तेषां स्वसारो गरुडध्वजात्" ।
इति महाभारते हरिवंशे १६२ अध्यायः ॥ * ॥
इक्ष्वाकुराजपिता । यथा,—
"आसीत् कृतयुगे तात ! मनुर्दण्डधरः प्रभुः ।
तस्य पुत्त्रो महाबाहुः प्रसन्धिरिति विश्रुतः ॥
प्रसन्धेरभवद् पुत्त्रः क्षुप इत्यभिविश्रुतः ।
क्षुपस्य पुत्त्रस्त्विक्ष्वाकुर्महीपालोऽभवत् प्रभुः" ।
इति महाभारते । १४ । ४ । २-४ ॥ द्वारकापश्चिमदिक्स्थपर्व्वतः । यथा,—
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते ।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः" ।
इति महाभारते हरिवंशे द्वारवतीनिर्म्माणे १५७ अध्यायः ॥

क्षुपकः, पुं, (क्षुप + स्वार्थे कन् ।) क्षुपः । क्षुद्रवृक्षः । यथा,—
"अतो यो विपरीतः स्यात् सुखसाध्यः स उच्यते
अवद्धमूलः क्षुपको यद्वदुत्पाटने सुखः" ॥
इति सुश्रुते प्रथमभागे २४ अध्यायः ॥

क्षुपालुः, पुं, (क्षुप + आलुप्रत्ययः ।) पानीयालुः । इति राजनिर्घण्टः ॥

क्षुपडोडमुष्टिः, पुं, (डुड उत्क्षेपे + अच् ततो गुडः लकारस्य डत्वम् । दस्यापि डत्वं पृषोदरात्

साधु । तादृक् मुष्टिर्यस्य ।) विषमुष्टिक्षुपः । इति राजनिर्घण्टः ॥ (विषमुष्टिशब्देऽस्या गुणादयो ज्ञेयाः ॥)

क्षुब्धः, पुं, (क्षुभ् + "क्षुब्धस्वान्तध्वान्तलग्नेति" । ७ । २ । १८ । इति निपातनात् साधु ।) मन्थानदण्डः । इति हेमचन्द्रः ॥ षोडशरतिबन्धान्तर्गतैकादशबन्धः । यथा,—

"पार्श्वोपरि पदौ कृत्वा योनौ लिङ्गेन ताडयेत् ।
बाहुभ्यां धारयेद् गाढं बन्धो वै क्षुब्धसंज्ञकः" ॥

इति रतिमञ्जरी ॥ क्षोभविशिष्टे त्रि ॥

क्षुभ, ल्ट ङ सञ्चलने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट् । लृदित् ।) लृ, अक्षुभत् । ङ, क्षोभते नानुजीविषु । इति हलायुधः । इति दुर्गादासः ॥

क्षुभ, य ग सञ्चलने । इति कविकल्पद्रुमः ॥ (दिवा-क्र्या च-पर-अक-सेट् ।) य, क्षुभ्यति रिपुश्चैवेति हलायुधः । ग, क्षुभ्नाति सुक्षोभ । इति दुर्गादासः ॥

क्षुभ, पुं, (क्षुभ् + "इगुपधज्ञाप्रीकिरः" । ३ । १ । १३५ । इति कः ।) प्रवर्त्तकः । यथा,—

"ये च तेऽनुचराः सर्व्वे पादोपान्तं समाश्रिताः ।
माठरावाणदण्डाद्यास्तांस्तान् वन्देऽशनिक्षुभान्" ॥

इति महाभारते । ३ । ३ । ६८ ॥ "अशनिक्षुभान् विद्युदशन्यादिप्रवर्त्तकान्" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभा, स्त्री, (क्षुभ + स्त्रियां टाप् ।) निग्रहानुग्रहकर्त्री देवता । यथा, महाभारते ३ । ३ । ६९ ।

"क्षुभया सहिता मैत्री याश्चान्या भूतमातरः ।
ताश्च सर्व्वा नमस्यामि पान्तु मां शरणागतम्" ॥

"क्षुभा मैत्र्यौ निग्रहानुग्रहकर्त्र्यौ देवते । भूतमातरः गौरीपद्मादयः । ब्राह्मीमाहेश्वर्य्यादयश्च" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभितः, त्रि, (क्षुभ + कर्त्तरि क्तः ।) भीतः । इति हलायुधः ॥ सञ्चलितः । इति क्षुभधात्वर्थदर्शनात् ॥

क्षुमा, स्त्री, (क्षु + मक् टाप् ।) अतसी । इत्यमरः । २ । ९ । २० ॥ शणः । इति तट्टीकासारसुन्दरी ॥ नीलिका । इति मेदिनी ॥ लताभेदः । इति शब्दरत्नावली ॥

क्षुर, श विलेखने । खनने । इति कविकल्पद्रुमः ॥ (तुदा-पर-सक-सेट् ।) श, क्षुरति भूमिं लोकः । अक्षोरीत् । क्षुरो लोमच्छेदनः । इति दुर्गादासः ॥

क्षुरः, पुं, (क्षुर + "इगुपधेति" । ३ । १ । १३५ । कः । यद्वा, "क्षुधेन्द्रायवष्वविप्रकुम्बक्षुम्बक्षुरखुरेति" । उणां । २ । २८ । इति निपातनात् सिद्धम् ।) कोकिलाक्षः । इत्यमरः । २ । ८ । ४९ ॥ (अस्य पर्य्याया यथा,—

"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः ।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नखम् । इति तट्टीका । छेदनद्रव्यम् । तत्तु नापितस्य लोमच्छेदकास्त्रम् । (यथा, मनुः । ८ । २९२ ।

"सर्व्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः ।
प्रवर्त्तमानमन्याये छेदयेल्लवशः क्षुरैः" ॥)

गोक्षुरः । इति मेदिनी ॥ (अस्य पर्य्याया यथा,— वैद्यकरत्नमालायाम् ।

"त्रिकण्टः स्वादुकण्टश्च गोकण्टोऽथ त्रिकण्टकः ।
त्रिपुटः कण्टकफलः श्वदंष्ट्रा गोक्षुरः क्षुरः" ॥

महापिण्डीतकः । शरः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १ । १३४ । ९० ।

"ततस्तस्य नगस्थस्य क्षुरेण निशितेन च ।
शिर उत्कृत्य तरसा पातयामास पाण्डवः" ॥

खट्वादिपादुका । इति धरणिः । क्षुरा इति भाषा ॥

क्षुरकः, पुं, (क्षुर + स्वार्थे कन् ।) तिलकवृक्षः । इत्यमरः । २ । ४ । ४० ॥ कोकिलाक्षः । (अस्य पर्य्याया यथा,—

"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः ।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अस्य व्यवहारो यथा,—

"यवानी जीरके द्वे च वानरी गजपिप्पली ।
जातीफलं सपत्रञ्च लवङ्गागुरुचन्दनम् ॥
तालीशं तिलमाषञ्च क्षुरकं गोक्षुरस्तथा ।
शतावरी शलाका च वचा दार्व्वी पुनर्नवा ॥
निकुम्भकुम्भौ मार्ज्जारी कन्दो नागबला तथा ।
वासामाषौ मुरामुस्तं पिप्पलीमूलमेव च ॥
मूषली वानरी भृङ्गी शाल्मली मूलमेव च ।
मेथिकागजकर्णौ च शर्करा चाखिलौषधम् ।
माशुपर्ण्यश्वगन्धा द्राक्षा च चोचकं समम्" ॥

इत्यादिषु द्रष्टव्यम् । इति वैद्यककषायसंग्रहे वृहत्कामेश्वरमोदकान्तर्गते ॥) गोक्षुरः । इति मेदिनी ॥ भूताङ्कुशः । इति राजनिर्घण्टः ॥

क्षुरकर्म्म, [न्] क्ली, (क्षुरेणोचितं क्षुरसाध्यं वा कर्म्म ।) चौरम् । क्षुरद्वारा केशादिकर्त्तनम् ॥ यथा,—

"यो जन्ममासे क्षुरकर्म्म यात्रां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्रनाशं
प्राप्नोति मूढो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठः
साष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
चूडे विवाहे क्षुरकर्णवेधे ॥
देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये ।
क्षुरिकर्म्म न कुर्व्वीत जन्ममासेऽथ जन्मभे" ॥

इति तिथ्यादितत्त्वम् ॥ चौरानन्तरं स्नानं कर्त्तव्यम् । यथा,—

"दुःस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्म्मणि ।
चिति यूपश्मशानाद्यानां स्पर्शने स्नानमाचरेत्" ॥

इति मिताक्षरायां प्रायश्चित्ताध्याये पराशरवचनम् ॥ अन्यत् चौरशब्दे द्रष्टव्यम् ॥

क्षुरधारः, पुं, (क्षुरस्य धारा इव धारा यस्य ।) अस्त्रविशेषः । यथा, महाभारते । ४ । ६ । २८ ।

"खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान् ।
विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह" ॥

"विपाटान् बाणविशेषान् तादृशान् क्षुरधारांश्च" । इति तट्टीकायां नीलकण्ठः ॥ * ॥ क्षुरस्य शाणितमुखम् । तद्युक्ते त्रि । (यथा, महाभारते । ४ । ६२ । २७ ।

"अथ जिष्णुरुपावृत्य क्षुरधारेण कार्म्मुकम् ।
चकर्त्त भीष्मस्य तदा जातरूपपरिष्कृतम्" ॥)

क्षुरधारा, स्त्री, (क्षुरस्य धारा ।) क्षुरधारः । यथा,

"अन्तकः पवनो मृत्युः पातालं वडवामुखम् ।
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः" ॥

इति महाभारते । १२ । पञ्चचूडानारदसंवादे ३८ । २९ ॥ "अन्तकादिवत् सद्यो नाशका इत्यर्थः" । इति तट्टीकायां नीलकण्ठः ॥

क्षुरपत्रः, पुं, (क्षुरस्य पत्रमिव पत्रमस्य क्षुरवत् पत्रमस्य वा ।) शरः । इति राजनिर्घण्टः ॥ (दर्भविशेषः । यथा,—

"ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) क्षुरतुल्यपर्णयुक्ते त्रि ॥

क्षुरपत्रिका, स्त्री, (क्षुरः इव पत्रमस्याः स्वार्थे कन् स्त्रियां टापि अत इत्वम् ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

क्षुरप्रः, पुं, (क्षुरः इव प्राति छिनत्ति । छेदनक्रियां पूरयति वा प्रा + कः । किंवा प्र गत्या ।) बाणविशेषः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ५३ । ४६ ।

"स तु द्रोणं त्रिसप्तत्या क्षुरप्राणां समार्पयत्" ॥)

क्षुरधानामकघासच्छेदनास्त्रञ्च ॥

क्षुरप्रगः, स्त्री, (क्षुरप्रः क्षुरप्रतां गच्छतीति । गम + डः ।) क्षुरप्रास्त्रम् । इति केचित् ॥ (क्षुरप्रः इव गच्छतीति । क्षुरप्रसदृशास्त्रविशेषः ॥)

क्षुरभाण्डं, क्ली, (क्षुरस्य भाण्डं आधारः ।) क्षुराधारः । भाँडि इति भाषा । यथा,—"भद्रे ! शीघ्रमानीयतां क्षुरभाण्डं येन चौरकर्म्मकरणाय गच्छामि । सापि छिन्ननासिका गृहमध्यस्थितैव कार्य्यकरणापेक्षया क्षुरभाण्डात् क्षुरमेकं समाकृष्य तस्याभिमुखं प्रेषयामास" । इति विष्णुशर्म्मविरचितपञ्चतन्त्रे १ तन्त्रम् ॥

क्षुरमर्द्दी, [न्] पुं, (क्षुरं मर्द्दयतीति । क्षुर + मृद + णिनि ।) नापितः । यथा,—

"मुक्त्वा शेष्यादिकर्म्म स्यात् नापितश्चखिल क्षुरी ।
क्षुरमर्द्दी दिवाकीर्त्तिर्मुण्डकोऽन्तावसाय्यपि" ॥

इति हेमचन्द्रः ॥

क्षुराङ्गः, पुं, (क्षुर इवाङ्गमस्य ।) गोक्षुरकः । इति राजनिर्घण्टः ॥

क्षुरिका, स्त्री, (क्षुर + ङीप् स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥ (पालङ्क्यशब्देऽस्या विवृतिर्ज्ञातव्या ॥) मत्स्यविशेषः । छुरी इति भाषा । (कृष्णयजुर्व्वेदान्तर्गत उपनिषद्विशेषः । यदुक्तं मुक्तिकोपनिषदि । "अमृतनादकालाग्निरुद्रक्षुरिका सर्व्वसारेत्युपक्रम्य सरस्वतीरहस्यानां कृष्णयजुर्व्वेद-

गतानां दाक्षिणात् सह्याकानां उपनिषदां सह नाव वसिति शान्तिरिति" ॥)

क्षुरिकापत्र, पु, (क्षुरिका इव क्षुरवदित्यर्थः पत्र यस्य ।) शर । इति राजनिर्घण्ट ॥

क्षुरिणी, स्त्री, (क्षुर अस्या अस्तीति । इनि ङीप् च ।) वराहक्रान्ता । इति शब्दचन्द्रिका ॥ नापित भार्य्या च ॥

क्षुरी, [न्] पु, (क्षुरोऽस्यास्तीति । क्षुर + इनि ।) नापित । इत्यमर । २ । १० । १० ॥

क्षुरी, स्त्री, (क्षुद क्षुर क्षुर इव वा । क्षुर + स्वल्पार्थे ङीप् ।) छुरिका । इति हेमचन्द्र ॥ छुरीति च पाठ ॥

क्षुल्ल, त्रि, (क्षुद सम्पेषणे + सम्पदादित्वात् क्विप् । क्षुदं लाति गृह्णातीति । क्षुद + ला + क ।) लघु । इति हेमचन्द्र ॥ (यथा, भागवते । ६ । ५ । १० ।
"अदृष्ट्वा क्षुल्लसुखावहानां
तेषामृते कर्म्मकथाम्नृतोषात्" ।)

क्षुल्लक, त्रि, (क्षुल्ल + स्वार्थे कन् ।) क्षुद्र । इत्यमर । ३ । ३ । १० ॥ स्वल्प । नीचक । कनिष्ठ । दरिद्र । इति भरत ॥ पामर । दुःखित । (यथा, भागवते । ४ । ३० । २९ ।
"येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् ।
अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिष" ॥)
खल । इति हेमचन्द्र ॥ शब्दरत्नावल्यां खुल्लक इति च पाठ ॥

क्षुल्लक, पु, (क्षुल्ल + संज्ञायां स्वल्पार्थे वा कन् ।) क्षुद्रशङ्ख । इति हेमचन्द्र राजनिर्घण्टश्च ॥ (शोधनादिप्रकरणेऽस्य विषयो यथा,—
"कङ्कुष्ठ गैरिक शङ्ख कासीस टङ्गणन्तथा ।
नीलाञ्जन शुक्तिभेदा क्षुल्लका सवराटका ॥
जम्बीरवारिणा खिन्ना क्षालिता कोष्णवारिणा ।
शुद्धिमायान्त्यमी योज्या भिषग्भिर्योगसिद्धये" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

क्षुल्लतात, पु, (क्षुल्ल पितु कनिष्ठः स चासौ तातश्चेति नित्यकर्म्मधारय ।) पितृकनिष्ठभ्राता । इति क्षुल्लतातकशब्ददर्शनात् ॥ शब्दरत्नावल्यां खुल्लतात इति पाठ ॥

क्षुल्लतातक, पु, (क्षुल्लतात + स्वार्थे कन् ।) पितृव्य । इति जटाधर । खुडा इति भाषा ॥

क्षेत्र, क्ली, (क्षि + ष्ट्रन् ।) भूमि । क्षेत इति भाषा ॥ तत्पर्य्याय । वप्रम् । २ केदार ३ । इत्यमर । २ । ९ । ११ ॥ वलजम् ४ निष्कुट ५ राजिका ६ पाटीर ७ । इति जटाधरः ॥ * ॥ तत्समूहवाचकानि यथा,—
"कैदारकन्तु कैदार्य्यं क्षेत्र कैदारक तथा ।
वारटक्षेत्रि पर्य्याय क्षेत्रवृन्दे निगद्यते" ॥
इति शब्दरत्नावली ॥ * ॥ तद्भेदा यथा,—
"व्रीहिभवोचित क्षेत्र व्रैहेय तत् समीरितम् ।
शाल्युद्भवोचित यत्तु शालेयमभिधीयते ॥
यव्य यवोचित क्षेत्र यवक्य यवकोचितम् ।
षष्टिकोद्भवम यत्तु षष्टिक्य तत् प्रकीर्त्तितम् ॥
तिलोद्भवोचित यत्त तिल्य तैलीनमित्यपि ।
एवं माष्यन्तु माषीण कौद्रव्यं कौद्रवीणवत् ।
तथा भङ्गाच भाङ्गीनमुम्यमौमीनमित्यपि ।
अथ मौद्गाच मौद्गीनमणव्यमाणवीनवत् ।
माषकोद्रवमुद्गोमामुद्गाणुप्रभवोचितम् ।
लोशाकृतगुणक्षुत्युत गोलिसमाह्वये ।
सीत्य कृष्ट हल्यञ्च तृतीयाकृतमित्यपि ।
त्रिगुणाकृतमित्येव त्रिवारकृष्टभूमिषु ॥
शम्बाकृत द्विहल्यञ्च द्वितीय द्विगुणाकृतम् ।
द्वितीयाकृतमप्यत्र द्विवारकृष्टभूमिषु ॥
द्रोणाढकाद्यार्य्यादिर्वापादौ द्रौणिकस्तथा ।
स्यादाढकिकखारीको उत्तमर्णादयस्त्रिषु ।
आदिश्चा प्रास्थिकादिश्च पाकादौ द्रौणिकोऽपि च" ॥
इति च शब्दरत्नावली ॥
परक्षेत्रे गोचारणकथननिषेधो यथा,—
"न कुर्य्यात् सह्यवैराणि विवाद न च पैशुनम् ।
परक्षेत्रे गां चरन्तीं न चाचक्षीत कस्यचित्" ॥
इति कूर्म्मपुराणे उपविभागे १५ अध्याय ॥ * ॥
अपि च । मनु ।
"आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले ।
भक्षयन्तीं न कथयेत् पिबन्तञ्चैव वत्सकम्" ॥
इति प्रायश्चित्ततत्त्वम् ॥ * ॥ तज्जशस्यगुणा ।
"कैदार मधुर प्रोक्त विपाके गुरु दोषलम्" ॥
इति राजवल्लभ ॥ * ॥

अथ सिद्धक्षेत्राणि ।

तत्र वाराणसीक्षेत्र यथा,—
"आसन्न युवयो क्षेत्रमिदं वाराणसी तु यत् ।
कथित नातिदूरे च वर्त्तते नरसत्तमौ" ॥ * ॥
कामरूपक्षेत्र यथा,—
"नाचिरात् कामद यस्मात् क्षेत्र पीठ निगद्यते ।
चिरात्तु कामदो देवो न चिरादत्र शङ्कर ॥
तत् क्षेत्रमिति लोके यद्गद्यते पूर्व्वसूरिभि ।
कामरूप महापीठ गुह्याद्गुह्यतम परम्" ॥
इति च कालिकापुराणे ५० अध्याय ॥ * ॥
गङ्गाक्षेत्र यथा, स्कान्दे ।
"तीराद्गव्यूतिमात्रन्तु परित क्षेत्रमुच्यते" ॥
नारायणक्षेत्रं यथा,—
"प्रवाहमवधि कृत्वा यावद्धस्तचतुष्टयम् ।
तत्र नारायण स्वामी गङ्गागर्भान्तरे परे ॥
तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरे पदे ।
एतेष्वन्येषु यो दान प्रतिगृह्णाति कामत ।
स च तीर्थप्रतिग्राही कुम्भीपाक प्रयाति च" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याय ॥ * ॥
भास्करक्षेत्र यथा, स्मृतिसमुच्चयलिखितवचने ।
"गङ्गायां भास्करक्षेत्रे मातापित्रोर्म्मृते गुरौ ।
आधाने सोमपाने च वपन सप्तसु स्मृतम्" ॥
भास्करक्षेत्र प्रयाग । इति प्रायश्चित्ततत्त्वम् ॥ * ॥
गयाक्षेत्र यथा,—
"पञ्चक्रोश गयाक्षेत्र क्रोशमेक गयाशिर" ॥
इति वायुपुराणम् ॥ * ॥ पुरुषोत्तमक्षेत्र यथा,—
मुनय ऊचु ।
"पुरुषोत्तमाख्य सुमहत् क्षेत्रं परमपावनम्" ॥
इत्यादि ।
जैमिनिरुवाच ।
"एतत् क्षेत्रवरञ्चास्य वसुर्भूत महात्मन ।
नाथ सपुण्यान् यत्रास्ते मनाम्ना ख्यापित हि तत्" ॥
इत्युत्कलखण्डम् ॥ * ॥ विष्णुक्षेत्राणि यथा,—
श्रीभगवानुवाच ।
"महागुह्यावहितो ब्रह्मन् । गुह्यनामानि मेऽधुना ।
क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि यत्नत ॥
कोकामुखे वराहञ्च मन्दरे मधुसूदनम् ।
अनन्त कपिलद्वीपे प्रभासे रविनन्दनम् ॥
माल्योदये तु वैकुण्ठ महेन्द्रे तु नृपान्तकम् ।
ऋषभे तु महाविष्णुं द्वारकायान्तु भूपतिम् ॥
पाण्डुसह्ये तु देवेशं वसुकुण्डे जगत्पतिम् ।
वल्लीवने महायोग चित्रकूटे नराधिपम् ॥
नैमिषे पीतवासञ्च गवां निष्क्रमणे हरिम् ।
शालग्रामे तपोवासमचिन्त्य गन्धमादने ॥
कुब्जाम्रके हृषीकेश गङ्गाद्वारे गदाधरम् ।
गरुडध्वज तोयके च गोविन्द नागसाह्वये ॥
वृन्दावने तु गोपाल मथुरायां स्वयम्भुवम् ।
केदारे माधव विद्यात् वाराणस्यान्तु केशवम् ॥
पुष्करे पुष्कराक्षन्तु धृष्टद्युम्ने जयध्वजम् ।
तृणबिन्दुवने वीरमशोक सिन्धुसागरे ॥
कसेरटे महाबाहुममृत तैजसे वने ।
विशाखयूपे विश्वेश नारसिंह वने वने ॥
लोहाकुले रिपुहर देवशाले त्रिविक्रमम् ।
पुरुषोत्तम दशपुरे कुब्जके वामन विदु ॥
विद्याधर वितस्तायां वाराहे धरणीधरम् ।
देवदारुवने गुह्य कावेर्य्यां नागशायिनम् ॥
प्रयागे योगमूर्त्तिञ्च पयोष्ण्यां सुन्दर विदु ।
कुमारतीर्थे कौमार लौहित्ये हयशीर्षम् ॥
उज्जयन्त्यां त्रिविक्रम लिङ्गस्फोटे चतुर्भुजम् ।
हरिहर तुङ्गभद्रायां दृष्ट्वा पापात् प्रमुच्यते ॥
विश्वरूप कुरुक्षेत्रे मणिकुण्डे हलायुधम् ।
लोकनाथमयोध्यायां कुण्डिने रुक्मिणीपतिम् ॥
भण्डीरे वासुदेवञ्च चक्रतीर्थे सुदर्शनम् ।
आद्य विष्णुपदे विद्यात् सूकरे सूकर विदु ॥
कुशेश मानसे तीर्थे दण्डके श्यामल विदु ।
त्रिकूटे नागमोक्षञ्च मेरुपृष्ठे च भास्करम् ॥
विरज पुष्पभद्रायां बालशालीकरे विदु ।
यशस्कर विपाशायां माहिष्मत्यां हुताशनम्
क्षीराब्धौ पद्मनाभञ्च विमले तु सनातनम् ।
शिवनद्यां शिवकर गयायाञ्च गदाधरम् ॥
सर्व्वत्र परमात्मान य पश्यति स मुच्यते ॥
अष्टषष्टिस्तु नामानि कीर्त्तितानि मया तव ।
क्षेत्राणि चैव गुह्यानि कथितानि विशेषत ॥
महत्यानि यथाशक्त्या क्षेत्राण्येतानि मानवैः ।
वैष्णवैस्तु विशेषेण तेषा मुक्ति ददाम्यहम्" ॥
इति नारसिंहे ६२ अध्यायः ॥ * ॥ मेषादिद्वादशराशि । यथा,—
"राशिनामानि च क्षेत्रं भवन गृहभ च ।
मेषादीनाञ्च पर्य्याय लोकादेश विचिन्तयेत्" ॥
ग्रहाणां क्षेत्राणि यथा,—
"कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम् ।

जीवार्किभानुनेन्द्वाना क्षेत्राणि स्युरजादयः” ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥ अपि च ।
“मेषमङ्गारकक्षेत्र वृष शुक्रस्य कीर्त्तितम् ।
मिथुनस्य बुधो ज्ञेयः सोम कर्क्कटकस्य तु ॥
सूर्य्यक्षेत्र भवेत् सिंह कन्या क्षेत्र बुधस्य च ।
धनु सुरगुरोश्चैव शनेर्मकरकुम्भकौ ॥
मीन सुरगुरोश्चैव ग्रहक्षेत्र प्रकीर्त्तितम्” ॥
इति गारुडे ६० अध्याय ॥ * ॥ शरीरम् ।
(यथा, भगवद्गीतायाम् । १३ । १ ।
“इद शरीरं कौन्तेय । क्षेत्रमित्यभिधीयते” ॥
कुत शरीरस्य क्षेत्रत्वमित्यत्र शाङ्करभाष्यम् ।
यथा,—“इदमिति सर्व्वनाम्नोक्त विशिनष्टि शरीरमिति । हे कौन्तेय । क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवद्वास्मिन् कर्म्मफलनिर्वृत्ते क्षेत्रमितीतिशब्दः एव शब्दपदार्थक क्षेत्रमित्येवमभिधीयते कथ्यते” ॥ इच्छा । द्वेष । सुखम् । दुःखम् । चेतना । धृति । यथा, भगवद्गीतायाम् । १३ । ६ ।
“इच्छा द्वेषः सुख दुःख सङ्घातश्चेतना धृति ।
एतत् क्षेत्र समासेन सविकारमुदाहृतम्” ॥
इत्यत्र शाङ्करभाष्य यथा,—“अथेदानीं आत्मगुणा इति यानाचक्षते वैशेषिकास्तेऽपि क्षेत्रधर्म्मा एव न तु क्षेत्रज्ञस्येत्याह भगवान् इच्छा द्वेष इति । इच्छा यज्जातीय सुखहेतुमर्थमुपलब्धवान् पूर्व्व पुनस्तज्जातीयमुपलभ्यमानस्तमादातुमिच्छति सुखहेतुरिति सेयमिच्छान्त करणधर्म्मो ज्ञेयत्वात् क्षेत्र तथा द्वेषो यज्जातीयमर्थ दुःखहेतुत्वेनानुभूतवान् पूर्व्वं पुनस्तज्जातीयमुपलभ्यमानस्त द्वेष्टि सोऽय द्वेषो ज्ञेयत्वात् क्षेत्रमेव तथा सुखमनुकूलं प्रसन्नं सत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव दुःख प्रतिकूलात्मक ज्ञेयत्वात् तदपि क्षेत्र सघातो देहेन्द्रियाणां संहतिस्तस्यामभिव्यक्तान्त करणवृत्ति तप्त इव लौहपिण्डेऽग्निरात्मचैतन्याभासरसविद्धा चेतना सा च क्षेत्र ज्ञेयत्वात् धृतिर्ययावसाद प्राप्तानि देहेन्द्रियाणि ध्रियन्ते सा च ज्ञेयत्वात् क्षेत्रं सर्व्वान्त करणधर्म्मोपलक्षणार्थमिच्छादिग्रहण यत उक्त तदुपसहरति एतत् क्षेत्र समासेन सविकारं सह विकारेण महदादिनोदाहृतमुक्त यस्य क्षेत्रभेदजातस्य सहतिरिद शरीर क्षेत्र इत्युक्त तत् क्षेत्रं व्याख्यात महाभूतादिभेदादभिन्न धृत्यन्तम्” ॥ इत्यत्र श्रीधरस्वामिनापि यदुक्त तदुच्यते । “एते चेच्छादयो दृश्यत्वान्नात्मधर्म्मा अपि तु मनोधर्म्मा अत क्षेत्रान्त पातिन एवोपलक्षणञ्चैतत् सङ्कल्पादीनाम् । तथा च श्रुति । कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति” ॥ * ॥ सप्तद्वीपा पृथिवी । यथा, भागवते ९ । ६ । ३७ ।
“यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातु क्षेत्रमुच्यते” ॥)
सिद्धस्थानम् । (यथा, कथासरित्सागरे । ३ । ७८ ।
“भाटलिपुत्र क्षेत्र लक्ष्मीसरस्वत्यौ” ।) कलत्रम् ।
इति मेदिनी ॥ (यथा मनु । ९ । ३३ ।
“क्षेत्रभूता स्मृता नारी बीजभूत स्मृत पुमान् ।
क्षेत्रबीजसमायोगात् सम्भव सर्व्वदेहिनाम्” ॥)
गृहम् । नगरम् । इति वैजयन्तीकोष ॥ * ॥


अथ क्षेत्रव्यवहारो लिख्यते ।

तत्र भुजकोटिकर्णानामन्यतमे ज्ञातेऽन्यतमयोर्ज्ञानाय करणसूत्रं वृत्तद्वयम् ।
इष्टादाहोर्य्य स्यात्तत्स्पर्द्धिन्या दिश्यीतरो बाहु ।
त्र्यस्रे चतुरस्रे वा सा कोटि कीर्त्तिता तज्ज्ञै ॥
तत्कृत्योर्य्योगपद कर्णो दो कर्णवर्गयोर्व्विवरात् ।
मूल कोटि कोटिश्रुतिकृत्योरन्तरात् पद बाहुः ॥

उदाहरणम् ।

कोटिश्चतुष्टय यत्र दोस्त्रयं तत्र का श्रुतिः ।
कोटि दो कर्णत कोटिश्रुतिभ्याञ्च भुज वद ॥


न्यास



कोटि ४ । भुज ३ । भुजवर्ग ९ । कोटिवर्ग १६ । एतयोर्य्योगात् २५ । मूल ५ कर्णो जात ॥

अथ कर्णभुजाभ्या कोट्यानयनम् ।


न्यास



कर्ण ५ । भुज ३ । अनयोर्व्वर्गान्तरम् १६ । एतन्मूल कोटि ४ ॥

अथ कोटिकर्णाभ्या भुजानयनम् ।

न्यास




कोटि ४ । कर्ण ५ । अनयोर्व्वर्गान्तरम् ९ । एतन्मूल भुज ३ ॥

प्रकारान्तरेण तज्ज्ञानाय करणसूत्र
सार्द्धवृत्तम् ।

राश्योरन्तरवर्गेण द्विघ्ने घाते युते तयो ।
वर्गयोगो भवेदेव तयोर्य्योगान्तराहति ।
वर्गान्तरं भवेदेव ज्ञेयं सर्व्वत्र धीमता ॥
कोटिश्चतुष्टयमिति पूर्व्वोक्तोदाहरणे ।


न्यास



कोटि ४ । भुज । ३ अनयोर्घात १२ । द्विघ्ने २४ । अन्तरवर्गेण १ । युते वर्गयोग २५ । अस्य मूल कर्ण ५ ॥

अथ कर्णभुजाभ्या कोट्यानयनम् ।


न्यास



कर्ण ५ । भुज ३ । अनयोर्य्योग ८ । पुनरेतयोरन्तरेण (२) हतो वा १६ । वर्गान्तरमस्य मूलं कोटिः ४ ॥

अथ भुजज्ञानम् ।

न्यास




कोटि ४ । कर्ण ५ । एवं जातो भुज ३ ॥

उदाहरणम् ।

साङ्घ्रित्रयमितो बाहुर्यत्र कोटिश्च तादृशी ।
तत्र कर्णप्रमाण किं गणक । ब्रूहि मे द्रुतम् ॥

न्यासः



भुज $\frac{१३}{४}$ । कोटि $\frac{१३}{४}$ । अनयोर्वर्गयोर्य्योग $\frac{१६९}{८}$ । अस्य मूलाभावात् करणीगत एवायं कर्ण ॥ अस्यासन्नमूलज्ञानार्थमुपाय ।
वर्गेण महतेष्टेन हताच्छेदांशयोर्वधात् ।
पद गुणपदक्षुण्णच्छिद्भक्त निकट भवेत् ॥
इय कर्णकरणी $\frac{१६९}{८}$ । अस्या छेदांशघात १३५२ । अयुतघ्नः १३,५२०,००० । अस्यासन्नमूल ३६७७ । इद गुणमूल १०० । गुणितच्छेदेन ८०० । भक्तं लब्धमासन्नपदम् ४ । भागा $\frac{४७७}{८००}$ । अयं कर्ण । एवं सर्व्वत्र ॥


त्र्यस्रजात्ये करणसूत्र वृत्तद्वयम् ।

इष्टो भुजोऽस्माद्द्विगुणेष्टनिघ्ना-
दिष्टस्य कृत्यैकवियुक्तयाप्तम् ।
कोटि पृथक् सेष्टगुणा भुजोना
कर्णो भवेत्त्र्यस्रमिदन्तु जात्यम् ॥
इष्टो भुजस्तत्कृतिरिष्टभक्ता
द्वि स्थापितेष्टोनयुताङ्घ्रिता वा ।
तौ कोटिकर्णाविति कोटितो वा
बाहुश्रुती वाकरणीगते स्त ॥

उदाहरणम् ।

भुजे द्वादशके यौ यौ कोटिकर्णावनेकधा ।
प्रकाराभ्या वद क्षिप्र तौ तावकरणीगतौ ॥

न्यास



इष्टो भुज १२ । इष्ट २ । अनेन द्विगुणेन ४ । गुणितो भुज ४८ । इष्ट २ । कृत्या ४ । एकोनया ३ । भक्तो लब्धा कोटि १६ । इयमिष्टगुणा ३२ । भुजोना २० । जात कर्ण २० ॥
द्वितीयप्रकारेण वा ।

क्षेत्रं

न्यास



कोटि ९ । कर्णः १५ ।

पञ्चकेन वा ।




कोटि ५ । कर्णः १३ । इत्यादि ॥


अथ द्वितीयप्रकारेण ।

इष्टो भुजः १२ । अस्य कृतिः १४४ । इष्टेन २ । भक्ताल्लब्धं ७२ । इष्टेन २ । ऊनं ७० । युतं ७४ । वर्द्धितौ जातौ कोटिकर्णौ ३५ । ३७ ।

न्यास



चतुष्टयेन वा ।



कोटि १६ । कर्णः २० ।

षट्केन वा ।



कोटि ९ । कर्णः १५ ।

अथेष्टकर्णात् कोटिभुजानयने करणसूत्रं वृत्तम् ।


इष्टेन निघ्नात् द्विगुणाच्च कर्णात्
इष्टस्य कृत्यैकयुजा यदाप्तम् ।
कोटिर्भवेत् सा पृथगिष्टनिघ्नी
तत्कर्णयोरन्तरमत्र बाहुः ॥

उदाहरणम् ।

पञ्चाशीतिमिते कर्णे यौ यावकरणीगतौ ।
स्यातां कोटिभुजौ तौ तौ वद कोविद सत्वरम् ॥

क्षेत्रं

न्यासः



कर्णः ८५ । अत्र द्विगुणः १७० । द्विकेनेष्टेन हतः ३४० । इष्ट २ । इष्टकृतिः ४ । सैकया ५ । भक्ते जाता कोटिः ६८ । इयमिष्टगुणा १३६ । कर्णोनाः ८५ । मिता जातो भुजः ५१ ।

चतुष्केणेष्टेन वा ।




कोटि ४० । भुजः ७५ ।

पुनः प्रकारान्तरेण तत्करणसूत्रं वृत्तम् ।

इष्टवर्गेण सैकेन द्विघ्नः कर्णोऽथवा हृतः ।
फलोनः श्रवणः कोटिः फलमिष्टगुणं भुजः ॥

पूर्वोदाहरणे ।

न्यासः



कर्णः ८५ । अत्र द्विकेन इष्टेन जातौ कोटिभुजौ ५१ । ६८ ।

चतुष्केण वा ।



कोटि ७५ । भुजः ४० । अत्र द्वयोर्नाम भेद एव केवलं न स्वरूपभेदः ॥


अथेष्टाभ्यां भुजकोटिकर्णानयने करणसूत्रं वृत्तम् ।

इष्टयोराहतिर्द्विघ्नी कोटिर्वर्गान्तरं भुजः ।
कृतियोगस्तयोरेव कर्णश्चाकरणीगतः ॥

उदाहरणम् ।


यैर्यैस्त्र्यस्रं भवेत् जात्यं कोटिदोःश्रवणैः सखे ।
त्रीनिष्टविदितानेतान् क्षिप्रं ब्रूहि विचक्षण ॥

न्यास



अथवेष्टे २ । १ । आभ्यां कोटिभुजकर्णाः ४ । ३ । ५ ।

क्षेत्रं



अथवेष्टे २ । ३ । आभ्यां कोटिभुजकर्णाः १२ । ५ । १३ ।



अथवा २ । ४ । आभ्यां कोटिभुजकर्णाः १६ । १२ । २० । एवमनेकधा ।

कर्णकोटियुतौ भुजे च ज्ञाते पृथक्करणसूत्रं वृत्तम् ।

वंशाग्रमूलान्तरभूमिवर्गो
वंशोद्धृतस्तेन पृथग्युतोनौ ।
वंशौ तदर्द्धे भवतः क्रमेण
वंशस्य खण्डे श्रुतिकोटिरूपे ॥

उदाहरणम् ।

यदि समभुवि वेणुर्द्वित्रिपाणिप्रमाणो
गणक पवनवेगादेकदेशे स भग्नः ।
भुवि नृपमितहस्तेष्वङ्ग लग्नं तदग्रं
कथय कतिषु मूलादेष भग्नः करेषु ॥

३२

न्यास



वंशाग्रमूलान्तरभूमि १६ । वंशः ३२ । कोटिकर्णयुतिः ३२ । भुजः १६ । जाते ऊर्ध्वाधःखण्डे २० । १२ ।


भाज्यकर्णयोगे दृष्टे कोट्यां च ज्ञातायां पृथक्करणसूत्रं वृत्तम् ।

स्तम्भस्य वर्गोऽहिबिलान्तरेण
भक्तं फलं व्यालबिलान्तरालात् ।
शोध्यं तदर्द्धप्रमितैः करैः स्यात्
बिलाग्रतो व्यालकलापियोगः ॥

उदाहरणम् ।

अस्ति स्तम्भतले बिलं तदुपरि क्रीडाशिखण्डी स्थितः स्तम्भे हस्तनवोच्छ्रिते त्रिगुणिते स्तम्भप्रमाणान्तरे । दृष्ट्वाहिं बिलमाव्रजन्तमपतत् तिर्यक् स तस्योपरि क्षिप्रं ब्रूहि तयोर्बिलात् कतिमितैः साम्येन गत्योर्युतिः ॥

न्यास



स्तम्भ ९ बर्हिविलान्तरम् २७। जाता विल-
युत्योर्मध्यहस्ताः १२ ॥


कोटिकर्णान्तरे भुजे च दृष्टे पृथक्करण-
सूत्रं वृत्तम्।

भुजाद्वर्गितात् कोटिकर्णान्तराप्त
द्विधा कोटिकर्णान्तरेणोनयुक्तम्।
तदर्द्धे क्रमात् कोटिकर्णौ भवेता
मिद धीमता वेद्य सर्वत्र योज्यम् ॥
सखे। पद्म तन्मज्जनस्थानमध्य
भुज कोटिकर्णान्तर पद्मदृश्यम्।
नल कोटिरेतन्मित स्याद्यदम्भो
वदैव समानीय पानीयमानम् ॥

उदाहरणम्।

चक्रक्रौञ्चाकुलितसलिले क्वापि दृष्ट तडागे
तोयादूर्द्ध्वं कमलकलिकाग्र वितस्तिप्रमाणम्।
मन्द मन्द चलितमनिलेनाहत हस्तयुग्मे
तस्मिन्मग्नं गणक। कथय क्षिप्रमम्भ प्रमाणम् ॥

न्यास



कोटिकर्णान्तर $\frac{१}{२}$। भुज २। लब्ध जलगाम्भीर्य्यं $\frac{१५}{४}$। इय कोटि $\frac{१५}{४}$। इयमेव कोटि कलिकामानयुता जात कर्ण $\frac{१७}{४}$ ॥


कोट्येकदेशेन युते कर्णे भुजे च दृष्टे कोटिकर्ण-
ज्ञानाय करणसूत्रं वृत्तम्।

द्विनिघ्नतालोच्छ्रितिसयुत यत्
सरोऽन्तर तेन विभाजिताया।
तालोच्छ्रितेस्तालसरोऽन्तरघ्ना
उड्डीयमान खलु लभ्यते तत् ॥

उदाहरणम्।

वृक्षाद्धस्तशतोच्छ्रयाच्छतयुगे वाप्यां कपि कोऽप्यगा-
दुत्तीर्य्याथ परो द्रुत श्रुतिपथेनोड्डीय किञ्चिद्द्रुमात्।
जातैव समता तयोर्यदि गतावुड्डीयमान किय-
द्विद्वन्। चेत्सुपरिश्रमोऽस्ति गणिते क्षिप्र तदाचक्ष्व मे।

न्यास



वृक्षवाप्यन्तर २००। वृक्षोच्छ्राय १००। लब्धमुड्डीयमान ५०। कोटि १५०। कर्ण २५०। भुज २०० ॥


भुजकोट्योर्योगे कर्णे च ज्ञाते पृथक्
करणसूत्र वृत्तम्।

कर्णस्य वर्गाद्द्विगुणाद्विशोध्यो
दो कोटियोग. स्वगुणोऽस्य मूलम्।
योगो द्विधा मूलविहीनयुक्त
स्याता तदर्द्धे भुजकोटिमाने ॥

उदाहरणम्।

दशसप्ताधिक कर्णस्त्र्यधिका विंशति सखे।।
भुजकोटियुतिर्यत्र तत्र ते मे पृथग्वद ॥

न्यास




कर्ण १७। दो कोटियोग २३। जाते भुजकोटी ८। १५।

उदाहरणम्।

दो कोट्योरन्तर शैला कर्णो यत्र त्रयोदश।
भुजकोटी पृथक् तत्र वदाशु गणकोत्तम ॥

न्यास



कर्ण १३। भुजकोट्यन्तरम् ७। लब्धे भुज कोटी ५। १२ ॥


लम्बावबाधाज्ञानाय करणसूत्र वृत्तम्।

अन्योन्यमूलाग्रगसूत्रयोगात्
वेण्वोर्वधे योगहृते च लम्ब।
वंशौ स्वयोगेन हृतावभीष्ट-
भूघ्नौ च लम्बोभयत कुखण्डे ॥

उदाहरणम्।

पञ्चदशदशकरोच्छ्राय वेण्वोरज्ञातमध्यभूमिकयो।
इतरेतरमूलाग्रगसूत्रयुतेर्लम्बमानमाचक्ष्व ॥

न्यास



वंशौ १५। १०। जातो लम्ब ६। वंशान्तरभू ५। अत्र जाते भूखण्डे ३। २। अथवा भू १०। खण्डे ६। ४। वा भू १५। खण्डे ९। ६। वा भू २०। खण्डे १२। ८। एव

सर्वत्र लम्ब। स एव यद्यत्र भूमितुल्ये भुजे वंश कोटिस्तदा भूखण्डेन किमिति त्रैराशिकेन सर्वत्र प्रतीति


अथ अक्षेत्रलक्षणे सूत्रम्।


धृष्टोद्दिष्टम्रजुभुज क्षेत्रं यत्रैकबाहुत सल्पा।
तदितरभुजयुतिरथवा तुल्या ज्ञेय तदक्षेत्रम् ॥

उदाहरणम्।

चतुरस्रे त्रिषड्द्वार्का भुजास्त्र्यस्रे त्रिषणवा।
उद्दिष्टा यत्र धृष्टेन तदक्षेत्र विनिर्दिशेत् ॥

एते अनुपपन्ने क्षेत्रे।






भुजप्रमाणा ऋजुशलाका भुजस्थानेषु विन्य-
स्यानुपपत्तिर्दर्शनीया ॥

आबाधादिज्ञानाय करणसूत्रमार्य्याद्वयम्।
त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्ध्या।
द्विस्था भूरूनयुता दलितावाधे तयो स्याताम् ॥
स्वाबाधा भुजकृत्योरन्तरमूल प्रजायते लम्ब।
लम्बगुण भूम्यर्द्धं स्पष्टं त्रिभुजे फल भवति ॥

उदाहरणम्।

क्षेत्रे मही मनुमिता त्रिभुजे भुजौ तु यत्र
त्रयोदशतिथिप्रमितौ च यस्य।
तत्रावलम्बकमथो कथयावबाधे
क्षिप्र तथा च समकोष्ठमिति फलाख्याम् ॥

न्यास




भू १४। भुजौ १३। १५। लब्धे आबाधे ५। ९। लम्बश्च १२। क्षेत्रफलञ्च ८४ ॥

ऋणाबाधोदाहरणम्।

दशसप्तदशप्रमौ भुजौ
त्रिभुजे यत्र नवप्रमा मही।
अवधे वद लम्बक तथा
गणितं गाणितिकाशु तत्र मे ॥

न्यास



भुजौ १०। १७। भूमि ९। अत्र त्रिभुजे भुजयोर्योग इत्या-

दिना लब्धम् २१। अनेन भूरूना न स्यात्। अस्मादेव भूरपनीता। शेषार्द्धमन्तरगता बाधा द्विवे परीत्यनेनेत्यर्थः। तथा जाते आबाधे ६। १५। अत उभयत्रापि जातो लम्ब ८। फलम् ८६॥

चतुर्भुजत्रिभुजयोरस्पष्टस्पष्टफलानयने


करणसूत्र वृत्तम्।

सर्व्वदोर्युतिदल चतु स्थित
बाहुभिर्विरहितञ्च तद्वधात्।
मूलमस्फुटफल चतुर्भुजे
स्पष्टमेव मुदित त्रिबाहुके॥

उदाहरणम्।

भूमिश्चतुर्दशमिता मुखमङ्कसङ्ख्यं
बाहू त्रयोदशदिवाकरसम्मितौ च।
लम्बोऽपि यत्र रविसङ्घ्यक एव तत्र
क्षेत्रे फल कथय तत् कथित यदाद्यै॥

न्यास




भूमि १४। मुखम् ९। बाहू १३। १२। लम्ब १२। उक्तवत् करणेन जात क्षेत्रफल करणी २९८०।

अस्या पद किञ्चिन्नूनमेकचत्वारिंशच्छतम् १४१। इदमत्र क्षेत्रे न वास्तव फल किन्तु लम्बेन निघ्न कुमुखैक्यखण्डमिति वक्ष्यमाणकरणेन वास्तव फल १३८।

अत्र त्रिभुजस्य पूर्व्वोदाहृतस्य।

न्यास



भूमि १४। भुजौ १३। १५। अनेनापि प्रकारेण त्रिबाहुके तदेव वास्तव फल ८४। अत्र चतुर्भुजस्यास्पष्टमुदितम्॥

अथ स्थूलत्वनिरूपणार्थं सूत्र सार्द्धवृत्तम्।

चतुर्भुजस्यानियतौ हि कर्णौ
कथ ततोऽस्मिन्नियतं फल स्यात्।
प्रसाधितौ तच्छ्रवणौ यदाद्यै
स्वकल्पितौ तावितरत्र न स्तः॥
तेष्वेव बाहुष्वपरौ च कर्णा-
वनेकधा क्षेत्रफल ततश्च॥

चतुर्भुजे हि एकान्तरकोणावाक्रम्यान्त प्रवेश्यमानौ तत्संसक्त स्वकर्णं सङ्कोचयतः। इतरौ तु बहिः प्रसरन्तौ स्वकर्ण वर्द्धयतः अत उक्त तेष्वेव बाहुष्वपरौ च कर्णाविति।

लम्बयोः कर्णयोर्व्वैकमनिर्दिश्यापरः कथम्।
पृच्छत्यनियतत्वेऽपि नियतञ्चापि तत्फलम्॥
स पृच्छक पिशाचो वा वक्ता वा नितरा तत।
यो न वेत्ति चतुर्ब्बाहुक्षेत्रस्यानियतां स्थितिम्॥

समचतुर्भुजायतयोः फलानयने करणसूत्रं

सार्द्धश्लोकद्वयम्।


इष्टा श्रुतिस्तुल्यचतुर्भुजस्य
कल्प्याथ तद्वर्गविवर्जिता या।
चतुर्गुणा बाहुकृतिस्तदीय
मूलं द्वितीयश्रवणप्रमाणम्॥
अतुल्यकर्णाभिहतिर्द्विभक्ता
फल स्फुट तुल्यचतुर्भुजे स्यात्।
समश्रुतौ तुल्यचतुर्भुजे च
तथायते तद्भुजकोटिघात॥
चतुर्भुजेऽन्यत्र समानलम्बे
लम्बेन निघ्न कुमुखैक्यखण्डम्॥

अथोद्देशक।

क्षेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य
कर्णौ ततश्च गणित गणक। प्रचक्ष्व।
तुल्यश्रुतेश्च खलु तस्य तथायतस्य
यद्विस्तृती रसमिताष्टमितञ्च दैर्घ्यम्॥

प्रथमोदाहरणे।


न्यास



भुजा २५। २५। २५। २५। अत्र त्रिंशन्मितामेका ३० श्रुति प्रकल्प्य यथोक्तकरणेन जातान्या श्रुति ४० फलञ्च ६००॥

अथवा।


न्यास



चतुर्दशमितामेका १४। श्रुति प्रकल्प्योक्तवत् करणेन जाता अन्या श्रुति ४८। फलञ्च ३३६॥

द्वितीयोदाहरणे।


न्यास



तत्कृत्योर्योगपद कर्ण इति जाता कर्णगता श्रुतिरुभयत्र तुल्यैव १,२५०। गणितञ्च ६२५।

अथायतस्य।

न्यास




विस्तृति ६। दैर्घ्यम् ८। अस्य गणितम् ४८।

उदाहरणम्।

क्षेत्रस्य यस्य वदनं मदनारितुल्यं
विश्वम्भरा द्विगुणितेन मुखेन तुल्या।
बाहू त्रयोदशनखप्रमितौ च लम्ब
सूर्य्योन्मितश्च गणित वद तत्र किं स्यात्॥


न्यासः





वदनम् ११। विश्वम्भरा २२। बाहू १३। २०। लम्ब १२।

अत्र सर्व्वदोर्युतिदलमित्यादिना स्थूलफल २५०। वास्तवन्तु लम्बेन निघ्न कुमुखैक्यखण्डमिति जात फलम् १९८। क्षेत्रस्य खण्डत्रय कृत्वा फलानि पृथगानीय ऐक्य कृत्वास्य फलोपपत्तिर्दर्शनीया खण्डत्रयदर्शनम्।

न्यासः








प्रथमस्य भुजकोटिकर्णाः ५। १२। १३। द्वितीयस्यायतस्य विस्तृति ६। दैर्घ्यम् १२। तृतीयस्य भुजकोटिकर्णाः १६। १२। २०।

अत्र त्रिभुजयोः क्षेत्रयोर्भुजकोटिघातार्द्ध फल आयते चतुरस्रे क्षेत्रे तद्भुजकोटिघातः फल यथा। प्रथमक्षेत्रे फलम् ३०। द्वितीये ७२। तृतीये ९६। एषामैक्य सर्व्वक्षेत्रफलम् १९८।

अथान्यदुदाहरणम् ।

पञ्चाशदेकसहिता वदनं यदीय
भू पञ्चसप्ततिमिता प्रमितोऽष्टषष्ट्या ।
सव्यो भुजो द्विगुणविंशतिसन्मितोऽन्य-
स्तस्मिन् फलं श्रवणलम्बमिती प्रचक्ष्व ॥

न्यास



वदनम् ५१ ।
भूमि ७५ ।
भुजौ ६८ ।
४० ।

अत्र फलावलम्बश्रुतीना सूत्रं वृत्तार्द्धम् ।

ज्ञातेऽवलम्बे श्रवणं श्रुतौ तु
लम्बं फलं स्यान्नियतन्तु तत्र ।

कर्णस्यानियतत्वात् लम्बोऽप्यनियत इत्यर्थ ॥

लम्बज्ञानाय करणसूत्रं वृत्तार्द्धम् ।

चतुर्भुजान्तस्त्रिभुजेऽवलम्ब
प्रागवत् भुजौ कर्णभुजौ मही भू ॥

अत्र लम्बज्ञानार्थं सव्यभुजाग्राद्दक्षिणभुजमूल-गामी इष्ट कर्णं सप्तसप्ततिमित ७७ कल्पित-स्तेन चतुर्भुजान्तस्त्रिभुज कल्पित तत्रासौ कर्णं एको भुज ७७ । द्वितीयस्तु सव्यभुज ६८ । भू सैव ७५ । अत्र प्रागवल्लब्धो लम्ब २०८/५ ।

लम्बे ज्ञाते कर्णज्ञानार्थं सूत्रं वृत्तम् ।


यल्लम्बलम्बाश्रितबाहुवर्ग-
विश्लेषमूल कथिताबधा सा ।
तदूनभूवर्गसमन्वितस्य
यल्लम्बवर्गस्य पद स कर्णं ॥


अत्र सव्यभुजाग्राल्लम्ब किल कल्पित २०८/५ । अतो जाताबाधा १४४/५ । तदूनभूवर्गसमन्वितत्या-दिना जातः कर्णं ७७ ॥

द्वितीयकर्णज्ञानार्थं सूत्रं वृत्तद्वयम् ।

इष्टोऽत्र कर्णं प्रथमं प्रकल्प्य
त्र्यस्रे तु कर्णोभयत स्थिते ये ।
कर्णं तयो क्ष्मामितरौ च बाहू
प्रकल्प्य लम्बावबधे च साध्ये ॥
आबाधयोरेककुप्स्थयोर्यत्
स्यादन्तरं तत् कृतिसयुतस्य ।
लम्बैक्यवर्गस्य पद द्वितीय
कर्णो भवेत् सर्वचतुर्भुजेषु ॥

न्यास





तत्र चतुर्भुजे सव्यभुजाग्रात् दक्षिणभुजमूल-गामिन कर्णस्य मानं कल्पितम् ७७ । तत्कर्ण-रेखावच्छिन्नस्य क्षेत्रस्य मध्ये कर्णरेखोभयतो ये त्र्यस्रे उत्पन्ने तयो कर्णं भूमी तदितरौ च भुजौ प्रकल्प्य प्रागवल्लम्ब आबाधा च साधिता तद्-यथा लम्ब ६० । द्वितीयलम्ब २४ । आबाधयो ४५ । ३२ । एककुप्स्थयोरन्तरस्य १३ । कृते १६९ लम्बैक्य ८४ । कृतेस्त ७०५६ । योग ७२२५ । तस्य पद द्वितीयकर्णप्रमाणम् ८५ ।

अत्रेष्टकर्णकल्पने विशेषोक्तिसूत्रं सार्द्धवृत्तम् ।

कर्णाश्रित स्वल्पभुजैक्यमुर्व्वीं
प्रकल्प्य तच्छेषमितौ च बाहू ।
साध्योऽवलम्बोऽथ तथान्यकर्ण
सोर्व्या कथञ्चित्क्रवणो न दीर्घ ॥
तदन्यलम्बान्न लघुस्तथेट
ज्ञात्वेष्टकर्णं सुधिया प्रकल्प्य ॥

चतुर्भुज हि एकान्तरकोणावाक्रम्य सङ्कोच्य-मान त्रिभुजत्व याति तत्रैककोणे लग्नलघुभुजयो-रैक्य भूमिरितरौ भुजौ प्रकल्प्य साधित स च लम्बादून सङ्कोच्यमान कर्णं कथञ्चिदपि न स्यात् तदितरौ भुजौ भूमेरधिकौ न स्यातामेव-मुभयथापि एतदनुक्तमपि बुद्धिमता ज्ञायते ॥

विषमचतुर्भुजफलानयनाय करणसूत्रं
वृत्तार्द्धम् ।

त्र्यस्रे तु कर्णोभयत स्थिते ये
तयो फलैक्य फलमत्र नूनम् ॥

अनन्तरोक्तक्षेत्रान्तस्त्र्यस्रयो फले । ९२४ । २३१० । अनयोरैक्यम् ३२३४ । तस्य फलम् ॥

समानलम्बस्याबधादिज्ञानाय करणसूत्रं
वृत्तद्वयम् ।


समानलम्बस्य चतुर्भुजस्य
मुखोनभूमि परिकल्प्य भूमिम् ।
भुजौ भुजौ त्र्यस्रवदेव साध्ये
तस्याबधे लम्बमितिस्ततस्च ॥
अबाधयोना चतुरस्रभूमि-
स्तल्लम्बवर्गैक्यपदं श्रुति स्यात् ।
समानलम्बे लघुदो कुयोगा-
न्मुखान्यदो सयुतिरल्पिका स्यात् ॥

उदाहरणम् ।

द्विपञ्चाशन्मितव्येकचत्वारिंशन्मितौ भुजौ ।
मुखन्तु पञ्चविंशत्या तुल्यं षष्ट्या मही किल ॥
अतुल्यलम्बका क्षेत्रमिदं पूर्वैरुदाहृतम् ।

षट्पञ्चाशत् त्रिषष्टिस्च नियते कर्णयोर्मिती ॥
कर्णौ तत्रापरौ ब्रूहि समलम्बस्च तत्कृतौ ॥


न्यास



अत्र वृहत् कर्णं त्रिषष्टि-मित प्रकल्प्या-त्र ज्ञात प्रा-गवदन्य कर्णं ५६ ॥

अथ षट्पञ्चाशत्स्थाने द्वात्रिंशन्मित कर्णं ३२ प्रकल्प्य प्रागवत् साध्यमाने कर्णे ।


न्यास



जात करणीखण्डद्वयम् ६२१ । २७०० अनयो-र्मूलयो २४ २७/२५ । ५१ २४/२५ । ऐक्य द्वितीय कर्णं ७६ २२/२५ ।


अथ तदेव क्षेत्रञ्चेत् समलम्बम् ।

न्यास



तदा मुखोनभूमि परिकल्प्य भूमिमिति-ज्ञानार्थं त्र्यस्रङ्कल्पितम् । अत्र क्षेत्रे लम्बाग्रद्वारयो षट्शते पतिते ।

न्यास




अत्राबाधे जाते ३/५ १०२/५ लम्बस्च कर-णीगतो जात ३८०१६/२५ आसन्न-मूलकरणेन जात ३८ ६००/६२५ । अथ तत्र चतुर्भुजे समलम्ब लब्धाबाधोनित-भूमे समलम्बस्य च वर्गयोग ५०४९ । अय कर्णवर्ग । एव वृहदाबाधातो द्वितीयकर्णवर्ग २१७६ । अनयोरासन्नमूलकरणेन जातौ कर्णौ ७१ १/२० ४६ १४/२० एव चतुरस्रे तेष्वेव बाहुष्वन्यौ कर्णौ बहुधा भवत एवमनियतत्वेऽपि नियतावेव कर्णावानीतौ ब्रह्मगुप्ताद्यैस्तदानयन यथा ।

कर्णाश्रितभुजघातैक्यमुभयथान्योन्यभाजित गुणये-येत् । योगेन भुजप्रतिभुजहत्यो कर्णौ पदे विषमे ।

क्षेत्रं

न्यास




कर्णाश्रितभुजघातेति एकवारमनयोः २५। ३९। घात ९७५। तथा ५२। ६०। अनयोर्घात ३१२०। घातयोर्द्वयोरैक्यम् ४०९५। तथा द्वितीयवारम् २५। ५२। अनयोर्घाते जातम् १३००। तथा द्वितीयवारम् ३९।६० अनयोर्घाते २३४०। घातयोर्द्वयोरैक्यम् ३६४०। एतदैक्य भुजप्रतिभुजयोः५२। ३९। घात २०२८। पश्चात् २५। ६०। अनयोर्वधः १५००। तयोरैक्यम् ३५२८। अनेनैक्येन ३६४० गुणित जात पूर्व्वैक्य १२,८४१,९२०। प्रथमकर्णाश्रितभुजघातैक्येन ४०९५। भक्त लब्ध ३१३६। अस्य मूल ५६। एककर्णस्तथा द्वितीयकर्णार्थं प्रथमकर्णाश्रितभुजघातैक्यम् ४० ९५। भुजप्रतिभुज-३५२८। वधयोगगुणित जात १४,४४७,१६०। अन्यकर्णाश्रितघातैक्येन ३६४० भक्त लब्ध ३९६९। अस्य मूलम् ६३। द्वितीय कर्ण। अस्मिन् विषमे क्षेत्रे कर्णौ साधन अस्य कर्णानयनस्य प्रक्रिया गौरवम्॥

लघुप्रक्रियादर्शनद्वारेणाह।

अभीष्टजात्यद्वयबाहुकोटय
परस्पर कर्णहता भुजा इति।
चतुर्भुज यद्विषम प्रकल्पित
श्रुती तु तत्र त्रिभुजद्वयात्तत॥
बाह्वोर्वध कोटिवधेन युक् स्या-
देका श्रुति कोटिभुजा वधैक्यम्।
अन्या लघौ सत्यपि साधनेऽस्मिन्
पूर्व्वैः कृत यद्गुरु तन्न विद्म॥

जात्यक्षेत्रद्वयम्।

न्यास




एतयो इतरेतरकर्णहता भुजा कोटय इतरेतरकर्णहता कोटयो भुजा इति कृते जातम् २५ ६०। ५२। ३९। तेषा महती भूर्लघु मुखमितरौ बाहू इति प्रकल्प्य क्षेत्रदर्शन इमौ कर्णौ महतायासेनानीतौ ६३। ५६। अस्यैव जात्यद्वयस्योत्तरोत्तरभुजकोट्योर्घातौ जातौ ३६। २०। अनयोरैक्यमेक कर्ण ५६। बाह्वो ३। ५। कोट्योश्च ४। १२। घातौ १५। ४८। अनयो-

क्षेत्रं

रैक्यमन्यः कर्णः ६३। एव श्रुती स्याता एव सुखेन जाते॥

अथ यदि पार्श्वभुजयोर्व्यत्यय कृत्वा न्यस्त क्षेत्रम्।

न्यास



क्षेत्रं


तदा जात्यद्वयकर्णयोर्व्वध ६५। द्वितीयकर्ण॥

अथ सूचीक्षेत्रोदाहरणम्।

क्षेत्रे यत्र शतत्रय ३०० क्षितिमितिस्तत्वेन्दु १२५ तुल्य मुख बाहू खाङ्कृतिभिः २६० शराति धृतिभि १९५ तुल्यौ च तत्र श्रुती। एका खाष्टयमै २८० समा तिथिगुणै ३१५ अन्याथ तल्लम्बकौ तुल्यौ गोष्टतिभि १८९ तथा जिनयमै २२४ र्योगाच्छ्रवो लम्बयो॥

तत् खण्डे कथयाधरे श्रवणयोर्योगाच्च लम्बावधे तत्सूची निजमार्गवृद्धभुजयोर्योगाद्यथा स्यात्तत। साबाध वद लम्बकश्च भुजयो सूच्या प्रमाणे च के सर्व्व गाणितिक। प्रचण्ड नितरा क्षेत्रेऽत्र दक्षोऽसि चेत्॥

न्यास।



सूच्याबाधा $\frac{१५३६}{१०}$ सूच्याबाधा $\frac{७५६४}{१०}$।

भूमानम् ३००। मुखम् १२५। बाहू २६०। १९५। कर्णौ २८०। ३१५। लम्बौ १८९। २२४॥

अथ सन्ध्याद्यानयनाय करणसूत्र वृत्तद्वयम्।

लम्बतदाश्रितबाह्वोर्मध्य सन्ध्याख्यमस्य लम्बस्य।
सन्ध्योना भू पीठ साध्य यस्याधर खण्डम्॥
सन्धिर्द्विस्थः परलम्बश्रवणाहत परस्य पीठेन।
भक्तो लम्बश्रुत्योर्योगात् स्यातामध खण्डे॥

लम्ब १८९। तदाश्रितभुज १९५। अनयोर्मध्ये यल्लम्बलम्बाश्रितबाहुवर्गेत्यादिना गता बाधा सन्धिसञ्ज्ञा ४८। तदूनितभूरिति द्वितीया बाधा सा पीठसञ्ज्ञा २५२।

एव द्वितीयलम्ब २२४। तदाश्रितभुज २६०। पूर्व्ववत् सन्धि १३२। पीठम् १६८।

अथाद्यलम्बस्याधः १८९। खण्ड साध्यम्।

अस्य सन्धि ४८। द्विस्थ ४८। परलम्बेन २२४। श्रवणेन च २८०। पृथग्गुणित १०७५२। १३४४०। परस्य पीठेन १६८। भक्तो लब्ध लम्बाध खण्डम् ६४। श्रवणाध खण्डञ्च ८०।

एव द्वितीयलम्बस्य २२४। सन्धि १३२। परलम्बेन १८९। कर्णेन च ३१५। पृथग्गुणित परस्य पीठेन २५२। भक्तो लब्ध लम्बाध खण्डम्। ९९। श्रवणाध खण्डञ्च १६५।

अथ कर्णयोर्योगादधोलम्बज्ञानार्थं सूत्र वृत्तम्।

लम्बौ भूघ्नौ निजनिजपीठविभक्तौ च वधौ स्त।
ताभ्या प्राग्वत् श्रुत्योर्योगाल्लम्ब कुखण्डे च॥

लम्बौ १८९। २२४। भू ३००। घ्नौ जातौ ५६७००। ६७२००। स्वस्वपीठाभ्या २५२। १६८। भक्तौ एवमत्र लब्धौ वधौ २२५। ४००। आभ्यामन्योन्यमूलाग्रगसूत्रयोगादित्यादिकरणेन लब्ध कर्णयोगादधोलम्ब। १४४। भूखण्डे च १०८। १९२॥

अथ सूच्याबाधालम्बभुजज्ञानार्थं सूत्र वृत्तत्रयम्।

लम्बहतो निजसन्धि परलम्बगुण समाङ्क्यो ज्ञेय।
समपरसन्ध्योरैक्य हारस्तेनोद्धृतौ तौ च॥
समपरसन्धी भूघ्नौ सूच्याबाधे पृथक् स्याताम्।
हारहृत परलम्ब सूचीलम्बो भवेद्भूय॥
सूचीलम्बघ्नभुजौ निजनिजलम्बोद्धृतौ सूच्या।
एव क्षेत्रक्षोद प्राज्ञैस्त्रैराशिकात् ज्ञेय॥

अत्र किलायं लम्ब: २२४। अस्य सन्धि: १३२। अयं परलम्बेन १९८। गुणितो २२४। अनेन भक्तो जात: समाङ्क: $\frac{८६१}{८}$। अस्य परसन्धेश्च ४८। योगो हार: $\frac{१२७५}{८}$। अनेन भूघ्न: ३००। सम: $\frac{२६७३००}{८}$। परसन्धिश्च। $\frac{१४४००}{१}$ भक्तो जाते सूच्याबाधे $\frac{३५६४}{१७}$। $\frac{१५३६}{१७}$। एवं द्वितीय: समाङ्क: $\frac{५१२}{६}$।

द्वितीयो हार: $\frac{१७००}{६}$। अनेन भूघ्न: स्वीय: सम: $\frac{१५३६००}{६}$। परसन्धिश्च $\frac{३६६००}{१}$। भक्तो जाते सूच्याबाधे $\frac{१५३६}{१७}$ $\frac{३५६४}{१७}$। परलम्ब: २२४। भूमि ३००। गुणो हारेण $\frac{१७००}{६}$। भक्तो जात: सूचीलम्ब: $\frac{६०४८}{१७}$। सूचीलम्बेन भुजौ १९५। २६०। गुणितौ स्वस्वलम्बाभ्याम् १९८।२२४। यथाक्रमं भक्तौ जातौ स्वमार्गस्थौ सूचीभुजौ $\frac{६२४०}{१७}$ $\frac{७०२०}{१७}$।


एवमत्र सर्वत्र भागहारराशिं प्रमाणं गुण्यगुणकौ तु यथायोग्यं फलेच्छे प्रकल्प्य सुधिया त्रैराशिकमूह्यम्॥

अथ वृत्तक्षेत्रे करणसूत्रं वृत्तम्।

व्यासे भनन्दाग्नि ३९२७ हते विभक्ते
खबाणसूर्यैः १२५० परिधिः स सूक्ष्मः।
द्वाविंशतिघ्ने विहृतेऽथ शैलैः ७
स्थूलोऽथवा स्याद्व्यवहारयोग्यः॥


उदाहरणम्।

विष्कम्भमानं किल सप्त यत्र
तत्र प्रमाणं परिधेः प्रचक्ष्व।
द्वाविंशतिर्यत् परिधिप्रमाणं
तद्व्याससंख्यां च सखे विचिन्त्य॥

व्यास:


व्यासमानम् ७। लब्धं परिधिमानम् २१ $\frac{१२३६}{१२५०}$। स्थूलो वा परिधिर्लब्ध: २२।

अथवा परिधितो व्यासानयनाय।

व्यास:


गुणहारविपर्ययेण व्याससमानं सूक्ष्मम् ७ $\frac{११}{३९२७}$। स्थूलं वा ७।


वृत्तगोलयोः फलानयने करणसूत्रं वृत्तम्।

वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं यत्
क्षुण्णं वेदैरुपरि परितः कन्दुकस्येव जालम्।
गोलस्यैव तदपि च फलं पृष्ठजं व्यासनिघ्नं
षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम्॥

उदाहरणम्।


यद्व्यासस्तुरगैर्मितः किल फलं क्षेत्रे समे तत्र किं
व्यासः सप्तमितश्च यस्य सुमते गोलस्य तस्यापि किम्।
पृष्ठे कन्दुकजालसन्निभफलं गोलस्य तस्यापि किं
मध्ये ब्रूहि घनं फलं च विमलां चेद्वेत्सि लीलावतीम्॥

वृत्तक्षेत्रफलदर्शनाय।

व्यास:



व्यासः ७। परिधिः २१ $\frac{१२३६}{१२५०}$। क्षेत्रफलम् ३८ $\frac{२४२३}{५०००}$।

गोलपृष्ठफलदर्शनाय।

व्यास:


व्यासः ७। गोलपृष्ठफलम् १५३ $\frac{११७३}{१२५०}$।

गोलान्तर्गतघनफलदर्शनाय।

व्यास:


व्यासः ७। गोलस्यान्तर्गतं घनफलम् १७९ $\frac{२४८७}{२५००}$।

अथ प्रकारान्तरेण तत्फलानयने करणसूत्रं सार्धवृत्तम्।

व्यासस्य वर्गे भनवाग्निनिघ्ने
सूक्ष्मं फलं पञ्चसहस्रभक्ते।
रुद्राहते शक्रहृतेऽथवा स्यात्
स्थूलं फलं तद्व्यवहारयोग्यम्॥
घनीकृतव्यासदलं निजैक-
विंशांशयुग्गोलघनं फलं स्यात्॥


व्यासः ७। अस्य वर्गः ४९। भनवाग्निनिघ्नः पञ्चसहस्रभक्तो तदेव सूक्ष्मं फलम् ३८ $\frac{२२३४}{५०००}$। अथवा व्यासस्य वर्गः ४९। रुद्राहते ५३९। शक्रहृते लब्धं स्थूलं फलम् ३८ $\frac{१}{२}$। घनीकृतव्यासदलम् $\frac{३४३}{२}$। निजैकविंशांशयुग्गोलस्य घनफलं स्थूलम् १७९ $\frac{२}{३}$।

शरजीवानयनाय करणसूत्रं सार्धवृत्तम्।

ज्याव्यासयोगान्तरघातमूलं
व्यासस्तदूनो दलितः शरः स्यात्॥
व्यासाच्छरोनाच्छरसंगुणाच्च
मूलं द्विनिघ्नं भवतीह जीवा।
जीवार्धवर्गे शरभक्तयुक्ते
व्यासप्रमाणं प्रवदन्ति वृत्ते॥

उदाहरणम्।

दशविस्तृतिवृत्तान्तर्यत्र ज्या षण्मिता सखे।
तत्रेषुं वद बाणाज्ज्यां ज्याबाणाभ्यां च विस्तृतिम्॥

व्यास:


व्यासः १०। ज्या ६। योगः १६। अन्तरम् ४। घातः ६४। मूलम् ८। एतदूनो व्यासः २।

क्षेत्रं

दलितं १। जातः शरः १। व्यासात् १०। शरोनात् ९। शर १। सङ्गुणात् ९। मूलम् ३। द्विनिघ्नं जाता जीवा ६। एवं ज्ञाताभ्यां ज्याबाणाभ्यां व्यासानयनं यथा जीवा- ६। दलं ३। वर्गो ९। शर १। भक्ते ९। शर १। युक्ते जातो व्यासः १०।

अथ वृत्तान्तस्त्र्यस्रादिनवास्रान्तक्षेत्राणां
भुजमानानयनाय करणसूत्रं
वृत्तत्रयम्।


त्रिद्व्यङ्काग्निनभश्चन्द्रैः १०३९२३
स्त्रिबाणाष्टयुगाष्टभिः ८४८५३।
वेदाग्निबाणखाश्वैश्च ७०५३४
खखाभ्राभ्ररसैः ६०००० क्रमात्॥
बाणेषुनखबाणैश्च ५२०५५
द्विद्विनन्देषुसागरैः ४५९२२।
कुरामदशवेदैश्च ४१०३१ वृत्तव्यासे समाहते॥
खखखाभ्रार्क- १२०००० संभक्ते
लभ्यन्ते क्रमशो भुजाः।
वृत्तान्तस्त्र्यस्रपूर्वाणां
नवास्रान्तं पृथक् पृथक्॥

उदाहरणम्।

सहस्रद्वितयव्यासं यद्वृत्तं तस्य मध्यतः।
समत्र्यस्रादिकानां मे भुजान् वद पृथक् पृथक्॥

अथ वृत्तान्तस्त्रिभुजे भुजमानानयनाय।


व्यास.



व्यासः २०००। त्रिद्व्यङ्काग्निनभश्चन्द्रैः १०३९२३। गुणित. २०७८४६०००। खखखाभ्रार्कैः १२००००। भक्ते लब्धं त्र्यस्रे भुजमानं १७३२ १/२०।

वृत्तान्तश्चतुर्भुजे भुजमानानयनाय।

व्यासः




व्यासः २००० त्रिबाणाष्टयुगाष्टभिः ८४८५३ गुणित. १६९७०६,०००। खखखाभ्रार्कैः १२००००। भक्ते लब्धं चतुरस्रे भुजमानं १४१४ १३/६०।

क्षेत्रं

वृत्तान्तःपञ्चभुजे भुजमानानयनाय।


व्यासः



व्यासः २०००। वेदाग्निबाणखाश्वैः ७०५३४। गुणितः १४१०६८००० खखखाभ्रार्कैः १२००००। भक्ते लब्धं पञ्चास्रे भुजमानं ११७५ १७/२०।

वृत्तान्तःषड्भुजे भुजमानानयनाय।


व्यासः



व्यासः २००० खखाभ्राभ्ररसैः ६००००। गुणित १२०,०००,०००। खखखाभ्रार्कैः १२००००। भक्ते लब्धं षडस्रे भुजमानं १०००।

वृत्तान्तःसप्तभुजे भुजमानानयनाय।

व्यासः



व्यास. २००० बाणेषुनखबाणैः ५२०५५। गुणित. १०४,११०,०००। खखखाभ्रार्कैः १२००००। भक्ते लब्धं सप्तास्रे भुजमानं ८६७ ७/१२।

वृत्तान्तरष्टभुजे भुजमानानयनाय।

व्यासः




व्यासः २०००। द्विद्विनन्देषुसागरैः ४५९२२। गुणित ९१,८४४,०००। खखखाभ्रार्कैः १२००००। भक्ते लब्धमष्टास्रे भुजमानं ७६५ ११/३०।

क्षेत्रं

वृत्तान्तर्नवभुजे भुजमानानयनाय।

व्यासः



व्यासः २०००। कुरामदशवेदैः ४१०३१ गुणित ८२,०६२,०००। खखखाभ्रार्कैः १२००००। भक्तं लब्धं नवास्रे भुजमानं ६८३ १७/२०।

एवमिष्टव्यासाद्येभ्योऽन्यापि जीवाः सिध्यन्तीति तास्तु गोले ज्योत्पत्तौ वक्ष्ये।

अथ स्थूलजीवाज्ञानार्थं लघुक्रियया
करणसूत्रं वृत्तम्।


चापोननिघ्नपरिधिः प्रथमाह्वयः स्यात्
पञ्चाहतः परिधिवर्गचतुर्थभागः।
आद्योनितेन खलु तेन भजेच्चतुर्घ्न-
व्यासाहतं प्रथममाप्तमिह ज्यका स्यात्॥

उदाहरणम्।

अष्टादशांशेन वृतेः समान-
मेकादिनिघ्नेन च यत्र चापम्।
पृथक् पृथक् तत्र वदाशु जीवाः
खार्कैर्मितं व्यासदलं च यत्र॥

७५४

व्यासः



४२

व्यासः २४०। अत्र क्रियालाघवाय विंशतिः सार्धाङ्कशतांशमिलितं सूक्ष्मपरिधिः ७५४। अस्याष्टादशांशः ४२। अत्रापि अङ्कलाघवाय द्वयोरष्टादशांशयुतौ गृहीतः अनेन पृथक् पृथगेकादिगुणितेन तुल्यं धनूंषि कल्पितं ज्याः साध्याः।

अथवात्र सुखार्थं परिधेरष्टादशांशेन परिधिं धनूंषि चापवशात् ज्याः साध्यास्तथापि ता एव भवन्ति।

चापवशितं न्यासः। परिधिः १८। चापानि च १।२।३।४।५।६।७।८।९। यथोक्तकरणेन लब्धा जीवाः ४२।८२।१२०।१५४।१८४।२०८।२२६।२३६।२४०।

अथ चापानयनाय करणसूत्रं वृत्तम् ।
व्यासाब्धिघातयुतमौर्व्विकया विभक्तो
जीवाङ्घ्रिपञ्चगुणितः परिधेस्तु वर्गः ।
लब्धोनितात् परिधिवर्गचतुर्थभागा-
दाप्ते पदे वृतिदलात् पतिते धनुः स्यात् ॥

उदाहरणम् ।
विहिता इह ये गुणास्ततो
वद तेषामधुना धनुर्मितिम् ।
यदि तेऽस्ति धनुर्गुणक्रिया
गणिते गाणितिकातिनैपुणम् ॥

न्यासः ४२ । ८२ । १२० । १५४ । १८४ । २०८ । २२६ । २३६ । २४० । स एवापवर्त्तित-परिधिः १८ । जीवाङ्घ्रिणा । २१/२ पञ्चभिश्च ५ । परिधेः १८ । वर्गो ३२४ गुणितः १७०१० । व्यासा-२४० । ब्धि ४ । घात ६६० । युतमौर्विकयानया १००२ भक्तो लब्धः १७ । अत्राङ्कलाघवाय चतु-र्विंशतेर्द्वंशाधिकसहस्रांशयुतो गृहीतोऽनेनोनितात् परिधिः १८ । वर्गं ३२४ । चतुर्थभागात् ६४ । पदे प्राप्ते ८ । वृति १८ । दलात् ६ । पतिते १ । जातं धनुः एव जातानि धनूंषि । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ६ । एतानि परिधिव्यष्टा-दशांशेन गुणितानि स्युः । इति श्रीभास्करा-चार्य्यविरचितायां लीलावत्यां क्षेत्रव्यवहारः समाप्तः ॥

क्षेत्रकर्कटी, स्त्री, (क्षेत्रजाता कर्कटी । मध्य-पदलोपिकर्म्मधारयः ।) वालुकी । इति राज-निर्घण्टः ॥

क्षेत्रचिर्भिटा, स्त्री, (क्षेत्रजाता चिर्भिटा । शाक-पार्थिववत् मध्यपदलोपिसमासः ।) चिर्भिटा-कर्कटी । इति राजनिर्घण्टः ॥

क्षेत्रजः, पुं, (क्षेत्रे स्त्रीरूपक्षेत्रे गुर्व्वाद्यनुज्ञात-देवरादिशुक्रात् जायते इति । क्षेत्र+जन्+डः ।) स्वस्त्रियामन्यद्वारा जनितः पुत्रः । द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । (यथाह मनुः । ६ । १६७ ।
"यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥"
द्वादशविधपुत्रा यथा तत्रैव ।६।१५८—१६० ।
"पुत्त्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षड्दायादबान्धवाः ॥")
स च देवरादिना भ्रात्रादिभार्य्यायां यथोक्त-विधानोत्पन्नः । यथा,—
"अपुत्त्रां गुर्व्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥
आगर्भसम्भवाद्गच्छेत् पतितस्त्वन्यथा भवेत् ।
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत् सुतः ॥"
इति मिताक्षरायामाचाराध्यायः ॥

तत्पर्य्यायः । देवरादिजः २ । इति हेमचन्द्रः ॥*॥ तस्य पितृरिक्थभागित्वं यथा, मनुः ।६।१६५।
"औरसक्षेत्रजौ पुत्त्रौ पितृरिक्थस्य भागिनौ ।
दशापरे च क्रमशो गोत्ररिक्थांशभागिनः ॥"*
अनियोगोत्पन्नक्षेत्रजस्य औरसेन सह विभाग-माह मनुः । ६ । १६२ ।
"यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ ।
यद्यस्य पैत्रिकं रिक्थं स तद्गृह्णीत नेतरः ॥"
(अत्र कुल्लूकभट्टः । "यदीति । अपुत्त्रेण पर-क्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च धर्म्मत इति याज्ञ-वल्क्योक्तविषये यदा क्षैत्रिकस्य पितुः क्षेत्रजा-नन्तरमौरसः पुत्त्रो भवति तदा तौ औरसक्षेत्रजौ एकरिक्थिनौ एकस्य पितुर्यद्यपि रिक्थार्हौ भवतस्तथापि यद्यस्य जनकसम्बन्धि धनं तदेव स गृह्णीयात् न क्षेत्रजः क्षैत्रिकपितुः । यत्तु वक्ष्यति षष्ठन्तु क्षेत्रजस्यांशं प्रदद्यात् पैतृका-द्धनात् । औरसो विभजन् दायमिति तत्पुत्त्रवत् बीजिविषयम् । यत्तु याज्ञवल्क्येन उभयसम्बन्धि-रिक्थहरत्वमुक्तं तत् क्षैत्रिकपितुरौरसपुत्त्रा-भावे बोद्धव्यम् । मेधातिथिगोविन्दराजौ तु औरसमनियुक्तापुत्त्रञ्च विषयीकृत्य इमं श्लोकं व्याचक्षाते । तन्न । अनियुक्तापुत्त्रस्याक्षेत्रजत्वात् अनियुक्तासुतश्चेत्यनेन तस्य रिक्थग्रहणनिषे-धात् यद्येकरिक्थिनौ इत्यनन्वयाच्च ॥") एक-रिक्थिनौ एकस्यां जातौ रिक्थिनौ यस्य बीजाद्यो जातः स तस्य रिक्थं गृह्णीयात् । इतरोऽन्यबीजजो न गृह्णीयादित्यर्थः । स्त्रीधने यत् पितृदत्तं यद्धनं स्त्रियै तद्बीजजस्तद्धनं गृह्णीयात् नान्य इत्याह नारदः ।
"द्वौ सुतौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने ।
तयोर्यद्यस्य पित्र्यं स्यात् स तद्गृह्णीत नेतरः ॥"
इति दायतत्त्वम् ॥*॥
कलौ क्षेत्रजपुत्त्रकरणनिषेधो यथा, आदित्य-पुराणे ।
"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः ।
देवरेण सुतोत्पत्तिर्दत्तकन्या प्रदीयते ॥"
इत्यादि ।
"दत्तौरसेतरेषान्तु पुत्त्रत्वेन परिग्रहः ।"
इत्यादि ।
"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्ब्बकं बुधैः ॥"
इत्यादि च उद्वाहतत्त्वम् ॥*॥
क्षेत्रजाते त्रि ॥

क्षेत्रजा, स्त्री, (क्षेत्रज+स्त्रियां टाप् ।) श्वेतकण्ट-कारी । शशाण्डुली । गोमूत्रिका । शिल्पिका । चणिका । इति राजनिर्घण्टः ॥ स्वस्त्रियामन्य-द्वारा जाता कन्या च ॥

क्षेत्रज्ञः, पुं, (क्षेत्रं शरीरं एतच्छरीरं ममेति ज्ञात्वा यो जानाति आपादतलमस्तकं ज्ञानेन विषयीकरोति स्वाभाविकेन औपदेशिकेन वेद-नेन विषयीकरोति वा धर्म्मीवत्सवत् तत्फल-भोक्तृत्वादित्यर्थः । ज्ञा+"इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) शरीराधिदेवतम् । तत्पर्य्यायः । आत्मा २ पुरुषः ३ । इत्यमरः । १।४।२६ ॥ त्रीणि शरीराधिदेवतेऽन्तर्भोक्तरि । (क्षेत्रेषु सर्व्वदेहेषु सर्व्वान्तर्य्यामितया विराज-मानः सन् "सर्व्वज्ञः सर्व्वशक्तिमान् सर्व्वक्षेत्र-पालयिता" इत्यात्मस्वरूपं जानाति अनुभवति यः प्रज्ञानघनः परमपुरुषः स सर्व्वान्तरात्मा असंसारी परमेश्वरः ।) क्षेत्रं शरीरं जाना-तीति क्षेत्रे शरीरे जानाति ज्ञानवान् भव-तीति वा क्षेत्रज्ञः । ह्नजनादिति डः । इति भरतः ॥ तस्य पर्य्यायान्तरम् । सुबीजः ४ पुरुषः ५ अन्तर्यामी ६ ईश्वरः ७ पुद्गलः ८ परसंज्ञकः ६ । इति शब्दरत्नावली ॥ प्रधानम् १० । इति जटाधरः ॥*॥ (उभयतः प्रमाणं यथा, भगवद्गीतायाम् । १३ । १—२ ।
"इदं शरीरं कौन्तेय । क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥
क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥"
ईश्वरपक्षे भाष्यकृदर्थो यथा,—"क्षेत्रक्षेत्रज्ञा-युक्तो किमेतावन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्युच्यते क्षेत्रज्ञमिति । क्षेत्रज्ञं यथोक्तलक्षण-ञ्चापि मां परमेश्वरमसंसारिणं विद्धि जानीहि योऽसौ सर्व्वक्षेत्रेष्वेकः क्षेत्रज्ञो ब्रह्मादिस्तम्ब-पर्य्यन्तानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्व्वो-पाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धी-त्यभिप्रायः । हे भारत । यस्मात् क्षेत्रक्षेत्रज्ञे-श्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यद-वशिष्टमस्ति तस्मात् क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यज् ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तज्ज्ञानं सम्यक्ज्ञानमिति मतं अभिप्रेत-मित्यभिप्रायो मम ईश्वरस्य विष्णोः ॥" अपि च तत्रैव । १३ । २२ ।
"उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥"
विष्णुः । यथा, महाभारते । १३ । विष्णुसहस्र-नामकीर्त्तने । १४६ । १५ ।
"पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥")
वटुकभैरवः । यथा,—"क्षेत्रज्ञः क्षत्त्रियो विराट् ।" इति तस्य स्तोत्रम् ॥ छेकः । इति मेदिनी ॥ विदग्धः । कृषकः । इति शब्दरत्ना-वली ॥ शेषद्वयार्थे त्रि ॥

क्षेत्रदः, पुं, (क्षेत्रं शरीरं ददाति रोगादिभ्यो मोचयति स्तुतिपाठिनो भक्तस्येति भावः । क्षेत्र +दा+कः ।) वटुकभैरवः । यथा,—
"क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्त्रियो विराट् ।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत् ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे वटुक-भैरवस्तोत्रम् ॥*॥ (क्षेत्रं शस्याद्युत्पादनक्षमां भूमिं ददातीति ।) क्षेत्रदातरि त्रि ॥

क्षेत्रदूती, स्त्री, (क्षेत्रस्य क्षेत्रे वा दूतीव । यद्वा, क्षेत्रे शरीरे दूतीव । औषधान्तरैर्युक्तस्यास्य आरोग्यसंघटकतया तथात्वम् ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

क्षेत्रदेवता स्त्री, (क्षेत्राधिष्ठात्री देवता ।) केदाराधिष्ठात्री । सा च सर्पादिरूपा । यथा, “रक्ताक्षः कथयति । अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः । तस्य च कृषिं कुर्व्वतस्तदैव निष्फलः कालोऽतिवर्त्तते । अथैकस्मिन् दिवसे स ब्राह्मणः उष्णकालावसाने घर्म्मार्त्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तः । अनतिदूरे वल्मीकोपरि प्रसारितं वृहत्स्फुटाटोपं भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास । नूनमेषा क्षेत्रदेवता मया कदापि न पूजिता । तेनेदं मे कृषिकर्म्म विफलीभवति ।” इति पञ्चतन्त्रे काकोलूकीयं नाम ३ तन्त्रम् ॥

क्षेत्रप पुं, (क्षेत्रं शरीरं पाति रक्षति स्तोत्रकारिणो भक्तस्येति यावत् । क्षेत्र + पा रक्षणे “आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) वटुकभैरवः । यथा,—
“अस्त्रोर्भूताश्रयं न्यस्य वदने तीक्ष्णदर्शनम् ।
क्षेत्रप कार्णयोर्म्मध्ये क्षेत्रपालं हृदि न्यसेत ॥”
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे वटुकभैरवस्तोत्रम् ॥ * ॥ (क्षेत्रं शस्योत्पादनक्षमां भूमिं पातीति । क्षेत्र + पा + कः ।) क्षेत्ररक्षके त्रि ॥ (क्षेत्रं शरीरं विश्वं जगद् वा पाति अपरिमेयालौकिकैश्वर्य्यप्रभावेन चैतन्यदानेन वा इति व्युत्पत्त्या परमात्मा परमेश्वरः ॥)

क्षेत्रपति, पुं, (क्षेत्रस्य शस्यभूमेः पतिः ।) केदाराधिपः । वप्रस्वामी । यथा,—“अथ प्रभाते स क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः ।” इति हितोपदेशे मित्रलाभप्रकरणम् ॥ (क्षेत्रस्य शरीरस्य विश्वस्य वा पतिः । जीवः । अग्निः । परमात्मा । यथा तन्त्रसारे ।
“जीवं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे ।
स्वतन्त्र एव स कश्चित् क्षेत्रस्य पतिरिष्यते ॥”)

क्षेत्रपर्पटी, स्त्री, (क्षेत्रे पर्पटीव । यद्वा, क्षेत्रे जाता पर्पटी ।) क्षुपविशेषः । इति वैद्यकम् ॥ क्षेतपापड़ा इति भाषा ॥

क्षेत्रपाल, पुं, (क्षेत्रं पालयति रक्षतीति । क्षेत्र + पाल + णिच् + अण् अच् वा ।) देवताविशेषः । तद्भेदा यथा,—
“भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः ।
मातृकाबीजभेदेन सम्भिन्ना नामभेदतः ॥
अजरश्चापकुम्भश्च इन्द्रमूर्त्तिस्ततः परः ।
ईडाचारस्तोक्तमश्च उग्राह ऋषिसूदनः ॥
ऊष्मकतो लुप्तकेशस्य लूतकश्चैकदंष्ट्रकः ।
ऐरावतस्तौघसन्धुरौमघोशस्तथैव च ॥
अञ्जनस्तास्त्रवारश्च कपलः खरस्वानलः ।
गासुण्डश्चैव घण्टादोऽस्मनाश्च चक्रवारकः ॥
छटाटोपी घटाख्यो भञ्जीवश्च जड़बरः ।
टङ्कपाणिस्तथा चाम्यलानबन्धुश्च डामरः ॥
ढक्कारवो यवार्थश्च तड़िद्देहस्थिरस्तथा ।
दन्तुरो धनदश्चान्यो नतिकान्तः प्रचण्डकः ॥
फटकारी वीरसंघश्च भृङ्गाख्यो मेघभासुरः ।
युगान्तौ रौद्रवश्चाथ लम्बोष्ठो वसवस्तथा ॥
शूकनन्दः षडालाख्यः सुनामाद्यनुकस्तथा ।
एते भेदाः समाख्याता मातृकाक्षरयोनिकाः ॥”*॥
क्षेत्रपालकथनप्रयोजनं यथा —
“नामपद्यस्य वर्णानां यो वर्णो मातृकान्तरे ।
दृश्यते प्रथमं तत्र तत्राय क्षेत्रपालकः ॥
तत्र तत्र विधिर्ष्टात्मा भेदैरेतैर्व्यवस्थितः ।
ततो विधिष्टो यष्टव्यः क्षेत्रपालस्तु सर्व्वतः ॥
क्षेत्रपालमसम्पूज्य यः कर्म्म कुरुते क्वचित् ।
तस्य कर्म्मफलं हन्ति क्षेत्रपालो न संशयः ॥”
इति एकोनपञ्चाशत्क्षेत्रपालकथनम् ।
इति क्षेत्रपालप्रकरणे प्रयोगसारः ॥ * ॥
अथ क्षेत्रपालमन्त्राः । मन्त्रदेवप्रकाशिन्याम् ।
क्षौमित्तिवीजादि क्षेत्रपालाय इति नमोऽन्तः ।
अथ प्रणवादिर्व्वा मन्त्रः । तथा,—
“वर्णान्तयमी विन्दुयुक्तः क्षेत्रपालाय हृन्मनुः ।
ताराद्यो वसुवर्णोऽयं क्षेत्रपालस्य ईरितः ॥”
प्रातःकृत्यादानन्तरं प्राणायामान्तामस्य पूजां विधाय धर्म्मादिपीठं विन्यस्य ऋष्यादिन्यासं कुर्य्यात् । अस्य ब्रह्मा ऋषिर्गायत्री छन्दः क्षेत्रपालो देवता क्षौं वीजं आयेतिशक्तिः षड्दीर्घभाजा वीजेनाङ्गन्यासः । ततो ध्यानम् ।
“भालचन्द्रजटाधरं त्रिनयनं नीलाञ्जनाद्रिप्रभं दोर्द्दण्डात्तगदाकपालमरुणस्रग्गन्धवस्त्रोज्ज्वलम् ।
घण्टामेखलघर्घरध्वनिमिलज्झङ्कारभीमं विभुं वन्दे संहितसर्पकुण्डलधरं श्रीक्षेत्रपालं सदा ॥”
एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा धर्म्मादिकल्पितपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत् । अङ्गैः प्रथममावरणम् । अनलाख्याग्निकेशकरालघण्टारवमहाक्रोधपिङ्गिलाशनभिङ्गलाक्षोर्द्ध्वकेशैरष्टभिर्द्वितीयम् । इन्द्रादिभिस्तृतीयम् । वज्रादिभिश्चतुर्थम् । ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं लक्षजपः । आज्येन चरुणा दशांशहोमः । तथा च निबन्धे ।
“लक्षमेकं जपेन्मन्त्रं जुहुयात्तद्दशांशतः ।
चरुणा घृतसिक्तेन ततः क्षेत्रेशमर्च्चयेत् ॥”
मन्त्रदेवप्रकाशिकायान्तु प्रणवरहितोऽयं मन्त्रः ।
अस्य पुरश्चरणमयुतसंख्यजपः ॥ * ॥
अथास्य बलिविधानम् । रात्रौ गृहाङ्गने स्थण्डिलं कृत्वा तत्र देवं सपरिवारं सम्पूज्य देवस्य हस्ते बलिमन्त्रेण त्रिवारं बलिं दत्वा सपरिवारगणेभ्यः स्वस्वनामभिर्ब्बलिं दद्यात् । बलिमन्त्रस्तु । एह्येहि विदुषि हुरु हुरु मुञ्च मुञ्च तर्ज्जय तर्ज्जय विघ्नप विघ्नप महाभैरव क्षेत्रपाल बलिं गृह्ण गृह्ण स्वाहा । तथा च निबन्धे ।
“पूर्व्वमेहिद्वयं पश्चात् विदुषि स्यात् हुरुद्वयम् ।
मुञ्चयद्वितयं भूयस्तर्ज्जयद्वितयं पुनः ॥
ततो विघ्नपदद्वन्द्वं महाभैरव तत्परम् ।
क्षेत्रपाल बलिं गृह्ण द्वयं पावकसुन्दरी ॥”
यद्वा, एह्येहि तुरु तुरु हुरु हुरु जम्भ जम्भ हन हन विघ्नं विनाशय विनाशय महाबलिं क्षेत्रपाल गृह्ण गृह्ण स्वाहा । इति मन्त्रः । एष बलिविधिः सर्व्वग्रहनिवारको विजयश्रीकरश्च भवति । बलिमपि सोपदग्राहहेतुपिण्डेन दद्यात् ॥ फलन्तु ।
“बलिदानेन सन्तुष्टः क्षेत्रपालः प्रयच्छति ।
कान्तिमेधाबलारोग्यतेजःपुष्टियशःश्रियः ॥”
इति तन्त्रसारः ॥
(द्वारपालो भैरवविशेषः । यथा, तन्त्रशास्त्रे ।
“गणेशं वटुकश्चैव क्षेत्रपालश्च योगिनीः ।
पूर्व्वादिक्रमयोगेन द्वारपालान् प्रपूजयेत् ॥”
क्षेत्ररक्षके त्रि । यथा,—
“स एव ग्रामपालोऽभूत् पशुपालः स एव च ।
क्षेत्रपालः स एवासीद् द्विजातीनाञ्च रक्षिता ॥”
इति मार्कण्डेयपुराणे । १८ । २४ ॥)

क्षेत्रपालरसः, पुं, (क्षेत्रपाल इति संज्ञा विद्यते यस्य । स एव रसः औषधविशेषः ।) ग्रहण्युक्तरोगस्यौषधम् । दुग्धवटीति ख्यातम् । यथा,—
“हिङ्गुलञ्च विषं ताम्रं लौहं तालकटङ्कणम् ।
क्षीरमाहूरफेनञ्च समभागं विमर्द्दयेत् ॥
यवार्द्धा वटिका कार्य्या पथ्यं दुग्धौदनं हितम् ।
अलवणं वारिहीनञ्च दातव्यं भिषजां वरैः ॥
गुरुशोथमग्निमान्द्यं ग्रहणीमतिदुस्तराम् ।
ज्वरञ्च विषमं जीर्णं नाशयेन्नात्र संशयः ॥”
इति भैषज्यरत्नावली ॥
आहूरफेन अहिफेनम् ॥

क्षेत्रयमानिका, स्त्री, (क्षेत्रे जाता यमानिका ।) क्षेत्रजातयमानी । यथा,—
“उपाधिरुग्रगन्धे तु वचाक्षेत्रयमानिके ।”
इति नानार्थे त्रिकाण्डशेषः ॥

क्षेत्ररुहा, स्त्री, (क्षेत्रे रोहति उत्पद्यते इति । क्षेत्र + रुह + कः ।) वालुकीकर्कटी । इति राजनिर्घण्टः ॥ क्षेत्रजाते त्रि ॥

क्षेत्रलिप्ता, स्त्री, भूमण्डलस्य कला । यथा । अथ यदि दृग्ग्रहोदयासुभिरुदयासुतास्ति क्षेत्रलिप्ता लभ्यन्ते तदा तदन्तरकलासुभिः किमिति फलं क्षेत्रलिप्ताः सा ग्रहार्कोक्तमन्तरेऽक्षभाभ्याः । सुक्रमन्तरं हि क्षेत्रलिप्तान्तरात्मकमतः सजातीयकरणाय क्षेत्रलिप्तीकरणं सुक्रमन्तरैकोः दिवसो लभ्यत इति युक्तमुक्तम् । इति सिद्धान्तशिरोमणौ गणिताध्याये ग्रहोदयास्ताधिकारः ॥ * ॥ असुभिः दृग्विपलैः । यथा,—
“गुर्व्वक्षरैः खेन्दुमितैरसुस्तैः
षड्भिः पलं तैर्घटिका खषड्भिः ॥”
इति तत्रैव कालमानाध्याये ॥

क्षेत्रवित् [द्] पुं, (क्षेत्रं शरीरं याथात्म्येन वेत्ति जानाति इदं शरीरमेवाहमिति

आत्मत्वेन मन्यते इत्यर्थः । क्षेत्र+विद्+क्विप् ।) क्षेत्रज्ञः । जीवात्मा । यथा,—
"तत्त्वं नरेन्द्र । जगतामथ तस्थुषाञ्च
देहेन्द्रियासुधिषणात्मभिरावृतानाम् ।
यः क्षेत्रवित्तपतया हृदि विश्वगाविः
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि ॥"
इति श्रीभागवते । ४ । २२ । ३५ ॥
"यस्मादनात्मरतिरनर्थहेतुः तत् तस्माज्जगतां जङ्गमानां तस्थुषां स्थावराणाञ्च देहादिभिः आत्मना अहङ्कारेण चावृतानां हृदि यश्चकास्ति प्रकाशते तमवेहि । कथं सोऽस्मीति । सोऽस्तीति पाठे स एवैकोऽस्ति ततोऽन्यदसत् इत्यर्थः । ननु जीवो हृदि चकास्ति नान्यस्तत्राह । क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपः तस्य भावस्तत्ता तया अन्तर्यामिरूपेण । यद्वा क्षेत्रवित्ति अहं ममताख्ये पातीति क्षेत्रवित्तपः तेन रूपेण । जीवस्तु पारतन्त्र्यान्न पाति । ननु कर्म्म जीवं नियच्छति न आविः प्रत्यक्चः । तर्हि बुद्धिर्न प्रत्यक् प्रतिलोमं चकास्ति बुद्धिस्तु पराक् विषयाकारेण । तर्ह्यहङ्कारः न विश्वक् व्यापकत्वेन स तु परिच्छिन्नः । एवम्भूतो यो भगवान् तमवेहीति ।" इति तट्टीकायां श्रीधरस्वामी ॥

क्षेत्रसम्भवः, पुं, (क्षेत्रे सम्भवति उत्पद्यते इति । क्षेत्र+सम्+भू+अच् ।) चक्षुष्चुपः । भिण्डाक्षुपः । इति राजनिर्घण्टः ॥ भूमिजे त्रि ॥

क्षेत्रसम्भूतः, पुं, (क्षेत्रे सम्भूतः जातः ।) कुन्दरः । इति राजनिर्घण्टः ॥ क्षेत्रोद्भवे त्रि ॥

क्षेत्रसीमा, स्त्री, (क्षेत्रस्य भूमेः सीमा मर्य्यादा ।) अङ्गारतुषघटादिद्वाराचिह्नितभूमिमर्य्यादा । यथा "सीमा क्षेत्रादिमर्य्यादा सा चतुर्व्विधा । जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति ।" इति मिताक्षरायां व्यवहाराध्याये सीमाविवादशब्दे द्रष्टव्यः ॥

क्षेत्राजीवः, त्रि, (क्षेत्रेण क्षेत्रोद्भवशस्यादिना आजीवतीति । आ+जीव्+कर्त्तरि अच् ।) कर्षकः । इत्यमरः । २ । ९ । ६ ॥

क्षेत्राधिदेवता, स्त्री, (क्षेत्रस्य अधिदेवता अधिष्ठात्री देवता ।) तीर्थाधिपदेवता । यथा,—
"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् ।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत् ॥"
इति संस्कारतत्त्वे प्रयोगसारः ॥

क्षेत्राधिपः, पुं, (क्षेत्रस्य अधिपः स्वामी अधिष्ठाता वा ।) मेषादिद्वादशराशीनामधिपतिग्रहगणः । यथा,—
"कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीसुताम् ।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः ॥"
इति ज्योतिस्तत्त्वम् ॥
क्षेत्राधिष्ठात्री देवता च ॥

क्षेत्रामलकी, स्त्री, (क्षेत्रे भूमौ जाता आमलकी । शाकपार्थिववत् मध्यपदलोपी समासः ।) भूम्यामलकी । इति शब्दमाला ॥

क्षेत्रिकः, पुं, (क्षेत्रं अस्यास्तीति । ठन् ।) क्षेत्रस्वामी । यथा, मनुः । ९ । ५४—५५ ।
"ओघवाताहृतं वीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद्वीजं न वप्ता फलमर्हति ॥
एष धर्म्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च ।
विहङ्गमहिषीणाञ्च विज्ञेयः प्रसवं प्रति ॥"
"तत्र दासीपदं परोढापरं तस्यामन्येन जातो दासीभर्त्तुर्न वीजिभर्त्तुः ।" इत्युद्वाहतत्त्वम् ॥ कलत्रस्वामी । यथा, मनुः । ९ । १४५ ।
"हरेत्तत्र नियुक्तायां जातः पुत्त्रो यथौरसः ।
क्षेत्रिकस्य तु तद्वीजं धर्म्मतः प्रसवश्च सः ॥"
"हरेदिति । तत्र नियुक्तायां यो जातः क्षेत्रजः पुत्त्र औरस इव धनं हरेत् यस्मात् यत्तस्य कारणभूतं वीजं तत् क्षेत्रस्वामिन एव तत्-कार्य्यकारणत्वात् ।" इति तट्टीकायां कुल्लूकभट्टः ॥

क्षेत्रियं, क्ली, क्षेत्रगततृणम् । परदेहचिकित्स्या । इति मेदिनी ॥

क्षेत्रियः, पुं, (परक्षेत्रे चिकित्स्यः । "क्षेत्रियच् परक्षेत्रे चिकित्स्यः ।" ५ । २ । ९२ । इति परक्षेत्रस्य क्षेत्रियचनादेशः ।) असाध्यरोगः । परदाररतः । इति मेदिनी ॥ (त्रि, परदेहचिकित्स्यो रोगादिः । यथा, भट्टिः । ४ । ३२ ।
"अहं शूर्पणखा नाम्ना नूनं नाज्ञासिषि त्वया ।
दण्डोऽयं क्षेत्रियो येन मय्यपातीति साब्रवीत् ॥")

क्षेत्री, [न्] त्रि, (क्षेत्रमस्यास्तीति इनिः ।) क्षेत्रविशिष्टः । कृषीवलः । यथा, हेमचन्द्रः ।
"कुटुम्बी कर्षकः क्षेत्री हली कृषिककार्षिकौ ॥"
(यथा च मानवे । ९ । ५१ ।
"तथैवाक्षेत्रिणो वीजं परक्षेत्रप्रवापिणः ।
कुर्व्वन्ति क्षेत्रिणामर्थं न वीजी लभते फलम् ॥")
परगवादिना शस्यविनाशे तत्प्राप्तिर्यथा,—
"यावत् शस्यं विनश्येत्तु क्षेत्री तावत् फलं लभेत् ।
पालस्ताड्योऽथ गोस्वामी पूर्व्वोक्तं दण्डमर्हति ॥
इति याज्ञवल्क्यवचने गवादिदोषेण यावत् शस्यं विनश्यति तावदेव पालकात् प्राप्तव्यं पालकाशक्तौ पालकस्ताड्यः गोस्वामी पूर्व्वोक्तं दण्डादिकं अर्हति ।" इति प्रायश्चित्ततत्त्वम् ॥

क्षेत्री, [न्] पुं, (क्षेत्रं स्त्री अस्त्यस्य । क्षेत्र+इनिः ।) स्वामी । भर्त्ता । यथा, मनुः । ९ । ३२ ॥
"भर्त्तुः पुत्त्रं विजानन्ति श्रुतिद्वैधन्तु भर्त्तरि ।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥"
"भर्त्तुरिति । भर्त्तुः पुत्त्रो भवतीति साधो मन्यन्ते । भर्त्तरि द्विप्रकारा श्रुतिर्वर्त्तते । केचिदुत्पादकमवोढारमपि भर्त्तारं तेन पुत्त्रेण पुत्त्रिणमाहुः । अन्ये तु वोढारं भर्त्तारमनुत्पादकमपि अन्यजनितेन पुत्त्रेण पुत्त्रिणमाहुः ।" इति तट्टीकायां कुल्लूकभट्टः ॥ (परमात्मा । यथा, गीतायाम् । १३ । ३३ ।
"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥")

क्षेत्रेक्षुः, पुं, (क्षेत्रे इक्षुरिव ।) यावनालः । इति राजनिर्घण्टः ॥

क्षेत्रोपेक्षः, पुं, श्वफल्कपुत्त्रः । इति केचित् ॥ यथा,—
"युगन्धरोऽनमित्रस्य वृष्णिः पुत्त्रोऽपरस्ततः ।
श्वफल्कश्चित्ररथश्चैव गान्दिन्याञ्च श्वफल्कतः ॥
अक्रूरप्रमुखा आसन् पुत्त्रा द्वादश विश्रुताः ।
आसङ्गः सारमेयश्च मृदुरो मृदुविद्गिरिः ॥
धर्म्मवृद्धिः सुकर्म्मा च क्षेत्रोपेक्षोऽरिमर्द्दनः ।
शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश ॥"
इति श्रीभागवते । ९ । २४ । १४—१६ ॥
क्षत्त्रोपेक्ष इति साधुपाठः । (तत्र क्षत्त्रेषु क्षत्त्रियकुलेषु उपेक्षा यस्य ॥)

क्षेपः, पुं, (क्षिप+घञ् ।) निन्दा । (यथा, याज्ञवल्क्यः । २ । २०७ ।
"क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश ॥")
विक्षेपः । (यथा, गोः रामायणे । ४ । ६२ । १२ ।
"पक्षक्षेपपरिश्रान्ताः सुपार्श्वेऽभ्यपयास्यति ॥")
लेपनम् । गर्व्वः । प्रेरणम् । इति मेदिनी ॥ विलम्बः । हेला । लङ्घनम् । इति हेमचन्द्रः ॥ गुच्छः । इति त्रिकाण्डशेषः ॥ (यथा, मेघदूते । ४९ ।
"कुन्दक्षेपानुगमधुकरश्रीमुषामात्मविम्बम् ॥")

क्षेपकः, त्रि, (क्षिपतीति । क्षिप्+ण्वुल् ।) क्षेपकर्त्ता । इति व्याकरणम् ॥

क्षेपणं, क्ली, (क्षिप+भावकर्म्मादिषु ल्युट् ।) प्रेरणम् । तत्पर्य्यायः । क्षिपा २ । इत्यमरः । ३ । २ । ११ ॥ यापनम् । यथा,—
"विधवा यौवनस्था च नारी भवति कर्कशा ।
आयुषः क्षेपणार्थन्तु दातव्यं स्त्रीधनं सदा ॥"
इति विवादचिन्तामणिधृतहारीतवचनम् ॥
प्रस्तरादीनां दूरप्रेरणार्थरज्जुनिर्म्मितशिक्यम् । फिङ्गा इति भाषा । यथा, श्रीभागवते । ३ । १९ ।
"प्रववुर्व्वायवश्चण्डास्तमः पांशवमैरयन् ।
दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव ॥"
"पांशुमन्ततमश्च प्रेरितवन्तः । क्षेपणैर्यन्त्रैः ।"
इति तट्टीकायां श्रीधरस्वामी ॥ (परित्यागः । यथाह मनुः । ४ । ११९ ।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् ॥"
"उपाकर्म्मणि उत्सर्गे त्रिरात्रमध्ययनक्षेपणम् ।"
इति कुल्लूकभट्टः ॥ सहयोद्धृणां सहसा भूपातनरूपनियुद्धकौशलविशेषः । यथा, महाभारते । ४ । १२ । २८ ।
"क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः ।
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ॥"
"क्षेपणं कथनं यत्तु स्थानात् प्रच्यवनं घटात ॥"
इति तट्टीकाधृतमल्लकण्टकमहाशास्त्रम् ॥

क्षेपणि, } स्त्री, (क्षिप+बाहुलकात् अनि ।
क्षेपणी, } ङीप् वा ।) नौकादण्डः । इत्यमरः । १ । १० । १३ ॥ डाँड् इति भाषा । जालभेदः । इति मेदिनी ॥ (अस्त्रविशेषः । यथा, रामायणे । ६ । ७ । २४ ।
"क्षेपण्यस्तोमरांश्चैव प्रासानि मुसलानि च ॥")

क्षेपणीयं, क्ली, (क्षिप+अनीयर् ।) पाषाणप्रक्षेपणास्त्रम् । यथा, रघुवंशे ४ । ७७ ।

"तत्र घोरं रघोर्युद्धं पार्व्वतीयैर्गणैरभूत्।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥"
"तत्रेति। तत्र हिमाद्रौ गणैः सह रघोर्युद्धं अभूत्। किंगणैः पर्व्वते उत्पन्नैः। किं युद्धं भयङ्करम्। पुनः किं नाराचानां वाणविशेषाणां क्षेपणीयानां पाषाणप्रक्षेपणयन्त्राणां ये अश्मानस्तेषाञ्च घर्षणेन उत्पतिता अनलो यस्मिन्।" इति तट्टीका ॥ क्षेपणयोग्ये त्रि ॥

क्षेपदिनं, क्ली, अहर्गणानयनार्थं स्वीयविंशांशयुतचयनाड़ी। यथा। "इदानीमहर्गणार्थं क्षेपदिनान्याह। स्वीयनखांशयुताः चयनाड्यः क्षेपदिनानि दिवागणसिद्ध्यै। पूर्व्वमानीता ये चयाहास्तेषामधो यत्नाड्यिकाद्य तत् स्वीयविंशांशयुतं सद्दिनाद्यं कल्प्यम्। या घटिकास्तानि दिनानि। या विघटिकास्ता घटिकास्तासामप्यधो ये षष्ट्यंशास्तानि पानीयपलानि कल्प्यानीति।" इति सिद्धान्तशिरोमणौ गणिताध्याये प्रत्यब्दशुद्धिः ॥

क्षेपपात, पु, ग्रहकक्षाक्रान्तिमण्डलयोर्योगः। यथा। इदानीं क्रान्तिवृत्तमाह। "क्रान्तिवृत्तं विधेयं ग्रहाङ्क भ्रमतश्च भाश्च भार्द्धे क्रमाभांशतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाक्षेपपाताश्च खलनबोधकृत् ॥" इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

क्षेपिमा, [न्] पुं, (क्षिप्रस्य भावः "पृथ्वादिभ्य इमनिज् वा।" ५।१।१२२। इति इमनिच्। "स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्व्वस्य च गुणः।" ६।४।१५६। इति साधुः।) अतिशयक्षेपः। इति सिद्धान्तकौमुदी ॥

क्षेपिष्ठ, त्रि, (अतिशयेन क्षिप्रः। क्षिप्र+इष्ठन्। "स्थूलदूरेति।"६।४।१५६। इति साधुः।) अतिशीघ्रः। क्षिप्रतरः। इत्यमरः। ३। २। १११ ॥

क्षेपीयान्, [स्] त्रि, (अतिशयेन क्षिप्रः। ईयसुन्। "स्थूलदूरेति।"६।४।१५६। इति साधुः।) अतिशयक्षिप्रः। इति सिद्धान्तकौमुदी ॥

क्षेप्ता, [ऋ] त्रि, (क्षिपति इति। क्षिप्+तृच्।) क्षेपणकर्त्ता। इति सिद्धान्तकौमुदी ॥ (यथा, रामायणे। ४। ६। ८४।
"उपासृश्य ददौ शाप क्षेप्तारं वालिनं प्रति ॥")

क्षेमं, क्ली, शाकद्वीपस्य वर्षविशेषः। यथा। "शाको यत्रुप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्रामिरूपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं वयसं सुभद्रं शान्तं क्षेममस्तमभयमिति वर्षाणि।" इति श्रीभागवते।५।२०।२-३॥ * ॥ मठविशेषः। यथा,—
"मठं ययौ च वाराहक्षेत्रं यत्राविधायकः।
श्रीकण्ठक्षेममठयोरासीद्धुष्कपुरान्तिके ॥"
इति राजतरङ्गिण्यां ६ तरङ्गः ॥

क्षेमः, पुं, क्ली, (क्षि क्षये+"अर्त्तिस्तुसुहुसृधृ-क्षीति।" उणां। १। १३९। इति मन्।) (कुशलम्। (यथा, मनुः।२।१२७।
"ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥")
तद्वति त्रि। इत्यमरः २।४।२६॥ (यथा, गौः रामायणे। ५। ८। १७।
"कृताः क्षेमाश्च पन्थानः सुखं गच्छन्ति खेचराः॥")
लब्धरक्षणम्। इति मेदिनी॥ मोक्षः। इति हेमचन्द्रः॥

क्षेमः,पु,(क्षेमं मङ्गलमस्मिन्नस्तीति। अर्श आद्यच्।) चोरनामगन्धद्रव्यम्। चण्डानामौषधम्। इति शब्दरत्नावली मेदिनी च॥ धर्म्मेण शान्त्यासुत्पादितः पुत्त्रः। यथा, विष्णुपुराणे।१।७।२८।
"व्यवसायं प्रसन्ने वै क्षेमं शान्तिरसूयत।
सुखं तुष्टिर्यशःकीर्त्तिरित्येते धर्म्मसूनवः ॥"
कलिङ्गदेशस्य राजा। यथा,—
"क्षेमोऽग्रतीर्थः कुहरः कलिङ्गेषु नराधिपः।
मतिमांश्च मनुष्येन्द्र! ईश्वरश्चेति विश्रुतः॥"
इति महाभारते। १। ६७। ६५॥ * ॥
चन्द्रवंशीयशुचिराजपुत्त्रः। यथा,—
"ततः सुतञ्जयाद्विप्रः शुचिस्तस्य भविष्यति।
क्षेमोऽथ सुव्रतस्तस्माद्धर्म्मसूत्रः समस्ततः॥"
इति श्रीभागवते। ९। २२। ४७॥ * ॥
लब्धपरिपालनम्। यथा,—
"उपेयादीश्वरञ्चैव योगक्षेमार्थसिद्धये।
स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्च्चयेत्तथा॥"
इति याज्ञवल्क्यसंहितायामाचाराध्यायः॥
"तदनन्तरमीश्वरमभिषेकादिगुणयुक्तमन्यं वा श्रीमन्तमकुत्सित योगक्षेमार्थम्। अलब्धलाभो योगः। लब्धपरिपालनं क्षेमः तदर्थमुपेयात्। उपासीत उपेयादित्यनेन सेवां प्रतिषेधति। वेतनग्रहणेन आज्ञाकरणं सेवा तस्याः श्ववृत्तित्वेन निषेधात्।" इति तट्टीका मिताक्षरा॥
(यथाच मनुः। ८। २३०।
"योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्॥")

क्षेमकः, पु, (क्षेम+स्वार्थे संज्ञाया वा कन्।) चोरनामगन्धद्रव्यम्। इति जटाधरः॥ * ॥ नागविशेषः। यथा,—
"नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः।
क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा॥"
इति महाभारते। १। ३५। ११॥
जनमेजयवंशोत्पन्नराजविशेषः। यथा,—
"शतानीकाद्दुर्द्दमनस्तस्यापत्य महीनरः।
दण्डपाणिर्निमिस्तस्य क्षेमको भविता यतः॥"
इति श्रीभागवते। ९। २२। ४३॥
एतत्पर्य्यन्तं अस्य वंशस्य विश्रान्तिः। परीक्षिदादयः क्षेमकान्ताः कलौ सहस्रवत्सरपर्य्यन्तं राजान आसन्। ततः सोमवंशशाखान्तरे मगधवंश्या राजानः कलौ बहुकालं स्थिताः। इति श्रीभागवतमतम्॥ राक्षसविशेषः। यथा,—
"एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप।
शून्यां निवेशयामास क्षेमको नाम राक्षसः॥"
इति हरिवंशे। २९। ७६॥

क्षेमकरः, त्रि, (करोतीति। कृ+अच्।) मङ्गलकारकः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १४। ३५। ३१।
"पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः॥")

क्षेमकारः, त्रि, (क्षेमं करोतीति। क्षेम+कृ+"कर्म्मण्यण्।" ३। २। १। इति अण्।) शुभङ्करः। इति भूरिप्रयोगः॥ क्षेमङ्करः। मङ्गलकर्त्ता। यथा,"क्षेमप्रियमद्रात् कृञ्" इति सूत्रेण क्षेमशब्दात् परस्य कृधातोः खप्रत्ययाभावपक्षे टात् पश्चिति अणप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिः।५।७७।
"पितुः प्रियङ्करी भर्त्ता क्षेमकारस्तपस्विनाम्॥")

क्षेमकृत्, त्रि, (क्षेमं करोतीति। क्षेम+कृ+क्विप्।) मङ्गलकारकः। यथा,—
"दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः॥"
इति चाणक्ये। ५४॥

क्षेमगुप्तः, पुं, (क्षेमेण मङ्गलमयेन परमेश्वरेण गुप्तः रक्षितः यद्वा क्षेमं लब्धरक्षणं तेन गुप्तः।) काश्मीरदेशस्य राजविशेषः। यथा,—
"क्षेमगुप्ताभिधानोऽभूदथ राजा तदात्मजः।
व्यासवासेवनोत्सिक्तवित्तताराण्यसञ्ज्वरः॥"
इति राजतरङ्गिण्यां ६ तरङ्गः॥
(क्षेमगुप्ते त्रि॥)

क्षेमङ्करः, त्रि, (क्षेमं करोतीति। क्षेम+कृ+"क्षेमप्रियमद्रेऽण् च।" ३।२।४४। इति अण्। चात् खच् मुम् च।) मङ्गलकारकः। तत्पर्य्यायः। अरिष्टतातिः २ शिवतातिः ३ शिवङ्करः ४। इति हेमचन्द्रः॥ क्षेमकारः ५ मद्रङ्करः ६ शुभङ्करः ७। इति भूरिप्रयोगः॥

क्षेमङ्करी, स्त्री, (क्षेमङ्कर+स्त्रियां ङीप्।) देवीविशेषः। यथा,—
"क्षेमान् देवेषु सा देवी कृत्वा दैत्यपते स्वयम्।
क्षेमङ्करी शिवेनोक्ता पूज्या लोके भविष्यसि॥
अनेनैव तु रूपेण विद्याष्टकसमन्विता।
एका वा नगरान्तस्था पूजिता स्थापिता शुभा॥
प्रासादे पटकुड्ये वा पुस्तके जलवह्निगा।
निश्चिशे पूजयेत् क्षेमां सर्व्वकामफलप्रदाम्॥
दमनी पद्ममाला च शोषोणा वज्रशासना।
अष्ट प्रत्यङ्गिरादेव्याः पूजयेत् समुदाहृता।
एताभि स्थापनं कार्य्यं शिवासनसमाश्रुगम्॥"
इति देवीपुराणे क्षेमङ्करीप्रादुर्भावे ४७अध्यायः॥
शङ्खचिल्ली। सा च भगवत्या मूर्त्तिः। तस्या नमस्कारमन्त्रः। यथा,—
"कुङ्कुमारुणसर्व्वाङ्गि! कुन्देन्दुधवलानने!।
मत्स्यमांसप्रिये देवि! क्षेमङ्करि! नमोऽस्तु ते॥"
अपि च।
"कृशोदरि महाचण्डे! मुक्तकेशि! बलिप्रिये!।
कुलाचारप्रसन्नास्ये नमस्ते शङ्करप्रिये!॥"
इति तन्त्रम्॥

क्षेमजित्, पुं, (क्षेमं मङ्गलं जयति जितवान् वा मङ्गलपुण्यात्मककर्म्मणा। यद्वा क्षेमं ग्रामस्य रक्षणं जितवान् व्याप्तवान् दैवपुरुषकारादिप्रभावेणेति यावत्।) राजविशेषः। स तु मगधदेशे षट्त्रिंशद्वर्षपर्य्यन्तं राजा भविष्यति। तस्य नामान्तरं क्षेमार्चिः। इति मत्स्यपुराणमिति केचित्॥

क्षेमदर्शी, [न्] पुं, (क्षेमं मङ्गलं शीलमस्य यद्वा क्षेमं मङ्गलं ग्रामस्य रक्षणं वा पश्यतीति। क्षेम + दृश् + णिनिः।) कोशलदेशीयराजविशेषः। यथा, महाभारते। १२।८२।६।
"कौशल्यानामाधिपत्यं संप्राप्तं क्षेमदर्शिनम्।
मुनिः कालकवृक्षीय आजगामेति नः श्रुतम्॥"

क्षेमधन्वा, [न्] पुं, (क्षेमं मङ्गलजनकं धनुर्यस्य यद्वा क्षेमं प्रजानां मङ्गलसाधनं जगद्धितकार्य्यमित्यर्थः धनुर्यस्य।) सूर्य्यवंशीयराजविशेषः। स तु पुण्डरीकपुत्रः। यथा,—
"नभसः पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः।
क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान्॥"
इति हरिवंशे। १५।२७॥
सावर्णमनुसमकालीयमनुपुत्रविशेषः। यथा,—
"धर्म्मधृक् सुशर्म्मा च देवानीकः पुरूद्वहः।
क्षेमधन्वा दृढायुश्च आदर्शः पण्डको मनुः।
सावर्णस्य तु पुत्रा वै तृतीयस्य नव स्मृताः॥"
इति च तत्रैव। ७।७४॥

क्षेमधर्म्मा [न्,] पुं, (क्षेमं मङ्गलरूपं क्षेमे वा धर्म्मो यस्य। यद्वा क्षेमरूपो धर्म्मो यस्य।) राजविशेषः। यथा, "ततश्च शिशुनागस्य पुत्रः काकवर्णो भविता तस्य पुत्रः क्षेमधर्म्मा तस्यापि क्षत्त्रौजाः।" इति विष्णुपुराणे। ४।२४।३॥

क्षेमधूर्त्तिः, पुं, (क्षेमे मङ्गले कल्याणकार्य्ये वा धूर्त्तिः धारणा यस्य।) राजविशेषः। यथा,—
"बृहन्तमसहायाभ्यां वीक्ष्य दृढविक्रमम्।
क्षेमधूर्त्तिर्महाराज। विव्याधोरसि मार्गणैः॥"
इति महाभारते। ७।१०८।१॥

क्षेममूर्त्तिः पुं, (क्षेमा मङ्गलमयी मूर्त्तिर्यस्य यद्वा धारणा यस्य।) कलिङ्गदेशीयराजविशेषः। इति केचित्। क्षेमधूर्त्तिरिति साधुपाठः। यथा,—
"सारस्वताश्च राजानः क्षेमधूर्त्तिस्तथैव च।
सुसायुर्महाबाहुश्च बृहत्क्षत्रोऽपरस्तथा॥"
इति महाभारते आदिपर्व्वणि ६७ अध्यायः॥

क्षेमवान् [त्] त्रि, (क्षेमं मङ्गलं अस्यास्तीति। अस्त्यर्थे मतुप् मस्य वत्वम्।) मङ्गलयुक्तः। इति सिद्धान्तकौमुदी॥

क्षेमङ्करः, पुं, (क्षेमं मङ्गलमयाने निर्गमने वा करोति।) [illegible] कार्य्यसाधकः। यथा—
"[illegible] क्षेमङ्करी [illegible]।
[illegible]॥"
इति रामायणे। १।१६।२६॥
"क्षेमे निःसंदेहे [illegible]।
[illegible]॥
[illegible]

एव न कश्चिदपि बहिर्दृश्येन इत्यर्थः। दुष्प्रवेशमर्द्दितमिलाश्रयवनं ओको यस्य तेन शम्भुना।" इति तट्टीकायां श्रीधरस्वामी॥

क्षेमा, स्त्री, (क्षेम + टाप्।) कात्यायनी। इति मेदिनी॥ क्षेमङ्करी। यथा —
"निस्त्रिंशे पूजयेत् क्षेमां सर्व्वकामफलप्रदाम्।"
इति देवीपुराणे क्षेमङ्करीप्रादुर्भावनामाध्यायः॥
(अप्सरोभेदः। यथा, महाभारते। १।१२३।५९।
"अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा॥")

क्षेमाधिः, पुं, (क्षेमा मङ्गलमयी क्षेमे मङ्गलविषये धीर्यस्य पृषोदरात् ह्रस्वः।) मिथिलादेशस्य सूर्य्यवंशीयराजविशेषः। यथा,—
"अरिष्टनेमिस्तस्यापि श्रुतायुस्तत् सुपार्श्वकः।
ततश्चित्ररथो यस्य क्षेमाधिर्मिथिलाधिपः॥"
इति श्रीभागवते। ९।१३।२३॥

क्षेमाफला, स्त्री, (क्षेमं मङ्गलजनकं हितकरं फलं यस्याः। पृषोदरादित्वात् साधुः।) क्षेमफला इति वा पाठः॥ उदुम्बरवृक्षः। इति शब्दचन्द्रिका॥

क्षेम्यं, त्रि, (क्षेमाय साधुः "प्राग्घितादत्।" ४।४।७५। इति यत्। यद्वा, क्षेममर्हतीति "दण्डादिभ्यो यत्।" ५।१।६६। इति यत्।) क्षेमीयम्। कुशलयोग्यम्। इति सिद्धान्तकौमुदी॥ (यथा, मनुः। ७।२१२।
"क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजेत् नृपो भूमिमात्मार्थमविचारयन्॥")

क्षेम्यः, पुं, (क्षेममर्हत्यसौ। क्षेम + यत्।) राजविशेषः। यथा, हरिवंशे। २०।३६।
"उग्रायुधस्य दायादः क्षेम्यो नाम महायशाः॥
क्षेम्यात् सुवीरो नृपतिः सुवीरात्तु नृपञ्जयः।
नृपञ्जयाद्बहुरथ इत्येते पौरवाः स्मृताः॥"

क्षै, क्षये। इति कविकल्पद्रुमः॥ (भ्वां-पर-अकं-अनिट्।) क्षादि। क्षायति। इति दुर्गादासः॥

क्षैण्यं, क्ली, (क्षीणस्य भावः। क्षीण + ष्यञ्।) क्षीणता। यथा, "क्षैण्यस्थाने तु प्रायश्चित्तं प्राक्ता प्रत्यक्षस्य चान्द्रायणपादादिकम्॥" इति प्रायश्चित्ततत्त्वम्॥ अपि च।
"पतिन् प्रशमक्षैण्यनिमित्तं मदसौष्ठवे।
मन्वतो दिग्गुणत्वाय[illegible]॥"
इति रायमुकुटधृतवाक्यम्॥

क्षैत्रं, क्ली, (क्षेत्राणां समूहः। 'भिक्षादिभ्योऽण्।' ४।२।३८। इति अण्।) क्षेत्रसमूहः। तत्पर्य्यायः। केदारिकम् १ क्षैत्रकम् २ कैदार्य्यम् ३ कैदारकम् ४। इत्यमरः। २।९।११॥ वारटम् ५। इति शब्दरत्नावली॥

क्षैत्रज्ञं, }
क्षैत्रज्ञ्यं, } क्ली, (क्षेत्रज्ञ + "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।
'कुलालवरुडनिषादचण्डालामित्रेभ्यश्छन्दसि' इति क्षेत्रज्ञः गुणादिषु पाठकर्म्मणि। 'क्षेत्रज्ञ्यं' — 'पुरोहितादिभ्यो यक्, इति च।' ५।१।१२८। इति यक्।) क्षेत्रज्ञस्य भावः। इति सिद्धान्तकौमुदी॥

क्षैरेयी स्त्री, (क्षीरे संस्कृतं भक्षम्। ततः स्त्रियां ङीप्।) परमान्नम्। इति हेमचन्द्रः॥ क्षीरमध्यभक्ष्येन नि। क्षौरेयी इति च पाठः॥

क्षोड, पुं, (क्षोड्यते बध्यते अनेन। क्षोड + अधिकरणे + घञ्। घञ् इति केचित् इदम् वैदिकधातुस्वरूपम्।) आलानम्। गजबन्धनी। इति भूरिप्रयोगः॥

क्षोणि, } स्त्री, (क्षै + बाहुलकात् डोनिः वा
क्षोणी, } ङीप्।) पृथिवी। इति शब्दरत्नावली॥ अमरटीका च॥ (यथा, ऋग्वेदे १।५४।१।
"अक्रन्दयो नद्योरोरुवद्वना कथा न क्षोणी-
र्भियसा समारत॥")

क्षोदः, पुं, (क्षुद्यते इति। क्षुद पेषणे + कर्म्मणि भावे च घञ्।) चूर्णः। इत्यमरः। २।९।४८॥
(यथा, काशीखण्डे। ३६।६३।
"कापि प्रागवासना योगनिद्राधर्म्मरता सती।
हित्वा मलयजक्षोदं बिभूर्त्ती भस्मं सा वै॥")
रजः। पेषणम्। इति मेदिनी॥ (यथा रत्नावलीनाटिकायाम्। १ अङ्के।
"कीर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुम-
क्षोदगौरै-
र्हेमालङ्कारभाभिर्भरनमितशिरःशेखरैः
किरातैः॥")

क्षोदितः, त्रि, (क्षुद + भावे क्तः। आदिकर्म्मणि वा कर्म्मणि + क्तः।) चूर्णम्। इति शब्दचन्द्रिका॥ पेषिते त्रि॥

क्षोदिमा, [न्] पुं, (क्षुद + "पृथ्वादिभ्य इमनिज् वा।" ५।१।१२२। इति इमनिच्।) अतिशयक्षुद्रता। इति व्याकरणम्॥

क्षोदिष्ठः, त्रि, (अतिशयेन क्षुद्र इति। इष्ठन् प्रत्ययः।) अतिशयक्षुद्रः। इत्यमरः। ३।१।११॥

क्षोदीयान्,[स्] त्रि, (क्षुद्र + ईयसुन्।) अतिक्षुद्रः। इति सिद्धान्तकौमुदी॥ (यथा माघे। २।१००।
"इहतमहताय: कार्य्यान्त क्षोदीयानपि गण्यताम्।
समूहाच्छोध्यमर्थानां महानपि न गण्यताम्॥")

क्षोद्यः, त्रि, (क्षोदनीयः क्षोदितुमर्हति वा। क्षुद — "ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) क्षोदनीयः। चूर्णनीयः। यथा,—
"उपगुप्तस्य कार्य्येषु क्षोद्यान् मधुसूदनः।
शिशुनिर्भर्त्सनीयेषु गोपान देवारिभञ्जनः॥"
इति रामायणे। २।८०।१०॥
"क्षपणीयान् शत्रून्। क्षोद्यान् क्षोदनीयान् [illegible]। [illegible] [illegible]। [illegible]॥"
इति टीका॥

क्षोभः, पुं, (क्षुभ + भावे घञ्।) संचलनम्। [illegible]। चित्तवैकल्यम्। यथा —
"पूर्व्वक्षोभे [illegible] [illegible]।
[illegible] तु पूर्व्वं प्रसादे[illegible]॥"
इति उत्तररामचरिते। १ अङ्के।
[illegible]। [illegible]
[illegible]। [illegible]॥

अपि च प्राणतोषिण्यां कालानन्दतरङ्गिणीधृततन्त्रे ।
"शुक्ला पीता चरेत् पूजां जपं देयाः समाहितः ।
साधके क्षोभमापन्ने मम क्षोभं प्रजायते ।
तस्माच्छुक्ला च पीता च वयसुध्वो यजनं चरेत् ॥"

क्षोभकः, पुं, (क्षोभ + संज्ञायां कन् ।) कामाख्यास्थ-पर्व्वतविशेषः । यथा,—
"दुर्ज्जराख्यस्य पूर्व्वस्यां पुरं नाम वरासनम् ।
तद्दक्षिणे महाशैलः क्षोभको नाम नामतः ॥
तस्मिन् गिरौ शिलापृष्ठे वक्रे देवी व्यवस्थिता ।
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ॥
एकत्र पञ्चमिद्गर्त्ता योनिभिः मञ्चवक्त्रकम् ।
स्थिता रमयितुं तत्र नित्यमेव शिवादिवा ॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥ * ॥ (क्षुभ् + कर्त्तरि + ण्वुल् ।) क्षोभजनके त्रि ॥

क्षोभणं, त्रि, (क्षुभ् + णिच् + ल्युः ।) क्षोभजनकम् । चञ्चलनकारकम् । यथा,—
"व्याहृताक्षैः ससत्त्वैस्तं दैवप्रहरणैस्तदा ।
अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम् ॥"
इति रामायणे । ३ । ३६ । १० ॥
"क्षोभणं क्षोभकर्त्तारम् ।" इति तट्टीका ॥
(क्ली भावे ल्युट् । क्षोभः ॥)

क्षोभणः, पुं, (क्षुभ् + णिच् + ल्युः ।) वटुकभैरवः । यथा, विश्वसारोद्धारतन्त्रे तस्य स्तोत्रम् ।
"कङ्कालधारी सुखी च व्यालयज्ञोपवीतवान् ।
जृम्भणो मोहनस्तम्भी मारणः क्षोभणस्तथा ॥"

क्षोभित,, त्रि, (क्षुभ् + णिच् + कर्म्मणि क्तः ।) क्षोभयुक्तः । सञ्चालितः । यथा,—
"पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ८२ । ३७ ॥

क्षोमं, क्ली, (क्षुम + मन् । पृषोदरात् वृद्धिर्वा ।) दुकूलम् । इत्यमरः । २ । २ । १२ । क्षौम इति च पाठः ॥

क्षोमः, पुं क्ली, (क्षुम + मन् ।) अट्टः । इत्यमरटीकायां भरतः ॥ क्षौमोऽपि पाठः ॥

क्षोमकः, पुं, (क्षोम + संज्ञायां कन् ।) गन्धद्रव्यकः । इति जटाधरः ॥

क्षोणिः, } क्षोणी, } स्त्री, (क्षु + बाहुलकात् निः णत्वं वृद्धिः वा ङीप् च ।) पृथिवी । इत्यमरः । २ । १ । २ ॥ अस्या व्युत्पत्तिर्यथा,—
"दृष्ट्वा च यागाधाराश्च क्षोणी क्षोणालये च या ।
मत्वालये चयं याति क्षितिस्तेन प्रकीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ॥
(यथा, भागवते । ३ । १४ । ३ ।
"तस्य चोद्धरतः क्षौणीं स्वदंष्ट्राग्रेण लीलया ॥")

क्षोणीप्राचीरः, पुं, (क्षोण्याः प्राचीर इव ।) समुद्रः । इति जटाधरः ॥

क्षोणीभुक् [ज्,] पुं, (क्षोणीं पृथ्वीं भुनक्तीति । भुज् + क्विप् ।) राजा । यथा,—
"कृत्वा शस्त्रविभीषिकां कतिपयग्रामेषु दीना प्रजा मथ्नन्तो विटलम्पटैरुपहताः क्षोणीभुजस्ते किल ।
विद्वांसोऽपि वयं किल त्रिजगतां सर्गस्थितिस्थापना-मीशस्तत्परिचर्य्यया न गणितो येरेव नारायणः ॥"
इति शान्तिशतके । १ । ११ ॥

क्षोणीमयः, पुं, (क्षोणी + मयट् ।) मत्स्यः । पृथिव्याश्रयः । यथा,—
"मत्स्यो युगान्तसमये मनुनोपलब्धः
क्षोणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्मे
आदाय तत्र विजहार ह वेदमार्गान् ॥"
इति श्रीभागवते । २ । ७ । १२ ॥
"मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः । क्षोणीमयः पृथ्वीमयः पृथिवीप्रधानस्तदाश्रय इत्यर्थः । अत एव निखिलजीवनिकायानामाश्रयः । मे मुखाद्विस्रंसितान् गलितान् वेदस्य मार्गान् वेदानादाय तत्र युगान्तसलिले विजहार । ह हर्षे ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ क्षोणीमयोऽपि पाठः ॥

क्षौद्रं, क्ली, (क्षुद्राभिः पिङ्गलवर्णमक्षिकाभिः सरघाभिर्निर्म्मितम् । क्षुद्र + "क्षुद्राभ्रमरवटरपादपादञ् ।" ४ । ३ । ११९ । इति अञ् ।) मधु । इत्यमरः । २ । ९ । १०७ ॥ जलम् । इति मेदिनी ॥ पिङ्गलवर्णक्षुद्रमक्षिकाकृतकपिलवर्णमधु । अस्य गुणाः । अतिशीतलत्वम् । लघुत्वम् । क्लेदनाशित्वम् । एतद्युक्तक्षौद्रस्यैव्यतुल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"माक्षिका: कपिला: सूक्ष्मा: क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥"
इति भावप्रकाशः ॥

क्षौद्रः, पुं, (क्षुद्र + अण् ।) चम्पकवृक्षः । इति शब्दचन्द्रिका ॥ वर्णसङ्करविशेषः । स तु सजातीयात् मागध्यां जातः । यथा,—
"चतुरो मागधी सूते क्रूरान् मायोपजीविनः ।
मांसं स्वादुकरं क्षौद्रं सौगन्ध्यमिति विश्रुतम् ॥"
इति महाभारते । १३ । ४८ । २२ ॥
"एते मागधामायोगवादिभ्यश्चतुर्भ्यः क्रमाज्जायन्ते । इत्युपसंहरति चतुर इति । एते चत्वारो वागुरादिना जीवन्तीति मायोपजीविनः । अन्येऽपि चत्वारो मागध्यां विश्रुताः सजातीयाद्युत्पद्यन्ते । तेषां नामानि मांसमित्यादि । मांस मांसविक्रेतारम् । स्वादुकरं मांसस्यैव संस्कारकम् । क्षौद्रं सूदं शूद्रमिति पाठत्रयेऽपि प्राकाद्यन्नपाककरम् । सौगन्ध्यम् उत्तमगन्धसैरन्ध्रम् । एकस्यैव मागधस्य एतद्वृत्तिचतुष्टयसत्त्वमिति ज्ञेयम् ।" इति तट्टीकायां नीलकण्ठः ॥ * ॥ क्षुद्रता । इति पाणिनियाकरणम् ॥

क्षौद्रक्य, त्रि, (क्षुद्रक: आयुधजीविसंघः । "आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् ।" ५ । ३ । ११४ । इति ञ्यट् ।) क्षुद्रम् । इति सिद्धान्तकौमुदी ॥

क्षौद्रजं, क्ली, (क्षौद्रात् जायते इति । जन + डः ।) सिक्थकम् । इति राजनिर्घण्टः ॥ मधुजातमात्रे त्रि ॥

क्षौद्रधातु, पुं, (क्षौद्रजातो धातुः क्षौद्रं धातुरिव वा ।) माक्षिकम् । इति राजनिर्घण्टः ॥

क्षौद्रप्रियः, पुं, (क्षौद्राणां सरघाणां प्रियः क्षौद्रवत् मधुवत् प्रियो वा ।) जलमधुकवृक्षः । इति राजनिर्घण्टः ॥ मधुप्रिये त्रि ॥

क्षौद्रमेहः, पुं, (क्षौद्रसंज्ञको मेहः ।) प्रमेहरोगविशेषः । मधुमेह इति वैद्यकम् ।) तल्लक्षणं यथा,—
"कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
कषायं कषायवर्णम् ।" इति भावप्रकाशः ॥ अस्य चिकित्सा प्रमेहशब्दे द्रष्टव्या ॥

क्षौद्रेयं, क्ली, (क्षौद्रे भवं इति । ढञ् ।) सिक्थकम् । इति राजनिर्घण्टः ॥ क्षौद्रसम्बन्धिनि त्रि ॥

क्षौमं, त्रि, (क्षु + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभा ... ।" उणां । १ । १३९ । इति मन् । ततः प्रज्ञादित्वात् अण् । वृद्धिः ।) क्षुमाया विकारः । स्त्रियां क्षौमी कन्या इत्यादि । इत्यमरटीकायां भरतः ॥

क्षौमं, पुं, क्ली, (क्षु + मन् । ततोऽण् वृद्धिश्च ।) अट्टालकः । तत्पर्य्यायः । अट्टः २ । इत्यमरः । २ । २ । १२ ॥
"हे हर्म्म्यादिरूपे । प्राकाराग्रस्थितरथ्यागृहे इति कौटिल्यः । अट्टेति ख्याते गृहविशेषे इति कोट्टः । प्राकारमध्यस्थोपरिशालायामिति केचित् । हर्म्म्यादिवातक्षुटिकायामिति केचित् । मध्यमोपरि हर्म्म्यपृष्ठे इति केचित् । प्राकारधारणार्थोऽभ्यन्तरे क्षौमाख्योऽट्टः । इति भट्टः । अट्टालिकौ अट्ट । अट्ट ङ विक्रमे वधे अच् । क्षुवन्ति शब्दायन्तेऽत्र क्षौमं । टु क्षु क क्षुते नाम्नि इति मः गुणः स्वार्थे ष्णे क्षौमञ्च । अट्टदुकूलयोः क्षौमं गुणवत् । वस्त्रभेदे क्षौमं इति मदिति वक्ष्यः । क्षौममट्टे दुकूले स्यादतसीवसनेऽपि चेति विश्वप्रकाशे अतसीवनेन सह पाठादट्टेऽपि क्षौममन्यत्स्वरवत् । तत्र त्रि परेषां वृद्धिविधानात् ।" इति पुरवर्गे भरतः ॥ * ॥ अतसीवस्त्रम् । इति हेमचन्द्रः ॥ (यथाह याज्ञवल्क्यः । १ । १८७ ।
"स गौरसर्षपैः क्षौमं पुनः पाकान्महीमयम् ।
कारुहस्तः शुचिः पण्यं भैक्ष योषिन्मुखन्तथा ॥")
"क्षुमायाः विकारः क्षौमं इत्यादि वाच्यलिङ्गत्वे स्त्रियां क्षौमी कन्थेत्यादि ।" इति दुर्गे भरतः ॥ * ॥ पट्टवस्त्रम् । तत्पर्य्यायः । दुकूलम् २ । इत्यमरः । २ । ६ । ११३ ॥ "द्वे पट्टवस्त्रे । सौत्रवस्त्रादधिकं क्षौति क्षौमं टु क्षु नाम्नीति मः गुणः । यद्वा ... प्रकृत्यन्तरं सदूद्धिमत् दुकूलार्थास् ... स्वार्थे प्रज्ञादित्वादण् क्षौमं चेति केचित् । ... उपसादयति अधिकशोभाजनकत्वादिति मार्के । कूलकि दुकूलम् ।" इति च दुर्गे भरतः ॥ शयनवस्त्रम् । यथा, शब्दरत्नावल्याम् ।

"क्षौमं दुकूले स्याद्द्वे तु पुनपुंसकयोरिह ।
क्षौमन्तु शणजेऽपि स्यादतसीजे नपुंसकम् ॥"
(यथा, महाभारते । १।२००।३ ।
"क्षत्त्या च क्षौमसंवीता कृतकौतुकमङ्गला ।
कृताभिवादना श्वश्र्वास्तस्थौ प्रह्वा कृताञ्जली ॥")

क्षौमकः, पुं, (क्षुमा एव क्षौमः प्रज्ञादित्वात् अण् । ततः संज्ञायां कन् ।) चोरनामगन्धद्रव्यम् । इति केचित् ॥

क्षौमी, स्त्री, (क्षुमा एव इति स्वार्थे अणि वृद्धिः ततो गौरादित्वात् ङीष् ।) अतसी । इति रत्नमाला ॥ (विकारार्थे अणि) क्षुमानिर्म्मितकन्था । इति क्षौमशब्दटीकायां भरतः ॥

क्षौरं, क्ली, (क्षुरस्य कार्य्यं कर्म्म क्षुरकृतं कर्म्मेति भावः क्षुरस्येदं वा ।) क्षुरकर्म्म । कामान इति भाषा । तत्पर्य्यायः । मुण्डनम् २ भद्रकरणम् ३ वपनम् ४ परिवापनम् ५ । इति हेमचन्द्रः ॥ अस्य गुणः ।
"केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम् ।"
संप्रसाधनं पवित्रीकरणमिति यावत् । इति राजवल्लभः ॥ * ॥ व्रतादिसंयमे क्षौरकर्म्माकरणे दोषो यथा,—
"व्रतानामुपवासानां श्राद्धादीनाञ्च संयमे ।
न करोति क्षौरकर्म्म अशुचिः सर्व्वकर्म्मसु ॥
स च तिष्ठति कुण्डेषु नखादीनाञ्च सुन्दरि ।।
तदेव दिनमानाब्दं तद्भोजी दण्डताडितः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥*॥
नित्यक्षौरविहितनिषिद्धदिनादि यथाह राजमार्त्तण्डः ।
"न स्नानमाचगमनोत्सुकभूषितानामभ्यक्तभुक्तरणकालनिरासनानाम् ।
सन्ध्यानिशाशनिकुजार्कदिनेषु रिक्ते
क्षौरं हितं प्रतिपदह्नि न चापि विष्ट्याम् ॥"*॥
"प्राचीमुखः सौम्यमुखोऽपि भूत्वा
कुर्य्यान्नरः क्षौरमनुत्कटस्थः ॥
उत्तरात्रितयवाम्यरोहिणी-
रौद्रसर्पपितृभेषु [illegible] ।
श्मश्रुकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान्नरः ॥"
प्रेतकार्य्ये पतितप्रेतसंप्रदानकदासीघटदानविषयकम् । अन्यथा वक्ष्यमाणवचनविरोधः स्यात् ॥
"चन्द्रशुद्धिर्यदा नास्ति ताराया[श्च] विशेषतः ।
अक्षौरिभिरपि कर्त्तव्यं चन्द्रचन्द्रजयोर्द्दिने ॥
मानं हन्ति गुरुः क्षौरे शुक्रं शुक्रो धनं रविः ।
आयुरङ्गारको हन्ति सर्व्वं हन्ति शनैश्चरः ॥"*॥
श्रीपतिरत्नमालायाम् ।
"आज्ञया नरपतेर्द्विजजन्मनां
दारकर्म्मम्टतसूतकेषु च ।
बन्धमोक्षमखदीक्षणेष्वपि
क्षौरमिष्टमखिलेषु चोडुषु ॥
देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये ।
क्षुरिकर्म्म न कुर्व्वीत जन्ममासे च जन्मभे ॥"*॥
वृद्धगार्ग्यः ।
"केशवमानन्दपुरं पाटलिपुत्रं पुरीमहिच्छत्रम् ।
दितिमदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणम् ॥ * ॥"
अत्र क्रमो वराहपुराणे ।
"श्मश्रुकर्म्म कारयित्वा नखच्छेदमनन्तरम् ॥"
इति ज्योतिस्तत्त्वम् ॥
अपि च । गोभिलः ।"केशश्मश्रुलोमनखानि वापयीत शिखावर्ज्जम् ।" इति शुद्धितत्त्वम्॥*॥अन्यच्च ।
"रोहिण्याञ्च विशाखायां मैत्रे चैवोत्तरासु च ।
मघायां कृत्तिकायाञ्च द्विजैः क्षौरं विवर्ज्जितम् ॥
कृत्वा तु मैथुनं क्षौरं यो देवांस्तर्पयेत् पितॄन् ।
रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
नापितगृहे क्षौरनिषेधो यथा,—
"स्वयं माल्यं स्वयं पुष्पं स्वयं घृष्टञ्च चन्दनम् ।
नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥
रवौ दुःखं सुखं चन्द्रे कुजे म्टत्युर्बुधे धनम् ।
मानं हन्ति गुरोर्व्वारे शुक्रे शुक्रक्षयो भवेत् ॥
शनौ च सर्व्वदोषाः स्युः क्षौरमत्र विवर्ज्जयेत् ॥"
इति कर्म्मलोचनम् ॥ * ॥ * ॥
अथ प्रथमक्षौरस्य चूडाकरणस्य विहितदिनादि । ज्योतिषे ।
"अयुग्माब्दे तथा मासि चूडा भौमशनीतरे ।
अर्केन्दुकालशुद्धौ च जन्ममासेन्दुभेतरे ।
रिक्तादर्शाष्टमीषष्ठीप्रतिपद्वर्ज्जिते सिते ॥"
दक्षोऽपि सामान्यतो दोषमाह ।
"षष्ठ्यष्टमी पञ्चदशी उभे पक्षे चतुर्द्दशी ।
अत्र सन्निहितं पापं तैले मांसे भगे क्षुरे ॥
मेषसिंहतुलाकर्किवृषश्चिकेतरलग्नके ।
श्रवणादित्रयस्वातीचित्रापुष्याश्विचन्द्रभे ॥
आदित्यरेवतीहस्ता ज्येष्ठामूले च चौडकम् ॥
मौष्णाश्विपुष्यवसुरामकवासुदेव-
ब्रह्मार्कचन्द्रवरुणादितिचित्रभेषु ।
वारेषु सोमबुधवाक्पतिभार्गवाणां
क्षौरं करोति कुशलं खलु मानवानाम् ॥"
इति वचनात् रोहिण्यामपि चूडाकरणम् ।
अत्रापि तिथ्यादिविहितदिवसरूपं विवर्ज्जयेत् ॥
"सूर्य्ये दक्षिणमार्गगामिनि हरौ सुप्ते निरंशे रवौ
क्षीणे शीतरुचौ मृचीजग्रसयोर्व्वारे निशासन्ध्ययोः ।
भुक्तेऽभ्यक्ततनौ निषिद्धसमयेऽलङ्कारयुक्ते शिशौ
क्षौराद्रोगभयं वदन्ति यवना म्टत्युं तथान्ये जगुः॥"
राजमार्त्तण्डे ।
"मानं हरेत् क्षौरमिहायुषोऽर्कः
शनैश्चरः सप्त कुजस्तथाष्टौ ।
आचार्य्यपूर्व्विन्दुबुधाः क्रमेण
दद्युर्द्दशैकादश सप्त पञ्च ॥"
जीवादिवारे क्षौरं प्रशस्तम् ॥*॥ भोजराजः ।
"शिखिसन्निधाने च चूडाकरणं जगुः शुभं यवनाः।
चैत्रे माघि दिवाकरवारे उत्तरवर्त्मनि सवितरि ॥"
दिवाकरवारविनिर्म्मोके तु गर्गः ।
"जन्मर्क्षे जन्ममासे च युग्ममासे च वत्सरे ।
न कुर्य्यात् प्रथमं क्षौरं विशेषाज्ज्येष्ठपौत्रयोः ॥"
ज्येष्ठपुत्रकन्ययोस्तु ज्येष्ठशब्दाद्याथन्तरे चूडानिषेधो विवाहप्रकरणे उक्तः । इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च । भोजराजः ।
"यो जन्ममासे क्षुरकर्म्म यात्रां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्त्रनाशं
प्राप्नोति मूढो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
पूर्व्वे विवाहे क्षुरकर्णवेधे ॥"
एतद्विषयभेदस्तु राजमार्त्तण्डे ।
"उक्तानि पतिषिद्धानि पुनः सम्भावितानि च ।
सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः ॥
सापेक्षनिरपेक्षाणि समर्थासमर्थविषयकाणि ।
स्मरेति क्षुरकर्म्म ।" इति तिथ्यादितत्त्वम् ॥

क्षौरपव्यं, क्ली, (क्षुरैः पविभिर्व्वज्रैर्निर्म्मितं निर्वृत्तमिव वा गृहम् ।) क्षुरवज्रतुल्यतीक्ष्णदृढगृहम् । यथा, श्रीभागवते । ६ । ५ । ८ ।
"नदीमुभयतो वाहां पञ्चपञ्चाद्भुतं गृहम् ।
क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि ॥"
"पञ्चपञ्चानां पञ्चविंशतेः । अद्भुतं गृहम् । क्षौरपव्यं क्षुरैः पविभिर्व्वज्रैश्च निर्म्मितमिव तीक्ष्णं दृढञ्चेत्यर्थः । स्वयं स्वतन्त्रम् । भ्रमि भ्रमणस्वभावम् ।" इति तट्टीकायां श्रीधरस्वामी ॥

क्षौरिकः, पुं, (क्षुरकर्म्म क्षुरेण वा कर्म्म करोति । यद्वा क्षुरिकर्म्म कार्य्यत्वेनास्त्यस्य । इति ठञ् । क्षौरं शिल्पत्वेनास्यास्य इति तु ठन् ।) नापितः । इति शब्दमाला ॥

क्ष्णु, ल तेजने । इति कविकल्पद्रुमः ॥ (अदा-परं-सकं-सेट् ।) मूर्द्धन्यणकारोपधः । क्ष्नादिः । क्ष्णौति खड्गं कर्म्मकारः । इति दुर्गादासः ॥

क्ष्णुतः, त्रि, (क्ष्णु+कर्म्मणि क्तः ।) शाणितः । तीक्ष्णीकृतः । इत्यमरः । ३ । १ । ६१ ॥

क्ष्मा, स्त्री, (क्षमते सहते भारं अपराधजनितं वा आसन्नां जीवानां चतुर्व्विधानां इति । क्षम् + अच् उपधायाः लोपश्च ।) पृथ्वी । इत्यमरः ।२।१।२॥ (यथा, भागवते ।७।८।३३ ।
"द्यौस्तत् सटोत्क्षिप्तविमानसङ्कुला
प्रोत्सर्पत क्ष्मा च पदातिपीडिता ॥")

क्ष्माजः, पुं, (क्ष्मा पृथ्वी तस्यां तस्याः वा जातवान् इति । क्ष्मा+जन्+डः ।) मङ्गलग्रहः । इति ज्योतिषम् ॥

क्ष्मातलं, क्ली, (क्ष्मायाः तलम् ।) भूतलम् । (यथा, मार्कण्डेये । २३ । ४७ ।
"यद्यस्ति क्ष्मातले खेऽन्यतो वा
त्वत्सम्यक् तत् खरेश्वैः श्रुनेश्च ॥")
पृथिवीमध्यम् । इति केचित् ॥

क्ष्माहुतिः, पुं, (क्ष्मायां पृथ्व्यां हुतिर्धारणा मालनोप्रक्रियस्य ।) काश्मीरदेशीयराजविशेषः । यथा राजतरङ्गिण्याम् । ५ । ४८२ ।

"अथाभ्यषिष्यत क्षिप्रं विप्रैरेत्य यशस्करः।
क्ष्माभृति प्रौढसामर्थ्यः सानुमानिव तोयदैः॥"

क्ष्माप, पुं, (क्ष्मां पाति रक्षतीति। क्ष्मा+पा+कः।) राजा। यथा,—
"क्षामयार्त्तिरिपुत्रासक्षुदाद्यै दृष्टवैकृताः।
लब्धोदया क्षोभगेन क्ष्मापा सन्त्यनुयायिनः॥"
इति राजतरङ्गिण्याम्। ५। ३१९॥

क्ष्मापाल, पुं, (क्ष्मां पालयतीति। क्ष्मा+पाल्+णिच्+अण्। क्ष्मायाः पालो वा।) राजा। यथा राजतरङ्गिण्याम्। ५। ३२४।
"न के लोभं समुत्पाद्य जिह्वया स्निग्धदीर्घया।
पिपीलिका इव ग्रस्ताः क्ष्मापालैः शलाकैरिव॥"

क्ष्माभुक् [ज्,] पुं, (क्ष्मां पृथ्वीं भुनक्ति उपभुनक्ति इत्यर्थः। क्ष्मा+भुज्+क्विप्। कुत्वञ्च।) राजा। इत्यमरः। २। ८। १॥ (यथा, राजतरङ्गिण्याम्। ५। ५५।
"तत्रस्था क्ष्माभुजा पृष्टास्तन्निवेदनकारणम्।
अनिज्ञपन् क्षितिन्यस्तजानुप्राञ्जलयस्तत॥")

क्ष्माभृत्, पुं, (क्ष्मां पृथ्वीं बिभर्त्ति। क्ष्मा+भृ+क्विप् तुगागमश्च।) राजा। (यथा, पञ्चतन्त्रे। १। १६६।
"देशानामुपरि क्ष्माभृदातुराणां चिकित्सकाः।
वणिजो ग्राहकाणाञ्च मूर्खाणामपि पण्डिताः॥")
पर्व्वतः। इत्यमरः। २। ८। १॥ (यथा, राजेन्द्रकर्णपूरे। ६७।
"कान्तारेषु च काननेषु च सरित्तीरेषु च क्ष्माभृता-
मुत्सङ्गेषु च पत्तनेषु च सरिद्भर्त्तुस्तटान्तेषु च॥")

क्ष्माय ई ङ विधूनने। इति कविकल्पद्रुमः॥ (भ्वां-आत्म-अक-सेट्।) पवर्गशेषयुक्तः। क्ष्मादिः। विधूननमिति विधून्यतेऽसाविति कर्म्मणि घञि विधूनः सकम्पः ततो विधून इवाचरतीति क्वौ कृते अनटि रूपम्। कम्पनमित्यर्थः। ई, क्ष्मातः। ङ, क्ष्मायते वृक्षः। (तथाच, भट्टिः। १४। २१।
"उल्का ददृशिरे दीप्ता ररुवुश्चाशिवं शिवाः।
चक्ष्माये च मही रामं शशङ्के चाशुभागमम्॥")
क्ष्मायते कम्पते त्वङ्गत्येजतीर्ते च वेपते इति कम्पार्थे भट्टमल्लोऽपि। रमानाथस्तु विधूननशब्दस्येणन्तादवुत्पत्तेः सकर्म्मकोऽयं इति प्रतीमः। प्रयोगस्त्वन्यथा दृश्यते इत्याह। इति दुर्गादासः॥

क्ष्मायित, त्रि, (क्ष्माय+इतच्।) कम्पितः। इति व्याकरणम्॥

क्ष्मायिता, [ऋ] त्रि (क्ष्माय+तृच्प्रत्ययः।) कम्पकः। इति व्याकरणम्॥

क्ष्मील, निमेषे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अक-सेट्।) निमेषः पक्ष्मभिश्चक्षुष आवरणम्। क्ष्मीलति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः। इति दुर्गादासः॥

क्ष्विड़, ऌ आ ङ ञि स्नेहे। मोचने। इति कविकल्पद्रुमः॥ (भ्वां-आत्म-अकं-मोचने सकं-सेट्।) वकारयुक्तः। ऌ, अक्ष्विडत्। आ, क्ष्विडितं क्ष्विट्टं तेन। ङ, क्ष्वेडते। ञि, क्ष्विट्टोऽस्ति। स्नेह स्निग्धीभावः। मोचने क्ष्वेडते तिलः तैलं मुञ्चतीत्यर्थः। इति दुर्गादासः॥

क्ष्विन्न, त्रि, (क्ष्विद्+क्तः।) मुक्तः। स्निग्धः। इति व्याकरणम्॥

क्ष्विद आ ञि कूजने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अक-सेट्।) आ, क्ष्वेदितं क्ष्विण्णं तेन। ञि, क्ष्विण्णोऽस्ति। मूर्द्धन्यवर्गतृतीयान्तोऽयमित्येके। इति दुर्गादासः॥

क्ष्विद, इर् य आ मोचने। स्नेहे। इति कविकल्पद्रुमः॥ (दिवां-परं-अक-मोचने तु सकं-सेट्।) इर्, अक्ष्विदत् अक्ष्वेदीत्। अस्मात् पुषादित्वान्नित्य ङ इत्यन्ये। य, क्ष्विद्यति। आ, क्ष्वेदितं क्ष्विन्नं तेन। इति दुर्गादासः॥

क्ष्विद, ऌ आ ङ ञि मोचने। स्नेहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्म-सक-स्नेहे तु अक-सेट्।) एतदाद्यास्त्रयो वकारयुक्ताः क्ष्वाद्याः। ऌ अक्ष्विदत्। आ, क्ष्वेदितं क्ष्विन्नं तेन। ङ, क्ष्वेदते तिलः तैलं मुञ्चतीत्यर्थः। ञि, क्ष्विन्नोऽस्ति। स्नेह स्निग्धीभावः। इति दुर्गादासः॥

क्ष्वेड, क्ली, (क्ष्विड+घञ्।) लोहितार्कपर्णफलम्। घोषापुष्पम्। इति मेदिनी। डे। ६॥

क्ष्वेड, पुं, (क्ष्विड+भावादौ घञ्। क्ष्वेडते इति अच् वा।) ध्वनिः। कर्णामयः। विषम्। इति मेदिनी। डे। ५॥ (यथा, आनन्दलहर्य्याम्। ८९।
"करालं यत् क्ष्वेडं कवलितवतः कालकलना
न शम्भोस्तन्मूलं जननि तव ताडङ्कमहिमा॥")
पीतघोषावृक्षः। इति रत्नमाला॥ * ॥ क्ष्वेड़रोगस्य निदानादि कर्णरोगशब्दे द्रष्टव्यम्॥

क्ष्वेड, त्रि, (क्ष्विड+कर्म्मणि घञ्।) दुरासदः। कुटिलः। इति मेदिनी। डे। ६॥

क्ष्वेडन, क्ली, (क्ष्विड+भावे ल्युट्।) मोचनम्। त्यागः। यथा, महाभारते। ३। १७८। २६।
"त्रासनं सर्व्वभूतानां कालान्तकयमोपमम्।
निश्वासक्ष्वेडनादेव भर्त्सयन्तमिव स्थितम्॥"

क्ष्वेडा, स्त्री, (क्ष्विड+घञ्+टाप् च।) वंशशलाका। सिंहनादः। इति मेदिनी। डे। ५॥ (स तु लोकस्य शब्दविशेषः। यथा, वक्रोक्तिपञ्चाशिकायाम्। ३६।
"एषा सागरसङ्गताभिमतता याता न मे कच्चिच्चित्
मुग्धे कण्ठगतं ब्रवीषि मम किं सक्ष्वेडतामीशयीम्।
क्ष्वेडाराव इहोषितस्तव गणशाते सह क्रीडतो
युष्मामीलनलोऽवतादिति गिरा गौर्य्या हतो-
ऽनुत्तरः॥"
"सागरसङ्गतेति। सागरेण समुद्रेण सङ्गता। अर्थाद्गङ्गा। उत्तरे तु सेति सर्व्वनामपदम्। गरो विषम्। तदाह सक्ष्वेडेति। क्ष्वेडेन विषेण क्ष्वेडया शब्दविशेषेण च सक्ष्वेडम्। क्ष्वेडं विषम्। क्ष्वेडा जनस्य शब्दविशेषः॥" इति तट्टीका॥)
कोषातकी। इति राजनिर्घण्टः॥

क्ष्वेडित, क्ली, (क्ष्विड्+भावे क्तः।) सिंहनादः। इत्यमरः। ३। ५। ३४॥ (यथा, महाभारते। १। ६९। ६।
"नानायुधधरैश्चापि नानावेशधरैस्तथा।
हेषितस्वनमिश्रैश्च क्ष्वेडितास्फोटितस्वनैः।
आसीत् किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे॥")

क्ष्वेल, ऋ चालगत्योः। इति कविकल्पद्रुमः॥ (भ्वां-परं-अक गतौ तु सक-सेट्।) वकारयुक्तः। क्ष्वादिः। ऋ, अचिक्ष्वेलत्। चालः कम्पः। चाल, केश्चिन्न मन्यते। इति दुर्गादासः॥ (क्रीडायामिति केचित्। यथा, रामायणे। ५। १०। १३।
"आस्फोटननिनादांश्च बालानां क्ष्वेलतां तथा॥")

क्ष्वेलिका, स्त्री (क्ष्वेला+स्वार्थे कन् अत इत्वञ्च।) क्रीडा। यथा, श्रीभागवते। ५। ८। १८।
"क्ष्वेलिकायां मां मृषा समाधिना आमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषत्परुषविषाणाग्रेण लुठति।" "सम्भवति चेत्-इत्याह। क्ष्वेलिकायां क्रीडायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं मां प्रेमसंरम्भेण प्रणयकोपेन पृषत्जलबिन्दुवदपरुषेण विषाणाग्रेण लुठति सघट्टयति।" इति तट्टीकायां श्रीधरस्वामी॥

क्ष्वेली, स्त्री, (क्ष्वेल+गौरादित्वात् ङीष्।) क्रीडा। यथा, श्रीभागवते। १०। २९। ४६।
"बाहुप्रसारपरिरम्भकरालकोरु-
नीविस्तनालभननर्म्मनखाग्रपातैः।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणा-
मुत्तम्भयन् रतिपतिं रमयाञ्चकार॥"
"बाहुप्रसारश्च परिरम्भश्च करालकादीनामालभनं स्पर्शश्च नर्म्म परिहासश्च नखाग्रपातश्च तैः। क्ष्वेल्या क्रीडया च अवलोकैश्च हसितैश्च कामं तासां उद्दीपयन् ता रमयामास।" इति तट्टीकायां श्रीधरस्वामी॥ * ॥ अत्र क्ष्वेल्यमिति प्रमादात् केनचिल्लिखितम्॥

ख

ख, खकारः। स तु व्यञ्जनद्वितीयवर्णः। अस्योच्चारणस्थानं कण्ठः। (यथा, सिद्धान्तकौमुद्याम्। "अ-कु-ह-विसर्ज्जनीयानां कण्ठः।" इति। शिक्षाग्रन्थे तु अस्य जिह्वामूलीयत्वमुक्तम्। यथा,—"जिह्वामूले तु कुः प्रोक्तः।" इति। परं जिह्वामूलीयस्यापि कण्ठमूलोच्चारणपरत्वात् न दोषाय एव ॥) यथा, कामधेनुतन्त्रे।
"खकारं परमाश्चर्य्यं शङ्खकुन्दसमप्रभम्।
कोणत्रययुतं शून्य विन्दुत्रयसमन्वितम् ॥
गुणत्रययुतं देवि। पञ्चदेवमयं सदा।
त्रिशक्तिसंयुतं वर्णं खकारं प्रणमाम्यहम् ॥"
तस्योत्पत्तिर्यथा, प्रपञ्चसारे।
"स सर्गः श्लेषितः कण्ठे वायुना कादिमीरयेत्।
वर्गस्पर्शनमात्रेण कं खरस्पर्शनात्तु खम् ॥"
(वङ्गाक्षरैः) तस्य लिखनप्रकारादिर्यथा,—
"शिवरूपा वामरेखा दक्षरेखा प्रजापतिः।
अधोरेखा विष्णुरूपा साक्षाद्ब्रह्मस्वरूपिणी ॥
वामाद्दामगता रेखा वह्निरूपा च सा स्मृता।
मात्रा कुण्डलिनी साक्षात् खकारः पञ्चदैवत. ॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने।।
वन्धूकपुष्पसङ्काशां रत्नालङ्कारभूषिताम् ॥
वराभयकरों नित्यामीषद्धास्यमुखीं पराम्।
एव ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
तस्य नामानि यथा, नानातन्त्रेषु,—
"खः प्रचण्डः कामरूपी शद्धिर्वह्निः सरस्वती।
आकाशमिन्द्रिय दुर्गा चण्डीशस्तापिनी गुरुः ॥
शिखण्डी दन्तजातीशः कफोणिर्गरुतो यदि।
शून्यं कपाली कल्याणी शूर्पकर्णोऽजरामरः।
शुभामेया चण्डलिङ्गो जना अङ्गारखड्गकौ ॥"

खं, क्ली, (खर्व्वति मनोऽस्मिन् खन्यते चुभ्यते मनोऽनेन वा। खर्व्व गतौ, खन दारणे वा अन्येभ्योपीति डः।) इन्द्रियम्। (यथा, मनौ। २। ६०।
"त्रिराचामेदपः पूर्ब्बं द्विः प्रमृज्यात् ततो मुखम्।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥")
पुरम्। क्षेत्रम्। शून्यम्। (यथा, महाभारते। १। ८८। ७।
"पतस्युदीर्णाम्बुधरान्धकारात्
खात् खेचराणां पवरो यथार्कः ॥")
विन्दुः। (यथा, लीलावत्यां क्षेत्रव्यवहारे।
"वेदाग्निवाणखाश्वेभ खखाभ्राभ्ररसै. क्रमात् ॥")
आकाशम्। (यथा, मनौ। १२। १२०।
"ख सन्निवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम् ॥"
"खं वाह्याकाशं खेषु उदराद्यवच्छिन्नशरीराकाशेषु।" इति कुल्लूकभट्टः ॥) संवेदनम्। देवलोकः। शर्म्म। इति मेदिनी। खे। १ ॥ लग्नात् दशमराशिः। इति दीपिका ॥ (यथा, जातकप्रकरणे। "तनुनिधनसखभेशाः केन्द्रकोणे त्रिलाभे ॥") अभ्रकम्। इति राजनिर्घण्टः ॥ (शब्दतन्मात्रम्। यथा, मण्डूकोपनिषदि।
"एतस्माज्जायते प्राणो मनः सर्व्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथ्वी सर्व्वस्य धारिणी ॥"
चिदानन्दमयब्रह्माकाशम्। यथा, छान्दोग्योपनिषदि "कं ब्रह्म खं ब्रह्म यदेव कं तदेव खं गङ्काकारो वै पुरुषो वकारो घोषयंस्तथा ॥"
छिद्रम्। यथा, भागवते। ७। १२। २५।
"खे खानि वायौ निःश्वासांस्तेजस्युष्माणमात्मवान् ॥")

खः, पु, (खर्व्वयति स्वरश्मिभिरिति। खर्व्व + अन्तर्भूतणिच् + डः।) सूर्य्यः। इति हेमचन्द्रः ॥

खकुन्तलः, पु, (खं आकाशं कुन्तलं कुन्तलस्थानीयं यस्य।) शिवः। इति त्रिकाण्डशेषः ॥ (विष्णुः। "आकाशं वै विष्णुर्व्योमकेशः शिवो महर्षिः।" इति श्रुतिः ॥)

खक्ख, हासे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) कोपधः। खादिः। खक्खति। इति दुर्गादासः ॥

खक्खटः, पु, (खक्ख् + अटन्।) कक्खटः। कठिनः। इत्यमरटीकायां रायमुकुटः ॥

खखोल्कः, पुं, (खे आकाशे सूर्य्यरूपेण खेषु इन्द्रियेषु आत्मरूपेण उल्का इव। अन्तर्व्वहिःप्रकाशकत्वात् तथात्वम्।) सूर्य्यः। यथा,—
हरिरुवाच।
"पुनः सूर्य्यार्च्चनं वक्ष्ये यदुक्तं भृगवे पुरा।
ओम् खखोल्काय ओम् नमः ॥"
इति गारुडे १६ अध्यायः ॥
खषोल्कायेति च पाठः॥ (अयं हि काशीस्थितादित्यः। इति काशीखण्डम् ॥ यदुक्तं तत्रैव ५० अध्याये।
"खखोल्को नाम भगवानादित्यः परिकीर्त्तितः॥"
एतद् विवरण तत्रैवाध्याये विशेषतो द्रष्टव्यम् ॥)

खगः, पु, (खे आकाशे गच्छति। ख + गम् + डः।) सूर्य्यः। ग्रहः। (यथा, ज्योतिषे।
"आपोक्लिमे यदि खगाः स किलेन्दुवारः ॥")
देवः। वाणः। पक्षी। इति मेदिनी। गे। ६ ॥ (यथा, महाभारते। १। ३३। १६।
"त व्रजन्तं खगश्रेष्ठं वज्रेणेन्द्रोऽभ्यताडयत् ॥")
वायुः। इति शब्दचन्द्रिका ॥ (यथा, महाभारते वनपर्व्वणि।
"तमांसीव यथा सूर्य्यो वृक्षानग्निर्घनान् खगः ॥")
शलभः। इत्यमरटीकायां भरतः ॥ (यथा, मनुः। १२। ६३।
"मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः ॥"
महादेवः। यथा, महाभारते। १३। १७। ६६।
"आकाशनिर्व्विरूपश्च निपाती ह्यवशः खगः॥")

खगखानं, क्ली, (खन्यते इति। खन् + कर्म्मणि घञ्। खगानां पक्षिणां खानं वासार्थकोटरम्।) वृक्षकोटरम्। इति शब्दचन्द्रिका ॥

खगपतिः, पु (खगान् पातीति। खग + पा + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) गरुड़ः। इति शब्दरत्नावली ॥

खगवक्त्रः, पुं, (खगस्य वक्त्रमिव वक्त्रं अग्रभागः आकृतिर्वा यस्य।) लकुचवृक्षः। इति शब्दचन्द्रिका ॥

खगवती, स्त्री, (पृथिव्याः स्वकक्षायामाकाशगतिमत्त्वात् खगतुल्यगतित्वेन सादृश्यमस्त्यस्या इति आर्य्यभट्टः। सूर्य्यसिद्धान्तमते तु खगसादृश्यं आकाशस्थितित्वेनास्त्यस्याः। मतुप्। मस्य वः।) पृथ्वी। इति जटाधरः ॥

खगशत्रुः, पु, (खगानां शत्रुरिव।) पृश्निपर्णी चाकुलिया इति भाषा ॥ इति शब्दचन्द्रिका ॥

खगान्तकः, पुं, (खगानां अन्तकः यम इव। यद्वा, अन्तयति अन्तं करोति इति। अन्तणिच् ततो ण्वुल्।) श्येनपक्षी। इति राजनिर्घण्टः ॥

खगासनः, पु, (खगस्य सूर्य्यस्य आसनमिव उदयस्थानं यत्र। आसनत्वेन कल्पितत्वात्तथात्वम्।) उदयपर्व्वतः। इति शब्दमाला ॥ (खगो गरुड आसनं यस्येति विग्रहे।) विष्णुः। (एतद्विवरणं यथा, महाभारते।१। सौपर्णे। ३३। १२—१८।
"तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम्।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः ॥
उवाच चैनं भूयोऽपि नारायणमिदं वच।
अजरश्चामरश्च स्यामममृतेन विनाप्यहम् ॥
एवमस्त्विति तं विष्णुरुवाच विनतासुतम्।
प्रतिगृह्य वरौ तौ च गरुडो विष्णुमब्रवीत् ॥
भवतेऽपि वरं दद्यां वृणोतु भगवानपि।
तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महावलम्।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् ॥
एवमस्त्विति तं देवमुक्त्वा नारायणं खगः।
वव्राज तरसा वेगाद् वायु स्पर्द्धन् महार्णवः ॥")

खगेन्द्रः, पुं, (खगानां पक्षिणां इन्द्रः।) गरुडः। इति राजनिर्घण्टः ॥ (यथा, महाभारते। १। सौपर्णे। ३१। ३५।
"पतत्रीणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत ॥"
अस्य खगेन्द्रत्वकथा यथा तत्रैव। १६—२०।
"तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः।
वालिखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत ॥
एवमस्त्विति तच्चापि प्रत्यूचुः सत्यवादिनः।
तान् कश्यप उवाचेदं सान्त्वपूर्ब्बं प्रजापतिः ॥
अयमिन्द्रस्त्रिभुवने नियोगाद् ब्रह्मणः कृतः।
इन्द्रार्थे च भवन्तोऽपि यत्नवन्तस्तपोधना. ॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः। ॥
भवतां हि न मिथ्याऽयं सङ्कल्पो वै चिकीर्षितः ॥
भवत्वेष पतत्रीणामिन्द्रोऽतिवलसत्त्ववान्।
प्रसादः क्रियतामस्य देवराजस्य याचतः ॥")

खगेन्द्रध्वजः, पु, (खगेन्द्रो गरुडो ध्वजः केतुर्वाहनं च यस्य।) विष्णुः। (यथा, भागवते। १। १८। १६।
"त्वायेन वैयासकिशास्त्रेन
भेजे खगेन्द्रध्वजपादमूलम् ॥")

खगेश्वरः, पुं, (खगानां ईश्वरः।) गरुडः। इत्यमरः। १। १। ३१ ॥

खगोलः, पुं, आकाशमण्डलम्। तस्य विवरणं यथा। एतद्ब्रह्माण्डं सच्छिद्रं कटाहद्वयस्य गोलाकारसम्पुटतुल्यम्। यत्र भूर्भुवःस्वर्महर्जनतपःसत्य-संज्ञकानि सप्तभुवनानि सन्ति। ब्रह्माण्डमध्ये यः परिधिः स आकाशकक्षा। तन्मध्ये परावह-परिवह-सुवह-समवहोद्वहाख्यानां पञ्चानां वायूनां स्थानानि अधोऽधःक्रमेण सन्ति। तदधस्तात् अधोऽधःस्थितपूर्व्वाभिमुखशनिबृहस्पतिराहुकेतुमङ्गलसूर्य्यशुक्रबुधचन्द्रद्वययुक्तं दक्षिणोत्तरस्थितध्रुवाख्य-ताराद्वयेन बद्धं नक्षत्रचक्रं सदापश्चिमगतिना प्रवहवायुना भ्रमति। ततः अधोऽधःक्रमेण सिद्धविद्याधरमेघविद्युदादियुक्तः सदोत्तरगतिरावहवायुर्भ्रमति। एतद्ब्रह्माण्डस्य मध्ये समन्तात् ईश्वरस्य धारणात्मिकां शक्तिं बिभ्राणो भूगोलः शून्ये तिष्ठति। पृथ्व्यन्तर्गता नागासुरसमाश्रया दिव्यौषधिरसोपेता रम्याः पाताल-रसातल-महातल-तलातल-सुतल-वितलातल-संज्ञका ऊर्द्ध्वक्रमेण सप्तपातालभूमयश्च सन्ति। सुमेरुपर्व्वतोपरि शून्ये एका ध्रुवतारा भ्रमति। एव वडवानलोपरि शून्ये अन्या ध्रुवतारा भ्रमति।

	अथ कक्षायोजनानि	व्यासयोजनानि	पृथिव्युच्चयोजनानि
आकाशस्य ब्रह्माण्डस्य वा	१८७१२०८०८६४००००००	५९५३८४३९११२७२७२७	२९७६९२१९५५६३६३६३
नक्षत्रस्य	२५९८९००००	८२६९२२०३	४१३४५३३६
शनेः	१२७६६८२५५	४०६२०२१७	२१३१००५८
राहुकेत्वोः	८०५७२८६३२	२५६३६८०१	१२८१८८३००
गुरोः	५१३७५७६४	१६३४६८३४	८१७२६१७
चन्द्रोच्चस्य	३८३२८४८४	१२०४२८२८	६३७०६१४
मङ्गलस्य	८१४६९०९	२५९२१९८	१२९५२९९
सूर्य्यस्य	४३३१५००	१३७८२०४	६८८३०२
शुक्रशीघ्रस्य	२६६४६३७	८४७८३९	४२३११९
बुधशीघ्रस्य	१०४३२०९	३३१९३०	१६५१६५
बुधशुक्रयोः	४३६१५०	१३८७०५	६८५८८
चन्द्रस्य	३२४०००	१०३ ०९१	५०४५
आवहवायोः	५१०४	१६२४	१२
भूगोलस्य	४९६७	१५८१	०

अथ ग्रहाणां मध्यभुक्तयः।

	रवेः	चन्द्रस्य	मङ्गलस्य
दिने— कलाद्याः	५९।८।१०।०	७९०।३४।५२	३१।२६।२८
वर्षे—— राश्याद्याः	१२।०।०।०	४।१२।४६।४०।४८	६।११।२४।९।३६
युगे—— भगणाद्याः	४३२००००	५७७५३३३६	२२९५८३२
कल्पे—— भगणाद्याः	४३२०००००००	५७७५३३३६०००	२२९५८३२०००

	बुधशीघ्रस्य	बृहस्पतेः	शुक्रशीघ्रस्य
दिने— कलाद्याः	२४५।३२।२१	४।५९।९	९६।७।४३
वर्षे—— राश्याद्याः	१।२४।४५।२२।४८	१।०।२१।६।३६	७।१५।११।४९।१२
युगे—— भगणाद्याः	७१९३७०६०	३६४२२०	७०२२३७६
कल्पे—— भगणाद्याः	७१९३७०६००००	३६४२२००००	७०२२३७६०००

खगोलः

अथ ग्रहाणां मध्यभुक्तयः ।

	शनेः	राहोः	चन्द्रोच्चस्य
दिने— कलाद्याः	२।०।२३	३।१०।४४	६।४१।१०
वर्षे— राश्याद्याः	०।१२।१२।५४	०।१९।२१।१२।३६	११०।४०।५९।४२
युगे— भगणाद्याः	२४६५६८	२३१२३८	४८८१०३
कल्पे— भगणाद्याः	२४६५६८०००	२३१२३८०००	४८८१०३०००

अथ राशिषु नक्षत्राणां स्थितिः ।

	अश्विनी	भरणी	कृत्तिका	रोहिणी	मृगशिरा	आर्द्रा	पुनर्वसुः	पुष्या	अश्लेषा
राशिः	०	०	१	१	२	२	२	३	३
अंशाः	१	२०	१	२९	३	१	२०	१६	२९
कला	०	०	३	३०	०	१०	४०	२०	२०
अपक्रम-भागाः	१० उत्तरः	१२ उत्तरः	५ उत्तरः	५ दक्षिणः	१० दक्षिणः	९ दक्षिणः	६ उत्तरः	० उत्तरः	७ दक्षिणः

	मघा	पूर्वफल्गुनी	उत्तरफल्गुनी	हस्ता	चित्रा	स्वाती	विशाखा	अनुराधा	ज्येष्ठा
राशिः	४	४	५	५	५	६	६	७	७
अंशाः	२	२२	५	१०	२४	१६	२६	२४	२९
कला	२०	२०	४०	०	१०	४	४०	०	०
अपक्रम-भागाः	उ	१२ उ	१३ उ	११ द	२ द	२७ उ	३४ द	३ द	४ द

	मूला	पूर्वाषाढ़ा	उत्तराषाढ़ा	अभिजित्	श्रवणा	धनिष्ठा	शतभिषा	पूर्वभाद्रपद्	उत्तरभाद्रपद्	रेवती
राशिः	८	८	८	८	९	९	१०	१०	११	११
अंशाः	१	१४	२०	२४	१०	२०	२०	२६	१	२६
कला	१०	०	०	४०	०	०	०	०	०	५०
अपक्रम-भागाः	९ द	५ ३० द	५ द	३० उ	३० उ	३३ उ	३० द	२४ उ	२६ उ	० उ

अथ राशिषु नक्षत्राणां स्थितिः ।

	अगस्त्यः	मृगव्याधः । कालपुरुषः	हुतभुक्	ब्रह्महृदयं	प्रजापतितारा
राशिः	३	२	१	१	१
भागः	०	२०	२२	२२	१
कला	०	०	०	०	३
अपक्रम-भागाः	६० द	६४० द	३८ द	३३० द	५ उ
	पुनर्व्वसौ	आर्द्रायाम्	रोहिण्याम्	रोहिण्याम्	कृत्तिकायाम्

अथ खगोलरचना ।

खवाङ्कितं काष्ठनिर्म्मितं भूगोलं तन्मध्यगं सुमेरोरुभयत्र निर्गतं दण्डञ्च कृत्वा षट्शतर-शतत्रय-परिमित समविभक्तं आधारकक्षाद्वयं विषुवकक्ष्यैका च कार्य्या ॥

अथ मेषादिराशिस्थितिः ।

स्वाहोरात्रार्द्धकर्णं तत्प्रमाणानुमानेन च क्रान्तिस्थानात् दक्षिणोत्तरविभक्तैर्विक्षेपभागै-र्निजनिजापक्रमैश्च मेषादीनां राशीनां तिस्रः कक्ष्याः कुर्य्यात् । ता एव कक्ष्याः कर्कादीनां वैपरीत्येन कुर्य्यात् । ताहृश्यस्तिस्रस्तुलादीनां तथा-विपर्य्ययात मकरादीनाञ्च कुर्य्यात् ॥

अहोरात्रार्द्धकर्णज्ञान यथा ।

स्वक्रान्तेरुत्क्रमक्रमज्ये हे कुर्य्यात् । तत्र उत्क्रमज्यया हीना त्रिज्या दक्षिणोत्तर दिन-व्यासदल स्यात् ॥

विक्षेपज्ञानं यथा ।

चन्द्र स्वक्रान्त्यंशात् निजपातेन राशिचक्र-कलाशीतिभागे. परम दक्षिणोत्तर विक्षिप्यते । तस्य नवभाग द्विगुणितं वृहस्पतिः मङ्गल-स्त्रिगुणित अन्ये चतुर्गुण विक्षिप्यन्ते । तत्र क्रमः चन्द्रस्य मध्यविक्षेपकला २७०मङ्गलस्य९० बुधस्य १२० वृहस्पते ६० शुक्रस्य १२० शनेः १२० रवेर्न्विक्षेपकला नास्ति ॥

अथ नक्षत्रादिकक्ष्यास्थानम् ।

आधारकक्ष्याद्वयोपरियाम्योदग्गोलसंस्थितानां नक्षत्रादीनां कक्ष्याः कुर्य्यात् । सर्व्वासां कक्ष्याणां मध्यस्थाने विषुवत्कक्ष्या स्थिता । तदाधार-कक्ष्ययोर्युतेरूर्द्ध्वे हे अयने विषुवद्वयञ्च कुर्य्यात् । विषुवस्थानात् भगणसञ्चारपर्य्यन्तं स्फुटभागै-र्मङ्गलादीनां चिह्नाण्येव कुर्य्यात् अर्थात मेषादि-राशीन् तिर्य्यक्ष्याभी रचयेत् । तथा अयन-स्थानात् अन्यायनपर्य्यन्तं तिर्य्यक् अपरा कक्ष्या-क्रान्तिसंज्ञा कार्य्या । तया कक्ष्यया सूर्य्य प्रकाशयन् सदा भ्रमति ॥ चन्द्राद्या ग्रहा अपमण्डलमाश्रितैः स्वस्वपातांशैरपक्रमात् विक्षे-पान्तेषु अपक्रमेणाकृष्टाः सन्तो लोकैर्द्दृश्यन्ते । क्षितिजे उदयन् राशिः लग्नं स्यात् तद्वशात् अस्तं गच्छंश्च अस्ताख्यं स्यात् । लग्नोदयैर्यथा चिह्न दशचतुर्थस्थानञ्च कुर्य्यात् । मध्यक्षिति-जयोर्म्मध्ये या ज्या सा अन्यथा कथ्यते । विषु वत्क्षितिजयोरन्तरज्या चरदलज्या । उपरि स्वक स्थान मध्ये क्षितिजमण्डलं कृत्वा वस्त्र-वेष्टित लोकालोकवेष्टितञ्च कृत्वा जलपतनयोगेन पारदसावयोगेन वा कालभ्रमञ्च साधयेत् । इति सूर्य्यसिद्धान्तसम्मतम् ॥

खगड़ः, पु, (खे आकाशे गलतीति । गल+अच् पृषोदरात् साधु ।) दृक्षविशेषः । खागड़ा इति भाषा ॥ तत्पर्य्याय. पोटगल. २ वृहत्-काश. ३ काकेक्षु. ४ । इति रत्नमाला ॥

खङ्कुरः, पु, (खन्यते कङ्कतिकया इति । खनृ दारणे+ क्विप् । कीर्य्यते विकीर्य्यते इति । कृ विक्षेपे+ अप् । तत कर्म्मधारयः ।) चूर्णकुन्तलः । इति हेमचन्द्र ॥

खच, ग भूतिपूत्योरुत्पत्तौ । इति कविकल्पद्रुमः ॥ (क्र्या-परं-अक-सेट् ।) भूतिः सम्पत्ति पूतिः पवित्रता तयोरुत्पत्तिः प्रादुर्भाव । भूत्युत्पत्तौ पूत्युत्पत्तौ चेत्यर्थः । ग, खच्नाति राजा सम्पन्न. स्यादित्यर्थः । शेषार्थः कातन्त्राद्यसम्मतः । इति दुर्गादास ॥

खच, तु क बन्धने । इति कविकल्पद्रुम. ॥ (अदन्त-चुरा-पर-सक सेट् ।) खचयति । इति दुर्गादास. ॥

खचमसः, पुं (खे आकाशे चम्यते भक्ष्यतेऽसौ पितृलोकस्थैः पुण्यात्मभिरित्यर्थः । चमु भक्षणे+ असच् । खे चमसः यज्ञीयपात्रमिव अम्टतमय-त्वात्तथात्वम् ।) चन्द्रः । इति त्रिकाण्डशेष ॥

खचरः, पुं, (खे आकाशे चरतीति । चर+ "चरेष्टः ।" ३।२।१६। इति टः ।) मेघ । इति शब्दचन्द्रिका ॥ वायु । राक्षसः । सूर्य्य । एतेषां प्रमाण यथा । महाभारते द्रोणपर्व्वणि ।

"खचरस्य सुतस्य सुत. खचर
खचरस्य पिता न पुन. खचरः ।
खचरस्य सुतेन हतः खचर
खचरी परिरोदिति हा खचर । ॥"

आकाशगामिनि त्रि । यथा । स्मृतिः ।

"पवनो दिक्पतिर्भूमि-राकाश खचरामराः ॥"

रूपकभेदः । यथा । सङ्गीतदामोदरः ।

"खचरो रङ्गताले स्यात् गुरुरादौ लघुस्तथा ।
शान्तेऽथवा हास्यरसे भवेदेष दशाक्षर ॥"

खचित, त्रि, (खच्+क्त ।) सयुक्तम् । तत्पर्य्याय करम्बितम् २ रूषितम् ३ गुण्डितम् ४ । इति त्रिकाण्डशेषः ॥ करम्बम् ५ कवरम् ६ मिश्रम् ७ संपृक्तम् ८ । इति हेमचन्द्रः ॥ व्याप्तम् ९ । इति शब्दरत्नावली ॥ गुण्ठितम् १० छुरितम् ११ । इति जटाधर. ॥

खज, मन्थे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सक-सेट् ।) मन्थो विलोडनम् । खजति जल मत्स्य । इति दुर्गादास ॥

खञ, इ खाञ्जल्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् । इदित् ।) इ, खञ्जते । पङ्गु खोड भावप्रधाननिर्द्देशात् पङ्गुत्वमिति यावत् । सो-ऽस्यास्तीति चूडादित्वात्क्षः । पङ्गुलस्तस्य भाव खाञ्जल्यं खोटनमित्यर्थः । खञ्जति खोड । भावप्रधाननिर्द्देशो यथा । वुदसवर्णे इति का-तन्त्रसूत्रम् । अत्र असवर्णे परे उवर्णो वकारत्व प्राप्नोतीत्येवार्थ. । इति दुर्गादासः ॥

खज., पुं, (खज्यते निर्म्मथ्यतेऽनेन । खज्+करणे अप् । यद्वा, खजति मथ्नातीति । खज्+अच ।) दर्व्वि । इत्यमरटीकायां भरत ॥ हाता इति भाषा ॥ (यथा, महाभारते । १२ । २१४ । २१ ।

"पयस्यन्तर्हितं सर्पिर्यद्वद् निर्म्मथ्यते खजै. ।
शुक्रं निर्म्मथ्यते तद्वद्देहसङ्कल्पजैः खजैः ॥"
"खजेनामथ्य च स्थाप्य तन्निहन्त्युपयोजितम् ॥"

इति वाभट्टे चिकित्सास्थाने तृतीयेऽध्याये ॥

खजकः, पुं, (खजति मथ्नातीति । खज्+ण्वुल् ।) मन्थानदण्ड । इति हेमचन्द्रः ॥

खजपं, क्ली, (खज्यते मथ्यते इति । "उषिकुटि-दलिकचिखजिभ्यः कपन् ।" उणां ३ । १४२ । इति कपन् ।) घृतम् । इत्युणादिवृत्ति. ॥

खजलं, क्ली, (खे आकाशे निश्चित यज्जलम् ।)

नीहारः। इति त्रिकाण्डशेषः॥ आकाशवारि। यथाह राजवल्लभः। [लुताश्च।
"वर्षासु चरन्ति घनैः सहोरगा वियति कीट-
तद्विषशुद्धमपेयं खजलमगस्त्योदयात् पूर्व्वम्॥"

खजा, स्त्री, (खज्+भावे अप् टाप् च।) मन्थः। मन्थोया इति भाषा॥ प्रहरसः। इति मेदिनी॥ (खज+करणे अप् स्त्रियां टाप्।) दर्व्वी। इति हेमचन्द्रः॥ (यथा, चिकित्सितस्थाने षड्-विंशेऽध्याये सुश्रुतेनोक्तम्।
"गुञ्जाफलं गोक्षुरकाच्च वीजं
तयोश्चूर्णं गोपयसा विपाच्य।
खजाहतं शर्करया च युक्तं
पीत्वा नरो हृष्यति सर्व्वरात्रम्॥"
पाकसाधनद्रव्यविशेषः। यथा, महाभारते। ४।७।११।
"खजाश्च दर्व्वीश्च करेण धारय-
न्नविघ्न कालाङ्गमकोषमग्रयम्।")
मारणम्। इति शब्दरत्नावली॥

खजाकः, पुं, (खज् मन्थे+"खजेराकः।" उणा० ४।१३। इति आकः।) पक्षी। इत्युणादिवृत्तिः॥

खजाका, स्त्री, पुं, (खजति मथ्नाति पाकम्। खज् मन्थे+"खजेराकः।" उणा० ४।१३। इति आकः ततष्टाप्।) दर्व्वी। इत्यमरः। २।९।३४। हाता चमस इत्यादि भाषा॥
("खजाकः पक्षिणि ख्यातः खजाका दर्व्विरुच्यते॥" इत्युणादिवृत्तिटीका।)

खजित्, पुं, (खेन आकाशध्यानेन शून्यभावनयेति भावः जयति संसारभावम्। जि+क्विप्। शून्य-वादिनां वौद्धानां शून्यं सर्व्वमेव इत्याकार-भावनया संसारभावजयनात् तथात्वम्।) बुद्ध-विशेषः। इति हेमचन्द्रः। २। १४९॥

खज्योतिः, [स्] पु, (खे आकाशे ज्योतिर्यस्य।) खद्योतः। इति राजनिर्घण्टः॥

खञ्ज, त्रि, (खजि गतिवैकल्ये+अच्।) विकल-गतिः। खोँड़ा इति भाषा॥ यथा, मनुः।३।२४२।
"खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा
भवेत्॥")
तत्पर्य्यायः। खोडः २। इत्यमरः।२।६।४८। खोलः ३। इति शब्दरत्नावली॥ खोरः ४ खञ्जकः ५। इति हेमचन्द्रः॥ खोटः ६। इति खोड़वातलर्यशंनात्॥ तस्य लक्षणं यथाह माधवकरः।
"वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा।
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात्॥"

खञ्जकः, त्रि, (खञ्जतीति। खजि+कर्त्तरि ण्वुल्। स्वार्थे कन् वा।) खञ्जः। इति हेमचन्द्रः।३।११९॥

खञ्जकारिः, पुं, (खञ्जकस्य अरिः नाशकः।) सरदा। इति राजनिर्घण्टः॥ खेँसारि इति भाषा॥

खञ्जखेटः, पुं, (खञ्ज इव खेटति गच्छति नृत्यन्निव भूमौ चरतीत्यर्थः। खिट्+अच्।) खञ्जन-पक्षी। इति शब्दमाला॥

खञ्जखेलः, पु, (खञ्ज इव खेलति तद्वच्चलनादि-त्यर्थः। खेल्+अच्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥

खञ्जनं, क्ली, (खजि विकलगतौ+भावे ल्युट्।) गमनम्। इति मेदिनी। ने। ५५॥

खञ्जनः, पु, (खजि+कर्त्तरि ल्युः।) खनामख्यात-पक्षी। तत्पर्य्यायः। खञ्जरीटः २। इत्यमरः। २।५।१५॥ कणाटीनः३ काकच्छर्दिः४ खञ्जखेलः५ ताततः ६ मुनिपुत्त्रकः ७ भद्रनामा ८ रत्न-निधिः ९। इति त्रिकाण्डशेषः॥ खञ्जखेटः १० गूढनीडः ११ तक्षकः १२ चरः १३। इति शब्दमाला॥ काकच्छदः १४ नीलकण्ठः १५ कणाटीरः १६ कणाटारकः १७। इति शब्द-रत्नावली॥ (अस्य दर्शनेन यत् शुभाशुभं फलं भवति तदुक्तं वृहत्संहितायां ४५ अध्याये। तद्यथा,—
"खञ्जनको नामायं यो विहगस्तस्य दर्शने प्रथमे।
प्रोक्तानि यानि मुनिभिः फलानि तानि
प्रवक्ष्यामि॥"
तत्र चत्वारः खञ्जना भवन्ति। तेषां नामान्याह।
"स्थूलोऽभ्युन्नतकण्ठः कृष्णगलो भद्रकारको भद्रः।
आकण्ठमुखात् कृष्णः सम्पूर्णः पूरयत्याशाम्॥
कृष्णो गलेऽस्य बिन्दुः सितकरटान्तः स रिक्त-
सन्दिक्तः।
पीतो गोपीत इति क्लेशकरः खञ्जनो दृष्टः॥"
अथ कस्मिन् काले दृष्टः कीदृक्फलं करोति इत्याह।
"अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु
पुण्येषु।
करितुरगभुजगमूर्द्ध्नि प्रासादोद्यानहर्म्म्येषु॥
गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे।
हस्तितुरङ्गमशालाच्छत्रध्वजचामराद्येषु॥
हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु।
दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते॥
पङ्के स्वाद्वन्नाप्तिर्गोरसमम्बच्च गोमयोपगते।
शाड्वलगे वस्त्राप्तिः शकटस्थे देशविभ्रंशः॥
गृहपटलेऽर्थभ्रंशो वध्रे बन्धोऽशुचौ भवति रोगः।
पृष्ठे त्वजाविकानां प्रियसङ्गममावहत्याशु॥
महिषोष्ट्रगर्द्दभास्थिश्मशानगृहकोणशर्करा-
द्रिस्थः।
प्राकारभस्मकेशेषु चाशुभो मरणरुग्भयदः॥
पक्षौ धुन्वन्नशुभः शुभः पिबन् वारि निम्नगासंस्थः।
सूर्य्योदयेऽथ शस्तो नेष्टफलः खञ्जनोऽस्तमये॥
नीराजने निवृत्ते यया दिशा खञ्जनं नृपो यान्तम्।
पश्येत्तया गतस्य क्षिप्रमरातिर्वशमुपैति॥
तस्मिन् निधिर्भवति मैथुनमेति यस्मिन्
यस्मिंस्तु छर्द्दयति तत्र तलेऽस्ति काचः।
अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य
तत्कौतुकापनयनाय खनेद्धरित्रीम्॥
मृतविकलविभिन्नरोगित,
स्वतनुसमानफलप्रदः खगः।
धनकृदभिनिलीयमानको
वियति च बन्धुसमागमप्रदः॥
नृपतिरपि शुभं शुभप्रदेशे
खगमवलोक्य महीतले विदध्यात्।
सुरभिकुसुमधूपयुक्तमर्घं
शुभमभिनन्दितमेवमेति वृद्धिम्॥
अशुभमपि विलोक्य खञ्जनं
द्विजगुरुसाधुसुरार्च्चने रतः।
न नृपतिरशुभं समाप्नुया-
न्न यदि दिनानि च सप्त मांसभुक्॥"
ततः कालफलप्रदर्शनार्थमाह। [दिनशेषे।
"आ वर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु
दिक्स्थानमूर्त्तिलग्नर्क्षशान्तदीप्तादिभिश्चोह्यम्॥"
शाकुने दिग्विशेषेऽस्य शब्दफलं यथा,—
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामभिभयं सुरद्विषि कलिर्लाभः समुद्रालये।
वायव्यां नरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे-
ऽशान्या मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने॥")

खञ्जनरतं, क्ली, (खञ्जनस्य रतमिव गोपनीयं अव्यक्तं रतं रतिः।) यमिनां गोप्यं रतम्। यतिना गोपनीयमैथुनम्। इति हारावली॥

खञ्जना, स्त्री, (खञ्जन इवाचरति। खञ्जन+क्याच्+क्विप् टाप् च। यद्वा, खजि+युच्+टाप्।) सर्षपी। क्षुद्रखञ्जनजातिः। इति मेदिनी॥

खञ्जनाकृतिः, स्त्री, (खञ्जनस्याकृतिरिवाकृतिरस्य।) खञ्जनविशेषः। इति शब्दचन्द्रिका॥ तत्-पर्य्यायः। छापुत्त्रिका २ खञ्जनिका ३ सर्षपी ४। इति शब्दरत्नावली॥

खञ्जनिका, स्त्री,(खञ्जनस्तदाकारोऽस्त्यस्याः इति। खञ्जन+ठन् टाप् च।) खञ्जनाकारपक्षि-विशेषः। तत्पर्य्यायः। छापुत्त्रिका २ तुलिका३ स्फोटिका ४ सर्षपी ५। इति त्रिकाण्डशेषः॥ खञ्जनाकृतिः ६। इति शब्दचन्द्रिका॥

खञ्जरीटः, पु (खञ्ज इव ऋच्छतीति। ऋ गतौ+बाहुलकात् कीटन्।) खञ्जनपक्षी। इत्यमरः। २।५।१५॥ (यथा अमरुशतके। ६६।
"तन्वी शरत्त्रिपथगापुलिने कपोलौ
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ॥")

खट, काङ्क्षि। इति कविकल्पद्रुमः॥ (भ्वा-पर-सकं-सेट्।) खटति। काङ्क्षि आकाङ्क्षायाम्। इति दुर्गादासः॥

खटः, पु, (खट्+अच्।) अन्धकूपः। कफः। प्रहारान्तरम्। टङ्कः। इति मेदिनी॥ तृणम्। इति हेमचन्द्रः॥ लाङ्गलम्। कत्तृणम्। इत्य-जयपालः॥

खटकः, पु, (खट्+बाहुलकाद् वुन्।) घटकः। तत्पर्य्यायः। नागवीटः २ टाङ्करः ३ चाम्परः ४। इति त्रिकाण्डशेषः॥ कुञ्चितपाणिः। इति शब्द-माला॥

खटिकः, पु, (खटः अस्त्यस्य इति ठन्।) कुञ्चित-पाणिः। इति हेमचन्द्रः॥

खटिका, स्त्री, (खट्+अच्। ततः संज्ञायां कन् टाप् अत इत्वं।) लेखनद्रव्यम्। खड़ी इति भाषा। (यथा, कलाविलासे। २। २३।

"विविधनवांशुकमृगमदचन्दनकर्पूरमरिच
पूगफलैः ।
खटिकाहस्तः स सदा गणयति कोटीर्मुहूर्त्तेन ॥")
कर्णरन्ध्रम् । वीरणम् । इति विश्वः ॥

खटिनी स्त्री, (खट् + बाहुलकात् इनिः । ङीप् च ।) खटी । इति राजनिर्घण्टः ॥ (यथा, हितोपदेशे ।
"न पतति खटिनी ससम्भ्रमा यस्य मधुकरगणनायाम् ॥")

खटी, स्त्री, (खट् + अच् । गौरादित्वात् ङीष् ।) लेखनद्रव्यम् । खडी इति भाषा । तत्पर्य्यायः । खटिनी २ खटिका ३ धवलमृत्तिका ४ सितधातुः ५ पाण्डुमृत् ६ पाण्डुमृत्तिका ७ । अस्या गुणाः । मधुरत्वम् । तिक्तत्वम् । शीतलत्वम् । पित्तदाहव्रणदोषकफास्रनेत्ररोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायान्तराणि कठिनीशब्दे द्रष्टव्यानि ॥ (यथास्याः पर्य्याया गुणाश्च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"खटिका कठिनी चापि लेखनी च निगद्यते ।
खटिका दाहजिच्छीता मधुरा विषशोथजित् ॥
लेपादेतद्गुणाः प्रोक्ता भक्षिता मृत्तिका समा ।
खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्त्तिते ॥")

खट्ट, क वृतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सक-सेट् ।) टद्वयान्तः । क, खट्टयति । इति संवरणम् । इति दुर्गादासः ॥

खट्टनः, त्रि, (खट्ट्यते व्रियते शय्यादिभिः इति । खट्ट वृतौ + कर्म्मणि ल्युट् ।) खर्व्वः । इति हेमचन्द्रः । छोट इति भाषा ॥ खट्टत इति पाठोऽपि दृष्टः ॥

खट्टा, स्त्री, (खट्ट + टाप् ।) खट्वा । इति शब्दचन्द्रिका ॥

खट्टाशः, पुं स्त्री, (खट्टः आत्मा वृतः सन् अश्नाति इति । अश + अच् । अश्नुते व्याप्नोति गात्रगन्धेन वा । अशूङ् व्याप्तौ + अच् ।) वनजन्तुविशेषः । खटाश इति गन्धगोकुला इति च भाषा । तत्पर्य्यायः । गन्धौतुः २ वनवासनः ३ । इति त्रिकाण्डशेषः ॥ खट्टाशी ४ वनाखुः ५ । इति शब्दरत्नावली ॥ खट्टासः ६ गन्धमार्जारः ७ वनश्वा ८ शालिः ९ । इति जटाधरः ॥ पुष्पलकः १० । इति दुर्गादासधृतवचनम् ॥

खट्टासः, पुं, (खट्टाश + पृषोदरात् शकारस्य सत्वम् । यद्वा, खट्ट इवासति दीप्यते प्रकाशते । अस दीप्तौ + अच् ।) खट्टाशः । इति जटाधरः ॥ (लक्षणमस्य यथा भैषज्यरत्नावल्यां वातव्याधिशिकारे ।
"खट्टासोऽनूपजः श्रेष्ठो वर्त्तुलो मांसलश्च यः ।
सम्मतो मध्यदेशीयो मध्यमो मरुजोऽधमः ॥")

खट्टिः, पुं, (खट्ट + इन् ।) शवयानम् । तत्पर्य्यायः । अस्त्रशय्या २ वारठः ३ । इति त्रिकाण्डशेषः ॥

खट्टिकः, त्रि, (खट्टनं आवरणं खट्टः स शिल्पत्वेनास्यास्तीति । ठन् ।) शाकुनिकः । इति शब्दमाला । पाखिमारा इति भाषा ॥

खट्टिका, स्त्री, (खट्ट + स्वार्थे स्वल्पार्थे वा कन् + टाप् अत इत्वञ्च ।) क्षुद्रखट्वा । तत्पर्य्यायः । निसटा २ सन्दी ३ । इति त्रिकाण्डशेषः ॥ आसन्दी ४ । इति जटाधरः । शवयानम । इति शब्दमाला ॥

खट्टेरकः, त्रि (खट्ट + बाहुलकात् कर्म्मणि एरक् ।) खर्व्वः । इति शब्दमाला ॥

खट्वा, स्त्री, (खट्यते काङ्क्ष्यते शयनार्थिभिरिति । खट् काङ्क्षायां + "अशूप्रुषिलटीति ।" उणां १ । १५१ । इति क्वन् ।) काष्ठादिरचितशय्याधारः । खाट् इति भाषा । तत्पर्य्यायः । शयनम् २ मञ्चः ३ पर्य्यङ्कः ४ पल्यङ्कः ५ । इत्यमरः । २ । ६ । १३८ ॥ तल्पम् ६ शयः ७ । इति शब्दरत्नावली ॥ * ॥ तद्युक्तिर्यथा,—
"अष्टाभिः काष्ठखण्डैश्च खट्वेति प्रतिपद्यते ॥"
अथैषां नामानि ।
"तिष्ठेत यदालम्ब्य खट्वा तन्त्रेय चरणाश्रयम् ।
शिरःस्थं युपधानं स्यात् अधःस्थं स्यात् निरूपकम् ॥
आलिङ्गने उभे पार्श्वे प्राह भोजमहीपतिः ।
आलिङ्गने चतुर्हस्ते युपधाननिरूपके ॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति ।
सर्व्वषोड़शिका खट्वा सर्व्वत्राभयदायिका ॥
आलिङ्गने सार्द्धभेदे युपधाननिरूपके ।
सार्द्धद्वये च चरणा हस्तैकपरिसम्मिताः ॥
सर्व्वाष्टादशका खट्वा सर्व्वकामफलप्रदा ।
आलिङ्गने पञ्चहस्ते युपधाने निरूपके ॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति ।
सर्व्वविंशतिका खट्वा धनधान्यजयप्रदा ॥
आलिङ्गने पञ्चहस्ते युपधाने निरूपके ।
त्रिहस्तसम्मिते पादा हस्तैकपरिसम्मिताः ॥
सर्व्वविंशतिका खट्वा एवमप्युपजायते ।
आलिङ्गने सार्द्धपञ्चे युपधाने निरूपके ॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति ।
सर्व्वद्वाविंशिका खट्वा सर्व्वसम्पत्प्रदायिनी ॥
आलिङ्गने च षड्हस्ते युपधाने निरूपके ।
त्रिहस्तसम्मिते पादाश्चत्वारश्चरणा इति ॥
चतुर्विंशतिका खट्वा सर्व्वरोगक्षयङ्करी ।
आलिङ्गने सप्तहस्ते युपधाने निरूपके ॥
त्रिहस्ते सार्द्धहस्ताश्च चत्वारश्चरणा इति ।
सर्व्वषड्विंशिका खट्वा सर्व्वसौभाग्यकारिका ॥
आलिङ्गने सार्द्धसप्ते युपधाने निरूपके ।
सार्द्धत्रिहस्ते सार्द्धाश्च चत्वारश्चरणा इति ॥
सर्व्वाष्टाविंशिका खट्वा सर्व्वभोगप्रदायिका ।
आलिङ्गने चाष्टहस्ते युपधाने निरूपके ॥
चतुर्हस्ते सार्द्धहस्ताश्चत्वारश्चरणा इति ।
सर्व्वत्रिंशतिका खट्वा सर्व्वकामार्थदायिनी ॥
एवमष्टविधाः खट्वा समासेनोपदर्शिताः ।
आदित्यादिदशानानां नृणां सम्पत्तिदायिकाः ॥
कार्य्याः शिल्पिभिरेतास्तु विविधाकृतिकल्पनाः ।
सर्व्वषोड़शिका खट्वा सर्व्वेषामेव युज्यते ॥
अष्टौ खण्डानि यस्याः स्युश्चतुर्हस्तयुतानि च ।
श्रीसर्व्वमङ्गला नाम खट्वेयं पृथिवीपते ॥
इयं यदा चन्द्रदना तदा सर्व्वजयाभिधा ।
यात्रासिद्धिः सर्व्वसिद्धिर्विजया चाष्टमङ्गला ॥ * ॥
एकैकहस्तवृद्ध्या तु भवेच्चञ्चमतः परम् ।
जयोऽथ मङ्गलः प्रेयान् चित्रकान्तः परो महान् ॥
एकैकहस्तवृद्ध्या तु मञ्चानामिति लक्षणम् ।
सा तुङ्गा ह्यतितुङ्गा च शिखरी विषयेक्षणा ॥
एकैकहस्तवृद्ध्या तु टङ्क इत्यभिधीयते ।
यात्रासिद्धि समारभ्य शेऽमी षोडश कीर्त्तिताः ॥
आदित्यादिदशानानामाद्यन्तैकद्वय क्रमात् ।
दूरदर्शी दीर्घदर्शी दुर्लक्षोऽथ दुरासदः ॥
यथोत्तरं दशगुणाः पादैकपरिणाहिनः ।
प्रासादसंज्ञकाः कार्य्या राज्ञा सुखमभीप्सता ॥
चत्वार एते सर्व्वेषां भूपतीनां सुखावहाः ॥" * ॥
भोजमते च ।
"सर्व्वत्रिंशतिका यावत् आरभ्याभयषोडशीम् ।
खट्वानामिति नामानि अष्टौ हस्तद्वयाधिकाम् ॥"
तद्यथा,—
"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम् ।
प्रचण्डा सर्व्वतोभद्रा खट्वानामाष्टकं विदुः ॥"
आसां विभागः पूर्व्ववत् ॥ * ॥
पराशरसंहितायान्तु ।
"अष्टाभिः काष्ठखण्डैस्तु योऽयं पिण्डो विजायते ।
स चेत् समो भवेत् खट्वा प्रशस्ता स्यादतोऽन्यथा ॥
समे सर्व्वायसम्पत्तिर्विषमे विषमासदम् ।
तस्मात् खट्वाङ्गपिण्डो यः सम. कार्य्यः स सूरिभिः ॥"
इदन्तु सामान्यं सर्व्वसम्मतञ्च । काष्ठनियमस्तु पूर्व्ववदेव । इत्यासनयुक्तौ खट्वोद्देशः ॥ * ॥
तस्या दोषगुणा यथा,—
"खट्वाया यो गुणो दोषो मानस्य परिकीर्त्तितम् ।
तेनैव खट्वा काष्ठोत्था तथैव गुणमावहेत् ॥
अनेनैव विधानेन कार्य्यं मञ्चविधासनम् ।
विना नौका समं कार्य्यं सर्व्वत्रैवासनं गुरु ॥"
इति तत्रैव युक्तिकल्पतरुः ॥
अस्या गुणाः । वातलत्वम् । इति राजवल्लभः ॥
प्रेङ्खा । इत्यमरटीका ॥ कोलशिम्बी । इति राजनिर्घण्टः ॥

खट्वाङ्ग, क्ली, (खट्वाया अङ्गम् । तदिवाकृतिर्यस्य इति ।) शिवस्यास्त्रविशेषः । तत्पर्य्यायः । सुखसुणः २ ॥ इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८७ । ६ ।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥")

खट्वाङ्गः, पुं, (खट्वाङ्ग इत्याख्याऽस्य । शिवस्य खट्वाङ्गास्त्रवत् सर्व्वत्र दुर्लङ्घ्यशासनत्वात् अमोघवीर्य्यवत्त्वाच्चास्य तथात्वम् ।) सूर्य्यवंशीयराजविशेषः । स तु विश्वसहराजपुत्रः । यथा,— श्रीमद्भागवते । ९ । ९ । ४१ ।
"ततो दशरथस्तस्मात् पुत्त्र ऐड़विड़स्ततः ।
राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्त्यभूत् ॥"

खट्वाङ्गभृत्, पुं, (खट्वाङ्ग बिभर्त्ति इति । भृ + क्विप् ।) शिवः । इति हेमचन्द्रः ॥

खट्वाङ्गी, [न्] पुं, (खट्वाङ्ग अस्त्रविशेषः सोऽस्यास्तीति इनिः ।) शिवः । इति हारावली ॥ (प्रायश्चित्तार्थं धारणीयं खट्वाङ्गाकृतिकाष्ठखण्डविशेषः । यथा, मनुः । ११ । १०५ ।

"खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने ।
प्राजापत्यं चरेत् कृच्छ्रमब्दमेकं समाहितः ॥")

खट्वारूढः, त्रि, (खट्वामारूढः । "खट्वा क्षेपे ।" २।१।२६ । इति निन्दायां द्वितीयान्तस्य क्तान्तेन नित्यसमासः ।) अविनीतः । प्रमादवान् । इति त्रिकाण्डशेषभूरिप्रयोगौ ॥ (यथा, भट्टौ ।५।१०।
"वृतस्त्वं पात्रसमितै खट्वारूढः प्रमादवान् ।
पानशौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः ॥"
'खट्वारूढः उत्पथस्थितः । खट्वा क्षेपे इति द्वितीया ।" इति जयमङ्गलटीका ॥) खट्वारूढो नरो जाल्मः । इति कलापव्याकरणम् ॥ (वेदं व्रतानि च समाप्य समावृत्तेन हि खट्वा रोढव्या ब्रह्मचर्य्य एव भूमिशयनादौऽपि यः खट्वामारोहति स जाल्मः । रूढ़श्चाय तेन खट्वामारोहतु मा वा निषिद्धानुष्ठानपरः सर्व्वोऽपि खट्वारूढ़ उच्यते। इति शब्दार्थचिन्तामणिः ॥) खट्वोपरिस्थितश्च ॥

खट्विका, स्त्री, (अल्पा खट्वा । अल्पार्थे कन् । अत इत्वञ्च ।) क्षुद्रखट्वा । इति जटाधरः ॥ खट्वाविशेषः । तद्युक्तिर्यथा,—
"ब्रह्मक्षत्त्रियवैश्यानां चतुःषडष्टकोणिकाः ।
खट्विकाः सुखसम्भूताः शुक्लरक्तासिताम्बराः ॥"
इति युक्तिकल्पतरौ खट्विकोद्देशः ॥

खड, इ ड मथि । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् । इदित् ।) मथि मन्थने मन्थनञ्चेह भञ्जनम् । इ, खण्ड्यते । ड, खण्डे दण्डेन भाण्डं लोकः । इति दुर्गादासः ॥

खड, क भेदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, खाडयति । इति दुर्गादासः ॥

खडं, क्ली, पुं, (खड्यते छिद्यते धान्ये पक्वे सति इति । खड + कर्म्मणि अप् ।) लवृत्तृणम् । इति शब्दरत्नावली । खड् इति भाषा ॥

खडः, पु, (खड़ + भावकर्म्मादौ यथायथं अप् ।) पानान्तरम् । भेदः । इति मेदिनी । डे । ८ ॥ खडयूषो यथा, चक्रदत्ते ।
"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः ।
सुपक्वं खडयूषोऽयमयं काम्बलिकोऽपरः ॥"

खडक्किका, स्त्री, (खडक इत्यव्यक्तशब्दं करोतीति । कृ + बाहुलकात् डः ततो गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) पक्षद्वारम् । इति हारावली ॥ खड्किद्वार इति भाषा ॥

खडतूः, पु, (खड + अतूप्रत्ययः ।) बाहुजङ्घा-भरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

खडिका, स्त्री, (खड् + अप् + गौरादित्वात् ङीष् । ततः स्वार्थे कन् पूर्व्वह्रस्वः ।) कठिनी । इति जटाधरः ॥

खडी, स्त्री, (खड् + अप् + ततो ङीष् ।) कठिनी । स्वनामख्यातश्वेतवर्णमृत्तिकाविशेषः । इति शब्द-चन्द्रिका ॥ अस्या गुणपर्य्यायौ कठिनीशब्दे खटीशब्दे च द्रष्टव्यौ ॥

खड़ूः, स्त्री, (खड् + "खडेर्डुः ।" उणां ।१।८४। इति ऊः ।) मृतशय्या । (बाहुजङ्घाभरणम् । इत्युज्ज्वलदत्तः ॥)

खड्गं, क्ली, (खड भेदे + "छापूखडिभ्यः कित् ।" उणां ।१।१२३ । इति गन् प्रत्ययः ।) लोहम् । इति राजनिर्घण्टः ॥

खड्गः, पु, (खडति भिनत्तीति । खड् + "छापू-खडिभ्यः कित् ।" उणा ।१।१२३ । इति गन् ।) गण्डकः । गण्डार इति भाषा ॥ (यथा, मनुः । ३ । २७२ ।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु ।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः ॥"
"खड्गो गण्डकः लोहो लोहितवर्णश्छाग एव ।"
इति कुल्लूकभट्टः ॥) गण्डकशृङ्गम् । खाग इति भाषा । बुद्धभेदः । इति मेदिनी ॥ चोरकनाम-गन्धद्रव्यम् । इति राजनिर्घण्टः ॥ अस्त्रविशेषः । खाँडा तरवाल इत्यादि भाषा ॥ (यथा, महा-भारते । ४ । ४१ । २५ ।
"यस्त्वय विपुलः खड्गो गव्ये कोषे समर्पितः ।
सहदेवस्य विद्ध्येनं सर्व्वभारसहं दृढम् ॥")
तत्पर्य्यायः । निस्त्रिंशः २ चन्द्रहासः ३ असिः ४ रिष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करवालः ८ कृपाणः ९ । इत्यमरः ।२।८।८९ ॥ ऋष्टिः १० कर-पालः ११ । इति तट्टीका ॥ विशसनः १२ तीक्ष्णधारः १३ दुरासदः १४ श्रीगर्भः १५ विजयः १६ धर्म्मपालः १७ कौक्षेयः १८ तरवारिः १९ तवराजः २० कृपाणकः २१ कृपाणी २२ शस्त्रः २३ । इति शब्दरत्नावली ॥ * ॥ तस्योत्-पत्तिर्ब्रह्मणो यज्ञाग्नौ यथा,—
"विकीर्य्याग्निं तथाभूतमुत्थितं श्रूयते तदा ।
नीलोत्पलसवर्णाभं तीक्ष्णदंष्ट्रं कृशोदरम् ॥
प्रांशुं सुदुर्द्धर्षतरं तथैव ह्यमितौजसम् ।
ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः ॥
विमलस्तीक्ष्णधारश्च कालान्तक इवोद्यतः ।
ततः स शितिकण्ठाय रुद्रायर्षभकेतवे ॥
ब्रह्मा ददावसिं तीक्ष्णमधर्म्मप्रतिवारणम् ।
ततः स भगवान् रुद्रो दानवव्रातजोच्छितम् ॥
असिं धर्म्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे ।
विष्णुर्मरीचये स महर्षिभ्यः ते इन्द्राय स लोक-पालेभ्यः ते मनवे सूर्य्यपुत्राय स क्षुपाय स इक्ष्वाकवे स पुरूरवसे स आयवे स नहुषाय स ययातये स पूरवे स अमूर्त्तरयसे स भूमिशयाय स भरताय स ऐडविड़ाय स धुन्धुमाराय स काम्बोजाय स मुचुकुन्दाय स मरुत्ताय स रैव-ताय स यौवनाश्वाय स रघवे स हरिणाश्वाय स शुनकाय स उशीनराय स भोजाय स शिवये स प्रतर्द्दनाय स अष्टकाय स ऋषदश्वाय स भर-द्वाजाय स द्रोणाय स कृपाय स पाण्डवेभ्यो दत्तवान् ॥ * ॥ अथ खड्गविषयकत्रयोदश-विधसञ्चरणं यथा, महाभारते ।
"मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते ।
तदेव बाहुमुद्यम्य कृतमुद्भ्रान्तमीरितम् ॥
भ्रामणं स्वस्य परितः खड्गस्याविद्धमुच्यते ।
परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम् ॥
शत्रोराक्रमणार्थाय गमनन्त्वाप्लुतं मतम् ।
खड्गस्याग्रेण तद्देहस्पर्शनं प्रसृतं मतम् ॥
वञ्चयित्वा रिपौ शस्त्रपातनं गदितं सृतम् ।
परिवृत्तं भवेत् शत्रोर्वामदक्षिणतो गतिः ॥
पश्चात् पदापसरणं निवृत्तं संप्रचक्षते ।
अन्योऽन्यताडनं प्राहुः सम्पातमुभयोरपि ॥
आधिक्यमात्मनो यत् तत् समुदीर्णमुदीरितम् ।
अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम् ॥
विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम् ।
निलीय चर्म्मणि क्षेपो यदसेः सात्वतं हि तत् ॥"
तस्य परीक्षा तरवारिशब्दे द्रष्टव्या ॥ (अस्य लक्षणादिकं यथा, बृहत्संहितायां ५० अध्याये ।
"अङ्गुलशतार्धमुत्तम ऊनः स्यात्पञ्चविंशतिं खड्गः ।
अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः ॥
श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम् ।
सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानाञ्च ॥
कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः ।
खड्गे व्रणा न शुभदा वंशानुगाः प्रभूताश्च ॥
स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनो-
ऽनुगतः ।
अस्वन इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः ॥
क्वणितं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात् ।
स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे ॥
नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम् ।
देशं न चास्य कथयेत् प्रतिमानयेच्च
नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥
गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च ।
करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः ॥
निष्पन्नो न च्छेद्यो निकषैः कार्य्यः प्रमाणयुक्तः सः ।
मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ॥
यस्मिन् त्सरुप्रदेशे व्रणो भवेत्तद्वदेव खड्गस्य ।
वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा ॥
अथवा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तद-
वधार्य्य ।
कोशस्थस्यादेश्यो व्रणोऽसि शास्त्रं विदित्वेदम् ॥
शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे ।
भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च ॥
नासौष्ठकपोलहनुश्रवणग्रीवांसकेषु पञ्चाद्याः ।
उरसि द्वादशसंस्थस्त्रयोदशे कक्षयोर्ज्ञेयः ॥
स्तनहृदयोदरकुक्षीनाभीषु चतुर्द्दशादयो ज्ञेयाः ।
नाभीमूले कट्यां गुह्ये चैकोनविंशतितः ॥
ऊर्वोर्द्वाविंशे स्याद् ऊर्वोर्मध्ये व्रणस्त्रयोविंशे ।
जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च ॥
जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च ।
षड्विंशतिकाद्यावत्त्रिंशदिति मतेन गर्गस्य ॥
पुत्त्रमरणं धनाप्तिर्धनहानिः सम्पदश्च बन्धश्च ।
एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्द्दिशेत् क्रमशः ॥
सुतलाभः कलहो हस्तिलब्धयः पुत्त्रमरण-
धनलाभौ ।
क्रमशो विनाशवनिताप्तिचित्तदुःखानि षट्प्रभृति ॥
लब्धिर्हानिस्त्रीलब्धयो वधो वृद्धिमरणपरितोषाः ।
ज्ञेयाश्चतुर्द्दशादिषु धनहानिश्चैकविंशे स्यात् ॥

विस्ताग्निरनिर्वाणं धनागमो ऽत्युसम्पदो ऽम्बलम् ।
ऐश्वर्य्यमत्युरण्यानि च क्रमाच्छिंशदिति यावत् ॥
परतो न विशेषफलं विषमसमस्थास्तु पाप-
शुभफलदाः ।
केचिदफलाः प्रदिष्टाश्चिंशत्परतो ऽग्रमितियावत्॥
करवीरोत्पलगजमदघृतकुङ्कुमकुन्दचम्पकसगन्धः।
शुभदो ऽनिष्टो गोमूत्रपङ्कमेदःसदृशगन्धः ॥
कूर्म्मवसाक्षक्षारोपमश्च भयद्दुःखदो भवति गन्धः।
वैदूर्य्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः ॥
इदमौशनसञ्च शस्त्रपानं
रुधिरेण श्रियमिच्छतः प्रदीप्ताम् ।
हविषा गुणवत्सुताभिलिप्सो.
सलिलेनाक्षयमिच्छतश्च वित्तम् ॥
वडवोष्ट्रकरेणुदुग्धपानं
यदि पापेन समीहते ऽर्थसिद्धिम् ।
झषपित्तमृगाश्ववस्तदुग्धे.
करिहस्तच्छिदये सतालगर्भैः ॥
आर्कं पयो हुडुविषाणमषीसमेतं
पारावताखुशकृता च युतं प्रलेपः ।
शस्त्रस्य तैलमथितस्य ततो ऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥
क्षारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत् ।
सम्यक् छितं चाश्मनि नैति भङ्गं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम् ॥”)

खड्गकोषः, पुं, खड्गलता । तत्पर्य्यायः । खड्गपत्रः २ खड्गिमारः ३ अश्वपुच्छकः ४ । इति शब्दचन्द्रिका ॥ (खड्गस्य कोषः ।) खड्गाधारः । खाप इति भाषा । अथ युत्पत्तिलब्धो ऽर्थः ॥

खड्गटः, पुं, (खड्ग इव अटतीति । अट् + अच् । शकन्ध्वादित्वात् साधुः ।) बृहत्काशः । इति हारावली ॥

खड्गधेनुः, स्त्री, खड्गपुत्त्रिका । छुरि इति भाषा । (खड्गस्य गण्डकस्य धेनुः पत्नी ।) गण्डकस्त्री । इति मेदिनी ॥ मादी गण्डार इति भाषा ॥

खड्गपत्रः, पुं, (खड्गाकाराणि पत्राणि अस्य ।) खड्गलता । इति शब्दचन्द्रिका ॥

खड्गपिधान, क्ली, (खड्गस्य पिधानमाच्छादनम् ।) खड्गकोषः । खाप इति भाषा । इति हलायुधः ॥

खड्गपिधानक, क्ली, (खड्गस्य पिधानकम् ।) खड्गपिधानम् । खाप इति भाषा । तत्पर्य्यायः । प्रत्याकारः २ परीवारः ३ कोशः ४ । इति हेमचन्द्रः ॥

खड्गारीटः, त्रि, (खड्ग ऋच्छतीति । ऋ + कीटन् । निपातनात् पूर्व्ववृद्धिः । यद्वा खड्गारिरिवाचरति इति । क्विप्, ततः कीटन ।) फलकः । असिधाराव्रतधारी । इति मेदिनी ॥

खड्गिकः, पुं, मध्यिमीक्षीरफेनः । शौनिकः । इति मेदिनी ॥

खड्गिमारः, पुं, (खड्गिनं गण्डकं मारयतीति । मृ + णिच् “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । वृक्षविशेषः ।) खड्गकोषलता ॥ इति शब्दचन्द्रिका ॥

खड्गी, [न्] पुं, (खड्गस्तदाकारं शृङ्गमस्यास्तीति । इनिः ।) वनजन्तुविशेषः । गण्डार इति भाषा । तत्पर्य्यायः । गण्डकः २ खड्गः ३ । इत्यमरः ।२।५।४ ॥ खड्गमृगः ४ क्रोड़ीमुखः ५ तुङ्गमुखः ६ मली ७ वज्रचर्म्मा ८ वार्ध्रीनसः ९ । इति राजनिर्घण्टः ॥ एकचरः १० गणोत्साहः ११ । इति त्रिकाण्डशेषः ॥ गण्डः १२ खनोत्साहः १३ । इति शब्दरत्नावली ॥ अस्य मांसगुणाः । मलकारित्वम् । वृंहणत्वम् । गुरुत्वम् । इति राजनिर्घण्टः ॥ कफवायुनाशित्वम् । कषायत्वम् । पितृलोकतृप्तिकारित्वम् । पवित्रत्वम् । आयुर्हितत्वम् । मूत्रबन्धकारित्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥ (“कफघ्नं खड्गिपिशितं कषायमनिलापहम् । पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् ॥” इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमे ऽध्याये ॥ महादेवः । यथा, महाभारते ।१३।१७।४२।
“अशनी शतघ्नी खड्गी पट्टिशी चायुधी
महान् ॥”
खड्गो विद्यते ऽस्य इति व्युत्पत्त्या तु वाच्यलिङ्गः । यथा, भागवते । ८।२५।८ ।
“सुसन्धरो ऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः ॥”)

खड्गीकं, क्ली, (खड्गस्तत् कर्म्मणि कुशलम् । बाहुलकात् ईकः ।) दात्रम् । इति शब्दरत्नावली ॥

खण्ड, क्ली, (खडि + घञ् । इदित्वात् नुम् ।) विड्लवणम् । इति राजनिर्घण्टः ॥ इक्षुविकारः । अस्य गुणाः । रुच्यतमत्वम् । चक्षुष्यत्वम् ॥ वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥ (अस्य गुणा यथा,—
“खण्डन्तु मधुरं वृष्यं चक्षुष्यं वृंहणं हिमम् ।
वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम् ॥”
मधुखण्डगुणा. यथा,—
“मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः ।
छर्द्द्यतीसारतृड्दाहरक्तहृत्तुवरा हिमा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

खण्डः, पुं, क्ली, (खडि + घञ् इदित्वात् नुम् ।) एकदेशः । तत्पर्य्यायः । भित्तम् २ शकलम् ३ । इत्यमरः ।१।३।१६ ॥ (यथा, मार्कण्डेये ।८३।२६ ।
“धृतशृङ्गविभिन्नाश्च खण्डखण्डं ययुर्घनाः ॥”
अभ्रादिसमूहः । इत्यमरः । १ । १० । ४२ ॥)

खण्डः, पुं, (खडि + घञ् ।) इक्षुविकारः । खाँड़ इति भाषा । मणिदोषः । इति मेदिनी ॥ (योगिविशेषः । यथा, हठयोगदीपिकायाम् । १ । ८ ।
“भानुकीमारदेवश्च खण्डः कापालिकस्तथा ॥”)

खण्डकः, पुं, (खण्डेन निर्वृत्तः इति संज्ञायां कः ।) निर्नखः । इति शब्दचन्द्रिका ॥ सिताखण्डः । इति राजनिर्घण्टः ॥ (खण्डयतीति । खडि + ण्वुल् । छेदकारी ॥)

खण्डकथा, स्त्री, (खण्डा खण्डिता कथा ।) वाङ्मयभेदः । इति त्रिकाण्डशेषः ॥

खण्डकर्णः, पुं, (खण्ड इव कर्णः कन्दो यस्य ।) आलुविशेषः । शकरकन्द आलु इति भाषा ॥ तत्पर्य्यायः । वज्रकन्दः २ । इति रत्नमाला ॥ अस्य गुणाः । कफपित्तनाशित्वम् । कटुपाकित्वम् । इति राजवल्लभः ॥

खण्डकालु, क्ली, (खण्ड इव कायतीति । कै + कः । ततः खण्डक आलु इति कर्म्मधारयः ।) आलुविशेषः । इति शब्दचन्द्रिका ॥

खण्डजः, पुं, (खण्ड इव जायते खण्डाकारेण जायते वा । जन् + डः ।) गुड़ः । यवासशर्करा । इति राजनिर्घण्टः ॥

खण्डजोद्भवः, पुं, (खण्डज उद्भवो ऽस्य इति खण्डजोद्भवः तस्माज्जायते इति । जन् + डः ।) तत्र राजोद्भवखण्डः । इति राजनिर्घण्टः ॥

खण्डतालः, पुं, (खण्डेन वाद्यांशभेदेन निर्वृत्तस्तालः ।) तालविशेषः । यथा,—
“द्रुतमेकं भवेद्यत्र खण्डतालः स उच्यते ।
अपरं नियमं विना ।”
इति सङ्गीतदामोदरः ॥

खण्डधारा, स्त्री, (खण्डे एकदेशे धारा यस्याः ।) कर्त्तरी । इति शब्दमाला ॥ काँचि इति भाषा ॥

खण्डनं, क्ली, (खडि भावे + ल्युट् ।) भञ्जनम् । भेदनम् । निराकरणम् । छेदनम् । यथा,—
“घटय भुजबन्धनं जनय रदखण्डनं देहि पदपल्लवमुदारम् ॥” इति जयदेवः ॥

खण्डपरशुः, पुं, (खण्डयति शत्रून् इति खण्डः स्ताद्दशः परशुरस्य ।) शिवः । इत्यमरः ।१।१।३३॥ (यथा, महाभारते ७ । रुद्रमाहात्म्ये ।२००।४१।
“पिनाकिनं खण्डपरशुं लोकानां पतिमीश्वरम् ॥”
विष्णुः । यथा, महाभारते ।१३।१४९।७४ ।
“सुधन्वा खण्डपरशुर्द्दारुणो द्रविणप्रदः ॥”)

खण्डपर्शुः, पुं (शत्रून् खण्डयति विदारयति इति खण्डस्तथाविधः पर्शुरस्य ।) परशुरामः । शिवः । चूर्णलेपी । खण्डामलकभेषज्यम् । राहुः । इति मेदिनी ॥ भग्नदन्तहस्ती । इति शब्दरत्नावली ॥

खण्डपालः, पुं, (खण्डं पालयतीति । पालि + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) मोदकः । मयरा इति भाषा । तत्पर्य्यायः । खाण्डिकः २ । इति हारावली ॥

खण्डमोदकः, पुं, (खण्डेन खण्डोत्पादितलड्डुकादिना वा मोदयतीति । खण्ड + मुद् + णिच् + ण्वुल् ।) यवासशर्करा । इति राजनिर्घण्टः ॥

खण्डलवण, क्ली, (खण्ड्यते इति खण्डम् । खडि + कर्म्मणि घञ् । तच्च तत् लवणञ्चेति ।) विड्लवणम् । इति राजनिर्घण्टः ॥ (विड्शब्दे ऽस्य विवरणं ज्ञातव्यम् ॥)

खण्डशाखा, स्त्री, (खण्डा खण्डिता शाखा अस्याः ।) महिषवल्ली । इति राजनिर्घण्टः ॥

खण्डसरः, पुं, (खण्ड इव सरतीति । सृ + अच् ।) यवासशर्करा । इति राजनिर्घण्टः ॥

खण्डाभ्रं, क्ली, (खण्डं अभ्रं मेघः ।) अभ्रलेशः । छेंड़ा मेघ इति भाषा । दन्तक्षतविशेषः । इति मेदिनी ॥

खण्डिकः, पुं, (खण्डोऽस्यास्तीति । ठन् ।) कलायः । कड़ाइ इति भाषा । इत्यमरः ॥ (अस्य पर्य्याया यथा,— [अथ ॥"
"त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तद्गुणा
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्य त्रिपुटशब्दे वक्तव्याः ॥) कक्षः । इति हेमचन्द्रः ॥ वगल इति भाषा ॥

खण्डितं, त्रि, (खडि+क्तः ।) खण्डीकृतम् । तत्पर्य्यायः । छिन्नम् २ लूनम् ३ छितम् ४ दितम् ५ छेदितम् ६ वृक्णम् ७ वृत्तम् ८ । इति हेमचन्द्रः ॥ (यथाह शब्दार्थचिन्तामणिः ।
"चन्द्रे कलङ्कः सुजने दरिद्रता
विकाशलक्ष्मीः कमलेषु चञ्चला ।
सुखेऽप्रसादः सधनेषु सर्व्वदा
यशो विधातुः कथयन्ति खण्डितम् ॥"
खण्डिताङ्गः । खण्डिताङ्गत्वं दुष्टवचनकर्म्मविपाकः । यथाह शातातपः । ३ अध्याये ।
"दुष्टवादी खण्डितः स्यात् स वै दद्यात् द्विजातये ।
रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम् ॥")

खण्डिता, स्त्री, (खण्डित+टाप् ।) स्वीयादिनायिकाया भेदः । अस्या लक्षणम् । अन्योपभोगचिह्नितः पतिः प्रातरागच्छति यस्याः सा । अस्याश्चेष्टा । "अस्फुटालापचिन्तासन्तापनिश्वासतूष्णीम्भावाश्रुपातादय. ।" इति रसमञ्जरी ॥ (साहित्यदर्पणोक्तलक्षणं यथा, तत्रैव । ३ । ८३ ।
"पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्षाकषायिता ॥
उदाहरणं यथा, तत्रैव ।
"तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः ।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥")

खण्डिनी, स्त्री, (खण्डोऽस्यास्तीति । खण्ड+इनिः । स्त्रियां ङीप् । यद्वा, खण्डयति आत्मानं द्वीपपर्व्वतसमुद्रादिव्यवच्छेदेनेति शेषः । खडि+णिनि ।) पृथ्वी । इति शब्दरत्नावली ॥

खण्डी, [न्] पु, (खण्डयति आत्मानं द्विदलरूपेण इति । खडि+णिनिः ।) वनमुद्गः । इति हेमचन्द्रः ॥

खण्डीरः, पु, (खण्डी+मुण्डादित्वात् रः ।) पीतमुद्गः । इति हेमचन्द्रः ॥

खतमालः, पुं, (खे आकाशे अन्तरीक्षे तमाल इव । तत्वर्णसादृश्यात्तथात्वम् ।) धूमः । मेघः । इति मेदिनी ॥

खद, स्थैर्य्ये । वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-वधे तु सकं-सेट् ।) खदति । इति दुर्गादासः ॥

खदिका, स्त्री, (खे भर्ज्जनपात्रादूर्द्ध्वाकाशे दीयते खण्ड्यते इति । ख+दो अवखण्डने+घञर्थे कः । ततः संज्ञायां कन् टाप् अत इत्वञ्च ।) लाजाः । इति त्रिकाण्डशेषः ॥ खइ इति भाषा ॥

खदिरः, पु, (खद स्थैर्य्यहिंसयोः+"अजिरशिशिरशिथिलेति ।" उणा । १ । ५४ । इति किरच् ।) वृक्षविशेषः । खयेरगाछ इति भाषा । तत्पर्य्यायः । गायत्री २ बालतनयः ३ दन्तधावनः ४ । इत्यमरः । २ । ४ । ४९ ॥ तिक्तसारः ५ कण्टकीद्रुमः ६ । इति रत्नमाला ॥ बालपत्रः ७ खद्यपत्री ८ क्षितिक्षमः ९ सुशल्यः १० वक्रकण्टः ११ यज्ञाङ्गः १२ जिह्मशल्यः १३ कण्टी १४ सारद्रुमः १५ कुष्ठारिः १६ बहुसारः १७ मेध्यः १८ बालपुत्रः १९ रक्तसारः २० कर्कटी २१ जिह्मशल्यः २२ । इति जटाधरः ॥ कुष्ठहृत् २३ बालपत्रकम् २४ यूपद्रुमः २५ । इति शब्दरत्नावली ॥ अपि च भावप्रकाशे ।
"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञिकः ॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत् ।
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथाममित्तास्रपाण्डुकुष्ठकफान् हरेत् ॥"
अस्य गुणाः । तिक्तरसत्वम् । शीतत्वम् । पित्तकफकुष्ठकासरक्तशोफकण्डुव्रणनाशित्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ विसर्पवेदनामेहमेदोनाशित्वम् । इति राजवल्लभः ॥*॥ (अथ श्वेतखदिरः । पपरी खयेर इति भाषा ॥
"खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः ।
कदरो विशदो वर्ण्यो मुखरोगकफास्रजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे च ॥ खदति हन्ति शत्रून् इति । खद्+किरच् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (खे आकाशे दीर्य्यते यस्माच्चन्द्रलोकादिष्टापूर्त्तादिकर्म्मिभिः । दृ+बाहुलकात् अपादाने किरच । इष्टापूर्त्तादिकर्म्मिणां हि आरब्धाम्मयदेहविदारेण चन्द्रमण्डलात् आकाशे पतनात् तथात्वम् ।) चन्द्रः । इति मेदिनी ॥ (तथा च शाङ्करदर्शनभाष्ये ।
"येन कर्म्मवृन्देन चन्द्रमसमारूढाः फलोपभोगाय तस्मिन् उपभोगेन क्षयिते तेषां यदम्मयं शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनशोकाग्निसम्पर्कात् प्रलीयते सवितृसम्पर्कात् हिमकरका इव हुतभुगर्च्चिःसम्पर्कादिव च घृतकाठिन्यम् । ततः कृतात्यये कृतस्य इष्टादेः कर्म्मणः फलोपभोगेनोपक्षये सति सानुशया एवेममवरोहन्ति ॥")

खदिरपत्रिका, स्त्री, (खदिरस्य पत्रमिव पत्रमस्याः । कप् कापि अत इत्वम् ।) अरिखदिरः । लज्जालुलता । इति राजनिर्घण्टः ॥

खदिरपत्री, स्त्री, (खदिरस्य पत्रमिव पत्रमस्याः ।) लज्जालुलता । इति वैद्यकम् ॥

खदिरा, स्त्री, (खदिरस्तत्पत्राकारोऽस्त्यस्याः । अच् टाप् च ।) लज्जालुलता । इति राजनिर्घण्टः ॥

खदिरिका, स्त्री, (खदिरेण खदिररसेन समो रसोऽस्त्यस्याः । अस्त्यर्थे+ठन् ततः टाप् ।) लाजा । इति राजनिर्घण्टः ॥

खदिरी, स्त्री, (खद्+किरच् । गौरादित्वात् ङीष् ।) खदिरीशाकम् । लाजालु इति ख्याता । इति केचित् । किन्तु रभसेन वराहक्रान्ता लज्जालुः समङ्गा जलकारिकेति खदिरिकायां सङ्कोचपत्री लज्जालुरिति लज्जालुकायां पठितम् । इति भरतः ॥ तत्पर्य्यायः । नमस्कारी २ गण्डकाली ३ समङ्गा ४ । इत्यमरः । २ । ४ । १४१ ॥ (क्वचित् खदिरेति पाठो दृश्यते ॥) गण्डकारी ५ । इति भरतः ॥ शमीपत्रा ६ रक्तपत्री ७ अञ्जलिकारिका ८ राज्ञा ९ । इति जटाधरः ॥
("गण्डकाली नमस्कारी समङ्गा खदिरी क्वचित् ।"
इति वैद्यरत्नमालायाम् ॥)

खदिरोपमं, क्ली, (खदिरेण उपमीयते इति । खदिर उपमा अस्य वा ।) कदरः । इति रत्नमाला । काँटा वावला इति भाषा ॥

खदूरवासिनी, स्त्री, (खे शून्ये दूरे च वसतीति । वस्+णिनिः । ततो ङीप् ।) बुद्धशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

खद्योतः, पुं, (खं आकाशं द्योतयतीति । द्युत् दीप्तौ+णिच्+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) सूर्य्यः । इति जटाधरः ॥ (यथा, भागवते । ४ । २९ । १० ।
"खद्योताविर्म्मुखी चात्र नेत्रे एकत्र निर्म्मिते ।
रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥"
नेत्रस्य हि सूर्य्याधिष्ठातृतया रूपादिदर्शनशक्तिरिति प्रसिद्धेस्तथात्वम् ॥ खे आकाशे द्योतते इति । द्युत्+अच् ।) कीटविशेषः । जोनाक पोका इति भाषा । तत्पर्य्यायः । ज्योतिरिङ्गणः २ । इत्यमरः । २ । ५ । २८ ॥ खज्योतिः ३ प्रभाकीटः ४ उपसूर्य्यकः ५ । इति राजनिर्घण्टः ॥ ध्वान्तोन्मेषः ६ तमोमणिः ७ दृष्टिबन्धुः ८ तमोज्योतिः ९ ज्योतिरिङ्गः १० निमेषकः ११ । इति शब्दरत्नावली ॥ (यथा, श्रीमद्भागवते । ६ । १६ । ४६ ।
"विदितमनन्तसमस्तं
तव जगदात्मनो जनैरिहाचरितम् ।
विज्ञाप्यं परमगुरोः
कियदिव सवितुरिव खद्योतैः ॥")

खद्योतनः, पुं, (द्योतयतीति । द्युत्+णिच्+कर्त्तरि ल्युः । ततः खस्य आकाशस्य द्योतनः प्रकाशकः ।) सूर्य्यः । इति जटाधरः ॥

खधूपः, पु, (खं आकाशं धूपयति । खे धूपः ज्वलच्छिखवह्निरिव वा । धूप्+"कर्म्मण्यण् ।" । ३ । २ । १ । इति अण् ।) अग्निक्रीड़ाविशेषः । हाउइ इति भाषा । यथा, भट्टौ । ३ । ५ ।
"उच्चाम्प्रचक्रुर्नगरस्य मार्गान्
ध्वजान् ववन्धुर्मुमुचुः खधूपान् ॥"

खन, उ ञ विदारे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) उ, खनित्वा खात्वा ।

तृषितो जाह्नवीतीरे कूपं खनति दुर्म्मतिः ।
खनते । इति दुर्गादासः ॥
खनकः, पुं, (खन् + “शिल्पिनि ष्वुन् ।” ३।१।१४५। इति वुन् स च षित ।) उन्दुरुः । सन्धितस्करः । सिंदेल चोर इति भाषा । भूमिविशाग्रः । स्वर्णाद्युत्पत्तिस्थानज्ञः । इति हेमचन्द्रः ॥ (स्वनामप्रसिद्धो विदुरस्य बन्धुविशेषः । यथा, महाभारते जतुगृहे । १ । १४८ । १ ।
“विदुरस्य सुहृत् कश्चित् खनकः कुशलो नरः ॥”)
खनकः, त्रि, (खन + वुन् ।) अवदारकः । खनन-कर्त्ता । इति मेदिनी ॥ (यथा, गो. रामायणे । १ । १२ । ६ ।
“स्थापत्ये चेह स्थाप्यन्तां दृष्टाः परमधार्म्मिकाः ।
कर्म्मान्तिका लिपिकरा वर्धका खनका अपि ॥”)
खननं, क्ली, (खन् + भावे ल्युट् ।) विदारणम् । खोँड़न खोदन इति च भाषा । यथाह कश्चित् ।
“पश्य त्वं खननं नखेन तदभूदालोक्य मूकः शठः ॥”
खनयित्री, स्त्री, (खन् + णिच् न वृद्धिर्निपातनात् । ततस्तृच् ङीप् च ।) अस्त्रभेदः । खन्तीति भाषा । यथा, नारदपञ्चरात्रे पाद्मसंहिता ।
“खनयित्री शुभा यात्रा जयार्थं जयकाङ्क्षिणाम् ।
पञ्चवर्णाम्बुकयुता चालनीया पुरः सताम् ॥”
खनिः स्त्री, (खन विदारे + “खनिकष्यञ्ज्यसीति ।” उणां ।४।१३९। इति इन् ।) रत्नाद्युत्पत्तिस्थानम् । खानि इति भाषा ॥ (यथा, रघुः । १८।२२ ।
“उत्खातशत्रुं वसुधोपतस्थे
रत्नोपहारैरुदितैः खनिभ्यः ॥”)
तत्पर्य्यायः । आकरः २ । इत्यमरः । २।३।७ ॥ खानी ३ खनी ४ खानि ५ । इति शब्दरत्नावली ॥ गञ्जा ६ । इति हेमचन्द्रः ॥
खनित्रं, क्ली, (खन् + “अर्त्तिलूधूसूखनेति ।” ।३।२।१८४ । इत्र ।) अस्त्रविशेषः । खन्ता इति भाषा । तत्पर्य्यायः । अवदारणम् । इत्यमरः । २।९।१२ ॥ (“तथाहि भागवते । ७ ।२ । १५ ।
“केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ॥”)
खनी, स्त्री, (खनि + वा ङीष् ।) रत्नाद्युत्पत्ति-स्थानम् । इति शब्दरत्नावली ॥
खपुरं, क्ली, (खं आकाशं पिपर्त्ति । पृ + क ।) घटः । इति हेमचन्द्रः ॥ (खे आकाशे चरं पुरम् ।) अन्तर्गं पुरम् । (स तु दैत्यपुरविशेषः । तदुत्पत्तिकथा यथा, महाभारते । ३ । १७३ । निवातकवचवधे । ७-११ ।
“पुलोमा नाम दैतेयी कालका च महासुरी ।
दिव्यवर्षसहस्रं ते चेरतुः परमं तपः ॥
तपसोऽन्ते ततस्ताभ्यां स्वयम्भूरददद्वरम् ॥
अगृह्णीतां वरं ते तु सुतानामल्पदुःखिताम् ।
अवध्यताञ्च राजेन्द्र ! सुरराक्षसपन्नगैः ॥
पुरं सुरमणीयञ्च खेचरञ्च महाप्रभम् ।
सर्व्वरत्नैः समुदितं दुर्द्धर्षममरैरपि ॥
महर्षियक्षगन्धर्व्वपन्नगासुरराक्षसैः ।
सर्व्वकामगुणोपेतं वीतशोकमनामयम् ॥
ब्रह्मणा भरतश्रेष्ठ ! कालकेयकृते कृतम् ।
तदेतत् खपुरं दिव्यं चरत्यमरवर्ज्जितम् ॥”
खे आकाशे उत्थितं पुरम् । शुभाशुभादि-सूचनार्थं प्रकाशितं गन्धर्व्वनगरम् । अस्यो-त्तरादिदिग्भेदेनोदये फलभेदो यथा, वृहत्-संहितायाम् ३६ अध्याये ।
“उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम् ।
सितरक्तपीतकृष्णं विप्रादीनामभावाय ॥
नागरनृपतिजयावहमुदग् विदिक्स्थं विवर्ग-नाशाय ।
शान्तायां दृष्टं सतोरणं विजयाय ॥
सर्व्वदिगुत्थं सततोत्थितञ्च भयदं नरेन्द्रराष्ट्रा-णाम् ।
चौराटविकान् हन्याद्धूमानलशक्रचापाभम् ॥
गन्धर्व्वनगरमुत्थितमापाण्डुरमशनिनिपातवात-करम् ।
दीप्ते नरेन्द्रमृत्युर्वामेऽरिभयं जयः सव्ये ॥
अनेकवर्णाकृति खे प्रकाशते
पुरं पताकाध्वजतोरणान्वितम् ।
यदा तदा नागमनुष्यवाजिनां
पिबत्यसृग्भूरि रणे वसुन्धरा ॥”)
हरिश्चन्द्रपुरम् । इति त्रिकाण्डशेषः ॥
खपुरः, पुं, (खं पिपर्त्ति उच्चत्वेन । पृ + क ।) गुवाकः । (अस्य पर्य्याया यथा ।
“खपुरो हस्वकः पूगः ।” इति वैद्यकरत्नमाला-याम् ॥ खेन आकाशागतेन हिमकरादिना पूर्य्यते इति । पृ + कर्म्मणि घञर्थे क ।) भद्रमुस्त-कम् । (खमिन्द्रियं पिपर्त्ति । पृ + क ।) अलसके त्रि । इति मेदिनी ॥ व्यालनखः । इति राजनिर्घण्टः ॥
खभ्रान्तिः, पुं, (खे आकाशे अन्तरिक्षे भ्रान्तिर्भ्रमणं आमिषार्थं यस्य ।) चिल्लः । इति शब्दरत्ना-वली ॥ चिल इति भाषा ॥
खमणिः पुं, (खे आकाशे मणिरिव ज्योतिर्मय-त्वात् प्रकाशकत्वाद्वा ।) सूर्य्यः । इति त्रिकाण्ड-शेषः ॥
खमीलनं, क्ली, (खानां इन्द्रियाणां मीलनम् ।) तन्द्रा । इति शब्दरत्नावली ॥
खमूलिः, स्त्री, (खं शून्यभूतं मूलमस्याः पृषो-दरात् साधुः । मूलराहित्यादस्यास्तथात्वम् ।) कुम्भिका । इति शब्दरत्नावली ॥ पाना इति भाषा ॥
खमूलिका, स्त्री, (खमूलि + स्वार्थे कन् ततष्टाप् ।) खमूली । कुम्भिका । इति शब्दरत्नावली ॥
खम्ब, गतौ, इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-सेट् ।) ओष्ठवर्गशेषोपधः । खम्बति । इति दुर्गादासः ॥
खरं, क्ली, (खाय अन्तरिन्द्रियाय खस्य वा तीव्रता-रूपगुणं रातीति । ख + रा + क ।) तीव्रम् । तत्पर्य्यायः । तिग्मम् २ तीक्ष्णम् ३ ॥ इत्य-मरः ।१।३।३५॥ (यथा, भागवते ।७।८।२८ ।
“हत्वाऽऽद्रवाक्षं खरमुत्स्वनोल्वणं
निमीलिताक्षं जगृहे महाजवः ॥”
तद्वति त्रि । यथा, रघुवंशे । ८ । ९ ।
“न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव ॥”)
खरः, पुं, (खं मुखकुहरं छिद्रमतिशयेनास्या-स्तीति । र ।) गर्द्दभः । इत्यमरः ।२।९।७७ (यथा, मनुः । २ । २०१ ।
“परीवादात् खरो भवति श्वा वै भवति निन्दकः ॥”
अश्वतरः । यथा, तत्रैव ।११। २० ।
“उष्ट्रयानं समारुह्य खरयानन्तु कामतः ॥”)
घर्म्मः । इति मेदिनी ॥ निष्ठुरः । राक्षसविशेषः । स तु रावणभ्राता । इति हेमचन्द्रः ॥ (यथा रामायणे । १ । ३ । २० ।
“वधं खरत्रिशिरसोरुत्थानं रावणस्य च ॥”)
दैत्यः । इति त्रिकाण्डशेषः ॥ (यथा, भाग-वते । २ । ७ । ३४ ।
“ये च प्रलम्बखरदर्दुरकेश्यरिष्ट-
मल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ॥”)
कण्टकिवृक्षविशेषः । इत्यजयः ॥ कङ्कः । काकः । कुररपक्षी । इति राजनिर्घण्टः ॥ (वत्सर-विशेषः । यथा, ज्योतिषतत्त्वे ।
“उपद्रुतं जगत् सर्व्वं तस्करैर्मूषिकैः खगैः ।
पीडिताश्च प्रजाः सर्व्वाः देशभङ्गः खरे प्रिये ॥”
कठिनम् । रविपार्श्वगः । पश्चिमद्वारगृहम् । इति शब्दार्थचिन्तामणिः ॥)
खरकाष्ठिका, स्त्री, (खरं उग्रं काष्ठं यस्याः । ततः कप् टाप् च । कापि अत इत्वम् ।) बला । इति राजनिर्घण्टः ॥
खरकुटी, स्त्री, (खरा क्षुरवत्तया तीव्रा कुटी ।) नापितशालिका । नापितस्य गृहम् । इति त्रिकाण्डशेषः ॥
खरकोणः, पुं (खरवत् कोणयति शब्दायते । अत्र सङ्कोचार्थकुणधातोः शब्दार्थे इति बोध्यं धातूनामनेकार्थत्वात् । यद्वा कोणयति आत्मानं सङ्कोचयति वा । कुण + अच् । “कर्म्मण्यण् ।” ३ । २ । १ । इति अण् वा ।) तित्तिरिपक्षी । इति हेमचन्द्रः ॥
खरगन्धनिभा, स्त्री, (खरगन्धेन तीव्रगन्धेन नितरां अतिशयेन भातीति । नि + भा + क ।) नागबला । इति जटाधरः ॥
खरगन्धा, स्त्री, (खरो गन्धो यस्याः ।) नाग-बला । इति राजनिर्घण्टः ॥
खरगृहं, क्ली, (खरस्य गर्द्दभस्य गृहम् ।) गर्द्दभ-शाला । गादार घर इति भाषा । तत्पर्य्यायः । खरगृहः २ । इति त्रिकाण्डशेषः ॥
खरगेहं, क्ली, (खरस्य गेहम् ।) खरगृहम् । इति शब्दरत्नावली ॥
खरग्रहः, पुं, (खरस्य ग्रहः गृहम् ।) खरगृहम् । इति त्रिकाण्डशेषः । (खरो गृह्यते निपीड्यते ऽस्मात् । ग्रह + अप् । गर्द्दभगृहभेदः ॥)

खरघातनः, पुं, (खरं उग्रं रोगविशेषं घातयतीति। हन्+स्वार्थे णिच्+कर्त्तरि ल्यु.।) नागकेशरः। इति शब्दचन्द्रिका॥(खरं एतन्नाम्ना प्रसिद्धं राक्षसं घातयतीति। श्रीरामचन्द्रः। इति व्युत्पत्तिलब्धोऽर्थः॥)

खरच्छदः, पु, (खरस्तीव्रश्छदः पत्रमस्य।) उलूकम्। उलुखड़ इति भाषा॥ इत्कटः। चोकडा इति भाषा। इति रत्नमाला॥ क्षुद्ररत्वम्। इति राजनिर्घण्टः॥

खरणसः, त्रि, (खरा तीक्ष्णा नासिका अस्य। "खुरखराभ्यां वा नस्।" इति वार्त्तिं पत्ते "अच् नासिकायाः।" ५।४।११८। इत्यच् नसादेशश्च। ततः"पूर्व्वपदात् संज्ञायामगः।"८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। तत्पर्य्यायः। खरणाः २। इत्यमरः।२।६।४६॥

खरणाः, [स्] त्रि, (खरा तीक्ष्णा नासिका यस्य। "खुरखराभ्यां वा नस्।" वार्त्तिं इति नसादेशः। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। इत्यमरः। २।६।४६॥

खरत्वक्, स्त्री, (खरा तीक्ष्णा त्वक् यस्याः।) अलम्बुषा। लज्जालुप्रभेदः। इति भावप्रकाशः॥

खरदण्डं, क्ली, (खरः कर्कशः दण्डो मृणालं यस्य कण्टकाद्दततयेति भावः।) पद्मम्। इति धरणी॥

खरदला, स्त्री, (खरं कर्कशं दलं पत्रमस्याः।) क्षेमाफला। इति शब्दचन्द्रिका॥ डुमुर इति भाषा॥

खरदूषणः, पुं, (खरं उग्रं दूषणं मादकताजनकदोषो यत्र।) धुस्तूरः। इति शब्दचन्द्रिका॥ खरेण राक्षसेन सह दूषणश्च॥ (त्रि, बहुदोषः॥)

खरध्वंसी [न्,] पु, (खरं खनामविश्रुतं राक्षसं ध्वंसयतीति। ध्वन्स्+णिच्+णिनिः।) श्रीरामः। इति शब्दरत्नावली॥ (खरं कंसचरं दैत्यं ध्वंसयतीति। कृष्णः। इति व्युत्पत्तिलब्धोऽर्थः॥)

खरनादिनी, स्त्री, (खरं कर्कशं नदतीति। नद्+णिनि.। ततः स्त्रियां ङीप्।) रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

खरपत्रः, पुं, (खरं पत्रमस्य।) क्षुद्रपत्रतुलसी। शाकाख्यवृक्षः। इति रत्नमाला॥ यावनालशरः। हरिदर्भः। मरुवकः। इति राजनिर्घण्टः॥

खरपत्रकः, पु, (खरपत्र+कप् संज्ञाया कन् वा।) तिलकवृक्षः। इति शब्दचन्द्रिका॥

खरपत्री, स्त्री, (खरपत्र+गौरादित्वात् ङीष्।) गोजिह्वावृक्षः। काकोदुम्बरिका। इति राजनिर्घण्टः॥

खरपात्रं, क्ली, (खरं कठोरं कठिनं वा पात्रम्।) लौहपात्रम्। इति त्रिकाण्डशेषः॥

खरपादाढ्यः, पुं, (खरैः दृढैः पादैर्मूलैराढ्यः।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥

खरपुष्पः, पुं, (खरं पुष्पमस्य।) मरुवकवृक्षः। इति रत्नमाला॥

खरपुष्पा, स्त्री, (खरं पुष्पं खराणि पुष्पाणि वा यस्याः।) वर्व्वरा। इत्यमरः।२।४।१३६॥ वावुइ तुलसी इति भाषा॥ (यथास्याः पर्य्यायाः। "वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ व्यवहारोऽस्या यथा चरके विमानस्थानेऽष्टमेऽध्याये कटुकस्कन्धे। "एला-कुष्ठ-भल्लातकास्थि-हिङ्गु-किलिम-मूलक-सर्षप-लशुन-करञ्ज-शिग्रुक-मधुशिग्रुक-खरपुष्पा" इत्यादिषु॥)

खरप्रियः, पु, (खलः धान्यकणायादिशस्यमर्द्दनस्थानं प्रियोऽस्य। लस्य रत्वम्।) पारावतः। इति शब्दमाला॥

खरमञ्जरी, स्त्री, (खरा मञ्जरी यस्याः।) अपामार्गः। इत्यमरः।२।४।८६॥ (खर्ज्जिकाद्यतैलेऽस्या व्यवहारो यथा,—
"खर्ज्जिकासिन्धुदन्त्यग्निरूपिकानलनीलिका।
खरमञ्जरीवीजेषु तैलं गोमूत्रपाचितम्।
दुष्टव्रणप्रशमनं कफनाडीव्रणापहम्॥"
इति वैद्यकचक्रपाणिसंग्रहे नाडीव्रणाधिकारे॥)

खररोमा [न्,] पु, (खरं रोम अस्य।) नागभेदः। इति जटाधरः॥

खरवल्लिका, स्त्री, (खरा वल्लरी ततः स्वार्थे कन् टाप् च ईकारस्य ह्रस्वत्वं रस्य लत्वञ्च।) नागवला। इति रत्नमाला॥ गोरच्चाउलिया इति भाषा॥

खरशब्दः, पु, (खरः उग्रः शब्दोऽस्य।) कुररपक्षी। इति राजनिर्घण्टः॥

खरशाकः, पु, (खरं शाकमस्य।) भार्गी। इति भावप्रकाशः॥ वामणहाटी इति भाषा॥

खरस्कन्धः, पु, (खरः स्कन्धोऽस्य।) प्रियालवृक्षः। इति राजनिर्घण्टः॥

खरस्कन्धा, स्त्री, (खरः स्कन्धोऽस्याः।) खर्ज्जूरी। इति राजनिर्घण्टः॥

खरस्वरा, स्त्री, (खरं रौद्रं स्वृणाति नाशयतीति। स्वृ+अच्।) वनमल्लिका। इति रत्नमाला॥

खरा, स्त्री, (खं आकाशं लाति गृह्णातीति। ला+कः। लस्य रत्वम्।) देवताडवृक्षः। इत्यमरः।२।४।६६॥

खरांशुः, पु, (खरा अंशवो रश्मयो यस्य।) सूर्य्यः। इति त्रिकाण्डशेष.॥

खरागरी, स्त्री, (खरं आगिरतीति। आ+गॄ+अच्। ततो गौरादित्वात् ङीष्।) देवताड़वृक्षः। इत्यमरटीकायां रायमुकुटः॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम्।
"वेणी जीमूतकश्चाखुविषाजिलोमशच्छद.।
खरागरी कदम्बश्च खुङ्गाको देवताडकः॥")

खराब्दाङ्करकं, क्ली, (खराब्दात् तीव्रगर्ज्जनमेघात् अङ्कुरयतीति। अङ्कुरि+ण्वुल्। यस्य हि नूतनजलदध्वनेरङ्कुरोत्पत्तेस्तथात्वम्।) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥

खराश्वा, स्त्री, (खरैरश्यते भुज्यतेऽसौ। अश भोजने+"उल्वादयश्च।" उणां।४।६५। इति व.।) मयूरशिखा। रुद्रजटा इति ख्याता। क्षेत्रयमानिका इति केचित्। इत्यमरभरतौ॥ (यथास्या गुणाः।
"खराश्वा कफवातघ्नी वस्तिरोगरुजापहा॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

खराह्वा, स्त्री, (खरं तीव्रगन्धं आह्वयतीति। ह्वे+क.। स्त्रियां टाप।) अजमोदा। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—
"अजगन्धाजमोदाख्या खराह्वा कारवी च सा॥"
इति वैद्यकरत्नमालायाम्॥)

खरिका, स्त्री, (खात् शून्यात् गन्धविशेषं रातीति। रा+कः ततः संज्ञाया कन् टाप् अत इत्वञ्च।) कस्तूरीभेदः। सा तु चूर्णाकृतिः। इति राजनिर्घण्टः॥

खरुः, पु, (खन्+'खरुशङ्कुपीयुनीलङ्गुलिगु।" उणां १।३७। इति कुः रस्यान्तादेशः।) शिवः। हयः। दर्पः। दन्तः। इति मेदिनी। रे।२१॥ कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शुक्लवर्णः। इति हेमचन्द्रः॥

खरुः, त्रि, (खन्+"खरुशङ्कुपीयुनीलङ्गुलिगु।" उणां १।३७। इति कुः रस्यान्तादेशः।) श्वेतः। इति मेदिनी। रे।२२॥ निषिद्धेकरुचिः। इति हेमचन्द्रः॥ निर्बोधः। क्रूरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ तीक्ष्णः। इति संक्षिप्तसारे उणादिवृत्तिः॥

खर्ज्ज, व्यथाग्ने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) खर्ज्जति। मृष्ट् मार्ज्जनम्। इति दुर्गादासः॥

खर्ज्जिका, स्त्री, (खर्ज्ज+ण्वुल्+स्त्रियां टाप् अत इत्वञ्च।) उपदंशः। इति शब्दचन्द्रिका॥

खर्ज्जुः, पु, (खर्ज्ज+उन्।) खर्ज्जूरी। कण्डुः। कीटः। इति हेमचन्द्रः॥

खर्ज्जुरं, क्ली, (खर्ज्ज+उरच्।) रौप्यम्। इत्यमरटीकाया रमानाथः॥

खर्ज्जूः, स्त्री, (खर्ज्ज व्यथने+"कृषिचमितनीति।" उणां १।८२। इति ऊः।) कण्डुः। कीटः। इत्युणादिकोषः॥

खर्ज्जूघ्नः, पु, (खर्ज्जूं कण्डूयनं हन्तीति। हन्+टक्।) चक्रमर्द्द.। धुस्तूरः। अर्कवृक्षः। इति राजनिर्घण्टः॥

खर्ज्जूरं, क्ली, (खर्ज्जूरस्य फलम्। फले विहितस्याणो लुप्।) खर्ज्जूरफलम्। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। गुरुत्वम्। क्षयाभिघातदाहवातपित्तरोगे हितत्वम्। वृंहणत्वम्। शुक्रवृद्धिकारित्वञ्च। इति राजवल्लभः॥ ("अपक्वखर्ज्जूरफलं त्रिदोषशमनं मतम्।
पक्वमेव हितं श्रेष्ठं त्रिदोषशमनं परम्॥"
इति प्रथमे स्थाने दशमेऽध्याये हारीतेनोक्तम्॥
यथा च चरके सूत्रस्थाने सप्तविंशेऽध्याये।
"मधुरं वृंहणं हृद्यं खर्ज्जूरं गुरु शीतलम्।

घर्येऽभिघाते दाहे च वातपित्ते च तद्धितम् ॥”) रौप्यम् । हरितालम् । इति हेमचन्द्रः ॥ खलः । इति मेदिनी ॥

खर्ज्जूरः, पु स्त्री, (खर्ज्ज मार्ज्जने + “खर्ज्जिपिञ्जादिभ्य ऊरोलचौ ।” उणां ४ । ९० । इति ऊरः ।) खर्ज्जूरीवृक्षः । खेजुर गाछ इति भाषा ॥ अस्य मस्तिष्कगुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । मूत्रातङ्करोगनाशित्वम् । मलप्राणशुक्रवृद्धिकारित्वञ्च । इति राजवल्लभ ॥

(“खर्ज्जूरस्य विषं हन्ति तदा वै नात्र संशयः ।” इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥) वृश्चिकः । इति मेदिनी ॥

खर्ज्जूरिका, स्त्री, (खर्ज्जूर + स्त्रियां गौरादित्वात् ङीष् ततः सञ्ज्ञायां कन् टाप् च ततो ह्रस्वः ।) मिष्टान्नविशेषः । इति पाकराजेश्वरः । मिठा गजा इति भाषा ॥

खर्ज्जूरी, स्त्री, (खर्ज्जूर + गौरादित्वात् ङीष् ।) वनखर्ज्जूरः । इत्यमरः । २ । ४ । १७० ॥ खर्ज्जूरवृक्षः । खेजुरगाछ इति भाषा । तत्पर्य्यायः । खरस्कन्धा २ दुष्प्रधर्षा ३ दुरारुहा ४ निःश्रेणी ५ कषायी ६ यवनेष्टा ७ हरप्रिया ८ । अस्या गुणाः । कषायत्वम् । पक्के गौल्यत्वम् । कषायिकत्वम् । पित्तकृमिनाशित्वम् । बृंहणत्वम् । कफशुक्रवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

“भूमिखर्ज्जूरिका स्वाद्वी दुरारोहा मृदुच्छदा ।
तथा स्कन्धफला काककर्कटी स्वादुमस्तका ॥ * ॥
पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा पराद्वीपादिहागता ॥
जायन्ते पश्चिमे देशे सा छोहारेति कीर्त्त्यते ।
खर्ज्जूरीत्रितयं शीत मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ॥
कोष्ठमारुतकृद्बल्यं वान्तिवातकफापहम् ।
ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम् ॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ।
महतीभ्यां गुणैरल्पा स्वल्पा खर्ज्जूरिका स्मृता ॥ * ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥ * ॥
सुलेमानी तु मृदुला बलिहीनफला च सा ।
सुलेमानी श्रमभ्रान्तिदाहमूर्च्छासपित्तहृत् ॥”
इति भावप्रकाशः ॥

खर्द्द, दंशने । इति कविकल्पद्रुम ॥ (भ्वां-परसक-सेट् ।) दंशनं दन्तकरणकक्रिया । खर्द्दति सूककं लोकः । केचित्तु दन्दशूके इति पठित्वा दन्दशूकः दन्दशूककर्तृकक्रियेत्याहुः । इति दुर्गादासः ॥

खर्परः, पु, (कर्परः । पृषोदरात् खत्वम् ।) तस्करः । धूर्त्तः । भिक्षापात्रम् । कपालम् । इति मेदिनी ॥ छत्रम् । इति त्रिकाण्डशेषः ॥

खर्परी, स्त्री स्त्री, (खर्पर उपधातुभेदकारकत्वेनास्त्यस्या इति अच् ततो गौरादित्वात् ङीष् ।) कर्परीतुत्थम् । इत्यमरटीका ॥

खर्परीतुत्थ, क्ली, (खर्पर्य्येव तुत्थं खर्परीरूपं तदाख्यं तुत्थं वा ।) तुत्थविशेषः । तत्पर्य्यायः । खर्परीरसकम् २ चक्षुष्यम् ३ अमृतोत्पन्नम् ४ तुत्थम् ५ खर्परिका ६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुर्हितत्वम् । रसायनत्वम् । त्वग्दोषशमनत्वम् । दीप्यत्वम् । बलपुष्टिप्रदत्वञ्च । इति राजनिर्घण्टः ॥

खर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परसकं-सेट् ।) खर्ब्बति । इति दुर्गादासः ॥

खर्ब्ब, क्ली, (खर्ब्ब + अच् ।) संख्याविशेषः । इति मेदिनी ॥ तत्तु दशाब्जसंख्या । इति लीलावती ॥ दशवृन्दसंख्या । १०,०००,०००,००० । इति स्मृति ॥ (सहस्रमहापद्मसंख्या । इति गोः रामायणम् । यथा, तत्रैव । ६ । ४ । ५६-५९ ।

“शतं शतसहस्राणां कोटिमाहुर्मनीषिणः ।
शतं कोटिसहस्राणां शङ्ख इत्यभिधीयते ॥
शतं शङ्खसहस्राणां वृन्दमाहुर्मनीषिणः ।
शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम् ॥
महावृन्दसहस्राणां शतं पद्मं परिश्रुतम् ।
शतं पद्मसहस्राणां महापद्मं विभाव्यते ॥
महापद्मसहस्राणां तथा खर्ब्बमिहोच्यते ॥”)

खर्ब्ब, पुं, (खर्ब्ब + अच् ।) कुबेरस्य निधिविशेषः । इति शब्दरत्नावली ॥ दशवृन्दसंख्या । इति स्मृतिः ॥ शुक्रवृक्ष । इति राजनिर्घण्टः । (वामनः । इत्यमरः । २ । ६ । ४६ ॥ स्त्री । गायत्रीस्वरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ३८ ।

“खड्गखेटकरा खर्ब्बा खेचरी खगवाहना ॥”)

ख(र्व्व)र्ब्ब, त्रि, (खर्ब्ब + अच् ।) क्षुद्रः । खाटो छोट इत्यादि भाषा । तत्पर्य्यायः । न्यक् २ नीचः ३ वामनः ४ ह्रस्व ५ । इत्यमरः । ३ । १ । ७० ॥ निखर्व्वः ६ खट्टनः ७ खर्व्वशाख ८ । इति हेमचन्द्रः ॥ अनुच्चः ९ अनायतः १० । इति जटाधरः ॥

खर्व्वशाख, त्रि, (खर्व्वा शाखा हस्तपदाद्यवयवाः यस्य ।) वामनः । खर्व्व । इति हेमचन्द्र ॥

खर्म्म पु, (खुर + बाहुलकात् मक पृषोदरात् उकारस्य लोपः ।) पौरुषम् । क्षौमवस्त्रांशुकम् । पट्टवस्त्रम् । इति मेदिनी ॥

खर्व्व, गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वां-परंअकं-सेट् ।) अन्तस्थवकारान्तोऽयम् ॥ खर्व्वति । इति दुर्गादास ॥

खर्व्वः, त्रि, (खर्व्व + अच् ।) ह्रस्वः । वर्ग्यबकारान्तखर्ब्बशब्दार्थोऽप्यत्र ॥

खर्व्वट, पुं स्त्री, (खर्व्व + अटन्) चतुःशतग्राममध्यस्थलम् । इति भूरिप्रयोग ॥ पर्व्वतप्रान्तग्राम । इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

खर्व्वुरा, स्त्री, (खर्व्व + उरच् टाप् च ।) तरटीवृक्षः । इति राजनिर्घण्टः ॥

खर्व्वूजं, क्ली, (खर्व्वू + जन् + डः ।) मधुभुजा । इति भावप्रकाशः ॥ खरबुजा इति भाषा (अस्य लक्षणं गुणाश्च यथा,—

“दशाङ्गुलन्तु खर्व्वूजं कथ्यते तद्गुणा अथ ।
खर्व्वूजं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु ॥
स्निग्धं स्वादुतरं शीतं वृष्यम्पित्तानिलापहम् ।
तेषु यच्चाम्लमधुरं सक्षारञ्च रसाद्भवेत् ॥
रक्तपित्तकरन्तत्तु मूत्रकृच्छ्रकरम्परम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खल, चलनार्थे । इति कविकल्पद्रुमः ॥ (भ्वां-परअक-सेट् ।) चलनार्थश्चालचयौ । चालश्चेह स्खलनम् । खलति खलो धर्म्मात् । इति दुर्गादासः ॥

खलं, क्ली, (खल् + अच् ।) भूः । स्थानम् । कल्कः । इति मेदिनी । खलाधानम् । इति हेमचन्द्रः ॥ धान्यमाडिवार खामार इति भाषा ॥ (यथा, मनुः । ११ । १७ ।

“खलात् क्षेत्रादगाराद्वा यतो वाऽप्युपलभ्यते ॥”)

खलः, पु, (खल् + अच्) सूर्य्यः । इति भूरिप्रयोगः ॥ तमालवृक्षः । इति शब्दचन्द्रिका ॥ धत्तूरवृक्षः । इति राजनिर्घण्टः ॥ (प्रवाहिकारोगे भेषजादिविहितपथ्यविशेष । यथा, चिकित्सास्थाने नवमेऽध्याये वाभटेनोक्तम् ।

“कल्को बिल्वशलाटूनां तिलकल्कश्च तत्समः ।
दध्नः सरोऽम्लः सस्नेहः खलो हन्ति प्रवाहिकाम् ॥”)

खलः, त्रि, नीचः । अधमः । इति मेदिनी ॥ क्रूरः । (यथा, मृच्छकटिकायां १ मे अङ्के ।

“खलस्वभावं भवितव्यता तथा
चकार सर्व्वं किल शूद्रको नृपः ॥”)

तत्पर्य्यायः । दुर्ज्जनः २ पिशुनः ३ । इत्यमरः । ३ । १ । ४७ ॥ द्विजिह्वः ४ विश्वकद्रुः ५ नृशंसः ६ घातुकः ७ क्रूरः ८ पापः ९ । इति जटाधरः ॥

खलतिः, पु, (स्खलन्ति केशा अस्मात् । स्खल सञ्चलने + “खलतिः ।” उणां ३ । ११२ । इति निपातनात् साधु ।) इन्द्रलुप्तरोगयुक्तः । टाकपड़ा माथा इति भाषा । तत्पर्य्यायः । खल्वाट २ ऐन्द्रलुप्तिकः ३ शिपिविष्टः ४ बभ्रुः ५ । इति हेमचन्द्रः ॥ खल्लीटः ६ । इति त्रिकाण्डशेष । खल्लिटः ७ । इति शब्दरत्नावली ॥

(“रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ॥
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ।
रोमकूपान् रुणद्ध्यस्य तेनान्येषामसम्भवः ॥
तदिन्द्रलुप्तं रूढ्याश्च प्राहुश्चाचेति चापरे ।
खलतेरपि जन्मैव सदनं तत्र तु क्रमात् ॥”
इति वाभट्टे उत्तरस्थाने त्रयोविंशेऽध्याये ॥)

खलपूः, त्रि, (खलं भूमिं पुनाति परिष्कृतं करोतीति । खल + पू + क्विप् ।) मार्ज्जनकारी । झाड़ुकश फरास इत्यादि भाषा । तत्पर्य्यायः । बहुकरः २ । इत्यमरः । ३ । १ । १७ ॥

खलमूर्त्तिः, पु, (खल इव अनिष्टकारकत्वात् उग्रा मूर्त्तिरस्य ।) पारदः । इति शब्दचन्द्रिका ॥ पारा इति भाषा ॥

खलाधारा, स्त्री, (खल आधारो यस्याः ।) तैलपायिका । इति जटाधरः ॥ आरसुला इति भाषा ॥

खलिः, पुं, (खल+इन् ।) तैलकिट्टम् । इति राजनिर्घण्टः ॥ (यथा, भारतरत्नाकरे । २ । ६८ ।
"स्थाल्यां वैदूर्य्यमय्यां पचति तिलखलिं चन्दनैरिन्धनौघैः ॥")

खलिनः, पुं स्त्री, (खे अश्वमुखच्छिद्रे लीनः पृषोदरादित्वात् वा ह्रस्वः ।) खलीनः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, कादम्बर्य्याम्
"उभयतः खलिनकनककटकावलम्बाभ्यां पदे पदे कृताकुञ्चनप्रयत्नाभ्यां पुरुषाभ्यामवकृष्यमाणम् ।" अश्वमित्यर्थः ॥)

खलिनी, स्त्री, (खलानां समूहः । "इनित्रकट्यचश्च ।" ४ । २ । ५१ । इति इनिः । ततो ङीप् ।) खलसमूहः । धानेर अनेक खामार इति भाषा ॥ तत्पर्य्यायः । खल्या २ । इत्यमरः । ३ । २ । ४२ ॥ तालमूली । इति रत्नमाला ॥

खलिशः, पुं, (खे जलादूर्द्ध्वाकाशे लिशति ईषदुद्गच्छतीति । यद्वा, खे जलाभ्यन्तरे छिद्रादौ लिशति स्वल्पीभावेन तिष्ठतीति । लिश्+कः ।) स्वनामख्यातमत्स्यः । खलिशामाछ इति भाषा ॥ तत्पर्य्यायः । कञ्चोटः २ खलेशयः ३ । इति शब्दरत्नावली ॥ अस्य गुणाः । ग्राहित्वम् । कषायत्वम् । वायुकोपनत्वम् । रूक्षत्वम् । लघुत्वम् । शूलहरत्वम् । किञ्चिदामविनाशित्वञ्च । इति राजवल्लभः ॥ खल्लिशोऽपि पाठः ॥

खलीकारः, पुं, (खल+कृ+घञ् । अभूततद्भावे च्विः ।) अपकारः । इति जटाधरः ॥ (निर्भर्त्सनम् । इति चिन्तामणिः ॥)

खलीनः, पुंस्त्री, (खे अश्वमुखच्छिद्रे लीनः ।) कविका । इत्यमरः । २ । ८ । ४९ ॥ कड़ियालि इति भाषा ॥ (यथा, महाभारते । १ । १९९ । १५ ।
"शतं रथानां वरहेममालिनां
चतुर्युजां हेमखलीनशालिनाम् ॥")

खलु, अ, (खल्+बाहुलकात् उन् ।) निषेधः । वाक्यालङ्कारः । (यथा, माघे । २ । ७० ।
"सम्पत्यसाम्प्रतं वक्तुमुक्ते मुषलपाणिना ।
निर्द्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् ॥"
"अत्राद्यखलुशब्दः प्रतिषेधार्थे द्वितीयः वाक्यालङ्कारे ।" इति तट्टीकायां मल्लिनाथः ॥) जिज्ञासा । (यथा, गणरत्ने । "स खल्वधीते वेदम् ?") अनुनयः । इत्यमरः । ३ । ४ । १८ ॥ (यथा, गणरत्ने । "न खलु न खलु मुग्धे । साहसं कार्य्यमेतत्" ॥) निश्चितम् । (यथा, कुमारे । ४ । २८ ।
"दयितास्वनवस्थितं नृणां
न खलु प्रेम चलं सुहृज्जने ॥")
पदवाक्यादिपूरणम् । (यथा, रामायणे । ३ । ४१ । ६ ।
"वध्याः खलु न वध्यन्ते सचिवास्तव रावण ।
ये त्वामुत्पथमारूढं न निगृह्णन्ति सर्व्वशः ॥")
वीप्सा । इति शब्दरत्नावली ॥ (यथा,— शाकुन्तले १ मे अङ्के ।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ॥")

खलुक्, [ज्] पु, (खं इन्द्रियं स्पर्शेन्द्रियं लुञ्चयति हन्तीति । ख+लुञ्च+क्विप् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥

खलुरेषः, पुं, (खलु रिष्यते वध्यतेऽसौ । खलु+रिष्+कर्म्मणि घञ् ।) मृगभेदः । इति शब्दचन्द्रिका ॥

खलूरिका, स्त्री, (खलु+रिष्+निपातनात् साधुः ।) शस्त्राभ्यासभूमिः । इति हेमचन्द्रः ॥

खलेधानी, स्त्री, (खले धीयन्ते वृषभा अस्मिन् । धा+अधिकरणे ल्युट् ततो ङीप् ।) मेधिः । खलेपशुबन्धनदारु । इति जटाधरः ॥

खलेवाली, स्त्री, (खले वाल्यन्ते चाल्यन्तेऽत्र वृषभा इति । वल्+अधिकरणे घञ् गौरादित्वात् ङीष् ।) खले गोबन्धनदारु । इति हेमचन्द्रः ॥ मेइ काठ इति भाषा ॥ (यथा, कात्यायनश्रौतसूत्रे । २२ । ३ । ४८ ।
"खलेवालीयूपो लाङ्गलेषा ॥")

खलेशः, पु, (खे जलादूर्द्ध्वाकाशे गमनकाले लिशति संश्लिष्यतीति । लिश्+अच् ।) खलिशमत्स्यः । इति हारावली ॥

खलेशयः, पु, (खलेशं जलादूर्द्ध्वस्थाकाशसंसर्गं यातीति । या+कः ।) खलिशमत्स्यः । इति शब्दरत्नावली ॥

खल्या, स्त्री, (खलानां समूहः । यत् ।) खलिनी । इत्यमरः । ३ । ३ । ४२ ॥ धानमाडार अनेक खामार इति भाषा ॥

खल्लः, पु, (खलतीति क्विप् खल् तं लातीति । ला आदाने+कः ।) वस्त्रप्रभेदः । गर्त्तः । चर्म्म । चातकपक्षी । इति मेदिनी ॥ दृतिः । इति हेमचन्द्रः ॥ मशक इति भाषा । औषधमर्द्दनपात्रम् । खल इति भाषा । इति वैद्यकम् ॥ ("अजाशकृत्तुषाग्निञ्च भूगर्भे द्वितयं क्षिपेत् । तस्योपरिस्थितं खल्लं तप्तखल्लमिति स्मृतम् ॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

खल्लिका, स्त्री, (खल्ल+संज्ञायां कन् ततष्टाप्, कापि अत इत्वम् ।) ऋजीषम् । पिष्टकादिभर्ज्जनपात्रम् । इति शब्दचन्द्रिका ॥

खल्लिटः, त्रि, (खल्ल+इन् । खल्लि इव टलतीति । टल्+डः ।) खलतिः । इति शब्दरत्नावली ॥

खल्ली, स्त्री, (खल्ल+गौरादित्वात् ङीष् ।) हस्तपादावमर्द्दनाख्यरोगः । इति मेदिनी ॥ तस्य लक्षणं यथा, माधवकरः ।
"खल्ली तु पादजङ्घोरुकरमूलावमोटनी ॥"
तच्चिकित्सा यथा, भावप्रकाशे ।
"कुष्ठसैन्धवयोः कल्कश्चुक्रतैलसमन्वितः ।
सुखोष्णो मर्द्दने योज्यः खल्लीशूलनिवारणः ॥"
अपि च भैषज्यरत्नावल्याम् ।
"खल्ल्यां स्निग्धाम्ललवणैः स्वेदोन्मादोपनाहनम् ॥"

खल्लीटः, त्रि, (खल्लीव टलतीति । टल्+बाहुलकात् डः ।) खलतिः । इति त्रिकाण्डशेषः ॥ (तच्चिकित्सा यथा, गारुडे । १९० । १ ।
"सप्तरात्रात्प्रजायन्ते खल्लीटस्य कचाः शुभाः ।
दग्धहस्तिदन्तलेपात् साजाक्षीररसाञ्जनात् ॥")

खव, ग भूतिपूत्योरुत्पत्तौ । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) भूतिः सम्पत्तिः पूतिः पवित्रता तयोरुत्पत्तिः प्रादुर्भावः ॥

खवल्ली, स्त्री, (खे आकाशे स्थिता वल्ली ।) आकाशवल्ली । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्याया गुणाश्च । अथ आकाशवल्ली । अमरबेलि इति च भाषा ।
"आकाशवल्ली तु बुधैः कथितामरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पिच्छिला आमयापहा ।
तुवराग्निकरी हृद्या पित्तश्लेष्मामनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खवारि, क्ली, (खे आकाशे स्थितं वारि उदकम् । खादागतं वारि वा ।) दिव्योदकम् । इति राजनिर्घण्टः ॥

खवासः, पु, (खे आकाशे शून्ये स्थितो वासः ।) हिमम् । इति हारावली ॥

खशः, पु, देशविशेषः । इति त्रिकाण्डशेषः ॥ (तद्देशवासिनि तद्देशनृपे च बहुषु अणो लुक् ।) तथा हि मनुः । १० । ४४ ।
"पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥")

खशा, स्त्री, मुरानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ (कखयोस्तुल्यार्थत्वात् खः प्रजापतिर्दक्षः आदौ तद्गर्भे कन्यात्मकवीजभावेन शेते इति । ख+शी+डः ततष्टाप् ।) दक्षकन्या । सा च कश्यपपत्नी । यथा,—
"धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम् ।
अदितिर्दितिर्दनुः काला अनायुः सिंहिका मुनिः ॥
कद्रुः प्राधा इरा क्रोधा विनता सुरभिः खशा ॥"
"इरा वृक्षलतावल्लीः तृणजातीश्च सर्व्वशः ।
खशा च यक्षरक्षांसि मुनिरप्सरसस्तथा ॥"
इति गारुडे ६ अध्यायः ॥

खशेटः, पु, (खं शेटति इति । शिट् अनादरे अण् । अस्य गमनसमये खस्यानादरत्वेन गतियोग्यत्वाभावेऽपि तद्गत्यानादरेण गमनात्तथात्वम् ।) खलिशमत्स्यः । इति त्रिकाण्डशेषः ॥

खश्वासः, पु, (खस्य आकाशस्य श्वास इव ।) वायुः । इति त्रिकाण्डशेषः ॥

खष, वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) खषति । इति दुर्गादासः ॥

खष्यं, क्ली, (खन्+"खष्यशिल्पशष्पवाष्पेति ।" उणां ३ । २८ । इति षप्रत्ययात् निपातनात् सिद्धम् ।) क्रोधः । बलात्कारः । इत्युणादिकोषः ॥

खसः, पु, (खं हस्तादीन्द्रियं स्यति निश्चलीकरोतीति । सो+कः ।) पामा । खोस इति भाषा ॥ तत्पर्य्यायः । पाम २ कच्छूः ३ विचर्च्चिका ४ । इति हेमचन्द्रः ॥ (पामन्शब्देऽस्य विवरणं ज्ञातव्यम् ॥)

खसकन्दः, पुं, (खस इव कन्दोऽस्य ।) क्षीरकञ्चुकीवृक्षः । इति रत्नमाला ॥ खसगन्धोऽपि क्वचित् पाठः ॥

खसतिलः, पुं, (खसपूय इव तिलति स्निह्यतीति । तिल स्नेहे + कः । अस्य शुक्रस्नेहनिःसरणात् तथात्वम् ।) खखसः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य यथा,—

"तिलभेदः खसतिलः कासश्वासहरः स्मृतः ।
स्याद्वा खसफलोद्भूत वल्कलं शीतलं लघु ॥
ग्राहि तिक्तं कषायञ्च वातकृच्च कफासकृत् ।
धातूनां शोषणं रूक्षं मदकृद्वाग्विवर्द्धनम् ॥
मुहुर्मोहकरं रुच्यं सेवनात् पुंस्त्वनाशनम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खसमः, पुं, (खेनाकाशेन सम. ।) बुद्धः । इति त्रिकाण्डशेषः ॥

खसम्भवा, स्त्री, (खे सम्भवतीति । सम् + भू + अच् ।) आकाशमांसी । इति राजनिर्घण्टः ॥

खसर्पणः, पुं, (खे शून्ये सर्पणमस्य योगप्रभावात् ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

खसात्मजः, पुं, (खसायाः कश्यपपत्न्या आत्मजः ।) राक्षसः । इति त्रिकाण्डशेषः ॥

खसमः, पुं, विप्रचित्तिदैत्यपुत्त्रः । यथा,—

"सिंहिकायां समुत्पन्ना विप्रचित्तिसुतास्तथा ।
वंशः शल्यश्च बलवान् नभश्चैव महाबलः ॥
वातापिर्नमुचिश्चैव इल्वलः खसमस्तथा ।
अन्तको नरकश्चैव कालनाभस्तथैव च ॥
निवातकवचा दैत्याः प्रह्लादस्य कुलेऽभवन् ॥"

इति गारुडे ६ अध्यायः ॥

खखसः, पुं, (खस + पृषोदरात् द्वित्वम् ।) वृक्षविशेषः । पोस्ता इति भाषा ॥ तत्पर्य्यायः । सूक्ष्मबीजः २ सूक्ष्मतण्डुलः ३ सुबीजः ४ । अस्य गुणः । पाके मधुरत्वम् । कान्तिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (खसतिलशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

खखसरसः, पुं, (खखसस्य सूक्ष्मबीजवृक्षविशेषस्य रसः ।) अहिफेनः । इति राजनिर्घण्टः ॥ आफिं इति भाषा ॥

खखनी, स्त्री, (खं आकाशं खनवद्यस्याः मेघवारिपतनेन शस्याद्युत्पत्तेः पुत्त्रस्थानीयानां पृथिवीस्थजीवानां जीवनधारणात् तथात्वम् ।) पृथिवी । इति त्रिकाण्डशेषः ॥

खस्फाटिकः, पुं, (खवत् निर्म्मलः स्फाटिकः । यद्वा खस्फाटिकः सूर्य्यः स अधिष्ठाताऽस्य ।) सूर्य्यकान्तमणिः । चन्द्रकान्तमणिः । इति हेमचन्द्रः ॥

खाखसः, पुं, (खस प्रकारे द्वित्वं ततः पृषोदरात् साधुः ।) बीजविशेषः । पोस्तादाना इति भाषा । तत्पर्य्यायगुणाः ।

"तिलभेदः खसतिलः खाखसश्चापि स स्मृतः ।
स्याद्वा खसफलोद्भूतं वल्कलं शीतलं लघु ॥
ग्राहि तिक्तं कषायञ्च वातकृत् कफकासहृत् ।
धातूनां शोषकं रूक्षं मदकृद्वाग्विवर्द्धनम् ॥
मुहुर्मोहकरं रुच्यं सेवनात् पुंस्त्वनाशनम् ॥

अथ अफेनम् ।
उक्तं खसफलक्षीरमाफुकमहिफेनकम् ।
आफुकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम् ॥
तथा खसफलोद्भूतं वल्कलप्रायमिल्वपि ।

अथ खसबीजम् ।
उच्यन्ते खसबीजानि ते खाखसतिला अपि ॥
खसबीजानि बल्यानि वृष्याणि सुगुरूणि च ।
जनयन्ति कफं तानि शमयन्ति समीरणम् ॥"

इति भावप्रकाशः ॥

खाजिकः, पुं, (खे ऊर्द्धदेशे आजः क्षेपः तत्र साधुः ठन् ।) लाजाः । इति हारावली ॥ खै इति भाषा ॥

खाटः पुं, स्त्री, (खे ऊर्द्धमार्गे अटनेन । अट् + करणे घञ् ।) शवरथः । इति शब्दरत्नावली ॥ मरार खाट् इति भाषा ॥

खाटिः, स्त्री, (खट् काङ्क्षायां बाहुलकात् इण् ।) असद्वृत्तः । किणः । शवरथः । इति मेदिनी ॥

खाटिका, स्त्री, (खाटि + स्वार्थे संज्ञायां वा कन् ततष्टाप् ।) खाटः । शवरथः । इति शब्दरत्नावली ॥

खाण्डवं, क्ली, (खाण्डवाख्यया प्रसिद्धाया नगर्य्या जातम् । खाण्डवी + अण् । यदुक्तं कालिकापुराणे ६० अध्याये ।

"पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम् ।
भङ्क्त्वा वनं ततश्चक्रे तेन तत् खाण्डवं वनम् ॥")

वनविशेषः । तद्विवरणं यथा,—

"विरूपस्याभवद्वाधिर्गाधेर्मित्रोऽभवत् सुतः ।
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत् ।
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा ।
शक्रस्यानुमते चक्रे खाण्डवं शतयोजनम् ॥
यत् सव्यसाची ह्यदहत् पाण्डुपुत्त्रः प्रतापवान् ।
आवहन् परमां प्रीतिं ज्वलनस्य महात्मनः ॥


ऋषय ऊचुः ।
कथं स खाण्डवं चक्रे विजयः शतयोजनम् ।
तद्वयं श्रोतुमिच्छाम कथयस्व तपोधन ॥

मार्कण्डेय उवाच ।
सोमवंशेऽभवद्राजा महात्मा स महाबलः ॥
धीरः सुदर्शनो नाम चारुरूपः प्रतापवान् ।
स वै हिमवतो नातिदूरे भङ्क्त्वा महावनम् ॥
सिंहान् व्याघ्रान् समुत्सार्य्य कपिवाराँस्तपोधनान् ।
खाण्डवीं नाम नगरीमकरोत्तत्र शोभनाम् ॥
विंशद्योजनविस्तीर्णामायतां शतयोजनम् ।
उच्चप्राकारसंयुक्तां साट्टालामुदतोरणाम् ॥
निम्नाभिरतिदीर्घाभिः परिखाभिः समावृताम् ।
दीर्घिकाभिश्चोपवनैर्व्वृक्षैर्भिश्चापरोगकैः ॥
आकीर्णाञ्च तथावासैरुत्तमैरपि मानवैः ।
सोत्सवाः सततं यत्र जना देवान् दिवि स्थितान् ॥
सार्द्धं स्त्रीभिः सदा युक्ता आढ्या भोगसमन्विताः ।
स वै सुदर्शनो राजा खात्वा भूमिं विदार्य्य च ॥
गङ्गां कनखलां देवीं वाहयामास खाण्डवीम् ।
आनाय्य खाण्डवीमध्यं तेन स्रातेञ्च वर्त्मभिः ॥
यत्रास्ते वक्रगा भूत्वा याति सीतां नदीं प्रति ।
स जित्वा सकलान् भूपान् विशालाश्च्युत्य भूरिशः ॥
राशीश्चकार खाण्डव्या मध्ये रत्नैरनेकशः ।
अन्येभ्यो नगरेभ्यस्तु जनानानीय भूपतिः ॥
खाण्डव्यां वासयामास हठादपि सुदर्शनः ।
देवदानवगन्धर्व्वान् जित्वा जित्वा युधा हृती ॥
देववृक्षं देवरत्नं देवीश्चापि तथौषधीम् ।
खाण्डव्यां रोपयामास सहामात्यः सुदर्शनः ॥
अथ दिग्विजयी सर्व्वो जिगीषुर्भूपतिस्तं सुदर्शनम् ।
कृतसामप्रचारं बहुधा दवानाञ्च तथा शुभाम् ॥
धाराशयौपतिं वीरं विजयं जयशालिनम् ।
सन्धाय हत्वा साचिव्यं तत्रैवासौ न्ययोजयत् ॥
विजयो विवरं प्राप्य महाबलपराक्रमः ।
सुदर्शनस्य नृपतेरवस्कन्दमथाकरोत् ॥
नासहत् सोऽप्यवस्कन्दं विजयस्य सुदर्शनः ।
चतुरङ्गबलेनाशु युद्धायाभिमुखोऽभवत् ॥
विजयो रथमारुह्य नियुज्य चतुरङ्गिणीम् ।
सेनां सुदर्शनं योद्धुं सम्मुखोऽभवदञ्जसा ॥
तदा महद्युद्धमासीद्विजयेन महात्मना ।
सुदर्शनस्य नृपतेर्व्वृत्रवासवयोरिव ॥
ततः सुदर्शनो राजा दारितो गदयाऽपतत् ।
तस्मिन्निपतिते वीरे सेनाभिस्तस्य सैनिकाः ॥
भयात् सम्प्राद्रवन्नस्मादिशः प्रदिश एव च ।
नष्टेषु तस्य सैन्येषु विजयः खाण्डवीं पुरीम् ॥
प्रविश्य ददृशे तत्र राशीभूतान् गिरीनिव ।
सुवर्णानाञ्च रत्नानां सञ्चयान् बहुशः पुरः ॥
दृष्ट्वा सरांसि तत्राथ प्रफुल्लकमलानि तु ।
हंसकारण्डवानादनादितानि समन्ततः ॥
राशीन् सुवर्णरत्नानां पर्व्वतानिव विस्तृतान् ।
पुष्पितान् देववृक्षांश्च भ्रमद्भ्रमरभूषितान् ॥
प्रासादान् विपुलान् शुभ्रान् कैलासशिखरप्रभान् गजान् ।
विस्फुटांश्च हयान्नागान् प्रतिगेहे व्यवस्थितान् ॥
उत्फुल्लनयनो राजा विजयः परवीरहा ।
मेनेऽमरावतीं तान्तु पुरीं क्षितिगतामिव ॥
तं वीक्षन्तं नरपतिं नगरीं तां सुरेश्वरः ।
समेत्य विजयं प्राह सान्त्वयन् श्लक्ष्णया गिरा ॥


इन्द्र उवाच ।
राजन् यद्धनमिदमासीद्देवगणाहृतम् ।
नरगन्धर्व्वयक्षाणां मुनीनाञ्च मनोहरम् ॥
सर्व्वानुत्सार्य्य देवादीनाम चाप्यप्रिये रतः ।
भङ्क्त्वा वनमिदं गुह्यं समुत्साद्य तपोधनम् ॥
खाण्डवीं नगरीं चक्रे हठाद्राजा सुदर्शनः ।
तदिदं पुनरेव त्वं वनं कुरु नृपोत्तम ! ॥
तत्राहं विहरिष्यामि तद्यत्नेन समं रहः ।
मुनीनाञ्च तपः स्थानं भवतु ते प्रसादतः ॥
भविष्यति च यच्चान्यं किन्नरागाश्च पार्थिव ! ॥

मार्कण्डेय उवाच ।
एतत् श्रुत्वा वचस्तस्य शक्रस्य विजयस्तदा ।
वनमेवाकरोत्तान्तु खाण्डवीं शक्रगौरवात् ॥
गच्छन्तु भो यथास्थानं प्रजाः सर्व्वा यथेच्छया ।


येषां वाञ्छास्ति लोकानां मद्राज्यगमने पुनः ॥
वाराणसीं ते गच्छन्तु मयैव प्रतिपालिताम् ।
ततस्तस्य वचः श्रुत्वा जनाः केचिन्निजं पदम् ॥
जग्मुर्व्वाराणसीं केचिद्विजयेनाभिपालिताम् ।
ततो धनानां ताम्राणां रत्नानाञ्च पृथक् पृथक् ॥
वासनां कनकानाञ्च कूप्यानां विजयस्तदा ।
धीवरैर्व्वाहयामास पुरीं वाराणसीं प्रति ॥
गन्धर्व्वाणाञ्च देवानां यदानीतं हठात् पुरा ।
रत्नदार्व्वादिकं यत्तु विजयं तत् प्रसाद्य च ॥
तैस्तैर्नीतन्तु खाण्डव्याः स्वस्थानं प्रति हर्षितैः ।
त्रिंशद्योजनविस्तीर्णां शतयोजनमायताम् ।
तां पुरीं विजयश्चक्रे न चिरादेव वै वनम् ।
तस्मिन् शक्रस्य सम्मत्या तक्षकः सहितो गणैः ॥
उवास सुचिरं तत्र ततोऽभून्निर्ज्जनं वनम् ।
तत्र देवाः सगन्धर्व्वाः क्रीडन्तेऽप्सरसां गणाः ॥
आशंसयंश्च विजयं रणेषु विजयावहम् ॥”॥
“अष्टाविंशतिमे प्राप्ते युगे द्वापरशेषतः ॥
वह्निर्ब्राह्मणरूपेण भिक्षां जिष्णुमयाचत ।
दातुमङ्गीकृते भिक्षां तदा पाण्डुसुतेन वै ॥
वह्निः स्वरूपमास्थाय जिष्णुं वचनमब्रवीत् ।
अहमग्निः पाण्डुपुत्र । यज्ञभागातिभोजनात् ॥
व्याधितोऽहं ततो व्याधिं मम त्वं नाशयाधुना ।
खाण्डवं नाम विपिनं सपक्षिमृगराक्षसम् ॥
यदि त्वं मां भोजयितुं शक्नोषि श्वेतवाहन ।।
तदा ममात्यसौ व्याधिरपयास्यति नोऽचिरात् ॥
पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम् ।
भङ्क्त्वा वनं वतश्चक्रे तेन तत् खाण्डवं वनम् ॥
तदर्थं देवविहितं वनं तच्छ्वेतवाहन ।।
विरोधात्तु शक्रस्य न स्वयं भोक्तुमुत्सहे ॥
सर्व्वां चाहि महाभाग । वने तस्मिन्नियोजय ।
यथाऽहं सकलं भोक्तुं प्राप्नोमि त्वत्प्रसादतः ॥
तस्य तद्वचनं श्रुत्वा सव्यसाची महाबलः ।
दाहयामास विपिनं तत् सर्व्वं प्राणिसंयुतम् ।
देवकीतनयेनासौ वासुदेवेन पालितः ।
खाण्डवं दाहयामास व्यसनस्य हिते रतः ॥”
“सुप्रीतः प्रददौ तस्मादर्ज्जुनाय महात्मने ।
वह्निर्धनुश्च गाण्डीवं दारुणं देवनिर्म्मितम् ॥
अक्षयाविषुधी द्वौ च रूप्याभांश्चतुरो हयान् ।
हनूमताधिष्ठितञ्च प्रकामं वानरध्वजम् ॥
खड्गञ्च निशितं तीक्ष्णं दहनः सव्यसाचिने ।
नीरोगश्चाभवद्वह्निस्तदा जिष्णुप्रसादतः ॥
तैर्व्वाणैस्तेन धनुषा तेन खड्गेन केतुना ।
तद्गुणसादनेनापि विजिग्ये फाल्गुनो रणे ॥
सर्व्वं भैरववर्गेषु संजातो विश्रुतो नृपः ।
खाण्डवं नाम विपिनं चकार सुमहाद्युती ॥”
इति श्रीकालिकापुराणे ६० अध्यायः ॥
(खाण्डव इक्षुखण्डादेर्विकार इत्यण् । गुडादि-
विकारमिष्टान्नद्रव्यम् । यथा, महाभारते । १३ ।
१३ । १८ । [वान् ॥”)
“रसालापूपकांश्चान्नान् मोदकानथ खाण्ड-
खाण्डवी, स्त्री, (हिमवतः सन्निहितं इन्द्रवनं
खण्डयित्वा चन्द्रवंशीयेन राज्ञा सुदर्शनेन
निर्म्मिता या पुरी सा ।) चन्द्रवंशीयसुद-
र्शनराजकृतहिमवत्पर्व्वतनिकटस्थपुरीविशेषः ।
तद्विवरणं खाण्डवशब्दे द्रष्टव्यम् ॥
खाण्डिकः, पुं, (खण्डं मोदकादिकं शिल्पमस्य ।
इति ठञ् ।) खण्डपालः । मोदकः । इति
हारावली ॥ मयरा इति भाषा ॥ (क्लीवे तु
खण्डिकानां समूहः “खण्डिकादिभ्यश्च ।” ४ ।
२ । ४५ । इत्यञ् । खण्डिकसमूहः ॥)
खातं, क्ली, (खन्यते इति । खन्+कर्म्मणि क्तः ।)
पुष्करिणी । इत्यमरः । १ । १० । २७ ॥ तस्य
परिमाणं यथा,—शतेन धनुभिः पुष्करिणी
त्रिभिः शतैर्दीर्घिका चतुर्भिर्द्रोणः पञ्चभि-
स्तडागः द्रोणदशगुणा वापीति ॥
“चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः ।
शतधन्वन्तरश्चैव तावत् पुष्करिणी शुभा ।
एतत्पञ्चगुणः प्रोक्तस्तडाग इति निर्णयः ॥”
इति नव्यवर्द्धमानधृतो वशिष्ठः ॥
खातकं, क्ली, (खात+संज्ञायां कन् ।) परिखा ।
इति हेमचन्द्रः ॥ खाना गड़ार इत्यादि भाषा ॥
खातकः, पुं, अधमर्णः । धारी । ऋणी । यथा,—
“उत्तमर्णो धनस्वामी अधमर्णस्तु खातकः ॥”
इति संक्षिप्तसारटीकायां गोयीचन्द्रः ॥
(परसैन्यविदारकः । यथा, महाभारते । १२ ।
११८ । ११ ।
“खातकं व्यूहतत्त्वज्ञं बलहर्षणकोविदम् ॥”
“खातक. परसैन्यविदारकः ।” इति तट्टीकाकृ-
न्नीलकण्ठः ॥)
खातभूः, स्त्री, (खातयुक्ता भूर्भूमिः ।) प्रतिकूपः ।
परिखा । इति हारावली ॥
खातव्यवहारः, पुं, (खातस्य पुष्करिण्यादेर्व्यवहारः
परिमाणम् ।) पुष्करिण्यादिपरिमाणम् । पुकुरे
काटीति भाषा ॥
“अथ खातव्यवहारे करणसूत्रं सार्द्धार्या ।
गणयित्वा विस्तारं बहुषु स्थानेषु तद्युतिर्भाज्या ।
स्थानकमित्या सममितिरेवं दैर्घ्ये च वेधे च ।
क्षेत्रफलं वेधगुणं खाते घनहस्तसंख्या स्यात् ॥
उदाहरणम् ।
भुजवक्रतया दैर्घ्यं दशेशार्ककरैर्म्मितम् ।
त्रिषु स्थानेषु षट्पञ्चसप्तहस्ता च विस्तृतिः ॥
यस्य खातस्य वेधोऽपि द्विचतुस्त्रिकरः सखे ! ।
तत्र खाते कियन्तः स्युर्घनहस्ताः प्रचक्ष्व मे ॥”




अत्र सममितिकरणेन विस्तारे हस्ताः ।
दैर्घ्ये । ११ । वेधे । ३ । तत्क्षेत्रदर्शनं यथा,—



यथोक्तकरणेन लब्धा घनहस्तसंख्या ॥ १९८ ॥
खातान्तरे करणसूत्रं सार्द्धवृत्तम् ।
मुखजतलजतद्युतिजक्षेत्रफलैक्यं हृतं षड्भिः ।
क्षेत्रफलं सममेतत् वेधहतं फलं घनफलं स्पष्टम् ।
समखातफलत्र्यंशः सूचीखाते फलं भवति ॥
उदाहरणम् ।
सखे दशद्वादशहस्ततुल्यं
विस्तारदैर्घ्यन्तु तले तदर्द्धम् ।
यस्याः सखे सप्तकरश्च वेधः
का खातसंख्या वद तत्र वाप्याम् ॥




मुखजं क्षेत्रफलम् । १२० । तलजम् । ३० ।
तद्युतिजम् । २७० । एषामैक्यम् । ४२० ।
षड्भिः । ६ । हृतं जातं समफलम् । ७० । वेध-
७ हतं जातं खातफलं घनहस्ताः । ४९० ।
द्वितीयोदाहरणम् ।
खातेऽथ तिग्मकरतुल्यचतुर्भुजे च
किं स्यात् फलं नवमितः किल यत्र वेधः ।
वृत्ते तथैव दशविस्तृतिपञ्चवेधे
सूचीफलं वद तयोश्च पृथक् पृथङ्मे ॥



भुजः । १२ । वेधः । ९ । जातं यथोक्तकरणेन
खातफलं घनहस्ताः । १२९६ । सूचीफलम् । ४३२ ।

वृत्तखातदर्शनाय ।



व्यास: ।१०। वेध: ।५। अत्र सूक्ष्मपरिधि: $\frac{३९२७}{१२५}$ । सूक्ष्मक्षेत्रफलम् $\frac{३९२७}{५०}$ । वेधगुणं जातं सूक्ष्मखातफलम् $\frac{३९२७}{१०}$ । सूक्ष्मसूचीफलम् $\frac{१३०९}{१०}$ । यद्वा स्थूलखातफलम् $\frac{२७५०}{७}$ । सूचीफलं स्थूलम् $\frac{२७५०}{२१}$ ।

इति लीलावत्यां खातव्यवहार: समाप्त: ॥

खात्रं, क्ली (खनु विदारे + "उषिखनिभ्यां कित् ।" उणा । ४ । १६१ । इति ष्ट्रन् किच्च ।) खातम् । खनित्रम् । इत्युणादिकोष: ॥ दारुणम् । वनम् । सूत्रम् । इति संक्षिप्तसारे उणादिवृत्ति: ॥ (जलाधारविशेष: । इति उज्ज्वलदत्त: ॥)

खाद, ऋ भक्षणे । इति कविकल्पद्रुम: ॥ (भ्वा-पर-सक-सेट् । ऋदित् ।) ऋ, अचखादत् । इति दुर्गादास: ॥

खादक:, त्रि, (खाद् भक्षणे + ण्वुल् ।) ऋणग्रहीता । खातक इति ख्यात: । इति मिताक्षरा ॥ भक्षक: । यथा,—
"विक्रयैर्गोविनिमयैर्दत्त्वा गोमांसखादके ।
व्रतं चान्द्रायणं कुर्याद्‌वधे साक्षाद्वधी भवेत् ॥"
इति प्रायश्चित्ततत्त्वे गोभिल: ॥

खादनं, क्ली, (खाद् + भावे ल्युट् ।) भक्षणम् । आहार: । (खादति चर्व्वयत्यनेन इति ।) दन्ते पुं । इति हेमचन्द्र: ॥

खादित, त्रि, (खाद + क्त: ।) भक्षितम् । इत्यमर: । ३ । १ । ११० ॥ खाओया इति भाषा ॥ ("अग्नितं खादितं पीतं लीढं कोष्ठगतं नृणाम् । तज्जीर्य्यति यथाकालं शोषितं पित्ततेजसा ॥" इति शारीरस्थाने चतुर्थेऽध्याये सुश्रुतेनोक्तम् ॥)

खादिरसार:, पु, (खदिर + स्वार्थे अण् तत: षष्ठीतत्पुरुष: ।) खदिरवृक्षनिर्यास: । खयेर इति भाषा ॥ तत्पर्य्याय: । खादिर: २ बहुसार: ३ सत्सार: ४ रङ्गद: ५ रङ्ग: ६ । अस्य गुणा: । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातव्रणकण्ठामयनाशित्वम् । रुचिकारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्ट: ॥ खदिरसारोऽपि पाठ: ॥ (यथा,—
"विना खदिरसारेण सारेण हरिणीदृशाम् ।
नाधरे जायते रागो नागरागः पयोधरे ॥"
इति उद्भट: ॥)

खाडुक:, त्रि, (खादति छिनत्ति इति । खाद् + उन् संज्ञायां कन् ।) हिंसालुक: । इति हारावली ॥

खाद्यं, त्रि, (खाद्यते इति । खाद् + कर्म्मणि ण्यत् ।) भक्षणीयद्रव्यम् । यथा,—
"कश्त्वं भद्र खलेश्वरोऽहमिह किं घोरे वने स्थीयते शार्दूलादिभिरेव हिंस्रपशुभि: खाद्योऽहमित्याशया ।" इत्युद्भट: ॥

खानपान, क्ली, (धातूनामनेकार्थत्वात् खे भक्षणे + भावे ल्युट् खानम् । पा पाने + भावे ल्युट् पानम् । खानेन सह पानं यद्वा खानञ्च पानञ्च तयो: समाहार: ।) कठिनद्रवद्रव्ययोर्गलाध:करणम् । खाना पिना इति हिन्दी भाषा ॥ यथा, गारुडे नीतिसारे १०९ अध्याय: ।
"सद्भावेन हि तुष्यन्ति देवा: सत्पुरुषा द्विजा: ।
इतरे खानपानेन वाक्प्रदानेन पण्डिता: ॥"

खानि:, स्त्री, (खन + इन् । पृषोदरात् वृद्धि: ।) खनि: । इति हेमचन्द्र: ॥

खानिकं, क्ली, (खानेन खननेन निर्वृत्तं इति ठञ् ।) कुड्यच्छेद्यम् । इति त्रिकाण्डशेष: ॥ देयालेर गर्त्त इति भाषा ॥

खानिल:, त्रि, (खानं खननं शीलत्वेनास्त्यस्य । इति बाहुलकात् इलच् ।) भित्तिचौर: । इति शब्दरत्नावली ॥ सिंदेल चोर इति भाषा ॥

खानी, स्त्री, (खानि + वा ङीष् ।) खनि: । इति शब्दरत्नावली ॥

खानोदक:, पु, (खानाय पानार्थं उदकमत्र ।) नारिकेल: । इति त्रिकाण्डशेष: ॥

खापगा, स्त्री, (खे आकाशे स्थिता खात् आगता वा आपगा नदी ।) गङ्गा । इति हेमचन्द्र: ॥

खार:, पुं, (ख अवकाशमाधिक्येन ऋच्छतीति । ऋ + अण् ।) खारीपरिमाणम् । इति हरचन्द्र: ॥

खारि:, स्त्री, (ख मध्यावकाशं आरातीति । आ + रा + इन् ।) खारीपरिमाणम् । इति भरतधृतचन्द्र: ॥

खारिक, क्ली, (खारि + संज्ञायां कन् ।) मधुपारेवतम् । इति राजनिर्घण्ट: ॥

खारिम्पच:, त्रि, (खारिं खारीपरिमितधान्यमित्यर्थ: पचतीति । पच् + "परिमाणे पच: ।" ३ । २ । ३३ । इति खश् + ततो मुम् ।) खारिपरिमितान्नादिपाककर्त्ता । इति व्याकरणम् ॥

खारी, स्त्री, (खं मध्यावकाशं आरातीति । आ + रा + इन् । "कृदिकारादक्तिन: ।" ४।१।४५। इत्यस्य वार्त्तिं इति पक्षे ङीष् ।) परिमाणविशेष: । इत्यमर: । २ । ९ । ८८ ॥ यदाह तट्टीकायां भरत: ।
"पलं प्रकुञ्चकं मुष्टि: कुडवस्तच्चतुष्टयम् ।
चत्वार: कुडवा: प्रस्थश्चतु:प्रस्थमथाढकम् ॥
अष्टाढको भवेद्‌द्रोणो द्विद्रोण: सूर्प उच्यते ।
सार्द्धसूर्पो भवेत् खारी द्वे खार्य्यौ गोण्युदाहृता ॥
तामेव भारं जानीयात् वाहो भारचतुष्टयम् ॥"
"षोडशद्रोणपरिमाणम् ।" इत्यमरटीकायां स्वामी लीलावती च ॥ गोणीचतुष्टयम् । तत्तु प्रस्थवत्त्वधिकचत्वारिंशत्सहस्रपलानि । पाँचशत वारसेर इति भाषा । इति वैद्यकपरिभाषा ॥ द्रोणचतुष्टयम् । यथा,—
"चतुराढको भवेद्द्रोण: खारी द्रोणचतुष्टयम् ॥"
इति स्मृति: ॥

खारीकं, त्रि, (खारीं खारीवापमर्हतीति । "खार्य्या ईकन् ।" ५ । १ । ३३ । "केवलायाश्चेति वक्तव्यम् ।" इति वार्त्ति इति ईकन् ।) खारीक्षेत्रम् । खारीपरिमितबीजवपनयोग्ययुक्तक्षेत्रम् । तत्पर्य्याय: । खारीवाप: २ । इत्यमर: ।२।९।१०॥

खारीवाप:, त्रि, (खारी तत्परिमितधान्य उप्यते ऽत्र । वप् + अधिकरणे घञ् ।) खारीक: । इत्यमर: । २ । ९ । १० ॥ (खारीं वपतीति । वप् + कर्म्मणि अण् । धान्यादिवपनकारी ।)

खिखि:, स्त्री, (खिरित्यव्यक्तशब्देन खेटति भीरूणां भयमुत्पादयतीति । खि + खिट् + इ: । पृषोदरात् साधु: ।) किखि: । इति क्वचित् त्रिकाण्डशेषे पाठ: ॥ खाँकशियाली इति भाषा ॥

खिङ्किर:, पु, (खिं अव्यक्तध्वनिविशेषं किरति विकृतिभावेन शब्दं करोतीत्यर्थ: । कॄ + क: । पृषोदरात् खत्वेन साधु: ।) शिवाभेद: । खाँकशियाली इति भाषा । खट्वाङ्गम् । तत्तु शिवस्याङ्गम् । वारिवालकम् । तत्तु गन्धद्रव्यम् । इति विश्वो हेमचन्द्रश्च ॥

खिट, भयभीषणयो: । इति कविकल्पद्रुम: ॥ (भ्वा-पर-भये अक-भयोत्पादने सक-सेट् ।) भीषा खतो भयोत्पादना । खेटति जनो व्याघ्रादिभेतीत्यर्थ: । खेटति व्याघ्रो जनं भीषयते इत्यर्थ: । इति दुर्गादास: ॥

खिद, श म औ परिघाते । इति कविकल्पद्रुम: ॥ (तुदा-परं-सक-अनिट् ।) श म, खिन्दति दुष्टं राजा । औ, खेत्ता । इति दुर्गादास: ॥

खिद, रु घ य औ दैन्ये । इति कविकल्पद्रुम: ॥ (दिवा-रुधा च-आत्म-अक-अनिट् ।) दैन्यकसुपसर्ग्गभाव: । रु घ, खिन्ते संवेव ये द्रव्यम् दीयमानं न गृह्यते । इति हलायुध: ॥ रु य, खसुखनिरभिलाष: खिद्यते लोकहेतोरिति शाकुन्तले । औ, खेत्ता । इति दुर्गादास: ॥

खिदिर:, पुं, (खिद्यते क्षणपक्षेण दु:खेन तपसा वा । यथायथं वृत्पत्तिर्ज्ञातव्या । खिद् + "इषिमदि-मुदि-खिदीति ।" उणा । १ । ५२ । इति किरच् ।) चन्द्र: । इत्युणादिकोष: ॥ दीन: । तापस: । इति संक्षिप्तसारे उणादिवृत्ति: ॥

खिद्यमान:, त्रि, (खिद् + ताच्छील्ये चानश् ।) खेदयुक्त: । दैन्यपक्ष: । उपतप्त: । यथा,—
"खिद्यमानन्तु तं दृष्ट्वा सूर्य: क्षणात्मजं तदा ।"
इति शाम्बपुराणे सूर्य्यस्तव: ॥

खिल:, पुं, (खिद् दैन्ये + "स्फायि तञ्चिवञ्चीति ।" उणा । २ । १३ । इति रक् ।) रोग: । दारिद्र्य: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

खिन्न:, त्रि, (खिद् + क्त ।) दैन्ययुक्त: । खेदयुक्त: । यथा, श्रीभागवते ।

"गौर्भूत्वाश्रुमुखी खिन्ना रुदन्ती करुणं विभोः ॥"

खिरहिट्टी, स्त्री, महासमङ्गा । इति राजनिर्घण्टः ॥

खिलं, त्रि, (खिल + कः ।) हलादिना अकृष्टभूमिः । खिल भूँइ इति भाषा ॥ तत्पर्य्यायः । अप्रहतम् २ । इत्यमरः । २ । १ । ५ ॥ सारसंग्रहे वेधसि च पुं । इति मेदिनी ॥
"खिलो नारायणः प्रोक्त एवमस्तद्गुणाः स्मृताः ।" इति खिलेषु हरिवंशे इत्यत्र नीलकण्ठटीका ॥

खु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, खवते । इति दुर्गादासः ॥

खुङ्गाहः, पुं (खु इत्यव्यक्तशब्दं कुर्व्वन् गाहते रणस्थलं विलोडयतीति । गाह + अच् ।) कृष्णवर्णघोटकः । इति हेमचन्द्रः ॥

खुज, उ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्वात् क्त्वा वेट् ।) उ, खोजित्वा खुक्त्वा । स्तेयं चौर्य्यम् । इति दुर्गादासः ॥

खुज्जाकः, पु, (खुज् + आकः निपातनात् जस्य द्वित्वम् ।) देवताड़वृक्षः । इति रत्नमाला ॥ खुञ्जाक इति क्वचित् पाठः ॥

खुड, इ ङ खञ्जे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्-इदित् ।) पञ्चमस्वरी । खञ्जः खोटनम् । इ, कर्म्मणि खुण्ड्यते । ङ, खुण्डते खोड़ः । इति दुर्गादासः ॥

खुड, क } खुड, इ क } भेदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । माधविक इदित् ।) द्वौ पञ्चमस्वरिणौ । क, खोडयति । द्वितीय आद्यस्वरीति कातन्त्राद्याः । स्वमते तु द्वितीयस्याद्यस्वरित्वे पूर्व्वेणैवेदनुबन्धः स्यात् । पञ्चमस्वरित्वे तु खनातीयस्य पुनःपाठात् पूर्व्वो नेदनुबन्धः । खुण्डयति । खण्डयतीति प्रयोगस्तु खडि ङ मथीत्यस्मात् यद्वा खण्डं करोतीति णौ साधनम् । तस्य भेदवाचित्वन्तु धातूनामनेकार्थत्वात् । इति दुर्गादासः ॥

खुर, श विलेखने । छेदने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, खुरति भूमिं तृणं वा लोकः । खोरिता । खुरः शफम् । इति दुर्गादासः ॥

खुरः, पुं, (खुर छेदने + कः । यद्वा "क्षुरेन्द्रायवर्णेति ।" उणां । २ । २८ । इति रन् गुणाभावोऽन्त्यलोपश्च ।) शफम् । गवादीनां पादाग्रम् । (यथा, मनुः । ४ । ६७ ।
"न भिन्नशृङ्गाक्षिखुरैर्न वालधिविरूपितैः ॥")
कोलदलम् । नखीनामगन्धद्रव्यम् । इति मेदिनी ॥ छेदनवस्तु । नापितस्य खुरः । इति शब्दरत्नावली ॥ खट्टादीनां पादुकम् । इति धरणी ॥ खुरा इति भाषा ॥

खुरकः, पु, (खुर + संज्ञायां कन् । खुरो गन्धद्रव्यविशेषः स इव कायति वा । कै + कः ।) तिलवृक्षः । इति शब्दचन्द्रिका ॥ (तिलशब्देऽस्य गुणादयो बोद्धव्याः ॥)

खुरणसः, त्रि, (खुर इव नासिका यस्य "अग्नासिकाया इति ।" ५ । ४ । ११८ । इति अच् नसादेशश्च "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) चिपिटनासिकः । इत्यमरः । २ । ६ । ४७ ॥ चेपटानाकयुक्त इति भाषा ॥

खुरणाः, त्रि, (खुर इव नासिका यस्य "खुरखराभ्यां वा नस् ।" इति नसादेशः "पूर्व्वपदादिति ।" ८ । ४ । ३ । इति णत्वं च ।) खुरणसः । इत्यमरः । २ । ६ । ४७ ॥ छेपडानासिकायुक्त इति भाषा ॥

खुरप्रः, पु, (खुर इव प्राति खुराग्रवत् कार्य्यं पूरयतीत्यर्थः । खुर + प्रा + कः ।) वाणविशेषः । इत्यमरटीकायां स्वामी ॥ खुरपा इति भाषा ॥

खुरली, स्त्री, (खुरैः सह विविधानि अस्त्रादीनि लाति पौनःपुन्येन शिक्षार्थमत्र । ला ग्रहणे + इन् + वा ङीष् ।) शराभ्यासः । इति हेमचन्द्रः ॥

खुराकः, पु, (खुर + आकन् ।) पशुः । इत्युणादिकोषः ॥

खुरालकः, पु, (खुर इव अलति पर्य्याप्नोतीति । अल + ण्वुल् ।) लौहमयवाणः । इति शब्दमाला ॥

खुरालिकः, पुं, (खुराणां आलिभिः कायति प्रकाशते । कै + कः ।) वासशीर्षकः । नापितेर भाँड़ि इति भाषा । नाराचः । उपधानम् । इति मेदिनी ॥ खरालिकोऽपि पाठः ॥

खुर्द्द, ङ क्रीडायाम् । इति कविकल्पद्रुमः (भ्वां-आत्मं-अकं-सेट् ।) पञ्चमस्वरी । दीर्घिणः पृथकपाठात् पूर्व्वस्य न दीर्घः । ङ, खुर्द्दते । इति दुर्गादासः ॥

खुल्लं, क्ली, (क्षुद् + सम्पदादित्वात् क्विप् । क्षुदं लातीति । ला + कः । पृषोदरात् साधुः ।) नखीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ क्षुद्रे नीचे च त्रि ॥

खुल्लकः, त्रि, (खुल्ल + स्वार्थे कन् ।) स्वल्पः । नीचः ॥ कनिष्ठः । दरिद्रः । निष्ठुरः खलः । इत्यमरटीका ॥

खुल्लतातः, पुं, (खुल्लः कनिष्ठः तातस्य पितुरिति पूर्व्वनिपातः ।) पितृकनिष्ठभ्राता । इति शब्दरत्नावली ॥ खुड़ा इति भाषा ॥

खुल्लमः, पु, (खुल्लेन मीयते इति । मा + घञर्थे कः ।) पन्थाः । इति त्रिकाण्डशेषः ॥

खूर्द्द, ङ क्रीडायाम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) षष्ठस्वरी । ङ, खूर्द्दते । इति दुर्गादासः ॥

खेकीलकः, पु, (खे आकाशे कीलक इव यस्य रत्नम् ।) शब्दवती यष्टिः । इति हारावली ॥

खेगमनः, पु, (खे आकाशे गमनं यस्य ।) कालकण्ठपक्षी । इति शब्दमाला ॥

खेचरः, पु, (खे चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । अलुक् समासः ।) शिवः । इति शब्दरत्नावली ॥ विद्याधरः । इति जटाधरः ॥ पारदः । इति राजनिर्घण्टः ॥ आकाशगामिनि त्रि ॥ ("हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः । बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः ॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारमारणाधिकारः ॥
मेषादिराशिः । यथा ज्योतिषतत्त्वे—"खेचराश्च सर्व्वे ॥")

खेचरान्नं, क्ली, (खेचरं द्विदलादिमिश्रितं अन्नम् ।) द्विदलादिसहितपक्वतण्डुलम् । खिचडीति भाषा ॥ इति पाकराजेश्वरः ॥

खेट, तृ क भक्षणे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) अचिखेटत् । इति दुर्गादासः ॥

खेटं, क्ली, (खे + अट् + अच् ।) तृणम् । इति शब्दरत्नावली ॥ खेड़मपि पाठः ॥

खेटः, पु, (खे आकाशे अटति । अट् + अच् ।) ग्रहः । यथा, भावविवेके ।
"यस्मिन् राशौ स्थितः खेटस्तेन तं परिपूरयेत् ॥"

खेटः, त्रि, (खिट् + अच् । खेट + कः वा ।) अधमः । इत्यमरः । ३ । १ । ५४ ॥ घोटकः । इति शब्दरत्नावली ॥ सुनिन्दकः । इति विश्वः ॥ सुनन्दक इति पाठे बलरामस्य गदा इति कश्चित् ॥

खेटः, पु, क्ली, (खिद्यते भयमुत्पद्यते अस्मादनेन वा । खिट् + अपादाने करणे वा घञ् ।) मृगया । इत्यमरहेमचन्द्रौ ॥ कफः । (खिद्यते भक्षोपयोगिशस्यादिना उपजीव्यते अस्मात् ।) ग्रामभेदः । स तु कर्षकग्रामः । (तथा च भागवते । १ । ६ । ११ ।
"खेटखर्व्वटवाटीश्च वनान्युपवनानि च ॥"
"खेटाः कर्षकग्रामाः ।" इति श्रीधरस्वामी ॥) चर्म्म । इति मेदिनीशब्दरत्नावल्यौ ॥

खेटकः, पु, (खेट + स्वार्थे कः ।) ग्रामभेदः । चासार गाँ इति भाषा ॥ इति जटाधरः ॥ फलकम् । इति हेमचन्द्रः ॥ "खेटकं वसुनन्दके ।" इति हारावली ॥ वसुनन्दको घनच्छिजीवकः । इति तत्सूची ॥ बलदेवस्य गदा इति कश्चित् ॥

खेटः } खेटकः } पु, (खेटति भयमुत्पादयत्यनेन । खिट् + करणे घञ् । खेट + स्वार्थे कः ।) यष्टिः । यथा,—
"यष्टिरूपेण खेट ! त्वमरिसंहारकारक ।
देवीहस्तस्थितो नित्यं मम रक्षां कुरुष्व च ॥"
इति शारदीयदुर्गापूजापद्धतौ अस्त्रपूजाप्रकरणम् ॥
"खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ॥"
इति च तत्र दशभुजाया दुर्गाया ध्यानम् ॥

खेटितालः, पुं, (खे अटतीति अट् इन् । खिट् + इन् वा । खेटिः तालोऽस्य ।) वैतालिकः । इति शब्दमाला ॥

खेटी, [न्] पु (खेट् + णिनिः ।) नागरः । कामी । इति शब्दमाला ॥

खेड, तृ क भक्षणे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) अचिखेडत् । इति दुर्गादासः ॥

खेद', पुं, (खिद्+भावे घञ्।) शोक:। इति हेमचन्द्र:॥ अवसन्नता। इति जटाधर:॥ (यथा, रामायणे। ४। ६६। ७।
"यद्यपीदं वनं दुर्गं विचिन्वन्तु वनौकस'।
खेदं त्यक्त्वा पुन: सर्व्वं वनमेव विचिन्वताम्॥")

खेदिनी, स्त्री, (खिद्+णिच्+णिनि। स्त्रियां ङीप्।) अश्मन्तपर्णीवृक्ष:। लता। इति शब्दचन्द्रिका॥ (दैन्यकारिणी। शोककारिणी॥ इति व्युत्पत्तिलब्धोऽर्थ:॥)

खेयं, क्ली, (खन्यते इति। खनु विदारे+"ई च खन:।"३।१।१११ इति कर्म्मणि यत् ईकारश्चान्तादेश'।) परिखा। गड़खाइ इति भाषा। इत्यमर'॥ खननीयम्। इति व्याकरणम्॥ (सेतुभेद:। यथा मिताक्षरोद्धृतनारदवचनम्।
"सेतुश्च द्विविधो ज्ञेय: खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेय:।" इति॥)

खेल, ऋ चाले। गत्याम्। इति कविकल्पद्रुम:॥ (भ्वां-परं-चलने अकं गत्यां सकं सेट्।) कवर्गद्वितीयादि:। अचिखेलत्। चाल, कम्प:। चाल: केचिन्न मन्यते। इति दुर्गादास:॥

खेलनं, क्ली, (खेल्+भावे ल्युट्।) क्रीड़नम्। इति हलायुध:॥ (यथा, गीतगोविन्दे। १। ४१।
"कापि विलासविलोलविलोचन-
खेलनजनितमनोजम्॥")

खेलनी, स्त्री, (खेलति अस्मिन् इति। खेल+अधिकरणे ल्युट्+स्त्रियां ङीप्।) शारिफलम्। इति हेमचन्द्र:॥

खेला, स्त्री, (खेल+भावे+अप् टाप्।) खेलनम्। तत्पर्य्याय:। क्रीड़ा २ कूर्द्दनम् ३। इत्यमर:। १। ७०। ३३॥

खेलि:, स्त्री, (खे आकाशे अलति पर्य्याप्नोति। अल्+इन्।) गीतम्। वाण:। सूर्य्य:। पक्षी। जन्तु:। इत्यजयपाल:॥

खेव, ऋ ङ सेवे। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-सकं सेट् ऋदित्।) ऋ, अचिखेवत्। ङ, खेवते। इति दुर्गादास:॥

खेसर:, पुं, (खे आकाशे इव द्रुतगामित्वात् सरतीति। सृ+ट:।) जन्तुविशेष:। खच्चर इति भाषा। तत्पर्य्याय:। अश्वखरज: २ सकृद्गर्भ: ३ अध्वग: ४ वामी ५ सन्दुरज: ६ मिश्रज: ७ मिश्रशब्द: ८ अतिभारग: ९। इति राजनिर्घण्ट:॥

खै, स्थैर्य्ये। खनने। हिंसायाम्। इति कविकल्पद्रुम:॥ (भ्वां-परं स्थैर्य्ये अकं-खननादौ सकं-अनिट्।) खायति। इति दुर्गादास:॥

खोङ्गाह', पुं, (खे आकाशे उङ् इत्यव्यक्तशब्दं कुर्व्वन् गाहते इव प्रधावतीत्यर्थ:। गाह+अच्। पृषोदरात् साधु:।) श्वेतपिङ्गलाश्व:। इति हेमचन्द्र:॥ खाङ्गाहोऽपि पाठ:॥

खोट, ऋ गत्याघाते। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोटत्। गत्याघात: खोटनम्। खोटति खञ्ज:। इति दुर्गादास:॥

खोट, त क क्षेपे। इति कविकल्पद्रुम:॥ (अदन्त-चुरां परं-सकं सेट्।) अचुखोटत्। इति दुर्गादास:॥

खोटि:, स्त्री, (खोट्+इन्।) चतुरा स्त्री। इति शब्दमाला॥ खोरिरित्यपि पाठ:॥

खोटी, स्त्री, (खोटि+वा ङीप्।) पालङ्कीद्रव्य:। इति शब्दचन्द्रिका॥ चतुरापि॥

खोड़, ऋ खोटने। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट।) ऋ, अचुखोड़त्। खोड़ति खञ्ज:। रमानाथस्तु खोड़ति बाला क्रिमिमित्युदाहृतवान्। इति दुर्गादास:॥

खोड़, तृ क क्षेपे। इति कविकल्पद्रुम:॥ (अदन्त-चुरां-परं सक सेट्।) अचुखोड़त्। इति दुर्गादास:॥

खोड:, त्रि, (खोडति इति। खोड़+अच्।) खञ्ज:। खोंड़ा इति भाषा॥ इत्यमर:। २।६।४८॥

खोडकशीर्षक, क्ली, (खोड़ क्षेपे+ण्वुल्। खोड़क शीर्षं अस्य इति कप्।) कपिशीर्षम्। क्रयशीर्षम्। इति त्रिकाण्डशेष:॥

खोर, ऋ खोटने। गतिवैकल्ये इति यावत्। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं सेट्।) ऋ, अचुखोरत्। खोरति खञ्ज:। इति दुर्गादास:॥

खोर:, त्रि, (खोरति इति। खोर्+अच्।) खञ्ज:। इति हेमचन्द्र:॥

खोल, ऋ खोटने। गतिवैकल्ये। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोलत्। खोलति खञ्ज:। रमानाथस्तु खोलति बाला क्रिमिमित्युदाहृतवान्। इति दुर्गादास:॥

खोल:, त्रि, (खोलति इति। खोल+अच्।) खञ्ज:। इति शब्दमाला॥

खोलक:, पुं, (खोल+संज्ञायां कन्।) पाक:। खोला इति भाषा॥ शिरस्त्र:। खोपड़ा इति भाषा॥ वल्मीक:। उयेर ढिपि इति भाषा॥ पूगकोष:। इति मेदिनी॥ गुयार छोबड़ा इति भाषा॥

खोलि:, स्त्री, (खोल+इन्।) तूण:। इति शब्दमाला॥

खोल्मुक:, पुं, (खे आकाशे उल्मुक इव लोहितवर्णतयेति बोध्यम्।) मङ्गलग्रह:। इति त्रिकाण्डशेष:॥

ख्या, ल ख्यातौ। कथने। इति कविकल्पद्रुम:॥ (अदां-परं-अकं-कथनादौ तु सकं-अनिट्।) ख्याति: प्रसिद्धि:। ल, ख्याति गुणी प्रसिद्ध: स्यादित्यर्थ:। ख्याति साधु: कथां हरे:। तथा च। ख्या प्रकथने। प्रकथनं प्रसिद्धिरिति गोविन्दभट्ट:। ख्या प्रकथने इति चतुर्भुजभुमरौ। इति दुर्गादास:॥

ख्यात:, त्रि, (ख्या+क्त:।) ख्यातियुक्त:। तत्पर्य्याय:। प्रतीत: २ प्रथित: ३ वित्त: ४ विज्ञात: ५ विश्रुत: ६। इत्यमर:। ३। १। ९॥ (यथा, भट्टि:। ६। ६०।

"अमितम्पचमीशान सर्व्वभोगीणमुत्तमम्।
आययो, पितरं विद्धि ख्यातं दशरथं भुवि॥")

ख्यातगर्हण:, त्रि, (ख्याता विश्रुता गर्हणा निन्दा यस्य।) प्रसिद्धकुत्सन:। तत्पर्य्याय:। अवगीत' २। इत्यमर:। ३। १। ६३॥

ख्यातगर्हित:, त्रि, (ख्यातं गर्हितं गर्हणमस्य।) ख्यातगर्हण:। इति जटाधर:॥

ख्याति:, स्त्री, (ख्या+क्तिन्।) प्रसिद्धि:। तत्पर्य्याय:। यश: २। इत्यमर:। ३। २। ९॥ (यथा, पञ्चतन्त्रे। १। ४०२।
"लोके ख्यातिमुपागताऽत्र सकले लोकोक्तिरेषा यत:।"
[पुष्कलाम्।
मनुश्च। १२। ३६।
'येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम्॥"
प्रकाश:। ज्ञानम्। यथा, माघे। ४। ५५।
"मैत्र्यादिचित्तपरिकर्म्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगा:।
ख्यातिं च सत्त्वपुरुषान्यतयाऽधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्॥"
"मैत्रीति। इहाद्रौ समाधिभृतो योगिन:। मैत्री करुणा मुदिता उपेक्षेति चतस्रश्चित्तवृत्तय:। तत्र पुण्यकृत्सु मैत्री दु:खिषु करुणा सुखिषु मुदिता अनुमोदनं पापिषु उपेक्षा। मैत्री आदिर्येषां तानि चित्तस्य परिकर्म्माणि प्रसाधकानि शोधकानीत्यर्थ: तानि विन्दन्ति लभन्ते इति तद्विद' सन्तस्ते' क्षीणान्त:करणमला: इत्यर्थ:। अतएव क्लेशप्रहाणं विधाय। अविद्यास्मितारागद्वेषाभिनिवेशा' पञ्च क्लेशा:। तत्रानित्येषु नित्यत्वाभिमान: अनात्मनि च देहेन्द्रियादौ आत्मधीरित्यादि विभ्रमोऽविद्या। अस्मिता अहङ्कार:। रागोऽभिमतविषयाभिलाष,। द्वेषोऽनभिमतविषयेषु रोष:। अभिनिवेश:। कार्य्याकार्य्येष्वाग्रह:। ते हि पुरुषं क्लिश्यन्ति इति क्लेशा: क्लेशहेतव, तेषां प्रहाणं नाश: तद्विधाय क्लेशान् छित्वा इत्यर्थ:। अतो लब्ध: सबीज: सावलम्बयोगो यैस्ते लब्धसबीजयोगा: सन्त: आलम्बनमेव आनन्ति। सत्त्वपुरुषयोरन्यतया अन्यत्वेन मिथो भिन्नत्वेन ख्यातिं ज्ञानं अधिगम्य प्रकृतिपुरुषौ भिन्नाविति ज्ञात्वा प्रकृतिपुरुषयोर्विवेकाग्रहणात् संसार:। विवेकग्रहणात् मुक्तिरिति साङ्ख्या:। अथ तां ख्यातिमपि निरोद्धुं निवर्त्तयितुं वाञ्छन्ति वृत्तिरूपां तां निवर्त्त्य स्वयम्प्रकाशतयैवावस्थातुमिच्छन्तीत्यर्थ,। प्रकृतावुपरतायां पुरुषस्वरूपेणावस्थानं मुक्तिरिति साङ्ख्यसिद्धान्त:॥" इति तट्टीकायां मल्लिनाथ' ॥)

ग

ग, गकारः । स तु व्यञ्जनतृतीयवर्णः । अस्यो-
च्चारणस्थानं कण्ठः । (यथा, "अ-कु-ह-विस-
र्ज्जनीयानां कण्ठः ।") इति व्याकरणम् ॥ * ॥
"गकारं परमेशानि । पञ्चदेवात्मकं सदा ।
त्रिगुणं त्रिगुणोपेतं निरीहं निर्म्मलं सदा ॥
पञ्चप्राणमयं वर्णं सर्व्वशक्त्यात्मकं प्रिये ।
अरुणादित्यसङ्काशां कुण्डलीं प्रणमाम्यहम् ॥"
इति कामधेनुतन्त्रम् ॥ * ॥
"ससर्गः स्तेमितः कण्ठे वायुना कादिमीरयेत् ।
वर्गस्पर्शनमात्रेण कं खरस्पर्शनात्तु खम् ।
लोकगम्भीरसंस्पर्शाद्गवौ ङश्च वह्निर्गतम् ॥"
इति प्रपञ्चसारः ॥ * ॥
(वङ्गाक्षरेऽस्य लेखनप्रकारादिर्यथा,—
"अधःकुञ्चितरेखा या गाणेशी सा प्रकीर्त्तिता ।
ततो दक्षगता या तु कमला तत्र संस्थिता ।
अधोगता ततो या तु तस्यामीशः सदा वसेत् ॥"
अधोमुखेन गता पुनरूर्द्ध्वमुखेनागतेत्यर्थः ॥ * ॥
तस्य ध्यानं यथा,—
"ध्यानमस्याः प्रवक्ष्यामि शृणुष्व वरवर्णिनि ।
दाडिमीपुष्पसङ्काशां चतुर्ब्बाहुसमन्विताम् ॥
रक्ताम्बरधरां नित्यां रत्नालङ्कारभूषिताम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
तस्य नामानि यथा,—
"गोगौरी गौरवो गङ्गा गणेशो गोकुलेश्वरः ।
शार्ङ्गी पञ्चात्मको गाथा गन्धर्व्वः सर्व्वगः स्मृतिः ॥
सर्व्वसिद्धिः प्रभा धूम्रा द्विजाख्यः शिवदर्शनः ।
विश्वात्मा गौः पृथग्रूपा बालवह्निस्त्रिलोचनः ॥
गीतं सरस्वती विद्या भोगिनी नन्दनो धरा ।
भोगवती च हृदयं ज्ञानं जालन्धरो लवः ॥"
इति नानातन्त्रोक्तनामानि ॥
गं, क्ली, (गीयते इति । गै गाने + भावे बाहु-
लकात् डः ।) गीतम् । इत्येकाक्षरकोषः ॥
गः, पुं, (गच्छति सर्व्वं जानाति इच्छामात्रेण
अभिलषितं सर्व्वं प्राप्नोति वा सर्व्वज्ञत्वात् प्राप्त-
सर्व्वैश्वर्य्यत्वाच्च । गम् + डः ।) गणेशः । (गायति
इति । गै + डः ।) गन्धर्व्वः । इत्येकाक्षरकोषः ॥
(गुरुसंज्ञकवर्णः स तु छन्दसो गणविशेषः । यथा,
छन्दोमञ्जर्य्यां १ मे स्तवके ।
"म्यरसतजभ्नगैर्लान्तैरभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥"
"गुरुरेको गकारस्तु लकारो लघुरेककः ॥"
वाच्यलिङ्गे तु उपसर्गरहितः कर्म्मोपपदश्च
स्यात् । तत्र "गापोष्टक् ।" ३ । २ । ८ । इति
टक् । यथा, साम गायतीति सामगः । तथा च
मनुः । २ । ६२ ।
"हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः ।
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभि-
रन्ततः ॥")

गगनं, क्ली, (गं गानं शब्दात्मकं गुणं गच्छति
यद्वा गकारं भूतेषु प्रथमभूतत्वात् प्राधान्यं
गच्छति । यद्वा गच्छन्त्यस्मिन् देवादय इति ।
"गमेर्गश्च ।" उणां । २ । ७७ । इति युच्
गश्चान्तादेशः ।) आकाशम् । इत्यमरः ।१।२।१॥
(यथा मेघदूते । ४८ ।
"प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥")
तत्पर्य्यायः । अमरोक्तपर्य्यायाः आकाशशब्दे
द्रष्टव्याः ॥ (तेभ्यः परम् ।) बर्हिः १९ धन्व २०
आपः २१ पृथिवी २२ भूः २३ स्वयम्भूः २४
अध्वा २५ सगरः २६ समुद्रः २७ अध्वरः २८ ।
इति वेदनिघण्टौ १ अध्यायः ॥ * ॥
"आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममुच्यते ।
अधिभूतं तथा शब्दो दिशस्तत्राधिदैवतम् ॥"
इत्याश्वमेधिकपर्व्व ॥
तस्य गुणाः । शब्दः १ व्यापित्वम् २ छिद्रता ३
अनाश्रयम् ४ अनालम्बम् ५ आश्रयान्तर-
शून्यम् । अव्यक्तम् ६ रूपस्पर्शशून्यत्वात् । अवि-
कारिता ७ द्रव्यान्तरानारम्भकत्वम् । अप्रती-
घातिता ८ भूतत्वम् ९ श्रोत्रेन्द्रियोपादानत्वात् ।
विकृतानि १० देहान्तर्गतच्छिद्राणि । तद्यथा —
"आकाशस्य गुणः शब्दो व्यापित्वं छिद्रमेव च ।
अनाश्रयमनालम्बमव्यक्तमविकारिता ॥
अप्रतीघातिता चैव भूतत्वं विकृतानि च ।
गुणाः पञ्चाशतः प्रोक्ताः पञ्चभूतात्मभूतता ॥"
पञ्चानां भूतानां व्याप्त्या प्राप्तिः स्वकं स्वरूपं
तत्र लक्षिता । इति मोक्षधर्म्मः ॥ (गगनात्
पतिताम्बुगुणविशेषो यथा,—
"गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने ।
बल्यं रसायनं मेध्यं पात्रापेक्षि ततः परम् ॥
रक्षोघ्नं शीतलं ह्लादि ज्वरदाहविषापहम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)
गगनध्वजः, पुं, (गगने गगनस्य वा ध्वज इव ।)
मेघः । इति हारावली ॥ सूर्य्यः । इति हेम-
चन्द्रः ॥
गगनाध्वगः, पुं, (गगनरूपाध्वना आकाशपथेन
गच्छतीति यद्वा गगनाध्वानं व्याप्य गच्छति ।
अनन्तगगनरूपमहान्तं व्याप्य सर्व्वतः स्थित
इत्येव प्रकृततात्पर्य्यार्थः । गम + डः ।) सूर्य्यः ।
इति हेमचन्द्रः ॥
गगनेचरः, पुं, (गगने चरतीति । "चरेष्टः ।" ३ ।
२ । १६ । इति टः । अलुक् समासः ।) ग्रहः ।
नक्षत्रम् । इति सिद्धान्तशिरोमणिः ॥ (गगन-
चारिणि त्रि । यथा, महाभारते । १ । २७ । १५ ।
"तस्मिंस्तु कथिते मात्रा कारणे गगनेचरः ॥")
गगनोल्मुकः, पुं, (गगने गगनस्य वा उल्मुक
इव । मङ्गलग्रहस्य रक्तवर्णत्वात् तथात्वम् ।)
मङ्गलग्रहः । इति हारावली ॥
गग्घ, हसने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
अकं-सेट् ।) कण्ठ्यवर्गतृतीयोपधः । गग्घति ।
इति दुर्गादासः ॥

गङ्गका, स्त्री, (गङ्गा + अज्ञातार्थे कः । ततो
ह्रस्वः । "अभाषितपुंस्काच्च ।" ७ । ३ । ४८
इति पक्षे इत्वाभावः ।) गङ्गा । इति मुग्धबोधम् ॥
गङ्गा, स्त्री, (गमयति प्रापयति ज्ञापयति वा
भगवत्पदं या शक्तिः यद्वा गम्यते प्राप्यते
ज्ञाप्यते मोक्षार्थिभिर्या । गम गतौ + "गन्
गम्यद्योः ।" उणां । १ । १२२ । इति गन् तत-
ष्टाप् ।) स्वनामख्यातनदी । तदधिष्ठात्री देवता च ।
तत्पर्य्यायः । विष्णुपदी २ जह्नुतनया ३
सुरनिम्नगा ४ भागीरथी ५ त्रिपथगा ६
त्रिस्रोताः ७ भीष्मसूः ८ । इत्यमरः । १ । १० । ३१ ॥
अर्घतीर्थम् ९ तीर्थराजः १० । इति पद्मपुराणम् ॥
त्रिदशदीर्घिका ११ कुमारसूः १२ सरिद्वरा १३
सिद्धापगा १४ स्वरापगा १५ स्वर्य्यापगा १६
खापगा १७ ऋषिकुल्या १८ हैमवती १९
स्वर्व्वापी २० हरशेखरा २१ । इति हेमचन्द्रः ॥
सुरापगा २२ धर्म्मद्रवी २३ सुधा २४ जह्नु-
कन्या २५ गान्दिनी २६ रुद्रशेखरा २७
नन्दिनी २८ अलकनन्दा २९ सितसिन्धुः ३० ।
इति जटाधरः ॥ अध्वगा ३१ उग्रशेखरा ३२
सिद्धसिन्धुः ३३ इति त्रिकाण्डशेषः ॥ स्वर्ग-
सरिद्वरा ३४ मन्दाकिनी ३५ जाह्नवी ३६
पुण्या ३७ समुद्रसुभगा ३८ स्वर्नदी ३९ सुर-
दीर्घिका ४० सुरनदी ४१ स्वर्धुनी ४२ ज्येष्ठा ४३
जह्नुसुता ४४ भीष्मजननी ४५ शुभ्रा ४६ शैले-
न्द्रजा ४७ भवायना ४८ । इति शब्दरत्ना-
वली ॥ अस्या जलस्य गुणाः । शीतलत्वम् । स्वादु-
त्वम् । स्वच्छत्वम् । अत्यन्तरुच्यत्वम् । पथ्यत्वम् ।
पावनत्वम् । पापहारित्वम् । तृष्णामोहध्वंसन-
त्वम् । दीपनत्वम् । प्रज्ञाधारित्वञ्च । इति राज-
निर्घण्टः ॥ * ॥
("गङ्गा सरस्वती कोनं यमुना सरयूः सची ।
वेणा इरावती नीला उत्तरात् पूर्व्ववाहिनी ॥
हिमवत्-प्रभवा स्रोता हिमसम्भवशीतलाः ।
समाः सर्व्वगुणैर्नद्यो वातश्लेष्महरा नृणाम् ॥
आसां नवशतैर्युक्ता गङ्गा पूर्व्वसमुद्रगा ॥"
इति हारीते प्रथमस्थाने सप्तमेऽध्याये ॥)
अस्या उत्पत्तिस्तु हिमालयात् सुमेरु-
दुहितरि मनोरमायाम् । हिमालयः प्रार्थितः
सन् देवेभ्य इमां दत्तवान् । तां नीत्वा
देवाः स्वर्गं गतवन्तः ॥ * ॥ पृथिव्यामस्या अव-
तरणकारणम् । सगरराजस्य सुतान् कपिल-
शापेन भस्मीभूतानुद्धर्त्तुं भगीरथराजः पृथिव्यां
गङ्गानयनाय तपस्तेपे । ततो ब्रह्मा तुष्टस्तस्मै
तं वरं दत्त्वा गङ्गाधारणार्थं शिवाराधनं कर्त्तुं
मुक्तवान् । स शिवं पर्य्यतोषयत् । शिवोऽपि
हिमालयपर्व्वतं गत्वा जटा विकीर्य्य पतेति
गङ्गामब्रवीत् । सा तज्जटासु पतित्वा संवत्सर-
पर्य्यन्तं बभ्राम । ततः शिवो भगीरथप्रार्थनया
जटामेकामुत्क्षिप्य तामुत्ससर्ज्ज । साऽतिवेगेन
पृथिवीतलमागत्य भगीरथस्य पश्चात् पश्चा-
दाजगाम । स सगरपुत्त्रकृतखातेन तां रसातल-

मानीय तज्जलेन सगरसुतान् तांस्तर्पयामास । ते पूताः स्वर्गं गतवन्तः । इति वाल्मीकिरामायणमतम् ॥ * ॥ प्रकारान्तरम् । वामनदेवस्य बलेः सकाशात्त्रिलोकहरणकाले ब्रह्माण्डोपरिगतवामपादाङ्गुष्ठनखभिन्नविवरेण ब्रह्माण्डोर्द्ध्वस्थिता या जलधारा तच्चरणस्पर्शेन समधिकपूता सती ध्रुवलोके पपात । ततो देवमार्गेण सुमेरुपर्व्वतोपरि ब्रह्मसदने पतित्वा सीतालकनन्दा चक्षुर्भद्रेति चतुर्द्धा भूत्वा चतुर्द्दिशमाश्रित्य लवणसमुद्रं प्रविष्टा । तत्र सीता ब्रह्मसदनात् केशराचलश्रृङ्गेभ्योऽधोऽधः स्रवन्ती गन्धमादनमूर्द्धसु पतित्वा भद्राश्ववर्षमध्येन प्राच्यां दिशि एव चक्षुर्माल्यवच्छिखरान्निपत्य केतुमालवर्षमध्येन प्रतीच्यामपरं भद्रा गिरिश्रृङ्गाण्यतिक्रम्य श्रृङ्गवतः शिखरान्निपत्य उत्तरकुरुवर्षमध्येनोदीच्यामतोऽलकनन्दा बहुपर्व्वतश्रृङ्गाण्यतिक्रम्य हिमकूटान्निपत्य भारतवर्षमध्येन दक्षिणस्यां दिश्येवक्रमेण लवणसमुद्र सर्व्वाः प्रविष्टाः । इति भागवतमतम् ॥ * ॥ अस्याः पृथिव्यामवतरणकालस्तु आदित्यपुराणे ।

“वैशाखशुक्लपक्षे तु तृतीयायां युधिष्ठिर ।।
यवानुत्पादयामास युगञ्चारब्धवान् कृतम् ॥
ब्रह्मलोकात् त्रिपथगां पृथिव्यामवतारयत् ।
तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्च्चयेत् ॥”* ॥

अस्या हिमालयान्निर्गताया दशहरा संज्ञा । तथा च स्मृतिः ।

“ज्यैष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां
हस्ते शैलान्निरगमदियं जाह्नवी मर्त्यलोकम् ।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्य्याः
पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य ॥”* ॥

अथ गङ्गाध्यानम् । भविष्ये ।

“चतुर्भुजां त्रिनेत्राञ्च सर्व्वावयवभूषिताम् ।
रत्नकुम्भां सिताम्भोजां वरदामभयप्रदाम् ॥
श्वेतवस्त्रपरीधानां मुक्तामणिविभूषिताम् ।
ततो ध्यायेत् सुरूपाञ्च चन्द्रायुतसमप्रभाम् ॥
चामरैर्वीज्यमानाञ्च श्वेतच्छत्रोपशोभिताम् ।
सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम् ॥
सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम् ।
त्रैलोक्यनमितां गङ्गां देवादिभिरभिष्टुताम् ॥
दिव्यरूपविभूषाञ्च दिव्यमाल्यानुलेपनाम् ॥”

अपि च ।

“सितमकरनिषण्णां शुक्लवर्णां त्रिनेत्रां
करधृतकमलोद्यत्सूत्पलाऽभीत्यभीष्टाम् ।
विधिहरहरिरूपां सेन्दुकोटीरचूड़ां
कलितसितदुकूलां जाह्नवीं तां नमामि ॥” * ॥

अथ गङ्गामाहात्म्यश्रवणपठनफलम् । यथा,—भविष्ये ।

“माहात्म्यं ये च गङ्गायाः शृण्वन्ति च पठन्ति च ।
तेऽप्यशेषैर्महापापैर्मुच्यन्ते नात्र संशयः ॥”

अस्याः स्मरणफलम् । [वदन् ।

“गच्छंस्तिष्ठन् स्वपन् ध्यायन् जाग्रद्भुञ्जन् श्वसन् यः स्मरेत् सततं गङ्गां स च मुच्येत बन्धनात् ॥
भवनानि विचित्राणि विचित्राभरणाः स्त्रियः ।
आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलम् ॥”

अस्या दर्शनादिफलम् । ब्रह्माण्डाग्नेययोः ।

“दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता ॥”

तथा, भविष्ये ।

“यत् फलं जायते पुंसां दर्शनात् परमात्मनः ।
तद्भवेदेव गङ्गाया दर्शने भक्तिभावतः ॥”

अस्यां स्नानफलम् । ब्रह्माण्डपुराणे ।

“यैः पुण्यवाहिनी गङ्गा सकृद्भक्त्याऽवगाहिता ।
तेषां कुलानां लक्षन्तु भवात्तारयते शिवा ॥
अनेकजन्मसम्भूतं पापं पुंसां प्रणश्यति ।
स्नानमात्रेण गङ्गायां सद्यः पुण्यस्य भाजनम् ॥”

दानधर्म्मे । [ऽन्यजा ।

“अन्धाः क्लीवा जड़ा पङ्गाः पतिता रोगिणो-
गङ्गां संसेव्य पुरुषा देवैर्गच्छन्ति तुल्यताम् ॥
स्नानन्तु भक्त्या गङ्गायां कर्त्तुंकामस्य गच्छतः ।
पदे पदेऽश्वमेधस्य फलं मर्त्त्यस्य जायते ॥”

तथा, ब्रह्माण्डे ।

“ये गच्छन्ति स्वतो गङ्गां परांश्च प्रेरयन्ति ये ।
इह ते सर्व्वभोगानामन्ते ज्ञानस्य भाजनम् ॥”

अस्याः पूजायाः फलम् । आग्नेये ।

“गङ्गायां पूजितायान्तु पूजिताः सर्व्वदेवताः ।
तस्मात् सर्व्वप्रयत्नेन पूजयेदमरापगाम् ॥” * ॥

तस्यां यज्ञादिकरणफलम् । स्कान्दे ।

“यज्ञो दानं तपो जप्यं श्राद्धञ्च सुरपूजनम् ।
गङ्गायां यत् कृतं सर्व्वं कोटिकोटिगुणं भवेत् ॥”

तथा भविष्ये ।

“सुलभं सकलं पुण्यं यज्ञदानादिजं फलम् ।
गङ्गातोयैस्तु सतिलैर्दुर्लभं पितृतर्पणम् ॥
गयाश्राद्धं कृतं तेन उत्सृष्टस्तु वृषस्तथा ।
येन तद्वीचिसंसिक्ते तीरे श्राद्धमकारि च ॥”* ॥

तज्जलपानफलम् । भविष्ये ।

“गण्डूषमात्रपानेन अश्वमेधफलं लभेत् ।
स्वच्छन्दं यः पिबेदापस्तस्य मुक्तिः करे स्थिता ॥
त्रिभिः सारस्वतं तोयं सप्तभिस्तथ यामुनम् ।
नार्म्मदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति ॥
नाभ्यन्तर्गततोयानां मृतानां क्वापि देहिनाम् ।
तत्तत्तीर्थफलप्राप्तिर्नात्र कार्य्या विचारणा ॥”

यमोक्तौ ।

“चैत्रस्थसदृशं वापि शीतमुष्णमथापि वा ।
गाङ्गेयं हरते पापमाजन्ममरणान्तिकम् ॥”* ॥

अस्यां मरणफलम् । कूर्म्मपुराणे ।

“गङ्गायां ज्ञानतो मृत्वा मुक्तिमाप्नोति मानवः ।
अज्ञानाद्ब्रह्मलोकञ्च याति नास्त्यत्र संशयः ॥
गङ्गायाञ्च जले मोक्षो वाराणस्यां जले स्थले ।
अन्तरीक्षे च गङ्गायां गङ्गासागरसङ्गमे ॥”

तथा च, स्मृतौ ।

“शुक्लपक्षे दिवा भूमौ गङ्गायामुत्तरायणे ।
धन्या देहं विमुञ्चन्ति हृदयस्थे जनार्द्दने ॥”* ॥

तत्रास्थिनिक्षेपफलम् ।

“दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति ।
गङ्गायां मरणे यादृक् स तादृक् फलमाप्नुयात् ॥”* ॥

तत्र त्रयोदशक्रियावर्ज्जनं यथा, ब्रह्माण्डे ।

“गङ्गां पुण्यजलां प्राप्य त्रयोदश विवर्ज्जयेत् ।
शौचमाचमनं सेकं निर्माल्यं मलघर्षणम् ॥
गात्रसम्वाहनं क्रीड़ां प्रतिग्रहमथो रतिम् ।
अन्यतीर्थरतिञ्चैव अन्यतीर्थप्रशंसनम् ॥
वस्त्रत्यागमथाघातं सन्तारञ्च विशेषतः ॥”* ॥

अथ नारायणक्षेत्रलक्षणम् । ब्रह्मपुराणे ।

“प्रवाहमवधि कृत्वा यावद्धस्तचतुष्टयम् ।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥”

अथ गर्भतीरयोर्लक्षणम् ।

“भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात् तदूर्द्ध्वं तीरमुच्यते ।
सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते ॥” * ॥

तीरे प्रतिग्रहादिनिषेधो यथा,—

“तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रयः ॥”

अथ गङ्गाक्षेत्रफलम् । स्कान्दे ।

“तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते ।
अत्र यद्यत् कृतं कर्म्म गङ्गायां नात्र संशयः ।
अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥”

इति प्रायश्चित्ततत्त्वम् ॥ * ॥

(अस्या माहात्म्यं यथा, महाभारते ।३।८५।६४।

“न गङ्गा सदृशं तीर्थं न देवः केशवात् परः ।
ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः ॥”

अस्याश्च माहात्म्यवर्णने सहस्रनामकथनं यथा काशीखण्डे २६ अध्याये ।

अगस्त्य उवाच ।

“विना स्नानेन गङ्गायां नृणां जन्म निरर्थकम् ।
उपायान्तरमस्त्यन्यद् येन स्नानफलं लभेत् ॥
अशक्तानां च पङ्गूनामालस्योपहतात्मनाम् ।
दूरदेशान्तरस्थानां गङ्गास्नानं कथं भवेत् ॥
दानं वाथ व्रतं वाथ मन्त्रः स्तोत्रं जपोऽथवा ।
तीर्थान्तराभिषेको वा देवतोपासनन्तु वा ॥
यद्यस्ति किञ्चित् षड्वक्त्र ! गङ्गास्नानफलप्रदम् ।
विधानान्तरमात्रेण तद्वद प्रणताय मे ॥
त्वत्तो न वेद स्कन्दान्यो गङ्गागर्भसमुद्भव ! ।
परं स्वर्गतरङ्गिण्या महिमानं महामते ! ॥

स्कन्द उवाच ।

सन्ति पुण्यजलानीह सरांसि सरितो मुने ! ।
स्थाने स्थाने च तीर्थानि जितात्माध्युषितानि च ॥
दृष्टप्रत्ययकारीणि महामहिमभाञ्ज्यपि ।
परं स्वर्गतरङ्गिण्याः कोट्यंशोऽपि न तत्र वै ॥
अनेनैवानुमानेन बुध्यस्व कलशोद्भव ! ।
दध्रे गङ्गोत्तमाङ्गेन देवदेवेन शम्भुना ॥
स्नानकालेऽन्यतीर्थेषु जप्यते जाह्नवी जनैः ।
विना विष्णुपदीं क्वान्यत् समर्थमघमोचने ॥
गङ्गास्नानफलं ब्रह्मन् ! गङ्गायामेव लभ्यते ।
यथा द्राक्षाफलस्वादो द्राक्षायामेव नान्यतः ॥ १० ॥
अस्त्युपाय इह त्वेकः स्याद्येनाविकलं फलम् ।
स्नानस्य देवसरितो महागुह्यतमो मुने ! ॥
शिवभक्ताय शान्ताय विष्णुभक्तिपराय च ।
श्रद्धालवे त्वास्तिकाय गर्भवासमुमुक्षवे ॥

कथनीयं न चान्यस्य कस्यचित् केनचित् क्वचित्।
इदं रहस्यं परमं महापातकनाशनम् ॥
महाश्रेयस्करं पुण्यं मनोरथकरं परम्।
द्युनदीप्रीतिजनकं शिवसन्तोषसन्तति ॥
नाम्नां सहस्रं गङ्गायाः स्तवराजेषु शोभनम्।
जप्यानां परमं जप्यं वेदोपनिषदां समम् ॥
जपनीयं प्रयत्नेन मौनिना वाचकं विना।
शुचिस्थानेषु शुचिना सुस्पष्टाक्षरमेव च ॥
स्कन्द उवाच। ओँ नमो गङ्गादेव्यै ॥
ओँकाररूपिण्यजराऽतुलाऽनन्ताऽमृतस्रवा।
अत्युदाराऽभयाऽशोकाऽलकनन्दाऽमृताऽमला ॥
अनाथवत्सलाऽमोघाऽपां योनिरमृतप्रदा।
अव्यक्तलक्षणाऽक्षोभ्याऽनवच्छिन्नाऽपराजिता ॥
अनाथनाथाऽभीष्टार्थसिद्धिदाऽनङ्गवर्द्धिनी।
अणिमादिगुणाधाराऽग्रगण्याऽलीकहारिणी ॥
अचिन्त्यशक्तिरनघाऽद्भुतरूपाऽघहारिणी।
अद्रिराजसुताऽष्टाङ्गयोगसिद्धिप्रदाऽच्युता ॥२०॥
अक्षुण्णशक्तिरसुदाऽनन्ततीर्थाऽमृतोदका।
अनन्तमहिमाऽपाराऽनन्तसौख्यप्रदाऽन्नदा ॥
अशेषदेवतामूर्त्तिरघोराऽमृतरूपिणी।
अविद्याजालशमनी ह्यप्रतर्क्यगतिप्रदा ॥
अशेषविघ्नसंहर्त्री त्वशेषगुणगुम्फिता।
अज्ञानतिमिरज्योतिरनुग्रहपरायणा ॥
अभिरामाऽनवद्याङ्ग्यनन्तसाराऽकलङ्किनी।
आरोग्यदाऽऽनन्दवल्ली त्वापन्नार्त्तिविनाशिनी ॥
आश्चर्यमूर्त्तिरायुष्या ह्याढ्याऽऽद्याऽऽप्राऽऽर्य्यसेविता।
आप्यायिन्याप्तविद्याख्या त्वानन्दाश्वासदायिनी ॥
आलस्यघ्नाऽऽपदां हन्त्री ह्यानन्दामृतवर्षिणी।
इरावतीष्टदात्रीष्टा त्विष्टापूर्त्तफलप्रदा ॥
इतिहासश्रुतीड्यार्था त्विहामुत्र शुभप्रदा।
इज्याशीलसमिज्येष्ठा त्विन्द्रादिपरिवन्दिता ॥
इलालङ्कारमालेद्धा त्विन्दिरा रम्यमन्दिरा।
इदिन्दिरादिसंसेव्या त्वीश्वरीश्वरवल्लभा ॥
ईतिभीतिहरेड्या च त्वीडनीयचरित्रभृत्।
उत्कृष्टशक्तिरुत्कृष्टोडुपमण्डलचारिणी ॥
उदिताम्बरमार्गोस्रोरगलोकविहारिणी।
उक्षोर्वरोत्पलोत्कुम्भा उपेन्द्रचरणद्रवा ॥३०॥
उदन्वत्पूर्त्तिहेतुश्चोदारोत्साहप्रवर्द्धिनी।
उद्वेगघ्न्युष्णशमनी उष्णरश्मिसुताप्रिया ॥
उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी।
ऊर्ज्जं वहन्त्यूर्ज्जधरोर्ज्जावती चोर्म्मिमालिनी ॥
ऊर्द्ध्वरेतःप्रियोर्द्ध्वाध्वा ह्यूर्म्मिलोर्द्ध्वगतिप्रदा।
ऋषिवृन्दस्तुतर्द्धिश्च ऋणत्रयविनाशिनी ॥
ऋतम्भरर्द्धिदात्री च ऋक्स्वरूपा ऋजुप्रिया।
ऋक्षमार्गवहर्क्षार्चिर्ऋजुमार्गप्रदर्शिनी ॥
एधिताखिलधर्म्मार्था त्वेकैकाऽमृतदायिनी।
एधनीयस्वभावैज्या त्वेजिताशेषपातका ॥
ऐश्वर्यदैश्वर्यरूपा ह्यैतिह्यं ह्यैन्दवीद्युतिः।
ओजस्विन्योषधीक्षेत्रमोजोदौदनदायिनी ॥
ओष्ठामृतौन्नत्यदात्री त्वौषधं भवरोगिणाम्।
औदार्यचञ्चुरौपेन्द्री त्वौग्री ह्यौमेयरूपिणी ॥
अम्बराध्ववहाऽम्बष्ठाऽम्बरमालाम्बुजेक्षणा।
अम्बिकाऽम्बुमहायोनिरन्धोदाऽन्धकहारिणी ॥
अंशुमाला ह्यंशुमती त्वङ्गीकृतषडानना।
अन्धतामिस्रहन्त्र्यन्धुरञ्जना ह्यञ्जनावती ॥
कल्याणकारिणी काम्या कमलोत्पलगन्धिनी।
कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी ॥
काञ्चनाक्षी कामधेनुः कीर्त्तिकृत् क्लेशनाशिनी।
क्रतुश्रेष्ठा क्रतुफला कर्म्मबन्धविभेदिनी ॥४१॥
कमलाक्षी क्लमहरा कृशानुतपनद्युतिः।
करुणार्द्रा च कल्याणी कलिकल्मषनाशिनी ॥
कामरूपा क्रियाशक्तिः कमलोत्पलमालिनी।
कूटस्था करुणा कान्ता कूर्म्मयाना कलावती ॥
कमला कल्पलतिका काली कलुषवैरिणी।
कमनीयजला कम्रा कपर्द्दिसुकपर्द्दगा ॥
कालकूटप्रशमनी कदम्बकुसुमप्रिया।
कालिन्दी केलिललिता कलकल्लोलमालिका ॥
क्रान्तलोकत्रया कण्डूः कण्डूतनयवत्सला।
खड्गिनी खड्गधाराभा खगा खण्डेन्दुधारिणी ॥
खे खेलगामिनी खस्था खण्डेन्दुतिलकप्रिया।
खेचरी खेचरीवन्द्या ख्यातिः ख्यातिप्रदायिनी ॥
खण्डितप्रणताघौघा खलबुद्धिविनाशिनी।
खातैनःकन्दसन्दोहा खड्गखट्वाङ्गखेटिनी ॥
खरसन्तापशमनी खनिः पीयूषपाथसाम्।
गङ्गा गन्धवती गौरी गन्धर्वनगरप्रिया ॥
गम्भीराङ्गी गुणमयी गतातङ्का गतिप्रिया।
गणनाथाम्बिका गीता गद्यपद्यपरिष्टुता ॥५०॥
गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा।
गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी ॥
गोत्रप्रवर्द्धिनी गुण्या गुणातीता गुणाग्रणीः।
गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा ॥
गुणनीयचरित्रा च गायत्री गिरिशप्रिया।
गूढरूपा गुणवती गुर्वी गौरववर्द्धिनी ॥
ग्रहपीडाहरा गुन्द्रा गरघ्नी गानवत्सला।
घर्म्महन्त्री घृतवती घृततुष्टिप्रदायिनी ॥
घण्टारवप्रिया घोराऽघौघविध्वंसकारिणी।
घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥
घातुका घूर्णितजला घृष्टपातकसन्ततिः।
घटकोटिप्रपीताम्भा घटिताशेषमङ्गला ॥
घृणावती घृणिनिधिर्घस्मरा घूकनादिनी।
घुसृणापिञ्जरतनुर्घर्घरा घर्घरस्वना ॥
चन्द्रिका चन्द्रकान्ताम्बुश्चञ्चदापा चलद्युतिः।
चिन्मयी चितिरूपा च चन्द्रायुतशतानना ॥
चाम्पेयलोचना चारुश्चार्वङ्गी चारुगामिनी।
चार्या चारित्रनिलया चित्रकृच्चित्ररूपिणी ॥
चम्पूश्चन्दनशुच्यम्बुश्चर्चनीया चिरस्थिरा।
चारुचम्पकमालाढ्या चमिताऽशेषदुष्कृता ॥६०॥
चिदाकाशवहाऽचिन्त्या चञ्चच्चामरवीजिता।
चोरिताशेषवृजिना चरिताऽशेषमण्डला ॥
छेदिताऽखिलपापौघा छद्मघ्नी छलहारिणी।
छन्नत्रिविष्टपतला छोटिताऽशेषबन्धना ॥
छुरिताऽमृतधारौघा छिन्नैनाश्छन्दगामिनी।
छत्रीकृतमरालौघा छटीकृतनिजामृता ॥
जाह्नवी ज्या जगन्माता जप्या जङ्घालवीचिका।
जया जनार्द्दनप्रीता जुषणीया जगद्धिता ॥
जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी।
जीवजीवातुलतिका जन्मिजन्मनिबर्हिणी ॥
जाड्यविध्वंसनकरी जगद्योनिर्जलाविला।
जगदानन्दजननी जलजा जलजेक्षणा ॥
जनलोचनपीयूषा जटातटविहारिणी।
जयन्ती जन्तुपापघ्नी जनितज्ञानविग्रहा ॥
झल्लरीवाद्यकुशला झलज्झालजलावृता।
झिण्टीशवन्द्या झाङ्कारकारिणी झर्झरावती ॥
टीकिताऽशेषपाताला टङ्किकैनोऽद्रिपाटने।
टङ्कारनृत्यत्कल्लोला टीकनीयमहातटा ॥
डम्बरप्रवहा डीनराजहंसकुलाकुला।
डमड्डमरुहस्ता च डामरोक्तमहाण्डका ॥७०॥
ढौकिताऽशेषनिर्वाणा ढक्कानादचलज्जला।
ढुण्ढिविघ्नेशजननी ढणड्ढुणितपातका ॥
तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी।
त्रिलोकगोप्त्री तोयेशी त्रैलोक्यपरिवन्दिता ॥
तापत्रितयसंहर्त्री तेजोबलविवर्द्धिनी।
त्रिलक्ष्या तारणी तारा तारापतिकरार्चिता ॥
त्रैलोक्यपावनी पुण्या तुष्टिदा तुष्टिरूपिणी।
तृष्णाच्छेत्री तीर्थमाता त्रिविक्रमपदोद्भवा ॥
तपोमयी तपोरूपा तपःस्तोमफलप्रदा।
त्रैलोक्यव्यापिनी तृप्तिस्तृप्तिकृत्तत्त्वरूपिणी ॥
त्रैलोक्यसुन्दरी तुर्या तुर्यातीतपदप्रदा।
त्रैलोक्यलक्ष्मीस्त्रिपदी तथ्या तिमिरचन्द्रिका ॥
तेजोगर्भा तपःसारा त्रिपुरारिशिरोगृहा।
त्रयीस्वरूपिणी तन्वी तपनाङ्गजभीतिनुत् ॥
तरिस्तरणिजामित्रं तर्पिताऽशेषपूर्व्वजा।
तुलाविरहिता तीव्रपापतूलतनूनपात् ॥
दारिद्र्यदमनी दक्षा दुष्प्रेक्षा दिव्यमण्डना।
दीक्षावती दुरावाप्या द्राक्षामधुरवारिभृत् ॥
दर्शिताऽनेककुतुका दुष्टदुर्ज्जयदुःखहृत्।
दैन्यहृद्दुरितघ्नी च दानवारिपदाब्जजा ॥८०॥
दन्दशूकविषघ्नी च दारिताऽघौघसन्ततिः।
द्रुता देवद्रुमच्छन्ना दुर्व्वाराघविघातिनी ॥
दमग्राह्या देवमाता देवलोकप्रदर्शिनी।
देवदेवप्रिया देवी दिक्पालपददायिनी ॥
दीर्घायुःकारिणी दीर्घा दोग्ध्री दूषणवर्ज्जिता।
दुग्धाम्बुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा ॥
द्युनदी दीनशरणं देहिदेहनिवारिणी।
द्राघीयसी दाघहन्त्री दितपातकसन्ततिः ॥
दूरदेशान्तरचरी दुर्गमा देववल्लभा।
दुर्वृत्तघ्नी दुर्विगाह्या दयाधारा दयावती ॥
दुरासदा दानशीला द्राविणी द्रुहिणस्तुता।
दैत्यदानवसंशुद्धिकर्त्री दुर्बुद्धिहारिणी ॥
दानसारा दयासारा द्यावाभूमिविगाहिनी।
दृष्टादृष्टफलप्राप्तिर्देवतावृन्दवन्दिता ॥
दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा।
दण्डयित्री दण्डनीतिर्दुष्टदण्डधरार्चिता ॥
दुरोदरघ्नी दावार्चिर्द्रवद्द्रव्यैकशेवधिः।
दीनसन्तापशमनी दात्री दवथुवैरिणी ॥
दरीविदारणपरा दान्ता दान्तजनप्रिया।

दारितादितटा दुर्गा दुर्गारण्यप्रचारिणी ॥९०॥
धर्म्मद्रवा धर्म्मधुरा धेनुर्धीरा धृतिर्ध्रुवा ।
धेनुदानफलस्पर्शा धर्म्मकामार्थमोक्षदा ॥
धर्म्मोर्म्मिवाहिनीधुर्य्या धात्री धात्रीविभूषणम् ।
धर्म्मिणी धर्म्मशीला च धन्विकोटिकृतावना ॥
ध्यातृपापहरा ध्येया धावनी धूतकल्मषा ।
धर्म्मधारा धर्म्मसारा धनदा धनवर्द्धिनी ॥
धर्म्माधर्म्मगुणच्छेत्री धत्तूरकुसुमप्रिया ।
धर्म्मेशी धर्म्मशास्त्रज्ञा धनधान्यसमृद्धिकृत् ॥
धर्म्मलभ्या धर्म्मजला धर्म्मप्रसवधर्म्मिणी ।
ध्यानगम्यस्वरूपा च धरणी धातृपूजिता ॥
धूर्द्धूर्जटिजटासंस्था धन्या धीर्धारणावती ।
नन्दा निर्व्वाणजननी नन्दिनी नुन्नपातका ॥
निषिद्धविघ्ननिचया निजानन्दप्रकाशिनी ।
नभोऽङ्गणचरी नूतिर्नम्या नारायणी नुता ॥
निर्म्मला निर्म्मलाख्याना नाशिनी तापसम्पदाम् ।
नियता नित्यसुखदा नानाश्चर्य्यमहानिधिः ॥
नदीनदसरोमाता नायिका नाकदीर्घिका ।
नष्टोद्धरणधीरा च नन्दना नन्ददायिनी ॥
निर्णिक्ताशेषभुवना निःसङ्गा निरुपद्रवा ।
निरालम्बा निष्प्रपञ्चा निर्णाशितमहामला ॥१००॥
निर्म्मलज्ञानजननी निःशेषप्राणितापहृत् ।
नित्योत्सवा नित्यतृप्ता नमस्कार्य्या निरञ्जना ॥
निष्ठावती निरातङ्का निर्लेपा निश्चलात्मिका ।
निरवद्या निरीहा च नीललोहितमूर्द्धगा ॥
नन्दिभृङ्गिगणस्तुत्या नागानन्दा नगात्मजा ।
निष्प्रत्यूहा नाकनदी निरयार्णवदीर्घनौः ॥
पुण्यप्रदा पुण्यगर्भा पुण्या पुण्यतरङ्गिणी ।
पृथुः पृथुफला पूर्णा प्रणतार्त्तिप्रभञ्जिनी ॥
प्राणदा प्राणिजननी प्राणेशी प्राणरूपिणी ।
पद्मालया पराशक्तिः पुरजित्परमप्रिया ॥
परापरफलप्राप्तिः पावनी च पयस्विनी ।
परानन्दा प्रकृष्टार्था प्रतिष्ठा पालिनी परा ॥
पुराणपठिता प्रीता प्रणवाक्षररूपिणी ।
पार्व्वती प्रेमसम्पन्ना पशुपाशविमोचनी ॥
परमात्मस्वरूपा च परब्रह्मप्रकाशिनी ।
परमानन्दनिष्यन्दा प्रायश्चित्तस्वरूपिणी ॥
पानीयरूपनिर्व्वाणा परित्राणपरायणा ।
पापेन्धनदवज्वाला पापारिः पापनामनुत् ॥
परमैश्वर्य्यजननी प्रज्ञा प्राज्ञा परापरा ।
प्रत्यक्षलक्ष्मीः पद्माक्षी परव्योमामृतस्रवा ॥११०॥
प्रसन्नरूपा प्रणिधिः पूता प्रत्यक्षदेवता ।
पिनाकिपरमप्रीता परमेष्ठिकमण्डलुः ॥
पद्मनाभपदार्घ्येण प्रसूता पद्ममालिनी ।
परर्द्धिदा पुष्टिकरी पथ्या पूर्त्तिः प्रभावती ॥
पुनाना पीतगर्भघ्नी पापपर्व्वतनाशिनी ।
फलिनी फलहस्ता च फुल्लाम्बुजविलोचना ॥
फालितैनोमहाक्षेत्रा फणिलोकविभूषणम् ।
फेनच्छलप्रणुन्नैनाः फुल्लकैरवगन्धिनी ॥
फेनिलाच्छाम्बुधाराभा फडुच्चाटितपातका ।
फाणितस्वादुसलिला फाण्टपथ्यजलाविला ॥
विश्वमाता च विश्वेशी विश्वा विश्वेश्वरप्रिया ।

ब्रह्मण्या ब्रह्मकृद् ब्राह्मी ब्रह्मिष्ठा विमलोदका ॥
विभावरी च विरजा विक्रान्तानेकविष्टपा ।
विश्वमित्रं विष्णुपदी वैष्णवी वैष्णवप्रिया ॥
विरूपाक्षप्रियकरी विभूतिर्व्विश्वतोमुखी ।
विपाशा वैबुधी वेद्या वेदाक्षररसस्रवा ॥
विद्या वेगवती वन्द्या बृंहणी ब्रह्मवादिनी ।
वरदा विप्रकृष्टा च वरिष्ठा च विशोधनी ॥
विद्याधरी विशोका च वयोवृन्दनिषेविता ।
बहूदका बलवती व्योमस्था विबुधप्रिया ॥१२०॥
वाणी वेदवती वित्ता ब्रह्मविद्यातरङ्गिणी ।
ब्रह्माण्डकोटिव्याप्ताम्बुर्ब्रह्महत्यापहारिणी ॥
ब्रह्मेशविष्णुरूपा च बुद्धिर्व्विभववर्द्धिनी ।
विलासिसुखदा वैश्या व्यापिनी च वृषारणिः ॥
वृषाङ्कमौलिनिलया विपन्नार्त्तिप्रभञ्जिनी ।
विनीता विनता ब्रध्नतनया विनयान्विता ॥
विपञ्ची वाद्यकुशला वेणुश्रुतिविचक्षणा ।
वर्च्चस्करी बलकरी बलोन्मूलितकल्मषा ॥
विपाप्मा विगतातङ्का विकल्पपरिवर्ज्जिता ।
वृष्टिकर्त्री वृष्टिजला विधिर्व्विच्छिन्नबन्धना ॥
व्रतरूपा वित्तरूपा बहुविघ्नविनाशकृत् ।
वसुधारा वसुमती विचित्राङ्गी विभावसुः ॥
विजया विश्वबीजं च वामदेवी वरप्रदा ।
वृषाश्रिता विषघ्नी च विज्ञानोर्म्म्यंशुमालिनी ॥
भव्या भोगवती भद्रा भवानी भूतभाविनी ।
भूतधात्री भयहरा भक्तदारिद्र्यघातिनी ॥
भुक्तिमुक्तिप्रदा भेशी भक्तस्वर्गापवर्गदा ।
भागीरथी भानुमती भाग्यं भोगवती भृतिः ॥
भवप्रिया भवद्वेष्ट्री भूतिदा भूतिभूषणा ।
भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥१३०॥
भ्रान्तिज्ञानप्रशमनी भिन्नब्रह्माण्डमण्डपा ।
भूरिदा भक्तिसुलभा भाग्यवद्दृष्टिगोचरी ॥
भञ्जितोपप्लवकुला भक्ष्यभोज्यसुखप्रदा ।
भिक्षणीया भिक्षुमाता भावाभावस्वरूपिणी ॥
मन्दाकिनी महानन्दा माता मुक्तितरङ्गिणी ।
महोदया मधुमती महापुण्या मुदाकरी ॥
मुनिस्तुता मोहहन्त्री महातीर्था मधुस्रवा ।
माधवी मानिनी मान्या मनोरथपथातिगा ॥
मोक्षदा मतिदा मुख्या महाभाग्यजनाश्रिता ।
महावेगवती मेध्या महामहिमभूषणा ॥
महाप्रभावा महती मीनचञ्चललोचना ।
महाकारुण्यसम्पूर्णा महर्द्धिश्च महोत्पला ॥
मूर्त्तिमन्मुक्तिरमणी मणिमाणिक्यभूषणा ।
मुक्ताकलापनेपथ्या मनोनयननन्दिनी ॥
महापातकराशिघ्नी महादेवार्द्धहारिणी ।
महोर्म्मिमालिनी मुक्ता महादेवी मनोन्मनी ॥
महापुण्योदयप्राप्या मायातिमिरचन्द्रिका ।
महाविद्या महामाया महामेधा महौषधम् ॥
मालाधरी महोपाया महोरगविभूषणा ।
महामोहप्रशमनी महामङ्गलमङ्गलम् ॥१४०॥
मार्त्तण्डमण्डलचरी महालक्ष्मीर्मदोज्झिता ।
यशस्विनी यशोदा च योग्या युक्तात्मसेविता ॥
योगसिद्धिप्रदा याज्या यज्ञेशपरिपूरिता ।

यज्ञेशी यज्ञफलदा यजनीया यशस्करी ॥
यमिसेव्या योगयोनिर्योगिनी युक्तबुद्धिदा ।
योगज्ञानप्रदा युक्ता यमाद्यष्टाङ्गयोगयुक् ॥
यन्त्रिताघौघसञ्चारा यमलोकनिवारिणी ।
यातायातप्रशमनी यातनानामकृन्तनी ॥
यामिनीशहिमाच्छोदा युगधर्म्मविवर्ज्जिता ।
रेवती रतिकृद्रम्या रत्नगर्भा रमा रतिः ॥
रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी ।
रत्नप्रासादगर्भा च रमणीयतरङ्गिणी ॥
रत्नार्च्चीः रुद्ररमणी रागद्वेषविनाशिनी ।
रमा रामा रम्यरूपा रोगिजीवानुरूपिणी ॥
रुचिकृद्रोचनी रम्या रुचिरा रोगहारिणी ।
राजहंसा रत्नवती राजत्कल्लोलराजिका ॥
रामणीयकरेखा च रुजारी रोगशोषिणी ।
राका रङ्कार्त्तिशमनी रम्या रोलम्बराविणी ॥
रागिणी रञ्जितशिवा रूपलावण्यशेवधिः ।
लोकप्रसूर्लोकवन्द्या लोलत्कल्लोलमालिनी ॥
लीलावती लोकभूमिर्ल्लोकलोचनचन्द्रिका ।
लेखस्रवन्ती लटभा लघुवेगा लघुत्वहृत् ॥१५१॥
लास्यतरङ्गहस्ता च ललितालयभङ्गिगा ।
लोकबन्धुर्लोकधात्री लोकोत्तरगुणोर्ज्जिता ॥
लोकत्रयहिता लोका लक्ष्मीर्लक्षणलक्षिता ।
लीलालक्षितनिर्व्वाणा लावण्यामृतवर्षिणी ॥
वैश्वानरी वासवेड्या वन्ध्यत्वपरिहारिणी ।
वासुदेवाङ्घ्रिरेणुघ्नी वज्रिवज्रनिवारिणी ॥
शुभावती शुभफला शान्तिः शन्तनुवल्लभा ।
शूलिनी शैशववयाः शीतलामृतवाहिनी ॥
शोभावती शीलवती शोषिताशेषकिल्बिषा ।
शरण्या शिवदा शिष्टा शरजन्मप्रसूः शिवा ॥
शक्तिः शशाङ्कविमला शमनस्वसृसम्मता ।
शमा शमनमार्गघ्नी शितिकण्ठमहाप्रिया ॥
शुचिः शुचिकरी शेषा शेषशायिपदोद्भवा ।
श्रीनिवासश्रुतिः श्रद्धा श्रीमती श्रीः शुभव्रता ॥
शुद्धविद्या शुभावर्त्ता श्रुतानन्दा श्रुतिस्तुतिः ।
शिवेतरघ्नी शबरी शाम्बरीरूपधारिणी ॥
श्मशानशोधनी शान्ता शश्वच्छतधृतिस्तुता ।
शालिनी शालिशोभाढ्या शिखिवाहनगर्भभृत् ॥
शंसनीयचरित्रा च शातिताशेषपातका ।
षड्गुणैश्वर्य्यसम्पन्ना षडङ्गश्रुतिरूपिणी ॥१६१॥
षण्ढताहारिसलिला स्त्यायन्नदनदीशता ।
सरिद्वरा च सुरसा सुप्रभा सुरदीर्घिका ॥
स्वःसिन्धुः सर्व्वदुःखघ्नी सर्व्वव्याधिमहौषधम् ।
सेव्या सिद्धिः सती सूक्तिः स्कन्दसूश्च सरस्वती ॥
सम्पत्तरङ्गिणी स्तुत्या स्थाणुमौलिकृतालया ।
स्थैर्य्यदा सुभगा सौख्या स्त्रीषु सौभाग्यदायिनी ॥
स्वर्गनिःश्रेणिका सूक्ष्मा स्वधा स्वाहा सुधाजला ।
समुद्ररूपिणी स्वर्ग्या सर्व्वपातकवैरिणी ॥
स्मृताघहारिणी सीता संसाराब्धितरण्डिका ।
सौभाग्यसुन्दरी सन्ध्या सर्व्वसारसमन्विता ॥
हरप्रिया हृषीकेशी हंसरूपा हिरण्मयी ।
हृताघसङ्घा हितकृत् हेला हेलाघगर्व्वहृत् ॥
क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी क्षमा ।

इति नामसहस्रं हि गङ्गायाः कलशोद्भव ।।
कीर्त्तयित्वा नरः सम्यग् गङ्गास्नानफलं लभेत् ॥
सर्व्वपापप्रशमनं सर्व्वविघ्नविनाशनम् ।
सर्व्वस्तोत्रजपाच्छ्रेष्ठं सर्व्वपावनपावनम् ॥
श्रद्धयाभीष्टफलदं चतुर्व्वर्गसमृद्धिकृत् ।
सकृज्जपादवाप्नोति ह्येकक्रतुफलं मुने । ॥१७०॥
सर्व्वतीर्थेषु यः स्नातः सर्व्वयज्ञेषु दीक्षितः ।
तस्य यत् फलमुद्दिष्टं त्रिकालपठनाच्च तत् ॥
सर्व्वव्रतेषु यत् पुण्यं सम्यक् तीर्थेषु वाडव ।।
तत् फलं समवाप्नोति त्रिसन्ध्यं नियतः पठन् ॥
स्नानकाले पठेद्यस्तु यत्र कुत्र जलाशये ।
तत्र सन्निहिता नूनं गङ्गा त्रिपथगा मुने ।॥
श्रेयोऽर्थी लभते श्रेयो धनार्थी लभते धनम् ।
कामी कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥
वर्षं त्रिकालपठनात् श्रद्धया शुचिमानसः ।
ऋतुकालाभिगमनादपुत्त्रः पुत्त्रवान् भवेत् ॥
नाकालमरणं तस्य नाग्निचौरादिसाध्वसम् ।
नाम्नां सहस्रं गङ्गाया यो जपेच्छ्रद्धया मुने । ॥
गङ्गानामसहस्रन्तु जप्त्वा ग्रामान्तरं व्रजेत् ।
कार्य्यसिद्धिमवाप्नोति निर्व्विघ्नो गेहमाविशेत् ॥
तिथिवारर्क्षयोगानां न दोषः प्रभवेत् तदा ।
यदा जप्त्वा व्रजेदेतत् स्तोत्रं ग्रामान्तरं नरः ॥
आयुरारोग्यजननं सर्व्वोपद्रवनाशनम् ।
सर्व्वसिद्धिकरं पुंसां गङ्गानामसहस्रकम् ॥१७८॥
जन्मान्तरसहस्रेषु यत् पापं सम्यगर्ज्जितम् ।
गङ्गानामसहस्रस्य जपनात् तत् क्षयं व्रजेत् ॥
ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः ।
तत्संयोगी भ्रूणहन्ता मातृहा पितृहा मुने । ॥
विश्वासघाती गरदः कृतघ्नो मित्रघातकः ।
अग्निदो गोवधकरो गुरुद्रव्यापहारकः ॥
महापातकयुक्तोऽपि संयुक्तोऽप्युपपातकैः ।
मुच्यते श्रद्धया जप्त्वा गङ्गानामसहस्रकम् ॥
आधिव्याधिपरिक्षिप्तो घोरतापपरिप्लुतः ।
मुच्यते सर्व्वदुःखेभ्यः स्तवस्यास्यानुकीर्त्तनात् ॥
संवत्सरेण युक्तात्मा पठन् भक्तिपरायणः ।
अभीप्सितां लभेत् सिद्धिं सर्व्वैः पापैः प्रमुच्यते ॥
संशयाविष्टचित्तस्य धर्म्मविद्वेषिणोऽपि च ।
दाम्भिकस्यापि हिंस्रस्य चेतो धर्म्मपरं भवेत् ॥
वर्णाश्रमपथीनस्तु कामक्रोधविवर्ज्जितः ।
यत् फलं लभते ज्ञानी तदाप्नोत्यस्य कीर्त्तनात् ॥
गायत्र्ययुतजप्येन यत् फलं समुपार्ज्जितम् ।
सकृत् पठनतः सम्यक् तदशेषमवाप्नुयात् ॥१८८॥
गां दत्त्वा वेदविदुषे यत् फलं लभते कृती ।
तत् पुण्यं सम्यगाख्यातं स्तवराजसकृज्जपात् ॥
गुरुशुश्रूषणं कुर्व्वन् यावज्जीवं नरोत्तमः ।
यत् पुण्यमर्ज्जयेत् तद्भाग् वर्षं त्रिषवणं जपन् ॥
वेदपारायणात् पुण्यं यदत्र परिपठ्यते ।
तत् षण्मासेन लभते त्रिसन्ध्यं परिकीर्त्तनात् ॥
गङ्गायाः स्तवराजस्य प्रत्यहं परिशीलनात् ।
शिवभक्तिमवाप्नोति विष्णुभक्तोऽथवा भवेत् ॥
यः कीर्त्तयेदनुदिनं गङ्गानामसहस्रकम् ।
तत्समीपे सहचरी गङ्गादेवी सदा भवेत् ॥
सर्व्वत्र पूज्यो भवति सर्व्वत्र विजयी भवेत् ।
सर्व्वत्र सुखमाप्नोति जाह्नवीस्तोत्रपाठतः ॥
सदाचारी स विज्ञेयः स शुचिस्तु सदैव हि ।
कृतसर्व्वसुरार्च्चः स कीर्त्तयेद् य इमां स्तुतिम् ॥
तस्मिंस्तृप्ते भवेत् तृप्ता जाह्नवी नात्र संशयः ।
तस्मात् सर्व्वप्रयत्नेन गङ्गाभक्तं समर्च्चयेत् ॥
स्तवराजमिमं गाङ्गं शृणुयाद्यश्च वै पठेत् ।
श्रावयेदथ तद्भक्तान् दम्भलोभविवर्ज्जितः ॥
मुच्यते त्रिविधैः पापैर्मनोवाक्कायसम्भवैः ।
क्षणान्निष्पापतामेति पितॄणाञ्च प्रियो भवेत् ॥
सर्व्वदेवप्रियश्चापि सर्व्वर्षिगणसम्मतः ।
अन्ते विमानमारुह्य दिव्यस्त्रीशतसंवृतः ॥
दिव्याभरणसम्पन्नो दिव्यभोगसमन्वितः ।
नन्दनादिवने स्वैरं देववत् स प्रमोदते ॥२००॥
भुज्यमानेषु विप्रेषु श्राद्धकाले विशेषतः ।
जपन्निदं महास्तोत्रं पितॄणां तृप्तिकारकम् ॥
यावन्ति तत्र सिक्थानि यावन्तोऽम्बुकणाः स्थिताः
तावन्त्येव हि वर्षाणि मोदन्ते स्वः पितामहाः ॥
यथा प्रीणन्ति पितरो गङ्गायां पिण्डदानतः ।
तथैव तृप्नुयुः श्राद्धे स्तवस्यास्यानुसंश्रवात् ॥
एतत् स्तोत्रं गृहे यस्य लिखितं परिपूज्यते ।
तत्र पापभयं नास्ति शुचि तद्भवनं सदा ॥
अगस्ते । किं बहूक्तेन शृणु मे निश्चितं वचः ।
संशयो नात्र कर्त्तव्यः सन्देग्धरि फलं न हि ॥
यावन्ति मर्त्त्ये स्तोत्राणि मन्त्रजालान्यनेकशः ।
तावन्ति स्तवराजस्य गाङ्गेयस्य समानि न ॥
यावज्जन्म जपेद्यस्तु नाम्नामेतत् सहस्रकम् ।
स कीकटेष्वपि मृतो न पुनर्गर्भमाविशेत् ॥
नित्यं नियमवानेतद्यो जपेत् स्तोत्रमुत्तमम् ।
अन्यत्रापि विपन्नः स गङ्गातीरे मृतो भवेत् ॥
एतत् स्तोत्रवरं रम्यं पुरा प्रोक्तं पिनाकिना ।
विष्णवे निजभक्ताय मुक्तिबीजाक्षरास्पदम् ॥
गङ्गास्नानप्रतिनिधिः स्तोत्रमेतन्मयेरितम् ।
सिस्नासुर्जाह्नवीं तस्मादेतत् स्तोत्रं जपेत् सुधीः ॥”
इति श्रीस्कन्दपुराणे काशीखण्डे गङ्गासहस्रनामकथनं नामैकोनत्रिंशत्तमोऽध्यायः ॥*॥*॥
इयमेव शिवस्य तोयरूपा परा मूर्त्तिः । यथा काशीखण्डे । २७ । २—७ ।

ईश्वर उवाच ।

“निशामय महाबाहो । विष्णो । त्रैलोक्यसुन्दर ॥
प्राप्तं वाराणसीक्षेत्रमविमुक्तं यथा तथा ॥
निर्द्दग्धान् सागरान् श्रुत्वा कपिलक्रोधवह्निना ।
अश्वमेधाश्वसंयुक्तान् पूर्व्वजान् स्वान् भगीरथः ॥
सूर्य्यवंशे महातेजा राजा परमधार्म्मिकः ।
आरिराधयिषुर्गङ्गां तपसे कृतनिश्चयः ॥
हिमवन्तं नगश्रेष्ठमगमद्यस्तराज्यधूः ।
जगाम यशसां राशिरुद्दिधीर्षुः पितामहान् ॥
ब्रह्मशापाग्निनिर्द्दग्धान् महादुर्गतिगानपि ।
विना त्रिमार्गगां विष्णो ! को जन्तूंस्त्रिदिवं नयेत् ॥
ममैव सा परा मूर्त्तिस्तोयरूपा शिवात्मिका ।
ब्रह्माण्डानामनेकानामाधारः प्रकृतिः परा ॥

शरीरस्था इडा नाडी । यथा, हठयोगदीपिकायाम् । ३ । ११० ।
“इडा भगवती गङ्गा पिङ्गला यमुना नदी ।
इडापिङ्गलयोर्मध्ये बालरण्डा च कुण्डली ॥”)
दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
“क्रियाकारणरूपत्वात् सरणाच्च सरित्कृता ।
सङ्गमाद्गमनाद्गङ्गा लोके देवी विभाव्यते ॥”

गङ्गाका, स्त्री, (गङ्गा एव । स्वार्थे कन् ततः “अभाषितपुंस्काच्च ।” ७।३।४८ । इति पाणिनिमतेन गङ्गका गङ्गिका इत्येव पदद्वयं सिद्धं परं मुग्धबोधमतेन “वाचापोऽयुक्तपुंस्कस्य ।” इति सूत्रेण । गङ्गिका गङ्गाका गङ्गका इति पदत्रयं सिद्धम् । “वाग्रहणमकारस्यापि स्थित्यर्थम् ।” इति मुग्धबोधटीकाकृद् दुर्गादासः ।) गङ्गा । इति मुग्धबोधम् ॥

गङ्गाचिल्ली, स्त्री, (गङ्गास्थिता चिल्ली ।) चिल्लविशेषः । गाङ्चिल इति भाषा । तत्पर्य्यायः । देवट्टी २ विश्वका ३ जलकुक्कुटी ४ । इति हारावली ॥

गङ्गाजः, पुं, (गङ्गायाः गङ्गागर्भात् जायते इति । जन्+डः ।) भीष्मः । इति शब्दरत्नावली ॥ कार्त्तिकेयः । इति भारतम् ॥

गङ्गाटेयः, पुं, (गङ्गाया गङ्गादिनद्यामित्यर्थः अटतीति । अट्+अच् । ततो ढक् । यद्वा गङ्गातटे यातीति । या+कः । पृषोदरात् तकारलोपे साधुः ।) मत्स्यभेदः । चिङ्गिडि इति भाषा । तत्पर्य्यायः । गलानिलः २ । इति त्रिकाण्डशेषः ॥

गङ्गाधरः, पुं, (धरतीति धरः । धृ+अच् । गङ्गाया धरः । स्वशिरोजटाभिरिति शेषः ।) शिवः । इत्यमरः । १ । १ । ३६ ॥ (अस्य गङ्गाधारणविवरणं यथा, रामायणे । १ । ४३ । १-११ ।
“देवदेवे गते तस्मिन् सोऽङ्गुष्ठाग्रनिपीडिताम् ।
कृत्वा वसुमतीं राम । वत्सरं समुपासत ॥
अथ संवत्सरे पूर्णे सर्व्वलोकनमस्कृतः ।
उमापतिः पशुपती राजानमिदमब्रवीत् ॥
प्रीतस्तेऽहं नरश्रेष्ठ । करिष्यामि तव प्रियम् ।
शिरसा धारयिष्यामि शैलराजसुतामहम् ॥
ततो हैमवती ज्येष्ठा सर्व्वलोकनमस्कृता ।
तदा सातिमहद्रूपं कृत्वा वेगञ्च दुःसहम् ॥
आकाशादपतद्राम । शिवे शिवशिरस्युत ।
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा ॥
विशाम्यहं हि पातालं स्रोतसा गृह्य शङ्करम् ।
तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः ॥
तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा ।
सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्द्धनि ॥
हिमवत्प्रतिमे राम । जटामण्डलगह्वरे ।
सा कथञ्चित् महीं गन्तुं नाशक्नोत् यत्नमास्थिता ॥
नैव सा निर्गमं लेभे जटामण्डलमन्ततः ।
तत्रैवाबम्भ्रमद्देवी संवत्सरगणान् बहून् ॥
तामपश्यत् पुनस्तत्र तपः परममास्थितः ।
स तेन तोषितश्चासीदत्यन्तं रघुनन्दन ! ॥

विमसर्ज ततो गङ्गां हरो विन्दुसरः प्रति ॥”)
समुद्रः । इति त्रिकाण्डशेषः ॥ ६ ॥ (जीर्णाति-
सारोगनाशकचूर्णौषधविशेषः । यथा,—
“धातक्यामलकीपयोधरशटीकौटङ्कयष्टीमधु-
श्रीवल्लाम्रफलाम्बिनागरविषाहीबेरलोध्रेन्द्रवैः ।
तुल्यांशैर्विहितः सतण्डुलजलः गङ्गाधराख्यः स्फु-
टचूर्णस्तूर्णममाकरोति सकलं जीर्णातिसारं परम् ॥”
इति ग्रन्थार्थचिन्तामणिः ॥)
गङ्गापत्री, स्त्री, (गङ्गावत् पवित्रं शुभ्रं वा पत्रमस्याः इति ङीष् ।) वृक्षविशेषः । तत्पर्यायः । पत्री २ सुगन्धा ३ गन्धपत्रिका ४ । अस्याः गुणाः । कटुत्वम् । उष्णत्वम् । वातनाशित्वम् । व्रण-शोषणत्वञ्च । इति राजनिर्घण्टः ॥
गङ्गापुत्रः, पुं, (गङ्गायाः पुत्रः ।) भीष्मः । इति पुराणम् ॥ वर्णसङ्करजातिविशेषः । ‘सुरदा-फराश’ इति पारस्य भाषा । स तु लेटात् तीवर-कन्यायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ (कार्त्तिकेयः ॥)
गङ्गासुतः, पुं, (गङ्गायाः सुतः पुत्रः ।) कार्त्ति-केयः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । २३१ । १५ ।
“सहस्रशीर्षस्त्वमनन्तरूपः
सहस्रपात् त्वं गुरुशक्तिधारी ।
गङ्गासुतस्त्वं स्वमतेन देव ।
स्वाहामहीकृत्तिकानां तथैव ॥”)
भीष्मश्च । इति पुराणम् ॥
गङ्गिका, स्त्री, (गङ्गा एव । स्वार्थे कन् ततः “अभाषितपुंस्काच्च ।” ७।३।४८। इति पक्षे इत् ।) गङ्गा । इति मुग्धबोधम् ॥
गच्छः, पुं, (गम् + सम्पदादित्वात् क्विप् तुक् च गत् गमनं छ्यति नाशयतीति । गत् + छो + क ।) वृक्षः । इति हेमचन्द्रः ॥ गाछ इति भाषा ॥ निर्दिष्टगमनक्रियानुमतिः । (गम्धातोः लोटि मध्यमपुरुषस्यैकवचनस्य रूपम् ।) इति व्याकरणम् ॥ याओ इति भाषा ॥
गज मदे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-सेट् ।) गजति । इति दुर्गादासः ॥
गज इ शब्दे मदे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-सेट् इदित् ।) इ कर्म्मणि गञ्ज्यते । इति दुर्गादासः ॥
गज, क शब्दे । (चुरां-पर-अकं-सेट् ।) क, गाज-यति । इति दुर्गादासः ॥
गजः, पुं, (गजति मदेन मत्तो भवतीति । गज + अच् ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (गजनिरूपणं यथाह ग्रन्थार्थचिन्तामणिः ।
“भद्रो मन्द्रो मृगश्चेति विज्ञेयास्त्रिविधा गजाः ॥”
अत्र लक्षणानि यथा, गरुडपुराणे ९० अध्याये ।
“मध्वाभदन्ताः सुविभक्तदेहा
न चोपदिग्धाश्च कृशाः क्षमाश्च ।
गात्रैः समैश्चापधनुःप्रकाशा
वराहतुल्यैर्जघनैश्च भद्राः ।
वक्षोऽथ कक्षावलयः श्लथाश्च
लम्बोदरस्त्वग्बृहती गलश्च ।
स्थूला च कुक्षिः सह पेचकेन
सैंही च दृग्मन्दमतङ्गजस्य ॥
मृगास्तु ह्रस्वाधरवालमेढ्रा-
स्तन्वङ्घ्रिकण्ठद्विजहस्तकर्णाः ।
स्थूलेक्षणाश्चेति यथोक्तचिह्नैः
सङ्कीर्णनागा व्यतिमिश्रचिह्नाः ॥
पञ्चोन्नतिः सप्त मृगस्य दैर्घ्यं
मष्टौ च हस्ताः परिणाहमानम् ।
एकद्विवृद्धावथ मन्दभद्रौ
सङ्कीर्णनागोऽनियतप्रमाणः ॥
भद्रस्य वर्णो हरितो मदश्च
मन्दस्य हारिद्रकसन्निकाशः ।
कृष्णो मदश्चाभिहितो मृगस्य
सङ्कीर्णनागस्य मदो विमिश्रः ॥
ताम्रोष्ठतालुवदनाः कलविङ्कनेत्राः
स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंशा-
स्तन्वेकरोमचितकूर्म्मसमानकुम्भाः ॥
विस्तीर्णकर्णहनुनाभिललाटगुह्याः
कूर्म्मोन्नतद्विनवविंशतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुवालाः
धन्याः सुगन्धिमदपुष्करमारुताश्च ॥
दीर्घाङ्गुलिरक्तपुष्कराः
सजलाम्बोदनिनादबृंहिणः ।
बृहदायतवृत्तकन्धरा
धन्या भूमिपतेर्मतङ्गजाः ॥
निर्म्मदाभ्यधिकहीनननखाङ्गान्
कुब्जवामनकमेषविषाणान् ।
दृश्यकोशफलपुष्करहीनान्
श्यावनीलशबलासिततालून् ॥
स्वल्पवक्त्ररुहमत्कुणषण्ढान्
हस्तिनीं च गजलक्षणयुक्ताम् ।
गर्भिणीं च नृपतिः परदेशं
प्रापयेदतिविरूपफलास्ते ॥ ९ ॥
यथा, भट्टिः । १४ । ५ ।
“हया जिहेषिरे हर्षाद्गम्भीरं जगर्जुर्गजाः ॥”)
परिमाणविशेषः । स तु हस्तद्वय पादोनहस्त-द्वयञ्च । (यथा, ग्रन्थार्थचिन्तामणौ ।
“अरत्नीनां शतान्यष्टाविंशत्यधिकानि च ।
रत्नप्रमाणमाख्यातं मुनिभिर्नन्दनादिभिः ॥”)
वास्तुनः स्थानभेदः । इति मेदिनी ॥
“प्रस्तारे दैर्घ्यमानन्तु स्वरहीनं तथा गजे ।
प्रासाद ...तु वास्तुन्यासविलेपनम् ॥
अश्वो वृषश्च सिंहश्च श्वा वृषः खरहस्तिनौ ।
अत्र कोणदध्वेजे स्थाने च वास्तुनः ॥
ध्वजे सिंहाश्रवणे वृषे
सिंहे नृप, ... च वर्णितं ।
श्वे च ...
...रिताः ॥”
इति ज्योतिषम् ॥ ७ ॥
औषधपाकार्थगर्त्तविशेषः । यथा,—
“सपादहस्तमानो यः पुटः स तु गजाह्वयः ।
चारत्निके कुण्डे पुटो वाराह उच्यते ॥”
इति वैद्यकप्रयोगामृतम् ॥
(असुरविशेषः । स तु महिषासुरपुत्रः । यथा, काशीखण्डे । ६८ । ३ ।
“महिषासुरपुत्रोऽसौ समायाति गजासुरः ।
प्रमथन् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः ॥”)
गजकन्दः, पुं, (गज इव स्थूलः गजस्य दन्त इव वा कन्दो यस्य ।) हस्तिकन्दः । इति राज-निर्घण्टः ॥
गजकूर्म्माशी, [न्] पुं, (गजश्च कूर्म्मश्च तौ गज-कूर्म्मौ । तौ अश्नातीति । अश भोजने + णिनि ।) गरुडः । इति शब्दरत्नावली ॥ (पुरा हि कदाचित् विभावसुसुप्रतीकनामानौ द्वौ भ्रातरौ पैतृकधनविभागार्थं परस्पर-मभिशप्तौ गजत्वं कूर्म्मत्वं च गतावपि पूर्व्ववैर-मनुस्मरन्तौ सुचिरं युध्यमानौ प्रजापतिकश्यपा-दिष्टेन पतगेश्वरेण गरुडेन भक्षितौ । एतद्वि-वरणन्तु महाभारतीयादिपर्व्वणि सौपर्णे २९ अध्याये सविस्तरं दर्शनीयम् ॥)
गजचिर्भटा, स्त्री, (गजस्य प्रिया चिर्भटा ।) इन्द्रवारुणी । इति रत्नमाला ॥ गोरक्षलाउ राखालशसा इति च भाषा ॥
गजचिर्भिटः, पुं, (गजप्रियश्चिर्भिटः ।) गोडुम्बा । इति त्रिकाण्डशेषः ॥
गजचिर्भिटा, स्त्री, (गजभक्ष्या चिर्भिटा ।) महेन्द्रवारुणी । इति राजनिर्घण्टः ॥
गजच्छाया, स्त्री, (गजस्य कुञ्जरस्य छाया प्रति-बिम्बः । हस्तिच्छाया ।) योगविशेषः । यथा,—
“यदेन्दुः पित्र्यदैवत्यं हंसश्चैव करे स्थितः ।
याम्या तिथिर्भवेत् सा हि गजच्छाया प्रकी-र्त्तिता ॥”
इति मिताक्षरापरिभाषा ॥
अपि च । कृत्यचिन्तामणौ ।
“कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः ।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते ॥”
अन्यच्च ।
“योगो मघात्रयोदश्यां कुञ्जरच्छायसंज्ञितः ।
भवेन्मघायां सस्मी च शशिपर्के करे स्थिते ॥” ॥
चन्द्रसूर्य्ययोर्ग्रहणकालः । यथा, पराशरः ।
“सैंहिकेयो यदा भानुं ग्रसते पर्व्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत् ॥”
अमावास्यायाद्यकालः । यथा,—
“अमावास्यां यदा सोमे छाया या प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत् ॥”
इति च श्राद्धतत्त्वम् ॥
गजटक्का, स्त्री, (गजस्य उर्द्ध्वभागे स्थिता या ढक्का ।) ... । इति शब्दरत्नावली ॥
गजता, स्त्री, (गजानां समूहः । “ग्रामजनबन्धु-भ्यस्तल् ।” ४ । २ । ४३ । इत्यादि सूत्रात्

"गजस्तुस्वायाभ्याश्वेति वक्तव्यम् ।" वार्त्तिं इति तल् ।) गजसमूहः । तत्पर्य्यायः । हास्तिकम् २ । इत्यमरः । २ । ८ । ३६ ॥

गजदघ्न, पु (गजेन परिमाणमस्य इति परिमाणार्थे दघ्नच् ।) गजपरिमाणम् । इति मुग्धबोधम् ॥

गजदन्तः, पु, (गजस्य दन्तौ इव दन्तोऽस्य ।) गणेशः । इति शब्दरत्नावली ॥ (गजस्य दन्तः ।) गजसम्बन्धिदन्तः । नागदन्तः । हातिर दाँत इति भाषा । स तु द्रव्यस्थापनार्थं भित्तिस्थदण्डद्वयम् । दाखा इति भाषा ॥

गजदन्तफला, स्त्री, (गजदन्ताकृति गजदन्त इव शुभ्रं वा फलमस्याः ।) इन्द्रीलता । इति राजनिर्घण्टः ॥

गजदानं, क्ली, (गजस्य दानं मदः गण्डकटादिभ्यः क्षरितो मद इत्यर्थः ।) हस्तिमदः । इति राजनिर्घण्टः ॥ (तस्य प्रस्रवणस्थानानि । यथा,— "करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदश्रुतिः ।" इति पालकाव्यम् ॥

तथा च रघुः । ४ । ४५ ।

"स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥"

गजस्य हस्तिनो दानं प्रदानम् । गजसम्प्रदानम् । इति व्युत्पत्तिलभ्योऽर्थः ॥)

गजद्वयसः, त्रि, (गजेन परिमाणमस्य इति । गज + "दघ्नमात्रद्वयसट्माने ।" इति परिमाणार्थे द्वयसट् ।) परिमितः । इति मुग्धबोधम् ॥

गजपादपः, पुं, (गजस्य नाम्ना ख्यातः पादपः गजप्रिय पादपो वा ।) स्थालीवृक्षः । इति भावप्रकाशः ॥

गजपिप्पली, स्त्री, (गजोपपदेन युक्ता पिप्पली । गजनाम्ना ख्याता पिप्पली वा ।) पिप्पलीभेदः । गजपिँपुल इति भाषा । तत्पर्य्यायः । करिपिप्पली २ इभकणा ३ कपिवल्ली ४ कपिल्लिका ५ श्रेयसी ६ वशिरः ७ गजाह्वा ८ । इति रत्नमाला ॥ कोलवल्ली ९ । इत्यमरः ॥ वशिरः १० । इति तट्टीका ॥ गजोषणा ११ चव्यफलम् १२ चव्यजा १३ छिद्रवैदेही १४ दीर्घग्रन्थिः १५ तेजस्वी १६ वर्त्तुली १७ स्थूलवैदेही १८ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रक्षामलविशोषणत्वम् । वलासवातहरत्वम् । स्तनकण्ठविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ भेदामिकारित्वम् । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः । यथा, भावप्रकाशः ।

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली ।
कपिवल्ली कोलवल्ली श्रेयसी वशिरश्च सा ॥
गजकृष्णा कटुर्वातश्लेष्मनुद्वह्निवर्द्धिनी ।
उष्णा निहन्त्यतीसारश्वासकण्ठामयक्रिमीन् ॥"

गजपुटः, पु, (गजाह्वयः पुटः हस्तप्रमाणो गर्त्तः ।) औषधपाकार्थं हस्तपरिमितगर्त्तः । इति वैद्यकम् ॥ अस्य प्रमाणं गजशब्दे द्रष्टव्यम् ॥ (लौहमारणादावस्य प्रयोजनं यथा,—

"दशादिशतपर्य्यन्तो गजपुटविधिर्म्मतः ॥"

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे जारणविधधिकारे ॥ क्वचित् क्लीवलिङ्गत्वमपि दृश्यते । यथा, भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।

"सपादहस्तमानेन कुण्डे निम्ने यथायते ।
वनोपलसहस्रेण पूर्णे मध्ये विधारयेत ॥
पुटनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे ।
अथार्द्धानि करण्डानि अर्द्धान्युपरि निःक्षिपेत् ॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्व्वपुटोत्तमम् ॥
हस्तश्चतुर्व्विंशत्यङ्गुलप्रमाणं सपादस्तेन त्रिंशदङ्गुलप्रमाणेनेत्यर्थः । अतएवोक्तम् ।
साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः ॥"
इति गजपुटम् ॥)

गजप्रिया, स्त्री, (गजस्य प्रिया ।) शल्लकीवृक्षः । इति हेमचन्द्रः ॥

गजबन्धनी, स्त्री, (गजः हस्ती बध्यते लौहशृङ्खलादिभिः रुध्यतेऽस्याम् । बन्ध + ल्युट् ङीप् च ।) गजबन्धनस्थानम् । हातिशाला इति भाषा । तत्पर्य्यायः । वारी २ । इत्यमरः ।२।८ ४३ । वारिः ३ । इति भरतः ॥ प्रारब्धिः ४ । इति जटाधरशब्दरत्नावली ॥

गजभक्षकः, पु, (गजेन हस्तिना भक्ष्यते इति । भक्ष + कर्म्मणि अप् ततः कप् स्वार्थे कन् वा । यद्वा गजः हस्ती भक्षकोऽस्य ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥

गजभक्षा, स्त्री, (गजेन भक्ष्यतेऽसौ । भक्ष + अप् + टाप् ।) शल्लकीवृक्षः । इति शब्दरत्नावली ॥

गजभक्ष्या, स्त्री, (गजेन भक्ष्या भक्षणीया ।) शल्लकीवृक्षः । इत्यमरः । २ । ४ । १२३ ॥

गजमाचलः, पुं, स्त्री, (मच + भावे घञ् माचः । गजस्य हस्तिनः माचं दम्भं लाति आदत्ते लुनाति वा बाहुलकात् डः ।) सिंहः । इति हारावली ॥

गजमात्रः, त्रि, (गजेन परिमाणमस्य इति । "दघ्नमात्रद्वयसट् माने ।" इति परिमाणार्थे मात्र ।) गजपरिमितः । इति मुग्धबोधम् ॥

गजमोटनः, पुं, स्त्री, (गजं हस्तिनं मोटयति मर्द्दयतीति । मुट् मर्द्दने + कर्त्तरि ल्युः ।) सिंहः । इति शब्दमाला ॥

गजवदनः, पुं, (गजस्य वदनमेव वदनं यस्य ।) गणेशः । इति हलायुधः ॥

गजवल्लभा, स्त्री, (गजस्य वल्लभा प्रिया ।) गिरिकदली । शल्लकी । इति राजनिर्घण्टः ॥

गजसाह्वयं, क्ली, (गजनाम्ना नरपतिना सह आह्वयो नाम यस्य ।) हस्तिनापुरम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३।१।८ ।

"ततो द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः ।
धार्त्तराष्ट्रैः सहामात्यैर्निर्ययुर्गजसाह्वयात् ॥")

गजाख्यः, पुं, (गजाख्यया आख्यातः गजेन सह आख्या यस्येति वा गजकर्णवदस्य पत्राकारत्वात्तथात्वमिति केचित् ।) चक्रमर्द्दवृक्षः । इति राजनिर्घण्टः ॥

गजाग्रणीः, पुं, (अग्रे नीयते इति अग्रणीः । गजानां अग्रणीः श्रेष्ठः ।) ऐरावतहस्ती । इति शब्दरत्नावली ॥

गजाजीवः, पुं, (आजीव्यतेऽस्मादनेन वा आजीवः आ + जीव + कर्म्मणि घञ् । गजः आजीवः जीवनोपायोऽस्य । गजपरिचालनपालनादिकार्य्यमालम्ब्य आजीवतीति । जीव + कर्त्तरि अच् वा ।) हस्तिपालकः । तत्पर्य्यायः । आधोरणः २ हस्तिपकः ३ इभपालकः ४ । इति हेमचन्द्रः ॥

गजाण्डं, क्ली, (गजस्याण्डवत् मूलमस्य ।) पिण्डमूलम् । इति राजनिर्घण्टः ॥

गजाननः, पु, (गजस्य हस्तिन आननं मुखमेव आननं यस्य ।) गणेशः । इत्यमरः ।१।१।४१॥ (यथा, ब्रह्मवैवर्त्ते गणेशखण्डे ६ अध्याये ।

"शनिदृष्ट्या शिरश्छेदात् गजवक्त्रेण योजितः ।
गजाननः शिशुस्तेन नियतिः केन बाध्यते ॥"

पुराणान्तरे मतभेदोऽपि दृश्यते यथा, स्कान्दे गणेशखण्डे ११ अध्याये ।

गुरुरुवाच ।

"अवतारो यदि कृतः सान्त्वनाय भो विभो ।
प्रकाशयाशु वदनं सर्व्वेषां शोकनाशनम् ॥
नयस्व सर्व्वदेवानामानन्दं हृदये प्रभो । ।"

शिव उवाच ।

प्रत्युवाच गुरुं पुत्त्रः पार्व्वत्या हीनमस्तकः ॥

शिशुरुवाच ।

मद्देशाख्येन राज्ञा ते प्रणतौ चरणौ यदा ।
तदाशीर्या त्वया दत्ता तस्मै राज्ञे गुरो मुदा ॥
गजयोनौ जनिर्मुक्तिः शिवहस्ताहुदीरिता ।
तत् सर्व्वमभवत् तस्य विद्यते चारुमस्तकः ॥
पूज्यमानः शिवेनास्ते शुण्डादण्डः सुशोभनः ।
अवतारकरोऽसौ मे गुरोऽस्ति भविता सुखम् ॥

शिव उवाच ।

आश्चर्य्यपूर्णहृदयो गुरुरूचे पुनः शिशुम् ॥

गुरुरुवाच ।

भगवन् । विश्वरूपोऽसि त्रिकालज्ञोऽखिलेश्वरः ।
मया यदुदितं तस्मै त्वया ज्ञातं यतः प्रभो । ॥
अहमीशस्वरूपं ते परिच्छेत्तुं न च क्षमः ।
श्रुत्वैव ब्रह्मणः पुत्त्रो नारदस्तत्र चाब्रवीत् ॥

नारद उवाच ।

एवमेवावतीर्णोऽसि हीनमूर्द्धा कथं प्रभो । ।
अथवा बालरूपस्य छिन्नं ते केन तच्छिरः ॥
एतन्मे संशयं छिन्धि कृपया परमेश्वर । ।

शिव उवाच ।

निपीय नारदीं वाणीमुवाच शिशुरुत्त्वके ॥

शिशुरुवाच ।

सिन्दूरः कोऽपि दैत्यो मे वायुरूपधरोऽच्छिनत् ।
अष्टमे मासि सम्पूर्णे प्रविश्योमोदरं शिरः ॥
तमिदानीं हनिष्येऽहं [illegible] स्वं साम्प्रतं द्विज । ।

शिव उवाच ।

श्रुत्वैव नारदः प्राह शिशुरूपिणमीश्वरम् ॥

नारद उवाच ।

अकिञ्चिज्ज्ञा वयं देव । योजनेऽस्य मुखस्य ते ।
त्वमेव च स्वभावेन मखमेतन्नियोजय ॥

शिव उवाच ।
वदतीत्थं मुनिर्यावत् तावत् स दृष्टवांऽखिलैः ।
सर्व्वावयवसम्पूर्णो गजानन उमासुतः ॥
किरीटकुण्डलधरो युगबाहुः सुलोचनः ।
वामदक्षिणभागे च सिद्धिबुद्धिविराजितः ॥
दृष्ट्वा विनायक स्कन्द ! तथाभूतं निजेच्छया ।
हर्षोत्फुल्लनयना देवाः सर्व्वे तदाभवन् ॥
गजानन इति ख्यातो भविताऽयं जगन्नये ।
एवं भाद्रचतुर्थ्यां स अवतीर्णो गजाननः ॥")

गजारिः, पुं, (गजस्य अरिः शत्रुः । तन्नाशकत्वात् तथात्वम् ।) वृक्षविशेषः । सिंहः । यथा, "गजारिस्तरुसिंहयोः ।" इति हेमचन्द्रः ॥

गजाशनः, पुं, (गजेन हस्तिना अश्यते अद्यते इति । गज + अश् + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इति रत्नमाला ॥ गजादनोऽपि ॥

गजाशना, स्त्री, (अश्नातीति । अश ग भोजने + कर्त्तरि ल्युः । गजः अशनो भक्षको यस्याः ।) भङ्गा । इति शब्दचन्द्रिका ॥ (यस्मिन्नियं व्यवह्रियते तद्यथा,—
"गजाशना-कुम्भिक-दाड़िमानां
रसैः कृते तैलघृते सदध्नि ॥"
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये ॥)
शल्लकीवृक्षः । पद्ममूलम् । इति रत्नमाला ॥

गजास्यः, पुं, (गजस्य आस्यं मुखमेव आस्यं यस्य ।) गणेशः । इति हेमचन्द्रः ॥ (गजस्य आस्यम् ।) हस्तिमुखे क्ली ॥

गजाह्वं, क्ली, (गजेन गजनाम्ना आहूयते इति गजेन सह आह्वा सञ्ज्ञा यस्य इति वा ।) हस्तिनापुरम् । इति मेदिनी ॥

गजाह्वय, क्ली, (गजेन गजनाम्ना आह्वयोऽस्य ।) हस्तिनापुरम् । इति शब्दरत्नावली ॥

गजाह्वा, स्त्री, (गजस्य आह्वया सञ्ज्ञया आह्वा सञ्ज्ञा यस्याः ।) गजपिप्पली । इति मेदिनी ॥ (पर्य्यायोऽस्या यथा,—
"करिपिप्पलीभकणा कपिवल्ली कपिवल्लिका ।
श्रेयसी वशिरश्चापि गजाह्वा गजपिप्पली ॥"
इति वैद्यकरत्नमालायाम् ॥)

गजेष्टा, स्त्री, (गजस्य इष्टा प्रिया ।) विदारी । इति राजनिर्घण्टः ॥ भुँइकुमड़ा इति भाषा ॥

गजोषणा, स्त्री, (गजोपपदेन युता उषणा पिप्पली ।) गजपिप्पली । इति राजनिर्घण्टः ॥

गञ्जः, पुं, (गजि भावे + घञ् ।) अवज्ञा । भाण्डागारम् । खनिः । इति हेमचन्द्रः ॥ गोष्ठागारम् । इति हारावली ॥ गोयालिघर इति भाषा ॥

गञ्जः पुं क्ली, (गजि भावे + घञ् ।) भाण्डागारम् । इति मेदिनी ॥

गञ्जा, स्त्री, (गञ्ज + टाप् ।) मदिरागृहम् । इत्यमरः ।२।२।८॥ खनिः । इति मेदिनी ॥ पामरसद्म । मद्यभाण्डम् । इति शब्दरत्नावली ॥

गञ्जिका, स्त्री, (गञ्जा + स्वार्थे कन् अत इत्वम् ।) मदिरागृहम् । इति शब्दरत्नावली ॥

गड, इ गण्डे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्-इदित् ।) इ, कर्म्मणि गण्ड्यते । गण्डे कपोलविषयक्रियायाम् । तथा च । यत्र द्रव्यनिर्द्देशस्तत्र तन्निष्ठक्रियाविशेषो लभ्यते । इति मैत्रेयवोपदेवौ ॥ रमानाथस्तु कण्डु कार्कश्ये इत्यस्मात् कार्कश्य इत्यनुवृत्त्या कपोलकर्तृककार्कश्यमिति व्याख्याय गण्डति कपोलः पांशुना इत्युदाहृतवान् । केचित्तु गण्ड इति शब्दस्य व्युत्पत्त्यर्थमेवायं धातुर्मन्तव्यो न लक्ष्यान्यत्र प्रयोगः इत्याह । इति दुर्गादासः ॥

गड, म सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । घटादिः ।) म, गड़यति । सेकः क्षरणम् । गड़यति घटात् पानीयम् । डलयोरेकत्वात् लस्यैव प्रायः प्रयोगः । इति रमानाथः ॥ तन्मते तु लान्तपचेऽपि मानुबन्धः । क्षमते तु लान्तो वक्ष्यमाणः स लघुबन्धमूल्यः इति विरोधः । इति दुर्गादासः ॥

गड', पुं, (गड़ति गलति हस्ताज्जालादिभ्यो वा क्षरतीत्यर्थः । गड् + अच् ।) मत्स्यभेदः । गड़ुइ माछ इति भाषा ॥ अन्तरायः । इति मेदिनी ॥ परिखा । व्यवधानम् । इति शब्दरत्नावली ॥ देशविशेषः । राजनिर्घण्टे गड़लवणपर्य्याये गड़देशजमिति दर्शनात् ॥

गडकः, पुं, (गड + स्वार्थे कन् ।) मत्स्यविशेषः । गड़ुइ माछ इति भाषा । तत्पर्य्यायः । शकुलार्भकः २ । इत्यमरः । १ । १० । १७ ॥ गड़ः ३ गलः ४ गलकः ५ । इति शब्दरत्नावली ॥ अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । कषायत्वम् । शीतलत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

गड़यन्त', पुं, (गड़यति जलमिति । गड स्रावणे + झिच् । "तभूवह्विवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ।" उणां ।३।१२८। इति झच् । घटादित्वात् मित्त्वे मितां ह्रस्वः अयामन्तेति णेरयादेशः ।) मेघः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गड़लवण, क्ली, (गड़देशाज्जातं लवणम् । शाकपार्थिवादित्वत् मध्यपदलोपिसमासः ।) सांवरदेशोद्भवलवणम् । साम्भरनुण इति भाषा ॥ तत्पर्य्यायः । शुभ्रम् २ पृथ्वीजम् ३ गड़देशजम् ४ गड़ोत्थम् ५ महारम्भम् ६ सांवरम् ७ सवरोद्भवम् ८ । अस्य गुणाः । उष्णत्वम् । लवणत्वम् । ईषदम्लत्वम् । मलापहत्वम् । दीपनत्वम् । कफवातार्शोनाशित्वम् । कोष्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥

गड़देशजं, क्ली, (गड़देशात् जायते इति । जन् + डः ।) सांवरलवणम् । इति राजनिर्घण्टः ॥

गड़ि, पुं, (गड़ + इन् ।) वत्सतरः । इति राजनिर्घण्टः ॥ अलसो गवादिः । गड़िया इति भाषा ॥ यथा, काव्यप्रकाशे ।
"गुणानामेव दौरात्म्याद्धुरि धूर्य्यो नियुज्यते ।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गड़िः ॥"

गड़ुः, पुं, (गड + बाहुलकात् उन् ।) गलगण्डः । पृष्ठगुड़ः । स तु घाटामस्तकयोर्मध्ये मांसवृद्धिः । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ कुब्जः । इति मेदिनी ॥ शल्यास्त्रम् । इति शब्दरत्नावली ॥ किञ्चुलुकः । इति त्रिकाण्डशेषः ॥ विषमग्रन्थिः । यथा काव्यप्रकाशे तदेतत् काव्यान्तर्गड़ुभूतमिति गाढ़ं भेदलक्षणं कृतमित्यत्र तट्टीकाकारः ॥ ("न च अजागलस्तनवद्गलगड़ुना तेन किं वेति वाच्यम् ।" इति वेदान्तभाष्यम् ॥)

गड़ुरः, त्रि, (गड़ुल + रस्य लत्वम् ।) कुब्जः । इति शब्दरत्नावली ॥

गड़ुलः, त्रि, (गड़ु, स्थूलमांसपिण्डविशेषः अस्यास्तीति । गड़ु + "सिध्मादिभ्यश्चेति ।" ५ । २ । ९७ । इति लच् ।) कुब्जः । इत्यमरः ।२।६।४८॥

गड़ेरः, पुं, (गड़ + "पतिकठिकुठिगड़िगुडिदंशिभ्य एरक् ।" उणां । १ । ५६ । इति एरक् ।) मेघः । इति त्रिकाण्डशेषः ॥

गड़ोत्थ क्ली, (गड़देशात् उत्तिष्ठति सञ्जायते इति । गड़ + उत् + स्था + कः ।) गड़लवणम् । इति राजनिर्घण्टः ॥

गड़ोलः, पुं, (गड़ + "कपिगड़िगण्डिकटिपटिभ्य ओलच् ।" उणां । १ । ६७ । इति ओलच् ।) गुडः । इत्युणादिकोषः ॥ ग्रासः । इति हेमचन्द्रः ॥

गड्डुरिका, स्त्री, (गड्डुरः जलप्रवाहः सोऽस्या अस्तीति । यद्वा गड्डुरः मेषपालः तमनुगच्छतीति । ठन् टाप् च ।) अज्ञातप्रवाहागमनशील धारावाही नदीविशेषः । इति केचित् । मेषपृष्ठैरनुगम्यमाना मेषी । इत्यन्ये । इति काव्यप्रकाशटीकायां महेश्वरः ॥

गड्डुकः, पुं, (गड्डुक इति निपातनात् द्वित्वम् ।) जलपात्रविशेषः । इति शब्दरत्नावली ॥ गाड़ु इति भाषा ॥

गड्डूकः, पुं, (गड्डुक इति पृषोदरात् उकारस्य दीर्घत्वम् ।) गड्डुकः । इति शब्दरत्नावली ॥

गण, स क सङ्ख्याने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) स्वरान्त्योपधः । गणयति । इति दुर्गादासः ॥

गणः, पुं, (गण्यते गणयति वा कर्म्मणि अप् कर्त्तरि अच् वा ।) समूहः । (यथा, हितोपदेशे १ । ६३ ।
"न गणस्याग्रतो गच्छेत् सिद्धे कार्य्ये सम फलम् ॥")
प्रमथः । (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः ॥")
रुद्रानुचरः । (यथा, गो. रामायणे । ५।८८।७ ।
"धनाध्यक्षसभां देवः प्राप्तो हि वृषभध्वज ।
उमासहायो देवेशो गणैश्च बहुभिर्वृतः ॥")
सेनासङ्ख्याविशेषः । तद्यथा । गजाः २७ रथाः २७ अश्वाः ८१ पदातिकाः १३५ समुदायेन २७० । इत्यमरः । २ । ८ । ८१ ॥ (यथा, महाभारते ।
"त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ॥")

संख्या । चोरनामगन्धद्रव्यम् । इति मेदिनी ॥*॥ गणेशः । यथा, महानिर्व्वाणतन्त्रे ।
"गाणपस्तु महेशानि ! गणदीक्षाप्रवर्त्तकः ॥"
अश्विन्यादिजन्मनक्षत्रानुसारेण देवमानुषराक्षसगणा इति तु पारिभाषिकम् । यथा,—
"दे म रा म दे मा दे दे रा रा म म द रा द रा ॥
दे रा रा म म दे रा रा म म देति गणत्रयम् ॥"
इति ज्योतिषरत्नमाला ॥
"पूर्व्वोत्तरात्रयश्चैव भरण्यार्द्रा च रोहिणी ।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः ॥
ज्येष्ठाशतभिषामूलधनिष्ठाश्लेषकृत्तिकाः ।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः ॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः ।
अनुराधा मृगशिरः श्रवणं देवतारकाः ॥"
इति निबन्धः ॥
(तस्य मिलनकथनं यथा, ज्योतिषे ।
"सजातौ परमा प्रीतिर्मध्यमा देवमानुषे ।
देवासुरे कनिष्ठा च मृत्युर्मानुषराक्षसे ॥",)
धातुसमूहः । यथा, मनोरमा ।
"भ्वाद्यदादिजुहोत्यादिदिवादिः स्वादिरेव च ।
तुदादिश्च तनुक्र्यादिश्चुरादिश्च गणा दश ॥"
(छन्दःशास्त्रोक्तपारिभाषिकाक्षरविशेषः । स तु म-न-भ-य-ज-र-स-त-ग-लसंज्ञः । इति छन्दोमञ्जरी ॥ * ॥ महादेवः । यथा, महाभारते । १३ । १७ । ४० ।
"विश्वरूपः स्वयं श्रेष्ठो बलवीरो बलो गणः ॥"
दैत्यविशेषः । स तु अभिजिदिति नामान्तरस्य दैत्यस्य गुणवतो भार्य्याया गुणवत्यां सम्भूतः । यथा, स्कन्दपुराणे गणेशखण्डे ३ अध्याये ।
"अथ सोऽप्यभिजित् पत्न्या समुद्रस्नानमाययौ ।
पर्व्वणि श्रद्धया युक्तश्चक्रे स्नानं तया सह ॥
तृषिता सा गुणवती पपौ चाञ्जलिना जलम् ।
यद्वीर्य्यं ब्रह्मणा त्यक्तं दैवात्तदुरे गतम् ॥"
"भार्य्यागुणवती तस्य नवमासादनन्तरम् ।
पुत्त्रं प्रसूताह्नि शुभे दिव्यरूपं गुणाद्भुतम् ॥
ज्योतिर्विद्भिरनुज्ञातो गण इत्यभिधां पिता ।
कृत्वाभ्युदयिकं चक्रे व्यतीते दशमेऽहनि ॥"
स च महादेवमाराध्य वरं लब्ध्वा त्रैलोक्यं निर्जित्य च कपिलमुनेश्चिन्तामणिमपहृतवान् । कपिलमुनिस्तु अस्मादपराधात् जातमन्युर्गणेशमाराधयामास । अथ प्रसन्नेन गणपतिना तद्गृहे अवतीर्य्य तं गणदैत्यं विनाशितवान् इत्येषा कथा तत्रैवाध्याये विस्तरशो द्रष्टव्या ॥)

गणकः, पु, (गणयति शुभाशुभग्रहभोगजनितफलं निरूपयतीति । गण त् क सङ्ख्याने + कर्त्तरि ण्वुल् ।) दैवज्ञः । ज्योतिर्वित् । तत्पर्य्यायः । साम्वत्सरः २ ज्योतिषिकः ३ दैवज्ञः ४ मौहूर्त्तिकः ५ मौहूर्त्तः ६ ज्ञानी ७ कार्त्तान्तिकः ८ । इत्यमरः । २।८।१४ ॥ ज्योतिषिकः ९ । इति तट्टीका ॥ स तु वर्णसङ्करजातिविशेषः । देवलाद्वैश्यागर्भजातः । तस्य कर्म्म तिथिवारादिज्ञापनम् । इति पराशरपद्धतिः ॥ स तु अस्पृश्यः । यथा,—
"कलिकाले महेशानि । पाषण्डा बहवो जनाः ।
सङ्गदोषान्महेशानि । तत्सम्भाषान्नितां व्रजेत् ॥
तस्मात् प्रयत्नतो देवि । संसर्गं वर्ज्जयेत् सुधीः ।
वरं चाण्डालसंस्पर्शं कुर्य्यात्तु साधकोत्तमः ॥
तथाप्यस्पृश्यगणकं सर्व्वदा तं परित्यजेत् ॥"
इति शाक्तानन्दतरङ्गिण्या षोड़शोल्लासे महिषमर्द्दिनीतन्त्रवचनम् ॥ तस्य लक्षणं यथा,—
"ज्योतिःशास्त्रविशेषज्ञः सुन्दराङ्गः सभापटुः ।
कुलक्रमागतः शुद्धो गणकः स्यान्महीपतेः ॥"
इति युक्तिकल्पतरुः ॥
(यदि च शास्त्रविशेषे गणकस्य निन्दादिक श्रूयते तत्तु केवलं नक्षत्रजीविन एवेति बोध्यम् । प्रकृतज्योतिःशास्त्रन्तु द्विजातिभिरेवावश्यमध्ययनीयं वेदाङ्गत्वात् । यथा,—
"संयुतोऽपीतरैः कर्णनासादिभि-
श्चक्षुषाङ्गेन हीनो न किञ्चित् करः ।
तस्माद्द्विजैरध्ययनीयमेतत्
पुण्यं रहस्यं परमञ्च तत्त्वम् ॥"
इति सिद्धान्तशिरोमणिः ॥*॥
प्रजापतिपुत्त्रास्तारविशेषकेतवः । यथा,—
"ताराः पुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ
पुत्त्राः ॥"
इति वृहत्संहिता । ११ । २५ ॥
संकीर्णजातिविशेषः । यथोक्तम् ।
"चर्म्मकारस्य द्वौ पुत्त्रौ गणको वाद्यपूरकः ॥")

गणकर्णिका, स्त्री, (गणस्य गणाधिपस्य कर्णवत् पत्त्रमस्याः ।) इन्द्रवारुणी । इति राजनिर्घण्टः ॥

गणकारः, पु, (गणाना सैन्यानां कारः कर्त्ता सेनापरिचालनदक्षः ।) भीमसेनः । इति शब्दरत्नावली ॥ (गणं धात्वर्थप्रकाशकग्रन्थविशेषं करोतीति । कृ + अण् ।) धातुसंग्रहकर्त्ता । यथा, "गणकारवचनप्रामाण्यार्थमिदम् ।" इति कातन्त्रवृत्तिः ॥

गणकी, स्त्री, (गणकस्य पत्नी इति । तत्पत्न्यामिति ङीष् ।) गणकपत्नी । इति जटाधरः ॥

गणचक्रकं, क्ली, (गणाः धार्म्मिकगणास्तेषां चक्रं सम्भूय भोजनमत्र इति कप् ।) धार्म्मिकाणां सम्भूय भोजनम् । इति त्रिकाण्डशेषः ॥

गणता, स्त्री, (गणस्य धर्म्मः भावो वा इति तल् ।) गणस्य भावः । समूहत्वम् । पक्षपातित्वम् । इति लोकप्रसिद्धिः ॥

गणदीक्षी, [न्] पु, (गणान् बहुशिष्यान् दीक्षयति दीक्षां कारयतीति ।) बहुयाजकः । इति मिताक्षरा ॥ (वाच्यलिङ्गे तु गणस्य शिवस्य गणेशस्य वा दीक्षा विद्यते अस्मिन् अस्य वा । दीक्षा + इनिः । शिवदीक्षितः ।) गणेशदीक्षिते त्रि । गणस्य गणेशस्य दीक्षा गणदीक्षा । इति महानिर्व्वाणतन्त्रम् ॥

गणदेवता, स्त्री, (गणः सङ्घः तद्रूपा देवता सम्भूय स्थिता देवता इत्यर्थः ।) संहतदेवताविशेषः । यथा,—
"आदित्या विश्ववसवस्तुषिता भास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥
आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः ।
वसवश्चाष्टसंख्याताः षट्त्रिंशत् तुषिता मताः ॥
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः ।
महाराजिकनामानो द्वे शते चापि विंशतिः ॥
साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः ।
एते च संहता देवास्तत्रादित्याः स्वनामतः ॥"
इति जटाधरः ॥

गणद्रव्यं, क्ली, (गणानां साधारणानां द्रव्यम् । यद्वा द्रव्याणां गण इति परनिपातः ।) साधारणद्रव्यम् । मिलितानेकस्वामिकासम्बन्धिद्रव्यम् । द्रव्यसमूहः । तत्र द्रव्याणां गण इति व्युत्पत्तिः ॥

गणनं, क्ली, (गण्यते इति । गण + भावे ल्युट् ।) सङ्ख्यानम् । गणा ठिक् देया इति च भाषा ॥ यथा, विश्वसारतन्त्रे ।
"येनैव लिखनं कुर्य्यात्तेनैव गणनं स्मृतम् ॥"

गणना, स्त्री, (गण + युच् टाप् च ।) गणनम् । संख्या । (यथा, नैषधे । ३ । ४० ।
"यदि त्रिलोकी गणनापरा स्या-
त्तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात् ॥")

गणनाथः, पु, (गणानां विघ्नकर्तृदेवविशेषाणां नाथः ।) गणेशः । इति शब्दरत्नावली ॥ (गणानां प्रमथानां नाथः स्वामी इति व्युत्पत्त्या शिवः ॥)

गणनायकः, पु, (गणानां नायकः ।) गणेशः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १ । ७७ ।
"लेखको भारतस्यास्य भव त्वं गणनायक । ॥"
गणानां देवसङ्घानां नायकः । यथा, भागवते । ५।१७।१३ । "यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः ॥" इति ॥*॥ गणानां प्रमथाना नायकः । शिवः ॥)

गणनायिका, स्त्री, (गणानां नायकः शिवः तस्य शक्तिरिति टाप् अत इत्वं च गणनेत्री इत्यर्थः ।) दुर्गा । इति त्रिकाण्डशेषः ॥

गणनीयं, त्रि, (गण + अनीयर् ।) गणनार्हम् । संख्येयम् । तत्पर्य्यायः । गणेयम् २ । इत्यमरः । ३ । १ । ६४ ॥ गणितव्यम् ३ गण्यम् ४ । इति व्याकरणम् ॥ सङ्ख्येयम् ५ । इति जटाधरः ॥

गणपतिः, पुं, (गणानां गणसंज्ञकाना देवानां पतिः अधीश्वरः स्वामी वा ।) गणेशः । इति हलायुधः ॥ (यथा, पञ्चतन्त्रे । १ । १७० ।
"अत्तुं वाञ्छति शाम्भवो गणपतेराखुं क्षुधार्त्तः
फणी
तं च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि
नागाशनम् ॥"
अग्रपूजनीयप्रधानदेवताविशेषः । यथा, यजुर्वेदीयवाजसनेयसंहितायाम् । १६ । २५ । "नमो गणेभ्यो गणपतिभ्यश्च वो नमो नम इति ॥"

बृहस्पतिः । यथा, ऋग्वेदे । २ । २३ । १ ।
"गणानां त्वा गणपतिं हवामहे
कविं कवीनामुपमश्रवस्तमम् ॥"
शिवः । यथा, महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासाः काम एव च ।
मन्त्रवित् परमो मन्त्रः सर्व्वभावकरो हरः ॥"
आथर्व्वणोपनिषद्विशेषः । यथा, मौक्तिकोपनिषदि प्रथमाध्याये ।
"त्रिपुरातपनदेवीभावनाभस्मजाबालगणपतिमहावाक्यगोपालतपनकृष्णहयग्रीवेति ॥")

गणपर्व्वतः, पुं, (गणानां प्रमथगणानां गणपत्यादिदेवानां वा आवासरूपः पर्व्वतः । गणभूयिष्ठः पर्व्वतो वा ।) कैलासपर्व्वतः । इति त्रिकाण्डशेषः ॥

गणपीठकं, क्ली, (गणस्य शिवस्य परमेश्वरस्येति यावत् पीठः आसनमिव कायति प्रकाशते इति । कै+कः ।) वक्षः । इति शब्दचन्द्रिका ॥

गणरात्रं, पुं, (गणानां बह्वीनां रात्रीणां समाहारः गणशब्दस्य सङ्ख्यावाचित्वात् तद्धितार्थेति द्विगुसमासः । "अहः सर्व्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः ।" ५ । ४ । ८७ । इत्यच् । सङ्ख्यापूर्व्वं रात्रं क्लीवमिति लिङ्गानुशासने क्लीवत्वविधानात् "रात्राह्नाहाः पुंसि ।" २ । ४ । २९ । इति क्लीवत्वम् ।) रात्रिसमूहः । इत्यमरः ।१।४।६ ॥

गणरूपः, पुं, (गणाः बहुप्रकाराणि रूपाणि अस्य ।) अर्कवृक्षः । इत्यमरः ।२।४।८० ॥

गणरूपकः, पुं, (गणरूप+संज्ञायां कन् । गणरूप इव कायति प्रकाशते इति वा । कै+कः ।) राजार्कः । इति राजनिर्घण्टः ॥

गणरूपी, [न्] पुं, (गणाः बहुविधानि रूपाणि वर्णाकृत्यादयः सन्त्यस्य इति अस्त्यर्थे इनिः ।) श्वेतार्कः । इति रत्नमाला ॥

गणवतीसुतः, पुं, (गणवत्याः सुतः ।) दिवोदासः । यथा, त्रिकाण्डशेषे ।
"धन्वन्तरिर्दिवोदासः काशिराजः सुधोद्भवः ।
पालकाख्यागणवतीकरेणुरुचिरासुतः ॥"

गणहासः, पुं, (गणान् गन्धद्रव्यगणान् हासयतीति । गण+हस्+णिच्+अण् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

गणहासकः, पुं, (गणहास+स्वार्थे कः ।) चोरकनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२८ ॥

गणाग्रणीः, पुं, (अग्रे नीयते इति अग्रणीः । गणानां गणाख्यदेवविशेषाणां अग्रणीः ।) गणेशः । इति त्रिकाण्डशेषः ॥

गणाचलः, पुं, (गणानां वासाय अचलः गणभूयिष्ठोऽचलो वा ।) कैलासपर्व्वतः । इति जटाधरः ॥

गणाधिपः, पुं, (गणानां अधिपः अधीश्वरः ।) गणेशः । इत्यमरः । १ । १ । ४० ॥ शिवः । इति हलायुधः ॥

गणिः, स्त्री, (गण+"सर्व्वधातुभ्य इन् ।" उणां । ४।११७। इति इन् ।) गणनम् । इति व्याकरणम् ॥

गणिका, स्त्री, (गणः सम्पटगणः उपपतित्वेनास्त्यस्याः इति ठन् ।) वेश्या । (यथा, हरिवंशे । ८५ । ९ ।
"गणिकानां पृथक्सङ्घाः शुभैरालङ्करणाम्बरैः ॥")
यूथिका । इत्यमरः । २ । ४ । ७२ ॥ गणिकारिकावृक्षः । इति शब्दरत्नावली ॥ हस्तिनी । इति जटाधरः ॥

गणिकारिका, स्त्री, (गणिः गणनं करोतीति । कृ+ण्वुल्+टाप्+अत इत्वञ्च । यद्वा गणिकेत्याख्यां ऋच्छतीति । ऋ+"कर्म्मण्यण् ।"३।२।१। इत्यण् । स्वार्थे कन् अत इत्वञ्च ।) वृक्षविशेषः । वड़ गणियारी इति भाषा ॥ तत्पर्य्यायः । श्रीपर्णम् २ अग्निमन्थः ३ कणिका ४ जया ५ । इत्यमरः ।२। ४।६६ ॥ तेजोमन्थः ६ हविर्मन्थः ७ ज्योतिष्कः ८ पावकः ९ अरणिः१० वह्निमन्थः ११ मथनः१२। इति रत्नमाला ॥ अग्निमथनः १३ तर्कारी १४ वैजयन्तिका १५ अरणीकेतुः १६ श्रीपर्णी १७ कर्णिका १८ नादेयी १९ विजया२० अनन्ता२१ नदीजा २२ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । अनिलकफशोफश्लेष्माग्निमान्द्यार्शोमलबन्धश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ क्षुद्रगणिकारिकागुणपर्य्यायौ क्षुद्राग्निमन्थशब्दे द्रष्टव्यौ ॥

गणिकारी, स्त्री, (गणिर्गणनं करोति पूजादिषु आत्मानं गणनं कारयतीत्यर्थः । कृ+कर्म्मण्यण् ततो ङीप् ।) पुष्पवृक्षविशेषः । गणियारी इति भाषा । तत्पर्य्यायः । काञ्चनिका २ काञ्चनपुष्पी ३ वसन्तदूती ४ गन्धकुसुमा ५ अलिमोदा ६ वासन्ती ७ मदनमादिनी ८ । अस्या गुणाः । सुरभितरत्वम् । त्रिदोषशमनत्वम् । दाहशोषकामक्रीडाडम्बरसम्बरहरत्वम् । चापलप्रसरत्वञ्च । इति राजनिर्घण्टः ॥ (विशेषश्चास्या गणिकारिकाग्निमन्थशब्दयोर्ज्ञेयः ॥)

गणितं, त्रि, (गण+कर्म्मणि क्तः ।) कृतगणनम् । तत्पर्य्यायः । सङ्ख्यातम् २ । इत्यमरः । ३ । १ । ६४ ॥ (चिन्तितम् । यथा, शिवपुराणे ज्ञानसंहितायाम् । १२ । २७ ।
"दुःखञ्च विविधं तत्र गणितं न तथा तथा ॥")

गणितं, क्ली, (गण्यते इति । गण+क्तः ।) अङ्कशास्त्रम् । तत् द्विविधं व्यक्तं पाटीगणितम् । अव्यक्तं बीजगणितम् । इति लीलावती ॥ गणनम् । यथा, नैषधे । ३ । ४० ।
"पारे परार्द्धं गणितं यदि स्यात् ॥"

गणिपिटका, स्त्री, द्वादशाङ्गी । सा तु जिनानां विद्याविभागः । इति हेमचन्द्रः । २ । १५९ ॥

गणेयः, त्रि, (गण+एय ।) सङ्ख्येयः । गणनीयः । इत्यमरः । ३ । १ । ६४ ॥ (यथा, नैषधे ।३।४० ।
"गणेयनिःशेषगुणोऽपि स स्यात् ॥")

गणेरुः, पुं, (गण+बाहुलकात् एरुः ।) कर्णिकारवृक्षः । इति मेदिनी । रे । १४८ ॥

गणेरुः, स्त्री, (गण+बाहुलकात् एरुः ।) वेश्या । हस्तिनी । इति मेदिनी । रे । १४८ ॥

गणेरुका, स्त्री, (गणेरूणां गणिकानां गणिकासु वा मध्ये कायति प्रकाशते इति । कै+कः ।) कुट्टिनी । इति त्रिकाण्डशेषः ॥

गणेशः, पुं, (गणानां प्रमथसमूहानां यद्वा गणानां जीवजातानां ईशः ईश्वरः ।) शिवः । इति हारावली । ८ ॥ (यथा, महाभारते । ३ । कैराते । ३९ । ७८ ।
"प्रसादये त्वां भगवन् ! सर्व्वभूतमहेश्वर ! ।
गणेशं जगतः शम्भुं लोककारणकारणम् ॥"
गणानां गणाख्यदेवविशेषाणां विघ्नाख्यदेवानां वा ईशः नियन्ता ।) शिवपुत्त्रः । (यथा, महाभारते । १ । १ । ७३ ।
"काव्यस्य लेखनार्थाय गणेशः स्मर्य्यतां मुने ! ॥")
तत्पर्य्यायः । विनायकः २ विघ्नराजः ३ द्वैमातुरः ४ गणाधिपः ५ एकदन्तः ६ हेरम्बः ७ लम्बोदरः ८ गजाननः ९ । इत्यमरः ।१।१। ४० ॥ विघ्नेशः १० पर्शुपाणिः ११ गजास्यः १२ आखुगः १३ । इति हेमचन्द्रः । २ । १२१ ॥ शूर्पकर्णः १४ । इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥ तस्योत्पत्तिः । तत्र पार्व्वतीं प्रति वृद्धब्राह्मणरूपश्रीकृष्णवाक्यम् । यथा,—
"न भवेद्विष्णुभक्तिश्च विष्णुमाये । त्वया विना ।
त्वद्व्रतं लोकशिक्षार्थं त्वत्तपस्तव पूजनम् ॥
सर्व्वेप्सफलदात्री त्वं नित्यरूपा सनातनी ।
गणेशरूपः श्रीकृष्णः कल्पे कल्पे तवात्मजः ॥
त्वत्क्रोडमागतः क्षिप्रमित्युक्त्वान्तरधीयत ।
कृत्वान्तर्द्धानमीशश्च बालरूपं विधाय सः ॥
जगाम पार्व्वतीतल्पं मन्दिराभ्यन्तरस्थितम् ।
तल्पस्थे शिववीर्य्ये च मिश्रितः स बभूव ह ॥
ददर्श गेहशिखरं प्रसूतबालको यथा ।
शुद्धचम्पकवर्णाभः कोटिचन्द्रसमप्रभः ॥
सुखदृश्यः सर्व्वजनैश्चक्षूरश्मिविवर्द्धकः ।
अतीवसुन्दरतनुः कामदेवविमोहनः ॥
मुखं निरुपमं बिभ्रत् शारदेन्दुविनिन्दकम् ।
सुन्दरे लोचने बिभ्रत् चारुपद्मविनिन्दके ॥
ओष्ठाधरपुटं बिभ्रत् पक्वबिम्बविनिन्दकम् ।
कपालञ्च कपोलान्तद्दतीव सुमनोहरम् ॥
नासाग्रं रुचिरं बिभ्रत् खगेन्द्रचञ्चुनिन्दकम् ।
त्रैलोक्येषु निरुपमं सर्व्वाङ्गं बिभ्रदुत्तमम् ॥
शयानः शयने रम्ये प्रेरयन् हस्तपादकम् ॥"
तस्य शनैश्चरदर्शनात् मस्तकविनाशः विष्णु कर्तृकगजमस्तकसंयोगश्च यथा,—
"सा च देववशीभूता शनिं प्रोवाच कौतुकात् ।
पश्य मां मत्शिशुमिति नियतिः केन वार्य्यते ॥
पार्व्वतीवचनं श्रुत्वा सोऽनुमेने हृदा स्वयम् ।
पश्यामि किं न पश्यामि पार्व्वतीसुतमित्यहो ॥
बालं द्रष्टुं मनश्चक्रे न बालमातरं शनिः ।
विषण्णमानसः पूर्व्वं शुष्ककण्ठौष्ठतालुकः ॥
सव्यलोचनकोणेन ददर्श च शिशोर्मुखम् ।
शनिश्च दृष्टिमात्रेण चिच्छेद मस्तकं मुने ! ॥
विस्मितास्ते सुराः सर्व्वे चित्रपुत्तलिका यथा ।
देव्यश्च शैला गन्धर्व्वाः शिवः कैलासवासिनः ॥

तान् सर्व्वान् सुक्लिनान् दृष्ट्वा चारुरुं गरुडं हरिः ।
जगाम पुष्पभद्रां स उत्तरस्यां दिशि स्थिताम् ॥
पुष्पभद्रानदीतीरे ददर्श्श काननस्थितम् ।
गजेन्द्रं निद्रितं तत्र शयानं हस्तिनीयुतम् ॥
शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो मुदा ।
स्थापयामास गरुडे रुधिराक्तं मनोहरम् ॥
आगत्य पार्व्वतीस्थानं बालं कृत्वा स्ववक्षसि ।
रुचिरं तच्छिरः कृत्वा योजयामास बालके ॥
ब्रह्मस्वरूपो भगवान् ब्रह्मज्ञानेन लीलया ।
जीवनं जीवयामास हुंकारोच्चारणेन च ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥

अस्य ध्यानम् ।
"खर्व्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम् ।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥"
इति पुराणम् ॥ * ॥

ध्यानान्तरं यथा,—
"सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दन्तं पाशाङ्कुशेष्टान्युरुकरविलसद्बीजपूराभि-
रामम् ।
बालेन्दुद्योतमौलिं करिपतिवदनं दानपूरार्द्रगण्डं
भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्राङ्ग-
रागम् ॥"
इति तन्त्रसारः ॥

(तस्य नमस्कारमन्त्रो यथा,—
"देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ॥"
इति पूजापद्धतिः ॥)

एकपञ्चाशद्गणेशा । यथा,—
"विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ ।
विघ्नकृत् विघ्नहर्त्ता च गणैकदिक्चतुष्टकाः ॥
गजवक्त्रनिरञ्जनौ कपर्द्दी दीर्घजिह्वकः ।
शङ्कुकर्णश्च वृषभध्वजश्च गणनायकः ॥
गजेन्द्रः सूर्पकर्णश्च स्यात्त्रिलोचनसञ्ज्ञकः ।
लम्बोदरमहानन्दौ चतुर्म्मूर्त्तिसदाशिवौ ॥
आमोददुर्म्मुखौ चैव सुमुखश्च प्रमोदकः ।
एकपादो द्विजिह्वश्च सुरवीरः सषण्मुखः ॥
वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः ।
सेनानीर्ग्रामणीर्म्मत्तो विमत्तो मत्तवाहनः ॥
जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः ।
भक्ष्यप्रियो गणेशश्च मेघनादकसंज्ञकः ॥
व्यापी गणेश्वरः प्रोक्ताः पञ्चाशद्गणपा इमे ।
तरुणारुणसङ्काशा गजवक्त्रास्त्रिलोचनाः ॥
पाशाङ्कुशवराभीतिहस्ताः शक्तिसमन्विताः ॥" ॥
तेषामेकपञ्चाशच्छक्तयश्च यथा,—
"ह्रीः श्रीश्च पुष्टिः शान्तिश्च स्वस्तिश्चैव सरस्वती ।
स्वाहामेधाकान्तिकामिन्यो मोहिन्यपि वै नटी ॥
पार्व्वती ज्वालिनी नन्दा सुयशाः कामरूपिणी ।
उमा तेजोवती सत्या विघ्नेशानी सुरूपिणी ॥
कामदा मदजिह्वा च भूतिः स्याद्भौतिका सिता ।
रमा च महिषी प्रोक्ता ज्वलिनी च विकर्णमा ॥

भ्रुकुटिः स्याल्लज्जा लम्बा दीर्घघोणा धनुर्द्धरा ।
यामिनी रात्रिसंज्ञा च कामान्धा च शशिप्रभा ॥
लोलाक्षी चपला दीप्तिः सुभगा दुर्भगा शिवा ।
भर्गा च भगिनी चैव भोगिनी सुभगा मता ॥
कालरात्रिः कालिका च पञ्चाशच्छक्तयः स्मृताः ।
सर्व्वालङ्करणोद्दीप्ताः प्रियाङ्कस्थाः सुशोभनाः ॥
रक्तोत्पलकरा ध्येया रक्तमाल्याम्बरारुणाः ॥"
इति शारदातिलकटीकायां राघवभट्टः ॥

गणेशकुसुमं, क्ली, (गणेश इव कुसुमम् । रक्त-
वर्णसादृश्यात्तथात्वम् ।) रक्तकरवीरः । इति
राजनिर्घण्टः ॥

गणेशभूषणं, क्ली, (गणेशस्य भूषणमिव ।) सिन्दू-
रम् । इति राजनिर्घण्टः ॥

गणोत्साहः, पुं, (गणाय गणार्थं वा यूथीकरणाये-
त्यर्थः उत्साहोऽस्य । यद्वा गणान् यूथान् उत्-
साहयतीति । उत् + साहि + अण् ।) गण्डकः ।
इति त्रिकाण्डशेषः ॥ गण्डार इति भाषा ॥

गण्ड, पुं, (गडि वक्त्रैकदेशे + अच् । यद्वा गम
गतौ + "ञमन्ताड्डः ।" उणां । १ । ११३ । इति
डः ।) हस्तिकपोलः । (यथा, पञ्चतन्त्रे । १ । ३५६ ।
"प्रमाणाभ्यधिकस्यापि गण्डश्याममदच्युतेः ।
पदं मूर्द्ध्नि समाधत्ते केशरी मत्तदन्तिनः ॥")
तत्पर्य्यायः । कटः २ । इत्यमरः । २ । ८ । ३७ ॥
करटः ३ । इति तट्टीका ॥ कटकः ४ हस्ति-
गण्डकः ५ । इति शब्दरत्नावली ॥ कपोलः ।
इत्यमरः । २ । ६ । ९० ॥ गाल इति भाषा ॥
(यथा, कुमारे । ७ । ८२ ।
"तदीषदार्द्रारुणगण्डलेखं
उच्छ्वासिकालाञ्जनरागमक्ष्णोः ॥")
खड्गी । वीथ्यङ्गम् । पिटकः । चिह्नम् ।
वीरः । हयभूषणम् । बुद्बुदः । इति मेदिनी ॥
स्फोटकः । ग्रन्थिः । इत्यमरटीकायां रमानाथः ॥
विष्कुम्भादिसप्तविंशतियोगान्तर्गतदशमयोगः ।
(यथा, ज्योतिषवचने ।
"गण्डे वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥")
तत्र जातफलम् ।
"स्वकार्य्यकर्त्ता परकार्य्यहर्त्ता
गण्डोद्भवः स्यादतिगण्डवादः ।
अत्यन्तधूर्त्तः पुरुषः कुरूपः
सुहृज्जनानामतितापदाता ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
रेवत्यश्विन्यादिनक्षत्राणां भागविशेषः ।
यथा,—
"अश्विनीमघमूलानां तिस्रो गण्डान्तनाडिकाः ।
अन्यथा पौष्णरौद्रेन्द्राणां पञ्चैव नवता जगुः ॥
गजेन्द्रयोर्दिवा गण्डो निशायां पितृसर्पयोः ।
सन्ध्याद्वये तथा ज्ञेयो रेवतीतुरगद्वयोः ॥" * ॥
तत्र जातस्य दोषो यथा,—
"सन्ध्यारात्रिदिवाभागे गण्डयोगोऽत्र त्रिषु ।
बालान् मातरं तातं निनिघ्नन्ति यथाक्रमम् ॥"
तस्य शान्तिर्यथा,—
"सर्व्वेषां गण्डजातानां परित्यागो विधीयते ।

तातेनादर्शनं वापि यावत् षाण्मासिको भवेत् ॥
कुङ्कुमं चन्दनं कुष्ठं गोरोचनमथापि वा ।
घृतेनैवान्वितं कृत्वा चतुर्भिः कलसैर्बुधः ॥
सहमाक्षेण सन्तोय बालकं स्नापयेत्ततः ।
पितृयुक्तं दिवाजातं मातृयुक्तञ्च रात्रिजम् ॥
स्नापयेत् पितृमातृभ्यां सन्ध्ययोरुभयोरपि ।
कांस्यपात्रं घृतैः पूर्णं गण्डदोषोपशान्तये ॥
दद्याद्धेनुं हिरण्यञ्च शय्याञ्चापि प्रपूजयेत् ।
मूलायाः प्रथमे पादे पितुर्मृत्युर्विनश्यति ॥
द्वितीये नियता पीडा मातुः कुर्य्यात् पितुस्तथा ।
तृतीये धननाशाय चतुर्थे सर्व्वसम्पदः ॥
व्यत्ययेन फलं ज्ञेयमश्लेषास्वपि पूर्व्ववत् ।
वल्मीकगजमृत्तिकां नद्यास्तूभयतटमृत्तिकाम् ॥
गोविषाणमृदश्चापि दन्तिमृदश्च निःक्षिपेत् ।
तीर्थाम्भःपञ्चगव्येन स्नानं मातुः पितुः शिशोः ॥
दिवा जाता तु या कन्या निशि जातस्तु यः पुमान् ।
नोभयोर्गण्डदोषः स्यात् नाघ्नन्ति पञ्चतत्त्वम् ॥"
इति ज्योतिषतत्त्वम् ॥

गण्डकः, पुं, (गण्ड + स्वार्थे कन् ।) खड्गी । इत्य-
मरः । १ । १० । १७ ॥ गण्डार इति भाषा ॥
खड्गः । संख्याप्रभेदः । गण्डा इति भाषा ।
विद्याविशेषः । अवच्छेदः । अन्तरायः । इति
मेदिनी । के ८२ ॥ (देशविशेषः । यथा, महा-
भारते । ७ । ७९ । ४ ।
"ततः स गण्डकान् शूरो विदेहान् भरतर्षभः ॥"
भूषणम् । यथा, कादम्बर्य्याम् । "ग्रथनखपङ्क्ति
मण्डिता गण्डकाभरणा च ॥" ग्रन्थिः । यथा,
तत्रैव । "गोरोचनालिखितभूर्जपत्रगर्भान् मन्त्र-
गण्डकान् ॥" स्फोटकरोगविशेषः । यथा, तत्रैव ।
"अनेकवेत्राघातनिर्मितबहुगात्रगण्डकम् ॥")

गण्डकारी, स्त्री, (गण्डं भग्नास्थिग्रन्थिमित्यर्थः
करोति संयोजयतीति ।) खदिरीक्षुपः । इति
शब्दचन्द्रिका ॥ वराहक्रान्ता । इति रत्नमाला ॥

गण्डकाली, स्त्री, (गण्ड + कृ + "कर्म्मण्यण् ।"
३ । २ । १ । इत्यण् ततो ङीप् । रस्य लत्वं यद्वा
गण्डेषु ग्रन्थिषु काली यस्याः ।) खदिरीक्षुपः ।
इत्यमरः । २ । ४ । १४१ ॥
("गण्डकाली नमस्कारी समङ्गा खदिरी क्वचित् ॥"
इति वैद्यकरत्नमालायाम् ॥)

गण्डकी, स्त्री, (गण्डक + स्त्रियां जातौ ङीष् ।) स्वनाम-
ख्याता नदी । इति मेदिनी । ८२ ॥ यथा स्कान्दे ।
"गण्डक्याश्चैकदेशे च शालग्रामस्थलं स्मृतम् ।
पाषाणं तद्भवं यत्तु शालग्राममिति स्मृतम् ॥"
तत्र शालग्रामोत्पत्तिकारणं यथा —
"गण्डक्यापि पुरा तप्तं वर्षाणामयुतं त्रिधा ।
शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम् ॥
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा ।
तत्र साक्षाज्जगन्नाथो हर्षितः कार्य्यसिद्धये ॥
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ।
[illegible] ।
[illegible] ॥
[illegible] ॥

गण्डक्यपि पुरो दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत् प्रणता भूत्वा ततः स्तोतुं प्रचक्रमे ॥
अहो देव ! मया दृष्टो दुर्दर्शो योगिनामपि ।
त्वया सर्व्वमिदं सृष्टं जगत् स्थावरजङ्गमम् ॥
तदनु त्वं प्रविष्टोऽसि पुरुषस्तेन चोच्यते ।
त्वल्लीलोन्मीलिते विश्वे कः स्वतन्त्रोऽस्ति वै पुमान् ॥
अनाद्यन्तमपर्य्यन्तं यद्ब्रह्म श्रुतिबोधितम् ।
तदेव त्वं महाविष्णो ! यस्त्वां वेद स वेदवित् ॥
तवैवाद्या जगन्माता या शक्तिः परमा स्मृता ।
तां योगमायां प्रकृतिप्रधानमिति वक्ष्यते ॥
निर्गुणः पुरुषोऽव्यक्तश्चित्स्वरूपी निरञ्जनः ।
आनन्दरूपः शुद्धात्मा ह्यकर्त्ता निर्विकारकः ॥
त्वां योगमायामाविश्य कर्त्तृत्वं प्राप्तवानसि ।
प्रकृत्या सृज्यमानेऽस्मिन् द्रष्टा साक्षी निगद्यते ॥
प्रकृतेस्त्रिगुणैरस्मिन् सृज्यमानेऽपि नान्यथा ।
सान्निध्यमात्रतो देव ! त्वयि स्फुरति कारणे ॥
स्फटिके हि यथा स्वच्छे जवाकुसुमरागतः ।
प्रकाशते त्वत्प्रकाशात् ज्योतीरूप ! नतास्मि ते ॥
ब्रह्मादयोऽपि कवयो न विन्दन्ति यथार्थतः ।
तत् कथं वेशग्रहं मूढा तव रूपं निरञ्जनम् ॥
मूढस्य जगतो मध्ये स्थिता किञ्चिदजानती ।
त्वया दृष्टा कृता चास्मि योग्यायोग्यमविन्दती ॥
तेन लोके महत्त्वञ्च त्वत्प्रसादेन चेच्छती ।
यद्याचे तत्त्वमोदार ! तन्मे दातुं त्वमर्हसि ॥
दयालुरसि दीनेषु नेति मां न वद प्रभो ! ।
तत उवाच भगवान् देवि ! यद्यत्त्वमिच्छसि ॥
तद्याचय वरारोहे । अदेयमपि सर्व्वथा ।
यद्दुर्लभं मनुष्याणां शीघ्रं याचय मां प्रति ॥
मद्दर्शनमसम्प्राप्य कोवाऽपूर्णमनोरथः ।
ततो हिमांशो ! सा देवी गण्डकी लोकतारिणी ॥
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ।
यदि देव । प्रसन्नोऽसि देयो मे वाञ्छितो वरः ॥
मम गर्भगतो भूत्वा विष्णो । मत्पुत्रतां व्रज ।
ततः प्रसन्नो भगवान् चिन्तयामास गोपते । ॥
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ।
दास्यामि याचितं येन लोकानां भवमोचनम् ॥
इत्येवं कृपया देवो निश्चित्य मनसा स्वयम् ।
गण्डकीमवदत् प्रीतः शृणु देवि । वचो मम ॥
शालग्रामशिलारूपी तव गर्भगतः सदा ।
तिष्ठामि तव पुत्त्रत्वे भक्तानुग्रहकारणात् ॥
मत्सान्निध्यात् नदीनां त्वमतिश्रेष्ठा भविष्यसि ।
दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात्
हरिष्यसि महापापं वाङ्मनःकायसम्भवम् ।
यः स्नास्यति विधानेन देवर्षिपितृतर्पकः ॥
तर्पयेत् स्वपितॄंश्चापि तारयित्वा दिवं नयेत् ।
स्वयं मम प्रियो भूत्वा ब्रह्मलोकं गमिष्यति ॥
यदि त्वय्युत्सृजेत् प्राणान् मम कर्म्मपरायणः ।
सोऽपि याति परं स्थानं यत्र गत्वा न शोचति ॥
एवं दत्त्वा वरान् देव्यै तत्रैवान्तरधीयत ।
ततः प्रभृति तिष्ठामः क्षेत्रेऽस्मिन् शशलाञ्छन ॥”
इति वराहपुराणे सोमेश्वरादिलिङ्गमहिमा-
ऽनिमुक्तक्षेत्रनिर्णयादिमहिमनामाध्यायः ॥

गण्डकुसुमं, क्ली, (गण्डेषु गजानां कपोलदेशेषु कुसुममिव । हस्तिनां हि कटदेशात् कपोलयोरेव मदवारि चरति ।) हस्तिमदः । तत्पर्य्यायः । उत्कटः २ । इति हारावली ।१६१॥

गण्डकूपः, पुं, (गण्डे गिरेरूर्द्ध्वदेशे कूप इव ।) पर्व्वतस्योच्चस्थानम् । (यथा,—
“उद्देशो गण्डकूपस्तु पर्व्वतस्याभिधीयते ॥”
इति हारावली । ५१ ॥)

गण्डगात्रं, क्ली, (गण्डः स्फोटक इव बन्धुरत्वं उच्चनीचत्वं गात्रेऽस्य ।) फलविशेषः । इति शब्दचन्द्रिका ॥ आता इति भाषा ॥

गण्डदूर्व्वा, स्त्री, (गण्डा ग्रन्थिला दूर्व्वेति कर्म्मधारयः ।) दूर्व्वाविशेषः । गाँटिया दूर्व्वा इति भाषा ॥ तत्पर्य्यायः । गण्डाली २ अतितीव्रा ३ मत्स्याक्षी ४ वारुणी ५ मीनपर्णी ६ सूचीभेत्रा ७ श्यामग्रन्थिः ८ ग्रन्थिला ९ ग्रन्थिपर्णी ९ सूचीपत्रा १० श्यामकाण्डा ११ जलस्था १२ शकुलाक्षी १३ कलाया १४ चित्रा १५ । अस्या गुणाः । मधुरत्वम् । वातपित्तज्वरभ्रमतृष्णाश्रमद्वन्द्वदोषनाशित्वम् । शिशिरत्वञ्च । इति राजनिर्घण्टः ॥ यथा, भावप्रकाशे ।
“गण्डदूर्व्वा तु गण्डाली मत्स्याक्षी शकुलाक्षकः ।
गण्डदूर्व्वा हिमा लोहद्राविणी ग्राहिणी लघुः ॥
तिक्ता कषाया मधुरा वातकृत् कटुपाकिनी ।
दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा ॥”

गण्डमाला, स्त्री, (गण्डानां ग्रीवाजातस्फोटविशेषाणां माला समूहोऽस्याम् ।) गलरोगविशेष । तत्पर्य्यायः । गलगण्डः २ । इति हेमचन्द्रः । ३ । १३१ ॥ तस्यौषधं यथा,—
“अजमोदा ... सिन्दूरो हरितालनिशाद्वयम् ।
क्षारद्वय फेनयुतमार्द्रकं शरलोद्भवम् ॥
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः ।
एभि. सर्षपजं तैलमजामूत्रेण योजितम् ॥
मृद्वग्निना पचेदेतदर्कक्षीरेण संयुतम् ।
अजमोदादिकं तैलं गण्डमालां व्यपोहति ॥
विदग्धस्तु पचेत् पक्वं पक्वश्चैव विशोधयेत् ।
रोपणं मृदुभावञ्च तैलेनानेन कारयेत् ॥
अजमोदादिकं तैलं महावीर्य्यञ्च रोगनुत् ॥”
इति गारुडे १७८ अध्यायः ॥
अपि च । तत्रैव १८० अध्याये ।
“द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा ।
गण्डमालां हरेल्लेपात् कुरण्डगलगण्डकम् ॥”
अपि च । तत्रैव १८४ अध्याये ।
“अपराजितायाः मूलञ्च गोमूत्रेण समन्वितम् ।
पीतञ्चापि हरत्येव गण्डमालां न संशयः ॥”
अपि च ।
“बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ॥
बला चातिबला रास्ना श्वदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा ॥
एषां दशपलिकान् भागान् क्वाथयेत् सलिलेऽम्भसे ।
तेन पादावशेषेण तैलं पात्रे विपाचयेत् ॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् ॥
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तत् शृणु ।
शतपुष्पा देवदारु शालपर्णी वचागुरु ॥
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ॥
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ।
अपस्मारं वातरक्तमायुष्मांश्च पुमान् भवेत् ॥
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी शिव ! ।
अश्वानां वातभग्नानां कुञ्जराणां नृणां तथा ॥
तैलमेतत् प्रदातव्यं सर्व्ववातविकारिणाम् ॥”
इति गारुडे १९८ अध्यायः ॥ * ॥
अन्यच्च ।
अथ गण्डमालाया लक्षणमाह ।
“कर्कन्धुकोलामलकप्रमाणैः
कक्षांसमन्यागलवङ्क्षणेषु ।
मेदःकफाभ्यां चिरमन्दपाकैः
स्याद्गण्डमाला बहुभिस्तु गण्डैः ॥”
कर्कन्धुः क्षुद्रबदरी । कोलं बृहद्बदरम् । चिरमन्दपाकैः चिरेण मन्दोऽल्पः पाको येषां तैः ॥*॥
अथ गण्डमालाया एवावस्थाविशेषमपचीमाह ।
“ते ग्रन्थयः केचिदवाप्तपाकाः
स्रवन्ति नश्यन्ति भवन्ति चान्ये ।
कालानुबन्धं चिरमादधाति
सैवापचीति प्रवदन्ति केचित् ॥”
ते ग्रन्थयः गण्डमालाया एवं गण्डाः केचिदवाप्तपाकाः सन्तः स्रवन्ति केचित् नश्यन्ति अन्ये भवन्ति च । कालानुबन्धं चिरमादधाति या गण्डमाला चिरं तिष्ठति सैवापची इति केचिद्वदन्ति ॥ * ॥
अपच्याः साध्यत्वादिकमाह ।
“साध्या स्मृता पीनसपार्श्वशूल-
कासज्वरच्छर्द्दियुता त्वसाध्या ॥” * ॥
अथ ग्रन्थिः । ग्रन्थेर्लक्षणमाह ।
“वातादयो मांसमसृक् च दुष्टाः
संदूष्य मेदश्च तथा शिराश्च ।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥”
विग्रथितं ग्रन्थिरूपम् । अतो ग्रन्थिः ॥ * ॥
अस्या निदानादिपूर्व्वलिखितम् । अथ गण्डमालायाश्चिकित्सा ।
“काञ्चनारत्वचः क्वाथः शुण्ठीचूर्णेन संयुतः ।
माक्षिकाढ्यः सकृत्पीतः क्वाथो वरुणमूलजः ॥
गण्डमालां हरत्याशु चिरकालानुबन्धिनीम् ।
पलमर्द्धपलं वापि पिष्ट्वा तण्डुलवारिणा ॥
काञ्चनारत्वचं पीत्वा गण्डमालां व्यपोहति ।
काञ्चनारस्य गृह्णीयात् त्वचं पञ्चपलोन्मितम् ॥
नागरस्य कषायाश्च मरीचस्य पलं पलम् ।
पथ्याविभीतधात्रीणां पलमर्द्धं पृथक् पृथक् ॥
वरुणस्याप्येकञ्च पत्रकैलात्वचं पुनः ।
टङ्कं टङ्कं समादाय सर्व्वाण्येकत्र चूर्णयेत् ॥

यावच्चूर्णमिदं सर्व्वं तावानेवात्र गुग्गुलुः ॥
सङ्कुट्य सर्व्वमेकत्र पिण्डं कृत्वा विधारयेत् ।
गुटिकाः शाणिकाः कृत्वा प्रभाते भक्षयेन्नरः ॥
गण्डमालां जयत्युग्रामपचीमर्व्वुदानि च ।
ग्रन्थ्यर्व्वुदानि गुल्मांश्च कुष्ठानि च भगन्दरम् ॥
प्रदेयश्चानुपानार्थं क्वाथो मुण्डितिकाभवः ।
क्वाथः खदिरसारस्य क्वाथः कोष्णोऽभयाभवः ॥"
इति काञ्चनारगुग्गुलुः ॥ * ॥
"चक्रमर्द्दकमूलस्य कल्कं दत्त्वा विपाचयेत् ।
केशराजरसे तैलं कटुकं मृदुनाग्निना ॥
पादशेषे विनिःक्षिप्य सिन्दूरमवतारयेत ।
एततैलं निहन्त्याशु गण्डमालां सुदारुणाम् ॥"
इति चक्रमर्द्दतैलम् ॥ * ॥
"गुञ्जाम्लफलैस्तैलं विपक्वं द्विगुणाम्भसा ।
हरेदभ्यङ्गनस्याभ्यां गण्डमालां सुदारुणाम् ॥"
इति गुञ्जतैलम् ॥*॥ अथापच्याश्चिकित्सा ।
"चन्दनं साभया लाक्षा वचा कटुकरोहिणी ।
एभिस्तैलं शृतं पीतं समूलामपचीं हरेत् ॥"
इति चन्दनादितैलम् ॥ * ॥
"व्योषं विडङ्गं मधुकं सैन्धवं देवदारु च ।
तैलमेभिः शृतं नस्यात् सकृच्छ्रामपचीं हरेत् ॥"
व्योषादितैलम् ॥ * ॥ अथ ग्रन्थिचिकित्सा ।
"सर्ज्जिकामूलकक्षारशङ्खचूर्णसमन्वितम् ।
एतेन सहितो लेपो हन्ति ग्रन्थिं तथार्व्वुदम् ॥
ग्रन्थिर्न यो नश्यति भेषजेन
निष्काश्य तं शस्त्रचिकित्सकेन ।
जात्यादिपक्वेन घृतेन वैद्यो
व्रणेन साम्येन च संचिकित्सेत् ॥
ग्रन्थिस्तु तत्कृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये शेषे शस्त्रं प्रयुज्यते ॥"
इति भावप्रकाशः ॥
(अथास्याः सकारणलक्षणचिकित्सितानि ।
"दुष्टाम्बुपानसकदन्ननिषेवणाच्च
सञ्जायते च क्रिमिसम्भवगण्डमाला ।
सा मारुतेन कफपित्तभवे विकारे
संसर्पते क्रिमिजदोषगणाच्च गण्डात् ॥
मातेन वातसदृशानि च लक्षणानि
पित्तेन दाहसरुजव्रणशोषतापाः ।
सा श्लेष्मणा च घनशीतलसम्प्रयोगात्
स्यात् सन्निपातविहिता च समस्तलिङ्गैः ॥
तस्य चेमं प्रतीकारं वक्ष्यामि शृणु पुत्रक ॥
रोहिणी विशदा चैव विजया च मिमेदिनी ॥
कान्तारी व्रजपुष्पा च तथा चैन्द्रायुधा परा ।
इति सप्तविधा लूताः शृणु पश्चात् पृथक् पृथक् ॥
रक्तमुखा भवेद्रक्ता रक्तस्थाने च रोहिणी ।
विशदा मांसलस्थाने श्वेतवर्णा च दीर्घिका ॥
विजया च शिरो मध्ये पीतवर्णा यवप्रभा ।
मेदिनी मेदसः स्थाने श्वेता च नीलरेखिका ॥
कान्तारी च अस्थिमध्ये श्वेताङ्गा रक्तमुखिका ।
व्रजपुष्पा चास्थिमध्ये श्वेताक्षणा शिरा मता ॥
ऐन्द्रायुधा शिरान्ते च धूम्रा कृष्णा शिरा मता ।
रोहिण्यङ्गुलिमात्रेण सूक्ष्मेण विशदा समा ॥
विजया च यवाकारा वर्त्तुला विजया तथा ।
अन्या नवाञ्च विज्ञेया तण्डुली कण्टकानिभा ॥
रोहिणी विजया विंशा मांसस्थानसमाश्रिता ।
गुल्फे वा चास्थिसन्धौ च दृश्यते मेदिनी नरे ॥
कुक्षौ कर्णान्तरेऽपाङ्गे कान्तारी विद्धि पुत्रक ॥
व्रजपुष्पा शिरसि च शिरान्तार्त्तिप्रदा मता ॥
अतो वक्ष्यामि भैषज्यं शृणु पुत्र । प्रयत्नतः ।
सान्द्रपूयविस्रावश्च गम्भीरश्च व्रणां विदुः ॥
अन्यश्च सरुजश्चैव पक्वजम्बूसमप्रभम् ।
लूताव्रणानाश्चैतानि अपक्वं यदि दृश्यते ॥
त्यक्ता सन्धिस्थमर्म्मस्थां लूताश्चैव हि तद्व्रणम् ।
तदा तप्तेन तैलेन दाहश्चाशु विधीयते ॥
अङ्कोलश्चैवमद्यानि पारिभद्रदलानि च ।
गृहधूमं कणाजीरं गोमूत्रेण तु पेषितम् ॥
लेपनञ्च प्रशस्तञ्च लूतानां मारणे परम् ।
पिण्डीतकं विडङ्गानि तथा चेङ्गुदिमूलकम् ॥
वीजपूरकमूलानि पेषितानि विलेपयेत् ।
गण्डमालां तथा घोरां हन्ति शीघ्रं प्रकण्टकाम् ।
स्नुहीक्षीरञ्चार्कक्षीरं लूतारन्ध्रे नियोजयेत् ॥
तेन कीटस्तु तन्मध्ये म्रियते नात्र संशयः ।
आस्यतो गिरिकर्णीञ्च चन्दनञ्च समांशकम् ॥
पिष्ट्वा लेपः प्रयोक्तव्यो लूतां हन्ति सुदारुणाम् ।
करवीरञ्चार्कदुग्धं तथा च कटुतुम्बिकाम् ॥
निशाद्वयं जाङ्गलिकां तिलतैले विपाचयेत् ।
लूतामभ्यञ्जने हन्ति गण्डमालाञ्च दारुणाम् ॥
घृतं जात्यादिकं नाम तथा चात्र प्रयोजयेत् ।
अन्यान्यपि व्रणे यानि प्रोक्तानि च यथाविधि ॥"
इति महर्ष्यात्रेयभाषिते हारीतोत्तरे तृतीयस्थाने लूतागण्डमालाचिकित्सा नाम सप्तत्रिंशोऽध्यायः ॥
"गलस्य पार्श्वे गलगण्ड एकः
स्याद्गण्डमाला बहुभिस्तु गण्डैः ।
साध्याः स्मृताः पीनसपार्श्वशूल-
कासज्वरच्छर्द्दियुतास्त्वसाध्याः ॥
तेषां सिरा-काय-शिरो-विरेको
धूमः पुराणस्य घृतस्य पानम् ॥"
इति चरके चिकित्सास्थाने सप्तदशेऽध्याये ॥)

गण्डमालिका, स्त्री, (गण्डानां ग्रन्थीनां मालाऽस्या अस्यां वा इति कप् । ततष्टाप् अत इत्वञ्च) लज्जालुवृक्षः । इति रत्नमाला ॥

गण्डशैलः, पुं, (गण्ड इव शैलः स्खलितस्थूलोपलः । शैलशब्दोऽत्र शैलावयवे वर्त्तते । "विशेषणं विशेष्येण बहुलम् ।" २ । १ । ५७ । इति समासः । यद्वा शैलस्य पर्व्वतस्य गण्ड इव । राजदन्तादित्वात् पूर्व्वनिपातः ।) गिरेश्च्युतः स्थूलोपलः । भूकम्पादिना पर्व्वतात् गलितो महान् प्रस्तरः । इत्यमरः । २ । ३ । ६ ॥ (यथा, आर्य्यासप्तशत्याम् । १७६ ।
"किं पुत्रि ! गण्डशैलभ्रमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलसितगर्ज्जितदेशान्तर-
भ्रान्तीः ॥")
ललाटम् । इति हेमचन्द्रः । ४ । १०२ ॥

गण्डाङ्गः, पुं, (गण्ड इव उच्छ्रयमङ्गमस्य ।) खड्गी । इति शब्दचन्द्रिका ॥

गण्डारिः, पुं, (गण्डस्य रोगविशेषस्य अरिः । तन्नाशकत्वात्तथात्वम् ।) कोविदारवृक्षः । (यथा,—
"काञ्चनाल । काञ्चनकी गण्डारिः शोणपुष्पकः ॥"
इति भावप्रकाशः ॥)

गण्डाली, स्त्री, (गण्डं अलतीति । अल् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । गण्डेन ग्रन्थिना आल्यते भूष्यते वा । अल् + घञ् स्त्रियां ङीष् ।) श्वेतदूर्व्वा । इत्यमरः । २ । ४ । १५६ ॥ सर्पाक्षी । इति भावप्रकाशः ॥ गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

गण्डिः, पुं, (गडि + इन् ।) वृक्षस्य मूलाच्छाखावधिभागः । इति हेमचन्द्रः । ४ । १८६ ॥ गुंडि इति भाषा ॥

गण्डीरः, पु, (गण्ड + ईरन् ।) समष्ठिला । शसा इति ख्यातः । समठ इति ख्यातः । अनूपदेशजं शाकम् । इति केचित् । गुण्ठिया इति ख्यातशाकम् । इति सर्व्वानन्दः । इत्यमरटीकायां भरतः ॥ ("गण्डीरः शाकविशेषो गण्डीनीति लोके गण्डारी मञ्जिष्ठा च ।" इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य गुणा यथा, चरके सूत्रस्थाने २७ अध्याये ।
"वायुं वत्सादनी हन्यात् कफं गण्डीरचित्रकौ ॥")
वीरः । इति जटाधरः ॥

गण्डीरी, स्त्री, (गण्डीर + गौरादित्वात् ङीष् । यद्वा गण्डं रोगविशेषं ईरयति दूरीकरोति स्वनिर्य्यासादिभिरिति शेषः ।) सेहुण्डवृक्षः । इति राजनिर्घण्ट. ॥ सिज इति भाषा ॥

गण्डुः, पु स्त्री, (गण्डयते शिरोभागः स्थाप्यतेऽत्र । गडि + अधिकरणे उन् ।) उपधानम् । इति जटाधरः ॥

गण्डूपदः, पु, (गण्डवः ग्रन्थयः ताभिरन्वितानि पदानि यस्य । शाकपार्थिवादित्वात् समासः ।) किञ्चुलुकः । इत्यमरः । १ । १० । २२ ॥
("गण्डूपदस्य रूपाणि पिच्छिलानि मृदूनि च ॥"
इति वैद्यकमाधवकररोगविनिश्चये अर्शोऽधिकारे ॥)

गण्डूपदभवं, क्ली, (गण्डूपद इव भवति उत्पद्यते इति । भू + अच् ।) सीसकम् । इति हेमचन्द्रः ।४।१०७ ॥

गण्डूपदी, स्त्री, (गण्डूपद + स्त्रियां अल्पार्थे ङीप् ।) किञ्चुलुकपत्नी । तत्पर्य्यायः । शिली २ । इत्यमरः । १ । १० । २४ ॥ सिली ३ क्षुद्रकिञ्चुलुकजातिः । इत्यमरटीकायां भरतः ॥ छोटजाति केंचुया इति भाषा ॥

गण्डूषः, पु, (गडि + "गण्डेश्च ।" उणां ।४।७८ इति ऊषन् ।) मुखपूरणम् । (यथा, भागवते । ६ । १५ । ३ ।
"भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः ।
तस्य जह्नुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ॥")
हस्तिशुण्डाग्रभागः । प्रसृतिपरिमितम् । इति मेदिनी । षे ३५ ॥ (यदाह कश्चित् ।

"अगाधजलसञ्चारी विकारी न च रोहितः ।
गण्डूषजलमात्रेण शफरी फर्फरायते ॥")

गण्डूषा, स्त्री, (गण्डूष+टाप् ।) गण्डूषः । इति लिङ्गादिसंग्रहे अमरः ॥ "सुखपूर्णतोयमिति भरतः ॥ रायमुकुटस्तु गण्डूषाशब्दो सुखपूरणे स्त्रीलिङ्गः । पुंलिङ्गस्तु गण्डूषशब्दश्चुलुकपरिमाण इति । यथा,—

"अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥"

इति तट्टीकासारसुन्दरी ॥

गण्डोलः, पुं, (गडि+"कपिगडिगण्डिकटीति ।" उणां १ । ६७ । इति ओलच् ।) गुड़ः । ग्रासः । इति हेमचन्द्रः । ३ । ६० ॥

गण्यं, त्रि, (गणं लब्धा इति । "धनगणं लब्धा ।" ४ । ४ । ८४ । इति यत् । यद्वा गण्यते इति । कर्म्मणि यत् । गणे भव । "दिगादिभ्यो यत् ।" ४।३।५४ । इति यदित्येके ।) गणनीयम् । गणितव्यम् । तत्पर्य्यायः । गणेयम् २ संख्येयम् ३ । इति हेमचन्द्रः ।३।३३६ ॥ (यथा, ऋग्वेदे ।३।७।५।
"दिवो रुच सुरुचो रोचमाना इला येषां गण्या माहिना गीः ॥")

गत, त्रि, (गच्छति आगाति यासीति वा । "गत्यर्थाकर्म्मकेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्त ।) विज्ञातम् । यातम् । इति मेदिनी । ते १५ ॥ (यथा, किरातार्ज्जुनीये । ४ । ५ ।

"तुतोद तस्य स्वसमप्रदिग्नीगत
वितर्कमाविष्कृतफेनसन्तति ॥"

गम्यते इति । भावे क्ते तु गमने क्ली ॥ यथा, माघे । १ । २ ।

"गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्द्धज्वलनं हविर्भुजः ॥")

गतनासिकः, त्रि, (गता विरहिता नासिका यस्य ।) नासिकारहितः । तत्पर्य्यायः । विग्रः २ । इत्यमरः ।२।६।४६ ॥ विख्रः ३ । छिन्ननासिकः ४ । इति शब्दरत्नावली ॥ विनासिकः ५ विनसः ६ । इति जटाधरः ॥

गतसन्नकः, पुं, (गतः सन्नः सादहेतुको मदो यस्मात् यस्य वा इति कप् ।) निर्म्मदहस्ती । इति शब्दचन्द्रिका ॥

गतागत, क्ली, (गतं ऊर्द्ध्वगमनं आगतं अधोगमनं यत्र ।) पक्षिगतिविशेषः । इति जटाधरः ॥ (गतञ्च आगतञ्च द्वयोः समाहारः ।) यातायातम् । यथा, रसमञ्जर्य्याम् ।

"गतागतकुतूहलं नयनयोरपाङ्गावधि ॥"

(तथा च भगवद्गीतायाम् । ९ । २१ ।

"ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्त्यलोकं विशन्ति ।
एवं त्रयीधर्म्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥"

गतं विनष्टं आगतं पुनः संसारागमनं यस्मात् । यं प्राप्य जीवो न पुनर्निवर्त्तते इति वाक्यात् तथात्वम् । पुं, महादेवः । यथा, महाभारते । १३ । १७ । ७९ ।

"नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः ॥")

गतार्त्तवा, स्त्री, (गतं निवृत्तं आर्त्तवं रजोऽस्याः ।) वृद्धा । (गतं दृष्टं आर्त्तवमस्या इति ।) वन्ध्या । इति राजनिर्घण्टः ॥

गतिः, स्त्री, (गम्+भावे क्तिन् ।) गमनकर्म्म । (यथा रघुवंशे । १ । ४ ।

"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥")

तत्पर्य्यायः । वर्त्तते १ अयते २ लोटते ३ लोठते ४ स्यन्दते ५ कसति ६ सर्पति ७ स्यमति ८ स्रवति ९ स्रंसते १० अवति ११ श्चोतति १२ ध्वंसति १३ वेनति १४ मार्ष्टि १५ भुरण्यति १६ शवति १७ कालयति १८ पेलयति १९ कण्टति २० पिस्यति २१ विस्यति २२ मिस्यति २३ प्सवते २४ प्रवते २५ च्यवते २६ कवते २७ गवते २८ नवते २९ क्षोदति ३० नक्षति ३१ सक्षति ३२ म्यक्षति ३३ सचति ३४ अच्छति ३५ तुरीयति ३६ चतति ३७ अतति ३८ गाति ३९ इयक्षति ४० सश्चति ४१ सरति ४२ रंहति ४३ यतते ४४ भ्रमति ४५ ध्रजति ४६ रजति ४७ लजति ४८ सियर्त्ति ४९ धमति ५० मिनाति ५१ ऋण्वति ५२ ऋणोति ५३ स्वरति ५४ सिसर्त्ति ५५ वेविष्टि ५६ योयोष्टि ५७ ऋच्छति ५८ ऋयते ५९ तेजति ६० इष्यति ६१ इष्णोति ६२ युध्यति ६३ धन्वति ६४ अरमति ६५ आर्य्यन्ति ६६ डीयते ६७ तकति ६८ टीयते ६९ इयति ७० फणति ७१ हनति ७२ अर्द्दति ७३ मर्द्दति ७४ सस्रते ७५ नसते ७६ हर्षति ७७ इयर्त्ति ७८ ईर्त्ते ७९ ईङ्खते ८० अयति ८१ स्वात्रति ८२ गन्ति ८३ आगनीगन्ति ८४ जङ्गन्ति ८५ जिन्वति ८६ जसति ८७ गमति ८८ धति ८९ भाति ९० धयति ९१ वहते ९२ रघर्य्यति ९३ जेहते ९४ स्वकति ९५ ह्युम्यति ९६ ख्याति ९७ नाति ९८ याति ९९ हयति १०० द्राति १०१ ह्वलति १०२ एजति १०३ जमति १०४ जवति १०५ मषति १०६ वनति १०७ पवते १०८ हन्ति १०९ सेधति ११० अगन् १११ अजगन् ११२ जिगाति ११३ पतति ११४ इन्वति ११५ द्रमति ११६ द्रयति ११७ वेति ११८ हयन्तात् ११९ एति १२० जगायात् १२१ अयुयुः १२२ । इति द्वाविंशं शत गतिकर्म्म । इति वेदनिघण्टौ २ अध्याय. ॥ (गम्यतेऽस्यामिति । गम्+अधिकरणे क्तिन् ।) मार्गः । (यथा, भगवद्गीतायाम् । ८ । २६ ।

"शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः ॥")

दशा । (यथा, तत्रैव । ६ । ३७ ।

"अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगससिद्धिं कां गतिं कृष्ण । गच्छति ॥"

गम्यते ज्ञायतेऽनया । करणे क्तिन् ।) ज्ञानम् । (यथा, श्रीमद्भागवते ।७।५।३१।

"न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः ।
अन्धा यथान्धैरुपनीयमाना
स्तेऽपीशतन्त्र्यामुरुदाम्नि बद्धाः ॥"

"स्वस्मिन्नेव आत्मन्येव अर्थः प्रयोजनं येषां ते स्वार्थास्तत्त्वविदस्तेषां गतिर्ज्ञानस्वरूपं विष्णुं ते दुराशया बहिरर्थमानिनो न विदुः जानन्ति ।" इति तट्टीकायां स्वामी ॥) यात्रा । (गम्यते प्राप्यतेऽनया इति । गम्+करणे क्तिन् ।) अभ्युपायः । (यथा, महाभारते ।१३।१४९।६१।

"यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ॥")

नाडीव्रणम् । सरणी । इति मेदिनी । १४ ॥ (गम्+भावे क्तिन । परिणतिः । यथा, किराता र्ज्जुनीये । १० । ४० ।

"मदनमुपदधे स एव तासां
दुरधिगमा हि गतिः प्रयोजनानाम् ॥"

"गतिः परिणतिः ।" इति तट्टीकायां मल्लिनाथः ॥ प्रमाणम् । यथा, तत्रैव । १४ । १५ ।

"कृपेति चेदस्तु मृगः क्षतः क्षया-
दनेन पूर्व्वं न मयेति का गतिः ॥"

"मया नेत्यत्र का गतिः किं प्रमाणम् ।" इति तट्टीकायां मल्लिनाथः ॥ गम्यते इति । गम्+कर्म्मणि क्तिन् । स्वरूपम् । यथा, तत्रैव । ६।३६।

"चरतस्तपस्तव वनेषु सदा
न वयं निरूपयितुमस्य गतिम् ।"

"तव वनेषु तपश्चरतोऽस्य गतिं स्वरूपं निरूपयितुम् ।" इति मल्लिनाथः ॥ विषयः । यथा, कुमारे । ५ । ६४ ।

"तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ।"

"मनोरथानां कामानां अगतिः अविषयः ।" इति मल्लिनाथः ॥ कर्म्मफलम् । यथा, भगवद्गीतायाम् । । ९ । १८ ।

"गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् ॥"

"गतिः कर्म्मफलम् ।" इति शाङ्करभाष्यम् ॥ ग्रहभेदेन गतिभेदो यथा,—

"अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः ।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः ॥"

इति सूर्य्यसिद्धान्तः ॥

तत्र तु नक्षत्रभेदेन बुधग्रहस्य गतिभेदो यथा, वृहत्संहितायाम् । ७ अध्याये ।

"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम् ।
जलदहनपवनभयकृत् धान्यार्घक्षयविवृद्धये वा ॥
विचरन् श्रवणधनिष्ठा प्राजापत्येन्दुवैश्वदेवानि ।
मृद्नन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम् ॥
रौद्रादीनि मघान्तान्युपाश्रिते चन्द्रजे प्रजापीड़ा ।
शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः ॥
हस्तादीनि विचरन् षड्भान्युपपीड़यन् गवामशुभः ।
स्नेहरसार्घविवृद्धिं करोति चोर्व्वीं प्रभूतान्नाम् ॥
आर्य्यम्णं हौतभुजं भद्रपदामुत्तरां यमेशञ्च ।
चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुसङ्क्षयकृत् ॥
आश्विनवारुणमूलान्युपमृद्नन् रेवतीञ्च चन्द्रसुतः ॥

यस्यभियमौजीविकसलिलजतुरमोपघातकरः ॥
पूर्व्वाद्यूचचितयादेकमपौन्द्रोः सुतोऽभिन्द्रीयात् ॥
क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः ॥
प्राकृतविमिश्रसङ्क्षिप्रतीक्ष्णयोगान्तघोरपापाख्याः ।
सप्तपराशरतन्त्रे गणत्रैः कीर्त्तिता गतयः ॥
प्राकृतसंज्ञा वायव्ययाम्यपैतामहानि बहुलाश्च ।
मिश्रा गतिः प्रदिष्टा शशिशिवपित्र्यभुजगदैवानि ॥
सङ्क्षिप्तायां पुष्यः पुनर्व्वसुः फल्गुनीद्वयं चेति ।
तीक्ष्णायां भद्रपदाद्वयं सशाक्राश्वयुक् पौष्णम् ॥
योगान्तिकेति मूलं द्वे चाषाढ़े गतिः सुतस्येन्दोः ।
घोराश्रवणस्त्वाष्ट्रं वसुदेव वारुणं चैव ॥
पापाख्या सावित्रं मैत्रं शक्राग्निदैवतं चेति ।
उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह ॥
चत्वारिंशत्त्रिंशद्द्विसमेता विंशतिर्दिनवकाश्च ।
नव मासार्द्धं दश चैकसंयुता प्राकृताद्यानाम् ॥
प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमम् ।
सङ्क्षिप्तमिश्रयोर्मिश्रमेतदन्यास्तु विपरीतम् ॥
ऋज्व्यतिवक्रा वक्रा विकला च मतेन देवलस्यैताः ।
पञ्च चतुर्द्व्येकाहा ऋज्व्यादीना षडभ्यस्ताः ॥
ऋज्वी हिता प्रजानामतिवक्रार्थं गतिर्विनाशयति ।
शस्त्रभयदा च वक्रा विकला भयरोगसञ्जननी ॥
पौषाषाढ़श्रावणवैशाखेष्विन्दव. समाघेषु ।
दृष्टो भयाय जगतः शुभफलकृत् प्रोषितस्तेषु ॥
कार्त्तिक्यश्वयुजि वा यदि मासे
दृश्यते तनुभवः शिशिरांशोः ।
शस्त्रचौरहुतभुग्गदतोय-
क्षुद्भयानि च तदा विदधाति ॥
रुद्धानि सौम्येऽस्तमिते पुराणि
यान्युन्नते तान्युपयान्ति मोक्षम् ।
अन्ये तु पश्चाद्गुदिते वदन्ति
लाभः पुराणां भवतीति तज्ज्ञाः ॥
हेमकान्तिरथवा शुकवर्णः
सस्यकेन मणिना सदृशो वा ।
स्निग्धमूर्त्तिरलघुश्च हिताय
व्यत्यये न शुभकृच्छशिपुत्त्रः ॥"
अन्येषामपि ग्रहाणां गतिस्तत्रैव क्रमशो विशेषतो द्रष्टव्या ॥)

गतिला, स्त्री, (गम् + "मिथिलादयश्च ।" उणां । १ । ५८ । इति इलच् मलोपे तुक् च ।) नदीविशेषः । परम्पराभेदः । इत्युणादिकोषः ॥ (वेत्रलता । इत्युज्ज्वलदत्तः ॥)

गत्वरः, त्रि, (गच्छतीति । गम् + "इण्नशजिसर्त्तिभ्यः क्वरप् ।" ३ । २ । १६३ । इति क्वरप् ।) गमनशीलः । इति व्याकरणम् ॥ (यथा, शान्तिशतके । १ । २० ।
"वीभत्सा विषया जुगुप्सिततमः कायो वयो गत्वरं
सर्व्वैर्बन्धुभिरध्वनीव पथिकैर्योगो वियोगावहः ॥"

गद, त् क अभ्रध्वनौ । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-अकं-सेट् ।) अभ्रध्वनौ मेघकर्तृकशब्दे । गदयति मेघः । इति दुर्गादासः ॥

गद, भाषे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) गदति । चारङ्कं कतिचिच्च संजगदिरे इति गणकृतानित्यत्वात् । इति दुर्गादासः ॥

गदं, क्ली, (गद्यते पीड्यतेऽस्मादनेन वा । गद + अपादाने करणे वा अप् ।) विषम् । इति राजनिर्घण्टः ॥

गदः, पु, (गद्यते रुज्यतेऽनेन गदयति वा । गद + करणे अप् । कर्त्तरि णिच् अच् वा ।) रोगः । (यथा, हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ।
"शत्रुः स्थानबलं प्राप्य विक्रमं कुरुते बली ।
तथा धान्वन्तरं प्राप्य विक्रमं कुरुते गदः ॥
"यावत् स्थानं समाश्रित्य विकारं कुरुते गदः ।
तावत्तस्य प्रतीकारः स्थानत्यागाद्बलीयसः ॥")
श्रीकृष्णभ्राता । इति हेमचन्द्रः । ३ । १२७ ॥
(यथा, भागवते । १ । १४ । २८ ।
"हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः ॥")
भाषणञ्च । (औषधम् । यथा, महाभारते । १ । ४३ । २१ ।
"अथ शुश्राव गच्छन् स तक्षको जगतीपतिम् ।
मन्त्रैर्गदैर्विषहरै रक्ष्यमाणं प्रयत्नतः ॥"
असुरविशेषः । यथा, वायुपुराणे ५ अध्याये
"गदो नामासुरो ह्यासीत् वज्राद्वज्रतरो दृढ़ः ॥")

गदयित्नुः, पु, (गदयति कामयुक्तं करोतीति । "स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ।" उणां । ३ । २९ । इति इत्नुच् णेरयादेशश्च ।) कन्दर्पः । इति मेदिनी । १८२ ॥

गदयित्नु., त्रि (गदयति वाचालं वावदूकं कामयुक्तं वा करोतीति । "स्तनिहृषीति ।" उणां । ३ । २९ । इति इत्नुच् णेरयादेशश्च ।) जल्पाकः । कामुकः । इति मेदिनी । १८२ ॥

गदा, स्त्री, (गदयति पीड़यत्यनया विपक्षमितिशेषः । गद् + णिच् + करणे अप् + टाप् च । गदयतीति णिच् अच् वा ।) स्वनामख्यातलौहमयास्त्रम् । इति मेदिनी । दे । ४ ॥ (यथा महाभारते । ६ । ५६ । ४५ ।
"तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः ।
अभिदुद्राव वेगेन धार्त्तराष्ट्रं वृकोदरः ॥"
गदायुद्धस्य गतिप्रहारादिभेदो यथा तत्रैव । ६ । ५७ । १७—२० ।
"अचरद्भीमसेनस्तु मार्गान् बहुविधांस्तथा ।
मण्डलानि विचित्राणि गतप्रत्यागतानि च ॥
अस्त्रयन्त्राणि चित्राणि स्थानानि विविधानि च ।
परिमोक्षं प्रहाराणां वर्ज्जनं परिवारणम् ॥
अभिद्रवणमाक्षेपमवस्थानं सविग्रहम् ।
परिवर्त्तनसंवर्त्तमवप्लुतमुपप्लुतम् ॥
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ।
एवं तौ विचरन्तौ तु न्यघ्नतां वै परस्परम् ॥"
भगवतो विष्णोर्गदा तु गदसंज्ञकस्यासुरविशेषस्यास्थ्ना देवशिल्पिना विश्वकर्म्मणा निर्म्मिता । अतएवासौ गदेति नाम्ना प्रसिद्धा अपरा गदा तु एतद्गुणलक्षणेनैव सिद्धेति बोध्यम् । यथा, वायुपुराणे गयामाहात्म्ये ५ अध्याये ।
"गदो नामासुरो ह्यासीत् वज्राद्वज्रतरो दृढ़ः ।
प्रार्थितो ब्रह्मणे प्रादात् स्वशरीरास्थि दुस्त्यजम् ।
ब्रह्मोक्तो विश्वकर्म्मापि गदां चक्रेऽद्भुतां तदा ॥"
योगविशेषः । यथा, लघुजातकप्रकरणे । १० । ३ ।
"अनन्तरयोः केन्द्रयोर्यदा सर्व्वे ग्रहा भवन्ति ।
तदा गदानाम योगो भवति ॥")
पाटलाद्रुमः । इति शब्दचन्द्रिका ॥

गदाख्यं, क्ली, (गदत्वेन रोगनाशकतया आख्यायते विश्रूयते इति गद इत्याख्याऽस्येति वा ।) कुष्ठम् । इति रत्नमाला ॥ कुड़् इति भाषा ॥

गदागदौ, पु, (गदं रोगं आगदयतः नाशयतः इति । आ + गद + णिच् + अच् । यद्वा गदं रोगं आगच्छति प्राप्नोतीति गदागं रूपं दायतः विशोधयत. इति । दैप् शोधने + कः ।) अश्विनीकुमारौ । इति त्रिकाण्डशेषः ॥ द्विवचनान्तोऽयं शब्दः ॥

गदाग्रजः, पुं, (गदस्य वसुदेवपुत्रभेदस्य अग्रजः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ४ । २३ । १२ ।
"तावन्न योगगतिभिर्यतिरप्रमत्तो
यावन्न गदाग्रजकथासु रतिं न कुर्य्यात् ॥")

गदाग्रणीः, पु, (अग्रे नीयते । अग्र + नी + क्विप् गदानां रोगाणां गदेषु वा अग्रणीः ज्यायान् । अचिरात् संहारकत्वात् तथात्वम् ।) क्षयरोगः । इति राजनिर्घण्टः ॥

गदाधरः, पुं, (गदां धरति धारयति वा । धृ + अच् । यद्वा धरतीति धरः गदायाः धरः । धृ + अन्तर्णिजन्तात् अजिति.) विष्णुः । इति हलायुधः ॥ (यथा, भागवते । १ । ८ । ३९ ।
"नेयं शोभिष्यते तत्र यथेदानीं गदाधर ।
त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥"
अस्य गदाधारणकथा यथा, वायुपुराणे गयामाहात्म्ये ५ अध्याये ।
"अथ कालेन महता मनौ स्वायम्भुवेऽन्तरे ।
हेतिरक्षो ब्रह्मपुत्त्रस्तपस्तेपे सुदारुणम् ॥
दिव्यवर्षसहस्राणां शतं वायुमभक्षयत् ।
उन्मुखश्चोर्द्ध्वबाहुश्च पादाङ्गुष्ठभरेण हि ॥
एकेनातिष्ठदव्यग्रः शीर्य्यमाणनिराशनः ।
ब्रह्मादींस्तपसा तुष्टान् वरं वव्रे वरप्रदान् ॥
देवैर्दैत्यैश्च शस्त्रास्त्रैर्विविधैर्भुजादिभिः ।
कृष्णेशानस्य चक्राद्यैरवध्यः स्यां महाबलः ॥
तथेत्युक्तान्तर्हितास्ते हेतिर्देवानधाजयत् ।
इन्द्रत्वमकरोद्धेतिर्भीता ब्रह्महरादयः ॥
हरिन्ते शरणं जग्मुरूचुर्हेतिं जहीति तान् ।
ऊचे हरिरवध्योऽयं हेतिर्देवासुरैः सुराः ॥
महास्त्रं मे प्रयच्छध्वं हेतिं हन्मि हि येन तम् ।
इत्युक्तास्ते ततो देवा गदान्तां हरये ददुः ॥
दधार तां गदामादौ देवैरुक्तो गदाधरः ।
गदया हेतिमाहत्य देवेभ्यस्त्रिदिवं ददौ ॥"

मुद्रितस्वात्मिकेव भगवतो विष्णोः कौमोदकीनाम गदेति अध्यात्मशास्त्रेषु परिदृश्यते । तथाच विष्णुसहस्रनामभाष्ये ।
"मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम् ।
धारयन् लोकरक्षार्थमुक्तश्चक्रगदाधरः ॥"
महादेवः । स तु गयातीर्थे वर्त्तते । यथा, महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे ।
"भोगपुरे भोगनाथो गयायाञ्च गदाधरः ॥"
गदाधारिणि त्रि ॥)

गदाभृत्, पु, (गदां बिभर्त्तीति । गदा+भृ+क्विप् । तुक् च ।) विष्णुः । इति हेमचन्द्रः । २ । १३३ ॥ (यथा, भागवते । १ । १३ । १० ।
"भवद्विधा भागवतास्तीर्थीभूताः स्वयं विभो ।
तीर्थीकुर्व्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता ॥")

गदाम्बरः, पु, (गदं सशब्दं अम्बरं यस्मात् ।) मेघः । इति त्रिकाण्डशेषः ॥

गदारातिः, पुं, (गदस्य रोगस्य अरातिः शत्रुः तन्नाशकत्वात् ।) औषधम् । इति राजनिर्घण्टः ॥

गदाह्वं, क्ली, (गद एव आह्वा आख्या यस्य ।) कुष्ठम् । इति शब्दरत्नावली ॥ कुड़् इति भाषा ॥

गदी, [न्] पुं, (गदा विद्यते अस्ति वास्य । गदा+इनिः ।) विष्णुः । इति हारावली । ६ ॥ (यथा, भगवद्गीतायाम् । ११ । १७ ।
"किरीटिनं गदिनं चक्रिणञ्च
तेजोराशिं सर्व्वतो दीप्तिमन्तम् ॥")
गदाविशिष्टे रोगयुक्ते च त्रि ॥

गद्गदः, पु, स्खलत्पदकण्ठनाभिधायी । अव्यक्तवक्ता । तस्य सम्प्राप्तिपूर्व्वकलक्षणं यथा,—
"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान् ॥"
इति माधवकरः ॥
(अस्फुटोक्ते त्रि । यथा, अमरुशतके । ५३ ।
"खेदोऽस्मास्तु न मेऽपराध्यति भवान् सर्व्वेऽपराधा मयि ।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते ॥")

गद्गदध्वनिः, पुं, (गद्गदेन वायुपरिचालितश्लेष्मादिना योऽस्पष्टीकृतो ध्वनिः । गद्गदरूपो ध्वनिर्वा ।) हर्षशोकादिना अस्पष्टध्वनिः । तत्पर्य्यायः । मन्मनः २ । इति त्रिकाण्डशेषः ॥

गद्यं, क्ली, (गद्यते च्छन्दसा विना केवलं कथाप्रबन्धैरेव विरच्यते इति । गद+"गदमदचरयमश्चानुपसर्गे ।" ३ । १ । १०० । इति यत् ।) पद्यभिन्नम् । कवित्वतम् । अपादः पदसन्तानः । इत्यमरः । ३ । ५ । ३१ ॥ कवित्वभिन्ने त्रि । यथा गद्यो व्यवहारः गद्या वाक् गद्यं वचः । इति तट्टीकायां भरतः ॥ (यथा, महाभारते ।३।२६।३ ।
"यजुषामृचां साम्नाञ्च गद्यानाञ्चैव सर्व्वशः ।
आसीदुच्चार्य्यमाणानां निस्वनो हृदयङ्गमः ॥")
"अपादः पदसन्तानो गद्यमाख्यायिका कथा ॥"
इति दण्डी ॥
आख्यायिका तु आचष्टे प्रतिपादयति अत्यर्थं आख्यायिका यत्र नायकेन स्वयमुपलब्धोऽर्थ आख्यायते इत्येके । ख्यातायां सत्यार्थायां कथायाम् आख्यायिका । सा च माधविका-वासवदत्ता-हर्षचरितादिः । कथा तु । प्रबन्धस्य कल्पना रचना बहुमृषा स्तोकसत्या कथा ।
प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः ।
परम्पराश्रया यस्मात् सा मताख्यायिका क्वचित् ॥
इति कोलाहलाचार्य्यः ॥
कथा कादम्बर्य्यादिः ।" इत्यमरटीकायां भरतः ॥
(गद्यन्तु त्रिधा विभक्तं यथा छन्दोमञ्जर्य्याम् ।
"अपादं पदसन्तानं गद्यं तच्च त्रिधा मतम् ।
वृत्तकोत्कलिकाप्रायचूर्णकप्रभेदतः ॥"
एतेषामपि लक्षणं यथा तत्रैव ।
"अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम् ।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥
भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम् ॥"
मतभेदेनैतत् क्वचित् चतुर्द्धापि दृश्यते । यथा, साहित्यदर्पणे । ६ । ३३५ ।
"वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्व्विधम् ॥
आद्यं समासरहितं वृत्तभागयुतं परम् ।
अन्यद्दीर्घसमासाढ्यं तुर्य्यञ्चाल्पसमासकम् ॥")

गद्यानक, क्ली, (गद्येन औषधादिपरिमाणभेदेन आनीयते इति । आ+नी+डः । ततः स्वार्थे कन् ।) अष्टचत्वारिंशद्रक्तिकापरिमाणम् ।
("तुल्या यवाभ्यां कथितात्र गुञ्जा
वल्लस्त्रिगुञ्जो धरणञ्च तेऽष्टौ ।
गद्याणकस्तद्द्वयमिन्द्रतुल्यै-
र्वल्लैस्तथैको घटकः प्रदिष्टः ॥"
इति लीलावती ॥)
चतुःषष्टिगुञ्जापरिमाणम् । इति वैद्यकम् ॥
गद्याणकमिति क्वचित् पाठः ॥

गन्ता, [ऋ] त्रि, (गच्छतीति । गम्+कर्त्तरि तृच् ।) गमनकर्त्ता । इति व्याकरणम् । (यथा, नलोपाख्याने । २४ । ३३ ।
"न ह्येकाह्ना शतं गन्ता त्वदृतेऽन्यः पुमानिह ॥"
गच्छति प्राप्नोतीति शीलार्थे भाविकाले तृन् । यथा, भगवद्गीतायाम् । २ । ५२ ।
"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च ॥"
अत्र शीलार्थे तृन्नन्तत्वात् न कर्म्मणि षष्ठीति बोध्यम् ॥)

गन्तुः, पुं, (गच्छतीति । गम्+"सितनिगमीति ।" उणां १ । ७० । इति तुन् ।) पथिकः । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे । ३ । ५४ । १८ ।
"युयोत नो अनपत्यानि गन्तोः प्रजावान् नः पशुमाँ अस्तु गातुः ॥")

गन्त्री, स्त्री, (गम्यतेऽनया इति । गम्+"सर्व्वधातुभ्यः ष्ट्रन् ।" उणां ४ । १५८ । इति करणे ष्ट्रन् । ततो ङीष् ।) वृषवहनीयशकटम् । गरुर गाड़ि इति भाषा । इत्यमरः । २ । ८ । ५२ ॥ (गच्छतीति । गम्+कर्त्तरि तृन्+स्त्रियां ङीप् । गमनशीला गमनकारिणी वा । यथा, याज्ञवल्क्ये । ३ । १० ।
"गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्त्यलोको न यास्यति ॥")

गन्त्रीरथः, पु, (गन्त्रीणां गच्छन्तीनां स्त्रीणां गमनाय यो रथः ।) शकटम् । तत्पर्य्यायः । मठः २ । इति हारावली । १६८ ॥

गन्ध, क ङ अर्द्दि । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ङ, गन्धयते । अर्द्दि हिंसायाम् । गतिहिंसायाचनेष्विति रमानाथः । इति दुर्गादासः ॥

गन्धं, क्ली, (गन्धो विद्यतेऽस्य । अर्श आदित्वादच् ।) कृष्णागुरु । इति राजनिर्घण्टः ॥

गन्धः, पुं, (गन्ध+घञाद्यच् ।) आमोदः । इति विश्वः । स तु घ्राणग्राह्यपृथिवीगुणः । यथा,—
"घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः ।
सौरभश्चासौरभश्च स द्वेधा परिकीर्त्तितः ॥"
इति भाषापरिच्छेदे । १०३ ॥
(अस्य लक्षणान्तरं यथा, भावमात्रवृत्त्यगुणत्वव्याप्यजातिमत्त्वं गन्धत्वं यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमिति ॥) स तु दशविधः । (यथा, महाभारते । १४।५०।४०-४२।
"शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
एते पञ्च गुणा भूमेर्विज्ञेया द्विजसत्तमाः ॥
पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः ।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून् गुणान् ॥
इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा ।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च ।
एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत ॥"
एतेषामपि केषु को गन्ध इत्येतद्विवृतिमाह ।)
इष्टः १ कस्तूरिकादौ । अनिष्टः २ शवादौ । मधुरः ३ मधुपुष्पादौ । अम्लः ४ आम्रातकादौ । कटुः ५ मरिचादौ । निर्हारी ६ हिङ्ग्वादौ । संहतः ७ चित्रगन्धः अनेकद्रव्यगतः । स्निग्धः ८ सद्यःसम्पृक्तादौ । रूक्षः ९ सार्षपतैलादौ । विशदः १० शाल्यन्नादौ ॥
सौरभम् । तत्तु पञ्चविधम् । यथा,—
"गन्धञ्च सम्यक् प्रवदामि पुत्त्र वेतालभैरव ।
चूर्णीकृतो वा घृष्टो वा दाहाकर्षित एव वा ॥
रसः सम्मर्द्दजो वापि प्राण्यङ्गोद्भव एव वा ।
गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिदायकः ॥
गन्धचूर्णं गन्धपत्रं चूर्णं सुमनसां तथा ।
प्रशस्तगन्धयुक्तानां पत्रचूर्णानि यानि च ॥
तानि गन्धाह्वयानि स्युः स गन्धः प्रथमः स्मृतः ।१
घृष्टो मलयजो गन्धः प्रस्तरेण समेरितः ॥
अगुरुप्रभृतिश्चापि यस्य पङ्कः प्रदीयते ।
घृष्ट्वा स घृष्टो गन्धोऽयं द्वितीयः परिकीर्त्तितः ॥२
देवदार्व्वगुरुप्रभृतिशालसाराम्लपङ्कजाः ।
प्रियादीनाञ्च यो दग्ध्वा गृह्यते दाहजो रसः ॥
स दाहाकर्षितो गन्धस्तृतीयः परिकीर्त्तितः ।३।
सगन्धकरवीरविल्वगन्धिनीसिपर्णं तथा ॥

प्रभृतीनां रसो योऽसौ निष्पीड्य परिगृह्यते ।
स सम्मर्द्दोद्भवो गन्धः संमर्द्देन इतीष्यते ॥ ४ ॥
मृगनाभिसमुद्भूतस्तत्कोषोद्भव एव वा ।
गन्धः प्राण्यङ्गजः प्रोक्तो मोददः स्वर्गवासि-
नाम् ॥ ५ ॥
कर्पूरगन्धसाराद्याः चोदे दृष्टे च संस्थिताः ।
चन्द्रभागादयश्चापि रसे पङ्के च सङ्गताः ॥
गन्धसारस्तु सर्व्वत्र संसर्गादौ प्रयुज्यते ।
मृगनाभिर्भवेद्दृष्टश्चूर्णोऽप्यन्यस्य योगतः ॥
एवं सर्व्वस्तु सर्व्वत्र गन्धो भवति पञ्चधा ।
दृष्टादिभावादन्योऽयं गन्धः प्रीतिकरः परः ॥
गन्धस्य विस्तरो भेदः प्रोक्तः कालीयकादयः ।
सर्व्वे पञ्चविधेष्वेव प्रविष्टो भवति क्षणात् ॥"*॥
"गन्धो मलयजो यस्तु देवे पैत्रे च सम्मतः ।
तत्पङ्को वा रसो वापि चूर्णो वा विष्णुतुष्टिदः ॥
सर्व्वेषु गन्धजातेषु प्रशस्तो मलयोद्भवः ।
तस्मात् सर्व्वप्रयत्नेन दद्यान्मलयजं सदा ॥
कृष्णागुरुः सकर्पूरः सहितो मलयोद्भवैः ।
वैष्णवीप्रीतिदो गन्धः कामाख्यायाश्च भैरव ! ॥
कुङ्कुमागुरुकस्तूरीचन्द्रभागैः समीकृतैः ।
त्रिपुराप्रीतिदो गन्धस्तथा चण्डाय शम्भुना ॥
दैवतोद्देशपूर्व्वेण गन्धान् सम्पूज्य साधकः ।
देवायेष्टाय विसृजेत् सर्व्वशाठ्येषु पूजकः ॥
गन्धेन लभते कामं गन्धो धर्म्मप्रदः सदा ।
अर्थानां साधको गन्धो गन्धे मोक्षः प्रतिष्ठितः ॥
अथ वां कथितो गन्धः पुत्रौ वेतालभैरवौ ! ॥
इति कालिकापुराणे ६८ अध्याय. ॥
प्रतिवेशी । लेशः । सम्बन्धः । गन्धकः । इति मेदिनी ॥ (यथा, प्रयोगामृते ।
"शोधितो यस्तु गन्धः स्यात् जरामृत्युरुजापहः ।
अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽस्यितः ॥")
गर्व्वः । इति हेमचन्द्रः ॥ शोभाञ्जन । इति शब्दरत्नावली ॥ घृष्टचन्दनम् । यथा, "घृष्टो मलयजो गन्धः ।" इति शुद्धितत्त्वम् ॥

गन्धकः, पुं, (उग्रो गन्धोऽस्यास्तीति । "अर्श आदिभ्योऽच् ।" ५।२।१२७। इत्यच् ततः स्वार्थे कन् ।) शोभाञ्जनवृक्षः । इति शब्दरत्नावली ॥ उपधातुविशेषः । तत्पर्य्यायः । गन्धाश्मा २ सौगन्धिकः ३ । इत्यमरः । २।९।१०२ ॥ गन्धिकः ४ सुगन्धिकः ५ । इति तट्टीका ॥ गन्धपाषाणः ६ पामाघ्नः ७ । इति रत्नमाला ॥ गन्धमोदनः ८ पूतिगन्धः ९ अतिगन्धः १० वरः ११ सुगन्धः १२ दिव्यगन्धः १३ गन्धः १४ रसगन्धकः १५ कुष्ठारिः १६ क्रूरगन्धः १७ कीटघ्नः १८ शरभूमिजः १९ गन्धी २० । इति शब्दरत्नावली ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तीव्रगन्धत्वम् । अतिवह्निकारित्वम् । विषकुष्ठकण्डूतिखजुत्वगदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ कृमिश्लीहनेत्ररोगनाशित्वम् । इति राजवल्लभः ॥ तस्य भेदाः ।
"श्वेतो रक्तः पीतश्च नीलश्चेति चतुर्विधः ।
गन्धको वर्णतो ज्ञेयो भिन्नभिन्नगुणाश्रयः ॥
श्वेतः कुष्ठापहारी स्याद्रक्तो लोहप्रयोगकृत् ।
पीतो रसे प्रयोगार्हो नीलो वर्णान्तरोचितः ॥"
इति राजनिर्घण्टः ॥ * ॥
अथ गन्धकस्योत्पत्तिनामलक्षणगुणाः ।
"श्वेतद्वीपे पुरा देव्याः क्रीडन्त्या रजसाप्लुतम् ।
दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ ।
प्रसृतं यद्रजस्तस्माद्गन्धकः समजायत ॥
गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो बलिर्वसयश्चापि च ॥
चतुर्द्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः ।
रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने ।
व्रणविलेपने श्वेतः कृष्णः श्रेष्ठः सुदुर्लभः ॥"
श्रेष्ठो हेमक्रियादिषु सर्व्वत्र प्रशस्ततरः ॥ * ॥
"गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः ।
पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् ॥
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ।

अशोधितो गन्धक एष कुष्ठं
करोति तापं विषमं शरीरे ।
सौख्यञ्च रूपञ्च बलं तथौजः
शुक्रं निहन्त्येव करोति चासम् ॥"*॥

तस्य शोधनविधिर्यथा,—
"लोहपात्रे विनिःक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते घृते तत्समानं क्षिपेद्गन्धकजं रजः ॥
विद्रुतं गन्धकं दृष्ट्वा तनुवस्त्रे विनिःक्षिपेत् ।
यथा वस्त्राद्विनिःसृत्य दुग्धमध्येऽखिलं क्षिपेत् ॥
एवं स गन्धकः शुद्धः सर्व्वकर्म्मोचितो भवेत् ॥"
इति भावप्रकाशः ॥
"शोधितो यस्तु गन्धः स्यात् जरामृत्युरुजापहः ।
अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽस्थितः ॥"
इति प्रयोगामृतम् ॥

गन्धकन्दकः, पुं, (गन्धमूलः गन्धप्रधानो वा कन्दोऽस्य ततः कप् स्वार्थे कन् वा ।) कशेरु । इति वैद्यकम् ॥

गन्धकारिका, स्त्री, (गन्धं सुरभिप्रधानं मण्डनं करोतीति । गन्ध + कृ + ण्वुल् ततष्टाप् कापि अत इत्वञ्च ।) सैरिन्ध्री । सा तु परवेश्मस्था स्ववशा शिल्पकारिका । इति हलायुधः ॥

गन्धकालिका, स्त्री, (गन्धं प्रशस्तगन्धं पराशरमुनेर्व्वरप्रभावेन दूरवाहिगात्रसौरभं कलयति धारयतीति । कल + णिच् + अच् ङीप् च । ततः स्वार्थे कन् टाप् च पूर्व्वह्रस्वः ।) व्यासमाता । इति हेमचन्द्रः ॥

गन्धकाली, स्त्री, (गन्धं प्रशस्तदूरवाहिगात्रसौरभं कलयतीति । कल + णिच् अच् ङीप् च । यद्वा, गन्धवती काली । मध्यपदलोपि समासः ।) व्यासमाता । इति शब्दरत्नावली ॥ (इयं हि दाशराजकन्या पुरा बाल्यसमये मत्स्यगन्धा कालीत्येतन्नाम्ना ख्यातासीत् । ततः कदाचित् नदीपरपारं जिगमिषुणा मुनिप्रवरपराशरेण सङ्गता तस्यैव ऋषेर्वरप्रभावेन निजगात्रे पद्मपुष्पवत् सौरभमवाप्य ततः प्रभृति पद्मगन्धा गन्धकालीति नाम्ना च विश्रुताऽभवत् । परं तस्यामेव कन्यायां तदा पराशरौरसात् कानीनपुत्रो महर्षिर्व्यासः सञ्जातः । ततो गच्छति काले महात्मना भीष्मेण राज्यं दारपरिग्रहञ्च न करिष्यामीति निदारुणं प्रतिश्रुत्य दाशराजसकाशात् समानीता भुवनविश्रुता सा पद्मगन्धाद्या गन्धकाली तत्कामुकाय पित्रे शान्तवे समर्पिता । एतद्विवरणं महाभारते१ । सम्भवे । ९९-१०० । अध्याययोर्विशेषतो दर्शनीयम् ॥ अस्या हेतोरेव नरपतिरुग्रायुधः समरे भीष्मेण निहतः । यथा, हरिवंशे ।२०।४७-५० ।
"स चापुग्रायुधस्तात । दुर्बुद्धिरभवत्तदा ।
प्रदीप्तचक्रो बलवान् नीपान्तकरणोऽभवत् ॥
स दर्पपूर्णो हत्वाजौ नीपानन्यांश्च पार्थिवान् ।
पितर्य्युपरते मह्यं श्रावयामास किल्बिषम् ॥
मामामात्यैः परिवृतं शयानं धरणीतले ।
उग्रायुधस्य राजेन्द्र ! दूतोऽभ्येत्य वचोऽब्रवीत् ॥
अद्य त्वं जननीं भीष्म ! गन्धकालीं यशस्विनीम् ।
स्त्रीरत्नं मम भार्य्यार्थे प्रयच्छ कुरुनन्दन ! ॥"
ईदृशं जुगुप्सितवाक्यं दूतमुखादाकर्ण्यामितप्रतापो महात्मा भीष्मः अशौचान्ते तं दुरात्मानं समराङ्गणे समाहूय निपात्य च राज्ञे काम्पिल्याय तत् पैतृकं राज्यं समर्पयत् । अस्मिन्नेवाध्याये एतत् सर्व्वं वृत्तं सविशेषं द्रष्टव्यम् ॥)

गन्धकाष्ठं, क्ली, (गन्धप्रधानं सुगन्धसमन्वितं काष्ठमस्य । कर्म्मधारयो वा ।) अगुरुकाष्ठम् । इति त्रिकाण्डशेषः ॥ शम्बरचन्दनम् । इति राजनिर्घण्टः ॥

गन्धकुटी, स्त्री, (गन्धस्य सुगन्धस्य कुटी आलय इव गन्धबाहुल्यात् तथात्वम् ।) मुरानामगन्धद्रव्यम् । इत्यमरः ।२।४।१२३ ॥

गन्धकुसुमा, स्त्री, (गन्धं सुरभियुक्तं कुसुमं यस्याः ।) गणिकारीवृक्षः । इति राजनिर्घण्टः ॥

गन्धकेलिका, स्त्री, (गन्धं केलयति गमयति प्रापयति सन्निकर्षस्थानिति । गन्ध + केल + णिच् + अच् ततः स्वार्थे कन् अत इत्वञ्च । गन्ध केलसीति ण्वुल् वा ।) कस्तूरी । इति राजनिर्घण्टः ॥

गन्धकोकिला, स्त्री, (गन्धमूलिका गन्धप्रधाना वा कोकिला ।) गन्धद्रव्यविशेषः । अस्या गुणाः । स्निग्धत्वम् । उष्णत्वम् । कफनाशित्वम् । तिक्तत्वम् । सुगन्धित्वम् । इति भावप्रकाशः ।

गन्धखेड़ं, क्ली, (गन्धस्य खेडः खेलोऽत्र । डलयोरैक्यात्तथात्वम् ।) गन्धवीरणम् । गन्धवेणा इति भाषा । तत्पर्य्यायः । भूतृणम् २ रौहिषम् ३ गोमयप्रियम् ४ । इति रत्नमाला ॥

गन्धखेड़कं, क्ली, (गन्धेन खेड़ति खेलतीति । खेल् + ण्वुल् । गन्धस्य खेड़ः खेलोऽत्र इति कप् वा ।) गन्धतृणम् । इति शब्दरत्नावली ॥

गन्धचेलिका, स्त्री, (गन्धं चेलति गच्छतीति । चेल् + ण्वुल् + टाप् अत इत्वञ्च ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्देऽस्या विवृतिर्वर्णिता ॥)

गन्धजातं, क्ली, (गन्धेन सह जातं उत्पन्नम् ।) तेजपत्रम् । इति शब्दरत्नावली ॥

गन्धज्ञा, स्त्री, (गन्धं इष्टानिष्टगन्धं जानाति ज्ञायते अनया इति । ज्ञा + करणे कः ततष्टाप् ।) नासिका । इति हेमचन्द्रः ।३।२४४ ॥

गन्धतूर्य्यं, क्ली, (गन्धे विजयिनोत्सवे शोणितवसादिगन्धयुक्तहिंसाप्रधानस्थाने रणक्षेत्रे इत्यर्थः । आहवमात्रे स्थितं वा यत् तूर्य्यम् ।) वाद्यविशेषः । तत्पर्य्यायः । रणतूर्य्यम् २ महावाद्यः ३ । इति शब्दरत्नावली ॥

गन्धत्वग्, क्ली, (गन्धं सुगन्धान्वितं त्वगम् ।) सुगन्धत्वगम् । तत्पर्य्यायः । सुगन्धभूत्वगम् २ सुरसः, सुरभिः सुगन्धिः ५ सुखवासः ६ । अस्य गुणाः । सुगन्धित्वम् । इषत्तिक्तत्वम् । रसायनत्वम् । स्निग्धत्वम् । मधुरत्वम् । शीतलत्वम् । कफपित्तश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

गन्धत्वक्, क्ली, (गन्धयुक्ता गन्धप्रधाना वा त्वगस्य ।) एलवालुकम् । इति राजनिर्घण्टः ॥

गन्धदला, स्त्री, (गन्धयुक्तं दलं पत्रमस्याः ।) अजमोदा । इति राजनिर्घण्टः ॥

गन्धधूमजः, पुं, (गन्धाढ्यात् धूमात् जायते उत्पद्यते इति । जन् + ड ।) खादुनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

गन्धधूलिः, स्त्री, (गन्धप्रकाशिका धूलिः चूर्णं वा यस्याः ।) कस्तूरी । इति हेमचन्द्रः ।

गन्धनं, क्ली, (गन्ध गतिहिंसायाचनेषु + भावे ल्युट् ।) उत्साहः । प्रकाशनम् । सूचनम् । हिंसा । इति मेदिनी ॥ ने । ५७ ॥

गन्धनकुलः, पुं, (गन्धः दुर्गन्धप्रधानो नकुल इव ।) छुछुन्दरी । इति हारावली ॥ ८३ ॥ छुंछा इति भाषा ॥

गन्धनाकुली, स्त्री, (गन्धयुक्ता नाकुली रास्ना ।) रास्ना । इत्यमरः ।२।४।११४॥ कन्दविशेषः । तत्पर्य्यायः । महासुगन्धा २ सुवहा ३ सर्पाक्षी ४ फणिहन्त्री ५ नकुलाढ्या ६ अहिभुक् ७ विषमर्द्दनिका ८ अहिमर्द्दनी ९ विषमर्द्दनी १० महाहिगन्धा ११ अहिलता १२ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । त्रिदोषानेकविषनाशित्वम् । नाकुल्याः किञ्चित् श्रेष्ठत्वम् । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

"नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ।
भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान् ॥"
इति भावप्रकाशः ॥

("रास्ना युक्तरसा युक्ता श्रेयसी सुवहा सहा ।
सुगन्धा सर्व्वगन्धाढ्या नाकुली गन्धनाकुली ॥"
इति वैद्यकरत्नमालायाम् ॥)

गन्धनामा, [न्] पुं, (गन्धेति पदपूर्व्वं नामास्य ।) रक्ततुलसी । इति रत्नमाला ॥

गन्धनाम्नी, स्त्री, (गन्धनामन् + संज्ञायां ङीप् जातौ नान्तत्वाद् ङीप् वा ।) क्षुद्ररोगविशेषः । तत्लक्षणम् । यथा,—

"माक्षुकपासपार्श्वेषु कक्षास्फोटी सवेदनाम् ।
पित्तप्रकोपसम्भूतां कक्षामिति विनिर्द्दिशेत् ॥
एकान्तु तादृशीं दृष्ट्वा पिडकां स्फोटसन्निभाम् ।
त्वग्गतां पित्तकोपेन गन्धनाम्नीं प्रचक्षते ॥"
तादृशीं बाह्वादिषु कक्षा सवेदना च ॥ ६ ॥

तच्चिकित्सा यथा,—

"कक्षाञ्च गन्धनाम्नीञ्च चिकित्सेत् चिकित्सकः ।
पैत्तिकस्य विसर्पस्य क्रियया पूर्व्वमुक्तया ॥"
इति भावप्रकाशः ॥

गन्धनालो, स्त्री, (गन्धाय गन्धज्ञानार्थं नाली प्रणालीव । गन्धग्रहणार्थं नालीरं वा ।) नासिका । इति त्रिकाण्डशेषः ॥

गन्धनिलया, स्त्री, (गन्धस्य इष्टानिष्टघ्राणस्य निलया आश्रयीभूता । गन्धस्य निलयोऽत्र वा स्त्रियां टाप् ।) नवमल्लिका । इति शब्दचन्द्रिका ॥

गन्धनिशा, स्त्री, (गन्धात् गन्धहेतोर्गन्धेन वा निशा हरिद्रेव ।) गन्धपत्रा । इति राजनिर्घण्टः ॥

गन्धपत्र, पुं (गन्धयत् पत्रमस्य ।) श्वेततुलसी । इति रत्नमाला ॥ मरुवः । वर्व्वरः । नारङ्गः । विल्वः । इति राजनिर्घण्टः ॥

गन्धपत्रा, स्त्री, (गन्धाढ्यं पत्रमस्याः ।) शटीभेदः । पलाश इति भाषया प्रसिद्धा । तत्पर्य्यायः । स्थूला २ तिक्तकन्दिका ३ वनजा ४ शटिका ५ वन्या ६ तवक्षीरी ७ एकपत्रिका ८ गन्धपीता ९ पलाशान्ता १० गन्धाढ्या ११ गन्धपत्रिका १२ दीर्घपत्रा १३ गन्धनिशा १४ वेदसुखा १५ सुपाकिनी १६ । अस्या गुणाः । कटुत्वम् । स्वादुत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । कफवासकासच्छर्द्दिज्वरनाशित्वम् । पित्तकोपकारित्वञ्च । इति राजनिर्घण्टः ॥

गन्धपत्रिका, स्त्री, (गन्धपत्रा + संज्ञायां कन् अत इत्वञ्च ।) गन्धपत्रा । अजमोदा । इति राजनिर्घण्टः ॥ (विवरणमस्या गन्धपत्राशब्दे ज्ञातव्यम् ॥)

गन्धपत्री, स्त्री, (गन्धपत्र + गौरादित्वात् ङीष् ।) अम्बष्ठा । अश्वगन्धा । अजमोदा । इति राजनिर्घण्टः ॥

गन्धपलाशिका, स्त्री, (गन्धाढ्यं पलाशं पत्रमस्याः ङीप् । संज्ञायां कन् टाप् पूर्व्वह्रस्वश्च । कप् टाप् अत इत्वञ्च इत्येके ।) हरिद्रा । इति हारावली । ६३ ॥

गन्धपलाशी स्त्री, (गन्धाढ्यं पलाशं पत्रमस्याः । गौरादित्वात् ङीष् ।) शटी । इति भावप्रकाशः ॥ (यथाह [illegible] र्थचिन्तामणि ।

"भवेद् गन्धपलाशी तु कषाया ग्राहिणी लघुः ।
तिक्ता तीक्ष्णा च कटुकाऽनुष्णास्यमलनाशिनी ।
शोथकासव्रणश्वासशूलहिक्काग्रहापहा ॥")

गन्धपाषाणः, पुं, (गन्धयुक्तः पाषाणः । पाषाणस्येव काठिन्यात् तथात्वम् ।) गन्धकः । इति जटाधरः ॥ (यथास्य पर्य्यायाः ।

"गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो बलिर्व्वसारश्चापि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

अनेनास्य यथाप्रशस्तश्च यथा,—

"गन्धपाषाणचूर्णेन यवक्षारेण लेपितम् ।
सिध्मनाशं प्रयात्याशु कटुतैलयुतेन तु ॥"
इति वैद्यकचक्रपाणिसंग्रहे कुष्ठरोगाधिकारे ॥)

गन्धपिशाचिका, स्त्री, (गन्धेन पिशाचिका इव । पिशाचिका तामसप्रकृतिरूपदेवभेदः तस्या इव गन्धत्वात् तथात्वम् । नैवास्याः सर्व्वाङ्गीनत्वोपमानम् । किन्तु गन्धमात्रग्रहणादंशेनैव सादृश्यमिति बोध्यम् ।) धूपः । इति हेमचन्द्रः । ४ । ३१४ ॥

गन्धपीता, स्त्री, (गन्धाढ्यं पीतं पीतवर्णञ्च पत्रमस्याः ।) गन्धपत्रा । इति राजनिर्घण्टः ॥

गन्धपुष्पः, पुं, (गन्धसमन्वितं पुष्पमस्य ।) वेतसवृक्षः । इति शब्दरत्नावली ॥ अङ्कोठवृक्षः । इति जटाधरः ॥ बहुवारवृक्षः । इति राजनिर्घण्टः ॥

गन्धपुष्पा, स्त्री, (गन्धाढ्यं पुष्पमस्याः ।) नीली । केतकी । गणिकारी । इति राजनिर्घण्टः ॥

गन्धफणिज्झकः, पुं, (गन्धसारः गन्धप्रधानो वा फणिज्झकः ।) रक्ततुलसी । इति रत्नमाला ॥

गन्धफलः, पुं, (गन्धाढ्यं फलमस्य ।) कपित्थः । विल्वः । तेजःफलवृक्षः । इति राजनिर्घण्टः ॥

गन्धफला, स्त्री, (गन्धेन युक्तं फलमस्याः ।) प्रियङ्गुवृक्षः । इति शब्दरत्नावली ॥ मेथिका । विदारी । शल्लकी । इति राजनिर्घण्टः ॥

गन्धफली, स्त्री, (गन्धेन फलति विदीर्य्यते आत्मनेति शेषः । गन्ध + फल विदारे + कर्म्मण्यण् ततो गौरादित्वात् ङीष् ।) चम्पककलिका । (यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ।
एतस्य कलिका गन्धफलीति कथिता बुधैः ॥")

प्रियङ्गुवृक्षः । इत्यमरः । २ । ४ । ५६ ॥

गन्धवधूः, स्त्री, (गन्धेन बध्नाति सन्निकृष्टजनानां चित्तमिति । बन्ध + उः न लोपे वा ऊङ् । गन्धस्य वधूरिव वा ।) शटी । चीडानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

गन्धबन्धुः, पुं, (गन्धेन बध्यते इति गन्धं बध्नाति इति वा । बन्ध + उन् । यद्वा, गन्धस्य बन्धुरिव । बन्धोरिव चिरसहचरत्वादस्य तथात्वम् ।) आम्रवृक्षः । इति शब्दरत्नावली ॥

गन्धबहुलः, पुं (गन्धः बहुलः बहुलोऽस्य ।) सितार्जकः । इति राजनिर्घण्टः ॥

गन्धबहुला, स्त्री, (गन्धबहुल + टाप् ।) गोरक्षीवृक्षः । इति राजनिर्घण्टः ॥

गन्धबीजा, स्त्री, (गन्धः बीजेऽस्याः ।) मेथिका । इति राजनिर्घण्टः ॥ (मेथिकाशब्देऽस्या गुणा ज्ञेयाः ॥)

गन्धभद्रा, स्त्री, (गन्धः भद्रोऽस्याः गन्धेन भद्रा वा । एतया युक्तस्य व्यञ्जनयूषस्य गन्धमात्रग्रहणे-

नैव रूमस्य मङ्गलं भवतीति भावः।) लताविशेषः। गन्धभादालिया इति भाषा॥ इति शब्दचन्द्रिका॥ (गुण-पर्य्यायावस्थाः प्रसारणीशब्दे ज्ञातव्याः॥)

गन्धभाण्डः, पु, (गन्धस्य भाण्डमिव।) गर्द्दभाण्डवृक्षः। इति शब्दरत्नावली॥ (पर्य्यायोऽस्य यथा,
"नन्दिवृक्षस्ताम्रपाकी फलपाकी च पीतकः।
गन्धभाण्डो गन्धमुण्डो द्वितीयः क्षिप्रपाक्यसौ॥"
इति वैद्यकरत्नमाला॥)

गन्धमांसी, स्त्री (गन्धसारा मांसी।) जटामांसीभेदः। तत्पर्य्यायः। केशी २ भूतजटा ३ पिशाची ४ पूतना ५ भूतकेशी ६ लोमशा ७ जटाला ८ लघुमांसी ९। अस्या गुणाः। तिक्तत्वम्। शीतलत्वम्। कफकण्ठामयरक्तपित्तविषभूतज्वरनाशित्वम्। वर्ण्यत्वञ्च। इति राजनिर्घण्टः॥ (जटामांसीशब्देऽस्या विवृतिर्बोद्धव्या॥)

गन्धमाता, स्त्री, (गन्धस्य मातेव। गन्धगुणप्राधान्यात् तथात्वम्। यथा, मनौ। १। ७८।
"ज्योतिषश्च विकुर्व्वाणादापो रसगुणाः स्मृताः।
अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः॥")
पृथिवी। इति हेमचन्द्रः। ४। २॥

गन्धमादनं, क्ली पुं, (गन्धैः व्याप्तोपरिसञ्जातौषधीविशेषसौरभैः मादयति सन्निहितस्थानिति। मद्+णिच्+कर्त्तरि ल्युः। मादयतेऽनेन इति णिच् ल्युट् वा।) पर्व्वतविशेषः। इत्यमरः। २। ३। ३॥ अयं इलावृतभद्राश्ववर्षयोः सीमापर्व्वतः। अस्य विस्तारः नीलनिषधपर्व्वतपर्य्यन्तः। इति श्रीभागवतम्॥ (तथा च महाभारते। २। १०। ३०।
"मलयो दर्द्दरश्चैव महेन्द्रो गन्धमादनः।
इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्व्वतौ॥"
अस्य गिरेरधिष्ठातृदेवोऽपि एतन्नाम्ना विश्रुतः। यथा, तत्रैवाध्याये। २८ श्लोके।
"द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम्।
राक्षसाधिपतिश्चैव महेन्द्रो गन्धमादनः॥"
अयमेव पर्व्वतो भगवत्याः पीठस्थानविशेषः। यथा, देवीभागवते। ७। ३०। ५६।
"प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने॥")

गन्धमादनः, पु, (गन्धेन पुष्पसौरभेण मादयत्यात्मानमिति। गन्ध+मद्+णिच्+ल्युः। यद्वा गन्धेन मादयति इति। मद्+स्वार्थे णिच्+ल्युः।) भ्रमरः। वानरविशेषः। (यथा, रामायणे ४। २५। ३३।
"गयो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवांस्तथा॥")
गन्धकः। इति मेदिनी॥ ने। २३४॥

गन्धमादनी, स्त्री, (गन्धेन मादयतेऽनया। मद्+णिच्+करणे ल्युट् ततो ङीप्।) मदिरा। इति त्रिकाण्डशेषः॥ वन्दाकः। चोडानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमादिनी, स्त्री, (गन्धेन मादयतीति। मद्+णिच्+णिनिः।) लाक्षा। मुरानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमार्ज्जारः, पुं, (गन्धेन गात्रगन्धेन युक्तः गन्धप्रधानो वा मार्ज्जारः।) खट्टासः। इति जटाधरः॥

गन्धमालती, स्त्री, (गन्धेन मालती इव।) गन्धद्रव्यविशेषः। सा तु गुणैर्गन्धकोकिलातुल्या। (यथा, भावप्रकाशे।
"गन्धकोकिलया तुल्या विज्ञेया गन्धमालती॥")

गन्धमालिनी, स्त्री, (गन्धानां गन्धस्य वा माला समूहः अस्त्यस्यामस्या वा इति। अस्त्यर्थे इनिः ततो ङीप्।) मुरानामगन्धद्रव्यम्। इति जटाधरः॥

गन्धमुण्डः, पुं, (गन्धं अपरगन्धं मुण्डयति मर्द्दयति स्वगन्धेनेति शेषः। मुडि मर्द्दने+णिच्+अण्। यद्वा गन्धेन स्वगन्धेन अन्यं दुष्टगन्धं मार्ष्टि शोधयतीति। मुडि शोधने+णिच्+अच्।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। नन्दीवृक्षः १ ताम्रपाकी २ फलपाकी ४ पीतकः ५ गर्द्दभाण्डः ६ क्षिप्रपाकी ७। इति वैद्यकम्॥

गन्धमूलः, पुं, (गन्धसारं मूलमस्य।) कुलञ्जनवृक्षः। इति राजनिर्घण्टः॥

गन्धमूलकः, पुं, (गन्धमूल+संज्ञायां कन्।) शटी। इति शब्दरत्नावली॥

गन्धमूला, स्त्री, (गन्धसारं गन्धप्रधानं वा मूलमस्याः।) शल्लकी। शटी। इति राजनिर्घण्टः॥

गन्धमूलिका, स्त्री, (गन्धमूली+संज्ञायां कन्। पूर्व्वह्रस्वः। यद्वा गन्धप्रधानं मूलमस्य इति कप् ततष्टाप् कापि अत इत्वम्।) माकन्दी। शटी। इति राजनिर्घण्टः॥

गन्धमूली, स्त्री, (गन्धमूल+स्त्रियां ङीष्।) शटी। इत्यमरः। २। ४। १४५॥

गन्धमूषिकः, पु स्त्री, (गन्धप्रधानो मूषिकः।) छुछुन्दरी। इति त्रिकाण्डशेषः॥

गन्धमूषी, स्त्री, (गन्धा दुर्गन्धप्रधाना मूषी।) छुछुन्दरी। इति हेमचन्द्रः। ४। ३६८॥

गन्धमृगः, पु, (गन्धाढ्यः गन्धेन युक्तो वा मृगः।) खट्टासः। इति शब्दमाला॥ (खट्टासशब्देऽस्य गुणादयो व्याख्याताः॥)

गन्धमैथुनः, पु, (गन्धेन वासितायाः ऋतुमत्या गोर्य्योनिघ्राणेन मैथुनोद्योगः स्पृहा वा यस्य।) वृषः। इति जटाधरः॥

गन्धमोदनः, पु, (गन्धेन व्याप्तोऽङ्गवगन्धेन मोदयतीति। मुद्+णिच्+ल्युः।) गन्धकः। इति राजनिर्घण्टः॥

गन्धमोहिनी, स्त्री, (गन्धेन स्वावयवस्थगन्धेनेत्यर्थः मोहयति सन्निकर्षस्थानिति। मुह्+णिच्+णिनिः ङीप् च।) चम्पककलिका। इति राजनिर्घण्टः॥

गन्धरसः, पुं, (गन्धाढ्यः गन्धान्वितो वा रसोऽस्य।) उपधातुविशेषः। फुलखल इति ख्यातः। तत्पर्य्यायः। बोलः २ प्राणः ३ पिण्डः ४ गोपः ५ रसः ६। इत्यमरः। २। ६। १०४॥ रसगन्धः ७ गोसः ८ पिण्डगोसः ९ प्राणः १० गोसप्राणः ११। इति तट्टीका॥ गन्धारम् १२ मसिवर्द्धनम् १३। इति त्रिकाण्डशेषः॥ गोपरसः १४ बोलनः १५ गोपकः १६। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। ३७। ११।
"न्यायोपेतं ब्राह्मणेभ्यो यदन्नं
श्रद्धापूतं गन्धरसोपपन्नम्॥")

गन्धरसाङ्गकः, पु (गन्धरसो अङ्गे यस्य इति कप्।) श्रीवेष्टनामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

गन्धराजं, क्ली, (गन्धेन राजते इति। राज्+अच्।) चन्दनम्। जवादिनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ स्वनामख्यातशुक्लवर्णपुष्पञ्च॥

गन्धराजः, पुं, (गन्धानां गन्धसाराणां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच।) मुद्गरवृक्षः। कणगुग्गुलुः। इति राजनिर्घण्टः॥ स्वनामख्यातपुष्पवृक्षः। तस्य पत्रं पनसवृक्षस्य क्षुद्रदलवत्। पुष्पञ्च सुगन्धिश्वेतवर्णं उपर्य्यधोद्वादशदलं षट्केशरमध्यं भवति वसन्तवर्षाकाले प्रस्फुटति च। तस्य शाखारोपणे वृक्षो जायते। इति लोकप्रसिद्धम्॥ गन्धश्रेष्ठस्य॥

गन्धराजी, स्त्री, (गन्धराज+स्त्रियां ङीप्।) नखीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

गन्धर्व्वः, पु, (गन्धं सङ्गीतवाद्यादिजनितप्रमोदं अर्व्वति प्राप्नोतीति। अर्व्व गतौ+अण्। शकन्ध्वादित्वात् अलोपे साधुः।) स्वर्गगायकः। स तु देवयोनिः। तत्पर्य्यायः। गातुः २ दिव्यगायनः ३। तद्भेदा यथा,—
"हाहा हूहूश्चित्ररथो हंसो विश्वावसुस्तथा।
गोमायुस्तुम्बुरुर्नन्दिरेवमाद्याश्च ते स्मृताः॥"
इति जटाधरः॥ *॥
तस्य एकादश गणा यथा,—
"अभ्राजोऽङ्गारिवभारी सूर्य्यवर्च्चास्तथा कृधुः।
हस्तः सुहस्तः स्वामी च मूर्द्धन्वांश्च महामनाः।
विश्वावसुः कृशानुश्च गन्धर्व्वैकादशा गणाः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥
(असौ देवमर्त्त्यभेदेन गानधर्म्मिगन्धर्व्वोऽपि द्विविधः। यथाह शब्दार्थचिन्तामणिः।
"अस्मिन् कल्पे मनुष्यः सन् पुण्यपाकविशेषतः।
गन्धर्व्वत्वं समापन्नो मर्त्त्यगन्धर्व्व उच्यते॥
पूर्व्वकल्पकृतात् पुण्यात् कल्पादावेव चेद्भवेत्।
गन्धर्व्वत्वं तादृशोऽत्र देवगन्धर्व्व उच्यते॥"
तत्र दिव्यगन्धर्व्वो यथा, ऋग्वेदे। १०।१३९।५।
"विश्वावसुरभि तन्नो गृणातु
दिव्यो गन्धर्व्वो रजसो विमानः॥"
तथाच महाभारते। ३। १६१। २६।
"स तमास्थाय भगवान् राजराजो महारथम्।
प्रययौ देवगन्धर्व्वैः स्तूयमानो महाद्युतिः॥"
मर्त्त्यगन्धर्व्वः। यथा, रामायणे। १। ४। ११।
"भ्रातरौ स्वरसम्पन्नौ गन्धर्व्वाविव रूपिणौ॥")
गुह्यकलोकोपरि विद्याधरलोकस्याधो गन्धर्व्वलोकः। यथा,—

"ततो विलोकयामास लोकं लोचनशर्म्मदम् ।
शिवशर्म्मा ततः प्राह सुकृती विष्णुपार्षदौ ॥
कैषमी पुण्यशालिनी लोकः किनाम वदसाम्प्रतं ॥
गणावूचतुः ।
गान्धर्व्वः लोकोऽयं लोकोऽमी गन्धर्व्वाः शुभव्रता ।
देवानां गायना ह्येते चारणा: स्तुतिपाठकाः ॥
गीतज्ञा ब्रतिगीतेन तोषयन्ति नराधिपान् ।
सुवर्ण्णं च धनाढ्योऽपि धान्येन मोदिता. ॥
रत्नानि प्रमादलभ्यानि सुवासांसि धनानि च ।
मयागयपि सुगन्धीनि कर्पूरादीन्यनेकशः ॥
नानाविध्यं प्रयच्छन्ति गीतं गायकवर्णिनम् ।
सुतायेव मनस्तेषां गान्धर्व्वाच्छन्द्रता: ॥
ते पुण्येन गान्धर्व्वो लोकस्तेषां विभोयते ।
गानज्ञानसोविता यद्वै गीतविद्याविमोहितेः ॥
गीतविद्याप्रभावेण देवर्षिर्नारदो महान् ।
मान्यो वैष्णवलोके वै श्रीशम्भोश्चापि सुमताः ॥
तुम्बुरुर्नारदश्चोभौ देवानामपि दुर्लभौ ।
नादरूपो शिव साक्षान्नादज्ञास्तद्विदो विदुः ॥
यदि गीतं क्वचिद्गीतं श्रीमद्धरिहरात्मकम् ।
मोक्षस्तु तत्फलं प्राहु. सान्निध्यमथवा तयो' ॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥
अमितोऽर्के सदा कालं स्तुतिर्वा प्रगायते ।
तल्लीनमालया पुण्यां देवौ हरिहरौ सदा ॥
इति स्मरन् ध्यानं प्राप पुनरन्यं मनोहरम् ।
शिवशर्म्माथ पप्रच्छ किमेतं नगरमिदम् ॥"

इति काशीखण्डम् ॥ ७ ॥

घोटक । (यथा, महाभारते । ३ । १६१ । २३ ।
"रथ मयोगयामासुर्गन्धर्व्वैर्हेममालिभि ॥")
पशुजातिविशेष' । स तु कस्तूरीमृग । अन्तरा भवसत्त्व' । इत्यमर । ३ । ३ । १३० ॥ "अन्तराभवसत्त्वस्तु जन्ममरणयोर्मध्यभव. प्राणी यो रुती नैव कायान्तर प्राप्त नापि जन्म स मरणजन्मनोरन्तरा भवत्वादन्तराभवसत्त्व स च यातनाशरीर' इत्यर्के इति सुकूट.। गुण-प्राणीति केचित गन्धर्व्वा पतयो मम इति विराटे इति रमानाथ'।" इत्यमरटीकायां भरत' ॥ (यथा, महाभारते । ४ । ८ । ३४ ।
"न चाप्यहं चालयितुं शक्या केनचिदङ्गने ! ।
दु'खशीला हि गन्धर्व्वास्ते च मे बलवत प्रिया. ।
प्रच्छन्नाश्चापि रक्षन्ति ते मां नित्यं शुचिस्मिते ॥")
पुंस्कोकिल' । गायनमात्रम् । इति मेदिनी । वे । ११ ॥ (शिव । यथा, महाभारते ।१३।१७।८७ ।
"गन्धर्व्वो ह्यदितिस्तार्क्ष्य सुविज्ञेय सुशारद.॥"
यक्षविशेष. । यथा, सुश्रुते ।
'देवास्तथा शत्रुगणाश्च तेषां
गन्धर्व्वयक्षा' पितरो भुजङ्गा ।
रक्षांसि या चापि पिशाचजाति-
रेषोऽष्टधा देवगणो ग्रहाख्य' ॥"
एतैर्ग्रहैर्ग्रस्तस्य मनुष्यस्य लक्षण यथा तत्रैव ।
"हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचार' प्रियपरिगीतगन्धमाल्य. ।

नृत्यन् वा प्रहसति चारु चाल्पशब्दं
गन्धर्व्वग्रहपरिपीडितो मनुष्य: ॥"
गन्धर्व्वोदाहरणं शृणाम्यहं यथा, हरिदासमाथे ७म आसरो जलकलीदाम प्रकरणे ।
"मनीषु परका' प्रभवन्ति ते मत्तप्रलम्बस्य कान्तस्य गन्धर्व्वेण तस्याभीदर्दुषिता गन्धर्व्वयष्टीता ॥"
"मनीषु मदान्ता जनमदाश्रीघु परका: भक्षणार्थं मत्तवरणात् परका भक्षणीयो या सम्प्रताम सम्भूष्टिजना:। ते परे सम्पृष्टा मत्तग्लनस्य नागत, कान्तस्य कपिशोभस्य यशोनेन गन्धर्व्वेन । तस्याभीद्दर्दुषिता गन्धर्व्वयष्टीता। गन्धर्व्वेण जलानुगित गन्धेन केनचिदादिशा ।"॥
गा इमानि इन्द्रयोपयोगीनि पानानि वा धारयति इति । गो + धृ + च गोशब्दादेश भाष्यकृद्भिर्गवम्भाषयाचार्य्यपादैरित्थं पुनरुक्तिः सोम.। रश्मीनामधारक: । उदकधारकः अम्भा-शादित्यविशेष' सम्यक्ष इति सर्वे एव बोधिता इत्यर्थ । एतेषां क्रमान्वयेनोदाहरणम् । यथा, ऋग्वेदे । १ । १६३ । २ ।
"गन्धर्व्वो अस्य रशना मगृभ्णात् सूरादश्वं वसवो निरतष्ट ॥" "गन्धर्व्व: सोम:।" इति भाष्यम् । तत्रैव । ८ । ५८६ । १२ । "इन्द्रो गन्धर्व्वौ अधिनाके अस्थात् विश्वारूपा प्रतिचक्षाणो अस्य ॥" "गन्धर्व्वो रश्मीनां धारक' ।" इति भाष्यम् । तत्रैव वेदे ।८। ७३ । ४ । "गन्धर्व्व इत्या पदमस्य रक्षति पाति देवानां जनिमा यद्भुत ।" "गन्धर्व्व: उदकानां स्तुतीनां वा धारक आदित्य ।" इति भाष्यम् । तत्रैव । ८।११।२। "यद्वत् क्रतुसमाप्त्युनैय प्रतक्रतु तस्य रदगन्धर्व्वमस्तृतम् ।" "गन्धर्व्व' गवां रश्मीनां धर्त्तार सूर्य्यम् । इति भाष्यम् ॥" अथ दिवसमय इत्यर्थ । यथा, भागवते । ४ । २८ । २१ ।
"तस्याधानीय गन्धर्व्वा गन्धर्व्व्यो रात्रय: स्मृता ।"
गाथा स्तुतिपाठक । यथा, भागवते ।१।११।२० ।
"नटनर्त्तकगन्धर्व्वा: सूतमागधवन्दिन ।
गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥"
आढ्यानां बालास्त्रीणां भर्तृभोगात् प्रागेव प्रथमयज्ञहृद्यौवनोपभोक्तृरूपशरीराधिष्ठातृदेवविशेष: । यथा, ऋग्वेदे । १० । ८५ । ४० ।
"सोम. प्रथमो विविदे गन्धर्व्वो विविद उत्तर' ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजा' ॥"
तथाच सप्तते । ३ । २१०-२१६ ।
"स्त्रिय: पूर्व्वं सुरैर्भुक्ता. सोमगन्धर्व्ववह्निभि' ।
भुञ्जते मानुषा पश्चात् तस्माद्दोषो न विद्यते ॥
सोमस्तासां ददौ शौचं गन्धर्व्वा शिक्षितं गिरम् ।
पावक' सर्व्वमेध्यत्व तस्मान्निष्कल्मषा' स्त्रिय' ॥
असम्प्राप्तरजा गौरी प्राप्ते रजसि रोहिणी ।
अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका ॥
व्यञ्जनैस्तु समुत्पन्नै सोमो भुङ्क्ते हि कन्यकाम् ।
पयोधराभ्यां गन्धर्व्वा रजस्यग्नि' प्रतिष्ठित ॥")
गन्धर्व्वतैल, क्ली,(गन्धर्व्वनामकं तैलम् । प्राकपार्थिववत् मध्यपदलोपिकर्म्मधारय. ।) एरण्डतैलम् ।

"गन्धर्व्वतैलमिश्रां च्चर्णितां हरीतकीं गोमूत्रेण पिवेत् ।
श्लीपदविवन्नयुक्तो भवत्यसौ मसप्ताहेन ॥
गन्धर्व्वतैल एरण्डतैलम् । गोमूत्रेण गोमूत्रेण ।"
इति भावप्रकाश: ॥
गन्धर्व्ववेद पुं, (वेदानामङ्गमेव वा। विद्+ अध्यापने करणे वा धञ् वेद.। गन्धर्व्वाणां गानविद्योपजीविनां यो वेद: सामवेदस्योपवेदविशेष:। यद्वा गन्धर्व्व: गन्धर्व्वसम्बन्धिनी गान्धर्व्वकलीयत्वं. गन्धर्व्वात्मका विद्या विद्यतेऽनेनागाद वा । विद ज्ञाने + करणे अपादाने वा घञ् ।) सङ्गीतविद्या । यथा, "ऋग्वेदस्यायुर्व्वेदोपवेदो यजुर्व्वेदस्य धनुर्व्वेदोपवेद: । सामवेदस्य गन्धर्व्ववेदोपवेदोऽथर्व्ववेदस्य शस्त्रशास्त्राणीति।" इति शौनककोक्तचरणव्यूह ॥
गन्धर्व्वहस्त, पुं, (गन्धर्व्वस्य तुरगविशेषस्य हस्त, अग्रपाद इव आकारोऽस्य ।) एरण्डवृक्ष । इति राजनिर्घण्ट. । १०८ ॥ एतस्य पत्राङ्कुरनवनीतपरिमाणाशिध्य कप् प्रत्ययेन सह यथाह सुश्रुत ।
"गन्धर्व्वहस्तकस्नुक्कात्मकमासाद्यकपूतिकागृगपणिपत्रपर्णीनां पत्राण्यार्द्रानि लवणेन सह रोद्रवतोऽपुनग्नेऽग्निपवे प्रविश्यार्वलिप्य गोमूत्रविमाणसेन् एतत् पत्रलवणमुपदिशन्ति दातरोगेषु ॥")
गन्धर्व्वहस्तक, पुं, (गन्धर्व्वहस्त + स्वार्थे कन् ।) एरण्डवृक्ष. । इत्यमर' । २ । ४ । ५० ॥ (यथास्य पर्य्याया । वैद्यकरत्नमालायाम् ।
"आमण्डो वर्द्धमान' स्यादेरण्डो रुबुको वुक ।
गन्धर्व्वहस्तकश्चित्रो वातारिस्तरुणो रुबु' ॥")
गन्धलोलुपा, स्त्री, (गन्धे गन्धात्मकद्रव्ये लोलुपा लोभनप्रकृति ।) मक्षिका । इति शब्दरत्नावली ॥
गन्ध(व)वणिक, [ज] पुं, (गन्धस्य अगुरुचन्दनादिगन्धद्रव्यजातस्य वणिक् व्याजीव । यद्वा गन्ध गन्धद्रव्यजातं पणायते व्यवहरति गन्धद्रव्यस्य क्रयविक्रयादिना व्याजीवति इत्यर्थ.। पण्+ इजि कृते पस्य (व)वत्वे च पृषोदरात् साधु ।) गान्धिक. । स च वर्णसङ्करजातिविशेष । गन्धवेनिया इति भाषा । स तु अम्बष्ठात् राजपुत्र्यां जात । तस्य कर्म्म लिखन गन्धदानञ्च । इति पराशरभाष्यम् ॥
गन्धवती स्त्री, (गन्धो विद्यतेऽस्या । गन्ध + मतुप् । मस्य वत्वे स्त्रियां ङीप् ।) पृथिवी । ("गन्धवती पृथ्वीरूपा ।" इति काशीखण्डे । २६ । ४८ श्लोकस्य टीकायाम् ॥) वायुपुरी । (यथा, काशीखण्डे । १३ । १ ।
"इमां गन्धवतीं पुण्यां पुरीं वायोर्विलोकय ।
वारुण्या उत्तरे भागे महाभाग्यनिधे द्विज ।॥")
व्यासमाता । (इय हि पूर्व्वं मत्स्यगन्धा आसीत् पश्चात् प्रसन्नात् पराशरात् लब्धवरा सद्गन्धविशिष्टा गन्धवतीति प्रसिद्धा जाता । यथा, महाभारते । १ । ६३ । ७६—८० ।
"एवमुक्ता वर वव्रे गात्रसौगन्ध्यमुत्तमम् ।

स धास्ते भगवान् प्रादान्मनसः काङ्क्षितं प्रभुः।
ततो लब्धवरा प्रीता स्त्रीभावगुणभूषिता ॥
जगाम सह संसर्गमृषिणाद्भुतकर्म्मणा ।
तेन गन्धवतीत्येव नामास्याः प्रथितं भुवि ॥")
सुरा । इति मेदिनी । ते । १६४ ॥ वनमल्लिका । इति रत्नमाला ॥ मुरानामगन्धद्रव्यम् । इति जटाधरः ॥ (गङ्गा । यथा, काशीखण्डे ।२९।४६।
"गङ्गा गन्धवती गौरी गन्धर्व्वनगरप्रिया ॥")

गन्धवल्कलं, क्ली, (गन्धाढ्यं वल्कलं अस्य ।) त्वचम् । इति राजनिर्घण्टः ॥ दारचिनी इति भाषा ॥

गन्धवल्लरी, स्त्री, (गन्धाढ्या वल्लरी लताविशेषः ।) सहदेवी । इति राजनिर्घण्टः ॥

गन्धवल्ली, स्त्री, (गन्धान्विता वल्ली लता ।) पीतपुष्पदण्डोत्पलः । छानिपोला इति भाषा । तत्पर्य्यायः । गोवन्दनी २ सहदेवी ३ सहा ४ । इति रत्नमाला ॥

गन्धवहः, पुं, (गन्धं वहतीति । वह् + अच् । गन्धस्य वहो वा ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ (यथा, महाभारते । २ । १० । ७ ।
"मन्दाराणामुदाराणां वनानि परिलोड़यन् ।
सौगन्धिकवनानाञ्च गन्धं गन्धवहो वहन् ॥")
गन्धयुक्ते त्रि ॥

गन्धवहा, स्त्री, (गन्धमिष्टानिष्टप्राणं वहतीति । गन्ध + वह् + अच् + टाप् । यद्वा, गन्धस्य वहा ।) नासिका । इत्यमरः । २ । ६ । ८९ ॥

गन्धवाहः, पुं, (गन्धं वहतीति । वह् + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) वायुः । इत्यमरः ।१।१।६५ ॥ (यथा, गीतगोविन्दे ।१।३६।
"इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद् गन्धवाहः ॥")
मृगविशेषः । स तु कस्तूरीमृगः । इति हेमचन्द्रः ॥

गन्धवाहा, स्त्री, (गन्ध + वह् + घञ् + टाप् ।) नासिका । इति हेमचन्द्रः ॥

गन्धविह्वलः, पुं, (गन्धेन आमोदेनसुरभिणा विह्वलयतीति । वि + ह्वल् + णिच् + अच् ।) गोधूमः । इति शब्दचन्द्रिका ॥

गन्धवृक्षकः, पुं, (गन्ध. स्वनिर्यासजन्यसुरभियुक्तः गन्धप्रधानो वा वृक्ष. । ततः स्वार्थे संज्ञायां वा कन् ।) सालवृक्षः । इति राजनिर्घण्टः ॥

गन्धव्याकुलं, क्ली, (गन्धेन व्याकुलयतीति । वि + आ + कुल + णिच् + अच् ।) कक्कोलम् । इति शब्दचन्द्रिका ॥

गन्धशटी, स्त्री, (गन्धान्विता शटी ।) शटी । इति शब्दरत्नावली ॥

गन्धशाक, क्ली, (गन्धाढ्यं शाकम् ।) गौरसुवर्णशाकम् । इति राजनिर्घण्टः ॥

गन्धशालिः, पुं, (गन्धाढ्यः शालिः ।) शालिधान्यविशेषः । तत्पर्य्यायः । कल्माषः २ गन्धालु ३ कलमोत्तमः ४ सुगन्धिः ५ गन्धबहुल ६ सुरभिः ७ गन्धतण्डुलः ८ सुगन्धिशालिः ९ । अस्य गुणाः । मधुरत्वम् । अतितृष्यत्वम् । पित्तश्रमसायुविदाहशान्तिकारित्वम् । सान्यगर्भस्थिरताख्यवायुपुष्टाख्यकफबलमदत्वञ्च । इति राजनिर्घण्टः ॥

गन्धशुण्डिनी, स्त्री, (गन्धाढ्यः शुण्डः सुखमस्यस्याः । इति इनिः ।) छुच्छुन्दरी । इति राजनिर्घण्टः ॥ क्वचित् पुस्तके गन्धा सुण्डिनी इति नामद्वयम् ॥

गन्धशेखरः, पुं, (गन्धः शेखरे शिरोदेशेऽस्य ।) कस्तूरी । इति हारावली । १०३ ॥

गन्धसारः, पुं, (गन्धाढ्यः सारः स्थिरांशो यस्य ।) चन्दनवृक्षः । इत्यमरः । २ । ६ । १३१ ॥
(अस्य पर्य्याया यथा,—
"श्रीखण्डं चन्दनं न स्त्री भद्रः श्रीसलपर्णिकः ।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
मुद्गरवृक्षः । इति राजनिर्घण्टः ॥

गन्धसारणः, पुं, (गन्धं सारयतीति । सृ + णिच् + ल्युः ।) वृहन्नखी । इति रत्नमाला ॥

गन्धसोमं, क्ली, (गन्धाय गन्धार्थं प्रमोदायेत्यर्थः सोमश्चन्द्रो यस्य ।) कुमुदम् । इति त्रिकाण्डशेषः ॥

गन्धहारिका, स्त्री, (गन्धं हरतीति । हृ + ण्वुल् ततष्टाप् कापि अत इत्वञ्च ।) परगृहे गत्वा कर्म्मकारिणी शिल्पिनी । इति शब्दमाला ॥ गन्धहरणकर्त्री च ॥

गन्धा, स्त्री, (गन्धयति गन्धं वितरतीति । गन्ध + णिच् + अच् + टाप् च ।) चम्पककलिका । इति शब्दरत्नावली ॥ शटी । इति राजनिर्घण्टः ॥ शालपर्णी । इत्यमरटीकायां भरत. ॥

गन्धाखुः, पुं, (गन्धप्रधानः गन्धाढ्यो वा आखुः ।) छुच्छुन्दरी । इति हारावली ॥ ८३ ॥

गन्धाजीवः, पुं, (गन्धेन गन्धात्मकद्रव्येण आजीवतीति । गन्ध + आ + जीव् + अच् ।) गन्धवणिक् । इति जटाधरः ॥

गन्धाढ्यं, क्ली, (गन्धेन आढ्यम् ।) जवादिनामगन्धद्रव्यम् । चन्दनम् । इति राजनिर्घण्टः ॥ गन्धयुक्ते त्रि ॥

गन्धाढ्यः, पुं, (गन्धेनाढ्यः ।) नारङ्गवृक्षः । इति राजनिर्घण्टः ॥

गन्धाढ्या, स्त्री, (गन्धेनाढ्या ।) गन्धपत्रा । स्वर्णयूथी । तरणी । आरामशीतला । इति राजनिर्घण्टः ॥ गन्धाली । इति शब्दचन्द्रिका ॥ (गन्धान्वितद्रव्ये त्रि । यथा, अमराष्टके । १ ।
"गन्धाढ्याऽसौ भुवनविदिता केतकी स्वर्णवर्णा ॥")

गन्धाधिकं, क्ली, (गन्धः अधिकः यस्मिन् । गन्धस्य अधिकोऽत्रेति वा ।) तृणकुङ्कुमम् । इति राजनिर्घण्टः ॥

गन्धाम्ला, स्त्री, (गन्धयुक्तो अम्ल अम्लरसोऽत्रास्या वा ।) वनबीजपूरकः । इति राजनिर्घण्टः ॥

गन्धाला, स्त्री, (गन्धेन अलति पर्य्याप्नोतीति । अल् + अच् टाप् च ।) वृक्षविशेष. । इति शब्दचन्द्रिका ॥ जियतीति ख्याता ॥

गन्धाली, स्त्री, (गन्धस्य आली श्रेणी यस्याम् । यद्वा गन्धेन अलति पर्य्याप्नोतीति । अल् + अच् जातौ ङीष् ।) लताविशेषः । गाँधाली गन्धभादाली इति च भाषा । तत्पर्य्यायः । प्रसारणी २ भद्रपर्णी ३ कटम्भरा ४ । इति रत्नमाला ॥ गन्धाढ्या ५ । इति शब्दचन्द्रिका ॥ सरणा ६ राजवला ७ भद्रवला ८ । इत्यमरः ।२।४।१२७ ॥ गन्धोली ९ सारणी १० । इति जटाधरः ॥ अपि च ।
"प्रसारणी राजवला भद्रपर्णी प्रतानिनी ।
सरणिः सारणी भद्रवला चापि कटम्भरा ॥
प्रसारणी गुरुर्वृष्या बलसन्धानकृत्सरा ।
वीर्य्योष्णा वातहृत्तिक्ता वातरक्तकफापहा ॥"
इति भावप्रकाशः ॥
राजनिर्घण्टोक्तगुणपर्य्यायौ प्रसारिणीशब्दे द्रष्टव्यौ ॥

गन्धालीगर्भः, पुं, (गन्धाली गन्धश्रेणी गर्भे यस्य ।) सूक्ष्मैला । इति राजनिर्घण्टः ॥

गन्धाश्मा [न्] पुं, (गन्धयुक्तः अश्मा प्रस्तर इव ।) गन्धकः । इत्यमरः ।२।९।१०२ ॥

गन्धाष्टक, क्ली, (गन्धानां गन्धात्मकागुरुचन्दनादीनां अष्टकम् ।) पञ्चदेवतादेयाष्टप्रकारगन्धद्रव्यम् । यथा,—
"चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः ।
जटामांसी कपियुता शक्तेर्गन्धाष्टकं विदुः ॥ * ॥
चन्दनागुरुह्रीबेरकुष्ठकुङ्कुमसेव्यकाः ।
जटामांसी मुरमिति विष्णोर्गन्धाष्टकं विदुः ॥ * ॥
चन्दनागुरुकर्पूरतमालजलकुङ्कुमम् ।
कुशीदं कुष्ठसंयुक्तं शैवं गन्धाष्टकं शुभम् ॥ * ॥
स्वरूपं चन्दनं चोरं रोचनागुरुमेव च ।
मदं मृगद्वयोद्भूतं कस्तूरीचन्द्रसंयुतम् ।
गन्धाष्टकं विनिर्दिष्टं गणेशस्य महेशितुः ॥"
इति शारदातिलकम् ॥ * ॥
अपि च ।
"चन्दनागुरुकर्पूररोचनाकुङ्कुमं मदम् ।
रक्तचन्दनह्रीबेरं गायत्र्याः समुदाहृतम् ॥ * ॥
जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनैः ।
उशीरागुरुकर्पूरैः सौरं गन्धाष्टकं विदुः ॥"
इति मेरुतन्त्रम् ॥

गन्धि, क्ली, (गन्ध + "सर्व्वधातुभ्य इन् ।" ४।११७ । इति इन् ।) तृणकुङ्कुमम् । इति राजनिर्घण्टः ॥

गन्धिकः, पुं, (गन्धो विद्यतेऽस्मिन् । गन्ध + "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) गन्धक. । इति हेमचन्द्रः ।३।१२३ ॥

गन्धिनी, स्त्री, (गन्धोऽस्त्यस्या इति । "अत इनिठनौ ।" ५।२।११५ । इति इनिः । स्त्रियां ङीप ।) सुरा । इत्यमरः ।२।४।१२३ ॥

गन्धिपर्णः, पुं, (गन्धि गन्धप्रधानं पर्णं पत्रमस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥

गन्धोतुः, पुं, (गन्ध. गन्धयुक्त. ओतुः ।"ओत्वोष्ठयोः समासे वा ।" इति वार्त्तिं इति अकारलोपः ।) खट्टाशः । इति त्रिकाण्डशेषः ॥ गन्धौतुश्च ॥

गन्धोत्कटा, स्त्री, (गन्धेन उत्कटा उद्रिक्ता उग्रा वा ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥

गन्धोत्तमा, स्त्री, (गन्धेन उत्तमा गन्धप्रधानेत्यर्थः ।) मदिरा । इत्यमरः ।२।१०।४० ॥

गन्धोलि,, स्त्री, (गन्धयति गन्धयुक्तं करोति संमिलितद्रव्यान्तराणीत्यर्थः । गन्ध + ओलच ततो जातौ ङीष् निपातनात् ह्रस्वः ।) शटी । इति शब्दरत्नावली ॥

गन्धोली, स्त्री, (गन्धयति अर्द्दयतीति । गन्ध अर्द्दने + बाहुलकात् ओलच् ततो जातौ संज्ञायां वा ङीष् ।) वरटा । इत्यमरः । २ । ५ । २७ ॥ भद्रा । शटी । इति मेदिनी ॥ ले । ८५ ॥

गभस्तिः, पुं, (गम्यते ज्ञायते इति ग, विषयः । गम् + ड्ः । त बभस्ति दीपयति प्रकाशयतीति । भस + "क्तिच्क्तौ चेति ।" ३।३।१७४ । इति क्तिच् ।) किरणः । (यथा भागवते ।५।८।२२ ।

"मासुपस्तगतनय शिशिरशान्तानुरागगुणितनिजवदनसलिलाप्लतमयगभस्तिभिः स्वधयतीति च ॥" गम्यते ज्ञायते इति । गम् + ड । ग इद सर्व्वं जगत् बभस्ति भासयति निजकिरणजालैरिति शेष । भस + क्तिच् ।) सूर्य्यः । इति मेदिनी ॥ ते ।१०७ ॥ (यथा सूर्य्यस्तोत्रे ।

"गभस्तिमान् गभस्तिश्च विश्वात्मा भासकस्तथा ।
त्वं योनिर्वेदविद्यानां वेदवेद्यस्तथैव च ॥"

शिव. । यथा, महाभारते ।१३।१७।१३३ ।

'गभस्तिर्ब्रह्मकृद् ब्रह्मा ब्रह्मवित् ब्राह्मणोगति ॥")

गभस्तिः, स्त्री, (गच्छति प्राप्नोति हव्यादिकमिति ग अग्निस्तं बभस्त्यनया इति । भस् + करणे क्तिच् ।) स्वाहा । इति मेदिनी ॥ ते । १०७ ॥

गभस्तिमत्, क्ली, (गभस्तयो रश्मय नित्य वर्त्तन्तेऽस्मिन् लोके मण्यादिज्योति प्रभावात् । इति नित्ययोगे मतुप् ।) सप्तपातालान्तर्गतपातालविशेष । तत्तु तलातलम् । इति शब्दरत्नावली ॥

गभस्तिमान्, [त्] पु, (गभस्तयः रश्मय. विद्यन्ते भूम्नास्मिन् । इति भूमार्थे मतुप ।) सूर्य्यः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३।३।१६ ।

"ओ सूर्य्योऽर्य्यमाभगस्त्वष्टा पूषार्क सविता रवि. ।
गभस्तिमानज' कालो मृत्युर्धाता प्रभाकर' ॥")

गभस्तिहस्त , पुं, (गभस्तयो रश्मयो हस्ता इव जलाद्याकर्षणविसर्ज्जनाय यस्य ।) सूर्य्य । इति त्रिकाण्डशेषः ॥

गभीर, त्रि, (गच्छति जलमत्र । गम् + "गभीरगम्भीरौ"। उणां । ४।३५ । इति ईरन् भश्चान्ता देश ।) नीचस्थानम् । तत्पर्य्यायः । निम्नम् २ गम्भीरम्३ । इत्यमरः ।१।१०।१५॥ गभीरकम्४ । इति शब्दरत्नावली॥ अगाधम् । (यथा, प्रबोधचन्द्रोदये ।४।'५ ।

"निष्कम्पनिर्म्मलपयोधिगभीरवीरा
धीराः परस्य परिवादगिरः सहन्ते ॥")

गहनम् । इत्युणादिकोषः ॥ (प्रचण्डम् । यथा, भागवते ।१।५।१८ ।

"कालेन सर्व्वत्र गभीररंहसा ॥")

गभीरिका, स्त्री, (गभीरो ध्वनिर्विद्यतेऽस्याः । "अत इनिठनौ ।" इति ठन् । स्त्रियां टाप् ।) हहडक्का । इति शब्दरत्नावली ॥

गभोलिक', पु, मसूरः । इति हारावली । १३४ ॥

गम, ऌ गतौ । इति कविकल्पद्रुम. ॥ (भ्वां परं-सकं-अनिट् ।) ऌ, गन्ता । ऌ, अगमत । गतिरत्र देशसंयोगफलकव्यापार. । इति दुर्गादास. ।

गमः, पुं, (गम्यते इति यथायथं भावकर्म्मादौ अप ।) जिगीषोर्गमाम् । इत्यमरः ।२।८।६५ ॥ अक्षविवर्त्तः । स तु द्यूतप्रभेदः । अपर्य्यालोचितम् । अध्वा । इति मेदिनी । मे १० ॥ सदृक्पाठ' । इति हेमचन्द्र ॥ गमनम् ॥ (उपभोग' । मैथुनम् । यथा, मनौ ।११।५४ ।

"ब्रह्महत्या सुरापान स्तेय गुर्व्वङ्गनागम' ॥")

गमक पु (गमयति प्रापयति बोधयति वा मूर्च्छनादि लक्षणैर्य आत्मानमिति । गम् + णिच् + ण्वुल् ।) स्वरविशेषः । यथा, सङ्गीतदामोदरे ।

"गमकः स्वश्रुतिस्थानच्छायां श्रुत्यन्तराश्रयाम् ।
स्वरो यो मूर्च्छ नामेति गमकः स इहोच्यते ॥
कम्पितः स्फुरितो लीनो भिन्न स्थविर एव च ।
आहतान्दोलितौ चेति गमकाः सप्त कीर्त्तिता. ॥
माघमौघनिशायान्तु शेषप्रहरमात्रके ।
साधकः सलिले स्थित्वा गमकान् सप्त साधयेत् ॥
दाक्षिणात्या हरिप्रीत्यै गायन्ति गमकानिमान् ॥"

(गमयति बोधयतीति । गम् + णिच + ण्वुल् । बोधकमात्रे त्रि । यथा, मालतीमाधवे । ३ ।

"यत् प्रौढ़त्वमुदारता च वचसां यच्चार्थतो गौरव तच्चेदस्ति ततस्तदेव गमकं पाण्डित्य वैदग्ध्ययो ॥")

गमकारित्व', क्ली, (गम्यते इति । गम् + भावे अप् । गमं करोतीति । कृ + णिनि । तस्य भावः इति ।) रभसः । इति त्रिकाण्डशेष' ॥

गमथ', पुं, (गच्छत्यस्मिन् इति । गम् + "शीङ्-शपिरुगमिवञ्चिजीविप्राणिभ्योऽथ. ।" उणां ३ । ११३ । इति अधिकरणे अथ. ।) पन्था' । (गम् + कर्त्तरि अथः ।) पथिके त्रि । इत्युणादिकोष ॥

गमनं, क्ली, (गम्यते जिगीषुणा इति । गम् + भावे ल्युट् ।) जिगीषो' प्रयाणम् । कुच् इति पारस्य भाषा । तत्पर्य्याय' । यात्रा२ व्रज्या३ अभिनिर्याणम् ४ प्रस्थानम् ५ । गमः ६ । इत्यमरः । २ । ८ । ९५ ॥ प्रयाणम् ७ प्रस्थितिः ८ यानम् ९ प्राणनम् १० । इति शब्दरत्नावली ॥ पादविहरणम् । (यथा, रामायणे । ३।१३।११।

"न च मे रोचते वीर ! गमन दण्डक प्रति ॥')

तत्तु पञ्चविधकर्म्मान्तर्गतकर्म्मविशेष. । (यथा, भाषापरिच्छेदे । ६ ।

"उत्क्षेपण ततोऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणञ्च गमन कर्म्माण्येतानि पञ्च च ॥")

तस्य भेदाः । यथा, भ्रमणम् १ रेचनम् २ स्यन्दनम् ३ ऊर्द्ध्वज्वलनम् ४ तिर्य्यग्गमनम् ५ । इति च भाषापरिच्छेदे ७ । (उपभोगः । यदुक्त तिथितत्त्वे ।

"अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥')

गमी, [न्] त्रि, (गमिष्यतीति । गम् + "भविष्यति गम्यादयः ।"३।३।३। "गमेरिनि' ।" उणां ।४।६ । इति भविष्यति इनि. ।) गमनकर्त्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गम्ब, गतौ । इति कविकल्पद्रुम ॥ (भ्वां परं-सकं सेट् ।) गम्बति । इति दुर्गादास. ॥

गम्भारिका, स्त्री, (गच्छति हार्द्दं सौन्दर्य्य भारञ्च इति । निम्नगतिमित्येके । गम् + विच् । गम बिभर्त्ति इति । भृ + ण्वुल् ततष्टाप् कामित इत्वञ्च ।) गम्भारीवृक्ष. । इति राजवल्लभ' ॥

गम्भारी, स्त्री, (कं जलं बिभर्त्ति इति । भृ + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् पृषोदरात् कस्य गत्वं साधु' । यद्वा गच्छति प्राप्नोति सौन्दर्य्यमिति । गम् + विच् । गमं बिभर्त्ति ।) वृक्षविशेषः । गामारी इति भाषा ॥ तत्पर्य्याय. । सर्व्वतोभद्रा २ काश्मरी ३ मधुपर्णिका ४ श्रीपर्णी ५ भद्रपर्णी ६ काश्मर्य्यः ७ । इत्यमर' । २ । ४ । ३५ ॥ काश्मरी ८ । इति तट्टीका ॥ भद्रा ९ गोपभद्रिका १० कुमुदा ११ सदाभद्रा १२ कट्फला १३ कृष्णवृन्तिका १४ । इति रत्नमाला ॥ कृष्णवृन्ता १५ हीरा १६ सर्व्वतोभद्रिका १७ स्निग्धपर्णी १८ सुभद्रा १९ कम्भारी २० गोपभद्रा २१ विदारिणी २२ क्षीरिणी २३ महाभद्रा २४ मधुपर्णी २५ स्वरभद्रा २६ कृष्णा २७ अश्वेता २८ रोहिणी २९ गृष्टिः ३० स्थूलत्वचा ३१ मधुमती ३२ सुफला ३३ मेदिनी ३४ महाकुमुदा ३५ सुदृढ़त्वचा ३६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । भ्रमशोषत्रिदोषविषदाहातिज्वरतृष्णास्रदोषनाशित्वञ्च । इति राजनिर्घण्ट. ॥ एतत्फलगुणाः । तिक्तत्वम् । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । केशहितत्वम् । रसायनत्वम् । मेध्यत्वम् । शीतलत्वम् । दाहपित्तनाशित्वञ्च । एतन्मूलगुणौ । अनुष्णत्वम् । मानसबाधाहितकारित्वञ्च । इति राजवल्लभ' ॥ तत्पर्य्यायगुणाः ।

"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ॥
कृष्णवृन्ता मधुरसा महाकुसुदिकापि च ।
काश्मरी तुवरा तिक्ता वीर्य्योष्णा मधुरा गुरु' ॥
दीपनी पाचनी मेध्या भेदिनी भ्रमशोषजित् ।
दोषतृष्णामशूलार्शोविषदाहज्वरापहा ॥
तत्फल बृंहण वृष्य गुरु केश्य रसायनम् ।
वातपित्ततृषारक्तक्षयमूत्रविबन्धहृत् ॥
स्वादु पाके हिम स्निग्ध तुवराम्ल विशुद्धिकृत् ।
हन्याद्दाहतृषावातरक्तपित्तक्षतक्षयान् ॥"

इति भावप्रकाशः ॥

गम्भीरं, त्रि, (गच्छति जलमत्र । "गभीर-गम्भीरौ ।" उणां । ४ । ३५ । इति गच्छते-रीरन् भस्यान्तादेशः शुमागमश्च ।) गभीरम् । इत्यमरः । १।१०।१५ ॥ (यथा, गो. रामायणे । ५ । १ । ५० ।

"ततः सागरगम्भीरो वानरः पवनो जवे ॥")

गम्भीरः, पुं (गम् + " गभीरगम्भीरौ" उणां । ४ । ३५ । इति ईरन् भस्यान्तादेशः शुमागमश्च ।) जम्बीरः । पङ्कजम् । ऋग्मन्त्रः । इत्युणादिकोषः ॥ (शिवः । यथा, महाभारते । १३ । १७ । ५२ ।

"गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥"

स्त्रियां, हिक्कारोगभेदः । यथा, सुश्रुते उत्तर-तन्त्रे ५० अध्याये ।

"नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी ।
शुष्कोष्ठकण्ठजिह्वास्यश्वासपार्श्वरुजाकरी ।
अनेकोपद्रवयुता गम्भीरा नाम सा स्मृता ॥")

गम्भीरवेदी, [न्] पुं, (गम्भीरं मन्दं यथा स्यात् तथा चिरकालात् इत्यर्थः यद्वा गम्भीरं अङ्कुश-वेधनं निषादिदत्तशिक्षामादेशं वा वेत्तीति विद् + णिनि ।) दुर्द्धरहस्ती । तत्पर्य्यायः । अङ्कुश-दुर्द्धरः २ चालकः ३ व्यालकः ४ । इति त्रिकाण्ड-शेषः ॥ अवमताङ्कुशः ५ । इति हेमचन्द्रः ॥ (यथा, रघौ । ४ । ३६ ।

"स प्रताप महेन्द्रस्य मूर्द्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥"

अस्य लक्षणम् ।

"चिरकालेन यो वेत्ति शिक्षां परिचितामपि ।
गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः ॥"

इति शब्दार्थचिन्तामणिधृतराजपुत्त्रीयवचनम् ॥ मतभेदेन लक्षणान्तरमपि दृश्यते ।

"त्वग्भेदाच्छोणितस्रावात् मांसस्य क्रथनादपि ।
आत्मानं यो न जानाति स स्याद् गम्भीर-वेदिता ॥"

इति रघुटीकायां मल्लिनाथः ॥)

गम्यं, त्रि, (गम्यते इति । गम् + कर्म्मादौ यत् ।) प्राप्यम् । इत्यमरः । ३ । २ । ४२ ॥ (यथा, भगवद्गीतायाम् । १३ । १७ ।

"ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम् ॥")

गमनयोग्यश्च ॥ (यथा, महाभारते ।३।८५।१०२।

"गम्यान्यपि च तीर्थानि कीर्त्तितान्यगमानि च ॥"

स्त्रिया, सम्भोगार्हा स्त्री । यथा, महाभारते । १ । ८३ । ३५ ।

"अभिकामां स्त्रियं यस्तु गम्यां रहसि याचितः ॥")

गम्यमानः, त्रि, (गम्यते इति । गम् + कर्म्मणि शानच् ।) वर्त्तमानगमनाश्रयग्रामादिः ॥

गयः, पुं, (गीयते वीर्य्यादिप्रभावेनासौ । गै + घञ् । पृषोदरात् इत्वत्वे साधुः ।) वानर-भेदः । (यथा, गो. रामायणे ।४।२५।३३।

"गयो गवाक्षो गवयः शरभो गन्धमादनः ॥")

स तु वैवस्वतपुत्त्रः । इति रामायणम् ॥ राजर्षि-भेदः । स च अमूर्त्तरयःपुत्त्रः । (यथा, श्रीभाग-वते । ५ । १५ । ७ ।

"गयं नृपः कः प्रति याति कर्म्मभिः ॥")

असुरभेदः । इति वायुपुराणम् ॥ गयाप्रदेशः । यथा, हे: रामायणे । २ । १०७ । ११ ।

"गयेन यजमानेन गयेष्वेव पितॄन् प्रति ।"
"गयेषु गयाप्रदेशेषु ।" इति तट्टीकायाम् ॥)

गया, स्त्री, (गयेन गयनाम्ना लोकप्रसिद्धेना-सुरेण पुराणान्तरमतभेदेन तन्नाम्ना राजर्षिणा वा निर्म्मिता ।) गयराजर्षिपुरी । इति हेम चन्द्रः । ४ । ३६ ॥ सा तु तीर्थभेदः । तस्य नामकरणं यथा,—

"यज्ञं चक्रे गयो राजा बह्वन्नं बहुदक्षिणम् ।
यत्र द्रव्यसमूहानां संख्या कर्त्तुं न शक्यते ॥
गयं विष्ण्वादयस्तुष्टा वरं ब्रूहीति चाब्रुवन् ।
गयस्तान् प्रार्थयामास अभिशप्तास्तु ये पुरा ॥
ब्रह्मणा ते द्विजाः पूता भवन्तु क्रतुपूजिताः ।
गयापुरी तु मन्नाम्ना ख्यातु ब्रह्मपुरी तथा ॥
एवमस्तु वरं दत्त्वा तत्रैवान्तर्दधुः सुराः ॥"*॥

तस्योत्पत्तिकारणं यथा,—

' गयासुरोऽसुराणाञ्च महाबलपराक्रमः ।
योजनानां सपादञ्च शतं तस्योच्छ्रयः स्मृतः ॥
स्थूलः षष्टिर्योजनानां श्रेष्ठोऽसौ वैष्णवः स्मृतः ।
कोलाहले गिरिवरे तपस्तेपे सुदारुणम् ॥
बहुवर्षसहस्राणि निरुच्छ्वासः स्थिरोऽभवत् ।
तत्तपस्तापिता देवाः संक्षोभं परमं गताः ॥
ब्रह्मलोकं गता देवाः प्रोचुस्तेऽथ पितामहम् ।
गयासुरात्त्रायस्व देव । ब्रह्मा देवांस्तथाब्रवीत् ॥
व्रजामः शङ्करं देवा ब्रह्माद्यास्तु गताः शिवम् ।
कैलासे चाब्रुवन्नत्वा रक्ष रक्ष महाऽसुरात् ॥
ब्रह्माद्यांश्चाब्रवीच्छम्भुर्व्रजामः शरणं हरिम् ।
क्षीराब्धौ देवदेवेशः स नः श्रेयो विधास्यति ॥
ब्रह्मा महेश्वरो देवा विष्णुं नत्वा प्रतुष्टुवुः ।
किमर्थमागता देवा विष्णुनोक्तास्तमब्रुवन् ॥
गयासुरभयाद्देव । रक्षास्मानब्रवीद्धरिः ।
ब्रह्माद्या यान्तु तं दैत्यमागमिष्याम्यहं ततः ॥"*
"ऊचुस्तं वासुदेवाद्याः किमर्थं तप्यते त्वया ।
सन्तुष्टास्त्वागताः सर्व्वे वरं ब्रूहि गयासुर ॥"
"यदि तुष्टाः स्थ मे देवा ब्रह्मविष्णुमहेश्वराः ।
सर्व्वदेवद्विजातिभ्यो यज्ञतीर्थशिलोच्चयात् ॥
मन्त्रेभ्यो देवदेवीभ्यो योगिभ्यश्चापि सर्व्वशः ।
ज्ञातिभ्योऽतिपवित्रोऽहं पवित्रः स्यां सदा सुराः ॥
पवित्रो भव तं देवा दैत्यमुक्त्वा ययुर्दिवम् ।
दृष्ट्वा दैत्यं ततः स्पृष्ट्वा सर्व्वे हरिपुरं ययुः ॥
शून्ये लोकत्रये जाते शून्या यमपुरी ह्यभूत् ।
यम इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततोऽगमत् ॥
ब्रह्माणमूचिरे देवा गयासुरविलोपिताः ।
त्वया दत्तो योऽधिकारस्तं गृहाण पितामह ॥
ब्रह्माब्रवीत्ततो देवा व्रजामो विष्णुमव्ययम् ।
ब्रह्मादयोऽब्रुवन् विष्णुं त्वया दत्तवरेऽसुरे ॥
तद्दर्शनाद्ययुः स्वर्गं शून्यं लोकत्रयं ह्यभूत् ।
देवैरुक्तो वासुदेवो ब्रह्माणं स वचोऽब्रवीत् ॥
गत्वासुरं प्रार्थयस्व यज्ञार्थं देहि देहकम् ।
विष्णूक्तः ससुरो ब्रह्मा गत्वाऽपश्यन्महासुरम् ॥

ब्रह्मोवाच ।
पृथिव्यां यानि तीर्थानि दृष्टानि भ्रमता मया ।
यज्ञार्थं न तु ते तानि पवित्राणि शरीरतः ॥
अतः पवित्रं देहं स्वं यज्ञार्थं देहि मेऽसुर ॥

गयासुर उवाच ।
धन्योऽहं देवदेवेश । यद्देहः प्रार्थ्यते त्वया ।
त्वयैवोत्पादितो देहः पवित्रश्च त्वया कृतः ।
सर्व्वेषामुपकाराय यागोऽवश्यं भवत्विति ॥
इत्युक्त्वा सोऽपतद्भूमौ श्वेतकल्पे गयासुरः ।
नैरृर्त्यां दिशमाश्रित्य तदा कोलाहले गिरौ ॥
शिरः कृत्वोत्तरे दैत्यः पादौ कृत्वा तु दक्षिणे ।
ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत् ॥
चलितश्चकितो ब्रह्मा धर्म्मराजमभाषत ।
यास्ते गृहे तव शिला तामानीयात्र धारय ॥
दैत्यस्य शीघ्रं शिरसि तां धारय ममाज्ञया ।
निश्चलार्थं यमः श्रुत्वा धारयन्मस्तके शिलाम् ॥
शिलाया धारितायान्तु सशिलश्चासुरोऽचलत् ।
देवानूचेऽथ रुद्रादीन् शिलाया निश्चलाः किल ॥
तिष्ठन्तु देवाः सकलास्तथेत्युक्त्वा च ते स्थिताः ।
देवाः पादैर्लक्षयित्वा तथापि चलितोऽसुरः ॥
ब्रह्माथ व्याकुलो विष्णुं गतः क्षीराब्धिशायिनम् ।
अवनम्रे हरिः कस्मादागतोऽसि वदस्व तत् ॥

ब्रह्मोवाच ।
देवदेव । कृते यागे प्रचचाल गयासुरः ।
इदानीं निश्चलार्थं हि प्रसादं कुरु माधव ॥
ब्रह्मणो वचनं श्रुत्वा ह्याकृष्य स्वशरीरतः ।
मूर्त्तिं ददौ निश्चलार्थं ब्रह्मणे भगवान् हरिः ॥
आनीय मूर्त्तिं ब्रह्मापि शिलायां समधारयत् ।
तथापि चलितं वीक्ष्य पुनर्देवमिहाह्वयत् ॥
आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितो-ऽभवत् ।
आद्यया गदया चासौ यस्माद्दैत्यः स्थिरीकृतः ॥
स्थित इत्येव हरिणा तस्मादादिगदाधरः ॥"*॥
"ऊचे गयासुरो देवान् किमर्थं वञ्चितो ह्यहम् ।
यज्ञार्थं ब्रह्मणे दत्तं शरीरममलं मया ।
पीडाश्च यदहं देवाः प्रसन्नाः सन्तु सर्व्वदा ॥"
"वरं ब्रूहि प्रसन्नाः स्मो देवैरूचे गयासुरः ॥"
"यावत् पृथ्वी पर्व्वताश्च यावच्चन्द्रार्कतारकाः ।
तावच्छिलायां तिष्ठन्तु ब्रह्मविष्णुमहेश्वराः ॥
गदाधरः स्वयं लोकान् पूयात् सर्व्वाघनाशनः ।
श्राद्धं सपिण्डकं येषां ब्रह्मलोकं प्रयान्तु ते ॥"
"किं बहूक्त्या सुरेशानां युष्माकमपि देवता ।
येन, तिष्ठाम्यहं नापि समयः प्रतिमाल्यताम् ॥"
"त्वया यत् प्रार्थितं वीर । तद्भविष्यत्यसंशयम् ।
अस्मत्पादानर्च्चयित्वा यास्यन्ति परमां गतिम् ।
दैवैर्दत्तवरो दैत्यो हर्षितो निश्चलोऽभवत् ॥"

अथ गयाशिरआदिपरिमाणम् ।
"नागाज्जनार्द्दनाद्भूपयूपाच्चोत्तरमानसात् ।
एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते ॥
पितामहं समासाद्य यावदुत्तरमानसम् ।
फल्गुतीर्थन्तु विज्ञेयं देवानामपि दुर्लभम् ॥
क्रौञ्चपादात् फल्गुतीर्थं यावत् साक्षाद्गयाशिरः ।

सखं गयासुरस्यैतत्प्रसादात् श्राद्धमक्षयम् ॥
मुण्डपृष्ठाच्च पूर्व्वस्मिन् पश्चिमे दक्षिणोत्तरे ।
सार्द्धं क्रोशद्वयं मान गयायां ब्रह्मणेरितम् ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
तन्मध्ये सर्व्वतीर्थानि त्रैलोक्ये यानि सन्ति वै ॥"

अथ गयामाहात्म्यादि ।

"गयायां न हि तत् स्थानं यत्र तीर्थं न विद्यते ।
सान्निध्यं सर्व्वतीर्थानां गयातीर्थं ततो परम् ॥
ब्रह्मज्ञानेन किं साध्यं गोगृहे मरणेन किम् ।
वासेन किं कुरुक्षेत्रे यदि पुत्त्रो गयां व्रजेत् ॥
श्राद्धकृद्यो गयाक्षेत्रे पितॄणामनृणोऽपि सः ।
शिरसि श्राद्धकृद्यस्तु कुलानां शतमुद्धरेत् ॥
गयाशिरसि यः पिण्डान् येषां नाम्ना तु निर्व्वपेत् ।
नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥
गत्वा वणिग्गयाशीर्षे प्रेतराजस्य पिण्डकम् ।
प्रददौ मनुजैः सार्द्धं स्वपितृभ्यस्ततो ददौ ॥
प्रेताः प्रेतत्वनिर्म्मुक्ता वणिक् च गृहमागतः ।
प्रेतराजः सह प्रेतैर्गयाश्राद्धाद्दिवं गतः ॥"* ॥
"गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने चास्तेऽपि गुरुशुक्रयोः ॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि वृहस्पतौ ।
तथा दैवप्रमादेन प्रवहत्सु ग्रहेषु च ॥
पूतः कर्म्माधिकारी च श्राद्धकृद्ब्रह्मलोकभाक् ॥
मीने मेषे स्थिते सूर्य्ये कन्यायां कार्म्मुके घटे ।
नारद । त्रिषु लोकेषु गयाश्राद्धं सुदुर्लभम् ॥"* ॥
"मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ।
वर्ज्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ॥
दण्डं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः ।
दण्डं न्यस्य विष्णुपदे पितृभिः सह मुच्यते ॥
गयागजो गयादित्यो गायत्त्री च गदाधरः ।
गया गयासुरश्चैव षड्गया मुक्तिदायिका ॥"

अथ पिण्डद्रव्याणि ।

"पायसेनाथ चरुणा सक्तुना पिष्टकेन वा ।
तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनम् ॥
तिलकल्केन खण्डेन गुडेन सघृतेन वा ।
केवलेनैव दध्ना वा अन्नेन मधुनाथवा ॥
पिण्याकं सघृतं खण्डं पितृभ्योऽक्षयमित्युत ॥"

अथ गयास्थब्राह्मणपूजाविधिः ।

तत्रस्था ब्राह्मणा ब्रह्माणमूचुः ।

"त्वया यद्दत्तमखिलं तत् सर्व्वं शापतो गतम् ।
जीवनार्थं प्रसादं नो भगवन् ! कर्त्तुमर्हसि ॥
तत् श्रुत्वा ब्राह्मणान् ब्रह्मा प्रोवाचेदं दयान्वितः ।
तीर्थोपजीविका यूयमाचन्द्रार्कं भविष्यथ ॥
लोकाः पुण्यगयायां ये श्राद्धिनो ब्रह्मलोकगाः ।
युष्मान् ये पूजयिष्यन्ति तैरहं पूजितः सदा ॥"

अथ गयायां श्राद्धादिकरणार्थं तीर्थानि ।

प्रथमदिने गयाप्रवेशे फल्गुतीर्थे स्नानतर्पण-श्राद्धानि १ प्रेतशिलायां ब्रह्मकुण्डे स्नान श्राद्ध षोड़शपिण्डदान प्रेतपर्व्वते तिलमिश्रितसक्तु-निक्षेपश्च २ पञ्चतीर्थमध्ये उत्तरमानसे स्नान सपिण्डक श्राद्ध सूर्य्यार्च्चनञ्च ३ दक्षिणमानसे उदीच्यां उदीचीतीर्थे स्नानम् ४ तस्य मध्ये कनखलतीर्थे स्नानम् ५ तस्य दक्षिणे दक्षिण-मानसे तीर्थत्रये स्नानं श्राद्धं सूर्य्यार्च्चनञ्च ६ फल्गुतीर्थे स्नानं तर्पणं सपिण्डक श्राद्धं ततो गदाधरस्य दर्शनं पूजनञ्च ७ ॥ द्वितीयदिने धर्म्मारण्ये गमनं धर्म्मेश्वरनमनं बोधितरु-नमनञ्च ८ मतङ्गवाप्यां स्नानं तर्पणं श्राद्ध मत-ङ्गेशनमनं यूपकूपयोर्मध्ये श्राद्धञ्च ९ ॥ तृतीय-दिने ब्रह्मसरसि स्नानं सपिण्डकं श्राद्धं यूप-प्रदक्षिणं ब्रह्मनमनञ्च १० गोप्रचारसमीपे आम्रवृक्षसेचनम् ११ ततो यमकुक्कुरकाकबलि-दान पुनः स्नानञ्च १२ ॥ चतुर्थदिने फल्गुतीर्थे स्नानादिकं ततो गयाशिरसि विष्णुपदस्य दर्शनं स्पर्शन पूजनं तत्र सपिण्डक श्राद्धञ्च १३ रुद्र. १४ ब्रह्मा १५ दक्षिणाग्निः १६ गार्हपत्यः १७ आहवनीयः १८ सत्यः १९ आवसथ्यः २० शक्रः २१ अगस्त्यः २२ क्रौञ्चः २३ मातङ्गः२४ कार्त्तिकेयः २५ गणेशः २६ कश्यपः एषां पदेषु श्राद्धम् २७ गजकर्णिकायां तर्पणम् २८ कनकेशकेदारनरसिंहवामनरथमार्गाणां पूज-नम् २९ ॥ पञ्चमदिने गदालोले स्नानं सपि-ण्डक श्राद्धञ्च ३३ अक्षयवटे श्राद्धं ब्रह्मकल्पित-विप्राणां पूजनं पुरोधसे षोडशदानञ्च ३४ गायत्त्र्यग्रे प्रातःसन्ध्याचरणं सपिण्डकं श्राद्धञ्च३५ समुद्यततीर्थे स्नात्वा सावित्त्र्यग्रे मध्याह्नसन्ध्या-चरणं पिण्डदानञ्च ३६ प्राचीसरस्वत्यां स्नात्वा सायाह्नसन्ध्याचरणं ३७ विशाला ३८ लेलि-हानम् ३९ भरताश्रमनामकरामतीर्थम् ४० पदा-ङ्कितम् ४१ मुण्डपृष्ठस्थगदाधरसमीपम् ४२ आकाशगङ्गा ४३ गिरिकर्णमुख एषु स्नान पिण्डदानञ्च ४४ वैतरण्यां स्नान पिण्डदानं श्राद्धं गोदानञ्च ४५ घृतकुल्या ४६ मधुकुल्या ४७ देविकानदी४८ शिलासङ्गम४९ मधुस्रवासु स्नान सपिण्डकं श्राद्ध पिण्डदानञ्च५० दशाश्वमेधिकम्५१ हंसतीर्थम्५२ अमरकण्टकम्५३ कोटितीर्थम्५४ रुक्मिणीकुण्डं एषु पिण्डदानम् ५५ मार्कण्डेये-श्वर-५६ कोटीश्वरयोर्दर्शनं नमनञ्च ५७ द्वैती-कस्यां पुष्करिण्यां पितृभ्यो दानम् ५८ पङ्कजवने पाण्डुशिलायां श्राद्धम् ५९ मुख्यतीर्थे स्नान तर्पण पिण्डदानञ्च ६० गयाकूपे पिण्डदानं ६१ भस्मकूटे भस्मना स्नानम् ६२ सङ्गमतीर्थे स्नानम् ६३ धेनुकारण्ये पिण्डदानम् ६४ काम-धेनुपदे स्नात्वा कामदुघानमनम् ६५ ॥ * ॥

"कर्द्दमाले गयानाभौ मुण्डपृष्ठसमीपतः ।
स्नात्वा श्राद्धादिकं कृत्वा पितॄणामनृणो भवेत् ॥
फल्गुचण्डीश्मशानाक्षीमङ्गलाद्याः समर्च्चयेत् ।
गयायाञ्च वृषोत्सर्गस्त्रिसप्तकुलमुद्धरेत् ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥ * ॥

तत्र मरणे मुक्तिर्यथा, तत्रैव ३ अध्याये ।

"गदाधरोद्भवतीर्थं सर्व्वतीर्थोत्तमोत्तमम् ।
मुक्तिर्भवेत् पितॄणाञ्च कर्त्तॄणां श्राद्धतः सदा ॥
जरायुजा अण्डजा वा स्वेदजा वापि चोद्भिदः ।
त्यक्ता देहं शिलायां ते यान्ति विष्णुस्वरूपताम् ॥"

तत्रस्थजनार्द्दनहस्ते जीवितस्य पिण्डदानविधि-र्यथा,—

"जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यक्षयाशेषां सदधेनैव तिलैर्व्विना ॥
जीवतां दधिसम्मिश्रं सर्व्वे ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो मृते प्रभो ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गयाशिरे ।"

इति च वायुपुराणे गयामाहात्म्ये ४ अध्यायः ॥

गरं, क्ली, (गिरति दोषसमूहं नाशयति स्वस्मिन् जातस्य बालकस्येति भावः । गृ + पचाद्यच् ।) ववादेरेकादशकरणान्तर्गतपञ्चमकरणम् । इति मेदिनी । रे । २२ ॥ (यथा, वृहत्संहिता-याम् । ९९ । ४ ।

"ववबालवकौलवतैतिलाख्य
गरवणिजविष्टिसञ्ज्ञानाम् ।"

एतेषामधीशाः । यथा, तत्रैव । ९९ । ४-५ ।

" पतयः सुरेन्द्रकमलज-
मित्रार्य्यमभूश्रियः सयमाः ॥
कृष्णचतुर्द्दश्यर्द्धाद् ध्रुवाणि
शकुनिश्चतुष्पदं नागम् ।
किंस्तुघ्नमिति च तेषां
कलिवृषफणिमारुताः पतयः ॥")

तत्र जातस्य फलम् ।

"विचारदक्षो विजितारिपक्षः
शूरोऽतिधीरो मृदुहास्ययुक्तः ।
दाता दयालुर्गुणवान्नरः स्याद्
गरे परेषामुपकारकर्त्ता ॥"

इति कोष्ठीप्रदीपः ॥

(गरादेः फलं यथा वृहत्संहितायाम् । ९९।७।

"कृषिबीजगृहाश्रयजानि गरे
वणिजि ध्रुवकार्य्यवणिग्युतयः ॥"

गीर्य्यते भक्ष्यते इति । गृ + कर्म्मण्यप् ।) विषम् । (यथा, भागवते । ८।७।४१ ।

"तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ॥")

वत्सनाभाख्यविषम् । इति राजनिर्घण्टः ॥ (सम्मोहनं विषम् । इति माधवकरकृतरुग्वि-निश्चयटीकाकृता श्रीकण्ठदत्तेनोदररोगव्याख्याने उक्तम् ॥)

गरः, पुं, (गीर्य्यते इति । गॄ + कर्म्मणि अप् ।) विषम् । (यथा, भागवते । ६।१४।४३ ।

"विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः ।
गरं ददुः कुमाराय दुर्म्मर्षा नृपतिं प्रति ॥")

उपविषम् । रोगः । इति हेमचन्द्रः । ४।१८० ॥

गरघ्नः, पुं, (गरं विषं हन्तीति । हन् + टक ।) कृष्णार्जकः । वर्व्वरः । इति राजनिर्घण्टः ॥

गरघ्नी, स्त्री, (गरघ्न + टित्वात् ङीप् ।) मत्स्य-विशेषः । गरई इति भाषा । अस्या गुणाः । मधुरत्वम् । कषायत्वम् । वातपित्तकफनाशित्वम् । रुचिबलवीर्य्यकारित्वम् । दीपनत्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥

("गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत् ।
कफघ्नी रुचिकृद्वृष्या दीपनी बलवीर्य्यकृत् ॥"
इति शब्दार्थचिन्तामणिधृतवचनम् ॥
गरं संसारयातनारूपं विषं हन्तीति । हन्+
टक् ङीप् च । गङ्गा । यथा, काशीखण्डे । २९।५४ ।
"गरघ्नीढाश्वरा गुन्द्रा गरघ्नी गानवत्सला ॥")

गरणं, क्ली, (गृ सेचने गॄ निगरणे + भावे ल्युट् ।)
सेचनम् । निगरणम् । इति व्याकरणम् ॥

गरद, क्ली, (गॄ + भावे अप् । गरो भक्षणम् । गरेण
भक्षणेन दीयते खण्ड्यते म्रियतेऽनेनादनेन वा ।
दो + अपादाने करणे वा घञर्थे कः ।) विषम् ।
इति राजनिर्घण्टः ॥

गरद:, त्रि, (गरं विषं ददातीति । दा + कः ।)
विषदानकर्त्ता । (अयं हि आततायिनामन्यतम ।
अस्य हनने दण्डादिकं नास्ति ।) यथा, स्मृतिः ।
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापह. ।"
(अयं हि श्राद्धभोजने परिहर्त्तव्य. । तथा च
मनौ । ३ । १५८ ।
"आगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥")

गरव्रतः, पुं, (गरो गरणं सर्पादिग्रसनरूपं व्रतं
नैसर्गिको नियमो यस्य ।) मयूरः । इति
शब्दरत्नावली ॥

गरभः, पुं, (गॄ + बाहुलकात् अभच् ।) गर्भः ।
इति हेमचन्द्रः । ३।२०४ ॥

गरलं, क्ली, (गिरति ग्रसति नाशयतीत्यर्थः ।
गॄ + अलच् । गरात् भक्षणात् लाति आदत्ते
जीवनं वा । ला + क. ।) विषम् । इत्यमरः ।
१।८।९ ॥ (यथा, गीतगोविन्दे ४ । २ ।
"व्यालनिलयमिलनेन गरलमिव कलयति
मलयसमीरम् ॥")
पन्नगविषम् । परिमाणम् । तृणपूलकम् । इति
हेमचन्द्र. ॥ घासेर गङ्गा पुला आटि इत्यादि
भाषा ॥

गरलारिः, पुं, (गरलस्य विषस्य अरिः तन्नाशक-
त्वात्तथात्वम् ।) मरकतमणिः । इति राज-
निर्घण्टः ॥

गरा, स्त्री, (गीर्य्यते भक्ष्यते औषधार्थं रोगि-
भिरिति शेषः । गॄ + कर्म्मण्यप् । ततोऽजादि-
त्वात् टाप् ।) देवदालीलता । इति राज-
निर्घण्टः ॥ निगरणम् । इति धरणी ॥

गरागरी, स्त्री, (गरं विषं आगिरति नाश-
यतीति । गरं स्वमिकविषमित्येके । आ + गॄ
अच । संज्ञायां जातौ वा ङीष् ।) देवताड-
वृक्षः । इत्यमरटीकायां स्वामी ॥ (यथास्या.
पर्य्यायाः ।
"गरागरी च वेणी च तथा स्याद्देवताडकः ।"
इति कल्पस्थाने द्वितीयेऽध्याये चरकेणोक्तम् ॥
गुणाश्चास्या जीमूतकशब्दे ज्ञातव्या. ॥)

गरात्मक, क्ली, (गर. विष आत्मा बीजभूत
यस्य इति कप् ।) क्षोमाजनबीजम् । इति
शब्दचन्द्रिका ॥

गराधिका, स्त्री, (गरेषु गरप्रतीकारादिषु
अधिका प्रधाना ।) लाक्षा । इति रत्नमाला ।
गरायिका गवाधिकापि पाठः ॥ (गरादधिका ।
विषप्रधाना ॥)

गरिमा, [न्] त्रि, ("प्रियस्थिरस्फिरोरुबहुल-
गुरुवृद्धेति ।" ६ । ४ । १५७ । इति गरादेशः ।
पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति
इमनिच् ।) गुरुता । इति व्याकरणम् ॥ (यथा,
भागवते । ८ । २ । २२ ।
"गिरिं गरिम्णा परितः प्रकम्पयन् ॥
निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥")

गरिष्ठः, त्रि, (अतिशयेन गुरुः । "प्रियस्थिरेति ।"
६।४।१५७ । इति इष्ठन् गरादेशश्च ।) अति
गुरुः । इति जटाधरः ॥ (पु, दानवविशेषः ।
यथा, महाभारते । १ । ६५ । ३० ।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥"
नृपविशेषः । यथा, तत्रैव । २।७।१२ ।
"हविष्मांश्च गरिष्ठश्च हरिश्चन्द्रश्च पार्थिवः ॥")

गरी, स्त्री, (गर + जातौ संज्ञायां वा ङीष् ।)
देवताडवृक्षः । इत्यमरः । २ । ४ । ९६ ॥ खरा ।
इति मेदिनी । रे । २२ ॥ (देवताडशब्देऽस्या
विवरणं बोद्धव्यम् ॥)

गरीयान्, [स्] त्रि, (अतिशयेन गुरुः ।
गुरु + ईयसुन् गरादेशश्च ।) अतिगुरुः । इति
व्याकरणम् ॥

गरुडः, पुं, (गरुद्भ्यां पक्षाभ्यां डयते उड्डयते । इति
गरुत् + डी + ड । पृषोदरात् तलोपे साधुः ।
यद्वा, "गिर उडच् ।" उणां ४ । १५५ ।
इति उडच् ।) स्वनामख्यातपक्षी । तत्-
पर्य्यायः । गरुत्मान् २ तार्क्ष्यः ३ वैनतेयः ४
खगेश्वरः ५ नागान्तकः ६ विष्णुरथः ७ सुपर्णः ८
पन्नगाशनः ९ । इत्यमरः । १ । १ । ३० ॥ महा-
वीरः १० पक्षिसिंहः ११ उरगाशनः १२ । इति
जटाधरः ॥ शाल्मली १३ हरिवाहनः १४
अमृताहरणः १५ नागाशनः १६ । इति हारा-
वली ॥ शाल्मलिस्थः १७ खगेन्द्रः १८ भुजगा-
न्तकः १९ तरस्वी २० तार्क्ष्यनायकः २१ । इति
राजनिर्घण्टः ॥ * ॥ तस्योत्पत्तिकारणं यथा,—
"यजतः पुत्त्रकामस्य कश्यपस्य प्रजापतेः ।
साहाय्यमृषयो देवा गन्धर्व्वाश्च ददुः किल ॥
तत्रेध्मानयने शक्रो नियुक्तः कश्यपेन ह ।
मुनयो वालिखिल्याश्च ये चान्ये देवतागणाः ॥
शक्रस्तु वीर्य्यसदृशमिध्मभारं गिरिप्रभम् ।
समुत्क्षिप्यानयामास नातिकृच्छ्रादिव प्रभुः ॥
अथापश्यदृषीन् ह्रस्वानङ्गुष्ठोदरवर्ष्मणः ।
पलाशवर्त्तिकामेकां सहितान् वहतः पथि ॥
तान् सर्व्वान् विस्मयाविष्टो वीर्य्योन्मत्तः पुरन्दरः ।
अवहस्याभ्यगात् क्षिप्रं लङ्घयित्वावमन्य च ॥
तेऽथ रोषसमाविष्टाः सुभृशं जातमन्यवः ।
आरेभिरे महत् कर्म्म तदा शक्रभयङ्करम् ॥
कामवीर्य्यः कामगमो देवराजभयप्रदः ।
इन्द्रोऽन्यो सर्व्वदेवानां भवेदिति यतव्रताः ॥
तद्बुद्ध्वा भृशसन्तप्तो देवराजः शतक्रतुः ।
जगाम शरणं तत्र कश्यपं संशितव्रतम् ॥
तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः ।
वालिखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत ॥
अथ ते तं महात्मानं प्रत्यूचुः सत्यवादिनः ।
तान् कश्यप उवाचेदं सान्त्वपूर्व्वं प्रजापतिः ॥"
तस्य पक्षीन्द्रत्वकारणं यथा,—
"अयमिन्द्रस्त्रिभुवने नियोगात् ब्रह्मणः कृतः
इन्द्रार्थञ्च भवन्तोऽपि यत्नवन्तस्तपोधनाः ॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः ।
भवतां हि न मिथ्यायं सङ्कल्पो वै चिकीर्षितः ॥
भवत्वेष पतत्त्रीणामिन्द्रोऽतिबलसत्त्ववान् ।
प्रसादः क्रियतामस्य देवराजस्य याचतः ॥
वालिखिल्या ऊचुः ।
अपत्यार्थं समारम्भो भवतश्चायमीप्सितः ।
तथा चैव विधत्स्वात्र यथाश्रेयोऽनुपश्यसि ॥
एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा ।
विनता नाम कल्याणी पुत्त्रकामा यशस्विनी ॥
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः ।
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः ॥
आरम्भः सफलो देवि । भविता यस्तवेप्सितः ।
जनयिष्यसि पुत्त्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ॥
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा ।
एतौ सर्व्वपतत्त्रीणामिन्द्रत्वं कारयिष्यतः ॥
विनता चापि सिद्धार्था बभूव मुदिता तथा ।
जनयामास पुत्त्रौ द्वावरुणं गरुडं तथा ॥
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ।
पतत्त्रीणान्तु गरुड इन्द्रत्वेनाभ्यषिच्यत ॥"*॥
तस्य जन्मकालीनरूपं यथा,—
"एतस्मिन्नन्तरे चापि गरुडः काल आगते ।
विना मात्रा महातेजा विदार्य्याण्डमजायत ॥
महासत्त्वबलोपेतः सर्व्वा विद्योतयन्दिशः ।
कामरूपी कामगमः कामवीर्य्यो विहङ्गमः ॥
अग्निराशिरिवोद्भासन् समिद्धोऽतिभयङ्करः ।
विद्युद्विस्पष्टपिङ्गाक्षो युगान्ताग्निसमप्रभः ॥
प्रवृद्धः सहसा पक्षी महाकायो नभो गतः ।
घोरो घोरस्वनो रौद्रो वह्निरौर्व्व इवापरः ॥"*॥
तस्य विष्णुवाहनत्वे कारणं यथा,—
"अपीत्वा चामृतं पक्षी परिगृह्याशु निःसृतः ।
अगच्छदपरिश्रान्त आवार्य्यार्कप्रभां खगः ॥
विष्णुना तु तदाकाशे वैनतेयः समेयिवान् ।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा ॥
तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् ।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः ॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः ।
अजरश्चामरश्च स्याममृतेन विनाप्यहम् ।
एवमस्त्विति तं विष्णुरुवाच विनतासुतम् ।
प्रतिगृह्य वरौ तौ च गरुडो विष्णुमब्रवीत् ।
भवतेऽपि वरं दद्मि वृणोतु भगवानपि ।
तं वव्रे वाहनं कृष्णो गरुत्मन्तं महाबलम् ।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् ।"
इति महाभारते । १ । ३१–३३ । अध्यायेषु ।

(व्यूहविशेषः । यथा, मनुः । ७ । १८७ ।
"वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥"
"दण्डमुखपक्षाङ्गाग: पृथुमध्यो वराहव्यूहः । एष एव पृथुतरमध्यो गरुडव्यूहः।" इति कुल्लूकभट्टः॥)
गरुडध्वजः, पुं, (गरुडः ध्वजश्चिह्नं यस्य । यद्वा, गरुडो ध्वजे रथध्वजे यस्य ।) विष्णुः । इत्यमरः ।१।१।१८ ॥ (यथा, विष्णुपुराणे ।५।१।३३।
"इत्युक्त्वा प्रययौ विप्र । सह देवैः पितामहः ।
समाहितमतिश्चैव तुष्टाव गरुडध्वजम् ॥"
अस्य एतन्नामकारणकथा यथा, महाभारते । १ । ३३ । १२-१७ ।
"विष्णुना तु तदाकाशे वैनतेयः समेयिवान् ।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा ॥
तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् ।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः ॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः ।
अजरश्चामरश्च स्याममृतेन विनाप्यहम् ।
एवमस्त्विति तं विष्णुरुवाच विनतासुतम् ॥"
"ध्वजश्च चक्रे भगवानुपरि स्थास्यतीति तम् ॥")
गरुडाग्रजः, पुं, (गरुडस्य अग्रजो ज्येष्ठः ।) अरुणः । इत्यमरः ।१।३।३२ ॥ (अस्य गरुडाग्रजत्वकथा यथा, महाभारते । १।१६।२४-३४।
"विनता नाम कल्याणी पुत्त्रकामा यशस्विनी ।
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः ॥
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः ।
आरम्भः सफलो देवि ! भवितायं तवेप्सितः ॥
जनयिष्यसि पुत्त्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ।
तपसा वालखिल्यानां मम सङ्कल्पजौ तथा ॥
भविष्यतो महाभागौ पुत्त्रौ त्रैलोक्यपूजितौ ।
उवाच चैनं भगवान् कश्यपः पुनरेव ह ॥
धार्य्यतामप्रमादेन गर्भोऽयं सुमहोदयः ।
एतौ सर्व्वपतत्त्रीणामिन्द्रत्वं कारयिष्यतः ॥"
"विनता चापि सिद्धार्था बभूव मुदिता तथा ।
जनयामास पुत्त्रौ द्वावरुणं गरुडं तथा ॥
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ।
पतत्त्रीणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत ॥")
गरुडाङ्कितं, क्ली, (गरुड इव अङ्कितम् । गरुडसादृश्यादस्य तथात्वम् ।) मरकतमणिः । इति शब्दरत्नावली ॥
गरुडाश्मा, [न्] पुं, (गरुडवर्णवत् अश्मा प्रस्तरः । गरुडवर्णसादृश्यात् तथात्वम् ।) मरकतमणिः । इति जटाधरः ॥
गरुडोत्तीर्णं, क्ली, (गरुडादुत्तीर्णं वर्णेनेति शेषः । यद्वा, गरुड उत्तीर्णो वर्णेनातिक्रान्तो येन ।) मरकतमणिः । इति राजनिर्घण्टः ॥
गरुत्, पु, (गृणाति शब्दायते वायुवेगवशादिति । गॄ गि शब्दे + "म्रुगॄभ्य उतिः ।" उणां । १ । ९६ । इति उतिः ।) पक्षः । इत्यमरः । २ । ५ । ३६ ॥ पाखा इति भाषा ॥ (गिरतीति । गॄ निगरणे + उतिः । निगरणम् । भक्षणम् । यथा, यजुर्व्वेदे ।१७।७२। "सुपर्णोऽसि गरुत्मान् दिवं गच्छ ।"
"असि । त्वं सुपर्णोऽसि सुपर्णपक्ष्याकारो गरुडोऽसि । गरुत्मान् गरुत् गरणं गिलनं भक्षणं अस्यास्तीति गरुत्मान् अग्निनायत्वानित्यर्थः ।" इति वेददीपितिः ॥)
गरुत्मान्, [त्] पुं, (गरुतः पक्षाः सन्त्यस्य । गरुत् + मतुप् ।) गरुडः । इत्यमरः । १।१।३१ । (यथा, भागवते । ३ । १६ । ११ ।
"जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥")
पक्षिमात्रम् । इति मेदिनी । ते । १६६ ॥
गरुद्योधी, [न्] पु, (गरुता पक्षेण युध्यतीति । युध् + णिनिः ।) भारतीपक्षी । इति त्रिकाण्डशेषः ॥ भारद्द इति भाषा ॥
गर्गः, पु, (गृणाति वेदध्वनिना शब्दायते स्तौति इत्यर्थः । गॄ गि शब्दे + "सृदिगॄगर्गौ ।" उणां । १।१२७ । इति गः ।) मुनिविशेषः । स तु गयाक्षेत्रे यज्ञार्थं सृष्टो ब्रह्मणः पुत्त्रः । इति वायुपुराणे गयामाहात्म्ये २ अध्यायः ॥ (इहस्पतिवंशसम्भवोऽन्यो मुनिभेदः । स तु वितथस्य पुत्त्रः । यथा, हरिवंशे । ३२ । १५—२० ।
"इहस्पतेरङ्गिरसः पुत्त्रो राजन्महामुनिः ।
सङ्क्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्व्विभुः ॥
अत्रैवोदाहरन्तीमं भरद्वाजस्य धीमतः ।
धर्म्मसंक्रमणञ्चापि मरुद्भिर्भरताय वै ॥
अयाजयद्भरद्वाजो मरुद्भिः क्रतुभिर्हि तम् ।
पूर्व्वन्तु वितथे तस्य कृते वै पुत्त्रजन्मनि ॥
ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत् ।
मौत्रेऽथ वितथे जाते भरतस्तु दिवं ययौ ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ ।
स चापि वितथः पुत्त्रान् जनयामास पञ्च वै ॥
सुहोत्रञ्च सुहोतारं गयं गर्गन्तथैव च ॥"
अयं हि शिवमाराध्य चतुःषष्ट्यङ्गज्योतिषादिज्ञानमलभत । यथा, महाभारते । १३।१८।३८।
गर्ग उवाच ।
"चतुःषष्ट्यङ्गमददत् कलाज्ञानं ममाद्भुतम् ।
सरस्वत्यास्तटे तुष्टो (शिवः) मनोयज्ञेन पाण्डव ॥"
तथा, इहत्संहितायाम् । २१ । ५ ।
"न तु तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये ॥")
तालविशेषः । यथा, सङ्गीतदामोदरे ।
"चतुर्द्रुत विरामान्तं तालोऽयं गर्गसञ्ज्ञितः ॥"
गर्गरः, पु, (गॄ गि शब्दे + भावे गः । गर्गं शब्दं रातीति । रा + "आतोऽनुपसर्गे कः ।"३।२।३ । इति कः ।) मत्स्यभेदः । इति जटाधरः ॥ गागरा इति भाषा ॥ अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥ अस्याकारगुणौ यथा, राजनिर्घण्टे ।
"यः पीतवर्णोऽपि च पिच्छिलाङ्गः
पृष्ठेषु रेखा बहुलः सशल्कः ।
स गर्गरो वर्ब्बरनादवश्यो
जडश्च शीतः कफवातकारी ॥"
"गर्गरः पित्तलः किञ्चित् वातजित् कफकोपनः ।"
इति भावप्रकाशः ॥
गर्गरी, स्त्री, (गर्गं शब्दं रातीति । रा + कः । गौरादित्वात् ङीष् ।) मन्थनी । दधिमन्थनपात्रम् । इत्यमरः । २ । ९ । ७४ ॥ कलसी । गागरी इति भाषा ॥ यथा, तिथ्यादितत्त्वे ।
"मेषादौ सक्तवो देया वारिपूर्णा च गर्गरी ॥"
गर्गाटः, पुं, (गर्गेति शब्दं कृत्वा अटतीति । गर्ग + अट् + पचाद्यच् । शकन्ध्वादिवदकारलोपः ।) मत्स्यविशेषः । तत्पर्य्यायः । योगनाविकः २ । इति हारावली । १९६ ॥
गर्ज्ज, ऊर्ज्जाशब्दे । इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट् ।) ऊर्ज्जा बलम् । सेमन्तात् सरोरिति यः तत्करणकशब्दः । गर्ज्जति सिंहः । इति दुर्गादासः ॥
गर्ज्ज, क खने । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, गर्ज्जयति । इति दुर्गादासः ॥
गर्ज्जः, स्त्री, (गर्ज्जनमिति । गर्ज्ज + भावे घञ् ।) हस्तिशब्दः । इति हेमचन्द्रः । ६ । ४१ ॥ मेघादिशब्दश्च ॥
गर्ज्जकः, पु, (गर्ज्जतीति । गर्ज्ज + ण्वुल् ।) मत्स्यविशेषः । गजाड इति भाषा ॥ तत्पर्य्यायः । शालः । शालकः ३ । इति शब्दरत्नावली ॥ (शालशब्देऽस्य विवृतिर्ज्ञातव्या ॥)
गर्ज्जनं, क्ली, (गर्ज्ज + भावे ल्युट् ।) शब्दः । (गर्ज्जत्यनेनेति । गर्ज्ज + करणे ल्युट् ।) कोपः । इति मेदिनी । ने । ५६ ॥
गर्ज्जरं, क्ली, मूलविशेषः । गाजर इति भाषा ॥ तत्पर्य्यायः । पिण्डमूलम् २ पीतकन्दम् ३ सुमूलकम् ४ स्वादुमूलम् ५ सुपीतम् ६ नारङ्गम् ७ पीतमूलकम् ८ । अस्य गुणाः । मधुरत्वम् । रुचिकारित्वम् । किञ्चित् कटुत्वम् । कफाध्मानक्रिमिशूलदाहपित्ततृष्णानाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"गाजरं गृञ्जनं प्रोक्तं तथा नारङ्गवर्णकम् ।
गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु ॥
संग्राहि रक्तपित्तार्शोग्रहणीकफवातजित् ॥"
इति भावप्रकाशः ॥
गर्ज्जाफलः, पु, (गर्ज्जा सम्मर्द्दध्वनिः फले यस्य । शुष्कपक्कफले शब्दबाहुल्यादस्य तथात्वम् ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥ (गर्ज्जा गर्ज्जनमेव फलं यस्य ।) युद्धम् । इति हेमचन्द्रः ॥ भर्त्सनम् । उत्तेजनम् । इति शब्दरत्नावली ॥
गर्ज्जिः, पु, (गर्ज्ज ऊर्ज्जाशब्दे + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इति इन् ।) मेघशब्दः । इति हेमचन्द्रः । ६ । ४२ ॥
गर्ज्जितं, क्ली, (गर्ज्ज + भावे क्तः ।) मेघशब्दः । इत्यमरः । १ । ३ । ८ ॥ (रणादौ आस्फालनम् । यथा, हरिवंशे । १८२ । ४६ ।
"वाण ! किं गर्ज्जसे मोहात् शूराणां न [illegible] गर्ज्जितम् ।
एह्येहि युध्यस्व रणे किं वृथा गर्ज्जितेन ते ॥")
क्तप्रत्यये त्रि ॥ (यदुक्तं स्मृतौ ।
"सन्ध्यायां गर्ज्जिते मेघे शास्त्रचिन्तां करोति यः ।
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम् ॥")

गर्जित, पुं, (गर्ज्जो गर्ज्जनं जातोऽस्य । जातार्थे इतच् ।) मत्तहस्ती । इत्यमरः । २ । ८ । ३६ ॥

गर्त्तः, पु, (गिरति ग्रसति खस्मिन् पतितं जीवजातादिकमित्यर्थः । गॄ निगरणे + "हसिमृग्रिण्वामिदमीति ।" उणां । ३ । ८६ । इति तन् ।) भुवि श्वभ्रम् । गाड़ा इति भाषा ॥ तत्पर्य्यायः । अवटः २ । इत्यमरः । १ । ८ । २ ॥ भूरन्ध्रम् ३ दरः ४ श्वभ्रम् ५ । इति जटाधरः ॥ अवटिः ६ अवटुः ७ पृथिवीरन्ध्रम् ८ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । २१ । ६ ।
"धरण्यां विद्यते गर्त्ते निपपात लघुक्रमः ॥")
त्रिगर्त्तदेशः । कुकुन्दरः । इति मेदिनी । ते । १३ ॥ रोगभेदः । इति शब्दरत्नावली ॥ (मातृगर्भरूपगह्वरम् । यथा, भागवते । ३ । ३१ । ५ ।
"शेते विण्मूत्रयोर्गर्त्ते स जन्तुर्जन्तुसम्भवे ॥"
कूपः । यथा, तत्रैव । ३ । १३ । ३४ ।
"यद्रोमगर्त्तेषु निलिल्युरध्वराः
तस्मै नमः कारणसूकराय ते ॥"
नरकविशेषः । यथा, मार्कण्डेये । २१ । १० ।
"निपपात महागर्त्ते तिमिरौघसमावृते ॥"
अष्टधनुःसहस्रेभ्यो न्यूनगतिदेवखातभेदः । एतल्लक्षणं यथा, छन्दोगपरिशिष्टे ।
"धनुः सहस्राण्यष्टौ च गतिर्यासां न विद्यते ।
न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥"
अस्योदाहरणं यथा, मनौ । ४ । २०३ ।
"नदीषु देवखातेषु तडागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥"
गीर्य्यते स्तूयते वेदस्तुतिं कुर्व्वता जनेनेति । गॄ + तन् गुणश्च । देवरथः । यथा, ऋग्वेदे ।५।६२।८।
"आरोहथो वरुण ! मित्र ! गर्त्तमतश्चाचाथे अदितिं दितिं च ॥" "गर्त्तं रथम ।" इति भाष्यम् ॥)

गर्त्तिका, स्त्री, (गर्त्तोऽस्त्यस्याः इति ठन् ।) तन्तुशाला । इति हेमचन्द्रः । ३ । ६५ ॥ तांतघर इति भाषा ॥

गर्द्द, कि रवे । इति कविकल्पद्रुमः ॥ (चुरांपक्षे-भ्वां-परं-अकं-सेट् ।) कि, गर्द्दयति गर्द्दति । रवः शब्दः । इति दुर्गादासः ॥

गर्द्दभ, क्ली, (गर्द्द्यते शब्द्यते विश्रूयते गन्धादिभिरिति यावत् । गर्द्द रवे । "कृशृशलिकलिगर्द्दिभ्योऽभच् ।" उणां ।३।१२२। इति अभच् ।) श्वेतकुमुदम् । इति हेमचन्द्रः ॥ (यथा, वैद्यकरत्नमालायाम् ।
"कैरवं चन्द्रकान्तश्च गर्द्दभं कुमुदं कुमुत् ॥")
विडङ्गम् । इति रत्नमाला ॥

गर्द्दभः, पु, (गर्द्दति गर्द्दयति वा कर्कशशब्दं करोतीत्यर्थः । गर्द्द कि रवे + "कृशृशलिकलीति ।" उणां । ३ । १२२ । इति अभच् ।) पशुविशेषः । गाधा इति भाषा । (यथा, मनौ । ८ । २६८ ।
"गर्द्दभाजाविकानान्तु दण्डः स्यात् पञ्चमाषिकः ॥")
तत्पर्य्यायः । चक्रीवान् २ वालेयः ३ रासभः ४ खरः ५ । इत्यमरः । २ । ६ । ७७ ॥ राशभः ६ । इति तट्टीका ॥ शङ्कुकर्णः ७ भारगः ८ भूरिगमः ९ धूसराह्वयः १० वेशवः ११ धूसरः १२ । इति जटाधरः ॥ स्मरस्मर्य्यः १३ चिरमेही १४ पशुचरिः १५ चारपुष्टः १६ चारटः १७ ग्राम्याश्वः १८ । इति शब्दरत्नावली ॥ * ॥ अस्य मांसस्य गुणः । किञ्चित् गुरुत्वं बलप्रदत्वञ्च । मूत्रस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । क्षारत्वम् । कफमरुद्वातभूतकम्पोन्मादहरत्वञ्च । इति राजनिर्घण्टः ॥ (तथा च ।
"गार्द्दभं वा वनं मूत्रं तैलयोग्यं क्वचिद्भवेत् ।
सक्षारं तिक्तकटुकमुन्मादकुष्ठरोगजित् ॥"
इति हारीते प्रथमे स्थाने नवमेऽध्याये ॥
"गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत् ।
दीपनं गार्द्दभं मूत्रं क्रमिवातकफापहम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
तस्मात् गुणशिक्षा यथा,—
"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात् ॥"
इति चाणक्यम् । ७० ॥

गर्द्दभगद, पु,(गद्यते पीड्यतेऽनेन।गद + करणे अच् । गदो रोगः । गर्द्दभनामको गदः शाकपार्थिववत् समासः ।) ज्वालागर्द्दभकरोगः । इति राजनिर्घण्टः ॥ अस्य लक्षणं जालगर्द्दभशब्दे द्रष्टव्यम् ॥

गर्द्दभशाक, पु, (गर्द्दभाख्यः शाकः । यद्वा, गर्द्दभप्रियः शाको यस्य ।) ब्रह्मयष्टिवृक्षः । इति जटाधरः ॥

गर्द्दभशाका, स्त्री, (गर्द्दभशाक + टाप् ।) ब्रह्मयष्टिः । वामनहाटी इति भाषा ॥ इति रत्नमाला ॥

गर्द्दभशाखी, स्त्री, (गर्द्दभाख्या शाखा यस्याः । यद्वा गर्द्दभप्रिया शाखा अस्याः जातौ संज्ञायां वा ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥

गर्द्दभाण्ड, पु, (गर्द्दभं गन्धविशेषं अमति गच्छति प्राप्नोतीत्यर्थः । अम गत्याम् + "अमन्ताड्डः ।" उणां । १।११३। इति ड्प्रत्ययः ।) वृक्षविशेषः । गान्धिभाट इति ख्यातः । अयं पत्रकाण्डफलादिभिरश्वत्थाकारः । गन्धपिप्पलः । इति केचित् । इति भरतः ॥ गर्द्दपिप्पली । इति ख्यातः । इति सारसुन्दरी ॥ तत्पर्य्यायः । कन्दरालः २ कपीतनः ३ सुपार्श्वकः ४ प्लक्षः ५ । इत्यमरः । ३ । ४ । ४२ ॥ सुङ्गी ६ प्लवः ७ कमण्डलुः ८ । इति जटाधरः ॥ गर्द्दभाण्डः ९ प्लक्षेशः १० कन्दरालकः ११ । इति शब्दरत्नावली ॥ प्लक्षवृक्षः । इति राजनिर्घण्टः ॥ पाकुड इति भाषा ॥(कपीतनाश्वत्थशब्दयोरस्य विवृतिर्ज्ञेया ॥)

गर्द्दभाह्वय., पुं, (गर्द्दभेन गन्धेन आह्वयति स्पर्द्धते इति । आ + ह्वे + अच् । यद्वा गर्द्दभः आह्वयः आख्या यस्य ।) कुमुदम् । इति हेमचन्द्रः । ४ । २३० ॥

गर्द्दभिका, स्त्री, (गर्द्दभः दुर्गन्धमयपिडकाभेदो विद्यतेऽस्यामिति ठन् टाप् च ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा,—
"मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकाचितम् ।
रुजाकरीं गर्द्दभिकां तां विद्यात् वातपित्तजाम् ॥"
तच्चिकित्सा यथा,—
"विवृत्तामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ॥
पाके तु शोधयेदाद्यैः पक्वैर्म्मधुरभेषजैः ॥"
इति भावप्रकाशः ॥

गर्द्दभी, स्त्री, (गर्द्दभस्य पत्नीति स्त्रिया जातौ गौरादित्वाद्वा ङीष् ।) गर्द्दभपत्नी ।
("सहैव दशभिः पुत्त्रैर्भारं वहति गर्द्दभी ॥")
तस्याः क्षीरस्य गुणाः । बलकारित्वम् । वातश्वासहरत्वम् । मधुराम्लरसत्वम् । रूक्षत्वम् । दीपनत्वम् । पथ्यत्वञ्च । तद्दधिगुणाः । रूक्षत्वम् । उष्णत्वम् । लघुत्वम् । दीपनत्वम् । पाचनत्वम् । मधुराम्लरसत्वम् । रुच्यत्वम् । वातदोषनाशित्वञ्च । तन्नवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । वल्यत्वम् । दीपनत्वम् । पाके लघुत्वम् । उष्णत्वम् । मूत्रदोषकारित्वञ्च । इति राजनिर्घण्टः ॥ क्षुद्रजन्तुविशेषः । गर्द्दभिकारोगः । इति मेदिनी । भे । १६ ॥ (अस्य लक्षणं यथा,—
"सा विज्ञा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी ।
मण्डला विपुलोत्सन्ना सरागपिटिकाचिता ॥"
इति वाभटे उत्तरस्थाने एकत्रिंशेऽध्याये ॥)
अपराजिता । श्वेतकण्टकारी । कटभी । इति राजनिर्घण्टः ॥ (क्षुद्रकीटभेदः । यथाह सुश्रुतः ।
"पञ्चकीटो दुन्दुभिको मकरः शतपादकः ।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी ॥")

गर्द्ध, क लिप्से । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, गर्द्धयति । इति दुर्गादासः ॥

गर्द्धः,पु,(गर्द्ध्यते इति । गर्द्ध + भावे घञ् ।) स्पृहा । इति हेमचन्द्रः । ३ । ९४ ॥ गर्द्दभाण्डवृक्षः । इति शब्दचन्द्रिका ॥

गर्द्धनः, त्रि, (गृध्यति स्पृहयतीति । गृध + "जुचङ्क्रम्यदन्द्रम्यसृगृधीति ।" ३ । २ । १५० । इति युच् ।) लुब्धः । इत्यमरः । ३ । ६ । २२ ॥

ग(र्व्व)र्ब्ब, त् क ङ दर्पे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा-आत्म-अकं-सेट् ।) दर्पोऽहङ्कारः । ङ, गर्व्वयते गर्व्वापयते धनेनीचः । इति दुर्गादासः ॥

ग(र्व्व)र्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा परं-सकं-सेट् ।) गर्व्वति । इति दुर्गादासः ॥

ग(र्व्व)र्ब्बः, पुं, (गर्व्व + भावे अच् । यद्वा, गिरति मदमिति । गॄ निगरणे + "कॄगॄशॄदृभ्यो वः ।" उणां । १ । १५५ । इति वः ।) अहङ्कारः । दर्पार्थादन्तगर्व्वधातोर्भावेऽल्प्रत्ययः ॥ इति मुग्धबोधम् ॥ (यथा, रामायणे । २ । ३१ । २० ।
"यदि दुःखो न रक्षेत भरतो राज्यमुत्तमम् ।
प्राप्य दुर्म्मनसा वीर । गर्व्वे(र्ब्बे)ण च विशेषतः ॥")

गर्भः, पुं, (गीर्य्यते जीवसञ्चितकर्म्मफलदात्रा ईश्वरेण प्रकृतिवलात् जठरगह्वरे स्थाप्यते पुरुषशुक्रयोगेणासौ । गॄ + "अर्त्तिगृभ्यां भन् ।" उणां । ३ । १५२ । इति कर्म्मणि भन् ।) भ्रूणः । तद्विवरणं यथा,—

"स्वर्गाच्च नरकान्मुक्तः स्त्रीणां गर्भो भवत्यपि ।
नाभिभूतश्च तस्यैव याति वीजद्वयं हि तत् ॥
कललं बुद्बुदत्वञ्च ततः पेशीत्वमेव च ।
पेश्यापलसमोऽण्डः स्यादङ्कुरस्तत उच्यते ॥
अङ्गानामथ चोत्पत्तिः सञ्चानामनुलोमकात् ।
उपाङ्गान्यङ्गुलीनेत्रनासास्यश्रवणानि च ॥
प्ररोहं यान्ति चाङ्गेभ्यस्तद्वत्तेभ्यो नखादिकम् ।
त्वचो रोमाणि जायन्ते केशाश्चैव ततः परम् ॥
नरश्चाधोमुखः स्थित्वा दशमे च स जायते ।
ततस्तु वैष्णवी माया समाश्रयति मोहिनी ॥
वालत्वञ्च कुमारत्वं यौवनं वृद्धतामपि ।
ततश्च मरणं तत्तत्कर्म्ममाप्नोति मानवः ॥
एवं संसारचक्रेऽस्मिन् भ्राम्यते घटियन्त्रवत् ।"
इति गारुडे २०६ अध्यायः ॥

तस्य लक्षणं यथा,—
"गर्भाशयगतं शुक्रमार्त्तवं जीवसञ्ज्ञकम् ।
प्रकृतिः सविकारा च तत् सर्व्वं गर्भसञ्ज्ञकम् ॥
कालेन वर्द्धितो गर्भो यदाङ्गोपाङ्गसंयुतः ।
भवेत्तदा स मुनिभिः शरीरीति निगद्यते ॥" ॥

तदन्यप्रकृतिर्यथा,—
"यदा नार्य्यावुपेतायां वृषस्यन्त्यौ कथञ्चन ।
मुञ्चन्त्यौ शुक्रमन्योऽन्यमनस्थिस्तत्र जायते ॥
ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि प्रवर्द्धेत स गर्भो गर्भलक्षणः ।
कललं जायते तस्या वर्ज्जितं पैतृकैर्गुणैः ॥"
इति भावप्रकाशः ॥ ॥

अस्य द्वादशधा गतिर्यथा,—
"भूयोऽनिलेन विगुणेन ततः स गर्भः
सङ्ख्यामतीत्य बहुधा समुपैति योनिम् ।
द्वारं निरुध्य शिरसा जठरेण कश्चित्
कश्चिच्छरीरपरिवर्त्तितकुब्जदेहः ॥
एकेन कश्चिदपरस्तु भुजद्वयेन
तिर्य्यग्गतो भवति कश्चिदवाङ्मुखोऽन्यः ।
"पार्श्वापवृत्तगतिरेति तथैव कश्चि-
दित्यष्टधा गतिरियं ह्यपरा चतुर्द्धा ॥
सङ्कीलकः प्रतिखुरः परिघोऽथ वीज-
स्तेषूर्द्ध्ववाहुचरणैः शिरसा च योनौ ।
सङ्गी च यो भवति कीलकवत् सकीलो
दृश्यैः खुरैः प्रतिखुरः स हि कायसङ्गी ॥
गच्छेद्भुजद्वयशिराः स च वीजकाख्यो
योनौ स्थितः स परिघः परिघेण तुल्यः ॥" ॥

गर्भनाशलक्षणादि ।
"अपविद्धशिरा या तु शीताङ्गी निरपत्रपा ।
नीलोद्धतशिरा हन्ति सा गर्भं स च तां तथा ॥
मानसागन्तुभिर्मातुरुपतापैः प्रपीडितः ।
गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीडितः ॥" ॥

अन्तर्मृतगर्भलक्षणं यथा,—
"गर्भास्पन्दनमावीनां प्रणाशः श्यावपाण्डुता ।
भवेदुच्छ्वासपूतित्वं शोथश्चान्तर्मृते शिशौ ॥"
इति माधवकरः ॥ ॥

("कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ।
गर्भः सञ्जायते नार्य्याः सञ्जातो वाल उच्यते ॥
आधिक्ये रजसः कन्या पुत्त्रः शुक्राधिके भवेत् ।
नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ॥"
इति पूर्व्वखण्डे चतुर्थेऽध्याये शार्ङ्गधरेणोक्तम् ॥
"शुद्धे शुक्रार्त्तवे सत्त्वः स्वकर्म्मक्लेशचोदितः ।
गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ ॥
वीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः ।
मातुश्चाहाररसजैः क्रमात् कुक्षौ विवर्द्धते ॥
तेजो यथार्करश्मीनां स्फटिकेन तिरस्कृतम् ।
नेन्धनं दृश्यते गच्छत् सत्त्वो गर्भाशयं तथा ॥
कारणानुविधायित्वात् कार्य्याणां तत्स्वभावता ।
नानायोन्याकृतीः सत्त्वो धत्तेऽतो द्रुतलोहवत् ॥
अतएव च शुक्रस्य वाहुल्याज्जायते पुमान् ।
रक्तस्य स्त्री तयोः साम्ये क्लीवः शुक्रार्त्तवे पुनः ॥
वायुना वहुशो भिन्ने यथास्वं वह्वपत्यता ।
वियोनिविकृताकारा जायन्ते विकृतैर्मलैः ॥"
"पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता ।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥
वीर्य्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः ।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥"
"शुद्धशुक्रार्त्तवं स्वस्थं संरक्तं मिथुनं मिथः ।
स्नेहैः पुंसवनैः स्निग्धं शुद्धशीलितवस्तिकम् ॥
नरं विशेषात् क्षीराज्यैर्मधुरौषधसंस्कृतैः ।
नारीं तैलेन माषैश्च पित्तलैः समुपाचरेत् ॥"
"मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः ।
ईषत् कृष्णं विगन्धञ्च वायुर्योनिमुखान्नुदेत् ॥
ततः पुष्पेक्षणादेव कल्याणध्यायिनी त्र्यहम् ।
मृजालङ्काररहिता दर्भसंस्तरशायिनी ॥
क्षैरेयं यावकं स्तोकं कोष्ठशोधनकर्षणम् ।
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी ॥
चतुर्थेऽह्नि ततः स्नात्वा शुक्लमाल्याम्बरा शुचिः ।
इच्छन्ती भर्तृसदृशं पुत्त्रं पश्येत् पुरः पतिम् ॥
ऋतुस्तु द्वादशनिशाः पूर्व्वास्तिस्रश्च निन्दिताः ॥
एकादशी च युग्मासु स्यात् पुत्त्रोऽन्यासु कन्यका ।
उपाध्यायोऽथ पुत्त्रीयं कुर्व्वीत विधिवद्विधिम् ॥
नमस्कारपरायास्तु शूद्राया मन्त्रवर्ज्जितम् ।
अवन्ध्य एवं संयोगः स्यादपत्यञ्च कामतः ॥
सन्तोऽप्याहुरपत्यार्थं दम्पत्योः सङ्गतं रहः ।
दुरपत्यं कुलाङ्गारो गोत्रे जातं महत्यपि ॥
इच्छेतां यादृशं पुत्त्रं तद्रूपचरितांश्च तौ ।
चिन्तयेतां जनपदांस्तदाचारपरिच्छदौ ॥
कर्म्मान्ते च पुमान् सर्पिःक्षीरशाल्योदनाशितः ।
तैलमाषोत्तराहारा तत्र मन्त्रं प्रयोजयेत् ॥
अहिरसि आयुरसि सर्व्वतः प्रतिष्ठासि धाता त्वाम् ।
दधातु विधाता त्वां दधातु ब्रह्मवर्च्चसा भवेति ॥
ब्रह्मा वृहस्पतिर्विष्णुः सोमः सूर्य्यस्तथाश्विनौ ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥
सान्त्वयित्वा ततोऽन्योन्यं संविशेतां मुदान्वितौ ।
उत्ताना तन्मना योषित् तिष्ठेदङ्गैः सुसंस्थितैः ॥
तथा हि वीजं गृह्णाति दोषैः स्वस्थानमास्थितैः ।
लिङ्गन्तु सद्यो गर्भाया योन्या वीजस्य संग्रहः ॥
तृप्तिर्गुरुत्वं स्फुरणं शुक्रास्रानुववन्धनम् ।
हृदयस्पन्दनं तन्द्रा तृड्ग्लानिर्लोमहर्षणम् ॥
अव्यक्तः प्रथमे मासि सप्ताहात् कललो भवेत् ।
गर्भः पुंसवनान्यत्र पूर्व्वं व्यक्तेः प्रयोजयेत् ॥
वली पुरुषकारो हि दैवमप्यतिवर्त्तते ।
पुष्ये पुरुषकं हैमं राजतं वाथ वायसम् ॥
कृत्वाग्निवर्णं निर्व्वाप्य क्षीरे तस्याञ्जलिं पिवेत् ।
गौरदण्डमपामार्गं जीवकर्षभसैर्य्यकान् ॥
पिवेत् पुष्ये जले पिष्टान् एकद्वित्रिसमस्तशः ।
क्षीरेण श्वेतवृहतीमूलं नासापुटे स्वयम् ॥
पुत्त्रार्थं दक्षिणे सिञ्चेत् वामे दुहितृवाञ्छया ।
पयसा लक्ष्मणामूलं पुत्त्रोत्पादस्थितिप्रदम् ॥
नासयास्येन वा पीतं वटशुङ्गाष्टकं तथा ।
ओषधीर्जीवनीयाश्च वाह्यान्तरुपयोजयेत् ॥
उपचारः प्रियहितैर्भर्त्रा भृत्यैश्च गर्भधृक् ।
नवनीतघृतक्षीरैः सदा चैनामुपाचरेत् ॥
अतिव्यवायमायासं भारं प्रावरणं गुरु ।
अकालजागरस्वप्नकठिनोत्कटकासनम् ॥
शोकक्रोधभयोद्वेगवेगश्रद्धाविधारणम् ।
उपवासाध्वतीक्ष्णोष्णगुरुविष्टम्भिभोजनम् ॥
रक्तं निवसनं श्वभ्रकूपेक्षां मद्यमामिषम् ।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत् त्यजेत् ॥
तथा रक्तस्रुतिं शुद्धिं वस्तिमामासतोऽष्टमात् ।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येत् म्रियेत वा ॥
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः ।
पित्तलैः खलतिः पिङ्गः श्वित्री पाण्डुः कफात्मभिः ॥
व्याधींश्चास्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत् ।
द्वितीये मासि कललाद्घनः पेश्यथवार्व्वुदम् ॥
पुंस्त्रीक्लीवाः क्रमात्तेभ्यस्तत्र व्यक्तस्य लक्षणम् ।
व्यक्तीभवति मासेऽस्य तृतीये गात्रपञ्चकम् ॥
मूर्द्धा द्वे सक्थिनी वाहू सर्व्वसूक्ष्माङ्गजन्म च ।
सममेव हि मूर्द्धाद्यैर्ज्ञानञ्च सुखदुःखयोः ॥
गर्भस्य नाभौ मातुश्च हृदि नाडी निवध्यते ।
यया स पुष्टिमाप्नोति केदार इव कुल्यया ॥
चतुर्थे व्यक्तताङ्गानां चेतनायाश्च पञ्चमे ।
षष्ठे स्नायुशिरारोम-वल-वर्ण-नख-त्वचाम् ॥
सर्व्वैः सर्व्वाङ्गसम्पूर्णो भावैः पुष्यति सप्तमे ।
गर्भेणोत्पीडिता दोषास्तस्मिन् हृदयमाश्रिताः ॥
कण्डूं विदाहं कुर्व्वन्ति गर्भिण्याः किक्किसानि च ।
नवनीतं हितन्तत्र कोलाम्बुमधुरौषधम् ॥
सिद्धमल्पपटुस्नेहं लघु स्वादु च भोजनम् ।
चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम् ॥
ओजोऽष्टमे सञ्चरति माता पुत्त्रौ मुहुः क्रमात् ।
तेन तौ म्लानमुदितौ तत्र जातो न जीवति ।
शिशुरोजोऽनवस्थानात् नारी संशयिता भवेत् ॥

क्षीरपेया च पेयाच्च सघृतान्वासनं घृतम् ।
मधुरैः साधित शुद्ध्यै पुराणशकृतस्तथा ॥
शुष्कमूलककोलाम्लकषायेण प्रशस्यते ।
शताह्वकल्कितो वस्तिः स तैलघृतसैन्धवः ॥
तस्मिंस्त्वेकाहयातेऽपि काल: सूतेरत: परम् ।
वर्षाद्विकारकारी स्यात् कुक्षौ वातेन धारित: ॥
शस्तश्च नवमे मासि स्निग्धो मांसरसौदन: ।
बहुस्नेहा यवागूर्वा पूर्व्वोक्तश्चानुवासनम् ॥
तत एव पिचुश्चास्या योनौ नित्यं निधापयेत् ।
वातघ्नपत्रभङ्गाम्भ: शीत स्नानेऽन्वहं हितम् ॥
नि:स्नेहाङ्गी न नवमान्मासात् प्रभृति वासयेत् ।
प्रागदक्षिणस्तनस्तन्या पूर्व्वं तत् पार्श्वचेष्टिनी ॥
पुन्नामदोहदप्रश्नरता पुस्वप्रदर्शिनी ।
उन्नते दक्षिणे कुक्षौ गर्भे च परिमण्डले ॥
पुत्तं सूतेऽन्यथा कन्यां या चेच्छति नृसङ्गतिम् ।
नृत्यवादित्रगान्धर्व्व-गन्धमाल्यप्रिया च या ॥
क्लीवं तत् सङ्करे तत्र मध्य कुक्षे: समुन्नतम् ।
यमौ पार्श्वद्वयोन्नामात् कुक्षौ द्रोणयामिव स्थिते ॥
प्राक् चैव नवमान्मासात् सूतिका गृहमाश्रयेत् ।
देशे प्रशस्ते सम्भारे सम्पन्नं साधकेऽहनि ॥
तत्रोदीक्षेत सा सूतिं सूतिका परिवारिता ।
अद्य श्व: प्रसवे ग्लानि: कुक्ष्यक्षिश्लथताक्लम: ॥
अधो गुरुत्वमरुचि: प्रसेको बहुमूत्रता ।
वेदनोरूदरकटीपृष्ठहृद्वस्तिवङ्क्षणे ॥
योनिभेदरुजातोदस्फुरणस्रवणानि च ।
आवीनामनुजन्मातस्ततो गर्भोदकस्रुति: ॥
अथोपस्थितगर्भां तां कृतकौतुकमङ्गलाम् ।
हस्तस्थपुन्नामफलां स्वभ्यक्तोष्णाम्बुसेचिताम् ॥
पाययेत् सघृतां पेयां तनौ भूशयने स्थिताम् ।
आभुग्नसक्थिमुत्तानामभ्यक्ताङ्गीं पुन: पुन: ॥
अधोनाभेर्विमृद्नीयात् कारयेज्जृम्भचंक्रमम् ।
गर्भ: प्रयात्यवागेवन्तल्लिङ्ग हृद्विमोक्षत: ॥
आविश्य जठरं गर्भो वस्तेरुपरि तिष्ठति ।
आवी हि त्वरयन्त्येनां खट्टामारोपयेत्तत: ॥
अथ सम्पीडिते गर्भे योनिमस्या: प्रसाधयेत् ।
मृदुपूर्व्वं प्रवाहेत वाढ़माप्रसवाच्च सा ॥
हर्षयेत्तां मुहु: पुत्त्रजन्मशब्दजलानिलै: ।
प्रत्यायान्ति तथाप्राणा: सूतिक्लेशावसादिता: ॥
धूपयेद्गर्भसङ्गे तु योनिं कृष्णाहिकञ्चुकै: ।
हिरण्यपुष्पीमूलञ्च पाणिपादेन धारयेत् ॥
सुवर्च्चलां विशल्य वा जरायुपतनेऽपि च ।
कार्य्यमेतत् तयोर्तृष्णिण्य वाङ्कोरेनां विकम्पयेत् ॥
कटीमाकोटयेत् पार्ष्ण्या स्फिचौ गाढ़ निपी-
डयेत् ।
तालुकण्ठं सृपेरेण्या मूर्द्ध्नि दद्यात् सुदीपय: ॥
भूर्ज्जलाङ्गलिकीतुम्बी सर्पत्वकुष्ठसर्षपै: ।
पृथग् द्वाभ्यां समस्तैर्वा योनिलेपनधूपनम् ॥
कुष्ठतालीशकल्कं वा सुरामण्डेन पाययेत् ।
यूषेण वा कुलत्थाना बिल्वजेनारुवेन वा ॥
शताह्वासर्षपाजाजीशिग्रुतीक्ष्णकचित्रकै: ।
सहिङ्गुकुष्ठमदनैर्मूत्रे क्षीरे च साधितम् ॥
तैलं सिद्धं हितं पायौ योन्यां वाप्यनुवासनम् ।
शतपुष्पा वचाकुष्ठकणासर्षपकल्कित: ॥
निरूह: पातयत्याशु सस्नेहलवणोऽपराम् ।
तत्सङ्गे ह्यनिलो हेतु: सा निर्य्यात्याशु तज्जयात् ।
कुशला पाणिनाक्तेन हरेत्कृत्तनखेन वा ।
मुक्तगर्भां परां योनिं तैलेनाङ्गञ्च मर्द्दयेत् ॥
मक्कल्लाख्ये शिरोवस्ति कोष्ठमूले तु पाययेत् ।
सचूर्णितं यवक्षारं घृतेनोष्णजलेन वा ॥
धान्याम्बु वा गुडव्योषत्रिजातकरजोऽन्वितम् ॥”
इति वाभटे शरीरस्थाने प्रथमोऽध्याय: ॥ * ॥

अथ गर्भोपचार: ।

आत्रेय उवाच ।

“प्रथमे मासि मधुकं मधुपुष्पाणि चैव हि ।
नवनीतेन पयसा मधुरं पाययेच्च सा ॥
द्वितीये मासि काकोली मधुरं पाययेत्तथा ।
तृतीये कृशरं श्रेष्ठं चतुर्थे च कृतौदनम् ॥
पञ्चमे पायसं दद्यात् षष्ठे च मधुरं दधि ।
सप्तमे घृतखण्डेन चाष्टमे घृतपूरकम् ॥
नवमे विविधान्नानि दशमे दोहदन्तथा ।
मासे तृतीये सम्प्राप्ते दोहदं भवति स्त्रिया: ॥
यदयत् कामयते सा च तत्तद्द्याद्भिषग्वर: ।
वर्ज्जयेद्द्विदलान्नानि विदाहीनि गुरूणि च ॥
अम्लानि सोष्णक्षीराणि गुर्व्विणीना विवर्ज्जयेत् ।
मृत्तिका भक्षणीया न न च शूरणकन्दका: ॥
रसोनश्च पलाण्डुश्च सन्त्यक्तो गुर्व्विणीस्त्रिया ।
शूरणानि प्रदेयानि गौल्यानि सरसानि च ॥
पथ्यं हितानि चैतानि गुर्व्विणीनां सदा भिषक् ।
व्यायामं मैथुनं रोषं शीर्य्यञ्चक्रमणन्तथा ॥
वर्ज्जयेद्गुर्व्विणीनाञ्च जायन्ते सुखसम्पद: ॥
अथोपपन्नं विहितमपि स्वकीयाचारेण पञ्च-
मासिकमष्टमासिकं वा । ब्राह्मणमङ्गलादिभि-
र्गोत्रभोजनमपि कर्त्तव्यम् । दोहदादिषु परि-
पूर्णेषु रूपवान् शूर: पण्डित: शीलवान् पुत्त्रो
जायते ॥” इति महर्ष्यात्रेयभाषिते हारीतोत्तरे
तृतीयस्थाने गर्भोपचारो नाम अष्टचत्वारिंशो
ऽध्याय: ॥ * ॥

अथ चलितगर्भचिकित्सा ।

आत्रेय उवाच ।

“प्रथमे मासि गर्भस्य चलनं दृश्यते यदि ।
तदा मधुकमृद्वीका चन्दनं रक्तचन्दनम् ॥
पयसा लोडितं पीतं तेन गर्भ: स्थिरो भवेत् ।
द्वितीये मासि चलिते मृणाले नागकेशरम् ॥
तृतीये मासि गर्भस्य चलनं दृश्यते यदा ।
तदा मधुककोद्रन्तु शर्करां पयसा पिवेत् ॥
चतुर्थे मासि दाहश्च पिपासा शूलमेव च ॥
ज्वरेण स्त्रीणां यदि गर्भश्चलते तदोशीरचन्दन-
नागकेशरधातकीकुसुमशर्कराघृतमधुदधि पाय-
येत् । पञ्चमे मासे चलिते गर्भे दाड़िमी-
पत्राणि चन्दन दधि मधु च पाययेत् । षष्ठे-
मासि गैरिकं कृष्णमृत्तिका गोमयभस्म उदक
परिस्रुतं शीतलं चन्दन शर्करया सह पिवेत् ।
सप्तमेमासि गोक्षुरसमङ्गापद्मकघनसुशीरं मधुरं
पाययेत् । अष्टमे मासि रोध्रं मधुमागधिकाश्च
सह दुग्धेन पीतवतीनाञ्चलिते गर्भे स्त्रीणां
सुखं सम्पद्यते ।” इति महर्ष्यात्रेयभाषिते
हारीतोत्तरे तृतीये स्थाने चलितगर्भचिकित्सा
नामोनपञ्चाशत्तमोऽध्याय: ॥ * ॥
“नरो धातुवलेनापि जीवितश्चात्र दृश्यते ।
तस्माच्च मैथुनात् सम्यग्जायते गर्भसम्भव: ॥

हारीत उवाच ।

संयोगेन विना प्राज्ञ । कथं गर्भो न जायते ।
संयोगेन विना पुष्पं फलं वा न कथं भवेत् ॥
वृक्षवन्न कथं स्त्रीणां फलोत्पत्ति: प्रदृश्यते ।
एतत् पृष्टो महाचार्य्य: प्रोवाच ऋषिपुङ्गव: ॥

आत्रेय उवाच ।

विरुद्धानाञ्च वल्लीनां स्थावराणाञ्च पुत्त्रक ।।
तत्र धातुसमं वीजं सह योगेन वर्त्तते ॥
न भिन्नदृष्टिस्तस्यैव दृश्यते शृणु पुत्त्रक ।।
स्थावराणाञ्च सर्व्वेषां शिवशक्तिमयं विदु: ॥
निश्चलोऽपि शिवो ज्ञेयो वापिशक्तिर्महासते ।।
तत्र स्त्रीपुरुषगुणा वर्त्तन्ते समयोगत: ॥
आम्रपुष्पं फलं तद्वत् वीजं शुक्रमयं विदु: ।
स्त्रीणां रजोमयं रेतो वीजाद्यमिन्द्रियं नरे ॥
तस्मात् संयोगत: पुत्त्रो जायते गर्भसम्भव: ।
प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत् ॥
जायते बुद्बुदाकारं शोणितञ्च दशाहनि ।
घनं पञ्चदशाहे स्यात् विंशाहे मांसपिण्डकम् ॥
मासैकेन च पिण्डस्य पञ्च तत्त्वं प्रजायते ।
पञ्चाशद्दिवसे प्राप्ते अङ्कुराणाञ्च सम्भव: ॥
मासत्रये तु सम्प्राप्ते हस्तपादौ प्रवर्त्तितौ ।
सार्द्धमासत्रये प्राप्ते शिरश्च सारवद्भवेत् ॥
चतुर्थके च लोमानां सम्भवश्चात्र दृश्यते ।
पञ्चमे च सुजीव: स्यात् षष्ठे प्रस्फुरणं भवेत् ॥
अष्टमे मासि याते च अग्नियोग: प्रवर्त्तते ।
मासे तु नवमे प्राप्ते जायते तस्य चेष्टितम् ॥
जायते तस्य वैराग्यं गर्भवासस्य कारणात् ।
दशमे च प्रसूयेत तथैकादशमासि वा ॥
अथ दोषवलेनापि गर्भो वापि प्रसूयते ।
वातसंप्रेरिते गर्भे अपूर्णे दिवसे यदि ॥
प्रसूतये वाप्यथ तद्गर्भे वाल: प्रदृश्यते ॥”
इति हारीते शारीरस्थाने प्रथमोऽध्याय: ॥ * ॥)
शिशु: । (गीर्य्यते निगीर्य्यते नि:क्षिप्यते वीर्य्यं योनि-
रन्ध्रे यस्मिन् । गिरति सिञ्चति निषेकं करोति
रेतोऽत्र वा । गॄ ग्र वा + भन् ।) कुक्षि: । (यथा,
महाभारते । १४ । १८ । ६ ।
“यथा लोहस्य निस्यन्दो निषिक्तो विम्वविग्रहम् ।
उपैति तद्विजानीहि गर्भे जीवप्रवेशनम् ॥”)
सन्धि: । पनसकण्टकम् । इति मेदिनी ॥ भे । ३ ॥
मध्यम् । (यथा, आर्य्यासप्तशत्याम् । १७६ ।
“केतकगर्भे गन्धादरेण दूरादमी इतसुपेता' ॥”)
अपवरक: । इति हेमचन्द्र: ॥ गङ्गादिसन्निहित-
देश: । यथा,—
“भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात् तदूर्द्धं तीरमुच्यते ॥”
इति प्रायश्चित्ततत्त्वम् ॥

(आभ्यन्तरिकवस्तुमात्रम् । यथा, गोः रामायणे । ४ । २७ । ३ ।
"अष्टमासधृतं गर्भं भास्करस्य गभस्तिभिः ।
रसं सर्व्वसमुद्राणां द्यौः प्रसूते रसायनम् ॥")

गर्भकं, क्ली, (गर्भ+संज्ञायां कन् । यद्वा चन्द्रस्य गर्भद्वयमिव कायतीति । कै+कः ।) रजनीद्वन्द्वम् । इति हेमचन्द्रः ।२।५८॥ दुइ रात्रि इति भाषा ॥

गर्भकः, पुं, (गर्भे केशगर्भे केशमध्ये इति यावत् कायते पकाशते शोभते इत्यर्थः । यद्वा गर्भ इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) केशमध्यस्थितमाल्यम् । इत्यमरः । २ । ७ । १३५ । खोपार माला इति भाषा ॥

गर्भकरः, पुं, (गर्भं करोति गर्भदोषं निवारयति व्यवहारयोगेन इति । कृ+टः ।) पुत्त्रजीववृक्षः । इति भावप्रकाशः ॥

गर्भघातिनी, स्त्री, (गर्भं घातयति स्रावयतीति । हन्+णिच्+णिनिः ङीप् च ।) लाङ्गलिकावृक्षः । इति रत्नमाला ॥

गर्भण्डः, पुं, (गर्भस्य अण्ड इव । शकन्ध्वादित्वात् अकारलोपे साधुः ।) नाभिगुडकः । इति त्रिकाण्डशेषः ॥ नाभिर गोंड़ इति भाषा ॥

गर्भदः, पुं, (गर्भं ददाति उत्पादयति व्यवहारेणेति । दा+क ।) पुत्त्रजीववृक्षः । इति राजनिर्घण्टः ॥

गर्भदात्री, स्त्री, (गर्भं ददातीति । दा+तृच् ङीप् ।) क्षुपविशेषः । गर्भदा इति ख्याता । तत्पर्य्यायः । पुत्त्रदा २ प्रजादा ३ अपत्यदा ४ इष्टिप्रदा ५ प्राणिमाता ६ तापसद्रुमसन्निभा ७ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । नारीपुष्पादिदोषपित्तदाहश्रमनाशित्वम् । गर्भसम्भूतिदातृत्वञ्च । इति राजनिर्घण्टः ॥

गर्भनुत्, [द्] पुं, (गर्भं नुदति प्रेरयति नाशयतीत्यर्थः । नुद+क्विप् ।) कलिकारीवृक्षः । इति भावप्रकाशः ॥ विषलाङ्गलिया इति भाषा ॥

गर्भपाकी, [न्] पुं, (गर्भस्य पाकः परिपाकः परिणतिरित्यर्थः साध्यतयास्त्यस्य इति इनिः ।) षष्टिकव्रीहिः । इति हेमचन्द्रः । ४ । २३४ ॥ षेटे धान इति भाषा ॥

गर्भपातः, पुं, (गर्भस्य पातः पतनं विच्युतिरित्यर्थः ।) पञ्चमषष्ठमासीयस्य कठिनशरीरस्य गर्भस्य पतनम् । (यथा, माधवकरोक्तवैद्यके ।
"आ चतुर्थात् ततो मासात् प्रस्रवेद्गर्भविच्युतिः ।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः ॥"
तथाच सुश्रुते निदानस्थाने १ अध्याये ।
"गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः ।
गर्भाघातनिमित्तश्च न सिध्यत्यपतानकः ॥")
अस्य प्रमाणादि विशेषतो गर्भस्रावशब्दे द्रष्टव्यम् ॥

गर्भपातकः, पुं, (गर्भं पातयति नाशयतीति । पत्+णिच्+ण्वुल् ।) रक्तशोभाञ्जनवृक्षः । इति जटाधरः ॥

गर्भपातनः पुं, (गर्भं पातयतीति । पत्+णिच्+कर्त्तरि ल्युः ।) रीठाकरञ्जः । इति भावप्रकाशः ॥

गर्भपातनी, स्त्री, (गर्भपातन+संज्ञायां ङीप् । गौरादित्वादित्येके ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥

गर्भपातिनी, स्त्री, (गर्भं पातयतीति । पत्+णिच्+णिनिः । स्त्रियां ङीप् ।) विशल्यावृक्षः । इति जटाधरः ॥

गर्भरूपः, त्रि, (गर्भे देहकोषे रूपं लावण्यादिकं यस्य । यद्वा गीर्य्यते निगीर्य्यते प्रकाश्यते रूपं यस्मात् । तारुण्यप्रभावादिति यावत् ।) तरुणः । इति भूरिप्रयोगः ॥

गर्भवती, स्त्री, (गर्भो विद्यतेऽस्याः अस्यां वा । अस्त्यर्थे मतुप् । मस्य वत्वम् ।) अन्तरापत्या । (यथा, महाभारते । ३ । १३४ । १७ ।
"दशैव मासान् बिभ्रति गर्भवत्यः ।
दशेरका दशदाशा दशार्हाः ॥")
तत्पर्य्यायः । अन्तर्व्वत्नी २ गुर्व्विणी ३ गर्भिणी ४ ससत्त्वा ५ आपन्नसत्त्वा ६ दोहदवती ७ । इति शब्दरत्नावली ॥ उदरिणी ८ गुर्व्वी ९ । इति हेमचन्द्रः । ३ । २०२ ॥ अथ सद्योगृहीतगर्भाया लक्षणम् । यथा,—
"शुक्रशोणितयोर्योनिरसावोऽथ श्रमोद्भवः ॥
सावसादः पिपासा च ग्लानिः स्फुर्त्तिर्भगे भवेत् ॥"
तस्या उत्तरोत्तरकालीनलक्षणम् । यथा,—
"स्तनयोर्मुखकार्ष्ण्यं स्यात् रोमराज्युद्गमस्तथा ।
अक्षिपक्ष्माणि चाप्यस्याः समील्यन्ते विशेषतः ॥
छर्द्दयेत् पथ्यभुक्तापि गन्धादुद्विजतेऽशुभात् ।
प्रसेकः सदनञ्चैव गर्भिण्या लिङ्गमुच्यते ॥" * ॥
पुत्त्रगर्भवत्या लक्षणम् । यथा,—
"पुत्त्रगर्भयुतायास्तु नार्य्या मासि द्वितीयके ।
गर्भो गर्भाशये लक्ष्यः पिण्डाकारोऽपरे शृणु ॥
दक्षिणाक्षिमहत्त्वं स्यात् प्राक् क्षीरं दक्षिणस्तने ।
दक्षिणोरुः सुपुष्टः स्यात् प्रसन्नमुखवर्णता ॥
पुन्नामधेयद्रव्येषु स्वप्नेष्वपि मनोरथः ।
आम्रादि फलमाप्नोति स्वप्नेषु कमलादि च ॥" * ॥
कन्यागर्भवतीलक्षणम् । यथा,—
"कन्यागर्भवतीगर्भे पेशी मासि द्वितीयके ।
पुत्त्रगर्भस्य लिङ्गानि विपरीतमपेक्षते ॥" * ॥
नपुंसकगर्भवतीलक्षणम् । यथा,—
"नपुंसकं यदा गर्भो भवेद्गर्भोऽर्व्वुदाकृतिः ।
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत् ॥"
इति भावप्रकाशः ॥

गर्भशय्या, स्त्री, (गर्भे गर्भगता वा शय्येव । गर्भगतस्यापत्यस्य वासस्थानमित्यर्थः ।) गर्भोत्पत्तिस्थानम् । तत्तु पित्ताशयपक्वाशययोर्मध्यवर्त्ति । तस्या रूपं यथा, भावप्रकाशे ।
"शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता ।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रकीर्त्तिता ॥
यथा रोहितमत्स्यस्य मुखं भवति रूपतः ।
ततः संस्थाञ्च तद्रूपां गर्भशय्यां विदुर्बुधाः ॥"
(यथा वेणीसंहारे । ५ मे अङ्के ।
"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ॥")

गर्भस्रावः, पुं, (गर्भस्य स्रावश्च्युतिः, पात इत्यर्थः ।) गर्भपातः । चतुर्थमासपर्य्यन्तं शोणितरूपगर्भस्य स्रवणम् । पेटखसा इति भाषा ॥ तस्याशौचं यथा,—
"यदि गर्भो विपद्येत स्रवते वापि योषितः ।
यावन्मासान् स्थितो गर्भस्तावद्दिनानि सूतकम् ॥"
इति गारुडे १०७ अध्यायः ॥
"रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ।"
इति मनुः । ५ । ६६ ॥ * ॥
"अर्व्वाक् षण्मासतः स्त्रीणां यदि स्यात् गर्भसंस्रवः ।
तदा माससमैस्तासामशौचं दिवसैः स्मृतम् ॥
अत ऊर्द्ध्वन्तु पतने स्त्रीणां स्याद्दशरात्रकम् ।
सद्यः शौचं सपिण्डानां गर्भस्रावाच्च वा ततः ॥"
इति कूर्म्मपुराणम् ॥ * ॥
("अन्तरा जन्ममरणे शेषाहोभिर्विशुध्यति ।
गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ॥"
इति याज्ञवल्क्यः । ३ । २० ॥)
अन्यत् अशौचशब्दे द्रष्टव्यम् ॥ * ॥ * ॥

अथ गर्भस्रावनिदानलक्षणे ।

"भयाभिघाततीक्ष्णोष्णपानाशननिषेवणात् ।
गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् ॥
आ चतुर्थात् ततो मासात् प्रस्रवेद्गर्भविद्रवः ।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः ॥
गर्भोऽभिघातविषमाशनपीडनाद्यैः
पक्वं द्रुमादिव फलं पततिं क्षणेन ।
मूढः करोति पवनः खलु मूढगर्भं
शूलञ्च योनिजठरादिषु मूत्रसङ्गम् ॥"
इति माधवकरः ॥

अथ गर्भस्रावपातयोर्निदानमाह ।

"ग्राम्यधर्म्माध्वगमनयानस्खलनपीडनैः ।
ज्वरोपवासोत्पतनप्रहाराजीर्णधावनैः ॥
वमनाच्च विरेकाच्च क्षुत्यनाद्गर्भपातनात् ।
तीक्ष्णक्षारोष्णकटुकतिक्तरूक्षनिषेवणात् ॥
वेगाभिघाताद्विषमादासनाच्छयनाद्भयात् ।
गर्भे पतति रक्तस्य सशूलं दर्शनं भवेत् ॥"
गर्भपातनात् नियमेन गर्भपातनशीलं द्रव्यं तस्मात् ॥ गर्भस्य स्रावपातयोः पूर्व्वरूपमाह । गर्भे पततीत्यादि । पतति स्रावेण पातेन वा पतिष्यति ॥ * ॥

स्रावपातयोरवधिमाह ।

आ चतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः ।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः ॥
आ चतुर्थात् मासात् चतुर्थमासपर्य्यन्तम् । गर्भस्य विद्रवः शोणितरूपः । गर्भं स्रवति शोणितमिति भोजवचनात् । स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य । गर्भपातस्य दृष्टान्तं दर्शयति ।
गर्भोऽभिघातविषमाशनपीडनाद्यैः
पक्वं द्रुमादिव फलं पतति क्षणेन ।

यथा वृन्तलग्नं पक्वं फलं अभिघातेनाकाल
एव पतति तथा गर्भोऽप्यभिघातादिनाऽकालेऽपि
पतति ॥ * ॥
अथ गर्भस्रावस्य चिकित्सा ।
गुर्व्विण्या गर्भतो रक्तं स्रवेद्यदि मुहुर्मुहुः ।
तन्निरोधाय सुस्निग्धमुत्पलादि शृतं पिबेत् ॥
उत्पलादिगणमाह ।
उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा ।
श्वेताम्भोजञ्च मधुकमुत्पलादिरयं गणः ॥
संशीलितो हरत्येव दाहं तृष्णां हृदामयम् ।
रक्तपित्तञ्च मूर्च्छाञ्च तथा छर्द्दिमरोचकम् ॥ * ॥
अथ गर्भपातस्योपद्रवानाह ।
प्रस्रंसमाने गर्भे स्याद्दाहः शूलञ्च पार्श्वयोः ।
पृष्ठरुक् प्रदरानाहौ मूत्रसङ्गश्च जायते ॥
प्रस्रंसमाने पतति ॥ * ॥ अथ गर्भस्य स्थाना-
न्तरगमने चोपद्रवानाह ।
स्थानात् स्थानान्तरं तस्मिन् प्रयात्यपि च जायते ।
आमपक्वाशयादौ तु क्षोभः पूर्व्वेऽप्युपद्रवाः ॥
पूर्व्वेऽप्युपद्रवाः पार्श्वे शूलादयः ॥ * ॥
तच्चिकित्सामाह । [चरेत् ।
स्निग्धाः शीताः क्रियास्तेषु दाहादिषु समा-
कुशकाशोरुवूकाणां मूलैर्गोक्षुरकस्य च ॥
शृतं दुग्धं सितायुक्तं गर्भिण्याः शूलहृत् परम् ।
श्वदंष्ट्रामधुकक्षुद्राम्लानैः सिद्धं पयः पिबेत् ॥
शर्करामधुसंयुक्तं गुर्व्विणीवेदनापहम् ।
अम्लानः पुष्पजातिः । अयं वाणपुष्पं इति
गौड़ादौ प्रसिद्धः ।" इति भावप्रकाशः ॥

गर्भस्रावी, [न्] पु, (गर्भं उदरस्थशिशुं स्रावयति वियोजयति सेवनेनेति । गर्भ + स्रु + णिच् + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः ।) हिन्तालवृक्षः । इति राजनिर्घण्टः ॥

गर्भागारं, क्ली, (गर्भ इव आगारं गृहम् । गृहाभ्यन्तरवर्त्तित्वात् तथात्वम् ।) गृहमध्यभागः । शयनगृहम् । गृहान्तर्गृहं इत्येके । इति भरतः ॥ तत्पर्य्यायः । वासगृहम् २ । इत्यमरः । २ । २ । ८ ॥ (यथा, कथासरित्सागरे । ७ । ७१ ।
"सायंकाले समुद्दिश्य तत्र राजसुता ययौ ।
एकैव देव दृष्टश्च गर्भागारादयाविशत् ॥" * ॥
गर्भः कुक्षिः आगारं गृहमिव । शिशोराश्रयभूमेस्तथात्वम् । यद्वा, गर्भस्य उदरस्थशिशोरागारम् ।) गर्भाशयः । इति राजनिर्घण्टः ॥

गर्भाधानं, क्ली, (गर्भं आधीयतेऽनेनेति । आ + धा + करणे ल्युट् ।) दशसंस्कारान्तर्गतप्रथमसंस्कारः । यथा,—
"गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा ।"
ऋतौ ऋतुकाले । स च कालो याज्ञवल्क्येनोक्तः ।
"षोड़शर्त्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् ।"
इति मलमासतत्त्वम् ॥ तत्र क्रमः । "ऋतुस्नानादूर्द्ध्वं निषेकदिवसे सायं सन्ध्यायामतीतायां पतिः शुचिः सुगन्धिः सुवेशः मन्त्रेण सूर्य्यार्घ्यं दत्त्वा पूर्व्वाभिमुखोपविष्टायाश्च वध्वाः दक्षिणहस्तेनोपस्थं स्पृशन् मन्त्रं जपेत् ततः पुनरपि उपस्थं स्पृशन् मन्त्रं जपेत् । ततो भार्य्यामुपेयात् ।" इति भवदेवभट्टः ॥ तद्विहितनिषिद्धनक्षत्रादि यथा,—
"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी ।
उत्तरात्रितयं त्यक्त्वा पर्व्ववर्ज्ज्यं व्रजेदृतौ ॥"
पर्व्वाण्याह विष्णुपुराणम् ।
"चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र । रविसंक्रान्तिरेव च ॥"
शौनकः ।
"पुनश्चनाग्नि चैतानि तिष्यो हस्तः पुनर्व्वसुः ।
अभिजित् प्रौष्ठपच्चैवानुराधाषाढ़श्वाश्वयुक् ॥"
अन्यच्च । [पुष्यश्च ।
"हस्तो मूलं श्रवणः पुनर्व्वसुर्मृगशिरस्तथा
गर्भाधानादिकार्य्येषु पुनामायं गणः शुभदः ॥
रोहिण्यन्तकचित्राहिविशाखशतवर्ज्जिते ।
मे पुष्यहादे स्त्रीशुद्धा फलवन्ध्यनमिष्यते ॥
पुष्यार्कचन्द्रशिवमूलपुनर्व्वसुः स्या-
दाषाढ़युग्महरिभाद्रपदद्वयञ्च ।
एतानि पुंसि कथितानि शुभानि भानि
चान्येषु गर्भपतनादिभयञ्च भेषु ॥
नन्दा भद्रा भवेत् पुंसि स्त्रीषु पूर्णा जया स्मृता ।
रिक्ता नपुंसके त्वाहुस्तस्मात्तां परिवर्ज्जयेत् ॥
स्त्रीणामृतुर्भवति षोड़शवासराणि
तत्रादितः परिहरेच्च निशाश्चतस्रः ।
युग्मासु रात्रिषु नरा विषमासु नार्य्यः
कुर्य्यान्निषेकमथ तास्वपि पर्व्ववर्ज्जम् ॥
मूलर्क्षे स्मृतिदुष्टत्वाद्गर्भाधानेषु नेष्यते ।
तस्य पुंसवनादौ तु पुंसंज्ञत्वे प्रयोजनम् ॥
(मतान्तरे तु चतुर्थेऽहनि स्नानानन्तरं नार्य्यः शुध्यन्ति । यथाह भरद्वाजः ।
"प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥"
एवं धर्म्मशास्त्रेऽपि । यथा,—
"भर्त्तुः स्पृश्या चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला ।
पञ्चमेऽहनि योग्या स्याद्दैवे पित्र्ये च कर्म्मणि ॥")
यथा, याज्ञवल्क्यः ।
"एवं गच्छन् स्त्रियं क्षामां मघां मूलाञ्च वर्ज्जयेत् ।
सुस्थ इन्दौ सकृत् पुत्त्रं लक्षण्यं जनयेत् पुमान् ॥"
क्षामां आहारलाघवादिना क्षीणाम् । फलञ्च ।
"युग्मासु पुत्त्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्त्रार्थी संविशेदार्त्तवे स्त्रियम् ॥
पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ।
समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः ॥"
इति मनुः । ३ । ४८—४९ ॥)
एवञ्च ।
"युग्मायामपि रात्रौ चेत् शोणितं प्रचुरं यदा ।
कन्या च पुंवद्भवति शुक्राधिक्ये पुमान् भवेत् ॥
कन्यैवायुग्मरात्रौ च प्राधान्यं समवायिनो । ।
निमित्तकारणात् कालात् शुक्रशोणितयोर्यतः ॥
पीड़ा राशौ भौमदृष्टे शशाङ्के
मासं मासं योषितामार्त्तवं स्यात् ।
चन्द्रांशे शान्तं यच्च रक्तं नवाभं
तद्गर्भार्थे वेदनागन्धहीनम् ॥"
गर्भयोग्यर्त्तुनिरूपणम् ॥
"पापासंयुतमध्यगेषु दिनकृल्लग्नक्षपास्वामिषु
तद्गृहेषु शुभोज्झितेषु विकुजे छिद्रे विपापे सुखे ।
सद्युक्तेषु त्रिकोणकण्टकविधुव्यायत्रिषष्ठान्विते
पापे युग्मनिशास्वगण्डसमये पुंस्थिते सङ्गमः ॥
मूलमघाश्विनीनामाद्यं ज्येष्ठान्त्यसर्पाणामन्त्यम् ।
चतुर्थांशं गण्डपदं त्यक्त्वा षोड़शाहे ऋतौ व्रजेत् ॥"
अशक्तौ तु भुजवलभीमे ।
"अन्त्यं पौष्णेन्द्रसर्पाणामाद्यं पित्र्याश्विमूलगम् ।
गण्डं दण्डत्रयं ख्यातं सर्व्वकार्य्येषु कुत्सितम् ॥
पुमान् विंशतिवर्षश्चेत् पूर्णषोड़शवर्षया ।
स्त्रिया सङ्गच्छते गर्भाशये शुद्धे रजस्यपि ॥
अपत्यं जायते भद्रं तयोर्न्यूनेऽधमं स्मृतम् ।
मासेशे सितकुजगुरुरविशनिसौम्यलग्नपशशीने ।
कलुषेः पीड़ा गर्भस्य पीड़िते पतनमन्यथा पुष्टिः ॥
कालुष्यं मासेशेन पापग्रहयोगशत्रुगृहस्थितिनीचगृहयोगोपग्रहयोगादि । मासेशजन्मनक्षत्रे पापग्रहयोगः पीड़ा येषां जन्मर्क्षाणि । १६ । ३ । २० । २२ । ११ । ८ । २७ । २ । ६ । मासेशशान्त्यादौ कृते न गर्भपीड़ा ॥
अथ प्रश्नात् पुत्त्रादिज्ञानम् ।
"विवाहलग्नं विषमर्क्षसंस्थः
सौरोऽपि पुंजन्मकरो विलग्नात् ।
ग्रहादिग्रहाणामवलोक्य वीर्य्यं
वाच्यः प्रसूतौ पुरुषोऽङ्गना वा ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च । गोभिलः ।
"यदा ऋतुमती भवति उपरतशोणिता तदा सम्भवकालः । ऋतुः प्रजाजननयोग्यकालः । तन्निमित्तेन नैमित्तिकं गमनं कार्य्यं अकुर्व्वतः प्रत्यवायान्नियमः । यदुक्तं स्मृतेः ॥
"ऋतुमतीन्तु यो भार्य्यां सन्निधौ नोपसर्पति ।
अवाप्नोति स मन्दात्मा भ्रूणहत्यामृतावृतौ ॥"
ज्योतिषे ।
"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी ।
उत्तरात्रितयं त्यक्त्वा पर्व्ववर्ज्जं व्रजेदृतौ ॥"
विष्णुपुराणम् ।
"चतुर्द्दश्यष्टमी चैव अमावस्याथ पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र । रविसंक्रान्तिरेव च ॥"
याज्ञवल्क्यः ।
"षोड़शर्त्तुनिशा स्त्रीणां तासु युग्मासु संविशेत् ।
अत्र षोड़शाहो रात्र्यात्मककालस्य सावकत्वात् पुंसवननामकरणयोरपि सावनगणनाया युक्तत्वाच्च संस्कारमात्रे सावनगणनया व्यवहारः ॥
तथा च याज्ञवल्क्यः ।
"गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा ।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः ।
षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम् ॥
एवमेनः शमं याति बीजगर्भसमुद्भवम् ।

चतुर्थे स्पन्दते ततः इति वचनात् स्पन्दनात् पूर्व्वं तृतीयमासः पुंसवनकालः। अत्र चतुर्थमासस्य सौरत्वे चान्द्रत्वे वा निषेकमासस्यापि तथात्वे तदाद्यन्तदिननिषेके सति अधिकयुगकालयोर्गर्भस्पन्दनमनियतमापद्येत सावने तु नियतम्। तेनात्र सावनगणना युक्ता योषिद्गर्भव्यवहारसिद्धा च। अहन्येकादशे नाम इत्यत्रापि अशौचव्यपगमे नामधेयमिति विष्णुसूत्रात् सूतकोत्तरदिनपरमेकादशपदम्।

"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता॥"

इति सूर्य्यसिद्धान्तवचनेन सूतकस्य सावनदिनघटितत्वात् तदुत्तरदिनस्यापि तथात्वम्। अतो दिनमासवर्षगणना सावनेनेति। शुभाशुभविवेचनन्तु सौरेण ज्योतिःशास्त्रात्। अतएव पितामहः।

"विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः।"

अत्र द्वितीयादिशब्दात् संस्कारपरिग्रहः।

"गर्भाधाने सदा ग्राह्या वारा भौमरवीज्यकाः।"

गोभिलः। दक्षिणेन पाणिना उपस्थमभिमृशेत विष्णुर्योनिं कल्पयत्वेतया ऋचा। गर्भं धेहि सिनीवालि च समाप्य ऋचौ सम्भवतः॥ कुत्सितदेशस्य सव्येन पाणिना शौचदर्शनात् तद्वारणाय दक्षिणेनेति। उपस्थं योनिं स्पृशेत् विष्णुरिति मन्त्रेण प्रथमं ततो गर्भं धेहि सिनीवालीत्यादिमन्त्रेण च। मन्त्रान्ते कर्म्मादिसन्निपात इति न्यायात् पाठानन्तरं स्पर्शः। न तु भवदेवभट्टोक्तं स्पृशन् जपतीति। ऋचौ समाप्यैव संयोगं कुरुत न मध्ये वामदेव्यजपः। देवलः।

'सकृच्च संस्कृता नारी सर्व्वगर्भेषु संस्कृता।'

तेन गर्भाधानपुंसवनसीमन्तोन्नयनानि सकृदेव कर्त्तव्यानि। छन्दोगपरिशिष्टम्।

"विवाहादि कर्म्मगणो य उक्तो
गर्भाधानं शुश्रुम यस्य चान्ते।
विवाहादावेकमेवात्र कुर्य्यात्
श्राद्धं नादौ कर्म्मणः कर्म्मणः स्यात्॥"

विवाहादिगर्भाधानान्तकर्म्मसु एकमेव श्राद्धं न तु प्रतिकर्म्मादौ एकेनैव श्राद्धेन कृतेन सर्व्वाणि श्राद्धवन्तीति। अन्तशब्दोऽत्रावयवार्थः दशान्तः पट इतिवत्। समीपार्थत्वे उपलक्षणं स्यात्। ततश्च विशेषणोपलक्षणसन्देहे विशेषणत्वेन ग्रहणं कार्य्यान्वितत्वात्। यत्तु।

"निषेककाले सोमे च सीमन्तोन्नयने तथा।
ज्ञेयं पुंसवने चैव श्राद्धं कर्म्माङ्गमेव च॥"

इत्यनेन भविष्यपुराणेन श्राद्धं कर्म्माङ्गत्वेन विहितं तच्छन्दोगेतरपरं अतएव भवदेवभट्टेनापि न लिखितम्। अत्र श्राद्धोत्तरगमनेऽपि न दोषः। उक्तभविष्यपुराणात्। नित्ये नान्दीमुखश्राद्धे कृते दाराद्यवर्ज्जनम्। इति व[...]न्तराच।" इति संस्कारतत्त्वम्॥ *॥ (निषेकादनन्तरं यद्यन्मासि मिश्रितशुक्रशोणितस्य यद्यद्भवति तदुक्तं यथा, बृहज्जातके निषेकाध्याये।

"कललं कठिनं रक्ताद्यस्थित्वग्रोमचेतनाः।
अशनोद्वेगसूतिश्च मासेष्वीशाः क्रमादमी॥
भृग्वारेज्यार्कचन्द्रार्किज्ञाङ्गेशाजदिवाकराः।
मासेशे पीडिते गर्भरोगः पुष्टिश्च सद्बले॥"

अस्यार्थः। प्रथमे मासि कललं शुक्रशोणितमिश्रणरूपं तत्र अधिपः शुक्रः। द्वितीये कठिनं मिश्रितशुक्रशोणितयोः काठिन्यं तत्राधिपतिः कुजः। तृतीये हस्ताद्युत्पत्तिस्तत्राधिपो गुरुः। चतुर्थे अस्थ्युत्पत्तिस्तत्राधिपः सूर्य्यः। पञ्चमे त्वच उत्पत्तिस्तत्रेशश्चन्द्रः। षष्ठे रोमोत्पत्तिस्तत्राधिपः शनिः। सप्तमे चैतन्यं तत्राधिपो बुधः। अष्टमे भोजनशक्तिस्तत्र गर्भाधानलग्नपतिः स्वामी। नवमे उद्वेगस्तत्राधीशश्चन्द्रः। दशमे प्रसवस्तत्राधीशो दिवाकरः। आधानकाले उक्तग्रहे पीडिते तत्तुल्यमासे गर्भपातादि। बलवति च तत्तन्मासे गर्भपुष्टिः॥

"ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥
जातो वा न चिरं जीवेज्जीवेद्वा दुर्ब्बलेन्द्रियः।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत्॥
अतिवृद्धायां दीर्घरोगिण्यां अन्येन वा विकारेणोपसृष्टायां गर्भाधानं नैव कुर्व्वीत। पुरुषस्याप्येवंविधस्य त एव दोषाः सम्भवन्ति॥"

इति सुश्रुते शारीरस्थाने दशमेऽध्याये॥)

गर्भाशयः, पुं, (आशेतेऽस्मिन्निति। आ+शी+अधिकरणे अच्। गर्भस्य भ्रूणस्य आशयः शय्यावदाश्रयस्थानम्।) जरायुः। येन वेष्टितो गर्भः कुक्षौ तिष्ठति सः। इत्यमरः। २। ६। ३८॥ गर्भशय्या। इति भावप्रकाशः॥ (यथा, महाभारते। १४। १८। ५।

"शुक्रं शोणितसंसृष्टं स्त्रिया गर्भाशयं गतम्।
क्षेत्रं कर्म्मजमाप्नोति शुभं वा यदि वाऽशुभम्॥"

"पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि॥
वीर्य्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा॥"

इति वाभटे शारीरस्थाने प्रथमेऽध्याये॥)

गर्भाष्टमः, पुं, (गर्भात् गर्भकालात् अष्टमः।) गर्भजननमासादष्टममासः। तत्पर्य्यायः। देवमासः २। इति त्रिकाण्डशेषः॥ (यथा, मनुः। २। ३६।

"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥")

गर्भिणी, स्त्री (गर्भोऽस्त्यस्याम्। गर्भ+"अत इनिठनौ।" ५। २। ११५। इति इनि ततो ङीप्।) गर्भवती। इत्यमरः। २। ६। २२॥ पोयाति इति भाषा॥ (यथा, मनुः। ३। ११४।

"सुवासिनीः कुमारीश्च रोगिणो गर्भिणीस्तथा।
अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्॥"

अस्याः कर्त्तव्यतामाह कश्यपः। यथा —

"गर्भिणी कुञ्जराश्वादिशैलहर्म्यादिरोहणम्।
व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्॥
शोकं रक्तविमोक्षञ्च साध्वसं कुक्कुटासनम्।
व्यवायञ्च दिवास्वप्नं रात्रौ जागरणं त्यजेत्॥"

तथा, मदनरत्ने स्कान्दे।

"हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा।
कूर्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम्॥
केशसंस्कारकबरीकरकर्णविभूषणम्।
भर्त्तुरायुष्यमिच्छन्ती वर्ज्जयेद्गर्भिणी न हि॥"

बृहस्पतिरप्याह।

"चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणी यदा।
यात्रा तदा विवर्ज्या स्यादाषाढे तु विशेषतः॥"

गर्भिणीप्रतिकरणीयतामाह याज्ञवल्क्यः।

"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं वापि तस्मात् कार्य्यं प्रियं स्त्रियाः॥"

आश्वलायनः।

"वपनं मैथुनं तीर्थं वर्ज्जयेद्गर्भिणीपतिः।
श्राद्धञ्च सप्तमान्मासादूर्द्ध्वं चान्यत्र वेदवित्॥"

कालविधाने मुहूर्त्तदीपिकायाम्।

"चौरं शवानुगमनं नखकृन्तनञ्च
युद्धादिवास्तुकरणं त्वतिदूरयानम्।
उद्वाहमौपनयनं जलधेश्च गाह-
मायुःक्षयार्थमिति गर्भिणिकापतीनाम्॥"

रत्नसंग्रहे गालवोऽपि।

"दहनं वपनञ्चैव चौलं वै गिरिरोहणम्।
नाव आरोहणञ्चैव वर्ज्जयेद्गर्भिणीपतिः॥"

गर्भिण्या यद्यत् लक्षणं जायते तदाह —

"क्षामता गरिमा कुक्षौ मूर्च्छाच्छर्द्दिररोचकः।
जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनम्॥
अम्लेष्टता स्तनौ पीनौ सस्तन्यौ कृष्णचूचुकौ।
पादशोफो विदाहोऽन्ये श्रद्धाश्च विविधात्मिकाः॥
मातृजं ह्यस्य हृदयं मातुश्च हृदयेन तत्।
सम्बद्धं तेन गर्भिण्या नेष्टं श्रद्धाविघारणम्॥"

इति वाभटे शारीरस्थाने प्रथमेऽध्याये॥

"समानयोगक्षेमा हि माता तदा गर्भेण केषुचिदर्थेषु तस्मात् प्रियहिताभ्यां गर्भिणीं विशेषेणोपचरन्ति कुशलाः।

तस्या गर्भापत्तेर्द्वृदय्यस्य च विज्ञानार्थं लिङ्गानि समासेनोपदेक्ष्यामः। उपचारासम्बाधनं ह्यस्या ज्ञाने दोषज्ञानञ्च लिङ्गतस्तस्मादिष्टो लिङ्गोपदेशस्तद्यथा गर्भावदर्शनमास्यसंस्रवणमनन्नाभिलाषः छर्द्दिररोचकोऽम्लकामता विशेषेण। श्रद्धाप्रणयनञ्चोच्चावचेषु भावेषु गुरुगात्रत्वं चक्षुषोर्ग्लानिः स्तनयोः स्तन्यमोष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यमत्यर्थं श्वयथुः पादयोरीषल्लोमराज्या योन्याश्च वालत्वमिति गर्भे पर्य्यागते रूपाणि भवन्ति। सा यद्यदिच्छेत्तत्तस्यै दद्यादन्यत्र गर्भोपघातकरेभ्यो भावेभ्यः। गर्भोपघातकरास्त्विमे भावास्तद्यथा, — सर्व्वमतिगुरूष्णतीक्ष्णदारुणाश्च चेष्टा इमांश्चान्यानुपदिशन्ति वृद्धाः। देवतारक्षोऽनुचरपरिरक्षणार्थं न रक्तानि वासांसि बिभृयान्न मदकराणि चाद्यान्यभ्यवहरेन्न यानमधिरोहेन्न मांसमश्नीयात् सर्व्वेन्द्रियप्रतिकूलांश्च भावान् दूरतः परिवर्ज्जयेत्।"

चतुर्थे मासि स्थिरत्वमापद्यते गर्भस्तस्मात्तदा गर्भिणी गुरुगात्रत्वमधिकमापद्यते विशेषेण।

पञ्चमे मासि गर्भस्य मांसशोणितोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी कार्श्यमापद्यते विशेषेण।

षष्ठे मासि गर्भस्य बलवर्णोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी बलवर्णहानिमापद्यते विशेषेण।

सप्तमे मासि गर्भः सर्व्वभावैराप्याय्यते सहसा तस्मात्तदा गर्भिणी सर्व्वाकारैः क्लान्ततमा भवति।

अष्टमे मासि गर्भस्य मातृतो गर्भतश्च माता रसवाहिनीभिः संवाहिनीभिर्मुहुर्मुहुरोजः परस्परत आददाते गर्भस्य सम्पूर्णत्वात् तस्मात्तदा गर्भिणी मुहुर्मुदा युक्ता भवति मुहुर्मुहुश्च ग्लाना तथा गर्भः तस्मात्तदा गर्भस्य जन्मव्यापद्वत्योजसोऽनवस्थितत्वात् तच्चैवमभिसमीक्ष्याष्टमं मासमगर्भिण्यमित्याचक्षते कुशलाः।" इति चरके शारीरस्थाने चतुर्थेऽध्याये॥

"स्तनयोः कृष्णमुखता रोमराज्युद्गमस्तथा।
अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः॥
अकामतश्छर्दयति गन्धादुद्विजते शुभात्।
प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते॥

तदा प्रभृत्येव व्यायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयमुत्कटकासनं चैकान्ततः स्नेहादिक्रियां शोणितमोक्षणञ्चाकाले वेगविधारणञ्च न सेवेत।

दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते॥"

"इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी।
गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्॥
सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितम्।
अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम्॥
येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना।
प्रजायेत सुतस्यार्त्तिस्तस्मिंस्तस्मिंस्तथेन्द्रिये॥
राजसन्दर्शने यस्या दौहृदं जायते स्त्रियाः।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते॥
दुकूलपट्टकौषेयभूषणादिषु दौहृदात्।
अलङ्कारैषिणं पुत्रं ललितं सा प्रसूयते॥
आश्रमे संयतात्मानं धर्म्मशीलं प्रसूयते॥
देवताप्रतिमायान्तु प्रसूते पार्षदोपमम्।
दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते॥
गोधामांसाशने पुत्रं सुषुप्सुं धारणात्मकम्।
गवां मांसे च बलिनं सर्व्वक्लेशसहन्तथा॥
माहिषे दौहृदाच्छूरं रक्ताक्षं लोमसंयुतम्।
वराहमांसात् स्वप्नालुं शूरं सञ्जनयेत् सुतम्॥
मार्गाद्विक्रान्तजङ्घालं सदा वनचरं सुतम्।
सृमरादुद्विग्नमनसं नित्यभीतञ्च तैत्तिरात्॥
अतोऽनुक्तेषु या नारी समभिध्याति दौहृदम्।
शरीराचारशीलैः सा समानं जनयिष्यति॥
कर्म्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्।
यथा यथा दैवयोगाद्दौहृदं जनयेद्धृदि॥"
इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये॥)

चीरावीट्टकः। इति शब्दचन्द्रिका॥ चीराइ इति भाषा॥

गर्भिण्यवेक्षणं, क्ली, (गर्भिण्या गर्भवत्या अवेक्षणं यत्नेन परिचर्य्या।) कुमारभृत्या। गर्भिणीपरिचर्य्या। इति त्रिकाण्डशेषः॥

गर्भोपघातिनी, स्त्री (गर्भं उपहन्तीति। उप + हन् + "सुप्यजातौ णिनिस्ताच्छील्ये।" ३।२।७८। इति णिनिः। गर्भं उपघातयतीति। हन् + णिच् णिनिः। इति केचित्।) अकृतौ वयोपगमनादिवशात् यस्याः गर्भपातो भवति सा गौः। गावडाफेला गाइ इति भाषा॥ तत्पर्य्यायः। वेहत् २। इत्यमरः। २। ९। ६९॥

गर्म्मुत्, स्त्री (गीर्य्यते भक्ष्यते ग्राकृतैरिति। गॄ निगरणे + "ग्रो मुट् च।" उणा। १। ९७। इति उति मुडागमश्च।) तृणधान्यविशेषः। इत्यमरो भरतश्च॥ मयना इति ख्यातः। गड गड इति केचित्॥ (गीर्य्यते भक्ष्यते यद्वा गीर्य्यते विज्ञाप्यते विख्याप्यतेऽनेनेति। गॄ + उति मुट् च।) स्वर्णम्। नड.। इति मेदिनी। ते। १०७॥

गर्म्मुटिका, स्त्री (गर्म्मुत इव उटं पत्रमस्याः। कप् + टाप् + अत इत्वञ्च। पृषोदरात् तकारलोपः।) व्रीहिभेदः। माडुया इति भाषा॥ तत्पर्य्यायः। गर्म्मूच्छद २। इति रत्नमाला॥

गर्म्मोटिका, स्त्री, (गर्म्मुटिका + निपातनात् उकारस्यौकारः।) जरडीतृणम्। इति राजनिर्घण्टः॥

गर्व्व, मदे। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) मद इह अहङ्कारः। नीचो गर्व्वति सम्पदा। इति दुर्गादासः॥

गर्व्व, पुं (गर्व्व मदे + भावे घञ्। यद्वा, गिरति मदमत्तत्वात्मानमुद्गिरतीव इति। गॄ निगरणे + "कॄगॄशॄदृभ्यो वः।" उणा। १। १५५। इति वः।) अहङ्कारः। इत्यमरः। १। ७। २२॥ (यथा रामायणे। २। ५१। २०।
"यदि दग्धो न रक्षेत भरतो राज्यमुत्तमम्।
प्राप्य दर्पेणरता वीर। गर्व्वेण च विशेषतः॥")
"अहङ्कारस्तथाध्यात्म सर्व्वसंसारकारणम्।
अभिमानोऽधिभूतञ्च रुद्रस्तत्राधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व॥
(अयं हि व्यभिचारिभावविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे। ३। १५०।
"गर्व्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत्॥")

गर्व्वाटः, पुं, (गर्व्वेण मदेन अटतीति। अट् + अच्। शकन्ध्वादित्वात् अलोपः।) द्वाःस्थितः। द्वारपालः। इति त्रिकाण्डशेषः॥

गर्व्वितः, त्रि, (गर्व्वः सञ्जातोऽस्य। गर्व्व + "तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्। यद्वा, गर्व्व + कर्त्तरि क्तः।) गर्व्वयुक्तः। अहङ्कृतः। इति जटाधरः॥ (यथा, रघुः। ६। ५५।
"आविर्बभूव कुशगर्भमुखं मृगाक्ष्या
यूथं तदग्रसरगर्व्वितकृष्णसारम्॥")

गर्ह्, ङ कुत्सने। इति कविकल्पद्रुमः। (भ्वा-आत्म-सकं-सेट्।) रेफोपधः। ङ, गर्हते। कुत्सनं निन्दा। इति दुर्गादासः॥ (यथा, रामायणे। २। ८७। १०।
"स वाक्यकलया वाचा कलहंसस्वरो युवा।
विललाप सभामध्ये जगर्हे च पुरोहितम्॥")

गर्ह् कि कुत्सने। इति कविकल्पद्रुमः॥ (चुरा-पक्षे भ्वा-पर-सकं-सेट्।) कि, गर्हयति गर्हति। इति दुर्गादासः॥ (यथा, भागवते। ६।७।१०।
"गर्हयामास सदसि स्वयमात्मानमात्मना॥"
तथा, तत्रैव। ४। ४। १०।
"जगर्ह सामर्षविपन्नया गिरा
शिवद्विषं धूमपथश्रमस्मयम्॥")

गर्हणं, क्ली, (गर्ह कुत्सने + भावे ल्युट्।) निन्दा। इत्यमरः। १। ६। १३॥

गर्हा, स्त्री (गर्ह्यते निन्द्यते इति। गर्ह कुत्सने + "गुरोश्च हलः।" ३। ३। १०३। इति स्त्रियां अः ततष्टाप्।) निन्दा। इति शब्दरत्नावली॥ (यथा पञ्चतन्त्रे। १। १८७।
"कुलपतनं जनगर्हां
बन्धनमपि जीवितव्यसन्देहम्।
अङ्गीकरोति कुलटा
सततं परपुरुषसंसक्ता॥")

गर्हितं, त्रि (गर्ह्यते स्म इति। गर्ह + क्त। यद्वा, गर्हा सञ्जाताऽस्य। गर्हा + इतच्।) निन्दितम्। यथा, चाणक्ये। ५०।
"अतिदर्पे हता लङ्का अतिमाने च कौरवाः।
अतिदाने बलिर्बद्धः सर्व्वमत्यन्तगर्हितम्॥"

गर्ह्यः, त्रि, (गर्ह्यते निन्द्यते इति। गर्ह ङ निन्दायाम् + "ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्।) अधमः। निन्द्यः। इत्यमरः। ३। १। ५४॥ (यथा, मनुः। ५। १४९।
"पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः।
एषां हि विरहेण स्त्री गर्ह्ये कुर्य्यादुभे कुले॥")

गर्ह्यवादी [न्] त्रि, (गर्ह्यं वदतीति। गर्ह्य + वद् + "सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः।) कद्वदः। इत्यमरः। ३। १। ३७॥

गल भक्षे। स्रावे। इति कविकल्पद्रुमः॥ (भ्वा-पर-सकं-स्रावे अकं-सेट्।) गलति। इति दुर्गादासः॥ (स्रावार्थे यथा, कथासरित्सा। ११। ५७।
"इति मे तव कान्तामपश्यन्त्या गलन्त्यमी।
सन्तापक्वथिताः प्राणा इव बाष्पाम्बुबिन्दवः॥")

गल, क ङ स्रावे। इति कविकल्पद्रुमः॥ (चुरा-आत्म-अकं-सेट्।) स्रावः। क्षरणम्। क ङ, गालयते रक्तं क्षतस्य। इति दुर्गादासः॥

गलः, पुं, (गलति भक्षयत्यनेन । गल् + करणे अप् । यद्वा गीर्य्यतेऽनेन । गॄ + करणे अप् ।) कण्ठः । इत्यमरः । २ । ३ । ८८ ॥ गला इति भाषा ॥ (यथा, पञ्चतन्त्रे । ३ । १६४ ।
"प्रजा न रञ्जयेद्यस्तु राजा रक्षादिभिर्गुणैः ।
अजागलस्तनस्येव तस्य राज्यं निरर्थकम् ॥" ॥
गलति चरति प्राणस्थानादेरिति । गल + पचाद्यच् ।) सर्ज्जरसः । इति मेदिनी । ले । १३ ॥ धुना इति भाषा ॥ वाद्यभेदः । (गलति निःसरति जालादेरिति ।) गडकमत्स्यः । इति शब्दरत्नावली ॥

गलकः, पुं, (गलति निःसरति जालादिभ्य इति । गल चरणे + ण्वुल् ।) गडकमत्स्यः ॥ इति शब्दरत्नावली ॥

गलकम्बलः, पुं, (गले कम्बल इव ।) गवां गलस्थितकम्बलाकृतिर्मांसम् । तत्पर्य्यायः । सास्ना २ । इत्यमरः । २ । ९ । ६३ ॥ ("सास्ना गोगलकम्बलः ।" इत्युज्ज्वलदत्तः ॥)

गलगण्डः, पुं, (गले गण्डः स्फोटक इव ।) गलरोगविशेषः । गरगण्ड इति भाषा ॥ अथ गलगण्डाधिकारः । तत्र गलगण्डस्य सामान्यलिङ्गमाह ।
"निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले ।
महान् वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ॥"
निबद्धो दृढः अचलो वा । मुष्कवत् अण्डवत् । गल इति हनुमन्ययोरुपलक्षणम् । तथा च भोजः ।
"महान्तं शोथमल्पं वा हनुमन्या गलाश्रयम् ।
मुष्कवल्लम्बमानं तु गलगण्डं विनिर्द्दिशेत् ॥" ॥
सम्प्राप्तिमाह ।
"वातः कफश्चापि गले प्रदुष्टो
मन्ये तु संसृत्य तथैव मेदः ।
कुर्व्वन्ति गण्डं क्रमशः स्वलिङ्गैः
समन्वितं तं गलगण्डमाहुः ॥"
क्रमशः शनैः शनैः । स्वलिङ्गैः वातकफमेदोलक्षणैः ॥ ॥
वातिकमाह ।
"तोदान्वितः कृष्णशिरावनद्धः
श्यावारुणो वा पवनात्मकस्तु ।
पारुष्ययुक्तश्चिरवृद्ध्यपाको
यदृच्छया पाकमियात् कदाचित् ॥
वैरस्यमास्यस्य च तस्य जन्तो-
र्भवेत्तथा तालुगलप्रशोषः ॥"
चिरवृद्ध्यपाकः चिरेण वृद्धिरपाकश्च यस्य सः ॥
श्लैष्मिकमाह ।
"स्थिरः सवर्णो गुरुरुग्रकण्डुः
शीतो महांश्चापि कफात्मकस्तु ।
चिराच्च वृद्धिं भजतेऽचिराद्वा
प्रपच्यते मन्दरुजः कदाचित् ॥
माधुर्य्यमास्यस्य च तस्य जन्तो-
र्भवेत्तथा तालुगलप्रलेपः ॥"
कदाचित् प्रपच्यते वा पाकोऽपि चिराद्भवति ॥ प्रलेपः श्लेष्मणा ॥ ॥
मेदोजमाह ।
"स्निग्धो मृदुः पाण्डुरनिष्टगन्धो
मेदोऽन्वितः कण्डुयुतोऽरुजश्च ।
प्रलम्बतेऽलाबुवदल्पमूलो
देहानुरूपक्षयवृद्धियुक्तः ॥
स्निग्धास्यता तस्य भवेच्च जन्तो-
र्गलेन शब्दं कुरुते च नित्यम् ।"
देहक्षये कार्श्ये च देहवृद्धौ वृद्धिं यातीत्यर्थः ॥ ॥
असाध्यमाह ।
"कृच्छ्राच्छ्वसन्तं मृदुसर्व्वगात्रं
संवत्सरातीतमरोचकार्त्तम् ।
क्षीणञ्च वैद्यो गलगण्डयुक्तं
भिन्नस्वरं नैव नरं चिकित्सेत् ॥" ॥
अथ गलगण्डचिकित्सा ।
"सर्षपान् शिग्रुबीजानि शणबीजातसीयवान् ।
मूलकस्य च बीजानि तक्रेणाम्लेन पेषयेत् ॥
गलगण्डो गण्डमाला ग्रन्थयश्चैव दारुणाः ।
प्रलेपात्तस्य नश्यन्ति विलयं यान्ति सत्वरम् ॥ १ ॥
रुचोषितैलयुक्तेन जलकुम्भीकभस्मना ।
लेपनं गलगण्डस्य चिरोत्थस्यापि नाशनम् ॥
रुचोषः सर्षपः ॥ २ ॥
श्वेतापराजितामूलं प्रातः पिष्ट्वा पिबेन्नरः ।
सर्पिषा नियताहारो गलगण्डप्रशान्तये ॥ ३ ॥
तिक्तालाबुफले पक्वे सप्ताहमुषितं जलम् ।
सद्यः स्याद्गलगण्डघ्नं पानात् पथ्यानुसेविनाम् ॥ ४ ॥
तैलं पिबेच्चामृतवल्लिनिम्बा
हिंसाभयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्यां सह देवदारु
हिताय नित्यं गलगण्डरोगी ॥
वृक्षकोऽत्र तुगिः । उक्तञ्च निघण्टौ धन्वन्तरिणा ।
'तुणिस्तुणी कपीतस्तु नन्दिवृक्षोऽथ वृक्षकः ।'
बलाभ्यां बलातिबलाभ्याम् । अमृतादितैलम् ॥ ५ ॥
यवमुद्गपटोलादिकटुरूक्षान्नभोजनम् ।
वमनं रक्तमोक्षञ्च गलगण्डे प्रयोजयेत् ॥ ६ ॥
दापयेद्गलगण्डे तु प्रच्छन्नानि बहूनि च ।
गण्डगोपालिकां पिष्ट्वा तत्र लेपं प्रकल्पयेत् ॥
अवश्यं नश्यति क्षिप्रं गलगण्डो गदोऽमुना ।
प्रलेपस्त्वनुभूतोऽयं बहुधा बहुभिर्ज्जनैः ॥
प्रच्छन्नानि पछना इति लोके । गण्डगोपालिका गण्डगुया इति लोके प्रसिद्धा आम्रवाटिकायां सुलभः कीटविशेषः ॥ ७ ॥
लवणं जलकुम्भ्यास्तु कणाचूर्णेन संयुतम् ।
प्रभाते नित्यमश्नीयात् गलगण्डप्रशान्तये ॥" ८ ॥
इति भावप्रकाशः ॥

गलग्रहः, पुं, (गलं कण्ठं गृह्णाति मत्स्यास्थ्ना इति । ग्रह + अच् । यद्वा गलं मत्स्यकण्ठो गृह्यतेऽस्मिन् । ग्रह + अधिकरणे अप् ।) अशुभतिथिविशेषः । तत्पर्य्यायः । मत्स्यघण्टः २ । इति शब्दचन्द्रिका ॥ तिथिविशेषः । यथा,—
"कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम् ।
त्रयोदशीचतुष्कञ्च अष्टावेते गलग्रहाः ॥"
इति मदनरत्ने नारदः ॥
अपि च ।
"आरम्भानन्तरं यत्र प्रत्यारम्भो न विद्यते ।
गर्गादिमुनयः सर्व्वे तमेवाहुर्गलग्रहम् ॥"
इति राजमार्त्तण्डः ॥
(रोगविशेषः । यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥"
"यस्य श्लेष्मा प्रकुपितस्तिष्ठत्यन्तर्गले स्थिरः ।
आशु सञ्जनयेच्छोथं जायतेऽस्य गलग्रहः ॥"
इति चरके सूत्रस्थानेऽष्टादशेऽध्याये ॥
गलग्रहरोगवत् परित्यागाशक्यत्वात् पीडादायकत्वाच्च लक्षणया अशक्या पोष्यात्मीयजनोऽपि बोध्यते । यथा, स एव मे गलग्रहः । इति लोकप्रसिद्धिः ॥)

गलन्तिका, स्त्री, (गलतीति । गल् + शतृ । उगित्वात् ङीप् । "शप्श्यनोर्नित्यम् ।" ७ । १ । ८१ । इति नुम् स्वार्थे कन् ह्रस्वश्च ।) कर्करी । स्वल्पवारिधानिका । इत्यमरः । २ । ९ । ३१ ॥ (यथा, काशीखण्डे ।
"यथा कार्य्या च वैशाखे देवे देया गलन्तिका ॥")

गलमेखला, स्त्री, (गलस्य कण्ठस्य मेखलेव ।) गलसूत्रम् । कण्ठाभरणविशेषः । तत्पर्य्यायः । सूत्राली २ । इति हारावली । १७४ ॥

गलव्रत, पुं, (गलो गिलनमेव व्रतं नियमो यस्य ।) मयूरः । इति त्रिकाण्डशेषः ॥

गलशुण्डिका, स्त्री, (अल्पा शुण्डा शुण्डिका । गलस्य शुण्डिकेव ।) तालूर्द्ध्वस्थजिह्वा । आलजिव् इति भाषा ॥ (यथा, याज्ञवल्क्ये । ३।८८ ।
"तालूदरं वस्तिशीर्षे चिबुके गलशुण्डिके ॥")
तत्पर्य्यायः । सुधास्रवा २ घण्टिका ३ लम्बिका ४ । इति हेमचन्द्रः । ३ । २४६ ॥ रसाज्ञा ५ गलिशुण्डिका ६ माध्वी ७ अलिजिह्विका ८ । इति शब्दरत्नावली ॥ (तालुगतरोगविशेषः । यथा, सुश्रुते सूत्रस्थाने २५ अध्याये ।
"शस्त्रं जतुमणिर्म्मांससङ्घातो गलशुण्डिका ॥"
"यस्य श्लेष्मा प्रकुपितः काकले व्यवतिष्ठते ।
आशु सञ्जनयेच्छोथं करोति गलशुण्डिकाम् ॥"
इति चरके सूत्रस्थानेऽष्टादशेऽध्याये ॥
तच्चिकित्सादिकं यथा,—
"गले च घण्टिकामार्गे रक्तश्लेष्मविकारजा ।
लम्बिका वर्द्धते नॄणां विज्ञेया गलशुण्डिका ॥
रुणद्धि चास्य मार्गञ्च नेत्रस्रावः प्रदृश्यते ।
शिरोऽर्त्तिः श्वासकासश्च ज्वरश्चैव प्रपद्यते ॥
आशुकारी महाप्राज्ञः शीघ्रं कुर्य्यात् प्रतिक्रियाम् ।
शस्त्रेण शुण्डिकां छित्वा कुर्य्याज्जिह्वाप्रमं हितम् ॥
मागधी मरिचं पथ्या वचा धान्ययवानिकाः ।
क्वाथः सोष्णः खेदनश्च गलशुण्डीप्रशान्तये ॥
दिवारात्रौ यवान्याश्च मुखे सञ्चारणं हितम् ।
मर्द्दनं कण्ठदेशे तु तेन सम्पद्यते सुखम् ॥
सिद्धार्थकं वचा कुष्ठं रजनी मारिभद्रकम् ।
गृहधूमं सलवणं कण्ठे वा लेपनं हितम् ॥

ज्वरे प्रोक्तानि पथ्यानि यानि तानि महामते।। न गौल्यं पिच्छिलं सेव्यं तैलं नैव गलामये ॥” इति हारीते चिकित्सितस्थाने पञ्चचत्वारिंशेऽध्याये ॥)

गलस्तनी, स्त्री, (गले स्तनाविव मांसपिण्डौ यस्याः।) छागी। इति हेमचन्द्रः। ४। ३४१ ॥

गला, स्त्री, (गलतीति। गल्+अच्। स्त्रियां टाप्।) अलम्बुषा। इति भावप्रकाशः ॥

गलाङ्कुरः, पुं, (गलरोधकोऽङ्कुरो यत्र।) गलरोगविशेषः। तत्पर्य्यायः। रोहिणी २। इति हेमचन्द्रः। ३। १३१ ॥ तस्य सम्प्राप्तिपूर्ब्बकलक्षणमाह माधवकरः।
“गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम्।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरयञ्च रोहिणी ॥”

गलानिलः, पुं, (गले कण्ठदेशे अनिलः प्राणवायुर्यस्य।) मत्स्यविशेषः। तत्पर्य्यायः। गड्डाटेयः २। इति त्रिकाण्डशेषः ॥ गलानिलः गलाविल इति च क्वचित् पाठः ॥

गलिः, पुं, (गिरति अमेण विना केवलं भक्षयतीति। गॄ+“सर्व्वधातुभ्य इन्।” उणा। ४। ११७। इति इन्। गुणः रस्य लत्वञ्च।) शक्तोऽप्यधूर्व्वहो वृषः। गड़िया गरु इति भाषा। तत्पर्य्यायः। दुष्टवृष. २। इति हेमचन्द्रः। ४। ३२६ ॥

गलितः, त्रि, (गल्+क्त।) पतितः। तत्पर्य्यायः। स्रस्तः २ ध्वस्तः ३ भ्रष्टः ४ स्कन्नः ५ पन्नः ६ च्युतः ७। इत्यमरः। ३। १। १०४ ॥ (यथा, भागवते। १। १। ३।
“निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ॥”)

गलुः, पुं, (गलतीति। गल्+उन्।) मणिविशेषः। इति महाभारतम् ॥

गलेगण्डः, पुं, (गले गण्ड इव यस्य। अलुक् समासः।) पक्षिविशेषः। तत्पर्य्याय। मर्कटः २। इति त्रिकाण्डशेषः ॥ (हाड़गिला इति भाषा ॥)

गलेस्तनी, स्त्री, (गले स्तनाविव मांसपिण्डौ यस्याः। अलुक् समास.।) छागी। इति राजनिर्घण्टः ॥

गल्भ, ङ धृष्टत्वे। इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्।) अन्तःस्थतृतीयोपधः। ङ, गल्भते लोकः प्रगल्भः स्यादित्यर्थः। इति ‑ र्गादासः ॥

गल्या, स्त्री, (गलानां कण्ठानां समूहः। “पाशादिभ्यो यः।” ४। २। ४९। इति यः।) गलसमूहः। कण्ठानां समूहः। इत्यमरः। ३।३।४३॥

गल्लः, पुं, गण्डः। इति हेमचन्द्रः ॥ गाल इति भाषा ॥

गल्लचातुरी, स्त्री, (गल्ले गण्डे गण्डमधिकृत्य चातुरी यस्या यस्यां वा। संज्ञात्वान्न कप्।) उपधानविशेषः। इति जटाधरः ॥ गालवालिश इति भाषा ॥

गल्लर्कः, पुं, (गल्लमणिविशेषः स इव अर्को दीप्तिर्यस्य।) चषकः। मद्यपानपात्रम्। इति हेमचन्द्रः। ३। ५७०॥ मसारकमणिः। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते।७।१५।५३।
“मसारगल्वर्कसुवर्णरूप्यै-
र्वज्रप्रवालस्फटिकैश्च मुख्यैः ॥”)

गल्ह, ङ कुत्सने। इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट्।) अन्त.स्थतृतीयोपधः। ङ, गल्हते। इति दुर्गादास. ॥

गवयः, पुं, (गु ङ शब्दे+भावे अप्। गवं शब्दं याति प्राप्नोति गव इति शब्दं यातीति वा। गव+या+कः।) गलकम्बलशून्यगोसदृशपशुः। (यथा, रामायणे। २। १०३। ४२.
“व्याघ्रगोकर्णगवया वित्रेसुः पृषतैः सह ॥”)
तत्पर्य्यायः। गवालूकः २। इति त्रिकाण्डशेषः ॥ वनगौः ३ वलभद्रः ४ महागवः ५। तन्मांसगुणाः। मधुरत्वम्। बृंहणत्वञ्च। इति राजनिर्घण्टः ॥ वानरविशेषः। स तु वैवस्वतपुत्त्रः। यथा,—
“पुत्त्रा वैवस्वतस्यात्र पञ्च कालान्तकोपमाः।
गयो गवाक्षो गवयः शरभो गन्धमादनः ॥”
इति रामायणम् ॥

गवयी, स्त्री, (गवय+जातौ गौरादित्वात् वा ङीष्।) गवयस्त्री। तत्पर्य्यायः। वनधेनुः २ भिल्लगवी ३। इति राजनिर्घण्टः ॥

गवराजः, पुं, (गवेन शब्देन राजते इति। राज्+अच्।) वृषः। इति शब्दचन्द्रिका ॥

गवल, क्ली, महिषशृङ्गम्। इत्यमरः। २।६।१००॥

गवल., पुं, (गव शब्दं लातीति। ला+कः।) वनमहिष.। इति हेमचन्द्रः।४।३४९॥ (यथा, बृहत्संहितायाम्। ३२। १७।
“गवलालिकुलाहिनिभा विसृजन्ति पयः पयोवाहाः ॥”)

गवाक्षः, पुं, (गवामक्षीव। “अक्ष्णोऽदर्शनात्।” ५। ४। ७६। इत्यच्। यद्वा, गावः रश्मयः अक्ष्णुवन्ति व्याप्नुवन्ति अनेन इति। अक्षू व्याप्तौ+अकर्त्तर्य्यर्थे घञ्।) गवामक्षीव यः। जानालार जाली इति भाषा ॥ (यथा, रघुः।७।७।
“उत्सृष्टलीलागतिरागवाक्षा-
दलक्तकाङ्कां पदवीं ततान ॥”)
तत्पर्य्यायः। वातायनम् २। इत्यमरः। २।२।८॥ वधूटगवनम् ३ जालम् ४ जालकम् ५। इति कोषान्तरम्। इति भरतः ॥ वानरविशेष'। इति मेदिनी। क्षे। ३५ ॥ स तु वैवस्वतपुत्त्रः। यथा, रामायणे।
“पुत्त्रा वैवस्वतस्यात्र पञ्च कालान्तकोपमा.।
गयो गवाक्षो गवयः शरभो गन्धमादन. ॥”

गवाक्षी, स्त्री, (गां भूमिमक्ष्णोति व्याप्नोतीति। अक्षू व्याप्तौ+“कर्म्मण्यण्।” ३। २। १। इत्यण्। स्त्रियां ङीप्।) गोडुम्बा। इत्यमर'। २। ४। १५६ ॥ गोमुक् इति भाषा ॥ इन्द्रवारुणी। राखाल शसा इति भाषा ॥ (अस्याः पर्य्याया यथा,—
“ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी गजचिर्भटा।
मृगेर्व्वारुः पिटङ्कोटी विशाला च मृगादनी ॥”
इति वैद्यकरत्नमालायाम् ॥
अव्यवहारोऽस्य यथा,—
“चित्रकं मृङ्गबेरञ्च तथादन्ती गवाक्ष्यपि ॥”
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥
मामालाकु इति क्वचित् भाषा ॥) शाखोटः। शेओड़ा इति भाषा ॥ इति राजनिर्घण्टः ॥ अपराजिता। (यथा, वैद्यकरत्नमालायाम्।
“गवाक्ष्यश्वखुरीश्वेता श्वेतभण्डापराजिता।
द्विविधा सा मिता नीला गिरिकर्णी गवादनी ॥”)

गवाची, स्त्री (गवि भूमौ अञ्चति गच्छतीति। अञ्च+क्विप्। ङीष्। “अवङ् स्फोटायनस्य।” ६। १। १२३। इत्यवङ्।) मत्स्यविशेषः। पाँकाल माछ इति भाषा ॥ अस्य गुणाः। अजीर्णकारित्वम्। गुरुत्वम्। श्लेष्मप्रकोपनत्वञ्च। इति राजवल्लभः ॥

गवादनं, क्ली, (अद्यते भक्ष्यते इति। अद्+कर्म्मणि ल्युट्। ततः षष्ठीतत्पुरुषः।) घासः। इति शब्दचन्द्रिका ॥

गवादनी, स्त्री (गवादन+गौरादित्वात् ङीष्।) इन्द्रवारुणी। (अद्यतेऽस्यामिति। अद्+अधिकरणे ल्युट्। तत' षष्ठीतत्पुरुषस्ततः स्त्रियां ङीष्।) गवां घासभक्षणाधार'। इति मेदिनी। ने। १७८॥ गरुर घास खाइवार गडा इति भाषा॥ नीलापराजिता। इति राजनिर्घण्ट ॥ (यथास्याः पर्य्यायाः,—
“गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी ॥”
इति वैद्यकरत्नमालायाम् ॥)

गवालूकः, पुं, (गवेन शब्देन अलति पर्य्याप्नोतीति। अल्+बाहुलकात् ऊकण्।) गवय.। इति त्रिकाण्डशेषः ॥

गवाशनः,पुं,(गामश्नातीति। अश ग भोजने+ल्युट्।) गोभक्षक'। मुचि इति भाषा ॥ यथाह कश्चित्।
“मातामिका पितामिकी मम तस्य च पक्षिणः।
अह मुनिभिरानीतः स चानीतो गवाशनैः ॥”

गवाषिका, स्त्री, लाचा। इति रत्नमाला ॥ गराधिकापि पाठः ॥(गवाधिका इति क्वचित् पाठ.॥)

गवीश्वरः, पुं, (गवामीश्वर.। पक्षे अवङादेशाभाव.।) गवां स्वामी। तत्पर्य्यायः। गोमान्२ गोमी ३। इत्यमरः। २।९। ५८ ॥ गवेश्वरोऽपि ॥

गवेडुः, स्त्री, (गवे गवार्थे दीयते इति। दा+मृगय्वादित्वात् कुः। पृषोदरात् दकारस्य डत्वम्। तत्पुरुषे कृतीत्यलुक्।) धान्यविशेषः। इत्यमर। २। ९। २५ ॥ गड्गड् इति भाषा ॥

गवेधु, पुं, (गवे गवार्थे धीयते इति। धा+कु'। तत्पुरुषे कृतीत्यलुक्। यद्वा, गवि भूमौ एधते इति। गो+एध वृद्धौ+कुः।) गवेडुः। इति भरतः ॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते। यथा,—

"गवेधुका तु विज्ञज्ञैर्गवेधु' कथिता स्त्रियाम् ।
गवेधुः कटुका स्वाद्वी कार्श्यकृत् कफनाशिनी ॥"
इति भावप्रकाशः ॥)

गवेधुक, क्ली, (गवेधुरिव कायतीति । कै + कः । गैरिकम् । इति राजनिर्घण्टः ॥ (तृणधान्य विशेषः । गडगडि इति भाषा ॥ यथा,—
"चिल्लीलट्टाकलोणीका कुरुण्टकगवेधुकम् ।"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
सर्पविशेषे पुं । यथा, सुश्रुते कल्पस्थाने ४अध्याये ।
"मण्डलिनः शङ्खपाली लोहिताक्षो गवेधुकः परिसर्पः" इत्यादयः ॥)

गवेधुका, स्त्री, (गवेधु + स्वार्थे संज्ञायां वा कन् ।) तृणधान्यविशेषः । गडगड् देधान इति च भाषा । (यथा, विष्णुपुराणे । १ । ६ । २५ ।
"श्यामाकास्त्वथ नीवारा जर्त्तिला. सगवेधुका ।")
तत्पर्य्यायः । गवेडु. २ । इत्यमरः । २ । ९ । ५२ ॥
गवेधुः ३ गवेडका ४ । इति तट्टीका ॥ क्षुद्रा ५ गोजिह्वा ६ गुन्द्रा ७ गुल्य. ८ । इति रत्नमाला ॥ नागवला । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"गाङ्गेरुकी नागवला झषा ह्रस्वगवेधुका ।
खरवल्लरिका विश्वदेवा गोरक्षतण्डुली ॥"
इति च वैद्यकरत्नमालायाम् ॥)

गवेरुकं, क्ली, (गां भूमिमीर्त्ते उत्पत्तिकारणत्वेन प्राप्नोतीति । गो + ईर + बाहुलकादुक । ततोऽवङादेशः ।) गैरिकम् । इति त्रिकाण्डशेषः ॥

गवेशका, स्त्री, (इष्टे इति । ईश् + अच । ततो गवामीशः । स इव कायतीति । कै + कः ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ गोरच चाउलिया । इति भाषा ॥ (गुणादयोऽस्या गोरक्षतण्डुलाशब्दे ज्ञातव्याः ॥)

गवेष, त् क मार्गणे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा पर-सकं-सेट ।) खर्द्धन्योमध्य. । अजगवेषत् गुणा गुणी । इति दुर्गादासः ॥

गवेषणा, स्त्री क्ली, (गवेष + भावे युच् ।) अन्वेषणा । इत्यमरः । २ । ७ । ३२ ॥

गवेषित त्रि, (गवेष्यते स्म इति । गवेष + क्त ।) अन्वेषितम् । इत्यमरः । ३ । १ । १०५ ॥

गवोद्वः पुं, उत्तमगवः । गोयूथः प्रशस्तः । इति व्युत्पत्तिः ॥

गव्य, त्रि, (गोरिदं गोर्विकारो वा । "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् । "वान्तो यि प्रत्यये ।" ६।१।७९ । इति अव् ।) गवां सब्बन् । गोसम्बन्धि । तत्तु दुग्धगोमयादि । इत्यमरः । २ । ९ । ५० ॥ (यथा, मनुः । ३।७१ ।
"संवत्सरन्तु गव्येन पयसा पायसेन च ॥")
गोहितम् । इति मेदिनी । ये । १७ ॥

गव्य, क्ली, (गवि वाणे साधु । गो + यत् । ततोऽव् ।) ज्या । (गवि नेत्रे साधु इति ।) रागद्रव्यम् । इति मेदिनी । ये । १७ ॥

गव्या, स्त्री, (गवां समूहः । "खलगोरथात् ।" ४ । २ । ५० । इति यत् । "वान्तो यि प्रत्यये ।" ६ । १ । ७९ । इति अव ।) गोसमूहः । तत्पर्य्यायः । गोत्रा २ । इत्यमरः । २ । ९ । ६० ॥ गव्यूतिः । (गवि इषौ साधुः । गो + यत । ततष्टाप् ।) ज्या । इति हेमचन्द्रः ॥ गोरोचना । इति राजनिर्घण्टः ॥

गव्यूतं, क्ली, (गोर्यूतिः । "गोर्यूतौ छन्दस्युपसंख्यानम् ।" "अध्वपरिमाणे च ।" ६ । १ । ७९ । इत्यस्य वार्त्ति इति अव । पृषोदरात् इकारलोपे साधुः ।) क्रोशः । गव्यूतिः । इति हेमचन्द्रः । ३ । ५५१ ॥

गव्यूतिः, स्त्री, पु, (गोर्यूतिः । "गोर्यूतौ छन्दस्युपसंख्यानम् ।" "अध्वपरिमाणे च ।" ६ । १ । ७९ । इत्यस्य वार्त्ति इति अव ।) द्विसहस्रधनु. । इति शब्दार्णवः ॥ क्रोशद्वयम् । (यथा, राजतरङ्गिण्याम् । ३ । ४०९ ।
"गव्यूतिमात्रमासन्ने देवीधामनि धैर्य्यवान् ।
सुन्वन् कराभ्यां मध्वान् धावति स्म स धीरधीः ॥")
तत्पर्य्यायः । क्रोशयुगम् २ । इत्यमरः । २ । १ । १८ ॥ गव्यूतम् ३ गोरुतम् ४ गोतमम् ५ । इति भरतधृतवाचस्पतिः ॥ गव्या ६ । इति हेमचन्द्रः । ३ । ५५२ ॥

गह, त् क गहने । इति कविकल्पद्रुमः ॥ (अदन्तचुरा-पर-सक-सेट ।) गहन दुर्बोध । गहयति शास्त्रं जडधी । दु खेन जानातीत्यर्थः । इति दुर्गादासः ॥

गहन, क्ली, (गाह्यते दुर्गम्यतेऽस्मिन्निति । गाह + बहुलमन्यत्रापि इति युच् कृच्छ्रगहनयोरिति निर्द्देशात् वा ह्रस्वः । यद्वा, गह त् क गहने + ल्युट् ।) वनम् । इत्यमरः । २ । ४ । १ ॥ (यथा, गो. रामायणे । ६ । ६ । ६ ।
"सखीस्नेहेन तद्भीरु मया सर्व्वं प्रतिश्रुतम् ।
निलीय गहने शून्ये भयसन्त्रस्य रावणात् ॥")
गह्वरम् । दुःखम् । इति मेदिनी । ने । ५७ ॥ (पु, विष्णुः । दुर्ज्ञेयत्वादस्य तथात्वम् । यथा, महाभारते । १३ । १४९ । ५४ ।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ।"
"सर्व्वरूप सामर्थ्यं चेष्टितं तस्य ज्ञातुं न शक्यते इति गहन ।" इति भाष्यम् ॥)

गहन', त्रि, (गाह्यते दुःखेन गम्यते इति । गाह + युच् । कृच्छ्रगहनयोरिति निर्द्देशात् वा ह्रस्व ।) दुर्गमं । दुष्प्रवेशः । तत्पर्य्याय । कलिलं २ । इत्यमरः । २ । ४ । १ ॥ (यथा, रामायणे । ३ । १ । २३ ।
"गहनेष्वाश्रमाग्र्येषु लीलाविलसदर्शनाः ।
रमन्ते तापसांस्तत्र त्रासयन्तः सुदारुणाः ॥")

गहना, स्त्री, अलङ्कारः । इति देवीपुराणम् ॥

गह्वरं, क्ली, (गाह्यते इति । गाह + "छित्वरच्छत्वरेति ।" उणा । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधु. ।) गुहा । (यथा, रघुः । २ । २६ ।
"गङ्गाप्रपातान्तविरूढशष्प
गौरीगुरोर्गह्वरमाविवेश ॥") ॥
गाह्यते विलुड्यते व्याजाऽनेन इति ।) दम्भः । इत्यमरः । ३ । ३ । ६ ॥ वनम् । इति मेदिनी । रे । १९६ ॥ रोदनम् । इति हेमचन्द्रः । ६।३८ ॥ (गहने त्रि । यथा, भागवते । १ । ६ । १३ ।
"नलवेणुशरस्तम्बकुशकीचकगह्वरम् ।
एक एवातियातोऽहमद्राक्षं विपिनं महत् ॥")

गह्वर, पु (गाह्यते विलुड्यते इति । गाह विलोडने + "छित्वरच्छत्वरेति ।" उणा । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधुः ।) निकुञ्जः । इति मेदिनी । रे । १४६ ॥

गह्वरी, स्त्री, (गह्वर + स्त्रियां ङीप् ।) गुहा । इति शब्दरत्नावली ॥

गा, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) ङ, गाते । इति दुर्गादासः ॥

गा, र लि स्तुतौ । जन्मनि । इति कविकल्पद्रुमः ॥ (ह्वां-पर-सक-सेट ।) र, वैदिकः । लि, जगाति । इति दुर्गादासः ॥

गा स्त्री, (जगाति स्तौति अनया । गा स्तुतौ + क्विप् ।) गाथा । इति पुरुषोत्तमः ॥

गाङ्गं, त्रि, (गङ्गाया इदमिति अण् ।) गङ्गासम्भूतम् । इति मेदिनी ॥ गे । ५ ॥ (यथा, कुमारे । ५ । ३७ ।
"विकीर्णसप्तर्षिबलिप्रहासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ॥"
मेघधारावारिणि. स्मृते जलविशेषे, क्ली । तल्लक्षणादिकं यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"तत्रान्तरीक्षं चतुर्व्विधम् । तद्यथा, धार कार तौषार हैममिति । तेषां धारं प्रधानं लघुत्वात् । तत्पुनर्द्विविधं गाङ्गं सामुद्रञ्चेति । तत्र गाङ्गमाश्वयुजे मासि प्रायशो वर्षति तयोर्द्वयोरपि परीक्षणं कुर्व्वीत शाल्योदनपिण्डमकुथितमविदग्धं रजतभाजनोपहितं वर्षति देवे बहिष्कुर्व्वीत स यदि मुहूर्त्तं स्थितस्तादृश एव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्णान्यत्वे सिक्थक्लेदे च सामुद्रमिति विद्यात्तन्नोपादेयम् । सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गवद् भवतीति ॥"
अस्य परीक्षा यथा —
"गाङ्गं सामुद्रविज्ञानं कथयिष्यामि साम्प्रतम् ।
धारितं येन पात्रेण लक्ष्यते येन तद्द्विधम् ॥
धौतं शुद्धं सितं वस्त्रं चतुर्हस्तप्रमाणकम् ।
दृढाश्लिष्टं स्वांस चतुस्तत्चतुष्कोणेषु यन्त्रयेत् ।
तस्मात् परीक्षते तोयं शुद्धं रौप्यमयेऽथवा ॥
कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वरः ।
शुद्धकर्म्मा स तत्सर्व्वं श्वेतशाल्योदनस्य वा ॥
पिण्डिका तत्र सञ्चिप्ता नान्यथा भाति सा पुनः ।
श्वेता च निर्म्मला पिण्डी शुद्धञ्च विमलं पयः ॥
तस्माच्च सर्व्वदोषघ्नं गृहीत्वा हि सुभाजने ।
तदाहरेच्च मतिमान् बल्यं मेध्यं रसायनम् ॥
श्रमक्लमपिपासाघ्नं काष्ठदोषनिवारणम् ।
लघु मूर्च्छात्यया-च्छर्द्दि-मूत्र स्तम्भ-विनाशनम् ॥
गाङ्गोदकस्य दृष्टिं स्यादिवसे वा प्रदोषत ॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥)

गङ्गागर्भजातत्वात् सुवर्णमपि। इति महाभारतम् ॥)

गाङ्गः, पु, (गङ्गाया अपत्यं पुमानिति। "शिवादिभ्योऽण्।" ४।१।११२। इत्यण्।) भीष्मः। (यथा, हरिवंशे। ३२।१११।

"गाङ्गं देवव्रतं नाम पुत्त्रं सोऽजनयत् प्रभुः।
स तु भीष्म इति ख्यातः कौरवाणां पितामहः॥"

अस्य जन्मवृत्तान्तादिकं भीष्मशब्दे द्रष्टव्यम्॥) कार्त्तिकेयः। इति मेदिनी। गे। ५॥

गाङ्गटः, पु, (गाङ्गे गङ्गातीरादौ अटति भ्रमतीति। अट्+अच्। शकन्ध्वादित्वात् साधुः।) मत्स्यभेदः। इति शब्दरत्नावली॥ चिङ्गिडि माछ इति भाषा॥ (चिङ्गिटशब्दे विवरणमस्य ज्ञेयम्॥)

गाङ्गटकः, पुं, (गाङ्गे गङ्गातीरादौ अटतीति। अट्+ण्वुल्।) गाङ्गटमत्स्यः। इति शब्दरत्नावली॥

गाङ्गटेयः, पु, (गाङ्गे अटतीति। अट गतौ+बाहुलकात् एयः।) गाङ्गटमत्स्यः। इति शब्दरत्नावली॥

गाङ्गायनिः, पु (गङ्गाया अपत्यं पुमान्। "तिकादिभ्यः फिञ्।" ।४।१।१५४। इति फिञ्।) भीष्मः। इति त्रिकाण्डशेषः॥ कार्त्तिकेयश्च॥

गाङ्गेयं, क्ली, (गङ्गाया अपत्यम्। "शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्। गङ्गाजातत्वादस्य तथात्वम्।) स्वर्णम्। (यदुक्तं महाभारते वनपर्व्वणि।

"यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम्।
तदुल्बं पर्व्वते न्यस्तं हिरण्यं समपद्यत॥")

धुस्तूरः। कशेरु। इत्यमरः। २।६।६४॥ मुस्तम्। इति हेमचन्द्रः॥ (अस्य पर्य्याया. यथा, वैद्यकरत्नमालायाम्।

"मेघाख्यं मुस्तकं मुस्ता गाङ्गेयं भद्रमुस्तकम्॥"

गङ्गाजातजलादौ त्रि। यथा, महाभारते। ३।३।३४।

"योगमास्थाय धर्म्मात्मा वायुभक्षो जितेन्द्रियः।
गाङ्गेयं वार्य्युपस्पृश्य प्राणायामेन तस्थिवान्॥")

गाङ्गेयः, पु, (गङ्गाया अपत्यं पुमान्। "शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्।) भीष्मः। (यथा, देवीभागवते। २।४।३७।

"वसुदेवं विदित्वेनं सुखं सुङ्क्ष्व सुतोद्भवम्।
गाङ्गेयोऽयं महाभाग! भविष्यति बलाधिकः॥"

अस्य जन्मविवरणं तत्रैव २ अध्याये तथा भीष्मशब्दे विस्तरशो द्रष्टव्यम्॥) कार्त्तिकेयः। इति हेमचन्द्रः॥ (यथा, महाभारते। १।१३८।१३।

"आग्नेयः कृत्तिकापुत्त्रो रौद्रो गाङ्गेय इत्यपि।
श्रूयते भगवान् देवः सर्व्वदेवमयो गुहः॥")

इल्लीशमत्स्यः। इति त्रिकाण्डशेषः॥ भद्रमुस्ता। इति राजनिर्घण्टः॥

गाङ्गेरुकी, स्त्री, (गाङ्गं जलविशेषमीरयतीति। ईर गतौ क्षेपणे च+"स्त्रगयुद्यश्च।" उणा। १।३८। इति कुः। ततः स्वार्थे कन् गौरादित्वात् ङीष्।) गोरक्षतण्डुला। इत्यमरः। २।४।११७॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाश्मन्तकाश्वकर्णफल्गुपरूषकगाङ्गेरुकीपुष्करवर्त्तिबिल्वबिम्बीप्रभृतीनि॥"

यथास्याः पर्य्यायाः।

"गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका।
खरवल्लरिका विश्व-देवा गोरक्षतण्डुली॥"

इति वैद्यकरत्नमालायाम्॥

यथास्या गुणाः।

"गाङ्गेरुकी करीरश्च बिम्बीतोदनधन्वनम्।
मधुरं सकषायश्च शीतं पित्तकफापहम्॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

गाङ्गेष्ठी, स्त्री, (गाङ्गे गङ्गादिनदीतटे तिष्ठतीति। स्था+कः अलुक्। गौरादित्वात् ङीष्।) कटशर्कराख्यलता। इति हारावली। २१०॥ नटा इति भाषा॥

गाञ्जिकायः, पु, वर्त्तिकपक्षी। इति राजनिर्घण्टः॥

गाढं, क्ली, (गाह्यते स्म इति। गाह विलोडने+क्तः।) अतिशयः। दृढम्। (यथा, आर्य्यासप्तशत्याम्। ६१०।

"आलिङ्गति सा गाढं पुनः पुनर्यामिनीप्रथमे॥")

तद्युक्ते त्रि। इत्यमरः। १।१।७०॥ (यथा, रघुः। ६।७२।

"अमफेनसुधा तपस्विगाढां
तमसां प्राप नदीं तुरङ्गमेण॥")

गाढमुष्टिः, पुं (गाढा दृढा मुष्टिर्यत्र। दृढमुष्ट्या धारणादस्य तथात्वम्।) खड्गः। कृपणे त्रि। इति मेदिनी। टे। ६१॥ (दातृत्वाभावादेवास्य तथात्वम्॥)

गाढावटी, स्त्री (गाढा दृढा वटी वटिका यत्र। निपातनात् पुंवद्भावाभावः।) चतुरङ्गक्रीडामध्ये क्रीडाविशेषः। यथा, तिथ्यादितत्त्वे।

"नौकैका वटिका यस्य विद्यते खेलने यदि।
गाढावटीति विख्याता पदं तस्य न दुष्यति॥"

गाणपत्यः, त्रि, (गणपतिर्गणेश उपास्यदेवो यस्य। गणपति+ण्यः। केचाचित्तु अश्वपत्यादिभ्यश्चेति गणपदादेऽण्। तत्र गाणपत इति साधुः।) गणेशोपासकः। इत्यागमः॥ (गणपतेर्भावः कर्म्म वा "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) गणपतिसम्बन्धी। गणपतिभावे क्ली॥ (यथा, महाभारते। ३।८५।६७।

"प्रदक्षिणमुपावृत्य गाणपत्यमवाप्नुयात्॥")

गाणिक्यं, क्ली, (गणिकानां वेश्यानां समूहः। "गणिकाया यञिति वक्तव्यम्।" ४।२।४०। इत्यस्य वार्त्तिं इति यञ्।) गणिकासमूहः। बहुवेश्याः। इत्यमरः। २।६।२२॥

गाण्डिवः, पु, क्ली, (गाण्डिर्ग्रन्थिरस्यास्तीति। गाण्डि+"गाण्ड्यजगात् संज्ञायाम्।" ५।२।११०। इति वः।) अर्ज्जुनधनुः। (यथा, महाभारते। ३।२३५।३०।

"धनुर्ग्राहश्चार्ज्जुनः सव्यसाची
धनुश्च तद्गाण्डिव भीमवेगम्॥")

धनुर्मात्रम्। इति मेदिनी॥ वे। ३६॥

गाण्डीवः, पु, क्ली, (गाण्डिर्ग्रन्थिः। "कृदिकारान्तादिति।" ङीषि कृते गाण्डी। सा विद्यते अस्य। "गाण्ड्यजगात् संज्ञायाम्।" ५।२।११०। इति वः।) अर्ज्जुनधनुः। इत्यमरः। २।८।८४॥ (यथा, महाभारते। ४।४१।१।

"यत्तत् पूर्व्वमिदं शङ्खः शत्रुसेनानिबर्हणम्।
गाण्डीवमेतत् पार्थस्य लोकेषु विदितं धनुः॥"

एतद्धनुर्हि ब्रह्मादयोऽपि आदौ धृतवन्तः। यदुक्तं तत्रैव। ४।४१।५—८।

"एतद्वर्षसहस्रन्तु ब्रह्मा पूर्व्वमधारयत्।
ततोऽनन्तरमेवाथ प्रजापतिरधारयत्॥
त्रीणि पञ्चशतञ्चैव शक्रोऽशीतिञ्च पञ्च वै।
सोमः पञ्चशतं राजा तथैव वरुणः शतम्॥
पार्थः पञ्च च षष्टिञ्च वर्षाणि श्वेतवाहनः।
महावीर्य्यं महद्दिव्यमेतद्धनुरनुत्तमम्॥
एतच्च मानुषं प्राप्तं वरुणाच्चारुदर्शनम्।
पूजितं सुरमर्त्त्येषु बिभर्त्ति परमं वपुः॥"

खाण्डवदाहनार्थं हि वह्निना वरुणसकाशादानीयधनुरेतदर्ज्जुनाय प्रदत्तम्। तत्कथा यथा, महाभारते। १।२२६।१—६।

"एवमुक्तः स भगवान् धूमकेतुर्हुताशनः।
चिन्तयामास वरुणं लोकपालं दिदृक्षया॥
आदित्यमुदके देवं निवसन्तं जलेश्वरम्।
स च तच्चिन्तितं ज्ञात्वा दर्शयामास पावकम्॥
तमब्रवीद्धूमकेतुः प्रतिगृह्य जलेश्वरम्।
चतुर्थं लोकपालानां देवदेवं सनातनम्॥
सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ते।
तत् प्रयच्छोभयं शीघ्रं रथञ्च कपिलक्षणम्॥
कार्य्यञ्च सुमहत् पार्थो गाण्डीवेन करिष्यति।
चक्रेण वासुदेवश्च तन्ममाद्य प्रदीयताम्॥
ददानीत्येव वरुणः पावकं प्रत्यभाषत।
तदद्भुतं महावीर्य्यं यशःकीर्त्तिविवर्द्धनम्॥
सर्व्वशस्त्रैरनाधृष्यं सर्व्वशस्त्रप्रमाथि च।
सर्व्वायुधमहामात्रं परसैन्यप्रधर्षणम्॥
एकं शतसहस्रेण सम्मितं राष्ट्रवर्द्धनम्।
चित्रमुच्चावचैर्वर्णैः शोभितं श्लक्ष्णमव्रणम्॥
देवदानवगन्धर्व्वैः पूजितं शाश्वतीः समाः।
प्रादाच्चैव धनूरत्नमक्षय्यौ च महेषुधी॥"
"तच्च दिव्यं धनुःश्रेष्ठं ब्रह्मणा निर्म्मितं पुरा।
गाण्डीवमुपसंगृह्य बभूव मुदितोऽर्ज्जुनः॥")

कार्म्मुकम्। इति मेदिनी। वे। ३६॥

गाण्डीवी, [न्] पु, (गाण्डीवोऽस्त्यस्य। गाण्डीव+"अत इनिठनौ।" ५।२।११५। इति इनिः।) अर्ज्जुनः। इति त्रिकाण्डशेषः॥ अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥

गाता, [ऋ] त्रि, (गायतीति। गै गाने+तृच्।) गायकः। इति सङ्गीतदामोदरः॥ (यथा, हरिवंशे। ५४।११।

"गाता चतुर्णां वेदानामुद्गाता प्रथमर्त्विजाम्॥"

गातुः, पुं, (गायतीति । गै गाने + "कमिमनि-जनिगाभायाहिभ्यश्च ।" उणां । १ । ७३ । इति तुः ।) कोकिलः । भ्रमरः । गन्धर्व्वः । इति मेदिनी । ते । १५ ॥ (गाते गच्छतीति । गा ङ गतौ + कमिमनीतिसूत्रे गानिर्द्देशात् तु. । पथिकः । इति उज्ज्वलदत्तः ॥ गै गाने + भावे तु । गानम् । यथा, ऋग्वेदे । ४ । ५१ । १ । "गातुं कृण्वन्नुषसो जनाय ।" "गातुं गानम् ।" इति भाष्यम् ॥ गाते गच्छत्यत्र इति । गा ङ गतौ + अधिकरणे तु । गमनीयः पन्थाः । यथा, ऋग्वेदे । ६ । ८५ । ४ । "उरुं नो गातुं कृणु सोममीढ्वः ।" "गातुं गन्तव्यमार्गम् ।" इति भाष्यम् ॥ पृथिवी । यथा, तत्रैव । ३ । ३१ । १५ । "इन्द्रो नृभिरजनद्दीद्यानः साकं सूर्य्यमुषसं गातुमग्निम् ।" "गातुं पृथिवीम् ।" इति भाष्यम् ॥ गा र लि स्तुतौ + भावे तुः । स्तवः । यथा, तत्रैव । ४ । ४ । ६ । "स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।" "गातुं स्तवम् ।" इति भाष्यम् ॥ उपायः । यथा, तत्रैव । ५ । ६५ । ४ । "मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते ।" "गातुमुपायम् ।" इति भाष्यम् ॥)

गातु, त्रि, (गाते कोपं गच्छतीति । गा ङ गतौ + "कमिमनीति ।" उणां । १ । ७३ । इति गानिर्द्देशात् तु ।) रोषणः । इति मेदिनी । ते । १५ ॥ (गायतीति । गै गाने + तु ।) गायनः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गात्र, न क ङ शैथिल्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-आत्म-अकं-सेट ।) दन्त्यवर्गमध्यः । ङ, गात्रयते गात्रापयते । इति दुर्गादासः ॥

गात्र, क्ली (गच्छत्यनेन । गम् + "गमेरा च ।" उणां । ४ । १६८ । इति त्रन् आकारादेशश्च ।) हस्तिपूर्व्वजङ्घादिदेशः । हस्त्यग्रपदादिसम्मुखभागः । (यथा, माघे । १८ । ४६ ।

"व्यापस्काराल्लूनगात्रस्य भूमिं
निःसाधारं गच्छतोऽवाङ्मुखस्य ॥"

"लूनगात्रस्य छिन्नजङ्घस्य ॥" इति तट्टीकायां मल्लिनाथः ॥ * ॥ गच्छति मरणात् परं स्वकारणं भूतपञ्चकं प्राप्नोति यद्वा गम्यते स्थानात् स्थानान्तरं प्राप्यते बाल्यात् वा अनेन इति ।) अङ्गम् । इति मेदिनी । रे । २१ । हस्तपादाद्यवयवसमुदयः । गा इति भाषा ॥ (यथा, महाभारते ।१। १५४ । ३० ।

"अद्य गात्राणि ते कङ्काः श्येना गोमायवस्तथा ।
कर्षन्तु भुवि संहृष्टा निहतस्य मया मृधे ॥")

तत्पर्य्यायः । कलेवरम् २ वपुः ३ संहननम् ४ शरीरम् ५ वर्ष्म ६ विग्रहः ७ कायः ८ देहः ९ मूर्त्तिः १० तनुः ११ तनूः १२ । इत्यमरः । २ । ६ । ७० ॥ इन्द्रियायतनम् १३ अङ्गम् १४ क्षेत्रम् १५ भूघनः १६ मृत्करण्डम् १७ वेरम् १८ सञ्चरः १९ घनः २० बन्धः २१ पुरम् २२ पिण्डः २३ पुद्गलम् २४ । इति हेमचन्द्रः ॥ भूतात्मा २५ मर्गोलोकेशः २६ स्कन्धः २७ पञ्जरः २८ कुलम् २९ बलम् ३० । इति जटाधरः ॥

(गात्रवादनादि निषेधो यथा,—

"गात्रवक्त्रनखैर्वाद्यं हस्तकेशावधूननम् ।
तोयाग्निपूज्यमध्येन यानं धूमं शवाश्रयम् ॥
मद्यातिसक्तिं विश्रम्भस्वातन्त्र्ये स्त्रीषु च त्यजेत् ॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ॥)

गात्रभङ्गा, स्त्री (गात्रस्य भङ्गोऽवसादो यस्याः ।) शूकशिम्बी । इति शब्दचन्द्रिका ॥

गात्रमार्ज्जनी, स्त्री, (गात्रं मार्ज्यतेऽनयेति । मृज् + ल्युट् + स्त्रियां ङीप् ।) शरीरमार्ज्जनार्थं वस्त्रम् । इति लोकप्रसिद्धिः ॥ गामोछा इति भाषा ॥

गात्रसङ्कोची, [न्] पुं, (गात्रं सङ्कोचयतीति । सम् + कुच् + णिच् + णिनिः । यद्वा, गात्रस्य सङ्कोची ।) जाहकजन्तुः । इति राजनिर्घण्टः ॥

गात्रसम्प्लव, पुं, (गात्रेण संप्लवते भासते सन्तरति जले इत्यर्थः । सम् + प्लु + अच् ।) प्लवपक्षी । इति हेमचन्द्रः । ४ । ४०६ ॥

गात्रसम्मितः, पुं (गात्रं सम्मितं उत्पन्नावयवमात्रं यत्र ।) गात्रावयवोत्पत्तिः । यथा,—

"पादं उत्पन्नमात्रे तु द्वौ पादौ गात्रसम्मिते ।
पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनम् ॥
अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेत समन्विते ।
द्विगुणं गोव्रतं कुर्य्यात् प्रायश्चित्तं विशुद्धये ॥

मध्यमवचनं भवदेवेन व्याख्यातम् । यदा लगुडाद्यभिघातेन गौर्ज्जीयति गर्भमात्रपातो भवति तदोत्पन्नगर्भमात्रपाते यथोक्तप्रायश्चित्तपादाचरणम् । गात्रावयवोत्पत्तौ प्रायश्चित्तपादद्वयम् । सकलगात्रसम्पत्तौ प्रायश्चित्तपादत्रयम् । अथ चैतन्ययुक्तगर्भघाते कृत्स्नमेव प्रायश्चित्तमूहनीयम् ।" इति प्रायश्चित्ततत्त्वम् ॥

गात्रानुलेपनी स्त्री, (गात्रमनुलिप्यतेऽनया इति । अनु + लिप् + ल्युट् + स्त्रियां ङीप् ।) गात्रानुलेपनयोग्य घृष्टं पिष्टं वा सुगन्धिद्रव्यम् । तत्पर्य्यायः । वर्त्तिः २ वर्णकम् ३ विलेपनम् ४ । इत्यमरः । २ । ७ । १३३ ॥

गाथक, त्रि, (गायतीति । गै गाने + "गस्थकन् ।" ३ । १ । १४६ । इति थकन् ।) गायकः । इति त्रिकाण्डशेषः ॥

गाथा, स्त्री, (गीयते इति । गै गाने + "उषिकुषिगार्त्तिभ्यस्थन् ।" उणां । २ । ४ । इति थन् स्त्रियां टाप् ।) श्लोकः । (यथा, महाभारते । ३ । ८५ । ३० ।

"गाथा च गीतिका चापि तस्य सम्पद्यते नृप ।॥")

संस्कृतान्यभाषा । सा तु प्राकृतभाषा । गेयम् । तच्च गीतम् । (यथा, मनुः । ९ । ४२ ।

"अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥")

वृत्तम् । तत्तु अक्षरसङ्ख्यातं पदम् । इति मेदिनी । थे । ६ ॥

गाध, ऋ ङ प्रतिष्ठायाम् । ग्रन्थे । लिप्सायाम् इति कविकल्पद्रुमः । (भ्वां-आत्मं-प्रतिष्ठायां सकं-ग्रथने अकं सेट् ।) ऋ, अजगाधत् । ङ, गाधिताहे नभो भूय इति भट्टिः । गाधते मान्त्रिकः मन्त्रः । इति दुर्गादासः ॥

गाधः, पुं (गाध प्रतिष्ठायां लिप्सायाञ्च + भावे घञ् ।) स्थानम् । (यथा, महाभारते । १ । ७१ । १७ ।

"अनासादितगाधश्च पातालतलमव्ययम् ॥")

लिप्सा । इति हेमचन्द्रः ॥ (कूलम् । परपारम् । यथा, महाभारते । ७ । ११३ । २ ।

"द्वीपो य आसीत् पार्थानामगाधे गाधमिच्छताम् ॥"

सुखोत्तरणीये, त्रि । यथा, रघुः । ४ । २४ ।

"सरितः कुर्व्वती गाधाः पथश्चाश्यानकर्द्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥"

स्त्रियां टाप् । गायत्रीरूपिणी महादेवी । यथा, देवीभागवते । १२ । ६ । ४० ।

"गौतमी गामिनी गाधा गन्धर्व्वाप्सरसेविता ॥"
"गाधा प्रतिष्ठारूपिणी ।" इति तट्टीका ॥)

गाधि, पुं, (गाधते उच्चपदं लिप्सतीति । गाध ङ लिप्सायाम् + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इति इन् ।) चन्द्रवंशीयकुशिकराजपुत्रः । स तु विश्वामित्रमुनिपिता कान्यकुब्जदेशस्य राजा च । (यथा, महाभारते । ३ । ११५ । १९ ।

"कान्यकुब्जे महानासीत् पार्थिवः सुमहाबलः ।
गाधीति विश्रुतो लोके वनवासं जगाम ह ॥"

अस्य उत्पत्तिकथा यथा, हरिवंशे । २७ । १३—१६ ।

"कुशिकस्तु तपस्तेपे पुत्त्रमिन्द्रसमं विभुः ।
लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् ॥
पूर्णे वर्षसहस्रे वै तन्तु शक्रो ह्यपश्यत ।
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः ॥
समर्थं पुत्त्रजनने स्वमेवांशमवासयत् ।
पुत्त्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः ॥
स गाधिरभवद्राजा मघवान् कौशिकः स्वयम् ।
पौरकुत्स्यभवद्भार्य्या गाधिस्तस्यामजायत ॥"

अस्य कन्या सत्यवती भृगुवंशीय-ऋचीकपत्नी । सा च जमदग्निं प्रसूतवती । यथा, हरिवंशे । २७ । १८ ।

"गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा ।
तां गाधिः काव्यपुत्त्राय ऋचीकाय ददौ प्रभुः ॥"

ऋग्वेदमते तु अयमेव गाथीत्याख्यया प्रसिद्धः इति तु तत्रैव ३ मण्डले द्रष्टव्यः ॥ एतदनुसारेणैव रामायणे 'गाधिन्' इति नान्तप्रयोगो भगवता वाल्मीकिना विहितः । यथा, तत्रैव १ । १८ । ४० ।

"शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः [सुतम् ॥")

गाधिजः, पुं, (गाधेः राज्ञः कौशिकात् जायते इति । जन् + डः ।) विश्वामित्रमुनिः । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ७ । ४२ ।

"पृथुस्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च ।

कुवेरस्य धनैश्वर्य्यं ब्राह्मण्यञ्चैव गाधिज: ॥"
एतद्‌जन्मकथा विश्वामित्रशब्दे द्रष्टव्या ॥)
गाधिपुरं, क्ली, (गाधे: कौशिकस्य राज्ञ: पुरम् ।)
कान्यकुब्जदेश: । इति हेमचन्द्र: । ३ । ४० ॥
(यथा राजतरङ्गिण्याम् । ४ । १३४ ।
"कन्यानां यत्र कुशलं यथात् गाधिपुरे मरुत् ।
तत्रैव शंसनीय: स पुमांश्चक्रे भयस्पृशाम् ॥")
गाधिभू:, पुं, (गाधेर्भूरुत्पत्तिर्यस्य गाधिर्भरुत्-
पत्तिस्थानं यस्येति वा । यद्वा गाधेर्भवति उत्-
पद्यते स्म । भू + भूतवर्त्तमानयोरिति क्विप् ।)
विश्वामित्रमुनि: । इति शब्दरत्नावली ॥
गाधेय:, पु, (गाधेरपत्यं पुमान् । गाधि + "इत-
श्चानिञ: ।" ४ । १ । १२२ । इति ढक् ।) विश्वा-
मित्रमुनि: । इति हेमचन्द्र: । ३ । ५१४ ॥ (यथा,
हरिवंशे । २७ । १७ ।
"विश्वामित्रस्तु गाधेयो राजा विश्वरथश्च ह ॥")
गानं, क्ली, (गीयते इति । गै + भावे ल्युट् ।)
गीतम् । इत्यमर: । १ । ७ । २५ ॥ (यदुक्तम्,—
"जपकोटिगुणं ध्यानं ध्यानकोटिगुणो लय: ।
लयकोटिगुणं गानं गानात् परतरं न हि ॥")
तत्पर्य्याय: । गेयम् २ गीति: ३ गान्धर्व्वम् ४ ।
इति हेमचन्द्र: । २ । १६४ ॥ (गानं हि वैदिक-
लौकिकभेदात् द्विविधम् । तत्र वैदिकगानन्तु
मुक्तिप्रदं अन्यत् लोकरञ्जनकरम् । वैदिक-
लौकिकयोर्मार्गदेशीति नामान्तरमपि श्रूयते ।
गानन्तु सामवेदादेव उत्पन्नं यदुक्तं सङ्गीत-
दर्पणटीकायाम् ।
"ऋग्भि: पाठ्यमभूद्‌गीतं सामभ्य: समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्व्वण: स्मृता: ॥'
द्विविधसङ्गीतयोर्लक्षणमाह सङ्गीतदर्पणे ।३-६।
"मार्गदेशीविभागेन सङ्गीतं द्विविधं मतम् ।
द्रुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च ।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ॥
तत्तद्देशस्थया रीत्या यत् स्याल्लोकानुरञ्जनम् ।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते ॥
गीतवादित्रनृत्यानां रक्ति: साधारणो गुण: ।
अतो रक्तिविहीनं यत् न तत् सङ्गीतमुच्यते ॥"
गानन्तु नादात्मकमेव नादस्तु यदा स्वयं राजते
तदा स्वर इति प्रसिद्ध: स्यात् । स्वरस्तु षड्ज-
ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादभेदात्
सप्तविध: । एतेषां विज्ञापनार्थं एतदाश्रयीभूत-
द्वाविंशतिश्रुतीनां नामानि स्वरस्थितिश्च कथ्यन्ते ।
यथा, सङ्गीतदर्पणे । ५३—५६ ।
"तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगा: ।
दयावती रञ्जनी च रतिका चर्षभे स्थिता ॥
रौद्री क्रोधा च गान्धारे वज्रिकाथ प्रसारिणी ।
प्रीतिश्च मार्ज्जनीत्येता: श्रुतयो मध्यमाश्रिता: ॥
क्षिती रक्ता च सन्दीपन्यालापिन्यपि पञ्चमे ।
मदन्ती रोहिणी रम्येत्येता धैवतसंश्रया: ॥
उग्रा च क्षोभिणीति द्वे निषादे वसत: श्रुती ॥"
अन्यत् विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम् ॥ *॥
गाने तु रागा रागिण्यश्च प्रयोक्तव्या: अतस्तेषां
नामानि कथ्यन्ते । यथा, सङ्गीतदर्पणे स्वरा-
ध्याये । १२—१६ ।
मार्कण्डेय उवाच ।
"के रागा: काश्च रागिण्य: का वेला ऋतवश्च के ।
किं रूपं कथमुद्धारो वद देव । प्रसादत: ॥"
ईश्वर उवाच ।
"श्रीरागोऽथ वसन्तश्च भैरव: पञ्चमस्तथा ।
मेघरागो बृहन्नाट: षडेते पुरुषाह्वया: ॥"
इति षट् रागा: ॥
अथ रागिण्य: ।
"मालश्री त्रिवणी गौरी केदारी मधुमाधवी ।
तत: पाहाडिका ज्ञेया श्रीरागस्य वराङ्गना: ॥
देशी देवगिरी चैव वराटी तोडिका तथा ।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गना: ॥-
भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा ।
वाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गना: ॥
विभाषा चाथ भूपाली कर्णाटी वड़हंसिका ।
मालवी पटमञ्जर्य्या सहैता: पञ्चमाङ्गना: ॥
मल्लारी सौरटी चैव सावेरी कौशिकी तथा ।
गान्धारी हरशृङ्गारा मेघरागस्य योषित: ॥
कामोदी चैव कल्याणी आभिरी नाटिका तथा ।
सारङ्गी नट्टहम्बीरा नट्टनारायणाङ्गना: ॥"
इति षट्‌त्रिंशत् रागिण्य: ॥
रागरागिणीनां विशेषविवरणन्तु तत्तच्छब्दे
गानस्य अन्यद्विवरणं गीतशब्दे च दर्शनीयम् ॥)
ध्वनि: । इति धरणी ॥
गानिनी, स्त्री, (गानं रोगादिनाशकतया प्रशस्त-
गीतिर्विद्यतेऽस्या: । गान + इनि: ।) वचा ।
इति शब्दचन्द्रिका ॥ (गानं सङ्गीतविद्या
गति: स्तुतिश्चास्त्यस्या इति व्युत्पत्त्या यथाक्रमं
गानज्ञा गतिमती स्तवयुक्ता च स्त्री । इति
व्युत्पत्तिलब्धोऽर्थ: ॥)
गान्तु:, त्रि, (गच्छतीति । गम गतौ + "क्रमि-
गमिक्षमीति ।" उणां । ५ । ४३ । इति तुन्
टिल्लिश्च ।) गन्ता । इत्युणादिकोष: ॥ गायक: ।
इति संक्षिप्तसारे उणादिवृत्ति: ॥
गान्त्री, स्त्री, (गन्त्री एव । स्वार्थे अण् । ततो
ङीप् ।) गन्त्री । इत्यमराद्यशकट: । गरुर गाडि
इति भाषा । इत्यमरटीकायां रायमुकुट: ॥
(क्वचित् क्लीवलिङ्गत्वमपि दृश्यते ॥)
गान्दिनी, स्त्री, (गां पशुं जीवजातमित्यर्थ: दायति
शोधयतीति । दैप शोधने + णिनि + ङीप् ।
पृषोदरात् साधु: ।) गङ्गा । इति त्रिकाण्ड-
शेष: शब्दरत्नावली च ॥ (गा धेनुं ददाति
प्रतिदिनमित्यर्थ: । दा दाने + णिनि + ङीप् ।
पृषोदरात् साधु: ।) अक्रूरमाता । इति श्रीभाग-
वतम् ॥ (अस्या नामनिरुक्तिर्यथा, हरिवंशे ।
३४ । ७—११ ।
"श्वफल्क: काशिराजस्य सुतां भार्य्यामविन्दत ।
गान्दिनीं नाम सा गास्तु ददौ विप्रेषु नित्यश: ॥
सा मातुरुदरस्था वै बहून् वर्षगणान् किल ।
निवसन्ती न वै जज्ञे गर्भस्थां ता पिताब्रवीत् ॥
जायस्व शीघ्रं भद्रन्ते किमर्थञ्चेह तिष्ठसि ।
प्रोवाच चैनन्तु गर्भस्था सा कन्या गान्दिने दिने ॥
यदि दद्यां ततो जाये पितरं प्रत्यवाच ह ।
तथेत्युक्ता च तां चास्या: पिता काममपूरयत् ॥
दाता यज्वा च वीरश्च श्रुतवानतिथिप्रिय: ।
अक्रूर: सुषुवे तस्यां श्वफल्काद्भूरिदक्षिण: ॥"*॥
गान्धिनीति पाठोऽपि क्वचित् दृश्यते ॥)
गान्दिनीसुत:, पुं, (गान्दिन्या गङ्गाया: सुत: ।)
भीष्म: । इति त्रिकाण्डशेष: ॥ (कार्त्तिकेय: ।
इति व्युत्पत्तिलब्धोऽर्थ: ॥ गान्दिन्याख्यया
प्रसिद्धाया श्वफल्कभार्य्याया: सुत: ।) अक्रूर: ।
इति श्रीभागवतम् ॥ (यथा, माघे । १७ । १२ ।
"विलङ्घितस्थितिमभिवीक्ष्य रुष्टया
रिपोर्गिरा गुरुमपि गान्दिनीसुतम् ॥")
गान्धर्व्वं, क्ली, (गन्धर्व्वस्य इदं गन्धर्व्वेण गीतं वा ।
गन्धर्व्व + अण् । यद्वा, गन्धर्व्वो अधिष्ठात्री देवता
अस्येति अण् ।) गानम् । इति हेमचन्द्र: ॥
(यथाह दत्तिल: ।
"पदस्थस्वरसङ्घातस्तालेन सङ्गतस्तथा ।
प्रयुक्तश्चावधानेन गान्धर्व्वमभिधीयते ॥"
यथा च महाभारते । १३ । १८ । ३६ ।
"अवादयंश्च गन्धर्व्वा वाद्यानि विविधानि च ।
अथ प्रवृत्ते गान्धर्व्वे दिव्ये ऋषिरुपाविशत् ॥"
गन्धर्व्वो अधिष्ठात्री देवता अस्येति अण् ।
गन्धर्व्वदेवताकमस्त्रम् । यथा, रघु: । ५ । ५७ ।
"गान्धर्व्वमादत्स्व यत: प्रयोक्तु-
र्न चारिहिंसा विजयश्च हस्ते ॥")
गान्धर्व्व:, पु, (गन्धर्व्व एव । "प्रज्ञादिभ्यश्च ।" ५ ।
४ । ३८ । इत्यण् ।) गन्धर्व्व: । इति हेमचन्द्र: ।
२ । १६४ ॥ (भारतवर्षीयोपद्वीपविशेष: । यथा,
विष्णुपुराणे ।
"भारतस्यास्य वर्षस्य नवभेदान्निशामय ।
इन्द्रद्वीप: कशेरुमांस्ताम्रवर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुण: ।
अयन्तु नवमस्तेषां द्वीप: सागरसंवृत: ॥")
अष्टप्रकारविवाहान्तर्गतविवाहविशेष: । यत्र
कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं
मे पतिरिति निश्चय: स: । (तल्लक्षणं यथा,
मनौ । ३ । ३२ ।
"इच्छयाऽन्योन्यसंयोग: कन्यायाश्च वरस्य च ।
गान्धर्व्व: स तु विज्ञेयो मैथुन्य: कामसम्भव: ॥"
स च क्षत्रियाणामेव धर्म्म्य: । यथा, तत्रैव ।३।२६।
"गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्रस्य तौ स्मृतौ ॥")
तत्सम्बन्धिनि त्रि ॥ (यथा, काशीखण्डे ।
"गान्धर्व्वस्त्वेष लोकोऽमी गन्धर्व्वाश्च शुभव्रता: ॥"
गन्धर्व्वदेशोद्भवे च । यथा, महाभारते । २२६ । १० ।
"उपेतं राजतैरश्वैर्गान्धर्व्वैर्हेममालिभि: ।
पाण्डराभ्रप्रतीकाशैर्मनोवायुसमैर्जवे ॥")
गान्धारं, क्ली, (गन्ध एव गान्धं सुगन्धं ऋच्छ-
तीति । ऋ गतौ + "कर्म्मण्यण् ।" ३ । २ । १ ।
इत्यण् । यद्वा, गान्धाराणाम्नदेशवासिनां
प्रियम् । अण् ।) गन्धरस: । इति त्रिकाण्डशेष: ॥

गान्धारः, पुं, (गन्ध एव गान्धो गन्धकस्तं ऋच्छति उत्पत्तिकारणत्वेन गच्छतीति । ऋ गतौ + अण् ।) सिन्दूरम् । जम्बुद्वीपस्योत्तरदेशः । कान्धार इति भाषा । इति मेदिनी । रे । १४६ ॥ (देशोऽयं बृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः । यथा, तत्रैव । १४ । २८ ।
"उत्तरतः कैलासः ।" इत्युपक्रम्य,—
"गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च ॥"
इत्युक्तवान् । दुर्य्योधनमातुलः शकुनिस्तु एतद्देशस्य राजासीत् । यथा, महाभारते । ३ । २३७ । २१ ।
"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव ॥"*॥
गन्ध एव गान्धः । स्वार्थे अण् । तं ऋच्छतीति । "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) सप्तस्वरान्तर्गततृतीयस्वरः । स तु छागस्वरतुल्यः । (यदुक्तं सङ्गीतशास्त्रे ।
"षड्जं रौति मयूरस्तु गावो नर्द्दन्ति चर्षभम् ।
गान्धारन्तु अजो रौति क्रौञ्चः क्वणति मध्यमम् ॥")
तस्योत्पत्त्यादिः ।
"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः ।
नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥"
इति भरतः ॥
अपि च ।
"नाभेः समुद्गतो वायुर्गन्धं शोभं च चालयन् ।
स शब्दस्तेन निर्य्याति गान्धारस्तेन कथ्यते ॥
चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।
ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके ॥"
(अयन्तु देवकुलसम्भूतो वैश्यजातिः स्वर्णवद्उज्ज्वलपीतवर्णः । अस्य जन्म कुशद्वीपे, ऋषिः शशाङ्कः, सरस्वती देवता, त्रिष्टुप् छन्दः । करुणरसे एवास्य उपयोगित्वम् ॥ इति सङ्गीतदर्पणे । ८३—९१ ॥ * ॥ स्वरग्रामविशेषः । तल्लक्षणम् । यथा, तत्रैव ७९—८० ।
"रि-मयोः श्रुतिमेकैकां गान्धारश्चेत् समाश्रयेत् ।
प-श्रुतिं धो निषादस्तु ध-श्रुतिं स-श्रुतिं श्रितः ॥
गान्धारग्राममाचष्ट तदा तं नारदो मुनिः ।
प्रवर्त्तते स्वर्गलोके ग्रामोऽसौ न महीतले ॥"*॥)
रागविशेषः । तस्य रूपं यथा, सङ्गीतदामोदरे ।

"जटां दधानः सितभूतिभूषणः
काषायवासास्तनुदेहयष्टिः ।
सयोगपट्टः कृतनेत्रमुद्रो
गान्धाररागः कथितस्तपस्वी ॥"

स तु भैरवरागपुत्त्रः । प्रभाते तस्य गानसमयः ॥
गान्धारराजः, पुं, (गान्धारस्य देशविशेषस्य राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) शकुनिः । (यथा, महाभारते । ३ । २३७ । २१ ।
"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव ॥"
अस्य पित्रादयोऽपि । यथा, तत्रैव । १ । ११० । १४ ।
"ततो गान्धारराजस्य पुत्त्रः शकुनिरभ्ययात् ॥")
गान्धारी, स्त्री, (गान्धारस्य गान्धारराजस्य अपत्यं स्त्री । इञ् ततो ङीष् ।) धृतराष्ट्रराजपत्नी । सा तु दुर्य्योधनमाता । इति महाभारतम् ॥ (इयं हि हरमाराध्य शतपुत्त्रवरं लब्धवती । यथा, महाभारते । १ । ११० । ९ ।
"अथ शुश्राव विप्रेभ्यो गान्धारी सुबलात्मजाम् ।
आराध्य वरदं देवं भगनेत्रहरं हरम् ॥
गान्धारी किल पुत्त्राणां शतं लेभे वरं शुभा ॥"
पार्व्वतीसहचरी भेदः । यथा, तत्रैव । ३ । २३० । ४८ ।
"गौरी विद्याथ गान्धारी केशिनी मित्रसाह्वया ॥"
गायत्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । १० ।
"गायत्री गोमती गीता गान्धारी गानलोलुपा ॥"
गङ्गा । यथा, काशीखण्डे । २९ । ५१ ।
"गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा ॥"
"गां धारयतीति गान्धारी ।" इति तट्टीका ॥
नाडीविशेषः । यथा, सङ्गीतदर्पणे । २६ ।
"सुषुम्नेडा पिङ्गला च कुहूरथ पयस्विनी ।
गान्धारी हस्तिजिह्वा च वारणाथ यशस्विनी ॥")
जिनानां शासनदेवताविशेषः । इति हेमचन्द्रः ॥ यवासः । इति राजनिर्घण्टः ॥ दुरालभा । इति भावप्रकाशः ॥ मादकद्रव्यविशेषः । गाँजा इति भाषा ॥ इति विष्णुसिद्धान्तसारावलीवैद्यकग्रन्थः ॥
गान्धारेयः, पुं, (गान्धार्य्या अपत्यं पुमान् । "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) दुर्य्योधनराजः । इति त्रिकाण्डशेषः ॥ (दुःशासनादयोऽपि ॥)
गान्धिकः, पुं, (गन्धयते परप्रार्थनां गच्छतीति । गन्ध क ङ गतौ + णिनिः । ततः स्वार्थे कन् । यद्वा, गन्धो गर्व्वोऽस्यास्तीति । गन्ध + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) लेखकः । सुगन्धिव्यवहारी । गन्धवणिक् इति ख्यातः । इति मेदिनी । के । ८३ ॥ स तु अम्बष्ठात् राजपुत्त्र्यां जातः । इति पराशरपद्धतिः ॥ (अयं हि नायकस्य शृङ्गारसहायेषु अन्यतमः । यथा, साहित्यदर्पणे । ३ । ४६ ।
"शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः ।
भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ॥
आदिशब्दात् मालाकाररजकताम्बूलिकगान्धिकाद्यः ॥") कीटविशेषः । इति शब्दरत्नावली ॥ गाँधिपोका इति भाषा ॥ (गान्धं गन्धप्रधानं द्रव्यमस्यास्ति । ठन् । गन्धप्रधानद्रव्यविशिष्टे त्रि । यथा, पञ्चतन्त्रे । १ । १३ ।
"पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनादिभिः ।
यत्रैकेन च यत् क्रीतं तच्छतेन प्रदीयते ॥")
गामुकः, त्रि, (गच्छतीति । गम गतौ + "लषपतपदेति ।" ३ । ३ । १५४ । इति उकञ् ।) गन्ता । इति व्याकरणम् ॥
गाम्भीर्य्यं, क्ली, (गम्भीरस्य भावो गम्भीरे भवं वा । "गम्भीराञ्ञ्यः ।" ४ । ३ । ५८ । इति ञ्यः ।) गम्भीरता । यथा,—
"मेघनिर्घोषगाम्भीर्य्यं प्रतिनादविधायिता ।"
इति जिनवाग्गुणे हेमचन्द्रः ॥
(इदं हि नायकस्य सात्त्विकगुणविशेषः । यथा, साहित्यदर्पणे । ३ । ५८ ।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी ।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"
तस्य लक्षणम् । यथा, तत्रैव । ३ । ६२ ।
"भीशोकक्रोधहर्षाद्यैर्गाम्भीर्य्यं निर्व्विकारता ॥"
उदाहरणम् । यथा,—
"आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥")
गायकः, त्रि, (गायतीति । गै गाने + ण्वुल् ।) गानकर्त्ता । इति शब्दरत्नावली ॥ (यथा, माघे । ११ । १० ।
"कलमविकलतालं गायकैर्बोधहेतोः ॥")
तत्पर्य्यायः । गायनः २ गाथकः ३ । इति त्रिकाण्डशेषः ॥ गाता ४ । तस्य दोषा यथा,—
"लज्जितं भीतसन्त्रस्तं अव्यक्तमनुनासिकम् ।
काकस्वरं शिरःकम्पो लयस्थानविवर्ज्जितम् ॥
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ।
व्याकुलं तालहीनञ्च गातुर्दोषाश्चतुर्द्दश ॥"
इति सङ्गीतदामोदरः ॥
गायत्री, [न्] पुं, (गायन्तं त्रायते इति । गायत् + त्रै + णिनिः । अलोपात् साधुः ।) खदिरवृक्षः । इति भरतः ॥ (खदिरशब्दे गुणादिकं ज्ञेयम् ॥ गायत्रं स्तोत्रमस्यास्तीति गायत्र + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः । उद्गातरि सामगायके च । यथा, ऋग्वेदे । १ । १० । १ ।
"गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ॥")
गायत्री, स्त्री, (गायन्तं त्रायते इति । त्रै ङ पालने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ इति कः । ततो गौरादित्वात् ङीष् ।) खदिरवृक्षः । इत्यमरः । २ । ४ । ४९ ॥ (यथा, वैद्यके हरिद्रादिक्वाथे ।
"मूर्व्वादारुकलिङ्गभृङ्गमगधा त्रायन्ति पाठामरी गायत्री त्रिफलाकिरातकमहानिम्बासनारग्वधम् ॥")
षडक्षरच्छन्दोविशेषः । तस्याष्टात्रिंशद्भेदा यथा । तनुमध्या १ शशिवदना २ सोमराजी ३ । आद्याया आद्यन्तयोर्गुरुद्वये मध्ये लघुद्वयम् । द्वितीयायाः आदिमध्ययोर्लघुद्वये अन्ते गुरुद्वयम् ॥ तृतीयायाः आदिमध्ययोर्लघुगुरू गुरुलघू अन्ते गुरुद्वयम् ॥ क्रमेणोदाहरणानि यथा । आस्तां मम चित्ते नित्यं तनुमध्या ॥ १ ॥ शशिवदनानां व्रजतरुणीनाम् ॥ २ ॥ हरे सोमराजी समा ते यशःश्रीः ॥ ३ ॥ इति छन्दोमञ्जरी ॥*॥ दुर्गा । यथा,—
"गायनात्त्रमनाच्चापि गायत्री त्रिदशार्च्चिता ।
साधनात् सिद्धिरित्युक्ता साधका याच ईश्वरी ॥"
इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः ॥
(सा च गायत्रीरूपेण ब्रह्मण्येव वर्त्तते । यथा, देवीभागवते । ७ । ३० । ८१ ।
"गायत्री वेदवदने पार्व्वती शिवसन्निधौ ॥"*॥

गङ्गा। यथा, काशीखण्डे। २६। ५३।
"गुणनीयचरित्रा च गायत्री गिरिशप्रिया॥")
त्रिपदा देवी। इति मेदिनी। रे। १५०॥ सा तु त्रिपादष्टाक्षरच्छन्दोयुक्तमन्त्रात्मिका वेदमाता द्विजैरुपास्या। (यथाह मनुः। २। ७७—७८।
"त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥
एतदक्षरमेतां च जपन् व्याहृतिपूर्ब्बिकाम्।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते॥"
इयमेव सव्याहृतिका ब्रह्मपदप्राप्तिद्वाररूपं तस्मात् प्रत्यहं ब्राह्मणैर्व्याहृतिपूर्ब्बिकेयं अध्ययनीया। यदुक्तं तत्रैव। २। ८१—८३।
"ओङ्कारपूर्ब्बिकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥
योऽधीतेऽहन्यहन्येतांस्त्रीणि वर्षाण्यतन्द्रितः।
स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान्॥
एकाक्षरं परं ब्रह्म प्राणायामाः परन्तप।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते॥")
तस्या नामव्युत्पत्तिर्यथा, स्मृतौ।
"गायन्तं त्रायते यस्मात् गायत्री त्वं ततः स्मृता॥"
सापि ब्रह्मणः पत्नी। यथा,—
"अध्वर्युणा समाहूता एहि देवि। त्वरान्विता।
उत्पन्नास्त्वामयः सर्व्वे दीक्षाकालमुपागताः॥
सावित्र्युवाच।
लक्ष्मीर्नाद्यापि चायाति सती नैवेह दृश्यते।
इहदाग्रायणी हूता शक्राणी गच्छती त्विह।
नाहमेकाकिनी यास्ये यावन्नायान्ति ताः स्त्रियः॥
ब्रूहि गत्वा विरिञ्चिन्तं तिष्ठत्विह मुहूर्त्तकम्॥
वदमानां तथाध्वर्युस्त्यक्त्वा देवमुपागमत्।
सावित्री व्याकुला देवी प्रसक्ता गृहकर्म्मणि॥
सख्यो नाभ्यागता यावत् तावन्नागमनं मम।
एवमुक्तोऽस्मि वै देव! कालश्चाप्यतिवर्त्तते॥
यच्च योग्यं भवेदत्र तत् कुरुष्व पितामह!।
एवमुक्ते तदा वाक्यं किञ्चित्कोपसमन्वितः॥
पत्नीञ्चान्यां मदर्थन्तु शीघ्रं त्वञ्च समानय।
प्रवर्त्तते यथा यज्ञः कालहीनो न जायते॥
तथा शीघ्रं विधेहि त्वं नारीं काञ्चिदुपानय।
एवमुक्तस्तथा शक्रो गत्वा सर्व्वं धरातलम्॥
स्त्रियो दृष्टास्तु यास्तेन सर्व्वास्तास्तु परिग्रहाः।
आभीरकन्या सुरूपा सुभाषा चारुलोचना॥
ददर्श तां सुचार्व्वङ्गीं कमलायतलोचनाम्।
कासि कस्य कुतश्च त्वमागता सुभ्रु! कथ्यताम्॥
एकाकिनी किमर्थञ्च वीथिमध्येऽवतिष्ठसे।
रूपान्विता च सा कन्या शक्रं प्रोवाच वेपती॥
गोपकन्या त्वहं वीर! विक्रेतुमिह गोरसम्।
समागता घृतादीनां प्रगृह्णीष्व यथेप्सितम्॥
एवमुक्तस्तदा शक्रो गृहीत्वा तां करे दृढम्।
आनीय तां विशालाक्षीं यत्र ब्रह्मा व्यवस्थितः॥
कमलाक्षीं स्फुरद्वाणीं पुण्डरीकनिभेक्षणाम्।
धर्म्मेण तदा ब्रह्मा ग्रहीतुं मन आदधे॥
प्रभुत्वमात्मनो दाने गोपकन्याप्यमन्यत।
यदेवं मां सुरूपत्वादिच्छयादातुमागच्छत्॥
नास्ति सीमन्तिनी काचिन्मत्तो धन्यतरा यतः।
अनेनाहं समानीता यस्य दृग्गोचरं गता॥
एवं चिन्तापरा दीना यावत् सा गोपकन्यका।
भवत्वेषा महाभागा गायत्री नामतः प्रभो!॥
तावदेव महाविष्णुः प्रोक्तवानिदमुत्तमम्।
अनुग्रहेण देवेश! अस्याः पाणिग्रहं कुरु॥
गान्धर्व्वेण विवाहेन उपयेमे पितामहः॥"* ॥
अस्या ध्यानं यथा,—
"श्वेता त्वं श्वेतरूपासि शशाङ्केन समा मता।
बिभ्रती विपुलावूरू कदलीगर्भकोमलौ॥
एणशृङ्गं करे गृह्य पङ्कजञ्च सुनिर्म्मलम्।
वसाना वसने क्षौमे रक्ते चाक्षुतदर्शने॥
शशिरश्मिप्रकाशेन हारेणोरसि राजसे।
दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता॥
चन्द्रसौगण्ययुक्तेन मुकुटेन विराजसे।
मुकुटेन त्रिगन्धेन केशबन्धेन शोभिना॥
भुजगाभोगसदृशौ भुजौ भ्राजयतो दिशः।
स्तनौ ते कठिनौ देवि! वर्त्तुलौ समचूचुकौ॥
जघनेनातिशुभ्रेण त्रिवलीभिश्च संयुता।
विस्तीर्णसदृजघना सुश्रोणी च वरानना॥
चारुरूपोरुयुगला अम्बुजाभरणा तथा।
त्रैलोक्यचारिणी सा त्वं जगतामेव पावनी॥"
अस्या वैदिकतान्त्रिकध्यानद्वयं गुह्यत्वादत्र न लिखितम्॥ * ॥ तस्या जपफलं तत्र ब्राह्मणान् प्रति गायत्रीवाक्यम्।
"विशेषात् पुष्करे स्नात्वा मां जप्त्वा वेदमातरम्।
प्रतिग्रहकृतान् दोषान्न प्राप्स्यथ द्विजोत्तमाः!॥
मदीयैः किलजप्यैस्तु तारणाय त्रिभिः कृतैः।
ब्रह्महत्यासमं पापं तत्क्षणादेव नश्यति॥
दशभिर्जन्मजनितं शतेन तु पुरा कृतम्।
त्रियुगन्तु सहस्रेण नात्र कार्य्या विचारणा॥
अष्टाक्षरा स्थिता चाहं जगद्व्याप्तं मया त्विदम्।
माताह सर्व्ववेदानां पदैः सर्व्वैरलङ्कृता॥
जप्त्वा मां परमां सिद्धिं यास्यन्ति द्विजसत्तमाः।।
प्राधान्यं मम जाप्येन सर्व्वेषां वो भविष्यति॥" ॥
तस्या माहात्म्यादि यथा,—
"उपलभ्य च सावित्रीं नोपतिष्ठेत यो द्विजः।
काले त्रिकालं सप्ताहात् स पतेन्नात्र संशयः॥
गायत्रीमन्त्रतोयार्घ्यं दत्तं येनाञ्जलित्रयम्।
काले सावित्रिकेण स्यात्तेन दत्तं जगत्त्रयम्॥
अष्टादशसु विद्यासु मीमांसाऽतिगरीयसी।
ततोऽपि तर्कशास्त्राणि पुराणं तेभ्य एव च॥
ततोऽपि धर्म्मशास्त्राणि तेभ्यो गुर्व्वी श्रुतिर्नृप!।
ततो ह्युपनिषत् श्रेष्ठा गायत्री च ततोऽधिका॥
वाच्यवाचकसम्बन्धो गायत्र्याः सवितुर्द्वयोः।
वाच्योऽसौ सविता साक्षात् गायत्री वाचिका परा॥
ता देवीमुपतिष्ठन्ते ब्राह्मणा ये जितेन्द्रियाः।
सूर्य्यलोकं ते प्रयान्ति क्रमान्मुक्तिञ्च पार्थिव!॥"
इति पद्मपुराणम्॥ * ॥
अथ गायत्रीकल्पः।
"जपन् हि पावनीं देवीं गायत्रीं वेदमातरम्।
तपसा भावितो देया ब्राह्मणः पूतकिल्बिषः॥
न सीदेत् प्रतिगृह्णन् स त्वपि पृथ्वीं ससागराम्।
द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः॥
यस्तस्य दुष्कृतं नास्ति पूर्ब्बतः परतोऽपि वा।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः॥
गायत्रीध्यानपूतस्य कलां नार्हति षोडशीम्।
एवं किल्बिषयुक्तस्तु विनिर्द्दहति पातकम्॥
उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः।
छन्दस्तस्यास्तु गायत्रं गायत्रीत्युच्यते ततः॥
गायन्तं त्रायते यस्मात् गायत्री तु ततः स्मृता।
मरीचे! कारणात्तस्मात् गायत्री कीर्त्तिता मया॥
तव बुद्धिमतां श्रेष्ठ! नित्यं सर्व्वेषु कर्म्मसु।
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥
जपन्ति ये सदा तेषां न भयं विद्यते क्वचित्।
दशकृत्वः प्रजप्ता सा रात्र्यह्नोर्यत् कृतं लघु॥
तत् पापं प्रणुदत्याशु नात्र कार्य्या विचारणा।
शतं जप्ता तु सा देवी पापौघशमनी स्मृता॥
सहस्रं जप्ता सा देवी महापातकनाशिनी।
लक्षजाप्येन साप्येव सप्त जन्मानि पातकम्॥
कोटिजाप्येन विप्रर्षे! यदिच्छति तदाप्नुयात्।
यक्षविद्याधरत्वे वा गान्धर्व्वे देवतेऽपि वा॥
यत्र यत्र भवेद्वाञ्छा तत्तदाप्नोत्यसंशयम्।
दशसाहस्रजाप्येन निष्कामः पुरुषो यदि॥
विधिना नियतं ध्यायेत् प्राप्नोति परमं पदम्।
यथाकथञ्चिज्जपिता गायत्री पापहारिणी॥
सर्व्वकामप्रदा प्रोक्ता पृथक्कर्म्मसु निष्ठिता॥"* ॥
मरीचिरुवाच।
"विधिना केन कर्त्तव्या गायत्री पापनाशिनी।
पवित्रा परमा ह्येषा सर्व्वकल्याणसाधिनी॥
वह्निरुवाच।
सव्याहृतिं सप्रणवां जप्त्वा मासांश्च षोडश।
अपि भ्रूणहनं पापात् मुच्यन्तेऽहरहःकृतात्॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः।
अहोरात्रकृतात् पापात् मुच्यते नात्र संशयः॥
अन्तर्जले त्रिरावर्त्य गायत्रीं प्रयतस्तथा।
मुच्यते पातकैः सर्व्वैर्यदि न ब्रह्महा भवेत्॥
नास्ति सत्यात् परो धर्म्मो नास्ति कृष्णात् समा गतिः।
गायत्र्याश्च समं नास्ति दिवि चेह च पावनम्॥
हुता च वरदा देवी सर्व्वकामफलप्रदा।
गायत्र्याश्च तिलैर्होमः सर्व्वपातकनाशनः॥
शान्तिकामो यवैः कुर्य्यादायुष्कामो घृतेन तु।
कर्म्मान्तसिद्धिकामस्तु कुर्य्यात् सिद्धार्थकैर्नरः॥
ब्रह्मवर्च्चसकामस्तु पयसा च समाचरेत्।
पुत्त्रकामः सदा दध्ना धान्यकामस्तु शालिभिः॥
क्षीरवृक्षसमिद्भिस्तु ग्रहपीडोपशान्तये।
धनकामस्तथा विल्वैः श्रीकामः कमलैस्तथा॥
आरोग्यकामः क्षीराक्तैः कुर्य्यात् दूर्व्वाङ्कुरैस्तथा।

देशोपसर्गे संप्राप्ते तदेव च विधीयते ॥
गुग्गुलोर्गुटिकाभिस्तु कृत्वा होममतन्द्रितः ।
सौभाग्यं महदाप्नोति नात्र कार्य्या विचारणा ॥
पायसेन तथा हुत्वा विद्यां समधिगच्छति ॥”*॥
“येन येन तु कामेन लक्षहोमं समाचरेत् ॥
तं तं काममवाप्नोति नात्र कार्य्या विचारणा ।
कृच्छ्रेण शुद्धिमुत्पाद्य प्राणायामशतेन च ॥
अन्तर्जले च तां जप्त्वा स्नातो नित्यमतन्द्रितः ।
प्राणायामांस्ततः कृत्वा विधानेनैव षोडश ॥
पूर्व्वाह्णे जुहुयादग्नौ सुसमिद्धे यथाविधि ।
भैक्षया च कणाशी वा फलमूलाशनोऽपि वा ॥
क्षीरभक्तघृताहारो भवेत्तत्र विचक्षणः ।
आहाराणां यथोक्तानामेकाहारं समाश्रयेत् ॥
समाप्तिर्लक्षहोमस्य यावद्भवति नित्यशः ।
लक्षहोमावसाने तु ब्राह्मणेभ्यस्तु दक्षिणा ॥
देया भवति शक्त्या तु गावो वस्त्राणि काञ्चनम् ।
सर्व्वोत्पातसमुत्पत्तौ सर्व्वं भवति शोभनम् ॥
पञ्चभिर्दशभिर्व्वाथ लक्षहोमं समाचरेत ।
असङ्कीर्णे तथा दोषे नृपतिस्तत्प्रशान्तये ॥
नास्ति लोके स उत्पातो यो ह्यतो नोपशाम्यति ।
मङ्गलञ्च परं नास्ति यदस्मादतिरिच्यते ॥
ग्रहशान्तिं पुरा कृत्वा मन्त्रैः स्वैः स्वैः ग्रहांश्च तान् ।
इन्द्रायाग्नये सोमाय नमः प्रजापतेस्तथा ॥
आहुतिभ्यस्ततः पश्चात् पूर्णाहुतिमथाददेत् ।
गणानान्त्वेति वा कृष्ण इम देवेति चेन्द्रवे ॥
अग्निर्मूर्द्धेत्युद्बुध्यस्व इहस्ततेति प्रयोजयेत् ।
अस्मात् परिस्रुतेनैव शन्नो देवीस्ततः पुनः ॥
कया न इति राहोर्व्वै केतुं कृण्वेति केतवे ।
त्र्यम्बकेन तु रौद्रन्तु होमयेज्जातवेदसि ॥
सर्व्वं गायत्रीहोमन्तु लक्षहोमे प्रकल्पयेत् ।
दिक्पालेभ्यश्च होतव्यं भूतेभ्यश्च ततः क्रमात् ॥
मरुत्त्वमग्नि दूतं वै यस्मिन् वृत्ते नमामि तम् ।
वरुणं वो रिशा दश वयसृत्वा मयस्य ते ॥
सोमं राजानमवसे ब्रह्मरुद्राय वै तथा ।
क्षेत्रस्य पतिना चैव भूतानां पतये तथा ॥
रक्षोघ्नेनैव मन्त्रेण होतव्यं विधिपूर्व्वकम् ।
घृताक्ताभिः समिद्भिश्च तिलहोमं ततः परम् ॥
दशैकं प्रति वा कुर्य्यादष्टाविंशतिमेव च ।
एकैकं पति पूर्णा स्यात्तदत्र ऋषिसत्तमा ॥
ब्रह्मवृक्षोद्भवास्त्वेभास्तथा दूर्व्वाङ्कुरोद्भवाः ।
होतव्या लक्षहोमे तु गायत्र्या कामिकं परम् ॥
श्रीसूक्तं पावमानञ्च पौरुषं शाम्भवं तथा ।
रौद्रमैन्द्रञ्च रामञ्च ज्येष्ठसाम बृहद्रथम् ॥
महाजपन्तु होमान्ते कुर्य्यात् वै सर्व्वसिद्धिदम् ।
सम्यक् पूर्णां ततो दद्यात् सप्त ते अभिमन्त्रितम् ॥
नमो ब्रह्मणेति चामन्त्र्य सवित्रञ्च नवं घटम् ।
रत्नैर्बीजैः शुभैर्व्वस्त्रैर्हेम्ना चैव तु संयुतम् ॥
तज्जलेनाभिषिञ्चेत देवस्य त्वेति वै तदा ।
धन्वनागादिभिर्मन्त्रैरभिषिञ्चेत्ततः क्रमात् ॥
एवं यः कुरुते राजा लक्षहोमं यतव्रतः ।
न तस्य शत्रवः सर्वे अग्रे तिष्ठन्ति कर्हिचित् ॥
न चैव मरको देशे व्याधिर्व्वा जायते तथा ।
अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ॥
राक्षसाद्या विनश्यन्ति सर्व्वास्तत्र तथेतयः ।
रसवन्ति च तोयानि शस्यञ्च निरुपद्रवम् ॥
जायते यस्य या चेष्टा धर्म्मिष्ठा सा न किं भवेत् ॥ ३ ॥
कोटिहोमन्तु यो राजा कारयेद्विधिपूर्व्वकम् ॥
न तस्य मानसो दाह इह लोके परत्र च ।
कोटिहोमे तु वरयेत् ब्राह्मणान् विंशतिं नृप ॥
शतं वाथ सहस्रं वा य इच्छेद्धितमात्मनः ।
कोटिहोमं स्वयं यस्तु कुरुते श्रद्धया द्विजः ॥
क्षत्त्रियो वाथ वैश्यो वा तस्य पुण्यफलं महत् ।
यद्यदिच्छति कामानां तत्तदाप्नोत्यसंशयम् ॥
सशरीरोऽपि चेद्गन्तुं दिवमिच्छेत्तदाप्नुयात् ।
सावित्री परमा देवी सावित्री पावनं परम् ॥
सर्व्वकामप्रदा चैव सावित्री कथिता तव ।
अभिचारेषु तां देवीं विपरीतां विचिन्तयेत् ॥
कार्य्या व्याहृतयश्चात्र विपरीताक्षरास्तथा ।
विपरीताक्षरं कार्य्यं शिरश्च ऋषिसत्तम ॥
आदौ शिरः प्रयोक्तव्यं प्रणवोऽन्तेन वै ऋषे ॥
मतिस्थेनैव फट्कारं मध्ये नाम प्रकीर्त्तितम् ॥
गायत्रीं चिन्तयेत्तत्र दीप्तानलसमप्रभाम् ।
घातयन्तीं त्रिशूलेन केशेष्वाक्षिप्य वैरिणम् ॥
निरीक्षन्तीं त्रिशूलेन भ्रुकुटीभूषिताननाम् ।
उच्चाटने तु तां देवीं वायुभूतां विचिन्तयेत् ॥
धावमानं तथा साध्यं तस्माद्देशात्तु दूरतः ।
अभिचारेषु होतव्या राजिका विषमिश्रिताः ॥
स्वरक्तमिश्रं होतव्यं कटुतैलमथापि वा ।
तत्रापि च विषं देयं होमकाले प्रयत्नतः ॥
क्रोधेन महताविष्टः पराभाभिचरेद्बुधः ।
न जह्यात् यदि क्रोधेन भुवं नश्येत् स एव तु ॥
अनागसि न कर्त्तव्यमभिचारमतो बुधैः ।
स्वल्पागसि न कर्त्तव्यो ह्यभिचारो महामुने ॥
महापराधं मलिनं देवब्राह्मणकण्टकम् ।
अभिचारेण यो हन्यान्न स दोषेण लिप्यते ॥
धर्म्मप्रदाने तु तथा स्वल्पागसि तथैव च ।
अभिचारं न कुर्व्वीत बहुपापं विचक्षणः ॥
बहूनां कण्टकं यस्तु पापात्मानं सुदुर्म्मतिम् ।
हन्यात् प्राप्तापराधन्तु तस्य पुण्यफलं महत् ॥
ये भक्ताः पुण्डरीकाक्षे वेदयज्ञे द्विजे जने ।
न तानभिचरेत् जातु तत्र सद्विफलं भवेत् ॥
न हि केशवभक्तानामभिचारेण कर्हिचित् ।
विनाशमभिपद्येत तस्मात्तन्न समाचरेत् ॥
सेयं धात्री विधात्री च सावित्र्यघविनाशिनी ।
प्राणायामेन जप्येन तथा चान्तर्ज्जलेन च ॥
सव्याहृतीकप्रणवा जप्तव्या शिरसा सह ।
प्रणवेन तथा न्यस्ता वाच्या व्याहृतयः पृथक् ॥
दैवतं सविताप्यस्या गायत्रं छन्द एव च ।
विश्वामित्र ऋषिश्चैव प्रोच्यते ऋषिसत्तम ॥
कर्म्मेन्द्रियाणि पञ्चैव पञ्च बुद्धीन्द्रियाणि च ।
पञ्चेन्द्रियार्थाः सुमहत् भूताना पञ्चकम् ॥
मनो बुद्धिस्तथैवात्मा अव्यक्तञ्चैव सत्तम ॥
चतुर्व्विंशत्यथैतानि गायत्र्याश्चाक्षराणि तु ।
प्राणैव पुरुषं विद्धि सङ्गतं पञ्चविंशकम् ।
सप्तलोकाश्च ये चेह महाव्याहृतयस्तथा ॥
शिरश्च तत्तथा वाच्यः पुरुषः परमेश्वरः ।
एवंविधा च गायत्री जप्तव्या राजसत्तम ॥
होतव्या च यथाशक्त्या सर्व्वकामसमृद्धिदा ।
सावित्रीसारमात्रोऽपि वरं विप्रः सुयन्त्रितः ॥
नायन्त्रितश्चतुर्व्वेदी सर्व्वाशी सर्व्वविक्रयी ।
गायत्रीं जपते यस्तु त्रिकालं ब्राह्मणः सदा ॥
अर्थी प्रतिग्रही वापि स गच्छेत् परमां गतिम् ।
गायत्रीं जपते यस्तु कल्यमुत्थाय यो द्विजः ॥
स लिप्यति न पापेन पद्मपत्रमिवाम्भसा ।
कामकामी लभेत् कामान् गतिकामश्च सद्गतिम् ॥
अकामः समवाप्नोति तद्विष्णोः परमं पदम् ॥”
इत्याद्ये वह्निपुराणे गायत्रीकल्पनामाध्यायः ॥

गायनः, त्रि, (गायति सङ्गीतविद्यया उपजीवतीति । गै + “ण्युट् च ।” ३ । १ । १४७ । इति ण्युट् ।) गायकः । (यथा, काशीखण्डे ।
“देवानां गायना ह्येते चारणाः स्तुतिपाठकाः ॥”)
गानोपजीवी । इति त्रिकाण्डशेषः ॥ (एतेषामन्नं विशुद्धब्राह्मणादिभिरग्राह्यं पतितत्वात् । यथाह मनुः । ४ । २१० ।
“स्तेनगायनयोश्चान्नं तक्ष्णोर्वार्द्धुषिकस्य च ॥”)
जल्पाकः । इति धरणी ॥ (स्तुतिपाठकः । यथा, महाभारते । १ । ७८ । ३२ ।
“सत्यं किलैतत् सा प्राह दैत्यानामसि गायनः ॥”)

गारित्रं, क्ली, (गीर्य्यते भक्ष्यते इति । गॄ निगरणे + “भूवादिगृभ्यो णित्रन् ।” उणां ४ । १७० । इति कर्म्मणि णित्रन् ।) ओदनम् । इत्युणादिकोषः ॥

गारुडं, क्ली, (गरुडस्य इदमिति । गरुड + अण् वृद्धिश्च । यद्वा, गरुडं श्रोतारमालम्ब्य भगवता यदुपदिष्टम् । यद्वा, गरुडेन प्रोक्तमिति । तन्निरुक्तिरुक्ता शिवपुराणे यथा —
“गरुडस्तु स्वयं वक्ता यत्तद् गारुडसंज्ञकम् ।”)
गरुडपुराणम् । इति पुराणम् ॥ यथा,—
गरुड उवाच ।
“मम माता च विनता नागैर्दासीकृता हरे ।
यथाहं देवतान् जित्वा चामृतं ह्यानयामि तत् ॥
दास्याद्वि मोक्षयिष्यामि यथाहं वाहनं तव ।
महाबलो महावीर्य्यः सर्व्वज्ञो नागदारणः ।
पुराणसंहिताकर्त्ता यथाहं स्यां तथा कुरु ॥
विष्णुरुवाच ।
यथा त्वयोक्तं गरुड । तथा सर्व्वं भविष्यति ।
देवादीन् सकलान् जित्वा चामृतं ह्यानयिष्यसि ॥
नागदास्यान्मातरं त्वं विनतां मोचयिष्यसि ।
महाबलो वाहनस्त्वं भविष्यसि विषार्द्दनः ॥
पुराणं मत्प्रसादाच्च मम माहात्म्यवाचकम् ।
यदुक्तं मत्स्वरूपञ्च तव चाविर्भविष्यति ॥
गारुडं तव नाम्ना तल्लोके ख्यातिं गमिष्यति ।
यथाहं देवदेवानां श्री ख्यातो विनतासुत ॥
तथा ख्यातिं पुराणेषु गारुडं गरुडैष्यति ।
यथाहं कीर्त्तनीयोऽथ तथा त्वं गरुडात्मना ॥
मां ध्यात्वा पक्षिमुख्येदं पुराणं गद गारुडम् ।
इत्युक्तो गरुडो रुद्र । कश्यपायाह पृच्छते ॥

काश्यपो गरुडं स्तुत्वा वृक्षं दग्धमजीवयत् ।
स्वयञ्चाप्यमलो भूत्वा विशयान्यानजीवयत् ॥
पक्षी ओम् तं स्वाहा जापी विद्येयं गारुडी
परा ।
गरुडोऽहं गारुडं हि शृणु रुद्र । महात्मकम् ॥"
इत्याद्ये महापुराणे गारुडे प्रश्नाध्यायो नाम
द्वितीयः ॥ * ॥ (अस्मिन् पुराणे एकोनविंशत्-
सहस्रसंख्यकश्लोका वर्त्तन्ते । यथा, देवीभाग-
वते । १ । ३ । ११ ।
"एकोनविंशत् साहस्रं गारुडं हरिभाषितम् ॥"
अस्य विशेषविवरणन्तु पुराणशब्दे द्रष्टव्यम् ॥*॥)
गारुडी विद्या गरुडपुराणे २०२ अध्यायादौ
द्रष्टव्या ॥ स्वर्णम् । इति हेमचन्द्रः ॥ विषमन्त्रः ।
इति जटाधरः ॥ (गरुडः गरुडवर्णस्तस्येदम् ।
गरुड + अण् । गरुडवर्ण इव वर्णोऽस्येति भावः ।)
मरकतमणिः । इति राजनिर्घण्टः ॥ (यथा-
रघौ । १३ । ५३ ।
"त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां
सपद्मरागः फलितो विभाति ॥"
गरुडाकारेण सेनारचनयाधिष्ठितत्वात् महा-
व्यूहभेदः । यथा, महाभारते । ६ । ५३ । २ ।
"गारुडञ्च महाव्यूहं चक्रे शान्तनवस्तदा ॥"
एतस्य रचनायां गरुडाकृतित्वविवृतिर्यथा,
तत्रैवाध्याये । ३—८ ।
"गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव ।
चक्षुषी च भरद्वाजः कृतवर्म्मा च सात्वतः ॥
अश्वत्थामा कृपश्चैव शिर आस्तां यशस्विनौ ।
त्रिगर्त्तैर्मत्स्यकेकयैर्वाटधानैश्च संयुतैः ॥
भूरिश्रवाः शलः शल्यो भगदत्तश्च मारिष ! ।
मद्रकाः सिन्धुसौवीरास्तथा पञ्चनदाश्च ये ॥
जयद्रथेन सहिता ग्रीवायां सन्निवेशिताः ।
पृष्ठे दुर्य्योधनो राजा सोदर्य्यैः सानुगैर्वृतः ॥
विन्दानुविन्दावावन्त्यौ काम्बोजाश्च शकैः सह ।
पुच्छमासन् महाराज । शूरसेनाश्च मारिष ! ॥
दक्षिणं पक्षमासाद्य स्थिता व्यूहस्य दंशिताः ।
कारूषाश्च विकुञ्जाश्च मुण्डाः कुण्डीवृषास्तथा ॥
बृहद्बलेन सहिता वामपार्श्वे समास्थिताः ॥"
कदा वास्य व्यूहस्य प्रयोजनं तदाह मनुः ।
७ । १८६—१८७ ।
"शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत् ।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥"
"सूक्ष्ममुखपश्चाद्भागः पृथुमध्यो वराहव्यूहः ।
एष एव पृथुतरमध्यो गरुडव्यूहः ॥" इति तट्टीका-
कृत् कुल्लूकभट्टः ॥)

गारुडिकः, पुं, (गरुडः अधिष्ठाताऽस्य इति
गारुडः विषनिवारणमन्त्रविशेषः । तेन चिकित्-
सति स एव आजीवो यस्येति वा । इति ठक् ।)
विषवैद्यः । इति शब्दरत्नावली ॥

गारुडी, स्त्री, (गरुडनाम्नाख्यायते इति । अण्
ङीप् च ।) पातालगरुडीलता । इति राज-
निर्घण्टः ॥ (गरुडः अधिष्ठात्री देवता अस्या इति
अण् ङीप् च । गरुडविद्या । सा च गरुडपुराणे
२०२ अध्यायादौ द्रष्टव्या ॥)

गारुत्मतं, क्ली, (गरुत्मान् गरुडस्तस्य वर्णोऽस्त्यस्य
गरुत्मान् अधिष्ठातृदेवताऽस्य वा इति अण् ।)
मरकतमणिः । इत्यमरः । २ । ९ । ९२ ॥
(यथा, माघे । ३ । ५ ।
"तस्योल्लसत्काञ्चनकुण्डलाग्र-
प्रत्युप्तगारुत्मतरत्नभासा ।"
पन्ना इति लोके । तस्य नामानि ।
"गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गारुत्मतपत्रिका, स्त्री, (गारुत्मतं मरकतमणि-
स्तद्वर्णसदृशं पत्रमस्याः इति कप् कापि अत
इत्वञ्च ।) पाचीलता । इति राजनिर्घण्टः ॥

गार्गकः, पु, (गर्गस्य अपत्यं पुमान् इति । "गर्गा-
दिभ्यो यञ् ।" ४ । १ । १०५ । इति गार्ग्यः
ततः कन् । "आपत्यस्य च तद्धितेऽनाति ।" ६ ।
४ । १५१ । इति यकारलोपः ।) गर्गस्यापत्यम् ।
इत्यमरटीकायां रायमुकुटः ॥

गार्गी, स्त्री, (गर्गस्यापत्यं स्त्री । "गर्गादिभ्यो
यञ् ।" ४ । १ । १०५ । इति यञ् । "यञश्च ।"
४ । १ । १६ । इति ङीप् "ततो हलस्तद्धितस्य ।"
६ । ४ । १५० । इति यलोपः ।) गर्गस्य स्त्र्यप-
त्यम् । इति मुग्धबोधम् ॥ (यथा, बृहदारण्यके
पञ्चमप्रपाठके ६ ब्राह्मणे ।
"अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति
होवाच यदिदं सर्व्वमप्स्वोतञ्च प्रोतञ्च कस्मिन्नु
खल्वाप ओताश्च प्रोताश्चेति ॥" दुर्गा । यथा,
हरिवंशे । १७६ । १४ ।
"ह्रीं श्रीं गार्गी च गान्धारी योगिनी योगदा
सदा ॥")

गार्गीपुत्त्रकायणिः, पु, (गार्ग्याः पुत्त्रस्तस्मादागतो
वंशः इति । "पुत्त्रान्तादन्यतरस्याम् ।" ४ । १ ।
१५९ । इति वा फिञ् वा कुक् च ।) गार्गी-
पुत्त्रवंशः । अस्य रूपान्तरम् । गार्गीपुत्त्रायणिः ।
गार्गीपुत्त्रिः । इति पाणिनिव्याकरणम् ॥

गार्ग्यः, पु, (गर्गस्यापत्यं पुमान् । "गर्गादिभ्यो यञ् ।"
४ । १ । १०५ । इति यञ् ।) गर्गस्य पुमपत्यम् ।
इति मुग्धबोधव्याकरणम् ॥ (यथा, बृहदा-
रण्यके । ४ । १ । "दृप्तबालाकिर्हानूचानो
गार्ग्य आस सहोवाचाजातशत्रुं काश्यं ब्रह्म ते
ब्रवाणीति ॥")

गार्द्धपक्षः, पुं, (गृध्रस्य गृधस्य वा इदमिति अण् गार्ध्रौ
गार्ध्रौ वा पक्षौ पत्रे यत्र यस्य वा ।) गार्द्ध्र-
पत्रबाणः । इति हेमचन्द्रः । ३ । ४४२ ॥ गार्द्ध्र-
पक्षोऽपि ॥

गार्द्ध्यं, क्ली, (गर्द्ध एव इति । चतुर्वर्णादित्वात्
स्वार्थे ष्यञ् ।) लिप्सा । यथा, माघे । ३ । ७३ ।
"पीत्वा जलानां निधिनातिगार्द्ध्यात् ॥"

गार्द्ध्रपत्रः, पु, (गार्द्ध्रं गृध्रसम्बन्धिनं पत्रं पक्षः यस्य
यत्र वा ।) गृध्रपक्षयुक्तबाणः । (यथा, महा-
भारते । ४ । ४८ । २५ ।
"न हि गाण्डीवनिर्म्मुक्ता गार्द्ध्रपत्राः सुतेजनाः ।
अन्तरेष्वेव तिष्ठन्ति गिरीणामपि दारणाः ॥")

गार्भिणं, क्ली, (गर्भिणीनां समूहः इति । "भिक्षा-
दिभ्योऽण् ।" ४ । २ । ३८ । इति अण् ।)
गर्भिणीसमूहः । इत्यमरः । २ । ६ । ३२ ॥

गार्हपत्यः, पु, (गृहपतिर्यजमानस्तेन संयुक्तः इति ।
"गृहपतिना संयुक्ते ञ्यः ।" ४ । ४ । ९० । इति
ञ्यः ।) गृहपतिर्गृहस्वामी तेन नित्यसम्बद्धः ।
इत्यमरभरतौ ॥ यज्ञीयाग्निविशेषः । (यथा,
ऋग्वेदे । १० । ८५ । २७ ।
"इह प्रियं प्रजया ते समृध्यता-
मस्मिन् गृहे गार्हपत्याय जागृहि ॥"
भक्तिवर्द्धनाय पितापि गार्हपत्याग्नित्वेन पुत्त्रा-
दिना वेदितव्यः इत्युपदिदेश भगवान् मनुः ।
यथा । २ । २३१ ।
"पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः
स्मृतः ॥")

गालनं, क्ली, (गाल्यते इति । गल् + णिच् + भावे
ल्युट् ।) क्षारणम् । छाँकन गड़ान इत्यादि
भाषा ॥ यथा । "तथा पचेत् यथा दाहकाठि-
न्यातिशैथिल्यमण्डगालनरहितोऽन्तरुष्मपक्वश्चरु
र्भवति ।" इति भवदेवभट्टः ॥

गालवः, पु, (गाल्यते नाश्यतेऽज्ञानमनेन इति ।
गल् + णिच् + घञ् । गालः वेदान्तादिज्ञानप्रति-
पादकशास्त्रं तं वाति गच्छति जानाति वा ।
वा + कः ।) मुनिविशेषः । (यथा, भागवते ।
८ । १३ । १५ ।
"गालवो दीप्तिमान् रामो द्रोणपुत्त्रः कृपस्तथा ॥")
लोध्रवृक्षः । इति मेदिनी । वे । ३७ ॥ श्वेतलोध्रः ।
इत्यमरटीकायां स्वामी ॥ केन्दुकवृक्षः । इति
शब्दचन्द्रिका ॥

गालिः, पु, (गाल्यते विक्रियते श्रवणमात्रेण
मनो यस्मात् येन वा । गल् + इञ् ।) शापः ।
इति त्रिकाण्डशेषः ॥ (यदुक्तं चिन्तामणौ ।
"ददति ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ॥")

गालितः, त्रि, (गल् + णिच् + कर्म्मणि क्तः ।) द्रवी-
कृतः । गलान इति भाषा ॥ यथा,—
"गालितस्य सुवर्णस्य षोडशांशेन सीसकम् ॥"
इति रत्नावली ॥
कृतगालनः । यथा । "तथा पचेत् यथा अगा-
लितमण्डश्चरुर्भवति ।" इति कालेशिः ॥

गालिनी, स्त्री, (गालयति द्रवीकरोत्यविद्यामिति ।
गल् + णिच् + णिनि + ङीप् ।) मुद्राविशेषः ।
यथा,—
"कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ।
तर्ज्जनी मध्यमानामा संहता भुग्नवर्ज्जिता ॥
सैषैषा गालिनी प्रोक्ता शङ्खस्योपरिचालिता ॥"
इति तन्त्रसारः ॥

गालोडनं, क्ली, (गाः इन्द्रियाणि व्यालोड्यन्ते प्रमाद्यन्तेऽनेन । गो+व्या+लोडि+करणे ल्युट् । निपातनात् साधुः ।) उन्मादः । रोगः । मूर्खत्वम् । इति वक्ष्यमाणशब्ददर्शनात् ॥

गालोडितः, त्रि, (गालोडः उन्मादरोगः सञ्जातोऽस्य । इतच् ।) उन्मत्तः । रुग्णः । मूर्खः । यथा,
"उन्मादशीले रोगार्त्ते मूर्खे गालोडितः स्मृतः ॥"
इति दुर्गसिंहकृतकलापवृत्तिटीकायां त्रिलोचनदासः ॥ गोलोडितोऽपि पाठः ॥

गालोड्यं, क्ली, (गोभिः पशुविशेषैरालोड्यते भक्षणाय इति । गो+व्या+लोडि+कर्म्मणि यत्प्रत्ययेन निपातनात् साधुः ।) पद्मवीजम् । इति राजनिर्घण्टः ॥

गावौ, पुं, (गोशब्दस्य द्विवचनेन निष्पत्तिरिति वोध्यम् ।) ग्रामः । यथा —
"एकैकेन तथा द्वाभ्यां वचनैस्त्रिभिरेव च ।
साकाङ्क्षत्वप्रयुक्तन्तु नाम पञ्चविधं स्मृतम् ॥
एकवचनसाकाङ्क्षत्वमुक्तं एकविंशत्यादिशब्दे । उभयद द्विपद पुष्पवन्तपद सर्व्वेद्वे अश्विनादिपद भूस्वर्गयो रोदस्यादिपद ग्रामे गोपदञ्च द्विवचनमात्रेणाकाङ्क्षम् । इति । तदा गावौ ग्राम इत्यादाविव साधुत्वार्थकमेव तत्र द्विवचनमिति वदन्ति ।" इति च शब्दशक्तिप्रकाशिका ॥

गाह, ऊ ङ विलोडने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) ङ, गाहन्तां महिषा निपानसलिलमिति शाकुन्तले । ऊ, अगाहिष्ट अगाढ़ । इति दुर्गादासः ॥

गिरा, स्त्री, (गॄ+भावे क्विप् स्त्रियां टाप् ।) वचनम् । इति त्रिकाण्डशेषः ॥ ("तां गिरां करुणां श्रुत्वा ।" इति दशरथविलापनाटकम् ॥)

गिरिः, पुं, (गिरति धारयति पृथ्वीं गिरयते स्तूयते गुरुत्वाद्वा । "कृगृशृपकुटिभिदिच्छिदिभ्यश्च ।" उणां । ४ । १४२ । इति इः किच्च ।) पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ (पर्व्वतानां अष्टावेव पूजनीयाः कुलाचलत्वात् । यदुक्तम्,—
"मेरुमन्दरकैलासमलया गन्धमादनः ।
महेन्द्रः श्रीपर्व्वतश्च हेमकूटस्तथैव च ।
अष्टावेते तु सम्पूज्या गिरयः पूर्व्वदिक्क्रमात् ॥"
इति शब्दार्थचिन्तामणिः ॥)
गेण्डुकः । इति हेमचन्द्रः । ३ । ३५२ ॥ चक्षुरोगविशेषः । इति मेदिनी । रे । २३ ॥ पारदस्य दोषविशेषः । यथा, रसावल्याम् ।
"नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः ।
असह्याग्निर्महादोषा निसर्गात् पारदे स्थिताः ॥"
सन्न्यासिनां पद्धतिविशेषश्च ॥ (तत्र प्रथमतस्तान्त्रिकगिरिसन्न्यासिलक्षणं यथा,—
"सदोंकारमाहुर्यो वीरो मुक्तक्रोधो दिगम्बरः ।
सर्व्वत्र समभावेन भावयेद्यो नरोत्तमः ।
दृष्टदेवोऽधिया नारीं स गिरिः परिकीर्त्तितः ॥"
इति तन्त्रशास्त्रम् ॥
शङ्कराचार्य्यकृतदशनामब्रह्मचारिपरिव्राजकानामन्यतमः । तेषां दशनामानि यथा,—
"तीर्थाश्रमवनारण्यगिरिपर्व्वतसागराः ।
पुरिः सरस्वती चैव भारती च तथा दश ॥"
तत्र गिरेर्लक्षणम् । यथा, प्राणतोषिण्यां अवधूतप्रकरणे ।
"वासो गिरिवरे नित्यं गीताभ्यासे हि तत्परः ।
गम्भीराचलबुद्धिश्च गिरिनामा स उच्यते ॥"
यदुवंशीयश्वफल्कस्य द्वादशपुत्राणामन्यतमः । यथा, भागवते । ९ । २४ । १५—१६ ।
"अक्रूरप्रमुखा आसन् पुत्त्रा द्वादशविश्रुताः ।
आसङ्गः सारमेयश्च मृदुरो मृदुविद्गिरिः ॥")

गिरिः, स्त्री (गॄ+भावे इः किच्च ।) निगरणम् । इत्यमरः । ३ । २ । ११ ॥ गेला इति भाषा ॥ बालमूषिका । इत्यमरटीकायां रमानाथः ॥ पूज्ये त्रि । इति मेदिनी । रे । २४ ॥

गिरिकण्टकः, पुं, (गिरेः पर्व्वतस्य कण्टक इव तन्नाशकत्वात्तथात्वम् ।) वज्रः । इति त्रिकाण्डशेषः ॥

गिरिकदम्बः, पुं, (गिरिसमुत्पन्नः कदम्बः ।) नीपः । धाराकदम्बः । इति राजनिर्घण्टः ॥

गिरिकदली, स्त्री, (गिरिसञ्जाता कदली ।) पर्व्वतीयकदली । तत्पर्य्यायः । गिरिरम्भा २ पर्व्वतमोचा ३ अरण्यकदली ४ बहुवीजा ५ वनरम्भा ६ गिरिजा ७ गजवल्लभा ८ । अस्या गुणाः । मधुरत्वम् । हिमत्वम् । बलवीर्य्यवृद्धिकारित्वम् । लघुत्वम् । तृष्णापित्तदाहशोषप्रशमनत्वम् । दुर्ज्जरत्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

गिरिकर्णिका, स्त्री, (गिरौ गिरिमधिकृत्य कर्णिकेव प्रतिभातीत्यर्थः । यद्वा, गिरिः सुमेरुपर्व्वतः कर्ण इव यस्याः इति कप् टाप् च कापि अत इत्वम् ।) पृथिवी । इति त्रिकाण्डशेषः ॥ श्वेतकिणिहीवृक्षः । अपराजिता । इति राजनिर्घण्टः ॥ (अस्या व्यवहारो यथा,—
"गुडपुष्पसारशिखरितरुफलगिरिकर्णिका
हरिद्राभिः ।
अञ्जनगुडिका शमयति विषमाग्निं त्रिकटु-
सनाथा ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे ॥)

गिरिकर्णी, स्त्री, (गिरेर्बालमूषिकायाः कर्ण इव पत्रमस्याः ।) अपराजिता । इत्यमरः । २ । ४ । १०४ ॥ (अस्याः पर्य्याया यथा,—
"गवाक्षीश्वखुरी श्वेता श्वेतभण्डापराजिता ।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी ॥"
इति वैद्यकरत्नमालायाम् ॥
पार्व्वतीयापराजितार्थे पर्य्याया यथा तत्रैव,—
"गिरिकर्णी महाश्वेता स्थूलपुष्पा सिता क्वचित् ॥")
यवासः । इति शब्दचन्द्रिका ॥

गिरिका, स्त्री, (गिरिरेव स्वार्थे कन् टाप् च ।) बालमूषिका । इत्यमरः । २।५।१२ ॥ (स्वनामख्याता उपरिचरवसुराजपत्नी । सा हि गिरेः कोलाहलाख्यपर्व्वतात् शुक्तिमत्यां नद्यां जातत्वात् गिरिकेति नाम्ना विश्रुता । यथा, महाभारते । १ । ६३ । ३५—३९ ।
"राजोपरिचरेत्येवं नाम तस्याथ विश्रुतम् ।
पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः ॥
अरौत्सीत् चेतनायुक्तः कामात् कोलाहलः किल ।
गिरिं कोलाहलं तन्तु पदा वसुरताडयत् ॥
निश्चक्राम ततस्तेन प्रहारविवरेण सा ।
तस्यां नद्यामजनयन्मिथुनं पर्व्वतः स्वयम् ॥
तस्माद्विमोक्षणात् प्रीता नदी राज्ञे न्यवेदयत् ।
यः पुमानभवत्तत्र तं स राजर्षिसत्तमः ॥
वसुर्व्वसुप्रदश्चक्रे सेनापतिमरिन्दमः ।
चकार पत्नीं कन्यान्तु तथा तां गिरिकां नृपः ॥
वसोः पत्नी तु गिरिका कामकालं न्यवेदयत् ।
ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः ॥")

गिरिकाणः, पुं, (गिरिणा अक्षिरोगविशेषेण काणः एकचक्षुर्हीनः ।) गिरिरोगेणैकचक्षुर्हीनः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गिरिगुडः, पुं, (गिरेः गिरौ वा जातः गुडः गुडिकवर्त्तुल इव ।) गेण्डुकः । इति हेमचन्द्रः । ३।३५३ ॥

गिरिजं, क्ली, (गिरौ जायते इति । जन+डः ।) अभ्रकम् । शिलाजतु । शैलजम् । लोहम् । इति मेदिनी । जे २३ ॥ गैरिकम् । इति राजनिर्घण्टः ॥

गिरिजः, पुं, (गिरौ जायते इति । जन्+डः ।) मधूकवृक्षविशेषः । तत्पर्य्यायः । गौरशाकः २ मधूलः ३ स्वल्पपत्रकः ४ । इति रत्नमाला ॥

गिरिजा, स्त्री, (गिरेर्हिमालयपर्व्वतात् हिमगिरेरधिष्ठातृदेवादिति तात्पर्य्यार्थः जायते । जन्+डः स्त्रियां टाप् च । हिमालयस्य अधिष्ठातृप्रमाणं यथा, कुमारे । १ । १ ।
'अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।"
"देवता आत्मा यस्य सः । एतेनास्य वक्ष्यमाणमेनकापरिणयपार्व्वतीजननादिचेतनव्यवहारयोग्यत्वसिद्धिः ।" इति टीकायां मल्लिनाथः ।) पार्व्वती । (यथा अनर्घराघवे । ४ र्थे अङ्के ३१ ।
"स्त्रीषु प्रवीरजननी जननी तवैव
देवी स्वयं भगवती गिरिजाऽपि यस्य ॥"
गायत्त्रीरूपा देवी । यथा, देवीभागवते । १२ । ६ । ४३ ।
"गिरिजा गुह्यमातङ्गी गरुडध्वजवल्लभा ॥"
गङ्गा । इति व्युत्पत्तिलब्धोऽर्थः ॥ गिरौ पर्व्वते जायते इति । जन्+डः ।) मातुलुङ्गी । इति मेदिनी । जे । २४ ॥ (अस्याः पर्य्याया यथा,—
"मातुलुङ्गी सुगन्धाख्या गिरिजा पूतिपुष्पिका ।
अत्यम्ला देवदूती च सा कपिलमधुकर्कटी ॥"
इति वैद्यकरत्नमालायाम् ॥)
श्वेतबुह्ना । इति रत्नमाला ॥ क्षुद्रपाषाणभेदा । त्रायमाणा लता । कारीलवृक्ष । मल्लिका । गिरिकदली । इति राजनिर्घण्टः ॥

गिरिजामलं, क्ली, (गिरौ पर्व्वते अभ्रे अभ्रवादित्यर्थः जायते इति । जन्+डः । गिरिजम् । तदमलं गच्छति । अम्+कलच् । यद्वा, गिरिजैः

अनिबद्धं भवेद्गीतं वर्णादिनियमं विना ॥
यद्वा गमकधातुभ्यैरनिबद्धं विना कृतम् ।
निबद्धञ्च भवेद्गीतं तालमानरसाश्रितम् ॥
छन्दो गमकधातुभ्यैर्वर्णादिनियमैः कृतम् ॥
ऋग्भ्यः पाठ्यमभूद्गीतं सामभ्यः समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्व्वणः स्मृताः ॥"

अथ सङ्गीतलक्षणम् ।

"तालवाद्यानुगं गीतं नटीभिर्यत्र गीयते ।
नृत्यस्यानुगतं रङ्गे तत् सङ्गीतकमुच्यते ॥" * ॥

अथ गीतप्रशंसा ।

"सङ्गीतकेन रम्येण सुखं यस्य न चेतसि ।
मनुष्यदुर्लभे लोके विधिनैव स वञ्चितः ॥
संसारदुःखदग्धानामुत्तमानामनुग्रहात् ।
प्रभुणा शङ्करेणात्र गीतवाद्यं प्रकाशितम् ॥
गीतं वाद्यं तथा नृत्यं तौर्य्यत्रिकमिदं मतम् ।
तूर्य्यशब्दो मृदङ्गे स्यात् मुरजेऽपि च दृश्यते ॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥
गीतेन हरिणा रङ्गं पाशुवन्त्यपि पक्षिणः ।
वनादायान्ति फणिनः शिशवो न रुदन्ति च ॥

कृतिचमत्कृतये किमतः परं
फणिवरोऽश्वतरो बत पश्यत ।
अपि मृतां यदवाप मदालसां
मधुरगीतवशीकृतशङ्करः ॥

परमानन्दविवर्द्धनमभिमतफलवशीकरणम् ।
सकलजनचित्तहरणं विमुक्तिबीजं परं गीतम् ॥
गीतं पीनपयोधरा समदना नारी विचित्रा कथा
रम्यं हर्म्म्यतलं सुधांशुकिरणप्रोद्दीपिता यामिनी ।
चित्तज्ञाः सुहृदः सुताः सुमनसो भक्ताः पुनः सेवकाः
शुद्धं गीतफलं कवित्वमतुलं संसारसारा मताः ॥"
"शुद्धशालगसङ्कीर्णभेदाद्गीतं त्रिधा मतम् ॥"
शुद्धस्य विंशतिर्यथा,—
"एला सोऽप्यभवा सपाटकरणं ततपश्चतावेश्वरः
कैवातसारचक्रपालविजया गद्यं त्रिभङ्गिस्तथा ।
ढेङ्कीवर्णसरः पुटौ द्विपदिका मुक्तावली मातृका
लम्बो दण्डकवर्त्मनीति कथिताः शुद्धास्तु ते विंशतिः ॥"

एलादीनामेतेषां विंशतिसंख्यकानां प्रबन्धगीतानामङ्गानि षट् भवन्ति । तथा च ।
"पदं तानो विरुदञ्च तालः पाटः स्वरस्तथा ।
एलादीनां षडङ्गानि कथितानि विरिञ्चिना ॥
पौनरुक्त्यं न दोषाय गीते दोषोऽभिजायते ।
शीघ्रोच्चारेण वर्णानां तथा चैव प्रसारणे ॥
लिङ्गान्यत्वे विसन्धौ च संयुक्ताक्षरमोक्षणे ।
परिवर्त्तेऽक्षराणाञ्च ह्रस्वदीर्घव्यतिक्रमे ॥" * ॥

अथ शालगसूत्रम् ।

"ध्रुवको मण्ठकश्चैव प्रतिमण्ठो निसारुकः ।
पासकः प्रतिलाभश्च तथान्या चैकतालिका ॥
यतिश्च झुमरिश्चेति शालगं सूत्रमीरितम् ॥" * ॥

अथ सङ्कीर्णसूत्रम् ।

"चैत्रो मङ्गलकस्तथा न गणिका चर्चातिनाटोऽभवी
दोहा स्यान्नहुलस्तथा गुरुबलो गीता च गोविन्दस्तथा ।
हेम्नोकोऽप्यथ कारिका त्रिपदिरित्येतानि कामद्विषा
संक्षेपेण चतुर्द्दश प्रकटितान्यत्राधमानि क्रमात् ॥"

इति सङ्गीतदामोदरः ॥

(सङ्गीतस्यान्यद्विवरणं गानशब्दे द्रष्टव्यम् ॥ * ॥
गीयते स्म इति । गै शब्दे + कर्म्मणि क्तः ।)
शब्दिते त्रि । इति मेदिनी । ते । १६ ॥

गीतमोदी, [न्] पु, (गीतेन सङ्गीतेन मोदते इति । मुद + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनि ।) किन्नरः । इति शब्दरत्नावली ॥ (सङ्गीतानुरागिणि त्रि ॥)

गीता स्त्री, (गीयते स्म आत्मविद्योपदेशात्मिका ब्रह्मतत्त्वोपदेशमयी कथा यत्र । गै + क्त ।) ग्रन्थविशेषः । भगवद्गीतेति ख्याता । सा तु अर्ज्जुनस्य मोहनिवृत्त्यर्थं महाभारतीयभीष्मपर्व्वान्तर्गता कर्म्मोपासनाज्ञानकाण्डत्रयात्मिकाष्टादशाध्यायी श्रीकृष्णोक्ता । यथा,—
"भारते सर्व्ववेदार्थो भारतार्थश्च कृत्स्नशः ।
गीतायामस्ति तेनेयं सर्व्वशास्त्रमयी मता ॥
इयमष्टादशाध्यायी क्रमात् षट्कत्रयेण हि ।
कर्म्मोपास्तिज्ञानकाण्डत्रितयात्मा निगद्यते ॥"

इति नीलकण्ठः ॥

"गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृता ॥"

इति स्वामी ॥

(अस्याः प्रयोजनादिकं श्रीमद्भिर्मधुसूदनसरस्वतीपादैर्विस्तरशो गीतागूढार्थदीपिकायां दर्शितम् । तद्यथा,—
"सहेतुकस्य संसारस्यात्यन्तोपरमात्मकम् ।
परं निःश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम् ॥
सच्चिदानन्दरूपं तत् पूर्णं विष्णोः परं पदम् ।
यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः ॥
कर्म्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात् ।
तद्रूपाष्टादशाध्यायीगीताकाण्डत्रयात्मिका ॥
एकमेकेन षट्केन काण्डमत्रोपलक्षयेत् ।
कर्म्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः ॥
यतः समुच्चयो नास्ति तयोरतिविरोधतः ।
भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्त्तिता ॥
उभयानुगता सा हि सर्व्वविघ्नापनोदिनी ।
कर्म्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा ॥
तत्र तु प्रथमे काण्डे कर्म्म तत्त्यागवर्त्मना ।
त्वम्पदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते ॥
द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना ।
भगवान् परमानन्दस्तत्पदार्थोऽवधार्य्यते ॥
तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम् ।
एवमप्यत्र काण्डानां सम्बन्धोऽस्ति परस्परम् ॥
प्रत्यध्यायं विशेषस्तु तत्र तत्रैव वक्ष्यते ।
मुक्तिसाधनपर्व्वेदं शास्त्रार्थत्वेन कथ्यते ॥
निष्कामकर्म्मनिष्ठात्यागात् काम्यनिषिद्धयोः ।
तत्रापि परमो धर्म्मो जपस्तुत्यादिकं हरेः ॥
क्षीणपापस्य चित्तस्य विवेके योग्यता यदा ।
नित्यानित्यविवेकस्तु जायते सुदृढस्तदा ॥
इहामुत्रार्थवैराग्यं वशीकाराभिधं क्रमात् ।
ततः शमादिसम्पत्त्या सन्न्यासो निष्ठितो भवेत् ॥
एवं सर्व्वपरित्यागान्मुमुक्षा जायते दृढा ।
ततो गुरूपसदनमुपदेशग्रहस्ततः ॥
ततः सन्देहहानाय वेदान्तश्रवणादिकम् ।
सर्व्वमुत्तरमीमांसाशास्त्रमत्रोपयुज्यते ॥
ततस्तत्परिपाकेन निदिध्यासननिष्ठता ।
योगशास्त्रन्तु सम्पूर्णमुपक्षीणं भवेदिह ॥
क्षीणदोषे ततश्चित्ते वाक्यात्तत्त्वमतिर्भवेत् ।
साक्षात्कारो निर्व्विकल्पः शब्दादेवोपजायते ॥
अविद्याविनिवृत्तिस्तु तत्त्वज्ञानोदये भवेत् ।
तत आवरणे क्षीणे क्षीयेते भ्रमसंशयौ ॥
अनारब्धानि कर्म्माणि नश्यन्त्येव समन्ततः ।
न चागामीनि जायन्ते तत्त्वज्ञानप्रभावतः ॥
प्रारब्धकर्म्मविक्षेपाद्वासना तु न नश्यति ।
सा सर्व्वतो बलवता संयमेनोपशाम्यति ॥
संयमो धारणा ध्यानं समाधिरित्येतत् त्रिकम् ।
यमादिपञ्चकं पूर्व्वं तदर्थमुपयुज्यते ॥
ईश्वरप्रणिधानात्तु समाधिः सिध्यति द्रुतम् ।
ततो भवेन्मनोनाशो वासनाक्षय एव च ॥
तत्त्वज्ञानं मनोनाशो वासनाक्षय इत्यपि ।
युगपत्त्रितयाभ्यासाज्जीवन्मुक्तिर्दृढा भवेत् ॥
विद्वत्सन्न्यासकथनमेतदर्थं श्रुतौ श्रुतम् ।
प्रागसिद्धो य एवांशो यत्नः स्यात्तस्य साधने ॥
निरुद्धे चेतसि पुरा सविकल्पसमाधिना ।
निर्व्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः ॥
व्युत्तिष्ठते स्वतस्त्वाद्ये द्वितीये परबोधितः ।
अन्ते व्युत्तिष्ठते नैव सदा भवति तन्मयः ॥
एवम्भूतो ब्राह्मणः स्याद्वरिष्ठो ब्रह्मवादिनाम् ।
गुणातीतः स्थितप्रज्ञो विष्णुभक्तश्च कथ्यते ॥
अतिवर्णाश्रमी जीवन्मुक्त आत्मरतिस्तथा ।
एतस्य कृतकृत्यत्वात् शास्त्रमस्मान्निवर्त्तते ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
इत्यादिश्रुतिमानेन कायेन मनसा गिरा ।
सर्व्वावस्थासु भगवद्भक्तिरत्रोपयुज्यते ॥
पूर्व्वभूमौ कृता भक्तिरुत्तरां भूमिमानयेत् ।
अन्यथा विघ्नबाहुल्यात् फलसिद्धिः सुदुर्लभा ॥
पूर्व्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
अनेकजन्मसंसिद्ध इत्यादि च वचो हरेः ॥
यदि प्राग्भवसंस्कारस्याचिन्त्यात् कश्चन ।
प्रागेव कृतकृत्यः स्यादाकाशफलपातवत् ॥
न तं प्रति कृतार्थत्वाच्छास्त्रमारब्धुमिष्यते ।
प्राक्सिद्धसाधनाभ्यासाद्दुर्ज्ञेया भगवत्कृपा ॥
एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये ।
विधेया भगवद्भक्तिस्तां विना सा न सिध्यति ॥
जीवन्मुक्तिदशायान्तु न भक्तेः फलकल्पना ।
अद्वेष्टृत्वादिवत्तेषां स्वभावो भजनं हरेः ॥
आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्व्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥

नेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
इत्यादिवचनात् प्रेमभक्तोऽयं मुख्य उच्यते ॥
एतत् सर्व्वं भगवता गीताशास्त्रे प्रकाशितम् ।
अतो व्याख्यातुमेतन्मे मन उत्सहते भृशम् ॥
निष्कामकर्म्मानुष्ठानं मूलं मोक्षस्य कीर्त्तितम् ।
शोकादिरासुरः पाप्मा तस्य च प्रतिबन्धकः ॥
यतः स्वधर्म्मविभ्रंशः प्रतिषिद्धस्य सेवनम् ।
फलाभिसन्धिपूर्व्वा वा साहङ्कारा क्रिया भवेत् ॥
आविष्टः पुरुषो नित्यमेवमासुरपाप्मभिः ।
पुमर्थलाभायोग्यः सन् लभते दुःखसन्ततिम् ॥
दुःखं स्वभावतो द्वेष्यं सर्व्वेषां प्राणिनामिह ।
अतस्तत्साधनं त्याज्यं शोकमोहादिकं सदा ॥
अनादिभवसन्तानिनि(रू)ढ़ं दुःखकारणम् ।
दुस्त्यजं शोकमोहादि केनोपायेन हीयताम् ॥
एवमाकाङ्क्षयाविष्टं पुरुषार्थोन्मुखं नरम् ।
बुबोधयिषुराहेदं भगवान् शास्त्रमुत्तमम् ॥”)
एतदन्याः श्रीभागवतोक्तगोपीगीताध्यात्मरामायणोक्तरामगीताश्वमेधिकपर्व्वोक्तब्राह्मणगीतानुगीते देवीभागवतोक्तभगवतीगीता शिवगीता इत्याद्याः सन्ति ॥

गीतासारः, पुं, (गीतासु सारः गीतानां वेदान्तादिशास्त्राणां वा सारो यत्र इति वा । सूक्ष्मार्थं संक्षेपेण समस्तयोगज्ञानादिप्रतिपादकशास्त्राणां सारार्थो गीतो यत्र इति तात्पर्य्यार्थः ।) अर्ज्जुनं प्रति श्रीकृष्णोक्तसूक्ष्मार्थाष्टाङ्गादियोगः । यथा,—

श्रीभगवानुवाच ।

“गीतासारं प्रवक्ष्यामि अर्ज्जुनायोदितं पुरा ।
अष्टाङ्गयोगं सूक्ष्मार्थं सर्व्ववेदान्तसारगम् ॥
आत्मलाभः परो नान्य आत्मा देहादिवर्ज्जितः ।
रूपादिमान् हि देहोऽतः करणत्वादिलोचनम् ॥
करणत्वान्मनोऽधीनो न प्राणोऽचेतनो यतः ।
विज्ञानरहितः प्राणः सुषुप्ते हि प्रतीयते ॥
नाहमात्मा च दुःखादिसंसाराभिसमन्वयात् ।
विधूम इव दीप्तार्च्चिरादित्य इव दीप्तिमान् ॥
वैद्युतोऽग्निरिवाकाशे हृत्स्थो ध्येयात्मनात्मनि ।
श्रोत्रादीनि न पश्यन्ति स्वं स्वमात्मानमात्मना ।
सर्व्वज्ञः सर्व्वदर्शी च चेत्रज्ञस्तानि पश्यति ।
स्थानान्तु मनसा रश्मीन् यदा सम्यङ्नियच्छति ॥
तदा प्रकाशते ह्यात्मा घटे दीपो ज्वलन्निव ।
ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ।
इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्च च ।
मनो बुद्धिमहङ्कारमव्यक्तं पुरुषं तथा ।
प्रसंख्याय परावाप्तौ विमुक्तो बन्धनैर्भवेत् ॥
इन्द्रियग्राममखिलं मनसाभिनिवेश्य च ।
मनश्चैवाप्यहङ्कारे प्रतिष्ठाप्य च पाण्डव ॥
अहङ्कारं तथा बुद्धौ बुद्धिञ्च प्रकृतावपि ।
प्रकृतिं पुरुषे स्थाप्य पुरुषं ब्रह्मणि न्यसेत् ॥
अथ ब्रह्मपरं ज्योतिः प्रसंख्याय विमुच्यते ।
द्विषादशेभ्यः ख्यातो यः पुरुषः पञ्चविंशकः ॥
विवेकात् केवलीभूतः षड्विंशमनुपश्यति ।
नवद्वारमिदं गेहं त्रिस्थूणं पञ्चसाक्षिकम् ॥
चेत्रमाधिष्ठितं विद्वान् यो वेद स वरः कविः ॥
ज्ञानयज्ञस्य सर्व्वाणि कलां नार्हन्ति षोडशीम् ॥”
अश्वमेधसहस्राणि वाजपेयशतानि च ।

इति गारुडे २३३ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।

“यमाश्च नियमाः पार्थ । आसनं प्राणसंयमः ।
प्रत्याहारस्तथा ध्यानं धारणार्ज्जुन । सप्तमी ॥
समाधिरयमष्टाङ्गो योग उक्तो विमुक्तये ।
कर्म्मणा मनसा वाचा सर्व्वभूतेषु सर्व्वदा ॥
अक्लेशजननं प्रोक्तं भूतानां यदहिंसनम् ।
अहिंसा परमो धर्म्मो ह्यहिंसा परमं सुखम् ॥
विधिना या भवेद्धिंसा त्वहिंसा सा प्रकीर्त्तिता ।
यथा नागपदेऽन्यानि पदानि पदगामिनाम् ॥
सर्व्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ।
एवं सर्व्वं हि हिंसायां धर्म्मार्थमपिधीयते ॥
यद्भूतहितमत्यन्तं वचः सत्यस्य लक्षणम् ।
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ॥
प्रियञ्च नानृतं ब्रूयात् एष धर्म्मः सनातनः ।
यत् द्रव्यापहरणं चौर्य्याद्वाथ बलेन वा ॥
स्तेयं तस्यानाचरणमस्तेयं धर्म्मसाधनम् ।
कर्म्मणा मनसा वाचा सर्व्वावस्थासु सर्व्वदा ॥
सर्व्वत्र मैथुनत्यागं ब्रह्मचर्य्यं प्रचक्षते ।
द्रव्याणामप्यनादानमापत्स्वपि यथेच्छया ॥
अपरिग्रहमित्याहुस्तं प्रयत्नेन वर्ज्जयेत् ।
द्विधा शौचं मृज्जलाभ्यां बाह्यं भावादथान्तरम् ॥
यदृच्छालाभतस्तुष्टिः सन्तोषः सुखलक्षणम् ।
मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं परमं तपः ॥
शरीरशोषणं वापि कृच्छ्रचान्द्रायणादिभिः ।
वेदान्तशतरुद्रीयप्रणवादिजपं बुधाः ॥
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ।
स्तुतिस्मरणपूजादिवाङ्मनःकायकर्म्मभिः ॥
सुनिश्चला हरौ भक्तिरेतदीश्वरचिन्तनम् ।
आसनं स्वस्तिकं प्रोक्तं पद्ममर्द्धासनं तथा ॥
प्राणः स्वदेहजो वायुरायामस्तन्निरोधनम् ।
प्राणापाननिरोधस्तु प्राणायाम उपस्थितः ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
नियमः प्रोच्यते सद्भिः प्रत्याहारस्तु पाण्डव ॥
मूर्त्तामूर्त्तब्रह्मरूपचिन्तनं ध्यानमुच्यते ।
योगारम्भे मूर्त्तहरिममूर्त्तमथ चिन्तयेत् ॥
नाभिकन्दे स्थितं नालं दशाङ्गुलसमायुतम् ।
नाले चाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतम् ॥
सकर्णिके केशराले सूर्य्यसोमाग्निमण्डलम् ।
अग्निमण्डलमध्यस्थो वासुदेवश्चतुर्भुजः ॥
शङ्खचक्रगदापद्मयुक्तः कौस्तुभसंयुतः ।
वनमाली कौस्तुभेन युतोऽहं ब्रह्ममुक्त ओम् ॥
धारणेत्युच्यते चेयं धार्य्यते यन्मनोमये ।
प्रादुर्भ्या हृदये चानु तृतीया च तयोरसि ॥
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणादश प्रकीर्त्तिताः ॥
अहं ब्रह्मेत्यवस्थानं समाधिरभिधीयते ।
एकाकारः समाधिः स्याद्देशलक्षणवर्ज्जितः ॥”

इति गारुडे २३४ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।

“ब्रह्मगीतां प्रवक्ष्यामि यां ज्ञात्वा मुच्यते भवान् ।
अहं ब्रह्मास्मीति वाक्याज्ज्ञानान्मोक्षो भवेन्नृणाम् ॥
वाक्यज्ञानं भवेज्ज्ञानादहंब्रह्मपदार्थयोः ।
पदद्वयार्थौ द्विविधौ वाच्यौ लक्ष्यौ स्मृतौ बुधैः ॥
वाच्यौ दशबलौ ज्ञेयौ लक्ष्यौ शुद्धौ प्रकीर्त्तितौ ।
प्राणपिण्डात्मकार्थेषु चेतनं शरणन्तु यत् ॥
तथा वै देवपर्य्यन्तमहं शब्देन नोच्यते ।
प्रत्ययूपमद्वितीयमहं शब्देन भण्यते ॥
अद्वयानन्दचैतन्यं परोक्षसहितं परम् ।
प्राणपिण्डात्मकाद्यर्थसद्वितीयविभागकम् ॥
त्यागेन प्रत्यक्चैतन्यभागो लक्ष्येत चाहमा ।
तथा ब्रह्मपदेनैव प्राणपिण्डात्मकारणा ॥
विद्यापरोक्षभागे च परित्यागे च लक्ष्यते ।
अद्वयानन्दचैतन्यभाग एव विचिन्तयेत् ॥
अहंपदेन चैतन्यप्रत्यग्ब्रह्मपदेन तु ।
अद्वयानन्दचैतन्यं लक्षयित्वा स्थितस्य च ॥
ब्रह्माहमस्म्यहं ब्रह्म अहंब्रह्मपदार्थयोः ।
अहं ब्रह्मास्मि वाक्याच्च आत्मभूतिफलात्मकम् ॥
एकत्वज्ञानञ्च भवेद्वेदान्ताद्गुरुतो दृढम् ।
ज्ञानादज्ञानताकार्य्यनिवृत्तिर्भुक्त एकतः ॥”

इति गारुडे २३५ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।

“सम्मायिब्रह्मतः खं स्यात् खान्मरुत्वांस्ततोऽनलः ।
अग्नेरापस्ततः पृथ्वी प्रपञ्चीकृतभूतकम् ॥
ततः सप्तदशं लिङ्गं पञ्च कर्म्मेन्द्रियाणि च ।
वाक्पाणिपादं पायुश्च उपस्थमथ धीन्द्रियम् ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं स्यात् पञ्च वायवः ।
प्राणोऽपानः समानश्च व्यानस्तूदान एव च ॥
मनो धीरन्तःकरणं स्यान्मनः संशयात्मकम् ।
बुद्धिर्निश्चयरूपा तु एतत्सूक्ष्मशरीरकम् ॥
हिरण्यगर्भमात्मीयं भूततत्कार्य्यलिङ्गकम् ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूततः ॥
पञ्चीकृतेभ्यो भूतेभ्यो ब्रह्माण्डं समजायत ।
लोकप्रसिद्धं स्थूलाद्यं शरीरचरणादिमत् ।
पञ्चीकृतानि भूतानि तत्कार्य्यञ्चाहमेव च ।
सर्व्वं शरीरजातञ्च प्राणिनां स्थूलमीरितम् ॥
तौराद्युपरतात्मानः शरीरं प्रोच्यते बुधैः ।
देहद्वयाभिमानी च त्वमथो जीव एकतः ॥
सच्छन्दवाच्यं ब्रह्मैव प्रविष्टं देहयोर्द्वयोः ।
जलार्कवद्घटखवज्जीवः प्राणादिधारणात् ॥
जाग्रत्स्वप्नसुषुप्तीनां साक्षी जीवः स च स्मृतः ।
जाग्रत्स्वप्नसुषुप्ताख्यैर्व्यतिरिक्तश्च निर्गुणः ।
निर्गतावयवोत्सर्गो नित्यशुद्धस्वभावकः ।
परमात्मैव सञ्जायत्स्वप्नादौ सन्निधानतः ॥
अन्तःकरणरागेश्च अन्तःकरणस्थितः ।
जाग्रत्स्वप्नसुषुप्तीश्च पश्यतोऽविकृतः सदा ॥
फलं क्रियाकारकयोर्जाग्रदादीन् वदाम्यहम् ।
इन्द्रियैरनुविज्ञानं जाग्रत्स्थानमुदीरितम् ॥
जाग्रत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः ।
स्वप्नं प्रसुप्तिशरणे प्रसंहारोऽधिपः स्थितः ॥

महाकारगरूपेण वटस्य कणिकात्मना ।
क्रमते क्रमतो जीवो जाग्रदादीन् स पश्यति ॥
समाधारमाकाशे तु पूर्व्वमेवावधारयेत् ।
सम्यक्तः पश्चात् संज्ञासे व्यम्तःकरणमिष्यते ॥
विलापयेत क्षितिधारं धेनाश्च परिशोधयेत ।
पञ्चीकृतेभ्यो भूतेभ्यः व्यक्तादियतिरिक्तकम् ॥
यथा घटो पटो भिन्नो नास्ति तत्कार्य्यतस्तथा ।
पञ्चीकृतानि भूतानि ह्यपञ्चीकृतभूतत ॥
समष्टिव्यतिरेकेण शिष्टं स्थूलशरीरकम् ।
अपञ्चीकृतभूतेभ्यो न लिङ्गं व्यतिरिक्तकम् ॥
पृथ्वी वारि विना नास्ति वारि नास्ति च तेजसा ।
तेजश्च वायुना नास्ति वायुर्नभो विना न हि ॥
सद्ब्रह्मणा च न नास्ति सद्ब्रह्म विना च न ।
शुद्धभावात्तथा जाग्रत्स्वप्नादीनामसम्भवे ॥
जीवत्ववर्ज्जितं ब्रह्मात्मा वै तद्गुरुत्पकं ।
नित्यशुद्धबुद्धमुक्तं सत्यं नन्दाद्वितीयकम् ॥
तत्त्वपदार्थौ शिष्टौ तत्राकारो महाकारकः ।
उकारश्च मकारश्च मकारोऽयं इत्यद्वयं ॥
मत्वाऽहमस्माद्वं ब्रह्म ध्यानमज्ञानमर्द्दनम् ।
अयमात्मा ब्रह्मज्योतिर्विज्ञानानन्दरूपकम् ॥
सत्यज्ञानमनन्तं स तत्त्वमसि श्रुतीरितम् ।
अहं ब्रह्मास्मि ब्रह्माहं सर्व्वप्राणिषु संस्थितम् ॥
योऽसावादित्यपुरुषः सोऽसावहमनादिमन् ।
गीतासारोऽर्ज्जुनायोक्तो येन मह्यमपि वै स्मृत ॥"
इत्यादिमहापुराणे गारुडे गीतासारे २३६ अध्याय ॥

गीतिः, स्त्री, (गै गाने + क्तिन् ।) गानम् । (यथा, कुमारे । ३ । ४० ।

"श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव ॥")

आर्य्याछन्दोविशेषः । इति मेदिनी । ते १६ ॥ (अस्या लक्षणं यथा छन्दोमञ्जर्य्यां मात्रावृत्ते । ७ । [गीति ॥")

"आर्य्याप्रथमार्द्धसमं यस्या परार्द्धमीरिता

गीरथः, पुं, (गीर्व्वाणी वाङ्मयं शास्त्रमित्यर्थः रथ इव यस्य ।) वृहस्पतिः । इति त्रिकाण्डशेषः ॥

गीर्णः, त्रि, (गीर्य्यते स्म इति । गॄ ग्रि स्तुतौ + क्त ।) स्तुतः । इत्यमरटीकायां भरतः ॥

गीर्णिः स्त्री, (गॄ + क्तिन् । ऋल्वादिभ्यः क्तिन्निष्ठावत् तेन नत्वम् ततो रेफात् णत्वञ्च ।) गिलनम् । इत्यमरः । ३ । ३११ ॥ स्तुतिश्च । गीर्णशब्ददर्शनात् ॥

गीर्द्देवी, स्त्री, (गीर्व्वाणी तस्याः देवी । वागधिष्ठातृतयास्यास्तथात्वम् ।) सरस्वती । इति शब्दरत्नावली ॥

गीर्लता, स्त्री, (गीरिव तमोनाशिनी विस्तृता च लता ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

गी(र्व्वा)र्व्वाणः, पुं (गीर्वाणीव वाणोऽस्य यस्य । अथर्थवाक्यतयास्य तथात्वम् । अन्तःस्थवकारमध्यपाठे तु गिरं वनुते याचते काङ्क्षतीत्यर्थः स्तुतिप्रियत्वादिति । वन याचनायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) देवता । इत्यमरः । १ । १ । ८ ॥ (यथा, भागवते । ८ । १५ । ३० ।

"एवं सुगन्धितापर्य्याप्तो गुरुणाध्यापुरर्दश्मा ।
हित्वा त्रिविष्टपं जग्मुर्गी(र्व्वा)र्व्वाणाः काम-रूपिणः ।")

गी(र्व्वा)र्व्वाणकुसुमं, क्ली, (गी(र्व्वा)र्व्वाणप्रियं कुसुमं पुष्पं यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥

गीष्पतिः, पुं, (गिरां पतिः । "षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ।" ८ । ३ । ५३ । इति विसर्गस्य सत्वम् । अपाशापामीत्येतस्मिन् "इदुदुपधस्य चाप्रत्ययस्य ।" ८ । ३ । ४१ । इति ष । मुग्धबोधमते "गपि वा ।" इति सूत्रस्य पाक्षिको विधिः ।) वृहस्पतिः । इत्यमरः । १ । १ । २४ ॥ पण्डितः । इति शब्दरत्नावली ॥ अस्य रूपान्तरे गीर्पतिः गीः पतिः । इति मुग्धबोधम् ॥

गु ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट ।) ङ गवते । इति दुर्गादासः ॥

गु, शि ष्ठौ विष्ठोत्सर्गे । इति कविकल्पद्रुमः ॥ (तुदां (कुटां)-पर-अकं-अनिट ।) शि, गुवति अगुषीत् । ष्ठौ, गुतः । इति दुर्गादासः ॥

गुग्गुलः, पुं, (गोजति शब्दायतेऽनेनेति । गुज् + क्विप् । गुक् रोगस्तस्मात् गुडति रक्षतीति । गुक् + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । डलयोरैक्यात् डस्य लत्वम् ।) गुग्गुलुः । इत्यमरटीकायां भरतः ॥

गुग्गुलुः, पुं, (गुज्यतेऽनेनेति । गुज शब्दे + क्विप् । गुक् रोगस्तस्मात् गुडतीति । गुड रक्षणे + बाहुलकात् कुः । डलयोरैक्यात् डस्य लत्वम् ।) रक्तशोभाञ्जनवृक्षः । इति शब्दचन्द्रिका ॥ स्वनामख्यातवृक्षः । स तु गोरक्षोद्भवः । यथा,—
"गोरोचनायां महत्या स जाता सर्व्वकामिकाः ।
गुग्गुलुस्तु ततो जातो गोमत्राच्छुभदर्शनः ॥"
इति वह्निपुराणे वैष्णवधर्म्मे शुद्धिस्नानाध्यायः ॥

अस्य निर्य्यासः सुगन्धिद्रव्यम् । तत्पर्य्यायः । कुम्भम् २ उलूखलकम् ३ कौशिकः ४ पुरः ५ ॥ इत्यमरः । २ । ४ । ३४ ॥ कुम्भोलुः ६ खलकम् ७ कुम्भोलूखलकम् ८ गुग्गुलः ९ । इति भरतः ॥ जटायुः १० कालनिर्य्यासः ११ देवधूपः १२ सर्व्वसहः १३ महिषाक्षः १४ पलङ्कषा १५ । इति रत्नमाला ॥ यवनद्विष्टः १६ भवाभीष्टः १७ शिवाटकः १८ घटालः १९ पुटः २० भूतहरः २१ शिवः २२ शाम्भवः २३ दुर्गः २४ यातुघ्नः २५ महिषाक्षकः २६ देवेष्टः २७ मरुद्विष्टः २८ रक्षोहा २९ रूक्षगन्धकः ३० दिव्यम् ३१ ।

अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफमारुतकासकृमिवातोदरप्लीहशोफार्शोनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ दीपनत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मेदःकुष्ठनाशित्वम् । पित्तदाहित्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ विशदत्वम् । सारकत्वम् । रूक्षत्वम् । पाके कटुत्वम् । भग्नसन्धानकारित्वम् । हृष्यत्वम् । सूक्ष्मत्वम् । स्वर्य्यत्वम् । पिच्छिलत्वम् । बलकारित्वम् । व्रणमेदोऽश्मवातामवातपिडकाग्रन्थिशोथमालाघ्नित्वञ्च ॥ * ॥

"माधुर्य्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ।
तिक्तत्वात् कफजित्तेन गुग्गुलुः सर्व्वदोषहा ॥"

स तु पञ्चधा यथा,—

"महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्चजातयः ॥"

तेषां रूपाणि यथा,—

"भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥
कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः ।
हिरण्याक्षस्तु हेमाभः पञ्चानां लिङ्गमीरितम् ॥"

तेषां प्राणिविशेषे प्रयोगो यथा,—

"महिषाक्षमहानीलौ गजेन्द्राणां हितावुभौ ।
हयानां कुमुदः पद्मः स्वस्त्यारोग्यकरौ परौ ॥
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ।
कदाचिन्महिषाक्षस्तु मतः कैश्चिन्नृणामपि ॥"

नूतनगुग्गुलो रूपं यथा,—

"स्निग्धकाञ्चनसङ्काशः पक्वजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥"

पुरातनस्य रूपं यथा,—

"शुष्को दुर्गन्धिकश्चैव त्यक्तप्रकृतवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्व्वीर्य्यवर्ज्जितः ॥"

इति भावप्रकाशः ॥ * ॥

अस्य स्थानविशेषे धर्म्मादिकथनम् । यथा,—

"जायन्ते पुरपादपा मरुभुवि ग्रीष्मेऽर्कसन्तापिता
शीतार्त्ता शिशिरेऽपि गुग्गुलुरसं मुञ्चन्ति ते पञ्चधा ।
हेमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं
भृङ्गाभं कुमुदद्युतिञ्च विधिना यात्रा परीक्ष्या ततः ॥
वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति
क्षिद्यन्ति कोष्णसलिले पयसः समानाः ।
याह्याः शुभाः परिहरेच्चिरकालजाता-
नङ्गारवर्णसमपूयविगन्धवर्णान् ॥"

इति प्रयोगामृतम् ॥

पक्वस्यास्य पूर्व्ववीर्य्यत्वं मासत्रयपर्य्यन्तं तिष्ठति । इति परिभाषा ॥

गुच्छः, पुं, (गुध्यति परिवेष्टते इति । गुध + "शुक्तादिभ्यश्छन् ।" इति छन् इति भोजराजः । यद्वा, गुड शब्दे + क्विप् । गुत् शब्दं छ्यति नाशयतीति । गुत् + छो + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) स्तवकः । पुष्पादिर घलुया इति भाषा । (यथा, गीतगोविन्दे । ११ । ११ । [वलीम् ॥")

"अस्योर्नियमितपदच्छन्न श्रवणयोस्तामिन्द्रगुच्छा-

स्तम्बः । इत्यादिर गोच्छा इति भाषा ॥ (उद्भिद्-विशेषः । स तु मल्लिकादिः । यथा, मनुः । १ । ४८ ।

"गुच्छगुल्मन्तु विविधं तथैव तृणजातयः ।"

"मूलत एव यत्र लतासमूहो भवति न च प्रकाण्डानि ते गुच्छा मल्लिकादयः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) द्वात्रिंशद्यष्टिकहारः । वर्त्तिश

नर हार इति भाषा ॥ कलापः। इति मेदिनी।
छे। ३॥ मयूरेर पाखा इति भाषा। सक्ता-
हारः। इति रन्तिदेवः॥

गुच्छकं, क्ली (गुच्छ+संज्ञायां कन्।) ग्रन्थि-
पर्णम्। इति भावप्रकाशः॥

गुच्छकः, पु, (गुच्छ+स्वार्थे कन्।) स्तवकः। इत्य-
मरः। २।४।१४॥ तत्पर्य्यायः। गुलच्छः २
स्तम्बः ३ कुसुमोच्चयः ४ गुच्छः ५। इति राज-
निर्घण्टः॥ गुत्सः ६ गुत्सकः ७। इत्यमर-
टीकायां भरतः॥ रीठाकरञ्जः। इति राज-
निर्घण्टः॥ स्वार्थे कप्रत्ययात् गुच्छशब्दार्थोऽप्यत्र॥

गुच्छकणिशः, पुं, (गुच्छवत् कणिशानि मञ्जर्य्यो
यस्य।) रागीधान्यम्। इति राजनिर्घण्टः॥

गुच्छकरञ्जः, पु, (गुच्छः स्तवकः करञ्जफले यस्य।)
करञ्जविशेषः। तत्पर्य्यायः। स्निग्धदलः २
गुच्छपुष्पकः ३ नन्दी ४ गुच्छी ५ सानन्दः ६
दन्तधावनः ७। अस्य गुणाः। कटुत्वम्।
तिक्तत्वम्। उष्णत्वम्। विषवातार्शःकण्डूविच-
र्च्चिकाकुष्ठसर्व्वत्वग्दोषनाशित्वञ्च॥" इति राज-
निर्घण्टः॥

गुच्छदन्तिका, स्त्री, (गुच्छाः स्तवकीभूता दन्ता
इव फलानि यस्याः। कप् टाप् अत इत्वञ्च।)
कदली। इति राजनिर्घण्टः॥

गुच्छपत्रः, पु, (गुच्छीभूतानि पत्राणि यस्य।)
तालवृक्षः। इति राजनिर्घण्टः॥

गुच्छपुष्पः, पु, (गुच्छीभूतानि पुष्पाणि यस्य।)
सप्तच्छदवृक्षः। इति राजनिर्घण्टः॥ (अशोक
वृक्षः। अस्य पर्य्याया यथा,—
"हेमपुष्पस्त्वशोकश्च गुच्छपुष्पोऽङ्गनाप्रियः।"
इति वैद्यकरत्नमालायाम्॥)

गुच्छपुष्पकः, पु, (गुच्छपुष्प+संज्ञायां कन्।)
रीठाकरञ्जः। गुच्छकरञ्जः। इति राज-
निर्घण्टः॥

गुच्छपुष्पी, स्त्री, (गुच्छपुष्प+जातौ ङीष्।) धातकी।
शिम्बडीवृक्षः। इति राजनिर्घण्टः॥

गुच्छफलः, पु, (गुच्छीभूतानि फलानि यस्य।)
रीठाकरञ्जः। राजादनी। कतकः। इति
राजनिर्घण्टः॥ (राजादनशब्देऽस्य गुणादयो
ज्ञातव्याः॥)

गुच्छफला, स्त्री, (गुच्छीभूतानि फलानि यस्याः।
स्त्रियां टाप्।) अग्निदमनी। काकमाची।
निष्पावी। द्राक्षा। कदली। इति राज-
निर्घण्टः॥

गुच्छबध्रा, स्त्री, (गुच्छेन बध्यते इति। बन्ध+
बाहुलकात् रक्। ततष्टाप्।) गुण्डालावृक्षः।
इति राजनिर्घण्टः॥

गुच्छमूलिका, स्त्री, (गुच्छाकृति मूलमस्याः।
कप् स्त्रियां टाप् अत इत्वञ्च।) गुण्डासिनी-
तृणम्। इति राजनिर्घण्टः॥

गुच्छार्द्धः, पु, (गुच्छस्य द्वात्रिंशद्यष्टिकहारस्य
अर्द्धः। ग्रामार्द्धवत् समासः।) चतुर्विंशति-
यष्टिको हारः। इत्यमरः। २।६।१०५॥
(पुलिङ्गनिर्द्देशादेवास्य तथात्वम्। क्लीवलिङ्गे तु
"पुंस्यर्द्धोऽर्द्धं समेंऽशके।" इत्यमरोक्तेः षोडश-
यष्टिकहारो बोद्धव्य इति तु सुधीभिर्विभाव्यम्॥)

गुच्छाल, पु, (गुच्छेन अलति पर्य्याप्नोतीति।
अल पर्य्याप्तौ+अच्।) भूतृणम्। इति राज-
निर्घण्टः॥

गुच्छाङ्ककन्दः, पु, (गुच्छाङ्को गुच्छसंज्ञकः कन्दः।)
गुलञ्चकन्दः। इति राजनिर्घण्टः॥

गुच्छी, स्त्री, (गुच्छ+जातौ ङीष्।) गुच्छकरञ्जः।
इति राजनिर्घण्टः॥

गुज, कूजने। इति कविकल्पद्रुमः॥ (भ्वा-परं-
अक-सेट्।) पञ्चमस्वरी। गोजति। कूजन-
मव्यक्तशब्दः। इति दुर्गादासः॥

गुज, इ कूजने। इति कविकल्पद्रुमः॥ (भ्वा-परं-
अक-सेट्।) पञ्चमस्वरी। इ, कर्म्मणि गुञ्ज्यते।
कूजनमव्यक्तशब्दः। गुञ्जति भ्रमरः कुञ्जे। इति
दुर्गादासः॥

गुज, शि ध्वनौ। इति कविकल्पद्रुमः॥ (तुदां-
(कुटां)-परं-अकं-सेट्।) शि, गुजति अगु-
जीत् जुगोज। इति दुर्गादासः॥

गुज्जरी, स्त्री, (गुर्ज्जरदेशवासिनां प्रिया।
गुर्ज्जर+अण्+स्त्रियां ङीप्। पृषोदरात्
रलोपे वृद्ध्यभावे च साधुः।) रागिणीविशेषः।
अस्य ध्यानं यथा, सङ्गीतदर्पणे।
"श्यामा सुकेशी मलयद्रुमाणां
मृदूल्लसत्पल्लवतल्पयाता।
श्रुतेः स्वराणां दधती विभागं
तन्त्रीमुखाद्दक्षिणगुज्जरीयम्॥"
अस्याः कालनियमो यथा,—
"नाटो गौडो वडारी च गुज्जरी देशिरेव च।
पूर्व्वाह्णे गानमेतेषां निषिद्धमिति तद्विदः॥"
इति सङ्गीतदामोदरः॥
मतभेदेन पूर्व्वाह्णेऽपि गीयते॥ (इयंपुनर्भैरव-
रागस्य वराङ्गना। हनूमन्मते तु मेघरागस्य।
अस्याः स्वरूप यथा, सङ्गीतदर्पणे।
"ग्रहांशन्यास-ऋषभा सम्पूर्णा गुर्ज्जरी मता।
पौरवी मूर्च्छना यस्या वङ्गाख्या सह मिश्रिता॥"
"पौरवीमूर्च्छना यस्याम्।" इत्यत्र "सप्तमी
मूर्च्छनैतस्याम्।" इति क्वचित् पाठः। सोमे-
श्वरमते इयं पञ्चमहीना षाडवा। इयञ्च
केनापि कारणेन रागविकारे जाते तत्पाप-
प्रायश्चित्तार्थं प्रायेण गीयते तथाचोक्तम्,—
"लोभान्मोहाच्च ये केचिद् गायन्ति च विरागतः।
सुरसा गुर्ज्जरी तस्य दोषं हन्तीति कथ्यते॥")

गुञ्जः, पु, गुञ्जन्ति भ्रमरादयो यत्र गुञ्ज+अधि-
करणे घञ्।) गुच्छः। पुष्पस्तवकः। इति शब्द-
रत्नावली॥

गुञ्जकृत्, पु, (गुञ्जं गुञ्जनं करोतीति। कृ+क्विप्
तुक् च।) भ्रमरः। इति शब्दचन्द्रिका॥

गुञ्जन, क्ली, (गुजि कूजने+भावे ल्युट्।) गुन्
गुन्ध्वनिः। भ्रमरादिशब्दः।
(किमिदं गुञ्जनं सख्यः षट्पदाना मनोहरम्।)

गुञ्जा, स्त्री, (गुञ्जतीति। गुजि+अच्। अस्या
पक्कफलगुच्छे शब्दबाहुल्यात्तथात्वम्।) लता-
विशेषः॥ कुँच इति भाषा॥ तत्पर्य्यायः।
काकचिञ्ची २ कृष्णला ३। इत्यमरः। २।४।९८॥
साङ्गुष्ठा ४ रक्तिका ५ काकणन्तिका ६ काका-
दनी ७ काकतिक्ता ८ काकजङ्घा ९ शिख-
ण्डिनी १०। इति रत्नमाला॥ चूडामणिः ११
सौम्या १२ शिखण्डी १३ अरुणा १४ ताम्रिका १५
शीतपाकी १६ उच्चटा १७ कृष्णचूडिका १८
रक्ता १९ काम्बोजी २० भिल्लभूषणा २१ वन्या २२
श्यामलचूडा २३ काकचिञ्चिका २४। अस्या
बीजगुणाः। तीक्ष्णत्वम्। उष्णत्वम्। इति राज-
निर्घण्टः॥ कुष्ठव्रणनाशित्वम्। इति राज-
वल्लभः॥ अस्याः शिफागुणाः। वान्तिकारि-
त्वम्। शूलविषनाशित्वञ्च। वश्यकर्म्मणि श्वेता
प्रशस्ता। इति राजनिर्घण्टः॥ *॥ (इयन्तु
श्वेतरक्तभेदेन द्विविधम्। यदुक्तं भावप्रकाशे।
"श्वेतरक्ताप्रभेदेन ज्ञेयं गुञ्जाद्वयं बुधैः।
गुञ्जाद्वयन्तु केश्यं स्यात् वातपित्तज्वरापहम्॥
मुखशोषश्रमश्वासतृष्णामदविनाशनम्।
नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत्॥
कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च॥"
श्वेतगुञ्जा तु अभिचारकर्म्मणि प्रशस्ता। यथा,
नवदुर्गामन्त्राभिचारे।
"जपित्वा सितगुञ्जानां कुडव कुलिकोदये॥"
इत्यादि॥
गुञ्जाफलन्तु विषप्रायत्वात् कदापि स्वस्थैर्न भोक्त-
व्यम्। अस्या विषमयत्वमुक्तं यथा, पञ्चतन्त्रे।
४। ५८।
"अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः॥")
चतुर्यवपरिमाणम्। रति इति भाषा। (यथा,—
"यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्याच्चतुष्टयम्॥"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये॥)
चतुर्धान्यपरिमाणम्। इति शुभङ्करः॥ गोधूम-
द्वयमानम्। इति राजनिर्घण्टः॥ (गुञ्जति
शब्दायते इति। कर्त्तरि अच्।) पटहः।
(गुञ्जनमिति। गुजि+भावे अप्।) कल-
ध्वनिः। इति मेदिनी॥ (गुञ्ज्यते भ्रमरादिभि-
र्मद्यपायिभिर्वा यत्र+अधिकरणे अप् घञ् वा।)
मदिरागृहम्। इति शब्दरत्नावली॥ चर्च्चा।
इति त्रिकाण्डशेषः॥

गुञ्जिका, स्त्री, (गुञ्जा एव। स्वार्थे कन्। अत
इत्वम्।) गुञ्जा। त्रियवपरिमाणम्। इति शब्द-
चन्द्रिका॥ (गुञ्जाशब्दे विवरणमस्या ज्ञातव्यम्॥)

गुञ्जितं, क्ली, (गुञ्ज+भावे क्तः।) गुञ्जनम्। यथा,
"न गुञ्जितं तन्न जहार यन्मनः॥"
इति भट्टिः। २। १९॥

गुटिका, स्त्री, (गुटिरेव। गुटि+स्वार्थे कन्।)
वटिका। गुलि इति वडि इति च भाषा॥
यथा, "गुटिकापातादिना व्यञ्जनम्।" इति
दायभागः॥

गुठ, इ क वेष्टे । इति कविकल्पद्रुमः ॥ (चुरां-पर-सक-सेट् ।) इखी । इ क, गुण्ठयति पशु गुठत् । इति दुर्गादास. ॥

गुड, इ क वेष्टे । रक्षे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) प्रथमस्वरी । इ क, गुण्डयति । अनेकार्थत्वाच्चूर्णीकरणेऽपि । गुण्डयति छिक्कुल लोकः । इति दुर्गादासः ॥

गुड, शि रक्षे । व्याघाते । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)पर-सकं-सेट् ।) शि, गुडति अगुडीत् । इति दुर्गादासः ॥

गुडः, पुं (गवते अव्यक्तशब्दं करोतीति । गु ङ शब्दे+"स्फायितञ्चि. कित् ।" उणां । १ । ११४ । इति डः स च कित् ।) गोलः । हस्तिसन्नाहः । इति मेदिनी । डे । १० ॥ ग्रासः । इति हेमचन्द्रः ॥ कार्पासी । इति राजनिर्घण्टः ॥ इक्षुपाकः । इत्यमरः ।३ । ३ । ४१ । तस्य पर्य्यायः । इक्षुसारः २ मधुरः ३ रसपाकजः ४ खण्डजः ५ द्रवजः ६ सिद्धः ७ मोदकः ८ अम्टतसारजः ९ शिशुप्रियः१० सितादिः११ अरुणः१२ रसजः१३ । इति राजनिर्घण्टः॥ इक्षुरसक्वाथः१४ गण्डोल १५ मधुवीजकः १६ । इति वैद्यकम् ॥ गण्डोलम् १७ गुलः १८ खाडुखण्डः १९ । इति शब्दरत्नावली ॥ खाड़ २० । इति त्रिकाण्डशेषः ॥ अस्य गुणाः । दृष्यत्वम् । स्निग्धत्वम् । गुरुत्वम् । वातनाशित्वम् । मूत्रशोधनत्वम् । नातिपित्तहरत्वम् । मेदःकफक्रमिबलप्रदत्वञ्च । इति राजवल्लभः ॥ मधुरत्वम् । क्षारत्वम् । उष्णत्वम् । कफनाशित्वम् । पित्तरक्ते अहितत्वम् । जीर्णस्यैव रसायनः ॥ पुरातनस्य तस्य गुणाः । पित्तपवनार्त्तित्रिदोषपाण्डुप्रमेहश्रमनाशित्वम् । द्रव्यान्तरसंयोगेन विशेषतो ज्वरनाशित्वम् । रुचिकारित्वम् । हृद्यत्वम् । सन्तापशान्तिप्रदत्वम् । विण्मूत्रामयशोधनत्वम् । अग्निजननत्वम् । स्निग्धत्वम् । स्वादुतरत्वम् । लघुत्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टः ॥ अधिकगुणत्वम् । रक्तप्रसन्नबलकारित्वम् । मधुरत्वञ्च । इति राजवल्लभः ॥ यावनालरसपाकभवगुडगुणाः । क्षारत्वम् । कटुत्वम् । मधुरत्वम् । कफवातनाशित्वम् । पित्तप्रदत्वम् । सततनिषेवणेन कण्डूतिकुष्ठजननत्वम् । जनन इत्यत्र शमन इति क्वचित् पाठः । अस्रविदाहदायित्वञ्च । इति राजनिर्घण्टः ॥ *॥

"इक्षो रसो यः सपक्वो जायते लोष्टवद्दृढ़ः ।
स गुडो गौड़देशे तु मतस्खण्डेव गुड़ो मतः ॥
श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण
पित्तं निहन्ति च तदेव हरीतकीभिः ।
शुण्ठ्या समं हरति वातमशेषमित्थं
दोषत्रयक्षयकराय नमो गुडाय ॥
इति भावप्रकाशः ॥

("वल्यो दृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः ।
नातिपित्तहरो मेध्यः कफक्रिमिकरो गुडः ॥
पित्तघ्नो मधुरः शुद्धो वातहा मूत्रशोधनः ।
स पुराणोऽधिकगुणो गुल्मार्शोऽरोचकापहः ॥
क्षये कासे क्षतक्षीणे पाण्डुरोगेऽस्रजि क्षये ।
हितो योगेन संयुक्तो गुडः पथ्यतमो मतः ॥
गुदामये कामलशोषमेहे
गुल्मामये पाण्डुहलीमके च ।
वाते सपित्तार्त्तजि राजरोगे
रुचिप्रदो रोगहरो गुडः स्यात् ॥
कासे शोफे गुडो नेष्टः अन्यत्रापि हितो मतः ।
योगयुक्तोऽपि सर्व्वत्र हितो गुणगणो नय ॥
क्षामक्षीणे पवनकुपिते श्वासमूर्च्छातुराणां
अध्वश्रान्तश्रमदवथि मूत्रकृच्छ्राश्मरीणाम् ।
जीर्णः क्षामज्वरविषमगे रक्तपित्तप्रकोपे
तृष्णादाहक्षयरुधिरगे सर्व्वरोगान्निहन्ति ॥"
इति गुडगुणाः ॥
इति हारीते प्रथमस्थानेऽष्टमेऽध्याये ॥*॥

गुड़क, पुं, (गुडेन पक्वः । गुड़+वाहुलकात् कः । यद्वा, गुड़ेन कायतीति । कै+कः ।) गुड़द्वारा पक्वौषधविशेषः । अस्य पूर्णतेजः पञ्चमास पर्य्यन्त तिष्ठति । इति परिभाषा ॥ (गुड एव । स्वार्थे कन् । गोलाकृतिः । यथा, महाभारते । ३ । १५ । ८ ।
"ससुशुण्डाश्मगुडका सायुधा समरश्वधा ॥"
"अश्मगुडका वर्त्तुलीकृता पाषाणाः ।" इति तट्टीकायां नीलकण्ठः ॥)

गुड़करी, स्त्री, (गुड गुड़वत्सुमिष्ट श्रुतिसुखकरमित्यर्थः करोतीति । गुड़+कृ+"कृञो हेतुताच्छील्यानुलोम्येषु ।" ३ । २ । २० । इति टः स्त्रियां ङीप् ।) रागिणीविशेषः । इति हलायुधः ॥

गुडची, स्त्री, (चि+क्विप् निपातनाद्दीर्घत्वे साधुः । गुडवत् ची चयन चरितोरसो यस्याः इत्यर्थः । अम्टतोद्भवत्वादेवास्यास्तथात्वम् ।) गुडूची । इत्यमरटीकायां भरतः ॥ (अस्या उत्पत्तिकथा अम्टताहिवरणे गुडूचीशब्दे द्रष्टव्या ॥)

गुड़त्वक्, स्त्री, (गुड़प्रधानं गुडकारणं वा त्वग् ।) इक्षुः । इति राजनिर्घण्टः ॥

गुडत्वचं, क्ली, (गुड़प्रधान त्वचम् । निपातनात् साधु ।) गुडत्वचम् । इक्षुः । इति शब्दरत्नावली ॥

गुडत्वक्, [च्] क्ली, (गुडइव मधुरा त्वगस्य ।) स्वनामख्यातगन्धद्रव्यम् । तत्पर्य्याय । त्वक्पत्रम् २ भृङ्गम् ३ त्वकपत्रम् ४ वराङ्गकम् ५ लवम् ६ चोलम् ७ त्वचापत्रम् ८ हृद्यम् ९ सुरभिवल्कलम् १० । इति शब्दरत्नावली ॥ उत्कटम् ११ चोचम् १२ । इत्यमरः । २ । ४ । १३४ ॥ त्वक् १३ पत्रम् १४ इति तट्टीका ॥ अस्य गुणाः । कफशुक्रामवातनाशित्वम् । मधुरत्वम् । कटुत्वञ्च । इति राजवल्लभः ॥ लघुत्वम् । उष्णत्वम् । स्वादुत्वम् । तिक्तत्वम् । रूक्षत्वम् । पित्तवृद्धिकारित्वम् । अरुचिकण्डूहृद्वस्तिवातार्शःक्रिमिपीनसरोगनाशित्वञ्च । इति भावप्रकाशः ॥

गुडत्वच, क्ली, (गुड़वत् मधुर त्वचम ।) गुडत्वक् । राजभोग्यम् । इति शब्दचन्द्रिका ॥ जयिनी इति भाषा ॥

गुड़दारु क्ली, गुडप्रधान गुड़कारणं वा दारु । इत्यमरः ।) इक्षुः । इति त्रिकाण्डशेषः ॥

गुड़धेनुः, स्त्री, (गुड़निर्म्मिता गुड़भारादिभिः कृता धेनुः ।) गुडादिनिर्म्मिता धेनुः । यथा,—
"गुड़धेनुविधानस्य यद्रूपमिह यत् फलम् ।
तदिदानीं प्रवक्ष्यामि सर्व्वपापविनाशनम् ॥
कृष्णाजिन चतुर्हस्तं प्रागग्रीवं विन्यसेद्भुवि ।
गोमयेनानुलिप्तायां दर्भमास्तीर्य्य सर्व्वतः ॥
लघ्वेणाजिन तद्वत् वत्सस्य परिकल्पयेत् ।
उदङ्मुखीं कल्पयेद्धेनुमुदीच्याभ्य सवत्सकाम् ॥
उत्तमा गुड़धेनुः स्यात् सदा भारचतुष्टयैः ।
वत्सुभारेण वा काय्या भाराभ्यां मध्यमा स्मृता ॥
अर्द्धभारेण वत्सः स्यात् कनिष्ठा भारकेण तु ।
चतुर्थांशेन वत्सः स्यात् गृहवित्तानुसारतः ॥
धेनुवत्सौ तदा तौ तु सितसूक्ष्माम्बरावृतौ ।
शुक्तिकर्णाविक्षुपादौ शुद्धमुक्ताफलेक्षणौ ॥
सितसूत्रशिरालौ तु सितकम्बलकम्बलौ ।
ताम्रगुडकपृष्ठौ तु सितचामररोमकौ ।
विद्रुमभ्रूयुगक्षतौ नवनीतस्तनान्वितौ ॥
क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ ।
इत्येवं रचयित्वा तु धूपदीपैः समर्च्चयेत् ॥
सर्व्वासां धेनूनामेवं विधानं ज्ञेयम् । इति मात्स्ये षष्टिखण्डम् ॥

गुडपुष्पः, पु, (गुड इव मधुरं पुष्पमस्य ।) मधूकवृक्षः । इत्यमरः । २ । ४ । २७ ॥

गुडफलः, पु, (गुड इव मधुरं फलमस्य ।) पीलुवृक्षः । इत्यमरः । २ । ४ । २८ ॥

गुडवीजः, पुं (गुडवत् मधुरं यद्वा, गुडं वर्त्तुलाकृति वीजं यस्य ।) मसूरः । इति राजनिर्घण्टः ॥

गुडभा, स्त्री, (गुड़वत् भाति शोभते इति । भा+कः । स्त्रियां टाप् ।) यावनालशर्क्करा । इति राजनिर्घण्टः ॥

गुड़मूलः, पुं, (गुडवत् सुमिष्टं मूलं यस्य ।) अरुणमारिषशाकम् । इति शब्दचन्द्रिका ॥

गुडला, स्त्री, (गुडं उत्पत्तिकारणत्वेन लातीति । ला+कः ।) गौड़ी मदिरा । इति शब्दचन्द्रिका ॥

गुडशर्क्करा, स्त्री, (गुड़जाता शर्क्करा ।) शर्क्करा । तत्पर्य्यायः । पिप्पटा २ । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये ।
"विदारी त्रिफला भीरु शृङ्गाटी गुड़शर्क्करा ॥")

गुड़शिग्रुः, पु (गुड़ इव रक्तवर्णः शिग्रुवृक्षविशेषः ।) रक्तशोभाञ्जन । इति शब्दचन्द्रिका ॥

गुडा, स्त्री (गुड+स्त्रियां टाप् ।) स्नुहीवृक्षः । गुडिका । इति मेदिनी ॥ उशीरी । इति राजनिर्घण्टः ॥

गुड़ाका, स्त्री, (गुड़यति सङ्कोचयति जडीकरोति देहेन्द्रियादीनि योऽवस्थाविशेषः स गुडः त आकायति प्रकाशयतीति । गुडां व्याजस्य आख्यावस्थां कायति वा । गुड़+आ+कै+कः स्त्रियां टाप् ।) निद्रा । इति गुडाकेशशब्दव्युत्पत्तौ श्रीधर

स्वामी ॥ (व्यालस्यम् । इति मधुसूदनसरस्वति: ॥)

गुडाकेश:, पुं, (गुडाका निद्रा माया इत्यर्थस्तस्या ईश: ।) शिव: । (गुडा निद्रा आलस्यं इन्द्रियाणि वा तस्या ईश: शास्ता जितनिद्रो जितेन्द्रियो वा ।) अर्ज्जुन: । इति जटाधर: ॥ (यथा, गीतायाम् । १ । २४ ।

"एवमुक्तो हृषीकेशो गुडाकेशेन भारत । ॥")

गुडाशय:, पु, (आशेतेऽस्मिन्निति । आशयो वासस्थानम् । ततो गुडस्येव मधुररसस्य आशय: ।) आखोटवृक्ष: । इति राजनिर्घण्ट: ॥

गुडिका, स्त्री, (गुडा वर्त्तुलाकृति: । स्वार्थे कन् टापि अत इत्वम् ।) गुटिका । वृहद्वटिका । यथा, वैद्यकपरिभाषा ॥

"वटिका गुटिका चेति सञ्ज्ञावान्तरभेदत: ।"

("चूर्णावलेहगुडिका कल्कानामशुभानकम् ।
वातपित्तकफोद्रेके त्रिदोषकपलमाहरेत् ॥
इति शार्ङ्गधरे मध्यखण्डे षष्ठेऽध्याये ॥)

गुडुची, स्त्री, (गुडूची + निपातनाद्ध्रस्वागम: ।) गुडूची । इति द्विरूपकोष: ॥

गुडूची, स्त्री, लताविशेष: । गुलञ्च इति भाषा ॥ तत्पर्य्याय: । वत्सादनी २ छिन्नरुहा ३ तन्त्रिका ४ अमृता ५ जीवन्तिका ६ सोमवल्ली ७ विशल्या ८ मधुपर्णी ९ । इत्यमर: ॥ गुडूची १० । इति भरत: ॥ कुण्डली ११ चक्रलक्षणा १२ । इति रत्नमाला ॥ अमृतवल्ली १३ ज्वरारि: १४ श्यामा १५ वरा १६ सुरकृता १७ मधुपर्णिका १८ छिन्नोद्भवा १९ अमृतलता २० रसायनी २१ छिन्ना २२ सोमलतिका २३ भिषक्प्रिया २४ कुण्डलिनी २५ वयस्था २६ नागकुमारिका २७ छद्मिका २८ चन्द्रहासा २९ । इति राजनिर्घण्ट: ॥ अमृतवल्लरी ३० सुधा ३१ जीवन्ती ३२ सोमा ३३ चक्रलक्षणिका ३४ वयस्या ३५ मण्डली ३६ देवनिर्म्मिता ३७ । अस्या गुणा: । कटुत्वम् । स्वादुपाकित्वम् । रसायनत्वम् । संग्राहित्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । बल्यत्वम् । अग्निदीपनत्वम् । दोषत्रयामतृड्दाहमेहकासपाण्डुकामलाकुष्ठवातास्रज्वरकृमिवमिनाशित्वञ्च । इति भावप्रकाश: ॥ गुरुत्वम् । वीर्य्यदातृत्वम् । भ्रमनाशित्वञ्च । इति राजनिर्घण्ट: ॥ रक्तपित्तनाशित्वम् । इति राजवल्लभ: ॥ अस्या: पत्रस्य गुणा: । व्यामेयत्वम् । सर्व्वज्वरहरत्वम् । लघुत्वम् । कषायत्वम् । कटुत्वम् । स्वादुपाकित्वम् । रसायनत्वम् । बलकारित्वम् । उष्णत्वम् । संग्राहित्वम् । त्रिदोषतृष्णादाहप्रमेहवातासृक्कामलाकुष्ठपाण्डुतानाशित्वञ्च । इति भावप्रकाश: ॥ घृतयुक्ताया वातनाशित्वम् । गुडयुक्ताया: पित्तनाशित्वम् । मधुयुक्ताया: कफनाशित्वम् । एरण्डतैलयुक्ताया उग्रवातास्रनाशित्वम् । शुण्ठीयुक्ताया आमवातनाशित्वम् । इति राजवल्लभ: ॥ * ॥ अस्या उत्पत्तिर्यथा,—

"अथ लङ्केश्वरो नाम्ना रावणो राक्षसाधिप: ।
रामपत्नीं बलात् सीतां जहार मदनातुर: ॥
ततस्तं बलवान् रामो रिपुं जायापहारिणम् ।
वलं वानरसैन्येन जघान रणमूर्द्धनि ॥
हते तस्मिन् सुरारातौ रावणे बलगर्व्विते ।
देवराज: सहस्राक्ष: परितुष्टोऽपि राघवे ॥
तत्र ये वानरा: केचिद्राक्षसैर्निहता रणे ।
तानिन्द्रो जीवयामास संसिच्यामृतवृष्टिभि: ॥
ततो येषु च देशेषु कपिगात्रात् परिच्युता: ।
पीयूषविन्दव: पेतुस्तेभ्यो जाता गुडूचिका ॥"
इति भावप्रकाश: ॥

(गुडूचीघृतम् । यथा,—

"गुडूचीक्वाथकल्काभ्यां सपयस्कं घृतं श्रृतम् ।
हन्ति वातं तथारक्तं कुष्ठं जयति दुस्तरम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातरक्ताधिकारे ॥)

गुडेर:, पु, (गुडति रक्षतीति गुड रक्षायाम् + "पतिकठिकुठिगडि गुडिदंशिभ्य एरक् ।" उणा । १ । ५८ । इति एरक् । रक्षक: । इति व्युत्पत्तिलब्धोऽर्थ: ।) ग्रास: । इत्युणादिकोष: ॥ गुडक: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

गुडेरक:, पु, (गुडेर + स्वार्थे कन् ।) ग्रास: । इति हेमचन्द्र: । ३ । ८६ ॥

गुडोद्भवा, स्त्री, (गुडादुद्भवो यस्या: । यद्वा, उद्भवत्यस्मादिति उद्भव: । गुड उद्भवो उत्पत्त्याश्रयो यस्या: ।) शर्करा । इति राजनिर्घण्ट: ॥

गुण, त् क मन्त्रणे । इति कविकल्पद्रुम: ॥ (अदन्त चुरा-परं-सकं-सेट् ।) ह्रस्वी । मूर्द्धन्योपध: । गुणयति । इति दुर्गादास: ॥

गुण:, पु, (गुण्यते मन्त्र्यते मन्त्रणादिभिर्निश्चीयते राजभिरितिशेष: । गुण मन्त्रणे + घञ् ।) षट्प्रकारराजनीतिविशेष: । तद्यथा । सन्धि: १ विग्रह: २ यानम् ३ आसनम् ४ द्वैधम् ५ आश्रय: ६ ॥ (यथा, मनु: । ७ । १६० ।

"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"

एते षड्गुणास्तु नीतिविदा राज्ञा कदा केनोपायेन च प्रयोक्तव्यास्तद्विवरणादिकन्तु तत्रैव । ७ । १६१ । श्लोकमारभ्य द्रष्टव्यम् ॥) धनुराकर्षणरज्जु: । छिला इति भाषा । (यथा, रघुवंशे । ९ । ५४ ।

"अथ नभस्य इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेशरी ॥")

तत्पर्य्याय: । मौर्व्वी २ ज्या ३ शिञ्जिनी ४ शिञ्जा ५ ज्यावा ६ पतञ्चिका ७ । इति शब्दरत्नावली ॥ जीवा ८ । इति जटाधर: ॥ रज्जु: । (यथाह कश्चित् ।

"गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि ।
सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जति ॥"

सूत्रम् । यथा, आर्य्यासप्तशत्याम् । ३६६ ।

"काञ्चीगुण इव पतित: स्थितिकारण: फणी
स्फुरति ॥")

सत्वरजस्तमांसि । (यथा भागवते । १ । २ । २३ ।

"सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्त: पर: पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञा:
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्यु: ॥")

शुक्लकृष्णरक्तपीतादि: । द्रव्याश्रित: । स तु शौर्य्यादि:रसगन्धादिश्च । इत्यमर: । ३ । ३ । ४६ ॥ तस्य लक्षणं यथा,—

"सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुण: ॥"
इति मुग्धबोधम् ॥

(अस्यार्थमाह दुर्गादास: ।

"य: सत्त्वे द्रव्ये निविशते तदेवाश्रयतीत्यर्थ: । अपैति तस्मात् सत्त्वादपगच्छतीत्यर्थ: ॥ यथा श्यामता पूर्व्वमाम्रादिफलमुपगच्छति पश्चात् पक्वदशायां ततोऽपैति । पृथक् जातिषु दृश्यते भिन्नेषु पदार्थेषु दृश्यते । यथा आम्रादिफले या श्यामता दृष्टा सा कदलीफलादिषु च दृश्यते स गुण: स्यादित्यर्थ: । ननु तर्हि उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्म्माणीति उक्तकर्म्मस्वपि गुणत्वापत्ति: । यदा द्रव्य सक्रियं भवति तदा कर्म्म सत्त्वे निविशते यदा द्रव्य निष्क्रियं भवति तदा कर्म्म सत्त्वादपैति पृथग्जातिषु च दृश्यते यथा मनुष्येषु गमनादिक्रिया दृश्यते तथा पश्वादिषु च दृश्यते अत कर्म्मणो गुणत्वमपाकर्त्तुमाह आधेयश्चाक्रियाजश्चेति । आधेय उत्पाद्य: यथा पक्वमृण्मयपात्रेषु रक्ततागुण: सहि वह्निसंयोगादिना निष्पाद्यते । अक्रियाज इति । क्रियाया जायते । इति क्रियाज: । न क्रियाजोऽक्रियाज: नित्य इत्यर्थ: । आकाशादिषु महत्त्वादिर्गुण: । ततश्च गुणस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्च इति प्रकारद्वयदर्शनतया कर्म्मणो गुणत्वं न स्यादिति ज्ञापितम् कर्म्मत्व सर्व्वमेव उत्पाद्यमिति । एवञ्चेत्तर्हि द्रव्यमपि गुणोऽस्तु तत्रापि द्वौ ते धर्म्मौ वर्त्तेते । यथा तदपि द्रव्यमारम्भके अवयवद्रव्ये निविशते ततोऽपैति च यथा शरीरमवयवि तद्धि मस्तकादिष्ववयवेषु समवेतं भवतीति तद्विनाशात् ततोऽपैति । पृथग्जातिषु पश्वादिषु च दृश्यते एव द्रव्यस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्चास्ति अवयवि द्रव्यस्य उत्पाद्यत्वात् आकाशादेस्तु अनुत्पाद्यत्वादिति । अत आह असत्त्वप्रकृतिरिति । सत्त्वं द्रव्य प्रकृति:स्वभाव: । सत्त्व प्रकृतिर्यस्य स सत्त्वप्रकृति: । न सत्त्वप्रकृतिरसत्त्वप्रकृति: ॥")

विशेषाधानहेतु: सिद्धो वस्तुधर्म्म: । शुक्लादयो हि गवादिक स्वजातीयेभ्य: कृष्णगवादिभ्यो व्यावर्त्तयन्तीति साहित्यदर्पणम् ॥

अपि च ।

द्रव्यत्वव्यापकतावच्छेदकसत्त्वान्यजातिमत्त्वं तदर्थ तद्यथा । रूपम् १ रस: २ गन्ध: ३ स्पर्श: ४

सत्त्वा ५ परिमाणम् ६ पृथक्त्वम् ७ संयोगः ८ विभागः ९ परत्वम् १० अपरत्वम् ११ बुद्धिः १२ सुखम् १३ दुःखम् १४ इच्छा १५ द्वेषः १६ यत्नः १७ गुरुत्वम् १८ द्रवत्वम् १९ स्नेहः २० संस्कारः २१ धर्म्मः २२ अधर्म्मः २३ शब्दः २४। इति भाषापरिच्छेदः ॥ (सात्त्विकनायकगुणा यथा साहित्यदर्पणे। ३। ५८।
"शोभाविलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥
एतेषां विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम् ॥)
अप्रधानम्। सूदः। इन्द्रियम्। त्यागः। मौर्वी। इति मेदिनी ॥ णे। १०॥ भीमसेनः। तन्तुः। दोषान्यविशेषणम्। इति हेमचन्द्रः ॥ विद्यादि। इति विश्वः ॥ (व्यञ्जनम्। यथा, मनुः। ३।२२६।
"गुणांश्च सूपशाकाद्यान् पयोदधिघृतं मधु।
विन्यसेत् प्रयतः सम्यक् भूमावेव समाहितः ॥"
"गुणान् व्यञ्जनानि अप्रापेक्षयाऽप्राधान्यात् गुणयुक्तान् वा।" इति तट्टीकायां कुल्लूकभट्टः ॥ आवृत्तिः। यथा, महाभारते।
"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥")
व्याकरणोक्तसंज्ञाविशेषः। यथा। इकोऽरले ङण्। अस्यार्थः। इ उ ऋ ऌ एषां स्थाने ए ओ अर् अल् एते गुणसंज्ञा भवन्ति। इति मुग्धबोधम्। काव्यगुणस्य लक्षणं यथा,—
ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥
इति काव्यप्रकाशः ॥
तस्य भेदाः।
श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ॥
इति दण्डी ॥
माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश ॥
तस्य दशसंख्याभावे हेतुर्यथा,—
केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥
इति भरतमुनिः। स्त्रलुक्तगुणविशेषा उपवास-शब्दे द्रष्टव्याः ॥

गुणकः, पुं, (गुणयति आवर्त्तयतीति। गुण + ण्वुल्।) पूरकाङ्कविशेषः। यथा गुण्यान्त्यमङ्कं गुणकेन हन्यात्। इति लीलावती ॥

गुणकारः, पुं, (गुणं व्यञ्जनादिकं पाकजनितगुणं वा करोतीति। कृ + अण्। विराटनगरे छद्मवेशेन सूपकारित्वग्रहणात् पाकशास्त्रकर्त्तृत्वाच्च भीमस्य तथात्वम्।) भीमसेनः। इति त्रिकाण्डशेषः ॥ (विराटनगरेऽस्य सूपकारित्वस्वीकारकथा यथा, महाभारते। ४।२।१—४।
भीम उवाच।
"पौरोगवो ब्रुवाणोऽहं बल्लवो नाम नामतः।
उपस्थास्यामि राजानं विराटमिति मे मतिः ॥
सूपानस्य करिष्यामि कुशलोऽस्मि महानसे।
कृतपूर्व्वाणि यैरस्य व्यञ्जनानि सुशिक्षितैः ॥
तानप्यभिभविष्यामि प्रीतिं सञ्जनयन्नहम्।
आहरिष्यामि दारूणां निचयान् महतोऽपि च ॥
तत् प्रेक्ष्य विपुलं कर्म्म राजा प्रीतो भविष्यति।
अमानुषाणि कुर्व्वाणं तानि कर्म्माणि भारत ! ॥
राजानस्य परिप्रेष्या मंस्यन्ते मां यथा नृपम्।
भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः ॥")
पाचके गुणकारके च त्रि।

गुणज्ञः, त्रि, (गुणं जानातीति। गुण + ज्ञा + कः।) गुणवेत्ता। यथा,—
गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः।
अलिरेति वनात् कमलं न हि भेकस्त्वेकवासोऽपि ॥
उद्भटः ॥

गुणनिका, स्त्री, (गुण्यते पुनःपुनराम्रेड्यतीति। गुण आम्रेडने + "ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्। संज्ञायां कन् कापि अत इत्वञ्च।) नृत्यम्। नृत्याङ्गम्। पाठनिश्चयः। इति मेदिनी ॥ के १८५। (शास्त्राणां पुनः पुनरनुशीलनम्। यथा माघे। २। ७५।
"हेतुः परिच्छयस्थैर्य्ये वक्तुर्गुणनिकेव सा ॥"
माला। इत्यानन्दलहरीटीका ॥ (यथा आनन्दलहर्य्याम्। ३।
"दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती ॥")

गुणनी, स्त्री, (गण्यते पुनःपुनरनुशील्यतेऽनया। गुण + ल्युट् + ङीप्।) पाठनिश्चयः। तत्पर्य्यायः। भणितिः २ शीलनम् ३। इति त्रिकाण्डशेषः ॥

गुणनीयः, पुं, (गुण्यते पुनःपुनरनुशील्यतेऽनेन इति। गुण आम्रेडने + करणे अनीयर्।) शास्त्राभ्यासः। इति हारावली। १५०। (कर्म्मणि अनीयर्। गुणितव्ये त्रि ॥)

गुणभ्रंशः, पुं, (गुणस्य भ्रंशो विनाशः।) गुणनाशः। तत्पर्य्यायः मर्म्मन्तिका २। इति हारावली ॥ २१०॥

गुणलयनिका, स्त्री, (गुणा गुणनिर्म्मिताः पटा लीयन्तेऽस्याम्। गुण + ली + अधिकरणे + ल्युट्। स्त्रियां ङीप् कन् टापि पूर्व्वह्रस्वश्च।) वस्त्रनिर्म्मितगृहम्। तत्पर्य्यायः केणिका २ पटकुटी ३। इति हेमचन्द्रः। ३। ३४६ ॥

गुणलयनी, स्त्री, (गुणा गुणमयपटाः लीयन्ते यत्र। ली + ल्युट् + ङीप्।) गुणलयनिका। इति हलायुधः ॥

गुणवान्, [त्] पुं, त्रि, (गुणोऽविद्यतेऽस्य। गुण + मतुप् मस्य वत्वम्।) सम्बन्धी। इति त्रिकाण्डशेषः ॥ गुणविशिष्टः। यथा, "दाता दयालुर्गुणवानरः स्यात् गरे परेषामुपकारकर्त्ता।" इति कोष्ठीप्रदीपः ॥ (पुं, यदुवंशीय सुनाभस्य दौहित्रः। यथा, हरिवंशे। १५५।
"गुणवत्यपि पुत्रञ्च गुणवन्तमजीजनत् ॥"
स्त्रियां ङीप्। तस्य सुनाभस्य दुहिता। यथा, तत्रैव। १५४।
"वज्रनाभस्य तनयः सुनाभो नाम विश्रुतः।
दुहितृद्वयञ्च सुषुवे। तस्य रूपगुणान्वितम्।
एका प्रभावती नाम्ना गुणवत्यथ चापरा ॥"
गायत्रीरूपा महादेवी। यथा, देवीभागवते। १२। ६। ३२।
"गुहावासा गुणवती गुणपापप्रणाशिनी ॥"
गङ्गा। यथा, काशीखण्डे। २९। ५३।
"गूढरूपा गुणवती गुर्व्वी गौरववर्द्धिनी ॥"
अप्सरोविशेषः। यथा, तत्रैव ६ अध्याये।
"अलम्बुषा गुणवती स्थूलकेशी कलावती ॥")

गुणवृक्षकः, पुं, (गुणानां तरणीस्थरज्जूनां वृक्ष इव। तत स्वार्थे कन्।) नौकागुणबन्धनस्तम्भः। मास्तुल इति भाषा। तत्पर्य्यायः। कूपकः २। इत्यमरः। १। १०। १२।

गुणसागरः, पुं, (गुणानां सागर इव आधारस्थानम्।) ब्रह्मा। इति शब्दरत्नावली ॥ बुद्धविशेषः। इति त्रिकाण्डशेषः ॥ सकलगुणाधारश्च ॥

गुणा, स्त्री, (गुणाः सूक्ष्मतन्तवः सन्त्यस्याः। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। स्त्रियां टाप्।) दूर्व्वा। मांसरोहिणी। इति राजनिर्घण्टः ॥

गुणाकरः, पुं, (गुणानामाकर इव। गुणबाहुल्यात् तथात्वम्।) बुद्धः। इति शब्दरत्नावली ॥ (महादेवः। यथा, महाभारते। १३। १७। ४७।
"गणकर्त्ता गणपतिर्ह्यकालो लोकधाता गुणाकरः ॥")
गुणयुक्ते त्रि। यथा,—
"तपस्विभिरतस्याथ तस्य पुत्त्रो गुणाकरः।
सत्यवान् नाम देवर्षे। मनसा सम्वृतो मया ॥"
इति वनपर्व्वणि सावित्रीव्रतकथा ॥

गुणित, त्रि, (गुण्यते स्म। गुण आम्रेडने + क्त।) पूरितः। तत्पर्य्यायः। आहतः २। इत्यमरः। ३। १। ८८ ॥ यथा। पञ्चधा गुणिता द्वादशसंख्या षष्टिर्भवतीत्यादि इति भरतः ॥ (गुणोऽस्य जातः। तारकादिभ्य इतच्।) पिञ्जितः। इति शब्दरत्नावली ॥

गुणी, [न्] पुं, (गुणो ज्या विद्यतेऽस्य। गुण + इनि।) धनुः। इति त्रिकाण्डशेषः ॥ (गुणास्तु दाक्षिण्यादयो विद्यन्तेऽस्येति।) गुणविशिष्टे त्रि। यथा। गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद्यस्य। तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम ॥ इति हितोपदेशः ॥

गुणीभूत, त्रि, (अगुणो गुणोभूतः। गुण + भू + क्तः। अभूत तद्भावे च्विः।) अप्रधानीभूतः। यथा। कृतपूर्व्वीकटमित्यत्र समासनिविष्टत्वाद्गुणीभूतास्वपि विशेषयोधिका द्वितीया नोक्ता। इति सुषेणकविराजः ॥ (तथाच महाभारते। २। २५। ११।
"सर्व्वैरपि गुणैर्युक्तो निर्व्वीर्य्यः किं करिष्यति।
गुणीभूता गुणाः सर्व्वे तिष्ठन्ति हि पराक्रमे ॥")

गुणीभूतव्यङ्ग्यः, पु, (गुणीभूतमप्रधानीभूतं व्यङ्ग्यं व्यञ्जना शक्तिर्यत्र ।) काव्यविशेषः । यथा,—
"अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ॥*
तस्याष्टौ भेदाः यथा ।
"अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।
व्यङ्ग्यमेव गुणीभूतव्यङ्ग्यस्याष्टौ भिदा मताः ॥*॥
अगूढं यथा ।
स्फुटतया वाच्यायमानमिति अपराङ्गम् । यथा अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अङ्गं रसादि अनुरणनरूपं वा ॥ * ॥
वाच्यसिद्ध्यङ्गं यथा ।
आपाततः प्रतीतस्य वाच्यार्थस्य प्रतिसन्धीयमानानुपपत्तिनिरासकं व्यङ्ग्यम् ॥ * ॥
अस्फुटं यथा ।
विदग्धैरपि क्लेशगम्यं सन्दिग्धप्राधान्यं यथा प्राधान्यमत्र रसादिव्यञ्जकत्वेन तथा च प्रतीतस्य रसादेर्व्यञ्जकं किं वाच्यं किंवा व्यङ्ग्यमित्युत्तरकालिकसन्देहविषयत्वं तत्त्वम् ॥ * ॥
तुल्यप्राधान्यं यथा ।
अत्रापि रसादिव्यञ्जकत्वेनैव प्राधान्यं व्यङ्ग्यस्य निश्चितत्वेन तेन तेन वाच्येन तुल्यार्थो बोध्यः ॥*
काक्वाक्षिप्तं यथा ।
आक्षिप्तमत्र प्रागेव पदार्थविधया उपस्थानम् ॥*
असुन्दरं यथा ।
"रसादिव्यञ्जने वाच्यसुखनिरीक्षकं व्यङ्ग्यम् ।"
इति काव्यप्रकाशः ॥
(इत्यत्र साहित्यदर्पणकारेण काव्यभेदमाश्रित्य यदुक्तं तद्यथा । ४ । १ ।
"काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यञ्चेति द्विधा मतम् ।
वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ॥"
तत्रैव च । ४ । १६ ।
"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ।
"अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति ॥" ततस्तत्र स्यादितराङ्गं काक्वाक्षिप्तञ्चेत्याद्यष्टौ भेदानुक्त्वा इतरस्य रसादेरङ्गं रसादिव्यङ्ग्यं यथेत्यभिधाय क्रमश इतराङ्गादेरुदाहरणानि प्रदर्शितानि । यथा,—
"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥
अत्र शृङ्गारः करुणस्याङ्गम् ।
"मानोन्नतां प्रणयिनीमनुनेतुकाम-
स्त्वत्सैन्यसागररवोद्गतकर्णतापः ।
हा ! हा ! कथं नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोकः ॥
अत्रौत्सुक्यत्राससन्धिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभावः ।
जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृता लङ्काभर्त्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥"
अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते । वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्व्वता तद्गोपनमपाकृतम् । तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम् । काक्वाक्षिप्तं यथा,—
मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥
अत्र 'मथ्नाम्येवेत्यादि' व्यङ्ग्यं वाच्यस्य निषेधस्य सह भावेनैव स्थितम् ।
दीपयन् रोदसीरन्ध्रमेष ज्वलति सर्व्वतः ।
प्रतापस्तव राजेन्द्र ! वैरिवंशदवानलः ॥
अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः । प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम् । 'हरस्तु किञ्चित् परिवृत्तधैर्य्यश्चन्द्रोदयारम्भ इवाम्बुराशिः । उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥' इत्यादौ' विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः ।
ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यस्य वो मित्रमन्यथा दुर्म्मनायते ॥
अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।
सन्धौ सर्व्वस्वहरणं विग्रहे प्राणनिग्रहः ।
अल्लापदीननृपतौ न सन्धिर्न च विग्रहः ॥
अत्र अल्लापदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं व्युत्पन्नानामपि झटिति स्फुटम् ।
अनेन लोकगुरुणा सतां धर्म्मोपदेशिना ।
अहं व्रतवती स्वैरमुक्तेन किमतः परम् ॥
अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यक् योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम् ।
वाणीरकुडङ्गुड्डीणसउणिकोलाहलं
सुणन्तीए ।
घरकम्मवावडाए वहूए सीअन्ति अङ्गाइं ॥"
अत्र दत्तसङ्केतः कश्चिल्लतागृहं प्रविष्टः इति व्यङ्ग्यात् 'सीदन्त्यङ्गानि' इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरं किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव । काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् । तदुक्तं ध्वनिकृता ।
अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः ॥
यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः । यथा,—
दृष्ट्या केशवगोपरागहृतया किञ्चिन्न दृष्टं मया
तेनात्र स्खलितास्मि नाथ । पतितां किं नाम
नालम्बसे ?
एकस्त्वं विषमेषु खिन्नमनसां सर्व्वाबलानां गति-
र्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्व्वश्चिरम् ॥"
अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां 'सलेशमिति' पदेन स्फुटतयावभासः । सलेशमिति पदस्य परित्यागे ध्वनिरेव । किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः । तदुक्तं तेनैव ।
प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्य्यालोचनया पुनरिति ॥
यत्र च ।
यत्रोन्मादानां प्रमदाजनाना-
मभ्रंलिहः शोणमणीमयूखैः ।
सन्ध्याभ्रमं प्राप्नुवता मकाण्डे-
ऽप्यनङ्गनेपथ्यविधिं व्यधत्त ॥
इत्यादौ रसादीनां नगरीवृत्तादि वस्तुमात्रेऽङ्गत्वम । तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः । तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डिदासपादैः । काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वादिति ॥")

गुणेश्वरः, पु (गुणैर्हेतुभिरीश्वरःश्रेष्ठः पूज्य इत्यथः । विविधगुणशालिद्रव्यजातोत्पादकतयास्य तथात्वम् ।) चित्रकूटपर्व्वतः । इति शब्दरत्नावली ॥ गुणपतौ त्रि ॥ (गुणानां नानाविधपुरुषोपयोगिगुणाना ईश्वरः प्रभुः स्वामी वा शान्तदान्तादिगुणशाली पुरुष इत्यर्थः । गुणानां सत्त्वरजस्तमसां त्रयाणां मायागुणानामिति यावत् ईश्वरः नियन्ता । परमेश्वरः ॥)

गुणोत्कर्षः, पु, (गुणानां उत्कर्षः उत्कर्षणं प्राधान्यमित्यर्थः ।) गुणप्राधान्यम् । (यथा, गोः रामायणे । १ । २५ । १८ ।
"स्वभावजैर्गुणैर्दिव्यैः कामजैर्व्वहुलैर्वृतः ।
भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः ॥")
अतिशयः । तत्पर्य्यायः । परभागः २ । इति हेमचन्द्रः । ६ । ११ ॥

गुणोत्कीर्त्तनं, क्ली, (गुणानां उत्कीर्त्तनं कथनम् ।) यद्वा गुणैर्गुणसूचकवाक्यैरुत्कीर्त्तनम् । गुणकथनम् । विरहकालीनकान्ताविषयकप्रशंसाप्रतिपादनम् । इति रसमञ्जरी ॥ कान्तापदमत्रोपलक्षणम् ॥

गुण्ठितः, त्रि, (गुठि वेष्टने + कर्म्मणि क्तः ।) गुण्डितः । इत्यमरटीकायां रमानाथः ॥ आवृतः । रूषितः । धूल्यादिभिर्धूसरित इत्यर्थः । यथा, गो. रामायणे । ६ । ८२ । ८ ।
"तन्न युद्धेन मे कार्य्यं न प्राणैर्नापि सीतया ।
लक्ष्मणं निहतं दृष्ट्वा भ्रातरं पांशुगुण्ठितम् ॥")

गुण्डः, पु, (गुडि वेष्टने + अच् ।) तृणभेदः । यस्य कन्दः कशेरु । तत्पर्य्यायः । काण्डगुण्डः २ दीर्घकाण्डः ३ त्रिकोणकः ४ छत्रगुच्छः ५ असिपत्रः ६ नीलपत्रः ७ त्रिधारकः ८ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कफपित्तातिसारदाहरक्तनाशित्वम् । अस्य मध्ये स्थूलतरोऽधिकगुणः । इति राजनिर्घण्टः ॥

गुण्डकः, पुं, (गुण्ड+सञ्ज्ञायां कन् । गुडि+ण्वुल् वा ।) मलिनः । धूली । कलोक्तिः । स्नेहपात्रम् । इति मेदिनी । के । ८३ ॥

गुण्डकन्दः, पुं, (गुण्ड इत्याख्यया प्रसिद्धः कन्दः । गुण्डानां कन्द इति केचित् ।) कशेरु । इति राजनिर्घण्टः ॥

गुण्डारोचनिका, स्त्री, (गुण्डाऽपि रोचना हरिद्रा इव । ततः इवार्थे कन् टाप् कापि अत इत्वञ्च ।) वृक्षविशेषः । कमलागुँडि इति भाषा । तत्-पर्य्यायः । काम्पिल्लकः २ रक्ताङ्गा ३ । इति रत्नमाला ॥

गुण्डाला, स्त्री, (गुण्डाल+टाप् । यद्वा गुण्डां चूर्णं आलाति आदत्ते इति । आ+ला+कः । स्त्रियां टाप् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । जलोद्भूता २ गुच्छवधा ३ जलाश्रया ४ । अस्याः गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । शोथव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

गुण्डासिनी, स्त्री, (गुण्ड इत्याख्यया आस्ते वर्त्तते इति । आस्+णिनि । गुण्डा सती आस्ते इत्येके ।) तृणभेदः । तत्पर्य्यायः । गुण्डाला २ गुडाला ३ गुच्छमूलिका ४ चिपिटा ५ तृण-पत्री ६ यवासा ७ पृथुला ८ विष्टरा ९ । अस्याः गुणाः । कटुत्वम् । पित्तदाहश्रमश्वयथुव्रणदोष-नाशित्वम् । तिक्तत्वम् । उष्णत्वञ्च । इति राज-निर्घण्टः ॥

गुण्डिकः, पुं, स्त्री (गुण्डोऽस्त्यस्येति । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) गुण्डकः । तण्डुलादिचूर्णम् । गुँडा इति भाषा । यदुक्तं अनन्तव्रतकथायाम् ।

"गुण्डिकैः सितपीतैश्च मण्डयन्ती गृहाङ्गनम् ॥"

गुण्डिचा, स्त्री, (गुण्डिभिर्गुण्डिकैः सितपीतादि-रङ्गैः प्रस्तरेष्टकादिचूर्णैर्वा चीयते उपचीयते इति । चि+घञर्थे कः, ततष्टाप् । गुण्डिचा इत्या-ख्यया प्रसिद्धा वा । यद्वा गुण्ड्यते अवगुण्ठ्यते मत्तैर्जनैर्भिरस्याः दर्शक इति शेषः । गुडि वेष्टने इति धातोर्निपातनात् चकारागमे साधुः । इय व्युत्पत्तिस्तु गुण्डिचाविवरणदर्शनेरेवबोध्यथा ।) श्रीपुरुषोत्तमदेवस्य रथारोहणानन्तरवासार्थ-मण्डपविशेषः । यथा,—

"मण्डपे वासयेद्देवान् गुण्डिचाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ॥
रत्नस्तम्भमये स्वर्णवेदिकोपस्कृतान्तरे ।
प्राचीरवलयावीते सुधालेपससुज्ज्वले ॥
साधुसोपानघटिते चतुर्द्वारोपशोभिते ।
त्रैलोक्याडम्बरयुते महावेद्यां महाकृतौ ॥
प्रादुर्भावो महेशस्य यात्राभूद्रावणांशकः ॥ * ॥
तस्यां श्रीजगन्नाथदेवस्य दर्शनफलं यथा,—
"सिन्धुतीर्थतटे तस्मिन् सप्ताहानि जनार्द्दनः ।
तिष्ठेत् पुरा स्वयं राज्ञे वरमेतत् समादिशत् ॥
त्तीर्थतीरे राजेन्द्र ! स्थास्यामि प्रतिवासरम् ।
सर्व्वतीर्थानि तस्मिंश्च स्थास्यन्ति मयि तिष्ठति ॥
तत्र स्नात्वा विधानेन तीर्थे तीर्थोपपावने ।
सप्ताहं ये प्रपश्यन्ति गुण्डिचामण्डपे स्थितम् ॥
माञ्च रामं सुभद्राञ्च मम सायुज्यमाप्नुयुः ॥" * ॥

तस्या नामकरणं यथा, उत्कलखण्डम् ।

"अत ऊर्द्ध्वं प्रवक्ष्यामि महावेदीमहोत्सवम् ।
अज्ञानतिमिरान्धोऽपि येन भास्वत्पदं भजेत् ॥
सर्व्वपापरजःशान्त्यै पूज्यत्वात् सर्व्वदैवतैः ।
गुण्डिचाख्यापि सा यात्रा जायते जोऽवगुण्ठ-
नात् ॥"

गुण्डितः, त्रि, (गुडि वेष्टने+कर्म्मणि क्तः ।) धूलि-गुण्डकेनैव ध्वंसितः । तत्पर्य्यायः । रूषितः २ । इत्यमरः । ३ । १ । ९८ ॥ चूर्णीकृतश्च ॥

गुत्थः, पुं, (गुत्स+पृषोदरादित्वात् साधुः ।) गवेधुका । इति रत्नमाला ॥

गुत्थकं, क्ली, (गुत्थ+सञ्ज्ञायां कन् । यद्वा गुच्छ इव गुच्छेन वा कायतीति । कै+कः । पृषोदरात् साधुः ।) ग्रन्थिपर्णम् । इति रत्नमाला ॥

गुत्सः, पुं (गुध्यते तृणपत्रपुष्पादिभिः परिवेष्ट्यते-ऽसौ इति । गुध् परिवेष्टने+"उन्दिगुधि-कुषिभ्यश्च ।" उणां । ३ । ६८ । इति कर्म्मणि सः किच्च ।) स्तवकः । स्तम्बः । (हारादौ तु गुध्यते परिवेष्ट्यते कण्ठवक्षःस्थलादिकमनेन ।) द्वात्रिं-शद्यष्टिकहारः । ग्रन्थिपर्णवृक्षः । इति मेदिनी । से । २ ॥

गुत्सकः, पुं, (गुत्स+स्वार्थे कन् ।) स्तवकः । इति शब्दरत्नावली ॥ ग्रन्थपरिच्छेदः । इति त्रिकाण्डशेषः ॥

गुत्सकपुष्पः, पुं, (गुत्सकानि स्तवकीभूतानि पुष्पाणि यस्य यत्र वा ।) सप्तच्छदवृक्षः । इति जटाधरः ॥

गुत्सार्द्धः, पुं, (गुत्सं गुच्छं प्राप्य आश्रित्य वा ऋध्नोतीति । ऋध् + अच् । गुत्सं आर्द्धयति वर्द्धयति इति । ऋध्+णिच् अच् वा । यद्वा गुत्सस्य अर्द्धं, अर्द्धं सर्व्वांशकः ।) गुच्छार्द्धः । चतु-र्व्विंशतियष्टिकहारः । इत्यमरटीकायां भरतः ॥

गुद, ङ खेलने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अकं-सेट् ।) ङ, गोदते । इति दुर्गादासः ॥

गुदं, क्ली, (गोदते खेलति चलतीत्यर्थः अपान-सञ्ज्ञकवायुः अनेन । गुद्+"इगुपधेति ।" ३।१। १३५ । इति कः ।) मलत्यागद्वारम् । तत्-पर्य्यायः । अपानम् २ पायुः ३ । इत्यमरः । २ । ६ । ७३ ॥ गुह्यम् ४ गुदवर्त्म ५ । इति जटाधरः ॥ (यथा, मनौ । ८ । २८२ ।

"अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदम् ॥")

गुदकीलः, पुं, (गुदस्य अपानस्य मलद्वारस्येत्यर्थः यद्वा गुदे कील इव ।) अर्शोरोगः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"आनाहमेदो गुदकीलहिक्का-
श्वासापहं शोणितपित्तकृच्च ॥")

गुदकीलकः, पुं, (गुदकील+स्वार्थे कन् ।) गुद-कीलः । इति हलायुधः ॥

गुदग्रहः, पुं, (गुदस्य ग्रह इव गुदमाश्रित्य ग्रह-वत् प्रवर्त्तते इत्यर्थः । यद्वा गुदं मलद्वारमधि-कृत्य आभ्यन्तरिकस्थानं गृह्णाति धारयतीति ग्रह+अच् ।) उदावर्त्तरोगः । इति हेम-चन्द्रः । ३ । १३३ ॥

गुदभ्रंशः, पुं (गुदस्य भ्रंशोऽस्मात् । गुदं मग भ्रश्यतेऽस्मादिति वा ।) मलद्वारनिर्गमरोगः । तस्य लक्षणम् ।

"प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः ।
रूक्षदुर्व्वलदेहस्य गुदभ्रंशं तमादिशेत् ॥"
इति माधवकरः ॥

तच्चिकित्सा यथा,—

"गुदभ्रंशे गुदं स्विन्नं स्नेहेनाक्तं प्रवेशयेत् ।
प्रविष्टं रोधयेद्यत्नाद्गाढसच्छिद्रचर्म्मणा ॥
पद्मिन्याः कोमलं पत्रं यः खादेच्छर्करान्वितम् ।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः ॥
मूषिकाणां वसाभिर्व्वा गुदभ्रंशे प्रलेपनम् ।
सुस्विन्नमूषिकामांसेनाथवा स्वेदयेद्गुदम् ॥
वृश्चाम्लानलचाङ्गेरीबिल्वपाठायवाग्रजम् ।
तक्रेण शीलयेत् पायुं भ्रंशार्त्तोऽनलदीपनम् ॥
मूषिकान् दशमूलानि गृह्णीयादुभयं समम् ।
तयोः क्वाथेन कल्केन पचेत्तैलं यथोदितम् ॥
अभ्यङ्गात्तस्य तैलस्य गुदभ्रंशो विनश्यति ।
विनश्यति तथा तेन गुदमूलभगन्दरः ॥"
इति मूषकतैलम् । इति भावप्रकाशः ॥

(यदा गुदं निरस्येत तदा कुर्य्यात् क्रियामिमाम् ।
सहचर्य्यावलानाञ्च रसो ग्राह्यो घृतं पयः ॥
पक्वा घृतेन लेपः स्यात् तस्य सेकः प्रशस्यते ।
अरणीपल्लवक्वाथो वार्य्यं लोष्ट्रं सचन्दनम् ॥
शोषाय्य वह्निसदृशं सहसा नरस्य
निर्व्वाप्य काञ्जिकमधो विदधीत तद्वत् ।
सौख्यञ्च साम्यगुदलेपनकं प्रशस्तं
स वेशमध्यगुदतो दृढबन्धनं स्यात् ॥"
इति गुदभ्रंशः ॥
इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये ॥ * ॥

अथास्य चिकित्सा ।

"गुदनिःसरणे शूले पानमम्लस्य सर्पिषः ।
प्रशस्यते निरामाणामथवाप्यनुवासनम् ॥
चाङ्गेरी कोलदध्यम्लनागरक्षारसंयुतम् ।
घृतमुत्क्वथितं पेयं गुदभ्रंशरुजापहम् ॥"
इति चाङ्गेरीघृतम् ॥ * ॥

"सचव्यपिप्पलीमूलं सव्योषविड्दाडिमम् ।
पेयमम्लं घृतं युक्त्या सधान्याजाजिचित्रकम् ॥
दशमूलोपसिद्धं वा सबिल्वमनुवासनम् ।
शताह्वा शटी बिल्वैर्व्वा वचया चित्रकेण वा ॥
स्तब्धभ्रष्टगुदे पूर्व्वं स्नेहस्वेदौ प्रयोजयेत् ॥"
इति चरके चिकित्सास्थाने दशमेऽध्याये ॥)

गुदाङ्कुरः, पुं, (गुदे अङ्कुरः प्ररोह इव गुदमधि-कृत्य प्ररोहवदुत्पद्यते वलिरित्यर्थः ।) अर्शो-रोगः । इति हेमचन्द्रः ॥ ३ । १३२ ।
("गुदाङ्कुरा बद्धगिलाः ।" इति वाभटे निदान-स्थाने सप्तमेऽध्याये ॥)

गुर, ई य ङ वधे । गत्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-सेट् ॥)

गुर, ङ ई शि उद्यमे । इति कविकल्पद्रुमः ॥ (तुदां-आत्मं-अकं-सेट् ।) ह्रस्वी । ङ शि, गुरते अगुरिष्ट । ई, गूर्णः । इति दुर्गादासः ॥

गुरणं, क्ली, (गुर्+भावे ल्युट् ।) उद्यमः । इत्यमरः । ३ । २ । ११ ॥ अस्य रूपान्तरे गूरणं गोरणं इति भरतः ॥

गुरुः, पुं (गृणाति उपदिशति वेदादिशास्त्राणि इन्द्रादिदेवेभ्यः इति । यद्वा गीर्य्यते स्तूयते देवगन्धर्व्वमनुष्यादिभिः । गॄ+"कृग्रोरुच ।" उणां । १ । २४ । इति उत् ।) बृहस्पतिः । (यथा, देवीभागवते । १ । ११ । ४४ ।
"इत्याश्वास्य गुरुं शक्रो दूतं वक्तु विचक्षणः ॥")
निषेकादिकृत् । इत्यमरः । ३ । ३ । १६१ ॥ (यथा, मनुः । २ । १४२ ।
"निषेकादीनि कर्म्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥")
निषेको गर्भाधानं आदिना सीमन्तोन्नयनादेर्मन्त्रविद्यादानादेश्च ग्रहणम् । तत्कर्त्ता पित्रादिर्गुरुः स्यात् । इति भरतः ॥ मन्त्रदाता । तस्य वर्ज्जनीयत्वं यथा, कालिकापुराणे ५४ अध्याये ।
'अभिशप्तमपुत्रञ्च सन्नद्धं कितवं तथा ।
क्रियाहीनमकल्पाङ्गं वामनं गुरुनिन्दकम् ॥
सदा मत्सरसंयुक्तं गुरुं मन्त्रेषु वर्ज्जयेत् ।
गुरुर्मन्त्रस्य मूलं स्यान्मूलशुद्धौ सदा शुभम् ॥"
अपि च । क्रियासारसमुच्चये ।
'श्वित्री चैव गलत्कुष्ठी नेत्ररोगी च वामनः ।
कुनखी श्यावदन्तश्च स्त्रीजितश्चाधिकाङ्गकः ॥
हीनाङ्गः कपटी रोगी बह्वाशी बहुजल्पकः ।
एतैर्दोषैर्व्विहीनो यः स गुरुः शिष्यसम्मतः ॥"
इति तन्त्रसारः ॥ * ॥

गुरुवर्गो यथा,—
'उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ।
मातामही मातुलानी तथा मातुश्च सोदरा ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः ॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ।
गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ॥
नैतैरुपविशेत् सार्द्धं विवदेन्नात्मकारणात् ।
जीवितार्थमपि द्वेषाद्गुरुभिर्नैव भाषणम् ॥
उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः ।
गुरूणामेव सर्व्वेषां पूज्याः पञ्च विशेषतः ॥
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ।
यो भावयति या सूते येन विद्योपदिश्यते ॥
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ।
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ॥
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ।
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ॥
पिता माता च संप्रीतौ स्यातां पुत्त्रगुणैर्यदि ॥
स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ।
नास्ति पितृसमो देवो नास्ति मातृसमो गुरुः ॥
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ।
तयोर्न्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ॥
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ।
वर्ज्जयित्वा मुक्तिफलं नित्यं नैमित्तिकं तथा ॥
धर्म्मसारः समुद्दिष्टः प्रेत्यानन्तफलप्रदः ।
सम्यगाराध्य वक्तारं विसृष्टस्तदनुज्ञया ।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चाप्याप्नुते दिवि ॥
यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते ।
तेन दोषेण स प्रेत्य निरयं घोरमृच्छति ॥
पुंसा वर्त्मनिविष्टेन पूज्यो भक्त्या तु सर्व्वदा ।
अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवम् ॥
ये नरा भर्तृपिण्डार्थं स्वान् प्राणान् संत्यजन्ति हि ।
तेषामथाक्षयांल्लोकान् प्रोवाच भगवान् मनुः ॥
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।
असावहमिति ब्रूयुः प्रत्युत्थाय यवीयसः ॥"
इति कूर्म्मपुराणे उपविभागे ११ अध्यायः ॥ * ॥

तस्य परीक्षा यथा ।
"सदाचारः कुशलधीः सर्व्वशास्त्रार्थपारगः ।
नित्यनैमित्तिकानाञ्च कार्य्याणां कारकः शुचिः ॥
अपर्व्वमैथुनपरः पितृदेवार्च्चने रतः ।
गुरुभक्तो जितक्रोधो विप्राणां हितकृत् सदा ॥
दयावान् शीलसम्पन्नः सत्कुलीनो महामतिः ।
परदारेषु विमुखो दृढसङ्कल्पको द्विजः ॥
अन्यैश्च वैदिकगुणैर्युक्तः कार्य्यो गुरुर्नृपैः ।
एतैरेव गुणैर्युक्तः पुरोधाः स्यान्महीभुजाम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥

शिष्यकृतपापं गुरुं स्पृशति यथा ।
"मन्त्रिपापञ्च राजानं पतिं जायाकृतं तथा ।
तथा शिष्यकृतं पापं प्रायो गुरुमपि स्पृशेत् ॥
प्राय इति गुरुणा शिष्यः सम्यग्बोधितोऽपि तद्वाक्यमनादृत्य पापञ्चेदाचरति तदा तत् पापं गुरौ न व्याप्नोतीत्यर्थः ॥
वर्णाश्रमाणां सर्व्वेषामाचारः सङ्गतिप्रदः ।
गुरुस्त्रिवारमाचारं बोधयेत् कुलनायिके ! ॥
न गृह्णाति हि शिष्यश्चेत्तदा पापं गुरोर्न हि ।
इति कुलार्णववचनात् । इति शिवार्च्चनचन्द्रिका ॥

मन्त्रदगुरोर्लक्षणं यथा ।
"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य हारकः ।
उकारो विष्णुरव्यक्तस्त्रितयात्मा गुरुः परः ॥
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥
उद्धर्त्तुं चैव संहर्त्तुं समर्थो ब्राह्मणोत्तमः ।
तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते ॥" * ॥

देशभेदेन तस्य विशेषो यथा ।
"मध्यदेशकुरुक्षेत्रनाटकोङ्कणसम्भवाः ।
अन्तर्व्वेदिप्रतिष्ठाना आवन्त्याश्च गुरूत्तमाः ॥
गौडाः शाल्वोद्भवाः सौरा मगधाः केरलास्तथा ।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः ॥
कर्णाटनर्म्मदारेवाकच्छातीरोद्भवास्तथा ।
कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चाधमा मताः ॥
वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके ।
शैवः शाक्तोऽपि सर्व्वत्र दीक्षास्वामी न संशयः ॥"
इति तन्त्रसारः ॥ * ॥
"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्व्वत्राभ्यागतो गुरुः ॥"
इति चाणक्यम् ॥
कपिकच्छुः । इति राजनिर्घण्टः ॥ द्विमात्रः । दीर्घः । इति शब्दरत्नावली ॥ (गृणाति उपदिशति वेदान् । गॄ+"कृग्रोरुच ।" उणां ।१।२४। इति उत् । वेदाध्यापयिताचार्य्यः । यथा मनुः । ३ । १ ।
"षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥"
गृणाति उपदिशति किञ्चिदपि यः । उपाध्याय इत्यर्थः । यथा, मनुः । २ । १४९ ।
"अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥"
गीर्य्यते स्तूयतेऽसौ ज्ञानतपोवृद्धत्वात् । ज्ञानप्रभावान्वितत्वात् तपोबलप्राधान्याद् वा पूज्यतमो महात्मा । यथा, मनुः । २ । १३० ।
"मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।"
"भूयिष्ठाः खलु गुरव इत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरपि हारीतेन गुरुत्वकीर्त्तनात् तयोश्च कनिष्ठयोरपि सम्भवात् तद्विषयोऽयं गुरुशब्दः ।"
इति टीकाकृत् कुल्लूकभट्टः । गृणाति उपनीयसन्ध्योपासनाचारादीनि कर्म्माणि उपदिशति । उपनेता सन्ध्योपासनाद्युपदेष्टा च । यथा, मनुः । २ । ६९ ।
"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च ॥"
पिता । यथा, रामायणे । २ । ७९ । २ ।
"गतो दशरथः स्वर्गं यो नो गुरुतरो गुरुः ।"
राजचक्रवर्त्ती सम्राट् । यथा, रघुः २ । ६८ ।
"गुरुर्नृपाणां गुरवे निवेद्य ।"
गिरति अज्ञानमन्धतामिस्ररूपेणाविद्यां नाशयतीत्यर्थः । गीर्य्यते स्तूयते जीवनिकरैरिति वा । गॄ वा उत् । विष्णुः । यथा, महाभारते । १३ । १४९ । ६५ ।
"आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥"
शिवः । तत्रैव । १७ । १३० ।
"महासम्भूर्द्दा देवेन्द्रः सर्व्वदेवमयो गुरुः ।"
ब्रह्मा । माननीयः । एकेनैव श्लोकेनैतयोरुदाहरणं यथा, काशीखण्डे । ६६ । ७१ ।
"बिभ्रत् सहजकाठिन्यं जातो गौरीगुरुर्गुरुः ।
शम्भुं प्रपूज्य सुतया सजा विश्वगुरोरपि ॥"
विश्वगुरोर्ब्रह्मणोऽपि गुरुर्माननीयः पूज्यो वा इति तट्टीका ।
उपदेष्टृ अर्थे यथा सुश्रुतसूत्रस्थाने तृतीयाध्याये
"अथ वत्स ! तदेतदध्येय यथा तथोपधारय

मया प्रोच्यमानम् । अथ शुश्रूषये कृतोत्तरासङ्गाया-व्याकुलायोपस्थितायाध्ययनकाले शिष्याय यथाशक्ति गुरुरुपदिशेत् पदं पादं श्लोकं वा ते च पद-पाद-श्लोका भूयः क्रमेणानुसन्धेया एवमेकैकशो घटयेदात्मनाप्यनुपठेत् ।" तत्रैव चतुर्थे
"शास्त्रं गुरुमुखोद्गीर्णमादायोपास्य चासकृत् ।
यः कर्म्म कुरुते वैद्यः स वैद्योऽन्ये तु तस्कराः ॥")
गुरुः, त्रि, (गीर्य्यते सूयते महत्त्वात् । गॄ+कुगोरुच" उणां ।१।२४। इति उत्) महान् । (यथा, ऋग्वेदे ।४।५।६। "इदं मे अग्ने । कियते पावकामिनते गुरुं भारं न मन्म।") दुर्ज्जरः । अलघुः । इति मेदिनी ॥ रे ।२५॥ (यथा, मयतन्त्रे ।२।१६६ "प्राप्तो बन्धनमप्ययं गुरुरपगतस्तावत् त्वया मे हृतः ।" पराक्रान्तः । यथा, पञ्चतन्त्रे । ३ । २८ । "सोत्साहशक्तिसम्पन्नो हन्याच्छत्रुं लघुर्गुरुम् ।"
भारायमाणः । यथा, रघु. । १२ । १०२ ।
"अथ मदगुरुपक्षैर्लोकपालद्विपानाम् ।"
अथ मदेन गजगण्डस्थास्रसंक्रान्तेन गुरुपक्षैः भारायमाणपक्षैः अलिवृन्दैः ।" इति टीकायां मल्लिनाथः । अतिशयः । यथा, मेघदूते ।१।१।
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तं गमितमहिमा वर्षभोग्येण भर्त्तुः ॥")
गुरुक्रमः, पुं, (गुरुरेव क्रमः पारम्पर्य्यं यत्र ।) इतिह । पारम्पर्य्योपदेशः । इति हलायुधः ॥
गुरुघ्नः, पु, (गुरून् पराक्रान्तानपि यज्ञघ्नान् राक्षसादीन् हन्ति निराकरोतीत्यर्थः । हन्+टक् ।) गौरसर्षपः । इति राजनिर्घण्टः । गुरुहन्तरि त्रि ॥
गुरुचण्टकः, पु, (गुरुं दुर्ज्जरवस्त्रादिकं रुचटति चोरयति हरतीति यावत् । गुरुं गुरुतां दुर्ज्जरतां रुचटतीत्येके रुचटदस्तेये+ण्वुल् ततः पृषोदरात् रुलोपे साधुः ।) तिलमयूरः । इति त्रिकाण्डशेषः ॥
गुरुतल्पगः, पुं, (गुरोः पितुराचार्य्योपाध्यायादेर्वा तल्पं शय्यां पत्नीमित्यियावत्ः गच्छति इति गम्+डः ।) विमातृगन्ता । यथा,—
"गुरुतल्पगः सुरापश्च रुक्मस्तेयथ विप्रहा ।
महापातकिनस्त्वेते संसर्गी चैव पञ्चमः ॥
इति प्रायश्चित्तविवेकः ॥
(यथा, मनुः । ८ । २३५ ।
"ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः ।
एते सर्व्वे पृथग्ज्ञेया महापातकिनो नराः ॥"
एतस्य नरकभोगावसाने पुनर्गृहीतमनुष्यदेहस्य फलं यथा, तत्रैव । ११ । ४८ ।
"ब्रह्महा क्षयरोगित्वं दौश्चर्म्म्यं गुरुतल्पगः ।")
गुरुतालः, पु, (गुरुः अपेक्षाकृतदीर्घकालव्यापी तालः ।) तालविशेषः । यथा,—
"एक एव गुरुर्यत्र गुरुतालः स कथ्यते ।
अपरं नियमं विना ॥" इति सङ्गीतदामोदरः ।
गुरुत्वं, क्ली, (गुरोर्भावः । "त्वतलौ" इति त्वप्रत्ययस्तत, त्वान्तं क्लीवमिति क्लीवत्वम् ।) महत्त्वम् । गुरुता । (यथा, भाषापरिच्छेदे ।३१)
"स्पर्शादयोऽष्टौ वेगाख्य गुरुत्वञ्च द्रवत्वकम् ।")
अलघुता । यथा,—
"अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यात् नित्ये नित्यमुदाहृतम् ॥
तदेवासमवायि स्यात् पतनाख्ये तु कर्म्मणि ।"
इति भाषापरिच्छेदः ॥
(आधिक्यम् । यथा, रघु. । २ । १८ ।
"गुर्व्विर्गुरुत्वाद्वपुषो नरेन्द्रः ।" वपुषो गुरुत्वात् आधिक्यात् इति मल्लिनाथस्तट्टीकायाम् । पूज्यत्वम् । यथा, तत्रैव । १० । ६४ ।
"मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ।")
गुरुदैवतः, पु, (गुरुर्वृहस्पतिर्दैवतमस्येति ।) पुष्यनक्षत्रम् । इति हेमचन्द्रः । २ । २५ ॥
गुरुपत्रं, क्ली, (गुरुपाके दुर्ज्जरं पत्रं पत्राकारफलकमस्य ।) वङ्गम् । इति हेमचन्द्रः ॥ ४ । १०८ ॥
गुरुपत्रा, स्त्री, (गुरु सेवने दुर्ज्जरं पत्रं पर्णमस्याः ।) तिन्तिडीवृक्षः । इति शब्दरत्नावली ॥
गुरुमर्द्दलः, पुं, (गुरुः मर्द्दलः इति नित्यकर्मधारयः ।) डिण्डिमवाद्यम् । इति शब्दरत्नावली ॥
गुरुरत्नं, क्ली (गुरु गौरवान्वितं महार्घमित्यर्थः गुरुत्वाद्गुरु वा रत्नम् गुरोः प्रिय रत्नमित्येके ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥ (परमित्यत्र नवग्रहदोषशान्त्यै गुरौ सत्त्वेवेत्युक्ता) यथा, अस्मिन्नेव शब्दकल्पद्रुमे नवरत्नशब्दे ।
"नवग्रहदोषशान्त्यै धार्य्याणि नवरत्नानि ।
वदूर्य्यं धारयेत् सूर्य्ये नीलञ्च मङ्गलाच्छने ॥
आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे ।
गुरौ मुक्ता भृगौ वज्रं शनौ नीलं विदुर्बुधाः ॥"
इति ॥
मणीवस्यप्रयोगोऽत्रैव रत्नशब्दे दृश्यते यथा,—
"वज्रमुक्ताश्मगणाः सपद्मरागाः समरकताः प्रोक्ताः ।
अपिचेन्द्रनीलवरवैदूर्य्याश्च पुष्परागाश्च ॥")
गुरुवर्च्चोघ्नः, पु, (गुरुवर्च्चः वातपित्तादिप्रकोपजनिताग्निमान्द्यकोष्ठरोधनादिदोषस्तं हन्ति इति हन्+टक् ।) जिम्बाकः । इति शब्दचन्द्रिका ॥ पातिलेवु । इति भाषा ॥
गुरुहा, [न्] पुं, (गुरुं हन्ति इति । हन्+क्विप् ।) गुरुघ्नः । तत्पर्य्यायः । नरकीलकः २ । इति हेमचन्द्रः । ३ । ५२२ ॥ गुरुहन्तरि त्रि ।
गुर्ज्जरः, पु, (गुरं शत्रुकृतताडन वधोद्यमादिकं वा उज्जरयति यो देशः । कलिङ्गाः साहसिका इतिवद्देशस्थजने लक्षणेति ज्ञेयम् ।) गुज्जराटदेशः । इति शब्दरत्नावली ॥
गुर्ज्जरी, स्त्री, (जॄ+णिच्+अच् । गुरिति शत्रुकृतताडनादिकं तज्जीर्य्यतेऽत्र इति अधिकरणे अप् । गुर्ज्जरः देशः तस्य प्रियेति ङीष् । यद्वा गुर्ज्जरदेशःप्रियोऽस्या इति अण् ङीप् च । गुर्ज्जरदेशवासिनी अतो गुर्ज्जरीति केचित् ।)
रागिणीविशेषः । इति हलायुधः ॥ इयन्तु भैरवरागस्य रागिणीति बोध्यम् । यथा, सङ्गीतदर्पणे रागविवेकाध्याये । १६ ।
"भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा ।
वाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गनाः ॥"
अस्या गानवेलानिर्णयो यथा, तत्रैव । २० ।
"वेलावली च मल्लारी वल्लारी सोमगुर्ज्जरी ।"
इयं हि ग्रीष्मऋतौ स्वस्वामिना भैरवरागेण सह गीयते । यथा, तत्रैव । २७ ।
"भैरवः ससहायस्तु ऋतौ ग्रीष्मे प्रगीयते ।"
इति सोमेश्वरमतम् । हनुमन्मते तु । इयमेव मेघरागस्य स्त्री । यथा, तत्रैव । ३७ ।
"मल्लारी देशकारी च भूपाली गुर्ज्जरी तथा ।
टङ्का च पञ्चमी भार्य्या मेघरागस्य योषितः ॥"
इयं पुना रागार्णवमते पञ्चमरागाश्रया रागिणीत्यवधेयम् । यथा, तत्रैव । ४० ।
"ललिता गुर्ज्जरी देशी वराडी रामकृत्तथा ।
मता रागार्णवे रागाः पञ्चैते पञ्चमाश्रयाः ॥")
गुर्द्द क निकेतने । कूर्द्दे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) दीर्घिणो वक्ष्यमाणत्वादस्य न दीर्घः । क गुर्दयति । निकेतनं निवासः । इति दुर्गादासः ॥
गुर्द्द ङ कूर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-अकं सेट् ।) दीर्घिणो वक्ष्यमाणत्वादस्यापि न दीर्घः । ङ गुर्दते । कूर्द्दः क्रीडा । इति दुर्गादासः ॥
गुर्व्व ई उद्यमे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ईरित् । अकमित्येके । खड्गादेरुत्तोलनार्थकस्य गुर्व्वधातोः सकर्म्मकत्वमकर्म्मकत्वम् वैतत् प्रज्ञावद्भिरेव चिन्तनीयम् ।) ई गूर्णः । गूः गुरौ गुरः । ई गूर्णः । गुर्व्वति पत्तिः खड्गम् । इति दुर्गादासः ॥
गुर्व्विणी, स्त्री, (गर्व्वति ऊर्ध्वौ सन्तानमपत्यमित्यर्थः प्राप्नोति धारयतीति यावत् । गर्व्वगतौ "गर्व्वेरत उच्च ।" उणां । २ । ५४ । इति उत् इनन् च गौरादित्वात् ङीष् । गर्व्वयति सुखतीत्येके । यद्वा गुरुर्गुरुभारयुक्तो गर्भोऽस्त्यस्याः अपत्यधारणात्तथात्वम् । गुरु+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) गर्भिणी । इत्यमरः । २ । ६ । २२ ॥ (यथा, मार्कण्डेये । २७ । २० ।
"वन्मकीपद्मशरभमूलिकागुर्व्विणीस्तनात् ।
प्रज्ञा नृपेण चार्टया तथा गोपालयोषितः ॥"
यथाऽस्याः पथ्यापथ्यनियमः ।
यद्यत् कामयते सा च तत्तद्द्द्याद्भिषग्वरः ।
वर्ज्जयेद्विदलान्नानि विदाहीनि गुरूणि च ॥
अन्नानि सोष्णक्षीराणि गुर्व्विणीनां विवर्ज्जयेत् ।
मृत्तिका भक्षणीया न न च शूरणकन्दकाः ॥
रसोनञ्च पलाण्डुञ्च सन्त्यज्यो गुर्व्विणीस्त्रिया ।
शूरणानि प्रदेयानि गौल्यानि सरसानि च ॥
पथ्ये हितानि चैतानि गुर्व्विणीनां सदा भिषक् ।
व्यायामं मैथुनं रोषं शैत्यमुक्रमणन्तथा ॥
वर्ज्जयेद्गुर्व्विणीनाञ्च जायन्ते सुखसम्पदः ॥"
इति हारीते तृतीयस्थानेऽष्टचत्वारिंशेऽध्याये ॥)

गुर्व्वी, स्त्री, (गुरुर्भारयुक्तो गर्भोऽस्याः । गुरु + ङीष् ।) गर्भवती । इति हेमचन्द्रः । ३ । २०३ ॥ ("नहि वन्ध्या विजानाति गुर्व्वीप्रसववेदनाम् ॥" इति हितोपदेशः ॥) गुरुपत्नी । (गुरोः पत्नीति गुरु + ङीष् ।) गौरवयुक्ता । (गुरु + "वोतोगुणवचनात् ।" ४ । १ । ४४ । इति विभाषायां ङीष् ।) यथा । अनन्यगुर्व्व्यास्तवकेन केवलः पुराणमूर्त्तेर्म्महिमावगम्यते । इति माघः ॥ (गुरुभारविशिष्टा । यथा, महाभारते । ३ । २२ । ३७ ।
"ततः शाल्वं गदां गुर्व्वीमाविध्यन्तं महाहवे ।
छिन्नां चकार सहसा प्रजज्वाल च तेजसा ॥"
गायत्री । यथा,—
देवीभागवते । १२ । ६ । ४२ ।
"गुहावासा गुणवती गुरुपापप्रणाशिनी ।
गुर्व्वी गुणवती गुह्या गोप्तव्या गुणरूपिणी ॥")

गुलः, पुं, (गुड् + डलयोरैक्यात् डकारस्य लत्वम् ।) ऐक्षवः । गुडः । इति मेदिनी । ले । १३ ॥

गुलञ्चकन्दः, पुं, (गुलञ्चस्य लताविशेषस्य कन्द इव कन्दोऽस्य गुलं गुडवद्रसं अञ्चति अञ्च + अण् । ततः शकन्ध्वादित्वादलोपे गुलञ्चः तादृशः कन्दः । इति केचित् ।) कन्दविशेषः । कुली इति भाषा । तत्पर्य्यायः । गुच्छाङ्ककन्दः २ वलाङ्ककन्दः ३ निवरिटका ४ । अस्य गुणाः । मधुरत्वम् । सुशीतलत्वम् । रुच्यप्रदत्वम् । तर्पणत्वम् । दाहनाशित्वञ्च । इति राजनिर्घण्टः ॥

गुला, स्त्री, (गुलः गुड इव रसोऽस्त्यस्या इति अर्श आदिभ्योऽच् ततष्टाप् ।) स्नुहीवृक्षः । इति मेदिनी । ले । १३ ॥

गुली, स्त्री, (गुडः क्षुद्रवर्त्तुलाकृतिर्विषमयस्फोटाकृतिरित्यर्थः विद्यतेऽस्याः इति अर्श आदिभ्योऽच् ततो ङीष् ।) गुटिका । रोगभेदः । वसन्त इति ख्यातः । इति मेदिनी । ले । १४ ॥

गुलुच्छः, पुं, (गुच्छ + पृषोदरात् साधुः ।) गुच्छः । स्तवकः । इति त्रिकाण्डशेषः ॥

गुलुञ्छः, पुं, (गुडति गोलाकारेण वेष्टयतीति गुड् + क्विप् गुड् स तदाकारं उञ्छति आदत्ते उपार्ज्जयति वा । उछि "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ततो डस्य लत्वे साधुः ।) गुच्छः । इति हेमचन्द्रः । ४ । १९२ ॥

गुलुञ्छकः, पुं, (गुलुञ्छ + स्वार्थे कन् ।) गुच्छः । इति शब्दरत्नावली ॥

गुल्फः, पुं, (गल + "कलिगलिभ्यां फगस्योच ।" उणां । ५ । २६ । इति फक् अकारस्योत्वं च ।) पादग्रन्थिः । तत्पर्य्यायः । घुटिका २ । इत्यमरः । २ । ६ । ७२ ॥ चरणग्रन्थिः ३ घुटिकः ४ घुण्टकः ५ घुण्टः ६ । इति हेमचन्द्रः । ३ । २७९ ॥ (यथा, गोः रामायणे । ६ । २३ । १२ ।
"समावेतौ करौ पादौ गुल्फौ चावनतौ मम ॥")

गुल्मः, पुं, (गुडति वेष्टयति गुड्यते वेष्ट्यते वा, गुड + करणे बाहुलकात् मक् डलयोरैक्यात् डस्य लत्वे साधुः ।) उदरजरोगविशेषः । तस्य निदानादि ।
"दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः ।
कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥ *
तस्य पञ्चविधं स्थानं पार्श्वे हृन्नाभिवस्तयः ।
हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः ॥
वृत्तश्चयापचयवान् स गुल्म इति कीर्त्तितः ।
स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः ॥
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥ *
तस्य पूर्व्वरूपं यथा,—
"उद्गारबाहुल्यपुरीषबन्ध-
तृप्त्यक्षमत्वान्त्रविकूजनानि ।
आटोपमाध्मानमपक्तिशक्ति-
रासन्नगुल्मस्य वदन्ति लिङ्गम् ॥" * ॥
तस्य सामान्यरूपम् ।
"अरुचिः कृच्छ्रविण्मूत्रवाततान्त्रविकूजनम् ।
आनाहश्चोर्द्ध्ववातश्च सर्व्वगुल्मेषु लक्षयेत् ॥ * ॥
वातिकस्य निदानं यथा,—
"रूक्षान्नपानं विषमातिमात्रं
विचेष्टनं वेगविनिग्रहश्च ।
शोकोऽभिघातोऽतिमलक्षयश्च
निरन्नता चानिलगुल्महेतुः ॥" * ॥
वातिकस्य रूपम् । यथा —
"यः स्थानसंस्थानरुजा विकल्पं
विड्वातसङ्गं गलवक्त्रशोषम् ।
श्यावारुणत्वं शिशिरज्वरञ्च
हृत्कुक्षिपार्श्वांसशिरोरुजञ्च ॥
करोति जीर्णेऽभ्यधिकं प्रकोपं
भुक्ते मृदुत्वं समुपैति यश्च ।
वातात् स गुल्मो न च तत्र रूक्षं
कषायतिक्तं कटु चोपशेते ॥" * ॥
पैत्तिकस्य निदानं यथा,—
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताशसेवा ।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥" * ॥
पैत्तिकस्य रूपं यथा,—
"ज्वरः पिपासा वदनाङ्गरागः
शूलं महज्जीर्य्यति भोजने च ।
स्वेदो विदाहो व्रणवच्च गुल्मः
स्पर्शासहः पैत्तिकगुल्मरूपम् ॥" * ॥
श्लैष्मिकस्य निदानम् ।
"शीतं गुरु स्निग्धमचेष्टनञ्च
सम्पूरणं प्रस्वपनं दिवा च ।
गुल्मस्य हेतुः कफसम्भवस्य
सर्व्वस्तु दृष्टो निचयात्मकस्य ॥" * ॥
श्लैष्मिकस्य रूपम् ।
"स्तैमित्यशीतज्वरगात्रसाद-
हृल्लासकासारुचिगौरवाणि ।
शैत्यं रुगल्पा कठिनोन्नतत्वं
गुल्मस्य रूपाणि कफात्मकस्य ॥" * ॥
द्वन्द्वजस्य रूपं यथा,—
"निमित्तलिङ्गान्युपलभ्य गुल्मे
द्विदोषजे दोषबलाबलञ्च ।
व्यामिश्रलिङ्गानपरांश्च गुल्मां-
स्त्रीनादिशेदौषधकल्पनार्थम् ॥" * ॥
त्रिदोषजस्य रूपं यथा —
"महारुजं दाहपरीतमश्मवद्
घनोन्नतं शीघ्रविदाहि दारुणम् ।
मनःशरीराग्निबलापहारिणं
त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥" * ॥
अथ स्त्रीणां रक्तजगुल्मनिदानं यथा,—
"नवप्रसूताहितभोजना या
या चामगर्भं विसृजेदृतौ वा ।
वायुर्हि तस्याः परिगृह्य रक्तं
करोति गुल्मं सरुजं सदाहम् ॥" * ॥
स्त्रीणां रक्तजगुल्मलक्षणं यथा,—
"पैत्तस्य लिङ्गेन समानलिङ्गं
विशेषणञ्चाप्यपरं निबोध ।
यः स्पन्दते पिण्डित एव नाङ्गै-
श्चिरात् सशूलः समगर्भलिङ्गः ॥
स रौधिरः स्त्रीभव एव गुल्मो
मासे व्यतीते दशमे चिकित्स्यः ।
स्त्रीणामार्त्तवजो गुल्मो न पुंसामुपजायते ।
अन्यस्त्वसृग्भवो गुल्मः स्त्रीणां पुंसाञ्च जायते ॥
अथासाध्यलक्षणं यथा,—
सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः ।
कृतमूलः शिरानद्धो यदा कूर्म्म इवोन्नतः ॥
दौर्ब्बल्यारुचिहृल्लासकासच्छर्द्यरतिज्वरैः ।
तृष्णातन्द्राप्रतिश्यायैर्युज्यते न स सिध्यति ॥
गृहीत्वा सज्वरं श्वासच्छर्द्यतीसारपीडितम् ।
हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥
श्वासः शूलं पिपासान्नविद्वेषो ग्रन्थिमूढता ।
जायते दुर्ब्बलत्वञ्च गुल्मिनो मरणाय वै ॥"
इति माधवकरः ॥ * ॥
तच्चिकित्सा यथा,—
"वातारितैलेन पयोयुतेन
पथ्यासमेतेन विरेचनं हि ।
सस्वेदनं स्निग्धमतिप्रशस्तं
प्रभञ्जनक्रोधकृते तु गुल्मे ॥
स्वर्ज्जिकाकुष्ठसहितः क्षारः केतकसम्भवः ।
पीतस्तैलेन शमयेद्गुल्मं पवनसम्भवम् ॥
तित्तिरांश्च मयूरांश्च कुक्कुटान् क्रौञ्चवर्त्तकान् ।
सर्पिः शालिं प्रसन्नाञ्च वातगुल्मे प्रयोजयेत् ॥ * ॥
पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलाम्बुना ।
विरेकाय सितायुक्तं काम्पिल्लं वा समाक्षिकम् ॥"
त्रिफलाम्बुना त्रिफलाक्वाथेन । काम्पिल्लं कमिला इति लोके ।
"अभयां द्राक्षया खादेत् पित्तगुल्मी गुडेन वा ॥ *
योगैश्च वातगुल्मोक्तैः श्लेष्मगुल्ममुपाचरेत् ।
अपरैश्च बलासघ्नैर्युक्तियुक्तैः शमं नयेत् ॥" * ॥
हिङ्गुग्रन्थिकधान्यजीरकवचाचव्याग्निपाठाशटी
वृक्षाम्लं लवणत्रयं त्रिकटुकं क्षारद्वयं दाडिमम् ।
पथ्यापौष्करवेतसाम्लहपुषाजाज्यस्तदेभिः कृतं
चूर्णं भावितमेतदार्द्रकरसैः स्याद्बीजपूरद्रवैः ।
गुल्माध्मानगुदाङ्कुरान् ग्रहणिकोदावर्त्तसञ्ज्ञौ गद

प्रत्याध्मानगरोदराग्रसरिवुर्त्तां खूनीह्रयारोच-
कान् ।
उरुस्तम्भमतिभ्रमञ्च मनसो वाधिर्य्यमष्ठीलिकां
प्रत्यष्ठीलिकया सहापहरते प्राक्पीतमुष्णाम्बुना ॥
हृत्कुक्षिवङ्क्षणकटीजठरान्तरेषु
वस्तिस्तनांशफलकेषु च पार्श्वयोश्च ।
शूलानि नाशयति वातवलासजानि
हिङ्ग्वाद्यमाद्यमिदमाश्विनसंहितोक्तम् ॥”
हिङ्ग्वादिचूर्णम् ॥ * ॥
“धीमानुपचरेद्गुल्मं प्रत्येकञ्च त्रिदोषजम् ।
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ॥
शरपुङ्खस्य लवणं पथ्याचूर्णं समं द्वयम् ।
शाणप्रमाणमश्नीयाच्चूर्णं गुल्मगदापहम् ॥
स्वर्जिका शाणमाना स्यात्तावदेव गुडं भवेत् ।
उभयोर्व्वटिकां खादेद्गुल्मामयविनाशिनीम् ॥ *
पलाशवज्रोशिखरिचिञ्चार्कतिलनालजाः ।
यवजः स्वर्जिका चेति क्षारा अष्टौ प्रकीर्त्तिताः ॥
गुल्मशूलहरा क्षारा अजीर्णस्य च पाचनाः ।”
क्षाराष्टकम् ॥ * ॥
“सामुद्रं सैन्धवं काचं यवक्षारः सुवर्च्चलम् ।
टङ्कणं स्वर्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥
वज्रीक्षीरैरर्कक्षीरैरातपे भावयेत् त्र्यहम् ।
वेष्टयेदर्कपत्रेण रुद्ध्वा भाण्डपुटे पचेत् ॥
तत्क्षारं चूर्णयेत् पश्चात् त्र्यूषणं त्रिफलां
तथा ।
यवानी जीरकौ वह्निश्चूर्णमेषाञ्च कारयेत् ॥
सर्व्वचूर्णसमं क्षारं सर्व्वमेकत्र कारयेत् ।
तच्चूर्णं टङ्कयुगलं सलिलेन प्रयोजयेत् ॥
गुल्मे शूले तथाजीर्णे शोथे सर्व्वोदरेषु च ।
मन्दे वह्नावुदावर्त्ते प्लीह्नि चापि परं हितम् ॥
वातेऽधिके जलैः कोष्णैर्हितं पित्तेऽधिके घृतैः ।
गोमूत्रेण कफाधिक्ये काञ्जिकेन त्रिदोषजे ॥
वज्रक्षार इति ख्यातः प्रोक्तः पूर्व्वं स्वयम्भुवा ।
सेवितो हरतेऽजीर्णं तथाजीर्णभवान् गदान् ॥”
वज्रक्षारः ॥ * ॥
“सुवर्च्चिका टङ्कमिता शाणमानार्द्रिकापि च ।
उभे भुञ्जीत युगपद्गुल्मामयनिवृत्तये ॥”
सुवर्च्चिका सोरा इति लोके ।
“शुक्तिकाचूर्णगुटिकां टङ्कमात्रां सुवेष्टयेत् ।
गुडेन शाणमानेन ताञ्चखेत् गुल्मरोगवान् ॥
गुल्मी कुमारिकामांस कर्षार्द्धं गोघृतान्वितम् ।
शिवेत् पोषाभयासिन्धुव्योषचूर्णावधूलितम् ॥
कुमारिका घिउकुंयारी इति लोके ॥ * ॥
“वल्लूरं मूलक मत्स्यं शुष्कशाकानि वैदलम् ।
न खादेदालुकं गुल्मी मधुराणि फलानि च ॥
पैदलानां निषेधेऽपि माषमुद्गत्ययोर्नानिषेधः ।
इति सन्मतटीका । इति गुल्माधिकारः ॥ इति
भावप्रकाशः ॥

अथ गुल्मचिकित्सा ।
आत्रेय उवाच ।
“अपथ्योपचारैश्च दोषैः संकुपितेऽनिल ।
मन्दाग्निना हि जठरे जायते गुल्मरुङ् नृणाम् ॥
उदरं गर्ज्जते यस्य विषमाग्निश्च दृश्यते ।
तोदो वपुषि शूलञ्च वातगुल्मं विनिर्द्दिशेत् ॥
शोषोऽरतिः सपीतत्वं मन्दज्वरनिपीड़ितम् ।
तमोभ्रमपिपासार्त्तं गुल्मं तत् पित्तसम्भवम् ॥
शोफो जाड्यञ्च हृल्लासं तन्द्रालस्यं सशीतकम् ।
मन्दाग्निर्विड्विबन्धश्च गुल्मं तत् श्लेष्मसम्भवम् ॥
मोहो विभ्रमता जाड्यमरतिक्षुत्पिपासकम् ।
आलस्यं निद्रया चैव गुल्मं तत् कफपैत्तिकम् ॥
निद्रालस्यञ्च दाहश्च शोषात् शूलञ्च सज्वरम् ।
वैवर्ण्यमरतिर्जाड्यं विड्बन्धो विकलाङ्गता ॥
तथातीसारमूर्च्छा च तृषाहृल्लासवेपथु ।
श्वासोऽरुचिरजीर्णत्वं गुल्मं तत्सान्निपातिकम् ॥
साध्यं केवलदोषोत्थं द्वन्द्वं कष्टेन सिध्यति ।
असाध्यं सन्निपातोत्थं वक्ष्यामस्तत्प्रतिक्रियाम् ॥
यक्षत्चिकित्सितञ्चैव कथितञ्चोपचारणम् ।
तद्वत्प्लीह्ना समाख्यातो न चात्र कथितं पुनः ॥
चिकित्सोदरगुल्मस्य वक्ष्यते शृणु साम्प्रतम् ।
स्नेहनं रेचनञ्चैव पाचनं शोधनानि च ॥
संशमनं विरेकञ्च वस्ति-स्नेह-निरूहणम् ।
क्षये पानञ्च चूर्णानि गुल्मोपचरणक्रिया ॥
शुण्ठीमूर्व्वा पञ्चमूलं लघुरास्ना च दारु च ।
क्वाथोऽस्य चावशेषः स्यात् तत्समं क्षीरमेव च ॥
दधितत्सममेवन्तु पाचयेत्तत्समाग्निना ।
घृतं यावत् प्रपश्येच्च सिद्धमुत्तार्य्यते ततः ॥
तत्क्षतं पानकेऽभ्यङ्गे भोजने च प्रदापयेत् ।
स्नेहं सप्तदिनं यावत् तस्माच्च रूक्षणं हितम् ॥
दिनत्रयञ्च कर्त्तव्यं कथयाम्यत्र कोविद ॥
शुण्ठी सौवर्च्चलं जीरे द्वे वा हिङ्गुसमन्वितम् ॥
काञ्जिकं पानमेतेषां रूक्षणं गुल्मशान्तये ।
गुल्मचिकित्सिते क्षारपाकोऽत्र प्रतिगुण्यते ॥
क्षारं पलाशार्ज्जुनशूरणस्य
क्षारं तथा वै सहयावशूकम् ।
सौवर्च्चलं सिन्धुभवोद्भिदञ्च
सामुद्रजं वापि विमिश्रयेच्च ॥
तोयं परिस्राव्य विधानतोऽपि
युक्तं तथैतानि महौषधानि ।
पथ्याग्निशुण्ठी रजनीसुराह्वं
कुष्ठं विशाला च यवानिका च ॥
तथाजमोदा सहजीरके द्वे
षड्ग्रन्थिका हिङ्गुयुतञ्च चूर्णम् ।
क्षारोदकैः पानविमिश्रपानं
निहन्ति सर्व्वाण्यपि कोष्ठजानि ॥
गुल्मानि सर्व्वाणि विसूचिकानां
मन्दाग्निमूलानि भगन्दराणाम् ।
प्लीहोदरानाहमपीह विष्वं
विनाशनो रोगचयं नराणाम् ॥”
इति विरेचनम् ॥ * ॥
अथ विरेचनानि वक्ष्यामः ॥ * ॥
“नागरं त्रिमितिन् पथ्या त्रिवृता त्रिगुणायुतम् ।
चूर्णं गुडान्वितं देयं वातगुल्मविरेचनम् ॥
दन्ती च भागमेकन्तु द्वौ भागौ च हरीतकी ।
त्रिवृतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार एव च ॥
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुडेन तु ।
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिबेत् ॥
कथितञ्च विरेकश्च वातगुल्मोपशान्तये ।”
इति वातगुल्मविरेचनम् ॥ * ॥
“पिबेदेरण्डतैलञ्च शर्कराक्षीरसंयुतम् ।
पित्तगुल्मविरेकाय श्रेष्ठमेतत् सुखावहम् ॥
आरग्वधं प्रवालानि तथैवारग्वधानि च ।
विभाव्यैरण्डतैलेन तत्पत्रैश्चैव वेष्टयेत् ॥
कर्द्दमेन प्रलिप्याथ अङ्गारेषु निधापयेत् ।
सुस्विन्नभर्ज्जितां ताञ्च भक्षयेत् शर्करान्विताम् ॥
विरेकं पैत्तिके गुल्मे हितं शुद्धविरेचनम् ।”
इति पित्तगुल्मविरेचनम् ॥ * ॥
“त्रिफला सुरसा शुण्ठी चूर्णं कृत्वा विभावयेत् ।
स्नुहीक्षीरेण वारैकं गुडेन सह मिश्रितम् ॥
विरेकः श्लेष्मगुल्मे च सर्व्वोदरविनाशनम् ।
शुण्ठी सौवर्च्चलं पथ्या विडङ्गञ्च पुनर्नवा ॥
चूर्णोऽपामार्गबीजानां स्नुहीक्षीरेण भावितः ।
गुडेन संयुतं खादेत् पश्चात् कोष्णं जलं पिबेत् ॥
विरेकः सर्व्वगुल्मेषु प्रशस्तो हितकारकः ॥
इति विरेचनम् । [कोकिला
शुक्तिक्षारनिशाविशालकदली स्यात् शूरणं
पालाशं दहनार्ज्जुनं शठिजयाऽपामार्गकुष्माण्डकम् ।
दग्ध्वा क्षारविपाचितं परिस्रुत हिङ्गुत्रिकट्वन्वित
गुल्मानाहविबन्धशूलहरणं सर्व्वोदराणां हितम् ॥
इति क्षारपानम् ॥ * ॥
“अजमोदा शठी दन्ती विडङ्गं सुषवी तुम्बुरु ।
त्रिफला चित्रकञ्चैव शुण्ठी कर्कटशृङ्गिका ॥
त्रिवृता च सुराह्वा च पुष्करं वृद्धदारकम् ।
तथाम्लवेतसञ्चैव तिन्तिड़ीकञ्च पिप्पलि ॥
समन्तु मातुलुङ्गेन विभाव्यमेकतः कृतम् ।
त्रिभागहिङ्गुसंयुक्तं घृतेन चूर्णितं हितम् ॥
निहन्ति वातगुल्मञ्च सशूलमुदरन्तथा ।”
इत्यजमोदादि ॥ * ॥
हिङ्गुफलत्रिकजीरकयुग्मं
चित्रकभागिककुष्ठविडङ्गम् ।
तुम्बुरुपुष्कर-विश्वसुराह्वं
क्षारयुतं लवणानि च पञ्च ॥
वातिकगुल्मविनाशनहेतुः
शूलरुजञ्च नरस्य निहन्ति ॥”
इति वातगुल्मचिकित्सा ॥ * ॥
“विदारी क्षीरशुक्ला च पथ्या विश्वौषधं मधु ।
लेहः पित्तात्मके गुल्मे हितः शोफनिवारणः ॥
यष्टिकं निम्बपत्राणि तथा धात्रीफलं सिता ।
चूर्णं मध्वावलीढञ्च पित्तगुल्मनिवारणम् ॥”
इति पित्तगुल्मचिकित्सा ॥ * ॥
“त्रिकटुत्रिफलाचित्रकटकट्फलसंयुतम् ।
चूर्णं मद्येन वा पीतं फलाद्येन वा भोजनम् ॥
श्लेष्मगुल्मविनाशाय हितमेतत् सुखावहम् ।
लोध्रं कट्फलं विश्वा कुष्ठं चित्रकमेव च ॥
नागरं हिङ्गुसंयुक्तं चूर्णं ... ।

श्लेष्मगुल्मविनाशाय शूलोदरविनाशनम् ॥
उग्रगन्धा च मरिचं क्षारचूर्णसमन्वितम् ।
पिबेन्मूत्रेण संयुक्तं श्लेष्मगुल्मविनाशनम् ॥”
इति श्लेष्मगुल्मचिकित्सा ॥ ६ ॥
“शुण्ठी सौवर्चलं भार्गी वत्सक यावशूकजम् ।
जीरे द्वे पाटलस्यच यवानी हिङ्गुसैन्धवम् ॥
आरग्वधेन संयुक्तं चूर्णं सघृतमेव च ।
वातश्लेष्मोद्भवे गुल्मे सुखमाशु प्रपद्यते ।
उग्रगन्धा फलत्रिक देवदारुपुनर्नवा ॥
त्रिवृत्सौवर्चलोपेतं क्षारोदकसमन्वितम् ।
पीतं वातकफे गुल्मे शुभकारि परं मतम् ॥”
इति वातश्लेष्मगुल्मचिकित्सा ॥ ७ ॥
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये ॥
“रूक्षकृष्णारुणशिरा तन्तुजालगवाक्षित. ।
गुल्मोऽष्टधा पृथक् दोषै: संसृष्टैर्निचय गत. ॥
आर्त्तवस्य च दोषेण नारीणां जायतेऽष्टम ।
ज्वरच्छर्द्यतिसाराद्यैर्वमनाद्यैश्च कर्म्मभि. ॥
कर्शितो वातलान्यत्ति शीत वाम्बुबुभुक्षित: ।
य पिबत्यनुपानानि लङ्घनं प्लवनादिकम् ॥
सेवते देहसङ्क्षोभिच्छर्द्दिं वा समुदीरयेत् ।
अनुदीर्णानुदीर्णान् वा वातादीन् विसृजति ॥
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते ।
शुद्धो वाशु विदाहीनि भजते स्यन्दनानि वा ॥
वातोल्बणास्तस्मला पृथक् क्रुद्धा द्विशोऽथवा ।
सर्व्वे वा रक्तयुक्ता वा महास्रोतोऽनुशायिन' ॥
ऊर्द्धाधोमार्गमावृत्य कुर्व्वते शूलपूर्व्वकम् ।
स्पर्शोपलभ्य गुल्माख्यमुत्प्लुत ग्रन्थिरूपिणम् ॥
कर्शनात् कफविट्पित्तैर्मार्गस्यावरणेन वा ।
वायु कृताश्रय. कोष्ठे रौक्ष्यात् काठिन्यमागत ।
स्वतन्त्र: स्वाश्रये दुष्ट: परतन्त्र' पराश्रये ॥
पिण्डितत्वादमूर्त्तोऽपि मूर्त्तत्वमिव संश्रित' ।
गुल्म इत्युच्यते वस्तिनाभिहृत्पार्श्व-संश्रय: ॥
वाताम्मन्याशिर शूल ज्वरप्लीहान्त्रकूजनम् ।
व्यथा सूच्येव विट्सङ्ग: कृच्छ्रादुच्छ्वसन मुहु ॥
स्तम्भो गात्रे मुखे शोष. कार्श्यं विषमवह्निता ।
रूक्षकृष्णत्वगादित्व चलत्वादनिलस्य च ॥
अनिरूपित-संस्थान-स्थानवृद्धिक्षयव्यथ' ।
पिपीलिकाव्याप्त इव गुल्म' स्फुरति तुद्यते ॥
पित्ताद्दाहोऽम्लको मूर्च्छा विड्भेदस्वेदतृड्-
ज्वरा: ।
हारिद्रत्व त्वगाद्येषु गुल्मश्च स्पर्शनासह' ॥
दूयते दीप्यते सोष्मा स्वस्थानं दहतीव च ।
कफात् स्तैमित्यमरुचि. सदन शिशिरज्वर: ॥
पीनसालस्य-हृल्लास-कासशुक्लत्वगादिता: ।
गुल्मोऽवगाढ़ कठिनो गुरु: सुप्त: स्थिरोऽल्प-
रुक् ॥
स्वदोषस्थानधामान. स्वे स्वे काले च रुक्करा' ।
प्रायस्त्रयस्तु द्वन्द्वोत्था गुल्मा: संसृष्टलक्षणा: ॥
सर्व्वजस्तीव्ररुग्दाह' शीघ्रपाकी घनोन्नत' ।
सोऽसाध्यो रक्तगुल्मस्तु स्त्रिया एव प्रजायते ॥
ऋतौ वा नवसूता वा यदि वा योनिरोगिणी ।
सेवते वातलानि स्त्री क्रुद्धस्तस्या समीरण ॥
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम् ।
कुक्षिं करोति तद्गर्भ-लिङ्गमाविष्करोति च ॥
हृल्लास दौर्हृदस्तन्य-दर्शनं क्षामतादिकम् ।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ।
रुक्स्तम्भदाहातीसारतृड्ज्वरादीनुपद्रवान् ॥
गर्भाशये च सुतरां शूलदुष्टासृगाश्रये ।
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदना: ॥
न चाङ्गैर्गर्भवद् गुल्म: स्फुरत्यपि तु शूलवान् ।
पिण्डीभूत: स एवास्या: कदाचित् स्पन्दते चिरात् ॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते ।
स दोषसंश्रयो गुल्म. सर्व्वो भवति तेन स: ॥”
इति वाभटे निदानस्थाने पञ्चमेऽध्याये ॥
“रूक्षान्नपानैरतिसेवनैर्वा
शोकेन मिथ्या प्रतिकर्म्मणा वा ।
विचेष्टितैर्वा विषमातिमात्रै.
कोष्ठे प्रकोप समुपैति वायु. ॥
कफञ्च पित्तञ्च स दूषयित्वा
नोहृत्य मार्गान् विनिबध्य ताभ्याम् ।
हृन्नाभिपार्श्वोदरवस्तिशूल
करोत्यधो याति न बद्धमार्ग: ॥
पक्वाशये पित्तकफाशये वा
स्थित' स्वतन्त्र परसंश्रयो वा ।
स्पर्शोपलभ्य' परिपिण्डितत्वात्
गुल्मो यथा दोषमुपैति नाम ॥
वस्तौ हि नाभ्यां हृदिपार्श्वयोर्वा
स्थानानि गुल्मस्य भवन्ति पञ्च ।
पञ्चात्मकस्य प्रभवन्तु तस्य
वक्ष्यामि लिङ्गानि चिकित्सितञ्च ॥
क्रियाक्रममत: सिद्धं गुल्मिनां गुल्मनाशनम् ।
प्रवक्ष्याम्यत ऊर्द्धञ्च योगान् गुल्मनिबर्हणान् ॥
रूक्षव्यायामजं गुल्म वातिक तीव्रवेदनम् ।
बद्धविट् मारुत स्नेहैरादित' समुपाचरेत् ॥
भोजनाभ्यञ्जने पानैर्निरूहै सानुवासनै. ।
स्निग्धस्य भिषजा स्वेद कर्त्तव्यो गुल्मशान्तये ॥
स्रोतसां मार्द्दव कृत्वा जित्वा मारुतमुल्बणम् ।
भित्त्वा विबन्ध स्निग्धस्य स्वेदो गुल्ममपोहति ॥
स्नेहपान मत गुल्मे विशेषेणोर्द्ध्वनाभिजे ॥
हपुषाद्यं घृतम् ।
हपुषा व्योष पृथ्वीका चव्यचित्रकसैन्धव' ।
साजाजीपिप्पलीमूलैर्द्दीप्यकैर्विपचेद्घृतम् ॥
मातुलुङ्गदधिक्षीर-कोलमूलकदाडिमै. ।
रसैस्तद्वातगुल्मघ्न शूलानाहविमोक्षणम् ॥
योन्यर्शोग्रहणीदोषश्वासकासारुचिज्वरान् ।
वस्तिहृत्पार्श्वशूलञ्च घृतमेतद्व्यपोहति ॥”
इति हपुषाद्यं घृतम् ॥ * ॥
“तैल प्रसन्ना गोमूत्रमारनाल यवाग्रज. ।
गुल्मजठरमानाहं पीतमेकत्र साधयेत् ॥”
इति तैलपञ्चकम् ॥ * ॥
“यथोक्तै: कोपनैर्दोषा. कुपिता. कोष्ठमागता' ।
जनयन्ति नृणां गुल्म स पञ्चविध उच्यते ॥
पञ्च गुल्माश्रया नृणां पार्श्वे हृन्नाभिवस्तय ।
कुपितानिलमूलत्वाद्गूढमूलोदयादपि ॥
गुल्मवद्वा विशालत्वाद् गुल्म इत्यभिधीयते ।
स यस्मादात्मनिचय गच्छत्यप्स्विव बुद्बुद' ॥
अन्त. सरति यस्माच्च न पाकमुपयात्यत' ।
सदन मन्दता वह्ने राटोपोऽन्त्रविकूजनम् ॥
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा ।
द्वेषोऽन्ने वायुरूर्द्धञ्च पूर्व्वरूपेषु गुल्मिनाम् ॥
हृत्कुक्षिशूल मुखकण्ठशोषो
वायोर्निरोधो विषमाग्निता च ।
ते ते विकारा' पवनात्मकाश्च
भवन्ति गुल्मेऽनिलसम्भवे तु ॥
स्वेदज्वराहारविदाहदाह-
तृष्णाङ्गराग कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि
पित्तात्मके तानि भवन्ति गुल्मे ॥
स्तैमित्यमन्नेऽरुचिरङ्गसाद
च्छर्द्दि. प्रसेको मधुरास्यता च ।
कफस्य लिङ्गानि च यानि तानि
भवन्ति गुल्मे कफसम्भवे तु ॥
सर्व्वात्मक: सर्व्वविकारयुक्त.
सोऽसाध्य उक्त: क्षतजश्च वक्ष्ये ।
“न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम् ॥
तं गर्भकालातिगमे चिकित्स्य
मसृग्भव गुल्ममुशन्ति तज्ज्ञा: ॥”
चिकित्सा यथा ॥
“वातगुल्मार्द्दितं स्निग्धं युक्त स्नेहविरेचनै. ।
उपाचरेत् यथाकाल निरूहै सानुवासनै. ॥
पित्तगुल्मार्द्दित स्निग्ध काकोल्यादिघृतेन तु ।
विरिक्तं मधुरैर्योगैर्निरूहै: समुपाचरेत् ॥
श्लेष्मगुल्मार्द्दितं स्निग्ध पिप्पल्यादिघृतेन तु ।
तीक्ष्णैर्विरिक्तं तद्रूपैर्निरूहै. समुपाचरेत् ॥
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हित' ।
पित्तवद्रक्तगुल्मिन्या नार्य्या: कार्य्य: क्रियाविधि: ॥
विशेषमपरञ्चास्या: शृणु रक्तविभेदनम् ।
पलाशभस्मतोयेन सिद्धं सर्पि: प्रयोजयेत् ॥
दद्यादुत्तरवस्तिञ्च पिप्पल्यादिघृतेन तु ।
उष्णैर्वा भेदयेद्भिन्ने विधिरासृग्दरोदित: ॥
आनूपौदकमज्जानो वसा तैल घृत दधि ।
विपक्वमेकत: शस्त वातगुल्मेऽनुवासनम् ॥
जाङ्गलैकशफानाञ्च वसा सर्पिश्च पैत्तिके ।
तैलं जाङ्गलमाज्जान एवं गुल्मे कफोत्थिते ॥
धात्रीफलानां स्वरसे षडङ्गं विपचेद्घृतम् ।
शर्करा सैन्धवोपेतं तद्धितं वातगुल्मिने ॥
चित्रकव्योषसिन्धूत्थ पृथ्वीका चव्यदाडिमै: ।
दीप्यकग्रन्थिकाजाजी हपुषा धान्यके. समै. ॥
दध्यारनालबदर-मूलकस्वरसैर्घृतम् ।
तत् पिबेद्वातगुल्मार्त्तिदौर्बल्याटोपशूलनुत ॥
बिडदाडिमसिन्धूत्थ-हुतभुग्व्योषजीरकै' ।
हिङ्गुसौवर्च्चलक्षार-वृक्षाम्लाम्लवेतसै. ॥
बीजपूररसोपेत सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिक नाम गुल्मघ्नं प्लीहशूलजित् ॥

रसोनखरसे सर्पिः पञ्चमूलरसान्वितम् ।
सुरारनालदध्यम्ल-मूलकखरसैः सह ॥
योष-दाडिमवृक्षाम्लयवानीचव्यसैन्धवैः ।
हिङ्गम्लवेतसाजाजीदीप्यकैश्च समांशिकैः ॥
सिद्धं गुल्मग्रहण्यर्शः श्वासोन्मादक्षयज्वरान् ।
कासापस्मारमन्दाग्नि-प्लीहशूलानिलान् जयेत् ॥
त्र्यूषणत्रिफलाकल्कं द्विपञ्चमूलं षडङ्गकम् ।
कषायमूलकथाये तु जीवनीयैः पचेद्‌घृतम् ।
न्यग्रोधादिगणे वापि गणे वाम्युत्पलादिके ॥
रक्तपित्तोत्थितं घ्नन्ति घृतान्येतान्यसंशयम् ।
आरग्वधादौ विपचेद्दीपनीययुतं घृतम् ॥
क्षारवर्गे पचेच्चान्यत् पचेन्मूत्रगणेऽपरम् ।
घ्नन्ति गुल्मं कफोद्भूतं घृतान्येतान्यसंशयम् ॥
यथा दोषोच्छ्रयञ्चापि चिकित्सेत् सान्निपातिकम् ।
चर्म हिक्कादिकं वापि घृतं वा श्लीहनाशनम् ॥
पिबेद्‌गुल्मापहं काले सर्पिःक्षैरकमेव वा ।
निवेच्चुरकपालाग्नसार्षपं यवनालजम् ॥
भस्म मूलकजञ्चापि गोजाविखरहस्तिनाम् ।
एतेन मद्दिषीणाञ्च पालिकैश्चावचूर्णितैः ॥
कुष्ठ-सैन्धवयष्ट्याह्व-नागरक्रिमिघातिभिः ।
साजमोदैश्च दशभिः सामुद्राद्य पलैर्युतम् ॥
अयःपात्रेऽग्निनाल्पेन पक्वा लेहमघोद्धरेत् ।
तस्य मात्रां पिबेद्‌ध्वा सुरया सर्पिषापि वा ॥
धान्याम्लेनोष्णतोयेन कौलत्थेन रसेन वा ।
गुल्मं वातविकाराँश्च क्षारोऽयं हन्त्यसंशयम् ॥"
"पीतं सुखाम्बुना वापि स्वर्जिका कुष्ठसैन्धवम् ।
इक्षीकासुरबूकाच वर्षाभूद्वृहतीद्वयम् ।
चित्रकञ्च जलद्रोणे पक्वा पादावशेषितम् ॥
मागधी चित्रकक्षौद्रलिप्ते कुम्भे निधापयेत् ।
समधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतम् ॥
तुषोषितं दशाहन्तु जीर्णभक्तः पिबन्नरः ।
अरिष्टोऽयं जयेद्‌गुल्ममविपाकमरोचकम् ॥
सम्मूर्च्छे सोन्नतस्पन्दे दाहपाकरुजन्विते ।
गुल्मे रक्तं जलौकोभिः शिरामोक्षेण वा हरेत् ॥
सुखोष्णा जाङ्गलरसाः सुस्निग्धा व्यक्तसैन्धवाः ।
कटुत्रिकसमायुक्ता हिताः पाने च गुल्मिनाम् ॥
पेया वातहरैः सिद्धाः कौलत्थाः संस्कृता रसाः ।
खला, सपञ्चमूलाश्च गुल्मिनां भोजने हिताः ॥
बद्धवर्चोऽनिलानान्तु सार्द्रकं क्षीरमिष्यते ।
कुम्भापिण्डेष्टकास्वेदान् कारयेत् कुशलो भिषक् ॥
गुल्मिनः सर्व्व एवोक्ता दर्व्विरेष्वतमा भृशम् ।
अतस्तेनास्तु सुस्विन्नान् संस्नेनोपपादयेत् ॥
विलेपनाभ्यञ्जनानि तथा सन्दहनानि च ।
उपनाहाश्च कर्त्तव्याः सुखोष्णाः साल्वणादयः ।
उदरोक्तानि सर्पींषि चूर्णवर्त्तिक्रियास्तथा ॥
लवणानि च योज्यानि यान्युक्तान्युदरामये ।
वातवर्च्चोनिरोधे तु सामुद्रार्द्रकसर्षपैः ॥
कृत्वा पाथौ विधातव्या वर्त्तयो मरिचोत्तराः ।
दन्ती चित्रकमूलेषु तथा वातहरेषु च ॥
कुर्य्यादरिष्टान् सन्धाय सूत्रस्थाने यथेरितान् ।
खादेद्वाप्यङ्कुरान् भृष्टान् पूतिकञ्चरघजान् ॥
ऊर्द्ध्ववातमनुष्यञ्च गुल्मिनं न निरूहयेत् ।
पिबेत्त्रिवृन्मागरं वा सगुडां वा हरीतकीम् ॥
गुग्गुलुं त्रिवृतां दन्तीं द्रवन्तीं सैन्धवं वचाम् ।
मूत्रमद्य-पयोद्राक्षा-रसैर्वीक्ष्य बलाबलम् ॥
एव मौलानि पिष्टानि पिबेत् सलवणानि तु ।
पिप्पलीपिप्पलीमूलचव्यचित्रकसैन्धवैः ॥
युक्ता हन्ति सुरा गुल्मं शीघ्रं काले प्रयोजिता ।
बहुविमारुतो गुल्मी भुञ्जीत पयसा यवान् ॥
कुल्माषान् वा बहुस्नेहान् भक्षयेल्लवणोत्तरान् ॥"
इत्युत्तरतन्त्रे द्वाचत्वारिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) सेनासंख्याविशेषः । (यथा, महाभारते । १।२।१६-२० ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥")
अस्यार्थविवृतिर्यथा,—
"अत्र गजा नव, रथा नव, अश्वाः सप्तविंशतिः पदातयः पञ्चचत्वारिंशत्, समुदायेन नवतिः ॥
स्तीहा । अप्रकाण्डस्तम्बः । तत्पर्य्यायः । स्तम्बः २ इत्यमरः । २ । ४ । ८ ॥ "अविद्यमानप्रकाण्डस्तनुप्रकाण्डो वा बहुपत्रवान् मल्लीभिण्टीनलकमलवणवीरणादिः मूलादारभ्य पूर्व्वभागः प्रकाण्डः ।" इति भरतः ॥ (यथा, मनुः । १।४८ ।
"गुच्छगुल्मन्तु विविधं तथैव तृणजातयः ।"
"यत्र लतासमूहा भवन्ति न च प्रकाण्डानि ते गुच्छा मल्लिकादयः, गुल्मा एकमूलाः सङ्घातजाताः ।" इति टीकाकृत् कुल्लूकभट्टः ॥) घट्टभेदः । सैन्यरक्षणम् । इति मेदिनी । मे । ११ ॥ (रक्षिपुरुषसमूहः । यथा, मनुः । ७ । ११४ ।
"द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम् ।"
गुल्मं रक्षिपुरुषसमूहमित्यस्य टीकायां कुल्लूकभट्टः ॥ सैन्यैकदेशः । यथा, तत्रैव । ७ । १६० ।
"गुल्मांश्च स्थापयेदाप्तान् कृतसञ्ज्ञान् समन्ततः ।"
गुल्मान् सैन्यैकदेशानिति टीकाकृत् कुल्लूकभट्टः ॥)

गुल्मकेतुः, पुं, (गुल्मानां केतुर्ध्वज इव । गुल्मः केतुर्यस्येति वा । अत्र तु केतुर्लिङ्गं ज्ञापनमित्यर्थः ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

गुल्ममूलं, क्ली, (गुल्मवन्मूलमस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

गुल्मवल्ली, स्त्री, (गुल्माढ्या वल्ली यस्याः ।) सोमलता । इति राजनिर्घण्टः ॥ (सोमलताशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

गुल्मशूलः, पुं, (गुल्मात्मकं गुल्ममूलकं वा शूलमत्र ।) रोगविशेषः । तस्यौषधं यथा,—
"नारी पुष्यदिने पीत्वा गोक्षीरेणोपवासतः ।
श्वेतार्कस्य तु वै मूलं तस्याश्च दुग्गुल्मशूलनुत् ॥"
इति गारुडे १६३ अध्यायः ॥

गुल्मिनी, स्त्री, (गुल्मोऽस्त्यस्या इति । "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः । ततः ङीप् ।) विस्तृता लता । तत्पर्य्यायः । वीरुत् २ उलुपः ३ । इत्यमरः । २ । ४ । ८ ॥ वीरुधा ४ अवरुत् ५ । इति शब्दरत्नावली ॥

गुल्मी, स्त्री, (गुल्माकारो विद्यतेऽस्या इति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततो ङीष् ।) आमलकी । एला । वनी । वस्त्रवेश्म । इति मेदिनीशब्दरत्नावली हेमचन्द्रश्च ॥ शृगनखीवृक्षः । इति शब्दचन्द्रिका ॥ गुडकाओली इति भाषा ॥ (गुल्मः गुल्मनामको रोगोऽस्त्यस्य इति । गुल्म + इनिः ।) गुल्मरोगयुक्ते त्रि ॥ (यथा, अत्रैव घृतपानसशब्दगुणव्याख्याने भावप्रकाशः ।
"विशेषात् मनसं वर्ज्ज्यं गुल्मिभिर्मन्दवह्निभिः ॥")

गुल्यः, पुं, (गुडमिव माधुर्य्यमर्हतीति । गुड + यत् । ततो डस्य लत्वम् ।) मधुरः । स्वादुः । इति हेमचन्द्रः । ६ । २४ ॥

गुवाकः, पुं, (गुवति मलवत् क्वाथसुत्सृजतीति । गु + "पिणाकादयश्च ।" उणा । ४ । १५ । इति व्याकः तुडादित्वाद्‌गुणाभावः । निपातनान दीर्घोऽपि दृश्यते ।) वृक्षविशेषः । गुया सुपारि इति च भाषा ॥ तत्पर्य्यायः । घोण्टा २ पूगः ३ क्रमुकः ४ खपुरः ५ । इत्यमरः । २।४।१३६ ॥ गूवाकः ६ । इति तट्टीका ॥ पूगवृक्षः ७ दीर्घपादपः ८ वल्कतरुः ९ दृढवल्कः १० चिक्कणः ११ । इति राजनिर्घण्टः ॥ पूगी १२ । इति भावप्रकाशः ॥ सुरञ्जनः १३ गोपदलः १४ राजतालः १५ छटाफलः १६ । इति त्रिकाण्डशेषः ॥*॥ अस्य फलस्य पर्य्यायः । क्रमुकफलम् १ पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कणम् ५ श्लक्ष्णकम् ६ उद्वेगम् ७ पूगफलम् ८ । इति राजनिर्घण्टः ॥ पूगीफलम् ९ । इति भावप्रकाशः ॥*॥ अस्य मस्तिष्कस्य गुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । बलप्राणशुक्रवृद्धिमेदमदकारित्वम् । मूत्ररोगनाशित्वञ्च । इति राजवल्लभः ॥*॥ अस्य निर्यासस्य गुणाः । हिमत्वम् । मोहनत्वम् । गुरुत्वम् । विपाके उष्णत्वम् । क्षारत्वम् । साम्लत्वम् । वातघ्नत्वम् । पित्तलत्वञ्च ॥*॥ अस्य फलगुणाः सम्मोहकारित्वम् । कषायत्वम् । स्वादुत्वम् । रेचनत्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । वक्त्रक्लेदमलापहत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । रूक्षत्वम् । कफपित्तकारित्वम् । दीपनत्वञ्च ॥*॥ आर्द्रस्य तस्य गुणाः । गुरुत्वम् । अभिष्यन्दित्वम् । अग्निदृष्टिहरत्वञ्च ॥*॥ स्विन्नस्य तस्य गुणः । दोषत्रयच्छेदित्वम् । दृढमध्यं तद्गुणसमम् । इति भावप्रकाशः ॥*॥ आमपूगस्य गुणाः । कषायत्वम् । सुखमलरक्तामश्लेष्मपित्तोदराध्माननाशित्वम् । कण्ठशुद्धिकारित्वम् । सारकत्वञ्च ॥*॥ शुष्कस्य तस्य गुणाः । कण्ठामयघ्नत्वम् । रुचिकरत्वम् । पाचनत्वम् । रेचनत्वञ्च ॥*॥ तत् ताम्बूलेनासमयुतञ्च चेत् झटिति पाण्डुवातशोथकारित्वञ्च । इति राजनिर्घण्टः ॥*॥ तत्पीतगुणाः । तस्यादिपीतं विषतुल्यम् । द्वितीयपीतं भेदकं दुर्जरञ्च । तृतीयपीतं मानोपेयुक्तं सुधातुल्यं रसायनञ्च । इति राजवल्लभः ॥
(ताम्बूलेन विना केवलं गुवाकभक्षणाच्चाप्ता-

लताबाणिज्यमोचनार्थं गङ्गादर्शनरूपप्रायश्चित्तमप्युक्तम् । यथा,—

"ताम्बूलं न मुखे दत्त्वा गुवाकं भक्षयेद् यदि ।
तावच्चाण्डालतां याति यावद् गङ्गानदर्शनम् ॥")

गुह, ऊ ञ संवृतौ । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सक-वेट् ।) ह्रस्वी । ऊ, अगूहीत् अघुक्षत् । ञ, गूहति गूहते । गुहो गोऽकरिति दीर्घः । इति दुर्गादासः ॥

गुहः, पुं, (गूहति रक्षति पालयतीत्यर्थः देवसेनाम् । गुह+"इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः । नामनिरुक्तौ तु गुहा आवासत्वेनास्त्यस्येति अच् । एतयोर्युक्तमपि द्वयोरेव क्रमान्वयेनोदाहरणे दृश्यते । यथा, महाभारते । ३ । २२८ अध्याये ।

"रुद्रसूनुं ततः प्राहुर्गुहं गुणवतामरम् ।"

इत्युपक्रम्य ।

"अथैनमभ्ययुः सर्वा देवसेनाः सहस्रशः ।
अस्माकं त्वं पतिरिति ब्रुवाणाः सर्व्वतो दिशः ॥"
इत्यन्तेन महात्मा कार्त्तिकेयः सैनापत्यार्थं देवैः प्रार्थितः । ततो नामनिरुक्तिः । यथा, महाभारते । १३ । ८५ । ८०—८३ ।

"दिव्यं शरवणं प्राप्य ववृधेऽद्भुतदर्शनः ।
ददृशुः कृत्तिकास्तन्तु बालार्कसदृशद्युतिम् ॥
स्कन्नत्वात् स्कन्दतां चापि गुहावासाद् गुहोऽभवत् ॥")

कार्त्तिकेयः । इत्यमरः । १ । १ । ४२ ॥ घोटकः । इति शब्दरत्नावली ॥ श्रीरामसखः । स तु शृङ्गवेरपुरवासी निषादाधिपतिः । (यथा, रामायणे । २ । ५० । ३३ ।

"तत्र राजा गुहो नाम रामस्यात्मसमः सखा ।
निषादजात्यो बलवान् स्थपतिश्चेति विश्रुतः ॥"

गूहते संवृणोति स्वरूपादीनि मायया इति । गुह+कः ।) विष्णुः । (यथा, महाभारते । १३ । १४९ । ५४ ।

"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ॥"

महादेवः । यथा, महाभारते । १३।१७।६० ।

"बालरूपो गुहावासी गुहो माली तरङ्गवित् ॥")

कायस्थानां पद्धतिविशेषः ॥ (यथा, कायस्थकुलदीपिकायाम् ।

"अथ गुहकुलोद्भवो दशरथाभिधानो महान् कुलाम्बुजमधुव्रतो विविधपुण्यपुञ्जान्वितः ॥")

गुहषष्ठी, स्त्री, (गुहस्य कार्त्तिकेयस्य प्रिया या षष्ठी तस्य जन्मतिथित्वात्तथात्वम् ।) मार्गशीर्षमासीयशुक्लषष्ठी । यथा, भविष्ये ।

"येयं मार्गशिरे मासि षष्ठी भरतसत्तम ! ।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया ॥"

शुक्लेयं गुहषष्ठी । इति तिथ्यादितत्त्वम् ॥

गुहा, स्त्री (गुह+कः टाप् च ।) सिंहपुच्छीलता । गर्त्तः । पर्व्वतादेर्गह्वरम् । इति मेदिनी । हे । ४ । (यथा, रामायणे । १ । १ । ७० ।

"किष्किन्ध्यां रामसुग्रीवौ जग्मतुश्च गुहां तदा ॥")

शरीरस्य पर्य्यायः । बिलम् २ शिलासन्धिः ३ देवखातम् ४ गह्वरम् ५ । शालपर्णी इत्यः ६ । इति राजनिर्घण्टः ॥ (हृदयम् । यथा, शतपथब्राह्मणे । ११ । २ । ६ । ५ ।

"तस्मादिदं गुहाहृदयम् ॥" गूढा आत्मज्ञानज्ञेयपदार्थाः यस्यां गूहतेऽस्यामात्मा इति वा । गुह+भिदादित्वादधिकरणे अङ् टाप् च । बुद्धिः । यथा, श्वेताश्वतरोपनिषदि ।

"अणोरणीयान् महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः ॥")

गुहाशयः, पुं, (गुहासु गिरिगह्वरादिषु शेते अवतिष्ठते इति । शीङ् ल शयने+"अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् ।) व्याघ्रः । इति राजनिर्घण्टः ॥ (गुहाशायित्वादेवास्य तथात्वम् । यथा, भावप्रकाशे ।

"सिंहव्याघ्रर्क्षतरक्षुद्वीपिगण्डकाः ।
बभ्रुजम्बुकमार्ज्जारा इत्याद्याः स्युर्गुहाशयाः ॥"

गुहायां हृदये बुद्धौ वा शेते विराजते इत्यर्थः ।) विष्णुः । (यथा, श्वेताश्वतरोपनिषदि । "सर्व्वभूतगुहाशयः ।" यथा च । [शयः ।

"तावत् स भगवान् साक्षात् योगाधीशो गुहाशयः ।
अन्तर्दधे ऋषेः सद्यो यथेहानीशनिर्म्मिता ॥"

इति श्रीभागवतम् ॥

(प्राणाः । यथा, मुण्डकोपनिषदि । २ । १ । ८ ।

"सप्त इमे लोका येषु चरन्ति प्राणा
गुहाशया निहिताः सप्त सप्त ।"

गुहाशायिनि त्रि ॥)

गुहिनं, क्ली, (गूहते हस्त्यादिभिराक्रमं भवतीति । गूहतेऽस्मिन्निति वा । गुह+बाहुलकात् इनन् ।) वनम् । इति शब्दरत्नावली ॥

गुहिलं, क्ली, (गूहते पादपादिभिराक्रमं भवतीति । गुह+"गुपादिभ्यः कित् ।" उणां । १ । ५६ । इति इलच् । गुणनिषेधार्थं कित्त्व ।) धनम् । इत्युणादिकोषः ॥

गुहेरः, पुं, (गूहते लौहादेर्मलादिकं विलोपयन् खड्गादयस्त्वेनापादयतीति । धातूनामनेकार्थत्वात्तथात्वमित्यवधेयम् । गुह+"मूलेरादयः ।" उणां । १ । ६१ । इति निपातनादेरक्प्रत्ययः ।) लौहकारः । इत्युणादिकोषः ॥ (गूहते रक्षतीति ।) गोप्ता । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गुह्यं, क्ली, (गुहां गोपनं अर्हति वस्त्राद्यभ्यन्तरस्थानं सम्भुमर्हतीति यावत् । गुहा+"तदर्हति ।" ५ । १ । ६३ । इति यत् । गुह+कर्म्मणि क्यपित्येके ।) उपस्थः । स तु भगं लिङ्गञ्च । (भगार्थे यदुक्तम् ।

"कामार्त्तः पुरुषो यत्र चुम्बयेद् गुह्यमोहतः ॥")

रहस्ये त्रि । इत्यमरः । ३ । ३ । १५३ ॥ गोप्यम् । तत्पर्य्यायः । विविक्तः २ विजनः ३ छन्नः ४ निःशलाकः ५ रहः ६ उपांशु ७ गूढम् ८ उपह्वरम् ९ । इति जटाधरः ॥ (यथा, भगवद्गीतायाम् । ९ । २ ।

"राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ॥"

तथा च, देवीभागवते । १ । ३ । ३० ।

"पुराणगुह्यं सकलं समेतं
गुरोः प्रसादात् करुणानिधेश्च ॥")

गुह्यः, पुं, (गुहां संरक्षादेर्गर्त्तमर्हतीति । गुहा+"दण्डादिभ्यो यत् ।" ५ । १ । ६६ । इति यत् ।) कमठः । दम्भः । इति मेदिनी । ये । १९ ॥ (गूहितुमर्हति योग्यो भवति उपनिषद् वेद्यत्वात् यद्वा गुहायां बुद्धौ हृदयाकाशे वस्तुमर्हति ध्यानायार्हतीति यावत् ।) विष्णुः । इति तस्य सहस्रनाममध्ये पठितः ॥ (यथा, महाभारते । १३ । १४९ । ७१ ।

"गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥"

महादेवः । यथा, महाभारते । १३ । १७ । ९१ ।

"यज्ञः पादसुतो गुह्यः प्रकाशो जङ्गमस्तथा ॥"

गुह्यानि गूहति गुप्तान् प्रकटीकरोतीति । ग्रहशान्तिप्रभावान्वितजीवविशेषः । यथा, ऋग्वेदे । ७ । १०३ । ८ ।

"अध्वर्य्यवो घर्म्मिणः सिष्विदाना
आविर्भवन्ति गुह्या न केचित् ॥"

उपदेवताविशेषः । यथा, महाभारते । ३ । ३ । ४३ ।

"गुह्याः पितृगणाः सप्त ये दिव्या ये च मानुषाः ॥"

स्त्रियां टाप् । गायत्रीस्वरूपा देवी । यथा, देवीभागवते । १२ । ६ । ४२ ।

"गुर्व्वी गुणवती गुह्या गोप्तव्या गुणदायिनी ॥"

गोपनीये त्रि । यथा, मनुः । ११ । २६५ ।

"सगुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥"

"प्रणवाख्यो गुह्यो गोपनीयः ।" इति कुल्लूकभट्टः ॥)

गुह्यकः, पुं, (गूहति निधिं धनविशेषं रक्षतीति । गुह+ण्वुल् । पृषोदरादित्वाद्यगागमे साधुः ।) देवयोनिविशेषः । स तु कुवेरानुचरः निधिरक्षको माणिभद्रादियक्षभेदः । इत्यमरभरतौ ॥ (काव्योतुपक्षादिभेदेनैव तु बहुधोदाहियते तथाच याज्ञिकोक्तम् ।

"निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञकाः ॥"

गुह्यं कुत्सितं कायति शब्दायते प्रकाशयति वा । कै+कः । यद्वा गुह्यं गोप्यं कं सुखं यस्य । "शकिदुहिगुहिभ्योवेति" काशिकोक्तेः ण्यप् वा । यद्वा गुह्यात् सृष्टिं चिकीर्षोः परब्रह्मणः शरीरस्य गुह्यदेशात् कायति आविर्भवतीति । यदुक्तं ब्रह्मवैवर्त्ते ब्रह्मखण्डे । ५ । ६० ।

"आविर्ब्बभूव कृष्णस्य गुह्यदेशात्ततः परम् ।
पिङ्गलश्च पुमानेकः पिङ्गलैश्च गणैः सह ।
आविर्भूता यतो गुह्यात् तेन ते गुह्यकाः स्मृताः ॥"

यथा, महाभारते । ३ । ३ । १० ।

"तव दिव्यं रथं यान्तमनुयान्ति वराथिनं ।
सिद्धचारणगन्धर्व्वा यक्षगुह्यकपन्नगाः ॥")

तस्य लोकः पिशाचलोकादूर्द्धं गन्धर्व्वलोकादधः । येन येन कर्म्मणा एतल्लोकप्राप्तिस्तदुच्यते ।

"ततो गच्छन्ददर्शाथ वृक्षपुष्पजनैर्वृतम् ।
शिम्बिकैः सूक्ष्मवत्रैश्च घनगम्भीरनिःस्वनैः ॥

लोकैरध्युषितं लोकं श्यामलाङ्गैश्च सोमपैः ।
गत्वौ कथयतं केऽमी को लोकः पुण्यतः कृतः ॥
गणावूचतुः ।
गुह्यकानामयं लोकस्तेते वै गुह्यकाः स्मृताः ।
न्यायेनोपार्ज्य वित्तानि गूहयन्ति च ये भुवि ॥
स्वमार्गगा धनाढ्याश्च शूद्रप्रायाः कुटुम्बिनः ।
संविभज्य च भोक्तारः क्रोधासूयाविवर्ज्जिताः ॥
न तिथिं नैव वारञ्च संक्रान्त्यादि न पर्व्व च ।
नाधर्मञ्च न धर्मञ्च विदन्त्येते सदासुखाः ॥
एकमेव हि जानन्ति कुलपूज्यो हि यो द्विजः ।
तस्मै गाः संप्रयच्छन्ति मन्यन्ते तद्वचः स्फुटम् ॥
सम्यग्विभाज्यो स्यात्रापि तेन पुण्येन गुह्यकाः ।
भुञ्जते स्वर्गसौख्यानि देवत्वमकुतोभयाः ॥”

इति काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादः ॥ (पक्वान्नविशेषः । तस्य पाकप्रकारो यथा, शब्दार्थचिन्तामणिधृतपाकशास्त्रे ।
“समितां सर्पिषा भृष्टां सितादाक्षादिसम्भृताम् ।
एला लवङ्गकर्पूरमरीचपरिवासिताम् ॥
क्षिप्त्वान्यसमितालम्बपुटे वेष्ट्य घृते पचेत् ।
ततः खण्डे न्यसेत् पक्वं गुह्यकोऽयमुदाहृतः ॥”
अस्य गुणास्तत्रैव । यथा,—
“गुह्यको बृंहणो हृद्यो रुच्यः पित्तानिलापहः ।
मधुरोऽतिगुरुः पाके किञ्चित् सन्तानकृत् सरः ॥”)

गुह्यकेश्वरः, पुं, (गुह्यकानामीश्वरः प्रभुरधिपतिरित्यर्थः ।) कुवेरः । इत्यमरः । १ । १ । ७१ ॥ (यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे । ५ । ६१ ।
“यः पुमान् स कुवेरश्च धनेशो गुह्यकेश्वरः ॥”)

गुह्यगुरुः, पु (गुह्यः गोप्यः हृदयाभ्यन्तर्वर्त्ती अन्तर्यामिस्वरूपो गुरुः ।) शिवः । इति त्रिकाण्डशेषः ॥

गुह्यदीपकः, पुं, (गुह्येन गुह्यस्थज्योतिषा दीपयति प्रकाशयतीति । स्वयं गुह्यः सन् दीपयतीत्येके । दीप + ण्वुल् ।) खद्योतः । इति शब्दचन्द्रिका ॥

गुह्यनिष्यन्दः, पुं, (गुह्यात् गुह्यदेशात् उपस्थछिद्रादित्यर्थः निष्यन्दते निर्गच्छते इति ।) मूत्रम् । इति राजनिर्घण्टः ॥

गुह्यपुष्पः, पुं, (गुह्यानि अदृश्यानि पुष्पाणि अस्य इति ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥

गुह्यबीजः, पुं, (गुह्यमदृश्यं बीजमस्य ।) भूतृणम् । इति राजनिर्घण्टः ॥

गुह्यभाषितं, क्ली, (गुह्यं रहस्यं भाषितम् ।) मन्त्रः । इति जटाधरः ॥ गुप्तवाक्यञ्च ॥

गू, ओ शि विट्त्सर्गे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) ओ, गूनः । शि, गुवति अगुवीत् । विट्त्सर्गो हदनम् । इति दुर्गादासः ॥

गूः, पुं, गुः । विष्ठा । गूधातोः कर्म्मणि क्विप्प्रत्ययेन निष्पन्नः ॥ (गच्छत्यपानेन देहात् । गम + क्वः । मलोप इत्येके ॥)

गूढं, क्ली, (गुह + भावे क्तः ।) रहः । गुह्यम् । इति मेदिनी । ढे । १ ॥

गूढः, त्रि, (गुह + कर्म्मणि क्तः ।) संवृतः । गुप्तः । इत्यमरमेदिनीकरौ ॥ (यथा, पञ्चदश्याम् ।३।२८।
“शक्तिरस्त्यैश्वरी काचित् सर्व्ववस्तुनियामिका ।
आनन्दमयमारभ्य गूढा सर्व्वेषु वस्तुषु ॥”)

गूढजः, पुं, (गूढात् गुप्तभावादित्यर्थः गूढे गुप्तस्थाने वा जायते इति । गूढः सन् जायते इत्येके । गूढ + जन + डः ।) गूढोत्पन्नपुत्त्रः । इति मिताक्षरा ॥ (यथा, याज्ञवल्क्यः । २ । १३२ ।
“गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतो मतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥”)

गूढनीडः, पुं, (गूढः गोपनस्थलस्थः गूढे गुप्तस्थाने वा नीडः कुलायोऽस्य ।) खञ्जनपक्षी । इति शब्दमाला ॥

गूढपत्रः, पुं, (गूढः समाच्छन्नः पत्रैर्य योऽसौ । गूढं पत्रमस्येति केचित् ।) करीरवृक्षः । अङ्कोठवृक्षः । इति राजनिर्घण्टः ॥

गूढपथः, पुं, (गूढः पन्था गतिर्यस्य समासनिष्पन्नत्वात् च ।) अन्तःकरणम् । इति हेमचन्द्रः ।६।५॥ गुप्तपथश्च ॥

गूढपात्, [द्] पु, (गूढं पादयति । पद गतौ + णिजन्तात् क्विप् । यद्वा गूढाः पादा अस्य हस्तोदरादित्वादलोपे साधुः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥

गूढपादः, पु, (गूढाः संवृताः पादा अस्य ।) सर्पः । इति शब्दरत्नावली ॥
(“पादानामपि विज्ञेये द्वे शते द्वे च विंशती ।”
इत्यागमः ।
आच्छादितपादे त्रि । यथा, महाभारते ।
“सन्तोषामृततृप्तस्य विश्वैश्वर्यं करस्थितम् ।
उपानद्गूढपादस्य सर्व्वा चर्म्मावृतेव भूः ॥”)

गूढपुरुषः, पु (गूढः गुप्तः पुरुषः छद्मवेशी राजप्रेरितो जनः इत्यर्थः ।) चरः । इत्यमरः ।२।८।१३॥

गूढपुष्पकः, पुं, (गूढः समावृत इव पुष्पैर्योऽसौ इवार्थे कन् । गूढानि संवृतानि पुष्पाण्यस्य इत्येके ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥

गूढफलः, पु, (गूढः संवृतप्रायः फलेनासौ । गूढं यथा स्यात् तथा फलतीत्येके ।) वदरः । इति राजनिर्घण्टः ॥

गूढमार्गः, पु, (गूढः प्रच्छन्नः मार्गः ।) भुवोऽन्तरमार्गः । सुड़ङ्ग इति भाषा ॥ तत्पर्य्यायः । सुरङ्गा २ सन्धिला ३ । इति हेमचन्द्रः । ४।५१॥

गूढमैथुनः, पु, (गूढं अन्यैरदृश्यं मैथुनं यस्य ।) काकः । इति त्रिकाण्डशेषः ॥

गूढवर्च्चाः, [स्] पुं, (गूढं वर्च्चोऽस्य ।) भेकः । इति त्रिकाण्डशेषः ॥

गूढवल्लिका, स्त्री, (गूढा वल्लिका वल्ली यस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

गूढसाक्षी, [न्] त्रि, (गूढः प्रच्छन्नः सन् यः अर्थिना प्रत्यर्थिवाक्यं श्रावितः तादृशः साक्षी ।) योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः सः । फरियादी गोपने राखिया आसामीर कथा याहाके शुनाइयाछे सेइ साक्षी इति भाषा ॥ तथा च नारदः ।
“अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।
यः श्राव्यते तदा गूढो गूढसाक्षी स उच्यते ॥”
इति व्यवहारतत्त्वम् ॥

गूढाङ्गः, पु, (गूढानि अङ्गानि यस्य इच्छामात्रेणैवाङ्गानि अन्तःप्रवेशयति इति तात्पर्य्यार्थः ।) कच्छपः । इति राजनिर्घण्टः ॥

गूढाङ्घ्रिः, पु, (गूढः संवृतः शल्कैनावृतोऽङ्घ्रिश्चरणोऽस्य ।) सर्पः । इति राजनिर्घण्टः ॥

गूढोत्पन्नः, पुं, (गूढं अन्यैरविज्ञातं यथा स्यात् तथा उत्पन्नो जातः ।) द्वादशविधपुत्त्रमध्ये पुत्त्रविशेषः । यथा, मनुः । ९ । १७० ।
“उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥”
अस्यार्थः । “यस्य गृहेऽवस्थितायां भार्य्यायां पुत्त्र उत्पद्यते सजातीयोऽयं भवतीति ज्ञानेऽपि कस्मात् पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स गृहे अप्रकाशमुत्पन्नस्तस्य पुत्त्रः स्यात् यदीयायां भार्य्यायां जातः ।” इति कुल्लूकभट्टः ॥
(अयं हि बन्धुदायहारी । यथाह मनुः । ९।१५९ ।
“औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥”)

गूथं, क्ली पु, (गवते शब्दायते गुवति पुरीषमुत्सृजतीति वा । गुङ शब्दे गुशि विष्ठोत्सर्गे वा + “तिथपृष्ठ गूथ यूथ प्रोथाः ।” उणा । २ । १२ । इति थक् दीर्घश्च ।) विष्ठा । इत्यमरः । २ । ६ । ६८ ॥ गु इति भाषा । (शरीरादिमलेऽपि कर्णगूथादिशब्ददर्शनात् ॥)

गूथलक्तः, पुं, (गूथे विष्ठायां रक्तः अनुरक्त आसक्त इत्यर्थः । ततो रस्य लत्वम् ।) पक्षिविशेषः । गुये शालिक् इति भाषा । तत्पर्य्यायः । शरमल्लः २ क्षुद्रचूड़ः ३ साक्षिकः ४ । इति शब्दचन्द्रिका ॥

गूनः, त्रि, (गूयते पुरीषमुत्सृज्यते स्म इति । गु शि विष्ठोत्सर्गे + क्तः । “दुग्वोदीर्घश्चेति ।” नत्वं दीर्घश्च ।) कृतपुरीषोत्सर्गः । तत्पर्य्यायः । हनः २ । इत्यमरः । ३ । १ । ६६ ॥

गूर, ङ क उद्यमे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) दीर्घी । ङ क, भ्रमेषु नो गूरयते महोरगः । इति दुर्गादासः ॥ (तथा च कविरहस्ये । ५१ ।
“भ्रमेषु नोद्गूरयतेऽक्षमाद्भवे-
ऽप्युक्तोऽपि यो नोद्गुरते स्वधर्म्मवित् ॥”)

गूर, ई य ङ वधे । गत्याम् । इति कविकल्पद्रुमः । (दिवां-आत्मं-सकं-सेट् ।) दीर्घी । तथा च ।
“दीपिपूरिजनिगारिघूरयः
काशिवाशिपदिसूरितूरयः ।
चरिजूरिखिदिविदयतिः क्लिशि-
चूरिरुध्यतिमनो दिवादिषु ॥
इति रथोद्धतायां चक्रेश्वरः ।” इति दुर्गादासः ॥

गूरणं, क्ली, (गूर क ङ उद्यमे + भावे ल्युट् ।) उद्यमः । इत्यमरटीकायां रायमुकुटः ।३।२।११॥

गूर्द्द क निकेतने। कूर्द्दे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गूर्द्दयति। इति दुर्गादासः॥

गूर्द्द, ङ कूर्द्दे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ङ, गूर्द्दते। इति दुर्गादासः॥

गूवाकः पुं, (गुवति पुरीषमुत्सृजत्यनेन यद्वा गुवति बहुलमभ्यासेन सुखविवरात् पुरीषवद्गुतं उत्सृजतीति। गुध्रि विष्ठोत्सर्गे+"पिनाकादयश्च।" उणा। ४। १५। इति आकः। कुटादित्वाद्गुणाभावः। निपातनात् दीर्घत्वम्।) गुवाकः। इति शब्दरत्नावली॥

गृघणा, स्त्री, (भूषयतीति। निपातनात् भकारस्य गत्वम्।) मयूरचन्द्रकः। मयूरपिच्छचक्रम्। इति शब्दचन्द्रिका॥

गृ सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) गरति नरं मेघः। इति दुर्गादासः॥

गृज, ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) सप्तमस्वरी गर्ज्जति। इति दुर्गादासः॥ (यथा पूर्व्वचातकाष्टके। ४।

"गर्ज्जसि मेघ। न यच्छसि तोयं
चातकपक्षी व्याकुलितोऽहम्।
दैवादिह यदि दक्षिणवातः
क्व त्वं क्वाहं क्व च जलपातः॥")

गृजि, इ ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) सप्तमस्वरी। इ, गृञ्जति। इति दुर्गादासः॥ (ध्वनिरिह कथनमिति मत्वा केचित् सकर्म्मकमपि वदन्ति॥)

गृञ्जनं क्ली, (गृञ्जते अभक्ष्यत्वेन कथ्यते प्राणनाशकत्वादिति। गजि ध्वनौ — कर्म्मणि ल्युट्।) विषदिग्धपशोर्म्मांसम्। इति मेदिनी। ने। ५८॥ (गृञ्जते रोगनाशकतया भक्ष्यत्वेन कथ्यते इति।) मूलविशेषः। सलगम इति ख्यातः। तत्पर्य्यायः। शिखिमूलम् २ यवनेष्टम् ३ वर्त्तुलम् ४ ग्रन्थिमूलम् ५ शिखाकन्दम् ६ कन्दम् ७ डिण्डीरमोदकम् ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातरोगगुल्मनाशित्वम्। रुच्यत्वम्। दीपनत्वम्। हृद्यत्वम्। दुर्गन्धत्वञ्च। इति राजनिर्घण्टः॥

गृञ्जनः, पुं, (गृञ्जते अभक्ष्यत्वेन कथ्यते इति। गजि+ल्युट्।) रसोनकः। रसुन् इति भाषा। इति मेदिनी। ने। ५८॥ रक्तलशुनः। इति राजनिर्घण्टः॥ (अस्य अभक्षणीयत्वमुक्तं यथा, मनौ। ५। १९—२०।

"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः॥
अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनञ्चरेत्।
यतिचान्द्रायणं वापि शेषेषूपवसेदहः॥")

गृडीवः, पुं, पृथुश्रृगालः। वड शेयाल इति भाषा। तत्पर्य्यायः। लोपाकः २। इति हेमचन्द्रः। ४। ३५७॥ (गृडिवोऽपि पाठः॥)

गृत्सः, पुं, (गृध्यति लिप्सत्यनेनेति। गृध अभिकाङ्क्षायाम्+"गृधिपण्योर्दकौ च।" उणा। ३। ६९। इति सः, स च कित् दकारान्तादेशश्च।) कन्दर्पः। इत्युणादिकोषः॥ (त्रि, स्तुत्यः। यथा, ऋग्वेदे। ७। ८७। ५।

"गृत्सो राजा वरुणश्चक्र एतं दिविप्रेङ्खम्।"
"गृत्सः स्तुत्यः।" इति भाष्यम्॥)

गृध, इर य उ लिप्से। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट् क्वावेट्।) इर, अगृधत् अगर्धीत्। असात् पुषादित्वात् नित्यं ङ इत्यन्ये। य, गृध्यति धनं लुब्धः। उ, गर्द्धित्वा गृद्धा। इति दुर्गादासः॥

गृधुः, पुं, (गृध्यत्यनेनास्वादुवा इति। गृधुय इर लिप्सायाम्+"भृमिदिय्धिगृधिधृषिमृषिभ्यः।" उणां। १। २३। इति कुः।) कामदेवः। इत्युणादिकोषः॥ (गृध्यति अभिलषतीति विग्रहे वाच्यलिङ्गत्वात्।) अभिलाषुकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृधूः, पुं, (गृध्+बाहुलकात् कूः।) गुह्यं। अपानम्। कुत्सितम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृध्नुः, त्रि, (गृध्यति कामयते लिप्सति वा धनमिति शेषः। गृध्+"त्रसिगृधिधृषिक्षिपेः क्नुः।" ३। २। १४०।। इति क्नुः।) लुब्धः। इत्यमरः। ३। १। २१॥ (यथा, भागवते। ३। १४। २०।

"न वयं प्रभवस्तां त्वामनुकर्त्तुं गृहेश्वरि।।
अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः॥"
क्वचित् गृध्रोऽपि पाठः॥)

गृध्नुता, स्त्री, (गृध्नोर्भावः इति तल्।) लुब्धता। तत्पर्य्यायः। रागः २ सङ्गः ३। इति त्रिकाण्डशेषः॥

गृध्रः, पुं, (गृध्यति अभिकाङ्क्षति मांसानीति। "सुसूधाञ्गृधिभ्यः क्रन्।" उणा। २। २४। इति क्रन्।) पक्षिविशेषः। गृधिनी शकुनी इति च भाषा। तत्पर्य्यायः। दाक्षाय्यः २ वज्रतुण्डः ३ दूरदर्शनः ४। इति राजनिर्घण्टः॥ (यथा, महाभारते। ६। ३। ३१।

"गृध्रः सम्पतते शीर्षे जनयन् भयमुत्तमम्॥"
इह लोके लोभवशात् यस्तु देवब्राह्मणस्वं हरति स पापात्मा परत्र गृध्रोच्छिष्टेनोपजीवति। यथाह मनुः। ११। २६।

"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥")

गृध्रनखी, स्त्री, (गृध्रस्य नख इवाकारोऽस्त्यस्याः इति। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। ततो ङीष्।) कुलिकवृक्षः। इति रत्नमाला॥ कालियाकडा इति भाषा। (यथा, सुश्रुते सूत्रस्थाने। ३८ अध्याये।

"करमर्द्दत्रिवृत्सहाचरीयकशतावरीगृध्रनख्य इति कण्टकपञ्च॥") कोलिवृक्षः। इति त्रिकाण्डशेषः॥

गृध्रपत्रा, स्त्री, (गृध्रस्य पत्रमिव पक्षवदित्यर्थः पत्रमस्याः। गृध्र इव धूम्रवर्णं पत्रमस्या इत्येके।) धूम्रपत्रावृक्षः। इति राजनिर्घण्टः॥

गृध्रराजः, पुं, (गृध्रः राजा इवेत्युपमितसमासः। गृध्राणां राजेति वा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) जटायुपक्षी। यथा,—

"भूयः कनकपुङ्खाग्रैः रथो बाणैरजिह्मगैः।
निर्बिभेद सुतीक्ष्णाग्रैर्गृध्रराजं शिलाशितैः॥"
इति रामायणम्॥

गृध्रसी, स्त्री (गृध्यति मांसमभिकाङ्क्षति सततं इति गृध्+क्रन्। गृध्रो मांसलोलुपो मनुष्यः तं स्यति पीडयति नाशयति वा। सो+कः ङीष्।) वातरोगविशेषः। तल्लक्षणं यथा,—

"स्फिक्पूर्व्वोरुकटीपृष्ठजानुजङ्घापदं क्रमात्।
गृध्रसी स्तम्भरुक् तोदैर्गृह्णाति स्पन्दते मुहुः॥
वाताद्वातकफाभ्यां सा विज्ञेया द्विविधा पुनः।
वातजायां भवेत्तोदो देहस्यातीव वक्रता॥
जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता दृढम्।
वातश्लेष्मवायान्तु गौरवं वह्निमार्द्दवम्॥
तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्तथैव च॥"
गृध्रसीवातात् केवलात् स्फिगादिपर्य्यन्तं स्तम्भरुक् तोदैर्गृह्णाति। क्रमात् वृद्धिक्रमात्। तेन यथा यथा वर्द्धते तथा तथा स्फिगादीन्याक्रामति नात्र ग्रन्थे निर्द्देशक्रमनियमः। तथा मुहुः स्पन्दते स्फिगादिषु शिराकम्पं करोतीत्यर्थः॥१॥

अथ तस्याश्चिकित्सा।

"गृध्रस्यान्तु नरं सम्यक् रेचेन वमनेन वा।
ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत्॥
नादौ वस्तिविधिं कुर्य्याद्यावदूर्द्ध्वं न शुध्यति।
स्नेहो निरर्थकः स स्याद्भस्मन्येव हुतो यथा॥१॥
तैलमेरण्डजं प्रातर्गोमूत्रेण पिबेन्नरः।
मासमेकं प्रयोगोऽयं गृध्रस्यान्तु महापहः॥१॥

तैलं घृतं सार्द्रकमातुलुङ्ग-
रसं सचुक्रं सगुडं पिबेद्वा।
कट्यूरुपृष्ठत्रिकशूलगुल्म-
गृध्रस्युदावर्त्तहरः प्रयोगः॥२॥

निष्कुष्यैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत्।
तत्पायसं कटीशूले गृध्रस्यां परमौषधम्॥३॥
एरण्डमूलं बिल्वञ्च बृहती कण्टकारिका।
कषायो रुचकोपेतः पीतो वृषणवस्तिजम्॥
गृध्रसीजं हरेच्छूलं चिरकालानुबन्धि च॥"
रुचकं सौवर्च्चलम्॥ ४॥

"गोमूत्रैरण्डतैलाभ्यां कृष्णाचूर्णं पिबेन्नरः।
दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम्॥५॥

सिंहास्यदन्तीकृतमालकानां
पिबेत् कषायं रुबु-तैलमिश्रम्।
यो गृध्रसीनष्टगतिः प्रसुप्तः
स शीघ्रगः स्यादिह किमत्र चित्रम्॥६॥

हृद्धिम्वितरोः सारो वारिणा परिपेषितः।
स पीतो नाशयेत् क्षिप्रमसाध्यामपि गृध्रसीम्॥७॥
शेफालिकादलैः क्वाथो मृद्वग्निपरिपाचितः।
दुर्व्वारगृध्रसीरोगं पीतमात्रं प्रणाशयेत्॥"
शेफालिकानिर्गुण्डी॥ ८॥

"रास्नायास्तु पलञ्चैकं पञ्च कर्षाणि गुग्गुलोः।
सर्पिषा वटिकां कृत्वा भक्षयेद् गृध्रसीहरीम्॥"

इति रास्नागुग्गुलुः ॥ ६ ॥
"रास्नाम्लतारग्वधदेवदारु-
त्रिकण्टकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं
जङ्घोरुपृष्ठत्रिकपार्श्वशूली ॥"
इति रास्नासप्तकक्वाथ ॥ १० ॥
"पथ्याविभीतामलकीफलानां
शतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तश्च पलद्वयाणा
द्रोणे जले संस्थितमेकरात्रम् ॥
अर्द्धावशेषं क्वथितं कषायं
भाण्डे पचेत्तत् पुनरेव लौहे ।
अश्मनि वस्त्रैरवताम्य दद्यात्
द्रव्याणि सञ्चूर्ण्य पलार्द्धकानि ॥
विडङ्गदन्तीत्रिफलागुडूची-
कृष्णात्रिवृन्नागरकोषणानि ।
यथेष्टचेष्टस्य नरस्य शीघ्रं
हिमाम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
स गृध्रसीं नूतनखञ्जताञ्च ।
प्लीहानमुग्रं जठराणि गुल्मं
पाण्डुत्वकण्डूवमिवातरक्तम् ॥
पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः ।
बलेन नागेन समं मनुष्यं
जवेन कुर्य्यात्तुरगेण तुल्यम् ॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विशाम् ।
वातस्य सन्तानकरो विशेषा-
द्रोगेषु शस्तः सकलेषु तज्ज्ञैः ॥"
इति पथ्यादिगुग्गुलुः ॥ ११ ॥
इति भावप्रकाशः ॥
(तथा च ।
"रक्तवातसमुद्भूतान् दोषान् शृणु महामते ।
कट्यूरुजानुमध्ये तु जायते बहुवेदना ।
गृध्रसीति विजानीयात् तेन नोक्तञ्च लक्षणम् ॥"
"शतावरी बले द्वे च पिप्पली पुष्कराह्वयम् ।
चूर्णमेरण्डतैलेन गृध्रसीमपकर्षति ॥
अजमोदादिकं चूर्णमामवाते प्रकीर्त्तितम् ।
तदत्र योजनीयञ्च गृध्रसीनां निवारणम् ॥"
इति हारीते चिकित्सितस्थाने त्रयोविंशेऽध्याये ॥
"पार्ष्णिं प्रत्यङ्गुलीनां या कण्डरा मारुतार्द्दिता ।
सक्थ्युत्क्षेपं निगृह्णाति गृध्रसीं तां प्रचक्षते ॥"
इति वाभटे निदानस्थाने पञ्चदशेऽध्याये ॥
"पार्ष्णी प्रत्यङ्गुलीनान्तु कण्डरा यानिलार्द्दिता ।
सक्थ्नः क्षेपं निगृह्णीयाद् गृध्रसीति हि सा
स्मृता ॥"
इति सुश्रुते निदानस्थाने प्रथमेऽध्याये ॥
चिकित्सास्या यथा,—
"गृध्रसीविश्वाचीक्रोष्टुकशिरःखञ्जपङ्गुलवातकण्टक
पादहर्षपाददाहावबाहुकबाधिर्य्यधमनीगतवात-
रोगेषु यथोक्तं यथोद्देशञ्च शिराव्यधं कुर्य्या-
न्यन्नाववाहुकाद्वातथाविधिचिकित्सितश्चावे-
क्षेत ॥" इति च सुश्रुते चिकित्सितस्थाने ५मे
अध्याये ॥)

गृध्राणी, स्त्री, (गृध्र इव धूम्रवर्णेन अनिति प्राणि-
तीति । अन् + पचाद्यच् । गौरादित्वात् ङीष् ।
संज्ञायां णत्वम् ।) धूम्रपत्राक्षुपः । इति राज-
निर्घण्टः ॥

गृष्टि, स्त्री, (गृह्णाति सकृद्गर्भमिति । ग्रह उपा-
दाने + कर्त्तरि क्तिच् पृषोदरादित्वात् साधुः ।)
एकवारप्रसूता गौः । तत्पर्य्यायः । सकृत्प्रसू-
तिका २ । इति हेमचन्द्रः ॥ (यथा, महा-
भारते । १३ । ६३ । ३३ ।
"प्रष्ठौहीनां पीवराणाञ्च तावदग्र्या गृष्टयो धेनवः
सुव्रताश्च ॥"
यथा च ।
"गृष्ट्य एव स्थिरादीनि जले पक्त्वैकविंशतिम् ।
रसे तस्मिन् पचेत् सर्पिर्गृष्टिक्षीरं चतुर्गुणम् ॥
वीराद्विमाषकाकोली स्वयंगुप्तर्षभर्द्धिभिः ॥
मेदया च समैः कल्कैस्तत् स्यात् कल्याणकं महत् ।
बृंहणीयं विशेषेण सन्निपातहरं परम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे ॥
सकृत्प्रसूतस्त्रीमात्रम् । इति शब्दार्थचिन्ता-
मणिः ॥) वराहक्रान्ता । इत्यमरः ।२।४।१३५ ॥
बदरवृक्षः । इति मेदिनी । टे । १२ ॥ काश्मरी ।
इति राजनिर्घण्टः ॥

गृह, त क ङ ग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त-
चुरां-आत्मं-सकं-सेट् ।) सप्तमस्वरी । क ङ,
गृहयते । गृहो ग्रहणम् । इति दुर्गादासः ॥

गृहं, क्ली, (गृह्णाति धान्यादिकं जीवनार्थं यस्मि-
न्निति । ग्रह + "गेहे कः ।" ३।१।१४४ । इति
कः ।) इष्टकादिरचितवासस्थानम् । घर इति
भाषा ॥ (यथा, मनुः । २ । ३४ ।
"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात् ॥"
अर्द्धर्चादित्वादेवायं शब्दो विभाषया पुंसि च
वर्त्तते । तत्र बहुवचनान्त एव । यथा,—
"गृहाः पुंसि च भूम्न्येव ।" इत्यमरः ॥ अत
एव मनौ । ४ । २५० ।
"शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन् ,
दधि ॥")
तत्पर्य्यायः । गेहम् २ उदवसितम् ३ वेश्म ४
सद्म ५ निकेतनम् ६ निशान्तम् ७ वस्त्यम् ८
सदनम् ९ भवनम् १० अगारम् ११ मन्दिरम् १२
गृहाः १३ निकाय्यः १४ निलयः १५ आलयः १६
वासः १७ कुटः १८ शाला १९ सभा २० । इत्य-
मरः । २ । २ । ४ ५ ॥ पस्त्यम् २१ सादनम् २२
आगारम् २३ कुटिः २४ कुटी २५ गेहः २६
निकेतः २७ साला २८ मन्दिरा २९ ओकः ३० ।
इति भरतः ॥ निवासः ३१ संवासः ३२
आवासः ३३ अधिवासः ३४ निवसतिः ३५
वसतिः ३६ केतनम् ३७ । इति शब्दरत्नावली ॥
गयः ३८ कृदरः ३९ गर्त्तः ४० हर्म्म्यम् ४१
अस्तम् ४२ दुरोणे ४३ नीलम् ४४ दुर्य्याः ४५
स्वसराणि ४६ अमा ४७ दमे ४८ कृत्तिः ४९
योनिः ५० शरणम् ५१ वरूथम् ५२ छर्द्दिः ५३
छदिः ५४ छाया ५५ शर्म्म ५६ अजम ५७ ।
इति वेदनिघण्टौ ३ अध्यायः ॥ * ॥
अथ गृहारम्भकालः ।
"वैशाखश्रावणाषाढमार्गफाल्गुनकार्त्तिकाः ।
सुप्रशस्ता गृहारम्भे पत्नीपुत्त्रसमृद्धिदाः ॥
शुक्लपक्षे भवेत् सौख्यं कृष्णपक्षे भवेद्भयम् ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ॥
पूर्णिमाद्यष्टमीं यावत् पूर्व्वास्यं वर्जयेद्गृहम् ।
उत्तरास्यं न कुर्व्वीत नवम्यादिचतुर्द्दशीम् ॥
अमावस्याद्यष्टमीं यावत् पश्चिमास्यं विवर्ज्जयेत् ।
नवम्यादि तथा याम्यां यावच्छुक्लचतुर्द्दशीम् ॥
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ।
विष्कुम्भगण्डयोश्चैव गृहारम्भं न कारयेत् ॥
आदित्यद्वयरोहिणी स्वगशिरो ज्येष्ठा धनिष्ठो-
त्तरा
रेवत्याथ मघानुराधहरिभिः शुद्धैः स्वभावा-
दिभिः ।
सौम्यानां दिवसेऽथ गण्डरहिते योगे विरिक्ते
तिथौ
विष्टिव्यक्तदिने वदन्ति मुनयो वेश्मादिकार्य्यं
शुभम् ॥
त्रिभिस्त्रिभिर्वेश्मनि कृत्तिकाद्यै-
रुक्क्षेमपुत्त्राप्तिधनानि शोकाः ।
शत्रोर्भयं राजभयञ्च मृत्युः
सुखं प्रवासश्च नव प्रभेदाः ॥
नाशं दिशन्ति मकरालिकुलीरलग्ने
मेषे घटे धनुषि कार्म्मिसुदीर्घसूत्रम् ।
कन्याझषे मिथुनके ध्रुवमर्थलाभो
ज्योतिर्व्विदः कलशसिंहवृषेषु वृद्धिम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥
तत्र प्रवेशकालः ।
"ज्येष्ठापुनर्व्वसुवर्ज्जं गृहारम्भोदितञ्च यत् ।
तत् सर्व्वं चिन्तयेद्वेश्मप्रवेशे दैवचिन्तकः ॥
हस्तापुष्यपुनर्व्वसुप्रतिभिषाज्येष्ठास्वथो रोहिणी-
रेवत्युत्तरविष्णुवातशशभृन्मूलाधनिष्ठासु च ।
कन्याकुम्भवृषालिसिंहमिथुनस्वर्चोदयेऽर्के शुभे-
शुक्रेज्येन्दुजशीतरश्मिदिवसे वेश्मप्रवेशः शुभः ॥
कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनञ्च तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयं निलयं विशेत्तु ॥"
इति समयप्रदीपः ॥ * ॥
(गृहकरणे समयशुद्धिरुक्ता विश्वकर्म्मप्रकाशे
द्वितीयाध्याये यथा,—
"चैत्रे व्याधिमवाप्नोति यो नवं कारयेद्गृहम् ।
वैशाखे धनरत्नानि ज्येष्ठे मृत्युं तथैव च ॥
आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु हानिं भाद्रपदे तथा ॥
युद्धञ्चैवाश्विने मासि कार्त्तिके धनधान्यकम् ।
धनवृद्धिं मार्गशीर्षे पौषे तस्करतो भयम् ॥

माघे चाग्निभयं विद्याल्लक्ष्मीश्चैव फाल्गुने ॥”
गृहसंस्थापने मेषादिराशिगतशुभाशुभं यथा
तत्रैव, द्वितीयाध्याये ।
“गृहसंस्थापनं सूर्य्ये मेषस्थे शुभदं भवेत् ।
वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं भवेत् ॥
कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्द्धनम् ।
कन्या रोगं तुला सौख्यं वृश्चिके धनधान्यकम् ॥
कार्म्मुके च महाहानिर्मकरे स्याद्धनागमः ।
कुम्भे तु रत्नलाभः स्यात् मीने स्वप्नभयावहम् ॥
चापमीनमृगयुक्कन्यामासा दोषवहाः स्मृताः ।
ज्यैष्ठोर्ज्जमाघसिंहाख्याः सौरमाने तु शोभना ॥
मासे तपस्ये तपसि माधवे नभसि त्विषे ।
ऊर्ज्जे च गृहनिर्म्माणं पुत्त्रपौत्त्रधनप्रदम् ॥
निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने ।
तृणदारुगृहारम्भे मासदोषो न विद्यते ॥
पाषाणेष्टादिगेहानि निन्द्यमासे न कारयेत् ।
निन्द्यमासेऽपि चन्द्रस्य मासेन शुभदं गृहम् ॥
गोचराष्टकवर्गाभ्यां वामवेध विचिन्तयेत् ।
दशा चान्तर्दशादीनां विचारश्चात्र कर्म्मणि ॥
गुरुशुक्रबले विप्रान् सूर्य्यभूमिजयोस्तथा ।
राशिसौम्यबले सौर-वर्णानुक्रमपूर्ब्बशः ॥
गृहारम्भं प्रकुर्व्वीत वर्णनाथबले सति ।
सर्व्वेषामपि वर्णानां सूर्य्यचन्द्रबलं स्मृतम् ॥”
गृहयोग्यभूमिपरीक्षा यथा तत्रैव, १मे अध्याये ।
“अथातः सम्प्रवक्ष्यामि लोकानां हितकाम्यया ।
श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्ब्बशः ॥
सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तु क्षत्त्रिणी ।
मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिणी ॥
मधुरा ब्राह्मणी भूमिः कषाया क्षत्त्रिया मता ।
अम्ला वैश्या भवेद्भूमिस्तिक्ता शूद्रा प्रकीर्त्तिता ॥”
अथ भूमिभेदे फलानि यथा तत्रैव ।
“सुवर्णगन्धा सुरसा धनधान्यसुखावहा ।
व्यत्यये व्यत्ययफला अतः कार्य्यं परीक्षणम् ॥
चतुरस्रा महाधन्या द्विपाभा धनदायिनी ।
सिंहाभा सद्गुणान् पुत्त्रान् वृषाभा पशुवृद्धिदा ॥
वृत्ता सद्वृत्तदा भूमिर्भद्रपीठनिभा तथा ।
त्रिशूलरूपा वीराणासुतृप्तिधनसौख्यदा ॥
लिङ्गाभा लिङ्गिनां श्रेष्ठा प्रासादध्वजसन्निभा ।
पदोन्नति प्रकुरुते कुम्भाभा धनवर्द्धिनी ॥
त्रिकोणशकटाकारा सूर्पव्यजनसन्निभा ।
क्रमेण सुखसौख्यार्थधर्म्महानिकरी स्मृता ॥
मुरजा वंशहा सर्पमण्डूकाभा भयावहा ।
नेत्रा खरानुकारा च मृत्युदाऽजगरान्विता ॥
चिपिटा पौरुषैर्हीना मुरजाभा तथैव च ।
काकोलूकनिभास्तद्वत् दुःखशोकभयप्रदा ॥
सर्पाभा पुत्त्रपौत्त्रघ्नी वंशाभा वंशहानिदा ।
शूकरोष्ट्राजसदृशी धनु परशुरूपिणी ।
कुत्सितान् मलिनान् मूर्खान् ब्रह्मघ्नान् जनयेत्
सुतान् ॥
छत्त्रकासशवाकारां मृतपुत्त्रधनार्त्तिदाम् ।
दुर्गन्धां पापिनीं दुष्टप्रजां भूमिं परित्यजेत् ॥
मनोरमा सुतप्रदा दृढा धनप्रदा मता ।
सुतार्थदा तथाप्युदक् सुरेशदिक्प्लवा मही ॥”
अथ पद्विवरणमपि तत्रैव विस्तरशो द्रष्टव्यम् ॥*॥
गृहकर्म्मणि वर्ज्यकाष्ठान्याह यथा, ज्योतिषतत्त्वे ।
“क्षीरिवृक्षोद्भवं दारु गृहेषु न निवेशयेत् ।
कृताधिवासं विहगैरनिलानलपीडितम् ॥
गजैर्विभग्नञ्च तथा विद्युन्निर्घातपीडितम् ।
चैत्यदेवालयोत्पन्नं नद्यभग्नं श्मशानजम् ॥
देवाद्यधिष्ठितं दारु नीपनिम्बविभीतकान् ।
कण्टकिनोऽसारतरून् वर्ज्जयेद् गृहकर्म्मणि ॥
वटाश्वत्थौ च निर्गुण्डीं कोविदारांस्तथैव च ।
प्लक्षं शाल्मलींश्चैव मनाशश्च विवर्ज्जयेत् ॥”*॥
गृह्यते निर्द्दिश्यतेऽनेन इति ।) नाम । (गृह्यते स्वीक्रियते धर्म्माचरणायासौ इति ।) कलत्रम् । इति शब्दरत्नावली ॥ तथा च स्मृतिः ।
“न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
तया हि सहितः सर्व्वान् पुरुषार्थान् समश्नुते ॥”

गृहकच्छपः, पुं, (गृहस्थितः कच्छप इव । हस्तपादादिरहितत्वादेवान्तर्निहितकरचरणकच्छपवत् प्रतीयमानत्वादस्य तथात्वम् ।) पेषणशिला । तत्पर्य्यायः । पेषणिः २ पेषणीपट्टः ३ गृहाश्मा ४ । इति शब्दरत्नावली ॥

गृहकन्या, स्त्री, (गृहस्थिता कन्येव । गृहपालितया कन्याया इव रोगादिषु हितकारितया चास्यास्तथात्वम् ।) घृतकुमारी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
“कुमारी गृहकन्या च कन्या घृतकुमारिका ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

गृहकपोतकः, पुं, (गृहस्थितः गृहपालितो वा कपोतः । ततः स्वार्थे सञ्ज्ञायां वा कन् ।) पक्षिविशेषः । पायरा इति भाषा ॥ तत्पर्य्यायः । प्रासादकुक्कुटः २ भिल्लीकण्ठः ३ पारावतः ४ । इति त्रिकाण्डशेषः ॥ (पारावतशब्दे विवृतिरस्य ज्ञातव्या ॥)

गृहकर्त्ता, पुं, (गृहं वासार्थं तृणादिरचितवेश्म करोतीति । गृह + कृ + तृच् ।) धूसरोऽतिसूक्ष्मश्चटकः । तत्पर्य्यायः । धान्यभक्षणः २ क्षमः ३ भीरुः ४ कृमिद्विट् ५ कणप्रियः ६ । इति राजनिर्घण्टः ॥ (गृहकारके, त्रि ॥)

गृहकारकः, पुं, (गृहं करोतीति । गृह + कृ + ण्वुल् ।) वर्णसङ्करजातिविशेषः । घरामी इति भाषा ॥ यथा, पराशरपद्धतौ ।
“प्रतिमाघटकादेव कन्यायां नापितस्य च ।
सूत्रकारस्य सम्भूतिः सोपानगृहकारकः ॥”

गृहकारी, [न्] (गृहं करोतीति । गृह + कृ + णिनिः ।) कीटविशेषः । कुमिरपोका इति भाषा ॥ इति केचित् ॥ (यथा, मनुः ।१२।६६ ।
“बको भवति हृत्वाग्निं गृहकारी ह्युपस्करम् ॥”)

गृहगोधा, स्त्री, (गृहे गृहस्थिता गोधेव ।) ज्येष्ठी । गेठी टिकटिकी इति च भाषा ॥ तत्पर्य्यायः । पल्ली २ मुसली ३ विशम्भरा ४ ज्येष्ठा ५ कुड्यमत्स्यः ६ पल्लिका ७ गृहगोधिका ८ । इति राजनिर्घण्टः ॥ गृहगोलिका ९ माणिक्या १० भित्तिका ११ गृहालिका १२ । इति हेमचन्द्रः । ४ । ३६३ ॥

गृहगोधिका, स्त्री, (क्षुद्रा गोधा अल्पार्थे कः । कापि अत इत्त्वं टाप् च । गृहस्य गोधिका गोधिरिव ।) ज्येष्ठी । इत्यमरः । २ । ५ । १२ ॥ (यथा, वृहत्संहितायाम् । ८६ । ३७ ।
“शिवा श्यामा रला छुच्छुः पिङ्गला गृहगोधिका ।
शूकरी परपुष्टा च पुन्नामानश्च वामतः ॥”
यथा च सुश्रुते कल्पस्थाने तृतीयेऽध्याये ।
“मार्ज्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाकगृहगोधिकाचतुष्पादकीटास्तथान्ये दंष्ट्रा नखविषाः ॥”)

गृहगोलिका, स्त्री, (गृहे गृहस्था वा गोधिकेव । निपातनात् साधुः ।) ज्येष्ठी । इति हेमचन्द्रः । ४ । ३५३ ॥

गृहणी, स्त्री, (गृहे नीयते क्रियते इति । नी + क्विप्, सञ्ज्ञायां णत्वम् ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥ (विवरणमस्याः काञ्जिकशब्दे ज्ञेयम् ॥)

गृहतटी, स्त्री, (गृहस्य गृहे वा तटमाश्रित्येत्यर्थः तटीव ।) वीथी । इति हारावली । १५० ॥ पिडा दाओया इति च भाषा ॥

गृहद्रुमः, पुं, (गृहमिव द्रुमः ।) मेढ़शृङ्गीवृक्षः । इति रत्नमाला ॥

गृहनाशनः, पुं, (गृहं नाशयति प्रवेशेन इति । नश् + णिच् + ल्युः ।) कपोतः । इति राजनिर्घण्टः ॥ (कपोतोऽत्र वनकपोतः वनकपोतस्य प्रवेशेनैव गृहनाशित्वात् । घुघु इति यस्य भाषा ॥)

गृहनीडः, पुं, (गृहे नीडं कुलायोऽस्य ।) चटकः । इति हारावली । ८९ ॥

गृहपतिः, पुं, (गृहस्य पतिः ।) गृहस्थः । (यथा, अथर्व्ववेदे । १४ । १ । ५१ ।
“भगस्ते हस्तमग्रहीत् सविता हस्तमग्रहीत् ।
पत्नीत्वमसि धर्म्मणाहं गृहपतिस्तव ॥”)
सत्त्री । इति मेदिनी । ते । १६५ ॥ धर्म्मः । इति शब्दरत्नावली ॥ (अग्निः । यथा, ऋग्वेदे । १ । १२ । ६ ।
“अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ॥”)
स्त्री, गृहस्य पतिः “विभाषा सपूर्ब्बस्य ।” ४।१।३४ । इति वा नान्तादेशे गृहपत्नी गृहपतिरिति रूपद्वयम् । गृहस्वामिनी ॥)

गृहपोतकः, पुं, (गृहं पोतः शिशुरिव यस्य इति कप् ।) वास्तुः । वाटी । इति शब्दरत्नावली ॥

गृहबलिप्रियः, पुं, (गृहबलिः प्रियोऽस्य । गृहबलीनां प्रियः इत्येके ।) बकपक्षी । इति शब्दरत्नावली ॥ (काकादयोऽपि ॥)

गृहबलिभुक्, [ज्] पुं, (गृहे दत्तं बलिं अन्नादिभक्ष्यद्रव्यं भुङ्क्ते इति । भुज् + क्विप् ।) चटकः । इति हेमचन्द्रः । ४ । ३६३ ॥ बकः । काकः । इति केचित् ॥

गृहभूमिः, स्त्री, (गृहयोग्या भूमिः ।) वास्तु । वेश्मभूः । इति हलायुधः ॥ (अस्याः लक्षणादिकं गृहशब्दे द्रष्टव्यम् ॥)

गृहमणिः, पु, (गृहे मणिरिव ।) प्रदीपः । इति हेमचन्द्रः । ३ । ३५१ ॥

गृहमाचिका, स्त्री, (गृहे मचते शठति गुप्तभावेन तिष्ठतीति । मच् + "ण्वुल् तृचौ" ।३।१।१३३ । इति ण्वुल् । ततष्टाप् । कापि अत इत्वञ्च ।) चर्म्मचटी । इति त्रिकाण्डशेषः ॥ चामचिका इति भाषा ॥

गृहमृगः, पु, (गृहे मृग इव । यद्वा, गृहस्थितो मृगः पशुः ।) कुक्कुरः । इति हेमचन्द्रः ।४।३४५॥

गृहमेधी, [न्] पु, (गृहैर्दारैर्मेधते सङ्गच्छते इति । गृह + मेधृ सङ्गमे + "सुप्यजाताविति ।" ३ । २ । ७८ । इति णिनिः ।) गृहस्थ. । इति हेमचन्द्रः । ३ । ४७२ ॥ (यथा, मनुः । ४ । ३१ ।

"वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः ।
पूजयेद्धव्यकव्येन विपरीतांश्च वर्ज्जयेत् ॥ ")

गृहमेधिनी,स्त्री (गृहं मेधते पुनाति शास्त्रोक्तदानदयादाक्षिण्यादिना सङ्गच्छते इत्यर्थः। गृह + मेध + णिनिः । ततो ङीप् ।) सात्त्विकी बुद्धिः । इति महाभारतम् ॥ (गृहमेधिन् + स्त्रियां ङीप् ।) गृहस्थपत्नीच ॥

गृहयाय्यः, पु, (गृह ग्रहणे । गृहयते इति । गृह + "श्रुदक्षिस्पृहिगृहिभ्य आय्यः ।" उणा । ३ । ६६ । इति आय्यः । तत' "अयामन्तेति ।" ६।४। ५५ । इति णेरयादेशः ।) गृहस्थः । इत्युणादिकोषः ॥

गृहयालुः, पु, (गृहयते गृह्णातीति । गृह + "स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।" ३ । २ । १५८ । इति आलुच् । "अयामन्तेति ।" ६ । ४ । ५५ । इति णेरयादेश. ।) गृहीता । ग्रहणशील: । इत्यमरः । ३ । १ । २७ ॥

गृहवाटिका, स्त्री, (गृहसमीपस्था वाटिका आरामः ।) गृहसमीपवनम् । इति हारावली । १६८ ॥

गृहस्थः, पुं, ("न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।" अतएव गृहेषु दारेषु तिष्ठति अभिरमते इति । गृह + स्था + "सुपि स्थः ।"३।२।४। इति कः ।) गृही । द्वितीयाश्रमी । तत्पर्य्यायः । ज्येष्ठाश्रमी २ गृहमेधी ३ स्नातकः ४ गृही ५ । इति हेमचन्द्रः । ३ । ४७१ ॥ गृहपतिः ६ सत्री ७ । इत्यमरः । २ । ८ । १५ ॥ गृहयाय्यः८ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ गृहाधिपः ९ । इति हलायुधः ॥ कुटुम्बी १० । इति जटाधरः ॥ गृहायनिकः ११ । इति शब्दरत्नावली ॥ * ॥ तस्य धर्म्मो यथा,—

"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः॥
य. कश्चिदिह लोकेऽस्मिन्नागमः संप्रकीर्त्तितः ।
तस्यात्र गमनं श्रेयः कीर्त्तिरेषा सनातनी ॥
संस्कारैः संस्कृतः पूर्व्वं यथावच्चरितव्रतः ।
जातौ गुणविशिष्टायां समावर्त्तेत वेदवित् ॥
स्वदारनिरतो नित्यं शिष्टाचारो जितेन्द्रिय. ।
पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेदिह ॥
देवतातिथिशिष्टाशी निरतो वेदकर्म्मसु ।
इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥
न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य गोचर' ॥
नित्यं यज्ञोपवीती स्यात् शुक्लवासाः शुचिव्रतः ।
नियतो दमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥
जितशिश्नोदरो मैत्र शिष्टाचारसमन्वितः ।
वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥
अधीत्याध्यापनं कुर्य्यात् तथा यजनयाजने ।
दानं प्रतिग्रहञ्चापि षड्गुणां वृत्तिमाचरेत् ॥
त्रीणि कर्म्माणि यानीह ब्राह्मणानान्तु जीविका ।
याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥
अथ शेषाणि चान्यानि त्रीणि कर्म्माणि यानि तु ।
दानमध्ययनं यज्ञो धर्म्मयुक्तानि तानि तु ॥
तेष्वप्रमादं कुर्व्वीत त्रिषु कर्म्मसु धर्म्मवित् ।
दान्तो मैत्र' क्षमायुक्तः सर्व्वभूतसमो मुनिः ॥
सर्व्वमेतद् यथाशक्ति विप्रो निर्व्वर्त्तयन् शुचिः ।
एव युक्तो जयेत् स्वर्गं गृहस्थः संशितव्रतः ॥"
इत्याश्वमेधिकपर्व्व ॥

"सर्व्वेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्व्विधम् ।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्च्चनम् ।
गृहस्थस्य समासेन धर्म्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥
ऋणानि त्रीण्युपाकृत्य त्यक्ता भार्य्याधनादिकम् ।
एकाकी विचरेद् यस्तु उदासीनः स मौक्षिकः ॥"
इति गारुड़े ४९ अध्यायः ॥

बाहुल्यन्तु तत्रैव।५०।५१। अध्याययोर्द्रष्टव्यम्॥*॥ गृहस्थब्राह्मणधर्म्मो यथा,—

"चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम् ॥
ऋतामृताभ्याञ्जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"
इत्यादि मानवे ४ अध्यायः ॥

गृहस्थूणं, क्ली, (गृहस्य गृहावलम्बनार्था स्थूणा । अभिधानात् क्लीवत्वम् ।) गृहस्तम्भः । इत्यमर. । ३ । ५ । ३० ॥

गृहाः, पु, (गृह्णन्ति धान्यादिकं इति । ग्रह् + "गेहे कः ।" ३।१।१४४ । इति कः ।) गृहम् । (यथा, मनुः । ४ । २५० ।

"शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन् दधि ।
धाना मत्स्यान् पयो मांसं शाकञ्चैव न निर्णुदेत्॥'
गृह्यन्ते धर्म्माचरणाय इति । ग्रह + क. ।) दारा' । इत्यमरः । २ । २ । ५ ॥ नित्यबहुवचनान्तोऽयं शब्दः ॥

गृहागतः, पु, (गृहमागतः । आ + गम् + कर्त्तरि क्तः ।) अतिथिः । इत्यमरः । २ । ७ । ३४ ॥ (गृहमागते, त्रि । यथा, हितोपदेशे ।
"नाहं गृहागतं हन्मि ॥")

गृहाधिपः, पु (गृहस्य अधिपः ।) गृहस्थ. । इति हलायुधः ॥

गृहाम्ल, क्ली, (गृहे पर्य्युषितामादिना प्रस्तुतीकृतमम्लम् ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

गृहायनिकः, पु, (गृहरूपमयनं विद्यतेऽस्य इति ठन् ।) गृहस्थः । इति शब्दरत्नावली ॥

गृहारामः, पु, (गृहस्य गृहे गृहसमीपस्थो वा आरामः ।) गृहसमीपे कृत्रिमवनम् । तत्पर्य्यायः । निष्कुटः २ । इत्यमरः । २ । ४ । १ ॥

गृहालिका, स्त्री, (गृहे आलिरिव कायते प्रकाशते इति । गृहालि + कै + कः । ततष्टाप् ।) ज्येष्ठी । इति हारावली । १८४ ॥

गृहावग्रहणी, स्त्री, (गृहमवगृह्यतेऽनया इति । अव + ग्रह् + करणे ल्युट् । ततो ङीप् ।) देहली । इत्यमरः । २ । २ । १३ । हातिना दाओया इति च भाषा ॥

गृहाशया, स्त्री, (गृहे इव छायायुक्तस्थाने आशेते इति । आ + शी + अच् । ततः स्त्रियां टाप् ।) ताम्बूली । इति शब्दचन्द्रिका ॥ पानेर गाछ इति भाषा ॥

गृहाश्मा, [न्] पु, (गृहरचितोऽश्मा अश्मनिर्म्मितपेषणशिलाविशेषः ।) पेषणशिला । इति शब्दरत्नावली । शिल इति भाषा ॥

गृहिणी, स्त्री, (गृहस्वामित्वमस्त्यस्याः । इति इनिः ङीप् च ।) भार्य्या । इति हेमचन्द्र. । ३ । १७६ । (यथा, रघौ । ८ । ६७ ।
"गृहिणी सचिवः सखी मिथ.
प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना-
हरता त्वां वद किं न मे हृतम् ॥"
गृहं गृहकार्य्यं साध्यतयाऽस्त्यस्या इति इनिः ङीप् च । गृहकर्म्मकुशला स्त्री । यथा, शकुन्तलायां चतुर्थाङ्के ।
"शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ ")

गृही,[न्] पु,(गृहा दारा विद्यन्तेऽस्य इति इनिः ।) गृहस्थः । इत्यमरः । २ । ७ । ३ ॥ भर्त्ता । इति राजनिर्घण्टः ॥ (यथा भागवते । ३ । ३० । ९ ।
"गृहेषु कूटधर्म्मेषु दु.खतन्त्रेष्वतन्द्रित' ।
कुर्व्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ॥")

गृहीतं, त्रि, (ग्रह + कर्म्मणि क्तः।) स्वीकृतम्। प्राप्तम्। ज्ञातम्। धृतम्। यथा, हितोपदेशे।१।३।
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्म्ममाचरेत्॥"

गृहीतदिक्, [श्] त्रि, (गृहीता आश्रिता दिक् येन सः प्रहर्त्तुर्वा भयाद्येन।) पलायितः। तिरोहितः। इति हेमचन्द्रः। ३। ४६८॥

गृहोलिका, स्त्री, (गृहे पलति चलतीति। गृह + चल + क्वुन्। बाहुलकात् गस्य गारत्वम्। लीन यस्य उत्वम्।) गृहोली। इति हेमचन्द्रः। ४। १८॥

गृह्य क्ली, (गृह्यते आक्रम्यते स्पर्श-आदिभी रोगैरिति। ग्रह + "पदास्वैरिबाह्यापक्ष्येषु च।" ३। १। ११९। इति क्यप।) गुदम्। (गृह्यन्ते मनुष्यन्ते सामवेदाद्युक्तानि कर्म्मविधानान्यत्र इति। ग्रह + क्यप्।) कात्यायनकृत गोभिलादिकृतसूत्रग्रन्थभेदः। इति मेदिनी। ये। १८॥ तत्र तु गोभिलादिकृतसामवेदाद्युक्तकर्म्मकाण्डनिर्णयः॥

गृह्य, पुं, (गृह्यते गार्य्येनेति। ग्रह + "पदास्वैरिबाह्यापक्ष्येषु च"। ३। १। ११९। इति क्यप। पञ्जरादिबन्धनेन परस्वीकृतत्वादस्य तथात्वम्।) गृहासक्तमृगादिः। इति मेदिनी। ये। १९॥ (त्रि। यथा, मनौ। ३। ८४।
"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्ब्बकम्।
आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम्॥")

गृह्य त्रि, (गृह्यते स्वाम्यादिभिरिति। ग्रह + क्यप्।) अस्वैरी। अस्वतन्त्रः। पक्ष्यः। इति विश्व-मेदिन्यौ॥ (यथा, भारवि। २। ५।
"ननु वक्तृविशेषनिःस्पृहा
गुणगृह्या वचने विपश्चितः॥"
गृहे भव इति यत्। गृहोत्पन्नवस्तु॥)

गृह्यक, त्रि, (गृह्य + स्वार्थे अनुकम्पायां वा कन्।) अस्वतन्त्रः। पराधीनः। इत्यमरः। ३। १। १६॥

गृह्यक, पु, (गृह्य + स्वार्थे अनुकम्पायां वा कन्।) गृहासक्तपक्षिमृगादिः। तत्पर्य्यायः। छेकः २। इत्यमरः। २। ६। ४३॥

गृह्या, स्त्री, (गृह्यते नृपेणेति। ग्रह् + क्यप् + टाप्।) शाखापुरम्। नगरनिकटस्थग्रामः। इत्यमरः॥

गॄ, क ड विज्ञापे। विज्ञाने। इति कविकल्पद्रुमः॥ (चुरा-आत्म-सक-सेट।) विज्ञापो विज्ञापनम्। क ड गारयते स्वसामर्थ्यं सुधीः। इति दुर्गादासः॥

गॄ, गि शब्दे। इति कविकल्पद्रुमः॥ (क्र्या-पर-सक-सेट।) शब्द इह व्यक्तवाक्यम्। गि, गृणाति वाक्यं लोकः। गीर्णं गीर्णिः। इति दुर्गादासः॥

गॄ, श निगरणे। इति कविकल्पद्रुमः॥ (तुदा-पर-सक-सेट्।) निगरणं भक्षणम्। श, गिरत्यन्नं लोकः। देवात्ततो विगलितो गिलितो वकेन इति तु अस्मात् लत्वे. कभावे इति भावे कप्रत्यये ऋदिरगाविति इति वक्तव्यादेरेफस्य लकारे गिल इति स्थिते वे" व्याख्याने इति औ कर्म्मणि क्ते सिद्धम्। इति दुर्गादासः॥

गेण्डु, पुं, (गच्छतीति। गम् + डः। गो गन्ता। गः इन्दुरिवेति गेन्दुः, पृषोदरादित्वात् दस्य डत्वे साधुः।) गेण्डुक। इति भरतो द्विरूपकोषश्च॥ (गेन्दुरपि च दृश्यते॥)

गेण्डुकः, पुं, (गः इन्दुरिवेत्यतः इवे प्रतिकृताविति कन्। अत्र गेन्दुकोऽपि पाठः।) कन्दुकः। इत्यमरः। २। १०। १३८॥ गेंडु इति गेंद इति च भाषा॥

गेण्डूकः, पुं, (गेण्डुक, ततः पृषोदरादित्वात् दीर्घः। अत्र गेन्दूकोऽपि पाठः।) गेण्डुक। इति जटाधरः॥

गेद, ऋ ङ उ गतौ। यान्ते। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-सक-सेट॥)

गेप, ङ ऋ गतिचालयोः। (भ्वा-आत्म-सक-सेट।) ङ, गेपते। ऋ, अजिगेपत। इति दुर्गादासः॥

गेय क्ली, (गै + "अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति आत ईत्वम्। ततो गुणश्च। गीतम्। इति मेदिनी। गे। २०॥ (यथा, माघे। २। ७२।
"यतौ. कतिपयैरेव ग्रथितस्य स्वरैरिव।
अनन्तता वाङ्मयस्य गेयस्येव विचित्रता॥")

गेयः त्रि (गै + यत्। तत आत ईत्वम्।) गातव्यः। गायनः। इति मेदिनी। गे। २०॥ (यथा हरिवंशे हरिवंशपर्व्वणि। ५०। ४१।
"इमे त्वां गुणयःसप्त सहिता मुनिसत्तमैः।
स्तुवन्ति देवदियाभिर्गेयाभिर्गीर्भिरक्षरा॥")

गेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-सक-सेट्।) ऋ, अजिगेवत्। ङ, गेवते। इति दुर्गादासः॥

गेष, ऋ ङ अन्वेषे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-सक-सेट्।) ऋ, अजिगेषत्। ङ, गेषते। जिगेषे। अन्वेषोऽनुसन्धानम्। इति दुर्गादासः॥

गेष्णः, पुं, (गायतीति। गै + "इष्णो गादाभ्यां किच्च।" इत्युणादिकोषटीकाकारधृतसूत्रात् इष्णः।) रङ्गोपजीवी। सामगानकर्त्ता। इत्युणादिकोषः॥

गेष्णुः, पुं, (गायतीति। गै गाने + "गादाभ्यामिष्णुच्।" उणां। ३। १६। इति इष्णुच्।) गायनः। नटः। इति मेदिनी। णे। ११॥ सामगानकर्त्ता च॥

गेहं, क्ली (गो गन्धर्व्वो गणेशश्च। गेन गन्धर्व्वेण गणेशेन वा ईह्यते काम्यते इति। ग + ईह + कर्म्मणि घञ्। यद्वा, गो गन्धर्व्वो गणेशो वा ईहः ईप्सितो यस्मिन्।) गृहम्। इत्यमरः। २। २। ४॥ (यथा, हितोपदेशे।
"तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥")

गेही, [न्] त्रि, (गेहमस्यास्तीति। गेह + इनिः।) गृही॥ (स्त्रियां ङीप्। गेहिनी। यथा, आर्य्यासप्तशती। १६६।
"गेहिन्याः प्रस्खलन्ती गोत्रस्खलितापराधतो [मानम्॥")

गेहेनर्द्दी, [न्] पुं, (गेहे नर्द्दति गर्ज्जतीति। गेह + नर्द्द + णिनि अलुक् समासः। अस्य गृह एव गर्ज्जनं नान्यत्र अतस्तथात्वम्।) कापुरुषः। तत्पर्य्यायः। गेहेशूरः २ पिण्डीशूरः ३। इति हेमचन्द्रः। ३। १४१॥

गेहेशूर., पुं, (गेहे एव शूरः। अलुक् समासः। अन्यत्र शूरत्वाभावादस्य तथात्वम्।) गेहेनर्द्दी। इति हेमचन्द्रः। ३। १४१॥

गै, गाने। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-अनिट्।) गीतं गायति गायनः। इति दुर्गादासः॥

गैरिक, क्ली, (गिरौ भवमिति अध्यात्मादित्वात् ठञ्।) स्वर्णम्। रक्तवर्णधातुविशेषः। गिरिमाटी इति भाषा॥ तत्पर्य्यायः। रक्तधातु २ गिरिधातुः ३ गवेधुकम् ४ धातु ५ सुरङ्गधातु ६ गिरिसिन्दूरम् ७। इति राजनिर्घण्टः॥ धातुरक्तम् ८ गवेरुकम् ९ [illegible] १० गिरिरेज ११। इति शिकाकाण्डशेषः॥ लोहितमृत्तिका १२ गिरिजम् १३॥ पीतगैरिकस्य पर्य्यायः। सुवर्णगैरिकम् १ सुवर्णम् २ स्वर्णगैरिकम् ३। इति रत्नमाला॥ स्वर्णधातु ४ सुरक्तक ५ सन्ध्याभ्रम् ६ बभ्रुधातु ७ शिलाधातु ८। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। कषायत्वम्। व्रणरोपणत्वम्। विस्फोटाग्निदाहनाशित्वम्। सर्व्व[illegible]दिक शुभम्। इति राजनिर्घण्टः॥ निर्म्मलत्वम्। स्निग्धत्वम्। सुवर्णगैरिक तद्वत् विशेषतश्चक्षुस्तेजस्कारित्वम्। इति राजवल्लभः॥
"गैरिकं रक्तधातुश्च गैरेयं गिरिजमाया।
सुवर्णगैरिकं त्वन्यत्ततो रक्ततरं हि तत्॥
गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमम्।
चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

गैरिकाक्ष पुं, (गैरिकमिव रक्तवर्णमक्षि पुष्परूपायनं यस्य।) जलमधूकवृक्षः। इति राजनिर्घण्टः॥

गैरी, स्त्री, (गिरौ भव। गिरि + अण्। गौरादित्वात् ङीष्।) लाङ्गलिकीवृक्षः। इति रत्नमाला॥ (लाङ्गलिकीशब्देऽस्या गुणादयो ज्ञातव्याः॥) विषलाङ्गला इति भाषा॥

गैरेय, क्ली, (गिरौ भवमिति। गिरि + ढक्।) शिलाजतु। इत्यमरः। २। ९। १०४॥ (यथास्य पर्य्याया।
"शिलाजत्वश्मजतु च शैलनिर्य्यास इत्यपि।
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
गुणास्तु शिलाजतुशब्दे ज्ञेयाः॥) गिरिजाते त्रि॥

गोकण्टकः, पुं, (गोः पृथिव्याः कण्टक इव।) गोक्षुरकवृक्षः। (अस्य पर्य्याया यथा,—
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टक.।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि॥
पलङ्कषा श्वदंष्ट्रा च तथा स्वादिक्षुगन्धिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

खपुटः। गवां खुरम्। इति विश्वमेदिन्यौ ॥ गोखुरे: खपुटीकृतः। इति हेमचन्द्र. ॥ विकङ्कतवृक्षः। इति राजनिर्घण्ट. ॥

गोकर्णः, पु, (गोः कर्ण इव। तत्तुल्यपरिमाणवत्त्वादस्य तथात्वम्।) परिमाणविशेषः। स तु अनामिकायुक्तविस्तृताङ्गुष्ठम्। (गोः कर्णाविव कर्णौ यस्य।) मृगभेदः। इत्यमर.।२।५।१०॥ (यथा च अनर्घराघवे। २।२३।

"मुनिविनियोगविलूनप्ररूढदूर्वाङ्कुरा-ग्रदलानि वर्त्मनि।
गोकर्णतर्णकोऽयं तर्णोत्सुपकण्टकच्छेत्सु ॥"

अस्य मांसगुणा यथा,—

"गोकर्णमांसं मधुरं स्निग्धं मृदु कफापहम्।
विपाके मधुरञ्चापि रक्तपित्तविनाशनम् ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥) अश्वतरः। (गौरश्वतरेव कर्णो यस्य।) सर्पभेदः। (गोरिव कर्णौ यस्य।) गणदेवताविशेषः। इति मेदिनी। णे। ४६ ॥ तीर्थविशेषः। यथा, भागवते।

"ततोऽभिव्रज्य भगवान् केरलांस्तु त्रिगर्तकान्।
गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः ॥"

(पीठस्थानम्। यथा, देवीभागवते।७।३०।६०।

"केदारपीठे सम्प्रोक्ता देवीसन्मार्गदायिनी।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥")

गोकर्णी, स्त्री, (गोः कर्ण इव पत्रमस्याः। "पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च।" ४।१।६४। इति ङीष्।) मूर्व्वालता। इत्यमरः। २।४।८८ ॥ (विवृतिरस्या मूर्व्वाशब्दे ज्ञातव्या ॥)

गोकिराटिका, स्त्री, (गां वाचं किरति रटतीत्यर्थः। कॄ+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः। ततष्टाप् गोकिरा। तथा सती अटतीति। अट्+ण्वुल्। ततष्टाप् अत इत्वञ्च।) सारिकापक्षी। इति हेमचन्द्रः ॥

गोकिराटी, स्त्री, (गोकिरा वाच रटन्ती सती अटतीति। अट गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्। गौरादित्वात् ङीष्।) सारिकापक्षी। इति राजनिर्घण्टः ॥

गोकिलः पु (गोः पृथिव्याः कील इव। निपातनात् ह्रस्वः।) मुषलम्। हलम्। इति हेमचन्द्रः ॥

गोकीलः, पु, (गोः पृथिव्याः कील इव।) मुषलम्। हलम्। इति हारावली ॥ २५५ ॥

गोकुलं, क्ली, (गोः कुलम्।) गोसमूहः। तत्पर्य्यायः। गोधाम् २ गवाम्बणः ३। इत्यमरः। २।६।५८ ॥ (यथा, रामायणे। २।६।१७।

"गोकुलाकुलतीरायाः तमसाया विदूरतः।
अवसत् तत्र तां रात्रिं रामः प्रकृतिभिः सह ॥")

गोस्थानम्। यथा, तिथ्यादितत्त्वे।

'गोकुले मन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः।
अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च ॥"

मथुराप्रदेशे नन्दस्य वासस्थानम्। यथा,—

"पालेन प्रगता तात। गोकुले नन्दवेश्मनि।
जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ विजह्रतुः ॥"

इति श्रीभागवतम् ॥

(अत्र प्रदेशे महादेवो गोपीश्वर इत्याख्यया प्रसिद्धो विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे,—

"गोकुले गोपिनीपूज्यो गोपीश्वर इतीरितः ॥"

पु, स्वनामख्यातः पण्डितविशेषः। अयन्तु सप्तदशशतपरिमितशकाब्दसम्मतसरम्भारम्भे एव मिथिलादेशान्तर्वर्त्तिनि 'मगरौणी' संज्ञकग्रामे विद्यानिधिपीताम्बरपण्डितात् जात. इति मैथिला:। अद्यावधि ज्ञाता अनेन विरचिता ग्रन्थास्त्विमे। १ दीधितिविद्योत: (शिरोमणिटीका।) २ न्यायसिद्धान्ततत्त्वम्। ३ पदवाक्यरत्नाकरः। ४ मासमीमांसा। ५ मिथ्यात्वनिरुक्तिः। ६ रश्मिचक्रम् (चिन्तामणिटीका। ७ रसमहार्णवः। ८ लाघवगौरवरहस्यम्। ९ शिवशतकम् ॥)

गोकुलिकः, त्रि, (गोर्नेत्रस्य कुलं चपलभाव. प्रखरदृष्टिचातुर्य्यमित्यर्थः। तदस्यास्तीति। "अत इनिठनौ।" ५।२।११६। इति ठन्।) केकरः। (पङ्कपतिते गवि कुलिकः उपेक्षकत्वात् जड इव।) पङ्कस्थगवुपेक्षकः। इति मेदिनी। के। १८६ ॥

गोकृतं, क्ली, (गोभिः कृतम् उत्सरितम्। कृ+भावे क्तः। कृद्विहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् गोपुरीषमित्यर्थः।) गोमयम्। इति शब्दचन्द्रिका ॥

गोक्षुरः, पुं, (क्षुरति विलिखतीति। क्षुर विलेखने+"इगुपधज्ञेति।" ३।१।१३५। इति कः। ततो गोः पृथिव्याः क्षुरः क्षुपविशेष इव। बहुकण्टकाकीर्णत्वात् तथात्वम्।) क्षुद्रक्षुपविशेषः। स तु क्षुद्रबृहद्भेदेन द्विविधः। गोखरि इति गोखुरु इति च भाषा ॥ तत्पर्य्याय.। त्रिकण्ट.२ स्थलशृङ्गाट ३ गोकण्ट: ४ त्रिकण्टक: ५ त्रिपटः ६ कण्टकफल: ७ क्षुरः ८। इति रत्नमाला ॥ गोक्षुरक ९ पलङ्कषा १० इक्षुगन्धा ११ श्वदंष्ट्रा १२ स्वादुकण्टकः १३ गोकण्टकः १४ वनशृङ्गाटः १५। इत्यमरः। २।४।९८—९९ ॥ क्षुरकः १६ भक्ष्यकण्ट. १७ इक्षुगन्धिका १८। इति भावप्रकाशः ॥ क्षुरङ्गः १९ श्वदंष्ट्रकः २० कण्टकी २१ भद्रकण्टः २२ व्यालदंष्ट्रः २३ षडङ्गः २४ गोखुरः २५ त्रिकट २६ त्रिक. २७ इक्षुर २८। इति शब्दरत्नावली ॥ अस्य गुणाः। सुशीतलत्वम्। बलप्रदत्वम्। मधुरत्वम्। बृंहणत्वम्। कृच्छ्राश्मरीमेहविदाहनाशित्वम्। रसायनत्वम्। तत्र बृहतो गुणोत्तरत्वञ्च। इति राजनिर्घण्टः ॥ स्वादुत्वम्। बस्तिशोधनत्वम्। दीपनत्वम्। पुष्टिदत्वम्। श्वासकासार्शोव्रणनाशित्वञ्च। इति भावप्रकाशः ॥ वातुनाशित्वम्। वृष्यत्वञ्च। तत्फलगुणाः। तिक्तत्वम्। वृष्यत्वम्। स्रोतोविशोधनत्वञ्च। इति राजवल्लभः ॥

गोक्षुरकः, पु, (गोक्षुर+स्वार्थे कन्।) गोक्षुर.। इत्यमरः। २।४।९८ ॥ (अस्य पर्य्याया यथा —

"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि।
पलङ्कषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ यथा, च सुश्रुते चिकित्सितस्थाने षड्विंशेऽध्याये ॥

"गुप्ताफल गोक्षुरकाच्च बीजं
तथोच्चटा गोपयसा विपाच्य।
खजाहतं शर्करया च युक्तं
पीत्वा नरो हृष्यति सर्व्वरात्रम् ॥")

गोखुरः, पु, (खुरति विलिखतीति। खुर. अस्त्रविशेषः। गोः पृथिव्याः खुर इव।) गोक्षुरवृक्षः। इति शब्दरत्नावली ॥ (गवा खुरम्।) गवा शफे क्ली ॥

गोखुरिः, पु, (गवा खुरिरिव।) गोक्षुरः। इति शब्दचन्द्रिका ॥

गोगृष्टिः, स्त्री, (गौर्गृष्टिः गौरेव गृष्टिरित्यर्थः। जात्या समासे परनिपातः।) सकृत्प्रसूता गौः। इति केचित ॥

गोगोयुगं, क्ली, (गोर्द्वित्वम्। गो+द्वित्वे गोयुगच्।) गोद्वयम्। ("पशुभ्य. स्थानद्वियटके गोष्ठगोयुगषड्गवम्।" इति मुग्धबोधसूत्रम् ॥)

गोगोष्ठं, क्ली, (गोः स्थानम्। गो+स्थाने गोष्ठच्।) गोस्थानम्। इति मुग्धबोधव्याकरणम् ॥

गोग्रन्थिः, पु, (गोनिःसृतो ग्रन्थिरिव।) करीष। (गोर्ग्रन्थिर्वाहुल्यात् एकत्र ग्रन्थनं यत्र।) गोष्ठम्। (गोर्ग्रन्थिरिव।) गोजिह्विकौषधिः। इति मेदिनी। थे। १६ ॥

गोघ्नः, पु, (गौर्हन्यतेऽस्मै। गो+हन्+सम्प्रदाने मूलविभुजादित्वात् कः।) अतिथिः। इति पाणिनिः ॥ (गां हन्ति। हन्+कः।) गोघातके त्रि। यथा, प्रायश्चित्ततत्त्वे।

"गोघ्नवद्विहित. कृत्वचान्द्रायणमथापि वा ॥"

गोघृतं, क्ली, (गोः पृथिव्या घृतमिव शस्यादिपोषकत्वात्।) वृष्टिः। इति त्रिकाण्डशेषः ॥ (गोजात घृतम्।) गव्यघृतञ्च ॥

गोचरः, पुं, (गाव इन्द्रियाणि चरन्त्यस्मिन्। गो+चर+"गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च।" ३।३।११९। इति निपातनात् साधुः।) इन्द्रियार्थः। स तु रूपशब्दगन्धरसस्पर्शस्वरूपः। इत्यमरः। १।५।८ ॥ (यथा भाषापरिच्छेदे "घ्राणस्य गोचरो गन्ध." ५५ गोचरस्यार्थस्याश्रितिः। गोचरस्थानम्। इति सिद्धान्तमुक्तावली। यथा च भारवि.। ६।१०।

"उपारताः पश्चिमरात्रिगोचरा-
दपारयन्तः पतितुं जवेन गाम् ॥"

गोषु इन्द्रियेषु चरतीति। गो+चर्+पचाद्यच्। इन्द्रियप्रत्यक्षीभूतविषयः। यथा, वैराग्यशतके।

"गगनं भवितुं बहुवाग्विषयागोचरम् ॥"

देश । यथा चै: रामायणे । २ । ८५ । ५ ।
"अब्रवीत् प्राञ्जलिर्भूत्वा गुहो गहनगोचरः ॥"
"गहनं वनं गोचरो देशो यस्य सः ।" इति तट्टीकाकृद्रामानुजः ॥) जन्मराश्यवधिग्रहाक्रान्तराशीनां संज्ञा । यथा,—
"गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥"
अपि च ।
"अष्टवर्गशुभे श्रीमान् कर्म्म कुर्य्याच्छुभग्रहैः ।
गोचरस्थैस्तदप्राप्तौ तत्प्राप्तौ तु वेधगैः ॥"
गोचरशुद्धिर्यथा,—
"केतूपप्लवभौममन्दगतय षट्त्रिसंस्था, शुभा-
श्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्र पुन: सप्तमः।
जीव: सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मजः
शुक्र: षड्दशसप्तवर्ज्जमितरे सर्व्वेऽप्युपान्ते शुभा:॥"
इति दीपिका ॥
(अथ ग्रहाणां गोचरगतफलम् । यथा,—
बुधस्य गोचरफलम् ।
"स्थानं जन्मनि नाशयेद्दिनकरः कुर्य्याद्द्वितीये भयम् ।
दुश्चिक्ये श्रियमातनोति हिबुके मानक्षयं यच्छति ॥
दैन्यं पञ्चमगः करोति रिपुहा षष्ठेऽर्थहा सप्तमे ।
पीडामष्टमगः करोति नितरां कान्तिक्षयं धर्म्मगः ॥
कर्म्मसिद्धिजनकस्तु कर्म्मगो
वित्तवृद्धिकृदथायसंस्थितः ।
द्रव्यनाशजनितां महापदं
यच्छति व्ययगतो दिवाकरः ॥"
चन्द्रस्य गोचरफलम् ।
"जन्मन्यर्थं दिशति हिमगुर्व्वित्तनाशं द्वितीये
दद्याद्द्रव्यं सहजभवने नेत्ररोगं चतुर्थे ।
कार्य्यभ्रंशं तनयगृहगो वित्तलाभञ्च षष्ठे
द्यूने द्रव्यं युवतिसहितं मृत्युसंस्थोऽथ मृत्युम् ॥
नृपभयं कुरुते नवमः शशी
दशमधामगतस्तु महत् सुखम् ।
विविधमायगतः कुरुते धनं
व्ययगतस्तु रुजं सधनक्षयम् ॥"
मङ्गलस्य गोचरफलम् ।
"प्रथमगृहगः क्षौणीसूनुः करोत्यरिजं भयं
क्षपयति धनं वित्तस्थाने तृतीयगतोऽर्थदः ।
अरिभयकरः पातालेऽसृक् क्षिणोति च पञ्चमे
रिपुगृहगतो धत्ते वित्तं शुचं मदनस्थितः ॥
जनयति मरणस्थः शस्त्रबाधां धरायो
दिशति च नवमस्थो कार्य्यपीडामतीव ।
शुभमपि दशमस्थो लाभगो भूरिलाभं
व्ययभवनगतोऽसौ व्याध्यनर्थार्थनाशान् ॥"
बुधस्य गोचरफलम् ।
"बुधः प्रथमधामगो दिशति बन्धमर्थं धनं
वधं रिपुभयान्वितः सहजगश्चतुर्थेऽर्थदः ।
अनिर्वृतिकरो भवेत्तनयगोऽरिगः स्थानदः
करोति मदगस्थितो बहुविधां शरीरापदम् ॥
अष्टमे शशिसुते धनलब्धि-
र्धर्म्मगोऽतिमहतीं तनुपीडाम् ।
कर्म्मगः शुभमथायगतोऽर्थं
द्वादशे भवति वित्तविनाशः ॥"
गुरोर्गोचरफलम् ।
"भयं जन्मन्यार्य्यो जनयति धनस्थोऽर्थमतुलं
तृतीयेऽङ्गक्लेशं दिशति च चतुर्थेऽर्थविलयम् ।
शुभं पुत्त्रस्थानेऽशुभमपि च कुर्य्यादरिगृहे
गुरुर्द्यूने पूजां धननिचयनाशञ्च निधने ॥
धर्म्मगतो धनवृद्धिकरः स्यात्
प्रीतिहरो दशमेऽमरपूज्यः ।
स्थानधनानि ददाति स चाये
द्वादशगस्त्वशुभानथ पीडाम् ॥"
शुक्रस्य गोचरफलम् ।
"जन्मन्यतिक्षयकरो भृगुजोऽर्थदोऽर्थे
दुश्चिक्यगः शुभकरो धनदश्चतुर्थे ।
स्यात् पुत्त्रदस्तनयगोऽरिगतोऽरिवृद्धि
शोकप्रदो मदनगो निधनेऽर्थदाता ॥
जनयति विविधाम्बराणि धर्म्मे
न शुभकरो दशमस्थितस्तु शुक्रः ।
धननिचयकरस्तु लाभसंस्थो
व्ययभवनेऽपि धनागमं करोति ॥"
शनेर्गोचरफलम् ।
"वित्तभ्रंशं सदाह दिनकरतनयो जन्मराशिं प्रपन्न-
श्चित्तक्लेशं द्वितीये रिपुहननकृतं वित्तलाभं तृतीये ।
पाताले शत्रुवृद्धिं सुतभवनगतः पुत्त्रभृत्यादिनाशं
षष्ठस्थानेऽर्थलाभं जनयति मदने दोषसङ्घातमार्किः ॥
शरीरपीडां निधनेऽथ धर्म्मे
धनक्षयं कर्म्मणि दौर्म्मनस्यम् ।
उपान्त्यगो वित्तमनर्थमन्ते
शनिर्ददातीत्यवदत् सुहृत्तः ॥"
राहोर्गोचरफलम् ।
"जन्मान्त्यपञ्चवसुरन्ध्रनवद्विसप्त-
राशौ स्थिते यदि भवेदसुरः कदापि ।
अर्थक्षयं रिपुभयं बहुकार्य्यहानिं
रोगप्रवासमरणाग्निभयं करोति ॥"
केतोर्गोचरफलम् ।
"एकादशत्रिदशषष्ठगते नराणां
सम्मानभोगनृपमानसुखार्थदाता ।
आज्ञाकराश्च पुरुषाः प्रमदाश्च नित्यं
सौख्योदयं दिशति पुण्यचयञ्च केतुः ॥"
अन्यत्सर्व्वं ग्रहशब्दे द्रष्टव्यम् ॥)

गोचर्म्म, [न्] क्ली, (गोश्चर्म्म ।) गवां त्वक् । कर्म्मविशेषे तद्दानविधिर्यथा,—
"मेषाजिनन्तु वश्यार्थमाकृष्टौ व्याघ्रचर्म्म च ।
शान्तौ मृगाजिनं शस्तं मोक्षार्थं व्याघ्रचर्म्म च ॥
गोचर्म्मस्तम्भने देवि ! सम्भवे वाजिचर्म्म च ॥"
इति समयाचारतन्त्रे २ पटलः ॥ * ॥
परिमाणविशेषः । यथा,—
"यत् किञ्चित् कुरुते पापं ज्ञानतोऽज्ञानतोऽपि वा ।
अपि गोचर्म्ममात्रेण भूमिदानेन शुध्यति ॥"
गोचर्म्मलक्षणञ्च बृहस्पतिना दर्शितम् । यथा,—
"सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम् ।
दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते ॥"
इति मिताक्षरायां आचाराध्यायः ॥

गोच्छाल:, पुं, (गां भूमिं छादयतीति । छद + णिच् + अण् । पृषोदरादित्वात् साधुः ।) कुलाहल-वृक्षः । इति रत्नमाला ॥ कोकशिमा इति भाषा ॥

गोजलं, क्ली, (गवि जातं जलम् ।) गोमूत्रम् । इति राजनिर्घण्टः ॥ (यथा, गारुडे १८० अध्याये ।
"गोजलेनैव पूरेण कर्णस्रावो विनश्यति ॥")

गोजा, स्त्री, (गवि पृथिव्यां जायते इति । गो + जन् + "जनसनखनक्रमगमो विट् ।" ३ । २ । ६७ । इति विट् । "विड्वनोरनुनासिकस्यात्" ६ । ४ । ४१ । इति आत्वञ्च ।) गोलोमिकावृक्षः । इति राजनिर्घण्टः ॥

गोजागरिकं, क्ली (गोषु इन्द्रियेषु जागरः अप्रमादोऽस्त्यस्य ठन् ।) मङ्गलम् । इति मेदिनी । के । २२७ ॥

गोजागरिकः, पुं, (गवि पृथिव्यां जागरिकः प्रहरीव । अस्त्रवत्कण्टकान्वितत्वादस्य तथात्वम् ।) कण्टकारिका । इति मेदिनी । के । २२७ ॥

गोजापर्णी, स्त्री, (गोजं दुग्धं तद्वत् आपर्णयति शुक्लवर्णो भवतीति । आ + पर्ण + अच् ।) गौरादित्वात् ङीष् ।) दुग्धफेनीवृक्षः । इति राजनिर्घण्टः ॥

गोजिह्वा, स्त्री, (गोर्जिह्वेव ।) क्षुपविशेषः । गोजियालता इति दारियाशाक इति च भाषा । तत्पर्य्यायः । दार्व्विका २ । इत्यमरः । २ । ४ । ११६ ॥ दर्व्विका ३ । इति भरतः ॥ दार्व्विपत्त्रिका ४ । इति रत्नमाला ॥ खरपत्री ५ वातोना ६ अधोमुखा ७ अनडुज्जिह्वा ८ अधःपुष्पी ९ दर्व्वी १० गोजिह्विका ११ । इति शब्दरत्नावली ॥ अपि च भावप्रकाशे ।
"गोजिह्वा गोजिका गोभी दार्व्विका खरपर्णिनी ।
गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् ॥
हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः ।
कोमला तुवरी तिक्ता स्वादुपाकरसा स्मृता ॥"
अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । शीतलत्वम् । पित्तसर्व्वदन्तिविमार्तिनाशित्वम् । व्रणसरोपणत्वञ्च । इति राजनिर्घण्टः ॥ (अस्या व्यवहारो यत्र तद्यथा,—
"सोमवल्कोऽश्वकर्णश्च गोजिह्वा हंसपद्यपि ।
रजन्यौ गैरिकं लेपो नखदन्तविषापहः ॥"
इति वैद्यकचक्रपाणिसंग्रहे विषाधिकारे ॥)
गवेधुका । इति रत्नमाला ॥ गड़गड़ इति भाषा ॥

गोजिह्विका, स्त्री, (गोर्जिह्वेव गोजिह्वा स्वार्थे कन् । अत इत्वञ्च ।) गोजिह्वा लता । इति शब्दरत्नावली ॥

गोड:, पुं (गोरण्ड इव । पृषोदरादित्वात् साधु: ।) गोण्ड: । स तु नाभौ प्रवृद्धमांसगुडक. । इति लिङ्गादिसंग्रहटीकायां भरत: ॥

गोडुम्ब:, पुं, (गां भुवं तुम्बति अर्द्दतीति । गो+तुम्ब+क । पृषोदरादित्वात् साधु: ।) शीर्णवृन्त: । इति मेदिनी । बे । १२ ॥ तरमूज् इति ख्यात: ॥

गोडुम्बा, स्त्री, (गोडुम्ब+स्त्रियां टाप् ।) गवादनी । इति मेदिनी । बे । १२ ॥ गोमुक इति ख्याता गोमा इति राजगोमुक् इति च ख्याता इत्येके । इति भरत: ॥ तत्पर्य्याय: । चित्रा २ गवाक्षी ३ । इत्यमर: । २ । ४ । १५६ ॥ गोडुम्बिका ४ । इति रत्नमाला ॥

गोडुम्बिका, स्त्री, (गोडुम्ब+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च ।) गोडुम्बा । इति रत्नमाला ॥

गोणी, स्त्री, (शणादिगुणाद् जात गोण: निपातनादुकारस्य गुण: । गोणशब्दात् आवपनेऽर्थे "जानपदकुण्डगोणेति ।" ४ । १ । ४२ । इति ङीष् ।) धान्यादिवहनार्थाधारविशेष: । इति मुग्धबोधम् । गुण् इति भाषा ॥ द्रोणीपरिमाणम् । इति वैद्यकपरिभाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने चतुर्थाध्याये ।
"विडालनकुलोद्राणां चर्म्मगोण्या मृगस्य वा ।
प्रवेशयेद्वा स्वभ्यक्त शाल्वणेनोपनाहितम् ॥"
"शूर्पाभ्याञ्च भवेद्द्रोणी वाहो गोणी च सा स्मृता ।
माषटङ्काक्षविल्वानि कुडव: प्रस्थमाढकम् ।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणा: ॥"
इति शार्ङ्गधरेण पूर्व्वखण्डे प्रथमेऽध्याय उक्तम् ॥
"गोणी शूर्पद्वयं विद्यात् खारीं भारीन्तथैव च ।
द्वात्रिंशतं विजानीयात् वाहं शूर्पाणि बुद्धिमान् ॥"
इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम् ॥) छिन्नवस्त्रम् । तत्पर्य्याय: । शाणी २ । इति हेमचन्द्र: । ३ । ३४३ ॥

गोण्ड:, पु (गो: अण्ड इव ।) नाभौ वृद्धमांसगुडक: । इति लिङ्गादिसंग्रहे अमर. । ३ । ५ । १८ ॥ गेंड् इति भाषा । पामरजाति. । वृद्धनाभियुक्ते त्रि । इति मेदिनी । डे । ११ ॥ अस्य रूपान्तरं गोड: गौड: । इत्यमरटीका ॥

गोतम:, पु, (गोभिर्ध्वस्तं तमो यस्य । पृषोदरादित्वात् साधु: । एतन्निरुक्तिर्यथा, महाभारते । १३ । ९३ । ९५ ।
"गोदमोऽहंमतोऽधूमोऽदमस्ते समदर्शनात् ।
गोभिस्तमो मम ध्वस्तं जातमात्रस्य देहत: ।
विद्धि मां गोतमं कृत्ये यातुधानि । निबोध माम् ॥")
गौतममुनि: । स तु ब्रह्मपुत्त्र: । इति गयामाहात्म्ये वायुपुराणम् ॥

गोतमान्वय:, पु, (गोतमोऽन्वयो वंशप्रवर्त्तको यस्य ।) शाक्यमुनि: । इति हेमचन्द्र: ॥

गोतल्लज:, पु, (प्रशस्तो गौ: "प्रशंसावचनैश्च ।" २ । १ । ६६ । इति कर्म्मधारय: ।) उत्तमगौ. । गोषु मध्ये तल्लज: प्रशस्त: इति वा व्युत्पत्ति: ॥

गोत्रं, क्ली, गवते शब्दयति पूर्व्वपुरुषान् यत् । इति भरत: ॥ (गु+"गुधृवीपतीति ।" उणा । ४ । १६६ । इति त्र. ।) तत्पर्य्याय: । सन्तति: २ जननम् ३ कुलम् ४ अभिजन: ५ अन्वय: ६ वंश. ७ अन्ववाय: ८ सन्तान: ९ । इत्यमर: । २ । ७ । १ ॥ आख्या । (यथा, कुमारे । ४ । ८ ।
"स्मरसि स्मरमेखलागुणै-
रुत गोत्रस्खलितेषु बन्धनम् ॥")
सम्भावनीयबोध: । काननम् । क्षेत्रम् । वर्त्म । इति मेदिनी । रे । २६ ॥ छत्रम् । इति हेमचन्द्र: ॥ संघ: । वृद्धि: । इति शब्दचन्द्रिका ॥ वित्तम् । इति विश्व: ॥ * ॥ "वंशपरम्पराप्रसिद्धं आदिपुरुषं ब्राह्मणरूपम् ।
क्षत्त्रियवैश्ययोरुपदिष्टातिदिष्टगोत्रं शूद्रस्यातिदिष्टातिदिष्टगोत्रम् ।" इत्युद्वाहतत्त्वम् ॥ क्षत्त्रियवैश्यशूद्राणामतिदिष्टातिदिष्टगोत्रप्रवरमतएव तेषां पुरोहितगोत्रप्रवरमित्यर्थ: । तथा चाग्निपुराणे वर्णसङ्करोपाख्याने ।
"क्षत्त्रियवैश्यशूद्राणां गोत्रञ्च प्रवरादिकम् ।
तथान्यवर्णसङ्कराणां येषां विप्राश्च याजका ॥"
गोत्राणि तु चतुर्व्विंशति: तथा च मनु: ।
"शाण्डिल्य: काश्यपश्चैव वात्स्य: सावर्णकस्तथा ।
भरद्वाजो गौतमश्च सौकालीनस्तथापर: ॥
कल्किषश्चाग्निवेश्यश्च कृष्णात्रेयवशिष्ठकौ ।
विश्वामित्र: कुशिकश्च कौशिकश्च तथापर: ॥
घृतकौशिकमौद्गल्यौ आलम्यान: पराशर: ।
सौपायनस्तथात्रिश्च वासुकी रोहितस्तथा ॥
वैयाघ्रपद्यकश्चैव जामदग्न्यस्तथापर: ।
चतुर्व्विंशतिर्वै गोत्रा कथिता. पूर्व्वपण्डितै: ॥"
तथा च मनु: ।
"जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमा: ।
वशिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिण: ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते ॥"
एतदुपलक्षणमन्येषामपि दर्शनात् । तथा च ।
"सौकालीनकमौद्गल्यौ पराशरवृहस्पती ।
काण्वनो विष्णुकौशिक्यौ कात्यायनात्रेयकाश्यका: ॥
कृष्णात्रेय: साङ्कृतिश्च कौण्डिल्यो गर्गसंज्ञक. ।
आङ्गिरस इति ख्यात: अनावृकाख्यसञ्ज्ञित: ॥
अथजैमिनिवृद्धाख्या: शाण्डिल्यो वात्स्य एव च ।
सावर्ण्यालम्यानवैयाघ्रपद्यश्च घृतकौशिक: ॥
शक्ति: कात्यायनश्चैव वासुकी गौतमस्तथा ।
शुनक: सौपायनश्चैव मुनयो गोत्रकारिण: ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते ॥"
सर्व्वे चत्वारिंशद्गोत्रा: । इति कुलदीपिकाधृतधनञ्जयकृतधर्म्मप्रदीप: ॥ (मेघ: । इति निघण्टु. । १ । १० । यथा, ऋग्वेदे । १ । ५१ । ३ ।
"त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित् ॥")

गोत्र:, पुं, (गां पृथिवीं त्रायते रक्षतीति । गो+त्रै+"आतोऽनुपसर्गे क: ।" ३ । २ । ३ । इति क: ।) पर्व्वत: । इत्यमर: । २ । ३ । १३ ॥ (यथा, भागवते । २ । ६ । ९ ।
"नाड्यो नदनदीनान्तु गोत्राणामस्थिसंहति: ॥")

गोत्रज:, त्रि, (गोत्रे जायते इति । गोत्र+जन्+ड: ।) गोत्रोत्पन्न: । स तु जन्मनामस्मृतिपर्य्यन्तसमानोदकभावात् पश्चाद्भवति । इति शुद्धितत्त्वम् ॥ (यथा, याज्ञवल्क्ये । २ । १३८ ।
"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धु: शिष्य: सब्रह्मचारिण: ॥")

गोत्रभित्, [द्] पु, (गोत्रं पर्व्वतं भिनत्तीति । "सत्सूद्विषेत्यादि ।" ३ । २ । ६१ । इति क्विप् । ततस्तुगागम: ।) इन्द्र: । इत्यमर: । १ । १ । ४५ ॥ (यथा, ऋग्वेदे । ६ । १७ । २ ।
"यो गोत्रभिद्वज्रभृद्यो हरिष्ठा:
स इन्द्र चित्रॉ अभितृन्धि वाजान् ॥"
यथा च भट्टौ । १ । ३ ।
"सहासनं गोत्रभिदाध्यवात्सीत् ॥")

गोत्रवृक्ष:, पुं, (गोत्रजात: पर्व्वतजातो वृक्ष: ।) धन्वनवृक्ष: । इति भावप्रकाश: ॥
"धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्ष: सुतेजन: ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गोत्रा, स्त्री, (गा: पशून् सर्व्वान् जीवानित्यर्थ: त्रायते इति । त्रै+क: । स्त्रियां टाप च ।) पृथिवी । (गवां समूह: । "इनित्रकट्यचश्च ।" ४ । २ । ५१ । इति त्र: । टाप् च ।) गोसमूह: । इति मेदिनी । रे । २६ ॥ (गायत्त्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४१ ।
"गान्धर्व्वी गह्वरी गोत्रा गिरिशा गहना गमी ॥")

गोद:, पु, (गा इन्द्रियाणि दायति शोधयतीति । गो+दै+क: ।) मस्तकस्नेह: । मस्तिष्कम् । इति हेमचन्द्र: ॥ (गा: ददातीति । +दा+क ।) गोदातरि त्रि । इति मुग्धबोधम् ॥ (यथा, मनु: । ४ । २३१ ।
"वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वद: ।
अनडुह: श्रियं पुष्टां गोदो ब्रध्नस्य पिष्टपम् ॥")

गोदन्त, क्ली, (गोदन्त इव अवयवो विद्यते यस्य ।) हरितालम् । इति राजनिर्घण्ट: ॥ (हरितालशब्देऽस्य गुणादयो बोद्धव्या: ॥)

गोदा, स्त्री, (गां जलं स्वर्गं वा ददाति स्नानेनेति । गो+दा+क: । स्त्रियां टाप् ।) गोदावरी नदी । इति हेमचन्द्र: । ४ । १५० ॥ (गायत्त्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४३ ।
"गर्व्वापहारिणी गोदा गोकुलस्था गदाधरा ॥"
गा: ददातीति । दा+क्विप् । गोदातरि त्रि । यथा, ऋग्वेदे । १ । ४ । २ ।
"गोदा इद्रेवतो मद: ।"
"गोदाश्चक्षुरिन्द्रियव्यवहारप्रद: ।" इति दयानन्दभाष्यम् ॥)

गोदारणं, क्ली, (गौर्भूमिर्दार्य्यतेऽनेनेति । गो+दॄ+णिच्+करणे ल्युट् ।) लाङ्गलम् । इत्यमर । २ । ९ । १४ ॥ कुद्दाल: । इति हेमचन्द्र: । ४ । ५५६ ॥

गोदावरी, स्त्री, (गां जलं स्वर्गं वा ददातीति गोदा । तासु वरी श्रेष्ठा । वर+ङीष् सञ्ज्ञायाम् । यद्वा गां स्वर्गं ददाति । गो+दा+वनिप्+ङीप् रान्तादेशश्च ।) नदीविशेषः । (अस्या उत्पत्तिकथा यथा, ब्रह्मवैवर्त्ते । १० । १२६—१३० ।
"गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं रविनन्दनः ।
ददर्श्श कामुकः शान्तः पुष्पोद्याने च निर्ज्जने ॥
तया निवारितो यत्नात् कालेन बलवान् सुरः ।
अतीवसुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः ॥
द्रुतं तत्याज गर्भं सा पुष्पोद्याने मनोहरे ।
सद्यो बभूव पुत्त्रश्च तप्तकाञ्चनसन्निभः ॥
सपुत्त्रा स्वामिनो गेहं जगाम व्रीडिता तदा ।
स्वामिनं कथयामास यन्मार्गे दैवसङ्कटम् ॥
विप्रो रोषेण तत्याज तञ्च पुत्त्रं स्वकामिनीम् ।
सरिद्बभूव योगेन सा च गोदावरी स्मृता ॥")
तत्पर्य्यायः । गोदा २ । इति हेमचन्द्रः ॥ गौतमसम्भवा ३ ब्राह्मद्रिजाता ४ गौतमी ५ । (यथा, हितोपदेशे ।
"अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः ॥")
इयमेव पीठस्थानविशेषः । अत्र देवी त्रिसन्ध्यारूपेणाविराजते । यथा, देवीभागवते । ७।३०।६८ ।
"गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥")
अस्या जलस्य गुणाः । पित्तार्त्तिरक्तार्त्तिवायुपापकुष्ठादिदुष्टामयदोषदहनानाशित्वम् । परमपथ्यत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

गोदुग्धदा, स्त्री, (गवां दुग्धं ददाति आधिक्येन सम्पादयतीति । गो+दा+क । तद्भक्षणेन गवां दुग्धवर्द्धनादस्यास्तथात्वम् ।) चणिकाख्यम् । इति राजनिर्घण्टः ॥

गोदोहनी, स्त्री, (गावो दुह्यन्तेऽस्यामिति । गो+दुह्+अधिकरणे ल्युट् ।) गोदोहनपात्रम् । तत्पर्य्यायः । पारी २ । इति जटाधरः ॥

गोद्रव, पुं, (द्रवति स्रवतीति । द्रु+अच् द्रवः । गवां द्रवः ।) गोमूत्रम् । इति राजनिर्घण्टः ॥

गोधन, क्ली, (गवां धनं समूहः ।) गोसमूहः । इत्यमरः । २ । ६ । ५८ ॥ (यथा, गोः रामायणे । २ । ३२ । ४२ ।
"स आत्मनो दर्व्वीं कर्षां बद्ध्वा सम्भ्रान्तमानसः ।
दण्डमुद्यम्य सहसा प्रससर्प्प गोधनं प्रति ॥")

गोधनः, पुं, (घन शब्दे भावे अप् घनं शब्दः । गोर्वत्सस्येव घनः शब्दो यस्य ।) स्थूलाग्रबाणः । इति हरिवंशः ॥ तुक्का इति भाषा ॥

गोधा, स्त्री, (गुध्यते परिवेष्ट्यते बाहुर्य्यया । गुध्+"हलश्चेति ।" करणे घञ् ।) धनुर्गुणाघातवारणाय प्रकोष्ठबद्धा चर्म्मकृतपट्टिका । तत्पर्य्यायः । तला २ ज्याघातवारणः ३ । इत्यमरः । २ । ८ । ८४ ॥ तलम् ४ । इति तट्टीका ॥ (यथा, महाभारते । ३ । १७ । ३ ।
"शिञ्जिप्रमादयश्चापि धनुःश्रेष्ठं महाबले ।
तूणखड्गधरः शूरो बद्धगोधाङ्गुलित्रवान् ॥")
जन्तुविशेषः । गोसाप इति भाषा ॥ सा तु स्थलजलजभेदात् द्विविधा । तत्पर्य्यायः । निहाका २ गोधिका ३ । इत्यमरः । १ । १० । २२ ॥ दारुमुख्याहा ४ । (यथा, सुश्रुतसंहितायाम् । ५४ । १३ ।
"श्वेता गोधाहनरे पुरुषे स्थूलसरा ततः कृष्णा ।
पीता चिता सचिकता ततो जलं विनिर्द्दिशेद्भेदमितम् ॥"
पञ्चनखतया गोधाया मांसं भक्ष्यत्वेन ग्राह्यमित्यभिहितं मन्वादिभिर्धर्म्मशास्त्रप्रयोक्तृभिः । यथा, मनुः । ५ । १८ ।
"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा ।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः ॥")
अस्या मांसगुणाः । वातश्वासकासनाशित्वम् । इति राजनिर्घण्टः ॥ पाके मधुरत्वम् । कषायत्वम् । कटुरसत्वम् । पित्तनाशित्वम् । रक्तशुक्रबलकारित्वम् । इति राजवल्लभः ॥
("गोधा विपाके मधुरा कषायकटुका रसे ।
वातपित्तप्रशमनी बृंहणी बलवर्द्धनी ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

गोधापदिका, स्त्री, (गोधाया इव पादो मूलमस्याः । स्वाङ्गत्वात् ङीष् । ततः "कुम्भपदीषु च ।" ५ । ४ । १३९ । इति पद्भावः । गोधापदी । ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) गोधापदीलता । इति शब्दरत्नावली ॥

गोधापदी, स्त्री, (गोधाया इव पादो मूलं यस्याः । स्वाङ्गत्वात् ङीष् । "कुम्भपदीषु च" ५ । ४ । १३९ । इति पद्भावः ।) लताविशेषः । गोयालिया इति भाषा ॥ तत्पर्य्यायः । सुवहा २ । इत्यमरः । २ । ४ । ११९ ॥ हंसपदी ३ गोधाङ्घ्री ४ त्रिफला ५ । इति भरतः ॥ त्रिपदी ६ मधुस्रवा ७ हंसपादी ८ । इति रत्नमाला ॥ हंसपादिका ९ हंसाङ्घ्रि १० रक्तपादी ११ त्रिपदा १२ घृतमण्डलिका १३ विश्वग्रन्थि १४ त्रिपादिका १५ त्रिपादी १६ कीटमारी १७ कर्णाटी १८ ताम्रपादी १९ विक्रान्ता २० प्रह्लादनी २१ पदाङ्गी २२ शीताङ्गी २३ सुतपादिका २४ सञ्चारिणी २५ मदिका २६ प्रस्रादी २७ कीटपादिका २८ धार्त्तराष्ट्रपदी २९ गोधापदिका ३० । इति शब्दरत्नावली ॥ हिदला ३१ हंसवती ३२ । इति जटाधरः ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । विषभूतभ्रान्त्यपस्मारदोषनाशित्वम् । रसायनत्वञ्च । सुवली । तालमूली इति ख्याता । इति राजनिर्घण्टः ॥

गोधास्कन्ध, पुं (गोधेव स्कन्धोऽस्य ।) विट्खदिरः । इति राजनिर्घण्टः ॥

गोधिः, पुं, (गावौ नेत्रे धीयेते अस्मिन् । "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) ललाटम् । इत्यमरः । २ । ६ । ९२ ॥ (गुधाति क्रुध्यतीति । गुध्+"सर्व्वधातुभ्य इन् ।" उणा । ४ । ११८ । इति इन् ।) गोधिका । इति शब्दरत्नावली ॥

गोधिका, स्त्री, (गुधातीति । गुध्+ण्वुल् । टाप् । अत इत्वञ्च ।) गोधा । इत्यमरः । १ । १० । २२ ॥ गोसाप इति भाषा ॥

गोधिकात्मज, पुं, (गोधिकाया आत्मजः ।) स्थूलगोधिका । गोधाशिशुतुल्याकारकोटरस्थजन्तुविशेषः । लोके इति ख्यात इति भगी । इति सारसुन्दरी ॥ तत्पर्य्यायः । गौधेरः २ । गौधारः ३ गौधेयः ४ । इत्यमरः । २ । ५ । ६ ॥ (सर्पाद्गोधायामुत्पन्ने जन्तुविशेषे इति गोधिकापुत्त्रशब्दार्थे शब्दार्थचिन्तामणिः ॥)

गोधिनी, स्त्री, (गोधः क्रीडाभेदः सोऽस्त्यस्या इति इनिः ङीप् च ।) चविका । सा तु हस्तीभेदः । इति राजनिर्घण्टः ॥

गोधुक्, [ह्] त्रि, (गां दोग्धीति । गो+दुह्+"सत्सूद्विषद्रुहदुहयुजविदादि ।" ३ । २ । ६१ । इति क्विप् ।) गोदोग्धा । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । २६ ।
"उप ह्वये सुदुघां धेनुमेतां
सुहस्तो गोधुगुत दोहदेनाम् ॥")

गोधुमः, पुं, (गुध्+"गुधेरूमः ।" उणां । ५ । २ । इति ऊमः । निपातनात् ह्रस्वः ।) गोधूमः । इति शब्दचन्द्रिका ॥

गोधूम, पुं, (गुध्यते वेष्ट्यते त्वगादिभिः । गुध्+"गुधेरूमः ।" उणां । ५ । २ । इति ऊमः ।) नागरङ्गः । ओषधीविशेषः । व्रीहिभेदः । इति मेदिनी ॥ मे । ४३ । गम गोम् इति च भाषा ॥ शेषस्य पर्य्यायः । बहुदुग्धः २ अपूपः ३ म्लेच्छभोजनः ४ यवनः ५ निस्तुषक्षीरः ६ रसालः ७ सुमनाः ८ । (यथा, मनुः । ५ । २५ ।
"यवगोधूमजं सर्व्वं पयसश्चैव विक्रियाः ॥")
अस्य गुणाः । स्निग्धत्वम् । मधुरत्वम् । वातपित्तदाहनाशित्वम् । गुरुत्वम् । श्लेष्मदबलरुचिवीर्य्यकारित्वञ्च । इति राजनिर्घण्टः ॥ हृद्यत्वम् । जीवनहितत्वम् । शीतत्वम् । भग्नसन्धानस्थैर्य्यकारित्वम् । सारकत्वञ्च । इति राजवल्लभः ॥ (अथ गोधूमस्य नामानि लक्षणं गुणाश्च ।
"गोधूमः सुमनोऽपि स्यात् त्रिविधः स च कीर्त्तितः ।
महागोधूम इत्याख्यः पश्चाद्देशात् समागतः ॥
महागोधूमः बड़ गोधूमा इति लोके ।
मधुली तु ततः किञ्चिदल्पा सा मध्यदेशजा ।
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ।
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत् सरः ॥
जीवनो बृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत् ।
कफप्रदो नवीनो न तु पुराणः ।
पुराणयवगोधूमः क्षौद्रजाङ्गलशूलभागिति ।
वाग्भटेन वसन्ते गृहीतत्वात् ।
मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघु
शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

गोधूमचूर्णं, क्ली, (गोधूमस्य चूर्णम् ।) चूर्णीकृतगोधूमः । मयदा इति भाषा ॥ यथा,—
"शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च रोटिकाम् ॥"
इति भावप्रकाशः ॥

गोधूमसम्भव, क्ली, (सम्भवत्यस्मादिति सम्भव उत्पत्तिस्थानम् । गोधूमः सम्भवोऽस्य ।) सौवीरम् । काञ्जिकभेदः । इति राजनिर्घण्टः ॥

गोधूमसार, पु, गोधूमस्य सारभागः । पालो इति भाषा ॥ तत्करणविधिर्यथा । "निस्तुषगोधूमं उदूखले कण्डयित्वा सन्ध्याकाले मृत्तिकादिपात्रे जले मग्नं कारयित्वा परदिने प्रभाते उपरिस्थजलं क्रमेण दूरीकृत्य नीचस्थसारं रौद्रे शुष्कं कृत्वा पात्रान्तरे स्थापयेत् ।" इति पाकराजेश्वरः ॥

गोधूमी, स्त्री, (गा धूमयतीति । धूमि+अण् । गौरादित्वाद् ङीष् ।) गोलोमिका । इति राजनिर्घण्टः ॥ (गोलोमिकाशब्देऽस्या विवरणं ज्ञेयम् ॥)

गोधूलिः, स्त्री, (गवां खुरोत्थिता धूलिर्यत्र काले ।) कालविशेषः । गोधूलिकालस्तु त्रिविधः । यथा, ग्रीष्मे अर्द्धास्तरविकाशः । हेमन्तशिशिरयोर्मृदुभाप्राप्तपिण्डीकृतरविकालः । वर्षाशरद्वसन्तेष्वस्तगतरविकालः । यथा,—
"गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवाहादिके
हेमन्ते शिशिरे प्रयाति मृदुतां पिण्डीकृते भास्करे ।
ग्रीष्मेऽर्द्धास्तमिते वसन्तसमये भानौ गतेऽदृश्यतां
सूर्य्ये चास्तमुपागते च नियतं वर्षाशरत्कालयोः ॥"
इति दीपिका ॥

गोधेनुः, स्त्री, (गौरेव धेनुः ।) दुग्धवती गवी । इति संक्षिप्तसारव्याकरणम् ॥

गोधेरः, पु (गोधति धातूनामनेकार्थत्वात् रक्षतीति । गुध्+बाहुलकादेरक् ।) गोधा । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गोनन्दी, स्त्री, (गवि जले नन्दतीति । नन्द+अच् । गौरादित्वात् ङीष् ।) सारसपक्षिणी । इति हारावली ॥

गोनर्द्द, क्ली,(गवि पृथिव्या नर्द्दते स्वनाम्ना आख्यायते इत्यर्थः । नर्द्द+अप् ।) मुस्तकम् । इति मेदिनी । दे । २८ ॥

गोनर्द्दः, पुं, (गवि जले नर्द्दति कूजतीति । गो+नर्द्द+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।"३ । १ । १३४ । इति पचादित्वादच् ।) सारसपक्षी । इति मेदिनी । दे । २८ ॥ (गोभिर्वाग्भिर्नर्द्दतीति । अच् ।) देशविशेषः । यथा, वृहत्संहितायाम् । १४ । १२ ।
"कङ्कटटङ्कणवनवासिशिविकफणिकारकोङ्कणाभीराः ।
आकरवेणावन्तकदशपुरगोनर्द्दकेरलकाः ॥"
गोनर्द्दस्य देशस्य राजा । "तद्राजेऽपि ।" २ । ४ । ६२ । इत्यण् । गोनर्द्दराजः । यथा, राजतरङ्गिण्याम् । १ । ५७ ।
"काश्मीरेन्द्रः स गोनर्द्दो वेल्लद्गङ्गादुकूलया ।
दिशा कैलासहासिन्या प्रतापी पर्य्युपास्यत ॥")

गोनर्द्दीय, पु, (गोनर्द्दे देशे भवः । गोनर्द्द+"एङ् प्राचां देशे ।" १ । १ । ७५ । इति वृद्धसंज्ञत्वात् छः ।) पतञ्जलिमुनिः । इति हेमचन्द्रः । ३ । ५१५ ॥ (अस्य गोनर्द्ददेशोद्भूतत्वात् तथात्वम् । तद्देशभवे, त्रि ॥)

गोनसः, पु, (गोरिव नासिका यस्य । "अञ् नासिकायाः सञ्ज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इति अच् नसादेशश्च ।) सर्पविशेषः । वोडा इति ख्यात इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । तिलित्सः २ । इत्यमरः । १ । ८ । ४ ॥ गोनासः ३ घोनसः ४ । इति हेमचन्द्रः ॥ मण्डलीवोड् ५ । इति विक्रमादित्यः ॥ वोड्रः ६ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।
"मिलिन्दको गोनसो वृद्धगोनसः पनसी ॥")
वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनाथः पु, (गवां नाथः ।) अनड्वान् । इति राजनिर्घण्टः ॥

गोनासं, क्ली, (गोर्नासा इव आकृतिरस्य । गोनसाकारत्वादस्य तथात्वम् ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनासः, पुं, (गोर्नासा इव नासा यस्य ।) गोनससर्पः । इति हेमचन्द्रः । ४ । ३७२ ॥

गोनिष्यन्दः, पु, (गोर्निष्यन्दते क्षरतीति । नि+स्यन्द+पचाद्यच् । यद्वा गवा निष्यन्दः ।"कृद्विहितो भावो द्रव्यवत् प्रकाशते ।" इति न्यायात् ।) गोमूत्रम् । इति राजनिर्घण्टः ॥

गोपः, पु, (गोर्जलात् कफपित्तादिदूषितरसात् पाति रक्षतीति । गो+पा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) बोलः । (गां गोजाति पाति रक्षतीति । गो+पा+कः ।) जातिविशेषः । गोयाला इति भाषा ॥ तत्पर्य्यायः । गोसंख्यः २ गोधुक् ३ आभीरः ४ वल्लवः ५ गोपालः ६ । इत्यमरः । २ । ९ । ५७ ॥ तस्योत्पत्तिर्यथा,—
"मणिबन्ध्यां तन्त्रवायात् गोपजातेश्च सम्भवः ।"
इति पराशरपद्धतिः ॥
(यथा, मनुः । ८ । २६० ।
"व्याधाञ्छाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान् ।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः ॥")
गोष्ठाध्यक्षः । (गां पृथिवीं पाति रक्षतीति । पा+कः ।) पृथ्वीपतिः । बहुग्रामस्याधिकृतः । इति मेदिनी । पे । ५ ॥ (गाः पाति रक्षतीति । पा+कः । गोरक्षकः । यथा, मनुः । ८ । २३१ ।
"गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः ॥"
गन्धर्व्वविशेषः । यथा, रामायणे । १ । ९१ । ४६ ।
"नारदस्तुम्बुरुर्गोपः प्रभया सूर्य्यवर्च्चसः ।
एते गन्धर्व्वराजानो भरतस्याग्रतो जगुः ॥")

गोपः, त्रि, (गोपायति रक्षतीति । गुपू ञ् रक्षणे गुप+आय+"आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति अच् ।) रक्षकः । उपकारकः । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । १० । ६१ । १० । "द्विबर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥")

गोपकः, पु, (गोप+स्वार्थे कन् ।) बोलः । बहुग्रामाधिपतिः । इति शब्दरत्नावली ॥

गोपकन्या, स्त्री, (इन्द्रियाद्युपलक्षितशरीररक्षकस्य गोपस्य वैद्यस्य कन्येव हितकारित्वात् ।) शारिवौषधिः । इति राजनिर्घण्टः ॥ (गोपस्य कन्या ।) आभीरसुता ॥ (यथा,—
"युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित् ।
कैशोरक मानयन् वै सह ताभिर्मुमोद ह ॥"
इति हरिवंशे । ७६ । १८ ॥)

गोपघोण्टा, स्त्री, (गोपप्रिया घोण्टा वदरीविशेषः ।) हस्तिकोलिः । इति रत्नमाला ॥ वदरीसदृशसूक्ष्मफलवृक्षः । शेयाकुल इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।
("वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत् ।
अटव्यामेव सा घोण्टा गोपघोण्टेति चोच्यते ॥")
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

गोपतिः, पु, (गोर्वृषभस्य पतिः । यद्वा गवां पशूनां जीवानां पतिः ।) शिवः । (यथा, महाभारते । १३ । १७ । १३ ।
"गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥"
गां पृथ्वीं जगदित्यर्थः पाति पालयतीति । गो+पा+डतिः । विष्णुः । यथा, महाभारते । १३ । १४९ । ६६ ।
"उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥"
गोपेन्द्रनन्दनकृष्णः । यथा, हरिवंशे । ७६ । ४ ।
"अमानुषाणि कर्म्माणि पश्यामस्तव गोपते ! ॥"
असुरभेदः । यथा, महाभारते । ३ । १२ । ३५ ।
"गोपतिस्तालकेतुश्च त्वया विनिहतावुभौ ॥"
गवां रश्मीनां पतिः ।) सूर्य्यः । (यथा, भागवते । १ । १२ । १० ।
"परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।
अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥"
गोः पृथिव्याः पतिः ।) राजा । (गवां सौरभेयाणां पतिः ।) वृषः । इति मेदिनी ॥ ते । १०७ ॥ (यथा, वृहत्संहितायाम् । ६८ । ११५ ।
"शार्दूलहंससमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनां च भूपाः ।
येषाञ्च शब्दरहितं स्तिमितञ्च यातं
तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः ॥")
ऋषभनामौषधिः । इति राजनिर्घण्टः ॥

गोपदलः, पु, (गोपदं गोचरणन्यासयोग्यं स्थानं लाति गृह्णातीति । गोपद+ला+कः ।) गुवाकः । इति त्रिकाण्डशेषः ॥

गोपनं, क्ली, (गुप्+भावे ल्युट् ।) अपह्नवः । (यथा, महानिर्व्वाणतन्त्रे । ४ । ७९ ।
"गोपनाद्धीयते सत्यं न गुप्तिरनृतं विना ।
तस्मात् प्रकाशतः कुर्य्यात् कौलिकः कुलसाधनम् ॥")
कुत्सनम् । रक्षा । (यथा, राजेन्द्रकर्णपूरे ।३४।
"अधिक समाप्तसमरः प्रथितो भुवनेषु गोपनरसोत्कः ॥")
व्याकुलत्वम् । दीप्तिः । इति कविकल्पद्रुमे गुपधात्वर्थदर्शनात् ॥ तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

गोपनीय, त्रि, (गुप्+अनीयर् ।) गोप्यम् । गोपितव्यम् । यथा,—
"स्वर्गेऽपि दुर्लभा विद्या गोपनीया प्रयत्नतः ।"
इति नाडीप्रकाशः ॥

गोपवधूः, स्त्री, (गोपस्य वधूरिव प्रियत्वात् । गोपान् बध्नाति स्वगुणेन इति वा । बन्ध+बाहुलकात् ऊन् ।) शारिवा । इति भावप्रकाशः ॥ गोपस्य पत्नी च ॥ (यथा, गीतगोविन्दे । १ । ४१ ।
"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥")

गोपभद्र, क्ली, (गोपे भद्रमिव ।) शालूकम् । इति शब्दचन्द्रिका ॥

गोपभद्रा, स्त्री, (गोपानां भद्रं मङ्गलं यस्याः यस्यां वा गोपाद्यारण्यकजातिभिः पूज्यत्वादस्यास्तथात्वम् ।) काश्मरीवृक्षः । इति राजनिर्घण्टः ॥

गोपभद्रिका, स्त्री, (गोपभद्रा संज्ञायां कन् । टापि अत इत्वञ्च ।) गम्भारीवृक्षः । इति रत्नमाला ॥

गोपरसः, पुं, (गोपः गन्धद्रव्यविशेषः । गोपः रसोऽस्य । गोपः अभ्यन्तरगुप्तो रसो यस्मिन् वा ।) बोलः । इति शब्दरत्नावली ॥

गोपवल्ली, स्त्री, (गां पाति रक्षतीति । पा+कः । टाप् । गोपा चासौ वल्ली चेति कर्म्मधारयः ।) मूर्व्वा । शारिवा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"गोपवल्ली कराला च सुगन्धा भद्रवल्लिका ।
गोपीभद्रा तथानन्ता नागजिह्वातिशारिवा ॥"
इति वैद्यकरत्नमालायाम् ॥
यथा च सुश्रुते उत्तरतन्त्रे ५१ अध्याये ।
"गोपवल्ल्यादके सिद्धं स्याद्दध्यद्धिगुणे घृतम् ॥")
श्यामालता । इति शब्दरत्नावली ॥

गोपा, स्त्री, (गां पाति रक्षतीति । पा+"आतोऽनुपसर्गे कः ।"३।२।३। इति कः । स्त्रियां टाप् ।) श्यामालता । इत्यमरटीका शब्दरत्नावली च ॥ (गां पाति रक्षतीति । पा रक्षणे+कप्राप्तिविषये चासरूपन्यायेन "आतो मनिन्क्वनिप्वनिपश्च ।" ३ । २ । ७४ । इति चेन विच् अदन्तत्वाभावादाप् विधेरभावे गोपा गोरक्षाकर्त्री । गोपा विश्वपावदिति मुग्धबोधव्याकरणम् ॥)

गोपानसी, स्त्री, (गोपायति रक्षति गृहमिति । गुपू ञ रक्षणे+बाहुलकात् नसट् यलोपश्च ततो ङीप् च ।) वड़भी । गृहाग्रामग्रभागे दत्तवक्रकाष्ठम् । सुदनी इति भाषा ॥ इत्यमरटीकासारसुन्दरी ॥ गृहचूड़ा वड़भी तच्छादनार्थं वक्रीकृत्य यत् काष्ठं दीयते सा वड़भी चतुष्किकादिचूड़ा तच्छादनाय वक्रीकृत्य यत् काष्ठं दीयते सा । इति मधु. ॥ पटलाधोवंशपञ्जरम् । इति भट्टः ॥ कर्णिकाविष्कम्भिदारु इत्यन्ये । वक्रीभूत धरणकाष्ठम् । इत्येके । इत्यमरटीकायां भरत. ॥ (यथा माघे । ३ । ४९ ।
"गोपानसीषु क्षणमास्थितानामालम्बिभिश्चन्द्रकिणां कलापैः ।
हरिन्मणिश्यामतृणाभिरामैर्गृहाणि नीध्रैरिव यत्र रेजुः ॥")

गोपायित, त्रि, (गुपू ञ रक्षणे । गोपाय्यते स्म इति । गोपाय+कर्म्मणि क्तः ।"आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति आयागमश्च ।) रक्षितम् । इत्यमरः । ३ । १ । १०६ ॥ (भावे क्त रक्षणम् ॥)

गोपालः, पु (गाः पालयतीति । गा+पाल+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) गवां पालकः । वृन्दावनस्थगोपालानां स्वरूपं यथा,
"गोपाला मुनयः सर्व्वे वैकुण्ठानन्दमूर्त्तयः ॥"
इति पद्मपुराणे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम् ॥ * ॥ (गां पृथिवीं पालयतीति । गो+पाल+अण ।) राजा । (गां पृथिवीं वेदं वा पालयतीति ।) नन्दनन्दनः कृष्णः । इति मेदिनी । ले । ८६ ॥*॥ श्रीगोपालस्य ध्यानं यथा,
"अव्याद्व्याकोचनीलाम्बुजरुचिररुणाम्भोजनेत्रोऽम्बुजस्थो
बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको मुकुन्दः ।
दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विश्ववन्द्यो
गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूषश्चिरं वः ॥"
इति तन्त्रसारः ॥ * ॥
तस्य स्वरूपं यथा,—
श्रीव्यास उवाच ।
"ततोऽहमब्रुवं हृष्टः पुलकोत्फुल्लविग्रहः ।
त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन ॥
यत्तत् सत्यं परं ब्रह्म जगद्योनिर्जगत्पतिः ।
वदन्ति वेदशिरसि चाक्षुषं नाथ मेऽस्तु तत् ॥
श्रीभगवानुवाच ।
ब्रह्मणैव पुरा पृष्टः प्रार्थितश्च यथा पुरा ।
यद्वोचमहं तस्मै तत्तुभ्यमपि कथ्यते ॥
मामेके प्रकृतिं प्राहुः पुरुषञ्च तथेश्वरम् ।
धर्म्ममेके धनञ्चैके मोक्षमेकेऽकुतोभयम् ॥
शून्यमेके भावमेके परमार्थमथापरे ।
देवमेके देवमेके ब्रह्ममेके मनः परे ॥
बुद्धिमेके कालमेके शिवमेके सदाशिवम् ।
अपरे वेदशिरसि स्थितमेकं सनातनम् ॥
सद्भावं विक्रियाहीनं सच्चिदानन्दविग्रहम् ।
मन्मायामोहितधियः सर्व्वकार्येषु वञ्चिताः ॥
कोऽपि वेद पुमान् लोके मदनुग्रहभाजनः ।
पश्चाद्य दर्शयिष्यामि स्वं रूपं वेदगोपितम् ॥
ततोऽपश्यमहं भूप । बालं बालाम्बुदप्रभम् ।
गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥
कदम्बमूलमासीनं पीतवाससमद्भुतम् ।
वनं वृन्दावनं नाम नवपल्लवमण्डितम् ॥
कोकिलभ्रमरारावमनोभवमनोहरम् ।
नदीमपश्यं कालिन्दीमिन्दीवरदलप्रभाम् ॥
गोवर्द्धनं तथापश्यं कृष्णवामकरोद्धृतम् ।
महेन्द्रदर्पनाशाय गोगोपालसुखावहम् ॥
दृष्ट्वा विहृष्टो ह्यभवं सर्व्वभूषणभूषणम् ।
गोपालमबलासङ्गमुदितं वेणुनादितम् ॥
ततो मामाह भगवान् वृन्दावनचरः स्वयम् ।
यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम् ॥
निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम् ।
पूर्णं पद्मपलाशाक्षं नातः परतरं मम ॥
इदमेव वदन्त्येते वेदाः कारणकारणम् ।
सत्यं व्यापि परानन्दं चिद्घनं शाश्वतं शिवम् ॥
नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा ।
यमुनां गोपकन्याश्च तथा गोपालबालकान् ॥
ममावतारो नित्योऽयमत्र मा संशयं कृथाः ।
ममेष्टा हि सदा राधा सर्व्वज्ञोऽहं परात्परः ॥
मयि सर्व्वमिदं विश्वं भाति मायाविजृम्भितम् ॥"
इति पद्मपुराणे पातालखण्डम् ॥ * ॥
द्वादशगोपालाश्चैतन्यशब्दे द्रष्टव्याः ॥

गोपालकः, पु, (गाः पशुं जीवजातमित्यर्थः पालयति रक्षतीति । गो+पालि+ण्वुल् ।) शिवः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णः । यथा,—
"दाता फलानामभिवाञ्छितानां
प्रागेव गोपालकमन्त्र एषः ।"
क्रमदीपिका ॥
गोपालशब्दात् स्वार्थे के गोरक्षकश्च ॥ (यद्वा गवां पालकः रक्षकः । पालि+ण्वुल । यथा, महाभारते । ३ । २३९ । ६ ।
"अथ संस्मारणां कृत्वा लक्षयित्वा त्रिहायनान् ।
वृतो गोपालकैः प्रीतो व्यहरत् कुरुनन्दनः ॥"
चण्डमहासेननृपतेः पुत्रयोरन्यतरः । यथा, कथासरित्सागरे । ११ । ७४ ।
"जातौ द्वौ तनयौ चण्डमहासेनस्य भूपतेः ।
एको गोपालको नाम द्वितीयः पालकस्तथा ॥")

गोपालकर्कटी, स्त्री, (गोपालप्रिया कर्कटी फलविशेषः ।) कर्कटीभेदः । गोयालकाँकरी गुरुभा इति च हिन्दी भाषा ॥ तत्पर्य्यायः । वन्ध्या २ गोपकर्कटिका ३ क्षुद्रेर्व्वारु ४ क्षुद्रफला ५ गोपाली ६ क्षुद्रचिर्भिटा ७ । अस्याः गुणाः । शीतत्वम् । मधुरत्वम् । पित्तमूत्रकृच्छ्राश्मरीमेहदाहशोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

गोपालिका, स्त्री, (गोपालकस्य गोरक्षकस्य पत्नी । "पालकान्तात् न ।" ४ । १ । ४८ । इत्यस्य

वार्त्तिं इति न ङीष् अतस्टापि अत इत्वम् ।)
गोपालपत्नी । इति मुग्धबोधम् ॥ कीटविशेषः ।
तत्पर्य्यायः । महाभीरुः २ । इति हेम-
चन्द्रः । ४ । २७४ ॥
गोपाली, स्त्री, (गोपालानां प्रिया । गोपाल +
जातौ ङीष् ।) गोपालकर्कटी । गोरक्षी । इति
राजनिर्घण्टः ॥ (गोपालस्य पत्नी । गोपाल +
स्त्रियां ङीष् । गोपपत्नी ॥ स्कन्दानुचरमातृ-
विशेषः । यथा, महाभारते । ९ । ४६ । ४ ।
"अम्बुजाता च गोपाली बृहदम्बालिका तथा ॥")
गोपाष्टमी, स्त्री, (गोपप्रिया अष्टमी । शाक-
पार्थिववादिवत् समासः ।) कार्त्तिकशुक्लाष्टमी ।
यथा,—
"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ॥
तत्र कुर्य्यात् गवां पूजां गोग्रासं गोप्रदक्षिणम् ।
गवानुगमनं कार्य्यं सर्व्वान् कामानभीप्सता ॥"
इति कूर्म्मपुराणम् ॥
गोपिका, स्त्री, (गोप्येव स्वार्थे कन् ह्रस्वश्च ।)
गोपी । यथा,—
"न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।"
इति श्रीभागवते । १० । ३१ । ४ ॥
(गोपायति रक्षति या । गुपू ण रक्षणे + ण्वुल् ।
स्त्रियां टापि अत इत्वम् ।) रक्षित्री ॥
गोपिनी, स्त्री, (गोपायति रक्षतीति । गुप् +
णिनिः ङीप् च ।) श्यामालता । इति शब्द-
चन्द्रिका ॥ (वीराचारि पश्वाचारिणां पूज-
नीयनायिकाविशेषः । यदुक्तं गुप्तसाधनतन्त्रे
१ म पटले ।
"नटी कापालिकी वेश्या रजकी नापिताङ्गना ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥"
अस्या निरुक्तिर्यथा, कुलार्णवतन्त्रे ।
"आत्मानं गोपयेत् या च सर्व्वदा पशुसङ्कटे ।
सर्व्ववर्णोद्भवा रम्या गोपिनी सा प्रकीर्त्तिता ॥")
गोपिलः, त्रि, (गोपायति रक्षतीति । गुपू रक्षणे
+ "मिथिलादयश्च ।" उणां । १ । ५८ । इति
इलच् निपातनात् किद्भावः ।) गोप्ता । इति
संक्षिप्तसारे उणादिवृत्तिः ॥
गोपी, स्त्री, (गोपस्य स्त्री । "पुयोगादाख्या-
याम् ।" ४ । १ । ४८ । इति ङीष्) गोपपत्नी ।
वृन्दावनस्थगोपीनां स्वरूपं यथा —
"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः ।
देवकन्याश्च राजेन्द्र । न मानुष्यः कथञ्चन ॥" * ॥
तत्र व्रजबाला यथा,—
पूर्णरसा रसमन्थरा रसालया रससुन्दरी
रसपीयूषधामा रसतरङ्गिणी रसकल्लोलिनी
रसवापिका अनङ्गमञ्जरी अनङ्गमानिनी मद-
यन्ती रङ्गविह्वला ललिता ललितयौवना अनङ्ग-
कुसुमा मदनमञ्जरी कलावती रतिकला कल-
कण्ठी अमनास्या रसोत्सुका रतिसर्व्वस्वा रति-
चिन्तामणिः इत्याद्याः ॥ * ॥
श्रुतिगणा यथा,—
उद्गीता रसगीता कलगीता कलस्वरा कल-
कण्ठिका विपञ्ची कलपदा बहुमता बहुकर्म्म-
सुनिष्ठा बहुहरिः बहुशाखा विशाखा सुप्र-
योगतमा विप्रयोगा बहुप्रयोगा बहुकला कला-
वती क्रियावती इत्याद्याः ॥ * ॥
मुनिगणा यथा,—
उग्रतपाः सुतपाः प्रियव्रता सुरता सुरेखा
सुपर्व्वा बहुप्रदा रत्नरेखा मणिग्रीवा अपर्णा
सुपर्णा मत्ता सुलक्षणा सुदती गुणवती सौका-
लिनी सुलोचना सुमनाः सुभद्रा सुशीला
सुरभिः सुखदायिका इत्याद्याः ॥ * ॥
गोपबाला यथा —
चन्द्रावली चन्द्रिका काञ्चनमाला रुक्ममाला-
वती चन्द्रानना चन्द्ररेखा चान्द्रवापी चन्द्रमाला-
चन्द्रप्रभा चन्द्रकला सौवर्णमाला मणिमालिका
वर्णप्रभा शुद्धकाञ्चनसन्निभा मालती यूथी
वासन्ती नवमल्लिका मल्ली नवमल्ली शेफालिका
सौगन्धिका कस्तूरी पद्मिनी कुमुद्वती रसाला
सुरसा मधुमञ्जरी रम्भा उर्व्वशी सुरेखा स्वर्ण-
रेखिका वसन्ततिलका इत्याद्याः । इति पाद्मे
पातालखण्डम् ॥ अस्या विवरणं कृष्णशब्दे
द्रष्टव्यम् ॥ * ॥ (गोपायति रक्षतीति । गुप् +
अच् + गौरादित्वात् ङीष् ।) शारिवा ।
रक्षिका । इति विश्वः ॥ (रक्षित्री यथा,
रघुः । ४ । २० ।
"इक्षुच्छाया निषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्धातं शालिगोप्यो जगुर्यशः ॥")
प्रकृतिः । यथा, गोपायति सकलमिदं गोपायति
परं पुमांसं गोपीप्रकृतिरिति क्रमदीपिका ॥
गोपीथं, क्ली, (गोपायति रक्षति भवबन्धना-
दिति । यद्वा गाः पशून् पाति रक्षतीति । गुप्
अथवा गो + पा + "निशीथगोपीथावगाथाः ।"
उणां । २ । ९ । इति थक्प्रत्ययेन निपातनात्
साधुः ।) तीर्थस्थानम् । इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः ॥ (गावः पिबन्त्यस्मामिति व्युत-
पत्त्या जलाशयादि । इति चिन्तामणिः ॥)
गोपीथः, पुं, (गुप्यते रक्ष्यते इति । गुप् +
"निशीथगोपीथावगाथाः ।" उणां । २ । ९ ।
इति भावे थक्प्रत्ययेन निपातनात् साधुः ।)
रक्षणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥
(यथा, ऋग्वेदे । १ । १९ । १ ।
"प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे ।
मरुद्भिरग्न आ गहि ॥"
"गोपीथाय पृथिवीन्द्रियादीनां रक्षणाय ॥"
इति दयानन्दभाष्यम् ॥ गां वाणीं पृथिवीं वा
पातीति व्युत्पत्त्या । गो + पा + थक् । निपा-
तनात् ईत्वम् । पक्षिः । राजा । इति कश्चित् ॥)
गोपुच्छः, पुं, (गोः पुच्छ इव आकृतिर्यस्य
गोपुच्छाकारत्वादस्य तथात्वम् ।) हारभेदः ।
इति हेमचन्द्रः । ३ । ३२५ ॥ (वाद्यविशेषः ।
इति तट्टीका ॥) गोलाङ्गूलवानरः । यथा,—
"शार्दूलसदृशाकारैः सिंहैर्भीमबलैर्वृतम् ।
ऋक्षवानरगोपुच्छैर्भीमाकारैश्च निषेवितम् ॥"
इति रामायणे किष्किन्ध्याकाण्डम् ॥
गवां लाङ्गूलञ्च ॥ (यथा, बृहत्संहितायाम् ।
६५ । ३५ ।
"गोपुच्छस्थे वल्मीकगेऽथवा दर्शनं भुजङ्गस्य ॥")
गोपुटा, स्त्री, (गौर्व्वत् तद्वदतिकठिनमिति भावः
पुटं आच्छादनं यस्याः ।) स्थूलैला । इति
राजनिर्घण्टः ॥
गोपुटिकं, क्ली, (गोः शिववृषभस्य पुटिकं आच्छा-
दनयुक्तं गृहम् ।) शिववृषस्य मण्डपः । इति
त्रिकाण्डशेषः ॥
गोपुरं, क्ली, (गोपायति नगरं रक्षतीति । गुप् +
बाहुलकात् उरच् । यद्वा गाः पिपर्त्तीति । पॄ
पालनपूरणयोः + "मूलविभुजादिभ्य उपसंख्या-
नम् ।" इति कः ।) नगरद्वारम् । सहरेर फटक्
इति भाषा ॥ तत्पर्य्यायः । पुरद्वारम् २ । इत्य-
मरः । २ । ३ । १६ ॥ दुर्गपुरद्वारम् । इत्यन्ये ॥
द्वारमात्रम् । इति भरतः ॥ (यथा, महा-
भारते । १ । २०८ । ३१ ।
"द्विपक्षगरुडप्रख्यैर्द्वारैः सौधैश्च शोभितम् ।
गुप्तमभ्रचयप्रख्यैर्गोपुरैर्म्मन्दरोपमैः ॥" * ॥
गौर्जलं पुरमस्य यद्वा गवा जलेन पिपर्त्ति
पूरयति आत्मानमिति । पॄ + क ।) कैवर्त्ती-
मुस्तकम् । इति मेदिनी । रे । १५० ॥ (वैद्यक-
शास्त्रप्रणेता ऋषिभेदः । यथा, सुश्रुते सूत्रस्थाने
१ अध्याये । "अथ खलु भगवन्तममरवरमृषि-
गणपरिवृतं आश्रमस्थं काशिराजं दिवोदासं
धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावत कर-
वीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः ॥")
गोपुरकः, पुं, (गां भूमिं पिपर्त्तीति । पॄ पूर्त्तौ +
"मूलविभुजादिभ्य उपसंख्यानम् ।" इति कः ॥
ततः संज्ञायां कन् ।) कुन्दुरुकः । इति राज-
निर्घण्टः ॥
गोपुरीषं, क्ली, (गोः पुरीषम् विष्ठा ।) गोमयम् ।
इति राजनिर्घण्टः ॥
गोपेन्द्रः, पुं, (गोपेषु गोकुलस्थगोपालेषु मध्ये इन्द्रः
श्रेष्ठः । गोप इन्द्र इव वा । यद्वा गा वाचं
पाति रक्षतीति गोपो वेदस्तत्र इन्दति सर्व्वै-
श्वर्य्यवत्तया विराजते । इदि परमैश्वर्य्ये -
"ऋज्रेन्द्रेति ।" उणां । २ । २८ । इति रन्प्रत्य-
येन निपातनात् साधुः ।) विष्णुः । इति हेम-
चन्द्रः । २ । १३२ ॥ (श्रीकृष्णः । इति भागवतम् ।
गोपानामिन्द्र ईश्वरः । गोपपतिः । स तु नन्दः ।
यथा, महाभारते । ९ । २२ । २३ ।
"गोपेन्द्रस्यात्मजे ज्येष्ठे नन्दगोपकुलोद्वहे ॥")
गोपेशः, पुं, (गाः पृथिवीं पान्ति रक्षन्तीति गोपा
राजानस्तेषामीशः । सर्व्वहिंसानिवारणादिति
भावः । प्राप्तराज्योऽप्ययं विषयभोगं तुच्छीकृत्य
सन्न्यासेन निर्व्वाणमलभतातोऽस्य राजसु श्रेष्ठ-
त्वमायातमिति तात्पर्य्यार्थः ।) शाक्यमुनिः ।
इति त्रिकाण्डशेषः ॥ (गोपानां गोकुलस्थ-

गोपालानामीशः।) नन्दघोषः। यथा —
"रामकृष्णावुभयतो गोपेशं परितः परे॥"
इति मुग्धबोधम्॥
श्रीकृष्णश्च॥

गोप्ता, [ऋ] त्रि (गोपायति रक्षतीति। गुप् + रक्षणे + "ण्वुल्तृचौ।" ३।१।१३३। इति तृच।) रक्षकः। यथा,—
"विप्राणामभयार्थमध्वरविधेर्गोप्ता गुरो-राज्ञया।"
इति राघवपाण्डवीये कविराजः॥
(तथा च मनुः। ११। ७९।
"ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजन्।
मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च॥"
गोपायति सर्व्वाणि यद्वा आत्मानं गोपायति स्वमायया संवृणोतीति व्युत्पत्त्या विष्णौ पुं। यथा, महाभारते। १३। १४९। ७६।
"गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥"
स्त्री, गङ्गा। यथा, काशीखण्डे। २९। ५१।
"गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी॥")

गोप्यः, पु, (गोप्यते रक्ष्यतेऽसौ इति। गुप् रक्षणे + "ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) दासः। इत्यमरटीकायां भरतः॥ दासीपुत्त्रः। रक्षणीये त्रि। इति मेदिनी। ये। २०॥ (यथा, महाभारते। १२। ४१। १५।
"सहदेवं समीपस्थं नित्यमेव समादिशत्।
तेन गोप्यो हि नृपतिः सर्व्वावस्थो विशाम्पते।॥"
गोप्यतेऽसाविति। गुप् + गोपने + कर्म्मणि ण्यत्।) गोपनीयः। यथा —
"आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्।
अपमानन्तपो दानं नव गोप्यानि यत्नतः॥"
इति पुराणम्॥
गोपीसमूहश्च॥ (तत्र गोपीशब्दात् प्रथमाविभक्तौ बहुवचनप्रयोगः॥)

गोप्यकः, पु, (गोप्य एव। स्वार्थे कन्।) दासः। इत्यमरः। २। १०। १७॥

गोप्याधिः, पुं, (गोप्यो रक्षणीय आधिर्बन्धकः।) बन्धकविशेषः। (यथा, याज्ञवल्क्ये। २। ६०।
"गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते॥")
"तथा च नारदः।
आधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च।
गोप्यो रक्षणीयः।" इति मिताक्षरा॥

गोप्रकाण्डं, क्ली, (प्रशस्ता गौर्गोजातिः। "प्रशंसावचनैश्च।" २।१।६६। इति परनिपातः। प्रकाण्डशब्दस्य नियतलिङ्गतया क्लीवत्वम्।) श्रेष्ठगौः। इति सिद्धान्तकौमुदी॥

गोभक्षीरः, पु, (गवि जले भक्षीरः अतिवाचालः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥

गोम, त् क लेपने। इति कविकल्पद्रुमः॥ (अदन्त-चुरा-परं-सकं-सेट्।) अजुगोमद्गोमयेन स्थानं चेटी। इति दुर्गादासः॥

गोमक्षिका, स्त्री (गोसन्निकटस्था गोप्रिया वा मक्षिका।) दंशः। इति शब्दरत्नावली॥ डांश इति भाषा॥

गोमतल्लिका, स्त्री, (प्रशस्ता गौर्गोजातिः। "प्रशंसावचनैश्च।" २।१।६६। इति नित्यसमासेन परनिपातः।) सुशीला गौः। इति हलायुधः॥

गोमती, स्त्री, (बहवो गावो जलानि सन्त्यस्यामिति। भूम्नि "तदस्यास्तीति।" ५।२।९४। मतुप्। "उगितश्च।" ४।१।६। इति ङीप्।) स्वनामख्याता नदी। तत्पर्य्यायः। वाशिष्ठी २। इति हेमचन्द्रः॥ (यथा, महाभारते। ६।९।१७।
"गोमतीं धूतपापाञ्च चन्दनाञ्च महानदीम्॥"
अस्यास्तीरे महादेवस्त्र्यम्बकमूर्त्त्या विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे।
"त्र्यम्बको गोमतीतीरे गोकर्णे च त्रिलोचनः॥"
गङ्गा। यथा, काशीखण्डे। २९। ५१।
"गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी॥"
पीठस्थानस्था भगवती। सा तु गोमन्तपर्व्वते वर्त्तते। यथा, देवीभागवते। ७। ३०। ५७।
"गोमन्ते गोमती देवी मन्दरे कामचारिणी॥"
वैदिकमन्त्रभेदः। यथा —
"पञ्चगव्येन गोघाती मासेकेन विशुध्यति।
गोमतीञ्च जपेद् विद्यां गवां गोष्ठे च संवसेत्॥"
इति प्रायश्चित्ततत्त्वे शातातपः॥
(गोविशिष्टायाम्॥)

गोमन्तः, पु, पर्व्वतविशेषः। इति जटाधरः॥ (अयं हि सह्यपर्व्वतविवरस्थितो गिरिः यदुक्तं हरिवंशे। ९५। ६३।
"ततस्तु ता गमिष्याम सह्यस्य विवरे गिरिम्।
गोमन्त इति विख्यातं नैकशृङ्गविभूषितम्॥"
अत्र पर्व्वते भगवती गोमतीरूपेण विराजते। यदुक्तं देवीभागवते। ७। ३०। ५७।
"गोमन्ते गोमती देवी मन्दरे कामचारिणी॥"
अयं हि द्वितीयमेरुरिव महान् पर्व्वतः। अस्य वर्णनं यथा, हरिवंशे। ९६। ४—२७।
"ते चाध्वविधिना सर्व्वे ततो वै दिवसक्रमात्।
गोमन्तमचलं प्राप्ता मन्दरं त्रिदशा इव॥
लताचारुविचित्रञ्च नानाद्रुमविभूषितम्।
गन्धागुरुपिनद्धाङ्गं चित्रं चित्रैर्मनोरमैः॥
हरिकेशगणसङ्कीर्णं शिलासङ्कटपादपम्।
मत्तबर्हिणनिर्घोषैर्निनादितं मेघनादिभिः॥
गगनालम्बिशिखरं जलदासक्तपादपम्।
मत्तद्विपविषाणाग्रपरिघृष्टोपलाङ्कितम्॥
कूजद्भिः खण्डजगणैः समन्तात् प्रतिनादितम्।
दरीप्रपाताम्बुवेगैश्च शाड्वलप्रभवैः॥
नीलाभ्रचयसङ्घातैर्बहुवर्णं यथा घनम्।
धातुविस्रावदिग्धाङ्गं सानुप्रसवभूषितम्॥
वीणां सुरगणैः कान्तैर्मैनाकमिव कामगम्।
उच्छ्रितं सुविशालाग्रं सम्मूलाम्बुपरिस्रवम्॥
सकाननदरीप्रस्थं श्वेताभ्रगणभूषितम्।
पनसाम्रातकाम्रैश्च वेत्रस्यन्दनचन्दनैः॥
तमालैलावनयुतं मरिचक्षुपसङ्कुलम्।
पिप्पलीवल्लिकलिलं चित्रमिङ्गुदपादपैः॥
द्रुमैः सर्ज्जरसानाञ्च सर्व्वतः प्रतिशोभितम्।
प्रांशुशालवनैर्गुप्तं वल्गुचित्रवनैर्युतम्॥
सर्ज्जनिम्बार्ज्जुनवनं पाटलीकुलसङ्कुलम्।
हिन्तालैश्च तमालैश्च पुन्नागैश्चोपशोभितम्॥
जलेषु जलजैश्छन्नं स्थलेषु स्थलजैरपि।
पङ्कजैश्च मयूखैश्च सर्व्वतः प्रतिभूषितम्॥
जम्बूजम्बूलखण्डाढ्यं कन्दकन्दलभूषितम्।
चम्पकाशोकबकुलं बिल्वतिन्दुकशोभितम्॥
कूटशैलागपुष्पैश्च समन्तादुपशोभितम्।
नागयूथसमाकीर्णं मृगसङ्घातशोभितम्॥
सिंहपारावताक्षोभि, सेवितप्रस्तरान्तरम्।
विद्याधरगणैर्नित्यमुपकीर्णशिलातलम्।
सिंहशार्दूलसन्नादैः सततं प्रतिनादितम्।
सेवितं वारिधाराभिश्चन्द्रपादैश्च शोभितम्॥
स्तुतं त्रिदशगन्धर्व्वैरप्सरोभिरलङ्कृतम्।
वनस्पतीनां दिव्यानां पुष्पैरुच्चावचैश्चितम्॥
शस्त्रवज्रप्रहाराणामनभिज्ञं कदाचन।
दावाग्निभयनिर्मुक्तं महावातभयोज्झितम्॥
प्रपातप्रभवाभिश्च सरिद्भिरुपशोभितम्।
चलशैवलहस्ताभिरुन्मिषन्तमिव श्रिया॥
स्थलीभिर्मृगजुष्टाभिः कान्ताभिरुपशोभितम्।
पार्श्वैरुपलकल्माषैर्मेघैरिव विभूषितम्॥
पादपोच्छ्रितसौम्याभिः सपुष्पाभिः समन्ततः।
मण्डितं वनराजीभिः प्रमदाभिः पतिं यथा॥
सुन्दरीभिर्द्दरीभिश्च कन्दरीभिस्तथैव च।
तेषु तेष्ववकाशेषु सदारमिव शोभितम्॥
व्योमश्रीदीप्तशिखरं वानरप्रवरनिषेवितम्।
जातरूपैश्च नोद्देशे कृत्रिमैरिव भूषितम्॥
मूलेन सुविशालेन शिरसाप्युच्छ्रितेन च।
पृथिवीमन्तरीक्षञ्च गाहयन्तमिव स्थितम्॥"
श्रीकृष्णो बलरामेण सह जरासन्धभयात् अत्र पर्व्वते पलायमानः स्थितः। ततो मदमत्तैर्बहुसङ्ख्यकराजभिरतिगर्व्वितो जरासन्धः कृष्णेन सार्द्धं युयुत्सुरत्रागत्येमं गोमन्तपर्व्वतं ददाह। प्रवृत्तः एतत्कथा हरिवंशे ९८ अध्याये विस्तरशो द्रष्टव्या॥*॥) गवां स्वामिसमूहश्च॥ (तत्र गोमच्छब्दे प्रथमाविभक्तेर्बहुवचनप्रयोगः॥)

गोमयः, क्ली पु, (गोः पुरीषम्। "गोश्च पुरीषे।" ४।३।१४५। इति मयट्।) गवां गूथम्। गोबर इति भाषा॥ तत्पर्य्यायः। गोविट् २ इत्यमरः। २।९।५०॥ छगलम् ३ गोहन्नम् ४ गोशकृत् ५। इति रत्नमाला॥ गोपुरीषम् ६ गोविष्ठा ७ गोमलम् ८। इति राजनिर्घण्टः॥
तस्य माहात्म्यं यथा,—
"शतं वर्षसहस्राणां तपस्तप्तं सुदुष्करम्।
गोभिः पूर्व्वविसृष्टाभिर्गच्छेम श्रेष्ठतामिति॥
अस्मत्पुरीषस्नानेन जनः पूयेत सर्व्वदा।
शकृता च पवित्रार्थं कुर्व्वीरन् देवमानुषाः॥
ताभ्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः।
एवं भवत्विति विभुर्लोकांस्तारयतेति च॥"*॥

तत्र लक्ष्म्या वासो यथा, लक्ष्मीं प्रति गवा वाक्यम् ।
"अवश्यं मानना कार्य्या तवास्माभिर्यशस्विनि ।।
शकृन्मूत्रे निवस त्वं पुण्यमेतद्धि नः शुभे ।॥"
श्रीरुवाच ।
"दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः ।
एवं भवतु भद्रं वः पूजितास्मि सुखप्रदाः ॥"
इति महाभारते दानधर्म्मः ॥
(कृच्छ्रसान्तपने अस्य भक्षणविधिर्यथा, मनुः । ११ । २१२ ।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥"
"अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः ।
रोगार्त्तायाः प्रसूताया न गोर्गोमयमाहरेत् ॥"
इति चिन्तामणिधृतस्मृतिवचनम् ॥
गां सर्व्वतीर्थमयीं परिकल्प्य एतस्या गोमयं यमुनानदीतया परिकल्पयन्ति वृद्धाः । यदुक्तम्,—
"गोमयं यमुना साक्षात् गोमूत्रं नर्म्मदा शुभा ।
गङ्गा क्षीरन्तु यासां वै किं पवित्रमतः परम् ॥" * ॥)
गवात्मके क्ली ॥

गोमयच्छत्र, क्ली, (गोमयात् जातं छत्रं छत्राकारं शिलीन्ध्रमित्यर्थः ।) करकम् । इति त्रिकाण्डशेषः ॥ कोँडकछाता इति भाषा ॥

गोमयच्छत्रिका, स्त्री, (गोमये गोमयप्रचुरे स्थाने जाता छत्रिका शिलीन्ध्रमित्यर्थः ।) गोमयच्छत्रम् । तत्पर्य्यायः । दिलीरम् २ शिलीन्ध्रकम् ३ । इति हारावली ॥ उच्छिलीन्ध्रम् ४ । यथा, "उच्छिलीन्ध्रमिवार्भकाः ॥" इति श्रीभागवतम् ॥

गोमयप्रियं, क्ली, (गोमयं प्रियं उत्पत्तिकारणत्वेन यस्य ।) भूतृणम् । इति रत्नमाला ॥ गन्धखड इति भाषा ॥

गोमयोत्था, स्त्री, (गोमयादुत्तिष्ठतीति । उत् + स्था + "आतोऽनुपसर्गे कः ।" ३ । १ । ३ । इति कः । ततः स्त्रियां टाप् ।) गोमयजातकीटविशेषः । तत्पर्य्यायः । गर्द्दभी २ । इति हेमचन्द्रः । ४ । २७४ ॥

गोमयोद्भवः, पुं, (उद्भवत्यस्मादिति उद्भवः, गोमयं उद्भवः कारणं यस्य । यद्वा गोमयादुद्भव उत्पत्तिर्यस्य ।) आरग्वधः । इति शब्दचन्द्रिका ॥ शोनालु इति भाषा ॥

गोमांसं, क्ली, (गवां मांसम् ।) गवां पिशितम् । तद्भक्षणप्रायश्चित्तं यथा । "सुमन्तुः । गोमांसभक्षणे प्राजापत्यञ्चरेत् । इदमज्ञानतः सकृद्भक्षणविषयम् । यथाह पराशरः ।
अगम्यागमने चैव मद्यगोमांसभक्षणे ।
शुद्ध्यै चान्द्रायणं कुर्य्यान्नदीं गत्वा समुद्रगाम् ॥
चान्द्रायणे ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम् ।
अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम् ॥
इदं ज्ञानतोऽभ्यासे । शङ्खः ।
गामश्वं कुञ्जरोष्ट्रौ च सर्व्वं पञ्चनखं तथा ।

क्रव्यादं कुक्कुटं ग्राम्यं कुर्य्यात् संवत्सरं व्रतम् ॥
एतच्चिरकालाभ्यासे । संवत्सरकृच्छ्रव्रते पञ्चदशधेनवः । पुनरुपनयनञ्च । यथा, विष्णुः । विड्वराहग्रामकुक्कुटनरगोमांसभक्षणे सर्व्वेष्वेव द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यात् ।" इति प्रायश्चित्तविवेकः ॥ (अस्य गुणा यथा,—
"गव्यं केवलवातेषु पीनसे विषमज्वरे ।
शुष्ककासश्रमात्यग्निमांसक्षयहितञ्च यत् ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥
"श्वासकासप्रतिश्यायविषमज्वरनाशनम् ।
श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
अन्यत् गोशब्दे 'गौः' इत्यत्र द्रष्टव्यम् ॥ * ॥
हठयोगमतेनास्य पारिभाषिकोऽर्थो यथा, हठयोगप्रदीपिकायाम् । ३ । ४७—४८ ।
"गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम् ।
कुलीनं तमहं मन्ये इतरे कुलघातकाः ॥
गोशब्देनोच्यते जिह्वा तत्प्रवेशो हि तालुनि ।
गोमांसभक्षणं तत्तु महापातकनाशनम् ॥")

गोमान्, [त्] त्रि, (बहवो गावोऽस्यास्मिन् वा सन्तीति । "तदस्यास्त्यस्मिन्निति ।" ५ । २ । ९४ । मतुप् ।) बहूनां गवां स्वामी । तत्पर्य्यायः । गवीश्वरः २ गोमी ३ । इत्यमरः । २ । ९ । ५८ ॥ (यथा, अथर्व्ववेदे । ६ । ६८ । ३ ।
"येनावपत् सविता क्षुरेण
सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपते दमस्य
गोमानश्ववानयमस्तु प्रजावान् ॥")

गोमायु, पुं, (गां विकृतां वाचं मिनोतीति । डुमिञ् + "कृवापाजि—" इत्युण् ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥ (यथा, महाभारते । २ । ६७ । २३ ।
"ततो राज्ञो धृतराष्ट्रस्य गेहे
गोमायुरुच्चैर्व्याहरदग्निहोत्रे ॥"
अस्य ध्वनौ शुभाशुभफलं शृगालशब्दे द्रष्टव्यम् ॥) गन्धर्व्वविशेषः । इति जटाधरः ॥ गोपित्ते सान्तक्लीवोऽयम् ॥

गोमी, [न्] त्रि, (गौरस्त्यस्य । "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्निति ।" ५ । २ । ११४ । इति मिनिः ।) गोमान् । इत्यमरः । २।९।५८ ॥ (यथा, मनुः । ९ । ५० ।
"यद्यन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥"
गौर्वीजमन्त्रवाक्यं अस्यास्तीति ।) उपासकः । इति मेदिनी । ने । ६० ॥

गोमी, [न्] पुं, (गौः कठोरध्वनिरस्त्यस्येति । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति मिनि ।) शृगालः । इति मेदिनी । ने । ६० ॥ बुद्धभिक्षुशिष्यः । इति त्रिकाण्डशेषः ॥

गोमीनः, पुं, (गौरिव स्थूलो मीनः ।) मत्स्यविशेषः । यथा, मत्स्यसूक्ते ।
"शृणु देवि । प्रवक्ष्यामि मांसभेदान् निबोध मे ।
न दद्यात् तिक्तकमठं पशुशृङ्गिणमेव च ॥
गोमीनं चक्रशकुलं वडालं राघवन्तथा ॥"

गोमुखं, क्ली, (गोर्मुखमिव मुखं प्रवेशद्वारमस्य ।) कुटिलागारम् । (गोर्मुखमिव आकृतिरस्य ।) वाद्यभाण्डम् । (एतदर्थे पुंलिङ्गोऽपि दृश्यते । यथा, गीतायाम् । १ । १३ ।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥"
तथा च महाभारते । ९ । ४६ । ५७ ।
"आडम्बरान् गोमुखांश्च डिण्डिमांश्च महास्वनान् ॥")
लेपनम् । इति मेदिनी । खे । ८ ॥ (यथा, माघे । ३ । ४८ ।
"शुकाङ्गनीलोपलनिर्म्मितानां
लिप्तेषु भासा गृहदेहलीनाम् ।
यस्यामलिन्देषु न चक्रुरेव
मुग्धाङ्गना गोमयगोमुखानि ॥")
चौरक्रियमाणसुरङ्गाभेदः । सिँधविशेष इति भाषा ॥ इति त्रिकाण्डशेषः ॥ (आसनविशेषः । तल्लक्षणं यथा, हठयोगप्रदीपिकायाम् ।१।२० ।
"सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखाकृति ॥"
जपमालागोपनार्थं वस्त्रनिर्म्मितयन्त्रं यथा,—
"चतुर्व्विंशाङ्गुलमितं पट्टवस्त्रादिसम्भवम् ।
निर्म्मायाष्टाङ्गुलिमुखं ग्रीवा तत् षड्दशाङ्गुलम् ॥
ज्ञेयं गोमुखयन्त्रञ्च सर्व्वतन्त्रेषु गोपितम् ।
तन्मुखे स्थापयेन्मालां ग्रीवामध्यगतः करः ॥
प्रजपेद्विधिना गुह्यं वर्णमालाधिकं प्रिये ॥"
इति मुण्डमालातन्त्रम् ॥
अपि च मायातन्त्रे ।
"गोमुखादौ ततो मालां गोपयेन्मातृजारवत् ॥"

गोमुखः, पुं, (गोर्मुखमिव मुखं यस्य ।) नक्रः । यक्षविशेषः । इति हेमचन्द्रः । ४ । ४१५ ॥ (मातलिपुत्रः । यथा, महाभारते ।५।१००।८ ।
"बहुशो मातले । त्वञ्च तव पुत्रश्च गोमुखः ॥"
वत्सराजमन्त्रिपुत्रविशेषः । स पुनः वत्सराजसुतस्य मन्त्रिणामन्यतमः । यथा, कथासरित्सागरे । २३ । ५७ ।
"ततो नित्योदिताख्यस्य प्रतीहाराधिकारिणः ।
इत्यकापरसञ्ज्ञस्य पुत्त्रोऽजायत गोमुखः ॥")

गोमुखी, स्त्री, (गोर्मुखमिव आकृतिरस्याः । स्त्रियां ङीष् ।) हिमालयाद्गङ्गापतने गोमुखाकारगुहा । इति लोकप्रसिद्धिः ॥ राढदेशस्थनदीविशेषः । गोमुड इति ख्याता ॥

गोमूत्रं, क्ली, (गोर्मूत्रम् ।) गोप्रस्रावः । चोना इति भाषा ॥ तत्पर्य्यायः । गोजलम् २ गोऽम्भः ३ गोनिष्यन्दः ४ गोद्रवः ५ । (कृच्छ्रसान्तपने गोमूत्रभक्षणविधिर्यथा, मनुः । ११ । २१२ ।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् ।

लघुत्वम् । कफवातत्वग्दोषनाशित्वम् । पित्तकारित्वम् । दीपनत्वम् । मेध्यत्वम् । मतिप्रदत्वञ्च । इति राजनिर्घण्टः ॥ तीक्ष्णत्वम् । क्षारत्वम् । कषायत्वम् । शूलगुल्मोदरानाहकण्डूक्षिमुखरोगकिलासवातामवस्तिरुक्कुष्ठकासश्वासशोथकामलापाण्डुतिसारमूत्ररोधकृमिश्लीपदश्वित्रवर्ध्मग्रहणीनाशित्वम् । पूरणात् कर्णशूलनाशित्वम् । सर्व्वमूत्रेषु गुणाधिकत्वञ्च । इति भावप्रकाशः ॥

("तीक्ष्णोष्णं क्षारमेव कषायं)
मेध्यं लघ्वाग्नेयमाद्याप्यक्षिभ्रञ्च ।
तस्मान्नव्यं रक्तपित्तप्रमेहि
भूशङ्ककण्ठाद्युरोगघ्नञ्च ॥
कण्डूकिलासगदशूलमुखाक्षिरोगान्
गुल्मातिसार-मरुदामय-मूत्ररोधान् ।
कासं सकुष्ठजठरक्रिमिरोगजालं
गोमूत्रमेकमपि पीतमपाकरोति निहन्ति ॥"

इति प्रथमस्थाने नवमेऽध्याये हारीतेनोक्तम् ॥

"गोमूत्रं कटुतीक्ष्णोष्णं सक्षारत्वान्नवातलम् ।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥
शूलगुल्मोदरानाहविरेकास्थापनादिषु ।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ॥"

इति सुश्रुते सूत्रस्थाने पञ्चचत्वारिंशत्तमेऽध्याये ॥ गां सर्व्वतीर्थमयीं कल्पयित्वा एतस्या मूत्रं नर्म्मदानदीत्वेन परिकल्पयन्ति वृद्धाः । यदुक्तम् ।

"गोमयं यमुना साक्षात् गोमूत्रं नर्म्मदा शुभा ।
गङ्गा क्षीरन्तु यासां वै किं पवित्रमतः परम् ॥")

गोमूत्रिका, स्त्री, (गोमूत्रवत् वक्रसरलाकृतिरस्या अस्तीति । गोमूत्र + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् टाप् च ।) तृणविशेषः । ताम्बड इति भाषा ॥ तत्पर्य्यायः । रक्ततृणा २ चेत्रला ३ क्षमाभूमिजा ४ । अस्या गुणाः । मधुरत्वम् । वृष्यत्वम् । गोदुग्ध दायित्वञ्च । इति राजनिर्घण्टः ॥ (गोमूत्रस्येव उच्चावचा गतिरस्या अस्तीति ठन् ।) चित्रकाव्यविशेषः । यथा,—

"गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव ।
गोमूत्रिकेति तत् प्राहुर्दुष्करं चित्रवेदिनः ॥"

तस्या भेदाः । पादगोमूत्रिका । अर्द्धगोमूत्रिका । श्लोकगोमूत्रिका । विपरीतगोमूत्रिका । इति सरस्वतीकण्ठाभरणम् ॥ (उदाहरणं यथा, किरातार्ज्जुनीये । १५ । १२ ।

"नासुरोऽयं नवानागो धरसंस्थो हि राक्षस ।
नासुखोऽयं नवाभोगो धरणिस्थो हि राजसः ॥"
"वर्णानामेकरूपत्वं यद्येकान्तरमर्द्धयोः ।
गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो विदुः ॥
इति लक्षणात् ।
षोडशकोष्ठद्वये अर्द्धद्वयं क्रमेण विलिख्यैकान्तरविनियमेन वाचने श्लोकनिष्पत्तिरित्युद्धारः ॥"

इति तट्टीकायां मल्लिनाथः ॥)

गोमेदः, पु, (गौः कमलमिव मेदयति स्नेहयतीति । मिद् + णिच् + अच् ।) गोमेदकमणिः । इति राजनिर्घण्टः ॥ (स तु नवरत्नान्तर्गतरत्न-विशेषः । यथा,—

"रत्नं गारुत्मतं पुष्पं रागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ अस्य परीक्षागुणादिकञ्च गोमेदकशब्दे द्रष्टव्यम् ॥ कक्कोलं । इति हारावली । २६१ ॥ द्वीपविशेषः । तन्नामनिरुक्तिर्यथा,—

"गोमेदे गोपतिर्नाम राजाभूद्गोत्रबोधतः ।
याज्योऽभूद्वह्निकल्पानामौतथ्यानां मनोः कुले ॥
स तेषु हरियज्ञाय प्रवृत्तेषु भृगून् गुरून् ।
वव्रे सं गौतमः कोपादशपत् सोऽगमत् क्षयम् ॥
यज्ञवाटेऽस्य ता गावो दग्धाः कोपाग्निना मुने ।
तन्मेदसा मही छन्ना गोमेदः स ततोऽभवत् ॥"

इति चिन्तामणिधृतवचनानि ॥ प्लक्षद्वीपस्थवर्षाचलभेदः । यथा, विष्णुपुराणे । २ । ४ । ६—७ ।

"मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्व्वताः ।
सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम ॥
गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा ।
सोमकः सुमनाश्चैव वैभ्राजश्चैव सप्तमः ॥")

गोमेदकं, क्ली, (गोमेद + स्वार्थे कन् ।) पीतमणिः । काकोलम् । पत्रकम् । इति मेदिनी । के । १८६ ॥

गोमेदकः, पु, (गोमेद + स्वार्थे कन् ।) स्वनामख्यातमणिः । तत्पर्य्यायः । गोमेदः २ राहुरत्नम् ३ तमोमणिः ४ स्वर्भानवः ५ पिङ्गस्फटिकः ६ । अस्य गुणाः । अम्लत्वम् । उष्णत्वम् । वातकोपविकारनाशित्वम् । दीपनत्वम् । पाचनत्वम् । धारणे पापनाशित्वञ्च । इति राजनिर्घण्टः ॥ तस्य परीक्षा यथा,—

"हिमालये वा सिन्धौ वा गोमेदमणिसम्भवः ।
स्वच्छकान्तिर्गुरुः स्निग्धो वर्णाढ्यो दीप्तिमानपि ॥
वलक्षः पिञ्जरो धन्यो गोमेदः इति कीर्त्तितः ।
चतुर्णां जातिभेदस्तु गोमेदेऽपि प्रकाश्यते ॥
ब्राह्मणः शुक्लवर्णः स्यात् क्षत्रियो रक्त उच्यते ।
आपीतो वैश्यजातिस्तु शूद्रास्तु नील उच्यते ॥
छाया चतुर्विधा श्वेता रक्ता पीतासिता तथा ॥
गुरुप्रभाढ्यं सितवर्णरूपः
स्निग्धो मृदुत्वातिमहापुराणः ।
स्वच्छस्तु गोमेदमणिर्धृतोऽयं
करोति लक्ष्मीं धनधान्यवृद्धिम् ॥
लघुर्विरूपोऽतिखरोऽन्यमानः
छेदोपलिप्तो मलिनः खरोऽपि ।
करोति गोमेदमणिर्विनाशं
सम्पत्तिभोगाबलवीर्य्यराशेः ॥
ये दोषा हीरके प्रोक्तास्ते गोमेदमणावपि ।
परीक्षा वह्निना कार्य्या शाने वा रत्नकोविदैः ॥
स्फटिकेनैव कुर्व्वन्ति गोमेदप्रतिरूपकम् ॥
शुद्धस्य गोमेदमणेस्तु मूल्यं
सुवर्णतो द्विगुणमाहुरेके ।
अन्ये तथा विद्रुमतुल्यमूल्यं
तथापरे चामरतुल्यमाहुः ॥
चतुर्व्विधानामेषान्तु धारणं परिसम्मतम् ॥"

इति भोजराजकृतयुक्तिकल्पतरुः ॥ (कतक-गोमेदक-विषग्रन्थि-शैवालमूल-वस्त्राणि मुक्तामणिश्चेति ।" इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

गोमेदसन्निभ, पु, (गोमेदस्य सन्निभस्तुल्यः ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥

गोमेधः, पुं, (मेधृ हिंसायम् + भावे घञ् । गवां मेधो हिंसा यत्र ।) यज्ञविशेषः । तत्र स्त्रीगोपशुः मन्त्रेषु स्त्रीलिङ्गपाठात् । तस्य लक्षणं सम्प्रशस्तत्वमवध्यफलत्वमस्वप्रदन्त्वकाणत्वच्छिन्नकर्णत्वादिदोषराहित्यम् । तस्य प्रयोगः सर्व्वोऽपि छागपशुवत् । यजमानस्य स्वर्गः फलं गोश्च गोलोकप्राप्तिः । तस्य च कलौ निषेधो यथा,—

"अश्वालम्भो गवालम्भः सन्न्यासः पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्ज्जयेत् ॥"

इत्यापस्तम्बादिकल्पसूत्रपुराणम् ॥

गोरक्षः, पु, (गां रक्षतीति । रक्ष + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) ऋषभनामौषधम् । इति हेमचन्द्रः ॥ नागरङ्गः । गोरक्षके त्रि । इति मेदिनी । षे । ३६ ॥ (यथा, मनुः । ८ । १०२ ।
(गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान् ॥" स्वनामख्यातो योगिविशेषः । अयं हठविद्यया प्राप्तैश्वर्य्यः सिद्धपुरुषः । यथा हठयोगप्रदीपिकायाम् । १ । ५ ।

"श्री-आदिनाथमत्स्येन्द्रशावरानन्दभैरवाः ।
चौरङ्गीमीनगोरक्षविरूपाक्षबिलेशयाः ॥"

एतदुपदिष्टयोगप्रकरणानि गोरक्षसंहितायां वर्णन्ते । तत्र आसनप्राणसंरोधप्रत्याहारधारणाध्यानसमाधयः षट् योगाङ्गानि उक्तान्येवेति ॥ शिवोपासकानां कर्ण फट् इत्याख्ययोगिनां गुरुर्गोरक्षनाथ एव धर्म्मप्रयोजकः । अमी शैवयोगिनः एनं शिवावतारं गुरुं मन्यमानास्तत्प्रवर्त्तितहठयोगमभ्यस्यन्ति । गोरक्षस्वामी आदिनाथस्य पौत्रो मत्स्येन्द्रनाथस्य पुत्र आसीदिति तद्देशीयैर्गीयते ॥)

गोरक्षकर्कटी, स्त्री, (गोरक्षा गोरक्षाकर्त्री कर्कटी ।) चिर्भिटा । इति भावप्रकाशः ॥

गोरक्षजम्बू, स्त्री, (गोरक्षा जम्बूः ।) गोधूमः । गोरक्षतण्डुला । इति विश्वः ॥ घोण्टाफलम् । इति जटाधरः ॥

गोरक्षतण्डुला स्त्री, (गोरक्षा तण्डुला ।) क्षुद्रलताविशेषः । गोरक्षचाउलिया इति भाषा । तत्पर्य्यायः । गाङ्गेरुकी २ नागबला ३ झषा ४ ह्रस्वगवेधुका ५ खरवल्लरिका ६ विश्वदेवा ७ । इति रत्नमाला ॥

गोरक्षतुम्बी स्त्री, (गा जल रक्षत्यस्मिन्निति अप् । गोरक्षः कुम्भः । तद्वत् कुम्भाकारा तुम्बी । गोरक्षेति नामिका तुम्बी वा ।) कुम्भतुम्बी । इति राजनिर्घण्टः ॥

गोरक्षदुग्धा, स्त्री, (गोरक्ष गोपालकं दुग्धं रसो यस्याः ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः ।

गोरक्षी २ ताम्रदुग्धा ३ रसायनी ४ बहुपत्री ५ अमृता ६ जीवा ७ अमृतसञ्जीवनी ८ । अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । संग्राहित्वम् । हिमत्वम् । सर्व्ववश्यकारित्वम् । रससिद्धिगुणप्रदत्वञ्च । इति राजनिर्घण्टः ॥

गोरक्षी, स्त्री, (गां रक्षति पालयति इति । "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ततो ङीप् ।) क्षुद्रक्षुपविशेषः । सा तु मालवे प्रसिद्धा । तत्पर्य्यायः । सर्पदण्डी २ दीर्घदण्डी ३ सुदण्डिका ४ चित्रला ५ गन्धबहुला ६ गोपाली ७ पञ्चपर्णिका ८ । अस्या गुणाः । मधुरत्वम् । तिक्तत्वम् । शिशिरत्वम् । दाहपित्तविस्फोटवान्त्यतीसारज्वरदोषनाशित्वञ्च । गोरक्षदुग्धा । कुम्भतुम्बी । इति राजनिर्घण्टः ॥

गोरङ्कुः, पुं, (गवा वाचा रङ्कुर्मृगविशेष इव ।) पक्षिभेदः । नग्नकः । वन्दी । इति मेदिनी । के । ८५ ॥ क्वचित् पुस्तके नग्नकस्थाने नयकोऽपि पाठः ॥

गोरटः, पु, (गवि इन्द्रिये रटतीति । रट् + अच् ।) दुर्गखदिरः । इति राजनिर्घण्टः ॥

गोरणं, क्ली, (गुर् + भावे ल्युट् ।) गुरणम् । (गुर्य्यते गम्यते फलमनेनेति । गुर + करणे ल्युट् ।) उद्यमः । इत्यमरटीका ॥

गोरसः, पुं (गवां रसः ।) दुग्धम् । दधि । तक्रम् । इति हेमचन्द्रः । ३ । ७२ ॥ (यथा, गोः रामायणे । ३ । २२ । ७ ।
"प्राप्तकामा जनपदाः सम्पन्नयवगोरसाः ।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥"
"विषदा गुरवो रूक्षा ग्राहिणस्तक्रपिण्डकाः ।
गोरसानामयं वर्गो नवमः परिकीर्त्तितः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

गोरसजं, क्ली, (गोरसात् जायते इति । गोरस + जन् + "अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) तक्रम् । इति राजनिर्घण्टः ॥

गोराटी, स्त्री, (गां मनुष्यवद्वाचं रटतीति । रट् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ततो ङीप् ।) शारिकापक्षी । इति हेमचन्द्रः । ४ । ४०२ ॥

गोराटिका, स्त्री, (गोराटी + स्वार्थे कन् । टाप् पूर्व्वह्रस्वश्च । ततो निपातनात् साधुः । गोराटिका इत्यपि दृश्यते ।) शारिकापक्षी । इति राजनिर्घण्टः ॥

गोरिका, स्त्री, (गोराटिका + पृषोदरात् साधुः ।) शारिकापक्षी । इति राजनिर्घण्टः ॥

गोरुतं, क्ली, (गो रुतं रवः श्रूयते यावता पथेति शेषः । गोशब्दः श्रुतिगोचरत्वेन अत्यस्य इत्यच् इत्येके वस्तुतस्तु पारिभाषिकोऽयं शब्दः ।) क्रोशद्वयम् । इति हेमचन्द्रः । ३ । ५५१ ॥ (गवां रुतं रवः इति तत्पुरुषसमासे तु गवां शब्दमात्रे । तत्तु कालादिभेदेन स्वामिनरपतिप्रभृतीनां शुभाशुभकरं स्यात् । यथा, वृहत्संहितायाम् । ९२ । १—३ ।
"गावो दीनाः पार्थिवस्याशिवाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान् ।
मृत्युं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्करानारुवन्त्यः ॥
अकारणे क्रोशति चेदनर्थो
भयाय रात्रौ वृषभः शिवाय ।
भृशं निरुद्धा यदि मक्षिकाभि-
स्तदाशु वृष्टिं सरमात्मजैर्वा ॥
आगच्छन्त्यो वेश्म बम्भारवेण
संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः ।
आर्द्राङ्ग्यो वा हृष्टरोमाः प्रहृष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम् ॥")

गोरोचं, क्ली, (गोभिः तेजोभिः रुच्यते दीप्यते इति । रुच् + अप् । गा इन्द्रियाणि इन्द्रियोपलक्षितानि शरीरादीनि रोचयति दीपयति औषधादियोगेनेत्यर्थः । रुच् + णिच् + अच् ।) हरितालम् । इति राजनिर्घण्टः ॥

गोरोचना, स्त्री, (गोर्जाता रोचना हरिद्रा इव ।) स्वनामख्यातपीतवर्णद्रव्यम् । तत्तु गोमस्तकस्थशुष्कपित्तम् । यथा, माधवकरे ।
"विशोषयेद्वस्तिगतं सशुक्रं
मूत्रं सपित्तं पवनः कफं वा ।
यदा तदाश्मर्य्युपजायते च
क्रमेण पित्तेष्विव रोचना गोः ॥"
तत्पर्य्यायः । रुचिः २ शोभा ३ रुचिरा ४ शोभना ५ शुभा ६ गौरी ७ रोचनी ८ पिङ्गा ९ मङ्गल्या १० मङ्गला ११ शिवा १२ पीता १३ गौतमी १४ गवा १५ वन्दनीया १६ काञ्चनी १७ मेध्या १८ मनोरमा १९ श्यामा २० रामा २१ । इति राजनिर्घण्टः ॥ वन्द्या २२ रोचना २३ । अस्या गुणाः । हिमत्वम् । तिक्तत्वम् । वश्यमङ्गलकान्तिकारित्वम् । विषालक्ष्मीग्रहोन्मादगर्भस्रावक्षतास्रनाशित्वञ्च । इति भावप्रकाशः ॥ रुच्यत्वम् । पवित्रताऽलङ्कारहितकारित्वम् । कृमिकुष्ठनाशित्वम् । भूतोपशमनत्वम् । जनमोहनत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, कुमारे । ७ । १५ ।
"विन्यस्तशुक्लागुरुचक्रुरङ्गं
गोरोचनापत्त्रविभक्तमस्याः ।"
"क्रमेण पित्तेष्विव रोचना गोः ।"
इति माधवकृतरुग्विनिश्चयस्याश्मर्य्यधिकारे ॥)

गोर्द्दं, क्ली, (गुर् + "अब्दादयश्च ।" उणां ।४।९८। इति ददन्प्रत्ययेन निपातनात् साधुः ।) मस्तिष्कम् । मस्तकस्नेहः । इत्यमरः । २।६।६५॥ (मस्तिष्कशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

गोलं, क्ली, (गुड + भावे घञ् डस्य लत्वं च ।) मण्डलम् । इति मेदिनी । ले । २५ ॥ (यथा, भागवते । ३ । २३ । ४३ । [स्वया ॥")
"प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसं-

गोलः, पु, (गुड + भावे घञ् अविवेके । डस्य लत्वम् ।) सर्व्ववर्त्तुलः । इति हेमचन्द्रः ॥ मदनवृक्षः । इति रत्नमाला ॥ जारात् विधवायाः सुतः । इति धरणी ॥ (यथा, याज्ञवल्क्ये । १ । २२२ ।
"अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः ॥")
बोलः । इति जटाधरः ॥ भूगोलः खगोलश्च । (यथा, भागवते । ५ । २० । ४३ ।
"सूर्य्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्च
विंशतिः ॥")
यथा, शिद्धान्तशिरोमणौ । [त्वम् ॥"
"गोलं श्रोतुं यदि तव मतिर्भास्करीयं शृणु
एकराशौ षड्ग्रहयोगः । यथा, प्रश्नकौमुद्याम् ।
"षड्ग्रहाणामेकस्मिन् यदि भवति मध्ये निवसति-
स्तदा गोलो योगः प्रलयपदमिन्द्रोऽपि लभते ।
भवेल्लोको रुग्णः परिहरति पुत्रञ्च जननी कृपाणा
नाशः स्यात् ज्वलति वसुधा शुष्यति नदी ॥"
एकराशौ सप्तग्रहयोगश्च । यथा, मयूरचित्रके ।
"सप्तग्रहा यद्येकस्था गोलयोगस्तदा भवेत् ।
दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले नृपक्षयः ॥"
अपि च । [संख्याख्याः ।
"एकादिवृद्ध्योपेतैरुक्तान् योगान् विहाय
गोलयुक्शूलकेदारपाशदामाख्यवीमाः स्युः ॥
दुःखितदरिद्रघातुककृषिकरदुःशीलपशुप-
निपुणानाम् ॥
जन्मक्रमेण दुःखिनः परभाग्यैः सर्व्व एवैते ॥"
इति दीपिका ॥

गोलकं, क्ली, (गुड़ + घञ् । स्वार्थे कन् च । ण्वुल् इत्येके ।) गोलोकम् । यथा, तन्त्रे ।
"यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके ॥"

गोलकः, पुं, (गुड + घञ् । ततः स्वार्थे कन् । डस्य लत्वं च । ण्वुल् इत्येके ।) मृते भर्त्तरि जारजः । इत्यमरः ॥ रांड़ेर छेले इति भाषा ॥ (यथा, मनुः । ३ । १५६ ।
"शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥")
अलिञ्जरः । गुडः । पिण्डः । इति हेमचन्द्रः ॥ गन्धरसः । इति रत्नमाला ॥ कलायः । इति शब्दचन्द्रिका ॥ मटर इति ख्यातः ॥

गोला, स्त्री, (गां पृथ्वीं सर्व्वं जगदित्यर्थः स्वशक्तिव्यापकतया लाति प्रलयकाले स्वस्मिन् लाति गृह्णाति इति वा ।) दुर्गा । (गा बहुयोजनपर्यं जलरूपशरीरव्यापकतया लाति ।) गोदावरी । (गा वाचं लाति । ला + क्विप् ।) सखी । कुनटी । पत्राञ्जनम् । मण्डलम् । अलिञ्जरः । बालक्रीडनकाष्ठम् । इति मेदिनी । ले । २५ ॥

गोलाङ्गूलः, पुं, (गोर्लाङ्गूलवल्लाङ्गूलमस्य ।) वानरः । (यथा, रामायणे । ६ । १०५ । ८ ।
"निरुग्णो निर्व्रणांश्चैव सम्पन्नबलपौरुषान् ।
गोलाङ्गूलांस्तथैवर्क्षान् द्रष्टुमिच्छामि मानद ॥"
तत्पर्य्यायः । कपित्थास्यः २ दधिशोणः ३ नगाटनः ४ । इति त्रिकाण्डशेषः ॥ कृष्णवानरः । इति राजनिर्घण्टः ॥

गोलासः, पु, (गां पृथ्वीं भूमिमित्यर्थः लासयति उल्लासयति विभूषयति इति यावत् ।) गोमयच्छत्रिका । शिलीन्ध्रम् । इति हारावली । २५ ॥

गोलिहः, पुं, (गाः लेढीव इति । लिह + कः । गोभिर्लिह्यते इति घञर्थे क इति केचित् ।) घण्टापाटलिः । इति जटाधरः ॥

गोलीढः, पुं, (गोभिर्लिह्यते स्म इति क्तः ।) घण्टापाटलिः । इत्यमरः । २ । ४ । ३६ ॥

गोलोकं, क्ली, (गौर्ज्योतीरूपं ज्योतिर्मयं पुरुष इत्यर्थस्तस्य लोकं स्थानम् । अभिधानात् क्लीवत्वम् । यद्वा गोभिः किरणैः शास्त्रज्ञानतेजोभिरित्यर्थः लोक्यते इति । लुक + घञ् ।) श्रीकृष्णस्य स्थानम् । यथा, तन्त्रे ।

"वैकुण्ठस्य दक्षभागे गोलोकं सर्व्वमोहनम् ।
तत्रैव राधिका देवी द्विभुजो मुरलीधरः ॥
यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके ।
ज्ञाने वा चक्षुषो, किं वा ध्यानयोगे न विद्यते ॥
शुद्धतत्त्वमयं देवि । नानादेवेन शोभितम् ।
मध्यदेशे गोलोकाख्यं श्रीविष्णोर्लोभमन्दिरम् ॥
श्रीविष्णोः सत्त्वरूपस्य यत् स्थलं चित्तमोहनम् ।
तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना ॥
तत्रैव सततं भाति द्विभुजो मुरलीधरः ।
तदा सत्त्वमयो विष्णुर्भुवनं पाति निश्चितम् ॥
वैष्णवस्य महामोक्षो यत्रैव परमेश्वरि ॥
इति स्थानस्य माहात्म्यं सङ्क्षेपेण मयोदितम् ॥
विस्तारेण न शक्नोमि जन्मान्तरशतेन च ।
बीजकोषस्य बाह्ये तु वेष्टितं तोयमण्डलम् ॥
प्रमाणं सुन्दरं तोयं यथा क्षीरोदसागरम् ।
अस्य ज्योतिषाकारं कोटिचन्द्रसमप्रभम् ॥
वलयाकाररूपेण सुशुभ्रं तोयमण्डलम् ।
गङ्गादिसरितः सर्व्वास्तत्रैव भान्ति सुन्दरि ॥
इन्द्रादिदेवताः सर्व्वाः स्तूयमाना निरन्तरम् ।
गन्धर्व्वयक्षनागादिकुष्माण्डा भैरवास्तथा ॥
नानासुखविलासेन सदा चैकाग्रचेतसः ।
विष्णुगानं प्रकुर्व्वन्ति स्तुतिभक्तिपरायणाः ॥
देवा गानं प्रकुर्व्वन्ति चतुर्व्वक्त्रेण वेधसा ।
मालवाद्याश्च षड्रागाः षट्त्रिंशद्रागिणी तथा ॥
वेदगानेन भासन्तो मूर्त्तिमन्तः सदैव हि ।
मालवेनैव रागेण सामगानं सदा प्रिये ॥
मल्लारेण सदाथर्व्वं वसन्तेन तथा पुनः ।
हिन्दोलेन यजुःपाठं सदा कुर्व्वन्ति चेतसा ॥
कर्णाटेनैव ऋग्वेदं श्रीरागेण तथा प्रिये ।
निर्द्दिष्टपाठमेतत्तु ह्यनिर्द्दिष्टमतः परम् ॥
तत्रैव सन्ति ते रागाः सहस्राणि च षोडश ।
मुरारेर्मुरलीगानात् सर्व्वकालं प्रजायते ॥
तेन तालेन रागेण सदा गायन्ति वेधसः ।
तद्रागस्य विभागं हि कुर्व्वन्ति मुनयो जनाः ॥
वसन्ताद्याश्च ऋतवस्तिष्ठन्ति तत्र सन्ततम् ।
नानाकुसुमजातेन भूषितं मुरलीधरम् ॥
तत्रैव राधिका देवी नानासुखविलासिनी ।
वदन्ती मुरलीगानं कुरु कान्त ! प्रमोहनम् ॥
येन शब्देन कामस्य उत्पत्तिर्जायते सदा ।
तद्रागस्यैव तत्कालं कुरु गानं प्रयत्नतः ॥
एवमानन्दसंयुक्ता महावेशविलासिनी ।
वामभागे सदा भाति राधिका भक्तवत्सला ॥"

(एतस्य धाम्नो नित्यादिकमाहात्म्यं लक्षणादिकञ्च ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २८ अध्याये विस्तरशो विवृतं यथा,—

"नित्यं स्थलञ्च प्रच्छन्नं गोलोकाभिधमेव च ।
लक्षकोटियोजनञ्च चतुरस्रं मनोहरम् ॥
रत्नेन्द्रसारनिर्म्माणैर्गोपीनामावृतं सदा ।
सुदृश्यं वर्त्तुलाकारं यथैव चन्द्रमण्डलम् ॥
रत्नेन्द्रसारनिर्म्माणं निराधारञ्च स्वेच्छया ।
ऊर्द्ध्वञ्च नित्यं वैकुण्ठात् पञ्चाशत्कोटियोजनम् ॥
गोगोपगोपीसंयुक्तं कल्पवृक्षसमन्वितम् ।
कामधेनुभिराकीर्णं रासमण्डलमण्डितम् ॥
वृन्दावनवनाच्छन्नं विरजावेष्टितं मुने ।
शतशृङ्गं शतशृङ्गैः सुदीप्तं दीप्तशोभितम् ॥
लक्षकोटिपरिमितैराश्रमैः सुमनोहरैः ।
शतमन्दिरसंयुक्तमाश्रमं सुमनोहरम् ॥
प्राकारपरिखायुक्तं पारिजातवनान्वितम् ।
कौस्तुभेन्द्रेण मणिना निर्म्माणकलसोज्ज्वलैः ॥
हीरासारविनिर्म्माणसोपानसुमनोहरैः ।
मणीन्द्रसारनिर्म्माणैः कपाटदर्पणान्वितैः ॥
नानाचित्रविचित्राढ्यैराश्रमञ्च सुसंस्कृतम् ।
षोडशद्वारसंयुक्तं सुदीप्तं रत्नदीपकैः ॥
रत्नसिंहासने रम्ये चामूल्यरत्ननिर्म्मिते ।
नानाचित्रविचित्राढ्ये वसन्तमीश्वरं वरम् ॥")

गोलोकः, पुं, (लोक्यतेऽसौ इति लोकः गोभिस्तेजोभिरुपलक्षितो लोकः । ब्रह्मस्वरूपज्योतिर्म्मयलोक इत्यर्थः ।) श्रीकृष्णस्य नित्यधाम । यथा, ब्रह्मवैवर्त्तपुराणे ॥

"निराधारश्च वैकुण्ठो ब्रह्माण्डानां परो वरः ।
ततः परश्चापि गोलोकः पञ्चाशत्कोटियोजनात् ॥
ऊर्द्ध्वे निराश्रयश्चापि रत्नसारविनिर्म्मितः ।
सप्तद्वारः सप्तसारः परिखासप्तसंयुतः ॥
लक्षप्राकारयुक्तश्च नद्या विरजया युतः ।
वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा ॥
योजनायुतमानश्च यस्यैकं शृङ्गमुज्ज्वलम् ।
शतकोटीयोजनश्च शैल उच्छ्रित एव च ॥
दैर्घ्यं तस्य शतगुणं प्रस्थे च लक्षयोजनम् ।
योजनायुतविस्तीर्णस्तत्रैव रासमण्डलः ॥
अमूल्यरत्ननिर्म्माणो वर्त्तुलश्चन्द्रबिम्बवत् ।
पारिजातवनेनैव पुष्पितेन च वेष्टितः ॥
कल्पवृक्षसहस्रेण पुष्पोद्यानशतेन च ।
नानाविधैः पुष्पवृक्षैः पुष्पितेन च चारुणा ॥
त्रिकोटिरत्नाभरणैर्गोपीलक्षैश्च रक्षितः ।
रत्नप्रदीपयुक्तश्च रत्नतल्पसमन्वितः ॥
नानाभोगसमायुक्तो मधुवापीशतैर्वृतः ।
पीयूषवापीयुक्तश्च कामभोगसमन्वितः ॥
गोलोकगृहसंख्यानं वर्णनं वा विशारद ।
न कोऽपि वेद विद्वान् वा वेद विद्वान् प्रजेश्वर ॥"

गोलोमिका, स्त्री, (गवां लोमेव लोमानः सन्त्यस्याः इति ठन् टाप् च । यद्वा गोलोमी स्वार्थे के पूर्व्वह्रस्वः । इत्येके ।) क्षुद्रक्षुपविशेषः । गोधूमा इति माथरी इति च भाषा । तत्पर्य्यायः । गोधूमी२ गोजा३ क्रोष्टुकपुच्छिका४ गोसम्भवा५ प्रस्तारिणी६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । त्रिदोषशमनत्वम् । हिमत्वम् । शूलरोगास्रदोषनाशित्वम् । ग्राहित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

गोलोमी, स्त्री, (गोर्लोमवत् लोमाकारं पत्रमस्याः ।) श्वेतदूर्व्वा । (व्यवहारो यथा —

"पुराणसर्पिर्लशुनं हिङ्गु-सिद्धार्थकं वचा ।
गोलोमी चाजलोमी च भूतकेशी जटा तथा ॥"

इत्यादिषु इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये ।) वचा । भूतकेशः । इति मेदिनी ॥ (व्यवहारोऽस्य यथा, संज्ञास्थापनगणे ।

"हिङ्गुकैटर्य्यारिमेदा वचा-चोरक-वयस्था गोलोमी-जटिला-पलङ्कषाशोकरोहिण्य इति दशेमानि संज्ञास्थापनानि भवन्ति ॥" इति चरके सूत्रस्थाने चतुर्थेऽध्याये ॥) वेश्या । इति हेमचन्द्रः ॥ गोलोमिका । इति राजनिर्घण्टः ॥

गोवत्सादी, [न्] पुं, (गोवत्सं अत्ति भक्षयति । अद + णिनिः ।) वृकः । इति राजनिर्घण्टः ॥

गोवधः, पुं, (गोर्वधो हननम् ।) गोहत्या । स च उपपातकविशेषः । यथा, मनुः ११ अः ।

"गोवधोऽयाज्यसंयाज्यपारदार्य्यात्मविक्रयाः ॥"

तत्प्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम् ॥

गोवन्दनी, स्त्री, (गवि पृथिव्यां वन्द्यते प्रशस्यते इति कर्म्मणि ल्युट् ततो ङीप् ।) प्रियङ्गुवृक्षः । इत्यमरः ॥ पीतचन्दनोत्पलः । इति रत्नमाला ॥ (प्रियङ्गुपीतदण्डोत्पलयोरस्या विशेषो ज्ञातव्यः ।)

गोवरं, क्ली, (गोभ्यो निःसृतत्वात् वरं श्रेष्ठं माननीयमित्यर्थः । गोषु व्रियते । वृ + बाहुलकात् अः इत्येके ।) गोखरक्षुण्णगोष्ठस्थशुष्कगोमयचूर्णम् । यथा,—

"गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं गोमयचूर्णितम् ।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने ॥"
इति भावप्रकाशः ॥

गोवर्द्धनः, पुं, (गा वर्द्धयति कोमलतृणपत्रादिदानेन इति । वृध + णिच + ल्यु । यद्वा गावो वर्द्धन्तेऽत्र इति । णिच + ल्युट् अधिकरणे । पर्व्वतबोधकत्वात् पुंस्त्वम् । यद्वा गां पृथ्वीं भूमिं वा वर्द्धयति । वृध + णिच् कर्त्तरि ल्युः ।) स्वनामख्यातश्रीवृन्दावनस्थपर्व्वतः । इति जटाधरः ॥ तस्य स्वरूपं यथा,—

"अनादिर्हरिदासोऽयं भूधरो नात्र संशयः ।"

इति पाद्मे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम् ॥ तस्य पूजाकालादिर्यथा,—

"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः ॥
श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः ।
शुक्लप्रतिपदि प्रातः कार्त्तिकेऽर्च्योऽच वैष्णवैः ॥"
"प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत् ।"
इति क्वचित् पाठः ।

तस्मात्तदिदं कर्म्म गोवर्द्धनप्राधान्येन गोप्राधान्येन च ख्यातमप्येकमेव ज्ञेयम् । तत्र दिननिर्णयः । तदाह देवलः ।

"प्रतिपद्दर्शसंयोगे क्रीडनन्तु गवां मतम् ।
परविद्धान्तु यः कुर्य्यात् पुत्त्रदारधनक्षयः ॥"
निर्णयामृतधृतं पुराणान्तरवचनम् ।
"या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ।।
पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपते ॥"
ततः प्रातर्गोवर्द्धनं पूज्येति पूर्व्वाह्णात्पर्य्यकम् ।
द्वितीयासमये तु सर्व्वथा निषिद्धम् । तद्-
यथा,—
"नन्दायां दर्शने रक्षा वलिदानदशासु च ।
भद्रायां गोकुलक्रीडा देशनाशाय जायते ॥"
पुराणसमुच्चये तु सम्भावितचन्द्रोदयद्वितीया-
संयोग एव निषिध्यते ।
"गवा क्रीडादिने यत्र रात्रौ दृश्यते चन्द्रमाः ।
सोमो राजा पशून् हन्ति सुरभी पूजकांस्तथा ॥"
तदुदयसम्भावनञ्च निर्णयामृते निर्णीतम् । प्रति-
पद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां
चन्द्रदर्शनं सम्भाव्यते । तदुक्तमग्न्याधानविषये
वृद्धशातातपेन ।
"द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी ।
अग्न्याध्यानञ्चतुर्द्दश्यां परतः सोमदर्शनादिति ॥"
अपराह्णश्च पञ्चधा विभक्तस्याह्नश्चतुर्थोभाग ।
ततश्च यत्र प्रतिपदि त्रिमुहूर्त्तव्यापिनी द्वितीया
तत्र चन्द्रदर्शनसम्भावनमिति । अन्यदा तूत्त-
रैव प्रतिपत्तत्र गृहीता । तथैव पुराण-
समुच्चये ।
"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका ।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र चोच्यते ॥"
किञ्च । यदा पूर्णप्रतिपत् परत्र निष्क्रामति
तदाप्युत्तरैव कार्य्या । यथोक्तं भविष्योत्तरे ।
"यथा द्वादशभिर्म्मासैर्म्मासो वृद्धो मलिम्लुच' ।
तथैवाहोरात्रिवृद्ध्या तिथिः प्रोक्तो मलिम्लुचः ॥
यथा मलिम्लुच. पूर्व्वो मासो देवस्तथा परः ।
व्याज्या तिथिस्तथा पूर्व्वा ग्राह्या चैव तयो-
त्तरेति निर्णयामृतमतम् ॥ किन्तु । अञ्जलीन्यायेन
पूर्व्वैव मन्तुं शक्यते । तद्वदन्तापि देवलादि-
वचनप्रामाण्यमस्तीति ॥ * ॥
अथ गोवर्द्धनपूजाविधि. । पाद्मे तत्रैव ।
"मथुरायास्तथान्यत्र कृत्वा गोवर्द्धनं गिरिम् ।
गोमयेन महास्थूलं तत्र पूज्यो गिरिर्य्यथा ॥
मथुराया तथा साक्षात् कृत्वा चैव प्रदक्षिणम् ।
वैष्णव धाम सम्प्राप्य मोदते हरिसन्निधौ ॥"
पूजामन्त्र. ।
"गोवर्द्धन । धराधार । गोकुलत्राणकारक. ।
विष्णुबाहुकृतोच्छ्रायो गवां कोटिप्रदो भव ॥"
गोपूजामन्त्र. । स्कान्दे तत्रैव ।
"लक्ष्मीर्या लोकपालाना धेनुरूपेण संस्थिता ।
घृत वहति यज्ञार्थे मम पापं व्यपोहतु ॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम् ॥"
अथ गोक्रीडा । तत्रैव ।
"क्रोधापयेद्धावयेच्च गोमहिष्यादिकं ततः ।
वृषान् कर्षापयेन्नोपैरुक्तिप्रत्युक्तिवादनात् ॥"

पाद्मे च तत्रैव ।
"महिष्यादेस्तथा भूषा क्रीडनं वारणन्तथा ॥"
तन्माहात्म्यञ्च तत्रैव ।
"एव गोवर्द्धनं गावश्च पूजनीया विधानतः ।
गोवर्द्धनमखो रम्यः कृष्णसन्तोषकारकः ॥"
इति श्रीहरिभक्तिविलासे कार्त्तिकृकृत्ये १६
विलासः ॥ (पुरुषोत्तमक्षेत्रे भगवता शङ्करा-
चार्य्येण प्रतिष्ठापितो मठविशेषः । इति शङ्कर-
विजयः ॥ आर्य्यासप्तशतीप्रभृतिग्रन्थकार आ-
चार्य्यविशेष. । अयमेव कविवरः वङ्गाधिपस्य
लक्ष्मणसेनस्य सभापण्डित आसीत् । एतन्मत-
समर्थनोदाहरणानि क्रमान्वयेन वेदितव्यानि
यथा, आर्य्यासप्तशत्याम् । ७०२ ।
"हरिचरणाञ्जलिममलं कविवरहर्षाय बुद्धिमान्
सततम् ।
अकृतार्य्यासप्तशतीमेता गोवर्द्धनाचार्य्यः ॥"
तत्रैव टीकासुखवन्धाभ्यन्तरे । यथा,—
"गोवर्द्धनोक्तिसुखदाननिदानमेतद्-
थद्याथदीपनमनल्पचमत्कृतीनाम् ।"
"गोवर्द्धनाचार्य्यसमयस्तद्यापि सम्यङ् न ज्ञायते
परन्त्वय गीतगोविन्दकर्त्तुर्जयदेवात् प्राचीनस्तत्-
समकालीनो वेति वक्तुं शक्यते । यतो जय-
देवेन गीतगोविन्दप्रारम्भे 'शृङ्गारोत्तरसत्-
प्रमेयरचनैराचार्य्यगोवर्द्धनस्पर्द्धी कोऽपि न
विश्रुतः' इत्युक्तमस्ति । जयदेवकविश्च वङ्ग-
देशाधिपस्य वल्लालसेनसूनोर्लक्ष्मणसेनस्य स-
भायामासीदिति श्रीसनातनगोस्वामिना मतम् ।
'गोवर्द्धनश्च शरणो जयदेव उमापतिः ।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च ॥'
इत्यय श्लोको लक्ष्मणसेनसभागृहद्वारोपरि
शिलायामुत्कीर्ण्ण आसीत् । तस्माद् गोवर्द्धन-
जयदेवादय. सर्व्वेऽपि लक्ष्मणसेनसभायामास-
न्निति केचित् ॥")
गोवर्द्धनधरः, पु, (धरति धारयति वा । धृ + अच् ।
गोवर्द्धनस्य धरः ।) श्रीकृष्ण. । इति शब्द-
चन्द्रिका ॥ (यथा, हरिवंशे । ७६ । १ ।
"गते शक्रे ततः कृष्ण पूज्यमानो व्रजालयैः ।
गोवर्द्धनधरः श्रीमान् विवेश व्रजमेव ह ॥")
गोवशा, स्त्री (वशा बन्ध्या गौरिति परनिपा-
तनात् तथात्वम ।) बन्ध्या गौः । इति कलाप-
व्याकरणम् ॥
गोविट्, [श्] पु, (गवां विट् विष्ठा ।) गोम-
यम् । इत्यमरः । २ । ६ । ५० ॥
गोविन्द., पु, (गा पृथ्वीं धेनु वा विन्दतीति ।
विन्द + "अनुपसर्गाल्लिम्पेति ।" ३ । १ । १३८ ।
इत्यस्य "गवादिषु विन्दे: संज्ञायाम् ।" इति
वार्त्तिकोक्त्या शः ।) श्रीकृष्ण. । (यथा, भग-
वद्गीतायाम् । १ । ३२ ।
"किं नो राज्येन गोविन्द । किं भोगैर्जीवि-
तेन वा ॥")
एतस्य शास्त्रान्तरीयव्युत्पत्तिर्यथा, हरिवंशे—
विष्णुपर्व्वणि । ७५ । ४३—४५ ।

"अद्य प्रभृति नो राजा त्वमिन्द्रो वै भव प्रभो ।।
तस्मात्त्वं काञ्चनैः पूर्णैर्दिव्यस्य पयसो घटैः ॥
एभिरद्याभिषिच्यस्व मया हस्तावनामितैः ।
अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः ॥
गोविन्द इति लोकास्त्वा स्तोष्यन्ति भुवि शाश्व-
तम् ॥"
गोभिर्वाणीभिर्वेदान्तवाक्यैर्विद्यते योऽसौ पुरुषः
विदन्ति यं पुरुष तत्त्वज्ञा इति वा । यथा,
विष्णुतिलके ।
"गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः ॥"
गां वेदलक्षणा वाणीं गोभूम्यादिकं वा वेत्तीति ।
यथा, गोपालतापन्यां पूर्व्वविभागे ध्यानप्रक-
रणे । ७—८ ।
"तद् होचुः कः कृष्णो गोविन्दश्च कोऽसाविति
गोपीजनवल्लभ. कः का स्वाहेति ॥ तानुवाच
ब्राह्मणः पापकर्षणो गोभूमिवेदविदितो विदिता
गोपीजनाविद्याकलाप्रेरकस्तन्माया चेति ।"
एतन्नाम्नो भारतादिमतेन व्युत्पत्तिर्यथा, महा
भारते । १ । २१ । १२ ।
"गां विन्दता भगवता गोविन्देनामितौजसा ।
वराहरूपिणा चान्तर्विक्षोभितजलाविलम् ॥"
तत्रैव । ५ । ७० । १३ ।
"विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते ।
शाश्वतत्वादनन्तश्च गोविन्दो वेदनाद्गवाम् ॥"
यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्याये ।
"युगेयुगे प्रणष्टां गां विष्णो । विन्दसि तत्त्वतः ।
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा ॥"
विन्दतीति विन्दः पालकः स्वामी वा । विन्द +
शः । गवा गोसमूहानां विन्दः ।) गवाध्यक्ष. ।
(गवां शास्त्रमयीनां वाणीनां विन्दः पतिः ।)
बृहस्पतिः । इति मेदिनी ॥ (गौड़पादाचार्य्य-
शिष्यः योगिविशेषः । अयं हि परमहंस-
परिव्राजकाचार्य्यस्य भगवतः शङ्करस्य गुरुः ।
यथा, माधवीये सङ्क्षिप्तशङ्करजये । ५ । १०१ ।
"तस्योपदर्शितवतश्चरणौ गुहायां
द्वारे न्यपूजयदुपेत्य स शङ्करार्य्यः ।
आचार इत्युपदिदेश स तत्र तस्मै
गोविन्दपादगुरवे स गुरुर्यतीनाम् ॥"
अनेन च योगिप्रवरेण गोविन्देन बौधायनधर्म्म-
विवरणं बौधायनधर्म्मसूत्रभाष्यञ्च प्रणीतमिति
श्रूयते ततो बौद्धमतमालोक्य रससाराख्यग्रन्थो-
ऽपि विरचित इति दृश्यते । यथा, रससारे
५म पटले ।
"बौद्धानाञ्च मतं ज्ञात्वा रससारः कृतो मया ॥"
पञ्चावरूशिखनातीना गुरुभेदः । योऽसौ गुरु-
गोविन्द इति नाम्नोदाहृतः ॥ गा. मनः-
प्रधानानीन्द्रियाणि तेषां विन्दः प्रवर्त्तयिता
चेतयिता वा । अन्तर्यामी आत्मेत्यर्थः ।)
परमब्रह्म । यथा,—
"तत्र यद्यसमर्थस्त्वं ज्ञानयोगे महामते ।।
क्रियायोगे दिवा रात्रौ तत्परः सततं भव ॥
करोषि यानि कर्म्माणि तानि देवे जगत्पतौ ।

समर्पयस्व भद्रं ते ततः कर्म प्रयास्यसि ॥
शुभाशुभपरित्यागी क्षीणो निःशेषकर्मणि ।
लयमाप्स्यसि गोविन्दं तद्ब्रह्म परमं महत् ॥"
तन्नाममाहात्म्यं यथा,—
"ये तिष्ठन्तः स्वपन्तश्च गच्छन्तश्चलिते स्नुते ।
सङ्कीर्त्तयन्ति गोविन्द ते वध्याच्या. सुदूरतः ॥"
इति च वह्निपुराणे यमानुशासननामाध्यायः ॥
(अस्य ध्यानं यथा,—
"फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्च्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥")
गोविन्दद्वादशी, स्त्री, (गोविन्दप्रीतये या द्वादशी गोविन्दाख्या द्वादशी वा । गोविन्दप्रिया द्वादशीत्येके ।) फाल्गुनशुक्लद्वादशी । यथा,—
"फाल्गुने द्वादशी शुक्ला या पुष्यर्क्षेण संयुता ।
गोविन्दद्वादशी नाम सा स्यात् गोविन्दभक्तिदा ॥
तस्यामुपोष्य विधिना भगवन्तं प्रपूजयेत् ।
लिखितः पापनाशिन्यां विधिर्योऽत्रापि स स्मृतः ॥"
तन्माहात्म्यञ्च ब्रह्मपुराणे श्रीवशिष्ठमान्धातृसंवादे ।
"फाल्गुनामलपक्षे तु पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥
तस्यामुपोष्य विधिवन्नरः सर्व्वीघकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति ॥
आमर्द्दकी द्वादशीति लोके ख्यातैयमेव हि ।
यत्र आमर्द्दकीपूजा व्रतमस्यां विशेषतः ॥"
तदुक्तं ब्राह्मे तत्रैव पापनाशिनीमाहात्म्यप्रसङ्गे ।
"फाल्गुने तु विशेषेण विशेषं कथितो नृप ।
आमर्द्दव्या व्रतं पुण्यं विष्णुलोकप्रदं नृणाम् ॥"
प्रभासखण्डे च । श्रीदेवीमहेशसंवादे ।
"फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः ।
स्नात्वा नद्यां तडागे वा वाप्यां कूपे गृहेऽपि वा ॥
गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा ।
क्षीरोदे मथ्यमाने तु यदा दृष्टा समुत्थिता ॥
आमर्द्दद्देवदैत्यानां तेन सामर्द्दकी स्मृता ।
शिवा लक्ष्मीः स्मृतो हरिः सेवते सुरसत्तमैः ॥
दैत्यैर्ब्रह्मादिभिः सर्व्वैर्नृभिश्चोऽसौ वैष्णवः स्मृतः ।
तत्र गत्वा हरिः पूज्यो रुद्रमन्त्रोऽथवा शिवा ॥
पूज्या पुण्ये शुभे रात्रौ कार्य्यं जागरणं हरेः ।
करकं जलपूर्णन्तु कर्त्तव्यं पात्रसंयुतम् ॥
हविष्यान्नन्तु कर्त्तव्यं दीपं कार्य्यो विधानतः ।
एवं जागरणं कार्य्यं कथाश्रवणतत्परैः ॥
मुच्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः ।
देहान्ते च नराः सर्व्वे पूज्यन्ते हरिमन्दिरे ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥
गोविष्ठा, स्त्री, (गवां विष्ठा शकृत् ।) गोमयम् । इति राजनिर्घण्टः ॥
गोवृन्द, क्ली, (गवां वृन्दं समूहः ।) गोसमूहः । इति हलायुधः ॥

गोवृन्दारकः, पुं, (गौर्विन्दारक इव पूज्य इति शेषः । "वृन्दारकनागकुञ्जरैः पूज्यमानम् ।" २।१।६२ । इत्यनेन सूत्रेणोपमितसमासे व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनमिति वार्त्तिकम् ।) श्रेष्ठगौः । इति कलापव्याकरणम् ।
गोरथः, पुं, (गोषु स्त्रीगोष्वित्यर्थः वर्षति सिञ्चति रेतः । वृष् + "इगुपधेति ।" ३ । १ । १३५ । इति कः ।) वृषः । इति शब्दरत्नावली ॥ (यथा, मनुः । ८ । १५० ।
"कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च ।"
"कीनाशः कर्षकः गवां सेक्ता वृषो यानमश्वादि ।" इति कुल्लूकभट्टः ॥)
गोशकृत्, क्ली, (गवां शकृत् विष्ठा ।) गोमयम् । इति जटाधरः ॥ (यथा, मनुः । ७ । १८२ ।
"उदकुम्भं सुमनसो गोशकृत् मृत्तिका कुशान् ॥"
पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"गोमयं जगलं गोविट् गोहन्नं तथा गोशकृत् ॥")
गोशाल, क्ली स्त्री, (गवां शाला "विभाषा सेनेति ।" २ । ४ । २५ । इति विभाषया क्लीवत्वम् ।) गोस्थानम् । इति लिङ्गादिसंग्रहे अमरः ॥ गोयालि इति भाषा ॥ (गोशालायां जातः । "स्थानान्तगोशालखरशालाच्च ।" ४।३।३५ । जातार्थप्रत्ययस्य लुक् । ततो विभाषासेनेति नपुंसकत्वे ह्रस्वत्वम् । गोशालजाते त्रि ॥)
गोशीर्ष, क्ली, (गोः शीर्षं शीर्षदेशाकारो विद्यतेऽस्य ऋषभपर्व्वतैकदेशजातानां चन्दनभेदानां शीर्षभागस्य तत्तुल्यतया तथात्वम् ।) चन्दनम् । इति राजनिर्घण्टः ॥ हरिचन्दनम् । इत्यमरः ॥
"गोः शीर्षं गोशीर्षं तदाकारे मलयैकदेशे जातः कालताम्रश्यामिश्रवर्णमुत्पलगन्धि अतिसुरभि शीतलतया सदैव सर्पैर्वेष्टितम् ।" इति भरतः ॥ (यथा, गो रामायणे । ४ । ४१ । ५६ ।
"गोशीर्षचन्दनं यत्र पद्मकाञ्चनसन्निभम् ॥"
यदधिक्रियते यस्मिंस्तद्यथा,—
"सोतसर्ग्गे वदनाद्यस्य स्वेदः प्रच्यवते भृशम् ।
लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम् ॥"
इति चरके इन्द्रियस्थानेऽष्टमेऽध्याये ॥)
गवां मस्तकञ्च ॥
गोशीर्षकः, पुं, (गोशीर्षमिव कायति प्रकाशते इति । कै + क ।) द्रोणपुष्पीवृक्षः । इति रत्नमाला ॥ (स्वार्थे कन् । चन्दनविशेषः ॥)
गोशृङ्ग, पुं, (गोः शृङ्गमिव शृङ्गं शीर्षभागोऽस्य । स्वनामप्रसिद्धः पर्व्वतविशेषः । यथा, महाभारते । २ । ३१ । ५ ।
"निषादभूमिं गोशृङ्गं पर्व्वतप्रवरन्तथा ।"
अत्रैव पर्व्वते अरक्षिमात्रा मन्देहा नाम राक्षसा निवसन्ति । ते हि देवराजमहेन्द्रेणाभिशप्ताः सन्तः सूर्य्योदये जले पतन्ति रजन्यां पुनरुत्पतन्ति । एतद्विवरणं यथा, रामायणे । ४ । ४० । ४२—४४ ।
"हस्त्यथामुत्कटं दिव्यं गोशृङ्गं नाम पर्व्वतम् ।
तस्य शृङ्गसहस्रेषु मन्देहा नाम राक्षसाः ॥

अरक्षिमात्रा लम्बन्ते नानारूपा भयावहाः ।
ते पतन्ति जले घोराः सूर्य्यस्योदयनं प्रति ॥
अभिशप्ता महेन्द्रेण निशायामुत्पतन्ति च ॥")
वर्व्वूरवृक्षः । इति राजनिर्घण्टः ॥ गोविषाणे स्त्री ॥
गोषड्गवं, क्ली, (गवां षट्कम् । "पशुभ्यः स्थानद्वियट्के गोष्ठगोयुगषड्गवम् ।" इति मुग्धबोधसूत्रात् ।) गोषट्कम् । इति मुग्धबोधव्याकरणम् ॥
गोष्ट, ङ संघाते । इति कविकल्पद्रुमः (भ्वां-आत्मं- सक-सेट् ।) सङ्घातो राशीकरणम् । ङ, गोष्टते धान्यं लोकः । इति दुर्गादासः ॥
गोष्ठं, क्ली, (गावस्तिष्ठन्त्यत्र इति । स्था + "सुपि स्थः ।" ३ । २ । ४ । इति कः । घञर्थे कः । इत्येके ।) गोस्थानम् । गोठ । इति भाषा ॥ इत्यमरः ॥ (यथा, रामायणे । ४ । ११ । ३१ ।
"सिंहेन निहतं गोष्ठे गां सवत्सामिव गोपतिम् ।
दृष्ट्वा संग्रामयज्ञेन रामवाणमहाम्भसा ॥")
प्रत्ययविशेषः । स तु स्थानार्थे पशुवाचकशब्देभ्यो भवति । यथा । गोगोष्ठ महिषगोष्ठ इत्यादि । इति भरतः ॥ (गोष्ठीश्राद्धे । यथा मनुः । ३ । २५४ ।
"पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम् ।
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥"
"गोष्ठे गोष्ठीश्राद्धे ।" इति कुल्लूकभट्टः ॥)
गोष्ठश्वः, त्रि, (गोष्ठे श्वा । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । समासे अच् । षष्ठीतत्पुरुष समासे तु गोष्ठश्वा इत्येव स्यात् ।) स्वगृहाङ्गने स्थितो यः परान् द्वेष्टि सः । इति जटाधरः ॥
गोष्ठाष्टमी, स्त्री, (गोष्ठोत्सवदानिता अष्टमी । गोष्ठे विहिता अष्टमी वा । एतस्यां तिथौ भगवतो वालरूपिणो नन्दनन्दनस्य गोष्ठगमनपुरःसरं वत्सपालं विहाय गोपालस्वीकरणात् तथात्वम् ।) गोपाष्टमी । सा च कार्त्तिकशुक्लाष्टमी । यथा पाद्मे कूर्म्मपुराणे च ।
"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ॥
तत्र कुर्य्याद्गवां पूजां गोग्रासं गोप्रदक्षिणम् ।
गवानुगमनं कुर्य्यात् सर्व्वान् कामानभीप्सता ॥"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
"भीमपराक्रमे कार्त्तिकशुक्लपक्षमधिकृत्य ।
गोष्ठाष्टम्यां गवां पूजा गोग्रासं गोप्रदक्षिणम् ।
गवानुगमनं कुर्य्यात् सर्व्वपापविमुक्तये ॥"
इति तिथ्यादितत्त्वम् ॥
गोष्ठी, स्त्री (गावः बहुविधा वाचस्तिष्ठन्त्यत्र । गो + स्था + कः । स्त्रियां ङीष् ।) सभा । तस्याः लक्षणविशेषः ।
"एकाङ्का कथिता गोष्ठी कौशिकीवृत्तिसंयुता ।
सम्भोगरसषट् पञ्च सप्त वा योषिदन्विता ॥
प्राकृतैर्नवभिः पुम्भिर्दशभिर्व्वाप्यलङ्कृता ।
गर्भावमर्षसन्धिभ्यां हीना प्राकृतसम्मता ॥

वाद्याद्यैरन्विता नैव कर्त्तव्येयं विचक्षणैः ॥”
इति सङ्गीतदामोदरः ॥
(गावोऽनेका वाचस्तिष्ठन्ति यत्र । गो + स्था + घञर्थे कः । ततः “अम्बाम्बगोभूमीति ।” ८ । ३ । ९७ । इति षत्वम् ।) सलापः । इति मेदिनी । ठे । ४ ॥ (यथा, पञ्चतन्त्रे । १ । ४०० । “एवमनुष्ठिते चत्वारोऽपि ते एकस्थाने विद्यारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति ॥”) परिषद्वर्गः । यथा, चाणक्ये । “विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥” (यथा च राजेन्द्रकर्णपूरे । ४७ । “कृत्वा नैलापुलिनलवलीपल्लवग्रासगोष्ठीं दिक्मातङ्गाः सममथ सरिन्नाथपाथः पिबन्ति ॥”)

गोष्ठीपतिः, पुं, (पातीति पतिः । गोष्ठ्याः परिषद्वर्गस्य सभाया वा पतिः ।) परिषद्वर्गपालकः । सभापतिः ।

अथ ब्राह्मणगोष्ठीपतिलक्षणं यथा — [दिता
“नानाशास्त्रविशारदै रसिकता सत्काव्यसम्मोनिर्दोषैः कुलभूषणैः परिमिता पूर्णा कुलश्रैरपि । श्रीमद्भागवतादिकारणकथाशुश्रूषयानन्दिता गत्वाभीष्टसुमेति यद्गुणिजनो गोष्ठी हि सा चोच्यते ॥”
एवम्भूता गोष्ठी तस्याः पतिः । अपि च । “कुलीनाः श्रोत्रिया' सर्व्वे यस्यान्नं भुञ्जते मुहुः । कुलीनाय सुता दत्ता स गोष्ठीपतिरुच्यते ॥”
तद्यथा । गाङ्गवंशे लक्ष्मीकान्तमजुमदार. १ मुखवंशे मदनभट्टाचार्य्यः २ तद्वंशे गन्धर्व्वरायः ३ वन्द्यवंशे शुभराजखानवंशः ४ चट्टवंशे अनन्तभट्टाचार्य्य' ५ एते प्राचीना आधुनिका बहवः सन्ति ॥ * ॥
कायस्थगोष्ठीपतिलक्षणं यथा —
“नीतिज्ञः कुलकर्म्मठ. स्थितिमता मान्योऽपि धर्म्मान्वितः
कार्य्याकार्य्यविलोकनैः कुलश्रतां सम्मानदानोद्यतः ।
पोष्टा यः कुलसंविदां कुलसुधीः सन्मौलिकानां तथा
सद्वंशप्रभवः क्षितौ सुविदितो दाता स गोष्ठीपतिः ॥”
अथ कायस्थगोष्ठीपतिगणना ।
“आदौ द्वादशपर्य्यये समभवद्दानेन गोष्ठीपतिः सत्कीर्त्तिश्च सुबुद्धिखानतनयः श्रीमन्तरायः कृती । १ ।
सञ्जातस्तदनन्तरं गुणधरो गण्ये च पर्य्यायके श्रेष्ठातो हि पुरन्दर' कुलभव' खान. सदा दानतः ॥ २ ॥
पर्य्याये च चतुर्द्दशे समभवत् पौरन्दरः केशवः खानः सन्ततदानतो हि विलसत्कीर्त्तिर्धरामण्डले ॥ ३ ॥
नानावित्तविसर्जनेन जनितप्रोत्फुल्लकीर्त्तिः चिरावासीत् पञ्चदशे तदात्मजकृती श्रीकृष्णविश्वासखास् ॥ ४ ॥
ततः षोड़शे पर्य्यये दानजालैः
कुलीनालिमाली दयारामपालः ॥ ५ ॥
ततस्तत्सुतः पर्य्यये सप्तवाचि-
चमानाथगण्येऽभवत् पुण्यराचि. ॥ ६ ॥
ततः पर्य्ययेऽष्टादशे तत्तनूजः
समाहूय भूयोर्च्चितार्य्यव्रजो यः ।
सदा सत्कथालापसंलापतोषः
कुलीनौघपूजापरोऽयं सुभाषः ॥ ७ ॥
आसीत् किङ्करसेननामसुकृती यो मौलिकैकाग्रणीः
पर्य्याये परिपूजितार्य्यनिचये चैकोनविंशे हि सः । सद्गोष्ठीपतिपालवंशतनयापाणिग्रहेणात्मनो दानेनापि च मेलिकाटिरपरो गोष्ठीपतिः प्राथम. ॥ ८ ॥
दानेनातिवदान्यतादिगुणतो निःसीमपुण्यैश्च यो गोपीसिंहचतुर्धुरीणसुकृती विंशे हि पर्य्यायके ।
यस्मात् किङ्करसेनवंशतनयापाणिग्रहाद्वागतः सोऽप्यासीद् भुवि मेलिकाटिरपरो गोष्ठीपति सस्तुतिः ॥ ९ ॥
पर्य्याये पुनरेकविंशक इह ख्यात क्षमामण्डले गोपीसिंहचतुर्धुरीणकुलजो यो रामकान्तः कृती ।
धन्यो गण्यसुपुण्यजन्ययशसा गोष्ठीपतेरग्रणीर्दानैः कर्णं इवातिधैर्य्यपयसा रत्नाकरश्चापर. ॥ १० ॥
द्वाविंशे किल पर्य्ययेऽतिनियतैस्तस्यात्मजाः संग्रहात्
स्वस्यैवास्यसुपुण्यदत्तकतनूजूतस्य च श्रीमतः । गोपीमोहनसञ्ज्ञकस्य तनयद्वारा च गोष्ठीपतिः सम्भूतो नवकृष्णभूपतिवरः सद्मेलिकाटिः क्षितौ ॥ ११ ॥
तावन्मुख्यकनिष्ठमध्यमकुलोद्भूतां स्तृतीयोद्भवान् यद्भ्रातॄनपि तात्रतोऽत्र गणना बहुक्रमानादरात् । सद्गोष्ठीपतिकारकानतिनताधीनान् कुलीनान् समाहूयात्र प्रकृतास्तथात्र सहजान् पूज्यास्तथा कोमलान् ॥
वित्तैर्वागमृतैर्नुतिप्रणतिभिश्चान्यैश्चयोविंशके पर्य्यायेऽतितरां प्रपूज्य परमाह्लादान्वित श्रीयुतः । गोपीमोहनदेववंशतिलको गोष्ठीपतिः क्ष्मापतिर्जातः सम्प्रति भूमिदेवघटकानाञ्चाध्वना-दस्तुतिः ॥” १२ ॥
इति दक्षिणराढीयकायस्थकुलाचार्य्यकारिका ॥
अथ वैद्यानां गोष्ठीपतिर्यथा,—
“विप्रेभ्यः प्रियभोज्यवस्त्रवसनं छत्रासनं भूषणं ग्रामा भूमितुरङ्गमा गणगणाः स्वर्णानि रत्नानि च । गावो नाव उदारमन्दिरचयो वाप्यश्च दत्ता. सदा साधुज्ञातिकुटुम्बसद्गुणगणाः संप्रीणिता येन च ॥
गौड़क्ष्मापतिना य एव भिषजा श्रेष्ठोऽभिषिक्तः कृती
नानाशास्त्रविशारद शुभमतिर्वाग्मी चिकित्सापटुः ।
तस्मात् प्राप गणं तुरङ्गकनकच्छत्रञ्च रत्नं धनं सोऽभूत् सेनविनायको बहुगुणैरम्बष्ठगोष्ठीपतिः ॥ वैनायकेषु सर्व्वेषु भास्कर' श्रेष्ठ ईरितः । गोष्ठीपतितया ख्यातः स वैद्यैः पूजितोऽग्रतः ॥”
इति भरतमल्लिककृतकुलपञ्जिका ॥

गोष्पदं, क्ली, (गोः पदम् । यद्वा गावः पद्यन्ते गच्छन्ति यस्मिन् देशे । “गोष्पदं सेवितासेवितप्रमाणेषु ।” ६ । १ । १४५ । इति सुट् सस्य षत्वञ्च ।) गोसेवितस्थानम् । गोखुरप्रमाणम् । इत्यमरः । ३ । ३ । ६३ ॥ (यथा, महाभारते । ६ । ७ । ३७ । “भीष्मद्रोणार्णवं तीर्त्त्वा कर्णपातालसम्भवम् । मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम् ॥”) तथा विश्वो मेदिनी च । “गोष्पदं गोपदश्वभ्रे गवाञ्च गतिगोचरे ॥” (गवासेवितारण्यादि । इति सिद्धान्तकौमुदी ॥)

गोसः, पुं, (गां जलं स्यति नाशयतीति । सो य नाशने + “आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) बोलः । उषःकालः । इति मेदिनी । से । ३ ॥

गोसङ्ख्यः, पुं, (गाः सङ्ख्यते इति । चक्षिङ् ङल उक्तौ + “चक्षिङः ख्याञ् ।” २ । ४ । ५४ । इति ख्याञ्, ततः “समिख्यः ।” ३ । २ । ७ । इति कः । यद्वा, गवां सङ्ख्या बहवो गाव इत्यर्थः विद्यते यस्य । समासे पुंवद्भाव' ।) गोपः । इत्यमरः । २ । ६ । ५७ ॥

गोसङ्गः, पुं, (गोभिः सङ्गो मिलनं यस्मिन् काले । प्रत्यूषकाले हि गावो गोष्ठगमनाय निर्गच्छन्तीति प्रसिद्धिः । यद्वा गौः सूर्य्यकिरणं तेन सङ्गो यस्मिन् ।) प्रत्यूष । इति भूरिप्रयोग' ॥

गोसदृक्षः, पुं, (गोः सदृक्षः तुल्यः । गोसदृशाकारत्वादस्य तथात्वम् ।) गवयः । इति हेमचन्द्रः ॥

गोसन्दायः, पुं, (गां सन्ददातीति । सम् + दा + अण् ।) गोदानकर्त्ता । इति व्याकरणम् ॥

गोसम्भवा, स्त्री, (गोरिव सम्भवो लोमादिरूपा कृतिर्यस्याः ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥ (सम्भवत्यस्मात्, इति सम्भवा उत्पत्तिकारणम् । गौः सम्भवा यस्याः ।) गोजाते त्रि ॥

गोसर्गः, पुं, (गवां सर्गो वनगमनाय मोचनं यद्वा गवां सूर्य्यकिरणानां सर्गो विसृष्टिः यस्मिन् ।) प्रभातम् । इति हारावली । १६१ ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये । “गोसर्गे चार्द्धरात्रे च तथा मध्यन्दिनेषु च ॥”)

गोसवः, पुं, (गौः सूयते पीड्यते हिंस्यते यत्र । सु ञ् पीडायाम् + “ऋदोरप् ।” ३ । ३ । ५७ ।) इति अप् ।) गोमेधयज्ञः । इति जटाधर. ॥ (यथा, मनुः । ११ । ७४ ।

"यज्ञेन वाश्वमेधेन स्वर्जिता गोसवेन वा ।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृतामिष्टुतापि वा ॥")
गोसशश पुं (गोस एव शशः शशतुल्यः इति गोवलीवर्द्दन्यायेन सिद्धः ।) वोलः । इत्यमरटीकायां रायमुकुटः ॥
गोसहस्री, स्त्री, (गवां सहस्रं तद्दानफलं विद्यते यत्र । अर्श आदित्वादच् गौरादित्वात् ङीष् ।) मङ्गलवारयुक्तामावास्या । तत्र गङ्गास्नाने सहस्रगोदानफलम् । यथा, व्यासः ।
"अमावास्यां भवेद्वारो यदि भूमिसुतस्य च ।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
सोमवारयुक्तामावास्या । तत्र अरुणोदयकालमारभ्य स्नानकालपर्य्यन्तं मौनीभूत्वा स्नानात् गोसहस्रदानफलम् । यथा व्यासः ।
"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥"
इति च तिथ्यादितत्त्वम् ॥
गोस्तन पुं, (गोः स्तन इव गुच्छो यस्य ।) हारभेदः । इत्यमरः । २ । ६ । १०५ ॥ स तु चतुर्यष्टिकः । चतुस्त्रिंशद्यष्टिक इति केचित् । इति भरतः ॥ (गवां स्तनः ।) गवां कुचश्च ॥ (यथा, सुश्रुते उत्तरतन्त्रे १ मे अध्याये ।
सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम् ॥")
गोस्तना, स्त्री, (गोः स्तन इव फलमस्याः । ङीषभावपक्षे टाप् ।) गोस्तनी । इत्यमरटीका ॥
गोस्तनी, स्त्री, (गोः स्तन इव फलमस्याः । "स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात् ।" ४ । १ । ५४ । इति ङीष् ।) द्राक्षा । इत्यमरः । २ । ४ । १०७ ॥ कपिलद्राक्षा । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायाः ।
"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥"
तथा स्याद्गोस्तनी द्राक्षा गुर्व्वी च कफपित्तनुत् ॥
गोस्तनी सुनक्षा इति ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गोः स्तना इव स्तना यस्याः । कुमारानुचारिणी मातृगणानामन्यतमा । यथा महाभारते । ९ । ४६ । ३ ।
"प्रभावती विशालाक्षी पलिता गोस्तनी तथा ॥"
गोनसीति पाठोऽपि वर्त्तते ॥)
गोस्थान, क्ली, (गवां स्थानम् ।) गोष्ठम् । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ६० । २७ ।
"साग्निलह्रारगोवाट मध्ये गोस्थानसङ्कुलम् ॥")
गोस्थानक, क्ली, (गोस्थान+स्वार्थे कन् ।) गोष्ठम् । इत्यमरः । २ । १ । १३ ॥
गोस्वामी [न्] त्रि (गवां स्वामी ।) गोपतिः । इति हलायुधः ॥ (यथा मनुः । ८ । २३१ ।
'गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः ॥")
स्वर्गस्य भुवो वा प्रभुः । (यद्वा, गवां इन्द्रियाणां स्वामी । जितेन्द्रियतया एव तथात्वम् ।) यथा । "श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी ।" इत्यनन्तसंहिता ॥
गोहत्या, स्त्री, (गवां हत्या हननम् ।) गोवधः । तत्प्रायश्चित्तादि प्रायश्चित्तशब्दे द्रष्टव्यम् ॥ * ॥ पारिभाषिकगोहत्या यथा,—
सावित्र्युवाच ।
"विप्रहत्याश्च गोहत्यां किंविधामातिदेशिकीम् ।
का वा नृणामगम्या वा को वा सन्ध्याविहीनकः ॥
एतेषां लक्षणं सर्व्वं वद वेदविदां वर ! ॥
यम उवाच ।
गवामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत् ।
याति गोविप्रयोर्म्मध्ये गोहत्याञ्च लभेत्तु सः ॥
दण्डैर्गान्ताडयन् मूढो यो विप्रो वृषवाहकः ।
दिने दिने गवां हत्यां लभते नात्र संशयः ॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम् ।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद्ध्रुवम् ॥
वृषलीपतिं याजयेद् यो भुङ्क्तेऽन्नं तस्य यो नरः ।
गोहत्याशतकं सोऽपि लभते नात्र संशयः ॥
पादं ददाति वह्नौ यो गाश्च पादेन ताडयेत् ।
गृहं विशेदधौताङ्घ्रिः स्नात्वा गोवधमालभेत् ॥
यो भुङ्क्तेऽस्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च ।
सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद्ध्रुवम् ॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम् ॥
पितॄंश्च पर्व्वकाले च तिथिकाले च देवताः ।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद्ध्रुवम् ॥
स्वभर्त्तरि च कृष्णे वा भेदबुद्धिं करोति या ।
कटूक्त्या ताडयेत् कान्तं सा गोहत्यां लभेद्ध्रुवम् ॥
गोमार्गं खननं कृत्वा ददाति शस्यमेव च ।
तडागे च तदूर्द्धे वा स गोहत्यां लभेद्ध्रुवम् ॥
प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमम् ।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेद्ध्रुवम् ॥
राजके दैवके यस्मात् गोस्वामी गां न पालयेत् ।
दुःखं ददाति यो मूढो गोहत्यां लभते ध्रुवम् ॥
प्राणिनं लङ्घयेद्यो हि देवार्च्चामनलं जलम् ।
नैवेद्यं पुष्पमन्नञ्च स गोहत्यां लभेद्ध्रुवम् ॥
शश्वन्नास्तीति वादी यो मिथ्यावादी प्रतारकः ।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥
देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं प्रति ।
न सम्भ्रमान्नमेत् यो हि स गोहत्यां लभेद्ध्रुवम् ॥
न ददात्याशिषं कोपात् प्रणताय च यो द्विजः ।
विद्यार्थिने च विद्याञ्च स गोहत्यां लभेद्ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
गोहन्न, क्ली, (हद विष्ठात्यागे+क्तः । हन्नम् । गोर्हन्नं विष्ठा ।) गोमयम् । इति रत्नमाला ॥
गोहरीतकी, स्त्री, (गवां हरीतकीव हितकारित्वात् ।) विल्ववृक्षः । इति शब्दरत्नावली ॥
गोहालिया, स्त्री, लताविशेषः । गोयालिया इति भाषा ॥ यथा, गारुडे १९० अध्याये ।
"पीतं गोहालियामूलं तिलदध्याज्यसंयुतम् ।
निबद्धमूत्रं क्वथितं प्रवर्त्तयति शङ्कर ! ॥"
गोहित, पुं, (गोषु हितः ।) घोषलता । विल्वः । इति शब्दचन्द्रिका ॥ गवां हितकारके त्रि ॥ (गोर्भूमेर्भारावतरणे स्वेच्छया शरीरग्रहणं कुर्व्वन् गोहितः, यद्वा गवां रक्षार्थं गोवर्द्धनं धृतवानिति गोहितः । विष्णुः । यथा, महाभारते । १३ । १४९ । ७६ ।
"गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥")
गोहिर, क्ली, (गुह+बाहुलकादिरच् ।) पादमूलम् । इति हेमचन्द्रः । ३ । २८० ॥
गोह्य, त्रि, (गुहू सवरणे+"शंसिदुहिगुहिभ्यो वा ।" इति काशिकोक्तेः क्यबभावपक्षे ण्यत् ।) गुह्यम् । गोपनीयम् । इति पाणिनिव्याकरणम् ॥
गौ, [गो] पुं स्त्री, (गच्छतीति । गम्+"गमेर्डोः ।" उणां । २ । ६७ । इति डोः । यद्वा, गच्छत्यनेनेति करणे डोः । वृषस्य यानसाधनत्वात् स्त्रीगव्या दानेन स्वर्गगमनसाधनत्वाच्च उभयोरपि दानेन स्वर्गगमनत्वाद्वा तथात्वम् । वस्तुतस्तु रूढ एव शब्दः । यदुक्तम् ।
"रूढा गवादयः प्रोक्ता यौगिकाः पाचकादयः ।
योगरूढाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः ॥")
स्वनामख्यातपशुः । गरु इति भाषा ॥ पुंगोः पर्य्यायः अनड्वान् इति पदे द्रष्टव्यः ॥ स्त्रीगोः पर्य्यायः । माहेयी २ सौरभेयी ३ उस्रा ४ माता ५ शृङ्गिणी ६ अर्ज्जुनी ७ अघ्न्या ८ रोहिणी ९ । इत्यमरः ॥ माहेन्द्री १० इज्या ११ धेनुः १२ अघ्ना १३ दोग्ध्री १४ भद्रा १५ भूरिमही १६ अनडुही १७ कल्याणी १८ पावनी १९ गौरी २० सुरभिः २१ मही २२ निलिनाचि. २३ सुरभी २४ अनड्वाही २५ इडा २६ अघमा २७ । इति शब्दरत्नावली ॥ बहुला २८ मही २९ सरस्वती ३० । इति जटाधरः ॥ उस्रिया ३१ अही ३२ अदितिः ३३ इला ३४ जगती ३५ शर्करी ३६ । इति वेदनिघण्टौ २ अध्यायः ॥ * ॥ (गवां लक्षणादिकं यथा, बृहत्संहितायां ६१ अध्याये ।
"पराशरः प्राह बृहद्रथाय
गोलक्षणं यत् क्रियते ततोऽयम् ।
मया समासः शुभलक्षणास्ताः
सर्व्वास्तथाप्यागमतोऽभिधास्ये ॥
सास्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः ।
प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः ॥
दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः ।
ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च ॥
श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृहद्भिर्वा ।
अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च ॥
वृषभोऽप्येवं स्थूलातिलम्बवृषणः शिराततक्रोडः ।
स्थूलशिराचितगण्डस्त्रिस्थानं मेहते यश्च ॥
मार्ज्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्येष्टः ।

कृष्णोष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः ॥
स्थूलशकृन्मणिशृङ्गः सितोदरः कृष्णसारवर्णश्च ।
गृहजातोऽपि त्याज्यो यूथविनाशावहो वृषभः ॥
श्यामकपुष्पचिताङ्गो भस्मारुणसन्निभो विडा-
लाक्षः ।
विप्राणामपि न शुभं करोति वृषभः परिगृहीतः ।
ये चोद्धरन्ति पादान् पङ्कादिव योजिताः कृश-
ग्रीवाः ।
कातरनयना हीनाः पृष्ठतश्च ते न भारसहाः ॥
मृदुसंहतताम्रोष्ठास्तनुस्फिजस्ताम्रतालुजिह्वाश्च ।
तनुह्रस्वोच्चश्रवणाः सुकुक्षयः स्पृष्टजङ्घाश्च ॥
आताम्रसंहतखुरा व्यूढोरस्का वृहत्ककुद-
युक्ताः ।
स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुशृङ्गाः ॥
तनुभूस्पृग्वालधयो रक्तान्तविलोचना महो-
च्छ्वासाः ।
सिंहस्कन्धास्तन्वल्पकम्बलाः पूजिताः सुगताः ॥
वामावर्त्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्त्तैः ।
शुभदा भवन्त्यनड्वाहो जङ्घाभिश्चैणकनिभाभिः ॥
वैदूर्य्यमल्लिका बुद्बुदेक्षणाः स्थूलनेत्रचर्म्माणः ।
पार्ष्णिभिरस्फुटिताभिः शस्ताः सर्व्वेऽपि भार-
वहाः ॥
घ्राणोद्देशे सवलिर्माज्जारमुखः सितश्च दक्षि-
णतः ।
कमलोत्पललाक्षाभः सुवालधिर्वाजितुल्यजवः ॥
लम्बैर्वृषणैर्मेषोदरश्च सङ्क्षिप्तवङ्क्षणाक्रोड़ः ।
ज्ञेयो भाराध्वसहो जवेऽश्वतुल्यश्च शस्तफलः ॥
सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महा-
वक्त्रः ।
हंसो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥
भूस्पृग्वालधिराताम्रवङ्क्षणो रक्तदृक् ककुद्मी च ।
कल्माषश्च स्वामिनमचिरात्कुरुते पतिं लक्ष्म्याः ॥
यो वा सितैकचरणो यथेष्टवर्णश्च सोऽपि शस्त-
फलः ।
मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तो-
ऽस्ति ॥' * ॥
गोरीङ्गितभेदेन शुभाशुभमुक्तं यथा, तत्रैव
६२ अध्याये,—

"गावो दीनाः पार्थिवस्याशिवाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान् ।
मृत्युं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्करानारुवन्त्यः ॥
अकारणे क्रोशति चेदनर्थो
भयाय रात्रौ वृषभः शिवाय ।
भृशं निरुद्धा यदि मक्षिकाभि-
स्तदाशु वृष्टिं सरमात्मजैर्व्वा ॥
आगच्छन्त्यो वेश्म बम्भारवेण
संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः ।
आर्द्राङ्ग्यो वा हृष्टरोमण्यः प्रहृष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम् ॥"* ॥)

गोमङ्गलत्वादि यथा, देवलः ।
"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
एतानि सततं पश्येन्नमस्येदर्च्चयेच्च यः ।
प्रदक्षिणञ्च कुर्व्वीत तथा चायुर्न हीयते ॥"
अभिप्रेतार्थसिद्धिर्मङ्गलं तद्धेतुतया ब्राह्मणा-
दापि ॥ * ॥ गोप्रणामे ब्रह्मपुराणम् ।
"सदा गावः प्रणम्यास्तु मन्त्रेणानेन पार्थिव ।।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
मन्त्रस्य स्मरणादेव गोदानफलमाप्नुयात् ॥"
भविष्ये ।
"गामालभ्य नमस्कृत्य कृत्वा चैव प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
गवामस्थि न लङ्घेत मृते गन्धेन वर्ज्जयेत् ।
यावदाघ्राति तद्गन्धं तावद्गन्धेन युज्यते ॥"
विष्णुः ।
"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना ।
षडङ्गमेतन्माङ्गल्यं पवित्रं सर्व्वदा गवाम् ॥"
षडङ्गं षट्प्रकारम् । इति शुद्धितत्त्वम् ॥ * ॥
तन्मांसगुणाः । सुस्निग्धत्वम् । पित्तश्लेष्मविवर्द्धन-
त्वम् । बृंहणत्वम् । बलकारित्वम् । पीनसप्रदर-
नाशित्वञ्च । इति भावप्रकाशः ॥ अपूतत्वम् ।
गुरुत्वम् । वातकफापहत्वञ्च ॥ * ॥ तद्दुग्धगुणाः ।
पथ्यत्वम् । अत्यन्तरुच्यत्वम् । स्वादुत्वम् । स्निग्ध-
त्वम् । पित्तवातामयनाशित्वम् । मेध्यत्वम् ।
कान्तिप्रज्ञाङ्गपुष्टिवीर्य्यवृद्धिकारित्वञ्च ॥ (यथा
च हारीते प्रथमस्थानेऽष्टमाध्याये ।

"गव्यं पवित्रञ्च रसायनञ्च
पथ्यञ्च हृद्यं बलपुष्टिदं स्यात् ।
आयुःप्रदं रक्तविकारपित्त-
त्रिदोषहृद्रोगविषापहं स्यात् ॥" * ॥)

तद्दधिगुणाः । अतिपवित्रत्वम् । शीतत्वम् ।
स्निग्धत्वम् । दीपनत्वम् । बलकारित्वम् । मधुर-
त्वम् । अरोचकवातामयनाशित्वम् । ग्राहित्वञ्च ॥
(यथा च हारीते प्रथमस्थानेऽष्टमेऽध्याये ।
"अम्लस्वादुरसं ग्राहि गुर्व्वुष्णं वातरोगजित् ।
मेद.-शुक्र-बल-श्लेष्म-रक्तपित्ताग्नि-शोफकृत् ॥
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ।
वातापहं पवित्रञ्च दधि गव्यं गुणप्रदम् ॥"* ॥
तद्दुग्धफेनगुणाः ।
"गवान्तु क्षीरफेनं वा तक्रेण सहितन्तथा ।
पक्वाम्रं भक्षयेद्वापि ग्रहणी तस्य नश्यति ॥")
तन्नवनीतगुणाः । शीतत्वम् । वर्णबलशुक्रकफ-
रुचिसुखकान्तिपुष्टिकारित्वम् । सुमधुरत्वम् ।
संग्राहकत्वम् । चक्षुर्हितत्वम् । वातसर्व्वाङ्गशूल-
कासश्रमसर्व्वदोषनाशित्वञ्च ॥ * ॥
तद्घृतगुणाः । हृद्यत्वम् । धीकान्तिस्मृतिबल-
मेधापुष्ट्यग्निवृद्धिशुक्रवपुःस्थौल्यकारित्वम् । वात-
श्लेष्मश्रमपित्तनाशित्वम् । विपाके मधुरत्वम् ।
हृद्यतमत्वम् । बहुगुणत्वञ्च ॥ (तथा च ।
"विपाके मधुरं वृष्यं वातपित्तकफापहम् ।
चक्षुष्यं बलकृन्मेध्यं गव्यं सर्पिर्गुणोत्तमम् ॥"
इति हारीते प्रथमस्थाने अष्टमेऽध्याये ॥ * ॥)

"गवां प्रत्यूषसि क्षीरं गुरु विष्टम्भि दुर्ज्जरम् ।
तस्मादभ्युदिते सूर्य्ये यामं यामार्द्धमेव वा ॥
समुत्ताप्य पयो ग्राह्यं तत् पथ्यं दीपनं लघु ।
विवत्साबालवत्सानां पयो दोषसमीरितम् ॥
शस्तं वत्सैकवर्णाया धवलीकृष्णयोरपि ।
इक्ष्वादा माषपर्णादा ऊर्द्ध्वशृङ्गी च या भवेत् ॥
तासां गवां हितं क्षीरं शृतं वाशृतमेव वा ।
गवां सिताना वातघ्नं कृष्णाना पित्तनाशनम् ।
श्लेष्मघ्नं रक्तवर्णानां त्रीन् हन्ति कपिलापयः ॥"
इति राजनिर्घण्टः ॥

गौः, [गो] पु, (गम्यते कर्म्मिभिः यज्ञदान-
परोपकारादिधर्म्ममूलककर्म्मफलैर्यस्मिन् । गम्
+ "गमेर्डोः ।" उणां । २ । ६३ । इति अधि-
करणे डोः ।) स्वर्गः । (गम्यन्ते ज्ञायन्ते
विषया येन यद्वा गच्छति शीघ्रमिति करणे
कर्त्तरि वा डोः । किरणसम्पर्केण विना चाक्षुष-
ज्ञानाभावात् किरणस्य ज्ञानप्रकाशधर्म्मवत्त्वात्
शीघ्रगामित्वाच्च तथात्वम् ।) रश्मिः । (यथा,
महाभारते । ३ । ३ । ५२ ।
"त्रयोदशद्वीपवतीं गोभिर्भासयसे महीम् ।
त्रयाणामपि लोकानां हितायैकः प्रवर्त्तसे ॥"* ॥)
वज्रः । इति मेदिनी । गे । १ ॥ (गम्यते पुण्यवद्भि-
र्यस्मिन् । अधिकरणे डोः । इष्टापूर्त्तादिसकाम-
कर्म्मभिः पुण्यवताञ्चन्द्रलोकगमनात् तथा-
त्वम् ।) चन्द्रः । इति विश्वः ॥ (गच्छति प्राप्नोति
विश्वं प्रकाशकात्मकेन स्वतेजसेति जानाति
सर्व्वमिति वा । कर्त्तरि डोः ।) सूर्य्यः । गोमेध-
यज्ञः । इत्यमरटीकायां भानुदीक्षितः ॥ ऋषभ-
नामौषधम् । इति राजनिर्घण्टः ॥

गौः, [गो] स्त्री, (गम्यते विषयज्ञानं यया । गम्
+ "गमेर्डोः ।" उणां । २ । ६३ । इति करणे
डोः ।) चक्षुः । (गच्छति शीघ्रमिति कर्त्तरि
डोः ।) बाणः । दिक् । (गम्यते ज्ञायते चित्ताभि
प्रायो यया । करणे डोः ।) वाक् । (यथा,
रघुः । ५ । १२ ।

"इत्यर्घ्यपात्रानुमितव्ययस्य
रघोरुदारामपि गां निशम्य ॥" * ॥

गम्यते भ्रम्यतेऽस्यामिति । अधिकरणे डोः ।)
भूः । (यथा, रघुः । १ । २६ ।
"दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥" * ॥
जले बहुवचनान्तोऽयम् । इति मेदिनी । गे । १ ॥
जले एकवचनान्तोऽपि इति केचित् । इति
भरतः ॥ (यथा, वृन्दावनयमके । २ ।

"खमिव सुनं गवि शेषं
व्युपधाय स्वपिति यो भुजङ्गविशेषम् ।
नव पुष्करसमकरया
श्रीयोर्म्मिपंक्त्या च सेवितः समकरया ॥")

माता । इत्येकाक्षरकोषः ॥ (स्वनामख्याता
शुकदौहित्रस्य ब्रह्मदत्तस्य भार्य्या । यथा, भाग-
वते । ९ । २१ । २५ ।
"स कीर्त्त्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ।

स योगी गवि भार्य्यायां विष्वक्‌सेनमधात् सुतम्॥"
"गवि सरस्वत्यां भार्य्यायाम्॥" इति कश्चित् व्याचष्टे॥)

गौः, [गो] पुं, स्त्री, (गम्यते ज्ञायते सर्व्वंसुखमनेन। गम्+"गमेर्डोः।" उणां। २। ६३। इति करणे डोः। त्वचि जातत्वादेवास्य तथात्वम्।) लोम। (गच्छति निम्नदेशमिति। कर्त्तरि डोः। निम्नप्रवणादेवास्य तथात्वम्।) जलम्। इत्यमरटीकायां भानुदीक्षितः॥

गौञ्जिकः, पुं, (गुञ्जा परिमाणविशेषस्तद्‌ग्रहणे तु शीलमस्य। यद्वा गुञ्जा गुञ्जाफलं तस्य परिमाणार्थं ग्रहणं विद्यते अस्य। गुञ्जा+ठक्।) स्वर्णकारः। इति त्रिकाण्डशेषः॥

गौडः, पुं, स्वनामख्यातदेशः। (यथा, प्रबोधचन्द्रोदये। २। ७।
"गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ापुरी।
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता॥")
तद्देशस्थे पुं भूम्नि। इति जटाधरः॥ तद्देशसीमा यथा, शक्तिसङ्गमतन्त्रे सप्तमपटले।
"वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे।।
गौडदेशः समाख्यातः सर्व्वविद्याविशारदः॥"
(देशोऽयं बृहत्संहितायां कूर्म्मविभागे पूर्व्वस्यामुक्तः। यथा, तत्रैव। १४। ५, ७।
"अथ पूर्व्वस्याम्।" इत्युक्त्वा
"उदयगिरिभद्रगौडक-
पौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः॥"
इत्युक्तवान्॥)

पञ्च गौडा यथा, स्कन्दपुराणे।
"सारस्वताः कान्यकुब्जा गौडमैथिलिकोत्कलाः।
पञ्च गौडा इति ख्याता विन्ध्यस्योत्तरवासिनः॥"
(गुडस्य विकारः। गुड+अण्। गुड़जाते आसवे क्ली च। अस्य गुणा यथा,—
"सृष्टमूत्रशकृद्वातो गौडस्तर्पण-दीपनः॥"
इति सूत्रस्थाने पञ्चमेऽध्याये वाभटेनोक्तम्॥
"श्यामादन्तीरसे गौडः पिप्पलीफलचित्रके।
सिद्धोऽविरोऽनिल-कफ-श्लीहपाण्डूदरापहः॥"
इति च चरके कल्पस्थाने द्वादशेऽध्याये॥)

गौडवास्तूकः, पुं, (गौडे गौड़देशे जातः गौडदेशवासिप्रियो वा वास्तूकः शाकविशेषः।) चिल्लीशाकम्। इति राजनिर्घण्टः॥ (चिल्लीशब्देऽस्य विषया ज्ञेयाः॥)

गौडिकं, क्ली, (गौडं गुड़विकारस्तत् कारणत्वेनास्त्यस्य। "अत इनिठनौ।" ५। २। ११५। इति ठन्।) मद्यविशेषः। यथा, "पैष्टिकगौड़िकमाध्वीकानां पानं सुरापाने कष्टतमम्॥" इति प्रायश्चित्तविवेके देवलः॥ गुड़निष्पन्नद्रव्ये त्रि॥ (पुं गुडे साधु। "गुड़ादिभ्यष्ठञ्।" ४।४।१०३। इति ठञ्। इक्षुः। इति सिद्धान्तकौमुदी॥)

गौड़ी, स्त्री, (गुडस्य विकारः गुडविकारेण सम्पादिता इत्यर्थः। गुड+अण्। स्त्रियां ङीप्।) गुड़ादिकृता सुरा। गुड़ेर मद इति भाषा॥ (यथा, मनुः। ११। ९४।
"गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा॥")
तत्पर्य्यायः। वाल्कली २। इति त्रिकाण्डशेषः॥ अस्या गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। मधुरत्वम्। वातनाशित्वम्। पित्तबलकान्तिवृष्टिकारित्वम्। दीपनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ (यथा च हारीते प्रथमे स्थाने ११ अध्याये।
"गौडी कषाया मधुराम्लशीता
सन्दीपनी शूलहरणामहन्त्री।
हृद्या त्रिदोषं शमयत्यजीर्णं
पाण्डामयार्शःश्वसनं निहन्ति॥")
रागिणीविशेषः। सा तु मेघरागस्य पत्नी। इति सङ्गीतदामोदरः॥ (गौड़ानां गौडदेशवासिनां प्रिया।) काव्यरीतिविशेषः। यथा,—
"ओजःप्रसादमाधुर्य्यं गुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः॥"
इति काव्यचन्द्रिका॥
(यथा च साहित्यदर्पणे। ९। ४।
"ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।
समासबहुला गौडी——————॥"
उदाहरणं यथा, तत्रैव धृतो वेणीसंहारश्लोकः।
"चञ्चद्भुजभ्रमितचण्डगदाभिघात
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
पुरुषोत्तमस्याद्य।
बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया।
रीतिरनुप्रासमहिमपरतन्त्रास्तोभवाक्या च॥")

गौणः, पुं, (गुणादागतः गौणी। तस्या आगतः प्रतिबोधितः। गौणी+अण्।) गौणीवृत्तिबोधितः। यथा, "शक्यस्य सादृश्यात्मकः सम्बन्धो गुणः तदधीना या लक्षणा सा गौणी तद्‌योगात् गौणः।" इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥ (अमुख्ये त्रि। यथा, महाभारते। १२। ३४१। ६।
"बहूनि मम नामानि कीर्त्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्म्मजानि च कानिचित्॥")

गौणकालः, पुं, (गौणोऽमुख्यः कालः।) मुख्यकालकर्त्तव्यकर्म्मकरणयोग्यकालान्तरः। यथा,—
"यद्वागामिक्रियामुख्यकालस्याप्यन्तरालवत्।
गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि॥
यद्येति पक्षान्तरं प्राक्तनकार्य्ये मध्यकालवत् आगामिक्रियाया मुख्यकालस्यापि गौणकालत्वम्। तेन सायं सन्ध्याया रात्रिः प्रातः सन्ध्याकालश्च गौणकाल इत्यर्थः।" इति मलमासतत्त्वम्॥

गौणचान्द्रः, पुं, (गौणोऽप्रधानश्चान्द्रश्चन्द्रसम्बन्धिमासः।) कृष्णप्रतिपदादिपौर्णमास्यन्तमासः। यथा, जन्माष्टमीप्रकरणे तिथ्यादितत्त्वे।
"गौणचान्द्रेण भाद्रस्य मुख्यचान्द्रेण श्रावणस्य॥"
अपि च शब्दरत्नावल्याम्।
"चान्द्रोऽपि द्विविधः प्रोक्तो मुख्यगौणविभेदतः।
गौणः कृष्णप्रतिपदादिपौर्णमास्यन्त ईरितः॥"

गौणी, स्त्री, (गुणं सादृश्यमधिकृत्य प्रवृत्ता। गुण+अण+स्त्रियां ङीप्।) अशीतिप्रकारलक्षणान्तर्गतलक्षणाविशेषः। यथा,—
"सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोड़श भेदिताः॥"
("ताः पूर्व्वोक्ता अष्टादशभेदा लक्षणाः। सादृश्येतरसम्बन्धाः कार्य्यकारणभावादयः। अत्र शुद्धानां 'श्वेतो धावति' इत्यादीन्युदाहरणानि ज्ञेयानि। रूढ़ावुपादानलक्षणा सारोपा गौणी यथा 'एतानि तैलानि हेमन्ते सुखानि' अत्र तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिस्नेहेषु वर्त्तते। प्रयोजने यथा, राजकुमारेषु तत्सदृशेषु गच्छत्सु 'एते राजकुमारा गच्छन्ति।' रूढ़ावुपादानलक्षणा साध्यवसाना गौणी यथा, 'तैलानि हेमन्ते सुखानि।' प्रयोजने यथा, 'राजकुमारा गच्छन्ति।' रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा, 'राजा गौड़ेन्द्रः कण्टकं शोधयति।' प्रयोजने यथा, 'गौर्वाहीकः।' रूढ़ौ लक्षणा साध्यवसाना गौणी यथा, राजा कण्टकं शोधयति। प्रयोजने यथा, 'गौर्जल्पति।'

अत्र केचिदाहुः गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति। यदुक्तं, गोशब्दस्याग्रहीतसङ्केतं वाहीकार्थमभिधातुमसामर्थ्यात् गोशब्दार्थमात्रबोधनाच्च। अभिधाया विरतत्वात् विरतायाश्च पुनरुत्थानाभावात्। अन्ये पुनर्गोशब्देन वाहीकार्थो नाभिधीयते किन्तु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते। तदप्यन्ये न मन्यन्ते। तथाह्यत्र गोशब्दाद्वाहीकार्थः प्रतीयते न वा। आद्येऽपि गोशब्दादेव वा लक्षिताद्वा गुणात्। अविनाभावद्वारा तत्र न प्रथमः। वाहीकार्थेऽस्यासङ्केतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासम्भवात्। शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यते। न द्वितीयः। यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयते तदास्य वाहीकस्य सामानाधिकरण्यमसमञ्जसं स्यात्। तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्म्यसम्बन्धाद्वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। इयञ्च गुणयोगात् गौणी इत्युच्यते। पूर्व्वा तु उपचारामिश्रणात् शुद्धा। उपचारो हि नामात्यन्तं विशकलितयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्। यथा अग्निमाणवकयोः शुक्लपटयोस्तु नात्यन्तं भेदप्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा॥"

इति साहित्यदर्पणे । २ । १३ ॥) अन्यत् सर्व्वं
लक्षणाशब्दे द्रष्टव्यम् ॥
गौतमः, पु, (गोतमस्य ऋषेर्गोत्रापत्यमिति ।
"ऋष्यन्धकेति ।" ४ । १ । ११४ । इत्यण् ।)
मुनिविशेषः । स तु शतानन्दः । इति हेमचन्द्रः ॥
शाक्यवंशावतीर्णबुद्धमुनिविशेषः । तत्पर्य्यायः ।
शाक्यमुनिः २ शाक्यसिंहः ३ सर्व्वार्थसिद्धः ४
शौद्धोदनिः ५ अर्कबन्धुः ६ मायादेवीसुतः ७ ।
इत्यमरः । १ । १ । १५ ॥ खजित् ८ श्वेतकेतुः ६
धर्म्मकेतुः १० महामुनिः ११ महाज्ञानः १२
सर्व्वदर्शी १३ महाबोधिः १४ महाबलः १५ बहु-
क्षमः १६ त्रिमूर्त्तिः १७ सिद्धार्थः १८ शकः १६ ।
इति शब्दरत्नावली ॥ (अस्य हि गौतमीपुत्त्रत्वे
प्रमाणं यथा, ललितविस्तरे १५ अध्याये ।
"ते सान्तर्वेश्मभिर्मृगयन्ते । सान्तर्वेश्मभिर्मृगयमाणा
न पश्यन्ति स्म । महाप्रजावत्यपि गौतमी परि-
देवमाना महीतले परिवर्त्तते स्म राजानं
शुद्धोदनमेवाह । क्षिप्रं मां महाराज । पुत्त्रेण
सङ्गिनीं कुरुष्वेति ॥" वैवस्वतमन्वन्तरे सप्त-
र्षीणामन्यतमः । यदुक्तं हरिवंशे ७।३४—३५ ।
"अत्रिर्वशिष्ठो भगवान् काश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च ॥
तथैव पुत्त्रो भगवान् ऋचीकस्य महात्मनः ।
सप्तमो जमदग्निश्च ऋषयः साम्प्रतं दिवि ॥"
अयमेव तु विंशतितमे द्वापरयुगे वेदव्यासो-
बभूव । यथा, देवीभागवते । १ । ३ । ३१
"अत्रिरेकोनविंशेऽथ गौतमस्तु ततः परम् ॥"
कुरुकुलजधृतराष्ट्रपाण्डुसुतानामाचार्य्यः कृपः ।
गोतमवंशोत्पन्नत्वादेवास्य तथात्वम् । यथा,
हरिवंशे ३२ । ७५—७६ ।
"अवस्कन्नं शरस्तम्बे मिथुनं समपद्यत ।
कृपया तच्च जग्राह शान्तनुर्मृगयाङ्गतः ॥
कृपः स्मृतः स वै तस्मात् गौतमी च कृपी
तथा ।
एते शारद्वता प्रोक्ता एते ते गौतमाः स्मृताः ॥"
मुनिभेदः । स तु एकतद्वितादिमुनीनां पिता ।
यथा, महाभारते । ६ । ३६ । ७—६ ।
"आसन् पूर्व्वयुगे राजन् । मुनयो भ्रातरस्त्रयः ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ।
सर्व्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ॥
ब्रह्मलोकजितः सर्व्वे तपसा ब्रह्मवादिनः ।
तेषान्तु तपसा प्रीतो नियमेन दमेन च ॥
अभवद्गौतमो नित्यं पिता धर्म्मरतः सदा ॥"
स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६५ ॥)
गौतमसम्भवा, स्त्री, (गौतमः सम्भवो यस्याः ।
यद्वा, गौतमात् सम्भवतीति । सम्+भू+
अच् ।) गोदावरी नदी । इति राजनिर्घण्टः ॥
गौतमी, स्त्री, (गोतमस्य इयम् । तस्येदमित्यण् ।
ततः स्त्रियां ङीप् ।) दुर्गा । इति मेदिनी ॥
मे । ४३ ॥ (यथा, हरिवंशे । १७६ । ७ ।
"गौतमीं कंसघातार्थ यशोदानन्दवर्द्धिनीम् ॥")
राक्षसीविशेषः । इति शब्दरत्नावली ॥ गोदा-
वरी नदी । (यथा, गोः रामायणे । ६ । २।२७ ।
"यो नदीं गौतमीं रम्यां गिरिं पर्य्येति चार्व्वुदम् ॥"
तथा च हारीते प्रथमस्थाने सप्तमेऽध्याये ।
"पश्चिमाद्रिसमुद्भूता गौतमी पुण्यभावना ।
अस्याः शीतं जलं वापि कफवातविकारहृत् ॥
पित्तप्रशमनं वल्यं रक्तदोषविकारकृत् ।
पुण्या पयस्विनी वेणा प्रणीता च वरानना ॥
द्रोणा गोवर्द्धिनी चान्या गौतम्यानुगता इमाः ।
आसां जलं घनं नातिवातश्लेष्मविकारकृत् ॥")
गोरोचना । इति राजनिर्घण्टः ॥ (गोत
मस्यापत्यं स्त्री । गोतमवंशीयशरद्वतः कन्या
त्वादस्यास्तथात्वम् । कृपी । सा तु द्रोणस्य
भार्य्या अश्वत्थाम्नो माता च । यथा, महा-
भारते । १ । १३१ । २३ ।
"अलभत् गौतमी पुत्त्रमश्वत्थामानमेव च ॥"
गायत्त्रीरूपा महादेवी । यथा, देवीभाग-
वते । १२ । ६ । ४० ।
"गौतमी गामिनी गाधा गन्धर्व्वाप्सर.सेविता ॥")
गौधारः, पु, (गोधाया अपत्यम् । "आरगुदी-
चाम् ।" ४ । १ । १३० । इति आरक् ।)
गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥ गोधा
इति ख्यातः ॥
गौधेयः, पु, (गोधाया अपत्यम् । "शुभ्रादिभ्यश्च ।"
४ । १ । १२३ । इति ढक् ।) गोधिकात्मजः ।
इत्यमरः । २ । ५ । ६ ॥
गौधेरः, पु, (गोधाया अपत्यम् । "गोधाया
ढ्रक् ।" ४ । १ । १२६ । इति ढ्रक् ।) गोधि-
कात्मजः । इत्यमरः । २ । ५ । ६ ॥
गौरं, क्ली, (गुरते चित्तं यत्र । गुर श ढ उद्य-
मने+हलश्चेति घञ् । ततः स्वार्थे अण् । यद्वा,
गवते इति । गुङ शब्दे+"ऋज्रेन्द्रेति ।" उणां ।
२ । २८ । इति रन्प्रत्ययेन निपातनात् साधुः ।)
पद्मकेशरः । इति मेदिनी । रे २८ ॥ (पद्म-
केशरशब्देऽस्य विवृतिर्ज्ञातव्या ॥) कुङ्कुमम् ।
स्वर्णम् । इति राजनिर्घण्टः ॥
गौरः, पु, (गवते अव्यक्तं शब्दयतीति । गुङ शब्दे
+"ऋज्रेन्द्रेति ।" उणां । २ । २८ । रन्प्रत्ययेन
निपातनात् सिद्धम् ।) श्वेतसर्षपः ।
("गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ।
सर्षपस्तु रसे पाके कटुस्निग्ध. सतिक्तकः ॥
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः ।
रक्षोहरो जयेत् कण्डू कुष्ठ-कोठक्रिमिग्रहान् ॥
यथा रक्तस्तथा गौर किन्तु गौरो वरो मत ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
चन्द्रः । इति मेदिनी । रे । २८ ॥ धवदृक्षः । इति
राजनिर्घण्टः ॥ पीतवर्णः । गोरो इति भाषा ।
तद्वर्णकरणौषधं यथा,—
"कुशाद्यनालक्षारस्तु सगोमूत्रश्च तत्त्वचः ।
जलपिष्टा हरिद्रा च विद्रा मन्दानलेन हि ॥
माहिषेण पुरीषेण वेष्टिता वृषभध्वज ।
अस्या उद्वर्त्तनं कुर्य्यादङ्गगौरत्वमीश्वर ! ॥"
इति गारुडे १६४ अध्याय. ॥
श्वेतवर्णः । अरुणवर्णः । तद्वति त्रि । इत्यमरः ॥
(यथा, रामायणे । ४ । ३६ । १४ ।
"तरुणादित्यगौरैश्च शरगौरैश्च वानरैः ॥"
यथा च रघुः । २ । ३५ ।
"कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥")
श्रीचैतन्यदेवः । इत्यनन्तसंहिता ॥ (स्वग-
विशेषः । यथा, भागवते । ३ । १० । २२ ।
"खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः ! शृणु पञ्चनखान् पशून् ॥")
गौरः, त्रि, विशुद्धः । इति मेदिनी । रे । २७ ॥
गौरचन्द्रः, पु, (गौरेण तप्तहेमवर्णेन चन्दयति
आह्लादयतीति । चदि आह्लादे+णिच्+रन् ।)
श्रीचैतन्यदेवः । यथा,—
"कृष्णश्चैतन्यगौराङ्गौ गौरचन्द्र. शचीसुतः ।
प्रभुर्गौरो गौरहरिर्नामानि भक्तिदानि मे ॥"
इत्यनन्तसंहिता ॥
गौरजीरकः, पु, (गौरः शुक्लवर्णो जीरकः ।)
शुक्लजीरकः । शादा जीरा इति भाषा ॥ तत्-
पर्य्यायः । अजाजी २ श्वेतजीरकः ३ कणाह्वा ४
कणजीरः ५ कणा ६ सितदीप्यः ७ दीर्घकणा ८
सिताजाजी ६ गौराजाजी १० । अस्य गुणाः ।
हिमत्वम् । रुचिकारित्वम् । कटुत्वम् । मधु-
रत्वम् । दीपनत्वम् । कृमिविषाध्माननाशित्वम् ।
चक्षुर्हितत्वञ्च । इति राजनिर्घण्टः ॥
गौरत्वक, पुं (गौरी शुक्लवर्णा त्वग् यस्य ।)
इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥
गौरवं, क्ली, (गौरवं साधनत्वेनास्त्यस्य । "अर्श
आदिभ्योऽच् ।" ५।२।१२७ । इत्यच् ।) अभ्यु-
त्थानम् । इति हेमचन्द्र. ।३।१६४॥ (गुरोर्भावः ।
गुरु+"इगन्ताच्च लघुपूर्व्वात् ।" ५।१।१३१ ।
इत्यण् ।) गुरुत्वम् । इति मुग्धबोधम् ॥ (यथा,
महाभारते । १ । १६३।१८ ।
"शरीरगौरवादस्य शिला गात्रैर्विचूर्णिता ॥"
उत्कर्षः । यथा, रघुः । १४ । १८ ।
"शुश्राव तेभ्यः प्रभवादिदृत्तं
स्वविक्रमे गौरवमादधानम् ॥"
आदरः । यथा, कुमारे । ३ । १ ।
"प्रयोजनापेक्षितया प्रभूणां
प्रायश्चलं गौरवमाश्रितेषु ॥")
गौरवितः, त्रि, (गौरवं सञ्जातमस्येति तार-
कादित्वादितच् ।) आर्य्यः । तत्पर्य्यायः । आर्य्य-
मिश्रः २ । इति त्रिकाण्डशेषः ॥
गौरशाकः, पु, (गौरः गौरवर्णः शाकोऽस्येति ।)
मधूकवृक्षविशेषः । इति जटाधरः ॥
गौरसर्षपः पु, (गौरश्चासौ सर्षपश्चेति कर्म्म-
धारयः ।) श्वेतसर्षपः । (यथा,—
"रक्षोघ्नः सर्षपः श्वेतः सिद्धार्थो गौरसर्षपः ॥"
इति वैद्यकरत्नमालायाम् ॥)
तत्पर्य्यायः । अनदाः२ सिद्धार्थः३ भूतनाशनः ४

कटुस्नेहः ५ गन्धनः ६ कल्कनः ७ राजिकाफलः ८ तीक्ष्णकः ९ दुराधर्षः १० रक्षोघ्नः ११ कुष्ठनाशनः १२ सिद्धप्रयोजनः १३ सिद्धसाधनः १४ सितसर्षपः १५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातरक्तग्रहत्वग्दोषविषभूतव्रणनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥ हृद्यत्वम् । तीक्ष्णत्वम् । कफरक्तःकण्डूकुष्ठकोठकृमिनाशित्वम् । रक्तपित्ताग्निवर्द्धनत्वञ्च । इति भावप्रकाशः ॥ (परिमाणविशेषः । यथा, मनुः । ८ । १३३ ।
"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥")

गौरसुवर्ण, क्ली, (गौरं शुभ्रः अतएव सु शोभनो वर्णो यस्य ।) पत्रशाकविशेषः । तत्तु चित्रकूटदेशे प्रसिद्धम् । तत्पर्य्यायः । स्वर्णम् २ सुगन्धिकम् ३ भूमिजम् ४ वारिजम् ५ ह्रस्वम् ६ गन्धशाकम् ७ कटुह्मालम् ८ चूर्णशाकाङ्कः ९ । अस्य गुणाः । शिशिरत्वम् । कफपित्तज्वरदाहशमिभ्रान्तिरक्तश्रमनाशित्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टः ॥

गौरा, स्त्री, (गौरादिशब्दे वर्णवाचिन एव गौरशब्दस्य ग्रहणात् अत्र विशुद्धार्थपरत्वे टाप् ।) गौरी । इति द्विरूपकोषः ॥

गौराङ्ग, पुं, (गौरं तप्तकाञ्चनवर्णं अङ्गं कलेवरं यस्य ।) श्रीचैतन्यदेवः । यथा —
"गौराङ्ग गौरदीप्ताङ्ग पठेत् स्तोत्रं कृताञ्जलिः ।
नन्दगोपसुतस्यैव नमस्यामि गदाग्रजम् ॥"
इति ब्रह्मयामले चैतन्यकल्पे चैतन्यस्तवः ॥
अपि च कृष्णयामले ।
"गौराङ्गो नादगम्भीरः स्वनामामृतलालसः ॥"

गौरार्द्रक, पुं, (गौरवर्णं आर्द्रकं इव ।) स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६४ ॥

गौरास्य, पुं, (गौरं शुक्लवर्णं आस्यं मुखं यस्य ।) कृष्णवानरः । इति राजनिर्घण्टः ॥

गौरिका, स्त्री, (गौर्य्येव । गौरी + स्वार्थे कन् । ह्रस्वश्च ।) अष्टवर्षीया कन्या । इति शब्दरत्नावली ॥

गौरिल, पुं, (गौरवर्णोऽस्यास्तीति । गौर + वातूलकादिलच् ।) श्वेतसर्षपः । लौहचूर्णम् । इति मेदिनी । ८७ ॥

गौरी, स्त्री, (गौर + "षिद्गौरादिभ्यश्च ।" ४ । १ । ४१ । इति ङीष् ।) पार्व्वती । (यथा, रघुः । २ । २६ ।
"गौरीगुरोर्गह्वरमाविवेश ॥"
पार्व्वती किल गौरीरूपतया पीठस्थाने कान्यकुब्जे विराजते । यथा, देवीभागवते । ७।३०।५८ ।
"गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ॥")
असञ्जातरजः कन्या । (सा तु अष्टवर्षवयस्का कन्यका । यदुक्तं स्मृतौ ।
"अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ॥"
तथा च महाभारते । १ । २२२ । ४७ ।
"स्वैरिण्या सह गौर्य्या सुवेशानां सुवर्चसाम् ॥")
हरिद्रा । दारुहरिद्रा । गोरोचना । प्रियङ्गुवृक्षः । वसुधा । नदीविशेषः । (यथा, महाभारते । ६ । ९ । २५ ।
"वस्तुं सुवर्णां गौरीञ्च किम्पुनां बहिरस्वतीम् ॥")
गङ्गा । यथा, काशीखण्डे । २९ । ४९ ।
"गङ्गा गन्धवती गौरी गन्धर्व्वनगरप्रिया ॥")
वरुणभार्य्या । इति मेदिनी । रे । २८—२९ ॥
सूर्य्यवंशीयप्रसेनजिद्राजभार्य्या । यथा,—
"लेभे प्रसेनजिद्भार्य्या गौरीं नाम पतिव्रताम् ।
अभिशस्ता तु सा भर्त्त्रा नदी वै बाहुदाऽभवत् ॥"
इति हरिवंशः ॥
बुद्धशक्तिविशेषः । इति हेमचन्द्रः ॥ मञ्जिष्ठा । श्वेतदूर्व्वा । मल्लिका । तुलसी । सुवर्णकदली । आकाशमांसी । इति राजनिर्घण्टः ॥ रागिणीविशेषः । सा तु मालवरागपत्नी । तस्या रूपं यथा, सङ्गीतदामोदरे ।
"आराममध्यगता कुमारिका शारदेन्दुसुखलक्ष्मी ।
राज्ञी दाडिमयौवनं दधती कीरानने गौरी ॥"
(केषाञ्चित् मते तु इयं कौशिकरागस्य पत्नी । यदुक्तं सङ्गीतदर्पणे रागाध्याये । ३३ ।
"तोडी खाम्बावती गौरी गुणक्री ककुभा तथा ।
रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः ॥"
केषाञ्चित् मते इयं श्रीरागस्य पत्नी । यदुक्तं तत्रैव रागाध्याये । १४ ।
"मालश्री त्रिवणी गौरी केदारी मधुमाधवी ।
ततः पाहाडिका ज्ञेया श्रीरागस्य वराङ्गनाः ॥"
अस्या रागवेला तृतीयप्रहरात् परं अर्द्धरात्रावधि ।)

गौरीज, क्ली, (गौर्य्या जायते इति । जन् + ड ।) अभ्रकम् । इति राजनिर्घण्टः ॥

गौरीपुत्त्र, पुं, (गौर्य्याः पुत्त्रः ।) कार्त्तिकेयः । इति हलायुधः ॥

गौरीपुष्प, पुं, (गौरीप्रियं पुष्पमस्य ।) प्रियङ्गुवृक्षः । इति राजनिर्घण्टः ॥

गौरीललित, क्ली, (गौरीव हरिद्रेव ललितम् । पीतवर्णत्वादस्य तथात्वम् ।) हरितालम् । इति राजनिर्घण्टः ॥

गौरुतल्पिक, पुं, (गुरुतल्पं गुरुशय्यां गुरुपत्नीमित्यर्थः गच्छतीति । "गच्छतौ परदारादिभ्यः ।" ४ । ४ । १ । इत्यस्य वार्त्ति इति ठक् ।) गुरुपत्नीगामी । इति प्रायश्चित्तप्रकरणे धर्म्मशास्त्रम् ॥

गौलिक, पुं, (गुडे साधु । गुड + ठक । अस्य लत्वम् ।) मुष्ककवृक्षः । इति राजनिर्घण्टः ॥

गौल्य, क्ली, (गुडस्य भावः । गुड + ष्यञ् । अस्य लत्वम् ।) मधुरम् । इति राजनिर्घण्टः ॥

गौशतिक, त्रि, (गोशतमस्यास्तीति । गोशत + "एकगोपूर्व्वात् ठञ् नित्यम् ।" ५ । २ । ११८ । इति ठञ् ।) गोशतस्वामी । इति व्याकरणम् ॥ याहार एक शतगरु आछे इति भाषा ॥

गौष्ठीन, क्ली, (पूर्व्वं भूतं गोष्ठम् । गोष्ठ + "गोष्ठात् खञ् भूतपूर्व्वे ।" ५ । २ । १८ । इति खञ् ।) भूतपूर्व्वकगोस्थानम् । इत्यमरः । ३ । १ । १३ ॥ पूर्व्वेर गोठ इति भाषा ॥ (यथा, भट्टिः । ४ । २१ ।
"तासुवाच स गोष्ठीने वने स्त्रीपुंसभीषणौ ॥")

ग्रथ, इ ङ कौटिल्ये । इति कविकल्पद्रुमः ॥ (भ्वां आत्म-अक-सकं च-सेट् ।) रेफयुक्तः । कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इ, कर्म्मणि ग्रन्थ्यते । ङ, ग्रन्थते काष्ठं कुटिलं स्यादित्यर्थः । ग्रन्थते लता वायुः कुटिलां करोतीत्यर्थः । इति दुर्गादासः ॥

ग्रथित, त्रि, (ग्रथ्यते स्म इति । ग्रन्थ ग दर्भे + क्तः । ततो न लोपः ।) कृतग्रन्थनम् । गाँथा इति भाषा । तत्पर्य्यायः । ग्रन्थितम् २ दृब्धम् ३ । इत्यमरः । ३ । १ । ८६ ॥ गुम्फितम् ४ । (यथा, रघुः । ८ । ३४ ।
"कुसुमैर्ग्रथितामपार्थिवैः
स्रजमातोद्यशिरोनिवेशिताम् ॥")
आक्रान्तम् । छिन्नितम् । इति मेदिनी । ते । १०६ ॥

ग्रन्थ, कि ग दर्भे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वा-क्र्या च-पर-सकं-सेट् ।) रेफयुक्तः । दर्भो ग्रन्थनम् । कि, ग्रन्थयति ग्रन्थति । ग, ग्रथ्नाति मालां मालिकः । ग्रन्थिसङ्ग्रथयितुं हरयेशः । इति माघे चिन्त्यम् । इति दुर्गादासः ॥

ग्रन्थ, पुं, (ग्रन्थ ग दर्भे + भावे घञ् ।) गुम्फः । ग्रन्थना । धनम् । (ग्रथ्यते विरच्यते इति । ग्रन्थ + कर्म्मणि घञ् ।) शास्त्रम् । (यथा, महाभारते । १ । १ । ८० ।
"ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढं कुतूहलात् ॥")
द्वात्रिंशदक्षरनिर्मितिः । अनुष्टुप्छन्दः श्लोकः । इति हेमचन्द्रः ॥

ग्रन्थकर्त्ता, [कृ] त्रि, ग्रन्थं करोतीति । कृ + तृच्-प्रत्ययः । ग्रन्थकारः । पुस्तककारकः । शास्त्रकृत् ॥

ग्रन्थकुटी, स्त्री, (ग्रन्थस्य कुटी गृहादिस्थानम् ।) लेखस्थानम् । इति त्रिकाण्डशेषः ॥

ग्रन्थन, क्ली, (ग्रन्थ + भावे ल्युट् ।) गुम्फनम् । ग्रन्थना । तत्पर्य्यायः । सन्दर्भः २ रचना ३ गुम्फः ४ श्रन्थनम् ५ । इति हेमचन्द्रः ।३।३१७॥

ग्रन्थना, स्त्री, (ग्रन्थ + भावे युच् । स्त्रियां टाप् ।) ग्रन्थनम् । इति मुग्धबोधम् ॥

ग्रन्थि, पुं, (ग्रन्थ ग सन्दर्भे + "खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचरिभ्यश्च ।" उणां । ४ । १३९ । इति भावकरणादौ यथायथं इः ।) वंशादिसन्धिः । गाँटि इति भाषा । तत्पर्य्यायः । पर्व्व २ परुः ३ । इत्यमरः । २ । ४ । १६२ ॥ काण्डसन्धिः ४ । (यथा, आर्य्यासप्तशत्याम् ।१६८
"इक्षोरिव सुन्दरि । मानस्य ग्रन्थिरपि काम्यः ॥")
भद्रमुस्ता । छिन्नावली । पिण्डालुः । इति राजनिर्घण्टः ॥ (अन्योन्याध्यासः । मायापाशः । यथा, भागवते । १ । २ । २१ ।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ॥")
कौटिल्यम् । ग्रन्थिपर्णवृक्षः । (यथा, चरके सूत्रस्थाने तृतीयेऽध्याये ।
"मनःशिला त्वक्कुटजात् सकुष्ठः
सलोमशः सैड़गजः करञ्जः ।
ग्रन्थिश्च भौर्ज्जः करवीरमूलं
चूर्णानि साध्यानि तुषोदकेन ॥")
बन्धनम् । रुग्भेदः । इति मेदिनी । थे । ६ ॥
तस्य निदानसंप्राप्ती यथाह माधवकरः ।
"वातादयो मांसमसृक्प्रदुष्टाः
सन्दूष्य मेदश्च तथा शिराश्च ।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥"
तस्य वातिकरूपं यथा,—
"आयम्यते वृश्चति तुद्यते च
प्रत्यस्यते मथ्यति भिद्यते च ।
कृष्णो मृदुर्वस्तिरिवाततश्च
भिन्नः स्रवेच्चानिलजोऽस्रमच्छम् ॥"
पैत्तिकरूपं यथा,—
"दन्दह्यते धूप्यति चूष्यते च
पापच्यते प्रज्वलतीव चापि ।
रक्तः सपीतोऽप्यथवापि पित्तात्
भिन्नः स्रवेदुष्णमतीव चास्रम् ॥"
श्लैष्मिकरूपं यथा,—
"शीतो विवर्णोऽल्परुजोऽतिकण्डूः
पाषाणवत्संहननोपपन्नः ।
चिराभिवृद्धिश्च कफप्रकोपा-
द्भिन्नः स्रवेच्छुक्लघनञ्च पूयम् ॥"
(अथास्य सम्प्राप्तिकलक्षणं यथा,—
"कफप्रधानाः कुर्व्वन्ति मेदोमांसासृगामलाः ।
वृत्तोन्नतं यं श्वयथुं सग्रन्थिर्ग्रथनात् स्मृतः ॥
दोषास्रमांसमेदोऽस्थि शिराव्रणभवा नव ।
ते तत्र वातादायामतोदभेदान्वितोऽसितः ॥
स्थानात् स्थानान्तरगतिरकस्माद्धानिवृद्धिमान् ।
मृदुर्वस्तिरिवानद्धो विभिन्नोऽच्छस्रवत्यसृक् ॥
पित्तात् सदाहः पीताभो रक्तो वा पच्यते द्रुतम् ।
भिन्नोऽस्रमुष्णं स्रवति श्लेष्मणा नीरुजो घनः ॥
शीतः सवर्णः कण्डूमान् पक्वः पूयं स्रवेद्घनम् ।
दोषैर्दुष्टेऽसृजि ग्रन्थिर्भवेन्मूर्च्छत्सु जन्तुषु ॥
शिरामांसञ्च संश्रित्य सस्वापः पित्तलक्षणः ।
मांसलैर्दूषितं मांसाहारैश्च ग्रन्थिमावहेत् ॥
स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम् ।
प्रवृद्धं मेदुरैर्मेदोनीतं मांसेऽथवा त्वचि ॥
वायुना कुरुते ग्रन्थिं भृशं स्निग्धं मृदुं चलम् ।
श्लेष्मतुल्याकृतिं देहक्षयवृद्धिक्षयोदयम् ॥
स विभिन्नो घनं मेदस्ताम्रासितसितं स्रवेत् ।
अस्थिभङ्गाभिघाताभ्यामुन्नतावनतन्तु यत् ॥
सोऽस्थिग्रन्थिः पदान्ते च सहसाम्भोऽवगाहनात् ।
व्यायामाद्वा प्रतान्तस्य शिराजालं सशोषितम् ॥
वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च ।
निष्फुरं नीरुजं ग्रन्थिं कुरुते स शिराह्वयः ॥
अरूढे रूढमात्रे वा व्रणे सर्व्वरसाशिनः ।

सार्द्रे वा बन्धरहिते गात्रेऽश्माभिहतेऽथवा ॥
वातासमसृतं दुष्टं संशोष्य ग्रथितं व्रणम् ।
कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ॥
साध्या दोषास्रमेदोजा न तु स्थूलखराश्चलाः ।
मर्म्मकण्ठोदरस्थाश्च————————॥"
इति वाभटेनोत्तरस्थाने २९ अध्याये उक्तम् ॥)
तस्य चिकित्सा यथा,—
"स्वर्ज्जिकामूलकक्षारः शङ्खचूर्णसमन्वितः ।
एतेन विहितो लेपो हन्ति ग्रन्थिं तथार्ब्बुदम् ॥
ग्रन्थिर्न यो नश्यति भेषजेन
निष्काश्य तं शस्त्रचिकित्सकेन ।
जात्यादिपक्वेन घृतेन वैद्यो
व्रणेन चान्येन च सच्चिकित्सेत् ॥'
ग्रन्थीनुद्धृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये शोथे शस्त्रं प्रयुञ्जते ॥
अन्ये आचार्य्याः ।" इति भावप्रकाशः ॥
("ग्रन्थिष्वामेषु कर्त्तव्या यथास्वं शोफवत् क्रिया ।
बृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा ॥
स्नेहयेच्छुद्धिकामञ्च तीक्ष्णैः शुद्धस्य लेपनम् ।
सस्वेदं बहुशो ग्रन्थिं विमृद्नीयात् पुनः पुनः ॥
एष वाते विशेषेण क्रमः पित्तासृजे पुनः ।
जलौकसो हिमं सर्व्वं कफजे वातिको विधिः ॥
तथाप्यपक्वं छित्त्वैनं स्थिते रक्तेऽग्निना दहेत् ।
साध्यशेषं सशेषो हि पुनराप्यायते ध्रुवम् ॥
मांसव्रणोद्भवौ ग्रन्थी पाटयेदेवमेव च ।
कार्य्यं मेदोभवेऽप्येतत्तप्तैः फालादिभिश्च तम् ॥
प्रमृद्यात्तिलदिग्धेन च्छन्नं द्विगुणवाससा ।
शस्त्रेण पाटयित्वा वा दहेन्मेदसि सूद्धृते ॥
शिराग्रन्थौ नवे पेयं तैलं साहचरन्तथा ।
उपनाहोऽनिलहरैर्वस्तिकर्म्मशिराव्यधः ॥
अङ्गिकादेशेष्वनिलादिभिः स्यात्
स्वल्पधारी स्फुरणः शिराभिः ।
ग्रन्थिर्महान्मांसभवस्तनर्त्ति-
र्मेदोभवः स्निग्धतमश्चलश्च ॥
तं शोधितं स्वेदितमश्मकाष्ठैः
साङ्गुष्ठदण्डैर्विनयेदपक्वम् ।
विपाट्य चोद्धृत्य भिषक् सकोषं
शस्त्रेण दग्ध्वा व्रणवच्चिकित्सेत् ॥
अदग्ध ईषत् परिशोषितश्च
प्रयाति भूयोऽपि शनैर्विवृद्धिम् ।
तस्मादशेषः कुशलैः समन्ता-
च्छेद्यो भवेद्वीक्ष्य शरीरदेशान् ॥
शोषे कृते पाकवशेन शीर्य्येत्
ततः क्षतोत्थः प्रसरेद्विसर्पः ।
उपद्रवं तं प्रतिवारयेज्ज्ञः
स्वैर्भेषजैः पूर्व्वतरैर्यथोक्तैः ॥
ततः क्रमेणास्य यथाविधानं
व्रणं व्रणज्ञस्त्वरया चिकित्सेत् ॥"
इति चरके चिकित्सास्थाने १७ अध्यायः ॥
अपरा चिकित्सा च यथा,—
"ग्रन्थिष्वथामेषु भिषग्विदध्या-
च्छोफक्रियायां विहितं विधिज्ञः ।

रचेद्दलक्षापि नरस्य नित्यं
तदर्च्चितं व्याधिबलं निहन्ति ॥
तैलं पिबेत् सर्पिरथो द्वय वा
दत्त्वा वसां वा चिरतं विदध्यात् ।
अपेहि वातादशमूलसिद्धं
वैद्यस्तुःस्नेहमथो द्वयं वा ॥
हिंसाथ रोहिण्यमृताथ भार्गी
श्योनाकबिल्वागुरुकृष्णगन्धाः ।
गोजी च पिष्टा सह तालपत्र्या
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान् विविधांश्च कुर्य्या-
त्तथा प्रसिद्धानपरांश्च लेपान् ।
विदार्य्य वा पक्वमपोह्य पूयं
प्रक्षाल्य बिल्वार्कनरेन्द्रतोये ॥
तिलैः सपथ्याङ्गुलपत्रमिश्रैः
संशोधयेत् सैन्धवसंप्रयुक्तैः ।
शुद्धं व्रणं वाप्युपरोपयेत्तु-
स्तैलेन रास्नासवलान्वितेन ॥
विडङ्गयष्टीमधुकामृताभिः
सिद्धेन वाचीरसमन्वितेन ।
जलौकसः पित्तकृते हितास्तु
चीरोदकाभ्यां परिषेचनञ्च ॥
काकोलिवर्गस्य च शीतलानि
पिबेत् कषायाणि सशर्कराणि ।
द्राक्षारसेनेक्षुरसेन वापि
चूर्णं पिबेच्चापि हरीतकीनाम् ॥
मधूकजम्ब्वर्ज्जुनवेतसानां
त्वग्भि.प्रदाहानवचारयेत ।
सशर्करैर्वा तृणशून्यकन्दै-
र्दिह्यादभीक्ष्णं मुचुकुन्दकैर्वा ॥
विदार्य्य वा पक्वमपोह्य पूयं
धावेत् कषायेण वनस्पतीनाम् ।
तिलैः सयष्टीमधुकैर्विशोध्य
सर्पिः प्रयोज्यं मधुरैर्विपक्वम् ॥
हृतेषु दोषेषु यथानुपूर्व्व्या
ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु ।
स्विन्नस्य विम्लापनमेव कुर्य्या-
दङ्गुष्ठलोहोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकणन्ती
काकादनी तापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकालामदनैश्च विद्वान् ॥
अमर्म्मजातं शममप्रयात-
मपक्वमेवापहरेद्विदार्य्य ।
दहेत् स्थिते वासृजि सिद्धकर्म्मा
सद्यः क्षतोक्तञ्च विधिं विदध्यात् ॥
या मांसकन्दः कठिना हृत्य-
स्ताश्चैव योज्यस्तु विधिर्विधिज्ञैः ।
शस्त्रेण वापाद्य सुपक्वमाशु
प्रक्षालयेत् पथ्यतमैः कषायैः ॥
संशोधनैस्तञ्च विशोधयेयुः
क्षारोत्तरैः चौद्रघृतप्रगाढैः ।

शुद्धे च तैलं लवणारणीय
विडङ्गपाठारजनीविपक्वम् ॥
मेदःसमुत्थे तिलकल्कदिग्ध
दग्धोपरिष्टादृद्विगुणा पटान्तम् ।
हुताशतप्तेन मुहुः प्रमृज्या-
क्षोदेन धीमान् दहन हिताय ॥
प्रलिप्य दार्व्वीमथ लाक्षया वा
प्रतप्तया स्वेदनमस्य कार्य्यम् ।
निपात्य वा शस्त्रमपोह्य मेदो-
दहेत् सुपक्वन्त्वथवा विदार्य्यम् ॥
प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः
सुवर्च्चिकाद्यैर्हरितालमिश्रैः ।
ससैन्धवैः क्षौद्रघृतप्रगाढैः
क्षारोत्तरैरेनमभिप्रशोध्य ॥"

इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)

ग्रन्थिक, क्ली, (ग्रन्थिभिः कायति प्रकाशते इति । कै+कः ।) पिप्पलीमूलम् । (अस्य पर्य्याया यथा,
"ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) ग्रन्थिपर्णम् । गुग्गुलुः । इति मेदिनी । के । ६ ॥

ग्रन्थिकः, पुं, (ग्रन्थिभिः पर्व्वभिः कायतीति । ग्रन्थि+कै+कः ।) करीरः । (ग्रन्थिना कौटिल्येन कायतीति । कै+कः । यद्वा ग्रन्थः मञ्जिकास्यास्तीति ठन् ।) दैवज्ञः । (यथा, महाभारते । १४ । ७० । ७ ।
"तत्र मल्ला नटाश्चैव ग्रन्थिकाः सौख्यशायिकाः ।
सूतमागधसङ्घाश्चाप्यस्तुवंस्तं जनार्द्दनम् ॥")
सहदेवाख्यपाण्डवः । इति मेदिनी । के । ८१ ॥ (नकुलश्च । इयमाख्या तु यदानेन छद्मरूपिणा विराटगृहे वासः कृतस्तदैव जाता । यथा, महाभारते । ४ । ३ । २ ।

नकुल उवाच ।
"अश्वबन्धो भविष्यामि विराटनृपतेरहम् ।
सर्व्वथा ज्ञानसम्पन्नः कुशलः परिरक्षणे ।
ग्रन्थिको नाम नाम्नाहं कर्म्मैतत् सुप्रियं मम ॥")

ग्रन्थित, त्रि, (ग्रथ्यते स्म इति । ग्रथि+क्तः ।) ग्रथितम् । इत्यमरः । ३ । १ । ८६ ॥

ग्रन्थिदला, स्त्री, (ग्रन्थिर्दलेषु पत्रेषु यस्याः ।) मालाकन्दः । इति राजनिर्घण्टः ॥

ग्रन्थिदूर्व्वा, स्त्री, (ग्रन्थिबहुला दूर्व्वा । शाकपार्थिवादिवत् समासः ।) मालादूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिपर्णं, क्ली, (ग्रन्थिषु पर्णानि यस्य । ग्रन्थिप्रचुराणि पर्णानि यस्येति वा ।) द्रव्यविशेषः । गाँठियाला इति भाषा ॥ तत्पर्य्यायः । शुकम् २ वर्हिपुष्पम् ३ स्थौणेयम् ४ कुक्कुरम् ५ । इत्यमरः । २ । ४ । १३२ ॥ वर्हिःपुष्पम् ६ वर्हा ७ पुष्पम् ८ वर्हम् ९ शुकवर्हम् १० । इति तट्टीका ॥ स्थौणेयकम् ११ कुक्कुरपुष्पम् १२ गुत्सकम् १३ । इति रत्नमाला ॥ विशीर्णाख्यम् १४ खारामगुच्छकम् १५ वर्हिः १६ शुकपुच्छम् १७ शुकच्छदम् १८ । इति शब्दान्तरम् ॥ ग्रन्थिकम् १९ काकपुष्पम् २० नीलपुष्पम् २१ सुगन्धम् २२ तैलपर्णकम् २३ । अस्य गुणाः । तिक्तत्वम् । तीक्ष्णत्वम् । कटुत्वम् । उष्णत्वम् । दीपनत्वम् । लघुत्वम् । कफवातविषश्वासकण्डूदौर्गन्ध्यनाशित्वञ्च । इति भावप्रकाशः ॥ अस्य लेपनगुणः । रक्ततालक्षीरोद्यसज्वरनाशित्वम् । इति राजवल्लभः ॥

ग्रन्थिपर्णः, पुं, (ग्रन्थिः पर्व्व तत्प्रचुराणि पर्णान्यस्य ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ (चोरकशब्देऽस्य गुणादयो ज्ञेयाः ॥)

ग्रन्थिपर्णा, स्त्री, (ग्रन्थिपर्ण+टाप् ।) जतुकालता । इति राजनिर्घण्टः ॥

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण+गौरादित्वात् ङीष् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिफल, पुं, (ग्रन्थियुक्तं फलमस्य ।) शाकुरुण्डवृक्षः । कपित्थवृक्षः । मदनवृक्षः । इति राजनिर्घण्टः ॥

ग्रन्थिमत्फलः, पुं, (ग्रन्थिरस्यास्तीति मतुप् । ग्रन्थिमत् पर्व्वविशिष्टं फलं यस्य ।) लकुचः । इति राजनिर्घण्टः ॥

ग्रन्थिमान्, [त्] पुं, (ग्रन्थिरस्त्यस्यास्मिन् वा । ग्रन्थि+मतुप् ।) अस्थिसंहारकवृक्षः । हाड़भाङ्गा इति हाड़जोड़ा इति च भाषा । तत्पर्य्यायः । अस्थिसंहारी २ वज्राङ्गी ३ अस्थिशृङ्खला ४ । अस्य गुणाः । वातश्लेष्मभिदुर्नामनाशित्वम् । अस्थियोक्तृत्वम् । उष्णत्वम् । सारकत्वम् । अक्षिरोगपित्तकारित्वम् । रूक्षत्वम् । स्वादुत्वम् । लघुत्वम् । वृष्यत्वम् । पाचनत्वञ्च । इति भावप्रकाशः ॥ रत्नमालोक्तपर्य्याया राजवल्लभोक्तगुणाश्चास्थिसंहारशब्दे द्रष्टव्याः ॥ (ग्रन्थियुक्ते, त्रि । यथा, कुमारे । ३ । ४६ ।
"कण्ठप्रभासङ्गविशेषनीलां
कृष्णत्वचं ग्रन्थिमतीं दधानम् ॥")

ग्रन्थिमूल, क्ली, (ग्रन्थिर्मूले यस्य ।) गृञ्जनम् । इति राजनिर्घण्टः ॥

ग्रन्थिमूला, स्त्री, (ग्रन्थिबहुलं मूलं यस्याः । शाकपार्थिवादित्वात् समासः ।) मालादूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिल, क्ली, (ग्रन्थिर्विद्यतेऽस्य । ग्रन्थि+"पिच्छादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) पिप्पलीमूलम् । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति शब्दचन्द्रिका ॥

ग्रन्थिलः, पुं, (ग्रन्थिरस्यास्तीति । "पिच्छादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) विकङ्कतवृक्षः । वँइचि इति भाषा ॥ (पर्य्यायोऽस्य यथा,—
"विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) करीरवृक्षः । इत्यमरः । २।४।३७, ७७ ॥ तण्डुलीयशाकम् । क्षितावली । पिण्डालुः । चोरकनामगन्धद्रव्यम् । विकण्टकवृक्षः । इति राजनिर्घण्टः ॥ ग्रन्थियुक्ते त्रि । इति मेदिनी । ले । ८५ ॥ (यथा, आर्य्यासप्तशत्याम् । ५०० ।
"रोषेणेव मया सखि । वक्रोऽपि ग्रन्थिलोऽपि कठिनोऽपि ।
ऋजुतामनीयतायं सद्यः स्वेदेन वंश इव ॥")

ग्रन्थिला, स्त्री, (ग्रन्थिल+टाप् ।) भद्रमुस्ता । (भद्रमुस्ताशब्देऽस्या गुणादिकं ज्ञातव्यम् ॥) मालादूर्व्वा । गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिवर्ही, [न्] पुं, (ग्रन्थिभिर्वर्हते वर्द्धते इति । वृह वृद्धौ+णिनि ।) ग्रन्थिपर्णवृक्षः । इति शब्दचन्द्रिका ॥

ग्रन्थिहरः, पुं, (ग्रन्थिं कौटिल्यं हरति मरकतकुटिलतां कार्य्यजटिलतां वा विभेदयतीत्यर्थः । ग्रन्थि+हृ+अच् ।) अमात्यः । मन्त्री । इति त्रिकाण्डशेषः ॥

ग्रन्थीक, क्ली, (ग्रन्थिभिः कायतीति । ग्रन्थि+कै+क । निपातनात् दीर्घत्वम् ।) ग्रन्थिकम् । पिप्पलीमूलम् । इति द्विरूपकोषः ॥

ग्रस, उ ङ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) रेफयुक्तः । उ, ग्रसित्वा ग्रस्त्वा । ङ, ग्रसते । हिमांशुमाशु ग्रसते । इति माघः । इति दुर्गादासः ॥

ग्रस, कि ग्रासे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं सक सेट् ।) रेफयुक्तः । कि, ग्रासयति फलं लोकः । ग्रसति तव मुखेन्दुं पूर्णचन्द्र विहाय । इमं ग्रहणे पठन्ति केचित् । इति दुर्गादासः ॥

ग्रस्त, त्रि, (ग्रस्यते स्म इति । ग्रस+क्तः । "ग्रस्त विभाषा ।" ७ । २ । १५ । इति इडभावः ।) लुप्तवर्णपदम् । असम्पूर्णवाक्यम् । मुक्तम् । (यथा, रामायणे । २ । ४२ । १२ ।
"राज्ञो नातिबभौ रूपं ग्रस्तस्यांशुमतो यथा ॥")
खादितम् । इत्यमरः । ३ । १ । २० ॥ (आक्रान्तम् । यथा, याज्ञवल्क्ये । ३ । २४४ ।
"दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा ॥")

ग्रह, ग ञ ग्रहणे । इति कविकल्पद्रुमः ॥ (क्र्या-उभ-सक-सेट् ।) ग ञ, गृह्णाति गृह्णीते । इति दुर्गादासः ॥

ग्रह स कि आदाने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-पर-सक- सेट् ।) स, अग्रहीत् अग्राहीत् । कि, ग्राहयति ग्रहति । एवकारादेरेव मन्यते तत्राप्यात्मनेपदी एव । इति दुर्गादासः ॥

ग्रह, पुं (गृह्णाति गतिविशेषानिति । यद्वा, गृह्णाति फलदातृत्वेन जीवानिति । ग्रह+"विभाषा ग्रहः ।" ३ । १ । १४३ । इति पक्षे अच् ।) सूर्य्यादिनव । यथा । रविसोममङ्गलबुधबृहस्पतिशुक्रशनिराहुकेतव । (यदुक्तम्,—
"सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः ॥"
"लोकानन्दीन् स्वरान् धातून् मुनीन् द्वीपान् ग्रहानपि ।
समिधः सप्त सञ्जाताः सप्तजिह्वा हविर्भुजः ॥"

इत्यनेन ग्रहाणां यत् सप्तत्वमुक्तं तत् वराह-मतानुसारेणेत्यवधेयम्। एतेन राहुकेत्वोर्ग्रहत्वं सर्व्वे नाद्रियन्ते इति सूचितम् ॥) तेषामष्टधा गतिर्यथा। वक्रा १ अतिवक्रा २ कुटिला ३ मन्दा ४ मन्दतरा ५ समा ६ शीघ्रा ७ शीघ्र-तरा ८। इति ज्योतिषम् ॥ तेषां ध्यानानि यथा। तत्र सूर्य्यस्य ध्यानम्।

"क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम्।
पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम् ॥
शिवाधिदेवतं सूर्य्यं वह्निप्रत्यधिदेवतम् ॥" * ॥

सोमस्य ध्यानम्।

"सामुद्रं वैश्यमात्रेयं हस्तमात्रं सिताम्बरम्।
श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम् ॥
दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदेवतम्।
जलप्रत्यधिदेवञ्च सूर्य्यास्यमाह्वयेत्तथा ॥" * ॥

मङ्गलस्य ध्यानम्।

"आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलम्।
आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम् ॥
दक्षिणोर्द्ध्वक्रमाच्छक्तिवराभयगदाकरम्।
आदित्याभिमुखं देवं तद्वदेव समाह्वयेत् ॥
स्कन्दाधिदेवतं भौमं क्षितिप्रत्यधिदेवतम् ॥"* ॥

बुधस्य ध्यानम्।

"मागधं द्व्यङ्गुलात्रेयं वैश्यं पीतं चतुर्भुजम्।
वामोर्द्ध्वक्रमतश्चर्म्मगदावरदखड्गिनम् ॥
सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाह्वयेत्।
नारायणाधिदेवञ्च विष्णुप्रत्यधिदेवतम् ॥" * ॥

बृहस्पतेः ध्यानम्।

"द्विजमाङ्गिरसं पीतं सैन्धवञ्च षडङ्गुलम्।
ध्यात्वा पीताम्बरं जीवं सरोजस्थं चतुर्भुजम् ॥
दण्डोर्द्ध्वादक्षवरदकरकादण्डमाह्वयेत्।
ब्रह्माधिदेवं सूर्य्यास्यमिन्द्रप्रत्यधिदेवतम् ॥" * ॥

शुक्रस्य ध्यानम्।

"शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्।
पद्मस्थमाह्वयेत् सूर्य्यमुखं श्वेतं चतुर्भुजम् ॥
सदाक्षवरकरकादण्डहस्तं सिताम्बरम्।
शक्राधिदेवतं ध्यायेत् शचीप्रत्यधिदेवतम् ॥"* ॥

शनेर्ध्यानम्।

"सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम्।
कृष्णं कृष्णाम्बरं गृध्रगतं सौरिं चतुर्भुजम् ॥
सक्षद्बाणवरं शूलधनुर्हस्तं समाह्वयेत्।
यमाधिदेवतं प्रजापतिप्रत्यधिदेवतम् ॥" * ॥

राहोर्ध्यानम्।

"राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्।
कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाह्वयेत् ॥
'चतुर्ब्बाहुं खड्गवरशूलचर्म्मकरन्तथा।
कालाधिदेवं सूर्य्यास्यं सर्पप्रत्यधिदेवतम् ॥" * ॥

केतूनां ध्यानम्।

"कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम्।
धूम्रं गृध्रगतं शूद्रमाह्वयेद्विकृताननम् ॥
सूर्य्यास्यं धूम्रवसनं वरदं गदिनं तथा।
चित्रगुप्ताधिदेवञ्च ब्रह्मप्रत्यधिदेवतम् ॥"

इति ग्रहयागतत्त्वम् ॥

तेषां कामरूपे स्थानानि ध्यानमन्त्रादिश्च यथा,

"पूर्व्वे सुमदनायास्तु ब्रह्मक्षेत्रस्य पश्चिमे।
महाक्षेत्रं यत्र देव आदित्यः सततं स्थितः ॥
भैरवस्य हितार्थाय यदा सर्व्वे सुराः स्थिताः।
कामरूपे महापीठे ब्रह्मेन्द्रवरुणादयः ॥
तदा तत्त्वाह्वये शैले श्रीसूर्य्योऽपि व्यवस्थितः।
त्रिस्रोता नाम तस्यास्ति नदी पूर्व्वदिशि स्थिता ॥
कापोतं करणं पश्चाद्यस्य कुण्डद्वय स्थितम्।
कापोतकुण्डे विधिवत् स्नात्वा करणकुण्डके ॥
तत्त्वाचलं समारुह्य संपूज्य च दिवाकरम्।
सकृदेव नरो याति भास्करस्य गृहं प्रति ॥
सूर्य्यरश्मिसमुद्भूत। कापोत। करणान्वित।।
पुण्यतोय। महाघोरं पापं कापोत। मे हर।॥
इत्यनेन तु मन्त्रेण स्नात्वा कापोतपुष्करे।
करणं समुपस्पृश्य तत्त्वशैले रविं यजेत् ॥
त्रिविधं ब्रह्मबीजन्तु सहस्रपदमन्ततः।
रश्मयेति चतुर्थ्यन्तं देवतायाः शुचेस्ततः ॥
अङ्गबीजमिदं प्रोक्तमादित्यस्यातिकामदम् ॥"

ध्यानं यथा,—

"पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः।
सप्ताश्वः सप्तरज्जुश्च द्विभुजो भास्करः सदा ॥
वर्त्तुलं मण्डलं चास्य अष्टपत्रसमन्वितम्।
चाङ्गुष्ठाद्यङ्गुलीनान्तु हृदादीना तथा च षट् ॥
अङ्गमन्त्रेण संयुक्त उपान्त्यो वह्निसंयुतः।
सर्व्वन्यासे समुद्दिष्टो मन्त्रः सर्व्वफलप्रदः ॥
हृच्छिरस्तु शिखावर्म्मनेत्रास्योदरपृष्ठतः।
बाह्वोः पाण्योर्जङ्घयोस्तु पादयोश्चापि विन्यसेत् ॥
जघने तु समस्तानि क्रमान्मन्त्राक्षराणि तु।
क्रमश्चोत्तरतन्त्रोक्तः पूजनेऽस्य प्रकीर्त्तितः ॥
विसर्ज्जनं तथैशान्या विद्याद्या दलशक्तयः।
निर्म्माल्यधृग्दण्डचण्डौ माठराद्यास्तु पार्श्वयः ॥
बीजमुत्तरतन्त्रस्य पूर्व्वतः प्रतिपादितम्।
अनेन विधिना तत्र पूजयित्वा सुरोत्तमम् ॥
स कामानखिलान् प्राप्य इह लोके स उत्तमः।
सुखी शेषे ततो गच्छेद्भास्करस्यालयं प्रति ॥१॥"

इति कालिकापुराणे ८० अध्यायः ॥

"पूर्व्वे वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः।
त्रिकोणताम्रसंकाशस्तदूर्द्ध्वे चन्द्रमण्डलम् ॥
द्वितीयवर्गस्याद्यन्तु बिन्दिन्दुभ्यामलङ्कृतम्।
चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत् ॥
अद्यापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः।
प्रदक्षिणीकरोत्येव दशभिश्चाश्वभिर्युतः ॥
तस्यैव पूर्व्वभागे तु सोमकुण्डाह्वय सरः।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते ॥
स्वर्गादवरतश्चन्द्रः कामाख्यासेवने यदा।
तदा तद्रश्मिसङ्घातनिःसृतास्तोयराशयः ॥
तैस्तोयैर्व्वासवः कुण्डमकरोदिन्द्रचन्द्रयोः।
मध्ये पुण्यतमस्थाने स्वयं ब्रह्मशिलोपरि ॥
चन्द्ररश्मिसमुद्भूतचन्द्रकुण्ड महोदधे।
सुधासवण साक्षात् त्वं चन्द्र कलुषं हर ॥
इत्यनेन तु मन्त्रेण यः स्नात्वा चन्द्रपाथसि।
चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः ॥
अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते।
परत्र चन्द्रभवनं भित्त्वा याति परं पदम् ॥"

ध्यान यथा,—

"श्वेतः श्वेताम्बरधरो दशाश्वो हेमभूषितः।
गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी ॥२॥
पूर्व्वस्या कर्पटाख्यास्तु शैलाश्चित्र इति स्मृतः।
यः पूर्व्वभागशान्तोऽभूद्दिशाग्नेय्यां व्यवस्थितः ॥
पीठस्य ब्राह्मणाश्वस्तु अर्व्वाक् पर्व्वत उच्यते।
तस्मिन् वसन्ति सततं ग्रहा राजन्। यथेच्छया ॥
तत्र तान् पूजयेद्यस्तु स नाप्नोत्यापदं क्वचित्।
रूपं मन्त्रश्च सूर्य्यस्य चन्द्रस्य प्रतिपादितम्।
सप्तानामितरेषान्तु मन्त्रं रूपं शृणुष्व मे ॥
रक्ताम्बरधरः शूली शक्तिमांश्च गदाधरः।
चतुर्भुजो मेषरथो वरदो मङ्गलो मतः ॥ ३ ॥
पीताम्बरधरः शूली पीतमाल्यानुलेपनः।
खड्गचर्म्मगदापाणिः सिंहस्थो वरदो बुधः ॥४॥
स्वर्णगौरः पीतवासाः स्वर्णपङ्कजसंस्थितः।
माला कमण्डलु दण्डं वामेन वरदायकम् ॥
चतुर्भुजं सुसम्बद्धं चिन्तयेद्देवतीर्थकम्।
सर्व्वैर्द्देवगणैर्नित्यं नम्यमानं मनोहरम् ॥५॥
शुक्लवस्त्रं शुक्लवर्णं शक्लनागोपरिस्थितम्।
चतुर्भुजं चाक्षमालां पुस्तकञ्च वराभये ॥
क्रमाद्दक्षिणवामाभ्यां धत्ते दैत्यगुरुः सदा ॥६॥
इन्द्रनीलनिभः शूली वरदो गृध्रवाहनः।
पाशबाणासनधरो ध्यातव्योऽर्कसुतः सदा ॥७॥
कामदेवस्य बीजन्तु मन्त्रं भौमस्य कीर्त्तितम्। म।
दुर्गाया नेत्रबीजस्य यत्तु मध्याक्षरं शुभम्।
तन्मन्त्रं शशिपुत्त्रस्य सर्व्वकामफलप्रदम् ॥ बु ॥
भकारपञ्चमो यस्तु चतुर्थस्वरसंयुतः।
गणेशबीज तदिदं गुरोर्म्मन्त्रं प्रकीर्त्तितम् ॥ बृ ॥
बिन्दिन्दुसंयुतश्चापि पूर्व्ववर्णद्वयं पुनः।
सप्तमस्वरसंयुक्तो भकारस्त्वादिरन्तरम् ॥
प्रान्तवर्गाद्यक्षरन्तु बिन्दिन्दुभ्यां समन्वितम्।
भवेच्छुक्रस्य बीजन्तु सर्व्वकामसमृद्धिदम् ॥ शु ॥
प्रान्तवर्गाद्यक्षरन्तु चन्द्रबिन्दुसमन्वितम्।
आद्यमन्त्यस्वरोपेत तदेवेन्द्वादिसंयुतम्।
शनैश्चरस्य मन्त्रोऽयं सर्व्वदोषविनाशनः ॥ श ॥
बिन्दुचन्द्रसमायुक्तं नामाद्यक्षर एव वा।
तेषां सर्व्वग्रहाणां वै मन्त्रसङ्घः प्रकीर्त्तितः ॥
शान्तिके पौष्टिके कार्य्ये एभिर्मन्त्रैर्ग्रहानिमान्।
पूजयेत् सर्व्वदा धीरो भूतिकामो महामतिः ॥
वरदाभयहस्तश्च खड्गचर्म्मधरस्तथा।
सिंहासनगतः कृष्णो राहुर्धीरैः प्रचक्ष्यते ॥८॥
धूम्रवर्णो विशालाक्षः पुच्छरूपी चतुर्भुजः।
खड्गचर्म्मगदाबाणपाणिः केतुः शवासनः ॥९॥
उपान्तादिद्वादशेन स्वरेण सहितः पुनः।
उपान्तपञ्चमेनेन्दुबिन्दुभ्यां सहितावुभौ ॥
मन्त्रोऽयमनुलोमेन राहोः केतोर्विलोमतः।
चाद्याक्षर बिन्दुमद्वा मन्त्रमुक्त तथैतयो ॥रा। के
एवं चित्रे शैलवरे पूजयित्वा नवग्रहान्।
अभीष्टान् लभते कामान्नरः शान्तिं तथोत्तमाम् ॥"

इति कालिकापुराणे ८१ अध्यायः ॥ * ॥

(अथ ग्रहयुत्यधिकारो यथा,—
"ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ ।
समागमः शशाङ्केन सूर्य्येणास्तमनं सह ॥
शीघ्रे मन्दाधिकेऽतीते संयोगो भवितान्यथा ।
द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्य्ययात् ॥
प्राग्यायिन्यधिकेऽतीतो वक्रिण्येष्यः समागमः ॥
ग्रहान्तरकलाः स्वस्वभुक्तिलिप्तासमाहताः ।
भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः ॥
द्वयोर्वक्रिणयथैकस्मिन् भुक्तियोगेन भाजयेत् ॥
लब्धं लिप्तादिकं शोध्यं गते देयं भविष्यति ।
विपर्य्ययाद्वक्रगत्योरेकस्मिंस्तु धनव्ययौ ॥
समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ ।
विवरं तद्वदुद्धृत्य दिनादि फलमिष्यते ॥
कृत्वा दिनक्षपामानं तथा विक्षेपलिप्तिकाः ।
नतोन्नतं साधयित्वा स्वकालक्षवशात्तयोः ॥
त्रिघ्नच्छाययाभ्यस्ताद्विक्षेपाद् द्वादशोद्धृतात् ।
फलं स्वनतनाडीघ्नं स्वदिनार्द्धविभाजितम् ॥
लब्धं प्राच्यामृणं सौम्याद्विक्षेपात् पश्चिमे धनम् ।
दक्षिणे प्राक्कपाले स्वं पश्चिमे तु तथा व्ययः ॥
सत्रिभग्रहजक्रान्तिभागघ्नाः क्षेपलिप्तिकाः ।
विकला स्वमृणं क्रान्तिक्षेपयोर्भिन्नतुल्ययोः ॥
नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने ।
शृङ्गोन्नतौ तु चन्द्रस्य दृक्कर्म्मादाविदं स्मृतम् ॥
तात्कालिकौ पुनः कार्य्यौ विक्षेपौ च तयोस्ततः ।
दिक् तुल्ये त्वन्तरं भेदे योगः शिष्टं ग्रहान्तरम् ॥
कुजार्किज्ञामरेज्यानां त्रिंशदर्द्धार्द्धवर्द्धिताः ।
विष्कम्भाश्चन्द्रकक्षायां भृगोः षष्टिरुदाहृता ॥
त्रिचतुःकर्णयुक्त्याप्तास्ते द्विघ्नास्त्रिज्यया हृताः ।
स्फुटाः स्वकर्णास्तिथ्याप्ता भवेयुर्मानलिप्तिकाः ॥
छायाभूमौ विपर्य्यस्ते स्वच्छायाग्रे तु दर्शयेत् ।
ग्रहः स्वदर्पणान्तस्थः शङ्क्वग्रे सम्प्रदृश्यते ॥
पञ्चहस्तोच्छ्रितौ शङ्कू यथादिग्भ्रमसंस्थितौ ।
ग्रहान्तरेण विक्षिप्तावधो हस्तनिखातगौ ॥
छायाकर्णौ ततो दद्याच्छायाग्राच्छङ्कुमूर्द्धगौ ।
छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत् ॥
स्वशङ्कुमूर्द्धगौ व्योम्नि ग्रहौ दृक्तुल्यतामितौ ।
उल्लेखं तारकास्पर्शाद्भेदे भेदः प्रकीर्त्त्यते ॥
युद्धमंशुविमर्द्दाख्यमंशुयोगे परस्परम् ।
अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदणुः ॥
समागमोंऽशादधिके भवतश्चेद्बलान्वितौ ।
अपसव्ये जितो युद्धे पिहितोऽणुरदीप्तिमान् ॥
रूक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः ।
उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येऽपि यो
बली ॥
आसन्नावप्युभौ दीप्तौ भवतश्चेत् समागमः ।
स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ ॥
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी ।
शशाङ्केनैवमेतेषां कुर्य्यात् संयोगसाधनम् ॥
भावाभावाय लोकानां कल्पनेयं प्रदर्शिता ।
स्वमार्गगाः प्रयान्त्येते दूरमन्योन्यमाश्रिताः ॥"
इति सूर्य्यसिद्धान्ते ग्रहयुत्यधिकारः ॥
अथ ग्रहाणां राश्यधिपत्वकथनं ग्रहभावप्रकाशे
यथा,—
"मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाभृतोः ।
बुधः कन्यामिथुनयोः प्रोक्तः कर्कस्य चन्द्रमाः ॥
स्यान्मीनधन्विनोर्जीवः शनिर्मकरकुम्भयोः ।
सिंहस्याधिपतिः सूर्य्यः कथितो गणकोत्तमैः ॥"
अथ ग्रहाणामुच्चनीचत्वकथनं तत्रैव यथा,—
"रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्कौ च कन्यामीनौ बुधस्य तु ॥
जीवस्य कर्कमकरौ मीनकन्ये सितस्य च ।
तुलामेषौ च मन्दस्य उच्चनीचावुदाहृतौ ॥"
अथ ग्रहाणामन्योन्यं मित्रशात्रवमाह तत्रैव ।
"रवीन्दुभौमगुरवो ज्ञशुक्रशनिराहवः ।
स्वस्मिन् मित्राणि चत्वारि परस्मिन् शात्रवं
स्मृताः ॥
राहुरव्योः परं वैरं गुरुभार्गवयोरपि ।
हिमांशुबुधयोर्वैरं विवस्वन्मन्दयोरपि ॥"
अथ ग्रहाणां प्रभातादिकालज्ञानमाह तत्रैव,
"प्रभातमिन्दुजगुरू मध्याह्नं रविभूमिजौ ।
अपराह्णं भार्गवेन्दू सन्ध्यां मन्दभुजङ्गमौ ॥"
अथ ग्रहाणां दृष्टिकथनं तत्रैव यथा,—
"तिर्य्यग्दृशौ बुधसितौ भौमार्कौ व्योमदर्शिनौ ।
जीवेन्दू समदृष्टी च शनिराहू अधोदृशौ ॥"
अथ ग्रहाणां विचरणस्थानानि तत्रैव यथा,—
"भार्गवेन्दू जलचरौ ज्ञजीवौ ग्रामचारिणौ ।
राहुशितिजमन्दार्कान् भुवतेऽरण्यचारिणः ॥"
अथ ग्रहाणां पित्तादिधातुज्ञानमाह तत्रैव
"पित्तं प्रभाकरक्ष्माजौ श्लेष्मा भार्गवशीतगू ।
ज्ञगुरू समधातू च पवनौ राहुमन्दगौ ॥"
अथ ग्रहाणां रसज्ञानमाह तत्रैव ।
"कुजार्कौ कटुकौ जीवो मधुरस्तुवरो बुधः ।
क्षाराम्लौ चन्द्रभृगुजौ तीक्ष्णौ सपार्कनन्दनौ ॥"
अथ ग्रहाणां धातुमूलादिचिन्ताज्ञानमाह ।
"मन्देन्दूरगभौमाः स्युर्धातु सविदभार्गवौ ।
मूलं जीवश्च सौम्यश्च जीवं प्राहुर्महाधियः ॥"
अथ ग्रहाणां पदज्ञानमाह तत्रैव ।
"द्विपदौ भार्गवगुरू भूपुत्रार्कौ चतुष्पदौ ।
पक्षिणौ बुधशौरी च चन्द्रराहू सरीसृपौ ॥"
अथ ग्रहाणां जातिविशेषमाह ।
"विप्रौ शुक्रगुरू क्षत्त्रौ कुजार्कौ शूद्र इन्दुजः ।
इन्दुर्वैश्यः स्मृतौ म्लेच्छौ सैंहिकेयशनैश्चरौ ॥"
अथ ग्रहाणां देहादीनां स्वरूपमाह ।
"स्थूल इन्दुः सितः षण्डः चतुरस्रौ कुजो भृगुः ।
वर्त्तुलौ सोमधिषणौ दीर्घौ शनिभुजङ्गमौ ॥"
अथ ग्रहाणां वर्णस्वरूपमाह तत्रैव ।
"रक्तवर्णः कुजः प्रोक्तो धिषणः कनकद्युतिः ।
शुकपिच्छसमः सौम्यो गौरकान्तिरथोष्णगुः ॥
मन्दारस्यार्कपुष्पस्य समद्युतिरथोष्णगुः ।
कविरत्यन्तधवलः फणी कृष्णः शनिस्तथा ॥"
ग्रहाणां धातुचिन्तामाह तत्रैव ।
"शुक्रे चन्द्रे भवद्रौप्यं बुधे स्वर्णमुदाहृतम् ।
गुरौ रत्नयुतं हेम सूर्य्ये मौक्तिकमुच्यते ॥
भौमे त्रपुः शनौ लौहं राहावश्मानि कीर्त्तयेत् ।
धातोर्विनिश्चये ज्ञाते विशेषः स्यादुदाहृतः ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदाश्मानमिष्टकानिचयो बुधे ॥
भृगौ स्थानं कुजे प्रोक्तं शनिराहू च सान्त्वभृः ।
अमीभिर्हि युकस्थाने नष्टभूमिं विलोकयेत् ॥"
अथ ग्रहाणां लिङ्गज्ञानमाह तत्रैव ।
"जीवमङ्गलमार्त्तण्डान् शंसन्ति पुरुषान् बुधाः ।
सोमसोमजमन्दा हि भृगुपुत्रास्तु योषितः ॥"
अथ ग्रहाणां वयोज्ञानमाह तत्रैव ।
"युवा कुजः शिशुः सौम्यः शशिशुक्रौ च मध्यमौ ।
मन्दमार्त्तण्डदैवेज्यफणिनः स्थविरा ग्रहाः ॥"
अथ ग्रहाणां प्रकृतिस्वरूपमाह तत्रैव ।
"भौममन्दार्कभोगीन्द्राः प्रकृत्या दुःखदायकाः ।
भृगुश्वेतकिरणशुक्राः सुखकराः सदा ॥"
अथ ग्रहाणां राशिभोगकालनिरूपणं यदुक्तं
ज्योतिषे ।
"रविर्मासं निशानाथः सपाददिवसद्वयम् ।
पक्षत्रयं भूमिपुत्त्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशद्दिनं भृगुः ।
शनिः सार्द्धद्वयं वर्षं स्वर्भानुः सार्द्धवत्सरम् ॥"
ग्रहाणां स्तुत्यादिकन्तु नवग्रहशब्दे द्रष्टव्यम् ॥)
तेषां दशा तत्फलादि च दशाशब्दे गरुड-
पुराणे ६० अध्याये च द्रष्टव्यम् ॥ * ॥
अथ नवग्रहयागविधानादि यथा,—
याज्ञवल्क्य उवाच ।
"श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुरभिचार-
वान् ।
ग्रहयज्ञं समं कुर्य्यात् ग्रहाश्चैते बुधैः स्मृताः ॥
सूर्य्यः सोमो मङ्गलश्च बुधश्चैव बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुः कुर्य्यात् ग्रहांस्तथा ॥
ताम्रकात् स्फटिकाद्रक्तचन्दनात् स्वर्णकादुभौ ।
रजतादयसः सीसात् कांस्यात् वस्त्रान् निबोधत ॥
रक्तः शुक्लस्तथा रक्तः पीतः पीतः सितोऽसितः ।
कृष्णः कृष्णः क्रमाद्वर्णा द्रव्याणि सुनयस्तत ॥
स्थापयेद्ग्रहवर्णानि होमार्थं प्रलिखेत् पटे ।
सवर्णानि प्रदेयानि वासांसि कुसुमानि च ॥
गन्धाश्च वलयश्चैव धूपो देयश्च गुग्गुलुः ।
कर्त्तव्यास्तत्र मन्त्रैश्च चरवः प्रतिदैवतम् ॥
आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत् ।
उद्बुध्यस्वेति जुहुयादृग्भिरेव यथाक्रमम् ॥
बृहस्पतेऽतियदर्य्येति सर्व्वेऽन्नात् परिस्रुतः ।
शन्नो देवीस्तत काण्डात् केतुं कृण्वन्निति क्रमात् ॥
अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः ।
औडुम्बरः शमी दूर्व्वा कुशश्च समिधः क्रमात् ॥
होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ।
गुडौदनं पायसञ्च हविष्यं क्षीरयष्टिकम् ॥
दध्योदनं हविः पूपान्मांसं चित्रान्नमेव च ।
दद्याद्ग्रहक्रमादेतान् ग्रहेभ्यो भोजनं सतः ॥
धेनुः शङ्खस्तथानड्वान् हेम वासो हयस्तथा ।
कृष्णा गौरायसश्छाग एता वै दक्षिणाः क्रमात् ॥
ग्रहाः पूज्याः सदा यस्माद्राज्यादि प्राप्यते फलम् ॥"
इति गारुडे १०१ अध्यायः ॥

अथ वेदभेदे ग्रहादीनां मन्त्रभेदाः क्रमशः प्रदर्श्यन्ते ।

	ऋग्वेदिनाम्	यजुर्वेदिनाम्	सामवेदिनाम्	अथर्ववेदिनाम्
सूर्य्यस्य	आ कृष्णेन रजसा ।१।३५।२	आ कृष्णेन रजसा। वा: ३३।४३	उदु त्यं जातवेदसम् १।१।१।३।११*	विषासहिं सहमानम् १७।१।१
सोमस्य	आ प्यायस्व समेतु ते १।९१।१६	इमं देवा असपत्नम्। वा: ९।४०	सन्ते पयांसि । वा: १२।११३†	शक्रधूमं नक्षत्राणि ६।१२८।१
मङ्गलस्य	अग्निर्मूर्द्धा दिव: ८।४४।१६	अग्निर्मूर्द्धा दिव: । वा: १५।२०	अग्निर्मूर्द्धा दिव: १।१।१।३।७	त्वया मन्यो सरथम् ४।३१।१
बुधस्य	अग्ने विवस्वत् १।४४।१	उद्बुध्यस्वाग्ने। वा: १५।५४	अग्ने विवस्वत् १।१।१।४।६	यद्राजानो विभजन्त: ३।२९।१
बृहस्पते:	बृहस्पते परि दीया १०।१०३।४	बृहस्पते अतियदर्य्य:। वा: २६।३	बृहस्पते परि दीया २।९।३।२।१‡	बृहस्पतिर्न: परिपातु ७।५१।१
शुक्रस्य	शुक्रं ते अन्यत् ६।५८।१	अन्नात् परिस्रुत: । वा: १९।७५	शुक्रं ते अन्यत् १।१।२।३।३	हिरण्यवर्णा: शुचय: १।३३।१
शनैश्चरस्य	शन्नोदेवीरभीष्टये १०।९।४	शन्नो देवीरभीष्टये । वा: ३६।१२	शन्नो देवीरभीष्टये १।१।१।३।१३	सहस्रबाहु: पुरुष: १९।६।१
राहो:	कया नश्चित्र: ४।३१।१	काण्डात् काण्डात्। वा १३।२०	कया नश्चित्र: १।२।२।३।५	दिव चित्रन्स्तुधा:
केतो:	केतुं कृण्वन्नकेतवे १।६।३	केतु कृण्वन्नकेतवे। वा: २९।३७	केतु कृण्वन्नकेतवे २।६।३।१२।३	यस्ते पृथु: स्तनयित्नु: ७।११।१
सूर्य्यादिदेवेश्वरस्य	आ वो राजानम् ४।३।१	त्र्यम्बकं यजामहे। वा: ३।६०	आ वो राजानम् १।१।२।२।७	मानो विदन् विव्याधिन:१।१९।१
सोमाधिदेवोमाया:	गौरीर्मिमाय १।१६४।४१	श्रीश्चते लक्ष्मीश्च। वा: ३१।२२	आपो हि ष्ठा २।९।२।१०।१	आपो हि ष्ठा १।५।१
कुजाधिदेवस्कन्दस्य	कुमार माता ५।२।१	यदक्रन्द: प्रथमम् । वा: २९।२२	स्योना पृथिवि । वा: ३५।२१	अग्निरिव मन्यो त्विषित:४।३१।२
बुधाधिदेवहरे:	इदं विष्णुर्विचक्रमे १।२२।१७	विष्णोरराटमसि। वा: ५।२१	इदं विष्णुर्विचक्रमे १।३।१।३।९	प्र तद्विष्णु: स्तवते ७।२६।२
जीवाधिदेवब्रह्मण:	त्वमित् सप्रथा: ८।६०।५	आ ब्रह्मन् ब्राह्मण:। वा: २२।२२	त्वमित् सप्रथा: १।१।१।४।८	ब्रह्म जज्ञानम् ४।१।१
शुक्राधिदेवेन्द्रस्य	इन्द्रं वो विश्वत: १।७।१०	सजोषा इन्द्र: । वा: ७।३७	इन्द्रमित् देवतातये १।३।२।१।७	इन्द्रेम प्रतरम् ६।५।२
शन्यधिदेवयमस्य	यमाय सोम सुनुत १०।१४।१३	यमाय त्वाङ्गिरस्वते। वा: ३८।९	आयं गौ: पृश्नि: २।९।१।११।१	य: प्रथम प्रवतमाससाद६।२८।३
राह्वधिदेवकालस्य	ब्रह्म जज्ञानम्। वा. ।१३।३	कार्षिरसि समुद्रस्य। वा: ६।२८	ब्रह्म जज्ञानम्। १।४।१।३।९	रोहित: काल. १३।२।३९
केत्वधिदेवचित्रगुप्तस्य	उभो वाजं हि १।४८।११	चित्रावसो स्वस्ति। वा: ३।१८	चित्र इच्छिशो: १।१।२।२।१	आज्ञातं यदनाज्ञातम्
सूर्य्यप्रत्यधिदेवाग्ने:	अग्निं दूतं वृणीमहे १।१२।१	अग्नि दूतं पुरोदधे। वा. २२।१७	अग्निं दूतं वृणीमहे १।१।१।१।३	समास्त्वाग्ने ऋतव. २।६।१
सोमप्रत्यधिदेवजलस्य	अप्सु मे सोम: १।२३।२०	आपो हि ष्ठा। वा: ११।५०	उदुत्तमं वरुण पाशम्। वा:१२।१२	शन्नो देवीरभीष्टये। वा: ३६।१२
कुजप्रत्यधिदेवक्षिते:	स्योना पृथिवि १।२२।१५	स्योना पृथिवि। वा. ३५।२१	पृथिव्यन्तरीक्षम्। तै: आ.७।७।३	भूमे मातर्निधेहि १२।१।६३
बुधप्रत्यधिदेवविष्णो:	सहस्रशीर्षा पुरुष. १०।९०।१	इदं विष्णुर्विचक्रमे। वा. ५।१५	सहस्रशीर्षा पुरुष:। वा: ३१।१	इदं विष्णुर्विचक्रमे ७।२६।४
जीवप्रत्यधिदेवेन्द्रस्य	इन्द्रायेन्दो मरुत्वते ९।६४।२२	इन्द्र आसां नेता। वा: १७।४०	इन्द्रायेन्दो १।५।२।४।६	इन्द्र जुषस्व प्र वहा २।५।१
शुक्रप्रत्यधिदेवशच्या.	उत्तानपर्णे सुभगे १०।१४५।२	अदित्यै रास्नासि। वा: १।३०	एकाष्टका तपसे। अ. ३।१०।१२	प्रेतं पादौ १।२७।४
शनिप्रत्यधिदेवप्रजापते.	प्रजापते न त्वद् १०।१२१।१०	प्रजापते न त्वद्। वा: १०।२०	प्रजापते न त्वद्। वा: १०।२०	नक्ता जातास्योषधे १।२३।१
राहुप्रत्यधिदेवसर्पाणाम्	आयं गौ: पृश्नि: १०।१८९।१	नमोऽस्तु सर्पेभ्य:। वा. १३।६	तमेन्द्रिद्रावमम् १।३।२।३।८	शेरभक शेरभ २।२४।१
केतुप्रत्यधिदेवब्रह्मण.	ब्रह्म जज्ञानम्। वा: १३।३	ब्रह्म जज्ञानम्। वा: १३।३	एष ब्रह्मा य ऋत्विज: १।५।२।१।२	ये दिशामन्तर्देशेभ्य. ४।४०।८

पाठान्तराणि प्रदर्श्यन्ते,—

* वयमद्याञ्चसि १।३।२।४।४   † सोम राजानम् १।१।२।५।१   ‡ बृहद्वयो हि।१।१।२।४।८

(गृह्यते अनुगृह्यते अभ्युपपद्यते इति । ग्रह । "ग्रहवृद्वनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) अनुग्रह । निर्बन्धः । (यथा, आर्य्यासप्तशत्याम् । ४४५ ।
"महति स्नेहे निहितः कुसुमं नव दशनखण्डितो मधुपः ।
वक्रस्तदपि शशीभर इव गति । दुग्रहो दयिता ॥"
"दृष्टो ग्रह आग्रहो यस्य पक्षे दुष्टआग्रहो ग्रहश्चेति विग्रह ।" इति तट्टीका ॥) ग्रहणम । (यथा, भागवते । ३ । १५ । १५ ।
"सद्योहरेरनुचरारुरु बिभ्यतुस्तत्-
पादग्रहमपृथामतिकातरेण ॥")
रणोद्यम । पूतनादय. । ते च बालग्रहा । (एतेषां नामानि नवग्रहशब्दे द्रष्टव्यानि ॥) सैंहिकेय । (यथा रघु । १२ । २८ ।
"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षस ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रह ॥")
उपराग । स तु चन्द्रसूर्य्ययोर्ग्रहणम् । इति मेदिनी । हे । ३ ॥ (यदुक्त सिद्धान्ते ।
"भत्रिपातान्तरे राहोः केतोर्वा सस्थितो रवि ।
चतुष्पातान्तरे चन्द्रस्तदा सम्भाव्यते ग्रह ॥"
ग्रहाणां नवसंख्यात्वेन ग्रहशब्देनापि नवसंख्या उच्यते । यथा, देवीभागवते । २ । ३ । ३ ।
"चतुर्द्दशसहस्रञ्च मात्स्यमाद्य प्रकीर्त्तितम् ।
तथा ग्रहसहस्रन्तु मार्कण्डेय महाद्भुतम् ॥"
महादेवः । यथा, महाभारते । १३ । १७ । १७ ।
"चन्द्र सूर्य्यः शनिः केतुर्ग्रहो ग्रहपतिर्वर ॥")
ग्रहकल्लोल, पु, (ग्रहस्य चन्द्रसूर्य्यादे कल्लोलः विमर्द्दक इव ।) राहु । इति त्रिकाण्डशेष ॥
ग्रहण, क्ली, (गृह्यते इति । ग्रह + भावे ल्युट ।)
स्वीकार । (यथा, रामायणे । २ । ६६ । १६ ।
"नबीभूग्रहणे तस्य धनुषस्तोलनेऽपि वा ॥"
आदर । कर । उपलब्धिः । (यथा रघु । ३ । २८ ।
"स वृत्तचूलश्चलकाकपक्षकै-
रमात्यपुत्त्रै सवयोभिरन्वित ।
लिपेर्यथावद्ग्रहणेन वाङ्मय
नदीमुखेनेव समुद्रमाविशत ॥")
बन्दी । उपराग । इति मेदिनी । णे ४५ ॥
(गृह्यन्ते विषया येन । ग्रह + करणे ल्युट् ।)
इन्द्रियम । इति राजनिर्घण्ट ॥ शब्द । इति जटाधर ॥ अथ सूर्य्यचन्द्रग्रहणकारण यथा,—
"भत्रिपातान्तरे राहोः केतोर्वा सस्थितो रवि ।
चतुष्पातान्तरे चन्द्रस्तदा सम्भाव्यते ग्रह. ॥
यस्मिन् पक्षे रविस्तस्माच्चतुर्द्दशगतः शशी ।
पूर्णिमाप्रतिपत्सन्धौ राहुणा ग्रस्यते शशी ॥
कृष्णपक्षे तृतीयायां मासार्द्धं यदि जायते ।
ततस्त्रयोदशे सूर्य्यो राहुणा ग्रस्यते रवि. ॥"*॥
ग्रहणकालीनरविचन्द्रयोर्मेघेनाच्छादनाच्छादन कारण यथा,—
"रविभौमगवांशे तु निरभ्रं ग्रासमादिशेत् ।
बुधगीष्पतिवांशे तु मलिनं मृदवर्त्तुलम् ।
शुक्रे रशकमागाय जायते मत्तलाष्टक ।
शशिशुक्रवांशे तु प्रावृट्काले महज्जलम् ।
अन्यथा शतरश्मौ सौरस्मिते चादिशान्मरौ ॥"*॥
राहोर्वर्णविशेषे शुभाशुभं यथा, (वृहत्संहितायाम् । ५ । ५३-५८ ।)
"श्वेते क्षेमसुभिक्षं ब्राह्मणपीडाञ्च
निर्द्दिशेद्राहौ ।
अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम ॥
हारिते रोगोल्वणता शस्यानामीतिभिश्च विध्वंस ।
कपिले शीघ्रगसत्त्वम्लेच्छध्वंसोऽथ दुर्भिक्षम ॥
अरुणकिरणानुरूपे दुर्भिक्षाव्रष्टयो विहङ्गपीडा ।
धूम्राभे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिञ्च ॥
कापोतारुणकपिले श्यावाभे चाद्भयं विनिर्द्दिष्टम ।
कापोत शूद्राणां व्याधिकरः कृष्णवर्णश्च ॥
विमलकमणिपीताभो वैश्यध्वंसी भवेत् सुभि-
क्षाय ।
सार्च्चिष्मत्यग्निभयं गैरिकरूपे च युद्धानि ॥
दूर्व्वाकाण्डश्यामे हारिद्रे चापि निर्द्दिशेन्मरकम ।
अशनिभयसम्प्रदायी पाटलकुसुमोपमो राहुः ॥"
ग्रहदर्शननिषेधो यथा —
"गोचराष्टकवर्गेषु चतुर्थे दशमे तथा ।
नवमे च तथा चन्द्रे न कुर्य्याद्राहुदर्शनम ॥
जन्मभे जन्मराशौ च सप्ताष्टमगते तथा ।
चतुर्थे द्वादशे चन्द्रे न कुर्य्याद्राहुदर्शनम ॥
ग्रहदर्शनमात्रेण पापं हानिर्महद्भयम ।
जायते नात्र सन्देहस्तस्मात्तत्परिवर्ज्जयेत् ॥
पितृकरप्रत्यरिषु स्थितेषु
वैनाशिकर्क्षेषु कृता हि कर्म्म ।
सर्व्वं कृतं निष्फलमेव यस्मात्
कृतेऽपि तस्मात्तु शुभं न किञ्चित् ॥"
तत्र कर्त्तव्य कर्म्म यथा,—
"एकरात्रमुपोष्यैव राहुं दृष्ट्वा च यं नर ।
पुण्यमाप्नोति स्नात्वा च दत्त्वा श्राद्धं विधानत ॥
आदित्यकिरणैः पूत पुनः पूतश्च वह्निना ।
जल व्याधातुर स्नायात् ग्रहणेऽप्युष्णवारिणा ॥
सर्व्वं भूमिसम दान सर्व्वे व्याससमा द्विजाः ।
सर्व्वं गङ्गासमं तोयं ग्रहणे नात्र सशय ॥
सर्व्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने ।
अकुर्व्वाणस्तु तत् श्राद्धं पङ्के गौरिव सीदति ॥
आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा ।
आमश्राद्ध द्विजै कार्य्यं शूद्रेण तु सदैव हि ॥
चन्द्रसूर्य्यग्रहे स्नान श्राद्धदानजपादिकम् ।
कार्य्याणि मलमासेऽपि नित्यं नैमित्तिक तथा ॥
सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्व्वणो. ।
मन्त्रदीक्षां प्रकुर्व्वाणो मासर्क्षादीन् न शोधयेत् ॥
चन्द्रग्रहश्चन्द्रवारे सूर्य्ये सूर्य्यग्रहस्तथा ।
चूडामणिरयं योगस्तत्रानन्तफल स्मृतम् ॥
अन्यस्माद्ग्रहणात् कोटिगुणमत्र फल लभेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥
ग्रहणेऽर्कस्य चेन्दोर्व्वा शुचि पूर्व्वमुपोषित ॥
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थित. ।
यद्वा पुण्योदके स्नात्वा शुचि. पूर्व्वमुपोषित ॥
ग्रहणादिविमोक्षान्त जपेन्मन्त्रं समाहित ।
अनन्तरं दशांशेन क्रमाद्धोमादिक चरेत् ॥
तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणतर्पणम् ।
ततो मन्त्रसिद्ध्यर्थं गुरु सम्पूज्य तोषयेत ॥
तस्य मन्त्रसिद्धिः स्याद्देवता च प्रसीदति ।
तस्माच्च स्नानं चैव न शोचो राहुदर्शने ।
स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्ज्जितम् ॥"*॥
नक्षत्रविशेषे ग्रहणे नराणां दोषस्तच्छान्तिश्च यथा,—
"यस्मिन्निक्षत्रे ग्रस्येत शशिभास्करौ ।
तज्जातानां भवेत् पीडा ये नरा. शान्ति-
वर्ज्जिता ॥
ग्रहणग्रहपरिपीडितनाडीनक्षत्रदोषशम-
नाय ।
गह सुवर्णं दद्यात् प्रणिनीममचन्द्रो-
र्द्धोरे ॥"
नाडीनक्षत्राणि च । जन्मदशषोडशाष्टादश-
त्रयोविंशपञ्चविंशतय ॥
"ताम्रपात्रे तिलै. पूर्णे पूर्णं वा गव्यसर्पिषा ।
भास्करग्रहणे ह्येतच्छोदोषोपपीडितः ॥
एतत्कुर्म्मामिर निष्कं सह नवनीतपूरित
दद्यात ।
नाथादिदोषशान्त्यै द्विजाय दोषाकरग्रहणे ॥"
तत्र भोजनादिनिषेधो यथा,—
"चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव ।।
ग्रहणन्तु भवेत्तत्र तत्पूर्व्वं भोजनक्रियाम् ॥
नाचरेत् ग्रस्ते चैव तथैवास्तमुपागते ।
यावत् स्यान्मोदयस्तस्य नाश्नीयात्तावदेव तु ॥
मुक्तिं दृष्ट्वा तु भुञ्जीत स्नान कृत्वा परेऽहनि ॥
सूर्य्यग्रहे तु नाश्नीयात् पूर्व्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना ॥
त्रायेन कीर्त्तयेद्भक्त रात्रौ राहोश्च सूतके ॥"
तदाशौचं यथा,—
"सर्व्वेषामेव वर्णानां सूतक राहुदर्शने ।
स्नात्वा कर्म्माणि कुर्व्वीत शृतमन्न विवर्ज्जयेत् ॥
ग्रहणे शावमाशौच विसृष्टौ सौतिक स्मृतम् ।
तयो सम्पत्तिमात्रेण उपस्पृश्य क्रियाक्रम ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
अथ ज्योतिर्म्मते ग्रहणस्वरूप यथा । राहुः पृथिवीच्छाया समाश्रित्य चन्द्र चन्द्रमाश्रित्य रवि यदाच्छादयति तत ग्रासाख्यम् । किन्तु रविचन्द्रयोर्न गतिरोधकस्वरूपो ग्रास ॥ * ॥
अथ ग्रहणसम्भावना । अमावस्यावसान-समये यदि रविस्फुटराश्यादि राहुकेत्वो स्फुटराश्यादिभिस्तुल्य. किंवा दशभागान्तरितो भवति तदा सूर्य्यग्रहणम् । पूर्णिमावसानकाले यदि चन्द्रस्फुटराश्यादिः राहुकेत्वोः स्फुटराश्यादिभिस्तुल्यः किंवा त्रयोदशभागान्तरितो भवति तदा चन्द्रग्रहण स्यात् ॥ * ॥ तस्य गणना-प्रकारो यथा । अमावस्या शेषदण्डे पूर्णिमा-वसाने च सूर्य्यसिद्धान्तोक्तगणितागतौ यथा-

सम्भवराश्यादिस्थौ रविचन्द्रौ कार्य्यौ । मध्य राहुराश्यादिभिर्युक्तः स्फुटराश्यादिस्थो रविश्च कार्य्यः । अस्मिन् राहुयुक्तरवौ षड्राश्यधिके सति षड्राशीन् त्यक्त्वा त्रिंशता पूरितः सन् यदि नवतिभागाधिको भवति तदाशीत्युत्तरशतांशेभ्यो हीनः कार्य्यः । अवशिष्टाङ्को द्विःस्थाप्य एकस्मात् द्वाभ्यां हृताङ्केनापरो युक्तः सन् शरो भवति । राहुरव्योर्योगे कृते मेषादिराशिषट्के सति स शरः सौम्यसंज्ञकः तुलादिषट्के सति याम्यसंज्ञकः स्यात् ॥ * ॥ चन्द्रराहुमानज्ञानम् । पञ्चत्रिंशद्विकलाधिकनवत्युत्तरसप्तशतकलामितमध्यचन्द्रभुक्तिः ७९० । ३५ । सा च स्फुटकर्म्मणा किञ्चित् कलादिभिर्न्यूनाधिका वा भवति । तस्याः स्फुटेन्दुभुक्त्याः सकाशात् द्वाचत्वारिंशदधिकशतेन १४२ हरणाल्लब्धं चन्द्रस्य मानं स्यात् । पञ्चगुणितचन्द्रमानात् द्वाभ्यां हरणाल्लब्धं राहुमानं भवति ॥ * ॥

अथ चन्द्रग्रहणम् ।

राहुचन्द्रयोर्म्मानं मिलितं शरेण हीनकरणात् यदवशिष्टं तत् ग्रासो भवेत् शरे शून्ये सति राहुचन्द्रयोर्म्मिलितं मानद्वयं ग्रासो भवेत् । शरेऽधिके ग्रासो न स्यात् ॥ * ॥

चन्द्रग्रहणारम्भादिकालज्ञानं यथा । षड्गुणितग्रासाङ्कात् चतुर्म्मिश्रितग्रासाङ्केन लब्धं दण्डादिकं स्थितिदण्डादेरर्द्धं भवति । तत् पौर्णमासीयदण्डादिषु हीनं सत् स्पर्शकालः । युक्तं सत् मुक्तिकालः द्विगुणितं तत् स्थितिदण्डादिकालः स्यात् ॥ * ॥

चन्द्रमण्डलस्य स्पर्शादिदिग्ज्ञानम् ।

पूर्व्वोक्तशरे याम्ये सति आकाशे चन्द्रमण्डलस्य अग्निकोणे स्पर्शो नैरृतकोणे मुक्तिश्च स्यात् । शरे सौम्ये सति ईशानकोणे स्पर्शः वायुकोणे मोक्षः । इति चन्द्रग्रहणम् ॥ * ॥

सूर्य्यग्रहणे अङ्को यथा । स्वदेशविषुवच्छाया द्विः स्थाप्या । एकस्या षड्हृतेनान्या युक्ता सती भागादिर्याम्याक्षः स्यात् ॥ * ॥ सूर्य्यग्रहणोपयोगिनतमाह । दिनार्द्धामावस्ययोर्दण्डादीनां यदन्तरं तत् अंशादिकं नतनामकं स्यात् ॥ * ॥ सूर्य्यग्रहणोपयोगि लम्बनं यथा । द्विगुणनतसमसङ्ख्याकखण्डो ग्राह्यः खण्डान्तरगुणितशेषात् षष्टिलब्धयुक्तः सन् स्फुटलम्बनं अंशादिकं भवति ॥ * ॥ सूर्य्यग्रहणे फलं यथा । दिनपूर्व्वपरार्द्धक्रमेण षड्गुणितनतयुक्तलम्बनसहितस्फुटरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा त्रिंशता गुणितो यदि नवत्या अधिको भवति तदा अशीत्युत्तरशतात् हीनः कार्य्यः । त्रिगुणितदशलब्धैः खण्डो ग्राह्यः खण्डान्तरगुणितशेषात् दशलब्धयुक्तः सन् फलं भवति ॥ * ॥

सूर्य्यग्रहणे नतिर्यथा । अक्षफलयोर्योगो नतिः स्यात् षड्राश्यूने अक्षफलान्तरनतिः सा फले अधिके सति सौम्या अक्षे अधिके सति याम्या भवति ॥ * ॥ सूर्य्यग्रहणे शरो यथा । मध्यराहुसहितः स्फुटरविर्द्विगुणितलम्बनखण्डात् नवहृतांशादिभिर्हीनपूर्व्वार्द्धे रहितः दिनपरार्द्धे सहितः कार्य्यः एतादृशसंस्कृतरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा इत्यादि चन्द्रग्रहणोक्तवत् शरः कार्य्यः । एवं स्फुटशरः उभयोः शरनत्योर्दिक्तुल्यतायां नत्या सह युक्तो दिग्भिभेदे रहितः कार्य्यः अन्तरे कार्य्ये सति यदधिक तस्य दिशा शरस्य दिक् वक्तव्या ॥ * ॥ सूर्य्यमानं यथा । दशानुपलाष्टविपलाधिकोनषष्टि कलामितरविमध्यभुक्तिः । ५९ । ८ । १० सा च स्फुटकर्म्मणि किञ्चित् कलादिभिर्न्यूनाधिका वा भवति । तस्यास्त्रिगुणितस्फुटरविभुक्तेर्द्वात्रिंशता लब्धं रविमानं स्यात् ॥ * ॥

अथ सूर्य्यग्रहणम् ।

पूर्व्वोक्तचन्द्रमानं रविमानं मिलितं शरेण हीनं सत् ग्रासो भवेत् ॥ * ॥ सूर्य्यग्रहणस्यारम्भादिकालज्ञानम् । चतुर्गुणितग्रासाङ्कात् द्वियुतग्रासाङ्केन लब्धं दण्डादिकं स्थितिनाडिकार्द्धं भवति । तदमावस्याया दण्डादिषु हीनं स्पर्शकालः युक्तं मुक्तिकालः स्यात् ॥ * ॥ स्पर्शादिदिग्ज्ञानम् । शरे याम्ये सति अर्कमण्डलस्य नैरृतकोणे स्पर्शोऽग्निकोणे मोक्षः स्यात् । सौम्ये शरे सति वायुकोणे स्पर्श ईशानकोणे मुक्तिर्भवेत् द्विगुणितं तत् स्थितिदण्डादि स्यात् ॥ * ॥ दिवारात्रोः परार्द्धे यदि ग्रहणं भवति तदा अमावस्यापौर्णमास्योर्दण्डादिः स्फुटलम्बनयुक्तः कार्य्यः ॥ गणितानि-कालात् हीनातिरिक्ते काले यदि ग्रहणं स्यात् तत् औत्पातिकं भवेत् ॥ * ॥ ग्रहणे मण्डलस्य सामान्यवर्णो यथा । विम्बस्य वैवर्ण्यं अंशुहानिसमीरेति खण्डनमल्पता वा शुक्लारुणश्यामलपीतचित्रैः पटाद्यैः रोध इव वेष्टनं वा भवति ॥*॥ अपर्व्वणं ग्रहणं ईतिभयसनार्त्तिकारि स्यात् तदा दिशश्च विरूपाः स्युः ॥ * ॥ ग्रासाङ्गुलिमानज्ञानम् । दशगुणितग्रासाङ्कात् मानद्वयार्द्धेन लब्धं चन्द्रसूर्य्ययोर्ग्रासस्य गताङ्गुलाद्यं भवति । सूर्य्यस्य त्र्यङ्गुलमपि ग्रासोऽदृश्यो भवति । चन्द्रस्य सार्द्धाङ्गुलः सुदृश्यः यदि षोडशाङ्गुलाधिको भवति तदा सर्व्वग्रासः ॥ * ॥ ग्रहणे मण्डलवर्णो यथा । अल्पे ग्रहणे धूम्राभं समग्रे कपिलं अर्द्धे कृष्णाभम् । इति सूर्य्यग्रहणम् ॥ इति सिद्धान्तमञ्जरीसम्मतम् ॥

(अधुना सूर्य्यसिद्धान्तमतमुच्यते तत्र चन्द्रग्रहणाधिकारो यथा,—

"सार्द्धानि षट्सहस्राणि योजनानि विवस्वतः ।
विष्कम्भो मण्डलस्येन्दोः सहाशीत्या चतुःशतम् ॥
स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ ।
रवेः स्वभगणाभ्यस्तः शशाङ्कभगणोद्धृतः ॥
शशाङ्ककक्षागुणितो भाजितो वार्ककक्षया ।
विष्कम्भश्चन्द्रकक्षायां तिथ्याप्ता मानलिप्तिका ॥
स्फुटेन्दुभुक्तिर्भूव्यासगुणिता मध्ययोद्धृता ।
लब्धं सूची महीव्यासस्फुटार्कश्रवणान्तरम् ॥
मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम् ।
विशोध्य लब्धं सूच्या तु तमो लिप्तास्तु पूर्व्ववत् ॥
भानोर्भार्द्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा ।
शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके ॥
तुल्यौ राश्यादिभिः स्यातामामावास्यान्तकालिकौ ।
सूर्य्येन्दू पौर्णमास्यन्ते भार्द्धे भागादिकौ समौ ॥
गतैष्यपर्व्वनाडीनां स्वफलेनोनसंयुतौ ।
समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा ॥
छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत् ।
भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ ॥
तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः ।
योगार्द्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते ॥
यद्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा ।
योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः ॥
ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक् ।
विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे ॥
षष्ट्या संगुण्य सूर्य्येन्द्वोर्भुक्त्यन्तरविभाजिते ।
स्यातां स्थितिविमर्द्दार्द्धे नाडिकादिफले तयोः ॥
स्थित्यर्द्धनाडिकाभ्यस्ता गतयः षष्टिभाजिताः ।
लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः ॥
तद्विक्षेपैः स्थितिदलं विमर्द्दार्द्धं तथासकृत् ।
संसाध्यमन्यथा पाते तल्लिप्तादिफलं स्वकम् ॥
स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत् ।
स्थित्यर्द्धनाडिकाहीने ग्रासो मोक्षस्तु संयुते ॥
तद्वदेव विमर्द्दार्द्धनाडिकाहीनसंयुते ।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे ॥
इष्टनाडीविहीनेन स्थित्यर्द्धेनार्कचन्द्रयोः ।
भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः ॥
भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्द्धसङ्गुणाः ।
स्फुटस्थित्यर्द्धसम्भक्ताः स्फुटाः कोटिकलाः स्मृताः ॥
क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत् ।
मानयोगार्द्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत् ॥
मध्यग्रहणतश्चोर्द्ध्वमिष्टनाडीर्विशोधयेत् ।
स्थित्यर्द्धान्मौक्षिकाच्छेषं प्राग्वच्छेषं तु मौक्षिके ॥
ग्राह्यग्राहकयोगार्द्धाच्छोध्याः स्वच्छन्नलिप्तिकाः ।
तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिम्पदम् ॥
कोटिलिप्ता रवेः स्पष्टस्थित्यर्द्धेनाहता हृताः ।
मध्येन लिप्तास्तन्नाड्यः स्थितिवद्ग्रासनाडिकाः ॥
नतज्याक्षज्ययाभ्यस्ता त्रिज्याप्ता तस्य कार्मुकम् ।
वलनांशाः सौम्ययाम्याः पूर्व्वापरकपालयोः ॥
राशित्रययुताद्ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युताः ।
भेदेऽन्तराज्ज्या वलना सप्तत्यङ्गुलभाजिता ॥
सोन्नतं दिनमध्यार्द्धे दिनार्द्धाप्तं फलेन तु ।
छिन्द्याद्विक्षेपमानानि तान्येषामङ्गुलानि तु ॥
इति सूर्य्यसिद्धान्ते चन्द्रग्रहणाधिकारः ॥

अथ सूर्य्यग्रहणाधिकारः ।

"मध्यलग्नसमे भानौ हरिजस्य न सम्भवः ।
अक्षोदङ्मध्यभक्रान्तिसाम्ये नावनतेरपि ॥
देशकालविशेषेण यथावनतिसम्भवः ।
लम्बनस्यापि पूर्व्वान्यदिग्वशाच्च तथोच्यते ॥
लग्नं पर्व्वान्तनाडीनां कुर्य्यात् स्वैरुदयासुभिः ।
तस्यान्त्यापक्रमज्याघ्नी लम्बज्याप्तोदयाभिधा ॥

यदा लम्बोदयैर्लग्नं साधयन्तं यथोदितम् ।
सम्प्राप्य चापगमने निकाग्न्दोऽस्तमागमात् ॥
शेषं तत्पाश्चात्यनोत्रौ साधयत्तान्यधिकर्षे ।
सध्योदयस्यास्यता त्रिज्यायामा यदि स्ताज्ञत ॥
मध्यस्यापर्वान्तिरिष्ट दकश्चेपः शेषतः परम् ।
मतिस्यापयान्तिरिपाच्याफल शङ्कुः स हन्यति, ॥
सत्तांशनादुकोटिस्फि स्फुटे दत्तशोधदक्षी ।
दक्श्यायायतमन्देदी स्वं इत्यनितमोयया ॥
साधनमाकविरोधपदा वृन्दद विभागिता ।
स्रोदोलम्बन गेयं प्राकपश्चाद्रवटिकादिकम् ॥
मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् ।
धनमूने स्फुटं कर्म यावत् सर्वं स्थिरीभवेत् ॥
दकद्येपः शीतांशोर्मध्यग्रहणादिकम् ।
तिथिराशिस्थया भक्तो लम्बनमाभिर्धन ॥
दकचेपात् समासेऽर्थे तात्, त्रिज्यान्ति, परम् ।
पयया त्रिज्यया भक्तात् सममसरमात्मना ॥
मध्यम्या तिथ्यन्तात तत्र स्थितिर्दलिनेत्यत्र ।
सेन्दुपिचेपदिक्साम्ये युक्ता विश्लेषितान्यथा ॥
तया स्थितिविमर्दार्द्धयोगात्तु यथोदितम् ।
प्रमाण वलनाभीष्टग्रासादि हिमरश्मिवत ॥
स्थित्यर्द्धनाडिकाभ्यस्ता गत्यस्तिथ्यान्तमन पुन. ।
ग्रासमोक्षोदयं साध्य तन्मध्यहरिजान्तरम् ॥
प्राग्ग्रासेऽधिकमध्याद्वेन प्राग मध्यम यदि ।
मौक्षिक लम्बन होन पश्चाद्धि तु विपर्ययः ॥
तत्र सोक्षान्तिके देय प्रग्रहे पचा ।
हरिजान्तरक शोध्य यत्रेतत स्यादिपर्यय ॥
तन्नदृत कपाले वसदिक्पर्व सम्भवेत् ।
मे मे स्थितिदलं योज्या विमर्दाद्धेऽपि चोक्तवत्॥"

इति सूर्यसिद्धान्ते सूर्यग्रहणाधिकार ॥)

ग्रहणि, स्त्री, (गृह्णाति आक्रमते उदरमन्नादि रूपेण नाडीविशेषमवधित्य ग्रहरोगमिति। ग्रह न उपादाने + "ग्रहेर्णिः ।" उणा। ५। ५०। इति अनि णत्व च ।) ग्रहणीरोग । इत्यमर-टीकायां रायमुकुट ॥

ग्रहणी, स्त्री, (ग्रहणि + "कृदिकारादक्तिनः ।" इति ङीष ।) अग्न्यधिष्ठाननाडी । तदाश्रित-व्यातरोग । तस्य निदानसम्प्राप्ती यथा,—
"अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥
सैकाग्न मन्दपाक दोषैरत्यर्थं सम्प्लुते ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥
पक्व वा सरुज पूति मुहुर्बद्ध मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्वेदविदो जना ॥"
तस्य पूर्व्वरूप यथा,—
"पूर्वरूपन्तु तस्येद तृष्णालस्य बलक्षय ।
विदाहोऽन्नस्य पाकश्च चिरात् कायस्य गौरवम्॥"
तत्र वातिकस्य निदानरूपे ।
"कट्वतिक्तकषायातिरूक्षसन्दुष्टभोजनै ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनै ॥
मारुत कुपितो वह्निं सञ्छाद्य कुरुते गदान् ।
तस्यान्नं पच्यते दु ख शुक्तपाक खराङ्गता
कण्ठास्यशोष. क्षुत् तृष्णा तिमिरं कर्णयोः स्वन.।

पार्श्वोरुवङ्क्षणग्रीवारुजाभीक्ष्णं विसूचिका ॥
हृत्पीडा कार्श्यदौर्बल्य, वैरस्यं परिकर्तिका ।
गृद्धिः सर्व्वरसानाञ्च मनसः सदनं तथा ॥
जीर्णे जीर्य्यति चाध्मान भुक्ते स्वास्थ्यमुपैति च ।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानव ॥
चिराद्दु ख द्रव शुष्क तन्वाम शब्दफेनवत् ।
पुन पुनः सृजेद्वर्च्च कासश्वासार्दितोऽनिलात् ॥"
पैत्तिकस्य तस्य निदानरूपे ।
"कट्वजीर्णविदाह्यम्लक्षाराद्यै. पित्तमुल्वणम् ।
आप्लावयद्धन्त्यनल जल तप्तमिवानलम् ॥
सोऽजीर्णं नीलपीताभ पीताभ सार्य्यते द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्दित ॥"
श्लैष्मिकस्य तस्य निदानरूपे ।
"गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपित कफः ॥
तस्यान्न पच्यते दु ख हृल्लासच्छर्द्यरोचका. ।
आस्योपदेहमाधुर्य्यकासष्ठीवनपीनसा: ॥
हृदय मन्यते स्त्यानमुदर स्तिमित गुरु ।
दुष्टो मधुर उद्गार सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्च,प्रवर्त्तनम् ।
अकृशस्यापि दौर्ब्बल्यमालस्यञ्च कफात्मके ॥
पृथग्वातादिनिर्द्दिष्टहेतुलिङ्गसमागमे ।
त्रिदोष निर्द्दिशेत्तेषां वक्ष्यामि भेषजम् ॥"
तस्यासाध्यलक्षणं यथा,—
"लिङ्गैरसाध्यो ग्रहणीविकारो
यैस्तैरतीसारगदो न सिध्येत् ।
वृद्धस्य नून ग्रहणीविकारो
हत्वा तनुं नो विनिवर्त्तते च ॥"

इति माधवकर ॥

तस्य चिकित्सा यथा, गारुडे १७४ अध्याय ।
"चित्रकापक्वयुक्तं ग्रहणीं पाचनाग्निदी।
पिप्पलीक्षारसक्षौद्रं ग्रहणीमं वसं इति ।"* ॥

हरिद्राच ।
"ग्रन्थि सुरदेवच्च कुटजत्वगेव च ।
पानाच्च ग्रहणी नश्येत् प्रवाहहरवारिणा ॥"

इति तत्रैव १८७ अध्याय ॥

"शुण्ठीसमाक्षादि पिष्ट तण्डुलपारिणा ।
सत्वातीसारग्रहणी पीतं हन्ति भूप । ॥
मरीचशुण्ठीकुटजत्वक्चूर्णन्तु गुडान्वितम् ।
तक्रेण द्विगुणं पीतं ग्रहणीव्याधिनाशनम् ॥"

इति तत्रैव १८८ अध्याय ॥ २ ॥

अथ सामान्यग्रहणीरोगस्य चिकित्सा ।
"ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत् ।
लङ्घनैर्द्दीपनीयैश्च सदातीसारभेषजैः ॥
दोषं साम निरामञ्च विद्यादत्रातिसारवत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
पेयादिपट्वलघ्वन्नं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक् ॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
यवागूः पाचयत्याम शकृत् संवर्त्तयत्यपि ॥"
स वर्त्तयति घनीकरोति ॥ ७ ॥
अथ तक्रम् । तत्र गोदधिगुणा ।

"गव्यं मधुराम्लं पाके स्वादु रुचिप्रदम् ।
पवित्रं दीपनं स्निग्धं पुष्टिकृत् पवनापहम् ॥
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥"
अथ माहिषदधिगुणा, ।
"माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ।
स्वादुपाकमभिष्यन्दि वृष्य गुर्व्वसदूषणम् ॥"
अथ छागदधिगुणाः ।
"आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् ।
शस्यते श्वासकासार्श-क्षयकार्श्येषु दीपनम् ॥"
उभयं ग्राहिणी मध्ये श्रेष्ठ तक्रं ॥
अथ तक्रस्य भेदाः ।
"सस्नेहं घोलमर्द्धोदश्वितमिति प्रभेदतः ।
तत्तक्रारैर्निर्द्दिष्टं धन्वन्तरिप्रमुखैस्तथा ॥
सस्नेहं निःस्नेहं घोलं मथितमस्नेहकम् ।
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम् ॥
वातपित्तहरं घोलं मथितं कफपित्तनुत् ।
उदश्वित् कफदं बल्यं श्रमघ्नं परमं मतम् ॥"
अथ तक्रस्य गुणा ।
"तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु ।
वीर्य्योष्णं बलकृद्रूक्षं प्रीणनं वातनाशनम् ॥
ग्रहण्यादिमतां पथ्यं तक्रं संग्राहि लाघवात् ।
मधुरत्वात् पित्तघ्नं स्यात् सद्रस्य संविदाहि च ।
उष्णत्वाद्वीर्यतः कषायत्वाच्च पित्तप्रकोपकृत् ॥
कषायोष्णविकाशित्वाद्रौक्ष्याच्चैव कफे हितम् ॥'
तथोद्धृतस्नेहं मध्योद्धृतस्नेहस्य तक्रस्य गुणा
'समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः ।
स्तोकोद्धृतघृतं तस्मात् गुरु वृष्यं कफापहम् ।
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम् ॥"
अथ दोषविशेषे तक्रविशेषा ।
"वातेऽम्लं सैन्धवोपेतं पित्ते स्वादु सशर्करम् ।
पिबेत्तक्रं कफे चापि क्षारसिकटुकसंयुतम् ॥
हिङ्गुजीरयुतं घोलं सैन्धवेनावचूर्णितम् ।
ग्रहण्यर्शोऽतिसारघ्नं भवेद्वातहरं परम् ॥
रोचनं पुष्टिदं बल्यं बस्तिशूलविनाशनम् ॥"
अथ तक्रगुणाः ।
"तक्रमाम कफं कोष्ठे हन्ति कण्ठे करोति च ।
पीनसश्वासकासादौ पक्वमेव विधीयते ॥"* ।
अथ तक्रस्य निषेधः ।
"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ॥"* ॥
अथ तक्रस्य गुणोत्कर्षः ।
"न तक्रसेवी व्यथते कदाचि
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ॥" * ।
"सुपक्व रसं तक्रं धान्यजीरकसंयुतम् ।
सैन्धवेनान्वितं दद्यात् षड्यूषमिति कीर्त्तितम्॥"
रस लघु ग्राहि मांसभवरसम्। इति षड्यूषम् ॥
"कर्षं गन्धमहेः पारदसमं कुर्य्यात्सुभां कज्जलीं
त्र्यक्षं चूर्णतश्च पञ्चलवणं सार्द्धेषु कर्षं पृथक् ।
भृष्टं हिङ्गु च जीरकद्वययुतं सर्व्वार्द्धभङ्गान्वितं

खादेद्दृढमितं प्रहसितगदवास्तक्रस्य विल्वेन च ॥”
इति लवुलाईचूर्णम् ॥ * ॥
“त्रिकटु त्रिफला चैव विडङ्गं जीरकद्वयम् ।
भल्लातकं यमानी च हिङ्गु लवणपञ्चकम् ॥
गृहधूमवचाकुष्ठं रसगन्धकमभ्रकम् ।
क्षारत्रयाजमोदा च चित्रकं गजपिप्पली ॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम् ।
समभागकृतश्चैषां चूर्णं ग्रहणी विनिर्म्मितम् ॥
शक्राशनस्य चूर्णन्तु चूर्णतुल्यं प्रदापयेत् ॥
मन्दाग्निकासदुर्नामशोथपाण्डुरुचिज्वरान् ।
विष्टम्भं सग्रहं शूलं हन्यान्नानातिसारजित् ॥
आमवातापहं बल्यं सूतिकादोषनाशनम् ।
वर्ज्जनीयं माषमत्स्यं स्नानं पिशितभोजनम् ॥
पथ्यं काञ्जिकमत्रापि दधि तक्रमथापि वा ।
वृहल्लाईचूर्णमिदं लाईभाषितमुत्तमम् ॥”
इति वृहल्लाईचूर्णम् ॥ * ॥
“जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गां च तावतीम् ।
सर्व्वचूर्णसमानांशा प्रदेया शुभ्रशर्करा ॥
कर्षमात्रमिदं खादेन्मधुनाशाषितं जनः ।
नाशयेत् ग्रहणीं कासं क्षयं श्वासमरोचकम् ॥”
इति जातीफलादिचूर्णम् ॥ * ॥
“चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम् ।
व्योष हिङ्ग्वजमोदाश्च चव्यं चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्व्वा दाडिमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥”
क्षारौ स्वर्ज्जिका यवक्षारश्च । लवणपञ्चकमिति सैन्धवं रुचकं चैव विडं सामुद्रिकं गडमिति । व्योष शुण्ठीपिप्पलीमरिचानि । अजमोदात्र यवानिका । मातुलुङ्गं बीजपूरकम् । इति चित्रकादिवटिका ॥ * ॥ [सगुडः ।
“श्रीफलशलाटुः कल्को नागरचूर्णेन मिश्रितः
ग्रहणीगदमत्युग्रं तक्रभुजा शीलितो जयति ॥”
श्रीफलशलाटुः विल्वस्यामं फलम् । गुडस्यात्र भागद्वयम् । इति विल्वकल्कः ॥ * ॥
“चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम् ।
वार्त्ताकोः कुडवश्चार्कमूलाद्विल्वे तथानलात् ॥
दग्ध्वा रसेन वार्त्ताकोर्गुटिका भोजनोत्तरम् ।
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम् ॥
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥”
इति वार्त्ताकुगुटिका ॥ * ॥
“मुस्तकातिविषाविल्वकौटजं सन्मचूर्णितम् ।
मधुना च समालीढं ग्रहणीं सर्व्वजां जयेत् ॥”
कौटजं इन्द्रयवं । इति मुस्तकादिचूर्णम् ॥ * ॥
“श्वेतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः ।
गुडेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥”
सर्ज्जः राल इति लोके । इति सर्ज्जरसचूर्णम् ॥ * ॥
“विल्वान्दशक्रयवबालकमोचसिद्ध-
मालं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥”
मोचो मोचरसः । क्षिणोति हन्ति ।
“प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुडस्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहपुषाजमोदैः ॥
विडङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तरग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रसिद्धः ॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्धि पलं पलम् ।
सिद्धे निधेयमत्रैव गुडे कल्याणपूर्व्वके ॥”
इति कल्याणगुडः ॥ * ॥
“पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
त्रिफला चाजमोदा च नलिनी जीरकस्तथा ।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विडम् ॥
आरग्वधश्च त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका ।
शुण्ठीशक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
स्नुहीकायाः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुडस्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृद्वग्निना पचेत् ॥
औडम्बरं चामलकं वादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद् वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम् ।
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं
स्वरम् ।
पिचुमाठान्यथाहन्ति रक्तपित्तञ्च विग्रहम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः ।
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुडः ॥”
इति महाकल्याणकगुडः ॥ * ॥
“कुष्माण्डानां सुपक्वानां स्विन्नानां निष्कुल-
त्वचाम् ।
सर्पिः प्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विडङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलं चैकं त्रिवृतोऽष्टौ पलानि च ॥
तैलस्य च पलान्यष्टौ गुडात् पञ्चाशदेव तु ।
आमलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ॥
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक् ।
यावत् दर्व्वीप्रलेपः स्यात्तदैनमवतारयेत् ॥
औडुम्बरं चामलकं वादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ।
कामला पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ॥
वातशोणितवीसर्पदद्रुपक्षहलीमकान् ।
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समा-
चरेत् ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः ।
तेभ्यो हितो गुडोऽयं स्यात् वन्ध्यानामपि पुत्त्रदः ॥
वृष्यो बल्यो वृंहणश्च वयसः स्थापनः परः ॥”
इति कुष्माण्डकल्याणकगुडः ॥ * ॥
अतीसाराधिकारलिखितं विल्वतैलं चात्र हितम् । इति ग्रहणीरोगाधिकारः । इति भावप्रकाशः ॥ (सनिदानलक्षणादिकं चिकित्सितञ्चास्य यथा,—
“सामं सान्नमजीर्णेऽन्ने जीर्णे पक्वन्तु नैव वा ।
अकस्माद्वा मुहुर्बद्धमकस्माच्छिथिलं मुहुः ॥
चिरकृद्ग्रहणीदोषः सञ्चयाच्चोपवेशयेत् ।
स चतुर्धा पृथग् दोषैः सन्निपाताच्च जायते ॥
प्राग्रूपं तस्य सदनं चिरात् पचनमम्लकः ।
प्रसेको वक्त्रवैरस्यं मरुचिस्तृट्क्लमो भ्रमः ॥
आनद्धोदरता च्छर्द्दिः कर्णक्ष्वेडोऽन्त्रकूजनम् ।
सामान्यं लक्षणं कार्श्यं धूमकस्तमको ज्वरः ॥
मूर्च्छा शिरोरुग्विष्टम्भः श्वयथुः करपादयोः ।
तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः ॥
पार्श्वोरुवङ्क्षणग्रीवारुजाभीक्ष्णं विसूचिका ।
रसेषु गृद्धिः सर्व्वेषु क्षुत्तृष्णा परिकर्त्तिका ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यं समश्नुते ।
वातहृद्रोगगुल्मार्शःप्लीहपाण्डुत्वशङ्कितः ॥
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुनः पुनः सृजेद्वर्च्चः पायुरुक् श्वासकासवान् ॥
पित्तेन नीलं पीताभं पीताभः सृजति द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्द्दितः ॥
श्लेष्मणा पच्यते दुःखमन्नं छर्द्दिररोचकः ।
आस्योपदेहनिष्ठीवकासहृल्लासपीनसाः ॥
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।
उद्गारो दुष्टमधुरः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्चःप्रवर्त्तनम् ।
अकृशस्यापि दौर्ब्बल्यं सर्व्वजे सर्व्वसङ्करः ॥
विभागेऽङ्गस्य ये चोक्ता विषमाद्यास्त्रयोऽग्नयः ।
तेऽपि स्युर्ग्रहणीदोषाः समस्तु स्वास्थ्यकारणम् ॥
वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ॥”
इति वाभटे निदानस्थानेऽष्टमेऽध्याये ॥
चिकित्सास्या यथा,—
“ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
अन्नकाले यवाग्वादिपञ्चकोलादिभिर्युतम् ।
वितरेत् पटुकघ्नं पुनर्योगाश्च दीपनान् ॥

ग्रामेण ग्राम्येण भोग्यद्रव्येण आयुर्नयति यापयतीति। ग्रामान् भोग्यवस्तूनि नयति आत्मानं प्रापयतीति वा।) भोगिकः। इति हेमचन्द्रः॥

ग्रामणी, स्त्री, (ग्रामेण जनसमूहेनेत्यर्थः नीयते गृह्यते यद्वा ग्रामेण ग्राम्यधर्म्मेण केवलं मैथुनादिना नयति कालं यापयतीति। नी+क्विप्।) वेश्या। ग्रामेया। नीलिका। इति हेमचन्द्रः॥

ग्रामतक्ष, पुं, (ग्रामस्य ग्रामपरतन्त्रो वा तक्षा। "ग्रामकौटाभ्याञ्च तक्ष्णः।" ५।४।९५। इति टच्।) ग्रामाधीनः काष्ठतट्। ग्रामायत्ततक्षा। इत्यमरः। २।१०।९॥ गेंये कुतार इति भाषा॥

ग्रामता स्त्री, (ग्रामाणां समूहः। "ग्रामजनबन्धुभ्यस्तल्।" ४।२।४३। इति तल्।) ग्रामसमूहः। इत्यमरः। ३।२।४३॥ (ग्रामस्य भावः। "तस्य भावस्त्वतलौ।" ५।१।११९। इति तल्।) ग्रामत्वञ्च॥

ग्रामभृतः, पुं, (ग्रामे ग्रामस्य वा भृतः भरणीयः ग्रामावस्थितजनैरिति शेषः।) ग्रामप्रेष्यः। स तु ब्राह्मणश्चेत् पञ्चमोऽब्राह्मणः। इत्याह्निकतत्त्वम्॥ (यथाह शातातपः।
"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥")

ग्राममद्गुरिका, स्त्री, (ग्रामस्य मत्स्यस्य मेद्गुर्वा मद्गुरिकेव। क्षुद्रमद्गुर इवेत्यर्थः।) शृङ्गीमत्स्यः। ग्रामयुद्धम्। इति मेदिनी। के।२३४॥

ग्राममुखः, पुं, (ग्रामस्य मुखमिव यो स्थितः। यद्वा ग्रामो ग्रामवासिजनो मुखत्वेन प्रधानकारणत्वेन यस्य। ग्रामस्थजनसाध्यत्वादेवास्य तथात्वम्।) हट्टः। इति शब्दरत्नावली॥

ग्राममृगः, पुं, (ग्रामस्य मृग इव। यद्वा, ग्रामे स्थितो मृगः पशुः।) कुक्कुरः। इति शब्दरत्नावली॥

ग्रामयाजक, पुं, (ग्रामस्य याजको यागकर्त्ता।) ग्रामस्थनानावर्णानां पुरोहितः। स तु चतुर्थोऽब्राह्मणः। यथाह शातातपः।
"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"
(एतस्मै प्रदत्तं दानादिकं निष्फलं भवति। यथोक्तं महाभारते। ३।१९९।७।
"व्यर्थन्तु पतिते दानं ब्राह्मणे तस्करे तथा।
गुरौ चानृतिके पापे कृतघ्ने ग्रामयाजके॥")

ग्रामस्थः त्रि, ग्रामवासी। ग्रामे तिष्ठति य इत्यर्थे कप्रत्ययः॥

ग्रामहासकः, पुं, (ग्रामान् ग्रामवासिनः श्वशुरालयस्थसमूहान् वा हासयतीति। हस्+णिच्+ण्वुल्।) भगिनीपतिः। इति शब्दरत्नावली॥

ग्रामाधान, स्त्री, (आधीयते उपजीविका यत्र तत्। आ+धा+ल्युट्। ततो ग्रामस्य मृगयुसमूहस्य आधानं पोषणकम्।) मृगया। इति हलायुधः॥

ग्रामान्त स्त्री, (ग्रामस्य अन्तं समीपम्।) ग्रामसमीपम्। तत्पर्य्यायः। उपशल्यम् २। इत्यमरः। २।३।२०॥ ग्रामान्तिकम् ३। इति वोपालितः॥

ग्रामिणी, स्त्री, (ग्रामः उत्पत्तिस्थानत्वेन अस्ति अस्याः। अत इनि स्त्रियां ङीप्।) नीलीवृक्षः। इति जटाधरः॥

ग्रामी [न्] त्रि, (ग्रामः अधिकारित्वेनास्त्यस्य। अत इनि।) ग्रामविशिष्टः। गाँइ इति भाषा॥ यथा, ब्राह्मणकुलाचार्य्यकारिकायाम्।
"रामो गडगडग्रामी निपः केशरकोणितः।
केशरकोणीति ख्यातो ग्रामी ग्रामवताम्वरः॥"
(ग्रामो ग्राम्यधर्म्मो मैथुनं अस्त्यस्येति। ग्राम्यधर्म्मविशिष्टः। यथा, भागवते। ४।२९।१४।
"आसुरी मेढ्रमर्व्वाग्द्वार्व्यवायो ग्रामिणां रतिः।
उपस्थो दुर्म्मदः प्रोक्तो निरृतिर्गुद उच्यते॥")

ग्रामीणः, पुं (ग्रामे भवः। ग्राम+"ग्रामाद्यखञौ।" ४।२।९४। इति खञ्।) ग्राम्यशूकरः। इति राजनिर्घण्टः॥ कुक्कुरः। काकः। ग्रामोत्पन्ने त्रि। इति मेदिनी। णे। ४६॥ (यथा, भाषापरिच्छेदे। ७९।
"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्॥")

ग्रामीणा, स्त्री, (ग्रामीण+स्त्रियां टाप्।) नीलीवृक्षः। इति मेदिनी॥ (अस्याः पर्य्याया यथा
"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणाश्चास्या नीलिनीशब्दे ज्ञातव्याः॥) पालङ्कशाकम्। इति राजनिर्घण्टः॥

ग्रामेयकः, त्रि, (ग्रामे भवः। ग्राम+"कत्त्र्यादिभ्यो ढकञ्।" ४।२।९५। इति ढकञ्।) ग्राम्यः। इति हेमचन्द्रः। ३।१४५॥

ग्रामेया स्त्री, (ग्रामे भवा। ग्राम+ढक्।) ग्राम्यनारी। इति ग्रामणीशब्दार्थे हेमचन्द्रः॥

ग्रामेश त्रि (ग्रामस्य ईशः।) ग्रामेश्वरः। ग्रामाधिपतिः। यथा शान्तिशतके। ११।
"य कश्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं।
सेवायै मृगयामहे नरमहो मूढा वराका वयम्॥"

ग्राम्यः, त्रि (ग्रामे भवः। ग्राम+"ग्रामाद्यखञौ।" ४।२।९४। इति यः।) ग्रामोत्पन्नः। तत्पर्य्यायः। ग्रामेयकः २ ग्रामीणः ३। इति हेमचन्द्रः। ३।१४५॥ (यथा, मनुः। ११।१९९।
"श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च॥"
तथा, माघे। १२।६८।
"ग्राम्यानपश्यत् कपिशं पिपासतः॥"
मूढः। प्राकृतः। यथा, तत्रैव। १४।६४।
"ग्राम्यभावमपहातुमिच्छवो
योगमार्गपतितेन चेतसा॥")
भण्डादिवचनम्। "हालिकशाकटिकप्रधानत्वात् ग्रामे भवं ग्राम्यम्।" इति भरतः॥ तत्पर्य्यायः। अश्लीलम् २। इत्यमरः। १।६।१९॥ (काव्यस्य दोषविशेषः। स च शब्दगतः अर्थगतश्च। तत्र शब्दगतो यथा, साहित्यदर्पणे। ७।३।
"दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तता।
ग्राम्योऽप्रतीतसन्दिग्धनेयार्थनिहतार्थता॥"
अस्य उदाहरणं यथा तत्रैव। "कटिस्ते हरते मनः। अत्र कटिशब्दो ग्राम्यः॥" अर्थगतो यथा तत्रैव। ७।५।
"अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः॥"
उदाहरणं यथा तत्रैव। "स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय।॥ अत्रार्थो ग्राम्यः॥")

ग्राम्यकन्दः, पुं, (ग्राम्यो ग्रामभवः कन्दः।) ग्राम्यौलः। वनओल इति भाषा। तत्पर्य्यायः। स्थूलकन्दः २। इति रत्नमाला॥ स तु दोषलः। इति राजवल्लभः॥

ग्राम्यकर्कटी, स्त्री, (ग्राम्या ग्रामजाता कर्कटी।) कुष्माण्डः। इति त्रिकाण्डशेषः॥

ग्राम्यकुङ्कुमं, क्ली, (ग्राम्यं ग्रामसम्भूतं कुङ्कुमम्।) कुसुम्भम्। इति त्रिकाण्डशेषः॥

ग्राम्यधर्म्मः पुं, (ग्राम्यस्य इतरादेर्धर्म्मः।) मैथुनम्। इत्यमरः। २।७।५७॥ (यथा, महाभारते। १।४८।४।
"प्रमत्तो ग्राम्यधर्म्मेषु मन्दात्मा पापनिश्चयः।
मम पुत्त्रः सुदुर्बुद्धिः पृथिवीं घातयिष्यति॥")

ग्राम्यपशु पुं, (ग्राम्यो ग्रामजातः पशुः।) ग्रामजातजन्तुः। (यथा, भागवते। ६।१५।१६।
"तस्माद् युवां ग्राम्यपशोर्म्मम मूढधियः प्रभू।
अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्य्यताम्॥")
स तु सप्तविधो यथा। गौः १ अजः २ मेषः ३ मनुष्यः ४ अश्वः ५ अश्वतरः ६ गर्द्दभः ७। इति तिथ्यादितत्त्वम्॥ (यथाह पैठीनसिः।
"ग्राम्यारण्याश्चतुर्द्दश। गौरविरजोऽश्वोऽश्वतरो गर्द्दभो मनुष्यश्चेति ग्राम्याः पशवः। महिषवानर-ऋक्षसरीसृपरुरुपृषतमृगाश्चेति सप्तारण्याः॥" सुश्रुतमते उष्ट्रादयोऽपि ग्राम्याः। यदुक्तं तत्रैव सूत्रस्थाने ४६ अध्याये।
"अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः॥")

ग्राम्यमद्गुरिका, स्त्री (ग्राम्या ग्रामोद्भवा मद्गुरिका) शृङ्गीमत्स्यः। इति हारावली॥

ग्राम्यमृग, पुं, (ग्राम्यो ग्रामभवो मृगो हरिण इव। मृगः पशुर्वा इत्येके।) कुक्कुरः। इति जटाधरः॥

ग्राम्यराशि, पुं, (ग्राम्यो राशिः।) मिथुनम्। कन्या। तुला। वृश्चिकः। धनुः। कुम्भः। रात्रौ मेषः वृषश्च। इति ज्योतिषम्॥

ग्राम्यवल्लभा, स्त्री, (ग्राम्याणां ग्रामस्थजनानां वल्लभा प्रिया। पल्लीग्रामस्थजनप्रियत्वादेवास्यास्तथात्वम्।) पालङ्क्यशाकम्। इति राजनिर्घण्टः॥ (ग्राम्यं अश्लीलं वल्लभं प्रियं यस्याः इति विग्रहे वेश्या। इति व्युत्पत्तिलब्धोऽर्थः॥)

ग्राम्यशूकरः, पु, स्त्री, (ग्राम्यः शूकरः।) ग्रामोत्पन्नवराहः। तत्पर्य्यायः। विड्वराहः २ ग्रामीणः ३ ग्रामक्रोडः ४ ग्रामकोलः ५ विष्कलः ६ दारकः ७। तस्य मांसस्य गुणाः। वनवराहमांसाद्गुरुत्वम्। मेदोबलवीर्य्यवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

ग्राम्या, स्त्री, (ग्रामे भवा। ग्राम + "ग्रामाद्यखञौ।" ४।२।९४। इति य। स्त्रियां टाप्।) नीली। निष्पावी। इति राजनिर्घण्टः॥ (तुलसी। इति चिन्तामणिः॥)

ग्राम्याश्वः, पुं, (ग्राम्यः ग्रामजातोऽश्वः।) गर्द्दभः। इति त्रिकाण्डशेषः॥

ग्रावा, [न्] पु, (ग्रसते इति ग्रः। ग्रस् + अन्येभ्योऽपीति डः। आवनति शब्दायते इति। आ + वन शब्दे + विच्। ततो ग्रश्चासौ आवा चेति।) प्रस्तरः। (यथा, भागवते। ४।५।१८।
"सर्व्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः।
तैरर्द्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन्॥")
पर्व्वतः। इत्यमरः। २।३।१॥ (यथा,—
"पृथ्वी तावत् त्रिकोणा विपिननदनदीग्राववृद्धं तदह्नम्॥"
इत्युद्भटः॥)
मेघः। इति विश्वः॥ दृढे त्रि। इति शब्दरत्नावली॥

ग्रासः, पु, (ग्रस्यते अद्यते इति। ग्रस् + कर्म्मणि घञ्।) सुखपूरणान्नादि। यथा,—
"कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्।
एतं ग्रासं विजानीयात् शुद्ध्यर्थे कायशोधनम्॥"
इति प्रायश्चित्तप्रकरणे पराशरः॥
(तथा च मनुः। ११।२१३।
"एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्व्ववत्॥")
तत्पर्य्यायः। कवलः २। इत्यमरः। २।९।५४॥ गुडेरकः ३ पिण्डः ४ गण्डोलः ५ कवकः ६ गुरुः ७। इति हेमचन्द्रः।३।८९॥ (दशौषधकालान्तर्गतकालविशेषः। "तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्यभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुः ग्रासं ग्रासान्तरञ्चेति दशौषधकालाः॥" इत्युत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

ग्राहः, पु, (गृह्यते इति। ग्रह ञ उपादाने + भावे घञ्।) ग्रहणम्। (गृह्णातीति। ग्रह + "विभाषा ग्रहः।" ३।१।१४३। इति व्यवस्थापितविभाषया णः।) जलजन्तुविशेषः। हाङ्गर इति भाषा॥ जलहस्ती इति केचित्॥ तत्पर्य्यायः। अवहारः २। इत्यमरभरतौ॥ (यथा, महाभारते। १।२१।५।
"भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्तथा।
उग्रैर्नित्यमनाधृष्यं कूर्म्मग्राहसमाकुलम्॥")
शिशुकः। इति राजनिर्घण्टः॥ (आग्रहः। यथा, गीतायाम्। १७।१९।
"मूढग्राहेणात्मनो यत् पीडया क्रियते तपः॥"
"मूढग्राहेणाविवेककृतेन दुराग्रहेण।" इति श्रीधरस्वामी॥)

ग्राहकः, पुं, (गृह्णातीति। ग्रह + ण्वुल्।) सितावरशाकम्। इति राजनिर्घण्टः॥ हिंस्रपक्षी। व्यालग्राही। ग्रहीतरि त्रि। इति शब्दरत्नावली॥ (ग्रह + णिच् + ण्वुल्। ज्ञापकः। यथा, महाभारते। ३।२१०।१३।
"यथार्थं ग्राहकाण्येषां शब्दादीनामिमानि तु॥")

ग्राहिणी, स्त्री, (गृह्णाति अशेषगुणानिति। ग्रह उपादाने + "नन्दिग्रहीति।" ३।१।१३४। इति णिनि ङीप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥ ताम्रमूलाटच। इति रत्नमाला॥ खिरइ इति भाषा॥

ग्राहिफलः, पु, (ग्राहि धारकं मलबन्धकमित्यर्थः फलं यस्य।) कपित्थवृक्षः। इति राजनिर्घण्टः॥

ग्राही, [न्] पु, (गृह्णातीति। ग्रह + णिनिः।) कपित्थः। इति शब्दचन्द्रिका॥

ग्राही, [न्] त्रि, (गृह्णातीति। ग्रह + णिनि।) मलबन्धकः। धारकः। इति वैद्यकम्॥ (यथा, भावप्रकाशे।
"कांस्यनारी हिमा ग्राही तुवरा श्लेष्मपित्तनुत्॥")
ग्रहणकर्त्ता। इति व्याकरणम्॥ (यथा, कथासरित्सागरे। २५।४६।
"तत्र तस्यैव कैवर्त्तपतेः सत्यव्रतस्य सः।
शफरग्राहिभिर्भृत्यैः प्राप्य देवाद्गृहीत॥"
प्रतिकूलः। यथा, भट्टिः। ५।६३।
"मास्म भूर्ग्राहिणी भीरु! गन्तुमुत्साहिनी भव॥"
"हे भीरु! मास्म भूर्ग्राहिणी प्रतिकूला मा भूः।" इति जयमङ्गलः॥)

ग्रीवा, स्त्री, (गीर्य्यतेऽनया। गॄ निगरणे + "शेवायह्वजिह्वाग्रीवाप्वामीवाः।" उणा। १।१५४। इति वन्प्रत्ययेन निपातनात् साधुः।) गलघाटादिसमुदिता। इति भरतः॥ (यथा, शकुन्तलायां १ मे अङ्के।
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः॥")
सा तु गर्भे मासमात्रेण भवति। इति सुखबोधः॥ तत्पर्य्यायः। शिरोधिः २ कन्धरा ३। इत्यमरः। २।६।८८॥ कन्धिः ४ शिरोधरा ५। इति राजनिर्घण्टः॥ कन्धराशिरा। इति मेदिनी। वे।६॥

ग्रीवी, [न्] पु स्त्री, (ग्रीवा विद्यते यस्य। ग्रीवा + इनिः। दीर्घग्रीवावत्त्वया एव अस्य तथात्वम्।) उष्ट्रः। इति जटाधरः॥ प्रशस्तग्रीवायुक्ते त्रि॥

ग्रीष्मः, पुं, (ग्रसते रसान् इति। ग्रस् अदने + "ग्रीष्मः।" उणा। १।१४६। इति मक ग्रीभावश्च धातोः सुगागमश्च निपात्यते।) ऋतुविशेषः। (यथा, मनुः। ६।२३।
"ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः॥")
स तु ज्यैष्ठाषाढौ। तत्पर्य्यायः। उष्णकः २ निदाघः ३ उष्णोपगमः ४ उष्णः ५ ऊष्मागमः ६ तपः ७। इत्यमरः। १।४।१९॥ घर्म्मः ८ तापनः ९ उष्णागमः १० उष्णकालः ११।
"ग्रैष्मिकन्त्वनभिस्यन्दि जलमित्येव निश्चय॥"
इति राजनिर्घण्टः॥
("दीर्घवासरकं तीक्ष्णं ज्वालामालाकुलं जगत्।
दिशि ग्रीष्मे मृगतृष्णाः खिन्नाः स्युर्न्गवाजिनः॥
नैरृती मारुतो रूक्षः शीर्णपर्णा महीरुहा।
दग्धं वृषाकुलारण्यं दावाग्निश्च दिशो दश॥
एवं लक्षणके ग्रीष्मे पित्तरक्तमुदीर्य्यते।
तस्मात् क्रिया प्रतीकारं कुर्य्यात् संशमनं भिषक्॥
जलक्रीडा दिवानिद्रा सेवनं सुखसाधनम्।
श्यामारामारतं शस्तं कुञ्जकिञ्जल्कशीतलम्॥
नीलनालदलोपेतः श्रमघ्नो व्यजनानिलः।
केतक्या मोदकुसुमचन्दनोशीरशीतले॥
लेपनं शीतलं सम्यक् धारागाराश्रयः पुनः।
एवं क्रिया समापन्ने ग्रीष्मे च सुखसङ्गमः॥"
इति ग्रीष्मोपचारः॥
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये॥
"तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत्।
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते॥
अतोऽस्मिन् पटुकट्वम्लव्यायामार्ककरांस्त्यजेत्।
भजेन्मधुरमेवान्नं लघुस्निग्धं हिमं द्रवम्॥
सुशीततोयसिक्ताङ्गो लिह्यात् शक्तून् सशर्करान्।
मद्यं न पेयं पेयं वा स्वल्पं सुबहु वारि वा॥
अन्यथा शोफशैथिल्यदाहमोहान् करोति तत्।
कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः॥
पिबेद्रसं नातिघनं रसालां रागखाण्डवौ।
पानकं पञ्चसारं वा नवमृद्भाजनस्थितम्॥
मोचचोचदलैर्युक्तं साम्लं मृण्मयशुक्तिभिः।
पटलावासितं ह्यम्भः सकर्पूरं सुशीतलम्॥
शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत्।
ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम्॥
अभ्रंकषमहाशालतालरुद्धोष्णरश्मिषु।
वनेषु माधवीश्लिष्टद्राक्षास्तवकशालिषु॥
सुगन्धिहिमपानीयसिच्यमानपटालिके।
कायमाने चिते चूतप्रवालफललम्बिभिः॥
कदलीदलकह्लार-मृणालकमलोत्पलैः।
कल्पिते कोमले तल्पे हसत्कुसुमपल्लवे॥
मध्यन्दिनेऽर्कतापार्त्तः स्वप्याद्धारागृहेऽथवा।
पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि॥
निशाकरकराकीर्णे सौधपृष्ठे निशासु च।
आसनाःस्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः॥
निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः।
जलार्द्रास्तालवृन्तानि विस्तृताः पद्मिनीपुटाः॥
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः।
कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः॥
मनोहरकलालापाः शिशवः सारिकाः शुकाः।
मृणालवलया कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः॥
जङ्गमा इव पद्मिन्यो हरन्ति दयिताः क्लमम्॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये॥

दद्यात् सातिविषां पेयामामे साम्लां सनागराम्।
पानेऽतिसारविहितं वारितक्रं सुरादि च ॥
ग्रहणीदोषिणां तक्रं दीपनग्राहि लाघवात्।
पथ्यं मधुरपाकित्वान्न च पित्तप्रदूषणम् ॥
कषायोष्णविकाशित्वाद्रूक्षत्वाच्च कफे हितम्।
वाते स्वाद्वम्लसान्द्रत्वात् सद्यस्कमविदाहि तत् ॥"
"क्षीणक्षामशरीरस्य दीपनं स्नेहसंयुतम्।
दीपनं बहुपित्तस्य तिक्तैर्मधुरकैर्युतम् ॥
स्नेहोऽम्ललवणैर्युक्तो बहुवातस्य शस्यते।
स्नेहमेव परं विद्याद्दुर्ब्बलानलदीपनम् ॥
नालं स्नेहसमिद्धस्य शमायान्नं सुगुर्व्वपि।
योऽल्पाग्नित्वात् कफे क्षीणे वर्च्चः पक्वमपि श्लथम् ॥
मुञ्चेद्‌ यद्दीपनयुतं स पिबेदल्पशो घृतम्।
तेन स्वमार्गमानीतः स्वकर्म्मणि नियोजितः ॥
समानो दीपयत्यग्निमग्नेः सन्धुक्षको हि सः।
पुरीषं यश्च कृच्छ्रेण कठिनत्वाद्विमुञ्चति ॥
स घृतं लवणैर्युक्तं नरोऽन्नावग्रहं पिबेत्।
रौक्ष्यान्मन्देऽनले सर्पिस्तैलं वा दीपनैः पिबेत् ॥
क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः।
उदावर्त्तात् प्रयोक्तव्या निरूहस्नेहवस्तयः ॥
दोषातिवृद्ध्या मन्देऽग्नौ संशुद्धोऽन्नविधिं चरेत्।
व्याधिमुक्तस्य मन्देऽग्नौ सर्पिरेव तु दीपनम् ॥
अध्वोपवासक्षामत्वे यवाग्वा पाययेद्‌ घृतम्।
अन्नावपीडितं बल्यं दीपनं बृंहणञ्च तत् ॥
दीर्घकालप्रसङ्गात्तु क्षामक्षीणकृशान्नरान्।
प्रसहानां रसैः साम्लैर्भोजयेत् पिशिताशिनाम् ॥
लघूष्णकटुशोधित्वाद्दीपयन्त्याशु तेऽनलम्।
मांसोपचितमांसत्वात् परञ्च बलवर्द्धनम् ॥
स्नेहासवसुरारिष्टचूर्णक्वाथहिताशनैः।
सम्यक्प्रयुक्तैर्देहस्य बलमग्नेश्च वर्द्धते ॥
दीप्तो यथैव स्थाणुश्च वाह्योऽग्निः सारदारुभिः।
सस्नेहैर्जायते तद्वदाहारैः कोष्ठकोऽनलः ॥
न भोजनेन कायाग्निर्दीप्यते नातिभोजनात्।
यथा निरिन्धनो वह्निरल्पो वातीन्धनान्वितः ॥
यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम्।
प्रवृद्धं वर्द्धयत्यग्निं तदासौ सानिलोऽनलः ॥"
इति वाभटे चिकित्सास्थाने दशमेऽध्याये ॥
अपरं सकारणलक्षणचिकित्सितं यथा,—
"दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः।
अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ॥
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत्।
तस्मात् कार्य्यः परीहारस्त्वतीसारे विरक्तिवत् ॥
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा।
षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता ॥
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता।
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः ॥
तस्मात् सन्दूषिते वह्नौ ग्रहणी सम्प्रदुष्यति।
तस्योत्पत्तौ विदाहोऽन्ने सदनालस्यतृट्क्लमाः ॥
बलक्षयोऽरुचिः कासः कर्णक्ष्वेडान्त्रकूजनम्।
अथ जाते भवेज्जन्तुः शूनपादकरः कृशः ॥
पर्व्वरुग्लौल्यतृट्छर्द्दिज्वरारोचकदाहवान्।
उद्गिरेच्छुक्ततिक्ताम्ललोहधूमामगन्धिकम् ॥
प्रसेकमुखवैरस्यतमकारुचिपीडितः।
वाताच्छूलाधिके पायुहृत्पार्श्वोदरमस्तके ॥
पित्तात् सदाहैर्गुरुभिः कफात्त्रिभिस्त्रिलक्षणैः।
दोषवर्णनखैस्तद्वद्विण्मूत्रनयनाननैः ॥
हृत्पाण्डूदरगुल्मार्शःप्लीहाशङ्की च मानवः।
यथा दोषोच्छ्रयन्तस्य विशुद्धस्य यथाक्रमम् ॥
पेयादि वितरेत् सम्यग् दीपनीयोपसम्भृतम्।
ततः पाचनसङ्ग्राहि दीपनीयगणत्रयम् ॥
पिबेत प्रातः सुरारिष्टस्नेहमूत्रसुखाम्बुभिः।
तक्रेण वाथ तक्रं वा केवलं हितमुच्यते ॥
कृमिगुल्मोदराशोंघ्नीः क्रियाश्चात्रावचारयेत्।
चूर्णं हिङ्ग्वादिकञ्चात्र घृतं वा क्षीरनाशनम् ॥
कल्केन मगधादेश्च चाङ्गेरीस्वरसेन वा।
चतुर्गुणेन दध्ना च घृतं सिद्धं हितं भवेत् ॥
सर्व्वथा दीपनं सर्व्वं ग्रहणीरोगिणां हितम्।
ज्वरादीनविरोधाच्च साधयेत्स्वैश्चिकित्सितैः ॥"
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये ॥)

ग्रहणीरुक्, [ज्] स्त्री, (ग्रहण्येव रुक्।) ग्रहणीरोगः। तत्पर्य्यायः। प्रवाहिका २। इत्यमरः। २।६।५५॥ ग्रहिणी ३। इति तट्टीका ॥

ग्रहणीहरं, क्ली, (ग्रहणीं हरतीति। हृ + अच्।) लवङ्गम्। इति शब्दचन्द्रिका ॥ (ग्रहणीहारके त्रि ॥)

ग्रहद्रुमः, पुं, (ग्रहाख्यो द्रुमः वृक्षविशेषः।) शाकवृक्षः। इति राजनिर्घण्टः ॥

ग्रहनायकः, पुं (नयतीति। नी + ण्वुल्। ततो ग्रहाणां नायकः।) शनिः। इति शब्दरत्नावली ॥ सूर्य्यश्च ॥

ग्रहनाशः, पुं, (गृह्णाति रुणद्धि मलमिति शेषः। कोष्ठरोधकवायुविशेषः रोगविशेषो वा तं नाशयति। नश् + णिच् + अण्।) वृक्षविशेषः। इति शब्दरत्नावली ॥ छातियान इति भाषा ॥

ग्रहनाशनः, पुं, (ग्रहं रोगविशेषं नाशयतीति। नश् + णिच् + ल्यु।) ग्रहनाशवृक्षः। इति शब्दरत्नावली रत्नमाला च ॥

ग्रहनेमिः पुं, (ग्रहाणां ग्रहकक्षाणां ग्रहेषु वा नेमिरिव। ग्रहकक्षाधःस्थिततयाऽस्य नेमिसादृश्यमिति बोध्यम्।) चन्द्रः। इति शब्दरत्नावली ॥

ग्रहपतिः, पुं, (ग्रहाणां पतिः।) सूर्य्यः। (यथा महाभारते। १२।१६८।२५।
"तस्य विस्तीर्य्यते राज्यं ज्योत्स्ना ग्रहपतेरिव ॥")
अर्कवृक्षः। इत्यमरः। १।३।३० ॥ (शिवः। यथा, महाभारते। १३।१७।६७।
"चन्द्रः सूर्य्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ॥"
गृहस्वामी। यथा, महाभारते। १३।८५।११७।
"मम सत्रमिदं दिव्यमहं गृहपतिस्त्विह।
त्रीणि पूर्व्वाण्यपत्यानि मम तानि न संशयः ॥")

ग्रहपुषः, पुं, (ग्रहान् अन्यान् सर्व्वान् पुष्णाति स्वतेजसेत्यर्थः।) सूर्य्यः। इति हेमचन्द्रः ॥

ग्रहभीतिजित्, [द्] पुं, (ग्रहभीतिं जयतीति। जि + क्विप्।) चोडानामगन्धद्रव्यम्। इति राजनिर्घण्टः ॥

ग्रहयागः, पुं (यत्राग्नौ ग्रहानुद्दिश्य वा यो यागः।) ग्रहाणां यज्ञः। तस्य शान्तिकत्वे मलमासागस्त्यपि कर्त्तव्यत्वं पौष्टिकत्वे तु शुद्धकाले। तस्य प्रयोगो यथा। यजमानः कृतस्नानादिर्गोमयोपलिप्ते देशे कुशासने उपविश्य उदङ्मुखो ब्राह्मणान् स्वस्तिवाच्य सङ्कल्प्य सङ्कल्पार्थं श्वेतसर्षपैर्विघ्नकरानुत्सार्य्य गणाधिपषोडशमातृकापूजावसोर्द्धारावृद्धिश्राद्धानि कृत्वा स्वयं करणासामर्थ्ये ब्राह्मणान् वृणुयात्। ततो मण्डपोत्तरपूर्व्वभागे वितस्तिद्वयविस्तृतायां वितस्त्युच्छ्रितायां उदक्प्रवायां वेद्यां रक्तचन्दनादिना मध्ये वर्त्तुलं सूर्य्यं आग्नेय्यां श्वेतमर्द्धचन्द्राकारं सोमं दक्षिणस्यां त्रिकोणं रक्तं मङ्गलं ऐशान्यां पीतं धनुराकारं बुधं उत्तरस्यां पीतं पद्माकारं गुरुं प्राच्यां श्वेतं चतुष्कोणं शुक्रं प्रतीच्यां श्यामं सर्पाकारं शनिं नैरृत्यां श्यामं मकराकारं राहुं वायव्यां धूम्रवर्णं खड्गाकारान् केतून् विलिख्य स्वस्वगोत्रविशिष्टस्वस्वस्थापनादिप्रतिष्ठापनपर्य्यन्तं कर्म्म कृत्वा ग्रहशब्दे लिखितसद्गानेन मन्त्रेण ग्रहान् आवाह्य तेषां स्वस्ववर्णवस्त्रगन्धपुष्पादिना पूजयेत्। गन्धे विशेषः सूर्य्याय रक्तचन्दनं सोमाय श्वेतचन्दनं मङ्गलाय कुङ्कुमं बुधाय सरलं गुरवे समभागेन मिश्रितानि रक्तचन्दनश्वेतचन्दनकुङ्कुमसरलानि शुक्राय श्वेतचन्दनं शनैश्चराय कस्तूरीं राहवे मलयजं केतुभ्यश्च मदं दद्यात्। धूपे विशेषः। रवये गुग्गुलुं सोमाय सरलं मङ्गलाय देवदारु बुधाय घृतमिश्रितदेवदारु वृहस्पतये दशाङ्गं शुक्रायागुरुं शनैश्चराय कालागुरुं राहवे गुडत्वचं केतुभ्यो मधुमिश्रितगुडत्वचं दद्यात्। ततोऽधिदेवप्रत्यधिदेवताः पूजयेत्। ततो बलिं दद्यात्। सूर्य्याय गुडौदनं सोमाय घृतपायसं मङ्गलाय पक्वयवचूर्णात्मकं यावकं बुधाय क्षीराद्दध्योदनं शुक्राय घृतौदनं शनैश्चराय घृतसहितं तण्डुलात्मकं कृशरं राहवे छागमांसं केतुभ्यः अजाक्षीरसाधिताजकर्णरक्तमिश्रितवर्णान्वितं तण्डुलरूपं चित्रौदनम्। ततश्च मण्डपं कुशण्डिकां समाप्य दधिभक्तेन वह्निं कुर्य्यात्। ततो यथाशक्ति एकैकस्याष्टाविंशतिमष्टोत्तरशतमष्टोत्तरसहस्रं वा मधुघृताक्ताभिः सूर्य्यादीनां तत्तत्समिद्भिर्होमं कुर्य्यात्। समिधस्तु।
"अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः।
उडुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात् ॥"
ततः उदीच्यकर्म्म समाप्य दक्षिणां दद्यात्।
दक्षिणास्तु।
"धेनुः शङ्खस्तथानड्वान् हेम वासो हयः क्रमात्।
कृष्णा गौरायसञ्छाग एता वै दक्षिणाः क्रमात् ॥"
(अस्य यागस्य प्रयोजनं यथा, महानिर्व्वाणे।
"शान्तौ पुष्टौ महेशानि। तथा क्रूरेऽभिचारके।
ग्रहयागं प्रकुर्व्वाणो वाञ्छितार्थमवाप्नुयात्।

दीपिकायाञ्च । यथा,—
"शुभग्रहार्कवारेषु मृदुक्षिप्रध्रुवेषु च ।
शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम् ॥
मृदुगणः चित्रानुराधामृगशिरोरेवत्य । क्षिप्रगणो लघुगणः पुष्याश्विहस्ताः । ध्रुवगणः रोहिण्युत्तरात्रयम् ॥)
"गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥"
इति ग्रहयागतत्त्वम् ॥
(मात्स्योक्तम् । यथा,—
"श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन् पुनः ॥
येन ब्रह्मन् । विधानेन तन्मे निगदतः शृणु ।
सर्व्वशास्त्राण्यनुक्रम्य संक्षिप्य ग्रन्थविस्तरम् ॥
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिनोदिताम् ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥
ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत् ।
ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ।
प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम् ।
तृतीयः कोटिहोमस्तु सर्व्वकामफलप्रदः ॥
अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः ।
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ॥"
ग्रहवेदिनियमः । यथा,—
"गर्त्तस्योत्तरपूर्व्वेण वितस्तिद्वयविस्तृताम् ।
वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रयसम्मिताम् ॥
संस्थापनाय देवानां चतुरस्रामुदङ्मुखाम् ।
अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ॥
देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्क्कजाः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥"
मण्डले स्थानम् । यथा,—
"मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ।
उत्तरेण गुरुं विद्याद्बुधं पूर्व्वोत्तरेण तु ॥
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ।
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ॥
पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतण्डुलैः ॥"
अधिदेवताः । यथा,—
"भास्करस्येश्वरं विद्यात् उमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम् ।
शनैश्चरस्य तु यमं राहोः कालं तथैव च ।
केतोर्वै चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥"
प्रत्यधिदेवताः । यथा,—
"अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः ॥"
पञ्च लोकपालाः । यथा,—
"विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥"
ग्रहवर्णः । यथा,—
"संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ।
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ॥"
"ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ॥
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥"
अन्यद्विवरणन्तु ग्रहयागतत्त्वे दर्शनीयम् ॥)

ग्रहराजः, पुं, (ग्रहाणां राजा इति । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) सूर्य्यः । चन्द्रः । इति मेदिनी । जे । ३२ ॥ बृहस्पतिः । इति शब्दरत्नावली ॥

ग्रहाधारः, पुं, (ग्रहाणां आधारः आश्रयः । मेधीवद्धेतस्थानमाश्रित्य स्वस्वगत्यनुसारेण ग्रहाणां परिभ्रमणात्तथात्वम् ।) ध्रुवनक्षत्रम् । इति शब्दरत्नावली ॥

ग्रहामयः, पुं, (ग्रहः उपदेवविशेषस्तज्जन्य आमयः रोगभेदः ।) आवेशः । स तु भूतादिना जातरोगः । इति राजनिर्घण्टः ॥

ग्रहाशी, [न्] पुं, (ग्रहं ग्रहजन्यदोषं अश्नाति दूरीकरोतीति । अश+णिनिः । स्कन्दग्रहदोषमत्रातीत्यन्ये ।) ग्रहनाशवृक्षः । इति शब्दरत्नावली ॥

ग्रहाह्वयः, पुं, (ग्रहाणामुपदेवानामाह्वय आह्वा सञ्ज्ञा यस्य । ग्रहान् आह्वयति आकारयति तज्जनितदोषनाशायेति भावः । आ+ह्वे+शः । इत्यन्ये ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

ग्रहीता, [ऋ] त्रि, (गृह्णातीति । ग्रह+तृच् ।) ग्रहणकर्त्ता । तत्पर्य्यायः । ग्रहयालुः २ । इत्यमरः । ३ । १ । २७ ॥ (यथा, श्वेताश्वतरोपनिषदि ।
"अपाणिपादो यवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।"
तथा च मनुः । ८ । १६६ ।
"ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः ॥")

ग्रामः, पुं, (ग्रस+"ग्रसेरात् ।" उणां । १।१४२ । इति मन् धातोराकारान्तादेशश्च ।) विप्रादिवर्णप्रायाः प्राकारपरिखादिरहिता बहुजनवसतिः । इति भरतः ॥ तत्पर्य्यायः । संवसथः २ । इत्यमरः । २ । ३ । १९ ॥ हट्टादिशून्यवसतिः । इति श्रीधरस्वामी ॥ यथा, मार्कण्डेयपुराणे ।
"तथा शूद्रजनप्रायाः सुसमृद्धकृषीबलाः ।
क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥"
(तथा च मनुः । १० । ५४ ।
"अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥")
शब्दादिपूर्ब्बकश्चेत् समूहार्थः । इति विश्वः ॥ यथा शब्दग्रामः भूतग्रामः गुणग्रामः । इत्यादि ॥ (यथा, मनुः । २ । २१५ ।
"बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥"
शिवः । यथा, महाभारते । १३ । १७ । ११३ ।
"गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥")
स्वरभेदः । यथा,—
"षड्जमध्यमगान्धारास्त्रयो ग्रामा मता इह ।
षड्जग्रामो भवेदत्र मध्यमग्राम एव च ।
सुरलोके च गान्धारो ग्रामः प्रचरति स्वयम् ॥"
इदानीं षड्जग्रामस्य मूर्च्छनाः क्रियन्ते । मूर्च्छना प्रस्तार इत्यर्थः । स ऋ ग म प ध निश्च । इति षड्जस्य । म-पौ ध-नी स ऋ च गः । इति मध्यमस्य । ऋ-गौ म-पौ ध नी सोऽन्ते । इति गान्धारस्य मूर्च्छनाः । स ऋ ग म प ध निश्च । नि-सौ ऋ-ग-म-पाश्च धः । ध नि स ऋ ग म पोऽन्ते । प-धौ नि-सौ ऋ-गौ च म । म-पौ ध-नी च स ऋ ग । ग म प ध नि स च ऋः । ऋ-गौ म-पौ ध-नी सोऽन्ते । मूर्च्छना सप्त षड्जाः ॥
"आदि द्वित्रिचतुःपञ्चषट्सप्तस्वपि समे मता ।
मध्यमौ मो यदा तेषु मध्यमग्राममूर्च्छना ॥
आदौ गकारो यत्रास्ति गान्धारग्राममूर्च्छना ॥"
तत्र षड्जग्रामप्रस्तारस्यायं क्रमः ।
"षड्जान्निषधान्तं नेषान्तं धात् पान्तमिष्यते ।
पान्मान्तं मध्यमाद्गान्तं गादृषभान्तमिष्यते ॥
ऋषभात् सान्तमित्याहुः षड्जग्रामस्य मूर्च्छना ।
मध्यमग्रामजास्त्वेवं मूर्च्छनाः परिकीर्त्तिताः ॥
मकारादिक्रमेणैव गकारान्तास्तु ता मताः ।
तारो मन्द्रश्च आवश्च इति ग्रामनिरूपणाः ॥
षड्जग्राममूर्च्छनायाः सप्त कोष्ठानि ।
ब्रह्मविष्णुशिवैरुक्तास्त्रयो ग्रामा मनोहराः ॥"
इति सङ्गीतदामोदरः ॥

ग्रामकूटः, पुं, (ग्रामे ग्रामस्थो ग्रामस्य वा कूट इव तत्प्राधान्यात्तथात्वम् ।) शूद्रः । इति त्रिकाण्डशेषः ॥

ग्रामजनिष्पावी, स्त्री (ग्रामे ग्रामसन्निकर्षे वा जायते इति । जन+डः । ग्रामजा निष्पावीति कर्म्मधारयः ।) नखनिष्पावी । इति राजनिर्घण्टः ॥

ग्रामणीः, पुं, (ग्रामाः जीवसमूहाः नीयते चैतन्यदानेन परिचाल्यतेऽनेन । यद्वा ग्रामान् जीवसमूहान् नयति प्रापयति चेतयतीत्यर्थः । नी+क्विप् ततो णत्वम् ।) विष्णुः । यथा, महाभारते । १३ । १४९ । ३७ ।
"अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ॥"
यक्षः । यथा, विष्णुपुराणे २ । १० । २ ।
"स रथाधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥"
"देवैरादित्यैः आदित्या एव देवास्तैः । ग्रामण्यो यक्षाः ।" इति तट्टीका ॥ नापितः । इत्यमरः । ३ । ३ । ४९ ॥

ग्रामणीः, त्रि, (ग्रामं संवसथं तत्रत्यान् जनान् नयति दोषगुणविचारादिभिः परिचालयति प्रेरयति वा क्विप् ।) प्रधानः । अधिपतिः । इति मेदिनी । ने । ४५ ॥ (यथा, ऋग्वेदे । १० । १०७ । ५ ।
"दक्षिणावान् प्रथमो हूत एति ।
दक्षिणावान् ग्रामणीरग्रमेति ॥"
तथा च महागणपतिस्तोत्रे । ८ ।
"दानामोदविनोदलुब्धमधुपप्रोत्सारणाविर्भवत्
कर्णान्दोलनखेलनो विजयते देवो गणग्रामणीः ॥"

ग्रामेण ग्राम्येण भोग्यद्रव्येण आयुर्नयति यापयतीति। ग्रामान् भोग्यवस्तूनि नयति आत्मानं प्रापयतीति वा।) भोगिकः। इति हेमचन्द्रः॥

ग्रामणी, स्त्री, (ग्रामेण जनसमूहेनेत्यर्थः नीयते गम्यते यद्वा ग्रामेण ग्राम्यधर्म्मेण केवलं मैथुनादिना नयति कालं यापयतीति। नी + क्विप्।) वेश्या। ग्रामेया। नीलिका। इति हेमचन्द्रः॥

ग्रामतक्षः, पुं, (ग्रामस्य ग्रामपरतन्त्रो वा तक्षा। "ग्रामकौटाभ्यां च तक्ष्णः।" ५। ४। ९५। इति टच्।) ग्रामाधीनः काष्ठतट्। ग्रामायत्ततक्षा। इत्यमरः। २। १०। ९॥ गेंये छुतार इति भाषा॥

ग्रामता स्त्री (ग्रामाणां समूहः। "ग्रामजनबन्धुभ्यस्तल्।" ४। २। ४३। इति तल्।) ग्रामसमूहः। इत्यमरः। ३। २। ४३॥ (ग्रामस्य भावः। "तस्य भावस्त्वतलौ।" ५।१।११९। इति तल्।) ग्रामत्वञ्च॥

ग्रामभृतः, पुं, (ग्रामे ग्रामस्य वा भृतः, भरणीयः ग्रामावस्थितजनैरिति शेषः।) ग्रामप्रेष्यः। स तु ब्राह्मणश्चेत् पञ्चमोऽब्राह्मणः। इत्याह्निकतत्त्वम्॥ (यथाह शातातपः।
"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥")

ग्राममद्गुरिका, स्त्री, (ग्रामस्य मत्स्यग्रामेषु वा मद्गुरिकेव। क्षुद्रमद्गुर इवेत्यर्थः।) शृङ्गीमत्स्यः। ग्रामयुद्धम्। इति मेदिनी। के। २३४॥

ग्रामसुखः, पुं, (ग्रामस्य सुखमिव यो स्थितः। यद्वा ग्रामो ग्रामवासिजनो सुखत्वेन प्रधानकारणत्वेन यस्य। ग्रामस्थजनसाध्यत्वादेवास्य तथात्वम्।) हट्टः। इति शब्दरत्नावली॥

ग्राममृगः, पुं, (ग्रामस्य मृग इव। यद्वा, ग्रामे स्थितो मृगः पशुः।) कुक्कुरः। इति शब्दरत्नावली॥

ग्रामयाजकः, पुं, (ग्रामस्य याजको यागकर्त्ता।) ग्रामस्थनानावर्णानां पुरोहितः। स तु चतुर्थोऽब्राह्मणः। यथाह शातातपः।
"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादित्यान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"
(एतस्मै प्रदत्तं दानादिकं निष्फलं भवति। यथोक्तं महाभारते। ३। १९९। ७।
"यथैव पतिते दानं ब्राह्मणे तस्करे तथा।
गुरौ चानृतिके पापे कृतघ्ने ग्रामयाजके॥")

ग्रामस्थः त्रि, ग्रामवासी। ग्रामे तिष्ठति य इत्यर्थे कप्रत्ययः॥

ग्रामहासकः, पुं, (ग्रामान् ग्रामवासिनः श्वशुरालयस्थसमूहान् वा हासयतीति। हस् + णिच् + ण्वुल।) भगिनीपतिः। इति शब्दरत्नावली॥

ग्रामाधानं, क्ली,(आधीयते उपजीविका यत्र तत्। आ + धा + ल्युट्। ततो ग्रामस्य मृगयुसमूहस्य आधानं पोषणकम्।) मृगया। इति हलायुधः॥

ग्रामान्तं क्ली, (ग्रामस्य अन्तं समीपम्।) ग्रामसमीपम्। तत्पर्य्यायः। उपशल्यम् २। इत्यमरः। २। ३। २०॥ ग्रामान्तिकम् ३। इति वोपालितः॥

ग्रामिणी स्त्री, (ग्रामः उत्पत्तिस्थानत्वेन अस्ति अस्याः। अत इनिः, स्त्रियां ङीप्।) नीलीवृक्षः। इति जटाधरः॥

ग्रामी [न्] त्रि, (ग्रामः अधिकारित्वेनास्त्यस्य। अत इनिः।) ग्रामविशिष्टः। गाँई इति भाषा॥ यथा, ब्राह्मणकुलाचार्य्यकारिकायाम्।
"रामो गडगडग्रामी निपः केशरकोणितः।
केशरकोणीति ख्यातो ग्रामी ग्रामवताम्वरः॥"
(ग्रामो ग्राम्यधर्म्मो मैथुनं अस्त्यस्येति। ग्राम्यधर्म्मविशिष्टः। यथा, भागवते। ४। २९। १४।
"आसुरी मेढ्रमर्व्वाग्द्वार्व्यवायो ग्रामिणां रतिः।
उपस्थो दुर्म्मदः प्रोक्तो निरृतिर्गुद उच्यते॥")

ग्रामीणः, पुं (ग्रामे भवः। ग्राम + "ग्रामाद्यखञौ।" ४। २। ९४। इति खञ्।) ग्राम्यशूकरः। इति राजनिर्घण्टः॥ कुक्कुरः। काकः। ग्रामोत्पन्ने त्रि। इति मेदिनी। णे। ४६॥ (यथा, भाषापरिच्छेदे। ७९।
"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्॥")

ग्रामीणा, स्त्री, (ग्रामीण + स्त्रियां टाप्।) नीलीवृक्षः। इति मेदिनी॥(अस्याः पर्य्याया यथा
"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ गुणाश्चास्या नीलिनीशब्दे ज्ञातव्याः॥) पालङ्क्यशाकम्। इति राजनिर्घण्टः॥

ग्रामेयकः, त्रि,(ग्रामे भवः। ग्राम + "कत्त्र्यादिभ्यो ढकञ्।" ४।२।९५। इति ढकञ्।) ग्राम्यः। इति हेमचन्द्रः। ३। १४५॥

ग्रामेया स्त्री, (ग्रामे भवा। ग्राम + ढक्।) ग्राम्यनारी। इति ग्रामणीशब्दार्थे हेमचन्द्रः॥

ग्रामेशः त्रि (ग्रामस्य ईशः।) ग्रामेश्वरः। ग्रामाधिपतिः। यथा शान्तिशतके। ११।
"यः कश्चित् पुरुषाधमः कतिपयग्रामेशमल्पार्थदं।
सेवायै मृगयामहे नरमहो मूढा वराका वयम्॥"

ग्राम्यः, त्रि (ग्रामे भवः। ग्राम + "ग्रामात् यखञौ।" ४। २। ९४। इति यः।) ग्रामोत्पन्नः। तत्पर्य्यायः। ग्रामेयकः २ ग्रामीणः ३। इति हेमचन्द्रः। ३। १४५॥ (यथा, मनुः। ११। १९९।
"श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च॥"
तथा, माघे। १२। ३८।
"ग्राम्यानपश्यत् कपिशं पिपासतः॥"
मूढः। प्राकृतः। यथा, तत्रैव। १४। ६४।
"ग्राम्यभावमपहातुमिच्छवो
योगमार्गपतितेन चेतसा॥")
भण्डादिवचनम्। "हालिकशाकटिकप्रधानत्वात् ग्रामे भवं ग्राम्यम्।" इति भरतः॥ तत्पर्य्यायः। अश्लीलम् २। इत्यमरः। १।६।१९॥ (काव्यस्य दोषविशेषः। स च शब्दगतः अर्थगतश्च। तत्र शब्दगतो यथा, साहित्यदर्पणे। ७। ३।
"दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः।
ग्राम्योऽप्रतीतसन्दिग्धनेयार्थनिहतार्थता॥"
अस्य उदाहरणं यथा तत्रैव। "कटिस्ते हरते मनः। अत्र कटिशब्दो ग्राम्यः॥" अर्थगतो यथा तत्रैव। ७। ५।
"अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः॥"
उदाहरणं यथा तत्रैव। "स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय।॥ अत्रार्थो ग्राम्यः॥")

ग्राम्यकन्दः, पुं, (ग्राम्यो ग्रामभवः कन्दः।) ग्राम्योलः। वनओल इति भाषा। तत्पर्य्यायः। स्थूलकन्दः २। इति रत्नमाला॥ स तु दोमलः। इति राजवल्लभः॥

ग्राम्यकर्कटी, स्त्री, (ग्राम्या ग्रामजाता कर्कटी।) कुष्माण्डः। इति त्रिकाण्डशेषः॥

ग्राम्यकुङ्कुमं, क्ली, (ग्राम्यं ग्रामसम्भूतं कुङ्कुमम्।) कुसुम्भम्। इति त्रिकाण्डशेषः॥

ग्राम्यधर्म्मः पुं, (ग्राम्यस्य इतरादेर्धर्म्मः।) मैथुनम्। इत्यमरः। २। ७। ५७॥ (यथा, महाभारते। ३। ४८। ४।
"प्रमत्तो ग्राम्यधर्म्मेषु मन्दात्मा पापनिश्चयः।
मम पुत्त्रः सुदुर्बुद्धिः पृथिवीं घातयिष्यति॥")

ग्राम्यपशुः पुं, (ग्राम्यो ग्रामजातः पशुः।) ग्रामजातजन्तुः। (यथा, भागवते। ६। १५। १६।
"तस्माद् युवां ग्राम्यपशोर्मम मूढधियः प्रभू।
अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्य्यताम्॥")
स तु सप्तविधो यथा। गौः १ अजः २ मेषः ३ मनुष्यः ४ अश्वः ५ अश्वतरः ६ गर्द्दभः ७। इति तिथ्यादितत्त्वम्॥ (यथाह पैठीनसिः।
"ग्राम्यारण्याश्चतुर्द्दश। गौरविरजोऽश्वोऽश्वतरो गर्द्दभो मनुष्यश्चेति ग्राम्याः पशवः। महिषवानरऋक्षसरीसृपरुरुपृषतमृगाश्चेति सप्तारण्याः॥" सुश्रुतमते उष्ट्रादयोऽपि ग्राम्याः। यदुक्तं तत्रैव सूत्रस्थाने ४६ अध्याये।
"अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः॥")

ग्राम्यमद्गुरिका, स्त्री (ग्राम्या ग्रामोद्भवा मद्गुरिका) शृङ्गीमत्स्यः। इति हारावली॥

ग्राम्यमृगः, पुं, (ग्राम्यो ग्रामभवो मृगो हरिण इव। मृगः पशुर्वा इत्येके।) कुक्कुरः। इति जटाधरः॥

ग्राम्यराशिः, पुं, (ग्राम्यो राशिः।) मिथुनम्। कन्या। तुला। वृश्चिकः। धनुः। कुम्भः। रात्रौ मेषः वृषश्च। इति ज्योतिषम्॥

ग्राम्यवल्लभा, स्त्री, (ग्राम्याणां ग्रामस्थजनानां वल्लभा प्रिया । पल्लीग्रामस्थजनप्रियत्वादेवास्या-स्तथात्वम् ।) पालङ्कशाकम् । इति राज-निर्घण्टः ॥ (ग्राम्यं अश्लील वल्लभ प्रियं यस्याः इति विग्रहे वेश्या । इति व्युत्पत्तिलब्धोऽर्थः ॥)

ग्राम्यशूकरः, पु, स्त्री, (ग्राम्यः शूकरः ।) ग्रामोत्-पन्नवराहः । तत्पर्य्यायः । विड्वराहः २ ग्रामीणः ३ ग्रामक्रोडः ४ ग्रामकोलः ५ विष्कलः ६ दारकः ७ । तस्य मांसस्य गुणाः । वनवराह-मांसाद्गुरुत्वम् । मेदोबलवीर्य्यवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

ग्राम्या, स्त्री, (ग्रामे भवा । ग्राम + "ग्रामात् यखञौ ।" ४ । २ । ९४ । इति यः । स्त्रियां टाप् ।) नीली । निष्पावी । इति राज-निर्घण्टः ॥ (तुलसी । इति चिन्तामणिः ॥)

ग्राम्याश्वः, पु, (ग्राम्यः ग्रामजातोऽश्वः ।) गर्द्दभः । इति त्रिकाण्डशेषः ॥

ग्रावा, [न्] पुं, (ग्रसते इति ग्रः । ग्रस् + अन्ये-भ्योऽपीति डः । आवनति शब्दायते इति । आ + वन शब्दे + विच् । ततो ग्रश्चासौ आवा चेति ।) प्रस्तरः । (यथा, भागवते । ४ । ५ । १८ । "सर्व्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः । तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् ॥") पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ (यथा,— "पृथ्वी तावत् त्रिकोणा विपिननदनदीग्रावरुद्धं तदद्धम् ॥" इत्युद्भटः ॥) मेघः । इति विश्वः ॥ दृढे त्रि । इति शब्दरत्ना-वली ॥

ग्रासः, पु, (ग्रस्यते अद्यते इति । ग्रस् + कर्म्मणि घञ् ।) सुखपूरणान्नादि । यथा,— "कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम् । एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम् ॥" इति प्रायश्चित्तप्रकरणे पराशरः ॥ (तथा च मनुः । ११ । २१३ । "एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्व्ववत् ॥") तत्पर्य्यायः । कवलः २ । इत्यमरः । २ । ९ । ५४ ॥ गुडेरकः ३ पिण्डः ४ गण्डोलः ५ कवकः ६ गुरुः ७ । इति हेमचन्द्रः । ३ । ८६ ॥ (दशौषध-कालान्तर्गतकालविशेषः । "तत्र निर्भक्तं प्राग्-भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुः ग्रासं ग्रासान्तरञ्चेति दशौषधकालाः ॥" इत्युत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥)

ग्राहः, पु, (गृह्यते इति । ग्रह ञ उपादाने + भावे घञ् ।) ग्रहणम् । (गृह्णातीति । ग्रह + "विभाषा ग्रहः ।" ३ । १ । १४३ । इति व्यव-स्थापितविभाषया णः ।) जलजन्तुविशेषः । हाङ्गर इति भाषा ॥ जलहस्ती इति केचित् ॥ तत्-पर्य्यायः । अवहारः २ । इत्यमरभरतौ ॥ (यथा, महाभारते । १ । २१ । ५ । "भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्तथा । उग्रैर्नित्यमनाधृष्यं कूर्म्मग्राहसमाकुलम् ॥") शिशुकः । इति राजनिर्घण्टः ॥ (आग्रहः । यथा, गीतायाम् । १७ । १९ । "मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ॥" "मूढग्राहेणाविवेककृतेन दुराग्रहेण ।" इति श्रीधरस्वामी ॥)

ग्राहकः, पु, (गृह्णातीति । ग्रह + ण्वुल् ।) चिता-वरशाकम् । इति राजनिर्घण्टः ॥ हिंस्रपक्षी । व्यालग्राही । ग्रहीतरि त्रि । इति शब्दरत्ना-वली ॥ (ग्रह + णिच् + ण्वुल् । ज्ञापकः । यथा, महाभारते । ३ । २१० । १३ । "यथाख्यं ग्राहकाण्येषां शब्दादीनामिमानि तु ॥")

ग्राहिणी, स्त्री, (गृह्णाति अशेषगुणानिति । ग्रह उपादाने + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनि ङीप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥ ताम्रमूलाटक्ष । इति रत्न-माला ॥ धिरद इति भाषा ॥

ग्राहिफलः, पु (ग्राहि धारकं मलवन्धकमित्यर्थः फलं यस्य ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥

ग्राही, [न्] पु, (गृह्णातीति । ग्रह + णिनिः ।) कपित्थः । इति शब्दचन्द्रिका ॥

ग्राही, [न्] त्रि, (गृह्णातीति । ग्रह + णिनिः ।) मलवन्धकः । धारकः । इति वैद्यकम् ॥ (यथा, भावप्रकाशे । "काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत् ॥") ग्रहणकर्त्ता । इति व्याकरणम् ॥ (यथा, कथा-सरित्सागरे । २५ । ४६ । "तत्र तस्यैव कैवर्त्तपतेः सत्यव्रतस्य सः । शफरग्राहिभिर्भृत्यैः प्राप्य दैवादगृह्यत ॥" प्रतिकूलः । यथा, भट्टिः । ५ । ९३ । "मास्म भूर्ग्राहिणी भीरु । गन्तुमुत्साहिनी भव ॥" "हे भीरु । मास्म भूर्ग्राहिणी प्रतिकूला मा भूः ।" इति जयमङ्गलः ॥)

ग्रीवा, स्त्री, (गीर्य्यतेऽनया । गॄ निगरणे + "ग्रीवा-यज्ञजिह्वाग्रीवाप्रामीवाः ।" उणा । १ । १५४ । इति वन्प्रत्ययेन निपातनात् साधुः ।) गल-घाटादिसमुदिता । इति भरतः ॥ (यथा, शकुन्तलायां १ मे अङ्के । [दृष्टिः ॥") "ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्त-सा तु गर्भे मासमात्रेण भवति । इति सुख-बोधः ॥ तत्पर्य्यायः । शिरोधिः २ कन्धरा ३ । इत्यमरः । २ । ६ । ८८ ॥ कन्धिः ४ शिरो-धरा ५ । इति राजनिर्घण्टः ॥ कन्धराशिरा । इति मेदिनी । वे । ६ ॥

ग्रीवी, [न्] पु स्त्री, (ग्रीवा विद्यते यस्य । ग्रीवा + इनिः । दीर्घग्रीवावत्त्वया एव अस्य तथा-त्वम् ।) उष्ट्रः । इति जटाधरः ॥ प्रशस्तग्रीवा-युक्ते त्रि ॥

ग्रीष्मः, पु, (ग्रसते रसान् इति । ग्रस्नु अदने + "ग्रीष्मः ।" उणां । १ । १४९ । इति मक् ग्रीभावश्च धातोः सुगागमश्च निपात्यते ।) ऋतु-विशेषः । (यथा, मनुः । ६ । २३ । "ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ॥") स तु ज्यैष्ठाषाढौ । तत्पर्य्यायः । उष्णकः २ निदाघः ३ उष्णोपगमः ४ उष्णः ५ ऊष्मागमः ६ तपः ७ । इत्यमरः । १ । ४ । १९ ॥ घर्म्मः ८ तापनः ९ उष्णागमः १० उष्णकालः ११ । "ग्रैष्मिकन्त्वनभिस्यन्दि चलमित्येव निश्चय ॥" इति राजनिर्घण्टः ॥

("दीर्घवासरकं तीक्ष्णं ज्वालामालाकुलं जगत् । दिशि शैष्मे स्वगत्याः खिन्नाः सूर्य्यस्य वाजिनः ॥ नैर्ऋतो मारुतो रूक्षः शीर्णपर्णा महीरुहाः । दग्धं तृणाकुलारण्यं दावाग्निश्च दिशो दश ॥ एवं लक्षणके ग्रीष्मे पित्तरक्तमुदीर्य्यते । तस्मात् क्रिया प्रतीकारं कुर्य्यात् सप्रशमं भिषक् ॥ जलक्रीडा दिवानिद्रा सेवनं सुखसाधनम् । श्यामारामारतं शस्तं कुञ्जकिञ्जल्कशीतलम् ॥ नीलनालदलोपेतं अमन्दो व्यजनानिलः । केतक्या मोदकुसुमचन्दनोशीरशीतले ॥ लेपनं शीतलं सम्यक् धारागाराश्रयं पुनः । एवं क्रिया समापन्ने ग्रीष्मे च सुखसङ्गमः ॥" इति ग्रीष्मोपचारः ॥ इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥ "तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत् । प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते ॥ अतोऽस्मिन् पटुकट्वम्लव्यायामार्ककरांस्त्यजेत् । भजेन्मधुरमेवान्नं लघुस्निग्धं हिमं द्रवम् ॥ सुशीततोयसिक्ताङ्गो लिह्यात् शक्तून् सशर्करान् ॥ मद्यं न पेयं पेयं वा स्वल्पं सुबहु वारि वा ॥ अन्यथा शोफशैथिल्यदाहमोहान् करोति तत् । कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः ॥ पिबेद्रसं नातिघनं रसालां रागखाण्डवौ । पानकं पञ्चसारं वा नवमृद्भाजनस्थितम् ॥ मोचचोचदलैर्युक्तं साम्लं मृण्मयशुक्तिभिः । पटलावासितञ्चाम्भः सकर्पूरं सुशीतलम् ॥ शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत् । ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम् ॥ अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु । वनेषु माधवीश्लिष्टद्राक्षास्तवकशालिषु ॥ सुगन्धिहिमपानीयसिच्यमानपटालिके । कायमाने चिते चूतप्रवालफललम्बिभिः ॥ कदलीदलकह्लार-मृणालकमलोत्पलैः । कल्पिते कोमले तल्पे हसत्कुसुमपल्लवे ॥ मध्यदिनेऽर्कतापार्त्तः स्वप्याद्धारागृहेऽथवा । पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि ॥ निशाकरकराकीर्णे सौधपृष्ठे निशासु च । आसनास्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः ॥ निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः । जलार्द्रास्तालवृन्तानि विस्तृताः पद्मिनीपुटाः ॥ उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः । कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः ॥ मनोहरकलालापाः शिशवः शारिकाः शुकाः । मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः ॥ जङ्गमा इव पद्मिन्यो हरन्ति दयिताः क्लमम् ॥" इति वाभटे सूत्रस्थाने तृतीयेऽध्याये ॥

"ग्रीष्मे पुनर्भृशोष्णोपहतत्वात् शरीरमसुखोपपन्नं भवति। उष्णवातातपव्यातमतिशिथिलमत्यन्तप्रविलीनदोषं भेषजं पुनः संशोधनार्थमुष्णस्वभावमुष्णानुगमनात्तीक्ष्णतरत्वमापद्यते। तस्मात्तयोः संयोगे संशोधनमतियोगायोपपद्यते शरीरं पिपासोपद्रवाय।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥

"मयूखैर्जगतः सारं ग्रीष्मे पेपीयते रविः।
स्वादुशीतं द्रवं स्निग्धमन्नपानं तदा हितम् ॥
शीतं सशर्करं मन्थं जाङ्गलान्मृगपक्षिणः।
घृतं पयः सशाल्यन्नं भजन् ग्रीष्मे न सीदति ॥
मद्यमल्पं न वा पेयमथवा सुबहूदकम्।
लवणाम्लकटूष्णानि व्यायामञ्चात्र वर्ज्जयेत् ॥
दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतलम्।
भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्म्यमस्तके ॥
व्यजनैः पाणिसंस्पर्शैश्चन्दनोदकशीतलैः।
सेव्यमानो भजेदास्या मुक्तामणिविभूषितः ॥
काननानि च शीतानि जलानि कुसुमानि च।
ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः ॥"

इति च सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम् ॥)
तत्र जातफलं यथा, कोष्ठीप्रदीपे।

"ग्रीष्मोद्भवो भोगभवानुरक्तो
वक्ता सुशीलो जलकेलिशीलः।
विद्याघनैश्वर्य्ययशोमनोज्ञो
धन्वी सुवेशः परदारचित्तः ॥"

उष्णः। इति मेदिनी। मे। १०॥ गरमि इति तात् इति च भाषा॥ तद्वति त्रि॥

ग्रीष्मजा, स्त्री, (ग्रीष्मात् ग्रीष्मप्रभावात् ग्रीष्मे ग्रीष्मकाले वा जायते या इति। जन्+ड। ततष्टाप् च।) नवमल्ली। इति शब्दचन्द्रिका॥ लोया इति भाषा॥ (ग्रीष्मजातमात्रे, त्रि॥)

ग्रीष्मपुष्पी, स्त्री, (ग्रीष्मे ग्रीष्मकाले पुष्पं यस्याः। जातौ सञ्ज्ञायां वा ङीप्।) करुणीपुष्पवृक्षः। इति राजनिर्घण्टः॥

ग्रीष्मभवा, स्त्री, (ग्रीष्मे ग्रीष्मसमये ग्रीष्मागमे इत्यर्थः भवति उत्पद्यते या। भू+अच्। टाप्।) नवमल्लिका। इति रत्नमाला॥ ("कुमारिका ग्रीष्मभवा सुगन्धा।" इति वैद्यकरत्नमालायाम्।)

ग्रीष्मसुन्दरकः, पुं, (ग्रीष्मे सुन्दर इव कायते शोभते इति। कै+कः। ग्रीष्मसुन्दर+स्वार्थे कन् वा।) शाकविशेषः। गिमा इति भाषा॥ तस्य गुणाः। तिक्तत्वम्। लघुत्वम्। कफपित्तदोषनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभः॥

ग्रीष्महासः, पुं, (ग्रीष्मे ग्रीष्मसमये हासः प्रकाश उत्पत्तिजन्यशोभेत्यर्थः यस्य।) इन्द्रतूलकम्। इति त्रिकाण्डशेषः॥ बुडीर सूता। इति भाषा॥

ग्रीष्मी, स्त्री, (ग्रीष्मे ग्रीष्मसमये उत्पत्तिकारणत्वेनास्त्यस्याः। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच् ततो ङीप्।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्रीष्मोद्भवा, स्त्री, (उद्भवतीति। उत्+भू+अच्। ग्रीष्मे उद्भवो यस्याः ग्रीष्मे उद्भवतीति वा।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्रुच, इर् उ चौर्य्ये। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) रेफयुक्तः। पञ्चमस्वरी। इर्, अग्रुचत् अग्रोचीत्। उ, ग्रोचित्वा ग्रुक्त्वा। इति दुर्गादासः॥

ग्रैवं, क्ली, (ग्रीवायां भवम्। "ग्रीवाभ्योऽण् च।" ४।३।५७। इति अण्।) ग्रीवाभूषणम्। इति शब्दरत्नावली॥ (यथा, रघुः। ४।४८॥

"भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्।
नास्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥")

ग्रैवेयं, क्ली (ग्रीवायां भवम्। "चात् ढञ्।" "ग्रीवाभ्योऽण् च।" ४।३।५७। इत्यस्य सूत्रस्य वार्त्तिकोक्त्या चकारात् ढञ्।) कण्ठभूषणम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ७।३५।३४।

"पुनर्दीप्तान् द्विपारोहान् वैजयन्त्यङ्कुशध्वजान्।
तूणवर्म्मोपरयो कक्षान् ग्रैवेयास्तथ कम्बलान्॥")

ग्रैवेयकः, क्ली, (ग्रीवायां भवमिति। "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु।" ४।२।९६। इति ढकञ्।) कण्ठभूषा। इत्यमरः।२।६।१०४॥ (यथा, मार्कण्डेयपुराणे। ८२।२५।

"नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥")

ग्रैष्मी, स्त्री, (ग्रीष्मे भवेति। "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।"४।३।१६। इति अण् ततो ङीप्। "पचे अत्वण् ङीप्।" इति व्याडियौके।) नवमल्लिका। इति त्रिकाण्डशेषः॥ ग्रीष्मसम्बन्धिनि त्रि नान्तस्य॥

ग्लस, उ ङ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-सक-सेट्-उदित्वात् क्त्वा वेट्।) अन्तस्थतृतीययुक्तः। उ, ग्लसित्वा ग्लस्त्वा। ङ, ग्लसते। इति दुर्गादासः॥

ग्लस्तं, त्रि, (ग्लस्+कर्म्मणि क्तः।) भक्षितम्। इत्यमरः। ३।२।११२॥

ग्लह, ऊ कि आदाने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-वेट्।) अन्तःस्थतृतीययुक्तः। ऊ, अग्लहीत् अग्लाक्षीत्। कि, ग्लाहयति ग्लहति। एषः कैश्चिन्न मन्यते इति दुर्गादासः॥ (यथा, महाभारते। २।६७।१६।

"इमां चेत् पूर्व्वं कितवोऽग्लहीष्यदीशोऽभविष्यदपराजितात्मा ॥")

ग्लहः, पुं, (ग्लह्+"अक्षेषु ग्लहः।" ३।३।७०। अक्षशब्देन देवनं लक्ष्यते तत्र यत् पणरूपेण ग्राह्यं तत्र ग्लह इति निपात्यते। इति वार्त्तिकोक्त्या च निपातनात् तथात्वम्।) अक्षक्रीडासु पणः। इत्यमरः। २।१०।४५॥ बाजि इति बाजि इति च भाषा॥ (यथा, महाभारते। २।६७।६।

"पाञ्चालस्य द्रुपदस्यात्मजामिमां
सभामध्ये यो वदेवीद् ग्लहेषु ॥")

ग्लाता, [ऋ] त्रि, (ग्लायति ग्लानियुक्तो भवतीति। ग्लै+तृच्।) ग्लानियुक्तः। इति व्याकरणम्।

ग्लानः, त्रि, (ग्लै+कर्त्तरि क्तः।) रोगात् क्षीणदेहः। तत्पर्य्यायः। ग्लास्नुः २। इत्यमरः। २।६।५८॥ रोगी। इति राजनिर्घण्टः॥

ग्लानिः, स्त्री, (ग्लायति अनेनास्मिन् वा। ग्लै+"वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्।" उणा। ४।५१। इति निः।) बलहीनता। इति हेमचन्द्रः।२।२३३॥ (यथा, गीतायाम्। ४।७।

"यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत।")

रोगः। इति राजनिर्घण्टः॥ (यथा, भागवते। ५।२४।१३। "देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति।")

ग्लास्नुः, त्रि, (ग्लायतीति। ग्लै+"ग्लाजिस्थश्च ग्स्नुः।"३।२।१३९। इति ग्स्नुः।) ग्लानः। इत्यमरः। २।६।५८॥ (यथा, भट्टिः।७।४।

"पश्यन् मान्यवति ग्लास्नुं रामो जिष्णुरधृष्णुवत्।")

ग्लुच, इर् उ चौर्य्ये गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं सेट्। उदित्वात् क्त्वावेट्।) अन्तस्थतृतीययुक्तः। पञ्चमस्वरी। इर्, अग्लुचत् अग्लोचीत्। उ, ग्लोचित्वा ग्लुक्त्वा। इति दुर्गादासः॥

ग्लुञ्च, उ इर् गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सक-सेट्।) उदित्त्वात् क्त्वावेट्। अन्तस्थतृतीययुक्तादिः। पञ्चमस्वरी। उ, ग्लुञ्चित्वा ग्लुक्त्वा। इर्, अग्लुचत् अग्लुञ्चीत्। इति दुर्गादासः॥

ग्लेप, ऋ ङ दैन्ये। गतौ। चाले। इति कविकल्पद्रुमः। (भ्वा आत्म-अक-सक च-सेट्।) अन्तःस्थतृतीययुक्तः। ङ, ग्लेपते निर्धनः सदा। ऋ, अजिग्लेपत्। इति दुर्गादासः॥

ग्लेयः, त्रि, (ग्लानिमर्हतीति। ग्लै+यः।) ग्लानियोग्यः। इति व्याकरणम्॥

ग्लेव, ऋ ङ सेवे। इति कविकल्पद्रुमः॥ (भ्वां आत्म-सक-सेट्।) अन्तःस्थतृतीययुक्तः। ऋ, अजिग्लेवत्। ङ, ग्लेवते। इति दुर्गादासः॥

ग्लेष, ऋ ङ अन्वेषे। इति कविकल्पद्रुमः॥ (भ्वां आत्म-सक-सेट्।) अन्तःस्थतृतीययुक्तः। ऋ, अजिग्लेषत्। ङ, ग्लेषते जिग्लेषे। अन्वेषोऽनुसन्धानम्। ग्लेषते यः सतां मार्गमिति हला युधः। इति दुर्गादासः॥

ग्लै, क्षये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अक अनिट्।) अन्तःस्थतृतीययुक्तः। क्षयो हर्षक्षयः। ग्लायति लोकः शोकात्। अनुपसर्गस्य ग्लै ज्वल ह्वल ह्मल इत्यादिना वा ह्रस्वः। ग्लपयति ग्लापयति। सोपसर्गस्य तु प्रग्लापयति। इति दुर्गादासः॥ (यथा, मनुः।२।९८।

"श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥")

ग्लौः, पुं, (ग्लायति ग्लानिं प्राप्नोति कृष्णपक्षे इति भावः। ग्लै+"ग्लानुदिभ्यां डौः।" उणा।

२ । ६४ । इति टीः ।) चन्द्रः । (यथा, अथर्व्व-
वेदसंहितायाम् । ६ । ८३ । ३ ।
"ग्लौरितः प्र पतिष्यति स गलुन्तो नशिष्यति ॥")
कर्पूरः । इत्यमरः । १ । ३ । १४ ॥

घ

घ, घकारः । स तु व्यञ्जनचतुर्थवर्णः । अस्यो-
च्चारणस्थानं कण्ठः । इति व्याकरणम् ॥ (एतत्तु
मुग्धबोधमतम् । यथा, "अ आ ह क ख ग
घ ङाः कण्ठ्याः ।" पाणिनीये तु एष कण्ठ्यो
जिह्वामूलीयश्च । यथा, "अकुहविसर्ज्जनीयानां
कण्ठः ॥" इत्युक्त्वा पुन. शिक्षायाम् ।
"जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो व' स्मृतो
बुधे. ॥")
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"घकार चञ्चलापाङ्गि । चतुष्कोणात्मकं सदा ।
पञ्चदेवमय वर्णमरुणादित्यसन्निभम् ॥
निर्गुणं त्रिगुणोपेत सदा त्रिगुणसंयुतम् ।
सर्व्वगं सर्व्वदं शान्तं घकारं प्रणमाम्यहम् ॥"
अस्योत्पत्तिर्गवर्णे द्रष्टव्या ॥ वङ्गाक्षरैस्तस्य
लेखनप्रकारादिर्यथा,—
"दृष्टिरूपा वामरेखा किञ्चिदाकुञ्चिता ततः ।
कुण्डलीरूपमास्थाय ततोऽधोगत्य दक्षत. ॥
अत ऊर्द्ध गता रेखा शम्भुर्नारायणस्तयोः ।
ब्रह्मस्वरूपिणी देवि । मात्राशक्तिः प्रकीर्त्तिता ॥"
अस्य ध्यानं यथा,—
"मालतीपुष्पवर्णाभां षड्भुजा रक्तलोचनाम् ।
शुक्लाम्बरपरीधानां शुक्लमाल्यविभूषिताम् ॥
सदा स्मेरमुखीं रम्यां लोचनत्रयराजिताम् ।
एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रणाममन्त्रो यथा, वर्णोद्धारतन्त्रे ।
"निर्गुण त्रिगुणोपेतं सदा त्रिगोलसंयुतम् ।
सर्व्वग सर्व्वदा शान्त घकारं प्रणमाम्यहम् ॥"
तस्य नामानि यथा, नानातन्त्रेषु ।
"घः खड्गी घुर्घुरो घण्टी घण्टीशस्त्रिपुरान्तकः ।
वायुः शिवोत्तमः सत्ता किङ्किणी घोरनायकः ॥
मरीचिर्व्वरुणो मेघा कालरूपी च दाम्भिक. ।
लम्बोदरा ज्वालमूलं नन्देशो हनन ध्वनि. ॥
त्रैलोक्यविद्या संहर्त्ता कामाख्यमनघामय. ॥"
घः, पु, (घण्टयति शब्देन शोभते घटयति घर्घ-
रादिशब्दं वा । घटि द्युतौ घट चेष्टाया च
+बाहुलकात् डः ।) घण्टा । घर्घरशब्दः । इति
मेदिनी । घे । १ ॥
घग्घ, हसने । इति कविकल्पद्रुम. ॥ (भ्वा-परं-
अकं-सेट् ।) कण्ठ्यवर्गतृतीयोपधः । घग्घति ।
इति दुर्गादासः ॥
घट, क हिंसे । संघाते । द्युतौ । इति कविकल्प-
द्रुमः ॥ (चुरा-परं-सक-अकंच-सेट् ।) क, घाट-
यति कवाटं द्वारि जन. संयोजयतीत्यर्थः ।
इति दुर्गादासः ॥

घट, इ कि द्युतौ । इति कविकल्पद्रुमः ॥ (चुरां-
पक्षे भ्वां-परं-अकं-सेट् ।) इ, भावे घण्ट्यते ।
कि, घण्टयति घण्टति । द्युतिर्दीप्तिः । द्युत्यर्थत्वेन
पाक्षिकचुरादित्वे सिद्धे कि करणमर्थान्तरेऽपि
पाक्षिकचुरादित्वार्थम् । तथाच,—
"क्रियावाचित्वमाख्यातु प्रसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ॥"
इति वोपदेवः ॥
प्रसिद्धार्थं कथयितु धातूनां प्रसिद्धोऽर्थः प्रद-
र्शितः । किन्तु महाकविप्रयोगं दृष्ट्वान्येऽप्यर्था
मन्तव्याः हि यस्मात् धातवोऽनेकार्था भवन्ती-
त्यर्थः । तेन हिंसास्तुत्योः पठितस्यापि शंसतेः
कथनार्थत्वे न मे ह्रिया शंसति किञ्चिदीप्सित-
मिति रघौ कथयतीत्येवार्थः । एवं दीप्तिपठित-
स्यापि तर्कधातोर्वितर्कणार्थत्वे तर्कयत्यन्यगुणं
सुधीरित्यादिः । इति दुर्गादासः ॥
घट, ष ङ म चेष्टे । इति कविकल्पद्रुमः ॥ (भ्वा-
आत्मं-अक सेट् ।) ष, घटा । ङ, घटते
पठितु शिष्यः । म, घटयति । घटतीति घटी
त्रियो नाघटन् घटताम्मियादिति तु घटते घट.
पचादित्वादन् । ततो घट इवाचरतीति क्वौ
साध्यम् । इति दुर्गादासः ॥ (यथा, भट्टिः ।
१२ । २६ ।
"घटेत सन्ध्यादिषु यो गुणेषु
लक्ष्मीर्न तं मुञ्चति चञ्चलापि ॥")
घटः, पुं, (घटते मृदादिसङ्घातैः जलादिग्रहणाय
इत्यर्थः । घट्+पचाद्यच् ।) कलसः । इत्यमरः ।
२ । ६ । ३२ ॥ (यथा, मनुः । ८ । ३१६ ।
"यस्तु रज्जु घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥")
तस्य परिमाणं कलशशब्दे द्रष्टव्यम् ॥ समाधि-
भेदः । (घटस्थवारिवत् निश्चलत्वात्तथात्वम् ।)
स तु कुम्भकम् । इभशिरः । (आकृतिसादृश्या-
त्तथात्वम् ।) कूटकुटः । इति मेदिनी । टे । ७ ॥
कुम्भराशिः । यथा,— [लभेत् ।"
"सिंहे वा यदि गोघटे गतनरः सर्व्वार्थसिद्धिं
इति समयप्रदीप. ॥ द्रोणपरिमाणम् । इति
वैद्यकपरिभाषा ॥ (अस्य पर्य्याया यथा,—
"चतुर्भिराढकैर्द्रोणः कलशोनल्वणोर्म्मनः ।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥
"कंसश्चतुर्गुणो द्रोणः अर्म्मणोनल्वणश्च तत् ।
स एव कलशः ख्यातो घट उन्मान मेवच ॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)
कुम्भपरिमाणम् । यथा,—
"दशद्रोणो भवेत् खारी कुम्भस्तु द्रोणविंशतिः ।"
इति प्रायश्चित्ततत्त्वे कात्यायनः ॥
(योगावस्थाभेदः । यथा, हठयोगप्रदीपिकायाम् ।
४ । ६८ ।
"आरम्भश्च घटश्चैव यथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥"
एतदवस्थायां किं स्यात्तदाह तत्रैव ।४।७२-७३।

"द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः ।
अतिशून्ये विमर्द्दश्च भेरीशब्दस्तथा भवेत ॥")
घटकः, पुं, (घटयति परस्परसम्बन्धादिकमिति ।
घट्+णिच्+ण्वुल् ।) कुलाचार्य्य' । तस्या-
साश्यत्वम् । यथा,—
"वरं चाण्डालसंस्पर्शं कुर्य्यात्तु साधकोत्तमः ।
तथाप्यस्पृश्यगणकं सर्व्वदा तं परित्यजेत् ॥
दूषिताः कलिकालेषु भारते विविधाः प्रजाः ।
अतएव महेशानि । सर्व्वे संसर्गदूषिताः ॥
घटकं ब्राह्मण देवि । संस्पर्शे यत्नतस्त्यजेत् ॥"
इति शाक्तानन्दतरङ्गिण्यां षोड़शोल्लासे महिम
मर्द्दिनीतन्त्रवचनम् ॥*॥ योजकः । तत्पर्य्यायः ।
चारचर. २ । इति त्रिकाण्डशेष; ॥ तस्य लक्षणं
यथा, कुलदीपिकायाम् ।
"धावको भावकश्चैव योजकश्चांशकस्तथा ।
दूषकस्तावकश्चैव षडेते घटकाः स्मृताः ॥"
अन्यच्च ।
"के नो विदन्ति पुरुषा पुरुषानुपूर्व्वी-
मुर्व्वीतले कुलभृतां परिवर्त्तनं वा ।
अत्यन्तसूक्ष्ममपि ये कुलतारतम्यं
जानन्ति ते हि घटका न तु योजकाद्याः ॥"
वनस्पतिः । पुष्पेण विना यः फलति सः । इति
भूरिप्रयोगः ॥ (घटयति योजयति परार्थंहिता-
दिकं साधयतीत्यर्थः । योजके, त्रि । यथाह
भर्तृहरिः । २ । ६६ ।
"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य
बाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन
ये ।
ते वै मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये च घ्नन्ति निरर्थकं परहितं ते के न जानी-
महे ॥")
घटदासी, स्त्री, (घटार्थं घटनार्थं नियोजिता
दासीव या । घटयति योजयति नायकनायिके
इति घटा योजिका सा दासीव इति वा ।)
कुट्टनी । तत्पर्य्याय' । कुट्टिनी २ दृष्या ३ रत-
ताली ४ गणेरुका ५ । इति त्रिकाण्डशेषः ॥
घटना, स्त्री,(घट+णिच्+युच् टाप् च ।) संघाती-
करणम् । सम्बद्धीकरणम् । यथा,"करिणां घटना
घटा ।" इत्यमरः । २ । ८ । १०७ ॥ योजना ।
मेलनम् । यथा, "अघटनघटनापटीयसी
माया ।" इति मायालक्षणम् ॥ (यथा, राज-
तरङ्गिण्याम् । ४ । ३६५ ।
"शक्तिः काऽप्यपरीक्षितास्ति महता स्वैरं
दविष्ठान्यहो
यस्माद्धात्मवशेन यान्ति घटनां कार्य्याणि
निर्यन्त्रणम् ॥")
घटयोनिः, पु, (घटः कुम्भः योनिः कारणं उत्-
पत्तिस्थानम् यस्य ।) अगस्त्यमुनिः । इति
हलायुधः ॥

लक्षणं केचित् कृतं तद्युक्तिशून्यं दुर्घटं चेत्येतदु-
पेक्षितम् । दृष्टप्रमाणाकारमुपरि मात्रं घटी-
संज्ञमङ्गीकृतम् । छुनिष्ठानिमज्जनसङ्ख्यया यदि
षट्त्रिंशच्छतानि पानीयपलानि लभ्यन्ते तदे-
केन निमज्जनेन किमिति त्रैराशिकम् ।” इति
घटीयन्त्रम् ॥ अन्यानि कालमानयन्त्राणि तु
यन्त्रशब्दे द्रष्टव्यानि ॥)

घटोत्कच, पुं, (घट इव उन्नतः कचोऽस्य ।) राक्षसविशेषः । स तु हिडिम्बाराक्षसीगर्भे भीमसेनाज्जातः ॥ इति महाभारतम् ॥ (अस्य नामनिरुक्त्या सह जन्मादिविवरणं यथा, महाभारते । १ । १५६ । २१—६३ ।
“तथेति तत् प्रतिश्रुत्य हिडिम्बा राक्षसी तदा ।
भीमसेनमुपादाय सोर्द्धमाचक्रमे तत ॥
शैलशृङ्गेषु रम्येषु देवतायतनेषु च ।
मृगपक्षिविघुष्टेषु रमणीयेषु सर्व्वदा ॥
कृत्वा च रूपं परमं सर्व्वाभरणभूषिता ।
सञ्जल्पन्ती सुमधुरं रमयामास पाण्डवम् ॥
तथैव वनदुर्गेषु पुष्पितद्रुमसानुषु ।
सरःसु रमणीयेषु पद्मोत्पलयुतेषु च ॥
नदीद्वीपप्रदेशेषु वैदूर्य्यसिकतासु च ।
सुतीर्थवनतोयासु तथा गिरिनदीषु च ॥
काननेषु विचित्रेषु पुष्पितद्रुमवल्लिषु ।
हिमवद्गिरिकुञ्जेषु गुहासु विविधासु च ॥
प्रफुल्लशतपत्रेषु सरःस्वमलवारिषु ।
सागरस्य प्रदेशेषु मणिहेमचितेषु च ॥
पत्तनेषु च रम्येषु तथैवोपवनेषु च ।
देवारण्येषु पुण्येषु तथा पर्व्वतसानुषु ॥
गुह्यकानां निवासेषु तापसायतनेषु च ।
सर्व्वर्त्तुफलपुष्पेषु मानसेषु सरःसु च ॥
बिभ्रती परमं रूपं रमयामास पाण्डवम् ।
रमयन्ती तथा भीमं तत्र तत्र मनोजवा ॥
प्रजज्ञे राक्षसीपुत्त्रं भीमसेनात् महाबलम् ।
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ॥
भीमनादं सुताम्रौष्ठं तीक्ष्णदंष्ट्रं महारवम् ।
महेष्वासं महावीर्य्यं महासत्त्वं महाभुजम् ॥
महाजवं महाकायं महामायमरिन्दमम् ।
दीर्घघोणं महोरस्कं विकटोद्बद्धपिण्डिकम् ॥
अमानुषं मानुषजं भीमवेगं महाबलम् ।
यः पिशाचानतीवान्यान् बभूवातीव राक्षसान् ॥
बालोऽपि यौवनं प्राप्तो मानुषेषु विशाम्पते ।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥
सद्यो हि गर्भान् राक्षस्यो लभन्ते प्रसवन्ति च ।
कामरूपधराश्चैव भवन्ति बहुरूपिकाः ॥
प्रणम्य विकचः पादावगृह्णात् स पितुस्तदा ।
मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः ॥
घटो हास्योत्कच इति माता तं प्रत्यभाषत ।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह ॥”

असौ हि कुरुक्षेत्रयुद्धे कर्णनिक्षिप्तैकपुरुषघातिन्या वासवदत्तया शक्त्या गाएतो ग्तश्च । यथा, महाभारते । ७ । १७७ । ४८—६३ ।

“ततोऽब्रुवन् कुरवः सर्व्व एव
कर्णं दृष्ट्वा घोररूपाञ्च मायाम् ।
शक्त्या रक्षो जहि कर्णाद्य तूर्णं
नश्यन्त्येते कुरवो धार्त्तराष्ट्राः ॥
करिष्यतः किञ्च नो भीमपार्थौ
तपन्तमेनं जहि पापं निशीथे ।
यो नः संग्रामाद्घोररूपाद्विमुच्येत्
स नः पार्थान् सबलान् योधयेत ॥
तस्मादेनं राक्षसं घोररूपं
जहि शक्त्या वै दत्तया वासवेन ।
मा कौरवाः सर्व्व एवेन्द्रकल्पा
रात्रियुद्धे कर्ण ! नेशुः सयोधाः ॥
स वध्यमानो रक्षसा वै निशीथे
दृष्ट्वा राजन् त्रास्यमानं बलञ्च ।
महच्च श्रुत्वा निनदं कौरवाणां
मतिं दध्रे शक्तिमोक्षाय कर्णः ॥
स वै क्रुद्धः सिंह इवात्यमर्षी
नामर्षयत् प्रतिघातं रणे तम् ।
शक्तिं श्रेष्ठां वैजयन्तीमसह्यां
समाददे तस्य वधं चिकीर्षन् ॥
याऽसौ राजन् ! निहिता वर्षपूगान्
वधायाजौ सत्कृता फाल्गुनस्य ।
यां वै प्रादात् सूतपुत्त्राय शक्रः
शक्तिं श्रेष्ठां कुण्डलाभ्यां निमाय ॥
तां वै शक्तिं लेलिहानां प्रदीप्तां
पाशैर्युक्तामन्तकस्येव रात्रिम् ।
मृत्योः स्वसारं ज्वलितामिवोल्कां
वैकर्त्तनः प्राहिणोद्राक्षसाय ॥
तामुत्तमां परकायावहन्त्रीं
दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम् ।
भीतं रक्षो विप्रदुद्राव राजन् !
कृत्वात्मानं विन्ध्यतुल्यप्रमाणम् ॥
दृष्ट्वा शक्तिं कर्णबाह्वन्तरस्थां
नेदुर्भूतान्यन्तरीक्षे नरेन्द्र ! ।
ववुर्वातास्तुमुलाश्चापि राजन् !
सनिर्घाता चाशनिर्गां जगाम ॥
सा तां मायां भस्म कृत्वा ज्वलन्ती
भित्त्वा गाढ़ं हृदयं राक्षसस्य ।
ऊर्द्ध्वं ययौ दीप्यमाना निशायां
नक्षत्राणामन्तराण्याविशन्ती ॥
युद्ध्वा चित्रैर्विविधैः शस्त्रपूगै-
र्दिव्यैर्वीरो मानुषै राक्षसैश्च ।
नदन्नादान् विविधान् भैरवांश्च
प्राणानिष्टांस्त्याजितः शक्रशक्त्या ॥
इदञ्चान्यच्चित्रमाश्चर्य्यरूपं
चकारासौ कर्म्म शत्रुक्षयाय ।
तस्मिन् काले शक्तिनिर्भिन्नमर्म्मा
बभौ राजन् ! शैलमेघप्रकाशः ॥
ततोऽन्तरीक्षादपतद्गतासुः
स राक्षसेन्द्रो भुवि भिन्नदेहः ।
अवाक्शिराः स्तब्धगात्रो विजिह्वो
घटोत्कचो महदास्थाय रूपम् ॥
स तद्रूपं भैरवं भीमकर्म्मा
भीमं कृत्वा भैमसेनिः पपात ।
हतोऽप्येवं तव सैन्यैकदेश-
मपोथयत् स्वेन देहेन राजन् ! ॥
ततो मिश्राः प्राणदन् सिंहनादै-
र्भेर्य्यश्च शङ्खाः मुरजाश्चानकाश्च ।
दग्धां मायां निहतं राक्षसञ्च
दृष्ट्वा हृष्टाः प्राणदन् कौरवेयाः ॥
ततः कर्णः कुरुभिः पूज्यमानो
यथा शक्रो वृत्रवधे मरुद्भिः ।
अन्वारूढ़स्तव पुत्त्रं रथस्थं
हृष्टश्चापि प्राविशत् स्वं स्वसैन्यम् ॥”)

घटोत्कचान्तकः, पुं, (घटोत्कचस्य अन्तकः संहारकः ।) कर्णराजः । इति त्रिकाण्डशेषः ॥

घटोद्भवः, पुं, (उद्भवतीति उद्भवः घटः कलसः उद्भवः उत्पत्तिस्थानं यस्य । यद्वा घटात् उद्भवतीति । उत्+भू+अच् ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ३६ ॥

घट्ट, क चाले । इति कविकल्पद्रुमः ॥ (चुरा-पर-अक क्वचित् सक-सेट् ।) टवर्यान्तः । चालश्चलनम् । क, घट्टयति मेघो वायुना । इति दुर्गादासः ॥

घट्ट, ङ चाले । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-अकं क्वचित् सक-सेट ।) टवर्यान्तः । ङ, घट्टते । इति दुर्गादासः ॥

घट्टः, पुं, (घट्टतेऽस्मिन् इति । घट्ट+“हलश्च ।” ३ । ३ । १२१ । इति घञ् ।) नद्यादौ स्नानाद्यर्थं प्रवेशस्थानम् । इति लिङ्गादिसंग्रहे अमर भरतौ ॥ घाट् इति यस्य प्रसिद्धिः । जगात इति ख्यातो वा । तत्पर्य्यायः । तीर्थः २ । अवतारः ३ । इति हेमचन्द्रः । ४ । १५३ ॥

घट्टगा, स्त्री, (घट्टेति नाम्ना गीयते उदाह्रियते इति । घट्टा+गै+कः टाप् च ।) नदीभेदः । यथा,—
“मलापहा भीमरथी च घट्टगा
यथा च कृष्णा जलसाम्यतागुणैः ।
मलापहा वट्टपवस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम् ॥”
इति राजनिर्घण्टः ॥

घट्टजीवी, [न्] पुं, (घट्टेन घट्टे देयतरपण्येन शुल्कादिनेत्यर्थः जीवतीति । जीव+णिनिः ।) वर्णसङ्करजातिविशेषः । पाटुनि इति भाषा । स तु वैश्याया रजकाज्जातः । इति विवादार्णवसेतुः ॥

घट्टना, स्त्री (घट्ट+“ण्यासश्रन्थोयुच् ।” ३ । ३ । १०७ । इत्यस्य सूत्रस्य “घट्टिवन्दिविदिभ्यश्चेति वाच्यम् ।” इति वार्त्तिकोक्त्या युच् टाप् च ।) चलना । (आङ् पूर्व्वकघट्टनाशब्दस्य प्रयोगो यथा, माघे । १ । १० ।
“रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः ॥”)
हलिः । इति हेमचन्द्रः ॥

घण, द न उ दीप्तौ । इति कविकल्पद्रुमः ॥ (तना-उभ-अक-सेट् । उदित्वात् क्वासेट् ।) द न, घणोति घणुते । उ, घणित्वा घत्वा । इति दुर्गादासः ॥

घण्टः, पु, (घण्+क्त ।) स्वनामख्यातव्यञ्जन-विशेषः । मत्स्यघण्टगुणाः । बलरुच्यकारित्वम् । वातनाशित्वञ्च । इति राजवल्लभः ॥

घण्टकः, पु, (घण्ट+संज्ञायां कन् ।) क्षुपविशेषः । घेंटकोल इति भाषा । अस्य मूलगुणाः । कफ-नाशित्वम् । कटुपाकित्वम् । पित्तकारित्वञ्च । इति राजवल्लभः ॥ घण्टकर्णोऽपि पाठः ॥

घण्टा, स्त्री, (घण्टयति दीप्यते पूजादिकाले वादनेन शोभते, घण्टयति शब्दायते वा । घटि दीप्तौ+अच् ततष्टाप् ।) कांस्यनिर्म्मितवाद्य-विशेषः । यथा, स्मृतिः ।

"सर्व्ववाद्यमयी घण्टा वाद्याभावे नियोजयेत् ॥"

"शङ्खो यस्य गृहे नास्ति घण्टा वा गरुडान्विता ।
पुरतो वासुदेवस्य न स भागवतः कलौ ॥"

इति पद्मपुराणे पातालखण्डम् ॥

अथ घण्टामाहात्म्यसूक्तञ्च स्कान्दे श्रीब्रह्म-नारदसंवादे यथा,—

"स्नानार्च्चनक्रियाकाले घण्टानादं करोति यः ।
पुरतो वासुदेवस्य तस्य पुण्यफलं शृणु ॥
वर्षकोटिसहस्राणि वर्षकोटिशतानि च ।
वसते देवलोके तु अप्सरोगणसेवितः ॥
सर्व्ववाद्यमयी घण्टा केशवस्य सदा प्रिया ।
वादनाल्लभते पुण्यं यज्ञकोटिसमुद्भवम् ॥
वादित्रनिनदैस्तूर्य्यगीतमङ्गलनिःस्वनैः ।
यः स्नापयति गोविन्दं जीवन्मुक्तो भवेद्धि सः ॥
वादित्राणामभावे तु पूजाकाले हि सर्व्वदा ।
घण्टाशब्दो नरैः कार्य्यः सर्व्ववाद्यमयी यतः ॥
सर्व्ववाद्यमयी घण्टा देवदेवस्य वल्लभा ।
तस्मात् सर्व्वप्रयत्नेन घण्टानादन्तु कारयेत् ॥
मन्वन्तरसहस्राणि मन्वन्तरशतानि च ।
घण्टानादेन देवेशः प्रीतो भवति केशव ॥" ॥

तथा, विष्णुधर्म्मोत्तरे श्रीभगवत्प्रह्लादसंवादे ।

"शृणु दैत्येन्द्र । वक्ष्यामि घण्टामाहात्म्यमुत्तमम् ।
प्रह्लाद । त्वत्समो नास्ति मद्भक्तो भुवनत्रये ॥
मम नामाङ्किता घण्टा पुरतो मम तिष्ठति ।
अर्च्चिता वैष्णवगृहे तत्र मां विद्धि दैत्यज ॥
वैनतेयाङ्कितां घण्टां सुदर्शनयुतां यदि ।
ममाग्रे स्थापयेद्यस्तु देहे तस्य वसाम्यहम् ॥
यस्तु वादयते घण्टां वैनतेयेन चिह्निताम् ।
धूपे नीराजने स्नाने पूजाकाले विलेपने ॥
मामाग्रे प्रत्यहं वत्स । प्रत्येकं लभते फलम् ।
मखायुतं गोयुतञ्च चान्द्रायणशतोद्भवम् ॥
विधिवाह्यकृता पूजा सफला जायते नृणाम् ।
घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम् ॥
नागारिचिह्निता घण्टा रथाङ्गेन समन्विता ।
वादनात् कुरुते नाशं जन्ममृत्युभयस्य च ॥
गरुडेनाङ्कितां घण्टां दृष्ट्वाहं प्रत्यहं सदा ।
प्रीतिं करोमि दैत्येन्द्र । लक्ष्मीं प्राप्य यथाधनः ॥
दृष्ट्वान्तं यथा देवाः प्रीतिं कुर्व्वन्त्यहर्निशम् ।
सुपर्णे च तथा प्रीतिं घण्टाशिखरमाश्रिते ॥
स्वकरेण प्रकुर्व्वन्ति घण्टानादं सुभक्तितः ।
मदीयार्च्चनकाले तु फलं कोट्यैन्दवं कलौ ॥"

अन्यत्र च ।

"घण्टादण्डस्य शिखरे सचक्रं स्थापयेत्तु यः ।
गरुडं वै प्रिय विष्णोः स्थापितं भुवनत्रयम् ॥
सचक्रघण्टानादन्तु मृत्युकाले शृणोति यः ।
पापकोटियुतस्यापि नश्यन्ति यमकिङ्कराः ॥
सर्व्वे दोषाः प्रलीयन्ते घण्टानादे कृते हरौ ।
देवतानां मुनीन्द्राणां पितॄणामुत्सवो भवेत् ॥
अभावे वैनतेयस्य चक्रस्यापि न संशयः ।
घण्टानादेन भक्तानां प्रसादं कुरुते हरिः ॥
गृहे यस्य भवेन्नित्यं घण्टा नागारिसंयुता ।
न सर्पाणां तत्र भयं नाग्निविद्युत्समुद्भवम् ॥
यस्य घण्टा गृहे नास्ति शङ्खश्च पुरतो हरेः ।
कथं भागवतं नाम गीयते तस्य देहिनः ॥"
"अतो भगवतः प्रीत्यै घण्टा श्रीगरुडान्विता ।
सर्व्वाद्या वैष्णवैर्न्नित्यं चक्रेणोपरि मण्डिता ॥
गीतं नृत्यं पुराणादिपठनञ्च प्रशस्यते ॥"

इति श्रीहरिभक्तिविलासे ६ विलासः ॥

(घण्टयति दीप्यते कुसुमादिभिरिति । घटि+अच् । स्त्रियां टाप् ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥ अतिबला । नागबला । इति राजनिर्घण्टः ॥ (अतिबलानागबलाघण्टापाटलि-शब्देष्वासां विवृतिर्यथायथं ज्ञातव्या ॥)

घण्टाकः, पु, (घण्टयति दीप्यते स्वकुसुमैरिति । घटि+अच् टाप् । घण्टा तया घण्टेति आख्ययेत्यर्थः कायतीति । घण्टा+कै+क ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥

घण्टाकर्णः, पु, (घण्टावत् कर्णो यस्य ।) शिव-गणविशेषः । घेंटु इति ख्यातः । यथा,—

"घण्टाकर्णो गणः श्रीमान् शिवस्यातीववल्लभः ॥"

इति शिवपुराणम् ॥

तस्य पूजाविधिर्यथा,—

"चैत्रे मासि च संपूज्यो घण्टाकर्णो घटात्मकः ।
आरोग्याय सुहृद्भिश्च संक्रान्त्यां तत्र कारयेत् ॥"

पूजामन्त्रो यथा,—

"घण्टाकर्ण । महावीर । सर्व्वव्याधिविनाशन ॥
विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल ! ॥"

इति तिथ्यादितत्त्वे रविसंक्रान्तिप्रकरणम् ॥

(काशीस्थरुद्रविशेषः । यथा, काशीखण्डे । ३३ । १०५ ।
"इयं हि चित्रघण्टेशी घण्टाकर्णह्रदस्त्वयं ॥")

घण्टापथः, पु, (घण्टानां उपलक्षणात् घण्टादि-वादित्राणां पन्थाः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अ ।) घण्टोपलक्षितानां हस्त्यादीनां पन्थाः । इति भरतः ॥ ग्रामादौ प्रधानमार्गः । यथा,—

"दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः ॥"

इति चाणक्यम् ।

तत्पर्य्यायः । संसरणम् २ । तत् संसरणं यदि पुरसम्बन्धि स्यात्तदा उपनिष्करमिति ख्यातम् । इत्यमरः । २ । १ । १८ ॥

घण्टापाटलिः, पुं, (घण्टा चासौ पाटलिश्चेति कर्म्मधारयः ।) वृक्षविशेषः । घण्टापारुल इति भाषा ॥ तत्पर्य्यायः । गोलीढः २ झाटलः ३ मोचः ४ मुष्ककः ५ । इत्यमरः । २ । ४ । ३६ ॥ गोलिहः ६ घण्टा ७ पाटलिः ८ । इति तट्टीका ॥ क्षारद्रुः ९ कालमुष्ककः १० । इति रत्नमाला ॥ पाटली ११ घण्टाकः १२ झाटः १३ । इति शब्दरत्नावली ॥ तीक्ष्णः १४ घण्टकः १५ । इति रत्नकोषः ॥ मोक्षकः १६ काष्ठपाटली १७ कालास्थाली १८ काचस्थली १८ । इति भाव-प्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ मुष्कक-शब्दे द्रष्टव्यौ ॥

घण्टाबीजः, क्ली, (घण्टेव बीजमस्य ।) जय-पालः । इति राजनिर्घण्टः ॥

घण्टारवा, स्त्री, (घण्टारववत् रवः पक्वफलेषु यस्याः । यद्वा, पक्वेषु फलेषु घण्टेव रौतीति । रु शब्दे+अच् ।) वृक्षविशेषः । झनझनिया इति वनशणः इति च भाषा ॥ तत्पर्य्यायः । शणपुष्पिका २ । इत्यमरः । २ । ४ । १०७ ॥ शणपुष्पी ३ । इति भरतः ॥

घण्टाली, स्त्री, (घण्टां अलति पर्य्याप्नोति शब्देनेत्यर्थः । अल पर्य्याप्तौ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् स्त्रियां ङीप् च । यद्वा घण्टा आली सहचरी यस्याः शब्दसादृ-श्यात् तथात्वम् ।) कोशातकी । इति राज-निर्घण्टः ॥ झिङ्गा इति भाषा ॥ (घण्टानां आली श्रेणी ।) घण्टाश्रेणी च ॥

घण्टाशब्दः, क्ली, (घण्टायाः शब्द इव शब्दो यस्य ।) कांस्यम् । इति हेमचन्द्रः । ४ । ११५ ॥

घण्टिका, स्त्री, (घण्टा+अल्पार्थे कन् ततष्टापि अत इत्वञ्च । घण्टिका क्षुद्रघण्टा तद्वत् आकृति-रस्त्यस्याः । अर्श आदित्वादच् ।) लम्बिका । तालूर्द्ध्वस्थजिह्वा । इति राजनिर्घण्टो हेम-चन्द्रश्च ॥ (गलरोगविशेषः । अस्य सलक्षण-चिकित्सितं यथा,—

"तिलपिच्छिलगौल्यादिसेवनातिद्रवादपि ।
नवोत्कर्षेन कफतो जायते घण्टिकागदः ॥
जिह्वामूले कण्ठसन्धौ श्लेष्मरक्तसमुद्भवा ।
तेनास्यशोषो जड़ता ज्वरो मन्दश्च जायते ॥
शिरोव्यथा रुचिस्तन्द्रा तथास्यजड़ता भवेत् ।
तर्ज्जन्या कण्ठमध्ये तु सपीड्य रक्तग्रन्थिका ॥
परिस्रुतं तथा रक्तं तदा विस्रावणं हितम् ।
वचाञ्च मरिचं कृष्णाचूर्णं तत्र निधापयेत् ॥
मर्द्दनं स्यात् कण्ठदेशे तेन ग्रन्थिर्विलीयते ।
धान्यनागरनीमतवचान्यग्रोधशुङ्गकाः ॥
क्वाथः स्वेदो घण्टिकाया मुखे गण्डूषधारणम् ।
गले च घण्टिकामार्गे रक्तश्लेष्मविकारजा ॥"

इति घण्टिकारोगः ।

इति हारीते चिकित्सितस्थाने पञ्चचत्वारिंश-त्तमेऽध्याये ॥)

घण्टिनीवीजं, क्ली, (घण्टिनीव वीजं यस्य ।) जयपालः । इति राजनिर्घण्टः ॥

घण्टुः, पु, (घण्टयति दीप्यते इति । घटि दीप्तौ + "तन्वादेश्च ।" इति उणादिकोषटीकाधृतसूत्रेण उः ।) गजघण्टा । प्रतापः । इत्युणादिकोषः ॥

घण्टेश्वरः, पु, (घण्टानां घण्टाकर्णादिगणविशेषाणां ईश्वरः प्रभुः ।) देवताविशेषः । स तु मङ्गलपुत्त्रः । व्रणदाता च । घेँटु इति भाषा ॥ यथा,

"मङ्गलस्य प्रिया मेधा तस्या घण्टेश्वरो महान् ।
व्रणदाता च तेजस्वी विष्णुतुल्यो बभूव ह ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥

घड्डः पु, (घडिति शब्दं कुर्व्वन् ड्यते उड्डीयते इति । डी नभोगतौ + बाहुलकात् डः ।) भ्रमरः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

घनं, क्ली, (हन्यते ताड्यते यत् इति । हन् + "मूर्त्तौ घनः ।" ३ । ३ । ७७ । इति अप् घनादेशश्च ।) कांस्यतालादिकं वाद्यम् । इत्यमरः । १ । ७ । ४ ॥ कांस्यतालः करताल इति ख्यातः आदिना काहलादयः । इति सारसुन्दरी ॥ मध्यमनृत्यम् । इति मेदिनी । ने । ३ ॥ लौहः । इति हेमचन्द्रः ॥ त्वचम् । इति राजनिर्घण्टः ॥

घनः, पु, (घनति दीप्यते इति । घन दीप्तौ + अच् ।) मेघः । (यथा, महाभारते । १ । १३७ । २४ ।

"ततः स्नेहाद्धरिद्वयं दृष्ट्वा रङ्गावलोकिनम् ।
भास्करोऽप्यनयन्नाशं समीपोपगतान् घनान् ॥")

मुस्ता । ओघः । दार्ढ्यं । विस्तारः । (हन्यते वध्यतेऽनेन । हन् + "मूर्त्तौ घनः ।" ३ । ३ । ७७ । इति अप् घनादेशश्च ।) लौहमुद्गरः । इति मेदिनी । ने । ३ ॥ (यथा, भारविः ।१८।१।

"धनुरपास्य सबाणधिशङ्करः
प्रतिजघान घनैरिव मुष्टिभिः ॥")

शरीरम् । कफः । अभ्रकम् । इति राजनिर्घण्टः ॥ सजातीयाङ्कत्रयस्य पूरणम् । यथा,

"समत्रिघातश्च घनः प्रदिष्टः
स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः ।
आदित्रिनिघ्नस्तत आदिवर्ग-
स्त्र्यन्त्याहतोऽथादिघनश्च सर्व्वे ॥"

इति लीलावती ॥

(वेदपाठविशेषः । यथा,—

"जटासक्तां विपर्य्यस्य घनमाहुर्मनीषिणः ॥")

घन, त्रि, (हन्यते इति । हन् + अप् घनादेशश्च ।) निविड़ः । तत्पर्य्यायः । निरन्तरः २ सान्द्रः ३ । इत्यमरः । ३ । १ । ६६ ॥ (यथा, रघुः । ८ । ९१ ।

"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने
प्रतियातमिवान्तिकमस्य गुरोः ॥")

दृढ़ः । इति मेदिनी । ने । ४ ॥ (यथा, रघुः । ११ । ११८ ।

"यश्चकार विवरं शिलाघने
ताडकोरसि स रामसायकः ॥")

पूर्णः । (यथा, महाभारते । १ । १३६ । २८ ।

"किञ्चिदापूर्य्यते व्योम जलधारावनैर्घनैः ॥")

सम्पुटः । इति शब्दरत्नावली ॥ (निरवकाशः । यथा, पञ्चतन्त्रे । ३ । २३६ ।

"किं गाण्डीवस्फुरदुरुघनास्फालनक्रूरपाणि-
र्नासौ लीलानटनविलसन्मेखली सव्यसाची ॥")

घनकफः, पु, (घनस्य मेघस्य कफ इव ।) करका । इति त्रिकाण्डशेषः ॥

घनकालः, पु, (घनस्य मेघस्य घनप्रधानो वा कालः ।) वर्षा ऋतुः । इति शब्दरत्नावली ॥

घनगोलकः, पु, (घनस्य नानावर्णमेघस्य गोलः । स इव कायति प्रकाशते इति । घन + कै + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । शुक्लरक्तमेघसादृश्यादस्य तथात्वम् ।) संश्लिष्टरजतसुवर्णम् । इति हेमचन्द्रः । ४ । ११३ ॥ मिशान सोणा रूपा इति भाषा ॥

घनजम्बालः, पु, (घनः सान्द्रो जम्बालः इति कर्म्मधारयः ।) चुलुकः । इति त्रिकाण्डशेषः ॥

घनज्वाला, स्त्री, (घनस्य मेघस्य ज्वाला दीप्तिः प्रस्फुरणमित्यर्थः ।) मेघदीप्तिः । वज्राग्निः । इति शब्दरत्नावली ॥

घनतालः, पुं, (घनतायां निविडतायां अलति पर्य्याप्नोतीति । अल पर्य्याप्तौ + अच् ।) सारङ्गपक्षी । इति जटाधरः ॥

घनतोलः, पु, (घनं मेघं अभिलक्षीकृत्य स्वमुखं तोलयति ऊर्द्धमुखीभवतीत्यर्थः । तुल उन्माने + अच ।) चातकपक्षी । इति त्रिकाण्डशेषः ॥

घनद्रुमः, पुं (घनः कण्टकाकीर्णत्वान्निविडो द्रुमो वृक्षः ।) विकण्टकवृक्षः । इति राजनिर्घण्टः ॥

घननाभिः, पु, (घनस्य मेघस्य नाभिर्गर्भाशयस्थानमिव । मेघस्य धूमयोनित्वादेव तथात्वम् ।) धूमः । इति शब्दरत्नावली ॥

घनपत्रः पु, (घनानि निविडानि पत्राणि यस्य ।) पुनर्नवा । इति राजनिर्घण्टः ॥

घनपाषण्डः, पु, (घनेन मेघेन मेघध्वनिनेत्यर्थः । पाषण्ड इव । मेघध्वनिश्रवणेन उन्मत्ततयास्य तथात्वम् ।) मयूरः । इति शब्दमाला ॥

घनफलः, पु, (घनानि बहूत्पन्नत्वात् निविडानि फलानि यस्य ।) विकण्टकवृक्षः । इति राजनिर्घण्टः ॥

घनमूल, क्ली, (घनस्य सजातीयाङ्कत्रयपूरणस्य मूलम् आद्यम् ।) पूरितसजातीयाङ्कत्रयस्याद्याङ्कः । यथा । नवघनस्य मूलं त्रयं इत्यादि ॥ करणसूत्रं यथा,—

"आद्यं घनस्थानमथाघने द्वे
पुनस्तथान्त्यात् घनतो विशोध्य ।
घनं पृथक्स्थं पदमस्य कृत्वा
त्रिघ्ना तदाद्यं विभजेत् फलन्तु ॥
पङ्क्त्यां न्यसेत्तत्कृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य ।
घनं तदाद्यात् घनमूलमेव
पंक्त्या भवेदेवमतः पुनश्च ॥'

इति लीलावती ॥

घनमूलः, पु, (घनं दृढं मूलमस्य ।) मोरटः । इति राजनिर्घण्टः ॥

घनरसः, पु, (घनः सान्द्रो रसः ।) सान्द्रनिर्यासः । (घनो रसो यस्य ।) मोरटः । (घनस्य मेघस्य रसः ।) जलम् । कर्पूरम् । पीलुपर्णी । सत्यक्सिद्धरसः । इति मेदिनी । से । ५१ ॥ जले क्लीवलिङ्गोऽपि । यथा, रत्नकोषे ।

"घनरसमयं चीरं घृतममृतं जीवनं भुवनम् ।"

घनवल्लिका, स्त्री, (घनस्य मेघस्य वल्लिका लता इव ।) विद्युत् । इति हारावली । ५८ ॥

घनवल्ली, स्त्री, (घना घनरसा वल्ली लता ।) अमृतस्रवा लता । इति राजनिर्घण्टः ॥ (घनस्य मेघस्य वल्लीव इति विग्रहे विद्युत् ॥)

घनवातः, पु, (घनो निविडो वातो वायुर्यत्र ।) नरकभेदः । इति हेमचन्द्रः । ५ । २ ॥

घनवासः, पु, (घनस्तीव्रः वासो गन्धो यस्य ।) कुष्माण्डः । इति हारावली । ६७ ॥

घनवाहनः, पु, (घन इव शुभ्रं वाहनं यस्य । शुभ्रवृषवाहनत्वादेवास्य तथात्वम् ।) शिवः । इति हेमचन्द्रः ।२।१११ ॥ (घनो मेघः वाहनं यस्य ।) इन्द्रः । मेघवाहन इत्यमरदर्शनात् ॥

घनश्यामः, त्रि, (घनो मेघस्तद्वत् श्यामः श्यामवर्णः ।) निविड़कृष्णवर्णः । मेघतुल्यश्यामवर्णः । योगरूढिरयं शब्दः श्रीरामकृष्णयोर्बोधकः । इति केचित् तत्र पु । यथा, महानाटके ।

"अये राम । घनश्याम । चुम्बामि मुखपङ्कजम् ।
यदि जीवामि शोकेन पुनर्द्रक्ष्यामि ते मुखम् ॥'

"समानकर्णविन्यस्तस्फुरन्मकरकुण्डलम् ।
हेमाम्बर घनश्याम श्रीवत्सश्रीनिकेतनम् ॥"

इति श्रीभागवतम् ॥

घनसारः, पु, (घनः शुक्लमेघस्तद्वत् शुभ्रः सारः यस्य ।) कर्पूरम् । (यथा, सुश्रुते उत्तरतन्त्रे ४० अध्याये ।

"पीनस्तनोरुजघना घनसारदिग्धा-
स्ता एवमार्द्रवसना सह सविशेषुः ॥"

यथाच महागणपतिस्तोत्रे । ६ ।

"दिक्कान्तावनसारचन्दनरसासाराः श्रयन्ताम्
मन ॥"

घनो निविडः सारो यस्य ।) दक्षिणावर्त्तपारदः । इति मेदिनी रे । २६० ॥ वृक्षभेदः । (घनस्य मेघस्य सारः ।) जलम् । इति धरणी ॥

घनस्कन्धः, पु, (घनो दृढः स्कन्धो यस्य ।) कोशाम्रवृक्षः । इति राजनिर्घण्टः ॥

घनस्वनः, पु, (घनो राजा तद्वत् सुष्ठु अनिति प्राणितीति । अन घलु प्राणने + अच् ।) तण्डुलीयशाकः । इति राजनिर्घण्टः ॥ (घनस्य मेघस्य स्वनः ।) मेघशब्दश्च ॥

घना, स्त्री, (घन + टाप् ।) माषपर्णी । रुद्रजटा । इति राजनिर्घण्टः ॥

नाकरः, पुं, (घनानां मेघानामाकरः।) वर्षाकालः। इति शब्दरत्नावली॥

घनाघनः, पुं, (हन्तीति। हन वधे+पचाद्यच्। ततः "हन्तेर्घत्वञ्च।" ६।१।१२४। इत्यस्य वार्त्तिं इति द्वित्वं अभ्यासस्य।) इन्द्रः। घातुकमत्तहस्ती। वर्षुकमेघः। इत्यमरः।३।३।१०६॥ (यथा, राजतरङ्गिण्याम्।४।३६५।
"अम्भोजानि घनाघनध्वनिहितोऽप्युल्लासयत्यंशुमान् दूरस्थोऽपि पयोधरोऽतिशिशिरस्पर्शं करोत्यातपम्॥")
अन्योन्यघट्टन इति धरणी॥

घनाघनः, त्रि, निरन्तरः। (हन्तीति। हन्+अच्। "हन्तेर्घत्वञ्च।" इति द्वित्वं अभ्यासस्य।) घातुकः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे।१०।१०३।१।
"आशुः शिशानो वृषभो न भीमो
घनाघनः क्षोभणश्चर्षणीनाम्॥")

घनाघना, स्त्री, (घनाघन+टाप्।) काकमाची। इति शब्दचन्द्रिका॥

घनात्ययः, पुं, (घनानां मेघानामत्ययो नाशो यस्मिन्।) शरत्कालः। इति हेमचन्द्रः।२।७२॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये।
"पैत्तिकानां व्याधीनामुपशमो हेमन्ते श्लैष्मिकानां निदाघे वातिकानां घनात्यये स्वभावत एव॥"
"हैमन्तिकं दोषचयं वसन्ते
प्रवाहयन् ग्रैष्मिकमभ्रकाले।
घनात्यये वार्षिकमाशु सम्यक्
प्राप्नोति रोगानृतुजान्न जातु॥"
इति चरके शारीरस्थाने द्वितीयेऽध्याये॥)

घनामयः, पुं, (घनो दृढ़ आमयो यस्मात्।) खर्जूरवृक्षः। इति त्रिकाण्डशेषः॥

घनामलः, पुं, (घनो निविड अमलश्च।) वास्तूकशाकः। इति त्रिकाण्डशेषः॥

घनाश्रयः, पुं, (घनानां मेघानामाश्रयः।) आकाशम्। इति हेमचन्द्रः।२।७७॥

घनोदधिः पुं, (घनानां लौहसुकराणामुदधिः समुद्र इव। लौहसुकरप्रचुरतया तथात्वम्।) नरकभेदः। इति हेमचन्द्रः।५।२॥

घनोपलः, पुं, (घनस्य मेघस्य उपलः।) करका॥ इति हेमचन्द्रः।२।८०॥ (करकाशब्देऽस्य विवरणं ज्ञातव्यम्॥)

घम्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट।) ओष्ठ्यवर्गशेषोपधः। घम्बति। इति दुर्गादासः॥

घरट्टः, पुं, (घर घर्घर इति शब्देन अटति भ्राम्यतीति। अट+निपातनात् द्वित्वे साधुः) पेषणी। इति पुराणम्॥ जाता इति भाषा॥ (यथा, श्रीकण्ठचरिते।६।६३।
पृथुभ्रमत्सजवघट्टपट्टचक्रच्छिद्र
यत्प्रोच्छ्वसत्कुसुममाविरभूल्लतानाम्।
मानस्य मन्मथभुवा सहसैव पेष्टुं
तत् चण्डमारुतघरट्टविलासमासीत्॥")

घर्घटः, पुं, (घर्घं इत्यस्फुटशब्दं अटति गच्छतीति। अट+अच्। शकन्ध्वादित्वात् साधुः।) मत्स्यविशेषः। इति शब्दरत्नावली॥ ट्याङ्गरा इति भाषा॥

घर्घरः, पुं, (घर्घेति अव्यक्त ध्वनिविशेष रातीति। रा+"आतोऽनुपसर्गे कः।"३।२।३। इति कः।) पर्व्वतद्वारम्। द्वारम्। उलूकः। नदविशेषः। स्वरभेदे त्रि। इति मेदिनी। रे।१५१॥ ध्वनिः। (यथा, राजतरङ्गिण्याम्।२।१०३।
"चण्डडमरनिर्घोषैर्घर्घरं श्रुतवान् ध्वनिम्॥")
हास्यम्। इति हेमचन्द्रः।२।२१०॥ तुषानलः। इति भूरिप्रयोगः॥

घर्घरकः, पुं, (घर्घर एव। स्वार्थे कन्।) घर्घरनदः। यथा, राजनिर्घण्टे।
"शोणे घर्घरके जलन्तु रुचिद सन्तापशोषापहं पथ्य वह्निकरं तथाच बलद क्षीणाङ्गदृष्टिप्रदं॥"

घर्घरा, स्त्री, (घर्घ इत्यव्यक्तशब्द रातीति। रा+क स्त्रियां टाप्।) क्षुद्रघण्टिका। वीणाभेदः। इति मेदिनी। रे। १५१॥ (गङ्गा। यथा, काशीखण्डे। २९। ५७।
"घुर्घुरा पिङ्गरतनुर्घर्घरा घर्घरस्वना॥")

घर्घरिका, स्त्री, (घर्घरैव। स्वार्थे कन्। अत इत्वञ्च।) क्षुद्रघण्टिका। भृष्टधान्यम्। नदीविशेषः। वादित्रदण्डः। इति हेमचन्द्रः॥ वाद्यप्रभेदः। इति विश्वः॥

घर्घुर्घा, स्त्री, (घुर ध्वनौ+क्विप्। घुर्घुरा ध्वनिविशेषेण गायतीति। गै+डः। निपातनात् गस्य घत्वम्।) यमकीटः। इति रत्नमाला॥ घुरघुरिया इति भाषा॥

घर्व्व, गतौ। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) रेफोपधः। घर्व्वति। इति दुर्गादासः॥

घर्म्मः, पुं (क्षरति चरति अङ्गादिति। क्षृ चरणे+"घर्म्म।" उणा। १। १४८। इति मन्प्रत्ययेन निपातनात् साधुः।) श्रमवारि। अङ्गजलम्। घाम् इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। २१२।
"दयितस्पर्शोन्मीलित-
घर्म्मजलस्खलितचरणनखलाक्षे॥")
तत्पर्य्यायः। निदाघः २ स्वेदः ३। इत्यमरः। १।७।३३॥ स्विन्नः ४। इति जटाधरः॥ स्वदनम् ५। इति शब्दरत्नावली॥ अस्य निदानं स्वेदशब्दे द्रष्टव्यम्॥ (क्षरति चरति स्वेदः शरीरादनेन इति। क्षृ+करणे मन्।) आतपः। ग्रीष्मः। उष्मा। इति हेमचन्द्रः॥ (यथा, सुश्रुते उत्तरतन्त्रे ६४ अध्याये।
"सरांसि सरितो वापि वनानि रुचिराणि च।
चन्दनानि परार्घ्याणि स्रजः सकमलोत्पलाः॥
तालवृन्तानिलाहाराःस्तथा शीतगृहाणि च।
घर्म्मकाले निषेवेत वासांसि सुलघूनि च॥"

घर्म्मदोषः, पुं, (घर्म्मस्य स्वेदस्य दोषः विकृतिः।) स्वेदस्य विकारः। तस्यौषधं यथा,—
"मन्दोष्णलोध्रनीवारचूर्णन्तु कनकस्य च।
तेनोद्वर्त्तितदेहस्य हरेद्गौरीप्रसारिकाम्॥
लग्दोषश्चैव देवेन्द्र। घर्म्मदोषश्च नश्यति॥"
इति गारुडे १९४ अध्यायः॥

घर्म्मविचर्च्चिका, स्त्री, (घर्म्मजनिता स्वेदोत्पन्ना विचर्च्चिका। घर्म्मो ग्रीष्मकालस्तज्जनिता विचर्च्चिका वा।) घर्म्मविच्चर्चिः। घर्म्मचर्च्चिका। घामाचि इति भाषा॥ यथा, प्रयोगामृते।
"स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा।
ततः स्वेदः प्रवर्त्तेत दौर्गन्ध्यं घर्म्मचर्च्चिका॥
राजिकाकृतिरुष्णोत्था यतो घर्म्मविचर्च्चिका॥"
अस्याश्चिकित्सा स्वेदशब्दे द्रष्टव्या॥

घर्म्मान्तः, पुं, (घर्म्मस्य निदाघकालस्य अन्तोऽत्र।) वर्षाकालः। इति राजनिर्घण्टः॥ (यथा, मेघदूते। १०६।
"घर्म्मान्ते मे विगणय कथं वासराणि व्रजेयुः॥"
वर्षाकालविवरणेऽस्य विशेषो बोध्यः॥)

घर्म्मान्तकामुकी, स्त्री, (घर्म्मान्ते वर्षासु कामुकी कामार्त्ता। वर्षाकाले हि अस्याः मैथुनस्पृहा भवतीति प्रसिद्धिः। यद्वा, घर्म्मान्तं वर्षाकाल कामयते इति। कम्+उकञ् स्त्रियां ङीप्।) बलाका। इति राजनिर्घण्टः॥

घर्षणं, क्ली, (घृष्+भावे ल्युट्।) घर्षः। घषा इति भाषा॥ यथाह माधवकरः।
"घर्षणादभिघाताद्वा यदङ्ग विगतत्वचम्।
उषासावान्वितं तद्धि घृष्टमित्यभिधीयते॥"

घर्षणालः, पुं, (घर्षणे घर्षणाय वा अलति पर्य्याप्नोति। अल्+अच्।) शिलापुत्रः। इति त्रिकाण्डशेषः॥ नोड़ा इति भाषा॥

घर्षणी, स्त्री, (घृष्यते इति। घृष+कर्म्मणि ल्युट्। टित्त्वात् ङीप् च।) हरिद्रा। इति त्रिकाण्डशेषः॥ (विवृतिरस्या हरिद्राशब्दे ज्ञातव्या॥)

घष, इ ङ क्षरे। इति कविकल्पद्रुमः॥ (भ्वा आत्मं अक सेट्।) आद्यस्वरी। इ, घष्यते। ङ, घंषते। अय केश्चिन्न मन्यते। इति दुर्गादासः॥

घस, इ ङ चरणे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-अक-सेट्।) इ, घस्यते। ङ, घंसते। अय केश्चिन्न मन्यते। इति दुर्गादासः॥

घस, ऌ ञौ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वा-पर सक-अनिट।) ऌ, अघसत्। ञौ, घस्ता। इति दुर्गादासः॥

घसिः, पुं (घस् भक्षणे+भावे इन्।) आहारः। इति हेमचन्द्रः॥ (तथाच, वैदिके।
"घसिना मे मास एकृया ऊर्द्ध मे नाभेः सीद॥")

घस्मरः, त्रि, (घस+"सृघस्यदः क्मरच्।" ३। २। १६०। इति क्मरच्।) अद्मरः। भक्षकः। इत्यमरः। ३। १। २०॥ (यथा, महाभारते। ८। ४०। ३६।
"गौर्य्यो वृहत्यो निर्ह्रीकाः मद्रिकाः कम्बलावृताः।
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम॥")

घस्रं, क्ली, (घस्+रक्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥

घस्रः, पुं, (घसति भक्षयति अन्धकारम् । घस् + रक् ।) दिनम् । हिंस्रे त्रि । इति मेदिनी । रे ३० ॥ (यथा, पञ्चदश्याम् । ६ । १८५ ।
"रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने ।
तूष्णीम्भावमनोराज्ये इव सुषुप्तिजयाविमौ ॥")

घा, स्त्री (हन् + ड: । हस्य घत्वम् । टाप् च ।) काञ्ची । घातः । इति मेदिनी । घे । १ ॥

घाटः, पुं, घटते सङ्गच्छते शिरोऽनेन देहे इत्यर्थः । घट् + करणे घञ् ।) घाटा । इति शब्दरत्नावली ॥ (घाटा अस्यास्तीति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । घाटाविशिष्टे, त्रि । इति व्युत्पत्तिलब्धोऽर्थः ॥)

घाटा, स्त्री, (घाटा विद्यतेऽस्मिन् इति घाटः तत. टाप् ।) ग्रीवापश्चाद्भागः । घाड इति भाषा ॥ तत्पर्य्यायः । अवटुः २ कृकाटिका ३ । इत्यमरः । शिरःपश्चात्सन्धिः । इति राजनिर्घण्टः ॥ घाटः ५ कृकाटी ६ । इति शब्दरत्नावली ॥ घाटिका ७ । इति शब्दचन्द्रिका ॥
("दोषास्तु दुष्टास्त्रय एवमन्यां
सम्पीड्य घाटां सुरुजां सुतीव्राम् ॥"
इत्युत्तरतन्त्रे पञ्चविंशेऽध्याये सुश्रुतेनोक्तम् ॥)

घाटिका, स्त्री, (घाटा + स्वार्थे कन् । टापि अत इत्वञ्च ।) घाटा । इति शब्दचन्द्रिका ॥ (यथा, पञ्चतन्त्रे गङ्गदत्तप्रकरणे । ४ । २५ । "अथ कूपमासाद्यारघट्टघाटिकामार्गेण सर्पेणात्मना स्वालयं नीतः ॥")

घाण्टिकः, पुं (घण्टया चरतीति । चरतीति ठक् ।) यो बहुभिर्मिलित्वा स्तुतिं पठति सः । यो देवताद्यग्रे घण्टाघातेन शंसति स श्रावणाख्यः । इति स्वामी । इति सारसुन्दरी ॥ (यदुक्तम् । "राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः ।") तत्पर्य्यायः । घाटिकः २ । इति भरत ॥ चाक्रिकः ३ । इत्यमरः । २ । ८ । ९७ ॥ अन्यच्च ।
"मिलिता बहवो ये तु भवेयुः स्तुतिकारकाः ।
चाक्रिकास्ते निगदितास्त्वक्रिका अपि क्वचित् ॥
घण्टावाद्यस्तावका ये घाण्टिका घण्टिकाश्च ते ।"
इति शब्दरत्नावली ॥ धुस्तूरवृक्षः । इति हारावली । १०७ ॥

घातः, पुं, (हन् + करणभावादौ घञ् । "हनस्तोऽचिण्णलोः ।" ७ । ३ । ३२ । इति हन्तेस्तकारोऽन्तादेशः । "हो हन्तेर्ञ्णिन्नेषु ।" ७ । ३ । ५४ । इति कुत्वञ्च ।) काण्डः । प्रहारः । इति मेदिनी । ते । १७ ॥ (यथा, गो: रामायणे । ६ । ८९ । २४ ।
"मुष्टिभिः पार्ष्णिघातैश्च बाहुघातैश्च शोभने ।
घोरैर्जानुप्रहारैश्च नयनाक्षनपीडनैः ॥")
अङ्कपूरणम् । यथा । "समत्रिघातश्च घनः प्रदिष्टः ।" इति लीलावती ॥ (वधः । यथा, पञ्चतन्त्रे । १ । ३१२ ।
"गृहे शत्रुमपि प्राप्तं विश्वस्तमकुतोभयम् ।
यो हन्यात् तस्य पापं स्याच्छतब्राह्मणघातजम् ॥"
लुण्ठनम् । यथा, मनुः । ९ । २७४ ।
"ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने ॥"
"ग्रामघाते ग्रामलुण्ठने तस्करादिभिः ।" इति कुल्लूकभट्टः ॥ द्रव्याद्युत्खातः हानिर्वा । यथा, याज्ञवल्क्ये । २ । १६२ ।
"माषानष्टौ तु महिषी शस्यघातस्य कारिणी ॥"
भङ्गः । उच्छेदादिर्वा । यथा, पञ्चतन्त्रे । १ । सञ्जीवककथायाम् । "प्रोवाच भो शेषभागे अयुक्तं मया पापेन कृतं सञ्जीवकं व्यापादयता यस्माद् विश्वासघातादन्यन्नास्ति पापतरम् ॥")

घातकः, त्रि, (हन्तीति । हन् + ण्वुल् । णिति ताम्तादेशे कुत्वम् ।) हननकर्त्ता । यथा,—
"गौरीमाधवयोर्भर्त्ता राधिका शिवसन्निधौ ।
इन्दुः कुमुदहन्ता च सूर्य्यः कमलघातकः ॥"
इति विदग्धमुखमण्डनम् ॥
(तथा च मनुः । ५ । ५१ ।
"संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ॥")

घातनं, क्ली, (हन् + णिच् + भावे ल्युट् ।) हननम् । वधः । यज्ञार्थपशुवधः । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । ४४ । ४० ।
"पशुवद्घातनं वा मे दहनं वा कटाग्निना ।")

घातनः, त्रि, (हन्ति मारयतीति । हन् + कर्त्तरि ल्युः स्वार्थे णिच् ।) वधकर्त्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (केचित्तु एतस्य प्रामादिकत्वमुक्तम् । "हन्तेर्घुमाद्यन्तयोर्घत्वतत्वे ।" ५।४२। इत्युणादिसूत्रेण हन्तेर्युं निकृते आद्यन्तयोर्घत्वतत्वे घतनः । इत्युक्तत्वात् । अतः सुधीभिश्चिन्त्यम् ।)

घातिः, पुं, (हन् + इण् ।) पक्षिबन्धनम् । इत्युणादिकोषः ॥ प्रहरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

घातिपक्षी, [न्] पुं, (घाति, घातक, पक्षीति कर्म्मधारयः ।) श्येनपक्षी । इति हारावली । ८६ ॥

घातुकः, त्रि, (हन्तीति । हन् + "लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ् ।" ३ । २ । १५४ । इति उकञ् ।) हिंस्रः । क्रूरः । इत्यमरः । ३ । १ । ४७ ॥ (यथा, अथर्ववेदे । १२ । ४ । ७ ।
"ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः ॥")

घात्यं, त्रि, (हन्यतेऽसौ हन्तुमर्हो य इत्यर्थः । हन् + ण्यत् ।) हननयोग्यम् । इति व्याकरणम् ॥ (यथा, पञ्चतन्त्रे । ३ । २२८ । "ततो मम सुखघात्याः सञ्जाताः ॥") [हेमचन्द्रः ॥

घारः, पुं, (घृ सेचने + घञ् ।) सेचनम् । इति

घार्त्तिकः, पुं, (घृतेन निर्वृत्तः । इति ठञ् ।) घृतपूरः । इति हेमचन्द्रः ॥ (घृतसंयुक्ते त्रि । यथा, पञ्चतन्त्रे । ५ । ३५ ॥ "अन्यस्य घार्त्तिकभोजनं दत्तम् ॥")

घासः, पुं, (घस्यतेऽसौ पशुभिरित्यर्थः । घस् + कर्म्मणि घञ् ।) गवाद्यदनीयतृणविशेषः । तत्पर्य्यायः । यवसम् २ । इत्यमरः । २।५।१६७॥ यवसः ३ जवसः ४ । इति भरतः ॥ यवाषम् ५ । इति शब्दरत्नावली ॥ (यथा, पञ्चतन्त्रे ।४।५३।

घासिः, पुं, (घसति भक्षयति हव्यमिति । घस + "जनिघसिभ्यामिण् ।" उणां ४ । १३० इति इण् ।) अग्निः । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे । १ । १६२ । १४ । [देवेष्वस्तु ॥")
"यच्च पपौ यच्च घासिं जघास सर्व्वा ता ते अपि

घिण, इ ङ ग्रहणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ, घिण्यते । ङ, घिणते । अजिघिण्यत । इति दुर्गादासः ॥

घु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, घवते । इति दुर्गादासः ॥

घुः, पुं, (घुङ् ध्वनौ + भावे बाहुलकात् डुः ।) ध्वनिः । इति जटाधरः ॥

घुट, ङ ऋ परिवर्त्ते । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) परिवर्त्तो गतवतः प्रत्यागमनं विनिमयो वा । ङ, घोटते नदी । ऋ, अघुटत् । इति दुर्गादासः ॥ (यथा, कविरहस्ये १४६ ।
"यस्य व्याघोटते दण्डो नाज्ञतार्थः कृतश्च न ॥")

घुट, शि प्रतिघाते । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) शि, घुटति अघुटीत् शत्रून् शूरः । जुघोट । इति दुर्गादासः ॥

घुटः, पुं, (घुट् प्रतिघाते + संज्ञायां कः ।) चरणग्रन्थिः । इति हेमचन्द्रः ॥ [कोषः ॥

घुटिः, स्त्री, (घुट + इन् ।) गुल्फः । इति द्विरूप-

घुटिकः, पुं, (घुट् + ठन् ।) गुल्फः । इति हेमचन्द्रः ॥ [मरः । २ । ६ । ७२ ॥

घुटिका, स्त्री, (घुटिक + टाप् ।) गुल्फः । इत्य-

घुटी, स्त्री, (घुट् + इन् । "कृदिकारादक्तिनः ।" इति ङीष ।) गुल्फः । इति द्विरूपकोषः ॥

घुड, शि व्याघाते । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) शि, घुडति अघुडीत् । इति दुर्गादासः ॥

घुण, ङ भ्रमणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, घोणते । इति दुर्गादासः ॥

घुण, इ ङ ग्रहणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सक-सेट् ।) इ, घुण्यते । ङ, घुणते अजुघुण्यते । इति दुर्गादासः ॥

घुण, श भ्रमणे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट् ।) श, घुणति घोणिता । इति दुर्गादासः ॥

घुणः, पुं, (घुणति काष्ठं भक्षयन् काष्ठाभ्यन्तरे भ्राम्यतीति । घुण भ्रमणे + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) काष्ठकृमिः । (यथा, सुश्रुते सूत्रस्थाने । ९ अध्याये । "घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबुमुखेष्वेषु ॥") तत्पर्य्यायः । काष्ठवेधकः २ । इति जिह्वादिसंग्रहटीकायां भरतः ॥ काष्ठलेखकः ३ । इति भूरिप्रयोगः ॥

घुणवल्लभा, स्त्री, (घुणः वल्लभो यस्याः । घुणस्य वल्लभा वा ।) अतिविषा । इति भावप्रकाशः ॥ (व्यवहारोऽस्या यत्र तद्यथा,—
"कुटजलकफलं तार्क्ष्यं माक्षिकं घुणवल्लभाम् ।
पिबेत्तण्डुलतोयेन——"
इति वाभटे चिकित्सितस्थानेऽष्टमेऽध्याये ॥)

घुण्टः, पुं, (घुण्यते परिस्खलतीत्यनेन। घुट+ घञर्थे क। निपातनात् मुम् च।) गुल्फः। इति शब्दमाला॥ [हेमचन्द्र.॥

घुण्टकः, पुं, (घुण्ट। स्वार्थे कन्।) गुल्फः। इति

घुण्टिका, स्त्री, (घुण्ट इव कायतीति। कै। कः।) वनस्थकरीषम्। इति शब्दचन्द्रिका॥ विलघुंटे इति भाषा॥ [मालाचिकोष॥

घुणः पुं, (घोलत भ्राम्यतीति।) भ्रमर.। इति

घुर, श भ्रमे। भीमार्थे। इति कविकल्पद्रुमः॥ (तुदा-पर-अक सेट।) भीमो भयानकस्तस्य अर्थो निमित्तं हेतुरिति यावत् भीमार्थ.। श, घुरति व्याघ्रो मनुष्याणां भयहेतुर्भवतीत्यर्थः। घुर भीमार्थशब्दयोरिति प्राञ्चः। तन्मते इति शब्दविशेषणमिति रमानाथ.। घुरत्यर्थो च करत इति। शब्दानुकृतौ भट्टमल्ल। घोरिता। इति दुर्गादास.॥

घुर्घुरः पुं, (घुरति मनुष्याणां भयहेतुर्भवतीति। घुर्+क्विप्। ततः घुरो भयानकात् शब्दोऽपि घुर भयानक.। एतद्शब्दे प्रायशो स्तनु-सम्भवादेव तथात्वम्।) कीटविशेष। घुर घुरिया इति भाषा॥ तत्पर्य्यायः। यमकीट २। इति त्रिकाण्डशेष॥ घर्घुरः ३। इति रत्नमाला॥ (शूकरशब्द। इति चिन्तामणि.॥)

घुर्घुरी, स्त्री, (घुर्घुरः शूकरशब्दवदव्यक्तशब्द सोऽस्या अस्तीति। घुर्घुर+"अर्श आदिभ्यो-ऽच्।" ५।२।१२७। इत्यच्। ततो गौरादित्वात् ङीष्।) जलजन्तुविशेष। तत्पर्य्याय। स्थलकिरा २। इति त्रिकाण्डशेष॥

घुलच, पुं, गवेधुका। इति रत्नमाला॥ गड-गड इति भाषा॥

घुलघुलारव, पुं, (घुल् घुल् इत्यव्यक्तमारौतीति। आ+रु+अच्।) पारावतभेद.। इति राज-निर्घण्ट॥

घुष, इ ङ घूषे। इति कविकल्पद्रुम॥ (भ्वा-आत्म-सक-सेट।) घूष कान्तिकृति। इ, घुंष्यते। ङ, घुषते चन्दन गात्रम्। इति दुर्गादास॥

घुष, इर वधे। इति कविकल्पद्रुम॥ (भ्वा-पर-सक-सेट्।) इर्, अघुषत् अघोषीत्। इति दुर्गादास॥

घुष कि इर शुतौ। स्तुतौ इति यावत्। विशब्दे। इति कविकल्पद्रुम॥ (चुरा पक्षे भ्वा-पर सक-सेट।) विशब्द इह कथन आविष्करण नाना-शब्दकरण वा आङ्पूर्ब्बक, सततक्रन्दने। इति तट्टीका॥ कि, घोषयति घोषति गढमर्थमभि-युक्त.। नानाशब्दे वाद्य घोषयति द्वारि यस्य कश्चिदुपद्रुत। इति हलायुध। इर् अघुषत् अघोषीत्। घुष किरशुवर्त्तते। कि, आघोषयति आघोषति शोकार्त्त सतत क्रन्दतीत्यर्थ.। इति दुर्गादास॥

घुषितं, त्रि, (घुष्यते स्म इति। घुष विशब्दे+ क्त.। "घुषिरविशब्दने।" ७।२।२३। इति कथनात् नेट्।) शब्दितम्। इति सुपद्म व्याकरणम्॥

घुष्ट, त्रि, (घुष्यते स्म इति। घुष+"घुषिरविशब्दने" इति सूत्रस्थ निपातनात् साधु.।) शब्दितम्। इति मुग्धबोधम्॥ (यथा, हरिवंशे। ७०।८९।
"इतराणामायुधैः कामदेवैश्च॥"
शब्दितार्थे तु "घुषिरविशब्दने।" ७।२। २३। इति नेट। "घुषा इत्यनुः।" इति सिद्धान्त-कौमुदी॥)

घुसृण, क्ली, (घुष्यते कामेन इति भाव। घुष+ नाम्नीकात् ऋण्क। पृषोदरादित्वात् साधु.। यद्वा घुष्यते कान्तिविशिष्टं क्रियते शरीर-मनेन। घुषि घृषौ। बाहुलकात्।) कुङ्कुमम्। इति त्रिकाण्डशेष॥ (यथा, कथासरित्। २८।५७।
"घुसृणापिञ्जरतनुर्धरण्या धारयन्मणीन्॥"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"काश्मीरं घुसृणोदित रक्ताभिमानगन्धम्।
न भोक्तुं न च वा भोज्य यथाकाले नरेष्यते॥"
इति घुसृणकुङ्कुमम्॥)

घूक, पुं, (घू इत्यव्यक्तशब्देन कायति शब्दायते इति। घू+कै+क।) उलूक.। इति हेम-चन्द्र.। ४।३८॥

घूकारि., पुं, (घूकस्य पेचकस्य अरि: शत्रु।) काक। इति हेमचन्द्र.। ४।३८८॥

घूकावास., पुं, (घूकानां पेचकानां आवासो यत्र स्थाने।) शाखोटवृक्ष। इति राजनिर्घण्ट॥

घूर, य ङ ई हिंसावयोहान्यो। इति कविकल्पद्रुम॥ (दिवा-आत्म सकं अक च सेट्।) दीर्घ। य ङ, घूर्य्यते। ई, घूर्ण। वयोहानिर्गतवयस्कयो-भाव। इति दुर्गादास॥

घूर्ण, ण श भ्रमणे। इति कविकल्पद्रुम॥ (तुदा-उभ-अक-सेट।) ण, घूर्णति घूर्णते। श, घूर्णती घूर्णन्तौ। इति दुर्गादास॥ (यथा गो रामायणे। ४।१५।२५।
"स तु वाली रणगत: सासताडनविह्वल।
गुरुभारसमाक्रान्तचचाल च सुघूर्ण च॥")

घूर्ण पुं, (घूर्णति स्रोतपरिभूमौ घूर्णाकारेण सम्भवतीति। घूर्ण+अच्। घूर्णाकारेण जाय-मानत्वात् तथात्वम्।) योन्निसुन्दरक। इति शब्दचन्द्रिका॥ गीमा इति भाषा॥ (घूर्ण+ भावे अच्।) भ्रमणञ्च॥ (विघूर्णिते, त्रि। यथा, भागवते। ७।२।२।
"आह चेदं रुषा घूर्ण सन्दष्टदशनच्छद.॥")

घूर्णन, क्ली, (घूर्ण+भावे ल्युट्।) भ्रमणम्। तत्-पर्य्याय। चक्रावर्त्त. २ भ्रम. ३ भ्रान्ति: ४ भ्रमि ५ घूर्णि ६। इति हेमचन्द्र:। ६।१५५॥ (यथा, गीतगोविन्दे। ८।११।
"अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसन-स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्र: कुरङ्गी-दृशाम्॥")

घूर्णायमान:, त्रि, (घूर्ण इवाचरतीति। घूर्ण+ क्यङ्। ततो घूर्णायत इति। घूर्णाय+शानच्।) भ्राम्यमाण। यथा, कर्णाधधातुव्याख्यायाम्।
"इन्द्राश्रैरनिमार्थमाधावद्भिः संसूयमाणं मुहुः पौर्णोर्मवफेनावगाह्यमानतया घूर्णायमानैर्जगत्॥"

घूर्णि., स्त्री, (घूर्ण+"सर्व्वधातुभ्य इन्।" उणा। ४।११७। इति भावे इन्।) घूर्णनम्। इति हेमचन्द्र.। ६।१५५॥

घूर्णित, त्रि, (घूर्णते स्म इति। घूर्ण+क्त।) भ्रमित.। तत्पर्य्याय.। प्रचलायित. २। इत्य-मर.। ३।१।३२॥ (यथा, कथासरित्-सागरे। २४।२।
"मदघूर्णितचक्षोलै सिन्दूरैरञ्जयन् महीम्।
हेरम्ब पातु वो विघ्नान् स्वतेजोभिर्दहन्निव॥")

घूर्णमान, त्रि, (घूर्ण्यते इति। घूर्ण+णिच+कर्म्मणि शानच्।) भ्राम्यमाण। यथा, महानाटके।
"भो हंसा: पश्यतस्या बहुकुसुमयुता वायुना घूर्ण्यमाना॥"
अणिजन्ते तु घूर्णमान इत्येव स्यात्। यथा हरिवंशे ४८।३६।
"अमन्त घूर्णमानश्च स्तुतिं देवा प्रचक्रिरे॥")

घृ, सेके। इति कविकल्पद्रुम॥ (भ्वा पर-सक-अनिट।) घरति तरु मेघ। इति दुर्गादास॥

घृ, क सेके। धारणे। इति कविकल्पद्रुम॥ (चुरा पर-सक-अनिट।) क, घारयति। इति दुर्गा-दास.॥

घृ, र लि भासि। सेके। इति कविकल्पद्रुम॥ (ह्वा-पर-सक-अनिट्।) र वैदिक। लि, जघर्ति घृत दीप्यते क्षरति चेत्यर्थ। इति दुर्गा-दास॥

घृण, इ ङ ग्रहणे। कविकल्पद्रुम॥ (भ्वा आत्म-सक सेट्।) इ, घृण्यते। ङ, घृणते जरी-घृण्यते। इति दुर्गादास॥

घृण, इ ण उ दीप्तौ। इति कविकल्पद्रुम॥ (तना-उभ अक-सेट्। उदित्वात् क्त्वावेट्।) इ ण, घृणोति घर्णोति। घृणुते घर्णुते। उ, घर्णित्वा घृत्वा। इति दुर्गादास.॥

घृणा, स्त्री, (घ्रियते सिच्यते हृदयमनया।। घृ सेके+बाहुलकात् नक् स्त्रियां टाप्। दयारसेन हि हृदय सिक्तमिवार्द्र भवतीति तथात्वम्।) करुणा। (यथा, किरातार्ज्जुनीये। १५।१३।
"मन्दमस्यन्निषुलतां घृणया मुनिरेष व.।
प्रणुदत्यागतावज्ञं जघनेषु पशूनिव॥"॥
घ्रियते आच्छाद्यते गुणादिकमनयेति।) जुगुप्सा। तत्पर्य्याय। अर्त्तनम् २ ऋतीया ३ हृणीया ४। इत्यमर। ३।२।६२॥ रोध्या ५ हृणिया ६ घ्रिणीया ७ घृणीया ८। इति तट्टीका॥ (यथा, रघु। ११।१७।
"तां विलोक्य वनितावधे घृणां पत्रिणा सह मुमोच राघव॥")

घृणावास, पुं, (घृणाया आवास।) कुष्माण्ड। इति त्रिकाण्डशेष.॥ घृणायुक्ते त्रि॥

घृणिः, पु, (जघर्त्ति दीप्यते इति । घृ+"घृणि-पृश्निपार्ष्णिचूर्णिभूर्णि ।" उणा । ४ । ५२ । इति निप्रत्ययेन निपातनात् साधुः ।) किरणः । इत्यमरः । १ । ३ । ३३ ॥ सूर्य्यः । (घरति सिञ्चतीति । घृ सेके+निः गुणाभावश्च ।) जलम् । इति मेदिनी ॥ (जघर्त्ति दीप्यते इति व्युत्पत्त्या दीप्तिशालिनि, त्रि । यथा, भागवते । ७ । २ । ७ । "तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ॥")

घृतः, पु क्ली, (जघर्त्ति क्षरतीति । घृ+"अञ्जिघृसिभ्यः क्तः ।" उणां । ३ । ८९ । इति क्तः ।) पक्वनवनीतम् । घि इति भाषा ॥ तत्पर्य्यायः । आज्यम् २ हविः ३ सर्पिः ४ इत्यमरः । २।९।५२ ॥ पवित्रम् ५ नवनीतकम् ६ अमृतम् ७ अभिघारः ८ होम्यम् ९ आयुः १० तेजसम् ११ । इति राजनिर्घण्टः ॥ आणम् १२ । यथा,—

"घृतोऽस्त्री चाजमाज्यञ्च सर्पिः स्यादमृतं हविः ।"

इति जटाधरः ॥

तस्य गुणाः । वृद्धाग्निशुक्रौजोमेदःस्मृतिकफकारित्वम् । वातपित्तविषोन्मादरोगशोषालक्ष्मीज्वरनाशित्वम् । मांसादष्टगुणगुरुत्वञ्च । इति राजवल्लभः ॥ रसायनत्वम् । स्वादुत्वम् । चक्षुर्हितत्वम् । शीतवीर्य्यत्वम् । पापनाशित्वम् । अल्पाभिष्यन्दित्वम् । कान्तितेजोलावण्यस्वरायुर्हितबलकारित्वम् । पवित्रत्वम् । गुरुत्वम् । उदावर्त्तशूलानाहव्रणक्षयवीसर्परक्तनाशित्वम् । स्निग्धत्वम् । रूक्षत्वञ्च । इति भावप्रकाशः ॥ * ॥ अथ गव्यघृतस्य गुणाः । विशेषेण चक्षुर्हितत्वम् । शीतलत्वम् । वातपित्तकफालक्ष्मीपापरक्षोनाशित्वम् । शुक्राग्निस्वादुपाकमेधालावण्यकान्त्योजस्तेजोवृद्धिवयःस्थितिबलायुर्हितकारित्वम् । गुरुत्वम् । पवित्रत्वम् । सुमङ्गल्यत्वम् । रसायनत्वम् । सुगन्धित्वम् । रोचनत्वम् । चारुत्वम् । सर्व्वाज्येषु गुणाधिकत्वञ्च । इति भावप्रकाशः ॥ बुद्धिस्मृतिपुष्टिवपुःस्थैर्य्यकारित्वम् । श्रमोपशमनत्वम् । हृद्यतमत्वम् । बहुगुणत्वञ्च ॥*॥ माहिषघृतगुणाः । उत्तमत्वम् । धृतिसौख्यकान्तिवमवर्णचक्षुर्हितकारित्वम् । वातश्लेष्मदुर्नामग्रहणीविकारनाशित्वम् । मन्दानलोद्दीपनत्वम् । नवगव्यतः परमहृद्यत्वम् । मनोहारित्वञ्च । इति राजनिर्घण्टः ॥ स्वादुत्वम् । पित्तरक्तनाशित्वम् । शीतलत्वम् । श्लेष्मशुक्रवृद्धिकारित्वम् । गुरुत्वम् । स्वादुपाकित्वञ्च ॥ * ॥ छागीघृतगुणाः । अग्निचक्षुर्हितबलकारित्वम् । कासश्वासक्षयेषु हितत्वम् । कटुपाकित्वञ्च । इति भावप्रकाशः ॥ कफनाशित्वम् । इति राजनिर्घण्टः ॥ * ॥ मेषीघृतगुणाः । पित्तमेदस्कारित्वम् । योनिदोषे शोषे कफे अनिले च प्रशस्तत्वम् । रूक्षत्वम् । दुर्नामोन्मादनाशित्वञ्च । इति राजवल्लभः ॥ पाके लघुत्वम् । पित्तकोपाकारित्वम् । शोफे कर्म्मे च हितत्वञ्च ॥ * ॥ मेडकघृतगुणाः । अतिगौरवात् सुकुमारदेहिवर्ज्यत्वम् । बुद्धिपाटवहरत्वम् । बलकारित्वम् । तृष्णावपुषो विस्रगन्धकारित्वञ्च ॥ * ॥ हस्तिनीघृतगुणाः । कफपित्तविषक्रमिनाशित्वम् । कषायत्वम् । लघुत्वम् । विष्टम्भित्वम् । तिक्तत्वम् । वह्निकरत्वञ्च ॥ * ॥ अश्वाघृतगुणाः । कटुत्वम् । मधुरत्वम् । कषायत्वम् । इषदग्निदीपनत्वम् । वाह्यप्रदत्वम् । मूर्च्छाहारित्वम् । गुरुत्वञ्च ॥ * ॥ गर्द्दभीघृतगुणाः । अग्निबलकारित्वम् । मूत्रदोषकफनाशित्वम् । पाके लघुत्वम् । कषायत्वम् । उष्णवीर्य्यत्वञ्च ॥ * ॥ उष्ट्रीघृतगुणाः । मधुरत्वम् । विपाके कटुत्वम् । शीतलत्वम् । कुष्ठक्रमिविषवातकफगुल्मोदरनाशित्वञ्च । इति राजनिर्घण्टः ॥ शोथनाशित्वम् । इति राजवल्लभः ॥ * ॥ नारीघृतगुणाः । चक्षुर्हितरुचिकारित्वम् । पथ्यत्वम् । मन्दाग्निदीपनत्वम् । पाके लघुत्वम् । सर्व्वामयविषनाशित्वञ्च । इति राजनिर्घण्टः ॥ प्रमेहनाशित्वम् । इति राजवल्लभः ॥ * ॥ दुग्धभवघृतगुणाः । ग्राहित्वम् । शीतलत्वम् । नेत्ररोगकारित्वम् । पित्तदाहास्रमदमूर्च्छाभ्रमानिलनाशित्वञ्च ॥ * ॥ ह्यस्तनदधिजघृतं तदेव हैयङ्गवीनम् । तस्य गुणाः । चक्षुर्हितत्वम् । दीपनत्वम् । रुचिबलकारित्वम् । हृद्यत्वम् । वृष्यत्वम् । विशेषात् ज्वरनाशित्वञ्च ॥ * ॥ वर्षाद्दूर्द्ध्वं पुराणस्य तस्य गुणाः । त्रिदोषमूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरनाशित्वम् । इति भावप्रकाशः ॥ मदशिरःकर्णादिजरोगभ्रान्तिनाशित्वम् । व्रणस्य शोधनत्वम् । रोपणत्वञ्च । आयुर्वृद्धिशरीरदृढतासौकुमार्य्यकान्तिस्मृतिबलकारित्वम् । बाल्ये तरुणे वार्द्धके चातिवल्लत्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टः ॥ प्रतिश्यायामकासजीर्णज्वरसर्व्वरोगनाशित्वम् । श्रेष्ठत्वम् । धातुसाम्यकारित्वञ्च ॥ * ॥ तस्य लक्षणम् ।

"उग्रगन्धं पुराणं स्याद्दशवर्षस्थितम् घृतम् ।
लाक्षारसनिभं शीतं प्रपुराणमतः परम् ।
यथा यथा भवेज्जीर्णं गुणवत् स्यात्तथा तथा ॥"

काम्यपात्रे दशदिनस्थितं घृतं त्याज्यम् । इति राजवल्लभः ॥ औषधघटितपक्वघृतस्य पूर्णवीर्य्यं षण्मासपर्य्यन्तं तिष्ठति । इति वैद्यकपरिभाषा ॥

("शस्तं धीस्मृतिमेधाग्नि-बलायुःशुक्रचक्षुषाम् ।
बालवृद्धप्रजाकान्ति-सौकुमार्य्यस्वरार्थिनाम् ॥
क्षतक्षीणपरीसर्पशस्त्राग्निग्लपितात्मनाम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥
स्नेहानामुत्तमं शीतं वयसः स्थापनं परम् ।
सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत् ॥"

इति पूर्व्वखण्डे षष्ठमेऽध्याये शार्ङ्गधरेणोक्तम् ॥

"विपाके मधुरं वृष्यं वातपित्तकफापहम् ।
चक्षुष्यं बलकृन्मेध्यं गव्यं सर्पिर्गुणोत्तरम् ॥"

इति गव्यघृतम् ॥

"आजं सन्दीपनीयञ्च चक्षुष्यं बलवर्द्धनम् ।
कासे श्वासे क्षयेऽर्शःसु लघुपाके कफापहम् ॥"

इत्याजघृतम् ॥

"वातपित्तसमं सर्व्वं सुप्रीतं माहिषं घृतम् ।
मधुरं गुरु विष्टम्भि भवत्यल्पगुणात्मकम् ॥"

इति माहिषघृतम् ॥

"औष्ट्रं कटु घृतं पाके शोषक्रिमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥"

इत्युष्ट्रीघृतम् ॥

"पाके लघ्वाविकं सर्पिः सर्व्वरोगविषापहम् ।
वृद्धिं करोति चास्थ्नाञ्च वाश्मरीशर्करापहम् ॥"

इत्याविकं घृतम् ॥

"वृद्धिं करोति देहाग्नेर्लघु पाके विषापहम् ।
चक्षुष्यं दीपनञ्चाश्वैर्वातदोषनिवारणम् ।
वृद्धिं करोति चास्थीनां तत्प्रोक्तञ्च विषापहम् ॥"

इत्यश्वीघृतम् ॥

"कफेऽनिले योनिदोषे शोषे पित्तेषु तद्धितम् ।
सात्म्यं क्षीणाश्च चक्षुष्यं सर्पिः स्यादमृतोपमम् ॥"

इति नारीघृतगुणाः ॥

"तर्पणं नेत्ररोगघ्नं दाहहृत पयसो घृतम् ॥"

इति क्षीरोद्भवघृतम् ॥

"दोषापहं वह्निसन्धुक्षणञ्च
मूर्च्छाह्निकोन्मादकर्णाक्षिशूले ।
शोफार्शसोर्योनिदोषे व्रणेषु
शस्तं सर्पिर्जीर्णमेव तृणां स्यात् ॥
उग्रगन्धं पुराणं स्याद्दशवर्षोषितं घृतम् ।
यथा यथा जरां याति गुणवत् स्यात्तु तत्तथा ॥"

इति जीर्णघृतगुणाः ॥

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥

"स्मृतिबुद्ध्यग्निशुक्रौजःकफमेदोविवर्द्धनम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥
सर्व्वस्नेहोत्तमं शीतं मधुरं रसपाकयोः ।
सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत् ॥
मदापस्मारमूर्च्छायशोफोन्मादगरज्वरान् ।
योनिकर्णशिरःशूलं घृतं जीर्णमपोहति ॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥

"विशेषतः पुराणञ्च घृत तत् पाययेद्भिषक् ।
त्रिदोषघ्नं पवित्रत्वात् विशेषाद्ग्रहमोचणम् ॥
गुणकर्म्माधिकं स्यानादास्वादात् कटुतिक्तकम् ।
उग्रगन्धं पुराणं स्याद्दशवर्षोषितं घृतम् ॥
लाक्षारसनिभं शीतं तद्धि सर्व्वग्रहापहम् ।
मेध्यं विरेचनेष्वग्र्यं प्रपुराणमतः परम् ॥
नासाध्यं नाम तस्यास्ति यत् स्याद्वर्षशतस्थितम् ।
दृष्टं स्पृष्टमथाघ्रातं तद्धि सर्व्वग्रहापहम् ।
अपस्मारग्रहोन्मादवतां शस्तं विशेषत. ॥"

इति चरके चिकित्सास्थाने चतुर्द्दशेऽध्याये ॥

"घृतन्तु सौम्यं शीतवीर्य्यं मृदुमधुरमल्पाभिष्यन्दि स्नेहनमुदावर्त्तोन्मादापस्मारशूलज्वरानाहवातपित्तप्रशमनमग्निदीपनं स्मृतिमतिमेधाकान्तिस्वरलावण्यसौकुमार्य्यौजस्तेजोबलकरं आयुष्यं वृष्यं मेध्यं वय स्थापनं गुरु चक्षुष्यं श्लेष्माभिवर्द्धनं पापालक्ष्मीप्रशमनं विषहरं रक्षोघ्नञ्च ॥
विपाके मधुरं शीतं वातपित्तविषापहम् ।
चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरम् ॥
आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनम् ।

कासे श्वासे क्षये चापि पथ्यं पाके च तल्लघु ॥
मधुरं रक्तपित्तघ्नं गुरुपाके कफावहम् ।
वातपित्तप्रशमनं सुशीतं माहिषं घृतम् ॥
औष्ट्रं कटुरसं पाके शोषक्रिमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥
पाके मधुराविकं सर्पिर्न च पित्तप्रकोपणम् ।
कफेऽनिले योनिदोषे शोषे कम्पे च तद्धितम् ॥
पाके लघ्वुष्णवीर्य्यञ्च कषायं कफनाशनम् ।
दीपनं बद्धमूत्रञ्च विद्यादैकशफं घृतम् ॥
चक्षुष्यमग्र्यं स्त्रीणान्तु सर्पिः स्यादमृतोपमम् ।
वृद्धिं करोति देहाग्न्योर्लघुपाकं विषापहम् ॥
कषायं बद्धविण्मूत्रं तिक्तमग्निकरं लघु ।
हन्ति कारेणवं सर्पिः कफकुष्ठविषक्रिमीन् ॥"

क्षीरघृतं पुनः सद्याहि रक्तपित्तभ्रममूर्च्छाप्रशमनं नेत्ररोगहितञ्च। सर्पिर्मण्डस्तु मधुरः सरो योनिश्रोत्राक्षिशिरसां शूलघ्नो वस्तिनस्याक्षिप्रपूरणेषूपदिश्यते। सर्पिः पुराणं सरं कटुविपाकं त्रिदोषापहं मूर्च्छामेदोन्माद उदरज्वरगरशोषापस्मारयोनिश्रोत्राक्षिशिरःशूलघ्नं दीपनं वस्तिनस्याक्षिपूरणेषूपदिश्यते। भवन्ति चात्र।

"पुराणं तिमिरश्वासपीनसज्वरकासनुत् ।
मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनम् ॥
एकादशशतञ्चैव वत्सरानुषितं घृतम् ।
रक्षोघ्नं कुम्भसर्पिः स्यात् परतस्तु महाघृतम् ॥
पेयं महाघृतं भूतैः कफघ्नं पवनाधिकैः ।
बल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहम् ॥
सर्व्वभूतहरञ्चैव घृतमेतत् प्रशस्यते ॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥ * ॥
क्ली सलिलम्। इति मेदिनी। ते। १७॥)

घृत, त्रि (जघर्त्ति दीप्यते क्षरति सिच्यतीति वा। घृ+"अञ्जिघृसिभ्यः क्तः।" उणां। ३। ८९। क्तः।) दीप्तः। सेचकः। इति शब्दरत्नावली॥

घृतकरञ्जः, पुं, (घृतमिव करञ्जः। घृतवद्रसबाहुल्यादस्य तथात्वम्।) करञ्जभेदः। घियाकरञ्जा इति भाषा॥ तत्पर्य्यायः। प्रकीर्य्यः २ घृतपर्णकः ३ स्निग्धपत्रः ४ तपस्वी ५ विषारिः ६ विरोचनः ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। वातव्रणसर्व्वत्वग्दोषविषसर्पनाशित्वञ्च। इति राजनिर्घण्टः॥

घृतकुमारिका, स्त्री, (घृतेन घृतसदृशरसेन कुमारिका सुन्दरी बालिकेव वा। गृहपाल्यत्वात् तथात्वम्।) घृतकुमारी। इति भावप्रकाशः॥ (यथास्याः पर्य्यायाः।
"कुमारी गृहकन्या च कन्या घृतकुमारिका॥"
गुणाश्च यथा—
"कुमारी भेदिनी शीता तिक्ता नेत्र्या रसायनी।
मधुरा बृंहणी बल्या वृष्या वातविषप्रणुत्॥
गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी हरेत्।
ग्रन्थ्यग्निदग्धविस्फोटपित्तरक्तत्वगामयान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

घृतकुमारी, स्त्री, (घृतेन घृतवद्रसेन कुमारी सुन्दरी। यद्वा कुमारी कन्येव। गृहे पालित तया तथात्वम्।) स्वनामख्यातगुल्मः। घिकुमारी इति भाषा। तत्पर्य्यायः। कुमारी २ तरणिः ३ सहा ४। इति शब्दरत्नावली॥ कन्यका ५ दीर्घपत्रिका ६ स्थलेरुहा ७ मृदुः ८ कन्या ९ बहुपत्रा १० अमरा ११ अजरा १२ कण्टकप्रावृता १३ वीरा १४ भृङ्गेष्टा १५ विपुलास्रवा १६ ब्रह्मघ्नी १७ तरुणी १८ रामा १९ कपिला २० अम्बुधिस्रवा २१ सुकण्टका २२ स्थूलदला २३ गृहकन्या २४। अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। मदगन्धित्वम्। कफपित्तकासविषश्वासकुष्ठनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ भेदकत्वम्। नेत्रहितत्वम्। मधुरत्वम्। बृंहणत्वम्। शुक्रबलकारित्वम्। वातगुल्मप्लीहयकृत्तृष्णवृद्धिज्वरग्रन्थ्यग्निदग्धविस्फोटपित्तरक्तत्वग्रोगनाशित्वञ्च। इति भावप्रकाशः॥ (कुमारीशब्दे विवरणमस्या ज्ञेयम्॥)

घृततैलादिकल्पः, पुं, (घृततैलादीनां रोगविनाशकपक्वघृततैलादीनां कल्पो विधिः।) रोगनाशकनानौषधिपक्वघृततैलादिवर्गः। यथा।

धन्वन्तरिरुवाच।

"घृततैलादि वक्ष्यामि शृणु सुश्रुत। रोगनुत्।
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्च्चला॥
अभया गुडूची चैव अटरूषकवाकुची।
एतैरक्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्॥
कण्टकार्य्या रसप्रस्थं क्षीरप्रस्थसमन्वितम्।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥ १॥
त्रिफलाचित्रकवलानिर्गुण्डीनिम्बवासकाः।
पुनर्नवा गुडूची च बृहती च शतावरी॥
एतैस्तैलं यथालाभं सर्व्वरोगविमर्द्दनम्॥ २॥
बलाशृतकषाये तु तैलस्यार्द्धाढ़कं पचेत्॥
कल्कैर्मधुकमञ्जिष्ठाचन्दनोत्पलपद्मकैः।
सूक्ष्मैलापिप्पलीकुष्ठत्वगेलागुरुकेशरैः॥
गन्धाश्मजीवनीयैश्च क्षीराढकसमाश्रितम्।
एतन्मृद्वग्निना पक्वं स्थापयेद्राजते शुभे॥
सर्व्ववातविकारांस्तु सर्व्वधात्वन्तराश्रयान्।
तैलमेतत् प्रशमयेद्बलाख्यं राजवल्लभम्॥ ३॥
शतावरीरसप्रस्थं क्षीरप्रस्थं तथैव च।
शतपुष्पा देवदारु मांसी शैलेयकं बला॥
चन्दनं तगरं कुष्ठं माला चांशुमती तथा।
एतैः कर्षसमैः कल्कैस्तैलप्रस्थं विपाचयेत्॥
कुब्जवामनपङ्गूनां बधिरव्यङ्गकुब्जिनाम्।
वायुना भग्नगात्राणां ये च सीदन्ति मैथुने॥
जराजर्ज्जरगात्राणामाध्मानमुखशोषिणाम्।
लग्नताश्चापि ये वाताः शिरास्नायुगताश्च ये॥
सर्व्वांस्तान् नाशयत्याशु तैलेनैव स्वाद्दशाङ्गकम्।
नारायणमिदं तैलं विष्णुनोक्तं रुगर्द्दनम्॥ ४॥
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौषधैः पृथक्।
शतावर्य्या गुडूच्या वा चित्रके रोचनायुतः॥
निर्गुण्ड्या वा प्रसारण्या कण्टकार्य्या रसादिभिः॥
वर्षाभ्वा वानलया वापि वासकेन फलत्रिकैः।
ब्राह्म्या भैरङ्गकेनापि भृङ्गराजेन मुण्डिना॥
मुसल्या दशमूलेन खदिरेण वटादिभिः।
वटिका मोदको वापि चूर्णं स्यात् सर्व्वरोगनुत्॥
घृतेन मधुना वापि युक्तं खण्डगुडादिभिः।
लवणैः कटुकैर्युक्तं यथालाभञ्च रोगनुत्॥ ५॥
चित्रकार्कत्रिवृत्तामलकद्वयमारकम्।
सुधाञ्च वालागणिकाश्मपर्णीसुवर्च्चिकाम्॥
ज्योतिष्मतीञ्च सम्भज्य तैलं धीरो विपाचयेत्।
एतन्निस्यन्दनं तैलं भृशं दद्याद्भगन्दरे॥
शोधनं रोपणञ्चैव सवर्णकरणं परम्।
चित्रकाद्यं महातैलं सर्व्वरोगप्रभञ्जनम्॥ ६॥
अजमोदा सचिन्दूरा हरितालं निशाद्वयम्।
क्षारद्वयं फेनयुतमार्द्रकं सरलोद्भवम्।
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः॥
एभिः सर्षपजं तैलमजमूत्रैश्च योजितम्।
मृद्वग्निना पचेदेतदर्कक्षीरेण संयुतम्॥
अजमोदादिकं तैलं गलमालां व्यपोहति।
विद्रधञ्च पचेत् पक्वं पक्वञ्चैव विशोधयेत्॥
रोपणं मृदुभावञ्च तेनैवानेन कारयेत्।
अजमोदादिकं तैलं महावीर्य्यञ्च रोगनुत्॥" ७॥

इत्यादि महापुराणे गारुडे १७८ अध्याये॥

घृतदीधितिः, पुं, (घृतेन प्रदीप्ता दीधितिः किरणा यस्य। घृताहुत्या अभिवर्द्धनादेव तथात्वम्।) अग्निः। इति त्रिकाण्डशेषः॥

घृतपर्णकः, पुं, (घृतयुक्तमिव पर्णं पत्रं यस्य। कप्।) घृतकरञ्जः। इति राजनिर्घण्टः॥

घृतपूरः, पुं, (घृतेन पूर्य्यते इति। पूरी इ य पूर्त्तौ+कर्म्मणि अप्। प्रचुरघृतपाकत्वादेवास्य तथात्वम्।) पिष्टकविशेषः। यथाह राजवल्लभः।
"मर्द्दितां समितां क्षीरनारिकेलघृतादिभिः।
अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते॥
घृतपूरो गुरुर्वृष्यः कफकृन्मांसदः।
रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽनिलः॥"
तत्पर्य्यायः। पिष्टपूरः २ घृतवरः ३ घार्त्तिकः ४। इति हेमचन्द्रः। ३। ६४॥ (अस्य पाकप्रकारादि यदुक्तं चिन्तामणौ।
"क्षीरेण मर्द्दितं चूर्णं गोधूमानां सुगालितम्।
विस्तार्य्य सर्पिषा माथ्यं कटाहेऽथ सितान्वितम्।
घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः॥"
नारिकेलजो यथा,—
"समिता मर्द्दिता क्षीरे नारिकेलसितार्द्रकैः।
अवगाह्य घृते पाच्या घृतपूरोऽपरः स्मृतः॥"
दुग्धजो यथा,—
"पाकपिण्डीकृतं क्षीरं शर्कराचूर्णमिश्रितम्।
घृतपूरविनिर्म्माणं कारयेत् खण्डवर्त्तिभिः॥"
शालिभवो यथा,—
"शुभ्रशालिपिष्टं दुग्धेन कथितं वस्त्रगालितम्।
खण्डयुक्तं घृते पक्वं घृतपूरो भवेदयम्॥"
कशेरुभवो यथा,—
"कशेरुचूर्णं निःक्षिप्य पाकपिण्डीकृतं पयः।
निर्म्माय घृतपूराणां शर्करासहितं भवेत्॥"

आम्नजो यथा,—
"पक्वाम्रस्य घृते तप्ते रसखनलपिण्डितः ।
शुद्धशर्करया योज्यो घृतपूरो यदृच्छया ॥
क्षीरमाद्यं स्वरूपं हि खण्डं चूर्णं ततः स्मृतम् ।
योजिते यो विशेषोऽत्र तदाख्यास्वर्णसंज्ञितः ॥
घृतपूरो गुरुर्वृष्यो हृद्यः पित्तानिलापहः ।
सद्यः प्राणप्रदो बल्यः सुरुच्योऽग्निप्रदीपनः ॥
शृङ्गाटकसुखानामप्येव स्यात् घृतपूरकः ।
विचार्य्य वस्तुसंयोगं तद्गुणानपि चाहरेत ॥")

घृतपूर्णकः, पु, (घृतेन पूर्ण इव कायतीति । कै+कः ।) करञ्जवृक्षः । इति त्रिकाण्डशेषः ॥

घृतमण्डलिका, स्त्री, (घृतस्य मण्डलं समूहः । तदिव निर्य्यासः अस्या अस्यां वा अस्तीति । घृतमण्डल+"अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥

घृतमण्डा, स्त्री, (घृतमण्डवत् निर्य्यासोऽस्त्यस्याः । "अर्श आदिभ्योऽच् ।"५ । २ । १२७ । इत्यच् ।) वायसोलीवृक्षः । इति शब्दचन्द्रिका ॥ माकड्छाता इति भाषा ॥

घृतवरः, पुं, (घृतमेव वरं बाहुल्यात् प्रधानं यत्र ।) घृतपूरः । इति हेमचन्द्रः । ३ । ६४ ॥

घृता, स्त्री, (घृतवत् निर्य्यासोऽस्त्यस्याः । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ।) घृतमण्डा । इति शब्दचन्द्रिका ॥

घृताची, स्त्री, (घृतेन अमृतेन अञ्चति तृप्तिं गच्छतीति । अनच+क्विप् । नलोपे स्त्रियां ङीप् । सर्व्वथा मनुष्याहारवर्ज्जितानां देवजातीनां अमृतमयघृतभोजनं महाभारतपुराणादिप्रसिद्धम् ।) अप्सरोविशेषः । इति हलायुधः ॥ (यथा, विष्णुपुराणे । १ । ९ । १०१ ।
"घृताचीप्रमुखा ब्रह्मन् ननृतुश्चाप्सरोगणाः ॥"
गायत्त्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४६ ।
"घनारिमण्डला घूर्णा घृताची घनवेगिनी ॥")

घृताचीगर्भसम्भवा, स्त्री, स्थूलैला । इति राजनिर्घण्टः ॥

घृताह्वः, पुं, (घृतस्य आह्वा आख्या यस्य । यद्वा, घृतेन आह्वयते स्पर्द्धते स्वगन्धेन इति । आ+ह्वे+कः ।) सरलद्रवः । इति त्रिकाण्डशेषः ॥

घृतेली, स्त्री, (घृते इलति तद्भक्षणाय तत्र स्वपितीति । इल स्वप्ने+अच् । गौरादित्वात् ङीष् ।) कीटविशेषः । तैलपायिका इति केचित् ॥ तत्पर्य्यायः । पिङ्गकपिशा २ । इति हेमचन्द्रः । ४ । २७३ ॥

घृतोदः, पु, (घृतमिव स्वादु आकृत्या शुभ्रं वा उदकं यस्य । उदकस्योदादेशः ।) घृतसमुद्रः । यथा,
"एवं सुरोदाद्बहिस्तद्द्विगुणः समानेन घृतोदेन यथा पूर्व्वः कुशद्वीपः ।" इति श्रीभागवते ।५।१३॥

घृष, उ संघर्षे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, घर्षित्वा घृष्ट्वा । घर्षति चन्दनं लोकः । इति दुर्गादासः ॥

घृष्टः, त्रि, (घृष्+कर्म्मणि क्तः ।) घर्षितः । घषा इति भाषा ॥ यथा । घृष्टो मलयजो गन्धः । इति शुद्धितत्त्वम् ॥ (यथाच काशीखण्डे ।१९।५६।
"घातुका घूर्णितजला घृष्टपातकसन्ततिः ॥")

घृष्टिः, स्त्री, (घृष्यतेऽसौ । घृष्+कर्म्मणि क्तिच् ।) वाराही । चामर आलु इति भाषा ॥ इत्यमरः । २ । ४ । १५१ ॥ (घृष्+भावे क्तिन् ।) घर्षणम् । स्पर्द्धा । अपराजिता । (घर्षतीति । घृष्+कर्त्तरि क्तिच् ।) शूकरे पु, । इति मेदिनी । टे । १३ ॥

घृष्टिला, स्त्री, (घृष्टिं घर्षणं लातीति । ला+कः ।) चित्रपर्णिका । पृश्निपर्णी । इति रत्नमाला ॥

घृष्विः, पु स्त्री, (घर्षति इति । घृष संघर्षे+"कृविघृष्विच्छवीति ।" उणां । ४ । ५६ । इति क्विन्प्रत्ययेन निपातनात् सिद्धः ।) शूकरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (भावे+क्विन् । घर्षणम् । यथा, ऋग्वेदे । १ । ३७ । ४ ।
"प्रव शर्द्धाय घृष्वये ।" "घृष्वये शत्रुघर्षणयुक्ताय ।" इति भाष्यम् ॥)

घेघुलिका, स्त्री, क्रौष्वादनम् । इति रत्नमाला ॥ घेँघु इति भाषा ॥ (यथा, वैद्यकरत्नमालायाम् ।
"क्रौष्वादनं घेघुलिका ॥")

घोटः, पु स्त्री, (घोटते परिवर्त्तते इति । घुट परिवर्त्तने+पचाद्यच् ।) घोटकः । इति राजनिर्घण्टः ॥

घोटकः, पु स्त्री, (घोटते गत्वा प्रत्यागच्छतीति । घुट परिवर्त्तने+ण्वुल् ।) पशुविशेषः । घोडा इति भाषा ॥ तत्पर्य्यायः । पीतिः २ तुरगः ३ तुरङ्गः ४ अश्वः ५ तुरङ्गमः ६ वाजी ७ वाहः ८ अर्व्वा ९ गन्धर्व्वः १० हयः ११ सैन्धवः १२ सप्तिः १३ । इत्यमरः । २ । ८ । ४४ ॥ घोटः १४ पीती १५ पीथिः १६ । इति भरतः ॥ तार्क्ष्यः १७ हरिः १८ वीती १९ । इति हेमचन्द्रः ॥ सुगभोजी २० धाराटः २१ जवनः २२ जितवः २३ जवी २४ वाहनश्रेष्ठः २५ श्रीभ्राता २६ अमृतसोदरः २७ । हुतभुक् २८ शालिहोत्रः २९ लक्ष्मीपुत्त्रः ३० प्रकीर्णकः ३१ । इति जटाधरः ॥ वातायनः ३२ श्रीपुत्त्रः ३३ चामरी ३४ हेषी ३५ शालिहोत्री ३६ मरुद्रथः ३७ वाजस्कन्धः ३८ हरिद्राक्तः ३९ एकशफः ४० किन्धी ४१ ललामम् ४२ विमानकः ४३ ॥ इति शब्दरत्नावली ॥ अत्यः ४४ वह्निः ४५ दधिक्रा ४६ दधिक्रावा ४७ एतग्वः ४८ एतशः ४९ पैद्वः ५० दौर्गहः ५१ उच्चैःश्रवसः ५२ आशुः ५३ ब्रध्नः ५४ अरुषः ५५ मांश्चत्वः ५६ अव्यथयः ५७ श्येनासः ५८ सुपर्णाः ५९ पतङ्गाः ६० नरः ६१ ह्वार्य्याणाम् ६२ हंसासः ६३ । इति वेदनिघण्टौ १ अध्यायः ॥ हरी इन्द्रस्य १ रोहितः अग्नेः २ हरितः आदित्यस्य ३ रासभौ अश्विनोः ४ अजाः पूष्णः ५ पृषत्यो मरुताम् ६ अरुण्यो गावः उषसाम् ७ श्यावाः सवितुः ८ विश्वरूपा बृहस्पतेः ९ नियुतो वायोः १० । इति दशादिष्टोपयोजनानि । इति च वेदनिघण्टौ १ अध्यायः ॥ अस्य मांसगुणाः । उष्णत्वम् । वातनाशित्वम् । लघुगुरुत्वम् । अतिसेवनात् पित्तदाहप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अग्निकफबलकारित्वम् । बृंहणत्वम् । चक्षुर्हितत्वम् । मधुरत्वञ्च । इति भावप्रकाशः ॥ * ॥

अथाश्वपरीक्षा ।

"सपक्षा वाजिनः पूर्व्वं संजाता व्योमचारिणः ।
गन्धर्व्वेभ्यो यथाकाम गच्छन्ति च समन्विताः ॥
इन्द्रादेशाच्छालिहोत्रस्तेषां पक्षमथाच्छिनत् ।
ततः प्रभृति निष्पक्षास्तुरङ्गा धरणीं गताः ॥
उत्तमा मध्यमा नीचाः कनीयासस्तथापरे ।
चतुर्द्धा वाजिनो भूमौ जायन्ते देशसंश्रयात् ॥
ताजिताः खुरशालाश्च तुषाराश्चोत्तमा हयाः ।
गोजिकाणाश्च केकाणाः प्रौढाहाराश्च मध्यमाः ॥
ताडजा उत्तमाशाश्च वाजशूलाश्च मध्यमाः ।
गत्वराः साध्यवासाश्च सिन्धुदाराः कनीयसः ॥
अन्यदेशोद्भवा ये च ते वै नीचाः प्रकीर्त्तिताः ।
वाजिनो जलजाः केचिद्वह्निजातास्तथापरे ॥
समीरप्रभवाश्चान्ये तुरगा मृगजाः परे ।
जलोद्भवा द्विजा ज्ञेयाः क्षत्त्रिया वह्निसम्भवाः ॥
प्रभञ्जनभवा वैश्या मृगजाः शूद्रजातयः ।
पुष्पगन्धिर्भवेद्विप्रः क्षत्त्रियोऽगुरुगन्धिकः ॥
घृतगन्धो भवेद्वैश्यो मीनामोदी च शूद्रकः ।
विवेकी सघृणो विप्रस्तेजस्वी क्षत्त्रियो बली ॥
क्रोधाभावो भवेद्वैश्यः शूद्रो निःसत्त्वको भवेत् ।
विप्राद्या वाहनाः सर्व्वे त्रयो भूमिपतेः सदा ॥
शूद्रजातिं तुरङ्गन्तु न स्पृशन्ति नरेश्वराः ॥"
इत्युत्पत्तिः ॥ * ॥

अथाङ्गुल्याङ्गविभाग ।

"सप्तविंशत्यङ्गुलिभिर्मुखमान विधीयते ।
कर्णौ षडङ्गुलौ प्रोक्तौ भालकं चतुरङ्गुलम् ॥
चत्वारिंशच्च सप्ताढ्या स्कन्धः संपरिकीर्त्तितः ।
पृष्ठवंशश्चतुर्व्विंशः सप्तविंशा तथा कटी ॥
इति स्पृष्टं तथा नित्नं प्रतिपुच्छं द्वयाधिकम् ।
लिङ्गं हस्तप्रमाणन्तु तथाण्डौ चतुरङ्गुलौ ॥
मध्यस्थानं चतुर्व्विंशं हृदयं षोडशात्मकम् ।
कटिकुक्ष्यन्तरं प्रोक्तं चत्वारिंशत् प्रमाणतः ॥
मणिबन्धद्वयश्चैव खुराश्च चतुरङ्गुलाः ।
अशीत्यङ्गुलिकाः पादा दीर्घा विंशाधिका मताः ॥"
इत्यङ्गुलिविभागः ॥ * ॥

अथ वयोविभागः ।

"दन्तेषु व्यञ्जन यद्वत्तेन ज्ञेयो वयःक्रमः ॥"
तद्यथा,—
"कालिका हरिणी शुक्ला काचा मक्षिकया सह ॥
शङ्खो मुषलकश्चैव दन्तानां चलता तथा ।
इत्यष्टौ व्यञ्जनान्याहुरश्वेषां लक्षण शृणु ॥
चतुर्भिर्वत्सरैर्दन्तास्चत्वारः परिकीर्त्तिताः ।
पञ्चभिश्च षड्त्येव जायन्ते त्वथ कालिकाः ॥
षष्ठे संवत्सरे प्राप्ते कालिकान्या भवेत्तु हि ।
तथान्या सप्तमे वर्षे चतुर्थी कालिका भवेत् ॥
अष्टमे वत्सरे प्राप्ते जायन्ते सर्व्वकालिकाः ।

नवमे त्वथ ताः सर्व्वा आपीताः सम्भवन्ति च ॥
केचिदेकादशे वर्षे तावत् पीततलमागताः ।
ततः श्वेताः प्रजायन्ते चतुर्द्दशसमावधि ॥
ततः काचप्रभाः सम्यक् यावत् सवत्सराष्टकः ।
ततः सप्तदशाद्दूर्द्ध्वं यावद्वर्षाणि विंशतिः ॥
मक्षिकाभा वदन्त्येषां यावद्वर्षत्रय पुन ।
शङ्खाभासाः सर्व्वदन्ता भवन्ति वाजिनां ततः ॥
त्रयोविंशात् परे वर्षे दशना सुचला मताः ।
षड्विंशात् परतो दन्ताः स्थानाच्चलनमाप्नुयुः ॥
यावद्वर्षत्रयं पश्चान्निपतन्ति समान्तये ।
द्वात्रिंशद्वत्सरे वाजी नून निर्व्वाणमाप्नुयात् ॥"

अथ शुभलक्षणानि ।

"दीर्घा शुष्का विशालाक्षा ये भवन्ति तुरङ्गमाः ।
ते शस्ताः पार्थिवेन्द्रस्य यानवाहनकर्म्मणि ॥

आस्य सृक्वौ चापि सृकाटिका च
दीर्घं चतुष्कं तुरगस्य शस्तम् ।
तथोन्नते घ्राणपुटे ललाटे
कफश्च वाजिप्रवरस्य बोध्य. "

श्रोत्रे च मणिबन्धश्च पुच्छ कोष्ठं लघूत्तमम् ।
पीताङ्गः श्वेतपादो यो यस्य स्यात् सितलोचन ॥
चक्रवाकःस विज्ञेयो राजार्ह प्रियसत्तम ।
मुखे चन्द्रकसम्बीतः पक्वजम्बूफलाकृति. ॥
श्वेतपाद. स विज्ञेयो मल्लिकाख्यः सुपूजितः ।
सर्व्वश्वेतो हयो यस्तु श्यामैकश्रवणो भवेत् ।
स वाजी वाजिमेधार्हः श्यामकर्णः सुदुर्लभ. ॥
यस्य पादाः सिता. सर्व्वे पुच्छो मुष्को मुख तथा ।
मङ्गलास्तु सिता यस्य तमिन्द्राद्दमङ्गलम् ॥
यस्य पादा. सिताः सर्व्वे चन्द्रकश्च ललाटके ।
कल्याणपञ्चकः प्रक्तो भर्त्तु कल्याणकारकः ॥
विमिश्रवर्णकाः सर्व्वे प्रशस्ता वाजिनो मता. ।
यस्योत्कृष्टतरा वर्णा वृद्धिं यान्ति शनै. शनै. ॥
नाशयन्ति तथा नीचान् करोति स बहून् हयान् ॥"

अथावर्त्तगुणाः ।

"रोम्णां भ्रमिवदावृत्तिरावर्त्त इति गद्यते ।
षड्विधो दक्षिणो वामो दक्षिणस्तु शुभावहः ॥
नासिकाग्रे ललाटाग्रे शङ्खे कण्ठे च मस्तके ।
आवर्त्तो जायते येषां ते धन्यास्तु तुरङ्गमाः ॥
ललाटे यस्य चावर्त्तो द्वितीयस्तु कुकुन्दरे ।
मस्तके च तृतीयस्तु स विज्ञेयो हयोत्तमः ॥
गलावर्त्तो भवेद् यस्य वाजिनो दक्षिणाश्रय ॥
स करोति महार्थौख्य स्वामिनः शिवसञ्चितः ।
कर्णमूले यदावर्त्त. स्तनमध्ये तथापर ।
विजयाख्यावुभौ तौ तु युद्धकाले जयप्रदौ ॥
स्कन्धपार्श्वे यदावर्त्त स भवेत् सुखकारक ।
नासामध्ये यदावर्त्त एको वा यदि वा त्रय ॥
चक्रवर्त्ती स विज्ञेयो वाजी भूपालभूषित. ।
कण्ठे यस्य महावर्त्तः प्रोक्तश्चिन्तामणिः शुभः ॥
रोम्णां वृश्चिकवत् स्थान शुक्तिरित्यभिधीयते ।
यत्रावर्त्तः शुभस्तत्र शुक्तिस्तत्र शुभावहा ॥" ॥

अथ दोषाः ।

"चत्वारोऽप्यसिताः पादा. सव्वश्वेतस्य वाजिन. ।
भवन्ति यस्य स त्याज्यो यमदूतः सुदूरतः ॥
चत्वारो यस्य वै पादा. परस्परविवर्णकाः ।
स त्याज्यो मुषली नाम्ना मुनिभिः कुलनाशनः ॥
दुर्ब्बर्णवाजिन जङ्घा यदीक्षेत् शाश्वतीं श्रियम् ।
यस्तु वर्णविभेदेन जायते रोमसम्भवात् ॥
पुण्याख्य. स परित्याज्यः सर्व्ववाजिभयावहः ।
यस्यावशेषवर्णेन छाद्यते च प्रधानत ॥
विटहि गच्छत. सोऽश्वः कुरुते क्षयसंचयम् ।
इति स्कन्धे गले चैव कटिदेशे तथैव च ॥
नाभौ कुक्षौ च पार्श्वाग्रे मध्यमः स प्रकीर्त्तित. ।
एको वामकपोलस्थो यस्यावर्त्तः प्रदृश्यते ॥
सर्व्वशो स हयस्त्याज्य कुरुते स्वामिनाशनम् ।
वामगण्डाश्रयावर्त्त. प्रकरोति धनक्षयम् ॥
कचान्ते यस्य चावर्त्तः स मृत्यु कुरुते विभोः ।
क्षिप्रं जानुगतावर्त्तः प्रवासं कुरुतेऽथवा ॥
वाजी मेढ्रगतावर्त्तो वर्ज्जनीयो महीभुजा ।
त्रिवलिप्रभवावर्त्तस्त्रिवर्गस्य प्रणाशकः ॥
पृष्ठवंशे यदावर्त्त एकः सपरिलक्ष्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपै. ॥
गुह्ये पुच्छे वलौ यस्य भवन्त्यावर्त्तकास्त्रयः ।
स कृतान्तस्तु रूपेण वर्ज्जनीयस्तुरङ्गम ॥
अधोऽथ यदा वाजी सम्पुट न स्पृशेत् क्वचित् ।
यमदूत स विज्ञेयो वर्ज्जनीयस्तुरङ्गमः ।
हीनदन्तोऽधिकश्चैव करालो कृष्णतालुकः ।
मुषली च तथा शृङ्गी षडेते घातकाः स्मृताः ॥
तन्नाद्यौ विदितार्थौ तु शेषाणां लक्षणं शृणु ।
त्रयः पादाः सिता यस्य कृष्ण एकोऽभिजायते ॥
त्रयो वाप्यसिता यस्य एकः शुक्लोऽभिजायते ।
मुषली नाम पापोऽयं दूरे त्याज्यो हयाधमः ॥
विकटो विषमो यस्य दशनः स करालक. ।
कराली कुरुते नाशं भर्त्तुरत्र न सशयः ॥
कृष्णतालुर्हयो नाशं कुरुते नात्र संशय. ।
विपदन्तो भवेद्यस्तु कृष्णतालुर्न दुष्यते ॥
कर्णान्ते चूलिकान्ते च शृङ्गवद्दृश्यते यदि ।
स शृङ्गी कुरुते नाशं राष्ट्रस्य च कुलस्य च ॥
एकाण्डोऽजातकाण्डश्च हीनाण्डोऽप्यधिकाण्डकः ।
घटी च कम्बली चैव षडेते पापकृत्तमाः ॥" ॥

अथारिष्टम् ।

"मुखस्यापि च नेत्रान्ते स्यातां नीले च वाजिनः ।
तथैव तस्य जानीयाद्भवेन्मृत्युर्द्विवार्षिकी ॥
नीलपीते च नेत्रान्ते त्रिभिमासैर्वपु क्षय ।
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ॥
विशेषाद्वाजिनो ज्ञेय तस्यायु पञ्चमासिकम् ।
जिह्वाया जायते विन्दुरकस्माद्यदि वाजिनः ॥
मासैक जीवित तत्र पीते मासद्वयन्तथा ।
रक्ते मृत्युस्त्रिभिमासैश्चतुर्भिश्च विचित्रके ॥
पञ्चभिर्नीलवर्णे च षड्भिर्भूसमाकृतौ ।
सप्तभि. पाटलाकारे चणकाभे तथाष्टभिः ॥
नवभिश्च हरिद्राभे दशभिर्नैतुकोपमे ।
एकादशे सुवर्णाभे वत्सरेण हिमद्युतौ ॥
यस्य श्वासो भवेदुष्ण. शरीर पुलकाञ्चितम् ।
जिह्वा हि मलिनाकारा मासषट्कं स जीवति ॥
जिह्वायां पिड़का यस्य पादान्ते च तथोदरे ।
मूत्रं करोति रक्तम्वा मासषट्कं स जीवति ॥
कर्णयोः क्षतज यस्य नेत्राभ्यां वा प्रवर्त्तते ।
वाजिनः पित्तग्रस्तस्य दशमासान् स जीवति ।
यस्य नेत्रे हरिद्राभे यस्य वातादितस्य च ।
तस्यायुः सप्तमासीयं बहुवर्षं तथा दिने ॥
यस्यैक लोचन हीन द्वितीयं रक्तसन्निभम् ।
पुटान्ते च स विज्ञेयः पीताभे मासजीवकः ॥"
एतानि अरिष्टानि रक्तदोषजानि ।

"स्फुलिङ्गा यस्य दृश्यन्ते पुच्छतोऽश्वस्य वह्निजाः
निर्गच्छन्तः प्रभोर्नाशं ते वदन्ति निशागमे ॥
अश्वशाला समासाद्य यदा च मधुमक्षिका. ।
मधुजाल प्रबध्नन्ति तदाश्वान् घ्नन्ति छत्रभृत ॥"

अथ हयक्रियाकालः ।

"श्रवणगुरुपार्श्वास्विषु भौमार्कवारे
क्षितिधिकरणतारावन्द्रयोगोदयेषु ।
शुभमिह हयकार्य्यं कार्यमार्थेण बुद्धा
न शनिरविकुजानां वासरे नोग्रतारे ॥"

इति कालः ॥ ॥

अथ हयारोहणज्ञानम् ।

"चलकिशलयपादः कर्णमध्यैकदृष्टि-
र्नचलति कटिदेशः श्वासने सुस्थितो यः ।
हृदयगतिज्ञः स्थानदण्डावपात
स खलु तुरगयाता पूज्यते पार्थिवेन्द्रे ॥
मेरुः स्थिरो यस्य चलौ च पादौ
त्रिकोन्नत संहतमासनञ्च ।
स वाजिवाह. प्रथित. पृथिव्यां
शेषा नरा भारकरा हयानाम् ॥ ॥

तत्र ताड़नविधिः ।

"रक्तकोष्ठे मुखे चौष्ठे गले पुच्छे च ताड़येत् ।
भीते वक्षःस्थल हन्याद्वक्ष्ये चोन्मार्गगामिन. ॥
कुपिते पुच्छसस्थान भ्रान्ते जानुद्वय तथा ।
सर्व्वस्थानप्रदण्डस्य दण्डमेक निपातयेत् ॥
व्यस्थानदण्डपाताच्च बहुदोष प्रजायते ।
तस्मान्निरीक्ष्य कर्त्तव्य हये दण्डनिपातनम् ॥" ॥

अथ धावनविधिः ।

"हस्तैश्चतुर्व्विंशतिभिर्द्दण्डैर्धनुरुदाहृतः ।
अक्ष्णोर्निमेषणान्यष्टौ मात्रा प्रोक्ता विचक्षणैः ॥
मात्रायोडशकेनाश्वो यो धावति धनुःशतम् ।
तमुत्तमोत्तम विद्याद्वायुवेगं महाजवम् ॥
विंशत्या मध्यमो ज्ञेयो त्रिंशतोऽन्ये चाधमा मताः ।
नभस्याश्वयुजे मासि नैवाश्वान् वाहयेन्नृपः ॥
वर्षासिसद्दश पित्त अमात् कुप्यति वाजिनाम् ।
कार्त्तिके महता वापि योज्यो मासि तु कार्त्तिके ॥
हेमन्ते शिशिरे योगो वसन्ते च यदृच्छया ।
बाल वृद्ध कृश रुग्ण दत्तस्नेहं तृडर्द्दितम् ॥
पूर्णातिरिक्तकोष्ठञ्च गुर्व्विणीञ्च न वाहयेत् ॥" ॥

अथ रक्तमोक्षणविधिः ।

"द्वासप्ततिसहस्राणि नाड़ीनां सम्भवन्ति हि ।
वाजिनामिह सर्व्वेषामासु रक्त व्यवस्थितम् ॥
तासां निर्मोक्षणार्थाय द्वाराण्यष्टौ वदाम्यहम् ।
येर्याति कृतदिव्यं रक्तं सर्व्वदेहसमुद्भवम् ॥
कण्ठे कक्षे लोचनयोरसयोश्च मुखे तथा ।

अक्ष्णोरथ पादेषु पार्श्वयोरुभयोरपि ॥
एतद्बलं सुविज्ञेयं वाजिनां भिषगुत्तमैः ।
अन्ये सप्तदशान्याहुः सिराद्वाराणि वाजिनः ॥
येषु रक्तं हृतं सद्यः प्रकरोति ततः सुखम् ।
गुल्फे गले तथा मेढ्रे कचान्ते चैव मस्तके ।
गुदे पुच्छेऽथ वस्तौ च जह्न्वोः सर्व्वसन्धिषु ।
जिह्वायां चाधरे चौष्ठे नेत्रयोरुभयोरपि ॥
कर्णमूले मणौ गण्डे रुधिरं स्रावयेद्भिषक् ।
सौश्रुतमानपलेन त्याज्यं रक्तं तुरङ्गप्रमाणम् ॥”
तद्यथा,—
“पलं शतं सुखे त्याज्यं कचयोश्चैकमेव च ।
शतार्द्धं नेत्रदेशाच्च मेढ्रदेशात्तथैव च ॥
गण्डयोरक्ष्णयोश्चैव स्रावयेत् पञ्चविंशतिम् ।
द्वादशैव गुदे प्राहुरश्वशास्त्रविचक्षणाः ॥
पैत्तिक कालिकं विद्याद्वाते विद्यात् सफेनिलम् ।
पिच्छिलं श्लेष्मलं पाण्डु कषायोदकवच्च यत् ॥”*

अथ ऋतुचर्य्या ।

“न प्राज्ञो वाहयेदश्वान् प्रावृट्काले कथञ्चन ।
यदीच्छेदस्तन्तस्य वाहनं दशमासिकम् ॥
कूपोदकं कटुकतैलनिवातगेहं
शस्तं पलार्द्धलवणं दिवसान्तरेण ।
तत्रान्यथा सति सुखामयवीर्य्यहानि-
र्मुख्यैर्बलैर्व्विरहितस्तु वयो विनश्येत् ॥
शरदि गुडघृतं पय. प्रशस्तं
शरदि सिताष्टपलप्रमाणमच्छम् ।
मधुरमथ जलं सरोवरोत्थ
घृतयुतनीलमुकुष्ठकाश्च भोज्याः ॥
हेमन्तकाले घृततैलमाषा
निर्व्वातसंस्था च पयो यथेच्छम् ।
शनैः शनैर्वाहनकर्म्म कुर्य्याद्-
यवांश्च पक्का वितरेद् विधिज्ञः ॥
शिशिरे तैलपलाष्टकं कटिस्थ
दिनसप्तावधि पाययेत्तुरङ्गान् ।
तदनु प्रातर्भोजयेद्यवांश्च
यवयवसाश्च तथाम्लतस्वरूपाः ॥
यस्य दत्ता यवा भोज्ये शिशिरे समुपस्थिते ।
अकृत्वापि क्रियाः सर्व्वा. स हयः सुखमृच्छति ॥
वसन्ते संप्राप्ते निजसुखवशाद्वाहय हयान्
घृत तैलं शस्तं सकलविधिरुक्तोऽपि च मतः ।
पयो दद्यादस्मै सलवणमथो वाहनविधि-
र्भृशं योज्यस्तेनाव्दमपि सुखमिच्छेद्धयवरः ॥
वसन्तसमये योऽश्व. स्थाने तिष्ठति बन्धने ।
तस्योत्साहः प्रणश्येत सालस्यं जायते वपुः ॥
ग्रीष्मे घृतं चतजमोक्षणधर्म्मशान्ति-
सुच्छायबन्धनविमर्द्दनशीततोयम् ।
दूर्व्वा तृणं लघु च कोमलमन्यदेव
यत्किञ्चिदेवसुपयुक्तमिदं वदन्ति ॥”* ॥
भोजे तु हयलक्षणमन्यथा,—
स्निग्धाङ्गो लघुतरलोमकस्तु पुच्छो
दीर्घास्याक्षिनयनकेशपृष्ठवंशः ।
रक्तोष्ठः पृथुलनितम्बभारवक्षा
राजार्हो भवति तुरङ्गमः प्रशस्तः ॥

नाभेरारभ्य देहस्तु द्विधा पूर्व्वापरक्रमात् ।
पूर्व्वकायस्थिता रक्ताः शुभाय हयसंस्थिताः ॥
अधःकाये स्थिता रक्ता अधमत्वप्रकाशकाः ।
शुक्तीनां वैपरीत्येन प्रशस्तफलमादिशेत् ॥”* ॥
वातस्यस्तु ।
“ब्रह्मादिजातिभेदेन हयजातिश्चतुर्व्विधा ।”
तद्यथा,—
“ये शुक्ला: सुविमलपुष्पगन्धा ये वा
शुद्धाङ्गाः सघृणसदुग्धभोजिनो वा ।
अक्रुद्धाः समरगता भृशञ्च पुष्टा-
स्ते विप्राः क्षितिपतिवाहनेऽतियोग्याः ॥
ये रक्ताः सदगुरुगन्धयोऽहता वा
संरुष्टाः बहुतरभोजिनो बलाढ्याः ।
अश्रान्ताः सकलगुणग्रहाः प्रवीणा
विज्ञेया विधिकरणातजातयस्ते ॥
ये पीताः खलु घृतगन्धयोऽपि ये वा
येऽक्रुद्धाः कथमपि रोषशालिनो ये ।
बद्धा वा बहुतरनादघोषणा वा
विज्ञेया नृपवर । वैश्यजातयस्ते ॥
ये कृष्णाः सरुषामगन्धयोऽपि ये वा
अन्यथा बहुतरताडनैरपीमे ।
क्षीणाङ्गा लघुतनवोऽपि वेगहीना-
स्ते शूद्राः क्षितिपतिना भृशं विहेयाः ॥”
एतत्तु एकैकमेव लक्षणं न सामुदायिकम् ॥
“लक्षणद्वयसम्बन्धात् द्विजातिः स्यात्तुरङ्गमः ।
चतुर्लक्षणयुक्तस्तु दूरे त्याज्यो हयाधमः ॥”* ॥
अन्यत्र तु ।
“सात्त्विका राजसाश्चेति तामसाश्चेति ते
हयाः ॥
ये शुद्धवर्णा भृशवेगयुक्ता
अश्रान्तिभाजो बहुभोगिनश्च ।
अक्रोधशीलाः समरेऽतिरुष्टा-
स्ते सात्त्विका भूप । तुरङ्गमा. स्युः ॥
ये रक्तवर्णा गुरुवेगरोषाः
कषाभिघातं न हि ये सहन्ते ।
येऽमी बलाढ्याः खलु दीर्घदेहा-
स्ते राजसा भूप । तुरङ्गमाः स्युः ॥
ये कृष्णवर्णास्तनुरोषवेगा
अल्पाशिनो लक्षणलक्षिताश्च ।
ये दुर्व्वलाः सर्व्वगुणैर्विहीना-
स्ते तामसा भूप ! तुरङ्गमाधमाः ॥
द्वयोर्लक्षणसम्बन्धात् द्विगुणो वाजिमध्यमः ।
त्रयाणां गुणसम्बन्धात् त्रिगुणो वाजिनिन्दितः॥”
पराशरसंहितायान्तु ।
“पृथिव्यप्वायुतेजःखैः पञ्चभिस्तुरगाश्रितैः ।
उल्वणैः पञ्चधा भेदाः परशरमता यथा ॥
ये स्थूला' श्रमसहदेहरूपभाज-
श्चाक्रान्ता बहुतरभोजनाश्च दीर्घाः ।
अक्रुद्धाः समरगतास्तु रोषभाजो
भौमास्ते घनगुरुघर्घरस्वरास्तु ॥
ये श्यथाङ्गास्तनुबलाः श्रमासहकलेवराः ।
अक्रोधवेगाः सखशा आप्यास्ते तुरगाधमाः ॥
ये वातवेगप्रतिमोग्रवेगाः
शुष्का भृशं दीर्घकलेवराश्च ।
अश्रान्तिभाजो बहुदूरगाश्च
ते वायवा वाजिवरा. प्रदिष्टाः ॥
ये क्रोधशीला भृशवेगयुक्ता
मुक्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसाः पुण्यवता प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥
एको यदा तैजससंज्ञकोऽश्वः
किं कार्य्यमन्यैस्तुरगाधमैस्तु ।
शुद्धं यदा हीरकखण्डमेकं
किं कार्य्यमन्यैर्मणिभिर्विचित्रैः ॥
उत्प्लुत्य ये वाजिवरा व्रजन्ति
क्षुधा भृशं वेगसमन्विताश्च ।
ये लङ्घयन्तः परिखामपारां
ते गागना पुण्यतमाः प्रदिष्टाः ॥
द्वयोर्लक्षणसम्बन्धात्तुरगः स्यात् द्विभौतिकः ।
स्वजातिगुणभूतानां हयानां वाहनं शुभम् ॥
शालिहोत्रादिविज्ञानात्तद्विज्ञेयं यथोत्तरम् ।
असम्भवे हि दुष्टाश्वं वाहयेदिति चेत्तदा ॥
तिलं सकाञ्चन दद्याल्लवणं वा गुडान्वितम् ।
रेवन्तं पूजयेद्वापि निजं निर्मन्थयेत्तदा ॥
दद्यात्ताम्रपलं वापि अभावे सर्व्वकर्म्मणि' ॥”
एवमन्यत्रापि ।
“काञ्चनं रजतं ताम्रं लौहमेतद्यथाक्रमम् ।
ब्रह्मादिजातिदोषाणां देयमेतत् प्रशान्तये ॥
अभावेऽपि च सर्व्वेषां ताम्रेण स्यात् प्रति-
क्रिया ।”

इति हयपरीक्षा ॥ * ॥

इति भोजराजकृतयुक्तिकल्पतरुः ॥

(“येन ज्ञानवता हिमालयतरुच्छायासु
विक्रीडितम्
यः स्नातो हिमपुष्पवातशिशिरे गङ्गाजले पावने ।
रेमे यस्तु तुरङ्गयूथजनितैर्नानाविधैर्हेषितै'
पायाद्वः स तुरङ्गघोषतनयः श्रीशालिहोत्रो
मुनिः ॥
जयति च पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो
नृपति' ।
भीमार्ज्जुनसहदेवास्तदनु च ये वाजिशास्त्रतत्त्वज्ञाः॥
दृष्ट्वा सम्यङ्नकुल. शास्त्रं कृत्स्नं च शालि-
होत्रीयम् ।
ब्रूते शास्त्रार्थमन्यच्छास्त्र कृत्वा समासेन ॥
प्रश्नो जातिवर्णमावर्त्तदन्ता
लक्ष्मं वेगा वाहनं धातुरसम् ।
कालो नस्यं पिण्डमान्य कषायं
शालां चेष्टा वाजिनामत्र वक्ष्ये ॥
सपक्षा वाजिनः सर्व्वे सञ्जाता व्योमचारिणः ।
गन्धर्व्वेभ्यो यथाकाम गच्छन्ति च समन्ततः ॥
तान् दृष्ट्वा त्रवसम्पन्नानसद्यान्वाहनोचितान् ।
शक्रः प्रोवाच पार्श्वस्थं शालिहोत्रं मुनीश्वरम् ॥
नास्त्यसाध्य मुने । किञ्चिद्भवतो भुवनत्रये ।
तस्मादाशु कुरुष्व त्वं वाहनार्हान् हयोत्तमान् ॥

ये च मे युद्धकार्य्येषु प्रवहन्ति रथं सदा ।
अशक्यं वारणेन्द्रैश्च दानवैर्बलवत्तरैः ॥
ईषिकाखं समुत्सृज्य पक्षच्छेदं यथासदा ।
वाजिना शक्रवाक्येन शालिहोत्रो महामुनिः ॥
छिन्नपक्षास्तु ते सर्व्वे गत्वा तमृषिमब्रुवन् ।
दीनाः सुदुःखसम्पन्ना रुधिरेण परिप्लुताः ॥
भगवन् ! किं निमित्तं नः पक्षच्छेदः कृतस्त्वया ।
अपराधविहीनानां नेदृगिच्छन्ति पण्डिताः ॥
तस्माद्गतिर्भव प्राज्ञ । सर्व्वेषामिह वाजिनाम् ।
यथा स्यात् सर्व्वदा सौख्यं पुष्टिश्च मुनिपुङ्गव ॥
अथासौ कृपयाविष्टस्तानुवाच सुदुःखितान् ।
इन्द्रादेशात् कृतं सर्व्वं भवतां पक्षपातनम् ॥
तस्मादहं प्रकरिष्यामि भविष्यति यथासुखम् ।
पुष्टौरम्या यथा देहे गौरवञ्च जगत्त्रये ॥
यूयं शक्रादिदेवानां वाहनत्वं करिष्यथ ।
तथा भूमिपौतनाञ्च गौरवेण समन्विताः ॥
यो राजा भवतां पुष्टिं स्वन्नपानादिभिः सदा ।
करिष्यति न सन्देहो भविष्यति स दुर्ज्जयः ॥
न च त्यक्ष्यति तं लक्ष्मीः कदाचिज्जयलक्षणा ।
अपि सर्व्वैर्गुणैर्हीनं बहुशत्रुभिरावृतम् ॥
तथा चैव विधास्यामि परमञ्च चिकित्सितम् ।
पुष्टेश्च रोगनाशार्थं नराणां विहितं यथा ॥
तस्मात्स्वच्छतं भूलोके पातालञ्च तथापरे ।
स्वर्गे चान्ये मदादेशाद्येन शान्तिर्भवेद् ध्रुवम् ॥
एवं विसृज्य तान् सर्व्वान् शालिहोत्रस्तुरङ्गमान् ।
चक्रे द्वादशसाहस्रीं तदर्थे संहितां सुधीः ॥
तत प्रभृति लोकेऽस्मिन् वाहा जातास्तुरङ्गमाः ।
तस्मश्चिकित्सितं तेषां शालिहोत्रप्रभाषितम् ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते प्रश्नो नाम प्रथमोऽध्यायः ॥

अथ जातिः ।

"उत्तमा मध्यमा नीचा कनीयांसस्तथापरे ।
चतुर्द्धा वाजिनो ऽश्वा जायन्ते देशभेदतः ॥
न जिकाः खुरशालाश्च उत्तराश्चोत्तमा हयाः ।
गोजिकाणाश्च केकाणाः प्रौढाहाराश्च मध्यमाः ॥
भाद्रदेशोत्तमाश्चापि राजशूलाश्च मध्यमाः ।
गौहराः पावराश्चैव सिन्धुपाराः कनीयसः ॥
अन्यदेशोद्भवा ये च नीचनीचाश्च ते स्मृताः ।
वर्णभेदे जायन्ते कोचिद्द्विजातयस्तथापरे ॥
गम्भीरप्रभवाश्चान्ये उत्तमाश्चापरास्तथा ।
जलोद्भवा द्विजातीयाः क्षत्त्रिया वह्निसम्भवाः ॥
समीरप्रभवा वैश्या गगनोत्थाश्च शूद्रकाः ।
वर्णैः सदृशो विप्रस्तेजस्वी क्षत्त्रियो बली ॥
दृष्टभावस्तथा वैश्यः शूद्रो निर्बलकातरः ।
ब्राह्मणः सामवादी च भेदवादी च क्षत्त्रियः ॥
उपप्रदानेन वैश्यः स्यात् शूद्रो दण्डेन ताडितः ।
पुष्पगन्धः सदा विप्रः क्षत्त्रियोऽगुरुगन्धकः ॥
घृतगन्धः सदा वैश्यो मीनगन्धो च शूद्रकः ।
विप्रार्हा वाजिनः सर्व्वे क्षत्त्रियो भूपतेः सदा ॥
वैश्यस्यापि शूद्रस्य शूद्र एव सुखावहः ।
कथिदिच्छन्ति भूपानां सर्व्वेऽश्वा वाहनोचिताः ॥
तदर्थं भूपते यस्माच्छालिहोत्रेण निर्म्मिताः ।

ब्राह्मणाः क्षेमकार्य्येषु सिद्धिं गच्छन्ति वाजिनः ॥
क्षत्त्रिया युद्धकार्य्येषु वैश्या वित्तार्ज्जने सदा ।
शूद्रास्त्वन्येषु कार्य्येषु भाव्येवं वाजिनः सदा ॥
आरोहेत् सर्व्वकार्य्येषु यदीच्छेच्छाश्वतीं श्रियम् ।
सदा शुभा भवन्त्येते वाजिनो यस्य भूतले ॥
यद्येव निद्रावशगा निद्राच्छेदस्य सम्भवः ।
जायते सङ्करे प्राप्ते कर्करस्य च भक्षणे ॥
प्रबुद्धाः कथयन्त्यश्वाः शुभं वा यदि वाशुभम् ।
स्वस्वामिनो निमेषेश्च ह्रेषितैर्हितैरिय विचक्षणे ॥
यः समृद्धो हयो रावमूर्द्ध्वमूर्द्ध्वं करोति च ।
खुराग्रेण लिखन् भूमिं स शंसति रणे जयम् ॥
यः करोत्यसकृन्मूत्रं पुरीषञ्चाश्रुमोक्षणम् ।
स शंसति पराभूतिं यस्यैव वर्त्तते हयः ॥
निरामिषं निशीथे यो जागर्त्ति नृपतेर्हयः ।
स शंसति द्रुतं तस्य स्थिरस्यापि प्रयाणकम् ॥
यदा व्याधिं विना वाजी ग्रासमन्यं जहाति दुर्म्मनाः ।
अश्रुपातञ्च कुरुते सदा भर्त्तुरशोभनम् ॥
पुलकाङ्कितपुच्छा ये जायन्ते भूपतेर्हयाः ।
निरीक्षन्तः प्रभोर्नाशं ते वदन्ति निशागमे ॥
शरद् रक्षयेद्यस्मात् प्रविशन्ते हयालये ।
यदीच्छेच्छाश्वतीं वृद्धिं तेषाञ्चैव तथात्मनः ॥
स्फुलिङ्गा यस्य दृश्यन्ते पुच्छदेशे च वह्निजाः ।
परचक्रागमाशंसी विज्ञेयो हयपण्डितैः ॥
अश्वशालां समासाद्य यदान्तर्म्मधुमक्षिकाः ।
मधुजालं प्रकुर्व्वन्ति तदाश्वान् घ्नन्ति कृतस्वराः ॥
तस्मात् सर्व्वप्रयत्नेन वाजिशालां प्ररक्षयेत् ।
उपायेभ्यश्च सर्व्वेभ्यो य इच्छेद्भूतिमात्मनः ॥
ब्राह्मणान्वाचयेत् स्वस्ति नित्यं वेदविचक्षणान् ।
तिलहोमस्तथा कार्य्यो जपश्च शतरुद्रियः ॥
मन्दुरान्ते सदा धार्य्यो रक्तवक्त्रो महाकपिः ।
सर्व्वपापविनाशाय वाजिनाञ्च विवृद्धये ॥
सर्पान् रक्षयेद्यस्मात् प्रविशन्तीं हयालये ।
यदीच्छेच्छाश्वतीं वृद्धिं तेषाञ्चैव तथात्मनः ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते जात्यधिकारे द्वितीयोऽध्यायः ॥

अथ वर्णवर्णनम् ।

"दशाः सप्त भवन्तीह सर्व्वेषां वाजिनां ध्रुवम् ।
तांश्च कीर्त्तयिष्यामि भेदैर्जाताननेकधा ॥
श्वेतो रक्तस्तथा पीतः सारङ्गः पिङ्ग एव च ।
नीलः कृष्णोऽथ सर्व्वेषां श्वेतः श्रेष्ठतमः स्मृतः ॥
पट्टार्हो भूपतेर्वाजी सर्व्वश्वेतः प्रशस्यते ।
तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण च ॥
श्वेतः प्रालेयसङ्काशो रक्तः कुङ्कुमसन्निभः ।
हरिद्रासदृशः पीतः सारङ्गः कर्व्वुरः स्मृतः ॥
पिङ्गः कपिलकाकारो नीलो दूर्व्वासमप्रभः ।
कृष्णो जम्बूफलाकारः शास्त्रज्ञैः समुदाहृतः ॥
पीताभः श्वेतपादो यस्तथा स्यात् सितलोचनः ।
चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥
सर्व्वश्वेतो हयो यस्तु भवेन्मेचककण्ठकः ।
स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तितः ॥
मुखे चन्द्रकसंयातो जम्बूफलसमाकृतिः ।
श्वेतपादः स विज्ञेयो मल्लिकाख्यः स पूजितः ॥

चत्वारोऽप्यसिताः पादाः सर्व्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतः सुदूरतः ॥
यस्य पादाः सिताः सर्व्वे पुच्छं वक्त्रो मुखं तथा ।
मूर्द्धजाश्च सिता यस्य तं विद्यादष्टमङ्गलम् ॥
भस्माभं वाजिनं यत्नात् सुदूरेण नराधिपः ।
यदि वाञ्छति कल्याणं वाञ्छेच्च श्रीसमृद्धवम् ॥
यस्य रोमविभेदेन जायन्ते रोमविन्दवः ।
पुष्पाख्यः स परित्याज्यः सर्व्ववाजिभयावहः ॥
यस्य पादाः सिताः सर्व्वे तथा वक्षश्च मध्यतः ।
कल्याणपञ्चकः प्रोक्तः सर्व्वकल्याणकृच्च सः ॥
विमिश्रवर्णकाः सर्व्वे प्रशस्ता वाजिनः स्मृताः ।
कृष्णनीलस्य मिश्रत्वमेकं मुक्त्वा सुदूरतः ॥
यस्योत्कृष्टतरो वर्णो वृद्धिं याति शनैः शनैः ।
नाशयति तथा नीचान् स करोति बहून् हयान् ॥
यस्याधमेन वर्णेन छाद्यते च प्रधानकः ।
विवृद्धिं गच्छता सोऽथ करोति हयसंक्षयम् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वर्णो नाम तृतीयोऽध्यायः ॥

अथ आवर्त्ताः ।

"आवर्त्ता विंशतिः प्रोक्ताः शालिहोत्रमहात्मना ।
गात्रस्थानविभागेन तेषां व्यक्तिर्म्मयोच्यते ॥
ललाटे मस्तके चैव ग्रीवायां हृदये तथा ।
पादे पृष्ठे मणीबन्धे नाभिदेशे विशेषतः ॥
स्कन्धे पार्श्वे गले वक्त्रे कुक्षौ रन्ध्रे त्रिके तथा ।
आद्याद्वयोर्दशावर्त्ता विज्ञेया वाजिपण्डितैः ॥
नासिकायां ललाटाग्रे शङ्खे कण्ठे च मस्तके ।
आवर्त्तो जायते येषां ते धन्यास्तुरगोत्तमाः ॥
हृदि स्कन्धे गले चैव कटिदेशे तथैव च ।
नाभौ कुक्षौ च पार्श्वाङ्के मध्यमास्ते प्रकीर्त्तिताः ॥
ललाटे यस्य चावर्त्तो द्वितीयस्य स लिङ्गकः ।
मस्तके च तृतीयश्च पूर्णकुक्षिः स उत्तमः ॥
पृष्ठवंशे तथावर्त्तो यस्यैकः सम्प्रजायते ।
स करोत्यश्वसङ्घातान् स्वामिनः सूर्य्यसञ्ज्ञकः ॥
कक्षायां जानुमेढ्रे च त्रिवलौ पुच्छसन्निधौ ।
पुच्छे गुह्ये बलावस्थावावर्त्ता अधमा हये ॥
त्रयो यस्य ललाटस्था आवर्त्ता अपरोत्तराः ।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः ॥
एवमेव प्रकारेण त्रयो ग्रीवां समाश्रिताः ।
त्रयावर्त्तः स वाजीशो जायते भूपमन्दिरे ॥
ललाटे युगलावर्त्तौ चन्द्रार्कौ सम्प्रकीर्त्तितौ ।
वाजिनो यदि तौ स्यातां राष्ट्रवृद्धिकरौ परौ ॥
उपर्य्युपरि यस्य स्युरावर्त्ता अलिके त्रयः ।
निःश्रेणिः स तु विज्ञेयो राष्ट्रवृद्धिकरः परः ॥
एकोऽथवा कपोलस्थो यस्यावर्त्तः प्रदृश्यते ।
वलमानः स विज्ञेय, स इच्छेत् स्वामिनाशनम् ॥
कपोलाभ्यान्तथावर्त्तौ विद्येते वाजिनो यदि ।
तावश्विनाविति प्रोक्तौ युद्धकाले जयप्रदौ ॥
गण्डावर्त्तो भवेद्यस्य वाजिनो दक्षिणाश्रयः ।
स करोति महासौख्यं स्वामिनः शिवसञ्ज्ञकः ॥
तद्वद्वामाश्रयः क्रूरः प्रकरोति धनक्षयम् ।
इन्द्राख्यावशुभौ शङ्खौ नृपराज्यविवृद्धिदौ ॥
कर्णमूले यदावर्त्तः स्तनमध्ये च तथापरः ।

विजयाख्याशुभौ ज्ञेयौ युद्धकाले जयप्रदौ ॥
नासामध्ये यदावर्त्त एको वा यदि वा त्रयः ।
चक्रवर्त्ती स विज्ञेयो वाजी भूपालपूजितः ॥
कण्ठे यस्य महावर्त्त एकोऽश्वस्य प्रजायते ।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवृद्धिदः ॥
स्कन्धे पार्श्वे यदावर्त्तः स भवेत् पद्मलक्षणः ।
करोति विधिवत् पद्मो स्वामिनः सततं सुखम् ॥
शुक्राख्यौ तालुकान्तस्थावावर्त्तौ कीर्त्तिवृद्धिदौ ।
हयस्य स्वामियुक्तस्य सदैव सुसुखावहौ ॥
एकावर्त्तो भवेद्यस्य कक्षान्ते वाजिनो यदा ।
स रणे मृत्युमाप्नोति द्वौ च स्वामिविनाशनौ ॥
जानुदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
प्रवासं सततं ब्रूते स्वभर्त्तुः क्लेशसंयुतम् ॥
वाजी मेढ्रतलावर्त्तो वर्जनीयो महीभुजाम् ।
स करोति हरेर्नाशं परचारसमुद्भवम् ॥
त्रिवलिस्थो यदावर्त्तस्त्रिवर्गस्य प्रणाशकः ।
वाजिनस्ते परिज्ञेयाः स्त्रीपार्श्वस्था भयप्रदाः ॥
पुच्छदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥
गुह्ये पुच्छे वलौ यस्य भवन्त्यावर्त्तकास्त्रयः ।
स कृतान्तस्वरूपेण वर्जनीयस्तुरङ्गमः ॥
अथ ऊर्द्ध्वं यदा वाजी सम्पुटं न स्पृशेत् क्वचित् ।
यमदूतः स विज्ञेयो वर्जनीयः प्रयत्नतः ॥
हीनदन्तोऽधिदन्तश्च कराली कृष्णतालुकः ।
मुशली च तथा शृङ्गी षडेते स्वामिघातकाः ॥
एकाण्डजातश्चैकाण्डो हीनाङ्गोऽप्यधिकाङ्गकः ।
परित्याज्यः स वाञ्छद्भिरन्विष्य परमं यशः ॥
घण्टी वदनको वाली शृङ्गी चैव चतुर्थकः ।
वर्जनीयः प्रयत्नेन सर्व्वे ते पापकृत्तमाः ॥
घण्टी च स्वामिनं हन्ति वदनी धनसंचयम् ।
अन्तःपुरं तथा वाली शृङ्गी राष्ट्रविनाशनः ॥
षट्पदाभो भवेद्यश्च कृष्णतालुर्न दुष्यति ।
शङ्खपादमुखो यस्तु आवर्त्तैः कुत्सितैरपि ।
न दुष्यति सदावर्त्तः शालिहोत्रमतं यथा ॥
इति श्रीनकुलविरचितेऽश्वचिकित्सिते
आवर्त्ताध्यायश्चतुर्थः ॥

अथ दन्ताः ।

दन्तोद्भेदं प्रवक्ष्यामि वाजिनामायुलक्षणम् ।
येन विज्ञातमात्रेण आयुर्ज्ञानं प्रचक्षते ॥
अश्वस्तु तनुभिर्दन्तैः क्षीरदन्त इति स्मृतः ।
तथा षोडशभिः कोणे प्राप्नोति द्वादशमासिकः ॥
त्रिंशन्मासोद्भवाः सर्व्वे अखण्डाः परिकीर्त्तिताः ।
द्वौ स्यातां द्वौ च न स्यातां मूर्द्धोपरि यथाक्रमम् ॥
चतुर्भिर्वत्सरैर्दन्ताः कालिकाख्या भवन्ति च ।
तथान्यः सप्तमे वर्षे चतुर्थः कालिको भवेत् ॥
अष्टमे वत्सरे प्राप्ते प्राप्ताः स्युः सार्व्वकालिकाः ।
नवमे त्वथवा रेखा पीतत्वं शंसयन्ति च ॥
तथाप्येकादशे वर्षे तावत् पीतत्वमागताः ।
तिष्ठन्ति दशनास्तेषां वाजिनामप्यसंशयम् ॥
ततः श्वेताः प्रदृश्यन्ते यावद्वर्षत्रयं पुनः ।
ततः काचप्रभाः सम्यक् यावत् वत्सरास्त्रयः ॥
ततः सप्तदशादूर्द्ध्वं यावद्वर्षाणि विंशतिः ।
मक्षिकाभारदास्तेषां यावद्वर्षत्रयं पुनः ॥
तस्मादुदूखलं प्राप्तास्तावद्वर्षत्रयं पुनः ।
प्रकम्पश्च समागम्य पश्चात् पातः समात्रयम् ॥
द्वात्रिंशद्वत्सरैरेव वाजी निर्व्वाणमाप्नुयात् ।
दंष्ट्राचतुष्टयं श्वेतं वर्ज्जेण परमायुषि ॥
अश्वानामेव सर्व्वेषां दन्ता द्वादश कीर्त्तिताः ।
कालिका हारिणी शुक्ला काचा वाप्यथ मक्षिका ॥
शङ्खोदूखलकश्चैव दन्तानाञ्चलनं तथा ।
ततस्तु पतनं विद्यादेष अष्टकसंग्रहः ॥
चतुर्विंशतयो दंष्ट्राः शालिहोत्रमतं तथा ।
एवं दन्तविशेषेण सर्व्वेषामिह वाजिनाम् ।
विज्ञेया चायुषःसंख्या वाजिपोषणतत्परैः ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते दन्तोद्भेदो
नाम पञ्चमोऽध्यायः ॥

अथ अवयवप्रमाणम् ।

दीर्घसूक्ष्मविमाभास्या ये भवन्ति तुरङ्गमाः ।
ते शस्ताः पार्थिवेन्द्रस्य यानवाहनकर्म्मणि ॥
स्कन्धमभ्युन्नतं दीर्घं वक्रग्रीवं विशेषतः ।
चमरालङ्कृतं सम्यक् स्तोकबालसमन्वितम् ॥
येषां पृष्ठं सुवंशं स्याद्विपुलं व्रणवर्जितम् ।
किञ्चिन्मध्ये भवेन्निम्नं राजार्हास्ते तुरङ्गमाः ॥
स्निग्धरोमा सुवृत्ता च सुस्थूला विपुला कटी ।
ग्रथिताः सुदृढा रम्या भुजा मांसप्रपूरिताः ॥
पादा निर्मांसला वक्राश्चक्राकारखुरान्विताः ।
अप्रमाणं तथा वक्षः कर्णौ लघुतरौ स्मृतौ ॥
पार्श्वौ तनुतरौ शस्तौ सुरसस्निग्धतालुकम् ।
दन्ताश्च शिखराकारा विपुला चन्द्रवर्च्चसः ॥
सप्तविंशप्रमाणेन मुखमश्वस्य शस्यते ।
कर्णौ षडङ्गुलौ प्रोक्तौ तालुकं चतुरङ्गुलम् ॥
चत्वारिंशच्च सप्ताढ्याः स्कन्धाः सम्यक् प्रकी-
र्त्तिताः ।
पृष्ठवंशश्चतुर्व्विंशः सप्तविंशा तथा कटी ॥
अतिसूक्ष्मं तथा निम्नं पुच्छं हस्तद्वयायतम् ।
लिङ्गं हस्तप्रमाणञ्च थान्तौ चतुरङ्गुलौ ॥
मार्गस्थानं चतुर्व्विंशं हृदयं षोडशाङ्गुलम् ।
कटिकक्षान्तरञ्चोक्तं चत्वारिंशत् प्रमाणतः ॥
मणिबन्धद्वयं चैव खुराश्च चतुरङ्गुलाः ।
अशीत्यङ्गुल उत्सेधो दैर्घ्यञ्च द्व्यधिकं शतम् ।
एवं क्रमेण गात्रस्य प्रमाणं वाजिनां मतम् ॥

दीर्घाणि चत्वारि तथोन्नतानि
चत्वारि रक्तानि च सूक्ष्मकाणि ।
ह्रस्वानि चत्वार्य्यथ चायतानि
भूयश्च चत्वार्य्यथ नम्रकाणि ॥

द्वात्रिंशत् क्रमशोऽप्याहुर्लक्षणानि मुनीश्वराः ।
तान्यहं कीर्त्तयिष्यामि वाजिनाञ्च पृथक्
पृथक् ॥

आस्यं भुजौ केशककाटिकाश्च
दीर्घं चतुष्कं तुरगस्य शस्तम् ।
तथोन्नते घ्राणपुटे ललाटे
शफाश्च तज्ज्ञाश्चरणौ वदन्ति ॥
ओष्ठौ च जिह्वाप्यथ तालुकञ्च
मेढ्रं सुरक्तं शुभदं हयस्य ।
लघूनि बन्धाश्चरणेषु कोष्ठं
श्रोत्राणि सर्व्वाणि तथैव पुच्छम् ॥
कर्णान्तरं कर्णसमन्वितञ्च
वक्षः तथा ह्रस्वतरं प्रशस्तम् ।
वक्त्रं मुखं कन्धरागानुनी च
पार्श्वञ्च सप्तैः शुभदं प्रदिष्टम् ॥
कक्षान्तरं चोदरमध्यमञ्च
निम्ना कटी तानि सजानुकानि ।
वक्षः शफोरूजघनस्थलञ्च
चतुष्कमेतत् पृथुलं प्रदिष्टम् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते सर्व्वावयव-
प्रमाणो नाम षष्ठोऽध्यायः ॥

अथ वेगः ।

गुणानामिह सर्व्वेषां गुणो वेगमयोऽधिकः ।
अश्वानां शस्यते तज्ज्ञैरश्वज्ञानविचक्षणैः ॥
संवाहनविधानेन प्रकाशं यान्त्यसंशयम् ।
तस्मात् सर्व्वप्रयत्नेन वेगो ज्ञेयश्च वाजिनाम् ॥
अवाहिता विनश्यन्ति विनश्यन्त्यतिवाहिताः ।
अश्वानां वाहनं पथ्यं सानुरागञ्च मोक्षणम् ॥
अधमा मध्यमास्ते स्युर्मध्यमाश्च तथोत्तमाः ।
उत्तमाश्चोत्तमा भूयो वाह्यमानास्तुरङ्गमाः ॥
रूढ़मश्वविदां श्रेष्ठ रूढे सर्व्वं प्रतिष्ठितम् ।
रूढेन तु विहीनस्य लक्षणं चाप्यलक्षणम् ॥
रूपावर्त्तगतिच्छायासत्ववर्णवयोबलम् ।
जवहीनस्य वाहस्य सर्व्वमेव निरर्थकम् ॥
गतेर्धन्यतरो वर्णो वर्णाद्धन्यतरः स्वरः ।
स्वराद्धन्यतरं सत्वं सर्व्वं सत्वे प्रतिष्ठितम् ॥
लघुत्वं मातृदोषेण पितृदोषेण जाड्यता ।
दौर्ब्बल्यं स्वामिदोषेण स्वदोषो नास्ति वाजिनाम् ॥

जवो हि सप्ते, प्रथमं विभूषणं
त्रपाङ्गनायाः कृशता तपस्विनः ।
द्विजस्य वेदोऽथ मुनेरपि क्षमा
पराक्रमः शस्त्रबलोपजीविनः ॥

आकर्षन्निव गां वमन्निव खुरौ पश्चार्द्धसद्यन्निव
खीकुर्व्वन्निव खं पिबन्निव दिशो वायु समश्नन्निव ।
साङ्गारप्रकरान् स्पृशन्निव महीं छायाममर्षन्निव
चञ्चच्चामरवीज्यमानवदनः श्रीमान् हयो धावति ॥
अलक्षितगतागतैर्मृगदृशां कटाक्षैरिव
क्षणानुनयशीतलैः प्रणयकेलिकोपैरिव ।
सुवृत्तमहृणोत्तरैर्मृगदृशासुरोजैरिव
त्वदीयतुरगैरलं धरणिचक्रमाक्रम्यते ॥
येषां दीपशिखोपमानि नयनान्युद्भावितः सन्निव
ग्रीवा क्रौञ्चनिभा विभाति च समा पादाश्च
सुक्तोपमाः ॥
वेगो वायुरिवाथ वानरसमः स्याद्वारणप्रेङ्गितं
शङ्खक्रौञ्चमृगेन्द्रदुन्दुभिघनध्वानेभतुल्यस्वनः ॥
वक्त्रे यो हरिणाधिपप्रतिनिभो व्याघ्रोपमो
बाहुभिः
आवर्त्तैरश्वशुभैः प्रधानकुलजाः सुस्निग्धवर्ण-
प्रभाः ।
उष्ट्राक्षाः प्रियदर्शनाश्च सुभगाः श्वासैः
सुगन्धैश्च ये

धन्यास्ते नयराज्यवित्तसुखदाः संवाहका भूपते' ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वेगवर्णनो-नाम सप्तमोऽध्यायः ॥

अथ आरोहणम् ।

अथातः संप्रवक्ष्यामि ह्यारोहणमुत्तमम् ।
येन विज्ञानमात्रेण रेवन्तेनोपमीयते ॥

चलकिसलयपादः कर्णमध्यैकदृष्टिः
न चलति कटिदेशे आसने सुस्थितश्च ।
हयहृदयगतिज्ञः स्थानदण्डावभासी
स खलु तुरगयोक्ता मान्यते पार्थिवेन्द्रैः ॥

यो नित्यं दृढमुष्टिरुत्सलघुकः क्रोधानलैर्वर्जितः
सर्वैकस्थिरबुद्धिमध्यमतनुः शास्त्रस्यतत्त्वज्ञकः ।
काले दण्डनिपातविश्रमयुतः ताम्बूलवक्त्रान्वितः
त्वेवं लक्षणसंयुतो हयरुहो राज्यार्थिभिः पूज्यते ॥

ऊरू स्थिरौ यस्य चलौ च पादौ
त्रिकोन्नतं सङ्गतमासनञ्च ।
स वाजिवाहः कथितः पृथिव्यां
शेषा नरा भारवहा हयानाम् ॥

प्राज्ञः सत्त्वबलोत्साही दृढः सर्वाङ्गसौष्ठवः ।
जितशीतातपालस्यो जितायासो जितासनः ॥
हयकालबलप्राणजवकामाध्वयोगवित् ।
श्रान्तोपचारसारज्ञो रणक्रीडासु दीक्षितः ॥
वाजिना हृदयस्यैव स्थाने दण्डनिपातवित् ।
दृष्टाश्वदमने दक्षः सर्वक्लेशसहः शुचिः ॥
ग्रासौषधान्नपानीये परव्यूहावलोकने ।
त्रिषु श्रेष्ठः प्रवेशे च निर्गमे कुशलोऽश्ववित् ॥
रोगं विकुरुते यस्य तत्त्वज्ञो बाधाविचारवित् ।
धनुः कुन्तासिशक्तिज्ञः सोऽश्ववाहः प्रकीर्तितः ॥
वक्त्रे स्कन्धे मुखे कोष्ठे गात्रे सक्थ्यौ च ताडयेत् ।
उन्मार्गो यदि भवेदश्वो मूढः स्खलति दृश्यते ॥
कुपिते पुच्छस्थाने भ्रान्ते जानुद्वयं तथा ।
सर्वथा प्राप्तदण्डस्य दण्डमेकं निपातयेत् ॥
द्वेषणे स्कन्धमुद्दिष्टं स्खलिते जघनान्तरम् ।
भीते वक्त्रं खलु हन्याद्वक्त्रयोन्मार्गगामिनम् ॥
अस्थाने ताडितो वाजी बहून् दोषान् प्रदर्शयेत् ।
तावद्भवन्ति ते दोषा यावज्जीवत्यसौ हयः ॥
दण्डेनाभिभवेद्वाहान्नारोहेद्दण्डवर्जितान् ।
दण्डो हि साधनं तीव्रं यद् दण्डात् प्रजायते ॥
तुलावद्धृता वल्गा नात्युच्चा नातिलम्बिता ।
दीर्घं दृष्ट्वा तु कर्त्तव्या तिर्यगाकुञ्चिता तथा ॥
कटिं सम्यक् शिथिलाद्वहमानस्य ताडयेत् ।
सद्यः प्रस्खलिते गात्रं तत्र दण्डं प्रदापयेत् ॥
अकालदण्डपाताच्च वल्गायाश्च मोक्षणात् ।
अकालच्छिन्नाघाताच्च तेन वाजी न धावति ॥
आसनं शिथिलं यस्य खरो यस्य न भीषणः ।
लघुप्रहारदाता च वाजी तस्य न धावति ॥
सर्वलक्षणसम्पन्नः सर्वदोषविवर्जितः ।
कुलशीलसमोपेतः कथमश्वो न धावति ॥
गतिरेका मता चान्या चतुराख्या तृतीयका ।
वेगसन्धिश्चतुर्थी च धारावेगगतिस्तथा ॥
अधरागार्धवेगस्य चपलस्य त्रिकोणतः ।
नित्यमुद्घातदक्षस्य तस्य वाजी न धावति ॥
धारा तु पञ्चमी प्रोक्ता न प्रणोति न मार्गति ।
सर्वकर्माधमो वाजी तस्मात्तां परिवर्जयेत् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते आरोहणं नाम अष्टमोऽध्यायः ॥

अथ ऋतुचर्या ।

कर्मचर्यासु नित्यानां शुद्धान्नं सुनिरूपितम् ।
धनुरष्टादशे योग्यं वाजिनां मण्डलं क्रमात् ॥
सङ्क्षेपयेच्च तावद् यावत् कार्मुकपञ्चकम् ।
तदूर्ध्वं मण्डलैर्योग्यो गोमूत्रास्तदनन्तरम् ॥
ऋजुवृत्तानुवृत्ता च गोमूत्रा सर्वकर्मसु ।
युज्यमानानि दृश्यन्ते प्रायशो हि विचक्षणैः ॥
शालिहोत्रमुनिप्रोक्ता चर्या योऽग्न्या वाजिनाम् ।
तासामनुपयोगित्वात् क्षतं सगणो मया ॥
तीक्ष्णार्कैकेन सुदितो द्वाभ्यां भद्रस्तु धावति ।
त्रिभिर्दण्डैस्तदा मन्दः क्रमात् यष्ठाभिताडने ॥
तीक्ष्णाश्वभद्रमन्दानां प्रधानो जव उच्यते ।
सोऽप्यनेनैव मार्गेण संविभज्यो विजानता ॥
अवाहिता विनश्यन्ति सर्वकर्मोत्तमा हयाः ।
कृशा व्याधिपरीताङ्गा जायन्तेऽत्यन्तवाहनात् ॥
बलं कालो वयो भूमिः कालः सत्त्वमतः क्रमात् ।
कुर्यादेकान्तरे योगश्चातियोगो हि दोषवान् ॥
तच्च लोकप्रसिद्धं हि बोद्धव्य यत्नतो बुधैः ।
हयवाहनवेत्तासौ नरेन्द्रैः पूज्यते सदा ॥
धाविते ये गुणाः सम्यग्वेग्यमायान्निबोध तान् ।
शालिहोत्रादिशास्त्राणां व्यायामफलसम्भवान् ॥
स्थिरमांसो भारसहो लघुगात्रः पराक्रमी ।
दीप्ताग्निश्च सुशीलश्च व्यायामेनोपजायते ॥
सत्वार्थो विनयी शीतो निर्दोषस्तापवर्जितः ।
वेदवित्सादिचित्तज्ञ उक्तो धावति तिष्ठति ॥
शुभावर्त्तगतिच्छायाबलशीलसमन्वितम् ।
गन्धवर्णस्वरोतुकण्ठसारपुङ्खविभूषितम् ॥
एवं विधं समारुह्य देवतांश्च हयं नृप ।
जित्वा रिपुकुलं भुङ्क्ते निःशङ्कोऽथ वसुन्धराम् ॥
जवः श्रेष्ठस्तुरङ्गानामुत्तमाधममध्यमः ।
त्रिविधोऽपि तथा भिन्नो जवभेदः स उच्यते ॥
यवोदरैरष्टभिरङ्गुलं परिकीर्त्तितम् ।
हस्तश्च तैश्चतुर्विंशैः कार्म्मुकं तैश्चतुर्गुणैः ॥
अक्ष्णोर्निमेषणैः काष्ठा अङ्गुलञ्चतुरं तथा ।
मात्रा ज्ञेया प्रमाणेऽश्च पूर्वप्रोक्ता तपोधने ॥
मात्रायोडशकेनाश्वो यो धावति धनुःशतम् ।
तमश्वमुत्तमं विद्याद्वायुवेगं महाजवम् ॥
यथोत्तमजवा वाहास्तथान्या मध्यमाधमाः ।
चतुरष्टाधिकां वृद्धिं मात्राणां लक्षयेद् बुधाः ॥
नभस्यश्वयुजे मासि भाराध्वानं जवं त्यजेत् ।
तत्राभिसहश्च पित्तः श्रमात् कुप्यति वाजिनाम् ॥
कार्य्यैव महान् किञ्चिद् युज्यो नभसि कार्त्तिके ।
हेमन्ते शिशिरे योगं वसन्ते च यथेच्छया ॥
ग्रीष्मभयात् अथ गात्रं न ग्रीष्मे वाहयेद्धयम् ।
नातो वृद्धः कृशो रोगी दन्तस्कन्धो महाबली ॥
पूर्णातिरिक्तकोष्ठश्च गुर्विणी न च वाहयेत् ।
सर्वां च विपुलाश्चैव किञ्चिन्-मांससमन्विताम् ॥
एकान्ते विजने चैव रङ्गभूमिं हयं नयेत् ।
सान्द्राश्चैव सुकठिनां मायाकोदकवर्जिताम् ॥
त्वगकाष्ठसमायुक्ता रङ्गभूमिं विवर्जयेत् ।
विण्मूत्रं कारयेदश्वं क्रोशक्रोशद्वयान्तरे ॥
वारि दद्यात् यथाकामं घासं सुहितं चारयेत् ।
अन्यथा दोषजातानि वक्ष्याम्येतानि तावतः ॥
गुरुविसर्गश्च छिन्नश्वासो च कम्पते ।
दुर्मना रुद्धविण्मूत्रः सर्वकर्माधमो हयः ॥
गूढमेढ्रोन्नतग्रीवो रक्तमेही गुरुक्रमः ।
क्षुत्पिपासाद्दतशुष्कास्यश्छायां प्राप्य विलिखति ॥
तर्जनैर्हन्यमानोऽपि विधुनोति शिरः परम् ।
मुहुर्विनमते पृष्ठं पदमेकं न गच्छति ॥
भाराध्वानपरिश्रान्तं शनैः सङ्क्रामयेत् पथि ।
नावतारितपर्याणं मार्गेऽध्वानसमागतम् ॥
मुक्तपुच्छाग्रबन्धस्य खलीनं नावतारयेत् ।
मर्दयित्वास्य गात्राणि पांशुमध्ये विवर्त्तयेत् ॥
स्नानपानावगाहश्च प्रतिपानं सभोजनम् ।
सर्वं क्रमेण कर्त्तव्यमन्यथा दोषसम्भवः ॥
रक्तपित्तसमीरोत्थमन्यासाम्भोदरादयः ।
हृद्रोगा वातशूलानि शीतोष्णोदकपानतः ॥
रक्तपित्तहरं देयं प्रतिपानं गुडौदनम् ।
रक्तपित्तसमीरोत्थे दातव्यं शर्करोदकम् ॥
जीवनं वातपित्तघ्नं हृद्यं बल्यतमं ततः ।
सर्वरोगहरोऽश्वानां मधु जाङ्गलको रसः ॥
स्वच्छाक्तश्च घृतं क्षीरं वारियुक्तं तुरङ्गम ।
पीत्वा हि निर्हरेद्दोषान् श्रमभाराध्वसम्भ्रमात् ॥

धर्मार्थकामा विजयो यशःश्री-
शोभासुखं जातिजनेश्च पूज्या ।
रणे निमित्तानि शुभावहानि
नृपस्य चैव विनिवेदयन्ति ॥
प्रत्यूषकाले च दिनं निरीक्ष्य
वह्निं द्विजं पूर्णघटं कुमारीम् ।
छत्रं ध्वजं चामरदर्पणञ्च
दृष्ट्वा तुरगं जयाय ॥
श्रुत्वा तु शङ्खाम्बुदवेदवाक्यं
पुण्याहमाङ्गल्यशिवस्य गीतम् ।
हयेव निमित्तं भवति स्वनेन
ध्रुवं जयं तत्र रणे नराणाम् ॥
सन्ध्याद्रुमाभिघातेन मही निघ्नन्ति
द्वेषन्ति ये स्वामिमुखं निरीक्ष्य ।
प्रदक्षिणावर्तविकीर्णपुच्छा
जयावहास्ते समरे नृपाणाम् ॥
विक्षिप्तदीनस्वरगद्गदा ये
अश्रुप्लुता भिन्नपुरीषमूत्राः ।
अनश्यमाना दिनकृन्निरीक्ष्याः
पराजयं ते कथयन्ति युद्धे ॥
अन्यापदं याश्च वदन्ति दीना
सव्येतरं चक्रविकीर्णपुच्छाः ।
युग्यासनादीन् परिवर्जयन्ते
पराजयं ते कथयन्ति भर्तुः ॥
विना निमित्तं रसयन्त्यभीक्ष्णं
व्याकुञ्चिता यापितमक्षिकाङ्गाः ।

ध्यायन्ति घातेश्च न चोद्विजन्ते
भयावहास्ते समरे नृपाणाम् ॥
शोकं शीलं भयं लक्ष्मालक्ष्मं चैवमादिषु ।
सुकुलं तं विजानीयादल्प पर्य्याणवारणे ॥
स्थाणुकण्टककाष्ठैश्च सुधाखदिरकण्टकैः ।
स्वामिघाताय चादत्ते तेषां रूपमिदं स्मृतम् ॥
वानरोलूकमार्ज्जारतरक्षुगण्डलोचनाः ।
गतिर्वा असुरैस्तुल्या स्थूलमेढ्रशिरान्विताः ॥
लम्बौष्ठकर्णनासाश्च हतस्कन्धाधिकच्छिदाः ।
विच्छिन्नप्रोथगण्डा ये भृकुटीचित्रमेहनाः ॥
एते दोषास्तथान्येऽपि सुकुलाश्वसमुद्भवाः ।
खलानामिह राजेन्द्र । वक्तुं शक्या न मादृशैः ॥
लक्ष्मं प्रधानमित्येके चान्ये लक्षणमाश्रिताः ।
लक्ष्यलक्षणमेतेषां तेनेदं दुष्करं विदुः ॥
अथाभिरतिसंक्षेपादतियापिश्च विस्तरात् ।
मुनीनामेकवाक्यत्वाद् ब्रूयामः स्थितिदुष्कराः ॥
सत्ववर्णगतिच्छायास्वरस्थानगतिः क्रमम् ।
पुण्यं पुण्ड्रकनामानि दोषं वा शवलक्षणम् ॥
एव लक्षणसंयुक्तं दृश्यते शूररक्षणे ।
लक्षणेन विहीना ये निर्द्दोषाःस्युः प्रधाविताः ॥
हयरोहस्य का चिन्ता लक्षणैः शुभनिन्दितैः ।
तेनात्र न कृतोऽस्माभिर्हयलक्षणविस्तरः ॥
हयवाहनविज्ञानं कौतुकाहितबुद्धयः ।
अनायासेन गृह्णन्ति परं कृपा इमे जनाः ॥
चलासनं कथा रागाः पाणिघातप्रतोदनम् ।
पदप्रघातसंज्ञानि दोषो येरुपजायते ॥
कामात कोपाद्भयात्कोहाद्दर्पाच्चैव मदाश्रयात् ।
पर्य्याणारोहदोषाच्च दुष्यन्त्यश्वा निसर्गतः ॥
श्रीयुक्तसामन्तनरेन्द्रवन्दित
रणे हयारोहवराभिनन्दितम् ।
धर्म्मार्थकामादियशःप्रधान-
मित्थ कृत वाहनशास्त्रविस्तरम् ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते वाहनाध्यायो नवमः ॥

अथ धातुपरीक्षा ।

अथातः सम्प्रवक्ष्यामि धातूना लक्षणं परम् ।
येन विज्ञानमात्रेण ज्ञायन्ते रोगसम्भवाः ॥
ततः शुद्धशरीरोत्थरक्तदोषानवाप्नुयात् ।
रक्तदोषात्तदा वाजी प्राप्नोत्येव महामयान् ।
तस्मात् सर्व्वप्रयत्नेन रक्तं ज्ञेय विचक्षणैः ।
आषाढसमये प्राप्ते शिरामोक्षेण तत्क्षणः ॥
तेन संशोध्यते रक्तं वाजिनां दोषसम्भवम् ।
ततः शुद्धशरीरोऽथ पिण्डाद्यैश्च बलीकृतः ॥
श्रावणे शष्पमासाद्य वत्सवत् सुदृढो भवेत् ।
यदि रक्ताधिको वाजी शस्यमश्नाति कर्हिचित् ॥
रक्तात् सञ्जायते पित्तं ततो नाशमवाप्नुयात् ।
रक्ताधिकश्चाश्वपुटः स्नेहाद्यैः शस्यमत्ति चेत् ॥
सम्प्राप्य श्लेष्मरक्ताढ्यो नाशमवाप्नुयात् ।
हीनरक्तो यदा शस्यं रूक्षोऽश्नाति तुरङ्गमः ॥
तदा वायु परं प्राप्य सद्यो नाशमवाप्नुयात् ।
तत्रेदं लक्षणं प्रोक्तं रक्तकोपसमुद्भवम् ॥
धातूनामपि सर्व्वेषां ज्ञेयश्चिह्नं विचक्षणैः ।

पित्तरक्तप्रकोपेण यदा संपीड्यते हयः ॥
तदा कण्डूतिमासाद्य कम्पते सततं वपुः ।
छायां वाञ्छति यत्नेन विशेषेण जलाश्रयम् ॥
मुहुर्वाञ्छति पानीयमाहारश्च विशेषतः ।
एव वातोत्थरक्तेन ज्ञात्वाश्वम्पीडितं ततः ॥
शिरामोक्षं विधायैव दद्यात् सकटुकं गुडम् ।
ततः शुद्धिमवाप्नोति नीरोगः संप्रपद्यते ॥
पित्तासृग्दूषितो वाजी यदि चाश्रूणि मुञ्चति ।
नेत्रान्ते पाण्डुरत्वञ्च सद्यो मृत्युमवाप्नुयात् ॥
नेत्रयोर्लक्षणं प्रोक्तं पित्तरक्तसमुद्भवम् ।
श्लेष्मरक्तप्रकोपेण यदा सम्पीड्यते हयः ॥
अधोवक्त्रो भवेन्नित्यं कासते च मुहुर्मुहुः ।
आहारं न च गृह्णाति नोत्साहं कुरुते क्वचित् ॥
न विन्दति कशाघातं न च पार्ष्णि न चासनम् ।
नासाग्रेण क्षिपेत्तोयं वह्निघर्म्मञ्च वाञ्छति ॥
तस्यापि शोधयित्वासृग् दद्यात्कुष्ठया युतं गुडम् ।
सर्व्वं रक्तं ततः शुद्धा निःशेषं समवाप्नुयात् ॥
वाजिनः श्लेष्मरक्ताभ्यां दूषितस्य सदा भवेत् ।
नेत्रान्ते बिन्दुकाकारकण्डूस्तस्य तथोदरे ॥
तदा मृत्युमवाप्नोति षण्मासाभ्यन्तरे ध्रुवम् ॥
शुण्ठ्यामृता गोक्षुरकं घनञ्च
श्यामावचाहिङ्गुयुता च यष्टिः ।
कफप्रणाशाय विनिर्मितोऽयं
पिण्डः प्रसिद्धश्च कफापहश्च ॥
नोचेदश्नाति शुण्ठ्यग्रं सैन्धवं नस्यमार्गतः ।
वायुरक्तप्रकोपेण पीडितस्तु तुरङ्गमः ॥
कुक्षिद्वये हयस्तीव्रं मुहुः श्वासं प्रमुञ्चति ॥
नैकत्र मन्यते स्थातुं क्षिपते च निरर्गलम् ।
एवं वातोद्भवं ज्ञाप्यं रक्तन्देहे हयस्य च ॥
शोधयित्वाथ सन्दद्यान्महाष्टतमनल्पकम् ।
ततः शुद्धिमवाप्नोति परां पुष्टिञ्च गच्छति ॥
उत्साहं कुरुते मार्गे सर्व्वदोषविवर्ज्जितः ।
वातरक्तप्रकोपेण लोचनान्ते हयस्य च ॥
यदा स्यातां सिते रक्ते काशः कण्डूस्तथानने ।
तदा तस्य भवेन्मृत्युर्यदि नाश्नाति चामिषम् ॥
च्यश्मकञ्च युतन्दद्या माहिषेण निशागमे ।
सन्निपातेऽथ रक्तेन यदा सम्पीड्यते हयः ॥
यदा वेपथुमाप्नोति काशते च निरर्गलम् ।
निद्रालस्याग्निमन्दत्वं वस्तौ मलनिबन्धनम् ॥
कर्णयोः पातनञ्चैव वक्त्राल्लालाविमोचनम् ।
तत्रापि शोधयेद्रक्तं ततो लङ्घनमर्हति ॥
यावद्दोषस्य निर्णाशं स्तोकोदककृताशनः ।
क्वचिदुष्णं क्वचिच्छीतं क्वचिद्भेषजसंयुतम् ॥
प्रदेयं युक्तितत्त्वज्ञैर्वारि वार्य्यं न कुत्रचित् ।
सपथ्या चामृता चैव कटुका च वचा तथा ॥
शमयेत्सतक्षणादेव त्रिधातुकुपितं ज्वरम् ।
शिरीषं श्रीफलञ्चैव चेतसञ्चैव वृद्धिभाक् ॥
मन्दाग्नित्वं सदोषाणां कुरुते भस्मसाद्द्रुतम् ।
मधुकं मधुजालञ्च माधुर्य्यं कुलिकान्वितम् ॥
शिरीषं क्षुद्रकं लाक्षा क्वाथयित्वा त्रिभागतः ।
यस्यैतत् सन्निपाताय वाजिनः संप्रदीयते ॥
तस्य तन्नाशमायाति तमः सूर्य्योदये यथा ।

स्वस्थस्यापि हि नेत्रान्ते स्यातां नीले च वाजिनः ॥
गन्धश्च सदृशः क्षोण्या तदा मृत्युस्त्रिमासिकः ।
नीले पीतेऽथ नेत्रान्ते स्यातां चेद्वाजिनः क्वचित् ।
स निर्व्वाणमवाप्नोति त्रिभिर्मासैरसंशयम् ॥
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ।
विशेषात् स्वरभेदः स्यात्तस्यायुः पाञ्चमासिकम् ॥
जिह्वाया जायते बिन्दुरकस्माद् यस्य वाजिनः ।
कृच्छ्रञ्च जीवते मासं स वाजी नात्र संशयः ॥
पीतो मासद्वयेनैव स मृत्युं प्रयच्छति ।
त्रिभिर्मासैस्तथारक्तश्चतुर्भिश्च विचित्रितः ॥
पञ्चभिर्नीलवर्णश्च षड्भिर्व्वश्वसमाकृतिः ।
सप्तभिः पाटलाकारश्चम्पकाभस्तथाष्टभिः ॥
नवभिश्च हरिद्राभो दशभिर्जम्बुकोपमः ।
एकादशभिर्दूर्व्वाभो वत्सरेण हिमद्युतिः ॥
यस्य श्वासो भवेदुष्णः शरीरं पुलकाङ्कितम् ।
जिह्वा हिमकराकारा मासषट्कं स जीवति ॥
ग्रीवाग्रे पिण्डिका यस्य जायते च तथाधरे ।
मूत्रं करोति रक्ताभं मासषट्कं स जीवति ॥
वर्णः श्वेतो यदा यस्य नेत्रयोश्च प्रजायते ॥
दशमासान् समासाद्य पित्तार्त्तो न स जीवति ।
यस्य नीलप्रभे स्यातां नेत्रे वातार्द्दितस्य तु ।
मासत्रयञ्च कृच्छ्रेण यः स्थितः स न जीवति ॥
श्लेष्मयुक्तस्य वा रक्ते यदि स्यातां विलोचने ।
वक्त्रगन्धः सुरातुल्यो दश मासान् स जीवति ॥
यस्य नेत्रे हरिद्राभे स्यातां पित्तार्द्दितस्य च ।
तस्यायुः सप्तमासाख्यं मुनिभिः परिकीर्त्तितम् ॥
बहुवर्णे घने नेत्रे स्यातां धातुसमागमे ।
तस्य सप्तैर्भवेन्मृत्युः सप्तरात्रादसंशयम् ॥
यस्यैकं लोचनं नीलं द्वितीयं रक्तसन्निभम् ।
दृश्यते स च विज्ञेय पित्ताढ्यो मासजीवकः ॥
यस्य पित्तप्रसक्तस्य काले नीरदवर्त्तिनि ।
हयस्य जीवितं तावद्दिनानि दश पञ्च च ॥
एव रक्तविकाराणां ज्ञात्वा धातु तुरङ्गमे ।
ततः प्रतिक्रिया कार्य्या उक्ता या कीर्त्तिता परा ॥
भयादपीतपानीयशीर्णविशीर्युतस्य च ।
आर्त्तोऽपि ताडितोऽत्यर्थं तिर्य्यग्विद्धो यदापि वा ॥
श्रमाङ्कराच्च वन्धाद्वा गात्रे वा विषमस्थिते ।
क्षीणशोणितमासस्य शिरावेधः प्रशस्यते ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते धातुपरीक्षाध्यायो दशमः ॥

अथ ऋतुचर्य्या ।

द्वासप्ततिसहस्राणि नाडीनां हि भवन्ति च ।
वाजिनामिह सर्वेषां वायुरक्तं व्यवस्थितम् ॥
तासां निर्म्मोचनार्थाय द्वाराण्यष्टौ वदाम्यहम् ।
यैर्याति कुत्सित रक्तं सर्व्वदेहसमुद्भवम् ॥
कण्ठे वक्षसि तालौ च नासयोश्च मुखे तथा ।
गण्डयोरथ पादेषु पादयोरुभयोरपि ॥
काल बलञ्च विज्ञाय वाजिनां भिषगुत्तमः ।
शिरामोक्षं प्रकुर्वीत स्थानेष्वेतेषु पण्डितः ॥
अन्ये सप्तदश प्राहुः शिराद्वाराणि वाजिनः ।
विकारयुक्तं यद्रक्तं सुस्वल्पमपि वर्जयेत् ॥
एवं शरदि यः सम्यक् पुष्टिं नयति वाजिनाम् ।

तस्य यद्वाञ्छितं किञ्चिद्यानार्थं तच्च सिध्यति ॥
ततो हेमन्तमासाद्य निवाते निबधेद्धयम् ।
मासोत्थं यवसन्दद्यात् पानीयञ्च यथेच्छया ॥
घृतं वा यदि वा तैलं पाने दद्याद्विचक्षण ।
वाहयेच्च शनैर्नित्यं सर्व्वदोषप्रशान्तये ॥
तत शिशिरमासाद्य दद्यात्तैलं हि वाजिनाम् ।
पलाष्टकप्रमाणेन यावद्दिनत्रिसप्तकम् ॥
यवोत्थं यवसन्दद्यादेकविंशत्यहानि च ।
यवाभावेऽथ चणकान् दद्यादार्द्रतरान् सदा ॥
तदभावे मसूरांश्च शुष्कार्द्रांस्तैलसयुतान् ।
यवसं चापि तद्देयं नीरोगो जायते हय ॥
अशेषाणाञ्च सर्वेषां जायानां नस्यकर्म्मणाम् ।
तैलानाञ्च घृतानाञ्च यवस्य यवस परम् ॥
पर्व्वतानां यथा मेरुरायुधानाञ्च वज्रकम् ।
तथा सर्व्वोपचाराणां सप्ते श्रेष्ठतमा यवा ॥
देवताना यथा विष्णुर्ब्राह्मणा वेदविदां वर ।
नदीनाञ्च यथा गङ्गा तथा श्रेष्ठा यवा हये ॥
यथोदित. सहस्रांशुर्निहन्ति तिमिरं जयेत् ।
तथा शरीरजान् दोषान् यवा सप्तैर्हरन्ति च ॥
उपचारक्रिया सर्व्वा पञ्चवर्षु जनिता हये ।
कृता स्युर्यवभोज्येन सप्तैस्तस्य कृता नरै ॥
यस्य दत्ता यवा भोज्ये शिशिरे समुपस्थिते ।
अकृतापि कृता सर्व्वा पञ्चवर्षु जनिता हये ॥
कृता स्युर्यवभोज्येन सप्तैस्तस्य कृता नरै ।
नीरोगास्तुरगा सर्वे शालिहोत्रमत यथा ॥
पञ्चवर्षंजनिता वाथ क्रिया यस्या तुरङ्गमे ।
अतीतास्ते विजानीयाद्यवभोज्यविवर्जित ॥
एवं रक्तनिर्मुक्ताना कृत्वा यत्नेन वाजिनाम् ।
दद्याद्गोमूत्रसंयुक्ता सतैलां च हरीतकीम् ॥
दिनं त्रिसप्तक यावत् पलपञ्चप्रमाणत ।
तत शुद्धिमवाप्नोति निःशेषाद्व्याधिरोहमात् ॥
ततो नवतृणाहारं संप्राप्य सुमनोहरम् ।
परा पुष्टिमवाप्नोति नीरोगश्च प्रजायते ॥
न रायो वाहयेदश्वं प्रावृट्काले कथञ्चन ।
य इच्छेद्वाजिनस्तस्य वाहनं दशमासिकम् ॥
कूपोदकं सदा शस्तं पानाय जलदागमे ।
अभ्यङ्ग कटुतैलेन निर्वातस्थानबन्धनम् ॥
एकाहान्तरितं दद्याल्लवणञ्च विचक्षण ।
पलद्वयप्रमाणेन सुखजातपरिशुद्धये ॥
मुखरोगमवाप्नोति क्षारस्वादविवर्जित ।
तृणाम्भोभिस्तु सिक्ताङ्गस्तेजसा त्यज्यते हय ॥
अशुद्धोदकजान् प्रायान् प्राप्नोति शतशः परान् ।
जलोदकप्रधानेन बलहीनश्च जायते ।
तस्मात् सर्व्वप्रयत्नेन प्रावृट्काल उपस्थिते ।
अनेन विधिना प्राज्ञो वाजिन परिपोषयेत् ॥
तत शरदमासाद्य मधुखण्डसमन्वितम् ।
शस्तं क्षारोदनं सप्तपलाष्टपरिसंख्यया ॥
दुग्धं वा केवलं रात्रौ क्वथितं सम्प्रशस्यते ।
तथान्यदपि यत्किञ्चिन्मधुरं सम्प्रजायते ॥
पानाय सारसं तोयं यवसं सुमनोहरम् ।
नीलवर्णमुकुष्ठाश्च घृतं प्राशेन संयुतम् ॥
वाहनं च प्रयत्नेन सुखरूपमपि वर्जयेत् ॥

परीक्षाग्नौ यथा हेम्न: स्नेहस्य च प्रतिक्रिया ।
हयजीवस्य तद्वच्च परीक्षा यवभक्षणे ॥
यथा सायान्निकः पारं गत्वोर्म्मे: स्वस्थतां व्रजेत् ।
तद्वत् यवाशनोत्तीर्णा: शुद्धदेहा हयोत्तमा ॥
अल्पेनापि हि छिद्रेण यथा नश्यति नौर्जले ।
स्वल्पेनापि हि दोषेण यवदोषांस्तथैव च ॥
एष ज्ञात्वा विदग्धेन यवा देया: प्रयत्नत: ।
प्राप्तक्षीरा विशेषेण शिशिरे समुपस्थिते ॥
शुष्का वापि यवा देया: सर्व्वकालं च वाजिनाम् ।
प्रायशस्ते ततो ज्ञेया: सर्व्वव्याधिविनाशना ॥
यश्चाश्नाति यवानार्द्रान् शुष्कांश्च स्वेच्छया सदा ।
न तस्य जायते रोग: कदाचिच्च यवान्नभाक ॥
न च शूलं न च श्वासो न च प्लीहा न च क्लम: ।
न च रक्तप्रकोपश्च न च वातादिधातव ॥
योग्यार्थं शनार्थं वाहानां प्रधानो यव इष्यते ।
यवाभावेऽथ चणका धान्यमन्यतमं परम् ॥
यवाभावेऽथवा दद्यान्मुकुष्ठांस्तैलसंयुतान् ।
भोजने तुरगेन्द्राणां परा पुष्टिरभीप्सताम् ॥
मुकुष्ठभोजनाद्वाजी पुष्टिं गच्छत्यलौकिकीम् ।
उत्साहं परमं धत्ते स च रोगैर्विमुच्यते ॥
अप्राप्तौ च मुकुष्ठानां मुद्गा देया मनीषिभि ।
सतैलास्तेऽपि कुर्व्वन्ति पुष्टिं सत्त्वविवर्द्धिनीम् ॥
एते पुष्टिगुणा: प्रोक्ताश्चणकाद्यारणा हये ।
नान्यस्तस्मादभावेन सर्वेषां तान् विनिर्द्दिशेत् ॥
नान्यद्धितं प्रशंसन्ति पञ्चमं वाजिनां बुधा: ।
भक्षणार्थं यतस्तस्य दानीमक्षनमुत्तमम् ॥
अन्नाभावे प्रदातव्यं घृतं वा यदि वा पय ।
शस्तं वा मांसमेवाथ पुष्ट्यर्थं वाजिनां सदा ॥
यस्याश्व शस्यमश्नाति सदा लवणमिश्रितम् ।
किं तस्य शस्यदानेन यथाभूतेन भूपते ॥
शस्याभावेऽथ यवसं शुष्कं वा यस्य वाजिन: ।
दिवानिशमरण्ये च स्वेच्छया संविमुक्तिका ॥
ते चापि वाजिनो देया यथा शस्यचरास्तथा ।
तथा सर्व्वप्रयत्नेन मुक्तान् सञ्चारयेद्वने ॥
आरोग्यार्थं सुपुष्ट्यर्थं सुसाधार्यं विशेषत. ।
वित्तक्षयस्य रक्षार्थं हरेद्रोगं प्रयत्नत ॥
वसन्तसमये प्राप्ते वाहयेत सततं हयम् ।
सनिम्बं लवणं दद्यात्ताभ्यां तैलं विशेषत: ॥
सर्व्वत्र सर्व्वभोज्यं तैलं वा यदि वा घृतम् ।
न दोषकारणं प्रोक्तं सञ्चारं लवमश्नत ॥
वसन्तसमये योऽश्व स्थाने तिष्ठति सन्वने ।
तस्योत्साह. प्रणश्येत जालस्य जायते वपु ॥
ततो मन्दाग्निनाविष्टो रोगाभावे प्रजायते ।
तस्मात् सर्व्वप्रयत्नेन वसन्ते वाहयेद्धयम् ॥
ग्रीष्मकाले च सम्प्राप्ते दूर्व्वाभोज्यं प्रशस्यते ।
वाजिनामिह सर्व्वेषां घर्म्मतापोपशान्तये ॥
घृतपानं विशेषेण सुच्छायासु निबन्धनम् ।
रक्तस्रावे च गात्रेषु ग्रासं वा घृतसंयुतम् ॥
दूर्व्वाभावे प्रदातव्यं तुरगाय घृतान्वितम् ।
कृत्तकाशस्यमध्याग्रं सर्व्वदोषोपशान्तये ॥
एवं स्वस्थमयं सम्यगुपचारं करोति य ।
हयस्य तु गच्छो नित्यं तस्य वर्द्धन्ति वाजिन. ॥

नीरोगा पुष्टिसंयुक्ता: प्रकृष्टोत्साहसंयुता: ।
तर्पिता भूमिपैरश्वा भूमिमार्गक्रियाक्षमा ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते ऋतु-
पर्य्यायाध्याय एकादश: ॥

अथ नस्य ।

कासश्वाससमो नस्यो वातपित्तकफोद्भव ।
नस्य: संनाशयेत्तस्मात्तं नस्य योजयेद्धये ॥
पिप्पली सैन्धवं सारं नागरञ्च गुडान्वितम् ।
कृत्तिकासारमध्याग्र वाजिनां श्लेष्मनाशनम् ॥
मूलिकालवणं नस्ये सदा रोगविनाशनम् ।
सिता चन्दनतोयानि सात्तुकाख्यानि वाजिनाम् ।
नस्यकर्म्माणि युक्तानि नाडीवातप्रशान्तये ।
मृद्वीकेरार्द्रकं सार्द्रं वचाचारविमिश्रितम् ॥
नस्ये दत्तं वातशान्त्यै हयरोगविनाशनम् ।
शर्करां माक्षिकं सैरं पटोलं पलसंयुतम् ॥
नस्ये शरदि सप्तीनां जायते रोगशान्तये ।
वचा चोशायक कुष्ठ शुण्ठी च कासमर्दिका ।
युक्तं शीतोदके स्तोके तेषा नस्येऽपसर्पयेत् ।
गुडूची कौमुदी ताली मिश्रिता कूपवारिणा ।
नस्ये दत्ता वराश्वानां शिशिरे सुखदा स्मृता ।
अपामार्गं महानस्यं सर्व्वरोगविनाशनम् ॥
केवलं कटुतैलं वा गोमूत्रे पाचितञ्च यत् ।
मैथुनादिक्तसप्तीनां स्रोतोबलकरं विदु: ॥
कण्ठरोगे तथा नस्य गोमूत्रलवणान्वितम् ।
महद्गुणकरं प्रोक्तं सर्व्वदोषनिवारणम् ॥
अपामार्गस्य मूलेन नस्ये मूत्रञ्च छागलम् ।
मुखरोगविनाशाय नस्यं मत्स्यवसोद्भवम् ॥
लशुनं पिप्पलीमूलं गण्डकी नागकेशरम् ।
दत्तं नस्येन रोगघ्नं कटुतैलेन वाजिनाम् ॥
नस्यं पर्य्युषितैस्तोयै. प्रातर्दत्तं तु केवले ।
अश्वानाञ्च नराणाञ्च चाक्षुष्यं बलवर्द्धनम् ॥
पिप्पलीमिश्रतोयेन ससितासलिलेन च ।
नस्यं यच्छति सप्तीनां सर्पिषा यच्छते बलम् ॥
नस्यं स्निग्धं तथा रूक्षं तिक्तञ्च मधुरं तथा ।
चतुर्द्धा वाजिशास्त्रज्ञैर्यथावत्परिकीर्त्तितम् ॥
देयं वाताधिके स्निग्धं रूक्षं तिक्तं कफाधिके ।
मधुरं चैव पित्ताढ्ये तुरङ्गे समयोचितम् ॥
द्विपञ्चाशत्प्रमाणं वा श्रेष्ठं तन्नस्यमुच्यते ।
पादोनं मध्यमं तत्र षड्विंशत्यां तथाधमम् ॥
नस्यात्ते वाजिनो रक्तं सदा पुष्टं प्रजायते ।
नस्यदानात् क्षतं तस्य विनाशमुपगच्छति ॥
दाडिमं पुष्करं श्रीकं श्वेतदूर्व्वाङ्कुरास्तथा ।
शीतोदकेन सयुक्तं रक्तं दुष्टं न जायते ॥
धातकी गोक्षुरं रोध्रं कुसुम्भं सिन्धुवारकम् ।
शीतोदकेन सयुक्तं नस्यं रक्तविनाशनम् ॥
धातकी गण्डकी चैव गोमूत्रं लवणं तथा ।
नस्ये दत्तं कफं हन्ति तमः सूर्य्योदये यथा ॥
शुण्ठी घृतञ्च दुग्धञ्च रससारं तथैव च ।
वातदोषविनाशाय नस्यमेतत्प्रयोजयेत् ॥
माक्षिकं शर्करायुक्तं चन्दनं केशराणि च ।
नस्योऽयं वारिणा सद्य पित्तनाशकर: परं ॥
गुडूची शुण्ठी मुस्ता च तगरं सितसर्षपा ।

सन्निपाते समिस्तोऽयं नस्य स्याज्जीवरक्षकः ॥
अभया पुलिणी धात्री एला लाक्षा शतावरी ।
सन्निपातेऽनिलाधिक्ये नस्योऽयं क्षेमकारकः ॥
मरिच पिप्पलीमूलं वचा भारङ्गिकाभया ।
सन्निपाते कफाधिक्ये नस्यं सर्पि सुखप्रदम् ॥"
इति श्रीनकुलकृतेऽश्वचिकित्सिते नस्याधिकाराध्यायो द्वादशः ॥

अथ पिण्डः ।

"कटुका च जयन्ती च भ्रामरी सुरसा घनाः ।
पञ्चाम्लतमथः पिण्डो वाजिनामयमिष्टकृत् ॥
एला शतघ्नी सुरसा काकजङ्घा शतावरी ।
माक्षिकं सघितं पिण्डः पित्तयुक्ते हि वाजिनि ॥
माक्षिकं सैन्धवं मुस्ता गोमूत्रञ्च हरीतकी ।
समभागेन पिण्डोऽयमुक्तो वह्निप्रदीपकः ॥
कंकोलं केतकी द्राक्षा शर्करा मधुयष्टिका ।
दत्तो घृतयुतः पिण्ड पुष्टिं नयति वाजिनः ॥
मत्स्यमांसेन संयुक्तं शावचूर्णं घृतप्लुतम् ।
बलहीनस्य वाहस्य पिण्डोऽयं बलवर्द्धनः ॥
बला मद्यं दधि क्षौद्रं भक्षयस्तुरगो भवेत् ।
अतिवृद्धोऽपि बल्योऽपि यथा षट्सप्तवार्षिकः ॥
मेथिका धातकी काली सारणी बीजपूरकः ।
पिण्डो दत्तो वराश्वानां तेजोवृद्धिकरः स्मृतः ॥
कटुका मद्यसंमिश्रा धात्री लोध्रगुडान्विता ।
दत्ता पिण्डविधानेन वाजिना सुखवृद्धिदा ॥
त्रिफला कटुका मुस्ता विडङ्गानि च चित्रकम् ।
मदालस्यसमेतानां वाजिनां पिण्ड आर्त्तिहृत् ॥
वचा विदलिताः स्निग्धाः मष्टताः क्षारभाविताः ।
पिण्डैर्दत्ताः प्रकुर्व्वन्ति वाजिनां व्याधिनाशनम् ॥
सैन्धवं नागरं श्यामा गुडूची सितसर्षपाः ।
अम्लवेनसमश्वानां पिण्डोऽयं शूलनाशनः ॥
पिप्पली पिप्पलीमूलं कटुका सहदेविका ।
दूर्व्वापल्लवसंमिश्रः पिण्डोऽयं शोथनाशकः ॥
केशर श्रीफल तालं माक्षिकं गिरिकर्णिका ।
पिण्डोऽयं शयने शस्तो वाजिनां सुगतिप्रदः ॥
वचा लोध्रं सकर्पूरं गुहा श्यामा गुडं मधु ।
समाशकेन पिण्डोऽयं करोति लघुता हये ॥
मद्य मरिचसंयुक्तं लशुनं नागकेशरम् ।
द्विगुणं मेषमांसञ्च पिण्डो दत्तो जयेच्छ्रमम् ॥
जम्बीरं फलिनीपत्रं त्वचा किञ्जल्कमेव च ।
जातशोणितवाहानां पिण्डोऽय रक्तनाशनः ॥
तमालं पुष्करं लोध्रमपामार्गं सतिन्दुकम् ।
पयसा पिण्डमेतद्धि वातकोपप्रणाशनम् ॥
आरनाल प्रविष्टा च पथ्या नेपालिकाफलम् ।
पिण्डे दत्ते हये दष्टा निहन्त्याशु विजृम्भितम् ॥
मुद्गपूगं वचामिश्रं तथा सर्ज्जरसान्वितम् ।
पिण्डे दत्ते निहन्त्याशु कृमिसंघं व्रणोद्भवम् ॥
सुहीक्षीरं सकर्पूरं कूपोदकविभावितम् ।
पिण्डोऽयं हन्ति मध्यस्थान् रोगान् सर्व्वान् कृमिप्रजान् ॥
सिता दुग्धं सकर्पूरमेलया पत्रसंयुतम् ।
अग्निदाहार्त्तियुक्तानां पिण्डोऽयं वाजिनां स्मृतः ॥
श्रीखासद्यप्रतप्तानामारनालं परिप्लुतम् ।
सक्तुदिच्छन्ति पिण्डेन वाजिनां सुखकारकम् ॥
दृष्टिवावाहिंसानाञ्च वाजिनां पुष्टिलम्भतः ।
पिण्डः कृतः सतैलेन लशुनेन पलेन च ॥
महाघृतं सकर्पूरं शर्करा दुग्धमेव च ।
कफनाशकरः प्रोक्तः पिण्डोऽय सुखदः स्मृतः ॥
रोचना च वरी धात्री तथा स्याद्बीजपूरकः ।
गुल्मं प्रशमयन्त्याशु वाजिनां हृदयोद्भवम् ॥
सहदेवी वचा कुष्ठं वरुणा चेन्द्रवारुणी ।
अतिश्वासं हरन्त्येते वाजिनां मधुना सह ॥
उदुम्बरफलं मांसं शौकरं माहिषं दधि ।
हयस्य चातिवृद्धस्य करोति परमं सुखम् ॥
विभीतकं प्रियङ्गुश्च सर्ज्जिका लवणं तथा ।
कासदोषोपशमनः पिण्डः सर्पिः सुखप्रदः ॥
तक्रं कर्पूरचूर्णञ्च शिवं सौवर्च्चलान्वितम् ।
पिण्डोऽय वस्तिसंरोधे वाजिनः संप्रकीर्त्तितः ॥
सौवर्च्चलं हरिद्रा च पिप्पली चेन्द्रवारुणी ।
मूत्रकृच्छ्रे परीघ्नन्ति पिण्डोऽयं तुरगस्य हि ॥
पिण्डीरसक्तवः क्षौद्रं भल्लातकफलं वुधम् ।
रक्तमूत्रे तु पिण्डोऽयं वाजिना रक्तनाशनः ॥
अभया यष्टिका श्यामा देवदारु सगन्धकम् ।
पुरीषे रक्तसंमिश्रे सदा शंसति वाजिनः ॥
पटोलं धातकी मुस्ता यष्टिका गिरिकर्णिका ।
रक्ताधिके कृतः पिण्डः करोति रुधिरक्षयम् ॥
हरिद्राद्वयसंयुक्तं गन्धकं कटुतैलकम् ।
पिण्डकं श्रुतियुक्ताभ्यां सदाश्वाना प्रशस्यते ॥
अतसीपत्रकं निम्बं न्यग्रोधकलिकान्वितम् ।
अतीसारे सुशंसन्ति पिण्डोऽयं वाजिनः शुभः ॥
व्रणैः कृमिभिरत्यर्थं सदा वाजी प्रपीड्यते ।
तदा पिण्डः प्रदातव्यः स्थूलैरण्डदलैरलम् ॥
कर्पूरशर्करालोध्रं माक्षिकं त्रिफलान्वितम् ।
तुरङ्गिण्याःप्रशंसन्ति पिण्डोऽयं वाजिनःशुभः ॥
पत्रकं सिन्धुवारञ्च भ्रामरं चक्रकिंशुकम् ।
मांसवृद्धौ प्रशंसन्ति पिण्डोऽय वाजिनः शुभः ॥
सैन्धव चूलिकाक्षारं विड़ङ्गानि मधूनि च ।
शक्षपीडाभिभूतस्य पिण्डोऽश्वस्य प्रशस्यते ॥"
इति श्रीनकुलकृतेऽश्वचिकित्सिते पिण्डाध्यायस्त्रयोदशः ॥

अथ घृतविधानम् ।

"शिलाजतु विशाला च पद्मकं नागकेशरम् ।
लाक्षा पद्मकाम्लञ्च निम्बद्वयसमन्वितम् ॥
घृतं माक्षिकसंयुक्तं सप्तविंशतिकं विदुः ।
अष्टांशं तु समादाय सुरामासघृतस्य च ॥
पलमात्राणि सर्व्वाणि पूर्व्वद्रव्याणि निःक्षिपेत् ।
तेषां दानेन तत्सर्पिर्जायते सर्व्ववाजिनाम ॥
बलपुष्टिकरं नित्यं सर्व्ववातविनाशनम् ।
सर्व्वरोगप्रशमनं कायाग्नेश्च प्रदीपनम् ॥
ओजस्करं व्यथानाशं शीघ्रशोषप्रणाशनम् ।
धातकी केशरं कुष्ठं कुसुम्भं कुङ्कुमं नलम् ॥
दाडिमं सितलोध्रञ्च पलमात्राणि निःक्षिपेत् ।
घृतञ्च पाचयेत् पानादभिघातान्वितो हयः ॥
जायते सर्व्वशुद्धाङ्गो महाप्राणैर्न संशयः ।
आरनालं वचा कुष्ठं पिङ्गला सिक्थकं घृतम् ॥
एतैः पक्वं घृतं सम्यक् पित्तव्याधिविनाशनम् ।
हरिद्राद्वयसंयुक्तं गन्धकं तु मनःशिला ॥
क्वाथयेन्नवनीतेन त्रिगुणेन घृतेन च ।
अभ्यङ्गेनाथ पानेन सप्तरात्रेण वाजिनः ॥
कण्डूर्लिर्निःक्षयं याति तथोदरभवा रुजः ।
माक्षिकं निम्बपत्राणि नखं गुग्गुल एव च ॥
भृङ्गराजो विशाला च पाठा चैव पुनर्नवा ।
विल्वमारुष्ककं लोध्रं सैन्धव तगर तथा ॥"
एतैः पक्वा घृतं वाजी संप्राप्यार्त्तेर्विमुच्यते ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते घृताध्यायश्चतुर्द्दशः ॥

अथ क्वाथः ।

"पूर्व्वाणि समभागानि क्वाथयेत् कूपवारिणा ।
ततोऽष्टांशं समादाय तोयस्य क्वथितस्य च ॥
एतत् सिद्धार्थकं नाम ह्युत्कृष्टं सर्व्ववाजिनाम् ।
कायाग्निं वर्द्धयत्याशु नीरोगत्वं प्रयच्छति ॥
मुस्ता मधुकपत्राणि केशरं लवणं रुहा ।
शताह्वा शाल्मली धात्री त्रपुषं फलिनी तथा ॥
क्वाथयित्वा जलं कौपं दत्तेस्तुल्यैर्विचक्षणः ।
त्रिभागमेवमादाय ततो दद्याद्धयस्य च ॥
प्रकरोति सदा नाशं पित्तस्यागन्तुकस्य च ।
एकविंशदिनं यावत्कालिदोत्तमतं यथा ॥
शुण्ठी हरीतकी पाठा भार्ङ्गी मुस्ता शिफालिका ।
हरिद्राद्वयसंयुक्ता हरितालं मनःशिला ॥
सिद्धस्त्रिभागशेषोऽयं क्वाथो हन्यात्त्रिरात्रिकम् ।
सन्निपातमशेषेण पलिकः पलमात्रकः ॥
मधुकं केशरं पत्रं भल्लातकविभीतकम् ।
शक्रपुष्पं रुहा सारं समभागेन मिश्रितम् ॥
कासार्त्तस्य समुद्दिष्टः क्वाथोऽयं त्रिफलात्मकः ।
उत्साहवर्द्धकः सद्यस्तथा कायाग्निदीपकः ॥
कुमारी शाल्मली पाठा मञ्जिष्ठा चेन्द्रवारुणी ।
काकोली समभागेन क्वाथयेत् समभागतः ॥
पलद्वयप्रमाणेन ततः पीतेन वाजिना ।
मोहयेच्छूलजं दोषं मूत्रदोषं च तत्क्षणात् ॥
यवानी माक्षिकं कासं सौवर्च्चलयुताभया ।
क्वाथयेदष्टमांशेन तत्पानाज्जायते हयः ॥
प्रदीप्ताग्निस्तु तेजस्वी सर्व्वरोगाद्विमुच्यते ।
स शीघ्रमार्गगामी च स्निग्धो रोगविवर्ज्जितः ॥
सेफालिका रुहानीवे वेणुका सिन्धुवारिका ।
एतैः क्वाथः कृतः सम्यक कृमिनाशकरः परः ॥
मातुलुङ्गस्य बीजानि चन्दनं सितसर्षपाः ।
उशीर पुष्करं ब्राह्मी लक्ष्मणा च पुनर्नवा ॥
क्वाथोऽयं शुण्ठिचूर्णेन धावितक्लेशनाशनः ।
प्रकरोति तुरङ्गाणां सर्व्वदैव सुखं तथा ॥"
इति श्रीनकुलकृतेऽश्वचिकित्सिते क्वाथाध्यायः पञ्चदशः ॥

अथ विषम् ।

"वारुणी माक्षिकी गौरी शीतालीबीजपूरकम् ।
कृमिक्लेदविनाशाय क्वाथो नित्यं रुजापहः ॥
अश्वगन्धा घृतं क्षौद्रं विषदग्धस्य वाजिनः ।
विषनाशं करोत्येव सर्व्वगात्रेषु तत्क्षणात् ॥
सामान्येन प्रदिष्टोऽयमगदो विषनाशनः ।

पृथक् पृथग्विभागेन कर्त्तव्यं साम्यतः परम् ॥
त्रिविधं कीर्त्तितं चैव कृत्रिमञ्च ततःपरम् ।
त्रिविधं कीर्त्तितं प्राज्ञैर्विषशास्त्रविशारदैः ॥
स्थावरं कन्दजं प्रोक्तं जङ्गमं सर्पसम्भवम् ।
कृत्रिमं योगजं प्रोक्तं त्रिविधं विषमुच्यते ॥
यदा खिरं समश्नन्ति कदाचित्तुरगोत्तमाः ।
तदा कार्य्यं विधानज्ञैरगदस्य प्रयोजनम् ॥
केशरं पद्मनालञ्च सौपर्णी बदरीफलम् ॥
तक्रमिश्रं हये दत्तं सर्व्वथा विषनाशनम् ॥
सौपर्णी सिन्धुवारञ्च नागवल्ली जटा तथा ।
विषार्त्तं प्राप्य संमिश्रं दुग्धं स्यादायुषी हयः ॥
अश्वगन्धा रुद्रा एला घृतमिश्रा पयोजिता ।
विषनाशं नयत्याशु जङ्गमं हयगात्रतः ॥
मूलं चन्दनवृक्षस्य माषचूर्णपरिप्लुतम् ।
जङ्गमस्य विषस्याशु प्रकरोति च सञ्चयम् ॥
तक्रं केशरसंयुक्तं विषं सद्यो नवाभ्रकम् ।
हयस्य जङ्गमं नाशं विषमयति तत्क्षणात् ॥
सौपर्णी विषकङ्कोली पिष्ट्वा मद्येन भाविता ।
जङ्गमं गात्रतः कृत्स्नं विषं नयति तत्क्षणात् ॥
एला कङ्कोलिकामूलं सौपर्णी घृतमिश्रितम् ।
विषनाशं करोत्याशु नस्यदानेन वाजिनाम् ॥
कौसुम्भं केशरं लाक्षा माक्षिका नाकुली तथा ।
कृत्रिमस्य विषस्याशु प्रकरोति च सञ्चयम् ॥
चम्पकं मालतीमूलमुत्पलसकरसं तथा ।
अश्वानां नाशयत्याशु विषं जङ्गममाश्रितम् ॥”
इति श्रीनकुलकृतेऽश्वचिकित्सिते विषयोगाध्याय षोडशः ॥

अथ अश्वशालाविधिः ।

“नृपवेश्मवामभागे शुभदिने तु कारयेद्धयागारम् ।
पूज्यश्रिय प्रयत्नाद्दुग्धैरश्वस्य प्रतिष्ठाप्य ॥
सुशुभे भूमिविभागे पूर्व्वोत्तरजलप्रवविधानात् ।
तस्मिन् शाला स्थिरां दशहस्तसमुच्छ्रितां दृढां कुर्य्यात् ॥
खादनकोष्ठकमस्मिन् हस्तद्वितय समुच्छ्रित कुर्य्यात् ।
संस्थाप्य वृषभगावौ सप्ताहं वाजिशालायाम् ॥
अत ऊर्द्ध्वन्तु हुताग्निः प्रवेशयेद्वाजिनो यथायोग्यम् ।
कुशलैस्तैरगैर्दचेरनुकूलैः स्थानपालैश्च ॥
कृतमङ्गलसत्कारा बन्धयास्तेऽत्र चोत्तराभिमुखा ।
नात्यायता न शिथिला, स्थाने वा दक्षिणाभिमुखम् ॥
वैद्यानां तुरगाय समीपं गृहं कारयेत् पूर्व्वम् ।
काष्ठासिकेन सूत्रेण माक्षिकाणां निवारणम् ॥
गन्धैर्माल्यैर्धूपैः स्थानानि विभूषयेदलङ्कारैः ।
सविशेष तद्यपीतौ हुत्वाग्निं पूरयेद्विद्वान् ॥
स्वच्छिद्रं नातियवसं यथा पश्यन्ति वाजिनः ।
स्थानं चैव पृथक् प्राप्य प्रयत्नं रोगिणां न वै ॥
कोष्ठी कुष्ठी ज्वरी यक्ष्मी परस्परं दूषयन्ति चारैः ।
निषिचारे केशांश्च खुरांश्च प्रशन्ति दीर्घान् ॥
अश्वस्याङ्गे प्रलिपेद्धरिद्रया वरिष्ठया मञ्जल्यात्र ।
सुपवित्रान् दोषघ्नैर्विभूषयेदलङ्कारैः ॥”
इति श्रीनकुलकृतेऽश्वचिकित्सितेऽश्वशालाविधिरष्टादशोऽध्यायः ॥ सप्तदशाध्यायस्तु नाधिगम्यते ॥

अथ ग्रहनामलक्षणानि ।

“दृश्यन्ते यानि लिङ्गानि ग्रहदोषेण वाजिनाम् ।
तानि सम्यक् प्रवक्ष्यामि ग्रहनामानि यानि तु ॥
लोहिताक्षो विरूपाक्षो हरिर्वलिस्तथैव च ।
षकाक्षी चैव विख्यातः सङ्काशी च परः स्मृतः ॥
सुसंस्थितश्च कौवेरो वैशाखश्च स्कन्दग्रहः ।
ऊर्द्ध्वं च दारुणश्चैव षड्विधो वरुणग्रहः ॥
टहसतिश्च सोमश्च तथा सूर्य्यग्रहोऽपरः ।
एते प्रोक्ता ग्रहाः सर्व्वे दारुणा मुनिसत्तमैः ॥
एतैर्दृष्टाः स्फुटं वाहा नैव जीवन्ति सर्व्वदा ।
चिह्नं सर्व्वं प्रवक्ष्यामि यथा शास्त्रे व्यवस्थितम् ॥
कम्पते पूर्व्वकायस्तु निश्चलो यस्य पश्चिमः ।
पश्चाल्लङ्गी सकम्पश्च खिद्यते हरिपीडितः ॥
भवन्ति बिन्दवो रक्ता ह्यकस्माद् यस्य चक्षुषः ।
हरिताक्षग्रहीतोऽश्वो ग्रासद्वेषी च जायते ॥
प्रस्विन्नगुरुगात्रश्च लुब्धचङ्क्रमणक्रियः ।
मीलतोन्मीलना चाक्ष्णा स्वभावान्नित्यमेव च ॥
विरूपाक्षगृहीते तु कम्पः स्वेदश्च जायते ।
उत्थितः सहसा यस्तु मूर्द्धा पतति भूतले ॥
स्तब्धाक्षो मुच्यते केशैस्तथा वालैः खुरैरपि ।
बलिग्रहगृहीतोऽसौ कृष्णवर्णशिरोधरः ॥
अकस्माद् यस्य लोमानि शीर्य्यन्ते यश्च लङ्घति ।
शूनपश्चिमपादस्य तस्य काशिग्रहं वदेत् ॥
सहसा कुपितो वाजी स्वानि गात्राणि खादति ।
प्रोथते सततञ्चैव सङ्काशिग्रहपीडितः ॥
खिन्नाङ्गो वेपमानश्च जानुभ्यां यश्च तिष्ठति ।
कौवेरग्रहसन्दुष्टं त विद्यात् कष्टजीवितम् ॥
हृष्यते सततं यस्तु पश्चादात्मानमीक्षते ।
सुसंस्थितग्रहाविष्टः स विज्ञेयो मनीषिभिः ॥
स्तब्धेन गुरुणा चैव वेपमानेन पक्षितः ।
गात्रेण विद्याद् वाहं तु वैशाखग्रहसेवितम् ॥
ग्रीवां चैव तथा जिह्वां परिवर्त्तं मुहुर्मुहुः ।
जृम्भते पूर्व्वकायेन शीतोच्छ्वासी विशोषणः ॥
नोद्विजेत्ताडितः पृष्ठे कशया पाणिनापि वा ।
त वै दीर्घस्वरग्रस्त इत्येव परिवर्जयेत ॥
श्यामं जिह्वामुखं यस्य नष्टदृष्टिस्मृतिर्भवेत् ।
ऊर्द्ध्वग्रहकृतं दोषं तस्य हीनस्य निर्द्दिशेत् ॥
तालुजिह्वे च नेत्रे च वृषणौ मेढ्रमेव च ।
श्यावं रूपञ्च यस्य स्याद् गात्रगौरवमेव च ॥
तस्य स्वेदपरीतस्य बुद्धिमान् वरुणग्रहे ।
कृतं दोषं महाघोरं स्तब्धाङ्गस्य विनिर्द्दिशेत् ॥
हृष्यते सततं यस्तु हृष्टरोमा तुरङ्गमः ।
स्तब्धाक्षो जृम्भतेऽत्यर्थं तस्यापि सलिलग्रहः ॥
सुविस्फुरितसर्व्वाङ्गः सलिले निश्चलस्थितः ।
हृष्यते विकरं वाजी वरुणग्रहपीडितः ॥
मुहुर्भावस्थितस्तोये जानुभ्यां योऽवगच्छति ।
मुखपाकश्च यस्यान्ते त विद्याद्दुदरग्रहम् ॥
उद्वर्त्तिनालः खिन्नश्च मगृहीतहनुश्च यः ।
कम्पमानश्च यो वाजी स रविग्रहपीडितः ॥
स्तब्धग्रीवो न जानाति कशाघातं मुहुर्मुहुः ।
जलग्रहगृहीतोऽश्वो वामपार्श्वेन निश्चलः ॥
शूनाक्षिकूटो रक्ताक्षः कृशः स्खलति यो मुहुः ।
बृहस्पतिगृहीतोऽसौ नैव जीवति तादृशः ॥
कम्पते पूर्व्वकायेन स्वल्पमात्राशनश्च यः ।
शेते प्रसार्य्य गात्राणि शीताङ्गः सोमपीडितः ॥
रक्ताक्षः शूनकण्ठश्च कम्पमानश्च श्वासयुक् ।
फेनलीढाङ्गखेदश्च ग्रस्तः सूर्य्यग्रहेण सः ॥
उदके तत्समीपे वा प्रायो गृह्णाति दारुणः ।
तुरङ्गं सत्त्वहीनन्तु षड्विधो वारुणग्रहः ॥
यज्ञभूमिचिताचैत्यशून्यवेश्मसुरालये ।
लोहिताक्षादयो रोषाद् ग्रहा गृह्णन्ति वाजिनः ॥
एवंविधैर्निदानैस्तु ग्रहदोषं विनिर्द्दिशेत् ।
वातपित्तकफाणान्तु निदानैर्व्याधिमादिशेत् ॥
एकाकारेण रोगेण म्रियते वा हयो यदा ।
तुरङ्गाणां तदा ज्ञेया उपसर्गाः सुदारुणाः ॥
ग्रहदोषेषु सर्व्वेषु उपसर्गास्तथैव च ।
अथोक्ताश्च महाशान्तिं गान्धर्व्वीञ्च प्रयोजयेत् ॥
अश्वरक्षाविधानाय कृत्वा सम्मान्य पावकम् ।
जुहुयाद्घृतसंयुक्तं शुचिः स्नात्वा सुपूजितः ॥
शान्तिकं कारयेत् कर्म्म बलिञ्चापि प्रयोजयेत् ।
ग्रहदोषेषु सर्व्वेषु शान्तिकर्म्माणि कारयेत् ॥
देवद्विजप्रव्रजितगुरुवृद्धान् यतीनपि ।
तोषयेद्भोजनैर्दानैर्वस्त्रगोकाञ्चनादिभिः ॥
रात्रौ शालासमीपे तु बलिं दद्यात् चतुर्द्दिशम् ।
मत्स्यमांसैश्च पक्वान्नैः कृशरैः पायसादिभिः ॥
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ।
नीराजनविधिं कृत्वा नयेदश्वान् पृथक् पृथक् ॥”
इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे ग्रहगृहीतचिकित्सिते सप्तपञ्चाशत्तमोऽध्यायः ॥)

घोटिका, स्त्री, (घोटते परिवर्त्तते कच्छादिगुणैरिति । घुट् + ण्वुल् । टापि अत इत्वम् ।) वृक्षभेदः । तत्पर्य्यायः । कर्कटी २ तुरङ्गी ३ चतुरङ्गा ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । मधुरत्वम् । वातश्लेष्मकण्डुकुष्ठाश्मरीघ्नत्वम् । इति राजनिर्घण्टः ॥

घोणा, स्त्री, (घोणते गृह्णाति वस्तुगन्धम् । घुण् + अच् टाप् च । घोणतेऽनया इति करणे घञ् वा ।) नासा । (यथा, महाभारते । १ । १५६ । ३२ ।
“दीर्घघोणं महोरस्कं विकटोद्दष्टपिङ्गकम् ॥”
“घोणायां द्वे ॥” इति सुश्रुते शारीरस्थाने पञ्चमाध्याये ॥) अश्वनासिका । तत्पर्य्यायः । प्रोथ २ । इत्यमरः । २ । ८ । ४८ ॥ (यथा, अश्ववैद्यके । २ । ७ ।
“मासाच्छिद्राक्षिमध्ये तु घोणाख्यः समुदाहृतः ।
घोणापार्श्वगतौ गण्डौ चौरिके च तत परम् ॥”)

घोणी, [न्] पुं, (प्रशस्ता घोणा अस्त्यस्य इति । “व्रीह्यादिभ्यश्च ।” ५ । २ । ११६ । इति इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

घोण्टा, स्त्री, (घुण्यते गृह्यते भक्षणायेति । घुण + बाहुलकात् टः ।) वृक्षविशेषः । शेयाकुल

इति भाषा ॥ तत्पर्य्यायः । वदरः २ गोप-
घोण्टा ३ शृगालकोलि. ४ कपिकोलिः ५ ।
इति काचित् रत्नमाला ॥ हस्तिकोलिः६ वदरी-
च्छदा ७ कर्कन्धुः । इति रत्नकोषः ॥ पूगवृक्षः ।
इति मेदिनी । टे । १४ ॥ (यथा, उत्तरस्थाने
त्रिंशेऽध्याये वाभटेनोक्तम् ।
"घोण्टाफलत्वग्लवणं सलाक्षं
वृकस्य पत्रं वनितापयश्च ।
स्नुगर्कदुग्धान्वित एष कल्को
वर्त्तीकृतो हन्त्यचिरेण नाडीम् ॥")
घोनसः, पु, (गोनसः + पृषोदरादित्वात् साधुः ।)
गोनसः । तिलित्ससर्पः । इति हेमचन्द्रः । ४ ।
३६२ ॥ (क्वचित् मूर्द्धन्यमध्योऽपि दृश्यते ॥)
घोरं, क्ली, (हन्यते वध्यतेऽनेनेति । हन + "हन्ते
रच् घुर् च ।" उणा । ५ । ६४ । इति अच्
धातोर्घुरादेशश्च ।) विषम् । इति राजनिर्घण्टः ॥
घोरः, पु, (घोरयति भयानकरसनिमित्तीभव-
तीति । घुर + अच् । यद्वा, हन्ति विनाशयति
रुद्ररूपेण इति । हन वधे + "हन्तेरच् घुर्
च ।" उणां । ५ । ६४ । इति अच् धातोर्घुरा-
देशश्च ।) शिवः । भयानके त्रि । इति हेम-
चन्द्रः ॥ (यथा, मनुः । १२ । ५४ । [च्चयात् ।
"बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत्-
संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥")
घोरदर्शनः, पु स्त्री, (घोरं भयानकं दर्शनं यस्य ।)
उलूकः । इति राजनिर्घण्टः ॥ भयानकरूपे
त्रि ॥ (यथा, रामायणे । १ । १ । ५५ ।
"मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥")
घोरपुष्पं, क्ली, कांस्यम् । इति राजनिर्घण्टः ॥
घोरपुष्पमपि पाठः ॥
घोररासनः, पु, (घोरं भयानकं रासनं शब्दो
यस्य ।) शृगालः । इति शब्दरत्नावली ॥
घोररासी, [न्] पुं, (घोरं यथा तथा रसति शब्दं
करोतीति । रस शब्दे + णिनिः ।) शृगालः ।
इति हेमचन्द्रः । ४ । ३५६ ॥
घोरा, स्त्री, (घोरति भयानकरसनिमित्तीभव-
तीति । घुर + अच् + टाप् च ।) रात्रिः । इति
त्रिकाण्डशेषः ॥ देवदाली लता । इति राज-
निर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे ।२९।५५।
"घण्टारवप्रिया घोराऽघौघविध्वंसकारिणी ॥"
रविसंक्रान्तिविशेषः । इति ज्योतिषम् ॥ यथा,
तिथितत्त्वे रविसंक्रान्तिप्रकरणे ।
"मन्दा मन्दाकिनी ध्वांक्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ।॥
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वांक्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥")
भयानका ॥ (यथा, कालीध्याने ।
"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ॥")
घोलं, क्ली, (घुण्यते आलोड्यते यत् । घुट + अच् ।
पृषोदरादित्वात् साधुः ।) ससरं निर्जलं मथितं
दधि । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"यत्तु सस्नेहमजलं मथितं घोलमुच्यते ॥")
तत्पर्य्यायः । दण्डाहतम् २ कालसेयम् ३ अरि-
ष्टम् ४ गोरसः ५ घलम् ६ मलिनम् ७
केवलम् ८ भग्नसन्धिकम् ९ । तस्य भेदा. ।
"तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बुनिर्जलम् ।
ससारं यद्भवेत्तक्रं कट्वरं तत् प्रकीर्त्तितम् ॥"
इति शब्दचन्द्रिका ॥
अस्य विशेषाः तक्रशब्दे द्रष्टव्याः ॥
घोली, स्त्री, पत्रशाकविशेषः । तत्पर्य्यायः । घोलिका
२ घोलिः ३ कलम्बुः ४ क्षुद्रकालुका ५ । क्षेत्र-
जाताया अस्या गुणाः । लवणत्वम् । रुचिकारि-
त्वम् । अम्लत्वम् । वातकफनाशित्वञ्च ॥ आराम-
घोलिकागुणाः । अम्लत्वम् । रूक्षत्वम् । रुच्यत्वम् ।
वायुनाशित्वम् । पित्तश्लेष्मकारित्वञ्च । सूक्ष्मायाः
जीर्णज्वरनाशित्वम् । इति राजनिर्घण्टः ॥
घोषं, क्ली, (घोषति शब्दायते इति । घुष विशब्दने
+ अच् ।) कांस्यम् । इति राजनिर्घण्टः ॥
घोषः, पु, (घोषन्ति शब्दायन्ते गावो यस्मिन् ।
घुषिर् विशब्दने + "हलश्च ।" ३ । ३ । १२१ ।
इति घञ् ।) आभीरपल्ली । (यथा, रघुः ।१।४५।
"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥"
घोषति शब्दायते इति । घुष + कर्त्तरि घञ् ।)
गोपालः । (घुष + भावे घञ् ।) ध्वनिः ।
(यथा मनु । ७ । २२५ ।
"तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥")
घोषकलता । कांस्यम् । मेघशब्दः । इति
मेदिनी । षे । ११ ॥ मशकः । इति त्रिकाण्ड-
शेषः ॥ (वर्णोच्चारणबाह्यप्रयत्नविशेषः । यदुक्तं
शिक्षायाम् । २० ।
"संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्व्वे अघोषा विवृताः स्मृताः ॥")
कायस्थादीनां पद्धतिविशेषः । (यथा, कुलदीपि-
कायाम् ।
"वसुवंशे च मुख्यौ द्वौ नाम्ना लक्षणपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाकृती ॥")
घोषकः, पु, (घोष एव । घोष + संज्ञायां कन् ।)
घोषालता । तत्पर्य्यायः । धामार्गवः २ । इत्य-
मरः । २ । ४ । ११७ ॥ घोषकाकृतिः ३ आदानी
४ देवदाली ५ तुरङ्गकः ६ घोषः ७ घोषालता
८ । इति शब्दरत्नावली ॥ कोषकालः ९ । इति
जटाधरः ॥ महांसेत् हस्तिघोषातकी ॥ * ॥
पीतघोषायाः पर्य्यायः । धामार्गवः १ पीत-
घोषा २ राजघोषातकी ३ कर्कोटकी ४ महा-
जाली ५ चूर्ह ६ कोषफला ७ कोषातकी ८ ।
इति च जटाधरः ॥ * ॥ श्वेतघोषायाः पर्य्यायः ।
घोषातकी १ मृदङ्गी २ जालिनी ३ कृतवेधक
४ श्वेतपुष्पा ५ व्याकृतिच्छत्रा ६ ज्योत्स्ना ७
इति रत्नमाला ॥
घोषकाकृतिः पु, (घोषकस्य घोषलताया आकृति-
रिवाकृतिर्यस्य ।) घोषकः । इति रत्नमाला ॥
घोषणा, स्त्री, (घुषिर् विशब्दने + "ण्यासश्रन्थो
युच् ।" ३ । ३ । १०७ । इति युच् ।) उच्चैः-
शब्दः । लोकविज्ञापनायोच्चैःशब्दितम् । (यथा,
कथासरित्सागरे । २४ । ५० ।
"गच्छ भ्रमय कृत्स्नेऽत्र पुरे पटहघोषणाम् ॥")
तत्पर्य्यायः । उच्चैर्घुष्टम् २ । इत्यमरः ।१।६।१२॥
निघुष्टम् ३ घुष्टघोषणम् ४ । इति शब्दरत्ना-
वली ॥
घोषयित्नुः, पु, (घोषयतीति । घुष + णिच् + बाहु-
लकात् इत्नुच् ।) ब्राह्मणः । कोकिलः । वन्दी ।
इति शब्दरत्नावली ॥
घोषवती, स्त्री, (घोषो विद्यतेऽस्याः । घोष +
मतुप् मस्य वः । स्त्रियां ङीप् ।) वीणा । इति
हेमचन्द्रः ॥ (यथा, कथासरित्सागरे ।११।३।
"स बभूव शनै राजा सुखेष्वेकान्ततत्परः ।
सदा सिषेवे मृगयां वीणां घोषवतीञ्च ताम् ।
दत्ता वासुकिना पूर्व्वं नप्त्रे दिनमवादयत् ॥"
तथाच तत्रैव । १२ । ३२ ।
"अङ्के घोषवती तस्य कण्ठे गीतश्रुतिस्तथा ॥")
शब्दविशिष्टे त्रि ॥ (यथा, महाभारते । १ ।
२५ । ११ ।
"त्वं वज्रमतुलं घोरं घोषवांस्त्वं वलाहकः ॥")
घोषा, स्त्री, (घोष्यन्ते मधुकरी यया । घुष +
णिच् + घञ् ।) मधुरिकौषधिः । मौरी इति
भाषा । इति मेदिनी ॥ (यथा, गारुडे
१६ अध्याये ।
"घोषाफलं सैन्धवञ्च तक्रिप्राशं पतेत्तथा ॥")
कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (गङ्गा ।
यथा, काशीखण्डे । २९ । ५५ ।
"घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥"
गायत्रीरूपा भगवती । यथा, देवीभागवते ।१२ ।
६ । ४४ ।
"घृणिमन्त्रमयी घोषा घनसम्पातदायिनी ॥")
घोषातकी, स्त्री, श्वेतघोषा । इति रत्नमाला ॥
(पर्य्यायोऽस्या यथा वैद्यकरत्नमालायाम् ।
"घोषातकी मृदङ्गी स्याज्जालिनी कृतवेधनः ।
श्वेतपुष्पा कृतिच्छत्रा ज्योत्स्नाकोषातकी
क्वचित् ॥")
घ्रा, गन्धोपादाने । इति कविकल्पद्रुमः ॥ (भ्वा-
पर-सक-अनिट् ।) जिघ्रति पुष्पं लोकः । इति
दुर्गादासः ॥
घ्राणं, क्ली, (जिघ्रत्यनेनेति । घ्रा + करणे ल्युट् ।
यद्वा, घ्रा + क्तः "नुदविदोन्दत्राघ्रेति ।" ८ । २ ।
५६ । इति निष्ठातस्य नो वा ।) नासिका । इत्य-
मरः । २ । ६ । ८९ ॥ (यथा रघुः । १६ । ११ ।
"घ्राणकान्तमधुगन्धकर्षिणी.
पानभूमिरचना प्रियासखः ॥")
न्यायमते घ्राणेन्द्रियग्राह्यगन्धत्वादि । (घ्रा +
भावे ल्युट् ।) आघ्राणम् । यथा, देवीभागवते ।
१ । १४ । २४ ।
"आलिलिङ्ग मुहुर्घ्राणं मूर्द्ध्नि तस्य चकार ह ॥")
घ्राते त्रि । इति मेदिनी । णे । ११ ॥

घ्राणतर्पणः, पुं, (घ्राणमिन्द्रियविशेषं तर्पयतीति । तृप् + णिच् + ल्युः ।) सुगन्धिः । इत्यमरः । २।५।११ ॥ (यथा, रामायणे । २ । ९४ । १४ ।
"घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत् ॥")

घ्राणदुःखदा, स्त्री, (घ्राणस्य दुःखं ददातीति । दा + कः । स्त्रियां टाप् ।) छिक्कनी । इति भावप्रकाशः ॥

घ्रातः, त्रि, (घ्रा + क्तः । "नुदविदेति ।" ८ । २ । ५६ । इति पाक्षिको नत्वाभावः ।) गृहीतगन्धपुष्पादिः । घ्राण लओया इति शोँका इति च भाषा । तत्पर्य्यायः । घ्राणः २ । इत्यमरः । ३ । १ । ९० ॥ शिङ्घितः ३ । इति जटाधरशब्दरत्नावल्यौ ॥ (यथा, मनुः । ५ । १२५ ।
"पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् ।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति ॥")

घ्रातिः, स्त्री, (जिघ्रत्यनया । घ्रा + करणे क्तिन् ।) नासिका । इति शब्दचन्द्रिका ॥ (भावे क्तिन् । आघ्राणम् । यथा, मनुः । ११ । ६७ ।
"ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः ॥")

ङ

ङ, ङकारः । स तु व्यञ्जनपञ्चमवर्णः । अस्योच्चारणस्थानं सनासिककण्ठः । इति व्याकरणम् ॥ ("जिह्वामूले तु कुः प्रोक्तः ।" इति ।
"अनुस्वारयमानाञ्च नासिकास्थानमुच्यते ॥"
इति च शिक्षोक्तेस्तथात्वम् ॥)
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"ङकारं परमेशानि । स्वयं परमकुण्डली ।
सर्व्वदेवमयं वर्णं त्रिगुणं लोललोचने ! ॥
पञ्चप्राणमयं वर्णं ङकारं प्रणमाम्यहम् ॥"
अपि च ।
"ऊर्द्ध्वाधःक्रमतो रेखा किञ्चिदाकुञ्चिता ततः ।
अधोगता कुण्डली तु मात्रा शक्तिस्वरूपिणी ॥
रेखामध्येषु मन्त्रेशविष्णवः सन्ति देवताः ॥
ध्यानं यथा, वर्णोद्धारतन्त्रे ।
"धूम्रवर्णां महाघोरां ललज्जिह्वां चतुर्भुजाम् ।
पीताम्बरपरीधानां साधकाभीष्टसिद्धिदाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"

तस्य नामानि यथा,—
"ङः शङ्खी भैरवश्चण्डो बिन्दूत्तंसः शिशुप्रियः ।
एकरुद्रो दक्षनखः खर्परो विषयस्पृहा ॥
कान्तिः श्वेताङ्गयो घोरो द्विजात्मा ज्वालिनी वियत् ।
मन्त्रशक्तिश्च मदनो विघ्नेशी चात्मनायकः ॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यतिः ।
शिवयोषा नीलकण्ठः कामेशी च मयासुकौ ॥"
इति नानातन्त्राणि ।
(मातृकान्यासे अस्य दक्षिणकराङ्गुलाग्रेषु न्यस्यता ॥)

ङः, पुं, (ङूयते यस्य इन्द्रियैरिति । ङु + बाहुलकात् डः ।) विषयः । विषयस्पृहा । इति मेदिनी । ङे । १ ॥ भैरवः । इत्येकाक्षरकोषः ॥ (यथा, स्तुतिपञ्चाशत् ।
"ङवन्दिते ! ङलिखिते ! ङकारवर्णरूपिणि ! ॥")

ङु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-अनिट ।) ङ, ङवते । इति दुर्गादासः ॥

च

च, चकारः । स तु व्यञ्जनषष्ठवर्णः । (द्वितीयवर्गस्याद्यवर्णश्च ।) अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "इचुयशाना तालु ।" इति । तथा च शिक्षायाम् । "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥") वङ्गाक्षरेरस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"चवर्णं शृणु सुश्रोणि । चतुर्वर्गप्रदायकम् ।
कुण्डलीसहितं देवि । स्वयं परमकुण्डली ॥
सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा ।
पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा ॥
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये । ॥"

अपि च ।

"वामाङ्कवर्त्तुलाकार ऊर्द्धाधः क्रमतो गतः ।
रेखात्रयेषु चन्द्रार्कवह्नयस्तिष्ठन्ति नित्यशः ।
शक्तिर्मात्रा तु विज्ञेया ध्यानमस्य प्रचक्ष्यते ॥"

तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे

"तुषारकुन्दपुष्पाभां नानालङ्कारभूषिताम् ।
सदा षोडशवर्षीयां वराभयकरां पराम् ॥
शुक्लवस्त्रावृतकटिं शुक्लवस्त्रोत्तरीयिणीम् ।
वरदां शोभनां रम्यामष्टबाहुसमन्विताम् ॥
एवं ध्यात्वा चकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

तस्य नामानि यथा, नानातन्त्रेषु ।

"चः पुष्करो द्वली वाणी चालशक्तिः सुदर्शनः ।
चर्म्मसुण्डधरो भूत्वा महिषाचारसञ्चिनी ॥
एकरूपो रुचिः कूर्म्मश्चामुण्डा दीर्घवालुकः ।
वामबाहुर्म्मूलमाया चतुर्मूर्त्तिस्वरूपिणी ॥
दयितश्च द्विनेत्रश्च लक्ष्मीश्चित्तयलोचनः ।
चन्दनं चन्द्रमा देवश्चेतनो टङ्किको बुधः ॥
देवी केटसखेच्छात्मा कौमारी पूर्व्वफाल्गुनी ।
अनङ्गमेखला वायुर्म्मेदिनी च स्मलावती ॥"

(मातृकान्यासे वामबाहुमूले एवास्य न्यस्यता ॥)

च, व्य (चयति चिनोतीति वा । चय शब्दे चिञ्च चित्यां वा+"अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति ड ।) अन्वाचयः । यत्र एकस्य प्राधान्येनापरस्य गौणत्वेनाख्यान सोऽन्वाचयः । यथा । भो वटो । भिक्षामट गाञ्चानय । भिक्षाटनमत्र प्रधानं तत कुर्व्वाणो यदि गां पश्यसि तदा तामप्यानयेति नो चेत् भिक्षामेवाटेति । समाहारस्तिरोहितावयवभेदः इतरेतर उद्भिक्तावयवभेदः । अतएव चार्थे द्वन्द्व इति सूत्र विधाय चार्थोऽत्र समाहार इतरेतरश्चेति व्याख्याय समाहारे अनभिव्यक्तावयवत्वात् एकवचनम् । इतरतरयोगे संहन्यमानप्रधानत्वात् द्विबहुवचनम् । यथा । "पाणिपादं अश्ववलीवर्द्दे ब्रह्मक्षत्रियविट्शूद्राः । प्लक्षन्यग्रोधाविति परेरुक्तम् । समुच्चितिः समुच्चयः प्राधान्येन क्वचित् क्रियाविषयेऽनेकस्य चीयमानता । यथा । धवाश्च खदिरांश्च छिन्धि । इति भरतः ॥ समाहारः । अन्योन्यार्थः । समुच्चय । (यथा, मनुः ।१२।८८। "इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्त्यते ।") पक्षान्तरम् । (यथा, हितोपदेशे ।

"मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"

तथा च शकुन्तलायां १ मे अङ्के ।

"शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥")

पादपूरणम् । (यथा, रामायणे । १ ।२०।१६ ।

"तेन सञ्चोदितौ तौ तु राक्षसौ च महाबलौ ।
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥")

अवधारणम् । इति मेदिनी । चे । १२ ॥ हेतुः । इति त्रिकाण्डशेषः ॥

चः, पुं, (चयति शब्दायते इति । चय शब्दे+"अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) चण्डेशः । (चिनोति स्वाङ्गानि सङ्कोचयतीति । चि+डः ।) कच्छपः । (चीयते उपचीयते क्रमशः कलाभिः प्रतिपदादिमारभ्येत्यर्थः ।) चन्द्रः । (चिनोति सञ्चिनोति परधनानि इति ।) चौरः । इति मेदिनी ॥ चे । १ ॥ निर्व्वीजे दुर्जने श्व त्रि । इति शब्दरत्नावली ॥

चक, इ भ्रान्तौ । सौत्रो धातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) इ, चङ्कुरः रथे । इति दुर्गादासः ॥

चक ञ ङ म प्रतिघाते । तृप्तौ । इति कविकल्पद्रुमः ॥) भ्वा-उभ-आत्म-च-सक-अकश्च-सेट् ।) ञ, चकति चकते खलः साधुम् । ङ, चकते जनस्तृप्यतीत्यर्थः । म, चकयति । इति दुर्गादासः ॥

चकास, ऋ च लु दीप्तौ । इति कविकल्पद्रुमः ॥ (अदा-परं-अकं-सेट् ।) ऋ, अचीचकासत् अचचकासत् । अनेकस्वरात् सन्वद्भावविकल्पः । च, चकासति । लु, चकास्ति । इति दुर्गादासः ॥

चकितं, त्रि, (चक भ्रान्तौ+क्तः ।) भीतम् । इति त्रिकाण्डशेषः ॥ (यथा, कलाविलासे ।२।८ ।

"दत्त्वा दिशि दिशि दृष्टिं याचकचकितोऽवगुण्ठनं कृत्वा ।
चौर इव कुटिलचारी पलायते विकटरथ्याभिः ॥"

क्ली, भावे क्तः । भयम् । नायिकालङ्कारविशेषः । तल्लक्षणं यदुक्तं साहित्यदर्पणे । ३ । १२१ ।

"कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः ॥")
"प्रियाग्रे चकितं भीतेरस्थानेऽपि भयं महत् ।" इत्युज्ज्वलनीलमणिः ॥

(स्त्री, छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।

"भात् समतनगैरष्टच्छेदे स्यादिह चकिता ॥")

चकोरः, पुं स्त्री, (चकते चन्द्रकिरणेन तृप्यतीति । चक तृप्तौ+"कठिचकिभ्यामोरन् ।" उणां । १ । ६४ । इति ओरन् ।) पक्षिविशेषः । (यथा, भागवते । ३ । २१ । ४३ ।

"सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥")

तत्पर्य्यायः । चन्द्रिकापायी २ कौमुदीजीवनः ३ अस्य मांसगुणाः । यथा, राजनिर्घण्टे ।

"चटकं शीतलं रुच्यं वृष्यं कापिञ्जलामिषम् ।
तद्वच्चकोरजं मांसं वृष्यञ्च बलपुष्टिदम् ॥"
("वातश्लेष्माधिको ज्ञेयः शीतलः शुक्रवर्द्धनः ।
अश्मरीं हन्ति विशदो बलकृन्मांसलक्षणः ॥
चकोरः शुकशारी च समदोषा गुणागुणे । ॥"

इति हारीते प्रथमस्थाने एकादशेऽध्याये ॥
अस्य डिम्बगुणा यथा, चरके सूत्रस्थाने२७अः ।

"धार्त्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि ।
चटकानाञ्च यानि स्युरण्डानि च हितानि च ॥
रेतःक्षीणेषु कासेषु हृद्रोगेषु क्षतेषु च ।
मधुराण्यविपाकीनि सद्यो बलकराणि च ॥")

चकोरकः, पुं स्त्री, (चकोर एव । चकोर+स्वार्थे कन् ।) चकोरपक्षी । इत्यमरः ।२।५।३५॥

चक्क, क व्यथे । इति कविकल्पद्रुमः ॥ (चुरा-पर-सकं-सेट् ।) कोपधः । आद्यस्वरमध्यः । व्यथिः पीडनम् । क, चक्कयति शत्रुं शूरः । इति दुर्गादासः ॥

चक्रं, क्ली, (क्रियतेऽनेनेति । कृ+घञर्थे कः । कृञादीनामिति द्वित्वञ्च ।) व्रजः । समूहः । सैन्यम् । रथाङ्गम् । चाका इति भाषा ॥ (यथा, याज्ञवल्क्ये । १ । ३५१ ।

"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकार्य्येण विना दैवं न सिध्यति ॥")

राष्ट्रम् । दम्भविशेषः । कुम्भकारोपकरणम् । कुमारेर चाक इति भाषा ॥ (यथा, याज्ञवल्क्ये । ३ । १४६ ।

"स्वदण्डचक्रसंयोगात् कुम्भकारो यथा घटम् ।
करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥")

अस्त्रविशेषः । (यथा, रघुः । ७ । ४६ ।

"आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः ॥")

जलावर्त्तः । इति मेदिनी ॥ भगवतः सुदर्शनचक्रम् । (यथा, महाभारते । १ । १९ । ६ ।

"ततो भगवता तस्य शिरश्छिन्नमलङ्कृतम् ।
चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा ॥")

तस्य भगवन्मन्दिरे स्थापनविधिर्यथा, श्रीभागवते । ३ । १ । २३ ।

"अन्यानि चेह द्विजदेवदेवैः
कृतानि नानायतनानि विष्णोः ।
प्रत्यङ्गमुख्याङ्कितमन्दिराणि
यद्दर्शनात् कृष्णमनुस्मरन्ति ॥"

"द्विजदेवैः ऋषिभिर्देवैश्च कृतानि अङ्गमङ्गं प्रति वर्त्तन्ते इति प्रत्यङ्गान्यायुधानि तेषु मुख्यं चक्रं तेनाङ्कितानि स्वर्णन्यस्तहेमकुम्भेषु चिह्नितानि मन्दिराणि येषु तानि नानाविधानि विष्णोरायतनानि क्षेत्राणि तीर्थानि च आससेवे । येषां चक्राङ्कितमन्दिरवतां दर्शनात् श्रीकृष्णस्मरणं भवति ।" इति तट्टीकायां श्रीधरस्वामी ॥

अथ चक्रलक्षणम् ।

"द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
चक्रं स्याद्दक्षिणावर्त्तः शङ्खश्च श्रीहरेः स्मृतः ॥"

इति श्रीहरिभक्तिविलासे ५ विलासः ॥

ग्रामजालम्। इति त्रिकाण्डशेषः॥ तगरपुष्पम्। इति राजनिर्घण्टः॥ व्यूहविशेषः। (एतस्य लक्षणं यथा,—
"अष्टारं वर्त्तुलाकारं व्यूहचक्रं त्रिनाडिकम्।
दण्डचतुष्टयं बाह्ये कर्त्तव्यञ्च चतुर्द्दिशम्॥
पूर्व्वदण्डाग्रतोऽन्यस्य दिनभाद्यं भमण्डलम्।
प्रवेशे निर्गमे चैव त्रीणि त्रीणि प्रदक्षिणे॥
शशिसप्ताष्टकं मध्ये तद्बाह्ये भानुसप्तकम्।
तृतीये राहुमन्त्रस्य केतुर्द्दण्डचतुष्टये॥
चन्द्रर्क्षे विजयो लाभः सूर्य्यर्क्षे मध्यमं फलम्।
राहुधिष्ण्याष्टके विघ्नं मृत्युः केतुचतुष्टये॥
एवमुक्तं चतुःस्थाने यद्दिने यस्य नामभम्।
तद्दिने तत् फलं तस्य सर्व्वकार्य्येषु सर्व्वदा॥"
एतच्चक्रन्तु भगवता द्रोणाचार्य्येण अभिमन्युवधायैवाभिकल्पितम्। तत्र व्यूहमध्ये निर्म्माणप्रणाल्या कः कुत्र आसीदिति प्रदर्शयितुमाह।
"चक्रव्यूहो महाराज! आचार्य्येणाभिकल्पितः।
तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः॥
अरस्थानेषु विन्यस्ता कुमाराः सूर्य्यवर्च्चसः।
सङ्घातो राजपुत्त्राणां सर्व्वेषामभवत्तदा॥
कृताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः।
रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥
सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः।
चन्दनागुरुदिग्धाङ्गाः स्रग्विणः सूक्ष्मवाससः॥
सहिताः पर्य्यधावन्त कार्ष्णिं प्रति युयुत्सवः।
तेषां दशसहस्राणि बभूवुर्दृढधन्विनाम्॥
पौत्त्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम्।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥
अन्योन्यं स्पर्द्धमानाश्चाप्यन्योन्यस्य हिते रताः॥
दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः।
कर्णदुःशासनकृपैर्वृतो राजा महारथैः॥
देवराजोपमः श्रीमान् श्वेतच्छत्त्राभिसंवृतः।
चामरव्यजनाक्षेपैरुदयन्निव भास्करः॥
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः।
सिन्धुराजस्तथाऽतिष्ठत् श्रीमान् मेरुरिवाचलः॥
सिन्धुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः।
सुतास्तव महाराज! त्रिंशत्त्रिदशसन्निभाः॥
गान्धारराजः कितवः शल्यो भूरिश्रवास्तथा।
पार्श्वतः सिन्धुराजस्य व्यराजन्त महारथाः॥
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम्।
तावकानां परेषाञ्च मृत्युं कृत्वा निवर्त्तनम्॥"
इति महाभारते। ७। ३२। १३—२४॥) तैलयन्त्रम्। इत्यमरटीकायां स्वामी॥ (यथा, आर्य्यासप्तशत्याम्। ५६२।
"स्नेहमयान् पीडयतः किं चक्रेणापि तैल-[कारस्य॥"
कालज्ञापकयन्त्रविशेषः। यथा, गोलाध्याये।
"चक्रं चक्रांशाङ्कं परिधौ सच्छिद्रकुलादिकाधारम्।
धात्री त्रिभं आधारात् कल्प्या भार्द्धेऽत्र खार्द्धञ्च॥
तन्मध्ये सूक्ष्माक्षं दिग्भार्काभिमुखनेमिकं धार्य्यम्।
भूमेरुन्नतभागास्तत्राक्षच्छायया भुक्ताः॥ [लम्।
तत्खार्द्धान्तश्च नता उन्नतनवसङ्गुणीकृत द्युद-
द्युदलोन्नतांशभक्ता नाड्यः स्थूलाः परैः प्रोक्ताः॥"
धातुमयं दारुमयं वा समं चक्रं कृत्वा तन्नेम्यां कुलादिराधारः शिथिलः कार्य्यः। चक्रमध्ये सूक्ष्मं सुषिरमाधारात् सुषिरोपगामिनी लम्बवदूर्द्धरेखा कार्य्या। तन्मध्यतोऽन्या तिर्य्यक्रेखा चात्र कार्य्या। तच्चक्रं परिधौ भगणांशैरङ्कयित्वाधारात् त्रिभ इति नवतिभागान्तरे तिर्य्यग्रेखा तत्परिधिसम्पाते धात्री क्षितिः कल्प्या। भार्द्धेऽन्तरे ऊर्द्धरेखानेमिसम्पाते खार्द्धं कल्प्यम्। सुषिरे सूक्ष्मा शलाका प्रदातव्या। सा चाक्षसंज्ञा। तच्चक्रमर्काभिमुखनेमिकञ्च यथा भवति तथाधारे धार्य्यम्। तथा धृतेऽक्षस्य छाया परिधौ यत्र लगति तत्कुजचिह्नयोरन्तरे ये अंशास्ते रवेरुन्नतांशाः। ये छायाखार्द्धयोरन्तरे ते नतांशा ज्ञेयाः। एवमत्र नतोन्नतांशज्ञानमेव भवति। अतोऽन्यैर्घटिका आनीताः। तद्यथा, तस्मिन् दिने गणितेन मध्यन्दिनोन्नतांशान् दिनार्द्धमानञ्च ज्ञात्वानुपातः कृतः। यदि मध्यन्दिनोन्नतांशैर्दिनार्द्धनाड्यो लभ्यन्ते तदेभिः किमित्येवं स्थूला घटिकाः स्युः॥ अथ वेधेन ग्रहज्ञानमाह।
"मैत्रर्क्षपुष्यान्तिमवारुणाना-
मृक्षद्वयं नेमिगतं यथा स्यात्।
दूरेऽन्तरेऽल्पेषु भखेचरौ वा
तथात्र यन्त्रं सुधिया प्रधार्य्यम्॥
नेमिस्थदृष्ट्याक्षगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्य च योगताराम्।
नेम्यङ्कयोरक्षयुजोस्तु मध्ये
येंऽशाः स्थिता भध्रुवको युतस्ते॥
प्रत्यक्स्थिते भेऽथ पुरःस्थिते ते
हीनो ध्रुवः स्यात् खचरस्य सम्यक्॥"
तत्र यन्त्रगणे नेम्यां दृष्टिं कृत्वोर्द्धनेम्यासक्तर्क्षाणां मध्ये भद्वितयं युगपन्नेमिगतं यथा स्यात् तथा यन्त्रं स्थिरं कृत्वा नेम्या धिष्ण्ययोरेकतरस्थानमङ्कयेत्। ततोऽग्रे पृष्ठतो वा दृष्टिं चालयित्वा ग्रहं विध्येत्। ग्रहः प्रायोऽक्षगतो दृश्यते। अथाक्षमूलस्य ग्रहस्य चान्तरं शरो ग्रहावधिः। अक्षमूलं नेम्यां यत्र लग्नं दृश्यते तत् स्थानमप्यङ्क्यम्। अथ भग्रहाङ्कयोर्मध्ये येंऽशास्तैर्भध्रुवो युतः स्फुटग्रहो भवति यदा ग्रहात् पश्चिमस्थं नक्षत्रम्। यदा पूर्व्वस्थं नक्षत्रं तदा भध्रुवो हीनः स्फुटग्रहो भवति। अथवाल्पशरं नक्षत्रं रोहिण्याद्यं ततो दूरेऽन्तरे यदा ग्रहस्तदा तावेव विद्ध्वा प्रोक्तवद्ग्रहज्ञानम्। इति चक्रयन्त्रम्॥ शरीरस्थषट्चक्राणि यथा। मूलाधारः १ स्वाधिष्ठानम् २ मणिपूरम् ३ अनाहतम् ४ विशुद्धम् ५ आज्ञाख्यम् ६। तद्यथा—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तदूर्द्धे कामबीजन्तु कलाशान्तीन्दुनादकम्।
तदूर्द्धे तु शिखाकारा कुण्डली ब्रह्मविग्रहा॥
तद्बाह्ये हेमवर्णाभं वसवर्णं चतुर्द्दलम्।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत्॥
तदूर्द्धेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम्।
वादिलान्तषड्वर्णेन युक्ताधिष्ठानसंज्ञकम्॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥
तदूर्द्धे नाभिदेशे तु मणिपूरं महाप्रभम्।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः॥
मणिवद्भिन्नतत्पद्मं मणिपूरं तथोच्यते।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्॥
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम्।
तदूर्द्धेऽनाहतं पद्ममुद्यदादित्यसन्निभम्॥
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम्।
तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम्॥
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते।
तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम्॥
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम्।
तदूर्द्धन्तु विशुद्धाख्यं दलषोडशपङ्कजम्॥
स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महाप्रभम्।
विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकनात्॥
विशुद्धं पद्ममाख्यातमाकाशाख्यं महाद्भुतम्।
आज्ञाचक्रं तदूर्द्धे तु आत्मनाधिष्ठितं परम्॥
आज्ञासङ्क्रमणं तत्र गुरोराज्ञेति कीर्त्तितम्।
कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः॥
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत!॥"
मन्त्रोद्धारार्थषट्चक्राणि यथा। कुलाकुलचक्रम् १ राशिचक्रम् २ नक्षत्रचक्रम् ३ अकथहचक्रम् ४ अकडमचक्रम् ५ ऋणिधनिचक्रम् ६। तद्यथा,—
"कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह।
वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात्॥
पञ्चह्रस्वाः पञ्चदीर्घा बिन्द्वन्ताः सन्धिसम्भवाः।
कादयः पञ्चशः य र ल व स हान्ताः प्रकीर्त्तिताः॥
तथा च।
अ आ ए क च ट त प य षाः मारुताः।
इ ई ऐ ख छ ठ थ फ र क्षाः आग्नेयाः।
उ ऊ ओ ग ज ड द ब लाः पार्थिवाः।
ऋ ॠ औ घ झ ढ ध भ व साः वारुणाः।
ऌ ॡ अं ङ ञ ण न म श हाः नाभसाः।
साधकस्याक्षरं पूर्व्वं मन्त्रस्यापि तदक्षरम्।
यद्येकभूतदैवत्यं जानीयात् स कुलं हि तत्॥
भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम्।
मारुतं पार्थिवानाञ्च शत्रुराग्नेयमम्भसाम्॥
नाभसं सर्व्वमित्रं स्याद्विरुद्धं नैव शीलयेत्॥"
अथ राशिचक्रम्।
"रेखाद्वयं पूर्व्वपरागतं स्यात्
तन्मध्यतो याम्यकुवेरभेदात्।
एकैकमीशाननिशाचरे तु
हुताशवाय्वोर्विलिखेत्ततोऽर्णान्॥
वेदाग्निवह्नियुगलश्रवणाग्निसङ्ख्यान्
पञ्चेषुवाणशरपञ्चचतुष्टयार्णान्।
मेषादितः प्रविलिखेत् सकलांस्तु वर्णान्
कन्यागतान् प्रविलिखेदथ शादिवर्णान्॥

तेन अ आ इ ई मेषः। उ ऊ ऋ वृषः। ॠ ऌ ॡ मिथुनम्। ए ऐ कर्कटः। ओ औ सिंहः। अं अः श ष स ह ल क्षाः कन्या। कवर्गस्तुला। चवर्गो वृश्चिकः। टवर्गो धनुः। तवर्गो मकरः। पवर्गः कुम्भः। यवर्गो मीनः। स्वराशीनामनुकूलं मन्त्रं भजेत्।
राशीनां शुद्धता ज्ञेया त्यजेत् शत्रु मृतिं व्ययम्।
स्वराशेर्मन्त्रराश्यन्तं गणनीयं विचक्षणैः॥
यदा तु स्वराशेरज्ञानं तदा साधकानामाद्याक्षरसम्बन्धिनं राशिं गृहीत्वा गणयेत्॥ * ॥

अथ नक्षत्रचक्रम्।

"अ आ अश्विनी देवगणः। इ भरणी मानुषः। ई उ ऊ कृत्तिका राक्षसः। ऋ ॠ ऌ ॡ रोहिणी मानुषः। ए मृगशिरो देवः। ऐ आर्द्रा मानुषः। ओ औ पुनर्व्वसुर्देवः। क पुष्यो देवः। ख ग अश्लेषा राक्षसः। घ ङ मघा राक्षसः। च पूर्व्वफल्गुनी मानुषः। छ ज उत्तरफल्गुनी मानुषः। झ ञ हस्ता देव। ट ठ चित्रा राक्षस.। ड स्वाती देवः। ढ ण विशाखा राक्षसः। त थ द अनुराधा देव.। ध ज्येष्ठा राक्षसः। न प फ मूलाराक्षसः। ब पूर्व्वाषाढ़ा मानुषः। भ उत्तराषाढ़ा मानुषः। म श्रवणा देवः। य र धनिष्ठा राक्षसः। ल शतभिषा राक्षस.। व श पूर्व्वभाद्रपदा मानुषः। ष स ह उत्तरभाद्रपदा मानुषः। अ अः ल क्ष रेवती देवः॥ तथा च।
"अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुन.।
वक्ष्यमाणविधानेन तन्मध्ये वर्णकान् लिखेत्॥
उत्तराद्दक्षिणाग्रान्तु रेखां कुर्य्याच्चतुष्टयीम्।
दश रेखाः पश्चिमाग्रा कर्त्तव्या वीरवन्दिते।॥
अकारादिचकारान्तान् द्विचन्द्रवह्निवेदकान्।
भूमीन्द्रनेत्रचन्द्रांश्च अश्लेषान्तं खगौ प्रिये।॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्दुनेत्राग्निचन्द्रकान्।
मघादिज्येष्ठपर्य्यन्त द्वितीय नवतारकम्॥
वह्निभूमीन्दुचन्द्रांश्च युगेन्दुनेत्रवह्निकान्।
वेदेन भेदिता वर्णा रेवत्यंशगताः क्रमात्॥
पूर्व्वोत्तरात्रयञ्चैव भरण्यार्द्रा च रोहिणी।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥
ज्येष्ठाशतभिषामूलाधनिष्ठाश्लेषकृत्तिकाः।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः।
अनुराधामृगशिरःश्रवणा देवतारकाः॥
स्वजातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु।
रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥
जन्म सम्पद्विपत् क्षेमः प्रत्यरिः साधको वधः।
मित्रं परममित्रञ्च जन्मादीनि पुनः पुन.॥"
अत्र त्रिपञ्चसप्तमानि वर्ज्जनीयानि नक्षत्राणि। साधकनक्षत्रादेव नक्षत्र गणनीयम्। स्वनक्षत्राज्ञाने स्वनामाद्यक्षरसम्बन्धिनक्षत्राद्गणनीयम्॥ * ॥

अथाकथहचक्रम्।

"चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम्।
पुनश्चतुष्कं तन्नापि लिखेद्धीमान् क्रमेण तु॥
इन्द्वग्निरुद्रनवनेत्रयुगार्कदिक्षु
ऋत्वष्टषोडशचतुर्द्दशभौतिकेषु।
पातालपञ्चदशवह्निहिमांशुकोष्ठे
वर्णान् लिखेत् लिपिभवान् क्रमशस्तु धीमान्॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम्।
चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम्॥
पुनः कोष्ठककोष्ठेषु सव्यतो नाम्न आदितः।
सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेया मनीषिभिः॥
सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धो ग्रहमात्रेण रिपुर्मूलं निकृन्तति॥"* ॥

अथाकडमचक्रम्।

"रेखाद्वयं पूर्व्वपरेण कुर्य्यात्
तन्मध्यतो याम्यकुवेरभेदात्।
महेश्वरश्चोऽधिपतिक्रमेण
तिर्य्यक् तथा वायुहुताशनेन॥
आकारादिहकारान्तान् क्लीववर्णान् लिखेत्ततः।
तथा ऋ ॠ वर्णद्वयं ऌ ॡ तद्धि क्लीव प्रचक्षते॥
एकैकक्रमतो लेख्यान् मेषादिषु वृषान्तकान्।
गणयेत् क्रमशो भद्रे नामादिवर्णकादिमान्॥
मेषादितश्च मीनान्तं गणयेत् क्रमश. सुधीः।
जपुः स्वनामतो मन्त्री यावन्मन्त्रादिमाक्षरम्॥
सिद्धसाध्यसुसिद्धारीन् पुन. सिद्धादयः पुनः।
नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके॥
सुसिद्धस्त्रिसप्तके रुद्रे वेदाष्टद्वादशे रिपुः।
एतत्ते कथितं देवि। अकडमादिकमुत्तमम्॥
ताराशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च।
राशिशुद्धिस्त्रैपुरे च गोपालेऽकडमः स्मृतः॥"

अथ ऋणिधनिचक्रम्।

"कोष्ठान्येकादशान्येव वेदेन पूरितानि च।
अकारादिहकारान्त लिखेत् कोष्ठेषु तत्त्ववित्॥
प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु।
द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः॥
शेषेष्वेकैकशो वर्णान् क्रमशस्तु लिखेत् सुधीः॥
द्वौ द्वौ स्वरौ पञ्चसु कोष्ठकेषु
शेषान् स्वरान् षट्सु षडेकमेकम्।
कादीन् हशेषान् विलिखेत्ततोऽर्णानेकैकमेकादशस्तु त्रिकेषु॥
षट्कालकालवियदग्निसमुद्रवेदखाकाशशून्यदहनाः खलु साध्यवर्णाः॥
युगदिपञ्चवियदम्बरयुक्शशाङ्कयोमाब्धिवेदशशिनः खलु साधकानाम्॥
नामाद्यभालादकठादुगणयुक्तशेषं
ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात्॥
मन्त्रो यद्यधिकाङ्कः स्यात् तदा मन्त्रं जपेत् सुधीः।
समेऽपि च जपेन्मन्त्र न जपेत्तु ऋणाधिके॥
शून्ये मृत्युं विजानीयात्तस्माच्छून्यं विवर्ज्जयेत्॥"
इति तन्त्रसारः॥ * ॥

कपोत्तरायणचक्रं यथा,—
"चक्र सारं विलिख्य यदपतिरयने संक्रमं यत् करोति
यस्मिन्नृक्षे तदृक्षं मरणभयकरं शूलमूलेऽपि दद्यात।
तत् पश्चाद्दारशूले विविधभयकरं शूलपार्श्वेऽर्थलाभः
सख्यं स्यात् शूलमध्ये भवति च नियतं वित्तवामक्रमेण॥"

केतुचक्रं यथा —
"कण्ठे हृदि त्रिभयुगे क्रतुमानलाभौ
षट्पृष्ठभं क्षयकरं धनदं करे त्रिः।
वामे चतुष्कं च रुजं पदयोस्तथाष्टौ
क्लेशो भयञ्च नितरामिह केतुचक्रम्॥"* ॥

अहिचक्रं यथा,—
"अथाहिचक्रं वक्ष्यामि विभ्रान्तद्रव्यशल्ययोः।
ऊर्द्ध्व रेखाष्टकं लेख्यं तिर्य्यक् च पञ्चरेखिकाः॥
स्थानद्वारमुख चक्रमष्टाविंशतिकोष्ठकम्।
तत्र पौष्णाश्वियाम्याग्नेयकृत्तिकामघभाग्यभम्॥
उत्तराफल्गुनी लेख्या पूर्व्वपङ्क्त्यां भसप्तकम्।
अहिर्बुध्न्योऽजपादर्क्षं शतभं ब्राह्मसर्पभम्॥
पुष्यं हस्तं समालेख्यं द्वितीयां पङ्क्तिमाश्विनम्।
अभिजिद्विष्णुवस्वृक्षं सौम्यं रौद्रं पुनर्व्वसुम्॥
चित्रभञ्च तृतीयायां पङ्क्तौ धिष्ण्यस्य सप्तकम्।
विश्वर्क्षं तोयभ मूलां ज्येष्ठामैत्रविशाखभम्॥
स्वाती पङ्क्तौ चतुर्थ्यान्तु कर्त्तव्यं पन्नगाकृति।
द्वारशाखे मघा याम्ये द्वारस्था कृत्तिका ततः॥
अश्वीशपूर्व्वाषाढ़ादित्रिकपञ्चचतुष्टयम्।
रेवती पूर्व्वभाद्रेन्दोर्भानि शेषाणि भास्वतः॥
उदयादिगता नाड्यो भघ्नाः षष्ट्याप्तशेषके।
दिनेन्दुभुक्तयुक्तोऽसौ भवेत्तत्कालचन्द्रमाः॥
चन्द्रवत्साधयेत् सूर्य्यं स्पष्टञ्चैतत्कालिकम्।
चन्द्र ऋक्षे यदार्केन्दू तदास्ति निश्चितं निधिः॥
भानु ऋक्षे स्थितौ तौ चेत्तदा शल्यं न संशयः।
स्वस्वभे द्वितयं ज्ञेयं नास्ति किञ्चिद्विपर्य्यये॥
स्थित न लभ्यते द्रव्यं चन्द्रे क्रूरग्रहान्विते।
पुष्टे चन्द्रे भवेन्मुद्रा क्षीणे चन्द्रेऽल्पको निधिः॥
हेमतारञ्च ताम्रारं रत्नं कांस्य तथा त्रपु।
नाग चन्द्रे विजानीयाद्भास्करादिग्रहे स्थिते॥
मिश्रैर्मिश्रं भवेद्द्रव्य शून्यं दृष्टिविवर्जिते॥
हेमतारञ्च ताम्रार पाषाणं मृन्मयायसम्।
सूर्य्यादिग्रहगे चन्द्रे द्रव्यभाक् प्रजायते॥
भुक्तराश्यंशमानेन भूमानं परिकल्पयेत्।
नीचे हिमं परे नीचे जलसंस्थो भवेन्निधिः॥
स्वोच्चस्थे तूच्चग द्रव्यं नवांशकक्रमेण च।
परमोच्चे भवेत्तुङ्गे भित्तिस्थस्पर्शसंक्रमे।
अधिष्ठित भवेद्द्रव्यं यत्र चन्द्रो ग्रहान्वित.॥"* ॥

कुलाकुलचक्रं यथा,—
"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्।
विषमाश्चाकुला: सर्व्वाः शेषाश्च तिथय. कुलाः॥
रविश्चन्द्रो गुरु. शौरिश्चत्वारोऽप्याकुला मताः।
भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः॥
वरुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्।
कुलानि समधिष्ण्यानि विषमाण्यकुलानि च॥
तिथौ वारे च नक्षत्रे अकुले वादिनो जयः।

कलाख्ये स्थायिनो नूनं सन्धिश्चैव कलाकुले ॥"

अथ कुम्भचक्रम्।

"कुम्भाकारं लिखेच्चक्रं तिर्य्यग्रेखाप्रभेदितम्।
क्रमादूर्द्ध्वमधो लेख्यमेकैकान्तरभं क्रमात् ॥
भादिभानि लिखेत्तत्र रिक्तं पूर्णं इति क्रमात्।
एवं राशिक्रमो लेख्यो रिक्तं पूर्णं इति द्विधा ॥
रिक्ते रिक्ता भवेद्यात्रा पूर्णे पूर्णा शुभावहा ॥"

अथ कोटचक्रम्।

"अथातः सम्प्रवक्ष्यामि कोटचक्रमिहाष्टधा।
स्रोकोऽरिं कुरुते यत्र भूरिसैन्यपराजयम् ॥
प्रथमो मृण्मयः कोटो द्वितीयो जलकोटकः।
तृतीयो ग्रामकोटश्च चतुर्थस्तत्र गह्वरः ॥
पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः।
सप्तमो वक्रभूमिष्ठो विषमाख्यस्तथाष्टमः ॥
मृण्मये साधयेत् खड्गि जलस्थे बन्धमोक्षणम् ॥
ग्रामदुर्गेऽग्निदाहश्च प्रवेशः गह्वरे तथा।
पर्व्वते स्थानभेदश्च भूतलं डामरे रणे ॥
वक्रस्थे कथियोगश्च विग्रहे स्थायियायिनौ।
अग्निदुर्गं कालकर्णं चक्रावर्त्तश्च टिङ्गनम् ॥
तुलावर्त्तश्च पद्माख्यो यन्त्रभेदश्च शाम्बरम्।
गतन्नामाष्टकं ज्ञेयं वर्गाष्टकक्रमेण च ॥
यस्य वर्गस्य ये भक्ष्या वर्ण्यास्तन्नामनागराः।
याजयेत् तेन वर्गेण तद्वर्गास्तस्य भङ्गदाः ॥
अ गरुड कः मार्ज्जारश्च सिंहश्च शुनीसुतः।
तः सर्पश्च पः व्याघ्रश्च यः गजः शः शशासुतः ॥
दुर्गवर्गस्य ये भक्ष्या वर्गनामस्थिता नराः।
तद्वर्गे ते रणे व्याख्या न कर्त्तव्या गडाधिपाः ॥
अवर्गात् पञ्चमे स्थाने खड्गिभङ्गश्च जायते।
अवर्गाद्यष्टकं ज्ञेयं पूर्व्वाद्यष्टदिशां क्रमात् ॥
कोटचक्रं लिखेदादौ चतुरस्रं त्रिनाडिकम्।
कृत्तिकादीनि धिष्ण्यानि साभिजिन्ति न्यसेद्बुध ॥
वह्निःकोटे तथा मध्ये कोटे मध्ये वह्निर्वह्निः।
प्रवेशो निर्गमस्तत्र ज्ञातव्यः स्वरवेदिभिः ॥
वह्निर्दर्शदशभान्यत्र प्राकारे तारकाष्टकम्।
दुर्गमध्ये तथा चाष्टौ मध्ये स्तम्भचतुष्टयम् ॥
कृत्तिकापुष्यसर्पेशः मघास्वातिविशाखभे।
अनुराधाभिजिद्धिष्ण्युर्धनिष्ठाश्वियमा वह्निः ॥
ब्राह्मा पुनर्व्वसुभाग्य चित्रा ज्येष्ठा तथोत्तराः।
शतभं रेवती चैव प्राकारे तारकाष्टकम् ॥
मृगरौद्रोत्तरा हस्तं मूलमाषाढ़पूर्व्वकम्।
पूर्व्वोत्तरा तथा भद्रा मध्ये भाष्टकं विदः ॥
पूर्व्वे रौद्रं यमे हस्तं पूर्व्वाषाढ़ा च वारुणे।
उत्तरे चोत्तरं भाद्रमेतत् स्तम्भचतुष्टयम् ॥
कृत्तिकाद्यं मघाद्यश्च मैत्राद्यं वासवादिकम्।
त्रीणि त्रीणि प्रवेशे च भानि द्वादश निर्गमे ॥
कृत्तिकादिरयं न्यासः सुबोधोऽयं प्रदर्शितः।
दुर्गभाद्गणनश्चात्र ग्रहैर्व्वाच्यं ततः फलम् ॥
चतुरस्रं तथा वृत्तं त्रिकोणं वृत्तदीर्घकम्।
अर्द्धचन्द्रं वर्त्तुलश्च गोस्तनं धनुराकृति ॥
चतुरस्रे यथा न्यासो भूमिभागक्रमेण च।
प्रवेशे निर्गमे स्तम्भे तथा वृत्तादिसप्तके ॥
दुर्गे भित्तिविभागेन दातव्यं धिष्ण्यमण्डलम्।
वाह्यभे मध्यभे चैव यत्रस्थाः क्रूरखेचराः ॥
तत्र स्थाने कृते यत्ने हन्तिदुर्गं ससैनिकम्।
ऊर्द्ध्वदृष्टी च भौमार्कौ केकरौ बुधभार्गवौ ॥
समदृष्टी च जीवेन्दू शनिराहू ह्यधोदृशौ।
नाडीत्रये वह्निर्मध्ये गर्भे नामादि लिख्यते ॥
कालपर्व्वीन्दशक्रेभ्यः पराक्रमविवक्षया।
यातुर्भे कालनाडीस्थे मृत्युर्मध्यपदे स्थिते ॥
चौर्य्यक्षयोपतापाश्च रौद्रनाड्या पुरग्रहः।
क्रूरा गर्भे पुरं घ्नन्ति प्राकारे खड्गिकारकाः ॥
वह्निःस्था वेष्टके सैन्ये भङ्गदा नात्र संशयः।
क्रूरा गर्भे शुभा वाह्ये गृह्यते निश्चितं पुरम् ॥
सौम्या मध्ये वह्निः क्रूरा असाध्यं दुर्गमुच्यते।
क्रूरचतुष्टयं मध्ये प्राकारे सौम्यखेचराः ॥
भेदाद्भङ्गो भवेद्दुर्गे विना युद्धेन गृह्यते।
प्राकारे संस्थिता क्रूरा मध्ये सौम्यग्रहा यदि ॥
दुर्गभङ्गे समुत्पन्ने भङ्गमायान्ति वेष्टकाः।
मध्यनाडीस्थिताः सौम्याः क्रूरा वह्निरवस्थिताः ॥
सैन्यावर्त्तो वह्निः शत्रोर्विना युद्धेन जायते।
प्राकारे पुरमध्ये च यदा क्रूरा व्यवस्थिताः ॥
सौम्या वाह्ये तदा दुर्गमयत्नेनापि सिध्यति।
सौम्या मध्ये च कोटे च वाह्ये पापग्रहा यदि ॥
देवैर्गन्धर्वादिभिः कोटो गृह्यते न कदाचन।
प्राकारवाह्यगाः क्रूराः सौम्या मध्यगता यदि ॥
युद्धं प्राकारखड्गिश्च पुरभेदो न जायते।
स्तम्भान्तरगता यस्य ग्रहाः सौम्याः शुभान्विताः ॥
भवेयुस्तस्य कोटस्य न नाशो विद्यते क्वचित्।
स्तम्भान्तरगता यस्य रविराहुशनैश्चराः ॥
भूमिपुत्त्रश्च तस्याशु नाशः कोटस्य निश्चितम्।
सौम्या वाह्ये तथा कोटे मध्ये क्रूरग्रहाः स्थिताः ॥
स्वयं दुर्गं प्रयच्छन्ति वेष्टकाय गडाधिपाः।
वाह्याभ्यन्तरगाः क्रूराः प्राकारे शोभनग्रहाः ॥
रिपुक्षयं क्षयं याति विना युद्धेन निश्चितम्।
प्रकारस्था ग्रहाः क्रूरा वह्निर्मध्ये शुभाः स्थिताः ॥
समयुद्धं भवेत्तत्र खड्गिपातो दिने दिने।
सौम्याः क्रूरास्तथा चाष्टौ प्राकारमध्यवाह्यगाः ॥
एकस्था यत्र कुर्व्वन्ति संग्रामस्तत्र दारुणम्।
गजाश्वरथभूपालाः सामन्ता मण्डलेश्वराः ॥
कुर्व्वन्ति च भटा युद्धमुभयोरपि सैन्ययोः।
विचार्य्य कुरुते युद्धं कोटचक्रं स्वरोदयौ ॥
प्रवेशधिष्ण्यगे चन्द्रे जीवचन्द्रैः संस्थिते।
निशीथे कविरणं दुर्गे कर्त्तव्यं वेष्टकैर्नृपे ॥
कर्त्तव्यं कवियुद्धञ्च रात्रौ शुभे वह्निर्दिने।
प्रवेशनिर्गमावुक्तौ सैनयोरुभयोरपि ॥
कवौ कोटे जयो युद्धे विपरीते पराजयः।
विहाय प्रकृतं चारं वक्रं गच्छति चेद्गुरुः ॥
तदा प्रागदिशि भङ्गः स्यात् तद्वयोः पूर्व्वसैन्ययोः।
भौमे च वक्रिते भङ्गो भवेत दक्षिणतोऽत्र च ॥
भवेत् पश्चिमतो भङ्गो भार्गवे वक्रगामिनि।
बुधे वक्रगतौ चैव भङ्गश्चोत्तरतो भवेत् ॥
यदि तत्र स्थितौ स्यातां न जात्वर्कशनैश्चरौ।
क्रूरो वक्री प्रवेशर्क्षे पुरमध्ये स्थितो यदा।
तदा कोटविनाशाय कोटस्थो वाह्यभूपतेः ॥
प्रवेशवाह्यगे क्रूरे वक्रे स्वसैन्यविग्रहः।
दुर्भिक्षं मृत्युभङ्गौ च वह्निः सैन्यस्य जायते ॥
निर्गमर्क्षे वह्निःस्थे च क्रूरो वक्रं करोति चेत्।
प्राकारस्य भवेद्भङ्गः प्राकारस्थे पुरस्य च ॥
पुरभे निर्गमे वक्राः कथञ्चित् क्रूरखेचराः।
दुर्गं त्यक्त्वा तदा काले दुर्गस्थः प्रपलायते ॥
यथा क्रूरैस्तथा सौम्यैः फलं ग्राह्यं विपर्य्ययात्।
मिश्रैर्मिश्रं विजानीयात् कोटचक्रे न संशयः ॥
दुर्गसैन्यं तथैवोच्चं प्राकारे मध्यभागगम्।
नीचस्थं वेष्टकं सैन्यं ज्ञातव्यं स्वरवेदिभिः ॥
कोटे कोटाधिपे नीचौ विप्रदौ भौमभास्करौ।
समस्थौ च पुरे सर्व्वे उच्चस्थौ निष्फलौ च तौ ॥
प्राकारं वेष्टकं हन्ति उच्चस्थौ राहुसूर्य्यजौ।
प्राकारस्थौ वह्निःसैन्यं नीचस्थौ तौ च निष्फलौ ॥
सितेऽर्कपुत्त्रे तु रवौ गुरावथ सितेऽपि च।
वक्रिता नैव शक्ताः स्युर्विधातुं कोटभेदनम् ॥
समदृष्ट्या गुरुश्चन्द्रः पश्यतः सर्व्वतः सदा।
तिर्य्यक्स्थितौ बुधशुक्रौ फलदौ नात्र संशयः ॥
ऊर्द्ध्वदृष्टिग्रहे कुर्य्यात् टिङ्गणीयन्त्रवाहनम्।
समे च साधयेत् खड्गि रन्ध्रपातमधोमुखे ॥
कोटभं मुखपुच्छस्य राहोर्यदि गजादिके।
कोटश्च भज्यते क्षिप्रं पूर्व्वोक्तविधिना चिरात्
दुर्गमध्यगते सूर्य्ये जलशोषः प्रजायते।
चन्द्रे भङ्गः कुजे दाहो बुधे सुस्थिवला नराः ॥
वाक्पतौ दुर्गमध्यस्थे सुभिक्षं प्रचुरं जलम्।
चलचित्ता नराः शुक्रे मृत्युरोगौ शनैश्चरे ॥
राहौ मध्यगते दुर्गे भङ्गो भेदो महद्भयम्।
केतौ मध्यगते तत्र विषादः स्याद्गडाधिपे ॥
सौरिश्च वाक्पतिश्चैव भवेतां दिशि संस्थितौ।
यस्यां तयां स कोटस्तु भज्यते नात्र संशयः ॥
इत्येवोक्तं फलं मध्ये एवं वाह्यगते ग्रहे।
उपग्रहसमायोगादत्यन्तं प्राणसंशयः ॥
अकारादिस्वराः पञ्च पूर्व्वाशादिचतुष्टये।
मध्यान्ताः सम्यमालेख्या अन्तस्थाः खड्गि-
कारकाः ॥
दुर्गनाम्नः स्वरो यस्य बालो वालमितोऽपि वा।
तद्दिने प्रारभेत् युद्धं दुर्गं सिध्यति नान्यथा ॥"


इति कोटचक्रम्।

इति समयाम्रतम् ॥✱॥ चक्रान्तराणि तत्तच्छब्दे द्रष्टव्यानि ॥ (चित्रकाव्यविशेषः। शब्दालङ्कारभेदः। अस्य च तथाविधलिपिसन्निवेशवशेन चमत्कारिविधायिनामपि वर्णानां तथाविध श्रोत्राकाशसमवायविशेषवशेन चमत्कारिविधायिभिर्वर्णैरभेदेन उपचारत्वात् शब्दालङ्कारत्वम्। उदाहरणं यथा, काव्यालङ्कारे। ५। ६—१३।

"मरारिशक्ररामेभमुखैरासाररंहसा।
साराख्यस्तवा नित्यं तदर्त्तिहरणक्षमा ॥
माता नतानां संघट्टः श्रिया बाधितसम्भ्रमा।
मान्याथ सीमारामाणां शं मे दिश्यादुमादिजा।
मायाविन महाहावा रसायात लसद्भुजा।
ज्ञातलीला यथा सारवाच मद्दिमभावधीः ॥

माममीढ़ा शरण्यामुतृषदेवारुकप्रदा च धीः।
धीरा पवित्रा सन्नाससाप्तशीला मातरारम ॥
माननापरुषं लोकदेवो सद्रस सन्नम ।
मनसा सादरं गत्वा सर्वदा दास्यमङ्ग ताम् ॥
मा सुधो राजस खासूक्षोककूटेश्रदेवताम् ।
तां शिवावाशितां सिद्धराध्यासितां हि स्तुतां स्तुहि ॥
माहिमाख्ये रणेऽन्या नु सा नु नानेयमन्त्र हि ।
हिमातङ्कादिवास्यं च क कम्पिनसमप्तुतम् ॥
मातङ्गानङ्गविघिनासुना पादं तमुद्यतम् ।
तङ्गयित्वा शिरस्यस्य निपात्याहन्ति रंहसा ॥"

अथ चक्रे वर्णविन्यासक्रमः ।



चक्रः, पु, (करोति अस्फुटशब्दम् । कृ+बाहुलकात् कः ततो निपातनात् द्वित्वे साधुः ।) चक्रवाकपक्षी । इत्यमरः । २ । ५ । २२ ॥

चक्रकं, त्रि, (चक्र इव कायति प्रकाशते इति । कै+कः ।) तर्कविशेषः । तस्य लक्षणं यथा । स्वापेक्षणीयापेक्षितसापेक्षितत्वनिबन्धनप्रसङ्गत्वम् । अपेक्षा च ज्ञाप्तौ उत्पत्तौ स्थितौ च ग्राह्या । तत्राद्या यथा । एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यज्ञानजन्यं स्यात् तदा एतद्घटज्ञानजन्यज्ञानभिन्नं स्यात् । द्वितीया यथा । घटोऽयं यद्येतद्घटजन्यजन्यजन्यः स्यात् तदा एतद्घटजन्यजन्यभिन्नः स्यात् । तृतीया यथा । घटोऽयं यद्येतद्घटवृत्तिरस्ति स्यात् तथात्वेनोपलभ्येत इति । इति तर्कशास्त्रम् ॥ (वेदान्तदर्शनमते तु "स्वग्रहसापेक्षग्रहकत्वं आत्माश्रयः॥ स्वग्रहसापेक्षग्रहसापेक्षग्रहकत्वं अन्योन्याश्रयः॥ स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षग्रहकत्वम् चक्रकम् ॥")

चक्रकारकं, क्ली, (चक्र चक्रवदाकारं करोत्यात्मन. वक्रनखाकृत्या इति शेषः । यद्वा चक्रं चक्राकृतिरेखादिकं करोतीति । कृ+खुल् ।) व्याघ्रनखनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२६ ॥

चक्रकुल्या, स्त्री, (चक्रस्य चक्राख्यौषधीलताविशेषस्य कुल्या इव ।) चित्रपर्णी । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥ (चित्रपर्णिकाशब्देऽ ज्ञेयमस्या विवरणम् ॥)

चक्रगजः, पु, (चक्रेण चक्राख्यया गज्यते शब्द्यते । यद्वा चक्रं चक्राकृतिदद्रुयाधौ गज इव । गज इव दद्रुरोगमर्द्दकः इत्यर्थः ।) चक्रमर्द्दवृक्षः । इति राजनिर्घण्टः ॥

चक्रगण्डुः, पु, (चक्रमिव वर्त्तुलाकारो गण्डुः ।) वर्त्तुलाकारोपाधानम् । इति चतुरशब्दार्थे हेमचन्द्रः ॥ गोलबालिश इति गालबालिश इति च भाषा ॥

चक्रगुच्छः, पुं, (चक्रवद्गुच्छः पुष्पगुच्छोऽस्मिन् अस्य वा ।) अशोकवृक्षः । इति शब्दचन्द्रिका ॥

चक्रजीवकः, पु, (चक्रेण कुम्भाद्युत्पादनयन्त्रविशेषेण जीवतीति । जीव+खुल् ।) कुम्भकारः । इति हेमचन्द्रः ॥

चक्रदंष्ट्रः, पु (चक्रं चक्राकृतिर्दंष्ट्रायां यस्य चक्रमिव दंष्ट्रा यस्येति वा ।) शूकरः । इति राजनिर्घण्टः ॥

चक्रदन्ती, स्त्री, (चक्रमिव दन्तरूपमिव च दृश्यते ।) दन्तीवृक्षः । इति राजनिर्घण्टः ॥

चक्रदन्तीबीजं, क्ली, (चक्रदन्त्या बीजम् ।) जयपालः । इति राजनिर्घण्टः ॥

चक्रधरः, पु, (धरतीति । धृ+अच् । चक्रं सुदर्शनाख्यं द्वादशारादिलक्षणलक्षितमस्त्रम् । तस्य धरः । चक्रं धरति धारयतीति वा ।) विष्णुः । (यथा, रघुः । १६ । ५५ ।

"विशाहितु श्रीमहिमानुरूपं
प्रचक्रमे चक्रधरप्रभाव. ॥"

चक्रं फणा तस्य धरः ।) सर्पः । (यथा, महाभारते । २ । ८५ । ७० ।

"अङ्गिरःप्रमुखाश्चैव तथा ब्रह्मर्षयोऽपरे ।
तथा नागाः सुपर्णाश्च सिद्धाश्चक्रधरास्तथा ॥")

ग्रामजालिनि त्रि । इति मेदिनी ॥ (यथा, महाभारते । ३ । ८५ । ७६ ।

"यजन्ते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ॥")

चक्रनखः, पु, (चक्रमिव नखः नखाकृत्यंशविशेषोऽस्यस्य इति । "अर्श आदिभ्योच्" इत्यच् ।) व्याघ्रनखनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

चक्रनामा, [न्] पु, (चक्रं सरघानिर्मितमधुचक्रं तन्नामेव नामास्य ।) माक्षिकधातुः । इति हेमचन्द्रः ॥

चक्रनायकः, पु, (चक्रं कर्षणजन्यचक्राकाररेखादिकं नयतीति । नी+खुल् ।) व्याघ्रनखः । इति राजनिर्घण्टः ॥ (चक्रस्य नायके त्रि ॥)

चक्रपद्माटः, पु, (चक्रं चक्रवत् यत् पद्म दद्रुरोगं तत्र अटति तं म्लद्नातीत्यर्थः ।) चक्रमर्द्दकवृक्षः । इति शब्दरत्नावली ॥

चक्रपरिव्याधः, पु, (चक्रं दद्रुरोगं परिविध्यतीति । परि+व्यध+अण् ।) आरग्वधवृक्षः । इति वैद्यकम् ॥

चक्रपर्णी, स्त्री, (चक्राकारं पर्णमस्या इति । जातौ संज्ञायां वा ङीष् ।) चक्रकुल्यालता । इति शब्दचन्द्रिका ॥

चक्रपाणिः, पु, (चक्रं सुदर्शनाख्यं पाणौ यस्य । व्यधिकरणबहुव्रीहिसमासः ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा, विष्णोरष्टोत्तरशतनामकीर्त्तने ।

"वैकुण्ठस्त्वच्युतो रामश्चक्रपाणिरधोक्षजः ॥")

चक्रपादः, पु, (चक्रं पाद इवास्य ।) रथ. । (चक्रवत् पादा यस्य ।) हस्ती । इत्यजयपाल. ॥

चक्रपुष्करिणी, स्त्री, (चक्रेण विष्णुचक्रेण खनिता पुष्करिणी ।) मणिकर्णिका । इति काशीखण्डम् ॥

चक्रफलं, क्ली, (चक्राकारं फल फलकमस्य ।) अस्त्रविशेष. । तत्पर्य्यायः । अट्टनम् २ । इति त्रिकाण्डशेषः ॥

चक्रबान्धवः, पु, (चक्रस्य पद्मस्य बान्धवः बन्धुः ।) सूर्य्यः । इति हेमचन्द्रः ॥

चक्रभृत्, [द्] पु, (चक्रं बिभर्त्तीति । भृ+क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । १ । ३८ ।

"चक्रभृद्विजयेशादिकेशवे शानभूषिते ॥")

चक्रभेदिनी, स्त्री, (चक्रं चक्रवाकमिथुनं भिनत्ति पृथक् करोतीति । भिद्+णिनि । ततो ङीप् । निशायां हि चक्रवाकयोर्वियोजनं भवतीति लोकप्रसिद्धम् ।) रात्रिः । इति त्रिकाण्डशेषः ॥

चक्रमण्डली, [न्] पु, (चक्राकारेण यन्मण्डलं तदस्त्यस्य इति इनिः ।) अजगरसर्पः । इति हेमचन्द्रः ॥

चक्रमर्द्दः, पु, (चक्रं चक्राकारदद्रुरोगं म्लद्नातीति, म्लद+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) क्षुपविशेषः । चाकुन्दिया इति भाषा ॥ तत्पर्य्यायः । एडगजः २ अडगज. ३ गजाख्यः ४ मेषाह्वयः ५ एडहस्ती ६ आवर्त्तकः ७ चक्रगजः ८ चक्री ९ पुन्नाटः १० पुन्नाड ११ विमर्द्दकः १२ दद्रुघ्नः १३ तर्व्वटः १४ चक्राह्वः १५ शुकनाशनः १६ दृढबीजः १७ प्रपुन्नाडः १८ खर्ज्जुघ्न. १९ । इति राजनिर्घण्टः ॥ चक्रमर्द्दकः २० पद्माटः २१ उरणाख्यः २२ । इत्यमरः । २।४।१४७ ॥ प्रपुन्नडः २३ प्रपुनाडः २४ उरणाक्षः २५ । इति तट्टीका ॥ अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । मेदोवातकफकण्डूकुष्ठदद्रुपामादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । स्वादुत्वम् । रूक्षत्वम् । पित्तश्वासकृमिनाशित्वम् । हृद्यत्वम् । हिमत्वञ्च । तत्फलगुणाः । उष्णताकुष्ठकण्डुदद्रुविषानिलगुल्मकासकृमिश्वासनाशित्वम् । कटुत्वञ्च । इति भावप्रकाशः ॥ (अस्य गुणाः पर्य्यायाश्च यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"चक्रमर्द्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचन. ।
पद्माटः स्यादेडगजश्चक्री पुन्नाट इत्यपि ॥
चक्रमर्द्दो लघुः स्वादू रूक्षः पित्तानिलापहः ।
हृद्यो हिम. कफश्वासकुष्ठदद्रुक्रिमीन् हरेत् ॥
हन्त्युष्णन्तत्फलं कुष्ठकण्डूदद्रुविषानिलान् ।
गुल्मकासक्रिमिश्वासनाशनं कटुकं स्मृतम् ॥")

चक्रमर्द्दकः, पु, (चक्र दद्रुरोगविशेषं म्लद्नातीति । म्लद्+खुल् ।) चक्रमर्द्द । इत्यमर । २ । ४ । १४७ ॥ (स्त्रियान्तु कापि अत इत्वञ्च ।

राजमातृविशेषः। यथा, राजतरङ्गिण्याम्। ४।२१३।
"ललितादित्यभूभर्त्तुर्वेश्याभा चक्रमर्द्दिका॥")

चक्रयान, क्ली, (चक्रेण अन्वितं यानम्।) रथादि। चक्रयुक्तवाहनम्। इत्यमरटीकायां रायमुकुटादय.॥

चक्ररदः, पु, (चक्रवद्वृत्तो रदः दन्तोऽस्येति।) शूकरः। इति त्रिकाण्डशेषः॥

चक्रलक्षणा, स्त्री, (चक्रे चक्राकारे द्दौ मण्डलाकारे कुण्डादौ वा लक्षणं आरोग्याय चिह्नं आरोग्यसूचनमित्यर्थः यस्याः।) गुडूची। इति रत्नमाला॥ (चक्रं लक्षणं यस्य इति वुत्पत्त्या। रथे विष्णौ च पु॥)

चक्रलताम्र., पु, (चक्+रक्। चक्रः ङ्गिणकः लताम्रं यत्र यस्य वा।) वह्नरसालवृक्षः। इति राजनिर्घण्टः॥

चक्रला, स्त्री, (चक्रं चक्राकारं लाति आदत्ते चक्राकारेण वर्त्तते इति यावत्। ला+क। तत-ष्टाप्।) उच्चटा। इत्यमरः। २। ४। १६०॥

चक्रवर्त्तिनी, स्त्री, (चक्राकारेण वर्त्तते इति। वृत्+णिनिः।) जनीनामगन्धद्रव्यम्। इत्य-मरः। २। ४। १५३। अलक्तकं। जटामांसी। इति राजनिर्घण्टः॥ (चक्रं पृथ्वीचक्रं वर्त्तते यस्यां यद्वा चक्रं सेनाचक्रं अशेषव्यूहरच-नयाधिष्ठितं सेनावृन्दं वर्त्तयितुं शीलमस्या इति। सर्व्वभूमेरधीश्वरी॥ चक्रेषु समूहेषु वर्त्तते या। यूथेश्वरी। यथा, कथासरित्-सागरे। २०। ११४।
"एव वाल्येऽपि जाताहं डाकिनीचक्रवर्त्तिनी॥")

चक्रवर्त्ती, [न्] पु, (चक्रं पद्माकारशुभचिह्नं करे वर्त्तते यस्य। वृत्+णिनि। यद्वा चक्रं पृथ्वीचक्रं तेन वर्त्तते इति। वृत+णिनि'।) समुद्रपरिवृतायाः सर्व्वभूमेरीश्वरः। ततपर्य्याय.। सार्व्वभौमः २। इत्यमरः। २। ८। २॥ (यथा, शकुन्तलायां १ म अङ्के।
"जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्त्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥")
वास्तुकम्। इति राजनिर्घण्टः॥ (श्रेष्ठः। यथा, गीतगोविन्दे। १। २।
"वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्त्ती॥"
"चारणचक्रवर्त्ती नर्त्तकश्रेष्ठ।" इति तट्टीकायां चैतन्यदासः। यद्वा पद्मावती महालक्ष्मी राधा तस्याश्चरणचारणे परिचर्य्यायां यश्चक्र मण्डलं तत्र वर्त्तते इति वुत्पत्त्या वैष्णवसम्प्र-दायविशेषः॥)

चक्रवाक, पु स्त्री, (चक्र इत्याख्यया उच्यतेऽसौ। वच+कर्म्मणि घञ्। ततो "न्यङ्क्वादीनाञ्च।" ७। ३। ५३। इति कुत्वम्।) पक्षिविशेषः। चकाचकि इति भाषा॥ (यथा, महाभारते। १। ६६। ५६।
"धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्व्वशः।
चक्रवाकांश्च भद्रं ते जनयामास सैव तु॥")

तत्पर्य्यायः। कोकः २ चक्रः ३ रथाङ्गाह्वय-नामकः ४। इत्यमरः। २। ५। २२॥ भूरि-प्रेमा ५ द्वन्द्वचारी ६ सहायः ७ कामः ८ कामी ९ रात्रिविश्लेषगामी १० रामायणोपो-पमः ११ कासुकः १२। अस्य मांसगुणाः। लघुत्वम्। स्निग्धत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (यथा, चरके सूत्रस्थाने २७ अ।
"चक्रवाकास्तथान्ये च खगाः सन्त्यम्बुचारिणः।")

चक्रवाट., पुं, (चक्रेण चक्राकारेण वाटः वेष्टनं यस्य।) क्रियारोहः। पर्य्यन्तः। शिखातरु.। इति मेदिनी। टे। ६२॥

चक्रवाड, क्ली, (चक्रवत् वाडते वेष्टयतीति। वाड़+अच्।) चक्रवालम्। इत्यमरटीकायां भरतः॥ पर्व्वतविशेषे पु। इति मेदिनी। डे। ३८॥

चक्रवात., पु, (चक्रवद्वातः। तृणमाश्वादीन्या-दाय चक्राकारेण भ्राम्यति यो वायुरिति यावत्।) भ्रमिवातः। घूर्णवाताश इति भाषा॥ तत्-पर्य्यायः। वात्या २। यथा, भागवते। १०। ७। २०।
"दैत्यो नाम्ना तृणावर्त्तः कंसभृत्यः प्रचोदितः।
चक्रवातस्वरूपेण जहारासीनमर्भकम्॥"

चक्रवाल, क्ली, (चक्रमिव वाडते वेष्टयतीति। वाड्+अच्। डस्य लत्वम्।) मण्डलाकारेण परिणतं समूहमात्रम्। मण्डलाकारो दिक्-समूहः इति माधवी। इति भरतः॥ तत्-पर्य्याय.। मण्डलम् २। इत्यमर.। १। ३। ६॥ (यथा, भागवते। ५। १८। १४।
"हित्वा गृहं सम्प्रतिचक्रवालं
नृसिंहपादं भजताकुतोऽभयम्॥")

चक्रवाल, पु (चक्रेण चक्राकारेण वलते लोका-लोकौ परिवेष्ट्य विराजते इत्यर्थः। वल+बाहु-लकात् णः। अस्य पर्व्वतस्य लोकालोकपरि-वेष्टनकारितया विराजमानत्वात्तथात्वम्।) लोका लोकपर्व्वतः। इत्यमरः।२।३।२॥ (मनुष्यादीनां मण्डलाकारेण स्थिति। यथा, हरिवंशे। ७६।३५।
"एव स कृष्णो गोपीनां चक्रवालैरलङ्कृतः।
शारदीषु सचन्द्रासु निशासु मुमुदे सुखी॥")

चक्रवृद्धि, स्त्री, (चक्रमिव चक्रभ्रमणमिव वृद्धिः उत्तरोत्तरं वृद्धेरपि वृद्धिरित्यर्थः।) यत्र वृद्धि-रूपं धनं दातुमशक्तोऽधमर्णः सवृद्धिकमिदं दास्यामीतिस्वीकरोति तत्र या वृद्धिः सा। सुदेर सुद इति भाषा। यथाह नारद.।
"वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता॥"
(तथाच मनुः। ८। १५३।
"चक्रवृद्धि. कालवृद्धिः कारिता कायिका च या।"
"कायिका कायसंयुक्ता मासग्राह्या च कालिका।
वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता॥"
इति तट्टीकायां कुल्लूकभट्टधृतवृहस्पतिवचनम्॥)

चक्रव्यूह, पु, (चक्रवत् मण्डलाकारेण रचितो-व्यूहः रचनयाधिष्ठापितं सेनासमूहः इति यावत्।) युद्धार्थमण्डलाकारेण सैन्यरचना। (एतस्य रचनालक्षणादिकं चक्रशब्दे द्रष्टव्य.॥

व्यूहोऽयमभिमन्युवधेप्सुना भगवता द्रोणाचार्य्ये-णाभिकल्पितः। यथा, महाभारते। ७। ३३। १२—२३।
"चक्रव्यूहो महाराज! आचार्य्येणाभिकल्पितः।
तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः॥
अयस्थानेषु विन्यस्ताः कुमाराः सूर्य्यवर्च्चसः।
सङ्घातो राजपुत्त्राणां सर्व्वेषामभवत्तदा॥
कृताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः।
रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥
सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः।
चन्दनागुरुदिग्धाङ्गाः स्रग्विणः सूक्ष्मवाससः
सहिताः पर्य्यधावन्त कार्ष्णिं प्रति युयुत्सवः।
तेषां दशसहस्राणि बभूवुर्दृढधन्विनाम्॥
पौत्त्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम्।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः।
अन्योन्यं स्पर्द्धमानाश्चाप्यन्योन्यस्य हिते रताः।
दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः॥
कर्णदुःशासनकृपैर्वृतो राजा महारथैः।
देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः॥
चामरव्यजनाक्षेपैरुदयन्निव भास्करः।
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः॥
सिन्धुराजस्तथातिष्ठन् श्रीमान् मेरुरिवाचलः।
सिन्धुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः॥
सुतास्तव महाराज! त्रिंशत्त्रिदशसन्निभाः।
गान्धारराजः कितवः शल्यो भूरिश्रवास्तथा।
पार्श्वतः सिन्धुराजस्य व्यराजन्त महारथाः॥")

चक्रशल्या, स्त्री, (चक्रवत् चक्राकारेण शः शल्यं यत्र।) काकतुण्डी। श्वेतगुञ्जा। इति राज-निर्घण्टः॥

चक्रश्रेणी, स्त्री, (चक्रमिव चक्राणां वा श्रेणी यत्र।) अजशृङ्गीवृक्षः। इति रत्नमाला॥

चक्रसञ्ज्ञ, क्ली, (चक्रेण वेदाकारेण चक्रेण सञ्ज्ञायते इति। सं+ज्ञा+क। चक्रस्य सञ्ज्ञा सञ्ज्ञा यस्य इति वा।) वङ्गम्। इति हेमचन्द्रः॥

चक्रसंवर, पु, (चक्रं अविद्याकामकर्म्मादिरूपं विषयवासनासमूहं इन्द्रियाणां समूहं वा संवृणोति संशमयतीति। सं+वृ+अच्।) बुद्धभेदः। तत्पर्य्यायः। हेरम्बः २ हेरुकः ३ देवः ४ वज्रकपाली ५ निशुम्भी ६ शशिशेखरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥

चक्रा, स्त्री, (चक् तृप्तौ+रक्। ततष्टाप्।) नागर-मुस्ता। कर्कटशृङ्गी। इति राजनिर्घण्टः॥

चक्राङ्गी, स्त्री, (चक्रेण चक्राकारेण अङ्कते गच्छतीत्यर्थः। अकि गतौ+अच् ततो ङीष्।) हंसी। इति शब्दरत्नावली॥ चक्राकी च पाठः॥

चक्राङ्गः, पु, स्त्री, (चक्रेण चक्राकारेण अङ्कति गच्छतीति। अङ्ग+अच्) हंसः। इत्यमरः। २।५।२३॥ (यथा, महाभारते। ८।४१।२१।
"हंसेषु त्वं चक्राङ्गो वयः, काक विहङ्गमाः॥"
चक्रमङ्गमस्येति वुत्पत्त्या रथोऽपि॥ (चक्र-वाकः। यथा, मनुः। ५। १२।
"कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्॥")

चक्राङ्गा, स्त्री, (चक्रमिवाङ्गमस्त्यस्याः इति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततष्टाप् ।) सुदर्शना लता । इति रत्नमाला ॥

चक्राङ्गी, स्त्री, (चक्राङ्ग + जातौ ङीष् ।) कटुरोहिणी । इति मेदिनी । गे । ३५ ॥ (अस्याः पर्य्यायाः यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ॥")
हंसी । इति शब्दरत्नावली ॥ हिलमोचिका । इति त्रिकाण्डशेषः ॥ मञ्जिष्ठा । वृषपर्णी । इति राजनिर्घण्टः ॥ कर्कटशृङ्गी । इति रत्नमाला ॥

चक्राटः, पुं, (चक्रं घूर्त्तताजालं शाठ्यसमूहं आलम्ब्य अटतीति । अट् + अण् ।) विषवैद्यः । धूर्त्तः । दीनारः । इति मेदिनी । टे । ४२ ॥

चक्राणः, त्रि, (चक्रे कर्म्मादिक इति । कृ + कान प्रत्ययः । ततो धातौ अभ्यस्ते णत्वम् ।) कृतवान् । कर्म्मवाच्ये कृतः । भाववाच्ये क्लीं कृतम् । इति मुग्धबोधव्याकरणं तट्टीका च ॥

चक्राधिवासी, [न्] पुं, (चक् तृप्तौ + रक् । चक्रं तृप्तिजनकं अधिवासयतीति । अधि + वस् + णिच् + णिनिः ।) नागरङ्गवृक्षः । इति त्रिकाण्डशेषः ॥

चक्रावर्त्तः, पु, (चक्राकारः आवर्त्तः ।) घूर्णनम् । इति हेमचन्द्रः ॥

चक्राह्वः, पु, (चक्र इत्याह्वा संज्ञा यस्य ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥ (चक्रवाकपक्षिविशेषः । यथा, भागवते । ३ । १० । २४ ।
"हंससारसचक्राह्वकाकोलूकादयः खगाः ॥"
यथाच, हारीते प्रथमस्थाने ११ अध्याये ।
"चक्राह्वोऽतिकषायस्तुक्रजननो वृष्योऽनिरुष्योष्टड्डः ॥")

चक्रिः, पु, (करोतीति । कृ + "आदृगमहनजनः किकिनौ लिट् च ।" ३ । २ । १७१ । इति किन् । स च लिड्वत् ।) कर्त्ता । इति मुग्धबोधम् ॥ (यथा, ऋग्वेदे । १ । ९ । २ ।
"चक्रिं विश्वानि चक्रये ।"
"चक्रये पुरुषार्थकरणशीलाय ॥" इति दयानन्दकृतभाष्यम् ॥)

चक्रिका, स्त्री, (चक्रं चक्रवद्गोलाकारो विद्यते अत्रास्या वा । चक्र + ठन् टाप् च ।) जानु । इति राजनिर्घण्टः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ३७६ ।
"अथोभयधनादायि भृत्यचक्रिकया समम् ॥")

चक्री, [न्] पु, (चक्रं सुदर्शनाख्यमनस्त्रात्मकमिति यावत् अस्यास्तीति । चक्र + इनिः ।) विष्णुः । (यथा, महाभारते । १३ । १४९ । ११० ।
"अरौद्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः ॥"
चक्रं ग्रामचक्रं ग्रामसमूह इत्यर्थः अधिकारितयास्त्यस्य इति इनिः ।) ग्रामजालिकः । (चक्रं चक्राकारचिह्नविशेषोऽस्त्यस्य ।) चक्रवाकः । (चक्रं घटादिनिर्म्माणकरणयन्त्रविशेषः सोऽस्त्यस्य इति ।) कुलालः । (चक्रं फणा अस्त्यस्य इति ।) सर्पः । सूचकः । इति विश्वमेदिन्यौ ॥ अजः । तैलिकभेदः । इति शब्दरत्नावली ॥ चक्रवर्त्ती । इति हेमचन्द्रः ॥ चक्रमर्द्दः । तिनिशः । व्यालनखः । काकः । खरः । इति राजनिर्घण्टः ॥ (कुलालतैलिकराजचक्रवर्त्त्याद्यर्थे प्रमाणं यथा आर्य्यासप्तशत्याम् । ५९२ ।
"स्नेहमयान् पीडयतः किं चक्रेणापि तैलकारस्य ।
चालयति पार्थिवानपि यः स कुलालः परं चक्री ॥")
चक्रविशिष्टे त्रि ॥ (चक्रयुक्तरथादियानारूढः । यथाह मनुः । २ । १३८ ।
"चक्रिणो दशमीस्थस्य रोगिणो भारिणः [स्त्रियाः ॥"
"चक्रिणः चक्रयुक्तरथादियानारूढस्य ॥"
इति तट्टीकायां कुल्लूकभट्टः ॥")

चक्रीवान्, [त्] पुं, स्त्री, ("आसन्दीवदष्ठीवचक्रीवदिति ।" ८।२।१२ । चक्रशब्दस्य चक्रीभावः ततो निपातनात् साधुरिति ।) गर्द्दभः । इत्यमरः ॥ राजविशेषः । इति सिद्धान्तकौमुदी ॥

चक्रुः, पु, (करोतीति । कृ + "कुर्भश्च ।" उणां १ । २२ । इति कु. ।) कर्त्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

चक्रेश्वरी, स्त्री, (चक्राणां जिनविशेषाणां ईश्वरी अधिष्ठात्री ।) जिनानां विद्यादेवीविशेषः । इति हेमचन्द्रः ॥

चक्ष, ल ङ वदे । इति कविकल्पद्रुमः ॥ (अदा-आत्मं-सकं-सेट् ।) वदः कथनम् । (दर्शने च इति केचित् ।) ल ङ, आचष्टे धर्म्मं धीरः । तृतीयस्वरानुबन्ध इति प्राञ्चः । इकार उच्चारणार्थ इति केचित् । छन्दसि नुमागमार्थ इति केचित् । वेदेषूच्चारणार्थं इति केचित् । अत्र वक्तव्यस्तु तृतीयस्वरो भ्रमकारितः किन्तु चतुर्थस्वरानुबन्धोऽयं निष्ठाया इमृनिषेधार्थः तेन वर्ज्जनार्थे ख्याञकशाञादेशयोरप्राप्तौ आचष्ट वर्ज्जनमित्याहुः । इति दुर्गादासः ॥

चक्षणं, क्ली, (चक्ष्यते कथ्यते मद्यपानाय मद्यपानेन सह वा । चक्ष + ल्युट । यद्वा, चक्ष्यते भक्ष्यते मद्यमनेनेति । चक्ष + ल्युट् निपातनात् कान्तागमश्च ।) मद्यपानरोचकभक्ष्यद्रव्यम् । इति हेमचन्द्रः । ३।५।७१ ॥ (चक्ष + भावे ल्युट् ।) कथनम् । (दर्शनम् । यथा, ऋग्वेदे । १।१३।५ ।
"स्तृणीत बर्हिरानुषग् घृतपृष्ठं मनीषिणः ।
यत्रामृतस्य चक्षणम् ॥")

चक्षाः, [स्] पु, बृहस्पतिः । इति त्रिकाण्डशेषः । उपाध्यायः । इत्युणादिकोषः ॥ (क्ली, दर्शनम् । यथा, ऋग्वेदे । १ । ७ । ३ ।
"इन्द्रो दीर्घाय चक्षस आ सूर्य्यं रोहयद्दिवि ।
वि गोभिरद्रिमैरयत् ॥")

चक्षुः, [स्] क्ली, (चष्टे पश्यत्यनेनेति । चक्ष + "चक्षेः शिच ।" उणां । २ । १२० । इति उसि, स च शित् । शित्वात् ख्याञादेशाभावः ।) दर्शनेन्द्रियम् । तस्य ग्राह्यं उद्भूतरूपम् १ तद्वद्द्रव्यम् २ पृथक्त्वम् ३ सङ्ख्या ४ विभागः ५ संयोगः ६ परत्वम् ७ अपरत्वम् ८ स्नेहः ९ द्रवत्वम् १० सङ्ख्यापरिमाणम् ११ योग्यवृत्तिक्रिया १२ योग्यवृत्तिजातिः १३ योग्यवृत्तिसमवायः १४ । अस्येन्द्रियसहकारिणः आलोकः उद्भूतरूपं महत्त्वम् । इति भाषापरिच्छेदः ॥ अस्याधिष्ठात्री देवता सूर्य्यः । इति श्रीभागवतम् । तत्पर्य्यायः । लोचनम् २ नयनम् ३ नेत्रम् ४ ईक्षणम् ५ अक्षि ६ दृक ७ दृष्टिः ८ । इत्यमरः । २ । ६ । ९३ ॥ अम्बकम् ९ दर्शनम् १० । इति हेमचन्द्रः ॥ तपनम् ११ । इति राजनिर्घण्टः ॥ विलोचनम् १२ दृशा १३ वीक्षणम् १४ प्रेक्षणम् १५ देवदीप १६ देवदीपः १७ दृशिः १८ दृशी १९ । इति शब्दरत्नावली ॥ * ॥ यथा, कर्म्मलोचने ।
"पाणिभ्यां न स्पृशेच्चक्षुश्चक्षुषी नैकपाणिना ।
चक्षुः परहिताकाङ्क्षी न स्पृशेदेकपाणिना ॥"
मेषशृङ्गीवृक्षः । इति रत्नमाला ॥

चक्षुर्वहनं, क्ली, (चक्षुस्तज्ज्योतिर्वहत्यनेनेति । वह + ल्युट । चक्षुर्ज्योतिर्वृद्धिकारित्वादेव तथात्वम् ।) मेषशृङ्गीवृक्षः । इति रत्नमाला ॥

चक्षुःश्रवाः, [स्] पु, (चक्षुर्नयनमेव श्रवः श्रवणं यस्य ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥ (यथा, नैषधे । १ । २८ ।
"इति स्म चक्षुःश्रवसां प्रिया नले
स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥"
अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
"व्याडश्चाशीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः ।
चक्षुःश्रवा दन्दशूको गूढपात् पन्नगोरगाः ॥")

चक्षुष्यं, क्ली, (चक्षुषे लोचनाय हितम् । चक्षुस् + "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ।) प्रपौण्डरीकम् । अस्य पर्य्याया यथा वैद्यकरत्नमालायाम् ।
"प्रपौण्डरीकं चक्षुष्यं शीतं श्रीपुष्पपुण्डरी ॥"
सौवीराञ्जनम् । खर्परीतुत्थम् । इति राजनिर्घण्टः ॥

चक्षुष्यः, पु, (चक्षुषे हितः । "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ।) केतकवृक्षः । पुण्डरीकवृक्षः । इति मेदिनी । ये । ८२ ॥ शोभाञ्जनवृक्षः । इति राजनिर्घण्टः ॥ रसाञ्जनम् । इति हेमचन्द्रः ॥

चक्षुष्यः, त्रि, (चक्षुषे हितः । चक्षुस् + यत् ।) प्रियदर्शनः । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४९५ ।
"धिया भाग्यानुगामिन्या चेष्टमानो न याचितम् ।
अभूत् सर्व्वस्य चक्षुष्यः स तु दुर्लभवर्द्धनः ॥"
चक्षुजः । इति विश्वः । यथा, माघे । ८ । ५७ ।
"चक्षुष्यः खलु महतामपरैरलङ्घ्यः ॥"
"चक्षुषि भवश्चक्षुष्य प्रियोऽपिजनस्य ।" इति तट्टीकायां मल्लिनाथः ॥) चक्षुर्हितः । इति मेदिनी । ये । ८२ ॥ (यथा, सुश्रुते सूत्रस्थाने २० अध्याये ।

"दक्षिणो मारुतः श्रेष्ठश्चञ्चुर्य्यो बलवर्द्धनः ॥")
चञ्चुर्य्या, स्त्री, (चञ्चुर्य्य+टाप् ।) कुलत्थिका । सुभगा । इति मेदिनी । ये । ८२ ॥ वनमुद्गी । अरण्यकुलत्थिका । इति राजनिर्घण्टः ॥

चच, न घातने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) न, चचोति । इति दुर्गादासः ॥

चङ्कुर, स्त्री, (चकति तृप्नोत्यनेन । चक+उरच् । इदित्वान्नुम् ।) यानमात्रम् । तत्पर्य्यायः । घोरणम् २ । इति त्रिकाण्डशेषः ॥

चङ्कुरः, पुं, (चक्यते तृप्यतेऽनेन । चकि+उरच् । इदित्वान्नुम् ।) रथः । वृक्षः । इति मेदिनी । रे । १५३ ॥

चङ्क्रमणं, क्ली, (पुनःपुनरतिशयेन वा क्राम्यतीति । चङ्क्रम+भावे ल्युट् ।) पुनः पुनर्भ्रमणम् । (यथा, *भागवते । ३ । २१ । ५० ।*
"नूनं चङ्क्रमणं देव । सतां संरक्षणाय ते ।
वधाय चासतां यत्त्वं हरेः शक्तिर्हि पालिनी ॥")
अतिशयभ्रमणम् । इति व्याकरणम् ॥ (यथा, सुश्रुते सूत्रस्थाने १९ अध्याये ।
"स्थानासनं चङ्क्रमणं यानयामातिभाषणम् ॥")
अनतिदेहपीडाकारकचङ्क्रमणस्य गुणाः । आयुर्बलमेधाग्नीन्द्रियशुद्धिकारित्वम् । सदोपानद्रहितपादचङ्क्रमणदोषाः । अनारोग्यत्वम् । अनायुष्यत्वम् । इन्द्रियदृष्टिनाशित्वञ्च । इति राजवल्लभः ॥

चञ्चः, त्रि, शोभनः । दक्षः । इति मेदिनी । गे । ७ ॥ (पुं, राजमन्त्रिविशेषः । यथा राजतरङ्गिण्याम् ।
"अमरङ्गाख्य चञ्चाद्या येऽभूवंस्तत्र मन्त्रिणः ।
ते स्त्रीवशाः सितन्तूर्णीं तस्थुः शस्त्रान्वितैरपि ॥")

चचेण्डा, स्त्री, (चि+बाहुलकात् डः । च उपचीयमानः अण्डवत् फलं अस्याः ततो निपातनात् साधुः ।) फललताविशेषः । चिचिण्डा इति भाषा । तत्पर्य्यायः । श्वेतकूलः २ श्वेतराजी ३ हस्तफला । अस्या गुणः । पटोलगुणात् किञ्चिन्न्यूनत्वम् । विशेषात् शोषिणोहितत्वञ्च । इति मदनविनोदः ॥

चचत्पुटः, पुं, (चचत् गुरुलघुना तालविशेषाणां पुटं द्वन्द्वं यत्र ।) तालप्रभेदः । यथा,—
"नाले चचत्पुटे ज्ञेय गुरुद्वन्द्वं लघुः प्लुतम् ॥"
इति सङ्गीतदामोदरः ॥
चचत्पुटोऽपि क्वचित् पाठः ॥

चचरी, स्त्री, पुं, (चचूर्य्यते पुनः पुनरतिशयेन वा चरति भ्राम्यतीति । चर+यङ् लुक् ततो टक टित्वात् ङीप् च ।) भ्रमरी । यथा,—
"करी करी करोति मे दृशं गतो गतोऽति कामम् ।
स्थिरो चरी करोति चेत् चचुरोति चञ्चरी ॥"
इत्युद्भटः ॥

चचरीकः, पुं, (चरति पुनःपुनरिति "चर्च्चरीकादयश्च ।" उणां । ४ । ७० । इति यङ् लुगन्तेन साधुः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

चपलः, त्रि, (चपं ग्राहि मानोमि । ला+कः ।) चञ्चलम् । (यथा, हरिवंशे । ९४ । ७ ।
"एष यदुमान् साम्यमर्णो शोभमानो महाचलम् ।
चङ्क्रम्यन्तौ रमन्तौ स किशोराविव चञ्चलौ ॥")
तत्पर्य्यायः । चलनम् २ कम्पनम् ३ कम्प्रम् ४ चलम् ५ लोलम् ६ चलाचलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १० । इत्यमरः । ३ । १ । ७५ ॥ चपलम् ११ चटुलम् १२ । इति तट्टीका ॥ वायौ पुं । इति मेदिनी । ले । ९० ॥

चञ्चला, स्त्री, (चञ्चं लाति । ला+कः टाप् च । यद्वा चञ्चलं चाञ्चल्यं अस्त्यस्या इति अच् ।) लक्ष्मीः । विद्युत् । इति मेदिनी । ले । ९० ॥ पिप्पली । इति शब्दचन्द्रिका ॥ (वर्णवृत्तविशेषः । यथा, शब्दार्थचिन्तामणिः ।
"तूर्य्यतालपक्षिराजमेरुहारनायकेन ।
चामरध्वजेन चापि मण्डिता सुवर्णकेन ॥
वर्णितातिसुन्दरेण पन्नगेन्द्रपिङ्गलेन ।
चञ्चला चकोरचारुलोचने सुमङ्गलेन ॥")

चञ्चा, स्त्री, (चञ्च+अच्+टाप् ।) नलनिर्म्मिता । चाच इति भाषा । (चञ्चेव मनुष्यः । इति इवार्थे कन् ततः "लुम्मनुष्ये ।" ५ । ३ । ९८ । इति कनो लुप् ।) तृणनिर्म्मितपुरुषः । इति मेदिनी । चे । ५ ॥

चञ्चुः, पुं (चन्च+बाहुलकात् उः ।) गोनाडीचः । स तु नाडीचशाकः । एरण्डवृक्षः । इति मेदिनी । चे । ५ ॥ मृगः । इति शब्दरत्नावली ॥ रक्तैरण्डः । क्षुद्रचञ्चुवृक्षः । इति राजनिर्घण्टः ॥

चञ्चुः, स्त्री, (चञ्चति प्राप्नोति गृह्णाति भक्ष्यमनया ।) पक्षिणामोष्ठः । पाखिर ठोँट् इति भाषा । (यथा, चातकाष्टके । ६ ।
[जानीमहे
"भ्रातश्चातक । पातक किमपि ते सम्यङ् न यत्तेऽसिन्न पतन्ति चञ्चुपुटके छिन्नाः पयोविन्दवः ॥")
तत्पर्य्यायः । त्रोटिः २ । इत्यमरः । २ । ५ । ३६ ॥ चञ्चूः ३ त्रोटी ४ चञ्चुका ५ । इति शब्दरत्नावली ॥ सृपाटिका ६ । इति हेमचन्द्रः ॥ पत्रशाकविशेषः । तत्पर्य्यायः । विजला २ चञ्चू ३ कलभी ४ चीरपत्रिका ५ चञ्चुरः ६ चञ्चुपत्रः ७ सुशाकः ८ क्षेत्रसम्भवः ९ । अस्या गुणाः । मधुरत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । गुल्मोदरविबन्धार्शोग्रहणीनाशित्वञ्च ॥
"चिचञ्चुश्चिञ्चुकी च दीर्घपत्रा सतिक्तिका ।
चञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा ।
धातुपुष्टिकरी बल्या मेध्या पिच्छिलिका स्मृता ॥"
इति भावप्रकाशः ॥
तस्या बीजस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मशूलोदररोगविषत्वग्दोषकण्डूमण्डूकुष्ठनाशित्वञ्च । इति राजनिर्घण्टः ॥ (चञ्चुदारोऽस्य यथा,
"ग्रामे परिगतं यस्तु विबन्धमतिदारुणम् ।
सगर्भविषमस्ताग्र्यं बहुधा सम्प्रवाधकम् ॥
न शमकार्य्या यदि वा बद्धरायामयापि वा ।
उभौ दर्काश्च वारिण्या यवाग्वा वाम्लकस्य वा ॥
सुवर्च्चलायाश्चञ्चोश्च शाकैर्वाप्युपकल्प वा ॥"
इति चरके चिकित्सास्थाने दशमेऽध्याये ।)

चञ्चुका, स्त्री, (चञ्चु+स्वार्थे कन् टाप् च ।) चञ्चुः । पक्षिणामोष्ठः । इति शब्दरत्नावली ॥

चञ्चुपत्रः, पुं, (चञ्च्वाकारं पत्रमस्य) चञ्चुशाकः । इति राजनिर्घण्टः ॥

चञ्चुभृत् पुं, स्त्री, (चञ्चु बिभर्त्तीति । भृ+क्विप् ।) पक्षी । इति त्रिकाण्डशेषः ॥

चञ्चुमान्, [त्] पुं, स्त्री, (चञ्चुरस्त्यस्येति । नित्ययोगे मतुप् ।) पक्षी । इति हारावली ॥

चञ्चुरः, पुं, (चञ्चति चञ्चुवदाकृतिं गच्छतीति । चञ्च गतौ+बाहुलकात् उरच् ।) चञ्चुशाकः । इति राजनिर्घण्टः ॥ (दक्षः । यथा, काशीखण्डे । १० । ४६ ।
"विज्ञाताखिलशास्त्रार्थो लौकिकाचारचञ्चुरः ।
कदाचिच्चिन्तयामास हृदि ध्यात्वा महेश्वरम् ॥")

चञ्चुसूचिः, पुं, (चञ्चुः सूचिरिव यस्य ।) कारण्डवपक्षी । तत्पर्य्यायः । सुग्रहः २ पीततुण्डः ३ । इति त्रिकाण्डशेषः । मरुलः ४ चञ्चुसूचिकः ५ । इति हेमचन्द्रः । ४ । ४०७ ॥

चञ्चुसूचिकः, पुं स्त्री, (चञ्चुसूचि+स्वार्थे कन् यद्वा चञ्चुः सूचिरिव यस्य इति कप् ।) चञ्चुसूचिपक्षी । इति हेमचन्द्रः । ४ । ४०७ ॥

चञ्चूः, स्त्री, (चञ्चु+"ऊङुतः ।" ४ । १ । ६६ । इत्यस्य "अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम् ।" इति वार्त्तिकोक्त्या ऊङ् ।) चञ्चुः । इति हेमचन्द्रः ॥

चट, भेदे । इति कविकल्पद्रुमः । (भ्वां परं-सकं-सेट् ।) चटति । इति दुर्गादासः ॥

चट, क वधे । भेदे । इति कविकल्पद्रुमः ॥ (चुरां परं-सक-सेट् ।) क, चाटयति । इति दुर्गादासः ॥

चटकः, पुं, (चटति भिनत्ति धान्यादिकं चञ्चुपुटेनेति । चट भेदे+"नन्दिग्रहीति ।" ३ । १ । १३४ । इति पचादित्वादच् ततः स्वार्थे कन् ।) पक्षिविशेषः । चटा इति भाषा ॥ (यथा, देवीभागवते । १ । ४ । ८ ।
"दीप्य प्रेमाद्भुतं तत्र बाले चटकयोस्तदा ।
व्यासश्चिन्तातुरः कामं मनसा समचिन्तयत् ॥")
तत्पर्य्यायः । कलविङ्कः २ । इत्यमरः । २ । ५ । १८ ॥ चित्रपृष्ठः ३ गृहनीडः ४ वृषायणः ५ । इति हारावली ॥ कामुकः ६ नीलकण्ठकः ७ कामकण्ठकः ८ कामचारी ९ । इति जटाधरः ॥ कलाविकलः १० । इति शब्दरत्नावली ॥ तन्मांसगुणाः । शीतत्वम् । लघुत्वम् । शुक्रबलप्रदत्वञ्च ।
तद्भार्य्यायाश्चटकाः तनुः क्रय लघु पथ्यदम् ॥
इति राजनिर्घण्टः ॥
("चटकः श्लेष्मलः स्निग्धो वातघ्नः शुक्रलः परम् ।
गुरूष्णस्निग्धमधुरा वर्गाश्चातो यथोत्तरम् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ।
"चटका मधुराः स्निग्धा बलशुक्रविवर्द्धनाः ।
सन्निपातप्रशमनाः शमना मारुतस्य च ॥"
इति चरके सूत्रस्थाने २७ अध्याये ।)

चटकका, स्त्री, (चटका+स्वार्थे कन्। "उदीचामातः स्थाने यकपूर्व्वायाः।" ७।३।४६। इति पक्षे इदादेशाभावः।) चटका। इति मुग्धबोधव्याकरणम्॥

चटका, स्त्री, (चटक+टाप्।) चटकपक्षी। (चटकस्य चटकाया वा स्त्र्यपत्यम्। चटका+ऐरक्। स्त्रियामपत्ये लुक् वक्तव्यः। तत्र टावन्तात् तद्धिते लुप्ते "लुक् तद्धितलुकि।"१।२।४९। इति टापो लुकि पुनः अजाद्यतष्टाप्। स च जातिलक्षणङीषो वाधकः।) चटकस्त्र्यपत्यम्। चटी इति भाषा॥ इत्यमरः।२।५।१८॥ पिप्पलीमूलम्। इत्यमरटीकायां नारायणचक्रवर्त्ती॥ श्यामापक्षी। इति राजनिर्घण्टः॥

चटकाशिरः [स्] क्ली (चटकायाः शिर इव।) पिप्पलीमूलम्। इति हेमचन्द्रः॥

चटकिका, स्त्री, (चटका+स्वार्थे कन्। "उदीचामातः स्थाने यकपूर्व्वायाः।" ७।३।४६। इति इदादेशः।) चटका। इति मुग्धबोधव्याकरणम्।

चटिका, स्त्री, (चटति भिनत्ति रोगादिकं नाशयतीत्यर्थः। चट्+वाहुलकात् इकन्।) पिप्पलीमूलम्। (चटति भिनत्ति धान्यादिक स्वचञ्चुपुटेनेति।) चटका। इति हलायुधः॥

चटिकाशिरः, [स्] क्ली, (चटिकायाः चटकपक्षिण्याः मस्तकमिव आकृतिरस्य।) पिप्पलीमूलम्। इत्यमरः।२।९।११०॥

चटिकाशिरः, पु, ("सर्व्वे सान्ता अदन्ताः स्युः।" इत्युक्तेः पृषोदरादित्वात् सलोपः।) पिप्पलीमूलम्। इत्यमरटीकायां भरतः॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"ग्रन्थिकं पिप्पलीमूलं षड्ग्रन्थिश्चटिकाशिरः॥")

चटुः, पु (चटति शोकसन्तापादिकं भिनत्तीति। चट भेदे+"मृगय्वादयश्च।" उणां।१।३७। इति कुः।) प्रियवाक्यम्। (यथा, माघे। ४।६।
"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चित् चटुलालसानाम्॥")
उदरम्। व्रतिनामासनभेदः। इति मेदिनी। टे।१४॥ प्रियभाषणे क्लीवलिङ्गोऽपि। इति संक्षिप्तसारे उणादिवृत्तिः॥

चटुलः, त्रि, (चटतीति। चट्+वाहुलकादुलच्। यद्वा, चटु+"सिध्मादिभ्यश्च।"५।२।९७। इति मत्वर्थे लच्।) चपलः। इति हेमचन्द्रः। ६।९१॥ (यथा, रघुः।९।५८।
"त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि॥")
सुन्दरः। इत्युणादिकोषः॥

चटुला, स्त्री, (चटुल+"अजाद्यतष्टाप्।" ४।१।४। इति टाप्।) विद्युत्। इति जटाधरः॥ (गायत्रीरूपा भगवती। यथा, देवीभागवते। १२।६।४७।
"चटुला चण्डिका चित्रा चित्रमाल्यविभूषिता॥")

चटुलोल, त्रि, (चटुलश्चञ्चलः लोलश्च। अतिचञ्चलत्वात्तथात्वम्। निपातनादलोपे साधुः।) चाटुलोलः। सुचञ्चलः। इति हारावली।२१६॥

चड, इ क रोषे। इति कविकल्पद्रुमः॥ (चुरां-परं-अक-सेट्।) इ क, चण्डयति। इति दुर्गादासः॥

चड, इ ङ रोषे। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-अकं सेट्।) इ, कर्म्मणि चण्ड्यते। ङ, चण्डते। इति दुर्गादासः॥

चण, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) चणति। इति दुर्गादासः॥

चण, म दाने। इति कविकल्पद्रुमः॥ (भ्वा-परं-सक-सेट्।) म, चणयति। इति दुर्गादासः॥

चण, मि गतौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) मि, चणयति चाणयति। इति दुर्गादासः॥

चणकः, पु, (चणति वेदोच्चारणादिध्वनिना शब्दायते इति। चण शब्दे+क्वुन्।) मुनिविशेषः। इति शब्दरत्नावली॥ (चण्यते दीयते इति। चण दाने+क्वुन्।) शस्यविशेषः। चणा बुट छोला इति च भाषा॥ तत्पर्य्यायः। हरिमन्थकः २। इत्यमरः।२।९।१८॥ हरिमन्थजः ३। इति तट्टीका॥ चणः ४ हरिमन्थः ५ सुगन्धः ६ कृष्णचञ्चुकः ७ वालभोज्यः ८ वाजिभक्ष्यः ९ कञ्चुकी १०। अस्य गुणाः। मधुरत्वम्। रूक्षत्वम्। मेहवान्त्यस्रपित्तनाशित्वम्। दीपनत्वम्। वर्णवलरुच्याध्मानकारित्वञ्च॥*॥ आमस्य तस्य गुणाः। शीतलत्वम्। रुच्यत्वम्। सन्तर्पणत्वम्। दाहतृष्णाश्मरीशोषनाशित्वम्। गौल्यत्वम्। कषायत्वम्। इषत्कफवीर्य्यकारित्वञ्च॥*॥ भृष्टस्य तस्य गुणाः। रुच्यत्वम्। वातनाशित्वम्। रक्तदोषकारित्वम्। उष्णवीर्य्यत्वम्। लघुत्वम्। स्वेदशैत्यहरत्वञ्च॥*॥ तस्य यूषस्य गुणाः। मधुरत्वम्। कषायत्वम्। कफवातविकारश्वासोर्द्धकासक्षमपीनसनाशित्वम्। वलदीपनत्वञ्च॥*॥ प्रातस्तज्जलपानगुणाः। चन्द्रमरीचिवत् शीतलत्वम्। पित्तरोगनाशित्वम्। पुष्टिप्रदत्वम्। पाके नैजगुणत्वम्। सन्तर्पणत्वम्। मञ्जुलत्वम्। मधुरत्वञ्च। इति राजनिर्घण्टः॥*॥ तस्य आर्द्रभृष्टस्य गुणः। वलकारित्वम्। रोचनत्वञ्च॥*॥ स्विन्नस्य तस्य गुणः। पित्तकफनाशित्वम्॥*॥ तत्सूपः क्षोभकरः॥*॥ तस्य शाकस्य गुणाः। रुच्यत्वम्। दुर्ज्जरत्वम्। कफवातकारित्वम्। अम्लत्वम्। विष्टम्भजनकत्वम्। पित्तदन्तशोथनाशित्वञ्च। इति भावप्रकाशः॥

चणकात्मजः, पु, (चणकस्य मुनिविशेषस्य आत्मजः।) वात्स्यायनमुनिः। इति हेमचन्द्रः।३।५१७॥

चणकाम्लकं, क्ली, (चणकजातमम्लम्। ततः स्वार्थे कन्।) चणकलवणम्। तस्य गुणाः। अत्यम्लत्वम्। दीपनत्वम्। दन्तहर्षणत्वम्। लवणानुरसत्वम्। रुच्यत्वम्। शूलाजीर्णविवन्धनाशित्वञ्च। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

चणकाम्लवाः, [र्] क्ली, (चणकाम्लस्य चणकलवणस्य वार् जलम्।) क्षेत्रस्थफलवच्चणकपत्रशिशिरवारि। इति रत्नावली॥

चणद्रुमः, पु, (चणश्चणक इव द्रुमो वृक्षः।) क्षुद्रगोक्षुर इति राजनिर्घण्टः॥ चणाद्रुमोऽपि पाठः॥

चणपत्री, स्त्री, (चणश्चणकस्तस्य पत्रमिव पत्रं यस्याः। स्त्रियां ङीप्।) रुदन्तीवृक्षः। इति राजनिर्घण्टः॥

चणिका, स्त्री, (चणति दुग्धवद्रसं ददातीति। चण दाने+क्वुन्। टाप् अत इत्वञ्च।) तृणविशेषः। तत्पर्य्यायः। गोदुग्धा २ सुनीला ३ क्षेत्रजा ४ हिमा ५। अस्या गुणाः। गोजैर्वृष्यत्वम्। वल्यत्वम्। अतिमधुरत्वञ्च। तृणैः पशुहितत्वम्। इति राजनिर्घण्टः॥

चण्डं, क्ली, (चण्डते इति। चडि+पचाद्यच्।) तीक्ष्णम्। इति शब्दरत्नावली॥

चण्डः, पु, (चणति चणयति वा अम्लरसं ददातीत्यर्थः। चण+"अमन्तात् डः।"उणां।१।११४। इति डः।) तिन्तिडीवृक्षः। चण्डते कुप्यतीति। चडि+अच्।) यमकिङ्करः। दैत्यविशेषः। इति मेदिनी। डे।११॥ (अयं हि शुम्भासुरसेनानीः। कदाचिदयं हिमाचलस्थां भगवतीं दृष्ट्वा शुम्भाय कथितवान्। ततः शुम्भार्थं भगवत्यानयनाय गतोऽसौ तल्ललाटफलकनिर्गतया चामुण्डया निहतः। एतद्विवरणं मार्कण्डेयपुराणे द्रष्टव्यम्। कार्त्तिकेयः यथा, महाभारते।३।२३१।४।
"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः॥")

चण्डः, त्रि, (चण्डते रुष्टो भवतीति। चडि+पचाद्यच्।) अत्यन्तकोपनः। इत्यमरः।३।१।३२॥ (यथा, महाभारते।३।२३३।११।
"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्चपलाश्च वर्ज्ज्याः॥")
तीक्ष्णताविशिष्टः। इति शब्दरत्नावली॥ (यथा, महाभारते।१।३२।२३।
"दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम्॥")

चण्डता, स्त्री, (चण्डस्य भावः। चण्ड+तल्।) उग्रता। इति हेमचन्द्रः।२।२३२॥

चण्डनायिका, स्त्री, (चण्डी कोपना नायिका।) दुर्गा। इति शब्दरत्नावली॥ अष्टनायिकान्तर्गतनायिकाविशेषः। (यथा, दुर्गाध्याने।
"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम्।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम्॥")
तस्या ध्यानं यथा, देवीपुराणोक्तदुर्गोत्सवपद्धतौ।
"चण्डनायिकां नीलवर्णां षोड़शभुजाम्।
कपालं खेटकं घण्टां दर्पणञ्च धनुर्ध्वजम्।
पाशञ्च शोभनां शक्तिं वामहस्तैर्विभ्रतीम्॥
मुद्गरं शूलवज्रञ्च खड्गाङ्कुशं तथाङ्कुशम्।
शरं चक्रं शलाकाञ्च दक्षिणेन च विभ्रतीम्॥"

चण्डरुद्रिका, स्त्री, (चण्डः प्रचण्डः रुद्रः अधिष्ठातृतयास्त्यस्याः। चण्डरुद्र+"अत इनिठनौ।"

५ । २ । ११५ । इति ठन् । स्त्रियां टाप । यद्वा प्रचण्डरुद्री रुद्रशक्तिविशेषः । तत, स्वार्थे कन् । टापि पूर्व्वह्रस्वः ।) विद्याविशेषः । इति रत्नावली ॥

चण्डवती, स्त्री, (चण्ड+"अमन्तात् डः ।" उणा । १ । ११४ । इति डः । चडि+अण वा । चण्डः चण्डता विद्यतेऽस्याम् । यद्वा, चण्डः रुद्रांशो भैरवविशेषो रक्षकतया विद्यतेऽस्याः । मतुप् ततो मस्य वत्वम् ।) दुर्गा । इति शब्दरत्नावली ॥ अष्टनायिकान्तर्गतनायिकाविशेषः । अस्या ध्यानं यथा । चण्डवती धूम्रवर्णा षोडशभुजामित्यादि शेष चण्डनायिकाध्यानवत् । इति देवीपुराणोक्तदुर्गोत्सवपद्धति ॥

चण्डा, स्त्री, (चम् चण् वा+डः । चडि+अच वा । ततष्टाप् ।) अष्टनायिकान्तर्गतनायिकाविशेषः । (यथा, देवीपुराणे ।
"चण्डा चण्डवती चण्डनायिकाप्यतिचण्डिका ॥")
अस्या ध्यान यथा । चण्डा शुक्लवर्णा षोडशभुजामित्यादि शेष चण्डनायिकाध्यानवत् । इति देवीपुराणोक्तदुर्गोत्सवपद्धति ॥ जिनानां शासनदेवताविशेषः । इति हेमचन्द्रः ॥ चोरनामगन्धद्रव्यम् । इत्यमरः । २।४।१२८ ॥ (यथा, चरके सूत्रस्थाने तृतीयेऽध्याये ।
"कुष्ठ हरिद्रे सुरस पटोल
निम्बाश्वगन्धे सुरदारुशिग्रु ।
ससर्षप तुम्बुरुधान्यवन्यम्
चण्डाच चूर्णानि समानि कुर्य्यात् ॥")
शङ्खपुष्पी । इति मेदिनी । डे । १२ ॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये ॥ "एलातगरकुष्ठमांसीध्यामकत्वकपत्रनागपुष्प प्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकवालकगुग्गुलुसर्ज्जरसतुरुष्ककुन्दुरुकागुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति ॥" लिङ्गिनीलता । कपिकच्छुः । आखुकर्णी । श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥ नदीविशेषः । इति शब्दरत्नावली ॥

चण्डांशुः पुं (चण्डा प्रखरास्तीक्ष्णा वा अंशवो रश्मयोऽस्य ।) सूर्य्यः । यथा महानाटके ।
"चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुज्जृम्भते ।"
(तथाच राजतरङ्गिण्याम् । ४ । ४०१ ।
"भ्रातरौ तौ समासाद्य राज्य नैव व्यराजत ।
हेमन्तशिशिरौ प्राप्य चण्डांशोरिव मण्डलम् ॥")

चण्डात., पु, (चण्ड चण्डता तीव्रत्व अतति निरन्तरं प्राप्नोतीति । अत+अण् ।) करवीरः । इत्यमरः । २ । ४ । ७६ ॥ (पर्य्यायोऽस्य यथा,—
"द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्य करवीरशब्दे ज्ञातव्याः ॥)

चण्डातक, स्त्री, (चण्डां स्त्रियं अतति सततं गच्छति प्राप्नोतीत्यर्थः । अत+ण्वुल् ।) अर्द्धोरुकम् । वरस्त्रीणामर्द्धोरुपर्य्यन्त वासः । इत्यमरः । २ । ६ । ११८ ॥ पुंस्काण्डे वोपालितप्रमात् पुलिङ्गोऽपि ॥

चण्डाल., पुं, (चण्डते कुप्यतीति । चडि कोपे+"पतिचण्डिभ्यामालञ् ।" उणां ।१।११६। इत्यालञ् । यद्वा, चण्डं विकटं अलं कालश्छागो यस्य इत्युज्ज्वलदत्तः ।) वर्णसङ्करजातिविशेषः । चाड़ाल इति भाषा । स तु ब्राह्मणीगर्भे शूद्रौरसाज्जातः । इति पराशरपद्धतिः ॥ तत्पर्य्यायः । प्लवः २ मातङ्गः ३ दिवाकीर्त्तिः ४ जनङ्गमः ५ निषादः ६ श्वपचः ७ अन्तेवासी ८ चाण्डालः ९ पुक्कसः १० । इत्यमरः । २ । १० । १९ ॥ जनङ्गम ११ निषाद. १२ श्वपक् १३ पुक्कशः १४ पुक्कसः १५ । इति तट्टीका ॥ निष्क, १६ । इति त्रिकाण्डशेषः ॥ तस्याकृतिर्यथा, रामायणे ।
"अथ रात्र्यां व्यतीतायां तस्यां राजा बभूव ह ।
चण्डालदर्शनो राम । मद्य एव दुरात्मनि ॥
नीलपीताम्बरधरो रक्ताम्बरलतोत्तर ।
सरक्तताम्रघोराक्षः करालो हरिपिङ्गल ॥
श्मशानभस्मनिवासी च लौहाभरणभूषितः ॥"
अस्य चण्डालस्य निवासकर्म्मादि यथा,—
"चण्डालश्वपचानान्तु वहिर्ग्रामात् प्रतिश्रयः ।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्द्दभम् ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥"
(एतैर्हतस्य पशोर्मांसस्य शुद्धिमाह मनुः ।५।१३१।
"श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ।
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः ॥")
क्रूरकर्म्मा । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (स्त्रियां ङीप् । तन्त्रोक्तशक्तिविशेषः ॥)

चण्डालकन्दः, पुं, (चण्डालप्रियः कन्दः ।) कन्दविशेषः । तस्य गुणाः । मधुरत्वम् । कफपित्तास्रदोषविषभूतादिदोषनाशित्वम् । रसायनत्वञ्च । तस्य भेदाः । एकपत्रः द्विपत्रः त्रिपत्रः चतुष्पत्रः पञ्चपत्रः । इति राजनिर्घण्टः ॥

चण्डालवल्लकी, स्त्री, (चण्डालवादनीया वल्लकी वीणा ।) चण्डालवीणा । इत्यमरः ।२।१०।३२॥ अस्याः पर्य्यायः । कण्डोलवीणाशब्दे द्रष्टव्यः ॥

चण्डालिका, स्त्री, (चण्डाल, वादकत्वेनाऽस्त्यस्याः । चण्डाल+ठन् टाप् च ।) चण्डालवल्लकी । उमा । (चण्डं प्रचण्डभावं अलतीति । अल+ण्वुल् कापि अत इत्वञ्च ।) ओषधीभेदः । इति मेदिनीकरहेमचन्द्रौ ॥

चण्डि, स्त्री, (चडि कोपे+इन् ।) चण्डी । इत्यमरटीकायां भरतः ॥

चण्डिका, स्त्री (चण्डी+स्वार्थे कन् टापि पूर्व्वह्रस्वः । चण्डि+कन् वा ।) दुर्गा । इत्यमरः । १ । १ । ३९ ॥ (यथा, मार्कण्डेये । ८७ । २९ ।
"इत्युक्ता सा भगवती चण्डिका चण्डविक्रमा ।"
इयमेव अमरकण्टके पीठशक्तिरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ७३ ।
"छागलण्डे प्रचण्डा तु चण्डिकाऽमरकण्टके ।"
गायत्रीरूपा देवी । यथा, देवीभागवते । १२ । ६ । ४७ ।
"चटुला चण्डिका चित्रा चित्रमाल्यविभूषिता ।")

चण्डिल, पु, (चण्डते कोपयुक्तो भवतीति । चडि कोपे+इलच । चण्ड+अस्त्यर्थे इलच् वा ।) रुद्रः । नापितः ॥ वास्तूकम् । इति हेमचन्द्रः ॥

चण्डिला, स्त्री (चण्डिल+स्त्रियां टाप् ।) नदीभेदः । इत्युणादिकोषः ॥

चण्डी, स्त्री, (चडि+"कञ्चादिभ्यश्च ।" ४।१।४१। इति वा ङीष् ।) दुर्गा । (यथा, तिथितत्त्वे दुर्गोत्सवबोधनप्रकरणे ।
"चण्डीमामन्त्रयेद् विद्वान् नात्र चण्डी पुरस्क्रिया ।")
कोपना । इति मेदिनी । ते । १२ ।
(यथा, रघुवंशे । १२ । ५ ।
"सा किलाश्वासिता चण्डी भर्त्रा तत् संश्रुतौ वरौ ।")
अस्या रूपान्तराणि । चण्डि चण्डा चण्डिका इत्यमरटीकायां भरतः ॥ * ॥ मार्कण्डेयपुराणोक्तदेवीमाहात्म्यम् । तस्य पाठक्रमो यथा,—
"अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत् ।
जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः ॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा ।
कवचं रक्षयेन्नित्यं चण्डिका त्रितयं तथा ॥"
इति तन्त्रम् ।

अपि च ।
"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
आदौ च प्रणवं जप्त्वा स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥
सर्व्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ।
शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ॥
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम् ।
आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः ।
हस्तसंस्थापनादेव यस्मादल्पफलं लभेत् ।
स्वयञ्च लिखितं यत्तु स्वतिना लिखितं न यत् ।
अब्राह्मणेन लिखितं तथापि विफलं भवेत् ।
ऋषिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः ।
स्तोत्रे न दृश्यते यत्र प्रणवन्यासमाचरेत् ।
सङ्कल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः ।
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ।
कृते विरामे मध्ये तु अध्यायादिं पठेन्नरः ॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् ।
श्रुत्वान्यवर्णजाद्राजन् । वाचकान्नरकं व्रजेत् ।
देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः ।
ग्रन्थिञ्च शिथिलं कुर्य्याद्वाचकः कुरुनन्दन ॥
पुनर्ब्बध्नीत तत् सूत्रं न सूत्रा धारयेत् क्वचित् ।

विसृष्टमद्रुत शान्तं स्पष्टाक्षरपदन्तथा ॥
कलस्वरसमायुक्तं रसभावसमन्वितम् ।
बुध्यमानः सदर्थं वै ग्रन्थार्थं कृत्स्नशो नृप ! ॥
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थञ्चार्पयेन्नृप ! ।
य एव वाचयेद्‌ब्रह्मन् । स विप्रो व्यास उच्यते ॥
सप्तस्वरसमायुक्तं काले काले विशाम्पते ।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप ! ॥”
तस्य फल यथा,—
“चण्डीपाठफलं देवि ! शृणुष्व गदतो मम ।
एकावृत्त्यादिपाठानां यथावत् कथयामि ते ॥
सङ्कल्प्य पूर्व्वं सम्पूज्य न्यस्याङ्गेषु मनून् सकृत् ।
पाठाद्‌बलिप्रदानाद्धि सिद्धिमाप्नोति मानवः ॥
उपसर्गस्य शान्त्यर्थं त्रिरावृत्तं पठेन्नरः ।
ग्रहोपशान्त्यै कर्त्तव्यं पञ्चावृत्तं वरानने ! ॥
महाभये समुत्पन्ने सप्तावृत्तं समुन्नयेत् ।
नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ।
अर्कावृत्त्या काम्यसिद्धिर्वैरिहानिश्च जायते ॥
मन्वावृत्त्या रिपुर्व्वश्यस्तथा स्त्रीवश्यतामियात् ।
सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः ॥
कलावृत्त्या पुत्त्रपौत्त्रधनधान्यागमं विदुः ।
राज्ञो भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥
कुर्य्यात् सप्तदशावृत्तं तथाष्टादशकं प्रिये ! ।
महाव्रणविमोक्षाय त्रिंशावृत्तिं पठेत् सुधीः ॥
पञ्चविंशावर्त्तनात्तु भवेद्‌बन्धविमोचनम् ।
सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ॥
जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्य्याद्‌यत्नात् शतावृत्तिं ततः सम्पद्यते शुभम् ॥
श्रियोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथापरे ।
मनसा चिन्तितं देवि ! सिद्ध्येदष्टोत्तराच्छतात् ॥
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ! ।
सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् ।
यथाश्वमेधः क्रतुराट् देवानाञ्च यथा हरिः ॥
स्तवानामपि सर्व्वेषां तथा सप्तशतीस्तवः ॥
अथवा बहुनोक्तेन किमेतेन वरानने ! ।
चण्ड्याः शतावृत्तपाठात् सर्व्वाः सिध्यन्ति
सिद्धयः ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥

अथ प्रथमचरितस्य ब्रह्मर्षिर्महाकाली देवता गायत्त्री छन्दो नन्दा शक्ती रक्तदन्तिका बीजमग्निस्तत्त्वम् । तत्र महाकाल्या ध्यानं यथा,—
“दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥
स्फुरद्दशनदंष्ट्राभा भीमरूपा भयङ्करी ।
खड्‌गशूलगदाबाणतोमरञ्च भुशुण्डिभृत् ॥
परिघं कार्म्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ।
मधुकैटभयोर्युद्धे ध्येया सा तामसी शिवा ॥”

मध्यमचरितस्य विष्णुरृषिर्महालक्ष्मीर्देवता अनुष्टुप् छन्दः शाकम्भरी शक्तिर्दुर्गाबीजं सूर्य्यस्तत्त्वम् । तत्र महालक्ष्म्या ध्यानं यथा,—
“श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ।
रक्तमध्या रक्तदेहा स्थूलजङ्घोरुतालुका ॥
चित्रानुलेपना कान्ता सर्व्वसौभाग्यशालिनी ।
अष्टादशभुजा पूज्या सा सहस्रभुजा रणे ॥
आयुधान्यत्र वक्ष्यन्ति दक्षिणाधःकरक्रमात् ।
अक्षमालाञ्च मुषलं बाणासिकुलिशं गदाम् ॥
चक्रं त्रिशूलं परशुं शङ्खघण्टे च पाशकम् ।
शक्तिदण्डं चर्म्म चापं पानपात्रं कमण्डलुम् ॥
अलङ्कृतभुजा एतैरायुधैः परमेश्वरी ।
स्मर्त्तव्या स्तुतिकालादौ महिषासुरमर्द्दिनी ॥
इत्येषा राजसी मूर्त्तिः सर्व्वदेवमयी मता ।
यां ध्यात्वा मानवो नित्यं लभेतेप्सितमात्मनः ॥”

उत्तरचरितस्य रुद्र ऋषिः सरस्वती देवता उष्णिक् छन्दो भीमा शक्तिर्भ्रामरी बीजं वायुस्तत्त्वम् । तत्र सरस्वत्या ध्यानं यथा,—
“गौरीदेहसमुत्पन्ना या सत्त्वैकगुणाश्रया ।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिसूदनी ॥
दधौ चाष्टभुजा बाणं मुषलं शूलचक्रकम् ।
शङ्खघण्टाहलञ्चैव कार्म्मुकञ्च तथा परम् ॥
ध्येया सा स्तुतिकालादौ वधे शुम्भनिशुम्भयोः ॥”
इति कात्यायनीतन्त्रम् ॥

(छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
“नयुगलययुगलगैरिति चण्डी ॥”)

चण्डीकुसुमः, पु, (चण्डीप्रीतिजनकं कुसुमं यस्य ।) रक्तकरवीरवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य करवीरशब्दे बोद्धव्याः ॥)

चण्डुः, पु, (चडि+बाहुलकात् उः ।) उन्दुरुः । इति शब्दचन्द्रिका ॥

चत, ऋ ञ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-सेट् ।) ऋ, अचचतत् । ञ, चतति चतते । इति दुर्गादासः ॥

चतुः, [र्] व्य, चतुर्व्वारम् । इति व्याकरणम् ॥

चतुःपत्त्री, स्त्री, (चत्वारि चत्वारि पत्त्राण्यस्याः ।) क्षुद्रपाषाणभेदी । इति राजनिर्घण्टः ॥

चतुःपर्णी, स्त्री, (चत्वारि चत्वारि पर्णानि यस्याः ।) क्षुद्राम्लिका । इति राजनिर्घण्टः ॥

चतुःपला, स्त्री, (चत्वारि पलानि यस्यां यस्या वा ।) नागबला । इति राजनिर्घण्टः ॥

चतुःपुण्ड्रः, पु, (चत्वारि पुण्ड्राणीव यत्र ।) भिण्डावृक्षः । इति राजनिर्घण्टः ॥

चतुःशालं, क्ली स्त्री, (चतसृणां शालानां समाहारः ।) परस्पराभिमुखगृहचतुष्टयम् । चक्मिलनबाडी इति भाषा ॥ इत्यमरः । २ । २ । ६ ॥ (यथा, महाभारते । १ । १४५ । ८ ।
“तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ॥”)

चतुःशालक, क्ली, (चतुःशाल+स्वार्थे कन् ।) चतुःशालम् । इति शब्दरत्नावली ॥

चतुःषष्टिः, स्त्री, (चतुरधिका षष्टिः ।) चतुरधिकषष्टिसंख्या । चौषट्टि इति भाषा ॥ कलानाम्नी उपविद्या । (यदुक्तं रूपगोस्वामिकृतभगवन्माहात्म्ये ।
“चतुःषष्टिकलानान्तु विद्यानां पारदृश्वनः ।
ऋते कृष्णाद्‌भगवतः कः क्षमो देहवान्नरः ॥”)
ऋग्वेदः । इति मेदिनी । टे । ६३ ॥

चतुरः, त्रि, (चत्यते याच्यते इति । चत+“मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् ।” उणां । १ । ३८ । इत्युरच् ।) कार्य्यक्षमः । निरालस्यः । तत्पर्य्यायः । दक्षः २ पेशलः ३ पटुः ४ सूत्थानम् ५ उष्णः ६ । इत्यमरः । २ । १० । १९ । पेशलः ७ पेषलः ८ इति तट्टीका ॥ निपुणः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । १ । १७ । ४४ ।
“चतुरो नैव मुह्येत मूर्खः सर्व्वत्र मुह्यति ॥”)
तस्य लक्षणं यथा । वाक्चेष्टाव्यङ्ग्यसमागमः । तत्र वचनव्यङ्ग्यसमागमो यथा, रसमञ्जर्य्याम् ।
“तमोजटाले हरिदन्तराले
काले निशायास्तव निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत शालोदरिक सहायः ॥”
चेष्टाव्यङ्ग्यसमागमो यथा,—
“कान्ते कनकजम्बीरं करे कमपि कुर्व्वति ।
अगारलिखिते भानौ बिन्दुमिन्दुमुखी ददौ ॥”
(उपभोगक्षमः । यथा, रघुः । ९ । ४७ ।
“त्यजत मानमलं बत विग्रहैः
न पुनरेति गतं चतुरं वयः ॥”
“चतुरं उपभोगक्षमम् ।” इति तट्टीकायां मल्लिनाथः ॥) नेत्रगोचरः । इति हेमचन्द्रः ॥

चतुरः, पुं, (चत+उरच् ।) चक्रगण्डुः । हस्तिशाला । इति हेमचन्द्रः ॥

चतुरक्रमः, पु, (चतुरः चातुर्य्यान्वितः क्रमः प्रणाली यत्र ।) सप्तधारूपकान्तर्गतरूपकभेदः । यथा—
“द्रुतद्वन्द्वं लुतद्वन्द्वं तथा प्रान्ते गुरुर्भवेत् ।
द्वाविंशत्यक्षरैर्युक्तः शृङ्गारे चतुरक्रमः ॥”
इति सङ्गीतदामोदरः ॥

चतुरङ्गं क्ली, (चत्वारि अङ्गानि यस्य ।) हस्त्यश्वरथपदातिरूप सैन्यम् । यथा, रामायणे ।
“चतुरङ्गं ह्यपि बलं सुमहत् प्रसहेमहि ।”
अक्षक्रीडाविशेषः । चौरङ्खेला इति भाषा ॥ यथा,—
युधिष्ठिर उवाच ।
“अष्टकोष्ठाश्च या क्रीडा तां मे ब्रूहि तपोधन ! ।
प्रकर्षेणैव मे नाथ चतूराजी यतो भवेत् ॥
व्यास उवाच ।
अष्टौ कोष्ठान् समालिख्य प्रदक्षिणक्रमेण तु ।
अरुणं पूर्व्वतः कृत्वा दक्षिणे हरितं बलम् ॥
पार्थ ! पश्चिमतः पीतमुत्तरे श्यामलं बलम् ।
राज्ञो वामे गजं कुर्य्यात् तस्मादश्वं ततस्तरिम् ॥
कुर्य्यात् कौन्तेय ! पुरतो मुद्धे पद्भिचतुष्टयम् ।
कोणे नौका द्वितीयेऽश्वस्तृतीये कुञ्जरो वसेत् ॥
तुरीये च वसेद्राजा वटिकाः पुरतः स्थिताः ॥
पञ्चकेन वटी राजा चतुष्कोणेव कुञ्जरः ॥
त्रिकोणे तु चलत्यश्वः पार्थ ! नौकाद्वयेन तु ॥
कोष्ठमेकं विलङ्घ्याथ सर्व्वतो याति भूपतिः ॥

अग्र एव वटी याति वल हन्त्यग्रकोणगम् ।
यथेष्टं कुञ्जरो याति चतुर्द्दिक्षु महीपते ॥
तिर्य्यक् तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम् ।
कोणकोष्ठद्वयं लङ्घ्य व्रजेन्नौका युधिष्ठिर ॥
सिंहासनं चतूराजी नृपाक्रष्टन्तु षट्पदम् ।
काककाष्ठं हन्त्यन्नौका नौकाक्रष्टप्रकारकम् ॥
घाताघाते वटी नौका बलं हन्ति युधिष्ठिर ।
राजा गजो हयश्चापि त्यक्त्वा घात निहन्ति च ॥
अत्यन्तं खबल रक्षेत् खराजा बलमुत्तमम् ।
अश्वस्तारतया पार्थ । हन्तथ बलमुत्तमम् ॥
नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि
इत्याधिक्यमश्वस्य ॥
मतङ्गजस्य गर्व्वेण राजा क्रीडति निर्भरम् ।
तस्मात् सर्व्वबल दत्त्वा रक्ष कौन्तेय । कुञ्जरम् ॥
सिंहासन चतूराजी यदवस्थानतो भवेत् ।
सर्व्वसैन्येर्गजेर्वापि रक्षितव्यो महीपति ॥
अन्यदाजपदं राजा यदाक्रान्तो युधिष्ठिर ।
तदा सिंहासन तस्य भण्यते नृपसत्तम ॥
राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा ।
द्विगुण वाहयेत् पणमन्यथैकगुण भवेत् ॥
द्विगुणं पण दातव्यत्वेन प्रापयेत् ॥
मित्रसिंहासन पार्थ यदारोहति भूपतिः ।
तदा सिंहासन नाम सर्व्वं नयति तद्‌बलम् ॥
यदा सिंहासनं कर्त्तुं राजा स्वपदाश्रितः ।
तदा घातेऽपि हन्तव्यो बलेनापि सुरक्षितः ॥
विद्यमाने नृपे यत्र स्वकीये च नृपत्रयम् ।
प्राप्नोति च तदा तस्य चतूराजी यदा भवेत् ॥
नृपेणैव नृप हत्वा चतूराजी यदा भवेत् ।
द्विगुणं वाहयेत् पणमन्यथैकगुण भवेत् ॥
स्वपदस्थ यदा राजा राजान हन्ति पार्थिव ।
चतुरङ्गे तदा भूप । वाहयेच्च चतुर्गुणम् ॥
यदा सिंहासने काले चतूराजी समुत्थिता ।
चतूराजी भवत्येव न तु सिंहासनं नृप ॥
अत्रेदं बीजं उभयथा तयोरपि परसिंहासनाधि-
कारात् परराजवधे प्रौर्य्याधिक्यनिष्कण्टकत्व-
दर्शनात् । क्रीडायामपि तथा कल्प्यते ॥ ॥
राजद्वय यदा हस्ते आत्मनो राज्ञि संस्थिते ।
परेण संहृतश्चैको बलेनाप्यपहाय्यते ॥
राजद्वय यदा हस्ते न स्यादन्यकरे परः ।
तदा राजा हि राजान घातेऽपि त हनिष्यति ॥
नृपाक्रष्टे यदा राजा गमिष्यति युधिष्ठिर ।
घाताघातेऽपि हन्तव्यो राजा तत्र न रक्षक ॥
कोणं राजपद त्यक्त्वा वटिकान्य यदा व्रजेत् ।
वटी नयेत् पद नाम तदा कोष्ठबल च षट् ॥
यदि तस्य भवेत् पार्थ । चतूराजी च षट्पदम् ।
तदापि च चतूराजी भवत्येव न संशय ॥
पदाते षट्पदे विद्धे राज्ञा वा हस्तिना तथा ।
षट्पद न भवेत्तस्य व्यवस्थं ध्रुवं पार्थिव ॥
सप्तमे कोष्ठके या स्याद्वटिका दृश्यकेन वै ।
तदान्योन्यघ हन्तथं सुखाय दुर्व्वल बलम् ॥
त्रिवटीकस्य कौन्तेय । पुरुषस्य कदाचन ।
षट्पद न भवत्येव इति गौतमभाषितम् ॥

नौकैका वटिका यस्य विद्यते खेलने यदि ।
गाढ़ावटीति विख्याता पद तस्य न दुष्यति ॥
गाढ़ावाल्यापदं राजपद कोणपदञ्च तत् ।
हस्ते रङ्गे बल नास्ति काककाष्ठ तदा भवेत् ॥
वदन्ति राक्षसाः सर्व्वे तस्य न स्तो जयाजयौ ।
प्रार्थिते पञ्चमे राज्ञि ह्यतवश्चाश्व षट्पदे ॥
अशौच स्यात्तदा राजन् । चलित्वा चालितं
पदम् ।
द्विराष्टत्या गतौ तस्मादन्यात् परबलं जयी ॥
सिंहासन भवत्येव काककाष्ठं न भण्यते ॥
उपविश्य यत् स्थान तस्योपरिचतुष्टये ।
नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥
नौकाचतुष्टय तत्र हन्यन्नौकेति भण्यते ।
न कुर्य्यादेकदा राजन् ! गजस्याभिमुख गजम् ॥
यदि कुर्व्वीत धर्म्मज्ञ । पापयुक्तो भविष्यति ।
स्थानाभावे यदा पार्थ । हस्तिनं हस्तिसम्मुखम् ॥
करिष्यति तदा राजन्निति गौतमभाषितम् ।
प्राप्ते गजद्वये राजन् । हन्तव्यो वामतो गजः ॥”
इति तिथ्यादितत्त्वे चतुरङ्गक्रीडनम् ॥
चतुरङ्गा, स्त्री, (चत्वारि अङ्गानि यस्याः ।)
घोटिकाटृष्य । इति राजनिर्घण्टः ॥
चतुरङ्गिणी, स्त्री, (चत्वारि अङ्गानि हस्त्यश्वरथ-
पदातय. सन्त्यस्यामिति । चतुरङ्ग + इनि ।)
चतुरङ्गसेना । इति रामायणम् ॥ (यथा, महा
भारते । १ । ७३ । २० ।
“प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ॥”)
चतुरङ्गुलः, पु (चतस्र अङ्गुलय परिमाणमस्य ।
समासे अच् ।) आरग्वधवृक्ष । इत्यमर ।
२ । ४ । २३ ॥ (यथा, सुश्रुते सूत्रस्थाने
४४ अध्याये ।
“विरेचनानि सर्व्वाणि विशेषाच्चतुरङ्गुलात् ॥”)
चतुरङ्गुलिपरिमिते त्रि ॥ (यथा, शतपथ-
ब्राह्मणे । १० । २ । २ । १ ।
“स चतुरङ्गुलमेवोभयतोऽन्तत उपगूहति ॥”)
चतुरम्ल क्ली, (चतुर्णां अम्लानां समाहारः ।)
चतुर्व्विधाम्लद्रव्यम् । यथा, भावप्रकाशे ।
“अम्लवेतसवृक्षाम्लबृहज्जम्बीरनिम्बुकैः ।
चतुरम्ल हि पञ्चाम्ल बीजपूरयुतैर्भवेत् ॥”
चतुरस्र, त्रि, (चतस्रोऽस्रयोऽस्य । “सुप्रातसुश्व
सुदिवेति ।” ५ । ४ । १२० । इति अच्प्रत्ययेन
निपातितः ।) चतुष्कोण । यथा,—
“चतुरस्र त्रिकोण वा वर्त्तुल वार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्वेण ब्राह्मणादिषु मण्डलम् ॥”
इत्याह्निकतत्त्वे बौधायनः ॥
सम्यक्चतुर्थांश्मलयम् । इति दीपिका ॥
चतुरानन., पुं, (चत्वारि आननानि मुखानि
यस्य ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥ तस्य
चतुराननत्वे कारण यथा,—
“तस्यां स चाम्भोरुहकर्णिकाया-
मवस्थितो लोकमपश्यमानः ।
परिक्रमन् व्योम्नि विवृत्तनेत्र-
श्चत्वारि लेभेऽनुदिशं मुखानि ॥”

इति श्रीभागवते । ३ । ८ । १६ ॥ (यथा,—
“इतरतापशतानि यथेच्छया
वितर तानि सहे चतुरानन ।
अरसिके तु रसस्यनिवेदनं
शिरसि मा लिख मा लिख मा लिख ॥”
इत्युद्भटः ॥)
चतुरूषण, क्ली (चतुर्णां ऊषणानां समाहारः ।)
पिप्पलीमूलसहित त्रिकटु । यथा, भावप्रकाशे ।
“त्र्यूषणं सकणामूल कथित चतुरूषणम् ।
व्योषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥”
चतुर्गति, पु, (चतुर्भिर्गतिरस्य ।) कच्छप ।
इति हेमचन्द्रः । ४ । ४१६ ॥ (चतुर्णां आश्र-
माणां वर्णानां ब्राह्मणादीनां यथोक्तकारिणां
गतिराश्रय । विष्णुः । यथा, महाभारते । १३ ।
१४६ । ६५ ।
“चतुर्मूर्त्तिश्चतुर्ब्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥”)
चतुर्थ, त्रि, चतुर्णां पूरणः । (“तस्य पूरणे डट् ।”
५ । २ । ४८ । इति डट् । ततः “षट्कतिकतिपय-
चतुरां थुक् ।” ५ । २ । ५१ । इति थुक् ।)
चतुर्थसंख्यापूरण । इति मुग्धबोधम् ॥ चौठा
इत्यादि भाषा ॥
चतुर्थांश, पु, (चतुर्थ अंशः ।) चतुर्भागैकभागः ।
तत्पर्य्याय. । तुरीय २ पाद ३ । इति राज
निर्घण्टः ॥ (चतुर्थः अंशो यस्य । चतुर्थांश-
स्वामिनि त्रि । यथा, मनुः । ८ । २१० ।
“तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥”)
चतुर्थिका, स्त्री, पलपरिमाणम् । इति वैद्यक-
परिभाषा ॥
चतुर्थी, स्त्री, (चतुर्णां पूरणी । “तस्य पूरणे
डट् ।” ५ । २ । ४८ । इति डट् । ततः “षट्
कतिपयचतुरां थुक् ।” ५ । २ । ५१ । इति
थुक् । तस्स्त्रीत्वात् ङीप् ।) तिथिविशेषः । सा
तु चन्द्रस्य चतुर्थकलाक्रियारूपा । इति स्मृतिः ॥
(चतुर्थी तु पञ्चमीयुता ग्राह्या । “युग्माग्नि-
कृतभूतानि ।” इति युग्मवचनात् तथा,—
“एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः ॥”
इत्यग्निपुराणवचनाच्च ॥
भविष्ये,—
“अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया ॥’
यत्तु,—
‘चतुर्थीसंयुता कार्य्या तृतीया च चतुर्थिका ।
तृतीयया युता नैव पञ्चम्या कारयेत् क्वचित् ॥’
इति ब्रह्मवैवर्त्तवचनं पञ्चमीयुतानिषेधकं तद्-
विनायकव्रतपरमिति गुरुचरणाः । तृतीयायुता
निषेधकत्वे क्वचिदित्ययुक्तत्वात् सर्व्वत्रैव पञ्चमी-
युताया ग्राह्यत्वात् । सारस्वत्यादिप्रदोषमाह ।
‘चयोदश्याश्चतुर्थ्याश्च सप्तम्या द्वादशीतिथेः ।
प्रदोषेऽध्ययनं धीमान् न कुर्व्वीत यथाक्रमम् ।
सारस्वतो गायत्रतः सौरश्च वैनायकस्तथा ॥’
प्रदोषशब्दोऽत्र प्रथमप्रहर इति हेमाद्रिः ।

रात्रिपर इति निर्णयामृतकृद् भोजदेव' ॥
'शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तत्र तं ततः ॥'
चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य
पञ्चम्यां दर्शने तु न दोषः । अत',—
'पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥'
दैवात् प्रमादाद्वा दर्शने तु ।
"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक । मा रोदीस्तव ह्येष स्यमन्तकः ॥"
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात्
स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । माघमासस्य
शुक्लचतुर्थ्यां गौरी पूजनीया । यथा, भविष्यो-
त्तरे माघशुक्लपञ्चमधिकृत्य,—
"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
इति तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"सपुत्त्रमित्रप्रमदाप्रमोदी
छताभिलाषी कृपया समेतः ।
विवादशीलो विजयी विवादे
भवेच्चतुर्थीप्रभवः कठोरः ॥"

चतुर्द्दन्तः, पु, (चत्वारो दन्ता यस्य ।) ऐरावत-
हस्ती । इति हेमचन्द्रः । २ । ६१ ॥ (स्वनाम-
ख्यातः पञ्चतन्त्रोक्तगजविशेषः । यथा, पञ्च-
तन्त्रे । ३ । ८० । "कस्मिंश्चिद्वनोद्देशे चतुर्द्दन्तो
नाम महागजो यूथाधिपः प्रतिवसति स्म ॥")

चतुर्द्दश, [न्] त्रि, चतुरधिका दश । चौद इति
भाषा । इति ज्योतिषम् ॥ (यथा, नैषधे । १ । ४ ।
"अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्द्दशत्वं कृतवान् कुतः स्वयं
न वेद्मि विद्यासु चतुर्द्दशस्वयम् ॥"
चतुर्द्दशानां पूरणः । "तस्य पूरणे डट् ।" ५।२।
४८ । इति डट् ।) पूरणार्थे अकारान्तोऽयं
शब्दः ॥ (यथा, रामायणे । २।११२।२५।
"चतुर्द्दशे हि सम्पूर्णे वर्षेऽहनि रघूत्तम ।
न द्रक्ष्यामि यदि त्वान्तु प्रवेक्ष्यामि हुताशनम् ॥")
तद्वाचकानि । विद्या १ यम २ मनुः ३ इन्द्रः ४
भुवनम् ५ ध्रुवतारकम् ६ । इति कविकल्पलता ॥

चतुर्द्दशी, स्त्री, (चतुर्द्दश+टित्वात् ङीप् ।)
तिथिविशेषः । सा तु चन्द्रस्य चतुर्द्दशकला-
क्रियारूपा । तत्पर्य्यायः । भूता २ । इति
तिथ्यादितत्त्वम् ॥ ("सा च शुक्ला पूर्णिमायुता
ग्राह्या युग्मात् कृष्णा पूर्व्वयुता ।
"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्द्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ।
उपवासादिकार्य्येषु एष धर्म्मः सनातनः ॥'
इति निगमवचनात् अपराह्णव्यापित्वे तु शुक्ल-
चतुर्द्दश्यपि पूर्व्वविद्धा ग्राह्या
'चतुर्द्दशी तु कर्त्तव्या त्रयोदश्या युता विभो ।
मम भक्तैर्महाबाहो । भवेद्या चापराह्णिकी ।
दर्शविद्धा न कर्त्तव्या राकाविद्धा तथा मुने ॥'
इति स्कन्दपुराणात् मम भक्तैरिति ईश्वरोक्तेः
शिवव्रतविषयम् । त्रयोदश्या दिवातनमुहूर्त्त-
चतुर्द्दशीलाभे तु मत्स्यपुराणम् ।
'एकादश्यष्टमी षष्ठी उभे पक्षे चतुर्द्दशी ।
अमावास्या तृतीया च उपोष्याः स्युः परा-
न्विता' ॥'
एतद्विषय एव ।
'शिवा घोरा तथा प्रेता सावित्री च चतुर्द्दशी ।
कुहूयुक्तैव कर्त्तव्या कुह्वामेव हि पारणम् ॥'
इति वचनम् ।" इति च तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"विरुद्धशीलः पुरुषः सरोष-
श्चौर कठोरः परवञ्चकश्च ।
पराम्नभोक्ता परदारचित्त-
श्चतुर्द्दशी चेत् जननस्य काले ॥"
मासविशेषे तत्र कर्म्माणि यथा । ज्यैष्ठकृष्ण-
चतुर्द्दश्यां स्त्रीकर्तृकसावित्र्यादिदेवतापूजा
स्वामिपूजा च ॥ भाद्रशुक्लचतुर्द्दश्यां अनन्त-
पूजा चतुर्द्दशपिष्टकभक्षणं डोरकबन्धनञ्च ॥
कार्त्तिककृष्णचतुर्द्दश्यां चतुर्द्दशशाकभक्षणं चतु-
र्द्दशदीपदानं यमतर्पणञ्च ॥ अग्रहायणशुक्ल-
चतुर्द्दश्यां गौरीपूजा पाषाणाकारपिष्टकभक्ष-
णञ्च ॥ माघकृष्णपक्षे रटन्त्याख्यचतुर्द्दश्यां काली-
पूजारुणोदये स्नानञ्च ॥ फाल्गुनकृष्णपक्षे शिव-
रात्र्याख्यचतुर्द्दश्यामुपवास' शिवपूजा च ॥ चैत्र-
शुक्लपक्षे मदनचतुर्द्दश्यां मदनहृत्पञ्चमवेन काम-
देवपूजा । इति स्मृतिः ॥

चतुर्द्दोलं, क्ली, पु, (चतुर्भिर्वाहकैर्दोल्यते उत्क्षिप्य
नीयते उह्यते इति यावत् । दोलि+कर्म्मणि
घञ् । यद्वा, चतुर्भिर्द्दण्डैरुपलक्षितं दोलं
दोलायमानयानविशेषः ।) स्वनामख्यातयान-
विशेष' । यथा,—
"राज्ञो यद्दिपदं यानं विशेषाख्यमलं विदुः ।
चतुर्भिरुह्यते यत्तु चतुर्द्दोलं तदुच्यते ॥
भोजस्तु ।
चतुर्भिर्वाहकैर्द्दण्डैः षड्भिः कुम्भैः सुसंस्थितैः ।
स्तम्भैरष्टाभिरुदितं चतुर्द्दोलमनुत्तमम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधाना भूपानां चतुर्द्दोला' प्रकाशिताः ॥
त्रिहस्तसम्मितायामो द्विहस्तपरिणाहवान् ।
हस्तद्वयोन्नतः प्रोक्तश्चतुर्द्दोलो जयाख्यया ॥
चतुर्हस्तायतो यस्तु सार्द्धद्वन्द्वसदन्यथा ।
चतुर्द्दोल, समाख्यात' कल्याणस्तावदुन्नत' ॥
पञ्चहस्तायतो यस्तु त्रिहस्तपरिणाहवान् ।
तावदेवोन्नतो वीरश्चतुर्द्दोल उदाहृत. ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि य. ।
चतुर्द्दोलो ह्यय सिंहस्तदर्द्धेनोन्नत. शुभ' ॥
सर्व्वोऽपि द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदि' ।
आद्यः समरवर्षासु परः केलिधनात्यये ॥
सर्व्वेषामेव काष्ठानां दण्डः स्याद्वंशवारण. ।
चन्दनेनैव घटना सर्व्वेषामुपयुज्यते ॥
लोहनं सर्व्ववस्तुषु कनकं सर्व्वधातुषु ।
कुम्भश्च पद्मकोषश्च गिरिश्चेति यथाक्रमम् ॥
त्रैदेशानां महीन्द्राणां चतुर्द्दोलेषु विन्यसेत् ॥
दर्पणश्चार्द्धचन्द्रश्च हंसः केकी शुको गज. ।
अश्व' सिंहश्च तस्याग्रे आदित्यादिदशोत्तरान् ॥
मणिनियमस्तु दण्डवत् ॥
रक्त' शुक्लश्च पीतश्च कृष्णश्चित्रस्तथारुण' ।
नीलः कपिल इत्युक्तः पताकानान्तु संग्रहः ॥
चतुर्द्दोल. सपताकः शुभयानमिति स्मृत. ॥
सुक्तास्तवकैर्द्दशभिर्युक्तः स्याद्राजकेशानाम् ।
चामरदण्डैर्द्दशभिर्द्दिग्जयिना चतुर्द्दोलः ॥
चामरचश्च पुच्छश्चेत् सर्व्वोपरि परिन्यसेत् ।
यात्रासिद्धिरिय नाम्ना चतुर्द्दोलो महीभुजाम् ॥
स्तम्भच्छादरहितो निश्छदिरुक्तश्चतुर्द्दोल. मानं
पूर्व्ववत् ॥
स पुनर्द्द्विविध. प्रोक्तः सध्वजश्चाथनिर्ध्वजः ।
ध्वजान् यत्र न्यस्यन्ति षड्वर्गविजयैषिणः ॥
तेषां मानन्तु चत्वारः स्वामिहस्तैकसम्मिताः ।
कोणेषु पश्चादग्रे च हस्तद्वयमितौ ध्वजौ ॥
सुवर्णं रजतं युग्मं त्रिविधानां महीभुजाम् ।
मणिचामरकुम्भानां खड्गादीनां विनिश्चय. ॥
चतुर्द्दोलध्वजे राज्ञां विज्ञेयो नवदण्डवत् ।
निर्ध्वजे च चतुर्द्दोले मानमन्यतमं पृथक् ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि य ।
विजयो नाम विख्यातश्चतुर्द्दोलो महीभुजाम् ॥
विजयो मङ्गलो भयो वितस्त्येकैकहृष्टितः ।
त्रिविधानां महीन्द्राणां यानत्रयमुदाहृतम् ॥
अष्टाभिरुह्यते यस्तु अष्टदोलमुशन्ति च ।
सोपानद्वितयञ्चात्र विज्ञेयं शिल्पिनिर्म्मितम् ॥
भोजस्तु ।
अष्टाभिर्व्वाहकैर्द्दण्डैः षड्भिस्तु दशभिर्घटैः ।
स्तम्भैस्तु दशभिर्ज्ञेयमष्टदोलं महीभुजाम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधानां भूपानामष्टदोलाः प्रकाशिताः ॥
षड्भिर्हस्तैर्म्मितायाम परिणाहश्चतुर्भुजः ।
चतुर्हस्तोन्नतो राज्ञामष्टदोलं जयं विदुः ॥
आयामपरिणाहाभ्यां पञ्चहस्तमितो हि यः ।
कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोन्नतिः ॥
सप्तहस्तायतः कार्य्ये प्रवरे पञ्चहस्तकः ।
पञ्चहस्तोन्नतो वीरश्चाष्टदोलो महीभुजाम् ॥
आयामपरिणाहाभ्यामष्टहस्तमितो हि य' ।
सिंहनामाष्टदोलोऽय विज्ञेयः षड्भुजोन्नतः ॥
सर्व्वोऽयं द्विविध' प्रोक्तः सच्छदिश्चापि निश्छदि' ।
काष्ठवस्त्रघटादीनां मणीनां चामरस्य च ॥
चतुर्द्दोलवदुन्नेयो नियमोऽन्योऽपि सूरिभिः ।
पूर्व्ववन्निश्छदिर्मानं ध्वजमानमिहोच्यते ॥
दशध्वजास्तेषु चाष्टौ स्वामिहस्तद्वयोन्नता' ।
पश्चादग्रे ध्वजौ राज्ञश्चतुर्हस्तमितौ मतौ ॥
मणिचामरपञ्चाणां नियमो निम्पताकवत् ।
निर्ध्वजश्चाष्टदोलो यः शिबिकेति स गद्यते ॥
मणिकुम्भमुखादीनां नियमो नवदण्डवत् ।
इत्यष्टदोलकथनम् ॥ * ॥

एवं द्वादशषोडशविंशतिदोलादिका' कार्य्या: ।
मानं सार्द्धद्विगुणं सार्द्धत्रिगुणित युक्तमेतेयाम् ॥
विंशतिदोलात् परतो भोजमते सम्भवेद्यानम् ।
यान बङ्कनुयोर्थं बहुगुणमेतज्जगाद वै व्यास: ॥
भविष्योत्तरेऽपि ।
यदुक्त हैमद यानं तेन मानेन यो नृप: ।
स्वयानं कुरुते दिव्यं स चिर सुखमश्नुते ॥
स्वयोगयुक्तयानस्थो भोगमाप्नोति मानव: ।
परयौगिकयानस्थ: क्लेशमाप्नोति पुष्कलम् ॥
यो दम्भादथवाज्ञानाद्यानं प्रकुरुतेऽन्यथा ।
तस्यैतानि विनश्यन्ति आयुर्व्विद्या यशो धनम् ॥
प्रधान यानमाश्रित्य नियमोऽयं समाश्रित: ।
नाप्रधाने निर्णयोऽस्ति तस्मिङ्क्तु मनोज्ञता ॥”
इति युक्तिकल्पतरु: ॥

चतुर्धा, अ, (चतु:प्रकारमिति । “धाच् प्रकारे ।” इति मुग्धबोधसूत्रेण धाच् ।) चतु:प्रकारम् । चारिप्रकार इति भाषा ॥ इति व्याकरणम् ॥ (यथा, भागवते । ३ । २६ । १४ ।
“मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् ।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥”)

चतुर्व्वीज, क्ली, (चतुर्णां वीजानां समाहार. ।) मेथिका चन्द्रशूरं कालाजाजी यवानिका एतच्चतुष्टय मिलितम् । तच्चूर्णनित्यभक्षणगुण: । पवनामयाजीर्णशूलाध्मानपार्श्वशूलकटिव्यथानाशित्वम् । इति भावप्रकाश: ॥

चतुर्भद्रं, क्ली, (चत्वारि भद्राणि यत्र वृन्दे । यद्वा, चतुर्णां धर्म्मार्थकाममोक्षरूपकानां भद्राणां श्रेयसां समाहार ।) सकलधर्म्मार्थकाममोक्षम् । इत्यमर' । २ । ७ । ५८ ॥ अन्यूनाधिकशक्तिधर्म्मार्थकाममोक्षम् । इति तट्टीकासारसुन्दरी ॥ (तत्सम्बन्धमङ्गलमयगुणयुक्ते त्रि । यथा, महाभारते । ७ । ६२ । १७ ।
“स चेन्ममार सृञ्जय । चतुर्भद्रतरस्त्वया ।
पुत्त्रात् पुण्यतरस्तुभ्यं मा पुत्त्रमनुतप्यथा: ॥”)

चतुर्भुज:, पु, (चत्वारो भुजा यस्य ।) विष्णु । इत्यमर । १ । १ । २० ॥ (यथा, देवीभागवते । १ । ७ । ५ ।
“विष्णु प्रबोधयाम्यद्य शेषे सुप्तं जनार्द्दनम् ।
चतुर्भुज महावीर्य्य दु खहा स भविष्यति ॥”
वटिकौषधविशेष । यथा,—
“मृतसूतस्य भागा द्वौ भागैक हेमभस्मकम् ।
मृगकस्तूरिका चैव हरितालश्च तत्समम् ॥
सर्व्वं खल्लतले पिष्ट्वा कन्याम्बरसमर्द्दितम् ।
एरण्डपत्रैरावेष्ट्य धान्यगर्भे दिनत्रयम् ॥
सस्थाप्य तत उद्धृत्य सर्व्वरोगेषु योजयेत् ।
एतद्रसायनवर त्रिफलामधुमर्द्दितम् ॥
तद्द्वयमाशिवल खादेद्वलीपलितनाशनम् ।
अपस्मारे ज्वरे कासे शोषे मन्दानले क्षये ॥
हस्तकम्पे शिर'कम्पे गात्रकम्पे विशेषत. ।
वातपित्तसमुत्थाश्च कफज नाशयेद्ध्रुवम् ॥
सर्व्वौषधिप्रयोगैर्ये व्याधयो न निवर्त्तिता: ।
कर्म्मभि: पञ्चभिश्चैव योजयेद्रसराजत. ॥
चतुर्भुजो रसो नाम महेशेन प्रकाशित: ।
क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा ॥”
इति चतुर्भुजो रस: ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाधिकारे ॥ स्त्रियां गायत्रीरूपा महाशक्ति: । यथा, देवीभागवते । १२ । ६ । ४७ ।
“चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ॥”
चतुर्भुजविशिष्टे, त्रि । यथा, देवीभागते । १ । १५ । ५६ ।
“तदा शान्ता भगवती प्रादुरास चतुर्भुजा ।
शङ्खचक्रगदापद्मवरायुधधरा शिवा ॥”)

चतुर्म्मुख:, पु, (चत्वारि मुखानि अस्य । यद्वा चत्वारो वेदास्तत्वारि मुखानीवास्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (यथा, रघु. । १० । २२ ।
“चतुर्व्वर्गफल ज्ञानं कालावस्थाश्चतुर्युगा: ।
चतुर्वर्णमयो लोकस्त्वत्त' सर्व्वं चतुर्म्मुखात् ॥”
“सर्व्वं चतुर्म्मुखात् चतुर्म्मुखरूपिणस्त्वत्त: जातमिति शेष: ।” इति तट्टीकायां मल्लिनाथ. ॥ शिव । यथा, महाभारते । १३ । १७ । ७६ ।
“चतुर्म्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ॥”) औषधविशेष' । यथा —
“रसगन्धकलौहाभ्रं सम सूताङ्घ्रि हेम च ।
सर्व्वं खल्लतले पिष्ट्वा कन्यारसविमर्द्दितम् ॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम् ।
संस्थाप्य तत उद्धृत्य सर्व्वरोगेषु योजयेत् ॥
एतद्रसायनवर त्रिफलामधुसयुतम् ।
तद्द्वयमाशिवल खादेत् वलीपलितनाशनम् ॥
क्षयमेकादशविध कासं पञ्चविधन्तथा ।
कुष्ठमष्टादशविधं पाण्डुरोगान् प्रमेहकान् ॥
शूल श्वासञ्च हिक्काञ्च मन्दाग्निं चाम्लपित्तकम् ।
व्रणान् सर्व्वानाढ्यवात विसर्पं विद्रधिन्तथा ॥
अपस्मारग्रहोन्मादान् सर्व्वार्शांसि त्वगामयान् ।
क्रमेण सेवित हन्ति वृक्षमिन्द्राशनिर्यथा ॥
पौष्टिकं वल्यमायुष्यं पुत्त्रप्रसवकारणम् ।
चतुर्म्मुखेण देवेन कृष्णात्रेयेण सूचितम् ॥”
इति प्रयोगामृते चतुर्म्मुखरस. ॥
(औषधान्तर यथा –
“मृत सूत मृत स्वर्णं द्वाभ्यां तुल्या मन: शिला ।
विमर्द्दितञ्च तैलेन चातसीसम्भवेन च ॥
तद्गोल वस्त्रतो बद्धा म्रक्षयेल्लेपयेत्तत' ।
अतसीफलकल्केन दोलायन्त्रे त्र्यह पचेत ॥
उद्धृत्य धारयेद्वक्त्रे जिह्वास्यदन्तरोगनुत् ॥”
इति चतुर्म्मुखो रस ॥
इति वैद्यकरसेन्द्रसारसंग्रहे मुखरोगाधिकारे ॥)

चतुर्युग, क्ली, चतुर्णां युगानां समाहार । इति व्याकरणममरटीका च ॥ (चत्वारि युगानि यत्र इति विग्रहे चतुर्युगविशिष्टे, त्रि । यथा, रघौ । १० । २२ ।
“चतुर्वर्गफल ज्ञानं कालावस्थाश्चतुर्युगा: ॥”
“चत्वारि युगानि कृतत्रेतादीनि यासु ता' चतुर्युगा कालावस्था' कालपरिमाणम् ॥” इति तट्टीकायां मल्लिनाथ. ॥)

चतुर्व्वक्त्र:, पु, (चत्वारि वक्त्राणि अस्य वस्तुतस्तु चत्वारो वेदा एव वक्त्राणि मुखानीवास्य ।) ब्रह्मा । इति हलायुध' ॥

चतुर्व्वर्ग , पु, (चतुर्णां धर्म्मार्थकाममोक्षाणां वर्ग: समूह: ।) धर्म्मार्थकाममोक्षम् । इत्यमर: । २ । ७ । ५८ ॥ (यथा, रघौ । १० । २२ ।
“चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगा: ॥”)

चतुर्व्विद्य:, पुं, (चतस्रो विद्या अस्मिन्निति । यद्वा । ७ । ३ । ३१ । इत्यस्य सूत्रस्य वार्त्तिकोक्त यथा, “चतुर्वेदस्योभयपदवृद्धिश्च । चतुरो वेदानधीते चतुर्वेद: स एव चातुर्वैद्य: । चतुर्विद्यस्येति पाठान्तरम् । चतुर्विद्य एव चातुर्व्वैद्य' ।”) चतुर्व्वेदवेत्ता । अस्य रूपान्तराणि । चतुर्व्वेद. । चातुर्व्वैद्य' । चातुर्व्वेद. । इति व्याकरणम् ॥

चतुल:, त्रि, (चत + उलच् ।) स्थापयिता । इति संक्षिप्तसारे उणादिवृत्ति: ॥

चतुष्क, क्ली, (चत्वारोऽवयवा यस्य वा कन् । चतुष्क चतुरवयवम् । यथा, मनु । ७ । ५० ।
“पानमक्षा: स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतम विद्याच्चतुष्क कामजे गणे ॥”
गृहविशेष' । यथा, कुमारे । ५ ६८ ।
“चतुष्कपुष्पप्रकरावकीर्णयो'
परोऽपि को नाम तवानुमन्यते ॥”)
यष्टिभेद' । इति शब्दरत्नावली ॥
(पुंसि तु राजविशेष । यथा, राजतरङ्गिण्याम् । ८ । २८४६ ।
“अथ पांक्तौहरिर्य्योऽभूच्चतुष्क' कोष्ठकानुज ॥”)

चतुष्की, स्त्री, (चतुष्क + स्त्रियां ङीप ।) मशहरी । मशारि इति भाषा ॥ पुष्करिणीभेद' । इति मेदिनी । के । ८७ ॥

चतुष्टय, क्ली, केन्द्रम् । इति नीलकण्ठीयजातकम् ॥ (चत'सङ्ख्या । यथा, कुमारे । ७ । १३ ।
“तस्मात प्रदेशाच्च वितानवन्त
युक्त मणिस्तम्भचतुष्टयेन ॥”
चत्वारोऽवयवा यस्य । “सङ्ख्याया अवयवे तयप् ।” ५ । २ । ४२ । इति तयप । ततो रेफस्य विसर्गे सत्वे च कृते “ह्रस्वात्तादौ तद्धिते ।” ८ । ३ । १०१ । इति षत्वम् ।) चतुरवयवे त्रि । इति मुग्धबोधम् ॥ (यथा, मनु' । ८ । १३० ।
“वधेनापि यदा त्वेतान्निग्रहीतु न शक्नुयात् ।
तदेषु सर्व्वमप्येतत् प्रयुञ्जीत चतुष्टयम् ॥”
यथाच, कुमारे । २ । १७ ।
“प्रवृत्तिरासौच्छन्दानां चरितार्था चतुष्टयी ॥”)

चतुष्पथ, क्ली, (चतुर्णां पथां समाहार. । “तद्धितार्थेति ।” २ । १ । ५१ । इति समास । “ऋक्पूरब्धू'पथामानक्षे ।” ५ । ४ । ७४ । इति अ. । “इदुदुपधस्येति ।” ८ । ३ । ४१ । इति षत्वम् । यद्वा, चत्वार: पन्थानो यत्र इति ।) एकत्र मिलितपथचतुष्टयम् । चौमाता पथ इति भाषा ॥ तत्पर्य्याय, । शृङ्गाटकम् २ । इत्य-

मरः । २ । १ । १७ ॥ (यथा, मनुः । ४ । ३९ ।
"मृदङ्गान् दैवतं विप्रं घृतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन् ॥")

चतुष्पथः, पुं, (चत्वारः पन्थानो ब्रह्मचर्य्यादय आश्रमा यस्य । "ऋक्पूरिति ।" ५ । ४ । ७४ । इति अः ।) ब्राह्मणः । इति मेदिनी । थे २७ ॥

चतुष्पदः, पुं, (चत्वारि पदानि यस्य ।) पशुः । (यथा, वृहत्संहितायाम् । २१ । १७ ।
"तरवश्च निरुपसृष्टाङ्कुरा नरचतुष्पदा हृष्टाः ॥")
करणविशेषः । इति मेदिनी । दे । ४८ ॥ तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"चतुष्पदभवो मर्त्यः सदाचारविवर्जितः ।
स्वल्पवित्तः क्षीणदेहश्चतुष्पादधनान्वितः ॥"
"मेषवृषसिंहराशयः मकरपूर्व्वार्द्धं धनुःपरार्द्धञ्च ।"
इति दीपिका ॥
(चतुष्पदविशिष्टे । त्रि । यथा, महाभारते । १ । ६० । ११ ।
"चतुष्पदं द्विपदञ्चापि सर्व्वमेव भूता गर्भभूता भवन्ति ॥"
व्याधिनिवारणोपायाः । यथा,—
"वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः ।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः ॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उद्गातृहोतृब्रह्माणो यथाध्वर्य्युं विनाध्वरे ॥
वैद्यस्तु गुणवानेकस्तारयेदातुरान् सदा ।
प्लवं प्रतितरैर्हीनं कर्णधार इवाम्भसि ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्ब्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्याये ॥)

चतुष्पदी, स्त्री, (चत्वारः पादा यस्याः । "सङ्ख्यासुपूर्व्वस्य ।" ५ । ४ । १४० । इति अन्तलोपः । "पादोऽन्यतरस्याम् ।" ४ । १ । ८ । इति ङीपि । "पादः पत् ।" ६ । ४ । १३० । इति पदादेशः ।) पद्यम् । इति मेदिनी । द । ४८ ॥ चौपदी इति भाषा ॥ (यथा, छन्दोमञ्जर्य्याम् । १ स्तवके ।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥")

चतुष्पाटी, स्त्री, (चतस्रः दिशः पाटयति भिनत्ति । पाटि+अण्+स्त्रियां ङीप् ।) नदी । इति शब्दमाला ॥

चतुष्पाठी, स्त्री, चतुर्णां वेदानां पाठो यस्यां सा । छात्राध्ययनस्थानम् । चौपाठी इति भाषा ॥ इति लोके प्रसिद्धिः ॥

चतुष्पाणिः, पुं, (चत्वारः पाणयो हस्ता यस्य ।) विष्णुः । इति हारावली । ९ ॥ (चतुर्हस्तविशिष्टे, त्रि ॥)

चतुःसमं, क्ली, (चतुर्णां चन्दनागुरुकस्तूरीकुङ्कुमानां समः समभागो यत्र । यद्वा चतुर्भिश्चन्दनादिभिः समं एकत्र सद्भावस्थानं यत्र ।) मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपम् । इति हेमचन्द्रः । ३ । ३०३ ॥ औषधविशेषः । यथा, सुखबोधे ।
"लवङ्गं चैन्धवं पथ्या यमानी च चतुःसमम् ।
आमशूलविबन्धघ्नं पाचनं भेदि शोथनुत् ॥"
अन्यच्च ।
"जातीफलं त्रिदशपुष्पसमन्वितञ्च
जीरञ्च टङ्कणयुतं चरकेण चोक्तम् ।
चूर्णानि माक्षिकसितासहितानि लीढ़ा
आमातिसारमखिलं गुरु हन्ति शूलम् ॥"

चतुस्त्रिंशत्, स्त्री, चतुरधिका त्रिंशत् । चौत्रिश् इति भाषा ॥ इति ज्योतिषम् ॥ (यथा, ऋग्वेदे । १ । १६२ । १८ ।
"चतुस्त्रिंशद्वाजिनो देवबन्धो
र्वङ्क्रीरश्वस्य स्वधितिः समेति ॥")

चतुस्त्रिंशज्जातकज्ञः, पुं (चतुस्त्रिंशज्जातं जानातीति । ज्ञा+"आतोऽनुपसर्गे कः ।"३।२।३। इति कः ।) बुद्धभेदः । इति हेमचन्द्रः । २ । १४७ ॥

चतूराजी, स्त्री, (चतुर्भिरङ्गैः राजते दीप्यते इति । राज्+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । स्त्रियां ङीप् ।) चतुरङ्गक्रीडाविशेषः । इति तिथ्यादितत्त्वम् ॥

चत्वरं, क्ली, (चत्यते स्वीक्रियते इति । चत+"कृगॄशॄवृचतिभ्यः ष्वरच् ।" उणा । २ । १२१ । इति ष्वरच् ।) स्थण्डिलम् । होमार्थपरिष्कृता भूमिः । अङ्गनम् । इत्यमरः । २ । ७ । ८ ॥ उठान चाताल इति च भाषा ॥ (चतसृणां रथ्यानां सङ्गमः । इति शब्दार्थचिन्तामणिः ॥ यथा, महाभारते । ३ । १५ । २० ।
"अनुरथ्यासु सर्व्वासु चत्वरेषु च कौरव ।
बल बभूव राजेन्द्र । प्रभूतगजवाजिमत् ॥"
नानाजनपदेभ्यः समागतानां वासस्थानम् । मठ इति भाषा ॥ यथा, कथासरित्सागरे । ६।४१।
"ज्ञात्वा तांश्चणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम् ।
अतिष्ठ चत्वरे गत्वा छायायां नगराद्बहिः ॥")

चत्वारः त्रि, (चतुर्शब्दस्य प्रथमाविभक्तौ बहुवचनेन सिद्धिरस्यात्वम् ।) चतुःसङ्ख्या । चारि इति भाषा ॥ इति व्याकरणम् ॥ तद्वाचकानि । वेद १ ब्रह्मास्यम् २ वर्णः ३ समुद्र ४ हरिबाहु ५ स्वर्दन्तिदन्तः ६ सेनाङ्गम् ७ उपायः ८ याम ९ युगम् १० आश्रमम् ११ हत्पाद १२ । इति कविकल्पलता ॥ चतुःसङ्ख्याविशिष्टे त्रि । इत्यमरः ॥

चत्वारिंशत्, स्त्री, (चत्वारो दशतः परिमाणमस्याः । "पङ्क्तिविंशतीति ।" ५ । १ । ५९ । इति निपातनात् साधुः ।) सङ्ख्याविशेषः । इति ज्योतिषम् ॥ चल्लिश इति भाषा ॥(यथा, भागवते । ४ । १ । ६० ।
"तेभ्योऽग्नयः समभवन् चत्वारिंशच्च पञ्च च ॥")

चत्वालः, पुं, (चत्यते प्रार्थ्यते स्वीक्रियते होमायेति । चत+"स्याचतिमृजेरिति ।" वालम् न वृद्धिः ।) होमकुण्डम् । दर्भः । इति मेदिनी । ले । ८९ ॥ गर्भः । इति विश्वहेमचन्द्रौ ॥

चद, ए ञ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-सेट् ।) ए, अचदीत् । ञ, चदति चदते । इति दुर्गादासः ॥

चद, इ ह्लादे । दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) इ कर्म्मणि चन्द्यते । ह्लादो हर्षः । इति दुर्गादासः ॥

चदिरः पुं, (चन्दति दीप्यते स्वशरीरादिना इति । चदि+बाहुलकात् किरच् निपातनात् नस्य लोपः ।) हस्ती । चन्द्रः । कर्पूरम् । भुजगः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चन, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) चनति । इति दुर्गादासः ॥

चन, म हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा परं-सकं-सेट् ।) म, चनयति । इति दुर्गादासः ॥

चन, य असाकल्यम् । अकार्त्स्न्यम् । यथा । किञ्चन । इत्यमरभरतौ ॥ ("किमः ऽदन्तात् चिच्चनौ ।" इति सूत्रेण ।) प्रत्ययोऽयं विभक्त्यन्तकिम्शब्दादुत्तरे भवति । इति मुग्धबोधम् ॥

चष, उ हतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं सकं सेट् । उदित्वात् क्वावेट् ।) उ, चषित्वा चष्ट्वा । इतिर्गतिः । इति दुर्गादासः ॥

चन्दः, पुं, (चन्दयति आह्लादयति यद्वा चन्दति दीप्यते इति । चन्दि वा चन्द+पचाद्यच् ।) चन्द्रः । इति भरतधृतशब्दार्णवः ॥

चन्दकः, पुं, (चन्दयति आह्लादयति लोकानिति । चदि ह्लादे+णिच्+"ण्वुल्तृचौ ।" ३ । १।१३३। इति ण्वुल् ।) मत्स्यविशेषः । चाँदा इति भाषा ॥ तस्य गुणः । रुचिबलकारित्वम् । अनभिष्यन्दित्वञ्च । इति राजवल्लभः ॥ चन्द्रकोऽपि पाठः ॥ (चन्द्रकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

चन्दनः पुं, क्ली, (चन्दयति आह्लादयतीति । चदि आह्लादे+णिच्+ल्युः ।) स्वनामख्यातवृक्षः । (यथा, गो. रामायणे । ५ । ७४ । ३ ।
"चन्दनातिलकाश्चूतानशोकान् सिन्धुवारकान् ॥"
तथा च पञ्चतन्त्रे । १ । ४२ ।
"विना मलयमन्यत्र चन्दनं न प्ररोहति ॥")
तत्पर्य्यायः । गन्धसारः २ मलयजः ३ भद्रश्रीः ४ । इत्यमरः । २ । ६ । १३१ ॥ श्रीखण्डम् ५ महार्हम् ६ श्वेतचन्दनम् ७ गोशीर्षम् ८ तिलपर्णम् ९ मङ्गल्यम् १० मलयोद्भवम् ११ गन्धराजम् १२ सुगन्धम् १३ सर्पावासम् १४ शीतलम् १५ गन्धाढ्यम् १६ भोगिवल्लभम् १७ पाव-

नम् १८ शीतगन्धः १९ । इति राजनिर्घण्टः ॥ तैलपर्णिकः २० चन्द्रद्युतिः २१ । इति भावप्रकाशः ॥ भद्रश्रियम् २२ हितम् २३ हिमम् २४ । इति रत्नमाला ॥ पटीरः २५ वर्णकः २६ भद्राश्रयः २७ सेव्यः २८ रौहिणः २९ । इति शब्दरत्नावली ॥ याम्यः ३० पीतसारः ३१ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतलत्वम् । स्वादे कियतकषायत्वम् । पित्तभ्रान्तिवमिज्वरक्रिमितृषासन्तापशान्तिकारित्वम् । वृष्यत्वम् । वक्त्ररोगनाशित्वम् । शरीरकान्तिवृद्धिकारित्वम् । लेपने कामवृद्धिकारित्वम् । अतिसौरभ्यदत्वञ्च । इति राजनिर्घण्टः ॥ रूक्षत्वम् । तिक्तत्वम् । आह्लादनत्वम् । लघुत्वम् । श्रमशोषरोगविषश्लेष्मामदाहनाशित्वञ्च ॥ * ॥ श्रेष्ठचन्दनलक्षणं यथा,—

"स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ।
ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥"

इति भावप्रकाशः ॥

वानरविशेषः । इति हेमचन्द्रः । ३ । ३०५ ॥

चन्दनं, क्ली, (चन्द्यते आह्लाद्यते अस्मादनेन वा इति । चदि आह्लादे + णिच् + ल्युट् ।) भद्रकाली । इति मेदिनी । ने । ६१ ॥

चन्दनगोपी, स्त्री, (चन्दनमपि गोपायति स्वगन्धादिना रक्षतीति । गुप + अण् । ततो ङीप् । यद्वा, चन्दनवद् गुप्यति दीप्यते इति । अच् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

चन्दनधेनुः, स्त्री, (चन्दनेन अङ्किता धेनुः । मध्यपदलोपिकर्म्मधारयः ।) पतिपुत्त्रवन्मृतनार्य्युद्देशकोत्सृष्टचन्दनाङ्कितसवत्सगौः । तत्प्रमाणप्रयोगौ लिख्येते ।

"नत्वा शिवं चन्दनचर्च्चिताया
धेनोः प्रदाने सविधिप्रयोगम् ।
रत्नाकरादेर्लिखितं विलोक्य
तनोति वाचस्पतिरग्र्यबुद्धिः ॥"

अथ चन्दनधेनुदानविधिः । तत्र रत्नाकरे देवलः ।

जीवद्भर्त्त्री तु या नारी पुत्त्रिणी म्रियते यदि ।
सवत्सामङ्कितां धेनुमाचार्य्याय प्रदापयेत् ॥
पतिपुत्त्रवती नारी म्रियते याग्रतस्तयोः ।
वृषं न चोत्सृजेत् पुत्त्रः पिता यावच्च जीवति ॥

तथा कर्म्मोपदेशिन्यां ब्राह्मणसर्व्वस्वे च हलायुधधृतानि वचनानि । यथा स्मृतिः ।

पतिपुत्त्रवती नारी म्रियते भर्त्तुरग्रतः ।
चन्दनेनाङ्कितां धेनुं तस्याः स्वर्गाय कल्पयेत् ॥

तथा जातूकर्णः ।

धेनुं चन्दनमालिप्य यो दद्यान्मातृहेतवे ।
यदि पापशतैर्युक्ता तथापि स्वर्गमाप्नुयात् ॥

तथा वशिष्ठः ।

न युक्तश्च वृषोत्सर्गो यावत् पितरि जीवति ।
चन्दनेनाङ्कितां धेनुमाचार्य्याय प्रदापयेत् ॥ * ॥
चतुर्हस्तो भवेद्यूपो यज्ञवृक्षसमुद्भवः ।
वर्त्तुलः शोभनः स्थूलः कर्त्तव्यो धेनुमौलिकः ॥
बिल्वस्य वकुलस्यैव कार्य्यो यूपः प्रशस्यते ।
अभावे वारुणेनापि यूपं कुर्य्याद्विधानतः ॥
वृषोत्सर्गे तु वृषमौलिकः ।
तरुणी रूपसम्पन्ना सुशीला च पयस्विनी ।
न्यायार्ज्जिता गृहे जाता देया सा श्रोत्रियाय गौः ॥
नदीतीरे वने गोष्ठे देवतायतनेषु च ।
शैवक्षेत्रे कुशक्षेत्रे राजद्वारे चतुष्पथे ॥

एषु वचनेषु वृषोत्सर्गनिषेधचन्दनधेनूत्सर्गविध्योर्युगपदुपसंहारदर्शनात् वृषोत्सर्गस्थाने प्रधानतया चन्दनधेनूत्सर्गः प्रतीयते । अतोऽस्य वृषोत्सर्गकार्य्यकारित्वात् तत्फलहेतुत्वं लभ्यते । एकोद्दिष्टं न कुर्व्वीत न्यासिनाञ्चैव सर्व्वदा । अहन्येकादशे प्राप्ते पार्व्वणन्तु विधीयते ॥ इति श्राद्धविवेकधृतोशनोवचने त्रिदण्डसन्न्यासिनां एकोद्दिष्टनिषेधपार्व्वणविध्योर्युगपदुपसंहारात् एकोद्दिष्टस्थाने पार्व्वणमिव । यद्वा पतिपुत्त्रवतीरूपप्रेतविशेषाधिकृतवृषं न चोत्सृजेदिति निषेधचन्दनधेनूत्सर्गविधिभ्यां प्रेतसमानाधिकृतसामान्यवृषोत्सर्गविध्यवगतफलभावनाकरणीभूतवृषकर्म्मकत्यागमनूद्य तत्कर्म्मीभूतवृषमपहाय तत्स्थाने धेनुमात्रगुणविधिलाघवादवगम्यते । पशुयागे सामान्यविध्यवगताप प्रणयनीयाधिकरणीभूतचमसस्थाने गोदोहनाप प्रणयेदिति विशेषविधिना गोदोहगुणविधिवत् । नानाभेऽपि प्रवेशिनीम् । उपोष्य द्वादशीं तत्र त्रयोदश्यान्तु पारणमित्यत्र एकादशीरूपनिमित्तस्थाने द्वादशीमात्रगुणविधिवच्च । अन्यथा धेनूत्सर्गस्य पृथक्कर्म्मत्वे फलभावना तत्करणनियोज्यानां पृथक्कल्पने गौरवं स्यात् । उक्तविधिनिषेधयोरुपसंहारवैयर्थ्यञ्च स्यात् । ततश्च करणैक्यात् फलैक्यमिति । चन्दनधेनूत्सर्गेऽपि प्रेतत्वविमुक्तिपूर्व्वकस्वर्गप्राप्तिः फलम् । एवं कपिलमन्त्रस्थपापपथपगमस्वर्गप्रार्थनाया अपि तथैव तात्पर्य्यम् । तथा जातूकर्णवचनस्थपापस्वर्गपदयोरपि तथैव तात्पर्य्यं बोध्यम् । भूतार्थानां विधिशेषिणामेव जैमिन्युक्तप्रामाण्येन प्रकृते सिद्धे विधिशेषित्वे लाघवात् । पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वेति कात्यायनवचनस्थपापपदस्य प्रेतत्वे एव तात्पर्य्यदर्शनाच्च । अत्र यद्यपि पतिपुत्त्रवतीत्यत्र पतिपुत्त्रवत्त्वस्य विशेष्यीभूतकर्त्तृन्वयिमरणान्वयित्वेन न विशेषणत्वं किन्तूपलक्षणत्वमेव ततश्च काकवन्तो देवदत्तस्य गृहा इतिवत् कादाचित्कतद्वत्तामादायापि पतिपुत्त्रवतीतिप्रयोग उपपद्यते । तथापि अग्रतस्तयोर्भर्त्तुरग्रत इत्याभ्यां मरणकालिकी पतिपुत्त्रवत्तावगम्यते । गवां गोष्ठे इतिवत् । अथवा मरणार्थान्वयेन धेनूत्सर्गकालिकीति । नचापुष्पिता मृता काचित् तस्या धेनुर्विगर्हिता । इति कपिलवचने अपुष्पितायाः पुत्त्रकर्त्तृकधेनूत्सर्गनिषेधस्याप्रसक्ततया सपत्नीपुत्त्रकर्त्तृकधेनूत्सर्गनिषेधप्राप्तौ तद्दृष्ट्या पतिपुत्त्रवतीत्यस्य सपत्नीपुत्त्रवतीपरत्वं अवश्यं वाच्यम् । तदेकवाक्यतया पुत्त्रिणीत्यादावपि तथात्वमिति वाच्यम् । अपुष्पितेति कपिलार्द्धस्य प्रसक्तिपूर्व्वकतार्थं पतिपुत्त्रवत् निवृत्तरजस्काया धेनूत्सर्गनिषेधार्थत्वात् गत्यां सत्यां लक्षणाया अन्याय्यत्वात् । प्रतियोगिवत्ध्वंसप्रागभावयोरपि अत्यन्ताभावविरोधित्वमते तु अजातपुष्पस्त्रीपरत्वं वा भवतु तथात्वेऽपि तस्या धेनुर्व्विगर्हितेति अप्रसक्तार्थापि अपुष्पिताधेनुदाननिन्दा पतिपुत्त्रवत्याश्चन्दनधेनुदानस्तुतिपरा । यथा हरेरुत्थाने पौर्णमासेन किन्तेन प्रतिपद्यथ यो निशीथप्रसक्तापि निन्दा एकादश्यादिपौर्णमास्यन्तपञ्चके रेवत्यन्तपादयोगविधिस्तुतिपरा । यथा वा वेदगाने यो गिरा गिरेति ब्रूयात् स आत्मानमपि गिरेत् इत्यप्रसक्तनिन्दा ऐरं कृत्वा अवगिरेदिति विधेः स्तुतिपरा । अतएव उक्तं शावरभाष्ये । न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तु इतरत् स्तोतुमिति । स्तुतौ हि अप्रसिद्धगुणदोषारोपणदोषाय । न चात्र काम्यस्यैव कार्त्तिक्यादिवृषोत्सर्गस्य स्थाने धेनुदानं विधीयते इति वाच्यम् । तन्मात्रपरत्वे मानाभावात् । प्रत्युत म्रियत इति वर्त्तमानार्थैकविभक्त्या वर्त्तमानसामीप्येनाचिरप्रमीतोपस्थितेश्च । ये तु बह्वीनामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत् । सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्म्मनुरिति मनुना पुत्त्रवतीत्वाभिधानादेव पतिपुत्त्रवतीत्यत्र सपत्नीपुत्त्रवती प्रतीयते इति ब्रुवते तेऽतीवभ्रान्ताः । पुत्त्रवतीति पदस्याखण्डतया मतुपा पतिपदस्यान्वये तटस्थत्वापत्तेः ॥ * ॥

ननु वृषतुल्यवयो वर्णो वृषः स्याद्दक्षिणा द्विजाः ।
वृषोत्सर्गे तथा पुंसां स्त्रीणां स्त्रीगौर्विशिष्यते ॥

इति भविष्यसवादाद्धेनुदानमिदं पतिपुत्त्रवत्या वृषोत्सर्गे दक्षिणादानस्य विशेषरूपम् । न तु प्रधानकर्म्मान्तरं गौरवात् । न च दक्षिणाया अङ्गत्वेन फलासङ्गतिः । यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीतिवत्तदुपपत्तिरिति चेत् न । वृषोत्सर्गदक्षिणातश्चन्दनाङ्कितधेनुदानस्य प्रकरणान्तराम्नायेन प्रकरणान्तरन्यायतः प्रधानत्वसिद्धेः । वृषोत्सर्गस्थानीयत्वेनानुवर्त्तमानशिष्टाचारात् । धेनुदानयुगपद्वृषोत्सर्गनिषेधानामसङ्गतेः । कपिलपञ्चरात्रे चन्दनधेनुदानस्यापीति कर्त्तव्यतायां वृषरूपदक्षिणादानविधानाच्च ॥ * ॥

यथा कपिल उवाच ।

अतः परं प्रवक्ष्यामि धेनुदानमनुत्तमम् ।
पतिपुत्त्रवती नारी म्रियते भर्त्तुरग्रतः ॥
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥

तथा ।

जीवद्भर्त्त्री तु या नारी पुत्त्रिणी म्रियते यदि ।
सवत्सामङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥
साध्वी पतिव्रता नारी म्रियते याऽग्रतस्तयोः ।
वृषं नैवोत्सृजेत् पुत्त्रो यावत् पितरि जीवति ॥

मृतपुत्त्रा च या नारी संगृहीता तु या भवेत्।
तस्या धेनुर्न दातव्या वृषोत्सर्गो विधीयते ॥
अपुत्त्रिता मृता काचित्तस्या धेनुर्विगर्हिता।
दद्याद्धेनुं सुतो ज्येष्ठः कनिष्ठो वृषमुत्सृजेत् ॥
द्वयोः सोदरयोरेको भवेत् ज्येष्ठः प्रधानतः।
त्रयाणां द्वौ सुतौ ज्येष्ठौ चतुर्णाञ्च त्रयः स्मृताः ॥
पञ्चानां सोदराणाञ्च त्रयो ज्येष्ठाः प्रकीर्त्तिताः।
ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः ॥
हेमशृङ्गीं खुरे रूप्यैः सुशीलां वस्त्रसंयुताम्।
कांस्योदरीं ताम्रपृष्ठां घण्टाचामरभूषिताम् ॥
प्रवालमालिकां दद्यात् कर्णयोरुभयोरपि।
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥
गवां लोकमवाप्नोति दिवि देवैश्च मोदते।
चन्दनेनाङ्कितां धेनुं दत्त्वा गच्छेत् सुरालयम् ॥
तावत्तिष्ठति स्वर्लोके यावदाभूतसम्प्लवम्।
न चोत्सर्गो वृषस्यात्र वत्सतर्य्यन्वितस्य च ॥
वृषोत्सर्गविधानेन कर्त्तव्यं सर्व्वकर्म्म च।
मा नस्तोकेति मन्त्रेण दक्षे वृषाण्यसीति च ॥
धेनोश्च सक्थिदेशे तु त्रिशूलाङ्कं समालिखेत्।
वामभागे विशेषोऽयं दक्षे चक्रं समालिखेत् ॥
तत्रान्यद्वर्ज्जयेद्विद्वानाचार्य्यस्तु विधानवित्।
ततो वै संलिखेच्चक्रं पञ्चाङ्गुलप्रमाणकम् ॥
शूलं षडङ्गुलं कार्य्यं दक्षे वामे यथाविधि।
पूर्व्वाशाभिमुखीं धेनुं यजमानोत्तरामुखः ॥
मस्तकादिक्रमेणैव प्रतिमन्त्रैः प्रपूजयेत् ॥” * ॥

शिरसि ओँ ब्रह्मणे नमः। ललाटे ओँ वृषभध्वजाय नमः। कर्णयोः ओम् अश्विनीकुमाराभ्यां नमः। चक्षुषोः ओँ शशिभास्कराभ्यां नमः। जिह्वायां ओँ सरस्वत्यै नमः। दन्तेषु ओँ वसुभ्यो नमः। ओष्ठयोः ओँ सन्ध्यायै नमः। ग्रीवायां ओँ नीलकण्ठाय नमः। हृदि ओँ स्कन्दाय नमः। रोमकूपेषु ओम् ऋषिभ्यो नमः। दक्षिणपार्श्वे ओँ कुवेराय नमः। वामपार्श्वे ओँ वरुणाय नमः। रोमाग्रेषु ओँ रश्मिभ्यो नमः। ऊरुषु ओँ धर्म्माय नमः। जङ्घासु ओम् अधर्म्माय नमः। श्रोणितटे ओँ पितृभ्यो नमः। खुरमध्ये ओँ गन्धर्व्वेभ्यो नमः। खुराग्रे ओम् अप्सरोभ्यो नमः। लाङ्गूले ओँ आदित्येभ्यो नमः। गोमये ओँ महालक्ष्म्यै नमः। गोमूत्रे ओँ गङ्गायै नमः। पयोधरेषु ओँ चतुःसागराय नमः।

एवमङ्गानि संपूज्य पठेन्मन्त्रं समाहितः।
ओम् इन्द्रस्य च शचिन्द्राणी विष्णोर्लक्ष्मीश्च या स्मृता।
रुद्रस्य गौरी या देवी सा देवी वरदास्तु मे ॥
ओँ या लक्ष्मीर्लोकपालानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी तस्याः पापं व्यपोहतु ॥
ओँ देहस्था या च रुद्राणी शङ्करस्य सदा प्रिया।
धेनुरूपेण सा देवी तस्याः शान्तिं प्रयच्छतु ॥
ओँ सर्व्वदेवमयी दोग्ध्री सर्व्वलोकमयी तथा।
धेनुरूपेण सा देवी तस्याः स्वर्गं प्रयच्छतु ॥
गृहीत्वार्घ्यञ्च पाद्यञ्च उत्सृजेत्तामलङ्कृताम्।
दीयते ब्राह्मणायैषा आचार्य्याय महात्मने ॥
एवंविशिष्टां तां धेनुं दत्त्वा तर्पणमारभेत्।
पुच्छं गृहीत्वा पित्रादीन् वृषोत्सर्गविधानतः ॥
ऐशान्याञ्चालयेत् किञ्चिदाचार्य्याय च दक्षिणाम्।
वृषभञ्च ततो दद्यादाचार्य्याय गुणान्वितम् ॥
पूजयेद्ब्राह्मणांश्चैव वस्त्रमाल्यादिभिस्ततः।
कांस्यपात्रं वस्त्रयुग्मं सुवर्णञ्च विशेषतः ॥
आचार्य्याय प्रदातव्यं ब्रह्मणे कनकं तथा।
आगतान् पूजयेद्भक्त्या यथाशक्ति विधानतः ॥
दीनार्त्तकृपणादींश्च अन्नाद्यैः परितोषयेत् ॥”
इति कापिले धेनुदानप्रमाणम् ॥ * ॥

पुस्तकान्तरे पाठाधिक्यं यथा,—
“एकादशाहे प्रेतायाः षण्मासे चाब्दिके तथा।
त्रिपक्षे मासिके वापि दद्याद्गां चन्दनाङ्किताम् ॥
तथा वराहपुराणम्।
अयने विषुवेऽष्टम्यां युगाद्यापूर्णिमासु च।
दर्शे मन्वन्तरे चैव धेनुं दद्यात् सुपूजिताम् ॥

ननु आद्यश्राद्धे त्रिपक्षे वेत्यादिना आद्यश्राद्धकर्त्तव्यनित्यवृषोत्सर्गकालस्य परपरकालो गौणः। न वा सर्व्वे कालाः स्युः। तत्र नाद्यः त्रिपक्षादौ शिष्टाचारविरोधात्। नापि द्वितीयः त्रिपक्षादौ नित्यत्वबोधकाभावात्। वस्तुतः आद्यश्राद्धे वृषोत्सर्गस्य नित्यत्वं त्रिपक्षादौ काम्यत्वम्। आद्यश्राद्धपदं अशौचान्तद्वितीयदिनपरम्। अशौचान्ताद्द्वितीयेऽह्नीत्यादेकवाक्यत्वात्। अत्र च आद्यश्राद्धस्य विप्रपतितत्वेन एकादशाहादौ क्रियमाणत्वे वृषोत्सर्गमपि न कुर्य्यात्। आद्यश्राद्धदिने वृषोत्सर्गाकरणे त्रिपक्षाद्यन्यतमकालेऽपि वृषोत्सर्गस्यावश्यप्रेतत्वपरीहारकत्वेन तस्य पुनः संवत्सरसाध्यसपिण्डनस्य नित्यत्वं कल्प्यम्। एवं धेनुदानस्यापि। अतएव पूर्व्वसंवत्सरे मलमासपातेऽपि प्रागपकृतश्चेत् कार्य्य एव इति नवीना जगुः। एककर्त्तृकानेकवृषोत्सर्गोऽपि शिष्टाचार एकदिनेऽपि। तथा हि स्वर्गलोकगमनफलश्रुतेः काम्यत्वेन यो भूय आरभते तस्मिन् फले विशेष इति न्यायादविरोधः ॥ ननु नैमित्तिकत्वात् कथमावृत्तिः सकृत्कृते कृतः शास्त्रार्थ इति न्यायात्। न चैकत्र क्रियाद्वयमिति वचनाच्च। अत्राय विशेषः। काम्यनैमित्तिकं फलविशेषार्थं भूयः कार्य्यं नैमित्तिकमात्रं सकृदेव। किञ्च। संक्रान्त्यादिनिमित्तकश्राद्धमपि पुनः पुनः स्यात्। नैवं तत्र पितृतृप्तिरूपप्रधानफलस्य सत्त्वेन चरितार्थं इति ॥ * ॥ अत्रोक्तानि सर्व्वाण्येतानि वचनानि तिर्य्यगधिकरणन्यायमूलानि। तथा हि तिर्य्यगधिकरणे तिर्य्यक्पङ्गुत्रार्षेयदेवतानामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः तिरश्चां विशिष्टान्तःकरणविरहात् पङ्गोः प्रचरणविरहात् त्रार्षेयाणां अन्धवधिरमूकानामवेक्षणश्रवणोच्चारणविरहात् साङ्गयागासामर्थ्ये तेषां यथा यागानधिकारस्तद्वत् स्वपितुः पितृकृत्येषु अधिकारो न विद्यते। इति छन्दोगपरिशिष्टे अग्निष्वात्ताद्यन्तर्गणसुतो जीवत्पितृकश्चैतानन्यांश्चेतर इति कात्यायनसूत्रे च जीवत्पितृकस्य पितृतर्पणनिषेधात् वृषोत्सर्गे तदङ्गभूततत्पुच्छगलितोदकतर्पणविरहात् साङ्गकरणासामर्थ्ये वृषोत्सर्गानधिकारः। अतएव द्वैतनिर्णयेऽपि। अनूचितस्त्रियां करणीभूतगर्भाधेन यागवद्वृषोत्सर्गस्य बाध उक्तो वाचस्पतिमिश्रेण। धेनुदानाङ्गतर्पणे तु प्रधानाधिकारश्रुतेः जीवत्पितृकाधिकृतविशेषविधानाच्चाधिकार एवाभ्युदयिकश्राद्धवत् जन्मादायुपनयनाङ्गसशिखवपनवच्च। अयन्तु सामान्यशास्त्रोपजीवित्वेन निषेधः पर्य्युदास एव। स तु यदि पतिपुत्त्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यादित्येव मात्रस्तदा पुत्त्र इत्यादिवचनभागवैयर्थ्यं स्यात्। यदि च जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इत्येव मात्रस्तदा पूर्व्वभागवैयर्थ्यं स्यात्। यदि वा पतिपुत्त्रवत्या जीवत्पितृकपुत्त्रभिन्नो वृषोत्सर्गं कुर्य्यादिति विशिष्टरूपस्तथापि पतिपुत्त्रवत्यास्तदुभयरहितायाश्च जीवत्पितृकपौत्त्रादिना वृषोत्सर्गः स्यात्। स चायुक्त एव प्रागुक्तवचनन्यायविरोधात्। तस्मात् समुदायवचनसार्थक्याय पतिपुत्त्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यात्। तथा जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इति वचनन्यायसंवादाद्वाक्यद्वयमेव सिध्यति। प्रमाणवद्गौरवस्य सर्व्वाङ्गीकृतत्वात्। दर्शपौर्णमासयोः षट्प्राधान्यापूर्व्ववत्। अथ वोक्तदेवलादिवचने ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानत इत्यन्तकापिलसकलवचनपर्य्यालोचनया कनिष्ठपुत्त्रवतीभिन्नपतिपुत्त्रवतीतरणनस्यकापिलप्रतिप्रसूतकनिष्ठपुत्त्रभिन्नजीवत्पितृकात् अन्यो जनो वृषोत्सर्गं कुर्य्यात्। इति सामान्यत एव वृषोत्सर्गविधिः। तथा पतिपुत्त्रवत्या ज्येष्ठपुत्त्र एव चन्दनाङ्कितधेनुमुत्सृजेदिति विधिश्च सिध्यति। ततश्च पतिपुत्त्रवत्याः कनिष्ठपुत्त्रसत्त्व एव तेन तदन्यमृतपितृकेण वा वृषोत्सर्गः कार्य्यः। कनिष्ठपुत्त्राभावे तु न केनापि। एवं पत्यादिना चन्दनधेनुदानमिति। प्रतिप्रसूतकनिष्ठान्यजीवत्पितृकेण न कस्यापि वृषोत्सर्गः कार्य्य इत्यपि च पर्य्यवसितम् ॥ वस्तुतस्तु पतिपुत्त्रवत्या वृषोत्सर्गनिषेधे तत्पुत्त्रस्य जीवत्पितृकत्वेनानधिकार एव हेतुः न तु स्त्रियाः पतिसत्त्वं पुत्त्रसत्त्वं वा। मृतपुत्त्रेत्यादिप्रागुक्तकापिलवचने पतिसत्त्वे कनिष्ठपुत्त्रसत्त्वे च वृषोत्सर्गावगतेः। तत्पुत्त्रस्य पितुः सत्त्व एवानधिकारोऽस्या तत्करणे वृषोत्सर्गावगमाच्च। न वा तदुभयसत्त्वं मिलितं उक्तन्यायावगततत्पुत्त्रस्य जीवत्पितृकत्वहेतोरेव तादृशनिषेधप्राप्तेः पतिपुत्त्रसत्त्वयोर्निर्बीजहेतुत्वकल्पनानौचित्यात् तयोर्व्यञ्जकहेतुत्वे तु अदृष्टकल्पनाया अन्याय्यत्वात् सिद्धजीवत्पितृकनिषेधप्रपञ्चतया पतिपुत्त्रवत्या निषेधोपपत्तौ अधिकारनिषेधकल्पने

गौरवाच। यत्तु जीवत्पितृकस्य वृषोत्सर्गनिषेधे पतिपुत्रवत्याः पृथगुपसंहारः सोऽपि तस्याः पुत्त्रानधिकारमात्रप्रयुक्तसिद्धवृषोत्सर्गाभावभागित्वानुवादः। पूर्व्ववाक्यावगतधेनुदानस्य वृषोत्सर्गस्थानीयत्वज्ञापनार्थ एवेति प्रागपि निरूपितम्। ततश्चोक्तवचने तिर्य्यगधिकरणन्यायप्राप्तं जीवतपितृकस्य वृषोत्सर्गकर्त्तृत्वाभावमनूद्य सपतिकाया वृषोत्सर्गस्थाने चन्दनाङ्कितधेनूत्सर्ग एव विधीयते। एतेन वृषोत्सर्गकर्त्तरि कपिलप्रतिप्रसूतसपतिकावृषोत्सर्गकृतिमत्कनिष्ठपुत्त्रान्यजीवतपितृकेतरत्वविशेषण सपतिकाया वृषोत्सर्गस्थाने ज्येष्ठपुत्त्रस्यैव चन्दनाङ्कितधेनूत्सर्गमात्रञ्च लभ्यते। अतो जीवत्पितृकेण काम्यवृषोत्सर्गं पतिते प्रव्रजिते वा पितरि जीवति पितामहादिवृषोत्सर्गश्च न कार्य्यं। एव सपतिकाया अपि पुत्त्रस्य कर्म्मयोग्यत्वे असत्त्वे वा पत्या कन्यादिना वा वृषोत्सर्गं कार्य्य एवेति स्थितम्। इदन्तु रत्नाकरहलायुधाचार्य्यचूडामणिविद्याभूषणशुभङ्करमहादेवभट्टाचार्य्यप्रभृतीनामपि सम्मतं तेषां पृथक् पृथक् पद्धतिरपि प्रचरति। क्वचिद्देशे स्मार्त्तभट्टाचार्य्यस्यापि समूलपद्धतिर्दृश्यते। अतएवात्र विशेषादर्शिनामनाचारोऽनाचार एव। अत्र भविष्योक्तप्रकारस्तु वैकल्पिक एव। स्मृतिशास्त्रे विकल्पो हि आकाङ्क्षापूरणे सतीति जैमिन्युक्तेः। तत्र त्वपूजाहोमाद्यङ्गेषु विशेषमन्त्रतन्त्रोक्तेः। कापिलकल्पेन वृषोत्सर्गधर्म्मातिदेशेन विशेषोक्तनिराशाच्च॥ १॥ सम्प्रति विचारितकापिलकल्पप्रयोगोऽभिधीयते यथा। गोशालादौ वितानयुक्ते प्रागुदक्प्लवन देशे गोमयेनोपलिप्य कृतनित्यक्रिय आचान्तः कुशहस्तो द्विवासाः प्राङ्मुखः ओँ तद्विष्णोः परमं पदं इति विष्णु स्मृत्वा नत्वा च उदङ्मुख ओँ तत् सदित्युच्चार्य्य कुशतिलजलपूर्णताम्रपात्रमादाय विशेषानुपदेशात मुख्यचान्द्रमासोल्लेखेन अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रायाः प्रेताया अमुकाया अशौचान्तद्वितीयेऽह्नि अमुकगोत्रायाः प्रेताया अमुकायाः प्रेतलोकविमुक्तत्वस्वर्गलोकगमनकामः च चन्दनाङ्कितसवत्सधेनुदानकर्म्माहं करिष्यामीति संकल्पयेत्। ततस्तज्जलमैशान्यां क्षिपेत्। ततः स्वस्वरीत्या सङ्कल्पसूक्तं पठेत्। ततः प्रथम ब्रह्मवरणम्। तत्र उत्तरामुख ब्रह्माणमुपवेश्य तत्समीपे आसनमानीय प्राङ्मुखो यजमानः प्राञ्जलिः ओँ साधुभवानास्तां इति वदेत। ओँ साध्वहमासे इति प्रतिवचनं दत्त्वा ब्रह्मा तदासने उपविशति। ततः कर्त्ता ओम् अर्च्चयिष्यामो भवन्तं इति वदेत्। ओम् अर्च्चयेति प्रतिवचनम्। ततो गन्धपुष्पताम्बूलवस्त्रालङ्कारैर्ब्रह्माणं सपूज्य तद्दक्षिणं जानु स्पृष्ट्वा ओम् अद्यामुकेमासि अमुकेपक्षेऽमुकतिथौ अमुकगोत्रायाः प्रेतायाः अमुकाया अशौचान्तद्वितीयेऽह्नि अमुकगोत्रममुकप्रवरं श्रीअमुकदेवशर्म्माणं त्वामस्मिन् चन्दनाङ्कितधेनुदानाङ्गहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्धादिभिरभ्यर्च्याद्य वृणे इति ब्रह्माणं वृणुयात्। ओँ वृतोऽस्मीति प्रतिवचनम्। ओँ यथाविहितं ब्रह्म कर्म्म कुरु। ओँ यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं ज्ञानाशक्तौ ब्रह्मकर्म्म कारयेत्यत्र ब्रह्मादिकर्म्मकरणायेति वदेत्। स्वयं होमासामर्थ्ये होतारं वृणुयात्। तत्र होतृकर्म्म करणायेति विशेषः। एवं तन्त्रधारकाचार्य्यमपि। आचार्य्यान्तराभावे ब्रह्मैवाचार्य्यत्वेनापि वरणीयः। तत्र ब्रह्माचार्य्यकर्म्मकरणायेति विशेषः। एवं प्रागुक्तवत् सदस्यवरणमपि। हस्ताङ्गुल्यादिमानन्तु याजमानिकमेव सर्व्वत्र ग्राह्यम्। ततः पुण्याहस्वस्त्यृद्धिवाचनं कृत्वा चन्दनाङ्कितधेनुदाननिमित्तकहोमीयपर्विरक्षयत्वकामो भारतनामोच्चारणं कुर्य्यात्। ततो यजमानो होता वा गायत्र्या गोमूत्रं ओँ गन्धद्वारेत्यादिना गोमयं ओम् आप्यायस्वेत्यादिना दुग्धं ओँ दधिक्राव्ण इत्यादिना दधि ओँ तेजोऽसीत्यादिना घृतं ओँ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति कुशोदकञ्च शोधयित्वा गायत्र्या सर्व्वमेकीकृत्य तेन वेदीमभ्युक्ष्य तत्र घटान् संस्थाप्य गणेशग्रहान् विष्णुञ्च सपूजयेत्। ततो हस्तप्रमाणं स्थण्डिलं शर्कराङ्गारास्थिकेशतुषादिरहितं पूर्व्वोत्तरप्लवं समं वा गोमयेनोपलिप्य तत्र स्वगृह्योक्तविधिनाग्निं संस्थाप्य स्वस्वगृह्योक्तवृषोत्सर्गपद्धतिक्रमेण कर्म्म कृत्वा प्राङ्मुखीं धेनुमग्निसमीपं नीत्वा ओँ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नोऽश्वेषु रीरिषः। वीरान्मा नो रुद्रभामिनोऽवधीर्हविष्मन्तः सदमित्त्वा हवामहे। इति मन्त्रेण धेनोर्वामसक्थिनि षडङ्गुलं त्रिशूलं चन्दनेन कुशेन लिखेत्। वीरान्मा न इति सामगानाम्। यजुषान्तु मा नो वीरानिति मन्त्रभागे पाठः। ततः ओँ वृषोऽसि भानुना द्युमन्तं त्वा हवामहे पवमानः स्वर्द्दृशम्। इति मन्त्रेण दक्षसक्थिनि षडङ्गुलं व्यासहीनं चक्रञ्च तथैवाचार्य्यो लिखेत्। अस्मिन्नवसरे अग्नेरुत्तरे सवत्सधेनुमौलिकं यूपमारोपयेत्। ततः स्वस्वगृह्योक्तविधिना वृष वद्धेनु स्नापयेत्। ततः सितवाससा जलमपनीय गन्धचन्दनपुष्पाञ्जनसिन्दूरगोरोचनादिभिः स्वर्णशृङ्गाभ्यां रूप्यसफैश्च वस्त्रेण कांस्यक्रोडेन ताम्रपृष्ठेन घण्टाचामराभ्याञ्च यथायोग्यं तथा कर्णयोः प्रवालमालिकाभ्याञ्च धेनुं भूषयित्वा पाद्यादिभिरभ्यर्च्च्य स्वस्वगृह्योक्तश्रायमन्त्रान् श्रावयित्वा च प्राङ्मुखीं धेनुं शुक्लवाससा यूपे बध्नीयात्। ततो यजमान उत्तरामुखः धेनोर्मस्तकादिक्रमेण तत्तन्मन्त्रैः पूजयेद्यथा। शिरसि ओँ ब्रह्मणे नमः। एवं ललाटे वृषभध्वजाय नमः। कर्णयोः अश्विनीकुमाराभ्याम्। चक्षुषोः शशिभास्कराभ्याम्। जिह्वायां सरस्वत्यै। दन्तेषु वसुभ्यः। ओष्ठयोः सन्ध्यायै। ग्रीवायां नीलकण्ठाय। हृदि स्कन्दाय। रोमकूपेषु ऋषिभ्यः। दक्षपार्श्वे कुबेराय। वामपार्श्वे वरुणाय। रोमाग्रे रश्मिभ्यः। ऊरुषु धर्म्माय। जङ्घासु अधर्म्माय। श्रोणीतटे पितृभ्यः। खुरमध्ये गन्धर्व्वेभ्यः। खुराग्रेषु अप्सरोभ्यः। लाङ्गूले द्वादशादित्येभ्यः। गोमये महालक्ष्म्यै। गोमूत्रे गङ्गायै। पयोधरेषु चतुःसागराय। एवं संपूज्य पठेत्।

ओम् इन्द्रस्य च त्वमिन्द्राणी विष्णोर्लक्ष्मीश्च या स्मृता।
रुद्रस्य देवी या गौरी सा देवी वरदास्तु मे॥
ओँ या लक्ष्मीर्लोकपालानां या च देयम्ववस्थिता।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥
ओँ देहस्था या च रुद्राणी शङ्करस्य सदा प्रिया।
धेनुरूपेण सा देवी तस्याः शान्तिं प्रयच्छतु॥
ओँ सर्व्वदेवमयी दोग्ध्री सर्व्वलोकमयी तथा।
धेनुरूपेण सा देवी तस्याः स्वर्गं प्रयच्छतु॥

ततः ओम् आचार्य्याय नमः इत्यनेनोदङ्मुखं सम्प्रदानब्राह्मणं पाद्यादिभिः सपूज्य एवं ओँ रुद्राय नमः इति तद्देवतां संपूज्य ओँ चन्दनाङ्कितसवत्सधेनवे नमः इत्यनेन पाद्यार्घ्याचमनीयगन्धपुष्पैर्धेनुं सपूज्य सप्रोक्ष्य च ब्राह्मणहस्ते जलं दत्त्वा कुशतिलजलान्यादाय ओँ तत् सदद्यामुके मासि अमुके पक्षे अमुकतिथावमुकगोत्रायाः प्रेताया अमुकाया अशौचान्तद्वितीयेऽह्नि अमुकगोत्रायाः प्रेताया अमुकायाः प्रेतलोकविमुक्तत्वस्वर्गलोकगमनकामोऽहं एतां सालङ्कारां चन्दनाङ्कितसवत्सधेनुं रुद्रदैवतकां अमुकगोत्राय श्रीअमुकदेवशर्म्मणे आचार्य्यब्राह्मणाय तुभ्यं ददानीति ब्राह्मणहस्ते जलं दद्यात्। ततः सम्प्रदानब्राह्मणः पुच्छं धृत्वा ओमित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा च सावित्रीं पठेत्। ततो धेनुरियं रुद्रदैवतकेति वदेत्। यथाशाखं कामस्तुतिञ्च पठेत्। यथा सामवेदे। ओँ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते॥ यजुर्व्वेदे तु। ओँ द्यौस्त्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु कोऽदात् कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते तव कामशतात् भुनजामहे॥ ऋग्वेदे तु। सामगमन्त्रास्ते। ओँ इहिरसि द्यौस्त्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु। इदमधिकम्। ततो यजमानः ओँ अद्येत्यादि कृतैतत्सालङ्कारचन्दनाङ्कितसवत्सधेनुदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं हेम तन्मूल्यं वा विष्णुदैवतं अमुकगोत्राय श्रीअमुकदेवशर्म्मणे आचार्य्याय ब्राह्मणाय तुभ्यमहं ददानीत्याचार्य्याय दद्यात्। आचार्य्यस्तु ओमिति गृहीत्वा

स्वस्तीति वदेत्। ततो वृषोत्सर्गवन्मन्त्रोहेन स्वस्वगृह्योक्तश्राद्धादिशेषं कर्म्म समापयेत्। ततः सदस्यदक्षिणां दत्त्वा आहूतान् वस्त्रमाल्यादिभिः पूजयेत्। सामगश्चेदिदानीं ब्रह्महोत्राचार्य्यसदस्येभ्यो ब्राह्मणेभ्यो दक्षिणां वृषोत्सर्गवद्दद्यात्। अन्यवेदी तु स्वस्वगृह्योक्तरीत्या यथास्थानं दक्षिणां वृषोत्सर्गवद्दद्यात्। शूद्रस्तु यजुर्व्वेदिवत् सर्व्वं कुर्य्यात्। किन्तु मन्त्रपाठं ब्राह्मणेन कारयेत्। दीनानाथादींश्च वस्त्रान्नाद्यैस्तोषयेदिति॥"*॥ इति श्रीचन्द्रशेखरवाचस्पतिभट्टाचार्य्यविरचितः चन्दनाङ्कितधेनुदानसविधिप्रयोगः समाप्तः॥

चन्दनपुष्पं, क्ली, (चन्दनमिव सुगन्धि पुष्पं यस्य।) लवङ्गम्। इति राजनिर्घण्टः॥

चन्दनशारिवा, स्त्री, (चन्दनगोपी शारिवा। शाकपार्थिवादिवत् समासः।) शारिवाविशेषः। इति राजनिर्घण्टः॥

चन्दनसारः, पुं, (चन्दनस्येव सारो यस्य।) वज्रक्षारम्। इति राजनिर्घण्टः॥

चन्दना, स्त्री, (चन्दयति आह्लादयति स्वगन्धादिनेति। चदि आह्लादे + णिच् + युच्। स्त्रियां टाप्।) शारिवाविशेषः। इति राजनिर्घण्टः॥ नदीविशेषः। सा तु मधुरवालुकाख्यनगरसमीपे प्रसिद्धा॥

चन्दनाचलः, पुं, (चन्दनस्य चन्दनोत्पादको वा अचलः। चन्दनाकरः पर्व्वत इत्यर्थः।) मलयपर्व्वतः। इति जटाधरः॥

चन्दनाद्रिः, पुं, (चन्दनस्य चन्दनोत्पादको वा अद्रिः पर्व्वतः।) मलयपर्व्वतः। इति त्रिकाण्डशेषः॥

चन्दनी, स्त्री, (चन्दयति आह्लादयति जलादिदानेनेत्यर्थः। चन्दन + ङीष्) नदीविशेषः। इति मेदिनी। ने। ६०॥ (यथा, गोः रामायणे। ४।४०।२०।
"रुचिरां कुटिलाञ्चैव चन्दनीं चापगां तथा॥")

चन्दनीया, स्त्री, (चन्द्यते दीप्यतेऽनया। चदि + करणे अनीयर्।) गोरोचना। इति राजनिर्घण्टः॥

चन्दिरः, पुं, (चन्दन्ति हृष्यन्ति लोका येन। चदि आह्लादे + "इषिमदीदि।" उणां। १।५१। इति किरच्।) चन्द्रः। हस्ती। इति मेदिनी। रे। १५२॥

चन्द्रं, क्ली, (चन्दति दीप्यते इति। चदि + "स्फायितञ्चीति।" उणां। २।१३। इति रक्।) स्वर्णम्। शुक्रम्। इति राजनिर्घण्टः॥ (वृत्तविशेषः। यथा, वृत्तग्रन्थे।
"द्विजवरगणयुगसुपधाय परिकलय कर-
मधनगणयुगलमिह गन्धयुगमपि वितर।
फणिनृपतिभणितमिति चन्द्रमिदमिति विद्युत
सकलकविकुलहृदयमोदकरमवतनुत॥")

चन्द्रः, पुं, (चन्दयति आह्लादयति चन्दति दीप्यते इति वा। चन्द + "स्फायितञ्चीति।" उणां। २।१३। इति रक्।) देवताविशेषः। चाँद इति भाषा। तत्पर्य्यायः। हिमांशुः २ चन्द्रमाः ३ इन्दुः ४ कुमुदबान्धवः ५ विधुः ६ सुधांशुः ७ शुभ्रांशुः ८ ओषधीशः ९ निशापतिः १० अब्जः ११ जैवातृकः १२ सोमः १३ ग्लौः १४ मृगाङ्कः १५ कलानिधिः १६ द्विजराजः १७ शशधरः १८ नक्षत्रेशः १९ क्षपाकरः २०। इत्यमरः। १।३।१३—१४॥ दोषाकरः २१ निशीथिनीनाथः २२ शर्व्वरीशः २३ एणाङ्कः २४ शीतरश्मिः २५। इति ग्रन्थान्तरम्॥ समुद्रनवनीतः २६ सारसः २७ श्वेतवाहनः २८ नक्षत्रनेमिः २९ उडुपः ३० सुधासूतिः ३१ तिथिप्रणीः ३२ अमतिः ३३ चन्दिरः ३४ चित्राटीरः ३५ पक्षधरः ३६ अजः ३७ नभश्चमसः ३८ राजा ३९ रोहिणीशः ४० अत्रिनेत्रजः ४१ पक्षजः ४२ सिन्धुजन्मा ४३ दशाश्वः ४४ हरचूडामणिः ४५ माः ४६ तारापीडः ४७ निशामणिः ४८। इति जटाधरः॥ मृगलाञ्छनः ४९ दर्शविपत् ५० छायामृगधरः ५१ ग्रहनेमिः ५२ दाक्षायणीपतिः ५३ लक्ष्मीसहजः ५४ सुधाकरः ५५ सुधाधारः ५६ शीतभानुः ५७ तमोहरः ५८ तुषारकिरणः ५९ हरिः ६० हिमद्युतिः ६१ द्विजपतिः ६२ विश्वप्सा ६३ अमृतदीधितिः ६४ हरिणाङ्कः ६५ रोहिणीपतिः ६६ सिन्धुनन्दनः ६७ तमोनुत् ६८ एणतिलकः ६९ कुमुदेशः ७० क्षीरोदनन्दनः ७१ कान्तः ७२ कलावान् ७३ यामिनीपतिः ७४ सिप्रः ७५ मृगपिप्लुः ७६ सुधानिधिः ७७ तुङ्गी ७८ पक्षजन्मा ७९ चन्दः ८० अब्धिनवनीतकः ८१ पीयूषमहाः ८२ शीतमरीचिः ८३ शीतलः ८४। इति शब्दरत्नावली॥ त्रिनेत्रचूडामणिः ८५ अत्रिनेत्रभूः ८६ सुधाङ्गः ८७ परिज्माः ८८ वलक्षगुः ८९ तुङ्गीपतिः ९० यज्वनाम्पतिः ९१ पर्व्वधिः ९२ क्लेदुः ९३ जयन्तः ९४ तपसः ९५ खचमसः ९६ विकसः ९७। इति त्रिकाण्डशेषः॥ दशवाजी ९८ श्वेतवाजी ९९ अमृतसूः १०० कौमुदीपतिः १०१ कुमुदिनीपतिः १०२ भपतिः १०३ दक्षजापतिः १०४ ओषधीपतिः १०५ कलाभृत् १०६ शशभृत् १०७ एणभृत् १०८ छायाभृत् १०९ अत्रिदृग्जः ११० निशारत्नम् १११ निशाकरः ११२ अमृतः ११३ श्वेतद्युतिः ११४। इति हेमचन्द्रः। २।१९॥ * ॥ तस्योत्पत्तिर्यथा,—
"ब्रह्मणो मानसः पुत्त्रस्त्वत्रिर्नाम महातपाः।
स्रष्टुकामः प्रजा वत्स। तपस्तेपे सुदुश्चरम्॥
त्रीणि वर्षसहस्राणि दिव्यानीतीह नः श्रुतम्।
ऊर्द्ध्वमाचक्रमे तस्य रेतः सोमत्वमीयिवत्॥
नेत्राभ्यां तस्य सुस्राव दशधा द्योतयद्दिशः।
तं गर्भं ब्रह्मणादिष्टा दश देव्यो दधुर्दिशः॥
संगत्यैव महाराज। नैव ताः समशक्नुवन्।
यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः॥
ततस्ताभिः सहैवासौ निपपात वसुन्धराम्।
पतितं सोममालोक्य ब्रह्मा लोकपितामहः॥
रथमारोपयामास लोकानां हितकाम्यया।
स तेन रथमुख्येन सागरान्तां वसुन्धराम्॥
त्रिःसप्तकृत्वो द्रुहिणोऽकारयत्तं प्रदक्षिणाम्।
तस्य तत्स्रावितं तेजः पृथिवीमन्वपद्यत॥
तेनौषध्यः समुद्भूता याभिः सन्धार्य्यते जगत्।
स लब्धतेजा भगवान् ब्रह्मणा वर्द्धितः स्वयम्॥"
तस्य क्षीणत्वपूर्णत्वयोः कालो यथा,—
"कृष्णाष्टमीदिनादूर्द्ध्वं यावच्छुक्लाष्टमीदिनम्।
तावत् कालं शशी क्षीणः पूर्णस्तत्रोपरि स्मृतः॥"
इत्यग्निपुराणे ज्योतिःशास्त्रम्॥
तस्य क्षयवृद्धिकारणं यथा, पाद्मे स्वर्गखण्डे।
"अश्विन्याद्यास्तु दक्षस्य उपयेमे सुता विधुः।
रोहिण्यामेव सततं बहुप्रेमा रराम ह॥
दृष्ट्वा तदितरास्ताश्च तप्ताः पितरमब्रुवन्।
अस्माकं कामदस्तात। जामाता तव रोहिणीम्।
रमयत्येव सततं तेन तप्ता वयं पितः।॥
तत् श्रुत्वा चाप्रियं दक्षः सोममाह भजस्व भोः।
प्रेम्णा समेन सर्व्वास्त्वं दुहितॄर्म्मम मानद।॥
जगृहे तद्वचो नैव सोमः सप्रेम रोहिणीम्।
तथैव रमयामास श्रुत्वा दक्षश्चुकोप ह॥
शशाप ते न भविता ह्यपत्यं मद्वचोऽतिगः।
यक्ष्मणा च परिग्रस्तो भव त्वं क्षीणरेतकः॥
अथ क्षयमिते तस्मिन् सर्व्वास्ताः सहिताः स्त्रियः।
पितरं शरणं प्राप्ताः क्षीयते नः पतिः पितः।।
न वयं तेन वर्त्तामो विना सुखनिराकृताः॥
उवाच दक्षस्ताः सर्व्वाः शापो मे नान्यथा भवेत्।
मासमध्ये पक्षमेकं वर्द्धतां स क्रमेण वै॥
क्षयं क्रमेण प्राप्नोतु पक्षमेकं व्यवस्थया।
एवं शापं वरञ्चैव ददावस्मै व्यवस्थया॥
तथैव राजते व्योम्नि क्षयवृद्धी दधद्विधुः॥"
स च गौरवर्णः वायुकोणस्त्रीवैश्यजातिसत्त्वगुणकर्कटराशिमृगशिरोनक्षत्रौष्यलवणरससुक्तागैरिकादिधातुसर्पाणामधिपतिः। आर्द्रभूमिचारी तपस्वी अपराह्णकाले प्रबलः श्लेष्मप्रकृतिः स्थूलो युवा शुभग्रहः शुभ्राभश्च। इति ताजकजातकादयः॥ अर्द्धादूनः शशी पापः। इति समयामृतम्॥ * ॥ कर्पूरम्। स्वर्णम्। (यथा, ऋग्वेदे। १।१४१।१२।
"उतनः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः॥") जलम्। काम्पिल्लः। इति मेदिनी। रे ३१॥ द्वीपविशेषः। इति शब्दमाला॥ विसर्गः। इति तन्त्रम्॥ कमनीयः। मेचकः। स तु वर्हचन्द्रकः। इति हेमचन्द्रः॥ रक्तरजतम्। तत्तु शोणमुक्ताफलम्। (योगोक्तेडानाडी। यथा हठयोगप्रदीपिकायाम्। २।७।
"बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्॥"
"चन्द्रेण चन्द्रनाड्या।" इति तट्टीका॥ भ्रूमध्यभागस्थसोममण्डलम्। यथा, तत्रैव। ३।४९।
"चन्द्रात् स्रवति यः सारः स स्यादमरवारुणी॥"
"चन्द्रात्भ्रुवोरन्तर्वामभागस्थात् सोमात्।"
तट्टीका॥)
आह्लादजनकद्रव्ये त्रि। इति भरतद्विरूपकोषः॥

चन्द्रकं, क्ली, (चन्द्र इव चन्द्रप्रभा इव कायतीति । कै+कः । वर्णसादृश्यात्तथात्वम् ।) सितमरिचम् । इति राजनिर्घण्टः ॥

चन्द्रकः, पुं, (चन्द्र इव कायति प्रकाशते इति । कै+कः ।) बर्हनेत्रम् । मयूरपुच्छेर चाँद इति भाषा । तत्पर्य्यायः । मेचकः २ । इत्यमरः । २ । ५ । ३१ ॥ (यथा, गीतगोविन्दे । २ । ३ ।
"चन्द्रकचारुमयूरशिखण्डकमण्डलवलयित-
केशम् ॥")
नखः । इति शब्दचन्द्रिका ॥ मत्स्यविशेषः । चाँदा माछ इति भाषा । अस्य गुणाः । अनभिष्यन्दित्वम् । मधुरत्वम् । बलवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायः । चलत्पूर्णिमा २ चन्द्रचञ्चला ३ चन्द्रिका ४ । इति शब्दरत्नावली ॥ (मण्डलम् । यथा, माघे । ५ । ४० ।
"यां चन्द्रकैर्मदजलस्य महानदीनां
नेत्रश्रिय विकसतो विदधुर्गजेन्द्राः ॥"
"चन्द्रकैश्चन्द्राकारैर्मण्डलैर्महानदीनाम् ।" इति मल्लिनाथः ।) चन्द्रशब्दात् स्वार्थे के चन्द्रश्च ॥

चन्द्रकला, स्त्री, (चन्द्रं चन्द्राकारं सुखभागं कलयतीति । कलि+अच् टाप् च ।) मृदङ्गवाद्यम् । वाचामत्स्यः । इति शब्दरत्नावली ॥ (चन्द्रस्य कला ।) चन्द्रस्य षोडशभागेषु भागः । तद्यथा,—
"पूषा यशा सुमनसा रतिः प्राप्तिस्तथा धृतिः ।
ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ॥
अङ्गिरा शशिनी चेति छाया सम्पूर्णमण्डला ।
तुष्टिश्चैवामृता चेति कलाः सोमस्य षोडश ॥"
आसां प्रयोजन तिथिभेदे स्त्रीणामङ्गविशेषे स्थितस्य कामस्य प्रथमादिस्वबिन्दुप्रत्येकस्वरयुक्तनमोऽन्ततत्तत्प्रत्येककलानामरूपैर्मन्त्रैश्चालनम् । इति कामशास्त्रम् ॥ * ॥ तन्त्रोक्ता कला यथा,
"अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः ।
आसां प्रयोजनं कलावतीदीक्षादौ पूजनम् ॥"
इति रुद्रयामलम् ॥
(चन्द्रः । यथा, कथासरित्सागरे । १ । ३६ ।
"स च दृष्टमखस्तेन नाशितो मन्युना मया ।
ततो जाता शिमाद्रिस्तमन्वेच्चन्द्रकला यथा ॥")

चन्द्रकान्त, क्ली, (चन्द्रवत् कान्तं कान्तिः कमनीयता अस्य ।) श्रीखण्डचन्दनम् । कैरवम् । इति रत्नमाला ॥

चन्द्रकान्तः, पुं, (चन्द्रः कान्तः प्रियो यस्य ।) कैरवम् । (चन्द्र इव कान्तः कान्तियुक्तः । चन्द्रः कान्तः अभीष्टो अधिष्ठातृदेवोऽस्येति वा ।) मणिभेदः । इति मेदिनी । ते । १६५ ॥ अस्य पर्य्यायाः । चन्द्रमणिः २ चान्द्रः ३ चन्द्रोपलः ४ । इति हेमचन्द्रः । ४ । १३२ ॥ इन्दुकान्तः ५ चन्द्राश्मा ६ संन्नवोपलः ७ शीताश्मा ८ चन्द्रिकाद्रावः ९ शशिकान्तः १० । (यथा, पञ्चतन्त्रे । १ । ८८ ।
"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥")
अस्य गुणाः । शिशिरत्वम् । स्निग्धत्वम् । अस्रदाहग्रहालक्ष्मीनाशित्वम् । शिवप्रीतिकरत्वम् । स्वच्छत्वञ्च ॥ * ॥ तद्दुत्भववारिगुणाः । विमलत्वम् । लघुत्वम् । पित्तमूर्च्छाधिताप्रदाहकासमदात्ययरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

चन्द्रकान्ता, स्त्री, (चन्द्रः कान्तः प्रियो यस्याः ।) रात्रिः । इति शब्दचन्द्रिका ॥ (चन्द्रस्य कान्ता ।) चन्द्रपत्नी च ॥

चन्द्रकालानलं, क्ली, चक्रविशेषः । यथा,—
"चन्द्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः ।
चतुर्दिक्षु त्रिशूलानि मध्यभिन्नानि कारयेत् ॥
पूर्व्वत्रिशूलमध्यस्थ दिन ऋच्चादि लिख्यते ।
त्रिशूले च वह्निर्मध्ये मध्ये वह्निस्त्रिशूलके ॥
मृत्युस्त्रिशूले नामर्क्षे मध्यमं वहिरक्षके ।
चेमलाभजयप्रश्नः नामर्क्षे चन्द्रगर्भगे ॥
वर्णनीयं प्रयत्नेन प्रथमाद्यन्त्रिपञ्चकम् ॥"
इति समयामृतम् ॥

चन्द्रकी, पुं, स्त्री, (चन्द्रको विद्यतेऽस्येति अच् । चन्द्रक+ङीष् ।) मयूरः । इति त्रिकाण्डशेषः ॥

चन्द्रकुण्डः, पुं, (चन्द्रस्य कुण्डः चन्द्ररश्मिनिर्म्मितः कुण्डो वा । चन्द्राधिष्ठातृकः कुण्ड इत्यर्थः ।) कामरूपस्थसरोवरविशेषः । (यथा, कालिकापुराणे कामाख्यारूपनिर्णये ८२ अध्याये ।
"चन्द्ररश्मिसमुद्भूत । चन्द्रकुण्ड । महोदधे । ॥")

चन्द्रकूटः पुं, (चन्द्राख्यः कूटः पर्व्वतः । यद्वा, चन्द्रः कूटे शृङ्गे यस्य । प्रतिदिनं चन्द्रप्रदक्षिणकरणादेवास्य तथात्वम् ।) कामरूपस्थपर्व्वतभेदः । यथा,—
"पूर्व्वे वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः ।
त्रिकोणस्तान्त्रवक्ताग्रस्तदूर्द्ध्वे चन्द्रमण्डलम् ॥
द्वितीयवर्गस्याद्यन्तु बिन्दिन्दुभ्यामलङ्कृतम् ।
चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत् ॥
अद्यापि प्रतिदर्शे तु पर्व्वतं सं निशापतिः ।
प्रदक्षिणीकरोत्येव दृश्यो रश्मिभिर्युतः ॥
तस्यैव पूर्व्वभागे तु सोमकुण्डाह्वयं सरः ।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते ॥
स्वर्गादवच्युतश्चन्द्रः कामाख्यासेवने यदा ।
तदा तद्रश्मिसङ्घातनिःसृताम्भोयराशयः ॥
तैस्तोयैर्व्वासव कुण्डमकरोदिन्द्रचन्द्रयोः ।
मध्ये पुण्यतमस्थाने स्वयं ब्रह्मशिलोपरि ॥
चन्द्ररश्मिसमुद्भूत ! चन्द्रकुण्ड । महोदधे ! ।
सुधास्रव ! शशाङ्कादे ! त्वं चन्द्र ! कलुषं हर ॥
इत्यनेन तु मन्त्रेण स्नात्वाय चन्द्रमायसि ।
चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः ॥
अविच्छिन्ना सन्ततिस्तु सकान्ता तस्य जायते ।
परश्च चन्द्रभवनं भित्त्वा याति परं पदम् ॥
सौरे तु चन्द्रकूटस्य नन्दनो नाम वै गिरिः ।
तस्मिन् वसति शक्रस्तु कामाख्यासेवने रतः ॥
सप्रभार्यः समासाद्य सर्व्वदेवेश्वरो हरिः ।
सेवितुं त्रिदशेशानीं सततं वर्त्तते नरः ॥
चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः ॥
प्रतिदर्शं तथा चन्द्रः प्रदक्षिणयति त्रिधा ॥
चन्द्रकुण्डजले स्नात्वा समारुह्याथ नन्दनम् ।
आराध्य शक्रं लोकेशं महाफलमवाप्नुयात् ॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८२ अध्यायः ॥

चन्द्रगुप्तः, पुं, (चन्द्रेण गुप्तः रक्षितः । चन्द्रवत् आह्लादजनकरूपगुणवत्त्वात्तथात्वं वा ।) राजविशेषः । (यथा, भागवते । १२ । १।११—१२ ।
"नवनन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति ।
तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ ।
स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥")
चित्रगुप्तः । इति केचित् ॥

चन्द्रगोलस्थाः, पुं, (चन्द्र एव गोलः चन्द्रगोलकस्थानं चन्द्रलोक इत्यर्थः । तत्र तिष्ठन्ति ये ।) दिव्यपितरः । इति त्रिकाण्डशेषः ॥ बहुवचनान्तोऽयं शब्दः ॥

चन्द्रगोलिका, स्त्री, (चन्द्रगोलः साधनत्वेनास्त्यस्याः । इति ठन् टाप् च ।) ज्योत्स्ना । इति हेमचन्द्रः । २ । २० ॥

चन्द्रचञ्चला, स्त्री, (चन्द्र इव जलस्थचन्द्रवत् चञ्चला ।) चन्द्रकमत्स्यः । इति शब्दरत्नावली जटाधरश्च ॥

चन्द्रदाराः, पु (चन्द्रस्य दाराः पत्न्यः ।) अश्विन्यादिनक्षत्राणि । इति हलायुधः ॥ बहुवचनान्तोऽयम् ॥

चन्द्रपुष्पा, स्त्री (चन्द्र इव पुष्पमस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

चन्द्रप्रभः, पुं, (चन्द्र इव प्रभा यस्य ।) इत्यर्हद्विशेषः । इति हेमचन्द्रः । १ । २७ ॥ (चन्द्रप्रभाविशिष्टे, त्रि । यथा, महाभारते । ४।२०८।
"चन्द्रप्रभं श्वेतमथातपत्रं
सौवर्णस्रग्भ्राजते चोत्तमाङ्गे ॥")

चन्द्रप्रभा, स्त्री, (चन्द्रवत् प्रभा स्निग्धादिगुणवत्तास्याः ।) वाकुची । इति राजनिर्घण्टः ॥ औषधविशेषः यथा, सुखबोधे ।
"हुमिरिपुदहनव्योषत्रिफलामरदारुचव्यभूनिम्बम् ।
मागधिमूलं मुस्तं सशठीवचामाक्षिकञ्चैव ॥
लवणक्षारनिशायुगकुस्तुम्बुरुगजकणातिविषाः ।
कर्षांशकान्येव समानि कुर्य्यात्
पलाष्टकं चाश्मजतोर्विदध्यात् ।
निष्कप्रमाणस्य पुरस्य धीमान्
पलद्वयं लौहरजस्तथैव ॥
सिताचतुष्कं पलमत्र यत्ना
निकुम्भकुम्भत्रिसुगन्धियुक्तम् ।
चन्द्रप्रभेयं गुडिका प्रयोज्या
चार्शांसि निर्व्वाशयते मदैव ॥
भगन्दरं पाण्डुरकामलाञ्च
निर्गेन्दवह्निं कुरुते च दीप्तिम् ।

हन्त्यामयान् पित्तकफानिलोत्था-
न्नाडीगते मर्म्मगते व्रणे च ॥
ग्रन्थ्यर्व्वुदे विद्रधिराजयक्ष्मणो-
र्म्मेहे भगाख्ये प्रवले च योन्या ।
शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे
शुक्रप्रवाहेऽप्युदरामये च ॥
भक्तस्य पूर्व्वं सततं प्रयोज्या
तक्रानुपानं त्वथ मस्तुपानम् ।
छागो रसो जाङ्गलजो रसो वा
पयोऽथवा शीतजलानुपानम् ॥
वर्णेन नागस्तुरगो जवेन
दृष्ट्या सुपर्णः श्रवणे वराहः ॥
वलीपलितनिर्मुक्तो वृद्धोऽपि तरुणायते ॥
न पानभोज्ये परिहार्य्यमस्ति
न शीतवातातपमैथुनेषु ।
शम्भु समभ्यर्च्च्य कृतप्रसादे-
नाम्ना गुडी चन्द्रमसः प्रसादात् ॥"
("मृतसूताभ्रकं लौहं नागं वङ्गं समं समम् ।
एलाबीजं लवङ्गञ्च जातीकोषफलन्तथा ॥
मधूकं मधुयष्टी च धात्री च समशर्करा ।
कर्पूरं खादिरं सारं शताङ्का कण्टकारिका ॥
अम्लवेतसतुल्यांशमम्ललोणीद्रवैर्दिनम् ।
भावयेन्मेषशृङ्ग्या च नागवल्ल्या दिनं दिनम् ॥
वटिकां वदरास्थ्याभां नाम्ना चन्द्रप्रभां पराम् ।
भक्षयेत्तीव्रमेहार्त्तः सर्व्वमेहकुलान्तकाम् ॥
धात्री पटोलपत्रं वा कषायं वाम्रतायुतम् ।
सक्षौद्रं पाययेच्चानु सर्व्वमेहप्रशान्तये ॥"
इति चन्द्रप्रभावटी ।
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥)

चन्द्रभागः, पुं, (भज्+भावे घञ् । चन्द्रस्य भागो-विभागो यत्र इति ।) पर्व्वतविशेषः । यथा,—

ऋषय ऊचु. ।
"चन्द्रभागा कथं सिन्धुस्तत्रोत्पन्ना महागिरौ ।
कीदृक् सरस्तद्द्विजेन्द्र ! वृहल्लोहितसञ्ज्ञकम् ॥
कथं स पर्व्वतश्रेष्ठश्चन्द्रभागाह्वयोऽभवत् ।
चन्द्रभागाह्वया कस्मान्नदी जाता वृषोदका ॥
एतन्नः श्रोष्यमाणानां जायते कौतुकं महत् ।
माहात्म्य चन्द्रभागायाः कासारस्य गिरेस्तदा ॥
मार्कण्डेय उवाच ।
श्रूयतां चन्द्रभागाया उत्पत्तिर्द्विजसत्तमाः ।
युष्माभिश्चन्द्रभागस्य माहात्म्यं नामकारणम् ॥
हिमवत्गिरिसंसक्तशतयोजनविस्तृतः ।
योजनत्रय उच्छ्रायः कुन्देन्दुधवलो गिरिः ॥
तस्मिन् गिरौ पुरा वेधाश्चन्द्रं शुद्धं सुधानिधिम् ।
विभज्य कल्पयामास देवार्थे स पितामहः ॥
पित्रर्थञ्च तथा तस्य तिथिवृद्धिक्षयात्मकम् ।
कल्पयामास जगतां हिताय कमलासनः ॥
विभक्तश्चन्द्रमा यस्मात् तस्मिन् पर्व्वतसत्तमे ।
अतो देवाश्चन्द्रभागं नाम्ना चक्रुः पुरा गिरिम् ॥"
इत्यादि कालिकापुराणे २० अध्यायः ॥

चन्द्रभागा, स्त्री, (चन्द्रभाग. पर्व्वतविशेषः स उत्पत्तिस्थानत्वेनास्त्यस्याः । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच ततष्टाप् । चन्द्रभागात् पर्व्वतविशेषात् जाता इति वा ।) नदीविशेषः । इत्यमरः । १ । १० । ३४ ॥ तत्पर्य्यायः । चन्द्रभागी २ चन्द्रिका ३ । इति शब्दरत्नावली ॥ सा तु काश्मीरदेशे प्रसिद्धा । तस्या उत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।
"यत्र देवसभा भूता सानौ तस्य महागिरेः ।
तत्र जाता देवनदी शीताख्या वचनाद्विधेः ॥
स्नापयित्वा यथा चन्द्रं शीतातोयैर्म्मनोहरैः ।
चन्द्रं पपुर्ब्रह्मवाक्यात् सर्व्वे ते त्रिदिवौकसः ॥
तदा शीताजलं चन्द्रस्नानयोगाच्च साम्प्रतम् ।
भूत्वा निपतितं तस्मिन् वृहल्लोहितसञ्ज्ञके ॥
तद्विवृद्धं तदा तोयं तस्मिन् सरसि निर्म्मलम् ।
तद्दर्शं स्वयं ब्रह्मा विवृद्धं साधु तज्जलम् ॥
तद्दर्शनाज्जलात्तस्मादुत्थिता कन्यकोत्तमा ।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ॥
भार्य्यार्थे सागरस्तान्तु जग्राह ब्रह्मसम्मते ।
तत्रैवाधिष्ठितं तोय गदाग्रेण निशापतिः ॥
निर्भिद्य पश्चिमे पार्श्वे गिरिं तत्तु प्रवाहयत् ।
तत् साम्प्रतजलं भित्त्वा वृहल्लोहितसञ्ज्ञकम् ॥
कासारं सागरं जातं चन्द्रभागा नदी तु सा ।
सागरोऽपि तदा भार्य्यां चन्द्रभागां महानदीम् ॥
तेन तोयप्रवाहेण निनाय भवनं स्वकम् ।
एव तस्मिन् समुत्पन्ना चन्द्रभागाह्वया नदी ॥
चन्द्रभागे महाशैले गुणैर्गङ्गासमा सदा ।"
इति कालिकापुराणे २२ अध्यायः ॥
अस्या जलस्य गुणाः । सुशीतलत्वम् । दाहपित्तवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

चन्द्रभागी, स्त्री,(चन्द्रभागस्य तदाख्यया प्रसिद्धस्य पर्व्वतस्य इयम् । चन्द्रभागपर्व्वतसञ्जातत्वात्तथात्वम् । चन्द्रभाग+"तस्येदम् ।" ४ । ३ १२० ॥ इत्यण् । अत्र न वृद्धिः । ततः "षिद्गौरादिभ्यश्च ।" ४ । १ । ४५ । इति ङीष् ।) चन्द्रभागानदी । इति शब्दरत्नावली ।

चन्द्रभूति, क्ली, (चन्द्रस्येव शुक्ला भूति सम्पत् कान्तिरिति यावत् यस्य । चन्द्रवत् शुभ्रदीप्तितयास्य तथात्वम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

चन्द्रमणिः, पु, (चन्द्रप्रियश्चन्द्रकान्त इत्यर्थ मणिः । शाकपार्थिववत् समासः ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४ । १३३ ॥

चन्द्रमण्डलं, क्ली, (चन्द्रस्य मण्डलम् ।) चन्द्रविम्बम् । चन्द्रपरिवेशः ॥ (यथा, गो रामायणे ।५।३२।४८।
"तस्याश्च विमलं वक्त्रं सुदन्तं सगुणैर्युतम् ।
यथा राहुविनिर्मुक्तमभवच्चन्द्रमण्डलम् ॥")

चन्द्रमाः, [स्] पुं, (चन्द्रमानन्दं मिमीते यद्वा चन्द्रं कर्पूरं सादृश्येन माति परिमातीति । मा+" चन्द्रे मो डित् । " उणा । ४।२२८ । इति असिः स च डित् । चन्द्रं रजतं अम्रतञ्च तदिव मीयते चन्द इति वा मीयते इति दासीभारादित्वात्पादने हरदत्तः ।) चन्द्र. । इत्यमर. । १ । ३ । १३ ॥ (यथा, पञ्चतन्त्रे । ३।६८।
"एकोपि कोपि सेव्यो यः क्षीण क्षीण पुनर्नवम् ।
अनुद्विग्न करोत्येव सूर्य्यश्चन्द्रमसं यथा ॥")

चन्द्रमौलिः, पु, (चन्द्रः मौलौ शेखरे यस्य ।) शिव । इति हारावली । ८ ॥ (यथा, कुमारे । ५ । ८६ ।
"अद्य प्रभृत्यवनताङ्गि । तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ॥ ")

चन्द्ररेखा, स्त्री, (चन्द्रस्य रेखा इव आकृतिर्यस्याः ।) वाकुची । इति भैषज्यरत्नावली ॥ हाकुच इति भाषा ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठाधिकारे ।
"गुडूची चन्द्ररेखा च सोमराट् चक्रमर्द्दकम् ॥"
वाकुचीशब्दे विवरणमस्या ज्ञातव्यम् ॥)

चन्द्ररेणुः, पुं, (चन्द्र आह्लादको रेणुर्यत्र ।) काव्यचौरः । इति त्रिकाण्डशेषः ॥

चन्द्रलेखा, स्त्री, (चन्द्रस्य लेखा इव आकृतिर्यस्याः ।) वाकुची । इति राजनिर्घण्टः ॥ (अप्सरोविशेषः । यथा, काशीखण्डे । ६ । ७ ।
"उर्व्वशी मेनका रम्भा चन्द्रलेखा तिलोत्तमा ॥"
छन्दोविशेषः । यथा छन्दोमञ्जर्य्याम् ।
"म्रौ मो यौ चेद्वयेतां सप्ताष्टकैश्चन्द्रलेखा ॥ ")

चन्द्रलोहकं, क्ली, (चन्द्र इव शुभ्रं लोहकं धातुद्रव्यम् ।) रूप्यम् । इति राजनिर्घण्ट. ॥

चन्द्रवंशः, पु, (चन्द्रस्य वंशः अन्ववायः ।) चन्द्रसन्तानः । यथा । ब्रह्मणः पुत्रः अत्रिः तस्य पुत्रश्चन्द्रः तस्य बुधः तस्य वैवस्वतमनुकन्यायां इलायां भार्य्यायां पुरूरवाः स प्रतिष्ठाननगरे इदानीं विठोरसंज्ञे राजचक्रवर्त्ती आसीत् । तस्योर्व्वश्यां षट् पुत्रा आसन् तेषां आयुर्ज्येष्ठ । तस्य पुत्रो नहुषस्तस्य ययातिश्चक्रवर्त्ती । तस्य द्वे भार्य्ये वृषपर्व्वणो दानवराजस्य सुता शर्म्मिष्ठा शुक्रस्य कन्या देवयानी च । देवयान्यां ययातेर्द्वौ पुत्रौ यदुस्तुर्व्वसुश्च । शर्म्मिष्ठायां त्रयः पुत्राः द्रुह्यु अनुः पूरुश्च । तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञाहेलनं कृतवन्तः पित्रा शप्ताः । ज्येष्ठपुत्रं यदुं शशाप तव वंशे राजचक्रवर्त्ती माभूत् । तुर्व्वसुद्रुह्यून् शशाप युष्माकं वंश्या वेदवाह्या म्लेच्छा भविष्यन्ति । पूरुस्तु पितुराज्ञया दुष्करं कर्म्म कृत्वा पितुरतिप्रिय आसीत् । ययातिः स्वमरणसमये कनिष्ठपुत्रं पूरुं राजचक्रवर्त्तिनं कृतवान् । यदवे दक्षिणस्यां दिशि किञ्चिद्राज्यखण्डं दत्तवान् । तथा द्रुह्यवे पूर्व्वस्यां दिशि, पश्चिमायां तुर्व्वसवे, उत्तरस्यां अनवे, सर्व्वान् पूरोरधीनांश्चक्रे । यदुरतीवधर्म्मशीलस्तद्वंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः । तच्चरित सर्व्वशास्त्रप्रसिद्धम् ॥ (अधुना यदोर्वंश उच्यते । यदोः पुत्र क्रोष्टा (क्रोष्टु) तस्य वृजिनिवान् तस्य स्वाहि तस्य रुशङ्कुः तस्य चित्ररथः तस्य शशविन्दु तस्य पृथुकीर्त्ति पृथुजय. पृथुदानः पृथुश्रवा इति चत्वारः पुत्राः । पृथु

श्रवसः तमः तस्य उशना तस्य शितायुः तस्य रुक्मकवचः तस्य ज्यामघः तस्य विदर्भः तस्य क्रथ. तस्य कुन्तिः तस्य वृष्टिः तस्य निर्वृत्तिः तस्य दशार्हः तस्य व्योमः तस्य जीमूतः तस्य विकृति. तस्य भीमरथः तस्य मधुरथः तस्य शकुनिः तस्य करम्भिः तस्य देवरातः तस्य देवक्षेत्रः तस्य मधु तस्य कुरुवश. तस्य अनुरथ. तस्य पुरुहोत्रः तस्य अंशु. तस्य सत्यश्रुत तस्य वृष्णि देवावृध. अन्धकः महाभुजः इति चत्वारः पुत्राः। तेषु वृष्णिज्येष्ठः तस्य सुमित्र. तस्य अनमित्र तस्य वृष्टिः तस्य चित्रक. तस्य विदूरथ. तस्य शूरः तस्य भजमानः तस्य शिनि तस्य भोज. तस्य राधिकः तस्य देवमीढ तस्य शूरसेनः तस्य वसुदेव. तस्य पुत्रो भगवान् श्रीकृष्ण ॥ * ॥) ययातिपुत्रस्य पूरोरतिविस्तीर्णो वंश उच्यते। पूरोः पुत्रो जनमेजय तस्य प्रचिन्वान् तस्य प्रवीर तस्य मनस्यु तस्य चारुपद तस्य सुद्युः तस्य बहुगवः तस्य संयाति तस्य अहंयाति. तस्य रौद्राश्व तस्य ऋतेयु. तस्य रन्तिनारः तस्य सुमति (तंसु.) तस्य रैभ्यः (सुरोध) तस्य दुष्मन्तश्चक्रवर्त्ती। तस्य शकुन्तलायां भार्य्यायां भरतश्चक्रवर्त्ती आसीत्। यस्त्रयस्त्रिंशच्छतमश्वमेधान् कृतवान् पश्चाद्राजसूयान् एवमन्यान् नानाविधान् यज्ञान् अकरोत् बहूनि धनरत्नादीनि दत्तवान् सप्तविंशतिसहस्रवत्सरान् एकच्छत्रं राज्य कृतवान्। तस्य पुत्रो वितथ तस्य मन्युः तस्य बृहत्क्षेत्र. तस्य हस्ती येन हस्तिनापुर निर्म्मितम्। तस्य अजमीढ़ तस्य ऋक्ष तस्य सम्वरण तस्य सूर्य्यकन्याया तपत्यां कुरुः तस्य जह्नु तस्य सुरथः तस्य विदूरथ. तस्य सार्व्वभौमः तस्य जयत्सेन तस्य राधिक. तस्य अयुतायु तस्य क्रोध. तस्य दिलीप तस्य प्रतीप तस्य देवापि शान्तनु. वाह्लीक इति त्रय पुत्रा। तत्र देवापि कलापग्रामे योगी भूत्वा वर्त्तते। स कलौ चन्द्रवंशे क्षीणे कलेरन्ते पुन सत्ययुगे चन्द्रवंशं भावयिष्यति ॥ * ॥ तत्र शान्तनू राजा अभवत् स चक्रवर्त्ती तस्य गङ्गायां भीष्म पुत्रो जात स परमधर्म्मात्मा महावीर, येन पितुर्दाशकन्याविवाहार्थं पितृराज्य त्यक्तम्। य स्वस्य विवाह त्यक्त्वा ऊर्द्ध्वरेता जात। शान्तनोर्दाशकन्यायां द्वौ पुत्रौ जातौ चित्राङ्गदो विचित्रवीर्य्यश्च। सत्यवत्यां कन्याकाले पराशरात व्यासो जात। पुनर्मुनेर्वरात् व्यासजन्मानन्तर सा कन्यारूपाभवत। चित्राङ्गदो युद्धे गन्धर्व्वेण हत.। विचित्रवीर्य्यस्य क्षेत्रे सत्यवत्याज्ञया व्यास धृतराष्ट्र पाण्डुञ्च जनयामास। धृतराष्ट्रस्यान्धस्य गान्धार्य्यां भार्य्यायां दुर्य्योधनज्येष्ठं पुत्रशत बभूव। पाण्डोर्द्वेभार्य्ये कुन्ती माद्री च। मृगीभूतस्य मुने. शापामैथुनरहितस्य पाण्डोराज्ञया कुन्ती धर्म्माद् युधिष्ठिर पवनाद्भीम इन्द्रादर्ज्जुनं जनयामास। माद्री अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास। युधिष्ठिरस्तु राजसूययाजी। अर्ज्जुनस्य सुभद्रायां भार्य्यायां अभिमन्युस्तस्य उत्तरायां भार्य्यायां परिक्षित्। युधिष्ठिरादनन्तर कलियुगस्यारम्भे स राजासीत् चक्रवर्त्ती। तस्य जनमेजयः तस्य शतानीकः तस्य सहस्रानीक तस्य अश्वमेधजः तस्य असीमकृष्णः तस्य नेमिचक्र स हस्तिनानगरे नद्याहृते कौशाम्ब्यां पुर्य्यां राजासीत्। तस्य उप्तः तस्य चित्ररथ तस्य शुचिरथः तस्य वृष्टिमान् तस्य सुसेन तस्य सुनीथः तस्य नृचक्ष. तस्य सुखीनलः तस्य परिप्लव तस्य सुनय. तस्य मेधावी तस्य नृपञ्जयः तस्य दूर्व्व. तस्य तिमि. तस्य बृहद्रथ. तस्य सुदासः तस्य शतानीक तस्य दुर्द्दमन तस्य महीनरः तस्य दण्डपाणिः तस्य निमि. तस्य क्षेमक। एतत्पर्य्यन्तमस्य वंशस्य शान्ति एते कलेः सहस्रवर्षपर्य्यन्तं स्थिता ॥ * ॥ सोमवंशशाखान्तरे मगधवंश्या राजानः कलौ बहुकाल स्थिताः। अतस्ते वर्ण्यन्ते। तत्र युधिष्ठिरसमकालीनो जरासन्धसुत. सहदेवो मगधेषु राजासीत्। तस्य मार्जारि तस्य श्रुतश्रवाः तस्य अयुतायुः तस्य निरमित्र तस्य सुनक्षत्र. तस्य बृहत्सेनः तस्य कर्म्मजित् तस्य श्रुतञ्जय तस्य विप्रः तस्य शुचि तस्य क्षेमः तस्य सुव्रतः तस्य धर्म्मसूत्रः तस्य समः तस्य द्युमत्सेन तस्य सुमतिः तस्य सुबल. तस्य सुनीथः तस्य सत्यजित् तस्य विश्वजित् तस्य पुरञ्जयः एते राजान, कलौ, सहस्रवत्सरपर्य्यन्त राज्य कृतवन्त ॥ * ॥ तत. पुरञ्जयस्य मन्त्री शुनकः पुरञ्जय हत्वा तस्य पुत्र प्रद्योत राजानं कृतवान्। तदारभ्य राजानो वर्णसङ्करदोषदुष्टा जाताः। प्रद्योतपुत्र पालक. तस्य विशाखयूपः तस्य राजकः तस्य नन्दिवर्द्धन। एते पञ्च अष्टत्रिंशोत्तरशतवर्षं भूमिपा आसन् ॥ * ॥ नन्दिवर्द्धनस्य पुत्रः शिशुनाग तस्य काकवर्णः तस्य क्षेमधर्म्मा तस्य क्षेत्रज्ञ तस्य विधिसारः तस्य अजातशत्रु तस्य दर्भक तस्य अजय. तस्य नन्दिवर्द्धन तस्य महानन्दि. एते दश नृपा षष्ठ्युत्तरशतत्रय वत्सरान् भूमिपाला आसन् ॥ * ॥ महानन्दिसुतो नन्द शूद्रायां समुत्पन्नः राजासीत् तस्य सुमाल्याद्या अष्टौ पुत्रा आसन्। ते शतवत्सरान् राज्य कृतवन्त.। चाणक्यनामा कश्चिद्ब्राह्मण नन्द तत्पुत्रांश्च हत्वा मौर्य्यं चन्द्रगुप्त राजान कृतवान्। कलौ नन्दान्त क्षत्रियवंश। इति श्रीभागवत महाभारतञ्च ॥

चन्द्रवल्लरी, स्त्री, (चदि आह्लादे+रक्। चन्द्रा आनन्ददायिका वल्लरी। सुधातुल्यमधुस्रावित्वा त्तथात्वम्। चन्द्रस्य वल्लरी लता इति केचित्।) सोमवल्लरी। सोमलता इति ख्याता। ब्राह्मी शाकमिति केचित्। इत्यमरटीकायां भरत ॥

चन्द्रवल्ली स्त्री, (चन्द्र इव आनन्ददायिका वल्ली।) प्रसारणी। माधवीलता। इति राजनिर्घण्ट ॥ सोमलता च ॥ (सोमलताशब्देऽस्या गुणादयो ज्ञेया ॥)

चन्द्रवाला स्त्री, (चन्द्रं कर्पूरमपि वलते सवृणोति स्वगन्धेन इति। वल संवरणे+अण्। ततष्टाप्।) स्थूलैला। इत्यमरः। २। ४। १२५ ॥ (पर्य्यायोऽस्या यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला बृहदेला च चन्द्रवाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रविहङ्गम, पुं, (चन्द्र इव शुभ्रो विहङ्गम।) बकपक्षी। इति त्रिकाण्डशेषः ॥

चन्द्रव्रत, क्ली, (चन्द्राय चन्द्रलोकप्राप्तये यत् व्रतम्। यद्वा चन्द्रस्य ह्रासवृद्धिभ्यां कृतं यद्व्रतं तत्।) चान्द्रायणम्। इति स्मृतिः ॥ (एतद्विवरण चान्द्रायणशब्दे द्रष्टव्यम् ॥)

चन्द्रशाला, स्त्री, (चन्द्रेण शालते शोभते इति। शाल+अच्। ततष्टाप्।) ज्योत्स्ना। इति त्रिकाण्डशेष ॥ (चन्द्र इव शालते भासते इति। उच्चस्थानस्थितत्वादेव तथात्वम्।) प्रासादोपरिगृहम्। तत्पर्य्याय। शिरोगृहम् २। इति हेमचन्द्रः। ४। ६१ ॥ चन्द्रशालिका ३ वड़भी ४ कूटागारम् ५। इति त्रिकाण्डशेषः ॥ (यथा, रघुः। १३। ४०।

"तस्यायमन्तर्हितसौधभाज
प्रसक्तसङ्गीतमृदङ्गघोष.।
वियद्गत. पुष्पकचन्द्रशाला:
क्षण प्रतिश्रुन्मुखराः करोति ॥")

चन्द्रशालिका स्त्री, (चन्द्र इव शालते इति। शाल+ण्वुल्। टापि अत इत्वम्। यद्वा, चन्द्रशाला+स्वार्थे कन्।) वडभी। इति त्रिकाण्डशेष. ॥

चन्द्रशूर, क्ली, फलविशेषः। हालिम् इति भाषा। तत्पर्य्याय.। चन्द्रिका २ चर्म्महन्त्री ३ पशुमेहनकारिका ४ नन्दनी ५ कारवी ६ भद्रा ७। अस्य गुणाः। हिक्कावातश्लेष्मातिसारिणां हितत्वम्। असृग्वातरोगघ्नमित्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति भावप्रकाश ॥

चन्द्रशेखरः, पु, (चन्द्र शेखरे मौलौ यस्य। यद्वा, चदि आह्लादे+रक्। चन्द्रः आह्लादः स्वानन्दानुभवरूपपरमात्मज्योतिः शेखरे ललाटोर्द्ध्वभागे यस्य। स्वप्रकाशात्मनां शरीरत्रयोपाधिवर्ज्जितानां योगीन्द्रपुरुषाणामपि ललाटदेशे सत्यज्ञानानन्दाख्यतत्सेतो. परब्रह्मण स्वाभासकज्योतिर्मण्डलस्य प्रकाशमानत्वात् अन्येष्वपि चन्द्रशेखरत्वमिति चेन्न। विश्वगुरोर्महादेवादन्यत्र पूर्णतमयोगसिद्धेरप्रसिद्धेः। किञ्च महेश्वरादिशब्दवत् रूढिशक्तितोऽपि सर्व्वयोगीन्द्रगुरौ भगवति महेश्वरे एव चन्द्रशेखरपदस्य समन्वयतेति पूज्यपादाचार्य्या. ॥) शिव.। इत्यमरः ।१।१।३२ ॥ (यथा, कुमारे। ५। ५८।

"यदा बुधैः सर्व्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथ जनम्।

इति मदनोल्लिखितस्य सुगन्धया
हरस्तमुपालभ्यत चन्द्रशेखरः ॥”
चन्द्रयुक्तः शेखरः चूडा यस्य ।) पर्व्वतविशेषः ।
यथा, आगमे शिववाक्यम् ।
“विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥”
(यथा, महालिङ्गेश्वरतन्त्रे ।
“शम्भुनाथचन्द्रनाथचन्द्रशेखर पर्व्वते ॥”)
चट्टलदेशे महापीठे भैरवविशेषः । यथा,—
“चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः ।
व्यक्तरूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥”
इति तन्त्रचूडामणौ ५१ पीठनिर्णयः ॥
करवीरपुरराजा । स च पौष्यराजपुत्त्रः । यथा,—
“अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तज्ज्ञापितमर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षिणाङ्गुष्ठाद्दक्षो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषाह्वयोऽभवत् ॥
पूष्णः पुत्त्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्त्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
शेषे वयसि सम्प्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥
तमुवाच स राजानं किमिच्छसि वदस्व मे ।
प्रसन्नोऽस्मि नृपश्रेष्ठ ! प्रदास्यामि यथेप्सितम् ॥
यदिष्टं तव जायाना तत्प्रदास्यामि साम्प्रतम् ॥
पौष्य उवाच ।
हिरण्यगर्भापुत्त्रोऽहं पुत्त्रार्थी त्वामुपागतः ।
त्वयि प्रसन्ने पुत्त्रो मे भवेल्लक्षणसंयुतः ॥
एतदर्थं सभार्य्योऽहं भक्त्या त्वां समुपस्थितः ।
यथा मे जायते पुत्त्रस्तथा कुरु जगत्पते ! ॥
पुन्नाम्नो नरकात् पुत्त्रस्त्रायते पितरं यतः ।
अतस्तस्माद्भयं ब्रह्मन् । त्वं नाशयितुमर्हसि ॥
ब्रह्मोवाच ।
नरा पौष्य ! यथा भावी पुत्त्रस्तव कुलोद्वहः ।
तदहं ते वदाम्यद्य भार्य्याभिस्तत् समाचर ॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम ॥
जगीर्णे बहुले काले प्राप्तेऽपि सुरसं सदा ॥
फलमेतत् समादाय यावत् संवत्सरद्वयम् ।
आराधय महादेव सुप्रसन्नो भविष्यति ॥
यदा संभाषते भर्गः फलमेतत्तदा भवान् ।
करिष्यति फलं राजन् । भार्य्याभिस्तिसृभिः सह ॥
तत्तो लप्स्यसे तनय कुलपावनः ।
भविष्यति च यः शास्ता चक्रवर्त्ती भविष्यति ॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भार्य्याभिः ।
हरं सह समारेभे भक्त्या परमया युतः ॥
निराशी संयताहारः कदाचित् फलभोजनः ।
इमहरिनदीतीरे फलं संस्थाप्य वाग्यतः ॥
पुष्पार्घ्यधूपदीपाद्यैस्तमभ्यर्चयत् ॥
स तु वर्षद्वयेऽतीते महादेवो जगत्पतिः ॥
पौष्यस्य वृषतः साध्वीक सभार्य्याधिष्ठिते ।
प्रणम्य प्राह दुर्गेश महादेवो दयानिधिः ।
उवाचते किमर्थं मां नम्रे वद ददामि ते ॥
पौष्य उवाच ।
अपुत्त्रोऽहं पुत्त्रकामः पूजयामि वृषध्वज ॥
यथाहं पुत्त्रवान् वै स्यां वृषध्वज । तथा कुरु ॥
इति सम्यग्वदद्राजा भार्य्याभिः सह हर्षितः ।
प्रणम्य स्तुतिपूर्व्वेण भक्तिनम्रात्ममानसः ॥
ततः पुत्त्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते कृत्वेदं तमुवाच ह ॥
ईश्वर उवाच ।
इदं फलं ब्रह्मदत्तं विभज्य नृपते त्रिधा ।
भोजयैताः स्वजायास्त्वं प्रहृष्टः शुद्धमानसः ॥
ततः प्रहृष्टे भवत एतासु ऋतुसङ्गमे ।
आधास्यन्ति च गर्भांस्तु भार्य्यास्ते युगपन्नृप ॥
काले प्राप्ते च युगपत् प्रसवो योषितां तव ।
भविष्यति नृपश्रेष्ठ । ता एव त्वं करिष्यसि ॥
एकस्या जठरे शीर्षं भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ॥
अधो नाभ्यास्तु यो भागः सोऽपरस्या भविष्यति ।
ततः खण्डत्रयं भूप । यथास्थानं पृथक् पृथक् ॥
योजयिष्यसि पश्चात्ते पुत्त्र एको भविष्यति ।
तस्य शीर्षे चन्द्ररेखा सहजा संभविष्यति ॥
तेनैव नाम्ना स ख्यातिं गमिष्यति च भूपते ॥
इत्युक्त्वा स महादेवस्तासां गर्भान् स्वयं तदा ॥
संस्कर्त्तुं जाह्नवीतोयमादाय शिरसो व्यधात् ।
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ॥
तदागमात् तत् फलं भूतं त्रिभागं स्वयमेव हि ।
पौष्यस्तत् फलमादाय मुदितः सह भार्य्यया ॥
प्रययौ मन्दिरं हृष्टो अनुज्ञाप्य वृषध्वजम् ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ॥
तत् फलं नृपशार्दूल । गर्भाधायाहिता शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तिसृभिः सह भार्य्याभिर्यत्नं पौष्यो विवेश ह ॥
कृतौ [illegible]क्रियां कर्म्म राज्ञा परमधार्म्मिकः ।
गते पितरि राजा स वनवासं सहाक्षम ॥
सर्व्वां क्षितिं वशे चक्रे मात्रे स चन्द्रशेखरः ।
सार्व्वभौमो नृपो भूत्वा राजभिः परिसेवितः ॥
अमरैरिव देवेन्द्रो विजहार श्रिया युतः ।
एवं पौष्यसुतो भूत्वा ऽन्तक प्राप्य निर्वृतिम् ॥
ब्रह्मावर्त्ताश्रये रम्ये करवीराश्रये पुरे ।
दृषद्वतीनदीतीरे राजा भूत्वा मुमोद ह ॥”
इति कालिकापुराणे ४९ अध्यायः ॥ * ॥
(स्वनामख्यातः पण्डितविशेषः । असौ हि
खिद्वपुरस्य त्रिवेणीसन्निकर्षे[illegible]
१६०० शकस्य प्रारम्भ एव वर्त्तमान आसीत ।
अद्यापि तस्य स्थितिस्थानं तत्रैव वर्त्तते । अयं
नानाशास्त्रवेत्ता विशेषतो ज्योतिषशास्त्रेषु
लब्धप्रतिष्ठो बभूव । एतत्संकलिता बहवो
ग्रन्था अस्मद्देशेऽद्यापि प्रचरन्ति ॥ * ॥)
सोऽम्बष्ठभुवकाकर्णान्तनवमर्त्तुकः । तद्विपरगं
[illegible] दृश्यम् ॥ अपि च ।
“[illegible] शिखिचन्द्रशेखरः ।
कथितः [illegible] ताले भवेन सप्तनारदयोः ॥”
इति सङ्गीतदामोदरः ॥
(वटिकौषधविशेषः ।
“सूतो गन्धकटङ्कणं मरिचकं स्या-
देतैस्तुल्या शर्करा मत्स्यपित्तैः ।
भूयो भूयो भावयेत् त्रिवारं
वल्लो देयः चन्द्रशेखरस्य वारा ॥
सम्यक् तापं वारिभक्तं सतक्रं
एकाकाथं पथ्यमेव प्रदिष्टम् ।
अन्ते रोगं हन्ति सामं प्रभातम्
पित्ताधिक्ये ग्रह्णीं नाशिप्रयोगः ॥”
इति रसेन्द्रसारसंग्रहे ॥

गर्भदा चन्द्रभा चान्द्री चन्द्रपुष्पा प्रियङ्करी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रा, स्त्री, (चन्दयति आह्लादयतीति । चदि + णिच् + रक् । स्त्रियां टाप् ।) एला । वितानम् । इति शब्दरत्नावली ॥ गुडूची । इति केचित् ॥

चन्द्रातपः, पु, (चन्द्र इव आतपति शीतलं करोति छायादानेन । आ + तप + अच् ।) आच्छादनविशेषः । चाँदोया इति भाषा ॥ तत्पर्य्यायः । उल्लोचः २ वितानम् ३ चन्द्रा ४ । इति शब्दरत्नावली ॥ (चन्द्रस्य आतपः रश्मिः ।) ज्योत्स्ना । इति हेमचन्द्रः । २ । २१ ॥ (यथा, कादम्बर्य्याम् । "चन्द्रातपमिव रसतासुपेतम् ॥")

चन्द्रापीडः, पु, (चन्द्रः आपीडे शेखरे यद्वा आपीडः शिरोभूषणं यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (काश्मीरस्य राजविशेषः । यथा, राजतरङ्गिण्याम् । ४ । ४५ ।
"राजचूडामणिः श्रीमांश्चन्द्रापीडस्ततोऽभवत् । पीडितेन्दुत्विषा कीर्त्त्या कलेः पीडाञ्चकार यः ॥"
कादम्बरीवर्णितनायकविशेषः । स तु राज्ञस्तारापीडस्य पुत्रः । यथा, कादम्बर्य्याम् । १३० ।
"अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये मुहूर्त्ते गाः सुवर्णञ्च कोटिशो ब्राह्मणसात् कृत्वा 'मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन् दृष्टः इति स्वप्नानुरूपमेव राजा सूनोश्चन्द्रापीड इति नाम चकार ।"
अयं हि एकदा मृगयां गच्छन् किन्नरमिथुनमनुधावन् हिमालयशिखरमधिरुह्य अच्छोदसरोवरसमीपं गतवान् । तत्रस्थाञ्च महाश्वेतां गन्धर्व्वकुमारीमवलोक्य तन्मुखात् तस्याः सर्व्ववृत्तान्तमाकर्ण्य च तया सह गन्धर्व्वलोकं गतवान् । तत्र गत एव गन्धर्व्वराजस्य चित्ररथस्य कादम्बरीं नाम कन्यां ददर्श । दृष्ट्वा च तां कन्दर्पबाणपीडितो बभूव । ततोऽतिकष्टेन तस्मात् स्थानात् प्रत्यागत्य स्वसहचरं वैशम्पायनं स्कन्धावारस्थकटकेन परिकल्प्य पित्राहूतः स्वभवनमाजगाम । अथ गच्छति काले वैशम्पायनानयनाय गतोऽसौ चिरबन्धोर्वैशम्पायनस्य मृत्युवार्त्तामाकलय्य छिन्नतरुरिव भूतले पतित्वा महाश्वेतासन्निकर्ष एव विदीर्णहृदयो गतासुरासीत् । ततो दैवादेशेन रक्षितशरीरोऽसौ पुनर्जीवितश्च कादम्बरीं परिणीतवान् । इत्येषा नीवाश्चर्य्यजनिका कथा कादम्बरीग्रन्थत एव विशेषतो विज्ञेया ॥)

चन्द्रावली, स्त्री, गोपीविशेषः । सा तु चन्द्रभानुकन्या व्रजे श्रीकृष्णस्य नित्यप्रिया राधातुल्या । यथा, उज्ज्वलनीलमणौ ।
"राधाचन्द्रावलीमुख्या प्रोक्ता नित्यप्रिया व्रजे । कृष्णवन्नित्यसौन्दर्य्यवैदग्ध्यादिगुणाश्रयाः ॥"

चन्द्रिका, स्त्री, (चन्द्र आश्रयत्वेनास्त्यस्याः । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) ज्योत्स्ना । इत्यमरः । १ । ३ । १६ ॥ (यथा, रघु. । १९ । ३९ ।
"अन्वभुङ्क्त सुरतश्रमापहां मेघमुक्तविशदां स चन्द्रिकाम् ॥")
स्थूलैला । चन्द्रकमत्स्यः । चन्द्रभागानदी । इति शब्दरत्नावली ॥ कर्णस्फोटा । मल्लिका । श्वेतकण्टकारी । मेथिका । सूक्ष्मैला । इति राजनिर्घण्टः ॥ चन्द्रशूरम् । इति भावप्रकाशः ॥ (पीठस्थदेवीविशेषः । सा तु हरिश्चन्द्रे विराजते । यथा, देवीभागवते । ७ । ३० । ६७ ।
"सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ॥"
छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"ननततगुरुभिश्चन्द्रिकाऽश्वर्त्तुभिः ॥"
वासपुष्पा । अस्याः पर्य्याया यथा,—
"चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका । नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रिकाद्रावः, पु, (चन्द्रिकया द्रावो द्रवणं यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥

चन्द्रिकापायी, [न्] पुं स्त्री, (चन्द्रिकां ज्योत्स्नां पिबतीति । पा + णिनि. ।) चकोरपक्षी । इति राजनिर्घण्टः ॥

चन्द्रिकाम्बुजं, क्ली, (चन्द्रिका इव शुभ्रं अम्बुजम् ।) सितोत्पलम् । इति राजनिर्घण्टः ॥

चन्द्रिलः, पु (चन्द्रो विद्यतेऽस्य । चन्द्र + बाहुलकात् अस्त्यर्थे इलच् ।) शिवः । नापितः । वास्तूकम् । इति मेदिनी । ले, ८६ ॥

चन्द्री, स्त्री, (चन्दयति आह्लादयतीति । चदि + णिच् + रक् । गौरादित्वात् ङीष् ।) वाकुची । इति राजनिर्घण्टः ॥

चन्द्रेष्टा, स्त्री, (चन्द्रः इष्टः प्रियो यस्याः । निष्ठायाः परनिपातः ।) उत्पलिनी । इति राजनिर्घण्टः ॥

चन्द्रोदयः, पु, (चन्द्रस्य उदयः ।) आकाशे चन्द्रस्य प्रकाशः । स च यद्दिने सार्द्धप्रहरद्वयव्यापिनी या तिथिस्तत्तिथ्यनुसारेण भवति । तस्य प्रमाणं यथा, पुराणसमुच्चये ।
"गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः । सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा ॥
तदुदयसम्भावनस्य निर्णयामृते निर्णीतम् ।
प्रतिपद्यपराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते । तदुक्तमग्न्याधानविषये वृहच्छातातपेन ।
द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी । अग्न्याधानं चतुर्द्दश्यां परतः सोमदर्शनादिति ॥
अपराह्णश्च पञ्चधाविभक्तस्याह्नश्चतुर्थो भागः । ततश्च यत्र प्रतिपदि यामुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति ।" इति श्रीहरिभक्तिविलासे १६ विलास ॥ (चन्द्रस्य वस्त्रखण्डादिरचितचन्द्राकृतेरातपो यत्र ।) चन्द्रातपः । औषधविशेषः । इति हेमचन्द्रः ।३।३४५॥ स तु मकरध्वजाख्यरससिन्दूरम् । यथा,—
"पलं मृदु स्वर्णदलं रसेन्द्र पलाष्टकं षोडश गन्धकस्य ।
शोणैः सुकार्पासभवैः प्रसूनैः सर्व्वं विमर्द्याथ कुमारिकाद्भिः ॥
तत्काचकुम्भे निहितं सुगाढे मृत्कर्पटैस्तद्दिवसत्रयञ्च ।
पचेत् क्रमाग्नौ सिकताख्ययन्त्रे ततो रसः पल्लवरागरम्यम् ॥
निगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव ।
जातीफलं शोषणमिन्द्रपुष्पं कस्तूरिकाया इह शाण एकः ॥ ० ॥
चन्द्रोदयोऽयं कथितस्तु माषो भुक्तोऽहिवल्लीदलमध्यवर्त्ती ।
मदोन्मदानां प्रमदाशतानां गर्व्वाधिकत्वं श्लथयत्यकाण्डे ॥
हृत घनीभूतमतीव दुग्धं मृदूनि मांसानि समण्डकानि ।
माषान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि चात्र ॥ ० ॥
वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः समस्तगदखण्डनः प्रचुररोगपञ्चाननः ।
गृहेषु रसराडयं भवति यस्य चन्द्रोदयः स पञ्चशरदर्पितो मृगदृशां भवेद्दुर्ल्लभः ॥"
इति सारकौमुदी सुखबोधः ॥

चन्द्रोदया, स्त्री, (चदि आह्लादे + भावे रक् । चन्द्रस्य दर्शनादिजन्यानन्दस्य उदयो यस्याः ।) नेत्ररोगस्यौषधविशेषः । यथाह चक्रपाणिदत्तः ।
"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च । विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला ॥ सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् । नाशयेत्तिमिरं कण्डुं पटलान्यर्व्वुदानि च ॥ अधिकानि च मांसानि यश्च रात्रौ न पश्यति । अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् । वर्त्तिश्चन्द्रोदया नाम्ना तथा दृष्टिप्रसादनी ॥")

चन्द्रोपलः, पु, (चन्द्रप्रभोद्भासित उपलः प्रस्तरः ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४ । १३३ ॥

चप, सान्त्वे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-सेट् ।) सान्त्वः प्रियवचनं उपशमो वा । चपति पुत्रं माता । इति दुर्गादासः ॥

चप, क म कल्के । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कल्कश्चूर्णीकरणम् । क म, चपयति तण्डुलं शिला । इति दुर्गादासः ॥

चपटः, पु, (चप + घञर्थे कः । चप, सान्त्वना चूर्णीकरणं वा तस्मै अटति गच्छतीति । अट + पचाद्यच् । ततः शकन्ध्वादिवत् साधु ।) चपेटः । इत्यमरटीका ॥ चड इति भाषा ॥

चपल, क्ली, (चपं सान्त्वनां लाति प्राप्नोतीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) शीघ्रम् । इति मेदिनी । ले, ८८ ॥ क्षणिकम् । इति हेमचन्द्रः ॥

चपलः, पुं, (चोपति मन्दं मन्दं गच्छतीति । चुप मन्दायां गतौ + "चुपेरच्चोपधायाः ।" उणां । १ । १११ । इति कल. धातोरुकारस्य अकारा-

देशश्च ।) पारदः । (अस्य पर्य्याया यथा,—
"पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यश्च रसः सूतः शिवाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मीनः । चोरकः । प्रस्तरविशेषः । इति मेदिनी । ले, ८७ ॥ चव । इति राजनिर्घण्टः ॥ (मूषिकविशेषः । यथा, सुश्रुते कल्पस्थाने ६ अध्याये ।
"पूर्व्वसुक्ताः शुक्रविधा मूषिका ये समासतः ।
नामलक्षणभैषज्यैरष्टादश निबोध तान् ॥"
"कुलिङ्गश्चाजितश्चैव चपलः कपिलस्तथा ॥"
एतस्य दंशनेन यल्लक्षणं भवति तदुपशमनाय च यदौषधं तद्यथा तत्रैव,—
"चपलेन भवेच्छर्द्दिर्मूर्च्छा च सह तृष्णया ।
सभस्मकाष्ठा सजटा क्षौद्रेण त्रिफलां लिहेत् ॥")

चपलः, त्रि, (चोपति मन्दं मन्दं गच्छतीति । चुप + कलः । उपधोरुकारस्याकारादेशश्च ।) तरलः । चञ्चलः । इति मेदिनी । ले, ८८ ॥ (यथा, आर्य्यासप्तशत्याम् । ५३० ।
"विचरति परितः कृष्णे राधायां रागचपल-
नयनायाम् ।
दशदिग्वेधविशुद्धं विशिखं विदधाति विषमेषुः ॥")
दोषमभिचिन्त्य वधबन्धनादिः कर्त्ता । तत्पर्य्यायः । चिकुरः २ । इत्यमरः । ३ । १ । ४६ ॥ विकलः । इति शब्दरत्नावली ॥

चपला, स्त्री, (चपल + टाप् ।) लक्ष्मीः । (यथा, माघे । ९ । १६ ।
"निलयः श्रियः सततमेतदिति
प्रथितं यदेव जलजन्म तया ।
दिवसात्ययात्तदपि मुक्तमहो
चपलाजनं प्रति न चोद्यमदः ॥"
"चपला चापलवती स्त्री कमला च ॥" इति तट्टीकायां मल्लिनाथः ॥) विद्युत् । (यथा, आर्य्यासप्तशत्याम् । १७९ ।
"किं पुत्रि ! गण्डशैलभ्रमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलासितगर्ज्जितदेशान्तर-
भ्रान्तीः ॥")
पुंश्चली । पिप्पली । इति मेदिनी । ले, ८८ ॥ (अस्याः पर्य्याया यथा,—
"पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
जिह्वा । इति शब्दचन्द्रिका ॥ विजया । मदिरा । इति राजनिर्घण्टः ॥ (आर्य्याछन्दोविशेषः । तल्लक्षणं यथा, वृत्तरत्नाकरे २ अध्याये ।
"उभयार्द्धयोर्जकारौ द्वितीयतुर्य्यौ गमध्यगौ
यस्याः ।
चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन ॥")

चपेटः, पुं, (चप + घञर्थे कः । चपः सान्त्वना चूर्णीकरणं वा तस्मै एटति गच्छतीति । इट गतौ + अच् ।) विस्तृताङ्गुलिपाणिः । चड इति चापड़ इति च भाषा । तत्पर्य्यायः । प्रतलः २ प्रहस्तः ३ । इत्यमरः । २ । ६ । ८४ ॥

चपेटी, स्त्री, भाद्रशुक्लषष्ठी । यथा, भाद्रशुक्लषष्ठ्यां अक्षयफलप्राप्तिकामः स्नानादिकं कुर्य्यात् । सन्तानकामा जलसमीपे षष्ठीं पूजयेत् । षष्ठ्यै नमः इति अरण्यषष्ठीपूजावत् । चापडाषष्ठीयम् । इति कृत्यचन्द्रिकाख्याख्या ॥ * ॥ अन्यच्च ।
"प्रसूत्या द्वादशे मासि सम्पन्यापत्यवृद्धये ।
सुते जाते तथा षष्ठ्या षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढे कार्द्दमी ज्ञेया श्रावणे लुण्ठनी मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाड्याख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मास्यन्नरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"
इति स्कन्दपुराणम् ॥
मन्थानषष्ठी इति केचित् ॥

चम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) चमति । उ, चमित्वा चान्त्वा । इति दुर्गादासः ॥

चम, न र उ भक्षे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) न, चम्नोति । र वैदिकः । उ, चमित्वा चान्त्वा । इति दुर्गादासः ॥

चमत्कारः, पुं, (चमत्करोतीति । कृ + अण् ।) अपामार्गः । इति शब्दरत्नावली ॥ (चमत् + कृ + भावे घञ् ।) चित्तविस्ताररूपः । तत्पर्य्यायः । विस्मयः २ । इति साहित्यदर्पणम् ॥ डमरुः ३ । इति त्रिकाण्डशेषः ॥ लोकातीतार्थाकलनेन किमेतदिति ज्ञानधाराजनने चित्तस्य दीर्घप्रायत्वं चित्तविस्तारः । दृष्टहेतुभ्योऽसम्भवित्वज्ञानेन हेत्वन्तरानुसन्धाने मनोव्यापार एव चित्तविस्तार इत्यपरे । इति साहित्यदर्पणटीका ॥ (यथा, कथासरित्सागरे । २२ । २५७ ।
"एवं सकलजगत्त्रयहृदयचमत्कारकारि-
चरितानाम् ।
स्वयमनुधावन्ति सदा कल्याणपरम्पराः पदवीम् ॥")

चमर, क्ली, (चमरस्येदम् । चमर + अण् । अत्र न वृद्धिः ।) चामरम् । इति मेदिनी । रे, १५२ ॥

चमरः, पुं, (चमति भक्षयतीति । चम + "अर्त्तिकमिभ्रमिचमीति ।" उणा । ३ । १३२ । इति अरच् ।) चमरगौः । तत्पर्य्यायः । धवली २ वन्यः ३ धेनुगः ४ वालधिप्रियः ५ । इति राजनिर्घण्टः ॥ (यथा, रामायणे । २९ । ३ ।
"चमरा सृमराश्चैव ये चान्ये वनचारिणः ॥")

चमरपुच्छः, पुं, (चमरस्य पुच्छ इव पुच्छो यस्य ।) कोकडः । स तु विडालयभेदः । इति राजनिर्घण्टः ॥ चामरे क्ली च ॥

चमरिकः, पुं, (चमरमिव केशरोऽस्त्यस्य । "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) कोविदारवृक्षः । इत्यमरः । २।४।२२ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डलीताम्रपुष्पश्च सन्तकः स्वल्पकेशरी ॥")

चमरी, स्त्री, (चमरस्य स्त्रीजातिः । चमर + स्त्रियां ङीष् ।) चमरगवी । तत्पर्य्यायः । दीर्घवाला २ गिरिप्रिया ३ । इति राजनिर्घण्टः ॥ (यथा, कुमारे । १ । १३ ।
"यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति वालव्यजनैश्चमर्य्यः ॥")
मञ्जरी । इति मेदिनी । रे, १५२ ॥

चमसः, पुं, क्ली, (चम्यते भक्ष्यते पीयते इति यावत् सोमोऽस्मिन्निति । चमु भक्षणे + "अत्यविचमीति ।" उणा । ३ । ११७ । इति असच् ।) यज्ञपात्रभेदः । इति मेदिनी । से, २१ ॥ चमच् इति भाषा ॥ (एतल्लक्षणादिकमुक्तं यथा,—
"चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः ।
त्र्यङ्गुलस्तु भवेत् स्कन्धो विस्तारश्चतुरङ्गुलः ॥
विकङ्कतमयाः श्लक्ष्णा वाग्विलाश्चमसाः स्मृताः ।
अन्येभ्यो वापि वा कार्य्यास्तेषां दण्डेषु लक्षणम् ॥
होतुर्मण्डल एव स्यात् ब्रह्मणश्चतुरस्रकः ।
उद्गातश्चाश्च त्र्यस्रिः स्याद् याजमानः पृथुः
स्मृतः ॥
प्रशास्तुरेवतष्टः स्यादुत्तोष्ठो ब्रह्मशंसिनः ।
पोतुरग्रे विशाखी स्यान्नेष्टुः स्याद्विरष्टीतकः ॥
अच्छावाकस्य रास्नाव आग्नीध्रस्य मयूखकः ।
इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्म्मणि ।
पलाशाद्वा वटाद्वान्यवृक्षाद्वा चमसाः स्मृताः ॥")

चमसः, पुं, (चम्यते भक्ष्यते इति । चम + असच् ।) पर्पटः । पिष्टभेदः । लड्डुकः । इत्यजयपालः ॥ (ऋषभदेवस्य पुत्राणामन्यतमः । यथा, भागवते । ५ । ४ । ११ ।
"कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥
एते भागवतधर्म्मदर्शना नव महाभागवताः ॥")

चमसी, स्त्री, (चमस + गौरादित्वात् ङीष् ।) मुद्गमसूरादिपिष्टम् । काष्ठरचितं यज्ञपात्रमित्यन्ये । इति लिङ्गादिसंग्रहटीकायां भरतः ॥
"चूर्णं यच्छ्यामाषाणां चमसी सा विधीयते ।"
इति भावप्रकाशः ॥

चमूः, स्त्री, (चमति भक्षयति शत्रून् नाशयतीत्यर्थः । चम + "कृषिचमितनीति ।" उणां । १।८० । इति ऊः ।) सेनामात्रम् । (यथा, गीतायाम् । १ । ३ ।
"पश्यैतां पाण्डुपुत्राणामाचार्य्य ! महतीं चमूम् ॥")
सेनाविशेषः । तत्र ७२९ हस्तिनः ७२९ रथाः २१८७ अश्वाः ३६४५ पदातयः । समुदायेन ७२९० द्विशतनवत्यधिकसप्तसहस्रम् । इत्यमरमेदिनीकारौ ॥

चमूरुः, पुं, स्त्री, (चमतीति । चम + "खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणां । ४।९० । इति ऊरः । पृषोदरादित्वात् अत उत्वञ्च ।) हरिणविशेषः । इत्यमरः । २ । ५ । ९ ॥ (यथा, माघे । १।८ ।
"चकासतं चारुचमूरुचर्म्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥")

चम्पः, पुं, (चम्पतीति । चम्प + अच् ।) कोविदारवृक्षः । इति शब्दमाला ॥

चम्पक, क्ली, (चम्पति सद्गन्धं गच्छतीति । चम्प + ण्वुल् ।) कदलीफलविशेषः । चाँपा कला इति भाषा । अस्य गुणाः । वातपित्तनाशित्वम् । गुरुत्वम् । वीर्य्यकारित्वम् । अतिशीतलत्वम् । रसे पाके मधुरत्वञ्च । इति राजवल्लभः ॥ (चम्पकस्य इदम् । चम्पक + अण् । ततोऽणो लुक् ।) चम्पकपुष्पम् ॥ (सांख्यशास्त्रोक्तसिद्धिभेदः । यथा,— "न्यायेन स्वयं परीक्षितमप्यर्थं तावन्न श्रद्धत्ते यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवाद्यते । अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिश्चतुर्थी चम्पकमुच्यते ॥")

चम्पक., पु, (चम्पयति सद्गन्धादिकं गच्छतीति । चम्प + ण्वुल् ।) वृक्षविशेषः । चाँपा इति भाषा । तत्पर्य्यायः । चाम्पेयः २ हेमपुष्पकः ३ । इत्यमरः । २ । ४ । ६३ ॥ स्वर्णपुष्पः ४ शीतलच्छदः ५ सुभगः ६ भृङ्गमोही ७ शीतलः ८ भ्रमरातिथिः ९ सुरभिः १० दीपपुष्पः ११ स्थिरगन्धः १२ अतिगन्धकः १३ स्थिरपुष्पः १४ हेमपुष्पः १५ पीतपुष्पः १६ हेमाह्वः १७ सुकुमारः १८ वनदीपः १९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । दाहकुष्ठकण्डूव्रणनाशित्वम् । गुणाढ्यो राजचम्पकः । इति राजनिर्घण्टः ॥ कषायत्वम् । मधुरत्वम् । विषकृमिरक्तकफवातास्रपित्तनाशित्वञ्च । इति भावप्रकाशः ॥ पनसफलकोषैकदेशावयवश्च ॥

चम्पककलिका, स्त्री, (चम्पकस्य कलिका कोरकः ।) चम्पककोरकः । तत्पर्य्यायः । गन्धफली २ बहुगन्धा ३ गन्धमोदिनी ४ । इति राजनिर्घण्टः ॥

चम्पकचतुर्द्दशी, स्त्री, (चम्पकसाध्या चतुर्द्दशी । अस्यां चम्पकैः शिवपूजनात् शिवलोकप्राप्तेस्तथात्वम् ।) ज्यैष्ठशुक्लचतुर्द्दशी । यथा, ज्यैष्ठमासमुपक्रम्य मत्स्यसूक्ते ४५ पटले ।
"चतुर्द्दश्याञ्च शुक्लायां चम्पकैः पूजयेत् शिवम् ।
अयुतैर्वा सहस्रैर्वा शतैर्व्वा परमेश्वरि ! ॥
पायसञ्च बलिं दद्यात् ततो नक्तं चरेद्व्रती ।
वृषस्येन विशेषेण न भूयो जायते भुवि ॥
त्रिमध्वक्तैश्चम्पकैश्च सहस्रं जुहुयान्निशि ।
चयपञ्चज्वरान् हन्ति शत्वा शोकाणि यानि च ॥
चम्पकचतुर्द्दशी ख्याता पूजयेद्वा सदाशिवम् ।
दशजन्मकृतं पापमर्च्चनादेव नश्यति ॥"
अन्यच्च ।
"चतुर्द्दश्याञ्च शुक्लायां ज्यैष्ठे मासि महेश्वरम् ।
चम्पकैः पूजयेत् भक्त्या शिवलोकमवाप्नुयात् ॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥
अपि च ।
"ज्यैष्ठशुक्लचतुर्द्दश्यां पुष्पैश्चम्पकसम्भवैः ।
अर्च्चयित्वा महादेवं रुद्रलोके महीयते ॥"
इति सम्वत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

चम्पकरम्भा स्त्री, (चम्पक इति नाम्ना प्रसिद्धा रम्भा । यद्वा, चम्पकपुष्पगन्धवद्गन्धविशिष्टा रम्भा ।) सुवर्णकदली । इति राजनिर्घण्टः ॥

(चाँपा कला । इति भाषा ॥ गुणादिकं चम्पकशब्दे द्रष्टव्यम् ॥)

चम्पकालुः, पुं, (चम्पकवत् चम्पकपुष्पवर्णवत् आलुरभ्यन्तरवीजकोषो यस्य । यद्वा, चम्पकं चम्पकवर्णं आलाति प्रतिगृह्णातीति । आ + ला + मितद्र्वादित्वात् डुः ।) पनसः । इति भूरिप्रयोगः ॥

चम्पकुन्दः, पु (चम्पकवर्णः सन् उनत्तीति । उन्दी क्लेदने + अच् । पृषोदरादित्वात् अकारलोपः ।) मत्स्यभेदः । चाँदकुड़ा । इति भाषा । अस्य गुणाः । गुरुत्वम् । शुक्रकारित्वम् । मधुरत्वम् । वातपित्तनाशित्वञ्च । इति राजवल्लभः ॥

चम्पकोषः, पु, (चम्पश्चम्पक इव कोषो यस्य ।) पनसः । इति त्रिकाण्डशेषः ॥

चम्पा, स्त्री, (चम्पा नदी विद्यतेऽस्यामिति । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । यद्वा, चम्पेन राज्ञो हरिश्चन्द्रस्य प्रपौत्रेण निर्म्मिता या पुरी । यदुक्तं भागवते । ९ । ८ । १ ।
"हरितो रोहितसुतश्चम्पस्तस्माद्विनिर्म्मिता ।
चम्पा पुरी ॥")
कर्णपुरी । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । मालिनी २ लोमपादपूः ३ कर्णपूः ४ । इति हेमचन्द्रः । ४ । ४२ ॥ चम्पावती ५ चम्पापुरी ६ । इति शब्दरत्नावली ॥ (इयन्तु अङ्गदेशान्तर्गता । यदुक्तं हेमचन्द्रेण । ४ । २३ ।
"वङ्गास्तु हरिकेलीया अङ्गाश्चम्पोपलक्षिताः ॥"
तथा च महाभारते । १२ । ५ । ६—७ ।
"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ ।
अङ्गेषु नरशार्दूल ! स राजासीत् सपत्नजित् ॥
पालयामास चम्पाञ्च कर्णः परबलार्दनः ।
दुर्य्योधनस्यानुमते तवापि विदितं तथा ॥"
इयमेव पुरा राज्ञो लोमपादस्य राजधानी आसीत् । इति रामायणम् ॥ अङ्गदेशस्थनदीविशेषः ॥)

चम्पाधिप, पुं, (चम्पाया अधिप ईश्वरः ।) कर्णराजः । इति हेमचन्द्रः ॥

चम्पापुरी, स्त्री, (चम्पा एव पुरी ।) चम्पानगरी । इति शब्दरत्नावली ॥

चम्पालु, पु, (चम्पश्चम्पकस्तद्वत् कोषवर्णं आलाति आ + ला + डु ।) पनसः । इति शब्दरत्नावली ॥

चम्पावती, स्त्री (चम्पा तदाख्यया प्रसिद्धा नदी विद्यतेऽस्यामिति । चम्पा + मतुप् । मस्य वत्वम् ।) चम्पापुरी । इति शब्दरत्नावली ॥

चम्पूः स्त्री, काव्यविशेषः । इति जटाधरः ॥ तल्लक्षणं यथा,—
"गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते ॥"
इति साहित्यदर्पणे । ६ । २९८ ॥

चम्पेशः, पु, (चम्पाया ईशः ।) कर्णराजः । इति त्रिकाण्डशेषः ॥

चम्पोपलक्षित, पु, (चम्पया नगर्य्या नद्या वा उपलक्षितः ।) अङ्गदेशः । इति हेमचन्द्रः । ४ । २३ ॥ तद्देशस्थे पुं भूम्नि ॥

चम्म, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चम्मति । इति दुर्गादासः ॥

चय, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) ङ, चयते । इति दुर्गादासः ॥

चयः, पु (चीयते इति । चि + "एरच् ।" ३ । ३ । ५६ । इति कर्म्मणि अच् ।) वप्रम् । इत्यमरः । २ । २ । ३ ॥ तत्तु प्राकारादिमूलबन्धम् । यदुपरि प्राकारो निरूप्यते सः । पगार इति ख्यात इति केचित् । इति तट्टीकासारसुन्दरी ॥ दुर्गनगरे उद्धृतमृत्तिकास्तूपवद्धं यदुपरि प्राकारो निवेश्यते । तथाचार्थशास्त्रम् । खातसुद्धृतमृदा वप्रं कारयेत् तस्योपरि प्राकारमिति । इति भरतः ॥ समूहः । (यथा माघे । १ । ३ ।
"चयस्त्विषामित्यवधारितं पुरा ॥")
समाहृतिः । इति मेदिनी । ये, २१ ॥ प्राकारः । (यथा, महाभारते । ३ । १६० । ३७ ।
"शैलादभ्युच्छ्रयवता चयाट्टालकशोभिना ॥")
पीठम् । इति हेमचन्द्रः ॥ (दोषाणां सञ्चयप्रकोपप्रशमादिषु प्रकारविशेषः । तद्यथा,—
"ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति ।
वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति ॥
हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति ।
प्रायेण प्रशमं याति स्वयमेव समीरणः ॥
शरत्काले वसन्ते च पित्तं प्रावृड्ऋतौ कफः ।"
"चयकोपशमान् दोषा विहाराहारसेवनैः ।
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्य्ययम् ॥"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ॥
शोथः । यथा,—
"कटुतैलान्वितैर्लेपात् सर्पनिर्म्मोकभस्मभिः ।
चयः शाम्यति गण्डस्य प्रकोपः स्फुटति द्रुतम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे अथशोथाधिकारे ॥)

चर, गमने । अदने । आचारे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चरति । इति दुर्गादासः ॥

चर, क संशीत्यसंशीत्योः । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) संशीतिः संशयः । असंशीतिरसंशयः । क, विचारयति यो धर्म्ममिति हलायुधः । चर असंशये । इति प्राञ्चः । केचित्तु संशये इति पठित्वा संशये हि विचारणा स्यादित्याहुः । इति दुर्गादासः ॥

चर, पु, (चरति स्वपरराष्ट्रस्य शुभाशुभज्ञानाय भ्राम्यतीति । चर + अच् ।) राष्ट्रादेः शुभाशुभादिज्ञानार्थं राज्ञा संगोपनं नियुक्तः पुरुषः । परतत्त्वज्ञानार्थभ्रमणकर्त्ता । तत्पर्य्यायः । यथार्हवर्णः २ प्रणिधिः ३ अपसर्पः ४ चारः ५ स्पशः ६ गूढपुरुषः ७ । इत्यमरः । २ । ८ । १३ ॥ अपसर्पकः ८ मतिष्कः ९ प्रतिष्कशः १० गुप्तगतिः ११ मन्त्रगूढः १२ हितप्रणीः १३ । इति शब्दरत्नावली ॥ उदास्थितः १४ । इति जटाधरः ॥ तत्राद्यो भिक्षुवणिगादिवेषेण नित्यस्थायिनि चरे । चरः स्वदेशपरदेशभ्रमणशीले इत्यन्ये । इति भरतः ॥ ॥ तस्य लक्षणं यथा,—

"विवस्वानिव तेजोभिर्गर्भस्वानिव वेगतः ।
राजा चरैर्ज्जगत् सर्व्वं प्राप्नुयाल्लोकसम्मतैः ॥
तर्केङ्गितज्ञः स्मृतिमान् स्वीयभावाप्रकाशकः ।
क्लेशायाससहो दक्षः सर्व्वत्र भयवर्ज्जितः ॥
सुभक्तो राजसु तथा कार्य्यास्था प्रतिपत्तिमान् ।
नृपो निष्कन्याचारेण परराष्ट्रं विचक्षणैः ॥
कालज्ञो मन्त्रकुशलान् संवत्सरचिकित्सकान् ।
तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः ॥
अक्रुद्धांश्च तथालुब्धान् दृष्टार्थान् तत्त्वभाषिणः ।
पाषण्डिनस्तापसादीन् परराष्ट्रे नियोजयेत् ॥
स्वदेशपरदेशज्ञान् सुशीलान् सुविचक्षणान् ।
वार्त्ताहर्य्यान् बहूंश्चैव चराणां विनियोजयेत् ॥
नैकस्य वचने राजा चारस्य प्रत्ययं वहेत् ।
द्वयोः सम्बन्धमाज्ञाय तद्युक्तं कार्य्यमारभेत् ॥
तस्माद्राजा प्रयुञ्जीत चरान् बहुसुखान् बहून् ।
नीरेतोवामनाः कुब्जास्तद्विधा ये च कारवः ॥
भिक्षुक्यश्चारणा दास्यो मालाकार्य्यः कलाविदः ।
अन्तःपुरगतां वार्त्तां निर्हरेयुरलक्षिताम् ॥
प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधो मतः ।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूतसंज्ञकः ॥"
इति भोजराजकृतयुक्तिकल्पतरुः ॥ ॥
अयद्यूतभेदः । भौमः । चलः । इति मेदिनी । रे, ३० ॥ खञ्जनपक्षी । इति शब्दमाला ॥ कपर्द्दकः । इति राजनिर्घण्टः ॥ मेषकर्कटतुलामकरलग्नानि । इति ज्योतिषम् ॥ अस्थिरविभूतिमित्रं चलमटनं स्खलितानियममपि चरन्ते । इति दीपिका । (यथा, तिथितत्त्वे ।
"चरलग्ने चरांशे वा स्थापनञ्च विसर्ज्जनम् ॥"
जङ्गमे, त्रि । यथा मनुः । ७ । १५ ।
"तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ॥"
तथाच चरके सूत्रस्थाने २७ अध्याये ।
"चरः शरीरावयवाः स्वभावो धातवः क्रिया ।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते ॥
चरोऽनूपजलाकाशधन्वाद्यो भक्ष्यविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः ॥")
चरकः, पुं, (चर एव । स्वार्थे कन् ।) चारः । इत्युणादिकोषः ॥ पर्पटः । इति राजनिर्घण्टः ॥ (चरति गच्छति वेत्ति वेदवेद्यकादीनि सर्व्वशास्त्राणीति । चर + अच् ततः कन् च । यद्वा चर इव महीवृत्तं द्रष्टुमागतः । चर + इवार्थे कन् ।) मुनिविशेषः । तत्कृततन्नामकग्रन्थः । तयोरुत्पत्तिर्यथा,—
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्नवान् ॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान् ।
एकदा स महीवृत्तं द्रष्टुं चर इवागतः ॥
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीड़ितान् ।
स्थलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥
संचिन्त्य स स्वयं तत्र मुनेः पुत्त्रो बभूव ह ।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले ।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि ॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ॥
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् ।
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ॥
चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः ॥"
इति भावप्रकाशः ॥
चरटः, पुं, (चरति नृत्यतीव विचरतीति । चर + बाहुलकात् अटच् ।) खञ्जनपक्षी । इति शब्दमाला ॥
चरणं, क्ली, (चर + भावे ल्युट् ।) गमनम् । (यथा, ऋग्वेदे । ९ । ११३ । ९ ।
"यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ॥")
भक्षणम् । (यथा, मनुः । २ । १८७ ।
"अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत् ॥")
आचारः । इति हेमचन्द्रः । ३ । ५०७ ॥ (यथा, ऋग्वेदे । १० । १३६ । ६ ।
"अप्सरसां गन्धर्व्वाणां मृगाणां चरणे चरन् ॥")
चरणः, पुं क्ली, बह्वृचादिः । (यथा, पञ्चतन्त्रे ।४।३।
"न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च ।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥"
अपि च महाभाष्यवचनम् । यथा,—
"सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥"
"चरणशब्दो वेदैकदेशवाची कठादिरूपः ।" इति मुग्धबोधटीकायां दुर्गादासः ॥) मूलम् । गोत्रम् । इति मेदिनी । णे, ४७ ॥ (चरतीति । चर + ल्युः । चरत्यनेनेति करणे ल्युट् वा ।) अधमाङ्गम् । तत्पर्य्यायः । पादः २ पत् ३ अङ्घ्रिः ४ । इत्यमरः । २ । ६ । ७१ ॥ विक्रमः ५ पदः ६ आक्रमः ७ । इति राजनिर्घण्टः ॥ क्रमणः ८ चलनः ९ क्रमः १० । इति हेमचन्द्रः । ३ । २८० ॥ पदम् ११ पात् १२ । इति जटाधरः ॥ (यथा, मनुः । ८ । २७७ ।
"अङ्गुलीर्ग्रन्थिभेदस्य च्छेदयेत् प्रथमे ग्रहे ।
द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥"
श्लोकचतुर्थभागः । यथा, वृत्तरत्नाकरे१ अध्याये ।
"श्रेष्ठं गाथाख्तिभिः षड्भिश्चरणैश्चोपलक्षिता ॥")
चरणग्रन्थिः, पुं, (चरणस्य ग्रन्थिः ।) गुल्फः । इति हेमचन्द्रः । ३ । २९५ ॥
चरणव्यूहं, क्ली, (चरणानां वेदशाखानां व्यूहोऽत्र ।) वेदव्यासविरचितचतुर्व्वेदविवरणशास्त्रम् । तत्तु वेदशब्दे द्रष्टव्यम् ॥
चरणायुधः, पुं, (चरण एवायुधं अस्त्रविशेषो यस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (पर्य्यायोऽस्य यथा,—
"कुक्कुटः कृकवाकुः स्यात् कलयश्चरणायुधः ।
ताम्रचूड़स्तथा दक्षो यामनादी शिखण्डिकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य मांसगुणादिकं कुक्कुटशब्दे द्रष्टव्यम् ॥
चरणास्त्रे, त्रि । यथा, रामायणे ।३।५१।३५।
"तुण्डपक्षप्रहारेण जटायुश्चरणायुधः ॥")
चरमः, त्रि, (चरतीति । "चरेश्च ।" उणां ५ । ६८ । इति अमच् ।) अन्तः । पश्चिमः । इत्युणादिकोषः ॥ (यथा, मनुः । २ । १९४ ।
"उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥")
चरमक्ष्माभृत्, पुं, (क्ष्मां बिभर्त्तीति । भृ + क्विप् । ततः चरमश्चासौ क्ष्माभृच्चेति कर्म्मधारयः ।) अस्ताचलः । इत्यमरः । २ । ३ । २ ॥
चरमाचलः, पुं, (न चलतीति पचाद्यच् अचलः पर्व्वतः । ततः चरमश्चासौ अचलश्चेति कर्म्मधारयः ।) अस्तपर्व्वतः । इति त्रिकाण्डशेषः ॥
चरमाद्रिः, पुं, (चरमश्चासावद्रिश्चेति ।) अस्ताचलः । इति हेमचन्द्रः ॥
चराचरं, क्ली, (चराचरयोः समाहारः ।) जगत् । इति मेदिनी । रे,२६० ॥ (तथा च मनुः ।१।५७।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम् ।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥")
आकाशः । इति धरणी ॥ जङ्गमाजङ्गमम् । यथा, देवीमाहात्म्ये ।
"तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥"
चराचरः, त्रि, (चरश्चलं आचरो व्यवहारचेष्टादिकं तौ विद्येते ऽस्मिन् ।) जङ्गमः । इत्यमरः । ३ । १ । ७४ ॥ इङ्गः । इति विश्वः ॥ इष्टः । इति हेमचन्द्रः ॥ कपर्द्दके पुं । इति राजनिर्घण्टः ॥ (चरतीति चरो जङ्गमः अचरः स्थावरः । चरेण सह अचरः । स्थावरजङ्गमः । यथा, भागवते । ३ । ६ । ६ ।
"चुक्षोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः ॥")
चरिः, पुं,(चर + "सर्व्वधातुभ्य इन् ।" उणां ४।११७। इति इन् ।) पशुः । इत्युणादिकोषः ॥
चरितं, क्ली, (चर + भावे क्तः ।) चरित्रम् । इति शब्दरत्नावली ॥ (यथा, भागवते ।१०।१।१।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः ।
राज्ञाञ्चोभयवंश्यानां चरितं परमाद्भुतम् ॥")
तद्द्विविधं यथा, उज्ज्वलनीलमणौ ।
"अनुभावाश्च लीला चेत्युच्यते चरितं द्विधा ।
अनुभावा अलङ्काराख्याः उद्भास्वराख्याः वाचिकाख्याश्च । लीला सच्चारुविक्रीड़ा रासकन्दुकखेलाद्या चारुक्रीड़ा प्रकीर्त्तिता । ताण्डवं वेणुवादश्च गोदोहः पर्व्वतोद्धारो गोहूतिर्गमनादिका ॥" (यथा, गीतगोविन्दे । १ । २ ।
"वाग्देवताचरितचित्रितचित्तसद्मा ॥"
वाच्यलिङ्गे तु । चर + कर्म्मणि क्तः । कृतम् । आचरितम् । यथा, रामायणे । १ । ३ । १ ।
"श्रुत्वा पूर्व्वं काव्यबीजं देवर्षेर्नारदात्ततः ।
लोकादन्विष्य भूयश्च चरितं चरितव्रतः ॥")
चरितार्थः, त्रि, (चरितः कृतः अर्थः प्रयोजनं येन सः ।) प्राप्तप्रयोजनः । यथा, कुमारसम्भवे । २ । ७ ।
"पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥"

चरित्रं, क्ली, (चर + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) स्वभावः । तत्पर्य्यायः । चरितम् २ चारित्रम् ३ चरित्रम् ४ । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ४ । ८३ ।
"अपित्वयं शीलगुप्तानां चरित्रं कुलयोषिताम् ॥")

चरित्रा, स्त्री, (चरित्र + टाप् ।) तिन्तिडी-वृक्षः । इति शब्दरत्नावली ॥

चरिष्णुः, त्रि, (चरतीति । चर + "अलङ्कृञ्निति ।" ३ । २ । १३६ । इति इष्णुच् ।) जङ्गमः । इत्यमरः ।३।१।७४ ॥ (यथा, भागवते । ७।९।४० ।
"एष विकारी गुण इन्द्रियाणि
विराट् स्वराट् स्थास्नु चरिष्णु भूमन् ॥")

चरीत्रं, क्ली, (चरित्र + पृषोदरादित्वाद्दीर्घत्वम् ।) चरित्रम् । इति शब्दरत्नावली ॥

चरुः, पुं, (चरन्ति भक्षयन्ति देवा इमं चर्य्यते भक्ष्यते वाम्राशिभिर्देवैरिति वा चरति होमादिकममादिति के । चर + "भृमृशीति ।" उणां १ । ७ । इति उः ।) हव्यान्नम् । तत्पाकभाण्डम् । इति मेदिनी । रे, ३२ ॥
"ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् ॥"
इति शारदातिलकम् ॥
तस्यानुष्ठानं यथा । अग्नेः पश्चिमायान्दिशि प्रागग्रान् कुशानास्तीर्य्य तदुपरि प्रक्षालित वायव्यमुदूखल मुषल वैणवञ्च सूर्पं वारण-चमसस्थजलप्रोक्षित संस्थाप्य व्रीहीन् यवान् वा सूर्पे निधाय चमसस्थजलेन ओँ वास्तोष्पतये त्वा जुष्टं प्रोक्षामि ओम् इन्द्राय त्वा जुष्टं प्रोक्षामि ओँ भूस्त्वा जुष्टं प्रोक्षामि ओँ भुवस्त्वा जुष्टं प्रोक्षामि ओँ स्वस्त्वा जुष्टं प्रोक्षामि ओँ प्रजापतये त्वा जुष्टं प्रोक्षामि द्विस्तूष्णीं इत्यष्टौ वारान् प्रोक्षयेत् । ततः कांस्यपात्रेण चरुस्थाल्या वा ओँ वास्तोष्पतये त्वा जुष्टं निर्व्वपामि ओम् इन्द्राय त्वा जुष्टं निर्व्वपामि ओँ भूस्त्वा जुष्टं निर्व्वपामि ओँ भुवस्त्वा जुष्टं निर्व्वपामि ओँ स्वस्त्वा जुष्टं निर्व्वपामि ओँ प्रजापतये त्वा जुष्टं निर्व्वपामि इति प्रत्येकं गृहीत्वा उदूखले स्थापयेत् द्विस्तूष्णीम् । ततो दक्षिणहस्तमुपरि कृत्वा मुषलेनावहत्य सूर्पेण प्रस्फोटयेत् । इत्थमेव वारत्रयं कृत्वा त्रिः प्रक्षालयेत् । ततश्चरुस्थालीममन्त्रकं कृतोत्तराग्रं पवित्रं निक्षिप्य प्रक्षालिततण्डुलं निधाय दुग्धं निक्षिप्य स्तोकं स्तोकमुदकं दत्त्वा तन्मध्ये खदिरपलाशोडुम्बराणामन्यतमस्य प्रादेशप्रमाणं दर्व्वीं उभयतोऽङ्गुष्ठपर्व्वप्रमाणां चतुष्कोणपुष्कलां मेक्षणं दक्षिणावर्त्तेन भ्रामयित्वा तथा पचेत् यथान्तरूष्मणा सम्यक् पाको भवति गालनं न भवति दाहश्च न भवति ततः सम्यक्पाके भूते मध्ये घृतस्रुवं दत्त्वा प्रागादिदिक्चिह्नितं चरुमवतार्य्य अग्नेरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये घृतस्रुवं दद्यात् । इति भवदेवभट्टः ॥

चरुव्रणः, पुं, (चरोर्व्रण इव ।) पिष्टापूपः । इति त्रिकाण्डशेषः ॥ पिठाइ पिठा इति भाषा ॥

चर्च, क इङ्गने । इति कविकल्पद्रुमः ॥ (चुरां-पर-सकं-सेट् ।) इङ्गनं अध्ययनम् । क, चर्चयति वेदं विप्रः । इति दुर्गादासः ॥

चर्च, श उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां परं-सकं-सेट् ।) रेफोपधः । श, चर्चती चर्चन्ती । गुणमात्ररहितानां तुदादिपाठफलन्तु शत्रन्तानामाद्योरिति नुमो विभाषा वेदितव्येत्यलम् । इति दुर्गादासः ॥

चर्चरी, स्त्री (चर्च + बाहुलकात् अरन् ततो गौरादित्वात् ङीष् ।) गीतभेदः । चर्चरी गीतभेदे च केशरचनाकरशब्दयोरिति रुद्रः ॥ चर्च-रीति रूपे हर्षक्रीडा? कापटिकानां गादवादित्र-तालिकचेष्टाशब्दे । चर्च्चरकफौटिलेके । इत्यमरटीकायां भरतः ॥ हर्षक्रीडावाक । तत्पर्य्यायः । चर्भटी २ । इति हेमचन्द्रः ॥ (यथा, रत्नावल्याम् । १ अङ्के । "अये । मधुरमभिपठ्यमानमृदङ्गानुगतसङ्गीतमधुरः पुरः पौरजनसञ्चरति चर्चरीध्वनिः ॥" एतदुदाहरणं यथा, विक्रमोर्व्वश्याम् । ४ अङ्के । अनन्तरे चर्चरीत्युक्ता,—
"गन्धोन्मादितमधुकरगीतै-
र्वाद्यमाने परभृततूर्य्ये ।
प्रसरितपवनोद्वेलितपल्लवनिकरः
सुललितविविधप्रकारैर्नृत्यति कल्पतरुः ॥"
वर्णवृत्तविशेषः । यथा, शब्दार्थचिन्तामणौ ।
"हारयुक्तसुवर्णकङ्कणपाणिशक्रविराजिता
पादनूपुरसङ्गता सुपयोधरद्वयभूषिता ।
शोभिता मलयेन पिङ्गलपन्नगाधिपवर्णिता
चर्चरी तरुणीव चेतसि चाकसीति सुसङ्गता ॥")

चर्चरीकः, पुं, (चर्च + "फर्फरीकादयश्च ।" उणां ४ । २० । इति ईकनप्रत्ययान्तेन निपातनात् साधुः ।) महाकालः । केशविन्यासः । शाकः । इति मेदिनी । के, १८७ ॥

चर्चा, स्त्री (चर्च्च्यते विचार्य्यते वेदवेदान्तादितत्त्वशास्त्रैरसौ इति । चर्च + णिच् + अङ् ।) दुर्गा । चिन्ता । चार्च्चिक्यम् । इति मेदिनी । चे ४ ॥ विचारणा । इत्यमरः । १ ।५।२ ॥ (चर्च + भावे अङ् । लेपनम् । यथा, छन्दोमञ्जर्य्याम् । १५ । ४ ।
"मृगमदकृतचर्च्चा पीतकौशेयवासाः ॥"
गायत्रीरूपा महाशक्तिः । यथा, देवीभागवते । १२ । ६ । ४६ ।
"ज्ञानधातुमयी चर्च्चा चर्च्चिता चारुहासिनी ॥")

चर्च्चिका, स्त्री, (चर्च्चा + स्वार्थे कन् । कापि अत इत्वम् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ चर्च्चा । इति द्विरूपकोषः ॥ (रोगविशेषः । तदपनोदन तुषारपानीयं यथा,—
"तौषारं लघुशीतलं श्रमहरं पित्तार्त्तिशान्तिप्रदं
दोषाणां शमनं जलार्त्तिदहन सर्व्वामयघ्नं परम् ।
कण्डूशीपदचर्च्चिका विषहरं पामाविसर्पापहं
योगानां चरणोपयोगि हितकरं मर्त्यस्य मान्यैः ॥"
इति चारीये प्रथमे स्थाने सप्तमेऽध्याये ॥
(चर्च्चा वेदादिविचारणा अस्ति इति । ठन् । वेदाद्यध्येतारि, त्रि ॥)

चर्च्चितं, त्रि (चर्च + कर्म्मणि क्तः । चर्च्चा लेपनं सञ्जातास्य इति इतच् वा ।) चन्दनादिना अनुलेपनम् । तत्पर्य्यायः । दिग्धम् २ लिप्तम् ३ । इति जटाधरः ॥ (यथा, गीतगोविन्दे । १।४० ।
"चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली ॥")

चर्च्यं, त्रि, (चर्च्यते इति । चर्च हिंसायाम् + "ऋदुपधाच्चाक्लृपिचृतेः ।" ३ । १ । ११० । इति ण्यत् ।) चर्च्चनीयम् । इति पाणिनिव्याकरणम् ॥

चर्पटः, पुं, (चृप् + अटन् ।) स्फारः । विपुलः । चपेटः । पर्पटः । इति मेदिनी । टे, ३१ ॥

चर्पटी, स्त्री, (चर्पट + ङीष् ।) भाद्रशुक्लषष्ठी । चापडाषष्ठी इति भाषा ॥ अस्या विवरणं चपेटीशब्दे द्रष्टव्यम् ॥

चर्पटी, स्त्री, (चर्पट + ङीष् ।) पोली । इति त्रिकाण्डशेषः ॥

चर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चर्ब्बति । इति दुर्गादासः ॥

चर्भटः, पुं, (चर + क्विप् । भटति भरति स्वशरीरदानेनेति । भट् + अच् । ततः कर्म्मधारयः ।) इर्व्वारुः । इति हलायुधः ॥

चर्भटी, स्त्री, (चर्भट + ङीष् ।) चर्चरी । हर्षक्रीडावाक । इति हेमचन्द्रः ॥

चर्म्म, स्त्री, (चर्म्म साधनतयास्त्यस्य अच् ।) फलकः । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ७ । १९२ ।
"स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले ॥")

चर्म्म, [न्] क्ली, (चर + "सर्व्वधातुभ्यो मनिन् ।" उणां । ४।१४५। इति मनिन् ।) इन्द्रियविशेषः । चाम इति भाषा ॥ तत्पर्य्यायः । त्वक् २ असृग्धरा ३ कृत्तिः ४ अजिनम् ५ देहचर्म्म ६ रक्ताधारः ७ रोमभूमिः ८ शरीरावरणम् ९ । इति राजनिर्घण्टः ॥ असृग्वरा १० । इति भरतधृतसर्व्वधरः ॥ (यथा, भागवते ।३।६।१६।
"निर्भिन्नान्यस्य चर्म्माणि लोकपालोऽनिलोऽविशत् ॥")
शरीरावरकं शस्त्रम् । ढाल इति भाषा ॥ तत्पर्य्यायः । फलकः २ फलम् ३ । इत्यमरः । २ । ८ । ९० ॥ फरम् ४ चर्म्मम् ५ । इति भरतः ॥ ॥
तस्य लक्षणं यथा, युक्तिकल्पतरौ ।
"शरीरावरकं शस्त्रं चर्म्म इत्यभिधीयते ।
तत् पुनर्द्विविधं काष्ठचर्म्मसम्भवभेदतः ॥
शरीरावरकत्वञ्च लघुता दृढता तथा ।
दुर्भेद्यतेति कथिता चर्म्मणां गुणसंग्रहः ॥
स्वल्पता गुरुता चैव मृदुता सुखभेद्यता ।
विरुद्धवर्णता चेति चर्म्मणां दोषसंग्रहः ॥

सितो रक्तस्तथा पीतः कृष्ण इत्यभिशब्दितः ।
ब्राह्मणादिजातिभेदेन चर्म्मणो वर्णनिर्णयः ॥
चित्रवर्णस्तु सर्व्वेषां सर्व्वदैवोपपद्यते ॥”॥
ब्रह्मचारिधार्य्यकृष्णसारचर्म्म । इत्यमरः । २।७। ४७ ॥ (यथा, मनुः । २ । ४१ ।
“कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः ॥”)

चर्म्मकषा, स्त्री, (चर्म्मणः कषा । चर्म्म कषतीति । कष + अच् इत्येके ।) पश्चिमदेशजातं गन्धद्रव्यम् । केचित्तु चामारकषा इति ख्याता इत्याहुः । इति भरतः ॥ तत्पर्य्यायः । सप्तला २ विमला ३ सातला ४ भूरिफेना ५ । इत्यमरः । २ । ४ । १४३ ॥ शातला ६ चर्म्मकसा ७ । इति भरतः ॥ मांसरोहिणी । इति राजनिर्घण्टः ॥
(“चर्म्मकषायाः कल्कं विल्वसमं मूर्द्ध्नि काकपदमस्य ।
कृत्वा कुर्य्यात् कटभीं कटुकोटफलाग्रघमनघ ॥”
इति चरके चिकित्सास्थाने पञ्चविंशेऽध्याये ॥)

चर्म्मकसा, स्त्री, (चर्म्मणः कसा ।) चर्म्मकषा । इत्यमरटीकायां भरतः ॥

चर्म्मकारः, पुं, (चर्म्म चर्म्मनिर्म्मितद्रव्यादिकं करोतीति । कृ + “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) वर्णसङ्करजातिविशेषः । चामार इति मुचि इति च भाषा ॥ स तु चण्डाल्यां तीवराज्जातः । इति पराशरपद्धतिः ॥ तत्पर्य्यायः । पादूकृत् २ । इत्यमरः । २।१०।७ पादुकृत् ३ चर्म्मारः ४ । इति तट्टीका ॥ चर्म्मकृत् ५ पादुकाकारः ६ । इति हलायुधः ॥ चर्म्मरुः ७ क्रुरटः ८ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । १० । ३६ ।
“कारावरो निषादात्तु चर्म्मकारः प्रसूयते ॥”)

चर्म्मकारी, स्त्री, (चर्म्म करोति वर्द्धयति उत्कर्षं करोतीति यावत् । कृ + अण् । चर्म्म किरतीति चर्म्म + कृ + अणित्येके । ततो ङीष् ।) चर्म्मकषौषधिः । इति मेदिनी । रे, २६१ ॥

चर्म्मकील, पुं, (चर्म्म कीलतीति । कील + अच् । चर्म्मणि गुह्यस्थचर्म्मणि कील इवेति वा ।) गुह्यरोगविशेषः । ढालीश इति चारिस् इति च भाषा ॥ तस्य निदानं यथा,—
“व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो वहिः ।
कीलोपमं स्थिरखरं चर्म्मकीलन्तु तद्विदुः ॥
वातेन तोदपारुष्यं पित्तादसितरक्तता ।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥”
इति माधवकरेण रोगविनिश्चयग्रन्थे अर्शोरोगाधिकारे धृतम् । अतोऽस्य चिकित्सा अर्शोरोगचिकित्सावत् । अपि च ।
“चर्म्मकीलं जतुमणिं मसकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥”
इति भावप्रकाशः ॥

चर्म्मकृत्, पुं, (चर्म्म करोति चर्म्मघटितपादुकादिकम् उत्पादयतीत्यर्थः । चर्म्म + कृ + क्विप् ।) चर्म्मकारः । इति हलायुधः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ५५ ।
“चर्म्मकृत् कोऽपि न प्रादात् कुटीं चेन्नोप- [योगिनीम् ॥”)

चर्म्मचटका, स्त्री, (चर्म्मणा चटकेव ।) निशाचरपक्षिविशेषः । चामचिका इति भाषा ॥ तत्पर्य्यायः । जतुका २ अजिनपत्रिका ३ । इति हेमचन्द्रः ॥ जतूका ४ गृहमाचिका ५ जतुनी ६ अजिनपत्रा ७ चार्म्मिः ८ चर्म्मचटी ९ । इति शब्दरत्नावली ॥ चर्म्मपत्रा १० । इति जटाधरः ॥ चर्म्मचटिका ११ । इति केचित् ॥

चर्म्मचटी, स्त्री, (चर्म्मणा चटीव । यद्वा, चर्म्म चटति भिनत्तीति । चट + अच् ङीष् ।) चर्म्मचटका । इति शब्दरत्नावली ॥

चर्म्मचित्रकं, क्ली, (चर्म्मणि चित्रकं चित्रितमिवेत्यर्थः । चर्म्म चित्रयतीति वा । चित्र + ण्वुल् ।) श्वेतकुष्ठम् । इति राजनिर्घण्टः ॥

चर्म्मजं, क्ली, (चर्म्मणो चर्म्मणि वा जायते । जन + डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

चर्म्मण्वती, स्त्री, (चर्म्मैव उत्पत्तिहेतुत्वेनास्त्यस्याः इति मतुप् मस्य वत्वम् ।) नदीविशेषः । सा तु बुन्देलखण्डाख्यदेशे चम्बल इति ख्याता ॥ कदली । इति मेदिनी । ते, १६६ ॥ (आसीत् किल पुरा रन्तिदेवनामा (शशविन्दुनामा वा) कश्चित् राजचक्रवर्त्ती । तस्य यज्ञे मारिता ये गावस्तेषां चर्म्मगलितरसक्लेदादिभ्यो जातेयं नदीति पौराणिकी गाथा । यथा, देवीभागवते । १ । १८ । ५४ ।
“चर्म्मणां पर्व्वतो जातो विन्ध्याचलसमः पुनः ।
मेघाम्बुप्लावनाज्जाता नदी चर्म्मण्वती शुभा ॥”)

चर्म्मदण्डः, पुं, (चर्म्मभिश्चर्म्मणा वा निर्म्मितो दण्डः ।) कशा । इति हेमचन्द्रः ॥ चावुक् इति भाषा ॥
(“चर्म्मदण्डाहतो विप्रः शशापातिरथा च तम् ॥”
इति महाभारतशान्तिपर्व्वणि ॥)

चर्म्मदूषिका, स्त्री, (चर्म्म दूषयति दोषयति वा । दुष + णिच् + ण्वुल् । ततष्टापि अत इत्वम् ।) कोठरोगः । इति राजनिर्घण्टः ॥

चर्म्मतरङ्गः, पुं, (चर्म्मणां चर्म्मभिर्वा तरङ्ग इव ।) वलिः । त्वक्सङ्कोचः । इति राजनिर्घण्टः ॥

चर्म्मद्रुमः, पुं, (चर्म्माकृतिवल्कलमयो द्रुमः ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥

चर्म्मपत्रा, स्त्री, (चर्म्ममयं पत्रं पक्षद्वयं यस्याः ।) चर्म्मचटी । इति जटाधरः ॥

चर्म्मपादुका, स्त्री, (चर्म्मनिर्म्मिता चर्म्ममयी वा पादुका ।) उपानत् । चामडार जुता इति भाषा ॥ यथा । “ततो ब्रह्मचारी अनेन मन्त्रेण चर्म्मपादुकायुगले पादौ निदध्यात् ।” इति भवदेवभट्टः ॥ अस्या गुणाः पादुकाशब्दे द्रष्टव्याः ॥

चर्म्मपुट, चर्म्मपुटकः, पुं, (चर्म्मनिर्म्मितः पुटः पात्रम् । पक्षे स्वार्थे कन् । चर्म्ममयं पुटमत्र इति कप् इत्येके ।) चर्म्मनिर्म्मितपात्रविशेषः । कुपा इति भाषा ॥ यथा । दृतिश्चर्म्मपुटकः । दृतिश्चर्म्मपुटे मत्स्ये चेति मेदिनी ॥ इति पुलिङ्गसंग्रहटीकायां भरतः ॥ तत्पर्य्यायः । दृतिः । खल्लश्चर्म्ममयीति हेमचन्द्रः ॥

चर्म्मप्रभेदिका, स्त्री, (चर्म्म प्रभिनत्तीति । प्र + भिद + ण्वुल् । टापि अत इत्वञ्च ।) चर्म्मप्रभेदनास्त्रम् । इत्यमरः । २ । १० । ३५ ॥ मोड इति भाषा ॥

चर्म्मप्रसेवकः, पुं, (चर्म्मणा प्रसीव्यते इति । सिवु तन्तुसन्ताने + “संज्ञायाम् ।” ३ । ३ । १०९ । इति कर्म्मणि ण्वुल् बाहुलकात् वुन् वा ।) चर्म्मप्रसेविका । इत्यमरटीकायां भरतः ॥

चर्म्मप्रसेविका, स्त्री, (चर्म्मप्रसेवक + टाप् अत इत्वञ्च ।) अग्निसन्दीपनार्थं चर्म्म निर्म्मितयन्त्रम् । भाती इति जाँता इति च भाषा ॥ तत्पर्य्यायः । भस्त्रा २ । इत्यमरः । २।१०।३३॥

चर्म्ममुण्डा, स्त्री, (चर्म्मणः जीवरहितदेहस्येत्यर्थः मुण्डमस्तिष्कस्त्रस्या इति । छिन्नशिरोधारणादेव तथात्वम् ।) दुर्गा । इति हेमचन्द्रः । २ । १२० ॥ (चण्डमुण्डा । इत्यपि क्वचित् पाठः ॥)

चर्म्मरङ्गा, स्त्री, (चर्म्मणो रङ्गो यस्याः ।) आवर्त्तकीलता । इति राजनिर्घण्टः ॥ (देशविशेषे, पुं । स च देशः कूर्म्मविभागे पश्चिमोत्तरस्यां दिशि उक्तः । यथा, बृहत्संहितायाम् । १४ । २३ ।
“दिशि पश्चिमोत्तरस्याम् ।” इत्युपक्रम्य,—
“वेणुमती फल्गुलुका
गुरुहा मरुकुचचर्म्मरङ्गाख्याः ॥”
इत्युक्तवान् ॥)

चर्म्मरुः, पुं, (चर्म्म रचयतीति । रच + बाहुलकात् डुः ।) चर्म्मकारः । इति त्रिकाण्डशेषः ॥

चर्म्मसम्भवा, स्त्री, (चर्म्मणि सम्भव उत्पत्तिर्यस्याः ।) एला । इति हारावली । ६७ ॥

चर्म्मसारः, पुं, (चर्म्मणः सारः । भुक्तद्रव्येभ्यो रसस्य त्वङ्मध्ये जायमानत्वात् तथात्वम् ।) रसः । इति राजनिर्घण्टः ॥

चर्म्माम्भः, पुं, (चर्म्मणोऽम्भः जलम् । सर्व्वे सान्ता अदन्ताश्च ।” इति न्यायादत्र अकारान्तः । क्वचित् क्लीवे सान्तोऽपि दृश्यते ।) रसः । इति राजनिर्घण्टः ॥

चर्म्मारः, पुं, (चर्म्म चर्म्मक्रियां ऋच्छतीति । ऋ गतौ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) चर्म्मकारः । इति जटाधरः ॥

चर्म्मी [न्] पुं, (चर्म्म शरीरावरकं शस्त्रविशेषोऽस्त्यस्य । चर्म्म + इनिः ।) चर्म्मधारियोद्धा । ढाली इति भाषा ॥ तत्पर्य्यायः । फलकपाणिः २ । (यथा, महाभारते । ३।२७।३१ ।
“श्यामं बृहन्तं तरुणं चर्म्मिणामुत्तमं रणे ।
नकुलं ते वने दृष्ट्वा कस्मात् मन्युर्न वर्द्धते ॥”
चर्म्म त्वक् अस्त्यस्येति ।) भूर्ज्जवृक्षः । इत्यमरः । २ । ४ । ४६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ११ अ । “चर्म्मिवृक्षगिरिकर्णिकाशीतशिवनिचुलदाडिमाजकर्णहरिद्रचराजादनगोपघोण्टाविकङ्कतेषु वा यवान्नविकारांश्च सेवेत ॥”) भ्रङ्गरिटिः । मोचा । इति शब्दरत्नावली ॥

चर्य्या, स्त्री, (चर+“गदमदचरयमश्चानुपसर्गे ।” ३ । १ । १०० । इति यत् । स्त्रियां टाप् ।) ईर्य्यापथस्थितिः । इत्यमरः । २ । ७ । ३६ ॥ नियमापरित्यागः । ईर्य्यते गुरोः शास्त्रोपासनया ज्ञायते ईर्य्या सा च ध्यानधारणादिः तस्याः पन्था उपायः तत्र व्रतिनां या स्थितिरवस्थानमपरित्यागः सा । इति भरतः ॥ (यथा, महाभारते । १ । २ । ३२६ ।
“चर्य्यायां हयसुतद्वत् पाण्डवस्यानुगच्छतः॥”)
गमनम् । भदनम् । आचरणम् । इति मुग्धबोधटीकायां दुर्गादासः ॥ (यथा, मनुः । ६।३२ ।
“आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनुम् ॥”
सेवा । यथा, रामायणे । २ । २६ । १५ ।
“वनवासस्य शूरस्य मम चर्य्या हि रोचते ॥”
त्रि, अनुष्ठेयः । आचरणीयः । यथा, मनुः ।३।१।
“षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्॥”)
चर्व्व, कि भक्षे । इति कविकल्पद्रुमः ॥ (चुरा-पक्षे भ्वा-पर-सक-सेट् ।) कि, चर्व्वयति चर्व्वति तण्डुलं बालकः । इति दुर्गादासः ॥
चर्व्वणं, क्ली, (चर्व्व+भावे ल्युट् ।) दन्तैश्चूर्णनम् । इति हेमचन्द्रः । ३ । ८८ ॥ चिवान इति भाषा ॥ (यथा, हारीते प्रथमे स्थाने प्रथमेऽध्याये ।
“चर्व्वणं गिलनञ्चापि कासितं श्वासितं तथा ॥”)
चर्व्वा [न्] पु, तलप्रहारः । इति हारावली । १६७ ॥
चर्व्वितं, त्रि, (चर्व्व्यते स्म इति । चर्व्व+कर्म्मणि क्तः ।) कृतचर्व्वणम् । भक्षितम् । इत्यमरः । ३।२।११० ॥ (यथा, भागवते । ७ । ५ । ३० ।
“अदान्तगोभिर्विशतां तमिस्रं
पुनः पुनश्चर्व्वितचर्व्वणानाम् ॥”)
चर्व्वितपात्रकं, क्ली (चर्व्वितानां ताम्बूलादीनां त्यागपात्रम् । ततः स्वार्थे कन् ।) चर्व्विततांबूलादित्यागपात्रम् । पीकदान इति भाषा ॥ यथा रासक्रीडायां पातालखण्डे ।
“ताम्बूलं दर्पणं पानपात्रं चर्व्वितपात्रकम् ॥”
चर्व्व्यं त्रि, (चर्व्व्यते दन्तैश्चूर्ण्यते इति । चर्व्व+कर्म्मणि यत् ।) चर्व्वणीयम् । यथा,—
“षट्कोटि ब्राह्मणांश्च भोजयामास नित्यशः । चूष्यलेह्यपेयचर्व्व्यैरतिरम्यैः दिने दिने ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
चर्षणिः, पु, (कर्षतीति । कृष+“कृषेरादेश्च च ।” उणा । २ । १०३ । इति अनिः आदेश्च च ।) जनः । यथा, श्रीभागवते ।
“स चर्षणीनामुदगाच्छुचो मृजन्
प्रियः प्रियाया इव दीर्घदर्शनः ॥”
मनुष्यजातिः । यथा,—
“अर्य्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः । यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥”
इति श्रीभागवते । ६ । ६ । ४२ ॥ “चर्षणयः कृताकृतज्ञानवन्तः । पश्यन्तिकर्म्मत्वेन निपातनादायुक्तेः । यत्र येषु व्यात्मानुसन्धानविशेषेण मानुषी जातिर्ब्रह्मणोपकल्पिता । तथा च श्रुतिः । पुरुषत्वे चाविस्तरामात्मेति ।” इति तट्टीकायां श्रीधरस्वामी ॥ (अत्र उणादिष्टसिद्धतोऽव्ज्वलदत्तेन तु “कृषेरादेश्च चः ।” इति पठित्वा चर्षणिर्वैन्यकीति व्याख्यातम् ॥)
चल, क भृतौ । इति कविकल्पद्रुमः ॥ (चुरा-परं-सक-सेट् ।) क, चालयति । दन्त्यवकारादिरयमिति दुर्गसिंहजुमरनन्दी । भृतिरिह पोषणम् । इति दुर्गादासः ॥
चल, ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) ज, चालः चलः । मित्त्वे इति वक्ष्यमाणे न पठित्वा इममेव मानुबन्धं भ्रान्ताः पठन्ति तद्धेयम् । तेनास्य चालयति हस्तिनं यन्ता । चलमानोऽनिल इत्यत्र ताच्छील्ये शानः । मित्त्वे । पूर्व्ववदन्वयः । चलधातु कम्पने मानुबन्धः स्यादित्यर्थः । म, चलयति लतां वायुः । चलयन् भृङ्गरुचस्तवालकानिति रघुः । चालयन् सकलां पृथ्वीमिति चलन्तात् चालं करोतीति णौ शत्रन्तम् । इति दुर्गादासः ॥
चल, श विलासे । इति कविकल्पद्रुमः ॥ (तुदा-पर-अक-सेट् ।) श, चलती चलन्ती । विलासः क्रीडनम् । इति दुर्गादासः ॥
चलं, त्रि, (चलति गच्छतीति । चल+पचाद्यच् ।) चञ्चलम् । इत्यमरः । ३ । १ । ७४ ॥ (यथा, रघु. । ११ । १५ ।
‘ताड़का चलकपालकुण्डला
कालिकेव निविड़ा बलाकिनी ॥”
पारदः । इति हेमचन्द्रः । ४ । ११६ ॥ अष्टादशाक्षरवृत्तभेदः । यथा, वृत्तरत्नाकरे ।
“भ्गौ नजौ भ्गौ चेच्चलमिदमुदितं मुनिभिः स्वरैः ॥”)
चलः, पु, (चल+पचाद्यच् ।) कम्पः । तद्युक्ते त्रि । इति मेदिनी । ले, १५ ॥ (शिवः । यथा, महाभारते । १३ । १७ । ११६ ।
“महाकेतुर्महाधातुर्नैकसानुचरश्चलः ॥”
विष्णुः । यथा, तत्रैव । १३ । १४९ । ८२ ।
“वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥”
“वायुरूपेण चलः ।” इति भाष्यम् ॥)
चलचञ्चुः, पु, (चला चञ्चला चञ्चुरस्य ।) चकोरपक्षी । इति हेमचन्द्रः । ४ । ४०५ ॥
चलत्पूर्णिमा, स्त्री, (चलन्ती पूर्णिमा तदाश्रयीभूतचन्द्र इवेति तात्पर्य्यार्थः ।) चन्द्रकमत्स्यः । इति त्रिकाण्डशेषः ॥
चलदङ्गः, पु, (चलत् चञ्चलं अङ्गं यस्य ।) मत्स्यविशेषः । चेङ्गा इति भाषा ॥ अस्य गुणाः । अनभिष्यन्दित्वम् । वाते हितत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥
चलदङ्गकः, पु, (चलदङ्गः यस्य इति कप् ।) चलदङ्गमत्स्यः । इति जटाधरः ॥
चलदलः, पुं, (चलानि दलानि पत्राणि यस्य ।) अश्वत्थवृक्षः । इत्यमरः । २ । ४ । २० ॥ (अश्वत्थशब्देऽस्य गुणादयो ज्ञातव्याः ॥)
चलनं, क्ली, (चल+भावे ल्युट् ।) भ्रमणम् । (यथा, देवीभागवते १ । १७ । १६ ।
“चलनञ्च विना कार्य्यं न भवेदिति मे मतिः ॥”)
कम्पनम् । (यथा, पञ्चतन्त्रे । २ । १७३ ।
“द्वावुपायाविह प्रोक्तौ विमुक्तौ प्रभुदर्शने । हस्तयोश्चलनादेको द्वितीयः पादवेगजः ॥”)
कम्प्रे, त्रि । इति मेदिनी । ने, ६१ ॥
चलनः, पुं, (चलत्यनेन इति । चल+करणे ल्युट् ।) पादः । इति हेमचन्द्रः ॥ हरिणः । इति जटाधरः ॥
चलनकः, पु, (चलन+सज्ञायां कन् ।) चण्डातकम् । इति हेमचन्द्रः । ३ । ३३८ ॥
चलनी, स्त्री, (चलन+ङीप् ।) वारीभेदः । गजबन्धनी । वस्त्रघर्घरी । इति हेमचन्द्रः ॥ घाघरा इति भाषा ॥
चलपत्त्रः, पु, (चलानि पत्त्राणि यस्य ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ (यथा, नैषधे ।
“अहीन केनापि विजेतुमस्या
गवेष्यते किं चलपत्त्रपत्त्रम् ।
नचेद्विशेषादितरच्छदेभ्य-
स्तस्यास्तु कम्पस्तु कुतो भयेन ॥”)
चला, स्त्री, (चलतीति चल+पचाद्यच् टाप् च । नैकत्रावस्थितत्वात् तथात्वम् ।) लक्ष्मीः । इति मेदिनी । ले, १५ ॥ सिह्लकः । इति रत्नमाला ॥
चलाचल, त्रि, (चलतीति चल+अच् । चरिचलिपतिवदीनां वा द्वित्वमिति द्वित्वे अभ्यासस्य आगागमश्च इति वार्त्तिकसम्मतेनास्य सिद्धिः ।) चञ्चलः । इत्यमरः । ३ । १ । ७४ ॥ (यथा, किरातार्ज्जुनीये ।११।३० ।
“अभिनोऽस्य क्षितिं विद्वान् लक्ष्मीमिव चला-[चलाम् ॥”)
काके पुं । इति राजनिर्घण्टः ॥
चलातङ्कः, पु, (चले चलने आतङ्को भयं यस्मात् ।) वातरोगः । इति राजनिर्घण्टः ॥
चलितं, त्रि, (चल+कर्त्तरि क्तः ।) कम्पितम् । इत्यमरः । ३ । १ । ८७ ॥ (यथा, राजतरङ्गिण्याम् । ५ । ३६५ ।
“तयोर्विलासवलितैश्चलितापाङ्गविभ्रमैः ॥”)
गतम् । चल च गतावितिदर्शनात् ॥ (यथा, गोः रामायणे । ३ । ५७ । २३ ।
“अधिरूढ़े गजारोहे यथा स्याच्चलितो गजः॥”)
चलुः, पुं, (चल+उन् ।) गण्डूषः । इति हेमचन्द्रः । ३ । २६२ ॥
चलुकः, पुं, (चलुना कायतीति । कै+कः ।) प्रसृतिः । भाण्डभेदः । इति मेदिनी । के, ८८ ॥
चविः, स्त्री, (चर्व्व्यते इति । चर्व्व+इन् । पृषोदरादित्वात् रलोपे साधुः ।) चविका । इति शब्दरत्नावली ॥
चविकं, क्ली, (चवि+सञ्ज्ञायां कन् ।) चविका । इति भरतधृतरुद्रः ॥
चविका, स्त्री, (चवि+स्वार्थे कन् ।) वृक्षविशेषः । चइ इति भाषा ॥ तत्पर्य्यायः । चव्यम् २ । इत्यमरः । २ । ४ । ९८ ॥ चवी ३ चविकम् ४

चवी ५ । इति भरतः ॥ चवि' ६ । इति शब्द-
रत्नावली ॥ तेजोवती ७ कोला ८ नाकुली ९
उषणा १० चव्यकम् ११ वशिरः १२ गन्ध-
नाकुली १३ वल्ली १४ कोलवल्ली १५ कोलम् १६
कुटिलसप्तकम् १७ तीक्ष्णम् १८ करिकरणा-
वल्ली १९ क्षकरः २० । (यथा, सुश्रुते उत्तर-
तन्त्रे ३९ अध्याये ।
"सारिवाह्वयष्ट्याह्वचविकारक्तचन्दनैः ॥")
अस्या गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् ।
रोचनत्वम् । दीपनत्वम् । जन्तुकफकासश्वास-
शूलनाशित्वञ्च । इति राजनिर्घण्टः ॥ भेद-
कत्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥
चवी, स्त्री, (चवि+"बह्वादिभ्यश्च ।" ४ । १ । ४५ ।
इति ङीष् ।) चविका । इति शब्दरत्नावली ॥
(यथा, कथासरित्सागरे । ६ । १५१ ।
"सर्व्ववर्म्मा चवीहस्तः प्रतिज्ञां तां सुदुस्तराम् ।
पश्यन् सानुशयः सर्व्वं स्वभार्य्यायै शशंस तत् ॥")
चव्यं, क्ली, (चर्व्व्यते इति । चर्व्व+ण्यत् । पृषो-
दरादित्वात् रलोपे साधुः ।) चविका । इत्यमरः ।
२ । ४ । ९८ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"चव्येन्द्रयवौ त्रिफला सर्पिर्म्मांसरसाम्बुभिः ॥")
चव्यकं, क्ली, (चव्यमेव । स्वार्थे कन् ।) चविका ।
इति राजनिर्घण्टः ॥
चव्यजा, स्त्री, (चव्यमिव जायते इति । जन+
डः ।) गजपिप्पली । इति राजनिर्घण्टः ॥
(विवृतिरस्या गजपिप्पलीशब्दे ज्ञेया ॥)
चव्यफलं, क्ली, (चव्यमिव फलं यस्य ।) गज-
पिप्पली । इति राजनिर्घण्टः ॥
चव्या, स्त्री, (चव्य+टाप् ।) चविका । इत्यमर-
टीकायां भरतः ॥ (यथा, सुश्रुते उत्तरतन्त्रे
४१ अध्याये ।
"सर्पिर्मधुभ्यां त्रिकटु प्रलिह्या-
च्चव्याविडङ्गोपहितं चयार्गः ॥")
वचा । इति मेदिनी ॥ कार्पासी । इति राज-
निर्घण्टः ॥
चष, वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-
सेट् ।) चषति । इति दुर्गादासः ॥
चष, ञ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-
सकं-सेट् ।) ञ, चषति चषते । इति दुर्गा-
दासः ॥
चषकः, पु, क्ली, (चषति भक्षयति पिबत्यनेनेत्यर्थः ।
चष+"क्वुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणां ।
२ । ३२ । इति क्वुन् ।) मद्यपानपात्रम् । तत्-
पर्य्यायः । गल्लर्कः २ सरकः ३ अनुतर्षणम् ४ ।
इति हेमचन्द्रः । ४ । १०२४ ॥ * ॥
अथ चषकोद्देशः ।
"यत् पानपात्रं भूपानां तज्ज्ञेयं चषकं बुधैः ।
कानकं राजतञ्चैव स्फाटिकं काचमेव च ॥
एतत् खराष्टदिकोणं चतुर्णां पृथिवीभुजाम् ।
इत्यन्यसम्मतं तेषां निर्णयः पाठसम्मतः ॥
खसुष्टिसम्मितं रत्नैश्चतुर्व्वर्णैः समन्वितम् ।
मार्सिकं वाथ फालं वा सर्व्वेषामुपयुज्यते ॥
काञ्चनं घातुजं शैलं जाङ्गलादि महीभुजाम् ।
यदन्यत्तोयपानादि पात्रं पृथ्वीभुजां भवेत् ॥"
एवं तत्रापि नियम इति भोजस्य निश्चयः । इति
युक्तिकल्पतरुः ॥ * ॥ सुरापात्रम् । मधु । मद्य-
प्रभेदः । इति मेदिनी । के, ८६ ॥
चषतिः, पु, (चष भक्षे वधे वा+भावे अतिः ।)
भक्षणम् । वधः । इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः ॥
चषालः पुं, (चष्यते वध्यतेऽस्मिन् । चष+"सानसि-
वर्णसीति ।" उणां । ४ । १०७ । इति आल
प्रत्ययेन निपातनात् साधुः ।) यूपकटकः । इत्य-
मरः । २ । ७ । १८ ॥ यज्ञसमाप्तिसूचकं पशु-
बन्धनार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः
तस्य शिरसि वलयाकृतिर्म्मृत्काकृतिर्व्वा यः
काष्ठविकारः सः । यूपमूले विहितलौहवलयश्च ।
इति केचित् । इति भरतः ॥ मधुस्थानम् । इति
संक्षिप्तसारे उणादिवृत्तिः ॥
चह, शाठ्ये । प्रतारणे इति यावत् । इति कवि-
कल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चहति ।
इति दुर्गादासः ॥
चह, त क शाठ्ये । इति कविकल्पद्रुमः ॥ (अदन्त-
चुरां परं सकं-सेट् ।) चहयति खलः । इति
दुर्गादासः ॥
चह, क म शाठ्ये । इति कविकल्पद्रुमः ॥ (चुरां-
परं-सकं-सेट् ।) क म, चहयति खलः साधुं
प्रतारयतीत्यर्थः । इति दुर्गादासः ॥
चाकचक्यं, क्ली, उज्ज्वलता । चकचक् इति भाषा ।
यथा, न हि लौकिकसिद्धसामग्री प्रातिभासिक-
रजतोत्पादिका किन्तु विलक्षणैव तथा हि ।
काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयो-
गादिदमाकारा चाकचक्याकारा च काचि-
दन्तःकरणवृत्तिरुदेति । इति वेदान्तपरिभाषा ॥
चाकचिका, स्त्री, श्वेतगुञ्जा । इति रत्नमाला ॥
चाक्रिकः, पु (चक्रेण समूहेन यन्त्रविशेषेण वा
चरतीति । चक्र+"चरति ।" ४ । ४ । ८ ।
इति ठक् ।) बहुभिर्मिलित्वा यः स्तौति सः ।
तत्पर्य्यायः । घाण्टिकार्थकः २ । इत्यमरः ।
२ । ८ । ९७ ॥ (यथा, याज्ञवल्क्ये । १ । १६५ ।
"पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥")
तैलकारः । इति हेमचन्द्रः ॥ शाकटिकः ।
इति महाभारते राजधर्म्मः ॥ गाडयोयान्
इति भाषा ॥
चाक्षुषं, क्ली, (चक्षुषा निर्वृत्तम् । चक्षुस्+"तेन
निर्वृत्तम् ।" ५ । १ । ७९ । इत्यण् ।) प्रत्यक्ष-
विशेषः । तत्तु चक्षुरिन्द्रियजन्यज्ञानम् । द्रव्य-
चाक्षुषं प्रति चक्षुःसंयोगः कारणम् । द्रव्य-
समवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः । द्रव्य-
समवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेत-
समवायः । इति सिद्धान्तमुक्तावली ॥ तथा च ।
"द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ॥"
इति भाषापरिच्छेदे ॥ ५९—६० ॥
(चक्षुषा गृह्यते इति । चक्षुस्+अण् । चक्षु-
र्ग्राह्यरूपादि । चक्षुर्ग्राह्ये, त्रि ॥)
चाक्षुषः, पु, (चक्षुषः ब्रह्मणो लोचनात् जातः ।
चक्षुस्+अण् । एतन्निरुक्तिर्यथा, मार्कण्डेये ।
७६ । २ ।
"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ॥")
षष्ठमनुः । अस्मिन्मन्वन्तरे अजितनामको विष्णो-
रवतारः । मन्त्रद्रुम इन्द्रः । आप्यादयो देवाः ।
हविष्मद्वीरकादयः सप्तर्षयः । पुरुपुरुषसुद्युम्ना-
दयो मनुपुत्राः । इति श्रीभागवतम् ॥ (अस्य
अन्यद्विवरणं मन्वन्तरशब्दे द्रष्टव्यम् ॥)
चाङ्गः, पु, (चीयते इति । चि+डः । चमङ्गं
यस्य ।) चाङ्गेरी । इत्यमरटीकायां राय-
मुकुटः ॥
चाङ्गेरी, स्त्री, (चाङ्गं ईरयतीति । ईर+अण् ।
ततो ङीष् ।) अम्ललोणिका । इत्यमरः । २ । ४ । १४० ॥
("ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता ।
उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)
चाचपुटः, पु, तालभेदः । यथा —
"गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे ॥"
इति सङ्गीतदामोदरः ॥
चाञ्चल्यं, क्ली, (चञ्चलस्य भावः । चञ्चल+ष्यञ् ।)
चञ्चलता । चापल्यम् । यथा —
"चाञ्चल्यरहिता लक्ष्मीः पुत्रपौत्रावधिस्थिरा ॥"
इति जगन्मङ्गलाख्यकवचम् ॥
चाटः, पु (चट्यते भिद्यते यस्मात् । चट+घञ् ।
यद्वा चटति भिनत्ति भित्त्यादिकम् । चट+ण' ।)
चौरः । इति मिताक्षरा ॥ प्रतारकः । यथा,—
"चाटतस्करदुर्व्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥"
चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति ।
प्रच्छन्नापहारिणस्तस्कराः । दुर्वृत्ता इन्द्रजालिक-
कितवादयः । सहो बलं सहसा बलेन कृतं
साहसं महच्च तत् साहसञ्च महासाहसं तेन
वर्त्तन्ते इति महासाहसिकाः प्रसह्यापहारिणः ।
आदिशब्दात्नौलिकक्कुहककण्टकाः । एतैः पीड्य-
मानाः बाध्यमानाः प्रजा रक्षेत् । कायस्थाः
गणका लेखकाश्च तैः पीड्यमानाः विशेषतो
रक्षेत् । तेषां राजवल्लभतया अतिमायावितया
च दुर्निवारत्वात् ।" इति मिताक्षरायां आचारा-
ध्यायः ॥
चाटकैरः, पु, (चटकस्य चटकाया वा पुमपत्य-
मिति । "चटकाया ऐरक ।" ४ । १ । १२८ ।
इत्यैरक्प्रत्ययः । "चटकाच्चेति वाच्यम् । लिङ्ग-
विशिष्टपरिभाषया स्त्रिया अपि" । इति वार्त्ति-
कम् ।) चटकस्य पुमपत्यम् । इत्यमरः ॥ चटार'
छा इति भाषा ॥

चाटु, पुं, क्ली, (चटति भिनत्ति मनश्चो(?)यागोद-यावयवेनेति । चट+"दसनौति ।" उणां १ । ३ । इति णुण् ।) प्रियवाक्यम् । तत्पर्य्यायः । चटु २ प्रियप्रायम् ३ । इति हेमचन्द्रः ॥ स्फुटवादी । इति संक्षिप्तसारे उणादिवृत्तिः ॥ मिथ्याप्रिय-वाक्यम् । इति महाभारतम् ॥ खोशामदिया कथा इति भाषा ॥ (यथा, गीतगोविन्दे । २ । १० ।

"प्रथमसमागमलज्जितया
पटुचाटुशतैरनुकूलम् ॥"

चाटूकारो चि । यथा, राजतरङ्गिण्याम् । १ । २१६ ।

"उपनिषे च संगत्य पुटकैश्चाटुमीतकतो. ॥")

चाटुपटु, पु, (चाटुषु पटुः निपुणः ।) भण्डः । इति हारावली ॥ भाँड इति भाषा ॥
("भाण्डानां पण्डितोऽसौ नामचाटुपटुः कवि ॥ इति नैषधम् ॥")

चाटुलोल., त्रि, (चाटुरेव लोल इति कर्म्मधारय । चाटुषु लोल इत्येके ।) चटुलोल । इति हारा वली ॥

चाटुवटु, पु, (चाटुपटु+पृषोदरात् साधु ।) चाटुपटु । इति भूरिप्रयोग ॥

चाटूक्ति, स्त्री, (चाटुरूपा उक्तिः । चाटुना-सुक्तिर्वा ।) सेवा । इति हारावली ॥ प्रियकथा च ॥

चाणकीन, त्रि, (चणकानां भवन क्षेत्रम् । "धान्यानां भवने क्षेत्रे खञ् ।" ५ । २ । १ । इति खञ् ।) चणकोत्पत्तियोग्यक्षेत्रम् । इत्य-मरटीकायां रायमुकुटः ॥

चाणक्य, पु, (चणकस्य गोत्रापत्यम् । "गर्गा-दिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) मुनिविशेष. । तत्पर्य्याय । द्रौमिण २ अङ्गुल ३ । इति त्रिकाण्डशेष ॥ (अयमेव द्विजश्चभि-चारक्रियायोगेन योगनन्दराज मारयन् नन्दौ-रसात् चौरकारपत्नीगर्भे जात स्वशिष्य चन्द्रगुप्त राज्येऽभिषेचयच्च तस्यामात्यपदमङ्गीचकार । एतद्विवरण मुद्राराक्षसविष्णुपुराणभागवता दिषु विशेषतो द्रष्टव्यम् । इत्यन्त कतिकृत-भेदोऽपि दृश्यते यथाच, कथासरित्सागरे । ५ । १२१—२३ ।

"स चाणक्यो द्विज क्वापि गत्वा कृत्यामसाधयत् ।
तद्वशाद्योगनन्दोऽथ दाहज्वरमवाप्य स ॥
सप्तमे दिवसे प्राप्ते पञ्चत्व समुपागमत ।
हत्वा हिरण्यगुप्तञ्च शकटालेन तत्सुतम् ।
पूर्व्वनन्दसुते लक्ष्मीश्चन्द्रगुप्ते निवेशिता ॥"

चाणक्येन प्रोक्तमित्यण् ।) ग्रन्थविशेषे, क्ली । यथा, तत्रैव ।

"नानाशास्त्रोद्धृत वक्ष्ये राजनीतिसमुच्चयम् ।
सर्व्वबीजमिद शास्त्रं चाणक्य सारसंग्रहम् ॥"

चाणक्यमूलक, क्ली, (चणकमेव चाणक्य तद्व-न्मूलमस्य । इति कप स्वार्थे कन् वा ।) मूलक-प्रभेद । चाणक्यमूलीति ख्यातम् । तत्पर्य्याय । वालेयम् २ विष्णुगुप्तकम् ३ स्थूलमूलम् ४ मधुर कन्दम् ५ कौटिल्यम् ६ मरुसम्भवम् ७ शालाक्य कटुकम् ८ मिश्रम् ९ । अस्य गुणा. । उष्णत्वम् । कटुत्वम् । रुचिकारित्वम् । दीपनत्वम् । कफ-वातकृमिगुल्मनाशकत्वम् । हृद्यत्वम् । गुरु-त्वञ्च । इति राजनिर्घण्टः ॥

चाणूर:, पु, कंसराजस्य मल्लविशेषः । यथा,—
"तत्र क्रोधाभिताम्राक्ष. कृष्णः परमकोपन. ।
चाणूरमादितश्चक्रे युद्धे तस्य सुमहाबलम् ॥"
इति महाभारते हरिवंशम् ॥
(तथाच, भागवते । १० । ४४ ।
"भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरै. ।
चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह ॥")

चाणूरसूदन., पुं, (चाणूरं सूदयतीति । सूदि+ ल्यु ।) श्रीकृष्णः । इति त्रिकाण्डशेष ॥ (चाणूरा-सुरस्य नाशवृत्तान्तस्तु हरिवंशे ८६ अध्याये द्रष्टव्यम् ॥)

चाण्डाल, पु, (चण्डति कुप्यति सततमिति ।"पति चण्डिभ्यामालञ् ।" उणां १ । ११७ । इति आलञ् । यद्वा, चण्डाल+"प्रज्ञादिभ्योऽण्" यद्वा चण्डाल एवेति प्रज्ञादिभ्योऽण् ।) चण्डाल. । इत्यमर. । २ । १० । १९ । (यथा, मनु । ४ । ७९ ।
"न संवसेत पतितैर्न चाण्डालैर्न पुल्कसै ॥"
कर्म्मदोषतो ब्राह्मणानामपि पारिभाषिकचाण्डा लत्वम् । यथा, महाभारते । १२ । ७५ ।
"आह्वायका देवलका नक्षत्रग्रामयाजका ।
एते ब्राह्मणचाण्डाला महापथिकपञ्चमा ॥")

चाण्डालिका, स्त्री, (चाण्डाली वादकत्वेनास्त्यस्याः । इति ठन् । चण्डालेन निवृत्ता इति ठक् वा ।) चण्डालवीणा । इत्यमर. । १ । १० । ३२ । चण्डालिकाशब्दोऽप्यत्र ॥ (चण्डालेन करोति कुलालादिभ्योऽञ् । चण्डालाकृतवस्तुमात्रे, त्रि ॥)

चाण्डाली, स्त्री, (चाण्डाल+जातित्वात् ङीष् ।) लिङ्गिनी । इति राजनिर्घण्ट ॥ चाण्डालपत्नी च ॥

चातक, पुं, (चतते याचते जलमम्बुदमिति । चत याचने+ण्वुल् ।) स्वनामख्यातपक्षी । तत्-पर्य्याय । स्तोकक २ सारङ्ग ३ मेघजीवन ४ । इति राजनिर्घण्टः ॥ तोकक: ५ । इत्यमर । २।५।१७ ॥ शारङ्गः ६ । इति भरत ॥ (यथा, मेघदूते । ९ ।
"वामश्चाय नदति मधुर चातकस्ते सगर्व्व ॥")
तन्मांसगुणाः । लघुत्वम् । शीतत्वम् । कफरक्त-पित्तनाशित्वम् । अग्निकारित्वञ्च । इति राज-वल्लभ ॥

चातकानन्दन, पु, (चातकं आनन्दयतीति । आ+नन्द+णिच्+ल्यु ।) वर्षाकाल । इति राजनिर्घण्टः ॥

चातुर, पु, (चतुर्भिरङ्गैः हस्तपदपृष्ठशिरोभि-रित्यर्थः उह्यते इति । चतुर+अण् । यद्वा चतुर एव । स्वार्थे अण् ।) चक्रगण्डु । इति मेदिनी ॥ गोलबालिश इति भाषा ॥

चातुर, त्रि, (चतुर+स्वार्थे अण् ।) नेत्रगोचर । चाटुकार । निपुण । इति मेदिनी । रे, १५३ ॥

चातुरक, पि, (चातुर+स्वार्थे कन् ।) चातुर । इति हेमचन्द्रः ॥

चातुराश्रम्य, क्ली, (चतुर्णां आश्रमाणां कर्म्म इति । "गुणवचनब्राह्मणादिभ्य कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) ब्रह्मचर्य्यगार्हस्थ्य वानप्रस्थभिक्षुरूपाश्रमचतुष्टयानां धर्म्म । इति पुराणम् ॥ (यथा, महाभारते । १२ । ६६ । २२ ।
"चातुर्विद्यं चातुर्वर्ण्यं चातुराश्रम्यमेव च ।
राजधर्म्मांश्च निखिलान् दर्शितं पृथिवीपते ॥"
चत्वार आश्रमा इतीति स्वार्थे ष्यञ् । चतुरा-श्रमसमानम् ॥)

चातुरिक:, पुं, (चातुर्य्यं रथपरिचालनकौशल दर्शयतीति ठक ।) सारथि. । इति जटाधर ॥

चातुरी, स्त्री, (चतुरस्येय "तस्येदम् ।" ४।३।१२० । इत्यण् । ततो ङीप् । यद्वा चतुरस्य भावः इति ष्यञ् बित्वात् ङीष् ततो यलोप ।) दाक्ष्यम् । चतुरता । इति मेदिनी ॥ [चातुरी ॥"
"या लोकद्वयसाधनी तनुभृतां सा चातुरी
इत्युद्भट ॥)
(गायत्रीरूपा महाशक्ति । यथा, देवीभाग-वते । १२ । ६ । ५० ।
"चतुर्भुजा चारुदन्ता चातुरी च क्रतुप्रदा ॥")

चातुर्जातक, क्ली, (चतुर्जातक एव इति स्वार्थे अण् ।) गुडत्वगेलापत्रनागकेशररूपचतुष्टयम् । इति राजनिर्घण्ट ॥ (अस्य लक्षणं गुणाश्च ।
"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते ॥
तद्वय रेचन रूक्ष तीक्ष्णोष्णमुखगन्धहृत् ।
लघु पित्ताग्निकृद्वर्ण्य कफवातविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चातुर्थक, पु, (चतुर्थे चतुर्थेऽह्नि भव इति । चतुर्थ+ठञ् ।) प्रतिचतुर्थदिनभवज्वर । तस्य मन्त्रौषध यथा, ओं जम्भनि स्तम्भनि विमो-हय सर्व्वव्याधीन्मे वज्रेण फट् । इति ।
पुष्यमस्तकजम्बू एको दत्ताच न स्पृशेत् ।
चातुर्थको ज्वरो रुद्र । अन्ये चैव ज्वरास्तथा ॥
जम्बुफलं हरिद्रा च सर्पस्यैव च कञ्चुकम् ।
सर्व्वज्वराणां धूपोऽयं हर । चातुर्थकस्य च ॥"
इति गारुडे १९७ अध्याय ॥
(अस्य सम्प्राप्तिचिकित्सादीनि यथा,—
"चातुर्थो द्विविधो ज्ञेयो वातश्लेष्मात्मको ज्वर ।
चातुर्थको नाम गदो दारुणो विषमज्वर ॥
शोषण, सप्तधातूनां बलवर्णाग्निनाशन ।
त्रिदोषजो विकार स्यादस्थिमज्जगतोऽनिल. ॥
कुपित पित्तमेवन्तु कफश्चैवं स्वकालत ।
शीतदाहकरस्तीव्रस्त्रिकालश्चानुवर्त्तते ॥
स सन्निपातसम्भूतो विषमो विषमज्वर ।
ऊर्द्ध कायस्य गृह्णाति य पूर्व्व सोऽनिलात्मक ।
पूर्व्वं गृह्णात्यध कायं श्लेष्मपूर्व्वज्वरस्तु स ।
जङ्घाभ्यां श्लैष्मिको ज्ञेय शिरसोऽनिलसम्भव ।
एवं विज्ञाय सद्वैद्य कुर्य्यात्तत्र प्रतिक्रियाम् ।
वेलाज्वरो रसगतो रक्तश्चैकाहिकस्तथा ॥

मांसगोऽपि तृतीयः स्याच्चतुर्थोऽस्थिसमाश्रितः ।
सर्व्वधातुगतो ज्ञेयो जीर्णो धातुक्षयङ्करः ॥
भूतघ्ने भूतविद्या स्याद्धाति समताडनम् ।
वासाधात्रीदारुपथ्या नागरत्रिफला भवः ॥
मधुना संयुतः क्वाथश्चातुर्थकनिवारणः ॥

अगस्तिपत्रस्वरसो निहन्ति
नस्ये च चातुर्थकरोगमुग्रम् ।
कासं भ्रमश्चापि शिरोरुजाश्च
विनाशयत्याशु हि तन्नराणाम् ॥"

इति हारीते चिकित्सास्थाने द्वितीयेऽध्याये ॥)

चातुर्भद्रं, क्ली, (चतुर्भद्रमेवेति अण् ।) नागरातिविषामुस्ता गुडूचीति चतुष्टयम् । इति राजनिर्घण्टः ॥

चातुर्म्मास्यं, क्ली, (चतुर्षु मासेषु क्रियते इति । "चतुर्म्मासाण्ण्यो यज्ञे ।" ५ । १ । ६४ । इत्यस्य सूत्रस्य वार्त्तिकोक्तेः ण्यः । यागविशेषः । चातुर्म्मास्ययागस्य चत्वारि पर्व्वाणि । वैश्वदेवो वरुणप्रघासः शाकमेधः शुनासीरीयश्चेति शब्दार्थचिन्तामणिः ॥) आषाढ़शुक्लद्वादश्यादिचतुर्म्मासकर्त्तव्यनियमविशेषः । "यत्तु वाराहे ।

'आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तच्चीर्णं चातुर्म्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत् ॥'

मात्स्ये ।

'चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़विवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् शत्रुनाशः प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा मुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्णीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोम्नाञ्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ॥
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ।
नमो नारायणायेति जप्तानशनज फलम् ॥
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति केशवः ॥'

सनत्कुमारः ।

'इद व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णे त्वहं म्रिये ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥

समाप्तौ च ।

'इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं सपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥'

अत्रैव यतिमधिकृत्य काठकगृह्यम् ।

'एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥'

एतदशक्तविषयम् । 'ऊर्द्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी' इति शङ्खोक्तेः ।" इति तिथ्यादितत्त्वम् ॥ * ॥ अन्यच्च । तत्रोपक्रमकालः सनत्कुमारेणोक्तः ।

"एकादश्यान्तु गृह्णीयात् संक्रान्तौ कर्कटस्य तु ।
आषाढ्यां वा नरो भक्त्या चातुर्म्मास्योदितं
व्रतम् ॥"

तत्र मन्त्रः ।

"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
इम करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ! ॥"

अथ चातुर्म्मास्यनियमावश्यकता भविष्ये ।

"यो विना नियमं मर्त्त्यो व्रतं वा जप्यमेव वा ।
चातुर्म्मास्यं नयेन्मूर्खो जीवन्नपि मृतो हि सः ॥"

अथ चातुर्म्मास्यनियमाः । स्कान्दे नागरखण्डे ।

"श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥"

तत्रैव श्रीब्रह्मनारदसंवादे ।

"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने ।
यो भक्षयति विप्रेन्द्र ! श्वपचादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिशार्दूल ! यावदाहूतनारकी ॥
कलिङ्गानि पटोलानि वृन्ताकसहितानि च ।
एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने ॥
सप्तजन्मार्ज्जितं पुण्यं हरते नात्र संशयः ॥"

किञ्च ।

"रुच्यं तत्तत्कालजलभ्यं फलमूलादि वर्ज्जयेत् ।
जपहोमाद्यनुष्ठानं नामसङ्कीर्त्तनन्तथा ।
स्वीकृत्य प्रार्थयेद्देवं गृहीतनियमो बुधः ॥
इदं व्रत मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं प्रसादात्ते जनार्द्दन ! ॥" * ॥

अथ चातुर्म्मास्यव्रतनियममाहात्म्यम् । विष्णुरहस्ये ब्रह्मनारदसंवादे ।

"शृणु नारद ! कार्त्स्न्येन चातुर्म्मास्यव्रतक्रियाः ।
या निर्व्वर्त्त्य नरो भक्त्या प्रयाति परमां गतिम् ॥
व्रतानि वैष्णवानीह मनस्यपि चिकीर्षतः ।
नरस्य क्षयमाप्नोति पापं जन्मशतोद्भवम् ॥
एकभक्तो नरः शान्तो नित्यस्नायी दृढ़व्रतः ।
योऽर्च्चयेच्चतुरो मासान् हरिं स्यात्तस्य लोक-
भाक् ॥
यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः ।
वार्षिकान् चतुरो मासान् लभते वैष्णवीं गतिम् ॥
यस्तु केशवमुद्दिश्य चान्द्रायणपरायणः ।
चातुर्म्मास्यं नयेद्भक्त्या स विष्णुतनुमाविशेत् ॥"

भविष्योत्तरे भगवद्युधिष्ठिरसंवादे ।

"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढ़व्रतः ॥
गृह्णीयान्नियमानेतान् दन्तधावनपूर्व्वकम् ।
तेषां फलानि वक्ष्यामि तत्कर्त्तॄणां पृथक् पृथक् ॥
मधुरस्वरसम्पन्नो भवेल्लवणवर्ज्जनात् ।
लभते सन्ततिं दीर्घां तैलस्य परिवर्ज्जनात् ॥
अभ्यङ्गवर्ज्जनात् पार्थ ! सुन्दराङ्गः प्रजायते ।
पक्वतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् ॥
मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ।
पुष्पोपभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।
कट्वम्लतिक्तमधुरक्षारकाषायजान् रसान् ॥
यो वर्ज्जयेत् स वैरूप्यं वैगन्ध्यं नाप्नुयात् क्वचित् ।
ताम्बूलवर्ज्जनाद्भोगी अपक्वादोऽमलो भवेत् ॥
पादाभ्यङ्गशिरोऽभ्यङ्गपरित्यागाच्च पार्थिव ! ।
दीप्तिमान् दीप्तचरणो यक्षो द्रव्यपतिर्भवेत् ॥
दधिदुग्धतक्रनियमात् गोलोकं लभते नरः ।
इन्द्रातिथित्वमायाति स्थालीपाकविवर्ज्जनात् ॥
लभेच्च सन्ततिं दीर्घां तापपक्वस्य वर्ज्जनात् ।
भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥
सदा मुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ।
निर्व्याधिर्नीरुगोजस्वी सुरामद्यविवर्ज्जनात् ॥
एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणान्नखलोमानां गङ्गास्नानं दिने दिने ॥
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ।
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ॥
नमो नारायणायेति जप्त्वा दानशतं फलम् ।
पादाभिवन्दनाद्विष्णोर्भवेद्गोदानजं फलम् ॥
विष्णुपादाम्बुजस्पर्शात् कृतकृत्यो भवेन्नरः ।
विष्णोर्द्देवकुले कुर्य्यादुपलेपनमार्ज्जने ॥
कल्पस्थायी भवेद्राजा स नरो नात्र संशयः ।
प्रदक्षिणत्रयं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपदं व्रजेत् ।
गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात् ॥
नित्यं शास्त्रविनोदेन लोकान् यस्तु प्रबोधयेत् ।
स व्यासरूपी भगवानन्ते विष्णुपुरं व्रजेत् ॥
पुष्पमालाकुलां पूजां कृत्वा विष्णोः पुरं व्रजेत् ।
कृत्वा प्रेक्षणिकं दिव्यं स्थानमप्सरसां लभेत् ॥
तीर्थाम्भसि कृतस्नानो निर्म्मलं देहमाप्नुयात् ।
पञ्चगव्याशनात् पार्थ ! चान्द्रायणफलं लभेत् ॥
एकभक्ताशनान्नित्यमग्निहोत्रफलं लभेत् ।
नक्तभोजी समग्रन्तु तीर्थयात्राफलं लभेत् ॥
अयाचितेन चाप्नोति वापीकूपप्रपाफलम् ।
षष्ठकालेऽन्नभोजी यः स्थायी स्वर्गे नरो भवेत् ॥
नित्यस्नायी नरो यस्तु नरकं स न पश्यति ।
भाजनं वर्ज्जयेद्यस्तु स स्नानं पौष्करं लभेत् ॥
पत्रेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
शिलायां भोजनं नित्यं भवेत् स्नानं प्रयागजम् ॥
यामद्वयजलत्यागान्न रोगैः परिभूयते ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति तोषितः ॥"

किञ्च ।

"योगनिद्रां समालम्ब्य शेषाहिशयने स्वपन् ।
क्षीरोदतोयवीच्यग्रैर्धौतपादः समाहितः ॥
लक्ष्मीकराम्बुजैः शश्वन्मृज्यमानपदद्वयः ।
तस्मिन् काले च मद्भक्तो यो मासांश्चतुरः क्षिपेत् ॥
व्रतैरनेकैर्नियमैः पाण्डवश्रेष्ठ ! मानवः ।
कल्पस्थायी विष्णुलोके भवेन्नास्त्यत्र संशयः ॥

सर्वा व्रतसमाप्तौ च श्रीकृष्णस्य प्रसादतः ।
यद्यद्दानादिकञ्चात्र शेयं तत्तच्च कार्त्तिके ॥
सुलाय कृष्णमभ्यर्च्य प्रसाद्य च पुनः पुनः ।
शेषं प्रबोधतीर्थे च स्वीकुर्य्याद्वैष्णवैः सह ॥
गीतनृत्यादिना देवं परितोष्याथ वैष्णवान् ।
सपूज्य नरयानेन देवं स्वालयमानयेत् ॥
प्रभोर्नीराजनं कृत्वा विसर्ज्ज्य तत वैष्णवान् ।
निवेश्य स्वासने देवं शयीत भुवि तं स्मरन् ॥
एवञ्च कुर्व्वतो मासाश्चत्वारो यान्ति ते सुखम् ।
अन्यथा प्रभवेद्दुःखमनारब्धञ्च जायते ॥
तथा च भविष्ये ।
मिथुनस्थे सहस्रांशौ न स्वापयति यो हरिम् ।
वैष्णवैः सह सम्भूय दुःखानर्थप्रदो भवेत् ॥
किञ्च । भविष्योत्तरे ।
यो देवशयन मार्थं । अनुमोद्य समाचरेत ।
उत्थान वापि कृष्णस्य स हरेर्लोकमाप्नुयात् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

चातुर्व्वर्ण्यं, क्ली, (चत्वारो वर्णाः । "चतुर्वर्णादीनां स्वार्थे उपसङ्ख्यानम् ।" इति ष्यञ् ।) ब्राह्मणक्षत्त्रियवैश्यशूद्राः । इति हेमचन्द्रः । ३।४०२॥ (यथा, मनुः । १० । १ ।
"चातुर्व्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयानघ ।॥")
चतुर्वर्णधर्मश्च ॥

चातुर्व्वैद्य, पु, (चतुरो वेदानधीते इति चतुर्व्वेदः । स एव । "चतुर्वेदस्योभयपदवृद्धिश्च ।" इति ष्यञ् ।) चातुर्विद्य । चतुर्व्वेदवेत्ता । इति व्याकरणम् ॥

चात्वालं, क्ली पु, (चतते याचते इति । चत+ "चात्वालं, कीपु, (चतते याचते इति । चत+ "स्थाचतिमृजेरालञ्चालञ्वालञालीयचः ।" उणां १ । ११५ । इति वालञ् ।) गर्त्तः । अग्निहोत्रोपकरणम् । इति सक्षिप्तसारे उणादिवृत्तिः ॥ (यथा, तैत्तिरीयसंहितायाम् । ६ । १ । ३ । ८ ।
"योनिर्वै यज्ञस्य चात्वालम् ॥")

चान्द्र, क्ली, (चन्द्रस्य इदम् । चन्द्र+अण् । यद्वा, चन्द्राय चन्द्रलोकप्राप्तये इदम् ।) चान्द्रायणम् । इति प्रायश्चित्ततत्त्वम् ॥

चान्द्र, पुं, (चन्द्रस्यायम् । "तस्येदम् ।" ४।३।१२० इत्यण् ।) चन्द्रकान्तमणिः । इति हेमचन्द्र । ४।१३३ ॥ चान्द्रमासः । इति शब्दरत्नावली ॥

चान्द्रक, क्ली, (चान्द्र आर्द्रकमिव कायतीति । कै+कः ।) शुण्ठी । इति राजनिर्घण्टः ॥

चान्द्राख्यं, क्ली, (चान्द्रमित्याख्या सज्ञा यस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

चान्द्रभागा, स्त्री, (चान्द्रश्चन्द्रसम्बन्धी भागो यस्याम् ।) चन्द्रभागानदी । इति त्रिकाण्डशेषः ॥

चान्द्रमस, क्ली, (चन्द्रमाश्चन्द्रोऽधिष्ठातृदेवता यस्य । चन्द्रमस्+अण् ।) मृगशिरोनक्षत्रम् । इति हेमचन्द्र । २ । २६ ॥ (चन्द्रमसश्चन्द्रस्य इदम् । चन्द्रमस्+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) चन्द्रमससम्बन्धिनि त्रि ॥ (यथा, महाभारते । १२ । २५० । २० ।
"सर्व्वत सुखमन्वेति वपुश्चान्द्रमस यथा ॥")

चान्द्रमसायनः, पु, (चन्द्रमसोऽपत्यं पुमान् । चन्द्रमस्+फक् ।) बुधग्रहः । इति हलायुध ॥ ("तिकादिभ्य फिञ् ।" ४ । १ । १५४ । इति फिञ् ।) चान्द्रमसायनिश्च ॥

चान्द्रमासः, पुं, (चान्द्रश्चन्द्रसम्बन्धी मासः ।) चन्द्रसम्बन्धिमासः । स तु गौणमुख्यभेदेन द्विविधः । तत्राद्यः कृष्णप्रतिपदादिपौर्णमास्यन्तः । द्वितीयः शुक्लप्रतिपदादिदर्शान्तः । सामान्यविशेषतिथ्यात्मकमासश्च ॥ तत्र मुख्यचान्द्रे कर्म्माणि । आह्निकश्राद्धान्वष्टकाश्राद्धादिसपिण्डीकरणान्तश्राद्धानि चान्द्रायणप्राजापत्यादिव्रतानि दानकर्म्मनियमार्थं यथापुष्करिण्यादिप्रतिष्ठा साधारणतिथिविहितकर्म्म । गौणचान्द्रे अष्टकादिपार्व्वणश्राद्ध वारुणीस्नान जन्मतिथिकृत्य जन्माष्टम्यादुपवास. दुर्गोत्सवादितिथिनियतपूजा । सामान्यविशेषतिथ्यात्मकमासेन मासिकादिमासगणना । इति स्मृतिः ॥

चान्द्रायण, क्ली, (चान्द्रस्य चन्द्रलोकस्य अयन प्राप्तिर्यस्मात् । "धर्म्मार्थी यश्चरेदेतच्चन्द्रस्यैति सलोकताम् ।" इति याज्ञवल्क्यवचनादेव तथात्वम् । यद्वा चन्द्रः चन्द्रतानन्दमयपुरुषः अयन आश्रयोऽधिष्ठातृदेवो यस्य व्रतस्य यत्र व्रते वा ।) व्रतविशेष । तत्पर्य्यायः । इन्दुव्रतम् २ । इति त्रिकाण्डशेषः ॥ तत्तु चतुर्व्विधं पिपीलिकामध्याख्यम् १ यवमध्याख्यम् २ यतिचान्द्रायणम् ३ शिशुचान्द्रायणम् ४ । यथा,—
"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥"
"एतदेव पिपीलिकामध्याख्यम् ।" इति कुल्लूकभट्टः ॥
"एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम् ॥
अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायण चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहित ।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् ॥"
इति मनुः ॥
तद्विधानं यथा, गारुडे १०५ अध्याये ।
"तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिख्यण्डसम्मितान् ।
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरेत् ॥
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपयुञ्जीत चान्द्रायणमथापरम् ॥
कुर्य्यात्त्रिषवण स्नान पिण्डं चान्द्रायणं चरेत् ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभिमन्त्रयेत् ॥
अनादिष्टेषु सर्व्वेषु शुद्धिश्चान्द्रायणेन च ।
धर्म्मार्थी यश्चरेदेतत् चन्द्रस्यैति सलोकताम् ॥
कृच्छ्रकृद्धर्म्मकामस्तु महतीं श्रियमश्नुते ॥"
अपि च ।
"एकैकं वर्द्धयेत् पिण्डं शुक्ले कृष्णे च ह्रासयेत् ।
उपस्पृशंस्त्रिषवण विपरीतोऽघमर्द्दनम् ॥"
इति तत्रैव २२६ अध्यायः ॥

चान्द्री, स्त्री, श्वेतकण्टकारी । (चन्द्रस्य इयम् । चन्द्र+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् स्त्रियां ङीप् ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥ (चन्द्रसम्बन्धिनि त्रि । यथा, माघे । २ । २ ।
"गुरुकार्य्यानुगां विभ्रच्चान्द्रीमभिनभ. श्रियम् ॥")

चापं, क्ली पु, (चपस्य वंशविशेषस्य विकारः । "अवयवे च प्राण्योषधिवृक्षेभ्यः ।" ४।३।१३५। इत्यण् ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥ (यथा, रघुः । १२ । ४० ।
"क्रमशस्ते पुनस्तस्य चापात् सममिवोद्ययुः ॥")
वृत्तखण्डार्द्धः । यथा, सिद्धान्तशिरोमणौ ।
"इतीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तूर्य्यगोलम् ॥"
नवमराशिः । यथा, वृहत्संहितायाम् ।४०।१०।
"चापगते गृह्णीयात् कुङ्कुमशङ्खप्रवालकाचानि ॥")

चापपटः, पुं, (चापो धनुरिव वक्रीभवनाकृतिः पट पत्रं यस्य ।) पियालवृक्षः । इति जटाधरः ॥

चापल, क्ली (चपलस्य भावः कर्म्म वा युवादित्वादण् ।) अनवस्थितिः । इति हेमचन्द्र । २ । २०८ ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ।
"मात्सर्य्यद्वेषरागादेश्चापलन्त्वनवस्थितिः ॥"
(यथा, रघु । १ । ९ ।
"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥")

चापल्य, क्ली, (चपलस्य भावः कर्म्म वा । ब्राह्मणादित्वात् ष्यञ् ।) चपलता । चाञ्चल्यम् । यथा,
"परदारं परद्रव्य परीवादं परस्य च ।
परीहासं गुरो स्थाने चापल्यञ्च विवर्ज्जयेत् ॥"
इति चाणक्ये । ३० ॥

चामर, क्ली पु, (चमरी मृगविशेषस्तस्या इदम् । चमरी+अण् ।) चमरीपुच्छलोमनिर्म्मितव्यजनम् । चौरी । इति भाषा ॥ तत्पर्य्यायः । प्रकीर्णकम् २ । इत्यमरः । २ । ८ । ३१ ॥ चमरम् ३ चामरा ४ चामरी ५ । इति भरतः ॥ वालव्यजनम् ६ रोमगुच्छकम् ७ । इति रभसः ॥ (यथा, पञ्चतन्त्रे । ३ । २६६ ।
"गुणेषु रागो व्यसनेष्वनादरो
रतिः सुभृत्येषु च यस्य भूपतेः ।
चिरं स भुङ्क्ते चलचामरांशुकां
सितातपत्राभरणां नृपश्रियम् ॥")
अस्य वायुगुणः । ओजःकारित्वम् । मक्षिकादिप्रमोहनत्वञ्च । इति राजवल्लभः ॥ * ॥
अथ चामरोद्देशः ।
"हस्तद्वयोन्नत शुक्ल, सुवर्णवलिभूषित ।
क्षीरेणालङ्कृतो राज्ञां भयमानसुखप्रदः ॥
यस्तेषामरदण्डाद्वा व्यायामत्व प्रकाशितम् ।
भयो भद्रो जयः शील सुखः सिद्धिश्च स्थिरः ॥
वितस्त्येकैकसङ्ख्या दिनेशाद्दिदिशां सदाम् ।
सौवर्ण राजत युग्म चैवेशानां महीक्षताम् ॥
योजयेदिति निश्चित्य वलिकल्पनकर्म्मणि ।
स्थलज जाङ्गलो राजा अनूपो जलज वहेत् ॥
हीरश्च पद्मरागश्च वैदूर्य्य नील एव च ।
मणिवैलिषु योक्तव्यो ब्रह्मादीना यथाक्रमम् ॥*॥

शुक्लो रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम् ।
चामरो राजकेऽप्यस्य न सामान्यस्य भूपते: ॥
न भयमानतो नूनं चामरं गुणमावहेत् ॥”

अथ चामरपरीक्षा ।

स्थलजं जलजञ्चेति चामरं द्विविधं विदुः ।
मेरौ हिमालये विन्ध्ये कैलासे मलये तथा ॥
उदयेऽस्तगिरौ चैव गन्धमादनपर्व्वते ।
एवमेतेषु शैलेषु यास्मर्यो भवन्ति हि ॥
तासां वालस्य जायेत चामरेत्यभिधा भुवि ॥
आपीता: कनकाद्रिजा हिमगिरे: शुभ्रायता विन्ध्यजा:
कैलासादसिता: सिता मलयजा: शुक्लास्तथा पिङ्गला: ।
आरक्ता उदयोद्भवाश्चमरजा आनीलशुक्लत्विष’
छाया. केचन गन्धमादनभवा: पाण्डुत्विषश्चामरा: ॥
अन्येषु प्रायश: छायाश्चामरा: सम्भवन्ति हि ।
ब्रह्मक्षत्रियविट्शूद्रजातयस्ताश्चतुर्व्विधा: ॥
चमर्य्य: पर्व्वतोद्भूता यथापूर्व्वं गुणावहा: ।
दीर्घवाला: सुलघव: स्निग्धाङ्गाश्चापि कोमला: ।
विरलास्तनुपर्व्वाणस्समर्थो ब्रह्मजातय: ।
विना सस्कारमप्यासां चामरं विमल भवेत् ॥
दीर्घवाला: सुगुरव: कर्कशाशा भृशं घना: ।
विज्ञेया: स्थूलपर्व्वाणस्समर्थो वैश्यजातय: ॥
सस्कारे चाप्यसस्कारे न स्वभावं त्यजेदिदम् ।
खर्व्ववाला: सुलघव: कोमलाङ्गा भृशं घना: ॥
चमर्य्यस्तनुपर्व्वाणो विज्ञेया: शूद्रजातय’ ।
सस्कारेणापि मलिनमासां चामरमिष्यन ॥४॥
दीर्घता लघुता चैव स्वच्छता घनता तथा ।
गुणाश्चत्वार इत्येते चामराणां प्रकीर्त्तिता: ॥
खर्व्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता ।
दोषाश्चत्वार इत्येते चामराणां प्रकीर्त्तिता: ॥
दीर्घे दीर्घायुराप्नोति लघौ भीतिविनाशनम् ।
स्वच्छे स्याद्धनकीर्त्तिश्च घने सु: स्थिरसम्पद. ॥
खर्व्वे खर्व्वायुरुद्दिष्टं गुरुर्गुरुभयप्रद: ।
वैवर्ण्ये रोगशोकौ च मलिन मृत्युमादिशेत् ॥”

इति स्थलजम् ॥ ५ ॥

अथ जलजम् ।

“लवणेक्षुसुरासर्पिर्दधितोयपयोऽब्धिषु ।
यथोत्तर गुणवत्यश्चमर्य्य: सप्त सप्तसु ॥
पुच्छानि तासां छन्नानि जन्तुभिर्म्मकरादिभि ।
कदाचिदुपलभ्येत तत्तीरे पुण्यशालिभि’ ॥
लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु ।
वह्नौ क्षिप्तश्च वालश्चेत् किञ्चिच्चटचटायते ॥
इक्षुसिन्धूद्भवं ताम्रं चामर विमल लघु ।
मक्षिका मशकाश्चैव तस्मिन् चलति चामरे ॥
सुराब्धिजातं कलुषं कर्व्वुरं गुरुकर्कशम् ।
तत्रस्थेनैव माद्यन्ति अपि दृष्टा मतङ्गजा: ॥
सर्पि:सिन्धुभव स्निग्धं श्वेतापीत घनं लघु ।
वायुरोगा प्रशाम्यन्ति तस्य वीजनवायुना ॥
दधिसिन्धूद्भवं पाण्डु दीर्घं लघु घन महत् ।
अस्य पातन नश्येत् तृष्णा स्पर्शा मदो भ्रम. ॥
नारिष्टं नैतयस्तस्य यस्येदं चामरं गृहे ।
क्षीरोदसम्भव श्वेतं दीर्घं लघु घनं महत् ॥
अस्य चामरराजस्य विज्ञेयो गुणविस्तर: ।
नाल्पेन तपसा लभ्यो देवानामपि जायते ॥
ध्रियतेऽभ्यन्तरे सिन्धोर्नागै: सम्पत्तिलोलुपै: ।
एषां पूर्व्ववदुन्नेयं जातिदोषगुणादिकम् ॥ ६ ॥
स्थलजे जलजे चैव भाव्यमेतद्विशेषणम् ।
स्थलजं सुखदृश्यं हि दाहे सियमिवायते ॥
जलजं वह्निदुर्दर्श्यं महान्तं धूमसुद्गिरेत् ।
चामराणां समुद्दिष्टमित्येवं लक्षणद्वयम् ॥
एव विन्यस्य यो धत्ते स राजा सुखमश्नुते ॥७॥
जलजं चामरं राजा यो धत्ते जाङ्गलेश्वर: ।
तस्याचिरात् कुलं वीर्य्यं लक्ष्मीरायुश्च नश्यति ॥
अनूपाधीश्वरो राजा यो वहेत् स्थलजं तथा ।
तस्यैतानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम् ॥
नालं वर्णद्वये तेषां विधेयं शिल्पिना क्रमात् ।
संस्कारो वालुकायन्त्रे मसृरसलिलादिभि’ ।
तदुष्णसलिलक्वाथात् कृत्रिमत्वं विपद्यते ॥”

इत्युपकरणयुक्तौ चामरोद्देश: । इति भोजराजकृतयुक्तिकल्पतरु: ॥

चामरपुष्प:, पु, (चामरवत् पुष्पमस्य ।) गुवाक: । काश: । आम्र: । केतक: । इति मेदिनी । षे ३१ ॥

चामरपुष्पक:, पु, (चामरपुष्प+स्वार्थे कन् । चामरमिव पुष्पमस्य इति कप् वा ।) काश: । इति जटाधर: ॥ चामरपुष्पार्थोऽप्यत्र ॥

चामरा, स्त्री, (चामर+अजादित्वात् टाप् ।) चामरम् । इत्यमरटीकायां भरत: ॥

चामरी, स्त्री, (चामर+संज्ञायां ङीप् ।) चामरम् । इत्यमरटीकायां भरत: ॥

चामरी, [न्] पु स्त्री, (चामर इव केशरोऽस्त्यस्य । इति इनि: ।) घोटक: । इति त्रिकाण्डशेष: ॥

चामीकरं, क्ली, (चमीकर: रत्नाकरविशेष: तत्र भवमित्यण् ।) स्वर्णम् । (यथा, शिवपुराणे वायुसंहितायाम् । २ । १५ ।
“इन्द्रमुर्म्मुनयो देवा देवर्षिगणसेवितम् ।
शुद्धचामीकरप्रख्यं सर्व्वाभरणभूषितम् ॥”)
धुस्तूर’ । इत्यमर: । २ । ६ । ६५ ॥

चामुण्डा, स्त्री, (महासङ्ग्रामे चण्डमुण्डाख्यौ द्वौ शुम्भनिशुम्भसेनाध्यक्षौ अनया शक्त्या निहतौ अत. परितुष्टया भगवत्या कौशिक्या अस्याश्चामुण्डेति संज्ञा रचिता । एतत् सर्व्वन्तु वक्ष्यमाणासु प्रशस्तिषु दर्शनीयम् ।) दुर्गा । इति जटाधर: ॥ मातृकाभेद: । इति शब्दरत्नावली ॥ तत्पर्य्याय’ । चर्व्विका २ चर्म्ममुण्डा ३ मार्ज्जारकर्णिका ४ कर्णमोटी ५ महागन्धा ६ भैरवी ७ कापालिनी ८ । इति हेमचन्द्र: ॥ अस्या ध्यानं यथा,—
“काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥”

अस्याश्चामुण्डेति नामकारणं यथा,—
“यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि । भविष्यसि ॥”

इति चण्डी ॥

अस्याजन्मादिकं यथा,—
“देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव । ॥
समाधिसंस्थितो दन्त्य: प्रान्तस्तस्मात् पुर:सर. ।
षष्ठस्वरमिविन्दिन्दुसंस्थितो मादिरेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि वत्सकाग्रमना: शृणु ॥
नीलोत्पलदलश्यामा चतुर्व्वाहुसमन्विता ।
खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म कपालञ्च ऊर्द्ध्वाधोभावत: पुन: ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणानना ।
एषा ताराह्वया देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनी चाष्टौ पूजयेच्चिन्तयेदपि ।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विधायिका ॥
कराला शूलिनी चेति अष्टौ ता: परिकीर्त्तिता: ।
एषातिकामदा देवी जाग्रद्धानिकरी सदा ॥
एतस्या: सदृशी काचित् कामदा न हि विद्यते ॥”

इति कालिकापुराणे ६० अध्याय: ॥

चाम्पिला, स्त्री, (चपि+भावे घञ् । ततष्टाप् । चम्पेवेति चाम्पा । ततोऽस्त्यर्थे इलच् टाप् च ।) नदी । इति त्रिकाण्डशेष: ॥

चाम्पेय:, पु, (चम्पायां नद्यां भव इति ढक् ।) चम्पक: । इत्यमर: । २ । ४ । ६३ । (यथास्य पर्य्याया: ।
“चाम्पेयश्चम्पक: प्रोक्तो हेमपुष्पश्च स स्मृत: ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नागकेशर: । (यथा,—
“नागपुष्प: स्मृतो नाग: केशरो नागकेशर: ।
चाम्पेयो नागकिञ्जल्क: कथित’ काञ्चनाह्वय: ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
राजविशेष: । यथा, राजतरङ्गिण्याम् । ८ । ५४० ।
“चाम्पेयो जासटोवक्षधरो वल्लापुराधिप: ॥”
विश्वामित्रपुत्त्राणामन्यतम. । यथा, महाभारते । १३ । ४ । ५७ ।
“गारागिर्नाचिकश्चैव चाम्पेयोज्जयनौ तथा ॥”
क्ली, सुवर्णे । यथा काशीखण्डे । २४ । ७६ ।
“मणिमाणिक्य चाम्पेयदुकूलैर्भाण्डगोधनम् ॥”)

चाम्पेयक, क्ली, (चाम्पेय इव कायतीति । कै+क’ । स्वार्थे कन् वा ।) किञ्जल्क: । इति राजनिर्घण्ट. ॥

चाम्यं, क्ली, (चम्यते भक्ष्यते इति । चम+कर्म्मणि ण्यत् ।) भक्ष्यम् । इति व्याकरणम् ॥

चाय, ऋ न निशामे । अर्च्चे । इति कविकल्पद्रुम’ ॥ (भ्वा-उभ-सक-सेट् ।) ऋ, अचचायत् । न, चायति चायते । निशाम इति चाक्षुषज्ञानम् । त मर्त्तीया प्रमदाश्चचायिरे । इति माघ: । इति दुर्गादास. ॥

चारं, क्ली, (चर्य्यते भक्ष्यते कोमदेयादिवयोऽस्मादिति । चर + कर्म्मणि घञ् ।) कृत्रिमविषम् । इति हेमचन्द्रः । ३ । ३८८ ॥

चार:, पु, पियालवृक्ष: । गति । बन्ध: । अपसर्प: । इति मेदिनी । रे, ३३ ॥ कारागारम् । इति हेमचन्द्र: । ३ । ३८८ ॥ (चर एव इति स्वार्थे अण् ।) गूढ़पुरुष । चर: । तद्विवरणम् । यदुक्तं कालिकापुराणे ८५ अध्याये ।

"कृषिदुर्गेषु वाणिज्यं रक्षणां करसाधनम् ।
आदानं सैन्यकरयोर्बन्धनं गजवाजिनो ॥
शून्यवप्रसुखानाञ्च योजनं सततं जने ।
प्रजानां चारसेतूनां बन्धनं चेति चाष्टमम् ॥
एतदष्टासु वर्गेषु चारान् सम्यक् प्रयोजयेत् ।
कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम् ॥
अष्टौ चारान् नियुञ्जीयादष्टवर्गेषु पार्थिव ।
दशस्वन्येषु युञ्जीत क्रमतः शृणु तानि मे ॥
स्वामी सचिवराष्ट्राणि मित्रं कोषो बलं तथा ।
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम् ॥
दुर्गयुक्ते चाष्टवर्गे चारं नात्मनि योजयेत् ।
तस्मादिमानि शेषाणि पञ्च चारपदानि तु ॥
शुद्धान्तेष्वेव पुत्त्रेषु सकपूपादौ महानसे ।
शत्रूदासीनयोश्चैव बलाबलविनिश्चये ॥
आदौ दशसु चैतेषु चारान् राजा प्रयोजयेत् ।
नयात् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत् ॥
निरूप्य तत्प्रतीकारमवश्यं छिद्रतश्चरेत् ।
यथानियोगमेतेषां यो यो यत्रान्यथा चरेत् ॥
ज्ञात्वा तत्र नृपश्चारैर्दण्डनेद्वा नियोजयेत् ।
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृप: ॥
प्रदोषसमये पृच्छेत्तदानीमेव साधयेत् ।
स्वपुत्त्रे चाथ शुद्धान्ते ये तु चारा महानसे ॥
नियुक्तांस्तान् मध्यरात्रौ पृच्छेत् यत्रापि मन्त्रिणि ।
एतान् चारान् स्वयं पश्येत् नृपतिर्मन्त्रिणा विना ॥
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम् ।
नैकवेशधरश्चारो नैको नीतसाहवर्ज्जित ॥
संस्तुतो न हि सर्व्वत्र नातिदीर्घो न वामन: ।
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान् ॥
न वित्तविभवैर्हीनो न भार्य्यापुत्त्रवर्ज्जित: ।
कार्य्यश्चारो नृपतिना गुह्यतत्त्वविनिर्णये ॥
अनेकवेशग्रहणक्षमं भार्य्यासुतैर्युतम् ।
बहुदेशवचोऽभिज्ञं पराभिप्रायवेदकम् ॥
दृढभक्तं प्रकुर्व्वीत चारं शक्तमसाध्वसम् ।
अधितिष्ठेत् स्वयं राजा कृषिमात्मसमैस्तथा ॥
वणिक्पथे च दुर्गादौ तेषु शक्तान्नियोजयेत् ।
अन्तःपुरे पितुस्तुल्यान् धीरान् वृद्धान् नियोजयेत् ॥
षण्डान् पण्डान् तथा वृद्धान् स्त्रियो या बुद्धितत्परा: ।
शुद्धान्तद्वारि युञ्जीयात् स्त्रियो वृद्धा मनीषिणी: ॥"

यथा च युक्तिकल्पतरौ ।
"नृपो निहन्याच्चारेण परराष्ट्रं विचक्षण: ।"
(कापटिकपुरुषादय. । यथा, मनु. । ७।१८४।
"उपगृह्यास्पदञ्चैव चारान् सम्यग्विधाय च ॥"
"चारांश्च कापटिकादीन् ।" इति कुल्लूकभट्ट: ॥
प्रचार: । यथा, रामायणे । २ । ६६ । २६ ।

"निवृत्तचार: सहसा गतो रवि.
प्रवृत्तचारा रजनी ह्युपस्थिता ।"

"निवृत्तचार: निवृत्तकिरणप्रचार: प्रवृत्तचारा प्रवृत्ततम:प्रचारा ।" इति तट्टीकायां रामानुज. ॥ वाणिज्यादिव्यवहार: । यथा, महाभारते । ५ । ३८ । १२ ।
"भृतैर्वाणिज्यचारञ्च पुष्पै: सेवेत च द्विजान् ॥"
सञ्चार: । प्रवृत्ति. । यथा, देवीभागवते । १ । ११ । २२ ।
"न स्त्री दुष्यति चारेण न विप्रो वेदकर्म्मणा ।"
"चारेण रज.सञ्चारेण ।" इति टीकाकृन्नीलकण्ठ: ॥)

चारक:, पुं, (चारयति इति । चर + णिच् + ण्वुल् ।) अश्वादे: पालक: । सञ्चारक: । (यथा, रामायणे । ६ । ६६ । १८ ।
"इयं गते भ्रातरि मे मयि वत्स्यति मैथिली ।
न चापमार्गां कुर्य्यां ते पाप । प्रच्छन्नचारक । ॥")
बन्ध: । इति मेदिनी ॥ के, ८७ । पियालवृक्ष: । इति राजनिर्घण्ट: ॥ (चर एव स्वार्थे अण् चार: । तत: स्वार्थे कन् । गुप्तचर: । यथा महाभारते । २।५।३८ । [चारके. ॥"
"त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि
चरणशीले, त्रि । यथा, कथासरित्सागरे।२४।६५।
"गुप्तं विरचितां नाम भेजेऽन्त:पुरचारिकाम् ॥")

चारटिका, स्त्री, (चर + णिच् + "शकादिभ्योऽटन् ।" ४ । ८१ । उणा । इति अटन् तत: संज्ञायां कन् कापि अत इत्वञ्च ।) नलीनामगन्धद्रव्यम् । इति राजनिर्घण्ट: ॥

चारटी, स्त्री, (चर + णिच् + "शकादिभ्योऽटन् ।" इति अटन् ततो गौरादित्वात् ङीष् ।) पद्मचारिणीवृक्ष: । इत्यमर । २ । ४ । १४६ ॥ भूम्यामली । इति राजनिर्घण्ट. ॥

चारण , पु, (चारयति प्रचारयति नृत्यगीतादिविद्या तज्जन्यकीर्त्तिं वा । चर + णिच् + ल्यु. ।) नटविशेष: । तत्पर्य्याय: । कुशीलव. । इत्यमर: । २ । १० । १२ ॥ (यथा, मनु: । १२ । ४४ ।
"चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिका. ।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गति: ॥"
"चारणा: नटादय: ।" इति कुल्लूकभट्ट: ॥")
गन्धर्व्वविशेष: । यथा,—
"गन्धर्व्वाणां ततो लोक: परत: शतयोजनात् ।
देवानां गायनास्ते च चारणा स्तुतिपाठका: ॥"
इति पाद्मे पातालखण्डम् ॥
(देवयोनिविशेष: । यथा, भागवते । २ । १ । ३६ ।
"गन्धर्व्वविद्याधरचारणाप्सर:
स्वर:स्मृतीरसुरानीकवीर्य्य: ॥"
चारपुरुष । यथा, भागवते । ४ । १६ । १२ ।
"अन्तर्वहिश्च भूतानां पश्यन् कर्म्माणि चारणै: ।
उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम् ॥")

चारभट:, पुं, (चारेषु चरेषु भट: । यद्वा, चारे युद्धकौशलादिप्रचारे भट: ।) वीर: । इति हेमचन्द्र: ।३।२८ ॥ (यथाह भर्तृहरि: ।१।६१।
"कथमपि कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ।
चारभटचौरचेटकनटविटनिष्ठीवनशरावम् ॥"

चारवायु:, पुं (चारेण सूर्य्यस्योदग्गतिभेदेन प्रेरितो यो वायु: ।) निदाघजवायु । इति त्रिकाण्डशेष: ॥

चारिणी, स्त्री, (चारयति स्वगुणमिति । चर + णिच् + णिनि, ङीप् च ।) करुणीवृक्ष: । इति राजनिर्घण्ट: ॥

चारित्र, क्ली, (चरित्रमेव इति । स्वार्थे अण् ।) चरित्रम् । इति हेमचन्द्र: । ३ । ५०० ॥ (यथा, रामायणे । ३ । ५६ । ६ ।
"कुलाक्रोशकरं लोके धिक् । ते चारित्रमीदृशम् ॥"
मरुद्गणानामन्यतम: । यथा, हरिवंशे ।१६६।५४।
"जयोनचाद्भुतश्चैव चारित्र बहुपन्नगम् ॥"
चरतीति । "चरेर्वृत्ते ।" ४ । १७२ । उणां । इति णित्रम् । वृत्तान्तम् ॥)

चारित्रा, स्त्री, (चारित्रं अम्लस्वभावो विद्यतेऽस्या इति । अच् टाप् ।) तिन्तिडीवृक्ष: । इति शब्दरत्नावली ॥

चारी, स्त्री, (चार: पदनिक्षेपभेद: गतिभेदो वा अस्त्यस्यामिति । "अर्श आदिभ्योऽच् ।" ५।२।१२७। इत्यच् । ततो ङीष् ।) नृत्याङ्गविशेष । यथा,—
"न हि चारीं विना नृत्ये नृत्यस्याङ्गं प्रवर्त्तते ।
शृङ्गारादिरसानान्तु भावोद्दीपनकारिका ॥
माधुर्य्योद्वर्त्तिना नित्यं चारी चारुगतिर्म्मता ॥"
अन्ये तु ।
"एकपादप्रचारो य: सा चारी तु निगद्यते ।
पादयोश्चरणं यत्र सा चारीति निगद्यते ॥
करणानां समायोग: खण्डक: परिकीर्त्तित ।
त्रिभि: खण्डैश्चतुर्भिर्व्वा मण्डलं समुदाहृतम् ॥
समनखा नूपुरविद्धा तिर्य्यङ्मुखी सचला च ।
कातरा च कुवीरा च विश्लिष्टा रथचक्रिका ॥
पार्ष्णिरेचितका तलदर्शिनी गजहस्तिका ।
परावित्तनला घोरुताडिताप्यर्द्धमण्डला ॥
स्तम्भक्रीडनिका हरिणत्रासिका चोरुरेचिका ।
तलोद्वृत्ता सञ्चरिता स्फुरिकापि तथैव च ॥
लङ्घितजङ्घा सङ्घट्टिता स्यादथ मदालसा ।
उत्कुञ्चितातितिर्य्यक्कुञ्चिता चापकुञ्चिता ॥
षड्विंशतिर्भौमचार्य्य इत्याख्याता मनीषिभि: ॥"
अन्ये तु ।
"समपादस्थिता वर्णा शकटास्याध्यर्द्धिकापि च ।
विच्यावा ताडिता बद्धा एड़का क्रीडिता तथा ॥
ऊरुवृत्ता छन्दिता जनितापस्यन्दिता तथा ।
स्यन्दितावत्समतन्वी समोत्सारितमत्तल्लिता ॥
उत्स्यन्दिता च विज्ञेयाश्चार्य्य षोडश भूमिगा: ॥"
इति भूमिचारी ॥ * ॥

आकाशचारी यथा,—
"चारीश्चाकाशगा वक्ष्ये विच्यवा त्वपरी तथा ।
लङ्घिताडिता भ्रमरी पुर:क्षेपा च सूचिका ॥

अपक्षेपा जङ्घावर्त्ता विद्धा च हरिणप्लुता ।
अकाजङ्घान्दोलिता च जङ्घा जङ्घनिका तथा ॥
विद्युतक्रान्ता भ्रमरिका दण्डपार्श्वेति षोडश ॥"
अन्ये तु ।
"विभ्रान्तातिक्रान्तापक्रान्ता पार्श्वक्रान्तिका ।
ऊर्द्ध्वजानुर्दोलपादादूरत्ता नूपुरपादिका ॥
भुजङ्गत्रासिका क्षिप्ताविद्धा ताला च सूचिका ।
विद्युतक्रान्ता भ्रमरिका दण्डपादा तथैव च ॥
आकाशचारिका एता. षोडशैव निरूपिता ॥"
एतास्वेव भूमिचारीष्वप्यन्तरभेदोऽस्ति तिर्य्यक्चारी ऊर्द्धचारी अधश्चारीति ता ऊहनीयाः ॥
"तैलाभ्यक्तेन गात्रेण लब्धाहारो जितश्रमः ।
स्तम्भे वा भित्तिदेशे वा प्रथमं ताः प्रयोजयेत् ॥
रूक्षाहारं तथाक्षेषु मुक्ता तां न समाचरेत् ।
नृत्यपादस्य विन्यासश्चारी सैवाभिधीयते ॥
शृङ्गारादिरसानान्तु भवेद्दीपनकारणम् ।
माधुर्य्यो भूमना नित्यं हृद्यतालत्रयान्विता ॥
नियतोऽङ्गविशेषाणां चारी सञ्चारतो भवेत् ॥"
इति सङ्गीतदामोदरोक्तचारीलक्षणम् ॥

चारु, पुं (चरति देवेषु गुरुत्वेन । चर+"दृसनिजनिचरीति ।"उणां १ । ३ । इति ञुण् ।) बृहस्पतिः । (चरति चित्ते इति ।) मनोज्ञे त्रि । इति मेदिनी । रे, ३३ ॥ (यथा, गीतगोविन्दे । १० । ६ । [मधिवचनजातम् ॥"
"इति चटुलचाटुपटुचारुमुरवैरिणो राधिकाश्रीकृष्णस्य रुक्मिणीगर्भसम्भूतपुत्त्राणामन्यतमः । यथा, हरिवंशे । ११७ । ३६ ।
"चारुश्च बलिनां श्रेष्ठ सुताश्चारुमतीं तथा ॥")

चारुकः, पु, (चारु+संज्ञायां कन् ।) शरबीजम् । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । रक्तपित्तकफापहत्वम् । शीतलत्वम् । लघुत्वम् । अवृष्यत्वम् । कषायत्वम् । वातकोपनत्वञ्च । इति भावप्रकाशः ॥

चारुकेशरा, स्त्री, (चारूणि केशराणि अस्याः ।) नागरमुस्ता । तरणीपुष्पम् । इति राजनिर्घण्टः ॥

चारुगर्भः, पु, (चारुः मनोज्ञः गर्भः अभ्यन्तर्वर्त्तिप्रान्तःकरणमिति यावत् यस्य । यद्वा चारुगर्भे उत्पत्तिस्थानं यस्य ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च ॥"

चारुगुप्तः, पु, (चारु यथा स्यात् तथा गुप्तः । यद्वा चारुणा ईश्वरेण कृष्णेन गुप्तः पालितः ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"सुवेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ॥"

चारुदेष्णः, पु, रुक्मिण्यां श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ५ ।
"द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः ॥"

चारुधारा स्त्री, (चारूणां मनोहरपदार्थानां धारा इव, त्रैलोक्यसुन्दरत्वेनास्याः तथात्वम् । चार्व्वी धारा दीप्तिर्य्यद्वा रीत यस्याः वा ।) शची । इति त्रिकाण्डशेषः ॥ (चारु धाम यस्याः ।) चारुधामा इत्यपि पाठः ॥

चारुनालकं, क्ली, (चारु नालं यस्य कप् ।) रक्तपद्मम् । इति पुराणम् ॥

चारुपर्णी, स्त्री, (चारु मनोज्ञं पर्णं पत्त्रं अस्याः ।) प्रसारणी । इति राजनिर्घण्टः ॥ गन्धभादालिया इति भाषा ॥ (प्रसारणीशब्देऽस्या गुणादिकं ज्ञेयम् ॥)

चारुफला, स्त्री, (चारु मनोहरं फलं अस्याः ।) द्राक्षा । इति राजनिर्घण्टः ॥

चारुबाहुः, पु, (चारू बाहू यस्य ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥"

चारुविन्दः, पु, (चारु चारुतां विन्दतीति । विदि+अण् ।) श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
"सुवेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ॥"

चारुमती, स्त्री, (चारु चारुता सौन्दर्य्यं अस्या अस्तीति । मतुप् ततो ङीप् ।) रुक्मिण्यां श्रीकृष्णस्य कन्या । यथा, हरिवंशे । १६० । ६ ।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥"

चारुलोचनः, पु,(चारुणी लोचनेऽस्य ।) हरिणः । इति त्रिकाण्डशेषः ॥(चारुलोचनविशिष्टे त्रि ॥)

चारुवर्द्धना, स्त्री, (चारु चारुत्वं श्रियमित्यर्थः वर्द्धयति स्वगुणैरिति यावत् । वृध+णिच्+युच् । कर्त्तरि ल्युर्वा ततष्टाप् ।) नारी । इति राजनिर्घण्टः ॥

चारुव्रता, स्त्री, (चारु व्रतमस्याः ।) मासोपवासिनी । इति त्रिकाण्डशेषः ॥

चारुशिला, स्त्री, (चारुश्चार्व्वी शिला इति नित्यकर्म्मधारयः ।) मणिः । इति त्रिकाण्डशेषः ॥

चार्च्चिक्यं, क्ली, (चर्च्चिकैव । स्वार्थे ष्यञ् ।) चन्दनादिना देहविलेपनविशेषः । इत्यमरः ॥ तत्पर्य्यायः । चर्च्चा २ स्थासकः ३ । इत्यमरः ॥ चर्च्चिक्यम् ४ । इति भरतः ॥ अपि च ।
"स्थासकः स्थायकश्चर्च्चा चर्च्चिक्यञ्च चतुष्टयम् ।
वस्त्रादौ कुङ्कुमादीनां छटादिषु निगद्यते ॥"
इति शब्दरत्नावली ॥

चार्म्मः, पु, (चर्म्मणा परिवेष्टितः इति । चर्म्म+अण् ।) चर्म्माच्छादितरथः । इति भरतः ॥ चर्म्माच्छन्नद्रव्ये त्रि ॥

चार्म्मणं, क्ली, (चर्म्मणां समूहः इति । भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ।) चर्म्मसमूहः । इत्यमरटीकायां भरतः ॥

चार्म्मिणं, क्ली, (चर्म्मिणां चर्म्मधारिणां समूहः । इति अण् ।) चर्म्मिसमूहः । इत्यमरटीकायां स्वामी ॥

चार्व्वाकः, पु, (चारुः आपातमनोरमः लोकचित्ताकर्षक इति यावत् वाकः वाक्यमस्य । ततः पृषोदरादित्वात् साधुः ।) तार्किकविशेषः । तत्पर्य्यायः । बार्हस्पत्यः २ नास्तिकः ३ लौकायतिकः ४ । इति हेमचन्द्रः ॥ स च आकाशभिन्नभूतचतुष्टयवादी । प्रत्यक्षमेकं प्रमाणमिति चार्व्वाकाः । इति न्यायसंग्रहः ॥ (यथा च सर्व्वदर्शनसंग्रहे ।"अथ कथं परमेश्वरस्य निःश्रेयसप्रदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्व्वाकेण दूरोत्सारितत्वात् दुरुच्छेदं हि चार्व्वाकस्य चेष्टितम् ॥") दुर्य्योधनसखराक्षसविशेषः । (यथा, महाभारते । १२ । ३८ । २२—२३ ।
"निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः ।
राजानं ब्राह्मणच्छद्मा चार्व्वाको राक्षसोऽब्रवीत् ॥
तत्र दुर्य्योधनसखा भिक्षुरूपेण संवृतः ।
साक्षः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः ॥")

चार्व्वी, स्त्री, (चारु+गुणवचनत्वात् ङीष् ।) कुवेरपत्नी । ज्योत्स्ना । बुद्धिः । शोभना । इति मेदिनी । वे, ६ ॥ दीप्तिः । इति शब्दरत्नावली ॥

चालः, पु, (चालयति छादयतीति । चल+णिच्+अच् णो वा । यद्वा चालयति आच्छादयत्यनेनेति । चल+णिच्+करणे घञ् ।) स्वनामख्यातगृहाच्छादनम् । तत्पर्य्यायः । पिटम् २ । इति त्रिकाण्डशेषः ॥ पटलम् ३ छदिः ४ । इत्यमरः । २ । २ । १४ ॥ कटलम् ५ । इति शब्दरत्नावली ॥ छादम् ६ । इति जटाधरः ॥ स्वर्णचूडपक्षी । इति भूरिप्रयोगः ॥

चालकः, पु, (चलति स्वेच्छयैव । चल+ण्वुल् ।) अङ्कुशदुर्द्धरहस्ती । इति त्रिकाण्डशेषः ॥

चालनं, क्ली, (चालयत्यनेनेति । चल+णिच्+करणे ल्युट् ।) चालनी । इत्यमरटीकायां भरतः ॥ (यथा, कर्म्मप्रदीपे ।
"क्षुद्रच्छिद्रसमोपेतं चालनं तितउः स्मृतः ॥"
भावे ल्युट् । प्रेरणम् । यथा, भागवते । ३ । २६ । ३७ ।
"चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ॥")

चालनी, स्त्री (चालयत्यनेनेति । चल+णिच्+करणे ल्युट् ङीप् च ।) स्वनामख्यातशस्यादिचालनपात्रम् । तत्पर्य्यायः । तितउः २ । इत्यमरः ।२।६।२६ ॥ चालनम् ३ बहुच्छिद्रा ४ । इति भरतः ॥ पाचीरः ५ । इति जटाधरः ॥

चाषः, पुं, (चषयति भक्षयति कणादिकमिति । चष+स्वार्थे णिच्+अच् । यद्वा चष्यते भक्ष्यतेऽसौ मांसाशिभिरिति । चष्+कर्म्मणि घञ् ।) स्वर्णचातकः । सोणाचड़ा इति ख्यातः । नीलकण्ठ इति क्वचित् ख्यातः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । किकीदिविः २ नीलाङ्गः ३ पुण्यदर्शनः ४ । इति राजनिर्घण्टः ॥

चासः, पु, (चाष+पृषोदरात् सत्वम् ।) चाषपक्षी । इक्षुः । इति मेदिनी । से, ३ ॥

चि, ञ चित्याम् । चयने । इति कविकल्पद्रुम ॥ (भ्वा-उभ-द्विक-अनिट् ।) ञ, चयति चयते धनं लोकः । इति दुर्गादासः ॥

चि, ञ न चित्याम् । इति कविकल्पद्रुम ॥ (स्वा-उभ-द्विक-अनिट् ।) चितिश्चयन राशीकरणमिति यावत् । न ञ, चिनोति चिनुते । इति दुर्गादासः ॥

चि, क मि चित्याम्। इति कविकल्पद्रुमः॥ (चुरां-परं-द्विकं-सेट्।) क मि, चययति चाययति। स्वमते तु चपयति चापयतीत्यपि। इति दुर्गादासः॥

चिकित्सकः, पुं, (चिकित्सति रोगमपनयतीति। कित्+"गुप्तिज्किद्भ्यः सन्।"३।१।५। इति स्वार्थे सन्+ण्वुल्।) चिकित्साकर्त्ता। (यथा, मनुः।९।२८४।
"चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः॥")
तत्पर्य्यायः। रोगहारी २ अगदङ्कारः ३ भिषक् ४ वैद्यः ५। इत्यमरः।२।६।५७॥
तस्य लक्षणं यथा, चाणक्ये।
"आयुर्व्वेदकृताभ्यासः सर्व्वेषां प्रियदर्शनः।
आर्य्यशीलगुणोपेत एष वैद्यो विधीयते॥"

चिकित्सा, स्त्री, (चिकित्सनमिति। कित् व्याधिप्रतीकारे+"गुप्तिज्किद्भ्यः सन्।"३।१।५। इति स्वार्थे सन् ततः अप्रत्ययः।) रोगप्रतीकारः। तत्पर्य्यायः। रुक्प्रतिक्रिया २। इत्यमरः।२।६।५०॥ उपचारः ३ उपचर्य्या ४ निग्रहः ५ वेदनानिग्रहः ६ क्रिया ७ उपक्रमः ८ शमः ९। इति राजनिर्घण्टः॥ चिकित्सितम् १० प्रतीकारः ११ भिषग्जितम् १२। इति रत्नमाला॥ रोगप्रतिकारः १३। इति शब्दरत्नावली॥ सा त्रिधा यथा, वैद्यके।
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता।
रसप्रधाना दैवी स्यात् छेदभेदात्मिकासुरी॥
मानुषी षड्रसा ज्ञेया जपहोमादिसंस्कृता।
कलौ चाल्पबले लोके मानुषी तत्र पूजिता॥"
तस्या लक्षणं यथा,—
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम्॥
या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्॥"
चिकित्साविधिरुपदेशो यथा,— [गदः।
"जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया
वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्।
ततः कर्म्म भिषक् पश्चाज्ज्ञानपूर्व्वं समाचरेत्॥
औषधं केवलं कर्त्तुं यो जानाति न चौषधम्।
वैद्यकर्म्म स चेत् कुर्य्याद्वधमर्हति राजतः॥
आदावन्ते दशां प्राप्ते प्रयतेत चिकित्सकः।
भेषजानां विधानेऽथ ततः कुर्य्यात् चिकित्सितम्॥
शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम्।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता।
क्रियाहीनातिरिक्ता च साध्येष्वपि न सिध्यति॥
क्रिया यास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्।
पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो मतः॥"
चिकित्साफलं यथा,—
"क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्म्मः क्वचिद्यशः।
कर्म्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला॥"*॥
चिकित्साङ्गानि यथा, भावप्रकाशे।
"रोगी दूतो भिषग्दीर्घमायुर्भैषज्यसेवकः।
सदौषधं चिकित्सायामित्यङ्गानि बुधा जगुः॥"

चिकित्सितं, क्ली, (कित्+स्वार्थे सन् ततो भावे क्तः।) चिकित्सा। इति रत्नमाला॥ (यथा, सुश्रुते सूत्रस्थाने २ अः। [तम्॥"
"यौगं चिकित्सितमित्येतत् समासेन प्रकीर्त्ति-
पर्य्याया अस्य यथा, वैद्यकरत्नमालायाम्।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम्॥"
चिकित्सत्यनेनेति। करणे क्तः। भेषजम्। अस्य पर्य्याया यथा, चरके चिकित्सास्थाने १ अः।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम्।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम्॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत्।
यद्व्याधिनिर्घातकरं वक्ष्यते तच्चिकित्सितम्॥
चिकित्सितार्थं एतावान् विकाराणां यदौषधम्।"
यथा, भागवते।१।५।३२।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्।
यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितम्॥")
कृतप्रतीकारे त्रि॥

चिकिनः, त्रि, (नि नता नासिकास्यस्य। "इनच्पिटच् चिकचि च।"५।२।३३। इति इनच् प्रकृतेश्चिकादेशश्च।) चिपिटनासिकः। इति केचित्॥

चिकिलः, पुं, (चि+बाहुलकात् इलच् कुक् च।) पङ्कः। इति हेमचन्द्रः।४।१५६॥

चिकीर्षा, स्त्री, (कर्त्तुमिच्छा इति। "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।"३।१।७। इति कृधातोः इच्छार्थकसन्प्रत्ययेन चिकीर्ष्। ततः "अ प्रत्ययात्।"३।३।१०२। इत्य।) कर्त्तुमिच्छा। इति मुग्धबोधम्॥ करिवार वाञ्छा इति भाषा। (यथा, भागवते।२।१०।२४।
"हस्तौ रुरुहतुस्तस्य नानाकर्म्मचिकीर्षया॥")

चिकीर्षुः, त्रि, (चिकीर्षतीति। कृ+सन्+"सनाशंसभिक्ष उः।"३।२।१६८। इति उः।) कर्त्तुमिच्छुः। करणेच्छाविशिष्टः। इति व्याकरणम्॥

चिकुरः, पुं, (चि इत्यव्यक्तशब्दं कुरतीति। कुरशब्दे+"इगुपधज्ञेति।"३।१।१३५। इति कः।) केशः। (यथा, राजतरङ्गिण्याम्।८।३६७।
"चिकुरनिचये यत् कौटिल्यं विलोचनयोश्च या॥")
सर्पः। (अयं हि ऐरावतकुलजातस्य सुमुखस्य पिता। यथा, महाभारते।५।१०३।२४।
"एतस्य हि पिता नागश्चिकुरो नाम मातले।।
न चिरात् वैनतेयेन पञ्चत्वमुपपादितः॥")
पर्व्वतः। पक्षिभेदः। वृक्षविशेषः। गृहबभ्रुः। तरलः। इति मेदिनी। रे, १५५॥

चिकुरः, त्रि, (चि+कुर+कः।) चपलः। स तु दोषमनिश्चित्य वधबन्धनादिकर्म्मा। इत्यमरः।३।१।४६॥

चिकुरपक्षः, पुं, (चिकुराणां केशानां पक्षः समूहः।) कचसमूहः। केशसमुदयः। इत्यमरः।२।६।९८॥

चिकुरपाशः, पुं, (चिकुराणां केशानां पाशः समूहः।) केशसमूहः। इत्यमरः।२।६।९८॥

चिकुरहस्तः, पुं, (चिकुराणां हस्तः समूहः।) केशसमूहः। इत्यमरः।२।६।९८॥

चिकूरः, पुं, (चिकुर+निपातनात् दीर्घः।) केशः। इति शब्दभेदप्रकाशः॥

चिक्क, क व्यथे। इति कविकल्पद्रुमः॥ (चुरां-परं-सक-सेट्।) कोपधः। तृतीयस्वरमध्यः। व्यथा पीडनम्। क, चिक्कयति शत्रुं शूरः। इति दुर्गादासः॥

चिक्कः, पुं, (चिक इत्यव्यक्तशब्देन कायति शब्दायते इति। चिक+कै+कः।) छुच्छुन्दरिः। इति त्रिकाण्डशेषः॥ (नि नता नासिकास्यस्येति। "इनच्पिटच्चिकचि।"५।२।३३। इत्यस्य वार्त्ति "कप्रत्ययचिकादेशौ च वक्तव्यौ।" इति कप्रत्ययो नेश्चिकादेशश्च। नतनासिके, त्रि। इति सिद्धान्तकौमुदी॥)

चिक्कणं, त्रि, (चीयते ज्ञायते इति। चित्+"चितेः कणः कश्च।" उणां।४।१७६। इति कर्म्मणि कणः कश्चान्तादेशः। बाहुलकात् गुणः।) स्निग्धमसृणादि (स्निग्धत्वमसृणत्वादिगुणवद्वस्तु।) इत्यमरः।२।९।४६॥ चिकण इति भाषा॥ (यथा, महाभारते।१२।१८४।३४।
"कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदुदारुणः॥")

चिक्कणः, पुं, (चिक्कणः स्निग्धगुणः विद्यतेऽस्य। अच्।) पूगवृक्षः। तत्फले क्ली। इति राजनिर्घण्टः॥ (औषधपाकस्यावस्थाविशेषो यथा,
"पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः॥"
इति वाभटे कल्पस्थाने षष्ठेऽध्याये॥)

चिक्कणा, स्त्री, (चिक्कणं मसृणता विद्यतेऽस्याः। अर्शआदित्वादच्। ततष्टाप्।) उत्तमा गौः। तत्पर्य्यायः। नैचिकी २। इति शब्दचन्द्रिका॥ पूगफलम्। इति राजनिर्घण्टः॥

चिक्कणी स्त्री, (चिक्कण+गौरादित्वात् ङीष्।) पूगफलम्। इति राजनिर्घण्टः॥

चिक्कसः, पुं, (चिक्कयति पीडयति चूर्णकारिणमिति। चिक्क+असच्।) यवचूर्णम्। इति हेमचन्द्रः।३।६६॥

चिक्का, स्त्री, (चिक्कयति पीडयति भोक्तारमिति। चिक्क+अच्।) पूगफलम्। इति राजनिर्घण्टः॥

चिङ्गटः, पुं, (चिङ्ग इत्यव्यक्तशब्देन अटतीति। अट गतौ+अच्। शकन्ध्वादिवत् अलोपः।) मत्स्यविशेषः। गलदाचिङ्गड़ी इति मोचाचिङ्गड़ी इति च भाषा॥ तत्पर्य्यायः। महाशल्कः २।

इति हारावली । १८७ ॥ अस्य गुणाः । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । बलवर्द्धनत्वम् । मेदःपित्तास्रनाशित्वम् । हृद्यत्वम् । रोचनत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥ (अस्य पानविधौ भक्षणनिषेधोऽस्य यथा,—

"प्रातः पानीयपाने मद्यकृषिगणितं ग्रथमेतच्च नाद्यात् ।

मांसं चीरञ्च शाकं सकलविदलकं पिष्टकं चिङ्गटञ्च ॥"

इति वैद्यक-ऋतुचर्य्यायाम् ॥)

चिङ्गटी, स्त्री, (चिङ्गट + जातौ ङीष् ।) मत्स्यविशेषः । सुषाचिङ्गडी इति भाषा ॥ अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । वातनाशित्वम् । श्लेष्मकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

चिङ्गडः, पुं, (चिङ्गट + पृषोदरादित्वात् टस्य डत्वे साधु ।) चिङ्गटमत्स्यः । इति शब्दमाला ॥ (विवरणमस्य चिङ्गटशब्दे व्याख्यातम् ॥)

चिचिण्ड', पु, फलविशेषः । चिचिण्डा इति चिचिङ्गा इति च भाषा ॥ तत्पर्य्याय' । श्वेतराजिः २ सुदीर्घः ३ गृहकूलकः ४ । अस्य गुणाः । वातपित्तनाशित्वम् । पथ्यत्वम् । बलरुचिकारित्वम् । शोषिणोऽतिहितत्वम् । पटोलतः किञ्चिद्गुणहीनत्वञ्च । इति भावप्रकाशः ॥ (यथा च हारीते प्रथमे स्थाने दशमेऽध्याये ।

"चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रद' । शोषिणोऽतिहित' किञ्चिद्गुणैर्न्यून' पटोलतः ॥")

चिञ्चा, स्त्री, (चि चयनं चिनोतीति । चि + अन्येभ्योऽपीति ड' ।) तिन्तिडीवृक्षः । इत्यमरः । २ । ४ । ४३ ॥ (यथा,—

"चिञ्चादलरसञ्चाशु पथ्यं दध्योदनं हितम् ॥"

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे गुल्माधिकारे ॥)

चिञ्ची, स्त्री, (चिञ्च + गौरादित्वात् ङीष् ।) गुञ्जा । इति केचित् ॥

चिञ्चाम्ल, क्ली, (चिञ्चा तिन्तिडी तद्वत् अम्लं यत्र ।) अम्लशाक' । इति राजनिर्घण्टः ॥

चिञ्चासारः, पु, (चिञ्चायास्तिन्तिड्याः सार इव सारोऽम्लं यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चोटकः, पुं, (चिञ्चेव अटतीति । अट + ण्वुल् । पृषोदरात् साधुः ।) तृणविशेषः । चैँचको इति चैँचडा इति च भाषा ॥ तत्पर्य्यायः । अङ्कलोद्यः २ । इति रत्नमाला ॥ चिञ्चाटकोऽपि पाठः ॥

चिट, प्रेषे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चेटति भृत्यं स्वामी । इति दुर्गादासः ॥

चिट, क प्रेषे । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ॥)

चित, ईं ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ईं, चित्तः । ज्ञानमिह जागरणम् । ज्ञानञ्च अविद्यानिद्रयाक्रान्ते जगत्येकः स चेततीति हलायुध' । चिचेत रामस्तत् लक्ष्मम् । इति दुर्गादासः ॥

चित, इ क स्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ क, चिन्तयति विद्यां सुधीः । इति दुर्गादासः ॥

चित, क ङ ज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं सकं-सेट् ।) क ङ, चेतयते । राघवस्य चेतयन्ति न । इति भट्टौ गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु चेतयते ततश्चेतं करोतीति णौ साध्यम् । इति दुर्गादासः ॥

चित्, स्त्री (चित् संज्ञाने + सम्पदादित्वात् भावे क्विप् ।) ज्ञानम् । इत्यमरः । १ । ५ । १ ॥ (यथा, भागवते । ३ । ७ । २ ।

"ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः । लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥")

चित् अ, अव्ययम् । इत्यमरः ॥ यथा । किञ्चित् कश्चित् इत्यादि ॥ (तत्तु प्रत्ययविशेषः । कालाद्यनिर्णये चित्प्रत्ययस्य प्रयोगो दृश्यते । "किम' क्रान्ताचिच्चनौ ।" इति मुग्धबोधव्याकरणप्रणेता पूज्यपादवोपदेवाचार्य्यः ॥)

चित, त्रि, (चि + कर्म्मणि क्तः ।) छन्नः । इति मेदिनी । ते, १८ ॥ (कृतचयनः । सञ्चितः । "इह वै कर्म्मचितो लोकः चीयते एवमसुत्र पुण्यचितः चीयते ।" इति श्रुतेः ॥)

चिता, स्त्री, (चीयते श्मशानाग्निरस्यां यद्वा चीयते उच्चीयतेऽसौ प्रेतस्य परलोकगमने इति । चि + अधिकरणे वा कर्म्मणि क्तस्ततष्टाप् ।) शवदाहाधारचुल्ली । तत्पर्य्यायः । चित्या २ । इत्यमरः । २।८।११७ ॥ काष्ठमठी ३ चैत्यम् ४ चिताचूडकम् ५ चित्यम् ६ । इति त्रिकाण्डशेष' ॥ चिति: ७ । (यथा, महाभारते । ३ । २१६ । १७ ।

"चिताग्निरद्रवद्दह्नाव्यं पञ्चाभ्यां तत् प्रवर्त्तते ॥")

संहतिः । इति मेदिनी । ते, १८ ॥

चिताचूडक, क्ली, (चितेव चूडकम् ।) चिता । इति त्रिकाण्डशेष' ॥

चितिः, स्त्री, (चीयतेऽस्यामग्निरिति । चि + अधिकरणे क्तिः ।) चिता । (यथा, भागवते ।४।२८।५० ।

"चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥")

समूहः । इति मेदिनी । ते, १८ ॥ दुर्गा । यथा,

"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।

महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिर्म्मता ॥"

इति देवीपुराणे ४५ अध्यायः ॥ * ॥

भित्तिश्चेष्टिकादिसङ्ख्याज्ञानार्थाङ्कविशेषः । यथा, चितौ करणसूत्रं सार्द्धवृत्तम् ।


"उच्छ्रयेण गुणित चितेः किल
चेत्रसम्भवफलं घनं भवेत् ।
इष्टिकाघनहृते घने चिते-
रिष्टिकापरिमितिश्च लभ्यते ॥
इष्टकोच्छ्रयहृदुच्छ्रितिश्चिते'
स्यु. स्तराश्च दृषदां चितेरपि ॥

उदाहरणम् ।

अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुल' । उच्छ्रितिस्त्र्यङ्गुला यस्यामिष्टिकास्ताश्चितौ किल ॥

यद्विस्तृतिः पञ्चकराष्टहस्तं
दैर्घ्यञ्च यस्यां त्रिकरोच्छ्रितिश्च ।
तस्यां चितौ किं फलमिष्टिकाना
सङ्ख्या च का ब्रूहि कतिस्तराश्च ॥

न्यासः



इष्टिकायाः घनहस्तमानम् $\frac{३}{६४}$ चितेः चेत्रफलम्४० । उच्छ्रयेण गुणितं चितेर्घनफलम्१२० । लब्धा इष्टिकासङ्ख्या २५६० । स्तरसङ्ख्या २४ । एव पाषाणचयेऽपि । इति चितिव्यवहारः ॥" इति लीलावती ॥ (इष्टाङ्गविशेषः । यथा, मार्कण्डेये । २२ । ६ ।

"चितयस्तत्र कर्णेया नान्तरिच्चगता यतः ॥")

चितिका, स्त्री, (चितिः काञ्चीभेदः सा इव कायतीति । कै + कः ।) कटिशृङ्खला । इति हारावली । २२४ ॥

चित्त, क्ली, (चेतत्यनेनेति । चित् + करणे क्तः ।) अनुसन्धानात्मिकान्तःकरणवृत्तिः । इति वेदान्तः ॥

"यत्तत् सत्वगुणं स्वच्छं शान्तं भगवतः पदम् । यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥ स्वच्छत्वमविकारित्व शान्तत्वमिति चेतसः । वृत्तिलक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥"

इति श्रीभागवतम् ॥

अस्यार्थः । "अधिभूतस्वरूपेण तस्यैव महानितिसञ्ज्ञा आध्यात्मस्वरूपेण चित्तं उपास्यरूपेण वासुदेवः अधिष्ठाता तु तस्य चेत्रज्ञ ।" इति श्रीधरस्वामी ॥ (अनेनैव चिच्छक्तेः प्रथमसम्बन्धः । अतएव भगवत्पतञ्जलिपादैरुपदिष्टं प्रथमसूत्रे "योगश्चित्तवृत्तिनिरोधः ।" तथा च मुण्डकोपनिषदि । ३ । १ । ६ ।

"एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्व्वमोतं प्रजानां
यस्मिन् विशुद्धे विभवत्येष आत्मा ॥")

मनः । इत्यमरः । १ । ४ । ३१ ॥

चित्तप्रसन्नता, स्त्री, (चित्तस्य प्रसन्नता प्रसादः ।) हर्षः । इति हेमचन्द्रः । २ । २३६ ॥

चित्तविप्लव', पु, (चित्तस्य विप्लवो विपर्य्ययः ।) उन्मादः । इति हेमचन्द्रः । २ । २३४ ॥

चित्तविभ्रमः, पु, (चित्तस्य विभ्रमः भ्रान्तिः ।) उन्मादः । इत्यमरः । १ । ७ । २६ ॥ (उन्मादशब्दे विवृतिरस्य ज्ञेया ॥)

चित्तसमुन्नति', स्त्री, (चित्तस्य समुन्नतिः समुन्नयनं उत्तेजनमिति यावत् ।) मानः । इत्यमरः । १ । ७ । २२ ॥

चित्ताभोगः, पुं (चित्तस्य आभोगः परिपूर्णता इत्यर्थः ।) एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिः । तत्पर्य्यायः । मनस्कारः २ । इत्यमरः । १ । ५ । २ ॥

चित्तोन्नतिः, स्त्री, (चित्तस्य उन्नतिः उन्नयनम् ।) गर्व्वः । इति हेमचन्द्रः । २ । २३१ ॥

चित्य, क्ली, (चीयते इति । चि + "चित्याग्निचित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः । निपातनात्तुगागमे साधुः । यद्वा, क्यप्प्रत्ययेन चिति तुगागमः ।) चिता । इति त्रिकाण्डशेषः ॥ (तज्जाते त्रि । यथा, रामायणे । १ । ५८ । ११ ।
"चित्यमाल्याङ्गरागश्च आयसाभरणोऽभवत् ॥")

चित्यः, पुं, (चीयतेऽसौ इति । चि + "चित्याग्निचित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः ।) अग्निः । इति मुग्धबोधम् ॥

चित्या, स्त्री (चीयतेऽग्निरस्यां प्रेतस्य । चि + यः निपातनात् साधुः । क्यप् वा ।) चिता । इत्यमरः । २ । ६ । ११७ ॥

चित्र, त् क चणिकेच्छणे । सोऽद्भुते । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-पर-सक-सेट् ।) चणिकेच्छणं कदाचिद्दर्शनम् । चित्रयति चित्रापयति राहुं लोकः कदाचित् पश्यतीत्यर्थः । चित्रयति प्रतिमां लोकः । इति दुर्गादासः ॥

चित्रं, क्ली, (चित्रयतीति । चित्र + कर्म्मणि अप् । यद्वा, चीयते इति । "अमिचिमिशसिभ्यः क्त्रः ।" उणां ४ । १६४ । इति क्त्रः ।) तिलकम् । आलेख्यम् । (यथा, पञ्चदश्याम् । ६ । ५ ।
"उत्तमाधमभावेन वर्त्तन्ते पटचित्रवत् ॥")
अद्भुतम् । (यथा, रामायणे । १ । १० ।
"चित्रं संक्रीडमानास्ताः क्रीडनैर्विविधैस्तथा ॥")
कर्व्वुरवर्णः । (यथा, माघे । १ । ८
"निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा ॥")
तद्युक्ते त्रि । इति मेदिनी । रे, २५ ॥ (अलङ्कारविशेषः । यथा,—
"तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ।"
सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्गमुरजपद्माकारमुल्लासयन्ति तच्चित्रं काव्यम् ॥ * ॥
अष्टिसञ्ज्ञकषोडशाक्षराष्ट्रत्तिच्छन्दोभेदः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"चित्रसञ्ज्ञमीरितं समानिकापदद्वयन्तु ।"
उदाहरणं यथा,—
"विद्रुमारुणाधरोष्ठशोभि वेणुवाद्यहृष्ट-
वल्लवीजनाङ्गसङ्गजातपुलकोत्कटाङ्ग ।।
त्वां सदैव वासुदेव । पुण्यलभ्यपाद । देव ।
वन्यपुष्पचित्रकेश । त्वां स्मरामि गोपवेश । ॥")
आकाशः । कुष्ठविशेषः । इति हेमचन्द्रः । ६ । ३४ ॥ (आश्चर्य्यान्विते, त्रि । यथा, महाभारते । १ । ७ । ३ ।
"चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ॥")

चित्रः, पुं, (चित्रयति पापपुण्ये विचार्य्य चित्रं करोति लिखतीत्यर्थः । चित्र + णिच् + अच् । यद्वा चीयन्ते उपचीयन्ते प्रेतलोका येन । चि + "अमिचिमिशसिभ्यः क्त्रः ।" उणां । ४ । १६४ । इति क्त्रः ।) यमविशेषः । यथा, तिथ्यादितत्त्वे ।
"वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥"
कर्व्वुरवर्णः । इत्यमरटीकायां भरतः ॥ (सर्पविशेषः । यथा, महाभारते । २ । ६ । ८ ।
"कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥"
धृतराष्ट्र-पुत्त्रभेदः । यथा, तत्रैव । १ । ११७ । ४ ।
"चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥")
एरण्डवृक्षः । अशोकवृक्षः । चित्रकवृक्षः । इति राजनिर्घण्टः ॥

चित्रकं, क्ली, (चित्र + स्वार्थे कन् । यद्वा चित्रमिव कायति । कै + कः ।) तिलकम् । इति मेदिनी । के, ८८ ॥ (वृक्षविशेषः । यथा, गारुडे १८७ अध्याये ।
"त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी ॥")

चित्रकः, पुं, (चित्रेण चित्र इव वा कायति । कै + कः ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ व्याघ्रभेदः । चितावाघ् इति भाषा । तत्पर्य्यायः । चित्रकायः २ उपव्याघ्रः ३ मृगान्तकः ४ शूरः ५ क्षुद्रशार्दूलः ६ चित्रव्याघ्रः ७ ॥ वृक्षविशेषः । चिता इति भाषा ॥ तत्पर्य्यायः । अग्निः २ शार्दूलः ३ चित्रः ४ पाचीकटुः ५ शिखी ६ कृशानुः ७ दहनः ८ व्यालः ९ ज्योतिष्कः १० पालकः ११ अनलः १२ दारुणः १३ वह्निः १४ पावकः १५ शम्बरः १६ पाची १७ द्वीपी १८ चित्राङ्गः १९ शूरः २० । अस्य गुणाः । अग्निसमत्वम् । पाके कटुत्वम् । शोफकफार्त्तिवातोदरार्शोग्रहणीकृमिकण्डूनाशित्वञ्च । इति राजनिर्घण्टः ॥ पाकेऽग्नितुल्यत्वम् । कुष्ठनाशित्वम् । इति राजवल्लभः ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम् ।
"चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः ।
रूक्षोष्णो ग्रहणीकुष्ठशोथार्शःकृमिकासनुत् ॥
वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तहृत् ।
विचित्रं चैत्रकं शाकं काशमर्द्दविमर्द्दितम् ॥
तप्ततैले सचार्क्षीकं पाचितं तक्रसम्भृतम् ॥"
ओषधिविशेषः । यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये ।
"पूतिकश्चित्रकः पाठा विडङ्गैलाहरेणवः ॥")
एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (चित्र + कन् ।) चित्रकारः । इति हेमचन्द्रः ॥ (मुचुकुन्दः । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः ॥"
अस्य गुणाः । शिरःपीडापित्तास्रविषनाशित्वञ्च ॥)

चित्रकण्ठः, पुं, (चित्रः चित्रितः कण्ठोऽस्य ।) कपोतः । इति जटाधरः ॥ (कपोतशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

चित्रकम्बलः, पुं, (चित्रश्चासौ कम्बलश्चेति ।) कम्बलविशेषः । दुलिचा गालिचा इत्यादि भाषा ॥ यथा, उणादिकोषे ।
"कुथः स्त्रीपुंसयोश्चित्रकम्बले पुंसि वर्हिषि ॥"

चित्रकरः, पुं, (चित्रं करोतीति । कृ + टः ।) वर्णसङ्करजातिविशेषः । पटुया इति भाषा ॥ स तु शूद्रागर्भे विश्वकर्म्मौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । रङ्गाजीवः २ । इत्यमरः । २ । १० । ७ ॥ रङ्गजीवकः ३ । इति शब्दरत्नावली ॥ वर्णी ४ वर्णाटः ५ चित्रकारः ६ । इति जटाधरः ॥ (यथा, आर्य्यासप्तशत्याम् । ३४५ ।
"चित्रकरतूलिकेव त्वां सा प्रतिभित्ति भावयति ॥")

चित्रकर्म्मा, [न्] पुं, (चित्रं कर्म्मास्य ।) तिनिशवृक्षः । इति शब्दचन्द्रिका ॥ बहुव्रीहौ आश्चर्य्यकर्म्मा चित्रकारश्च ॥

चित्रकायः, पुं, (चित्रो नानावर्णयुक्तः कायो देहो यस्य ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

चित्रकारः, पुं, (चित्रं करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चित्रकरः । (यथा महाभारते । १ । १२८ । ४० ।
"समार्ज्जितं सौधकारैश्चित्रकारैश्च चित्रितम् ॥")
अस्य उत्पत्तिविवृतिर्यथा, पराशरपद्धतौ ।
"स्थपतेरपि गान्धिक्यां चित्रकारो व्यजायत ॥"

चित्रकूटः, पुं, (चित्राणि कूटानि शृङ्गाणि यस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ पुरा रामो वनं गत्वा प्रथमे यत्र वासमकरोत् । (पर्व्वतोऽयं प्रयागक्षेत्रस्थभरद्वाजाश्रमात् सार्द्धयोजनद्वयेऽतीते पार्श्वगतायाः मन्दाकिन्याख्यायाः सरितो दक्षिणतो राजते । यदुक्तं रामायणे । २ । ९२ । १० — १२ ।
"भरतार्द्धतृतीयेषु योजनेष्वजने वने ।
चित्रकूटगिरिस्तत्र रम्यनिर्द्दरकाननः ॥
उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी ।
पुष्पितद्रुमसञ्छन्ना रम्यपुष्पितकानना ॥
अनन्तरं तत्सरितश्चित्रकूटञ्च पर्व्वतम् ।
तयोः पर्णकुटीं तात । तत्र तौ वसतो ध्रुवम् ॥")
अधुना बुन्देलखण्डाख्यदेशे कामृता इति ख्यातः ॥ (अयं हि पीठस्थानेषु अन्यतमः । अत्र च भगवती सीतारूपेण महादेवश्चन्द्रचूडरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ७० ।
"चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥"
तथा, महालिङ्गेश्वरतन्त्रे ।
"चित्रकूटे चन्द्रचूडो योगेन्द्रो विन्ध्यपर्व्वते ॥")

चित्रकृत्, पुं, (चित्रं नानावर्णं करोतीति । कृ + क्विप् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । २७ ॥ (चित्रमालेख्यं करोतीति ।) चित्रकारः । इति हलायुधः ॥

चित्रकोलः, पुं, (चित्रो विचित्रः कोलः क्रोडदेशो यस्य ।) अञ्जनिका । इति त्रिकाण्डशेषः ॥

चित्रगन्धं, क्ली, (चित्रो विचित्रो गन्धो यस्य ।) हरितालम् । इति राजनिर्घण्टः ॥

चित्रगुप्तः, पुं, (गुप रक्षणे + भावे क्तः । चित्राणां जीवकृतपापपुण्यादिविचित्राणां गुप्तं गोपनं

रचणं यस्मात्। यद्वा, चित्रं विचित्रं गुप्तं धर्म्मस्य रचणं यस्य।) चतुर्द्दशयमान्तर्गतयमः। तस्य लेखकः। इति मेदिनी। ते, १८८॥ तस्योत्पत्तिर्यथा,—

"ब्रह्मपादाद्गतः शूद्रमसीशौ द्वौ बभूवतुः।
एको मसीशः सर्व्वाख्यः सर्व्वाणीहृदयद्विजात्॥
कुलप्रदीपः स्वीयानां जातीनां पूततामृषः।
वगलेति महाविद्यां गृहीत्वा साधयन् सदा॥
सर्व्वाणीहृदयाख्यस्य पण्डितस्य प्रसादतः।
वर याचितवान् भक्त्या त्रिलोकाधिपतिं, गुरो॥
कृपया कुरु मा नाथ। त्वमेव वगला मम।
गुरुणापि वरो दत्तो राज्यं भुक्त्वा पुनर्भवान्॥
त्रिलोकाधिपतिर्भूत्वा सदा तत्र सुखिष्यति।
गुर्व्वाज्ञया मसीशः स राज्यभोगी द्विजार्च्चनात्॥
विहाय देहं भूयश्च त्रिधारूपो बभूव ह।
चित्रगुप्तश्चित्रसेनश्चित्राङ्गद इति त्रयः॥
स्वर्गे मर्त्ये च पाताले राजते चिरसत्तमः।
चित्रगुप्तो महाविद्यां प्राप्य कृष्णाख्यविप्रतः॥
पुत्रान् याचितवान्नैव गुरोर्देवत्वमावहन्।
यमान्तिकस्थो बभूवापि स्वर्मर्त्याधोविवेचकः॥
चिर शुभाशुभं कर्म्म विविच्य शमनान्तिके।
यद्वदेत् सकलानान्तु तदेवाभोजयेद्यमः॥"

इत्याचारनिर्णयतन्त्रम्॥

अस्योत्पत्त्यन्तरं कायस्थशब्दे द्रष्टव्यम्॥

चित्रजल्पः, पु, (चित्रो मनोहरो जल्पः।) वाक्यविशेषः। तल्लक्षणादिर्यथा,—

"प्रेष्ठस्य सुहृदा लोके गूढ़रोषाभिजृम्भितः।
भूरिभावमयो जल्पो यस्तीव्रोत्कण्ठितान्तिमः॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम्।
विजल्पो जल्पसंजल्पाववजल्पोऽभिजल्पितम्॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः॥
असद्भावभावैश्चित्रो चमत्कृतिसुदुस्तरः।
अपि चेच्चित्रजल्पोऽयं मनाक् तदपि कथ्यते॥
तत्र प्रजल्पः।
असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया।
प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्त्यते॥
यथा,—
मधुप। कितववन्धो। मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक्॥ १॥
अथ परिजल्पितम्।
प्रभोर्निर्दयताशाठ्यचापल्याद्युपपादनात्।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम्॥
यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक्।
परिचरति कथं तत्पादपद्मं तु पद्मा
ह्यपि वत हृतचेता उत्तमश्लोकजल्पैः॥ २॥
अथ विजल्पः।
व्यक्तयासूयया गूढ़मानमुद्रान्तरालया।
अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः॥
यथा,—
किमिह बहु षडङ्घ्रे। गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम्।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः॥ ३॥
अथोज्जल्पः।
हरेः कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया।
सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्य्यते॥
यथा,—
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः।
चरणरज उपास्ते यस्य भूतिर्वयं का
अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः॥ ४॥
अथ संजल्पः।
सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया।
तस्याकृतज्ञताद्युक्तिः संजल्पः कथितो बुधैः॥
यथा,—
विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन्॥ ५॥
अथ अवजल्पः।
हरौ काठिन्यकामित्वधौर्त्त्यादासक्त्ययोग्यता।
यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः॥
यथा,—
मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा
स्त्रियमकृतविरूपां स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः॥ ६॥
अथाभिजल्पितम्।
भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात्।
यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम्॥
यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति॥ ७॥
अथ आजल्पः।
जैह्म्यं तस्यार्त्तिदत्वञ्च निर्व्वेदाद्यत्र कीर्त्तितम्।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः॥
यथा,—
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमन्त्रिन्। भण्यतामन्यवार्त्ता॥ ८॥
अथ प्रतिजल्पः।
दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्यनुद्धतम्।
दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः॥
यथा,—
"प्रियसख। पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
सततमुरसि सौम्य। श्रीर्वधूः साकमास्ते॥ ९॥
अथ सुजल्पः।
यत्रार्ज्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम्।
सोत्कण्ठञ्च हरिः पृष्टः स सुजल्पो निगद्यते॥
यथा,—
अपि वत। मधुपुर्य्यामार्य्यपुत्त्रोऽधुनास्ते
स्मरति स पितृगेहान्। सौम्यवन्धूंश्च गोपान्।
क्वचिदपि स कथां नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्न्यधास्यत् कदा नु॥"१०॥
इत्युज्ज्वलनीलमणौ स्थायिभावः॥

चित्रतण्डुलं, क्ली, (चित्रो विचित्रस्तण्डुलो यस्य।) विडङ्गम्। इति रत्नमाला॥

चित्रतण्डुला, स्त्री, (चित्रो नानावर्णस्तण्डुलो यस्याः।) विडङ्गम्। इत्यमरः। २। ४। १०६॥ (यथास्याः पर्य्यायाः।
"पुंसि क्लीवे विडङ्गः स्यात् कृमिघ्नो जन्तुनाशनः।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

चित्रत्वक्, [च्] पुं, (चित्रा विचित्रा त्वक् यस्य।) भूर्जद्रुमः। इति राजनिर्घण्टः॥

चित्रदण्डकः, पु, (चित्रो विचित्रो दण्डो यस्य। इति कप्।) ओलद्रुमः। इति रत्नमाला॥

चित्रदेवी, स्त्री, (चित्रं दीव्यतीति। दिव् + अच्। गौरादित्वात् ङीष्।) महेन्द्रवारुणी। इति राजनिर्घण्टः॥

चित्रनेत्रा, स्त्री, (चित्रे मनोज्ञे नेत्रे यस्याः।) सारिकापक्षी। इति हारावली। ८६॥

चित्रपक्षः, पु, (चित्रौ विचित्रौ पक्षौ यस्य।) तित्तिरिपक्षी। इति जटाधरः॥

चित्रपत्रिका, स्त्री, (चित्राणि विचित्राणि पत्राणि पर्णानि यस्याः। कापि अत इत्वम्।) कपित्थपर्णीवृक्षः। इति रत्नमाला॥ द्रोणपुष्पी। इति राजनिर्घण्टः॥

चित्रपत्री, स्त्री, (चित्राणि पत्राणि यस्याः। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥

चित्रपदा, स्त्री, (चित्रं पदं यस्याः।) गोधापदीलता। इति शब्दमाला॥ छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम्॥ (चित्रं पदं वस्तुविन्यासो यस्य यत्र वा इति विग्रहे विचित्रपदयुक्ते त्रि। यथा, महाभारते। ३। ३१। १।
"वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि। त्वया वचः।
उक्तं तत् श्रुतमस्माभिर्नास्तिक्यन्तु प्रभाषसे॥")

चित्रपर्णिका, स्त्री, (चित्राणि पर्णानि पत्राणि यस्याः। कापि अत इत्वम्।) चित्रपर्णीभेदः। तत्पर्य्यायः। दीर्घा २ शृगालविन्ना ३ त्रिपर्णी ४ सिंहपुच्छिका ५ दीर्घपत्रा ६ अतिगुहा ७ घृष्ठिला ८। इति रत्नमाला॥

चित्रपर्णी, स्त्री, (चित्राणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) पृश्निपर्णी। इत्यमर,।

२ । ४ । ६२ ॥ कर्णस्फोटालता । चव्यपिप्पली । द्रोणपुष्पी । इति राजनिर्घण्टः ॥ मञ्जिष्ठा । इति रत्नमाला ॥ (यथास्याः पर्य्याया. ।
"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि । ताम्रवल्ली चित्रपर्णी काश्मीरी रक्तयष्टिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

चित्रपादा, स्त्री, (चित्रौ पादौ यस्याः ।) सारिकापक्षी । इति हारावली । ८८ ॥

चित्रपिच्छक', पु, (चित्राणि पिच्छानि पुच्छकानि यस्य । ततः कप् ।) मयूरः । इति राजनिर्घण्टः ॥

चित्रपुङ्ख , पु, (चित्रः पुङ्खो यस्य ।) शरः । इति त्रिकाण्डशेषः ॥

चित्रपुष्पी, स्त्री, (चित्राणि पुष्पाणि यस्याः । स्त्रियां ङीष् ।) अम्बष्ठा । इति राजनिर्घण्ट ॥ (विवरणमम्बष्ठाशब्देऽस्या ज्ञेयम् ॥)

चित्रपृष्ठ', पुं, (चित्रं नानावर्णं पृष्ठं यस्य ।) कलविङ्कपक्षी । इति हारावली । ८८ ॥

चित्रफल., पु, (चित्रं फलं फलक तद्वदाकृतिर्विद्यतेऽस्य । अच् ।) मत्स्यविशेषः । चितल इति भाषा ॥ अस्य गुणाः । गुरुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । दृष्यत्वम् । वलप्रदत्वञ्च । इति राजवल्लभः ॥

चित्रफलक., पु, (चित्रफल+स्वार्थे कन् ।) चित्रफलमत्स्यः । इति भूरिप्रयोग ॥

चित्रफला, स्त्री, (चित्राणि फलानि यस्याः ।) चिर्भिटा । म्गेर्व्वारु । लिङ्गिनी । महेन्द्रवारुणी । वार्त्ताकी । कण्टकारी । इति राजनिर्घण्ट ॥ मत्स्यविशेष. । फलुइ इति भाषा ॥ तत्पर्य्याय । राजग्रीवः २ फलकी ३ मद्गोन्मद ४ । इति शब्दरत्नावली ॥

चित्रभानु., पुं, (चित्रा नानावर्णा भानवो रश्मयो यस्य ।) अग्निः । (यथा, महाभारते ।२।३१।४२।
"चित्रभानु सुरेशश्च अनलस्त्व विभावसो । ॥")
सूर्य्य. । इति मेदिनी । ने, १८३ ॥ चित्रकवृक्ष । अर्कवृक्ष । वह्निसञ्ज्ञक इति अर्काङ्क इति चामरदर्शनात् ॥ भैरव' । इति शब्दरत्नावली ॥ (वर्षविशेष । यथा, वृहत्संहितायाम् ।८।३५।
"श्रेष्ठं चतुर्थस्य युगस्य पूर्व्वं
यच्चित्रभानुं कथयन्ति वर्षम् ॥")

चित्रभेषजा, स्त्री, (चित्रं भेषजं यस्याः ।) काकोडुम्बरिका । इति राजनिर्घण्टः ॥

चित्रमेखल', पुं, (चित्रा विचित्रा मेखला यस्य ।) मयूरः । इति त्रिकाण्डशेषः ॥

चित्रयोधी, [न्] पु, अर्ज्जुनवृक्ष' । इति राजनिर्घण्ट. ॥ (चित्रं यथा स्यात् तथा युध्यतीति । युध+णिनि. ।) पार्थ. ॥ (चित्रयुद्धशीले, त्रि । यथा, महाभारते । १ । १ । १८६ ।
"यदा द्रोणो विविधानस्त्रमार्गान्
निदर्शयन् समरे चित्रयोधी ॥")

चित्ररथः, पुं, (चित्रो रथो यस्य ।) सूर्य्य' । गन्धर्व्वविशेष. । इति मेदिनी । थे, २८ ॥ शेषस्य पर्य्यायः । गन्धर्व्वराजः २ अङ्गारपर्णः ३ कुवेरसखः ४ दग्धरथः ५ । (यथा, महाभारते । १ । १७१ । ३७—३८ ।
गन्धर्व्व उवाच ।
"जितोऽहं पूर्व्वकं नाम मुञ्चाम्यङ्गारपर्णताम् । न च श्लाघे वलेनाङ्ग ! न नाम्ना जनसंसदि ॥ साध्विमं लब्धवाँल्लाभं योऽहं दिव्यास्त्रधारिणम् । गान्धर्व्व्या माययेच्छामि संयोजयितुमर्ज्जुनम् ॥ अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तम । सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम् ॥")
स तु मुनिनाम्न्यां दक्षकन्यायां कश्यपौरसाज्जात. । इति महाभारते । १ । ६५ । ४३ ॥

चित्रल: पु, (चित्रमाश्चर्य्यं लातीति । ला+क. ।) कर्व्वुरवर्णः । तद्वति त्रि । इति शब्दरत्नावली ॥

चित्रलता, स्त्री, (चित्रा नानावर्णा लता ।) मञ्जिष्ठा । इति राजनिर्घण्ट' ॥

चित्रला, स्त्री (चित्रल+"अजाद्यतष्टाप् ।" ४ । १ । ४ । इति टाप् ।) गोरक्षीवृक्ष. । इति राजनिर्घण्ट ॥

चित्रलेखा, स्त्री, (चित्रो लेखो लेखनशक्तिर्यस्याः । चित्रं लेखयतीति वा । लिख+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । चित्रलेखनदक्षत्वादस्यास्तथात्वम् ।) अप्सरोविशेषः । सा ऊषाया सखी कुम्भाण्डस्य कन्या । यथा, हरिवंशे । १७४ । ७४—७५ ।
"उवाच रुदतीश्चैव कुम्भाण्डतनया सखीम् ! कुशला ते विशालाक्षि । सर्व्वथा सन्धिविग्रहे ॥ अप्सराश्चित्रलेखा वै क्षिप्रं विज्ञाप्यतां सखि ॥"
यथा, श्रीभागवते । १० । ६२ । १४ ।
"वाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता । सख्यपृच्छत् सखीमूषां कौतूहलसमन्विता ॥"
(अस्याश्चित्रलेखनपटुत्वकथा यथा हरिवंशे । १७४ । ८०—८८ ।
"चित्रलेखाब्रवीद्वाक्यमूषां हर्षयती शनै. ॥"
"देवदानवयक्षाणां गन्धर्व्वोरगरक्षसाम् । ये विशिष्टाः प्रभावेण रूपेणाभिजनेन च ॥ यथा प्रधानतः सर्व्वानालिखिष्याम्यहं सखि ! । मनुष्यलोके ये चापि प्रवरा लोकविश्रुता. ॥ सप्तरात्रेण ते भीरु ! दर्शयिष्याम्यहं प्रियम् । ततो विज्ञाय यद्दृष्टस्य भर्त्तारं प्रतिलप्स्यसे ॥ सा चित्रलेखया प्रोक्ता ऊषा स्मितचिकीर्षया । क्रियतामेवमित्याह चित्रलेखां सखीं प्रति ॥ तत' कुशलहस्तत्वात् यथा लेख्य समन्ततः । इत्युक्त्वा सप्तरात्रेण कृत्वा लेख्यगतांस्तु तान् ॥ चित्रपट्टगतान् मुख्यानानयामास शोभना ॥")
छन्दोविशेष । इति छन्दोमञ्जरी ॥ अस्य विवरणं छन्द शब्दे द्रष्टव्यम् ॥

चित्रलोचना, स्त्री, (चित्रे लोचने यस्याः ।) सारिकापक्षी । इति जटाधर' भूरिप्रयोगश्च ॥

चित्रवदाल:, पुं, (चित्रवत् आ समन्तादलति पर्य्याप्नोतीति । आ+अल+अच् ।) पाठीनमत्स्य. । इति जटाधरः ॥

चित्रवल्लिक:, पु, (चित्रा विचित्रा वल्लिर्लता । सा इव कायतीति । कै+क: ।) वदालमत्स्यः । इति हेमचन्द्र. । ४ । ४११ ॥

चित्रवल्ली, स्त्री, (चित्रा विचित्रा वल्ली लता यस्याः ।) म्गेर्व्वारुः । महेन्द्रवारुणी । इति राजनिर्घण्टः ॥

चित्रवीर्य्य', पुं, (चित्रमाश्चर्य्यजनकं वीर्य्यमस्य ।) रक्तैरण्ड: । इति राजनिर्घण्टः ॥

चित्रशिखण्डिज , पु, (चित्रशिखण्डिनोऽङ्गिरसो मुनेर्ज्जायते इति । जन+ड: ।) वृहस्पति' । इत्यमरः । १ । ३ । २४ ॥

चित्रशिखण्डिप्रसूत: पु, (चित्रशिखण्डिनोऽङ्गिरस: प्रसूत. सन्तति' ।) वृहस्पति. । इति हलायुध ॥

चित्रशिखण्डी, [न्] पुं, (चित्र' शिखण्डः शिखा अस्यस्य । "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) सप्तर्षय' । इत्यमरः । १ ।३।२७॥ यथाह भरतः ।
"मरीचिरङ्गिरा अत्रि पुलस्त्यः पुलहः क्रतु । वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः ॥"
(यथाच, महाभारते ।१२।३३५।२६—२८।
"ये हि ते ऋषय. ख्याता सप्त चित्रशिखण्डिन. । तैरेकमतिभिर्भूत्वा यत् प्रोक्तं शास्त्रमुत्तमम् ॥ वेदैश्चतुर्भिः समितं कृत मेरौ महागिरौ । आस्यैः सप्तभिरुद्गीर्णं लोकधर्म्ममनुत्तमम् ॥ मरीचिरत्र्यङ्गिरसौ पुलस्त्य' पुलह क्रतु' । वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिन' ॥")

चित्रसर्प:, पुं, (चित्र. नानावर्णरञ्जित सर्प) मालुधानसर्प । इति शब्दरत्नावली ॥

चित्रसेन ,पु,ब्रह्मपादजमसीशाख्यकायस्थस्य किञ्चगुप्तादित्रितयान्तर्गतमूर्त्तिविशेष । स तु गर्गलोकविवेचक' । यथा,—
"चित्रसेनो महाविद्यां वगलेति गुरोर्नयन् । जम्बु सन्तोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यतः ॥ राज्यं चकार सद्युक्तश्चित्राङ्गद अयो गतः ॥"
इत्याचारनिर्णयतन्त्रम् ॥
(चित्रा सेना यस्य । गन्धर्व्वविशेष' । यथा, महाभारते । २ । १० । २५ ।
"चित्रसेनश्च गीतज्ञस्तथा चित्ररथोऽपि च । एते चान्ये च गन्धर्व्वा धनेश्वरमुपासते ॥"
धृतराष्ट्रपुत्रविशेषः । यथा, महाभारते । १ । ६५ । ५७ । "तेषां धृतराष्ट्रस्य पुत्राणां चत्वार' प्रधाना बभूवु । दुर्य्योधनो दुःशासनो विकर्णश्चित्रसेनश्चेति ॥" पूरुवंशीयस्य परिक्षितः पुत्राणामन्यतम' । यथा, महाभारते । १।९४।५२ ।
"परिक्षितोऽभवन् पुत्त्रा सर्व्वे धर्म्मार्थकोविदा । कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्य्यवान् ॥"
शम्बरासुरस्य पुत्रविशेष. । यथा, हरिवंशे । १६१ । ४३ ।
"चित्रसेनोऽतिसेनश्च विश्वक्सेनजितस्तथा ॥"
नरिष्यन्तपुत्र । यथा, भागवते । ९ । २ । १९ ।
"चित्रसेनो नरिष्यन्तात् दक्षस्तस्य सुतोऽभवत् ॥")

चित्रा, स्त्री, (चित्रयति चित्रकर्म्म करोति सर्व्वगुणैः शोभते इति वा । चित्र + अच् + टाप् ।) श्रीकृष्णसखीविशेषः । यथा, उज्ज्वलनीलमणौ ।
"परमप्रेष्ठसख्यस्तु ललिता सविशाखिका ।
सचित्रा चम्पकलता तुङ्गविद्येन्दुलेखिका ।
रङ्गदेवी सुदेवी चेत्यष्टौ सर्व्वगुणाग्रिमाः ॥"
अस्याः कुञ्जः श्रीकुण्डस्य पूर्व्वस्यां आनन्दसुखदो नाम । वयः अष्टमासाधिकत्रयोदशवत्सरम् । वर्णो गौरः । अस्या वस्त्रं जातीपुष्पतुल्यम् । कर्म्म चित्रम् । इति गोस्वामिग्रन्थः ॥ * ॥ मूषिकपर्णी । गोडुम्बा । सुभद्रा । दन्तिका । (पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
"चित्रा दन्ती निकुम्भः स्यादुपचित्रा मुकूलकः ।
दाक्षायणी विशल्या च तथोडुम्बरपर्ण्यपि ॥")
माया । सर्पभेदः । नदीविशेषः । इति मेदिनी ॥ अप्सरोविशेषः । इति हेमचन्द्रः ॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्द्दशनक्षत्रम् । तत्तु मुक्तावदुज्ज्वल एकतारकामयम् । अस्य अधिष्ठात्री देवता विश्वकर्म्मा । यथा,—
"एकमौक्तिकसमुज्ज्वलप्रभे
त्वष्टरीन्दुवदने खमध्यगे ।"
इति कालिदासः ॥
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"प्रतापसन्तापितशत्रुपक्षो
दन्तो नये चापि विचित्रवासाः ।
प्रसूतिकाले यदि यस्य चित्रा
बुद्धिर्विचित्रा खलु तस्य शास्त्रे ॥"
गोर्व्वारुः । (यथा, चरके सूत्रस्थाने । १३ अः ।
"तिलः पियालाभिषुकौ विभीतकाश्चित्राभयैरण्डमधूकसर्षपाः ।
कुसुम्भविल्वारुकमूलकातसी निकोठकाक्षोडकरञ्जशिग्रुजाः ॥
स्नेहाशयाः स्थावरसंज्ञितास्तथा
स्युर्जङ्गमा मत्स्यमृगाः सपक्षिणः ॥")
गण्डदूर्व्वा । सुतश्रेणी । मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २ अध्याये ।
"चित्रासमन्वितश्चैव रुजादाहविनाशनम् ॥")
छन्दोविशेषः । इति छन्दोमञ्जरी ॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् ॥ (गायत्त्रीस्वरूपा महाशक्तिः । यथा, देवीभागवते ।१२।६।५२।
"चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी ॥")

चित्राक्षी, स्त्री, (चित्रे अक्षिणी नेत्रे यस्याः । समासे षच् स्त्रियां ङीष् ।) सारिकापक्षी । इति त्रिकाण्डशेषः ॥

चित्राक्षुपः, पु, (चित्रा मूषिकपर्णीव क्षुपः ह्रस्वशाखवृक्षः ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥

चित्राङ्ग, क्ली, (चित्रं अङ्गं यस्मात् ।) हिङ्गुलम् । हरितालम् । इति राजनिर्घण्टः ॥

चित्राङ्गः, पु, (चित्रमङ्गं यस्य ।) चित्रकः । रक्तचित्रकः । सर्पः । इति राजनिर्घण्टः ॥ (यथास्य गुणाः ।
"चित्राङ्गो वातशमनो हृद्यो वलकृन्मतः ।
श्लेष्मलः कथितो वापि दुर्ज्जरो मेदवर्द्धकः ॥"
इति हारीते प्रथमे स्थाने एकादशेऽध्याये ॥ धृतराष्ट्रपुत्त्राणामन्यतमः । यथा, महाभारते । १ । ११७ । ६ ।
"अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः ॥")

चित्राङ्गदः, पु, चन्द्रवंशीयराजविशेषः । स तु शान्तनुराजपुत्त्रः । विचित्रवीर्य्यभ्राता । (अयन्तु शान्तनुराजस्य स्वर्गगमनानन्तरं राज्यं लब्ध्वा ऐश्वर्य्यवीर्य्यमदेन शूरान् सर्व्वान् तृणवदमन्यत । अथ कदाचित् गन्धर्व्वराजचित्ररथः युद्धार्थमेनमभ्ययात् । ततः कुरुक्षेत्रमध्ये प्रवृत्ते महति युद्धे समधिकमायाबलेनानेन गन्धर्व्वराजेन निहतोऽयं कौरवप्रवीरः । इत्येषा कथा महाभारते । १। १०१ । अध्याये द्रष्टव्या ॥) गन्धर्व्वविशेषः । इति महाभारतम् ॥ (यथा, देवीभागवते । १ । २० । २२ ।
"चित्राङ्गदस्तु गन्धर्व्वो दृष्ट्वा तं मार्गगं नृपम् । उत्ततारान्तिकं भूमेर्विमानवरमास्थितः ॥")
ब्रह्मपादजमसीशाख्यकायस्थस्य चित्रगुप्तादित्रितयान्तर्गतमृत्स्यविशेषः । स अधोलोकविवेचकः । तस्याधोगमनकारणं यथा,—
"अधोगतस्य हेतुत्वं वगले । शृणु कालिके ।।
वगलेति मनुं प्राप्य विप्रः स्वामिति वाक्यया ॥
तपश्चकार पञ्चाब्दं नान्यत् किञ्चिद्गृहीतवान् ।
फलमूलादिकं किञ्चित् सायमत्ति यथा मिलेत् ॥
विहाय विप्रस्य गुरोरपि पूजाञ्च पार्व्वति ! ।
जपेन्नित्यं हि वगलामन्यविप्रञ्च नेक्षयन् ॥
ज्ञात्वेति ब्राह्मणाः सर्व्वे ऊचुश्चित्राङ्गदं क्रुधा ।
वचो हि मधुरं किञ्चित् प्रियाढ्यञ्च सुन्दरि ! ॥
रे चित्राङ्गद । अशस्तं वत्स । विप्रत्वमिच्छसि ।
कदाप्युपानन् मत्तस्थो नैवेति न हि बुध्यसे ॥
वत्स । शीघ्रमधो गच्छ चिरं कुरु तपो मुदा ॥"
चित्राङ्गदः शापं श्रुत्वा ब्राह्मणान् तुष्टाव ततो ब्राह्मणा लज्जिताः सन्तस्तमूचुः ।
"हे चित्राङ्गद । हे तात वत्स ! त्वं नोत्सव किल ।
दुश्चिन्तां कुरु मा तात भद्रं ते कथयाम भोः ॥
जनस्तपोबलेनैव सर्व्वं प्राप्नोत्यसंशयम् ।
नार्हतीशं विना तात । ब्राह्मणो भवितु किल ॥
: गम्भराज्ञा येदेऽस्ति प्रतिजानीहि तत्त्वतः ।
वर प्राप्नोति देवत्व ब्राह्मणत्व कदापि न ॥
यथामरत्वमीशेन विना क्वापि न शासने ।
नोत्सवत्वमधो गच्छ सुखेन वगलां जप ॥
कलेर्द्दशसहस्राणि नागलोकेश्वरो भव ।
ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि ॥
राज्यं भुङ्क्ष्वा[illegible] नैव पुनरावर्त्तनं तव ।
सदा वय तव शिव चिन्तयामो न भीं कुरु ॥
तान गच्छ सुखं भुङ्क्ष्व नागलोकेऽपि विस्तरात् ।
तत आनन्दमनसा गतश्चित्राङ्गदस्तलम् ॥"
इत्याचारनिर्णयतन्त्रम् ॥
(स्त्रियां टाप् । मणिपुरेश्वरस्य चित्रवाहनस्य कन्या । यथा, महाभारते । १।२१६।१५।
"तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना ॥")

चित्राङ्गदसूः, स्त्री, (चित्राङ्गदं सूते प्रसूते इति । सू ङ प्रसवे + क्विप् ।) सत्यवती । सा व्यासमाता । इति त्रिकाण्डशेषः ॥

चित्राङ्गी, स्त्री, (चित्रमङ्गं यस्याः । स्त्रियां ङीष् ।) मञ्जिष्ठा । कर्णजलौकाः । इति राजनिर्घण्टः ॥

चित्राटीरः, पुं, (चित्रां नक्षत्रविशेषं अटतीति । अट गतौ + बाहुलकात् ईरच् ।) चन्द्रः । (चित्रं तिलकं अटति गच्छति प्राप्नोति वलिच्छागासृग्विन्दुभिरित्यर्थः । अट + ईरच् ।) घण्टाकर्णः वलिच्छागासृग्विन्दुभिरङ्कितभालः । इति मेदिनी । रे, २६३ ॥

चित्रापूपः, पु, (चित्रो विचित्र आपूपः पिष्टकः ।) पिष्टकभेदः । चिताइ पिटा इति भाषा ॥ तत्पर्य्यायः । चरुव्रणः २ । इति त्रिकाण्डशेषः ॥

चित्रायसं, क्ली, (चित्रमायसं लोहम् ।) तीक्ष्णलोहम् । इति राजनिर्घण्टः ॥

चित्रिकः, पुं, (चित्रा नक्षत्रविशेषः सा पौर्णमास्यामस्यस्य । चित्रा + ठञ् ।) चैत्रमासः । इति शब्दरत्नावली ॥

चित्रिणी, स्त्री, (चित्रं विचित्रतास्त्यस्याः । चित्र + इनि + ङीप् ।) पद्मिन्यादिचतुर्व्विधस्त्रीमध्ये स्त्रीविशेषः । सा मीनगन्धा । तस्या लक्षणं यथा । रतिमञ्जर्य्याम् । ४ ।
"भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा
तिलकुसुमसुनासा स्निग्धदेहोत्पलाक्षी ।
कठिनघनकुचाढ्या सुन्दरी सा सुशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा ॥"
(इयं हि मृगजातीयपुरुषं लब्ध्वा सन्तुष्टा भवति । यदुक्तं तत्रैव । ८ ।
"शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम् ।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥"
अस्या रतिकरणप्रकारमाह तत्रैव । २६ ।
"शीत्कार चुम्बनं पीडा गले हस्ते च चुम्बनम् ।
क्षणे क्षणे स्तने हस्तं चित्रिणीरतिमादिशेत् ॥")

चित्रेशः, पु, (चित्रा नक्षत्रविशेषस्तस्या ईशः पतिः ।) चन्द्रः । इति शब्दचन्द्रिका ॥

चित्रोक्तिः, स्त्री, (चित्रा आश्चर्य्यकरी उक्तिर्वाणी ।) आकाशवाणी । इति त्रिकाण्डशेषः ॥ आश्चर्य्यकथनञ्च ॥

चित्रौदनं, क्ली, (चित्रमोदनम् ।) विचित्रान्नम् । इति ग्रहयज्ञतत्त्वम् ॥

चिद्रूपः, त्रि, हृदयालुः । इति भूरिप्रयोगः । (चित् ज्ञानमेव रूपं यस्य ।) ज्ञानमयः । यथा । चिद्रूपे परमात्मनीति योगशास्त्रम् ॥

चिन्ता, स्त्री, (चिन्तनमिति । चिति चिन्तायाम् + "चिन्तिपूजिकथिकुम्बिचर्च्चश्च ।" ३ । १०५ । इति अङ् ।) चिन्तना । चिन्तनम् । तत्पर्य्यायः । स्मृतिः २ आध्यानम् ३ । इत्यमरः । १ । ७ । २९ ॥ आध्या ४ ध्यानम् ५ चिन्तितिः ६ । इति शब्दरत्नावली ॥ चिन्तिया ७ । इति रभसः ॥ (यथाह कश्चित् ।

"चिन्ता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी।
चिता दहति निर्जीवं चिन्ता हि जीवितन्तथा॥")
इत्यसम्भोगयोः प्रकारभावना। इति रस-मञ्जरी॥ (सा च व्यभिचारिभावविशेषः। यथा साहित्यदर्पणे। ३। १७०। [इत्]॥")
"ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत्।"

चिन्तामणिः, पुं, (चिन्तायां सर्व्वकामप्रदो मणिरिव। शाकपार्थिववादित् समासः। यद्वा, चिन्तया ध्यानधारणादिना मण्यते ज्ञायते इति। मण+इन्।) ब्रह्मा। इति शब्दरत्नावली॥ (चिन्ता एव मणिरिव यस्य। चिन्ताशीलत्वादेवास्य तथात्वम्।) बुद्धविशेषः। इति त्रिकाण्डशेषः॥ मणिविशेषः। यथा, भट्टिः।
"सामर्थ्यसम्पादितवाञ्छितार्थ-
श्चिन्तामणिः स्यान्न कथं हनूमान्॥"
स्पर्शमणिः। तथा च।
"यथा चिन्तामणिं स्पृष्ट्वा लौहं काञ्चनतां भजेत॥"
इति माग्नोत्तरखण्डम्॥
(अश्वविशेषः। यथा, नकुलकृताश्वचिकित्सिते। ४। १६।
"कण्ठे यस्य महावर्त्त एकोऽश्वस्य प्रजायते।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवर्द्धनः॥")

चिन्तावेश्म, [न्] क्ली, (चिन्तायाः मन्त्रणादेर्व्वेश्म गृहम्।) मन्त्रणागृहम्। तत्पर्य्यायः। दाम्नटम् २। इति हारावली। १६८॥

चिन्तिड़ी, स्त्री, (तिन्तिड़ी। पृषोदरादित्वात् तस्य चत्वम्।) तिन्तिड़ी। इति द्विरूपकोषः॥ इति कश्चित्॥

चिन्तितं, त्रि, (चिति+कर्म्मणि क्तः।) कृतचिन्तनम्। यथा,—
"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति।"
इत्युद्भटः॥
कर्त्तरि क्ते चिन्तायुक्तः। भावे क्ते चिन्ता॥

चिन्तितिः, स्त्री, (चिन्त+भावे क्तिच् इट् च।) चिन्ता। इति शब्दरत्नावली॥

चिन्तिया, स्त्री, चिन्ता। इति त्रिकाण्डशेषः॥

चिन्नः, पुं, शस्यविशेषः। इति शब्दचन्द्रिका॥ चिना इति भाषा॥ (चीनशब्दे विशेषोऽस्य ज्ञातव्यः॥)

चिपिटः, पुं, (चयतीति। चि+बाहुलकात् पिटच् स च कित्।) भक्ष्यद्रव्यविशेषः। चिड़ा। इति भाषा॥ तत्पर्य्यायः। पृथुकः २। इति हेमचन्द्रः। ३। ६५॥ चिपिटकः ३। इत्यमरः॥ चिपुटः ४। इति भरतः॥ धान्यचमसः ५। इति त्रिकाण्डशेषः॥ चिपीटकः ६। इति शब्दरत्नावली॥ अस्य गुणाः। गुरुत्वम्। स्निग्धत्वम्। बृंहणत्वम्। कफवर्द्धकत्वञ्च॥ क्षीरयुक्तस्य तस्य गुणाः। बलकारित्वम्। वायुनाशित्वम्। मलभेदकत्वञ्च। इति राजवल्लभः॥ वृष्यत्वम्। पथ्यत्वञ्च। तस्य लक्षणं यथा, भावप्रकाशे पूर्व्वखण्डे द्वितीये भागे।

"शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः।
कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि॥"
"शालेया यावनालाद्याश्चिपिटाः पृथुसंज्ञकाः॥"
इति राजनिर्घण्टः॥
तस्य भक्षणविधिनिषेधौ यथा,—
"द्विःस्विन्नमन्नं पृथुकं गुडं देवविशेषके।
नात्यन्तशस्तं विप्राणां भक्षणे च निवेदने॥
अभक्ष्य यतीनाञ्च विधवानां व्रतचारिणाम्॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥
(नि नता नासिका विद्यतेऽस्य। "इनच्पिटच्चिकचि च।" ५। २। ३३। इति पिटच् प्रकृतेश्चिरादेशश्च। नतनासिके त्रि। यथा, विश्वकर्म्मप्रकाशे। १३। २।
"दिग्वक्त्रं चिपिटस्यैव यद्गृहं सुरवन्धया॥"
इत्यस्य फलमाह तत्रैव। ५म श्लोके।
"गुणहीनञ्च चिपिटं धनधान्यसदर्शनम्॥"
चिपिटाकारसुखादौ च। यथा, काशीखण्डे। ७०। १४।
"वक्त्रो हस्वश्च चिपिटः सुसखीभाग्यभञ्जकः॥"
"चिपिटः चिप्पिटकाकारः।" इति तट्टीका॥)

चिपिटकः, पुं, (चिपिट+स्वार्थे कन्।) चिपिटः। इत्यमरः। २। ९। ४७॥ (स्त्रियां टाप्। नतनासिका॥)

चिपिटा, स्त्री, गुल्माखिनीद्वयम्। इति राजनिर्घण्टः॥ (चिपिटा चिपिटाकारा इति। चिपिट+टाप्। चिपिटमूर्त्तिः। यथा, काशीखण्डे। ३७। १६। "चिपिटाभिर्भवेद्दासी॥")

चिपुटः, पुं, (चिपिट+पृषोदरादित्वात् साधुः।) चिपिटकः। इति भरतधृतरुद्रकोषः॥

चिप्पः, पुं, (चिकति पीड़यति अङ्गुलिमिति। चिक+अच्। निपातनात् कस्थाने पागमे साधुः।) नखरोगविशेषः। आङ्गुलहाड़ा इति भाषा॥ तल्लक्षणं यथा,—
"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
करोति दाहपाकौ च त व्याधिं चिप्पमादिशेत्॥"
अथ कुनखस्य लक्षणमाह।
"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः।
भवेत्तं कुनखं विद्यात् कुणीरं वा विधानतः॥"
अथ तयोश्चिकित्सा।
"चिप्पं रुधिरमोक्षेण शोधनेनाप्युपाचरेत्।
गतोष्माणमथैनन्तु सेचयेदुष्णवारिणा।
शस्त्रेणापि यथायोग्यसुत्कृत्य स्रावयेत्ततः॥
व्रणोक्तेन विधानेन रोपयेत्तं विचक्षणः।
खरसेन हरिद्रायाः पात्रे कलायसेऽभयाम्॥
घृष्ट्वा तत्केन कल्केन लिम्पेच्चिप्पं पुनः पुनः।
काञ्जिर्यां सम्भिः पत्रैः कोमलैः परिवेष्टितः॥
अङ्गुलीवेष्टकः पुंसां ध्रुवमाशु प्रशाम्यति।
दोषविदग्धिकस्येव कुनखं समुपाचरेत्॥
नखकोटिप्रविष्टेन टङ्कणेन प्रशाम्यति।
कुनखश्चेत्सदा शैलं सलिले स्रवतेऽपि च॥"
इति भावप्रकाशे मध्यखण्डे ४र्थे भागः॥
(लक्षणान्तरमस्य यथा,—
"कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम्।
चिप्पमक्षतरोगञ्च विद्यादुपनखञ्च तम्॥"
इति वाभटेनोत्तरस्थाने ३१ अध्याये उक्तम्।
चिकित्सितमस्य यथा,—
"चिप्पं शुद्धा जितोष्माणं साधयेत् कुनखं कर्म्मणा॥"
इत्युत्तरस्थाने द्वात्रिंशोऽध्याये वाभटेन चोक्तम्॥)

चिमिः, पुं, (चिनोति सञ्चिनोति मनुष्यजातिवद्वाक्यानीति। चि+बाहुलकात् मिक्।) शुकपक्षी। इति शब्दमाला॥

चिमिकः, पुं, (चिमि+स्वार्थे कन्।) शुकपक्षी। इति शब्दरत्नावली॥

चिर, व्य, (चि+बाहुलकात् रक्।) दीर्घकालः। तत्पर्य्यायः। चिराय२ चिररात्राय३ चिरस्य४। इत्यमरः॥ चिरेण५ चिरात्६ चिरे७। इति भरतः॥ चिरम्८। इति शब्दरत्नावली॥ (यथा मनुः। ४। ६०।
"नैकः प्रपद्येताध्वानं न चिरं पर्व्वते वसेत्॥)

चिरकारी, [न्] त्रि, (चिरं व्याप्य करोतीति। कृ+णिनिः।) चिरक्रियः। (यथा, महाभारते। १२। २६४। ३।
"चिरकारी हि मेधावी नापराध्यति कर्म्मसु॥")
गौतमस्य पुत्रभेदः। अस्य निरुक्त्यादिकं यदुक्तं महाभारते। १२। २६५। ४-५।
"चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः।
चिरेण सर्व्वकार्य्याणि विमृश्यार्थान् प्रपद्यते॥
चिरं सञ्चिन्तयन्नर्थांश्चिरं जाग्रत् चिरं स्वपन्।
चिरं कार्य्याभिपत्तिश्च चिरकारी तथोच्यते॥")

चिरकालः, पुं, (चिरः काल इति कर्म्मधारयः।) दीर्घकालः। तत्पर्य्यायः। दीर्घरात्रम् २। इति त्रिकाण्डशेषः॥

चिरक्रियः, त्रि, (चिरं व्याप्य क्रिया यस्य।) चिरकालेन क्रियाकारकः। तत्पर्य्यायः। दीर्घसूत्रः। इत्यमरः। ३। १। १७॥

चिरजीवकः, पुं, (चिरं जीवतीति। जीव+ण्वुल्।) जीवकवृक्षः। इति जटाधरः॥

चिरजीवी, [न्] पुं, (चिरं जीवतीति। जीव+णिनिः।) विष्णुः। काकः। इति मेदिनी॥ जीवकवृक्षः। शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ मार्कण्डेयः। अश्वत्थामा। बलिः। व्यासः। हनूमान्। विभीषणः। कृपः। परशुरामः। इति तिथ्यादितत्त्वम्॥ बहुकालजीविनि त्रि। इति जटाधरः॥ (यथा, रामायणे। २। १। ३६।
"अथ राज्ञो बभूवैवं वृद्धस्य चिरजीविनः॥")

चिरञ्जीवी, [न्] पुं, (चिरं जीवतीति। जीव+णिनिः।) विष्णुः। काकः। इति हेमचन्द्रः। ४। ३८८॥ जीवकवृक्षः। शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ चिरजीविनि त्रि॥

चिरण्टी, स्त्री, (चिरात् चिरेण वा अटति पितृगृहादिति। अट+अच्। "वयसि प्रथमे।" ४। १। २०। इति ङीप्। सत पृषोदरात् साधुः।) स्ववासिनी। ऊढ़ा अनूढ़ा वा पितृ-

गेहस्थिता कन्या। द्वितीयवयाः स्त्री। सा च युवती। इति भरतधृतरुद्रः हेमचन्द्रश्च ॥

चिरतिक्तः, पुं, (चिरं चिरात् वा चिरावधीत्यर्थः तिक्तः।) वृक्षविशेषः। चिरता इति भाषा ॥ तत्पर्य्यायः। चिरातिक्तः २ तिक्तकः ३ अनार्य्यतिक्तकः ४ किराततिक्तः ५ भूनिम्बः ६ किरातक ७ सुतिक्तक ८। इति शब्दरत्नावली ॥ (भूनिम्बशब्दे विवरणमस्य ज्ञातव्यम् ॥)

चिरत्नः, त्रि, (चिर + "चिरपरुत्परारिभ्यस्त्नो वक्तव्यः।" ४।३।२३। सूत्रस्य वार्त्तिकोक्त्या त्नप्रत्ययः।) पुरातनः। चिरकालोत्पन्नः। इति जटाधरः ॥

चिरन्तनः, त्रि, (चिरं भव इति। "सायंचिरमिति।" ४।३।२३। इति ट्युल् तुट् च। निपातनात् साधुः।) पुरातनः। इत्यमरः।३।१।७७॥ (यथा, पञ्चतन्त्रे।१।८०। "अयमस्माकं चिरन्तनो मन्त्रिपुत्त्रो दमनकोऽव्याहतप्रवेशः ॥" पुं, मुनिविशेषः। यथा, सिद्धान्तकौमुद्याम्।४।३।१०५। इत्यस्य वार्त्तिके। "ब्राह्मणेषु पुराणेन चिरन्तनेन मुनिना ॥")

चिरपाकी, [न्] पुं, (चिरेण पाकोऽस्यस्य। पाक + इनि।) कपित्थः। इति राजनिर्घण्टः ॥

चिरपुष्पः, पुं, (चिराणि पुष्पाणि यस्य।) वकुलवृक्षः। इति राजनिर्घण्टः ॥

चिरम्, व्य, (चि + रमुक्।) चिरार्थम्। दीर्घकालार्थम्। तत्पर्य्यायः। चिराय २ चिररात्राय ३ चिरस्य ४ चिरात् ५ चिरेण ६। इति हेमचन्द्रः।६।१६८॥ (यथा, रघौ।३।६२।
"तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः ॥")

चिरमेही, [न्] पुं, स्त्री, (चिरेण मेहतीति। मिह + णिनिः।) गर्द्दभः। इति हेमचन्द्रः।४।३२२॥

चिरभणः, पुं, (चिरं भणति क्रोशतीति। चिरं + भण + अच्।) चिल्लः। इति त्रिकाण्डशेषः ॥

चिररात्रं, क्ली, (चिरा रात्रिरिति योगविभागात् अच् समासे।) दीर्घकालः। इति हलायुधः ॥ (यथा, महाभारते।१।१६८।३।
"चिररात्रोषिताः स्मेह ब्राह्मणस्य निवेशने ॥")

चिररात्राय, व्य, (चिररात्रं अयते इति। अय + "कर्म्मण्यण्।" ३।२।१। इत्यण्।) दीर्घकालः। इत्यमरः।३।४।१४॥ (यथा, मनुः।३।२६६।
"हविर्यच्चिररात्राय यच्चानन्त्याय कल्प्यते।
पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः ॥")

चिरविल्वः, पुं, (चिरं विलति आच्छादयति पत्रकण्टकादिभिरिति। विल आच्छादने + वः।) करञ्जवृक्षः। इत्यमरः।२।४।४७॥ (यथा,—
"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतकङ्कगृध्राणां पुरीषाणि च दारुणम् ॥"
इति सुश्रुते सूत्रस्थाने षट्त्रिंशेऽध्याये ॥)

चिरसूता, स्त्री, (चिरं सूता या सा।) चिरप्रसूता गवी। केलेनु गाइ इति भाषा। तत्पर्य्यायः। वष्कयनी २। इत्यमरः।२।९।७१॥

चिरस्थायी, [न्] त्रि, (चिरं तिष्ठतीति। स्था + णिनिः।) बहुकालस्थाता ॥

चिरस्य, व्य, (चिरमस्यते इति। अस् + यत्। शकन्ध्वादित्वात् साधुः।) दीर्घकालः। इत्यमरः।३।४।१॥ (यथा, हरिवंशे।१२६।२३।
"चिरस्य खलु कालेन संस्मृतोऽसि महात्मना ॥")

चिराटिका, स्त्री, (चिरं अटतीति। अट + ण्वुल् कापि अत इत्वञ्च।) श्वेतपुनर्नवा। इति रत्नमाला ॥ पाताडी इति भाषा ॥ यथा, वैद्यके।
"गोमूत्रयुक्तस्य पुरातनस्य
यद्वायसस्तानि चिराटिकायाः ॥"

चिरात्, व्य, (चिरं अततीति। अत् + क्विप्।) दीर्घकालः। इति हेमचन्द्रः।६।१६८॥ (यथा, पञ्चतन्त्रे।४।७८। "भो भगिनीसुत। किमिति चिराद्दृष्टोऽसि ॥")

चिरात्, पुं (चिरं चिरेण वा अत्ति। अद् + क्विप्।) गरुडः। इति त्रिकाण्डशेषः ॥

चिरातिक्तः, पुं, (चिरं आतिक्तः।) चिरतिक्तः। इति शब्दरत्नावली ॥

चिराय, व्य, (चिरं अयते। अय + अण्।) दीर्घकालः। इति हेमचन्द्रः।६।१६८॥ (यथा, महाभारते।१३।६४।१०।
"पुरा धर्म्मो वर्त्तते नेह यावत्
तावद्गच्छामः सुरलोकं चिराय ॥")

चिरायुः, [स्] पुं, (चिरमायुर्यस्य।) देवता। इति त्रिकाण्डशेषः ॥ चिरजीविनि त्रि। यथा,
"भवति यदि मनुष्यो गुर्व्वधीनश्चिरायुः ॥"
इत्यागमः ॥
(यथा च पञ्चतन्त्रे।५।३४।
"यदि विस्तारविस्तीर्णं तद्भवेन्न चिरायुषम् ॥")

चिरि, र न हिंसे। इति कविकल्पद्रुम ॥ (स्वां-परं-सक-सेट्।) रेफोपधः। र वैदिकः। न, चिरिणोति। इति दुर्गादास ॥

चिरि', पुं, (चिनोति मनुष्यवद्वाक्यादिकम्। चि + रिक्।) शुकपक्षी। इति त्रिकाण्डशेषः ॥

चिरिण्टी, स्त्री, (चिरण्टी + पृषोदरात् साधुः।) ऊढा अनूढा वा पितृगृहस्थिता कन्या। तत्पर्य्यायः। सुवासिनी। इत्यमरः।२।६।९॥ चिरण्टी ३ सुवासिनी ४। इति भरतः ॥ द्वितीयवयाः स्त्री। युवती। इति मेदिनी ॥

चिरिविल्वः, पुं, (चिरविल्व'। पृषोदरादित्वात् साधुः।) चिरविल्वः। करञ्जवृक्षः। इत्यमरटीकायां भरतः ॥

चिरु, स्त्री, (चिञ् चयने + क्विप्। चि चयनं ग्रहणमित्यर्थः रातीति। रा + म्टगय्वादयश्चेति कुः। बाहुसन्धिबलमाश्रित्यैव ग्रहणक्रियासम्भवात् तथात्वम्।) बाहुसन्धिः। इति शब्दचन्द्रिका ॥

चिरे, व्य, चिरम्। इत्यमरटीकायां रायमुकुटः ॥

चिरेण, व्य, चिरम्। इति हेमचन्द्रः ॥ (यथा, रघुः।५।६४।
"भावावबोधकलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव ॥")

चिर्भटी, स्त्री, (चिरेण भटतीति। भट + अच्। गौरादित्वात् ङीष्। पृषोदरादित्वात् साधुः।) कर्कटी। इति हेमचन्द्रः।४।२५५॥ (यथा, पञ्चतन्त्रे।१।१६७। "अहो अविवेकोऽस्मद्भूपतेर्यः पुरीषोत्सर्गमाचरश्चिर्भटीभक्षणं करोति ॥")

चिर्भिटा, स्त्री, कर्कटीभेदः। चिभिडा इति वेलसेद इति च देशान्तरीयभाषा ॥ तत्पर्य्यायः। सुचित्रा २ चित्रफला ३ चैत्रचिर्भिटा ४ पाण्डुफला ५ पथ्या ६ रोचनफला ७ चिर्भिटिका ८ कर्कचिर्भिटा ९। इति राजनिर्घण्टः ॥ चिर्भिटम् १० घेनुदुग्धम् ११ गोरक्षकर्कटी १२। अस्या गुणाः। मधुरत्वम्। रूक्षत्वम्। गुरुत्वम्। पित्तकफापहत्वम्। अनुष्णत्वम्। ग्राहित्वम्। विष्टम्भित्वञ्च ॥ पक्वाया अस्या गुणाः। उष्णत्वम्। पित्तलत्वञ्च। इति भावप्रकाशः ॥ गौल्यत्वम्। दीपनत्वञ्च ॥ बालाया अस्या गुणाः। तिक्तत्वम्। किञ्चिदम्लत्वञ्च। शुष्कायास्तस्या गुणाः। श्लेष्मवातारुचिजाड्यनाशित्वम्। रोचनत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः ॥ (क्वचित् पुलिङ्गेऽपि दृश्यते ॥)

चिल, श वासे। इति कविकल्पद्रुमः ॥ (तुदा-परं-सकं-सेट्।) वासः परिधानम्। श, चिलति वस्त्रं लोकः परिदधातीत्यर्थः। चेलिता। इति दुर्गादासः ॥

चिलमीलिका, स्त्री, (चिरं मीलतीति। मील सङ्कोचे + ण्वुल्। सतत्यापि अत इत्वम्। रस्य लत्वे साधुः।) कण्ठीभेदः। खद्योतः। विद्युत्। इति मेदिनी। के, २२८॥

चिलिचिमः, पुं, (चिरि हिंसां चिनोतीति। चिरि + चि + मक्। रस्य लत्वम्।) मत्स्यविशेषः। बालियागडक इति ख्यातः। इक्षाक इत्येके। इति भरत' ॥ तत्पर्य्यायः। नलमीनः २। इत्यमरः।१।१०।१८॥ तलमीनः ३ चिलीचिमि ४ चिलीचिम' ५ चिलिचीम ६ चेलिचीमः ७ चिलीमः ८ चिलिमीनकः ९ चिलिचीमिः ११ कवल ११ विलोटकः १२। इति भरतधृतकोषान्तरम् ॥ चेङ्गो इति ख्यातो मत्स्य'। तस्य गुणाः। लघुत्वम्। रूक्षत्वम्। अनभिष्यन्दित्वम्। वायुकारित्वम्। कफनाशित्वञ्च। इति राजवल्लभः ॥

चिल्ल, शैथिल्ये। हावकृतौ। इति कविकल्पद्रुम ॥ (भ्वां-पर-अक-सेट्।) ह्रस्वी लद्वयान्त। चिल्लति चेचिल्लते। इति दुर्गादास ॥

चिल्लः, पुं, (चिल्लति हावभावेन उड्डीयते इति। चिल्ल + अच्।) पक्षिविशेष'। चिल् इति भाषा ॥ तत्पर्य्याय.। आतायी २। इत्यमरः।२।५।२१॥ शकुनिः ३ आतापी ४। इति हेमचन्द्र' ॥ खभान्ति ५ कण्ठनीडक, चिरभण' ७। इति त्रिकाण्डशेष ॥ (यथा, विष्णुधर्म्मोत्तरे।

"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च ॥"
क्लिन्ने चक्षुषी यस्य । "क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी ।" ५ । २ । ३३ । इत्यस्य वार्त्ति इति चिलादेशो लच्प्रत्ययश्च ।) क्लिन्नचक्षु । क्लिन्ननेत्रयुक्ते त्रि । इति मेदिनी । ले, १६ ॥

चिल्लिका, स्त्री, (चिल्ल इव कायतीति । कै+कः ।) झिल्लिका । इति शब्दरत्नावली ॥

चिल्लभक्ष्या, स्त्री, (चिल्लस्य भक्ष्या भक्षणीया ।) छद्दविलासिनी । इति शब्दचन्द्रिका ॥

चिल्लाभ, पु, (प्रसह्य हारकत्वात् चिल्ल इव आभातीति । आ+भा+क ।) प्रसह्यचौर । इति त्रिकाण्डशेष ॥ हातर्छे चड़ इति गाँटिकाटा इति च भाषा ॥

चिल्ली, स्त्री, (चिल्लति हाव करोति चिल्ल्यतेऽनेन वा । चिल्ल+इन् । ततो वा ङीष् ।) लोध्रः । पत्रशाकभेदः । तत्पर्य्यायः । चिल्लिका २ हुली ३ अग्रलोहिता ४ मृदुपत्री ५ क्षारदला ६ क्षारपत्रा ७ वास्तुकी ८ महद्दला ९ गौरवास्तुकः १० । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"सतीनो वास्तुकश्चुञ्चू चिल्ली मूलकपोतिका ।
मण्डूकपर्णी जीवन्ती शाकवर्गो प्रशस्यते ॥")
अस्य गुणाः । वास्तुकतुल्यत्वम् । क्षारत्वम् । श्लेष्मपित्तप्रमेहमूत्रकृच्छ्रनाशित्वम् । पथ्यत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥
("तद्वच्चिल्ली तु विज्ञेया वातपित्तविकारिणाम् ॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥)
झिल्लिका । इति शब्दरत्नावली ॥

चिविः, पुं, (चीयते आदराय गृह्यते इति । चीव ग्रहणे+"सर्व्वधातुभ्य इन् ।" उणा ४ । ११७ । इति इन् । पृषोदरादित्वात् ह्रस्व ।) चिबुकम् । इति जटाधरः ॥

चिविट , पुं, (चिपिट निपातनात् पस्य वः ।) चिपिटः । इत्यमरटीका ॥

चिविल्लिका, स्त्री, क्षुद्रक्षुपविशेष । तत्पर्य्याय । रक्तदला २ क्षुद्रघोली ३ मधुमालपत्रिका ४ । अस्या गुणा । कटुत्वम् । कषायत्वम् । जीर्णे ज्वरे अतिहितत्वम् । रसायनत्वञ्च । इति राजनिर्घण्ट ॥

चिवु , पु, (चीयते आदरादर्थं गृह्यतेऽसौ । चीव +"मृगय्वादयश्च ।" उणा । १ । ३८ । इति कुप्रत्ययेन साधु ।) चिवुकम् । इति भरत ॥

चिवुक, क्ली, (चिवु+स्वार्थे कन् । अभिधानात् क्लीवत्वम् ।) अधराधोभागः । इत्यमर । २ । ६ । ९० ॥ थुँति इति दाड़ि इति च भाषा ॥
(यथा, हठयोगप्रदीपिकायाम् । १ । ४६ ।
"उत्तम्भ्य चिवुकं वक्षस्युत्थाप्य पवनं शनैः ॥")

चिवुक , पु (चिवुरिव कायतीति । कै+क ।) मुचुकुन्दवृक्ष । इति राजनिर्घण्ट ॥

चिह्न, लक्षणे । (अदन्तचुरा-पर-सकं-सेट ।) सौत्रचुरादिरिति दुर्गा । इत्यमरटीकायां भरत ॥

चिह्नं, क्ली, (चिह्न्यतेऽनेनेति । चिह्न लक्षणे+करणे घञ् ।) चिह्न्यते येन तत् । चिना इति दाग इति च भाषा ॥ तत्पर्य्यायः । कलङ्कः २ अङ्कः ३ लाञ्छनम् ४ लक्ष्म ५ लक्षणम् ६ लिङ्गम् ७ । इत्यमरः । १ । ३ । १७ ॥ लक्ष्माणः ८ । इति भरतः ॥ अभिज्ञानम् ९ । इति जटाधरः ॥ (यथा, भागवते । ४ । १५ । ९ ।
"वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ।
पादयोररविन्दञ्च तं वै मेने हरेः कलाम् ॥")
पताका । इति मेदिनी । ने, ४ ॥

चिह्नकारी, [न्] त्रि, (चिह्नं करोतीति । कृ+णिनिः ।) घोरदर्शनः । विघाती । इति विश्वः ॥

चिह्नधारिणी, स्त्री, (चिह्नं धरति धारयतीति वा । धृ+णिनि स्त्रियां ङीप् ।) श्यामालता । इति शब्दचन्द्रिका ॥

चिह्नितः, त्रि, चिह्न+कर्म्मणि क्तः । चिह्नयुक्तः । अङ्कितः । लक्षित । (यथा मनु । १० । ५५ ।
"दिवा चरेयु. कार्य्यार्थं चिह्निता राजशासनैः ॥")

चीक, कि मर्शने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सक-सेट् ।) कि, चीकयति चीकति । मर्शनं स्पर्शः । तथा च । चन्द्रावतीतरङ्गाङ्गाश्चीकयन्ति च यद्वपुरिति हलायुध. । वायव, स्पृशन्तीत्यर्थः । भट्टमल्लस्तु मर्षणे इति मूर्द्धन्यषमध्यं पठित्वा क्षमार्थमाह । इति दुर्गादास ॥

चीडा, स्त्री, गन्धद्रव्यविशेष. । चीड़ागन्ध इति ख्याता । तत्पर्य्याय । दारुगन्धा २ गन्धवधू ३ गन्धमादनी ४ तरुणी ५ तारा ६ भूतमारी ७ मङ्गल्या ८ कपटिनी ९ ग्रहभीतिजित् १० । अस्या गुणा । कटुत्वम् । कासकफनाशित्वम् । दीपनत्वम् । अत्यन्तसेवनात् पित्तदोषभ्रमापहत्वञ्च । इति राजनिर्घण्टः ॥

चीन, क्ली, (चिनोति कौशेयादिकमिति । चि+बाहुलकात् नक् दीर्घश्च ।) पताका । इति त्रिकाण्डशेष ॥ सीसकम् । इति रत्नमाला ॥

चीन , पु, (चीयते सञ्चीयते दृढ़त्वादिदोषो यत्र । चि+बाहुलकात् नक् दीर्घश्च ।) देशविशेष । चीना इति भाषा ॥ यथा,—
"काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे ।
भोटान्तदेशो देवेशि । मानसेशाच्च दक्षिणे ।
मानसेशादुत्तरपूर्व्वे चीनदेशः प्रकीर्त्तित ॥"
इति शक्तिसङ्गमतन्त्रम् ॥
(तद्देशवासिषु तन्नृपेषु च बहुवचनान्त । यथा महाभारते । २ । २६ । ९ । [ऽभवत् ॥")
"स किरातैश्च चीनैश्च वृत प्राग्ज्योतिषो-
अंशुकविशेष । (यथा शकुन्तलायां १ माङ्के ।
"चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥")
व्रीहिभेद. । तन्तुः । मृगविशेष. । इति मेदिनी । ने, ४ ॥

चीनक, पुं (चीन एव । चीन+स्वार्थे कन् ।) धान्यविशेष । चीना इति भाषा ॥ तत्पर्य्याय । काककङ्गु २ । इति हेमचन्द्र. ॥ (यथा, विष्णुपुराणे । १ । ६ । २१ ।

"प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीनकाः ॥")
अस्य गुणाः । शोषणत्वम् । वायुवर्द्धकत्वम् । पित्तश्लेष्मनाशित्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥ कङ्गुनी । चीनकर्पूर । इति राजनिर्घण्टः ॥ (चीनदेशवासिषु बहुवचनान्त. । यथा, महाभारते । ८ । ८ । १९ ।
"तुषारान्यवनांश्चैव दरदांश्च प्रियधान् पुण्ड्रचीनकान् ॥")

चीनकर्पूर, पुं, (चीननामक कर्पूर ।) कर्पूरविशेष । चीनकर्पूर इति देशान्तरीयभाषा ॥ तत्पर्य्यायः । चीनक २ कृत्रिम ३ धवल. ४ पटुः ५ मेघसार ६ तुषार ७ द्वीपकर्पूरजः ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । ईषच्छीतत्वम् । कफकण्ठदोषक्रिमिनाशित्वम् । मेध्यत्वम् । पावनत्वञ्च । इति राजनिर्घण्ट. ॥

चीनज, क्ली, (चीने चीनदेशे जायते इति । जन +ड ।) लोहम् । तत्तु तीक्ष्णलौहम् । इति राजनिर्घण्ट. ॥

चीनपिष्ट, क्ली, (चीनस्य सीसकस्य पिष्ट क्षतपेषण यस्तु चूर्णमित्यर्थ. ।) सिन्दूरम् । इति हेमचन्द्र ॥ सीसकम् । इति राजनिर्घण्ट. ॥ (यथा, कथासरित्सागरे । २३ । ८५ ।
"चीनपिष्टमयी लोकक्षारेणैकमयी च भूः ॥")

चीनवङ्ग, क्ली, (चीनभव वङ्गम् ।) सीसकम् । इति राजनिर्घण्टः ॥

चीनाकः, पुं, (चीन चीनाकारमकतीति । अक +अण् ।) कर्पूरविशेष । तद्गुणाः । यथा, भावप्रकाशे ।
"चीनाकसञ्ज्ञः कर्पूर कफक्षयकरः स्मृत ।
कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च स ॥"

चीनाकर्कटी, स्त्री, (चीनमिव स्वादु कर्कटी । तत पृषोदरात् साधु ।) कर्कटीप्रभेद । सा तु चित्रकूटदेशे प्रसिद्धा । तत्पर्य्याय । राजकर्कटी २ सुदीर्घा ३ राजफला ४ वाला ५ कुलकर्कटी ६ । अस्या गुणा । रुच्यत्वम् । शिशिरत्वम् । पित्तदाहशोषनाशित्वम् । मधुरत्वम् । तृप्तिदत्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

चीभ ऋ ङ कत्थे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-सक-सेट ।) कत्थ श्लाघा । ऋ, अचिचीभत् । ङ, चीभते गुणिनं गुणी चोक्षादिकारादिरयमित्येके । इति दुर्गादास. ॥

चीय, ऋ ञ संहत्यादानयोः । (भ्वा-उभ-सकं-सेट् ।) चतुर्थस्वरी । ऋ, अचिचीयत् । ञ, चीयति चीयते । इति दुर्गादास ॥

चीर, क्ली, (चिनोति आवृणोति दृष कटिदेशादिक वा । चि+"शुसिचिमीनां दीर्घश्च ।" उणां । २ । २५ । इति क्रन् दीर्घश्च ।) वृक्षत्वक् । (यथा, रामायणे । ५ । ३१ । ०२ ।
"प्रागेव तु महाबुद्धि सौमित्रिर्भ्रातृवत्सल ।
पूर्व्वजस्यानुयात्रार्थे द्रुमचीरैरलङ्कृत ॥")
जीर्णवस्त्रखण्डम् । इति सुभूति । इति लिङ्गादिसङ्ग्रहटीकायां भरत. ॥ (यथा, भागवते । २ । २ । ५ ।

"चीराणि किं मथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥")
गोस्तन' । वस्त्रभेदः । (यथा, मनुः ।११।१०१।
"चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम् ॥")
रेखाभेदः । लेखनभेद. । इति मेदिनी ॥ चूडा ।
(यथा, महाभारते । ३ । ११ । ४६ ।
"मुञ्जवज्जर्झरीभूता बहवस्तत्र पादपाः ।
चीराणीव व्युदस्तानि रेजुस्तत्र महावने ॥")
सीसकम् । इति हेमचन्द्रः ॥

चीरकः, पु, (चीर+संज्ञायां कन् ।) विक्रिया-लेखः । विकारलेखनम् । इति विश्वः ॥ (स्वार्थे कनि चीरशब्दार्थोऽप्यत्र ॥)

चीरपत्रिका, स्त्री, (चीरमिव पत्त्रमस्य । तत. कन् टापि अत इत्वञ्च ।) चञ्चुशाकः । इति राजनिर्घण्टः ॥

चीरपर्ण , पु, (चीरमिव पर्णमस्य ।) शालवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य शालशब्दे विज्ञेया ॥)

चीरिः, स्त्री, (चि+बाहुलकात् क्रिः दीर्घश्च ।) नेत्रांशुकम् । इति शब्दरत्नावली ॥

चीरिका, स्त्री, (चीरीति कृत्वा कायति शब्दायते इति । कै+कः ।) झिल्ली । इति हेमचन्द्रः ॥

चीरितच्छदा, स्त्री, (चीरितः चीरमिव जातश्छदः पत्त्रं यस्याः ।) पालङ्क्यशाकम् । इति भावप्रकाशः ॥

चीरी, स्त्री, (चीरि+"कृदिकारादिति ।" वा ङीष् ।) कच्छाटिका । झिल्ली । इति हेमचन्द्रः ॥

चीरुक, क्ली, (ची इति कृत्वा रौति । रु+क्विप् । चीरुर्झिल्लीपतङ्ग. स इव इति इवार्थे कन् ।) फलविशेषः । चैँउर इतिभाषा ॥ अस्य गुणाः । रुचिदाहकफपित्तकारित्वम् । अम्लत्वञ्च । इति राजवल्लभः ॥

चीर्णं, त्रि, (चर+क्त । पृषोदरात् साधुः ।) शीलितम् । इति त्रिकाण्डशेष. ॥

चीर्णपर्णः, पु, (चीर्णं विदीर्णं पर्णमस्य ।) निम्बवृक्षः । खर्ज्जूरवृक्ष. । इति मेदिनी ॥

चीलिका, स्त्री, (चीरिका+रस्य लत्वे साधुः ।) चीरिका । झिल्ली । इति शब्दरत्नावली ॥

चील्लका, स्त्री, (चीलिका+पृषोदरात् साधुः । चीदिति शब्देन लक्ष्यते इति । लक्ष+घञ् । तत पृषोदरादित्वात् साधु. इति वा ।) झिल्ली । इति शब्दरत्नावली ॥

चीव, ऋ ञ ग्रहणे । सवृत्तौ । इति कविकल्पद्रुमः ॥ (भ्वा उभं-सक-सेट् ।) ऋ, अचिचीवत् । ञ, चीवति चीवते वल्कल भिक्षु. । गृह्णाति परिदधाति चेत्यर्थः । इति दुर्गादासः ॥

चीव, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरा-परं-अकं सेट् ।) क, चीवयति । इति दुर्गादासः ॥

चीवरं, क्ली, (चीयते तन्तुसन्तानैरिति । चि+"चित्वरक्षत्वरधीवरेति ।" उणा । ३ । १ । इति ष्वरच् । निपातनात् धातोर्दीर्घत्वे साधुः ।) भिक्षुवस्त्रम् । इत्युणादिकोषः ॥ (यथा, महाभारते । १ । ६१ । १२ ।
"अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः ।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥")

चीवरी, [न्] पुं, (चीवरं अस्त्यस्येति । इनिः ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

चुक्क, क व्यथे । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) कोपधः पञ्चमस्वरमध्यः । व्यथिः पीडनम् । क, चुक्कयति शत्रु शूरः । इति दुर्गादास. ॥

चुक्कारः, पु, (चुक्क+भावे अप् । चुक्कं पीडनं आराति सम्यक् ददातीति । सिंहनादश्रवणेन भीरूणां भयजनकत्वात्तथात्वम् । आ+रा+कः ।) सिंहनादः । इति त्रिकाण्डशेषः ॥

चुक्रं, क्ली, (चकते तृप्यत्यनेन इति । चक+"चकिरम्योरुच्चोपधायाः ।" उणा । २ । १४ । इति रक् उपधाया उच्च ।) अम्लद्रव्यविशेषः । महादा इति ख्यातम् । तत्पर्य्यायः । तिन्तिडीकम् २ वृक्षाम्लम् ३ । इत्यमरः । २ । ६ । ३५ ॥ चुक्रकम् ४ । इति शब्दरत्नावली ॥ महाम्लम् ५ । इति जटाधरः ॥ (अम्लवृक्षकम् ६ । इति भावप्रकाशः । १ । १ ॥) पत्रशाकविशेषः । चुक इति भाषा ॥ तत्पर्य्याय. । चुक्रवास्तूकम् २ लिकुचम् ३ अम्लवास्तुकम् ४ दन्ताम्लम् ५ अम्लशाकाख्यम् ६ अम्लादि ७ हिलमोचिका ८ । अस्य गुणाः । अम्लपत्रत्वम् । लघुत्वम् । उष्णत्वम् । वातगुल्मनाशित्वम् । रुच्यशीषतृपित्तकारित्वम् । पथ्यत्वम् । तत्पर्य्यायगुणाः ।
"चुक्रिया स्यात्तु पत्राम्ला रोचनी शतवेधिनी ।
चुक्रा लघ्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् ॥
रुच्या लघुतरा पाके वृन्ताके नातिरोचनी ॥"
इति भावप्रकाशः ॥ ॥
("चुक्रमत्यम्लमुष्णञ्च दीपनं पाचनं परम् ।
शूलगुल्मविबन्धामवातश्लेष्महरं परम् ॥
वमितृष्णास्यवैरस्यहृत्पीडावह्निमान्द्यहृत् ॥"
इति शब्दार्थचिन्तामणिधृतवैद्यकम् ॥)
काञ्जिकप्रभेदः । तत्पर्य्यायः । सहस्रवेधम् २ रसाम्लम् ३ चुक्रवेधकम् ४ शाकाम्लभेदनम् ५ चन्द्रम् ६ अम्लसारम् ७ चुक्रिका ८ । अस्य गुणाः । तिक्तत्वम् । अम्लत्वम् । स्वादुत्वम् । कफपित्तनासिकारोगदुर्गन्धशिरोरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ ॥ सन्धानविशेषः । यथा,
"यन्मस्त्वादिशुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम् ।
धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥
द्विगुणं गुडमध्वारनालमस्तु क्रमादिह ॥"
इति परिभाषा ॥
(अस्य लक्षणं यथा,—
"विनष्टे संहितो यस्तु तच्चुक्रमभिधीयते ॥"
इति शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये ॥)

चुक्रः, पुं, (चकते तृप्यतेऽनेनेति । चक+रक् उपधाया उच्च ।) अम्लः । अम्लवेतस. । इति विश्वः ॥

चुक्रकं, क्ली, (चुक्र+संज्ञायां कन् ।) शाकविशेषः । चुकापालङ्ग इति भाषा ॥ अस्य गुणाः । दुर्ज्जरत्वम् । भेदकत्वम् । वायुनाशित्वम् । पित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभ' ॥ (चुक्रार्थे स्वार्थे कन् ॥)

चुक्रफलं, क्ली, (चुक्रमेव फलं यस्य । चुक्रं फलति वा । फल+अच् ।) वृक्षाम्लम् । इति राजनिघण्टः ॥ (वृक्षाम्लशब्देऽस्य विशेषो ज्ञातव्यः ॥)

चुक्रा, स्त्री, (चुक्रः अम्लत्वं विद्यतेऽस्य इत्यच् टाप् च ।) चाङ्गेरी । इति मेदिनी । रे, ३५ ॥ आमरुल् इति भाषा ॥ (अस्या गुणा यथा,—
"चुक्रा लघ्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् ।
रुच्या लघुतरा पाके वृन्ताके नातिरोचनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तिन्तिडी । इति शब्दरत्नावली ॥ (यथास्याः पर्य्यायाः भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ।
अम्ला च विचिका चिञ्चा तिन्तिडीका च
तिन्तिडी ॥")

चुक्राम्लं, क्ली, (चुक्रमिव अम्लम् । चुक्रवदम्लोऽत्र इति वा ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥ (वृक्षाम्लशब्दे विवृतिरस्य ज्ञेया ॥)

चुक्राम्ला, स्त्री, (चुक्रमिव अम्लः अम्लत्वं विद्यतेऽस्याः । अच् टाप् च ।) अम्ललोणिका । चिञ्चा । काञ्जिकभेदः । इति राजनिर्घण्टः ॥

चुक्रिका, स्त्री, (चुक्रो विद्यतेऽस्मिन् इति । ठन् टाप् च ।) अम्ललोणिका । इत्यमरः । २ । ४ । १४० ॥ (अस्याः पर्य्याया यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।
अश्मन्तकस्तु शफरी कुशली चाम्लपत्रकः ॥")
कुचाङ्गेरी । इति रत्नमाला ॥ चुकापालङ्ग इति भाषा ॥ (यथास्याः पर्य्याया. ।
"चुक्रिका स्यात्तु पत्राम्ला रोचिनी शतवेधिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
तिन्तिडी । तत्पर्य्याया यथा, तत्रैव ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ॥
अम्ला च विचिका चिञ्चा तिन्तिडीका च
तिन्तिडी ॥")

चुचुकं, क्ली, (चुचु इत्यव्यक्तशब्देन कायति पानकाले इति । कै+कः ।) कुचाग्रम् । तत्पर्य्यायः । चूचुकम् २ चुचूकम् ३ । इति शब्दरत्नावली ॥ कुचाननम् ४ । पुलिङ्गोऽपि । इति रत्नकोष. ॥ स्तनवृन्तम् ५ । इत्यमरटीकायां भरत' ॥ (देशविशेषे तद्देशवासिषु च पु । यथा, महाभारते । १२ । २०७ । ४२ ।
"दक्षिणापथजन्मानः सर्व्वे नरवरान्ध्रकाः ।
गुहाः पुलिन्दाः शवराश्चुचुका मद्रकैः सह ॥")

चुचूः, पु शुनिषण्णशाकम् । इति त्रिकाण्डशेष' ॥

चुचूक, क्ली, (चुचुक+पृषोदरादित्वात् दीर्घः ।) चुचुकम् । इति शब्दरत्नावली ॥

चुच्य, ई अभिषवे । इति कविकल्पद्रुमः ॥ (भ्वा पर-अकं-सकञ्च-सेट् ।) तालव्यवर्गाद्योपधः । मध-

मखरी। इं, चुक्त.। यङ्यान्तोऽयमित्येके। अभिषव' स्नानं मन्थनं पीडन सन्धानञ्च। इति दुर्गादासः॥

चुञ्चुः, पुं, छुच्छुन्दरिः। इति हारावली। ८३॥ (सङ्करजातिविशेषः। यथा, मनुः। १०। ४८।

"मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्॥"

"चुञ्चुर्मद्गुश्च वैदेहकवन्दिस्त्रियोर्ब्राह्मणेन जातौ वौधायनेनोक्तौ बोद्धव्यौ।" इति तट्टीकायां कुल्लूकभट्टः॥ व्याकरणोक्तप्रत्ययविशेषः। स तु प्रसिद्धार्थे भवति। यथा, विद्यया वित्तो विद्याचुञ्चुः। इति सिद्धान्तकौमुदी॥ स्त्री, उद्भिज्जविशेषः। चेचुना इति लोके। नाडीचवत्। अस्याः पर्य्याया गुणाश्च यथा,—

"चिञ्चा चञ्चुश्चञ्चुकी च दीर्घपत्रा सतिक्तका।
चुञ्चु' शीता सरा रुच्या स्वाद्वी दोषत्रयापहा।
धातुपुष्टिकरी बल्या मेध्यपिच्छिलका स्मृता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

"सुवर्च्चलाया चुञ्चोर्वा लोणिकाया रसैरपि॥"

इति वाभटे चिकित्सितस्थाने नवमेऽध्याये॥)

चुञ्चुरी, स्त्री, (चुञ्चुरिव रातीति। रा+कः। स्त्रियां ङीप्।) तिन्तिडीद्यूतम्। इति त्रिकाण्डशेषः॥ काँइवीचिर खेला इति भाषा॥

चुञ्चुली, स्त्री, (चुञ्चुरी। रस्य लत्वम्।) तिन्तिडीकास्थिभिर्द्यूतक्रीडा। इति हारावली। ६२॥

चुट, तुच्छने। इति कविकल्पद्रुमः। (भ्वा-पर-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभाव'। चोटति नदी ग्रीष्मे। इति दुर्गादास'॥

चुट, इ तुच्छने। इति कविकल्पद्रुम'॥ (भ्वा-पर-अक-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभाव'। इ, चुण्ट्यते नद्या ग्रीष्मे। इति दुर्गादासः॥

चुट, इ क छेदे। इति कविकल्पद्रुम॥ (चुरा-पर-सकं-सेट्।) पञ्चमस्वरी। इ क, चुण्टयति धान्य लोक.। इति दुर्गादास॥

चुट, क शि छेदे। इति कविकल्पद्रुम.। (चुरा-तुदा'च-पर-सक-सेट्।) क, चोटयति। शि, चुटति अचुटीत्। इति दुर्गादास.॥

चुट्ट, क तुच्छने। इति कविकल्पद्रुम॥ (चुरा-पर-अक-सेट्।) टद्वयान्त'। पञ्चमस्वरी। एकटकार इति राम'। तुच्छनमल्पीभाव'। क, चुट्टयति नदी ग्रीष्मे। इति दुर्गादास'॥

चुड, इ तौक्ष्ण्ये। इति कविकल्पद्रुम॥ (भ्वा-परं-अकं-सेट्।) इ, चुण्ड्यते। तौक्ष्ण्यमल्पीभाव'। इति दुर्गादास.॥

चुड, इ क छिदि। इति कविकल्पद्रुम'॥ (चुरा-परं-सक-सेट्।) इ क, चुण्डयति। इति दुर्गादास'॥

चुड, इ क रोषे। (चुरा-पर-अक-सेट्।) इ क, चुण्डयति। इति दुर्गादासः॥

चुड, इ ङ रोषे। (भ्वा-आत्म-अक-सेट्।) इ, चुण्ड्यते। ङ, चुण्डते। इति दुर्गादास'॥

चुड्ड, कृतौ। हावे। इति कविकल्पद्रुमः॥ (भ्वा परं-सक-अकञ्च-सेट्।) टवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे चुड्। कातन्त्रादौ हाव करण इत्येकोऽर्थो दृश्यते। अमी हावाः क्रियाः शृङ्गारभावजाः। इत्यमर'। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताथवा कान्तः। इति दुर्गादासः॥

चुण, शि छिदि। इति कविकल्पद्रुमः॥ (तुदा-परं सक-सेट्।) शि, चुणति अचुणीत् चुचोण। इति दुर्गादास'॥

चुण्टा स्त्री, (चुण्ट्यतेऽसाविति। चुण्ट छेदे+घञ्। मृत्तिकाखननेन जायमानत्वात्तथात्वम्।) कूपः। इति त्रिकाण्डशेषः॥

चुण्टी, स्त्री, कूपः। इति त्रिकाण्डशेषः॥ उपकूपम्। कूप समीपे स्वल्पजलाधारः। इति हेमचन्द्र॥

चुत, इर् क्षरे। इति कविकल्पद्रुम.॥ (भ्वा पर सक सेट्। अक-इति केचित्।) इर, अचुतत अचोतीत्। क्षर इह आसेचनम्। चोतति इत वह्नौ यज्वा आसिञ्चतीत्यर्थ'। इति दुर्गादासः॥

चुत', पु, (चोतति क्षरति मलशोणितादिर्यस्मात्। चुत+घञर्थे कः।) गुदद्वारम्। इति शब्दरत्नावली॥

चुतिः, स्त्री, (चोतति क्षरति मलशोणितादिर्यस्याः। चुत+"सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्।) गुदद्वारम्। इति शब्दरत्नावली॥

चुद, क शुदि। इति कविकल्पद्रुमः॥ (चुरा-पर-सक सेट्।) शुदि प्रेरणे। क चोदयति बाण चाप'। इति दुर्गादास'॥

चुड्ड, कृतौ। हावे। इति कविकल्पद्रुम'॥ (भ्वा-पर-सकं-अक च-सेट्।) तवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे चुद्। कातन्त्रादौ हावकरण इत्येकोऽर्थो दृश्यते। अमी हावा' क्रिया शृङ्गारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुड्डति कान्ताथवा कान्तः। इति दुर्गादासः॥

चुन्दी, स्त्री, (चोदयति प्रेरयति घटयतीत्यर्थ' नायकादीनिति। चुद+क'। निपातनात् नुमागम। ततः स्त्रियां ङीप्।) कुट्टनी। इति हेमचन्द्रः। ३। १९७॥

चुप, शनैर्गतौ। इति कविकल्पद्रुम'॥ (भ्वा-पर-सक-सेट्।) चोपति खञ्जः। चोपति दुष्ट राजा। इति रमानाथ'। इति दुर्गादास.॥

चुब, इ कि चुम्बने। इति कविकल्पद्रुमः॥ (चुरा-पक्षे भ्वा-पर-सक-सेट्।) चुम्बन सुखसयोगः। इ, चुम्ब्यते। कि, चुम्बयति चुम्बति कान्ताधर कामी। प्रियासुखं किम्पुरुषश्चुचुम्बे॥ इति यतीहारे आत्मनेपदम्। इति दुर्गादास'॥

चुन्नं, क्ली, (चुम्ब्यतेऽनेनात्र वा। चुबि चुम्बने +"ऋज्रेन्द्राग्रेति।" उणां। २। २८। इति रप्रत्ययो नकारलोपश्च।) वदनम्। इत्युणादिकोषः॥

चुम्बकः, पु, (चुम्बति आकर्षति लौहमिति। चुम्ब+ण्वुल्।) कान्तलौहभेदः। तत्पर्य्याय। कान्तपाषाण. २ अयस्कान्तः ३ लौहकर्षकः ४। अस्य गुणा। लेखनत्वम्। शीतत्वम्। मेदोविषगरापहत्वञ्च। इति भावप्रकाश.॥ (विशेषोऽस्य कान्तलौहशब्दे ज्ञेयः॥) घटस्योर्द्धाव लम्बनम्। इति मेदिनी। के, ८६॥

चुम्बक', त्रि, (चुम्बतीति। चुम्ब+ण्वुल्। चुम्बनपर। धूर्त्त.। बहुग्रन्थैकदेशज्ञः। इति मेदिनी। के, ८६॥

चुम्बन, क्ली, (चुब इ कि चुम्बने+भावे ल्युट।) सुखसयोगः। चुमा इति भाषा॥ तस्य स्थानानि यथा, कामशास्त्रे।

"मुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि।
गण्डे च कर्णयोश्चैव कपोलभगमूर्द्धसु।
चुम्बनस्थानमित्युक्त विज्ञेय कामुकैरिह॥"

चुर, कि स्तेये। इति कविकल्पद्रुमः॥ (चुरा-पक्षे-भ्वा-पर-सक सेट्।) कि, चोरयति चोरति धन चौर.। इति दुर्गादास॥

चुरा, स्त्री, (चुर+बाहुलकात् कः। स्त्रियां टाप्।) चौर्य्यम्। इति शब्दरत्नावली॥

चुरी, स्त्री, (चुर+क'। स्त्रियां ङीप्।) उपकूपम्। कूपसमीपस्थाल्पजलाधार'। इति हेमचन्द्र.। ४। १५६॥

चुलुक, क्ली, (चोलयतीति। चुल+बाहुलकात् उकञ्।) माषमज्जनजलम्। यथा। माषमज्जनजलमाचाम सचुलुकमिति मन्त्रोपनिषत्॥

चुलुक, पु, (चोलयति उन्नतो भवतीति। चुल उन्नतौ+बाहुलकात् उकञ्।) घनपङ्कः। इति त्रिकाण्डशेषः॥ प्रसृति.। भाण्डप्रभेदः। इति हेमचन्द्रः॥

चुलुकी, [न्] पुं, (चुलुक ऊर्म्मिरिति विद्यतेऽस्य। चुलुक+इनि'।) शिशुमाराकृतिमत्स्यः। इति शब्दरत्नावली॥ (यथा, वाभटे सूत्रस्थाने।६।५८

"चुलुकी नक्रमकरशिशुमारतिमिङ्गिला'।
राजीचिलिचिमाद्याश्च मासमित्याहुरप्सु ॥")

चुलुम्प, लोपे। इति कविकल्पद्रुम'॥ (भ्वा-परं-सकं-सेट्।) अन्त'स्थतृतीयमध्यः। पञ्चमस्वरद्वयी। ओष्ठ्यवर्गशेषोपध.। चुलुम्पति। यगादौ चुलुम्प्यते इत्यादि। न तु मकारश्चावनुस्वारपञ्चमाविति स्वरसान्नप्रकृतित्वे यगादौ तल्लोप इति वाच्यम्। तर्हि नोपधस्यैव पठितुमुचितत्वात्। एव सति अङ्गादीना न प्रकृतित्वेऽपि ङमध्यपाठ' कथमिति चेन्न। ते तु कस्यचिन्मते ङमध्या एवेति ज्ञापनाय ङमध्याः पठिताः। न च तर्हि इदित् पाठेऽपीष्टसिद्धिरिति वाच्यम्। क्विपि संयोगान्तलोपे इदित्पाठे चुलुन् चुलुम्प लोपे चुलुम इति भेदात्। एव सर्व्वत्र। इति दुर्गादास'॥

चुलुम्प', पुं, (चुलुम्प्यते इति चुलुम्पनमिति वा। चुलुम्प+भावे घञ्।) बालकलालनम्। इति जटाधरः॥

चुलुम्पा, स्त्री, (चुलुम्पति चञ्चला भवतीति । चुलुम्प+अच् । स्त्रियां टाप् ।) छागी । इति त्रिकाण्डशेषः ॥

चुलुम्पी, [न्] पु, (चुलुम्पो लौल्यं चञ्चलता इत्यर्थः । सोऽस्यास्तीति । इनिः ।) शिशुमारः इतिमतान्तरः । उत्पलमतान्तरः । इति कश्चित् । इति शब्दरत्नावली ॥

चुल्ल, हावकृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पञ्चमस्वरी जद्वयान्तः । एकोऽयं । चुल्लन्ति चारुनयनाश्च सह प्रियेणेति हलायुधः । इति दुर्गादासः ॥

चुल्लः, पु, क्लिन्नचक्षुः । (क्लिन्ने चक्षुषी अस्य । "चुल् च ।" ५ । २ । ३३ । इत्यस्य वार्त्तिकोक्त्या क्लिन्नस्य चुलादेशो लप्रत्ययश्च ।) तद्युक्ते-त्रि । इति हेमचन्द्रः । ३ । १२५ ॥

चुल्लकी, स्त्री, (चुल्लति हावभावेन क्रीडतीति । चुल्ल+ण्वुल । गौरादित्वात् ङीष् ।) शिशुमारः । कुण्डीभेद. । कुलविशेषः । इति मेदिनी शब्दरत्नावली च ॥

चुल्लिः, स्त्री, (चुल्यते प्रज्वाल्यते अग्निरत्र । चुल्ल+"सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इति इन् । यद्वा, चुद्यते प्रेर्य्यते अग्निर्यत्र । चुद्+बाहुलकात् लिक् ।) पाकार्थमग्निस्थानम् । चुला इति भाषा इति च भाषा ॥ तत्पर्य्यायः । अश्मन्तम् २ उद्धानम् ३ अधिश्रयणी ४ अन्तिका ५ । इत्यमरः । २ । ९ । २९ ॥ असन्तम् ६ उधानम् ७ उद्धारम् ८ चुल्ली ९ आन्दिका १० । इति तट्टीका ॥ उद्धानिः ११ । इति शब्दरत्नावली ॥

चुल्ली, स्त्री, (चुल्लि+"कृदिकारादक्तिनः ।" ४ । १ । ४५ । इत्यस्य वार्त्तिकोक्त्या वा ङीष् ।) चिता । उद्धानम् । इति मेदिनी । ले, १७ ॥ (यथा, मनुः । ३ । ६८ ।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥")

चुस्तं, क्ली पु, वुस्तम् । तत्तु मांसपिण्डकविशेषः ॥ स्थालीभृष्टमांसम् । पनसादिफलस्यासारभागः । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ भोता इति ख्यातः ॥

चूचुकं, क्ली पु, (चूष्यते पीयते इति । चूष पाने+बाहुलकात् उकः सस्य चत्वञ्च ।) चुचुकम् । इत्यमरटीकायां भरतः ॥ (यथा, रामायणे । ६ । २३ । १३ ।

"स्तनौ च विरलौ पीनौ मग्नौ मे मग्नचूचुकौ ॥")

चूडकः, पु, (चुडति अल्पीभवतीति । चुड+ण्वुल् ततो निपातनात् दीर्घत्वे साधुः ।) कूपः । इति त्रिकाण्डशेषः ॥

चूड़ा, स्त्री, (चोलयति मस्तकादुपरि उन्नता भवतीति । चुल क उन्नतौ+भिदादित्वादङ् ततो दीर्घस्ततो लस्य डत्वे साधुः ।) मयूरशिखा । शिरोमध्यस्थशिखामात्रम् । तत्पर्य्यायः । शिखा २ । इत्यमरः । २ । ५ । ३२ ॥ केशपाशी ३ । चूटिका ४ जुटिका ५ । यथा, शब्दरत्नावल्याम् ।

"शिखा चूडा केशपाशी जूटिका जुटिकेत्यपि ।
शिरोमध्यवह्नचूडे भवेदेतत्तु मस्तकम् ॥"

वडभी । बाहुभूषणम् । इति मेदिनी । डे, १३ ॥ अग्रम् । इति हेमचन्द्रः ॥ (यथा, द्वितीयपदेशे ।

"अस्ताचलचूडालम्बिनि भगवति चन्द्रमसि ॥")

कूपः । इति त्रिकाण्डशेषः ॥ दशसंस्कारान्तर्गतसंस्कारविशेषः । यथा । चूडा कार्य्या यथाकुलमिति मलमासतत्त्वम् ॥ (यथाच,—

"अयुग्माब्दे तथा माघि चूडा भौमशनीतरे ।
अर्केन्द्रकालशुद्धौ च जन्ममासेन्दुभाद्दते ॥
रिक्तादर्शाष्टमीषष्ठीप्रतिपद्वर्ज्जिते सिते ॥"

इति संस्कारतत्त्वधृतज्योतिषवचनम् ॥ अस्य विशेषविवरणं चूडाकरणशब्दे द्रष्टव्यम् ॥)

चूडाकरणं, क्ली, (चूडायाः करणं कर्म्म ।) दशसंस्कारान्तर्गतसंस्कारविशेषः । तस्य क्रमो यथा । कुलाचारवशात् प्रथमे तृतीये वा वर्षे चूडाकरणं कर्त्तव्यम् । तत्र प्रथमं प्रातः-कृतस्नानः कृतवृद्धिश्राद्धः पिता सभ्यनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्याग्नेर्दक्षिणत एकविंशतिदर्भपिञ्जलीः सप्तसप्तभिरेकीकृत्य कुशान्तरेण वेष्टयित्वा उष्णोदकसहितं कांस्यपात्रं ताम्रनिर्म्मितक्षुरं तदभावे दर्पणं वा लौहक्षुरयावश्च नापितं स्थापयेत् अग्नेरुत्तरतो वृषगोमयं तिलतण्डुलमाषसिद्धञ्च कृशरं अग्नेः पूर्व्वतो मिश्रितव्रीहियवतिलमाषपूरितपात्रत्रयं स्थापयेत् । माता शुचिना वस्त्रेण कुमारमाच्छाद्य क्रोडे निधाय अग्नेः पश्चिमतो भर्त्तुर्व्वामपार्श्वे उत्तराग्रेषु कुशेषु प्राङ्मुखी उपविशति । ततः पिता प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा व्यस्तसमस्तमहाव्याहृतिहोमं कुर्य्यात् । प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः । ओँ भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिक् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः । ओँ भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः । ओँ स्वः स्वाहा । प्रजापतिर्ऋषिर्बृहती छन्दः प्रजापतिर्देवता व्यस्तसमस्तमहाव्याहृतिहोमे विनियोगः । ओँ भूर्भुवः स्वः स्वाहा । ततः पिता उत्थाय प्राङ्मुख. कुमारस्य मातुः पश्चादवस्थितः क्षुरपाणिं नापितं पश्यन् तमेव सवितृरूपं ध्यायन् जपति । प्रजापतिर्ऋषि. सविता देवता चूडाकरणे विनियोगः । ओम् आयमगात् सविता क्षुरेण । तत उष्णोदकसहितं कांस्यपात्रं पश्यन् वायु मनसा ध्यायन् जपति । प्रजापतिर्ऋषिर्वायुर्देवता चूडाकरणे विनियोग । ओँ उष्णेन वाय उदकेनेधि । ततः कांस्यपात्रस्थितोष्णोदकेन दक्षिणहस्तगृहीतेन दक्षिणकपुष्णिकामनेन मन्त्रेण क्लेदयति । कपुष्णिकाशब्देन दक्षिणोत्तरतः शिखास्थानादधः शिरसः कर्णाभिमुखोपदेश उच्यते । ततः प्रजापतिर्ऋषिरापो देवता चूडाकरणे विनियोगः । ओम् आप उन्दन्तु जीवसे । ततस्ताम्रक्षुरं तदभावे दर्पणं वा पश्यन् जपति । प्रजापतिर्ऋषिर्विष्णुर्देवता चूडाकरणे विनियोगः । ओँ विष्णोर्द्रंष्ट्रोऽसि । ततः कुशवह्नसप्तदर्भपिञ्जलीर्गृहीत्वा क्लिन्नदक्षिणकपुष्णिकादेशे अनेन मन्त्रेण ऊर्द्धमूला निदध्यात् । प्रजापतिर्ऋषिरोषधिर्देवता चूडाकरणे विनियोगः । ओम् ओषधे त्रायस्वैनम् । ततो वामहस्तगृहीतकुशपिञ्जलीसहितकपुष्णिकादेशे स्वदक्षिणहस्तगृहीतताम्रक्षुरं दर्पणं वा अनेन मन्त्रेण निदध्यात् । प्रजापतिर्ऋषिः स्वधितिर्देवता चूडाकरणे विनियोग. । ओँ स्वधिते मैनं हिंसीः । ततः केशच्छेदो यथा न भवति तथा ताम्रक्षुरं दर्पणं वा तत्रैव कपुष्णिकादेशे अनेन मन्त्रेण प्रेरयेत् । प्रजापतिर्ऋषि' पूषा देवता चूडाकरणे विनियोगः । ओँ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत्तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय बलाय वर्च्चसे । तूष्णीं वारद्वयम् । ततो लौहक्षुरेण दक्षिणकपुष्णिकदेशस्थ केशं छित्त्वा दर्भपिञ्जलीसहितकेशस्य वालमित्रविष्टतपात्रस्थवृषगोमयोपरि निधानं कुर्य्यात् । ततः कपुच्छलदेशस्थ कांस्यपात्रस्थितोष्णोदकेन दक्षिणहस्तगृहीतेन पूर्व्ववदेव आप उन्दन्तु जीवसे इत्यनेन मन्त्रेण क्लेदनं ओँ विष्णोर्द्रंष्ट्रोऽसि इत्यनेन ताम्रक्षुरस्य दर्पणस्य वा प्रेरणं ओम् ओषधे त्रायस्वैनं इत्यनेन कपुच्छलदेशे ऊर्द्धमूलदर्भपिञ्जलीनिधानं ओँ स्वधिते मैनं हिंसीरित्यनेन ताम्रक्षुरस्य दर्पणस्य वा कपुच्छलदेशे निधानं ओँ येन पूषा बृहस्पतेरित्यनेन पूर्व्वाभिमुखं ताम्रक्षुरप्रेरणं लौहक्षुरेण कपुच्छलदेशस्थ केशं छित्त्वा दर्भपिञ्जलीसहितकेशस्य वालमित्रविष्टतपात्रस्थवृषगोमयोपरि निधानं कुर्य्यात् । कपुच्छलशब्देन पश्चिमतः शिखास्थानादधःशिरसो नापितक्रोडाभिमुखोपदेशोऽभिधीयते । तथैव वामकपुष्णिकाप्लावनादिच्छेदनपूर्व्वकं वृषगोमयोपरिदेशे निधानान्तं पूर्व्ववत् सर्व्वं कुर्य्यात् । ततः कुमारस्य शिरः पाणिभ्यामुपगृह्य जपति । प्रजापतिर्ऋषिरुष्णिक् छन्दो जमदग्निकश्यपागस्त्याद्यो देवताश्चूडाकरणे विनियोगः । ओँ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तत्तेऽस्तु त्र्यायुषम् । ततोऽग्नेरुत्तरदेशं नीत्वा पुष्पादलङ्कृतो नापितः कुमारं मुण्डयति । सर्व्वमेव केशं वृषगोमयोपरि निधायारण्ये वंशविटपे स्थापयेत् ततः पूर्व्ववत् व्यस्तसमस्तमहाव्याहृतिहोमं कृत्वा तूष्णीं प्रादेशप्रमाणघृताक्तसमित्प्रक्षेपान्तप्रकृतं कर्म्म समाप्य उदीच्यं शाट्यायनहोमादिवामदेव्यगानान्तं कर्म्म निर्व्वृत्य कर्म्मकारयितृब्राह्म-

णाय दक्षिणां दद्यात् । कृशरधान्ययवतिल-
माषशरावान् नापिताय दद्यात् । इति चूडा-
करणं समाप्तम् ॥” इति भवदेवभट्टः ॥
चूडामणिः, पुं, (चूडा शिरोभूषणं मुकुटकिरीटा-
दिकम् । तत्र स्थितो मणिः । शाकपार्थिवादिवत्
समासः ।) शिरोरत्नम् । (यथा, महाभारते ।
१ । ११६ । ३८ ।
“ततश्चूडामणिं निष्कमङ्गदे कुण्डलानि च ॥”
चूडायामग्रभागे मणिरिव यस्य ।) काकचिञ्चा-
फलम् । इति मेदिनी । णे, ६४ ॥ योगविशेषः ।
(स तु ग्रहणकाले एव भवति ।) यथा गारुडे ।
“सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरयं योगस्तत्रानन्तं फलं स्मृतम् ।
अन्यस्माद्ग्रहणात् कोटिगुणमत्र फलं लभेत् ॥”
इति तिथ्यादितत्त्वम् ॥
शुभाशुभगणनाविशेषः । तस्य विवरणं गरुड-
पुराणे २०५ अध्याये द्रष्टव्यम् ॥ * ॥ बङ्ग-
देशीयपण्डितानामुपाधिश्च ॥
चूडाम्ल, क्ली, (चूडायां अग्रभागे अम्लो यस्य ।)
वृक्षाम्लम् । इति राजनिर्घण्टः ॥
चूडाल, क्ली, (चूडा अस्त्यस्य । “प्राणिस्थादातो
लजन्यतरस्याम् ।” ५ । २ । ९६ । इति लच् ।)
मस्तकम् । इति शब्दरत्नावली ॥ चूडायुक्ते
त्रि । इति हेमचन्द्रः ॥ (यथा, महाभारते ।
१० । ७ । ३७ ।
“चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः ॥”)
चूडाला, स्त्री, (चूडा शिखा अस्त्यस्याः । “प्राणि-
स्थादातो लजन्यतरस्याम् ।” ५ । २ । ९६ । इति
लच् । ततोऽजादित्वात् टाप् ।) उच्चटाख्यम् ।
इत्यमरः । २ । ४ । १६० ॥ श्वेतगुञ्जा । नागर-
मुस्ता । इति राजनिर्घण्टः ॥
चूडावान्, [त्] (चूडा अस्त्यस्य । चूडा+मतुप् ।
मस्य वत्वम् ।) चूडाविशिष्टः । इति चूडाला-
शब्दार्थे मेदिनी । ले, ६० ॥
चूण, क सङ्कोचे । इति कविकल्पद्रुमः ॥ (चुरां-
परं-अक-सेट् ।) तालव्यवर्गाद्यादि । षष्ठ-
स्वरी । क, चूणयति चक्षुः सङ्कुचितं स्यादि-
त्यर्थः । इति दुर्गादासः ॥
चूतः, पुं, (चूष्यते पीयते इति । चूष+कर्म्मणि
क्तः । पृषोदरादित्वात् षलोपः । रसालत्वा-
देवास्य तथात्वम् ।) आम्रवृक्षः । इत्यमरः ।
२ । ४ । ३३ ॥ (यथा, रामायणे ।३।७६।१७।
“परिचुम्बति संविश्य भ्रमरश्चूतमञ्जरीम् ।
नवसङ्गमसंहृष्टः कामी प्रणयिनीमिव ॥”
च्योतति क्षरति शोणितादिकमस्मादिति । चुत
क्षरणे+बाहुलकात् घञर्थे कः दीर्घश्च ।) गुह्य-
द्वारम् । इति शब्दरत्नावली ॥ च्यूत इत्यपि पाठः ॥
चूतक, पुं (चूत एव । चूत+स्वार्थे कन् ।)
आम्रः । कूपकः । इति मेदिनी । के, ६० ॥
चूर, ई ङ य दाहे । इति कविकल्पद्रुमः ॥ (दिवां-
आत्मं सक-सेट् । (दीर्घी । ङ य, चूर्य्यते वह्नि-
रिन्धनम् । ई, चूर्णः । इति दुर्गादासः ॥

चूर्ण, क पेषे । इति कविकल्पद्रुमः ॥ (चुरां परं-
सक-सेट् ।) पञ्चस्वरी । पेषः चूर्णीकरणम् ।
क, चूर्णयति शिलां । इति दुर्गादासः ॥
चूर्ण, क्ली, (चूर्ण्यते पिष्यते यत् । चूर्ण+कर्म्मणि
घञ् ।) सम्पेषणेन जातरजः । तस्य लक्षणं
यथा,—
“अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम् ।
तत् स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसम्मिता ॥
चूर्णे गुडः समो देयः शर्करा द्विगुणा मता ।
चूर्णेषु भर्ज्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत् ॥
लिहेच्चूर्णं द्रवैः सर्व्वैर्घृताद्यैर्द्विगुणोन्मितैः ।
पिबेच्चतुर्गुणैरेव चूर्णमालोडितं द्रवैः ॥
चूर्णावलेहगुटिका कल्कानामनुपानकम् ।
पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेत् ॥”
इति भावप्रकाशः ॥ * ॥
चूर्णौषधस्य पूर्णवीर्य्यं पक्षद्वयपर्य्यन्तं तिष्ठति ।
इति वैद्यकपरिभाषा ॥
(“कर्षश्चूर्णस्य कल्कस्य गुडिकानाञ्च सर्व्वशः ।
द्रवशुक्त्या स लेढव्यः पातव्यश्च चतुर्द्रवः ॥”
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
आवीर इति ख्यातम् । (यथा, मेघदूते । ७० ।
“अर्च्चिस्तुङ्गानभिमुखगतान् प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफला प्रेरणा चूर्णमुष्टिः ॥”)
पटवासश्चोद इत्यन्ये । इति भरतः ॥ गन्ध-
गुँड़ा इति ख्यातम् । इति सारसुन्दरी ॥ तत्-
पर्य्यायः । वासयोगः २ । इत्यमरः । २।६।१३४॥
वासयुक्तिः ३ । इति मेदिनी । ने,१२ ॥ गन्ध-
युक्तिः ४ । इति भूरिप्रयोगः ॥ पटयुक्तिः ५ ।
इति शब्दरत्नावली ॥ (कुङ्कुमादिरजः । यथा,
रघुः । ४ । ५४ ।
“अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥”)
चूर्णः, पुं, (चूर्ण्यते सम्पिष्यते इति । चूर्ण+
कर्म्मणि घञ् ।) सम्पेषणेन जातरजः । चूर
इति गुँड़ा इति फाकि इति च भाषा ॥ तत्-
पर्य्यायः । क्षोदः २ । इत्यमरः । २ । ८ । ६६ ॥
चूर्णम् ३ रजः ४ । इति भावप्रकाशः ॥ (यथा,
महाभारते । ६ । ११८ । ३ ।
“कन्याश्चन्दनचूर्णैश्च लाजैर्माल्यैश्च सर्व्वशः ।
अवाकिरञ्छान्तनवं तत्र गत्वा सहस्रशः ॥”)
धूलिः । क्षारविशेषः । इति मेदिनी । ने, १२ ॥
चूण इति भाषा ॥ (यथा,—
“पर्णानि शीर्णशणानि सीदन्त्याकर्णलोचने ।
चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने ॥”)
शोषस्य गुणः । वातश्लेष्ममेदोनाशित्वम् ॥ शङ्ख-
चूर्णस्य गुणाः । कटुत्वम् । क्षारत्वम् । उष्ण-
त्वम् । कृमिनाशित्वञ्च । इति राजवल्लभः ॥
चूर्णक, क्ली, (चूर्णं इव कायतीति । चूर्ण+कै+
कः ।) गद्यविशेषः । यथा,—
“अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम् ।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः ।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥

भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम् ॥
चूर्णक यथा । स हि त्रयाणामेव जगतां गतिः
परमपुरुषः पुरुषोत्तमो दृप्तदानवभरेण भङ्गु-
राङ्गीमवनिमवलोक्य करुणार्द्रहृदयस्तस्या भार
मवतारयितुं रामकृष्णस्वरूपेणांशतो यदुवंशे
अवततार ।” इति छन्दोमञ्जरी ॥ (क्वचित् वृत्तकं
इत्यपि दृश्यते ॥)
चूर्णकः, पुं, (चूर्णः कायते प्रकाशते इति । कै+
कः ।) सक्तुः । इति त्रिकाण्डशेषः ॥ (षष्टिकः ।
यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । “षष्टिक-
काङ्गुकमुकुन्दकपीतकप्रमोदककाकलकासन-
पुष्पकमहाषष्ठिकचूर्णककुरवककेदारकप्रभृतयः
षष्टिकाः ॥”) स्वार्थे के चूर्णशब्दार्थोऽप्यत्र ॥
चूर्णकारः, पुं, (चूर्णं क्षारविशेषं करोतीति ।
चूर्ण+कृ+“कर्म्मण्यण् ।” ३ । २ । १ इत्यण् ।)
वर्णसङ्करजातिविशेषः । चूणरी इति भाषा ॥
स नटकन्यायां पुण्ड्रकाज्जातः । इति पराशर-
पद्धतिः ॥
चूर्णकुन्तल, पुं, (चूर्णं वासयोगस्तद्युक्तः कुन्तलः ।
शाकपार्थिवादिवत् समासः ।) अलकः । इत्य-
मरः । २ । ६ । ९६ ॥
चूर्णखण्ड, क्ली, (चूर्णाय यत् खण्डम् ।) कर्करम् ।
इति हारावली । २०८ ॥ काँकर इति खुटिं
इति च भाषा ॥
चूर्णपारदः, पुं, (चूर्णः पारदस्य । एकदेशि-
समासः । पारदसम्भूततया एवास्य तथात्वम् ।)
हिङ्गुलम् । इति राजनिर्घण्टः ॥
चूर्णशाकाङ्कः, पुं, (चूर्णं इव शुभ्रः शाकसमङ्कते
सादृश्येन गच्छतीति । अकि गतौ+अच् ।)
गौरसुवर्णशाकम् । इति राजनिर्घण्टः ॥
चूर्णिः, स्त्री, (चूर्णयति खण्डयति अशेषपण्डि-
तानां तर्कमिति । चूर्ण+“सर्व्वधातुभ्य इन् ।”
उणां । ४ । ११७ । इति इन् । यद्वा, “वृणि-
पृश्निपार्ष्णीति ।” उणां । ४ । ५२ । इति इः ।)
पातञ्जलव्याकरणम् । महाभाष्यम् । कपर्दकः ।
इति लिङ्गादिसंग्रहटीकायां भरतः ॥ शत
सङ्ख्यककपर्दकाः । इति सिद्धान्तकौमुद्यां-
मुणादिवृत्तिः ॥
चूर्णिका, स्त्री, (चूर्णः क्षोदोऽस्यास्तीति । चूर्ण+
“अत इनिठनौ ।” ५ । २ । ११५ । इति ठन् ।)
सक्तुः । इति भूरिप्रयोगः ॥
चूर्णिकृत्, पुं, (चूर्णिं महाभाष्यं करोतीति । कृ+
क्विप् ।) भाष्यकारः । इति त्रिकाण्डशेषः ॥
चूर्णी, स्त्री, (चूर्णिः+“कृदिकारादक्तिनः ।” ४ ।
१ । ४५ । इत्यस्य वार्त्तिकोक्त्या वा ङीष् ।)
कपर्दकः । इति मेदिनी । णे, १२ । नदी-
विशेषः । सा राजाधाङ्गाख्यग्रामसमीपे तिष्ठति ॥
चूलः, पुं, (चोलयति पुनः पुनः छिन्नेऽपि उत्तिष्ठ-
तीति । चुल उन्नतौ+“इगुपधज्ञेति ।” ३ ।
१ । १३५ । इति कः । निपातनात् दीर्घः ।
यद्वा, चूर्य्यते इति । चूर्+कः । रस्य लत्वम् ।)

केशः। यथा। "मुक्तकेशाश्च चूलिनः।" इति लिङ्गपुराणम् ॥

चूलकः, पुं, (चूल एव। चूल+स्वार्थे कन्।) केशः। यथा, मत्स्यसूक्ते ३८ पटले।
"गृहीतचूलको विप्रो म्लेच्छेन रजकादिना।
प्राजापत्यद्वयं कुर्य्यात् शूद्रः कुर्य्यात्तु भागतः॥
सशिखं निर्व्वपेत् केशं धृते'चान्त्यावसायिना।
अन्त्यजैस्तु शिखावर्ज्जं शूद्रैरग्राङ्गुलिद्वयम्॥"

चूला, स्त्री, (चूडा+डस्य लत्वम्।) चन्द्रशाला। गृहोपरिगृहम्। इति शब्दरत्नावली॥ चूडा च॥

चूलिकं, स्त्री (चोलयति गोधूमचूर्णं पिष्टकाकारेण उन्नयति उत्पादयतीत्यर्थः। चुल+णिच्+ण्वुल्। पृषोदरात् दीर्घत्वे अत इत्वे च साधुः।) घृतभृष्टगोधूमचूर्णम्। इति शब्दचन्द्रिका॥ लूची इति भाषा॥

चूलिका, स्त्री, (चोलयति सन्निहितचर्म्ममांसराशिं उन्नयतीति। चुल+ण्वुल्+कापि अत इत्वञ्च। पृषोदरात् दीर्घत्वे साधुः।) हस्तिकर्णमूलम्। इत्यमरः।२।८।३८॥ नाटकाङ्गविशेषः। इति मेदिनी। के, ६०॥

चूष, पाने। इति कविकल्पद्रुमः॥ (भ्वां-पर-सकं सेट्।) दीर्घी। चूषत्याम्रं लोकः। इति दुर्गादासः॥

चूषा, स्त्री, (चूष्यते पीयते पृष्ठमांसेनाहश्यतां नीयते इति। चूष+घञर्थे क।) कक्ष्या। इत्यमरः। २। ८। ४२॥ काछदडी इति भाषा॥

चृत्, कि सन्दीपने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, चर्त्तयति। इति दुर्गादासः॥

चृतु, श हिंसे। ग्रन्थे। इति कविकल्पद्रुमः॥ (तुदां-परं सकं-सेट्।) श, चृतति चर्त्तिता। ग्रन्थो ग्रन्थनम्। इति दुर्गादासः॥

चेटः, पु, (चेटतीति। चिट् परप्रैषे+अच।) दासः। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ६। १२७।
"एतत्तस्य मुखाच्छ्रुत्वा राजचेटस्य दुर्म्मनाः॥"
स तु शृङ्गारसहायः। यथा, साहित्यदर्पणे।३।४६।
"शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः॥")

चेटकः, पुं, (चेटति दासत्वं करोतीति। चिट+ण्वुल्।) दासः। इत्यमरः। २। १०। १७॥ (यथा, कथासरित्सागरे। ६। १२४।
"आवाभ्यां राजहंसाख्य आहूतो राजचेटकः॥")
उपपतिनायकभेदः। तस्य लक्षणं सन्धानचतुरः। इति रसमञ्जरी॥

चेटिका, स्त्री, (चेटी+स्वार्थे कन् टापि अत इत्वं पूर्व्वह्रस्वः। यद्वा चिट् ण्वुल् टापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥ (यथा, कथासरित्सागरे। ४। ५१।
"अङ्गीकुर्व्वन् स तन्मूढश्चेटिकाभिः प्रवेशितः॥")

चेटी, स्त्री, (चेट+ङीप्।) दासी। इति हेमचन्द्रः॥ (यथा, रामायणे। २। ६१। ६४।
"प्रेष्याश्चेट्यश्च वध्वश्च वलस्याश्चापि सर्व्वशः॥")

चेडः, पु, (चेटति परप्रेष्यत्वं करोतीति। चिट+अच्। टस्य डत्वञ्च।) दासः। इत्यमरटीकायां रमानाथः॥

चेडकः, पु, (चेटति इति। चिट+ण्वुल्। टस्य डत्वम्।) दासः। इत्यमरटीका॥

चेड़िका, स्त्री, (चेडक+टाप्। कापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥

चेडी, स्त्री, (चेड+ङीप्।) दासी। इत्यमरटीका॥

चेत् अ, (चित्+विच्।) यदि। इत्यमरः। ३। ४। १२॥ (यथा, पञ्चदश्याम्। ६। ४२।
"अन्यत्ववारकं सत्वमिति चेदन्यवारणम्।
कूटस्थस्यात्मता वक्तुरिष्टमेव हि तद्भवेत्॥"
पक्षान्तरम्। असन्देहेऽपि सन्देहवचनम्। यथा,
"सत्यश्चेद्गुरुवाक्यमेव पितरो देवाश्च चेद्योगिनी
प्रीता चेत् परदेवता च यदि चेद्वेदाः प्रमाणं हि चेत्।
शाक्तीयं यदि दर्शनं भवति चेदाज्ञाप्य मोघास्मि चेत्
स्वातन्त्र्या अपि कौलिकाश्च यदि चेत् स्यान्मे जयः सर्व्वदा॥"
इति शब्दार्थचिन्तामणिधृतश्लोकः॥)

चेतः, [स्] क्ली, (चेतत्यनेन इति। चित्+करणेऽसुन्।) चित्तम्। इत्यमरः। १। ४। ३१॥ (यथा, पञ्चदश्याम्। १। ५४। [यत्।
"ताभ्यां निर्व्विचिकित्सेऽर्थे चेतसः स्थापितस्य
एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥")

चेतकी, स्त्री, (चेतयते उन्मीलयति ज्ञानेन्द्रियबलादीनि। चित+ण्वुल्। गौरादित्वात् ङीष्।) हरीतकी। इत्यमरः।२।४।५९॥ हिमाचलभवा त्रिशिरा हरीतकी। सा च सर्व्वरोगनाशिनी गन्धयुक्तदयकरणे प्रशस्ता। इति वैद्यकम्॥
("चेतकी द्विविधा प्रोक्ता चाकाराद्वर्णतस्तथा।
षड़ङ्गुला हिता प्रोक्ता शुक्ला चैकाङ्गुला स्मृता॥
श्रेष्ठा कृष्णा समाख्याता रेचनार्थे जिगीषुणा।
चेतकी वृक्षशाखायां यावत्तिष्ठति तां पुनः॥
भिन्दन्ति पशुपक्ष्याद्या नराणां कोऽत्र विस्मयः।
चेतकीं यावद्धिधृत्य हस्ते तिष्ठति मानवः॥
तावद्भिनत्ति रोगांस्तु प्रभावान्नात्र संशयः॥"
इति कल्पस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥
एतस्या उत्पत्तिगुणजात्यादिकं यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"पपात विन्दुर्मेदिन्यां शक्रस्य पिबतोऽमृतम्।
ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी॥
हरीतक्यभया पथ्या कायस्था पूतनाऽमृता।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा॥
वयस्था विजया चापि जीवन्ती रोहिणीति च।
विजया रोहिणी चैव पूतना चामृताऽभया॥
जीवन्ती चेतकी चेति पथ्यायाः सप्त जातयः।
अलाबुवृत्ता विजया वृत्ता सा रोहिणी स्मृता॥
पूतनास्थिमती सूक्ष्मा कथिता मांसलाऽमृता।
पञ्चरेखाऽभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी॥
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः।
विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी॥
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता।
अक्षिरोगेऽभया शस्ता जीवन्ती सर्व्वरोगहृत्॥
चूर्णार्थे चेतकी शस्ता यथायोगं प्रयोजयेत्।
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः॥
षडङ्गुलायता शुक्ला कृष्णात्वेकाङ्गुला स्मृता।
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत्॥
काचित् स्पर्शेन दृष्ट्यान्या चतुर्द्धा भेदयेच्छिवा।
चेतकी पादपच्छायामुपसर्पन्ति ये नराः॥
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः।
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः॥
तावद्भिद्येत रोगैस्तु प्रभावान्नात्र संशयः।
न धार्य्या सुकुमाराणां कृशानां भेषजद्विषाम्॥
चेतकी परमा शस्ता हिता सुखविरेचनी॥")
जातीपुष्पम्। इति राजनिर्घण्टः॥

चेतनः, पु, (चेतति जानाति सर्व्वं इति। चित्+कर्त्तरि ल्युः।) आत्मा। इति हेमचन्द्रः॥ (यथा, पञ्चदश्याम्। ६। ४५।
"चेतना चेतनभिदा कूटस्थात्मकृता न हि।
किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम्॥")
मनुष्यः। इति राजनिर्घण्टः॥ प्राणी। इत्यमरः। १। ४। ३०॥
("रथादौ नियता चेष्टा चेतनेनाधितिष्ठिते।
न दृष्टा चेतनस्तेन प्राणादीनां प्रवर्त्तकः॥"
इति शब्दार्थचिन्तामणिधृतवचनम्॥)
चेतनं चैतन्यं विद्यतेऽस्य इति। "अर्श आदिभ्योऽच्।"५।२।१२७। इत्यच्।) प्राणयुक्ते त्रि। इति मेदिनी। ने, ६४॥ (यथा, मेघदूते। ५।
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥")

चेतनकी, स्त्री, (चेतनं करोति बुद्धीन्द्रियादिस्फुरणं वर्द्धयतीत्यर्थः। कृ+टः। ततो ङीष्।) हरीतकी। इति राजनिर्घण्टः॥

चेतना, स्त्री, (चेतयतेऽनया इति। चित् संज्ञाने "ण्यासश्रन्थेति।" युच् टाप् च।) बुद्धिः। इत्यमरः।१।५।१॥ (यथा, भागवते। ४।२१। ३४।
"प्रधानकालाशयधर्म्मसंग्रहे
शरीर एष प्रतिपद्य चेतनाम्॥"
"एष विभुः परमात्मापि शरीरे विषयकारां बुद्धिं प्राप्य क्रियाफलत्वेन प्रतीयते।" इति टीकाकृच्चूर्णिः॥) सा गर्भस्थबालकस्य सप्तमे मासे भवति। इति सुखबोधः॥ (ज्ञानात्मिका मनोवृत्तिः। यथा, भगवद्गीतायाम्। १३। ६।
"इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः॥"
तस्यामभिव्यक्तेन्द्रियवृत्तिः तप्त इव लौहपिण्डेऽग्निरात्मचैतन्याभासरसविद्धा चेतना इति शाङ्करभाष्यम्। ज्ञानात्मिका मनोवृत्तिरिति श्रीधरस्वामी॥ स्वरूपज्ञानयष्टिकायां प्रमाणसाधारणकारणिकायां चित्तवृत्तौ ज्ञानाख्यायां भगवतो विभूताविति शब्दार्थचिन्तामणिः॥)

चेतनीया, स्त्री, (चित्+णिच्+अनीयर् टाप् च। यद्वा चेतनायै हिता इति छः।) ऋद्धिनामौषधिः। इति राजनिर्घण्टः॥

चेदि:, पुं, देशभेदः। तत्पर्य्यायः। चैद्यपुरः २ डाहलः ३ चैद्यः ४। (अयं देशस्तु आग्नेय्यां दिशि शुक्तिमतीनदीतीरे स्थितः। यथा, बृहत्संहितायाम्। १४। ८।
"शौलिकविदर्भवत्सान्ध्रचेदिकाश्चोर्द्ध्वकण्ठाश्च॥")
तद्देशस्थे पु भूम्नि। इति हेमचन्द्रः॥

चेदिपतिः, पु, (चेदिदेशस्य पतिः पालकः राजा।) उपरिचरवसुः। यथा,—
"इन्द्रप्रीत्यै चेदिपतिश्चकारेन्द्रमहञ्च सः।
पुत्राश्चास्य महावीर्य्याः पञ्चासन्नमितौजसः॥"
इति महाभारतम्॥
(शिशुपालः। यथा, महाभारते। २।४०।१५।
"इति तस्य वचः श्रुत्वा ततश्चेदिपतिं नृप।
भीष्म रूक्षाक्षरा वाचः श्रावयामास भारत॥")

चेदिराजः, पु, (चेदीनां राजा इति। "राजाहः-सखिभ्यष्टच्।" इति टच्।) शिशुपालः। इति पुराणम्॥ (यथा, महाभारते। २। ४०। १२।
"विमुता चास्य दुर्बुद्धेर्बुद्धिर्बुद्धिमतांवर।
चेदिराजस्य कौन्तेय। सर्व्वेषाञ्च महीक्षिताम्॥")
उपरिचरवसुः। स तु चन्द्रवंशीयकृतिराजपुत्रो विष्णुभक्त इन्द्रसखा इन्द्रादेशाच्चेदिराज्यं गृहीतवान् इन्द्रदत्ताकाशगविमानेनोपरिचरो बभूव। एकदा ऋषयो देवाश्च विवदमानास्तमपृच्छन् किमौषधया पशुना वा यज्ञाः कर्त्तव्याः तेनोक्तं पशुना तत ऋषयस्तं शेपुर्भवता यथाशास्त्रमनुक्ता देवानां पक्षपातः कृतस्तस्मादधो गच्छ इत्यभिशापं स तद्घरणात् भूविवरे गतः। श्रीविष्णुना तस्य भक्षणार्थं नान्दीश्राद्धादौ गृहभित्तौ घृतधारादानं विहितम्। इति महाभारतम्॥

चेदिराट्, [ज्] पुं, (चेदिषु राजते इति। राज+क्विप्। यद्वा चेदिषु राट्।) शिशुपालः। इति त्रिकाण्डशेषः॥ (यथा महाभारते। २।३८।३१।
"स वै पश्येद्यथा धर्म्मं न तथा चेदिराडयम्॥"
उपरिचरवसुः। दमघोषश्च। इति पुराणम्॥)

चेवी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

चेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-पर-अकं-सकञ्च-सेट्-ऋदित्।) ऋ, अचिचेलत्। इति दुर्गादासः॥

चेल, क्ली, (चेल्यते विस्तार्य्यते तन्तुभिरिति। चेल चाले+कर्म्मणि घञ्। यद्वा चिल्यते परिधीयते यत् इति। चिल+कर्म्मणि घञ्।) वस्त्रम्। (यथा, मनुः। ११। १६६।
"चेलचर्म्मामिषाणाञ्च त्रिरात्रं स्यादभोजनम्॥")
अधमे त्रि। इत्यमरः। ३। १। २०१॥

चेलानः, पुं, (चेल+आनच्।) फललताविशेषः। चेलना इति भाषा॥ तत्पर्य्यायः। अल्पप्रमाणक २। इति रत्नमाला॥ अस्य फलस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। मधुरत्वम्। कफवायुकारित्वञ्च। इति राजवल्लभः॥

चेलालः, पुं, (चेलमिव लचं आलाति। आ+ला+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) फललताविशेषः। तत्पर्य्यायः। चित्रफलः २ खरवासः ३ राजतेमिषः ४ लतामनसः ५ नाटाम्रः ६ सेटुः ७। इति त्रिकाण्डशेषः॥

चेलिका, स्त्री, (चिल्यते परिधीयतेऽसौ इति। चिल+इन्। स्वार्थे कन् ततष्टाप्।) पट्टवस्त्रविशेषः। चेलिरकापड इति भाषा॥ यथा,—
"सेयं कृष्णस्य वनिता पीतशाटीपरिच्छदा।
रक्तचेलिकया च्छन्ना शातकुम्भघनस्तनी॥"
इति पाद्मे पातालखण्डम्॥

चेलुकः, पु, (चेलति बुद्धितत्त्वं गच्छति इति। चेल+उक।) बुद्धभिक्षुशिष्यः। तत्पर्य्यायः। श्रामणेरः २ प्रव्रजितः ३ मठपासकः ४ गोमी ५। इति त्रिकाण्डशेषः॥

चेल्ल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-पर-सक-सेट्।) लद्वयान्तः। ऋ, अचिचेल्लत्। अस्य ऋदनुबन्धः कुटते। कुटादिपाठवशिष्यफलं वेदेमूघारणभेदार्थो वा। अयं केचिन्न मन्यते। इति दुर्गादासः॥

चेष्ट, ङ ईहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अक-सेट्।) ईहो व्यापारः। ङ, चेष्टते मठितुं शिष्यः। इति दुर्गादासः॥

चेष्टकः, पु, (चेष्टते इति। चेष्ट+ण्वुल्।) रतिबन्धविशेषः। यथा, स्मरदीपिकायाम्।
"पादमेकं हृदि न्यस्य इतरेणैव चेष्टयेत्।
कान्तः क्रोडे स्थिता नारी बन्धोऽयं चेष्टको मतः॥"
चेष्टाकर्त्तरि त्रि॥

चेष्टा, स्त्री, (चेष्ट+भावे अङ् टाप् च।) कायिकव्यापारः। इति मुग्धबोधटीकायां दुर्गादासः॥ (यथा, मनुः। ७। ६७।
"आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम्।"
"प्रवृत्तिरत्र चेष्टा ज्ञानेच्छा प्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वात् चेष्टायाश्च यत्नवानात्माप्यनुमीयते॥" इति सिद्धान्तमुक्तावली। ५५॥)

चेष्टानाशः, पु, (चेष्टायाः स्वस्थादेर्व्यापारस्य नाशो निवृत्तिरत्र।) प्रलयः। इति राजनिर्घण्टः॥

चेष्टित, क्ली, (चेष्ट+भावे क्तः।) गतिः। चेष्टा। इति मेदिनी॥ (यथा, देवीभागवते। १।१५।१८।
"जलूकेव सदा नारी रुधिरं पिबतीति व।
मूर्खस्तु न विजानाति मोहितो भावचेष्टितैः॥")

चैतन्य, क्ली, (चेतन एवेति। स्वार्थे भावे वा ष्यञ्।) प्रकृतिः। इति राजनिर्घण्टः॥ चेतना॥ (यथा,
"चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते।
ज्ञानक्रिये जगत्कर्त्तुर्दृश्येते चेतनाश्रये॥
नेष्यते वैशेषिकैः साङ्ख्यैश्चेति शेषः।" इति शब्दार्थचिन्तामणिः॥ तथाच, याज्ञवल्क्ये। ३। ८१।
"मनश्चैतन्ययुक्तोऽसौ नाडीस्नायुशिरायुतः।
सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि॥")

चैतन्यः पु, (चेतन एव। स्वार्थे ष्यञ्।) भगवदवतारविशेषः। तस्य प्रमाणं यथा,—
"श्रुत्वा तु कलिधर्म्मांस्तान् ब्रह्मा लोकपितामहः।
सर्व्वलोकहितार्थाय प्रोवाच मधुसूदनम्॥
भविष्यन्ति कलौ केनोपायेन धर्म्मपालनम्।
भक्तिमार्गमपीति कमलासनदस्य जगद्गुरो।॥
श्रीभगवानुवाच।
अवतीर्णो भविष्यामि कलौ निजगणैः सह।
शचीगर्भे नवद्वीपे स्वर्धुनीपरिवारिते॥
अप्रकाश्यमिदं गुह्यं न प्रकाश्यं बहिर्म्मुखे।
भक्तावतारं भक्ताख्यं भक्तं भक्तिप्रदं स्वयम्॥
मन्मायामोहिता केचिन्न ज्ञास्यन्ति बहिर्म्मुखाः।
ज्ञास्यन्ति मद्भक्तियुताः साधवो न्यासिनोऽमलाः॥
कृष्णावतारकाले याः स्त्रियो ये पुरुषाः प्रियाः।
कलौ तेऽवतरिष्यन्ति श्रीदामसुबलादयः॥
चतुःषष्टिमहान्तस्ते गोपा द्वादश बालकाः।
धर्म्मसंस्थापनार्थाय विहरिष्यामि तैरहम्॥
काले नष्टं भक्तिपथं स्थापयिष्याम्यहं पुनः।
कृष्णश्चैतन्यगौराङ्गो गौरचन्द्रो गौरहरिः॥
शचीसुतः प्रभुर्गौरो नामानि भक्तिदानि मे।
गच्छन्तु भुवि ते पुत्रा जायन्तां भक्तरूपिणः॥
धर्म्मसंस्थापनं काले कुर्व्वन्तु ते ममाज्ञया।
कृष्णावतारकाले ये मद्भक्तास्तान् शृणु क्रमात्॥
श्रीदामनामगोपालो मम रामस्य च प्रियः।
अभिरामः इति ख्यातः पृथिव्यां स भविष्यति॥
सुदामनामगोपालः श्रीमान् सुन्दरठक्कुरः।
वसुदामप्रियसखः श्रीधनञ्जयपण्डितः॥
सुबलो मे प्रियसखो गौरीदासाख्यपण्डितः।
कमलाकरपिप्पलाइः पूर्व्वख्यातो महाबलः॥
महाबाहुर्गोपबालः श्रीमान् साहृसपण्डितः।
पुरुषोत्तमो वैश्यकुले स्तोककृष्णः प्रियो मम।
अर्ज्जुनः पूर्व्वदेहे यः कलौ श्रीपरमेश्वरः॥
पूर्व्वप्रियो लवङ्गो मे कृष्णाख्यः स कलौ युगे।
श्रीधरः श्रीधरसमः पूर्व्वे श्रीमधुमङ्गलः॥
सुबलो बलरामसखः कलौ श्रीलहलायुधः।
द्वादशैते भविष्यन्ति कलौ मद्धर्म्मरक्षये॥
चतुःषष्टिमहान्तो ये स्त्रियः केचिच्च पूरुषाः।
पुरा गोपाङ्गनाः ख्याताः कलौ ताः पुरुषा भुवि॥
यतिर्य्यस्मात् कलौ चाहं तदर्थे पुरुषाः स्त्रियः।
नीलाम्बरश्चक्रवर्त्ती गर्गः ख्यातो मुनिः पुरा॥
अतिप्रिया राधिका मे श्रीगदाधरपण्डितः।
राधिकायाः प्रियांशः स श्रीगदाधरठक्कुरः॥
मधुमती प्रियसखी श्रीनरहरिसञ्ज्ञकः।
वृन्दा देवी प्राणसखी श्रीमुकुन्दः कलौ युगे॥
चन्द्रावली प्राणतुल्या कविराजः सदाशिवः।
ललिता या सखी मुख्या जगदानन्दपण्डितः॥
विशाखा या प्रियसखी श्रीदामोदरनामकः।
वनमाली कविराजः श्रीविशाखा सखी मम॥
श्रीरघुनाथभट्टस्य रङ्गदेवी मम प्रिया।
श्रीगदाधरभट्टस्तु सुदेवी या मम प्रिया॥
प्रबोधानन्दशिष्यास्तस्तुङ्गविद्या तथा प्रिया।
श्रीलराघवगोस्वामी चम्पकाख्या लता प्रिया॥

गोस्वामी श्रीलभूगर्भः इन्दुलेखा तथा प्रिया ।
काशिमिश्रः शशिरेखा रूपः श्रीरूपमञ्जरी ॥
श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी ।
श्रीरघुनाथदासः श्रीस्वरूपमञ्जरी मम ॥
द्वितीयो रघुनाथश्च श्रीरागमञ्जरी प्रिया ।
श्रीलगोपालभट्टः श्री-अनङ्गमञ्जरी सखी ॥
लोकनाथः प्रेमभक्तो लवङ्गमञ्जरी सखी ।
श्रीगदाधरभट्टस्तु प्रिया श्रीगुणमञ्जरी ॥
भट्टः श्रीजीवगोस्वामी योगमाया सहायिनी ।
दूती कलावती प्रेष्ठा श्रीगोविन्दः प्रियो मम ॥
दूती लीलावती श्रीमान् माधवः प्रीतिवर्द्धनः ।
वासुघोषाभिधो दूती ममानन्दप्रदायिनी ॥
श्रीशिवानन्दभार्य्या सा मत्प्रियेन्दुमती सखी ।
श्रीपरमानन्दपुरि प्रियो मे उद्धवः सखा ॥
श्रीलराघवदासस्तु धनिष्ठा मे प्रिया सखी ।
शुक्लाम्बरो ब्रह्मचारी याज्ञिको ब्राह्मणः स्मृतः ॥
पण्डितो जगदीशश्च यज्ञपत्नी मम प्रिया ।
आचार्य्यः श्रीलभगवान् श्रीचैतन्यप्रियांशभाक् ॥
पण्डितो गरुडः श्रीमान् गरुडो मम वाहनः ।
श्रीलगोपीनाथसिंहोऽक्रूरो भक्तो मम प्रियः ॥
घोषः शङ्कर आख्यातो गुणसागररायकः ।
माधवः शान्तगुरुर्निर्विश्वकर्म्मा तु भास्करः ॥
वनमाली सुदामा च सार्व्वभौमो वृहस्पतिः ।
प्रिया इन्दुमुखी या मे मकरध्वजविश्रुतः ॥
सिंहानन्दो लोकनाथः कविचन्द्रस्ततः परम् ।
श्रीनाथो रामनाथश्च चत्वारः सनकादयः ॥
काशिमिश्रस्तु कुब्जा स्याद्रामानन्दोऽर्ज्जुनः सखा ।
प्रतापरुद्रः ख्यातोऽसाविन्द्रद्युम्नो महीपतिः ॥
ठक्कुरश्च कालिदासः पुलिन्दीवनचारिणी ।
शिखी च राधिका दासी मा इति ख्यातिसंयुता ॥
आचार्य्यगोपीनाथस्य रत्नावती मम प्रिया ।
शार्ङ्गदासः पद्मिनी स्यात् सूर्य्यो विश्वेश्वरः स्मृतः ॥
भानुमती सत्यराजो रामानन्दः कलावती ।
अयश्च विजयश्चैव गोविन्दो गरुडस्तथा ॥
आचार्य्यरत्नचन्द्रः स्याद्व्यासो वृन्दावनः स्मृतः ।
शुकदेवो व्यासपुत्रो भट्टो वल्लभ ईरितः ॥
शिवानन्दोऽब्जज इव देवानन्दश्च भार्गवः ।
पण्डितः श्रीजगन्नाथो दुर्व्वासा मुनिरुच्यते ॥
आचार्य्यः श्री-अनन्तश्च हरिदासस्तथैव च ।
एता गोप्यो व्रजे ख्याता हृदयानन्द एव च ॥
प्रियास्तु परिते धर्म्मसंस्थापने कलौ ।
एतेषां पुण्यनामानि ये स्मरन्ति दिने दिने ॥
ते प्राप्नुवन्ति मद्भक्तिं पुनन्ति भुवनत्रयम् ।
मद्भक्तदासा ये मर्त्त्या नास्ति तेषां समः क्वचित् ॥
श्रुत्वा भगवतो वाक्यं ब्रह्मा हर्षमवाप्तवान् ।
स्तौति तं देवदेवेशं नेदुर्द्दुन्दुभयस्तदा ॥
जगुर्गन्धर्व्वप्रवरास्तुम्बुरुप्रमुखास्तदा ॥”

इत्यनन्तसंहितायां श्रीचैतन्यजन्मखण्डे सप्तपञ्चाशत्तमोऽध्यायः ॥ * ॥ अपि च ।

“यः सत्ये सितवर्णमादधदसौ श्रीशुक्लनामाभवत्
त्रेतायां मखभुक् मखाख्य उचितोऽभूद्रक्तवर्णं दधत् ।
यः श्यामं दधदाप्तु वर्णकममुं श्यामो युगे द्वापरे
सोऽयं गौरविधुर्व्विभाति कलयन्नामावतारं कलौ ॥
नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः ।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिव ॥”

इति गौरगणोद्देशः ॥

(अयमेव भगवांश्चैतन्यदेवो नवीनवैष्णवसम्प्रदायविशेषस्य प्रवर्त्तकस्तत्सम्प्रदायैश्चोपास्यदेवत्वेनासौ परिगृहीतश्च । असौ एव वृन्दावनरमण-श्रीकृष्णस्य पूर्णावतार इति केचित्, परन्तु प्रामाणिकग्रन्थवचनादर्शनात् तन्न मन्यते अतएवास्मिन् विषये पण्डितानां प्रायशो मतभेदो दृश्यते ।

स तु प्रभुः (१४०७) सप्ताधिकचतुर्द्दशशतशके कुम्भस्थे सवितरि पौर्णमास्यां तिथौ शुक्रवारे प्रदोषसमये नवद्वीपाख्यनगर्य्यां प्रादुर्बभूव । तस्मिन्नेव महामहिम्नस्तस्य भगवतो जन्मसमये चन्द्रदेवं प्रति सैंहिकेयोपरागो जातः । एतदुपलक्षीकृत्य गङ्गास्नानार्थं बहवो लोका नानादिग्देशादागत्य तत्र मिलिताः । तदा ग्रस्तेऽपि राहुणा चन्द्रमसि भक्तजनकुमुदबान्धवो गौरचन्द्रः समवेतलोकानां हरिसंकीर्त्तनप्रभृतिभिर्मङ्गलाचरणैः सह शचीपूर्व्वपर्व्वतादुदियाय । भवन्ति हि शुभसूचकानि महतामाविर्भूतानि । अतस्तदापि प्रसन्ना दिक् शैत्यसौगन्ध्यमान्द्यादित्रिगुणगणाढ्यो मलयसमीरणः प्रसन्नानि च साधुजनमनांसि समभवन् । अस्य पिता जगन्नाथमिश्रस्तु पुरा श्रीहट्टनिवासी आसीत् । कदाचित् गङ्गास्नानार्थमेव नवद्वीपमागत्य विप्रचक्रवर्त्तिकुलतिलकस्य नीलाम्बरशर्म्मणः शचीनाम्नीं कन्यां परिणीतवान् । ततो गच्छति काले अथ चैतन्यदेवः शचीगर्भे त्रयोदशमासं यावदुषित्वा जगन्नाथमिश्रस्य दशमपुत्रत्वेन समभवत् । अस्य पूर्व्वजो विश्वरूपो नाम जगन्नाथमिश्रस्यापरः पुत्र आसीत् । स तु यौवन एव ज्ञानवैराग्यविशारदो दारपरिग्रहमनङ्गीकुर्व्वन् पारिव्राज्यधर्म्मं समाश्रयत् ।

अथ चैतन्यदेवस्य जातकर्म्मादिसंस्कारे यथाकालं क्रमशो निवृत्ते अस्य मातामहो नीलाम्बरचक्रवर्त्ती सुलक्षणादिकमवलोक्य विश्वम्भर इति नाम्नैनमाजुहाव । शचीदेवी तु पुनः पुनः पुत्रधनेन वञ्चिता प्रियतममेनं कनीयांसं संसारस्थितिदीर्घजीवनकामनया निमाइ इत्याख्यया पौरवासिनस्तु असामान्यरूपलावण्यतया परमसमादरेण गौर इत्याख्यया च आहूतवन्तः । परं धर्म्मरसिकानां भक्तानां समाजे, शाक्यसिंहस्य बुद्धदेव इव अस्य महाप्रभुरिति चैतन्यदेव इति च आख्या प्रसिद्धा ।

अथ प्राप्ते काले चैतन्यदेवोऽयं शास्त्रसागरपारगमशेषबुधवर्गवन्दितचरणारविन्द महामहोपाध्याय गङ्गादासशर्म्माणमुपाध्यायत्वेनाङ्गीकृत्य स्वल्पेनैव कालेन सर्व्वशास्त्रार्थतत्त्वज्ञः समभवत् । अस्य बुद्धिप्राखर्य्यमवगम्य तदा सर्व्वे एवैनं देवांशसम्भूतममन्यन्त । अथ कदाचिदयं गङ्गास्नानार्थं गत्वा तत्र वल्लभाचार्य्यस्य लोकातीतरूपलावण्यां लक्ष्मीं नाम कन्यामवलोक्य मोहित आसीत् । वल्लभाचार्य्यस्तु एतदवगम्य स्वयमेव तां कन्यामस्मै सम्प्रददे । विवाहानन्तरमेवासौ छात्रानध्यापयितुं प्रवृत्तः । एतस्मिन्नेव समये बहवो दिग्विजयिनः पण्डिता नवद्वीपमागत्य अस्य तर्कजाले समाच्छन्ना भग्नदर्पाश्च सन्तः प्रतिनिवृत्ताः । असावपि दिग्विजिगीषया पूर्व्वादिस्थलीं गत्वा तत्रस्थान् पण्डितान् विमोहयन् सुविमलयशः प्राप्तवान् । एतस्मिन्नेव काले अस्य पूर्व्वपत्नी कालधर्म्मं प्राप्ता । चैतन्यदेवस्तु तस्या विरहेण आकुलितोऽपि मातुरनुरोधेनैव पुनः सनातनपण्डितस्य विष्णुप्रियानाम्नीं कन्यां द्वितीयपत्नीत्वेन स्वीचकार । परं सर्व्वगुणविभूषितायाः साक्षात् लक्ष्म्या इव लक्ष्म्या मरणादेवासौ संसारविरक्तः श्रीवासादिभिर्भक्तवर्गैर्मिलितो हरिभक्तिरसनिमग्न एव कालं यापयामास । अथ कदाचित् पितृलोकोद्धारवासनया गयातीर्थं गत्वा भक्तचूडामणेः श्रीमदीश्वरपुरिनाम्नो गोस्वामिनः सकाशात् हरिनामामृतदीक्षां लब्ध्वात्मानं कृतकृतार्थं मत्वा च स्वदेशं प्रत्यावृत्तवान् । एतस्मिन्नवसरे पाषण्डदुराचारौ दस्युप्रवरौ जगाइ माधाइ चेति प्रसिद्धौ ब्रह्मबन्धू अन्यांश्च कुलादिपाधिमीलितान् महापातकिनः करुणया हरिनामदीक्षादानेन संसारसागरात् समुद्धृत्य यवनजातीयकानिप्रभृतीन् वैष्णवद्वेषिणः स्वमहिम्ना दमयामास । ततः प्रभृत्येवासौ भक्तिरसप्रधानं वैष्णवधर्म्मं प्रचारयितुमिच्छन् नित्यानन्दाद्वैताचार्य्यादिभिर्भक्तवर्गैः सह नानाजनपदं परिभ्रमन् बहूनेव जनान् प्रेमोन्मत्तानकरोत् । अथ(१४३१) एकत्रिंशदधिकचतुर्द्दशशतशके उत्तरायणसंक्रान्त्यां संसारमायां परित्यज्य काटोयाख्यग्रामे केशवभारतिसकाशात् सन्न्यासधर्म्मं समाश्रयत् । अथ नीलाचलमागत्य श्रीजगन्नाथदेवं दृष्ट्वा राज्ञः प्रतापादित्यस्य सभापण्डितं वेदान्तशास्त्रपारदर्शिनं सार्व्वभौमं विचारेण पराजित्य वैष्णवदीक्षां प्रदत्तवान् । अथ कदाचित् गोदावरीतीरे भक्तवरं रामानन्दमवलोक्य सेव्यनिर्णयैर्धर्म्मालापैरात्मानं कृतकृत्यवदमन्यत । ततोऽसौ त्रिपदी-शिवकाञ्ची विष्णुकाञ्ची-त्रिमल्लप्रभृतीन् बहून् दाक्षिणात्यजनपदान् हरिप्रेमरसेन प्लावयित्वा द्वारकातीर्थदर्शनार्थं प्रस्थित । तत्रैवासौ ‘कृष्णकर्णामृत’ नाम सुप्रसिद्धवैष्णवग्रन्थं लब्धवान् । अतः परं पुनरेव नीलाचलमागत्य काशीश्वरनाम्न कस्यचिद्भक्तप्रधानस्य भवने अवस्थितवान् । अत्रैवासौ श्रीश्रीजगन्नाथदेवस्य रथयात्रामहोत्सवे हरिसंकीर्त्तनादिकं विधाय प्रेमोन्मादप्रलापादिभिर्भक्तिलक्षणं दर्शयामास । अथ गच्छति काले वृन्दावनं

जिगमिषुर्वंश्येनेव पथा अजन् स्वभावसारल्येन व्याघ्रादीनपि हिंसजन्तून् भक्तिप्रेमणा मादयित्वा वृन्दावनमुपतस्थे। तत्र स्वभक्तवृन्दात् एवासौ गोपीवल्लभश्रीकृष्णस्य विहारस्थानादिकमवलोक्य मथुरासन्निध्य प्रस्थित। ततोऽस्मात् स्थानात् प्रयागगमनकाले बहून् पाषण्डानपि यवनान् हरिभक्तान् विधाय वाराणसीमुपस्थित। तत्र कियत्कालमुषित्वा स्वधर्म्मं प्रचार्य्य च पुनर्नीलाचलमाजगाम। अयन्स्य एवासौ स्वप्रचारितवैष्णवधर्म्मस्य माहात्म्यं विज्ञापयितु भक्तवृन्दाग्रगण्यान् रूपसनातनादीन् नानातीर्थस्थानेषु प्रेषयामास। अथ स्वभक्तैर्मिलितो नानाविधमहोत्सवेन हरिसंकीर्त्तनादिकं विधाय भक्तिरसस्य उत्कटकोटिमभिगम्य विरहोन्मादादिप्रगाढभक्तिलक्षणैरन्वित आसीत्। तत एवासौ स्वभक्तगणान् कलियुगे हरिसंकीर्त्तनस्य माहात्म्यादिकं श्रावयित्वा अष्टचत्वारिंशद्वर्षवयसि कालस्य दुरतिक्रमणीयत्वात् (१४५५) पञ्चपञ्चाशदधिकचतुर्द्दशशततमशके मानवकायं परित्यज्य अन्तर्हितवान्॥)

चैत्य, क्ली पु, (चित्यस्य इदम्। "तस्येदम्।" ४। ३। १२०। इत्यण्।) आयतनम्। इत्यमरः। २। २। ७॥ यज्ञस्थानं केचित्तु सुखरहित देवकुलसदृशं यज्ञायतनं सचित्यमचित्यमपीत्याहुः। देवायतनमात्रम्। म्टर्श देवकुलम्। इति भरतः॥ (यथा, महाभारते। २। ३। १२। "यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः॥") चिता। इति त्रिकाण्डशेषः॥

चैत्य, पुं, (चैत्ये देवायतनादिस्थाने तिष्ठतीति। चैत्य+अण्।) वृक्षः। बिल्व। उद्देशवृक्षः। इति मेदिनी भरतश्च॥ शेषस्य पर्य्यायः। देवतरु २ देवावासः ३ करिभ ४ कुञ्जरः ५। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ६। ३। ४०। "वृक्षाः पतन्ति चैत्याश्च ग्रामेषु नगरेषु च॥" चैत्यज्ञः पुरुषः। यथा, भागवते। ३। २६। ६०। "अहङ्कारस्तयोरुद्धिक्त चैत्यस्ततोऽभवत्॥")

चैत्यद्रुः, पुं, (चैत्य एव द्रुः वृक्षः।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥ (अश्वत्थशब्देऽस्य गुणादयो ज्ञातव्याः॥)

चैत्यमुख, पुं, (चैत्यं चितिसम्पन्नं विस्तृतमित्यर्थः मुखं यस्य।) कमण्डलुः। इति त्रिकाण्डशेषः॥

चैत्यवृक्ष, पु, (चैत्यसंज्ञया प्रसिद्धो वृक्षः।) अश्वत्थवृक्षः। इति रत्नमाला॥ (यथा, मनुः। ६। २६४। "चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च॥")

चैत्र, क्ली, (चीयन्ते जीवाः स्थानात् स्थानान्तरमनेनेति। चि+बाहुलकात् करणे त्रन्। ततः स्वार्थे अण्।) म्टतम्। देवकुलम्। इति मेदिनी। रे, ३७॥ देउल इति भाषा॥ (यज्ञस्थानम्। यथा, महाभारते। १। १०६। १३। "भीष्मेण धर्म्मतो राजन्। सर्व्वतः परिरक्षिते। बभूव रमणीयश्च चैत्ययूपशताङ्कितः॥")

चैत्रः, पुं, (चित्रे विचित्रे कार्य्यादौ साधुः। चित्र+अण्।) बुद्धभिक्षुकः। इति त्रिकाण्डशेषः॥ वर्षपर्व्वतविशेषः। इति मेदिनी। रे, ३७॥ (यथा, हारावल्याम्। "हिमवान् हेमकूटश्च निषधो मेरुरेव च। चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः॥" चित्रायां भवः। चित्रा+अण्।) चित्रागर्भजो बुधपुत्रः। स सप्तद्वीपाधिपतिः सुरथराजपितामहः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ (चित्रानक्षत्रयुक्ता पौर्णमासी यत्र स। चित्रा+"विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।" ४। २। २३। इति पक्षे अण्।) मासभेदः। स तु सौरचान्द्रभेदेन द्विविधः। तत्र मीनराशिस्थरविकः सौरः, मीनस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। इति मलमासतत्त्वम्॥ तत्पर्य्यायः। चैत्रिकः २ मधुः ३। इत्यमरः। १। ४। १५॥ चैत्री ४ कालादिकः ५। इति राजनिर्घण्टः॥ चैत्रकः ६ चित्रिकः ७। इति शब्दरत्नावली॥ ✱॥ तत्र जातफलम्।

"सत्कर्म्मशाली विनयी सुवेशी
भोगी सुखी स्यान्मधुरान्नभोजी।
सत्सङ्गयुक्तो द्विजदेवभक्तो
भवेन्मनुष्यो मधुमासजन्मा॥"

इति कोष्ठीप्रदीपः॥ ✱॥

(चैत्रकृत्यानि तु वारुण्यशोकाष्टमी-श्रीरामनवमी-मदनत्रयोदशी-मदनचतुर्द्दशीप्रभृतीनि। एतेषां प्रकरणादिकं तत्तच्छब्दे द्रष्टव्यम्॥) तत्र शिवव्रतं कर्त्तव्यम्। यथा,—

"चैत्रे मास्यथ माघे वा योऽर्च्चयेत् शङ्करं व्रती। करोति नर्त्तनं भक्त्या वेत्रपाणिर्दिवानिशम्॥ मासं वाप्यर्द्धमासं वा दश सप्त दिनानि वा। दिनमानं युगं सोऽपि शिवलोके महीयते॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

अधुनास्य सन्न्यासं इति गाजन् इति च भाषा॥

चैत्रक, पु, (चैत्र+एव। स्वार्थे कन्।) चैत्रमास। इति शब्दरत्नावली॥

चैत्ररथ, क्ली, (चित्ररथेन गन्धर्व्वेण निर्वृत्तम्। "तेन निर्वृत्तम्।" ४। २। ६८। इत्यण्।) कुवेरस्योपवनम्। तत्तु चित्ररथगन्धर्व्वनिर्म्मितम्। इत्यमरः। १। १। ७३॥ (यथा, रघुः। ५। ६०। "एको ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान्॥" इदन्तु पीठस्थानानामन्यतमम्। यथा, देवीभागवते। ७। ३०। ५८। "मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे॥" पुं, कुरुपुत्रविशेषः। यथा, महाभारते। १। ६४। ४६। "अविक्षितमभिष्वन्तं तथा चैत्ररथं मुनिम्। जनमेजयञ्च विख्यातं पुत्त्रांश्चास्यानुशुश्रुम॥")

चैत्रावली, स्त्री, (चैत्रे चैत्रमासे आ सम्यक्रूपेण वरयत्यभिलषतीति। आ+वर+णिच्+अच्। स्त्रियां ङीप्। रस्य लत्वम्।) चैत्री पूर्णिमा। तत्पर्य्यायः। मधूत्सवः २ सुवसन्तः ३ काममहः ४ वासन्ती ५ कर्द्दमी ६। इति त्रिकाण्डशेषः॥

चैत्रिक, पु, (चित्रानक्षत्रयुक्ता पौर्णमासी विद्यतेऽस्मिन्। "विभाषा फल्गुनीति।" ४। २। २३। इति पक्षे ठक।) चैत्रमासः। इत्यमरः। १। ४। १५॥

चैत्री, [न्] पुं, (चैत्री चित्रायुक्ता पौर्णमासी विद्यतेऽस्मिन्। व्रीह्यादित्वादिनिः।) चैत्रमासः। इति राजनिर्घण्टः॥ (चित्रा+इञ्।) चैत्रिरिति च पाठः॥

चैद्यः, पुं, (चेदीनां जनपदानां राजा। चेदि+ष्यञ्।) शिशुपालः। स तु दमघोषसुत। इति जटाधरः॥ (यथा, माघे। २। ३८। "त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे॥" चेदिराजवंश्यः। इति पुराणम्॥) तद्देशीये पुं भूम्नि। इति त्रिकाण्डशेष॥

चोक्ष, त्रि, (चायते अच्यते गीयते इत्यर्थः। चक्ष+कर्म्मणि घञ्। ततः पृषोदरात् साधुः।) गीतः। शुचिः। (यथा, मनुः। ३। २०७। "अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि। विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा॥") दक्ष। (यथा, महाभारते। १२। ७०। ८। "अनीर्षुर्गुप्तदारः स्याच्चोक्षः स्यादघृणी नृपः॥") तीक्ष्णः। मनोज्ञः। इति मेदिनी। षे, १२॥

चोच, क्ली, (प्रशस्तं चोचं त्वक् विद्यतेऽस्य। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्।) गुडत्वक्। इत्यमरः। २। ४। १३४॥ (यथा, "सूक्ष्मा चोरकचोचपत्रतगरस्थौणेयजातीरसाः॥" इति वाभटे सूत्रस्थाने। १५। ४५। तेजपात इति ख्यातम्। इति केचित्॥ (अस्य पर्य्याया यथा,— "त्वक्पत्रञ्च वराङ्गं स्याद् भृङ्गं चोचं तथोत्कटम्॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।) उपभुक्तफलावशिष्टम्। चोँचा इति ख्यातम्॥ तालफलम्। इति भरत। कदलीफलम्। इति सारसुन्दरी॥ नारिकेलम्। इति स्वामी॥ वल्कलम्। चर्म्म। इति धरणी॥

चोचक, क्ली, (चोच+स्वार्थे कन्। यद्वा, चोचेन त्वचा कायतीति। कै+कः।) वल्कलम्। इति शब्दरत्नावली॥

चोटी, स्त्री, शाटी। इति हेमचन्द्रः। ३। ३३८॥

चोड़ः, पु, (चुड़ति संवृणोति शरीरमिति। चुड़ संवरणे+अच्।) प्रावरणम्॥ देशविशेषः। इति मेदिनी। डे, १३॥

चोदना, स्त्री, (चोदयति प्रवर्त्तयतेऽनयेति। चुद क्षुदि+युच्। टाप् च।) विधिः। (यथा, गीतायाम्। १८। १८। "ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना॥") प्रेरणा। यथा। चोदना लक्षणोऽर्थो धर्म्म इति जैमिनिसूत्रम्॥ एकोद्दिष्टादिष्टकादौ श्राद्धप्रकारादि चोदना। इति स्मृतिः॥

चोदनागुड़ः, पुं, (चोदनया प्रेरणया गुड्यते उत् क्षिप्यते इति। गुड़+"इगुपधक्रेति।" ३। १

१३५। इति कः। क्रीड़नकाले कन्दुकानां कन्दुक्षेपणप्रसिद्धतयास्य तथात्वम्।) कन्दुकः। इति त्रिकाण्डशेषः॥

चोद्यं, क्ली, (चोदयति प्रेरयति चित्तं रसविशेषे अनेनेति। चुद्+णिच्+यत्।) अद्भुतम्। प्रश्नः। इति मेदिनी। ये, २३॥ (यथा, महाभारते। ५। ४३। ३४।
"सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च।
अस्तेयं ब्रह्मचर्य्यञ्च तथासंग्रहमेव च॥")

चोद्यः, त्रि, (चोदयितुं प्रेरयितुं योग्यः। "अर्हे कृत्यतृचश्च।" ३।३।१६९। इति यत्।) चोदनार्हः। प्रेरणयोग्यः। इति मेदिनी। ये, २३॥ (यथा, महाभारते। ५। ३८। ७।
"नीवारमूलेङ्गुदशाकवृत्तिः
सुसंयता चाग्निकार्य्येषु चोद्यः।
वने वसन्नतिथिष्वप्रमत्तो
धुरन्धरः पुण्यकृदेष तापसः॥")

चोपनं, क्ली, (चुप मन्दगमने+भावे ल्युट्।) शनैर्गमनम्॥

चोरः, पुंस्त्री, (चोरयतीति। चुर+णिच्+पचाद्यच्।) स्तेयकर्त्ता। तत्पर्य्यायः। चौरः २ दस्युः ३ तस्करः ४ प्रतिरोधी ५ मलिम्लुचः ६ स्तेनः ७ ऐकागारिकः ८ स्तैन्यः ९ प्रच्छन्नजन. १० मोषकः ११ पाटच्चरः १२ परास्कन्दी १३ कुम्भिलः १४ खनकः १५ शङ्कितवर्णः १६ खानिकः १७। इति शब्दरत्नावली॥ प्रमुरपुरुषः १८। इति त्रिकाण्डशेषः॥ लुप्तः १९ तक्ता २० रिभ्वा २१ रिपुः २२ रिक्ता २३ विह्वायाः २४ तायुः २५ वनर्गुः २६ हुरश्चित् २७ मुषीवान् २८ मलिम्लुचः २९ अघशंसः ३० वृकः ३१। इति वेदनिघण्टौ ३ अध्याय.॥ (यथा, देवीभागवते १। १९। ९।
"चोरेषु चौरवृद्धिस्ते साधुबुद्धिस्तु तापसे।
स्वपरत्वं तवाप्यस्ति विदेहत्वं कथं नृप!॥")
शष्पशटी। इति क्रमचन्द्रिकाधृतचक्रपाणिः॥ गन्धद्रव्यविशेषः। यथा। चोरकुङ्कुमरोचना। इत्यष्टगन्धकथने आगमः॥

चोरकः, पुं, (चोरो गन्धद्रव्यविशेषस्तद्वत् कायतीति। कै+कः।) शठा। इति रत्नमाला॥ पिडिङ्ग इति भाषा। (चोर+स्वार्थे कन्।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। शङ्कितः २ खङ्गः ३ दुश्चरः ४ क्षेमकः ५ रिपुः ६ चपलः ७ कितवः ८ धूर्त्तः ९ नटः १० नीचः ११ निशाचरः १२ गणहासः १३ कोपनकः १४ चोरः १५ फलचोरकः १६ दुष्कुलः १७ ग्रन्थिलः १८ सुग्रन्थिः १९ पर्णचोरकः २० ग्रन्थिपर्णः २१ ग्रन्थिदलः २२ ग्रन्थिपत्रः २३। (यथा, सुश्रुते कल्पस्थाने ६ अध्याये।
"चोरको वरुणः कुष्ठं सर्व्वगन्धा ससप्तला॥")
अस्य गुणाः। तीव्रगन्धत्वम्। उष्णत्वम्। तिक्तत्वम्। वातकफनाशसुखरुग्णाजीर्णक्रिमिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

चोरपुष्पिका, स्त्री, (चोरपुष्पी+स्वार्थे संज्ञायां वा कन् टाप् पूर्व्वह्रस्वश्च।) चोरपुष्पी। इति शब्दरत्नावली॥ ("शङ्खिनी चोरपुष्पिका।" इति वैद्यकम्॥)

चोरपुष्पी, स्त्री, (चोरो गन्धद्रव्यविशेषस्तद्वत् सुगन्धि पुष्पमस्याः। "पाककर्णपर्णेति।" ४।१।६४। इति ङीष्।) तृणविशेषः। वोया इति चोरहुली इति च ख्याता इति भरतः॥ तत्पर्य्यायः। शङ्खिनी २ केशिनी ३। इत्यमरः।२।४।१२६॥ चोरपुष्पिका ४। इति शब्दरत्नावली॥ (चोरा ५। इति शब्दचन्द्रिका॥)

चोरस्नायुः, स्त्री, (चोरस्य स्नायुरिव।) काकनासालता। तस्करस्नायुरिति राजनिर्घण्टदर्शनात्॥

चोरा, स्त्री, (चोरो गन्धद्रव्यविशेषः तस्येव गन्धोऽस्त्यस्य। अच् ततष्टाप्।) चोरपुष्पी। इति शब्दचन्द्रिका॥

चोरिका, स्त्री, (चोरस्य भावः। मनोज्ञादित्वात् ठन्।) चौरिका। चौर्य्यम्। इत्यमरटीकायां रायमुकुटः॥

चोलः, पुं, (चोलयति समुच्छ्रयति स्त्रीणां वक्षःप्रदेशे इति। चुल उन्नतौ+अच्।) कञ्चुलिका। काँचुलि इति भाषा॥ (यथा, आनन्दलहर्य्याम्। ६६। तम्॥")
"निजां वीणां वाणी निचुलयति चोलेन निभृत-
तत्पर्य्यायः। कूर्पासकः २। इत्यमरः।२।६।११८॥ कञ्चूकः ३। इति जटाधरः॥ कञ्चुली ४ कञ्चुलिका ५। इति शब्दरत्नावली॥ स्त्रीणां निचोल इति रमानाथः॥ पुंसोऽप्यैतौ चोला इति ख्यातौ इति सुभूतिः॥ नदादित्वात् चोली च। कूर्परः कफोणिर्जानु च तद्द्वयमस्यते क्षिप्यते अत्र कूर्पासः पृषमनीषादित्वाद्रलोपः तत. स्वार्थे कः। इति भरतः॥ * ॥ देशविशेषः। इति शब्दरत्नावली। अधुना ताञ्जोर इति ख्यातः॥ शस्त्रधारिवेदयागानधिकारिम्लेच्छविशेषः। स तु पूर्व्वं क्षत्रिय आसीत् सगरराजेनास्य धर्म्मनाशं वेशान्यत्वञ्च चकार। इति हरिवंशः॥

चोलकं, क्ली, (चोलयति आच्छादयतीति। चुल+णिच्+अच्+स्वार्थे कन्। यद्वा चोल इव कायति इति। कै+कः।) वल्कलम्। इति शब्दरत्नावली॥

चोलकः, पुं, (चोल इव कायति इति। कै+कः।) वाणवारः। कवचम्। इति हारावली।१८७॥ (देशभेदः। यथा कथासरित्सागरे। १९।९५।
"उल्लङ्घ्यमाना कावेरी तेन समर्द्दकारिणा।
चोलकेश्वरकीर्त्तिश्च कालुष्यं ययतु. समम्॥")

चोलकी, [न्] पुं, (चोलकमिवास्त्यस्य इति इनिः।) करीरः। नारङ्गः। किष्कुपर्व्व। इति मेदिनी। ने, १८४॥

चोलण्डुक., पुं, (चोलस्य अण्डुक इव शकन्ध्वादित्वात् साधुः।) शिरोवेष्टः। इति त्रिकाण्डशेषः॥

चोषः, पुं, (चूष्यते इति। चि+डः। ततः उषदाहे+अच्। चश्चासौ उषश्चेति।) पार्श्वज्वाला॥ यथा—
"हृच्छूलपीडनयुतं पवनेन पित्ता-
त्तृड्दाहचोषबहुलं सकफप्रसेकम्।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजडताभिरथापरञ्च॥
चोषः पार्श्वस्थितामिनेव सन्तापः।" इति भावप्रकाशः॥ (यथाच, सुश्रुते। १। ४२।
"यो गले चोषमुत्पादयति सुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः॥")

चोस्कः, पुं, (चन्दयति आह्लादयति। चदि+डः। ततः स्कन्दति आक्रमते शत्रून् स्कुनाति आप्लवते वा। स्कन्दि स्कु वा+डः। ततः पृषोदरादित्वे साधुः।) सिन्धुवारदेशीयाश्वः। इति त्रिकाण्डशेषः॥

चौक्षं, त्रि, (चोक्ष एव इति। स्वार्थे अण्।) मनोज्ञम्। इति महाभारतम्॥

चौरः, पुं स्त्री, (चोर एव प्रज्ञादिभ्योऽण्। यद्वा चुरा शीलमस्य। "इति छत्रादिभ्यो णः।" ४।४।६२। इति णः।) चोरः। इत्यमरः।२।१०।२४॥ (यथा, देवीभागवते। १। १९। ५९।
"चौरं वा तापसं वापि समानं मन्यते कथम्॥"
असुरविशेषः। यथा, हरिवंशे। १७९। १९।
"किरातीं चीरवसनां चौरसेनानमस्कृताम्॥"
कविभेदः।
"कविरमरः कविररुः कविश्चौरो मयूरकः॥"
इत्युद्भटः॥) चोरपुष्पी। इति मेदिनी। रे, ३०॥ (चोरपुष्पीशब्दे विवरणमस्य ज्ञेयम्॥) सुगन्धिद्रव्यविशेषः। इति हेमचन्द्रः॥

चौरिका, स्त्री, (चोरस्य कार्य्यं भावो वा। "द्वन्द्वमनोज्ञादिभ्यश्च।" ५।१।१३३। इति वुञ्। टापि अत इत्वम्।) चौर्य्यम्। इत्यमरः।२।१०।२५॥ (यथा, मनुः। १। ८२।
"चौरिकानृतमायाभिर्धर्म्मश्चापैति पादशः॥")

चौरी, स्त्री, (चौर+ङीष्।) चौर्य्यम्। इति शब्दरत्नावली॥ (गायत्त्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२। ६। ४९।
"चन्द्रिका चन्द्रधात्री च चौरी चौरा च चण्डिका॥")

चौर्य्यं, क्ली, (चोरस्य कर्म्म भावो वा। "गुणवचनाद्ब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) चौरधर्म्मः। चोरी इति चुरी इति च भाषा॥ तत्पर्य्यायः। स्तैन्यम् २ स्तेयम् ३ चौरिका ४। इत्यमरः।२।१०।२५॥ चौरी ५। इति शब्दरत्नावली॥ चोरिका ६। इत्यमरटीका॥ (यथा, मनुः। ९। २७६।
"सन्धिं छित्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः।
तेषां छित्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्॥")

चौलकर्म्म, [न्] क्ली, (चूडाया इदम्। "तस्येदम्।" ४।३।१२०। इत्यण् डस्य लत्वञ्च।

सततचौलमेव कर्म्म इति कर्म्मधारयः ।) शूद्र-कर्म्म । इति स्मृतिः ॥

चौलुक्य, पुं (चुलकस्य गोत्रापत्यमिति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) राजर्षिभेदः । इति हेमचन्द्रः । ३ । ३१२ ॥

च्यु, क हासे । सहने । इति कविकल्पद्रुमः ॥ (चुरा-पर-अकं-सकम-सेट् ।) अयं स्वाद्युपधः । क, च्यावयति । इति दुर्गादासः ॥

च्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-अनिट् ।) अयं स्वाद्युपधः । ङ, च्यवते । इति दुर्गादासः ॥

च्युत्, इर् क्षरणे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सकं-सेट् । क्वचित् अकम च ।) अयं स्वादियुक्तः । इर्, अच्युतत् अच्योतीत् । क्षर इह नामेचनम् । च्योतति घृतं वह्नौ यज्वा । आसिञ्च तीत्यर्थः । इति दुर्गादासः ॥ (यथाच, भट्टि । ६ । २८ ।

"सीतां जिघांसु सौमित्रे । राक्षसमायारतां ध्रुवम् । इह शोणितमभ्यग्रं गम्यद्वारे च्युतत्तयो ॥"

"अच्युतत् गलितमकर्म्मकोऽत्र । 'इति तट्टीकायां जयमङ्गलभरतौ ॥")

च्युत, त्रि, (च्यवते स्म इति । च्यु + कर्म्मणि क्तः । यद्वा च्युत् + घञर्थे क ।) क्षरितम् । यथा,—

"पिबन्ति त्वन्मुखाम्भोजच्युतं हरिकथामृतम् ॥"

इति श्रीभागवतम् ॥

(स्खलितम् । यथा, रघु । ११ । २५ ।

"सम्भवोऽभवदपोढकर्म्मणां ऋत्विजां च्युतविकङ्कतस्रुचाम् ॥")

च्युति, स्त्री, (च्यवते शोणितादिकमस्या इति । च्यु + अपादाने क्तिन् ।) भगम् । इति हेमचन्द्रः । ३ । ६०६ ॥ गुदद्वारम् । इति शब्दरत्नावली ॥ (च्यु + भावे क्तिन् ।) क्षरणम् । यथा,—

"कुर्य्यां हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये ॥"

इति कुमारसम्भवे । ३ । १० ॥

च्युप, पुं, (च्यवन्ते भाषन्तेऽनेन इति । च्यु + "च्युवः किच्च ।" उणां । ३ । २४ । इति पः स च कित् च्युधातुरत्र भाषणार्थे वर्त्तते इत्युज्ज्वलदत्तः ।) सुखम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

च्युस, क हासे । इति कविकल्पद्रुमः ॥ (चुरा-पर-अक-सेट् ।) क्वचित् पुस्तके हासे । अयं स्वादियुक्तः । क, च्योसयति । इति दुर्गादासः ॥

च्योत, स्त्री, (च्युत + पृषोदरादित्वादोत्वे साधुः ।) च्योतनम् । घृतादिक्षरणम् । इत्यमरटीका ॥

च्यौत्न, त्रि, (च्यवते इति । "जनिदाच्युमिति ।" उणां । ४ । १०४ । इति त्नण् ।) गमनकर्त्ता । ग्रयङ्ज । च्यौत्नपुराय । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वलम् । इत्युज्ज्वलदत्तः ॥)

छ

छ, छकारः । स तु व्यञ्जनसप्तमवर्णः । चवर्गद्वितीयवर्णश्च । (वङ्गाक्षरे ।) तस्य लेखनप्रकारो यथा,

"ऊर्द्ध्वादधोगता रेखा कुञ्चिता कुण्डली ततः । पुनश्चाधोगता तासु सर्व्वास्त्रमुपिशाचिका ॥"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ ("इचुयशानां तालु ।" इति ग्रन्थकारेणोक्तम् । "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥"

इति शिक्षाग्रन्थः ॥)

अस्योत्पत्तिर्यथा । प्रपञ्चसारे ।

"विसर्गस्तालुगः सोष्मा स्पृष्टं चवर्गोऽपि यस्तया ।"

अघोषस्यापि वर्गस्य द्वितीयादिवर्णोच्चारणे स्मरणार्द्धनादिति स्तोकगम्भीरस्पर्शादिति च यथास्थानमन्वेतीति तट्टीकाकारो विश्वरूपः ॥

अस्य ध्यानं यथा, वर्णोद्धारतन्त्रे ।

"ध्यानमस्याः प्रवक्ष्यामि द्विभुजाञ्च त्रिलोचनाम् ।
पीताम्बरधरां नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा छकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"छकारं परमाश्चर्य्यं स्वयं परमकुण्डली ।
सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिबिन्दुसहितं वर्णं सदा ईश्वरसंयुतम् ॥
पीतविद्युल्लताकारं छकारं प्रणमाम्यहम् ॥"

तस्य नामानि यथा, तन्त्रशास्त्रे ।

"छः स्यन्दन सुसमृणा च पशु पशुपतिस्मृतिः ।
निर्म्मलं तरलं वह्निर्भूतमात्रा विलासिनी ॥
एकनेत्रश्च वृषली द्विशिरा वामकूर्परः ।
गोकर्णा लाङ्गली वामकामसत्ता सदाशिवः ॥
माता निशाचरः मायुर्विश्वस्तः स्थितिशब्दकः ॥"

छं, त्रि (छायते परिक्रियते यत् इति । छो + कर्म्मणि घञर्थे कः ।) निर्म्मलम् । इति मेदिनी । छे, १ ॥ तरलम् । इत्येकाक्षरकोषः ॥

छः, पुं, (छो + भावे डः घञर्थे को वा ।) छेदनम् । इत्येकाक्षरकोषः ॥

छग, पुं स्त्री, (छं यज्ञादौ छेदनं गच्छति प्राप्नोतीति । गम + डः ।) छागः । इति हेमचन्द्रः । ४ । १२७५ ॥

छगण, स्त्री पुं, (छद + डः । छः तस्मै चर्म्माच्छादनायेत्यर्थः गण्यते इति । गण + कर्म्मणि अप् ।) करीषः । इति हेमचन्द्रः । ४।१२।७३ ॥

छगलं, स्त्री, (छ्यति छिनत्ति छायते वा । छो + छेदने + "छो गुग् ह्रस्वश्च ।" उणां । १ । ११३ । इति कलच् प्रत्ययः धातोर्गुगागमो ह्रस्वश्च ।) नीलवस्त्रम् । इति मेदिनी । ले, १ ॥

छगलः, पुं स्त्री, (छायते छिद्यते देवोपहाराय इति । छो + कलच् गुगागमो ह्रस्वश्च ।) छागः । इति मेदिनी । ले, ६१ ॥ (यथा, सुश्रुते । १ । ४६ ।

"नातिशीतो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः । छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः ॥")

छगलक, पुं स्त्री, (छगल + स्वार्थे कन् ।) छागः । इत्यमरः । २ । ९ । ७६ ॥

छगला, स्त्री, (छगलस्तदाकारोऽस्त्यस्य छगलवत् स्वक् विद्यतेऽस्येति वा । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् टाप् च ।) वृद्धदारकवृक्षः । इति शब्दरत्नावली मेदिनी च ॥ (अथच्छगलोऽस्या यथा, "कुसुम्भिकालवणी-जीवन्तीविम्बीनिकान्तीभाल्लातकच्छगलान्त्री-वृषादनीपद्मीशाल्मलीशिंशुपा स्थानिप्रमवशाणक-नैपारकेविदारप्रभृतीनि ।" इति सुश्रुते सूत्र-स्थाने ३४ अध्याये ।)

छगलाङ्घ्री, स्त्री, (छगलवदङ्घ्रिर्मूलमस्याः । ततो ङीप् ।) छगलान्त्री । इत्यमरटीकायां रमानाथः ॥

छगलाण्डी, स्त्री, (छगलवदण्ड अन्तं यस्याः ।) छगलान्त्री । इत्यमरटीकायां रायमुकुटः ॥ (पुंसि तु पीठस्थानभेदे । यथा, देवीभागवते । ७ । ३० । ७३ ।

"छगलण्डे प्रचण्डा तु चण्डिकाऽमरकण्टके ॥")

छगलान्त्रिका, स्त्री (छगलान्त्री + स्वार्थे कन् । टापि पूर्व्वह्रस्वः ।) छगलान्त्री । इति शब्दरत्नावली ॥

छगलान्त्री स्त्री (छगलवदन्त्रं यस्याः ।) वृद्धदारकवृक्षः । इत्यमरः । २ । ४ । १३७ ॥ वृकः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने । ३८ अध्याये । "श्यामामहाश्यामात्रिवृद्दन्तीशङ्खिनी-तिल्वककम्पिल्लकरम्यकक्रमुकपुत्रश्रेणीगवाक्षी-राजवृक्षकरञ्जद्वयगुडूचीसप्तलाच्छगलान्त्री-सुधाः सुवर्णक्षीरी चेति ।")

छगली, स्त्री (छगल + जातित्वात् ङीष् ।) छाग-माता । वृद्धदारकवृक्षः । इति विश्वः ॥

छटा, स्त्री, (छो + अटन् किच्च ।) दीप्तिः । (यथा राजतरङ्गिण्याम् । ४ । १२८ ।

"प्रतापांशुच्छटाकूटे पटवासमधर्म्मभि ।
जम्बुद्वीपद्विजेन्द्रस्य येनातन्यत मण्डनम् ॥")

समूहः । यथा, माघे । १ । ४७ ॥

"सटाच्छटाभिन्नघनेन बिभ्रता
नृसिंह सैंहीमतनुं तनुं त्वया ।"

(सटाच्छटाभिः केशरसमूहैः ।" इति मल्लिनाथः ॥)

छटाफलः, पुं (छटा इव परस्परसंसक्तानि फलानि यस्य ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥ (पूगशब्देऽस्य विवृतिर्ज्ञेया ॥)

छटाभा, स्त्री, (छटाभिर्दीप्तिभिर्भाति इति । भा + क्विप् । यद्वा । भा + कः । टाप् च ।) विद्युत् । इति हारावली । ५८ ॥

छ(च्छ)त्र, स्त्री, (छादयत्यनेनातपादिकमिति । छद + णिच् + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणां । ४ । १५८ । इति ष्ट्रन् णिलोपः ह्रस्वश्च ।) रौद्रवृष्टि-निवारणार्थावरणविशेषः । छाति इति भाषा ॥ तत्पर्य्यायः । आतपत्रम् २ । इत्यमरः । २।८।३२ ॥ छायामित्रम् ३ पटोटजम् ४ । इति शब्दरत्नावली ॥ आतपवारणम् ५ । राजच्छत्रं यथा,—

"आतपत्रञ्च राज्ञस्तु वृषलस्य सितन्तु तत् ।

पुण्डरीकमथो भद्रासनं राजासनं तु यत् ॥”
इति जटाधरः ॥
अपि च शब्दरत्नावल्याम् ।
“छत्रे कनकदण्डे तु राजचिह्नमुदाहृतम् ।
नृपलक्ष्म भवेत्तत्तु यच्छत्रं पृथिवीभुजाम् ॥”
तस्य गुणाः । वृष्ट्यातपधूलिवायुहिमनाशित्वम् । वर्णवृष्टिकारित्वम् । शुभ्रावरणमङ्गलकारित्वञ्च । इति राजवल्लभः ॥ * ॥ तस्योत्पत्तिर्यथा । एकदा ज्यैष्ठमासे जमदग्निमुनिर्धनुषि वाणान् सन्धाय सन्धाय प्रचिक्षेप तत्पत्नी रेणुका तान् वाणानानीयानीय तस्मै प्रादात् । सा मध्याह्नकाले रौद्रेण पीडिता वृक्षच्छायामवलम्ब्य किञ्चित् कालं स्थित्वा तानानिनाय । ऋषिस्तदा क्रुद्धस्तामाह किं चिरेणागता । सा आह सूर्य्यतेजसा मे शिरः पादौ च सन्तप्तौ तेन वृक्षच्छायामाश्रित्य स्थिता तस्मात् चिरायैतत् कृतम् । तच्छ्रुत्वा मुनिराह अद्य सूर्य्यमस्त्राग्नितेजसा निपातयिष्यामीत्युक्त्वा धनुषि वाणान् सन्धाय सूर्य्याभिमुखोऽतिष्ठत् । सूर्य्यस्तं दृष्ट्वा भीतो द्विजरूपेण आगत्य आह सूर्य्यादन्नादि भवति तेनान्नेन भवद्भिः कर्म्माणि क्रियन्ते कथमेनं हनिष्यसि एवं माकार्षीस्तथापि मुनिः शमं न जगाम । अथ सूर्य्यः शिरस्त्राणं छत्रं निर्म्माय तस्मै दत्त्वा अद्यप्रभृति एतत् लोके प्रचरिष्यति व्रतादिषु च अस्य दानं महाफलं स्यादित्युक्त्वा गतः ॥ * ॥ तस्य दानफलं यथा —
“छत्रं हि भरतश्रेष्ठ । यः प्रदद्यात् द्विजातये ।
शुभ्रं शतशलाकं वै स प्रेत्य सुखमेधते ॥
स शक्रलोके वसति पूज्यमानो द्विजातिभिः ।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ । ॥”
इति महाभारते दानधर्म्मः ॥
अथ छत्रयुक्तिः ।
“विशेषश्चाथ सामान्यं छत्रस्य द्विविधा भिदा ।
राज्ञश्छत्रं विशेषाख्यं सामान्यञ्चान्यदुच्यते ॥
तत्र विशेषच्छत्रोद्देशः ।
सदण्डञ्चाथ निर्द्दण्डं तज्ज्ञेयं द्विविधं पुनः ।
सदण्डं तत्र विज्ञेयं सारणाकुञ्चनात्मकम् ॥
दण्डः कन्दः शलाकाश्च रज्जुर्वस्त्रञ्च कीलकः ।
षड्भिरेतैः सुसन्दिष्टैश्छत्रमित्यभिधीयते ॥
दिगष्टषट्चतुर्हस्तदीर्घो दण्डो युगक्रमात् ।
षड्वाणवेदनयनवितस्त्या कन्द उच्यते ॥
शतान्यशीतिः षष्टिश्च चत्वारिंशद्युगक्रमात् ।
शलाकाः षट्पञ्चवेदत्रिहस्तैः सम्मिताः क्रमात् ॥
नवभिस्तन्तुभिः सूत्रं सूत्रैस्तु नवभिर्गुणः ।
गुणैस्तु नवभिः पाशो रश्मिस्तैर्नवभिर्भवेत् ॥
नवाष्टसप्तषट्संख्यै रश्मिभी रज्जवः क्रमात् ।
वस्त्रं शलाकाद्विगुणमायामेन प्रतिष्ठितम् ॥
भानुदिग्ग्रहवसुभिरङ्गुलीभिस्तु कीलकः ।
यस्यां यन्मानमुदितं तद्राज्ञामेव भूतये ॥
पादोनं युवराजस्य अन्येषान्तु तदर्द्धतः ॥
एतेन राज्ञो दण्डो दशहस्तः युवराजस्य तत् अन्येषामपि तदेव ।

विशुद्धकाष्ठस्य तु दण्डकन्दौ
तथा शलाका अपि शुद्धवंशजाः ।
रज्जुश्च रक्ता वसनञ्च रक्तं
छत्रप्रसादं नृपतेर्व्वदन्ति ॥
प्रसादमिति प्रसादार्हम् ।
नीलो दण्डश्च वस्त्रञ्च शिरःकुम्भस्तु कानकः ।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥
चान्दनौ दण्डकन्दौ चेत् मुक्ते रज्जुवाससी ।
छत्रं मनोहरं राज्ञां स्वर्णकुम्भोपशोभितम् ॥
मुक्तानि रज्जुवासांसि स्वर्णकुम्भस्तथोपरि ।
इदं कनकदण्डाख्यं छत्रं सर्व्वार्थसाधकम् ॥
दण्डकन्दशलाकाश्च शुद्धस्वर्णेन निर्म्मिताः ।
कीलकं स्वर्णघटितमशुक्ले रज्जुवाससी ॥
कुम्भादिरथ हंसादिश्चामरादिर्यथाक्रमम् ।
कुम्भादावथ हंसादौ नवरत्नानि रञ्जयेत् ॥
द्वात्रिंशन्मौक्तिकी माला द्वात्रिंशत्तत्र दापयेत् ।
सर्व्वोपरि महाजातिं विशुद्धं हीरकं न्यसेत् ॥
दण्डान्ते कुरुबिन्दांश्च पद्मरागांश्च विन्यसेत् ।
स्वामिहस्तैकमानेन चामरः सित इष्यते ॥
इत्ययं नवदण्डाख्यश्छत्रराजो महीभुजाम् ।
अभिषेके विवाहे च ग्रहाणां प्रीतिवर्द्धनः ॥
पताका नवदण्डाग्रे राज्ञोऽष्टाङ्गुलिसंमिताः ।
अयं दिग्विजयी नाम छत्रराजो महीभुजाम् ॥”
इति भोजराजकृतयुक्तिकल्पतरुः ॥

छत्त्रः, पु, (छद + णिच् + ष्ट्रन् ह्रस्वश्च ।) मूलेन पत्रेण च वत्राकारवृक्षः । छातारियाविष । छातनाविष । खरविष इति च भाषा । तत्पर्य्यायः । अतिच्छत्रः २ कटुः ३ । इति रत्नमाला ॥ भूतृणम् । इति राजनिर्घण्टः ॥

छत्त्रकः, पु, (छत्रमिव कायति इति । कै + कः ।) मत्स्यरङ्गपक्षी । इति शब्दचन्द्रिका ॥ अतिच्छत्रः । राङ्गा कुलेखाडा इति भाषा ॥ इति रत्नमाला ॥ ईश्वरगृहविशेषः । इति शब्दरत्नावली ॥

छत्त्रगुच्छः, पु, (छत्रमिव गुच्छो यस्य ।) गुण्डतृणम् । इति राजनिर्घण्टः ॥

छत्त्रचक्रं, क्ली, (छत्राकृति चक्रम् ।) चक्रविशेषः । यथा, समयामृते छत्रचक्रम् ।
“अश्विनीमघमूलाद्यं चक्रं छत्रत्रयात्मकम् ।
प्रतीचीमध्यरेखाया ईशानान्तं हयाधिपः ॥
आग्नेयान्तं नराधीशो नैरृतान्तं गजाधिपः ।
एषां छत्रविभागेन ज्ञातव्यञ्च शुभाशुभम् ॥
अन्यस्य राज्ञो नामर्क्षं यत्र छत्रे ततः फलम् ।
चामरं कलसं वीणा छत्रं दण्डः पतद्ग्रहः ॥
आसनं कीलकं रज्जुर्नव भेदाः प्रकीर्त्तिताः ।
यत्र छत्रे स्थितः सौरिर्भङ्गं तस्य विनिर्द्दिशेत् ॥
चामरे चण्डता वायोरनावृष्टिः प्रजायते ।
दुर्भिक्षञ्च भवेत् घोरं प्रजापीडा न संशयः ॥
कलसस्थे भवेद्युद्धं भङ्गो घातादिकं ध्रुवम् ।
वीणास्थेनार्कपुत्त्रेण पट्टराज्ञी विनश्यति ॥
चलच्चित्तो भवेद्राजा भयभीता च मेदिनी ।
यदा ऋक्षत्रये सौरिश्छत्रे दण्डे पतद्ग्रहे ॥
तदा तस्य भवेद्भङ्गश्छत्रस्यास्य न संशयः ।
आसनस्य भवेन्नाश आसनस्थे शनैश्चरे ॥
युवराजक्षयः कीले बन्धनं रज्जुसंस्थिते ।
सौम्ययुक्तोऽतिचारस्थः शनिरुक्तफलो न हि ॥
वक्रगः क्रूरयुक्तश्च सर्व्वं क्रूरं करोति सः ।
शनिराहुकुजादित्या यदा जीवेन्दुसंयुताः ॥
उत्तराधीशराज्ञो वै निश्चितं छत्रभङ्गदाः ।
क्रूरं चतुष्टयञ्चैव बुधचन्द्रेण संयुतम् ॥
पूर्व्वच्छत्रविनाशाय तथा पापचतुष्टयम् ।
शुक्रेन्दुसंयुतं छत्रे दक्षिणे शस्यभङ्गदम् ॥
एवमन्येषु राज्येषु नामर्क्षात् फलमादिशेत् ।
यथा दुष्टफलः सौरिस्तथा सौम्यफलो गुरुः ॥
भौमज्ञौ गुरुराहू च रविचन्द्रौ बले समौ ।
यथा हानिकराः क्रूरास्तथा सौम्याः शुभङ्कराः ॥
एतेऽत्राष्टौ ग्रहाश्छत्रे परचक्रेण भङ्गदाः ।
नृपनामर्क्षगो राहुः केतुर्व्वा यत्र संस्थितः ॥
छत्रभङ्गो भवेत्तस्य विषदानेन भूपतेः ।
मृगयासाहसं यात्रां दुष्टहस्त्यश्ववाहनम् ॥
विग्रहञ्च त्यजेद्राजा छत्रस्थे क्रूरखेचरे ।
ज्ञात्वैव शान्तिकं कुर्य्यात् ग्रहाणां जायते शुभम् ॥”

छत्त्रधारः, त्रि, (छत्रं धरतीति । धृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) छत्रधरः । छातिधरा इति भाषा ॥ तत्पर्य्यायः । छायाकरः २ । इति हेमचन्द्रः । ३ । ४२८ ॥ (यथा, पञ्चतन्त्रे । ३ । ६७ । “स्वपक्षे च यथा, जननी देवी कञ्चुकी मालिकः शय्यापालकः सभाध्यक्षः सांवत्सरिकः भिषक् जलवाहकः ताम्बूलवाहकः आचार्य्यः अङ्गरक्षकः स्थानचिन्तकः छत्रधारः विलासिनी च ॥”)

छत्त्रपत्त्रं, क्ली, (छत्रमिव पत्त्रमस्य ।) स्थलपद्मम् । इति त्रिकाण्डशेषः ॥

छत्त्रपत्त्रः, पु, (छत्रमिव विस्तृतं पत्त्रमस्य ।) भूर्जवृक्षः । इति रत्नमाला ॥ (भूर्जशब्दे विवृतिरस्य ज्ञातव्या ॥) मानकचुः । इति केचित् ॥ सप्तपर्णवृक्षः । इति च केचित् ॥

छत्त्रभङ्गः, पु, (छत्रस्येव रक्षितुः स्वामिन इत्यर्थः भङ्गो यत्र ।) वैधव्यम् । स्वातन्त्र्यम् । नृपनाशः । इति मेदिनी । गे, ५६ ॥

छत्त्रा, स्त्री, (छत्रमिव आकृतिर्विद्यतेऽस्याः । अर्श आदित्वादच् ततष्टाप् । यद्वा, छदति आच्छादयति स्वोत्पत्तिस्थानमिति । छद् + “सर्व्वधातुभ्यः ष्ट्रन् ।” उणां । ४ । १५८ । इति ष्ट्रन् । ततः षिद्गौरादिपाठेऽपि ङीषोऽनित्यत्वात् टाप् ।) मिषिः । मौरी इति भाषा ॥ कुस्तुम्बुरु । धन्या इति भाषा ॥ (यथा,—
“मुस्तपर्पटकोदीच्यछत्राख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये ॥
छत्रा धान्याकम् ॥” इति भावप्रकाशः ॥)
शिलीन्ध्रम् । इति मेदिनी । रे, ३८ ॥ कोँडकछाता इति भाषा ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (निवृत्तसन्तापान्तर्गतरसायनौषधिविशेषः । तस्य

लक्षणं यथा, सुश्रुते चिकित्सितस्थाने ३० अः।
"छत्राकसर्पस्वरूपेण वाराहीकन्दसम्भवा।
एकपत्रा महावीर्या भिन्नाञ्जनसमप्रभा॥
छत्रातिच्छत्रके विद्यादक्षोर्णि फन्दसम्भवे॥")
छत्राक, क्ली, (छत्रा इव कायतीति। कै+कः।)
किम्पाकः। छत्त्रिका। इति प्रायश्चित्तविवेकः॥
(यथा, मनुः। ५। १९।
"छत्राकं विड्वराहञ्च लसुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः॥")
छत्राक, पुं, (छत्रमिव व्यकति आच्छादकत्वं गच्छतीति। छत्र+अक्+अच्।) जाल-
वर्व्वरकवृक्षः। इति राजनिर्घण्टः॥
छत्राकी स्त्री (छत्राक+गौरादित्वात् ङीष्।)
रास्ना। इत्यमरः। २। ४। ११५॥
छत्रातिच्छत्र, पुं, (छत्रमतिक्रम्य छदति आच्छा-
दयतीति। अति+छद्+ष्ट्रन्।) छत्राकार-
सलोद्भवसुगन्धाख्यतृणविशेषः। तत्पर्य्यायः।
छत्रातिच्छत्रा २ मालतृणं ३ अतिच्छत्रा ४
सुगन्धा ५ छत्रक ६ कटुकं ७ कटु ८। इति
शब्दरत्नावली॥
छत्राधान्य, क्ली, (छत्रा धान्यमिव।) धन्याकम्।
इति राजनिर्घण्टः॥
छत्त्रिका, स्त्री, (छत्रा एव। छत्रा+स्वार्थे कन्।
अत इत्वञ्च।) शिलीन्ध्रम्। कोँड़कछाता इति
भाषा॥ तत्पर्य्यायः। गोमयच्छत्त्रिका २ दिली-
रम् ३ शिलीन्ध्रकम् ४ उच्छिलम् ५ वसारोहम् ६
गोलासम् ७। इति हारावली॥ छत्राकम् ८।
इति स्मृतिः॥ उच्छिलीन्ध्रम् ९। इति श्रीभाग-
तम्॥ करीषेक्षुपलालपृथ्वीवेणुजच्छत्त्रिकायाः
सामान्यगुणाः। शीतलत्वम्। कषायत्वम्। स्वादु-
त्वम्। पिच्छिलत्वम्। गुरुत्वम्। छर्द्द्यतीसार-
ज्वरश्लेष्मरोगकारित्वञ्च॥ पलालजच्छत्त्रिका-
गुणाः। पाके स्वादुरसत्वम्। रूक्षत्वम्। दोष-
कारित्वञ्च॥ शुचिस्थानकाष्ठवंशगोष्ठजश्वेत-
च्छत्त्रिकायाः गुणाः। अतिदोषकारित्वम्। अन्य-
च्छत्त्रिकाभ्यो विगर्हिता। इति राजवल्लभः॥
छत्त्री [न्] पुं, (छत्रं कौशलार्थमिराच्छादकत्वं
विद्यतेऽस्य। छत्र+इनि।) नापितः। इति
शब्दरत्नावली॥ छत्रविशिष्टे, त्रि। यथा,—
"गच्छेद्वर्षातपे छत्री दण्डी रात्र्यटवीषु च।"
इति स्मृतिः॥
(यथा च हरिवंशे। २५३। ५।
"मौञ्जी यज्ञोपवीती च छत्री दण्डाजिनी तथा।
वामनो धूम्रवर्णाभो भगवान् वालरूपधृक्॥")
छत्वर, पुं, (छदते अपवारयति वर्षादिकमिति। छद अपवारणे+"छित्वरच्छत्वरेति।"
उणां। ३। १। इति ष्वरच् प्रत्ययेन साधु।)
गृहम्। कुञ्जः। इति सिद्धान्तकौमुद्यामुणादि-
वृत्तिः॥
छद, तु क सम्वृतौ। इति कविकल्पद्रुमः॥ (अदन्त-
चुरा-पर सक सेट्।) छदयति। इति दुर्गा-
दासः॥ (यथा, कविरहस्ये। १६।
"छदयति सुरलोकं यो गुणैर्यञ्च गुहे
सुरयुगमिविसुक्तान्मादयन्ति सजन॥")
छद, कि ण सम्वृतौ। इति कविकल्पद्रुमः॥ (चुरा-
पक्षे भ्वा-उभं-सक-सेट्।) कि ण, छादयति
छादयते छदति छदते दिर्घमेघः। आच्छा-
दयति इत्यर्थः। इति दुर्गादासः॥
छद, म कि ण ऊर्ज्जने। ऊर्ज्जनं बलं जीवनञ्च।
इति कविकल्पद्रुमः॥ (चुरा-पक्षे भ्वा-उभं-
सक-सेट्।) छदयति पुत्रं पिता। जीवयति
बलयन्तं करोति वा इत्यर्थः। इति दुर्गादासः॥
छद, पुं, (छदति आच्छादयतीति। छद+
अच्।) पत्रम्। (यथा, रामायणे। २।५५।६।
"ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम्।")
पक्षः। ग्रन्थिपर्णवृक्षः। तमालवृक्षः। इति
मेदिनी। दे, ५॥
छदनं, क्ली, (छदति आच्छादयतीति। छद+
ल्यु।) पत्रम्। पक्षः। (यथा, महाभारते।
३। १५८। ९९।
"विमलस्फाटिकाभानि पाण्डरच्छदनैर्द्विजैः।
कलहंसैरुपेतानि सारसाभिरुतानि च॥"
छद+भावे ल्युट्।) पिधानम्। इति मेदिनी।
ने, ६५॥ तमालपत्रम्। इति राजनिर्घण्टः॥
तेजपात इति भाषा॥
छदपत्र, पुं (छदानि आच्छादकानि पत्राणि
यस्य।) भूर्जपत्रवृक्षः। इति कश्चित् रत्नमाला॥
छदिः, [स्] क्ली, (छादयतीति छाद्यतेऽनेन
वा। छद्+णिच्+"अर्च्चिशुचिहुसृपिछादि-
छर्द्दिभ्य इसः।" उणां। २। १०९। इति
इसि। "इस्मन्त्रन्क्विषु च।" ६। ४। ९७।
इति ह्रस्वः।) पटलम्। इत्यमरः। २। २।
१४॥ (यथा, भागवते। ७। १४। १३।
"कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम्।
क्व तदीयरतिर्भार्य्या क्वायमात्मा नभश्छदिः॥")
छद्म, [न्] क्ली, (छद्यते व्याप्रियते स्वरूपमने-
नेति। छद+"सर्व्वधातुभ्यो मनिन्।" उणां।
४। १४४। इति मनिन्।) व्याजः। (यथा,
रघुः। १२। २
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा॥")
कपटं। शाठ्यम्। अपदेशः। स्वरूपाच्छा-
दनम्। इति मेदिनी। ने, ६४॥
छद्मतापस, पुं, (छद्मना कपटेन तापसः। अप्र-
कृततपस्वितया एवास्य तथात्वम्।) छल-
तपस्वी। तत्पर्य्यायः। सर्व्वाभिसन्धी २ वैडाल-
व्रतिकः ३ वेशधारी ४। इति शब्दरत्नावली॥
छद्मिका, स्त्री, (छद्म अस्त्यस्याः। व्रीह्यादित्वा-
दिनि, संज्ञायां कन् टाप् च।) गुडूची। इति
राजनिर्घण्टः॥
छन्द, पुं, (छन्द्यते इति। छन्द+भावे घञ्।)
अभिप्रायः। (यथा, रामायणे। २। ९। ७।
"मयोच्यमानं यदि ते श्रोतुं छन्दो विलासिनि!।
श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम्॥")
वशः। इत्यमरः। ३।३।८८॥ अभिलाषः। इति
भरतः॥ विषम्। इति शब्दचन्द्रिका॥ रहसि,
त्रि। इत्यमरटीकासारसुन्दरी॥
छन्दः, [स्] क्ली, (चन्दयति आह्लादयति
चन्द्यतेऽनेन वा। चदि आह्लादे+"चन्देरा-
देश्च छः।" उणां। ४। २१८। इति असुन्
चस्य छश्च।) वेदः। (यथा रघुः। १। ११।
"आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥")
स्वैराचारः। अभिलाषः। (यथा, महाभारते।
१२। २०१। १२।
"कामात्मकाश्छन्दसि कर्म्मयोगा
एभिर्विमुक्तः परमश्नुवीत॥")
पद्यम्। इति मेदिनी। से, २२॥ अस्य लक्षणं
यथाह गङ्गादासः।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः॥
आदिस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्॥"
एतदर्थः। अक्षरसंख्यातं अक्षरगणनया परि-
प्राप्तं वृत्तमुच्यते। मात्राकृता मात्रागणनया
निर्णीता जातिर्जातिसंज्ञिका भवति। समं
समचतुष्पादम्। अर्द्धसमं यस्य प्रथमः पादः
तृतीयेन पादेन तुल्यः चतुर्थः पादो द्वितीयेन
पादेन तुल्यः। विषमं पृथक्लक्षणचतुष्पादम्॥
(तत्र समवृत्तन्तु उक्थादिसंज्ञाभेदेन षड्-
विंशतिप्रकारकम्। यदुक्तं छन्दोमञ्जर्य्याम्।
"आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्द्धितैः।
पादैरुक्थादिसंज्ञं स्याच्छन्दः षड्विंशतिं गतम्॥
उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपू-
र्व्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च॥
त्रिष्टुप् च जगती चैव तथातिजगती मता।
शक्करी सातिपूर्व्वा स्यादष्ट्यत्यष्टी तथा स्मृते॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः संकृतिश्चैव तथातिकृतिरुत्कृतिः॥"
छन्दोलक्षणोपयोगिगणास्तु दश। यदुक्तं तत्रैव,
"म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥
मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥
गुरुरेको गकारस्तु लकारो लघुरेककः।
क्रमेण चैषां रेखाभिः संस्थानं दर्श्यते यथा॥"
म ऽऽऽ, न ।।।, भ ऽ।।, य ।ऽऽ, ज ।ऽ।,
र ऽ।ऽ, स ।।ऽ, त ऽऽ।, ग ऽ, ल ।)
छन्दस्तु नानाविधम्। तस्य ग्रन्थाः छन्दो-
विचितिपिङ्गलच्छन्दोमञ्जरीवृत्तरत्नाकरश्रुत-
बोधादयः सन्ति तेषु छन्दोमञ्जर्य्युक्तलक्षणो-
दाहरणादीनि लिख्यन्ते॥

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
एकाक्षरा वृत्तिः। उक्था।		
श्रीः	ग् श्री ऽ	श्रीस्ते। सास्ताम्॥
द्व्यक्षरा वृत्तिः। अत्युक्था।		
स्त्री	गौ स्त्री ऽ,ऽ	गोपस्त्रीभिः। कृष्णो रेमे॥
त्र्यक्षरा वृत्तिः। मध्या।		
नारी	मो नारी ऽऽऽ	गोपानां नारीभिः। श्लिष्टोऽव्यात् कृष्णो वः॥
मृगी	रो मृगी ऽ।ऽ	सा मृगीलोचना। राधिका श्रीपतेः॥
चतुरक्षरा वृत्तिः। प्रतिष्ठा।		
कन्या	ग्मौ चेत् कन्या ऽ,ऽऽऽ	भास्वत्कन्या सैका धन्या। यस्याः कूले कृष्णोऽखेलत्॥
सती	नगि सती ।।।,ऽ	सुररिपो। तव पदम्। नमति सा ननु सती॥
पञ्चाक्षरा वृत्तिः। सुप्रतिष्ठा।		
पङ्क्तिः	भगौ गिति पङ्क्तिः ऽ।।,ऽ,ऽ	कृष्णसनाथा तर्णकपङ्क्तिः। यामुनकच्छे चारु चचार॥
प्रिया	सलगैः प्रिया ।।ऽ,।,ऽ	व्रजसुभ्रुवो विलसत्कलाः। अभवन् प्रिया सुरवैरिणः॥
षडक्षरा वृत्तिः। गायत्री।		
तनुमध्या	त्यौ चेत् तनुमध्या ऽऽ।,।ऽऽ	मूर्त्तिर्मुरशत्रोरत्यद्भुतरूपा। आस्तां मम चित्ते नित्यं तनुमध्या॥
शशिवदना	शशिवदना न्यौ ।।।,।ऽऽ	शशिवदनानां व्रजतरुणीनाम्। अधरसुधोर्म्मिं मधुरिपुरैच्छत्॥
सोमराजी	द्वियां सोमराजी ।ऽऽ,।ऽऽ	हरे! सोमराजीसमा ते यशःश्रीः। जगन्मण्डलस्य च्छिनत्त्यन्धकारम्॥
विद्युल्लेखा	विद्युल्लेखा मो मः ऽऽऽ,ऽऽऽ	
वसुमती	त्सौ चेद् वसुमती ऽऽ।,।।ऽ	
सप्ताक्षरा वृत्तिः। उष्णिक्।		
मधुमती	ननगि मधुमती ।।।,।।।,ऽ	रविदुहितृतटे नवकुसुमततिः। अवित मधुमती मधुमथनमुदम्॥
कुमारललिता	कुमारललिता ज्सगाः ।ऽ।,।।ऽ,ऽ	मुरारितनुवल्ली कुमारललिता सा। व्रजेणनयनानां ततान मुदमुच्चैः॥
मदलेखा	म्सगौ स्यात् मदलेखा ऽऽऽ,।।ऽ,ऽ	रङ्गे बाहुविलग्नाद्दन्तीन्द्रान्मदलेखा। लग्नाभून्मुरशत्रौ कस्तूरीरसचर्चा॥
हंसमाला	सरगैर्हंसमाला ।।ऽ,ऽ।ऽ,ऽ	
अष्टाक्षरा वृत्तिः। अनुष्टुप्।		
चित्रपदा	चित्रपदा यदि भौ गौ ऽ।।,ऽ।।,ऽ,ऽ	यामुनसैकतदेशे गोपवधूजनकेलौ। कंसरिपोर्गतिलीला चित्रपदा जगदव्यात्॥
माणवकम् माणवकक्रीडमिति केचित्।	भात्तलगा माणवकम् ऽ।।,ऽऽ।,।,ऽ	चञ्चलचूडं चपलैर्वत्सकुलैः केलिपरम्। ध्याय सखे स्मेरमुखं नन्दसुतं माणवकम्॥
विद्युन्माला	मो मो गो गो विद्युन्माला ऽऽऽ,ऽऽऽ,ऽ,ऽ	वासो वल्लीविद्युन्माला बर्हश्रेणी शक्रश्चापः। यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृष्णाम्भोदः॥
समानिका	ग्लौ रजौ समानिका तु ऽ,।,ऽ।ऽ,।ऽ।	यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म। धीः समानिका परेण नोचिताऽत्र मत्सरेण॥
प्रमाणिका नगस्वरूपिणी इति कुत्रापि।	प्रमाणिका जरौ लगौ ।ऽ।,ऽ।ऽ,।,ऽ	पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः। श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका॥
गजगतिः	नभलगा गजगतिः ।।।,ऽ।।,।,ऽ	रविसुतापरिसरे विहरतो दृशि हरेः। व्रजवधूगजगतिर्मुदमलं व्यतनुत॥
हंसरुतम्	म्नौ गौ हंसरुतमेतत् ऽऽऽ,।।।,ऽ,ऽ	
नाराचिका	नाराचिका तरौ लगौ ऽऽ।,ऽ।ऽ,।,ऽ	
नवाक्षरा वृत्तिः। बृहती।		
भुजगशिशुभृता भृतेत्यत्र सृतेति युतेति च केचित्।	भुजगशिशुभृता नौ मः ।।।,।।।,ऽऽऽ	ह्रदतटनिकटक्षौणी भुजगशिशुभृता यासीत्। सुररिपुदलिते नागे व्रजजनसुखदा साभूत्॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
मणिमध्यम्	स्यान्मणिमध्यं चेत् भमसाः ऽ।।,ऽऽऽ,।।ऽ	कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा । चित्रपदाभो नन्दसुतश्चारु ननर्त स्मेरमुखः ॥
भुजङ्गसङ्गता	सजरैर्भुजङ्गसङ्गता ।।ऽ,।ऽ।,ऽ।ऽ	तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता । कथमेतु यत्नचारकश्चपलः सदैव तां हरिः ॥
हलमुखी	राननाविह हलमुखी ऽ।ऽ,।।।,।।ऽ	
भद्रिका	भद्रिका भवति रौ नरौ ऽ।ऽ,।।।,ऽ।ऽ	
दशाक्षरा वृत्तिः । पङ्क्तिः ।		
रुक्मवती रूपवती क्वचित् । चम्पकमाला इति क्वापि ।	रुक्मवती सा यत्र भमसगाः ऽ।।,ऽऽऽ,।।ऽ,ऽ	कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसद्विषि भक्तिः । राज्यपदे धर्मालिरुदारा रुक्मवती किन्नः खलु तस्य ॥
मत्ता	ज्ञेया मत्ता मभसगयुक्ता ऽऽऽ,ऽ।।,।।ऽ,ऽ	पीत्वा मत्ता मधु मधुमाली कालिन्दीये तटवनकुञ्जे । उद्गीथन्तीर्व्रजजनरामाः कामासक्ता मधुजिति चक्रे ॥
त्वरितगतिः	त्वरितगतिश्च नजनगैः ।।।,।ऽ।,।।।,ऽ	त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता । सुररिपुणा रतिगुरुणा परिरमिता प्रमदमिता ॥
मनोरमा	नरजगैर्भवेन्मनोरमा ।।।,ऽ।ऽ,।ऽ।,ऽ	तरणिजातटे विहारिणी व्रजविलासिनी विलासतः । सुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥
शुद्धविराट्	म्सौ ज्गौ शुद्धविराडिद मतम् ऽऽऽ,।।ऽ,।ऽ।,ऽ	
पणवम्	म्नौ य्गौ चेति पणवनामेदम् ऽऽऽ,।।।,।ऽऽ,ऽ	
मयूरसारिणी	र्जौ र्गौ मयूरसारिणी स्यात् ऽ।ऽ,।ऽ।,ऽ।ऽ,ऽ	
उपस्थिता	तौ ज्गौ गुरुणेयमुपस्थिता ऽऽ।,।ऽ।,।ऽ।,ऽ	
दीपकमाला	दीपकमाला भ्मौ मता ज्गौ ऽ।।,ऽऽऽ,।ऽ।,ऽ	
हंसी	ज्ञेया हंसी मभनगयुता ऽऽऽ,ऽ।।,।।।,ऽ	
एकादशाक्षरा वृत्तिः । त्रिष्टुप् ।		
इन्द्रवज्रा	स्यादिन्द्रवज्रा यदि तौ जगौ गः. ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ । यो गोकुलं गोपकुलञ्च सुस्थं चक्रे स नो रक्षतु चक्रपाणिः ॥
उपेन्द्रवज्रा उपेन्द्रवज्राया इन्द्रवज्रायाश्च चरणघटिता उपजातयः । ताश्च चतुर्वर्णप्रस्तारभेदादाद्यन्तौ त्यक्त्वा चतुर्दशप्रकारा भवन्ति ।	उपेन्द्रवज्रा जतजास्ततो गौ ।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥	उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते । स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥
सुमुखी	ननजजलैर्गदिता सुमुखी ।।।,।ऽ।,।ऽ।,।,ऽ	तरणिसुतातटकुञ्जगृहे वदनविधुस्मितदीधितिभिः । तिमिरमुदस्य मुखं सुमुखी हरिमवलोक्य मुमुद चिरम् ॥
शालिनी अस्याश्चतुर्थे ततः सप्तमे च यतिः ।	मात्तौ गौ चेत् शालिनी वेदलोकैः ऽऽऽ,ऽऽ।,ऽऽ।,ऽ,ऽ	अन्धो हन्ति ज्ञानवृद्धिं विधत्ते धर्मं धत्ते काममर्थं च सूते । मुक्तिं दत्ते सर्वदोपास्यमाना पुंसां श्रद्धाशालिनी विष्णुभक्तिः ॥
वातोर्म्मी	वातोर्म्मीयं गदिता म्भौ तगौ गः ऽऽऽ,ऽ।।,ऽऽ।,ऽ,ऽ	ध्याता मूर्त्तिः क्षणमप्यच्युतस्य श्रेणी नाम्नां गदिता हेलयापि । संसारेऽस्मिन् दुरितं हन्ति पुंसां वातोर्म्मी पोतमिवाम्भोधिमध्ये ॥
भ्रमरविलसिता भ्रमरविलसितमिति केचित् ।	मो गो नौ गो भ्रमरविलसिता ऽऽऽ,ऽ,।।।,।।।,ऽ	सुभ्रु । मानं परिहर न चिरात्तारुण्यं ते सफलयतु हरिः । फुल्लावल्ली भ्रमरविलसिताभावे शोभां कलयति किमु ताम् ॥
अनुकूला	स्यादनुकूला भतनगगाश्चेत् ऽ।।,ऽऽ।,।।।,ऽ,ऽ	वल्लववेशा सुररिपुमूर्त्तिर्गोपमृगाक्षीकृतरतिपूर्त्तिः । वाञ्छितसिद्धै प्रणतिपरस्य स्यादनुकूला जगति न कस्य ॥
रथोद्धता	रात् परैर्नरलगै रथोद्धता ऽ।ऽ,।।।,ऽ।ऽ,।,ऽ	राधिका दधिविलोडनस्थिता कृष्णवेणुनिनदैरथोद्धता । यामुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात् ॥
स्वागता	स्वागता रनभगैर्गुरुणा च ऽ।ऽ,।।।,ऽ।।,ऽ,ऽ	यस्य चेतसि सदा मुरवैरी वल्लवीजनविलासविलोलः । तस्य नूनममरालयभाजः स्वागतादरकरः सुरराजः ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
दोधकम्	दोधकमिच्छति भत्रितयाद्गौ ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	देव । सदोधकदम्बतलस्थ । श्रीधर । तारकनामपदं मे । कण्ठतलेऽसुविनिर्गमकाले स्वल्पमपि क्षणमेष्यति योगम् ॥
मोटनकम्	स्यान्मोटनकं तजजाश्च लगौ ऽऽ।,।ऽ।,।ऽ।,।,ऽ	रङ्गे खलु मल्लकलाकुशलस्वाणूरमहाभटमोटनकम् । यः केलिलवेन चकार स मे संसाररिपुं प्रतिमोटयतु ॥
श्येनी श्येनिका इति क्वचित् ।	श्येन्युदीरिता रजौ रलौ गुरुः ऽ।ऽ,।ऽ।,ऽ।ऽ,।,ऽ	यस्य कीर्त्तिरिन्दुकुन्दचन्दनश्येन्यशेषलोकपावनी सदा । जाह्नवीव विश्ववन्द्यविभ्रमा तं भजामि भावगम्यमच्युतम् ॥
श्रीः	वाणरसैः स्यात् भतनगगैः श्रीः ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
वृत्ता	ननसगगुरुरचिता वृत्ता ।।।,।।।,।।ऽ,ऽ,ऽ	
भद्रिका	ननरलगुरुभिश्च भद्रिका ।।।,।।।,ऽ।ऽ,।,ऽ	
मौक्तिकमाला	मौक्तिकमाला यदि भतनात् गौ ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
उपस्थितम्	उपस्थितमिदं जसौ ताद् गकारौ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
उपचित्रम्	उपचित्रमिदं ससमाल्लगौ ।।ऽ,।।ऽ,।।ऽ,।,ऽ	
कुपुरुषजनिता	कुपुरुषजनिता ननौ रगौ गः ।।।,।।।,ऽ।ऽ,ऽ,ऽ	
अनवसिता	अनवसिता न्यौ भगौ गुरुरन्ते ।।।,।ऽऽ,ऽ।।,ऽ,ऽ	
विध्वङ्कमाला	विध्वङ्कमाला भवेत्तौ तगौ गः ऽऽ।,ऽऽ।,ऽऽ।,ऽ,ऽ	
सान्द्रपदम्	सान्द्रपदं स्याद्भतनगलैश्च ऽ।।,ऽऽ।,।।।,ऽ,।	
शिखण्डितम्	शिखण्डितमिदं जसौ तगौ गुरुश्चेत् ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
द्वादशाक्षरा वृत्तिः । जगती ।		
चन्द्रवर्त्म	चन्द्रवर्त्म निगदन्ति रनभसैः ऽ।ऽ,।।।,ऽ।।,।।ऽ	चन्द्रवर्त्म पिहितं घनतिमिरै राजवर्त्म रहित जनगमनैः । इष्टवर्त्म तदलङ्कुरु सरसे । कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥
वंशस्थविलम् वशस्तनितमिति क्वापि ।	वदन्ति वंशस्थविलं जतौ जरौ ।ऽ।,ऽऽ।,।ऽ।,ऽ।ऽ	विलासवंशस्थविलं मुखानिलैः प्रपूर्य्य यः पञ्चमरागमुद्गिरन् । व्रजाङ्गनानामपि गानशालिनां जहार मानं स हरिः पुनातु नः ॥
इन्द्रवंशा वंशस्थविलेन्द्रवंशाचरणोभयघटिता-श्चतुर्व्वर्णप्रस्तारीयाद्यन्तव्यतिरिक्त-चतुर्द्दशप्रकारा उपजातयो भवन्ति।	स्यादिन्द्रवंशा ततजैरसंयुता ऽऽ।,ऽऽ।,।ऽ।,ऽ।ऽ	दैत्येन्द्रवंशाग्निरुदीर्णदीधितिः पीताम्बरोऽसौ जगतीतमोहरः । यस्मिन् ममज्जुः शलभा इव स्वयं ते कंसचाणूरमुखा मखद्विषः ॥
जलोद्धतगतिः	जसौ जसयुतौ जलोद्धतगतिः ।ऽ।,।।ऽ,।ऽ।,।।ऽ	यदीयहलतो विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः । विलासविपिनं विवेश सहसा करोतु कुशलं हली स जगताम् ॥
भुजङ्गप्रयातम्	भुजङ्गप्रयातं चतुर्भिर्यकारैः ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	सदारात्मजज्ञातिभृत्यो विहाय स्वमेतं ह्रदं जीवनं लिप्समानः । मया क्लेशितः कालियेत्थं कुरु त्वं भुजङ्ग । प्रयातं द्रुतं सागराय ॥
तोटकम्	वद तोटकमब्धिसकारयुतम् ।।ऽ,।।ऽ,।।ऽ ।।ऽ	यमुनातटमच्युतकेलिकला- लसदङ्घ्रिसरोरुहसङ्गरुचिम् । मुदितोऽट कलेरपनेतुमघं यदि चेच्छसि जन्म निज सफलम् ॥
स्रग्विणी	कीर्त्तितैषा चतूरेफिका स्रग्विणी ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	इन्द्रनीलोपलेनेव या निर्म्मिता शातकुम्भद्रवालङ्कृता शोभते । नव्यमेघच्छविः पीतवासा हरे- र्मूर्त्तिरास्तां ममैवोरसि स्रग्विणी ॥
वैश्वदेवी	बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ऽऽऽ,ऽऽऽ,।ऽऽ,।ऽऽ	अर्च्चामन्येषां त्वं विहायामराणा- मद्वैतेनैकं कृष्णमभ्यर्च्च भक्त्या । तत्राशेषात्मन्यर्च्चिते भाविनो ते भ्रात. । । देवी ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
प्रमिताक्षरा	प्रमिताक्षरा सजससैः कथिता ।।ऽ,।ऽ।,।।ऽ,।।ऽ	अमृतस्य शीकरमिवोद्गिरती रदमौक्तिकांशुलहरीस्फुरिता । प्रमिताक्षरा सुररिपोर्भणिति- र्व्रजसुभ्रुवामभिजहार मनः ॥
द्रुतविलम्बितम्	द्रुतविलम्बितमाह नभौ भरौ ।।।,ऽ।।,ऽ।।,ऽ।ऽ	तरणिजापुलिने नववल्लवी- परिषदा सह केलिकुतूहलात् । द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे ॥
मन्दाकिनी	ननररघटिता तु मन्दाकिनी ।।।,।।।,ऽ।ऽ,ऽ।ऽ	बलिदमनविधौ बभौ सङ्गता पदजलरुहि यस्य मन्दाकिनी । सुरनिहितसिताम्बुजस्रङ्निभा हरतु जगदघं स पीताम्बरः ॥
कुसुमविचित्रा	नयसहितौ न्यौ कुसुमविचित्रा ।।।,।ऽऽ,।।।,।ऽऽ	विपिनविहारे कुसुमविचित्रा कुतुकितगोपीमहितचरित्रा । सुररिपुमूर्त्तिर्मुखरितवंशा चिरमवताद्वस्तरलवतंसा ॥
तामरसम्	इह वद तामरसं नजजा यः ।।।,।ऽ।,।ऽ।,।ऽऽ	स्फुटसुषमामकरन्दमनोज्ञं व्रजललनानयनालिनिपीतम् । तव मुखतामरसं मुररात्रे । हृदयतडागविकाशि ममास्तु ॥
मालती यमुनेति क्वापि ।	भवति नजावथ मालती जरौ ।।।,।ऽ।,।ऽ।,ऽ।ऽ	इह कलयाच्युतकेलिकानने मधुरसमौरभसारलोलुपः । कुसुमकृतस्मितचारुविभ्रमा मलिरपि चुम्बति मालतीं मुहुः ॥
मणिमाला अस्याः षड्वर्णैर्यतिः ।	त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ऽऽ।,।ऽऽ,ऽऽ।,।ऽऽ	प्रह्वामरमौली रत्नोपलकॢप्ते जातप्रतिबिम्बा शोणा मणिमाला । गोविन्दपदाब्जे राजी नखराणा- मास्तां मम चित्ते ध्वान्तं शमयन्ती ॥
जलधरमाला अस्याश्चतुर्भिरष्टाभिश्च यतिः ।	मो भ्सौ मौ चेज्जलधरमालाब्ध्यङ्कैः ऽऽऽ,ऽ।।,।।ऽ,ऽऽऽ	या भक्तानां कलिदुरितोत्तप्तानां तापोच्छेदे जलधरमाला नव्या । भव्याकारा दिनकरपुत्रीकूले केलीलोला हरितनुरव्यात् सा वः ॥
पुटः	वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ।।।,।।।,ऽऽऽ,।ऽऽ	
प्रमुदितवदना प्रभेति मल्लिनाथः । गौरीति कौमुदीकारः ।	प्रमुदितवदना भवेन्नौ च रौ ।।।,।।।,ऽ।ऽ,ऽ।ऽ	
प्रियंवदा	भुवि भवेन्नभजरैः प्रियंवदा ।।।,ऽ।।,।ऽ।,ऽ।ऽ	
ललिता	धीरैरभाणि ललिता तभौ जरौ ऽऽ।,ऽ।।,।ऽ।,ऽ।ऽ	
उज्ज्वला	ननभरसहिता गदितोज्ज्वला ।।।,।।।,ऽ।।,ऽ।ऽ	
नवमालिका	इह नवमालिका नजभयैः स्यात् ।।।,।ऽ।,ऽ।।,।ऽऽ	
ललना	पञ्चमुनि भमौ सात् सयुता ललना ऽ।।,ऽऽऽ,।।ऽ,।।ऽ	
ललितम्	ललितमभिहितं नौ म्रौ नामतः ।।।,।।।,ऽऽऽ,ऽ।ऽ	
द्रुतपदम्	द्रुतपदं भवति नभनयाश्चेत् ।।।,ऽ।।,।।।,।ऽऽ	
विद्याधारः	सर्वे मा यस्मिन् सोऽयं विद्याधारः स्यात् ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ	
पञ्चचामरम्	लघुर्गुरुर्वदन्ति पञ्चचामरम् ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ	
सारङ्गम्	सारङ्गसंज्ञं समस्तैस्तकारैस्तु ऽऽ।,ऽऽ।,ऽऽ।,ऽऽ।	
मौक्तिकदाम	समस्तजमीरय मौक्तिकदाम ।ऽ।,।ऽ।,।ऽ।,।ऽ।,	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मोटकम्	मोटकनाम समस्तभमीरय ऽ।।,ऽ।।,ऽ।।,ऽ।।	
तरलनयनम्	वरिलघु तरलनयनमिह ।।।।।।।।।।।।	
त्रयोदशाक्षरा वृत्तिः । अतिजगती ।		
प्रहर्षिणी त्रिभिर्दशभिश्च यतिः ।	त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् ऽऽऽ,।।।,।ऽ।,ऽ।ऽ,ऽ	गोपीनामधरसुधारसस्य पानै- रुत्तुङ्गस्तनकलसोपगूहनैश्च । आश्चर्य्यैरपि रतिविभ्रमैर्मुरारेः संसारे मतिरभवत् प्रहर्षिणीह ॥
रुचिरा चतुर्भिर्नवभिश्च यतिः ।	जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ।ऽ।,ऽ।।,।।ऽ,।ऽ।,ऽ	पुनातु वो हरिरतिरासविभ्रमी परिभ्रमन् व्रजरुचिराङ्गनान्तरे । समीरणोल्लसितलतान्तरालगो यथा मरुत्तरलतमालभूरुहः ॥
मत्तमयूरः चतुर्भिर्नवभिश्च यतिः ।	वेदरन्ध्रैर्म्तौ यसगा मत्तमयूरः ऽऽऽ,ऽऽ।,।ऽऽ,।।ऽ,ऽ	लीलानृत्यन्मत्तमयूरध्वनिकान्तं नृत्यन्नीपामोदिपयोदानिलरम्यम् । कामक्रीडाक्रष्टमना गोपवधूभिः कंसध्वंसी निर्जनवृन्दावनमाप ॥
चण्डी	नयुगलसयुगलगैरिति चण्डी ।।।,।।।,।।ऽ,।।ऽ,ऽ	जयति दितिजरिपुताण्डवलीला- क्षपितकवलकरकालियमौली । चरणकमलयुगचापलचण्डी मदनखरुचिजितभोगमणिश्रीः ॥
मञ्जुभाषिणी सुनन्दिनीति शम्भौ	सजसा जगौ च यदि मञ्जुभाषिणी ।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	अमृतोर्म्मिशीतलकरेण लालयं- स्तनुकान्तिचोरितविलोचनो हरे । नियतं कलानिधिरसीति वल्लवी मुदमश्नुते वदित मञ्जुभाषिणी ॥
चन्द्रिका उत्पलिनीति क्वापि । विद्युदिति चमेति च क्वापि । सप्तभिः षड्भिश्च यतिः ।	ननततगुरुभिश्चन्द्रिकाऽश्वर्तुभिः ।।।,।।।,ऽऽ।,ऽऽ।,ऽ	शरदमलतरुचन्द्रिकाक्षालिते दिनकरतनयातीरदेशे हरिः । विहरति रभसाद्बल्लवीभिः सम न्त्रिदिवयुवतिभिः कोऽपि देवो यथा ॥
कलहंसः सिंहनादः क्वापि ।	सजसाः सगौ च कथितः कलहंसः ।।ऽ,।ऽ।,।।ऽ,।।ऽ,ऽ	यमुनाविहारकुतुके कलहंसो व्रजकामिनीकमलिनीकृतकेलिः । जनचित्तहारिकलकण्ठनिनादः प्रमदं तनोतु तव नन्दतनजः ॥
प्रबोधिता	सजसा जगौ च भवति प्रबोधिता ।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	शयिता त्वया चटुलमाननिद्रया रतिकेलिकुञ्जनिलये विलासिनी । मुरवैरिणा वदनचुम्बनादिना स्मितमाततान सपदि प्रबोधिता ॥
मृगेन्द्रमुखम्	भवति मृगेन्द्रमुखं ननौ जरौ गः ।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ	गुरुभुजवीर्य्यभर हरि महात्मा युधि समुपेत्य न दानवा निजीवुः । क्षुधितमृगेन्द्रमुखं मृगा उपेत्य क नु खलु बिभ्रति जीवनस्य योगम् ॥
चञ्चरीकावली	यमौ रौ विख्याता चञ्चरीकावली गः ।ऽऽ,ऽऽऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
चन्द्ररेखा	नसरयुगगैश्चन्द्ररेखत्तुंलोकैः ।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
कन्दुकम्	इद कन्दुकं यत्र येभ्यश्चतुर्भ्यो गः ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,ऽ	
मृगेन्द्रमुखम्	भवति मृगेन्द्रमुखं ननौ जरौ गः ।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ	
उपस्थितम्	उपस्थितमिदं जसौ तसौ यदि गुरुः स्यात् ।ऽ।,।।ऽ,ऽऽ।,।।ऽ,ऽ	
मञ्जुहासिनी	जतौ सजौ गो भवति मञ्जुहासिनी ।ऽ।,ऽऽ।,।।ऽ,।ऽ।,ऽ	
नन्दिनी	इह नन्दिनी सजससैर्गुरुयुक्तैः ।।ऽ,।ऽ।,।।ऽ,।।ऽ,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगाथाः ।	छन्दसामुदाहरणानि ।
कुटजगतिः	कुटजगतिर्नजौ सप्तत्तु मृतौ गुरुः ।।।,।ऽ।,ऽऽऽ,ऽऽ।,ऽ	
प्रभावती ।	यस्या प्रिये । प्रथमकमक्षरद्वय तुर्यं तथा गुरु नवमं दशान्तिमम् । सान्त्यं भवेद्‌यतिरपि चेद्‌युगग्रहैः सा लक्ष्यतामन्तरते । प्रभावती ॥	•
चतुर्दशाक्षरा वृत्तिः । शर्करी ।		
असम्बाधा पञ्चभिर्नवभिश्च यतिः ।	मो तो नो सो गौ शरनवभिरसम्बाधा ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽऽ	वीर्याग्नौ येन ज्वलति रणरसात् क्षिप्ते दैत्येन्द्रे जाता धरणिरियमसम्बाधा । धर्मस्थित्यर्थं प्रकटिततनुसम्बन्धः साधूनां बाधां प्रशमयतु स कंसारिः ॥
वसन्ततिलकम् अष्टाभिः षड्भिश्च यतिः । सिंहो- द्धता क्वापि । सिंहोन्नता इति सैतवाश्यपः । उद्धर्षिणी इति मुनिसैतवः ॥	ज्ञेयं वसन्ततिलकं तभजा जगौ गः ऽऽ।,ऽ।।,।ऽ।,।ऽ।,ऽ,ऽ	फुल्लं वसन्ततिलकं तिलकं वनाल्या लीलापरं पिककुलं कलमत्र रौति । वात्येष पुष्पसुरभिर्मलयाद्रिवातो यातो हरिः स मथुरां विधिना हताः स्मः ॥
अपराजिता सप्तभिर्यतिः ।	ननरसलघुगैः स्वरैरपराजिता ।।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	यदनवधिभुजप्रतापकृतास्पदा यदुनिचयचमूः परैरपराजिता । अजयत समरे समस्तरिपुव्रज स जयति जगतां गतिर्गरुडध्वजः ॥
प्रहरणकलिका सप्तभिर्व्यवसायैर्यतिः ।	ननभनलगिति प्रहरणकलिका ।।।,।।।,ऽ।।,।।।,।,ऽ	व्यथयति कुसुमप्रहरण । कलिका प्रमदवनभवा तव धनुषि सता । विरहविपदि मे शरणमिह ततो मधुमथनगुणस्मरणमविरतम् ॥
वासन्ती	मात्तो नो मो गौ यदि गदिता वासन्तीयम् ऽऽऽ,ऽऽ।,।।।,ऽऽऽ,ऽ,ऽ	भ्राम्यद्‌भृङ्गीनिर्भरमधुरालापोद्गीतै श्रीखण्डाद्रेरद्भुतपवनैर्मन्दान्दोला । लीलालोला पल्लवविलसद्धस्तोल्लासै कंसाराते नृत्यति सदृशी वासन्तीयम् ॥
लोला अस्याः सप्तभिर्यतिः ।	द्विःसप्तच्छिदि लोला म्सौ म्भौ गौ चरणे चेत् ऽऽऽ,।।ऽ,ऽऽऽ,ऽ।।,ऽ,ऽ	मुग्धे यौवनलक्ष्मीर्विद्युद्विभ्रमलोला त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः । तद्‌वृन्दावनकुञ्जे गुञ्जद्‌भृङ्गसनाथे श्रीनाथेन समेता स्वच्छन्दं कुरु केलिम् ॥
नान्दीमुखी अस्याः सप्तभिर्यतिः ।	स्वरभिदि यदि नौ तौ च नान्दीमुखी गौ ।।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ,	सरसखगकुलालापनान्दीमुखीय लहरिभुजलता चारुफेनस्मितश्रीः । सुरहरकलयासक्तिमासाद्य किन्ते प्रमुदितहृदया भानुजा नृत्यतीह ॥
इन्दुवदना	इन्दुवदना भजसनैः सगुरुयुग्मैः ऽ।।,।ऽ।,।।ऽ,।।।,ऽ,ऽ	
नदी सप्तभिर्यतिः ।	ननततगुरुगैः सप्तयतिर्नदी स्यात् ।।।,।।।,ऽऽ।,।ऽ।,ऽ,ऽ	
लक्ष्मीः	लक्ष्मीरन्तविरामा म्सौ तभौ गुरुयुग्मम् ऽऽऽ,।।ऽ,ऽऽ।,ऽ।।,ऽ,ऽ	
सुपवित्रम्	त्रिननगगिति वसुयति सुपवित्रम् ।।।,।।।,।।।,।।।,ऽ,ऽ	
मध्यक्षामा	मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ ऽऽऽ,ऽ।।,।।।,।ऽऽ ऽ,ऽ	
कुटिलम्	युगदिग्भिः कुटिलमिति सभौ न्यौ गौ चेत् ।।ऽ,ऽ।।,।।।,।ऽऽ,ऽ,ऽ	
प्रमदा	नजभजला गुरुश्च भवति प्रमदा ।।।,।ऽ।,ऽ।।,।ऽ।,।,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मञ्जरी पञ्चमे नवमे च यतिः ।	सजसा यलौ गिति शरग्रहैर्मञ्जरी ॥ऽ,।ऽ।,॥ऽ,।ऽऽ,।,ऽ	
कुमारी अष्टमे नवमे च यतिः ।	नजभजगैर्गुरुश्च वसुषट् कुमारी ॥।,।ऽ।,ऽ॥,।ऽ।,ऽ,ऽ	
सुकेसरम्	नरनरैर्लगौ च रचितं सुकेसरम् ॥।,ऽ।ऽ,॥।,ऽ।ऽ,।,ऽ	
चन्द्रौरसः	म्भौ न्यौ लगौ चेदिह भवति च चन्द्रौरसः ऽऽऽ,ऽ॥,॥।,।ऽऽ,।,ऽ	
चक्रपदम्	चक्रपदमिह भननननलगुरुभिः ऽ॥,॥।,॥।,॥।,।,ऽ	
वासन्ती	वासन्तीयं स्यादिह खलु मतौ न्यौ गौ चेत् ऽऽऽ,ऽऽ।,॥।,।ऽऽ,ऽ,ऽ	
पञ्चदशाक्षरा वृत्तिः । अतिशर्करी ।		
शशिकला	गुरुनिधनमनुलघुरिह शशिकला ॥॥॥॥॥॥,ऽ	मलयजतिलकसमुदितशशिकला व्रजयुवतिलसदलिकगगनगता । सरसिजनयनहृदयसलिलनिधिं व्यततुत विततरभसपरितरलम् ॥
स्रक् अस्याः षड्भिर्नवभिश्च यतिः ।	सगियमपि च रसनव रचितयतिः ॥॥।,॥।,॥॥।,ऽ	अयि सहचरि । रुचिरतरगुणमयी मृदिमवसतिरनपगतपरिमला । स्रगिव निवस विलसदनुपमरसा सुमुखि ! मुदितदनुजदलनहृदये ॥
मणिगुणनिकरः अष्टभिः सप्तभिश्च यतिः ।	वसुमुनियतिरिति मणिगुणनिकरः ॥॥॥,।,॥॥।,ऽ	नरकरिपुरवतु निखिलसुरगति- रमितमहिमभरसहजनिवसतिः । अनवधिमणिगुणनिकरपरिचितः सरिदधिपतिरिव धृततनुविभवः ॥
मालिनी अष्टभिः सप्तभिश्च यतिः ।	ननमययुतेयं मालिनी भोगिलोकैः ॥।,॥।,ऽऽऽ,।ऽऽ,।ऽऽ	मृगमदकृतचर्चा पीतकौषेयवासा रुचिरशिखिशिखण्डाबद्धधम्मिल्लपाशा । अनृजुनिहितमंसे वंशमुत्क्वाणयन्ती धृतमधुरिपुलीला मालिनी पातु राधा ॥
लीलाखेलः	एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ऽऽऽ,ऽऽऽ,ऽ,ऽ,ऽऽऽ,ऽऽऽ,ऽ	पायाद्वो गोविन्दः कालिन्दीकूलच्चौणीचक्रे रासोल्लासक्रीडन्गोपीभिः सार्द्धं लीलाखेलः । मन्दाकिन्यास्तीरोपान्ते खेरक्रीडाभिर्लोलो यद्वद्देवानामीशः स्वर्वेश्याभिः खेलन्तीभिः ॥
विपिनतिलकम्	विपिनतिलकं नसनरेफयुग्मैर्भवेत् ॥।,॥ऽ,॥।,ऽ।ऽ,ऽ।ऽ	विपिनतिलकं विकसितं वसन्तागमे मधुकृतमदैर्मधुकरै रणद्भिर्वृतम् । मलयमरुता रचितलास्यमालोकयन् व्रजयुवतिभिर्विहरति स सुभ्रो हरिः ॥
तूणकम्	तूणकं समानिकापदद्वयं विनान्तिमम् ऽ,।,ऽ।ऽ,।ऽ।,ऽ,।,ऽ।ऽ,।ऽ	सा सुवर्णकेतकं विकाशि भृङ्गपूरितं पञ्चवाणवाणजालपूर्णहेमतूणकम् । राधिका वितर्क्य माधवाद्य मासि माधवे मोहमेति निर्भरं त्वया विना कलानिधे । ॥
चन्द्रलेखा सप्तमे अष्टमे च यतिः ।	म्रौ मो यौ चेन्नवेतां सप्ताष्टकैश्चन्द्रलेखा ऽऽऽ,ऽ।ऽ,ऽऽऽ,।ऽऽ,।ऽऽ,	विश्लेषे ते मुरारे । पाण्डुप्रकाशा कृशाङ्गी म्लानच्छायं दुकूलं न भ्राजते बिभ्रती सा । राधाम्भोदस्य गर्भे लीना यथा चन्द्रलेखा क्लिष्टार्त्ता त्वां स्मरन्ती धत्ते भृशं जीवयोगम् ॥
चित्रा	चित्रा नामच्छन्दश्चित्रं चेत् त्रयो मा यकारौ ऽऽऽ,ऽऽऽ,ऽऽऽ,।ऽऽ,।ऽऽ	गोपाली लीलालोला यद्वत् कलिन्दात्मजान्ते खेलन्मुक्ताहारा वन्यस्रग्वसम्मूर्द्धचित्रा । कंसारातेर्मूर्त्तिस्तद्वन्मे हृदि क्रीडतीयं कोऽन्यः स्वर्गो मोक्षो वास्माद्विद्यते तन्न जाने ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
प्रभद्रकम्	भवति नजौ भजौ रसहितौ प्रभद्रकम् ।।।,।ऽ। ऽ।।,।ऽ।,ऽ।ऽ	
एला पञ्चभिर्दशभिश्च यतिः ।	सजना नयौ शरदशयतिरियमेला ।।ऽ,।ऽ।,।।।,।।।,।ऽऽ	
कामक्रीडा	माः पञ्च स्युयस्यां सा कामक्रीडासंज्ञा ज्ञेया ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ	
सुखेलकम्	नजभजरैर्विराजितमिदं सुखेलकम् ।।।, ।ऽ। ऽ।।,।ऽ।,ऽ।ऽ	
चन्द्रकान्ता सप्तभिरष्टाभिश्च यतिः ।	चन्द्रकान्ताभिधा रौ मसौ यो विरमः स्वराष्टौ ऽ।ऽ,ऽ।ऽ,ऽऽऽ,।।ऽ,।ऽऽ	
उपमालिनी अष्टाभिः सप्तभिश्च यतिः ।	ननतभरकृताष्टस्वरैरुपमालिनी ।।।,।।।,ऽऽ।,ऽ।।,ऽ।ऽ	
ऋषभः	ऋषभाख्यमेतदुदितं सजसा सयौ चेत् ।।ऽ,।ऽ। ।।ऽ,।।ऽ,।ऽऽ	
मानसहंसः	कथयन्ति मानसहंसनाम सजौ जभराः ।।ऽ,।ऽ।,।ऽ। ऽ।।,ऽ।ऽ	
नलिनी	सगणैः शिववक्त्रमितैर्गदिता नलिनी ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,	
निशिपालकम्	शस निशिपालकमिदं भजसनाश्च रः ऽ।।,।ऽ।,।।ऽ,।।।,ऽ।ऽ	
षोडशाक्षरा वृत्तिः । अष्टिः । चित्रम्	चित्रसंज्ञमीरितं समानिका पदद्वयम् ऽ,।,ऽ।ऽ,।ऽ।,ऽ,।,ऽ।ऽ,।ऽ।	विद्रुमारुणाधरोष्ठशोभिवेणुवाद्यहृष्ट- वल्लवीजनाङ्गसङ्गजातसुप्रकाशकाङ्ग ।। त्वां सदैव वासुदेव ! पुण्यलभ्यपादसेव ! वन्यपुष्पचित्रकेश । संस्मरामि गोपवेश । ॥
ऋषभगजविलसितम् गजतुरगविलसितमिति शम्भौ । सप्तभिर्नवभिश्च यतिः ।	भ्नौ जनगैः स्वराङ्कऋषभगजविलसितम् ऽ।।,ऽ।ऽ,।।।,।।।,।।।,ऽ	यो हरिरुच्चखान खरतरनखरशरै- र्दुर्जयदैत्यसिंहसुविकटहृदयतटम् । किञ्चिदिह चित्रमेष यदखिलमपहृतवान् कंसनिदेशदृप्यदृषभगजविलसितम् ॥
चकिता अस्या अष्टमे यतिः ।	भात् समतनगैरष्टच्छेदे स्यादिह चकिता ऽ।।,।।ऽ,ऽऽऽ,ऽऽ।,।।।,ऽ	दुर्जयदनुजश्रेणीदुश्चेष्टाशतचकिता यद्भुजपरिघत्राता याता साध्वसविगमम् । दीव्यति दिवि यन्माला स्वेच्छं नन्दनविपिने गच्छत शरणं कृष्णं तं भीता भवरिपुतः ॥
पञ्चचामरम्	प्रमाणिका पदद्वयं वदन्ति पञ्चचामरम् ।ऽ।,ऽ।ऽ,।,ऽ,।ऽ।,ऽ।ऽ,।,ऽ	सुरद्रुमूलमण्डपे विचित्ररत्ननिर्मिते लसद्वितानभूषिते सलीलविभ्रमालसम् । सुराङ्गनाभवल्लवीकरप्रपञ्चचामर- स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥
मदनललिता चतुर्थे षष्ठे च यतिः ।	म्भौ नो म्नौ गो मदनललिता वेदैः षड्ऋतुभिः ऽऽऽ,ऽ।।,।।। ऽऽऽ,।।।,ऽ	विभ्रश्यत्सग्गलितचिकुरा घौताधरपुटा म्लायत्पत्रावलिकुचतटोच्छ्वासोर्मितरला । राधात्यर्थं मदनललितान्दोलालसवपुः कंसारातेरतिरसमहो चक्रेऽतिचटुलम् ॥
वाणिनी	नजभजरैर्यदा भवति वाणिनी गयुक्तैः ।।।,।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ ऽ	स्फुरतु ममाननेऽद्य ननु वाणि ! नीतिरम्यं तव चरणप्रसादपरिपाकतः कवित्वम् । भवजलराशिपारकरणक्षमं मुकुन्द सततमहं स्तवैः स्वरचितैः स्तवानि नित्यम् ॥
प्रवरललितम्	यमौ नः सौ गश्च प्रवरललितं नाम वृत्तम् ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ	भ्रुणोत्स्वेष भ्रन्ये चलवलयझङ्कारयुक्तो मुधा मादन्यासः प्रकटिततुलाकोटिनादः । स्मितं वक्त्रे कस्मादृदृशि पटुकटाक्षोर्मिलीला हरौ जीयादीदृक् प्रवरललितं वल्लवीनाम् ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
अचलधृतिः	द्विगुणितवसुलघुभिरचलधृतिरिह IIIIIII,IIIIIII	तरणिदुहितृतटरुचिरतरवसति- रमरतनिसुखजनविहितधृतिरिह । मधुरिपुरभिनवजलधररुचितनु- रचलधृतिरुदयति सुकृतिहृदि खलु ॥
गरुडरुतम्	गरुडरुतं नजौ भजतगा यदा सुखदा III ।ऽI,ऽII,।ऽI,ऽऽI,ऽ	अमरमयूरमानसमुदे पयोदध्वनि- र्गरुडरुतं सुरारिभुजगेन्द्रसन्त्रासने । धरणिभरावतारविधिडिण्डिमाडम्बरः स जयति कंसरङ्गभुवि सिंहनादो हरेः ॥
धीरललिता	सकथिता भरौ नरनगाश्च धीरललिता ऽII,ऽIऽ,III,ऽIऽ,III,ऽ	
अश्वगतिः	पञ्चभकारयुताऽश्वगतिर्यदि चान्त्यगुरुः ऽII,ऽII,ऽII,ऽII,ऽII,ऽ	
मणिकल्पलता	ननरभभेन गेन च स्यान्मणिकल्पलता III,।ऽI,ऽIऽ,ऽII,ऽII,ऽ	
रूपम्	यस्मिन् सर्वे गा राजन्ते प्रख्यातं तद्रूपं नाम ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ	
वरयुवतिः	भो रयना नगौ च यस्यां वरयुवतिरियम् ऽII,ऽIऽ ।ऽऽ,III,III,ऽ	
सप्तदशाक्षरा वृत्तिः । अत्यष्टिः ।		
शिखरिणी षष्ठे एकादशे च यतिः ।	रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।ऽऽ,ऽऽऽ,III,IIऽ,ऽII,I,ऽ	करादस्य भ्रष्टं ननु शिखरिणी दृश्यति शिशौ- विलीनाः सा सत्य नियतमवधेयं तदखिलैः । इति त्रस्यद्गोपानुचितनिभृतालापजनितं स्मितं बिभ्रद्देवो जगदवतु गोवर्द्धनधरः ॥
पृथ्वी अष्टमे नवमे च यतिः ।	जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।ऽI,IIऽ,।ऽI,IIऽ,।ऽऽ,I,ऽ	दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं जहार निजलीलया यदकुलेऽवतीर्य्याशु यः । स एष जगतीगतिर्दुरितभारमस्माद्दृशां हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ॥
वंशपत्रपतितम् वंशदलमिति शम्भौ वंशपत्रपतिता इति केचित् । अस्य दशमे सप्तमे च यतिः ।	दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ऽII,ऽIऽ,III,ऽII,III,I,ऽ	नूतनवंशपत्रपतितं रजनिजललव पश्य मुकुन्द । मौक्तिकमिवोत्तममरकतगम् । एष च त चकोरनिकरः प्रपिबति मुदितो वान्तमवेत्य चन्द्रकिरणैरस्ततकणमिव ॥
मन्दाक्रान्ता अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः । इयं दौत्यवर्णनोपयोगिनी शस्ता ।	मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ऽऽऽ,ऽII,III,ऽऽI,ऽऽI,ऽ,ऽ	प्रेमालापैः प्रियवितरणैः प्रीणितालिङ्गनाद्यै- र्मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला । एवं शिक्षावचनसुधया राधिकायाः सखीनां प्रीतः पायात् स्मितसुवदनो देवकीनन्दनो नः ॥
हरिणी षष्ठे चतुर्थे सप्तमे च यतिः ।	नसमरसला गः षड्वेदैर्हयैर्हरिणी मता III,IIऽ,ऽऽऽ,ऽIऽ,IIऽ,I,ऽ	व्यधित स विधिर्नेत्रं नीत्वा ध्रुवं हरिणीगणाद्- व्रजमृगदृशां सन्दोहस्योल्लसन्नयनश्रियम् । यदयमनिशं दूर्व्वाश्यामे मुरारिकलेवरे व्यकिरदधिकं यदाकाङ्क्षी विलोलविलोचनम् ॥
नर्द्दटकम्	यदि भवतो नजौ भजजला गुरु नर्द्दटकम् III,।ऽI,ऽII,।ऽI,।ऽI,I,ऽ	व्रजवनिता वसन्तलतिका विलसन्मधुपं मधुमथनं प्रसूनघनवासितकल्पतरुम् । विभुमभिनीति कोऽपि सुकृती मुदितेन मुदा रुचिरपदावलीघटितनर्द्दटकेन कविः ।
कोकिलकम् अस्य सप्तमे षष्ठे चतुर्थे च यतिः ।	हयऋतुसागरैर्यतियुतं यदि कोकिलकम् III,।ऽI,ऽII,।ऽI,।ऽI,I,ऽ	स्मरशरपीडित मधुरभाषण मोहकर मधुसमयागमे सरसकेलिभिरुल्लसितम् । त्वयि निहितद्युतिं रसिकतायनकोकिलकं ननु यमयामि ते सखि । सदा हृदि नन्दसुतम् ॥

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
हारिणी अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः।	वेदर्त्वश्वैर्मभनमयला गश्चेत्तदा हारिणी ऽऽऽ,ऽ।।,।।।,ऽऽऽ,।ऽऽ,।,ऽ	यस्या नित्ये श्रुतिकुवलये श्रीशालिनी लोचने रागः स्वीयोऽधरकिसलये लाक्षारसारञ्जनम्। गौरी कान्तिः प्रकृतिरुचिरा रम्याङ्गरागच्छटा सा कंसारेरजनि न कथं राधा मनोहारिणी॥
भाराक्रान्ता चतुर्थे षष्ठे सप्तमे च यतिः।	भाराक्रान्ता मभनरसला गुरुः श्रुतिषड्हये. ऽऽऽ,ऽ।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणात् कम्पं धत्ते श्रमजलकणां तथा परिमुञ्चति। इत्यालपन् जयति जलदस्वनाकुलवल्लवी- सङ्क्षोभोत्थं स्मरविलसितं विलोक्य गुरुं हरिः॥
हरि	रसयुगहययुङ् नौ म्रौ सो लगौ हि यदा हरिः ।।।,।।।,ऽऽऽ,ऽ।ऽ,।।ऽ,।,ऽ	
कान्ता	भवेत् कान्ता युगरसहयैर्यभौ नरसा लगौ ।ऽऽ,ऽ।। ।।।,ऽ।ऽ ।।ऽ,।,ऽ	
चित्रलेखा दशमे सप्तमे च यतिः।	ससजा भजगा ग दिक्स्वरैर्भवति चित्रलेखा ।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ	
अतिशायिनी	ससजैरतिशायिनी मता भजयरैर्गुरुभ्याम् ।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ	
पञ्चचामरम्	अवेहि पञ्चचामरं जरौ जरौ जगौ लघुश्च ।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ,।	
अष्टादशाक्षरा वृत्तिः। इति।		
कुसुमितलतावेल्लिता पञ्चमे षष्ठे सप्तमे च यतिः।	स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ऽऽऽ,ऽऽ।,।।।,।ऽऽ,।ऽऽ,।ऽऽ	क्रीडत्कालिन्दीललितलहरीवारिभिर्दाक्षिणात्यै- र्वातैः खेलद्भिः कुसुमितलता वेल्लिता मन्दमन्दम्। भृङ्गालीगीतैः किसलयकरोल्लासितोल्लासलक्ष्मीं तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार॥
नन्दनम् एकादशे सप्तमे च यतिः। इदमेव वेदरेफैश्छिन्ना मञ्जुमालिका त्र्यधिकदशभिश्चारका दशवसुभिर्लता इति क्वापि।	नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम् ।।।,।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ,ऽ।ऽ	तरणिसुतातरङ्गपवनैः सलीलमान्दोलित मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम्। सुरहरचित्रचेष्टितकलाकलापसंस्मारक क्षितितलनन्दन व्रज सखे। सुखाय वृन्दावनम्॥
नाराचम्	इह ननरचतुष्कसृष्टं तु नाराचमाचक्षते ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	दिनकरतनयातटीकानने चारुसञ्चारिणी श्रवणनिकटकृष्टमेघोच्चया कृष्ण। राधा त्वयि। ननु विकिरति नेत्रनाराचमेषातिहृच्छेदनं तदिह मदनविभ्रमोद्भ्रान्तचित्तावधत्स्व द्रुतम्॥
चित्रलेखा चन्द्रलेखा इति क्वचित्।	मन्दाक्रान्ता नयरलघुयुता कीर्तिता चित्रलेखा ऽऽऽ,ऽ।।,।।।,।,ऽऽ।,ऽऽ।,ऽ,ऽ	शङ्केऽमुष्मिन् जगति मृगदृशां साररूपं यदासी- दाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि। नैतादृक् चेत् कथमुदधिसुतामप्यरेणाच्युतस्य प्रीतं तस्यां नयनयुगमभूच्चित्रलेखाद्भुतायाम्॥
शार्दूललसितम् द्वादशे चरणान्ते च यतिः।	म सो जः सतसा दिनेशऋतुभिः शार्दूललसि- तम् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,।।ऽ	कृत्वा कंसमृगे पराक्रमविधिं शार्दूललसित यश्चक्रे क्षितिभारकारिषु सुरारातिष्वपि दरम्। सन्तोष परमन्तु देवनिवहे त्रैलोक्यशरण श्रेयो व स तनोत्वपारमहिमा लक्ष्मीप्रियतमः॥
हरिणप्लुतम् हरिणप्लुतेति क्वापि।	मात् सो जौ भरसंयुतौ करिवाणखैर्हरिणप्लुतम् ऽऽऽ,।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ	
अश्वगति	पञ्चभकारयुताश्वगतिर्यदि चान्त्यसरचिता ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,।।ऽ	
सुधा	सुधा तर्कैस्तर्कैर्भवति ऋतुभिर्यो मो नसतसा ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,।।ऽ	
चित्रलेखा	वर्णाश्वैर्मननततमकैः कीर्तिता चित्रलेखेयम् ऽऽऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽऽऽ,	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणा. ।	छन्दसामुदाहरणानि ।
भ्रमरपदकम्	भाद्रननना नसौ भ्रमरपदकमिदमभिहितम् ऽ।।,ऽ।ऽ,।।।,।।।,।।।,।।ऽ	
शार्दूलम्	शार्दूलं वद मासषट्कयति म: सो जसौ रो मश्चेत् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽ।ऽ,ऽऽऽ	
केसरम्	अर्णाश्वाश्वैर्मभनयरयुगैर्वृत्तं मतं केसरम् ऽऽऽ,ऽ।।,।।।,।ऽऽ,ऽ।ऽ,ऽ।ऽ	
चलम्	भौ नृजौ भौ चेच्चलमिदमुदितं युगैर्मुनिभि: स्वरै. ऽऽऽ,ऽ।।,।।।,।ऽ।,ऽ।।,ऽ।ऽ	
लालसा	सैका वसुविरतिस्तनौ रैश्चतुर्भिर्युता लालसा ऽऽ।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
लता	भवति नयुगलं रभौ रौ दशभिर्गणैश्चेन्द्रैर्लता ।।।,।।।,ऽ।ऽ,ऽ।।,ऽ।ऽ,ऽ।ऽ	
सिंहविस्फूर्ज्जितम्	तक्षूतर्लश्वैर्मौ भमौ विरतिश्चेत् सिंहविस्फूर्ज्जितं यौ ऽऽऽ,ऽऽऽ,ऽ।।,ऽऽऽ,।ऽऽ,।ऽऽ	
हरनर्त्तनम् विबुधप्रिया इति च क्वापि ।	रसौ जजौ भरसंयुतौ करिवाणखैर्हरनर्त्तनम् ऽ।ऽ,।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ	
क्रौञ्चपदकम्	इदं क्रौञ्चपदकं सदीर्घं यमस्तैर्यकारै: समेतम् ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,	
हीरकम्	हीरकमुदितं भनजनैरिह रगणोऽन्तत. ऽ।।,।।ऽ,।।।,।ऽ।,।।।,ऽ।ऽ	
अनविंशत्यक्षरा वृत्ति:। अतिधृति:।		
मेघविस्फूर्ज्जिता षष्ठे षष्ठे सप्तमे च यति. ।	रसर्त्वश्वैर्य्मौ नृसौ ररगुरुयुतौ मेघविस्फूर्ज्जिता स्यात् । ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	कदम्बामोदाढ्या विपिनपवना. केकिन कान्तकेका विनिद्रा कन्दल्यो दिशि दिशि मुदा दर्दुरा दृप्तनादा । निशा नृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्ज्जिता चेत् प्रिय: स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात् किमन्यत्॥
छाया षष्ठे द्वादशे अन्ते च यति ।	भवेत् सैवच्छाया तयुगगयुता स्यात् द्वादशान्ते यदा ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	अभीष्ट पुष्टो यो वितरति लसद्दोश्चारुशाखोज्ज्वल स्फुरन्नानारत्नस्तवकिततनुश्चित्राशुकालम्बित' । न यस्याङ्घ्रिच्छायामुपगतवता संसारतीव्रातपस्तनोति प्रोत्तापं स जगदवतात् कंसारिकल्पद्रुम ॥
शार्दूलविक्रीडितम् द्वादशे अनविंशतौ च यति: ।	सूर्य्याश्वैर्यदि म: सजौ सततगा: शार्दूलविक्रीडितम् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	गोविन्द प्रणमोत्तमाङ्ग । रसने । त्व घोषयाहर्न्निशं पाणी । पूजयतं मन. । स्मर पदे । तस्यालय गच्छतम् । एवञ्चेत् कुरुताखिलं मम हित शीर्षेन्द्रियस्तद् ध्रुवं न प्रेक्षे भवता कृते भवमहाशार्दूलविक्रीडितम् ॥
सुरसा सप्तमे चतुर्द्दशे अन्ते च यति' ।	म्रौ भ्नौ यो नो गुरुश्चेत् स्वरमुनिकरणैराहु सुरसाम् ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,।ऽऽ,।।।,ऽ	कामक्रीडासतृष्णो मधुसमयसमारम्भरभसात् कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदय. । गोविन्दो बल्लवीनामधररससुधा प्राप्य सुरसा शङ्के पीयूषपानप्रभवकृतसुखं व्यस्मरदसौ ॥
फुल्लदाम पञ्चमे द्वादशे अन्ते च यति: । पुष्पदाम इति केचित् ।	मो गौ नौ तौ गौ स्वरहयतुरगै फुल्लदाम प्रसिद्धम् ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ	शश्वल्लोकाना प्रकटितकदन ध्वस्तमालोक्य कंसं हृष्यच्चेतोभिस्त्रिदिववसतिभिर्व्योमसंस्थैर्विमुक्तम् । सुग्धामोदेन स्थगितदशदिगाभोगमाहूतभृङ्ग मौलौ दैत्यारेर्न्यपतदनुपम स्वस्तरो. फुल्लदाम ॥
पञ्चचामर:	नयुगलगलघू रजौ रलगा यदा स पञ्चचामर: ।।।,।।।,ऽ,।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।,ऽ	
विम्बम्	वृत्तं विम्बाख्यं शरमुनितुरगैर्म्तौ नृसौ ततौ चेद्गुरु: ऽऽऽ,ऽऽ।,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मकरन्दिका	रसै यडभिर्लोकैर्यमनसजजा गुरुर्मकरन्दिका ।ऽऽ,ऽऽऽ,।।।,।।ऽ,।ऽ।,।ऽ।,ऽ	
मणिमञ्जरी	इनाश्वैः स्यात् यभनयजजगाः कीर्त्तिता मणि- मञ्जरी ।ऽऽ,ऽ।।,।।। ।ऽऽ,।ऽ।,।ऽ।,ऽ	
समुद्रतता	गजाश्वितुरगैर्यैसौ जसतभा गश्चेत् समुद्रतता ।ऽ।,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,ऽ।।,ऽ	
विंशत्यक्षरा वृत्तिः । कृतिः । सुवदना सप्तमे चतुर्दशे विंशतौ च यतिः ।	ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,।ऽऽ, ऽ।।,।,ऽ	प्रत्याहृत्येन्द्रियाणि त्वदितरविषयाण्यास्यनयना त्वां ध्यायन्ती निकुञ्जे परमतरुच हर्षोत्थपुलका । आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका कामार्त्तिं त्यक्तुकामा ननु नरकरिपो । राधा मम सखी ॥
गीतिका	सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका ।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ,।।ऽ,।,ऽ	करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा । बहुलानुरागनिवासरासससमुद्भवा भवरागिणा विदधौ हरि खलु वल्लवीजनचारु चामरगीतिका ॥
वृत्तम्	वृत्तमीदृशन्तु नामतो रजौ रजौ रजौ गुरुर्लघुश्च ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ,।	चित्रवृत्तलीलया निसर्गरम्यदेहरूपविभ्रमेण राजमानसद्वयोविलाससम्पदा कलाकुतूहलेन । यः सम व्रजाङ्गनाजनैः सुराङ्गनानिभैः सुखं समेत्य विष्णुरुल्ललास चित्तपद्मकोषषट्पदः स मे सदास्तु ॥
शोभा षष्ठे त्रयोदशे अन्ते च यतिः ।	रसाश्वाश्वैः शोभा नयुगगजटरा मेघविस्फू- र्ज्जिता चेत् ।ऽऽ,ऽऽऽ,।।।,।।।,ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	सपीयूषोन्मीलत्स्मरसिजयुगला मध्यनम्रा फलाभ्यां सयोरूर्ह्नं राजत्तरलकिशलयाश्लिष्टसुस्निग्धशाखा । लसन्मुक्तारक्तोत्पलकुवलयवच्चन्द्रविम्बाश्रिताग्रा महाशोभा मौलौ मिलदलिपटले कृष्ण । सा कापि वल्ली ॥
सुवंशा	ख्याता पूर्वं सुवंशा यदि मरभना तद्वयं गो गुरुश्च ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ	
मत्तेभविक्रीडितम् त्रयोदशे यतिः ।	सभरा नमौ यलगास्त्रयोदशयतिर्मत्तेभविक्री- डितम् ।।ऽ,ऽ।।,ऽ।ऽ,।।।,ऽऽऽ,।ऽऽ,।,ऽ	
एकविंशत्यक्षरा वृत्तिः । प्रकृतिः । स्रग्धरा सप्तमे चतुर्दशे एकविंशतौ च यतिः ।	म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम् ऽऽऽ ऽ।ऽ ऽ।।,।।।,।ऽऽ,।ऽऽ,।ऽऽ	याकोपेन्द्रीवराभा कनककमलसत्पीतवासा सुहासा बर्हैरुच्चन्द्रकान्तैर्वलयितचिकुरा चारुकर्णावतंसा । वंशव्यासक्तवक्त्रध्वनिसुखितजगद्वल्लवीभिर्लसन्ती मूर्त्तिर्गोपस्य विष्णोरवतु जगति वः स्रग्धरा हारिहारा ॥
सरसी सिद्धकमिति सलिलनिधिरिति च क्वापि ।	नजभजजा जरौ यदि तदा गदिता सरसी कवीश्वरैः ।।।,।ऽ। ऽ।। ।ऽ।,।ऽ।,।ऽ।,ऽ।ऽ	चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्म्मिषु स्फुटवदनाम्बुजासु विलसद्भुजवालमृणालवल्लिषु । कुचयुगचक्रवाकमिथुनानुगता सुकलाकुतूहली चरचपलस्फुरतो व्रजमृगीमयमानसरसीषु विभ्रमम् ॥
द्वाविंशत्यक्षरा वृत्तिः । आकृतिः । हंसी अष्टमे द्वाविंशतौ च यतिः ।	मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति भवति हंसी ऽऽऽ,ऽऽऽ,ऽ,ऽ,।।।,।।।,।।।,।।।,ऽ,ऽ	सार्द्धं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती कामक्रीडाकूतस्फीतप्रमदरसरभसमलघु रसन्ती । कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे कंसाराते । पश्य स्वेच्छं सरभसगतिरिह विलसति हंसी ॥
मदिरा	सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा ऽ।। ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ	माधवमासि विकस्वरकेशरपुष्पकसम्मदिरामुदिते- भृङ्गकुलैरुपगीतवने घनमालिनमालि । वनानिलयम् । कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसं त्वं भज माधविका मृदुनर्मकथासुनवातकृतोपगमा ॥

छन्दसां नामानि।	छन्दसां लक्षणानि।	छन्दसामुदाहरणानि।
भद्रकम्	भौ नरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिदम् ऽII,ऽIऽ,III,ऽIऽ,III,ऽIऽ,III,ऽ	
लालित्यम्	लालित्यं भुजगेन्द्रेण भाषितमेतच्चेन् मसरस्त- जनगुभिः ऽऽऽ,IIऽ,ऽIऽ,IIऽ,ऽऽI,IऽI,III,ऽ	
महास्रग्धरा	सजता नसौ ररौ गः फणितुरगहयैः स्यान्महा स्रग्धराख्या IIऽ,IऽI,ऽऽI,III,IIऽ,ऽIऽ,ऽIऽ,ऽ	
त्रयोविंशत्यक्षरा वृत्तिः। विकृतिः।		
अद्रितनया अश्वललितमित्यन्यत्र।	नजभजभा जभौ लघुगुरू बुधैस्तु गदितेय- मद्रितनया III,IऽI,ऽII,IऽI,ऽII,IऽI,ऽII,I,ऽ	खरतरशौर्य्यपावकशिखापतङ्गनिभमग्नदृप्तदनुजो जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा। भुवनहितावतारचतुरश्चराचरधरोऽवतीर्य्य इह हि क्षितिवलयेऽस्ति कंसशमनस्तमेति तमवोचदद्रितनया॥
मत्ताक्रीडम् अष्टमे त्रयोदशे त्रयोविंशतौ च यतिः। मत्ताक्रीडा इति क्वचित्॥	मत्ताक्रीडं वस्विष्वाशायति मयुगगयुगमनुलघु- गुरुभिः ऽऽऽ,ऽऽऽ,ऽ,ऽ,IIIIIIIIIIIII,ऽ	मुग्धोन्मीलन्मत्ताक्रीडं मधुसमयसुलभमधुरमधुरसात गाने याने किञ्चित्स्पन्दत्पदमरुणनयनयुगलसरसिजम्। रासोल्लासक्रीडत्कम्रव्रजयुवतिवलयरचितभुजरसं सान्द्रानन्दं वृन्दारण्ये स्मरत हरिमनघचरणपरिचयम्॥
सुन्दरिका	इह सुन्दरिका पिङ्गलमुनिनोक्ता सहयतो भसता न्लभगाः IIऽ,IIऽ,ऽII,IIऽ,ऽऽI,IऽI,I,ऽII,ऽ	
चतुर्विंशत्यक्षरा वृत्तिः। संस्कृतिः।		
तन्वी पञ्चमे द्वादशे चतुर्विंशतौ च यतिः।	भूतमुनीनैर्यतिरिह भतनाः सभौ भनयाश्च यदि भवति तन्वी ऽII,ऽऽI,III,IIऽ,ऽII,ऽII,III,Iऽऽ	माधव मुग्धैर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः कम्पमुपेता मलयजसलिलैः प्लावनतोऽप्यधिगततनुदाहा। पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिदूने निःश्वसती सा मुहुरतिपरुषं ध्यानलये तव निवसति तन्वी॥
किरीटम्	नाम किरीटमिदं भगणा यदि पिङ्गलनाग- मुनीन्द्रमतं किल ऽII,ऽII,ऽII,ऽII,ऽII,ऽII,ऽII,ऽII	
दुर्म्मिलम्	सगणै रिह वृत्तवरं वसुभिः किल दुर्म्मिलवृत्तमिदं कविभिः IIऽ,IIऽ,IIऽ,IIऽ,IIऽ,IIऽ,IIऽ,IIऽ	
पञ्चविंशत्यक्षरा वृत्तिः। अतिकृतिः।		
क्रौञ्चपदा पञ्चमे दशमे अष्टादशे पञ्च- विंशतौ च यतिः।	क्रौञ्चपदा स्यात् भो मसभाश्चेदिषुशरवसुमुनि- यति मनुलघुगैः ऽII,ऽऽऽ,IIऽ,ऽII,IIIIIIIIIIII,ऽ	क्रौञ्चपदालीचिञ्चिततीरा मदकलखगकुलकलव[illegible]रुचिरा फुल्लसरोजश्रेणिविलासा मधुमुदितमधुपरवरभरु[illegible]री। फेनविलासप्रोज्ज्वलहासा ललितलहरिभरपुलकितसुतनु पश्य हरेऽसौ कस्य न चेतो हरति तरलगतिरहिम- किरणजा॥
षड्विंशत्यक्षरा वृत्तिः। उत्कृतिः।		
भुजङ्गविजृम्भितम् अष्टमे एकविंशतौ षड्विंशतौ च यतिः।	वस्वीशाश्वैश्छेदोपेतं ममतनयुग रसलगै- र्भुजङ्गविजृम्भितम् ऽऽऽ,ऽऽऽ,ऽऽI,III,III,III,ऽIऽ,IIऽ,I,ऽ	हेलोदञ्चन्नाञ्चत्पादप्रकटविकटनटनभरो रणत्करतालक श्चारुप्रेङ्खच्चूडाबर्हः स्तुतितरलनवकिसलयस्मराङ्कित- हारधृत्। अस्मन्नागस्त्रीभिर्भक्त्या मुकुलितकरकमलयुग कृतस्तुति- रच्युत पायाद्वश्छिन्दन् कालिन्दीहृदकृतनिजवसतिदृढभुजङ्ग- विजृम्भितम्॥
अपवाहम्	मौ नाः षट् सगाविति यदि नवरसरसशर- यतियुतमपवाहाख्यम् ऽऽऽ III III,III,III,III,III,IIऽ,ऽ,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
अथ दण्डकाः । सप्तविंशत्यक्षरा वृत्तिः । चण्डवृष्टिप्रपातः	यदिह नयुगलं ततः सप्तरेफास्तदा चण्ड- वृष्टिप्रपातो भवेद्दण्डकः ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	प्रलयघनघटामहारम्भमेघावलीचण्डवृष्टिप्रपाताकुलं गोकुलं सपदि समवलोक्य सद्येन हस्तेन गोवर्द्धनं नाम शैलं दधल्लीलया । कमलनयन । रक्ष रक्षेति गर्व्वप्रसम्मुग्धगोपाङ्गनालिङ्ग नानन्दितो गलदभिनवधातुधाराविचित्राङ्गरागो सुरारातिरस्तु प्रमोदाय वः ॥
प्रचितकः	प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नदयादुत्तरैः सप्तभिर्यैः ।।।,।।।,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	मुरहर । यदुकुलाम्भोधिचन्द्र । प्रभो । देवकीगर्भरत्न । त्रिलोकैकनाथ । प्रचितकपटः [illegible] ओद्दामदन्तावलस्तोमविद्रावणे केशरीन्द्र । । [illegible] नखच्छटोन्मथनिःशेषितध्वायिचेतो निविडान्धकार । प्रणतजनामरितापोग्रदावाभलीच्छेदमेघ । प्रसीद प्रसीद प्रसीद ॥
कुसुमस्तवकम्	सगणैः सकलैः खलु यत्र भवेत्तमिह प्रवदन्ति बुधाः कुसुमस्तवकम् ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ	विरराज यदीयकरे कनकद्युतिमन्मुरलामहसः कुचकुड्मलगो भ्रमरप्रकरैर्यथावृतमम्बरिरशोकलताविलसत्कुसुमस्तवकः॥ स नवीनतमालदलप्रतिमच्छविविभ्रदलीवविलोचनहारिवपु श्चपलारुचिराशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुज- मध्यगतः ॥
मत्तमातङ्गलीलाकरः	यत्र रेफाः परं स्वेच्छया गुम्फिताः स स्मृतो दण्डको मत्तमातङ्गलीलाकरः ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,[illegible],ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	हेमगौरं वसानोऽंशुकं प्रक्नीलासिते वर्ष्मणि स्वर्दिवा- नुलेपाङ्कितो हारतारांशुवक्षोनभश्चित्रमालाञ्चितो भव्यभूगोज्वलाङ्ग सम सीरिणा । व्यञ्जनाभास्वरैर्येन्दुकुन्दाभ देहेन लीलापरिहास- हासोर्म्मिकौतूहले कंसरङ्गाद्रिमं मातु वध्यक्रमाग्निर्गतिक्रीडया मत्तमातङ्ग- लीलाकरः ॥
अष्टाविंशत्यक्षरा वृत्तिः । अशोकपुष्पमञ्जरी	यत्र दृश्यते गुरोः परो लघुः क्रमात् स उच्यते [illegible]शोकपुष्पमञ्जरीति ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।	मूर्द्ध्नि चारुचम्पकस्रगा सलीलवेष्टन लम्बमानबन्धचारु- चन्द्रिका कचेषु कर्णयोरशोकपुष्पमञ्जरीवतंसको गलेच कामकेशरो- पकल्पदाम । फुल्लनागकेशरादिपुष्परेणुरूष्य सर्वं विभिन्नमितप्रपात येन यथ वेशनः पुनातु वः सुपुष्पभूषित स स्मितमानिवागतो मधुर्विहर्भमन् ।
[illegible]	लघुर्गुरुर्निरिच्छया यदा निबध्यते नरैः स दण्डको भवत्यनङ्गशेखर ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ	उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके । विशुभ्र- मानगौरदीधित रश्मिमण्डलैर्निर्मितः कलाकुदूहलैः चारुचम्पकरत्न- शेखरः त्रिज इति प्रमोदकारिणी प्रियाप्रमोदयन्वचो गिर मधुरिपु मुरारिर्मुदा प्रदीपयन्मनोमनमदा मनोजभेदिर्षितुलो करोतु व शर्मणाम् ।

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
त्रिंशदक्षरा वृत्तिः । अर्णः	प्रतिचरणविवृद्धरेफाः स्युरर्णोऽर्णवव्यालजीमूत- लीलाकरोद्दामशङ्खादयः प्रतिचरणं चण्डवृष्टिप्रपातस्य इत्यर्थः । ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	जय जय जगदीश विष्णो हरे राम दामोदर श्रीनिवासा- च्युतानन्त नारायण त्रिदशगणगुरो मुरारे मुकुन्दासुरारे हृषीकेश पीताम्बर श्रीपते माधव । गरुडगमन कृष्ण वैकुण्ठ गोविन्द विश्वम्भरोपेन्द्र चक्रायुधा- धोक्षज श्रीनिधे बलिदमन नृसिंह शौरे । भवाम्भोधिघोरार्णसि त्वं निमज्जन्त- मभ्युद्धरोपेत्य माम् ॥
सिंहविक्रीडः	यकारैः कवीच्छानुरोधान्निबद्धैः प्रसिद्धो विशुद्धो ऽपरो दण्डकः सिंहविक्रीडनामा ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	
त्रयस्त्रिंशदक्षरा वृत्तिः । अर्णवः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	अर्णोऽर्णवादीनामप्युदाहरणानि बोद्धव्यानि ॥
अशोकमञ्जरी	स्वेच्छया रजौ क्रमेण संनिवेशयत्युदारधीः कविः स दण्डकः स्मृतो जयत्यशोकमञ्जरी ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ	
षट्त्रिंशदक्षरा वृत्तिः । व्यालः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
ऊनचत्वारिंशदक्षरा वृत्तिः । जीमूतः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ, ऽ।ऽ	
द्वाचत्वारिंशदक्षरा वृत्तिः । लीलाकरः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ, ऽ।ऽ,ऽ।ऽ	
पञ्चचत्वारिंशदक्षरा वृत्तिः । उद्दामः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ, ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
सिंहविक्रान्तः	नयुगलगुरुयुगेव यकाराः कवीच्छानुरोधा- त्सदा यत्र बध्यन्त एषोऽपरो दण्डकः पण्डितै- रीरितः सिंहविक्रान्तनामा ।।।,।।।,।,ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ, ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	
अष्टचत्वारिंशदक्षरा वृत्तिः । शङ्खः इत्यादयः । इति समवृत्तानि समाप्तानि ॥*॥	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ, ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
अथार्द्धसमवृत्तानि । उपचित्रम् ११ । ११ वृत्तिः ।	विषमे यदि सौ सलगा दले भौ युजि भाद्- गुरुकावुपचित्रम् । द्विरावृत्त्या श्लोकः पूरयितव्यः	
प्रथमपादे तृतीयपादे च द्वितीयपादे चतुर्थपादे च	।।ऽ,।।ऽ,।।ऽ,।,ऽ ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	सुरवैरिवपुस्तनुतां सुदं हैमनिभांशुकचन्दनलिप्तम् । गगनस्थपलामिलितं यथा शारदनीरधरैरुपचित्रम् ॥
वेगवती १० । ११ वृत्तिः ।	विषमे प्रथमाक्षरहीनं दोधकमेव हि वेगवती स्यात्	
प्रथमपादे तृतीयपादे च द्वितीयपादे चतुर्थपादे च	।।ऽ,।।ऽ,।।ऽ,ऽ ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	स्मर वेगवती व्रजरामा केशववंशरवैरतिमुग्धा । रभसान्न गुरून् गणयन्ती केलिनिकुञ्जगृहाय जगाम ॥

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
भद्रविराड् १०।११ वृत्ति।	ओजे तपरौ जरौ गुरुश्चेत् मसौ जगौ ग भद्रविराड् भवेदनोजे	
प्रथमपादे तृतीयपादे च	ऽऽ।-।ऽ।,ऽ।ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	ऽऽऽ,।।ऽ,।ऽ।,ऽ,ऽ	
केतुमती १०।११ वृत्तिः।	असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद् ग'	
प्रथमपादे तृतीयपादे च	।।ऽ,।ऽ।,।।ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	ऽ।।,ऽ।ऽ,।।।,ऽ ऽ	
विपरीतपूर्व्वा ११।११ वृत्ति'।	जतौ जगौ गो विषमे समे चेत् तौ जगौ ग एषा विपरीतपूर्व्वा	
प्रथमपादे तृतीयपादे च	।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	
आख्यानकी ११।१२ वृत्ति'।	आख्यानकी तौ जगुरू ग ओजे जतावनोजे जगुरू गुरुश्चेत्	
प्रथमपादे तृतीयपादे च	ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	
हरिणप्लुता ११।१२ वृत्तिः।	अयुजि प्रथमेन विवर्ण्णितं द्रुतविलम्बितक हरिणप्लुता	
प्रथमपादे तृतीयपादे च	।।,ऽ।।,ऽ।।,ऽ।ऽ	स्फुटफेनचया हरिणप्लुता बलिमनोज्ञतटा तरणेः सुता।
द्वितीयपादे चतुर्थपादे च	।।।,ऽ।।,ऽ।।,ऽ।ऽ	कलहंसकुलारवशालिनी विहरतो हरति स्म हरेर्म्मनः॥
अपरवक्त्रम् ११।१२ वृत्तिः।	अयुजि ननरला गुरु' समे तदपरवक्त्रमिद नजौ जरौ	
प्रथमे तृतीये च पादे	।।।,।।।,ऽ।ऽ,।,ऽ	स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम्।
द्वितीये चतुर्थे च पादे	।।।,।ऽ।,।ऽ।,ऽ।ऽ	मृगयुवतिगणै सम स्थिता ब्रजवनिता धृतचित्तविभ्रमा'॥
द्रुतमध्या ११।१२ वृत्ति।	भत्रयमोजगत गुरुणौ चेद् युजि च नजौ ज्ययुतौ द्रुतमध्या	
प्रथमपादे तृतीयपादे च	ऽ।। ऽ।।,ऽ।।,ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	।।।,।ऽ।,।ऽ।,।ऽऽ	
मालभारिणी ११।१२ वृत्ति.।	विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीयम्	
प्रथमपादे तृतीयपादे च	।।ऽ,।।ऽ,।ऽ।,ऽ,ऽ	
द्वितीयपादे चतुर्थपादे च	।।ऽ,ऽ।।,ऽ।ऽ,।ऽऽ	
कौमुदी १२।१२ वृत्ति।	अयुजि ननभमा समकेऽपि तु नयुगरयुगल तदा कौमुदी	
प्रथमपादे तृतीयपादे च	।।।,।।।,ऽ।।,ऽ।।	
द्वितीयपादे चतुर्थपादे च	।।।,।।।,ऽ।ऽ,ऽ।ऽ	
पुष्पिताग्रा १२।१३ वृत्तिः।	अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा	
प्रथमपादे तृतीयपादे च	।।।,।।।,ऽ।ऽ,।ऽऽ	करकिसलयशोभया विभान्तौ कुचफलभारविनम्रदेहयष्टिः।
द्वितीयपादे चतुर्थपादे च	।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ	स्मितरुचिरविलासपुष्पिताग्रा व्रजयुवतिर्व्रततौ हरेर्मुदेऽभूत॥
जवमती १२।१३ वृत्ति।	स्यादयुग्मके रजौ रयौ समे,चेत् जरौ जरौ गुरुश्चवात् परा मतीयम्	
प्रथमपादे तृतीयपादे च	ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽऽ	
द्वितीयपादे चतुर्थपादे च	।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,ऽ	
मञ्जुसौरभम् १२।१३ वृत्ति।	यदि विषमे भवतो नजौ जरौ सजया. समे तु जगौ मञ्जुसौरभम्	
प्रथमपादे तृतीयपादे च	।।।,।ऽ।,।ऽ।,ऽ।ऽ	
द्वितीयपादे चतुर्थपादे च	।।ऽ,।ऽ।,।ऽऽ,।ऽ।,ऽ	

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणा.।	छन्दसामुदाहरणानि।
सुन्दरी १०।११ वृत्तिः।	अयुजोर्यदि सौ जगौ युजोः सभरा: लगौ यदि सुन्दरी तदा	
प्रथमे तृतीये पादे च	।।ऽ,।।ऽ,।ऽ।,ऽ	यदवोचदवेक्ष्य सुन्दरी परितः स्नेहमयेन चक्षुषा।
द्वितीये चतुर्थे पादे च	,।।ऽ,ऽ।।,ऽ।ऽ,।ऽ	अपि कंसहरस्य दुर्वचं वचनन्तद्विदधीत विस्मयम्॥
इत्यर्द्धसमवृत्तानि समाप्तानि॥ * ॥	।	
अथ विषमवृत्तानि।		
उद्गता	प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनन्तरम्। यद्यथ भनभगा: स्युरथो सजसा जगौ च भवतीयमुद्गता॥	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	विललास गोपरमणीषु तरणितनयाप्रभोद्गता।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	कृष्णनयनचकोरयुगे दधती सुधांशुकिरणोर्म्मिविभ्रमम्॥
तृतीये १०	ऽ।।,।।।,ऽ।।,ऽ	
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
अन्यविधोद्गता	प्रथमे सजौ यदि सलौ च नसनगुरुकाण्यनन्तरम्। यद्यथ भनजलगा: स्युरथो सजसा जगौ च भवतीयमुद्गता॥	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम्।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जय॥
तृतीये ११	ऽ।।,।।।,।ऽ।,।,ऽ	इति भारवावुद्गताभेदः। १०। १॥
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
सौरभम्	चयमुद्गता सदृशमेव पदमिह तृतीयमन्यथा। जायते रनभगैर्ग्रथितं कथयन्ति सौरभकमेतदीदृशम्॥	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	परिभूतफुल्लशतपत्रवनविहृतगन्धविभ्रमा।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	कस्य हृन्न हरतीह हरे मुखपद्मसौरभकला तवाद्भुता॥
तृतीये १०	ऽ।ऽ,।।।,ऽ।।,ऽ	
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
ललितम्	नयुगं सकारयुगलञ्च भवति चरणे तृतीयके। तदुदितसुरुमतिभिर्ललितं यदि शेषमस्य सकलं यथोद्गता।	
प्रथमे पादे १०	।।ऽ,।ऽ।,।।ऽ,।	व्रजसुन्दरी समुदयेन मुदितमनसा स पीयते।
द्वितीये १०	।।।,।।ऽ,।ऽ।,ऽ	हिमकरगलितमिवामृतकं ललितं मुरारिमुखचन्द्रविच्युतम्॥
तृतीये १२	।।।,।।।,।।ऽ,।।ऽ	
चतुर्थे १३	।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	
वक्त्रम्	वक्त्रं युग्भ्यां मगौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम्।	
प्रथमे पादे ८	ऽऽऽऽ।ऽऽऽ	वक्त्राम्भोजं सदा स्मेरं चक्षुर्नीलोत्पलं फुल्लम्।
द्वितीये ८	ऽऽऽऽ।ऽऽऽ	वल्लवीनां मुरारातेश्चेतोभृङ्गं जहारोच्चैः॥
तृतीये ८	ऽ।ऽऽ।ऽऽऽ	
चतुर्थे ८	ऽऽऽऽ।ऽऽऽ	
पथ्यावक्त्रम्	युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्त्तितम्।	
प्रथमे पादे ८	ऽ।ऽ।।ऽऽ।	रासकेलिसतृष्णस्य कृष्णस्य मधुवासरे।
द्वितीये ८	ऽऽ।।।ऽ।ऽ	आसीद्गोपमृगाक्षीणां पथ्या वक्त्रमधुस्रुतिः॥
तृतीये ८	ऽऽऽ।।ऽऽऽ	
चतुर्थे ८	ऽऽऽ।।ऽ।ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
अनुष्टुप्	पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयो ।	
	गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः ॥	
	प्रयोगे प्रायिकं प्राहुः केऽप्येतद्वृत्तलक्षणम् ।	
	लोकेऽनुष्टुबिति ख्यातं तस्याष्टाक्षरता मता ॥	
प्रथमे चरणे ८	ऽ।ऽ॥ऽऽ।	पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः ।
द्वितीये ८	ऽ।ऽ॥ऽ।ऽ	गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः ॥
तृतीये ८	॥ऽऽ।ऽऽऽ	
चतुर्थे ८	ऽऽ॥ऽ।ऽ	
इति वृत्तवृत्तानि समाप्तानि ॥*॥		
अथ मात्रावृत्तानि ।		
आर्य्या अर्थात् गाथा	लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः ।	
	षष्ठो जश्च नलघु वा प्रथमार्द्धे नियतमार्य्यायाः ॥	
	षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपद-	
	नियमः ।	
	चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥	
प्रथमे पादे १२	ऽऽ।ऽ।ऽऽ	कृष्णः शिशुः सुतो मे वल्लवकुलटाभिराहृतो न गृहे ।
द्वितीये १८	ऽ॥।ऽ।ऽ।ऽ॥ऽ	क्षणमपि वसत्यसाविति जगाद गोष्ठ्यां यशोदार्य्या ॥
तृतीये १२	॥॥।ऽ।ऽ॥	
चतुर्थे १५	।ऽ।ऽऽ।ऽऽऽ	
प्रकारान्तरो यथा		
प्रथमे पादे १२	ऽऽ।ऽ।ऽऽ	वृन्दावने सलीलं वल्गुद्रुमकाण्डनिहिततनुयष्टिः ।
द्वितीये १८	ऽऽ॥ऽ॥॥।ऽऽ	स्मेरमुखार्पितवेणुः कृष्णो यदि मनसि कः स्वर्गः ॥
तृतीये १२	ऽ॥ऽ॥ऽऽ	
चतुर्थे १५	ऽऽ॥॥।ऽऽऽ	
नवधा आर्य्या क्रमेण यथा ।	[पथ्या ।	
पथ्या	प्रथमगणत्रयविरतिर्दलयोरुभयो प्रकीर्त्तिता	
प्रथमे पादे १२	॥॥ऽ॥ऽऽ	जय जय माधव। मुरारे। केशव। कंसान्तकाच्युतानन्त ।।
द्वितीये १८	ऽ॥ऽऽ।ऽ।ऽऽऽ	कुरु करुणामिति विनति पथ्या भवरोगदुःस्थानाम् ॥
तृतीये १२	॥॥ऽ॥॥ऽ	अत्र द्वितीयपादान्तलघोर्गुरुत्वम् ।
चतुर्थे १५	ऽऽ॥ऽ।ऽऽऽ	पूर्व्वपरार्द्धयोर्द्वादशमात्रायां यतिः ॥
विपुला	संलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।	
	यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥	
प्रथमे पादे १८	ऽऽ॥ऽऽऽ॥ऽऽ	पुंसां कलिकालव्यालग्रस्तानां नास्त्युपायान्तरमपि ।
द्वितीये १२	ऽ॥॥ऽऽऽ	वीर्य्यविपुला सुखे चेत् स्याद्गोविन्दास्यमन्त्रकला ॥
तृतीये १४	ऽ॥॥ऽ।ऽऽऽ	अत्र द्वितीयचरणान्तलघोर्गुरुत्वम् ।
चतुर्थे १५	ऽऽऽ।ऽ॥ऽ	पूर्व्वपरार्द्धयोर्द्वादशमात्रा संलङ्घ्य यतिः ॥
चपला	दलयोर्द्वितीयतुर्य्यौ गयौ जकारौ तु यत्र	
	चपला सा ।	
प्रथमे पादे १२	॥ऽ।ऽ।ऽऽ	चपला न चेत् कदाचिन्मृगां भवेद्भक्तिभावना कृष्णे ।
द्वितीये १८	।ऽ।ऽऽ।ऽ।ऽऽऽ	धर्म्मार्थकाममोक्षास्तदा करस्था न सन्देहः ॥
तृतीये १२	ऽऽ।ऽ।ऽऽ	
चतुर्थे १५	।ऽ।ऽऽ।ऽऽऽ	
मुखचपला	आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।	
	शेषः पूर्व्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥	
प्रथमे पादे १२	ऽ॥।ऽ।ऽऽ	नन्दसुत । यमपरस्त्व दृढ़ न ते प्रेम गच्छ समेय ।
द्वितीये १८	।ऽ।ऽऽ।ऽ।ऽऽऽ	यत्र भवति ते रागः कापि जगादेति मुखचपला ॥
तृतीये १२	ऽ॥॥ऽऽ	अत्र द्वितीयपदान्तलघोर्गुरुत्वम् ॥
चतुर्थे १५	ऽ॥ऽऽ॥॥।ऽ	

छन्दसां वृत्तिनामानि ।		छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
जघनचपला		प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे च चपलायाः । लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥	
प्रथमे चरणे	१२	ऽऽऽऽ।।ऽ	कृष्णः शृङ्गारपटुर्यौवनमदचञ्चलः सुललिताङ्गः ।
द्वितीये	१८	ऽ।।।ऽ।ऽ।।।ऽऽ	आसीद्व्रजाङ्गनानां मनोहरो जघनचपलानाम् ॥
तृतीये	१२	ऽऽ।ऽ।ऽऽ	
चतुर्थे	१५	।ऽ।ऽ।।।।ऽऽ	
गीतिः		आर्य्याप्रथमार्द्धसमं यस्या अपरार्द्धमाह तां गीतिम् ।	
प्रथमे चरणे	१२	ऽ।।ऽऽऽऽ	केशववंशीगीतिर्लोकमनोहरिणहारिणी जयति ।
द्वितीये	१८	ऽ।।ऽ।।।ऽ।ऽ।।ऽ	गोपीमानग्रन्थेर्व्विमोचनी दिव्यगायनाश्चर्य्या ॥
तृतीये	१२	ऽऽऽऽऽऽ	अत्र द्वितीयचरणान्तलघोर्गुरुत्वम् ॥
चतुर्थे	१८	।ऽ।ऽऽ।ऽ।ऽऽऽ	
उपगीतिः		आर्य्यापरार्द्धतुल्ये दलद्वये प्राहुरुपगीतिम् ।	
प्रथमे चरणे	१२	।।ऽ।ऽ।ऽऽ	नवगोपसुन्दरीणां रासोल्लासे मुरारातिम् ।
द्वितीये	१५	ऽऽऽऽ।ऽऽऽ	अस्मारयदुपगीतिः स्वर्गकुरङ्गीदृशां गीतिम् ॥
तृतीये	१२	ऽऽ।।।।ऽऽ	
चतुर्थे	१५	ऽ।।ऽऽ।ऽऽऽ	
उद्गीतिः		आर्य्याशकलद्वितये विपरीते पुनरिहोद्गीतिः ।	
प्रथमे चरणे	१२	ऽऽ।ऽ।ऽ।।	नारायणस्य सन्ततमुद्गीतिं संस्मृतिर्भक्त्या ।
द्वितीये	१५	ऽऽऽऽ।ऽऽऽ	अर्चायामासक्तिर्दुस्तरसंसारसागरे तरणिः ॥
तृतीये	१२	ऽऽऽऽऽऽ	
चतुर्थे	१८	ऽ।।ऽऽ।ऽ।ऽ।।ऽ	
आर्य्यागीतिः		आर्य्याप्रागदलमन्तेऽधिकगुरु तादृगपरार्द्धमार्य्यागीतिः ।	
प्रथमे चरणे	१२	ऽऽऽ।।।।ऽ	हर्षाश्रुस्तिमितदृशः प्रमोदरोमाञ्चकञ्चुकाञ्चितदेहाः ।
द्वितीये	२०	।ऽ।ऽऽ।ऽ।ऽ।।ऽऽ	आर्य्यागीतिं भक्त्या गायन्ति श्रीपतेश्चरितसम्बद्धाम् ॥
तृतीये	१२	ऽऽऽऽऽऽ	लघुगुरुविपर्य्ययरूपप्रस्तारभेदेन बहुविधा आर्य्या भवन्ति ॥
चतुर्थे	२	ऽऽऽ।ऽ।।।ऽऽऽ	
पूर्व्वार्द्धे विंशत्याश्चतुर्व्विंशत्या वा मात्राणां परार्द्धे षोडशमात्राणां परे लघुवर्णचतुष्टये सति प्रथमं द्वितीयं वा लघ्वक्षरं प्राप्य आर्य्यायाः सामान्येन यतिनियमः ॥			
वैतालीयम् । अपरवक्त्रमित्येके ।		षड्विषमेऽष्टौ समे कलास्ताश्च समेस्युर्नो निरन्तराः । न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः ॥	
प्रथमे चरणे	१४	।।ऽ।।ऽ।ऽ।ऽ	कुसुमेन मदेन चर्च्चित नव यन्निन्दति राधिके कुचम्
द्वितीये	१६	।।ऽऽ।।ऽ।ऽ।ऽ	मुरमातनुतेऽत्र पश्चिम तद्वैतालीयं फलं हरे ।
तृतीये	१४	।।ऽ।।ऽ।ऽ।ऽ	लघुगुरुव्यत्ययेनापि बहुधा भवति ॥
चतुर्थे	१६	ऽऽऽऽ।ऽ।ऽ	
औपच्छन्दसकम्		तत्रैवान्तेऽधिके गुरौ स्यादौपच्छन्दसकं कवीन्द्रहृद्यम् ।	
प्रथमे चरणे	१६	ऽऽऽऽ।ऽ।ऽऽ	आतन्वान सुरारिकान्तास्वौपच्छन्दसकं हृदा विनोदम् ।
द्वितीये	१८	ऽऽऽ।।ऽ।ऽ।ऽऽ	कंसं यो निर्जघान देवा वन्दे तं जगतां स्थितिं दधानम् ।
तृतीये	१६	ऽऽऽऽ।ऽ।ऽऽ	
चतुर्थे	१८	ऽऽऽ।।ऽ।ऽ।ऽऽ	
एतद्वैतालीयभेदः ॥			

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
पज्झटिका	प्रतिपदयमकितषोड़शमात्रा नवमगुरुत्वविभूषितगात्रा । पज्झटिकापुनरत्र विवेकः क्वापि न मध्यगुरुर्गण एकः ॥	
प्रथमे चरणे १६	।।।।ऽऽऽऽऽऽ	तरलवतसाश्चिटस्कन्धस्खलतपज्झटिकाकटिवन्ध ।
द्वितीये १६	।।।।ऽ।।ऽ।।ऽऽ	मौलिचपलशिखिचन्द्रकछन्दः कालियशिरसि ननर्त्त मुकुन्दः ॥
तृतीये १६	ऽ।।।।।ऽ।।ऽऽ	इयं प्रतिपदयमकितषोडशमात्रा लघुगुरुव्यत्ययेनापि वहुधा
चतुर्थे १६	ऽ।।।।।ऽ।।ऽऽ	अस्या नवम (मात्रा च कदाचित् लघ्वी भवति ॥
दोधड़िका	मात्रा त्रयोदशक यदि पूर्व्व लघुकविरामि । पश्चादेकादशकन्तु दोधड़िका द्विगुणेन ॥	
प्रथमे चरणे १३	ऽऽऽ।।।।।।।	माई दोधड़िपठण शुणि हासिओ काणु गोआल ।
द्वितीये १३	ऽ।ऽऽ।ऽऽ।	वृन्दावणघणकुञ्ज चलिओ कमलरसाल ॥
तृतीये ११	ऽऽ।।।ऽ।	अस्यार्थः । हे मातः । दोधडिकापाठ श्रुत्वा कृष्णो गोपालो हसित्वा कमपि रसाल चलित, कुत्र वृन्दावनघनकुञ्जे वृन्दावनस्य निविडनिकुञ्जे । राई इति क्वचित् पाठ तन्मतेन राधिकाया दोधडिकापाठ श्रुत्वा ॥
चतुर्थे ११	।।ऽ।।।ऽ।	गुरुलघुव्यत्ययेन वहुधा भवति ॥
अस्या अन्त्या मात्रा लघ्वी अपभ्रंशभाषया प्रचारः ॥ इति मात्रावृत्तानि समाप्तानि ॥*॥		

अत्र समवृत्तानि (२४७) सप्तचत्वारिंशदधिक द्विशत, अर्द्धसमवृत्तानि (१५) पञ्चदश, विषमवृत्तानि (७) सप्त, मात्रावृत्तानि च (१५) पञ्चदश समुदायेन (२८४) चतुरशीत्यधिकद्विशतसङ्ख्यकानि छन्दांसि लिखितानीति ॥ * ॥

छन्दकपातनः, पु, (छन्दकेन छद्मना पातयति लोकानिति । पत्+णिच्+ल्युः ।) छद्मतापसः । इति जटाधरः ॥

छन्दोगः, पुं, (छन्दो वेदविशेषं सामेत्यर्थः गायतीति । गै+"गोपोष्टक् ।" ३।२।८। इति टक् ।) सामगः । सामवेदी । इति जटाधर. ॥ (यथा, मनु । ३ । १४५ ।

"यत्नेन भोजयेच्छ्राद्धे वह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्तिकम् ॥")

छन्दोगपरिशिष्टं, क्ली, (छन्दोगेन सामगेन कात्यायनेन मुनिनेत्यर्थः । प्रणीत यत् परिशिष्टम् । यद्वा, छन्दोगेभ्यः कृत परिशिष्टम् ।) कात्यायनमुनिकृत सामवेदिकर्म्मवोधकगोभिलसूत्राणां परिशेषशास्त्रम् । इति स्मृति. ॥

छन्दोविचितिः, स्त्री, (छन्दसां विचितिर्यत्र ।) श्रुतिच्छन्दसां प्रत्यायक शास्त्रम् । इत्यमरटीकायां भरतः ॥ (यथा, वृहत्संहितायाम् । १०४ । ६४ ।

"विपुलामपि बुद्ध्वा छन्दोविचितिं भवति कार्य्यमेतावत् ।
श्रुतिसुखदवृत्तसंग्रहमिममाह वराहमिहिरोऽत ॥")

छन्नं, क्ली (छद्+क्त ।) रह । निर्जनस्थानम् । इति मेदिनी । ने, ५ ॥

छन्नः, त्रि, (छद्+क्तः ।) छादित । इति मेदिनी । ने, ५ ॥ (व्याप्तः । यथा, महाभारते । ३ । २० । २४ ।

"न हया न रथो वीर । न यन्ता मम दारुक ।
अदृश्यन्त शरैश्छन्नास्तथाहं सैनिकाश्च मे ॥")
रह. । इत्यमर. । २ । ८ । २२ ॥

छप, इ क सर्पे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सक-सेट् ।) इ क, छम्पयति । सर्पो गतिः । इति दुर्गादासः ॥

छम, उ भक्षे । इति कविकल्पद्रुमः । (भ्वां-पर सक-सेट् । उदित्वात् क्त्वावेट ।) छमति । उ, छमित्वा छान्त्वा । इति दुर्गादास. ॥

छमण्डः, पु, (छमति भक्षयति जन्मग्रहणान्तरं पितरं नाशयतीत्यर्थः । छम+बाहुलकादण्डन् ।) मृतपितृकः । इत्युणादिकोषः ॥ छेमडा इति भाषा ॥ वन्धुहीन. । इति सङ्क्षिप्तसारे उणादिवृत्तिः ॥

छर्द्द, क वमने । इति कविकल्पद्रुमः । (चुरां-पर-सक-सेट् ।) वमन वान्तिः । क, छर्द्दयति व्यन्न लोकः । इति दुर्गादासः ॥ (तथाच, महाभारते । ५ । ६६ । ४२ ।

"स्वपन्ति च स्रवन्ति च छर्द्दयन्ति च मानवाः ॥")

छर्द्दं, क्ली, (छर्द्द+भावे घञ् ।) वमनम् । इति हेमचन्द्रः । ३ । १३३ ॥

छर्द्दन, क्ली, (छर्द्द+भावे ल्युट ।) वमनम् । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । ४ । १० ।

"तत्राशु मदनालावुविम्बीकोशातकीफलैः ।
छर्द्दनं दधिदुग्धाभ्यामथवा तण्डुलाम्बुना ॥")

छर्द्दनः, पु, (छर्द्दयति नरयश्मादिक ग्रसित्वा पुनरुद्गिरतीति । छर्द्द+ल्यु ।) अलम्बुषराक्षसः । (छर्द्दयति कटुगन्धेन उद्गिरत्यनेनेति । छर्द्द+ल्युट् ।) निम्बवृक्ष. । इति हेमचन्द्र ॥ मदन वृक्ष. । इति भावप्रकाश ॥

छर्द्दापनिका, स्त्री, (छर्द्द वमन आपयति प्रापयतीत्यर्थः । आप्+णिच+ल्यु । तत स्वार्थे कः । टापि अत इत्वञ्च ।) कर्कटी । इति राजनिर्घण्टः ॥

छर्द्दिः, स्त्री, (छर्द्दयत्यनेनेति । छर्द्द वमने+इन् ।) वमिरोग. । वाँति इति भाषा ॥ तत् पर्य्याय । प्रच्छर्द्दिका २ छर्द्दन ३ वमथुः ४ वमनम ५ वमि, ६ । इति हेमचन्द्रः । ३ । १३३ ॥ छर्द्दिका ७ छर्द्दीका ८ वान्तिः ९ उद्गार १० । इति राजनिर्घण्ट. ॥ उत्कासिका ११ छर्द्दनम् १२ । इति शब्दरत्नावली ॥ तस्या निदानादि यथा,—

"दुष्टैर्दोषैः पृथक्सर्व्वैर्वीभत्सालोकनादिभि. ।
छर्द्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥
अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति ।
अकाले चातिमात्रैश्च तथा सात्म्यैश्च भोजनै ।
श्रमाद्भयात्तथोद्वेगादजीर्णात् क्रिमिदोषत ।
नार्य्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नत ॥
वीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो वलात ।
छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः ॥
निरुच्यते छर्द्दिरिति दोषो वक्त्र प्रधावित ॥"

तस्या पूर्व्वरूप यथा,—

"हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः ।
द्वेषो भक्तपाने च वमीनां पूर्व्वलक्षणम् ॥"

वातजायास्तस्या रूप यथा,—

"हृत्पार्श्वपीडामुखशोषशीर्ष
नाभ्यर्त्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रवल सफेनं
विच्छिन्नकृष्ण तनुक कषायम् ॥
कृच्छ्रेण चाल्प महता च वेगेनार्त्तोऽनिलाच्छर्द्दयतीह दुःखम् ॥"

तस्याः पित्तजाया रूप यथा,—

"मूर्च्छा पिपासा मुखशोषमूर्द्ध-
ताल्वक्षिसन्तापतमोभ्रमार्त्तः ।

पीतं भृशोष्णं हरितं सतिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥”
तस्याः श्लेष्मजाया रूपं यथा,—
“तन्द्रास्यमाधुर्य्यकफप्रसेक-
सन्तोषनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाद्विशुद्ध
सलोमहर्षोऽल्परुजं वमेच्च ॥”
तस्यास्त्रिदोषजाया रूप यथा,—
“शूलाविपाकारुचिदाहतृष्णा-
श्वासप्रमोहप्रवलाप्रसक्तम् ।
छर्द्दिस्त्रिदोषाल्लवणाम्लनील-
सान्द्रोष्णरक्तं वमतां नृणा स्यात् ॥”
असाध्याया लक्षणं यथा,—
“विट्स्वेदमूत्राम्बुवहानि वायुः
स्रोतांसि संरुध्य यदोर्द्ध्वमेति ।
उत्सन्नदोषस्य समाचित त
दोषं समुद्धूय नरस्य कोष्ठात् ॥
विण्मूत्रयोस्तत्समगन्धवर्ण
तृट्श्वासकासार्त्तियुतं प्रसक्तम् ॥
प्रच्छर्द्दयेद्दुष्टमिहातिवेगा-
त्तयार्द्दितस्त्वाशु विनाशमेति ॥”
आगन्तुजाया लक्षणं यथा,—
“वीभत्सजा दौर्हृदजामजा तु
असात्म्यजा या क्रिमिजा च या हि ।
सा पञ्चमी ताञ्च विभावयेच्च
दोषोच्छ्रयेणैव यथोक्तमादौ ॥”
क्रिमिजाया लक्षण यथा,—
‘शूलहृल्लासबहुला क्रिमिजा च विशेषत’ ।
‘क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥
क्षीणस्य या च्छर्द्दिरतिप्रसक्ता
सोपद्रवा शोणितपूययुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्या
साध्याश्चिकित्सेन्निरुपद्रवाश्च ॥”
तस्या उपद्रवा यथा,—
‘ कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्य
मेव च ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्देरुपद्रवा ॥”
इति माधवकर. ॥
तस्यौषधं यथा, गारुडे १८७ अध्याये ।
“अश्वगन्धाभया चैव उदकेन सम पिवेत ।
हरीतकीकुष्ठचूर्णं कृत्वा व्यास्यञ्च पूरयेत् ॥
शीत पीत्वाथ पानीय सर्व्वच्छर्द्दिनिवारणम् ।
गुडूचीपद्मकारिष्टधन्याक रक्तचन्दनम् ॥
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ॥”
अपिच ।
“विल्वमूलञ्च समधु गुडूचीक्वथितं जलम् ।
पीत हरेच्च त्रिविधां छर्द्दिं वै नात्र संशयः ॥
पीता दूर्व्वा च्छर्द्दिं नश्येत् पिष्टा तण्डुलवारिणा ॥”
इति च गारुडे १६४ अध्याय ॥*॥
अथ छर्द्देश्चिकित्सा ।
“आमाशयोत्क्लेशभवा हि सर्व्वा
श्छर्द्द्यो मता लङ्घनमेव तस्मात् ।
विधीयते मारुतजा विना तु
संशोधनं वा कफपित्तहारि ॥”
अत्र च्छर्द्दीशब्द. ।
“हन्यात् क्षीरोदकं पीतं छर्द्दिं पवनसम्भवाम् ।
मुद्गामलकयूषो वा ससर्पिष्क. ससैन्धव ॥
क्षीरोदक नाशितस्य क्षीरस्योदकम् ।
गुडूचीत्रिफलानिम्बपटोलैः क्वथितं जलम् ।
पिवेत् मधुयुत तेन छर्द्दिर्नश्यति पित्तजा ॥
हरीतकीना चूर्णन्तु लिह्यान्माक्षिकसयुतम् ।
अधोमार्गीकृते दोषे छर्द्दिः शीघ्र निवर्त्तते ॥
विडङ्गत्रिफलाविश्वाचूर्णं मधुयुत पिवेत् ।
विडङ्गप्लवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥
प्लव कैवर्त्तीमुस्तं गुडतर्णी इति लोके ।
पिष्ट्वा धात्रीफल लाजान् शर्कराञ्च पलोन्मितान् ।
दत्त्वा मधुपलञ्चापि कुडव सलिलस्य च ॥
वाससा गालित पीतं हन्ति छर्द्दिं त्रिदोषजाम् ।
गुडूच्या रचित हन्ति हिम मधुसमन्वितम् ॥
दुर्निवारामपि छर्द्दिं त्रिदोषजनिता वलात् ॥
एलालवङ्गगजकेशरकोलमज्जा-
लाजाप्रियङ्गुघनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा
छर्द्दिं निहन्ति कफमारुतपित्तजाताम् ॥
इति एलादिचूर्णम् ॥
अश्वत्थवल्कलं शुष्कं दग्ध निर्व्वापितं जले ।
तज्जल पानमात्रेण छर्द्दिं जयति दुर्ज्जयाम् ॥
यथा त्रिकटुधात्र्याकजीरकाणां रजो लिहन् ।
मधुना नाशयेच्छर्द्दिमरुचिञ्च त्रिदोषजाम् ॥
विल्वत्वचो गुडूच्या वा क्वाथ क्षौद्रेण संयुतः ।
छर्द्दिं त्रिदोषजां हन्ति पर्पटः पित्तजा तथा ॥
आम्रास्थिविल्वनिर्यूह' पीत समधुशर्करं ।
निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥
निर्यूह. क्वाथ' ।
जम्वाम्रपल्लवश्रृतं लाजरज.संयुतं शीतम् ।
शमयति मधुना युक्त वमिमतिसार तृषार्त्ति-
मुग्राम् ॥
वीभत्सजां हृद्यतमैरिष्टैर्द्दौर्हृदजां फलैः ।
लङ्घनेरामजां छर्द्दिं जयेत सात्म्यै रसात्मजाम् ॥
क्रमिहृद्रोगवद्धन्याद्वमिं क्रमिसमुद्भवाम् ।
तत्र तत्र यथा दोष क्रिया कुर्य्याच्चिकित्सक ॥
इति छर्द्यधिकारः ।” इति भावप्रकाश ॥
छर्द्दि, [स्] स्त्री, (छर्द्दयति छर्द्द्यते इति वा । छर्द्द वमने+“अर्च्चिशुचिहुसृपिच्छादिच्छर्द्दिभ्य इसिः ।” उणा । २ । १०८ । इति इसि ।) वमि' । इत्युणादिकोषः ॥ (यथा, चरके चिकित्सास्थाने २३ अध्याये ।
‘तदग्निवेशस्य वचो निशम्य
प्रीतो भिषक्श्रेष्ठ इद जगाद ।
छर्द्दीषि यानीह पुरोदितानि
विस्तारतस्तानि निबोध सम्यक् ॥”)
छर्द्दिका, स्त्री (छर्द्दि+स्वार्थे कन् । स्त्रियां टाप् । यद्वा, छर्द्दयतीति । छर्द्दि+ण्वुल् । टापि अत इत्वञ्च ।) छर्द्दि. । विष्णुक्रान्ता । इति राजनिर्घण्ट' ॥
छर्द्दिकारिपुः, पु, (छर्द्दिकाया रिपुः नाशक इत्यर्थः ।) क्षुद्रैला । इति शब्दचन्द्रिका ॥
छर्द्दिघ्न', पु, (छर्द्दिं हन्तीति । हन्+टक् ।) निम्बवृक्ष' । इति रत्नमाला ॥ (निम्बशब्देऽस्य विवरणं ज्ञेयम् ॥)
छल, क्ली, (छो+वृषादित्वात् कलच् । यद्वा, छल+अच् ।) स्खलितम् । शाठ्यम् । इति मेदिनी । ले, १७ ॥ (यथा, मनु । ८ । ४६ ।
“धर्म्मेण व्यवहारेण च्छलेनाचरितेन च ।
प्रयुक्त साधयेदर्थं पञ्चमेन बलेन च ॥”
व्याजः । यथा, मार्कण्डेये । २५ । १० ।
“सा वै मदालसा पुत्त्रं बालमुत्तानशायिनम् ।
उल्लापनच्छलेनाह रुदमानमविस्वरम् ॥”
तात्पर्य्यान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरेण कथनम् । यथा, अक्षपादसूत्रे । ५० ।
“वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम् ॥”
“अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्ध कल्प' अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वाद्युक्तस्य विघातो दूषणं तच्छलमित्यर्थः । वक्तृतात्पर्य्याविषयार्थ कल्पनेन दूषणाभिधानमिति फलितम् । तात-पर्य्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा । यथा, नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नव-संख्यापरत्वकल्पनयाऽसिद्ध्यभिधानम् । प्रमेयं धर्म्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्ध्य-भिधानम् । वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् । तत्त्रिविधम् । वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ॥” “छल नाम परिशठमर्थाभासमनर्थकं वाग्वस्तुमात्रमेव । तद्द्विविध वाक्छल सामान्यच्छलञ्च । तत्र वाक्-छल नाम यथा कश्चिद्ब्रूयात् नवतन्त्रोऽयं भिषगिति भिषग् ब्रूयात नाह नवतन्त्र एकतन्त्रो ऽहमिति । परो ब्रूयात् नाहं ब्रवीमि नव तन्त्राणि तवेति अपितु नवाभ्यस्तं ते तन्त्रमिति भिषग् ब्रूयात् न मया नवाभ्यस्त तन्त्र अनेक शताभ्यस्त मया तन्त्रमिति । एतद्वाक्छलम् । सामान्यच्छल नाम यथा, व्याधिप्रशमनायौषध मित्युक्ते परो ब्रूयात् सत् सत्प्रशमनायेति भवा-नाह सतरोग सदौषध यदि च सत्प्रशमनाय भवति सत्कास सत्क्षय सत्सामान्यात् कासस्ते क्षयप्रशमनाय भविष्यतीति एतत्सामान्य च्छलम् ॥” इति चरके विमानस्थाने वष्ठे ऽध्याये ॥)
छल्लि', स्त्री, (छदं छादनता लातीति । ला वाहुलकात् कि ।) त्वक् । इति शब्दरत्नावली । छाल इति भाषा ॥
छल्ली, स्त्री, (छद छादनतां लातीति । ला+कि' । तत कृदिकारादिति वा ङीष् ।) वीरुत् । सन्तान' । वल्कलम् । कुसुमविशेषः । इति मेदिनी । ले, १८ ॥
छवि', स्त्री, (छ्यति खण्डं करोति तमः छ्यति छिनत्ति दूरीकरोति मालिन्यादिकमेतदि-मिति । छो+“कृवृजृसिद्रुपन्यनिस्वपिभ्यो वित्”।

उणा । ४ । ५६ । इति क्विन् प्रत्ययेन निपातनात् साधु. ।) शोभा । दीप्तिः । इत्यमरः । १।३।१७॥ (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः॥")
छुष, ष वधे । इति कविकल्पद्रुमः । (भ्वां-उभं-सकं-सेट् ।) ष, छुषति छुषते । अयं केश्चिन्न मन्यते । इति दुर्गादासः ।
छा, स्त्री, (छद्+डः टाप् च ।) आच्छादनम् । इति मेदिनी । छे, १ ॥
छा ,पु,(छाद्यते मातृपक्षाभ्यामसौ । छद्+"सर्व्वधातुभ्योऽसुन् ।"उणा ।४।१८८। इति असुन् ततः पृषोदरात् साधुः ।) शावकः । इत्येकाक्षरकोषः ॥
छागः, पुं,स्त्री, (छायते छिद्यते देववलये इति । छो+"छापूखड्भ्यः कित् ।" उणा । १।१२४। इति गन् ।) पशुविशेषः । तत्पर्य्यायः । वस्तः २ छगलकः ३ अजः ४ स्तुभः ५ । इत्यमरः । २ । ९ । ७६ ॥ छगः ६ छगलः ७ छागलः ८ तभः ९ स्तभः १० शुभः ११ । इति तट्टीका ॥ लघुकामः १२ क्रयसदः १३ वर्करः १४ पर्णभोजनः १५ लम्बकर्णः १६ मेनादः १७ बुक्कः १८ अल्पायुः १९ शिवाप्रियः २० । इति शब्दरत्नावली ॥ अजकः २१ मेध्यः २२ पशुः २३ पयस्वलः २४ । तन्मांसगुणाः । लघुत्वम् । स्निग्धत्वम् । नातिशीतत्वम् । रुचिवलपुष्टिदात्वम् । निर्द्दोषत्वम् । वातपित्तनाशित्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः ॥ शुक्रधातुसाम्यकारित्वम् । वृंहणत्वम् । स्निग्धत्वम् । मृदुत्वम् । अनभिष्यन्दित्वम् । नातुष्णत्वञ्च । इति राजवल्लभः ॥ * ॥ छागपोतमांसगुणाः । लघुत्वम् । शीतत्वम् । प्रमेहनाशित्वञ्च ॥ छग्यचारिच्छागस्य मांसगुणाः । ईषद्गुरुत्वम् । वलदात्वञ्च ॥ तन्मूत्रगुणाः । कटुत्वम् । उष्णत्वम् । रूक्षत्वम् । नाडीविषार्शःश्लीपदोदरकफश्वासगुल्मशोफनाशित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥
"छागलो वर्करश्छागो वस्तोऽजश्छेलकः शुभः ।
छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषनुत् ॥
नातिशीतमदाहि स्यात् स्वादु पीनसनाशनम् ।
परं वलकरं रुच्यं वृंहणं वलवर्द्धनम् ॥
अजाया अप्रसूतायाः मांसं पीनसनाशनम् ।
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ॥
अजापुत्रस्य वालस्य मांसं लघुतरं स्मृतम् ।
हृद्यं ज्वरहरं श्रेष्ठं सुस्वादु वलदं भृशम् ॥
मांसं निष्कासिताण्डस्य छागस्य कफकृद्गुरु ।
स्रोतःशुद्धिकरं वल्यं मांसदं वातपित्तनुत् ॥
वृद्धस्य वातलं रूक्षं तथा व्याधिमृतस्य च ।
उर्द्ध्वजत्रुविकारघ्नं छागमुण्डं रुचिप्रदम् ॥"
इति भावप्रकाशः ॥
(एतन्मांसं पितॄणां तृप्तिकरत्वात् श्राद्धाय देयम् । यथाह याज्ञवल्क्यः । १ । २५८ ।
"मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥"
छागमांसेन पितॄणां षण्मासान् यावत्तृप्तिः ।
यथाह मनुः । ३ । २६९ ।
"षण्मासान् छागमांसेन पार्षतेन च सप्त वै ॥"
भोजराजेन युक्तिकल्पतरौ एतत्परीक्षोक्ता ।
यथा,—
"नक्षत्राणां विभेदेन नराणान्तु गणत्रयम् ।
तेषां शुभाय निर्दिष्टं पशुवस्त्रचयं वली ।
ये कृष्णाः शुभदश्छागाः पशवोऽन्ये तथैव च ।
देवनातिभिरुत्तस्त्वन्यास्ते सर्व्वार्थसिद्धये ॥
ये पीता हरिता वापि नरजातिरुदीरिताः ।
ये शुक्लाश्च महान्तो वा रक्षोजातेः शुभप्रदाः ॥
यो मोहादथवाज्ञानादूवलिमन्यं प्रयच्छति ।
वध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत् ॥"
एतस्य पशोर्लक्षणादिकं विशेषतो वृहत्संहितायाम् ६५ अध्याये उक्तम् । यथा,—
"छागशुभाशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ते ।
धन्याः स्थाप्या वेश्मनि सन्त्याज्याः सप्तदन्ता ये ॥
दक्षिणपार्श्वे मण्डलमसितं शुक्लस्य शुभफलं भवति ।
ऋष्यनिभकृष्णलोहितवर्णानां श्वेतमपि शुभदम् ॥
स्तनवदवलम्बते यः कण्ठेऽजानां मणिः स विज्ञेयः ।
एकमणिः शुभफलकृत्
धन्यतमा द्वित्रिमणयो ये ॥
मुण्डाः सर्व्वे शुभदाः
सर्व्वसिताः सर्व्वकृष्णदेहाश्च ।
अर्द्धासिताः सितार्द्धा
धन्याः कपिलार्द्धकृष्णाश्च ॥
विचरति यूथस्याग्रे
प्रथमं चाम्भोऽवगाहते योऽजः ।
स शुभः सितमूर्द्धा वा
मूर्द्धनि वा टिक्किका यस्य ॥
सपृषतकण्ठशिरा वा
तिलपिष्टनिभश्च ताम्रदृक् शस्तः ।
कृष्णचरणः सितो वा
कृष्णो वा श्वेतचरणो यः ॥
यः कृष्णाण्डः श्वेतो
मध्ये कृष्णेन भवति पट्टेन ।
यो वा चरति सशब्दं
मन्दञ्च स शोभनश्छागः ॥
ऋष्यशिरोरुहपादो
यो वा प्राक् पाण्डुरोऽपरे नीलः ।
स भवति शुभकृच्छागः
श्लोकश्चाप्यत्र गर्गोक्तः ॥
कुट्टकः कुटिलश्चैव जटिलो वामनस्तथा ।
ते चत्वारः श्रियः पुत्त्रा नालक्ष्मीके वसन्ति ते ॥
अथाप्रशस्ता खरतुल्यनादाः
प्रदीप्तपुच्छाः कुनखा विवर्णाः ।
निकृत्तकर्णा द्विपमस्तकाश्च
भवन्ति ये चासिततालुजिह्वाः ॥
वर्णैः प्रशस्तैर्मणिभिश्च युक्ता
मुण्डाश्च ये ताम्रविलोचनाश्च ।
ते पूजिता वेश्मसु मानवानां
सौख्यानि कुर्व्वन्ति यशः श्रियञ्च ॥")
छागणः, पुं, (छगण एव । स्वार्थे अण् ।) करीषाग्निः । इति त्रिकाण्डशेषः ॥ घुँटेर आगुन इति भाषा ॥
छागभोजी, [न्] पु, स्त्री, (छागं सुष्ठु भक्षयतीति । भुज्+णिनिः ।) वृकः । इति राजनिर्घण्टः ॥ छागभक्षके, त्रि ॥
छागरथः, पु, (छागः रथो वाहनमस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६३ ॥
छागलः, पु, स्त्री, (छगल एव इति प्रज्ञाद्यण् ।) छागः । इति राजनिर्घण्टः ॥ (यथा, पञ्चतन्त्रे । ३ । ११७ ।
"वहुबुद्धिसमायुक्ताः सुविज्ञाना वलोत्कटात् ।
शक्ता वञ्चयितुं धूर्त्ता ब्राह्मणं छागलादिव ॥"
छगलस्य गोत्रापत्यं पुमान् इति । छगल+"विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ।"
४ । २ । ११७ । इति अण् । आत्रेय ऋषिभेदः । इति सिद्धान्तकौमुदी ॥)
छागलकः, पुं, (छागल इव कायतीति । कै+कः ।) मत्स्यविशेषः । यथा,—
"श्वेतं सुपाकं समदीर्घपुच्छं
निःशल्कलं छागलकं वदन्ति ।
गवे हिकण्टः किल तस्य पृष्ठे
कण्टः सुपथ्यो रुचिदो वलप्रदः ॥"
इति राजनिर्घण्टः ॥
(स्वार्थे कन् ।) छागलश्च ॥
छागलाद्यं, क्ली, (छागलं आद्यं प्रधानो यत्र ।) छागलादिघृतम् । तच्च वातरोगस्यौषधम् । यथा
"आजं चर्म्मविनिर्म्मुक्तं त्यक्तशृङ्गखुरादिकम् ।
पञ्चमूलीद्वयञ्चैव जलद्रोणे विपाचयेत् ॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ।
जीवनीयैः सयष्ट्याह्वैः क्षीरश्चैव शतावरी ॥
छागलाद्यमिदं नाम्ना सर्व्ववातविकारनुत् ।
वधिरे कर्णशूले च वाधिर्य्ये मूकमिन्मिने ॥
जड़गद्गदपङ्गूनां खञ्जे गृध्रसिकुब्जयोः ।
अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते ॥
पृथगर्द्धतुलां पञ्चमूलद्वन्द्वाजमांसयोः ।
निःक्वाथ्य सलिलद्रोणे क्वाथे पादावशेषिते ॥"
इति स्वल्पच्छागलाद्यं घृतम् ॥ * ॥
घृतारम्भे मन्त्रः ।
"ओँ कालि वचेश्वरि अमुकस्य फलमिह देहि हृदयवचनेन स्वाहा ।
स्नापयित्वा छागमादौ मधु दत्त्वा ललाटके ।
उदङ्मुखः प्राङ्मुखो वा भिषगेनमुपालभेत् ॥
छागमारणमन्त्रः ।
ओँ हौँ ओँ गौँ गणपतये स्वाहा ।
छागमांसतुलां ग्राह्य दशमूल्याः पलं शतम् ।
अश्वगन्धापलशतं वाट्यालकशतं तथा ॥
घृताढकं पचेत्तोयैश्चतुर्भागावशेषितैः ।

क्षीरं स्नेहसमं दद्यात् शतावर्य्या रसं तथा ॥
ताम्रपात्रे दृढे चैव शनैर्मृद्वग्निना पचेत् ।
अस्यौषधस्य कल्कस्य प्रत्येकं शुक्तिसम्मितम् ॥
जीवन्ती मधुकं द्राक्षाकाकोल्यौ नीलमुत्पलम् ।
मुस्तं सचन्दनं रास्ना मणिनीद्वयशारिवे ॥
मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शटी ।
दार्व्वी प्रियङ्गु त्रिफला नतं तालीशनागकौ ॥
एलापत्रं वरीनागजातीकुसुमधान्यकम् ।
मञ्जिष्ठा दाडिमं दारु रेणुकं शैलवालुकम् ॥
विडङ्गं जीरकञ्चैव पेषयित्वा विनिक्षिपेत् ।
वस्त्रपूते च शीते च शर्कराप्रस्थसंयुतम् ॥
निधापयेत् स्निग्धभाण्डे आर्द्रे वा भाजने शुभे ।
अस्यौषधस्य सिद्धस्य दृष्ट्वा वीर्य्यमतःपरम् ॥
देवदेवं नमस्कृत्य संपूज्य गणनायकम् ।
पिबेत् पाणितलं तस्य व्याधिं वीक्ष्यानुमानतः ॥
सर्व्ववातविकारेषु अपस्मारे विशेषतः ।
उन्मादे पक्षघाते च आध्माने कोष्ठनिग्रहे ॥
कर्णरोगे शिरोरोगे वाधिर्य्ये चापतन्त्रके ।
भूतोन्मादे च गृध्रस्यां सोन्मादे चाक्षिपातके ॥
पार्श्वशूले च हृच्छूले वाह्यायामार्द्दिते तथा ।
वातकण्टकहृद्रोगमूत्रकृच्छ्रे सपङ्गुके ॥
क्रोष्टुशीर्षे तथा खञ्जे कुब्जे चाध्मानि मिन्मिने ।
अपतानेऽन्तरायामे रक्तपित्ते तथोर्द्धगे ॥
आनाहेऽर्शोविकारेषु चातुर्थकज्वरेऽपि च ।
हनुग्रहे तथा शोषे क्षीणे चैवाववाहुके ॥
दण्डापतानके भग्ने दाहे चाक्षेपके तथा ।
जीर्णज्वरे विषे कुष्ठे शेफःस्तम्भे मदात्यये ॥
आद्यवातेऽग्निमान्द्ये च वातरक्तगदेषु च ।
एकाङ्गरोगिणि चैव तथा सर्व्वाङ्गरोगिणि ॥
हस्तकम्पे शिरःकम्पे जिह्वाकम्पे जडे भ्रमे ।
क्षीणेन्द्रिये नष्टशुक्रे शुक्रनिःसरणे तथा ॥
क्षीणा वातासृपाते च पटवे चाक्षिसन्दने ।
एकाङ्गस्यन्दने चैव सर्व्वाङ्गस्यन्दने तथा ॥
नगादिपतिते वाते क्षीणामप्राप्तिचेतुके ।
आभिचारिकदोषे च घनसन्तापसम्भवे ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
शिरोमध्यगता ये च जङ्घापार्श्वादिसंस्थिता. ॥
मातृग्रहाभिभूतस्य शिशुर्यस्य विशुष्यति ।
प्रक्षीणबलमांसस्य न वृत्तिगमनक्षमः ॥
घृतेनानेन सिध्यन्ति वज्रमुक्तिरिवासुरान् ।
निहन्ति सकलान् रोगान् घृतं परमदुर्लभम् ॥
रसायनं वह्निबलप्रदञ्च
वपुःप्रकर्षं विदधाति रूपम् ।
दन्तावलेन्द्रेण समानतेजा
दीर्घायुषं पुत्रशतं करोति ॥
क्षीणां शतं गच्छति वातिरेकं
न याति तृप्तिं सरसः समाङ्गः ।
अपुत्रिणीपुत्रशतं करोति
शतायुषं कामसमं बलिष्ठम् ॥
महद्घृतं नाम तु छागलाद्यं
विनिर्म्मितं वातनिसूदनञ्च ।
शिवं शुभं रोगभयापहञ्च
चकार हारीतमुनिर्व्विशिष्टः ॥
छागालवर्ज्जिताः पाके पुमांसं तत्र दापयेत् ।
मयूरी जम्बुकी छागी वीर्य्यहीनाः स्वभावतः ॥
भाषितं काशिराजेन छागमेव नपुंसकम् ॥”
घृतम् १६ शेर । क्वाथार्थं छागमांसपलम् १०० ।
पाकार्थं जलं शं ६४ । शेषः शं १६ । विल्वादि-
दशमूलं प्रपलम् १० । जलं शं ६४ । शेषः
शं १६ । अश्वगन्धा १०० पलम् । जलं शं ६४ ।
शेषः शं १६ । वाट्यालक १०० पलम् ।
जलं शं ६४ । शेषः शं १६ । दुग्धं श १६ ।
शतमूलीरसः शं १६ । कल्कार्थं जीवन्त्या-
दीनां जीरकपर्य्यन्तानां कल्कद्रव्याणां प्रं तो ४ ।
वस्त्रपूते शीते शर्करा शं २ । इति बृहच्छागलाद्यं
घृतम् । इति भैषज्यरत्नावली ॥
(“छागमांसं तुलार्द्धं स्यात् दशमूलं तथापरम् ।
तोयद्रोणे पचेद्धीमान् यावत् स्यादंशशेषितम् ॥
तैलप्रस्थद्वयञ्चैव क्षीरञ्चैव शतावरी ।
जीवनीयं समधुकं बला रास्ना च शैलजम् ॥
मांसीस्थाद्वैमतालीशनालुकाघनवालुकम् ।
पृथक् पृथक् समादाय सर्व्वमेकत्र साधयेत् ॥
मञ्जिष्ठालोध्रलाक्षा च प्रत्येकं कुडवान्वितम् ।
आढकञ्च जलञ्चैव विधिना च विपाचयेत् ॥
छागलाद्यमिदं तैलं हारीतेन महात्मना ।
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते ।
सर्व्वज्वरगदं हन्ति सन्निमज्जास्थिजन्तथा ॥”
इति छागलाद्यं तैलम् ॥
इति वैद्यकसेन्द्रसारसंग्रहे वातरोगाधिकारे ॥)

छागलान्त्रिका, स्त्री, (छागलान्त्री + संज्ञाया कन् । टापि पूर्व्वह्रस्वः ।) वृद्धदारकवृक्षः । इति राजनिर्घण्टः ॥

छागलान्त्री, स्त्री, (छागलं अन्त्रयतीति वाहुलकात् रक् ततो ङीष् ।) वृकः । इति राजनिर्घण्टः ॥

छागवाहन., पु, (छागेन आत्मानं वाहयतीति । वह + णिच् + ल्युः । यद्वा, छागो वाहनमस्य ।) अग्निः । इति त्रिकाण्डशेषः ॥

छागिका, स्त्री, (छागी + स्वार्थे कन् । ततः टापि पूर्व्वह्रस्वः ।) छागी । इति हेमचन्द्रः ।४।३४१ ॥

छागी, स्त्री, (छायते छिद्यते देवोपहारायेति । छो + “छापूखडिभ्यः कित् ।” उणां ।१।१२४। इति गण् छागः तत. स्त्रियां जातौ ङीष् ।) छागमाता । वकरी इति मेंढी इति च भाषा । तत्पर्य्यायः । अजा २ पयस्विनी ३ भीरुः ४ मेध्या ५ गलेस्तनी ६ । इति राजनिर्घण्टः ॥ छागिका ७ मक्षा ८ सर्व्वभक्ष्या ९ गलस्तनी १० । इति हेमचन्द्रः ॥ सुसुम्या ११ । इति त्रिकाण्डशेषः ॥ सज्जा १२ सुखविलुण्ठिका १३ । इति शब्दरत्नावली ॥ तद्दुग्धगुणाः । मधुरत्वम् । शीतलत्वम् । ग्राहित्वम् । दीपनत्वम् । रक्तपित्तविकारक्षयकासनाशित्वञ्च । यथा, राजनिर्घण्टे ।
“अजानां लघुकायत्वाम्नानाद्रव्यनिषेवणात् ।
नात्यम्बुपानात् व्यायामात् सर्व्वव्याधिहरं पयः ॥”
कषायत्वम् । लघुत्वम् । अतीसारज्वरनाशित्वञ्च । यथा, भावप्रकाशे ।
“छागं कषायं मधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥
अजानामल्पकायत्वात् कटुतिक्तादिभक्षणात् ।
स्तोकाम्बुपानाद्व्यायामात् सर्व्वरोगापहं पयः ॥”
तद्दधिगुणाः । उत्तमत्वम् । ग्राहित्वम् । लघुत्वम् । दोषत्रयापहत्वम् । श्वासकासार्शःक्षयकार्श्येषु शस्तत्वम् । दीपनत्वञ्च । इति भावप्रकाशः ॥ कफवातनेत्रदोषदुर्नामश्वासकासनाशित्वम् । उष्णत्वम् । रुच्यत्वम् । पाचनत्वञ्च ॥ तन्नवनीतगुणाः । लघुत्वम् । मधुरत्वम् । कषायत्वम् । त्रिदोषनाशित्वम् । चक्षुष्यत्वम् । दीपनत्वम् । बल्यत्वम् । सदा हितत्वञ्च ॥ तन्नवोत्थनवनीतगुणाः । क्षयकासनेत्रामयकफनाशित्वम् । बल्यत्वम् । परमदीपनत्वञ्च ॥ तद्घृतगुणाः । चक्षुष्यत्वम् । दीपनत्वम् । बलवर्द्धनत्वम् । कासश्वासकफनाशित्वम् । राजयक्ष्मणि शस्तत्वञ्च । इति राजनिर्घण्टः ॥

छातः, त्रि, (छो + क्तः । “शाच्छोरन्यतरस्याम् ।” ७ । ४ । ४१ । इति विभाषायामित्वाभावः ।) छिन्नः । दुर्व्बलः । इत्यमरः । ३ । १ । १०३ ॥

छात्रं, क्ली, वरटीपुष्पसम्भव मधु । तस्य गुणाः । श्वित्रक्रिमिरोगरक्तपित्तनाशित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥
(“वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥”
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत् तर्पणञ्च गुणाधिकम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

छा(त्र)त्रः, पु, (छत्रं गुरोर्दोषाणामावरणं तच्छीलमस्येति । “छत्रादिभ्यो णः ।” ४ । ४ । ६२ । इति णः ।) शिष्यः । इत्यमरः । २ । ७ । ११ ॥ (यथा, राजतरङ्गिण्याम् । ६ । ८७ ।
“भूभुजा दानशौण्डेन मैत्रिके स्वर्गिस्थे कृतः ।
छात्राणामार्य्यदेश्यानां तेन विद्यार्थिनां मठः ॥”)

छात्रकं, क्ली, (छात्र + स्वार्थे कन् ।) छात्र मधु । यथा, राजनिर्घण्टे ।
“छत्राकारन्तु पटलं सरघाः पीतपिङ्गलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधु च्छात्रकमीरितम् ।
श्वित्रमेहकृमिघ्नञ्च विद्याच्छात्रं गुणोत्तरम् ॥”
अपिच भावप्रकाशे ।
“वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं कृमिश्वित्ररक्तपित्तप्रमेहजित् ॥
भ्रमतृड्मोहविषहृत्तर्पणञ्च गुणाधिकम् ॥”

छात्रगण्डः, पु, (छात्रो गण्ड इव ।) मदाद्यवित् । विभक्त्यन्तस्य श्लोकचरणस्य वा आदिमात्रवेत्ता ।

(अत्यन्तच्छात्रः ।) इति हारावली ।
२१६ ॥

छात्रदर्शनं, क्ली, (छात्रं वरटीच्छत्रसम्भूतं मधु नादिव दृश्यते इति । दृश + कर्म्मणि ल्युट् ।) हैयङ्गवीनम् । इति शब्दचन्द्रिका ॥ (छात्राणां दर्शनम् ।) शिष्यावलोकनञ्च ॥

छाद क्ली, (छाद्यते गृहमनेनेति । छद + णिच + करणे घञ् । छादयतीति । छद + णिच् + अच् वा ।) पटलम् । इति जटाधरः ॥ छात इति चाल इति च भाषा ॥

छादन, क्ली, (छद कि सहृतौ + णिच् + करणे ल्युट ।) छदनम् । अन्तर्द्धानम् । (कर्त्तरि ल्यु ।) पत्रम् । इत्यमरटीकायां भरत ॥ (भावे ल्युट् ।) आच्छादनम् । (यथा, हरिवंशे । ६५ । २५ ।
"नियोगपाशैरासक्तैर्गर्गरीस्तम्भसङ्कुलैः ।
छादनैश्च प्रकीर्णैश्च कण्टकैस्तृणसङ्कटैः ॥")

छादनः पु, (छादयति आवृणोति पत्रादिभिरिति । छादि + ल्यु ।) नीलाम्लानवृक्षः । इति राजनिर्घण्टः ॥

छादितः, त्रि, (छाद्यते स्मेति । छद + "वा दान्त-शान्तेति ।" ७।२।२७ । इडागमात् साधुः ।) छन्न । इति जटाधर ॥ आच्छादितः । यथा
"घनतरघनवृन्दैश्छादितौ पुष्पवन्तौ ॥"
इत्युद्भट ॥

छान्दसः पु, (छन्दो वेद अधीते वेत्ति वा । छन्दस् + "तदधीते तद्वेद ।" ४ । २ । ५९ । इत्यण् ।) वेदाध्येता । इत्यमरः । २।७।६ ॥ (छन्द एवेति । स्वार्थे अण् । वेदः ।
"मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् ॥"
इति भागवते । १ । ४ । १३ ॥
त्रि, छन्दसो व्याख्यानस्तत्र भव. । "छन्दसो यदणौ ।" ४ । ३ । ७१ । इत्यण् । वेदभव ॥ छन्दसोऽयम् । "तस्येदम् ।" इत्यण् । वेदसम्बन्धी । स्त्रियान्तु ङीप् । यथा हरिवंशे । २१५ । ७ ।
"छान्दसीभिरुदाराभिः श्रुतिभिः समलङ्कृतः ॥")

छान्दोग्य, क्ली, (छन्दोगानां धर्म्मः आम्नायो वा । छन्दोग + "छन्दोगौक्थिकयाज्ञिकबह्वृच नटाञ्ञ्यः ।" ४ । ३ । १२९ । इति ञ्यः ।) सामवेदोपनिषत् । इति वैदिकसम्प्रदाय ॥ (यथा, मौक्तिकोपनिषदि १ अध्याये ।
"ऐतरेयञ्च छान्दोग्यं बृहदारण्यकन्तथा ॥")

छाया स्त्री, (छ्यति छिनत्ति सूर्य्यादेः प्रकाश नाशयतीत्यर्थः । छो + "माच्छाससिसूभ्यो य ।" उणा । ४ । १०९ । इति यस्ततष्टाप् च ।) रौद्रशून्यम् । तत्पर्य्यायः । भाषानुगा २ श्यामा ३ अतेजः ४ भीरुः ५ अनातपः ६ आभीति: ७ आतपाभाव ८ भावालीना ९ । अस्या गुणा. । मधुरत्वम् । शीतलत्वम् । दाहश्रमहरत्वञ्च । इति राजनिर्घण्ट. ॥ घर्म्मनाशित्वम् । मेघच्छायागुणः । भ्रमश्रममूर्च्छासन्तापनाशित्वम् । इति राजवल्लभः ॥ * ॥
छायाविशेषे दोषो यथा,—
"दीपवृक्षातनुच्छाया छिन्नकेशनखादिकम् ।
अजमार्ज्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ॥"
इति कर्म्मलोचनम् ॥ * ॥
(लक्षणभेदेनास्या अरिष्टकारित्व यथा,—
"ज्योत्स्नायामातपे दीपे सलिलादर्शयोरपि ।
अङ्गेषु विकृता यस्य छायाप्रेतस्तथैव सः ॥
छिन्ना भिन्नाकुला च्छाया हीना वाप्यधिकापि वा ।
नष्टा तन्वी द्विधा च्छाया विशिरा विस्तृता च या ॥
एताश्चान्याश्च याः काश्चित् प्रतिच्छाया विगर्हिताः ।
सर्व्वा मुमूर्षतां ज्ञेया नचेल्लक्ष्यनिमित्तजा ॥
संस्थानेन प्रमाणेन वर्णेन प्रभया तथा ।
छाया विवर्त्तते यस्य स्वप्नेऽपि प्रेत एव सः ॥"
"खादीनां पञ्चपञ्चानां छाया विविधलक्षणाः ।
नाभसी निर्म्मला नीला सस्नेहा सप्रभेव च ॥
रूक्षा श्यावारुणा या तु वायवी सा हतप्रभा ।
विशुद्धरक्तात्वाग्नेयी दीप्ताभा दर्शनप्रिया ॥
शुद्धवैदुर्य्यविमला सुस्निग्धा चाम्भसी मता ।
स्थिरा स्निग्धा घना श्लक्ष्णा श्यामा श्वेता च पार्थिवी ॥
वायवी गर्हिता त्वासां चतस्रः स्युः सुखोदयाः ।
वायवी तु विनाशाय क्लेशाय महतेऽपि वा ॥
स्यात्तैजसी प्रभा सर्व्वा सा तु सप्तविधा स्मृता ।
रक्ता पीता सिता श्यावा हरिता पाण्डुरा सिता ॥
तासां याः स्युर्विकासिन्यः स्निग्धाश्च विपुलाश्च याः ।
ता शुभा रूक्षमलिनाः संक्षिप्ताश्चाशुभोदयाः ॥
वर्णमाक्रामति च्छाया भास्तु वर्णप्रकाशिनी ।
आसन्ना लक्ष्यते च्छाया भाः प्रकृष्टा प्रकाशते ॥
नाच्छायो नाप्रभः कश्चिद्विशेषाश्चिह्नयन्ति तु ।
नृणां शुभाशुभोत्पत्ति काले च्छाया प्रभाश्रिता ॥"
इतीन्द्रियस्थाने सप्तमेऽध्याये चरकेणोक्तम् ॥)
प्रतिबिम्बम् । (यथा, याज्ञवल्क्ये । ३ । २०९ ।
"मयि तेज इति च्छायां स्वां दृष्ट्वाम्बुगतां जपेत् ॥")
सूर्य्यपत्नी । सा सञ्ज्ञाप्रतिकृतिः । (यथा मत्स्यपुराणे । ११ । ५ ।
"नारीमुत्पादयामास स्वशरीरादनिन्दिताम् ।
त्वाष्ट्रीस्वरूपेण नाम्ना छायेति भामिनी तदा ॥")
पालनम् । उत्कोचः । कान्तिः । (यथा, मेघदूते । ३१ ।
"वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः
पाण्डुच्छायातटरुहतरुभ्रंशिभिः शीर्णपर्णैः ॥")
सच्छोभा । पङ्क्तिः । इति मेदिनी । ये, २३ ॥
कात्यायनी । इति शब्दरत्नावली ॥ तमः । इति हेमचन्द्रः ॥ सादृश्यम् । यथा,—
"अङ्कादङ्केऽथ च जम्बा व्याधाय शिशुमङ्गनि ।
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावह सुतम् ॥
पुत्रच्छाया पुत्रसादृश्यम् ।" इति रसकचन्द्रिका ॥
(ऊनविंशत्यक्षरवृत्तिविशेष । इति छन्दोमञ्जरी ॥ अस्य लक्षणादिक छन्दःशब्दे द्रष्टव्यम् ॥)

छायाकरः, त्रि, (करोतीति । कृ + अच् । छायाया कर । छायां करोतीति वा ।) छत्रधारः । इति हेमचन्द्र. ॥ छातावरदार इति भाषा ॥

छायातनयः, पु (छायाया. सूर्य्यपत्न्यास्तनयः पुत्रः ।) शनि. । इति हलायुधः ॥

छायातरुः, पुं, (छायाप्रदः छायाप्रधानो वा तरु । शाकपार्थिववत् मध्यपदलोपिसमासः ।) स्थिरच्छायवृक्ष. । इति त्रिकाण्डशेषः ॥ (अस्य लक्षण यदाह कश्चित् ।
"पूर्व्वाह्णे च पराह्णे च तलं यस्य न मुञ्चति ।
अत्यन्तशीतलच्छाया स च्छायातरुरुच्यते ॥"
यथा मेघदूते । १ ।
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥")

छायात्मजः, पु, (छायायाः सूर्य्यपत्न्या आत्मजस्तनय ।) शनिग्रह. । इति त्रिकाण्डशेष. ॥


छायापथः, पु, (छाया मेघच्छाया तदभ्यन्तर पन्थाः । छायायुक्तः पन्था इत्येके ।) देवपथ । आकाशः । इति त्रिकाण्डशेषः ॥

छायापुरुष पु, (छायायां दृष्टः पुरुषः पुरुषाकृतिविशेष ।) आकाशे दृष्ट स्वीयच्छायारूप पुरुषः । यथा,—
श्रीदेव्युवाच ।
"भगवन् ! देवदेवेश ! सर्व्वागमविशारद ! ।
नराणां पापिनां लोके पापनिर्म्मोचन कथम् ॥
कालज्ञानं कथं वा स्यात् सूक्ष्मोपायेन तद्वद ।
श्रुतानि साधनानीश ! मयानेकानि भूरिशः ॥
तथापि तानि मनुजैरशक्यान्यल्पबुद्धिभिः ।
प्रायेण मनुजा लोके कलौ स्वल्पायुषो ध्रुवम् ॥
अनेकवर्षसाध्येऽस्मिन् योगाभ्यासे ह्यशक्तयः ॥
शिव उवाच ।
साधु देवि ! त्वया पृष्टं लोकानां हितकाम्यया ।
तादृश साधन वक्ष्ये सर्व्वसाधारण लघु ॥
गोपनीय प्रयत्नेन न वाच्यं वै कथञ्चन ।
सिद्धाय भक्तियुक्ताय सेवकाय सुचेतसे ॥
पापिने क्रूरचेष्टाय भक्तिहीनाय भामिनि ! ।
न वदेद्यदि वा मोहात् वदेत् सिद्धि न विन्दति ॥
तस्मात् परीक्ष्य वक्तव्य शिष्याय ज्ञानिने शिवे ! ।
स्वच्छायापुरुष पश्येद्गगने शुद्धमानस. ॥
तस्यावलोकनात् सद्यः पापराशिर्विनश्यति ।
महापातकसङ्घश्च तत्समश्चोपपातकः ॥
विशुध्यते क्षणार्द्धेन तूलराशिर्यथानलात् ।
कालज्ञानञ्च षण्मासे तस्मिन् दृष्टे भवेद्ध्रुवम् ॥
देव्युवाच ।
अतश्छायां कथं पश्येद्गगने भूतलस्थिताम् ।
षण्मासकालज्ञानञ्च तस्मिन् दृष्टे कथं भवेत् ॥
शिव उवाच ।
निरभ्र गगनं देवि ! यदा भवति निर्म्मलम् ।
तदा छायास्थो भूत्वा निश्चल प्रयतो भिया ॥

स्वच्छायाकण्ठमालोक्य स्वगुरूक्तक्रमेण वै ।
सम्मुखं गगनं पश्येन्निर्निमेषस्थैकधीः ॥
शुद्धस्फटिकसङ्काशः पुरुषस्तत्र दृश्यते ।
न दृश्यते यदा तत्र पुनस्तद्वत् परीक्षयेत् ॥
बहुधा दर्शनेनैव साक्षात्कारो भवेद् ध्रुवम् ।
कस्यचिद् भाग्यतः पश्येद् यदि बिम्बोऽपि गोचर ।
भवत्येव न सन्देहो गुरुविश्वासतः शिवे ! ।
गुरुं सम्यक् पूजयित्वा पश्येच्छायां समाहितः ॥
तथा षण्मासपर्य्यन्तं मृत्युस्तस्य न विद्यते ।
शिरोहीनं यदा पश्येत् षण्मासाभ्यन्तरे मृतिः ॥
यदा पादौ न दृश्येते भार्य्याहानिर्न संशयः ।
न दृश्येते यदा पाणी भ्रातुर्हानिर्न संशयः ॥
एतज्ज्ञात्वा सुधीः सम्यक् गङ्गातीरं समाश्रयेत् ।
योगाभ्यासेन सततं प्राणायामेण संस्तुतिः ॥
यथा वा सत्समीपस्थो लक्ष मृत्युञ्जयं जपेत् ।
यो न सक्तो हविष्याशी यतवाग् यतमानसः ॥
मृत्युञ्जयेन सन्देहो ह्यन्यथा मृत्युमृच्छति ।
यदा तु मलिनं पश्येत् ज्वरपीडा भवेत्तदा ॥
तस्य शान्तिं प्रकुर्व्वीत शिवसेवां समाहितः ।
रक्तवर्णं यदा पश्येदैश्वर्य्यं भवति ध्रुवम् ॥
मध्यच्छिद्रं यदा पश्येत् शत्रुघातो भवेत्तदा ।
एवं सन्दर्शनाद् देवि ! ज्ञानवान् भवति ध्रुवम् ॥
नारदाय पुरा प्रोक्तं मया पुरुषदर्शनम् ।
तत्प्रसादान्महायोगी भूत्वा लोकांश्चरत्यसौ ॥
स्वच्छायादर्शनं देवि ! कलौ पुरुषलक्षणम् ।
दीर्घायुः समवाप्नोति ज्ञानञ्चापि सुनिर्म्मलम् ॥"
इति योगप्रदीपिकायां उमामाहेश्वरसंवादे छायापुरुषलक्षणं नाम पञ्चमः पटलः ॥ * ॥

"ओम् अस्य श्रीच्छायापुरुषग्रहणमन्त्रस्य ब्रह्मर्षिर्दैत्यगायत्री छन्दः छायादेवी देवता ह्रीं बीजं स्वाहा शक्तिः पुरुष इति कीलकं सर्व्वसिद्धिसन्दर्शनसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादि षडङ्गन्यासः ॥ मायया मायया ओँ ओँ ह्रौँ माया शिवविचार्य्या त्र्यक्षयः ओँ ह्रौँ च गां सरस्वति ओँ नमो भगवते भूतशरीरमात्मानमाकाशे दर्शय दर्शय त्रां त्रां त्रँ ह्रौँ भैरवाय नमः स्वाहा । इति मन्त्रः ॥
मातृभावे च पुत्त्रं वा बान्धवे च बान्धवम् ।
आत्मानं शिरसोऽभावे सर्व्वाभावे कुलक्षयम् ॥
विशीर्णे विद्यते घृते कुम्भे धूमे च विज्वरम् ।
दुर्भिक्षं जायते घोरं कज्ज्वले च परात् सुखे ॥
संपूर्णे च सुखे स्वच्छे क्षेमलाभं सुसिद्धये ।
हीने रक्ते जये प्रीते उग्रो मृत्युर्न संशयः ॥
पतिभीतिं शस्त्रघातमिति वेदविदो विदुः ।
मृत्युञ्जयं जपन्नेव शान्तिस्तस्य विधीयते ॥
षण्मासे मरणं तस्य शौर्य्यादपचये विदुः ॥
अथ मृत्युञ्जययन्त्रम् ।
"प्रथमं प्रणवमालिख्य तन्मध्ये साध्यनामकम् ।
बहिरष्टदलं पद्मं यान्तान्तं वसुपत्रके ॥
विलिखेत् सहकारञ्च केशरेषु सुशोभितम् ।
तद्बहिश्चन्द्रवृत्तं स्यात् षोडशस्वरकं लिखेत् ॥
द्वारं भूपुरमालिख्य चतुर्द्वारञ्च वारुणम् ।
पार्थिवञ्च चतुष्कोणं चक्रं मृत्युञ्जयं भवेत् ॥
ज्वरादिसर्व्वरोगादिदाहशान्तिकरं परम् ।
मृत्युञ्जयं महाचक्रं सर्व्वरक्षाकरं नृणाम् ॥"
अथ ध्यानम् ।
"चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥ * ॥
मत्वा तातगुरुं शिवं गणपतिं मन्त्रं जपेत् सर्व्वदा ।
खे लक्षयेत् सततं विलोकनवशं शुक्ले रवौ प्रत्यहम् ॥
खे विलोकनमन्त्रस्तु ।
ओँ ह्रीँ भूचरी खेचरी आत्मानमाकाशे दर्शय सर्व्ववृत्तान्तं कथय कथय हुं फट् स्वाहा ।
यः पश्येत् सर्व्वगं शान्तमात्मानं सत्यमद्वयम् ।
न तेन किञ्चिद्विज्ञातव्यं ज्ञातव्यं वावशिष्यते ॥"
इति योगप्रदीपिकायां छायापुरुषोपदेशो नाम षष्ठः पटलः ॥

छायाव्यवहारः, पुं, ज्योतिःशास्त्रोक्ताङ्कविशेषः ।
अथ छायाव्यवहारे करणसूत्रं वृत्तम् ।
"छाययोः कर्णयोरन्तरे ये तयो-
र्व्वर्गविश्लेषभक्ता रसाद्रीषवः ।
सैकलब्धेः पदघ्नन्तु कर्णान्तरं
भान्तरेणोनयुक्तं दले स्तः प्रभे ॥
उदाहरणम् ।
नन्दचन्द्रैर्मितं छाययोरन्तरं
कर्णयोरन्तरं विश्वतुल्यं ययोः ।
ते प्रभे वक्ति यो युक्तिमान् वेत्त्यसौ
व्यक्तमव्यक्तयुक्तं हि मन्येऽखिलम् ॥
न्यासः




छा $\frac{७}{२}$ छाया $\frac{४५}{२}$

छायान्तरम् । १९ । कर्णान्तरम् । १३ । अनयोर्व्वर्गान्तरेण । १९२ । भक्ता रसाद्रीषवः । ५७६ । लब्धम् । ३ । सैकस्यास्य । ४ । मूलम् । २ । अनेन कर्णान्तरम् । १३ । गुणितम् । २६ । द्विस्थम् । २६ । भान्तरेण । १९ । ऊनयुते । ७ । ४५ । तदर्द्धे लब्धे छाये $\frac{७}{२}$ $\frac{४५}{२}$ तत्कर्णौ-योगपदमित्यादिना जातौ कर्णौ $\frac{२५}{२}$ $\frac{५१}{२}$

छायान्तरे करणसूत्रं वृत्तार्द्धम् ।
शङ्कुः प्रदीपतलशङ्कुतलान्तरघ्न-
श्छाया भवेद्विनरदीपशिखौच्यभक्तः ।
उदाहरणम् ।
शङ्कुप्रदीपान्तरभूस्त्रिहस्ता
दीपोच्छ्रितिः सार्द्धकरत्रया चेत् ।
शङ्कोस्तदर्काङ्गुलसम्मितस्य
तस्य प्रभा स्यात् कियती वदाशु ॥


न्यासः



भूः ३ छाया $\frac{१}{२}$ शङ्कुः $\frac{१}{२}$ प्रदीपशङ्कुतलान्तरम् ३

अनयोर्घातः $\frac{३}{२}$ विनरदीपशिखौच्येन । ३ । भक्तो लब्धानि छायाङ्गुलानि । १२ ।
अथ दीपोच्छ्रित्यानयनाय करणसूत्रं वृत्तार्द्धम् ।
छायाहृते तु नरदीपतलान्तरघ्ने
शङ्कौ भवेन्नरयुते खलु दीपकौच्यम् ।
उदाहरणम् ।
प्रदीपशङ्क्वन्तरभूस्त्रिहस्ता
छायाङ्गुलैः षोडशभिः समा चेत् ।
दीपोच्छ्रितिः स्यात् कियती वदाशु
प्रदीपशङ्क्वन्तरसङ्ख्यतां मे ॥

न्यासः



भूः ३ छाया $\frac{२}{३}$

शङ्कु । १२ । छायाङ्गुलानि । १६ । शङ्कुप्रदीपान्तरहस्ताः । ३ । लब्धं दीपकौच्यं हस्ताः $\frac{११}{४}$


प्रदीपशङ्क्वन्तरभूमानानयनाय करणसूत्रं वृत्तार्द्धम् ।
विशङ्कुदीपोच्छ्रयसंगुणा भा
शङ्कूद्धृता दीपनरान्तरं स्यात् ॥
उदाहरणम् । पूर्व्वोक्त एव दीपोच्छ्रायः $\frac{११}{४}$
शङ्क्वङ्गुलानि । १२ । छाया । १६ । लब्धाः शङ्कुप्रदीपान्तरहस्ताः । ३ ।
छायाप्रदीपान्तरदीपौच्यानयनाय करणसूत्रं सार्द्धवृत्तम् ।
छायाग्रयोरन्तरसंगुणाभा
छायाप्रमाणान्तरहृद्भवेद्भूः ।

भूशङ्कुघातः प्रभया विभक्तः
प्रजायते दीपशिखौच्यमेवम् ॥
त्रैराशिकेनैव यदेतदुक्तं
व्याप्तं स्वभेदैर्हरिणेव विश्वम् ॥

उदाहरणम् ।

शङ्कोर्भार्कमिताङ्गुलस्य सुमते! दृष्टा किलाष्टाङ्गुला
छायाग्राभिमुखे करद्वयमिते न्यस्तस्य देशे पुनः ।
तस्यैवार्कमिताङ्गुला यदि तदा छायाप्रदीपान्तरं
दीपौच्यञ्च कियद्वद व्यवहृतिं छायाभिधां वेत्सि
चेत् ॥

न्यास.



भू $\frac{१३}{३}$ छा $\frac{१}{३}$ भूः २ छा $\frac{१}{२}$

अत्र छायाग्रयोरन्तरमङ्गुलात्मकम् । ५२ । छाये च । ८ । १२ । अनयोराद्या । ८ । इयमनेन । ५२ । गुणिता । ४१६ । छायाप्रमाणान्तरेण । ४ । भक्ता लब्धं भूमानम् । १०४ । इदं प्रथमच्छायाग्रदीपतलयोरन्तरमित्यर्थः । एवं द्वितीयच्छायाग्रमानम् ।१५६। भूशङ्कुघातः प्रभया विभक्त इति जातमुभयतोऽपि दीपौच्यं

सममेव हस्ताः ६ $\frac{१}{२}$ ।

एवमित्यत्र छायाव्यवहारे त्रैराशिककल्पनया नयनं वर्त्तते तद्यथा । प्रथमच्छायातो द्वितीयच्छाया । १२ । यावताधिका तावता छायावयवेन यदि छायाग्रान्तरतुल्याभूर्लभ्यते तदा छायया किमिति एवं पृथक् पृथक् छायाप्रदीपतलान्तरप्रमाणा लभ्यते । ततो द्वितीय त्रैराशिक यदि छायातुल्ये भुजे शङ्कुः कोटिस्तदा भूतुल्ये भुजे किमिति लब्धं दीपकौच्यमुभयतोऽपि तुल्यमेव । एवं पञ्चराशिकादिकमखिलं त्रैराशिककल्पनयैव सिद्धं यथा भगवता श्रीनारायणेन जननमरणक्लेशापहारिणा निखिलजगज्जननैकबीजेन सकलभुवनभावनेन गिरिसरित्सुरनरासुरादिभिः स्वभेदैरिद जगद्व्याप्तं तथेदमखिलं गणितजातं त्रैराशिकेन व्याप्तं यद्येवं तद्बहुभिः किमित्याशङ्क्याह ।
यत्किञ्चिद्गुणभागहारविधिना बीजेऽत्र वा
गण्यते
तत् त्रैराशिकमेव निर्म्मलधियामेवावगम्य
विदाम् ।
एतद्यद्बहुधास्मदादिजडधीधीवृद्धिबुद्ध्या बुधैस्तद्भेदान् सुगमान् विधाय रचितं प्राज्ञैः
प्रकीर्णादिकम् ॥"

इति श्रीभास्कराचार्य्यविरचितायां लीलावत्यां छायाधिकारः समाप्तामगात् ॥

छायाभृत्, पुं, (छायां छायारूपमृगलाञ्छनं यद्वा छायां शीतलकान्तिं बिभर्त्तीति । भृ + क्विप् ।) चन्द्रः । इति हेमचन्द्रः । २ । १९ ॥

छायामित्रं क्ली, (छायया छायाकरणेन मित्रमिव छायाया मित्रमिति वा ।) छत्त्रम् । इति शब्दरत्नावली ॥

छायामृगधरः, पुं, (छाया छायारूप एव मृगस्तं धरतीति । धृ + अच् । छायामृगस्य धरो वा ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

छायासुतः, पुं, (छायायाः सूर्य्यपत्न्याः सुतः पुत्त्रः ।) शनिः । इति हेमचन्द्रः । २ । ३४ ॥

छिः, पुं, (छ्यति छिनत्ति कीर्त्त्यादिकं नाशयतीत्यर्थः । छो + बाहुलकात् किः ।) गर्हा । इत्येकाक्षरकोषः ॥

छिक्कनी, स्त्री, (छिक इत्यव्यक्तक्षुतशब्दं कनत्यनया । कन् + करणे अप् ततो ङीप् ।) वृक्षविशेषः । छिक्नी इति नाकछिक्नी इति चाँचोटी इति च भाषा ॥ तत्पर्य्यायः । क्षवकृत् २ तिक्ता ३ छिक्किका ४ घ्राणदुःखदा ५ । अस्या गुणाः । कटुत्वम् । रुच्यत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । वह्निपित्तकारित्वम् । वातरक्तकुष्ठकृमिवातकफनाशित्वञ्च । इति भावप्रकाशः ॥

छिक्का, स्त्री, (छिगित्यव्यक्तशब्देन कायतीति । कै + कः । ततष्टाप् ।) क्षुतम् । इति शब्दरत्नावली ॥ छिँक् इति हिन्दी भाषा ॥ (यथा, गारुडे ज्योतिश्चक्रे ६० अध्याये ।
"छिक्कायां लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैरृते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम् ॥")

छिक्किका, स्त्री, (छिक्का क्षुतं साध्यत्वेनास्त्यस्याः । बाहुलकात् ठन् ।) छिक्कनी । इति भावप्रकाशः ॥

छित्, [द्] त्रि, (छिनत्तीति । छिद् + क्विप् ।) [छेदनकर्त्ता ॥

छितं, त्रि, (छायते स्मेति । छो + क्त । "शाच्छोरन्यतरस्याम् ।" ७।४।४१ । इती. ।) छिन्नम् । इत्यमरः । । ३ । १ । १०३ ॥

छित्ति , पु, (छिद् + क्तिन् ।) करजद्रुमः । इति शब्दचन्द्रिका ॥ छेदश्च ॥

छित्वरः, त्रि, (छिनत्तीति । छिद् + "छित्वरछत्वरेति ।" उणां । ३ । १ । इति ष्वरच् प्रत्ययेन निपातनात् साधुः ।) छेदनद्रव्यम् । धूर्त्तः । वैरी । इत्युणादिकोषः ॥

छिद, इर ध ञ औ छेदे । इति कविकल्पद्रुमः ॥ (रुधां-उभं-सकं-अनिट् ।) छेदो द्विधाकरणम् । इर्, अच्छिदत् अच्छैत्सीत् । ध ञ, छिनत्ति छिन्ते दात्रेण वृक्षं लोकः । औ, छेत्ता । इति दुर्गादास. ।

छिदक, क्ली, (छिनत्तीति । छिद् + क्वुन् ।) वज्रम् । इत्युणादिकोषः ॥

छिदा, स्त्री, (छिद् + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् ततष्टाप् ।) छेदनम् । इति मुग्धबोधम् ॥

छिदिः, स्त्री, (छिद्यतेऽनया इति । छिद् + "कृगृपकुटिभिदिछिदिभ्यश्च ।" उणां । ४ । १४२ । इति इः स च कित् ।) कुठारः । इत्युणादिवृत्तिः ॥

छिदिरः, पुं, (छिनत्त्यनेनेति । छिद् + "इषिमदिमुदिखिदिच्छिदीति ।" उणां । १ । ५१ । इति किरच् ।) करवालः । परश्वधः । पावकः । रज्जुः । इति मेदिनी । रे, १५५ ॥

छिदुरः, पुं, (छिनत्तीति । छिद् + "विदिभिदिच्छिदेः कुरच् ।" ३।२।१६२ । इति कुरच् ।) छेदनद्रव्यम् । धूर्त्तः । वैरी । इति मेदिनी । रे, १५६ ॥ (स्वयं छिन्ने, त्रि । यथा, रघुः । १६।६२ ।
"संलक्ष्यते न छिदुरोऽपि हारः ॥")

छिद्र, त् क भेदे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) भेद इह रन्ध्रकरणम् । छिद्रयति छिद्रापयति भाण्डं बालकः । इति दुर्गादासः ॥

छिद्र, क्ली, (छिद्यते भिद्यते यत् । छिदिरौ छेदने + "स्फायितञ्चिवञ्चीति ।" उणां । २।१३ । इति रक् ।) भेदः । छेँदा इति भाषा । तत्पर्य्यायः । कुहरम् २ शुषिरम् ३ विवरम् ४ बिलम् ५ निर्व्यथनम् ६ रोकम् ७ रन्ध्रम् ८ श्वभ्रम् ९ वपा १० शुषिः ११ । इत्यमरः । १ । ८ । २ ॥ खम्भम् १२ शुषी १३ । इति तट्टीका ॥ (यथा, महाभारते । ३।८२।५३ ।
"ततो गच्छेत धर्म्मज्ञ । हिमवत्सुतमर्व्वुदम् ।
पृथिव्यां यत्र वै छिद्रं पूर्व्वमासीत् युधिष्ठिर ॥")
दूषणम् । इति मेदिनी । रे, ३८ ॥ (यथा, महाभारते । २ । १२ । २९ ।
"बहुविघ्नश्च नृपते । क्रतुरेष स्मृतो महान् ।
छिद्राण्यस्य तु वाञ्छन्ति यज्ञघ्ना ब्रह्मराक्षसाः ॥"
अवकाशः । नवमसंख्या । इति ज्योतिषम् ॥ लग्नादष्टमस्थानम् । " छिद्राख्यमष्टमं स्थानमिति ।" इति ज्योतिस्तत्त्वम् ॥)

छिद्रवैदेही, स्त्री, (छिद्रप्रधाना वैदेही पिप्पली ।) गजपिप्पली । इति राजनिर्घण्टः ॥

छिद्रान्तः, [र्], पु, (छिद्रमन्तर्मध्ये यस्य ।) नलः । इति राजनिर्घण्टः ॥

छिद्राफल, क्ली, (छिद्रं दूषणमापलतीति । आ + फल + अच् ।) मायाफलम् । इति राजनिर्घण्टः ॥

छिद्रितः, त्रि, (छिद्र + क्तः ।) कृतच्छिद्रः । तत्पर्य्यायः । वेधितः २ विद्धः ३ । इत्यमरः । ३ । १ । ९९ ॥

छिन्नं, त्रि, (छिद्यते स्म इति । छिद् + क्तः ।) कृतच्छेदनम् । छेँडा इति काटा इति च भाषा । तत्पर्य्यायः । छातम् २ लूनम् ३ लवम् ४ दातम् ५ दितम् ६ छितम् ७ वृक्णम् ८ । इत्यमरः । ३।१।१०३॥ कृत्तम् ९ छादितम् १० । इति जटाधरः ॥ छेदितम् ११ खण्डितम् १२ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ९० । ११ ।

"छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥"*॥
मन्त्रविशेषे, पु। तल्लक्षणादिकं यथा, विश्वसारे।
"मनोर्यस्यादिमध्यान्तेष्वानिलं वीजमुच्यते।
संयुक्तं वा वियुक्तं वा पराक्रान्तस्त्रिधा पुनः॥
चतुर्धा पञ्चधा वापि स मन्त्रश्छिन्नसंज्ञकः॥")

छिन्नग्रन्थिनिका, स्त्री, (छिन्ना ग्रन्थिनी। संज्ञायां कन् ततष्टाप् पूर्व्वह्रस्वश्च।) त्रिपर्णिका। इति राजनिर्घण्टः॥

छिन्नपत्री, स्त्री, (छिन्नं पत्रं यस्याः। स्त्रियां ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः॥ (विवरणमस्या अम्बष्ठाशब्दे ज्ञेयम्॥)

छिन्नमस्ता, स्त्री, (छिन्नं मस्तं शिरो यस्याः।) दशमहाविद्यान्तर्गतषष्ठमहाविद्या। सा च प्रचण्डचण्डिका। यथा,—
"प्रचण्डचण्डिकां वक्ष्ये सर्व्वकामफलप्रदाम्।
यस्याः प्रसादमात्रेण सदाशिवो भवेन्नरः॥
अपुत्रो लभते पुत्त्रं अधनो धनवान् भवेत्।
कवित्वञ्च सुपाण्डित्यं लभते नात्र संशयः॥"
अथ प्रचण्डचण्डिकामन्त्राः। विश्वसारे जामले च।
"लक्ष्मीं लज्जां ततो मायां मात्रां द्वादशिकामपि।
वज्रवैरोचनीये हे मायो फट्स्वाहया युतः॥
लक्ष्मीवीजं यदाद्यं स्यात् तदा श्रीः सर्व्वतोसुखी।
लज्जावीजेन चाद्येन वश्यतां यान्ति योषितः॥
मायावीजेन चाद्येन महापातकनाशनम्।
मात्रां द्वादशिकां वीजमाद्यं स्यान्मुक्तिदायकम्॥
भैरवोऽस्य ऋषिर्द्देवि। सम्राट् छन्द उदीरितम्।
छिन्नमस्ता स्मृता देवी वीजं कूर्चद्वयं पुनः॥
स्वाहा शक्तिरभीष्टार्थे विनियोग उदाहृतः॥"
"अत्र लज्जापदं कामवीजपरम्। तथा च।
अत्र लज्जापदे देवि। कामवीजं वितन्यते।
महाकालमतं ज्ञेयं मन्त्रोद्धारं शुभावहम्॥"
पूर्व्वमायापदे इति पाठे मायायाः पूर्व्वं लज्जावीजं तस्मिन्नित्यर्थः। तथा च। पूर्व्वमायापदेन लज्जावीजमुच्यते। अन्यथा तापिन्यादिविरोधः। तथा च।
"कामाद्यां वाग्भवाद्यां वा मायाद्यां वा जपेत् सुधीः।
लक्ष्म्याद्यां वा जपेद्विद्यां चतुर्व्वर्गफलप्रदाम्॥
अन्येषाञ्च मुनीनां मते सर्व्वत्र मायापदं कूर्च्चपरम्। तत्रैव।
वान्तं वह्निसमायुक्तं रतिविन्दुसमन्वितम्।
लक्ष्मीवीजमिदं प्रोक्तं सर्व्वकामार्थसिद्धये॥
वामाक्षिवह्निसंयुक्तं विन्दुनादविभूषितम्।
शिववीजं महेशानि। लज्जावीजमुदाहृतम्॥
ईशानमुद्धृत्य पुरारिवीजं
सविन्दुकं नादविभूषितञ्च।
सवामकर्णं परितः प्रकल्प्य
माया वदन्तीह मनीषिणस्ताम्॥
द्वादशस्वरवर्णं स्यात् नादविन्दुविभूषितम्।
वाग्भवं वीजमित्युक्तं सर्व्ववाक्यविशुद्धये॥
इति मन्त्रे चतुर्व्वीजव्याख्यानात् अयन्तु समीचीनः। भैरवमते तु माया भुवनेश्वर्य्येव॥
लक्ष्मीः प्रथमवीजेऽस्ति लज्जावीजे मनोभवः।
तृतीयेऽस्मिन् सदा देवी महापातकनाशिनी॥
चतुर्थे तु गुणातीता मुक्तिविद्याप्रदायिका।
वकारे वरुणः साक्षात् जकारे तु सुराधिपः॥
रेफे हुताशनो देवो वकारे वसुधाधिपः।
ऐकारे त्रिपुरा देवी रेफे त्रिपुरसुन्दरी॥
त्रैलोक्यविजया देवी सदैवौकारसंस्थिता।
चकारे चन्द्रमा देवो नकारे हि विनायकः॥
ईंकारे कमला साक्षात् यकारे च सरस्वती।
मायायुग्मे सदा देवी प्रकृत्या सह सङ्गता॥
वैखरी चैव फट्कारे स्वाकारे कुसुमायुधः।
हाकारे च रतिस्तिष्ठेदेव मन्त्रसमुच्चयः॥"
इति व्याख्यानाच्च॥*॥
अस्याः पूजाप्रयोगः।
प्रातःकृत्यादिक कृत्वा मन्त्राचमनं कुर्य्यात्।
यथा,—
"लक्ष्मीमायाकूर्च्चवीजैस्त्रिभिः पीत्वाम्बु साधकः।
वाग्भवेनौष्ठौ संमृज्य मायाभ्यान्तु द्विरुन्मृजेत्॥
कूर्च्चेन क्षालयेत् पाणी एभिर्म्मन्त्रैश्च विन्यसेत्।
श्रीमायाकूर्च्चवाक्कामत्रिपुटाभगवर्गकैः॥
कामकलाङ्कुशाभ्याञ्च वक्त्रनासाक्षिकर्णकान्।
नाभिहृन्मस्तकं चांसौ स्पृष्ट्वा शम्भुर्भवेत् क्षणात्॥
आचम्यैव छिन्नमस्ता वत्सरार्त्तां प्रपश्यति॥
ततः प्राणायामान्तं विधाय षोढान्यासं कुर्य्यात्।
मन्त्रषोढां ततः कुर्य्यात् त्रैलोक्यवशकारिणीम्।
श्रीवाक्त्रिपुटायोनिप्रासादप्रणवैस्तथा॥
कालीवध्वङ्कुशैः कामकलाकूर्च्चास्त्रकैः क्रमात्।
षोडशीमनुवर्णैश्च पृथगष्टादशाक्षरी॥
एभिर्वीजैर्म्मातृकार्णान् स्वेषु स्थानेषु विन्यसेत्।
एषा ब्रह्मस्वरूपा हि वीजषोढा प्रकीर्त्तिता॥
अस्याः संन्यसनात् सर्व्वे वज्रदेहा भवन्ति हि।
सर्व्वैश्वर्य्ययुतास्ते हि जीवन्मुक्ता दशाब्दतः॥"*॥
तत ऋष्यादिन्यासः।
अस्य मन्त्रस्य भैरव ऋषिः सम्राट् छन्दः छिन्नमस्ता देवता हुँकारद्वयं वीजं स्वाहा शक्तिरभीष्टार्थसिद्धये विनियोगः। यथा, शिरसि भैरवऋषये नमः। मुखे सम्राट्छन्दसे नमः। हृदि छिन्नमस्तायै देवतायै नमः। गुह्ये हूँ हूँ वीजाय नमः। पादयोः स्वाहाशक्तये नमः॥ ततः कराङ्गन्यासौ। ओम् आं खड्गाय हृदयाय स्वाहा। इति कनीयसि। ओम् ईं सुखड्गाय शिरसे स्वाहा। इति पवित्राङ्गुलयोः। ओम् ऊं सुवज्राय शिखायै स्वाहा। इति मध्यमयोः। ओम् ऐं पाशाय कवचाय स्वाहा। इति तर्ज्जन्योः। ओम् औं अङ्कुशाय नेत्रत्रयाय स्वाहा। इत्यङ्गुष्ठयोः। ओम् अः सुरक्षाररक्षासुरघायास्त्राय फट्। इति करतलपृष्ठयोः। एवं हृदयादिषु। तदुक्तं भैरवतन्त्रे।
"उच्चरेत् पूर्व्वमाकार विन्दुलाञ्छितमस्तकम्।
खड्गाय हृदयायेति स्वाहायुक्त कनीयसि॥
ईंकारञ्च ततो देवि। चन्द्रकोटिसमप्रभम।
सुखड्गाय ततो वाच्यं शिरसे तदनन्तरम्॥
स्वाहायुक्तं ततो वाच्यं पवित्राङ्गुलिसंयुतम्।
ऊकारञ्च ततो वाच्यं विन्दुलाञ्छितमस्तकम्॥
सुवज्राय ततो वाच्यं शिखायै तदनन्तरम्।
स्वाहान्तं मध्यमायाञ्च विन्यसेत्तदनन्तरम॥
मात्रां द्वादशिकां देवीं विन्यसेच्च ततः परम्।
पाशायेति समुच्चार्य्य प्रवदेत् कवचाय च॥
स्वाहान्तं विन्यसेन्मन्त्रं तर्ज्जन्यां तदनन्तरम्।
औङ्कारञ्च ततो देवि। चाङ्कुशं तदनन्तरम्॥
नेत्रत्रयाय स्वाहान्तमङ्गुष्ठे करयोर्द्वयोः।
अकारञ्च विसर्गान्तं सुरक्षारक्षसंयुतम्॥
असुरघायसंयुक्तं अस्त्रायेति ततः परम्।
फड्घरसमायुक्तं विन्यसेत् करयोर्द्वयोः॥
हृदि मूर्द्ध्नि शिखायाञ्च कवचे नेत्रमण्डले।
यावदस्त्रं चतुर्द्दिक्षु विदिक्षु च यथाक्रमम्॥"
त्रिशक्तितन्त्रे भैरववाक्यम्।
"उच्चरेत् प्रणव पूर्व्वमाकारं विन्दुसंयुतम्।"
इत्यादिवाक्यात् कराङ्गेषु प्रणवसम्वलितो न्यासः। ततो मूलेन मस्तकादिपादपर्य्यन्त पादादिमस्तकपर्य्यन्तं वारत्रयं न्यसेत्॥*॥
ततो ध्यानम्।
"स्वनाभौ नीरजं ध्यायेदर्द्धं विकसितं सितम्।
तत्पद्मकोषमध्ये तु मण्डल चण्डरोचिषः॥
जवाकुसुमसङ्काशं रक्तवन्धूकसन्निभम्।
रजःसत्त्वतमोरेखायोनिमण्डलमण्डितम्॥
मध्ये तु तां महादेवीं सूर्य्यकोटिसमप्रभाम्।
छिन्नमस्ता करे वामे धारयन्तीं स्वमस्तकम्॥
प्रसारितमुखीं देवीं लेलिहानाग्रजिह्विकाम्।
पिबन्तीं रौधिरीं धारां निजकण्ठविनिर्गताम्॥
विकीर्णकेशपाशाञ्च नानापुष्पसमन्विताम्।
दक्षिणे च करे कर्त्रीं मुण्डमालाविभूषिताम्॥
दिगम्बरीं महाघोरां प्रत्यालीढपदे स्थिताम्।
अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम्॥
रतिकामोपरिष्ठाञ्च सदा ध्यायन्ति मन्त्रिणः।
सदा षोडशवर्षीयां पीनोन्नतपयोधराम्॥
विपरीतरतासक्तौ ध्यायेद्रतिमनोभवौ।
डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
वर्णिनीं लोहितां सौम्यां मुक्तकेशीं दिगम्बरीम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः।
नागयज्ञोपवीताढ्यां ज्वलत्तेजोमयीमिव॥
प्रत्यालीढपदां दिव्यां नानालङ्कारभूषिताम्।
सदा द्वादशवर्षीयामस्थिमालाविभूषिताम्॥
डाकिनीं वामपार्श्वे तु कल्पसूर्य्यानलोपमाम्।
विद्युज्जटां त्रिनयनां दन्तपङ्क्तिवलाकिनीम्॥
दंष्ट्राकरालवदनां पीनोन्नतपयोधराम्।
महादेवीं महाघोरां मुक्तकेशीं दिगम्बरीम्॥
लेलिहानमहाजिह्वां मुण्डमालाविभूषिताम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
करस्थितकपालेन भीषणेनातिभीषणाम्॥

आभ्यां निषेव्यमानां तां ध्यायेद्देवीं विचक्षणः ॥"
ध्यानस्यावश्यकत्वमाह । तन्त्रे ।
"प्रचण्डचण्डिकामेवमध्यात्वा यस्तु पूजयेत् ।
सम्वत्सरस्य शिरश्छित्वा देवी पिबति शोणितम् ॥"
पिबन्तीमिति तेन सुखेनेति शेष ।
तथा च ।
"स्वमस्तकं सखर्परं रक्तधाराभिपूरितम् ।
ललज्जिह्वं महाभीम धृतं वामभुजे तथा ॥"
इति भैरवतन्त्रे ।
तत्रैव ।
"सितं कुर्य्याद्दलं पूर्व्वमाग्नेयं रक्तवर्णकम् ।
याम्य कृष्णमतः पीत शुक्लं रक्त सितासितम् ॥
ततः पीतां प्रकुर्व्वीत कर्णिकां तस्य मध्यगाम् ।
तन्मध्ये तु प्रकुर्व्वीत मण्डल चक्ररोचिष' ॥
रजःसत्त्वतमोरेखा रक्ता शुक्लासिता क्रमात् ।
मायायुग्मं ततो न्यस्य षडक्षरसमन्वितम् ॥
वाह्यं तस्य च चक्रस्य कुर्य्यात् प्राकारवेष्टितम् ।
पूर्व्वं रक्त तत, कृष्ण सितं पीतं यथाक्रमम् ॥
चतुर्द्वारसमायुक्तं क्षेत्रपालैरधिष्ठितम् ॥"
इत्यस्याः पूजायन्त्रम् ॥ * ॥
यथा वा ।
"त्रिकोण विन्यसेदादौ तन्मध्ये मण्डलत्रयम् ।
तन्मध्ये विन्यसेद्योनि द्वारत्रयसमन्विताम ॥
वहिरष्टदल पद्म भूविम्बत्रितय पुन' ।
कूर्च्चबीजं लिखेन्मध्ये त्रिकोणे फट् समन्वितम् ॥"
यद्वा एतद्ध्यानोक्त यन्त्रम् ।
तथाच ।
"अपरञ्च प्रवक्ष्यामि शृणु देवि ! यथाक्रमम् ।
स्वनाभौ नीरज ध्यायेद्भानुमण्डलसन्निभम् ॥
योनिचक्रसमायुक्त गुणत्रितयसंश्रितम् ।
तत्र मध्ये महादेवीं छिन्नमस्तां स्मरेद्यतिः ॥
प्रदीपकलिकाकारामद्वितीयव्यवस्थिताम् ।
योनिमुद्रासमायुक्ता हृदयस्थितलोचनाम ॥
घोरयमेतद्यतीनाञ्च गृहस्थानां निशामय ॥"
यथा,—
"अन्तरे स्वशरीरस्य नाभिनीरजसङ्गताम् ।
निर्लेपां निर्गुणां सूक्ष्मां बालचन्द्रसमप्रभाम् ॥
समाधिमा- गम्यान्तु गुणत्रितयवेष्टिताम् ।
कलातीतां गुणातीतां मुक्तिमात्रप्रदायिनीम् ॥"
एव ध्यात्वा मानसे. सपूज्य तारिणीवत्कलश-
स्थापनं कुर्य्यात् । तत' पीठपूजा । आधारश-
क्तये । प्रकृतये। कूर्म्माय। अनन्ताय । पृथिव्यै ।
क्षीरसमुद्राय। रत्नद्वीपाय। कल्पवृक्षाय। तदध
सर्वसिंहासनाय । आनन्दकन्दाय । सम्वि-
न्नालाय । सर्व्वतत्त्वात्मकपद्माय । स सत्त्वाय ।
र रजसे । त तमसे । आं आत्मने । अ अन्त-
रात्मने । प परमात्मने । ह्रीं ज्ञानात्मने नम' ।
पद्ममध्ये रतिकामाभ्याम् ॥ भैरवमते तु ।
"आधारशक्तिं कूर्म्मन्तु नागराजमत परम् ।
पद्मनालञ्च पद्मञ्च पूजयेन्मन्त्रवित्तरः ॥
मण्डलं चतुरस्रञ्च रज' सत्त्व तमस्तथा ।
रतिकामौ च संपूज्य शक्तिपूजां समाचरेदिति ॥
रतिकामोपरि वज्रवैरोचनीये देहि देहि
एहि एहि गृह्ण गृह्ण मम सिद्धि देहि देहि
मम शत्रून् मारय मारय करालिके हूं फट्
स्वाहेति पीठमन्त्रः ॥ सर्व्वत्र प्रणवादिनमो-
ऽन्तेन पूजयेत् । पुनर्ध्यात्वावाहयेत् । सर्व्व-
सिद्धिवर्णनीये सर्व्वसिद्धिडाकिनीये वज्रवैरोच-
नीये इहावह इहावह पुनस्तन्मन्त्रमुच्चार्य्य इह
तिष्ठ इह तिष्ठ इह सन्निधेहि इह सन्निरुध्यस्व
इत्यनेनावाह्य आं ह्रीं क्रौं ह स इत्यनेन प्राण-
प्रतिष्ठां कृत्वा । ओम् आं खड्गाय हृदयाय
स्वाहा इत्यादिना षडङ्ग विन्यस्य यथाशक्ति
पूजां कृत्वा बलि दद्यात् । यथा । वज्रवैरो-
चनीये देहि देहि एहि एहि गृह्ण गृह्ण इम
बलि मम सिद्धिं देहि देहि मम शत्रून् मारय
मारय करालिके हूं फट् स्वाहा इति मन्त्रेण ।
ततो देव्या दक्षिणे ओँ वर्णिन्यै नम । वामे
ओँ डाकिन्यै नम' । ततो देव्यङ्गे षडङ्ग
सपूज्य दक्षिणे ओँ शङ्खनिधये नम । वामे
ओँ पद्मनिधये नम । पूर्व्वादिदिक्षु लक्ष्मीं
लज्जां मायां वागीशं पूजयेत् । विदिक्षु ब्रह्म-
विष्णुरुद्रेश्वरान् मध्ये सदाशिव सर्व्वत्र प्रणवादि
नमोऽन्तेन पूजयेत् । तत. पञ्च पुष्पाञ्जलि
दत्त्वा आवरणान् पूजयेत् । अग्नीशासुरवायुष
मध्ये दिक्षु च ओम् आं खड्गाय हृदयाय
स्वाहा इत्यादिना षडङ्गानि सपूज्य अष्टपत्रेषु
पूर्व्वादिक्रमेण ओम् ह्रीं काल्यै नम एवं वर्णिन्यै
डाकिन्यै भैरव्यै महाभैरव्यै इन्द्राक्ष्यै पिङ्गाक्ष्यै
संहारिण्यै सर्व्वत्र प्रणवादिनमोऽन्तेन पूजयेत् ।
यथा,—
"एका नामाभिधा काली वर्णिनी डाकिनी तथा ।
भैरवीञ्च महापूर्व्वा भैरवीं तदनन्तरम् ॥
इन्द्राक्षीञ्च सपिङ्गाक्षीं तत' संहारकारिणीम् ।
पूर्व्वादिके दले पूज्या शक्तयश्च यथाक्रमम् ॥
प्रणवादिनमोऽन्तेन लज्जाबीजं समुच्चरन् ।"
पद्ममध्ये हूं हूं फट् नम. स्वाहा नमः ।
देव्या दक्षिणे सम्राट्छन्दसे नमः । देव्या
उत्तरे सर्व्ववर्णेभ्यो नम' । पुनर्द्दक्षिणे ओं बीज-
शक्तिभ्यां नम । पत्राग्रेषु पूर्व्वादिक्रमेण ब्राह्म्यै
माहेश्वर्य्यै कौमार्य्यै वैष्णव्यै वाराह्यै इन्द्राण्यै
चामुण्डायै महालक्ष्म्यै सर्व्वत्र प्रणवादिनमो-
ऽन्तेन पूजयेत् । ततश्चतुर्दिक्षु द्वारेषु ओम्
करालाय नम' । विकरालाय नम' । एव अति-
करालाय महाकरालाय । यथा, भैरवीये ।
"पूर्व्वद्वारे करालञ्च विकरालञ्च दक्षिणे ।
पश्चिमेऽतिकरालञ्च महाकरालमुत्तरे ॥"
ततो धूपादिविसर्ज्जनान्त कर्म्म समापयेत् ।
विसर्ज्जने तत्र विशेष' । संहारमुद्रां प्रदर्श्य
अङ्गुलाद्यारोध्य वामनासापुटेन ।
योनिमुद्रासमारूढ़ां प्रदीपकलिकोज्ज्वलाम् ।
कृष्णपक्षे विधुमिव क्रमेण क्षीणतां गताम् ॥
इम मन्त्र समुच्चार्य्य चक्रपर्श्वे निवेशयेत् ।
उत्तरे शिखरे इत्यादि । अस्य पुरश्चरण लक्ष-
जप । सिद्धविद्यात्वात् ॥ * ॥ बलिदाने तु
भैरवीये ।
"रात्रौ बलि प्रदातव्यो मत्स्यमांससुरादिभि ।
अथवा मधुमानाद्यैर्म्मधुरैर्व्विभवक्रमे. ॥
मन्त्रस्तु ।
उच्चरेत् प्रणव पूर्व्वं सर्व्वसिद्धिप्रदेऽन्वितम् ।
वर्णिनीये ततो वाच्यं सर्व्वसिद्धिप्रदे ततः ॥
डाकिनीये ततो वाच्यं देवीनाम तत परम् ।
एह्येहीति ततो वाच्यं इमं बलिमनन्तरम् ॥
गृह्ण गृह्ण ततः प्रोक्ता मम सिद्धिमनन्तरम् ।
देहि देहीति मायं च तत फट्स्वाहया युतः ॥
बलिमन्त्रः समाख्यात. पूजितोऽय सुरेश्वरीति ॥
मन्त्रान्तरम ।
भुवनेशी कामबीजं कूर्च्चबीजञ्च वाग्भवम् ।
भुवनेशी कूर्च्चबीज वाग्भवं तदनन्तरम ॥
वज्रवैरोचनीये च हू फट् स्वाहा तत. परम्॥
अस्य पूजाप्रयोगन्यासपूजादिक षोड़शीवत
कार्य्यम ॥ * ॥
हृल्लेखा मादन लक्ष्मीर्व्वाग्भव कूर्च्चमेव च ।
अष्टान्ता छिन्नमस्ताया महाविद्या प्रकीर्त्तिता ॥
अस्यापि सदृशी विद्या जगत्स्वपि न विद्यते ।
षड्वर्णोऽय मनु' साक्षात्मोक्षदो नात्र सशयः ॥
अस्या ध्यानमह वक्ष्ये शृणुष्व कमलानने । ।
प्रत्यालीढ़पदां सदैव दधतीं छिन्नं शिर. कर्त्तृकां
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिबन्तीं मुदा ।
नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरि दृढां ध्यायेज्जवासन्नि-भाम् ॥
दक्षे चातिसिता विमुक्तचिकुरा कर्त्री तथा खर्पर
हस्ताभ्यां दधती रजोगुणभवा नाम्नापि सा वर्णिनी ।
देव्याश्छिन्नकबन्धतः पतदसृग्धारां पिबन्ती मुदा
नागाबद्धशिरोमणिर्म्मनुविदा ध्येया सदा सा सुरैः ॥
वामे कृष्णतनुस्तथैव दधती खड्ग तथा खर्पर
प्रत्यालीढ़पदा कबन्धविगलद्रक्त पिबन्ती मुदा ।
सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी
शक्ति' सापि परात्परा भगवती नाम्ना परा डाकिनी ॥
इति ध्यानम् ।
अस्या पूजादिक सर्व्वं षोड़शीवत् कार्य्यम् ॥*॥
मन्त्रान्तरम् ।
तार लज्जाद्वय वज्रवैरोचनीये हूं फट स्वाहा ।
अस्यापि ध्यानपूजादिक सर्व्वं षोड़शीवत् ॥*॥
वियन्मुखन्त्रयुत बिन्दुनादयुक्त तत. प्रिये ! ।
एकाक्षरी महाविद्या त्रैलोक्यवशकारिणी ॥
रूत्रं दीर्घं रुकारः ॥
टटान्तेयं महाविद्या त्रैलोक्यमोहकारिणी ।
ताराद्यन्ता भवत्येषा चतुर्व्वर्गफलप्रदा ॥ * ॥

मन्त्रान्तरं यथा,—
वज्रवैरोचनीये च कूर्च्चयुग्मं सफट्ठठः ।
तारादेषा महाविद्या सर्व्वतेजोऽपहारिणी ॥
त्रैलोक्याकर्षिणी विद्या चतुर्व्वर्गफलप्रदा ।
ध्यानपूजादिकं सर्व्वं षोडशीवत् समाचरेत् ॥*॥
इदानीं षोडशीविद्याप्रशंसामाह ।
तथा सर्व्वप्रयत्नेन सर्व्वोपास्या च षोडशी ।
लक्ष्मीबीजादिका सैव सर्व्वैश्वर्य्यप्रदायिनी ॥
लज्जाद्या स्वर्गभूनागयोषिदाकर्षिणी परा ।
कूर्च्चाद्या सर्व्वजन्तूनां महापातकनाशिनी ॥
वाग्भवाद्या यदा देवी वागीशत्वप्रदायिनी ।
एषा तु षोडशीविद्या वेद्या सप्तदशाक्षरी ॥
श्रीबीजपुटिता सा तु लक्ष्मीवृद्धिकरी सदा ।
लज्जया पुटिता विद्या त्रैलोक्याकर्षिणी परा ॥
कूर्च्चेन पुटिता सर्व्वपापिनां पापहारिणी ।
वाग्बीजपुटिता चैषा वागीशत्वप्रदायिनी ॥
चतुर्व्विधेति विद्यैषा प्रिये ! सप्तदशाक्षरी ।
ताराद्या षोडशी चान्या भवेत् सप्तदशाक्षरी ।
एषा विद्या महाविद्या भुक्तिमुक्तिकरी सदा ।
कमला भुवनेशानी कूर्च्चबीजं सरस्वती ॥
वज्रवैरोचनीये च पूर्व्वबीजानि चोच्चरेत् ।
फट् स्वाहा च महाविद्या वसुचन्द्राक्षरी परा ।
ताराद्येकोनविंशार्णा ब्रह्मविद्यास्वरूपिणी ।
एते विद्योत्तमे देवि । भुक्तिमुक्तिप्रदे शुभे ॥ * ॥
लक्ष्म्यादिपुटिता पूर्व्वा रन्ध्रचन्द्राक्षरी भवेत् ।
चतुर्द्धा च महाविद्या चतुर्व्वर्गफलप्रदा ॥
प्रणवाद्या यदा चैषा भोगमोक्षकरी सदा ।*।
विद्यान्तरं प्रवक्ष्यामि सावधानावधारय ।
हृल्लेखाकूर्च्चवाग्बीजवज्रवैरोचनीये हूं ॥
अस्त्रं स्वाहा महाविद्या चतुर्द्दशाक्षरी मता ।
सर्व्वैश्वर्य्यप्रदा चैषा सर्व्वसंमोहकारिणी ॥*॥
भुवनेशी त्रितत्त्वञ्च वाग्बीजं प्रणवं ततः ।
वज्रवैरोचनीये च फट् स्वाहा च तथापरा ॥
चतुर्द्दशाक्षरी चैषा चतुर्व्वर्गफलप्रदा ।
एषा विद्या महाविद्या जन्ममृत्युविनाशिनी ॥*॥
तन्त्रान्तरे ।
रमा कामस्तथा लज्जा वाग्भव वज्र वै पदम् ।
रोचनीये लज्जाद्वन्द्वमन्त्रं स्वाहासमन्वितम् ॥
इयं सा षोड़शी प्रोक्ता सर्व्वकामफलप्रदा ।
कथिताः सकला विद्याः सारात्सारतराः शुभाः ॥
आसां ऋषिर्भैरवोऽह नाम्ना तु क्रोधभूपतिः ।
सम्राट् छन्दो देवता च छिन्नमस्ता प्रकीर्त्तिता ।
षड्दीर्घभाक्स्वरेणैव प्रणवाद्येन सुन्दरि ! ।
खड्गाद्येन ठठान्तानि षडङ्गानि प्रकल्पयेत् ॥
नारदोषादिकञ्चासां ताः सिद्धाः सुरासुरैः ।
सकलेषु च वर्णेषु सकलेष्वाश्रमेषु च ॥
अन्तिमेषु च वर्णेषु भुक्तिमुक्तिप्रदायिका ।
प्रणवाद्याश्च या विद्या शूद्रादौ न समीरिताः ॥
अस्याश्चैव विशेषोऽयं योषिच्चेत् समुपासयेत् ।
डाकिनी सा भवत्येव डाकिनीभिः प्रजायते ॥
पतिहीना पुत्त्रहीना यथा स्यात् सिद्धयोगिनी ।
इति ते कथितं तत्त्वं रहस्यमखिलं प्रिये ! ॥
अतिस्नेहतरङ्गेन भक्त्या दासोऽसि ते प्रिये ।।
एतासां ध्यानपूजादिकं षोडशीवत् कार्य्यम् ॥*॥
नाभौ शुभ्रारविन्दं तदुपरि कमलं मण्डलं चण्ड-
रश्मेः
संसारस्यैकसारां त्रिभुवनजननीं धर्म्म-
कामोदयाढ्याम् ।
तस्मिन् मध्ये त्रिकोणे त्रितयतनुधरां छिन्नमस्तां
प्रशस्तां
तां वन्दे ज्ञानरूपां निखिलभयहरां योगिनीं
योगमुद्राम् ॥"
इति छिन्नमस्ताप्रकरणम् । इति तन्त्रसारः ॥
छिन्नरुहः, पुं, (छिन्नोऽपि रोहतीति । रुह+
"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।)
तिलकवृक्षः । इति राजनिर्घण्टः ॥
छिन्नरुहा, स्त्री, (छिन्ने सत्यपि रोहतीति । रुह
+कः । अजादित्वात् टाप् ।) गुडूची । इत्य-
मरः । २ । ४ । ८२ ॥ (यथास्याः पर्य्यायाः ।
"वत्सादनी छिन्नरुहा मधुपर्ण्यमृतामरा ।
कुण्डल्यमृतवल्ली च गुडूची चक्रलक्षणा ॥"
इति वैद्यकरत्नमालायाम् ॥)
स्वर्णकेतकी । शल्लकी । इति राजनिर्घण्टः ॥
छिन्नवेशिका, स्त्री, (छिन्नो विच्छिन्नो वेशो यस्याः ।
संज्ञायां कन् । ततष्टापि अत इत्वम् ।) पाठा ।
इति शब्दचन्द्रिका । आकनादी इति भाषा ॥
छिन्ना, स्त्री, (छिद्यतेऽसौ । छिद+क्तः । "अजा-
द्यतष्टाप् ।" ४।१।४। इति टाप् ।) गुडूची । (यथा,
भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"गुडूची मधुपर्णी स्यादमृतामृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥"
छिद्यते कुलात् बहिष्क्रियते इति ।) पुंश्चली ।
इति विश्वः ॥
छिन्नोद्भवा, स्त्री, (छिन्ना विभिन्ना सत्यपि उद्भवति
पुनर्जायते इति । उत्+भू+अच् । यद्वा,
छिन्ने छेदनेऽपि उद्भव उत्पत्तिर्यस्याः ।)
गुडूची । इति राजनिर्घण्टः ॥ (गुडूचीशब्देऽस्या
विवृतिर्ज्ञेया ॥)
छिलिहिण्डः, पुं, (चिलिना वसनखण्डरूपतया
हिण्डते अनाद्रियते इति । हिण्ड अनादरे+
अच् । पृषोदरादित्वात् चस्य छः ।) पाताल-
गरुडवृक्षः । इति भावप्रकाशः ॥
छुछुन्दरी, स्त्री, (छुछुमित्यव्यक्तशब्दो दीर्य्यते
निर्गच्छत्यस्याः । दॄ+"सर्व्वधातुभ्य इन् ।" उणां
४ । ११७ । इति इन् । ततः कृदिकारादिति
ङीष् ।) जन्तुविशेषः । छुँचा इति भाषा । तत्-
पर्य्यायः । गन्धमूषा २ । इति हेमचन्द्रः । ४ ।
३६७ ॥ चिकः ३ वेशन्तनकुलः ४ पुरुषः ५ गन्ध-
मूषिकः ६ । इति त्रिकाण्डशेषः ॥ गन्धमूषिका ७ ।
इति हलायुधः । राजपुत्त्री ८ प्रतिमूषिका ९
सुगन्धिमूषिका १० गन्धशुण्डिनी ११ चिण्ड-
मूषिका १२ । इति राजनिर्घण्टः ॥ गन्धाखुः १३
गन्धनकुलः १४ मुष्कः १५ । इति हारावली ।
(छुछुन्दरिः १६ । इति मार्कण्डेयपुराणम् । १५ । ३१ ॥
"अभ्यङ्गान्नाशयेत क्षिप्रं गण्डमालां सुदारुणाम् ।
छुछुन्दर्य्या विपक्वन्तु यथार्त्तैलवरं ध्रुवम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाधिकारे ॥)
छुट, क शि छेदे । इति कविकल्पद्रुमः ॥ (चुरा-
तुदां च-सकं-सेट् ।) क, छोटयति । शि,
छुटति । अच्छुटीत् । इति दुर्गादासः ॥
छुद्रं, क्ली, (छद+रक् । पृषोदरादित्वात् उत्वम् ।)
प्रतीकरणम् । रश्मिः । इति संक्षिप्तसार
उणादिवृत्तिः ॥
छुप, श औ स्पर्शे । इति कविकल्पद्रुमः ॥ (तुदां-
परं-सकं-अनिट् ।) श, छुपति । औ, छोप्ता ।
इति दुर्गादासः ॥
छुपः, पुं, (छुप+घञर्थे कः ।) क्षुपः । स्पर्शनम् ।
इति मेदिनी । पे, ६ ॥ चपलः । युद्धम् ।
इति विश्वः ॥
छुर, छेदे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
सक-सेट् । छोरति । अच्छोरीत् ॥)
छुर, शि लेपे । इति कविकल्पद्रुमः । (तुदां-परं-
सकं सेट् ।) शि, छुरति, अच्छुरीत् चुच्छोर ।
लेपश्छेदः । इति दुर्गादासः ॥
छुरा, स्त्री, (छुरति रञ्जयति नाशयति दुर्गन्धा-
दिकमिति वा । छुर+कः टाप् च ।) सुधा ।
चूर्णम् । इति हारावली । १३५ ॥
छुरिका, स्त्री, (छुरति छिनत्तीति । छुर+क्वुन् ।
यद्वा, छुरी+स्वार्थे कन् । पूर्व्वह्रस्वश्च ।)
अस्त्रविशेषः । छुरी इति ख्याता । तत्पर्य्यायः ।
शस्त्री २ असिपुत्त्री ३ असिधेनुका ४ । इत्य-
मरः । २ । ८ । ९२ ॥ छुरी ५ । इति भरतः ॥
क्षुरी ६ छूरी ७ कृपाणिका ८ धेनुपुत्त्री ९ ।
इति हेमचन्द्रः ॥ छूरिका १० । इति शब्द-
रत्नावली ॥ (यथा, कथासरित्सागरे । २५ । १४९ ।
"तावत् स्त्रियमपश्यत्ता छित्त्वा च्छुरिकया मुहुः ।
खादन्तीं तस्य मांसानि पुंसः शूलाग्रवर्त्तिनः ॥")
छुरितं, त्रि, (छुर+क्तः ।) खचितम् । इति
जटाधरः ॥ (रञ्जितम् । यथा, माघे । १ । २२ ।
"परस्परेण च्छुरितामलच्छवी
तदेकवर्णाविव तौ बभूवतुः ॥")
छिन्नश्च ॥
छुरी, स्त्री, (छुरति छिनत्तीति । छुर छेदे+
"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।
ततो ङीष् ।) छुरिका । इति भरतः ॥
छूरिकापत्त्री, स्त्री, (छुरिका इव पत्राणि यस्याः ।
स्त्रियां ङीष् ।) श्वेता । इति राजनिर्घण्टः ॥
छूरी, स्त्री, (छुरी+पृषोदरादित्वात् दीर्घः ।)
छुरिका । इति हेमचन्द्रः । ३ । ४४८ ॥
छृद, कि सन्दीपे । इति कविकल्पद्रुमः ॥ (चुरा-
पक्षे भ्वा-पर-सक-सेट् ।) सन्दीपो दीप्ती-
करणम् । कि, छर्द्दयति छर्दति दीपं लोकः ।
इति दुर्गादासः ॥
छृद, उ ञ ध इर् देवने । त्विषि । वमने । इति
कविकल्पद्रुमः ॥ (रुधा-उभं-सकं-सेट् । उदित्वात्
क्त्वावेट् ।) उ, छर्द्दित्वा छृत्त्वा । ञ ध, छृणत्ति

छृन्ते । इर्, अछृदत् अच्छर्दीत् । देवनं जिगीषेच्छायवहारस्तुतिद्युतिक्रीड़ागतयः । इति केचित् । स्वमते तु क्रीड़नमेव अन्यथा त्विषो ग्रहणमनर्थकं स्यात् । त्विषि दीप्तौ । इति दुर्गादासः ॥

छेकः, त्रि, (छ्यति वनवासादिसुखं छिनत्ति नाशयतीति । छो य लूनौ + बाहुलकात् डेकन् ।) गृहासक्तपक्षिमृगौ । तत्पर्य्यायः । गृह्यकः २ । इत्यमरः । २।६।४३ ॥ नागरः । इति मेदिनी । के, २४ ॥ (शब्दालङ्कारविशेषे, पुं । स तु अनुप्रासभेदः । तल्लक्षणं यथा, साहित्यदर्पणे ।१०।४।
"छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा ॥"
तदुदाहरणं यथा, तत्रैव,— [भ्रमरान् ।
"आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ॥"
अत्र गन्धानन्धीति संयुक्तयोः कावेरीवारीत्यसंयुक्तयोः पावनः पवन इति बहूनां व्यञ्जनानां सकृदावृत्तिः । छेको विदग्धस्तत्प्रयोज्यत्वादेष छेकानुप्रासः ॥")

छेकोक्तिः, स्त्री, (छेकानां विदग्धानां उक्तिः ।) वक्रोक्तिः । इति जटाधरः ॥ (विशेषस्तु वक्रोक्तिशब्दे ज्ञेयः ॥)

छेद, त् क छेदे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) अचिच्छेदत् । इति दुर्गादासः ॥

छेदः, पुं, (छिद् + भावे घञ् ।) छेदनम् । इति हेमचन्द्रः । ३ । ३६ ॥ (यथा, कुमारे ।२।४१।
"तेनामरवधूहस्तैः सदयालूनपल्लवाः ।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ॥"
नाशः । अपगतिः । यथा, शाकुन्तले ७म अङ्के ।
"मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं
भयक्रोधयोः ॥" * ॥
छिद्यते इति । छिद् + कर्म्मणि घञ् ।) खण्डम् । इति त्रिकाण्डशेषः ॥ (यथा, कुमारे । १ । ४ ।
"बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम् ॥")

छेदनं, क्ली, (छिद् + भावे ल्युट् ।) अस्त्रेण द्विधा करणम् । तत्पर्य्यायः । वर्द्धनम् २ । इत्यमरः । ३ । २ । ७ ॥ कर्त्तनम् ३ कल्पनम् ४ छेदः ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ११ । १४२ ।
"फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम् ॥"
नाशः । अपनोदनम् । यथा, महाभारते । ३ । १८५ । २४ ।
"श्रुत्वैव तु महात्मानो मनयोऽभ्यद्रवन् द्रुतम् ।
सनत्कुमारं धर्म्मज्ञं संशयच्छेदनाय वै ॥" * ॥)
भेदः । इति मेदिनी । ने, ६५ ॥
(छिनत्तीति । छिद् + ल्यु । छेदके, त्रि । यथा, महाभारते । २ । ५४ । ६ ।
"प्रच्छन्नो वा प्रकाशो वा योगो योऽरिं प्रबाधते ।
तद्वै शस्त्रं शस्त्रविदां न शस्त्रं छेदनं स्मृतम् ॥"
तथाच तत्रैव । १ । ३३ । ३ ।
"ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम् ।
घोररूपं तदत्यर्थं यन्त्रं देवैः सुनिर्म्मितम् ॥")

छेदनीयः, पुं, (छेदितुं योग्यः । छेद + "अर्हे कृत्यतृचश्च ।" ३।३।१६९ । इति अनीयर् ।) कतकवृक्षः । इति राजनिर्घण्टः ॥ (कतकशब्देगुणादयोऽस्य व्याख्याताः ॥) छेद्ये, त्रि ॥ (यथा, सुश्रुते । १ । २७ ।
"अनुत्तुण्डित शल्यानि छेदनीयमुखानि च ॥")

छेदिः, त्रि, (छिनत्तीति । छिद् + "कृपिधिरुहीति ।" उणां ४ । ११८ । इति इन् ।) छेदनकर्त्ता । इत्युणादिकोषः ॥

छेदितः, त्रि, (छेद त् क छेदे + क्त ।) छिन्नम् । इति हेमचन्द्रः ॥ (यथा, काशीखण्डे ।२६।६२।
"छेदिताखिलपापौघा छद्मघ्नी छलहारिणी ॥")

छेमण्डः, पुं, (छम अदने + बाहुलकात् अण्डन् अत एत्वञ्च ।) पितृहीनः । इत्युणादिवृत्तिः । १ । १२८ । छेमडा इति भाषा ॥

छेलुः, पुं, सोमराजी । इति शब्दचन्द्रिका ॥

छो, य लूनौ । इति कविकल्पद्रुमः ॥ (दिवां परं सकं-अनिट् ।) लूनिश्छेदः । य, छ्यति धान्यं लोकः । इति दुर्गादासः ॥

छोटिका, स्त्री, (छोटति यज्ञविघ्नकारिणां मायां छिनत्तीति । छुट + ण्वुल् । टापि अत इत्वञ्च ।) तर्ज्जन्यङ्गुष्ठाङ्गुलिध्वनिः । यथा, "छोटिकाभिर्दशदिग्बन्धनं कृत्वा भूतशुद्धिं कुर्य्यात् ।" इति तन्त्रसारः ॥

छोटी [न्] पुं, (छोटति नीचजातितया स्वल्पीभवतीति । छुट + णिनिः ।) कैवर्त्तः । इति त्रिकाण्डशेषः ॥

छोरणं, क्ली, (छुर + भावे ल्युट् ।) परित्यागः । इति त्रिकाण्डशेषः ॥ छोड़न इति हिन्दी भाषा ॥

छोलङ्गः, पुं, (छुरतीति । छुर + बाहुलकात् अङ्गच् । ततो रस्य लत्वम् ।) मातुलुङ्गः । इति शब्दरत्नावली ॥ टावालेबु इति भाषा ॥

च्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, च्यवते । इति दुर्गादासः ॥

ज

ज, जकारः । स व्यञ्जनाष्टमवर्णः । चवर्गस्तृतीयवर्णश्च । अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "इचुयशानां तालु ।" तथाच शिक्षायाम् ।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥")
अस्योत्पत्तिर्यथा, प्रपञ्चसारे ।
"विसर्गस्तालुगः सोष्मा शं चवर्गञ्च यन्नया ॥"
(बङ्गाक्षरेण) अस्य लेखनप्रकारो यथा, वर्णोद्धारतन्त्रे ।
"ऊर्द्धाधःकुञ्चिता रेखा तासु ब्रह्मेशविष्णवः ।
वाग्देवी कमला नित्या द्विधा मात्रा प्रकीर्त्तिता ॥"
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"जकारं परमेशानि ! या स्वयं मध्यकुण्डली ।
शरच्चन्द्रप्रतीकाशं सदा त्रिगुणसंयुतम् ॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये ! ॥"
तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे ।
"ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने ! ।
नानालङ्कारसंयुक्तैर्भुजैर्द्वादशभिर्युताम् ॥
रक्तचन्दनदिग्धाङ्गीं विचित्राम्बरधारिणीम् ।
त्रिलोचनां जगद्धात्रीं वरदां भक्तवत्सलाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
तस्य पर्य्याया यथा,—
"जः शर्वो नागरः शूली भोगदा विजया स्थिरा ।
जलदेवी जयो जेता धातकी सुमुखी विभुः ॥
लम्बोदरी स्मृतिः शाखा सुप्रभा कर्णिकाधरा ।
दीर्घबाहू रुचिर्हंसो नन्दी तेजाः सुराधिपः ॥
जवनो वेगितो वामो मागधाच्च सदात्मकः ।
त्र्यम्बकश्चेश्वरो वेगी चामोदो मदविह्वलः ॥"
इति नानातन्त्रम् ॥
(धातुपाठेऽनुबन्धविशेषः । यथा, कविकल्पद्रुमे ।
"लो ज्वलादौ जिरश्वत्तृ ष्णामुङ् क्षिमक-
युतः ॥"
छन्दःशास्त्रोक्तमध्यगुरुगणविशेषः । (। ऽ ।)
यदुक्तं छन्दोमञ्जर्य्याम् ।
"जो गुरुमध्यगतो रलमध्यः ॥" इति ॥)

जः, पुं, (जयति जायते वा । जि जन् वा + "अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) मृत्युञ्जयः । जनिः । तातमात्रम् । जनार्द्दनः । इति मेदिनी । जे, १ ॥ विषम् । मुक्तिः । तेजः । पिशाचः । इति शब्दरत्नावली ॥ वेगः । इत्येकाक्षरकोषः ॥

ज, त्रि, (जयति विपक्षमिति । जि + डः ।) जेता । वेगितः । इति शब्दरत्नावली ॥

जकुटं, क्ली, (जं जातं सत् कुटति वक्रीभवतीति । कुट् कौटिल्ये + "इगुपधज्ञेति ।" ३।१।१३५ । इति कः ।) वार्त्ताकुपुष्पम् । इति मेदिनी ॥ टे, ४३ ॥

जकुटः, पुं, (जो जातः सन् कुटतीति । कुट + कः ।) मलयपर्व्वतः । कुक्कुरः । इति मेदिनी ॥ टे, ४३ ॥

जख, इ म रु दाने । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ, जङ्खते । न मध्यपाठे नैवेष्टसिद्धे इदनुबन्धो वैदेशूचारणभेदार्थः । म, अजङ्खि अजाङ्खि जङ्खं जङ्खं जाङ्खं जाङ्खं अनुबन्धबलादनुपधाया अपि दीर्घः । चमते तु अत्र दीर्घविधिरुभयी नापेक्षते । रु, जङ्खते । इति दुर्गादासः ॥

जक्ष, च लु ष भक्षे । हासे । इति कविकल्पद्रुमः ॥ (अदां-परं-भक्षे सकं-हासे-अकं-सेट् ।) केचित्तु विष्णुपुराणे यक्षराक्षसोत्पत्तिप्रसङ्गे यक्ष्यतामिति यैरुक्तं ते वै यक्षास्तु यक्षणादिति भक्षणार्थस्यैव यक्षशब्दव्युत्पादनादेतमन्तःस्थादिं मन्यन्ते ॥ तत्र अमरटीकायां धर्म्म-

जकारस्यान्तःस्थयकारश्छान्दसो द्रष्टव्य इत्युक्ता वर्णादिरयं निर्णीतः। च, जक्षति। सु च, जक्षिथ। इति दुर्गादासः॥

जक्षणं, क्ली, (जक्ष+भावे ल्युट्।) भक्षणम्। इति हेमचन्द्रः। ३। ८७॥

जक्ष्मः, पु, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+बाहुलकात् मन्।) जक्ष्मा। इत्यमरटीका॥ (केचित्तु "अर्त्तिस्तुसुहुसृति।" १। १३६। उणादिसूत्रेण यच पूजायामिति धातोर्मन्प्रत्ययनिर्द्देशात् अन्तःस्थयकारादिरिति मन्यन्ते॥)

जक्ष्मा, [न्] पु, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+"सर्व्वधातुभ्यो मनिन्।" उणा। ४। १४४। इति मनिन्।) यक्ष्मरोगः। इत्यमरटीकायां भरतः॥

जगच्चक्षुः, [स्] पुं, (जगतां भुवनानां चक्षुरिव प्रकाशकत्वात्।) सूर्य्यः। इति हेमचन्द्रः। २। १२॥ (यथा, काशीखण्डे। ४६। ४४।
"इति काशीप्रभावज्ञो जगच्चक्षुस्तमोनुदः।
कृत्वा द्वादशधात्मानं काशीपुर्य्यां व्यवस्थितः॥")

जगत्, क्ली, (गच्छतीति। गम+"द्युतिगमिजुहोतीनां द्वे च।" ३। २। १७८। इत्यस्य वार्त्ति इति क्विपि द्वित्वे च "गमः क्वौ।" ६। ४। ४०। इति मलोपे तुक्।) विश्वम्। तत्पर्य्यायः। जगती२ लोकः३ विष्टपम्४ भुवनम्५। इत्यमरः। २। १। ६॥ विष्टपम्६। इति तट्टीका॥ (यथा, मनुः। १। ५२।
"यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति॥"
गच्छति इतस्ततो वातीति।) वायौ, पु। (गच्छन्त्यस्मिन् जीवा इति। महादेवः। यथा, महाभारते। १३। १७। १५१।
"विमुक्तो मुक्ततेजाश्च श्रीमान् श्रीवर्द्धनो जगत्॥")
जङ्गमे त्रि। इति मेदिनी। ते, १०८॥

जगत्कर्त्ता, [ऋ] पुं, (करोतीति। कृ+तृच्। ततो जगतः कर्त्ता कारकः।) ब्रह्मा। इति हेमचन्द्रः। २। १२६॥

जगत्प्राणः, पु, (जगतां विश्वस्थजीवानां प्राणो जीवनम्।) वायुः। इत्यमरः। १। १। ३५॥

जगत्साक्षी, [न्] पुं, (जगतां भुवनानां साक्षी कर्म्मद्रष्टा।) सूर्य्यः। इति हेमचन्द्रः। २। १२॥

जगती, स्त्री, (गच्छति कार्य्यत्वात् नश्वरा भवतीति। गम+"वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणा २। ८४। इति अतिप्रत्ययेन निपातनात् साधुः। ततः शतृतुल्यत्वात् "उगितश्च।" ४। १। ६। इति ङीप्।) भुवनम्। (यथा, रामायणे। २। ६६। ११।
"स्वप्नेऽपि सागरं शुष्कं चन्द्रञ्च पतितं भुवि।
उपरुद्धाञ्च जगतीं तमसेव समावृताम्॥")
पृथ्वी। (यथा, मार्कण्डेये। ८। २२।
"तमायान्तं ततो देवी सर्व्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्वा शूलेन वक्षसि॥")
जनः। छन्दोविशेषः। इति मेदिनी। ते, १०८॥ (सा च द्वादशाक्षरा वृत्तिः। यथा, छन्दोमञ्जर्य्यां १ स्तवके।
"त्रिष्टुप् च जगती चैव तथातिजगती मता॥"
अस्या उदाहरणादीनि छन्दःशब्दे द्रष्टव्यानि॥) जम्बूवप्रम्। इति हेमचन्द्रः॥

जगदम्बा, स्त्री, (जगतामम्बा माता।) दुर्गा। यथाह कश्चित्।
"अदूरे जगदम्बायाः शारदीयो महोत्सवः॥"
"जगदम्बापदद्वन्द्वमापदां स्वयसाधनम्॥"
इति शूलपाणिः॥
अपि च ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्याये।
"विष्णुमायां भगवतीं दुर्गां दुर्गतिनाशिनीम्।
प्रकृतिं जगदम्बाञ्च पतिपुत्त्रवतीञ्च च॥"

जगदम्बिका, स्त्री, (जगतां अम्बा जननी। ततः स्वार्थे कन्। टापि अत इत्वम्।) दुर्गा। यथा,
"सृष्टिस्थितिविनाशानां विधात्री जगदम्बिका।
अहं सर्व्वान्तरस्था च संसारार्णवतारिणी॥"
इति भगवतीगीतायां ५ अध्यायः॥
(यथा च देवीभागवते। १। ७। ४६।
"कामं कुरुष्व वधमद्य ममैव मात-
र्दुःखं न मे मरणजं जगदम्बिकेऽत्र॥")

जगदाधारः, पु, (जगतामाधारः आश्रयः।) वायुः। इति शब्दचन्द्रिका॥ जगदाश्रयः। यथा,
"कालो हि जगदाधारः।" इति स्मृतिः।

जगदीशः, पु, (जगतामीशो नियन्ता।) विष्णुः। इति शब्दरत्नावली॥ (यथा, पाद्मे उत्तरखण्डे। १११ अध्याये।
"सर्व्वान्तर्यामी जगदीशश्चानूरमर्द्दनः प्रभुः॥"
विधाता। यथा, कुमारे। २। ९।
"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥"
स्वनामख्यातपण्डितविशेषः। स च न्यायशास्त्रटीकाद्याख्यार्णवादिग्रन्थप्रणेता अस्य जन्मस्थानं नवद्वीपः॥)

जगद्गौरी, स्त्री, (जगत्सु मध्ये गौरी।) मनसादेवी। इति शब्दरत्नावली॥

जगद्धात्री, स्त्री, (जगतां धात्री विधात्री।) दुर्गाविशेषः। अस्याः पूजायाः कालो विधिश्च यथा, निगमकल्पसारज्ञानसारस्वते ग्रन्थे दुर्गाकल्पे।
श्रीशिव उवाच।
"प्रसीद जगतां मातर्ज्जगन्निस्तारकारिणि।
अतएव महेशानि! तवाहं शरणागतः॥
त्वया यत् कथितं पूर्व्वं तत् सर्व्वञ्च श्रुतं मया।
जगद्धात्री महादुर्गा चतुर्व्वर्गफलप्रदा॥
तस्याः पूजाविधिदिनं कालं तत्र प्रकाशितम्।
तदेव कथयेशानि! श्रोतुमिच्छामि साम्प्रतम्॥
श्रीदेव्युवाच।
कथयामि महेशान! सावधानोऽवधारय।
तस्याः पूजाविधिदिनं समयं भावभेदतः॥
कार्त्तिके शुक्लपक्षे च या दुर्गानवमी तिथिः।
सा प्रशस्ता महादेव! महादुर्गाप्रपूजने॥
प्रातश्च सात्त्विकी पूजा मध्याह्ने राजसी मता।
सायाह्ने तामसी पूजा त्रिविधा परिकीर्त्तिता॥
सप्तम्यादिभिर्द्देव! इति त्रैकालिकी मता।
अथान्यत् संप्रवक्ष्यामि शृणुष्व परमेश्वर!॥
सप्तम्यादिनवम्यान्तं पूजाकालमितीरितम्।
त्रिदिने त्रिविधा पूजा दशम्याञ्च विसर्ज्जयेत्॥
पूजापरेऽह्नि देवेश! तत्राप्यत्र विसर्ज्जनम्।
बोधितायाः प्रकारेण तत्र पूजा प्रकीर्त्तिता॥
श्रीशिव उवाच।
त्रिसन्ध्याव्यापिनी सा तु यदि स्यान्नवमी तिथिः।
त्रिकाले त्रिविधा पूजा कथं देया जगन्मयि!॥
कथयस्व महेशानि! इति मे संशयो हृदि॥
श्रीदेव्युवाच।
सा प्रातर्व्यापिनी यत्र वासरे नवमी तिथिः।
त्रिसन्ध्यं पूजयेत्तत्र वासरे जगदम्बिकाम्॥
मुहूर्त्तव्यापिनी चापि तत्र ग्राह्या महेश्वर!।
एककाले त्रिधा पूजा साधको नैव कारयेत्॥
इति ते कथितं वत्स! किमन्यत् श्रोतुमिच्छसि।
कथयिष्यामि तद्भक्त्या तव प्रीत्या त्रिलोचन!॥"
श्रीपार्व्वत्युवाच।
"दशम्यां बलिदानन्तु निषिद्धं जगदीश्वर!।
कथं त्रिकालं पूजा सा सम्भवेत् परमेश्वर!॥
श्रीशिव उवाच।
नवमीतिथिमाश्रित्य यत्र पूजाविधिर्भवेत्।
निषिद्धं बलिदानन्तु दशम्यां तत्र सुन्दरि!॥
नवमीदिनमाश्रित्य पूजाविधिरिहोदितः।
दशम्यां बलिदानन्तु निषिद्धं नात्र पार्व्वति!॥
ज्ञानात्तत्सारे पूर्व्वं पूजाप्रकारं उक्तः।
"मुहूर्त्तव्यापिनी चापि प्रातश्चेन्नवमी तिथिः।
तद्दिने पूजनं कार्य्यं त्रिसन्ध्यं वरवर्णिनि!॥
त्रिकालं पूजयेत्तत्र नैककाले कदाचन॥"
अथ कात्यायनीतन्त्रे अष्टसप्ततिपटले।
"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च।
उभयस्वर्द्धोदिते भानुर्दुर्गामाराध्य यत्नवान्॥
पुत्त्रारोग्यबलं लेभे लोकसाक्षित्वमेव च।
तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम्॥"
शक्तिसङ्गमतन्त्रे।
"कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम्।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत्॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः।
पूजयित्वा परदिने प्रतिमां तां विसर्ज्जयेत्॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः।
पुत्त्रपौत्त्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी॥"
तन्त्रान्तरे।
"कुजवारे युगाद्यायां नवम्यान्तु जगत्प्रसूः।
प्रादुर्भूता महेशानी तत्र तां परिपूजयेत्॥"
तन्त्रान्तरे।
"त्रिकालं पूजयेद्दुर्गां मूलेनैककालेन च।
नानारत्नविधानेन गीतवाद्यपुरःसरम्॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः।
कृत्वैव साधकश्रेष्ठो लभेद्राज्यमकण्टकम्॥"

योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्यान्तु विशेषतः ।
प्रगल्भायान्तु जगद्धात्रीं पूजयेद्दीपमालया ॥"
आगमतत्त्वसारे ।
"कार्त्तिकेऽमलपक्षे तु नवम्यां भौमवासरे ।
आविर्भूता जगद्धात्री युगादौ दैत्यनाशिनी ॥"
उत्तरकामाख्यातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि ।
त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्पत्प्रवृद्धये ॥"*॥
कुब्जिकातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥"*॥
दुर्गाकल्पे विद्योत्पत्तिः ।
"कार्त्तिके शुक्लपक्षेऽह्नि भौमवारे जगत्प्रसूः ।
सर्व्वदेवहितार्थाय दुर्वृत्तशमनाय च ॥
आविरासीज्जगच्छान्त्यै युगादौ परमेश्वरी ॥"
व्रतकालविवेकधृतवचनम् ।
"कार्त्तिकेऽमलपक्षस्य त्रेतायां नवमेऽहनि ।
पूजयेत्तां जगद्धात्रीं सिंहपृष्ठे निषेदुषीम् ॥"*॥
स्मृतिः ।
"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥"*॥
कृत्यतत्त्वार्णवे ।
"कार्त्तिकेऽमलपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये तत्र पूजाविधिरिहोदितः ॥"*॥
भविष्यपुराणकृत्यतत्त्वार्णवयोः ।
"कार्त्तिके शुक्लपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये काष्ठात्मिका परदिने यदि ॥
तत्र पूजादिकं कुर्य्यात् पिण्डनिर्व्वपणादृते ॥"
स्मृतिसागरे
"कार्त्तिकस्य युगाद्यायामृद्धिकामोऽर्च्चयेदुमाम् ॥"
इति जगद्धात्रीपूजाकालव्यवस्था ॥ * ॥ * ॥
अथ जगद्धात्रीविद्योत्पत्तिः ।
श्रीपार्व्वत्युवाच ।
"भगवन् ! प्राणनाथेश ! सर्व्वतत्त्वविशारद ! ।
श्रुता कात्यायनीविद्यासमुत्पत्तिस्त्रिलोचन ! ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिर्भवेद्यतः ।
तत् सर्व्वं ब्रूहि भगवन् ! कृपया परमेश्वर ! ॥
यदि न कथ्यते देव ! विमुञ्चामि तदा तनुम् ॥
श्रीशिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि रहस्यं परमाद्भुतम् ।
यत् श्रुत्वा लभते देवि ! सौभाग्यं सुखमुत्तमम् ॥
पुरा पुरन्दरसखाः खेश्वरत्वाभिमानिनः ।
प्राहुः किमीश्वरोऽस्मत्तोऽस्मदतिरिक्तः सुरानिति ॥
अथ दुर्गा जगन्माता नित्या चैतन्यरूपिणी ।
एतेषां धर्म्मसेतूनामिन्द्रादीनां नियम्यताम् ॥
करिष्यामीति निश्चित्य ज्योतीरूपं दधात्यलम् ।
तेषामाविरभूद्दुर्गा जगद्धात्री जगन्मयी ॥
कोटिसूर्य्यप्रतीकाशा चन्द्रकोटिसमप्रभा ।
ज्वलन्तं पर्व्वतमिव सर्व्वलोकभयङ्करी ॥
तद्दृष्ट्वा सुराः सर्व्वे भयमापुर्महौजसः ।
किमेतदिति निश्चेतुं प्रक्रान्ते ह्यभवन् सुराः ॥
वायुमाहुः समाहूय किमेतत् परमाद्भुतम् ॥
विजानीहि मरुद्वीर ! मातरिश्वा दिशःपते ! ॥
ततो वायुर्द्रुतं तत्र गतस्तेजोऽन्तिकं ततः ।
समन्तिकमुपायात प्राह तेजोमयी ततः ॥
बलवान् कस्त्वमायातो वीर्य्यं किञ्चास्ति वा त्वयि ।
आदातुं शक्यते सर्व्वं पृथिवीतलसम्भवम् ॥
इति प्रत्युक्तवान् वायुं चाथ तत्रैव तिष्ठति ।
आदत्स्वैतत् तृणमिति निदधौ वायवे तृणम् ॥
वायुः सर्व्वप्रयत्नेन नादातुं तत् क्षमोऽभवत् ।
ततो देवाः प्राहुरग्निं भीता उद्विग्नमानसाः ॥
अग्ने ! एतद्विजानीहि किमेतत् कर्म्म चाद्भुतम् ।
इत्युक्तो देवतावृन्दैरग्निस्तेजोऽन्तिकं गतः ॥
अमरो जातवेदा वा तेजो वागितुवाच तम् ।
स प्रोक्तवानग्निरस्मि सर्व्वदाहकशक्तिकः ॥
दहैतत् तृणमत्यर्थमिति तस्मै तृणं ददौ ।
अग्निः सर्व्वप्रयत्नेन दग्धुं नैतत् क्षमोऽभवत् ॥
ततो निवृत्ते वह्निर्भूत्वा सोऽपत्रपान्वितः ।
एकत्रस्थाः सुराः सर्व्वे मन्त्रयामासुरुत्तमम् ॥
इयमेवेश्वरी नूनं स्तोष्यामो नेश्वरा वयम् ।
इति निश्चित्य सुधियस्तुष्टुवुः परमेश्वरीम् ॥
प्राहुर्देवगणाः सर्व्वे त्वमीशा नेश्वरा वयम् ।
ईश्वरत्वाभिमानेन यदस्माकं सुदुष्कृतम् ॥
क्षमस्वार्हसि तत् सर्व्वं कृपया जगदम्बिके ! ।
तव रूपं सुगोप्यं यन्मङ्गलं सर्व्वमङ्गलम् ॥
तद्द्रष्टुं वयमिच्छामो देहि दर्शनमुत्तमम् ।
इत्युक्तानां सुश्रेष्ठानामाविरासीच्छिवाम्बरे ॥
तेजस्यन्तर्हिते तस्मिन् चमत्कारकलेवरे ।
मृगेन्द्रोपरि सुस्मेरा सर्व्वालङ्कारभूषिता ॥
चतुर्भुजा महादेवी रक्ताम्बरधरा शुभा ।
बालार्कसदृशीदेहा नागयज्ञोपवीतिनी ॥
त्रिनेत्रा कोटिचन्द्राभा देवर्षिमुनिसेविता ।
दर्शयामास देवानामेवं रूपं जगन्मयी ॥
ततस्तां तुष्टुवुर्देवा जगद्धात्रीं महेश्वरीम् ।
वरं प्रापुः सुरगणा यथेष्टं त्रिदशालये ॥
तत्रैवान्तर्हिता देवी महादुर्गा जगन्मयी ।
इति ते कथितं भद्रे ! विद्योत्पत्तिं सुदुर्लभाम् ॥"
इति कात्यायनीतन्त्रे ७६ पटलः ॥ * ॥
श्रीशिव उवाच ।
"अथ दुर्गामनुं वक्ष्ये शृणुष्व हरवल्लभे ! ।
यस्य प्रसादमात्रेण मुच्यते भवबन्धनात् ॥
यान्तवर्णं समुद्धृत्य वामकर्णं विभूषितम् ।
इन्दुबिन्दुसमायुक्तं बीजं परमदुर्लभम् ॥
चतुर्व्वर्गप्रदं साक्षान्महापातकनाशनम् ।
एकाक्षरीसमा नास्ति विद्या त्रिभुवने प्रिये ! ॥
कूर्च्चाद्यां वा जपेद्विद्यां तदन्ते वह्निसुन्दरी ।
लज्जाद्यां वा जपेद्विद्यां फडन्तां वा जपेत् सुधीः ॥
वधूबीजयुतां वापि स्वाहान्तां वा जपेत् पुनः ।
लक्ष्म्याद्यां वा जपेद्विद्यां चतुर्व्वर्गफलाप्तये ॥
वाग्भवाद्यां जपेद्वापि प्रणवाद्यां जपेत् पुनः ।
कामबीजादिकां वापि फडन्तां वा जपेत् पुनः ॥
एकाक्षरी विविधा विद्या कथिता मयका पुरा ।
विना गन्धैर्विना पुष्पैर्विना होमपुरःसरैः ॥
प्राणायामं विना देवि ! जपमात्रेण सिद्धिदा ।
मन्त्रस्यास्य ऋषिर्देवि ! नारदः परिकीर्त्तितः ॥
गायत्री छन्द आख्यातं जगद्धात्री च देवता ।
चतुर्व्वर्गप्रदा दुर्गा सर्व्वसत्त्वेषु संस्थिता ॥
दीर्घस्वरसमायुक्तनिजबीजानि पार्व्वति ! ।
विन्यसेदात्मनो देहे हृदयादिषु शङ्करि ! ॥
पूर्व्ववन्न्यासवर्णांस्तु पूर्व्ववत् कर्म्म चाचरेत् ।
कालीवद्वापरेद्विद्यां जपेद्विद्यामहर्न्निशम् ॥
लक्षद्वादशकं देवि ! पुरश्चरणमीरितम् ।
यथास्थाने यथाकाले यथाचारविधानतः ॥
प्रजपेत् परया भक्त्या दुर्गां दुर्गतिनाशिनीम् ॥*॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व नगनन्दिनि ! ॥
सिंहस्कन्धाधिसमारूढ़ां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्ब्बाणलोचनत्रितयान्विताम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशीतनुम् ॥
नारदाद्यैर्मुनिगणैः सेवितां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालमृणालिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ॥
प्रफुल्लकमलारूढ़ां ध्यायेत्तां भवगेहिनीम् ।
एवं ध्यात्वा जगद्धात्रीं पूर्व्वोक्तपूजनं चरेत् ॥
यन्त्रमस्याः प्रवक्ष्यामि शृणुष्व हरवल्लभे ! ।
त्रिकोणत्रितयस्याद्यौ त्रैविम्बसहितस्ततः ॥
अष्टपत्रं ततो लिख्य शिरोरेखासहितं ततः ।
चतुर्भूपुरसंयुक्तं विलिखेद्धिषिगासुना ॥
तत्र तां पूजयेद्देवीं स्थूलप्रकृतिरूपिणीम् ।
प्रभाद्याः शक्तयः पूज्या गन्धाद्यैर्नवकोणके ॥
प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी पुनः ।
सुप्रभा विजया सर्व्वसिद्धिदा नव शक्तयः ॥
वीणाद्याः पूजयेत्तास्तु रक्तचन्दनदूर्व्वकैः ।
शङ्खपद्मनिधी पूज्यौ वामदक्षिणयोगतः ॥
पूजयेत् परया भक्त्या रक्तचन्दनदूर्व्वकैः ।
अर्घ्यदानं ततः कुर्य्यात् पूजान्ते नगनन्दिनि ! ।
व्यङ्गादतिः पुनः पूज्या पत्रकोणेषु भास्वरः ।
वज्राद्यायुधसंयुक्ता भूपुरे लोकनायकाः ॥"
इति कात्यायनीतन्त्रे ७७ पटलः ॥ * ॥
श्रीशिव उवाच ।
"पूजा विधिविशेषेण चतुर्व्वर्गफलाप्तये ।
कर्त्तव्या या तु दुर्गायास्तां शृणुष्व शुभानने ! ॥
अष्टम्याञ्च चतुर्द्दश्यां नवम्यां वापि यत्नतः ।
यः पूजयेन्महादुर्गां सोऽभीष्टफलमाप्नुयात् ॥
पौर्णमास्याममायां वा रविसंक्रमणे तथा ।
शनिभौमदिने चैव पूजयेत् परमेश्वरीम् ॥
सुखं सौभाग्यमारोग्यमैश्वर्य्यं लभते ध्रुवम् ।
शनिभौमदिने चैव यदि स्यादष्टमी तिथिः ॥
तत्र पूज्या जगद्धात्री पुत्रपौत्रधनप्रदा ।
सोमवारेऽप्यमावास्या मघाश्रवणसंयुता ॥
उत्तरा सप्तमीयुक्ता चादित्याहे च पार्व्वति ! ।
चतुर्थ्यङ्गारवारे च रोहिणीसंयुता यदि ॥
गुर्व्वष्टम्यां तथा स्वाती यदि स्यात् परमेश्वरि ! ।
एषु पूजा महादेव्याः कर्त्तव्या सर्व्वसिद्धये ॥
मधुमासे सिताष्टम्यां वैशाखत्रितयेऽहनि ।

पौर्णमास्यां तथा ज्यैष्ठे अमायाञ्च महेश्वरि ! ॥
मिथुनेऽर्के द्वितीयायां श्रावणे द्वादशीदिने ।
भाद्रे मास्यसिताष्टम्यां आश्विने शुक्लपक्षके ॥
सप्तम्यामेव चाष्टम्यां नवम्याञ्च विशेषतः ।
अमायां कार्त्तिके चैव नवम्यां शुक्लपक्षके ॥
नक्तं मार्गशिरे भूते पौषेऽष्टम्यां सितेतरे ।
माघे च सितपञ्चम्यां फाल्गुन्यां च सुरेश्वरि ! ॥
एषु द्वादशमासेषु तिथिष्वेतासु पार्व्वतीम् ।
पूजयेत् परया भक्त्या यथाविभवविस्तरैः ॥
राजराजेश्वरो भूत्वा वसेत् कल्पायुतं दिवि ।
पुत्रपौत्रधनर्द्धीनामधिपो जायते ऽचिरात् ॥
अन्ते देवीपुरं याति भुक्त्वा भोगान् यथेप्सि-
तान् ॥

श्रीपार्व्वत्युवाच ।

देवदेव ! महादेव ! विश्वनाथ ! महेश्वर ! ।
श्रुत्वा तव मुखाम्भोजाद्दुर्गापूजा महाफला ॥
केन वा पूजिता देवी कस्य वा किञ्च सिध्यति ।
केन प्रकाशिता मूर्त्तिस्तत् सर्व्वं कथय प्रभो ! ॥

श्रीशिव उवाच ।

रामरावणयोर्युद्धे दुर्गा रामेण पूजिता ।
अवधीद्रावणं राम इषे मासि प्रपूजनात् ॥
तेन लोकाश्चरिष्यन्ति दुर्गायाः शारदोत्सवम् ।
एवमाराध्य देवेशीमिन्द्रजिद्रावणात्मजः ॥
अभवत् कार्त्तिके यो वै दुर्गामेव समर्च्चयन् ।
अमायां कार्त्तिके मासि तारकासुरनाशकः ॥
कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उमस्यर्द्धोदितो भानुर्दुर्गामाराध्य यत्नवान् ॥
पुत्रारोग्यवरं लेभे लोकसाक्षित्वमेव च ।
तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि ॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ।
एवं मार्गशिरे मासि वृषराशिगते विधौ ॥
चतुर्द्दश्यां निशायान्तु चन्द्रः संपूज्य पार्व्वतीम् ।
महापापाद्विमुक्तोऽसौ राजेशत्वमवाप च ॥
तेन मार्गशिरे मासि चतुर्द्दश्यां प्रपूजयेत् ।
इन्द्रत्वमेवमिन्द्रोऽसौ लेभे दुर्गां समर्च्चयन् ॥
ब्रह्मत्वमपि विष्णुत्वं रुद्रत्वञ्च महेश्वरि ! ।
देवत्वं सर्व्वदेवानामभवच्चण्डिकार्च्चनात् ॥
भूतं भव्यं भविष्यं यत् स्थावराणि चराणि च ।
सर्व्वं दुर्गाप्रभावेण स्वस्वभोगमवाप्नुयुः ॥
विना दुर्गां महेशानि ! न किञ्चिदपि वर्त्तते ।
इति ते कथितं देवि ! संक्षेपेण तवाग्रतः ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिं सुदुर्लभाम् ॥”

इति कात्यायनीतन्त्रे ७८ पटल. ॥

(सरस्वती । यथा, मार्कण्डेये । २३ । ३० ।
“जगद्धात्रीमहं देवीमारिराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥”)

जगद्बलः, पुं, (जगतां बलं यस्मात् ।) वायुः । इति त्रिकाण्डशेषः ॥

जगद्योनिः, पुं, (जगतां योनिरुत्पत्तिस्थानम् ।) शिवः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ७ । २०० । १३ ।
“जगद्योनिं जगद्बीजं जयिनं जगतो गतिम् ॥”)
विष्णुः । इति तस्य सहस्रनाम ॥ (यथा, विष्णुपुराणे । १ । १२ । ३२ ।
“ते समेत्य जगद्योनिमनादिनिधनं हरिम् ॥”
केचित्तु हरिविशेषणं कल्पयन्ति ॥)
ब्रह्मा । (यथा, कुमारे । २ । ६ ।
“जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ॥”)
पृथिव्यां स्त्री । इति शब्दचन्द्रिका ॥

जगद्वहा, स्त्री, (जगन्ति वहति धारयतीति । वह + अच् । अजादित्वात् टाप् ।) पृथिवी । इति त्रिकाण्डशेषः ॥

जगद्विनाशः, पु, (जगतां विनाशो ध्वंसः अखिलकार्य्यनाश इत्यर्थः यस्मिन् ।) युगान्तः । इति हलायुधः ॥ (प्रलयकाले च अखिलकार्य्यशून्यत्वं यथाह मनुः । १ । ५२—५४ ।
“यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति ॥
तस्मिन् स्वपिति तु स्वस्थे कर्म्मात्मानः शरीरिणः ।
स्वकर्म्मभ्यो निवर्त्तन्ते मनश्च ग्लानिमृच्छति ॥
युगपत्तु प्रलीयन्ते तदा तस्मिन् महात्मनि ।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः ॥”)

जगन्नाथः, पु, (जगतां नाथः ईश्वरः ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते ।१।४।३६।
“देवदेव ! जगन्नाथ ! भूतभव्यभवत्प्रभो ! ।
तपश्चरसि कस्मात्त्वं किं ध्यायसि जनार्द्दन ! ॥”)
पुरुषोत्तमक्षेत्रम् । यथा,

मुनय ऊचुः ।

“पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनम् ।
यत्रास्ते दारवतनुः श्रीशो मानुषलीलया ॥
दर्शनान्मुक्तिदः साक्षात् सर्व्वतीर्थफलप्रदः ।
तन्नो विस्तरतो ब्रूहि तत् क्षेत्रं केन निर्म्मितम् ॥
ज्योतिःप्रकाशो भगवान् साक्षान्नारायणः प्रभुः ।
कथं दारुमयस्तस्मिन्नास्ते परमपूरुषः ॥

जैमिनिरुवाच ।

एतत् क्षेत्रवरञ्चास्य वपुर्भूतं महात्मनः ।
स्वयं वपुष्मान् यत्रास्ते स्वनाम्नाख्यापितं हि तत् ॥
यथा चाशुदिनं देवा. सिद्धाः ब्रह्मर्षयस्तथा ।
समर्च्चितुमिहायान्ति देवेशं न तथान्यत ॥
अहो ! तत् परमं क्षेत्रं विस्तृतं दशयोजनैः ।
तीर्थराजस्य सलिलादुत्थितं वालुकाचितम् ॥
नीलाचलेन महता मध्यस्थेन विराजितम् ।
एकं स्तनमिवावन्याः सुदूरात् परिभावितम् ॥”
ब्रह्माणं प्रति विष्णुवाक्यम् ।
“सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ।
स प्रदेशः पृथिव्यां हि सर्व्वतीर्थफलप्रदः ॥
एकाम्रकाननाद्यावद्दक्षिणोदधितीरभूः ।
पदात् पदात् श्रेष्ठतमः क्रमेण परिकीर्त्तितः ॥
सिन्धुतीरे च यो ब्रह्मन् ! राजते नीलपर्व्वतः ।
पृथिव्यां गोपितं स्थानं तव चापि सुदुर्लभम् ॥
सुरासुराणां दुर्ज्ञेयं माययाच्छादितं मम ।
सर्व्वसङ्गपरित्यक्तस्तत्र तिष्ठामि देहभृत् ॥
स्वालयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ।
नीलाद्रेरन्तरस्ति कल्पन्यग्रोधमूलतः ॥
वारुण्यां दिशि यत् कुण्डं रौहिणं नाम विश्रुतम् ॥
तत्तीरे निवसन्तो मां पश्यन्तश्चर्म्मचक्षुषा ॥
तदम्भसा क्षीणपापा मम सायुज्यमाप्नुयुः ॥
व्रतेषु तीर्थेषु च यज्ञदानयोः
पुण्यं यदुक्तं विमलात्मना हि ।
अहर्निवासाल्लभते च सर्व्वं
निमेषवासात् खलु चाश्वमेधिकम् ॥

जैमिनिरुवाच ।

उदकार्थः समागत्य कुतश्चिद्वायसोत्तमः ।
कारणोदकसम्पूर्णे तस्मिन् कुण्डे निमज्जित ॥
विलोक्य माधवं नीलरत्नकान्तिं कृपानिधिम् ।
काकदेहं समुत्सृज्य लुठमानं मुहुः क्षितौ ॥
शङ्खचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः ॥”
यमं प्रति लक्ष्मीवाक्यम् ।
“पञ्चक्रोशमिदं क्षेत्रं समुद्रान्तर्व्यवस्थितम् ।
त्रिक्रोशं तीर्थराजस्य तटभूमौ सुनिर्म्मलम् ॥
सुवर्णवालुकाकीर्णं नीलपर्व्वतशोभितम् ।
योऽसौ विश्वेश्वरो देवः साक्षान्नारायणात्मकः ॥
संयम्य विषयग्रामं समुद्रतटमास्थितः ।
उपासितुं जगन्नाथं चतुःषष्ट्युत्तमः प्रभुः ॥
यमेश्वर इति ख्यातो यमसंयमनाशनः ।
यं दृष्ट्वा पूजयित्वा तु कोटिलिङ्गफलं लभेत् ॥
सीमा प्रतीची क्षेत्रस्य शङ्खाकारस्य मूर्द्धनि ।
शङ्खाग्रे नीलकण्ठः स्यादेतत् क्रोशं सुदुर्लभम् ॥
परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै ।
शङ्खस्योत्तरभागस्तु समुद्रोदकसंप्लुतः ॥
यत्सम्पर्कात् समुद्रोऽत्र तीर्थराजत्वमागतः ।
यथायं भगवान्मुक्तिप्रदो दृष्टिपथं गतः ॥
तथेदं मरणात् क्षेत्रं सिन्धुस्नानाद्विमुक्तिदम् ।
चिच्छेद ब्रह्मणः पूर्व्वं रुद्र. क्रोधात्तु पञ्चमम् ॥
तच्छिरो दुस्त्यजं गृह्णन् ब्रह्माण्डं परिबभ्रमे ।
तत्रागतो यदा ब्रह्मकपालं परिमुक्तवान् ॥
कपालमोचनं तीर्थं द्वितीयावर्त्तसंस्थितम् ।
तस्य दक्षिणपार्श्वे तु मरणं भवमोचनम् ॥
तृतीयावर्त्तसीमायां शक्तिं मे विमलाह्वयाम् ।
जानीहि धर्म्मराज ! त्वं भुक्तिमुक्तिफलप्रदाम् ॥
नाभिदेशे स्थितं ह्येतत् त्रयं कुण्डं वटो विभुः ।
कपालमोचनं यावदर्द्धाशनी प्रतिष्ठिता ॥
मध्यं शङ्खस्य जानीयात् सुगुप्तं चक्रपाणिना ।
तां दृष्ट्वा प्रणमेद्यस्तु भोगान् सोऽश्नाति शाश्व-
तान् ॥
सिन्धुराजस्य सलिलात् यावन्मूलं वटस्य वै ।
कीटपक्षिमनुष्याणां मरणान्मुक्तिदो मतः ॥
अन्तर्व्वेदी त्वियं पुण्या वाञ्छ्यते त्रिदशैरपि ।
यत्र स्थितान् हि पश्यन्ति सर्व्वांश्चक्रानधारिण. ॥
कामाख्या क्षेत्रपालश्च विमला चाम्बरा स्थिता ।
साक्षाद्ब्रह्मस्वरूपोऽसौ नृसिंहो दक्षिणे विभो. ॥
अन्तर्व्वेदी रक्षणार्थं शक्तयोऽष्टौ प्रकल्पिताः ।
उग्रेण तपसा पूर्व्वमहं सर्व्वेण भाविता ॥
यदर्थं सा मया दृष्टा गौरी तस्याश्च भाविनी ।
सर्व्वसौन्दर्य्यवसतिर्वपुषो मे विनिर्गता ॥
तदा दृष्टा मया भद्रे ! वचनं मे प्रियं कुरु ।
अन्तर्व्वेदीं रक्ष मम परितस्त्वं समर्त्तिभिः ॥

सात्र तिष्ठति मत्प्रीत्या अष्टधा दिक्षु संस्थिता।
मङ्गला वटमूले तु पश्चिमे विमला तथा।
शङ्खस्य पूर्व्वभागे तु संस्थिता सर्व्वमङ्गला॥
अर्द्धाशनी तथा लम्बा कुवेरदिशि संस्थिता।
कालरात्रिर्दक्षिणस्यां पूर्व्वस्यान्तु मरीचिका॥
कालरात्र्यास्तथा पश्चात् चण्डरूपा व्यवस्थिता।
रुद्राण्याश्चाष्टधा भेद दृष्ट्वा रुद्रोऽपि शङ्कर:।
आत्मानमष्टधा भित्त्वा उपास्ते परमेश्वरम्॥
कपालमोचनं नाम क्षेत्रपाल यमेश्वरम्।
मार्कण्डेय तथेशानं विश्वेश नीलकण्ठकम्॥
वटमूले वटेशञ्च लिङ्गान्यष्टौ महेशितु:।
यानि दृष्ट्वा तथा स्तुत्वा पूजयित्वा विमुच्यते॥"
तत्र जगन्नाथस्याविर्भावकारणम्।

जैमिनिरुवाच।

"इन्द्रद्युम्नस्य नृपते: क्षेत्रे श्रीपुरुषोत्तमे।
जगदीशप्रसादाय पितामहनिदेशत:॥
एकोन क्रमश: सख्यामवाप पृथिवीपते:॥
सहस्र हयमेधस्य यथावद्विधिचोदितम्।
कृत्वा सप्तदिनात् पूर्व्वं या रात्रिरभवद्द्विजा:॥
तस्यास्तुरीयप्रहरे ध्यायतो विष्णुमव्ययम्।
ध्याने तस्मिन् ददर्शासौ महाभाग्यवशान्नृप:॥
प्रत्यक्षमिव स श्वेतद्वीप स्फाटिकनिर्म्मितम्।
तन्मध्ये ददृशे देवं शङ्खचक्रगदाधरम्॥
नीलजीमूतसङ्काशं वनमालाविभूषितम्।
दक्षपार्श्वे स्थित तस्य अनन्त धरणीधरम्॥
हललाङ्गलशङ्खाब्जस्फुरद्बाहुचतुष्टयम्।
दक्षपार्श्वे स्थितां विष्णोर्लक्ष्मीं तां शुभलक्षणाम्॥
वराभयाब्जहस्तां वै कुङ्कुमाभां सुलोचनाम्।
ददर्श पद्मासनगां लावण्याम्बुधिपुत्त्रिकाम्॥
पितामहञ्च ददृशे पुरतोऽस्य कृताञ्जलिम्।
वामपार्श्वस्थितं चक्र सर्व्वज्ञानमय विभो:॥
तत: प्रवृत्ते कृत्या नृपतेर्वाजिमेधिका।
शस्ते: स्तोत्रैर्दिव्यदृग्भिर्वर्णक्रमसमुज्ज्वले:॥
दक्षिणे तटभूदेशे विश्वेश्वरसमीपत:।
नियुक्ता: सेवका राज्ञा ससम्भ्रममुपस्थिता:॥
न्यवेदयन्तो नृपतिं कृताञ्जलिपुटा द्विजा:।
देव! दृष्टो महावृक्षस्तटभूमौ महोदधे:॥
प्रविष्टाग्रसमुद्रान्तकल्लोलप्लवमूलक।
माञ्जिष्ठवर्ण, सर्व्वत्र शङ्खचक्राङ्कित: प्लवन्॥
न दृष्टपूर्व्वो वृक्षोऽयमुद्यत्सूर्य्यनिभांशुना।
नियुक्तानां वच: श्रुत्वा राजा नारदमब्रवीत्॥
तत् किं निमित्त यद्दृष्टं तरुश्रेष्ठं वदन्ति ते।
नारद प्रहसन् वाक्यमुवाच नृपसत्तमम्॥
उपस्थितस्तु ते भाग्य स्वप्ने यद्दृष्टवान् पुरा।
श्वेतद्वीपे विश्वमूर्त्तिर्दृष्टो यो विष्णुरव्यय:॥
तदङ्गस्खलितं लोम तरुत्वमुपपद्यते।
तद्दारव्यवश: सर्व्वलोकानां नयनातिथि:॥
भविष्यति महाराज! सर्व्वकल्मषनाशन:।
समाप्यावभृथस्नानं तटान्ते सरितां पते:॥
उत्सवं सुमहत् कृत्वा कृतकौतुकमङ्गलम्।
महावेद्यां स्थापयात्र यशेशं तरुरूपिणम्॥
विचार्य्येत्थ मुदा युक्तौ तौ च नारदभूभुजौ।
सुसम्हृष्टौ ततो यातौ यत्रासौ भगवान् द्रुम:॥
पुन: पुन: प्रणम्येन हर्षाश्रुनयनो नृप:।
द्विजैराहारयामास तरु कल्लोललोडितम्॥
स्रगगन्धालेपनं दिव्य महावेद्यां विनिन्यतु:।
पञ्चसा नारदस्तेन पूजयामास पार्थिव:॥
पूजावसाने पप्रच्छ नारद मुनिसत्तमम्।
कीदृशीं प्रतिमां विष्णोर्घटयिष्यति क: पुन:॥
विचारयन्तौ तावित्थ यावन्नारदपार्थिवौ।
अशरीरा ततो वाणी शुश्राव चान्तरीक्षत:॥
अपौरुषेयो भगवान् सद्विचारपथे स्थित:।
सगुप्तायां महावेद्यां स्वयं सोऽवतरिष्यति॥
प्रच्छाद्यतां दिनान्येव यावत् पञ्चदशानि वै।
उपस्थितोऽय यो वृद्ध: शस्त्रपाणिस्तु वर्द्धकी॥
एनमन्त प्रवेश्यैव द्वारं बध्नन्तु यत्नत:।
बहिर्वाद्यानि कुर्व्वन्तु यावत्तु घटना भवेत्॥
श्रुतस्तद्घटनाशब्दो बाधिर्य्यान्धत्वदायक:।
नरके वसतिञ्चैव कुर्य्यात् सन्ताननाशनम्॥
नान्त: प्रवेशनं कुर्य्यान्न पश्येच कदाचन।
नियुक्तान्य: प्रपश्येच्चेन्नाशो राष्ट्रस्य चैव हि॥
द्रष्टुश्चापि महाभीतिरन्धता च युगे युगे।
तच्छ्रुत्वा नारदाद्यास्ते यथोक्तं विष्णुना स्वयम्॥
चिकीर्षन्ति तथा कर्त्तुं तत्रायातस्तु वर्द्धकी।
प्रोवाच नृपतिं सोऽथ स्वप्ने दृष्टास्तु यास्त्वया॥
ता एवाहं घटिष्यामि दारुणा दिव्यरूपिणा।
इत्युक्तान्तर्दधे वेद्यां वृद्धवर्द्धकिरूपधृक्॥
वञ्चनार्थं मनुष्याणां साक्षान्नारायणो विभु:।
तत स पृथिवीपालस्तथा कृत्वान्तरीक्षगा॥
यदुवाच गिरां देवी तत्तत् परिचचार च।
निर्व्वाह्य स्वय देव: क्रमात् पञ्चदशे दिने॥
चतुर्मूर्त्ति: स भगवान् यथा पूर्व्वं मयोदित:।
दिव्यसिंहासनगतो बलभद्रसुदर्शनै:॥
शङ्खचक्रगदापद्मलसद्बाहुर्जनार्द्दन:।
हल मूषलचक्राब्ज धारयन् पन्नगाकृति:॥
छत्त्रीकृतफणासप्तमुकुटोज्ज्वलकुण्डल:।
सुभद्रा चारुवदना वराब्जाभयधारिणी॥
लक्ष्मी: प्रादुर्व्वभूवेयं सर्व्वचैतन्यरूपिणी।
सुदर्शनन्तु यच्चक्र सदा विष्णो: करे स्थितम्॥
शाखाग्रस्तम्भमध्यस्थ तद्रूपन्तु तुरीयकम्॥ * ॥
निर्वृत्ते भगवद्रूप चतुर्द्धा दिव्यरूपिणी॥
लोकानामुपकाराय पुनराहान्तरीक्षगा।
पटैराच्छाद्य सुदृढ़ं नृपते! प्रतिमास्त्विमा:॥
स्व स्व वर्णं प्रापयास्तु वर्णकैश्चित्रकर्म्मणा।
अमूर्द्दारुस्वरूपेण दृष्टा, पापाय दैवत:॥
गोपनीया: प्रयत्नेन पट्टनिर्यासवल्कलै:।
शिल्पिभि: कर्म्मकुशलैर्दृढमाच्छादयाग्रत:॥
वर्षे वर्षे च संस्कारा पूर्व्वसंस्कारमोचनात्।
ऋते वल्कललेपन्तु स तु दिव्यश्चिरन्तन:॥
प्रमादाद्यदि त लेपमपनीयेत कश्चन।
दुर्भिक्ष मरक राज्ये सन्ततिश्चास्य हीयते॥
नेक्षितव्यास्त्वया राजन्! कदाचिदमवारणा:।
मनुष्येण च राजेन्द्र! दृष्टा स्युर्भयहेतव:॥
तस्मात् सुचित्रा द्रष्टव्या वहुलेपविलेपिता:।
नीलाद्रौ कल्पवृक्षस्य वायव्यां शतहस्तत:॥
प्रदेशे सुमहत्स्थाने प्रासाद सुदृढ़ायतम्।
उत्तरे नरसिंहस्य सहस्रकरमुच्छ्रितम्॥
कारयित्वा प्रतिष्ठाप्य तत्रैनं विनिवेशय।
पुरा स्थित: पर्व्वतेऽस्मिन् योऽभ्यर्च्चयति माधवम्॥
नाम्ना विश्वावसुर्नाम शवरो वैष्णवोत्तम:।
तस्य सन्ततिरेवास्य लेपनस्थानकर्म्मणि॥
नियुज्यतां महाराज! भविष्यत्सूत्सवेषु च।
तत: स नृपति श्रीमान् शिल्पशास्त्रविशारदान्॥
सत्कारैर्दानमानैश्च योजयामास सादरम्।
दिने दिने सुघटित: प्रासादो ववृधे द्विजा:॥
परित: पूर्य्यमाणस्तु शुक्लपक्षे यथा शशी॥

नारद उवाच।

प्रवर्ष वहु राजेन्द्र! स्थित्वा चास्मिन् चिरं भुवि।
आराधय जगन्नाथमुपचारैर्महोत्सवै:।
पितामहं द्रष्टुकामो गन्ता चेदन्तिकं विभो:॥
उपदेक्ष्यति सोऽप्यस्य यात्रास्तास्ता महोत्सवा:।
उभौ तौ दिव्ययानेन जग्मतुर्मुनिभूभुजौ॥
प्रदक्षिणीकृत्य हरिं व्योममण्डलमध्यगम्।
दृष्ट्वा पितामहं दूरात् स्रष्टारं जगतां नृप:॥
अमन्यत द्विजश्रेष्ठा, साक्षाद्दारुमयं हरिम्।
शनै: शनैर्ययौ भूप: प्रणनाम कृताञ्जलि:॥
स्तुवन् प्रणिपतन् भूमौ साध्वसस्खलित व्रजन्।
जानन्नपि हि तत् कार्य्यं मानयन्नृपसत्तमम्॥
उवाच परमप्रीत इन्द्रद्युम्नं पितामह:।
किमर्थमागतोऽस्यत्र तद्ब्रूहि हृदयस्थितम्॥

इन्द्रद्युम्न उवाच।

आविर्व्वभूव भगवान् भूतभव्यभवत्प्रभु:।
गत्वा देवं जगन्नाथं स्थापयिष्यसि च प्रभो!॥

ब्रह्मोवाच।

त्वमग्रतोऽधरां गत्वा यावत् सम्भारम्भहिमत्।
करिष्यसि महाभाग! तावदेव व्रजाम्यहम्॥
इन्द्रद्युम्नोऽपि हृष्टात्मा दृष्ट्वा भार्गीं श्रिय
द्विजा:।
आजगाम भुव विप्रा विधिना चानुमोदित:॥
आगत्य च जगन्नाथं चिरादुत्कण्ठमानस।
दण्डवत् प्रणनामासौ घनरोमाञ्चकञ्चुक:॥
तत: क्रमात् सन्ददृशे विमानाग्रं प्रजापते:।
स्वर्णहंसशतै: स्कन्धैरुह्यमान समन्तत:॥
प्रणिपत्य जगन्नाथं त्रि: परीत्य पितामह:।
आनन्दसिन्धुसमग्न: सरोमाञ्चवपु: स्वयम्॥
समुत्तस्थौ ततो ब्रह्मा कृतस्वस्त्ययन: स्वयम्।
ऋषिभिर्नारदाद्यैश्च विप्रैर्ब्राह्मणैस्तथा॥
प्रासादद्वारि रचिते रत्नस्तम्भेऽथ मण्डपे।
वासयित्वाभिषेकाय सम्मुखादर्शमण्डले॥
सुवासितै रत्नकुम्भैस्तीर्थवार्य्युपसम्भृतै:।
युक्ताभ्यां स्त्रीपुरुषयोरभिषेक पितामह:॥
चकार भगवान् लोकसंग्रहार्थं द्विजोत्तमा:।
ततोऽभ्यलङ्कृतान् देवान् गन्धमाल्योपशोभितान्॥
नीराजयित्वा विधिवत् स स्वयं लोकभावन:।
रत्नसिंहासने रम्ये स्थापयामास मन्त्रत:॥
स्थापयित्वा जगन्नाथं सृष्टा तस्य हृदम्बुजम्।

ष्टाशुद्धं मन्त्रराजं सहस्रं प्रजजाप ह ॥
वैशाखस्यामले पक्षे अष्टम्यां पुष्ययोगतः ।
कृता प्रतिष्ठा भो विप्राः शोभने गुरुवासरे ॥”

तन्महाप्रसादमाहात्म्यं यथा,—

“बहून् नियोजयेत्तत्र लोकान् त्रैवर्गिकानुत ।
लौकिकव्यवहारोऽयं पश्यति श्रीः स्वयं ध्रुवम् ।
भुङ्क्ते नारायणो नित्यं तथा पक्कं शरीरवान् ॥
अमृतं तद्धि नैवेद्यं पापघ्नं मूर्द्ध्नि धारणात् ।
भक्षणात्मद्यपानादिमहादुरितनाशनम् ॥
आघ्राणान्मानसं पापं दर्शनाद्दृष्टिजं तथा ।
आस्वादाद्वाक्कृतं पापं श्रावणञ्च व्यपोहति ॥
स्पर्शनात् त्वक्कृतं पापं मिथ्यालापं तथा द्विजाः ॥
मात्रे लेपाद्धरेत् पापं शारीरं वै न संशयः ॥
महापवित्रं हि हरेर्निवेदितं
नियोजयेद्यः पितृदेवकर्म्मसु ।
तृप्यन्ति तस्मै पितरः सुराश्च
प्रयान्ति लोकं मधुसूदनस्य ॥
नातः परं हि वस्त्वस्ति हव्यकव्येषु भो द्विजाः ।।
नराणां रूपमास्थाय तदश्नन्ति दिवौकसः ॥
विष्णवालयगतं तद्धि निर्म्माल्यं पतितादयः ।
स्पृशन्ति चेन्न दुष्टं हि यथा विष्णुस्तथैव तत् ॥
निन्दन्ति ये तदमृतं मूढाः पण्डितमानिनः ।
स्वयं दण्डधरस्तेषु सहते नापराधिनः ॥
येषामत्र न दण्डश्चेद्ध्रुवा तेषां हि दुर्गतिः ।
कुम्भीपाके महाघोरे पच्यन्ते तेऽतिदारुणे ॥
चिरस्थमपि संशुष्कं नीतं वा दूरदेशतः ।
यथा तथोपयुक्तं तत् सर्व्वपापापनोदनम् ॥
नैवेद्यान्नं जगन्नाथस्य गाङ्गं वारि समं द्वयम् ।
दृष्टिस्पर्शनचिन्ताभिर्भक्षणादघनाशनम् ॥”

इत्युत्कलखण्डम् ॥ * ॥

स च कलेर्दशसहस्रवर्षपर्य्यन्तं पृथिव्यां स्थास्यति। यथा,—

“शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् ।
कलेर्दशसहस्रान्ते ययौ त्यक्त्वा हरेः पदम् ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

(स्वनामख्यातो बहुलग्रन्थकर्त्ता पण्डितविशेषः। अयं हि तैलङ्गवंशोद्भव.। अस्य पिता पेरमभट्ट इति ख्यातः। असौ पण्डितराजजगन्नाथो दिल्लीप्रभोः शाहजहान्-ज्येष्ठस्नोर्यवनस्य दाराशाहस्य सभायामासीत्। यतोऽनेन जगदाभरणकाव्ये दाराशाहस्यैव यशोवर्णन कृतम्। अपिच भामिनीविलाससमाप्तौ “दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः” इत्युक्तम्। दाराशाहस्तु १५८१ एकाशीत्यधिकपञ्चदशशतशकाब्दपर्य्यन्तं जीवित आसीत्। अतः पण्डितराजजगन्नाथोऽपि तात्कालिक इत्येवायातम्। अनेन पण्डितराजपदवी शाहजहानुसम्राजो दिल्लीप्रभोः प्राप्तेति तत्कृतादासफविलासनामकग्रन्थादेवागम्यते यथा,—

“अथ सकललोकविस्तारविस्तारितमहोपकारपरम्पराधीनमानसेन प्रतिदिनसुद्यदनवद्यगद्यपद्याद्यनेकविद्याविद्योतितान्तःकरणैः कविभिरुपास्यमानेन कृतयुगीकृतकलिकालेन क्रमतिव्ययजालसमाच्छादितसवेदवनमार्गविलोकनाय समुद्दीपितसुतर्कदहनज्वालाजालेन मूर्त्तिमतेव नव्वाबासफखानमनःप्रसादेन माथुरकुलसमुद्रेन्दुना रायमुकुन्दैनादिष्टेन सार्व्वभौमश्रीशाहजहानप्रसादाधिगतपण्डितराजपदवीविराजितेन तैलङ्गकुलावतंसेन पण्डितजगन्नाथेनासफविलासाख्येयमाख्यायिका निरमीयत। सेयमनुग्रहेण सहृदयानामनुदिनमुल्लासिता भवतात् ॥”

एतत्पण्डितविरचिता बहवो ग्रन्थाः सन्ति। तेषु अद्यावधि ज्ञातास्त्वेते, रसगङ्गाधरः १, यमुनावर्णनचम्पूः २, रतिमन्मथनाटकम् ३, वसुमतीपरिणयनाटकम् ४, जगदाभरणकाव्यम् ५, प्राणाभरणकाव्यम् (कामरूपदेशाधिपस्य प्राणनारायणमहीपस्य स्तुतिरूपोऽयं ग्रन्थः) ६, पीयूषलहरी ७, अमृतलहरी (यमुनास्तुतिरूपोऽयं ग्रन्थः) ८, सुधालहरी (सूर्य्यस्तवरूपोऽय ग्रन्थः) ९, करुणालहरी (विष्णुलहरी वा) १०, लक्ष्मीलहरी ११, भामिनीविलासः १२, मनोरमाकुचमर्द्दिनी १३, अश्वधाटीकाव्यम् १४, आसफविलासः १५ ॥ * ॥

तर्कपञ्चाननोपाधिकोऽपरपण्डितविशेषः। अयं हि विवादभङ्गार्णवसेतु-रामचरितादिग्रन्थाना प्रणेता। पितास्य रुद्रदेवः माता च अम्बिका। रुद्रदेवस्तु चतुःषष्टितमवयसि पूर्व्वसहधर्म्मिण्यां समुतायां मृतायां संसारविरक्तः काशीवाससुखमभिलषन् चिरसुहृद नित्यानन्दपुरनिवासिनं ज्योतिर्विद्याविशारदं सुप्रसिद्धं चन्द्रशेखरवाचस्पतिमभिगम्य स्वीयान्तिमदशाफलाफलं पृष्टवान्। चन्द्रशेखरस्तु रुद्रदेवस्य जन्मलग्नानुसारतश्चरमे वयसि सुप्रसिद्धपुत्त्रलाभरूप शुभफलमवगम्य वासुदेवनाम्नः कस्यचिद् विप्रवरस्याम्बिकानाम्नीं कन्यामुद्वाहयामास। रुद्रदेवस्तु ज्योतिर्विद्यापारदर्शिनश्चन्द्रशेखरस्य वाक्यादम्बिकां परिणीय सत्पुत्त्रप्राप्तिकामो काशीमभिगम्य विश्वेश्वरमुद्दिश्यैकविंशतिपुरश्चरणं कृतवान्। चरमपुरश्चरणदिवसीययामिन्याः शेषयामे प्राप्तसत्पुत्त्रलाभस्वप्नः प्रहृष्टमनाः पुनः स्वस्थानं त्रिवेणीप्रदेशं प्रत्यावृत्य गार्हस्थ्यधर्म्मानुरक्तो बभूव। अथ गच्छति काले पतिपरायणाम्बिका गर्भमुपलभ्य १६१६ शके (११०१ परिमितवङ्गाब्दे) सौराश्विनस्य देवीपक्षीयपञ्चम्यां पुत्त्ररत्नं जगन्नाथं प्रसूतवती। रुद्रदेवस्तु नवजातपुत्त्रस्य जातसंस्कारादिकं विधाय राश्यनुसारतो रामराम इति नाम चक्रे पर कुमारस्य मातामहो वासुदेवः अस्मिन्नेव समये श्रीजगन्नाथक्षेत्रात् तीर्थस्थानात् प्रत्यावृत्य दौहित्रमुख दृष्ट्वा जगन्नाथ इत्याख्ययैनमघोषयत्। ततः प्रभृत्येवायं जगन्नाथ इति नाम्ना प्रसिद्धोऽभूत्।

अयन्तु बाल्यावस्थायामतीवचञ्चलप्रकृतिर्द्दान्तोऽपि स्मृतिशक्तिसत्यवादितादिगुणनिकरैण बहूनां नितरां प्रियपात्रमासीत्। अथ प्रथमतः पितृसन्निधाने व्याकरणमधीत्य ततो ज्येष्ठतातस्य न्यायलङ्कारोपनामकस्य भवदेवस्य समीपे साहित्यादिकमधीतवान्। ततो भवदेवस्य परलोकप्राप्त्यनन्तरं कामालपुरनिवासिनं रघुदेवविद्यावाचस्पतिं अध्यापकत्वेन स्वीकृत्य दर्शनशास्त्रादिचिन्तया कालं यापयामास। अस्य एतादृशी प्रखरा स्मृतिशक्तिरासीत् यदनधीतस्यापि भिन्नदेशीयभाषाया निबद्धस्य ग्रन्थस्य द्वित्रिपत्राणि एकवारमात्रमाकर्ण्यैवायं अनर्गलं अभ्रान्त इव आवर्त्तयितुं समर्थः। एतादृशीमेधाशक्तिरेवैनं अल्पसमयेन बहुशास्त्रपारयायिनमकरोत्।

पञ्चदशवर्षसमय एवासौ द्रौपदीनाम्नीं सुलक्षणा कन्यामुपनीतवान्। विवाहात् परमेवास्य ज्येष्ठतातो भवदेवः परलोकं गतः। माता तु पूर्व्वमेव कालधर्म्ममुपगता पिता च चतुर्व्विंशतिवयस्कमेनमवलोक्यैव इह लोकं तत्याज। पितृवियोगानन्तरमेवायं छात्रानध्यापयितुं प्रवृत्त आसीत्।

अथ कदाचित् वर्द्धमानाधिपतिर्महाराजत्रिलोकचन्द्रवाहादुरोऽस्य पाण्डित्यप्रभावमवगम्य राजसभामधिरोहयितु निमन्त्रयामास। जगन्नाथस्तु राजप्रसादमुपलभ्य राजसभा प्रविश्य तर्कजालेन तत्रस्थान् पण्डितान् जितवान्। महीपतिस्तु जगन्नाथस्य तादृशीं बुद्धिशक्तिं मेधाशक्तिञ्चावलोक्य विशेषेण परीक्षितुं पथि दृष्टस्य समग्रवस्तुनो वार्त्तां विज्ञापयितुमादिदेश। जगन्नाथस्तु नृपतेर्मनोऽभिप्रायमवगम्य त्रिवेणीप्रदेशात् वर्द्धमानपर्य्यन्त यावत् पथि स्थितानां प्रत्येकपादपमन्दिराणामपि वृत्तान्तं कथयामास। राजा तु स्वकर्म्मचारिभिरेतद्वृत्तान्तस्य याथार्थ्यमुपगम्य सातिशयेनानन्दितो बभूव।

एकदा मुर्शिदाबादाख्यप्रदेशनृपतेर्यवनस्य मन्त्री नन्दकुमारोऽस्य पाण्डित्यमवगम्य (नवाव) महीपतिसमीपमेनमानयामास। नृपतिस्तु बहुविधैर्दुरूहप्रश्नैरेनं वञ्चयितुमभिललाष परं जगन्नाथः स्वीयबुद्धिप्राखर्य्येण नृपतिकृतप्रश्नानां सदुत्तरं दत्त्वा त सन्तोष्य च तस्माद् बहुलार्थप्रदां भूम्यादिसम्पत्तिं लब्धवान्।

अथ कालचक्रगत्यनुसारतो यवनराजानां वैभवरविरस्तं गतः इंराजराजानां सौभाग्यसमयः समुपागतश्च। तदा इंराजनृपतयस्तदानीन्तनप्रजारञ्जनार्थं विचारकार्य्यस्य सौकर्य्याय जगन्नाथतर्कपञ्चानन समाहूय व्यवहारोपयोगिनं ग्रन्थमेकं प्रणेतुमादिदेश। जगन्नाथस्तु नवीननृपतिभिस्तथादिष्टः “विवादभङ्गार्णवसेतु-” नामकं ग्रन्थ प्रणीतवान्।

अस्य द्विषष्टितमवयसि सहधर्म्मिणी द्रौपदी बहुपुत्त्रपौत्त्रादिक संरक्ष्य परलोकं गता। अस्य द्वौ पुत्त्रौ तिस्रः कन्याश्चाभवन्। पुत्त्रयोर्मध्ये रामसार्व्वभौम एव ज्येष्ठः प्रतिभाशाली मद्दुशास्त्र-

मारदर्शी च। अनन्तरं योऽयमन्तिमावस्थायां पुत्रपौत्रादिसुखमवलोक्य अतिदुर्लभमेतादृशं संसारसुखमनुभूय प्रकनरपतेः १७२८ वत्सरे (१२१४वङ्गाब्दे) आश्विनकृष्णपक्षीयतृतीयायां गङ्गातीरे प्राणान् तत्याज। मृत्योः प्राक्कालपर्य्यन्तमेवास्येन्द्रियशैथिल्यं न जातम्। गङ्गातीरं गतेन मुमूर्षुणानेन मृत्युप्राक्काले कृतः श्लोको यथा,—

"केचिद् ब्रह्म निराकारं नराकारञ्च केचन।
वयन्तु दीर्घयोगेन नीराकारमुपास्महे॥" इति॥)

जगद्गुः, पुं, (जगता विश्वस्थजीवजातेन गम्यते इति। जगत्+गम्+बाहुलकात् डुः। यद्वा, गु+क्विप् पृषो। गु नैव न स्तुतिरित्यर्थः जगति विश्वसंसारे गुः स्तुतिर्यस्य। सर्व्वजीवस्तुतत्वादेवास्य तथात्वम्।) अग्निः। जम्बुः। इति विश्वः शब्दरत्नावली च॥ जगद्गुरपि पाठः॥

जगरः, पुं, (जागर्त्ति संग्रामेऽनेनेति। जागृ+अच्। पृषोदरादित्वात् साधुः।) कवचः। इति हेमचन्द्रः। ३। ४३०॥

जगलः, पुं, (पुनः पुनरतिशयेन वा गलतीति। गल चरणे+यङ्लुगन्तात् अच्। संज्ञापूर्व्वकत्वात् "दीर्घोऽकितः।" ७।४।८३। इति न दीर्घः। यद्वा, जन्+डः। जः जातः सन् गलति निर्गच्छतीति। गल+अच्।) सुराकल्कम्। मेथा इति भाषा॥ तत्पर्य्यायः। मेदक. २। इत्यमरः। २। १०। ४२॥ (यथा, शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये।

"तद्घनो जगलो ज्ञेयो मेदको जगलाद्घनः॥")

मदनवृक्षः पिष्टमद्यम्। (तद्गुणा यथा,—

"भूलप्रवाहिकाटोपकफवातार्शसां हितः।
जगलो ग्राहिरूक्षोष्णः शोफघ्नो भक्तपाचनः॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥

"ग्राह्युष्णो जगलः पक्ता रूक्षस्तृट्कफशोफहृत्।
हृद्यः प्रवाहिकाटोपदुर्नामानिलशोफहृत्॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥)

धूर्त्ते त्रि। इति मेदिनी। ले, ६१॥ कवचः। रलयोरैक्यात्॥ गोमये, क्ली। इति रत्नमाला॥ (यथा, वैद्यकरत्नमालायाम्।

"गोमय जगल गोविट् गोहन्नं तच्च गोशकृत्॥")

जग्धं, त्रि, (अद्यते स्म इति। अद् भक्षणे+क्तः। "अदो जग्धिर्ल्यप्ति किति।" २। ४। ३६। इति जग्ध्यादेशः। इकार उच्चारणार्थः।) भुक्तम्। इत्यमरः। ३। २। १११॥

("स्निग्धं घन कुटजवल्कमजन्तु जग्धम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥)

जग्धिः, स्त्री, (अद भक्षणे+क्तिन्। "अदो जग्धिर्ल्यप्ति किति।" २। ४। ३६। इति जग्ध्यादेशः।) सहभोजनम्। इत्यमरः। २।९।५५॥ भक्षणम्। इति हेमचन्द्रः॥ (यथा, मनौ। ३। ११५।

"अदत्त्वा तु य एतेभ्यः पूर्व्वं भुङ्क्तेऽविचक्षणः।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः॥")

जघ्निः, पुं, (गच्छति इतस्ततो यातीति। गम+"आदृगमहनजनः किकिनौ लिट् च।" ३।२।१७१। इत्यस्य "भाषायां धाञ्कृसृजनिगमिनमिभ्यः।" इति वार्त्तिकोक्त्या किङ्कित्वञ्च।) वायुः। इति केचित्॥

जघनं, क्ली, (हन्यते इति। हन्+"हन्तेः शरीरावयवे द्वे च।" उणा। ५। ३२। इति अच् द्वित्वञ्च। "अभ्यासाच्च।" ७। ३। ५५। इति कुत्वम्।) स्त्रीकट्याः पुरोभागः। (यथा, माघे। ५। २९।

"नाभिह्रदैः परिगृहीतरयाणि यत्र
स्त्रीणां बृहज्जघनसेतुनिवारितानि॥")

कटिः। इति मेदिनी। ने, ६७॥ (यथा, देवीभागवते। १। ९। ८१।

"भगवान् द्विगुणं चक्रे जघनं विस्मितौ तदा।
शीर्षे सन्दधतां तत्र जघने परमाद्भुते॥")

जघनकूपकौ, पुं, (जघनकूपे इव कायतः इति। कै+कः।) कुकुन्दरौ। इति हलायुधः॥ द्विवचनान्तोऽयं शब्दः॥

जघनेफला, स्त्री, (जघने इव मध्यभागे फलमस्याः।) काकोडुम्बरिका। इत्यमरः। २। ४। ६१॥

जघन्यः, त्रि, (कुटिलं हन्यते जिन्धते इति। हन+यङन्तात् अचो यत्। अनित्यमागमशासनमिति गुगतोऽगुणाचिकाभ्यस्येति न गुक्। यद्वा, जघनमिव। "शाखादिभ्यो यत्।" ५। ३। १०३। इति यत्।) चरमः। (यथा, वैद्यकचक्रपाणिसंग्रहे स्नेहाधिकारे।

"उत्तमस्य पल मात्रा त्रिभिरक्षैश्च मध्यमे।
जघन्यस्य पलार्द्धेन स्नेहक्वाथौषधेषु च॥")

गर्हितः। (यथा, महाभारते। ३। ३५। १३।

"तत्र द्यूतमभवन्नो जघन्य
तस्मिन् जिताः प्रव्रजिताश्च सर्व्वे॥"॥

जघने कटिदेशे भवम्। दिगादित्वात् यत्।) मेहने, क्ली। इति मेदिनी। ये, ८३॥ पुं, शूद्रः। इति शब्दरत्नावली॥ (हीनजातिमात्रम्। यथा, मनौ। ८। ३६६।

"उत्तमां सेवमानस्तु जघन्यो वधमर्हति॥"
"हीनजातिरुत्कृष्टजातीयां कन्यामिच्छन्तीमनिच्छन्तीं वा गच्छन् जात्यपेक्षयाऽङ्गच्छेदनमारणात्मकं वधमर्हति॥" इति तट्टीकायां कुल्लूकभट्टः॥ ॥ पृष्ठभागः। यथा, रामायणे। २। १०४। २९।

"ततो जघन्यं सहितैः स्वमन्त्रिभिः
पुरप्रधानैश्च तथैव सैनिकैः।
जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रजम्॥"
"जघन्य जघनभागं पृष्ठभागमाश्रितः सन्।"
इति तट्टीकायां रामानुजः॥ ॥ राजानुचरविशेषः। यथा, बृहत्संहितायाम्। ६९। ३१, ३३—३४।

"पञ्चापरे वामनको जघन्यः
कुब्जोऽपरो मण्डलकोऽथ सामी।
पूर्व्वोक्तभूपानुचरा भवन्ति
सङ्कीर्णसंज्ञाः पृथगेव चैते॥"
"मालव्यसेवी तु जघन्यनामा
खण्डेन्दुतुल्यश्रवणः सुसन्धिः।
शुक्रेण सारः पिशुनः कविश्च
रूक्षच्छविः स्थूलकराङ्गुलीकः॥
क्रूरो धनी स्थूलमतिः प्रतीत-
ताम्रच्छविः स्यात् परिहासशीलः।
उरोऽङ्घ्रिहस्तेष्वशिरालपाद-
परश्च पाञ्चस्य जघन्यनामा॥")

जघन्यजः, पुं स्त्री, (जघन्ये चरमे जायते इति। जन्+"सप्तम्यां जने र्डः।" ३। २। ९७। इति डः।) शूद्रः। कनिष्ठे, त्रि॥ इति मेदिनी॥ जे, ३२॥ (यथा, महाभारते। १। ६५। १६।

"एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः॥")

जघ्निः पुं, (हन्यते इति। हन+"आदृगमहनेति।" ३। २। १७१। इति किन् द्वित्वञ्च।) हननयोग्यास्त्रम्। इति संक्षिप्तसारः॥ (यथा, ऋग्वेदे। ९। ६१। २०।

"जघ्निर्वृत्रममित्रियं सस्निर्व्वाजं दिवे दिवे॥")

जघ्नुः, त्रि, (हन्तीति। हन वधे+"कुर्भ्रश्च।" उणा। १।२३। चकारात् हन्तेरपि कुर्द्वित्वञ्च।) हन्ता। हननकर्त्ता। इत्युणादिकोषः॥

जङ्गमः, त्रि, (पुनः पुनर्गच्छतीति। गम्+यङ्+अच्।) अस्थावरः। गतिशक्तिविशिष्टः। तत्पर्य्यायः। चरिष्णुः २ चरः ३ त्रस. ४ इङ्ग ५ चराचरः ६। इत्यमरः। ३। १। ७४॥ (यथा, रघौ। २। ४४।

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः॥"
"औषधयस्तावद्द्विविधाः स्थावरा जङ्गमाश्च।"
"जङ्गमास्त्वपि चतुर्व्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः। तत्र पशु मनुष्य-व्यालादयो जरायुजाः। खग-सर्प सरीसृप-प्रभृतयोऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये॥)

जङ्गमकुटी, स्त्री, (जङ्गमा गतिशक्तिविशिष्टा कुटी गृहमिव।) छत्रम्। इति त्रिकाण्डशेषः॥

जङ्गल, त्रि, (पुनः पुनरतिशयेन वा गलतीति। गल+यङ्+अच्। पृषोदरादित्वात् साधुः।) निर्ज्जलदेशः। इति शब्दरत्नावली॥ निर्ज्जनस्थानम्। पिशिते, क्ली। इति मेदिनी। ले, ६३॥

जङ्गालः, पुं, (जङ्गं कुटिलगतिं अलति प्राप्नोतीति। अल+"कर्म्मण्यण्।" ३।२।१ इत्यण्।) रोधविशेषः। जाङ्गाल इति भाषा॥ तत्पर्य्यायः। आलिः २ पद्गारः ३ सेतुः ४ सम्वरः ५। इति जटाधरः॥

जङ्गुल, क्ली, विषम्। इति त्रिकाण्डशेषः॥

जङ्घा, स्त्री, (जङ्घन्यते कुटिलं गच्छतीति। हन वधे गतौ च यङ्लुगन्तात्+"अच्यघ्नोऽचीति।"

डः।) गुल्फोर्द्ध्वजान्वधोभागः। जाङ् इति भाषा॥ तत्पर्य्यायः। प्रसृता २। इत्यमरः॥ टङ्का ३ टङ्कम् ४ टङ्किका ५। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। १३३। १६।
"शत्रुर्निमज्जता ग्राह्यो जङ्घायां प्रपतिष्यता॥")

जङ्घाकरिकः, पुं, (जङ्घा तत्साध्यगतिरेव आकरो निधिः जीविकानिर्व्वाहधनस्येत्यर्थः। सोऽस्यास्येति। जङ्घाकर+"अत इनिठनौ।" ५। २। ११५। इति ठन्।) धावकः। तत्पर्य्यायः। जाङ्घिकः २। इत्यमरः। २। ८। ७३॥ डाकचक्री ३। इति शब्दरत्नावली॥

जङ्घात्राणं, क्ली, (त्रायतेऽनेनेति। त्रै+करणे ल्युट्। त्राणं वर्म्म। ततो जङ्घायास्त्राणमिति।) जङ्घासन्नाहः। तत्पर्य्यायः। मरुन्मुणम् २। इति त्रिकाण्डशेषः॥

जङ्घालः, त्रि, (प्रशस्ता वेगवतीत्यर्थः. जङ्घास्त्यस्येति। जङ्घा+"सिध्मादिभ्यश्च।"५।२।९७। इति लच्। जङ्घाबलेनैव वेगस्य जननात्तथात्वम्।) अतिवेगवान्। तत्पर्य्यायः। जविनः २। इत्यमरः। २। ८। ७३॥ (यथा, काशीखण्डे गङ्गामाहात्म्ये। २९। ६४।
"जाह्नवीज्या जगन्माता जप्या जङ्घाल-वीचिका॥")
हरिणः। एणः। कुरङ्गः। ऋष्यः। पृषतः। न्यङ्कुः। शम्बरः। राजीवः। मुण्डी। (यथा,—
"एणहरिणर्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करोगमातृकाप्रभृतयो जङ्घाला मृगाः कषाया मधुरा लघवो वातपित्तहराश्शीता बद्धा वस्तिशोधनाश्च॥" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
एषां मांसगुणाः।
"जङ्घालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः॥"
इति भावप्रकाशः॥

जङ्घाशूलं, क्ली, (जङ्घायाः शूलं रोगविशेषः।) जङ्घावेदना। तस्यौषधं यथा,—
"हरीतकी शृङ्गबेरं देवदारु च चन्दनम्।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम्॥
जङ्घाशूलमुरुस्तम्भं सप्तरात्रे तु नाशयेत्॥"
इति गारुडे १८७ अध्यायः॥

जज, युधि। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) जजति। युधि योधने। इति दुर्गादासः॥

जजि, इ युधि। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) इ, जञ्जति। युधि योधने। इति दुर्गादासः।

जञ्जपूकः, त्रि, (पुनःपुनरतिशयेन वा जपतीति। जप+यङ्+"यजजपदशां यङः।" ३।२।१६६। इति ऊकः।) पुनःपुनर्जपकर्त्ता। इति मुग्धबोधम्॥

जट, संहतौ। इति कविकल्पद्रुमः॥ (भ्वां परं-अकं-सेट्।) जटति केशाः परस्परं सम्मः स्यादित्यर्थः। इति दुर्गादासः॥

जटा, स्त्री, (जटति परस्परं संलग्ना भवतीति। जट्+अच्। यद्वा, जायते प्रादुर्भवतीति। जन्+"जनेष्टन् लोपश्च।" उणां। ५। ३०। इति टन् अन्त्यलोपश्च।) व्रतिनां शिखा। लग्नकचः। तत्पर्य्यायः। शटा २। इत्यमरः॥ जटिः ३ जटी ४ जूटः ५ जुटकम् ६ शटम् ७ कोटीरम् ८ जूटकम् ९ हस्तम् १०। इति शब्दरत्नावली॥ (यथा, महाभारते।३।११२।२।
"नीला, प्रसन्नाश्च जटाः सुगन्धा
हिरण्यरज्जुग्रथिताः सुदीर्घाः॥")
मूलम्। यथा,—
"यदि न समुद्धरन्ति यतयो हृदि कामजटा
दुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणिः॥"
इति श्रीभागवते श्रुतिस्तवे ८७ अध्यायः॥
मांसी। इति मेदिनी। टे, १५॥ रुद्रजटा। (यथा, सुश्रुते कल्पस्थाने ७ अध्याये।
"कालेयकं पद्मकञ्च मधुकं नागरं जटाम्॥")
शतावरी। इति राजनिर्घण्टः॥ कपिकच्छुः। इति रत्नमाला॥ (वेदपाठविशेषः। यथा,—
"जटा माला शिखा लेखा ध्वजो दण्डो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्व्वा महर्षिभिः॥")

जटाजूटः, पुं, (जटानां जूटः समूहः।) जटासमूहः। यथा, महानाटके।
"जटाजूटग्रन्थिं दृढयति रघूणां परिवृढः॥"
शिवजटा च॥

जटाज्वालः, पुं, (जटेव ज्वाला यस्य।) प्रदीपः। इति हारावली। २४॥

जटाटङ्कः, पुं, (जटा टङ्क इवास्य।) शिवः। इति त्रिकाण्डशेषः॥

जटाटीरः, पुं, (जटामटतीति। अट्+बाहुलकादीरन्।) शिवः। इति त्रिकाण्डशेषः॥

जटाधरः, पुं, (धरतीति। धृ+अच्। जटाया धरः।) शिवः। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। १७। १२६।
"त्रिनेत्रश्च विरूपाक्षो मणिविद्धो जटाधरः॥")
बुद्धभेदः। इति त्रिकाण्डशेषः॥ पर्य्यायनानार्थकोषाख्याभिधानतन्त्रकारश्च॥ (स्कन्दस्यानुचरविशेषः। यथा, महाभारते। ९। ४५। ५९।
"परिश्रुतः कोकनदः कृष्णकेशो जटाधरः॥"
देशविशेषः। स तु दाक्षिणात्यप्रदेशः। यथा, बृहत्संहितायाम्। १४। १६।
"अथ दक्षिणेन।" इत्युक्त्वा,—
"क्रौञ्चद्वीपजटाधरकावेर्य्यो रिष्यमूकश्च॥"
इत्युक्तवान्॥
जटाधारिणि, त्रि। यथा, रामायणे।२।८६।२५।
"जटाधरौ तौ द्रुमचीरवाससौ
महाबलौ कुञ्जरयूथपोपमौ॥")

जटामांसी, स्त्री, (जटा जटावतीं मन्यते इति। मन्+"मनेर्दीर्घश्च।" उणां।३।६४। इति सो दीर्घश्च।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। जलदम् २ वहिनी ३ पेषी ४ मांसी ५ कृष्णजटा ६ जटी ७ किरातिनी ८ जटिला ९ लोमशा १० तपस्विनी ११। इति रत्नमाला॥ भूतजटा १२। इति भावप्रकाशः॥ पेशी १३ क्रव्यादि १४ पिशिता १५ पिशी १६ पेशिनी १७ जटा १८ हिंस्रा १९ मांसिनी २० जटाला २१ जलदा २२ मेषी २३ तामसी २४ चक्रवर्त्तिनी २५ माता २६ अमृतजटा २७ जननी २८ जटावती २९ मृगभक्ष्या ३० जड़ामांसी ३१ मिंसी ३२ मिसिः ३३ मिसी ३४ मिषिका ३५ मिषिः ३६। इति शब्दरत्नावली॥ अस्या गुणाः। सुरभित्वम्। कषायत्वम्। कटुत्वम्। शीतलत्वम्। कफभूतदाहपित्तनाशित्वम्। कान्तिमोदकारित्वञ्च। इति राजनिर्घण्टः॥ तिक्तत्वम्। मेध्यत्वम्। बलप्रदत्वम्। स्वादुत्वम्। त्रिदोषास्रवीसर्पकुष्ठनाशित्वञ्च। इति भावप्रकाशः॥ अनुलेपनेन ज्वररूक्षतानाशित्वम्। इति राजवल्लभः॥

जटायुः, पुं, (जटां याति प्राप्नोतीति। या+मृगय्वादित्वात् कुः। सान्तपक्षे जटं संहतमायुर्यस्य।) स्वनामख्यातपक्षी। स तु अरुणपुत्त्रः सम्पातेरनुजः दशरथराजसखः सीताहरणसमये रावणेन हतः। इति रामायणम्॥ (यथा, च महाभारते। ३। २७८। १—७।
"सखा दशरथस्यासीत् जटायुररुणात्मजः।
गृध्रराजो महावीरः सम्पातिर्यस्य सोदरः॥
स ददर्श तदा सीतां रावणाङ्कगतां स्नुषाम्।
सक्रोधोऽभ्यद्रवत् पक्षी रावणं राक्षसेश्वरम्॥
अथैनमब्रवीद्गृध्रो मुञ्च मुञ्च मैथिलीम्।
ध्रियमाणे मयि कथं हरिष्यसि निशाचर।॥
नहि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे वधूम्।
उक्त्वैवं राक्षसेन्द्रं तं चकर्त्त नखरैर्भृशम्॥"
"स वध्यमानो गृध्रेण रामप्रियहितैषिणा।
खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिणः॥
निहत्य गृध्रराजं स भिन्नाभ्रशिखरोपमम्।
ऊर्द्ध्वमाचक्रमे सीतां गृहीत्वाङ्केन राक्षसः॥")
गुग्गुलु। इति मेदिनी। ये, ८४॥
("गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः।
कुम्भोलूखलकं क्लीबे महिषाक्षः पलङ्कषः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"जटायुः कालनिर्य्यासः कौशिको गुग्गुलुः पुरः।"
इति वैद्यकरत्नमालायाम्।)
सान्तोऽप्ययम्। इति द्विरूपकोषः॥ (यथा, महाभारते। १। ६६। ७०।
"अरुणस्य भार्य्या श्येनी तु वीर्य्यवन्तौ महाबलौ।
सम्पातिं जनयामास वीर्य्यवन्तं जटायुषम्॥")

जटालः, पुं, (जटास्त्यस्येति। जटा+"सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) कर्पूरः। वटः। मुष्ककः। गुग्गुलुः। इति राजनिर्घण्टः। जटायुक्ते, त्रि। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १८०। २२।
"गौरिषः शिखिनश्चान्ये जटालोर्द्ध्वशिरोरुहाः॥")

जटाला, स्त्री, (जटाऽस्त्यस्या इति । जटा + “सिध्मादिभ्यश्च । ५ । २ । ९७ । इति लच् । ततो ऽजादित्वात् टाप् ।) जटामांसी । इति राज-निर्घण्टः ॥ (विवरणमस्या जटामांसीशब्दे ज्ञातव्यम् ॥)

जटावती, स्त्री, (जटा विद्यतेऽस्याः । जटा + मतुप् । मस्य व स्त्रियां ङीप् च ।) जटामांसी । इति राजनिर्घण्टः ॥

जटावल्ली, स्त्री, (जटेव वल्ली ।) रुद्रजटा । गन्ध-मांसी । इति राजनिर्घण्टः ॥

जटि, स्त्री, (जटति सङ्घातं करोति भवतीति । जट + “सर्व्वधातुभ्य इन् ।” उणां । ४ । ११७ । इति इन् ।) प्लक्षवृक्षः । इति शब्दरत्नावली ॥ जटा । समूहः । इत्युणादिकोषः ॥

जटिलः, पुं, (जटा अस्त्यस्येति । जटा + “पिच्छादि-पामादिपिच्छादिभ्यः, प्रत्ययाः ।” ५ । २ । १००, इति इलच् ।) सिंहः । इति शब्दचन्द्रिका ॥ (ब्रह्मचारी । यथा मनुः । ३ । १५१ ।
“ जटिलञ्चानधीयानं दुर्ब्बलं कितवन्तथा ॥”
“जटिलो ब्रह्मचारी ।” इति तट्टीकायां कुल्लूक-भट्टः ॥) जटायुक्ते, त्रि । इति मेदिनी । ले, ८७ ॥ (यथा, कुमारे । ५ । ३० ।
“ विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥”)

जटिला, स्त्री, (जटिल + अजादित्वात् टाप् ।) जटामांसी । इत्यमरः । २ । ४ । १३४ ।
(“जटामांसी भूतजटा जटिला च तपस्विनी ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पिप्पली । इति मेदिनी ॥ वचा । उच्चटा । इति रत्नमाला । दमनकवृक्ष । इति राजनिर्घण्टः ॥ राधिकाश्वश्रूः । यथा, गौरगणोद्देशे ।
“जटिला राधिकाश्वश्रूः कार्य्यतोऽविशदेव सा ॥”
(ऋषिपत्नीविशेषः । यथा, महाभारते । १ । १९७ । १४ ।
“श्रूयते हि पुराणेऽपि जटिला नाम गौतमी ।
ऋषीनध्यासितवती सप्त धर्म्मभृतां वरा ॥”)

जटी, स्त्री, (जटि + “कृदिकारादक्तिनः ।” ४।१।४५। इत्यस्य वार्त्तिकोक्त्या वा ङीष् ।) पर्क्कटीवृक्षः । इति शब्दरत्नावली ॥ जटामांसी । इति रत्नमाला ॥

जटी [न्], पुं, (जटा अस्त्यस्येति । जटा + इनिः ।) प्लक्षवृक्षः । इत्यमरः । २ । ४ । ३२ ॥ (यथा,—
“प्लक्षो जटी पर्कटी च पर्कटी च स्त्रियामपि ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
स्कन्दस्यानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ५८ ।
“ज्वालाजिह्वः करालश्च शितकेशो जटी हरिः ॥”)
जटाविशिष्टे, त्रि । (यथा, महाभारते । ७ । ५० । ४२
“ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः ॥”)

जटुलः, पुं, (जटति देहे संहतो भवतीति । जट सङ्घाते + बाहुलकादुलच् ।) जतुकम् । जडुल इति भाषा ॥ तत्पर्य्यायः । कालकः २ पिप्लुः ३ । इत्यमरः । २ । ६ । ४९ ॥

जठरं, त्रि, (जटति सङ्घातीभवतीति । जट + बाहुलकादरः ठश्चान्तादेशः । यद्वा, जायते इति । जन + “जनेररष्ठ च ।” उणां ५ । ३८ । इति अरः ठश्चान्तादेशः ।) बद्धम् । कठिनम् । इति शब्दरत्नावली ॥ (यथा, शाकि-शाकुन्तले । ७ । १९ ।
“इदानीमस्माकं जठरकमठपृष्ठकठिना
मनोवृत्तिर्याता किं परनिविष्टेन सप्ताः ॥”)

जठरः, पुं क्ली, (जायते गर्भो यत्र वा अस्मिन्निति । जन + “जनेररष्ठ च ।” उणां । ५ । ३८ । इति अरः ठश्चान्तादेशः ।) उदरम् । इति मेदिनी ॥ (यथा, हितोपदेशे । २ । ६४ ।
“ एकतः शिवभेदश्च अन्यतः कुलानकम् ।
स्वामिनं सर्व्वभावेन मत्स्योपकारतायदा ॥”
देशविशेषः, पुं । स तु कूर्म्मविभागे वायव्यां दिशि वर्त्तते । यथा, बृहत्संहितायाम् । १४ । ८ ।
“वायव्यां दिशि कौशलकलिङ्गबङ्गो
पबङ्गजठराङ्गाः ॥”
तथाच महाभारते । ६ । ९ । ४९ ।
“अत ऊर्द्ध्वं जनपदान् निबोध गदतो मम ।”
इत्युपक्रम्य,—
“ जठराः कुक्कुराश्चैव सदशार्णाश्च भारत ॥”
इत्युक्तवान् ॥
पर्व्वतविशेषः । यथा, भागवते । ५ । १६ । २७ ।
‘ जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्र-मुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः ॥”
उदररोगविशेषः ।
“शाखो यथा सर्व्वगात्रो जठरे जठरेषु तु ।”
इति निदानस्थाने द्वादशेऽध्याये चरकेणोक्तम् ।
तल्लक्षणमुक्तं यथा, सुश्रुते निदानस्थाने ७ अध्याये ।
“कोष्ठादुपस्नेहपदमसारो
निःसृत्य दुष्टोऽनिलवेगयुक्तः ।
त्वच समुन्नम्य शनैः समन्ता-
द्विवर्द्धमानो जठरं करोति ॥”)

जठरगुत्, पुं, (गुदतीति । गुद + क्विप् । तत पष्ठीतत्पुरुषः । एतत्तुदिवमेनोदरभग्नादिपाल्य सपाल्यम् ।) आरग्वधवृक्षः । इति शब्द-चन्द्रिका ॥

जठरामयः, पुं, (जठरस्य आमयो रोगः ।) जलोदररोगः । इति राजनिर्घण्टः ॥ (अतीसाररोगश्च । तस्य चिकित्सा यथा,—
“कपित्थमध्य लीढ्वा तु सक्षौद्रं मधुशर्करम् ।
कट्फलं मधुयुक्तं वा मुच्यते जठरामयात् ॥”
इति चरके चिकित्सास्थाने दशमेऽध्याये ॥)

जडं, क्ली, (जलति लोकान् जीवयतीति । जल + अच् । डलयोरैक्यात् लस्य डत्वम् ।) जलम् । इत्यमरटीकायां रायमुकुटः ॥ (जलति घनी-भवतीति ।) सीसकम् । इति राजनिर्घण्टः ॥ (अचेतनपदार्थानां स्वरूपम् । यदुक्तं पञ्च-दश्याम् । ६ । १२० ।
“अचिदात्मघटादीनां यत् स्वरूपं जडं हि तत् ॥”)

जडः, त्रि, (जलति बुद्धिशक्तिमाच्छादयतीति । जल आच्छादने + अच् ।) हिमग्रस्तः । (शीतार्त्तः । यथा, रघौ । ४ । ६८ ।
“पराग्नमन् कर्म्मकुहैर्न पाचिना
गाढेयमन्दं कुलिशमणाद्भुतम् ॥”
“कर्म्मकुहैः कर्म्मशिशिरैः ।” इति तट्टीकायां मल्लिनाथः ॥) मूकः । (यथा, मनौ । ७ । १४९ ।
“नाइव कार्य्यविदृष्टयात् न चात्यन्तेन प्रसक्तः ।
पालकायि हि मेधायी जडवत्लोक अचरेत् ॥”
बधिरः । यथा तत्रैव । ८ । ३९४ ।
“अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः ।”
यथा तत्रैव । ८ । ३९४ ।
“अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः ॥”
“जडो बधिरः पङ्गुः सम्पूर्णसप्ततिवर्षः ।” इति तट्टीकायां कुल्लूकभट्टः ॥) अप्रज्ञः । इति मेदिनी । डे, १४ ॥ (यथा, विक्रमोर्व्वश्याम् १ अङ्के ।
“अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥”
निश्चेष्टः । यथा रघौ । २ । ४२ ।
“जटीलकण्ठामकरीचमेन
पपौ समस्थमिव मयूरखाद्यः ॥”
मोहितः । यथा, तत्रैव । ८ । ७५ । [अमहितः तत्र सं गयाय दीक्षितः प्रतियाभाद् गुरुरा-
अभिवन्दनाद् विपश्चिरवान्
इति शिष्येण किलान्वबोधयत् ॥”)

जडक्रियः, त्रि, (जडस्य मोहितस्येव क्रिया कार्य्यं यस्य ।) दीर्घसूत्री ॥ चिरक्रियः । इति हला-युधः ॥

जडता, स्त्री, (जडस्य भावः । जड + भावे तल् ।) जाड्यम् । तत्पर्य्यायः । जैमित्यम् शीतलत्वम् ३ अपाटवम् ४ । इति राजनिर्घण्टः (यथा, रघुः । ८ । ४६ ।
“अनयदाशनरज्जुपरिग्रहे
भुजलतां जडतामबलाजनः ॥”
इयं हि व्यभिचारिभावविशेषः । अस्या लक्षणं यथा, साहित्यदर्पणे । ३ । १४४ ।
“अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तत्र ॥”)
विरहदुःखेन जीवनमात्रस्थितिः । इति रस-मञ्जरी ॥

जडा, स्त्री, (जडयति सतुकरोतीति णिजन्तात् अच् ततष्टाप् ।) शूकशिम्बी । इत्यमरः ॥ भूम्यामलकी । इति रत्नमाला ॥

जडिमा, [न्]पुं, (जडस्य भावः । “वर्णदृढादिभ्यः ष्यञ् च ।” ५ । १ । १२३ । इति इमनिच् ।) जडता । तस्य लक्षणं यथा,—
“इष्टानिष्टापरिज्ञानं यत्र प्रश्नेष्वनुत्तरम् ।

दर्शनश्रवणाभावो जड़िमा सोऽभिधीयते ॥"
इत्युज्ज्वलनीलमणिः ॥
जडुलः, पुं, (जटुलः पृषोदरादित्वात् टस्य डलम् ।) देहस्थिततिलकः । इति हेमचन्द्रः ॥
जतु, क्ली, (जायते वृक्षादिभ्य इति । जन+"फलिपाटिनमिमनिजनामिति ।" उणां १ । १८ । इति उः तोऽन्तादेशश्च ।) वृक्षनिर्य्यासविशेषः । जौ इति ला इति च भाषा ॥ तत्पर्य्यायः । राक्षा २ लाक्षा ३ याव: ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ।२।२।१२५॥ रक्षा ७ । इति रभसः ॥ कीटजा ८ क्रिमिजा ९ जतुका १० जन्तुका ११ गवाधिका १२ । इति रत्नमाला ॥ जतुकम्१३ यावकः१४ अलक्तकः१५ रक्ता १६ । इति शब्दरत्नावली ॥ पलङ्कषा १७ क्रमि: १८ वरवर्णिनी १९ । इति जटाधरः ॥ (यथा, महाभारते । १ । १४७ । १३ ।
"जिघ्रन् सोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम् ॥")
जतुकं, क्ली, (जतु इव कायतीति । कै+कः ।) हिङ्गु । (जतु एव । स्वार्थे कन् ।) लाक्षा । इति मेदिनी । के, ९१ ॥
जतुका, स्त्री, (जतु इव आकया कायतीति । कै+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) जनीनामगन्धद्रव्यम् । इत्यमरटीकायां भरतः ॥ चर्म्मचटिका । इति शब्दरत्नावली ॥ (यथा, वैद्यकचक्रपाणिसंग्रहे अपस्माराधिकारे ।
"जतुकाशकृता तद्वद्दग्धेर्वा वस्तरोमभिः ।
अपस्मारहरो धूपो मूत्रसिद्धार्थशिग्रुभिः ॥")
पर्पटी । इति भावप्रकाशः ॥ लताविशेषः । सा तु मालवे प्रसिद्धा । तस्याः पर्य्यायाः । जतुकारी२ जननी३ चक्रवर्त्तिनी४ तिर्य्यक्फला५ निशान्धा६ बहुपुत्त्री७ सुपुत्त्रिका८ राजवृक्षा९ जनेष्टा१० कपिकच्छुफलोपमा११ रञ्जनी१२ रुष्यवल्ली१३ भ्रमरी१४ कृष्णवल्लिका१५ विष्णुलिका१६ कृष्णवृक्षा१७ ग्रन्थिपर्णा१८ सुवर्चिका१९ तन्वल्ली२० दीर्घफला२१ । अस्या गुणाः । शिशिरत्वम् । तिक्तत्वम् । रक्तपित्तकफदाहव्रणविषनाशित्वम् । रुचिकारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ जन्तुकापि पाठः । निशान्धाकृष्णवृक्षयोरित्यत्र क्रमेण निशाह्वा कृष्णवृक्षा च पाठः ॥ (लाक्षा । तत्पर्य्याया यथा,—
"कीटजा क्रिमिजा लाक्षा जतुका च गवायिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
जतुकारी, स्त्री, (जतु करोतीति । जतु+कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ततः स्त्रियां ङीष् ।) जतुकालता । इति राजनिर्घण्टः ॥ (गुणाद्वयोऽस्या जतुकाशब्दे व्याख्याताः ॥)
जतुकृत्, स्त्री, (जतु करोति उत्पादयतीति । कृ+क्विप् । जतोः कृदिति वा ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १५३ ॥
(अस्याः पर्य्याया यथा,—
"पर्पटी रञ्जनी कृष्णा जतुका जननी जनी ।
जतुकृच्चक्रवर्त्तिनी संस्पर्शा जतुकृच्चक्रवर्त्तिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
जतुकृष्णा, स्त्री, (जतु इव कृष्णा ।) पर्पटी । इति भावप्रकाशः ॥
जतुनी, स्त्री, (जतु इव नयति जत्वाकारेण प्रापयति संश्लिष्टद्वयमिति । नी+क्विप् । अस्याः संश्लेषात् द्वयस्य जतुवद्रूपत्वात्तथात्वम् ।) चर्म्मचटिका । इति त्रिकाण्डशेषः ॥
जतुपुत्त्रकः, पुं, (जतुनिर्म्मितः पुत्त्र इव । इवार्थे कन् ।) पाशकगुटिका । नयः । इति त्रिकाण्डशेषः ॥
जतुमणिः, पुं, क्षुद्ररोगविशेषः । (जडुल इति भाषा ॥) तस्य निदानं यथा,—
"सममुत्सन्नमरुजं मण्डलं कफरक्तजम् ।
सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिस्तु सः ॥"
इति माधवकरः ॥
तच्चिकित्सा यथा—
"चर्म्मकीलं जतुमणिं मशकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥
जतुरसः, पुं, (जतुनो रसः ।) अलक्तकः । इति राजनिर्घण्टः ॥ (विवृतिरस्यालक्तकशब्दे ज्ञातव्या ॥)
जतूका, स्त्री, (जतुका निपातनात् दीर्घः ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २।४।१५३ ॥ चर्म्मचटी । इति शब्दरत्नावली ॥
जत्रु, क्ली, (जायते वाहुरस्मात् । जन्+"जन्नादयश्च ।" उणां ४ । १०२ । इति रनकारस्य तकारश्च ।) स्कन्धसन्धिः । इत्यमरः । २।६।७८॥ माखुरा इति भाषा ॥ (यथा, महाभारते । ३ । १७ । २२ ।
"ते. स विद्धो महाबाहुः प्रद्युम्नः समरे स्थितः ।
जत्रुदेशे भृशं वीरो व्यवासीदद्रथे तदा ॥")
जत्रुकं, क्ली, (जत्रु एव । स्वार्थे कन् ।) जत्रु । इति शब्दरत्नावली ॥
जत्वश्मकं, क्ली, (जतुरूपमश्मकम् ।) शिलाजतु । इति राजनिर्घण्टः ॥
जन, ई म य उ जनौ । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट् ।) ई, जातः । म, जनयति । य उ, जायते जन्यते । जनिर्ज्जन्म । प्रादुर्भावे इति प्राञ्चः । प्रादुर्भावः स्फुटीभावः । आकाशे प्राङ्कुरविः स्यादित्यमरः । वीणादङ्कुरो जायते पत्रकाण्डादिभेदेन प्रकाशते इत्यर्थः । प्रादुर्भावोऽसदुत्पत्तिरिति केचित् । घटो जायते । इति दुर्गादासः ॥
जन, म लि र जनौ । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) म, जनयति । लि, जजन्ति । र, वैदिकः । इति दुर्गादासः ॥
जनः, पुं, (जायते इति । जन+अच् ।) लोकः । (यथा, महाभारते । १ । १४९ । ९ ।
"अथ प्रवाते तुमुले निशि सुप्ते जने तदा ।
तदुपादीपयत् भीमः शेते यत्र पुरोचनः ॥")
महर्लोकादूर्द्ध्वलोकः । पामरः । इति मेदिनी । ने, ६ ॥ (असुरविशेषः । जनार्द्दन इति शब्ददर्शनात् ॥)
जनक, पुं, (जनयतीति । जन+णिच्+ण्वुल् ।) पिता । राजभेदः । स तु मिथिलाधिपतिः । इति मेदिनी । के, ९० ॥ इक्ष्वाकुराजपुत्त्रो निमिर्वशिष्ठं त्यक्त्वा यज्ञं कृतवान् वशिष्ठस्तद्यज्ञस्थानमागत्य राजानं व्याह्वयामास राजा तदा निद्रित आसीत् । मुनिस्तु क्रोधात् त्वं विदेहो भव इत्युक्त्वा तमभिशशाप । ततः,—
"दृष्ट्वा विदेहं राजानमृषयः सर्व्व एव ते ।
तञ्च ते याजयामासुर्यावद्दीक्षां मनीषिणः ॥
नरेन्द्रस्यापि तं देहमरक्षन्नृषिपुङ्गवाः ।
वर्त्मौर्माल्यैश्च गन्धैश्च पूज्यमानं मुहुर्मुहुः ॥
ऋषयोऽपि महात्मानो निमिदेहं ममन्थिरे ।
अरणिन्तस्य देहात्तु मन्थानञ्चापि चक्रिरे ॥
मन्त्रहोमैर्महात्मानः पुत्त्रहेतोर्निमेस्तदा ।
अरण्यां मथ्यमानायां प्रादुर्भूतो यतश्च सः ॥
यतो मिथिरिति ख्यातो जननाज्जनकोऽभवत् ।
विदेहश्चाभवद्यस्मात्तस्मादात्मा स महातपाः ॥
तस्माद्विदेहाः प्रोच्यन्ते सर्व्वे तद्वंशजा नृपाः ।
एवं विदेहराजस्तु पूर्व्वको जनकोऽभवत् ॥
मिथिर्नाम महावीर्य्यो येन सा मिथिलाभवत् ॥"
इति रामायणम् ॥
(ऋषिविशेषः । स तु वैद्यसन्देहभञ्जनग्रन्थस्य प्रणेता । यथा, ब्रह्मवैवर्त्ते । १ । १६ । १९ ।
"चकार जनको योगी वैद्यसन्देहभञ्जनम् ॥"
शम्बरासुरस्य पुत्त्रविशेषः । यथा, हरिवंशे । १६१ । ४४ ।
"श्रुत्वा तु शम्बराह्वाक्यं सुतास्ते शम्बरस्य ह ।
सन्नद्धा निर्ययुर्हृष्टाः प्रद्युम्नवधकाम्यया ॥"
इत्युपक्रम्याह ।
"सेनस्कन्धोऽतिसेनश्च सेनको जनकस्तथा ॥")
उत्पादके, त्रि ॥ (यथा, ब्रह्मवैवर्त्ते ।१।१६।२७।
"जनकः सर्व्वरोगाणां दुर्न्निवारो दारुणो ज्वरः ॥")
जनकतनया, स्त्री, (जनकस्य विदेहनृपतेस्तनया ।) सीता । इति रामायणम् ॥ (यथा, मेघदूते ।१ ।
"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥")
जनकनन्दिनी, स्त्री, (जनकस्य नन्दिनी ।) सीता । इति रामायणम् ॥
जनकसुता, स्त्री, (जनकस्य सुता ।) सीता । इति रामायणम् ॥
जनकात्मजा, स्त्री, (जनकस्य आत्मजा ।) सीता । इति शब्दरत्नावली ॥ (यथाह कश्चित् ।
"युष्मत्कृते खञ्जनगञ्जनाक्षि !
शिरो मदीयं यदि यातु यातु ।
नूनानि नूनं जनकात्मजार्थे
दशाननेनापि दशाननानि ॥")
जनकारी, [न्] पुं, (जनान् किरति आच्छादयति स्वर्णेनेति । कृ आच्छादने+णिनिः ।) अलक्तकः । इति राजनिर्घण्टः ॥

जनङ्गमः, पुं, (जनेभ्यो गच्छतीति । "गमश्च ।" ३ । २ । ४७ । खच् मुमागमश्च ।) चाण्डालः । इत्यमरः । २।१०।१९ ॥ (यथा, माघे ।१५।३५ ।
"अवधीज्जनङ्गम इवैष
यदि हतवान् ऋषं नगु ।
स्पर्शमशुचिवपुरर्हति न
प्रतिमानगानु नितरां नृपोचिताम् ॥")

जनता, स्त्री, (जनानां समूहः । जन + "ग्राम-जनबन्धुभ्यस्तल् ।" ४ । २ । ४३ । इति तल् ।) जनसमूहः । इत्यमरः । ३ । २ । ४२ ॥ (यथा, रघौ । ११ । ८२ ।
"तावुभावपि परस्परस्थितौ
वर्द्धमानपरिहीनतेजसौ ।
पश्यति स्म जनता दिनात्यये
पार्व्वणौ शशिदिवाकराविव ॥"॥
जनस्य भावः ।) जनत्वञ्च ॥

जननं, क्ली, (जन्यतेऽस्मिन्निति । जन + अधिकरणे ल्युट् ।) वंशः । (जन + भावे ल्युट् ।) जन्म । इति मेदिनी । ने, ६६ ॥ (यथा, महानिर्व्वाण-तन्त्रे । ३ । ५० ।
"जननमरणभीतिभ्रंशि सच्चित्स्वरूपं
सकलभुवनबीजं ब्रह्मचैतन्यमीडे ॥"
उत्पत्तिः । यथा, कुमारे । १ । ४२ ।
"अन्योन्यशोभाजननाद्बभूव
साधारणो भूषणभूष्यभावः ॥"
पुं, जनयति उत्पादयति जीवानिति । जन + णिच् + कर्त्तरि ल्युः । विष्णुः । यथा, महा-भारते । १३ । १४९ । ११४ ।
"जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥"
"जन्तून् जनयन् जननः ।" इति तद्भाष्यम् ॥
जनयतीति । जनि + ल्युः । उत्पादके, त्रि । यथा, महाभारते । १ । ३६ । ३५ ।
"एकत्र चिरवासो हि न प्रीतिजननो भवेत् ॥")

जननिः, स्त्री, (जनयति प्राणसुखमिति । जन + णिच् + बाहुलकात् अनिः ।) जनीनामगन्ध-द्रव्यम् । इति शब्दरत्नावली ॥

जननी, स्त्री, (जनयतीति । जनि + बाहुलकादनिः । कृदिकारादिति वा ङीष् । यद्वा, कृत्यल्युटो बहुलमिति ल्युट् टित्वात् ङीप् ।) माता । (यथा, पञ्चतन्त्रे । १ । ३६ ।
"निरतिशयं गरिमाणं
तेन जनन्याः स्मरन्ति विद्वांसः ।
यत् कमपि वहति गर्भं
महतामपि यो गुरुर्भवति ॥")
दया । इति मेदिनी । ने, ६६ ॥ जनीनाम-गन्धद्रव्यम् । (पर्य्याया यथा,—
"पर्पटी रञ्जना कृष्णा जतुका जननी जनी ।
जतुकृष्णाग्निसस्पर्शा जतुकृत् चक्रवर्त्तिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
चर्म्मचटी । इति शब्दरत्नावली ॥ यूथिका । इति शब्दचन्द्रिका ॥ कटुका । मञ्जिष्ठा । अल-क्तकः । जटामांसी । इति राजनिर्घण्टः ॥

जनपदः, पुं, (जनस्य लोकस्य पदं आश्रयस्थानं यत्र । जनः पदं पदं यस्येति वा ।) देशः । (यथा, चाणक्यशतके । ३१ ।
"त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥"
जनपदनामानि महाभारते भीष्मपर्व्वणि ९ अध्याये कथितानि एतच्छब्दे च विशेषतो द्रष्टव्यानि ॥)
जनः । इति मेदिनी । दे, ४८ ॥

जनप्रवादः, पुं, (जनेषु लोकेषु प्रवादोऽपवादः ।) लोकापवादः । तत्पर्य्यायः । कौलीनम् २ विगानम् ३ वचनीयता ४ । इति हेमचन्द्रः । ।२।१८४ ॥ (यथा, महाभारते । २।७२।१६ ।
"जनप्रवादात् सुमहान् ग्रहस्तत्रापि नराधिपः ।
ह्रिया च धर्म्मसंयोगात् पार्थो द्यूतमियात्
पुनः ॥")

जनप्रियं, पुं, (जनानां प्रियं ।) धान्यकम् । शोभाञ्जनवृक्षः । इति राजनिर्घण्टः ॥ (लोक-प्रिये, त्रि ॥)

जनमेजयः, पुं, (जनान् शत्रुजनान् एजयति प्रतापैः कम्पयतीति । एजृ कम्पने + णिच् + "एजेः खश् ।"३।२।२८। इति खश् ततो मुमागमः ।) परीक्षितराजपुत्रः । तत्पर्य्यायः । राजर्षिः २ पारीक्षितः ३ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । २ । ११ । ६ ।
"पौरजानपदा लोकाश्चक्रुस्त नृपतिं शिशुम् ।
जनमेजयनामानं राजलक्षणसंयुतम् ॥"
जन्मेजय इति पाठोऽपि क्वचित् दृश्यते । तन्नि-रुक्तिस्तच्छब्दे द्रष्टव्या ॥

अयं हि चतुरशीतिवर्षाणि राज्यं कृतवान् । तत्र अश्वमेधादिक बहुयज्ञं कृत्वा पितृवधा-मर्षात् सर्पसत्त्रं चकार । अनेनासौ जरत्-कारुपुत्त्रेण आस्तीकेन प्रार्थितः सर्पसत्त्रात् विरराम ततश्चित्तप्रशमनार्थं भारतादिकं श्रुत-वान् । वृत्तान्तस्त्वेषः क्रमशः प्रदर्श्यते । यथा, राजावल्यां १ परिच्छेदे ।
"पारीक्षितस्तदा राजा नीतिमान्नीतिभीतिवः ।
पृथिवीं पालयामास निवसन् गजसाह्वये ।
कृत्वा पितृवधामर्षी सर्पेष्टिं मुनिभिः समम् ।
नाशयामास सर्पाणां कुलानि कुलनायकः ॥
हयमेधस्ततश्चक्रे सम्भारैर्बहुविस्तरैः ।
ब्रह्महत्याभवत्तत्र यागेऽकालकृते तदा ॥
तत् पापमभवत् तस्य दारुणं पृथिवीपते. ।
वैशम्पायनतो वेदव्यासशिष्यात्तपोनिधेः ।
श्रुत्वा भारतमाख्यानं तत्पापात् मुक्तिमाप सः ।
चतुरशीतिवर्षाणि कृत्वा राज्यं सुनिर्म्मलम् ।
शतानीकं सुतं राज्ये संस्थाप्यैव दिवं गतः ॥"
सोमश्रवसमृषिमसौ पौरहित्याय वृतवान् । तत्कथा यथा, महाभारते । १।३।१—२० ।
"जनमेजयः पारिक्षितः सह भ्रातृभिः कुरु-क्षेत्रे दीर्घसत्त्रमुपास्ते । तस्य भ्रातरस्त्रयः श्रुत-सेन उग्रसेनो भीमसेन इति । तेषु तत्सत्त्र-मुपासीनेष्वागच्छत् सारमेयः । स जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीप-मुपागच्छत् । तं माता रोरूयमाणमुवाच किं रोदिषि केनास्यभिहत इति । स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतो-ऽस्मीति । तं माता प्रत्युवाच व्यक्तं त्वया तत्रा-पराद्धं येनास्यभिहत इति । स तां पुनरुवाच नापराध्यामि किञ्चिन्नावेक्षे हवींषि नावलिह इति । तच्छ्रुत्वा तस्य माता सरमा पुत्त्रदुःखार्त्ता तत् सत्त्रमुपागच्छद्यत्र स जनमेजयः सह भ्रातृभिर्दीर्घं सत्त्रमुपास्ते । स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्त्रो न किञ्चिदपराध्यति नावे-क्षते हवींषि नावलेढि किमर्थमभिहत इति । न किञ्चिदुक्तवन्तस्ते सा तानुवाच यस्मादय-मभिहतोऽनपकारी तस्माददृष्टं त्वां भयमाग-मिष्यतीति । जनमेजय एवमुक्तो देवशुन्या सरमया भृशं सम्भ्रान्तो विषण्णश्चासीत् । स तस्मिन् सत्त्रे समाप्ते हास्तिनपुरं प्रत्येत्य पुरो-हितमनुरूपमन्विच्छमानः परं यत्नमकरोत् यो मे पापकृत्यां शमयेदिति । स कदाचि-न्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्चित् स्वविषये आश्रममपश्यत् । तत्र कश्चिदृषि-रासाञ्चक्रे श्रुतश्रवा नाम तस्य तपस्यभिरतः पुत्त्र आस्ते सोमश्रवा नाम । तस्य तं पुत्त्र-मभिगम्य जनमेजयः पारीक्षितः पौरहित्याय वव्रे । स नमस्कृत्य तमृषिमुवाच भगवन्नयं तव पुत्त्रो मम पुरोहितोऽस्त्विति । स एवमुक्तः प्रत्युवाच जनमेजयं भो जनमेजय । पुत्त्रोऽयं मम सर्प्यां जातो महातपस्वी स्वाध्यायसम्पन्नो मत्तपो-वीर्य्यसम्भृतो मच्छुक्रं पीतवत्यास्तस्याः कुक्षौ जातः । समर्थोऽयं भवतः सर्व्वाः पापकृत्याः शमयितुमन्तरेण महादेवकृत्याम् । अस्य त्वेक-मुपांशुव्रतं यदेनं कश्चिद्ब्राह्मणः कञ्चिदर्थ-मभियाचेत्तं तस्मै दद्यादयं यद्येतदुत्सहसे ततो नयस्वैनमिति । तेनैवमुक्तो जनमेजयस्तं प्रत्यु-वाच भगवंस्तत्तथा भविष्यतीति ॥"॥
अस्य सर्पसत्त्रविवरणकथा यथा देवीभागवते । २ । ११ । ४६—६० ।
"इति तस्य वचः श्रुत्वा राजा जन्मेजयस्तदा ।
नेत्राभ्यामश्रुपातञ्च चकारातीवदुःखितः ॥
धिक्कारमस्तु मद्वंशे धिग्वृथामानकरस्य वै ।
पिता यस्य गतिं घोरां प्राप्तः पन्नगपीडितः ॥
अद्याहं मखमारभ्य करोम्यपचितिं पितुः ।
हत्वा सर्पानसङ्ख्यान् दीप्यमाने विभावसौ ॥
आहूय मन्त्रिणः सर्व्वान् राजा वचनमब्रवीत् ।
कुर्व्वन्तु यज्ञसम्भारं यथार्हं मन्त्रिसत्तमाः ॥
गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः ।
कुर्व्वन्तु मण्डपं स्वस्थाः शतस्तम्भं मनोहरम् ॥
वेदी यज्ञस्य कर्त्तव्या ममाद्य सचिवाः खलु ।
तदङ्गत्वे विधेयो वै सर्पसत्त्रः सुविस्तरः ॥
तत्रास्तु यष्टा तत्र धौम्यो महामुनिः ।
शीघ्रमाहूयतां विप्राः सर्व्वज्ञा वेदपारगाः ॥
मन्त्रिणस्तु तदा चक्रुर्भूपवाक्यैर्मिताक्षराः ।

यज्ञस्य सर्व्वसम्भारं वेदीं यज्ञस्य विस्तृताम् ॥
हवने वर्त्तमाने तु सर्पाणां तक्षको गतः ।
इन्द्रं प्रति भयार्त्तोऽहं त्राहि मामिति चाब्रवीत् ॥
भयभीतं समाश्वास्य स्वासने सन्निवेश्य च ।
इदावभयमत्यर्थं निर्भयो भव पन्नग ! ॥
तमिन्द्रशरणं ज्ञात्वा मुनिर्द्दिष्टाभयं तथा ।
उत्तस्थौऽहयदुद्विग्नः सेन्द्रं कृत्वा निमन्त्रणम् ॥
स्तुतस्तदा तक्षकेण यायावरकुलोद्भवः ।
आस्तीको नाम धर्म्मात्मा जरत्कारुसुतो मुनिः ॥
तत्रागत्य मुनेर्बालस्तुष्टाव जनमेजयम् ।
राजा तमर्च्चयामास दृष्ट्वा बालं सुपण्डितम् ॥”)

जनयित्री, स्त्री, (जनयितृ + ङीप् ।) माता । इत्य-
मरः । २ । ६ । २८ ॥ (यथा, रघुः । १० । ७० ।
“कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ॥”)

जनरवः, पुं, (जनेषु लोकेषु रवः प्रवादः ।) लोक-
वादः । यथाह लक्ष्मणसेनः ।
“परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः ॥”

जनलोकः, पुं, (जन एव लोकः ।) महर्लोको-
परिभुवनम् । यथा,—
“अयं स हि महर्लोकः स्वर्लोकात् परमाद्भुतः ।
कल्पायुषो वसन्त्यत्र तपसा धुतकल्मषाः ॥
इत्थं कथां कथयतोर्भगवद्गणयोः प्रिये ! ।
क्षणार्द्धेन विमानन्तज्जनलोकं निनाय तान् ॥
निवसन्त्यमला यत्र मानसा ब्रह्मणः सुताः ।
सनन्दनाद्या योगीन्द्राः सर्व्वे ते ह्यूर्द्ध्वरेतसः ॥
अन्ये तु योगिनो ये वै त्वखण्डब्रह्मचारिणः ।
सर्व्वद्वन्द्वविनिर्म्मुक्तास्ते वसन्त्यत्र निर्म्मलाः ॥
महर्लोकः स्थितेरूर्द्ध्वमेककोटिप्रमाणतः ।
कोटिद्वयेतिसंख्यातो जनो भूर्लोकतो जनैः ॥”
इति स्कान्दे काशीखण्डम् ॥

जनवल्लभः, पुं, (जनानां लोकानां वल्लभः प्रियः ।)
श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ लोक-
प्रिये, त्रि ॥

जनवादः, पुं, (जनेषु लोकेषु वादोऽपवादः ।) जन-
प्रवादः । इति हलायुधः ॥ (यथा, आर्य्यासप्त-
शत्याम् । ४१८ ।
“भक्षयतोऽपि गिरिशे स्नेहमयी त्वमपि तेन
सुभगासि ।
मोचयति जनवादो यदोषधिप्रस्थदुहितेति ॥”)

जनश्रुतिः, स्त्री, (जनेभ्यः श्रुतिः श्रवणम् ।) सत्य-
मसत्यं वा लोकप्रवादः । तत्पर्य्यायः । किंव-
दन्ती २ । इत्यमरः । १ । ६ । ७ ॥ (यथा,
आर्य्यासप्तशत्याम् । ३६५ ।
“पुंसां दर्शय सुन्दरि ! मुखेन्दुमीषदपाङ्गमपास्य ।
मायाविन इति कृत्वा जनश्रुतिर्मे यशो भवतु ॥”)

जनस्थानं, क्ली, (जनस्य स्थानं भूभागः ।) दण्ड-
कारण्यम् । इति जटाधरः ॥ दण्डकारण्य-
समीपस्थानविशेषः । यथा । इक्ष्वाकुराजपुत्रो
दण्डः शुक्राचार्य्यकन्यामरजां बलाद्धर्षिता
मैथुनं कृतवान् स च दमितः शुक्रो राजानं
शशाप । यथा,—
“सप्तरात्रेण राजासौ सभृत्यबलवाहनः ।
पापकर्म्मसमाचारो वधं प्राप्स्यति दुर्म्मतिः ॥
सर्व्वसत्त्वानि यानीह जङ्गमानि स्थिराणि च ।
सर्व्वेषां पांशुवर्षेण क्षयः क्षिप्रं भविष्यति ॥
दण्डस्य विषयो यावत् तावत् सवनमाश्रमम् ।
पांशुभूतमिवाकस्मात् सप्तरात्राद्भविष्यति ॥
इत्युक्त्वा क्रोधसन्तप्तस्तदाश्रमनिवासिनम् ।
जनं जनपदस्यान्ते स्थीयतामित्यवोचत ॥
सप्ताहाद्भस्मसाद्भूतः स चापि ब्रह्मतेजसा ।
यस्य दण्डस्य विषयो विन्ध्यशैलस्य सानुषु ॥
तदाप्रभृति काकुत्स्थ ! दण्डकारण्यमुच्यते ।
तपस्विनः स्थिता यत्र तज्जनस्थानमुच्यते ॥”
इति रामायणम् ॥
(अत्र रावणस्य खरदूषणप्रभृतीनि सैन्या-
न्यासन् । यथा, रामायणे । १ । १ । ४६ ।
“तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥”
“जनस्थानं नाम दण्डकारण्ये रावणबलनिवेश-
स्थानम् ।” इति तट्टीकायां रामानुजः ॥)

जना, स्त्री, (जननमिति । जन + बाहुलकात्
अङ् ।) उत्पत्तिः । इति मुग्धबोधम् ॥

जनान्तः, पुं, (जनस्य प्रदेशस्य अन्तः ।) देशः ।
इति धनञ्जयः । सीमा इति पारस्यभाषा ॥

जनान्तिकम्, क्ली, अप्रकाशः । इति त्रिकाण्ड-
शेषः ॥ (एतल्लक्षणं यथा, साहित्यदर्पणे ।
“त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्ति-
कम् ॥”
एतल्लक्षणोक्तमप्रकाशकथनम् । नाटके एव
अस्य भूरिप्रयोगो दृश्यते । जनस्य अन्तिकम् ।
जनसमीपञ्च ॥)

जनार्द्दनः, पुं, विष्णुः । इत्यमरः । १ । १ । १८ ॥
तन्नामव्युत्पत्तिर्यथा । “समुद्रान्तर्वासिनो जन-
नाम्नोऽसुरान् अर्द्दितवान् जनार्द्दनः । अर्द्द
वधे अर्द्दकश्च नन्द्यादित्वादनः । किंवा जनै-
र्लोकैरर्द्द्यते याच्यते पुरुषार्थानसौ जनार्द्दनः ।
अर्द्द यातनगतियाचने कर्म्मणि अनट् । किंवा
जननं जनः भावे घञ् । जनं जन्म अर्द्दयति
हन्ति भक्तस्य मुक्तिदत्वादिति जनार्द्दनः ।
किंवा जनान् लोकान् अर्द्दति हररूपेण
संहारकत्वादिति जनार्द्दनः । किंवा जनयति
उत्पादयति लोकान् ब्रह्मरूपेण सृष्टिकर्तृत्वा-
दिति जनः जनेर्ण्यन्तात् पचाद्यच् । अर्द्दति
हन्ति लोकान् हररूपेण संहारकारित्वादिति
अर्द्दनः जनश्चासौ अर्द्दनश्चेति जनार्द्दनः ।
किंवा जनान् लोकान् अर्द्दति गच्छति प्राप्नोति
रक्षार्थं पालकत्वादिति जनार्द्दनः ।” इत्यमर-
टीकायां भरतः ॥ * ॥ गयायां तस्य हस्ते
जीवितस्य पिण्डदानविधिर्यथा,—
“जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यथवान्येषां सव्येन तिलैर्विना ॥
जीवता दधिसम्मिश्रं सर्व्वे ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो मृते प्रभो ! ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गयाशिरे ।
जनार्द्दन ! नमस्तुभ्यं नमस्ते पितृमोक्षद ! ॥
पितृपाद्य नमस्तुभ्यं नमस्ते पितृरूपिणे ।
गयायां पितृरूपेण स्वयमेव जनार्द्दनः ॥
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ।
नमस्ते पुण्डरीकाक्ष ! ऋणत्रयविमोचन ! ॥
लक्ष्मीकान्त ! नमस्तेऽस्तु पितृमोक्षप्रदो भव ।
वामजानु च सम्पात्य नत्वा भीमो जनार्द्दनम् ॥
श्राद्धं सपिण्डकं कृत्वा भ्रातृभिर्ब्रह्मलोकभाक् ।
पितृभिः सह धर्म्मात्मा कुलानाञ्च शतेन च ॥
शिलायां व्यक्तरूपेण व्यक्ताव्यक्तात्मना स्थितः ।
लक्ष्मीशो विबुधैः सार्द्धं तस्माद्देवमयी शिला ॥”
इति श्रीवायुपुराणे श्वेतवाराहकल्पे गया-
माहात्म्ये ४ अध्यायः ॥ * ॥ शालग्रामशिला-
विशेषः । तल्लक्षणं यथा,—
“सशङ्खचक्राब्जगदं जनार्द्दनशिलां नमः ।
उपेन्द्रं गदिनं शार्ङ्गिपद्मशङ्ख ! नमोऽस्तु ते ॥”
इति पाद्मे पातालखण्डे १० अध्यायः ॥
“आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात् ॥”
इति कर्म्मलोचनम् ॥

जनाशनः, पुं, (जनानश्नाति भक्षयतीति । अश +
ल्युः ।) वृकः । इति राजनिर्घण्टः ॥

जनाश्रयः, पुं, (जनानां लोकानामाश्रयः ।) मण्डपः ।
इत्यमरः । २ । २ । ८ ॥

जनिः, स्त्री, (जननमिति । जन + “जनिघसि-
भ्यामिण् ।” उणां ४ । १२६ । इति इण् ।
जनिवध्योश्चेति वृद्धिनिषेधः ।) उत्पत्तिः ।
इत्यमरः । १ । ४ । ३० ॥ (यथा, हरि-
वंशे । २०८ । ४० ।
“वनसत्त्वौषधीश्चैव युगपत् प्रतिपद्यसे ।
बालभावाय वसुधां मन्ये मन्ये जनिस्तव ॥”
जायते यस्याम् । जन + आधारे इण् ।) नारी ।
माता । इति शब्दरत्नावली ॥ (जायते सुख-
मनयेति । करणे इण् ।) जनीनामगन्धद्रव्यम् ।
इत्यमरटीकायां रायमुकुटः ॥

जनिका, स्त्री, (जायते वंशो यस्यामिति जनिः ।
ततः स्वार्थे कन् टाप् च ।) स्नुषा । इति शब्द-
रत्नावली ॥ (जनिशब्दार्थः ॥) जननकर्त्री च ॥

जनितं, त्रि, (जन्यते स्मेति । जन + णिच् + क्तः ।)
उत्पादितम् । यथा,—
“सेनाचरी भवदिभाननदानवारि-
वासेन यस्य जनिता सुरभी रजश्रीः ॥”
इति नैषधम् ॥
(यथा च हरिवंशे । १६१ । ११ ।
“जतोऽहं कामयामि त्वां नहि त्वं जनितो मया ।
कम्पते बीज ! पश्यन्ती ब्रीडामि हरि
दुर्म्मना ॥”)

जनिता [ऋ] पु, (जनयतीति । जन+णिच्+तृच् । "जनिता मन्त्रे ।" ६ । ४ । ५३ । इति निपातनात् णिलोपः ।) पिता । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । १ । १२९ । ११ ।
"अधा हि त्वा जनिता जीजनद्वसो
रक्षोहणं त्वा जीजनद्वसो ॥"
क्वचित् लौकिकेऽपि दृश्यते । यथा, पञ्चतन्त्रे । १ । ९ ।
"अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते ।
जनितारमपि त्यक्त्वा निःस्वं गच्छति दूरतः ॥")
जनित्री, स्त्री, (जनितृ+स्त्रियां ङीप् ।) माता । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । ३ । ४८ । २ ।
"तं ते माता परि योषा जनित्री
महः पितुर्दम आसिञ्चदग्रे ॥"
यथाच शङ्कराचार्यकृतविष्णुस्तोत्रे ९ ।
"या सूते सत्त्वजालं सकलमपि सदा सन्निधानेन पुंसो
धत्ते या सत्त्वयोगाच्चरमचरमिदं भूतये भूतजातम् ।
धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥")
जनित्वः, पु, (जायतेऽस्मादिति । जन+"जनिदाच्युसिति ।" उणां ४ । १०४ । इति इत्वन् ।) पिता । इत्युणादिकोषः ॥
जनित्वा, स्त्री, (जायतेऽस्याः । जन+इत्वन् । अजादित्वात् टाप् ।) माता । इत्युणादिकोषः ॥
जनिनीलिका, स्त्री, (जन्या उत्पत्त्या नीलिका ।) महानीली । इति राजनिर्घण्टः ॥ (महानीलीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)
जनिमा, [न्] पुं, (जन्यते इति । जन+"जनिमृङ्भ्यामिमनिन् ।" उणां ४ । १४८ । इति इमनिन् ।) जन्म । इत्युणादिकोषः ॥
जनी, स्त्री, (जायते सन्ततिर्यस्यामिति । जन+"जनिघसिभ्यामिण् ।" उणां ४ । १२९ । इतीण् जनिवध्योश्चेति वृद्धिनिषेधः । ततः कृदिकारादिति ङीष् ।) सीमन्तिनी । वधूः (जन+भावे इण् ।) उत्पत्तिः । (जायते आरोग्यमनया । करणे इण् ।) ओषधीभित् । इति मेदिनी । ने, ६ ॥ शेषस्य पर्य्यायः । जतूका २ रजनी ३ जतुकृत् ४ चक्रवर्त्तिनी ५ संस्पर्शा ६ । इत्यमरः । २ । ४ । १५३ ॥ जतुका ७ जनिः ८ जननी ९ । इति भरतः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ जतुकाशब्दे द्रष्टव्यौ ॥
जनुः [स्] क्ली, (जन्यते इति । जन+"जनेरुसिः ।" उणां । २ । ११६ । इति उसिः ॥) जन्म । इत्यमरः । १ । ४ । ३० ॥ (यथा, ऋग्वेदे । ४ । १७ । २० ।
"त्वं राजा जनुषां धेह्यस्मे अधिश्रवो
माहिनं यज्जरित्रे ॥")
जनुः, स्त्री, (जन्यते इति । जनीप्यादेः जनी+बाहुलकात् उः ।) जन्म । इत्युणादिकोषः ॥
जनूः, स्त्री, (जनु+स्त्रियां ऊङ् ।) जन्म । इति शब्दरत्नावली ॥
जनेष्टः, पुं, (जनानामिष्टः प्रियः ।) सुहृद्वृक्षः । इति राजनिर्घण्टः ॥
जनेष्टा, स्त्री, (जनानामिष्टा प्रिया ।) जतुका । वृद्धिनामौषधिः । जातीपुष्पम् । हरिद्रा । इति राजनिर्घण्टः ॥
जनोदाहरण, क्ली, (जनैरुदाह्रियते कथ्यते इति । उत्+आ+हृ+कर्म्मणि ल्युट् ।) यशः । इति धनञ्जयः ॥
जनौः, पुं, (जनानवति रक्षतीति । अव+क्विप् । "च्छ्वोः शूडनुनासिके च ।" ६ । ४ । १९ । इति ऊट् ततो वृद्धिः ।) जारधकः । इति मुग्धबोधम् ॥
जन्तुः, पुं, (जायते उद्भवतीति । जन+"कमिमनिजनीति ।" उणां । १ । ७२ । इति तुः ।) प्राणी । इत्यमरः । १ । ४ । ३० ॥ (यथा, मनौ । ४ । २४० ।
"एकः प्रजायते जन्तुरेक एव प्रलीयते ।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥"
मनुष्ये बहुवचनान्तः । इति निघण्टुः ॥ यथा, ऋग्वेदे । १ । ९४ । ५ ।
"विश्वां गोपा अस्य चरन्ति जन्तवो
द्विपच्च यदुत चतुष्पदक्तुभिः ॥"
सोमकस्य राज्ञः पुत्त्रविशेषः । अस्य विवरणमुक्तं यथा, महाभारते । ३ । १२७—१२८ अध्याययोः ।
"युधिष्ठिरासीन्नृपतिः सोमको नाम धार्म्मिकः ।
तस्य भार्य्याशतं राजन् । सदृशीनामभूत्तदा ॥
स वै यत्नेन महता तासु पुत्त्रं महीपतिः ।
कञ्चिन्नासादयामास कालेन महता त्वपि ॥
कदाचित्तस्य वृद्धस्य घटमानस्य यत्नतः ।
जन्तुर्नाम सुतस्तस्मिन् स्त्रीशते समजायत ॥
तं जातं मातरः सर्व्वाः परिवार्य्य समासते ।
सततं पृष्ठतः कृत्वा कामभोगान् विशाम्पते ॥
ततः पिपीलिका जन्तुं कदाचिददशत् स्फिचि ।
स दष्टो व्यनदन्नादं तेन दुःखेन बालकः ॥
ततस्ता मातरः सर्व्वाः प्राक्रोशन् भृशदुःखिताः ।
परिवार्य्य जन्तुं सहिता स शब्दस्तुमुलोऽभवत् ॥
तमार्त्तनादं सहसा शुश्राव स महीपतिः ।
अमात्यपर्षदो मध्ये उपविष्टः सहर्त्विजा ॥
ततः प्रस्थापयामास किमेतदिति पार्थिवः ।
तस्मै क्षत्ता यथावृत्तमाचचक्षे सुतं प्रति ॥
त्वरमाणः स चोत्थाय सोमकः सह मन्त्रिभिः ।
प्रविश्यान्तःपुरं पुत्त्रमाश्वासयदरिन्दमः ॥
सान्त्वयित्वा तु तं पुत्त्रं निष्क्रम्यान्तःपुरान्नृपः ।
ऋत्विजा सहितो राजन् । सहामात्य उपाविशत् ॥
सोमक उवाच ।
धिगस्त्विहैकपुत्त्रत्वमपुत्त्रत्वं वरं भवेत् ।
नित्यातुरत्वाद्भूतानां शोक एवैकपुत्त्रता ॥
इदं भार्य्याशतं ब्रह्मन् । परीक्ष्य सदृशं प्रभो ! ।
पुत्त्रार्थिना मया वोढ़ं न तासां विद्यते प्रजा ॥
एकः कथञ्चिदुत्पन्नः पुत्त्रो जन्तुरयं मम ।
यतमानासु सर्व्वासु किन्नु दुःखमतः परम् ॥
वयश्च समतीतं मे सभार्य्यस्य द्विजोत्तम ॥
आसां प्राणाः समायत्ता मम चात्रैकपुत्त्रके ॥
स्यान्नु कर्म्म तथा युक्तं येन पुत्त्रशतं भवेत् ।
महता लघुना वापि कर्म्मणा दुष्करेण वा ॥
ऋत्विगुवाच ।
अस्ति चैतादृशं कर्म्म येन पुत्त्रशतं भवेत् ।
यदि शक्नोषि तत् कर्त्तुमथ वक्ष्यामि सोमक ! ॥
सोमक उवाच ।
कार्य्यं वा यदि वाकार्य्यं येन पुत्त्रशतं भवेत् ।
कृतमेवेति तद्विद्धि भगवन् ! प्रब्रवीतु मे ॥
ऋत्विगुवाच ।
यजस्व जन्तुना राजंस्त्वं मया वितते क्रतौ ।
ततः पुत्त्रशतं श्रीमद्भविष्यत्यचिरेण ते ॥
वपायां हूयमानायां धूममाघ्राय मातरः ।
ततस्ताः सुमहावीर्य्यान् जनयिष्यन्ति ते सुतान् ।
तस्यामेव तु ते जन्तुर्भविता पुनरात्मजः ।
उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति ॥
ततः स याजयामास सोमकं तेन जन्तुना ।
मातरस्तु बलात् पुत्त्रमपाकार्षुः कृपान्विताः ॥
हा हताः स्मेति वाशन्त्यस्तीव्रशोकसमाहताः ।
रुदत्यः करुणञ्चापि गृहीत्वा दक्षिणे करे ॥
सव्ये पाणौ गृहीत्वा तु याजकोऽपि स्म कर्षति ।
कुररीणामिवार्त्तानां समाकृष्य तु तं सुतम् ॥
विशस्य चैनं विधिना वपामस्य जुहाव सः ।
वपायां हूयमानायां गन्धमाघ्राय मातरः ॥
आर्त्ता निपेतुः सहसा पृथिव्यां कुरुनन्दन ! ॥
सर्व्वाश्च गर्भानलभंस्ततस्ताः परमाङ्गनाः ॥
ततो दशसु मासेषु सोमकस्य विशाम्पते ।
जज्ञे पुत्त्रशतं पूर्णं तासु सर्व्वासु भारत ! ॥
जन्तुर्ज्येष्ठः समभवत् जनित्रीणामेव पार्थिव ! ।
स तासामिष्ट एवासीत् न तथा ते निजाः सुताः ॥
तच्च लक्षणमस्यासीत् सौवर्णं पार्श्व उत्तरे ।
तस्मिन् पुत्त्रशते चाग्र्यः स बभूव गुणैरपि ॥")
जन्तुकम्बुः, पुं, (जन्तुना केतनाविशिष्टः कम्बुरिव ।) क्रमिशङ्खः । इति राजनिर्घण्टः ॥
जन्तुका, स्त्री, (जन्तुभिः कायति प्रकाशते इति । कै+कः । अजादित्वात् टाप् ।) नाड़ीहिङ्गु । लाक्षा । इति राजनिर्घण्टः ॥ (यथा,—
"जन्तुका अलजभा च तथा प्रावरकन्दकम् ।"
इत्युत्तरस्थानेऽष्टादशेऽध्याये वाभटेनोक्तम् ॥)
जन्तुघ्नं, क्ली, (जन्तून् कृमीन् हन्तीति । हन+"अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) विड़ङ्गम् । इति शब्दरत्नावली ॥ (यथा, भावप्रकाशस्य मध्यखण्डे चतुर्थभागे योनिकन्दचिकित्सायाम् ।
"गैरिकाम्रास्थि जन्तुघ्नं रजन्यञ्जनकट्फलाः ॥")
हिङ्गु । इति रत्नमाला ॥
जन्तुघ्नः, पुं, (जन्तून् कृमीन् हन्तीति । हन+टक् ।) बीजपूरः । इति राजनिर्घण्टः ॥

जन्तुघ्नी, स्त्री, (जन्तुघ्न+टित्त्वात् ङीप् ।) विड़ङ्गम् । इति राजनिर्घण्टः ॥

जन्तुनाशनं, क्ली, (जन्तून् क्रिमीन् नाशयतीति । नश+णिच्+ल्युः । यद्वा, जन्तूनां नाशनं विनाशो यस्मादिति ।) हिङ्गु । इति राजनिर्घण्टः ॥

जन्तुपादपः, पुं, (जन्तुप्रधानः पादपः ।) कोषाम्रवृक्षः । इति राजनिर्घण्टः ॥

जन्तुफलः, पुं, (जन्तवः कीटाः फले यस्य ।) उडुम्बरः । इत्यमरः । २ । ४ । २२ ॥ (पर्य्यायोऽस्य यथा,—
"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जन्तुमारी, स्त्री, (जन्तून् क्रिमीन् मारयतीति । जन्तु+मृ+णिच्+"कर्म्मण्यण् ।" ३।२।१। इत्यण् । ततो ङीप् ।) निम्बूकः । इति राजनिर्घण्टः ॥

जन्तुला, स्त्री, (जन्तून् कीटान् लाति आददातीति । ला+कः ।) काशतृणम् । इति त्रिकाण्डशेषः ॥

जन्तुहन्त्री, स्त्री, (हन्तीति । हन्+तृच् स्त्रियां ङीप् । ततो जन्तूनां हन्त्री नाशिका ।) विड़ङ्गम् । इति राजनिर्घण्टः ॥

जन्म, [न्] क्ली, (जायते इति । जन+"सर्व्वधातुभ्यो मनिन् ।" उणां । ४ । १४४ । इति मनिन् ।) उत्पत्तिः । आद्यक्षणसम्बन्धः । इति तिथितत्त्वेऽमावस्याप्रकरणे व्याख्यातम् ॥ तथा च ।
"अध्यक्षक्षणयोगस्य क्षणयोगो जनिर्म्मता ।"
इति सामान्यलक्षणाग्रन्थे शिरोमणिकृतोदयनाचार्य्यकारिका ॥ तत्पर्य्यायः । जनुः २ जननम् ३ जनिः ४ उद्भवः ५ । इत्यमरः ।१।४।३० ॥ जन्मम् ६ जनी ७ । इति भरतः ॥ प्रभवः ८ भावः ९ भवः १० सम्भवः ११ जनूः १२ प्रजननम् १३ । इति शब्दरत्नावली ॥ जातिः १४ । इति जटाधरः ॥ तच्च शुभाशुभकर्म्मणा भवति । यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"शुभानामशुभानाञ्च कर्म्मणा जन्म जायते ।
पुण्यक्षेत्रे च सर्व्वत्र नान्यत्र भुञ्जते जनाः ॥"*॥
तस्य क्रमो यथा,—
"ऋतौ विकाशि भवति योनिः कमलवत् सदा ।
गर्भाशयस्ततः शुक्रं धत्ते रक्तसमन्वितः ॥
अन्यत्र काले सङ्कुला योनिर्भवति योषिताम् ।
सूक्ष्मं शुक्रमतो योनौ नैति गर्भाशयं शनैः ॥
ऋतावपि च योनिश्चेद्वातपित्तकफाष्टता ।
भवेत्तदा विशेषत्वं नैव तस्यां प्रजायते ॥
ऋतुकाले यदा शुक्रं निर्दोषं योनिसंस्थितम् ।
तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत् ॥
विमेकं मानवं स्त्रीणां बीजं प्राप्य रजस्य च ।
मुक्तमात्रोऽपि नरकात् स्वर्गाद्वापि प्रपद्यते ॥
विसर्गकाले शुक्रस्य जीवः करणसंवृतः ।
इच्छया प्रविशते योनिं कर्म्मभिः स्वैर्नियोजितः ॥
तच्छुक्ररक्तमेकस्थमेकाहात् कललं भवेत् ।
पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत् ॥
बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः ।
द्विसप्ताहाद्भवेत् पेशी रक्तमांसाचिता दृढ़ा ॥
बीजस्येवाङ्कुराः पेश्याः पञ्चविंशतिरात्रतः ।
भवन्ति मासमात्रेण पञ्चधा जायते पुनः ॥
ग्रीवा शिरश्च कण्ठश्च पृष्ठवंशस्तथोदरम् ।
पाणिपादं तथा पार्श्वं कटिमात्रं तथैव च ॥
मासद्वयेन सर्व्वाणि क्रमशः सम्भवन्ति हि ।
त्रिभिर्म्मासैः प्रजायन्ते सर्व्वाङ्गाङ्कुरसन्धयः ॥
मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम् ।
स्थैर्य्यं चतुर्थे चाङ्गानां पञ्चमे शोणितोद्भवः ॥
सुखं नासा च कर्णौ च जायन्ते मासि पञ्चमे ।
षष्ठे बलस्य वर्णस्य नखलोम्नाञ्च सम्भवः ॥
दन्तपङ्क्तिस्तथा गुह्यं जायन्ते च नखाः पुनः ।
कर्णयोश्च भवेच्छिद्रं षण्मासाभ्यन्तरेण च ॥
पायुर्म्मेढ्रमुपस्थञ्च नाभिश्चैवोपजायते ।
सन्धयो ये च गात्रेषु जायन्ते मासि सप्तमे ॥
मनस्तु चेतनायुक्तो नाड़ीस्नायुशिरास्ततः ।
सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि ॥
अङ्गप्रत्यङ्गसम्पूर्णः शिरःकेशसमन्वितः ।
विभक्तावयवः स्पष्टः पुनर्म्मासाष्टमेन च ॥
नवमे दशमे मासि प्रबलैः सूतिमारुतैः ।
निःसार्य्यते बाण इव जन्तुश्छिद्रेण सज्वरः ॥
मनसश्चञ्चलत्वेन यदा गर्भस्थितिर्भवेत् ।
तदा विकृतिरूपेण पापात्मा हि प्रजायते ॥
पुटद्वयं समासाद्य यदा वहति मारुतः ।
तदा प्रसूते पापिष्ठान् यमजान् कर्म्मबहिष्कृतान् ॥
मातृरक्तोत्तरा नारी पितुः शुक्रोत्तरो नरः ।
उभयोर्व्वीजसामान्ये जायते वै नपुंसकम् ॥"
अन्यच्च ।
"विषमायां तिथौ क्षिप्रं कुर्य्याद्बीजस्य काम्यकाम् ।
समायां पुरुषं नूनं केचिदाहुर्म्मनीषिणः ॥
वामाङ्गेन भवेन्नारी दक्षिणेन पुमान् भवेत् ।
रक्ताधिक्ये मातृरूपं रेतोऽधिक्ये तु पैतृकम् ॥
शुक्रशोणितसङ्घाते वायुना च द्विधा कृते ।
यमौ स्यातां त्रिधा चेति चतुर्द्धा बहुधापि वा ॥
ततो हीनाधिकाङ्गश्च कुब्जवामनकादयः ।
जायन्ते सर्पकुण्डाख्या विकृतान्याश्च योनयः ॥"
तथा च सारकलिकायाम् ।
"गर्भात् कोटिगुणं दुःखं योनियन्त्रनिपीड़ने ।
संमूर्च्छा तस्य जठराज्जायमानस्य देहिनः ॥
जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः ।
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ॥
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ।
क्लेशान्निष्क्रान्तिमायाति जठरान्मातुरातुरः ॥
ततस्तं वैष्णवी माया समास्कन्दति मोहिनी ।
तया विमोहितात्मासौ ज्ञानभ्रंशमवाप्नुयात् ॥
स्पृष्टमात्रस्य घोरश्च ज्वरः समुपजायते ।
तेन ज्वरेण महता महामोहः प्रजायते ॥
कण्टकैरिव छिन्नाङ्गः क्रकचैरिव दारितः ।
पूतिव्रणान्निपतितो धरण्यां क्रिमिको यथा ॥
त्वङ्कुसुमपरीताङ्गः क्वचित्तिष्ठति वा रटन् ।
विण्मूत्रभक्षणाद्यञ्च गतज्ञानः समाचरेत् ॥
कण्डूयनेऽपि चाशक्तः परिवर्त्तेऽप्यनीश्वरः ।
स्तानपानादिकाहारमप्याप्नोति परेच्छया ॥
अशुचिः संस्तरे सुप्तः कीटदंशादिभिस्तथा ।
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ॥
केन बन्धनबद्धोऽहं कारणं किमकारणम् ।
किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च नोच्यते ॥
कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वा वर्त्तते कथम् ।
किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत् ॥
संमूढश्च स्मृतिभ्रंशः शीघ्रं संजायते पुनः ।
रतिः संजायते तूर्णं जन्तोस्तत्रैव जन्मनि ॥
रक्तो मूढ़श्च लोकोऽयमकार्य्ये सम्प्रवर्त्तते ।
देही देहं परित्यज्य नेन्द्रस्थानमपीच्छति ॥
तस्मात् कीटोऽपि जन्तूनां सुमूढो जायते भृशम् ।
न चात्मानं विजानाति न परं न च दैवतम् ॥
न शृणोति परं श्रेयः सति चक्षुषि नेक्षते ।
बुद्धौ सत्यां न जानाति बुध्यमानो बुधैरपि ॥
संसारे क्लिश्यते तेन रागलोभवशानुगः ॥"
इति सुखबोधः ॥

जन्मं, क्ली, (जायते इति । जन+बाहुलकात् मन् ।) उत्पत्तिः । "अनन्तरं नाम्नीति मप्रत्यये जन्म मदन्तञ्च । जन्ममदन्तमपीत्युणादाविति सुकुटः । जन्मे पञ्चनवस्थिते कलहरिपुभयमिति ज्योतिषे ।" इत्यमरटीकायां भरतः ॥

जन्मकीलः, पुं, (जन्मनः कील इव । विष्णुसेवनेन हि जन्माभावात् तथात्वम् ।) विष्णुः । इति त्रिकाण्डशेषः ॥

जन्मदः, पुं, (जन्म ददातीति । जन्म+दा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) पिता । इति शब्दरत्नावली ॥

जन्मवर्त्म, [न्] क्ली, (जन्मन उत्पत्तेर्व्वर्त्म पन्थाः ।) योनिः । इति त्रिकाण्डशेषः ॥

जन्मान्तरं, क्ली, (जन्मनः अन्तरम् ।) परलोकः । इति भरतः ॥ तत्पर्य्यायः । भावान्तरम् २ प्रेत्य ३ अमुत्र ४ । इत्यमरः ॥ (यथा, महाभारते । ३ पर्व्वणि ।
"नूनं जन्मान्तरकृतं पापमाचरितं महत् ॥"
अन्यत् जन्म । मयूरव्यंसकादिवत् समासः । पुनर्जन्म । यथा, पञ्चतन्त्रे । २ । १८५ ।
"वरं प्राणपरित्यागो न वियोगो भवादृशैः ।
प्राणा जन्मान्तरे भूयो न भवन्ति भवद्विधाः ॥")

जन्माष्टमी, स्त्री, (जन्मनः श्रीकृष्णोत्पत्तेरष्टमी तिथिः ।) भाद्रकृष्णाष्टमी । सा च श्रीकृष्णस्य जन्मतिथिः । सा तु मुख्यचान्द्रेण श्रावणस्य कृष्णाष्टमी गौणचान्द्रेण भाद्रस्य । तत्र श्रीकृष्णस्य जन्मकालो यथा, ब्रह्मपुराणे ।
"अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥"
विष्णुपुराणे महामायां प्रति भगवद्वाक्यम् ।
"प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि ।
उत्पत्स्यामि नवम्यान्तु प्रसूतिं त्वमवाप्स्यसि ॥
श्रावणे वा नभस्ये वा रोहिणीसहिताष्टमी ।
यदा कृष्णे नरैर्लब्धा सा जयन्ती प्रकीर्त्तिता ॥"

अग्निपुराणे ।
"रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी ।
सप्तम्यामर्द्धरात्राधःकलयापि यदा भवेत् ॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ।
तमेवोपवसेत् कालं तत्र कुर्य्याच्च जागरम् ॥
अविद्धायाञ्च सर्व्वायां जातो देवकीनन्दनः ॥"
इति सप्तमीवेधे जन्मश्रवणकल्पभेदादविरुद्धम् ॥
नवम्यादियोगस्य प्रशंसा यथा । ब्रह्मवैवर्त्ते ।
"उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।
भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।
अपि वर्षशतेनापि लभ्यते वा न वा विभो ! ॥"
पद्मपुराणे ।
"प्रेतयोनिगतानान्तु प्रेतत्वं नाशितन्तु तैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥"
उपवासादिफलं यथा, भविष्यपुराणे ।
"एकेनैवोपवासेन कृतेन कुरुनन्दन ! ।
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ॥"
ब्रह्मवैवर्त्ते ।
"मन्वादिदिवसे प्राप्ते यत् फलं स्नानपूजनैः ।
फलं भाद्रपदेऽष्टम्यां भवेत् कोटिगुणं द्विज ! ॥
तस्यान्तिथौ वारिमात्रं पितृणां यः प्रयच्छति ।
गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः ॥"
उपवासाकरणे दोषो यथा, भविष्योत्तरे ।
"श्रावणेऽबहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु स भवेत् क्रूरराक्षसः ॥
वर्षे वर्षे च या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महाक्रूरा व्याली भवति कानने ॥"
स्कान्दे ।
"न करोति यदा विष्णोर्ज्जयन्तीसम्भवं व्रतम् ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥"
भविष्ये ।
"कृष्णार्थं देवकीसूनोर्ज्जयन्तीसंज्ञकं व्रतम् ।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह ॥
अकुर्व्वन् नरकं याति यावदिन्द्राश्चतुर्द्दश ॥"
तत्रोपवासक्रमः, भविष्यपुराणे ।
"पार्थ ! तद्दिवसे प्राप्ते दन्तधावनपूर्व्वकम् ।
उपवासस्य नियमं गृह्णीयाद्भक्तिभावतः ॥
वासुदेवं समुद्दिश्य सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्च्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्द ! त्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
गृहमुपक्रम्य ।
"तन्मध्ये प्रतिमा स्थाप्या काञ्चनादिविनिर्म्मिता ।
प्रतप्तकाञ्चनाभा सा देवकी सुतपस्विनी ॥
माञ्चापि बालकं सुप्तं सस्तुता नीरदच्छविम् ।
वसुदेवोऽपि तत्रैव खड्गचर्म्मधरः स्थितम् ॥
यशोदा चापि तत्रैव प्रसूतवरकन्यका ।
बलभद्रस्तथा नन्दो दक्षो गर्गस्तु सुमुखः ॥
एवं संपूजयेद्भक्त्या गन्धपुष्पाक्षतैः फलैः ।
स्थण्डिले स्थापयेद्देवीं सचन्द्रां रोहिणीं तथा ॥
देवकीं वसुदेवञ्च यशोदां नन्दमेव च ।
चण्डिकां बलदेवञ्च पूज्य पापैः प्रमुच्यते ॥
अर्द्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा ।
ततो वर्द्धापनं षष्ठीं नामादेः करणं मम ॥
कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमीदिने ।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः ॥
ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
सुवर्णं काञ्चनं गाश्च वासांसि कुसुमानि च ॥
यद्यदिष्टतमं लोके कृष्णो मे प्रीयतामिति ।
यं देवं देवकी देवी वसुदेवादजीजनत् ॥
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ।
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ॥
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्ज्जयेत् ॥
एवं यः कुरुते देव्या देवक्याः सुमहोत्सवम् ।
वर्षे वर्षे भगवतो मद्भक्त्या धर्म्मनन्दन ! ।
नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् ॥
पुत्त्रसन्तानमारोग्यधनधान्यर्द्धिमद्गृहम् ।
सम्पर्केणापि यः कुर्य्यात् कश्चिज्जन्माष्टमीव्रतम् ॥
विष्णुलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥"
पूजा च मध्यरात्रे गारुडे ।
"कृष्णाष्टम्यान्तु रोहिण्यामर्द्धरात्रेऽर्च्चनं हरेः ॥"
व्रतपारणायां कालनियमः । एकदिने जयन्तीलाभे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यलाभे तु रोहिणीयुक्ताष्टम्याम् । उभयदिने रोहिणीयुताष्टमीलाभे परदिने तदलाभे तु निशीथसम्बन्धिन्यामष्टम्यां उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिने इति । उपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम् । यदा महानिशायाः पूर्व्वमेकतरस्यावसानमन्यतरस्य महानिशायां तदनन्तरं वा तदेकतरावसाने पारणं यदा महानिशायामुभयस्थितिस्तदा उत्सवान्ते पारणम् ।" इति तिथ्यादितत्त्वम् ॥ * ॥
हरिभक्तिविलासमते तूपवासकालो यथा,—
"जन्माष्टमी पूर्व्वविद्धा न कर्त्तव्या कदाचन ।
पलवेधे तु विप्रेन्द्र ! सप्तम्यां चाष्टमीं त्यजेत् ॥
सुराया बिन्दुना स्पृष्टं गङ्गाम्भःकलसं यथा ।
विना ऋक्षेण कर्त्तव्या नवमीसंयुताष्टमी ॥
सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी ।
तस्मात् सर्व्वप्रयत्नेन त्याज्यमेवाशुभं बुधैः ॥
वेधे पुण्यक्षयं याति तमः सूर्य्योदये यथा ।
यच्च वह्निपुराणादौ प्रोक्तं विद्धाष्टमीव्रतम् ।
अवैष्णवपरं तच्च कृतं वा देवमायया ॥"
पारणकालो यथा,—
"यद्वा तिथ्यृक्षयोरेव द्वयोरन्ते तु पारणम् ।
समर्थानामशक्तानां द्वयोरेकवियोगतः ॥
केचिच्च भगवज्जन्ममहोत्सवदिने शुभे ।
भक्तोत्सवान्ते कुर्व्वन्ति वैष्णवा व्रतपारणम् ॥"
तद्व्रतकथा यथा,—
"एकदा श्रीकुलाचार्य्यं वशिष्ठं स्वस्थमानसम् ।
राजा दिलीपः पप्रच्छ विनयावनतः सुधीः ॥
दिलीप उवाच ।
भाद्रे मास्यसिते पक्षे यस्यां जातो जनार्द्दनः ।
तत्कथां श्रोतुमिच्छामि कथयस्व महामुने ! ॥
कथं वा भगवान् जातः शङ्खचक्रगदाधरः ।
देवकीजठरे विष्णुः किं कार्य्यं केन हेतुना ॥
वशिष्ठ उवाच ।
शृणु राजन् ! प्रवक्ष्यामि यस्माज्जातो जनार्द्दनः ।
पृथिव्यां त्रिदिवं त्यक्त्वा भवते कथयाम्यहम् ॥
पुरा वसुन्धरा ह्यासीत् कंसाराधनतत्परा ।
स्वाधिकारप्रमत्तेन कंसदूतेन ताडिता ॥
क्रन्दन्ती लज्जिता सापि ययौ घूर्णितलोचना ।
यत्र तिष्ठति देवेशः उमाकान्तो वृषध्वजः ॥
कंसेन ताडिता नाथ ! इति तस्मै निवेदितम् ।
वाष्पधारां प्रवर्षन्तीं विवर्णामपमानिताम् ॥
क्रन्दन्तीं तां समालोक्य कोपेन स्फुरिताधरः ।
उमया सहितः सर्व्वैर्द्देवतैरनुद्रुतः ॥
आजगाम महादेवो विधातुर्भवनं रुषा ।
गत्वा चोवाच ब्रह्माणं कंसध्वंसनिमित्तकम् ॥
उपायः क्रियतां ब्रह्मन् ! भवता विष्णुना सह ।
ऐश्वरं तद्वचः श्रुत्वा गन्तुं प्राक्रामदात्मभूः ॥
क्षीरोदे यत्र वैकुण्ठः सुप्तः स भुजगोपरि ।
हंसपृष्ठे समारुह्य हरेरन्तिकमाययौ ॥
तत्र गत्वा हरिं ध्यात्वा देवरुद्रेश्वरादिभिः ।
तुष्टाव भगवान् वाग्भिरर्थ्याभिर्व्वागीश्वरः ॥
नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त ! नमोऽस्तु ते ॥
नमः कमलकिञ्जल्कपीतनिर्म्मलवाससे ।
नमः समस्तदेवानामधिपाय महात्मने ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
इति तेषां स्तुतीः श्रुत्वा प्रत्युवाच जनार्द्दनः ।
देवा नम्रमुखाः सर्व्वे भवतामागमः कथम् ॥
ब्रह्मोवाच ।
शृणु देव ! जगन्नाथ ! यस्मादस्माकमागमः ।
कथयामि सुरश्रेष्ठ ! तदहं लोकतारक ! ॥
शूलिदत्तवरोन्मत्तः कंसराजो दुरासदः ।
वसुधा ताडिता तेन महाघातेन दुःखिता ॥
वरं दत्त्वा पुरा शम्भो मायया स प्रवञ्चितः ।
भागिनेयं विना राजन् ! शास्ता न भविता तव ॥
तस्मात्त्वञ्च स्वयं देव ! हन्तुं कंसं दुरासदम् ।
देवकीजठरे जन्म लभ गत्वा च गोकुलम् ॥
ब्रह्मणा प्रेषितो विष्णुः प्रत्युवाच पयोः पतिम् ।
पार्व्वतीं देहि देवेश ! अन्ते शिला गमिष्यति ॥
उमया रमया सार्द्धं शङ्खचक्रगदाधरः ।
उद्दिश्य मथुरां चक्रे प्रयाणं कंसनाशनम् ॥
देवकीजठरे जन्म लेभे विष्णुर्गदाधरः ।
यशोदाकुक्षिमध्ये तु सर्व्वाणी मृगलोचना ॥
नव मासांश्च विश्राम्य कुक्षौ नवदिनाधिकान् ।
भाद्रे मास्यसिते पक्षे अष्टमीसञ्ज्ञया तिथौ ॥

रोहिणीतारकायुक्ता रजनी घनघोरिता ।
धूमयोनौ तडिद्युक्ते वारि वर्षति सर्व्वदा ॥
तस्यां जातो जगन्नाथः कंसारिर्व्वसुदेवजः ।
वैराटे नन्दपत्नी च यशोदाजीजनत् सुताम् ॥
पुत्त्र पद्मकरं पद्मनाभं पद्मदलेक्षणम् ।
रम्यं चतुर्भुजं शान्तं शङ्खचक्रगदाधरम् ॥
तदा क्रन्दितुमारेभे दृष्ट्वा चानकदुन्दुभिः ।
तत्रैव वाण्यभूद्दैवी देवकीमात्रगोचरा ॥
पुत्त्र दत्त्वा यशोदायै कन्यां तस्याः समानय ।
कंसासुरभयात्त्वं हि उवाच देवकी तदा ॥
वैराटं गच्छ विप्रेन्द्र । सुतं प्रत्यर्पितुं प्रभो ।।
पुत्त्रं दत्त्वा यशोदायै सुतां तस्याः समानय ॥
तां दृष्ट्वा कंसराजोऽपि सभार्य्यां न हनिष्यति ।
तस्या वचः समाकर्ण्य वसुदेवोऽतिदुःखितः ॥
अङ्के कुमारमादाय वैराटाभिमुखं ययौ ।
यमुना जलसंपूर्णा तत्पथे मध्यवर्त्तिनी ॥
अतिस्रोता महावीर्य्या सुतीक्ष्णोर्म्मिभयाकुला ।
तां दृष्ट्वा तत्तटे स्थित्वा यमुनामवलोकयन् ॥
वसुदेवोऽतिदुःखार्त्तो विलोलचेतनोऽभवत् ।
किं करोमि क्व गच्छामि विधिनात्रापि वञ्चितः ॥
कथमद्य गमिष्यामि वैराटे नन्दमन्दिरम् ।
हरिणा तत्र सानन्दं मायया वञ्चितः पिता ॥
क्षणमात्रं तटे स्थित्वा यमुनामप्यलोकयत् ।
तेन दृष्टा पुनः सापि क्षीणा जानुवहाभवत् ॥
ततः सोऽपि पुरो दृष्ट्वा धावन्तं खलु जम्बुकम् ।
क्रोडे कृत्वा सुतं स्वैरं गन्तुं पारं प्रचक्रमे ॥
तं दृष्ट्वा दुःखचित्तन्तु भगवान् यमुनाजले ।
मायां कृत्वा जगन्नाथो ह्यङ्कात् स पतितः पितुः ॥
तं सुतं पतितं दृष्ट्वा सूर्य्यजाजीवने द्विज ।
तदा क्रन्दितुमारेभे भाले धात्वा करं दृढम् ॥
विधिना वैरिणा ह्यत्र दुःखितोऽहं प्रवञ्चितः ।
त्राहि मां जगतां नाथ । पुत्त्रं देहि सुरोत्तम ।।
जनकं क्रन्दितं दृष्ट्वा कंसारिः कृपया विभुः ।
जलक्रीडां समाचर्य्य पितुरङ्केऽवसत् पुनः ॥
यथा तेन द्विजश्रेष्ठो गतवान्नन्दमन्दिरम् ।
सुतं दत्त्वा यशोदायै सुतां तस्याः समानयत् ॥
सुतामङ्के तथा सोऽपि गृहीत्वानकदुन्दुभिः ।
निजागारं पुनः प्राप्य प्रत्यर्प्य तादृशीं सुताम् ॥
प्रतिमुच्य पदे लोहमासीत् पूर्व्ववदावृत. ।
देवकी च प्रसूतेति वार्त्ता प्राप्ता सुरारिणा ॥
आनेतुं प्रहितो दूतः सुतं दुहितरञ्च वा ।
आगत्य कंसदूतोऽसौ सुतां नेतुं प्रचक्रमे ॥
बलादङ्कात् समाकृष्य देवकीवसुदेवयो. ।
कंसदूतो गृहीत्वा तां कंसायादर्शयत् पुनः ॥
दृष्ट्वा तां कंसराजोऽपि सभयोऽभूद्दुरासदः ।
शुद्धकाञ्चनवर्णाभां पूर्णेन्दुसदृशाननाम् ॥
दृष्ट्वा कंसो विहसन्तीं विद्युत्स्फुरितलोचनाम् ।
आदिदेशासुरश्रेष्ठो वध नीत्वा शिलोपरि ॥
आज्ञां लब्ध्वासुरास्ते तु निष्पेष्टुं तां प्रवर्त्तिताः ।
विद्युद्रूपधरा गौरी जगाम शङ्करान्तिकम् ॥
अन्तरीक्षे क्षणं स्थित्वा कंसं प्रोवाच शङ्करी ।
त्वां हन्तु गोकुले जातः पूर्व्वशत्रुर्न संशयः ॥
तत्रातिष्ठज्जगन्नाथः कंसारिः सुरकार्य्यकृत् ।
क्रीडित्वा बालभावेन कंसध्वंसे मनो दधौ ॥
प्राप्तिमात्रेण तं कंसं जघान जगदीश्वरः ।
एतत्ते कथितं राजन् ! कृष्णजन्माष्टमीव्रतम् ॥
य इदं कुरुते राजन् । या च नारी हरेर्व्रतम् ।
प्राप्नोत्यैश्वर्य्यमतुलमिह लोके यथेप्सितम् ॥
अन्तकाले हरेः स्थानं दुर्लभञ्च गमिष्यति ।
एकेनैवोपवासेन कृतेन कुरुनन्दन । ॥
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
वत्सरद्वादशे चैव यत् पुण्यं समुपार्ज्जितम् ॥
विफलं तद्भवेत् सर्व्वं पुरा व्यासेन भाषितम् ।
न दृश्यं सुखं तेषां नराणां न च योषिताम् ॥
जयन्ती न कृता यैस्तु जागरादिसमन्विता ।
श्वानस्ते तु विज्ञेया जयन्तीविमुखा नराः ॥
योषितश्च न सन्देह. सत्योक्तं तव सुव्रते । ॥"

इति भविष्यपुराणे वशिष्ठदिलीपसंवादे श्रीकृष्णजन्माष्टमीव्रतकथा समाप्ता ॥

जन्मी [न्] पु, (जन्म अस्यास्तीति । जन्मन् + "व्रीह्यादिभ्यश्च ।" ५ ।२। ११६। इति इनिः ।) प्राणी । इत्यमरः । १ । ४ । ३० ॥ (यथा, भारविः । ११ । ३० ।
" जन्मिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम् ।
भवान्मास्म वधीत् न्याय्यं न्यायाधारा हि साधवः ॥")

जन्मेजय', पु, (जनान् शत्रून् एजयति कम्पयतीति । एज + णिच् + "एजेः खश् ।"३।२।२८। इति खश् ततो मुमागमात् जनमेजय इति सिद्धे शकन्ध्वादित्वादलोपे साधुः ।) जनमेजयराजः । इति श्रीभागवतम् ॥ (एतन्निरुक्तिर्यथा देवीभागवतस्य । २ । ११ । ४६ श्लोकटीकायाम् ।
"जन्मनैवातिशुद्धेन शत्रूनेजितवान् यतः ।
एजृङ् कम्पने धातोर्हि जन्मेजय इति श्रुतः ॥")

जन्यं, क्ली, (जन्यते इति । जनि + "तकिशसिचतियतिजनिभ्यो यद्वाच्यः ।" इति वार्त्तिकोक्त्या यत् ।) हट्टः । परीवादः । संग्रामः । इति मेदिनी । ये २५ ॥ (यथा, रघौ ।४।७७।
"तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गणैरभूत् ॥")

जन्य', पु, (जायते जनयति वा । जन + "भव्यगेयेति ।"३ । ४ । ६८ । इति कर्त्तरि यत् ।) जनक. । इति मेदिनी । ये, २६ ॥ (महादेव' । यथा, महाभारते । १३ । १७ । ५६ ।
"उग्रतेजा महातेजा जन्यो विजयकालवित् ॥"
देहः । यथा, भागवते । १ । ६ । ३१ ।
"निवृत्तसर्व्वेन्द्रियवृत्तिविभ्रम-
स्तुष्टाव जन्यं विसृजन् जनार्द्दनम् ॥"
जनस्य जल्पः । जन + "मतजनहलादिति ।" ४ । ४ । ९७ । इति यत् । जनजल्पः । इति सिद्धान्तकौमुदी ॥)

जन्यः, त्रि, (जन्यते इति । जन् + णिच् + कर्म्मणि यत् ।) उत्पाद्य. । यथा,—
"जनकस्य स्वभावो हि जन्ये तिष्ठति निश्चितम् ।
यथा श्रीकृष्णपादाङ्कं कालीयवश्यमस्तके ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
("जन्यानां जनकः कालो जगतामाश्रयो मतः ॥"
इति च भाषापरिच्छेदे ४५ ॥)
जनयिता । (जनीं वधूं वहति प्रापयति वा । संज्ञायामिति साधुः ।) नवोढ़ाज्ञातिः । नवोढाभृत्यः । वरस्य स्निग्धः । स तु जामातृवत्सल । इति मेदिनी । ये, २६ ॥ (जनाय हितः । यत् ।) जनहितः । इति व्याकरणम् ॥

जन्या, स्त्री, (जायतेऽस्याम् । जन् + यत् यत् वा । मातृतुल्यत्वादेवास्यास्तथात्वम् ।) मातृवयस्या । इति मेदिनी । ये, २६ ॥ (यथा, रघौ ।६।३०।
"अथाङ्गराजादवतार्य्य चक्षु-
र्याहीति जन्यामवदत् कुमारी ॥")
प्रीतिः । इति हेमचन्द्रः ॥

जन्युः, पु, (जायते इति । जन + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणां ३ । २० । इति युच् ।) प्राणी । अग्नि. । धाता । इति मेदिनी । ये, २६ ॥ (उत्पत्तिः । जन्म । यथा, हरिवंशे । १२३ । ४६ ।
"अमृताया द्वितीयोऽयं जन्युर्हि मम सर्व्वथा ॥")

जप, व्यक्तवाचि वाचि । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् ।) जिह्वोष्ठादिव्यापाररहितं शब्दार्थयोश्चिन्तनं व्यक्तवाक् । जपति मन्त्रं साधकः । इति दुर्गादासः ॥

जपः, पु, (जप्यते इति । जप + "व्यधजपोरनुपसर्गे ।" ३ । ३ । ६१ । इति भावे अप् ।) विधानेन मन्त्रोच्चारणम् । तद्विधिर्यथा,—
"गोचर्म्मपञ्च संकुर्य्यात् रहः कुर्य्यादतन्द्रितः ।
समाहितमनास्तूष्णीं मनसा वापि चिन्तयेत् ॥
विधियज्ञात् जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥
विना दर्भैस्तु यत् स्नानं यच्च दानं विनोदकम् ।
असंख्येयन्तु यज्जप्यं सर्व्वं तदफलं स्मृतम् ॥
मुक्ताफलैर्विद्रुमैर्वा रुद्राक्षैः स्फटिकेन वा ।
गणना सर्व्वथा कार्य्या सम्यगङ्गुलिपर्व्वभिः ॥
हिरण्यरत्नमणिभिर्जप्यं शतगुणं भवेत् ।
सहस्रगुणमिन्द्राक्षैः पद्माक्षैरयुतं भवेत् ॥
नियुतं वापि रुद्राक्षैर्भद्राक्षैस्तु न सशय ।
पुत्त्रजीवकजप्यस्य परिसंख्या न विद्यते ॥
दशभिर्जन्मजनितं शतेन च पुरा कृतम् ।
त्रियुगं तु सहस्रेण गायत्र्या हन्ति दुष्कृतम् ॥
दर्भहस्तस्तथासीनो दर्भैर्युदकपाणिना ।
प्राङ्मुखो वर्त्तयेत् माला सहस्रं शतमेव वा ॥"
इत्याद्ये वह्निपुराणे नित्याह्निकस्नानविधिनामाध्याय. ॥ तस्यानुष्ठानं यथा,—
"मनः संहृत्य विषयान्मन्त्रार्थगतमानस. ।
न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपङ्क्तिवत् ॥
जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेण्या वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृत ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानस. ॥

किञ्चिच्छ्रवणयोगात् स्यादुपांशुः स जपः स्मृतः ।
मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्जपादुविशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः ।
जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः ॥”
तत्र वर्ज्यं यथा,—
“विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म्म करोति च ।
जपार्च्चनादिकं सर्व्वमपवित्रं भवेत् प्रिये ! ॥
मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥”
अथ करमालाजपनियमो यथा,—
“तर्ज्जनी मध्यमानामा कनिष्ठा चेति ता क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ॥
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत् ।
अनामामध्यमारभ्य कनिष्ठादित एव च ॥
तर्ज्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत् ।
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥”
एतद्वचनन्तु अष्टोत्तरशतादिविषयम् ।
शक्तिविषये पुनः ।
“अनामिकात्रयं पर्व्व कनिष्ठादित्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्वणि ॥
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत् ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ॥
मध्यादिमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥”
श्रीविद्याविषये पुनः ।
“अनामामध्यमायाश्च मूलाग्रञ्च द्वयं द्वयम् ।
कनिष्ठायाश्च तर्ज्जन्याश्चैव पर्व्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्यात् द्वितयं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेत्त्रिपुरसुन्दरीम् ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्ज्जनीमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥”
इदमपि अष्टोत्तरशतादिविषयम् ॥ * ॥
“अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ॥
गणनाविधिमुल्लङ्घ्य यो जपेत्तज्जपं यतः ।
गृह्णन्ति राक्षसास्तेन गणयेत् सर्व्वथा बुधः ॥
हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥”
जपसंख्यायां निषिद्धद्रव्यं यथा,—
“नाक्षतैर्हस्तपर्व्वैर्वा न धान्यैर्न च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्याञ्च कारयेत् ॥” * ॥
तत्र विहितद्रव्यं यथा,—
“लाक्षाकुशीदसिन्दूरं गोमयञ्च करीषकम् ।
एभिर्निर्म्माय वटिकां जपसंख्यान्तु कारयेत् ॥”
अथ वर्णमालाजपनियमो यथा,—
“सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेद्बुधः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमतः ।
क्षकाराद्यक्षिपिभिर्म्माला विहिता सर्व्वकर्म्मसु ॥
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता ॥
क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥” * ॥
तस्य फलं यथा,—
“जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ।
सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्वतीम् ॥
यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥
यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥
माहात्म्यं वाचिकस्यैतत् जपयज्ञस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥”
इति तन्त्रसारः ॥
जपनं, क्ली, (जप व्यक्तायां वाचि+भावे ल्युट् ।) जपः । इत्यमरटीका ॥ (यथा, महाभारते ।१२। १९९ । ७ ।
“सन्यास एव वेदान्ते वर्त्तते जपनं प्रति ॥”)
जपपरायणः, त्रि, (जप एव परमयनं आश्रयो यस्य ।) जपासक्तः । जपनशीलः । यथा,—
“शिवरात्रिव्रतं देव ! पूजाजपपरायणः ।
करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर ! ॥”
इति तिथ्यादितत्त्वम् ॥
जपा, स्त्री, (जपन्ति तान्त्रिका अनयेति । जप+ अच् ततष्टाप् ।) जवापुष्पवृक्षः । इति हेमचन्द्रः । ४ । २१३ ॥ तस्य पर्य्यायगुणाः ।
“ओड्रपुष्पं जपा चाथ त्रिसन्ध्या सारुणा सिता ।
जपा संग्राहिणी केश्या त्रिसन्ध्या कफवातजित् ॥”
इति भावप्रकाशः ॥
(विशेषव्याख्या जवाशब्दे ज्ञातव्या ॥)
जभ, जभने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) जभनं मैथुनम् । जभति शुभा ।
इति दुर्गादासः ॥
जभ, इ जभने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) जभनं मैथुनम् । इ, जम्भ्यते ।
इति दुर्गादासः ॥
जभ, इ क नाशे । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट् ।) नाशोऽत्र अस्मभूतस्यार्थतया-नष्टीकरणं । इ क, जम्भयति पापं गङ्गा । इति दुर्गादासः ॥
जभ, इ ङ जृम्भे । गात्रशैथिल्ये इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट् ।) इ, जम्भ्यते । ङ, जम्भते । प्रद्युम्नकाले सुन-गाङ्गनानां सुखेषु कामः प्रतिजृम्भतीव । इति गणकृतानित्यत्वात् । इति दुर्गादासः ॥
जभ, ङ जृम्भे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट् ।) जृम्भो गात्रशैथिल्यमिति गोविन्दभट्टः । ङ, जभते लोकः । शुभ जभो-ऽभीत्यस्यैव शुभ् आत्मनेपदम् करबे सूत्रविधान-सामर्थ्यात् । इति दुर्गादासः ॥
जम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, जमित्वा जान्त्वा । इति दुर्गादासः ॥
जम्, य, पत्नी । इति जम्पतीशब्दटीकायां भरत-धृतनामप्रपञ्चः ॥
जमणौ, त्रि, (यमौ एकत्र सहचरौ सन्तौ जायेते इति । जन+ड । पृषोदरादित्वात् यस्य जः ।) यमजौ । इति द्विरूपकोषः ॥
जमदग्निः, पुं, (जमन् हुतभक्षणशीलः प्रज्वलित इत्यर्थः । तथाविधोऽग्निरिव । यद्वा, यमदग्निः । पृषोदरादित्वात् यस्य जः ।) यमदग्निमुनिः । इति द्विरूपकोषः ॥ स तु भृगुवंशोद्भव ऋचीकमुनिपुत्त्रः परशुरामपिता च । इति श्रीभागवतम् ॥ (अस्य जन्मविवरणादिकं महाभारते वनपर्व्वणि ।११५-११६ अध्यायायोर्द्रष्टव्यम् ॥ असौ च सावर्णिके मन्वन्तरे ऋषिविशेषः । यथा, मार्कण्डेये ।८०।६-१० ।
“अश्वत्थामा च रामश्च व्यासश्चैव महाशुचिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
तथैव पुत्त्रो भगवानृचीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते मुनयोऽत्र तथान्तरे ॥”)
जमनं, क्ली, (जम भक्षे+भावे ल्युट् ।) जेमनम् । भोजनम् । इत्यमरटीकायां भरतः ॥
जम्पती, पुं, (जाया च पतिश्च । राजदन्तादि-गणे पाठात् जायाशब्दस्य जम्भावो निपात्यते ।) जायापती । इत्यमरः । २ । ६ । ३८ ॥ द्विवच-नान्तोऽयं शब्दः ॥
जम्बालः, पुं, (जम अदने+बाहुलकात् बालन् । यद्वा, जम्म+भावे घञ् । जम्भं आलातीति । ला+कः ।) पङ्कः । इत्यमरः । १ । १० । ९ ॥ (यथा, श्रीकण्ठचरिते । २ । १० ।
“अवद्यजम्बालजवेषणाय
कृतोद्यमानां खलसैरिभाणाम्
कवीन्द्रवाङ्निर्झरनिर्झरिण्यां
सञ्जायते यत्र मनोरथलम् ॥”)
शैवालः । इति मेदिनी । ले, ९१ ॥ केतक-वृक्षः । इति शब्दरत्नावली ॥
जम्बालिनी, स्त्री, (जम्बालः शैवालोऽस्त्यस्या इति । जम्बाल+इनिः ।) नदी । इति हेमचन्द्रः ।४।१४६॥
जम्बिरः, पुं, (जम्बीर+निपातनात् ह्रस्वः ।) जम्बीरः । इति शब्दरत्नावली ॥
जम्बीरः, पुं, (जम्यते भक्ष्यते इति । जम भक्षे + “गम्भीरादयश्च ।” इति निपातनात् ईरन् प्रत्ययेन साधुः ।) फलवृक्षविशेषः । जामीर इति लेबु इति च भाषा । तत्पर्य्यायः । दन्त-शठः २ जम्भः ३ जम्भीरः ४ जम्भलः ५ । इत्यमरः । २ । ४ । २४ ॥ जम्भी ६ रोच-नकः ७ शोधी ८ जाम्बीरि ९ दन्तहर्षणः १० गम्भीरः ११ जम्बिरः १२ दन्तकर्षणः १३ । इति शब्दरत्नावली ॥ रेवतः १४ वक्त्रशोधी १५ दन्तहर्षकः १६ । इति जटाधरः ॥ तस्य गुणाः ।

"जम्बीरसुधां गुर्व्वम्लं वातश्लेष्मविबन्धनुत् ।
शूलं कासकफक्लेशच्छर्द्दितृष्णामदोषजित् ॥
आस्यवैरस्यहृत्पीडावह्निमान्द्यक्रमीन् हरेत् ।
स्वल्पजम्बीरिका तद्वत् तृष्णाच्छर्द्दिनिवारिणी ॥"
इति भावप्रकाशः ॥

तस्य फलस्य गुणाः । अम्लमधुररसत्वम् । वातनाशित्वम् । पथ्यत्वम् । पाचनत्वम् । रोचनत्वम् । पित्तबलाग्निवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अत्यम्लत्वम् । गुरुत्वम् । सुगन्धित्वम् । दुर्ज्जरत्वम् । वह्निकफवातविबन्धनाशित्वञ्च । इति राजवल्लभः ॥ पक्वस्य तस्य गुणाः । मधुरत्वम् । कफार्त्तिपित्तास्रदोषनाशित्वम् । वर्णवीर्य्यरुचिपुष्टितुष्टिकारित्वञ्च । मरुवकः । अर्जकः । सितार्जकः । इति राजनिर्घण्टः ॥ (क्षुद्रपत्रतुलसी । यथा, वैद्यकरत्नमालायाम् ।
"खरपर्णस्तु जम्बीरः प्रस्थपुष्पः फणिज्झकः ॥")

जम्बुः, स्त्री, (जम्यते इति । जमु भक्षणे + "अन्दूदृम्फूजम्बिति ।" उणां १ । ६५ । इति कू प्रत्ययेन निपातनात् साधुः । बाहुलकात् ह्रस्वः ।) जम्बूः । इत्यमरटीकायां भरतः ॥ (यथा,—
"जम्बुर्ग्राही मधुरकफहा रोचनो वातहारी।"
इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)

जम्बु, क्ली, स्त्री, जम्बूफलम् । तत्पर्य्यायः । जम्बूः २ जाम्बवम् ३ । इत्यमरः । २ । ४ । १६ ॥

जम्बुकः, पुं, (जमतीति । जमु भक्षणे + "मृगय्वादयश्च ।" उणां १ । ३८ । इति कुप्रत्ययेन निपातनात् साधुः । ततः स्वार्थे कन् ।) शृगालः । (यथा, महाभारते । १ । १४१ । ४६ ।
"एष तेषु प्रयातेषु जम्बुको हृष्टमानसः ।
खादति स तदा मांसमेकः सम्मन्त्रनिश्चयात् ॥")
वरुणः । (जम्बु इव कायतीति । कै + कः ।) वृक्षविशेषः । गोलापजाम इति भाषा ॥ नीचे च। इति शब्दरत्नावली ॥ श्योणाकप्रभेदः । इति राजनिर्घण्टः ॥ (सुवर्णकेतकी । यथा,—
"केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः ।
सुवर्णकेतकी त्वन्या लघुपुष्पा सुगन्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जम्बुद्वीपः, पुं, (जम्बुवृक्षयुक्तो द्वीपः ।) पृथिव्याः सप्तद्वीपान्तर्गतद्वीपविशेषः । अयं द्वीपः पद्मकोषमध्यवर्त्तिकोष इव लक्षयोजनविस्तीर्णः पद्मपत्र इव समवर्त्तुलः लक्षयोजनविस्तृतलवणसमुद्रेण वेष्टितः । यस्मिन् प्रत्येकनवसहस्रयोजनायामानि नव वर्षाणि तेषां वर्षाणामष्टौ सीमपर्व्वताः सन्ति । * । एषां वर्षाणां मध्ये इलावृतवर्षं मध्यवर्त्ति यस्य मध्यदेशे सुमेरुपर्व्वतः लक्षयोजनोत्सेधः । इलावृतवर्षस्योत्तरे नीलपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः क्षारसमुद्रावधि दीर्घः । * । तदुत्तरे रम्यकवर्षं तदुत्तरे श्वेतपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः क्षारसमुद्रावधि दीर्घः. दैर्घ्ये नीलपर्व्वतात् किञ्चिदधिकदशांशेन न्यूनः ।*। तदुत्तरे हिरण्मयवर्षं तदुत्तरे शृङ्गवान् पर्व्वतः तस्य विस्तारादयः श्वेतपर्व्वतवत् दैर्घ्ये श्वेतपर्व्वतात् किञ्चिदधिकदशांशेन न्यूनः । * । तदुत्तरे कुरुवर्षं तदुत्तरे लवणसमुद्रः । इलावृतवर्षस्य दक्षिणे निषधपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः क्षारसमुद्रावधि दीर्घः । * । तद्दक्षिणे हरिवर्षं तद्दक्षिणे हेमकूटपर्व्वतः अस्य विस्तारादयो निषधवत् दैर्घ्ये निषधात् किञ्चिदधिकदशांशेन न्यूनः । तद्दक्षिणे हिमालयपर्व्वतः अस्य विस्तारादयः पूर्व्ववत् दैर्घ्ये हेमकूटपर्व्वतात् किञ्चिदधिकदशांशेन न्यूनः । * । तद्दक्षिणे भारतवर्षं तद्दक्षिणे क्षारसमुद्रः । इलावृतस्य पश्चिमे माल्यवान् पर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः उत्तरदक्षिणयोर्नीलनिषधपर्व्वतावधि दीर्घः । * । तत्पश्चिमे केतुमालवर्षं तत्पश्चिमे लवणसमुद्रः । इलावृतस्य पूर्व्वे गन्धमादनपर्व्वतः अस्य विस्तारादयो माल्यवद्वत् । तत्पूर्व्वे भद्राश्ववर्षं तत्पूर्व्वे लवणसमुद्रः । * । मेरोः पूर्व्वादिचतुर्द्दिक्षु मन्दरमेरुमन्दरसुपार्श्वकुमुदनामानः पर्व्वतास्तिष्ठन्ति । तेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारो वृक्षाः सन्ति । ते सर्व्वे दैर्घ्ये एकादशशतयोजनपरिमिताः विस्तारे शतयोजनपरिमिताः । तेषां शाखाविस्तारः एकादशशतयोजनपर्य्यन्तम् । तेषु पर्व्वतेषु ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजलाः । एवं नन्दनचैत्ररथवैभ्राजकसर्व्वतोभद्रसंज्ञकानि चत्वारि देवोद्यानानि च सन्ति । * । मन्दरोपरिस्थितैकादशशतयोजनोच्चचूतमस्तकात् पर्व्वतशृङ्गवत् स्थूलानि फलान्यमृतकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामतिमधुरसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति । * । एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूर्नाम नदी मेरुमन्दरशिखराद्धरणितले निपतन्ती दक्षिणेनेलावृतं वहति । तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम स्वर्णं भवति ।*। सुपार्श्वपर्व्वतस्थो यो कदम्बवृक्षस्तस्य पञ्चकोटरेभ्यो विनिःसृताः पञ्चव्यामस्थूलाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्यः पश्चिमेनेलावृतमनुमोदयन्ति । * । कुमुदपर्व्वतोपरिस्थितो यो वटवृक्षस्तस्य स्कन्धेभ्यो निर्गताः पयोदधिघृतमधुगुडान्नाद्यम्बरशय्यासनाभरणादियुक्ताः कामदुघा नदाः कुमुदाग्रात् प्रपतन्त उत्तरेणेलावृतमुपभोजयन्ति । * । तान् नदान् सेवमानानां प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा न कदाचित् भवन्ति यावज्जीवं निरतिशयसुखमेव । कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिखरशिशिरपतङ्गरुचकनिषधशितिवासकपिलशङ्खवैदूर्य्यजारुधिहंसऋषभनागकालञ्जरनीरदादयः पर्व्वता मेरोर्मूलदेशे परित उपक्लृप्ताः । मेरोः पूर्व्वदिशि उत्तरस्यामष्टादशयोजनदीर्घौ जठरदेवकूटपर्व्वतौ तिष्ठतः । तौ द्विसहस्रयोजनविस्तारौ एव द्विसहस्रयोजनोच्चौ । मेरोः पश्चिमायान्दिशि पवनपारियात्रौ पर्व्वतौ उत्तरस्यां अष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवं दक्षिणस्यान्दिशि कैलासकरवीरपर्व्वतौ पूर्व्वस्यामष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवमुत्तरस्यां त्रिशृङ्गमकरपर्व्वतौ पूर्व्वस्यामष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवं वर्षे वर्षे नदाः नद्यश्च बहवः सन्ति ॥ * ॥ तत्रापि भारतमेव वर्षं कर्म्मक्षेत्रं अन्यान्यष्टानि वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भूस्वर्गनामाख्यातानि । एषु वर्षेषु पुरुषाणां आयुरयुतवर्षाणि ते देवकल्पा अयुतहस्तिबलविशिष्टाः वज्रवदृढशरीराः सर्व्वदा मोदयुक्ताः सन्ति । येषु देवपतयः सगणाः सस्त्रीकाः नानास्थानेषु स्वैरं विहरन्ति । नवसु वर्षेषु भगवान्नारायणस्तत्तत्पुरुषाणामनुग्रहाय स्वमूर्त्तिभेदेनाद्यापि सन्निहितो भवति ॥ * ॥ इलावृते तु वर्षे भगवान् शिव एक एव पुरुषः भवानीप्रधानार्ब्बुदसहस्रैः स्त्रीगणैः परिवृतः नारायणस्य सङ्कर्षणसंज्ञां मूर्त्तिं ध्यानेन सन्निधाप्य स्तुवन्नास्ते ॥ * ॥ भद्राश्वे वर्षे तद्वर्षपतिर्भद्रश्रवा नाम धर्म्मसुतः तत्कुलपतयः पुरुषा भगवतो हयशीर्षाभिधानां मूर्त्तिं परमसमाधिना सन्निधाप्य स्तुवन्ति ॥ * ॥ हरिवर्षे भगवान्नरहरिरूपेणास्ते तत्र प्रह्लादो दैत्यदानवकुलतीर्थस्वरूपः तद्वर्षपुरुषैः सहानन्यभक्तियोगेनोपास्ते ॥ * ॥ केतुमाले भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया आस्ते तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेता अहःसु तद्भर्त्तृभिरुपेता उपास्ते ॥ * ॥ हिरण्मये वर्षे भगवान् कूर्म्मतनुं बिभ्राणो निवसति तद्भगवन्मूर्त्तिं पितृगणाधिपतिरर्यमा तद्वर्षपुरुषैः सह उपास्ते ॥ * ॥ उत्तरकुरुवर्षे भगवान् वराहरूपी आस्ते तं भूमिस्तद्वर्षपुरुषैः सहास्खलितभक्तियोगेनोपास्ते ॥ * ॥ किम्पुरुषे वर्षे भगवान् दाशरथी रामरूपेणास्ते तं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् अविरतभक्तिस्तद्वर्षपुरुषैरुपास्ते ॥ * ॥ भारते वर्षे भगवान्नरनारायणाख्य आत्मज्ञानिनामनुग्रहायानुकम्पया अव्यक्तगतिस्तपश्चरति । तन्मूर्त्तिं नारदः वर्णाश्रमयुक्ताभिर्भारतवर्षीयप्रजाभिः सह भगवदनुभावोपवर्णनं पञ्चरात्रं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेन सेवते । * । भारतेऽप्यस्मिन् वर्षे सरिच्छैला बहवः सन्ति । यथा, मलयः मङ्गलप्रस्थः मैनाकः त्रिकूटः

ऋषभः कूटकः कोल्लः सह्यः देवगिरिः ऋष्यमूकः श्रीशैलः महेन्द्रः वारिधारः विन्ध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रः द्रोणः चित्रकूटः गोवर्द्धनः रैवतकः ककुभः नीलः कोकः गोमुखः इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलाः ।॥। तेषां नितम्बप्रभवा नद्यो ह्यसंख्याताः। यथा, चन्द्रवंशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेण्वा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेण्वा भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा गण्डकी वाग्मती कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूः ओघवती सुषोमा शतद्रुः चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वा इति महानद्यः । अन्धः शोणश्च नदौ ।॥। अस्मिन् वर्षे लब्धजन्मभिः पुरुषैः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो भवन्ति ॥॥॥ जम्बुद्वीपस्य अष्टौ उपद्वीपाः सन्ति सगरात्मजैरश्वान्वेषणे इमां महीं परितो निखनद्भिरुपकल्पिताः। तद्यथा, स्वर्णप्रस्थः चन्द्रशुक्लः आवर्त्तनः रमणकः मन्दहरिणः पाञ्चजन्यः सिंहलः लङ्का इति। इति श्रीभागवते । ५ । १९ अध्याये । तथा च मार्कण्डेये ५४ अध्याये मात्स्ये ११२ अध्याये च द्रष्टव्यम् ॥॥॥ ज्योतिःशास्त्रमते लवणसमुद्रस्योत्तरे जम्बुद्वीपः। स तु भूम्यर्द्धभागः। तस्य दक्षिणे द्वितीयार्द्धभागे द्वीपषट्कस्य सप्तसमुद्रस्य च निवेशः। इति सिद्धान्तशिरोमणिः ॥

जम्बुलः, पुं, (जम्बु जम्बुफलं लातीति । ला+कः ।) जम्बूवृक्षः। केतकवृक्षः। इति विश्वः ॥ (यथा, सुश्रुते । १ । १६ ।
"अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा ॥")

जम्बुवनजं, क्ली, (जम्बुवनमिव जायते इति। जन्+डः ।) श्वेतजवापुष्पम् । यथा —
"पारिभद्रं पाटला च बकुलं गिरिशालिनी ।
तिलकं जम्बुवनजं पीतकं तगरन्त्वपि ॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्च्चने ॥"
इति वामनपुराणम् ॥

जम्बूः, स्त्री, (जम्यते भक्ष्यते इति। जमु अदने + "अन्दूदृन्फूजम्बूकफेलुकर्कन्धूदिधिषू ।" उणां १ । ९५ । इति कू ।) नागदमनी । इति राजनिर्घण्टः ॥ वृक्षविशेषः। जाम इति भाषा। तत्पर्य्यायः। सुरभिपत्रा २ नीलफला ३ श्यामला ४ महास्कन्धा ५ राजार्हा ६ राजफला ७ शुकप्रिया ८ मोदमोदिनी ९ । तत्फलगुणाः । कषायत्वम् । मधुरत्वम् । श्रमपित्तदाहकण्ठार्त्तिशोषकृमिदोषश्वासातिसारकफकासविनाशित्वम् । विष्टम्भित्वम् । रोचनत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । स्वादुत्वम् । शीतलत्वम् । अग्निसन्दूषणत्वम् । रूक्षत्वम् । वातकारित्वम् । इति राजवल्लभः ॥ सा बृहत्क्षुद्रभेदेन द्विविधा । तत्र बृहत्याः पर्य्यायः। महाजम्बूः १ महापत्रा २ राजजम्बूः ३ बृहत्फला ४ । इति रत्नमाला ॥ फलेन्द्रः ५ नन्दः ६ महाफला ७ सुरभिपत्रा ८ । एतत्फलगुणाः। विष्टम्भित्वम् । गुरुत्वम् । रोचनत्वम् । इति भावप्रकाशः ॥ क्षुद्रायाः पर्य्यायः। सूक्ष्मकृष्णफला १ दीर्घपत्रा २ मध्यमा ३ । वनजम्बूपर्य्यायः। भूमिजम्बूः १ काकजम्बूः २ नादेयी ३ शीतपल्लवा ४ । इति रत्नमाला ॥ सूक्ष्मपत्रा ५ जलजम्बुका ६ । तत्फलगुणाः । ग्राहित्वम् । रूक्षत्वम् । कफपित्तास्रदाहनाशित्वञ्च । इति भावप्रकाशः ॥ तत्फलस्य पर्य्यायः। जम्बु २ जाम्बवम् ३ । इत्यमरः । । २ । ४ । १९ ॥ (स्वनामख्याता नदी । यथा, मात्स्ये । १२० । ६७ ।
"मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान् ।
जम्बूश्चैव नदी पुण्या यस्यां जाम्बूनदं स्मृतम् ॥")

जम्बूकः पुं, स्त्री, (जम्बुकः पृषोदरादित्वात् दीर्घः ।) शृगालः । इति शब्दरत्नावली ॥ जम्बुकशब्देऽप्यस्य ॥

जम्बूका, स्त्री, (जम्बूरिव कायतीति । कै+कः । अजादित्वात् टाप् ।) काकजोम्बुका । इति राजनिर्घण्टः ॥

जम्बूलः, पुं, (जम्बू जम्बूफलं लातीति । ला+कः ।) जम्बूवृक्षः। केतकवृक्षः। इति मेदिनी । ले, ९४ ॥ (यथा, हरिवंशे । ९६ । १६ ।
"जम्बूजम्बूलवृक्षाढ्यं कन्दकन्दलभूषितम् ॥"
वरपक्षीयस्त्रीणां परिहासवचनम् । इति नीलकण्ठः ॥)

जम्बूलमालिका स्त्री, (जम्बूलस्य वरपक्षीयरमणीपरिहासवचनस्य मालिका परम्परा ।) कन्यावरयोर्मुखचन्द्रिका । इत्युद्वाहतत्त्वम् ॥ (यथा, हरिवंशे । १८३ । २२ ।
"आशीर्भिर्व्वर्द्धयित्वा च देवर्षिः कृष्णमब्रवीत् ।
अनिरुद्धस्य वीर्य्याख्यो विवाहः क्रियतां विभो ॥
जम्बूलमालिकां द्रष्टुं श्रद्धा हि मम जायते ॥")
"जम्बूलं वरपक्षीयस्त्रीणां परिहासवचनं तेषां मालिका श्रेणी ।" इति तट्टीकायां नीलकण्ठः ॥

जम्भः, पुं, (जभति जृम्भते इति । जभि गात्रविनामे+पचाद्यच् । "रधिजभोरचि ।" ७ । १ । ६१ । इति नुम् ।) दैत्यभेदः । (इन्द्र एनं निहतवान् ॥ अपरो दैत्यविशेषः । विष्णुरेनं जघान । यथा, महाभारते । ३ । १०२ । २४—२५ ।
"असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः ।
यज्ञक्षोभकरः क्रूरस्त्वयैव विनिपातितः ॥
एवमादीनि कर्म्माणि येषां संख्या न विद्यते ।
अस्माकं भयभीतानां त्वं गतिर्मधुसूदन ॥"
प्रह्लादपुत्राणामेकतमः । यथा, हरिवंशे । २१८ । ३५ ।
"प्रह्लादस्य त्रयः पुत्रा विक्रान्ताश्च महाबलाः ।
विरोचनश्च जम्भश्च कुजम्भश्चेति विश्रुताः ॥"
राक्षसविशेष । स तु रावणस्यानुचरः । यथा, महाभारते । ३ । २८४ । रामरावणयुद्धे । २ ।
"पर्व्वणः पूतनो जम्भः खरः क्रोधवशो हरिः ॥"
जभ्यते भक्ष्यतेऽनेनेति । जभ+करणे घञ् ।) दन्तः । यथा, ऋग्वेदे । ८ । ९१ । २ ।
"इमं जम्भसुतं पिब ।" "जम्भसुतं दन्तैरभिषुतम् ।" इति तद्भाष्यम् ॥॥ जभ्यते भक्ष्यतेऽसौ इति कर्म्मणि घञ् ।) जम्बीरः । (यथा,—
"स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥॥ जम्भ+भावे घञ् ।) भक्षणम् । इति मेदिनी । भे, ४ ॥ (यथा, महाभारते । ५ । ६४ । २० ।
"इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः ॥")
अंशः । हनुः । तूणः । इति हेमचन्द्रः ॥

जम्भकः, पुं, (जम्भ एव । स्वार्थे कन् ।) जम्बीरः । इति शब्दचन्द्रिका ॥ (स्वनामख्यातो नृपविशेषः । यथा, महाभारते । २ । ३१ । ७ ।
"ततश्चर्म्मण्वतीकूले जम्भकस्यात्मजं नृपम् ।
ददर्श वासुदेवेन शेषितं पूर्व्ववैरिणा ॥"॥)
जम्भतीति जभइजभने+ण्वुल् । कामुके, त्रि ॥)

जम्भका, स्त्री, (जम्भा एव । स्वार्थे कन् ।) जृम्भा । इति राजनिर्घण्टः ॥

जम्भगः, पुं, (जम्भाय भक्षणाय गच्छति अमतीति । गम+डः । अतिशयभक्षणशीलत्वात् तथात्वम् ।) राक्षसविशेषः । यथा,—
"देवा यक्षास्तथा नागा गन्धर्व्वाप्सरसोऽसुराः ।
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भगाः खगाः ॥
विद्याधरा जलाधारास्तथैवाकाशगामिनः ।
निराहाराश्च ये जीवाः पापेऽधर्म्मे रताश्च ये ॥
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥"
इत्याह्निकाचारतत्त्वधृतपद्मपुराणवचनम् ॥

जम्भद्विट्, [ष्] पुं, (जम्भ तदाख्यया प्रसिद्धमसुरं द्वेष्टीति । द्विष्+क्विप् । जम्भस्य द्विट् इति वा ।) इन्द्रः । इति हेमचन्द्रः ॥ (विष्णुः । इति महाभारतम् ॥)

जम्भभेदी, [न्] पुं, (जम्भं भेत्तुं शीलमस्य । भिद्+"सुप्यजातौ णिनिस्ताच्छील्ये ।" ३।२।७८। इति णिनिः ।) इन्द्रः । इत्यमरः ।१ । १ । ४६ ॥

जम्भरः, पुं, (जम्भं भक्षणमपि राति ददातीति । जम्भ+रा+कः ।) जम्बीरः । इति शब्दचन्द्रिका ॥

जम्भलः, पुं, (जम्भर । रस्य लत्वम् ।) जम्बीरः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"स्याज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः ॥")
बुद्धदेवविशेषः । इति मेदिनी । ले, ९९ ॥

जम्भला, स्त्री, (जम्भं भक्षणं लाति आदत्ते इति । ला+कः ।) राक्षसीविशेषः । यथा,—
"समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी ।
तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ॥"
इति ज्योतिस्तत्त्वे राजमार्त्तण्डः ॥

जम्भा, स्त्री, (जम्भते इति । जभि जृम्भायाम्+भावे च ततः स्त्रियां टाप् ।) जृम्भा । इति राजनिर्घण्टः ॥

जम्भारिः, पुं, (जम्भस्यासुरस्य अरिः शत्रुः ।) इन्द्रः । यथा, "जम्भारिदम्भोलयः ।" इत्युत्तरनैषधम् ॥ वह्निः । वज्रम् । इति विश्वः ॥ (विष्णुः । इति महाभारतम् ॥)

जम्भी, [न्] पुं, (जम्भयति क्षुधामान्द्यादिकं नाशयतीति । जभि क नाशे+णिनिः ।) जम्बीरः । इति शब्दचन्द्रिका ॥

जम्भीरः, पुं, (जम्भते अमिलत्वार्थं भक्ष्यते इति । जभ+"गभीरादयश्च ।" इति ईरन् । ततो "रधिजभोरचि ।" ७ । १ । ६१ । इति नुम् ।) जम्बीरः । इत्यमरः । २ । ४ । ७६ ॥ मरुवकः । इति तट्टीकायां भरतः ॥

जयः, पुं, (जि जये+"एरच् ।" ३ । ३ । ५६ । इत्यच् ।) शत्रुपराङ्मुखीकरणम् । जित् इति भाषा । तत्पर्य्यायः । विजयः २ जयनम् ३ । इत्यमरः । २ । ८ । १० ॥ (यथा, मनुः । ७ । ४४ ।
"इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥")
अग्निमन्थः । (जयतीति । जि+पचाद्यच् ।) जयन्तः । युधिष्ठिरः । इति मेदिनी । चे, २५ ॥ (एतन्नाम तु विराटगृहे छद्मप्रवाससमये जातम् । यथा, महाभारते । ४ । ५ । ३४ ।
"जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥")
विजयनन्दनराजः । स तु इक्ष्वाकुवंशोद्भवः । इति हेमचन्द्रः । ३ । ३५८ ॥ श्रीनारायणपार्षदः । यथा,—
"एतौ तौ पार्षदौ मह्यं जयो विजय एव च ।
कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमम् ॥"
इति श्रीभागवते । ३ । १६ । २ ॥
(सर्व्वाणि भूतानि जयतीति । जीयते संसारमनेन वा । विष्णुः । यथा, महाभारते । १३ । १४९ । ६७ ।
"नयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥"
नागविशेषः । यथा, महाभारते । ५ । १०३ । १६ ।
"विरजा धारणश्चैव सुबाहुर्मुखरो जयः ॥"
दानवविशेषः । यथा, हरिवंशे । २४४ । ८३ ।
"जयो निकुम्भः कुम्भश्च दानवौ
एतावेते दश दानवाधिपम् ॥"
दशममन्वन्तरीय-ऋषिविशेषः । यथा, भागवते । ८ । १३ । २१—२२ ।
"दशमो ब्रह्मसावर्णिरुपश्लोकसुतो मनुः ॥"
"हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः ॥"
ध्रुवपौत्रस्य वत्सरनाम्नस्य पुत्रविशेषः । यथा, तत्रैव ४ । १३ । १२ ।
"सुवीथीर्वत्सरस्येष्टा भार्य्यासूत षडात्मजान् ।
पुष्पार्णं तिग्मकेतुञ्च इषमूर्जं वसुं जयम् ॥"
विश्वामित्रपुत्रविशेषः । (यथा, तत्रैव । ९ । १६ । ३६ ।
"एष वः कुशिका वीरो देवरातस्तमन्वित ।
अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥"
ऊर्व्वशीगर्भजातः पुरूरवसः पुत्रविशेषः । यथा, तत्रैव । ९ । १५ । १ ।
"ऐलस्य चोर्व्वशीगर्भात् षडासन्नात्मजा नृप ॥
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥"
राजर्षिविशेषः । यथा, महाभारते । २ । ८ । १४ ।
"तस्यां राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः ।
यमं वैवस्वतं तात । प्रहृष्टाः पर्य्युपासते ॥"
इत्युपक्रम्याह ।
"अङ्गो विरुद्ध सेवश्च दुःशकः सञ्जयो जयः ॥"
धृतराष्ट्रपुत्राणामन्यतमः । यथा, तत्रैव । १ । ६३ । ११७ ।
"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत ॥"
सञ्जयस्य राज्ञः पुत्रः । यथा, हरिवंशे । २९ । २ ।
"सञ्जयस्य जयः पुत्रो विजयस्तस्य चात्मजः ॥"
सञ्जयस्य राज्ञः पुत्रः । यथा, भागवते । ९ । १७ । १६ । [जयः ॥"
"कुशात् प्रतिः क्षात्रवृद्धात् सञ्जयस्तत् सुतो
दौष्मन्तिमन्योः पुत्रविशेषः । यथा, तत्रैव । ९ । २१ । १ ।
"वितथस्य सुतात् मन्योर्बृहत्क्षत्रो जयस्ततः ॥"
युयुधानपुत्रः । यथा तत्रैव । ९ । २४ । १४ ।
"युयुधानः सात्यकिर्व्वै जयस्तस्य कुणिस्ततः ॥"
भारतादिशास्त्रविशेषः । यथा, भविष्यपुराणे ।
"अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
सौराश्च धर्म्मा राजेन्द्र । मानवोक्ता महीपते ॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥"
दक्षिणद्वारगृहम् । इति शब्दार्थचिन्तामणिः ॥ वत्सरविशेषः । तत्फलं यथा,—
"क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः ।
पीडितास्ते वरारोहे । जये सर्व्वे न संशयः ॥")

जयकोलाहलः, पुं, (जयस्य कोलाहलो यत्र ।) पाशकभेदः । इति शब्दरत्नावली ॥ (जयस्य कोलाहलः ।) जयध्वनिश्च ॥

जयढक्का, स्त्री, (जयघोषिका ढक्का । विजयकाले एव वादनादस्य तथात्वम् ।) वाद्यविशेषः । इति लोकप्रसिद्धा । जयढाक इति भाषा ॥

जयदत्तः, पुं, (जयेन विजयेन दत्त इव । जयशीलत्वादेवास्य तथात्वम् ।) इन्द्रपुत्रः । इति हेमचन्द्रः । २ । ८८ ॥

जयनं, क्ली, (जीयतेऽनेनेति । जि+करणे ल्युट् ।) तुरङ्गादिसन्नाहः । (यथा, माघे । १७ । २३ ।
"सकल्पनं द्विरदगणं वरूथिन-
स्तुरङ्गिणो जयनयुजश्च वाजिनः ।
त्वरायुजः स्वयमपि कुर्व्वतो नृपाः
पुनः पुनस्तदधिकृतानतत्वरन् ॥" ॥
भावे ल्युट् ।) जयः । इति मेदिनी । ने, ६० ॥

जयनी, स्त्री, (जयन+स्त्रियां ङीप् ।) इन्द्रकन्या । इति शब्दरत्नावली ॥

जयन्तः, पुं, (जयतीति । जि+"तॄभूवहिवसीति ।" उणां ३ । १२८ । इति झच् ।) इन्द्रपुत्रः । तत्पर्य्यायः । पाकशासनिः २ । इत्यमरः । १ । १ । ४९ ॥ ऐन्द्रिः ३ । इति मेदिनी । ते, ११० । (यथा, रघौ । ३ । २३ ।
"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥")
विष्णुः । यथा, महाभारते । १३ । १४९ । ९८ ।
"अर्को वाजसनः शृङ्गी जयन्तः सर्व्वविज्जयी ॥"
"अतिशयेनारीन् जयते जयतेरुरिति वा जयन्तः ।" इति तद्भाष्यम् ॥) शिवः । (यथा, मात्स्ये । ५ । ३० ।
"सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
इति रुद्राः समाख्याता एकादशगणेश्वराः ॥")
चन्द्रः । इति त्रिकाण्डशेषः ॥ भीमः । इति मेदिनी । ते, ११० ॥ (एतन्नाम तु कृष्णा विराटगृहवासकाले जातम् । यथा, महाभारते । ४ । ५ । ३४ ।
"जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥"
मरुत्वतीगर्भजातो धर्म्मपुत्रविशेषः । अयं हि उपेन्द्र इत्याख्यया प्रसिद्धः । यथा, भागवते । ६ । ६ । ८ ।
"मरुत्वांश्च जयन्तश्च मरुत्वत्या बभूवतुः ।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥"
राज्ञो दशरथस्य मन्त्रिविशेषः । यथा, रामायणे । १ । ७ । २—३ ।
"अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः ।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥
धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्द्धनः ।
अकोपो धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ॥"
पर्व्वतविशेषः । यथा, हरिवंशे । १७० । १४ ।
"ततश्च पर्व्वताः सप्त केशव समुपस्थिताः ।
जयन्तो वैजयन्तश्च नीलो रजतपर्व्वतः ।
महामेरुः सकैलाश इन्द्रकूटश्च नामतः ॥"
ज्योतिषोक्तयात्रिकयोगविशेषः । यथा,—
"यत्र स्वोच्चगतश्चन्द्रो लग्नादेकादशे स्थितः ।
जयन्तो नाम योगोऽयं शत्रुपक्षविनाशकृत् ॥")
षोडशध्रुवकान्तर्गतध्रुवविशेषः । तस्य लक्षणं यथा,—
"आदितालेन जयन्तः स्यात् शृङ्गाररससंयुतः ।
रुद्रसंख्याक्षरपद आयुर्वृद्धिकरः परः ॥"
इति सङ्गीतदामोदरः ॥

जयन्तिका, स्त्री, (जयन्तीव कायतीति । कै+कः । ततो ह्रस्वो विभाषनात् ।) हरिद्रा । इति राजनिर्घण्टः ॥ (दुर्गायाः सखीविशेषः । यथा, काशीखण्डे । ४० । ३६ ।
"यथा जया च विजया यथा चैव जयन्तिका ।")

जयन्ती, स्त्री, (जयतीति । जि+"तॄभूवहीति ।" उणां ३ । १२८ । इति झच् । ततो गौरा-

दित्वात् ङीष् ।) गौरी । (यथा, कालिकापुराणे ।
"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमो-
ऽस्तु ते ॥")
इन्द्रपुत्त्री । पताका । इति मेदिनी । ते, १०६ ॥
वृक्षविशेषः । तत्पर्य्यायः । जया २ तर्कारी ३
नादेयी ४ वैजयन्तिका ५ । इत्यमरः ।२।४।६५॥
बला ६ मोटा ७ हरिता ८ विजया ९ सूक्ष्म-
मूला १० विक्रान्ता ११ अपराजिता १२ ।
(यथा, तिथितत्त्वे ।
"कदली दाडिमी धान्यं हरिद्रा मानकं कचु ।
विल्वोऽशोको जयन्ती च विज्ञेया नवपत्त्रिकाः ॥")
अस्याः गुणाः । महागन्धयुक्तत्वम् । तिक्तत्वम् ।
कटुत्वम् । उष्णत्वम् । क्रिमिभूतनाशित्वम् ।
कण्ठविशोधनत्वञ्च । सत्र लक्ष्मा रसायनी ।
इति राजनिर्घण्टः ॥ एतच्छाकस्य गुणाः ।
गरदोषनाशित्वम् । चक्षुर्हितत्वम् । मधुरत्वम् ।
हिमत्वञ्च । इति राजवल्लभः ॥
("श्वेतजयन्ती मूलं पिष्टं पीतञ्च गव्यपयसैव ।
श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा ॥"
इति वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे ॥)
योगविशेषः । यथा, तिथ्यादितत्त्वे स्कान्दम् ।
"जयं पुण्यञ्च कुरुते जयन्तीमिति तां विदुः ।
रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी ॥
अर्द्धरात्रादधश्चोर्द्ध्वं कलयापि यदा भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्व्वपापप्रणाशिनी ॥"
(द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"उन्मीलनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्यौ महापुण्याः सर्व्वपापहरा द्विज ॥"
वटिकौषधविशेषः । तद्यथा,—
"विषं माद्राश्वगन्धा च वचातालीशपत्त्रकम् ।
मरिचं पिप्पलीनिम्बमजाम्बुना तुल्यकम् ।
वटिका पूर्व्ववत्कार्य्या जयन्तीयोगवाहिका ॥"
इति जयन्ती वटी ।
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
जयपत्त्रं, क्ली, (जयसूचकं पत्त्रम् ।) अश्वमेधीय-
यज्ञघोटककपाले बद्धा लिपिः । तद्यथा,—
"त्रैलोक्यविजयी रामो रावणान्तकरः प्रभुः ।
स दीक्षितो वाजिमेधे तस्यायं प्रोषितः प्रभुः ॥
पालितो लक्ष्मणेनैव सुलक्षणविलक्षितः ।
सम्पूज्य च परित्याज्यः सर्व्वैरिति च संस्कृताम् ॥"
इति वाशिष्ठरामायणम् ॥*॥
विवादविषयकजयबोधकलिपिः । डिकरि इति
इङ्गराजी भाषा । यथा, व्यवहारतत्त्वे ।
"यद्वृत्तं व्यवहारात् पूर्व्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्त्रेऽखिलं लिखेत् ॥
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृप ।
प्रदद्याज्जयिने लेख्यं जयपत्त्रं तदुच्यते ॥"
जयपालः, पुं, (जयं पालयतीति । पालि +
"कर्म्मण्यण् ।" ३।२।१ । इत्यण् ।) विधिः ।
विष्णुः । भूपालः । इति शब्दरत्नावली ॥ वृक्ष-
विशेषः । जमालगोटा इति भाषा । तत्-
पर्य्यायः । सारकः २ रेचकः ३ तिन्तिडीफलम् ४
दन्तीबीजम् ५ मलद्रावि ६ बीजरेचनम् ७ कुम्भी-
बीजम् ८ कुम्भिनीबीजम् ९ घण्टाबीजम् १०
घण्टिनीबीजम् ११ निकुम्भाख्यबीजम् १२
शोधनीबीजम् १३ चक्रदन्तीबीजम् १४ । अस्य
गुणाः । कटुत्वम् । उष्णत्वम् । विरेचनत्वम् ।
दीपनत्वम् । क्रिमिकफामजठरामयनाशित्वञ्च ।
इति राजनिर्घण्टः ॥
जयपुत्त्रकः, पुं, (जयेन विजयेन पुत्त्र इव काय-
तीति । कै + कः । पुत्त्रतुल्यप्रीतिप्रदत्वात् तथा-
त्वम् ।) पाशकभेदः । इति शब्दरत्नावली ॥
जयमङ्गलः, पुं, (जय एव मङ्गलं यस्य । जयेन
मङ्गलं यस्मादिति वा ।) राजवाह्यहस्ती ।
इति शब्दरत्नावली ॥ ध्रुवकविशेषः । यथा,—
"चतुर्व्विंशतिवर्णाङ्घ्रिः कथितो जयमङ्गलः ।
शृङ्गारवीरयोरेष ताले चाचपुटे च सः ॥"
इति सङ्गीतदामोदरः ॥ *
ज्वरघ्न औषधविशेषः । यथा —
"हिङ्गूलसम्भवं सूतं गन्धकं टङ्कणं तथा ।
ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचं तथा ॥
समं सर्व्वं समाहृत्य द्विगुणं स्वर्णभस्मकम् ।
तदर्द्धं कान्तलौहञ्च रूप्यभस्मापि तत् समम् ॥
तत्समं पारदसमम् ।
एतत् सर्व्वं विचूर्ण्याथ भावयेत् कनकद्रवैः ।
शेफालीदलजैश्चापि दशमूलरसेन च ॥
किराततिक्तकक्वाथैस्त्रिवारं भावयेत् सुधीः ।
भावयित्वा तु तत् कार्य्या गुञ्जाद्वयमिता वटी ॥
अनुपानं प्रयोक्तव्यं जीरकं मधुसंयुतम् ।
जीर्णज्वरं महाघोरं चिरकालसमुद्भवम् ॥
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा ।
पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान् ॥
मेदोगतं मांसगतमस्थिमज्जगतं तथा ।
अन्तर्गतं महाघोरं वहिस्थञ्च विशेषतः ॥
नानादेशोद्भवञ्चैव ज्वरं शुक्रगतं तथा ।
निखिलं ज्वरनामानं हन्ति श्रीशिवशासनात् ॥
जयमङ्गलनामायं रसः श्रीशिवनिर्म्मितः ।
बलपुष्टिकरश्चैव सर्व्वरोगनिवर्हणः ॥"
इति श्रीजयमङ्गलो रसः ।
इति भैषज्यरत्नावली ॥
जयवाहिनी, स्त्री, (जयस्य जयन्तस्य वाहिनी
यद्वा स्वयंवरसभायां संग्रामे वा जयं वह-
तीति । वह + णिनिः । ततो ङीप् ।)
शची । इन्द्राणी । इति हेमचन्द्रः । २।८६ ॥
जया, स्त्री, (जीयतेऽनया । जि + "एरच् ।"
इति करणे अच् ततष्टाप् ।) दुर्गा । (यथा,
महाभारते । ६ । २२ । २२ ।
"कात्यायनि महाभागे करालि विजये जये ॥")
अस्या व्युत्पत्तिर्यथा,—
"जय कल्याणवचनो ह्याकारो दातृवाचकः ।
जयं ददाति सा नित्यं सा जया परिकीर्त्तिता ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
जयन्तीवृक्षः । यथा, वैद्यकरत्नमालायाम् ।
"वैजयन्ती च तर्कारी जयन्ती विजया जया ॥"
तिथिविशेषः । सा तु तृतीयाष्टमीत्रयोदश्यः ।
(यथा, ज्योतिषे ।
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् ॥"
द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्योऽष्टौ महापुण्याः सर्व्वपापहरा द्विज ॥")
हरीतकी । दुर्गासखी । इति मेदिनी । ये,२४॥
(यथा, काशीखण्डे । ४७ । ४६ ।
"यथा जया च विजया यथा चैव जयन्तिका ॥"
देवी भगवती तु वराहशैले पीठस्थाने जया-मूर्त्या
विराजते । यथा, देवीभागवते ।७।३०।५२ ।
"वराहशैले तु जया कमला कमलालये ॥")
शिवया । (यथा, रसप्रदीपे अर्शश्चिकित्-
सायाम् ।
"चारत्रयं सूतगन्धौ पञ्चकोलमिदं शुभम् ।
सर्व्वैस्तुल्या जया भृष्टा तदर्द्धा शिगुणा वटा ॥")
श्यामाहृषः । नीलदूर्व्वा । अग्निमन्थवृक्षः ।
इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशस्य
पूर्व्वखण्डे प्रथमे भागे ।
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥")
पताकाविशेषः । इति युक्तिकल्पतरुः ॥
(ज्वरघ्नौषधविशेषः । यथा,—
"विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपत्त्रकम् ।
विडङ्गमष्टमं चूर्णं छागमूत्रैः समं समम् ।
चणकाभा वटी कार्य्या स्याज्जया योगवाहिका ॥
जयन्ती वा जया वाथ नीरैः पित्तज्वरापहा ।
सुद्धामलकयूषेण पथ्यं देयं घृतं विना ॥
जयन्ती वा जया वाथ विषमज्वरसूदिनी ।
सर्व्वज्वरं मधुयोगैर्गवां मूत्रेण शीतकम् ॥
चन्दनस्य कषायेण रक्तपित्तज्वरापहा ।
जयन्ती वा जया वाथ माक्षिकेण च कासजित् ॥
जयन्ती वा जया वाथ गोमूत्रेण युतां पिबेत् ।
हन्त्याशु कामलां कुष्ठं सुलेपेन च सद्दृतम् ॥
द्विनिष्कं केतकीमूलं पिष्ट्वा तोयेन पाययेत् ।
जयन्ती वा जया वाथ मेहं हन्ति सुराध्वयम् ॥
जयन्ती वा जया वाथ मधुना सर्व्वमेहहृत् ।
जयन्ती वा जया वाथ गुडैः कोष्णजले पिबेत् ॥
त्रिदोषोत्थं हरेद्गुल्मं रसो वा नन्दभैरवः ।
जयन्ती वा जया वाथ शुष्का सर्व्वभगन्दरम् ।
जयन्ती वा जया वाथ तक्रेण ग्रहणीप्रणुत् ।
जयन्ती वा जया वाथ शृङ्गीदावैर्निशान्धहृत् ॥
जयन्ती वा जया वाथ घृष्ट्वा स्तन्येन चाञ्जनम् ।
श्रावणं सर्व्वदोषोत्थं मांसवृद्धिञ्च नाशयेत् ॥"
इति जयाजयन्ती वटी ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥*॥)
जयावहा, स्त्री, (जयमावहतीति । आ + वह +
अच् ।) भद्रदन्तीवृक्षः । इति राजनिर्घण्टः ॥
जयाश्रया, स्त्री, (जयमाश्रयतीति । आ + श्रि +
अच् ।) जरडीतृणम् । इति राजनिर्घण्टः ॥

जयाश्वा, स्त्री, (जयस्य आशा आख्या व्याप्ता यस्याः ।) भद्रदन्तीवृक्षः । इति राजनिर्घण्टः ॥

जयी, [न्] त्रि, (जेतुं शीलमस्य । जि+"जिदृक्षिविश्रीति ।" ३ । २ । १५७ । इति इनिः ।) जययुक्तः । विजयी । यथा,—

"जगति जयिनो यस्य विशिखाः ।"

इति महिम्नः स्तोत्रम् ॥

(यथा, च रघौ । ४ । ३४ ।

"पौरस्त्यानेवमाक्रामंस्तांस्तान् जनपदान् जयी ।

प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥")

जय्यः, त्रि, जेतुं शक्यः । ("शकि लिङ् च ।" ३ । ३ । १७२ । इति शक्तौ यत् । गुणः । "क्षय्यजय्यौ शक्यार्थे ।" ६ । १ । ८१ । इति । यान्तादेशः ।) जयकरणयोग्यः । इत्यमरः । २ । ८ । ७४ ॥ (यथा, शतपथब्राह्मणे । १४ । ४ । ३ । २४ ।

"सोऽयं मनुष्यलोकः पुत्त्रेणैव जय्यो नान्येन कर्म्मणा ॥")

जरठः, त्रि, (जीर्य्यत्यनेनेति । जॄ वयोहानौ + उणा १ । १०२ । सूत्रे बाहुलकात् जॄशमोर व्यठः इत्युज्ज्वलदत्तोक्तेरठः ।) कर्कशः । पाण्डुः । कठिनः । इति मेदिनी । ठे, १३ ॥ (यथा, माघे । ४ । २९ ।

"अयमतिजरठाः प्रकामगुर्व्वी-
रलघुविलम्बिपयोधरोपरुद्धाः ॥")

जीर्णः । इति हेमचन्द्रः ॥ (वृद्धः । यथा, भागवते । ६ । १ । २५ ।

"स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ।
निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥"

परिणतः । यथा, माघे । ११ । १४ ।

"हिमरुचिररुणिम्ना राजते रज्यमाने-
र्जरठकमलकन्दच्छेदगौरैर्मयूखैः ॥")

जरायां पुं । इति विश्वः ॥

जरडी, स्त्री, (जॄ+बाहुलकात् अड । ततो गौरादित्वात् ङीष् ।) तृणविशेषः । तत्-पर्य्यायः । गर्म्मोटिका २ सुनाला ३ जयाश्रया ४ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सारकत्वम् । दाहरक्तदोषनाशित्वम् । रुच्यत्वम् । पशूनां दुग्धदातृत्वञ्च । इति राजनिर्घण्टः ॥

जरणः, स्त्री, (जरयतीति । जॄष्+णिच्+ल्युः ।) हिङ्गु । कृष्ठौषधी । जीर्णे, त्रि । इति शब्दरत्नावली ॥ (श्वेतजीरकः । पर्य्याया यथा,—

"अजाजी जरणं दीर्घं मागधी जीरकं सितम् ॥"

इति वैद्यकरत्नमालायाम् ॥)

जरणः, पुं, (जरयतीति । जॄष्+णिच्+ल्युः ।) जीरकः । (यथा,—

"जीरको जरणो जाजी कणा स्याद्दीर्घजीरकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णजीरकः । सौवर्च्चललवणम् । इति शब्दरत्नावली ॥ कासमर्द्दः । इति राजनिर्घण्टः ॥

जरणा, स्त्री, (जरण+टाप् ।) कृष्णजीरकः । इति राजनिर्घण्टः ॥ (यथा, ऋग्वेदे । १० । ३७ । ६ ।

"भद्रं जीवन्तो जरणामशीमहि ॥")

जरणद्रुमः, पुं, (जरणो जीर्णः द्रुमः ।) अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥

जरण्डः, त्रि, (जीर्य्यतीति । जॄ+अण्डन् ।) जीर्णः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

जरत्, त्रि, (जॄ+अतृन्) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ पुरातनम् । इति हेमचन्द्रः ॥

जरत्कारुः, पुं, मुनिविशेषः । तत्पर्य्यायः । यायावरः २ । इति त्रिकाण्डशेषः ॥ (एतन्निरुक्तिर्यथा, महाभारते । १ । ४० । ३—४ ।

"जरेति क्षयमाहुर्व्वै दारुणं कारुसंज्ञितम् ।
शरीरं कारु तस्यासीत्तत् स धीमाञ्छनैः शनैः ॥
क्षपयामास तीव्रेण तपसेत्यत उच्यते ।
जरत्कारुरिति ब्रह्मन् । वासुकेर्भगिनी तथा ॥"

एतद्विवरणं यथा, देवीभागवते । २ । १२ । ८-९ ।

"जरत्कारुर्मुनिः शान्तो न चकार गृहाश्रमम् ।
तेन दृष्टा वने गर्त्ते लम्बमानाः स्वपूर्व्वजाः ॥

ततस्तमाहुः कुरु पुत्त्रदारान्
यथा च नः स्यात् परमा हि तृप्तिः ।
स्वर्गे प्रणामः खलु दुःखमुक्ता
वय सदाचारयुते सुते वै ॥
स तानुवाचाथ लभे सनामा-
मयाचिता चातिवशानुगाञ्च ।
तदा गृहारम्भमहं करोमि
ब्रवीमि तथ्यं मम पूर्व्वजा वै ॥

इत्युक्ता तान् जरत्कारुर्गतस्तीर्थान् प्रति द्विजः ॥"

अथ मात्राभिशप्तो वासुकिः ब्रह्मोपदेशात् स्वभगिनीं जरत्कारुमेनमर्पयामास । तद्यथा, तत्रैव । २ । १२ । ३५—४५ ।

"वासुकिस्तु तदाकर्ण्य वचनं ब्रह्मणः शिवम् ।
वनं गत्वा सुतां तस्मै ददौ विनयपूर्व्वकम् ॥
सनामा तां मुनिर्ज्ञात्वा जरत्कारुरुवाच तम् ।
अप्रियं मे यदा कुर्य्यात्तदा तां सन्त्यजाम्यहम् ॥
वाग्बन्धं तादृशं कृत्वा मुनिर्जग्राह तां स्वयम् ।
दत्त्वा च वासुकिः कामं भवनं स्वं जगाम ह ॥
कृत्वा पर्णकुटीं शुभ्रां जरत्कारुर्महावने ।
तया सह सुखं प्राप रममाणः परन्तप । ॥
एकदा भोजनं कृत्वा सुप्तोऽसौ मुनिसत्तमः ।
भगिनी वासुकेस्तत्र संस्थिता वरवर्णिनी ॥
न सम्बोधयितव्योऽहं त्वया कान्ते । कथञ्चन ।
इत्युक्ता तु गतो निद्रां मुनिस्तां सुदतीं तदा ॥
रविरस्तगिरिं प्राप्तः सन्ध्याकाल उपस्थिते ।
किं करोमि न मे शान्तिस्त्वयेन्मां बोधितः पुनः ॥
धर्म्मलोपभयाद्भीता जरत्कारुरचिन्तयत् ।
नोचेत् प्रबोधयाम्येनं सन्ध्याकालो वृथा व्रजेत् ॥
धर्म्मनाशाद्वरं त्यागस्तथापि मरणं ध्रुवम् ।
धर्म्महानिर्नराणां हि नरकाय भवेत् पुनः ॥
इति सञ्चिन्त्य सा बाला तं मुनिं प्रत्यबोधयत् ।
सन्ध्याकालोऽपि सञ्जात उत्तिष्ठोत्तिष्ठ सुव्रत । ॥
उत्थितोऽसौ मुनिः कोपात्तामुवाच ब्रजाम्यहम् ।
त्वन्तु भ्रातृगृहं याहि निद्राविच्छेदकारिणी ॥
वेपमानाब्रवीद्वाक्यमित्युक्ता मुनिना तदा ।
भ्रात्रा दत्ता यदर्थं तत् कथं स्यादमितप्रभ । ॥
मुनिः प्राह जरत्कारुं तदस्तीति निराकुलः ॥"

अस्य पुत्त्रः आस्तीकनामा मुनिप्रवरः । योऽसौ जनमेजयं गत्वा सर्पसत्रात् निवारयामास । जरत्कारुमुनेर्विशेषविवरणन्तु महाभारते आदिपर्व्वणि ४४—४८ अध्यायेषु द्रष्टव्यम् ॥)

जरत्कारुः, स्त्री, मनसादेवी । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । २ । १२ । ४७ ।

"मुनिः प्राह जरत्कारुं तदस्तीति निराकुलः ॥")

जरत्कारुप्रिया, स्त्री, (जरत्कारोः स्वनामख्यातस्य मुनेः प्रिया ।) मनसादेवी । इति शब्दरत्नावली ॥

जरती, स्त्री, (जरत्+"उगितश्च ।" ४ । १ । ६ । इति ङीप् ।) वृद्धा । इति राजनिर्घण्टः ॥

जरद्गवः, पुं, (जरंश्चासौ गौश्चेति । "गोरतद्धितलुकि ।" ५ । ४ । ९२ । इति टच् ।) जीर्णवृषः । तत्पर्य्यायः । वृद्धोक्षः २ । इत्यमरः । २ । ९ । ६१ ॥ (यथा, पञ्चतन्त्रे । ४ । ८४ ।

"अप्रत्य पौरुषं या श्रीः किं तयापि सुभोग्यया ।
जरद्गवः समश्नाति दैवादुपगतं तृणम् ॥"

जरन् क्षीयमाणो गौर्वृषरूपो धर्म्मः । धर्म्मरूपजीर्णवृषः । यथा, महाभारते । १३ । ९३ । ६८ ।

"नैतस्येह यथास्माकं शश्वच्छास्त्रं जरद्गवः ।
अलसः क्षुत्परो मूर्खस्तेन पीवाञ्छुना सह ॥")

गृध्रपक्षिविशेषः । यथा,—

"अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्ज्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥"

इति हितोपदेशे मित्रलाभपरिच्छेदः ॥

जरन्, पुं, (जरतीति । जॄ+शतृ ।) वृद्धः । इति राजनिर्घण्टः ॥

("वान्तमात्रे जरत् पित्तं शूलमाशु व्यपोहति ॥"

इति माधवकृतरुग्विनिश्चये शूलाधिकारे ॥)

जरन्तः, पुं, (जीर्य्यतीति । जॄ+"जॄविशिभ्यां झच् ।" उणां । ३ । १२६ । इति झच् ।) महिषः । वृद्धः । इति त्रिकाण्डशेषः ॥

जरसानः, पुं, (जीर्य्यति जराग्रस्तो भवतीति । जॄ वयोहानौ+"छन्दस्यसानच् शुजॄभ्याम् ।" उणां । २ । ८६ । इति असानच् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

जरा, स्त्री, (जीर्य्यत्यनया । जॄ+"षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । "ऋदृशोऽङि गुणः ।" ७ । ४ । १६ । इति गुणः ।) वयःकृतश्लथमांसाद्यवस्थाभेदः । वार्द्धक्यम् । "जीर्य्यत्यनया जरा जॄ ष वयोहानौ षित्वात् ङः ऋदृशोर्ङ्गुणरिति गुणः ।" इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । विस्रसा २ । इत्यमरः । २ । ६ । ४१ ॥ सा तु कालकन्या । यथा —

"कालकन्या जरा साक्षात् लोकस्तां नाभिनन्दति ।
स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥"

इति श्रीभागवतम् ।

एषां मेदप्रभेदेन चतुःषष्टिरुजः स्मृताः ।
मृत्युकन्यासुताश्चैव जरा तस्याश्च कन्यका ।
जरा च भ्रातृभिः सार्द्धं भ्रमत्यनुमति भूतलम् ॥
एते चोपाययेत्तारं न गच्छन्ति च संयतम् ।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः ॥
चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम् ।
कर्णयोर्मूर्द्ध्नि तैलञ्च जराव्याधिविनाशकम् ॥
वसन्ते भ्रमणं वह्निसेवां स्वल्पां करोति यः ।
बालाञ्च सेवते काले जरा तं नोपगच्छति ॥
स्नातश्चीतोदकस्नायी सेवते चन्दनद्रवम् ।
नोपयाति जरा तञ्च निदाघेऽनिलसेविनम् ॥
प्रावृट्सूष्णोदकस्नायी घनतोयं न सेवते ।
समये च समाहारी जरा तं नोपगच्छति ॥
शरदौद्रं न गृह्णाति भ्रमणन्तच्च वर्ज्जयेत् ।
स्नातस्नायी समाहारी जरा तं नोपतिष्ठते ॥
स्नातस्नायी च हेमन्ते काले वह्निं निषेवते ।
भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति ॥
शिशिरेऽंशुकवह्निञ्च नवोष्णान्नञ्च सेवते ।
य एवोष्णोदकस्नायी जरा तं नोपगच्छति ॥
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति ॥
भुङ्क्ते सदन्न क्षुत्काले तृष्णायां पीयते जलम् ।
नित्य भुङ्क्ते च ताम्बूल जरा तं नोपगच्छति ॥
दधि हैयङ्गवीनञ्च नवनीत तथा गुडम् ।
नित्यं भुङ्क्ते संयमी यो जरा त नैव गच्छति ॥
शुष्कमांसं स्त्रियं वृद्धां बालार्कन्तरुण दधि ।
ससेवन्ते जरा याति प्रहृष्टा भ्रातृभि. सह ॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम् ।
तानुपैति जरा हृष्टा भ्रातृभि. सह सुन्दरि ! ॥
रजस्वला च कुलटा चावीरा जारदूतिका ।
शूद्रयाजकपत्नी या ऋतुहीना च या सति ! ॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः ।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति ॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्तत ध्रुवम् ।
पापं व्याधिजराबीज विघ्नबीजञ्च निश्चितम् ॥
पापेन जायते व्याधि, पापेन जायते जरा ।
पापेन जायते दैन्य दुःख शोको भयङ्कर. ॥
तस्मात् पाप महावैरं दोषबीजममङ्गलम् ।
भारते सन्तत सन्तो नाचरन्ति भयातुरा. ॥
स्वधर्म्माचारयुक्तञ्च दीक्षित हरिसेवकम् ।
गुरुदेवातिथीनाञ्च भक्त सक्त तप सु च ॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिषेवकम् ।
रोगा द्रवन्ति त दृष्ट्वा वैनतेयमिवोरगा ॥
एतान् जरा न सेवेत व्याधिसङ्घश्च दुर्ज्जय. ।
सर्व्वं बोध्यमसमये काले सर्व्वं भविष्यति ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे । १ । १६ । ३३—५५ ॥
जराया औषध यथा, गारुडे १८६ अध्याये ।
“पलाशभृष्टं समधु गवाज्यामलकान्वितम् ।
सविडङ्ग पीतमात्रं नर कुर्य्यान्महामतिम् ॥
मासेकेन महादेव । जरामरणवर्ज्जित' ।
मलाशबीज सघृत तिलमध्वन्वित समम् ।
सप्ताह भक्षित रुद्र । जरा नयति सङ्घयम् ॥”

अपिच ।
“भृङ्गराजीकृतं भृङ्गराजस्य चूर्णं
तिलार्द्धकं चामलकार्द्धकञ्च ।
सशर्करं भक्षयते गुडेर्व्वा
न तस्य रोगो न जरा न मृत्यु' ॥
अन्य: मध्येऽप्रमनरहितो मत्तमातङ्गगामी
भक्तो वाग्मी श्रवणरहितो दूरशब्दानुसारी ।
नैरुज्यपूर्णो भवति पलितो नीलजीमूतकेशो
जीर्णा दन्ता: पुनरपि नवा: क्षीरगौरा भवन्ति ॥”
इति भैषज्यरत्नावल्यां भृङ्गराजादिचूर्णम् ॥
(“क्लैब्यं जरासम्भवं हि प्रवक्ष्याम्यथ तत् शृणु ॥
जघन्यमध्यमप्रवर वयस्त्रिविधमुच्यते ।
अथ प्रवयसां शुक्रं प्रायशः क्षीयते नृणाम् ॥
रसादीनां सङ्क्षयाच्च तथैवावृष्यसेवनात् ।
बलवीर्य्येन्द्रियाणाञ्च क्रमेणैव परिक्षयात् ॥
परिक्षयादायुषश्चाप्यनाहारात् श्रमात् क्लमात् ।
जरासम्भवज क्लैब्य इत्येतैर्हेतुभिर्नृणाम् ॥
जायते तेन सोऽत्यर्थं क्षीणधातुः सुदुर्ब्बल' ।
विवर्णो विह्वलो दीन: क्षिप्रं व्याधिमथाश्नुते ॥
एतज्जरा सम्भवं हि ॥”
“जरासम्भवजे क्लैब्ये क्षयजे चैव कारयेत् ।
स्नेहस्वेदोपपन्नस्य सस्नेह शोधन हितम् ॥
क्षीरसर्पिर्व्वृष्ययोगा वस्तयश्चैव यापना' ।
रसायनप्रयोगाश्च तयोर्भेषजमुच्यते ॥”
इति चरके चिकित्सास्थाने त्रिंशोऽध्याये ॥*॥
“या च भार्य्या विरूपाक्षी कश्मला कलहप्रिया ।
वचनोत्तरवक्त्री च सा जरा न जरा जरा ॥”
इति चाणक्यम् ॥*॥)
चौरिकाहन्त्री' । इति शब्दचन्द्रिका ॥ राक्षसी-
विशेष । यथा, श्रीभागवते ।
“अन्यस्यामपि भार्य्यायां शकले द्वे बृहद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥”
जरातुर., त्रि, (जरया आतुर: ।) जीर्ण: ।
जरारोगग्रस्त. । इति शब्दमाला ॥ (यथा,
नैषधे । १ । १३५ ।
“मदेकपुत्त्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्द्दय-
न्नहो विधे । त्वां करुणा रुणद्धि न ॥”)
जरापुष्ट', पु (जरया राक्षस्या पुष्ट' ।) जरा-
सन्ध । इति शब्दरत्नावली ॥
जराभीरु:, पु (जरातो भीरु ।) कामदेव. ।
इति हेमचन्द्र. । २।१४१ ॥ जरामयशीले, त्रि ॥
जरायणि', पुं, (जराया राक्षस्या अपत्यम् । जरा
+ बाहुलकात् फिः । तत्प्राप्तजीवत्वात् तथा-
त्वम् ।) जरासन्ध । इति शब्दरत्नावली ॥
जरायु , पुं, (जरामेतीति । जरा + इण् + “किञ्ज-
रयो. श्रिण. ।” उणां १ । ४ । इति ञुण् ।)
येन वेष्टितो गर्भ कुक्षौ तिष्ठति स. । गर्भ-
वेष्टनचर्म्म । फूल इति भाषा । तत्पर्य्याय ।
गर्भाशय' २ उल्बम् ३ कलल. ४ । इत्यमरः ।
२ । ६ । ३८ ॥

“या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते ॥”
इति महाभागवते भगवतीगीता ॥
अग्निजारवृक्षः । इति राजनिर्घण्टः ॥
जरायुज:, त्रि, (जरायौ जायते इति । जन +
ड: ।) गर्भाशयजात: । स तु नृपश्वादि: ।
इत्यमर: । ३ । १ । ५० ॥
“या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते ।
शुक्रशोणितयोर्योगस्तस्मिन् सञ्जायते यत: ।
तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुज: ॥”
इति महाभागवते भगवतीगीता ॥
जरासन्ध:, पुं, (जरया तदाख्यया प्रसिद्धया
राक्षस्या कृता सन्धा देहसंयोजनमस्य ।)
चन्द्रवंशीयराजविशेष: । स तु वृहद्रथराज-
पुत्त्र: । कंसश्वशुर' इन्द्रयुद्धे भीमस्तं हतवान् ।
अस्य नामकरणं यथा,—
“अन्यस्यामपि भार्य्यायां शकले द्वे बृहद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥
जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुत: ॥”
इति श्रीभागवतम् ॥
तत्पर्य्याय: । बार्हद्रथि:२ । इति त्रिकाण्डशेष: ॥
(अस्य जन्मविवरणं महाभारते सभापर्व्वणि १७
अध्याये तथा मृत्युविवरण तत्रैव २४ अध्याये
द्रष्टव्यम् ॥ अयं हि विप्रचित्तिनामकस्यासुर-
स्यावतार. । यथा, महाभारते । १।६७।४ ।
“विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभ ।
जरासन्ध इति ख्यातः स आसीत् मनुजर्षभ: ॥”
धृतराष्ट्रपुत्त्राणामन्यतम: । यथा, महाभारते ।
१ । ११७ । ८ ।
“दृढ़सन्धो जरासन्ध, सत्यसन्ध सद'सुवाक् ॥”)
जरासन्धजित्, पु, (जयतीति । जि + क्विप् । सतो
जरासन्धस्य जित् जेता ।) भीम. । इति
त्रिकाण्डशेष. ॥
जरी, [न्] त्रि, (जराऽस्यस्येति । जरा + इनि: ।)
वृद्ध: । इति हेमचन्द्र' । ३ । ४ ॥
जरूथ, क्ली, (जीर्य्यतीति । जॄ + “जॄवृञ्भ्या-
मूथन् ।” उणां । २ । ६ । इति ऊथन् ।)
मांसम् । इति त्रिकाण्डशेष. ॥
जर्च्च, श उक्तौ । भर्त्सं । इति कविकल्पद्रुम ॥
(तुदा-पर-सक-सेट् ।) श, जर्च्चती जर्च्चन्ती ।
गुणस्थानरहितानां मुहादिपाठफलन्तु शत्र-
न्तानां वाप्तीपोरिति नुणो विभाषा वैदेगूचारण-
भेदश्च । भर्त्सत्सर्ज्जनम् । इति दुर्गादास' ॥
जर्च्छ, श उक्तौ । भर्त्से । इति कविकल्पद्रुम: ॥
(तुदा-पर-सक-सेट् ।) श, जर्च्छती जर्च्छन्ती ।
भर्त्सत्सर्ज्जनम् । इति दुर्गादास. ॥
जर्ज्ज, श वाचि । भर्त्से । इति कविकल्पद्रुम: ॥
(तुदा-पर-सक-सेट् ।) श, जर्ज्जती जर्ज्जन्ती ।
भर्त्सत्सर्ज्जनम् । इति दुर्गादास' ॥
जर्ज्जर', पु, (जर्ज्जति स्वगुणेनापरान् भिन्दतीति ।
जर्ज्ज + बाहुलकात् अर: ।) शैलज. । (जर्ज्जति
शत्रून् तर्ज्जयतीति ।) शक्रध्वज । (जर्ज्जते
निन्द्यते इति । कर्म्मणि बाहुलकादर: ।)

अन्न नापि प्रभवति पानीयात् कुरुसत्तम ।
नागन्तोऽहि विना न किञ्चित् संप्रवर्त्तते ॥
अन्नौषधो महाराज । वीरुधश्च जलोद्भवाः ।
यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ॥
तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित् ।
तच्च दद्यान्नरो नित्यं य इच्छेद्भूतिमात्मनः ॥
धन्यं यशस्यमायुष्यं जलदानमिहोच्यते ।
शत्रूंश्चाप्यधि कौन्तेय । सदा तिष्ठति तोयदः ॥
सर्व्वकामानवाप्नोति कीर्त्तिञ्चैवेह शाश्वतीम् ।
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते ॥
तोयदो मनुजव्याघ्र । स्वर्गं गत्वा महाद्युते ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ॥"

इति महाभारते दानधर्म्मः ॥ * ॥

करकस्थे कृते तोयमभक्ष्यं सर्व्वसम्मतम् ॥"

इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥ * ॥

उद्धृत वामहस्तेन यत्तोयं पिबति द्विजः ।
सुरापानेन तुल्यं स्यान्मनुराह प्रजापतिः ॥"

इति मनुः ॥

तस्य वैदिकपर्य्यायाः । अर्णः १ क्षोदः २ क्षद्म ३ नभः ४ अम्भः ५ कबन्धम् ६ सलिलम् ७ वाः ८ वनम् ९ घृतम् १० मधु ११ पुरीषम् १२ पिप्पलम् १३ क्षीरम् १४ विषम् १५ रेतः १६ कशः १७ जन्म १८ वृबूकम् १९ बुसम् २० तुग्र्या २१ बर्बुरम् २२ सुक्षेम २३ धरुणम् २४ सुरा २५ अररिन्दानि २६ ध्वस्मन्वत् २७ जामि २८ आयुधानि २९ क्षपः ३० अहिः ३१ अक्षरम् ३२ स्रोतः ३३ तृप्तिः ३४ रसः ३५ उदकम् ३६ पयः ३७ सरः ३८ भेषजम् ३९ सहः ४० शवः ४१ यहः ४२ ओजः ४३ सुखम् ४४ क्षत्रम् ४५ आवयाः ४६ शुभम् ४७ यादुः ४८ भूतम् ४९ भुवनम् ५० भविष्यत् ५१ आपः ५२ महत् ५३ व्योम ५४ यशः ५५ महः ५६ सर्णीकम् ५७ स्वृतीकम् ५८ सतीनम् ५९ गहनम् ६० गभीरम् ६१ गम्भरम् ६२ ईम् ६३ अन्नम् ६४ हविः ६५ सद्म ६६ सदनम् ६७ ऋतम् ६८ योनिः ६९ ऋतस्ययोनिः ७० सत्यम् ७१ नीरम् ७२ रयिः ७३ सत् ७४ पूर्णम् ७५ सर्व्वम् ७६ अक्षितम् ७७ बर्हिः ७८ नाम ७९ सर्पिः ८० अपः ८१ पवित्रम् ८२ अमृतम् ८३ इन्दुः ८४ हेम ८५ स्वः ८६ सर्गाः ८७ शम्बरम् ८८ अभ्वम् ८९ वपुः ९० अम्बु ९१ तोयम् ९२ तूयम् ९३ कृपीटम् ९४ शुक्रम् ९५ तेजः ९६ स्वधा ९७ वारि ९८ जलम् ९९ जलाषम् १०० । इत्येकशतमुदकनामानि । इति वेदनिघण्टौ १ अध्यायः ॥ * ॥

तस्य गुणाः ।
"पानीयं श्रमनाशनं क्लमहरं मूर्च्छापिपासापहं
तन्द्राच्छर्द्दिविनाशनं बलकरं निद्राहरं तर्पणम् ।
हृद्यं गुप्तरसं ह्यजीर्णशमकं नित्यं हितं शीतलं
लघ्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥"

अथ तस्य भेदाः ।
"पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ।
दिव्यं चतुर्व्विधं प्रोक्तं धाराजं करकाभवम् ॥
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥"
तत्र धारस्य लक्षणं गुणाश्च ।
"धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
शिलायां वा सुधायां वा धौतायां पतितञ्च यत् ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते ।
भाजने मृण्मये चापि स्थापितं धारमुच्यते ॥
धारनीरं त्रिदोषघ्नमनिर्द्देश्यरसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादि जीवनम् ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत्पथ्यं विशेषात् प्रावृषि स्मृतम् ॥"
अथ धाराजलस्य भेदौ ।
"धाराजलञ्च द्विविधं गाङ्गसामुद्रभेदतः ॥"
तत्र गाङ्गसामुद्रयोर्लक्षणं गुणाश्च ।
"आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता वृष्टिं कुर्व्वन्तीति वचः सताम् ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्व्वथा तज्जलं पेयं तथैव चरके वचः ॥
स्थापितं हैमजे पात्रे राजते मृण्मयेऽपि वा ।
शाल्यन्नं येन संसिक्तं भवेदक्लेदि वर्णवत् ॥
तद्गाङ्गं सर्व्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ।
तत्तु सत्त्वं रसघ्नं शुक्रदृष्टिबलापहम् ।
विस्रञ्च दोषलं तीक्ष्णं सर्व्वकर्म्मसु गर्हितम् ।
सामुद्रं त्वाश्विने मासि गुणं गाङ्गवदादिशेत् ॥
यतोऽगस्त्यस्य दिग्धत्वात् सकलं सलिलम् ।
निर्म्मलं निर्व्विषं स्वादु शुक्लं स्याद्दोषहृत् ॥"
अत्र तन्त्रान्तरम् ।
"पुष्करावर्त्तकादीनां नागानां व्योमचारिणाम् ।
वर्षासु तासु नोयं दिव्यमप्याश्विनं विना ॥"
चापानाभवर्जनागुणाः ।
"अनार्त्तवं प्रमुञ्चन्ति वारि वारिधरास्तु यत् ।
तत्त्रिदोषाय सर्व्वेषां देहिनां परिकीर्त्तितम् ॥"
अनार्त्तवं पौषादिमासचतुष्टयविषयम् ॥
अथ कारकाम्भसो लक्षणं गुणाश्च ।
"दिव्यवायग्निसंयोगात् संहताः खात् पतन्ति याः ।
पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः ॥
करकाभं जलं रूक्षं विशदं गुरु च स्थिरम् ।
दारुणं शीतलं सान्द्रं पित्तहृत्कफवातकृत् ॥"
अथ तौषारजललक्षणं गुणाश्च ।
"अपि नद्याः समुद्रान्ते वह्निरापश्च तद्भवाः ।
धूमायन्तिर्म्मुक्तास्तुषाराख्यास्तु ताः स्मृताः ॥"
अपि नद्याः समुद्रान्ते वह्निः । नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते । तद्भवाः वह्निभवाः । धूमायन्तिर्म्मुक्ताः धूमैरवहिताः आपस्तुषाराख्याः । तुष इति लोके तुस इति च ।
"तापत्र प्राणिनां प्रायो भवन्त्याख्यातु नाहिताः ।
तुषारस्तु हिमं रूक्षं स्याद्वातलमपित्तलम् ॥
कफोरुस्तम्भकण्ठाग्निमेदोगलगण्डादिरोगनुत् ॥"
अथ हैमजलस्य लक्षणं गुणाश्च ।
"हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिमं हैमं जलमाहुर्म्मनीषिणः ॥
हैमन्तु शीतं पिच्छिलं गुरु वातविवर्द्धनम् ॥"
हैमं जलं कुञ्झटजलम् । कुज्झटि ।
"और्व्वानलधूमेरित-
मम्बु समुद्रस्य यद्घनीभूतम् ।
पवनाभीतसुदीर्घं
तद्धिममिति कथ्यते मुनिभिः ॥
हिम कुहस इति लोके ।
हिमन्तु शीतलं रूक्षं दारुणं सूक्ष्ममित्यपि ।
न तद्दूषयते वातं न च पित्तं न वा कफम् ॥" * ॥
अथ भौमं जलं तद्भेदाश्च ।
"भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥"
तेषां लक्षणानि गुणाश्च ।
"अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
ज्ञातव्यो जाङ्गलो देशस्तत्रत्यं जाङ्गलं जलम् ॥
बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तु ।
पित्तहृत् कफकृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
साधारणन्तु मधुरं दीपनं शीतलं लघु ॥
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ॥"
अथ भौमजलभेदानां नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
"नद्या नद्याः स्रवा या नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ॥
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ।
नद्यः शीघ्रवहा याश्च स्वच्छा याश्चामलोदकाः ॥
गुर्व्व्यः शैवालसञ्छन्नाः सन्दिग्धाः कलुषाश्च याः ।
नदीसरस्तडागानां कूपप्रस्रवणादिषु ॥
उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥"
अथौद्भिदस्य लक्षणं गुणाश्च ।
"विदार्य्य भूमिं निम्नां यदुच्छ्रिता धारया सवेत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥
औद्भिदं वारि पित्तघ्नमविदाहि निशीतलम् ।
प्रीणनं मधुरं बल्यमीषद्वातकरं लघु ॥"
अथ नैर्झरस्य लक्षणं गुणाश्च ।
"शैलसानुसरद्वारिप्रवाहो निर्झरो झरः ।
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥
नैर्झरं रुचिकृत्वीरं कफघ्नं दीपनं लघु ।
मधुरं कटुकं पाके वातलं स्यादपित्तलम् ॥"
अथ सारसस्य लक्षणं गुणाश्च ।
"नद्या शैलादिरुद्धाया यत्र संस्रुत्य तिष्ठति ।
तत् सरो उत्पलाद्यं तदम्भः सारसं स्मृतम् ।
सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु ।
रोचनं तुवरं रूक्षं बद्धमूत्रमलं हितम् ॥"
अथ ताडागस्य लक्षणं गुणाश्च ।
"प्रशस्तभूमिभागस्थो बहुवर्षवतुःशोभितः ।
जलाश्रयस्तडागः स्यात्ताडागं तज्जलं स्मृतम् ।
ताडागमुदकं स्वादु कषायं कटुपाकि च ।
वातलं बद्धविण्मूत्रमसृक्पित्तकफापहम् ॥"
अथ वाप्यस्य लक्षणं गुणाश्च ।

“पाषाणैरिष्टकाभिर्व्वा बद्धकूपा बृहत्तरा ।
ससोपाना भवेद्वापी तज्जलं वाप्यमुच्यते ॥
वाप्यं वारि यदि क्षारं पित्तकृत् कफवातहृत् ।
तदेव मिष्टं कफकृत् वातपित्तहरं भवेत् ॥”
अथ कौपस्य लक्षणं गुणाश्च ।
“भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः ।
बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौप्यमुच्यते ॥
कौपं पयो यदि स्वादु त्रिदोषघ्नं हितं लघु ।
तत् क्षारं कफवातघ्नं दीपनं कफकृत् परम् ॥”
अथ चौख्यस्य लक्षणं गुणाश्च ।
“शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम् ।
लतावितानसंछन्नं चौख्यमित्यभिधीयते ॥
अश्मादिभिरबद्धं यत्तत् चौख्यमिति चापरे ।
तत्रत्यमुदकं चौण्ड्रं मुनिभिः समुदाहृतम् ॥
चौण्ड्रं वह्निकरं नीरं रूक्षं कफहरं लघु ।
मधुरं पित्तनुद्दृष्यं पाचनं विशदं स्मृतम् ॥”
अथ पाल्वलस्य लक्षणं गुणाश्च ।
“अल्पं सरः पल्वलं स्यात् यत्र चन्द्रर्क्षगे रवौ ।
न तिष्ठति जलं किञ्चित् तत्रत्यं वारि पाल्वलम् ॥
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ॥”
अथ विकिरस्य जलस्य लक्षणं गुणाश्च ।
“नद्यादिनिकटे भूमिर्य्या भवेद्वालुकामयी ।
उद्धार्य्यते ततो यत्तु तज्जलं विकिरं विदुः ॥
विकिरं शीतलं स्वच्छं निर्द्दोषं लघु तत् स्मृतम् ।
तुवरं स्वादु पित्तघ्नं क्षारं तत् पित्तलं मनाक् ॥”
अथ कैदारस्य लक्षणं गुणाश्च ।
“केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरु दोषकृत् ॥”
अथ वृष्टिजलस्य लक्षणं गुणाश्च ।
“वार्षिकं तदहर्वृष्टं भूमिष्ठमहितं जलम् ।
त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ॥”
अथ हेमन्तादिकालविशेषे विहितो जलविशेषः ।
“हेमन्ते सारसं तोयं ताडागं वा हितं स्मृतम् ।
हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते ॥
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम् ।
न देयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ॥
विषवद्वनवृक्षाणां पत्राद्यैर्दूषितं यतः ।
औद्भिदं वान्तरीक्षं वा कौपं वा प्रावृषि स्मृतम् ॥
शस्तं शरदि नादेयं नीरमंशूदकं परम् ।
दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ॥
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् ॥
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥”
रविकरैर्जुष्टमित्युक्ते दिवापदं समस्तदिवसप्राप्त्यर्थं शीतकरांशुभिर्जुष्टमित्युक्ते निशीतिपदं समस्तरात्रिप्राप्त्यर्थम् । अन्यच्च ।
“शरदि स्वच्छमुदयादगस्त्यस्याखिलं हितम् ॥”
वृद्धसुश्रुतस्तु ।
“पौषे वारि सरोजातं माघे तत्तु तडागजम् ।
फाल्गुने कूपसम्भूतं चैत्रे चौख्यं हितं मतम् ॥
वैशाखे नैर्झरं नीरं ज्यैष्ठे शस्तं तथौद्भिदम् ।
आषाढे शस्यते कौपं श्रावणे दिव्यमेव च ॥
भाद्रे कौपं पयः शस्तमाश्विने चौख्यमेव च ।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते ॥”
अथ जलस्य ग्रहणकालः ।
“भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते ।
शीतत्वं निर्म्मलत्वञ्च यतस्तेषां महान् गुणः ॥”
अथ जलस्य पाने विधिः ।
“अत्यम्बुपानान्न विपच्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्म्मुहुर्व्वारि पिबेदभूरि ॥”
अथ शीतलजलपानस्य विषयाः ।
“मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
भ्रमे श्रमे विदग्धेऽन्ने तमके वमथौ तथा ।
ऊर्द्ध्वगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥”
अथ तन्निषेधः ।
“पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ।
आध्माने स्तिमिते कोष्ठे सद्यःशुद्धौ नवज्वरे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीताम्बु परिवर्ज्जयेत् ॥”
अथाल्पजलपानस्य विषयाः ।
“अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये ।
मुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे ।
व्रणे च मधुमेहे च पिबेत् पानीयमल्पकम् ॥”
अथ जलपानस्यावश्यकता ।
“जीवानां जीवनं जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सद्यो न क्वचित् वारि वार्य्यते ॥”
हारीतश्च ।
“तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
अतः सर्व्वास्ववस्थासु न क्वचित् वारि वारयेत् ॥”
अथ प्रशस्तं जलम् ।
“अगन्धमव्यक्तरसं सुशीतं तर्षनाशनम् ।
अच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते ॥”
अथ निन्दितं जलम् ।
“पिच्छिलं कृमिलं क्लिन्नं पर्णशैवालकर्द्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम् ॥
कलुषं छन्नमम्भोजपर्णनीलीतृणादिभिः ।
दुर्द्दशमसंस्पृष्टं सौरचान्द्रमसांशुभिः ॥
अनार्त्तवं वार्षिकमपि प्रथमं तच्च भूमिगम् ।
व्यापन्नं परिहर्त्तव्यं सर्व्वदोषप्रकोपणम् ॥
तत् कुर्य्यात् स्नानपानाभ्यां तृष्णाध्मानोदरज्वरान् ।
कासाग्निमान्द्याभिष्यन्दिकण्डूगण्डादिकांस्तथा ॥”
अथ दुष्टजलस्य निर्द्दोषीकरणोपायः ।
“निन्दितञ्चापि पानीयं क्वथितं सूर्य्यतापितम् ।
सुवर्णं रजतं लोहं पाषाणं सिकतां मृदम् ॥
भृशं सन्ताप्य निर्व्वाप्य सप्तधा साधितं तथा ।
कर्पूरजातिपुन्नागपाटलादिसुवासितम् ॥
शुचिसान्द्रपटस्रावैः क्षुद्रजन्तुविवर्ज्जितम् ।
स्वच्छं कनकमुक्तादेः शुद्धं स्याद्दोषवर्ज्जितम् ॥
पर्णमूलविसग्रन्थिमुक्ताकनकशैवलैः ।
गोमेदेन च वस्त्रेण कुर्य्यादम्बुप्रसादनम् ॥”
अथ पीतस्य जलस्य पाकावधिः ।
“आमं जलं जीर्य्यति याममात्रं
तदर्द्धमात्रं शृतशीतलञ्च ।
तदर्द्धमात्रं तु शृतं कदुष्णं
पयःप्रपाकेऽवधिरेष उक्तः ॥”
इति भावप्रकाशे वारिवर्गः ॥
अथ जले भगवत्पूजाविधिः ।
“उत्तापेऽर्कांशुतो जाते शीतलेन सुगन्धिना ।
जलेन पूरिते पात्रे श्रीकृष्णमुपवेशयेत् ॥
नित्यार्च्चाविधिनाभ्यर्च्च्य सायं सन्ध्यामुपास्य च ।
देवं सिंहासने नीत्वा गन्धादिभिरथार्च्चयेत् ॥
नीराज्य देवं सर्व्वेभ्यो दत्त्वा तीर्थं भजेत् स्वयम् ।
द्वादश्यान्तु विशेषेण रात्रौ तोयस्थमर्च्चयेत् ॥”
तन्माहात्म्यं यथा, गारुडे ।
“स्वर्णपात्रेऽथवा रौप्ये ताम्रे वा मृण्मयेऽपि वा ।
तोयस्थं योऽर्च्चयेद्भक्त्या शालग्रामसमुद्भवम् ॥
चक्राङ्कितं वा भूपाल ! निवृत्ते मधुमाधवे ।
प्रतिमासं महाभागस्तस्य पुण्यमनन्तकम् ॥
यावद्धराधरो लोके यावच्चन्द्रदिवाकरौ ।
तावत्तस्य कुले कश्चिन्न भवेद्भूप ! नारकी ॥
तस्माज्ज्यैष्ठे सदा भूप ! तोयस्थं पूजयेद्धरिम् ।
वीततापो नरस्तिष्ठेद्यावदाभूतसंप्लवम् ॥
कृतैः सुशीतलैस्तोयैस्तुलसीदलवासितैः ।
शुचिशुक्रगते काले येऽर्च्चयिष्यन्ति केशवम् ॥
जलस्थं विविधैः पुष्पैर्म्मुच्यते यमयातनात् ॥
जलस्थो यतो विष्णुर्ज्जलशायी जलप्रियः ।
तस्माद्ग्रीष्मे विशेषेण जलस्थं पूजयेद्धरिम् ॥
नीरमध्यस्थितं कृत्वा शालग्रामसमुद्भवम् ।
योऽभ्यर्च्चयेन्महाभक्त्या स भवेत् कुलपावनः ॥
कर्किराशिगते सूर्य्ये मिथुनस्थे विशेषतः ।
येनार्च्चितो हरिर्भक्त्या जलमध्ये महीपते ! ॥
द्वादश्यान्तु विशेषेण जलस्थं जलशायिनम् ।
योऽभ्यर्च्चयेत् कृतं तेन यज्ञकोटिशतं भुवि ॥
पात्रे गन्धादिकं कृत्वा यः क्षिपेद्गरुडध्वजम् ।
द्वादश्यां पूजयेद्रात्रौ मुक्तिभागी भवेन्नरः ॥”
किञ्च ।
“वनागमे प्रकुर्व्वन्ति जलस्थं वै जनार्द्दनम् ।
ये नरा नृपतिश्रेष्ठ ! तेषां वै नरकं ध्रुवम् ॥”
“तथैवात्युष्णसमये कालिन्द्यादौ विशेषतः ।
सम्पादयेद्भगवतो जलक्रीडामहोत्सवम् ॥”
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

जलः, त्रि, (जलति आच्छादयति विनाशयति वा ज्ञानं बुद्धिप्रतिभां वेति । जल + अच् ।) जडः । इति मेदिनी । ले, १८ ॥ (यथा, काशीखण्डे । २९ । ६६ ।
“जाड्यविध्वंसनकरी जगद्योनिर्ज्जलाविला ॥”
“जलानां जडानामज्ञानानामित्यर्थः । आविला कलुषितेव आवृतेवेति वा ।” इति तट्टीका ।)

जलकण्टकः, पुं, (जले जातः कण्टकः । कण्टकान्वितत्वादेवास्य तथात्वम् ।) शृङ्गाटः । पानी-

फल इति भाषा ॥ (जले कराटकः मघु इव ।) कुम्भीरः । इति हारावली । ७६ ॥
जलकपि, पु, (जले कपिरिव ।) शिशुमारः । इति हारावली । ७७ ॥
जलकरङ्क, पु, (जलपूर्णः करङ्कः । मध्यपदलोपि-समासः ।) नारिकेलफलम् । (जले करङ्कः अधःस्थनारिकेलफलमिव इव ।) पद्मम् । शङ्खः । जलतरङ्गः । मेघः । इति मेदिनी । के, २०८ ॥
जलकल्क, पु, (जलस्य कल्क इव ।) शैवाल । इति हारावली । २०५ ॥
जलकाक, पुं, (जले जलस्य वा काक इव ।) पक्षिविशेषः । पानीकौडि इति भाषा ॥ तत्-पर्य्यायः । दात्यूहः २ कालकण्टकः ३ । अस्य मांसगुणाः । स्निग्धं गुरु हिमं वृष्यं मांसं जलपक्षिणाम् वातहरम् । इति राजनिर्घण्टः ॥
जलकाङ्क, पु, स्त्री, (जलं काङ्क्षति अभिलषतीति । जल + काङ्क्ष + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) हस्ती । इति त्रिकाण्डशेषः ॥
जलकाङ्क्षी, [न्] पु स्त्री, (जलं काङ्क्षति अभि-लषतीति । काङ्क्ष + णिनि ।) हस्ती । इति हारावली । १४ ॥ जलाभिलाषिणि, त्रि ॥
जलकान्तार, पु (जलमेव कान्तारं दुर्गमपथो यस्य यस्मिन् इति वा । जलाधिष्ठातृत्वादेवास्य तथात्वम् ।) वरुणः । इति हेमचन्द्रः । २।१०२॥
जलकामुकः, पु, (जलस्य कामुकः अभिलाषुकः ।) कुटुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, अर्कपुष्पी । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका ॥")
जलकिराट, पु, (जले किरः शूकर इव अटति गच्छतीति । अट + अच् ।) ग्राहः । इति हारावली । ७७ ॥
जलकुक्कुटी, स्त्री, (जले कुक्कुट इव । तत स्त्रियां जातित्वात् ङीष् ।) गङ्गाचिल्ली । इति हारावली । ८६ ॥
जलकुक्कुभ, पु, (जले कुक्कुभः पक्षिविशेष इव ।) जलचरपक्षिविशेषः । कोडापाखी इति भाषा ॥ तत्पर्य्यायः । कोयष्टिः २ शिखरी ३ । इति हेमचन्द्रः ॥
जलकुन्तल, पु, (जलस्य कुन्तलः केश इव ।) शैवालम् । इति भूरिप्रयोगः ॥ (शैवालशब्देऽस्य विवृतिर्व्विधेया ॥)
जलकूपी, स्त्री, (जलस्य कूपीव ।) कूपगर्त्तः । पुष्करिणी । इति मेदिनी । प, २८ ॥
जलकूर्म्म, पु, (जले कूर्म्म इव । प्लवनसमये कूर्म्मस्येव दृश्यत्वादस्य तथात्वम् ।) शिशुमारः । इति त्रिकाण्डशेषः ॥
जलकेश, पु (जलस्य केश इव ।) शैवालम् । इति हारावली । १०६ ॥
जलक्रीडा, स्त्री, (जलेन जले वा क्रीडा ।) नद्यादौ वयस्यादिभिः सह जलनिःक्षेपादि-रूपक्रीडा । तत्पर्य्यायः । करपात्रम् २

वायुषी ३ फारफलिका ४ । इति हारावली । ११६ ॥ (यथा, महाभारते । १ । १२८ । ३६ ।
"गहिता भारतः सर्व्वे जलक्रीडामवाप्नुमः ॥")
जलगुल्मः, पु, (जलस्य गुल्म इव ।) जलावर्त्तः । कच्छपः । जलचत्वरम् । इति मेदिनी । मे, ६० ॥
जलङ्ग, पु (जलं गच्छतीति । जल + गम् + डः । खतो मुम् ।) महाकालः । मकालफलः । इति राजनिर्घण्टः ॥
जलङ्गम, पुं, (जलं ग्रामाद्गतजलभूमिं गच्छ-तीति । जल + गम + "गमश्च ।" ३ । २ । ४७ । इति खच् मुम् च । ग्रामान्तर्य्यामिलादेवास्य तथात्वम् ।) जनङ्गमः । चाण्डालः । इत्यमर-टीकायां भरतः ॥
जलचारी, [न्] पु, (जले चरतीति । चर + णिनिः ।) मत्स्यः । इति शब्दचन्द्रिका ॥ जल-चरे, त्रि ॥ (यथा, रामायणे । ३ । १५ । ६ ।
"इयन्तु भद्रिता रम्या तडागी योजनायनम् । प्रसारिताः प्रकरैराकीर्णे जलचारिभिः ॥")
जलज, क्लो, (जले जायते इति । जन + डः ।) पद्मम् । (यथा, कुमारे । ७ । ८० ।
"वाचस्पतिर्व्वाचयिष्यं प्राञ्जलिर्ज्जलजासनम् ॥") शङ्खः । इति मेदिनी । जे, ७४ ॥ (यथा, रघु । ७ । ६३ ।
"स तु प्रियोपान्तरसेऽधरोष्ठे
निवेश्य दध्मौ जलजं कुमारः ॥")
लोणारम् । इति राजनिर्घण्टः ॥
जलज, पु (जले जायते इति । जल + जन् + डः ।) मत्स्यः । इति शब्दचन्द्रिका ॥ (यथा, रामा-यणे । २ । ६१ । २२ ।
"स तादृशः सिंहवलो वृषभाक्षो नरर्षभः । स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥")
जले निवासात् कुम्भीरशिशुमारादयः । एषां मांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातनाशित्वम् । शुक्रवर्द्धनत्वञ्च । इति राजवल्लभः ॥ हिज्जलवृक्षः । शैवालः । पानीरक्षः । शङ्खः । इति राजनिर्घण्टः ॥ कुम्भीरः । इति भावप्रकाशः ॥ कर्कटमीन-कुम्भराशयः मकरशेषार्द्धञ्च । इति दीपिका ॥ जलजाते, त्रि ॥ (यथा, हरिवंशे । ६७ । ३२ ।
"जलजैः प्राणिभिः कीर्णा जलजैर्भूषिता शुभैः । जलजैः कुसुमैश्चित्रा जलजैर्द्दरितोदकाम् ॥")
जलजन्तु, पु, (जलजातो जन्तुः ।) जलजप्राणी । तत्पर्य्यायः । यादः २ । इत्यमरः । १।१०।२० ॥
जलजन्तुका, स्त्री, (जलजो जन्तुः । ततः सञ्ज्ञायां कन् । स्त्रियां टाप् ।) जलौका । इति भरतः ॥
जलजन्म, [न्] क्ली, (जले जन्म यस्य ।) पद्मम् । इति हेमचन्द्रः । ४ । २२८ ॥ (श्रावरकन्दके, पु । तद्यथा,—
"जम्बूका जलजन्मा च तथा श्रावरकन्दकम् ॥" इत्युत्तरस्थानेऽष्टादशेऽध्याये वाभटेनोक्तम् ॥)

जलजम्बूका, स्त्री (जलप्रधाना जम्बूका क्षुद्र-जम्बूः ।) क्षुद्रजम्बूः । इति भावप्रकाशः ॥ भुँइजाम इति पनजाम इति च भाषा ॥
जलजिह्व, पु, (जलमात्रग्रहणसमर्था जिह्वा यस्य । तस्य सः ।) नक्रः । इति हारावली ।७६॥
जलडिम्ब, पु, (जले डिम्ब इव ।) शम्बूकः । इति हारावली । ११२ ॥ (शम्बूकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)
जलतापिक, पुं, (जलतापिन् + सञ्ज्ञायां कन् ।) इल्लीशमत्स्यः । काकचीमत्स्यः । इति शब्द-रत्नावली ॥
जलतापी [न्] पुं, (जलेऽपि तपति प्रकाशयती-वेति । तप + णिनिः ।) इल्लीशमत्स्यः । इति शब्दरत्नावली ॥
जलताल, पु, (जलं अगाधसलिलं तलति आश्रय-त्वेन गच्छतीति । तल + अण् ।) इल्लीश-मत्स्यः । इति त्रिकाण्डशेषः ॥
जलतिक्तिका, स्त्री, (स्वल्पा तिक्ता तिक्तिका । स्वल्पार्थे कन् । जलप्रधाना तिक्तिका ।) शल्लकीवृक्षः । इति राजनिर्घण्टः ॥
जलत्रा, स्त्री, (जलात् त्रायते इति । त्रै + कः ।) छत्रम् । इति हारावली । ४० ॥
जलद, पुं, (जलं ददातीति । दा + कः ।) मेघः । (यथा, मेघदूते । १३ ।
"मार्गं तावत् शृणु कथयतस्त्वत्प्रयाणानुरूपं सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ॥")
मुस्तकम् । इति मेदिनी । दे, २८ ॥ (यथा,—
"अम्लता-नागर-सहचर-भद्रोत्कट-पञ्चमूल-जलदजमम् ।
शृतशीतं मधुयुक्तं निवारयति सूतिकातङ्कम् ॥" इति वैद्यकचक्रपाणिसंग्रहे सूतिकाधिकारे ॥ शाकद्वीपान्तर्गतवर्षविशेषः । यथा, महा-भारते । ६ । ११ । २२—२३ ।
"वर्षाणि तेषु कौरव्य ! सम्प्रोक्तानि मनीषिभिः । महामेरुर्म्महाकाशो जलदः कुमुदोत्तरः । जलधारो महाराज ! सुकुमार इति स्मृतः ॥")
जलदागम, पुं, (जलदानां मेघानां आगमः आगमनं यत्र ।) वर्षाकालः । इति राज-निर्घण्टः ॥ (यथाह वररुचिः ।
"भद्र कृतं कृतं मौनं कोकिलैर्ज्जलदागमे । दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥")
जलदाशन, पु, (अश्यते भक्ष्यते इति । अश + कर्म्मणि ल्युट् । जलदानां मेघानामशनम् । मेघा शालपत्रं भक्षयन्तीति प्रसिद्धेः ।) शाल वृक्षः । इति शब्दचन्द्रिका ॥
जलधरः, पु, (धरतीति धरः । धृ + अच् । जलस्य धरः ।) मेघः । (यथा, महाभारते । १ । १३५ । १८ ।
"नभो जलधरैर्हीनं साङ्गारक इवांशुमान् ॥")
मुस्तकम् । इत्यमरः । १।३ । ७,२ । ४ । १५६ ॥ समुद्रः । इति हेमचन्द्रः ॥ तिनिशवृक्षः । इति राजनिर्घण्टः ॥ जलधारिणि, त्रि ॥

जलधि॰, पु, (जलानि धीयन्तेऽस्मिन्निति । जल+धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । (यथा, आर्य्यासप्तशत्याम् । ४८० ।

"या दक्षिणा त्वमस्यामदक्षिणो दक्षिणस्य मितरस्याम् ।

जलधिरिव मध्यसंस्थो न वेलयोः सदृशमाचरसि ॥")

दशशङ्कुसङ्ख्या । सा तु शतलक्षकोटयः । इति लीलावती ॥

जलधिगा, स्त्री, (जलधिं समुद्रं गच्छतीति । गम+ड. । स्त्रियां टाप् ।) नदी । इति हेमचन्द्रः । ४ । १४९ ॥

जलधिजा, स्त्री, (जलधौ जायते इति । जन्+"सप्तम्यां जनेर्डः ।" इति ड. ।) लक्ष्मीः । इति त्रिकाण्डशेषः ॥

जलधेनुः, स्त्री, (जलकल्पिता धेनुः ।) दानार्थकृत्रिमधेनुः । यथा,—

होतोवाच ।

"जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्व्वकम् ।
गोचर्म्ममात्र भूभागं गोमयेनोपलेपयेत् ॥
तत्र मध्ये च राजेन्द्र ! पूर्णकुम्भन्तु विन्यसेत् ।
जलपूर्णंसुगन्धाढ्यं कर्पूरागुरुचन्दनैः ॥
वासितां गन्धतोयेन तां धेनुं परिकल्पयेत् ।
घृतस्य तथापरं कल्प्य घृतेन परिपूरितम् ॥
वर्द्धनीकं महाराज । पत्रपुष्पैः समन्वितम् ।
दूर्व्वाङ्कुरैरुपस्तीर्य्य स्रग्दामैश्च विभूषितम् ॥
पञ्चरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप ।
मांसीमुशीरं कुष्ठञ्च तथा शैलेयवालुकम् ॥
आमलकसर्षपाश्चैताः सर्व्वधान्यानि पार्थिव ।
चतुर्दिक्ष्वपि पात्राणि चतार्य्येव प्रकल्पयेत् ॥
एव घृतमय पात्रं द्वितीय दधिपूरितम् ।
तृतीय मधुनश्चैव चतुर्थं शर्करान्वितम् ॥
सुवर्णं मुखचक्षूंषि शृङ्गं कृष्णागुरूणि च ।
प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम् ॥
ताम्रपृष्ठां कांस्यदोहां दर्भरोमसमन्विताम् ।
पुच्छं सूत्रमयं कृत्वा कृष्णाभरणघण्टिकाम् ॥
कम्बले पुष्पमालाश्च गुडास्यां शुक्तिदन्तिकाम् ।
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनम् ॥
इक्षुपादान्तु राजेन्द्र । गन्धपुष्पोपशोभिताम् ।
कृष्णाजिनोपरि स्थाप्य वस्त्रैराच्छादितान्तु ताम्॥
गन्धपुष्पैः समभ्यर्च्य विप्राय विनिवेदयेत् ।
एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे ॥
साधुविप्राय राजेन्द्र । श्रोत्रियायाहिताग्नये ।
तपोवृद्धे वयोवृद्धे दातव्या च कुटुम्बिने ॥
यो ददाति नरो राजन् । यः पश्यति शृणोति च ।
प्रतिगृह्णाति यो विप्रः सर्व्वे मुच्यन्ति पातकात् ॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः ।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोकं स गच्छति ॥
योऽश्वमेधेन यजते समाप्तवरदक्षिणः ।
जलधेनुञ्च यो दद्यात् सममेतन्नराधिपः ॥
जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः ।
अथवा हविरेकदिने यः पयोव्रतमास्थितः ॥
ग्राहकोऽपि त्रिरात्रं वै तिष्ठेदेव न संशयः ।
यत्र क्षीरवहा नद्यो मधुपायसकर्द्दमाः ॥
यत्र चाप्सरसा गीतं तत्र यान्ति जलप्रदाः ।
दाता च दापकश्चैव प्रतिग्राही च यो द्विज. ॥
ते सर्व्वे पापनिर्म्मुक्ता विष्णुलोकञ्च प्राप्नुयुः ॥"

इति वाराहे जलधेनुमाहात्म्यनामाध्यायः ॥

जलनकुल॰, पुं, (जले नकुल इव ।) जलजन्तुविशेषः । धाडिया इति उद्‌बिडाल इति च भाषा । तत्पर्य्यायः । उद्रः २ जलमार्ज्जारः ३ जलाखुः ४ जलप्लव. ५ । इति त्रिकाण्डशेषः । जलविडालः ६ नीराखुः ७ । इति हारावली । । ७६ ॥ पानीयनकुलः ८ वसी ९ । इति हेमचन्द्र ॥

जलनिधिः, पु, (जलानि निधीयन्तेऽस्मिन्निति । धा+"कर्म्मण्यधिकरणे च । " ३ । ३ । ९३ । इति किः । जलानां निधिरिति वा ।) समुद्रः । इत्यमरः । १ । १० । २० ॥ (यथा, आर्य्यासप्तशत्याम् । ६१४ ।

"सरित इव यस्य गेहे शुष्यन्ति विशालगोत्रजा नार्य्यः ।
धाराभिश्च स तृप्यति जलनिधिलहरीषु जलद इव ॥"

चतुः सङ्ख्या समुद्रवाचित्वात् । यथा, सतृहत्यमुक्तावल्याम् ।

"वारे शीतकर तिथौ जलनिधिं भेऽप्यिषु योगे द्वयम् ॥" इति ॥)

जलनिर्गमः, पु, (गम+"ग्रहवृदनिश्चिगमश्च ।" ३ । ३ । ५८ । इति भावे अप् । जलाना निर्गमो वहिर्गमनं यस्मात् ।) प्राकारगृहभित्त्यादिषु जलनि.सरणमार्गः । इति भरतः ॥ देवकुलप्राकारादिषु जलनिःसरणद्वारम् । इति सर्व्वानन्दः ॥ तत्पर्य्यायः । भ्रमः २ । इत्यमरः । १।१०।७ ॥ वक्रम् ३ पुटभेदः ४ । इति स्वामी ॥

जलनीली, स्त्री, (जलं नीलयतीति । नील+तत् करोतीति णिच्+ततः "कर्म्मण्यण् ।"३।२।१ । इत्यण् । ततो ङीष् ।) शैवालम् । इत्यमरः । १ । १० । ३८ ॥ (शैवालशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

जलन्धरः, पुं, (जलं ब्रह्मनेत्रच्युताश्रुजलं धरतीति । जल+धृ+बाहुलकात् खच् मुम् च ।) असुरविशेषः । तस्योत्पत्तिकारणं यथा,—

इन्द्रः शिवं द्रष्टुं शिवलोकं गत्वा एकं भयानकं पुरुषं दृष्ट्वा तं पुनःपुनः पप्रच्छ ईश्वरः क गतः । स उत्तरं न ददौ इन्द्रः क्रुद्धस्तं वज्रेण जघान । ततो रुद्रस्तेजसा प्रजज्वाल । तत इन्द्रो भीतस्तं प्रणम्य तुष्टाव रुद्रस्तुष्ट इन्द्रदाहार्थोत्पन्नं भालनेत्रस्थवह्निं गृहीत्वा गङ्गासागरसङ्गमे प्राक्षिपत् तत स बालरूपोभूत्वा रुरोद तस्य रोदनशब्देन सप्तलोका वधिरीकृतास्तच्छ्रुत्वा ब्रह्मा विस्मितस्तत्रागत्य तं बालं समुद्रक्रोडे दृष्ट्वा तं पप्रच्छ कस्याय पुत्रः समुद्रस्तं प्रणम्योवाच मम पुत्रः अस्य जातकर्म्मादि कुरु इत्युक्त्वा ब्रह्मा क्रोडे ददौ स बालस्तस्य श्मश्रु दधार श्मश्रु धुन्वतो ब्रह्मणो नेत्राभ्यां जलमगमत् ब्रह्मा समुद्रमुवाच यस्मादनेन मम नेत्राभ्यां निर्गतं जलं धृतं तस्मादयं जलन्धरनामा अधुनैव सर्व्वशास्त्रवेत्ता रुद्रं विना सर्व्वभूतावध्यश्च भविष्यति इत्युक्त्वा शुक्रमाहूय तमासुरराज्ये न्यवेशयत् स कालनेमिसुतां वृन्दामुपयेमे । इति पाद्मोत्तरखण्डम् ॥

जलपति॰, पुं, (जलस्य पतिः ।) वरुणः । इति हेमचन्द्र. । २ । १०२ ॥ (अस्य जलपतित्वकथा यथा, काशीखण्डे । १२ । ८८—९५ ।

"ततस्तं तनयः दृष्ट्वा पितरं प्रणिपत्य च ।
जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम् ॥
तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम् ।
पञ्चवर्षसहस्राणि स्थितः पाषाणनिश्चलः ॥
आविरासीन्महादेवस्तुष्टस्तत्तपसा ततः ।
उवाच कार्द्दमे । ब्रूहि कं ददामि वरोत्तमम् ॥
कार्द्दमिरुवाच ।
यदि नाथ । प्रसन्नोऽसि भक्तानामनुकम्पक । ।
सर्व्वासामाधिपत्यं मे देह्यपां यादसामपि ॥
इति श्रुत्वा महेशानः सर्व्वचिन्तितदः प्रभुः ।
अभ्यषिञ्चत तं तत्र वारुणे परमे पदे ॥
रत्नानामब्धिजातानामब्धीनां सरितामपि ।
सरसां पल्वलानाञ्च वाप्यब्धुस्रोतसां पुनः ॥
जलाशयानां सर्व्वेषां प्रतीच्यास्त्वपि वै दिशः ।
अधीश्वरः पाशपाणिर्भव सर्व्वामरप्रियः ॥")

समुद्रः । अप्पतिरित्यमरदर्शनात् ॥

जलपारावतः, पु, (जले पारावत इव ।) पक्षिविशेषः । तत्पर्य्यायः । कोपी २ जलकपोतः ३ । इति राजनिर्घण्टः ॥

जलपित्त, क्ली, (जलानां पित्तमिव ।) अग्निः । इति शब्दरत्नावली ॥

जलपिप्पली, स्त्री, (जलजाता पिप्पली ।) पिप्पलीविशेष. । पनिसगा इति लोके । जलपिपरी इति हिन्दी भाषा । तत्पर्य्यायः । महाराष्ट्री २ शारदी ३ तोयवल्लरी ४ मत्स्यादनी ५ मत्स्यगन्धा ६ लाङ्गली ७ शकुलादनी ८ अग्निज्वाला ९ चित्रपर्णी १० प्राणदा ११ तृणशीता १२ बहुशिखा १३ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । व्रणकीटादिदोषरक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

"जलपिप्पल्यभिहिता शारदी शकुलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता॥
जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः ।
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ॥
कटुपाका रसा रुच्या कषाया वह्निवर्द्धिनी ॥"

इति भावप्रकाशः ॥

("गम्भीरो जलपिप्पल्यस्तुम्बुरुः शृङ्गवेरिका ।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च ॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥)

भोगः करे षट्पदयोस्तु षट्के
भीतिर्नृणां स्याद्विशुवस्य चक्रे ॥
यस्मिन्मृद्धे वसेन्नागुस्तस्मात् संगणयेद्बुधः ॥"
इति समयामृतम् ॥

जलवृश्चिकः, पुं, (जले वृश्चिक इव ।) चिङ्गट-मत्स्यः । इति त्रिकाण्डशेषः ॥

जलवेतसः, पुं, (जलजातो वेतसः ।) वानीर-वृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्याया गुणाश्च ।
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः कुष्ठकृच्छ्रातकोपनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जलव्यधः, पुं, (जलं विध्यतीति । व्यध+अच् ।) कङ्कोटमत्स्यः । इति त्रिकाण्डशेषः ॥

जलव्यालः, पुं, (जलस्थितो व्यालो हिंस्रजन्तुः ।) अलगर्द्दसर्पः । इत्यमरः । १ । ८ । ५ ॥ क्रूर-कर्म्मा जलजन्तुः । इति राजनिर्घण्टः ॥

जलशयः, पुं, (जले शेते । शी+अच् । पुंसीति घो वा ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥

जलशयनः, पुं, (जले क्षीरोदसलिले शेते इति । शी+ल्युः ।) विष्णुः । इति हलायुधः ॥

जलशायी, [न्] पुं, (जले शेते इति । शी+णिनिः ।) विष्णुः । यथा, पुराणम् ।
"जलमध्ये वराहञ्च पावके जलशायिनम् ॥"

जलशुक्तिः, स्त्री, (जलचरी शुक्तिः ।) शम्बूकः । इत्यमरः । १ । १० । २३ ॥ शामुक इति जल-सीपी इति च भाषा ॥ तत्पर्य्यायः । वारि-शुक्तिः २ क्षुद्रशुक्तिः ३ क्षुद्रशुक्तिका ४ शम्बूका ५ नदशुक्तिः ६ पुटिका ७ तोयशुक्तिका ८ । तस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । दीपन-त्वम् । गुल्मशूलविषदोषनाशित्वम् । रुच्यत्वम् । पाचनत्वम् । बलदातृत्वञ्च । इति राजनिर्घण्टः ॥

जलशूकं, क्ली, (जले शूकं सूक्ष्माग्रमिव ।) शैवालम् । इति हेमचन्द्रः । ४ । २३३ ॥ (पुंलिङ्गेऽपि दृश्यते । यथा,—
"जलशूकः स्वयं गुप्ता रजन्यौ हन्तीद्वयम् ॥"
इत्युत्तरस्थानेऽष्टादशेऽध्याये वाभटेनोक्तम् ॥)

जलशूकरः, पुं, (जले जलस्य वा शूकर इव ।) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१५ ॥

जलसर्पिणी, स्त्री, (जले सर्पति गच्छतीति । सृप+णिनि+ङीप् ।) जलौका । इति हेमचन्द्रः । ४ । २७० ॥

जलसूचिः, पुं, (जले सूचिरिव । अभिधानात् पुंस्त्वम् ।) कङ्कत्रोटमत्स्यः । शृङ्गाटः । शिशु-मारः । जलौकायां स्त्री । इति मेदिनी । चे, २० ॥ काकः । इति हेमचन्द्रः ॥

जलस्तम्भनं, क्ली, (जलस्य स्तम्भनम् ।) मन्त्रादि-द्वारा जलगतिनिवारणम् । तन्मन्त्रो यथा,—
"ओम् नमो भगवते जल स्तम्भय स्तम्भय सं सं
मसङ्ग कके कचर ।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते शिव ॥"
इति गारुडे १७८ अध्यायः ॥
पुस्तकान्तरे १८६ अध्यायः ॥ (जलस्तम्भनविद्या दुर्य्योधनेन विदितासीत् । अतएवाय द्वैपायन-ह्रदजलं संस्तभ्य तत्र सुष्वाप । एतत्कथा महाभारते शल्यपर्व्वणि ७६ अध्याये द्रष्टव्या ॥)

जलस्था, स्त्री, (जले जलबहुलप्रदेशे तिष्ठतीति । स्था+कः । स्त्रियां टाप् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ (जलावस्थिते त्रि । यथा, भाग-वते । ३ । २७ । १२ ।
"यथा जलस्थ आभासो जलस्थेनावदृश्यते ।
स्वाभासेन तथा सूर्य्यो जलस्थेन दिवि स्थितः ॥")

जलहं, क्ली, (जलेन हन्यते इति । हन+बाहु-लकात् डः ।) स्वल्पजलयन्त्रगृहम् । इति त्रिकाण्डशेषः ॥

जलहासः, पुं, (जलानां हास इव शुक्लत्वात् ।) समुद्रफेनः । इति त्रिकाण्डशेषः ॥

जलाका, स्त्री, (जले आकायति प्रकाशते इति । आ+कै+कः ।) जलौकाः । इति शब्द-रत्नावली ॥

जलाक्षी, स्त्री, (जलमक्ष्णोति व्याप्नोति कारण-तयेति । अक्ष+अण् ।) जलपिप्पली । इति शब्दरत्नावली ॥

जलाखुः, पुं, (जले आखुरिव ।) जलनकुलः । इति त्रिकाण्डशेषः ॥

जलाञ्चलं, क्ली, (जलमञ्चति व्याप्नोतीति । अञ्च+बाहुलकात् अलच् । यद्वा, जले अञ्चलं वस्त्रप्रान्त इव । अभिधानात् क्लीवत्वम् ।) शैवालम् । स्वतो वारिनिर्गमः । इति मेदिनी । ले, १५४ ॥

जलाटनः, पुं, (जले अटति भ्रमतीति । अट+ल्युः ।) कङ्कपक्षी । इति मेदिनी । ने, १८४ ॥ (विशेषोऽस्य कङ्कशब्दे ज्ञातव्यः ॥)

जलाटनी, स्त्री, (जले अटति भ्रमतीति । अट+ल्युः । स्त्रियां ङीप् ।) जलौका । इति मेदिनी । ने, १८४ ॥

जलाण्टकः, पुं, (जले अण्ठते इतस्ततो भ्रम-तीति । अठि गतौ+ण्वुल् । पृषोदरादित्वात् ठस्य टः ।) नक्रराजः । इति हारावली । ७७ ॥

जलाण्डकं, क्ली, (जले अण्डमिव कायतीति । कै+कः ।) पोताधानम् । इति शब्दरत्ना-वली ॥

जलात्मिका, स्त्री, (जलमेव आत्मा यस्याः । कप् ततः टापि अत इत्वम् ।) जलौका । इति शब्दरत्नावली ॥

जलाधारः, पुं, (जलस्य आधारः ।) जलाशयः । इत्यमरः । १ । १० । २५ ॥ (यथा, याज्ञ-वल्क्ये । ३ । १४४ ।
"आकाशमेकं हि यथा घटादिषु पृथग् भवेत् ।
तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान् ॥")

जलाधिदैवतं, पुं, (जलस्याधिदैवतं अधिष्ठात्री देवता ।) वरुणः । इति हलायुधः ॥ (जलं अधिदैवतं यस्य ।) पूर्व्वाषाढानक्षत्रे, क्ली । इति ज्योतिषम् ॥

जलाम्बिका, स्त्री, (जलस्य अम्बिका माता इव । क्रोडदेशे जलधारणादस्यास्तथात्वम् ।) कूपः । इति हारावली । ४१ ॥ जलात्मिका इति क्वचित् पाठः ॥

जलायुका, स्त्री, (जलमायुरस्याः । कप् । पृषो-दरादित्वात् सलोपः ।) जलौका । इति शब्द-रत्नावली ॥ (यथा, सुश्रुते । १ । १३ ।
"अथ जलायुका वक्ष्यन्ते । जलमासामायु-रिति जलायुकाः ॥" अस्या अन्यद्विवरणं जलौकःशब्दे द्रष्टव्यम् ॥ यस्मिन्निय व्यवहृता तद्यथा,—
"नस्याञ्जनाभ्यञ्जनपानधूमं
तथावपीडं कवलग्रहञ्च ।
संशोधनञ्चोभयतः प्रयुञ्ज्या-
द्रक्तं हरेच्चापि जलायुकाभिः ॥"
इति सुश्रुते कल्पस्थानेऽष्टमेऽध्याये ॥)

जलार्द्रः, पुं, (जलेन आर्द्रः सिक्तः ।) आर्द्र-वस्त्रम् । इति हारावली । १८६ ॥ (जलसिक्ते, त्रि । यथा, मेघदूते । ४५ ।
"तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ॥")

जलार्द्रा, स्त्री, (जलेन आर्द्रा सिक्ता ।) क्लिन्न-वस्त्रम् । इति हेमचन्द्रः । ३ । ३४३ ॥ (आर्द्र-तालवृन्तम् । यथा वैजयन्ती ।
"धुवित्रं तालवृन्तं स्यादुत्क्षेपव्यजनञ्च तत् ।
जलेनार्द्रं जलार्द्रा स्यात्—————— ॥")

जलार्णवः, पुं, (जलप्रचुरोऽर्णवः समुद्रो यत्र काले ।) वर्षाकालः । इति त्रिकाण्डशेषः ॥ (जलप्रचुरोऽर्णवः ।) जलसमुद्रश्च ॥

जलालु, पुं (जलजात आलुः । शाकपार्थिववत् समासः ।) पानीयालुः । इति राजनिर्घण्टः ॥

जलालुकं, क्ली, (जलालुरिव कायति प्रकाशते इति । कै+कः ।) पद्मकन्दः । इति राज-निर्घण्टः ॥

जलालुका, स्त्री, (जले अलति गच्छतीति । अल गतौ+बाहुलकात् उकः ।) जलौका । इति शब्दरत्नावली ॥

जलालोका, स्त्री, (जले आलोक्यते दृश्यते इति । आ+लोक दर्शने+कर्म्मणि घञ् ।) जलौका । इत्यमरटीकायां भरतः ॥

जलावर्त्तः, पुं, (जलस्य आवर्त्तः सम्भ्रमः ।) जल-गुल्मः । अम्भसां भ्रमः । इति जटाधरः ॥

जलाशयं, क्ली, (जले जलबहुलप्रदेशे आशेते इति । आ+शी+अच् ।) उशीरम् । इत्य-मरः । २ । ४ । १६४ ॥ लामज्जकम् । इति राजनिर्घण्टः ॥ (जलशायिनि, त्रि । यथा, महाभारते । ३ । १४३ । ५४ ।
"ततः सत्त्वान्युपाक्रामन् सुबहूनि महान्ति च ।
रुरुवानरसिंहांश्च महिषांश्च जलाशयान् ॥")

जलाशयः, पुं, (जलस्य आशय आधारः ।) जलाधारः । स तु पुष्करिण्यादि । इत्यमरः । १ । १० । २६ ॥ (यथा, मनुः । ४ । १२८ ।

"न स्नानमाचरेन्मुक्त्वा नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥"
जलं आशेते तिष्ठत्यत्र । आ + शी + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घ ।) समुद्रः । इति हेमचन्द्रः ॥ शृङ्गाटकः । इति राजनिर्घण्टः ॥

जलाशया, स्त्री, (जले जलसमीपे आशेते उद्भवतीति । आ + शी + अच् । स्त्रियां टाप् ।) गुण्डालातृणं । इति राजनिर्घण्टः ॥

जलाश्रय, पुं, (जले जलप्रचुरप्रदेशे आश्रय उत्पत्तिस्थानं यस्य ।) वृत्तगुण्डतृणम् । इति राजनिर्घण्टः ॥

जलाश्रया, स्त्री, (जले जलबहुलप्रदेशे आश्रयो यस्याः ।) शूलीतृणम् । बलाका । इति राजनिर्घण्टः ॥

जलाष्ठीला, स्त्री, (जलेनाष्ठीला संवृता ।) पुष्करिणी । इति हारावली । ४२ ॥

जलाह्वय, क्ली, (जले आह्वयः साह्वा यस्य ।) उत्पलम् । इति राजनिर्घण्टः ॥

जलिका, स्त्री, (जलं उत्पत्तिस्थानत्वेनास्त्यस्याः । जल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् स्त्रियां टाप् ।) जलौका । इत्यमरटीकायां भरतः ॥

जलुका, स्त्री, (जले तिष्ठतीति । जल + बाहुलकात् उकः ।) जलौका । इति शब्दरत्नावली ॥

जलूका, स्त्री, (जलुका । पृषोदरादित्वात् दीर्घः ।) जलौका । इति हेमचन्द्रः । ४ । २७० ॥ (यथा, देवीभागवते । १ । १५ । १८ ।
"जलूकेव सदा नारी रुधिरं पिबतीति वै ।
मूर्खस्तु न विजानाति मोहितो भावचेष्टितैः ॥")

जलेचर, पुं, (जले चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । "तत्पुरुषे कृति बहुलम् ।" ६ । ३ । १४ । इत्यलुक् ।) जलचरपक्षी । स तु हंससदृगुबकादिः । तस्य मांसगुणाः । गुरुत्वम् । उष्णत्वम् । स्निग्धत्वम् । मधुरत्वम् । वायुनाशित्वम् । शुक्रकारित्वञ्च । इति राजवल्लभः ॥ (जलचारिणि, त्रि । यथा, महाभारते । १ । २१७ । ११ ।
"स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम् ।
उदतिष्ठज्जलात्तस्माद्बाहुबलेन बलिना वरः ॥")

जलेच्छया, स्त्री, (जलमेतीति जलेत् जलप्रचुरस्थानम् । इ + क्विप् । तत्र शेते उद्भवतीति । शी + अच् । स्त्रियां टाप् ।) हस्तिशुण्डातृणम् । इति शब्दरत्नावली ॥

जलेजातं, क्ली, (जले जातमुत्पन्नम् ।) पद्मम् । इति शब्दरत्नावली ॥

जलेन्द्रः, पुं, (जलस्य इन्द्रः अधिपतिः ।) वरुणः । महोदधिः । जम्भलः । इति मेदिनी । रे, १५८ ॥

जलेन्धन, पुं, (जलान्येव इन्धनानि यस्य ।) वाडवाग्निः । इति भूरिप्रयोगः ॥

जलेरुहा, स्त्री, (जले रोहति उद्भवतीति । रुह + क । "तत्पुरुषे कृतीति ।" अलुक् ।) कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥

जलेवाहः, पुं, (जले जलमध्ये वाहते जलमग्नद्रव्यस्य लाभार्थं प्रयतते इति । वाह प्रयत्ने + अच ।) जातिविशेषः । डुबरु इति भाषा ॥ यथा, पाद्मे पातालखण्डे ।
"जलेवाहानथाहूय बहूंस्तत्र न्ययोजयत् ।
तत् कृत्वा परमं यत्नमाप्नुराभरणं न तत् ॥"

जलेशयः, पुं, (जले शेते इति । शी + अच् । "तत्पुरुषे कृतीति ।" अलुक् ।) मत्स्यः । इति त्रिकाण्डशेषः ॥ (कारणतोयशायित्वात् विष्णुः । यथा, हरिवंशे । २२ । ६८ ।
"नमोऽस्त्वनन्तपतये अव्ययाय महात्मने ।
जलेशयाय देवाय पद्मनाभाय विष्णवे ॥"
महादेवः । यथा, महाभारते । १३ । १७ । ८८ ।
"तुम्बवीणो महाक्रोध ऊर्द्धरेता जलेशयः ॥"
जलशायिनि, त्रि ॥)

जलेश्वरः, पुं, (जलस्य ईश्वरः ।) वरुणः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । २२६ । ३ ।
"तमनवीत् धूमकेतुः प्रतिगृह्य जलेश्वरम् ।
चतुर्थं लोकपालानां देवदेवं सनातनम् ॥"
जलानामाश्रयत्वात्) समुद्रश्च ॥

जलोका, स्त्री, (जलमोक आश्रयो यस्याः । पृषोदरादित्वात् साधुः ।) जलौका । इत्यमरटीकायां भरतः ॥

जलोच्छ्वासः, पुं, (जलानां उच्छ्वासः ।) जलाशयपरिपूर्य समधिकजलस्य सर्व्वतो वहनम् । इति केकटः ॥ समधिकजलस्योपायैर्निष्कासनम् । इति स्वामी ॥ जलाशयपर्यन्तं पुष्करिण्यादावुपायेन जलनिष्कासनम् । इति सर्व्वस्वम् ॥ सेतुभङ्गादिभयेन जलाशयादुपायैर्जलवर्द्धिष्करणम् । इत्यन्ये ॥ पुष्करिण्यादौ जलप्रवेशार्थमुपायः । इति ख्यात इत्येके । इति भरतः ॥ तत्पर्य्यायः । परीवाहः २ । इत्यमरः । १ । १० । १० ॥

जलोदर, क्ली, (जलप्रधानं उदरं यस्मात् ।) जठरामयः । तस्य निदानादि यथा,—
"यः स्नेहपीतोऽप्यनुवासितो वा
वान्तो विरिक्तोऽप्यथवा निरूढः ।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि ॥
स्नेहोपलिप्तेष्वथवापि तेषु
दकोदरं पूर्व्ववदभ्युपैति ।
स्निग्धं महत्तत् परिवृत्तनाभि-
समाततं पूर्णमिवाम्बुना च ॥
यथा दृतिः क्षुभ्यति कम्पते च
शब्दायते चापि दकोदरं तत् ॥
जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतम् ।
बलिनस्तदजातां वु यत्नसाध्यं नवोत्थितम् ॥"
इति माधवकरः ॥

(अस्य सकारणलक्षणचिकित्सितं यथा, हारीते चिकित्सितस्थाने २७ अध्याये ।
आत्रेय उवाच ।
"विषमाग्नेः प्रवेशात् पीततोयात्तथापि वा ।
श्रमाध्वश्वासनिष्क्रान्तादतिशायामतोऽपि वा ॥
शीतम्बूदरमेवञ्च तस्माज्जातं जलोदरम् ।
उदरं सजलं यस्य सशोथमतिवर्द्धितम् ॥
श्वयथुः पादयोः शोथो जलोदरस्य लक्षणम् ।
विरेकं वमनं कुर्य्यात् पाचनानि च कारयेत् ॥
नाराचयोगाश्च वटकास्तेन तद्दुपशाम्यति ।
तस्मान्नाभेर्वामभागे वर्ज्जयित्वाङ्गुलद्वयम् ॥
जलनाडीञ्चाशुमन्यं कुशमन्त्रेण वेधयेत् ।
एरण्डनालनालञ्च तत्र सञ्चारयेद्बुधः ॥
अन्तर्गतं जलं स्राव्य ततः सन्धारयेद्दृढम् ।
यदा न घरते तच्च तदा दाहः प्रशस्यते ॥
कणा कल्कं परिस्राव्य घृतं देयं चतुर्गुणम् ।
शुण्ठी विषा सम पाथ्य पानमालेपनं हितम् ॥
शस्त्रकर्म्म भिषक् श्रेष्ठो विज्ञातेनैव कारयेत् ।
दुष्करं शस्त्रकर्म्मैव न कुर्य्यात् यत्र तत्र तु ॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ।
तस्मादवश्यकर्त्तव्यमीश्वरं साधिकारिणा ॥")

जलोद्भवा, स्त्री, (जले उद्भवो यस्याः ।) लघुब्राह्मी । इति राजनिर्घण्टः ॥ (कालानुसारिवा । शिउली छोपर इति च यस्य ख्यातिः । यथास्याः पर्य्यायाः ।
"शीतली शीतकुम्भी च शुक्लपुष्पा जलोद्भवा ।
कालानुसारिवा तस्याः प्रवाहो नतवद्गुणैः ॥"
इति वैद्यकरत्नमालायाम् ॥)

जलोद्भूता, स्त्री, (जले उद्भूता ।) गुण्डालाक्षुपः । इति राजनिर्घण्टः ॥

जलोरगी, स्त्री, (जल उरगी सर्पिणीव ।) जलौका । इत्यमरटीकासारसुन्दरी ॥

जलौकसः, स्त्री, (जले ओको वासस्थानं यासाम् ।) जलौका । सान्तबहुवचनान्तोऽयं शब्दः । इत्यमरः । १ । १० । २२ ॥

जलौकसः, पुं, स्त्री, (जलमेव ओको वासस्थानं तदस्त्यस्येति । अर्शआदित्वादच् ।) जलौका । इत्यमरटीकायां रायमुकुटः ॥ अकारान्तोऽयम् ॥

जलौकाः, [स्] स्त्री, (जलमेव ओको वसतिस्थानं यस्याः ।) जलौका । इति भरतः ॥ (यदुक्तम् ।
"गृह्णाति साधुरपरस्य गुणं न दोषं
दोषान्वितो गुणिगुणं परिहाय दोषम् ।
बालस्तनात् पिबति दुग्धमसृग्विहाय
त्यक्त्वा पयो रुधिरमेव न किं जलौकाः ॥"
जलवासिनि, त्रि । यथा, महाभारते । १३ । ५० । १० ।
"जलौकसां स सत्त्वानां बभूव प्रियदर्शनः ॥"
विवरणमस्या यथा,—
"नृपाढ्य बाल-स्थविर-भीरु दुर्ब्बल-नारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः । तत्र वातपित्तकफ-दुष्ट-शोणितं यथासङ्ख्यं शृङ्ग-जलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वैर्वा ॥"
"उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम् ।
तस्माद्वातोपसृष्टे तु हितं तदवसेचने ॥
शीताधिवासा मधुरा जलौका वारिसम्भवा ।

तस्मात् पित्तोपसृष्टे तु हिता सा त्ववसेचने ॥
अलाबुकटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम् ।
तस्मात् श्लेष्मोपसृष्टे तु हितं तदवसेचने ॥”
“अथ जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः । ता द्वादश, तासां सविषाः षट् तावत्य एव निर्व्विषाः । तत्र सविषाः कृष्णा कर्व्वुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तास्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्व्वुरा । रोमशा महापार्श्वा कृष्णमुखालगर्द्दा । इन्द्रायुधवदूर्द्धराजिभिश्चित्रा इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका । गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति । ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरोदाहश्छर्द्दिर्म्मदः सदनमिति लिङ्गानि भवन्ति । तत्र महागदः पानालेपननस्यकर्म्मादिषूपयोज्यः । इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः ।

अथ निर्व्विषाः । कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिका चेति । तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धमुद्गवर्णा कपिला । किञ्चिद्रक्ता वृत्तकाया पिङ्गाशुगा च पिङ्गला । यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका । मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी । स्निग्धा पद्मपत्रवर्णाऽष्टादशाङ्गुलप्रमाणा सावरिका सा च पश्वर्थे । इत्येता अविषा व्याख्याताः । तासां यवनपाण्ड्यसह्यपौतनादीनि क्षेत्राणि । तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्व्विषाश्च विशेषेण भवन्ति । तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः । पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेषु अम्भःसु च निर्व्विषाः ॥”
“क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु ।
न च सङ्कीर्णचारिण्यो न च पङ्केशयाः सुखाः ॥”
“अथैनां नवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात् । भक्ष्यार्थे चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य शय्यार्थे तृणमौदकानि च पत्राणि । त्र्यहात्त्र्यहाच्चान्यज्जलं भक्ष्यं च दद्यात् सप्तरात्रात् सप्तरात्राच्च घटमन्यं संक्रामयेत् ॥”
“स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः ।
अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः ॥
अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात् । गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तंस्थिता विगतक्लमा ज्ञात्वा ताभी रोगं ग्राहयेत् । श्लक्ष्णशुक्लार्द्रपिचुप्रोतावच्छन्नां कृत्वा मुखमपावृणुयाद्गृह्णन्त्यै क्षीरविन्दुं शोणितविन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदन्यां ग्राहयेत् । यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद् गृह्णातीति गृह्णन्तीञ्चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च । दंशे तोदकण्डूप्रादुर्भावैर्ज्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत् । अथ शोणितगन्धेन न मुञ्चेन्मुखमस्याः सैन्धवचूर्णेनावकिरेत् । अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैल-लवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलीभ्यां शनैः शनैरनुलोमानुमार्ज्जयेदामुखाद्वामयेत्तावद् यावत् सम्यग्वान्तलिङ्गानीति । सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत् । या सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्वामयेत् । दुर्व्वान्ताया व्याधिरसाध्य इन्द्रमदो नाम भवति । अथ सुवान्तां पूर्व्ववत् सन्निदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्बध्नीत वा व्रणं कषायमधुर-स्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति ।”
“क्षेत्राणि ग्रहणं जातीः पोषणं सावचारणम् ।
जलौकसाञ्च यो वेत्ति तत् साध्यान् स जयेद्गदान् ॥”
इति सूत्रस्थाने त्रयोदशाध्याये सुश्रुतेनोक्तम् ॥)

जलौका, स्त्री, (जलमेव ओक वसतिस्थानं यस्याः ।) जलजन्तुविशेषः । जोँक इति भाषा । तत्पर्य्यायः । रक्तपा २ जलौकसः ३ इत्यमरः । १ । १० । २२ ॥ जलूका ४ जलाका ५ जलौकाः ६ जलोरगी ७ जलायुका ८ जलिका ९ जलासुका १० जलजन्तुका ११ वेणी १२ जलालोका १३ जलौकसः १४ जलौकसी १५ । इति भरतः ॥ जलौकसम् १६ जलौकसा १७ । इति रायमुकुटः ॥ रक्तपायिनी १८ रक्तसन्दंशिका १९ तीक्ष्णा २० वमनी २१ जलजीवनी २२ । इति राजनिर्घण्टः ॥ रक्तपाता २३ वेधिनी २४ जलसर्पिणी २५ जलसूचिः २६ जलाटनी २७ जलाका २८ जलपटालिका २९ जलिका ३० जलालुका ३१ । इति शब्दरत्नावली ॥ (यथा सुश्रुते शारीरस्थानेऽष्टमेऽध्याये ।
“सिरा-विषाणतुम्बैस्तु जलौकाभिः पदैस्तथा ।
अवगाढं यथापूर्व्वं निर्हरेद्दुष्टशोणितम् ॥”
अस्या विवरणमन्यत् सविस्तरं जलौकःशब्दे व्याख्यातम् ॥)

जल्प, वाचि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) अन्तःस्थतृतीयोपधः । जल्पति । इति दुर्गादासः ॥ (यथा, महाभारते । ७ । १९६ । १२ ।
“नारि जित्वा विकत्थन्ते न च जल्पन्ति दुर्व्वचः ॥”)

जल्पः, पुं, (जल्प वाचि + घञ् ।) विजिगीषोः कथा । परमतखण्डनपूर्व्वकं स्वमतस्थापनम् । इति जटाधरो गौतमश्च ॥ (“यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥” इति न्यायसूत्रम् । १ । ४२ ॥
“स वादो द्विविधः संग्रहेण जल्पो वितण्डा च । तत्र पक्षाश्रितयोर्वचनं जल्पः ।”
“यथैकस्य पक्षः पुनर्भवोऽस्तीति नास्तीत्यपरस्य तौ च स्वपक्षं स्वस्वहेतुभिः स्थापयतस्तत्परपक्षमुद्भावयतः एषः जल्पः ।” इति चरके विमानस्थानेऽष्टमेऽध्याये ॥) कथा । (यथा, भागवते । १ । ७ । १७ ।
“इति प्रियां वल्गुविचित्रजल्पैः
स सान्त्वयित्वाच्युतमित्रसूतः ॥”)

जल्पनं, क्ली, (जल्प + भावे ल्युट् ।) कथनम् । यथा,—
“किं मिथ्या शतजल्पनेन सततं रे वक्त्र रामं वद ॥”
इत्युद्भटः । (जल्पतीति । जल्प + नन्द्यादित्वात् ल्युः । कथके, त्रि ॥)

जल्पाकः, त्रि, (जल्पतीति । जल्प + “जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।” ३ । २ । १५५ । इति षाकन् ।) बहुकुत्सितभाषी । तत्पर्य्यायः । वाचालः २ वाचाटः ३ बहुगर्ह्यवाक् ४ । इत्यमरः । ३ । १ । ३६ ॥ (स्त्रियां षित्वात् ङीष् । यथा, भट्टिः । ७ । १९ ।
“जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना त्वया ॥”)

जल्पितं, त्रि, (जल्प्यते स्म इति । जल्प + क्तः । उक्तम् । इत्यमरः । ३ । १ । १०७ ॥ (यथा, पञ्चतन्त्रे । १ । १४९ । “भो भो गोरम्भ । सत्यमेतत् यत् त्वया जल्पितम् । किं देवी दन्तिलेन समालिङ्गिता ॥”) कथने, क्ली । (यथा, पञ्चतन्त्रे । २ । १३२ ।
“सा प्राह भो प्रियतम । मिथ्याजल्पितमेतत् ॥”)

जवः, पुं, (जवनमिति । जु वेगगतौ + “ऋदोरप् ।” ३ । ३ । ५७ । इति अप् ।) वेगः । (यथा, महाभारते । ३ । १४१ । २१ ।
“यस्य बाहुबले तुल्यः प्रभावे च पुरन्दरः ।
जवे वायुर्म्मुखे सोमः क्रोधे मृत्युः सनातनः ॥”)
वेगवति, त्रि । इति मेदिनी । वे, ७ ॥

जवनं, क्ली, (जु वेगगतौ + भावे ल्युट् ।) वेगः । इत्यमरः । ३ । २ । ३९ ॥

जवनः, पुं, (जु + “जुचङ्क्रम्येति ।” ३।२।१५० । इति युच् ।) वेगः । वेगयुक्ताश्वः । देशविशेषः । इउनान इति पारस्यभाषा । इति हेमचन्द्रः ॥ शीकारी मृगः । घोटकः । इति राजनिर्घण्टः ॥ म्लेच्छजातिविशेषः । एष पूर्व्वं जवनदेशोद्भवः क्षत्त्रिय आसीत् सगरराजेनास्य सर्व्वशिरोमुण्डनं सर्व्वधर्म्मबहिष्कृतत्वञ्च चकार । इति हरिवंशः ॥ (स्कन्दस्य सैनिकविशेषः यथा, महाभारते । ९ । ४५ । ७२ ।
“शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः ॥”

इत्युपक्रम्याह ।
"घोटो जवनो धवनः क्रमवक्रश्च क्रमकः ॥")
वेगयुक्ते त्रि । इति मेदिनी । ने, ६६ ॥ (यथा, महाभारते । ४ । १६ । १६ ।
"अपायाज्जवनैरश्वैः श्यामबाणप्रपीड़ितः ॥")

जवनाल, क्ली, (जवनाय चलति पर्य्याप्नोतीति । चल + अच् ।) फलविशेषः । जनार इति भाषा ॥ अस्य गुणाः । स्वादुत्वम् । शीतत्वम् । वायुकारित्वम् । कफपित्तनाशित्वञ्च । इति राजवल्लभः ॥

जवनिका, स्त्री, (जवनं वेगेन प्रतिरोधनमस्त्यस्याः । जवन + ठन् । टाप् च ।) अवधायकवस्त्रम् । कानात् इति भाषा ॥ तत्पर्य्यायः । प्रतिसीरा २ तिरस्करिणी ३ । इत्यमरः । २।६।१२० ॥ यवनिका ४ यमनिका ५ तिरस्कारिणी ६ । इति तट्टीका ॥ अन्तःपटः ७ पटी ८ चित्रा ९ काण्डपट १० । इति शब्दरत्नावली ॥ (यथा, माघे । ४ । ५४ ।
"समीरशिशिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम् ॥")

जवनी, स्त्री, (जूयते आच्छाद्यतेऽनया । जु + करणे ल्युट् । स्त्रियां ङीप् ।) अपटी । कानात् इति भाषा ॥ (यथा, आर्य्यासप्तशत्याम् । ५३८ ।
"क्रीडाप्रसरः प्रथमं तदनु च रसभावपुष्टचेष्टेयम् ।
जवनीविनिर्गमादनु नटीव दयिता मनो
हरति ॥")
ओषधीभेदः । इति हेमचन्द्रः ॥ (जवनजातिस्त्री । यथाह ।
"जवनी नवनीतकोमलाङ्गी
शयनीये यदि नीयते कथञ्चित् ॥"
वेगशीला । यथा, ऋग्वेदे । १ । ५१ । २ ।
"इन्द्रं दक्षासऋभवो मदच्युतं
शतक्रतुं जवनी सूनृतारुहत् ॥")

जवसं, क्ली, (जूयते भक्षार्थं प्राप्यते गवादिभिरिति । जु + बाहुलकात् कर्म्मणि असच् ।) घासः । इति शब्दरत्नावली ॥

जवा, स्त्री, (जवते रक्तवर्णत्वं गच्छतीति । जु गतौ + अच् । ततष्टाप् ।) स्वनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । ओड्रपुष्पम् २ । इत्यमर. । २ । ४ । ७६ ॥ जपा ३ ओड्राख्या ४ रक्तपुष्पी ५ अर्कप्रिया ६ रागपुष्पी ७ प्रतिकाप ८ हरिवल्लभा ९ । (यथा, माघे । ६ । ४६ ।
"गगुवन वनराजिमधूसुखे
स्फुटरागजवाधरचारुणि ॥")
अस्या गुणा. । कटुत्वम् । उष्णत्वम् । इन्द्रलुप्तविनाशकारित्वम् । विस्फोटजन्तुजननकत्वम् । सूर्य्याराधनसाधनत्वञ्च । इति राजनिर्घण्टः ॥ मलमूत्रस्तम्भनरञ्जनकारित्वम् । इति राजवल्लभः ॥
(यस्मिन्निय व्यवह्रियते तद्यथा,—
"सकाञ्जिक जवापुष्प भृष्टं ज्योतिष्मतीदलम् ।
दूर्व्वापिष्टञ्च सम्प्राश्य वनिता स्तार्त्तवं लभेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ॥)

जवादि, क्ली, सुगन्धिद्रव्यभेदः । तत्पर्य्यायः । गन्धराजम् २ कृत्रिमम् ३ मृगचर्म्मजम् ४ समूहगन्धम् ५ गन्धाढ्यम् ६ स्निग्धम् ७ मार्ज्जारिकर्द्दमम् ८ सुगन्धतैलनिर्य्यासम् ९ कटुमोदम १० । अस्य लक्षणम् । नीरसत्वम् । स्निग्धत्वम् । ईषत्पिङ्गत्वम् । सुगन्धदत्वम् । आतपे बहलामोदत्वम् । राज्ञां योग्यत्वञ्च । अस्य गुणा. । सौगन्धिकत्वम् । स्निग्धत्वम् । उष्णत्वम् । सुखावहत्वम् । वाते हितत्वम् । राज्ञां मोहनाह्लादकारकत्वञ्च । इति राजनिर्घण्टः ॥

जवाधिकः, पुं, (जवेन वेगेन अधिक. ।) वेगाधिकघोटकः । इत्यमरः । २ । ८ । ४५ ॥ अतिशय वेगयुक्ते, त्रि ॥

जवापुष्प, क्ली, (जवायाः स्वनामख्यातवृक्षस्य पुष्पम् । यद्वा, जवेव पुष्पम् ।) ओड्रपुष्पम् । इति शब्दरत्नावली ॥

जवी, [न्] त्रि, (जवो वेगः सोऽस्यास्तीति । जव + इनिः ।) वेगयुक्तः । इति हेमचन्द्रः । ३ । १५८ ॥ (यथा, याज्ञवल्क्ये । २ । १११ ।
"समकालमिषुं मुक्तमानीयान्यो जवी नरः ।
गते तस्मिन् निमग्नाङ्गं पश्येच्चेत् शुद्धिमाप्नुयात् ॥"
पु, उष्ट्रः । घोटकः । इति राजनिर्घण्टः ॥

जष, भ वधे । इति कविकल्पद्रुम. ॥ (भ्वा-उभ-सकं-सेट् ।) भ, जषति जषते । परस्मैपदीत्यन्ये । इति दुर्गादास. ॥

जस, इ क रक्षणे । इति कविकल्पद्रुमः ॥ (चुरां-पर सकं-सेट ।) इ क, जंसयति । इति दुर्गादास ॥

जस, उ इर् य मोक्षे । इति कविकल्पद्रुमः ॥ (दिवां-पर-सक-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, जसित्वा जस्त्वा । इर्, अजसत् अजासीत् । असात् पुषादित्वात् नित्यं ङ इत्यन्ये । य, जस्यति वत्स गोपः । इति दुर्गादासः ॥

जस, क वधे । अनादरे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सक-सेट् ।) क, जासयति । इति दुर्गादासः ॥

जसुरि, पु, (जस्यते मुच्यते हन्यते वाऽनेनेति । जस + "जसिसहोरुरिन् ।" उणां । २ । ७३ । इति उरिन् ।) वज्रम् । इत्युणादिकोषः ॥

जहकः, पु, (जहाति परित्यजतीति । ओ हाक् त्यागे + "जहातेर्द्वे च ।" उणां । २ । ३४ । इति क्वुन् द्वित्वञ्च ।) कालः । इति त्रिकाण्डशेषः ॥ त्यागकर्त्तरि, त्रि । इत्युणादिकोष. ॥ बाल. । निर्म्मोकः । निर्म्मोकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

जहा, स्त्री, (जहातीति । हा + बाहुलकात् श. ।) मुण्डितिका । इति शब्दचन्द्रिका ॥ मुण्डिरी इति भाषा ॥

जहानकः, पुं, प्रलय. । इति हेमचन्द्रः । २ । ७५ ॥

जहुः, पुं, (जहातीति । हा + बाहुलकात् उन् द्वित्वञ्च ।) अपत्यम् । यथा । "इति लतानुषङ्ग आशनशयनाटनस्नानादिषु सह मृगजहुना स्नेहानुबद्धहृदयः आसीत् ।" इति श्रीभागवते पञ्चमस्कन्धे आदिभरतचरिते । ८ । ११ ॥
"इत्येवं ततोऽनुषङ्गो आसक्तिर्येन । मृगजहुना मृगापत्येन सह । स्नेहानुबद्ध हृदय येन ।" इति तट्टीकायां श्रीधरस्वामी ॥

जह्नुः, पुं, (जहातीति । हा + "जहातेर्द्वे अन्त्यलोपश्च ।" उणां । ३ । ३६ । इति नु द्वित्वमन्त्यलोपश्च ।) विष्णुः । राजर्षिभेदः । स चन्द्रवंशीयहोत्रकराजपुत्रः । गङ्गागमनकाले येन गङ्गा पीता पुनर्भगीरथप्रार्थनेन जानु भित्त्वा बहिर्निर्गमिता तेन सा जाह्नवीति ख्याता । इति रामायणम् ॥

जह्नुतनया, स्त्री, (जह्नोस्तनया ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥

जह्नुसप्तमी, स्त्री, (जह्नोः सप्तमी । यस्यां तिथौ जह्नुमुनिना हि गङ्गा पीता पुनस्त्यक्ता अतोऽस्यास्तथात्वम् ।) वैशाखशुक्लसप्तमी । तन्नामकारणं यथा वाराहे नारदाम्बरीषसंवादे ।
"वैशाखशुक्लसप्तम्यां जाह्नवी जह्नुना पुरा ।
क्रोधात् पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ॥
तस्यां समर्च्चयेद्देवीं गङ्गां गगनमेखलाम् ।
स्नात्वा सम्यग्विधानेन स धन्यः सुकृती नरः ॥
तस्यां सन्तर्पयेद्देवान् पितॄन् मर्त्त्यान् यथाविधि ।
साक्षात् पश्यन्ति ते गङ्गास्नातक गतपातकम् ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥
अपि च उत्तरकामाख्यातन्त्रे ११ पटले ।
"शुक्लपक्षस्य सप्तम्यां वैशाखे जह्नुपुत्रिकाम् ।
प्रपूजयेत् सुखार्थाय स्वर्गमोक्षफलाप्तये ॥"

जह्नुसुता, स्त्री, (जह्नोः सुता ।) गङ्गा । इति राजनिर्घण्टः ॥ (यथा, महाभारते ।१।९८।१८
"अहं गङ्गा जह्नुसुता महर्षिगणसेविता ॥")

जा, स्त्री, (जायते सम्बन्धिनी या । जन + बाहुलकात् डः ।) याता । भर्तृभ्रातृपत्नी । इत्येकाक्षरकोष. ॥

जागर, पुं स्त्री, (जागृ जागरणे + भावे घञ् । "जाग्रोऽविचिण्णल्ङित्सु ।" ७ । ३ । ८५ । इति गुणः ।) जागरणम् । इत्यमरः । २ । ८ । ६४ ॥ (यथा, आर्य्यासप्तशत्याम् । ३६० ।
"प्रोञ्छति तवापराधं मानं मर्द्दयति निद्रां
हरति ।
स्वकृताभिरन्ति शपथान् जागरदीर्घा निशा
सुभग ॥"
जागर्त्ति जीवति संग्रामस्थलेऽनेनेति । जागृ + करणे घञ् ।) कवचे, पु । इति तट्टीका ॥

जागरणा, स्त्री, (जागृ + भावे ल्युट् ।) निद्राभाव. । जागा इति भाषा ॥ तत्पर्य्याय. । जागर्य्या २ जागरा ३ जागरः ४ । इति हेमचन्द्रः ॥ जागरिया ५ जागर्त्तिः ६ । इत्यमरटीका ॥ (यथा, महाभारते । ३ । १२६ । १२ ।
"रात्रिजागरणात् श्रान्ताः सौप्तिकं समतीयु-
तान् ॥")

जागरिता, [-] त्रि, (जागर्त्तीति । जागृ + तृच् ।) जागरणशीलः । इत्यमरः । ३ । १ । ३२ ॥

जागरी, [न्] त्रि, (जागरो जागरणमस्त्यस्येति । जागर + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) जागरूकः । इति हेमचन्द्रः । ३ । १०७ ॥

जागरूकः, त्रि, (जागर्त्तीति । जागृ + "जागरूकः ।" ३ । २ । १६५ । इति ऊकः ।) जागरणशीलः । जागरणकर्त्ता । तत्पर्य्यायः । जागरिता २ । इत्यमरः । ३ । १ । ३२ ॥ जागरी ३ । इति हेमचन्द्रः । ३ । १०७ ॥ (यथा, रघुः । १० । २४ ।
"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥"
कर्त्तव्यपालनादावप्रमत्तः । यथा, रघुः । १४ । ८५ ।
"निगृह्य शोकं स्वयमेव धीमान्
वर्णाश्रमावेक्षणजागरूकः ॥")

जागर्त्तिः, स्त्री, (जागृ + भावे क्तिन् ।) जागरणम् । इत्यमरटीकायां रायमुकुटः ॥

जागर्य्या, स्त्री, (जागृ + "जागर्त्तेरकारो वा ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिकोक्त्या यक् । "जाग्रोऽविचिणल्ङित्सु ।" ७ । ३ । ८५ । इति गुणः ।) जागरणम् । इत्यमरः । ३ । १ । १६ ॥

जागुडं, क्ली, (जागुड़ इत्याख्यया प्रसिद्धे देशे भवमित्यण् ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (देशविशेषः । यथा, माघे । २० । ३ ।
"अभिचैद्यमगादथोऽपि शौरे-
रवनिं जागुडकुङ्कुमाभिताम्रैः ॥"
जागुडोऽभिजनोऽस्येत्यण् । तद्देशवासिनि, त्रि, । यथा, महाभारते । ३ । ५१ । २४ ।
"जागुडान् रामठान् मुण्डान् स्त्रीराज्यानथ तङ्गनान् ॥")

जागृ, ञ नु जागरे । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) ञ, जाग्रति । नु, जागर्त्ति । दिशि निरीक्षमाणस्य नास्ति जागरतो भयमिति पचादित्वादनि जागर इवाचरतीति क्वौ शत्रन्तम् । इति दुर्गादासः ॥

जागृविः, पु, (जागर्त्ति साक्षित्वरूपतयेति । जागृ + "घृघृजागृभ्यः क्विन् ।" उणां । ४ । ५४ । इति क्विन् ।) अग्निः । इति हेमचन्द्रः । ४ । १६५ ॥ (यथा, ऋग्वेदे । ५ । ११ । १ ।
"जनस्य गोपा अजनिष्ट जागृविरग्निः ॥"
जागर्त्ति प्रजानां शुभाशुभकार्य्यदर्शनार्थमिति । नृपतिः । इत्युज्ज्वलदत्तः ॥)

जाग्रत्, त्रि, (जागर्त्तीति । जागृ + शतृ ।) जागरणविशिष्टः । यथा,—
"गङ्गोत्तुङ्गतरङ्गसङ्गजटाजूटाग्रजाग्रत्फणि-
स्फूर्ज्जत्फुत्कृतभीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा ॥"
इति काव्यचन्द्रिका ॥
(जागरणम् । यथा, मनौ । १ । ५७ ।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम् ।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥")

जाग्रिया, स्त्री, (जागृ + "जागर्त्तेरकारो वा ।" इति पक्षे शप्रत्ययो रिङादेशः ।) जागरणम् । इत्यमरटीकायां रायमुकुटः ॥

जाघनी, स्त्री, (जघनस्य समीपम् । जघन + शैषिकोऽण् । ततः स्त्रियां ङीप् ।) ऊरुः । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । १० । १०८ ।
"क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥"
विश्वामित्रस्य जाघनीहरणकथा महाभारते शान्तिपर्व्वणि १४१ अध्याये द्रष्टव्या ॥)

जाङ्गलं, क्ली, (जाङ्गलेषु स्थलचरपशुविशेषेषु भवम् । जाङ्गल + अण् ।) मांसम् । इति हेमचन्द्रः ॥

जाङ्गलः, पु, (जङ्गले भवः । जङ्गल + अण् ।) कपिञ्जलपक्षी । इति मेदिनी । ले, ८५ ॥ निर्ज्जलदेशः । इति शब्दरत्नावली ॥ (अस्य लक्षणं यथा,—
"स्वल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः ।
स ज्ञेयो जाङ्गलो देशः बहुधान्यादिसंयुतः ॥")
भावप्रकाशमतेऽस्य लक्षणं यथा,—
"आकाशशुभ्र उच्चश्च स्वल्पपानीयपादपः ।
शमीकरीरबिल्वार्कपीलुकर्कन्धुसङ्कुलः ॥
हरिणैणर्क्षपृषतगोकर्णखरसङ्कुलः ।
सुस्वादुफलवान् देशो वातलो जाङ्गलः स्मृतः ॥"
("खरपरुषविशालाः पर्व्वताः कण्टकीर्णाः
दिशि दिशि मृगतृष्णा भूरुहाः शीर्णपर्णाः ।
अतिखररविरश्मिः पांशुभृत् शुष्कभूमिः
सरसरसविहीनः कूपकाम्भःप्रकर्षः ॥
तदनुविरसशस्याहारणो गोमनुष्यः
प्रभवति रसमांसं रूक्षभावश्च सम्यक् ।
पुनरपि हिमवाहं शालिशस्यं न चेष्टं
भवति रुधिरपित्तं कोपमाशु ह्युपैति ॥"
इति च हारीते प्रथमस्थाने चतुर्थेऽध्याये ॥)
तस्य गुणाः । वातपित्तकारित्वम् । उष्णत्वम् । रूक्षत्वञ्च । तद्देशीयजलगुणः । अनूपदेशात् विपरीतत्वम् । इति राजवल्लभः ॥ रूक्षत्वम् । लवणत्वम् । लघुत्वम् । तनुत्वम् । पथ्यत्वम् । वह्निकफबहुविकारकारित्वञ्च । इति भावप्रकाशः ॥ जङ्गलदेशोद्भवञ्च ॥

जाङ्गलः, त्रि, स्थलजपशुविशेषः । यथा,—
"हरिणैणकुरङ्गर्क्षपृषतन्यङ्कुशम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋक्ष्यो नीलाण्डको लोके स रोझ इति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः ॥
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते ॥"
तस्य मांसस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । लघुत्वम् । बल्यत्वम् । बृंहणत्वम् । वृष्यत्वम् । दीपनत्वम् । दोषहरत्वम् । मूकत्व-मिन्मिनत्वगद्गदत्वार्द्दितबाधिर्य्यारुचिवमिप्रमेह-मुखजरोगश्लीपदगलगण्डवायुनाशित्वञ्च । इति भावप्रकाशः ॥ शीतलत्वम् । मनुष्यहितत्वम् । इति राजवल्लभः ॥ * ॥

जाङ्गलिः, पु, (जाङ्गलो जङ्गलभवः सर्पादिर्ग्राह्यतयास्त्यस्येति । जाङ्गल + बहुलवचनात् इञ् ।) व्यालग्राही । इति शब्दरत्नावली ॥

जाङ्गली, स्त्री, (जङ्गले भवा । जङ्गल + अण् । ततो ङीप् ।) शूकशिम्बी । इति । मेदिनी । ले, ८५ ॥ (यथास्याः पर्य्यायाः ।
"कपिकच्छूरात्मगुप्ता वृष्या प्रोक्ता च मर्कटी ।
अजरा कण्डुरा चण्डा दुःस्पर्शा प्रावृषायणी ॥
जाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जाङ्गुलं, क्ली, (जङ्गुलमेव । स्वार्थे अण् ।) विषम् । जालिनीफलम् । इति शब्दरत्नावली ॥

जाङ्गुलिः, पुं, (जङ्गुलं विषं व्यवहार्य्यतया विद्यतेऽस्येति । जाङ्गुल + बाहुलकात् इञ् ।) विषवैद्यः । इति शब्दरत्नावली ॥ सापुड़े इति भाषा ॥

जाङ्गुलिकः, पुं, (जाङ्गुलो विषप्रधानः सर्पादिर्ग्राह्यतयास्त्यस्येति । जाङ्गुल + ठन् ।) व्यालग्राही । इत्यमरः । १ । ८ । ११ ॥

जाङ्गुली, स्त्री, (जङ्गुलस्य इयम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । ततो ङीप् ।) विषविद्या । इति हेमचन्द्रः ॥

जाङ्घिकः, पु, (जङ्घाभिश्चरतीति । जङ्घा + "पर्पादिभ्यष्ठन् ।" ४ । ४ । १० । इति ठन् । यद्वा, जङ्घाभिर्जीवतीति । "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठञ् ।) उष्ट्रः । श्रीकारीमृगः । इति राजनिर्घण्टः ॥ जङ्घाजीवी । धावकादिः । तत्पर्य्यायः । जङ्घाकरिकः २ । इत्यमरः । २ । ८ । ७३ ॥ (प्रशस्तजङ्घाविशिष्टे, त्रि । यथा, भोजराजकृतयुक्तिकल्पतरौ ।
"जाङ्गलस्था जाङ्घिकाश्च म्लानसे राजसा
मताः ॥")

जाज्वल्यमानः, त्रि, (भृशं ज्वलतीति । ज्वल + यङ् + शानच् ।) देदीप्यमानः । यथा, चण्डी ।
"जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥"

जाटलिः, पु स्त्री, (जाटं सङ्घातं लातीति । ला + बाहुलकात् किः ।) वृक्षविशेषः । इति लिङ्गादिसंग्रहे अमरः ॥

जाड्यं, क्ली, (जडस्य भावः । जड + ष्यञ् ।) जड़ता । तत्पर्य्यायः । स्तम्भः २ । (यथा, पञ्चदश्यां । ६ । ८६ ।
"विना जाड्यानुभूतिं न कथञ्चिदुपपद्यते ॥")
मौर्ख्यम् । इति हेमचन्द्रः ॥

जाड्यारिः, पु, (जाड्यस्य अरिः शत्रुः । भक्षणेन जाड्यदोषनिराकरणात् तथात्वम् ।) जम्बीरः । इति राजनिर्घण्टः ॥

जातं, क्ली, (जन + कर्म्मणि क्तः ।) व्यक्तम् । समूहः । (यथा, भट्टिः । १ । १३ ।
"अग्न्याहुतिं स्रावयितुं सविप्रा-
ञ्चिचीषयन्तोऽध्वरपात्रजातम् ॥"

भावे क्त ।) जन्म । (पारिभाषिकपुत्रविशेषे, पु । यथा, पञ्चतन्त्रे । १ । ४४१—४४२ ।
"जातः पुत्रोऽनुजातश्च अतिजातस्तथैव च ।
अपजातश्च लोकेऽस्मिन् मन्तव्याः शास्त्रवेदिभिः ॥
मातृतुल्यगुणो जातस्त्वनुजातः पितुः समः ।
अतिजातोऽधिकस्तस्मादपजातोऽधमाधमः ॥")
उत्पन्ने त्रि । इति मेदिनी । ते, १६ ॥ (यथा, हितोपदेशे । १ । १४ ।
"कोऽर्थः पुत्त्रेण जातेन यो न विद्वान् न धार्म्मिकः ।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥")

जातकं, क्ली (जातं जन्म तदधिकृत्य कृतो ग्रन्थः इत्यण् तत स्वार्थे कन् । यद्वा, जातेन शिशो- र्जन्मना कायतीति । कै+क ।) जातबालकस्य शुभाशुभनिर्णायकग्रन्थः । तस्य भेदाः । जातकदीपिका १ जातकामृतम् २ जातकतरङ्गिणी ३ जातककौमुदी ४ जातकरत्नाकरः ५ जातकसारः ६ जातकार्णवः ७ जातकचन्द्रिका ८ लघुजातकम् ९ बृहज्जातकम् १० इत्यादि । इति ज्योतिषम् ॥

जातकः, पुं, कारण्डी । भिक्षुः । (जात+स्वार्थे कन् ।) जाते, त्रि । इति धरणिः ॥

जातकर्म्म, क्ली, (जातस्य जाते सति वा यत् कर्म्म ।) दशसंस्कारान्तर्गतसंस्कारविशेषः । तस्य क्रमो यथा । पुत्त्रे जाते पिता नाभिं मा कृन्तत स्तनञ्च मा दत्त इत्यभिधाय कृतस्नान कृतवृद्धिश्राद्धः प्रक्षालितशिलायां ब्रह्मचारिणा कुमार्य्या गर्भवत्या वा श्रुतस्वाध्यायशीलब्राह्मणेन वा अनावृतलोष्टपिष्टौ व्रीहियवौ दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा मन्त्रेण कुमारस्य जिह्वां मार्ष्टि । ततस्तथैव सुवर्णेन घृतं गृहीत्वा मन्त्रेण तथैव कुमारस्य जिह्वां मार्ष्टि । ततः पुनरपि सुवर्णेन घृतं गृहीत्वा मन्त्रेण तथैव कुमारस्य जिह्वां मार्ष्टि । ततो नाभिं कृन्तत स्तनञ्च दत्तेति पिता ब्रूयात् । स्नानं पुनः पिता न कुर्य्यात् । इति भवदेवभट्टः ॥

जातवेदाः, [स्] पुं, (विद्यते लभ्यते इति । विद लाभे+असुन् । जातं वेदो धनं यस्मात् ।) अग्निः । (अस्य निरुक्तिरुक्ता यथा, महाभारते २ । ३१ । ४१ ।
"पावनात् पावकश्चासि वहनाद्धव्यवाहनः ।
वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि ॥")
चित्रकवृक्षः । इत्यमरः । १ । १ । ५६ ॥
(जाते जाते सर्व्वप्रपञ्चस्य स्वस्मिन् अध्यस्ततया विद्यते यो जीवः । यद्वा, जातानि सर्व्वाणि कारणत्वेन विदन्ति यस्मिन् । विद ज्ञाने+असुन् । अन्तर्य्यामी परमेश्वरः । यथा, भागवते । ५ । ७ । १४ । "ओँ परो रजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ॥" "जातवेदो धनं कर्म्मफलं यस्मात् कर्म्मफलदमित्यर्थः ॥" इति श्रीभागवतटीकाकृत् श्रीधरस्वामी ॥)

जातरूपं, क्ली, (जातं प्रशस्तं रूपं यस्य ।) सुवर्णम् । (यथा, भागवते । १ । १७ । ३८ ।
"पुनश्च याचमानाय जातरूपमदात् प्रभुः ॥")
धुस्तूरः । इत्यमरः । २ । ९ । ९५ । उत्पन्नरूपे, त्रि । यथा, नैषधे । १ । १२९ ।
"न जातरूपच्छदजातरूपता
द्विजस्य दृष्टेयमिति स्तुवन् मुहुः ॥"

जातापत्या, स्त्री, (जातमपत्यमस्याः ।) प्रसूता । इत्यमरः । २ । ६ । १६ ।

जातिः, स्त्री, (जायतेऽस्यामिति । जन्+अधिकरणे क्तिन् ।) गोत्रम् । (जन+भावे क्तिन् ।) जन्म ॥ आमलकी । आमलकी । सामान्यम् । तत्तु ब्राह्मणक्षत्त्रियवैश्यशूद्रात्मकम् । छन्दः । जातीफलम् । मालती । इति मेदिनी । ति, १६ ॥ (अस्याः पर्य्याया यथा,—
"जातिर्ज्जाती च सुमना मालती राजपुत्त्रिका ।
चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
काम्पिल्लः । इति विश्वः ॥ गोत्वादिः । तस्य लक्षणं यथा, मुग्धबोधे ।
"आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥"
अस्यार्थः । "आक्रियते व्यज्यतेऽनयेति आकृतिः संस्थानं आकृत्या ग्रहणं ज्ञानं यस्याः सा आकृतिग्रहणा जातिराकृतिग्रहणा भवति संस्थानव्यङ्ग्या इत्यर्थः । तेन मनुष्यगोमृगहंसादीनां पृथक् पृथक् संस्थानैर्व्यज्यमाना मनुष्यत्वगोत्वमृगत्वहंसत्वादिर्जातिः । एवं ब्राह्मणक्षत्त्रियवैश्यशूद्राणां पृथक् संस्थानाभावाद्ब्राह्मणत्वादेर्जातित्वं नायातमिति लक्षणान्तरमाह लिङ्गानाञ्च न सर्व्वभागिति या सर्व्वाणि लिङ्गानि न भजते सा च जातिरित्यर्थः ।
स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च इत्यमरसिद्धे जातिभेदानां स्त्रीपुंसयोरेवेति नियमे ब्राह्मणादीनां सर्व्वलिङ्गभागित्वाभावाज्जातित्वम् । किन्तु अज्ञातहंसस्य जनस्य हंसं दृष्टवतोऽपि तस्य संस्थानेन हंसत्वं व्यक्तुं न शक्यते इति हंसस्यापि जातित्वं नायातमिति पूर्व्वलक्षणस्य दोषः । एवं देवदत्तादिसंज्ञाशब्दस्यापि सर्व्वलिङ्गभागित्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्य दोषः इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह सकृदाख्यातनिर्ग्राह्येति सकृदेकवारमाख्यातेन उपदेशेन निर्निश्चयेन ग्राह्या ग्रहीतुं शक्या इत्यर्थः । तेन ईदृशो हंस इत्युपदेशे हंसं दृष्टवतस्तस्य संस्थानेन हंसत्वं व्यक्तुं शक्यत एवेति पूर्व्वलक्षणस्य न दोषः । एवं देवदत्तादिसंज्ञाशब्दस्य एकस्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः । गार्ग्यः पुरुषः गार्गी स्त्री गार्ग्यं कुलमिति सर्व्वलिङ्गभाजित्वात् संस्थानव्यङ्ग्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह गोत्रञ्चेति । पुत्त्रपौत्त्रप्रभृतिकमपत्यं गोत्रमिति पूर्व्वाचार्य्यपरिभाषितं गोत्रमिह गृह्यते गार्गीवात्सीत्यादि । चतुर्थलक्षणमाह चरणैः सहेति चरणञ्च जातिरित्यर्थः । चरणशब्दो वेदैकदेशवाची कठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचक एव न तु जातिवाचकः तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तं गार्ग्यादीनां घित्वादौपि सिद्धेऽपि जातिसंज्ञा फलन्तु गार्गी भार्य्या यस्यासौ गार्गीभार्य्यः इत्यादौ नोपाककोठित्यादिना पुंवद्भावनिषेधः । गार्गी चासौ भार्य्या चेति गार्ग्यभार्य्या इत्यादौ कोठादिः पुवदित्यादिना पुनः पुंवद्भावः ।" इति दुर्गादासः ॥
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥"
इति भाषापरिच्छेदे । ८-९ ॥
तल्लक्षणन्तु "नित्यत्वे सत्यनेकसमवेतत्वम् ।" इति सिद्धान्तमुक्तावली ॥

जातिकोशं, क्ली, (जातेः कोशमिवेति ।) जातीफलम् । इति भावप्रकाशः ॥

जातिकोषं, क्ली, (जातेः कोषमिव ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥ (जयित्री इति लोके प्रसिद्धम् । तदत्र जातीफलानामावरणदलं व्यवहृतम् । तद्यथा वैद्यकरसेन्द्रसारसंग्रहे कासाधिकारे शृङ्गाराभ्ररसे ।
"कर्पूरं जातिकोषं सजलमिभकणातेजपत्रं लवङ्गं
मांसी तालीशचोचे गजकुसुमगदं धातकी
चेति तुल्यम् ।
पथ्या धात्री विभीतं त्रिकटुरपि पृथक्त्वष्टभाग द्विशाण-
मेलाजातीफलाख्यं चिति तलविधिनाशुद्धगन्धस्य
कोलम् ॥"
जातिकोषजातीफलयोरेकस्मिन्नौषधे समुल्लेखादत्रैव जयित्रीति लोकप्रसिद्धम् । औषधन्तु सर्व्वत्रैव प्रयुज्यते ॥)

जातिकोषी, स्त्री, (जातिकोषमस्या अस्तीति । "अर्श-आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततो ङीप् ।) जातीपत्री । इति राजनिर्घण्टः ॥

जातिफल, क्ली, (जात्याख्यं फलमिति ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥

जातिभ्रंशकर, क्ली, (जातेर्भ्रंशं करोतीति । कृ+ट ।) नवविधपापान्तर्गतपापविशेषः । यथा, मनुः । ११ । ६७ ।
"ब्राह्मणस्य रुजः कृत्याघ्रातिरघ्रेयमद्ययोः ।
जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम् ॥"
"ब्राह्मणस्य दण्डहस्तादिना पीडाक्रिया अघ्रेयलशुनपुरीषादि जैह्म्यं कुटिलत्वं वक्रता ।" इति कुल्लूकभट्टः ॥

जातिवैर, क्ली, (जात्या स्वभावतो वैरं शत्रुत्वम् ।) स्वाभाविकशत्रुत्वम् । तत्पर्य्यायः । ओतुता...

यथा श्रीकृष्णशिशुपालयोः ॥ वास्तुजम् २ यथा कौरवपाण्डवानाम् ॥ वाग्जम् ३ यथा द्रोणद्रुपदयोः ॥ सापत्नम् ४ मूषिकनकुलयोः ॥ अपराधजम् ५ यथा पूजनीब्रह्मदत्तयोः ॥ इति महाभारतम् ॥

जातिसारं, क्ली, (जात्या स्वभावतः सारोऽस्य ।) जातीफलम् । इति राजनिर्घण्टः ॥ (जातीफलशब्देऽस्य विवृतिर्ज्ञेया ॥)

जाती, स्त्री, (जन + क्तिन् । ततो वा ङीप् ।) जाती पुष्पम् । चमेली इति हिन्दी भाषा ॥ तत्पर्य्यायः सुरभिगन्धा २ सुमनाः ३ सुरप्रिया ४ चेतकी ५ सुकुमारा ६ सन्ध्यापुष्पी ७ मनोहरा ८ राजपुत्री ९ मनोज्ञा १० मालती ११ तैलभाविनी १२ जनेष्टा १३ हृद्यगन्धा १४ । (एतस्या हि सर्व्वपुष्पेषु श्रेष्ठत्वमुक्तम् । यथा, "पुष्पेषु जाती नगरेषु काञ्ची ।" इति उद्भटः ॥) अस्या गुणाः । तिक्तत्वम् । शीतत्वम् । कफस्वस्नपाकनाशित्वम् । इति राजनिर्घण्टः ॥ उष्णत्वम् । तुवरत्वम् । लघुदोषशिरोऽक्षिदन्तरोगविषकुष्ठव्रणरक्तदोषनाशित्वञ्च । इति भावप्रकाशः ॥ तत्कुड्मलस्य गुणाः । नेत्ररोगव्रणविस्फोटकुष्ठनाशित्वम् । इति राजनिर्घण्टः ॥

जातीकोशं, क्ली, (जातीत्याख्यया कोशमिव फलमिति यावत् ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥ (क्वचित् पुलिङ्गेऽपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"जातीकोशोऽथ कर्पूरं जातीकटुकयोः फलम् ।
कक्कोलकं लवङ्गञ्च तिक्तं कटुकफापहम् ॥")

जातीकोषं, क्ली, (जातीत्याख्यया कोषमिव फलम् ।) जातीफलम् । इति हेमचन्द्रः ॥

जातीपत्री, स्त्री, (जातीपत्त्रमिवास्त्यस्यामिति । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । ततो ङीप् ।) जातीफलत्वक् । जैत्री इति भाषा । तत्पर्य्यायः । जातिकोषी २ सुमनःपत्रिका ३ मालतीपत्रिका ४ सौमनसायनी ५ जातिपत्री ६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । सुरभित्वम् । कफध्वान्तनाशित्वम् । वक्त्रवैशद्यजननत्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । स्वादुत्वम् । उष्णत्वम् । रुचिवर्णकारित्वम् । कफकासवमिश्वासतृष्णाविषनाशित्वञ्च । इति भावप्रकाशः ॥ दुर्गन्धनाशित्वम् । इति राजवल्लभः ॥

जातीफलं, क्ली, (जातीत्याख्यं फलम् ।) सुगन्धफलविशेषः । जायफल इति भाषा ॥ तत्पर्य्यायः । जातीकोषम् २ । इत्यमरः । २।६।१३२ ॥ जातीकोशम् ३ जातिफलम् ४ । इति तट्टीका ॥ जातिशस्यम् ५ शालूकम् ६ मालतीफलम् ७ मज्जसारम् ८ जातिसारम् ९ पुटम् १० सुमनःफलम् ११ फलज्ञातिः १२ फलज्ञाती १३ कोशम् १४ कोषम् १५ जातिकोषम् १६ कोषकम् १७ । इति शब्दरत्नावली ॥ (यथा, वृहत्संहितायाम् । १६ । १० ।
"जातीफलागुरुवचामिशिलाश्चन्दनं च भङ्गो: ॥")
अस्य गुणाः । कषायत्वम् । उष्णत्वम् । कटुत्वम् । कण्ठामयारुचिवातातीसारमेहनाशित्वम् । हृद्यत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ रसे तिक्तत्वम् । तीक्ष्णत्वम् । रोचनत्वम् । ग्राहित्वम् । स्वरहितत्वम् । श्लेष्मानिलमुखवैरस्यमलदौर्गन्ध्यकृष्णताक्रिमिकासवमिश्वासशोषपीनसहृद्रुङ्नाशित्वञ्च । इति भावप्रकाशः ॥ तृष्णास्थूलनाशित्वम् । इति राजवल्लभः ॥

जातीय., त्रि, (जातौ भवः । "वृद्धाच्छः ।" ४ । २ । ११४ । इति छः । जातिभवः । यथा, कथासरित्सागरे । २३ । ४८ ।
"प्राग्जन्मभिन्नजातीयाः परिकृत्यैव कन्यकाः॥")
तद्धितप्रत्ययविशेषः । स तु प्रकारार्थे भवति । यथा । तार्किकजातीयाः । इति मुग्धबोधमतम् । (पाणिनिमते तु जातीयर् ॥)

जातीरसं, क्ली, (जात्या रसः इव रसो यस्य ।) बोलः । इति राजनिर्घण्टः ॥

जातु, व्य, (जन + क्तुन् । पृषोदरात् साधुः ।) कदाचित् । इत्यमरः । ३ । ४ । ४ ॥ (यथा, मनुः । २ । ९४ ।
"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥")
सम्भावितार्थः । (यथा, महाभारते ।५।१७६।२२।
"को जातु परभावां हि नारीं व्यालीमिव स्थिताम् ।
वासयेत गृहे जानन् स्त्रीणां दोषो महात्ययः॥")
गर्हार्थः । इति शब्दरत्नावली ॥
("जातु निन्दसि गोविन्दं जातु निन्दसि शङ्करम् ॥"
इति मुग्धबोधव्याकरणम् ॥)

जातुकं, क्ली, (जातु गर्हितं निन्दितं दूषितमित्यर्थः कं जलं यस्मादिति ।) हिङ्गु । इति शब्दचन्द्रिका ॥

जातुधानः, पुं, (धीयते सन्निधीयते इति धानं सन्निधानमस्य जातु गर्हितं । धानमभिधानमस्येत्येके ।) यातुधानः । राक्षसः । इत्यमरटीकायां रमानाथः ॥ (यथा, कालिकास्तोत्रे ।
("जातुधानाः पिशाचाश्च कुष्माण्डा भैरवादयः ॥"

जातुषं, त्रि, (जतुनो विकारः । "त्रपुजतुनोः षुक् ।" ४ । ३ । १३८ । इति अण् षुक् च ।) जतुविकारः । जतुनिर्म्मितम् । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । १२० ।
"अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।
जातुषाभरणस्येव रूपेणापि हि तस्य किम् ॥")

जातोक्षः, पु, (जातश्चासौ उक्षा चेति । जातः प्राप्तदम्यावस्थः उक्षा, इत्यर्थः । "अचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) वत्सतरः । इत्यमरः । २ । ९ । ६१ ॥ वत्सो दम्यभावः । प्राप्तयौवनेऽभाव उक्षा । इति भरतः ॥

जात्यः, त्रि, (जातौ भवः इति यत् ।) कुलीनः । श्रेष्ठः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । १६ । ६ ।
"स्वजात्यानधितिष्ठामि गयन्दानीव चन्द्रमा ॥")
कान्तः । इति जटाधरः ॥ (यथा, महाभारते । ५ । ३३ । १२२ ।
"अतीव स भ्रायते ज्ञातिमध्ये
महामणिर्ज्जात्य इव प्रसन्नः ॥")

जात्यन्धः, त्रि, (जात्या जन्मनैव अन्धः ।) जन्मान्धः । यथा, मनुः । ९ । २०१ ।
"अनंशौ क्लीवपतितौ जात्यन्धवधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥"

जादो, त्रि, (जात इत्यस्य जादो इतीयत्प्रयोगस्तु प्राकृतलङ्केश्वरवचमत इति बोध्यम् ।) जातः । इति प्राकृतलङ्केश्वरः ॥

जानकी, स्त्री, (जनकस्य मिथिलाधिपस्यापत्यं स्त्रीत्वम् ङीप् च ।) सीता । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । २७३ । १ ।
"प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ ! ।
रक्षसा जानकी तस्य हृता भार्य्या बलीयसा ॥")

जानपदः, पु, (जानेन जन्मना पद्यते इति अण् ।) जनः । (यथा, याज्ञवल्क्ये । २ । ३७ ।
"देयं चौराहृतं द्रव्यं राज्ञा जानपदाय तु ।
अददद्धि समवाप्नोति किल्विषं यस्य तस्य तत् ॥"
जनपद एव । स्वार्थे अण् ।) देशः । इति मेदिनी । दे, ४ । ४८ ॥ जनपदे भवः । इति "उत्सादिभ्योऽञ् । ४ । १ । ८६ । इत्यञ् । देशभवे, त्रि ॥ यथा, मनुः । ८ । ४१ ।
"जातिजानपदान् धर्म्मान् श्रेणीधर्म्मांश्च
धर्म्मवित् ॥")

जानु, क्ली, (जायते इति । जन् "दृसनिजनिचरिचटिभ्यो ञुण् ।" उणां १ । ३ । इति ञुण् ।) ऊरुजङ्घयोर्म्मध्यभागः । हाँटु इति भाषा ॥ (यथा, महाभारते । ४ । ३२ । ३६ ।
"तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना ॥")
तत्पर्य्यायः । ऊरुपर्व्व २ अष्ठीवत् ३ अष्ठीवान् ४ । इत्यमरः । २ । ६ । ७२ ॥ चक्रिका ५ । इति राजनिर्घण्टः ॥

जापः, पुं, (जप + भावे घञ् ।) जपः । इति जटाधरः ॥

जापकः, त्रि, (जपतीति । जप + ण्वुल् ।) जपकर्त्ता । (यथा, महाभारते । १२ । १९९ । ३ ।
"जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत ! ।
किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः ॥"
जपेन कृतं जपजन्यमित्यर्थः । जप + अण् + स्वार्थे कन् । जपजन्ये, त्रि । यथा, महाभारते । १२ । १९९ । ४९ ।
"अथवा सर्व्वमेवेह मामकं जापकं फलम् ॥")

जापनं, क्ली, (जप + स्वार्थे णिच् + भावे ल्युट् ।) निरसनम् । निर्व्वर्त्तनम् । इति धरणिः ॥ (यथा, संवर्त्तसंहितायाम् । २०९ ।
"मुच्यते सर्व्वपापेभ्यो मासमात्रेण जापनात् ॥")

जाबालः, पुं, (जबालाया अपत्यं पुमानिति । अण् ।) सत्यकामः । इत्यमरः । २ । १० । ११ ॥ मुनिविशेषः । (यथा, ब्रह्मवैवर्त्ते । १ । १६ । १४ ॥

"जाबालो जाजलिः पैलः करथोऽगस्त्य एव च । एते वेदाङ्गवेदज्ञाः षोडशव्याधिनाशकाः ॥"

उपनिषद्विशेषः । यथा, मौक्तिकोपनिषदि ।

"ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः ।

दर्भगन्धशाखाविशेषः । यथा, रामचन्द्रदत्तग्राम प्रकरणे । [यात् ॥")

"अधीत्य कूटजाबालं शार्गालिं योनिमाप्नु-

जाबालिः, पुं, (जबालाया अपत्यं पुमान् इति । इञ् ।) मुनिविशेषः । यथा, रामायणम् ॥

"सुयज्ञं वामदेवञ्च जाबालिमथ काश्यपम् ।"

(तथाच ब्रह्मवैवर्त्ते । २ । ४ । ७० ।

"कश्यपाङ्गिरसौ भरद्वाजश्चासुरिको देवलस्तथा । जैगीषव्योऽथ जाबालिर्यहुत्वा सर्व्वपूजितः ॥")

जामदग्न्यः, पुं, (जमदग्नेरपत्यं पुमान् इति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) जमदग्निपुत्रः । परशुरामः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । २५ । ४१ ।

"पित्राज्ञया जामदग्न्येन पूर्व्वं छिन्नं शिरो मातुरिति प्रसिद्धम् ।")

जामाता, [ऋ] पुं, (जायां माति मिमीते मिनोति वा । "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृ-" इति ।" उणां । २ । ९६ । इति निपातनात् साधुः ।) दुहितृपतिः । इत्यमरः । २ । ६ । ३२ । जामाइ इति भाषा ॥ (यथा, हरिवंशे । ११६ । २५ ।

"जामाता त्वभवत्तस्य कंसस्तस्मिन् हते युधि ॥")

सूर्य्यावर्त्तः । धवः । इति मेदिनी । ते, ११० ॥

जामिः, स्त्री, (जम् + इञ् । इन् निपातनात् साधुरित्येके ।) स्वसा । कुलस्त्री । इत्यमरः । ३ । ३ । १४२ ॥ (यथा, मनुः । ३ । ५७ ।

"शोचन्ति जामयो यत्र विनश्यन्त्याशु तत्-कुलम् ॥")

जामी, स्त्री, (जामि + वा ङीप् ।) जामिः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । ४६ । ७ ।

"यामीशप्तानि गेहानि निकृत्तानीव कृत्यया ॥")

जामेयः, पुं, (जाम्या अपत्यमिति । "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) भागिनेयः । इति हेमचन्द्रः ॥

जाम्बवं, क्ली, (जम्ब्वाः फलम् । "जम्ब्वा वा ।" ४ । ३ । १६४ । इत्येतेन अण् तस्य विधानात् न लुक् ।) जम्बूफलम् । इत्यमरः । २ । ४ । १९ ॥ (यथा, सुश्रुते । १ । ४६ ।

"अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित् ॥")

सुवर्णम् । इति राजनिर्घण्टः ॥ जाम्बवति, पुं । इति शब्दभेदः ॥

जाम्बवती, स्त्री, (जाम्बवतो अपत्यं स्त्री । अण् । ततो ङीप् ।) श्रीकृष्णपत्नी । जाम्बवत्कन्या । इति श्रीभागवतम् ॥ (यथा, हरिवंशे । ९८ । ४१ ।

"जेमे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम् ॥")

नागदमनी । इति राजनिर्घण्टः ॥

जाम्बवान्, [त्] पुं, (जम्बोर्वेदं जाम्बवं तदस्यास्तीति मतुप् मस्य वः । पृषोदरादित्वात् साधुः । अमृतसाधकत्वादस्य तथात्वम् ।) ऋक्षराजः । स ब्रह्मपुत्रः । यथा रामायणे ।

"ऋक्षराजस्य पुत्रोऽथ महाप्राज्ञः सुदुर्ज्जयः । पितामहसुतश्चाथ जाम्बवानिति विश्रुतः ॥")

(यथाच, हरिवंशे । ३८ । ३५ ।

"घाघरा कुमारमादाय सुतं जाम्बवतो नृप ।")

जाम्बवी, स्त्री (जाम्बवस्याकारोऽस्त्यस्याः इति ।) नागदमनी । इति राजनिर्घण्टः ॥

जाम्बुवान्, [त] पुं, (जाम्बवान् पृषोदरात् साधुः ।) जाम्बवान् । इति भरतो द्विरूपकोषश्च ॥

जाम्बूनदं, क्ली, (जम्बूनद्यां भवमिति । अण् ।) स्वर्णम् । धुस्तूरः । इति राजनिर्घण्टः ॥ स्वर्णविशेषः । यथा । "मेरुमन्दरमन्दरसजम्बूफलानां मलयभिपातनविशीर्णानां अत्रस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनामनदी इलावृतं पतति तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम स्वर्णं भवति ।" इति श्रीभागवतम् ॥

जायकं, क्ली, (जयति अपरं गन्धमिति । जि + ण्वुल् ।) कालीयकम् । कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम् । इत्यमरः । २।६।१२५॥

जाया, स्त्री, (जायते पुत्ररूपेणास्यामिति । जन् + यक् आत्वञ्च ।) भार्य्या । इत्यमरः । २ । ६ । ६ ॥ (यथा, मनुः । ९ । ८ ।

"पतिर्भार्य्यां सम्प्रविश्य गर्भो भूत्वेह जायते । जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥")

जायाजीवः, पुं, (जाया आजीवः जीवनोपायो यस्य इति । जायया जीवतीति वा । जीव + अच् । जायायाः सङ्गीतनर्त्तनादिना जीवनादस्य तथात्वम् ।) नटः । इत्यमरः । २।१०।१२ ॥

जायानुजीवी, [न्] पुं, (जायया अनुजीवतीति । अनु + जीव + णिनिः ।) नटः । बकपक्षी । इति मेदिनी । ने, १५५ ॥ वेश्यापतिः । इति शब्दरत्नावली ॥ दुःस्थः । इति हेमचन्द्रः ॥

जायापती, पुं, (जाया च पतिश्चेति तौ ।) भार्य्यापती । मागभातार इति भाषा ॥ नित्यद्विवचनान्तोऽयं शब्दः । इत्यमरः । २ । ६ । ३८ ॥

जायी, [न्] पुं, (जि + णिनिः । यद्वा, जि + णिनिः ।) ध्रुवकभेदः । यथा,—

"जायीति नाम्ना ध्रुवको द्वाविंशत्यक्षरान्वितः । सन्निपातेन तालेन शृङ्गारेऽभीष्टदो रसे ॥ "

इति सङ्गीतदामोदरः ॥

(यथा महाभारते । ३ । ३५ । ८ ।

"अफलं जन्म तस्याहं मन्ये दुर्ज्जातजायिनः ॥")

जायुः, पुं, (जयति रोगान् इति । जि + उण् ।) औषधम् । इत्यमरः । २ । ६ । ५० ॥ (जयतीति । जयशीले, त्रि ॥)

जारः, पुं, (जीर्य्यति स्त्रियाः सतीत्वमनेन । जॄ + करणे घञ् ।) उपपतिः । इत्यमरः ।२ ।६ । ३५ ॥ (यथा, याज्ञवल्क्ये । २ । ३० ।

"जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम् ॥"

जारयति नाशयति इति । जॄ + णिच् + अच् । हन्ता । यथा ऋग्वेदे । १ । ६६ । ४ ।

"यमोह जातो यमो जनित्वं जारः कनीनां पतिर्ज्जनीनाम् ॥")

जारजः, त्रि, (जारात् उपपतेर्ज्जायते इति । जन् + डः ।) उपपतिजातसन्तानः । इत्यमर. । २ । ६ । ३६ ॥ (यथा, मनुः । ३ । १५८ । श्लोके कुल्लूकभट्टकृतटीकायाम् ।

"अमृते जारजः कुण्डो मृते भर्त्तरि गोलकः ॥")

जारणी स्त्री, (जारयति परिपाकं कारयतीति । जॄ + णिच् + ल्युः । ततो ङीप् ।) स्थूलजीरकः । इति राजनिर्घण्टः ॥

जारी, स्त्री, (जारयति जीर्णं कारयतीति । जॄ + णिच् + अच् + गौरादित्वात् ङीष् ।) ओषधीविशेषः । इति मेदिनी । रे, ३९ । जारुी इति भाषा ॥

जारूथ्य, पुं, (जरूथं मांसं तदर्हतीति । जरूथ + ष्यञ् ।) त्रिगुणदक्षिणायज्ञः । (यथा, महाभारते । ३ । ९० । ७० ।

"ततो देवर्षिसहितः सरितं गोमतीमनु । दशाश्वमेधानाजह्रे जारूथ्यान् स निरर्गलान् ॥")

जालं, क्ली, (जल्यते आच्छाद्यतेऽनेनेति । जल-संवरणे + करणे घञ् । यद्वा, जले क्षिप्यते इति । जल + "श्रेषे ।" ४ । २ । ९२ । इत्यण् ।) स्वनामख्यातसूत्रादिनिर्म्मितमत्स्यादिधारणोपाय. । तत्पर्य्याय. । आनायः २ । इत्यमरः । ३ । ३ । १९९ ॥ जालकम् ३ । इति शब्दरत्नावली ॥ (यथा, याज्ञवल्क्यसंहितायाम् । ५५८ ।

"वंशावलम्बनं यद्वा यो विस्तारो गुणस्य यावनति ।

तज्जालस्य स्खलस्य च निजाङ्गुलप्रमाणाय ॥")

गवाक्षः । (यथा, रघुः । ६ । ४३ ।

"प्रासादजालैर्ज्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ॥")

क्षारकः । स तु अस्फुटकलिकाकुष्माण्डादि-मुद्गफलश्च । दम्भः । समूहः । इति मेदिनी । ले, १९ ॥ (यथा, रघुः । ७ । ६२ ।

"ततो धनुष्कर्षणमूढहस्तं एकांशपर्य्यस्तशिरस्त्रजालम् ॥"

वंशलौहादिनिर्म्मितजालवद्द्रव्यविशेषः । यथा, भट्टिः । १ । ८ ।

"अन्तर्निविष्टोज्ज्वलरत्नभासो गवाक्षजालैरभिनिष्पतन्त्यः ॥")

इन्द्रजालम् । इति हेमचन्द्रः । ३ । ५९० ॥

जालः, पुं, (जालयति शाखाप्रशाखादिभिः सहद्योतीति । जल संवरणे + णिच् + "अच्-ष्टीति ।" ३।१।१३४ । इत्यच् ।) कदम्बवृक्षः । इति मेदिनी । ले, १९ ॥

जालकं, क्ली, (जल संवरणे + भावे घञ् । जालेन आवरणेन कायति प्रकाशते इति । कै + कः । जाल + स्वार्थे कन् वा ।) अस्फुटकलिका । इति भरतः ॥ (यथा, मेघदूते । ६६ ।
"तासुत्याप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ॥")
कुष्माण्डादिक्षुद्रफलम् । इति सारसुन्दरी ॥
तत्पर्य्यायः । क्षारकः २ । इत्यमरः । २ । ४ ।
१६ ॥ कोरकः । दम्भः । कुलाय्यः । आनायः ।
इति मेदिनी । के, ६२ ॥ (यथा, सुश्रुते ।
उत्तरतन्त्रे ७ अध्याये ।
"दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते ।
मक्षिकान् मशकान् केशान् जालकानि च
पश्यति ॥")
समूहः । इति शब्दरत्नावली ॥ (यथा, शाकुन्तले प्रथमाङ्के ।
"वृद्धं कर्णशिरीषरोधि वदने घर्म्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्य्याकुला
मूर्द्धजाः ॥"
वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषः । यथा,
पञ्चतन्त्रे । ३ । १७ । ६ ।
"ततो यष्टिं शलाकाश्च जालकं पञ्जरं तथा ।
बभञ्ज लुब्धको दीनां कपोतीञ्च मुमोच ताम् ॥")
जालकं, क्ली स्त्री, (जल संवरणे + भावे घञ् । जालेन आवरणेन कायति प्रकाशते इति ।
कै + कः ।) मोचकफलम् । इति मेदिनी ॥ के, ६२ ॥
जालकः, पु, (जालेन वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषेण कायतीति । कै + कः ।)
गवाक्षः । इति हेमचन्द्रः । ४ । ७८ ॥
जालकारकः, पुं, (जालं करोतीति । कृ + ण्वुल् ।
जालस्य कारको वा ।) मर्कटकः । इति हेमचन्द्रः । ४ । २७६ ॥ जालकर्म्मरि, त्रि ॥
जालकिनी, स्त्री, (जालकं लोमसमूहस्तदस्त्यस्या इति । "अत इनिठनौ ।" ५।२।११५। इति इनिस्ततो ङीप् ।) मेषी । इति हेमचन्द्रः ।४।३।४३॥
जालगर्द्दभः, पुं, रोगविशेषः । तस्य लक्षणं यथा,
"विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् ।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः ॥"
अपाकवान् ईषत्पाकवान् । पित्तकृतत्वेन सर्व्वथा पाकाभावस्यायुक्तत्वात् । अयममिवात इति ख्यातः ॥ अथ विक्षतेन्द्रवृद्धागर्द्दभिकाजालगर्द्दभानां चिकित्सा ।
"विक्षतामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ।
पाके तु रोपयेदाश्वैः पक्कैर्म्मधुरमेषजैः ॥"
इति भावप्रकाशः ॥
जालगोणिका, स्त्री, (जालवत् गोण्या छिद्रवस्त्रेण कायतीति । कै + कः । ततो ह्रस्व. ।) दधिमन्थनभाण्डविशेषः । तत्पर्य्यायः । कलशः २ ।
इति शब्दरत्नावली ॥
जालन्धरः, पु, त्रिगर्त्तदेशः । इति हेमचन्द्रः ।
४ । १४ ॥ । (देवीपीठस्थानानामन्यतमः ।
यत्र भगवती विश्वमुखीमूर्त्त्या विराजते ।
यथा, देवीभागवते । ७ । ३० । ७६ ।
"जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते ॥"
जालन्धरोऽभिजन एषामिति । अण् ।) तद्देशस्थे पु भूम्नि । (दैत्यविशेषः । यथा,
काशीखण्डे । २१ । १०६ ।
"पुरा जालन्धरं दैत्यं ममापि परिकम्पनम् ।
पादाङ्गुष्ठाग्ररेखोत्थं चक्रं सृष्ट्वा न्यरोऽहरत् ॥"
ऋषिविशेषः । इति व्याकरणम् ॥)
जालपात् [द्] पु, (जालमिव पादौ यस्य ।)
हंसः । इति त्रिकाण्डशेषः ॥ (यथास्य सम्पर्कः ।
१४६ ।
"टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा ॥")
जालप्रायां, स्त्री, (जालस्य प्रायो बाहुल्यं यत्र ।)
कङ्कटचिशेषः । इति हेमचन्द्रः । ३ । ४३३ ॥
लोहार साँजोया इति भाषा ॥
जालवर्व्वूरकः, पु, (जालाकारो वर्व्वूरकः । शाकपार्थिवादिवत्समासः ।) वर्व्वूरवृक्षविशेषः ।
तत्पर्य्यायः । छत्राकः २ स्थूलकण्टकः ३ सूक्ष्मशाखः ४ तनुच्छायः ५ रन्ध्रकण्टः ६ । अस्य गुणाः । रूक्षत्वम् । वातामयकफनाशित्वम् ।
पित्तदाहकारित्वम् । कषायत्वम । उष्णत्वञ्च ।
इति राजनिर्घण्टः ॥
जालिकः, पु, (जालेन जीवतीति । जाल + "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठन् ।
यद्वा, जालेन चरतीति । "पर्पादिभ्यः ष्ठन् ।" ४।
४ । १० । इति ठन् ।) कैवर्त्तः । इति त्रिकाण्डशेषः ॥ वागुरिकः । जालेन मृगबन्धनकर्त्ता
इत्यमरः ।२।१०।१४॥ मर्कटकः । इति हेमचन्द्रः । ४ । २७७ ॥ (ऐन्द्रजालिकः । इति
व्याकरणम् ॥)
जालिकः, त्रि, (जालेन जीवतीति । जाल + ठन् ।)
ग्रामजाली । जालोपजीवी । इति मेदिनी ।के,६४॥
जालिका, स्त्री, (जालं जालवदाकृतिरस्ति अस्याः । जाल + "अत इनिठनौ ।" ५ । २ ।
११५ । इति ठन् ।) वस्त्रविशेषः । गिरिसारः । (जलमेवेति स्वार्थे अण् । ततो जालं
सलिलं उत्पत्तिस्थानत्वेनास्त्यस्या इति ठन् ।)
जलौका । विधवा । भटानामङ्गरक्षिताङ्गरक्षिणी । इति मेदिनी । के, ६४ ॥
जालिनी, स्त्री, (जालं चित्रकर्म्मवस्तुसमूहो विद्यतेऽस्यामिति । इनिस्ततो ङीप् ।) चित्रशाला । इति हेमचन्द्र. । ४ । ६५ ॥ (जालं आमाशयसदृशद्रव्यं विद्यतेऽस्या इति ।) कोशातकी । इति राजनिर्घण्टः ॥ (यथास्याः
पर्य्याया भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"धामार्गव. पीतपुष्पो जालिनी कृतवेधना ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥"
घोषातकी । इति रत्नमाला ॥ प्रमेहरोगिणः
पीडकाविशेषः । यथा, सुश्रुते निदानस्थाने ६
अध्याये । "तत्र वसामेदोभ्यामभिपन्नशरीरस्य
त्रिभिर्दोषैरनुगतधातोः प्रमेहिणो दश पीडका
जायन्ते । तद्यथा, शराविका सर्षपिका
कच्छपिका जालिनी विनता पुत्रिणी मसूरिका
अलजी विदारिका विद्रधिका चेति ।"
"जालिनी तीव्रदाहा तु मांसजालसमावृता ॥")
जाली, स्त्री, (जालं जालाकृतिरस्ति अस्याः
अच् ततो गौरादित्वात् ङीष् ।) ज्योत्स्नी ।
इत्यमरः । २ । ४ । ११८ ॥ झिङ्गा । इति
ख्याता । पटोलः । इति राजनिर्घण्टः ॥
जाल्मः, त्रि, (जालयति दूरीकरोति हिताहितज्ञानमिति । जल + णिच् + बाहुलकात् मः ।)
पामरः । (यदुक्तम् ।
"वरं विश्राम्यतां जाल्म । स्कन्धं ते यदि बाधति ।
न तथा बाधते स्कन्धं यथा बाधति बाधते ॥")
क्रूरः । असमीक्ष्यकारी । इति मेदिनी । मे,
१३ ॥ (यथा, माघे । १५ । ३३ ।
"त्वयि पूजनं जगति जाल्म ।
कृतमिदमपाकृते गुणैः ।
हासकरमघटते नितरा
शिरसीव कङ्कतमपेतमूर्द्धजे ॥")
जाषकं, क्ली, (जक्षति सुष्ठति सङ्गन्धादिकमिति ।
जस + ण्वुल् । पृषोदरादित्वात् सस्य षत्वम् ।)
कालीयनामगन्धद्रव्यम् । इत्यमरटीकासारसुन्दरी ॥
जाहकः, पु, घीहः । घोघ इति भाषा ।
मार्ज्जारः । खट्वा । कारण्डिका । इति मेदिनी ।
के, ६२ ॥ विलेशयजन्तुविशेषः । तत्पर्य्यायः ।
गात्रसङ्कोची २ मण्डली ३ बहुरूपकः ४ कामरूपी ५ विरूपी ६ बिलवासः ७ । इति राजनिर्घण्टः ॥
जाह्नवी, स्त्री, (जह्नोरपत्यं स्त्री । जह्नु + अण् +
ङीप् ।) गङ्गा । इति हेमचन्द्रः । ४ । १४७ ॥
एतन्नामकारणं यथा,—
"जानुद्वारा पुरा दत्त्वा जह्नुः संपीय कोपतः ।
तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ * ॥
तस्या तिथिविशेषे स्नानफलं यथा,—
"सामान्यदिवसस्नानसङ्ख्यं शृणु सुन्दरि ।
पुण्यं दशगुणञ्चैव मौषलस्नानतः परम् ॥
ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने ।
अमायाञ्चापि तत्तुल्यं द्विगुणं दक्षिणायने ॥
ततो दशगुणं पुण्यं नराणाञ्चोत्तरायणे ।
चातुर्म्मास्यां पौर्णमास्यामनन्तं पुण्यमेव च ॥
अक्षयायाञ्च तत्तुल्यं नैतद्वेदनिरूपितम् ।
असंख्यपुण्यफलदमेतेषु स्नानदानकम् ।
सामान्यदिवसस्नानात् दानात् शतगुणं भवेत् ॥
मन्वन्तरायां देवेशि ! युगाद्यायां तथैव च ।
माघस्य सितसप्तम्यां भीष्माष्टम्यां तथैव च ॥
ततोऽपि द्विगुणं पुण्यं नन्दायां भवदुर्लभे ! ।
दशाहरादशम्याञ्च युगाद्यादि समं फलम् ॥
नन्दासमञ्च वारुण्यां महत्पूर्व्वे चतुर्गुणम् ।
ततश्चतुर्गुणं पुण्यं हिमवत्पूर्व्वके सति ॥
पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत् ।

क्रोधपराजसमये कर्मे दशगुणं ततः ॥
पुण्येऽप्यर्द्धोदये काले सतः शतगुणं फलम् ।
सर्व्वेषामेव पर्व्वत्वं पैप्पलादोर्गी यिमर्म्मयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

जि, जये । अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-च्वर्क सकंच-अनिट् ।) जय उत्कर्षः लौकारक्ष । उत्कर्षे ऽकर्म्मकः । जयन्ति यमुनाकूले रह:-केलयः । मल्लैरसह्वौरवयत् सुरालयमिति कादम्बरी । जयति शत्रुं कली । च्याभिधामावमात् तुचन्द्यो: प्रयोगाभावः । किञ्च तयोः स्थाने तिष्ठतीति । किञ्च तुमः स्थाने सासह इष्यते । यथा, भवाम्यत्वः कोऽपि जयताद्यागगोचरः । इति दुर्गादासः ॥

जिः, त्रि, (जयतीति । जि + बाहुलकात् डिः ।) जेता । पिशाचे, पुं । इत्येकाक्षरकोषः ॥

जिगमुः, पुं, (गन्तुमिच्छतीति । गम + "गमेः सन्वच ।" उणां १ । ३१ । इति उः । सन्वत्कार्य्यञ्च । अनुदात्तोपदेशे इत्यादिना मलोपः ।) प्राणवायुः । इत्युणादिकोषः ॥

जिगमिषा, स्त्री, (गन्तुमिच्छा । गम + सन् + अ । ततष्टाप् ।) गमनेच्छा । इति व्याकरणम् ॥

जिगीषा, स्त्री, (जेतुमिच्छा । जि + सन् + अ । ततष्टाप् ।) जयेच्छा । (यथा, महाभारते १ । ७६ । ६ ।
"जिगीषया ततो देवा वव्रुरङ्गिरसः सुतम् ॥")
व्यवसायः । प्रकर्षः । इति मेदिनी । षे, ३६ ॥

जिघत्सा, स्त्री, (अत्तुमिच्छा । अद् भक्षणे + सन् + अ । "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्लृ ।) क्षुधा । इति हेमचन्द्रः । ३ । ५७ ॥

जिघत्सुः, त्रि, (अत्तुमिच्छुः । अद् + सन् + "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्-आदेशः । ततः "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) क्षुधितः । इत्यमरः । ३ । १ । २० ॥

जिघांसकः, त्रि, (जिघांसति हन्तुमिच्छतीति । हन + सन् + ण्वुल् ।) हननेच्छुकः । इति व्याकरणम् ॥

जिघांसा, स्त्री, (हन्तुमिच्छा । हन् + सन् + "अभ्यासाच्च ।" ७ । ३ । ५५ । इति कुत्वम् । "अज्झनगमां सनि ।" ६ । ४ । १६ । इति दीर्घः । तत अप्रत्ययस्ततः स्त्रियां टाप् ।) हननेच्छा । इति व्याकरणम् ॥ (यथा, मनुः । ११ । २०६ ।
"जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥")

जिघांसुः, पुं, (हन्तुमिच्छुः । हन् + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) शत्रुः । इति हेमचन्द्रः । ३ । ३९३ । हननेच्छौ, त्रि । यथा, भट्टिः ।
"प्रयातमेवं हरिणं जिघांसुः ॥"
(यथाच, महाभारते । ३ । १५४ । १८ ।
"जिघांसवः क्रोधवशा सभीमा
भीमं समन्तात् परिवव्रुरुग्राः ॥")

जिघ्रः, त्रि, (जिघ्रतीति । घ्रा गन्धोपादाने + "पाघ्राध्माधेट्दृशः शः ।" ३ । १ । १३७ । इति शः ।) घ्राणकर्त्ता । यथा, साहित्यदर्पणे ।
"सामी जिघ्रसितैरवाययति मनोजिघ्रः
सपत्नीजनः ॥"

जिङ्गिनी, स्त्री, वृक्षविशेषः । तत्पर्य्यायः । झिङ्गिनी २ झिङ्गी ३ सुनिर्य्यासा ४ प्रमोदिनी ५ । (यथा, गारुडे १८४ अध्याये ।
"जिङ्गिन्यैरण्डकं रक्त पूकशिम्बीसमन्वितम् ।
प्रीतोदकञ्च तत्तस्यौ बाहुल्यैवायनं हरेत् ॥"
यथाच, माभटे सूत्रस्थाने १५ अध्याये ॥
"रोधशावरकरोध्रपलाशा
जिङ्गिनी सरलकट्फलयुक्ताः ।
कुत्सितामकदली गलशोभा:
सेलवाश्वपरिमेलवमोचा: ॥")
अस्या गुणाः । मधुरत्वम् । उष्णत्वम् । कषायत्वम् । योनिशोधनत्वम् । कटुत्वम् । व्रणच्छर्दीगवातातीसारमनाशित्वम् । पटुत्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे १ मे भागे ॥

जिङ्गी, स्त्री, मञ्जिष्ठा । इत्यमरः । २ । ४ । ९० ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठचिकित्सायाम् ।
"पाठा जिङ्गी महातिक्ता विशाला कृमिमत्तकम् ॥")

जिज्ञासा, स्त्री, (ज्ञातुमिच्छा । ज्ञा + सन् + अः । स्त्रियां टाप् ।) ज्ञातुमिच्छा । यथा,—
"अथातो ब्रह्मजिज्ञासा ।"
इति शारीरकप्रथमसूत्रम् ॥
तत्पर्य्यायः । अनुयोगः १ प्रश्नः २ पृच्छा ३ निरूपणा ४ । इति जटाधरः ॥

जिज्ञासितः, त्रि, (जिज्ञासास्य जाता । तारकादित्वात् इतच् । यद्वा ज्ञा + सन् + कर्म्मणि क्त ।) कृतजिज्ञासः । दृष्टः । विचारितः । यथा, श्रीभागवते १ । ५ । ४ ।
"जिज्ञासितमधीतञ्च ब्रह्म यत्तत् सनातनम् ॥"
"किञ्च यत् सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं विचारितं अधीतं अधिगतं प्राप्तमेवेत्यर्थः ।" इति श्रीधरस्वामी ॥

जिज्ञासुः, त्रि, (ज्ञातुमिच्छुः । ज्ञा + सन् + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) आत्मज्ञानेच्छुः । यथा, श्रीभगवद्गीतायाम् ७।१६ ॥
"चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्ज्जुन ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥"
सामान्यवेदेच्छुकश्च ॥

जिज्ञास्यः, त्रि, (जिज्ञास्यते इति । ज्ञा + सन् + कर्म्मणि यत् ।) जिज्ञासितव्यः । जिज्ञासनीयः । (विचार्य्यम् । यथा, भागवते । २ । ९ । ३५ ।
"एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥"
"आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्य्यम् ॥" इति श्रीधरस्वामी ॥)

जितः, पुं, (जितं जयमस्यास्तीति । अच् ।) अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥

जितः, त्रि, (जि + कर्म्मणि क्तः ।) प्राप्तपराजयः । तत्पर्य्यायः । पराभूतः २ परिभूतः ३ अभिभूतः ४ भग्नः ५ पराजितः ६ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १८२ ।
"एभिर्जितैश्च जयति सर्व्वान् लोकानिमान् गृही ॥")

जितकाशिः, पुं, (जितेन जयोद्यमेन काशते प्रकाशते इति । काश + इन् ।) इन्द्रसुतिः । इति भारतटीकायां नीलकण्ठः ॥

जितकाशी [न्] त्रि, (जितेन जयेन काशते इति । काश + णिनिः ।) जययुक्तः । तत्पर्य्यायः । जिताहवः २ । इति हेमचन्द्रः । ३ । ४७० ॥ (यथा, हरिवंशे । १७५।१४१ ।
"अनिरुद्ध रणे यामो जितकाशी महाबलः ।
यत्त्वं प्रोवाच संक्रुद्धो पश्यतां मन्ततामिति ॥")

जितनेमिः, पुं, (जिता नेमिर्य्येन ।) अश्वत्थनिर्म्मितदण्डः । तत्पर्य्यायः । आश्वत्थः २ । इति हेमचन्द्रः । ३ । ४६० ॥

जितशत्रुः, पुं, (जितः शत्रुर्येन ।) इक्ष्वाकुपिता । इति हेमचन्द्रः । १ । ३६ ॥ कृतशत्रुपराजये, त्रि ॥

जिताक्षरः, त्रि, (जितानि आयत्तीकृतानि अक्षराणि येन ।) कृताक्षरजयः । वशीभूताक्षरकः । इष्टिमात्रेणाक्षरबोधेन पाठकः । इति लोकप्रसिद्धिः ॥

जितामित्रः, पुं, (जिताः अमित्राः रागद्वेषादयो बाह्यान्तरशत्रवश्च येन इति ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । १४९ । ६९ ।
"अजो महार्हः स्वाभाव्यो जितामित्रः
प्रमोदनः ॥"
जितोऽमित्रः शत्रुर्येन ।) कृतशत्रुपराजये, त्रि ॥
(यथा, मार्कण्डेये । ३४ । ११३ ।
"ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ।
जितामित्रो नृपो यत्र बलवान् धर्म्मतत्परः ॥")

जितारिः, पुं, (जिता अरयः कामक्रोधादयो येन ।) बुद्धः । इति त्रिकाण्डशेषः ॥ इक्ष्वाकुपिता । इति हेमचन्द्रः । १ । ३६ ॥ (कुरुपुत्त्रविशेषः विश्रुतः पुत्त्रायामन्यतमः । यथा, महाभारते । १ । ९५ । ५० ।
"अविक्षितः परिक्षिच्च शवलाश्वश्च वीर्य्यवान् ।
आदिराजो विराजश्च शाल्मलिश्च महाबलः ।
उच्चैःश्रवा भङ्गकारो जितारिश्चाष्टमः स्मृतः ॥")
जितशत्रौ, त्रि ॥

जिताष्टमी, स्त्री, (जिता पुत्त्रसौभाग्यदानेन सर्व्वोत्कर्षेण स्थिता या अष्टमी ।) गौणाश्विनकृष्णाष्टमी । सैव जीमूतवाहनपूजा । यथा, "आश्विनकृष्णाष्टम्यां जीमूतवाहनपूजा । तत्राष्टमी प्रदोषव्यापिनी ग्राह्या । भविष्योत्तरे ।
"इषे मासासिते पक्षे अष्टमी या तिथिर्भवेत् ।
पुत्त्रसौभाग्यदा स्त्रीणां ख्याता सा जीवपुत्त्रिका ॥
शालिवाहनराजस्य पुत्रो जीमूतवाहनः ।

तस्यां पूज्यः स नारीभिः पुत्त्रसौभाग्यलिप्सया ॥
प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः ।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्त्रिकाम् ॥”
किञ्च विष्णुधर्म्मोत्तरे ।
“पूर्व्वेद्युरपरेद्युर्व्वा प्रदोषे यत्र चाष्टमी ।
तत्र पूज्यः सदा स्त्रीभी राजा जीमूतवाहनः ॥”
तथा च । यद्दिने प्रदोषव्यापिनी अष्टमी तत्रैव व्रतं उभयदिने चेत् परदिने त्रिसन्ध्यव्यापित्वात् । उभयदिने प्रदोषाप्राप्तौ उदयगामिन्यां तदुक्तं निर्णयामृतसिन्धौ ।
“लक्ष्मीव्रतं चाभ्युदिते शशाङ्के
यत्राष्टमी चाश्विनकृष्णपक्षे ।
तत्रोदयं वै कुरुते दिनेशः
सदा भवेज्जीवितपुत्त्रिका सा ॥” इति ।
अस्यामष्टम्यां स्त्रीभिर्न्न भोक्तव्यम् ।
“आश्विनस्यासिताष्टम्यां याः स्त्रियोऽन्नं हि भुञ्जते ।
मृतवत्सा भवेयुस्ता वैधव्यञ्च भवेद्ध्रुवम् ॥”
इति वचनात् ।
इति वाचस्पतिमिश्रकृतचमत्कारचिन्तामणिः ॥
जिताहवः, पु, (जित आहवो युद्धं येन ।) जितकाशी । इति हेमचन्द्रः । ३ । ८३० ॥
जितेन्द्रियः, त्रि, (जितानि वशीकृतानि इन्द्रियाणि श्रोत्रादीनि येन ।) वशीकृतेन्द्रियः । तत्पर्य्यायः । शान्तः २ श्रान्तः ३ । इति हेमचन्द्रः ॥ (यथा, शब्दचिन्तामणिधृतवचनम् ।
“श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥”)
जितेन्द्रियाह्वः, पु (जितेन्द्रियं आह्वयते स्पर्द्धते इति । आ+ह्वे+क ।) कामवृद्धिक्षुपः । इति राजनिर्घण्टः ॥
जित्तमः, पु, (अयमेषामतिशयेन जित् जयशीलः । जित्+तमप् ।) जितुमः । मिथुनराशिः । इति ज्योतिस्तत्त्वम् ॥ जयशीलानां मध्ये उत्तमश्च ॥
जित्या, स्त्री, (जि+“विपूयविनीयजित्यामुञ्जकल्कहलिषु ।” ३ । १ । ११७ । इति क्यप् ।) हलिः । इति हेमचन्द्रः । ३।५५४ ॥ (सिद्धान्तकौमुदीमते तु पुलिङ्गान्तोऽयं शब्दः ॥)
जित्वरः, त्रि, (जयतीति । जि+“इण्नशजिसर्त्तिभ्यः क्वरप् ।” ३।२।१६३ । इति क्वरप् ।) जेता । इत्यमरः । ३ । १ । १० ॥ (यथा, माघे । २ । ६ ।
“करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम् ।
विनाप्यस्मदलम्भूष्णुरिज्यायै तपसः सुतः ॥”)
जित्वरी, स्त्री, (जयति सर्व्वोत्कर्षेण वर्त्तते इति । जि+क्वरप् । “टिड्ढाणञ् ।” ४ । १ । १५ । इति ङीप् ।) काशी । इति त्रिकाण्डशेषः ॥
जिनः, पुं (जयतीति । जि+“इण्सिञ्जिदीङुष्यविभ्यो नक् ।” उणां । ३ । २ । इति नक ।) अर्हन् । बुद्धः । विष्णुः । इति हेमचन्द्रः । २ । १५१ ॥ अतिवृद्धः । इत्युणादिकोषः ॥ जित्वरे, त्रि । इति मेदिनी । ने, ८ ॥

जिनयोनिः, पु, मृगः । इति शब्दरत्नावली ॥
जिनसद्म, [न्] क्ली (जिनानां सद्म गृहम् ।) जिनगृहम् । तत्पर्य्यायः । चैत्यः २ विहारः ३ । इति हेमचन्द्रः । ४ । ६० ॥
जिनेन्द्रः, पु, (जिनानां इन्द्रः ।) बुद्धः । इति हलायुधः ॥
जिम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, जिमित्वा जिन्त्वा । इति दुर्गादासः ॥
जिरि, र न हिंसायाम् । इति कविकल्पद्रुमः ॥ (स्वा-परं-सकं-सेट् ।) रेफोपधः । र, वैदिकः । न, जिरिणोति । इति दुर्गादासः ॥
जिव, इ प्रीणने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) [illegible] । इ, जिन्वते । जिन्वति लोकः पितरम् । इति दुर्गादासः ॥
जिवाजिवः, पु, (जीवञ्जीवः पृषोदरादित्वात् साधुः ।) जीवञ्जीवपक्षी । इति शब्दरत्नावली ॥
जिव्रिः, पु, (जीर्य्यत्यनेनेति । जृष वयोहानौ+“जीर्य्यतेः क्रिन् रश्च वः ।” उणां ५ । ४६ । इति क्रिन् । इरादिकार्य्ये रेफस्य च वः । बाहुलकात् ध्वनि चेति न दीर्घः ।) समयः । पक्षी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (जीर्णे, त्रि । यथा, ऋग्वेदे । १ । ७१ । ५ । [भरन्त ।”])
“वि त्वा नरः पुरुत्रा सपर्य्यन् पितुर्न जिव्रेर्वि वेदो
जिष, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वा वेट् ।) उ, जेषित्वा जिष्ट्वा । इति दुर्गादासः ॥
जिष्णुः, पु (जयतीति । जि जये+“ग्लाजिस्थश्च ग्स्नुः ।” ३ । २ । १३९ । इति ग्स्नुः ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥ (यथा, महाभारते । ५ । ७० । १३ ।
“विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते ।
शाश्वतत्वादनन्तश्च गोविन्दो वेदनाद्गवाम् ॥”)
इन्द्रः । (यथा, अथर्व्ववेदे । ११ । ६ । १८ ।
“धाता जिष्णुश्चामित्रा जयतामिन्द्रमेदिनौ ॥”)
अर्ज्जुनः । (यथा, महाभारते । ४ । ४२ । २१ ।
“अहं दुरापो दुर्द्धर्षो दमनः पाकशासनिः ।
तेन देवमनुष्येषु जिष्णुर्नामास्मि विश्रुतः ॥”
भौत्यस्य मनोः पुत्त्राणामन्यतमः । यथा, हरिवंशे । ७ । ८८ ।
‘तरङ्गभीरुर्व्वप्रश्च तरस्वानुग्र एव च ।
अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सबलश्चैव भौत्यस्यैते मनोः सुताः ॥’)
जेतरि त्रि । इति मेदिनी । णे, १३ ॥ (यथा, रघुः । ४ । ८५ ।
“इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतम् ।
रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु ॥”)
जिह्मं, क्ली, (जहातीति । हा+‘हाते सन्वद्वालोपश्च ।” उणां । १ । १४० । इति मन् ।) तगर[illegible] । इति मेदिनी । [illegible] १३ ॥
जिह्मः, त्रि, (जहाति । [illegible] मार्गमिति । हा+“हाते, सन्वद्वालोपश्च ।” उणां । १ ।
१४० । इति मन् ।) कुटिलः । (यथा, महाभारते । १ । १६२ । १८ ।
“सक्रोधामर्षजिह्मभ्रूकषायीकृतलोचनः ॥”)
मन्दः । इति मेदिनी । मे, १३ ॥
जिह्मगः, पु, (जिह्मं कुटिलं वक्रमित्यर्थः यथा स्यात् तथा गच्छतीति । गम+डः ।) सर्पः । (यथा महाभारते । १ । ६ । १६ ।
“स लब्ध्वा दुर्लभां भार्य्यां पद्मकिञ्जल्कवर्च्चसम् ।
व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः ॥”
जिह्मं मन्दं गच्छतीति ।) मन्दगे, त्रि । इति मेदिनी । गे, २५ ॥
जिह्ममोहनः, पु (जिह्मं कुटिलं यथा तथा मुह्यतीति । मुह+“नन्दिग्रहीति ।” ३ । १ । १३४ । इति ल्युः । यद्वा, जिह्मस्य कुटिलस्य सर्पस्य मोहनश्चित्तमोहनः । भक्ष्यत्वात् ।) भेकः । इति शब्दरत्नावली ॥
जिह्मशल्यः, पु, (जिह्मं कुटिलं शल्यं यस्मात् ।) खदिरः । इति जटाधरः ॥
जिह्वं, क्ली, (जिह्म निपातनात् मस्य वत्वे साधुः ।) तगरमूलम् । इति रत्नमाला ॥
जिह्वः, पु स्त्री, (हूयते आहूयते अनेनेति । ह्वे+बाहुलकात् ड्प्रत्ययेन द्वित्वादौ वेन साधुः ।) जिह्वा । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । ११२ । ६५ ।
“द्विसहस्रेण जिह्वेन वासुकिः कथयिष्यति ॥”)
जिह्वलः, त्रि, (जिह्वेन जिह्वया लाति आदत्ते परद्रव्याणीति । जिह्व+ला+कः ।) लुब्धः । लोलुपः । यथा, श्राद्धतत्त्वे ।
“श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः ।
पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः ॥”
जिह्वा स्त्री, (जयति रसमनयेति । जि+“शेवायह्वजिह्वाग्रीवाप्वामीवाः ।” उणां । १ । १५४ । इति वन् प्रत्ययेन हुगागमे निपातनात् साधु ।) रसज्ञानेन्द्रियम् । जिव् इति भाषा । तत्पर्य्यायः । रसज्ञा २ रसना ३ । इत्यमरः । २ । ६ । ९१ ॥ रसना ४ रसनम् ५ जिह्वः ६ । इति तट्टीका ॥ रसाल ७ सुधास्रवा ८ रसिका ९ रसाङ्गा १० । इति शब्दरत्नावली ॥ रसा ११ लोला १२ रसाला १३ रसना १४ ललना १५ । इति जटाधरः ॥ (यथा, मुकुन्दमालायाम् । २६ ।
“जिह्वे ! कीर्त्तय केशवं मुररिपुं चेतो ! भज श्रीधरं
पाणिद्वन्द्व ! समर्च्चयाच्युतकथाः श्रोत्रद्वय ! त्वं शृणु ।
कृष्णं लोकय लोचनद्वय ! हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण ! मुकुन्दपादतुलसीं मूर्द्धन्नमाधोक्षजम् ॥”)
तस्याः परीक्षा यथा, भावप्रकाशे ।
“श्यावचक्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्ताल्लिप्तार्द्रा धवला कफात् ।
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके ।
सैव दोष[illegible]धिक्ये दोष[illegible] ॥”
(यथास्या [illegible] ।

"उदरे पच्यमानानामाध्मानाद्रक्तसारवत् ।
कफशोणितमांसानां सारो जिह्वा प्रजायते ॥"
इति सुश्रुते शारीरस्थाने ४र्थे ऽध्याये ॥)

जिह्वानिर्लेखन, क्ली, (जिह्वाया निर्लेखनं संस्कारः ।) जिह्वामार्ज्जनम् । जिवछोँचडान इति भाषा । जिह्वामार्ज्जनद्रव्यम् । जिवछोँचडा चैयाडि इति भाषा । तत् दशाङ्गुलं कोमलं स्निग्धं स्वर्णरूप्यताम्रलोहनिर्म्मितं जिह्वामलापकर्षणे प्रशस्तम् । तस्य गुणाः । वक्त्रवैरस्यजिह्वाश्रितमलनाशित्वम् । आरोग्यरुचिकारित्वञ्च । इति राजवल्लभः ॥
("जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च ।
तन्मलापहरं शस्तं मृद्वग्रश्लक्ष्णं दशाङ्गुलम् ।
मुखवैरस्यदौर्गन्ध्य-शोफजाड्यहरं सुखम् ॥"
अस्याविधिना रोगजनकता यथा —
"जिह्वातिलेखनात्काष्ठभक्षणादभिघाततः ।
कुपितो हनुमूलस्थः स्रंसयित्वानिलो हनू ॥
करोति विवृतास्यत्वमथवा संवृतास्यताम् ।
हनुग्रहः स तेन स्यात् कृच्छ्राच्चर्व्वणभाषणम् ॥"
इति वाभटे निदानस्थाने पञ्चदशेऽध्याये ॥)

जिह्वाप, पुं, (जिह्वया पिबतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कुक्कुरः । व्याघ्रः । विडालः । भल्लूकः । इति शब्दरत्नावली ॥ चित्रकव्याघ्रः । इति विश्वः ॥

जिह्वामल, क्ली, (जिह्वाया मलम् ।) जिह्वास्थितमलम् । तत्पर्य्यायः । कुलुकम् २ । इति त्रिकाण्डशेषः ॥

जिह्वामूलीय, पुं, (जिह्वामूले भवः । "जिह्वामूलाङ्गुलेश्छः ।" ४ । ३ । ६२ । इति छः ।) वज्राकृतिवर्णः । बोधार्थेनास्य ᳵ इति संज्ञा कृता । स तु कखपरे विसर्गस्थाने भवति । यथा हरि × काम्यः । अस्योच्चारणं विसर्गवत् । इति व्याकरणम् ॥
"अघोषविरेकयुक्तायामात्रवज्रयरूपकः ।
जिह्वामूलीय इत्येव गजकुम्भोपमोऽपरः ॥"
इति सुपद्मव्याकरणटीका ॥

जिह्वारदः, पुं, (जिह्वा एव रदो दन्त इव यस्य ।) पक्षी । इति हारावली । ५६ ॥

जिह्वारोगः, पुं, (जिह्वाया रोगः ।) मुखरोगान्तर्गतरसनाजातव्याधिः । तत्र जिह्वारोगाणां निदानमाह सश्रुतः । प्राह ।
"वातेन पित्तेन कफेन चापि कफेन चोऽलाससञ्ज्ञकः ।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः ॥"
तत्र वातजस्य लक्षणमाह ।
जिह्वानिलेनस्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा ।
स्फुटिता मनाग्विदीर्णा । प्रसुप्ता रसानभिज्ञतया सुप्तेव । शाकच्छदनप्रकाशा शाकोमलभूमिजो द्रुमः तद्वत् कण्टकचिता ॥ * ॥
पित्तजमाह ।
पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपि कण्टकैश्च ।

अयं रोगो लोके जलीति ख्यातः । जाडीति वङ्गभाषा ॥ * ॥ कफजमाह ।
कफेन गुर्व्वी बहला चिता च
मांसोच्छ्रयैः शाल्मलिकण्टकाभैः ।
बहला स्थूला । मांसोच्छ्रयैः मांसजकण्टकैः ॥ * ॥
अलासमाह ।
जिह्वातले यः श्वयथुः प्रगाढः
सोऽलाससञ्ज्ञः कफरक्तमूर्त्तिः ।
जिह्वां स तु स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम् ॥
प्रगाढः प्रकर्षेण गाढो दारुणः । कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः । जिह्वास्तम्भेन वायुरप्यत्र बोद्धव्यः । भृशं पाकेन मिलति । अतस्त्रिदोषजोऽयम् । असाध्यलक्षणश्च ॥ * ॥ उपजिह्विकामाह ।
जिह्वाग्ररूपः श्वयथुर्हि जिह्वा-
मुन्नाम्य जातः कफरक्तयोनिः ।
प्रसेककण्डूपरिदाहयुक्ता
प्रकथ्यतेऽसावुपजिह्विकेति ॥
जिह्वाग्ररूपं जिह्वायामग्रमिति ॥" * ॥
अथ जिह्वारोगाणां चिकित्सा ।
"जिह्वागतविकाराणां शस्तं शोणितमोक्षणम् ।
गुडूचीपिप्पलीनिम्बकवलं कटुभिः सह ॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितम् ।
कण्टकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा खलु ॥
पित्तजे परिघृष्टे तु निःसृते दुष्टशोणिते ।
प्रतिसारणगण्डूषनस्यञ्च मधुरं हितम् ॥
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये ।
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे ॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत् ।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत् ॥
ओषधाराभयावह्निचूर्णमेतत् प्रघर्षणम् ।
उपजिह्वाप्रशान्त्यर्थमेभिस्तैलञ्च पाचयेत् ॥"
इति भावप्रकाशः ॥

जिह्वालिट् [ह्] पुं, (जिह्वया लेढीति । लिह + क्विप् ।) कुक्कुरः । इति भूरिप्रयोगः ॥

जिह्वाशल्यः, पुं, (जिह्वायाः शल्यमिव । अभिधानात् पुंस्त्वम् ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥

जिह्वास्वाद, पुं, (जिह्वया स्वाद आस्वादनम् ।) लेहनम् । इति हेमचन्द्रः । ३ । ८८ ॥

जीन, त्रि, (जिनाति जीर्य्यतीति । ज्या वयोहानौ + "गत्यर्थेति ।" क्तः । ग्रहिज्येति सम्प्रसारणम् । हल इति दीर्घः । ल्वादिभ्य इति नत्वम् ।) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ (चर्म्मपुटे । यथा, मनुः । ११ । १३८ ।
"जीनकार्म्मुकवस्तावीन् पृथग् दद्यात् विशुद्धये ॥")

जीमूत, पुं, (जयति आकाशमिति । जि + "जेर्मूट्चोदात्तः ।" उणां ३।८१ । इति क्तः । महागमो धातोर्दीर्घश्च ।) पर्व्वतः । (यथा, मत्स्यपुराणे । १२० । ७५ ।
"जीमूतो द्राविणश्चैव मैनाकश्चन्द्रपर्व्वतः ।
आयतास्ते महाशैलाः समुद्रं दक्षिणं प्रति ॥") * ॥

जीवनं जलं मूतयति सावयतीति । पृषोदरादित्वात् साधुः । इति पुरुषोत्तमदेवः ।) मेघः । (यथा, महाभारते । ६ । १६ । ३१ ।
"राजानमन्वयुः पश्चात् जीमूता इव वार्षिकाः ॥")
मुस्ता । देवताडवृक्षः । इत्यमरः । ३ । ३ । ५८ ॥
इन्द्रः । भृतिकरः । घोषकलता । इति हेमचन्द्रः ॥ (यथा, चरके सूत्रस्थाने प्रथमेऽध्याये ।
"धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनम् ॥"
सूर्य्यः । यथा, महाभारते । ३ । ३ । सूर्य्यस्याष्टोत्तरशतनामकीर्त्तने । २२ ।
"वरुणः सागरोऽंशुश्च जीमूतो जीवनोऽरिहा ॥"
ऋषिविशेषः । यथा, महाभारते ५।१११।२४ ।
"जीमूतस्यात्र विपुलैर्महातमसि महात्मनः ॥"
मल्लविशेषः । भीमसेनस्तु विराटगृहवासकाले नियुद्धेनैनं निहतवान् । यथा, महाभारते । ४ ।१२ । ७७ ।
"ततस्तु हतसङ्काशं भीमो मल्लं समाह्वयत् ।
जीमूतं नाम तं तत्र मल्लं विख्यातविक्रमम् ॥"
स्वनामख्यातो दशार्हस्य पौत्रः । यथा, हरिवंशे । ३७ । ७५ ।-
"दशार्हस्य सुतो व्योमा व्योम्नो जीमूत
उच्यते ॥"
वपुष्मतः पुत्रः । स तु शाल्मलद्वीपस्य ईश्वरविशेषः । यथा ब्रह्माण्डे ३६ अध्याये ।
"शाल्मलस्येश्वराः सप्त सुतास्ते तु वपुष्मतः ।
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ॥"
अस्य वर्षस्तु एतन्नाम्नैव विख्यातः । यथा, तत्रैव,—
"जीमूतस्य च जीमूतो रोहितस्य च रोहितः ॥"
ऊनचत्वारिंशदक्षरवृत्तिविशेषः । तल्लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

जीमूतकूट, पुं, (जीमूतो मेघः कूटे शिखरे यस्य । अत्युन्नतत्वादेवास्य तथात्वम् ।) पर्व्वतः । इति हारावली । ५१ ॥

जीमूतमूल, क्ली, (जीमूतस्य मुस्ताया मूलमिव मूलमस्य ।) शटी । इति रत्नमाला ॥

जीमूतवाहन, पुं, (जीमूतो मेघो वाहनं यस्य ।) इन्द्रः । मेघवाहन इत्यमरदर्शनात् । धर्म्मरत्ननामकस्मृतिसंग्रहकर्त्ता ॥ (यदुक्तं दायभागे ।
"बहुविधपूर्व्वनिबन्धृव्याख्यासङ्घातसम्प्रयस्येतत् ।
जीमूतवाहनकृत प्रकरणमवगन्तव्यं धीयम् ॥
परिभद्रकुलोद्भूत श्रीमान् जीमूतवाहनः ।
दायभागं चकारेमं विदुषां संशयच्छिदे ॥"
शालिवाहननृपस्य पुत्रः । आश्विनकृष्णाष्टम्यां पुत्रसौभाग्यकामाभिर्नारीभिरयं पूज्यः । एतद्विवरणं जिताष्टमीशब्दे द्रष्टव्यम् ॥ जीमूतकेतोर्नृपस्य पुत्रः । यथा, कथासरित्सागरे । २२ । २३ ।
"अथ तस्याचिरादेव राज्ञः समुदपद्यत ।
जीमूतवाहनं तं च नाम्ना स विदधे पिता ॥")

जीमूतवाही, [न्] पुं, (जीमूतं वहति जीमूताकारेणाकाशे परिणामयतीत्यर्थः । वह +

स्नेहाजीर्णे रोगिणा सुन्नचूर्णं
ज्वाणां सक्तो हन्ति वैरेचकानाम् ।
माषो भूयाम्निसस्तेन पाक-
स्त्रिषा मुञ्चत्यम्लतां चूर्णयोगात् ॥
उष्णेन शीत शिशिरेण चोष्णा-
मम्लेन च क्षारगणो गुणाय ।
स्वेदेन तीक्ष्णा वमनातियोगे
सिता हिता स्यादिति काशिराज: ॥
ताम्बूलमध्यस्थितचूर्णकेन
सदह्यते यस्य मुख नरस्य ।
तैलेन वा केवलकाञ्जिकेन
सुखाय गण्डूषमसौ विदध्यात् ॥
शीतोदक नस्यजरोगहारि
नारीपयश्चाञ्जनरुग्विनाशि ।
एलोदक धूमगदे प्रशस्त
धात्रीप्रलेपोऽतिविरेचनेषु ॥
स्मरस्य मांस श्रमजेऽनुकूलं
प्रवाससुप्तिः सुरतावसाने ।
क्षीरेक्षणासैन्धवसाधितन्तु
च्छागाण्डसुक्त सुरतातिरेके ॥
श्रवणपूरणजे तिलतैलत
श्रवणपूरणमेव सुख विदुः ।
कवलजेषु गदेष्वथ कारयेत्
कनलमार्द्रकजद्रवण पुन ॥”
इति जीर्णमञ्जरी ॥

जीर्णज्वर', पु (जीर्ण पुरातनो ज्वर ।) पुरातनज्वररोग' । अथ जीर्णज्वराधिकार । तत्र जीर्णज्वरस्य सामान्यलक्षणमाह ।
“यो द्वादशभ्यो दिवसेभ्य ऊर्द्ध
दोषत्रयस्त्रिगुणेभ्य ऊर्द्धम् ।
नृणा तनौ तिष्ठति मन्दवेगो
भिषग्भिरुक्तो ज्वर एष जीर्ण' ॥”* ॥
जीर्णज्वरस्यैव विशेष वातवलासकमाह ।
“नित्य मन्दज्वरो रूक्ष शून कृच्छ्रेण सिध्यति।
स्तब्धाङ्ग श्लेष्मभूयिष्ठो नरो वातवलासकी ॥”
वातवलासकाख्यो ज्वरोऽस्यास्ति इति वातवलासकी । नर ईदृगभवेत् । शून, शोथी । श्लेष्मभूयिष्ठो वहुलश्लेष्मक ॥ * ॥
अथ जीर्णज्वरस्य सामान्यचिकित्सा ।
“जीर्णज्वरी नर' कुर्य्यान्नोपवास कदाचन ।
लङ्घनात स भवेत् क्षीणो ज्वरस्तु स्याद्बली यत.॥
पुराणेऽपि ज्वरे दोषा यद्यपथ्ये पुनस्तथा ।
लङ्घयेत्तत्र त पश्चात पूर्व्ववत् कारयेत् क्रियाम् ॥”
तथा पूर्व्ववत् ॥ * ॥
“निदिग्धिकानागरकामृतताना
क्वाथ पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्द्दितपीनसेषु ॥
हन्त्यूर्द्धजानय प्राय: साय तेनोपयुज्यते ॥”
इति त्रिकण्टककाथ ॥ * ॥
‘पिप्पलीचूर्णसयुक्त क्वाथश्छिन्नोद्भवोद्भव ।
जीर्णज्वरकफध्वसी पञ्चमूलकृतोऽथवा ॥

अमृतताया. कषायस्तु शीतलीकृतमीरितम् ।
मधुपादयुत पीतं जीर्णज्वरहरं परम् ॥
पिप्पलीमधुसमिश्रं गुडूचीस्वरसं पिबेत् ।
जीर्णज्वरकफप्लीहकासारोचकनाशनम् ॥
जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली ।
कासाजीर्णारुचिश्वासहृत्पाण्डुज्वररोगनुत् ॥
द्विगुण: पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मत: ।
पिप्पली मधुसंयुक्ता मेद'कफविनाशिनी ॥
श्वासकासज्वरहरी पाण्डुप्लीहोदरापहा ।
आमल चित्रक पथ्या पिप्पली सैन्धव तथा ॥
चूर्णितोऽय गणो ज्ञेय सर्व्वज्वरहर' पर. ।
भेदी रुचिकर: श्लेष्महन्ता दीपनपाचन: ॥”
इति आमलक्यादिचूर्णम् ॥ * ॥
“द्राक्षामृता शटी शृङ्गी मुस्तकं रक्तचन्दनम् ।
नागरं कटुका पाठा भूनिम्ब' सदुरालभ: ॥
उशीर धान्यकं पद्म वालक कण्टकारिका ।
पुष्कर पिचुमर्द्दश्च दशाष्टाङ्गमिद स्मृतम् ॥
जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम् ॥”
इति द्राक्षाद्यष्टादशाङ्गकाथ. ॥ * ॥
“त्रिवृद्धया पञ्चवृद्धया वा सप्तवृद्धयाथवा कणा' ।
गव्यक्षीरेण सपिष्टा पिबेद्दश दिनानि हि ॥
तथैव ह्रासयेदेता एव विंशतिवासरान् ।
पिबता ज्वरशान्ति. स्यात् पाण्डुरोगश्च शाम्यति॥
कास श्वासोऽग्निमान्द्यञ्च कफाधिक्यञ्च नश्यति।
त्रयादिवृद्धिर्यथाकफवृद्धि'। दुग्धवृद्धिर्यथाग्निवृद्धि ।
इति वर्द्धमानपिप्पली ॥ * ॥
“वातश्लेष्मज्वरोक्ता स्यात् क्रिया वातवलासके ।
जीर्णे ज्वरे कफे क्षीणे दाहतृष्णासमन्विते ॥
पय. पीयूषसदृश तस्मिन् तु विषोपमम् ।
चन्दनाद्य हित तैल शीर्षाधिकारकीर्त्तितम् ॥
तथा नारायणन्तैल जीर्णज्वरहर परम् ॥”
इति जीर्णज्वराधिकार: । इति भावप्रकाश' ॥

जीर्णदारु , पु, (जीर्णमिव दारु यस्य।) वृद्धदारकभेद' । विधारा विशेष इति लोके । तत्पर्य्याय' । जीर्णफञ्जी २ सुपुष्पिका ३ अजरा ४ सूक्ष्मपर्णी ५ । अस्य गुणा । गौल्यत्वम् । पिच्छिलत्वम् । कफवातकासामदोषनाशित्वम् । वल्यत्वञ्च । इति राजनिर्घण्ट ॥

जीर्णपत्रिका, स्त्री, (जीर्णानि पत्राण्यस्या: । कप् ततष्टापि अत इत्वम् ।) वशपत्रीतृणम् । इति राजनिर्घण्ट' ॥

जीर्णपर्ण', पुं, (जीर्णानि पर्णानि यस्य ।) कदम्ब । इति राजनिर्घण्ट' ॥ (जीर्ण पर्ण पत्रम् ।) पुरातनपत्र, क्ली ॥ (जीर्ण पर्ण ताम्बूल इति विग्रहे पुरातनताम्बूले च । यदुक्त वैद्यके ।
“पर्णमूले भवेद्व्याधि' पर्णाग्रे पापसम्भव. ।
जीर्णपर्ण हरेदायु: शिराबुद्धिप्रणाशिनी ॥”)

जीर्णबुध्न , पु, (जीर्णोऽद्दढो बुध्नो मूलमस्य ।) पट्टिकालोध्र । इति राजनिर्घण्ट ॥

जीर्णबुध्नक, क्ली, (जीर्णो बुध्नो मूल यस्य । तत. कप् ।) परिपेलम् । इति राजनिर्घण्ट ॥ केओटसुता इति भाषा ॥

जीर्णवज्रं, क्ली, (जीर्ण वज्रं हीरकमिव ।) वैक्रान्तमणि. । इति राजनिर्घण्ट ॥

जीर्णवस्त्रं, क्ली, (जीर्ण पुरातन वस्त्रम् ।) पुरातनवस्त्रम् । तत्पर्य्याय. । पटच्चरम् २ । इत्यमर. । २ । ६ । ११५ ॥

जीर्णा, स्त्री, (जीर्य्यत्यनयेति । ज + करणे क्त. ।) स्थूलजीरक. । इति राजनिर्घण्ट' ॥

जीर्णि', स्त्री, (जॄ + क्तिन् ।) ज्यानि: । जीर्णता । इत्यमर: । ३ । २ । ६ ॥

जीर्णोद्धार., पु, (जीर्णानां भग्नमन्दिरादीनां उद्धार: सस्कार ।) भग्नमन्दिरादे' सस्कार' । यथा विष्णुधर्म्मोत्तरतृतीयकाण्डे ।
“यस्य राज्ञस्तु विषये देववेश्म विशीर्य्यते ।
तस्य सीदति तद्राष्ट्रं देववेश्म यथा तथा ॥
कृत्वा शीर्णस्य सस्कार तथा देवप्रवेशनि ।
द्विगुण फलमाप्नोति नात्र कार्य्या विचारणा ॥”
विष्णुरहस्ये ।
“पतितस्य च य: कर्त्ता पतमानस्य रक्षिता ।
विष्णोरायतनस्येह स नरो विष्णुलोकभाक् ॥”
वह्निपुराणे ।
“पतित पतमानन्तु तथार्द्धस्फुटित नर: ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥”
देवीपुराणे ।
“मूलाच्छतगुण पुण्य प्राप्नुयाज्जीर्णकारक' ।
तस्मात् सर्व्वप्रयत्नेन जीर्णस्योद्धारमाचरेत् ॥”
हयशीर्षपञ्चरात्रे ।
“वापीकूपतडागानां सुरधाम्नां तथानघ ! ।
प्रतिमानां सभानाञ्च सस्कर्त्ता यो नरो भुवि ॥
पुण्य शतगुण तस्य भवेन्मूलाच्च सशय: ।
प्रतिष्ठाया विधि' कार्य्यस्तथा मन्दिरनिर्म्मिते ॥
प्राय. श्रीहयशीर्षोक्तिरनुसारेण वैष्णवै: ।
देवालयप्रतिष्ठा च ख्याता तल्लिखनेन किम् ॥
श्रीमूर्त्तिस्थापनेनैव सपूर्णा सा विशेषत: ।
देवगृह देवताया' प्रतिष्ठाविधिना सदा ॥
सस्कार्य्यं मनुजानान्तु समुदायोक्तकर्म्मणा ॥”
इति श्रीहरिभक्तिविलासे २० विलास' ॥

जीर्वि', पु, (जीर्य्यति छिन्नीभवत्यनेनेति । जॄ + “जॄशॄस्तॄजागृभ्य' क्विन् ।” उणा ४ । ५४ । इति करणे क्विन् ।) कुठार' । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥ (जीर्य्यतीति । कर्त्तरि क्विन् ।) शकटम् । काय' । पशु' । इति सक्षिप्तसारे उणादिवृत्ति ॥

जीव, ऋ प्राणे । इति कविकल्पद्रुम. ॥ (भ्वा-पर-अक-सेट् ।) ऋ, अजीजिवत् अजिजीवत । प्राण' प्राणधारणम् । जीवति लोक । इति दुर्गादास ॥

जीव , पु, (जीवनमिति । जीव + “हलश्च ।” ३ । ३ । १२१ । इति घञ् ।) असुधारणम् । इत्यमर । २ । ८ । ११६ । (यथा, हरिवंशे । १७४ । ७२ ।
“त्वमेव चिन्तय सखि । नोपार प्रतिभाति मे ।
स्वकार्य्ये सुत्यते लोको यथा जीव सभाम्यहम् ॥”)

(जीवतीति । जीव प्राणे + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) प्राणी । (यथा, भागवते । १ । १३ । ४४ ।
"अहस्तानि सहस्तानामपदानि चतुष्पदाम् । फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥")
वृत्तिः । वृक्षविशेषः । (स एव महानिम्बवृक्षः । तत्पर्य्याया यथा,—
"महानिम्बः स्मृतोऽद्रेका रम्यको विषमुष्टिकः । केशमुष्टिर्निम्बकश्च कार्म्मुको जीव इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) वृहस्पतिः । इति मेदिनी । वे, ८ ॥ (यथा, काशीखण्डे । १७ । ४४ ।
"अस्माल्लिङ्गार्च्चनान्नित्यं जीवभूतोऽसि मे यतः । अतो जीव इति ख्यातिं त्रिषु लोकेषु यास्यसि ॥")
कर्णः । इति धरणी ॥ क्षेत्रज्ञः । तत्पर्य्यायः । आत्मा २ पुरुषः ३ पुद्गलः ४ अन्तर्यामी ५ ईश्वरः ६ । इति त्रिकाण्डशेषः । (यथा, भगवद्गीतायाम् ।१३।२ टीकायां श्रीधरस्वामिपादाः । "तञ्च क्षेत्रज्ञं संसारिणं जीवं वस्तुतः सर्व्वक्षेत्रेष्वनुगतं मामेव विद्धि ॥") तस्य स्वरूपं यथा,—
"कर्म्मणा जीवरूपस्य सन्ततं तत्फलप्रदः । कर्म्मरूपश्च भगवान् श्रीकृष्णः प्रकृतेः परः ॥ सोऽपि तद्धेतुरूपश्च कर्म्म तेन भवेत् सति । जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एव च ॥ आत्मनः प्रतिविम्बश्च देही जीवः स एव च । प्राणदेहादिभृद्देही स जीवः परिकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
(तथाच भागवते । १२ । १८४ । १७ ।
"जीव पश्यामि वृक्षाणामचैतन्यं न विद्यते ॥")
वेदान्तमते घटावच्छिन्नाकाशवत् शरीरच्छिन्न-यावच्छिन्नं चैतन्यम् । केषाञ्चिन्मते दर्पणस्थमुखप्रतिविम्ववत् बुद्धिस्थचैतन्यप्रतिविम्बम् ॥ (जीवयति लोकानन्तर्य्याम्यात्मकरूपेणेति । जीव + णिच् + अच् । विष्णुः । यथा, महाभारते । १३ । १५६ । ९८ ।
"जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ॥"
जीवनविशिष्टे, त्रि । यथा, महाभारते । १२ । २८८ । २३ ।
"मृते वा त्वयि जीवे वा यदा भोक्ष्यति वै जन ॥")

जीव, पु क्ली, (जीव + भावे घञ् ।) जीवितम् । इति मेदिनी । वे, ६ ॥ (यथा, भागवते । १ । २ । १० ।
"जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्म्मभिः ॥"
"जीवस्य जीवनस्य च पुनर्द्धर्म्मानुष्ठानद्वारा कर्म्मभिर्य इह प्रसिद्धः स्वर्गादि सोऽर्थो न भवति ।" इति तट्टीकायां श्रीधरस्वामी ॥)

जीवकः, पु, (जीवयति आरोग्यं करोतीति । जीव + णिच् + ण्वुल् ।) अष्टवर्गान्तर्गतौषधविशेषः । तत्पर्य्यायः । कूर्च्चशीर्षः २ मधुरकः ३ शृङ्गः ४ ह्रस्वाङ्गः ५ । इत्यमरः । २ । ४ । १४२ ॥ जीवनः ६ दीर्घायुः ७ प्राणदः ८ जीव्यः ९ भृङ्गाह्वः १० प्रियः ११ चिरञ्जीवी १२ मधुरः १३ मङ्गल्यः १४ कूर्च्चशीर्षकः १५ वृद्धिदः १६ आयुष्मान् १७ जीवदः १८ बलदः १९ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । रक्तपित्तानिलार्त्तिक्षयदाहज्वरनाशित्वम् । शुक्रश्लेष्मविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ बलकारित्वम् । कार्श्यवातनाशित्वम् । तस्य रूपं यथा,—
"जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ । रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥ जीवकः कूर्च्चकाकारः ऋषभो वृषशृङ्गवत् । जीवकर्षभकस्थाने विदारीमूलम् ॥"
इति भावप्रकाशः ॥ * ॥
प्राणकः । पीतशालः । क्षपणः । इति मेदिनी । के, ९५ ॥

जीवकः, त्रि, (जीवति प्रभुसेवावृत्त्या इति । जीव + ण्वुल् ।) सेवकः । वृद्धाजीवी । जीवी ॥ (यथा, महाभारते । १३ । १४१ । ९६ ।
"त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः ॥") अहितुण्डिकः । इति मेदिनी । के, ९५ ॥

जीवजीव, पु, (जीवेन भक्ष्यक्षुद्रकीटादिना जीवतीति । जीव + अच् । यद्वा, जीवञ्जीव + पृषोदरात् साधुः ।) जीवञ्जीवपक्षी । इति शब्दरत्नावली ॥

जीवञ्जीवः, पु, (जीव जीवयति विषदोषं नाशयतीति । कृत्यल्युटो बहुलमिति बाहुलकात् खच् ।) चकोरपक्षी । इत्यमरः । २ । ५ । ३५ ॥ (अयं पक्षिविशेषः । विषादिविकृतस्यान्नादेः परीक्षार्थमस्यावश्यकत्वं भवति । यथा, वाभटे सूत्रस्थाने ७ अध्याये १६ ।
"हंसः प्रस्खलति ग्लानिर्जीवञ्जीवस्य जायते । चकोरस्याक्षिवैराग्यं क्रौञ्चस्य स्यान्मदोदयः ॥") वृक्षविशेषः । इति मेदिनी । वे, ५६ ॥

जीवत्तोका, स्त्री, (जीवत् तोकं अपत्यं यस्याः ।) जीवत्पुत्त्रिका । तत्पर्य्यायः । जीवत्सूः २ । इति हेमचन्द्रः ॥

जीवत्पतिः, स्त्री, (जीवन् पतिर्यस्याः ।) सधवा । इति हेमचन्द्रः ॥

जीवत्पितृकः, पु, (जीवन् पिता यस्य इति कप् ।) विद्यमानपितृकः । यथा,—
"अमावास्यां गयाश्राद्धं दक्षिणामुखभोजनम् । न जीवत्पितृकः कुर्य्यात् कृतेऽपि पितृहा भवेत् ॥"
इति तिथ्यादितत्त्वम् ॥

जीवथः, पु, (जीवत्यनेनेति । जीव + "शीङ्शपिरुगमिवञ्चिजीवि प्राणिभ्योऽथः ।" उणा ३ । ११३ । इति अथः ।) प्राणः । कूर्म्मः । मयूरः । मेघः । धार्म्मिके चिरायुषि च त्रि । इत्युणादिकोषः ॥

जीवदः, पु, (जीव जीवनं ददाति औषधादिसुप्रयोगेणेति । दा + कः ।) वैद्यः । विद्विट् । इति मेदिनी । दे, २९ ॥ जीवनदातरि, त्रि ॥

जीवदात्री, स्त्री, (जीव जीवनं ददातीति । दा + तृच् ङीप् च ।) ऋद्धिः । इति राजनिर्घण्टः ॥

जीवधनं, क्ली, (जीव एव धनमिति ।) गवादिकम् । इति त्रिकाण्डशेषः ॥

जीवनं, क्ली, (जीव्यतेऽनेनेति । जीव + करणे ल्युट् ।) वृत्तिः । (यथा, भागवते । १।१३।४४ ।
"अहस्तानि सहस्तानामपदानि चतुष्पदाम् । फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥"
"जीवनं जीविकेति ॥" तट्टीकायां श्रीधरस्वामी ॥) जलम् । (यथा, आर्य्यासप्तशत्याम् । ४६३ ।
"यमुनाया इव तस्याः सखि । मलिनं जीवनं मन्ये ॥"
जीव + भावे ल्युट् ।) प्राणधारणम् । इति मेदिनी । ने, ९९ ॥ (यथा, हठयोगप्रदीपिकायाम् । २ । ३ ।
"यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ॥"
"प्राणान् हन्ति जगत्प्राणो जीवनं हन्ति जीवनम् । किमाश्चर्य्यं धारभूमौ प्राणदा यमदूतिका ॥"
इत्युद्भटः ॥) हैयङ्गवीनम् । इति शब्दचन्द्रिका ॥ मज्जा । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २९ । ९५ ।
"जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी ॥")

जीवनः, पु, (जीवयति सेवनादिना । जीव + कर्त्तरि ल्युः ।) जीवकौषधम् । वातः । इति राजनिर्घण्टः ॥ क्षुद्रफलकवृक्षः । इति शब्दचन्द्रिका ॥ पुत्त्रः । इति हेमचन्द्रः ॥ (सर्व्वान् प्राणरूपेण जीवयतीति । जीव + णिच् + कर्त्तरि ल्युः । विष्णुः । यथा, महाभारते । १३।१४९।११२ ।
"वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः ॥"
शिवः । महाभारते । १३ । १७ । १२१ ।
"निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ॥")

जीवनक, क्ली, (जीव्यतेऽनेन । जीव + करणे ल्युट् । ततः स्वार्थे कन् ।) अन्नम् । इति हेमचन्द्रः ॥

जीवनयोनिः, स्त्री, (जीवनस्य योनिः कारणम् ।) यत्नविशेषः । स तु अतीन्द्रियः शरीरे प्राणसञ्चारकारणम् । इति भाषापरिच्छेदः ॥

जीवनहेतुः, पु, (जीवनस्य हेतुरुपायः ।) वर्त्तनोपायः । स च दशविधः । यथा,—
"विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः । वृत्तिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः ॥"
इति गारुडे २१४ अध्यायः ॥

जीवना, स्त्री, (जीवयतीति । जीव + णिच् + युच् ल्युः वा ततष्टाप् ।) मेदौषधम् । इति मेदिनी । ने, ९९ ॥

जीवनाघातं, क्ली, (जीवनं आहन्यतेऽनेनेति । आ + हन् + करणे घञ् ।) विषम् । इति शब्दचन्द्रिका ॥

जीवनावासः, पु, (आवसत्यस्मिन् । आ + वस + घञ् । जीवनं जल आवासोऽस्य ।) वरुणः । इति शब्दरत्नावली ॥ (वारिवासिनि, त्रि ॥)

जीवनिका, स्त्री, (जीवन + ठन् । टाप् । यद्वा, जीवनी + स्वल्पार्थे कन् ह्रस्वश्च ।) हरीतकी । इति राज-

निर्घण्टः ॥ (हरीतकीशब्दे विवरणविशेषोऽस्या ज्ञातव्यः ॥)

जीवनी, स्त्री, (जीवत्यनेनेति । जीव+करणे ल्युट् ङीप् च ।) जीवन्ती । (पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) काकोली । डोडी । मेदा । महामेदा । इति राजनिर्घण्टः ॥ यूथी । इति शब्दचन्द्रिका ॥

जीवनीय, क्ली, (जीव्यतेऽनेन अस्माद्वा । जीव+करणे अपादाने वा अनीयर् ।) जलम् । इति हेमचन्द्रः ॥ (जीवनप्रदे, त्रि । यथा सुश्रुते । १ । ४५ ।
"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम् ।
जीवनीयं यथा वातपित्तघ्नं परमं स्मृतम् ॥")

जीवनीयगण, पु, (जीवनीयानामोषधीनां गणः ।) औषधविशेषः । यथा वैद्यकपरिभाषायाम् ।
"अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकन्तथा ।
जीवनीयगणः प्रोक्तो जीवनस्तु पुनस्तथा ॥"
("जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च ।
ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः ॥"
इति च वाभटे सूत्रस्थाने पञ्चदशेऽध्याये ॥)

जीवनीया, स्त्री, (जीवनीय+टाप् ।) जीवन्ती । इत्यमरः । २ । ४ । १४२ ॥

जीवनेत्री, स्त्री, (जीवं नयतीति । जीव+नी+तृच् +ङीप् च ।) सैंहली । इति राजनिर्घण्टः ॥

जीवनौषध, क्ली, (जीवनस्य औषधं उपायविशेषः ।) येन म्रियमाणो जीवति तदौषधम् । जीवरक्षाकारि । जीवनोपायः । तत्पर्य्यायः । जीवातुः २ । इत्यमरः । २ । ६ । १२० ॥

जीवन्त, पु, (जीवयति जीव्यतेऽनेन वा । जीव+"रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणां । ३ । १२७ । इति झच् ।) औषधम् । प्राणः । आयुर्विशिष्टे त्रि । इत्युणादिकोषः ॥ जीवशाकः । इति राजनिर्घण्टः ॥

जीवन्तिक, पु, (जीवान्तक । पृषोदरात् साधुः ।) जीवान्तकः । इत्यमरटीकासारसुन्दरी ॥

जीवन्तिका स्त्री, (जीवयतीति । जीव+झच्+कन् टाप् च । कापि अत इत्वम् ।) वन्दा । शमी परिजातवृक्षः । गुडूची । जीवाख्यशाकः । इति मेदिनी । के, १६० ॥ जीवन्ती हरीतकी । इति राजनिर्घण्टः ॥

जीवन्ती, स्त्री, (जीवन्त+ङीप् ।) लताविशेषः । जीवइ इति जीयाती इति च भाषा । तत्पर्य्यायः । जीवनी २ जीवनीया ३ जीवा ४ मधुः ५ । इत्यमरः । २ । ४ । १४२ ॥ जीवना ६ मधुस्रवा ७ स्रवा ८ । इति तट्टीका ॥ पयस्विनी ९ जीया १० जीवदा ११ जीवदात्री १२ शाकश्रेष्ठा १३ जीवभद्रा १४ भद्रा १५ मङ्गल्या १६ क्षुद्रजीवा १७ यशस्या १८ शृङ्गाटी १९ जीवदृष्टा २० काञ्जिका २१ शशशिम्बिका २२ नुपिङ्गला २३ । इति राजनिर्घण्टः ॥ मधुश्वासा २४ जीवश्रेया २५ सुखङ्करी २६ मृगराटिका २७ जीवपत्नी २८ जीवपुष्पा २९ । इति केचित् ॥ (यथा,—
"वरा शाकेषु जीवन्ती सर्षपास्त्ववराः परम् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)
अस्या गुणाः । मधुरत्वम् । शीतत्वम् । रक्तपित्तवायुक्षयदाहज्वरनाशित्वम् । कफवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ स्वादुत्वम् । स्निग्धत्वम् । त्रिदोषनाशित्वम् । रसायनत्वम् । बलकारित्वम् । चक्षुर्हितत्वम् । ग्राहित्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥ श्वासकासधातुक्षयनाशित्वम् । स्वरकारित्वञ्च । सुराष्ट्रदेशजस्वर्णवर्णहरीतकी । सा स्नेहपाके प्रशस्ता जीर्णरोगनाशिनी । इति राजवल्लभः ॥ (अस्या लक्षणं व्यवहारश्च यथा,—
"जीवन्ती स्वर्णवर्णिनी ॥"
"जीवन्ती सर्व्वरोगहृत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) शमी । गुडूची । (पर्य्याया यथा,—
"गुडूची मधुपर्णी स्यादमृतामृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासा वयस्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) वन्दा । इति मेदिनी । ते, ११२ ॥ डोडी । इति राजनिर्घण्टः ॥ (जीव इति शाकविशेषः । शर्कंरावन्मधुरपुष्पा लतति । अस्याः पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जीवन्मुक्त, त्रि, (जीवन्नेव मुक्तः आत्मज्ञानेन मायाबन्धरहितः ।) जीवद्दशायां मायाबन्धरहितः । (यथा, देवीभागवते । १ । १६ । ४८ ।
"जीवन्मुक्तः स राजर्षिर्ब्रह्मज्ञानमतिः शुचिः ।
तथ्यवक्तातिशान्तश्च योगी योगप्रियः सदा ॥")
तल्लक्षणं यथा । "स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्य्यसञ्चितकर्म्मसंशयविपर्य्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ।
'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥'
इत्यादिश्रुतेः ।
अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण आन्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्तत्पूर्व्वपूर्व्ववासनया क्रियमाणानि कर्म्माणि भुज्यमानानि ज्ञानाविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति । यथा इदमिन्द्रजालमिति ज्ञानवान् तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति । सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इव सप्राणोऽप्राण इव इत्यादिश्रुतेः । उक्तञ्च ।
'सुषुप्तवज्जाग्रति यो न पश्यति
द्वयञ्च पश्यन्नपि चाद्वयत्वतः ।
तथापि कुर्व्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः ॥' इति ।
अस्य ज्ञानात् पूर्व्वं विद्यमानानामेवाहारविहारादीनां अनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति । शुभाशुभयोरौदासीन्यं वा । तदुक्तम् ।
'बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे ॥
ब्रह्मवित्त्वं तथा मुक्ता स आत्मज्ञो न चेतरः' इति ।
तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्त्तन्ते । तदुक्तम् ।
'उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥' इति ।
किं बहुना अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्य्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते । न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते विमुक्तश्च विमुच्यते । इत्येवमादिश्रुतेः ।" इति वेदान्तसारः ॥

जीवपुत्त्रक, पु, (जीवः प्राणान् पुत्त्र इव । पुत्त्रवद्धर्षजनकत्वात् तथात्वम् । इवार्थे कन् ।) इङ्गुदीवृक्षः । इति शब्दरत्नावली ॥ वृक्षविशेषः । इत्यमरटीकायां रमानाथः ॥ जीयापुता इति भाषा ॥

जीवपुष्पा, स्त्री, (जीवयतीति । जीव+णिच्+अच् । जीवं प्राणदं पुष्पमस्याः ।) बृहज्जीवन्ती । इति राजनिर्घण्टः ॥

जीवप्रिया, स्त्री, (जीवानां प्राणिनां प्रिया हितकारित्वात् ।) हरीतकी । इति राजनिर्घण्टः ॥

जीवभद्रा, स्त्री, (जीवानां प्राणिनां भद्रं मङ्गलं यस्याः ।) जीवन्तीलता । ऋद्धिनामौषधम् । इति राजनिर्घण्टः ॥

जीवमन्दिर, क्ली, (जीवस्य आत्मनो मन्दिरं गृहमिव ।) शरीरम् । इति शब्दचन्द्रिका ॥

जीवला, स्त्री, (जीवं उदरस्थक्रिमिं लाति गृह्णाति नाशयतीति । ला+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) सैंहली । इति राजनिर्घण्टः ॥

जीववल्ली, स्त्री, (जीवयतीति जीवा प्राणदात्री । सा चासौ वल्ली चेति ।) क्षीरकाकोली । इति राजनिर्घण्टः ॥

जीवशाक', पु, (जीवो हितकरः शाकः। जीवाख्यः शाको वा।) मालवे प्रसिद्धशाकविशेषः। तत्पर्य्यायः। जीवन्तः २ रक्तनाल' ३ ताम्रपत्र' ४ प्रवाल. ५ शाकवीरः ६ सुमधुरः ७ मेषक' ८। अस्य गुणा.। सुमधुरत्वम्। हृद्यत्वम्। वस्तिशोधनत्वम्। दीपनत्वम्। पाचनत्वम्। वल्यत्वम्। वृष्यत्वम्। पित्तापहारकत्वञ्च। इति राजनिर्घण्टः॥

जीवशुक्ला, स्त्री, (जीवयतीति। जीव+णिच्+अच। जीवा हितकारी शुक्ला शुभ्रवर्णलता।) क्षीरकाकोली। इति राजनिर्घण्ट.॥

जीवश्रेष्ठा, स्त्री, (जीवाय जीवनाय श्रेष्ठा।) ऋद्धिनामौषधम्। इति राजनिर्घण्टः॥

जीवसंज्ञः, पु, (जीव इति संज्ञा यस्य। यद्वा, जीवस्य संज्ञा आख्या संज्ञा यस्य।) कामवृद्धिवृक्ष। इति राजनिर्घण्टः॥

जीवसाधन, क्ली, (जीवस्य जीवनस्य साधनं कारणम्।) धान्यम्। इति राजनिर्घण्टः॥

जीवसूः, स्त्री, (जीवं प्राणिनं सूते इति। सू+क्विप्।) जीवत्तोका। जीवत्पुत्त्रिका। हेमचन्द्रः। ३। १६४॥ (यथा, महाभारते। १।२००।७।
"जीवद्धवीरसूर्भद्रे। बहुसौख्यगुणान्विता।
सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता॥")

जीवस्थानं, क्ली, (जीवस्य जीवनस्य स्थानम्।) मर्म्म। इति हलायुधः॥

जीवा, स्त्री, (जीवयतीति। जीव+णिच्+अच्। ततष्टाप्।) जीवन्तीवृक्षः। मौर्व्वी। (यथा, आर्य्यासप्तशत्याम्। ३। २१।
"निर्गुण इति मृत इति च द्वावेकार्थाभिधायिनौ विद्धि।
पश्य धनुर्गुणशून्यं निर्ज्जीवं तदिह शंसन्ति॥"
"निर्गता जीवा ज्या यस्मात् तत्। 'जीवा ज्या शिञ्जिनीत्यपि' इत्यभिधानात्।" इति तट्टीका॥) वचा। शिञ्जितम्। भूमिः। इति मेदिनी। वे, ८॥ जीवितम्। इति जटाधरः॥

जीवातुः, पु, क्ली, (जीवत्यनेनेति। जीव+"जीवेरातुः।" उणा।१।८०। इति करणे आतुः।) भक्तम्। जीवनौषधम्। (यथा, काशीखण्डे। २६। ६५।
"जीवजीवातुलतिका जन्मिजन्मनिवर्हिणी॥"
"जीवानां प्राणिनां जीवनौषधरूपा।" इति तट्टीका॥ *॥ (जीव+भावे आतु.।) जीवितम्। इति मेदिनी। ते, ११२॥ (यथा, उत्तररामचरिते २ अङ्के।
"रे हस्त दक्षिण। मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य गात्रमसि दुर्व्वहगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते॥")

जीवात्मा, [न्] पु, (जीवस्य जीवनस्य आत्मा अधिष्ठाता। यद्वा, जीवश्चासौ आत्मा चेति कर्म्मधारयः।) देही। तत्पर्य्यायः। पुनर्भवी २ जीवः ३ असुमान् ४ सत्त्वम् ५ देहभृत् ६ जन्तुः ७ जन्युः ८। इति हेमचन्द्रः॥ प्राणी ९ चेतन' १० जन्मी ११ शरीरी १२। इत्यमरः। १।४।३०॥ (यथा, भागवते। ८। २२। २५।
"यदा कदाचित् जीवात्मा संसरन्निजकर्म्मभिः।
नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत्॥"
"एवं चतुर्व्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे।
जीवात्मा नियतो नित्यं वसति स्वात्मदूतवान्॥
स देही कथ्यते पापपुण्यदःखसुखादिभिः।
बाध्यो बद्धश्च मनसा कृत्रिमैः कर्म्मबन्धनैः॥
कामक्रोधौ लोभमोहावहङ्कारश्च पञ्चमः।
दशेन्द्रियाणि बुद्धिश्च तस्य बन्धाय देहिनः॥
आप्नोति बन्धमज्ञानादात्मज्ञानाच्च मुच्यते॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम्॥)

जीवाधार, पु, (जीवस्य क्षेत्रज्ञस्य आधारः आश्रयस्थानम्।) क्षेत्रम्। इति हेमचन्द्र.॥

जीवान्तकः, पु, (जीव अन्तयति नाशयतीति। अन्त+णिच्+ण्वुल्।) जीवनार्थं पक्षिघातकः। तत्पर्य्यायः। शाकुनिकः २। इत्यमरः। २। १०। १४॥ जीवनाशके, त्रि॥

जीवाला, स्त्री, (जीवं उदरस्थक्रमिं आलाति गृह्णाति नाशयतीत्यर्थः। आ+ला+कः।) सैंहिली। इति राजनिर्घण्टः॥

जीविका, स्त्री, (जीव्यतेऽनयेति। जीव+"गुरोश्च हलः।" ३।३।१०३। इत्यः। ततः संज्ञायां कन् टापि अत इत्वञ्च।) जीवनोपायः। तत्पर्य्यायः। आजीवः २ वार्त्ता ३ वृत्तिः ४ वर्त्तनम् ५ जीवनम् ६। इत्यमरः। २। ९। १॥ जीवः ७। इति शब्दरत्नावली॥ (यथा, मनुः। ४। ११।
"अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम्॥")
जीवन्ती। इति मेदिनी। के, ६५॥

जीवित, क्ली, (जीव+भावे क्तः।) जीवनम्। इति हेमचन्द्र.॥ (यथा, उत्तररामचरिते ३ अङ्के।
"त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव, शान्तमथवा किमिहोत्तरेण॥" *॥
कर्त्तरि क्तः।) जीवनयुक्ते, त्रि॥ (यथा, रघुः। १२। ७५।
"कामं जीवति मे नाथ इति सा विजहौ शुचम्।
प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता॥")

जीवितकालः, पु, (जीवितस्य जीवनस्य कालः।) आयुः। इत्यमरः। २। ८। १२०॥

जीवितज्ञा, स्त्री, (जीवितस्य जीवनस्य ज्ञा ज्ञानं यस्याः। नाडीस्पन्देन हि जीवानां जीवनज्ञानादस्यास्तथात्वम्।) नाडी। इति राजनिर्घण्टः॥

जीवितेशः, पुं, (जीवितस्य ईशः प्रभुः।) प्राणनाथः। यमः। (यथा, रघु.। ११। २०।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा॥"
"जीवितेशस्य अन्तकस्य प्राणेश्वरस्य च वसतिं जगाम।" इति तट्टीकायां मल्लिनाथः॥) चन्द्रः। सूर्य्यः। इति शब्दरत्नावली॥ जीवातु'। इति हेमचन्द्रः॥ जीवितेश्वरे, त्रि। इति मेदिनी। शे, ३५॥

जीवी, [न्] पु, (जीवोऽस्त्यस्येति। जीव+इनिः।) प्राणी। यथा, ब्रह्मवैवर्त्ते गणेशखण्डे।
"जीविनां दारुणो रोगः कर्म्मभोगः शुभाशुभः।
भक्तो वैद्यस्तं निहन्ति हरिभक्तिरसायनात्॥"

जीव्या, स्त्री, (जीवाय जीवनाय हिता। जीव+यत्।) गोक्षुरदुग्धा। जीवन्ती। हरीतकी। इति राजनिर्घण्टः॥

जु, रहसि। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) रंहो वेगगतिः। जवति घोटकः। इति दुर्गादास.॥

जु, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) ङ, जवते। इति दुर्गादासः॥

जुग, इ त्यागे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) इ, कर्म्मणि जुङ्ग्यते। इति दुर्गादास.॥

जुगुप्सनं, क्ली, (गुप+स्वार्थे सन्+ल्युट्।) निन्दा। इति हेमचन्द्रः।२।१८५॥ (निन्दाशीले, त्रि। तच्च "अनुदात्तेतश्च हलादेः।" ३।२।१४९। इति युच्॥)

जुगुप्सा, स्त्री, (गुप निन्दायाम्+सन्+भावे अ-स्ततष्टाप्।) निन्दा। इत्यमरः। १। ६। १३॥ (यथा, साहित्यदर्पणे। ३। १७६।
"दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा॥")

जुङ्गः, पु, (जुगि+अच्।) वृद्धदारकः। इत्यमर'। २। ४। १३७॥ (यथास्य पर्य्यायाः।
"जुङ्गश्छगन्धाच्छगलान्त्र्यावेगी वृद्धदारकः॥"
इति वैद्यकरत्नमालायाम्॥)

जुङ्गकः, पुं, (जुङ्ग+स्वार्थे कन्।) वृद्धदारकवृक्षः। इति राजनिर्घण्टः॥

जुङ्गा, स्त्री, (जुङ्ग+टाप्।) जुङ्गः। इत्यमरटीकायां रमानाथः॥

जुङ्गित., त्रि, (जुग इ त्यागे+कर्म्मणि क्त.।) त्यक्तः। इति व्याकरणम्॥

जुटकं, क्ली, (जुट् संहतौ+"इगुपधेति।" ३। १। १३५। इति क'। ततः संज्ञायां कन्।) जटा। इति शब्दरत्नावली॥

जुटिका, स्त्री, (जुटक+टाप्। टापि अत इत्वञ्च।) शिखा। इति शब्दरत्नावली॥ झुँटी इति टिकी। इति च भाषा॥ (यथा, आह्निकतत्त्वधृतब्रह्मपुराणवचनम्।
"जुटिकाञ्च ततो बद्ध्वा ततः कर्म्म समारभेत्॥")

जुड, क नोदे। इति कविकल्पद्रुम.॥ (चुरां-पर-सकं-सेट्।) क, जोडयति। नोदः प्रेरणम्। इति दुर्गादासः॥

जुड, श गतौ। इति कविकल्पद्रुमः॥ (तुदां पर-सकं-सेट्।) श, जुडति जोडिता। इति दुर्गादास.॥

जुड, शि बन्धे। इति कविकल्पद्रुमः॥ (तुदां-पर-सक-सेट्।) शि, जुडति अजुडीत्। तारुण्यकुसुमतापमतान् प्रहसनेन जुडयती। जुजोड। इति दुर्गादासः॥

जुत, ऋ ङ दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-अक-सेट्।) ऋ, अजुजोतत्। ङ, जोतते। इति दुर्गादासः॥

जुन, श गतौ। इति कविकल्पद्रुमः॥ (तुदां-पर सक-सेट्।) श, जुनति जोनिता। इति दुर्गादासः॥

जुर्व, ई वधे। इति कविकल्पद्रुमः॥ (भ्वां-पर-सक-सेट्।) ह्रस्वी। जूः जुरौ जुरः। ई, जूर्णः। इति दुर्गादासः॥

जुल, क पिषि। इति कविकल्पद्रुमः॥ (चुरा-परं-सक-सेट्।) क, जोलयति। पिषि चूर्णीकरणे। इति दुर्गादासः॥

जुष, कि तर्के। क्षमौ। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-पर-सक-अक च-सेट्।) कि, जोषयति जोषत्यन्यगुणं सुधीः। तर्कयतीत्यर्थः। इति दुर्गादासः॥

जुष, श ङ ई शि सुदि। सेवे। इति कविकल्पद्रुमः॥ (तुदा-आत्म-अक-सक च-सेट्।) पञ्चमस्वरी। श ङ, जुषते। ई शि, जुष्टोऽस्ति। सुदि हर्षे। इति दुर्गादासः॥

जुष्कक, पु, (जुष्+कक्। तत संज्ञायां कन्।) यूषः। इति शब्दचन्द्रिका॥

जुष्ट, त्री, (जुष्यते स्म इति। जुष+क्त।) उच्छिष्टम्। सेविते, त्रि। इति मेदिनी। टे, १५॥ (यथा, भट्टिः। १।४।

"पुण्यो महाब्रह्मसमूहजुष्टः सन्तर्पणो नाकसदां वरेण्यः॥")

जुष्य, त्रि, (जुष्+कर्म्मणि क्यप्।) सेव्यः। इति मुग्धबोधम्॥

जुहुवान, पु, (हूयते इति। हु+कर्म्मणि कानच्।) कठिनहृदयः। अग्निः। वृक्षः। इति संक्षिप्तसारे उणादिवृत्तिः॥

जुहू, स्त्री, (जुहोत्यनया। इति हु+"हुवः श्लुवच्च।" उणां। २।६०। इति क्विप् निपातनात् दीर्घत्वं द्वित्वञ्च।) पलाशकाष्ठनिर्म्मितार्द्धचन्द्राकृतियज्ञपात्रम्। जुहोत्यनया जुहूः। इत्यमरभरतौ॥ (यथा, ऋग्वेदे। १।७६।५।

"अग्ने। मन्द्रया जुह्वा यजस्व॥")

जुहूराण, पु, (जुहूं राति इति। "कर्म्मण्यण्।" ३।२।१। इत्यण्।) अग्निः। अध्वर्युः। इति विश्वः॥ चन्द्रः। इत्युणादिकोषः॥

जुहूवान्, [त्] पु, (जुहूः यात्र होमक्रियोद्देश्यतयास्त्यस्मिन्। जुहू+मतुप् निपातनात् मस्य वत्वम्।) अग्निः। इति शब्दरत्नावली॥

जूः, स्त्री, (जु+"क्विब्वचिप्रच्छीति।" उणां। २। ५७। क्विप् दीर्घश्च।) आकाशः। सरस्वती। पिशाची। जवनम्। इति शब्दरत्नावली॥ त्वरागमनम्। गमनम्। इति मेदिनी। जे, २॥

जूटः, पुं, (जट सङ्घाते+अच् निपातनादूत्वागमे साधुः।) शिवजटा। इत्यमरटीकायां भरतः। जटा। इति शब्दरत्नावली॥

जूटक, क्ली, (जूट+स्वार्थे कन्।) केशबन्धः। जटा। इति भूरिप्रयोगः॥

जूतिः, स्त्री, (जु वेगे+"ऊतियूतिजूतीति।" ३।३।९७। इति क्तिन् निपातनात् दीर्घत्वञ्च।) वेगः। इत्यमरः।३।२।१६॥ (यथा, अथर्व्ववेदे। १३।२।१३।

"स समाप्नोति जूतिभिः॥")

जूतिका, स्त्री, (जूत्या कायतीति। कै+कः। तत टाप्।) कर्पूरभेदः। इति राजनिर्घण्टः॥

जूर, ङ य ई ज्यानौ। वधे। इति कविकल्पद्रुमः॥ (दिवां-आत्म-अकं-सक-च सेट्।) दीर्घी। ङ य, जूर्यते। ई, जूर्णः। ज्यानिर्गतवज्जुवयोभावः। इति दुर्गादासः॥

जूर्णाख्य., पु, (जूर+क्त। जूर्ण इति आख्या यस्य।) तृणविशेषः। उलू इति भाषा॥ तत्पर्य्यायः। सूच्यग्रः २ स्थूलकः ३ दर्भः ४ खरच्छदः ५। इति रत्नमाला॥ उलूकम् ६ उलपः ७। इति केचित्॥

जूर्णाह्वय, पु, (जूर्ण इति आह्वयः आख्या यस्य।) देवधान्यम्। इति हेमचन्द्रः॥

जूर्णिः, स्त्री, (ज्वर+"वीज्याज्वरिभ्यो निः।" उणां। ४।४८। इति निः। "ज्वरत्वरेति।"६। ४।२०। इत्यूट् च।) वेगः। इत्युणादिकोषः॥ आदित्यः। देहः। ब्रह्मा। ज्वरः। इति संक्षिप्तसारे उणादिवृत्तिः॥

जूर्त्तिः, स्त्री, (ज्वर+भावे क्तिन्। "ज्वरत्वरेत्यादिना" ऊट् च।) ज्वरः। इत्यमरः।३।२।३६॥

जूष, ष वधे। इति कविकल्पद्रुमः॥ (भ्वा-उभ-सक-सेट्।) यष्ठस्वरी। ष, जूषति जूषते। परस्मैपदीत्यन्ये। इति दुर्गादासः॥

जूष, क्ली, पु, (यूष+पृषोदरात् साधुः।) यूषम्। मुद्गादिक्वाथरसः। इति लिङ्गादिसंग्रहटीकायां भरतः॥

जूषण, क्ली, (जूष्यतेऽनेनेति। जूष+करणे ल्युट्।) वृक्षविशेषः। इति शब्दचन्द्रिका॥ धाइफुल इति भाषा॥

जॄ, न्यक्कारे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सक-अनिट्।) न्यक्कारस्तिरस्करणम्। जरति शत्रुं शूरः। इति दुर्गादासः॥

जृभ, इ ङ जृम्भे। इति कविकल्पद्रुमः॥ (भ्वां-आत्म-अकं-सेट्।) सप्तमस्वरी। इ, जृम्भ्यते। ङ, जृम्भते। इति दुर्गादासः॥

जृभ, ङ ई जृम्भे। गात्रविनामः इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-आत्म-अक-सेट्।) ङ, जर्भते। ई, जृब्धः। इति दुर्गादासः॥

जृम्भ, पु क्ली, (जृम्भ+भावे घञ्।) मुखादिविकाशः। हाइ इति भाषा॥ तत्पर्य्यायः। जृम्भणम् २ जृम्भा ३ जृम्भिका ४। इति शब्दरत्नावली॥ जम्भा ५ जम्भका ६। इति राजनिर्घण्टः॥ (अस्य लक्षणं यथा, सुश्रुते। ३।४।

"निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्द्दिशेत्। पीत्वैकमनिलोच्छ्वासमङ्गैस्तन् विवृताननः॥ यमुञ्चति सनेत्रास्रं स जृम्भ इति संज्ञितः॥")

"जृम्भायर्थे समीरणात्।" इति वैद्यकम्॥

"क्षुद्रुतपतनजृम्भेषु जीवोत्तिष्ठाक्षिभ्वनिः। अवश्यमेव कर्त्तव्यश्चान्यथा तद्वधी भवेत्॥" इति कर्म्मलोचनम्॥ *॥

विकाशः। स्फारितः। इति शब्दरत्नावली॥ (यथा, प्रबोधचन्द्रोदये।४।२८। "एताश्च प्रति मुकुललममधुपावलीरणितमुखरा जृम्भारम्भ-भरविगलन्मकरन्दद्दुर्हिना कुसुमस्तरभयः॥")

जृम्भण, क्ली, (जृम्भ+भावे ल्युट्।) जृम्भः। इत्यमरः। १।७।३५॥ (यथा, सुश्रुते। ३।४।

"इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं क्लमः॥")

जृम्भा, स्त्री, (जृम्भ+भावे घञ् ततष्टाप्।) जृम्भः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १।१५।६१।

"तुष्टिः पुष्टिः क्षमा लज्जा जृम्भा तन्द्रा च शक्तयः॥")

जृम्भिका, स्त्री, (जृम्भा+स्वार्थे कन् टापि अत इत्वञ्च।) जृम्भः। इति शब्दरत्नावली॥ (निद्रावेगधारणजनितरोगविशेषः। यथा, वाभटे सूत्रस्थाने चतुर्थेऽध्याये।

"निद्राया मोहमूर्द्धाक्षिगौरवालस्यजृम्भिकाः। अङ्गमर्द्दश्च तत्रेष्टः स्वप्नः संवाहनानि च॥"

जृम्भ+णिच्+ण्वुल्। टापि अत इत्वम्। जृम्भणकारकोऽस्त्रविशेषः। यथा, महाभारते। ५।६।५२।

"अस्त्रेणसो महासत्त्वा जृम्भिकां तृष्णनाशिनीम्॥")

जृम्भित, क्ली, (जृम्भि+भावे क्तः।) विचेष्टितम्। प्रवृद्धम्। जृम्भा। स्फुटितम्। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे।२६।९८।

"अहो किं मे तदाश्चर्य्यमायाडम्बरजृम्भितम्॥")

क्षीणा करणम्। इति मेदिनी। ते, ११२॥

जृम्भिणी, स्त्री, (जृम्भि+णिनि।) एलापर्णी। इति शब्दचन्द्रिका॥ (एलापर्णीशब्देऽस्या विशेषो ज्ञेयः॥)

जॄ, इर् य म य ज्यानौ। इति कविकल्पद्रुमः॥ (दिवां-पर-अक-अनिट्।) इर, अजरत् अजारीत्। य, जरा। म, जरयति। य, जीर्य्यति। ज्यानं गतवज्जुवयोभावः। इति दुर्गादासः॥

जॄ, गि कि ज्याने। इति कविकल्पद्रुमः॥ (क्र्यां-चुरां पक्षे भ्वां-च-पर-अक-सेट्।) गि, जृणाति जीर्णः जीर्णिः। कि, जारयति जरति। इति दुर्गादासः॥

जेता, [ऋ] त्रि, (जयतीति। जि+तृच्।) जयशीलः। तत्पर्य्यायः। जिष्णुः २ जित्वरः ३ जैत्रः ४। इत्यमरः। ३।१।७७॥ (यथा, रघुः। १२।८९।

"जेतारं लोकपालानां स्वमुखैरर्च्चितेश्वरम्॥"

विष्णुः । यथा, महाभारते । १३ । १४९ । २९ ।
"अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥")

जेन्ताकः, पुं, स्वेदविशेषः । यथा, "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत पूर्व्वस्या-न्दिशि उत्तरस्यां वा गुणवति प्रशस्तभूमिभागे देशे कृष्णमधुरमृत्तिके सुवर्णवर्णमृत्तिके वा नदीपरीवापपुष्करिण्यादीनां जलाशयानामन्य-तमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे सम-सुविभक्तभागे देशे सप्ताष्टौ वा अरत्नीः प्रक्रम्य उदकात् प्राङ्मुखमुदङ्मुखं वा अभिमुखतीर्थं कूटागारं कारयेत् । उत्सेधविस्तारतः परम-रत्नीः षोडशासमन्तात् संवृत मृत्कर्म्मसम्पन्न-मनेकवातायनम् । अस्य च कूटागारस्यान्तः सम-न्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेत् आकवाटान्मध्ये चास्य च कूटागारस्य चतुष्किष्कुमात्रं द्विपुरुषप्रमाणं मृण्मय कन्दु-संस्थान बहुसूक्ष्मच्छिद्रं अङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत् । तच्च खादिराणामाश्व-कर्णिकानां वा मेध्येन काष्ठेनापूरयित्वा प्रदी-पयेत् । स यदा जानीयात् साधु दग्धानि काष्ठानि गतधूमानि अथ तप्तं केवलमग्निना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति । तत्रैनं वातहराभ्यङ्गाभ्यक्तगात्रं वस्त्रावच्छन्न प्रवेशयेत् प्रवेशयंश्चैनमनुशिष्यात् सौम्य । प्रविश कल्याणायारोग्याय चेति प्रविश्य चैनां पिण्डिका-मधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः । न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डि-कैषा मोक्तव्या आप्राणोच्छ्वासात् भ्रश्यमानो ह्यतः पिण्डिकावकाशात् द्वारमधिगच्छन् स्वेद-मूर्च्छापरीततया सद्यः प्राणान् जह्याः तस्मात् पिण्डिकां न कथञ्चन मुञ्चेथाः । स यदा जानीयाद्विगताभिष्यन्दमात्मानं सम्यक् प्रस्रुत-स्वेदपिच्छं सर्व्वस्रोतोविमुक्तं लघुभूतमपगत-विबन्धस्तम्भसुप्तिगौरववेदनमिति ततस्तां पिण्डि-कामनुवसन् द्वारं प्रपद्येत निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतमुदकं स्पृशेत् । अप-गतक्लमसन्तापस्तु मुहूर्त्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयात् ।" इति चरकः ॥

जेमनं, क्ली, (जिमु भक्षणे + भावे ल्युट् ।) भोजनम् । इत्यमरः । २ । ९ । ५६ ॥

जेयः, त्रि, (जीयते इति । जि जये + "अचो यत् ।" ३ । १ । ९७ । इति कर्म्मणि यत् ।) जेतव्यमात्रकम् । इत्यमरः । २ । ८ । ७४ ॥ (यथा, मार्कण्डेये । २७ । १२ ।
"तस्मात् कामादयः पूर्व्वं जेयाः पुत्त्र । महीभुजा ।
तज्जये हि जयोऽवश्यं राजा नश्यति तैर्ज्जितः ॥")

जेष, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सक-सेट् ।) ऋ, अजिजेषत् । ङ, जेषते जिजेषे । इति दुर्गादासः ॥

जेह, ङ ऋ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) ङ, जेहते जिजेहे । ऋ, अजिजेहत् । इति दुर्गादासः ॥

जै, क्षये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) जायति । इति दुर्गादासः ॥

जैत्रं, क्ली, (रोगजयात् जेतृ । तदेव । "प्रज्ञादि-भ्यश्च ।" ५ । ४ । ३८ । इत्यण् ।) औषधम् । इति राजनिर्घण्टः ॥

जैत्रः, त्रि, (जेतैव । जेतृ + प्रज्ञादित्वादण् ।) जेता । इत्यमरः । २ । ८ । ७४ ॥ (यथा, माघे । ३ । ६१ ।
"शरीरिणा जैत्रशरेण यत्र
निःशङ्कमूषे मकरध्वजेन ॥")
पारदे, पुं । इति राजनिर्घण्टः ॥

जैत्ररथः, पुं, (जैत्रो जयशीलो रथो यस्य ।) जयशीलः । इति हलायुधः ॥

जैत्री, स्त्री, (जयति रोगादिनाशकतया सर्व्वोत्-कर्षेण वर्त्तते इति । जि + तृच् । ततः स्वार्थे अण् ततः स्त्रियां ङीप् ।) जयन्तीवृक्षः । इति शब्दरत्नावली ॥

जैनः, पुं, (जिन एव । यद्वा, जिन उपास्य-देवतास्येति । जिन् + अण् ।) जिनोपासकः । बौद्धः । इति हलायुधः ॥ (धर्म्मक्षेत्रे-ऽस्मिन् भारतवर्षे प्रचलितेषु विविधेषु धर्म्मेषु जिनधर्म्म एव श्रेष्ठतम इति जैनाः प्रव-दन्ति । एषामुपास्यदेवता जिनः । ते तु श्वेता-म्बरदिगम्बरभेदेन द्विविधाः । श्वेताम्बरास्तु प्रायश आश्रमिणः । अधुना नानाशाखासु विभक्ताः समभवन् । दिगम्बरास्तु प्रायशो निर्ग्रन्थाः । एतेषां यन्मतं तत् सर्व्वदर्शनसंग्र-हात् प्रदर्श्यते । यथा,—

"ननु न कश्चित् पुरुषविशेषः सर्व्वज्ञपदवेद-नीयः प्रमाणपद्धतिमध्यास्ते सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात् तथाचोक्तं तौतातितैः ।

सर्व्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत् ॥
न चागमविधिः कश्चिन्नित्यसर्व्वज्ञबोधकः ।
न च तत्रार्थवादानां तात्पर्य्यमपि कल्पते ॥
न चान्यार्थप्रधानैस्तैस्तदस्तित्व विधीयते ।
न चानुवदितुं शक्यः पूर्व्वमन्यैरबोधितः ॥
अनादेरागमस्यार्थो न च सर्व्वज्ञ आदिमान् ।
कृत्रिमेण त्वसत्येन स कथं प्रतिपाद्यते ॥
अथ तद्वचनेनैव सर्व्वज्ञोऽन्यैः प्रतीयते ।
प्रकल्प्येत कथं सिद्धिरन्योन्याश्रययोस्तयोः ॥
सर्व्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता ।
कथं तदुभयं सिध्येत् सिद्धमूलान्तराद्दृते ॥
असर्व्वज्ञप्रणीतात्तु वचनान्मूलवर्ज्जितात् ।
सर्व्वज्ञमवगच्छन्तस्तद्वाक्योक्तं न जानते ॥
सर्व्वज्ञसदृशं किञ्चिद्यदि पश्येम सम्प्रति ।
उपमानेन सर्व्वज्ञं जानीयाम ततो वयम् ॥
उपदेशोऽपि बुद्धस्य धर्म्माधर्म्मादिगोचरः ।
अन्यथा नोपपद्येत सार्व्वज्ञ्यं यदि नाभवत् ॥

इत्यादि ॥

अत्र प्रतिविधीयते यदभ्यधायि सद्भावग्राह-कस्य प्रमाणपञ्चकस्य तत्रानुपलम्भादिति तद-युक्तं तत्सद्भावादेकस्यानुमानादेः सद्भावात् । तथाहि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्यय-त्वात् यद्यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रति-बन्धप्रत्ययं तत्तत्साक्षात्कारि यथा अपगत-तिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षा-त्कारि । तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रति-बन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थ-साक्षात्कारीति । न तावदशेषार्थग्रहणस्वभा-वत्वमात्मनोऽसिद्धं चोदनावलान्निखिलार्थज्ञा-नात् नोत्पत्त्यन्यथानुपपत्त्या सर्व्वमनेकान्तात्मक सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्ट-मित्येवं जातीयकमर्थमवगमयतीत्येवंजातीयकै-रध्वरमीमांसागुरुभिर्विधिप्रतिषेधविचारणा-निबन्धनं सकलार्थविषयज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वमात्मनोऽभ्युपगतम् । न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्तिः सम्यग्-दर्शनादित्रयलक्षणस्यावरणप्रक्षयहेतु-भूतस्य सामग्रीविशेषस्य प्रतीतत्वात् अनया मुद्रयापि क्षुद्रोपद्रवा विद्राव्याः ।

नन्वावरणप्रक्षयवशादशेषविषयं विज्ञानं विशद मुख्यप्रत्यक्षं प्रभवतीत्युक्तं तदयुक्तं तस्य सर्व्वज्ञ-स्यानादिमुक्तत्वेनावरणस्यैवासम्भवादिति चेत्तन्न अनादिमुक्तत्वस्यैवासिद्धेर्न सर्व्वज्ञोऽनादिमुक्तः मुक्तत्वादितरमुक्तवत् बद्धापेक्षया च मुक्तव्यप-देशः तद्रहिते चास्याप्यभावः स्यादाकाशवत् । नन्वनादेः क्षित्यादिकार्य्यपरम्परायाः कर्तृत्वेन तत्सिद्धिः तथाहि क्षित्यादिकं सकर्तृकं कार्य्य-त्वाद्घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैवा-सिद्धेः । न च सावयवत्वेन तत्साधनमित्यभि धातव्यं यस्मादिदं विकल्पजालमवतरति साव-यवत्वं किमवयवसंयोगित्वं अवयवसमवायित्वं अवयवजन्यत्वं समवेतद्रव्यत्वं सावयवबुद्धिविष-यत्वं वा । न प्रथमः आकाशादावनैकान्त्यात् । न द्वितीयः सामान्यादौ व्यभिचारात् । न तृतीयः साध्याविशिष्टत्वात् । न चतुर्थः विकल्प युगलागलग्रहणग्रस्तत्वात् समवायसम्बन्धमात्र-वद्द्रव्यत्वं समवेतद्रव्यत्वमन्यत्र समवेतद्रव्यत्व वा विवक्षितं हेतूक्रियते । आद्ये गगनादौ व्यभिचारः तस्यापि गुणादिसमवायवत्त्वद्रव्य-त्वयोः सम्भवात् । द्वितीये साध्याविशिष्टता अन्यशब्दार्थेषु समवायकारणभूतेष्ववयवेषु सम-वायस्य साधनीयत्वात् । अभ्युपगम्यैतदभाणि वस्तुतस्तु समवाय एव न समस्ति प्रमाणाभा वात् । नापि पञ्चमः आत्मादिनानैकान्त्यात्तस्य सावयवबुद्धिविषयत्वेऽपि कार्य्यत्वाभावात् । न च निरवयवत्वेऽप्यस्य सावयवार्थसम्बन्धेन साव-यवबुद्धिविषयत्वमौपचारिकमित्येष्टव्यं निरवय-वत्वे व्यापित्वविरोधात् परमाणुवत् । किञ्च किमेकः कर्त्ता साध्यते किं वा स्वतन्त्रः प्रथमे प्रासादादौ व्यभिचारः स्थपत्यादीनां बहूनां

प्रत्यक्षायां तत्र कर्त्तृत्वोपलम्भादनेनैव सकलजगज्जन्मोत्पत्त्यावितरवैयर्थ्यञ्च। तदुक्तं वीतरागस्तुतौ।

> कर्त्तास्ति नित्यो जगतः स चैकः
> स सर्व्वगः सन् स्ववशः स सत्यः।
> इमाः कुहेवाकविडम्बनाः स्यु-
> स्तेषां न येषामनुशासकस्त्वम्॥ इति॥

अन्यत्रापि।

> कर्त्ता न तावदिह कोऽपि यथेच्छया वा
> दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः।
> कार्य्यं किमत्र भवतापि च तक्षकाद्यै-
> राहत्य च त्रिभुवनं पुरुषः करोतीति॥

तस्मात् प्रागुक्तकारणत्रितयबलादावरणप्रक्षये सार्व्वज्ञ्यं युक्तम्। न चास्योपदेष्ट्रन्तराभावात् सम्यग्दर्शनादित्रितयानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वादस्याशेषार्थज्ञानस्य। न चान्योन्याश्रयतादिदोषः आगमसर्व्वज्ञपरम्परायाः बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम्।

रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयमर्हत्प्रवचनसङ्ग्रहपरे परमागमसारे प्ररूपितं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति। विवृतञ्च योगदेवेन येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्य्याय श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति।

अन्यदपि।

> रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते।
> जायते तन्निसर्गेण गुरोरधिगमेन वेति॥

परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः। येन स्वभावेन जीवादयः पदार्थाः व्यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम्। यथोक्तम्।

> यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
> योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः॥
> इति॥

तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन। तदुक्तम् मतिश्रुतावधिमनःपर्य्यायकेवलानि ज्ञानमिति। अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्यापृतः सन् यथार्थं मनुते सा मतिः। ज्ञानावरणक्षयोपशमे सति मतिजनितं स्पष्टं ज्ञानं श्रुतम्। असम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्तमवच्छिन्नविषयं ज्ञानमवधिः। ईर्ष्यान्तरायज्ञानावरणक्षयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः। तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानमन्यज्ञानासंस्पृष्टं केवलम्। तत्राद्यं परोक्षं प्रत्यक्षमन्यत्। तदुक्तम्

> विज्ञानं स्वपराभासि प्रमाणं बाधवर्ज्जितम्।
> प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति॥

अवान्तरभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः। संसरणकर्म्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक्चारित्रम्। तदेतत् सप्रपञ्चमुक्तमर्हता।

> सर्व्वथावद्ययोगानां त्यागश्चारित्रमुच्यते।
> कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा॥
> अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः॥
> न यत्प्रमादयोगेन जीवितव्यपरोपणम्।
> चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम्॥
> प्रियं पथ्यं वचस्तथ्यं सूनृतं व्रतमुच्यते।
> तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत्॥
> अनादानमदत्तस्यास्तेयव्रतमुदीरितम्।
> बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते॥
> दिव्यौदारिककामानां कृतानुमतकारितैः।
> मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम्॥
> सर्व्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः।
> यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः॥
> भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात्।
> महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति॥
> भावनापञ्चकप्रपञ्चनञ्च प्ररूपितम्।
> हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
> आलोच्यभाषणेनापि भावयेत् सूनृतं व्रतम्॥
> इत्यादिना॥

एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानाचरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम्।

अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे स्तः तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना।

> चिदचिद्द्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
> उपादेयमुपादेयं हेयं हेयञ्च कुर्व्वतः॥
> हेयं हि कर्त्तृरागादि तत्कार्य्यमविवेकिनः।
> उपादेयं परं ज्योतिरुपयोगैकलक्षणमिति॥

सहजचिद्रूपपरिणतिं स्वीकुर्व्वाणे ज्ञानदर्शने उपयोगः स परस्परप्रदेशानुप्रदेशानुबन्धात् कर्म्मणैकीभूतस्य आत्मनोऽन्यत्वप्रतिपत्तिकारणं लक्षणं भवति। सकलजीवसाधारणं चैतन्यमुपशमक्षयक्षयोपशमवशादौपशमिकक्षायात्मकक्षायोपशमिकभावेन कर्म्मोदयवशात् कलुषाद्याकारेण च परिणतजीवपर्य्यायजीवविवक्षाया स्वरूपं भवति। यदवोचद्वाचकाचार्य्यः औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ चेति। अनुदयप्राप्तिरूपे कर्म्मण उपशमे सति जीवस्योत्पद्यमानो भावः औपशमिकः यथा पङ्के कलुषतां कुर्व्वति कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्म्मणः क्षयोपशमे सति जायमानो भावः क्षायिकः यथा मोक्षः। उभयात्मा भावो मिश्रः यथा जलस्यार्द्धस्वच्छता। कर्म्मोदये सति भवन् भावः औदयिकः। कर्म्मोपशमाद्यनपेक्षः सहजो भावश्चेतनत्वादिः पारिणामिकः। तदेतत् सर्व्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः। तदुक्तं स्वरूपसम्बोधने।

> ज्ञानाद्भिन्नो न चाभिन्नो भिन्नाभिन्नः कथञ्चन।
> ज्ञानं पूर्व्वापरीभूतं सोऽयमात्मेति कीर्त्तितः॥
> इति॥

ननु भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्यैव वास्तवत्वादुभयात्मकत्वमयुक्तमिति चेत्तदयुक्तं बाधे प्रमाणाभावात् अनुपलम्भो हि बाधकं प्रमाणं न सोऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादित्यलम्।

अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमाचक्षते जीवाकाश-धर्म्माधर्म्म-पुद्गलास्तिकायभेदात्। एतेषु पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया स्थितिव्यपदेशः अनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः। तत्र जीवा द्विविधाः संसारिणो मुक्ताश्च भवाद्भवान्तरप्राप्तिमन्तः संसारिणः। ते च द्विविधाः समनस्का अमनस्काश्च तत्र संज्ञिनः समनस्काः शिक्षाक्रियालापग्रहणरूपा संज्ञा तद्विधुरास्त्वमनस्काः। ते चामनस्का द्विविधाः त्रसस्थावरभेदात् तत्र द्वीन्द्रियादयः शङ्खगण्डोलकप्रभृतयश्चतुर्व्विधास्त्रसाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः। तत्र मार्गगतधूलिः पृथिवी इष्टकादिः पृथिवीकायः पृथिवी कायत्वेन येन गृहीता स पृथिवीकायिकः पृथिवीं कायत्वेन यो ग्रहीष्यति स पृथिवीजीवः। एवमबादिष्वपि भेदचतुष्टयं योज्यम्। तत्र पृथिव्यादि कायत्वेन गृहीतवन्तो ग्रहीष्यन्तश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषां जीवत्वात्। ते च स्थावराः स्पर्शनैकेन्द्रियाश्च भवान्तरप्राप्तिविधुरा मुक्ताः धर्म्माधर्म्माकाशास्तिकायास्ते एकत्वशालिनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतुः। तत्र धर्म्माधर्म्मौ प्रसिद्धौ आलोकेनाविच्छिन्ने नभसि लोकाकाशपदवेदनीये सर्व्वत्रावस्थितिगतिस्थित्युपग्रहो धर्म्माधर्म्मयोरुपकारः अतएव धर्म्मास्तिकायः प्रवृत्त्यनुमेयः अधर्म्मास्तिकायः स्थित्यनुमेयः। अन्यवस्तुप्रदेशमध्येऽन्यस्य [वस्तुनः] प्रवेशोऽवगाह आकाशकृत्यम्। स्पर्शरसवर्णवन्तः पुद्गलाः ते च द्विविधाः अणवः स्कन्धाश्च। भोक्तुमशक्या अणवः द्व्यणुकादयः स्कन्धाः। तत्र द्व्यणुकादिस्कन्धभेदादण्वादिरुत्पद्यते अण्वादिसङ्घातात् द्व्यणुकादिरुत्पद्यते क्वचिद्भेदसङ्घाताभ्यां स्कन्धोत्पत्तिः अतएव पूरयन्ति गलन्तीति पुद्गलाः। कालस्यानेक-प्रदेशत्वाभावेनास्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् तदुक्तं गुणपर्य्यायवद्द्रव्यमिति। द्रव्याश्रया निर्गुणा गुणाः यथा जीवस्य ज्ञानत्वादिसामान्यरूपाः पुद्गलस्य रूपत्वादिसामान्यस्वभावाः धर्म्माधर्म्माकाशकायानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादि-

सामान्यानि गुणाः । तस्य द्रव्यस्योक्तरूपेण भवनमुत्पादः सद्भावः परिणामः पर्याय इति पर्यायाः यथा जीवस्य घटादिज्ञानसुखदुःखादयः पुद्गलस्य मृत्पिण्डघटादयः धर्मादीनां गत्यादिविशेषाः अतएव षट् द्रव्याणीति प्रसिद्धिः ।

केचन सप्त तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रव बन्ध संवर निर्जर-मोक्षास्तत्त्वानीति । तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते । औदारिकादिकायादिचलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः. यथा सलिलावगाहिद्वारं स्रोत आस्रवणकारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकयात्मनि कर्मास्रवतीति स योग आस्रवः । यथा आर्द्रं वस्त्रं समन्ताद्वातानीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति यथा वा निष्टप्तायःपिण्डो जले क्षिप्तोऽम्भः समन्ताद्गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म समन्तादादत्ते । कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः, क्रोधो मानो माया लोभश्च स द्विविधः शुभाशुभभेदात् । तत्राहिंसादिः शुभः काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः । तद्विपरीतस्त्वशुभभेदः कायवाङ्मनःसंयोगः स आस्रवः, शुभः पुण्यस्याशुभः पापस्यास्रव इति सर्वं स्पष्टमाभाति । अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रवः इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद्रूपादिज्ञानरूपेण परिणमत इति ।

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तानन्तप्रदेशानां पुद्गलानां कर्मबन्धयोग्यानामादानमुपश्लेषणं यत् करोति स बन्धः । तदुक्तं सकषायत्वाज्जीवः कर्मभावयोग्यान् पुद्गलानादत्ते स बन्ध इति । तत्र कषायग्रहणं सर्वबन्धहेतूपलक्षणार्थम् । बन्धहेतून् पपाठ वाचकाचार्यः । मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति । मिथ्यादर्शनं द्विविधं मिथ्याकर्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशजम् । पृथिव्यादिषट्कायानामन्तं षडिन्द्रियासंयमनञ्च अविरतिः । पञ्चसमितित्रिगुप्तिष्वनुत्साहः प्रमादः । कषायः क्रोधादिः । तत्र कषायान्ताः स्थित्यनुभावबन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः । बन्धश्चतुर्विध इत्युक्तं प्रकृतिस्थित्यनुभावप्रदेशास्तु तद्विधय इति यथा निम्बगुडादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्भोधरवत् प्रदीपप्रभातिरोधायककुम्भवच्च सद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्जनसङ्गवच्चारित्रमोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रकवद्गोत्रस्योच्चनीचकारित्वं कुम्भकारवद्दानादीनां विघ्ननिदानत्वं भाण्डागारिकवत् स्वभावः कोशाध्यक्षवत् । सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्मावान्तरभेदमूलप्रकृतिवेदनीयः । तथावोचदुमास्वातिवाचकाचार्यः आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तराया इति तद्भेदञ्च समाचष्टे पञ्चनवाष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रममिति । एतच्च सर्वं विद्यानन्दादिभिर्विवृतमिति विस्तरभयान्न प्रस्तूयते । यथा अजागोमहिष्यादिक्षीराणामेतावन्तं कालं माधुर्यस्वभावादप्रच्युतिः स्थितिः तथा ज्ञानावरणादीनामादितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिरित्यादिकालनियमः स्वस्वभावादप्रच्युतिः स्थितिः । यथा अजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्वकार्यकरणे सामर्थ्यविशेषोऽनुभावः तथा कर्मपुद्गलानां स्वकार्यकरणे सामर्थ्यविशेषोऽनुभावः । कर्मभावपरिणतपुद्गलस्कन्धानामनन्तानन्तप्रदेशानामात्मप्रदेशानुप्रवेशः प्रदेशबन्धः । आस्रवनिरोधः संवरः । येनात्मनि प्रविशत् कर्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः । संसारकारणाद्योगादात्मनो गोपनं गुप्तिः । सा त्रिविधा कायवाङ्मनोनिग्रहभेदात् । प्राणिपीडापरिहाराय सम्यगयनं समितिः सा ईर्याभाषादिभेदात् पञ्चधा । प्रपञ्चितञ्च हेमचन्द्राचार्यैः ।

लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥
अनवद्यमृतः सर्वजनीनं मितभाषणम् ।
प्रिया वाचंयमानां सा भाषासमितिरुच्यते ॥
द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥
आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।
गृह्णीयान्निक्षिपेद्वा यत् सादानसमितिः स्मृता ॥
कफमूत्रमलप्रायैर्निर्जन्तुजगतीतले ।
यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत् ॥

अत एवास्रवस्रोतसो द्वारं संवृणोतीति संवर इति निराहुः । तदुक्तमभियुक्तैः ।

आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् ।
इतीयमार्हती दृष्टिरन्यदस्याः प्रपञ्चनम् ॥

अर्जितस्य कर्मणस्तपःप्रभृतिभिर्निर्जरणं निर्जराख्यं तत्त्वम् । चिरकालप्रवृत्तकषायकलापं पुण्यं सुखदुःखे च देहेन जरयति नाशयति केशोल्लुञ्चनादिकं तप उच्यते । सा निर्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्जरा कामादिपाकजेति च जेगीयते । यत् कर्म तपोबलात् स्वकामनयोदयावलिं प्रवेश्य प्रपद्यते तत् कर्म निर्जरा । यदाह ।

संसारबीजभूतानां कर्मणां जरणादिह ।
निर्जरा संस्मृता द्वेधा सकामा कामनिर्जरा ॥
स्मृता सकामा यमिनामकामा त्वन्यदेहिना-
मिति ॥

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः अभिनवकर्माभावात् निर्जराहेतुसन्निधानेनार्जितस्य कर्मणो निरसनादात्यन्तिककर्ममोक्षणं मोक्षः बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्द्ध्वं गच्छत्यालोकान्तात् यथा हस्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्बलादेवासंस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये बहुशो यत् कृतं प्रणिधानं मुक्तस्य तदभावेऽपि पूर्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा मृत्तिकालेपकृतगौरवमलाबुद्रव्यं जलेऽधःपतति पुनरपेतमृत्तिकाबन्धमूर्द्ध्वं गच्छति तथा कर्मरहित आत्मा असङ्गत्वादूर्द्ध्वं गच्छति बन्धच्छेदादेरण्डबीजवच्चोर्द्ध्वगतिस्वभावाच्चाग्निशिखावत् । अन्योन्यं प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः । तदुक्तं पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गतिपरिणामाच्चाविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्चेति । अतएव पठन्ति ।

गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्यादयो ग्रहाः ।
अद्यापि न निवर्त्तन्ते त्वलोकाकाशमागताः
इति ।

अन्ये तु गतसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मुक्तिरित्यास्थिषत । एवमुक्तानि तत्त्वानि समवायनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः । तदुक्तं सिद्धान्ते जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्जरणं बन्धो मोक्षश्च नव तत्त्वानीति । संक्षेपे प्रवृत्ता वयमुपरताः स्मः ।

अत्र सर्वत्र सप्तभङ्गिनयाख्यं न्यायमवतारयन्ति जैनाः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति सप्तभङ्गनयमतीर्थ्यः प्रत्यपीपदत् ।

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत् ।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते ॥
क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक् ।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥
आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते ।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥
समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यत इति ।

स्याच्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः । यथोक्तम् ।

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषकम् ।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः ॥

यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा

स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यत इति नानर्थकम्। तदाह।

स्याद्वादः सर्व्वथैकान्तत्यागात् किं वृत्तचिद्विधेः।
सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति॥

यदि वस्त्वस्त्येकान्ततः सर्व्वथा सर्व्वदा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वहेयहानानुपपत्तेः। अनेकान्तपक्षे तु कथञ्चित् क्वचित् केनचित् कस्यचित् हानोपादाने प्रेक्षावतामुपपद्येते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रष्टव्यो न तावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम्।

घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः।
नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोः॥

इत्यादि॥

तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्व्वचनीयवादभेदेन प्रतिवादिनश्चतुर्व्विधाः पुनरप्यनिर्व्वचनीयमतेनामिश्रितानि सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्व्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्व्वतस्तत्र तत्र विजय इति सर्व्वमुपपन्नम्।
यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्।

अनेकान्तात्मकं वस्तु गोचरः सर्व्वसंविदाम्।
एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः॥
न्यायानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि।
सम्पूर्णार्थविनिश्चायि स्याद्वस्तु श्रुतमुच्यत इति॥

अन्योन्यपक्षप्रतिपक्षभावाद्-
यथापरे मत्सरिणः प्रवादाः।
नयानशेषानविशेषमिच्छन्-
नपक्षपाती समयस्तथार्हत इति॥

जिनदत्तसूरिणा जैनं मतमित्थमुक्तम्।
बलभोगोपभोगानामुभयोर्द्दानलाभयोः।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम्॥
हिंसा रत्यरती रागद्वेषौ रतिरनिस्मरः।
शोको मिथ्यात्वमेतेऽष्टादश दोषा नयस्य च॥
जिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः।
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्तिनि॥
स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च।
नित्यानित्यात्मकं सर्व्वं नव तत्त्वानि सप्त वा॥
जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च।
बन्धो निर्ज्जरणं मुक्तिरेषां व्याख्याधुनोच्यते॥
चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः।
सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः॥
आस्रवः कर्म्मणां बन्धो निर्ज्जरस्तद्वियोजनम्।
अष्टकर्म्मक्षयान्मोक्षोऽथान्तर्भावश्च कैश्चन॥
पुण्यस्य संस्रवे पापस्यास्रवे क्रियते पुनः।
लब्धानन्तचतुष्कस्य लोकागूढस्य चात्मनः।
क्षीणाष्टकर्म्मणो मुक्तिर्निर्व्यावृत्तिर्जिनोदिता॥
सरजोहरणा भैक्ष्यभुजो लुञ्चितमूर्द्धजाः।
श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥
लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः।
ऊर्द्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः॥
भुङ्क्ते न केवली न स्त्री मोक्षमेति दिगम्बरः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सहेति॥”

इति सर्व्वदर्शनसंग्रहे आर्हतदर्शनम्॥)

जैपालः, पुं, (जयपालः पृषोदरादित्वात् साधुः।) जयपालवृक्षः। इति हारावलीकोषः॥

जैमिनिः, पुं, मुनिविशेषः। स वेदव्यासशिष्यः उत्तरमीमांसाकर्त्ता भारतकृत् पक्षपारकश्च। यथा, पुराणवचनम्।
“जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः॥”

जैवातृकः, पुं, (जीवयति ओषधिप्रभृतीनीति। जीव+णिच्+“आतृकन् वृद्धिश्च।” उणां। १।८१। इति आतृकन् ईकारस्य वृद्धिश्च।) चन्द्रः। कर्पूरः। इत्यमरः। १। ३। १४. २। ६। १३०॥ पुत्रः। इति सिद्धान्तसारे उणादिवृत्तिः॥ भेषजम्। इति हेमचन्द्रः॥

जैवातृकः, त्रि, (जीवतीति। जीव+आतृकन् वृद्धिश्च।) दीर्घायुः। (यथा, दशकुमारचरिते। “जैवातृक। ननु श्रूयते पतिरस्या मिथिलायां प्रहारवर्म्मासीत्॥”) कृशः। इति मेदिनी। के, १६०॥

जैह्म्यम्, क्ली, (जिह्मस्य कुटिलस्य भावः। जिह्म+भावे ष्यञ्।) जिह्मता। कुटिलता। यथा, मनुः। ११। ६७।
“जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम्॥”

जोङ्गकम्, क्ली, (जुङ्गति त्यजति सद्गन्धमिति। जुगि त्यागे+ण्वुल्। निपातनात् गुणः।) अगुरु। इत्यमरः। २। ६। १२६॥

जोङ्गटः, पुं, (जुङ्गति अरोचकत्वं परित्यजत्यनेनेति। जुङ्ग+बाहुलकात् अटन् गुणश्च।) गर्भिण्यभिलाषः। इति हारावली। २१६॥ साध् इति भाषा॥

जोटिङ्गः, पुं, (जूटेन इङ्गति प्रकाशते इति। अच्। पृषोदरादित्वात् साधुः।) महादेवः। महाव्रती। इति त्रिकाण्डशेषः॥

जोत्काला, स्त्री, देवधान्यम्। इति हेमचन्द्रः। ४। २४४॥ (जोन्नला इति क्वचित् पाठः॥)

जोषं, क्ली, (जुष हर्षे+भावे घञ्।) सुखम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे।१।१२०।१।
“का राधद्धोत्राश्विना वां को वां जोष उभयोः॥”
“जोषे प्रीतिजनके व्यवहारे।” इति दयानन्दभाष्यम्॥)

जोषम्, व्य, (जुष्+बाहुलकात् अम्।) तूष्णीम्। (यथा, महाभारते। २। ६८। १६।
“मैवमित्यब्रवीच्चैनं जोषमास्वेति भारत!॥”) सुखम्। इत्यमरः। ३। ४। २५०॥

जोषा, स्त्री, (जुष्यते सेव्यते उपभुज्यते इति। जुष्+घञ्। स्त्रियां टाप्।) योषा। इति शब्दरत्नावली॥

जोषिका, स्त्री, (जुषते सेवते इति। जुष+ण्वुल्। टापि अत इत्वम्।) कलिका। इति शब्दरत्नावली॥

जोषित्, स्त्री, (जुष्यते उपभुज्यते। जुष्+“हृसृरुहियुषिभ्य इतिः।” उणां। १। ९९। इति प्रत्ययः। पृषोदरादित्वात् यस्य जः।) योषित्। इति शब्दरत्नावली॥

जोषिता, स्त्री, (जोषित्+हलन्तत्वाद् वा टाप्।) योषित्। इति शब्दरत्नावली॥

ज्ञः, पुं, (जानातीति। ज्ञा+“इगुपधज्ञाप्रीकिरः कः।” ३। १। १३५। इति कः।) ब्रह्मा। बुधः। पण्डितः। (यथा, चरके सूत्रस्थाने ३० अध्याये।
“पङ्गुः पङ्गूनां दौर्ब्बल्यात् कश्चित् मध्ये प्रकाशते।
समत्वं एकमासाद्य प्रकृतिं भजते पशु॥
तद्वदज्ञो ज्ञमध्यस्थः कश्चित् मौखर्य्यसाधनः।
स्थापयत्याप्तमात्मानमाप्तं त्वासाद्य भिद्यते॥”)
मङ्गलग्रहः। इति धरणी॥

ज्ञप, क म ज्ञाने। इति कविकल्पद्रुमः। (चुरां-पर-सक-सेट्।) क म, ज्ञपयति। ज्ञप्तिः। ज्ञारणालोकनिशानतोषणस्तुतयः। ज्ञाक इत्यनेनैवेष्टसिद्धौ ज्ञपपाठश्चुरादिषु मित्त्वप्रदीपितमते फलवत्कर्त्तरि परस्मैपदार्थः। इति धातुप्रदीपः। वस्तुतस्तु ज्ञप्तिपदमस्मादेव निष्पादितम्। तेन अनिर्द्दिष्टार्थतया ज्ञप्तिरिह ज्ञानम्। अत एव प्रज्ञप्तौ प्र शीर्ष इत्यत्र अस्यैव सन्नन्तस्य निष्पादितेन ज्ञीप्सशब्देन ज्ञातुमिच्छा प्रतिपाद्यते। एवं ज्ञानपर्य्याये प्रतिपन्नज्ञप्तिचेतनेत्यमरः। इति दुर्गादासः॥

ज्ञपितः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः।) ज्ञापितः। इत्यमरः। ३। १। ९८॥

ज्ञप्तः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः। “वा दान्तशान्तेति।” ७। २। २७। इति साधुः।) ज्ञापितः। इत्यमरः। ३। १। ९८॥

ज्ञप्तिः, स्त्री, (ज्ञप्यते ज्ञायते अनयेति। ज्ञप+भावे क्तिन्। इडभावः।) बुद्धिः। इत्यमरः। १। ५। १॥ (यथा, कथासरित्सागरे। २५। ५७।
“ततो दीर्घतपोवाक्यात् सम्भाव्य द्वीपगां च ताम्।
तज्ज्ञप्तये दाशपतेस्तत्स्थलद्वीपवासिनः॥”)

ज्ञा, क प्रेरणे। इति कविकल्पद्रुमः॥ (चुरां-पर-सकं-सेट्।) प्रेरणमिह नियोजनम्। क, ज्ञापयति भृत्यं स्वामी नियुक्तं करोतीत्यर्थः। इति दुर्गादासः॥

ज्ञा, क म मारणे। आलोके। निशाने। तोषणे। स्तुतौ। इति कविकल्पद्रुमः॥ (चुरां परं-सक-सेट्।) क म, ज्ञपयति अज्ञपि अजिज्ञपि ज्ञप ज्ञप

ज्ञापं ज्ञापम् । आलोको दर्शनप्रेरणम् । निशाणां तीक्ष्णीकरणम् । तोषणं तुष्टीकरणम् । ज्ञपयति शत्रुं शूरो मारयतीत्यर्थः । ज्ञपयति रूपं कामिनी षिङ्गान् दर्शयतीत्यर्थः । ज्ञपयति खड्गं कर्म्मकारः शाणयतीत्यर्थः । ज्ञपयति गुरुं शिष्यस्तोषयतीत्यर्थः । स्तुतिः केचिन्न मन्यते । आलोको ज्ञानप्रेरणमित्यनुन्यासरक्षितौ । अतएव क्रमदीश्वरोऽपि जानातेर्घटादित्वं विभाषया मन्यते । तेन ज्ञपयितुं बोधयितुमिच्छमाणो ज्ञीप्समान इति पाणिनीयवृत्तौ ज्ञानप्रेरणापि ह्रस्वे सनि ज्ञीप्समान इति प्रसिद्धम् । एवं विज्ञप्तिरेषा मम जीवबन्धौ इत्यादिषु च विज्ञापनमेवार्थः । इति दुर्गादासः ॥

ज्ञा, श बोधे । इति कविकल्पद्रुमः ॥ (क्र्या-परं-सकं-अनिट् ।) श, जानाति । “सन्दर्भशुद्धिं गिरां जानीते जयदेव एवेत्यत्र अनुपसर्गात् फलवत्कर्त्तर्य्यात्मनेपदम् । ततोऽनुजज्ञे गमनं सुतस्य इत्यत्रानुशब्दस्योपसर्ग प्रतिरूपकत्वेनानुपसर्गत्वात् ॥” इति दुर्गादासः ॥

ज्ञात, त्रि, (ज्ञायते विद्यते स्मेति । ज्ञा + कर्म्मणि क्तः ।) कृतज्ञानम् । जाना इति भाषा । तत्पर्य्यायः । विदितम् २ बुद्धम् ३ बुधितम् ४ प्रमितम् ५ मतम् ६ प्रतीतम् ७ अवगतम् ८ मनितम् ९ अवसितम् १० । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । १२३ ।
“पूर्व्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ॥”)

ज्ञातव्यं, त्रि, (ज्ञायते यदिति । ज्ञा + तव्य ।) ज्ञानीयम् । ज्ञेयम् । वेद्यम् । अवगन्तव्यम् । बोध्यम् । (यथा, महाभारते । ४ । २८ । ५ ।
“स्वराष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः ॥”)
मन्तव्यम् । इति व्याकरणम् ॥

ज्ञातसिद्धान्तः, पुं, (ज्ञातो विदितः सिद्धान्तः शास्त्रतत्त्वार्थो येन ।) शास्त्रतत्त्वज्ञः । तत्पर्य्यायः । तान्त्रिकः २ । इत्यमरः । २।८।१५ ॥

ज्ञाता, [ऋ] त्रि, (ज्ञा + तृच् ।) ज्ञानशीलः । तत्पर्य्यायः । विदुरः २ विन्दुः ३ । इत्यमरः । ३ । १ । ३० ॥ विदितः ४ ज्ञानसमन्वितः ५ । इति शब्दरत्नावली ॥

ज्ञातिः, पुं, जानाति छिद्रं कुलस्थितिञ्च ज्ञातिः नाम्नीति तिक् । इत्यमरटीकायां भरतः ॥ सपिण्डादिः । तत्पर्य्यायः । सगोत्रः २ बान्धवः ३ बन्धुः ४ स्वः ५ स्वजनः ६ । इत्यमरः । २।६।३४ ॥ अंशकः ७ गन्धः ८ दायादः ९ । इति त्रिकाण्डशेषः ॥ सकुल्यः १० समानोदकः ११ । इति जटाधरः ॥ स चतुर्व्विधः । सप्तमपुरुषपर्य्यन्त सपिण्डः । ततस्त्रिपुरुषपर्य्यन्तं सकुल्यः । ततश्चतुर्थपुरुषपर्य्यन्तं समानोदकः । जन्मनामस्मृतिपर्य्यन्तमपि समानोदकः । ततः परं गोत्रजः । इति शुद्धितत्त्वम् ॥ एषां विशेषस्तत्तच्छब्दे द्रष्टव्यः ॥ * ॥ ज्ञातिद्रोहे दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
“यानि कानि च पापानि ब्रह्महत्यादिकानि च ।
ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोडशीम् ॥”
(ज्ञायते विद्यतेऽस्मादिति । ज्ञा + अपादाने क्तिन् ।) पिता । इति मेदिनी । ते, २० ॥

ज्ञातेयं, क्ली, (ज्ञातेर्भावः कर्म्म वा । ज्ञाति + “कपिज्ञात्योर्ढक् ।” ५ । १ । १२७ । इति ढक् ।) ज्ञातित्वम् । इत्यमरः । २ । ६ । ३५ ॥

ज्ञान, क्ली, (ज्ञा + भावे ल्युट् ।) विशेषेण सामान्येन चावबोधः ॥
“मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।”
इत्यमरः । १ । ५ । ६ ॥
अस्यार्थः । “मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः । अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञानञ्चोच्यते एषा सामान्यप्रवृत्तिः । मोक्षे धीर्ज्ञानं विज्ञानञ्च यथाज्ञानान्मुक्तिरिति सा याचिता च विज्ञानं तुष्टा सद्धिं प्रयच्छति इति । अन्यत्र यथा ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति घटत्वप्रकारकज्ञानमिति ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मताः इति । ब्रह्मणो नित्यविज्ञानानन्दरूपत्वादिति एव चिज्ज्ञान व्याकरणज्ञानं घटपदविज्ञानमित्यादिकं प्रयुज्यत एव । मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित् । मोक्षविषया मोक्षफला धीर्ज्ञानं अन्यधीर्विज्ञानं क्वान्यत्र इत्याह शिल्पशास्त्रयोरिति केचित् । अवबोध इत्यध्याहृत्य मोक्षविषये अवबोधो धीः अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञानमिति केचित् ।” इति भरतः ॥ * ॥ योगशास्त्रमते तु ।
“एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वशः ।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम् ॥”
इति मोक्षधर्म्मः ॥
“एकत्वं बुद्धिमात्रेणावस्थान बुद्धिवृत्तिनिरोध इति यावत् ।” इति तट्टीका ॥ * ॥
“अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः ॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्त्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥”
सात्त्विकराजसतामसभेदेन तत्त्रिविधम् ।
सात्त्विकं यथा,—
“सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥”
राजसं यथा,—
“पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥”
तामसं यथा —
“यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् ॥” ३ ॥
इति श्रीभगवद्गीतायाम् । १८ । २०—२२ ॥
“सर्व्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतं एकमव्ययं निर्व्विकारं भाव परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्त्विकं विद्धि ॥ १ ॥
सर्व्वेषु भूतेषु नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखिदुःखित्वादिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञान राजसं विद्धि ॥ २ ॥
एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तं एतावानेव आत्मा ईश्वरो वा इत्यभिनिवेशयुक्तं अहैतुक निरुपपत्तिकं अतत्त्वार्थवत् परमार्थालम्बनशून्यं अत एवाल्पं तुच्छं अल्पविषयत्वात् अल्पफलत्वाच्च यदेवम्भूतं ज्ञानं तत् तामसमुदाहृतम् ॥” ३ ॥
इति तट्टीकायां श्रीधरस्वामी ॥
न्यायमते तु ।
“अप्रमा च प्रमा चैव ज्ञानं द्विविधमुच्यते ।
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः ।
आद्यो देहे आत्मबुद्धिः शङ्खादौ पीतिमा मतिः ॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते ।
किं स्विन्नरो वा स्थाणुर्व्वेत्यादि बुद्धिस्तु संशयः ।
तदभावाप्रकारा धीस्तत्प्रकारा तु निर्णयः ॥
स संशयो भवेद्या धीरेकत्राभावभावयोः ।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम् ॥
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः ॥”
“गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ।
अथवा तत्प्रकारं यज्ज्ञानं तद्वत् विशेष्यकम् ॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते ।
तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम् ॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत् ॥”
इति भाषापरिच्छेदः ॥
(यथा, वायुपुराणे उत्तरभागे । ११ । ३६ ।
“वैराग्याज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्त्तते ।
योगज्ञः पतितो वापि मुच्यते नात्र संशयः ॥”
विष्णुः । यथा महाभारते । १३।१४९।६१ ।
“सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम् ॥”
“ज्ञानं प्रकृष्टमजन्यमनवच्छिन्नं सर्व्वस्य साधकमिति ज्ञानमुत्तमं ‘सत्यं ज्ञानमनन्तं ब्रह्म’ इति श्रुतेः ॥” इति तद्भाष्यम् ॥)

ज्ञानदर्पणः, पुं, (ज्ञानं दर्पण इव यस्य ।) पूर्व्वजिनः । इति त्रिकाण्डशेषः ।

ज्ञानयोगः, पुं, (युज्यते ब्रह्मणानेनेति । युज + करणे घञ् । ज्ञानमेव योगः ।) ब्रह्मज्ञानप्राप्त्युपायः । यथा,—
“सर्व्वभूतेषु गोविन्दो बहुरूपो व्यवस्थितः ।
इति मत्वा महाप्राज्ञः प्रतिकूलं न कारयेत् ॥

शब्दादयो ये विषया विषयी चाथ पूरुषः ।
आनीयात्तद्द्वयं ये स्वरूपं परमात्मनः ॥
परमात्मा च भगवान् विष्वक्सेनो जनार्दनः ।
तद्भक्तिमान् भगवतो भाग्यपुण्योऽपि जायते ॥
भगवच्छासनालम्बी भगवच्छासनप्रियः ।
भगवद्भक्तिमास्थाय वत्स ! भागवतो भव ॥
भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः ।
भावेन तं भजस्वेशं भवभङ्गकरं हरिम् ॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम् ।
ततो भागवतो भूत्वा भवबन्धात् प्रमोक्ष्यसि ॥
तत्र चित्तं समाधातुं न शक्नोति भवान् यदि ।
तदभ्यासपरस्तस्मिन् कुरु योगं दिवानिशम् ॥
तत्र यद्यसमर्थस्त्वं ज्ञानयोगे महामते ! ।
क्रियायोगे दिवारात्रौ तत्परः सततं भव ॥"

इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनो नामाध्यायः । विस्तारस्तु श्रीभगवद्गीतायां ७ अध्याये द्रष्टव्यः ॥

ज्ञानलक्षणा, स्त्री, (ज्ञानं लक्षणं स्वरूपं यस्याः ।) त्रिविधालौकिकसन्निकर्षान्तर्गतसन्निकर्षः । तस्य लक्षणं यथा,—

"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणा ।"

इति भाषापरिच्छेदे । ६५ ॥

अस्यार्थः । "तद्विषयज्ञापकतद्विषयज्ञानम् । यथा पूर्व्वं घटादिज्ञाने सति पश्चात् घटादिज्ञानम् ।"

ज्ञानवापी, स्त्री, (ज्ञानस्य ज्ञानरूपोदकस्य वापी दीर्घिकेव ।) वाराणस्यन्तर्गततीर्थविशेषः । तदुक्तमत्रादिर्यथा,—

अगस्त्य उवाच ।

"स्कन्द ! ज्ञानोदतीर्थस्य माहात्म्यं वद साम्प्रतम् ।
ज्ञानवाप्यां प्रशंसन्ति यतः स्वर्गौकसोऽप्यलम् ॥

स्कन्द उवाच ।

घटोद्भव ! महाप्राज्ञ ! शृणु पापापनोदिनीम् ।
ज्ञानवाप्याः समुत्पत्तिं कथ्यमानां मयाधुना ॥
अनादिसिद्धे संसारे पुरा देवयुगे मुने ! ।
प्राप्तः कुतश्चिदीशानश्चरन् स्वैरमितस्ततः ॥
न वर्षन्ति यदाभ्राणि न प्रावर्त्तन्त निम्नगाः ।
जलाभिलाषो न यदा स्नानपानादिकर्म्मणि ॥
क्षारस्वादूदयोरेव यदासीज्जलदर्शनम् ।
पृथिव्यां नरसञ्चारे वर्त्तमाने क्वचित् क्वचित् ॥
निर्व्वाणकमलाक्षेत्रं श्रीमदानन्दकाननम् ॥"
"सुखसन्तानजनकं मोक्षसाधनसिद्धिदम् ।
प्रविश्य क्षेत्रमेतत् स ईशानो जटिलस्तदा ।
ज्वलत्त्रिशूलविमलरश्मिजालसमाकुलः ॥
आलुलोके महालिङ्गं वैकुण्ठपरमेष्ठिनोः ।
महाहमहमिकाया प्रादुरास यदादितः ॥
ज्योतिर्म्मयीभिर्म्मालाभिः परितः परिवेष्टितम् ॥"
"अस्येशानस्य तल्लिङ्गं दृष्ट्वेच्छेत्यभवत्तदा ।
स्नापयामि महालिङ्गं कलसैः शीतलैर्ज्जलैः ।
चखान च त्रिशूलेन दक्षिणाशोपकण्ठतः ॥
कुण्डं प्रचण्डवेगेन रुद्रो रुद्रवपुर्द्धरः ।
पृथिव्यावरणाम्भांसि निष्क्रान्तानि तदा मुने ! ॥
भूप्रमाणाद्दशगुणैर्य्यैरियं वसुधावृता ।
तैर्ज्जलैः स्नापयाञ्चक्रे त्वस्पृष्टैरन्यदेहिभिः ॥"
"विश्वभर्त्तुरुमाधार्शैर्ज्ञानानिसुखकारिभिः ।
महापथ्यपुण्यानमहाशुद्धिविधायिभिः ॥
सहस्रधारैः कलसैः स ईशानो घटोद्भव ! ।
सहस्रकृत्वः स्नपयामास संहृष्टमानसः ॥
ततः प्रसन्नो भगवान् विश्वात्मा विश्वलोचनः ।
तमुवाच तदेशानं रुद्रं रुद्रवपुर्द्धरम् ॥
तव प्रसन्नोऽस्मीशान ! कर्म्मणानेन सुव्रत ! ।
गुरुणानन्यपूर्व्वेण ममातिप्रीतिकारिणा ॥
ततस्त्वं जटिलेशान ! वरं ब्रूहि तपोधन ! ।
अदेयं न तवास्त्यद्य महोद्यमपरायण ! ॥

ईशान उवाच ।

यदि प्रसन्नो देवेश ! वरयोग्योऽस्म्यहं यदि ।
तदेतदतुलं तीर्थं तव नाम्नास्तु शङ्कर ! ॥

विश्वेश्वर उवाच ।

त्रिलोक्यां यानि तीर्थानि भूर्भुवःस्वःस्थितान्यपि ।
तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिवतीर्थमिदं परम् ॥
शिवं ज्ञानमिति ब्रूयुः शिवशब्दार्थचिन्तकाः ।
तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात् ॥
अतो ज्ञानोदनामैतत्तीर्थं त्रैलोक्यविश्रुतम् ।
अस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते ॥
ज्ञानोदतीर्थसंस्पर्शादश्वमेधफलं लभेत् ।
स्पर्शनाचमनाभ्याञ्च राजसूयाश्वमेधयोः ॥
फल्गुतीर्थे नरः स्नात्वा संतर्प्य तु पितामहान् ।
यत् फलं समवाप्नोति तदत्र श्राद्धकर्म्मणा ॥"
"ज्ञानरूपोऽहमेवात्र द्रवमूर्त्तिं विधाय च ।
जाड्यविध्वंसनं कुर्य्यां कुर्य्यां ज्ञानोपदेशनम् ॥
इति दत्त्वा वरान् शम्भुस्तत्रैवान्तरधीयत ।
कृतकृत्यमिवात्मानं सोऽप्यमंस्त त्रिशूलभृत् ॥
ईशानो जटिलो रुद्रस्तत् प्राश्य परमोदकम् ।
अवाप्तवान् परं ज्ञानं येन निर्व्वृतिमाप्तवान् ॥"

इति स्कान्दे काशीखण्डे ३३ अध्यायः ॥

ज्ञानी, [न्] पुं, (ज्ञानमस्यस्येति । ज्ञान + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) दैवज्ञः । (सामान्यबोधयुक्तमात्रे, त्रि । यथा, मार्कण्डेये । ८१ । ४६ ।

"ज्ञानिनो मनुजाः सत्यं किन्तु ते नहि केवलम् ।
यतो हि ज्ञानिनः सर्व्वे पशुपक्षिमृगादयः ॥")

ज्ञानयुक्ते च, त्रि । इति मेदिनी । ने, ६६ ॥ तस्य लक्षणं यथा,—

"प्रजहाति यदा कामान् सर्व्वान् पार्थ ! मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्म्मुनिरुच्यते ॥
यः सर्व्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥
यदा संहरते चायं कूर्म्मोऽङ्गानीव सर्व्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥"

ज्ञानिनापि कर्म्म कर्त्तव्यम् । यथा,—

"सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत ! ।
कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥
न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम् ।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन् ॥
प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः ।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥
तत्त्ववित्तु महाबाहो ! गुणकर्म्मविभागयोः ।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥"

ज्ञानिप्रशंसा यथा —

"चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्ज्जुन ! ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्व्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥
उदाराः सर्व्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः ॥"

इति श्रीभगवद्गीता ॥

ज्ञानेन्द्रियं, क्ली, (ज्ञायतेऽनेनेति । ज्ञा + करणे ल्युट् । ज्ञानप्रकाशकं ज्ञानसाधनं वा इन्द्रियमिति ।) बुद्धीन्द्रियम् । तत् षड्विधम् । मनः १ नेत्रम् २ श्रोत्रम् ३ घ्राणम् ४ जिह्वा ५ त्वक् ६ । इति श्रीभागवतम् ॥

ज्ञापनं, क्ली, (ज्ञा + णिच् + भावे ल्युट् ।) बोधनम् । इति व्याकरणम् । जानान इति भाषा ॥ (यथा, राजतरङ्गिण्याम् । ४ । १८२ ।

"चितिभृद्दाक्षिणात्यानां तिर्य्यक्त्वज्ञापनाय सः ।
पृष्ठे महीतलस्पर्शि चक्रे कौपीनवाससि ॥")

ज्ञप्तिः, स्त्री, (ज्ञा + णिच् + भावे क्तिन् ।) ज्ञापनम् । इति मुग्धबोधम् ॥

ज्ञेयं, त्रि, (ज्ञायते इति । ज्ञा + कर्म्मणि यत् ।) ज्ञानयोग्यम् । ज्ञातव्यम् । यथा,—

"ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥
सर्व्वतः पाणिपादं तत् सर्व्वतोऽक्षिशिरोमुखम् ।
सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ॥
सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य धिष्ठितम् ॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयञ्चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥"

इति श्रीभगवद्गीतायां १३ अध्यायः ॥

ज्या, श जरायाम् । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अक-अनिट् ।) जरा गतवयोभावः । श, जिनाति वृद्धः । जीनः । इति दुर्गादासः ॥

ज्या, स्त्री, (ज्या + अन्येभ्योऽपीति डः । टाप् ।) धनुर्गुणः । तत्पर्य्यायः । मौर्व्वी २ शिञ्जिनी ३ गुणः ४ इत्यमरः । २ । ८ । ८५ ॥ शिञ्जा ५ जीवा ६

पतञ्चिका ७ । इति शब्दरत्नावली ॥ गया ८ वागासनः ६ दुग्धा १० । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । २२६ । २० ।
"जग्राह वलमास्थाय ज्यया च युयुजे धनुः ॥")
माता । वसुधा । इति मेदिनी । ये, २ ॥

ज्यानिः, स्त्री, (ज्या+"वीज्याज्वरिभ्यो निः ।" उणा ४ । ४८ । इति निः ।) जीर्णता । ह्नानिः । तटिनी । इति शब्दरत्नावली ॥

ज्यायान्, [स्] त्रि, (अयमनयोरतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य+ईयसुन् ज्यादेशश्च ततो "ज्यादादीयसः ।" ६।४।१६० । इत्यात्वम् ।) वृद्धतमः । तत्पर्य्यायः । वर्षीयान् २ दशमी ३ प्रशस्यः ४ । इत्यमरः । २ । ६ । ४३ ॥ अतिवृद्धः ५ दशमीस्थः ६ । इति जटाधरः ॥ (यथा, मनुः । ३ । १३७ ।
"ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोत्रियः [पिता ॥")

ज्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट ।) ङ, ज्यवते । इति दुर्गादासः ॥

ज्युत, इर् दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट ।) इर, अज्युतत् अज्योतीत् जुज्योत । इति दुर्गादासः ॥

ज्युत, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट ।) अन्तःस्थादियुक्तः । ऋ, अजुज्योतत् । ङ, ज्योतते चन्द्रः । इति दुर्गादासः ॥

ज्येष्ठः, त्रि, (अयमेषामतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य+इष्ठन् ततो ज्यादेशः ।) अतिवृद्धः । श्रेष्ठः । (यथा, महाभारते । १३ । १४३ । ७ ।
"ज्येष्ठं वयमनुप्राप्य तस्माद्रचेत वै द्विजः ॥"
ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् इति ज्यैष्ठी सा अस्मिन् मासीति पुनरण् संज्ञापूर्व्वस्य विधेरनित्यत्वान्न वृद्धिः ।) ज्येष्ठमासि, पुं । इति मेदिनी । ठे, ५ ॥ अग्रजः । (यथा, रघुः । १२ । १९ ।
"दृढ़भक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ॥")
अधिकवयाः । इति भरतः ॥

ज्येष्ठतातः, पुं, (तातस्य पितुर्ज्येष्ठः । राजदन्तादित्वात् पूर्व्वनिपाते साधुः ।) पितुरग्रजः । इति शब्दरत्नावली ॥ ज्येठा इति भाषा ॥

ज्येष्ठवर्णः, पु, (वर्णाना ज्येष्ठः श्रेष्ठ. निर्द्धारणे तु वर्णेषु ज्येष्ठः । पूर्व्वनिपातः ।) ब्राह्मणः । इति शब्दरत्नावली ॥

ज्येष्ठवला, स्त्री, (ज्येष्ठाख्या वला ।) सहदेवी । इति राजनिर्घण्टः ॥

ज्येष्ठश्वश्रूः, स्त्री, (ज्येष्ठा पूज्या श्वश्रूरिव सत्त्वात् पुंवद्भाव' ।) पत्न्या ज्येष्ठभगिनी । वड्शाली इति भाषा । तत्पर्य्यायः । कुली २ । इति हेमचन्द्रः ॥

ज्येष्ठसाम, [न्] क्ली, (ज्येष्ठं साम इति नित्यकर्म्मधारयः ।) सामभेदः । तदध्ययनाङ्गव्रतम् । इति मिताक्षरा ॥ (यथा, महाभारते । १२।३४८।४६।
"ज्येष्ठं नाम्नाभिविख्यातं ज्येष्ठसामव्रतो हरिः ॥")

ज्येष्ठा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टादशनक्षत्रम् । सा तु शूकरदन्ताकृतितारकत्रितयात्मिका । इति कालिदासः ॥ वलयाकृतिः । अस्या देवता इन्द्रः मिश्रगुणः । इति दीपिका ॥ अत्र जातस्य फलम् ।
"सतकीर्त्तिपुत्त्रैर्विविधैः समेतो
वित्तान्वितोऽत्यन्तलसत्प्रतापः ।
श्रेष्ठप्रतिष्ठो विकलस्वभावो
ज्येष्ठा भवेद्यस्य च जन्मकाले ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
(यथा, मार्कण्डेयपुराणे । ३४ । १३ ।
"कुर्व्वन्तस्त्वनुराधासु लभन्ते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यमुत्तमम् ॥")
गृहगोधिका । इति मेदिनी । ठे, ५ ॥ मध्यमाङ्गुलिः । इति हेमचन्द्रः ॥ गङ्गा । इति राजनिर्घण्टः ॥ धीरादिनायिकाभेदः । तस्या लक्षणं यथा । परिणीतत्वे सति भर्त्तुरधिकस्नेहा । इति रसमञ्जरी ॥ * ॥ अलक्ष्मीः । यथा भगवतीं प्रति महादेववाक्यम् ।
"मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् ।
तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि । ॥
ज्येष्ठा देवी समुत्पन्ना रक्ताम्बरवाससावृता ।
उत्पन्ना साब्रवीद्देवान् किं कर्त्तव्यं मयेति वै ॥
तामब्रुवंस्तदा देवीं सर्व्वे देवगणा भृशम् ।
येषां गृहान्तरे नित्यं कलहः संप्रवर्त्तते ॥
तत्र स्थानं प्रयच्छामो वासस्तत्र शुभानने । ।
यस्य गेहे कपालास्थिभस्मकेशादिचिह्नितम् ॥
परुषं भाषते नित्यं वदन्त्यनृतवादिन' ।
सन्ध्याकाले च ये पापा. स्वपन्ति मलचेतसः ॥
तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी ।
कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु ॥
तत्र ते सतत स्थान भविष्यति न संशयः ।
अकृत्वा पादयोः शौचं यस्त्वाचामति दुर्म्मतिः ॥
तं भजस्व सदा देवि । कलुषेणावृता भृशम् ।
तृणाङ्गारकपालाभ्रवालुकायसचर्म्मभिः ॥
दन्तधावनकर्म्माणो भविष्यन्ति नराधमाः ।
रमस्व कलिना देवि । तेषां वेश्मसु नित्यशः ॥
तिलपिष्टञ्च नक्तञ्च कालिङ्गशिग्रुभक्षणम् ।
छत्राकं विड्वराहञ्च विल्वकोयातकीफलम् ॥
अलावुश्रीफल ये वै खादयन्ति नराधमा. ।
तेषां गृहे तव स्थानं देवि । दारिद्र्यदे । सदा ॥
इत्यादिश्य सुराः सर्व्वे ते ज्येष्ठां कलिवल्लभाम् ।
पुनश्च मन्थनं चक्रुः क्षीराब्धि सुसमाहिताः ॥"
इति पाद्मे उत्तरखण्डम् ॥

ज्येष्ठामूलीयः, पु, (ज्येष्ठा मूलं वा नक्षत्रमर्हति पौर्णमास्यामिति छ. ।) ज्यैष्ठमास' । इति त्रिकाण्डशेष. ॥ (यथा, शब्दार्थचिन्तामणिः ।
"ज्येष्ठामूलीयमिच्छन्ति मासमाषाढ़पूर्व्वजम् ॥")

ज्येष्ठाम्बु, क्ली, (ज्येष्ठं विविधरोगविनाशकत्वात् श्रेष्ठं अम्बु तण्डुलधौत जलमिति । नित्यकर्म्मधारयः ।) तण्डुलाम्बु । इति वैद्यकपरिभाषा ॥ चेलुनि जल इति भाषा ॥

ज्येष्ठाश्रमी, [न्] पु, (आश्रमोऽस्यस्य इति । आश्रम+इनिः । ज्येष्ठः श्रेष्ठ आश्रमी ।)
"ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुक' ।
चत्वार आश्रमा. प्रोक्ता' सर्व्वे गार्हस्थ्यमूलका ॥"
"यथा वायु समाश्रित्य वर्त्तन्ते सर्व्वजन्तवः ।
तथा गार्हस्थ्यमाश्रित्य वर्त्तन्ते सर्व्व आश्रमाः ॥"
इति वचनाच्च गृहस्थाश्रमस्य सर्व्वाश्रमेषूत्कृष्टत्वात् तथात्वम् ।) गृहस्थ' । इति हेमचन्द्र' ॥

ज्येष्ठी, स्त्री, गृहगोधा । जेठी इति टिक्टिकी इति च भाषा । तत्पर्य्यायः । मुषली २ मुसली ३ कुडमत्स्या ४ गृहगोधिका ५ मूली ६ टुकटुकी ७ शकुनज्ञा ८ गृहालिका ९ । इति शब्दरत्नावली ॥ तस्याः पतनफलं यथा,—
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो जायते वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणहृदिस्था सर्व्वसौख्य ददाति ॥"
इति ज्योतिषम् ॥
दिग्विशेषे तस्य शब्दफलम् ।
"वित्त ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिल दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुव निगदितं दिग्लक्षणं खञ्जने ॥
ज्येष्ठीरुते क्षुतेऽप्येवमूचुः केचिच्च कोविदाः ॥"
इति तिथ्यादितत्त्वम् ॥

ज्यैष्ठः, पु, (ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् ङीप् च । सा अस्मिन् मासे इति पुनरण् ।) मासविशेषः । ज्येष्ठानक्षत्रयुक्ता पौर्णमासी ज्यैष्ठी सा यत्र मासे भवति सः । वृषस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः । वृषराशिस्थरविकः सौरः । इति स्मृतिः ॥ तत्पर्य्याय । शुक्रः २ । इत्यमरः । १।४।१६ ॥ ज्येष्ठ' ३ । इति शब्दरत्नावली ॥ तत्र जातस्य फलं यथा,—
"विदेशवृत्तिः पुरुषः सुतीव्रः
धमान्वित. स्यात् खलु दीर्घसूत्रः ।
विचित्रबुद्धिर्विदुषा वरिष्ठो
ज्यैष्ठाभिधाने जनन हि यस्य ॥"
इति कोष्ठीप्रदीपः ॥

ज्यैष्ठसामा, [न्] पुं, (ज्येष्ठसाम अधीते यः सः । इत्यण् ।) ज्येष्ठसामा । ज्येष्ठसामवेदाध्येता । इति मिताक्षरा ॥

ज्यैष्ठी, स्त्री, (ज्येष्ठानक्षत्रान्विता पौर्णमासीत्यण् ङीप् च ।) ज्यैष्ठपूर्णिमा । इति शब्दरत्नावली ॥ (यथा, तिथितत्त्वधृतभविष्यपुराणवचनम् ।
"कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ।
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः ॥")
ज्येष्ठी च ॥

ज्यो, ङ नियमे । व्रतादेशे । उपनीतौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक नियमार्थे-व्रतादेशादौ तु सक-अनिट् ।) व्रतस्यादेशो व्रतादेश. । ङ, ज्यवते याज्ञिको नियमी स्यादित्यर्थः ।

व्यवते पण्डितो जनं प्रसमुपदिशतीत्यर्थः । व्यवते पुत्र विप्रः उपनयतीत्यर्थः । इति दुर्गादासः ॥

ज्योतिः, [स्] क्ली, (द्युत दीप्तौ + इसिः । यद्वा, द्युत दीप्तौ + "द्युतेरिसिन्नादेश्च जः ।" उणां । २ । ११२ । इति इसिन् दस्य च जः ।) दृष्टिः । नक्षत्रम् । (यथा, "ज्योतींष्यमिषामेध्यमप्रशस्तञ्च नाभिवीक्षेत ॥" इति चरके सूत्रस्थानेऽष्टमेऽध्याये ॥) प्रकाशः । इति मेदिनी । से, २३ ॥

ज्योतिः, [स्] पु, (ज्योतते इति । ज्युत + कर्त्तरि इसिः । ज्युत + इसिन् वा ।) अग्निः । (यथा,—
"तस्मात्तरंश्च नाभिस्तु ज्योतिः स्थानं ध्रुवं स्मृतम् ।
तदा धमति वातस्तु देहस्तेनास्य वर्द्धते ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥) सूर्य्यः । इति मेदिनी । से, २२ ॥ मेथिका । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते १३।१४९।७८ ।
"स्रघः स्रग्वी शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥")

ज्योतिरिङ्गः, पु, (ज्योतिषा इङ्गतीति । इगि गतौ + अच् । ज्योतिरिव इङ्गतीति वा ।) खद्योतः । इति शब्दरत्नावली ॥

ज्योतिरिङ्गणः, पु, (ज्योतिरिव इङ्गतीति । इगि गतौ + ल्युः ।) कीटविशेषः । ज्योनाकपोका इति भाषा । तत्पर्य्यायः । खद्योतः २ ध्वान्तोन्मेषः ३ तमोमणिः ४ दृष्टिबन्धुः ५ तमोज्योतिः ६ ज्योतिरिङ्गः ७ निमेषकः ८ । इति शब्दरत्नावली ॥ ज्योतिर्वीजम् ९ निमेषरुक् १० । इति त्रिकाण्डशेषः ॥

ज्योतिर्वीजं, क्ली, (ज्योतिर्वीजमिवास्य ज्योतिषो वीजमिव वा ।) ज्योतिरिङ्गणः । इति त्रिकाण्डशेषः ॥

ज्योतिर्हस्ता, स्त्री, (ज्योतिर्ज्योतीरूपं हस्तं शरीरमस्याः ।) दुर्गा । अस्या नामनिरुक्तिर्यथा,—
"हस्तं शरीरमित्याहुर्हस्तञ्च गगनं तथा ।
ज्योतिषि ग्रहनक्षत्राज्ज्योतिर्हस्ता ततः स्मृता ॥"
इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः ॥

ज्योतिश्चक्रं, क्ली, (ज्योतिर्म्मयं चक्रम् । ज्योतिर्भिः स्वस्वावस्थानेन विरचितं चक्रं वा ।) चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डलम् । राशिचक्रम् । यथा,
"ज्योतिश्चक्रं सुवो मानमूर्द्धा शौवाच्च केशव ।
धातुर्लेख्यं ज्योतिषस्य सारं रुद्राय सर्व्वदः ॥"
इति गरुड़पुराणम् ॥
अपि च तिथ्यादितत्त्वे ।
"सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगम् ।
तदर्कांशे भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥"

ज्योतिषं, क्ली, (ज्योतिः सूर्य्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच् ।) वेदाङ्गशास्त्रविशेषः । तत् ग्रहण्यादिगणनशास्त्रम् । इत्यमरटीकायां भरतः ॥
"पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता ।
केरलिः शकुनञ्चैव————— ॥"
इति प्रश्नरत्नटीका ॥ * ॥

अस्य सम्बन्धादि यथा,—
"अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति चोदितः ।
अभिधेयञ्च जगतां शुभाशुभनिरूपणम् ॥
इज्याध्ययनसङ्क्रान्तिग्रहषोडशकर्म्मणाम् ।
प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयः ॥"
इति नारदीयम् ॥ * ॥

अस्याध्ययनं द्विजैः कर्त्तव्यम् । यथा,—
"सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम् ।
वेदस्य निर्म्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम् ॥
विनैतदखिलं श्रौतं स्मार्त्तं कर्म्म न सिध्यति ।
तस्माज्जगद्धितायेदं ब्रह्मणा निर्म्मितं पुरा ॥
अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः ॥"
इति नारदः ॥ * ॥

शूद्रस्य पाठनिषेधो यथा,—
"स्नेहाल्लोभाच्च मोहाच्च यो विप्रोऽज्ञानतोऽपि वा ।
शूद्रायाशुपदेशन्तु दद्यात् स नरकं व्रजेत् ॥"
इति गर्गः ॥ * ॥

अस्य ज्ञानमावश्यकं यथा,—
"वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्व्या विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान् ॥
यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्धि संस्थितम् ॥"
इति वेदाङ्गज्योतिषम् ॥ * ॥

अस्याध्ययनफलं यथा,—
"एवंविधस्य श्रुतिनेत्रशास्त्र-
स्वरूपमर्त्थं खलु दर्शनं वै ।
निहन्त्यशेषं कलुषं जनानां
महत्तदम् धर्म्मसुखास्पदं स्यात् ॥"
इति माण्डव्यः ॥ * ॥

अस्य ज्ञाने फलं यथा,—
"ज्योतिश्चक्रे तु लोकस्य सर्व्वस्योक्तं शुभाशुभम् ।
ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम् ॥"
इति गर्गः ॥

ज्योतिषिकः, पु, (ज्योतिर्ज्योतिः शास्त्रं अधीते इति । क्रतूक्थादित्वात् ठक् । शब्दपूर्व्वस्य विधेरनित्यत्वात् न वृद्धिः ।) ज्यौतिषिकः । इत्यमरटीका ॥ (यथा, मार्कण्डेये ।
"धर्म्मारण्या ज्योतिषिका गौरग्रीवा
गुडाश्मकाः ॥")

ज्योतिषी, स्त्री, (ज्योतिरस्त्यस्या इति अच् ङीप् च ।) तारा । इति हेमचन्द्रः । ज्योतिषशास्त्रज्ञे, त्रि ॥

ज्योतिष्कः, पु, (ज्योतिरिव कायतीति । कै + कः ।) चित्रकवृक्षः । मेथिकावीजम् । इति राजनिर्घण्टः ॥ (अस्य व्यवहारो यथा, "ज्योतिष्कफलतैलं वा क्षीरेण स्वर्ज्जिका हिङ्गु मिश्रं पिबेत् ॥" इति चिकित्सितस्थाने चतुर्द्दशेऽध्याये सुश्रुतेनोक्तम् ॥) गणिकारिकावृक्षः । इति रत्नमाला ॥

ज्योतिष्काः, पु, (ज्योतिर्भिः कायतीति । कै + कः ।) चन्द्रार्कग्रहनक्षत्रतारकाः । इति हेमचन्द्रः ॥ बहुवचनान्तोऽयं शब्दः ॥

ज्योतिष्का, स्त्री, (ज्योतिरिव कायतीति । कै + क टाप् च ।) ज्योतिष्मतीलता । इत्यमरटीकायां स्वामी ॥

ज्योतिष्टोमः, पुं, (ज्योतींषि त्रिवृदादयः स्तोमा यस्य । "ज्योतिरायुषः स्तोमः ।" ८।३।८३ । इति षत्वम् ।) षोड़शर्त्विक्साध्ययज्ञविशेषः । तत्र द्वादशशतगोर्दक्षिणा । इति मलमासतत्त्वम् ॥ (यथा, महाभारते । ३ । ८२ । ८० ।
"बहुधा निःसृतः कायाज्ज्योतिष्टोमः क्रतुर्यथा ॥")

ज्योतिष्मती, स्त्री, (ज्योतिरस्त्यस्या इति । मतुप उदित्वात् ङीप् च ।) लताविशेषः । मालकङ्गनी इति लताफट्करी इति नयाफट्की इति च भाषा ॥ तत्पर्य्यायः । पारावताङ्घ्रिः २ कटभी ३ पिण्या ४ । इत्यमरः । २ । ४ । १५० ॥ पारावतपदी ५ नगणा ६ स्फुटबन्धनी ७ पूतितैला ८ इङ्गुदी ९ । इति रत्नमाला ॥ स्वर्णलता १० अनलप्रभा ११ ज्योतिर्लता १२ सुपिङ्गला १३ दीप्ता १४ मेध्या १५ मतिदा १६ दुर्ज्जरा १७ सरस्वती १८ अमृता १९ । अस्याः स्थूलाया गुणाः । अतितिक्तत्वम् । किञ्चित्कटुत्वम् । वातकफापहत्वञ्च । अस्याः सूक्ष्माया गुणाः । दाहप्रदत्वम् । दीपनत्वम् । मेधाप्रज्ञावृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ तीक्ष्णत्वम् । व्रणविस्फोटनाशित्वञ्च । इति राजवल्लभः ॥ रात्रिः । इति राजनिर्घण्टः ॥ (नदीविशेषः । यथा, मात्स्ये ।१२० । ६५ ।
"सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या ।
अवगाढे ह्युभयतः समुद्रौ पूर्व्वपश्चिमौ ॥"
ज्योतिर्विशिष्टे, त्रि । यथा, रघुः । ६ । २२ ।
"नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥")

ज्योतीरथः, पुं, (ज्योतिरेव रथोऽस्य सर्व्वस्य ज्योतिश्चक्रस्य रथ इव वा ज्योतिःपदार्थानां सूर्य्यादीनामाधारत्वात् तथात्वमिति बोध्यम् ।) ध्रुवः । इति त्रिकाण्डशेषः ॥

ज्योत्स्ना, स्त्री, (ज्योतिरस्त्यस्यामिति । "ज्योत्स्नातमिस्रेति ।" ५ ।२ । ११४ । इति निपातनात् नप्रत्यय उपधालोपश्च ।) चन्द्रज्योतिः । चाँदनी इति हिन्दी भाषा ॥ तत्पर्य्यायः । चन्द्रिका २ कौमुदी ३ । इत्यमरः । १ । ३ । १६ ॥ चान्द्री ४ कामवल्लभा ५ चान्द्रातपः ६ चन्द्रकान्ता ७ शीता ८ अमृततरङ्गिणी ९ । (यथा, महाभारते । १ । १ । ८६ ।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः ॥")
ज्योत्स्नायुक्तरात्रिः । इति मेदिनी । ने, ८ । पटोलिका । इत्यमरटीकायां स्वामी ॥ अस्या गुणाः । त्रिदोषशमनत्वम् । इति राजनिर्घण्टः ॥ कषायत्वम् । मधुरत्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥ श्वेतघोषा । इति

रत्नमाला ॥ दुर्गा । यथा,—
"प्रभाप्रसादशीतत्वात् ज्योत्स्ना चन्द्रार्क-
मालिनी ।"
इति देवीपुराणे ४५ अध्याय. ॥
अपि च ।
"रौद्रायै नमो नित्यायै गौर्य्यै धात्र्य नमो नमः।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नम.॥"
इति मार्कण्डेये देवीमाहात्म्ये ५ अध्याय' ॥
(प्रभातकालः । यथा, विष्णुपुराणे । १ ।५।३६।
"ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याऽभि-
धीयते ॥")

ज्योत्स्नाप्रिय',पु,(ज्योत्स्ना प्रियाऽस्य ।)चकोरः। इति हेमचन्द्रः ॥

ज्योत्स्नावृक्षः, पुं, (ज्योत्स्नाया दीपधारण वृक्ष इव ।) दीपाधारः । इति त्रिकाण्डशेषः ॥

ज्योत्स्नी, स्त्री, (ज्योत्स्ना अस्त्यस्या इत्यण् ङीप् च । सञ्ज्ञापूर्व्वकस्य विधेरनित्यत्वान्न वृद्धिः ।) चन्द्रिकायुक्ता रात्रिः । ज्योत्स्नारात्रिरिति ख्याता । पटोलिका। इत्यमरः ।२ । ४ । ११८॥ झिङ्गा इति भाषा ॥ रेणुकानाम गन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

ज्यौतिषिकः, पुं, (ज्योतिषं ज्योतिषशास्त्रमधीते वेद वा इति ठक् वृद्धिश्च ।) दैवज्ञ. । इत्य-मरः । २ । ८ । १४ ॥

ज्यौत्स्नः, त्रि, (ज्योत्स्नया अन्वित. । इत्यण् ।) दीप्तः । ज्योत्स्नायुक्तः ॥

ज्यौत्स्निका, स्त्री, (ज्योत्स्ना अस्त्यस्या इति ठक् पूर्व्ववृद्धिष्टाप् च ।) ज्योत्स्नान्विता निशा। इति शब्दरत्नावली ॥

ज्यौत्स्नी, स्त्री, (ज्योत्स्ना पूर्णचन्द्रचन्द्रिका अस्त्यस्याः इत्यण् पूर्व्ववृद्धिः ङीप् च ।) पूर्णिमा-युक्तरात्रि. । इति हेमचन्द्रः ॥ ज्योत्स्नी । इत्य मरटीकायां रायमुकुट' ॥

ज्रि, अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वा पर-सक-अनिट् ।) रेफोपध. । ज्रयति शत्रु बली । इति दुर्गादासः ॥

ज्री, गि क्वि ज्याने । गतवहुवयोभाव इति यावत । इति कविकल्पद्रुम' ॥ (क्र्या-चुरां पक्षे भ्वां-पर-अकं-अनिट् ।) गि, ज्रीणाति ज्रीणः ज्रीणिः । क्वि, ज्राययति ज्रयति। णिकाभ्यामेव पाक्षिक-चुरादित्वे सिद्धे क्वि पाठो भ्वादित्वार्थ. । इति दुर्गादासः ॥

ज्वर, म रोगे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) ज्वरति जनो धातुवैषम्यात् । म, ज्वरयति । इति दुर्गादासः ॥

ज्वरः, पु, (ज्वरति जीर्णो भवत्यनेन । ज्वर+ करणे घञ् भावे घञ् वा । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः ।) ज्वरणम् । स्वनामख्यात-रोगः । तत्पर्य्यायः । जूर्त्ति' २ । इत्यमरः । ३ । २ । ३६ ॥ ज्वरि. ३ आतङ्क. ४ रोगश्रेष्ठ. ५ महागद ६ । इति राजनिर्घण्ट ॥ तापक' ७ सन्ताप. ८ । इति शब्दरत्नावली ॥ * ॥

तस्योत्पत्तिर्यथा,—
"कालाग्निरुद्र' कोपेन चिक्षेप ज्वरमुल्वणम् ।
वभूवुर्य्यादवाः सर्व्वे ज्वराक्रान्ता हरिं विना ॥
तं दृष्ट्वा भगवान् कृष्णः ससर्ज्ज वैष्णव ज्वरम् ।
तं चिक्षेप ज्वरं हन्तुं माहेशं रणमूर्द्धनि ॥"*॥
माहेशज्वराकारो यथा,—
"जनक. सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव विकृताकृतिः ॥
भीमस्त्रिपादस्त्रिशिरा' षड्भुजो नवलोचनः ।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥"*॥
तस्य भेदाः ।
"वातजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
जातिभेदे ज्वरभेदो यथा, हरिवंशे ।
श्रीकृष्ण उवाच ।
"शृणुष्व ज्वर । सन्देशं यथा लोके चरिष्यसि ।
सर्व्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसि ।
चतुष्पादान् भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते ।
त्रिधाभूत वपुः कृत्वा पक्षिषु त्वं भव ज्वर ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।
एकान्तरश्चतुर्भागः खोरकश्च चतुर्थकः ॥
मानुषेष्वथ खेदाय वस त्वं प्रविभज्य वै ।
जातिष्वथावशेषासु निवस त्वं शृणुष्व मे ॥"
अस्यार्थः । "मानुषेषु यस्तृतीयो भागः तस्य चतुर्भाग कृत्वा एकांशेन पक्षिषु वस द्वितीयेन एकान्ता देवास्तेषु तृतीयांश. खोरकः चतु-र्थांशेन मानुषेषु वस ॥"
"वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः ।
पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च ॥"
आतुर्य्यं निःसारता: ॥
"पद्मिनीषु हिमो भूत्वा पृथिव्यामपि चोषरः ।
अपा तु नीलिका विद्यात् शिखोद्भेदश्च वर्हिणाम्॥
गैरिक पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि ।
गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि ॥
एव विविधरूपेण भविष्यसि महीतले ।
दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि ॥
ऋते देवमनुष्यांश्च नान्यस्त्वा विषहिष्यति ॥"
तस्य गारुडोक्तनिदानादिर्यथा,—
धन्वन्तरिरुवाच ।
"वक्ष्ये ज्वरनिदान हि सर्व्वज्वरविबुद्धये ।
ज्वरो रोगपतिः पाप्मा मृत्युराजोऽशनोऽन्तकः ॥
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्द्धनयनोद्भव' ।
तत्सन्तापो मोहमय. सन्तापात्मापचारजः ॥
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ।
पाकलो गजेष्वभितापो वाजिष्वलर्कः कुक्कुरेषु ।
इन्द्रमदो जलदेषु नीलिका ज्योतिरोषधिषु
भूम्यामूषरो नाम ॥ * ॥
"हृल्लासच्छर्द्दन कास' स्तम्भ श्वैत्यं त्वगादिषु ।
अङ्गेषु शीतपिडकामात्रोदर्द्दः कफोद्भवे ॥
काले यथास्वं सर्व्वेषां प्रवृत्तिर्वृद्धिरेव वा ।
निदानोक्तानुपशयो विपरीतोपशायिता ॥ * ॥
अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च ।
हृद्दाहश्च विपाकश्च तन्द्रा आलस्यमेव च ॥
वह्निर्विसर्गविलया दोषाणामप्रवर्त्तनम् ।
लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं मुखम् ॥
यच्च सुप्त गुरुत्वञ्च गात्राणां वहुमूत्रता ।
न विजीर्णा न चाग्लानिर्ज्ज्वरस्यामस्य लक्षणम् ॥
क्षुत्क्षामता लघुत्वञ्च गात्राणा ज्वरमार्द्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥ * ॥
यथास्वलिङ्गं संसर्गे ज्वरससर्गजोऽपि वा ।
शिरोऽर्त्तिमूर्च्छावमिदेहदाह-
कण्ठास्यशोषारुचिपर्व्वभेदाः ।
उन्निद्रता संभ्रमरोमहर्षौ
जृम्भातिवाक्त्वं पवनात सपित्तात् ॥*॥
तापहान्यरुचिपर्व्वशिरोरुक्-
पीनसश्वसनकासविवन्धाः ।
शीतजाड्यतिमिरभ्रमितन्द्राः
श्लेष्मवातजनितज्वरलिङ्गम् ॥ * ॥
शीतस्तम्भस्वेददाहव्यवस्था-
तृष्णाकासश्लेष्मपित्तप्रवृत्तिः ।
मोहस्तन्द्रालिप्ततिक्तास्यता च
ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य ॥ * ॥
सर्व्वजो लक्षणैः सर्व्वैर्दाहोऽत्र च मुहुर्म्मुहु ।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा ।
गीतनर्त्तनहास्यादिप्रकृतेहाप्रवर्त्तनम् ॥
साश्रुणी कलुषे रक्ते भग्ने लुलितपक्ष्मणी ।
अक्षिणी पिण्डिकापार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रम' ॥
सस्वनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा ।
परिदग्धा खरा जिह्वा गुरुसस्ताङ्गसन्निभा ॥
रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिलुट् ।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ॥
हृद्व्यथा मलसंसर्गः प्रवृत्तिर्वाल्पशोऽति वा ।
स्निग्धास्यता वलभ्रंशः स्वरसाद' प्रलापिता ॥
दोषपाकश्चिरात्तन्द्रा प्रतत कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ॥
वायुना कफरुद्धेन पित्तमन्त सुपीडितम् ।
यवायितात्व सौक्ष्म्याच्च वहिर्म्मार्गं प्रपद्यते ॥
तेन हारिद्रनत्रत्वं सन्निपातोद्भवे ज्वरे ।
दोषे विवृद्धे नष्टेऽग्नौ सर्व्वसपूर्णलक्षण' ॥
असाध्य' सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा ।
अन्यश्च सन्निपातोत्थो यत्र पित्तं पृथक स्थितम् ॥
त्वचि कोष्ठे च या दाहं विदधाति पुरोऽनु वा ।
तद्वद्वातकफौ शीतं दाहादिर्दु स्तरस्तयो' ॥
शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ।
शीते शान्तेऽन्ते मूर्च्छा मदस्तृष्णा च जायते ॥
दाहादौ पुनरन्ते स्युस्तन्द्रास्वेदवमिक्लमा' ॥ * ॥
आगन्तुरभिघाताभिषङ्गशापाभिचारत' ॥
चतुर्द्धा तु क्षतच्छेददाहाद्यैरभिघातजः' । * ।
श्रमाच्च तस्मिन् पवन' प्रायो रक्तं प्रदूषयन् ॥
सव्यथाशोफवैवर्ण्यं सरुज कुरुते ज्वरम् ।

ग्रहावेशौषधिविषक्रोधभीशोककामजः ॥
अभिघाताद्दृश्यहेतुभ्यो भ्रान्ते कसास्रासरोदने ।
ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः ॥४॥
विषान्मूर्च्छातिसारास्यश्यावता दाहहृद्भ्रमः ।
क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे॥
कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः ॥
ग्रहादौ सन्निपातस्य रूपादौ मरुतस्तयोः ॥
कोप कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ ।
सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ ॥५॥
तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते ।
पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः ॥
सदाहमूर्च्छाग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः ।
इति ज्वरोऽष्टधा दृष्टः समासाद्द्विविधस्तु सः ॥
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः ।
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः ॥
पूर्वं शरीरे शारीरे तापो मनसि मानसे ।
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् ॥
दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः ।
ज्वरोऽधिकं विकाराः स्युरन्तःक्षोभो मलग्रहः ॥
बहिरेव बहिर्वेगे तापोऽपि च सुसाधितः ।
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥
वैकृतोऽन्यः सुदुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ।
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ॥
कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः ।
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥
कफो वसन्ते तमपि वातपित्तं भवेदनु ।
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥
सर्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ।
ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता ॥
न प्रवृत्तिर्न विड्जीर्णा न क्षुत् सामज्वराकृतिः ।
ज्वरवेगोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥
जीर्णतामविपर्य्यासात् सप्तरात्रञ्च लङ्घनात् ।
ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् ॥
प्रायशः सन्निपातेन भूयसा तूपदिश्यते ।
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः ॥
तापयन्तस्तनूं सर्वां तुल्यदृष्यादिवर्द्धिताः ।
बलिनो गुरवस्तब्धा विशेषेण रसाश्रिताः ॥
सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्य्युः सुदुःसहम् ।
मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपयेत्ततः ॥
सर्वाकाररसादीनां शुद्ध्याशुद्ध्यापि वा क्रमात् ।
वातपित्तकफैः सप्तद्वादशद्वादशावसरान् ॥
प्रायोऽनुयाति मर्य्यादां मोक्षाय च वधाय च ।
इत्यग्निवेशस्य मतं हारीतस्य पुनः स्मृतिः ॥
द्विगुणा सप्तमी या च नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥
शुद्ध्यशुद्धौ ज्वरः कालं दीर्घमप्यत्र वर्त्तते ।
कृशानां व्याधियुक्तानां मिथ्याहारादिसेविनाम् ॥
अल्पोऽपि दोषो दुष्ट्यादेर्लब्ध्वान्यतमतो बलम् ।
स प्रत्यनीको विषमं यस्मात्तद्वृद्धिक्षयान्वितः ॥
सोऽरिपन्थी ज्वरं कुर्य्याद्विषमक्षयवृद्धिभाक् ।

दोषः प्रवर्त्तते तेषां स्वे काले ज्वरयन् बली ॥
निवर्त्तते पुनश्चैष प्रत्यनीकबलाबलः ।
क्षीणदोषो ज्वरः सूक्ष्मो रसादिष्वेव लीयते ॥
लीनत्वात् कार्श्यवैवर्ण्यजाड्यादीनादधाति सः ।
आसन्नविवृतास्यत्वात् स्रोतसां रसवाहिनाम् ॥
आशु सर्व्वस्य वपुषो व्याप्तिर्दोषेण जायते ।
सन्ततः सततस्तेन विपरीतो विपर्य्ययात् ॥
विषमो विषमारम्भः क्षयकालोऽप्यनुक्रमात् ।
दोषो रक्ताश्रयः प्रायः करोति सन्ततं ज्वरम् ॥
अहोरात्रस्य सन्धिः स्यात् सकृदन्येद्युराश्रितः ।
तस्मिन्मांसवहा नाड़ी मेदोनाड़ी तृतीयके ॥
ग्राही पित्तानिलान्मूर्द्ध्नस्त्रिकस्य कफपित्ततः ।
स पृष्ठास्यानिलकफात् स चैकाहान्तरः स्मृतः ॥
चतुर्थको मलैर्मेदो मज्जास्थ्यन्यतरस्थितैः ।
मज्जास्थस्त्वैतरेषाम् प्रभावं मनुदर्शयेन ॥
द्विविधः कफेन जङ्घाभ्यां स पूर्वं शिरसोऽनिलात् ।
अस्थिमज्जोभयगतः चातुर्थकविपर्य्ययः ॥
त्रिधा चाद्यः ज्वरयति दिनमेकञ्च मुञ्चति ।
बलाबलेन दोषाणामन्नचेष्टादिजन्मनाम् ॥
मलानामविपर्य्यासात् सप्तरात्रन्तु लङ्घयेत् ।
ज्वरः स्यात् मनसस्तद्वत् कर्म्मणश्च तदा तदा ॥
गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात् ।
तुल्यो मयाच दोषाणां दृष्टिकिनृस्यचतुर्थकः ॥
सूक्ष्मात् सूक्ष्मतरास्वेषु दूराद्दूरतरेषु च ।
दोषो रक्तादिमार्गेषु शनैरल्पचिरेण यत् ॥
याति देहञ्च नाशेष सन्तापादीन् करोत्यतः ।
क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः ॥
विषमो विषमारम्भः क्षयकालानुसारवान् ।
यथोत्तरं मन्दमतिर्मन्दशक्तिर्यथायथम् ॥
कालेनाप्नोति सदृशान् स रसादींस्तथा तथा ।
दोषो ज्वरयति क्षुद्रस्थिराश्चिरतरेण च ॥ * ॥
भूमौ स्थितं जले सिक्तं काले नैव प्रतीक्षते ।
अङ्कुराय यथा बीजं दोषबीजं भवेत्तथा ॥
वेगं हत्वा विषं यद्वदाशये नीयते बलम् ।
कुप्यत्याप्तबलं भूय काले दोषविषं तथा ॥
एवं ज्वरा प्रवर्त्तन्ते विषमाः सततादयः ॥ * ।
उतक्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम् ॥
अरोचको वमिः श्वासः सर्व्वस्मिन्नसगे ज्वरे ।
रक्तनिष्ठीवनं तृष्णा रूक्षोष्णं पिडकोद्गमः ॥
दाहरागभ्रममदप्रलापो रक्तसंस्थिते ।
तृड्ग्लानिसृष्टवर्च्चस्कमन्तर्दाहो भ्रमस्तमः ॥
दौर्ब्बल्यं गात्रविक्षेपो मांसस्थे मेदसि स्थिते ।
स्वेदोऽतितृष्णा वमनं दौर्गन्ध्यं चासहिष्णुता ॥
प्रलापो ग्लानिररुचिरस्थिगे त्वस्थिभेदनम् ।
दोषप्रवृत्तिरूर्द्ध्वाधः श्वासाङ्गविक्षेपकूजनम् ॥
अन्तर्दाहो बहिः शैत्यं श्वासो हिक्का च मज्जगे ।
तमसो दर्शनं मर्म्मच्छेदनं स्तब्धमेढ्रता ॥
शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंश्रये ।
उत्तरोत्तरदुःसाध्याः पञ्चान्ये तु विपर्य्यये ॥
प्रलिम्पन्निव गात्राणि श्लेष्मणा गौरवेण च ।
मन्दज्वरः प्रलापस्तु सशीतं स्यात् प्रलेपकः ॥
नित्यं मन्दज्वरो रूक्षः शीतः कृच्छ्रेण गच्छति ।

कफप्रायः श्लेष्मभूयिष्ठो भवेदङ्गबलाशकः ॥ * ॥
हारिद्राभेदवर्णाभमाद्भक्षेप प्रमेहति ।
स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः ॥
कफयातौ ग्रीष्मौ यत्र शैत्यपित्तस्य देहिनः ।
तीक्ष्णोऽथ वा दिवा मन्दो जायते रात्रिको ज्वरः ॥
दिवाकरामीतवचे व्यायामाच्च विशोषिते ।
शरीरे नियतस्थाता ज्वरः स्यात् पौर्वरात्रिकः ।
आमाशये यदा दुष्टे श्लेष्मपित्ते व्यवस्थिते ।
तदार्द्धं शीतलं देहे त्वर्द्धं चोष्णं प्रजायते ॥*॥
काये पित्तं यदा दुष्टं श्लेष्मा चान्ते व्यवस्थितः ।
उष्णत्वं तेन देहस्य शीतत्वं करपादयोः ॥ * ॥
रसरक्ताश्रयः साध्यो मांसमेदोगतश्च यः ।
अस्थिमज्जागतः कृच्छ्रस्तैस्तैः साङ्गैर्हतप्रभ ॥*॥
विसर्पो ज्वरवेगार्त्तः सक्रोध इव वीक्ष्यते ।
सदोषशब्दश्च शकृद्द्रवं स्रुवति वेगवत् ॥ * ॥
देहो लघुर्व्यपगतक्लमसोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम् ।
स्वेदः क्षवः प्रकृतिगामिमनोऽन्नलिप्सा
कण्डूश्च मूर्द्ध्नि विगतज्वरलक्षणानि ॥
इत्यादि महापुराणे गारुडे ज्वरनिदान
समाप्तम् । १५७ अध्यायः ॥
अथ ज्वरस्य चिकित्सा ।
धन्वन्तरिरुवाच ।
"ज्वरोऽष्टधा पृथक् द्वन्द्वसङ्घातागन्तुजः स्मृतः ।
मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ।
शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये ॥१॥
नागरं देवकाष्ठञ्च धन्याकं बृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरिताय ज्वरापहम् ॥२॥
आरग्वधाभयामुस्ततिक्तग्रन्थिकनिर्मितः ।
कषायः पाचनः सामे सशूले च ज्वरे हितः ॥३॥
मधुकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम्॥४
त्रिवृद्विशालात्रिफलाकटुकारग्वधैः कृतः ।
सक्षारो भेदनः क्वाथः पेयः सर्व्वज्वरापहः ॥५॥
महौषधामृतामुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्कराक्षौद्रयोजितः ॥६॥
अपामार्गजटा कट्यां लोहितैः सप्ततन्तुभिः ।
बद्धा वारे रवेर्नूनं ज्वरं हन्ति तृतीयकम् ॥७॥
शाल्मल्या उत्तरे कूले त्वपुत्रस्तापसो मृतः ।
तस्मै तिलोदकं दद्यान्मुच्यतेऽकाहिको ज्वरः ॥८॥
गुडूच्याः क्वाथकल्काभ्यां त्रिफलाया वृषस्य च ।
मृद्वीकाया बलायाश्च सिद्धाः स्नेहा ज्वरच्छिदः ॥९॥
धात्री शिवा कणा वह्निः क्वाथः सर्व्वज्वरान्तकः॥१०
ज्वरातिसारहरणमौषधं प्रवदाम्यथ ।
पृश्निपर्णीबलाबिल्वनागरोत्पलधान्यकैः ॥
पाठेन्द्रयवभूनिम्बमुस्तपर्पटकाः सृताः ।
जयन्त्याममतीसारज्वरं रसमहौषधाः ॥११॥
नागरातिविषामुस्तभूनिम्बामृतवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सर्व्वातीसारनाशनः ॥१२॥
मुस्तपर्पटकोशीरचन्दनस्येव शृतं पयः ।

शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ॥
बलाश्वदंष्ट्राबिल्वानि पाठा नागरधान्यकम् ।
एतदाहारसंयोगे हितं सर्व्वातिसारिणाम् ॥१३
बिल्वं वृताश्चिनिर्व्यूहः खण्डमध्वतिसारनुत् ॥१४॥
अतीसारे हितस्तद्वत् कुटजत्वक्फलान्वितः ॥१५॥
वत्सकातिविषाबिल्ववालाकन्दकयायकः ।
सविश्व आमशूलाढ्ये ह्यतीसारे मधुप्रोगिते ॥"१६
इति गारुडे १७४ अध्यायः ॥

अपि च ।
"हस्तबद्धं पलाशस्य अपामार्गस्य वा हर ।।
मूलं सर्व्वज्वरहरं भूतप्रेतादिनुद्भवेत् ॥ १७ ॥
पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
सार्द्धं विनाशयेद्दाहज्वरञ्च परमेश्वर । ॥ १८ ॥
शिखायाञ्चैव तद्बद्धं भवेदैकाहिकादिनुत् ॥१९॥
एतत् सकाञ्जिकं पीतं रक्तकुष्ठज्वरादिनुत् ॥"२०
इति तत्रैव १८३ अध्यायः ॥

"वचा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥२१
अभयामलकद्राक्षा पाठा चैव विभीतकम् ।
शर्क्करा च समञ्चैव नाथ ज्वरहरं भवेत् ॥"२२
इति च गारुडे १९९ अध्यायः ॥ * ॥

वैद्यकमते शिवज्वरस्योत्पत्तिर्यथा,—
"दक्षापमानसङ्क्रुद्धरुद्रनिश्वाससम्भवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसङ्घातागन्तुजः स्मृतः ॥
तस्य विप्रकृष्टकारणकथनपूर्व्विका सम्प्राप्तिर्यथा,
"मिथ्याहारविहारस्य दोषा ह्यामाशयाश्रया ।
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥"
तस्य सामान्यलक्षणं यथा,—
"स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणन्तथा ।
युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते ॥"* ॥
तस्य पूर्व्वरूपं यथा,—
"श्रमोऽरतिर्व्विवर्णत्वं वैरस्यं नयनप्लवः ।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥
जृम्भाङ्गमर्द्दो गुरुता रोमहर्षोऽरुचिस्तमः ।
अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे ॥"* ॥
सन्ततादिज्वराणां प्रति नियतदूष्या धातवो यथा,
"सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ।
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ॥
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ।
सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ॥
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते ।
अहोरात्रे सततको द्वौ कालावनुवर्त्तते ॥
अन्येद्युष्कस्त्वहोरात्रे एककालं प्रवर्त्तते ।
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ।
कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ॥
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ।
चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ॥

जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरस्तोऽनिलसम्भवः ।
विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः ॥
मध्ये अहनी ज्वरयत्यादावन्ते च मुञ्चति ॥"* ॥
वातबलासकज्वरो यथा,—
"नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ॥"
विषमज्वरविशेषा: ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहे चार्द्धश्चोष्णं प्रजायते ॥"* ॥
शीतपूर्व्वो ज्वरो यथा,—
"त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥"
दाहपूर्व्वो ज्वरो यथा,—
"करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥
द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥"
उक्तवातादिज्वराणां धातुविशेषदूष्यतया
अधिकलक्षणानि यथा,—
"गुरुता हृदयोत्क्लेशः सदनं छर्द्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यञ्चास्योपजायते ॥ १ ॥
रक्तनिष्ठीवनं दाहो मोहश्छर्द्दनविभ्रमौ ।
प्रलापः पिडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥२
पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता ।
उष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥३
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्द्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥४
भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्द्दिरेव च ।
विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ॥ ५ ॥
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ।
अन्तर्दाहो महाश्वासो मर्म्मच्छेदश्च मज्जगे ॥६॥
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥"७
अथ वैद्यकमते सामान्यतो ज्वरस्य चिकित्सा-
माह ।
"अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ।
साधारणे क्रियां तत्र विदधीत चिकित्सकः ॥
सामान्यतो ज्वरी पूर्व्वं निर्व्वाते निलये वसेत् ।
निर्व्वातमायुषो वृद्धिमारोग्यं कुरुते यतः ॥
व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः ॥
तालवृन्तभवो वातस्त्रिदोषशमनो मतः ॥
वंशव्यजनजः सोष्णो रक्तपित्तप्रकोपणः ।
चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा ॥
एते दोषजिता वाताः स्निग्धा हृद्याः सुपूजिताः ।
नवज्वरी भवेद्यत्नाद्गुरुवस्त्रावगुण्ठितः ।
यद्यत्तृष्णक पानीयं पिबेत् किञ्चिन्निवारयन् ॥
विनापि भेषजैर्व्याधिः पथ्यादेव निवर्त्तते ।
न तु पथ्यविहीनस्य भेषजानां शतैरपि ॥"* ॥
ततो ज्वरे वर्ज्जनीयान्याह सुश्रुतः ।
"परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च ।
दिवास्वप्नं व्यवायञ्च व्यायामं शिशिरं जलम् ॥
क्रोधप्रवातभोज्यानि वर्ज्जयेत्तरुणज्वरी ॥"

परिषेकः स्नानादिः । प्रदेहो व्यनुलेपना-
भ्यङ्गादिः । स्नेहान् पाने निषिद्धान् ॥ * ॥
निषिद्धानिषेवणाद्दोषमाह ।
"शोषं छर्द्दिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम् ।
प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात् ॥"
आदिशब्देन प्रदेहादयो गृह्यन्ते ॥ * ॥
हारीतेन प्रत्येकं दूषणमुक्तम् ।
"व्यायामाज्ज्वरवृद्धिर्व्यवायात् स्तम्भमूर्च्छनम् ।
स्वतिश्च स्नेहपानात्तु मूर्च्छा छर्द्दिर्मदोऽरुचिः ॥
गुर्व्वन्नभोजनात् स्वप्नाद्विष्टम्भो दोषकोपनम् ।
अभिसारः खरत्वञ्च स्रोतसां चाप्रवर्त्तनम् ॥"
स्वतिरिति व्यवायादित्यत्र सम्बध्यते । स्वप्नात्
दिवास्वापात् ॥ * ॥ अन्यच्च वर्ज्जयेत् ।
"सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च ।
असात्म्यान्यन्नपानानि विरुद्धाध्यशनानि च ॥
व्यायाममतिचेष्टाञ्चाभ्यङ्गं स्नानञ्च वर्ज्जयेत् ।
तेन ज्वरः शमं याति न शान्तश्च पुनर्भवेत् ॥
ज्वरी लङ्घनं कुर्य्यादिति चरकः वाग्भटश्च ।"
"आमाशयस्थो हत्वाग्निं सामो मार्गं पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
अस्यायमर्थः ।"यतो हेतोः आमाशयस्थो दोषो
वातपित्तश्लेष्मरूपः स्वहेतुदुष्टः अग्निं हत्वा
आच्छाद्य सामः अपक्वाहाररससहितो मार्गं रस-
मार्गं पिधापयन् । अत्रार्थत्वादन्तर्गतायपि कर्म-
णीन् । तेन पिदधदित्यर्थः । ज्वरं करोति तस्मा
द्धेतोर्ज्वरी लङ्घनमाचरेदित्यर्थः ॥ * ॥
"त्रिविधं त्रिविधे दोषे तत् समीक्ष्य प्रयोजयेत् ।
दोषेऽल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ।
प्रभूते शोधनं तच्च मूलादुन्मूलयेन्मलान् ॥"
चक्रश्च ।
"तरुणन्तु ज्वरं पूर्व्वं लङ्घनेन क्षयं नयेत् ।
आमदोषमलिङ्गाद्वा लङ्घयेत यथाविधि ॥"
अन्यच्च ।
"ज्वरादौ लङ्घनं कुर्य्यात् ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते रेचनं कुर्य्यात् कोष्ठशुद्ध्यै यथाबलम् ॥
दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च ।
लङ्घितश्चाल्पदोषश्च यवागूपानमाचरेत् ।
शालिषष्टिकमुद्गानां यूषं वा शक्तमाचरेत् ।
पञ्चकोलेन ससिद्धां यवागूमथ लङ्घने ॥
अतिलङ्घितश्च तं दृष्ट्वा तस्य सन्तर्पणं हितम् ।
द्राक्षादाडिमखर्ज्जूरपियालैः सपरूषकैः ॥
तर्पणार्थं तु कर्त्तव्यं तर्पणं ज्वरशान्तये ॥"
अत्र लङ्घनशब्देनानशनमुच्यते । यत आह
सुश्रुतः ।
"आनद्धस्तिमितैर्दोषैर्यावन्तं कालमातुरः ।
तावत्त्वनशनं कुर्य्यात्ततः संसर्गमाचरेत् ॥"
आनद्धस्तिमितैर्दोषैर्निबद्धस्थैर्दोषैः सम्बद्धः ।
संसर्गं औषधाहारादिप्रसङ्गम् ॥ * ॥
यत्तु चरक आह ।
"चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"
चतुःप्रकारा संशुद्धिः वमनविरेचनशिरोविरेचनास्थाप-

शिरोविरेचनानि। न त्वनुवासनं तस्य बृंहणत्वात्। अत्र लङ्घनं कर्षणमित्यर्थः। तथा च सुश्रुतः।
"शरीरलाघवकरं यद्‌द्रव्यं कर्म्म वा पुनः।
तल्लङ्घनमिति ज्ञेयं बृंहणन्तु पृथग्विधम्॥"
लङ्घनात् कर्षणादन्यत् शरीरपोषकमित्यर्थः॥*॥
ननु आनद्धस्तिमितैर्दोषैरित्यादिपूर्व्वोक्तसुश्रुतवचनात् सामान्यतो ज्वरिणा यथानशनरूपं लङ्घनं क्रियते तथा चतुष्प्रकारा संशुद्धिरित्यादिचरकवचनाद्वमनादिरूपं लङ्घनं सर्व्वैर्ज्वरिभिः कथं न क्रियते। तत्रोच्यते। वमनादिकमवस्थाविशेषेषु क्रियते न तु सर्व्वज्वरेषु। तथा च सुश्रुतः।
"सोत्क्लेशे बलिने देयं वमनं श्लेष्मिके ज्वरे।
पित्तप्राये विरेकस्तु कार्य्यः प्रशिथिलाशये॥"
प्रशिथिलाशये अत्र प्रोपसर्गः वैपरीत्ये तेन गाढाशये इत्यर्थः॥*॥
"सरुजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणम्।
कफाभिपन्ने शिरसि कार्य्यमूर्द्ध्वविरेचनम्॥"
अपि च। सर्व्वज्वरिभिः पिपासानिग्रहश्च न कार्य्यः। यत आह हारीतः।
"तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्॥"
अतोऽवस्थाविशेष एव पिपासासहनम्॥*॥
ज्वरिभिर्म्मारुतसेवनं न कार्य्यम्। सुश्रुतेन प्रवातसेवनस्य सर्व्वथा निषिद्धत्वात् अतो मारुतसेवनमवस्थाविशेष एव युक्तम्। आतपसेवनञ्चावस्थाविशेष एव सङ्गृहीतम्॥*॥
"लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते।
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः॥
ज्वरघ्नैः पाचनैर्हृद्यैः कषायैः समुपाचरेत्।"
इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः। व्यायामोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात्। अवस्थाविशेषे पुनः पार्श्वपरिवर्त्तनादिरूपः सोऽपि कर्त्तव्यः। तस्माच्चतुष्प्रकारा संशुद्धिरित्यादिश्लोके लङ्घनपदं कर्षणपर्य्यायमिति निर्णीतम्॥
अनशनरूपस्य लङ्घनस्य फलमाह।
"लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले।
विज्वरत्वं लघुत्वञ्च क्षुच्चैवास्योपजायते॥"
लङ्घनेन अनशनेन दोषे प्रवृद्धे क्षयं नीते। यत आह।
"आहारं पचति शिखी दोषानाहारवर्ज्जितः।"
पचतीति। सन्धुक्षितेऽनले आच्छादकदोषे संक्षीणे अग्नौ प्रदीप्ते। यथोक्तसम्प्राप्तिसामग्रीविघटनात्। विज्वरत्वं शरीरस्य गौरवाभावेन लघुत्वम्। क्षुत् बुभुक्षा च जायते इत्यर्थः॥*॥
अन्यच्चाह सुश्रुतः।
"अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम्॥"
अनवस्थितदोषाग्नेः अनवस्थितः स्वस्थानादिचलितो गतो दोषोऽग्निश्च यस्य तस्य ज्वरिणः। काङ्क्षा अन्नाभिलाषः। रुचिः लङ्घनेनामपाकान्मुखशोषादिनाशे मुखस्य यत् प्रकृतत्वं सैव रुचिः शोभा। रुचिः स्त्री दीप्तौ शोभायामभिलाषयोरिति मेदिनीकारः॥*॥ सम्प्रति कृतस्य लङ्घनस्य लक्षणमाह।
"वातमूत्रपुरीषाणां विसर्गाद्‌गात्रलाघवे।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते॥
स्वेदे जाते रुचौ वापि क्षुत्पिपासासहोदये।
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि॥"
हृदयस्य शुद्धिरनवरोधः। उद्गारशुद्धिः सधूमाम्लोद्गाराभावः। कण्ठस्य शुद्धिः कफाद्यलिप्तत्वम्। आस्यशुद्धिः मुखस्य प्रकृतरसत्वम्। तन्द्राक्लमे तन्द्रया क्लमः तस्मिन्। तन्द्रा निद्रावत्। क्लमोऽत्र ग्लानिः। क्षुत्पिपासासहोदये क्षुत्पिपासाभ्यां सह युगपदुदये। अन्तरात्मनि मनसि। एतानि लक्षणानि मिलितान्येव सम्यक् कृतं लङ्घनं बोधयन्ति। न तु प्रत्येकम्॥*॥
हीनस्य लङ्घनस्य लक्षणमाह।
"कफोत्क्लेशः सहृल्लासः ष्ठीवनञ्च मुहुर्म्मुहुः।
कण्ठास्यहृदयाशुद्धिस्तन्द्रा स्याद्धीनलङ्घने॥
कफोत्क्लेशः कफस्य वमनायोपस्थितिः।"
हृल्लासः हृदयात् कफनिर्गमः॥*॥
अतिशयितस्य लङ्घनस्य लक्षणमाह।
"पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः॥
मनसः सम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि।
देहाग्निबलहानिश्च लङ्घनेऽति कृते भवेत्॥"
दौर्ब्बल्यं श्रोत्रनेत्रयोः कर्णनेत्रयोः स्वविषयग्रहणासामर्थ्यम्। मनसः सम्भ्रमः भ्रान्तिः। ऊर्द्ध्ववातः उद्गारबाहुल्यम्। हृदि तमः अन्धकारप्रविष्टस्येव ज्ञानम्॥*॥ बलं रक्षन् लङ्घनं कारयेदित्याह।
"बलाविरोधिना चैनं लङ्घनेनोपपादयेत्।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः॥"
अयमर्थः। एनं ज्वरिणं बलविरोधिना अनतिबलक्षयकारिणा लङ्घनेन उपपादयेत् उपचरेत्। कुत इति चेत्तत्राह। यदर्थ इति। यस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः। तत् आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः॥*॥
केषाञ्चिदनशनस्य निषेधमाह सुश्रुतः।
"तद्धि मारुततृष्णाक्षुन्मुखशोषभ्रमान्विते।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः॥
न क्षयाध्वश्रमक्रोधकामशोकचिरज्वरे।"
तत् अनशनं उल्बणमारुतयुक्तेन ज्वरिणा न कार्य्यम्। मारुतोऽत्र निरामो बोद्धव्यः। सामे तु मारुते लङ्घनं कार्य्यमेव। यत आह तन्त्रान्तरे।
"अवश्यमेव कुर्व्वीत ज्वरी सामे समीरणे।
लङ्घनं त्वामपाकार्थं न तदूर्द्ध्वं यथा कफे॥
तदूर्द्ध्वं आमपक्वादूर्द्ध्वम्। अतएवोक्तम्।
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु।
आमक्षयादूर्द्ध्वमपि वायुर्न सहते क्षणम्॥"*॥
आमस्य लक्षणमाह।
"आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात्।
आमसंज्ञां स लभते बहुव्याधिसमाश्रयः॥"
तन्त्रान्तरे।
"आममन्नरसं केचित् केचित्तु मलसञ्चयम्।
प्रथमां दोषदुष्टिं वा केचिदामं प्रचक्षते॥"
अन्यच्च।
"अपि पक्वमसम्पक्वं दुर्गन्धं बहुपिच्छिलम्।
सदनं सर्व्वगात्राणामाम इत्यभिशब्दितः॥
तेनामेन समायुक्ता दोषा दूष्याश्च तादृशाः।
तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः॥"
अत्र सामस्य वातस्य लक्षणमाह।
"वायुः सामो विबन्धाग्निसादतन्द्रान्त्रकूजनैः।
वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीडयेत्॥
विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम्।
स्नेहाद्यैर्वृद्धिमायाति मेघसूर्य्योदये निशि॥"
विचरेद्युगपच्चायुरामश्चैककाले विचरेत्। कुपितः सामो वायुः भृशमतिशयेन गृह्णाति अङ्गानीत्यर्थः॥*॥ तस्यैव निरामस्य लक्षणमाह।
"निरामो विशदो रूक्षो निर्व्विबन्धोऽल्पवेदनः।
विपरीतगुणैः शान्तिं स्निग्धैर्याति विशेषतः॥"*॥
अत्र प्रसङ्गात् सामस्य पित्तस्य लक्षणमाह।
"पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु।
अम्लीकाकण्ठहृद्दाहकरं श्यावं तथा स्थिरम्॥"
अम्लीका अम्लिकपुकी इति लोके॥*॥
तस्य निरामस्य लक्षणमाह।
"निरामं पीतमाताम्रमत्युग्रं कटुकं सरम्।
दुर्गन्धि रुचिकृद्वह्निबलवर्द्धनमीरितम्॥"
अथ सामस्य कफस्य लक्षणमाह।
"आविलस्तन्तुलः स्त्यानः कण्ठदेशेऽवतिष्ठते।
सामो बलासो दुर्गन्धः क्षुदुद्गारविघातकृत्॥"
स्त्यानः संहतः॥
तस्य निरामस्य लक्षणमाह।
"श्लेष्मा निरामो निर्गन्धः फेनवांश्छेदवानपि।
भवेत् स पिच्छिलः पाण्डुरास्यवैरस्यनाशकृत्॥"
अथ सामस्य व्याधेर्लक्षणमाह।

"आलस्यतन्द्राहृदयाविशुद्धि-
दोषाप्रवृत्त्याविलमूत्रताभिः।
गुरूदरत्वारुचिसुप्तताभि-
रामान्वितं व्याधिमुदाहरन्ति॥
आमं जयेल्लङ्घनकोलपेया-
लघ्वन्नयूषौदनतिक्तयूषैः।
विरूक्षणस्वेदनपाचनैश्च
संशोधनैरूर्द्ध्वमधस्तथैव॥"

तद्धि मारुततृष्णाक्षुदित्यादिश्लोके तृष्णापि निरामैव विवक्षिता तेन निरामतृष्णान्वितेन लङ्घनं न कार्य्यम्। सामायान्तु तृष्णायां लङ्घनं कार्य्यमेव। तथा मुखशोषभ्रमावपि निरामावेव विवक्षितौ। सामयोस्तु तयोर्लङ्घनं कार्य्यमेव। गुर्व्विणीबालवृद्धादिभिरपि निरामैरेव लङ्घनं न कार्य्यम्। सामे पुनस्तैरपि लङ्घनं कार्य्यमेव। क्षयो धातुक्षयो राजयक्ष्मा। वातजे ज्वरे लङ्घनं न कार्य्यम्। ज्वरी लङ्घनेऽपि जलं पिबेदित्याह सुश्रुतः।

तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
अतः सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
हारीतश्च ।
तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥
अवश्यं पेयमपि जलं ज्वरी किञ्चिद्वारयन्
पिबेद्यत आह सुश्रुत एव ।
जीवनं जीविनां जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सुज्ञो न क्वचिद्वारि वारयेत् ॥
जीवनं जलम् ॥ किञ्चित्तु वारयेदेव । तथा च ।
ज्वरे नेत्रामये कोठे मन्देऽग्नावुदरे तथा ।
अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये ॥
व्रणे च मधुमेहे च पानीयं मन्दमाचरेत् ॥
प्रसेके मुखप्रसेके । मन्दमाचरेत् अल्पं पिबेत् ।
यत आह ।
"अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम् ।
प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः ॥*॥
तच्च जलं ज्वरी शीतलं न पिबेदित्याह सुश्रुतः ।
नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे ।
सद्यःशुद्धौ तथाध्माने व्याधौ वातकफोद्भवे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीतं वारि विवर्ज्जयेत् ॥"
अन्यच्च स एव ।
"सेव्यमानेन शीतेन ज्वरस्तोयेन वर्द्धते ।"
अत्र शीतं जलमक्वथितं निषिद्धम् । तथा सति
क्वथितं ग्राह्यं आयातम् ॥ तत्र क्वथितस्य विधि-
र्गुणाश्च ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ।
तत्तोयं क्वथितं ज्ञेयं दोषघ्नं पाचनं लघु ॥
निर्व्वेगं शने. ॥ क्वथितस्य विषयानाह सुश्रुत. ।
"वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु तृष्यते ।
दीपनं स्यात् कफच्छेदि वातपित्तानुलोमनम् ॥
तद्धि मार्द्दवकृद्दोषस्रोतसां शीतमन्यथा ॥"
वाग्भटश्च ।
"तृष्णाया प्राप्तमुष्णाम्बु पिबेद्वातकफज्वरे ।
तत् कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत् ॥
उदीर्य्य चाग्निं स्रोतांसि मृदूकृत्य विशो-
धयेत् ।
वातपित्तकफस्वेदशकृन्मूत्राणि सारयेत् ॥" * ॥
अथोष्णोदकस्य लक्षणं गुणाश्च ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा ।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वरकासकफश्वासवातपित्तामभेदसाम् ।
नाशनं वस्तिसंशोधि पथ्यमुष्णोदकं सदा ॥*॥"
अथर्त्तुभेदे जलस्य पाकभेदः ।
त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते ।
हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः ॥"*॥
अन्ये तु ।
"निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति केचिद्बुधा. प्राहुर्न्निजटागमदर्शनात् ॥"
केचित्तु ।
"वसुष्वङ्गेषु वाणेषु वेदेषु त्रिषु पञ्चयोः ।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात् ॥"
अत्र दोषाणां यथोल्वणता हीनता वा तथा
व्यवस्था कल्पनीया ॥
"तत् पादहीनं पित्तघ्नमर्द्धहीनन्तु वातनुत् ।
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु ॥" *॥
त्रिपादहीनस्य तन्त्रान्तरे आरोग्याम्बुसंज्ञा ।
तस्य लक्षणं गुणाश्च ।
"पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं कासश्वासकफापहम् ॥
सद्यो ज्वरहरं ग्राहि दीपनं पाचनं लघु ।
आनाहपाण्डुशूलार्शोगुल्मशोथोदरापहम् ॥"
अथर्त्तुभेदे जलस्य ग्रहणाय देशभेद. ।
"हेमन्ते शिशिरे चाम्बु सारसं वा तडागजम् ।
वसन्तग्रीष्मयोः कौप्यं वाप्यं वा नैर्झरं हितम् ॥
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्ब्बुधैः ।
विषवत् पत्रपुष्पादिदुष्टं निर्झरयोगतः ॥
औद्भिदं चान्तरीक्षं वा कौपं प्रावृषि च स्मृतम् ।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥
दिवा रविकरैर्जुष्टं शीतं शीतकरैर्न्निशि ॥
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् ॥
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥"
अन्यच्च ।
"शरद्यगस्त्योदयादखिलं सलिलं हितम् ।
वृद्धसुश्रुतश्च ।
"कार्त्तिके मार्गशीर्षे च पयोमात्रं प्रशस्यते ॥"
यथर्त्तुपक्वमपि जलं विषयविशेषे शीतलं पिबे-
दित्याह सुश्रुतः ।
"दाहातिसारपित्तासृङ्मूर्च्छामद्यविषार्त्तिषु ।
मूत्रकृच्छ्रे पाण्डुरोगे तृष्णाच्छर्द्दिभ्रमेषु च ॥
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा ।
सन्निपातसमुत्थे च शृतं शीतं प्रशस्यते ॥"
क्वथितस्य जलस्य शीतलकरणविशेषे गुण-
विशेषमाह सुश्रुतः ।
"शृताम्बु तत्त्रिदोषघ्नं यदन्तर्व्वाष्पशीतलम् ।
अरूक्षमनभिष्यन्दि क्रमितृड्ज्वरहृल्लघु ॥
धारापातेन विष्टम्भि दुर्ज्जरं पवनाहृतम् ॥
अन्तर्व्वाष्पशीतलं पिहितमेव शीतलम् ।
अत्रापरेऽपि विशेषाः ।
"दिवा शृतं पयो रात्रौ गुरुतामधिगच्छति ।
रात्रौ शृतं दिवा पीतं गुरुत्वमधिगच्छति ॥
तत्तु पर्य्युषितं वह्निगुणभ्रष्टं त्रिदोषकृत् ।
गुर्व्वम्लपाकं विष्टम्भि सर्व्वरोगेषु निन्दितम् ॥
शृतं शीतं पुनस्तप्तं तोयं विषसमं भवेत् ।
निर्य्यूहोऽपि तथा शीतः पुनस्तप्तो विषोपमः ॥"
रात्रौ तूष्णोदकस्य लक्षणमन्यदाह ।
"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।
अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत् ॥"
तस्य गुणाः ।
"श्लेष्मानिलामदोषघ्नं दीपनं वस्तिशोधनम् ।
श्वासकासज्वरहरं पीतमुष्णोदकं निशि ॥"
अन्यच्च ।
"भिनत्ति श्लेष्मसङ्घातं मारुतं चापकर्षति ।
अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि ॥"
रात्रावुष्णोदकञ्च तप्तमेव पिबेदित्याह ।
"उष्णं तदग्निजननं लघ्वच्छं वस्तिशोधनम् ।
पार्श्वरुक्पीनसाध्मानहिक्कानिलकफापहम् ॥
शस्तं तृट्श्वासशूलेषु सद्यःशुद्धौ नवज्वरे ॥"
विषयविशेषे त्वाममेव जलं शीतलं पिबेदित्याह
सुश्रुतः ।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
भ्रमश्रमपरीतेषु तमके वमथौ तथा ॥
धूमोद्गारेऽविदग्धेऽन्ने शोषे च मुखकण्ठयोः ।
ऊर्द्ध्वगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥"
शीतमम्भः आममेव न तु क्वथितम् । क्वथितन्तु
शीतं दाहादिषु यदुक्तं तत् सज्वरेषु । विज्वरेषु
तु दाहादिष्वामं शीतं प्रशस्यते इति भेदः ॥*॥
आमादिजलानां जठराग्निना पाककालावधि-
माह ।
"आमं जलं पाकमुपैति यामं
पक्वं पुनः शीतलमर्द्धयामम् ।
पक्वं कदुष्णञ्च ततोऽर्द्धकालं
कालात्ययः पीतजलस्य पाके ॥
पित्तमद्यविषोत्थेषु तिक्तकैः शृतशीतलम् ॥"
जलं हितमिति शेषः ॥ *॥ तिक्तानि बहुलानि
तेभ्यो निर्द्धार्य्य योगमाह सुश्रुतः ।
"मुस्तपर्पटकोदीच्यच्छत्राख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये ॥"
छत्रात्र धान्यकम् । यत आह निघण्टौ धन्व-
न्तरिः । कुस्तुम्बुरुः स्वर्णिकारा छत्रा धान्यं
वितुन्नकमित्यादि । तद्गुणाश्च ।
"धान्यकं दीपनं रुच्यं पाचनं स्वादुपाकि च ।
दोषत्रयतृषादाहश्वासकासज्वरप्रणुदित्यादि ॥"
चक्रदत्तवङ्गसेनवृन्दादयः छत्रास्थाने नागरं
पठन्ति । तद्यथा,—
"मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैरिति ।
नागरं कटुकमपि नाच पित्तजनकं मधुरपाकि-
त्वादिति तेषामभिप्रायः । नागरं नागरमुस्तक
इति केचित् । क्वचिदेकदेशेन समुदायोऽव-
गम्यते । यथा भीमो भीमसेन इति । तीसटे तु
नागरस्थाने पद्मकम् ॥ * ॥ एतस्य प्रक्रिया ।
चन्दनैरित्यत्र सहार्थे तृतीया । तैन मुस्ता-
दिभिः षड्भिरामैरेव चुर्णैः सहितं जलं शृतं
जलमेव केवलं यथर्त्तुपक्वं पश्चाच्छीतलीकृतं
दद्यात् । तथा च वङ्गसेन. ।
यदम्बु शृतशीतासु षडङ्गादि प्रयुज्यते ।
कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि ॥
अस्यायमर्थः । यत् हेतो. । अप्सु जलेषु ।
शृतशीतासु शृतासु केवलास्वेव यथर्त्तुपक्वासु ।
शीतासु शीतलीकृतासु । षडङ्गादि द्रव्य प्रयु-
ज्यते । आममेव संक्षुद्य जले स्थाप्यते । ततः
प्रक्षेप्यत्वात् कर्षमात्रं द्रव्यं समुदितं षडङ्गादि

प्रास्थिकेऽम्भसि प्रस्थमात्रे क्वथितशीतले जले चेत् ग्राहयेत्। अतएव षडङ्गमभिधाय षडङ्ग-पानीयमिति वङ्गसेनादिभिरुक्तम्। अस्मिन् पक्षे चन्दनं श्वेतं ग्राह्यं न तु रक्तम्। तत्-कषायलेपयोरेव प्रयोक्तुमुक्तम्। यत आह। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति। षडङ्गपानीयमिदम्॥ *॥ षडङ्गादेः पाने तु विधान्तरे प्रक्रिया भिन्ना तामाह वङ्गसेनः।
कर्षमात्रमिह द्रव्यं ग्राहयेत् प्रास्थिकेऽम्भसि।
अर्द्धशृतं प्रयोक्तव्यं पाने पेयादिसन्निधौ॥
आदिशब्देन यूषयवागूविलेपिभक्तानि गृह्यन्ते॥*
पानप्रक्रिया शार्ङ्गधरोऽप्येनामेवाह।
क्षुण्णं द्रव्यं पलं साध्यं चतुःषष्टिपले जले।
अर्द्धशिष्टन्तु तद्देयं पाने पेयादिसन्निधौ॥
पानप्रयोगश्च षडङ्गमुक्तवान्। अस्मिन् पक्षे चन्दनं रक्तं ग्राह्यम्। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति वचनात्॥ *॥
अथ रक्तचन्दनस्य गुणाः।
तत्तु रक्तं हिमं स्वादु श्छर्द्दितृष्णास्रपित्तजित्।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम्॥
षडङ्गादि प्रयुज्यते इत्यादि शब्देन वक्ष्यमाणा योगा उच्यन्ते। ते यथा —
श्रीपर्णीचन्दनोशीरपरूषकमधूकजम्।
पानं पित्तज्वरं हन्यात्सारिवाद्यं सशर्करम्॥
अत्र श्रीपर्णीपरूषकयोः फले ग्राह्ये। मधूकस्य तु पुष्पम्। अन्यच्च।
हन्यात् सयष्टीमधुकं तथैवोत्पलपूर्व्वकम्।
पानं शृतं हिमं किंवा सोत्पलं शर्करायुतम्॥
हन्यात् पित्तज्वरमिति शेषः। उत्पलमत्र-कमलमित्यादि।
दिवास्वापं न कुर्व्वीत यतोऽसौ स्यात्कफावहः।
ग्रीष्मवर्ज्जेषु कालेषु दिवास्वापो निषिद्ध्यते॥
उचितो हि दिवास्वापो नित्यं तेषां शरीरिणाम्।
वातादयः प्रकुप्यन्ति येषामस्वपतां दिवा॥ *॥
येषां दिवास्वप्न उचितस्तानाह।
व्यायामप्रमदाध्ववाहनरतान् क्लान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान्।
क्षीणान् क्षीणकफान् शिशून् मदहतान् वृद्धान् रसाजीर्णिनो
रात्रौ जागरितान् नरान् निरशनान् कामं दिवा स्वापयेत्॥ *॥
अथ वातिकादिज्वराणां पाकावधिमाह।
वातिकः सप्तरात्रे तु दशरात्रेण पैत्तिकः।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि॥*
रसस्यामत्वेऽवधिमतिक्रम्यापि ज्वरस्तिष्ठति।
यत आह सुश्रुतः।
बहुदोषस्य मन्दाग्नेः सप्तरात्रात् परं ज्वरे।
लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते॥
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः।
कषायैः पाचनैर्हृद्यैर्ज्ज्वरघ्नैः समुपाचरेत्॥ *॥

ज्वरस्य तारुण्यमध्यावस्थता जीर्णतावधिः।
आसप्तरात्रात्तरुणं ज्वरमाहुर्मनीषिणः।
द्वादशाहमभिव्याप्य मध्यं जीर्णं ततः परम्॥
आसप्तरात्रादिति। अत्राङ् मर्य्यादायाम्। रात्रिशब्दो दिवसस्योपलक्षकः। तेन सप्तम-दिवसादर्व्वाक ज्वरस्तरुण इत्यर्थः। तथा चोक्तं तन्त्रान्तरे।
ज्वरे यतीते षडहे जीर्णं इत्युच्यते बुधैरिति।
दशरात्रात् परं जीर्णमाहुरन्ये मनीषिणः।
अतएव जातूकर्णः। जीर्णस्त्रयोदशदिवस इति॥
अथ ज्वरे भेषजप्रयोगसमयः।
वातिके सप्तरात्रे तु दशरात्रेण पैत्तिके।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम्॥
सप्तरात्रे इत्यत्र रात्रिशब्दो दिवसस्योपलक्षकः।
अतएवोक्तम्।
पाययेदातुरं साममौषधं सप्तमे दिने।
शमनेनाथ वा दृष्ट्वा निरामं समुपाचरेदिति॥
शार्ङ्गधरेणाप्युक्तम्।
गुडूचीपिप्पलीमूलनागरैः पाचनं शृतम्।
वातज्वरे सदा पेयं कालिङ्ग सप्तमेऽहनीति॥
हारीतेनाप्युक्तम्।
एतां क्रियां प्रयुञ्जीत षडात्र सप्तमेऽहनि।
पिबेत कषायसंयोगात् पेयां ज्वरविनाशिनीम्॥
एतां क्रियां लङ्घनादिरूपाम्। कषायसंयोगात् कषायेण साधितां पेयामित्यर्थः॥ खरनादेना-प्युक्तम्।
इति षड्रात्रिकः प्रोक्तो नवज्वरहरो विधिः।
ततः परं पाचनीयं शमनीयं ज्वरे हितम्॥
ततः परं सप्तमेऽहनीत्यर्थः॥ वाग्भटश्च।
सप्ताहादौषधं केचिदाहुरन्ये दशाहतः।
लघ्वन्ने भोजिते केचिद्देयमामोल्बणे न तु॥
सप्ताहात् सप्ताहमारभ्येत्यर्थः। अत्र ल्यब्-लोपे कर्म्मणि पञ्चमी। अतएव सुश्रुतः।
दशरात्रात् परं सर्व्वैर्दातव्यमिति निश्चितम्।
अतएव दशरात्रेण द्वादशाहेनेति लङ्घनवता यतीतेनेत्यर्थः॥ अत्र चरकस्त्वेवमाह।
ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम्।
पाचनं शमनीयं वा कषायं पाययेत्तु तम्॥
अस्यायमर्थः। ज्वरितं षडहे लङ्घनेन यतीते सप्तमेऽहनि भोजितलघ्वन्नं अष्टमे दिने कषायं पाययेदित्यर्थः॥ तथा च सुश्रुतः।
सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम्॥
सप्तरात्रात् परं अष्टमेऽहनीत्यर्थः। केचि-च्चरकादयः। चक्रदत्तोऽपि।
सप्तरात्रेण पच्यन्ते सप्तधातुगता मलाः।
निरामस्तु ततः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने॥
एवं सति कषायदाने सप्तमाष्टमयोर्दिवसयो-र्व्विकल्पः॥ *॥ तत्रापि वयोबलाग्निदोषदेश-कालोचितं कुर्य्यात् भेषजमभ्रेष दोषपाकं दृष्ट्वा दद्यादित्याह सुश्रुतः।
"पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते।
अचिरज्वरितस्यापि भेषज्यं दोषपाकतः॥" इति।

अस्यायमर्थः। अल्पकालसमुत्थिते पैत्तिके ज्वरे दोषपाकं दृष्ट्वा भैषज्यं देयम्। न तु तत्र दश-रात्रापेक्षा। तथा अचिरज्वरितस्यापि पैत्तिके-तरनवज्वरयुक्तस्यापि दोषपाकं दृष्ट्वा भैषज्यं देयमित्यर्थः॥*॥ दोषपाकलक्षणमाह सुश्रुतः।
स्वर्द्दो ज्वरे लघौ देहे प्रचलेषु मलेषु च।
पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधमिति॥
ज्वरे मर्द्दो स्वल्पीभूते। मलेषु वातपित्तकफ-मूत्रपुरीषेषु। प्रचलेषु स्वमार्गसञ्चारिषु। पक्वं निरामम्। दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्ष-णम्। दोषाणां दुष्टवातपित्तकफानां प्रकृतिः ज्वरस्य तदुपद्रवाणाञ्चोत्पादनम्। तस्या वैकृत्यं वैपरीत्यं तस्मात् दोषपाकज्ञानं एकेषां मते।
क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम्।
दोषप्रवृत्तिरुत्साहो निरामज्वरलक्षणम्॥
दोषप्रवृत्तिः दोषाणां स्वमार्गसञ्चारः। माधव-निदाने उत्साहस्थाने अष्टाह इति पाठः॥*॥
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्।
अत्रानुक्ते प्रभाते स्यात् कषायेषु विशेषतः॥
मुख्यभेषजसम्बन्धो निषिद्धस्तरुणे ज्वरे।
तोयपेयादिसंस्कारे निर्द्दोषं तत्र भेषजम्॥
मुख्यभेषजं क्वाथः तस्य सम्बन्धः पानम्। यत आह।
न कषायं प्रशंसन्ति नराणां तरुणे ज्वरे।
कषायेणाकुलीभूता दोषा जेतुं सुदुस्तराः॥
व्याकुलीभूताः प्रदुष्टाः स्वमार्गं परित्यज्य यतस्ततो गताः। अत्र कषायशब्देन क्वाथो गृह्यते॥ *॥ उक्तञ्च क्वाथस्य पर्य्यायाः।
शृतः क्वाथः कषायश्च निर्य्यूहः स निगद्यते।
तोयपेयादिसंस्कारे निर्द्दोषं तत्र भेषजमिति॥
तत्र तरुणे ज्वरे भेषजं मुख्यभेषजं क्वाथरूपम्। तोयपेयादिसंस्कारैर्न्निर्द्दोषम्। यत आह।
न तु कल्पनमुद्दिश्य कषायः प्रतिषिध्यत इति।
कल्पनं तोयपेयायवाग्वादिकम्॥ *॥ ननु।
स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ।
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्॥
इति वचनात् स्वरसादयोऽपि कथं न निषिध्यन्ते। तन्न।
यः कषायः कषायः स्यात् स वर्ज्यस्तरुणे ज्वरे। इति।
यः कषायः कषायः स्यात् चतुर्थभागावशेष-करणेन अष्टमभागावशेषकरणेन वा कषायः वर्णः कषायरसश्च स्यात्। स कः क्वाथः। स तरुणज्वरे निषिद्धः॥ *॥ क्वाथवाचकस्य कषा-यस्य लक्षणमाह।
पादशिष्टः कषायः स्याद्द्रव्यं षोडशगुणाम्भसा।
क्वथितोऽतः षडङ्गादि न निषिद्धो नवज्वरे॥
अस्यायमर्थः। यः क्वाथ्यद्रव्यात् षोड़शगुणेना-म्भसा क्वथितः पक्वः अथ च पादशिष्टः चतुर्थ-भागावशेषः स कषायः स्यात्। अतः षड-ङ्गादिस्तरुणज्वरे न निषिद्धः। अपाकादर्द्ध

पाकाद्युक्तलक्षणाभावेन कषायत्वाभावात् ॥*॥
तरुणज्वरे कषायस्य दोषमाह ।
“दोषा बद्धाः कषायेण स्तम्भितास्तरुणे ज्वरे ।
स्तम्भन्ते न विपच्यन्ते कुर्व्वन्ति विषमज्वरम् ॥
कषायेण स्तम्भिताः प्रवृत्तये निवारिताः ।
यत आह कषायरसगुणान् ।
कषायः स्तम्भनः शीतो रूक्ष. पित्तकफापहः ।
इत्यादि ।
स्तम्भन्ते आध्मानं कुर्व्वन्ति । न विपच्यन्ते सुखेन न विपच्यन्ते दुःख दत्त्वा विलम्बेन विपच्यन्ते इति यावत् ॥ अन्यच्च ।
“न च्यवन्ते न पच्यन्ते कषायैः स्तम्भिता मलाः ।
तिर्य्यग्विमार्गगा वाते घोरं कुर्य्युर्नवज्वरम् ॥*॥
अनुपस्थितदोषाणां वमनं तरुणे ज्वरे ।
हृद्रोग श्वासमानाहमोहांश्च कुरुते भृशम् ॥”
अस्यायमर्थः । कफादिदोषोपस्थितौ स्वयमेव चेद्भवति वमनं न तद्दोषाय । अनुपस्थितदोषाणान्तु तरुणे ज्वरे वमनं यत्नकृतं हृद्रोगादीन् करोतीत्यर्थः । एतेन वचनेन तरुणे ज्वरे यत्नाद् वमन निषिद्धम् ॥ * ॥
अवस्थाविशेषे तदपि कर्त्तव्यमित्याह ।
“सद्यो भुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते ।
वमन वमनार्हस्य शस्तमित्याह वाग्भटः ॥”
वमनं वेति विकल्पो लङ्घनापेक्षया वमनार्हस्येत्यनेन गर्भिण्यतिकृशातिवृद्धादिनिरासः । वाग्भटोऽत्र वृद्धवाग्भट' ॥
“वमितं लङ्घयेत् प्राज्ञो लङ्घितं न तु वामयेत् ।
वमन ह्यथवाऽप्यल्पाद्वान्त्याल्लङ्घनकर्षितम् ।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्व्वलभीरुभिः ॥”
अनशनमिति शेष' । अनेन वचनेन गुर्व्विण्यादीनामनशननिषेधात् ज्वरे सामे पाचनं निरामे शमन पथ्याशनमण्डादिकञ्च दद्यात् ॥ * ॥
पाचनशमनयोर्लक्षणमाह ।
“यत् पचत्याममाहारं पचेदामरसञ्च यत् ।
यदपक्वान् पचेद्दोषांस्तद्धि पाचनमुच्यते ॥
न शोधयति यद्दोषान् समान्नोदीरयत्यपि ।
समीकरोति संदुष्टांस्तत् संशमनमुच्यते ॥”
न शोधयति नोर्द्धाधोमार्गाभ्यां पातयति । नोदीरयति न वर्द्धयति ॥ * ॥ तयोः सम्प्रदान कालमाह ।
“पाययेदातुरं सामं पाचनं सप्तमे दिने ।
शमनेनाथवा दृष्ट्वा निराम तमुपाचरेत् ॥
तस्मादादौ प्रदेयन्तु पाचनं दिवसत्रयम् ।
शमनीय प्रदेयन्तु पञ्चरात्रं ततः परम् ॥
शोधनं दीपनञ्चैव एकरात्रं प्रदापयेत् ॥”
इत्यत्रिसंहितातः ॥ अन्यच्च ।
“क्षपयेवाल्पदोषञ्च शमनीयैरुपाचरेत् ॥”
ननु ।
“लालाप्रसेको हृल्लासो हृदयाशुद्ध्यरोचकौ ।
तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता ॥
क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः ।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ॥
भेषजं ह्यामदोषस्य भूयो जनयति ज्वरम् ॥”
भूयो बाहुल्येन । अन्यच्च ।
“पाययेद्दोषहरणं मोहादामज्वरे तु यः ।
स सुप्तं कृष्णसर्पन्तु कराग्रेण परामृशेत् ॥”
इति वचनादामज्वरे भेषजनिषेधात् कथं सामे ज्वरे पाचनं देयम् । उच्यते निरुपद्रवे सामे ज्वरे पाचन देयम् । सोपद्रवे तु सामे भेषजं निषिद्धम् । तथा च वाग्भटः ।
“सप्ताहात् परतोऽदृष्टे सामे स्यात् पाचनं ज्वरे ।
निरामे शमनं स्तब्धे सामे नौषधमाचरेत् ॥”
अदुष्टे निरुपद्रवे । स्तब्धे सोपद्रवे ॥ * ॥ अथ सामान्यज्वरे पाचनं कषायमाह सुश्रुतः ।
“नागर देवकाष्ठञ्च धान्यकं बृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरितेभ्यो ज्वरापहम् ॥
धान्यकं रौहिषम् । तदलाभादुशीरं दद्यात् ।
बृहतीद्वयं बृहत्फला क्षुद्रफला बृहती । क्षुद्रा बृहती चेति । कण्टकारीद्वयं वा दद्यात् ॥
कण्टकारीद्वयं शुण्ठी धान्यकं सुरदारु चेति शार्ङ्गधरेण उक्तत्वात् । नागरादिक्वाथ. सर्व्वज्वरेषु ॥*॥ अथ सामान्यतः संशमनीयान्याह सुश्रुतः ।
“अथ संशमनीयानि कषायाणि निबोध मे ।
सर्व्वज्वरेषु देयानि यानि वैद्येन जानता ॥
वृश्चीरबिल्ववर्षाभूपयः सोदकमेव च ।
पचेत् क्षीरावशेषं तत् पेयं सर्व्वज्वरापहम् ॥
वृश्चीरः श्वेतपुनर्नवा । वर्षाभू रक्तपुनर्नवा । तथाच मदनपालः ।
“पुनर्नवः श्वेतमूलो वृश्चीरो दीर्घपत्रकः ।
पुनर्नवा परा रक्ता वर्षाभू रक्तपुष्पकः ॥”
पाकप्रकारमाह ।
“क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं पातव्यं क्षीरपाके त्वयं विधिः ॥”
द्रव्यात् पलपरिमितात् ॥ अन्यच्च ।
“उदकाद्विगुणं क्षीरं शिशपासारमेव च ।
तत् क्षीरशेषं क्वथितं पेयं सर्व्वज्वरापहम् ॥
गुडूचीधान्यकारिष्टं पद्मकं रक्तचन्दनम् ।
एषां क्वाथः सुप्रसिद्ध सर्व्वज्वरहरः स्मृत' ॥
दीपनो दाहहृल्लासतृष्णाच्छर्द्यरुचीर्हरेत् ॥”
गुडूच्यादिक्वाथ' ॥ * ॥ संशोधन तरुणज्वरिणो निषिद्ध तदाह सुश्रुतः ।
“छर्द्दिं मूर्च्छां मन्दमोहं भ्रमतृड्विषमज्वरान् ।
संशोधनस्य पानेन प्राप्नोति तरुणज्वरी ॥”
संशोधनस्य लक्षणमाह ।
“स्थानाद्बहिर्नयेदूर्द्ध्वमधो वा दोषसञ्चयम् ।
संशोधनं तदेव स्याद्देवदालीफल यथा ॥”
निषिद्धमपि संशोधनमवस्थाविशेषे देयं यत आह ।
“रोगे शोधनसाध्ये तु य विद्याद्दोषदुर्व्वलम् ।
तं समीक्ष्य भिषक् कुर्य्याद्दोषप्रधावनं मृदु ॥”
शोधनसाध्यान् रोगानाह ।
“सद्योज्वरे विषे जीर्णे मन्दाग्नावरुचौ तथा ।
स्तन्यरोगे च हृद्रोगे कासे श्वासे च वामयेत् ॥
जीर्णज्वरगरच्छर्द्दिगुल्मशोथोदरेषु च ।
शूले शोथे मूत्रघाते कृमिरोगे विरेचयेत् ॥”
दोषदुर्व्वलं दोषैरुपचितैर्दुर्व्वलं न तु उपवासादिकृशम् । अतएव समीक्ष्येति । अन्यच्च ॥
“चले दोषे मृदौ कोष्ठे नेच्छेतात्र बलं नृणाम् ।
अथापत् दुर्व्वलस्यापि शोधनं हि तदा भवेत् ॥”
कुतो बलं नापेक्षणीयमित्याशङ्कायामाह ।
तदा तस्यामवस्थाया शोधनं दुर्व्वलस्यापि दोषदुर्व्वलस्यापि अथापत् भवेत् । छर्द्यादियाधिहन्तृ न भवतीत्यर्थः ॥ * ॥ बलवतः' पुरुषस्य पक्वस्य दोषस्य स्वस्थानस्थितस्य शोधनाविधाने दोषमाह सुश्रुत' ।
“पक्वोऽप्यनिर्हृतो दोषो देहे तिष्ठन्महात्ययम् ।
विषमं वा ज्वरं कुर्य्याद्बलव्यापादमेव च ॥”
पक्वः लङ्घनतिक्ताम्बुपानपेयादिभिः । अनिर्हृतः अधोमार्गेणानुत्सृष्टः । महात्ययं विषमज्वरं चातुर्थकम् । तस्यैव महात्ययत्वादिति गदाधरः ॥ गम्भीरमिति कार्त्तिकः ॥ महात्ययं महाकष्टं वा । बलव्यापादं बलक्षयम् ॥*॥ संशोधनमाह ।

“आरग्वधग्रन्थिकमुस्ततिक्ता-
हरीतकीभिः क्वथितः कषायः ।
सामे सशूले कफवातपित्त-
ज्वरे हितो रेचनपाचनश्च ॥”

आरग्वध धनवहेरा ॥ अन्यच्च ।
“पथ्यारग्वधतिक्तात्रिवृदामलकैः शृतं तोयम् ।
पाचनसारकमुक्तं मुनिभिर्ज्जीर्णज्वरे सामे ॥”
इति आरोग्यपञ्चकद्वयम् ॥ * ॥
“अनन्ता बालकं मुस्तं नागरं कटुरोहिणीम् ।
पिष्ट्वा सुखाम्बुना कल्कं पाययेदक्षसम्मितम् ॥
कल्क. स्वल्पेन कालेन हन्यात् सर्व्वज्वरानयम् ।
विदध्यात् कोष्ठसंशुद्धिं दीपयेच्च हुताशनम् ॥”
अनन्ता सारिवा । इति सारिवादिकल्कः ॥*॥
संशोधनं संशमनञ्च येषां निषिद्धं तानाह ।
“शीताम्बुर्लङ्घनक्षीणो जीर्णो भुक्तः पिपासितः ।
न पिबेदौषधं यस्तु संशोधनमथेतरत् ॥”
शीताम्बुः शीततिक्ताम्बु । भुक्तः भुक्तवानित्यर्थ' ।
गत्यर्थाध्यवसितादित्वात् कर्त्तरि क्तप्रत्ययः । इतरत् संशमनम् ॥ * ॥
“त्रिफला रजनीयुग्मं कण्टकारीयुतं शटी ।
त्रिकटु ग्रन्थिकं मूर्व्वा गुडूची धन्वयासकः ॥
कटुका पर्पटो मुस्तं त्रायमाणा च बालुकम् ।
निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः ॥
यवानीन्द्रयवो भार्गी शिग्रुवीजं सुराष्ट्रजा ॥
वचा त्वक् पद्मकोशीरचन्दनातिविषा बला ॥
शालीपर्णी पृश्निपर्णी विडङ्गं तगरं तथा ।
चित्रकं देवकाष्ठञ्च चव्य पत्रं पटोलजम् ॥
जीवकर्षभकौ चैव लवङ्ग वंशलोचनम् ।
पुण्डरीकञ्च काकोली पत्रक जातिपत्रकम् ॥
तालीशपत्रमेतानि समभागानि चूर्णयेत् ।
अर्द्धांशं सर्व्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः ॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम् ।

ज्वरांश्च निखिलान् हन्यादत्र कार्य्या विचारणा॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमांस्तथा।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत्॥
शीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं तृषाम्।
कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलामपि॥
त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत्।
शीताम्बुना पिबेदेतत् सर्व्वज्वरनिवृत्तये॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम्।
तद्वज्ज्वराणां सर्व्वेषां चूर्णमेतत् प्रणाशनम्॥"
पुष्करमूलाभावे कुष्ठमपि दद्यात्। भार्ग्यभावे कण्टकारीमूलम्। सौराष्ट्राभावे स्फुटिकां दद्यात्। तगरालाभे कुष्ठं देयम्। जीवकर्षभकयोरलाभे विदारीकन्दस्य भागद्वयं दद्यात्। पुण्डरीकं श्वेतकमलम्। काकोल्यभावे अश्वगन्धामूलं दद्यात्। तालीशपत्रकाभावे स्वर्णतालीं प्रदीयते। इति। अथवा कण्टकारीजटा देया। इति सुदर्शनचूर्णम्। *।
"शटी निशाद्वयं शुण्ठी दारु पुष्करमूलकम्।
एला गुडूची कटुका पर्पटश्च सवासकः॥
भार्गी किराततिक्ताश्च दशमूलं तथैव च।
क्वाथमेषां पिबेत् कृष्णासिन्धुचूर्णयुतं नरः॥
ज्वरान् सर्व्वान् द्रुतं हन्ति नात्र कार्य्या विचारणा॥"
अनुभूतमत्युत्तममेतत्॥ *।
"हरीतकीत्रिवृद्दन्तीद्रारकाणां पृथग्भवेत्।
पलद्वयं कणा शुण्ठी गुडूची गोक्षुरो वरी॥
सहदेवी विडङ्गञ्च प्रत्येकं पलसम्मितम्।
मधुना वटिकां कृत्वा खादेत् ज्वरमपोहति॥
कासं श्वासं मलस्तम्भं वह्निमान्द्यं नियच्छति॥
लाक्षा दशाक्षा अरुणा यष्ठ्याह्वा
सचन्दनं लोहितचन्दनञ्च।
त्वक्पत्रकं वारि सुरा समुस्ता
प्रत्येकमेतानि पलोन्मितानि॥
किराततिक्तस्त्रिवृतावतिक्ता-
म्टताकणापर्पटकण्टकार्य्यः।
विडङ्गविश्वामलकानि वासा-
रसानिशात्रारुणसिन्धुवाराः॥
एतानि देयानि पृथक् पलार्द्ध-
मानानि सर्व्वाणि च भेषजानि।
कल्कानमीषां विदधीत गव्य-
दुग्धेन वै सार्द्धतुलामितेन॥
तैलं तिलानान्तु तुलाचतुर्मानं
तेनैव कल्केन शनैः पचेत्तु।
हन्यात् ज्वरान् तैलमिदं समस्तान्
कुर्य्याद्बलं वीर्य्यमतीवपुष्टिम्॥
विमर्द्दनादाशु परिश्रमं श्रमं
शमं नयेत् सञ्जनयेत् द्युतिं तनौ।
तथा यथामस्थिससुक्ष्मवामपि
प्रहृत्य निद्रां समुपार्ज्जयेत् सुखम्॥"
अरुणा मञ्जिष्ठा। वारि वाला। रसा रास्ना।
इति लाक्षादितैलम्॥ *॥
"लाक्षारससमं तैलं तैलाम्लस्तु चतुर्गुणम्।
अश्वगन्धानिशादारुकौन्तीकुष्ठाब्दचन्दनैः॥
समूर्व्वारोहिणीरास्नाशताह्वामधुकैः समैः।
सिद्धं लाक्षादिकं नाम तैलमभ्यञ्जनादिना॥
सर्व्वज्वरक्षयोन्मादश्वासापस्मारवातनुत्।
यक्षराक्षसभूतघ्नं गर्भिणीनाञ्च शस्यते॥"
मस्तु दधिजलम्। कौन्ती रेणुका। चन्दनमत्र श्वेतमेव न तु रक्तम्। रोहिणी कटुकी। इति च लाक्षादितैलम्॥ *॥
"लाक्षा हरिद्रा मञ्जिष्ठा फेनिलं मधुकं बला।
लामज्जकं चन्दनञ्च चम्पकं नीलमुत्पलम्॥
प्रत्येकमेषां पञ्चाशत् पक्त्वा तोये चतुर्गुणे।
चतुर्भागावशेषे तु गर्भे चैतत् समापयेत्॥
रेणुका पद्मकञ्चैव वाजिगन्धा तथैव च।
वेतसं चोरकं कुष्ठं देवदारु नखं त्वचम्॥
शतपुष्पा पुण्डरीकं मांसी मधुकमेव च।
एभिरक्षमितैः कल्कैः काथयेणैव पेषितैः॥
मस्तुशुक्तारनालानामाढ़काढकमावपेत्।
क्षीराढकसमायुक्तं तैलप्रस्थं विपाचयेत्॥
अभ्यङ्गात्तैलमेतद्धि शीघ्रं दाहमपोहति।
अपोहति तथा वातपित्तश्लेष्मभवं ज्वरम्॥
सप्रलापं सतृष्णाञ्च तालुशोषभ्रमान्वितम्।
ग्रहोपसृष्टा ये बाला रक्षःसन्दूषिताश्च ये॥
तेषां कष्टं प्रशमयेत्तैलं लाक्षादिकं महत्॥"
फेनिलं बदरम्। लामज्जकमुशीरवत् पीतच्छविद्रव्यविशेषः।
लामज्जकं यदा न स्यादुशीरं दीयते तदा।
चम्पकमित्यस्य स्थाने कुत्रापि गैरिकं इति पाठः।
नीलोत्पलस्यालाभे तु कुमुदं देयमिष्यते।
समापयेत् प्रक्षिपेदित्यर्थः। चोरकं ग्रन्थिपर्णस्य भेदः भटिउर इति नेपालदेशे भवति। तदलाभे ग्रन्थिपर्णं देयम्। पुण्डरीकं श्वेतकमलम्। मस्तु दधिजलम्। शुक्तं सन्धानभेदः। आरनालमपि सन्धानभेदः। इति महालाक्षादितैलम्॥ *॥ अथ नवज्वरे रसाः।
"सूतो गन्धष्टङ्कणं शोषणञ्च
सर्व्वैस्तुल्या शर्करा मत्स्यपित्तैः।
भूयो भूयो मर्द्दयेत्तं त्रिरात्रं
वल्लो देयः शृङ्गवेरद्रवेण॥
साये शीतं वीजनैस्तक्रभक्तं
वृन्ताकाद्यं पथ्यमेतत् प्रदिष्टम्।
अद्रौ योग्यं हन्ति सद्यो ज्वरन्तु
पित्ताधिक्ये मूर्द्ध्नि तोयञ्च दद्यात्॥"
अस्य प्रक्रिया। पारा शुद्ध भाग १ गन्धक शुद्ध भाग १ सोहागाभृष्ट भाग १ मरिच भाग १ शर्करा भाग ४ रोहुमत्स्यकपित्त भाग ३। अमुं प्रतिदिनं सर्व्वं दिनत्रयं मर्द्दयेत्। रसमिमं रक्तित्रयमितमार्द्रकरसेन दद्यात्। ओदनं तक्रं वृन्ताकफलं भोक्तुं दद्यात्। व्यजनादौ शीतलमुपचारं कुर्य्यात्। उदकमञ्जरीरसो नवज्वरेषु॥ *॥ रसरत्नप्रदीपे।
"अद्यात् समं सूतसमुद्रफेनं
हिङ्गूलगन्धं मरिचस्य यामम्।
नवज्वरे चक्रयुगं त्रिघस्र-
मार्द्राम्भसाय ज्वरधूमकेतुः॥"
प्रक्रिया। पाराशुद्धगन्धकशुद्धहिङ्गुलशुद्धसमुद्रफेनसभागं सर्व्वं याममेकमार्द्रकरसेन संमर्द्य रक्तिकाषट्कमितमार्द्रकरसेन दिनत्रयं नवज्वरी भक्षयेत्। दिनत्रयान्नवज्वरो नश्येत्। इति ज्वरधूमकेतुः॥ *॥ रसेन्द्रचिन्तामणौ।
"शुद्धः सूतो विषो गन्धः प्रत्येकं शाणसम्मितः।
धूर्त्तबीजं त्रिशाणं स्यात् सर्व्वेभ्यो द्विगुणा भवेत्॥
हेमाह्वा कारयेदेषां चूर्णं सूक्ष्मं प्रयत्नतः।
जम्बीरजीरकैर्देयश्चूर्णं गुञ्जाद्वयोन्मितम्॥
आर्द्रकस्य रसेनापि ज्वरं हन्ति त्रिदोषजम्।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्॥
विषमञ्च ज्वरं हन्यान्नवं जीर्णञ्च सर्व्वथा।
महाज्वराङ्कुशो नाम्ना रसोऽयं सर्व्वसम्मतः॥"
प्रक्रिया। शुद्धपारा शुद्धगन्धक शुद्धविष प्रत्येक टङ्क १ धस्तूरबीज टङ्क ३ चोकटङ्क १२ सर्व्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥ *॥ सर्व्वज्वरेषु शार्ङ्गधरे।
"एको भागो रसात् शुद्धात् द्वैधेयः पिप्पली शिवा।
आकारकरभो गन्धः कटुतैलेन शोधितः॥
फलानि चेन्द्रवारुण्याश्चतुर्भागमिता अमी।
एकत्र मर्द्दयेच्चूर्णमिन्द्रवारुणिकारसैः॥
माषोन्मितां वटीं कृत्वा दद्यात् सद्योज्वरे बुधः।
छिन्नारसानुपानेन ज्वरघ्नी वटिका मता॥"
शैलेयः छड़ इति लोके। शिवात्र हरीतकी। आकारकरभः अकरकरहा इति लोके। चतुर्भागमिता अमी शैलेयादयः षट् समुदिता भागचतुष्टयमिताः। इति ज्वरघ्नीवटिका॥ *॥ शार्ङ्गधरे।
"रसं गन्धञ्च दरदं जैपालं क्रमवर्द्धितम्।
दन्तीरसेन संपिष्य वटी गुञ्जामिता कृता॥
प्रभाते सितया सार्द्धमसिता शीतवारिणा।
एकेन दिवसेनैषा नवज्वरहरी भवेत्॥"
इति च ज्वरघ्नीवटिका॥ *॥ रसरत्नप्रदीपे।
"रसो गन्धो विषं शुण्ठी पिप्पली मरिचानि च।
पथ्या बिभीतकं धात्री दन्तीबीजञ्च शोधितम्॥
चूर्णमेषां समांशानां द्रोणपुष्पीरसैः पुटेत्।
वटीं माषनिभां कुर्य्यात् भक्षयेन्नूतने ज्वरे॥"
इति नवज्वरीहरीवटी। इति नवज्वरे रसाः॥ *॥
अथ सामान्यज्वरे रसाः।
"शुद्धं सूतं विषं गन्धं धूर्त्तबीजं त्रिभिः समम्।
चतुर्णां द्विगुणं व्योषं चूर्णं गुञ्जाद्वयोन्मितम्॥
आर्द्रकस्य रसैः किम्वा जम्बीरस्य रसैर्युतम्।
महाज्वराङ्कुशो नाम्ना सर्व्वज्वरविनाशनः॥
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्।
विषमं वा त्रिदोषं वा ज्वरं हन्ति न संशयः॥"
प्रक्रिया। शुद्धपाराटङ्क १ शुद्धविषटङ्क १ शुद्धगन्धकटङ्क १ धस्तूरबीजटङ्क ३ शोंटिटङ्क ४ पीपरीटङ्क ४ मरिचटङ्क ४ सर्व्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥ *॥

सर्व्वज्वरेषु सर्व्वरससंग्रहे।
"सूतं गन्धं विषञ्चैव टङ्कणञ्च मनःशिला।
एतानि टङ्कमात्राणि मरिचं त्वष्टटङ्ककम्॥
कटुत्रयं टङ्कषट्कं खल्ले क्षिप्त्वा विचूर्णयेत्।
रसः श्वासकुठारोऽयं श्वाससर्व्वज्वरापहः॥"
इति श्वासकुठारो रसः॥ * ॥
श्वासे सर्व्वज्वरे रसरत्नाकरे।
"दारुमूषां शिखिग्रीवां रसकञ्च पृथक् पृथक्।
टङ्कत्रयानुमानेन गृहीत्वा कनकद्रवैः॥
मर्द्दयेत्त्रिदिनं कार्य्या वटी चणकमात्रया।
मरिचैरेकविंशत्या सप्तभिस्तुलसीदलैः॥
खादेद्वटीद्वयं पथ्यं दुग्धभक्तं सशर्करम्।
तरुणं विषमं जीर्णं हन्यात् सर्व्वज्वरं ध्रुवम्॥"
दारुमूषा दारुमूषो। शिखिग्रीवा तुतिया। रसकं खपरिया। प्रत्येकं टङ्क ३ धत्तूरपत्त्रस्वरसेन मर्द्दयेत्। इति ज्वराङ्कुशः॥ * ॥
सर्व्वज्वरेषु।
"नागरं कर्षमात्रं स्यात् कर्षमात्रञ्च टङ्कणम्।
मरिचं सार्द्धकर्षं स्यात् तावद्दग्धवराटकम्॥
विषं कर्षचतुर्थांशं सर्व्वमेकत्र चूर्णयेत्।
रसो हुताशनो नाम्ना खाद्यो गुञ्जामितो ज्वरे॥"
इति हुताशनो रसो ज्वरे॥ * ॥
"शुद्धजैपालटङ्कन्तु कट्वीटङ्कद्वयोन्मितम्।
गैरिकं टङ्कमेकञ्च कन्यानीरेण मर्द्दयेत्॥
कलायसदृशी कार्य्या वटिका ताञ्च भक्षयेत्।
शीतलेन जलेनैषा वटी जीर्णज्वरापहा॥"
इति ज्वरघ्नीवटी॥

"द्विभागतालेन हतञ्च ताम्रं
रसञ्च गन्धञ्च समांशमाशु।
विषं समञ्च द्विगुणञ्च ताम्रं
त्रिसप्तरात्रेण दिवाकरांशैः॥
विमर्द्दयेदिष्टरसेन चूर्णं
गुञ्जैकदत्तं सितया समेतम्।
ज्वराङ्कुशोऽयं रविसुन्दराख्यो
ज्वरान्निहन्त्यष्टविधान् समस्तान्॥"

अस्य प्रक्रिया। पाराटङ्क १ गन्धकटङ्क १ विषटङ्क १ द्विगुणतालकहतताम्रटङ्क २ रोहुमत्स्यकपित्त १ सब एकत्र खले जबचूर्ण होइ मिले तब नीबिके पातकी स्वरसकभावना २१ घामे मह देवइ मात्रा रत्ती एक अनुपान श्वेतशर्करा रती २ खाइ। इति सर्व्वज्वरे रविसुन्दरो रसः॥ * ॥
"शुद्धं सूतं तथा गन्धं खल्ले तावद्विमर्द्दयेत्।
सूतं न दृश्यते यावत् किन्तु कज्जलवद्भवेत्॥
एषा कज्जलिका ख्याता बृंहणी वीर्य्यवर्द्धिनी।
नानानुपानयोगेन सर्व्वव्याधिविनाशिनी॥"*॥
कज्जलिकाविधानं तद्गुणाश्च रसरत्नप्रदीपे।
"जयापत्त्ररसेनाथ वर्द्धमानरसेन च।
भृङ्गराजरसेनापि काकमाच्या रसेन च॥
रसं संशोध्य यत्नेन तत्समं शोधयेद्बलिम्।
भृङ्गराजरसैः पिष्ट्वा शोषयेदर्करश्मिभिः॥
सप्तधा वा त्रिधा वापि पश्चाच्चूर्णन्तु कारयेत्।
चूर्णयित्वा समं तेन रसेन सह मर्द्दयेत्॥
नष्टसूतं यदा चूर्णं भवेत् कज्जलसन्निभम्।
निर्धूमे वदराङ्गारे द्रवीकुर्य्यात् प्रयत्नतः॥
तत्र तं मद्दिगोविष्ठास्थापिते कदलीतले।
निःक्षिप्य तदुपर्य्यन्यत् पत्त्रं दत्त्वा प्रपीडयेत्॥
शीतलान्तात् ततः पत्त्रात् समुद्धृत्य विचूर्णयेत्।
एव सिद्धा भवेद्व्याधिघातिनी रसपर्पटी॥
ज्वरादिव्याधिभिर्व्याप्तं विश्वं दृष्ट्वा पुरा हरः।
चकार कृपया युक्तः सुधावद्रसपर्पटीम्॥
रक्तिकासंमितां तावद्भृष्टजीरकसंयुताम्।
गुञ्जार्द्धभृष्टहिङ्ग्वाढ्यां भक्षयेद्रसपर्पटीम्॥
रोगानुरूपभैषज्यैरपि तां भक्षयेद्बुधः।
पिबेत्तदनुपानीयं शीतलं चुलुकत्रयम्॥
प्रत्यहं वर्द्धयेत्तस्या एकैकां रक्तिकां भिषक्।
नाधिकां दशगुञ्जातो भक्षयेत्तां कदाचन॥
एकादशदिनारम्भात् तां तथैवापकर्षयेत्।
एवमेतां समश्नीयान्नरो विंशतिवासरान्॥
शिवं गुरुं तथा विप्रान् पूजयित्वा प्रणम्य च।
श्रद्धया भक्षयेदेतां क्षीरमांसरसाशनः॥
ज्वरञ्च ग्रहणीञ्चापि तथातीसारमेव च।
कामलां पाण्डुरोगञ्च शूलप्लीहजलोदरम्॥
एवमादीन् गदान् हत्वा हृष्टः पुष्टश्च वीर्य्यवान्।
जीवेद्वर्षशतं साग्रं वलीपलितवर्ज्जितः॥"
इति रसपर्पटी॥ * ॥
अथ ज्वरिणो अन्नदानसमयः। तत्र चरकः।
"क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः॥"
अन्यच्च।
"आमे पाकं गते नृणां यदा भोजनलालसा।
भवेत् काले ह्यकाले वा सोऽन्नकाल उदाहृतः॥"
तत्र कालमाह। ज्वरस्य पाकावस्थान्नदानकालः ज्वरस्य पाककालश्च।
"वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि॥"
ज्वरस्य पाक उपशमः॥ ज्वरपाकेनैव रसपाके दोषपाकोऽपि कथितः। यतो दोषपाकं विना ज्वरपाको न भवति रसपाकं विना दोषपाकश्च न भवति॥*॥ ननु यथा पैत्तिको ज्वरो दशाहोरात्रेण पाकं याति। एकादशे दिनेऽन्नं दीयते। तथा श्लैष्मिको ज्वरो द्वादशाहोरात्रेण पाकं याति त्रयोदशदिवसेऽन्नं दीयते। तथा वातिको ज्वरः सप्ताहोरात्रेण पाकं याति। अष्टमे दिवसेऽन्नं कथं न दीयते। कथं सप्तम एव दिवसेऽन्नं दीयते। इति। उच्यते।
"कफपित्ते द्रवे धातू सहेते लङ्घनं बहु।
आमक्षयादूर्द्ध्वमपि वायुर्न सहते क्षणम्॥"
इति वचनादामरसपाके जाते आहारलाभं विना वायुः क्षणमात्रमपि सोढुं न शक्नोति। स आशुकारित्वात् क्षणादाक्षेपकादीन् विकारान् संजनयति॥ अतो वातिके ज्वरे पाकदिनानामन्तिमे सप्तम एव दिनेऽन्नं दीयते। तथा च धन्वन्तरिः।

"ज्वराभिभूतः षडहे व्यतीते
विपक्वदोषः कृतलङ्घनादिः।
यो भेषजं खादति वैद्यवश्यो
निःसंशयं हन्त्यचिरात् स रोगान्॥"

ज्वराभिभूतः वातज्वराभिभूतः। विपक्वदोषः पक्ववातः। कृतलङ्घनादिः आदिशब्दात् कृतपक्वजलपाननिर्व्वातगृहवासगुरुप्रावसनधारणादिः। भेषजमित्यन्नस्याप्युपलक्षणम्। अतएव चरकः।
"ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम्।
पाचनं शमनीयं वा कषायं पाययेत्तु तमिति॥"
ज्वरितं वातज्वरिणम्॥ षडहेऽतीते इत्युपलक्षणम्॥ पित्तज्वरिणं दशाहेऽतीते॥ श्लेष्मज्वरिणं द्वादशाहेऽतीते॥ लघ्वन्नं भोजितं ज्वरिणं पाचनं शमनीयं वा कषायं पाययेत्। पुनः स एव।
"सर्व्वज्वरेषु ज्वरितं दिनान्ते भोजयेल्लघु॥"
दिनान्तेऽन्तशब्दोऽत्र मध्यवाची तेन त्रिधा विभक्तस्य दिवसस्य मध्यभागे पित्तप्राधान्यसमये॥ उक्तञ्च वाग्भटेन।
"वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमा-
दिति।"
ते वातपित्तश्लेष्माणः॥ पित्तकालेऽपि मध्याह्नादर्व्वाक्। यत आह।
"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः॥" इति॥
एतत् सुस्थपरमिति चेत्तन्न। यत आह।
"श्लेष्मक्षये प्रवृद्धोष्मा बलवाननलस्तदा।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम्॥"
तदा पित्तप्राधान्यसमये। अन्यथा उक्तसमयादन्यदा। वेगापाये जठराग्निवेगनाशे। तत् भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः॥ * ॥ अत्र विषमज्वरिणोऽन्नं दातुं कालविशेषमाह चरकः।
"सर्व्वज्वरेषु सप्ताहं मात्रावल्लघु भोजयेत्।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम्॥"
सर्व्वज्वरेषु सर्व्वविषमज्वरेषु। वेगापाये ज्वरवेगापाये भोजयेत्। अन्यथा ज्वरवेगापायं विना। तत् भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः॥ * ॥ अथान्नग्रहणाय स्थानमाह।

"आहारनिर्हारविहारयोगाः
सदैव सद्भिर्विजने विधेयाः॥" इति॥*॥

अत्यबलस्य ज्वरितस्य भोजनार्थोपवेशनप्रकारमाह सुश्रुतः।
"ज्वरे प्रभेहो भवति स्वल्पैरपि विचेष्टितैः।
निषस्य भोजयेत्तस्मात् मूत्रोच्चारौ च कारयेत्॥"
निषस्य यथास्थानस्थितमेव न तु स्थानान्तरं नीतम्॥ * ॥ अन्नग्रहणसमये प्रथमं ज्वरितेन कवलः कर्त्तव्य इत्याह।
"यथा दोषोच्छितैर्द्रव्यैः कर्त्तव्यः कवलग्रहः।
अरोचकास्यवैरस्यमलपूतिप्रसेकहृत्॥
भृष्टजीरकचूर्णेन सिन्धुजन्मयुतेन च।
जिह्वां दन्तान् मुखस्यान्तर्घृष्ट्वा कवलमाचरेत्॥

मुखे मलं विगन्धत्वं विरसत्वञ्च नश्यति ।
मनः प्रसन्नं भवति भोजनेऽतिरुचिर्भवेत् ॥
ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽपि च ॥”
अयमर्थः । यद्यपि अस्य ज्वरितस्य हिते भक्ष्ये अरुचिर्भवेत् तथापि ज्वरितो हितमेवाश्नीयादिति नियमः । यत आह सुश्रुतः ।
“गुर्व्वभिष्यन्द्यकालञ्च ज्वरी नाद्यात् कथञ्चन ।
न तु तस्याहितं भक्तमायुषे चासुखाय च ॥
आनह्यस्तिमितैर्द्दोषैर्यावन्तं कालमातुरः ।
तावत्कालं स लघ्वन्नमश्नीयात् सविरिक्तवत् ॥”
आनद्धस्तिमितैर्द्दोषैः अपक्वैर्दोषैर्व्याप्त इत्यर्थः ॥
ननु हिते वस्तुनि कथमरुचिः स्यादत आह ।
सातत्यात् स्वाद्वभावाच्च पथ्यं द्वेष्यत्वमागतमिति ।
सातत्यात् एकस्यैव भक्ष्यस्य सर्व्वदोपयोगात् ।
स्वाद्वभावाच्च भक्ष्यान्तरादपि विस्वादुत्वात् । पथ्यमप्रियं स्यात् तथापि तदेव पथ्यम् । कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत् पुनरिति ॥
अथ च ज्वरितोऽन्नकालेऽश्नीयादेवेति द्वितीयो नियमः । कुत इति चेत् हि यतो हेतो अभुञ्जानः क्षीयतेऽपक्वधातुर्भवति ततो म्रियतेऽपि च ॥ * ॥
ज्वरिताय हितान्यन्नादीन्याह ।
“रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह ।
यवाग्वोदनलाजार्थे ज्वरितानां ज्वरापहाः ॥”
तत्र रक्तशालिगुणाः ।
“रक्तशालिर्ज्वरस्तेषां बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः ॥
विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥”
रक्तशालिर्यो मगधदेशे दाउदखानी इति प्रसिद्धः ॥
“मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ठकान् ।
यूषार्थे यूषसात्म्यानां ज्वरितानां प्रदापयेत् ॥”
तत्र मुद्गादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
“पटोलपत्रं वार्त्ताकुं कुलकं कारवेल्लकम् ।
कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ॥
पत्रं गुडूच्याः शाकार्थे ज्वरितानां प्रदापयेत् ॥”
तत्र पटोलादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
“लावान् कपिञ्जलानेणान् हरिणान् पृषतान् शशान् ।
कुरङ्गान् कालपुच्छांश्च तथैव मृगमातृकान् ॥
मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ।
सारसक्रौञ्चशिखिनस्तथा तित्तिरकुक्कुटान् ॥
गुरूष्णत्वान्न शंसन्ति केचिदेवं व्यवस्थिताः ॥”
तित्तिरिरत्र कृष्णतित्तिरिः । गौरतित्तिरेः कपिञ्जलपदेन पूर्व्वं गृहीतत्वात् ॥
“ज्वरितानां प्रकोपन्तु यदा याति समीरणः ।
तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः ॥
कपिञ्जल इति ख्यातो लोकेषु गौरतित्तिरिः ॥”
इति ॥ * ॥
“निम्बूकं दाड़िमं धात्रीफलमम्लं प्रकाङ्क्षते ।
प्रदद्यादम्लसात्म्याय काञ्जिकं वा पुरातनम् ॥”

अथौषधसिद्धायाः पेयायाः गुणाश्च ।
“अन्नकाले हिता पेया यथास्वं पाचनैः कृता ।
दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा ॥”
यथास्वं पाचनैः कृता यथादोषं पाचनैः कृता ।
यथा,—
“पञ्चमूल्याः कषायन्तु पाचनं वातिके ज्वरे ।
सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतम् ॥
पिप्पल्यादिकषायन्तु पाचनं कफजे ज्वरे ।
लघुना पञ्चमूलेन पिप्पल्या सह धान्यया ॥
महत्या पञ्चमूल्याथ व्याघ्री दुस्पर्शगोक्षुरैः ।
सिद्धानि भिषगन्नानि प्रयुञ्जीत यथाक्रमम् ॥
वातपित्ते श्लेष्मपित्ते कफवाते त्रिदोषजे ॥”
अस्यायमर्थः । वातपित्ते लघुना पञ्चमूलेन सिद्धान्यन्नानि भिषक् प्रयुञ्जीत ।
“शालिपर्णी पृश्निपर्णी कण्टकारीद्वयं तथा ।
गोक्षुरः पञ्चमः प्रोक्तः पञ्चमूलमिदं लघु ॥
श्लेष्मपित्ते वातपित्ते पिप्पल्या सह धान्यया ॥”
कफवाते महत्या पञ्चमूल्या ।
“श्रीफलः सर्व्वतोभद्रा पाटला गणिकारिका ।
श्योनाकः पञ्चमः प्रोक्तः पञ्चमूलमिदं महत् ॥
त्रिदोषजे ज्वरे देया व्याघ्री दुस्पर्शगोक्षुरैः ।
व्याघ्री कण्टकारिका । दुस्पर्शो यवासः ।
पेयां वा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
विबद्धवर्च्चाः सयवां पिप्पल्यामलकैः शृताम् ।
सर्पिष्मतीं पिबेत् पेयां ज्वरी दोषानुलोमनीम् ॥
कासी श्वासी च हिक्की च पञ्चमूलीशृतां पिबेत् ॥”
यवोऽत्रान्नम् । अत्र पञ्चमूली बृहती लघ्वी च हिता । तया शृतां पेयां पिबेदित्यर्थः ।
“पेया भेषजसंयोगाल्लघुत्वाच्चाग्निदीपिका ।
वातमूत्रपुरीषाणां दोषाणां चानुलोमिका ॥
स्वेदनाय च सोष्णत्वाद्द्रवत्वात् तृट्शमाय च ।
आहारभावात् प्राणाय सरत्वाल्लाघवाय च ॥
ज्वरघ्नी हेतुसात्म्यत्वात्तस्मात्तां पूर्व्वमाचरेत् ॥”
हेतुसात्म्यत्वात् हेतवो वातपित्तकफास्तेषां सात्म्यत्वात् ॥
“यवकोलकुलत्थानां मुद्गमूलकशुण्ठयोः ।
एकैकं मुष्टिमादाय पचेदष्टगुणे जले ॥
पञ्चमुष्टिक इत्येष वातपित्तकफापहः ।
शूले प्रशस्यते गुल्मे कासे श्वासे क्षये ज्वरे ॥”
पञ्चमुष्टिकयूषः ॥ * ॥
“रुद्धमूत्रपुरीषस्य गुदे वर्त्तिं निधापयेत् ।
पिप्पलीपिप्पलीमूलयवानीचव्यसाधितम् ॥
पाययेत यवागूं वा मारुतादनुलोमनीम् ॥”
पेयाया यवाग्वाश्च क्वचिदपवादमाह ।
“मदात्यये मद्यनित्ये ग्रीष्मे पित्तकफोत्थिते ।
ऊर्द्ध्वगे रक्तपित्ते च यवागूर्न हिता ज्वरे ॥
दाहच्छर्द्यर्द्दितं क्षामं निरन्नं तृष्णयान्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥”
लाजशक्तुरूपं तर्पणम् । तथा च ग्रन्थान्तरे ।
“दाहच्छर्द्यर्द्दितं क्षामं निरन्नं तृष्णयान्वितम् ।
घर्म्मार्त्तं मद्यपञ्चापि तोयालोड़ितशक्तुकम् ॥
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ।
ज्वरापहैः फलरसैर्युक्तमम्लं हितं क्वचित् ॥” * ॥
सन्तर्पणस्वरूपञ्चाह धन्वन्तरिः ।
“द्राक्षादाड़िमखर्ज्जूरमृद्वितामुसशर्करम् ।
लाजचूर्णं समध्वाज्यं सन्तर्पणमुदाहृतम् ॥
लाजाचूर्णम् । द्राक्षादिजलशर्करामध्वाज्यसहितं तर्पणमुक्तमित्यर्थः ॥ लाजशक्तुगुणाश्च गुणमन्थे ।
“लाजानां शक्तवः क्षौद्रसितायुक्ता विशेषतः ।
छर्द्यतीसारतृड्दाहविसूच्यो ज्वरापहाः ॥”
चरकश्च ।
“तत्र तर्पणमेवादौ प्रदेयं लाजशक्तुभिः ।
ज्वरापहैः फलरसैर्युक्तं मधुसशर्करम् ॥”
ज्वरघ्नानि फलान्याह चरक एव ।
“द्राक्षादाड़िमखर्ज्जूरपियालैः सपरूषकैः ।
तर्पणार्हस्य दातव्यं तर्पणं ज्वरनाशनम् ॥”
पियालमत्र पक्वफलं न तन्मज्जातिगुरुत्वात् ।
तर्पणार्हस्य दाहच्छर्द्दितृषार्त्तस्य लङ्घितस्य क्षीणस्येत्यर्थः ।
श्रमोपवासानिलजे हितो नित्यं रसौदनः ॥
रसोऽत्र मांसरसः । तेन सिक्त ओदनो रसौदनः । अन्नेन व्यञ्जनमित्यनेन समासः ॥
“मुद्गयूषौदनश्चैव हितः कफसमुत्थिते ।
स एव सितया युक्तः शीतपित्तज्वरे हितः ॥”
स एव मुद्गयूषौदन एव ॥
“क्षशोऽल्पदोषो यः क्षीणकफो जीर्णज्वरान्वितः ।
विबन्धादृष्टदोषश्च रूक्षः पित्तानिलज्वरी ॥
पिपासार्त्तः सदाहश्च पयसा स सुखी भवेत् ॥”
अन्यच्च ।
“अजादुग्धं गुड़ोपेतं पातव्यं ज्वरशान्तये ।
तदेव तु पयः पीतं तरुणे हन्ति मानवम् ॥”
तरुणे ज्वरे । अन्यच्च ।
“जीर्णे ज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥” * ॥
अथ ज्वरिणो नियममाह ।
“न हिरण्यान्न पूर्व्वाह्णे नाभिष्यन्दि कदाचन ।
न तीक्ष्णं न गुरुप्रायो भुञ्जीत तरुणज्वरी ॥
न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्षितम् ।
तेन संशमितोऽप्यस्य पुनरेव भवेज्ज्वरः ॥” * ॥
अथ ज्वरविमुक्तेः पूर्व्वरूपमाह ।
“दाहः स्वेदो भ्रमस्तृष्णा कम्पविड्भेदसंज्ञिताः ।
कूजनं चाति वेगत्वमाकृतिर्ज्वरमोक्षणे ॥”
विड्भित् मलप्रवृत्तिः । अत्र सम्पदादित्वात् भावे क्विप् । कूजनं कुन्थनम् । अतिवेगत्वमातुरस्य । ज्वरमुक्तौ भविष्यत्यामेतल्लक्षणं भवति ॥
ननु दोषक्षयं विना न व्याधिनिवृत्तिः । क्षीणश्च दोषः कथमेवंविधं रूपं करिष्यति । उच्यते । कश्चित् क्षीणोऽपि दोषः विनाशकाले स्वशक्तिं दर्शयति । यथा निर्व्वाणावस्थायां दीपो विशेषात् प्रज्वलति । वाग्भटोऽप्याह ।
“धातून् प्रक्षोभयन्दोषो मोक्षकाले विलीयते ।
ततो नरः श्वसन् कूजन् वमन् खिद्यन् च चेष्टते ॥”
न चेष्टते अचेष्टश्च स्यात् ।

"त्रिदोषजे ज्वरे स्वेदस्त्वन्तर्वेगे च धातुगे ।
लक्षणं मोक्षकाले स्यादन्यस्मिन् स्वेददर्शनम् ॥"
एतद्वाग्भटादिकं लक्षणं मोक्षकाले एतेष्वेव ज्वरेषु स्यात् । केषु त्रिदोषजे । अन्तर्वेगे । धातुगे ज्वरे । अन्यस्मिन् स्वेदमात्रं दर्शनं भवति ॥ * ॥
अथ ज्वरमुक्तस्य लक्षणमाह ।
"देहो लघुर्व्यपगतक्लममोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम् ।
स्वेदः क्षवः प्रकृतियोगिमनोऽन्नलिप्सा
कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि ॥"
सुश्रुतोऽप्याह ।
"स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।
क्षवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणम् ॥" * ॥
अथ ज्वरमुक्तस्य नियमाः ।
"व्यायामञ्च व्यवायञ्च स्नानं चंक्रमणानि च ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥"
अन्यच्च ।
"व्यायामञ्च व्यवायञ्च प्रवातं शिशिरं जलम् ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥
अपि ज्वरविमुक्तस्य स्नानं कुर्य्यात् पुनर्ज्वरम् ।
तस्माज्ज्वरविमुक्तोऽपि स्नानं विषमिव त्यजेत् ॥
बलवर्णाग्निवपुषां यावन्न प्रकृतिर्भवेत् ।
तावज्ज्वरेण मुक्तोऽपि वर्ज्जनीयानि वर्ज्जयेत् ॥"
अथ वातज्वराधिकारः । तत्र वातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्ब्बिकां संप्राप्तिमाह ।
"वातलाहारचेष्टाभ्यां वायुरामाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसानुगः ॥"
अथ तस्य पूर्ब्बरूपमाह । जृम्भात्यर्थं समीरणादिति । समीरणात् ज्वरे उत्पत्स्यति अत्यर्थं जृम्भा स्यात् । जृम्भा च श्रमादिपूर्ब्बिका भवति ॥
अथ वातज्वरस्य लक्षणमाह ।
"वेपथुर्व्विषमो वेगः कण्ठौष्ठमुखशोषणम् ।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता ।
शूलाध्माने जृम्भणञ्च भवत्यनिलजे ज्वरे ॥"
एतानि लक्षणानि प्रायो भाविलेन सुश्रुतेन निर्द्दिष्टानि । चकारादन्यान्यपि चरकनिदानोक्तानि बोद्धव्यानि । तान्येव श्लोकेन प्रदर्शयन्ति ।
"भवन्ति विविधा वातवेदना स्यादसुप्तता ।
पिण्डिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता ॥
ऊरुसादो हनुस्तम्भो विश्लेषः सन्धिजानुनोः ।
शुष्ककासो वमिर्लोमहर्षो दन्तहर्षः श्रमभ्रमौ ॥
अरुणं नेत्रमूत्रादि हृट् प्रलापोष्णकामिता ॥"
विषमो वेगः शरीरोष्णतादिरूपो ज्वरवेगो विषमो भवतीत्यर्थः । क्षवस्तम्भः छिक्काया अभावः । तथा च वाग्भटः ।
"हर्षो रोमाङ्गदन्तेषु वेपथुः क्षवथोर्ग्रहः ॥" इति । चरकोऽपि । क्षवथूद्गारनिग्रह इति । शिरोहृद्गात्ररुक् गात्रपदे प्रयुक्ते शिरोहृच्छब्दप्रयोगस्तत्र विशेषेण वेदनाबोधनार्थः ॥ * ॥

अथ वातज्वरचिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने वातज्वरिणो लङ्घनविधाने विशेषमाह चरकः ।
"ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम् ।
पाचनं शमनीयं वा कषायं पाययेद्भिषक् ॥"
सुश्रुतोऽप्याह ।
"वातिके सप्तरात्रेण दशरात्रेण पैत्तिके ।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति ॥"
ननु अन्नं वै प्राणिनां प्राणा इति श्रुतिः तदन्नं विना प्राणिभिः कथं स्थातव्यमित्याह ।
"दोषाणामेव सा शक्तिर्लङ्घने या सहिष्णुता ।
न हि दोषक्षये कश्चित् सोढुं शक्नोति लङ्घनम् ॥
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमक्षयादूर्द्धमपि वायुर्न सहते क्षणम् ॥" * ॥
भेषजमाह ।
"श्रीफलः सर्व्वतोभद्रा कामदूती च शोणकः ।
तर्कारी गोक्षुरः क्षुद्रा बृहती कलसी स्थिरा ॥
रास्ना कणा कणामूलं कुष्ठं शुण्ठी किरातकः ।
मुस्तामृता बला बालं द्राक्षा यासः शताह्विका ॥
एषां क्वाथो निहन्त्येव प्रभञ्जनकृतं ज्वरम् ।
सोपद्रवञ्च योगोऽयं सर्व्वयोगवरः स्मृतः ॥"
श्रीफलो बिल्वः । सर्व्वतोभद्रा गम्भारी । कामदूती पाटला । शोणकः शोनापाढ़ा इति लोके । तर्कारी गणिकारिका । कलसी पृश्निपर्णी । स्थिरा शालिपर्णी । बालं सुगन्धबाला । यासो यवासः । इति दशमूलादिक्वाथः ॥ * ॥
सुश्रुतस्तु ।
"पञ्चमूली कषायन्तु पाचनं वातिके ज्वरे ।" इति ।
अत्र पञ्चमूली बृहत्पञ्चमूली । अतएव त्रिशती ।
"श्रीपर्णी तर्कारी श्रीफलटुण्टुकपाटलामूलैः ।
पाचनमुदितं मारुतजनितज्वरहारिवारिणि क्वथितैः ॥"
इति बृहत्पञ्चमूली क्वाथः ॥ * ॥
"किराताब्दामृतोदीच्यबृहतीद्वयगोक्षुरैः ।
त्रिपर्णीकलसीविश्वैः क्वाथो वातज्वरापहः ॥"
उदीच्यं बालकम् । त्रिपर्णी शालिपर्णी । कलसी पृश्निपर्णी । इति किरातादिक्वाथः ॥ * ॥
"गुडूचीपिप्पलीमूलनागरैः पाचनं स्मृतम् ।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनि ॥"
कालिङ्गं घृतं ऐन्द्रयवं घृतम् ॥ * ॥
त्रिशती ।
"विश्वामृताशन्थिकसिद्धतोयं
मरुज्ज्वरस्यापिबतः कुतोऽयम् ।
क्वाथोऽथ कुस्तुम्बुरुदेवदारु-
क्षुद्रौषधैः पाचनमत्र चारु ॥"
क्षौषधं शुण्ठी । क्वाथः पाचनमिति । वेदाः प्रमाणमितिवत् ।
"पञ्चमूलीबलारास्नाकुलत्थैः सह पुष्करैः ।
क्वाथो हन्याच्छिरःकम्पं पर्व्वभेदं मरुज्ज्वरम् ॥"
पञ्चमूली बिल्वादिः । इति बृहत्पञ्चमूल्यादिक्वाथः ॥

"कणारसोनामृतवह्निविश्वा-
निदिग्धिकासिन्धुकभूमिनिम्बैः ।
समुस्तकैरार्धरितः कषायो
हिताशिनां हन्ति गदानिमांस्तु ॥
ज्वरं मरुद्दुष्टिसमुद्भवं तथा
बलासनष्टानलमन्दताश्च ।
कण्ठावरोधं हृदयावरोधं
स्वेदञ्च रोमाञ्चहिमत्वमोहान् ॥"
इति कणादिक्वाथः ॥ * ॥
"शुद्धं शङ्कररुक्रमच्युतजितं मारारिनारीरजस्तावत्तावदमापतिस्फुटगलालङ्कारवस्तु स्मृतम् ॥
तावत्तेव मनःशिला च विमला तावत्तथा टङ्कणं
शुण्ठी द्वाक्षमिता कणा च मरिचं दिक्पालसंख्याचकम् ॥
विश्वादि वस्तूनि शिलोपरिष्टा-
च्छिन्नार्गायेद्वाससि शोधयेच्च ।
ततस्तु खल्ले रसगन्धकौ च
चूर्णञ्च तद्द्यामयुगं विमर्द्द्य ॥
कल्पतरुनामधेयो यथार्थनामा रसः श्रेष्ठः ।
समीरणश्लेष्मगदान् हरते मात्रास्य गुञ्जैका ॥
आर्द्रकेण सममेष भक्षितो
हन्ति वातकफसम्भवं ज्वरम् ।
श्वासकासमुखसेकशीतता-
वह्निमान्द्यविरुचीश्च नाशयेत् ॥
नस्येनाश्वेव हरति शिरोऽर्त्तिं कफवातजाम् ।
मोहं महान्तमपि च प्रलापं क्षवथुग्रहम् ॥'
कल्पतरुरसः ॥ सामान्यज्वरचिकित्सोक्तो महाज्वराङ्कुशः प्रदेयोऽत्र ॥ * ॥
"विषमहौषधमाणधिकोषणा
द्रुमणिरक्तकमार्द्रकमर्द्दितम् ।
क्रमविवर्द्धितमुद्दलितज्वर-
स्त्रिपुरभैरव एव रसो वरः ॥"
द्रुमणिः मारितं ताम्रं तस्य भागाः पञ्च । रक्तकं हिङ्गुलं तस्य भागाः षट् । मात्रास्य रक्तिकार्द्धम् । त्रिपुरभैरवो रसो ज्वरे ॥ * ॥
"वातश्लेष्मज्वरे स्वेदं जङ्घापार्श्वास्थिशूलिनि ।
पीनसश्वासबाधिर्य्ये कारयेत्तद्विधानवित् ॥
स्रोतसां मार्द्दवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥
"खर्परभृष्टपटस्थितकाञ्जिकसिक्तबालुकास्वेदः ।
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥"
बालुकास्वेदः कर्म्म शिरोहृदयगात्रव्यथायां जृम्भायाम् । पादसुप्ततायां पिण्डिकोद्वेष्टने ऊरुसादे हनुस्तम्भे लोमहर्षे च ॥ * ॥
"मातुलुङ्गफलकेशरी घृत-
सिन्धुजन्ममरिचान्वितो मुखे ।
हन्ति वातकफरोगमास्यगं
शोषमाशु जडतामरोचकम् ॥"
इति कवलः कण्ठमुखशोषे ॥ * ॥

अन्यच्च ।
"शार्कैरादाड़िमाभ्याञ्च द्राक्षादाड़िमयोस्तथा ।
कल्कं विधारयेदास्ये शोषवैरस्यनाशनम् ॥
द्राक्षामलकयोः कल्कं सघृतं वदने क्षिपेत् ।
तेन घृष्ट्वा मुखस्यान्तः सशोषस्तेन शाम्यति ॥
सुरसं जायते वक्त्रं रुचिर्भवति भोजने ॥" * ॥
निद्रानाशस्य निदानमाह ।
"लाघवं लङ्घनं चिन्ता व्यायामः शोकभीक्रुधः ।
एभिरेव भवेन्निद्रानाशः श्लेष्मातिसञ्चयात् ॥"
अस्य चिकित्सामाह ।
"भृष्टन्तु विजयाचूर्णं मधुना निशि भक्षयेत ।
निद्रानाशेऽतिसारे च ग्रहण्यां पावकक्षये ॥
गुडं पिप्पलीमूलस्य चूर्णेनालोडितं लिहन् ।
चिरादपि च सनष्टां निद्रामाप्नोति मानवः ॥
वायसजङ्घामूलं मूत्रं वा शिरसि काकमाच्याश्च ।
विहृतं निद्राजनकं सुरमूलं वा घृतं सगुड़म् ॥"
पीतमिति शेषः ॥
"मूलन्तु काकमाच्या बद्धं सूत्रेण मस्तके नियतम् ।
विदधाति नष्टनिद्रो निद्रामाश्वेव सिद्धमिदम् ॥
शीलयेन्मन्दनिद्रस्तु क्षीरमद्यरसान् दधि ।
अभ्यङ्गोद्वर्त्तनस्नानमूर्द्धकर्णाक्षितर्पणम् ॥"
रसः मांसरसम् ॥
"कान्ताबाहुलताश्लेषानिर्वृतिकृतकृत्यता ।
मनोऽनुकूला विषया कामं निद्रासुखप्रदाः ॥
रसे शाके च सूपे च सर्पिर्यूषपयःसु च ।
निद्रा सञ्जनयत्याशु पलाण्डुरुपयोजितः ॥"
रसे मांसरसे ॥
"ऐक्षवं पीतकी माषाः सुरा मांसरसः पयः ।
गोधूमतिलमत्स्याश्च निद्रां कुर्व्वन्ति देहिनाम् ॥"
निद्रानाशे ॥ * ॥
"दारु हैमवती कुष्ठं शताह्वाहिङ्गुसैन्धवैः ।
लिम्पेत् कोष्णैरम्लपिष्टैः शूलाध्मानयुतोदरम् ॥"
हैमवती श्वेतवचा । दारुषट्कलेपः शूलाध्मानयोः ॥ * ॥
"कटुतैलं कणाहिङ्गुवचालशुनसाधितम् ।
उष्णं विनिहितं हन्ति कर्णयोर्निस्वनं व्यथाम् ॥"
तैलं कर्णस्वने ॥ * ॥
"कणासुगन्धिवचया यवान्या च समन्विता ।
ताम्बूलसहिता हन्ति शुष्ककासं मुखे धृता ॥"
शुष्ककासे ॥ * ॥ पथ्यान्नमाह ।
"श्रमोपवासानिलजे हितो नित्यं रसौदनः ।
मुद्गामलकयूषस्तु बद्धविट्काय दीयते ॥"
रसो विहितमांसरसः ॥
"पैयावा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
कासी श्वासी च हिक्की च पञ्चमूलीकृतां पिबेत् ॥"
पेयमिति शेषः । इति वातज्वराधिकारः ॥ * ॥
अथ पित्तज्वराधिकारः । तत्र पित्तज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह ।
"पित्तलाहारचेष्टाभ्यां पित्तमामाशयाश्रयम् ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत्स्याद्रसानुगम् ॥"
पित्तस्य पङ्गुत्वात्तेन कोष्ठाग्नेरुष्मा बहिर्नेतुं न शक्यते । यत आह ।
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥"
इति ॥
ततोऽत्र पित्तं वायुसहायं बोद्धव्यम् । यत आह ।
"द्वयमेकरसं नास्ति न रोगोऽप्येकदोषजः ।
एकस्तु कुपितो दोष इतरानपि कोपयेत् ॥" इति ।
अथ तस्य पूर्व्वरूपमाह । पित्तान्नयनयोर्दाह इति । पित्तात् ज्वरे उत्पत्स्यति नेत्रदाहः स्यात् । स च श्रमादिपूर्व्वको भवति ॥ * ॥
अथ पित्तज्वरस्य लक्षणमाह ।
"वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥"
अतिसारः पित्तस्य सरत्वात् यद्वा प्रवृत्तिर्न त्वतीसार एव तस्य ज्वरोपद्रवत्वात् । वमिः यदा पित्तं कफस्थानं याति तदा बोद्धव्या । प्रलापोऽनर्थकं वचः । मूर्च्छा रूपादेरज्ञानम् । मदः पूगकोद्रवधत्तूरभक्षणादिव मत्तता । भ्रमः चक्रारूढ़स्येव ज्ञानम् । चकारात् रक्तकोठादयो बोद्धव्याः ॥ * ॥ अथ पित्तज्वरस्य चिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः । पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजमिति । दशरात्रेण लङ्घनवता व्यतीतेनेत्यर्थः ॥ * ॥
किन्तद्भेषजं तदाह ।
"तिक्तामृताम्बुदयवैः पाठाकट्फलाभ्यां सदीप्यकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिक्वाथः ॥ * ॥
"पर्पटो वासकस्तिक्ता किरातो धन्वयासकः ।
प्रियङ्गुश्च कृतः क्वाथ एषां शर्करया युतः ॥
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत् ॥"
इति पर्पटादिक्वाथः ॥ * ॥
"द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्पटश्च कृतः क्वाथ एषां पित्तज्वरापहः ॥
मुखशोषप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥"
इति द्राक्षादिक्वाथः ॥ * ॥
"पटोलयवधान्याकमधूकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णां चातिप्रमाथिनीम् ॥"
इति पटोलादिक्वाथः ॥ * ॥
"गुड़ूच्यामलकीयुक्तः केवलो वापि पर्पटः ।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥"
इति गुड़ूच्यादिक्वाथः ॥ * ॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः ॥" * ॥
"ह्रीबेरं चन्दनोशीरघनपर्पटसाधितम् ।
दद्यात् सुशीतलं वारि तृट्छर्दिज्वरदाहयुक् ॥"
इति ह्रीबेरादिक्वाथः ॥ * ॥
"भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवामृताः ।
वालकं धान्यकं विल्वं कषायो माक्षिकान्वितः ॥
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् ॥"
इति भूनिम्बादिक्वाथः ॥ * ॥
"द्राक्षाचन्दनपद्मानि मुस्ता तिक्तामृतापि च ।
धात्री वालमुशीरञ्च लोध्रेन्द्रयवपर्पटाः ॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधूकं कुलकञ्चापि किरातो धान्यकं तथा ॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृष्णां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्द्दिं तथा शूलं मुखशोषमरोचकम् ।
कासं श्वासञ्च हृल्लासं नाशयेन्नात्र संशयः ॥"
इति महाद्राक्षादिक्वाथः ॥ * ॥
"ससितो निशि पर्य्युषितः प्रातर्धान्याकतण्डुलक्वाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥"
इति धान्याकक्वाथः ॥ * ॥
"अमृताया हिमः प्रातः ससितः पैत्तिकज्वरम् ।
वासायाश्च तथा कासरक्तपित्तज्वरान् जयेत् ॥"
"गुड़ूची भूमिनिम्बश्च वालं वीरणमूलकम् ।
लघु मुस्तं त्रिफलात्री द्राक्षा वासा च पर्पटः ॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं द्रुतम् ।
सोमद्रवमपि प्रातर्निपीतो मधुना सह ॥"
इति गुड़ूच्यादिक्वाथः ॥ * ॥
"पलाशस्य वदर्य्या वा निम्बस्य मृदुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥ * ॥

उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च ॥ * ॥

पथ्यां तैलघृतक्षौद्रैर्लिहन्दाहज्वरापहः ।
कासासृक्पित्तवीसर्पश्वासान् हन्ति वमीरपि ॥
तैलघृतक्षौद्रैरित्यत्र न समुच्चयस्तेन केवलेन क्षौद्रेणापि लिह्यात् ॥ * ॥
"काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ शीतकषस्विन्नशीतलीकृतवाससा ॥ * ॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः ।
पक्वदाड़िमबीजैर्व्वा धानाकल्केन च क्वचित् ॥"
धाना भ्रष्टधान्याकम् । इति कवलः ॥ * ॥
पथ्यान्नमाह ।
"दाहवम्यर्द्दितं क्षामं निरन्नं तृषयान्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजाशक्तुरूपं तर्पणम् । समस्तपथ्यस्वरूपमुक्तं सामान्यज्वरचिकित्सायाम् ॥ * ॥
"मुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे ।
हर्म्म्ये शुभ्राभ्रसङ्काशे शशाङ्ककरशीतले ॥
मलयोदकसिक्ते खण्यात् पित्तज्वरी नरः ॥

हारावली चन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम् ।

नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।
नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥”
इति पित्तज्वराधिकारः ॥ * ॥ * ॥
अथ श्लेष्मज्वराधिकारः । तत्र श्लेष्मज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह ।
“श्लेष्मलाहारचेष्टाभ्यां कफ आमाशयाश्रयः ।
बह्निर्निरस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसानुगः ॥”
कफस्य कोष्ठाग्नितेजसो बहिर्नयनेन मद्दलादाशङ्कायां जातायां पित्तस्यैव सिद्धान्तो बोद्धव्यः ॥ * ॥ अथ तस्य पूर्व्वरूपमाह ।
कफमान्नाभिनन्दनमिति । कफात् ज्वरे उत्पत्स्यति अन्नानभिलाषः स्यात् । स च श्रमादिपूर्व्वको भवति ॥ * ॥ अथ श्लेष्मज्वरस्य लक्षणमाह ।
“स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता ।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोरतिशुक्लता ॥
स्तैमित्यं अङ्गानामार्द्रपटावगुण्ठितमिव । स्तिमितो वेगः ज्वरस्य मन्दवेगः । आलस्यं समर्थस्यापि कर्म्मण्यनुत्साहः । स्तम्भः अङ्गानम्रता । तृप्तिः अन्नाभिलाषे सत्यपि भोजनासामर्थ्यम् । गौरवं गात्राणाम् । शीतं शीतं लगति । उत्क्लेदः वमनोपस्थितिरिव । अतिनिद्रता निद्राधिक्यम् । प्रतिश्यायो नासारोगविशेषः । अरुचिः भोजनानिच्छा । चकारात् पिडका शीता मुखप्रसेकश्छर्द्दिस्तन्द्रा हृदयोपलेप उष्णाभिलाषो वह्निमान्द्यमिति । यत उक्तम् ।
“प्रसेकः पिडकाः शीताश्छर्द्दिस्तन्द्रोष्णकामिता ।
कफेन लिप्तहृदयं भवेदग्नेश्च मन्दता ॥”
अथ श्लेष्मज्वरचिकित्सा ।
“आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधायन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥”
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने श्लेष्मज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः । श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति । द्वादशाहेन लङ्घनवता अतीतेनेत्यर्थः ॥ * ॥ किन्तद्भेषजं तदाह ।
“पिप्पल्यादिकषायन्तु कफजे परिपाचनमिति ।”
पिप्पल्यादिगणमाह ।
“पिप्पली पिप्पलीमूलं मरिचं गजपिप्पली ।
नागरं चित्रकं चव्यं रेणुकैलाजमोदिका ॥
सर्षपो हिङ्गु भार्गी च पाठेन्द्रयवजीरकाः ।
महानिम्बश्च मूर्व्वा च विषा तिक्ता विडङ्गकम् ॥
पिप्पल्यादिगणो ह्येष कफमारुतनाशनः ।
गुल्मशूलज्वरहरो दीपनश्चामपाचनः ॥”
इति पिप्पल्यादिक्वाथः ॥
“क्षौद्रोपकुल्यासंयोगः श्वासकासज्वरापहः ।
प्लीहानं हन्ति हिक्काञ्च बालानामपि शस्यते ॥
पिप्पलीं त्रिफलाञ्चापि समभागां ज्वरी लिहन् ।
मधुना सर्पिषा वापि कासी श्वासी सुखी भवेत् ॥ * ॥
कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह ।
श्वासकासज्वरहरो श्रेष्ठोऽयं कफनाशनः ॥”
इति चातुर्भद्रिकावलेहः ॥ * ॥
“कट्फलं पौष्करं शृङ्गी यवानी कारवी तथा ।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यान्मधुना वा कफज्वरी ।
कासश्वासारुचिच्छर्द्दिश्लेष्मानिलनिवृत्तये ॥”
इत्यष्टाङ्गोऽवलेहः ॥ * ॥
“सिन्धुवारदलक्वाथं कणाढ्यं कफजे ज्वरे ।
जङ्घयोश्च बले क्षीणे कर्णे च पिहिते पिबेत् ॥
यवानी पिप्पली वासा तथा खाखसवल्कलम् ।
एषां क्वाथं पिबेत् कासे श्वासे च कफजे ज्वरे ॥
वासाक्षुद्रामृताक्वाथः क्षौद्रेण ज्वरकासहृत् ॥”
इति वासादिक्वाथः ॥ * ॥
“मरिचं पिप्पलीमूलं नागरं कारवी कणा ।
चित्रकं कट्फलं कुष्ठं समुगन्धिवचा शिवा ॥
कण्टकारी जटा शृङ्गी यवानी पिचुमर्द्दकः ।
एषां क्वाथो हरत्येव ज्वरं सोपद्रवं कफात् ॥”
इति मरिचादिक्वाथः ॥
वातज्वराधिकारोक्तकल्पतरुरसोऽपि । श्लेष्मज्वरे दातव्यस्तस्य कफवाधिहरत्वात् ॥ * ॥
“सिन्धुत्रिकटुराजीभिरार्द्रकेण कफे हितः ॥”
कवल इति शेषः ॥ * ॥ पथ्यान्नमाह ।
“मुद्गयूषौदनो देयो ज्वरे कफसमुत्थिते ॥”
इति श्लेष्मज्वराधिकारः ॥ * ॥
अथ वातपित्तज्वराधिकारः । तत्र द्वन्द्वजज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां संप्राप्तिमाह । तत्र वातपित्तज्वरस्य ।
“वातपित्तकरैर्व्वातपित्ते आमाशयाश्रये ।
बह्निर्निरस्य कोष्ठाग्निं रसगे ज्वरकारिणी ॥”
स्यातामिति शेषः ॥ * ॥
अथ तस्य पूर्व्वरूपमाह ।
“प्रायूपे वातपित्तस्य भवतो वातपैत्तिके ॥”
ज्वर इति शेषः ॥ * ॥
अथ वातपित्तज्वरस्य लक्षणमाह ।
“तृष्णा मूर्च्छा भ्रमो दाहो निद्रानाशः शिरोरुजा ।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः ॥
पर्व्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ॥”
पर्व्वभेदः पर्व्वाणि भिद्यन्त इवेति सन्धिषु व्यथा ॥
अथ वातपित्तज्वरस्य चिकित्सा ।
“वातपित्तज्वरे देयमौषधं पञ्चमेऽहनि ।
किरातनिम्बाम्बुदर्व्वी द्राक्षामामलकीं शटीम् ।
निष्क्वाथ्य सगुडं क्वाथं वातपित्तज्वरे पिबेत् ॥”
इति किरातादिक्वाथः ॥ * ॥
“गुडूची पर्पटो मुस्तं किरातो विश्वभेषजम् ।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम् ॥”
इति पञ्चभद्रक्वाथः ॥ * ॥
“त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकैः ।
शृतमम्बु हरत्याशु वातपित्तभवं ज्वरम् ॥”
इति त्रिफलादिक्वाथः ॥ * ॥
“मधुकं सारिवा द्राक्षा मधूकं चन्दनोत्पलम् ।
काश्मीरफलकं लोध्रं त्रिफला पद्मकेशरम् ॥
पलांशकं न्यसेत्तञ्च क्षिपेत् संचूर्ण्य वारिणि ।
निशोषितं सितालाजमधुयुक्तञ्च तत् पिबेत् ।
वातपित्तज्वरं दाहं तृष्णामूर्च्छारुचिभ्रमान् ॥
शमयेद्रक्तपित्तञ्च जीमूतमिव मारुतः ॥”
अत्र मधुकादिन्यसनान्तं समुदितं पलपरिमितं सञ्चूर्ण्य क्षिपेत् वारिणि षट्पलपरिमिते ।
मधुकादिर्हिमो ह्यत्र ॥ * ॥
पथ्यान्नमाह ।
“मुद्गामलकयूषस्तु वातपित्तज्वरे हितः ।
सदाडिमः प्रदातव्यो यूषश्चणकसम्भवः ॥”
दाडिमामलकमुद्गसम्भवो यूष उक्त इति वातपैत्तिके ।
“कफपित्तहरा मुद्गाः कारवेल्लादयस्तथा ।
प्रायेण न च ते देया वातपित्तोत्तरे ज्वरे ॥
इमास्तु ज्वरविष्टम्भशूलोदावर्त्तकारिणः ॥”
इति वातपित्तज्वराधिकारः ॥ * ॥
अथ वातश्लेष्मज्वराधिकारः । तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह ।
“वातश्लेष्मकरैर्व्वातकफावामाशयाश्रयौ ।
बह्निर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ ॥”
पूर्व्वरूपमाह ।
“प्राग्रूपे वातकफयोः स्यातां वातकफज्वरे ॥”
तस्य लक्षणमाह ।
“स्तैमित्यं पर्व्वणां भेदो निद्रागौरवमेव च ।
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम् ॥
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥”
स्वेदाप्रवर्त्तनं स्वेदस्य आ समन्ताद्भावेन प्रवृत्तिः ।
तथाह हारीतः ।
“शिरोग्रहः स्वेदभवश्च कासो
ज्वरस्य लिङ्गं कफवातजस्येति ॥”
स्वेदभवः स्वेदोत्पत्तिः ॥ * ॥
ननु स्वेदः पित्तस्य धर्म्मः अतएव पित्तज्वरे कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायत इत्युक्तम् । तस्मात् कथं वातश्लेष्मज्वरे स्वेदस्यातिप्रवृत्तिः । उच्यते । विकृतिविषमसमवायारब्धत्वान्न दोष इति कार्त्तिकः । प्रकृतिसमसमवायस्य विकृतिविषमसमवायस्य चायमर्थः । प्रकृत्या हेतुभूतया समः कारणानुरूपः समवायः कार्य्यकारणभावः सम्बन्धः प्रकृतिसमसमवायः कारणानुरूपं कार्य्यमिति यावत् । यथा प्रकृत्यैवधारितैः शुक्लैस्तन्तुभिः समवायकारणैरारब्धः पटः शुक्ल एव भवति । तथा प्रकृत्या ... वातेन पित्तेन श्लेष्मणा वा जनितो ज्वरो मायादुःखितैर्धर्म्मैर्मन्दुवेगादिभिरु-

लोमित्यादिभिर्युक्तो भवति। विकृतिविषमसमवायस्तु विकृत्या हेतुभूतया विषमः कारणाननुरूपः समवायः कार्य्यस्य कारणेऽसमन्वः। यथा संयोगाद्विकृताभ्यां हरिद्रावर्णाभ्यां हेतुभूताभ्यां विषमः कारणाननुरूपो लोहितो वर्णो जायते। तथा योगेन विकृताभ्यां वातश्लेष्मभ्यां हेतुभूताभ्यां विषमा कारणाननुरूपा स्वेदस्यातिप्रवृत्तिरिति सिद्धान्तः ॥ * ॥

अथ वातश्लेष्मज्वरस्य चिकित्सा।
"वातश्लेष्मज्वरे देयमौषधं नवमेऽहनि।
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः।
दीपनीयः स्मृतो वर्गो वातश्लेष्मज्वरापहः ॥
कोलमात्रोपयोगित्वात् पञ्चकोलमिदं स्मृतम्।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत् ॥
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम् ॥"
इति पञ्चकोलम् ॥ * ॥
"किरातविश्वाम्टतवत्सिसिंहिका-
कणाकणामूलरसोनसिन्धुकैः।
कृतः कषायो विनिहन्ति सत्वरं
ज्वरं समीरात् सकफात् समुत्थितम् ॥"
इति किराताद्विक्वाथः ॥ * ॥
"पिप्पल्यादिगणक्वाथं पिबेद्वातकफज्वरी।
नातः परं किञ्चिदस्मिन् ज्वरे भेषजमुत्तमम् ॥"
इति पिप्पल्यादिक्वाथः ॥ * ॥
"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरं।
वचा सातिविषा जातीपाठावत्सकरेणुकम् ॥
किराततिक्तको मूर्व्वा सर्षपा मरिचानि च।
कट्फलं पुष्करं भार्गी विडङ्गं कर्कटाह्वयम् ॥
अर्कमूलं बृहत्सिंही श्रेयसी सदुरालभा।
दीप्यकश्चाजमोदा च शुकनासा सहिङ्गुका ॥
एतानि समभागानि गणः एषोऽष्टविंशतिः।
एषां क्वाथो निपीतः स्याद्वातश्लेष्मज्वरापहः ॥
हन्ति वातं तथा शीतं प्रसेकमपि वेपथुम्।
श्वासपञ्चातितन्द्राश्च रोमहर्षरुची तथा ॥
महावातेऽपतन्त्रे च मूर्च्छने सर्व्वगात्रगे।
पिप्पल्यादिर्महाक्वाथो ज्वरे सर्व्वत्र पूजितः ॥"
इति बृहत्पिप्पल्यादिक्वाथः ॥ * ॥
"दशमूलीरसं पीतं कणाढ्यं कफवातजे।
ज्वरे विपाके निद्रायां पार्श्वरुक्श्वासकासके ॥
इति दशमूलीक्वाथः ॥ * ॥
तत्र श्रेयसी रास्ना वातश्लेष्मज्वरहरत्वात् ॥
"पिप्पलीभिः शृतं तोयमनभिष्यन्दि दीपनम्।
वातश्लेष्मज्वरं हन्ति सेवितं प्लीहनाशनम् ॥"
इति पिप्पलीक्वाथः ॥ * ॥
"सूतकं टङ्कणं भस्म गन्धं शुद्धं समं समम्।
द्विगुणं सूतकादेयं जैपालं तुषवर्जितम् ॥
सैन्धवं मरिचं विषं त्वकं क्षारं शर्करापि च।
प्रत्येकं सूततुल्यं स्याज्जम्बीरैर्मर्द्दयेद्दिनम् ॥
सूर्य्यशेखरनामाय रसो गुञ्जाद्वयोन्मितः।
भक्षितस्तप्ततोयेन वातश्लेष्मज्वरापहः ॥"
सूर्य्यशेखरो रसो वातश्लेष्मज्वरे शीतज्वरे च ॥ रसप्रदीपे।

"स्वेदोद्गमे भ्रष्टकुलत्थचूर्णं-
निपातनं शस्तमिति ब्रुवन्ति।
जीर्णं शकृच्चैवं गवस्य भाजनं
संचूर्णितं स्वेदहरं सुधूलनात् ॥
मरिचं पिप्पली शुण्ठी पथ्या लोध्रञ्च मौष्करम्।
भूनिम्बः कटुका कुष्ठं कर्पूरो लिङ्गिका शटी ॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
एतदुद्धूलनं श्रेष्ठं सोतीयत् स्वेदनिर्गमे ॥"
लिङ्गिका पञ्चगुरिया इति लोके। अत्र शटी गन्धपलाशी। इति मरिचाद्युद्धूलनम् ॥ * ॥
"भूनिम्बकारवीतिक्तावचाकट्फलजं रजः।
एभाद्युद्धूलनं श्रेष्ठं सन्ततं स्वेदसंस्रवे ॥"
इति भूनिम्बाद्युद्धूलनम् ॥ * ॥
पूर्व्वोक्तो वालुकास्वेदोऽप्यत्र समुचितः ॥ यत उक्तम्।
"पीनसश्वासयाधीर्य्ये जङ्घापार्श्वास्थिशूलिनि।
वातश्लेष्मज्वरे स्वेदं कारयेत् सन्निधानवित् ॥ * ॥
मातुलुङ्गफलकेशरो धृतः
सिन्धुजन्ममरिचान्वितो मुखे।
हन्ति वातकफरोगमास्यगं
शोषमाशु जड़तामरोचकम् ॥
इति कवलः ॥"
अथान्नमाह।
"मद्यत्या पञ्चमूल्यान्नं सम्यक् सिद्धं चिकित्सकः।
सप्तमे दिवसे दद्यात् ज्वरे वातबलासजे ॥"
इति वातश्लेष्मज्वराधिकारः ॥ * ॥
अथ पैत्तिकश्लेष्मज्वराधिकारः। तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह।
"पित्तश्लेष्मकरैः पित्तकफवामाशयाश्रयौ।
बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ ॥"
पूर्व्वरूपमाह।
"प्रायूपे पित्तकफयोः स्यातां पित्तकफे ज्वरे ॥"
अथ तस्य लक्षणमाह।
"लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा।
मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः ॥"
आस्यस्य तिक्तत्वं पित्तेन। लिप्तत्वं कफेन। तन्द्रा चक्षुर्न्मीलितनेत्रत्वम्। मोहो मूर्च्छा ॥ * ॥
अथ पित्तश्लेष्मज्वरस्य चिकित्सा।
"पित्तश्लेष्मज्वरे देयमौषधं दशमेऽहनि।
गुडूचीनिम्बधान्याकचन्दनं कटुरोहिणी ॥
गुडूच्यादिरयं क्वाथः पाचनो दीपनः स्मृतः।
तृष्णादाहारुचिच्छर्द्दिपित्तश्लेष्मज्वरापहः ॥"
इति गुडूच्यादिक्वाथः ॥ * ॥
"अम्टताकटुकारिष्टपटोलं घनचन्दनम्।
नागरेन्द्रयवञ्चैतदम्टताष्टकमीरितम् ॥
क्वथितं सकणाचूर्णं पित्तश्लेष्मज्वरापहम्।
छर्द्द्यारोचकच्छर्द्दितृष्णादाहनिवारणम् ॥"
इति अम्टताष्टकम् ॥ * ॥
"कण्टकार्य्यम्टता भार्गी विश्वेन्द्रयववासकम्।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणीम् ॥
विपाच्य पाययेत् क्वाथं पित्तश्लेष्मज्वरापहम्।

दाहतृष्णारुचिच्छर्द्दिकासशूलनिवारणम् ॥"
इति कण्टकार्य्यादिक्वाथः ॥ * ॥
"नागरोशीरविश्वाब्दधान्यमोचरसाम्बुभिः।
कृतः क्वाथो भवेद्ग्राही पित्तश्लेष्मज्वरापहः ॥"
इति नागरादिक्वाथः ॥ * ॥
"सशर्करामक्षमात्रां कटुकामुष्णवारिणा।
पीत्वा ज्वरं जयेज्जन्तुः पित्तश्लेष्मसमुद्भवम् ॥"
अत्र कटुकाया द्वादशमाषाः। शर्करायाश्चत्वारो माषाः। एवं कर्षः इति चक्रदत्तः ॥ वैद्यव्यवहारे तु कटुकाशर्करयोः समभागयोरेव कर्षः। इति कटुकीकल्कः ॥ * ॥
"सपत्रपुष्पवासाया रसः क्षौद्रसितायुतः।
पित्तश्लेष्मज्वरं हन्ति सास्रपित्तं सकामलम् ॥"
अत्र वासाया रसो अर्द्धपलपरिमितो देयः। मधुसितयोः प्रत्येकं टङ्कः प्रक्षेप्यः ॥ * ॥
अथान्नमाह।
"कषायः परिपीतस्तु श्लेष्मपरपटोलयोः।
पित्तश्लेष्मज्वरश्वासदाहकण्डूहरो भवेत् ॥" * ॥
अन्यच्च।
"पटोलधान्ययोर्यूषः पित्तश्लेष्मज्वरापहः ॥"
इति पित्तश्लेष्माधिकारः ॥ * ॥
अथ सन्निपातज्वराधिकारः। तस्य निदानादिचिकित्सा सन्निपातज्वरशब्दे द्रष्टव्या ॥ * ॥
अथागन्तुकज्वराधिकारमाह। तत्रागन्तुकज्वरस्य निदानान्याह।
"अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः।
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत् ॥"
अभिघातः शस्त्रलगुड़ादिभिरभिहननम्। अभिषङ्गः कामशोकभयक्रोधभूतादीनामावेशः। अभिचारः कृत्याद्युत्पादनम्। अभिशापः ब्राह्मणगुरुवृद्धसिद्धादिकृतः शापः। तं आगन्तुं ज्वरं यथास्वं यथादोषलक्षणं दोषैर्विभावयेत् विजानीयात् ॥ * ॥ अपराण्यपि निदानान्याह।
"ये भूतविषवाय्वग्निक्षतभङ्गादिसम्भवाः।
रागद्वेषभयाद्यैश्च ते स्युरागन्तवो गदाः ॥"
भयाद्यैरित्याद्यशब्देन भूतविषवाय्वग्निक्षतभङ्गादय सगृह्यन्ते। तेन रागादयोऽभिषङ्गात्मका हेतवोऽप्यागन्तुसंज्ञाः स्युः। कार्य्यकारणयोरभेदोपचारात्। एतेन आगन्तुं स्मृत इत्यत्राप्यागन्तुशब्दो हेतुवाची आगन्तुर्जायते दोषैरित्यत्र व्याधिवाची अभिघाताभिषङ्गाभ्यामित्यादि श्लोके दोषैर्यथास्वं स विभावयेदितिवचनेनैव प्रतीयते। अभिघातादीनां विप्रकृष्टकारणत्वं मिथ्याहारविहाराणामिव दोषाणां सन्निकृष्टकारणत्वम्। तथा सति दत्तायमानसुश्रुतवचनेऽत्यादि श्लोके आगन्तुज्वरस्याष्टमत्वविघातो दोषजेष्वेव प्रवेशात्। उच्यते। आगन्तुज्वरस्य दोषा आरम्भका न किन्तु पश्चादनुबन्धिनः ॥ * ॥ तथा चागन्तुज्वरस्य सम्प्राप्तिमाह चरकः।
"आगन्तुर्हि व्यथापूर्व्वो जायते पश्चात्निजैर्मिश्रैरनुबध्यत इति ॥ * ॥

तत्र कस्यागन्तोः को निजो दोष इत्यपेक्षाया-
माह ।
“कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः ।
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ॥”
कामशोकभयात् कामशोकभयजादागन्तोर्वायुः
कुप्यति । क्रोधात् क्रोधजादागन्तोः पित्तं
कुप्यति । भूताभिषङ्गात् भूतावेशजादागन्तोः
त्रयो मला दोषाः कुप्यन्ति इत्यर्थः । भूत-
सामान्यलक्षणाः भूतस्य भूतलक्षणस्य सामान्यं
समानता येषां तानि भूतसामान्यानि भूतसा-
मान्यानि लक्षणानि येषां ते भूतसामान्य-
लक्षणाः मलाः ॥ * ॥
अथागन्तुज्वराणां हेतुभेदैर्लक्षणभेदानाह ।
“श्यावास्यता विषकृते तथातीसार एव च ।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥”
विषकृते स्थावरजङ्गमविषभक्षणकृते ज्वरे ।
श्याव' शुक्लानुविद्धः कृष्णो वर्णः शाकवर्णो वा ।
अतीसारः स्थावरविषेणैव तस्याधोगामित्वात् ।
तोदः सूचीव्यधनेनेव व्यथा ॥ * ॥
“ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा ।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् ॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति ॥”
कामजे समीहितकान्ताद्यप्राप्तिनिमित्तके ज्वरे ।
चकारात् वाग्भटोक्तान्यपि लक्षणानि बोद्ध-
व्यानि । तानि यथा,—
“कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः ।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ॥”
भयात् भयजे ज्वरे प्रलाप' । शोकाच्च चकारेण
प्रलाप एवानुकृष्यते । कोपाच्च कोपादपि
वेपथुर्भवति ॥ * ॥ ननु वेपथुर्वातस्य धर्म्मः तत्
कथं क्रोधजे ज्वरे वेपथुः । यत उक्तम् । क्रोधात्
पित्तमिति । उच्यते ।
“एकः प्रकुपितो दोष इतरानपि कोपयेत् ॥”
इति वचनात् पित्तकोपितवातजन्य एवात्र
वेपथुः ॥ * ॥ किञ्च क्रोधाद्वायुरपि भवति ।
यत उक्तं विदेहेन । क्रोधशोकौ स्मृतौ वात-
पित्तरक्तप्रकोपनाविति । यत उक्तम् ।
“भूताभिषङ्गादुद्वेगो हास्यं रोदनकोपने ।
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥”
भूताभिषङ्गोत्थो विषमज्वरो भवति । कदा-
चिदपि वेगवान् कदाचिच्छान्तवेग इत्यर्थः ॥
“अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते ।”
तृष्णा चेति चकारेण हारीताद्युक्तमपि वाग्-
भटोक्तञ्च बोद्धव्यम् । तद्यथा,—
“अत्राभिचारिकैर्म्मन्त्रैर्हूयमानस्य तप्यते ।
पूर्व्वं मनस्ततो देहस्ततो विस्फोटविभ्रमैः ।
सदाहमूर्च्छनैस्तस्य प्रत्यहं वर्द्धते ज्वर इति ॥”
अथ तेषां चिकित्सा ।
“आगन्तुजे ज्वरे नैव नरः कुर्व्वन्ति लङ्घनम् ॥”
तथा च वाग्भट' ।
“शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥”
नेष्यते इति शेषः । अन्यच्च ।

“लङ्घनं न हितं कामशोकचिन्ताप्रहारजे ।
भयभूतश्रमक्रोधलङ्घनेश्च कृते ज्वरे ॥
किन्तु दीप्ताग्नये तत्र दद्यान्मांसरसौदनम् ।
अभिघातज्वरे युञ्ज्यात् क्रियामुष्णविवर्ज्जिताम् ॥
कषायं मधुरं स्निग्धं यथादोषमथापि वा ।
अभिघातज्वरो नश्येत् पानाभ्यङ्गेन सर्पिषः ॥
रक्तावसेकैर्म्मेध्यैश्च तथा मांसरसौदनैः ॥”
मेध्यैर्म्मेधाय हितैः ॥ * ॥
“अध्वबन्धश्रमात्यध्वभङ्गभ्रंशक्षतसमुद्भवान् ।
ज्वरानुपाचरेत् पूर्व्वं क्षीरमांसरसौदनैः ॥”
अधस्ताडनं कर्णादिवेधो वा । भङ्गश्छेदभेदादिकः ।
भ्रंशो दृक्षादितः पतनम् ॥ * ॥
“अध्वश्रान्तेषु चाभ्यङ्गं दिवानिद्राञ्च कारयेत् ।
ओषधीगन्धविषजौ विषपित्तप्रबाधनैः ।
जयेत् कषायैर्म्मतिमान् सर्व्वगन्धकृतैर्भिषक् ॥”
सर्व्वगन्धमाह ।
“चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् ।
लवङ्गसहितञ्चैव सर्व्वगन्धं विनिर्द्दिशेत् ॥ * ॥
क्रोधजे पित्तजे काम्यै नार्य्याः सद्वाक्यमेव च ।
आश्वासेनेष्टलाभेन वायोः प्रशमनेन च ॥
हर्षणैश्च शमं यान्ति कामशोकभयज्वराः ।
कामैरथ मनोज्ञैश्च पित्तघ्नैश्चाप्युपक्रमैः ॥
सद्वाक्यैश्च शमं याति ज्वरः क्रोधसमुत्थितः ॥”
कामैः कामावेशैः । मनोज्ञैः धिक्कारादिभि-
र्भयजनकवचनैर्व्वा ॥ * ॥
“कामात् क्रोधज्वरो नश्येत् क्रोधात् कामज्वर-
स्तथा ।
घातिताभ्यामुभाभ्याञ्च कामक्रोधज्वरक्षयः ॥”
घातिताभ्यामुभाभ्यां मनसि निगृहीताभ्यां काम-
क्रोधाभ्याम् ॥ * ॥
“भूतविद्यासमुद्दिष्टैर्बन्धावेशनताडनैः ।
जयेद्भूताभिषङ्गोत्थं मनःसान्त्वैश्च मानसम् ॥”
ताडनैरित्यस्य स्थाने केचित् पूजनैरिति पठन्ति ॥
“सहदेवाया मूलं विधिना कण्ठे निबद्धमपहरति ।
एकद्वित्रिचतुर्भिर्द्दिवसैर्भूतज्वरं पुंसाम् ॥
अभिचाराभिशापोत्थौ ज्वरौ होमादिभिर्जयेत् ।
दानस्वस्त्ययनातिथ्यैरुत्पातग्रहदुःखजौ ॥”
इत्यागन्तुज्वराधिकारः ॥ * ॥
अथ विषमज्वराधिकारमाह । तत्र विषम-
ज्वरस्य निदानादिचिकित्सापर्य्यन्तं विषमज्वर-
शब्दे द्रष्टव्यम् ॥ * ॥
अथ जीर्णज्वराधिकार' । तस्य निदानादिकं
जीर्णज्वरशब्दे द्रष्टव्यम् ॥ * ॥
अथ दुर्ब्बलजनितस्य ज्वरस्य चिकित्सामाह ।
“हरीतकी निम्बपत्रं नागरं सैन्धवोऽनलः ।
एषां चूर्णं सदा खादेत् दुर्ब्बलज्वरशान्तये ॥”
इति हरीतक्यादि चूर्णम् ॥ * ॥
“अरुचिमनलमान्द्यं पीनसश्वासकासा-
वुदरसदकदोषानाशु हन्यादशेषान् ।
जनयति तनुकान्तिं चित्तनेत्रप्रसादं
पलपरिमितशुण्ठीचोदसिद्धः कषायः ॥”
इति शुण्ठीक्वाथः ॥ * ॥

“विषं भागद्वयं दग्धकपर्द्दः पञ्चभागकः ।
मरिचं नवभागञ्च चूर्णं वस्त्रेण शोधयेत् ॥
आर्द्रकस्य रसेनास्य कुर्य्यान्मुद्गनिभां वटीम् ।
वारिणा वटिकायुग्मं प्रातः सायञ्च भक्षयेत् ॥
अयं रसो ज्वरे योज्यः सामे दुर्ब्बलजेऽपि च ।
अजीर्णाध्मानविष्टम्भशूलेषु श्वासकासयोः ॥”
इति दुर्ब्बलजेता रसः ॥ * ॥
“पटोलमुस्तामृतवल्लिवासकं
सनागरं धान्यकिराततिक्तकम् ।
कषायमेषां मधुना पिबन्नरो
निवारयेत् दुर्ब्बलदोषमुल्बणम् ॥”
इति पटोलादिक्वाथः ॥ * ॥
“किराततिक्तत्रिवृदब्दपिप्पली-
विडङ्गविश्वाकटुरोहिणीरजः ।
निहन्ति लीढं मधुनातिसत्वरं
सुदुस्तरं दुर्ब्बलदोषजं ज्वरम् ॥”
इति किराततिक्तादिचूर्णम् ॥ * ॥
“भोजनादौ नरैर्भुक्तं शुण्ठीराज्यभयोत्थितम् ।
कल्कं तु सहते नित्यं नानादेशोद्भवं जलम् ॥
महार्द्रकयवक्षारौ पीत्वा चोष्णेन वारिणा ।
नानादेशसमुद्भूतंवारिदोषमपोहति ॥”*॥
अथ साध्यस्य ज्वरस्य लक्षणमाह ।
“बलवत्स्वपि दोषेषु ज्वरः साध्योऽनुपद्रवः ॥”
ज्वरस्योपद्रवानाह ।
“श्वासमूर्च्छारुचिच्छर्द्दितृष्णातीसारविड्ग्रहाः ।
हिक्काकासाङ्गभेदाश्च ज्वरस्योपद्रवा दश ॥”*॥
प्रसङ्गादुपद्रवाणां चिकित्सायां विशेषमाह ।
“सजातोपद्रवो व्याधिस्त्वसाध्यो न स्याच्चिकित्-
सकैः ।
व्याधौ शान्ते प्रणश्यन्ति सद्यः सर्व्वेऽप्युपद्रवाः ॥
अतो व्याधिं जयेद्यत्नात् पूर्व्वं पश्चादुपद्रवम् ।
भिषग्यः कुशलः सोऽत्र जयेत् पूर्व्वमुपद्रवम् ॥
तेष्वपि प्रचुरेषु प्राङ्नाशयेदाशुकारिणम् ।
मूलव्याधिं जयेत् पूर्व्वं जेयो यो वा भवेद्बली ॥
अविरोधेन वा कुर्य्यादुभयोरपि च क्रियाम् ॥”
तत्र ज्वरे श्वासस्य चिकित्सा ।
“सिंही व्याघ्री ताम्रमूली पटोली
शृङ्गी पद्मा पुष्करं रोहिणी च ।
शाकं शट्या शैलमल्लाश्च बीजं
श्वासं हन्यात् सन्निपाते दशाङ्गः ॥”
सिंही बडीकटैया । व्याघ्री कटैया । ताम्रमूली
दुरालभा । पद्मा भार्गी । रोहिणी कटुकी ।
शैलमल्ली कोरैया । इति दशाङ्गो योगः ॥ * ॥
“भार्गीनिम्बघनाभयामृतलताभूनिम्बवासाविषा-
त्रायन्तीकटुकावचात्रिकटुकश्योनाकशक्रद्रुमैः ।
रास्नायासपटोलपाटलिशटीदार्व्वीविशाला-
त्रिवृद्-
ब्राह्मीपुष्करसिंहिकाद्वयनिशाधात्र्यब्दद्देव-
द्रुमैः ॥
क्वाथोऽयं खलु सन्निपातनिवहान् द्वात्रिंशता
पानतो ।
दुर्द्धर्षाग्निजतेजसा विजयते सर्पान् गरुत्मानिव

किञ्च श्वासबलासकासगुदरुग्हृद्रोगहिक्कामरु-
न्मन्यास्तम्भगलामयाहितमला विष्टम्भशान्-
तमपि ॥”

विषा अतीस । शक्रद्रुमः ककुभः । देवद्रुम, देव
दारु ॥ इति द्वात्रिंशदङ्गक्वाथ, ॥ * ॥

“मधुना कृष्णाकट्फलकर्कटशृङ्गीभव चूर्णम् ।
श्वासामये सघोरे लीढ्वा लोकः सुखी भवति ॥
वन्योपलाग्नितापितदात्रस्याग्रेण पञ्चरे दाहः ।
अपहरति श्वासामयमसंशय भाषित मुनिभि.॥”

अथ ज्वरे मूर्च्छायाश्चिकित्सा ।
“आर्द्रकस्य रसैर्नस्यं मूर्च्छायामाचरेन्नरः ।
अञ्जनञ्च प्रयुञ्जीत मधुसिन्धुशिलोषणैः ॥
शीताम्भसाभिषेकः सुरभिर्धूपः सुगन्धिपुष्पञ्च ।
मृदुतालवृन्तवातं कोमलकदलीदलस्पर्शः ॥”

अथ ज्वरे अरुचेश्चिकित्सा ।
“अरुचौ तु शृङ्गवेररसकैः साम्लैः ससिन्धुजैः
कवलः ।
सिन्धूत्थमातुलुङ्गीफलकेशरधारण पक्के ॥”

अन्यच्च ।
“अरुचौ मातुलुङ्गस्य केशरं साज्यसैन्धवम् ।
धात्रीद्राक्षासितानां वा कल्कमास्ये तु
धारयेत् ॥”

अथ ज्वरे छर्द्देश्चिकित्सा ।
“क्वाथो गुडूच्या समधुः सुशीतः
पीतः प्रशान्तिं वमनस्य कुर्यात् ।
विश्वाम्बिकाणां मधुनावलीढा
सचन्दना शर्करयान्विता च ॥”

अथ ज्वरे तृष्णायाश्चिकित्सा ।
“दन्तशठवीजपूरकदाडिमवदरैः सचुक्रकैर्वदने ।
लेपो जयति पिपासामथ रजतशटीमुखान्तःस्था ॥
शीतं पयः क्षौद्रयुतं निपीत-
माकण्ठमाश्वेव तदुद्वमेच्च ।
तर्षप्रकर्षप्रशमाय वक्रे
दध्यात्मदक्षौद्रवटाग्रलाजान् ॥” *॥

अथ ज्वरे अतीसारस्य चिकित्सा ।
“लङ्घनमेक मुक्त्वा न चान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं शमयति तत् पाचयत्यपि च ॥
वत्सादनीवत्सकवारिवाह-
विश्वम्भरानिम्बविषाः सविश्वाः ।
ज्वरातिसारं त्वरितं जयन्ति
विश्वामृतावत्सकवारिवाह. ॥”

विश्वम्भरानिम्बो भूनिम्बः ।
“पाठामृतापर्पटकुस्तविश्वा-
किराततिक्तेन्द्रयवान् विपाच्य ।
पिबन् हरत्येव दृढेन सर्व-
ज्वरातिसारानपि दुर्निवारान् ॥” *॥

अथ ज्वरे विड्ग्रहस्य चिकित्सा ।
“विड्ग्रहे वातजित् कर्म कुर्यादन्नानुलोमनम् ।
मलं प्रवर्त्तयेदाशु तीक्ष्णाभिः फलवर्त्तिभिः ॥
पथ्यारग्वधतिक्ताच्छिन्नरुहामलकैः शृतं तोयम् ।
जीर्णज्वरे विबन्धे दद्यादाश्वेव विड्ग्रहं
शमयेत् ॥”

अथ ज्वरे हिक्कायाश्चिकित्सा ।
“नीरेण सिन्धूत्थरजोऽतिसूक्ष्मं
नस्येन नूनं विनिहन्ति हिक्काम् ।
शुण्ठी घृताढ्या सितया समेता
धूपोऽथवा हिङ्गुससर्षपश्च ॥” *॥

अथ ज्वरे कासस्य चिकित्सा ।
“कासे कणाकणामूलं कलिद्रुमफलं रजः ।
सविश्वभेषजं लिह्यात् मधुना वा दृषद्रसम् ॥”
रजः पर्पटकम् ।
“पुष्करमूलकटुत्रिकशृङ्गीकट्फलयासकफार-
विकाभिः ।
मधुलुलिताभिरयं खलु लेहः कासरिपुः कफ-
रोगहरश्च ॥” *॥

अथ ज्वरे दाहस्य चिकित्सा ।
“दाहाधिकारलिखितं दाहे कुर्याच्चिकित्सितम् ।
परं ज्वराविरुद्धं यन्मुख्यो नाश्यो ज्वरो यतः ॥”

अथ सुखसाध्यस्य ज्वरस्य लक्षणम् ।
“सन्तापोऽभ्यधिको वाह्यस्तृष्णादीनाञ्च मार्द्दवम् ।
बहिर्व्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ॥”
तृष्णादीत्यादिशब्देनान्तर्दाहसन्धास्थि-यथा-
श्वासा गृह्यन्ते । तेषामार्द्दवमल्पता । बहि-
र्व्वेगस्य ज्वरस्य ।
“वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृत क्रमात् ।
प्राकृतः सुखसाध्यस्तु शरत्सुरभिसम्भव. ॥”
सुरभिर्व्वसन्त. ॥ * ॥

अथ कष्टसाध्यस्य ज्वरस्य लक्षणमाह ।
“वैकृतोऽन्यः स दु साध्य. प्राकृतेष्वनिलोद्भव ॥”
अन्य. प्राकृतादन्य वैकृतः । * । वर्षादिषु
ज्वर जनयतां वातादीनां चिकित्साविशेषार्थं
प्राधान्यमप्राधान्यञ्चाह ।
“वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वित ज्वरम् ।
कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफ. ॥”
तस्य पित्तज्वरस्य चिकित्सामाह ।
“तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥”
तत्प्रकृत्या तस्य पित्तस्य प्रकृत्या स्वभावेन ।
यत उक्तम् ।
“कफपित्ते द्रवे धातू सहेते लङ्घन बहु ॥” इति ।
विसर्गाच्च शरदो विसर्गकालत्वाच्च । यत उक्तम् ।
वर्षाशरद्धेमन्ता विसर्गः कालास्तत्रोपचितबला-
प्राणिनो भवन्ति सोमस्य बलवत्त्वादिति । तत्र
शरदि पित्तज्वरे अनशनाद्भय न । कफो वसन्ते
तमपि वातपित्त भवेदनु । वसन्ते कफज्वरेऽपि
कफप्रकृत्या लङ्घनाद्भय न भवति । किन्तु
वसन्तस्यादानकालत्वात् नि.शङ्क न कर्त्तव्यम् ।
यत उक्तम् । शिशिरवसन्त-ग्रीष्मास्त्वादानकाला.
स्तत्रापचितबलाः प्राणिनो भवन्ति सूर्य्यस्य
बलवत्त्वादिति । एतेनेद उक्तम् । वर्षासु वायु
प्रधान पित्तश्लेष्माणावप्रधाने । शरदि पित्त
प्रधान कफोऽप्रधानम् । वसन्ते श्लेष्मा प्रधान
वातपित्ते अप्रधाने । तत्र प्रधानस्य प्राधा
न्येन चिकित्सा कर्त्तव्या । सा चाप्रधाना
निषिद्धा विधेया । एव वैकृतेष्वपि प्रधा-

नस्य प्राधान्येन चिकित्सा कर्त्तव्या । तद
प्युक्तम् ।
“संसर्गे यो गरीयान् स्यादुपक्रम्य स वै भवेत् ।
शेषदोषाविरोधेन सन्निपाते तथैव च ॥”
संसर्गे दोषद्वयस्य सम्पर्गे । गरीयान् प्रबल ।
“अन्तर्दाहोऽधिका तृष्णा प्रलापः श्वसनं भ्रम ।
सन्ध्यस्थिशूलमस्वेदो दोषवर्च्चोविनिग्रह ।
अन्तर्व्वेगस्य लिङ्गानि कष्टसाध्यत्वमेव च ॥”
वर्च्चोविनिग्रहः पुरीषाप्रवृत्तिः ॥ * ॥

अथासाध्यस्य ज्वरस्य लक्षणमाह ।
“ज्वरः क्षीणस्य शूनस्य गम्भीरो दैर्घरात्रिक
असाध्यो बलवान् यस्य केशसीमन्तकृज्ज्वर ।
दैर्घरात्रिक, बहुकालानुबन्धी । केशेषु
प्रभावात् केशेषु सीमन्तं यः करोति ॥”

गम्भीरस्य लक्षणमाह ।
“गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ।
आनद्धत्वेन चात्यर्थं कासश्वासोद्गमेन च ॥”
आनद्धत्वेन विबद्धमलत्वेन ॥ * ॥ अन्य
ज्वरेऽपि कर्णमूलशोथस्यासाध्यत्वादिकमा ।
“ज्वरस्य पूर्व्वं ज्वरमध्यतो वा
ज्वरान्ततो वा श्रुतिमूलशोथः ।
क्रमादसाध्यः खलु कृच्छ्रसाध्यः
सुखेन साध्यो मुनिभिः प्रदिष्टः ॥” ॥

अथारिष्टमाह । तत्रारिष्टस्य लक्षणम् ।
“रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्यादिष्टमप्यभिधीयते ॥
हेतुभिर्बहुभिर्जातो बहुभिर्बहुलक्षण. ।
ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशन ।
शीघ्रमिन्द्रियनाशनः उत्पन्नमात्र एव दृष्टि
स्पर्शनोऽपीन्द्रियाणां चक्षुरादीनां शक्ति
नाशयति ॥ * ॥ अन्यच्चारिष्टमाह ।
“विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा ।
शीतार्द्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ॥”
विसंज्ञ, विगतज्ञानः । ताम्यते मुह्यति ।
निपतितोऽपि वा अत्रापिशब्द एवार्थे निप
तित एव तिष्ठति न चोत्थातु समर्थः तथा
शेते एव । शीतार्द्दित, बहि, । अन्तरुष्ण
अन्तर्दाहवान् ॥ * ॥ अन्यच्च ।
“यो हृष्टरोमा रक्ताक्षो हृदि सङ्घातशूलवान् ।
वक्त्रेण चैवाप्युच्छ्वसिति ज्वरस्तं हन्ति मानवम् ॥”
हृष्टरोमा रोमाञ्चवान् । हृदि सङ्घात
सान्निपातिकशूलवान् । वक्त्रेण चैवोच्छ्वसिति
न तु नासिकया ॥ * ॥ अन्यच्च ।
“हिक्काश्वासतृषायुक्तं मूढ विभ्रान्तलोचनम् ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥”
क्षपयति समापयतीत्यर्थः ॥ * ॥ अन्यच्च ।
“हतप्रभेन्द्रियं क्षाममरोचकनिपीडितम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्ज्जयेत् ॥”
हता प्रभा दीप्तिर्येषाम् । अथवा हता प्र
प्रतिभा विषयग्रहणशक्तिर्येषां तथाविधानीन्द्रि
याणि यस्य तं हतप्रभेन्द्रियम् । क्षामं क्षीणम् ।
गम्भीरतीक्ष्णवेगार्त्तं गम्भीरं उक्तलक्षणं

तीक्ष्णवेगः अतिदुःसहवेगः ताभ्यां आर्त्तं दुःखितम् ॥ * ॥ अन्यच्च ।
"मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥"
व्याख्यातोऽयं श्लोकः ॥ * ॥
विषमज्वरस्यारिष्टमाह ।
"आरम्भाद्विषमो यस्य यस्य वा दैर्घ्यरात्रिकः ।
क्षीणस्य चातिरूक्षस्य गम्भीरो हन्ति यस्य तम् ॥"
यस्य आरम्भाद्विषमः प्रथमोत्पत्तेरेव विषमः न तु ज्वरोत्तरस्य । यस्य दैर्घ्यरात्रिको वा यस्य क्षीणस्यातिरूक्षस्य च गम्भीरो भवति स विषमो दैर्घ्यरात्रिको गम्भीरश्च हन्तीत्यर्थः ॥ इति ज्वराधिकारः ॥ * ॥ अथ ज्वरातिसाराधिकारः ।
"ज्वरातिसारयोरुक्तं निदानं यत् पृथक् पृथक् ।
तस्माज्ज्वरातिसारस्य निदानं नोदितं पुनः ॥"
अथ ज्वरातिसारस्य चिकित्सामाह ।
"ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक् ।
न तन्मिलितयोः कार्य्यमन्योन्यं वर्द्धयेत् पुनः ॥"
अयमभिप्रायः । ज्वरहरमनुलोमनं भवति । अतीसारहरं स्तम्भनं भवति । अतः परस्परविरुद्धत्वात् पृथक् उक्तं भेषजं मिलितयोर्न कार्य्यम् । यत आह ।
"अनुलोमनं ज्वरघ्नं ग्राहकमतिसारहृद्भवति ।
पृथगुक्तमौषधं तज्ज्वरातिसारे विरुद्धमन्योन्यम् ॥
अतस्तौ प्रतिकुर्व्वीत विशेषोक्तचिकित्सितैः ॥
लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं तत् पाचयेत्तथा शमयेत् ॥
लङ्घनमुभयोरुक्तं मिलिते कार्य्यं विशेषतस्तदपि ।
उत्पलषष्ठकसिद्धं लाजमण्डादिकं सकलम् ॥"
उत्पलषष्ठकं यथा,—
"पृश्निपर्णीबलाबिल्वधनिकानागरोत्पलैः ।
ज्वरातिसारी पेयां वा पिबेत् साम्लां शृतां नरः ॥"
अत्र लाजमण्डाद्यपेक्षया वाशब्दः । अतिसारे पुरीषातिप्रवृत्त्या साम्लत्वञ्च दाडिमरसादिना कर्त्तव्यम् । इत्युत्पलषष्ठकम् ॥ * ॥
"कणा करिकणा लाजकाथो मधुसितायुतः ।
पीतो ज्वरातिसारस्य तृष्णावम्योश्च नाशनः ॥"
इति कणादिकाथः ॥ * ॥
"नागरातिविषामुस्ताभूनिम्बवत्सकैः ।
काथः सर्व्वज्वरहरः सव्वातीसारनाशनः ॥"
इति नागरादिकाथः ॥ * ॥
"गुडूच्यतिविषाधान्यशुण्ठीबिल्वाब्दवालकैः ।
पाठा भूनिम्बकुटजं चन्दनोशीरपर्पटैः ।
पिबेत् काथं सचौद्रं ज्वरातीसारशान्तये ॥
हृल्लासारुचिच्छर्द्दिदाहवमीनां विनिवृत्तये ॥"
इति हृद्गुड्च्यादिकाथः ॥ * ॥
"उत्पलं दाडिमत्वक् च पद्मकेशरमेव च ।
पिबेत्तण्डुलतोयेन ज्वरातीसारनाशनम् ॥"
इत्युत्पलादिचूर्णम् ॥ * ॥
बिल्ववालकभूनिम्बगुडूचीधान्यनागरैः ।
कुटजाब्दयुतः काथो ज्वरातीसारशूलनुत् ॥
इति बिल्वादिकाथः ॥ * ॥

"नागरातिविषाविश्वागुडूचीविल्वमुस्तकैः ।
कषायः पाचनः शोथज्वरातीसारवारणः ॥"
इति नागरादिकाथः ॥ * ॥
"दशमूलीकषायेण विश्वामक्षसमां पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"
इति दशमूलीकाथः ॥ * ॥
इति ज्वरातिसाराधिकारः । इति भावप्रकाशः ॥
ज्वरघ्नः, पुं, (ज्वरं हन्तीति । हन् + टक् ।) गुडूची । वास्तूकम् । इति राजनिर्घण्टः ॥ ज्वरनाशके, त्रि । (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"ज्वरघ्नं पाचनं बल्यं हृद्यं रुच्यं कफापहम् ॥")
ज्वरहन्त्री, स्त्री, (ज्वरं हन्ति या । हन् + तृच् ङीप् च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ ज्वरघ्नी च ॥
ज्वराग्निः, पुं, (ज्वर एवाग्निः । दाहकत्वादस्य तथात्वम् ।) ज्वररूपाग्निः । तत्पर्य्यायः । आधिमन्थवः २ । इति हारावली ॥
ज्वराङ्गी, स्त्री, (ज्वरमङ्गति विनाशकतया प्राप्नोतीति । अङ्ग गतौ + अच् । गौरादित्वात् ङीष् ।) भद्रदन्तिका । इति राजनिर्घण्टः ॥
ज्वरान्तकः, पुं, (ज्वरस्य अन्तको विनाशकः ।) नेपालनिम्बः । आरग्वधः । इति राजनिर्घण्टः ॥ ज्वरघ्नौषधविशेषः । यथा,—
"भास्करो गन्धकः शर्व्वो देवी विहङ्गतीक्ष्णकम् ।
शोधितं गगनञ्चैव पुष्पकञ्च महेश्वरम् ॥
भूनिम्बादिकषायैर्भाव्यं मधुना गुटिका दृढा ।
चातुर्थिकं तृतीयञ्च ज्वरं सन्ततकं तथा ॥
ग्रामज्वरं भूतकृतं सर्व्वज्वरमपोहति ॥
अत्र भास्करः ताम्रम् । शर्व्वो रसः । देवी सौराष्ट्रमृत्तिका । विहङ्गं खर्परमाक्षिकम् । गगनं अभ्रकम् । पुष्पकं रसाञ्जनम् । महेश्वरं सुवर्णम् । अन्यत् सुगमम् । ताम्रादीनां समभागचूर्णं भूनिम्बादिकाथेन भावयेत् । भूनिम्बाद्यष्टादशद्रव्याणि सर्व्वद्रव्यतुल्यानि अष्टभागावशिष्टं काथं कृत्वा दिनत्रयं विभाव्य विशोष्य मधुना विमर्द्द्य अनुरूपं लिहेत् । ज्वरान्तको रसः ।" इति भैषज्यरत्नावली ॥ ज्वरनाशकश्च ॥
ज्वरापहा, स्त्री, (ज्वरं अपहन्ति नाशयतीति । अप + हन + डः ।) बिल्वपत्री । इति शब्दचन्द्रिका ॥ बेलशुंठा इति भाषा ॥ ज्वरनाशके, त्रि ॥
ज्वरारिः, पुं, (ज्वरस्य अरिः शत्रुर्नाशकत्वात् ।) ज्वरघ्नौषधविशेषः । यथा,—
"दरदबलिरसानां शुल्वनागाभ्रकाणां
शुभगविटशिलानां सर्व्वमेकत्र योज्यम् ।
विपिनवृषदलोत्थे भावितं शोषयेत्त
दिवसदशसमाप्तौ रक्तिकैकाञ्च कुर्य्यात् ॥
एकैकां भक्षयेदस्य चार्द्रकस्य रसेयुतम् ।
एतन्मात्रं ज्वरं हन्ति ज्वरारिः स निगद्यते ॥
सर्व्वमूलविनाशी च कफपित्तविनाशनः ॥
बलिः । गन्धकः । सर्व्वं शेफालिपत्ररसेन दश-

दिनं भावयित्वा गुञ्जाप्रमाणमार्द्रकरसेन देयम् । ज्वरारी रसः ।" इति भैषज्यरत्नावली ॥
ज्वराशनिः, पुं, (ज्वरे अशनिर्वज्रमिवामोघत्वात् ।) ज्वरनाशकौषधविशेषः । यथा,—
"रसं गन्धं समञ्च विषं ताम्रसमं भवेत् ।
सर्व्वचूर्णसमं लौहं तत्सम चूर्णमभ्रकम् ॥
लौहे च लौहदण्डे च निर्गुण्ड्याः खरसेन च ।
मर्द्दयेद्द्व्यहतः पश्चान्मरिचं हततुल्यकम् ॥
पर्णेन सह मातयो रसो रक्तिकषष्मितः ।
सर्व्वज्वरहरश्रेष्ठो ज्वराशनिरुदाहृतः ॥
कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम् ।
धातुस्थं प्रबलं दाहं ज्वरदोषं चिरोद्भवम् ॥
यकृद्गुल्मोदरप्लीहश्वयथुञ्च विनाशयेत् ॥
ज्वराशनी रसः ।" इति भैषज्यरत्नावली ॥
ज्वरितः, त्रि, (ज्वरः सञ्जातोऽस्य । ज्वर + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) ज्वरी । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ठकान् ।
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥"
यथाच,—
"ज्वरितो हितमश्नीयात् यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
ज्वरी, [न्] त्रि, (ज्वरोऽस्त्यस्येति । ज्वर + इनिः ।) ज्वरयुक्तः । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"गुर्व्वभिष्यन्द्यकाले वा ज्वरी नाद्यात् कथञ्चन ॥")
ज्वल, ज म चले । लिपि । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) चकारयुक्तः । ज, ज्वालः ज्वलः । म, प्रज्वलयति । मित्त्वेऽपि णौ ज्वलह्वलह्मल इत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः । ज्वालयति ज्वलयति प्रज्वलयति । लिट् दीप्तिः । ज्वलति वह्निः । इति दुर्गादासः ॥ (यथाह कश्चित् ।
"जागर्त्ति लोको ज्वलति प्रदीपः
सखीगणः पश्यति कौतुकेन ।
मुहूर्त्तमात्रं कुरु नाथ । धैर्य्यं
बुभुक्षितः किं द्विकरेण भुङ्क्ते ॥")
ज्वल., पुं, ज्वालः । दीप्तिः । (ज्वलतीति । ज्वल दीप्तौ + अच ।) दीप्तिविशिष्टे, त्रि । इति मुग्धबोधम् ॥
ज्वलका, स्त्री, (ज्वलतीति । ज्वल + बाहुलकात् वुन् ।) अग्निशिखा । इति हेमचन्द्रः ॥
ज्वलत्, त्रि, (ज्वल + शतृ ।) दीप्तिमत् । तत्पर्य्यायः । जमत् १ कल्मलीकिनम् २ जञ्जनाभवन् ३ मल्मलाभवन् ४ अर्चिः ५ शोचिः ६ तपः ७ तेजः ८ हरः ९ हृणिः १० शृङ्गाणि ११ । इत्येकादश ज्वलति नामधेयानि ॥ * ॥ भ्राजते १ भासते २ भास्यति ३ दीदयति ४ शोचति ५ मन्दते ६ भन्दते ७ रोचते ८ ज्योतते ९

द्योतते १० द्युमत् ११। इत्येकादश ज्वलतिकर्माणः। इति वेदनिघण्टौ १ अध्यायः॥

ज्वलन, पुं, (ज्वलतीति। ज्वल+"जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः।" ३। २। १५०। इति युच्।) अग्निः। (यथा, कलाविलासे। १। ४।

"यत्र त्रिनयननयनज्वलनज्वालावलीशलभवृत्तिः।
जीवति मानसजन्मा शशिवदनावदनकान्तिपीयूषे॥")

चित्रकवृक्षः। इत्यमरः।२।४।५६॥ (ज्वल+भावे ल्युट्।) दहने, क्ली॥

ज्वलनाश्मा, [न्] पु, (ज्वलनः सूर्य्यवद्दीप्तिविशिष्ट अश्मा प्रस्तरमणिः। नित्यकर्म्मधारयः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

ज्वलित, त्रि, (ज्वल+क्त।) दग्धः। उज्ज्वलः। इति मेदिनी। ते, ११०॥ (प्रदीप्तः। यथा, महाभारते। ६। १८। ६।

"काञ्चनाङ्गदिनो रेजुर्ज्वलिता इव पावकाः॥")

ज्वलिनी, स्त्री, (ज्वलो दीप्तिरस्त्यस्याः। ज्वल+इनि+ङीप्।) मूर्व्वालता। इति राजनिर्घण्टः॥

ज्वाल, पुं स्त्री, (ज्वलतीति। ज्वल+"ज्वलितिकसन्तेभ्यो णः।" ३। १। १४०। इति णः। पक्षे स्त्रियां टाप्।) अग्निशिखा। इत्यमरः।१।१।६०॥ (यथा, महाभारते। ३। २१८। ३।

"दीप्तो ज्वालैरनेकाभिरग्निरेषोऽथ वीर्य्यवान्॥")

दीप्तिविशिष्टे, त्रि। इति मुग्धबोधम्॥

ज्वाला, स्त्री, दग्धान्नम्। इति शब्दचन्द्रिका॥ (ज्वलतीति। ज्वल+णः+टाप्।) अग्निशिखा। इत्यमरः। १। १। ६०॥ (यथा, विष्णुपुराणे। १। १२। २४।

"अभ्युद्यतोग्रशस्त्राणि ज्वालामालाकुलैर्म्मुखैः॥")

दाहश्च॥ (स्वनामख्याता ऋचस्य पत्नी। यथा, महाभारते। १। ९५। २५।

"ऋचः खलु तक्षकदुहितरमुपयेमे ज्वालां नाम। तस्यां पुत्त्रं मतिनारं नामोत्पादयामास॥")

ज्वालागर्द्दभकः, पु, (जालगर्द्दभ+स्वार्थे कन्। तत पृषोदरादित्वात् साधुः।) रोगविशेषः। तत्पर्य्यायः। ज्वलारासभकामयः, २ ज्वालाखरगदः ३ गर्द्दभगदः ४। इति राजनिर्घण्टः॥ अस्य लक्षणं जालगर्द्दभशब्दे द्रष्टव्यम्॥

ज्वालाजिह्वः, पुं, (ज्वाला शिखा एव जिह्वा यस्य।) अग्निः। इति हेमचन्द्रः। ४।१६५॥ (स्कन्दस्यानुचरविशेषः। यथा, महाभारते ९। ४५। ५८।

"ज्वालाजिह्वः करालश्च शितकेशो जटी हरिः॥"

दानवविशेषः। स तु बलिराजस्य सेनानीविशेषः। यथा, हरिवंशे। २३२। ६।

"करालो ज्वालजिह्वश्च शताङ्गः शतलोचनः॥")

ज्वालामुखी, स्त्री, (ज्वालैव मुखं प्रधानं यस्याम्। तत्राजस्रप्रज्वलितज्वालाभिरेव पूजादिकं गृह्णाति देवीत्यतोऽस्यास्तथात्वम्।) पीठस्थानविशेषः। तत्र भगवत्या जिह्वा पतिता। तत्र अम्बिका देवी। उन्मत्तनामकभैरवश्च। इति पीठमाला॥ यथाच।

"ज्वालामुख्यां महाजिह्वा देव उन्मत्तभैरवः।
अम्बिका सिद्धिदा नाम्नी स्तनं जालन्धरे मम॥"
इति तन्त्रचूडामणौ पीठनिर्णयः॥

विद्याविशेषः। यथा,—

"ज्वालामुखीक्रमं वक्ष्ये या पूज्या मध्यतः शुभे॥
नित्याख्या मदनान्तरा मदमोहापरुप्यसिः॥
कमला श्रीभारती च व्याकर्षणी महेन्द्रापि।
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा।
वाराही चैव माहेन्द्री चामुण्डेति च पूजयेत्।
विजया चाजिता चैव मोहनी चापराजिता॥
स्तम्भनी जम्भनी पूज्या कालिका मध्यवाह्यतः।
ज्वालामुखीक्रमं पूज्य विषादिहरणं भवेत्॥"

इति गारुड़े ज्वालामुखीविद्या २०४ अध्यायः॥

झ

झ, झकारः। स व्यञ्जननवमवर्णः चवर्गचतुर्थवर्णश्च। अस्योच्चारणस्थानं तालु। इति व्याकरणम्॥ (यदुक्तं शिक्षायाम्। १७।

"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू॥")

अस्योत्पत्तिर्यथा,—

"विसर्गस्तालुगः सोष्मा शं चवर्गश्च यन्तथा॥"
इति प्रपञ्चसारः॥

(वङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,

"त्रिकोणकुण्डलीरूपा वामदक्षिणयोगतः।
क्रमशस्तासु तिष्ठन्ति चन्द्रसूर्य्याग्नयः प्रिये॥
तत्र क्रोड़गता मात्रा शक्तिब्रह्मस्वरूपिणी।
ऊर्द्ध्वमात्रा तथेन्द्राणी मध्ये नारायणी स्मृता॥"

अस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।

"ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने।
सन्तप्तहेमवर्णाभां रक्ताम्बरविभूषिताम्॥
रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम्।
चतुर्द्दशभुजां देवीं रत्नहारोज्ज्वलां पराम्॥
ध्यात्वा ब्रह्मस्वरूपां तां तन्मन्त्रं दशधा जपेत्॥"

अस्य स्वरूपं यथा,—

"झकारं परमेशानि। कुण्डली मोक्षरूपिणी।
रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा।
त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं तथा॥"
इति कामधेनुतन्त्रम्॥

तस्य ३५ पञ्चत्रिंशत् नामानि यथा,—

"झो झङ्कारी गुहो झञ्झावायुः सव्यः मदुम्रत.।
अजेशो द्राविणी नादः पाशी जिह्वा जलस्थितिः॥
विराजेन्द्रो धनुर्हस्तः कर्कशो नादजः कुजः।
दीर्घबाहुबलो रूपमाकन्दितः सुचञ्चलः॥
दुर्म्मुखो नष्ट आत्मवान् विकटा कुचमण्डलः॥
कलहंसप्रिया वामा अङ्गुलीमध्यपर्व्वकः।
दक्षहासाट्टहासश्च पायात्मा व्यञ्जनः स्वरः॥"
इति नानातन्त्रशास्त्रम्॥

झः, पु, (झटति सङ्घीभवतीति। झट सङ्घाते+बाहुलकात् डः।) झञ्झावातः। अस्मुवर्षणम्। इति शब्दरत्नावली॥ झण्टीशः। सुरगुरुः। दैत्यराजः। ध्वनिः। तारवायुः। इति मेदिनी। भे, १॥ नष्टे, त्रि। इति शब्दरत्नावली॥

झगझगायमानः, त्रि, (झगझग इवाचरतीति। झगझग+"कर्त्तुः क्यङ् सलोपश्च।" ३।१।११। इति क्यङ् ततः शानच्।) चाकचिक्ययुक्तः। झक्झकिया इति भाषा। यथा,—

"मयूरवरगामिनीं सुरदगुह्यवर्णोत्कटां
रणक्वणितघण्टिकां निशितशक्तिहस्तोद्यताम्।
प्रभानिकररश्मिभिर्झगझगायमानांशुकां
नयामि गुहसम्भवां त्रिदशशत्रुनिर्णाशिनीम्॥"
इति देवीपुराणे रुरुवधे मातृस्तवनामाध्यायः॥

झङ्कार, पु, (झ+भावे घञ् कारः। झमित्यव्यक्तशब्दस्य कारः करणं यत्र।) भ्रमरादिशब्दः। यथाह वल्लालसेन.।

"प्रारब्धो मधुपैरकारणमहो झङ्कारकोलाहलः॥"

(तथाच पञ्चतन्त्रे। ५। ४२।

"शरच्छीतुत्स्नाहते दूरं तमसि प्रियसन्निधौ।
धन्यानां विशति श्रोत्रे गीतझङ्कारजा सुधा॥")

झञ्झा, स्त्री, (झमित्यव्यक्तशब्देन झटति वेगेन वहतीति। झट्+बाहुलकात् डः। ततष्टाप्।) ध्वनिविशेषः। जलकणवर्षणम्। इति शब्दरत्नावली॥

झञ्झानिलः, पु, (झञ्झाध्वनियुक्तोऽनिलः।) प्रावृषिजवायुः। झञ्झावातः। इति त्रिकाण्डशेषः॥

झञ्झावातः, पु, (झञ्झाध्वनियुक्तो वातः।) प्रावृषिजवायुः। इति हलायुधः॥ (यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये।

"झञ्झावात रक्तवृष्टि वात्याश्च वृक्षपातनम्॥")

झट, सङ्घतौ। इति कविकल्पद्रुमः॥ (भ्वां-परअकं-सेट्।) झटति केशः। परस्परं लग्नः स्यादित्यर्थः। इति दुर्गादासः॥

झटिः, पुं, (झटति परस्परं सलग्नो भवतीति। झट सङ्घतौ+"सर्व्वधातुभ्य इन्।" उणां ४। ११७। इति इन्।) क्षुद्रवृक्षः। इत्युणादिकोषः॥

झटिति, व्य, द्रुतम्। शीघ्रम्। तत्पर्य्यायः। स्राक् २ अञ्जसा ३ अह्नाय ४ सपदि ५ द्राक् ६ मङ्क्षु ७। इत्यमरः। ३। ४। २॥ (यथा, पञ्चदशी। ७। १२५।

"तत्त्वविस्मृतिमात्रान्नानर्थः किन्तु विपर्य्ययात्।
विपर्य्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित्॥")

झत्ति, व्य, (झटिति इति शब्दस्य प्राकृतभाषायां झत्ति इति सिद्धम्।) झटिति। इति प्राकृतभाषायां काव्यप्रकाशः॥

झनत्कारः, पुं, (कृ + भावे घञ् कारः । झनदित्यव्यक्तशब्दस्य कारः करणं यत्र ।) अनुकरणशब्दः । कङ्कणादिध्वनिः । यथा, कालिदासः ।
"उद्वेल्लत्कुचवल्लिकङ्कणझनत्कारः क्षणं वार्य्यताम् ॥"

झम, उ भक्षे । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, झमित्वा झान्त्वा । इति दुर्गादासः ॥

झम्पः, पुं (झम्पः पृषोदरादित्वात् साधुः ।) सम्पातपतनम् । झम्पः । इति जटाधरः ॥ (यथा, महावीरचरिते । [ताः ॥")
"पुष्कास्फोटदलत्-ससद्रविवरैः पातालझम्पाश्च

झम्पारुः, पु, (झम्पं झम्पं आराति आददातीति । आ + रा + बाहुलकात् रुः ।) वानरः । इति शब्दरत्नावली ॥

झम्पाशी, [न्] पु, (झम्पेन सम्पातेन अश्नातीति । अश + णिनिः । मत्स्यादिधारणकाले झम्पदानपूर्व्वकपतनादस्य तथात्वम् ।) मत्स्यरङ्गपक्षी । इति जटाधरः ॥

झम्पी, [न्] पु, (झम्पो झम्फोऽस्त्यस्येति । झम्प + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) वानरः । इति शब्दरत्नावली ॥

झरः, पु, (झीर्य्यति जीर्णीभवति पतनादिस्थानमनेनेति । झॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) निर्झरः । पर्व्वतावतीर्णजलप्रवाहः । इत्यमरः । २ । ३ । ५ ॥ (समूहः । यथा, नैषधे ।२।३२ ।
"कलसे निजहेतुदण्डजः
किमु चक्रभ्रमिकारिता गुणः ।
स तदुच्चकुचौ भवन् प्रभा-
झरचक्रभ्रमिमातनोति यत् ॥"
"स कलसः प्रभारूपेण कान्तिसमूहेन चक्रभ्रमिं कुलालचक्रभ्रमणमातनोति जनयति । यद्वा प्रभाझरे कान्तिप्रवाहे चक्रभ्रमिं चक्रवाकभ्रान्तिमातनोति ।" इति तट्टीका ॥)

झरा, स्त्री, (झर + टाप् ।) झरः । इत्यमरटीकायां भरतः ॥

झरी, स्त्री, (झर + ङीष् ।) झरः । इत्यमरटीकायां भरतः ॥

झर्च्छ, श उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) रेफोपधः । श, झर्च्छती झर्च्छन्ती । गुणस्थानरहितानां तुदादिपाठफलमु शत्रन्तानामाह्वीपोरिति नुमो विभाषा वेदेषूच्चारणभेदश्च । भर्त्सनं सन्तर्ज्जनम् । इति दुर्गादासः ॥

झर्च्छ, श उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, झर्च्छती झर्च्छन्ती । भर्त्सनं सन्तर्ज्जनम् । इति दुर्गादासः ॥

झर्झ, श उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, झर्झती झर्झन्ती । भर्त्सनं सन्तर्ज्जनम् । इति दुर्गादासः ॥

झर्झरः, पुं, (झर्झ इत्यव्यक्तशब्दं रातीति । रा + कः । यद्वा, झर्झति शब्दायते इति । झर्झ + बहुलवचनात् अरः ।) वाद्यविशेषः । इत्यमरः । १ । ७ । ८ ॥ चर्म्मपुटाच्छादितकाष्ठयानम् । इति तट्टीकासारसुन्दरी ॥ करड इति ख्यातः ।
"डिण्डिमो डिण्डिरीप्रोक्तो झर्झरः पटहः स्मृतः ॥"
इति भरतघृतवैजयन्ती ॥

तत्पर्य्यायः । झल्लकी २ झल्ली ३ झल्लरी ४ झर्झरी ५ । इति शब्दरत्नावली ॥ (यथा, हठयोगप्रदीपिकायाम् । ४ । ८५ ।
"आदौ जलधिजीमूतभेरीझर्झरसम्भवाः ॥"
झर्झयते निन्द्यते इति । झर्झ भर्त्सने + अरः ।) कलियुगम् । (झर्झरो झर्झरशब्द इवास्त्यस्येति । अच् ।) नदभेदः । इति मेदिनी । रे, १५८ । (हिरण्याक्षपुत्रविशेषः । यथा, हरिवंशे । ३ । ७६ ।
"हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः ।
झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा ।
महानाभश्च विक्रान्तः कालनाभस्तथैव च ॥")

झर्झरकः, पुं, (झर्झर + स्वार्थे कन् ।) कलियुगम् । इति त्रिकाण्डशेषः ॥

झर्झरा, स्त्री, (झर्झ्यते निन्द्यते इति । झर्झ भर्त्से + बाहुलकात् अरः । ततष्टाप् ।) वेश्या । इति त्रिकाण्डशेषः ॥ (जलशब्दविशेषः । यथा, काशीखण्डे । २६ । ६८ । [वती ॥")
"झिण्टीशवन्द्या झाङ्कारकारिणी झर्झरा-

झर्झरी, स्त्री, (झर्झर + गौरादित्वात् ङीष् ।) झर्झरवाद्यम् । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । २३७ । २ ।
"गोमुखाडम्बराणाञ्च भेरीणां सुरजः सह ।
झर्झरीडिण्डिमानाञ्च वाद्यन्त महास्वनाः ॥")

झर्झरीकः, पुं, (झर्झतीति । झर्झ + "फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन् प्रत्ययेन निपातनात् साधुः ।) शरीरम् । इत्युणादिकोषः ॥ देशः । चित्रम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

झलज्झला, स्त्री, (झलज्झल इत्यव्यक्तशब्दोऽस्त्यस्याः । अच् ।) हस्तिकर्णास्फालनम् । इति त्रिकाण्डशेषः ॥

झलरी, स्त्री, (झल्लरी । पृषोदरादित्वात् ललोपः ।) हुडुक्कः । झर्झरवाद्यम् । बालचक्रम् । केशचक्रम् । इति मेदिनी । रे, १५६ ॥

झला, स्त्री, कन्या । आतपस्त्रोर्म्मिः । इति मेदिनी । ले, २० ॥

झल्लः, पु, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ स च क्षत्रियात् व्रात्यात् सवर्णायां जातः । (यथा, मनुः । १० । २२ ।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च ॥")
प्रहासकः । इति महाभारतम् ॥ भाँड इति भाषा ॥ (स्त्री, झर्झरवाद्यम् ॥)

झल्लकं, क्ली, (झल्ल + स्वार्थे कन् ।) कांस्यनिर्म्मितकरतालकम् । यथा, तिथ्यादितत्त्वे ।
"शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम् ।
दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत् ॥"

झल्लकण्ठः, पुं, (झल्लो झल्लकशब्द इव कण्ठः कण्ठस्वरो यस्य ।) पारावतः । इति हारावली । ८७ ॥

झल्लरी, स्त्री, (झल्लं झल्लकशब्दं रातीति । रा + कः । स्त्रियां ङीष् ।) हुडुक्कः । झर्झरवाद्यम् । (यथा, काशीखण्डे । २६ । ६८ ।
"झल्लरीवाद्यकुशला झलज्झालजलावृता ॥")
बालचक्रम् । बालझौति ख्यातम् । इति मेदिनी । रे, १५६ ॥ शुद्धम् । क्लेदः । इत्यजयपालः ॥

झल्लिका, स्त्री, (झल्लीव कायतीति । कै + कः । पृषोदरादित्वात् साधुः ।) उद्वर्त्तनपटः । द्योतः । इति मेदिनी । के, ६६ ॥ उद्वर्त्तनमलम् । इति शब्दरत्नावली ॥

झल्ली, स्त्री, (झल्ल + ङीष् ।) झर्झरवाद्यम् । इति शब्दरत्नावली ॥

झल्लीलः, पु, (झर्झ क्रिम् तादृशः सन् लोलः । ततः पृषोदरादित्वात् साधुः ।) तर्कुलाख्यक. इति हारावली । २१३ ॥ टेङ्कुयार वाँटुल इति भाषा ॥

झष, वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) आद्यस्वरी । झषति । षष्ठस्वरी चायमिति केचित् । झूषति । इति दुर्गादासः ॥

झष, ञ ग्रहे । पिधाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभ-सकं-सेट् ।) ञ, झषति झषते वस्त्रं जनो गृह्णाति परिदधाति वेत्यर्थः । सप्तमस्वरादिरयमिति पूर्णचन्द्रत्रिलोचनरामाः । चर्षति चर्षते । इति दुर्गादासः ॥

झर्य, क्ली, (झष ग्रहे + यत् ।) खिलम् । इत्यजयपालः ॥

झषः, पुं, (झष्यते वध्यते भक्षणाय झष्यते गृह्यते इति वा । झष + "खनो घ च ।" ३।३।१२५। इति घ ।) मत्स्यः । इत्यमरः । १ । १० । १ ॥ (यथा, भगवद्गीतायाम् । १० । ३१ ।
"झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥"
मकरः । यथा, रामायणे । २ । ११४ । ४ ।
"लीनमीनझषग्राहां कृशां गिरिनदीमिव ॥")
तापः । वनम् । इति मेदिनी । षे, १२ ॥ मीनराशिः । यथा,—
"सार्द्धसप्तझषे मेषे वसुसार्द्धौ घटे रवे ॥"
इति समयप्रदीपः ॥

झषकेतनः, पुं (झषो मकरो मीनो वा केतनं केतुरस्य ।) कन्दर्पः । इति हलायुधः ॥

झषा, स्त्री, (झष् + अच् ततष्टाप् ।) नागबला । इत्यमरः । २ । ४ । ११७ ॥

झषाङ्कः, पुं, (झषः अङ्को यस्य ।) अनिरुद्धः । इति हेमचन्द्रः ॥ (कन्दर्पः । यथा, श्रीकण्ठचरिते । ११ । २ ।
"यत्कला किल झषाङ्कपुरन्ध्रि-
स्यन्दमानवडिशप्रतिमाभात् ॥")

झषाशनः, पु, (झषान् मत्स्यान् अश्नातीति । अश् ग भोजने + कर्त्तरि ल्युः ।) शिशुमारः । इति त्रिकाण्डशेषः

झषोदरी, स्त्री, (झषो मत्स्य एव उदरं उत्पत्तिस्थानमस्याः । झषस्य उदरं उत्पत्तिस्थानतयास्त्यस्याः इति अर्श आदिभ्योऽजित्येके ।) व्यासमाता । इति त्रिकाण्डशेषः ॥

झाकृत, क्ली, (झाम् इत्यव्यक्तशब्दस्य कृतं करणं यत्र ।) परशालङ्कारविशेषः । इति धरणिः ॥

झाटः, पुं, (झट+घञ् ।) निकुञ्जः । कान्तारः । व्रणादीनां मार्ज्जनम् । इति मेदिनी । टे, १६ ॥

झाटल, पु, (झाट लातीति । ला+कः ।) घण्टापाटलिः । इत्यमरः । २ । ४ । ३८ ॥

झाटा, स्त्री, (झट्+णिच्+अच ततष्टाप् च ।) भूम्यामलकी । इत्यमरः ॥ यूथीदृक्षः । इति शब्दचन्द्रिका ॥

झाटिका, स्त्री, (झाटा+स्वार्थे कन् । टापि अत इत्वञ्च ।) भूम्यामलकी । इति शब्दचन्द्रिका ॥

झामक, क्ली, (झाम्+ण्वुल् ।) दग्धेष्टका । इति हारावली । २१४ ॥ झामा इति भाषा ॥

झामर, पु, (झाम रातीति । रा+कः ।) तर्कुशाणः । इतिशब्दरत्नावली ॥ टेकुयार शाण इति भाषा ॥

झार्झरः, पुं स्त्री, (झर्झरवादनं शिल्पमस्य । "मड्डुकझर्झरादन्यतरस्याम् ।" ४।४।५६। इति अण् ।) झार्झरिकः । झर्झरवाद्यकर्त्ता । इति व्याकरणम् ॥

झालि, स्त्री व्यञ्जनविशेषः । झाल इति ख्याता । यथा, भावप्रकाशस्य पूर्व्वखण्डे २ भागे ।
"आम्रमामफलं पिष्टं राजिकालवणान्वितम् ।
भृष्टं हिङ्गुयुतं पूतं घोलितं झालिरुच्यते ॥
झालिर्हरति जिह्वायाः कुण्ठत्वं कण्ठशोधिनी ।
मन्दं मन्दं निपीता सा रोचनी वह्निबोधिनी ॥"
(जारिः जालि इति पाठोऽपि कुत्रचित् दृश्यते ॥)

झावु, पु, (झा इति कृत्वा वाति वायुरत्र । वा+डु ।) वृक्षविशेषः । इति शब्दरत्नावली ॥ झाउ इति भाषा ॥

झावुक, पु, (झावुरेव । स्वार्थे कन् ।) वृक्षविशेषः । झाउ इति भाषा । तत्पर्य्यायः । पिचुलः २ झावुः ३ झावूः ४ । इति शब्दरत्नावली ॥

झिङ्गाक, क्ली, (लिगि+आकन् । पृषोदरात साधु ।) फलविशेषः । झिङ्गा इति भाषा । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । आमवातमन्दाग्निकारित्वञ्च । इति राजवल्लभः ॥

झिङ्गिनी, स्त्री, (लिगि+णिनिः । पृषोदरात् साधुः । ङीप् च ।) जिङ्गिनीवृक्षः । इति भावप्रकाशः ॥ उल्का । इति शब्दरत्नावली ॥

झिङ्गी, स्त्री, (लिगि+अच् ङीष् । पृषोदरात् साधुः ।) जिङ्गिनीवृक्षः । इति भावप्रकाशः ॥

झिञ्झिम, पु, (झिम् इत्यव्यक्तशब्दं कृत्वा झमति अत्ति वृक्षादीन् दहतीत्यर्थः । (झम भक्षे+अच् । पृषोदरादित्वात् साधुः ।) दावाग्निः । इति हारावली ॥ २६८ ॥

झिञ्झिरिष्टा, स्त्री, क्षुपविशेषः । झिञ्झिरीटा । इति भाषा । तत्पर्य्यायः । फला २ पीतपुष्पा ३ झिञ्झिरा ४ रोमाश्रयफला ५ दृत्ता ६ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । रक्तातिसारनाशित्वम् । वृष्यत्वम् । सन्तर्पणत्वम् । बल्यत्वम् । महिषीक्षीरवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

झिल्ली, स्त्री, (झि इत्यव्यक्तशब्दोऽस्त्यस्याः । अच् ततो ङीप् च ।) झिल्ली । यथा,—
"झिल्लीवाद्यक्तमधुरा कूजन्ती मधुरालतिः ॥"
इत्यागमः ॥

झिण्टी, स्त्री, (झिमिति कृत्वा रटतीति । रट्+अच । ङीप् च पृषोदरात् साधुः ।) पुष्पवृक्षविशेषः । झाँटी इति भाषा । तत्पर्य्यायः । सैरीयकः २ इत्यमरः । २ । ४ । ७५ ॥ कण्टकुरण्टः ३ सैरेयकः ४ झिण्टिका ५ । इति राजनिर्घण्टः ॥ नीलझिण्ट्याः पर्य्यायः । वाणा १ दासी २ आर्त्तगलः ३ । इत्यमरः । २ । ४ । ७४ ॥ वाणः ४ आर्त्तगलः ५ इति तट्टीका ॥ सहचरः ६ नीलकुरण्टकः ७ । इति रत्नमाला ॥ अरुणझिण्ट्याः पर्य्यायः । कुरवकः १ । इत्यमरः ॥ पीतझिण्ट्याः पर्य्यायः । कुरण्टकः १ सहचरी २ । इत्यमरः ॥ सहचरः ३ सहाचरः ४ । इति तट्टीका ॥ पीतः ५ पीतपुष्पः ६ दासी ७ कुरण्टकः ८ । इति रत्नमाला ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयशूलवातकफशोफकासत्वग्दोषनाशित्वञ्च । कुन्दरत्वम् । इति राजनिर्घण्टः ॥

झिरिका, स्त्री, (झिरीति अव्यक्तशब्देन कायति शब्दायते इति । कै+कः टाप् च ।) झिल्ली । इति शब्दरत्नावली ॥

झिरी, स्त्री, (झिर् इत्यव्यक्तशब्दो अस्त्यस्याः । अच् ङीप् ।) झिल्ली । इति शब्दरत्नावली ॥

झिल्लि., स्त्री, (झिर् इत्यव्यक्तशब्देन लिशतीति । लिश्+डि । रस्य लः ।) वाद्यविशेषः । यथा, गूढार्थदीपिकायाम् ।
"घण्टाशङ्खस्तथा भेरीग्टदङ्गौ झिल्लिरेव च ।
पञ्चानां शस्यते वाद्य देवताराधनेषु च ॥"

झिल्लिका, स्त्री, (झिर् इत्यव्यक्तशब्द लिशतीति । लिश्+डिः रस्य लत्वे साधुः । ततः स्वार्थे कन् ।) झिल्ली । (यथा, रामायणे । २।८६।११।
"झिल्लिकाविरुतैर्दीर्घैं रुदतीव समन्ततः ॥")
आतपस्य रुचिः । विलेपनमलम् । इति हेमचन्द्रः ॥ झिल्लिकारावः । उद्घर्षनवस्त्ररुचिः । इति शब्दरत्नावली ॥ (उद्घर्षनवस्त्रम् । झिण्टी । इति मेदिनी । के, ८६ ॥)

झिल्ली, स्त्री, (झिल्लि+कृदिकारादिति वा ङीष् ।) कीटविशेषः । झिँझिपोका इति भाषा । तत्पर्य्यायः । झिल्लीका२ झिल्लिका३ झिरिका४ झीरुका५ झिरी६ चीरिका७ चील्लिका८ चिल्ली९ भृङ्गारी१० चीरुका११ । इति शब्दरत्नावली ॥ चीरी१२ । इत्यमरः ।२।५।२८ ॥ चीरुका १३ । इति तट्टीका ॥ (यथा, भागवते, । ६ । १३ । ५ ।
"अट्टाट्टहासिक्षीस्वनकर्णशूल-
उलूकवाग्भिर्व्यथिताकराभा ॥")
आतपरुचिः । वर्त्तिः । उद्घर्षणांशुकम् । इति मेदिनी ॥ प्रालीलमदग्धान्नम् । इत्यजयपालः ॥

झिल्लीकण्ठ पुं, (झिल्लीवत् कण्ठः कण्ठशब्दोऽस्य ।) गृहकपोतः । इति त्रिकाण्डशेषः ॥

झिल्लीका, स्त्री, (झिल्ली+संज्ञायां कन् ततष्टाप् ।) झिल्लिका । इति हेमचन्द्रः ॥

झीरुका, स्त्री, (झिर इति कृत्वाव्यक्तं रौतीति । रु+शब्दे बाहुलकात् कक् टाप् च ।) झिल्ली । इत्यमरः । ० । ५ । २८ ॥

झु, ङ गत्याम् । (भ्वां आत्मं-सकं-अनिट् ।) जुङस्थाने झुङ इत्यपि केचित् । ङ, झवते । इति दुर्गादासः ॥

झुण्टः, पुं, (झट् संघाते+घञ् पृषोदरात् साधुः ।) स्तम्बः । अप्रकाण्डवृक्षः । इति शब्दचन्द्रिका ॥

झुमरिः, स्त्री, रागिणीविशेषः । यथा,—
"प्राय शृङ्गारबहुला माध्वीकमधुरा मृदुः ।
एकैव झुमरिर्लोके वर्णादिनियमोज्झिता ॥
अतो न लक्षणमेतस्या नोदाचारि विशेषकम् ।
इह हि प्राकृत स्वं प्रसिद्ध नृपरञ्जनम् ॥"
इति सङ्गीतदामोदरः ॥

झुणिः, पु, क्रमुकभेदः । स्त्री, दुष्टदेवश्रुतिः । इति मेदिनी । णे, १४ ॥

झॄ, य ष ज्यानौ । गतवर्द्धवयोभाव इति यावत् । (दिवां पर-अकं-अनिट् ।) इति कविकल्पद्रुमः ॥ य, झरा । य, झीर्य्यति । इति दुर्गादासः ॥

झोड़ः, पुं, गुवाकवृक्षः । इति भूरिप्रयोगः ॥

झ्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-सक-अनिट् ॥)

ञ

ञ, ञकारः । स व्यञ्जनदशमवर्णः चवर्गपञ्चमवर्णश्च । (असौ तु अर्द्धमात्राकालेनोच्चार्य्यः ।) अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥*॥ अस्योत्पत्तिर्यथा,—
"विसर्गस्तालुगः सोष्मा प्रं चवर्गश्च यन्तया ॥"
इति प्रपञ्चसारः ॥ * ॥
(पाणिनिमते तु अस्योत्पत्तिस्थानं नासिकान्विततालु । अस्योच्चारणे जिह्वामध्येन तालुमध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः । संवारनादघोषा अल्पप्राणश्च वाह्यप्रयत्नाः । मातृकान्यासेऽस्य वामहस्ताङ्गुल्यग्रे न्यासक्रिया स्यात् । वङ्गीयवर्णमालायां) अस्य लेखनप्रकारो यथा,
"कुण्डलीरूपमास्थाय दक्षतो वामतस्ततः ।
ऋजुश्चाधोगता मात्रा वामतः कुञ्चिता पुनः ॥
तिष्ठन्ति तासु नित्यासु सूर्य्येन्द्रग्निरूपा सदा ।
कुण्डलीद्वयरूपा तु या मात्रा मध्यतः स्थिता ॥
महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥*॥
चतुर्भुजां धूम्रवर्णां कृष्णाम्बरविभूषिताम् ।
नानालङ्कारसंयुक्तां जटामुकुटराजिताम् ॥

ईषद्धास्यमुखीं नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
“सदा ईश्वरसंयुक्तं ञकारं शृणु सुन्दरि ! ।
रक्तविद्युल्लताकारं या स्वयं परकुण्डली ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा ॥”
तस्य २२ द्वाविंशतिर्नामानि यथा,—
“ञकारो बोधनी विश्वा कुण्डली मखदो वियत् ।
कौमारी नागविज्ञानी सव्याङ्गुलनखो बकः ॥
शर्व्वेशश्चूर्णिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः ।
धर्म्मैकपादः सुमुखो विरजा चन्द्रनेश्वरी ॥
गायनः पुष्पधन्वा च रागात्मा च वराश्रिणी ॥”
इति नानातन्त्रशास्त्रम् ॥

ञः, पुं, गायनः । घर्घरध्वनिः । इत्येकाक्षर कोषः ॥ बलीवर्द्दः । शुक्रः । वाममतिः । इति मेदिनी । ञे, १ ॥ (गणपाठे धातोरुभयपदत्वविज्ञापकोऽनुबन्धविशेषः । इति वोपदेवः ॥)

ञिः, पुं, प्रत्ययविशेषः । स प्रेरणार्थे भवति । तस्य इकारस्तिष्ठति । धातोरनुबन्धविशेषः । स वर्त्तमानक्तप्रत्ययबोधकः । इति वोपदेव स्वामी ॥

ञ्यन्तः, पु, (ञिः प्रत्ययविशेषोऽन्ते यस्य ।) ञिप्रत्ययान्तः । यथा, “ञिञ्यन्तपिबघे” इत्यादि आत्मनेपदप्रकरणीयसूत्रम् ॥ स च प्रत्यय धातोः शब्दाच्च भवति । यथा, ञिः प्रेरणे इति चेः सूत्रव्याख्याने ञिरिति च मुग्धबोधव्याकरणम् ॥ मुग्धबोधव्याकरणस्य परिच्छेदविशेषः । यथा, इति ञ्यन्तपादः ॥

ट

ट, टकारः । स व्यञ्जनैकादशवर्णः । टवर्गप्रथमवर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे मूर्द्धस्थानेन जिह्वामध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः । मातृकान्यासेऽस्य दक्षिणस्फिचि न्यास्यत्वम् । वङ्गीयवर्णमालायाम्) तस्य लेखनप्रकारो यथा,—
“ऊर्द्धाधःक्रमतो रेखा कुण्डलीरूपतस्तथा ।
तिष्ठन्ति तासु नित्यासु कुवेरयमवायवः ॥
मात्रा कोणगता चोक्ता तत ऊर्द्धगता तु सा ।
या नित्या परमा शक्तिश्चतुर्व्वर्गप्रदायिनी ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि ! ।
मालतीपुष्पवर्णाभां पूर्णचन्द्रनिभाननाम् ॥
दशबाहुसमायुक्तां सर्व्वालङ्कारसंयुताम् ।
परमोक्षप्रदां नित्यां सदा स्मेरमुखीं पराम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥”
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा,—
“टकारं चञ्चलापाङ्गि ! स्वयं परमकुण्डली ।
कोटिविद्युल्लताकारं पञ्चदेवमयं सदा ॥
पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम् ।
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा ॥”
इति कामधेनुतन्त्रम् ॥

तस्य २७ सप्तविंशतिनामानि यथा,—
“टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः ।
मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
दक्षाङ्गकार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः ।
बृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ॥
राजा गिरिर्म्महाधनुर्प्राणात्मा सुमुखो मरुत् ॥”
इति नानातन्त्रशास्त्रम् ॥

टं, क्ली, (टल् + डः ।) करङ्कः । इति विश्वः ॥

टः, पु, (टल् + डः ।) वामनः । पादः । निस्वनः । इति मेदिनी । टे, १ ॥

टक, इ क बन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) इ क, टङ्कयति । इति दुर्गादासः ॥

टक्कदेशीयः, पु, (टक्कदेशे भव इति छः ।) वास्तूकशाकः । इति त्रिकाण्डशेषः ॥

टगरः, पु, (टः टङ्कणः क्षारविशेषः गर इव । तीव्रगुणत्वात्तथात्वम् ।) टङ्कणक्षारः । हेलाविभ्रमगोचरः । केकराक्षे, त्रि । इति मेदिनी । रे, १६० ॥

टङ्कः, पुं, (टकि + घञ् ।) कोपः । कोषः । असिः । ग्रावदारणः । इति मेदिनी । के, २४ ॥ (यथा, अनर्घराघवे । १ । २२ ।
“यः चक्रदेहं परितक्ष्य टङ्कै-
स्तपोमयैर्मा[?]णमुच्चकार ॥”)
परिमाणविशेषः । स तु चतुर्म्माषकरूपश्चतुर्व्विंशतिरक्तिकारूपो वा । जङ्घा । इति हेमचन्द्रः । ३ । ५८३ ॥ दर्पः । इति हलायुधः ॥

टङ्कः, पु क्ली, (टकि + घञ् अच् वा ।) नीलकपित्थः । (यथा, सुश्रुते सूत्रस्थाने ४६ ।
“शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु ॥”)
खनित्रम् । टङ्कणः । इति मेदिनी । के, २४ ॥ दर्पः । इति शब्दरत्नावली ॥

टङ्ककः, पु, (टङ्कति बध्नाति मनः स्नेहेनेति । टकि + ण्वुल् । यद्वा, टङ्क्यते रुध्यतेऽनेन मन इति । घञ् । ततः संज्ञायां कन् ।) रजतमुद्रा । इति रूप्याध्यक्षशब्दे अमरटीकासारसुन्दरी भरतश्च ॥ टाका इति भाषा ॥

टङ्ककपतिः, पुं, (टङ्ककस्य पतिः रक्षकः ।) रूप्याध्यक्षः । टङ्कशालानियुक्तः । इत्यमरटीकासारसुन्दरी ॥ टाकशालेर अध्यक्ष इति भाषा ॥

टङ्कशाला, स्त्री, (टङ्ककस्य शाला ।) रजतमुद्रागृहम् । इत्यमरटीकासारसुन्दरी ॥ टाकशाल इति भाषा ॥

टङ्कटीकः, पु, शिवः । इति त्रिकाण्डशेषः ॥

टङ्कणः, पु, (टकि बन्धे + ल्युः । पृषोदरात् णत्वे साधुः ।) क्षारविशेषः । सोहागा इति भाषा । (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“विरूक्षणोऽनिलकरः श्लेष्मघ्नः पित्तदूषणः ।
अग्निदीप्तिकरस्तीक्ष्णष्टङ्कणः क्षार उच्यते ॥”)
तत्पर्य्यायः । पाचनकः २ मालतीतीरजः ३ लोहश्लेषणः ४ रसशोधनः ५ । इति हेमचन्द्रः । ४ । १० ॥ टङ्कणक्षारः ६ रङ्गक्षारः ७ रसाधिकः ८ लोहद्रावी ९ रसघ्नः १० सुभगः ११ रङ्गदः १२ वर्त्तुलम् १३ कनकम् १४ क्षारम् १५ मलिनम् १६ धातुवल्लभम् १७ । इति राजनिर्घण्टः ॥ मालतीतीरसम्भवः १८ द्रावी १९ द्रावकः २० लोहशुद्धिकारकः २१ । इति भावप्रकाशः ॥ स्वर्णपाचकः २२ । इति रत्नमाला ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफस्थावरादिविषकासश्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥ अग्निवातपित्तकारित्वम् । रूक्षत्वम् । इति भावप्रकाशः ॥ (देशविशेषः । यथा, बृहत्संहितायाम् । १४।१२ ।
“कङ्कटटङ्कणवनवासि शिविकफणिकारकोङ्कणाभीराः ॥”)

टङ्का, स्त्री, (टकि + अच् टाप् ।) जङ्घा । इति मेदिनी । के, २५ ॥

टङ्कानकः, पु, (टङ्कं दर्पं कोपं वा आनयति उद्दीपयतीति । अन् + णिच् + ण्वुल् ।) श्लेष्मान्तकवृक्षः । इति शब्दचन्द्रिका ॥

टङ्कारः, पु, (टल् वैक्लवे + बाहुलकात् डः । टं वैक्लव्यं चित्तस्य विकृतिं करोतीति । कृ + कर्म्मण्यण् ।) विस्मयः । प्रसिद्धः । शिञ्जितध्वनिः । इति मेदिनी । रे, १६० ॥ (यथा, काशीखण्डे । २९ । ६९ ।
“टीकिताशेषपाताला टङ्किकेलोऽङ्घ्रिपाटवे ।
टङ्कारनृत्यत्कल्लोला टीकनीया महातटा ॥”
कृ + घञ् । कारः टं इति अव्यक्तशब्दस्य कारः करणं यत्र । ध्वनिमात्रे । यथा, भागवते । ३ । १७ । ९ ।
“अन्तर्ग्रामेषु मुखतो वमन्त्यो वह्निमुल्बणम् ।
शृगालोलूकटङ्कारैः प्रणेदुरशिवाः शिवाः ॥”)

टङ्कारी, स्त्री, (टङ्कं ऋच्छतीति । ऋ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । ततो गौरादित्वात् ङीष् ।) क्षुपविशेषः । टेकारी इति भाषा । अस्य गुणाः । वातश्लेष्मशोफोदरव्यथानाशित्वम् । तिक्तत्वम् । दीपनत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

टङ्गः, पुं क्ली, (टकि + अच् ।) खनित्रम् । खड्गभेदः । जङ्घा । इति मेदिनी । गे, ७ ॥

टङ्गः, पु, (टङ्क + पृषोदरात् साधुः ।) टङ्कणः । इति शब्दचन्द्रिका ॥ सोहागा इति भाषा । चतुर्म्माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥

टङ्गणः, पु क्ली, (टङ्कण + पृषोदरात् साधुः ।) टङ्कणः । सोहागा इति भाषा । अस्य गुणाः । श्लेष्मवायुनाशित्वम् । क्षाररसत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । अग्निवर्द्धकत्वम् । स्निग्धत्वम् । भेदकत्वम् । बलवर्द्धनत्वञ्च । इति राजवल्लभः ॥

टङ्गिणी, स्त्री, (टकि बन्धे + णिनिः । ततः पृषोदरात् णत्वे ङीपि च साधुः ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ आकमारि इति भाषा ॥

टट्टनी, स्त्री, (टट्ट इत्यव्यक्तशब्दं नयतीति । नी+क्विप् ।) च्येष्ठी । इति त्रिकाण्डशेषः ॥

टट्टरी, स्त्री, (टट्टमित्यव्यक्तशब्दं रातीति । रा +कस्ततो ङीष ।) मृषावादः । सम्यावाद्यम् । पटहवाद्यम् । इति मेदिनी । रे, १५८ ॥

टट्टरः, पुं, (टट्ट इत्यव्यक्तशब्दं रातीति । रा+ कः ।) भेरीशब्दः । इति हेमचन्द्रः ॥

टल, ण विक्लवे । इति कविकल्पद्रुमः ॥ (भ्वां पर-स्मै-अकं-सेट् ।) ण, टालः टलः । विक्लवो विक्लीभावः । इति दुर्गादासः ॥

टलनं, क्ली, (टल+भावे ल्युट् ।) विक्लवः । टला इति भाषा ॥

टा, स्त्री, (टलति प्रलये भूकम्पादौ वा । टल+ड टाप् च ।) पृथिवी । इत्येकाक्षरकोषः ॥

टाङ्करः, पु, (टङ्कस्येदं टाङ्कम् । टङ्क+अण् । टाङ्क रातीति । रा+क. ।) नागवीटः । इति त्रिकाण्डशेषः ॥

टारः, पुं, (टां पृथ्वीं ऋच्छतीति । ऋ+अण् ।) लङ्गः । तुरङ्गः । इति हेमचन्द्रः ॥

टिक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सक सेट् ।) ऋ, अटिटेकत् । ङ, टेकते । इति दुर्गादासः ॥

टिटिभकः, पु, (टिटीत्यव्यक्तशब्दं भणति । भण +डः । ततः स्वार्थे कन् ।) टिट्टिभपक्षी । इत्यमरटीका ॥

टिट्टिभः, पुं, (टिट्टीत्यव्यक्तशब्दं भणतीति । भण +डः ।) पक्षिविशेषः । टीठि इति भाषा । तत्पर्य्याय. । टीठिभकः २ । इति शब्दरत्ना-वली ॥ टिट्टिभकः ३ । इत्यमरः । २।५।३५ ॥ टिट्टिभकः ४ । इति तट्टीका ॥ (यथा, मनुः । ५ । ११ ।

"अनिर्द्दिष्टांश्चैकशफांष्टिट्टिभञ्च विवर्ज्जयेत् ॥")

त्रयोदशमन्वन्तरीयेन्द्रशत्रुदानवविशेषः । यथा,

"इन्द्रो दिवस्पति शत्रुष्टिट्टिभो नाम दानवः ।
मायूरेण च रूपेण घातयिष्यति माधवः ॥"

इति गारुडे ८७ अध्यायः ॥

(वरुणसभास्थदानवानामन्यतमः । असौ हि सत्यधर्म्मविवर्ज्जितः । यथा, महाभारते । २ । ६ । १५ ।

"टिट्टिभो विटभूतश्च संह्रादश्चेन्द्रतापनः ॥"

इत्युपक्रम्याह ।

"सर्व्वे लब्धवरा शूरा, सर्व्वे विगतमृत्यवः ॥")

टिट्टिभकः, पुं, (टिट्टिभ+स्वार्थे कन् ।) टिट्टिभ-पक्षी । इत्यमरः ।२।५।३५ ॥ [प्रकाशः ॥

टिरिटिणिका, स्त्री, अम्बुशिरीषिका । इति भाव-

टिण्डिशः, पुं, वृक्षविशेषः । डिण्डिशः । इति ढेँड्शी इति च भाषा । तत्पर्य्यायः । रोम-शफलः २ तिन्दिशः ३ सुनिनिर्म्मितः ४ । इति राजनिर्घण्टः ॥ डिण्डिशः ५ । अस्य गुणाः । रुचिकारित्वम् । भेदकत्वम् । पित्तश्लेष्माश्मरी-नाशित्वम् । सुशीतत्वम् । वातलत्वम् । रूक्ष-त्वम् । मूत्रलत्वञ्च । इति भावप्रकाशः ॥

टिप, क क्षिपि । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं सेट ।) क, टेपयति । क्षिपि प्रेरणे । इति दुर्गादासः ।

टिप्पनी, स्त्री, (टेपयति व्याख्यायतेऽनया । टिप+ करणे ल्युट् ङीप् च । पृषोदरादित्वात् पस्य द्वित्वे साधुः ।) टीका । यथा,—

"श्रीमद्गजानन नत्वा लीलावत्याः सुटिप्पनी ।
भयेशेन सुबोधार्थं क्रियते यद्गुरोः श्रुतम् ॥")

टीक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सक-सेट् ।) ऋ, अटिटीकत् । ङ, टीकते । इति दुर्गादासः ॥

टीका, स्त्री, (टीक्यते गम्यते प्रविश्यते ज्ञायते वानया । टीक+घञर्थे कः । टाप् च ।) विव-रणग्रन्थः । इति लिङ्गादिसंग्रहे अमरः ॥

टुण्टुकः, पुं, श्योणाकवृक्षः । इत्यमरः ।२।४।५६॥ कृष्णखदिरवृक्षः । इति शब्दचन्द्रिका ॥ (टुण्टु इत्यव्यक्तशब्देन कायति शब्दायते इति । कै+ कः ।) पक्षिविशेषः । इति शब्दरत्नावली ॥ टुण्टुनि इति भाषा । श्योणाकप्रभेदः । इति राजनिर्घण्टः ॥

टुण्टुकः, त्रि, नीचः । इति मेदिनी ॥ क्रूरः । इति विश्वः ॥

टुण्टुका, स्त्री, टङ्गिणीवृक्षः । इति शब्दचन्द्रिका ॥

टुनाका, स्त्री, तालमूलीवृक्षः । इति शब्द-चन्द्रिका ॥

टेरकः, त्रि, वक्रचक्षुः । टेरा इति भाषा । तत्-पर्य्यायः । वलिरः २ केकरः ३ केदरः ४ । इति शब्दरत्नावली ॥

ट्वल, ञ विक्लवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अक-सेट् ।) वकारयुक्तः । ञ, ट्वालः ट्वलः । विक्लवो विक्लीभावः । इति दुर्गादासः ॥

ठ

ठ, ठकारः । स व्यञ्जनद्वादशवर्णः टवर्गद्वितीय-वर्णश्च । (अर्द्धमात्राकालेनोच्चार्य्योऽयं वर्णः ।) अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्पर्श-आभ्यन्तरप्रयत्नः । विवारश्वासघोषा महा-प्राणश्च वाह्यप्रयत्नाः । वङ्गवर्णमालायाम्) तस्य लेखनप्रकारो यथा,—

"वामाकुण्डलाकारो रेखाधिष्ठितदेवताः ।
तिष्ठन्ति क्रमतो नित्यं चन्द्रसूर्य्याग्नयः प्रिये । ॥
मात्राहीनस्तूर्द्धशिखष्ठकारः परमेश्वरि । ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने । ।
पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम् ॥
सुन्दरीं षोडशभुजां धर्म्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"ठकारं चञ्चलापाङ्गि ! कुण्डली मोक्षरूपिणी ।
पीतविद्युल्लताकारं सदा त्रिगुणसंयुतम् ॥
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ।
त्रिविन्दुसहितं वर्णं त्रिशक्तिसहितं सदा ॥"

तस्य ३१ एकत्रिंशन्नामानि यथा,—

"ठः शून्यो मञ्जरी वीणः मायिनी लाङ्गली तथा ।
वनजो नन्दनो जिह्वा सुनन्दो घूर्णकः सुधा ॥
वर्त्तुलः कुण्डलो वह्निरमृतं चन्द्रमण्डलः ।
दक्षजानूरुभावश्च देवभक्षो वृहद्ध्वनिः ॥
एकपादो विभूतिश्च ललाट सर्व्वमित्रक. ।
वृषघ्नो नलिनी विष्णुर्महेशो ग्रामणीः शशी ॥"

इति नानातन्त्रशास्त्रम् ॥

ठ., पुं, शिवः । महाध्वनिः । चन्द्रमण्डलः । इत्येकाक्षरकोषः ॥ मण्डलः । शून्यम् । लोक-गोचरः । इति मेदिनी । ठे, १ ॥

ठक्कुरः, पु, देवता । ठाकुर इति ख्यातः । यथा,

"श्रीदामनामगोपालः श्रीमान् सुन्दरठक्कुरः ॥"

इत्यनन्तसंहिता ॥

ठठं } ठठठ } य, अनुकरणशब्दः । ठन् ठन् इति भाषा । यथा, महानाटके । ८६ ।

"रामाभिषेके मदविह्वलाया.
कक्षाच्युतो हेमघटस्तरुण्याः ।
सोपानमारुह्य चकार शब्दं
ठठं ठठं ठ ठठठं ठठं ठः ॥"

ठेरः, त्रि, वृद्ध । यथा, जा ठेर न्व हसन्तौ । इति काव्यप्रकाशे देशीभाषा ॥

ड

ड, डकारः । स व्यञ्जनत्रयोदशवर्णः टवर्गस्तृतीय वर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याक रणम् ॥ (यथा, शिक्षायाम् । १७ ।

"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥")

वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,

"ऊर्द्धाधःक्रमतो रेखा मध्ये त्वाकुञ्चिता तथा ।
लक्ष्मीर्वाणी भवानी च क्रमशस्तत्र संस्थिता ॥
ब्रह्मरूपा तथा मात्रा महाशक्तिः प्रकीर्त्तिता. ।
ध्यानमस्य प्रवक्ष्यामि शृणुष्वावहिता मम ।
जवासिन्दूरसङ्काशां वराभयकरां पराम् ॥
त्रिनेत्रां वरदां नित्यां परमोक्षप्रदायिनीम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ।"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"डकारं चञ्चलापाङ्गि ! सदा त्रिगुणसंयुतम्
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा ।
चतुर्ज्ञानमयं वर्णं आत्मादितत्त्वसंयुतम् ॥
पीतविद्युल्लताकारं डकारं प्रणमाम्यहम् ।"

तस्य २४ चतुर्विंशतिनामानि यथा,—

"डः स्मृतिर्दारुको नन्दिरूपिणी योगिनी प्रियः ।
कौमारी शङ्करस्त्रासस्त्रिवक्रो नदको ध्वनिः ॥

दुरूहो जटिलो भीमा द्विजिह्वः पृथिवी सती।
कोरगिरिः क्षमा कान्तिर्नाभिः स्वाती च
लोचनम् ॥"

इति नानातन्त्रशास्त्रम् ॥

(पद्यादौ अस्य प्रथमोपन्यासे फलं शोभा।
यदुक्तं वृत्तरत्नाकरटीकायाम्।
"ड: शोभां ढो विशोभा भ्रमणमथ च णस्तस्तु
खं यस्य युद्धम् ॥")

ड:, पुं, (डयते उड्डीयते भक्तानां हृदयाकाशे
य:। डी+बाहुलकात् ड:।) शिव:।
(डीयते आकाशमार्गे नभोगुणत्वादिति। डी
+ड:।) शब्द:। त्रास:। इत्येकाक्षरकोष:॥
वाडवाग्नि:। इति मेदिनी। डे, १॥

डङ्गरी, स्त्री, (ड अरोचकादिजनितत्रासं
गिरति नाशयतीति। गॄ+अच्। निपातनात्
सुमागम:। ततो ङीष्।) फलविशेष:। तत्-
पर्य्याय:। डाङ्गरी २ दीर्घेर्व्वारु: ३ डङ्करी ४
डङ्गारी ५ नागमुखी ६ गजदन्तफला ७।
अस्या गुणा:। शीतलत्वम्। रुचिकारित्वम्।
दाहपित्तास्रदोषाशोषाध्मत्रणरोधनाशित्वम्।
तर्पणत्वम्। गौल्यत्वञ्च। इति राजनिर्घण्ट:॥

डङ्गारी, स्त्री, (डङ्गरी पृषोदरादित्वात् साधु:।)
डङ्गरीफलम्। इति राजनिर्घण्ट:॥

डप, इ क ठ ञ संहतौ। इति कविकल्पद्रुम:॥
(चुरां-आत्मं उभं च-सकं-सेट्।) मूर्द्धन्य-
वर्गतृतीयादि:। इ क ठ, डम्पयते। ञ, डम्प-
यति डम्पयते। अयमात्मनेपदीत्यन्ये। संहतौ
राशीकरणम्। इति दुर्गादास:॥

डप, क ठ ञ संहतौ। इति कविकल्पद्रुम:॥
(चुरां-आत्मं-उभ च-सकं सेट्।) मूर्द्धन्यवर्ग-
तृतीयादि:। क ठ, डापयते। ञ, डापयति
डापयते। पुन:पाठान्नेदनुबन्ध:। अयं आत्मने-
पदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गा-
दास:॥

डब, इ क नोदे। इति कविकल्पद्रुम:॥ (चुरां-
परं-सक-सेट्।) मूर्द्धन्यवर्गतृतीयादि:। इ क,
डम्बयति। नोद: प्रेरणम्। इति दुर्गादास:॥

डभ, इ क ञ सङ्घे। इति कविकल्पद्रुम:॥ (चुरां-
उभ-अक-सेट्।) मूर्द्धन्यवर्गतृतीयादि:। इ क,
डम्भयति डम्भयते। अयमात्मनेपदीति केचित्।
सङ्घो राशीकरणम्। इति दुर्गादास:॥

डम, पु, (ड नीचयोनित्वात् भीतिं मातीति। मा
+क:।) वर्णसङ्करजातिविशेष:। डोम इति
भाषा। स चाण्डाल्यां लेटात् जात:। इति
ब्रह्मवैवर्त्तपुराणम्॥

डमरं, क्ली, (मृ+भावे अप्। मरं पलायन
धातूनामनेकार्थत्वात्। डेन त्रासेन मरम्।)
भीत्या पलायनम्। तत्पर्य्याय:। शृगालिका २
विद्रव: ३ डिम्ब: ४। इति हारावली॥६६॥

डमर:, पु, (डेन भयेन मरो म्रतिविर यत्र।)
परचक्रादिभयम्। अस्त्रकलह:। इत्यमर-
टीकायां स्वामी॥ तत्पर्य्याय:। डिम्बम् २
विप्लव: ३। इत्यमर:।३।२।१४॥ डिम्ब:४
विम्ब: ५ डामर: ६। इति भरत:॥ (यथाह
गर्ग:।

"तत्कालयोः शिखिकेतु: स तु रूक्ष: सुक्तयावह:
प्रोक्त:।

शिखिकेतावक् प्राच्यां शास्त्राख्यो डमर-
मरकाय॥")

डमरु:, पु, (डमित्यव्यक्तशब्दं ऋच्छतीति। ऋ
+"मृगय्वादयश्च।" उणां १।३८। इति कु-
प्रत्ययेन निपातनात् साधु:।) वाद्यभेद:।
इत्यमर:।१।७।८॥ कपालियोगिवाद्यम्।
इति भरत:॥ क्षीणमध्यो गुटिकाद्वयालम्बित:।
इति सारसुन्दरी॥ (यथा, योगसारे २ परि-
च्छेदे।

"वादयन् डमरुं योगी यत्र कुत्राश्रमे स्थित:॥")
चमत्कार:। इति त्रिकाण्डशेष:॥

डयनं, क्ली, (डीयते आकाशमार्गे गम्यतेऽनेनेति।
डी+करणे ल्युट्।) कर्णीरथ:। (डी ङ नभो-
गतौ+भावे ल्युट्।) नभोगति:। इति हेम-
चन्द्र:।४।३८४॥

डल्लकं, क्ली, वंशादिनिर्म्मितपात्रम्। डाला इति
भाषा। यथा,—

"त्रिशतञ्च शताधिकं डल्लकं वस्त्रसंयुतम्।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

डवित्थ, पु, काष्ठमयमृग:। यथा,—

"डित्थ: काष्ठमयो हस्ती डवित्थस्तन्मयो मृग:॥"

इति सुपद्मव्याकरणे विभक्तिपाद:॥

(द्रव्यवाचिसंज्ञाशब्दविशेष:। यथा साहित्य-
दर्पणे। "द्रव्यशब्दा एकव्यक्तिवाचिनो हरि-
हरडित्थडवित्थादय:॥")

डहु, पु, (दहति तापयति सर्व्वशरीरमिति।
दह+मृगय्वादित्वात् कुप्रत्ययेन निपातनात्
साधु:।) वृक्षविशेष:। डेहुया इति मादार
इति च भाषा। तत्पर्य्याय:। लकुच: २
लिकुच: ३। इत्यमर:।२।४।६०॥ अस्य
गुणा:। गुरुत्वम्। विष्टम्भित्वम्। त्रिदोष-
शुक्रदुष्टिकारित्वञ्च। इति राजवल्लभ:॥

डहू, पु, (डहु: पृषोदरादित्वात् दीर्घ:।)
डहु:। इति शब्दरत्नावली॥

डा, स्त्री, (डीयते नभोमार्गे गच्छतीति। डी
+अन्येष्वपीति ड: स्त्रियां टाप्।) डाकिनी।
इति मेदिनी। डे, १॥

डाकिनी, स्त्री, (डाय भयदानाय अकति कुटिलं
व्रजतीति। अक वक्रगतौ+इनि। ततो ङीप्।)
कालीगणविशेष:। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"सार्द्धञ्च डाकिनीनाञ्च विकटाना त्रिकोटिभि:॥"
(डाकानां समूह:। "खलादिभ्य इनिर्व्वक्तव्य:।"
४।२।५१। इत्यस्य वार्त्तिकोक्त्या इनि:।
डाकाना समूह:। इति सिद्धान्तकौमुदी॥)

डाङ्गरी, स्त्री, (डङ्गरी पृषोदरादित्वात् साधु:।)
डङ्गरीफलम्। इति राजनिर्घण्ट:॥

डामर:, पु, शिवोक्तशास्त्रविशेष:। (यथा,
काशीखण्डे।२६।७०।

"डमड्डमरुहस्ता च डामरोक्तमहाखण्डका॥"
"डामरो डामरकल्पो नवाक्षरदेवीमन्त्रस्य
प्रतिपादको ग्रन्थो महाराष्ट्रे सुप्रसिद्धस्तत्रोक्तं
प्रतिपादितं मन्त्रमय महच्छरीर यस्या:॥"

इति तट्टीका॥) स तु षड्विध:। तेषां
नामानि श्लोकसंख्याश्च यथा। योगडामर:
२३,५३३। शिवडामर: ११,००७। दुर्गाडामर:
११,५०३। सारस्वतडामर: ६,६०५। ब्रह्म-
डामर: ७,१०५। गन्धर्व्वडामर: ६००६०।
इति वाराहीतन्त्रम्॥ डमर:। इत्यमर-
टीकायां भरत:॥ चमत्कार:। यथा। भूतानां
डामरश्चमत्कारोऽनेनेति भूतडामरशब्दनिर्व्व-
चने निबन्धकार.॥ (गर्व्व:। आटोप:। यथा,
गीतगोविन्दे।१२।२२।

"मम रुचिरे चिकुरे कुरु मानद। मानसज-
ध्वजचामरे।

रतिगलिते ललिते कुसुमानि शिखण्डि-
शिखण्डकडामरे॥"

कोटचक्रविशेष:। यथा, समयामृते।

"अथात: संप्रवक्ष्यामि कोटचक्रमिहाष्टधा॥"

इत्युपक्रम्य,—

"पञ्चमो गिरिकोटश्च षष्ठ: कोटश्च डामर॥"

इत्युक्तवान्॥

अस्य विशेषविवृति: चक्रशब्दे द्रष्टव्या॥ *॥
क्षेत्रपालविशेष.। यथा, प्रयोगसारे।

"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिता:॥"

इत्युपक्रम्य,—

"टङ्कपाणिस्तथा चान्यष्ठानवन्धुश्च डामर:॥")

डालिम:, पु, (दाडिम: पृषोदरादित्वात् साधु:।)
दालिम:। इत्यमरटीकायां भरत:॥

डाहल., पु, त्रिपुरदेश:। इति भूरिप्रयोग:॥

डाहुक:, पु, दात्यूहपक्षी। इति जटाधर:॥

डिङ्गर:, पु, डङ्गर:। क्षेप:। खल:। धूर्त्त:।
सेवक:। इति शब्दरत्नावली॥

डिण्डिम:, पु, (डिण्डीति शब्दं मातीति। मा+
क:।) वाद्यप्रभेद:। इत्यमर:।१।७।८॥
डेङ्गरीति ख्यात.। इति भरत॥ माहेश्वर-
दण्डीति ख्यात:। इति सारसुन्दरी॥ (यथा,
महाभारते।७।१६३।४४।

"भेरीश्चाभ्यहनन् हृष्टा डिण्डिमांश्च सहस्रश:॥")
डिण्डिम इव आकृतिरस्यस्येति। अर्श
आदित्वादच्।) सुपाकफल:। इति शब्द-
चन्द्रिका॥ पानी आमला इति भाषा॥

डिण्डिर, पु, (हिण्डिर: पृषोदरादित्वात् हस्य
ड:।) समुद्रफेन.। इति हेमचन्द्र:।४।१४३॥

डिण्डिरमोदकं, क्ली, (मोदयतीति। मुद्+ण्वुल्।
डिण्डिर इव मोदकम्।) गृञ्जनम्। इति राज-
निर्घण्ट:॥

डिण्डिश., पु, टिण्डिश:। टिँडश् इति भाषा॥
(यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमभागे।

"डिण्डिमो रोमगुच्छो सुनिनिर्मिमस इत्यपि ।
डिण्डिमो दण्डिसंदेहो पित्तश्लेष्मापह. स्मृतः ।
सुग्रीतो मातलो रूपो मन्त्रलग्नासरीहरः ॥")
डित्थः, पुं, काष्ठमयहस्ती । यथा, समासप्रकरणे विभक्तिपादे ।
"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः ॥"
विशेषलक्षणयुक्तपुरुषः । यथा,—
"श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः ।
सर्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते ॥"
इति कलापटीकायां व्याख्यासारः ॥
(द्रव्यवाचिसंज्ञाशब्दभेदः । यथा, साहित्य-दर्पणे । "द्रव्यशब्दा एकव्यक्तिवाचिनो हरि-हरडित्थडवित्थादयः ॥")
डिप, इ क ङ ण संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-उभं-च-सकं-सेट् ।) महर्षयवर्ग-तृतीयादिः । इ क ङ, डिम्पयते । ण, डिम्पयति डिम्पयते । अयमात्मनेपदीत्यन्ये । संहती राशीकरणम् । इति दुर्गादासः ॥
डिप, क ङ ण संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-उभं-च सकं-सेट् ।) महर्षयवर्ग-तृतीयादिः । क ङ, डेपयते । ण, डेपयति डेप यते । पुन पाठाग्नेदनुबन्धः । अयमात्मनेपदी-त्यन्ये । संहती राशीकरणम् । इति दुर्गादासः ॥
डिप, शि क य इर् तुदि । इति कविकल्पद्रुमः ॥ (तुदां-चुरां-दिवां च-सकं-सेट् ।) शि, डिपति अडिपीत् । क, डेपयति । य, डिप्यति । इर अडिपत् अडेपीत् । तुदाद्यन्तर्गणस्यैव कुटादि-त्वमिति दिवादिपक्षे गुणः । दिवादिपक्षे पुषा-दित्वाग्नित्यं ङ इत्यन्ये । तुदि प्रेरणे । इति दुर्गादासः ॥
डिब, इ क नोदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सक-सेट् ।) महर्षयवर्गतृतीयादिः । इ क, डिम्बयति । नोदः प्रेरणम् । इति दुर्गादासः ॥
डिभ, इ क ण सङ्घे । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सक-सेट् ।) इ क ण, डिम्भयति डिम्भयते । अयमात्मनेपदीति केचित् । सङ्घो राशीकरणम् । इति दुर्गादासः ॥
डिम, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां परं-सक सेट् ।) डिडिमः । सौत्रधातुरयम् । इति दुर्गादासः ॥
डिमः, पुं, नाटकस्य रूपकविशेषः । इति हेम-चन्द्रः । २ । १६८ ॥ (तल्लक्षणादिकं यदुक्तं साहित्यदर्पणे । ६ । २४६ ।
"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
उपरागैश्च भूयिष्ठो डिमः ख्यातोऽतिवृत्तकः ॥
अङ्गी रौद्ररसस्तत्र सर्व्वेऽङ्गानि रसाः पुनः ।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ॥
नायका देवगन्धर्व्वयक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोड़शात्यन्तमुद्धताः ।
वृत्तयः कौशिकीहीना निर्व्विमर्शाश्च सन्धयः ।
दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गार-वर्ज्जिताः ॥")

डिम्बं, क्ली, (डिम+घञ् ।) भयम् । कलकम् । फुप्फुसः । इति हारावली । २४४ ॥ अमरः । इत्यमरः । ३ । २ । १४ ॥
डिम्बः, पुं, (डिवि नोदे+भावे घञ् ।) भय-ध्वनिः । अण्डम् । फुप्फुसः । प्लीहा । विप्लवः । इति मेदिनी । बे, ५ ॥ डिम्बाः । इति द्विरूपकोषः ॥
डिम्बाहव, पुं, (डिम्बः नृपतिहीनत्वात् विप्लव-रूप आहवः ।) नृपतिरहितयुद्धम् । इति जटाधरः ॥ (यथा, मनुः । ५ । ९५ ।
"डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च ॥"
"डिम्बाहवो नृपरहितयुद्धं तत्र हतानाम् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥)
डिम्बिका, स्त्री, (डिम्बयति नायकसमीपे नोदय-त्यात्मानमिति । डिम्ब+ण्वुल् । टाप् अत इत्वञ्च ।) कामुकी । जलबिम्बः । शोणक-वृक्षः । इति शब्दरत्नावली ।
डिम्भः, त्रि, (डिम्भयति संहतो भवतीति । डिम्भ+पचाद्यच् ।) शिशुः । इत्यमरः । २ । ६ । ३८ ॥ (यथा, रसिकरञ्जने । १ ।
"शुभारम्भोऽदम्भे मदितमतिडिम्भोग्नितपदं ।
भजित्तम्भे रम्भेत्यलसकुचकुम्भे परिचयम् ॥")
मूर्खः । इति मेदिनी । भे, ४ ॥ अस्य रूपा-न्तरं डिम्ब. । इति द्विरूपकोषः ॥
डिम्भकः, त्रि, (डिम्भ एव । डिम्भ+स्वार्थे कन् ।) बालकः । इति शब्दरत्नावली ॥ (स्वनामख्यातः शाल्वदेशाधिपतेर्ब्रह्मदत्तस्य पुत्र. । यथा, हरि-वंशे भविष्यपर्व्वणि । १२ । १८ ।
"हंसो ज्येष्ठो नृपसुतो डिम्भकोऽन्तरोऽभवत् ॥"
अस्य विशेषविवरणं तत्रैव विस्तरशो द्रष्टव्यम् ॥)
डिम्भचक्र, क्ली, (डिम्भ इव चक्रम् ।) नराणां शुभाशुभनिर्णायकचक्रविशेष. । यथा,—
"डिम्भचक्रे न्यसेद्भानि भानुभादिभिमस्तके ।
मुखे त्रीणि द्वय स्कन्धे चैकैकं बाहुहस्तयोः ॥
हृदि पञ्च नाभिगुह्ये चैकैकं षट् च जानुनोः ।
चरणाभ्यां तथैकैकं जन्मर्क्षगतनात् फलम् ॥
शीर्षर्क्षे छत्रलाभः स्यात् वक्त्रे मिष्टान्नभोजनम् ।
स्कन्धे धनी च बाहुभ्यां स्थानभ्रष्टो भवेन्नरः ॥
पाणिभ्यां तस्करो लक्ष्मीर्हृदयायुश्च नाभितः ।
गुह्ये कामी भ्रमो जान्वोरल्पजीवी च पादयोः ॥"
इति स्वरोदय ॥
डिम्भा, स्त्री, (डिम्भ+टाप् ।) अतिशिशुः । इत्यमरः । २ । ६ । ४१ ॥
डी, ञो ङ य गतौ । नभोगतौ । इति कवि-कल्पद्रुमः ॥ (दिवां-आत्मं-सकं अक च-सेट् ।) ञो, डीनः । ङ य, डीयते । इति दुर्गादासः ॥
डी, ङ नभोगतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अक सेट् ।) ङ, डयते पक्षी । अस्यापि निष्ठायां डीनः । इति कातन्त्राद्याः । धातु-पारायणिकास्तु इमनिषेधे ओदनुबन्धडीङो ग्रहणादस्मादिमिच्छत्याद्युग्यो डयित इत्याहुः । गोयीचन्द्रोऽपि । डयितः डयितवान् इत्युदा-

जहार । समते तु डीन इत्येव । इति दुर्गा-दासः ॥
डीनं, क्ली, (डी नभोगतौ+भावे क्त ।) पक्षि-गतिः । इति जटाधरः ॥ तद्भेदा यथा,—
"उड्डीनं संपतत्र निष्क्रम्य पतत्संपातमुच्यते ।
कङ्कणयोगतिभ्रमम्य: ससुदीर्णं प्रचक्षते ॥
संकल्प्य पतनगमनमुच्यते व्यतिरिक्तकम् ।
षड्विंशतिरमी भेदाः पतात्रामिह दर्शिताः ॥
महाडीनं विशायैर्षा पतात्रां त्रिविधा गतिः ।
गतं तत्र यथोद्दिष्टं आगतं पुनरागमः ॥
प्रत्याहृत्तिः प्रतिगतिरिति षट् सप्तभि. स्मृता ।
तेषां निपाता' कथ्यन्ते प्रत्येकं पञ्चविंशति. ॥"
तद्यथा । उड्डीनं ऊर्द्धगमनम् १ अवडीनं अधः-पतनम् २ प्रडीनं पतनवेगवत्ता ३ डीनं पतन-मात्रम् ४ निडीनं नीचैःपतनम् ५ संडीनं सम्यक्पतनम् ६ तिर्य्यग्डीनं तिर्य्यक्पतनम् ७ विडीनं विचित्रं पतनम् ८ परिडीनं सर्व्वतः पतनम् ९ पराडीनं पराङ्मुखं गमनम् १० सुडीनं सुकुमारपातः ११ अभिडीनं आभि-मुख्येन पुन. पुन. पतनम् १२ महाडीनं सुद्र-पतनं प्रत्याहृत्तिः १३ निडीनं अल्पमात्रं वा गमनं पतनम् १४ अतिडीनं दीर्घपतनम् १५ अवडीनं अधःपतनम् १६ प्रडीनं अधःपतने वेगवत्ता १७ अवप्रडीनं अधःपतने शोभन-वत्ता १८ डीनडीनकं पतनं निर्व्विशेषकं कुतु-चितञ्च १९ संडीनोड्डीनं शोभनमूर्द्धगमनम् २० संडीनडीनं शोभनगमनमात्रम् २१ पुनर्डीनं तदेव सामान्यगमनम् २२ डीनावडीनकं तदे-वाधः कुतुचितञ्च २३ संपातं बहुभिः सह गमनम् २४ समुदीर्णं परस्परसहितं भ्रम-नम् २५ ततोऽन्यत् व्यतिरिक्तकं तस्मात् स्थाना-न्तरादेत्य संकल्पित पतनम् २६ । एतेषु षड्-विंशतिसङ्ख्येषु पतनं एकं डीननामकं निर्व्वि-शेषणं पतनमात्रं सविशेषणानि पतनानि पञ्च-विंशतिसङ्ख्यानि तत्र तानि सविशेषाणि वक्ष्य-माणचतुर्भिर्विशेषणैर्विशिष्टानि इति शतं निर्व्वि-शेषणैकमिति एकोत्तरं शतम् । तानि चत्वारि विशेषणानि यथा । गतं गमनमात्रम् । आगतं आगमनम् । प्रतिगतं गत्वैव पुनरागमनं आग त्यैव पुनर्गमनञ्च । इति महाभारते । ८।४१ अः ॥
आगमशास्त्रविशेषः । यथा, मुण्डमालातन्त्रे ।
"डामरं समरं डीनं श्रुतं कालीविलासकम् ।
सप्तकोटिमहाग्रन्था मम वक्त्राद्विनिर्गताः ॥"
डीनडीनकं, क्ली, (डी+भावे क्तः । ततः स्वार्थे कन् । डीनेन सह डीनकं निर्व्विशेषण कुतुचितं वा पतनम् ।) पक्षिणां गतिक्रियाविशेषः । इति जटाधरः । अस्य विवरणं डीनशब्दे द्रष्टव्यम् ॥
डीनावडीनं, क्ली, (डीनेन सह अवडीनम् ।) पक्षिगतिविशेषः । तत्तु एकस्यां गतौ गत्यन्तर-मिश्रणम् । अधःकुतुचितगमनञ्च । इति महा-भारते कर्णपर्व्वटीका ॥

डुण्डुः, पुं, (डुमिति कृत्वा डयते गच्छतीति । डी + डुः ।) डुण्डुभसर्पः । इति त्रिकाण्डशेषः ॥

डुण्डुभः, पुं, (डुण्डुः सन् भातीति । डुण्डु इत्यनु-करणशब्देन भाति वा । भा + कः ।) सर्प-विशेषः । ढोँडा इति भाषा । तत्पर्य्यायः । राजिलः २ इत्यमरः ।१ । ८ । ५ ॥ डुण्डुभः ३ । इति भरतः ॥ नागभृत् ४ डुण्डुः ५ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते ।२।११।२८।
"एकदा स वने घोरं डुण्डुभं जरसान्वितम् ।
अपश्यद्दण्डमुद्यम्य हन्तुं तं समुपाययुः ॥")

डुण्डुलः, पुं, (डुण्डुरिति शब्दं लातीति । ला + कः ।) क्षुद्रपेचकः । तत्पर्य्यायः । क्षुद्रोलूकः २ शाकुनेयः ३ पिङ्गलः ४ वृक्षाश्रयी ५ दृढ-द्रावी ६ विशालाक्षः ७ भयङ्करः ८ । इति राजनिर्घण्टः ॥

डुलिः, स्त्री, (दुलि + पृषोदरादित्वात् साधुः ।) दुलिः । कमठी । इत्यमरटीकायां रायमुकुटः ॥

डुलिका, स्त्री, (डुलिरिव कायतीति । कै + कः । ततष्टाप् ।) खञ्जनाकारपक्षिविशेषः । इति जटाधरः ॥

डुली, स्त्री, (डुलिः + ङीष् वा ।) चिल्लीशाकः । इति राजनिर्घण्टः ॥

डोडी, स्त्री, क्षुपविशेषः । तत्पर्य्यायः । जीवन्ती २ शाकश्रेष्ठा ३ सुखालुका ४ बहुवल्ली ५ दीर्घपत्रा ६ सूक्ष्मपत्रा ७ जीवनी ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । दीपनत्वम् । कफवातकण्ठामयरक्तपित्तार्त्ति-दाहनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

डोमः, पु, स्वनामख्यातास्पृश्यजाति. । यथा,—
"चाण्डालस्यैव डोमस्य ज्ञानकस्य तथा इति ।
दण्डीरस्यैव भण्डीरो भूपुण्डस्य तथाश्रमी ॥
तथामुण्डी लिङ्गधारी समा एते यशस्विनि ।।
स्पृष्ट्वा प्रमादतः स्नात्वा गायत्र्यष्टशतं जपेत् ॥"
इति मत्स्यसूक्ततन्त्रे ३६ पटल. ॥

डोरं, क्ली, हस्तादिबन्धनसूत्रम् । यथा,—
"कोऽनन्त इत्युदीर्य्याथ हृत्वा तत्करपल्लवम् ।
हस्तादाकृष्य तड्डोरं क्षिप्तवान् पावकोपरि ॥"
इति भविष्यपुराणे अनन्तव्रतकथा ॥

डोरकं, क्ली, (डोर + स्वार्थे कन् ।) डोरम् । यथा,
"चतुर्द्दशग्रन्थियुक्तं कुङ्कुमाक्तं सुडोरकम् ।
स्त्रियश्च पुरुषश्चैव बध्नीयात् वामदक्षिणे ॥"
इति भविष्यपुराणे अनन्तव्रतकथा ॥

डोरली, स्त्री, (डोरमिव डयते इति । डी + क्विप् ।) वृहती । इति राजनिर्घण्टः ॥

ढ

ढ, ढकारः । स व्यञ्जनचतुर्द्दशवर्णः । टवर्गचतुर्थ-वर्णश्च । (अर्द्धमात्राकालेनोच्चारणीयः ।) अस्यो-च्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (पाणि-नीयादिषु अस्योच्चारणे जिह्वामध्यभागेन मूर्द्धः स्पर्शः आभ्यन्तरप्रयत्नः । संवारनादघोषा महा-प्राणश्च बाह्यप्रयत्नाः । मातृकान्यासेऽस्य दक्ष-पादाङ्गुलीमूले न्यासक्रिया । वङ्गीयवर्णमाला-याम् ।) तस्य लेखनप्रकारो यथा,—
"ऊर्द्ध्वाधःक्रमतो रेखा वामदक्षिणतो गता ।
ततः सा कुण्डलीरूपा विष्णुशक्तिस्वरूपिणी ॥
महाशक्तिमयी मात्रा ध्यानमस्य प्रचक्ष्यते ।
रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम् ॥
अष्टादशभुजां भीमां महामोक्षप्रदायिनीम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"ढकारं परमाराध्यं या स्वयं कुण्डली परा ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ॥
सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम् ।
रक्तविद्युल्लताकार ढकारं प्रणमाम्यहम् ॥"
तस्य २६ षड्विंशतिनामानि यथा,—
"ढो ढक्का निर्णयः पूर्णो यक्षेशादनदेश्वरः ।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिशिखी नवः ॥
दक्षपादाङ्गुलेर्मूलं सिद्धिदण्डा विनायकः ।
प्रहासा त्रिवेरा ऋद्धिर्निर्गुणो निधनो ध्वनिः ॥
विघ्नेशः पालिनी लक्ष्मधारिणी क्रोड़पुच्छकः ।
एलापुर लगात्मा च विशाखा श्रीमनोरतिः ॥"
इति नानातन्त्रशास्त्रम् ॥

ढः, पुं, (ढौकते उच्चैःशब्देन आवृणोति श्रवणे-न्द्रियमिति । ढौक गत्यावरणयोः + डः ।) ढक्का । (यथा, तन्त्रे ।
"ढो ढक्का निर्णयः पूर्णो यक्षेशादनदेश्वरः ॥")
श्वा । श्वलाङ्गूलम् । इति मेदिनी । ढे, १ ॥ निर्गुणः । ध्वनिः । इत्येकाक्षरकोषः ॥

ढक्कः, पुं, देशविशेषः । इति भूरिप्रयोगः ॥ ढाका इति भाषा ॥

ढक्का, स्त्री, (ढक् इति गभीरशब्देन कायतीति । कै + कः टाप् च ।) वाद्यविशेषः । ढाक इति भाषा । तत्पर्य्यायः । यशःपटहः २ । इत्य-मरः । १ । ७ । ६ ॥ विजयमर्द्दलः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् ।२४७।
"ढक्कामाहत्य मदं वितन्वते करिण इव चिरं पुरुषाः ॥")

ढक्कारी, स्त्री, (ढक्कां जयढक्कावत् गभीरसिंहनादं ऋच्छति समराङ्गणे इति । ऋ + अण् ङीप् च ।) तारिणी । यथा,—
"ढक्कारवा-च ढक्कारी ढक्कारवरवा ढका ॥"
इति कुलसद्भावे तारासहस्रनामस्तोत्रम् ॥

ढण्टी, स्त्री, वाक्यविशेषः । यथा, रुद्रयामले अन्नपूर्णासहस्रनाम कथने ।
"ढण्टीवाक्यस्वरूपा च ढकाराक्षररूपिणी ॥"

ढालं, क्ली, (ढौकते आवृणोति शरीरं अनेन । ढौक + अच् । पृषोदरात् आत्वे लत्वे च साधुः ।) फलकम् । ढालिपञ्चजयकरीति अन्नदाकल्पीय-सहस्रनामविवरणात् ॥

ढाली [न्] त्रि, (ढालमस्त्यस्येति । इनिः ।) ढाल-विशिष्टः । चर्म्मी । यथा,—
"ढालिपञ्चजयकरी ढकारवर्णरूपिणी ॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम् ॥

ढामरा, स्त्री, हंसी । इति धनञ्जयः ॥

ढुण्ढ, अन्वेषणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ढाद्यन्तो दन्त्यनोपधः । ढ-योगान्मूर्द्धन्यः । तेन यगादौ नलोपे ढुढ्यते इत्यादि । ढुण्ढति धनं लोकः । इति दुर्गादासः ॥

ढुण्ढिः, पुं, (ढुण्ढ्यतेऽसौ भक्तैरिति । ढुण्ढ अन्वे-षणे + इन् ।) गणेशः । तन्नामकरणं यथा,—
गणेशं प्रति शिववाक्यम् ।
"अन्वेषणे ढुढिरयं प्रथितोऽस्ति धातुः
सर्व्वार्थढुण्ढिततया भव ढुण्ढिनामा ।
काशीप्रवेशमपि को लभतेऽत्र देही
तोषं विना तव विनायक । ढुण्ढिराज । ॥"
तन्माहात्म्यं यथा,—
"ढुण्ढे । प्रणम्य पुरतस्तव पादपद्मं
यो मां नमस्यति पुमानिह काशिवासी ।
तत्कर्णमूलमधिगम्य पुरादिशामि
तत्किञ्चिदत्र न पुनर्भवतास्ति येन ॥"
"यः प्रत्यहं नमति ढुण्ढिविनायक ! त्वां
काश्यां प्रगे प्रतिहताखिलविघ्नसङ्घः ।
नो तस्य जातु जगतीतलवर्त्ति वस्तु
दुष्प्रापमत्र परत्र च किञ्च नापि ॥"
"प्रथमं ढुण्ढिराजोऽसि मम दक्षिणतो मनाक् ।
आढुण्ढ्य सर्व्वभक्तेभ्य. सर्व्वार्थान् संप्रयच्छसि ॥"
तस्य यात्राविधानं यथा,—
"माघशुक्लचतुर्थ्यान्तु नक्तं व्रतपरायणाः ।
ये त्वां ढुण्ढेऽर्च्चयिष्यन्ति तेऽर्च्च्याः सुरसुरद्वि-षाम् ॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम् ।
शुक्लां शुक्लतिलैर्व्वह्वान् प्राश्नीयाल्लड्डुकान् व्रती ॥
कार्य्या यात्रा प्रयत्नेन क्षेत्रसिद्धिमभीप्सुभिः ।
तस्यां चतुर्थ्यां त्वत्प्रीत्यै ढुण्ढे ! सर्व्वोपसर्गहृत् ॥
ता यात्रां नात्र यः कुर्य्यान्निवेद्य तिललड्डु-कान् ।
उपसर्गसहस्रैस्तु स हन्तव्यो । ममाज्ञया ॥
होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः ।
तस्यां चतुर्थ्यां मन्त्रज्ञस्तस्य मन्त्रः प्रसेत्स्यति ॥"
इति काशीखण्डे । ५० अध्याये ॥

ढोलः, पु, (ढः ढक्का तदाकारं लातीति । ला + क. पृषोदरात् ओत्वे साधुः । ढुल उत्क्षेपे अच् । पृषोदरात् साधु र्वा ।) स्वनामख्यातवाद्यम् । यथा,—
"ढक्काढोलप्रिया नित्या ढोलवाद्यप्रमोदिनी ।
ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी ॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम् ॥

ढौक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) चतुर्द्दशस्वरी । ऋ, अडु-ढौकत् । ङ, ढौकते । इति दुर्गादासः ॥ (आदृतौ । वदनं ढौकते । इति कालिदासः ॥)

ण

ण, णकारः। स व्यञ्जनपञ्चदशवर्णः। टवर्गपञ्चमवर्णश्च ॥ (अर्द्धमात्राकालेनोच्चारणीयः।) अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम् ॥ (शिक्षाग्रन्थादिमते तु अस्योच्चारणे जिह्वामध्येन मूर्द्धः स्पर्शः नासिकायत्नप्रभेदश्च आभ्यन्तरप्रयत्नः। संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादाङ्गुल्यग्रे न्यासक्रिया ॥ वङ्गीयवर्णमालायाम्।) तस्य लेखनप्रकारो यथा,—

"कुण्डलीत्वगता रेखा मध्यतस्तत ऊर्द्धतः।
वामादधोगता सैव पुनरूर्द्ध गता प्रिये। ॥
ब्रह्मेशविष्णुरूपा सा चतुर्व्वर्गफलप्रदा ॥
ध्यानमस्य णकारस्य प्रवक्ष्यामि च तत् शृणु।
द्विभुजां वरदां रम्यां भक्ताभीष्टप्रदायिनीम् ॥
राजीवलोचनां नित्यां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा,—

"णकारं परमेशानि। या स्वयं परकुण्डली।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं देवि। सदा त्रिगुणसंयुतम्।
आत्मादितत्त्वसंयुक्तं महामोहप्रदायकम् ॥"

इति कामधेनुतन्त्रम् ॥

तस्य २४ चतुर्विंशतिनामानि यथा,—

"णो निर्गुणं रतिर्ज्ञानं जम्भनः पक्षिवाहनः।
जया शम्भो नरकजित् निष्कला योगिनीप्रियः ॥
द्विमुखं कोटवी श्रोत्रं समृद्धिर्बोधनी मता।
त्रिनेत्रो मानुषी व्योमदक्षपादाङ्गुलेर्मुखः ॥
माधवः शङ्खिनी वीरो नारायणश्च निर्णयः ॥"

इति नानातन्त्रशास्त्रम् ॥

ण., पु, (णखति गच्छति जानात्यनेन इति। णख गतौ + ड। पृषोदरादित्वात् णत्वम्।) ज्ञानम्। निश्चयः। इत्येकाक्षरकोषः। बिन्दुदेवः। स बुद्धदेवताविशेषः। भूषणम्। गुणवर्ज्जितः। पानीयनिलयः। इति मेदिनी। णे, १ ॥

णक्ष, व्रजे। इति कविकल्पद्रुमः ॥ (भ्वा-परं-सक-सेट्।) नक्षति। व्रजो गतिः। इति दुर्गादासः ॥

णख, गतौ। इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट्।) प्रणखति। इति दुर्गादासः ॥

णट, नृत्यहिंसयोः। इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सकं च-सेट्।) प्रणटति। णोपदेशविधौ वर्ज्जनेऽपि अस्य परस्य चेह पाठः केषाञ्चिदनुरोधात्। अत्र नृत्यं साभिनयनर्त्तनम्। इति दुर्गादासः ॥

णट, म नृतौ। इति कविकल्पद्रुमः ॥ (भ्वा-परं-अक-सेट्।) म, प्रणाटयति। नृताविति नृत्यतेरौणादिकक्विप्प्रत्यये रूपम्। अत्र मिकारानुबन्धेनैवेष्टसिद्धेः पूर्व्वे नृत्यग्रहणमर्थभेदार्थम्। तेन पूर्व्वे नृत्यं साभिनयनर्त्तनम् इह तु नृतिरभिनयरहितनर्त्तनमिति। यथा पूर्व्वस्य। स्फटिककटकभूतिर्नाटयत्येव शैलः। इति माघः। अस्य तु। नाट्येन केन नटयिष्यति दीर्घमायुरिति मुरारिः। इति दुर्गादासः ॥

णद, श्लिष्टोक्तौ। इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट्।) श्लिष्टोक्तिरव्यक्तशब्दः। नदति घण्टा। इति दुर्गादासः ॥

णद, क भाषि। इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट्।) क, नादयति। इति दुर्गादासः ॥

णभ, ऌ ङ हिंसे। इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट्।) ऌ, अनभत्। ङ, नभते। इति दुर्गादासः ॥

णभ, य श हिंसे। इति कविकल्पद्रुमः ॥ (दिवा-क्र्या-च-पर-सकं-सेट्।) य, नभ्यति। श नभ्नाति। इति दुर्गादासः ॥

णम, औ शब्दे। नतौ। इति कविकल्पद्रुमः। (भ्वा-परं-अक-नतौ सकं अक च अनिट्।) औ, नन्ता। शब्दार्थो न भाषायाम्। नतिरिह नमस्कारो नम्रीभावश्च। नमति गुरुं लोकः। नमन्ति फलिनो वृक्षाः। अमन्तोऽप्यस्य ज्वलह्वलह्मलेत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः। नमयति नामयति प्रणमयति। अपुच्छमवनामित बधिरकर्णाचाप कृतः। इत्यादौ अवनमा अवनाम घञ् ततो अवनाम करोतीति णौ रूपम्। इति दुर्गादासः ॥

णय, ङ गतौ। रक्षे। इति कविकल्पद्रुमः ॥ (दिवा-आत्मं-सक-सेट्।) ङ, नयते। इति दुर्गादासः ॥

णर्द, शब्दे। इति कविकल्पद्रुमः ॥ (भ्वा-परं-अक-सेट्।) णोपदेशविधावस्य वर्ज्जनेऽपि इह पाठः केषाञ्चिदनुरोधात्। प्रणर्दति। इति दुर्गादासः ॥

णल, ज बन्धे। इति कविकल्पद्रुमः ॥ (भ्वा परं सक सेट्।) ज, नाल, नलः। नलति केशं लोकः बध्नाति इत्यर्थः। गन्धे इति केचित्। गन्धोऽदर्शनमिति गोविन्दभट्टः। इति दुर्गादासः ॥

णश, ऌ य ञ नाशे। इति कविकल्पद्रुमः ॥ (दिवा-पर-अक सेट्-अनिट् वान्।) नाशो दर्शनाभावः। इति शाब्दः। लुक्कायनमिति सर्व्वस्वः। ऌ, अनेशत् अनाशत्। य, नश्यति शत्रुस्तिरोभवति इत्यर्थः। ञ, नशिष्यति नङ्क्ष्यति। इति दुर्गादासः ॥

णस, ङ कृतौ। इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सक च-सेट्।) कृतिरिह कुटिलीभावस्तत्करणञ्च। ङ, नसते खलः कुटिलः स्यादित्यर्थः। नसते लतां वायुः कुटिलीकरोतीत्यर्थः। इति दुर्गादासः ॥

णह, व ञ औ बन्धे। इति कविकल्पद्रुमः ॥ (दिवा-उभ सक-अनिट्।) य ञ, नह्यति नह्यते। औ, अनद्ध। इति दुर्गादासः ॥

णाथ, ऋ ङ आशिषि। उपतापैश्वर्य्ये। इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-अक च-सेट्।) णोपदेशविधौ वर्ज्जनेऽप्यस्य पाठः कस्यचिदनुरोधात्। ऋ, अननाथत्। ङ, प्रणाथते। इह उपतापः। आशीरिष्टार्थस्याशंसनम्। ङित्त्वेऽपि शपथाशीर्गत्यनुकारे इति नियमादाभ्यामाशिषोऽन्यत्र परस्मैपदम्। नाथति शत्रु वली उपतापयति इत्यर्थः। नाथते श्रियं लोकः आशंसत इत्यर्थः। नाथति धनी ईश्वरः स्यादित्यर्थः। नाथति भूप भूमिं विप्रः प्रार्थयतीत्यर्थः। मार्गणैरथ तव प्रयोजनं नाथसे किमु न भूभृतः पतिमिति भारवौ। याचनमप्याशीर्विशेषः। आशिषि नित्यमात्मनेपदमन्यत्र विभाषेति केचित्। इति दुर्गादासः ॥

णाध, ऋ ङ नाथे। इति कविकल्पद्रुमः ॥ (भ्वा आत्मं-सक-सेट्।) णोपदेशविधावस्य वर्ज्जनेऽपि इह पाठः कस्यचिदनुरोधात्। ऋ, अननाधत्। ङ, नाधते नाथो दयाशीरैश्वर्य्यार्थनानि। इति दुर्गादासः ॥

णास, ऋ ङ ध्वाने। शब्द इति यावत्। इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट्।) ऋ, अननासत्। ङ, नासते। इति दुर्गादासः ॥

णिक्ष, चुम्बने। इति कविकल्पद्रुमः ॥ (भ्वा-परं-सक-सेट्।) निक्षति। इति दुर्गादासः ॥

णिज, इ स ङ शुद्धौ। इति कविकल्पद्रुमः ॥ (अदा-आत्म-सक सेट्-इदित्।) शुद्धिरिह शुद्धीकरणम्, इ, कर्म्मणि निञ्ज्यते। स ङ, प्रणिङ्क्ते। दक्षिणी, यानां विप्राणां समूहः इति हलायुधः। इति दुर्गादासः ॥

णिज, लि इर् ञ औ पोषे। शुद्धौ। इति कविकल्पद्रुमः ॥ (ह्वा-उभ-सक-अनिट्।) लि ञ नेनेक्ति नेनिक्ते। इर्, अनिजत् अनैक्षीत्। औ, नेक्ता। इति दुर्गादासः ॥

णिद, इ कुत्सने। इति कविकल्पद्रुमः ॥ (भ्वा-परं-सक-सेट् इदित्।) णिसनिन्दनिक्षां णोपदेशफलं चिन्त्यम्। णत्वविकल्पने स्वरूपग्रहणात्। केचित्तु कृतिविकल्पमिच्छन्ति त्यादौ तूपसर्गात् समासे उपसर्गात् समासे त्यादौ णित्यमित्यर्थः। यथा, प्रणिन्दकः प्रनिन्दकः। प्रणिन्दति। भट्टौ तु त्यादावपि विकल्पो दृश्यते। इ, कर्म्मणि निन्द्यते। निन्दति दुष्टं लोकः। इति दुर्गादासः ॥

णिद, ऋ ञ सन्निधौ। कुत्सने। इति कविकल्पद्रुमः ॥ (भ्वा-उभ-अक-कुत्सने-सक-सेट्-ऋदित्।) सन्निधिः सन्निकर्षः। ऋ, अनिनेदत्। ञ, नेदति नेदते दयालुः दीनं। निनिदुः। इति दुर्गादासः ॥

णिल, श गहने। इति कविकल्पद्रुमः ॥ (तुदा-पर-सक-सेट्।) ह्रस्वी। गहनं दुर्बोधः। श, निलति शास्त्रं कुधीः दुःखेन जानातीत्यर्थः। इति दुर्गादासः ॥

णिव, इ सेके। इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट्। इदित्।) ह्रस्वी। इ, निन्व्यते। इति दुर्गादासः ॥

णिश, शीते। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) शीते समाधौ। नेशति योगी। निनिशतुः। इति दुर्गादासः॥

णिष, उ सेके। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्। उदित्वात् क्वावेट्।) उ, नेषित्वा निष्ट्वा। इति दुर्गादासः॥

णिस, इ ङ ल चुम्बने। इति कविकल्पद्रुमः॥ (अदा-आत्मं-सकं-सेट्।) ल ङ, निंस्ते। इ, निंस्यते। इति दुर्गादासः॥

णी, ञ प्रापणे। इति कविकल्पद्रुमः॥ (भ्वा-उभं-द्विकं-अनिट्।) णोपदेशपाठो नादित्वेन प्रायम इति णत्वार्थः। प्रणयति। एव सर्व्वत्र। प्रापणमिह ण्यन्तस्य रूपम्। तथा च। गृह्णाति लम्भयति च देहत्यपि नयत्ययम्। इति क्रियानिर्घण्टः॥ ञ, नयति नयते गां वनं गोपः प्रापयतीत्यर्थः। इति दुर्गादासः॥

णील, वर्णे। इति कविकल्पद्रुमः॥ (भ्वा परं-अकं-सकं च-सेट्।) वर्णं इह कृष्णवर्णीभावस्तत्करणञ्च। नीलति पत्रं तमालस्य। नीलति सूत्रं तन्तुवायः। इति दुर्गादासः॥

णीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) नीवति लोकः स्थूलः स्यादित्यर्थः। इति दुर्गादासः॥

णु, ल स्तुतौ। इति कविकल्पद्रुमः॥ (अदा-परं-सकं-सेट्।) ल, नौति। इति दुर्गादासः॥

णुद, ञ श औ प्रेरणे। इति कविकल्पद्रुमः॥ (तुदा-उभं-सकं-अनिट्।) ञ श, नुदति नुदते शरं योधः। औ, नोत्ता। इति दुर्गादासः॥

णू, शि स्तवने। इति कविकल्पद्रुमः॥ (तुदा-परं-सकं-सेट्।) ह्रस्वान्तोऽयमिति वररुचिः। शि, नुवति। अनुवीत्। इति दुर्गादासः॥

णेद, ऋ ञ सन्निधौ। कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा-उभं-अकं-सकं च-सेट्।) सन्निधिः सन्निकर्षः। ऋ, अनिनेदत्। ञ, नेदति नेदते दयालुं दीनः। निनेदुः। इति दुर्गादासः॥

णेष, ऋ ङ गते। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-सकं-सेट्।) ऋ, अनिनेषत्। ङ, नेषते निनेषे। गणो गतिः। इति दुर्गादासः॥ *॥ एते धातवः स्वभावतो दन्त्यनादयो णोपदेशेन मूर्द्धन्यणादाः॥

त

त, तकारः। स व्यञ्जनषोडशवर्णः। तवर्गप्रथमवर्णश्च। (अर्द्धमात्राकालेनोच्चार्य्यः।) अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (अस्योच्चारणे दन्तमूलेन जिह्वाग्रस्य स्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासघोषाः बाह्यप्रयत्नाः। मातृकान्यासेऽस्य वामस्फिचि न्यासक्रिया स्यात्। बङ्गीयवर्णमालायां) तस्य लेखनप्रकारो यथा,—

"आदौ बिन्दुस्ततो मध्ये कुण्डलीत्वमवाप्य सा।
दक्षाद्वामगता नित्या ब्रह्मविष्णुशिवरूपिणी॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!।
चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम्॥
सदा षोडशवर्षीयां रक्ताम्बरधरां पराम्।
नानालङ्कारभूषां वा सर्व्वसिद्धिप्रदायिनीम्॥
एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"तकारं चञ्चलापाङ्गि। स्वयं परमकुण्डली।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा॥
त्रिशक्तिसहितं वर्णं आत्मादितत्त्वसंयुतम्।
त्रिबिन्दुसहितं वर्णं पीतविद्युत्समप्रभम्॥"

तस्य ३२ द्वात्रिंशन्नामानि यथा,—
"तः पूतना हरिः शुद्धिः शक्ती शक्तिर्जटी ध्वजा।
वामस्फिक्वामकटी च कामिनी मध्यकर्णकः॥
आषाढ़ी तण्डुलश्च कामिका पृष्ठपुच्छकः।
रत्नकश्च श्यामसुखी वाराही मकरोऽरुणा॥
सुगतोऽर्द्धसुखा युद्धजानुश्च क्रोड़पुच्छकः।
गन्धो विश्वामरश्छत्त्रश्चानुराधा च सौरकः॥
जयन्तिपुलको भ्रान्तिरनङ्गमदनातुरा॥"
इति नानातन्त्रशास्त्रम्॥

तं, क्ली स्त्री, (त+भावे डः।) तरणम्। (तरति भवसागरमनेनेति। तॄ+करणे डः।) पुण्यम्। इति मेदिनी। ते, १॥

तः, पुं, (तर्द्दति तम्यति वा छिनत्ति भयादिहरणेन जनानिति। तर्द्द तम्ब वा+डः।) चौरः। अमृतम्। पुच्छम्। क्रोड़ः। म्लेच्छः। इति मेदिनी। ते, १॥ गर्भः। शठः। इति शब्दरत्नावली॥ रत्नम्। सुगतः। योधः। गौरविवर्ज्जितपुच्छम्। क्रोड़पुच्छम्। इत्येकाक्षरकोषः॥

तक, सहने। हासे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-हासे अकं-सेट्) तकति। इति दुर्गादासः॥

तक, इ दौस्थ्ये। इति कविकल्पद्रुमः (भ्वा-परं-अकं-सेट्।) दौस्थ्यं दुःखेन जीवनम्। इ, तङ्क्यते दरिद्रेण दुःखेन जीव्यते इत्यर्थः। तङ्कति दीनः दुःखेन जीवति इत्यर्थः। इति दुर्गादासः॥

तकिलः, त्रि, (तक्+"मिथिलादयश्च।" उणां। १।५६। इति इलच् नलोपश्च।) धूर्त्तः। इत्युणादिकोषः॥

तकिला, स्त्री, (तकिल+टाप्।) औषधम्। इत्युणादिकोषः॥

तक्यः, त्रि, (तकं हासमर्हतीति। तक+यत्।) हास्यः। (तक सहने+"तकिशसि चयति जनिभ्यो यद्वाच्यः।" ६।४।६५। इत्यस्य सूत्रस्य वार्त्तिकोक्त्या यत्।) सहनीयः॥

तक्रं, क्ली, (तनक्ति सङ्कोचयति दुग्धं पादाम्बुदधिरूपेण परिणमयतीत्यर्थः। "स्फायितञ्चीति।" उणां। २।१३। इति रक् न्यङ्क्वादित्वात् कुत्वं च।) पादाम्बुसंयुतदधि। इत्यमरः।२।९।५३॥

तत्पर्य्यायः। गोरसजम् २ घोलम् ३ कालसेयम् ४ विलोड़ितम् ५ दण्डाहतम् ६ अरिष्टम् ७ अम्लम् ८ उदश्वित् ९ मथितम् १० द्रवः ११। इति राजनिर्घण्टः॥ तत् पञ्चविधम्। तेषां भिन्नानि नामानि लक्षणानि च यथा,—

"सरं निर्जलं घोलं मथितं त्वसरोदकम्।
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम्॥
छच्छिका सरहीनं स्यादच्छा प्रचुरवारिका॥"

तेषां गुणाः।
"वातपित्तहरं घोलं मथितं कफपित्तनुत्।
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु॥
वीर्य्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम्।
ग्रहण्यादिमतां पथ्यं भवेत् संग्राहि लाघवात्॥
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम्।
कषायोष्णविकाशित्वाद्रौक्ष्याच्चापि कफापहम्॥
न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः॥
उदश्वित् कफकृद्बल्यं श्रमघ्नं परमं मतम्।
छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी॥
वातनुत् कफकृत् सा तु दीपनी लवणान्विता॥"

अथोद्धृतघृतस्तोकोद्धृतघृतानुद्धृतघृतानां तक्राणां गुणाः।
"समुद्धृत घृतं तक्रं पथ्यं लघु विशेषतः।
स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफापहम्॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम्॥" *॥

अथ दोषविशेषे व्याधिविशेषे च तक्रविशेषाः।
"वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम्।
पित्ते स्वादुसितायुक्तं व्योषमरिचं कफे॥
हिङ्गुजीरयुतं घोलं सैन्धवेन सुसंयुतम्।
भवेदतीव वातघ्नमर्शोऽतीसारहृत् परम्॥
रुच्यं पुष्टिदं बल्यं वस्तिमूलविनाशनम्।
मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम्॥" *॥

अथामपक्वतक्रगुणाः।
"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च।
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते॥" *॥

अथ तक्रसेवननिमित्तानि।
"शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च।
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम्॥
तत्तु हन्ति गरच्छर्द्दिप्रसेकविषमज्वरान्।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान्॥
मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः।
श्वित्रकोठघृतव्यापत्कुष्ठशोथतृषाकृमीन्॥"

अथातक्रविषयाः।
"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्ब्बले।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके॥" *॥

अथ गव्यादीनां तक्राणां विशिष्टगुणाः।
"यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत्॥"
इति भावप्रकाशः॥

("गव्यन्त्रिदोषशमनं तक्रं श्रेष्ठन्तदुच्यते ।
दीपनं रुचिकृन्मेध्यमर्शोदरविकारजित् ॥"
इति गव्यतक्रगुणाः ॥
"माहिषं कफकृत् किञ्चिद्घनं शोफकरं नृणाम् ।
प्लीहार्शोग्रहणीगुल्मपाण्ड्वामयविनाशनम् ॥"
इति माहिषतक्रगुणाः ॥
"छागलं लघु सस्निग्धं त्रिदोषशमनं परम् ।
गुल्मार्शोग्रहणीशूलं पाण्ड्वामयविनाशनम् ॥"
इति छागीतक्रगुणाः ॥
"तथाच त्रिविधं तक्रं कथ्यते शृणु पुत्रक ! ।
यथायोगेन तत् सम्यक् शस्यते येषु रोगिषु ॥
समुद्धृतघृतं तक्रमर्द्धोद्धृतघृतञ्च तत् ।
अनुद्धृतघृतञ्चान्यदित्येतत्त्रिविधं मतम् ॥
सर्व्वं लघु च पथ्यञ्च त्रिदोषशमनं परम् ।
ततः परं पथ्यतमं क्रमेण समुदीरितम् ।
समुद्धृतघृतन्तक्रं लघु पथ्यतमं मतम् ॥
गरोदरार्शोग्रहणीपाण्डुरोगज्वरातुरे ।
वर्च्चोमूत्रग्रहे वापि प्लीहाय्यामप्रमेहिषु ॥
हितं संप्रीणनं बल्यं पित्तरक्तविवोधकृत् ॥
अर्द्धोद्धृतघृतं तस्मात् पथ्यं गुरु कफप्रदम् ।
मधुरं पित्तरक्तघ्नं श्रमघ्नं परमं मतम् ॥
अनुद्धृतघृतं सान्द्रं गुरु विद्यात् कफावहम् ।
बलप्रदन्तु क्षीणानामामशोफातिसारकृत् ॥"
इति त्रिविधतक्रगुणाः ॥*॥
"तक्रं ग्राहि कषायाम्लं वीर्य्योष्णं दीपनं लघु ।
श्रमापहरणं स्निग्धं ग्रहण्यर्शोऽतिसारनुत् ॥
इति तक्रगुणाः प्रोक्ता न दद्याद् यत्र तच्छृणु ।
वाते शोषे च क्षीणानां नोष्णकाले शरत्सु च ॥
संमूर्च्छाभ्रमतृष्णासु तथाच रक्तपित्तके ।
न शस्तं तक्रपानञ्च करोति विविधान् गदान् ॥"
एतेषां तक्रं निषिद्धम् ॥
इति हारीते प्रथमस्थानेऽष्टमेऽध्याये ॥*॥)

तक्रकूर्च्चिका स्त्री, (तक्रजाता कूर्च्चिका ।) तक्रयोगेन क्षणादुग्धात् जाता । छाना इति भाषा । अस्या गुणा । मलवद्धवातकारित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (यथा सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"ग्राहिणी वातला रूक्षा दुर्ज्जरा तक्रकूर्च्चिका ॥")

तक्रमांस, क्ली, (तक्रयोगेन पाचितं मांसम् ।) व्यञ्जनविशेषः । एखनि इति पारस्य भाषा । तस्य पाकप्रकारो यथा,—
"पाकपात्रे घृतं दत्त्वा हरिद्राहिङ्गु भर्ज्जयेत् ।
छागादेः सकलस्यापि खण्डान्यष्टौ च भर्ज्जयेत् ॥
सिद्धियोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा ।
राजिकादियुते तक्रे मांसखण्डानि पातयेत् ॥"
तस्य गुणा ।
"तक्रमांसन्तु वातघ्नं लघु रुच्यं बलप्रदम् ।
कफघ्नं पित्तलं किञ्चित् सर्व्वाहारस्य पाचनम् ॥"
इति भावप्रकाशः ।

तक्राटः, पुं, (तक्राय तक्रोत्पादनाय अटतीति । अट्+अच् ।) मन्थानदण्डः । इति हारावली । ३४ ॥

तक्ष, त्वचो याद्वे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सक-सेट् ।) त्वचो याद्दचर्म्मणो ग्रहणम् । तक्ष त्वचने इति प्राञ्चः । त्वचनं संवरणमिति रमानाथः । तक्षति कायं वर्म्मणा भटः । इति दुर्गादासः ॥

तक्ष, ऊ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सक-वेट् ।) ऊ, तक्षिष्यति तक्ष्यति । कार्श्यं कृशकरणम् । तक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्ष, ऊ न तक्षे । इति कविकल्पद्रुमः ॥ (स्वां-पर-सक-वेट् ।) तक्षः कृशकरणम् । ऊ, तक्षिष्यति तक्ष्यति । न, तक्ष्णोति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्षकः, पुं, (तक्षतीति । तक्ष+ण्वुल् ।) पातालस्थाष्टनागान्तर्गतनागविशेषः । स कश्यपात् कद्रुगर्भे जातः इन्द्रसखः । अस्य वासः खाण्डववने आसीत् । अयं परीक्षितं दष्टवान् । इति श्रीभागवतम् ॥ (अयं हि क्षपणकरूपधारी उतङ्कस्य मुनेर्गुरुदक्षिणार्थमानीते कुण्डले अपहृत्य नागलोकं गतवान् । यथा, महाभारते । १ । ३ । १२७ ।
"तस्य तक्षको दृढ़मासन्नः स तं जग्राह । गृहीतमात्रः स तद्रूपं विहाय तक्षकस्वरूपं कृत्वा सहसा धरण्यां विवृतं महाविलं प्रविवेश ॥"
तक्ष तनूकरणे+"क्वुन् शिल्पिसंज्ञयोः ।" उणां । २ । ३२ । इति क्वुन् ।) त्वष्टा । इत्यमरः । ३ । ३ । ४ ॥ विश्वकर्म्मा । इति शब्दरत्नावली ॥ द्रुमभेदः । इति हेमचन्द्रः ॥ सूत्रधारः । इत्यमरटीकासारसुन्दरी ॥ (स्वनामख्यातः प्रसेनजित्-पुत्रः । यथा, भागवते । ९ । १२ । ८ ।
"ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः ॥"
छेदके, त्रि । यथा, रामायणे । २।८०।२ ।
"तथा वर्द्धकयश्चैव मार्गिणो वृक्षतक्षकाः ॥")

तक्षण, क्ली, (तक्ष तनूकरणे+भावे ल्युट् ।) कृशकरणम् । (यथा, मनुः । ५ । ११५ ।
"द्रवाणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ॥")

तक्षणी, स्त्री, (तक्ष्यतेऽनेनेति । तक्ष+करणे ल्युट् । टित्त्वात् ङीप् ।) वासी अस्त्रम् । इति शब्दरत्नावली ॥

तक्षशिला, स्त्री, देशविशेषः । इति सिद्धान्तकौमुदी ॥ (यथा, महाभारते । १।३।२२ ।
"तेनैवमुक्ता भ्रातरस्तस्य तथा चक्रुः स तथा भ्रातॄन् सन्दिश्य तक्षशिलां प्रत्यभिप्रतस्थे ॥")

तक्षा, [न्] पुं, (तक्षति तनूकरोतीति । तक्ष+"कनिन् युवृषितक्षिराजीति ।" उणां १।१५६ । इति कनिन् ।) त्वष्टा । इत्यमरः । २।१०।९ ॥ (यथा, माघे । १२ । २५ ।
"सस्ताङ्गसन्धौ विगताक्षपाटवे
रुजा निकामं विकलीकृते रथे ।
"आप्तेन तक्ष्णा भिषजेव तत्क्षणं
प्रचक्रमे लङ्घनपूर्व्वकः क्रमः ॥")

तग, इ स्खलने । कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-गतौ तु सकं-सेट् ।) इ, कर्म्मणि तङ्ग्यते । इति दुर्गादासः ॥

तगर, नदीवृक्षः । पिण्डतगर इति कोङ्कणे प्रसिद्धः । तगरमूल इति ख्यातञ्च । तत्पर्य्यायः । कालानुसारिवा २ वक्रम् ३ कुटिलम् ४ शठम् ५ महोरगम् ६ नतम् ७ जिह्मम् ८ दीपनम् ९ तगरपादिकम् १० । इति रत्नमाला ॥ विनम्रम् ११ कुञ्चितम् १२ वक्रम् १३ नहुषाख्यम् १४ दण्डहस्तम् १५ बर्हणम् १६ पिण्डीतगरकम् १७ पार्थिवम् १८ राजहर्षणम् १९ कालानुसारकम् २० क्षत्रम् २१ दीनम् २२ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । दृष्टिदोषविषार्त्तिभूतोन्मादभयनाशित्वम् । पथ्यत्वञ्च ॥ आह्लादत्वं । इति राजनिर्घण्टः ॥ गन्धद्रव्यविशेषः । तस्य पर्य्यायगुणाः ।
"कालानुसार्य्यं तगरं कठिनं लघु सन्नतम् ।
अपरं पिण्डतगरं दण्डहस्ति च बर्हणम् ॥
तगरद्वयमुष्णं स्यात् स्वादु स्निग्धं लघु स्मृतम् ।
विषापस्मारमूर्द्धाक्षिरोगदोषत्रयापहम् ॥"
इति भावप्रकाशः ॥

तगरः, पुं, (तं क्रोड़भागं गिरतीति । गॄ+अच् ।) पुष्पवृक्षविशेषः । टगर इति भाषा । तत्पर्य्यायः । सितपुष्पः २ । कालपर्णः ३ कटुच्छदः ४ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । १०४ । ८५ ।
"प्रियङ्गुचन्दनाभ्याञ्च विल्वेन तगरेण च ।
पृथगेवानुलिम्पेत केशरेण च बुद्धिमान् ॥")
मदनवृक्षः । इति राजनिर्घण्टः ॥

तगरपादिक, क्ली, (तगरस्य पादो मूलदेश इव विद्यतेऽत्र इति ठन् ।) तगरम् । इति रत्नमाला ॥

तङ्कः, पुं क्ली, (टङ्क+पृषोदरात् साधुः ।) पाषाणदारणः । इत्यमरटीकायां रमानाथः ॥ (तकि कृच्छ्रजीवने+भावे घञ् ।) प्रियविरहजस्तापः । भयम् । इति लिङ्गादिसंग्रहटीकायां भरतः ॥

तन्वी, स्त्री, (तं पुच्छाकारं जवति गच्छतीति । जु+क्विप् ङीप् ।) पिष्टपर्णी । इति राजनिर्घण्टः ॥

तट, उच्छ्राये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अक-सेट् ।) उच्छ्राय उच्चीभावः । तटति पुलिनम् । इति दुर्गादासः ॥

तट, क आघाते । इति कविकल्पद्रुमः ॥ (चुरां-पर-सक-सेट् ।) क, ताटयति । इति दुर्गादासः ॥

तटं, क्ली, (तटति उच्छ्रितं भवतीति । तट उच्छ्राये+पचाद्यच् ।) क्षेत्रम् । इति मेदिनी । टे, १६ ॥ (प्रदेशः । यथा, महाभारते । ३ । ८६ । २ ।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥")

तट, त्रि, (तटति उच्छ्रितो भवतीति । तट्+अच् ।) तीरम् । इत्यमरः । १ । १० । ७ ॥

तड् इति भाषा ॥ (यथा, हरिवंशे । ६७५५ ।
"कर्णधमार्गौ भावेते ह्रदस्यास्य तटावुभौ ।"
महादेवे, पु । सर्व्वोच्छ्रितत्वादस्य तथात्वम् ।
यथा, महाभारते । १२ । २८४ । ३६ ।
"नमस्तटाय तथ्याय तटानाम्पतये नमः ॥")
तटस्थं, क्ली, लक्षणविशेषः । तस्य स्वरूपं यथा, वह्निमत्त्वे सति तद्बोधकत्वम् । तथाच ।
"स्वरूप तटस्थ द्विधालक्षणं स्यात्
स्वरूपस्य बोधो यतो लक्षणाभ्याम् ।
स्वरूपे प्रविष्टात् स्वरूपेऽप्रविष्टात्
यथा काकवन्तो गृहाः खं विलक्ष ॥"
इति वेदान्तकारिका ॥
(तटे तिष्ठतीति । स्था+कः ।) तटस्थिते, त्रि ॥ (उदासीनः । यथा, नैषधे । ३ । ५५ ।
"धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्गया
मया तटस्थस्त्वमुपद्रुतोऽसि ॥"
समीपस्थः । यथाह बलः ।
"तटस्थः स्यादुदासीने तीरस्थनिकटस्थयोः ॥")
तटाकः, पुं, (तटमकति गच्छतीति । अक+"कर्म्मण्यण् ।"३ । २ । १ । इत्यण् ।) तड़ागः । पद्मादियुक्तसरः । इति शब्दरत्नावली । (यथा, वैराग्यशतके । ४६ ।
"प्रादेशमात्रमुदरं परिपूरयितुं कियानयं यत्नः ।
चुलकेनाम्भः पातुं खनितव्यः किं तटाकोऽपि ॥")
तटिनी, स्त्री, (तटमस्त्यस्या इति । तट+"अत इनिठनौ ।" ५ । २ । ११५ । इति इनिस्ततो ङीप् ।) नदी । इत्यमरः । १।१०।३० ॥
(यथा, आर्य्यासप्तशत्याम् । ६६२ ।
"हृत्वा तटिनि । तरङ्गैर्भमितस्त्वंक्षेप्य नाश्रये
निहितः ।
फलदलवल्कलरहितत्वयान्तरिक्ते तरुस्त्यक्तः ॥")
तटी, स्त्री, (तटति उच्छ्रिता भवतीति । तट+अच् । ङीष् ।) तीरम् । इत्यमरः । १।१०।७ ॥
(यथा, साहित्यदर्पणे । ३ । ८६ ।
"मालयश्च स्तनाश्च नद्यादीनां तटी तथा ॥")
तड, द ड आघाते । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सकं-सेट् ।) द, तडयते । ड, तड्डते । इति दुर्गादासः ॥
तड, क लिपि । आघाते । इति कविकल्पद्रुमः ॥ (चुरा-परं-अकं-सकं च-सेट् ।) क, ताडयति । लिपि दीप्तौ । इति दुर्गादासः ॥
तड़गः, पुं, (तडयते आहन्यते ऊर्म्मिभिरिति । तड़+आगः । पृषोदरादित्वात् आलोपे साधुः ।) तड़ागः । इति द्विरूपकोषः ॥
तड़ाकः, पुं, (तड्यते आहन्यते ऊर्म्मिमालाभिरिति । तड़ि आघाते+"पिनाकादयश्च ।" उणा ४ । १५ । इति आकप्रत्ययेन निपातनात् साधुः ।) तड़ागः । इति शब्दरत्नावली ॥
तडाका, स्त्री, (तडाक+स्त्रियां टाप् ।) नदीसमुद्रादीनां सटमागः । (तडि आघाते+भावे आकः ।) आघातः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (प्रभा । इत्युज्ज्वलदत्तः । ४ । १५ ॥)
तड़ागः, पुं क्ली, (तड+तड़ागादयश्च । इति आगप्रत्ययेन निपातनात् साधुः ।) यन्त्रकूटकः । इति मेदिनी । गे, ३६ ॥ (तड्यते आहन्यते ऊर्म्मिमालाभिरिति । तडि आघाते+कर्म्मणि घाकः ।) पद्मादियुक्तं सरः । तत्पर्य्यायः । पद्माकरः २ । इत्यमरः । १ । १० । २८ ॥ तडाकः ३ तटाकः ४ । इति शब्दरत्नावली ॥ तड़गः ५ । इति द्विरूपकोषः ॥ शतधनुष्पत्रिंशत्परिमाणजलाशयः । चतुर्द्दिक्षु पञ्चचत्वारिंशद्धस्तान्यूनतायां सहस्रहितयधस्तान्यूनत्वेन तड़ागः । इति नयवर्द्धमानधृतो वशिष्ठः ॥ * ॥ तस्य जलगुणाः । वायुकारित्वत् । स्वादुत्वम् । कषायत्वम् । पाके कटुत्वम् । शिशिरहिमकाले प्रशस्तत्वञ्च । इति राजवल्लभः ॥ * ॥ तस्योत्सर्गविधिर्य्यथा,—
पुलस्त्य उवाच ।
"शृणु राजन्महाबाहो । तड़ागादिषु यो विधिः ।
पुराणेष्विति तिष्ठासेषु मन्यते राजसत्तम ! ॥
प्राप्य पक्षं शुभे शुक्लमागते चोत्तरायणे ।
पुण्येऽह्नि विप्रैः क्रियते कृत्वा ब्राह्मणवाचनम् ॥
प्राक्प्रस्रवणादम्भस्तड़ागस्य समीपतः ॥
चतुर्हस्तसमा वेदी चतुरस्रा समन्ततः ।
तथा षोड़शहस्तः स्यान्मण्डपश्च चतुर्म्मुखः ॥
वेद्या उत्तरतो गर्त्तारत्निमात्रा तु मेखला ।
नवसप्ताथवा पञ्च योनिवक्रा नृपात्मज । ॥
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलविस्तृता ।
सर्व्वे स्वहस्तमात्राः स्युस्त्रिपर्व्वोच्छ्रितमेखलाः ॥
सर्व्वे च सर्व्ववर्णाः स्युः पताकाध्वजसंयुताः ।
अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानि च ॥
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥
शुभास्तत्राष्ट होतारो द्वारपालास्तथापरे ।
अष्टौ तु जापकाः कार्य्या ब्राह्मणा वेदपारगाः ॥
सर्व्वलक्षणसम्पूर्णा मन्त्रविद्विजितेन्द्रियाः ।
कुलशीलसमायुक्ताः स्थापिता द्विजसत्तमाः ॥
प्रतिगर्त्तेषु कलसा यज्ञोपस्कारणानि च ।
व्यजनञ्चासनं शुभ्रं ताम्रपात्रं सुविस्तरम् ॥
आचार्य्यः प्रक्षिपेद्भूम्यामनुचक्रं विचक्षणः ।
चारत्निमात्रो यूपः स्यात् क्षीरिवृक्षविनिर्म्मितः ॥
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥
हेमालङ्कारिणः कार्य्याः पञ्चविंशतिरृत्विजः ॥
कुण्डलानि च हैमानि केयूरकटकानि च ।
तथाङ्गुलीपवित्राणि वासांसि विविधानि च ॥
दद्युः समानि सर्व्वेषामाचार्य्ये द्विगुणं पुनः ।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत् कृतम् ॥
सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यदुन्दुभौ ।
तथा कुलीरमण्डूका वायसः शिशुमारकः ॥
एवमासाद्य तत् सर्व्वं स्वर्णपात्रे विशाम्पते ! ।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥
सर्व्वौषध्युदकस्नातः पाठितो वेदपुङ्गवैः ।
यजमानः सपत्नीकः पुत्त्रपौत्त्रसमन्वितः ॥
पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् ।
ततो मङ्गलशब्देन भेरीणां निस्वनेन च ॥
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन चार्च्चितम् ।
षोड़शारं ततश्चक्रं पद्मगर्भं सुशोभनम् ॥
वेद्यामुपरि तत् कृत्वा ग्रहान् ग्रहपतींस्तथा ।
संन्यसेत् सर्व्वतः सर्व्वान् प्रतिदिक्षु विचक्षणः ॥
तत् पात्रं स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितम् ।
ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः ॥
विनायकञ्च विन्यस्य कमलामम्बिकां ततः ।
शान्त्यर्थं सर्व्वलोकानां भूतग्राममशेषतः ।
पुष्पभक्ष्यफलैर्युक्तमेव कृत्वाधिवासनम् ।
कुम्भांश्च रत्नगर्भांस्तु वासोभिः परिवेष्टयेत् ॥
गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः ।
पठध्वमिति तान् ब्रूयादाचार्य्यमपि पूजयेत् ॥
बह्वृचौ पूर्व्वतः स्थाप्यौ दक्षिणे च यजुर्व्विदौ ।
पश्चिमे सामगौ स्थाप्यावुत्तरेणाथर्व्वगौ ॥
उदङ्मुखो दक्षिणतो यजमान उपाविशेत् ।
पठध्वमिति तान् ब्रूयात् यजध्वमिति याजकम् ॥
उत्कृष्टमन्त्रपाठेन तिष्ठध्वं मन्त्रजापकाः ।
एवमादिश्य तान् सर्व्वान् पर्य्युक्ष्याग्निं स मन्त्रवित् ॥
जुहुयादाहुतीर्म्मन्त्रैराज्यञ्च समिधस्तथा ।
ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्व्वतः ॥
वैराजं पौरुषं सूक्तं पौष्णं चक्रं सुसंस्थितम् ।
शैशवं पञ्चनिधनं गायन्ति ज्येष्ठसामगाः ॥
वामदेव्यं इष्टतृचाम रौरवं सरथन्तरम् ।
गवां व्रतं विकर्णाञ्च रक्षोघ्नं नरघ्नस्तथा ॥
गायन्ति सामगा राजन् ! पश्चिमद्वारमाश्रिताः ।
अथर्व्वगाश्चोत्तरतः शान्तिकं पौष्टिकं तथा ॥
जपन्ति मनसा देवमाश्रिता वरुणं प्रभुम् ।
पूर्व्वेद्युरभितो मन्त्रैरेव कृत्वाधिवासनम् ॥
गजाश्वरथ्यावल्मीकसंगमरह्रदगोकुलात् ।
मृदमादाय दद्याच्च प्रक्षिपेच्च यथा तथा ॥
रोचनाञ्च ससिद्धार्थान् गन्धान् गुग्गुलमेव च ।
स्नपनं तस्य कर्त्तव्यं पञ्चगव्यसमन्वितम् ॥
प्रत्यृचं कर्त्तुमिष्टामन्त्रैरेवं कृत्वा विधानतः ।
एवं रक्षति राज्यार्थान् विधिदृष्टेन कर्म्मणा ॥*॥
ततः प्रभाते विमले संजाते तु गवां शतम् ।
ब्राह्मणेभ्यः प्रदातव्यं होमान्ते वाथवा पुनः ॥
पञ्चाशदथ षट्त्रिंशत् पञ्चविंशतिरेव च ।
ततः संवत्सरे प्राप्ते शुद्धे लग्ने सुशोभने ॥
वेदशब्दैश्च गान्धर्व्वैर्व्वाद्यैश्च विविधैः पुनः ।
कनकालङ्कृतां कृत्वा जले गामवतारयेत् ॥
सामगाय च सा देया ब्राह्मणाय विशाम्पते ! ।
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः ।
धृतां चतुर्भिर्व्विप्रैश्च वेदवेदाङ्गपारगैः ॥
महानदीजलोपेतान् दध्यक्षतविभूषितान् ।
उत्तराभिमुखो युक्तो जलमध्ये प्रकाशयेत् ॥
आथर्व्वणेन सुस्नातः पुनर्म्मामाशयेव च ।
आपो हि ष्ठेतिमन्त्रेण क्षिपेदागत्य मण्डपम् ॥

पूजयित्वा सुरांस्तत्र वलिं दद्यात् समन्वितः ।
पुनर्द्दिनानि होतव्यं चत्वारि राजसत्तम ॥
चतुर्थीकर्म्म कर्त्तव्यं देयं तत्रापि शक्तितः ।
कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च ॥
ऋत्विग्भ्यस्तु समं दद्यात् मण्डपं विभजेत् पुनः ।
होमपात्रञ्च शय्याञ्च आचार्य्याय निवेदयेत् ॥
ततः सहस्रं विप्राणामथवाऽष्टशतं तथा ।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिः ॥
एवमेव पुराणेषु तड़ागविधिरुच्यते ।
कूपवापीषु सर्व्वासु तथा पुष्करिणीषु च ॥
एष एव विधिर्द्दिष्टः प्रतिष्ठासु तथैव च ।
मन्त्रतस्तु विशेषः स्यात् प्रासादोद्यानभूमिषु ॥
अयन्तु ऋत्विगाचार्य्यविधिदृष्टेन कर्म्मणा ।
अल्पेष्वेकाग्निवत् कार्य्यं वित्तशाठ्यादृते नृणाम् ॥"
तड़ागे कालविशेषे जलस्थितेः फलं यथा,—
"प्रावृट्काले स्थितं तोयमग्निष्टोमसमं स्मृतम् ।
शरत्काले स्थितं तोयं यदुक्तफलदायकम् ॥
वाजपेयफलसमं हेमन्तशिशिरस्थितम् ।
अश्वमेधसमं प्राहुर्व्वसन्तसमयस्थितम् ॥
ग्रीष्मेऽपि तु स्थितं तोयं राजसूयफलाधिकम् ॥"
तड़ागकरणे फलं यथा,—
"एतान्महाराज ! विशेषधर्म्मान्
करोति योऽथोंग्नवथ शुद्धबुद्धिः ।
स याति ब्रह्मालयमेककल्पं
दिवं पुनर्याति सयैव दिव्यम् ॥"
इति पाद्मे सृष्टिखण्डम् ॥

तड़ाघातः, पुं, (तटे आघातः । पृषोदरात् टस्य डत्वम् ।) ऊर्द्धीकृत्य हस्तिशुण्डाघातः । यथा,
"उच्चैःकरिकराद्दीपे तड़ाघातं विदुर्बुधाः ॥"
इति कुमारसम्भवटीका ॥

तड़ित्, स्त्री, (ताडयत्यभ्रमिति । तड आघाते + "ताड़ेर्णिलुक् च ।" उणां । १ । १०० । इति इतिप्रत्ययः णेर्लुक् च ।) विद्युत् । इत्यमरः ।१।३। ९ ॥ (यथा, रघुः । ९ । ५४ ।
"अथ नभस्य इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेशरौ ॥")

तड़िल्वान्, [त्] पुं, (तड़ित् विद्युदस्त्यस्येति । तड़ित् + मतुप् । मस्य वः ।) मेघः । मुस्तकम् । इत्यमरः । १ । ३ । ७, २ । ४ । १५९ ॥ (विद्युद्विशिष्टे, त्रि । यथा,—
"समुदितनिचयेन तड़िल्वतीं
लघयता शरदम्बुदसंहतिम् ॥"
इति किरातार्ज्जुनीये । ५ । ४ ॥)

तण्डकः, पुं, (तण्डते नृत्यतीति । तण्ड + ण्वुल् ।) खञ्जनपक्षी । फेनः । समासप्रायवाक् । गृहदारु । तरुस्कन्धः । मायाबहुलके, त्रि । इति मेदिनी । के, ९८ ॥

तण्डकः, पुं स्त्री, (तण्ड + ण्वुल् ।) परिष्कारः । इति लिङ्गादिसंग्रहे अमरः ॥

तण्डुः, पुं, शिवद्वारपालविशेषः । इति हलायुधः ॥

तण्डुरीणः, पुं, कीटमात्रम् । (तण्डुले भवः । तण्डुल + छः । लस्य रः ।) तण्डुलोदकम् । वर्व्वरे, त्रि । इति मेदिनी । णे, ६५ ॥

तण्डुलः, पुं, (तण्ड्यते आहन्यते इति । तडि आघाते + "सानसिवर्णसीति ।" उणां ४ । १०७ । इति उलच् । यद्वा, "इष्मुटितनितडिभ्य उलन् तण्डश्च ।" उणां ।५।६। इति उलन् तण्डादेशश्च ।) विड़ङ्गम् । इति मेदिनी । ले, ६६ ॥
("पुंसि क्लीवे विडङ्गः स्यात् क्रमिघ्नो जन्तुनाशनः ।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
तण्डुलीयशाकम् । इति शब्दरत्नावली ॥ धान्यादिनिकरः । इति मेदिनी । ले, ६६ ॥ चाउल इति भाषा । (यथा, मनुसंहिते । ३।५५।
"सङ्गतिः श्रेयसी पुंसां स्वपक्षे च विशेषतः ।
तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुलाः ॥
मृदुर्व्विदः स्वादुरसो वृंहणस्तण्डुलो नवः ।
सन्धानकर्म्मे हृद्यः पुराणस्तण्डुलः स्मृतः ॥
द्रव्यसंयोगसंस्कारविकारान् समवेक्ष्य तु ।
यदाकारणमासाद्य भोक्तॄणां छन्दतोऽपि वा ॥
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान् विनिर्द्दिशेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)
भृष्टतण्डुलगुणाः । सुगन्धित्वम् । कफनाशित्वम् । रूक्षत्वम् । पित्तकारित्वञ्च । इति राजवल्लभः ॥

तण्डुलपरीक्षा, स्त्री, (तण्डुलेन परीक्षा ।) नवविधदिव्यान्तर्गतदिव्यविशेषः । चालपड़ा इति भाषा । तद्विधानं यथाह पितामहः ।
"चौर्य्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः ।
तण्डुलान् कारयेच्छुक्लाञ्छालेर्नान्यस्य कस्यचित् ॥
मृण्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ।
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् ॥
प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् ।
तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्त्रिधा ॥
भूर्ज्जस्यैव तु नान्यस्य अभावे पिप्पलस्य तु ।
शोणितं दृश्यते यस्य हनुस्तालु च शीर्य्यते ॥
गात्रञ्च कम्पते यस्य नमशुद्धं विनिर्द्दिशेत् ॥"
स्नानोदकेन देवतास्नानोदकेन । तथा च कात्यायनः ।
"देवतास्नानपानीयस्निग्धतण्डुलभक्षणी ।
शुद्धनिष्ठीवनात् शुद्धो नियम्योऽशुचिरन्यथा ॥"
शिरोरोपितपत्रकं तण्डुलान् भक्षयित्वा निष्ठीवयेत् प्राड्विवाकः इति । निष्ठीवयेदिति ण्यन्तात् सिद्धम् । तुलानिरूपितं सर्व्वदिव्यसाधारणञ्च धर्म्मवाहनादिहवनान्तं पूर्व्ववदिहापि कर्त्तव्यम् ॥ शिरोरोपितपत्रलेख्यमन्त्रादि यथा,—
"तच्चार्थमभियुक्तस्य लेखयित्वा तु पत्रके ।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोगतम् ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मो हि जानाति नरस्य वृत्तम् ॥"
इति दिव्यतत्त्वम् ॥

तण्डुला, स्त्री, (तण्ड्यते आहन्यते इति । तण्ड + उलच् ततष्टाप् ।) महासमङ्गा । विड़ङ्गम् । इति राजनिर्घण्टः ॥

तण्डुलाम्बु, क्ली, (तण्डुलस्य अम्बु ।) तण्डुलोदकम् । चेउनि इति भाषा । तत्पर्य्यायः । कण्ठाम्बु २ । इति वैद्यकपरिभाषा ॥ तण्डुलोत्थम् ३ । इति राजनिर्घण्टः ॥ यथा, वैद्यकचक्रपाणिसंग्रहे ग्रहण्यधिकारे ।
"पिबेत् समांशं तच्चूर्णं सक्षौद्रं तण्डुलाम्बुना ।"

तण्डुली, स्त्री, (तण्डुल + ङीष् ।) यवतिक्ता लता । शाकतण्डुलीककर्कटी । तण्डुलीयशाकः । इति राजनिर्घण्टः ॥ (विवृतिरस्यास्तण्डुलीयशब्दे ज्ञातव्या ॥)

तण्डुलीकः, पुं, (तण्डुलीव कायतीति । कै + कः ।) तण्डुलीयशाकः । इति शब्दरत्नावली ॥

तण्डुलीयः, पुं, (तण्डुलाय हितः । तण्डुल + "विभाषा हविरपूपादिभ्यः ।" ५ । १ । ४ । इति छः ।) पत्रशाकविशेषः । न्युटियानटिया इति चाँपानटिया इति च वङ्गभाषा । चवराइ इति अल्पमरुषा इति च हिन्दी भाषा । तत्पर्य्यायः । अल्पमारिषः २ । इत्यमरः । २ । ४ । १३६ ॥ तण्डुलीकः ३ तण्डुलः ४ । इति शब्दरत्नावली ॥ भण्डीरः ५ तण्डुली ६ तण्डुलीयकः ७ ग्रन्थिलः ८ बहुवीर्य्यः ९ मेघनादः १० घनस्वनः ११ सुशाकः १२ पथ्यशाकः १३ स्थूलेपुः १४ स्वविलाञ्छयः १५ वीरः १६ तण्डुलनामा १७ । अस्य गुणाः । शिशिरत्वम् । मधुरत्वम् । विषपित्तदाहभ्रमनाशित्वम् । रुचिकारित्वम् । दीपनत्वम् । पथ्यत्वञ्च । तद्बीजगुणाः । हिमत्वम् । अर्शःपित्तरक्तविषकासविनाशित्वम् । ग्राहकत्वम् । मधुरत्वम् । विपाके दाहशोषशमनत्वम् । रुचिदातृत्वञ्च । इति राजनिर्घण्टः ॥ विड़ङ्गम् । ताप्यम् । इति मेदिनी । ये, ११९ ॥ अस्य पर्य्यायगुणाः ।
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुलीवीजो विषघ्नश्चाल्पमारिषः ॥
तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् ।
सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः ॥"
तद्भेदः । जलतण्डुलीयं शास्त्रे कच्चटमिति प्रसिद्धम् ।
"पानीयतण्डुलीयन्तु कच्चटं समुदाहृतम् ।
कच्चटं तिक्तकं रक्तपित्तानिलहरं लघु ॥"
इति भावप्रकाशः ॥

तण्डुलीयकः, पुं, (तण्डुलीय + स्वार्थे कन् ।) तण्डुलीयशाकः । (यथा, हारीते १ स्थाने १० अः ।
"स्वादुः पाके स्वल्पकुपित्तविषघ्नस्तण्डुलीयकः ।
हन्ति वातं विड्विबन्धं मूत्रघातकफे हितः ॥")
विड़ङ्गम् । इति राजनिर्घण्टः ॥

तण्डुलीयिका, स्त्री, (तण्डुलीय + स्वार्थे कन् स्त्रियां टाप् । कापि अत इत्वञ्च ।) विड़ङ्गम् । इति राजनिर्घण्टः ॥

तण्डुलुः, स्त्री, (तण्डुल + पृषोदरात् उलेः साधुः ।) विड़ङ्गम् । इति शब्दरत्नावली ॥

तण्डुवेर:, पु, (तण्डुल+बाहुलकात् स्वार्थे ट्र ।) तण्डुलीयशाक: । इति हेमचन्द्र: । ४ । २५० ॥

तण्डुलोत्थं, क्ली, (तण्डुलात् तण्डुलप्रक्षालनात् उत्तिष्ठतीति । उत्+स्था+क: ।) तण्डुलाम्बु । इति राजनिर्घण्ट: ॥

तण्डुलोदकं, क्ली, (तण्डुलस्य तण्डुलक्षालनस्य उदकम् । तण्डुलक्षालितं उदकं वा ।) तण्डुलाम्बु । यथा, वैद्यकपरिभाषायाम् ।
"जलमष्टगुणं दत्त्वा पलं कण्डिततण्डुलात् ।
भावयित्वा ततो देयं तण्डुलोदककर्म्मणि ॥"
(अस्य गुणा यथा,—
"तन्वानं शीतलं वर्ण्यं महातिसारनाशनम् ।
सुस्वादु शीतलञ्चैव हृद्यं तण्डुलोदकम् ॥"
इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥)

तण्डुलौघ:, पुं, (तण्डुलानामोघ इव यत्र ।) वेणुवंश: । इति शब्दचन्द्रिका ॥ बेउडबाँश इति भाषा । तण्डुलसञ्चूर्ण्ण ॥

तत्, व, हेतु: । इत्यमर: । ३ । ४ । ३ ॥ (यथा, रघु: । ३ । ४६ ।
"तदङ्गमग्र्यं मघवन् । महाक्रतो-
रमुं तुरङ्गं प्रतिमोक्तुमर्हसि ॥")

तत्, [द्] त्रि, बुद्धिस्थपरामर्शः । सेइ इति भाषा । सर्व्वनामशब्दोऽयम् । इति व्याकरणम् ॥ (यथा, किरातार्ज्जुनीये । २ । २ ।
"अपि वागधिपस्य दुर्व्वच
वचनन्तद्विदधीत विस्मयम् ॥")

तत्, क्ली, ब्रह्मणो नामविशेष: । यथा,—
"ओँ तत् सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृत: ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिता: पुरा ॥
तस्मादोमित्युदाहृत्य यज्ञदानतप:क्रिया: ।
प्रवर्त्तन्ते विधानोक्ता: सततं ब्रह्मवादिनाम् ॥
तदित्यनभिसन्धाय फलं यज्ञतप:क्रिया: ।
दानक्रियाश्च विविधा: क्रियन्ते मोक्षकाङ्क्षिभि: ॥"
इति श्रीभगवद्गीतायाम् । १७ । २३-२५ ॥

ततं, क्ली, (तनोति मनोऽनेनेति । तन+"तनिमृङ्भ्यां किच्च ।" उणां । ७।८८ । इति तन् ।) वीणादिवाद्यम् । इत्यमर: । १ । ७ । ४ ॥

तत:, त्रि, (तन्यते स्म इति । तन्+क्त: ।) विस्तृत: । (यथा, महाभारते । ४ । ५ । १ ।
"ते वीरा बद्धनिस्त्रिंशास्ततायुधकलापिन: ॥")
व्याप्त: । (यथा, भगवद्गीतायाम् । ८ । २२ ।
"यस्यान्त:स्थानि भूतानि येन सर्व्वमिदं ततम् ॥")
वायौ, पुं । इति मेदिनी । ते, २० ॥

तत:, [स्] व, (तद्+"पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति तसिल् । यद्वा, सर्व्वविभक्तिषु तसिल् ।) हेतु: इत्यमर: । ३ । ४ । ३ ॥ (यथा, महाभारते । १२ । ३४८ । ७६ ।
"हीना: सत्त्वेन सूक्ष्मेण ततो वैकारिका: स्मृता: ॥"
आदि: । परिप्रश्न: । पञ्चम्यर्थ: । (यथा, मनु: । १२ । ८५ ।
"सर्व्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
तद्ध्यग्र्यं सर्व्वविद्यानां प्राप्यते ह्यमृतं तत: ॥"
सप्तम्यर्थ: । यथा, मनु: । ४ । १५ ।
"न विद्यमानेष्वर्थेषु नार्त्त्यामपि यतस्तत: ॥"
तृतीयार्थ: । यथा, नारदपञ्चरात्रे । २ । ६ ।
"आराधितो यदि हरिस्तपसा तत: किं
नाराधितो यदि हरिस्तपसा तत: किम् ॥")
कथान्तरम् । आनन्तर्य्यम् । इति विश्व: ॥ (यथा, महाभारते । ४ । ५ । २ ।
"ततस्ते दक्षिणं तीरमन्वगच्छन् पदातय: ॥")

ततपत्री, स्त्री, (ततं विस्तृतं पत्रमस्या: ।) कदलीवृक्ष: । इति शब्दचन्द्रिका ॥

ततम:, त्रि, (तेषां मध्ये निर्द्धारितो योऽसौ । तद्+"वा बहूनां जातिपरिप्रश्ने डतमच् ।) ५ । ३ । ९३ । इति डतमच् ।) बहुषु मध्ये स. । अनेकेर मध्ये सेइ इति भाषा । (यथा, ऐतरेयोपनिषदि । ३ । १२ । १३ ।
"स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्श-
मिति ॥")

ततर:, त्रि, (तयोर्मध्ये निर्द्धारितो योऽसौ । तद्+"किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ।" ५ । ३ । ९२ । इति डतरच् ।) द्वयोर्मध्ये स: । दुयेर मध्ये सेइ इति भाषा ॥

ततस्त्यं, त्रि, (ततस्तत्र भवमिति । ततस्+"अव्ययात्त्यप् ।" ४ । २ । १०४ । इत्यस्य "अमेहक्वतसित्रेभ्य एव ।" इति वार्त्तिकोक्ते: त्यप् प्रत्यय: ।) तत्रभवम् । तत्सम्बन्धि । इति व्याकरणम् ॥ तार इति भाषा ॥

तति:, स्त्री, (तन्+भावे क्तिन् ।) श्रेणी । इति हेमचन्द्र: । ६ । ५९ ॥ (यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । १५ ।
"अस्माकं विस्मयार्हाण्यखिलमुनिजनप्रार्थ-
नीयानि सेयं
दद्यादाद्यानवद्या ततिरतिरुचिरामङ्गलान्यङ्गु-
लीनाम् ॥")

तति, त्रि, (तत् परिमाणमेषामिति । तद्+डति ।) तत्परिमाणम् । ततगुलि इति भाषा । बहुवचनान्तोऽयम् । इति व्याकरणम् ॥

तत्काल:, पु, (स चासौ कालश्चेति ।) वर्त्तमानकाल: । तत्पर्य्याय: । तदात्वम् १ । इत्यमर: । २।८।२९॥ (यथा, कथासरित्सागरे । २ । ८३ ।
"वर्षस्य वेश्म वसुभि: स किलादरेण
तत्कालमेव समपूरयदुन्नतश्री: ॥")

तत्कालधी:, त्रि, (तस्मिन् काले कार्य्यकाले धीरुपस्थिता बुद्धिर्य्यस्य ।) प्रत्युत्पन्नमति: । उपस्थितबुद्धि: । इति हेमचन्द्र: । ३ । ८ ॥

तत्क्रिय:, त्रि, (सा क्रिया निसर्गतो वेतनमृते यस्येति ।) कर्म्मकार: । वेतनं विना भारवहादिकर्त्ता । इत्यमर: ॥

तत्क्षण:, पु, (स चासौ क्षणश्चेति स एव क्षणो वा ।) सद्य: । इत्यमर: । ३ । ४ । ९ ॥ (यथा, रघु: ३ । १४ ।
"दिश: प्रसेदुर्म्मरुतो ववु: सुखा:
प्रदक्षिणार्च्चिर्हविरग्निराददे ।
बभूव सर्व्वं शुभशंसि तत्क्षणं
भवो हि लोकाभ्युदयाय तादृशाम् ॥")

त(त्व)त्त्वं, क्ली, (तनोति सर्व्वमिदमिति । तन्+क्विप् तुक् च । पृषोदरादित्वात् साधु: । यद्वा, "सर्व्वं खल्विदं ब्रह्म ।" "ब्रह्मैवेदं सर्व्वम् ।" इति श्रुतेस्तस्य ब्रह्मणो भाव: इति । तत्+त्व ।) स्वरूपम् । परमात्मा । विलम्बितनृत्यम् । इति मेदिनी । वे, ९ ॥ वाद्यप्रभेद: । इति विश्व: ॥ वस्तु । इति त्रिकाण्डशेष: ॥ चेत: । इति धरणि: ॥ * ॥ चतुर्व्विंशतितत्त्वानि यथा । क्षिति: १ आप: २ तेज: ३ मरुत् ४ व्योम ५ गन्ध: ६ रस: ७ रूपम् ८ स्पर्श: ९ शब्द: १० नेत्रम् ११ नासिका १२ जिह्वा १३ कर्ण: १४ त्वक् १५ हस्त: १६ पाद: १७ मुखम् १८ पायु: १९ लिङ्गम् २० प्रकृति: २१ मन:२२ बुद्धि:२३ अहङ्कार: २४ । इति पुराणतन्त्रे ॥ तत्तु नानामुनिभिर्नानाविधमुक्तम् । तत्र त्रीणि तत्त्वानि यथा । सत्त्वम् १ रज: २ तम: ३ । चतुर्व्विधानि यथा । तेज: १ आप: २ पृथ्वी ३ आत्मा ४ । पञ्चविधानि यथा । शब्द: १ स्पर्श:२ रस: ३ गन्ध: ४ रूपम् ५ । षड्विधानि यथा । क्षिति:१ आप:२ तेज: ३ वायु: ४ आकाशम् ५ परमात्मा ६ । सप्तविधानि यथा । क्षिति: १ आप:२ तेज: ३ वायु: ४ आकाशम् ५ जीव: ६ आत्मा ७ । नवविधानि यथा । पुरुष: १ प्रकृति: २ महत्तत्त्वम् ३ अहङ्कार: ४ नभ: ५ वायु: ६ ज्योति: ७ आप. ८ क्षिति: ९ । एकादशविधानि यथा । श्रोत्रम् १ त्वक् २ चक्षु ३ घ्राणम् ४ जिह्वा ५ वाक् ६ पाणि: ७ उपस्थ: ८ पायु. ९ अङ्घ्रि: १० मन: ११ । त्रयोदशविधानि यथा । नभ: १ वायु: २ ज्योति: ३ आप: ४ क्षिति: ५ श्रोत्रम् ६ त्वक् ७ चक्षु: ८ घ्राणम् ९ जिह्वा १० मन. ११ जीवात्मा १२ परमात्मा १३ । षोडशविधानि यथा । नभ: १ वायु: २ ज्योति. ३ आप: ४ पृथ्वी ५ शब्द: ६ स्पर्श: ७ रूपम् ८ रस: ९ गन्ध: १० श्रोत्रम् ११ त्वक् १२ चक्षु: १३ जिह्वा १४ घ्राणम् १५ मन: १६ । सप्तदशविधानि यथा । पूर्व्वोक्तानि षोडश १६ आत्मा च १७ । पञ्चविंशतितत्त्वानि यथा । पूर्व्वोक्तानि सप्तदश १७ पुरुष: १८ प्रकृति: १९ महान् २० अहङ्कार: २१ मुखम् २२ पाणि. २३ उपस्थ: २४ पायु: २५ । षड्विंशतिविधानि यथा । पूर्व्वोक्तानि पञ्चविंशति: २५ जीव. २६ । सप्तविंशतिविधानि यथा । पूर्व्वोक्तानि षड्विंशति: २६ ईश्वर: २७ । इति श्रीभागवतम् ॥

तत्त्वज्ञानं, क्ली, (तत्त्वस्य ब्रह्मतत्त्वस्य ज्ञानम् ।) बुद्धिगुणविशेष: । तत्तु ब्रह्मज्ञानम् । इति हेमचन्द्र: । २ । २२५ ॥ यथा,—
"प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां षोडशपदार्थानां तत्त्वज्ञानान्नि:श्रेयसाधिगम: ।" इति गोतमसूत्रे ।१ ।

तत्त्वन्यासः, पुं, (तत्त्वानां न्यासः ।) विष्णुपूजाविषयकन्यासविशेषः । यथा,—

"मातृकान्यासनथार्णाख्य जीवादीनेकशो वदेत् ।
नमः परायेत्युच्चार्य ततस्तत्त्वात्मने नमः ॥
जीवं प्राणं इय प्रोक्ता सर्व्वाङ्गेषु प्रविन्यसेत् ।
ततो हृदयमध्ये च तत्त्वत्रयस्य विन्यसेत् ॥
इत्यच्युतोक्ततनुर्विद्धीत तत्त्वन्यास मपूर्व्वकपराचरनत्युपेतम् ।
भूय. पराय च तदाह्वयमात्मने च
नत्यन्तमुद्धरतु तत्त्वमनुक्रमेण ॥
सकलवपुषि जीव प्राणमायोज्य मध्ये
न्यसतु मतिमहङ्कारं मनश्चेति मन्त्री ।
कमुखहृदयगुह्याङ्घ्रिष्वयोशब्दपूर्व्वं
गुणगणमथ कर्णादिस्थितं श्रोत्रपूर्व्वम् ॥
वागादीन्द्रियवर्गमात्मनिलये त्वाकाशपूर्व्वं गण
मूर्द्धास्ये हृदये शिरे चरणयोर्द्धं तपुण्डरीक हृदि ॥
म बीजं हृत्पुण्डरीकतत्त्व हृदि प्रविन्यसेत् ।
ह बीज सूर्यमण्डलतत्त्व हृदि प्रविन्यसेत् ॥
स बीज चन्द्रमण्डलतत्त्व तत्र प्रविन्यसेत् ।
र बीजं वह्निमण्डलनत्त्व तत्रैव विन्यसेत् ॥
ष बीज परमेष्ठितत्त्वं वासुदेवस्य मूर्द्धनि ।
य बीजमथ पुंस्तत्त्वं सङ्कर्षणमथो मुखे ॥
ल बीज विश्वतत्त्वस्य प्रद्युम्नस्य हृदि न्यसेत् ।
व बीज निवृत्तितत्त्वस्य अनिरुद्धमुपस्थके ॥
ल बीजं सर्व्वतत्त्वस्य पादे नारायण न्यसेत् ।
क्ष्रौं बीज कोपतत्त्वस्य नृसिंहं सर्व्वगात्रके ॥
एव तत्त्वानि विन्यस्य प्राणायाम समाचरेत् ॥"

अस्य फल यथा,—

"तत्त्वन्यास ततः कुर्य्यात् साधक सिद्धिहेतवे ।
कृतेन येन देवस्य रूपतामेव यात्यसौ ॥"

इति गौतमीयतन्त्रम् ॥

तत्परः, त्रि, (स परोऽस्य । यद्वा तदेव परं सर्व्वोत्तममस्य ।) आसक्तः । इत्यमरः । ३ । १ । ६ ॥ (यथा, भागवते । ४ । १५ । ६ ।

"एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ।
इयञ्च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥")

तत्परायण, त्रि, (तदेव परमयनमस्य ।) तदासक्तः । यथा,—

"मुक्ता भवन्ति यद्वन्योऽन्यजना' कृष्णपरायणाः ॥"

इति पद्मोत्तरखण्डम् ॥

तत्फलः, पुं, (तदेव फलमस्य । यद्वा, तनोति तन्यते वा । तन + क्विप् तुक् च । तत् विस्तृत फलमस्य ।) कुवलयम् । कुष्ठनामौषधि. । चौरनामसुगन्धिद्रव्यम् । इति धरणिः ॥

तत्र, इ कुटुम्बधारणे । इति माधः । (भ्वा-पर-अक-सेट् ।) द्वावेतौ धारणेऽर्थे वर्त्तेते । इति चान्द्राः । केचित्तु कुटुम्बधातुममन्यमानास्तत्रिधातुः कुटुम्बस्य धारणेऽर्थे वर्त्तते इत्याहु । तन्त्र धारणे इत्यनेनैवेष्टसिद्धे इदनुबन्धो वैदेमूधारणमेवार्थः । इति दुर्गादासः ॥

तन्त्र } इ सादे । मोहे । (भ्वा-पर-अकं-सेट् ।)
तन्द्र } दन्त्यवर्गाद्योपधः । तन्त्रौः । दन्त्यवर्गद्वतौयोपधः । इति केचित् । तन्द्रीः । सौत्रधातुरयम् । इति दुर्गादासः ॥

तत्र, इ क ड धारणे । इति कविकल्पद्रुमः ॥ (चुरा-आत्म-सक-सेट् ।) आदिमध्ययोस्तकारः प्रेयो रेफयुक्तः । धारणं धरणम् । भाषायामस्य विस्तारणे प्राय: प्रयोगः । इ क ड, तन्त्रयते तन्तून् तन्तुवायः । इति दुर्गादासः ॥

तत्र, य, (तस्मिन्निति । तद् + "सप्तम्यास्त्रल् ।" ५।३।१० । इति त्रल् ।) तस्मिन् । तयोः । तेषु । इति व्याकरणम् ॥ सेखाने इति भाषा । (यथा, मनुः । २ । ११२ ।

"धर्म्मार्थौ यत्र न स्याता शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")

तत्रत्य , त्रि, तत्र भवः । (तद् + "अव्ययात्त्यप् ।" ४।२।१०४ । इत्यस्य "अमेहक्कतसित्रेभ्य एव ।" इति वार्त्तिकोक्त्या त्यप् ।) तस्मिन्नुत्पन्नः । इति मुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । ५ । ६६ ।

"प्राप्तस्यैव च तत्रत्यो जनोऽरोदीत् पुरो मम ॥")

तत्रभवान्, [त्] त्रि, (इतराभ्योऽपि दृश्यन्ते इति प्राग्दीव्यतीयः प्रथमार्थे त्रल् । तत. सुप्सुपेति समास.।) श्लाघ्यः । इति जटाधरः ॥

तथा, य, (तेन प्रकारेण । तद् + "प्रकारवचने थाल् ।" ५ ।३।२३ । इति थाल् । तेन प्रकारेणेत्यर्थः । यथा, मनुः । १ । ४ ।

"स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचार्च्य तान् सर्व्वान् महर्षीन् श्रूयतामिति ॥")

साम्यम् । इत्यमरः । ३ । ४ । ६ ॥ (यथा, मनुः । ६ । ९० ।

"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम् ॥")

अभ्युपगमः । पृष्टप्रतिवाक्यम् । समुच्चयः । (यथा, देवीभागवते । १ । २ । २६ ।

"अष्टादशानाञ्च तथा भारतं मुनिना कृतम् ।
इतिहास इति प्रोक्त पञ्चम वेदसम्मतम् ॥")

निश्चयः । इति मेदिनी । थे, ३६ ॥ (यथा, रघुः । १ । २९ ।

"तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")

तथागत., पु, (यथा पुनरावृत्तिर्न भवति तथा तेन प्रकारेण गतः । यद्वा, तथा सत्य गत ज्ञानं यस्य । सुप्सुपेति समास' ।) बुद्धः । इत्यमर. ।१।१।१३ ॥ (यथा, सर्व्वदर्शनसंग्रहे ।

"यथा गतास्ते सुगताः शिवां गति
तथा गतिं सोऽपि गतस्तथागतः ॥"*॥

तथा तेन प्रकारेणागतः ।) पूर्व्वोक्तप्रकारेणागते, त्रि ॥ (यथा, महाभारते । ३।७०।५ ।

"ततो बभूव नगरे सुमहान् हर्षजः स्वनः ।
जनस्य सम्प्रहृष्टस्य नलं दृष्ट्वा तथागतम् ॥")

तथाच य, (तथा च, च च इति द्वन्द्वसमासः।) पूर्व्वोक्तार्थदृढीकरणम् । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, मनु', । ६ । १६ ।

"तथाच श्रुतयो बह्वी निगीता निगमेष्वपि ॥"

अव्ययद्वयेनैव सिद्धेः केचिदय शब्दो न मन्यते ॥)

तथैव, य, (तथा च एव च ।) तद्वदेव । सेइ प्रकार इति भाषा । यथा शाकुन्तले । ४२ ।

"अस्ति पुत्रो वशे यस्य भार्य्या भर्त्तुस्तथैव च ॥"

अव्ययद्वयेनैव सिद्धे केचिच्छब्दोऽयं न मन्यते ॥)

तथ्य', क्ली, (तथा साधु । तथा + "तत्र साधु ।" ४ । ४ । ९८ । इति यत् ।) सत्यम् । (यथा, मनुः । ८ । २७४ ।

"काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥")

तद्वति त्रि । इत्यमर' । १ । ६ । २२ ॥ (यथा, महाभारते । ७ । १५७ । ३ ।

"यदर्ज्जुनगुणांस्तथ्यान् कीर्त्तयानं नराधम ।
शूरदेषात् सुदुर्बुद्धे । त्व भर्त्सयसि मातुलम् ॥")

तदा, य, (तस्मिन् काले । "तदो दा च ।" ५ । ३ । १९ । इति दा ।) तस्मिन् काले । इत्यमरः । ३ । ४ । २२ ॥ सेइ समये इति भाषा ॥ (यथा, मनु । १ । ५५ ।

"न च स्व कुरुते कर्म्म तदोत्क्रामति मूर्त्तित ॥")

तदात्व, क्ली, (तदा इत्यस्य भाव' । तदा + "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति त्व ।) तत्काल' । वर्त्तमानकाल. । इत्यमरः ।२।८।२१॥ (यथा, महाभारते । २ । ५६ । १४ ।

"स चोपभोगलोभान्धो हिरण्यार्थे परन्तप ।
आयतिञ्च तदात्वञ्च उभे सद्यो व्यनाशयत् ॥")

तदानीं, [म्] य, (तस्मिन् काले । "तदो दा च ।" । ५ । ३ । १९ । इति चकारात् दानीम् ।) तस्मिन् काले । इत्यमरः ।३।४।२२ ॥ (यथा, ऋग्वेदे । १० । १२९ । १ ।

"नासदासीन्नोसदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत् ॥")

तदासुख, क्ली, (तदा तस्मिन्नेव काले सुखं यस्य ।) आरम्भ । इति भूरिप्रयोगः ॥

तद्दिन, [म्] य, (तत् प्रखरकिरणलेन प्रसिद्ध दिन दिनांश ।) दिनमध्यम् । (तत्तदेव दिनम् ।) प्रतिदिनम् । इति हेमचन्द्रः ॥ (तदेव दिनम् ।) पूर्व्वोक्तदिने, क्ली ॥

तद्धनः, त्रि, (तदेव अव्ययेनाहीनं धनं यस्य ।) कृपण. । इति हेमचन्द्र' । ३ । ३२ ॥ (तदेव धनमिति विग्रहे पूर्व्वोक्तधने, क्ली ॥)

तद्बल , पु, (तस्मिन् लक्ष्ये एव बलं यस्य ।) बाणविशेष. । इति हेमचन्द्र' । ३ । ४४४ ॥

तन, उ कि उपकृतौ । अव्याघाते । शब्दोपतापयो । इति कविकल्पद्रुम' ॥ (चुरा पक्षे भ्वा-पर-अक-सक च-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, तनित्वा तत्वा । कि, तानयति तनति । उपकृतिरुपकारः । अघातो हिंसावर्ज्जनम् । सुनीतिरिति गोविन्दभट्टः । उपसर्गादिह्वके । दैर्घ्यक दीर्घीकरणम् । वितानयति य. कीर्त्तिं वितनयमलं यशः । इति हलायुधः । इति दुर्गादासः ।

तन, इ न उ विस्तृतौ । इति कविकल्पद्रुमः ॥ (तनां-उभं-सकं-सेट् । उदित्वात् क्वावेट् ।) इ न, तनोति तनुते पुण्यं ऋषिः । उ, तनित्वा तत्वा । इति दुर्गादासः ॥

तनयः, पु, (तनोति विस्तारयति कुलमिति । तन्+"वलिमलितनिभ्यः कयन् ।" उणां । ४ । ९९ । इति कयन् ।) पुत्रः । इत्यमरः । २ । ६ । २७ ॥ (यथा, मनुः । ३ । १६ ।
"शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च ॥")

तनया, स्त्री, (तनोति कुलमिति । तन+कयन्+टाप् ।) कन्या । इत्यमरः । २ । ६ । २७ ॥ (यथा, भागवते । १ । १६ । २ ।
"स उत्तरस्य तनयामुपयेमे इरावतीम् ॥")
चक्रकुल्यालता । इति शब्दचन्द्रिका ॥

तनिष्ठः, त्रि, अयमनयोरतिशयेन तनुः । (तनु+इष्ठन् ।) क्षुद्रः । इति व्याकरणम् ॥

तनीयान् [स्] त्रि, अयमेषामतिशयेन तनुः । (तनु+ईयसुन् ।) अल्पः । इति व्याकरणम् ॥

तनुः, स्त्री, (तनोति तन्यते इति वा । तन+"भृमृशीतृचरीति ।" उणां ।१।७ । इति उः ।) शरीरम् । (यथा, विष्णुपुराणे । १ । १७ । ५ ।
"देवाः सर्गं परित्यज्य तत्प्रसादात् मुनिसत्तम ।
विचेरुरवनौ सर्व्वे बिभ्राणा मानुषीं तनुम् ॥")
त्वक् । इति मेदिनी । ने, ६ ॥ स्त्री । इति राजनिर्घण्टः ॥

तनुः, त्रि, (तन+"भृमृशीति ।" उणां १ । ७ । इत्युः ।) अल्पः । विरलः । (यथा, मनुः ।३।१० ।
"तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम् ॥")
कृशः । इति मेदिनी । ने, ६ ॥ (यथा, आर्य्यासप्तशत्याम् । ५२५ ।
"वितरन्ती रसमन्तर्मर्म्माद्रभाव तनोषि तनु-
गात्रि ।॥")

तनुः, [स्] स्त्री, (तनोति तन्यते वा । तन+"अर्त्तिपृवपियजितनिधनितपिभ्यो नित् ।" उणां २ । ११८ । इति उसिः स च नित् ।) शरीरम् । इत्युणादिकोषः ॥

तनुक्षीरः, पु, (तनौ क्षीरं वहुलनिर्य्यासो यस्य ।) आम्रातकः । इति राजनिर्घण्टः ॥

तनुच्छाय., पु, (तनुर्विरला स्वल्पा छाया यस्य ।) जालवर्व्वूरकवृक्षः । इति राजनिर्घण्टः ॥ (तनोश्छाया ।) शरीरच्छायायां स्त्री क्ली च ॥

तनुजः, पुं, (तनोः शरीरात् जायते इति । जन+"अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) पुत्रः । इति हलायुधः ॥ (यथा, पञ्चतन्त्रे । ५ । २२ ।
"स्वामी द्वेष्टि सुसेवितोऽपि सहसा
प्रोज्झन्ति सद्बान्धवा
द्योतन्ते न गुणास्त्यजन्ति तनुजाः
स्फारीभवन्त्यापदः ।
भार्य्या नोत्तमवंशजापि भजते
नो यान्ति मित्राणि च
न्यायारोपितविक्रमानपि नरान् येषां
न हि स्याद्धनम् ॥")

तनुजा, स्त्री, (तनोः शरीरात् जायते इति । जन+डः+टाप् ।) कन्या । इति शब्दरत्नावली ॥

तनुत्रं, क्ली, (तनु त्रायते इति । त्रै+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) वर्म्म । इत्यमरः । २ । ८ । ६४ ॥

तनुत्राणं, क्ली, (त्रायतेऽनेनेति । त्रै+करणे ल्युट् । तनोः शरीरस्य त्राणम् ।) तनुत्रम् । इति हलायुधः ॥ (यथा, महाभारते । ३ । १७४ । ४ ।
"इदञ्च मे तनुत्राणं प्रायच्छन्मघवान् प्रभुः ॥")
शरीररक्षणञ्च ॥

तनुत्वचा, स्त्री, (तनुः तन्वी त्वक् वल्कलमस्याः ।) क्षुद्राग्निमन्थः । इति राजनिर्घण्टः ॥

तनुपत्रः, पु, (तनूनि पत्राणि यस्य ।) इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥

तनुभस्त्रा, स्त्री, (तनो. शरीरस्य भस्त्रा इव । निश्वासवायुनिर्गमात्तथात्वम् ।) नासिका । इति शब्दरत्नावली ॥

तनुरसः, पु, (तनोर्देहस्य रस इव तनोर्निर्गतो रस इति वा ।) घर्म्मः । इति हारावली ।१५४॥

तनुरुट्, [ह्] स्त्री, (तनौ शरीरे रोहतीति । रुह+क्विप् ।) तनूरुहम् । इति शब्दरत्नावली ॥

तनुरुहं, क्ली, (तनौ रोहति उत्पद्यते इति । रुह+"इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः ।) तनूरुहम् । इति शब्दरत्नावली ॥

तनुल., त्रि, (तन्यते स्म इति । तन+उलच् ।) विस्तृतः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तनुवातः, पु, (तनुः क्षीणो वातः वायुर्यत्र ।) नरकविशेषः । इति हेमचन्द्रः । ५ । ३ ॥

तनुवीज., पु, (तनु क्षीणं स्वल्पमात्रं वा वीजमस्य ।) राजवदरः । इति राजनिर्घण्टः ॥

तनुव्रणः, पु, (तनुः क्षुद्रः स्वल्पः व्रणो यत्र ।) वल्मीकरोगः । इति शब्दरत्नावली ॥

तनुसञ्चारिणी, स्त्री, (तनु अल्पमात्रं यथा स्यात् तथा सञ्चरतीति । सम्+चर+णिनिः ङीप् च ।) बालिका स्त्री । इति शब्दमाला ॥

तनूः, स्त्री, (तनु+ऊङ् ।) शरीरम् । इत्यमरः । २ । ६ । ७१ ॥

तनूकृतः, त्रि, (अतनुस्तनुरकारि । कृ+कर्म्मणि क्तः ।) तष्टः । अल्पीकृत. । इत्यमरः ।३।१।६६॥

तनूजः, पु, (तन्वाः शरीरात् जायते इति । जन+ड. ।) पुत्र. । इति जटाधरः ॥ (यथा, रघुः । ५ । ५३ ।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य ॥"
स्त्री, कन्या ।)

तनूनपं, क्ली, (तन्वा ऊनं कृशं पातीति । पा+कः ।) घृतम् । इति शब्दचन्द्रिका ॥

तनूनपात्, [द्] पु, (तनूनपं घृतं अत्तीति । अद्+विच् क्रिविशेषे । यद्वा, तनू स्वशरीरं न पातयतीति । पत+णिच्+क्विप् ।"नभ्राण्नपात् ।" ६ । ३ । ७५ । इति निपातितः ।) अग्निः । (यथा, ऋग्वेदे । ३ । २९ । ११ ।
"तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते ॥")
चित्रकवृक्षः । इत्यमरः । २ । ४ । ८० ॥

तनूरुह, क्ली, (तन्वां रोहतीति । रुह+कः ।) रोम । (यथा, भागवते । ७ । ८ । २२ ।
"चन्द्रांशुगौरैश्छुरितं तनूरुहै-
र्विष्वग्भुजानीकशतं नखायुधम् ॥"
तथाच शिवपुराणे । वायुसंहितायाम् ।१।१४ ।
"नमश्चकार तं दृष्ट्वा हृष्टसर्व्वतनूरुह. ॥")
पतत्रम् । इति मेदिनी । हे, ३० ॥

तनूरुहः, पु, (तन्वाः शरीरात् रोहति उत्पद्यते । रुह+कः ।) पुत्रः । गरुत् । (यथा, बृहत्संहितायाम् । ६३ । १ ।
"कुक्कुटस्त्वृजुतनूरुहाङ्गुलि-
स्ताम्रवक्त्रनखचूलिकः सितः ॥")
लोम । इति हेमचन्द्रः ॥

तनूह्रदः, पु, (तन्वाः तन्वां वा ह्रद इव ।) पायुः । इति त्रिकाण्डशेषः ॥

तनृच, उ इतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) उ, तञ्चित्वा तक्त्वा । इति दुर्गादासः ॥

तनृच, उ घ सङ्कुचि । इति कविकल्पद्रुमः ॥ (रुधा-परं-अकं-सेट् ।) उ, तञ्चित्वा तक्त्वा । घ, तनच्मि व्योम विस्तृतम् । इति दुर्गादासः ॥

तनज, उ घ सङ्कोचे । इति कविकल्पद्रुमः ॥ (रुधा-परं-अकं-सेट् ।) उ, तञ्जित्वा तक्त्वा । घ, तनज्मि व्योम विस्तृतम् । इति दुर्गादासः ॥

तन्तुः, पु, (तन्यते विस्तीर्य्यते इति तनोति वा । तन+"सितनिगमीति ।" उणां १ । ७० । इति तुन् ।) सूत्रम् ।इत्यमरः ।२।१०।२८ ॥ (यथा, महाभारते । १२ । ४७ । २२ ।
"यस्मिन् नित्यं तते तन्तौ दृढ़ं स्रगिव तिष्ठति ॥")
ग्राहः । इति हेमचन्द्रः ॥ सन्तति. । यथा,—
"अन्तःस्थः सर्व्वभूतानामात्मा योगेश्वरो हरिः ।
स्वमाययावृणोद्गर्भं वैराट्याः कुरुतन्तवे ॥"
इति श्रीभागवतम् ॥

तन्तुकः, पु, (तन्तुरिव तन्तुनेव वा कायतीति । कै+कः । तन्तु+संज्ञायां कन् वा ।) तन्तुभः । सर्षपः । इत्यमरटीकायां रमानाथः ॥ (यथा, सुश्रुते कल्पस्थाने ४ अध्याये । "पिङ्गलस्तन्तुकपुष्पपाण्डुः षडगोऽसिको वभ्रुकषायः ॥")

तन्तुकाष्ठं, क्ली, (तन्तुसमन्वितं काष्ठम् ।) तूली । इति शब्दरत्नावली ॥ ताँतेर काट इति भाषा ॥

तन्तुकी, स्त्री, (तन्तुरिव कायतीति । कै+क. ङीप् च ।) नाडी । इति राजनिर्घण्टः ॥

तन्तुकीटः, पु, (तन्तूत्पादकः कीट इति शाकपार्थिववत् मध्यपदलोपी समासः ।) कोषकारः । इति जटाधरः ॥ गुटिपोका इति भाषा ॥

तन्तुणः, पु, (तन+वाहुलकात् तुनन् निपातनात् णत्वं दन्त्यनकारान्त इत्येके ।) ग्राहः । इति हेमचन्द्रः ॥ हाङ्गर इति भाषा ॥

तन्तुपर्व्व, [न्] क्ली, (तन्तं यज्ञोपवीतिः सतुप्रदानाय यत् पर्व्व तिथिरित्यर्थः ।) परमेश्वरोपवीतदानतिथिः । सा श्रावणी पूर्णिमा । इति तिथ्यादितत्त्वम् ॥

तन्तुनाग., पुं, (तन्तुर्नाग इव ।) ग्राहः । इति हेमचन्द्रः ॥

तन्तुनिर्यास, पु, (तन्तुनेव निर्य्यासः तन्तुवत् निर्य्यासो यस्य वा ।) तालः । इति शब्दरत्नावली ॥

तन्तुभः, पु, (तन्तुरिव भातीति । भा + क ।) सर्षपः । इत्यमरः । २।९।१७ ॥ वत्सः । इति जटाधरः ॥

तन्तुर, क्ली, (तन्तुरस्त्यस्येति । तन्तु + अश्मादित्वात् रः ।) मृणालम् । इति शब्दरत्नावली ॥

तन्तुलं, क्ली, (तन्तुरम् । रस्य लत्वम् ।) मृणालम् । इति हेमचन्द्रः ॥

तन्तुवाप, पु, (तन्तून् वपतीति । वप + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) तन्त्रवायः । इति जटाधरः ॥ ताँति इति भाषा ॥ तन्त्रम् । इति शब्दमाला ॥ ताँत् इति भाषा ॥

तन्तुवाय, पु, (तन्तून् वयति विस्तारयति जालाकारेणेति । वे + "ह्वावामश्च ।" ३ । २ । ७१ । इत्यण् ।) लूता । इत्यमरः । २।६।१३ ॥ (तन्तून् वयतीति । वे + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तन्त्रवायः । इति शब्दरत्नावली ॥ (यथा, मनुः । ८ । ३९७ ।
"तन्तुवायो दशपलं दद्यादेकपलाधिकम् ॥")

तन्तुविग्रहा, स्त्री, (विगृह्यतेऽसौ । वि + ग्रह + अप् । विग्रहो देहः । तन्तुभिर्निर्म्मितो विग्रहोऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

तन्तुशाला, स्त्री, (तन्तुवपनार्थं या शाला गृहमित्यर्थः ।) तन्तुवपनगृहम् । ताँतघर इति भाषा । तत्पर्य्यायः । गर्त्तिका २ । इति हेमचन्द्रः ॥

तन्तुसन्ततं, त्रि, (तन्तुना तन्तुभिर्वा सन्ततं व्याप्तम् ।) सूत्रविस्तृतवस्त्रादि । सिलान कापड़ इति भाषा । तत्पर्य्यायः । ऊतम् २ स्यूतम् ३ उतम् ४ । इत्यमरः । ३ । १ । १०२ ॥

तन्तुसार, पुं, (तन्तुः एव सारो यस्य ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥

तन्त्रं, क्ली, (तनोति तन्यते इति वा । तन + कर्त्तरि यथायथं ष्ट्रन् । तन्त्रि कुटुम्बधारणे + घञ् वा ।) कुटुम्बकृत्यम् । (कुलप्रतिष्ठादिकस्थिति । यथा, महाभारते । १३ । ४८ । ६ ।
"सर्व्वानुपायानथ सम्प्रधार्य्य
समुद्धरेत् स्वस्य कुलस्य तन्त्रम् ॥")
सिद्धान्तः । औषधिः । प्रधानम् । तन्त्रवायः । परिच्छदः । श्रुतिशाखाविशेषः । हेतुः । उभयार्थप्रयोजकम् । इतिकर्त्तव्यता । इति मेदिनी ॥ राष्ट्रम् । परच्छन्दः । करणम् । अर्थसाधकः । तन्तुः । सैन्यम् । स्वराष्ट्रचिन्ता । इति हेमचन्द्रः ॥ (यथा, माघे । २ । ८८ ।
"तन्त्रावापविदा योगैर्म्मण्डलान्यधितिष्ठता ॥")
प्रबन्धः । इति शब्दरत्नावली ॥ शपथः । इति धरणिः ॥ धनम् । गृहम् । वयनसाधनम् । (यथा, महाभारते । १।३।१४० । "तदापश्यत् स्त्रियौ तन्त्रे अधिरोप्य सुवेमे पटं वयन्त्यौ ॥") कुलम् । इति नानार्थध्वनिमञ्जरी ॥ (शास्त्रम् । इति विश्वः । यथा, देवीभागवते । २।११।१६ ।
"अथर्व्वागमतन्त्रं वा वाचयेदागमन्वितम् ॥"
व्यवहारः । नियमादिः । यथा, महाभारते । १ । १०७ । २६ ।
"श्रुत्वा तां प्रतिपद्यस्व प्राज्ञैः सह पुरोहितैः ।
आपद्धर्म्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च ॥")
शिवोक्तशास्त्रम् । तच्च चतुःषष्टिसंख्यकम् । यथा,—
"सिद्धीश्वर महातन्त्रं कालीतन्त्रं कुलार्णवम् ।
ज्ञानार्णवं नीलतन्त्रं फेत्कारीतन्त्रमुत्तमम् ॥
देव्यागम उत्तराख्यं श्रीक्रमं सिद्धियामलम् ।
मत्स्यसूक्तं सिद्धसारं सिद्धिसारस्वतं तथा ॥
वाराहीतन्त्रं देवेशि ! योगिनीतन्त्रमुत्तमम् ।
गणेशविमर्शिनी तन्त्रं नित्यातन्त्रं शिवागमम् ॥
चामुण्डाख्यं महेशानि ! मुण्डमालाख्यतन्त्रकम् ।
हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम् ॥
कुलप्रकाशकं देवि ! कल्पं गान्धर्व्वकं शिवे ! ।
क्रियासारं निबन्धाख्यं स्वतन्त्रं तन्त्रमुत्तमम् ॥
सम्मोहनं तन्त्रराजं ललिताख्यं तथा शिवे ! ।
राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम् ॥
बृहत्श्रीक्रमं तन्त्रं गवाक्षं सुकुमुदिनी ।
[illegible] तन्त्रञ्च मालिनीविजयं तथा ॥
समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम् ।
योगिनीहृदयं तन्त्रं भैरवं परमेश्वरि ! ॥
सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम् ।
तन्त्रान्तरञ्च देवेशि ! नवरत्नेश्वरं तथा ॥
कुलचूडामणितन्त्रं भावचूडामणीयकम् ।
तन्त्रदेवप्रकाशञ्च कामाख्यानामकं तथा ॥
कामधेनु कुमारी च भूतडामरसञ्ज्ञकम् ।
[illegible] यामलं ब्रह्मयामलम् ॥
विश्वसारं महातन्त्रं महाकालं कुलामृतम् ।
कुलोड्डीशं कुब्जिकाख्यं यन्त्रचिन्तामणीयकम् ॥
एतानि तन्त्ररत्नानि सफलानि युगे युगे ।
कालीविलासकादीनि तन्त्राणि परमेश्वरि ! ॥
कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु ।
महाचीनादितन्त्राणि अविकल्पे महेश्वरि ! ॥
सुसिद्धानि वरारोहे ! रथक्रान्तासु भूमिषु ॥"
इति महासिद्धिसारस्वतम् ॥ * ॥
अपि च ।
"चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति ! ।
सफलानीह वाराहे ! विष्णुक्रान्तासु भूमिषु ॥
कल्पभेदेन तन्त्राणि कथितानि च यानि च ।
पाषण्डमोहनायैव विफलानीह सुन्दरि ! ॥"
इति महाविश्वसारतन्त्रम् ॥
तन्त्रागमस्य लक्षणं यथा,—
"सृष्टिश्च प्रलयश्चैव देवतानां यथार्च्चनम् ।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च ॥
षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तमागमं तद्विदुर्बुधाः ॥" * ॥
यामलस्य लक्षणम् ।
"सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च ॥
युगधर्म्मश्च सङ्ख्यातो यामलस्याष्टलक्षणम् ॥" * ॥
तन्त्रस्य लक्षणम् ।
"सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च ।
देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम् ॥
तथैवाश्रमधर्म्मश्च विप्रसंस्थानमेव च ।
संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः ॥
उत्पत्तिर्विबुधानाञ्च तरूणां कल्पसंज्ञितम् ।
संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च ॥
कोषस्य कथनञ्चैव व्रतानां परिभाषणम् ।
शौचाशौचस्य चाख्यानं नरकाणाञ्च वर्णनम् ॥
हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम् ।
राजधर्म्मो दानधर्म्मो युगधर्म्मस्तथैव च ॥
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम् ।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ॥" * ॥
तस्य माहात्म्यम् ।
"विष्णुर्वरिष्ठो देवानां ह्रदानामुदधिस्तथा ।
नदीनाञ्च यथा गङ्गा पर्व्वतानां हिमालयः ॥
अश्वत्थः सर्व्ववृक्षाणां राज्ञामिन्द्रो यथा वरः ।
देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा ॥
तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम् ॥
सर्व्वकामप्रदं पुण्यं तन्त्रं वै वेदसम्मितम् ।
कीर्त्तनं देवदेवस्य हरस्य मतमेव च ॥
साधनं श्रद्दधानानामिह लोके परत्र च ॥" * ॥
तस्य श्लोकसंख्या यथा,—
"न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि ।
सङ्क्षेपाद्धि प्रवक्ष्यामि लोककल्पोक्तवर्त्मना ॥
दिवि देवे नवलक्षं पाताले ब्रह्मशासने ॥
लक्षमात्रं भारते च क्षितौ तन्त्राणि यानि च ।
आगमं त्रिविधं प्रोक्तं चतुर्धर्म्मेश्वरं स्मृतम् ॥
कल्पश्चतुर्विधः प्रोक्त आगमो डामरस्तथा ।
यामलञ्च तथा तन्त्रं तेषां भेदाः पृथक् पृथक् ॥
मुक्तकाख्यं प्रपञ्चञ्च सारदाख्यञ्च नारदम् ।
महार्णवञ्च कपिलो योगः कल्पं कपिञ्जलम् ॥
अमृतसुन्दरीश्च [illegible] ।
प्रथमोऽष्टसहस्रन्तु श्लोका दश प्रकीर्त्तिताः ॥
द्वितीयो मुक्तकश्चैव षट्सहस्राणि संख्यया ।
श्लोकाः शताष्टसंख्यातास्तृतीयस्त्रिसहस्रकः ॥
शतद्वयं साधिकञ्च श्लोकानां पञ्चविंशतिः ।
त्रिंशत्सहस्राणि श्लोकानां भानुसंख्यया ॥
प्रपञ्चे प्रथमे तन्त्रे द्वितीये वसुसंख्यया ।
सहस्राणि तथा श्लोकाः सप्तविंशतिसंख्यया ॥
भूतनेत्रसहस्राणि तृतीये पञ्चसहस्रकम् ।
शतत्रयं षट्त्रिंशच्छ्लोकाः प्रपञ्चे कथितास्त्रिधा ॥
कलासंख्या सहस्राणि शारदायाः प्रकीर्त्तिताः ।
पञ्चविंशाधिकाः श्लोका वसुश्लोकाश्च नारदे ॥
विंशतिश्च सहस्राणि षट्सहस्राणि संख्यया ।
वसुश्लोकाश्च कथिताः कपिले श्लोकसंख्यया ॥
त्रयोदशसहस्राणि कालोत्तरशतत्रयम् ।

श्लोकसंख्यासमुद्दिष्टं योगे कल्पे च संख्यया ॥
बाणसंख्यासहस्राणि श्लोका नवतिः कीर्त्तिताः ।
श्लोकानान्तु सहस्राणि अष्टाविंशतिसंख्यया ॥
श्लोकाश्च भानुसंख्यातास्तन्त्रेऽपि च कपिञ्जले ।
अमृतशुद्धौ सहस्राणि पञ्चश्लोकाधिकानि च ॥
पञ्चैव कथिता नेत्रसंख्यातानि यथार्थतः ।
वीरागमे षडधिकानि शतानि परिसंख्यया ॥
सहस्राणि च तावन्ति श्लोकानान्तु यथार्थतः ।
पञ्चाधिकसहस्राणि श्लोकानामृतुसंख्यया ॥
सिद्धसम्बरणोक्तानि ऐश्वरेण यथा पुरा ॥ * ॥
डामरः षड्विधो ज्ञेयः प्रथमो योगडामरः ॥
श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्चशतानि च ।
त्रिविंशतिसहस्राणि श्लोकानि चेह संख्यया ।
एकादशसहस्राणि संख्याताः शिवडामरे ॥
श्लोका. सप्तैव निश्चित्य ईश्वरेणैव भाषिताः ।
तावत्श्लोकसहस्राणि पञ्चश्लोकशतानि च ।
गुणोत्तराणि दुर्गाया डामरे कथितानि च ॥
नवश्लोकसहस्राणि नवश्लोकशतानि च ।
सारस्वते तथा श्लोकाः पञ्चैव परिकीर्त्तिताः ॥
स्वरसंख्यासहस्राणि श्लोकानां ब्रह्मडामरे ।
पञ्चोत्तरशतान्यत्र संख्यातानि शिवेन तु ॥
षष्टिः श्लोकसहस्राणि गान्धर्व्वे डामरोत्तमे ।
श्लोकाश्च षष्टिसंख्याता ब्रह्मण्यायत्तयोगिना ॥
यामला. षट् च संख्यातास्तत्रादावादियामले ।
द्वात्रिंशच्च सहस्राणि त्रयस्त्रिंशत्शतानि च ॥
द्वितीये ब्रह्मसञ्ज्ञे ते द्वाविंशतिश्च संख्यया ।
सहस्राणि शतान्यत्र तान्येव कथितानि च ॥
तावत्संख्यासहस्राणि शतानि परिसंख्यया ।
विंशतिश्च तथा सख्या श्लोकाश्च विष्णुयामले ॥
कालसंख्यासहस्राणि वेदसंख्याशतानि च ।
पञ्चषष्टिस्तथा श्लोकाः कनिष्ठे रुद्रयामले ॥
नवश्लोकसहस्राणि त्रयोदशशतानि च ।
द्वाविंशतिस्तथा श्लोका गणेशे यामलोत्तमे ॥
रविसंख्यासहस्राणि आदित्याख्ये तु यामले ।
तन्त्रे नीलपताकायां सहस्राणि च पञ्च च ॥
पञ्चविंशतिश्लोकाश्च कथिता वामकेश्वरे ।
त्रयोदशसहस्राणि द्वे शते विंशतिस्तथा ॥
श्लोका मृत्युञ्जये तन्त्रे संख्यातास्तन्त्रवेदिभि ।
गजसंख्यासहस्राणि त्रीणि सख्याशतानि च ॥
सप्तश्लोकास्तथैवात्र तन्त्रे योगार्णवोत्तमे ।
दशश्लोकसहस्राणि तावन्त्येव शतानि च ॥
मायाख्ये च महातन्त्रे यथार्थतः प्रकीर्त्तिताः ।
पञ्चश्लोकसहस्राणि तावन्त्येव शतानि च ॥
शतार्द्धसंख्यया श्लोका दक्षिणामूर्त्तितन्त्रके ।
दशश्लोकसहस्राणि तावन्त्येव शतानि च ॥
त्रयोदश तथा श्लोकाः कालिकाख्ये च तन्त्रके ।
कामेश्वर्य्यास्तन्त्रवरे सहस्राणि त्रयं महत् ॥
श्लोकानां संख्यया चात्र तन्त्रराजे च संख्यया ।
नवश्लोकसहस्राणि नवश्लोकशतानि च ॥
द्वाविंशति सहस्राणि हरगौर्य्योश्च तन्त्रके ।
तथा च विंशतिः श्लोकास्तन्त्रेऽस्मिन् परि-
कीर्त्तिताः ।

अर्कसंख्यासहस्राणि द्वितीये तन्त्रवेदिभिः ।
अष्टाविंशतिश्च श्लोकाः सङ्ख्यातास्तन्त्रनिर्णये ॥
कुब्जिकाख्ये महातन्त्रे श्लोकाश्च दशसंख्यया ।
सहस्राणि तथा सप्तसङ्ख्यातानि मनीषिभिः ॥
द्वितीये षट्सहस्राणि तदर्द्धञ्च कनिष्ठके ।
अर्कसंख्यासहस्राणि तथाङ्कशशतानि च ॥
तावद्धा महातन्त्रे सङ्ख्यातानि द्विजोत्तमैः ।
द्वाविंशतिसहस्राणि द्वाविंशतिशतानि च ॥
कात्यायन्यास्तु तन्त्रस्य सङ्ख्यातानि मनीषिभिः ।
वसुश्लोकसहस्राणि तावन्त्येव शतानि च ॥
प्रत्यङ्गिरायास्तन्त्रे च निश्चितानि यथार्थतः ।
भूतसङ्ख्यासहस्राणि तथाहि तच्छतानि च ॥
महालक्ष्म्यास्तन्त्रराजे पञ्चश्लोकाश्च कीर्त्तिताः ।
गजसंख्यासहस्राणि श्लोकाश्च ऋतुसङ्ख्यया ॥
त्रिपुरार्णवे महातन्त्रे लिखिताः परमर्षिभिः ।
सरस्वत्याः सहस्रे द्वे द्वे शते सङ्ख्यया स्मृते ॥
पञ्चश्लोकास्तथैवात्र विज्ञातव्या द्विजातिभिः ।
द्वाविंशतिसहस्राणि आदौ तन्त्रोत्तमोत्तरे ॥
अङ्कसङ्ख्याशतान्यत्र श्लोकाः पञ्चदशैव तु ।
द्वाविंशतिसहस्राणि तथा बाणशतानि च ।
द्वात्रिंशच्च तथा श्लोका योगिन्यास्तन्त्रराजके ।
द्वितीये षट्सहस्राणि तथा च त्रिशतानि च ॥
त्रयः श्लोकास्तथैवात्र वाराह्यास्तन्त्र उत्तमे ।
ऊर्म्मिसङ्ख्यासहस्राणि तत्त्वसङ्ख्याशतानि च ॥
गवाक्षे तन्त्रराजेऽस्मिन् श्लोका हि तत्त्वसङ्ख्यया ।
वर्णसङ्ख्यासहस्राणि द्वे शते परिनिश्चिते ॥
श्लोकास्त्रयश्च सङ्ख्यातास्तन्त्रे नारायणीयके ।
वेदसङ्ख्यासहस्राणि तान्येव च शतानि च ॥
श्लोका नवतिसङ्ख्याता मृडानीतन्त्रराजके ।
तृतीये त्रिसहस्राणि त्रिशतानि कनिष्ठके ॥
त्रिंशत्श्लोकाश्च सङ्ख्याता ज्ञातव्यास्तन्त्र-
वेदिभिः ॥”

उपतन्त्राणि यथा,—
“बौद्धोक्तान्युपतन्त्राणि कापिलोक्तानि यानि च ।
अद्भुतानि च एतानि जैमिन्युक्तानि यानि च ॥
वशिष्ठः कपिलश्चैव नारदो गर्ग एव च ।
पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगुस्तथा ॥
शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः ।
एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च ॥
न सङ्ख्यातानि तान्यत्र धर्म्मविद्भिर्म्महात्मभिः ।
सारात्सारतराण्येव सङ्ख्यातानि निबोधत ॥”
इति वाराहीतन्त्रम् ।
(आगमतत्त्वविलासोक्ततन्त्रनामानि यथा,—
“स्वतन्त्रतन्त्रं फेत्कारीतन्त्रमुत्तरतन्त्रकम् ।
नीलतन्त्रं वीरतन्त्रं कुमारीतन्त्रमुत्तमम् ॥
कालीनारायणीतन्त्रे तारिणीतन्त्रमुत्तमम् ।
बालातन्त्रञ्च समयातन्त्रं भैरवतन्त्रकम् ॥
भैरवीत्रिपुरातन्त्रे वामकेश्वरतन्त्रकम् ।
कुक्कुटेश्वरतन्त्रञ्च मातृकातन्त्रमेव च ॥
सनत्कुमारतन्त्रञ्च विशुद्धेश्वरतन्त्रकम् ।
सम्मोहनाख्यतन्त्रञ्च गौतमीयञ्च तन्त्रकम् ॥
बृहद्गौतमीयतन्त्रं भूतभैरवतन्त्रकम्
चामुण्डापिङ्गलातन्त्रे वाराहीतन्त्रकं तथा ॥
मुण्डमालाख्यतन्त्रञ्च योगिनीतन्त्रमुत्तमम् ।
मालिनीविजयं तन्त्रं तन्त्रं स्वच्छन्दभैरवम् ॥
महातन्त्रं शक्तितन्त्र तन्त्रं चिन्तामणिं परम् ।
उन्मत्तभैरव तन्त्रं त्रैलोक्यसारतन्त्रकम् ॥
विश्वसाराह्वयं तन्त्रं तथा तन्त्रामृताभिधम् ।
महाफेत्कारीयतन्त्रं वायवीयञ्च तोडलम् ॥
मालिनीललितातन्त्रे त्रिशक्तितन्त्रकं तथा ।
राजराजेश्वरीतन्त्र महामोहस्वरोत्तरम् ॥
गवाक्षतन्त्र गान्धर्व्वं तन्त्रं त्रैलोक्यमोहनम् ।
हंसमाहेश्वरं हंसपरमेश्वरतन्त्रकम् ॥
कामधेन्वाख्यतन्त्रञ्च तन्त्रं वर्णविलासकम् ।
मायातन्त्रं मन्त्रराजं कुब्जिकातन्त्रमुत्तमम् ॥
विज्ञानलतिकां लिङ्गागम कालोत्तर तथा ॥”
* * * *
“ब्रह्मयामलकञ्चादियामलं रुद्रयामलम् ॥
बृहद्यामलकं सिद्धयामलं कल्पसूत्रकम् ।
मत्स्यसूक्तं कल्पसूक्तं कामराजं शिवागमम् ॥
उड्डीशञ्च कुलोड्डीशमड्डीशं वीरभद्रकम् ।
भूतडामरक तद्वत् डामरं यक्षडामरम् ॥
कालिकाकुलसर्व्वस्वं कुलसर्व्वस्वमेव च ।
कुलचूडामणि दिव्यं कुलसारं कुलार्णवम् ॥
कुलामृतकुलावल्यौ तथा कालीकुलार्णवम् ।
कुलप्रकाशं वाशिष्ठं सिद्धसारस्वतं तथा ॥
योगिनीहृदयं कालीहृदयं मातृकार्णवम् ।
योगिनीजालकुरक तथा लक्ष्मीकुलार्णवम् ॥
तारार्णव चन्द्रपीठं मेरुचन्द्रं चतुःशतीम् ।
तत्त्वबोधं महोग्रञ्च स्वच्छन्दसारसंग्रहम् ॥
ताराप्रदीपं सङ्केतचन्द्रोदयमतिस्फुटम् ।
षट्त्रिंशत्तत्त्वकं लक्ष्यनिर्णय त्रिपुरार्णवम् ॥
विष्णुधर्म्मोत्तरं मन्त्रदर्पणं वैष्णवामृतम् ।
मानसोल्लासकं पूजाप्रदीपं भक्तिमञ्जरीम् ॥
भुवनेश्वरीं पारिजातं प्रयोगसारमुत्तमम् ।
कामरत्नं क्रियासारं तथैवागमदीपिकाम् ॥
भावचूडामणिग्रन्थं तन्त्रचूडामणिं परम् ।
बृहच्छ्रीक्रमसंज्ञञ्च तथा श्रीक्रमरुद्रकम् ॥
सिद्धान्तशेखरं ग्रन्थं तां गणेशविमर्शिनीम् ।
मन्त्रमुक्तावलीं तत्त्वकौमुदीं तन्त्रकौमुदीम् ॥
मन्त्रतन्त्रप्रकाशाख्यं श्रीरामार्च्चनचन्द्रिकाम् ।
शारदातिलकं ज्ञानार्णवं सारसमुच्चयम् ॥
कल्पद्रुमं ज्ञानमालां पुरश्चरणचन्द्रिकाम् ।
आगमोत्तरकं तत्त्वसागरं सारसंग्रहम् ॥
देवप्रकाशिनीं तन्त्रार्णवञ्च क्रमदीपिकाम् ।
तारारहस्यं श्यामाया रहस्यं तन्त्ररत्नकम् ॥
तत्त्वप्रदीप ताराया विलासं विश्वमातृकाम् ।
प्रपञ्चसारं तं तन्त्रसारं रत्नावलीं तथा ॥”
कालतन्त्रम् । वासनाजालम् । यथा, महा-
भारते । १ । ३ । १४२ ।

“तन्त्रञ्चेदं विश्वरूपे युवत्यौ
वयतस्तन्तून् सततं वर्त्तयन्त्यौ ॥”

“तन्त्रं कालतन्त्र विश्वोपादाननिमित्तादिकारण-
समूहसम्बन्धम् ॥” इति दुर्घटार्थप्रकाशिन्या

विमलबोधः ॥ "इह सन्त वासनाजालम् ।" इति नीलकण्ठः ॥)

तन्त्रक, क्ली, (तन्त्रात् तन्तुवायात् अचिरापहृतम् । तन्त्र+"तन्त्रादचिरापहृते । ५ । २ । ७१ । इति कन् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११२ ॥

तन्त्रकाष्ठ, क्ली, (तन्त्रस्य काष्ठम् ।) तन्त्रवायस्य तुरी । इति त्रिकाण्डशेषः ॥

तन्त्रता, स्त्री (तन्त्रस्य भावः । तन्त्र+तल् ।) अनेकासुद्दिश्य सकृतप्रवृत्तिः । यथा ।"आग्नेयाष्टाकपालेन्द्रदध्यैन्द्रपयोयागानां त्रयाणां आग्नेयाष्टाकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां त्रयाणां सकृत् सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिध्यति ।""तथा नानाब्रह्मवधसत्त्वे सर्व्वोद्देशेन सकृत प्रायश्चित्ते कृते ब्रह्मवधजन्यपापनाशः ।" "तन्त्रताया हेतुश्च । अवदानार्थैकजातीयकर्म्मणः कालदेशकत्रादीनां प्रयोगानुबन्धवैधहेतुभूतानामभेदे उद्देश्यविशेषाश्च इति । एवञ्च ।

'स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि ।
पवित्राणां तथा जाप्ये दाने च विधिदर्शित' ॥'
इति विष्णूक्तम् ॥

'अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन ।'
इति दक्षोक्तञ्च क्रियाङ्गस्नान कर्त्तृसंस्कारद्वारैव तद्दिनकर्त्तव्याशेषकर्म्मार्थमेकमेव न तु प्रतिकर्म्म कर्त्तव्यम् ।" इति प्रायश्चित्ततत्त्वम् ॥

तन्त्रवाप', पुं, (तन्यते विस्तीर्य्यते इति तन्त्रं सूत्रम् । तत् वपतीति । वप+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तन्त्रवायः । तन्त्रे, पु क्ली । इति शब्दरत्नावली ॥

तन्त्रवाय', पुं, (तन्त्रेण वयतीति । वे ञ तन्तुसन्ताने +"ह्वावामश्च ।" ३ । २ । २ । इत्यण् ।) वर्णसङ्करजातिविशेषः । ताँति इति भाषा । अस्योत्पत्तिर्यथा, पराशरपद्धतौ ।

"तान्त्रकुट्टाच्छककार्य्यां मणिकारश्च जायते ।
मणिकारात् तान्त्रकुट्ट्यां मणिबन्धोऽप्यजायत ।
मणिबन्धान्मणिकार्य्यां तन्त्रवायाश्च जज्ञिरे ॥"

तत्पर्य्यायः । कुविन्दः २ । इत्यमरः ।२।१०।६॥ तन्त्रवाय' ३ । इति भरतः ॥ तन्तुवापः ४ । इति जटाधरः ॥ तन्तुवायः ५ । इति शब्दरत्नावली ॥ लूता । इत्यमरटीकायां स्वामी ॥

तन्त्रिका, स्त्री, (तन्त्री एव । तन्त्री+स्वार्थे कन् । पूर्व्वह्रस्वश्च ।) गुडूची । इत्यमरः । २।४।८२ ॥ (यथास्याः पर्य्यायाः ।

"गुडूचीमधुपर्णी स्यादमृताऽमृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तन्त्रिपालकः, पुं, जयद्रथराज. । इति शब्दमाला ॥

तन्त्रीः, स्त्री, (तन्त्रयति मोहयति लोकानिति । तन्त्र+"अवितृस्तृतन्त्रिभ्य ईः ।" उणा । ३ । १५८ । इति ईः ।) वीणागुणः । (यथा, रामायणे । २ । ३८ । ७८ ।

"नातन्त्रीर्विद्यते वीणा नाचक्रो विद्यते रथः ॥"
वीणा । यथा, तत्रैव । १ । २ । १८ ।

"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥")
गुडूची । देहशिरा । इति मेदिनी ॥ नदीविशेषः । युवतीभेदः । इति शब्दरत्नावली ॥ रज्जुः । इति हेमचन्द्रः ॥ (यथा, मनुः । ४।३८ ।

"न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥")

तन्द्रवाय., पु, (तन्त्रवाय निपातनात् तस्य दः ।) तन्त्रवाय. । इत्यमरटीकायां रायमुकुट. ॥

तन्द्रा, स्त्री, (तत् द्रातीति । तत्+द्रा+क' । निद्रातन्द्रेति नान्तत्व निपात्यते । यद्वा, तन्द्र अवसादे+भावे घञ् ततष्टाप् ।) निद्रा । आलस्यम् । इति हेमचन्द्रः ॥ (यथा, हठयोगप्रदीपिकायाम् । ३ । ३६ ।

"न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा ।")
तस्या निदानं यथा । "तमोवातकफात्तन्द्रा ।" इति । लक्षणञ्च ।

"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः ।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्द्दिशेत् ॥"
इति माधवकरः ॥

(कारणपूर्व्वकमस्याः सम्प्राप्तिर्लक्षणं चिकित्सितञ्च यथा, चरके सिद्धिस्थाने नवमेऽध्याये ।

"मधुरस्निग्धगुर्व्वन्नसेवनाच्चिन्तनाद्भयात् ।
शोकाद्व्याधिनुषङ्गाच्च वायुनोदीरितः कफः ॥
यदाशौ समवस्कन्द्य हृदयं हृदयाश्रयान् ।
समावृणोति भ्रमनार्दीस्तदा तन्द्रोपजायते ॥
हृदये व्याकुलीभावो वाक्चेष्टेन्द्रियगौरवम् ।
मनोबुद्ध्यप्रसादश्च तन्द्राया लक्षणं मतम् ॥
कफघ्नं तत्र कर्त्तव्यं शोधनं शमनानि च ।
व्यायामो रक्तमोक्षश्च भोज्यञ्च कटुतिक्तकम् ॥")

तन्द्रालु', त्रि, (तत् द्रातीति । तत्+द्रा+"स्पृहिगृहीति ।" ३ । २ । १५८ । इति आलुच् तत्शब्दस्य नान्तत्व निपात्यते ।) निद्रालुः । इति जटाधर. ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये ।

"अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् ॥")

तन्द्रि, स्त्री, (तदि मोहे धातुः+"वह्न्याद्यश्च ।" उणा । ४ । ६६ । इति क्रिन् ।) निद्रा । आलस्यम् । इत्युणादिकोष. ॥ (यथा, भागवते । ३ । २० । ४० ।

"दृष्ट्वा भूतपिशाचांश्च भगवानात्मतन्द्रिणा ।
दिग्वाससो मुक्तकेशान् वीक्ष्य चामीलयद्दृशौ ॥")

तन्द्रिका, स्त्री, (तन्द्रिरेव । स्वार्थे कन् टाप् च ।) तन्द्रि' । इति शब्दरत्नावली ॥

तन्द्री, स्त्री, (तन्द्रि+"कृदिकारादक्तिनः ।" वा ङीष् ।) अत्यन्तश्रमादिना सर्व्वाङ्गेन्द्रियाप्रसन्नम् । अत्यन्तश्रमादिना सर्व्वाङ्गनिमीलनं निःसहतेति यावत् इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । प्रमीला २ । इत्यमरः ॥ तन्द्रा ३ तन्द्रिः ४ । इति तट्टीका ॥ तन्द्रिका ५ विषयाभागम् ६ । इति राजनिर्घण्ट. ॥ (यथा, महाभारते । ३ । ३०३ । १८ ।

"निक्षिप्य राजपुत्त्री तु तन्द्रीं मानं तथैव च ।
धातस्थे परमं यत्नं ब्राह्मणस्याभिराधये ॥")
निद्रा । इति मेदिनी । रे, ४२ ॥ (केचित्तु तन्द्रधातोर्बाहुलकात् ईप्रत्ययेन तन्द्रीरिति पदं कल्पयन्ति यथा, चरके सूत्रस्थाने त्रयोदशेऽध्याये ।

"पाण्डुता गौरवं जाड्यं पुरीषस्याविपक्वता ।
तन्द्रीररुचिरुत्क्लेशः स्यादतिस्निग्धलक्षणम् ।")

तन्नि, स्त्री, (तन्नयतीति । नी+बाहुलकात् ड्नि ।) चक्रकुल्या । इति रत्नमाला ॥ तत्रिरपि पाठ. ॥

तन्मात्रं, क्ली, (तदेवेति । तत्+एवार्थे मात्रच् । यद्वा, सा मात्रा यस्य ।) अपञ्चीकृतसूक्ष्मरसगन्धस्पर्शशब्दानां संज्ञा । यथा,—

"इमान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ।" इति वेदान्तसारः ।२७। तट्टीका यथा । "नन्वयाकृतात् पञ्चतन्मात्राणि क्रमेण जायन्ते इति हि स्मृतीतिहासपुराणेषु प्रसिद्धिः सत् कथमाकाशादेरिहोत्पत्तिराम्नायते इति तत्राह एतान्येवेति । एतान्येवाकाशादीनि सूक्ष्मभूतानि व्यवहारासमानि शब्दादितारतम्यविकसभावानि अपञ्चीकृतानि परमसूक्ष्माणि चेति स्मृत्यादिषूच्यन्ते महर्षिभिरित्यर्थः ।" इति विद्वन्मनोरञ्जिनी ॥ * ॥ अपि च ।

"भूतादिस्तु विकुर्व्वाणः सर्गं तन्मात्रिकं ततः ।
ससर्ज्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ॥"
इति विष्णुपुराणे १२ अध्यायः ॥

तन्यतु, पुं, (तनोति विस्तारयति तमः शब्दं वा । तनु विस्तारे+"ऋतन्यञ्जिवनीति ।" उणा ।४। २ । इति यतुच् ।) रात्रिः । वातम् । इत्युणादिकोषः ॥ (वायुः । इत्युज्ज्वलदत्त ॥ अशनिः । इति माधवः । विद्युत् । इति दयानन्दः ॥ यथा, ऋग्वेदे । १ । ५२ । ६ ।

"वृत्रस्य यत् प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ॥")

तन्वी, स्त्री, (तनुः+"वोतो गुणवचनात् ।" ४ । १ । ४४ । इति ङीष् ।) कृशाङ्गी । यथा,—

"तव तन्वि ! कुचावेतौ नियतौ चक्रवर्त्तिनौ ।
आसमुद्रकरग्राही भवान् यत्र करप्रदः ॥"
इति कालिदासः ॥

शालपर्णी । इति राजनिर्घण्टः ॥ (चतुर्विंशवर्णवृत्तविशेषः । इति छन्दोमञ्जरी । तस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

तप, क दाहे । इति कविकल्पद्रुमः ॥ (चुरां-परसक-सेट् ।) क, तापयति । अयमात्मनेपदीत्येके । इति दुर्गादासः ॥

तपस्यं, क्ली, (तपसि ग्रीष्मे भवम् । तपस्+यत् ।) कुन्दपुष्पम् । इति शब्दचन्द्रिका ॥ (तपश्चरतीति । तपस्+कर्म्मणो क्यङ् । ततो भावे घञ् । तपश्चरणम् । यथा, महाभारते । १३।१०।१३ ।
“अथास्य बुद्धिरभवत् तपस्ये भरतर्षभ ॥”)

तपस्यः, पुं, (तपसि ग्रीष्मे साधु । तपस्+“तत्र साधुः ।” ४ । ४ । ९८ । इति यत् ।) फाल्गुनमासः । इत्यमरः । १ । ४ । १५ । (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये । “तत्र माघादयो द्वादशमासाः द्विमासिकमृतुं कृत्वा षड़्तवो भवन्ति । ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः । तेषां तपस्तपस्यौ शिशिरः ॥”) अर्ज्जुनः । इति हेमचन्द्रः ॥ (तामसस्य मनोः पुत्त्रविशेषः । यथा, हरिवंशे । ७ । २४ ।
“द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोशनः ।
तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः ।
तामसस्य मनोरेते दश पुत्त्रा महाबलाः ॥”)

तपस्या, स्त्री, (तपश्चरतीति । “कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोः ।” ३ । १ । १५ । इति क्यङ् । ततः “अ प्रत्ययात् ।” ३ । ३ । १०२ । इति अ ततष्टाप् ।) तपः । तत्पर्य्यायः । व्रतादानम् २ परिव्रज्या ३ नियमस्थितिः ४ । इति हेमचन्द्रः ॥ व्रतचर्य्या ५ । इति मेदिनी ॥

तपस्विनी, स्त्री, जटामांसी । इत्यमरः । २ । ४ । १३४ ॥ (तपस्वितुल्यजटायुक्तत्वादस्यास्तथात्वम् । यथा, वैद्यकरत्नमालायाम् ।
“मलदं नन्दिनी पेषी मांसी कृष्णजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥”)
कटुरोहिणी । इति हेमचन्द्रः ॥ महाश्रावणिका । इति भावप्रकाशः ॥ (तपोऽस्या अस्तीति । तपस्+“तप सहस्राभ्यां विनीनी ।” ५ । २ । १०२ । इति विनिः । ततः स्त्रियां ङीप् ।) तपोयुक्ता स्त्री ॥ (यथा, रामायणे । ३ । २ । ७ ।
“पत्नीं स च महाप्रज्ञां विद्वां शुद्धां तपस्विनीम् ।
अनसूयां महाभागां सर्व्वभूतहिते रताम् ॥”
दीना । दुःखिता । यथा, भागवते । १।९।४४ ।
“ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् ।
पितरं सान्त्वयामास गान्धारीञ्च तपस्विनीम् ॥”
पतिव्रता । यथा, नैषधे । १ । १३५ ।
“मदेकपुत्त्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्द्दयन्
अहो विधे । त्वां करुणा रुणद्धि न ॥”
“वरटा हंसी मम स्त्री मया नूतना प्रसूतिः प्रसवो यस्यास्तादृशी सापि स्त्री जीवितुमसमर्था तर्हि पत्यन्तरेण तस्या जीविका भवेदित्यपि निषेधयति यतस्तपस्विनी पतिव्रता मम मरणानन्तरं पत्यन्तराश्रयणाभावात् तस्या जीवनं शिशूनां पोषणञ्च दुर्घटमेव भवेदिति भावः ॥” इति तट्टीका ॥)

तपस्विपत्रः, पुं, (तपस्विप्रियं पत्रमस्य ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥

तपस्वी, [न्] त्रि, (तपोऽस्यास्तीति । तपस्+“तप सहस्राभ्यां विनीनी ।” ५ । २ । १०२ । इति विनिः ।) तपोयुक्तः । तत्पर्य्यायः । तापसः २ पारिकाङ्क्षी ३ । इत्यमरः ।२।७।४२॥ पारकाङ्क्षी ४ पारिकाङ्क्षकः ५ । इति शब्दरत्नावली ॥ तपोधनः ६ । (यथा, मनुः । ४ । १६२ ।
“न हिंस्याद्ब्राह्मणान् गाश्च सर्व्वांश्चैव तपस्विनः ॥”)
अनुकम्प्यः । इति मेदिनी । ने, १९५ ॥

तपस्वी, [न्] पुं, (तपस्+अस्त्यर्थे विनिः ।) नारदः । इति शब्दरत्नावली ॥ मत्स्यविशेषः । तपस्या माछ इति भाषा । तत्पर्य्यायः । तपःकरः २ पेष्टकः ३ पेटः ४ । इति शब्दचन्द्रिका ॥ (चाक्षुषस्य मनोः पुत्त्रविशेषः । यथा, हरिवंशे । २ । १८ ।
“ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवान् कविः ॥”)
घृतकरञ्जवृक्षः । इति राजनिर्घण्टः ॥

तपाः, [स्] पुं, (तपत्यस्मिन्निति । तप+असुन् ।) ग्रीष्मः । इत्यमरटीकायां नयनानन्दः ॥ माघमासः । शिशिरकालः । इति मेदिनी । से, २४ ॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये ।
“तेषां तपस्तपस्यौ शिशिरः ॥”)

तपात्ययः, पुं, (तपस्य ग्रीष्मस्य अत्ययो यत्र ।) वर्षाकालः । इति हेमचन्द्रः । २।७१ ॥ (यथा, कुमारे । ५ । २३ ।
“तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्द्ध्वगम् ॥”)

तपितं, त्रि, (तप्यते स्मेति । तप दाहे+क्तः ।) तप्तम् । इति द्विरूपकोषः ॥ (यथा, हरिवंशे । २३४ । २९ ।
“तपितकनकविन्दुपिङ्गलाक्षो
दितितनयोऽसुरसैन्ययुद्धनेता ॥”)

तपुः, [स्] पुं, (तपति तापयतीति वा । तप+“अर्त्तिपृवपीति ।” उणा । २ । ११८ । इति उसि ।) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥ (शत्रुः । इत्युज्ज्वलदत्तः ॥ तापयुक्ते तापने च, त्रि । यथा, ऋग्वेदे । १ । ३६ । १६ ।
“तपुर्ज्जम्भ यो अस्मध्रुक् ॥”)

तपोधनः, पुं, (तप एव धनं यस्य ।) तपस्वी । इति मेदिनी ॥ (यथा, मनुः । ११ । २४२ ।
“यत्किञ्चिदेनः कुर्व्वन्ति मनोवाङ्मूर्त्तिभिर्ज्जनाः ।
तत् सर्व्वं निर्द्दहन्त्याशु तपसैव तपोधनाः ॥”)
दमनकवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।
“उक्तो दमनको दान्तो मुनिपुत्त्रस्तपोधनः ।
गन्धोत्कटो ब्रह्मजटो विनीतः कुलपत्रकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तपोधना, स्त्री, (तपो ग्रीष्मकाल एव धनमिव यस्याः ।) मुण्डीरी । इति मेदिनी ॥ (तपोधने, त्रि । यथा, महाभारते । ५।१८८।२० ।
“षण्मासान् वायुभक्षा च स्थाणुभूता
तपोधना ॥”)

तपोवटः, पुं, ब्रह्मावर्त्तदेशः । इति त्रिकाण्डशेषः ॥

तप्तः, त्रि, (तप्यते स्मेति । तपौ सन्तापे+क्तः ।) तापयुक्तः । तत्पर्य्यायः । सन्तापितः २ दूनः ३ धूपायितः ४ धूपितः ५ । इति हेमचन्द्रः ॥ (यथा, हठयोगप्रदीपिकायाम् । १ । १० ।
“अशेषतापतप्तानां समाश्रयमठो हठः ॥”)

तप्तकुम्भः, पुं, (तप्तः सन्तापितः कुम्भो यत्र ।) नरकविशेषः ॥ (यथा, मार्कण्डेये ।१२।३४-३६ ।
“अतःपरं भीमतरं तप्तकुम्भं निबोध मे ।
समन्ततस्तप्तकुम्भा वह्निज्वालासमावृताः ॥
ज्वलदग्निचयोद्वृत्ततैलायश्चूर्णपूरिताः ।
तेषु दुष्कृतकर्म्माणो याम्यैः क्षिप्ता ह्यधोमुखाः ॥
क्वाथ्यन्ते विस्फुटद्गात्रगलन्मज्जजलाविलाः ।
स्फुटत्कपालनेत्रास्थिच्छिद्यमाना विभीषणैः ॥
गृध्रैरुत्पाट्य मुच्यन्ते पुनस्तेष्वेव वेगितैः ।
पुनः शिमशिमायन्ते तैलेनैक्यं व्रजन्ति च ॥
द्रवीभूतैः शिरोगात्रस्नायुमांसत्वगस्थिभिः ।
ततो याम्यैर्नरैराशु दर्व्व्याघट्टनघट्टिताः ॥
क्वाथ्यन्ते महातैले मथ्यन्ते पापकर्म्मिणः ।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पितः ॥”)

तप्तकृच्छ्रः, पुं क्ली, (तप्तेन जलदुग्धादिना आचरितं कृच्छ्रं कष्टं यत्र । यद्वा, तप्तेनाचरितं कृच्छ्रम् ।) व्रतविशेषः । यथा, “पयोघृतमुदकं वायुतप्तं प्रतित्र्यहं पिबेत् स तप्तकृच्छ्रः ।” इति गौतमः ॥ (द्वादशाहसाध्यव्रतमेतत् । यथा, मनुः । ११ । २१५ ।
“तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् ।
प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः ॥”
“तप्तकृच्छ्रं चरन् द्विजातिः त्र्यहमुष्णोदकं त्र्यहमुष्णगोक्षीरं त्र्यहमुष्णघृतं त्र्यहमुष्णवायुं एकवारं स्नानं कुर्व्वन् संयतवान् पिबेत् । अत्र पराशरोक्तविशेषः ।
षट्पलन्तु पिबेदम्भस्त्रिपलन्तु पयः पिबेत् ।
पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते ॥”
इति तट्टीकायां कुल्लूकभट्टः ॥)

तप्तपाषाणकुण्डं, क्ली,(तप्तानां पाषाणानां कुण्डमिव) नरकविशेषः । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

तप्तवालुकः, पुं, (तप्ता वालुका यत्र ।) नरकविशेषः । इति पुराणम् ॥ (उत्तप्तवालुकामये, त्रि । यथा, भागवते । ३ । ३० । २२ ।
“क्षुत्तृट्परिसोऽर्कदवानलानिलैः
सन्तप्यमानः पथि तप्तवालुके ॥)

तप्तमाषकः, क्ली, (तप्तं माषमितं सुवर्णादिकं यत्र कप् ।) परीक्षाविशेषः । तद्विधिर्यथा । पितामहः ।
“कारयेदायसं पात्रं ताम्रं वा षोडशाङ्गुलम् ।
चतुरङ्गुलखातन्तु मृण्मयं वाथ मण्डलम् ॥
मण्डलं सूक्ष्ममण्डलाकारं वर्त्तुलमिति यावत् ।
पूरयेद्घृततैलाभ्यां विंशत्या तु पलैस्तु तत् ।
सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः ॥

अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् ।
कराग्रं यो न धुनुयात् विस्फोटो वा न जायते ।
शुद्धो भवति धर्म्मेण पितामहवचो यथा ॥
कल्पान्तरमाह ।
सौवर्णे राजते ताम्रे आयसे मृण्मयेऽपि वा ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥
सौवर्णीं राजतीं ताम्रीमायसीञ्च सुशोधिताम् ।
सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥
भ्रमद्वीचितरङ्गाढ्ये न नखस्पर्शगोचरे ।
परीक्षेतार्द्रपर्णेन चुचुकारं सघोषकम् ॥
ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् ।
परं पवित्रममृतं घृत । त्वं यज्ञकर्म्मसु ॥
दह पावक । पापं त्वं हिमशीतः शुचौ भव ।
उपोषितं ततः स्नातमार्द्रवाससमागतम् ॥
ग्राहयेन्मुद्रिकां तान्तु घृतमध्यगतान्तथा ।
प्रदेशिनीञ्च तस्याथ परीक्षेयुः परीक्षकाः ॥
यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः॥
प्रयोगस्तु । मध्यविधाष्टयवतण्डुलमध्यमिता-ङ्गुलिषोडशाङ्गुलमितप्रस्तारे तथाविधाङ्गुलि-चतुष्टयखाते ताम्रादिघटितेऽशक्तौ मृण्मये वा चक्राकारे वर्त्तुले पात्रे लौकिकाष्टरत्तिकाधिक-माषद्वयाधिकत्रयस्त्रिंशत्तोलकल्प- ३३ । २ ।८। वैदिकपलदशकमितं घृतं एव तैलञ्च निक्षिप्य लौकिकचतुरत्तिकाधिकमषमाषक-मष्टषष्टितोलकल्प- ६६।५ । ४ । वैदिकविंशति-पलपरिमितं केवलं गव्यं घृतं वा निक्षिप्य तस्मिन् सुतप्ते सकृद्धौतां पञ्चरत्तिकामितां काञ्चनमुद्रिकां रजतादिकां वा निक्षिपेत् । धर्म्मावाहनादिहवनान्तं तुलोक्तं सदक्षिणं कर्म्म कृत्वा,—
ओम् परं पवित्रममृतं । घृत त्वं यज्ञकर्म्मसु ।
दह पावक । पापं त्वं हिमशीत. शुचौ भव ॥
इत्यनेनाभिमन्त्रयेत् प्राड्विवाकः । ततः कृतोप-वास. स्नातार्द्रवासाः शोध्यशिरसि प्रतिज्ञापत्रं निधाय,—
ओम् त्वमग्ने । सर्व्वभूतानामन्तश्चरसि पावक ॥
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम ॥
इत्यनेनाभिमन्त्र्य आर्द्रपत्रनिक्षेपकृतचुचुका-शब्दात् घृतात् मुद्रिकां तर्ज्जन्यङ्गुष्ठाभ्यां उत्तो-लयेत् । घृततैलाभ्यां वा तप्तमाषकमुत्तोलयेत् । अदग्धश्चेत्तदा शुद्ध इति । ततो दक्षिणां दद्यात् ॥”
इति दिव्यतत्त्वम् ॥
तप्तमुद्रा, स्त्री, (तप्ता अग्निसन्तप्ता मुद्रा ।) शरीर-धार्य्याग्नितप्तधातुमयभगवदायुधचिह्नम् । यथा,
“आषाढ्यां शुक्लद्वादश्यां हरौ शिशयिषौ सति ।
वैष्णवः पारणं कृत्वा तप्तमुद्राञ्च धारयेत् ॥
ब्राह्मण. क्षत्त्रियो वैश्यः शूद्रश्चैकान्तिनस्तथा ।
कुर्य्यादात्मार्पणं तप्तमुद्राभिर्देहमङ्कयेत् ॥*॥
तप्तमुद्राधारणं वाराहे तप्तमुद्राप्रसङ्गे ।
चक्रादिधारणं पुंसां परं सम्बन्धवेदनम् ।
पातिव्रत्यनिमित्तं हि वलयादिविभूषणमिति ॥*
अथ तप्तमुद्राधारणनित्यता । वायुपुराणे ।

अग्निनैव च सन्तप्तं चक्रमादाय वैष्णवः ।
धारयेत् सर्व्ववर्णाना हरिसालोक्यसिद्धये ॥”
ब्रह्माण्डे ।
कृत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनूम् ।
चक्रादिचिह्नितां भूप । धारयेद्वैष्णवो नरः ॥
नारदीयपञ्चरात्रे ।
द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
हरेः सुदर्शनं तप्तं धारयेत्तद्विचक्षणः ॥
सौपर्णे च श्रीभगवद्गरुडसम्वादे तप्तमुद्राप्रकरणे ।
गरुत्मन्नविशेषेण सर्व्ववर्णेष्वयं विधिः ।
विप्रो वा क्षत्त्रियो वापि वैश्यः शूद्रस्तथैव च ॥
पाद्मे ।
अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तचक्रादिधारणम् ॥
किञ्च । तत्रैवोत्तरखण्डे श्रीशिवोमासम्वादे ।
शङ्खचक्राङ्कनं कुर्य्याद्ब्राह्मणो बाहुमूलयोः ।
हुताग्निनैव सन्तप्य सर्व्वपापापनुत्तये ॥
चक्रं वा शङ्खचक्रे वा तथा पञ्चायुधानि वा ।
धारयित्वैव विधिवद्ब्रह्मकर्म्म समारभेत् ॥*॥
किञ्च । तत्प्रसङ्ग एव ।
अधृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत् ॥
किञ्च ।
न तस्य किञ्चिदश्नीयादपि क्रतुसहस्रिणः ।
सर्व्ववेदविदो वापि सर्व्वशास्त्रविशारदः ॥
अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत् ॥
किञ्च ।
तप्तेनैवाङ्कनं कुर्य्यात् ब्राह्मणस्य विधानत. ।
श्रौतस्मार्त्तादिसिद्ध्यर्थं मन्त्रसिद्ध्यै तथैव च ॥
हरेः पूजाधिकारार्थं चक्रं धार्य्यं विधानतः ।
वैष्णवस्य सिद्ध्यर्थं भक्तिसिद्ध्यै विशेषतः ॥
किञ्च ।
उपवीतादिवद्धार्य्याः शङ्खचक्रादयस्तथा ।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥*॥
श्रुतयश्च । यो ह वै सुश्लोकमौलेधर्म्मानुतिष्ठ-मानोऽग्निनाचक्रं धत्ते । अग्निर्व्वै सहस्रार. सह-स्रारो नेमिर्न्नेमिना तप्ततनुः सायुज्यं सलोक-तामाप्नोतीति ॥
चक्रं बिभर्त्ति वपुषाभितप्तं
बल देवानाममृतस्य विष्णो. ।
स एति नाकं दुरितं विधूय
विशन्ति यद्यतयो वीतरागा इति ॥”
कठशाखापरिशिष्टे । अतप्ततनुर्नतदामो अश्नुते श्रुता सह इहहन्तस्तत्समासतेति यजुः ॥ ऋग्वेदीया-श्वलायनशाखायाञ्च ।
प्रतद्विष्णोरुस्तचक्रे सुतप्ते
जन्माम्भोधिं वर्त्तते चर्षणीन्द्राः ।
मूले बाह्वोर्द्दधतेऽन्ये पुराणा
लिङ्गान्यन्ये तप्तायुधान्यर्पयन्ते इति ॥
छन्दोगपरिशिष्टे । सहोवाच याज्ञवल्क्यस्तत्-पुमानात्महिताय प्रेमणा हरिम्भजेत् । सुश्लो-कमौलेधर्म्माय लिङ्गैर्व्वग्निनाधत्ते इति शतपथी श्रुतिः ॥

अथर्व्वपरिशिष्टे तप्तचक्रादिप्रकरणे ।
देवासो यत्र वितनेन बाहुना
सुदर्शनेन प्रयताः स्वर्गमायन् ।
येनाङ्किता मनवो लोकसृष्टिं
वितन्वते ब्राह्मणास्तद्वहन्तीति ॥*॥
किञ्च । पाद्मे श्रीशिवेन तप्तमुद्राप्रसङ्गे ।
विष्णुचक्राङ्कित विप्रं पूजयेत् सर्व्वकर्म्मसु ।
विष्णुचक्रविहीनन्तु प्रयत्नेन विवर्ज्जयेत् ॥
नारदीये तप्तमुद्राप्रसङ्गे ।
श्रीकृष्णचक्राङ्कविहीनगात्रः
श्मशानतुल्यः पुरुषोऽथ नारी ।
दृष्ट्वा नरस्तं नृपते । सवासाः
स्नात्वा समर्च्चेद्धरिमङ्ग सद्य इति ॥*॥
वक्षाश्च वेङ्कटाचार्य्यपादप्रभृतिभिर्ब्बुधैः ।
श्रुतयः स्मृतयोऽप्यत्र विख्याता लिखिताः पराः ॥
अतएव तदनादरे दोषाः । पाद्मे ।
तप्तचक्राङ्कितं दृष्ट्वा ये निन्दन्ति नराधमाः ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥
अग्निपुराणे च । दशरथकृतपुत्त्रविप्रविलापे ।
शिखावृद्धिः कृता किंवा प्रतिमायां हरेर्म्मया ।
किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित् ॥
तनुमुद्राङ्कितदेहस्य चेतसा नादरः कृतः ।
येन कर्म्मविपाकेन पुत्त्रशोको ममेदृशः ॥*॥
अथ तप्तमुद्राधारणमाहात्म्यं सौपर्णे ।
अशुचिर्व्वाप्यनाचारः सर्व्वधर्म्मवहिष्कृतः ।
प्रतप्तशङ्खचक्राभ्यामङ्कितः पङ्क्तिपावनः ॥
वाराहे तप्तमुद्राधारणप्रसङ्गे ।
म्लेच्छदेशे शुभे वापि चक्राङ्को यत्र तिष्ठति ।
योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे । ॥
ब्रह्माण्डे ।
आयुधैर्व्वैष्णवैः सर्व्वैस्तापितैः स्वतनुं यदि ।
चिह्नयेद्वैष्णवो यस्तु स याति परमां गतिम् ॥
पाद्मे च तत्रैव ।
अग्नितप्तं पवित्रञ्च धृत्वा तु बाहुमूलयोः ।
त्यक्त्वा यमपुरं घोरं यान्ति विष्णोः परं पदम्॥
हुताग्नितप्तचक्रेण शरीरं यस्य चिह्नितम् ।
तेन तीर्थानि यज्ञाश्च लभ्यन्ते नात्र संशयः ॥
अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः ।
अङ्कयित्वा जपन्मन्त्रं संसारान्मोक्षभाग्भवेत् ॥
अग्नितप्तेन चक्रेण बाहुमूलेषु लाञ्छिताः ।
ते सर्व्वे पापनिर्म्मुक्ता यान्ति विष्णोः परं पदम्॥
किञ्च ।
अप्राकृता महात्मानो विष्णुचक्रेण लाञ्छिताः ।
विष्णुचिह्नविहीनास्तु प्राकृताः पतिताः स्मृताः ॥
इति ॥
इत्थं निषेधवचनं निर्मूलं सदनादृतम् ।
समूलं यच्च तत् सम्यविध्यभावादितत्परम् ॥*॥
अथ तप्तमुद्राधारणविधिः ।
तप्तमुद्राधारणार्थमुपचारैस्तु पञ्चभिः ।
कृष्णमभ्यर्च्य संपूज्य चक्रशङ्खौ तथा नमेत् ॥
तत्र मन्त्रः ।
“सुदर्शन । नमस्तेऽस्तु पाञ्चजन्य नमोऽस्तु ते इति ।

अग्निमभ्यर्च्य मूलेन हुत्वा चाज्याहुती. कृती ।
चक्रशङ्खगदादीनि शङ्खाग्न्यग्नौ प्रतापयेत् ॥
तत्तन्मन्त्रैर्यथावाक्य तान्यभ्यर्च्य प्रयाच्य च ।
गुरुं कृष्णञ्च सवन्द्य भक्त्या विज्ञापयेदिदम् ॥
उच्छिष्टभोजनादेव किङ्करः शरणागतः ।
तप्तचक्रगदादीनि तवाङ्कानीश । धारये ॥ इति ॥
अथ चक्रादीनामावाहनादिमन्त्रः ।
ओम् नमो भगवते सुदर्शनाय निर्व्वाशितसकलरिपुध्वजाय भगवन्नारायणकराम्भोरुहसंसर्गदुर्ल्ललिताय ।
एह्येहि त्व सहस्रार चक्रराज सुदर्शन । ।
यज्ञभाग प्रगृह्णष्व पूजाञ्चैव नमो नमः ॥
ओम् नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरघोरध्वन्याकुलीकृतकौरववाहिनीनाथाय निरेखादधिवर्णाय चित्रशङ्खाय ।
एह्येहि पाञ्चजन्य । त्व नारायणकरस्थित । ।
यज्ञभागं प्रगृह्णष्व पूजाञ्चैव नमो नमः ॥
ओम् र ण म न पाञ्चजन्याय नमः ॥ ओम् भगवते खड्गाय नन्दकाय त्रैलोक्यपवित्राय जयिने सकलसुरासुरसुन्दरीनेत्रोत्पलार्च्चिताय॥
एह्येहि खड्गरत्न । त्व नन्दकाख्य सुरार्च्चित । ।
यज्ञभागं प्रगृह्णष्व पूजाञ्चैव नमो नमः ॥
ओम् खड्गाय नमः ॥ ओम् नमो भगवत्यै कौमोदक्यै गदायै दानवेन्द्रनिसूदनायै भगवद्भट्टारकवासुदेवलालितायै ।
एह्येहि त्व गदे । देवि कौमोदक्यायुधेश्वरि । ।
यज्ञभाग प्रगृह्णष्व पूजाञ्चैव नमो नमः ॥
ओम् रं ख चं क सं गदायै नमः ॥ एव पद्माय नमः । सशराय शार्ङ्गाय नमः । इति ॥ * ॥
अथ धारणमन्त्र. ।
सुदर्शन । महाज्वाल सूर्य्यकोटिसमप्रभ । ।
अज्ञानान्धस्य मे नित्य विष्णोर्म्मार्गं प्रदर्शय ॥
तथा ।
पाञ्चजन्य । निजध्वानध्वस्तपातकसञ्चय ।
पाहि मां पापिन घोरसंसारार्णवपातिनमिति॥
इत्युच्चारयन् मन्त्र दक्षिणादिक्रमेण तु ।
भुजयोश्चक्रपूर्व्वाणि कृष्णशङ्खाणि धारयेत् ॥
कलत्रादिपरीवारान् निजान् सर्व्वांश्च वैष्णवः ।
भगवत्यर्पयन् तप्तमुद्राभिस्ताभिरङ्कयेत् ॥
तथा च । वाराहे ।
अङ्कयेत्तप्तचक्राद्यैरात्मनो बाहुमूलयोः ।
कलत्रापत्यभृत्येषु पश्वादिषु च सम्पदे ॥
किञ्च ।
आयस विधिवत् कृत्वा पञ्चायुधविधानतः ।
तत्तन्मन्त्रेण मन्त्रज्ञ प्रतिष्ठाप्य पृथक् पृथक् ॥
ललाटे च गदा धार्य्या मूर्द्ध्नि चाप शरन्तथा ।
नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये ॥
किञ्च ।
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् ।
सव्ये च शङ्ख बिभृयादिति ब्रह्मविदो विदुः ॥
अथ चक्रादिप्रतिकृतिद्रव्यम् । नवभ्रमचरात्रे ।
सौवर्ण्णं राजतं ताम्रं कांस्यमायसमेव वा ।
चक्रं कृत्वा तु मेधावी धारयेत विचक्षण इति ॥
एवमेव प्रबोधन्यां द्वादश्यां भगवत्परैः ।
तप्तमुद्रा ध्रुवं धार्य्या द्वारकायां विशेषतः ॥
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

तप्तरूपकं, क्ली, (तप्तं वह्निशोधितं रूपकं रूप्यम् ।) शुद्धरौप्यम् । इति राजनिर्घण्टः ॥

तप्तसूर्म्मिकुण्ड, क्ली, (तप्ता अग्निमयी सूर्म्मिः लौहप्रतिमा यस्मिन् । तथाविधं कुण्डं यस्मिन् ।) नरकविशेषः । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

तप्तसुराकुण्ड, क्ली, (तप्तायाः सुरायाः कुण्डमिव ।) नरकविशेषः । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

तम, उ इर् भ य खेदे । इच्छायाम् । इति कविकल्पद्रुमः ॥ (दिवां-परं-अक-सेट् ।) उ, तमित्वा तान्त्वा । इर्, अतमत् अतमीत् । अस्मात् पुषादित्वात् नित्य ङ इत्यन्ये । भ य, ताम्यति लोकः उत्तप्तः स्यादित्यर्थः । इति दुर्गादासः ॥

तम, क्ली, (ताम्यत्यस्मादनेन वा । तम+अपादाने करणे वा संज्ञायां घः ।) अन्धकारः । इति शब्दरत्नावली ॥ पादाग्रम् । इति शब्दचन्द्रिका ॥

तमः, पुं, (ताम्यत्यनेनेति । तम+संज्ञायां घः ।) तमोगुणः । इत्यमरटीकायां रायमुकुटः ॥ तमालवृक्षः । इति शब्दचन्द्रिका ॥ (राहुः । इत्यमरः ।१।३।२६। यथा, ज्योतिषे होरायाम् ।
"भृगुतमबुधजीवैरिति । कितवस्तमस्येति वराहः ॥" इति उणादिवृत्तिटीकायां उज्ज्वलदत्तः । ४ । १८८ ॥)

तमः, [स्] क्ली, (ताम्यत्यनेनेति । तम+"सर्व्वधातुभ्योऽसुन् ।" उणां । ४ । १८८ । इति असुन् ।) प्रकृतेर्गुणविशेषः । यथा,—
"सत्त्वं रजस्तम इति इष्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभूतस्तु यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याद्दाने तपसि यद्रतिः ॥
यदा कर्म्मसु काम्येषु शक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरस्तद्रजस्तमः ॥
यदा सदानृतं तन्द्री निद्राहिंसादिसाधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"
इति गारुडे २२७ अध्यायः ॥ * ॥
अपि च ।
"तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥
सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥"
"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥
रजसि प्रलयं गत्वा कर्म्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥
कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"
इति श्रीभगवद्गीतायाम् । १४ । ८-१८ ॥
तत्तु आवरकं मोहहेतुः । इत्यमरभरतौ ॥ अस्य कार्य्यं संहारः । इति श्रीधरस्वामी ॥ तस्य धर्म्मा यथा । प्रमादः १ मोहः २ भयम् ३ क्षान्तिः ४ विषादः ५ शोकः ६ अरतिः ७ अनार्य्यता ८ । इति मोक्षधर्म्मः ॥ श्रमः ९ तन्द्रा १० । इत्याश्वमेधिकपर्व्व ॥ अन्धकारः । (यथा, महाभारते । १ । १०५ । १० ।
"तमसा लोकमावृत्य नौगतामेव भारत ॥")
तत्पर्य्यायः । तमसम् २ निशाचर्म्म ३ नीलपङ्कम् ४ रजोबलम् ५ दिवान्धकः ६ वियद्भूतिः ७ खलुक्तृष्णः ८ । इति त्रिकाण्डशेषः ॥ रजोरसम् १० दिनान्तरम् ११ अन्धकम् १२ । इति शब्दरत्नावली ॥ अमरोक्तपर्य्यायोऽन्धकारशब्दे द्रष्टव्यः ॥ शोकः । इति मेदिनी । से २४ ॥ पापम् । इति हेमचन्द्रः ॥ (राहुः । इति मेदिनी । से, २४ ॥ यथा, रघुः । ८ । ३७ ।
"निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी ॥")

तमकः, पुं, इन्द्रलोमः । मधुकः । इति हेमचन्द्र त्रिकाण्डशेषश्च ॥

तमतः, त्रि, (तम+"भृन्दृहशियजिपर्व्विपच्यमितमीति ।" उणां । ३ । ११० । इति अतच् ।) इच्छितः । वाञ्छितः । इत्युणादिकोषः ॥

तमप्रभः, पुं, (तम इव प्रभाऽस्य अस्मिन् वा ।) नरकभेदः । इति हेमचन्द्रः ॥

तमर, क्ली, (तम रातीति । रा+कः ।) वङ्गम् । इति हेमचन्द्र. ॥

तमराजः, पुं, (तम इव राजते । राज+अच् ।) शर्कराविशेषः । नबात इति ख्यात इति केचित् । तत्पर्य्यायः । शालकः २ । तस्य गुणः इक्षुज्वरदाहरक्तपित्तनाशित्वम् । इति राजवल्लभः ॥

तमस, क्ली, (तम+"अत्यविचमितमीति ।" उणां । ३ । ११७ । इति असच् ।) अन्धकारः । इति त्रिकाण्डशेष ॥ नगरम् । इति सङ्क्षिप्तसारे उणादिवृत्तिः ॥

तमस, पुं, (तम+असच् ।) कूपः । अन्धकारः । इति सङ्क्षिप्तसारे उणादिवृत्तिः ॥

तमसा, स्त्री, (तमइव मलमस्त्यस्याः । अच् टाप् च ।) नदीविशेषः । इति सङ्क्षिप्तसारेउणादिवृत्तिः ॥ (यथा, महाभारते । ६ ।२२१ । २४ ।
"तमसा नर्म्मदा चैव नदी गोदावरी तथा ॥")

तमस्ततिः, स्त्री, (तमसस्ततिः समूहः ।) अन्धकारसमूहः । इति तमिस्राशब्दार्थे मेदिनी ॥

तमस्विनी, स्त्री, (तमो विद्यतेऽस्यामिति विनिः ङीप् च ।) रात्रिः । (यथा, महाभारते । ४ । २१ । ३८ ।
"अदृश्यमानस्तस्याद्य तमस्विन्यामनिन्दिते ।
नागोविल्वमिवाक्रम्य पोथयिष्याम्यहं शिरः ॥")
हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥

तमा, स्त्री, (तमोऽस्त्यस्यामिति । तम + अच् टाप् च ।) रात्रिः । इति हेमचन्द्रः ॥ तमालवृक्षः । इति शब्दचन्द्रिका ॥

तमाः, [स्] पुं, राहुः । इति मेदिनी । से, २४ ॥

तमाल, क्ली, (तम्यते काङ्क्ष्यते इति । तमु काङ्क्षायाम् + "तमिविशिविडीति ।" उणां ।१।११७। इति कालन् ।) पत्रकम् । इति राजनिर्घण्टः ॥

तमालः, पु, (तमु काङ्क्षायाम् + कालन् ।) वृक्षविशेषः । तत्पर्य्यायः । कालस्कन्धः २ तापिच्छः ३ । इत्यमरः । २ । ४ ।६८ ॥ तापिञ्जः ४ । इति भरतः ॥ नीलतालः ५ तमालकः ६ नीलध्वजः ७ कालतालः ८ महाबलः ९ । (यथा, भागवते । ३ । १३ । ३३ ।
"तमालनीलं सितदन्तकोट्या
क्ष्मामुत्क्षिपन्तं गजलीलयाङ्ग ॥")
अस्य गुणाः । मधुरत्वम् । बल्यत्वम् । वृष्यत्वम् । शिशिरत्वम् । गुरुत्वम् । कफपित्ततृषादाहश्रमशान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥ तिलकम् । (यथा, कुट्टनीमते । १६ ।
"यस्यामुपवनवीथ्यां तमालपत्राणि युवतिवदने च ।
नखरप्रहाररचितं तन्त्रीवाद्येषु सुरतकलहेषु ॥"
तमालस्तापिच्छवृक्षः युवतिवक्त्रपक्षे तिलकमिति ॥) खड्ग. । वरुणवृक्षः । इति मेदिनी । ले, ९७ ॥ कृष्णखदिर. । इति शब्दचन्द्रिका ॥ वृक्षभेदे वंशत्वचि च पु क्ली । इति लिङ्गादिसंग्रहे अमरभरतौ ॥

तमालक, क्ली, (तमालपत्रवत् वर्णेन कायतीति । कै + कः ।) सुनिषण्णशाकम् । इति त्रिकाण्डशेषः ॥ (तमालमेव । स्वार्थे कन् ।) पत्रकम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तमालकः, पु, क्ली, (तमाल एव । स्वार्थे कन् ।) तमालवृक्षः । (यथा, रामायणे । २ । ९१।५० ।
"ततः सरलतालाश्च तिलकाः सतमालकाः ।
प्रहृष्टास्तत्र सम्येतुः कुब्जा भूत्वाथ वामनाः ॥")
वंशत्वक् । इति शब्दरत्नावली ॥

तमालपत्रं, क्ली, (तमालस्य पत्रमिव वर्णोऽस्यास्तीति । अर्श आदित्वात् अच् ।) तिलकम् । पत्रकम् । (यथास्य पर्य्यायाः ।
"पत्रन्तमालपत्रञ्च तथा स्यात् पत्रनामकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) तमालवृक्षः । इति मेदिनी । रे, ३०२ ॥ (तमालस्य पत्रम् । यथा, रघुः । ६ । ६४ ।
"तमालपत्रास्तरणासु रन्तुं
प्रसीद शश्वन्मलयस्थलीषु ॥")

तमालिका, स्त्री, (तमालाः सन्त्यत्र । तमाल + ठन् ।) ताम्रलिप्तदेशः । इति त्रिकाण्डशेषः ॥ ताम्रवल्ली । भूम्यामलकी । इति राजनिर्घण्टः ॥

तमालिनी, स्त्री, (तमालो तमालवर्णोऽस्त्यस्या इति । इनिः ततो ङीप् ।) भूम्यामलकी । इति राजनिर्घण्टः ॥ ताम्रलिप्तदेशः । इति हेमचन्द्रः ॥

तमाली, स्त्री, (तम + कालन् । गौरादित्वात् ङीष् ।) ताम्रवल्ली । वरुणवृक्षः । इति राजनिर्घण्टः ॥

तमिः, स्त्री, (तम्यते ग्लायतेऽत्र । तम + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इतीन् ।) रात्रिः । इत्यमरटीकायां भरतः ॥

तमिस्रं, क्ली, (तमोऽस्त्यत्र । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४। इति निपातनात् साधुः । यद्वा, तमिस्रा अस्त्याश्रयत्वेनास्य अच् ।) अन्धकारम् । इत्यमरः ॥ (यथा, महाभारते । ४ । २१ । १७।
"यदेतन्नर्त्तनागारं मत्स्यराजेन कारितम् ।
दिवात्र कन्या नृत्यन्ति रात्रौ यान्ति यथागृहम् ॥
तमिस्रे तत्र गच्छेथा गन्धर्व्वास्तन्न जानते ॥")
क्रोधः । इति मेदिनी ।रे, ६१ ॥ (नरकविशेषः । यथा, भागवते । ४ । ७ । ४४ ।
"अमङ्गलानाञ्च तमिस्रमुल्वणं
विपर्य्ययः केन तदेव कस्यचित् ॥")

तमिस्रपक्षः, पु, (तमिस्रमन्धकारं तत्प्रधानः पक्षः ।) कृष्णपक्षः । यथा, तमिस्रपक्षत्रुटिकूटभक्षितमिति श्रीहर्षः ॥

तमिस्रा, स्त्री, (तमोबहुलमस्ति अस्याम् । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् साधुः ।) अन्धकाररात्रिः । कृष्णपक्षनिशा । इत्यमरः ॥ तमोयुक्तरात्रिमात्रम् । इति रायमुकुटः ॥ दर्शरात्रिः । इति वाचस्पतिः ॥ तमस्ततिः । इति मेदिनी । रे, १६१ ॥ (यथा, रघुः । ५ । १३ ।
"सूर्य्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ॥")

तमी, स्त्री, (तमि. कृदिकारादिति वा ङीष् ।) रात्रिः । (यथा, माघे । ९ । २३ ।
"दृशोऽपि भास्कररुचाह्नि न यः
स तमीं तमोभिरभिगम्य तताम् ॥")
हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥

तमोघ्नः, पु, (तमोऽन्धकारं मोहमज्ञानं वा हन्तीति । हन + टक् ।) वह्निः । सूर्य्यः । (यथा, महाभारते । ७ । १४४ । १३६ ।
"स देवशत्रूनिव देवराजः
किरीटमाली व्यधमत् समन्तात् ।
यथा तमास्यभ्युदितस्तमोघ्नः
पूर्व्वप्रतिज्ञां समवाप्य वीरः ॥")
चन्द्रः । बुद्ध. । केशवः । शम्भुः । इति मेदिनी । ने, ७१ ॥

तमोज्योतिः, [स्] पु, (तमसि ज्योतिर्यस्य ।) ज्योतिरिङ्गणः । इति शब्दरत्नावली ॥

तमोनुत्, [द्] पुं, (तमोऽन्धकारं नुदतीति ॥ नुद + क्विप् ।) अग्निः । सूर्य्यः । चन्द्रः । दीपः इति शब्दरत्नावली ॥ (तमोनाशके, त्रि । यथा महाभारते । १३ । १६६ । ८ ।
"एवमुक्तस्तदात्रिर्वै तमोनुदभवच्छशी ।
अभवत् सौम्यभावाच्च सोमवत् प्रियदर्शनः ॥")

तमोनुदः, पुं, (तमोऽन्धकारं नुदतीति । नुद + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) सूर्य्यः । इति शब्दरत्नावली ॥ (अग्निः । चन्द्रः । इति विश्वः ॥ यथा, रघुः । ३ । ३३ ।
"नरेन्द्रकन्यास्तमवाप्य सत्पतिं
तमोनुदं दक्षसुता इवाबभुः ॥"
प्रकृतिप्रेरकः । यथा, मनुः । १ । ६ ।
"ततः स्वयम्भुर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥")

तमोपहः, पु, (तमोऽन्धकारं अपहन्तीति । अप + हन् + "अपे क्लेशतमसोः ।" ३ । २ । ५० । इति डः ।) सूर्य्यः । चन्द्रः । बुद्धिः । अग्निः । इति मेदिनी । हे, ३० ॥ (अज्ञाननाशके, त्रि । यथा, किरातार्ज्जुनीये । ५ । २२ ।
"आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः ॥")

तमोभित्, [द्] पु, (तमस्तिमिरं भिनत्ति स्वज्योतिःप्रकाशनेन नाशयतीति । भिद + क्विप् ।) खद्योतः । इति शब्दमाला ॥

तमोमणिः, पु, (तमसि अन्धकारे मणिरिव ।) खद्योतः । इति त्रिकाण्डशेषः ॥ गोमेदकमणिः । इति राजनिर्घण्टः ॥

तमोलिप्ती, स्त्री, (तमसा लिप्यते इति । लिप + क्तः निपातनात् ङीप् ।) देशविशेषः । तमोलुक इति भाषा ॥ तत्पर्य्यायः । तामलिप्तः २ वेलाकुलम् ३ तमालिका ४ । इति शब्दरत्नावली ॥ तामलिप्तम् ५ तामलिप्ती ६ । इति त्रिकाण्डशेषः ॥ दामलिप्तम् ७ तमालिनी ८ स्तम्बपूः ९ विष्णुगृहम् १० । इति हेमचन्द्रः ॥

तमोविकारः, पु, (तमसैव विकारो यत्र ।) रोगः । इति राजनिर्घण्टः ॥

तमोहरः, पु, (तमो हरतीति । हृ + अच् । तमस्य हर इति वा ।) चन्द्रः । इति शब्दरत्नावली ॥ (अग्निः । सूर्य्यः । इति व्युत्पत्तिलब्धोऽर्थः ॥)

तम्पा, स्त्री, (तम्पति गच्छतीति । तम्प + अच् । पृषोदरादित्वात् साधुः ।) गौः । इति हेमचन्द्रः । ४ । ३३ ॥

तम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । तम्बति । इति दुर्गादासः ॥

तम्बा, स्त्री, (तम्बति गच्छतीति । तम्ब + अच् ।) गौः । इति हेमचन्द्रः । ४ । ३३२ ॥

तय, ङ गतौ । रक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, तयते । इति दुर्गादासः ॥

तरः, पुं, (तॄतरणे + "ऋदोरप् ।" ३।३।५७। इति अप् ।) तरणम् । (यथा, मनुः । ८ । ४०४ ।
"पण्यं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे ॥")
कृशानुः । इति मेदिनी । रे, ४० ॥ तरुः । इति भूरिप्रयोगः ॥ ("तरतमौ द्विबहूनामेकोतकर्षे ।" इति मुग्धबोधसूत्रात् प्रत्ययविशेषश्च ॥)

तरः, [स्] क्ली, (तॄ प्लवनतरणयोः + करणादौ यथायथं असुन् ।) बलम् । (यथा, रघुः । ११ । ७७ ।
"तिष्ठतु प्रधनमेवमप्यहं
तुल्यबाहुतरसा जितस्त्वया ॥")
वेगः । तीरम् । प्लवगः । इति शब्दरत्नावली ॥

तरक्षः, पुं, (तरक्षु + पृषोदरात् उलोपः ।) तरक्षुः । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे ... सायाम् । १२ । ६ ।
शैलकूटे तरक्षर्क्षशार्दूलशाखामृगाधाषिते ॥)

तरक्षुः, पुं, (तरं बलं मार्गं वा क्षिणोति । क्षिणु हिंसायाम् + मितद्र्वादित्वात् डुः ।) व्याघ्रविशेषः । नेकडे बाघ इति भाषा ॥ तत्पर्य्यायः । तरक्षुः २ मृगादनः ३ तरक्षुकः ४ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १६३ । १४ ।
"ततो मायां परां चक्रे दैवशत्रुः प्रतापवान् ।
सिंहान् व्याघ्रान् वराहांश्च तरक्षूनृक्षवानरान् ॥")

तरक्षुकः, पुं, (तरक्षु + स्वार्थे कन् ।) तरक्षुः । इति शब्दरत्नावली ॥

तरङ्गः, पुं, (तरति प्लवते इति । तॄ + "तरत्यादिभ्यश्च ।" उणां । १ । ११९ । इति अङ्गच् ।) वायुना नद्यादिजलस्य तिर्य्यगूर्द्ध्वप्लवनम् । ढेउ इति भाषा ॥ तत्पर्य्यायः । भङ्गः २ ऊर्म्मिः ३ वीचिः ४ । इत्यमरः ॥ ऊर्म्मी ५ वीची ६ विचिः ७ लहरी ८ हल्ली ९ विलि, १० । इति भरतः ॥ लहरिः ११ । इति सारसुन्दरी ॥ जललता १२ भृङ्गिः, १३ । इति हारावली ॥ उत्कलिका १४ ऊर्म्मिका १५ । इति जटाधरः ॥ वस्त्रम् । हयादीनां समुत्फालः । इत्युणादिकोषः ॥

तरङ्गिणी, स्त्री, (तरङ्गो वीचिरस्त्यस्या इति । तरङ्ग + "अत इनिठनौ ।" इति इनिः ।) नदी । इत्यमरः । १ । १० । ३० ॥ (यथा, माघः ।
"तरङ्गिणी वेणिरिवायता भुवः ॥")

तरणं, क्ली, (तॄ + भावे ल्युट् ।) प्लवनपूर्ब्बकदेशान्तरगमनम् । इति दुर्गादासः ॥ पारगमनम् । सन्तरणम् । यथा, मोहमुद्गरे । ६ ।
"क्षणमपि सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका ॥"

तरणः, पुं, (तीर्य्यतेऽनेनेति । तॄ + करणे ल्युट् ।) भेलकः । इति त्रिकाण्डशेषः ॥ स्वर्गः । इति शब्दसन्दर्भसिन्धुः ॥

तरणिः, स्त्री, (तीर्य्यतेऽनयेति । तॄ + "अर्त्तिसृधृधम्यमीति ।" उणां । २ । १०३ । इति अनिः ।) नौका । (यथा, आर्य्यासप्तशत्याम् । ३९० ।
"त्वामनुधावति तरणिस्तदपि गुणाकर्षतरलेयम् ॥")
घृतकुमारी । इत्यमरः । ४ । २ । ७३ ॥

तरणिः, पुं, (तरति पापमनेनेति । तॄ + अनिः ।) सूर्य्यः । (यथा, देवीभागवते । ३ । ६ । २८ ।
"इत्युक्त्वा तरणिः कुन्तीं तन्मनस्कां सुलज्जिताम् ।
भुक्त्वा जगाम देवेशो वरं दत्त्वाभिवाञ्छितम् ॥")
अर्कवृक्षः । इत्यमरः ॥ भेलकः । (यथा, वोपदेवप्रशस्तिश्लोकः ।
"सोऽयं व्याकरणार्णवैकतरणिस्तत्त्वार्थचिन्तामणि-
र्जीयात् कोविदगर्व्वपर्व्वतपविः श्रीवोपदेवः कविः ॥")
किरणः । इति हेमचन्द्रः ॥

तरणिपेटकः, पुं, (तरणिः पेटक इव ।) काष्ठाम्बुवाहिनी । इति जटाधरः ॥

तरणिरत्नं, क्ली, (तरणेः सूर्य्यस्य तत्प्रियं रत्नम् ।) माणिक्यम् । इति राजनिर्घण्टः ॥

तरणी, स्त्री, (तरणिः । कृदिकारादिति वा ङीष् ।) नौका । इति शब्दरत्नावली ॥ महाचारिणी । इति शब्दचन्द्रिका ॥ घृतकुमारी । इत्यमरटीकायां भरतः ॥

तरण्डः, पुं, स्त्री, (तरति प्लवत इति । तॄ प्लवनतरणयोः + बाहुलकात् अण्डन् ।) । बडिशीसूत्रबद्धकाष्ठादि । प्लवः । नौका । इति मेदिनी । डे, २९ ॥ कुम्भतुम्बीरम्भादिरचितः प्लवः । इति शब्दरत्नावली ॥

तरण्डः, पुं, देशविशेषः । इति शब्दरत्नावली ॥

तरण्डपादा, स्त्री, (तरण्डः प्लवनशीलः पादः प्रायेण तुरीयांशो यस्याः ।) नौका । इति शब्दरत्नावली ॥

तरण्डी, स्त्री, (तरत्यनयेति । तॄ + अण्डन् । गौरादित्वात् ङीष् ।) नौका । इति शब्दरत्नावली ॥ (तरण्डा । इति हारावलीधृतपाठः । ५५ ॥)

तरत्, [द्] स्त्री, (तरत्यनेनेति । तॄ + बाहुलकाददिः ।) प्लवः । (तरतीति । तॄ + कर्त्तरि अदि. ।) कारण्डवपक्षी । इति मेदिनी । दे, २९ ॥

तरदी, स्त्री, कण्टकिवृक्षभेदः । तत्पर्य्यायः । तारदी २ तीव्रा ३ खर्वुरा ४ रक्तवीजका ५ । अस्या गुणाः । तिक्तत्वम् । मधुरत्वम् । गुरुत्वम् । बल्यत्वम् । कफनाशित्वञ्च । इति राजनिर्घण्टः ॥

तरन्तः, पुं, (तरतीति । तॄ + "तॄभूवहिवसीति ।" उणां । ३ । १२८ इति झच् ।) भेकः । आसारः । (तीर्य्यते इति । + कर्म्मणि झच् ।) समुद्रः । इत्युणादिकोषः ॥

तरन्ती, स्त्री, (तीर्य्यतेऽनयेति । तॄ + झच् । ततो ङीष् ।) तरिः । इत्युणादिकोषः ॥

तरपण्यं, क्ली, (तॄ + भावे अप् । तरस्तरणं तस्य पण्यम् ।) आतरः । इत्यमरः । १ । १० । ११ ॥ नौका भाडा इति भाषा ॥

तरम्बुजं, क्ली, (तरं तरलं अम्बुवत् जायतेऽत्र । जन + बहुलवचनात् डः ।) फलविशेषः । तरमुज इति ख्यातः । यथा, उत्तरकामाख्यातन्त्रे ।
"ज्यैष्ठे मासि महेशानि ! पौर्णमास्यां निशार्द्धके ।
तृष्णातुरा महाकाली भ्रमन्ती पिठकागने ॥
तज्ज्ञात्वा भक्तया तस्यै फलं दत्तं तरम्बुजम् ।
तत्फलभक्षणात्तृप्ता वरदा सा हरप्रिया ॥
यो मे दद्यात् फलं रम्यं स चिरायुश्चतुर्युगम् ॥"

तरलः, पुं, (तॄ + "वृषादिभ्यश्चित् ।" उणां । १ । १०८ । इति कलप्रत्ययश्चित्त्वञ्च ।) हारः । हारमध्यमणिः । (यथा, महाभारते । ८ । ९४ । १९ ।
"प्रकीर्णका विप्रकीर्णाश्च राजन् ।
प्रवालमुक्तातरलाश्च हाराः ॥")
तलम् । इत्यजयपालः ॥ (जनपदविशेषः । तद्देशवासिनि बहुवचनान्तः । यथा, महाभारते । ८ । ८ । २० ।
"चतुषान् कलिङ्गान् तरलानश्मकानृषिकान्नपि ॥")

तरलः, त्रि, (तॄ + कलच् ।) चलः । (यथा नैषधे । ५ । २४ ।
"त्वाः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरलाः स्मः ॥")
पिङ्गः । भास्वरः । इति मेदिनी । ले, ९५ ॥ मध्यशून्यद्रव्यम् । इति धरणिः । द्रवीभूतश्च ॥

तरललोचना, स्त्री, (तरले चञ्चले लोचने यस्याः ।) चञ्चलनयना नारी । इति हेमचन्द्रः ॥

तरला, स्त्री, (तॄ + कलच् टाप् च ।) यवागूः । सुरा । इति मेदिनी । ले, ९६ ॥ मधुमक्षिका । इति हेमचन्द्रः ॥

तरलितं, त्रि, (तरलं तारल्यमस्य जातम् । तरल + इतच् । तरल इवाचरति तारलं करोतीति तरल + क्विप् + णिच् + क्त इति केचित् ।) जाततारल्यम् । तत्पर्य्यायः । प्रेङ्खोलितम् २ लुलितम् ३ प्रेङ्खितम् ४ दुतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १० । इति हेमचन्द्रः ॥ (यथा, गीतगोविन्दे । १२ । १५ ।
"व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ ॥")

तरवारिः, पुं, (तरं समागतविपक्षबलं वारयतीति । वृ + णिच् + इन् ।) खड्गः । तरवार इति भाषा । इति हेमचन्द्रः । ३ । ४४५ ॥

अथ खड्गपरीक्षा ।
"अङ्गं रूपं तथा जातिर्नेत्रारिष्टे च भूमिका ।
ध्वनिर्म्मानमिति प्रोक्तं खड्गज्ञानाष्टकं शुभम् ॥
अभिन्ने दृश्यते यादृक् विभिद्य घटिते तथा ।
यदेव दृश्यते चिह्नं तदङ्गं सम्प्रचक्षते ॥
नीलकृष्णादिकं खड्गे रूपमित्यभिधीयते ।
तेनैव यत् प्रतीतं स्यात् तज्जातिरिति गद्यते ॥
अङ्गातिरिक्तं यच्चातिसूक्ष्माद्दातरोमसन्निभकम् ।
तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदाः ॥
अङ्गातिरिक्तं खड्गादिषु कुत्सितापत्सूचकम् ।
तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारणम् ॥

यः खड्गे जायते शब्दो नखदण्डादिनाहते ।
स ध्वनिस्तुलनामानं ज्ञानमष्टविधन्त्विदम् ॥
पञ्चाद्या निपुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमाः ।
अन्त्यावकृत्रिमौ ज्ञेयौ तावेव सहजाविति ॥
शतमङ्गानि चत्वारि रूपाणि जातयस्तथा ।
त्रिंशन्नेत्राणि जानीयादरिष्टानि तथैव च ॥
भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः ।
मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः ॥”॥
अथ खड्गस्य शताङ्गगणना लौहार्णवे ।
“रूप्यस्वर्णगणोरुवृकदमनस्थूलाङ्गशृङ्गाटक श्वेता-
म्भोजगदातिलानलकणाग्रन्थिस्थिरातित्तिराः ।
मालाजीरकषट्पदोर्द्ध्वमरिचश्यालाश्वदर्शाञ्जन-
चौरच्छुरकमक्षिकातुषयवश्रीछिच्छुमासर्षपाः ॥
सिंहीतण्डुलगोशिराशिवनखग्राहाक्षिकेशोत्पल-
द्रोणीकाककपालपत्रतुवरीविम्बीफलीसर्षपाः ।
नीलीरक्तवचारवोनसुमनाजिह्वाशमीरोहित-
प्रोष्ठीमारिषमार्कवाखुरतडित्फेणाग्निगुञ्जाशराः ॥
दूर्वाविल्वमसूरटुण्टुकशटीमार्जारिकाकेतकी-
मूर्वावत्सकजायचम्पकवलान्यग्रोधवंशासनाः ।
ज्येष्ठीजालपिपीलिकानलरणः कुष्माण्डरोम-
स्पृही
कर्कन्धुर्नकुलारनालमहिषस्कन्धुंवक्रा इति ॥
प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः
क्रमात् ॥”

अथ तस्य चत्वारि रूपाणि ।
“नीलः कृष्णः पिशङ्गश्च धूम्रश्चेति चतुर्व्विधः ।
वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः ॥”
अथ चतस्रो जातयः ।
“ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्चेति चतुर्व्विधः ।
जातिभेदो विनिर्द्दिष्टः खड्गानां मुनिपुङ्गवैः ॥”
अथ त्रिंशन्नेत्राणि ।
“चक्रं पद्मं गदा शङ्खो डमरुर्द्धुरकूर्म्मः ।
छत्रं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः ॥
कुम्भः शूलश्च शार्द्दूलः सिंहः सिंहासनं गजः ।
हंसो मयूरो जिह्वा च दमनः खड्ग एव च ॥
वृश्चिका चामरं शैलः पुष्पमाला भुजङ्गमः ।
त्रिंशदेतानि नेत्राणि खड्गानां कथितानि वै ॥”
अथ त्रिंशदरिष्टानि ।
“छिद्रं काकपदं रेखा भिन्नं भेकश्च मक्षिका ।
विडालः शर्करा नीली मशको भृङ्गवृश्चिके ॥
चिविन्दुः कालिका दारी कपोतः काक एव च ।
खर्परः शकली क्रोड़ी कुशपत्रकणालिके ॥
करालकङ्कखर्ज्जूरश्लक्ष्णपुष्करखाचिकम् ।
लाङ्गलं चण्डिशाखश्च मुनिना तत्त्ववेदिना ॥
प्रोक्तान्येतान्यरिष्टानि खड्गानां त्रिंशदेव हि ॥”
अथ द्विविधा भूमिः ।
“दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत् ।”
अथाष्टधा ध्वनिः ।
“हंसकोकाश्वढक्कानां काककांस्यखरात्मनाम् ।
ध्वनयोऽष्टविधाः प्रोक्ता नागार्जुनमुनेर्मताः ॥”
अथ द्विविधं मानम् ।
“उत्तमाधमभेदेन मानं सद्द्विविधं भवेत् ।

इति प्रोक्तानि लक्षाणि खड्गानां ज्ञानहेतवे ।
एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिपूजितः ॥”
इति लक्षाध्यायः ॥ * ॥
तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत ॥
लौहप्रदीपे ।
“रूप्यपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते ।
ऊर्द्ध्वं सर्वं महाम्लत्वं रूप्यवर्णमुशन्ति तम् ॥
एष खड्गवरो दद्याल्लक्ष्मीमायुर्यशो बलम् ॥१॥
स्वर्णरेखा वर्णा तन्वी यद्भूमौ निकषोपमा ।
स्वर्णवर्णमिति प्राहुरायुर्लक्ष्मीजयप्रदम् ॥२॥
गजशुण्डाकृतिर्भूमौ कृष्णायामङ्गसम्भवः ।
गजवर्णमिति प्राहू रक्तवर्ण्णं तु तद्विशेत् ॥
ज्वरादिव्याधिशमनं तस्य प्रक्षालनाम्भसा ।
अपि क्षीणोऽपि भूपालस्तद्दीप्त्यात् साधयेन्
महीम् ॥३॥
एरण्डवीजप्रतिममङ्गं भूमिः सितेतरा ।
वृकवर्णमिदं नाम्ना शत्रुदर्पभयङ्करः ॥
एतस्य स्पर्शमात्रेण नरः सम्यग्विमुच्यते ।
महिषाख्यमिदं वर्णं केचिदाहुर्मनीषिणः ॥४॥
चक्रं दमनपत्राभं खड्गे यस्मिन् प्रतीयते ।
विद्याद्दमनवर्णञ्च तज्ज्ञेयं द्विविधं बुधैः ॥
नीला शुभ्रा भवेद्भूमिस्तत्र नीला गरीयसी ।
तस्मिन् पर्य्युषितं तोयं गन्धे दमनकोपमम् ॥
तत्प्रभावान्महीपालः कृत्स्नां पृथ्वीं हि साध-
येत् ॥५॥”॥

शार्ङ्गधरस्य ।
“एका स्थूला सिता रेखा भूमिर्नीला दृढा यदि ।
स्थूलाङ्गमङ्गवर्णं तद्विद्याल्लक्ष्मीयशःप्रदम् ॥
एतत्पते भवेच्छोषः स्थूलचिरतरस्थितिः ।
एतं महान्तमपरे वदन्ति खड्गकोविदाः ॥६॥
छायायां दृश्यते भूमौ चाङ्गञ्च प्रतिविम्बितम् ।
चाङ्गवर्णं भवेत्तस्य द्विधाभूमिः सितासिता ॥७॥”॥
लौहप्रदीपेऽपि ।
“निरङ्गं रूप्यपत्राभमीषच्छविनिभञ्च यत् ।
दुर्लभं तन्महामूल्यं कान्तलौह प्रचक्षते ॥
कृष्णा भूमिर्भवेत् स्वच्छा पीना वक्राङ्गसङ्गता ।
कृष्णवर्णमिति प्राहुस्तत्पते मोह उच्यते ॥”
प्रदीपेऽपि ।
“कृष्णा भूमिः सुवर्णाभमीषच्छुक्लाङ्गवङ्कतम् ।
डाहुलीवर्णकं विद्यात् कालवंशमथापरे ॥८॥
चक्रं कृष्णकर्द्दमेवाङ्ग भूमिः सितेतरा ।
चक्राख्यमिदं वर्णं शत्रुदर्पनिषूदनम् ।
कर्णांशुकर्षमात्रेण चक्रच्छिन्नं पतेत् शिरात् ।
तस्य स्पर्शनमात्रेण पश्वोऽपि स्फुटेन्मणिः ॥
दुर्लभं तच्छुभाख्यं मार्गे. कुत्रापि लभ्यते ।
सद्योजनपदस्यास्य श्रियं नाशयति ध्रुवम् ॥९॥
श्वेताश्रितो यदा रेखा चाग्रमूलादुपस्थिते ।
श्वेताङ्गमिति तद्विद्यादुपद्रवोपशमप्रदम् ॥१०॥
कमलोदरसदृशाभमङ्गं भूमिः सितेतरा ।
कमलोदरं तद्ध्येयं कथितं मुनिपुङ्गवैः ॥११॥
चक्रं यस्य गदाकारं भूमिश्चैव सितेतरा ।
गदावर्णमिदं ब्रूयात् तत्पते मूलकम्पदः ॥१२॥

अङ्गं कृष्णतिलाकारं भूमिश्चैव सितासिता ।
तिलवर्णमिदं ज्ञेयं लक्ष्मीबलयशःप्रदम् ॥
तत्पते तिलतैलाभा वक्ता प्रच्यवतेऽचिरम् ।१३।
धूम्रवर्णा भवेद्भूमिरङ्गं वह्निशिखोपमम् ॥
अग्निवर्णमिदं ज्ञेयं शत्रूणां दाहकारकम् ।
अत्र शीतोदकं न्यस्तं तप्तं भवति च क्षणात् ॥
धाम्नि वह्निं वमेद्यस्तु तथा सम्यक्सुसङ्गमात् ।
तत्पते वलवान् दाहो दग्धवच्च व्रणो भवेत् ॥
एतत् परमभाग्येन लभ्यते धरणीतले ।१४।
भूमिः सिता तिला वापि चाङ्गश्चेत् पिप्पली-
प्रभम् ॥
कणावर्णमिदं ज्ञेयमन्तर्दाहस्तु तत्पते ।१५।
कृष्णाभूमिर्यदैवाङ्गे दृश्यते ग्रन्थिसञ्चयः ॥
ग्रन्थिवर्णमिदं ज्ञेयं वैरिपक्षविनाशनम् ।
तत्पते वलवान् दाहस्तृषा च ज्वर एव च ॥१६॥
शालपर्णीदलाकारमङ्गं कृष्णासिपुत्रिका ।
स्थिरावर्णमिदं प्राहुस्तत्पते वेपथुर्भवेत् ॥१७॥
यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा ।
एतत्तित्तिरिवर्णं स्यात् तत्पते बहुवेदनम् ॥१८॥
वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते ।
मालाङ्गमिति तद्विद्यात्तत्तोयं गन्धवद्भवेत् ॥
अत्र तप्तोदकं न्यस्तं शीतं भवति तत्क्षणात् ।
एष दाहपरीतानामन्ते पित्तदहात्मनाम् ॥
भवेत् परमभैषज्यं भाग्येनैतद्धि लभ्यते ॥१९॥
यदा जीरकसङ्काशमङ्गं भूमिः सितासिता ॥
एतज्जीरकवर्णं स्यात्तत्पते तत्क्षणाज्ज्वरः ॥२०॥
भूमिः सितासितश्चैत्रा चाङ्गं भृङ्गाभमिष्यते ॥
तत्र चेन्मध्यमन्यस्तं शोषमाप्नोति केवलम् ।
एतद्भ्रमरवर्णं स्यात्तत्पते स्याद्विसूचिका ॥२१॥
ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
ऊर्द्ध्ववर्णमिदं प्राहुर्विषवेगनिषूदनम् ॥”
लौहप्रदीपेऽपि ।
“ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
लाङ्गलाङ्गन्तु तद्विद्यात् स्पर्शे तस्याहिनाशनम् ॥
२२ ॥
अङ्गं मरीचसङ्काशं भवेद्भूमिः सितेतरा ।
मरीचाङ्गमिदं वर्णं तत्पते कटुरक्तता ॥
तत्प्रक्षालनतोयेन नश्यन्ति मीनकादयः ।२३।
यदा सर्षपकाकारमङ्गं भूमिस्तु निर्म्मला ॥
भुजङ्गवर्णं तद्विद्यात्तत्पते विषवद्रुजा ।
तस्य स्पर्शनमात्रेण भेकः प्राणैर्विमुच्यते ॥
एकस्यास्य प्रसादेन कृत्स्नां शास्ति महीं नृपः ।
२४ ।
यदाम्बरसङ्काशमङ्गं भूमिस्तु निर्म्मला ।
अश्वाङ्गमिति तं विद्यात् खड्गं परमदुर्लभम् ।
तस्य संयोगमात्रेण वाजी मन्दोऽपि धावति ॥
तत्र क्षालनतोयेन हयानां रोगनाशनम् ।
एतत्पते भवेन्मूर्च्छा दाहश्च ज्वर एव च ।२५।
मयूरपिच्छसङ्काशमङ्गं भूमिः सितेतरा ।
मयूराङ्गमिति तं विद्यात्तत्पते [illegible] ॥
[illegible] ।
एतदेव दुर्लभं लोके. कुत्रापि लभ्यते ॥२६॥

भूमिरञ्जनसङ्काशा धारा चास्य सिता भवेत् ।
अञ्जनाख्यमिदं प्रायः सर्व्वत्रैवोपलभ्यते ॥”
लौहप्रदीपेऽपि ।
“धारा शुभ्रा भवेद्यस्य भूमिः कज्जलसन्निभा ।
कृष्णरङ्गैश्चितं वापि विद्यात् कज्जलवज्रकम् ॥ २७ ॥
मधुवर्णसमा भूमिरङ्गं वा मधुबिन्दुवत् ।
क्षौद्राख्यमिति जानीयात् जयलक्ष्मीयशःप्रदम् ॥”
शार्ङ्गधरेऽपि ।
“निम्नकर्णो भवेद्यत्र रात्रिन्दिवविलेपितः ।
मधुरो मधुवर्णाभः स खड्गो देववल्लभः ॥
विशेषाच्चात्र रज्यन्ति सततं मक्षिकादयः ॥ २८ ॥
आसीमकोणिका यस्य क्षुद्राङ्गं कुण्डलीकृतम् ॥
क्षुद्रवज्रकनामानं प्राह नागार्ज्जुनो मुनिः ।
इदं कुण्डलवज्रञ्च प्राह लौहार्णवे मुनिः ॥
अस्य घातेषु बलवान् दाहः समवलोकितः ॥ २९ ॥
यदङ्गं मक्षिकाकारं भूमिश्चैव सितासिता ॥
स्वेदः शुष्यति चैवात्र मक्षिकाङ्गं तमादिशेत् ॥ ३० ॥
अङ्गं यदा तुषाकारं या च भूमिः सितासिता ॥
तुषवज्रमिदं ख्यातं प्राह नागार्ज्जुनो मुनिः ॥ ३१ ॥
अङ्गं यवफलाकारं भूमिः कृष्णा सिता तथा ॥
यवाङ्गमिति तं विद्यात्तत्स्पर्शे कण्डूसम्भवः ।
एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः ॥ ३२ ॥
अङ्गं व्रीहिप्रसूनाभं भूमिर्धूम्रा घातेऽतिरुक् ।
तद्व्रीहिवज्रं जानीयाच्छत्रूणां भयवर्द्धनम् ॥ ३३ ॥
अतसीफलसङ्काशमङ्गं भूमिः सितासिता ।
अतसीवज्रमाहुस्तं तद्घाते शिरसो रुजा ॥ ३४ ॥
यदा सर्षपवीजाभमङ्गं भूमिः सितासिता ।
खरधारः खरस्पर्शः सर्षपाङ्गः स दुर्लभः ॥ ३५ ॥
सिंह्याकारं भवेद्यस्य अङ्गं भूमिः सितासिता ।
सिंहीवज्रन्तु तद्विद्यात्तद्घाते प्रलपेन्नरः ॥
एतद्धावनतोयेन कासरोगोपनाशनम् ॥ ३६ ॥
अङ्गं तण्डुलसङ्काशं भूमिर्धूम्रा सितासिता ।
तण्डुलाङ्गमिमं विद्याद्यशःश्रीबलवर्द्धनम् ।
एतत्पर्य्युषितं तोयं तण्डुलोदकसन्निभम् ॥
अस्य प्रभावान्मनुजो भर्त्ता हि लभते श्रियम् ॥ ३७ ॥
अङ्गञ्चेन्नोच्चुराकारं भूमिराघातनिःसहा ॥
खड्गाधममिदं विद्याल्लोवञ्च नाम नामतः ॥ ३८ ॥
स्थूला दीर्घाः शिरा कृष्णा भूमिश्चैव सितासिता ॥
शिराङ्गमिति तं ब्रूयादेनं खड्गाधमं बुधाः ॥ ३९ ॥
शिवलिङ्गाकृतिश्चाङ्गे धारा चैव सिताथवा ॥
शिवाङ्गमिति तं ब्रूयाच्छत्रुपक्षनिसूदनम् ॥ ४० ॥
यदा व्याघ्रनखाकारमङ्गं भूमिस्तु पिङ्गला ॥
नखवज्रमिदं ब्रूयात्तद्घाते श्वयथुर्भवेत् ।
एतदामिषसंस्पर्शात् प्रविशेत् स्वयमेव हि ॥ ४१ ॥
व्याघ्रपुच्छोपममङ्गं भूमिर्धूम्रा खराकृतिः ।
व्याघ्राङ्गमिति जानीयाच्छत्रुवंशोपनाशनम् ॥
अस्य स्पर्शनमात्रेण जीवन्मत्स्या जहत्यसून् ॥ ४२ ॥
यदा मनुजनेत्राभमङ्गं भूमिः सितासिता ॥
नेत्राङ्गमिति जानीयात् सङ्ग्रामे विजयप्रदम् ।
एतद्धावनतोयेन नूनमन्धोऽपि पश्यति ॥ ४३ ॥
अङ्गं केशसमं यस्य भूमिर्धूम्रा सितासिता ।
केशाङ्गमिति जानीयात् शोकदुःखभयापहम् ॥ ४४ ॥
निरङ्गं स्थूलप्रकृतिसुफलाङ्गं विदुर्बुधाः ।
एतद्धि प्रायशो लोके दृश्यते द्विजसत्तम ! ॥” ४५
पद्मपुराणस्य ।
“निरङ्गा निशिता धारा घाते वह्निं वमत्यपि ।
द्रोणीवज्रमिदं ज्ञेयं पृथिव्यां नातिदुर्लभम् ॥ ४६ ॥
अङ्गं काकपदाकारं भूमिराघातनिःसहा ।
एष खड्गाधमस्त्याज्यो काकाङ्गो भूतिमिच्छता ॥ ४७ ॥
यदा कपालमङ्गेषु दृश्यते स्पर्शतः खरम् ।
एतद्धि दुःखजनकं कपालाङ्गं बुधस्त्यजेत् ॥ ४८ ॥
तन्वीपत्रा बलाङ्का या सुवर्णाङ्गासिपुत्रिका ।
पत्रवज्रकमाहुस्तं आयुर्व्वेदविदो जनाः ॥”
लौहार्णवेऽपि ।
“सुपर्णसन्निभा भूमिरङ्गं काल प्रतीयते ।
तत् पत्रवज्रं काकस्य सुपर्णसमजायते ॥ ४९ ॥
तुवरीदलसङ्काशमङ्गं यस्मिन् प्रतीयते ।
तुवरीवज्रमाहुस्तं तद्घाते शिरसो भ्रमः ॥
एष खड्गाधमस्त्याज्यो यदीच्छेज्जीवनं निजम् ॥ ५० ॥
बिम्बीदलसमा भूमिरङ्गं बिम्बीफलोपमम् ॥
बिम्बीवज्रन्तु तद्विद्यात्तज्जलं तिक्तमुच्यते ।
पित्तश्लेष्मविकाराणां प्रशमाय प्रयुज्यते ॥ ५१ ॥
प्रियङ्गुसदृशन्त्वङ्गं भूमिश्च कपिलाकृतिः ।
फलवज्रमिदं प्रोक्तं घाते धूम्रं वमत्यपि ॥ ५२ ॥
अङ्गं सर्षपपुष्पाभं भूमिश्चैव सितासिता ।
एतत् सर्षपवज्रं स्यात् घाते वह्निं वमत्यपि ॥
अपि कुण्डलिकां याति एतदत्यन्तकोमलम् ।
एतत्प्रसादात् क्षितिपः कृत्स्नां साधयते महीम् ॥ ५३ ॥
नीलीरससमा भूमिरङ्गं नीलीतरङ्गवत् ।
नीलीवज्रमिदं दृष्टं घाते वह्निशिखां वमेत् ॥
एष खड्गवरो नृणामरिष्टभयनाशनः ॥ ५४ ॥
रक्ताक्तिलो महारेखा भूमिश्चैव सितासिता ॥
रक्ताङ्गमिति जानीयाद्वैरिपक्षविनाशनम् ।
घातेन यस्तु रक्तां वा नीलां वा वमते शिखाम् ॥
रक्तस्पर्शनमात्रेण स्वयमेव निकृन्तति ।
घातेऽस्य रक्तश्वयथुस्तृषा दाहश्च जायते ॥ ५५ ॥
अङ्गं वचादलसमं भूमिश्चैव सितासिता ।
वचावज्रमिदं ज्ञेयं तद्घाताद्विषनाशनम् ॥
एष खड्गवरो राज्ञा साधनीयः प्रयत्नतः ॥ ५६ ॥
रसोनाङ्कुसमं खङ्गं भूमिस्तस्य दलोपमा ॥
रसोनवज्रं जानीयात् घाते वह्निं वमत्यपि ।
अस्य धावनतोयेन आमवातविनाशनम् ॥ ५७ ॥
निरङ्गा निर्म्मला भूमिर्धारा तीक्ष्णा खरः खरः ।
सुमनावज्रमेतत् स्यात् भुवि नात्यन्तदुर्लभम् ॥ ५८ ॥
मञ्जिष्ठासदृशा दीर्घास्तन्वगो रेखाः सुविस्तराः ।
जिङ्गीवज्रमिदं नाम सर्व्वकामार्थसाधनम् ॥ ५९ ॥
अङ्गं शमीपत्रसमं भूमिर्धूम्रा सितासिता ।
शमीवज्रमिदं ज्ञेयं शनैश्चरसुदावहम् ॥
घातेषु वमते वह्निं सहते वह्निपीडनम् ॥ ६० ॥
रोहितवल्कलसदृशमङ्गं भूमिः सितासितापि ।
धूम्रा गम्भीरस्वरयुक्तं धारा तीक्ष्णा सिता भवेन्नेखा ॥
रोहिताख्यमिदं वज्रं सर्व्वारिष्टविनाशनम् ।
वह्निसंस्पर्शमात्रेण किञ्चिच्चिमिचिमायते ।
इत्ययं दुर्लभः खड्गो देवानामपि कथ्यते ॥ ६१ ॥
शफरीवल्कलाकारमङ्गं भूमिः सितासिता ।
शोष्ठीवज्रमिदं प्रोक्तं न्यस्तं तरति वारिणि ॥
एष खड्गोत्तमो राज्ञां विपक्षकुलनाशकः ।
कदाचिल्लभ्यते भाग्यैर्लभ्यते लभ्यते मही ॥ ६२ ॥
अङ्गं मारिषपत्राभं भूमिः स्याद्विषमच्छविः ।
इत्ययं मारिषाङ्गः स्यात् पृथिव्यां नातिदुर्लभः ॥ ६३ ॥
भृङ्गराजस्य पुष्पाभमङ्गं भूमिर्द्दलप्रभा ।
आघातं सहते नैव एष खड्गाधमो मतः ॥ ६४ ॥
धारा तीक्ष्णा खराकारा भूमिरङ्गविवर्ज्जिता ।
आघातं सहते घोरं घाते वह्निं वमत्यपि ।
खराङ्गमिति जानीयात् पृथिव्यां नातिदुर्लभम् ॥ ६५ ॥
निर्म्मला समला भूमिर्भवेच्चैव कदा कदा ।
मन्दा तीव्रा भवेद्धारा तद्विद्धस्य लक्षणम् ॥ ६६ ॥
नीलाञ्जनसमा भूमिरङ्गं जलतरङ्गवत् ।
मेघाङ्गमिति जानीयाच्छाणे शीतं भवत्यपि ॥
एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः ।
भर्त्तुः प्रतापं शमयेद्रविविम्बं यथा घनः ॥ ६७ ॥
मन्दा धारा भृशं गाढ़ा भूमिरङ्गविवर्ज्जिता ।
पर्व्वताङ्गमिदं नाम सर्व्वत्रैवोपलभ्यते ॥ ६८ ॥
अङ्गं गुञ्जाफलसमं भूमिर्म्मीनदलोपमा ।
गुञ्जावज्रमिदं पृष्ठं तप्तं भवति घर्षणे ॥
घाते सिन्दूरसङ्काशं रजो वमति चासकृत् ।
एष खड्गवरो राज्ञा भाग्यादेवोपयुज्यते ॥
अस्य प्रभावात्तन्नास्ति यन्न साधयते नृपः ॥ ६९ ॥
अङ्गं तनुशराकारं भूमिश्चैव सितासिता ।
धारा तीक्ष्णा वमति च घाते वह्निसमाः शिखाः ।
शरवज्रमिदं ज्ञेयं राज्ञां वाञ्छितसिद्धये ॥ ७० ॥
दूर्व्वादलनिभा भूमिर्धारा तीक्ष्णा खरः खरः ।
घातेन वमते वह्निं दूर्व्वावज्रं सुदुर्लभम् ॥ ७१ ॥
अङ्गं विल्वदलाकारं भूमिश्चैव सितासिता ।
विल्ववज्रमिदं घाते नीलपीतं वमेच्छिखे ॥
एष खड्गवरः प्रोक्तः शत्रूणां कुलनाशनः ॥ ७२ ॥
मरुवदलसङ्काशा भूमिरङ्गं मरुवत् ।
मरुवाङ्गमिदं घाते रजो वमति चारुणम् ॥ ७३ ॥
शोणपुष्पनिभा रेखा दीर्घा भूमिः सितेतरा ।
शोणाङ्गमिति जानीयात् खड्गं परमदुर्लभम् ॥ ७४ ॥
शटीदलसमा भूमिरङ्गं तत्कुसुमोपमम् ।
शटीवज्रमिदं प्रायो लभ्यते शुभवत्तरम् ॥ ७५ ॥
मार्ज्जाररोमसदृशमङ्गं भूमिः सितेतरा ।
मार्ज्जाराङ्गमिदं ज्ञेयं रोगशोकभयावहम् ।
एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः ॥ ७६ ॥
केतकीमञ्जसदृशमङ्गं यस्मिन् प्रतीयते ।

विद्यात् केतकवर्णं तत् वाराणसससमुद्भवम्॥" ७७
लौहप्रदीपस्य ।
"अङ्गं मर्कतनुनिभं भूमिर्मूर्वादलच्छविः ।
शाणेन वमते शुक्लां शिखां मौर्वीं भवेत्ततः ॥
मौर्वाङ्गमिदमुत्कृष्टं यशःकीर्त्तिबलावहम्॥७८॥
लिङ्गं तीक्ष्णं खरं गाढ़ं शाणे वह्निर्वमेत् कथम्॥
छिनत्त्यन्यविधं लौह वचाङ्गमिति तद्वदेत्॥७९॥
कलायपुष्पसदृशमङ्ग भूमिः सितासिता ।
कलायवच्च जानीयात् तत्क्षते पाक दृश्यते ॥८०॥
अङ्गं चम्पकपुष्पाभं भूमिः श्यामा तथा सिता ।
शिखां शाणे यमेच्छीतं तिक्तं तस्य जलं भवेत् ।
इदं चम्पकवर्णं स्यात् सर्व्वत्र विजयप्रदम्॥८१॥
अङ्गं बलाहलसम भूमिः शुक्ला तथेतरा ।
बलावच्चमिदं ज्ञेयं नानाभाव भवेद्द्रुतम् ॥
इत्यय वातरोगाणां नाशने परमौषधम् ॥८२॥
अङ्गं वटारोहसमं भूमिर्व्वटदलच्छविः ।
वटवच्चमिदं ज्ञेयं खरं खड्गाधमं बुधैः ।
एतस्य स्पर्शमात्रेण नरो मुच्येत सम्पदा ॥८३॥
वज्रनीलीसमा भूमिः खरधारा सिताकृतिः ।
वज्राङ्गमिति जानीयाद्वंशवृद्धिकरं परम् ॥८४॥
भूमिः शालदलाकारा अङ्गं लघु सितासितम् ।
शालाङ्ग एष खड्गः स्यात् पूज्यः सर्व्वार्थदायकः ।
अयं शाणे वमेद्वह्निं धारा चाप्यथवा भवेत्॥८५॥
भूमिः सितासिता वापि अङ्गं ज्येष्ठीसमं लघु ।
ज्येष्ठीवच्चमिदं निन्द्यं न स्पृश्यं वा हितेच्छुभिः ॥ ८६ ॥
पुराणशालसदृशमङ्गं भूमिः सितासिता ॥
शालवच्चमिदं पूज्यं शत्रुसम्पत्तिनाशनम् ।
यदि शाणे वमेन्नीलां शिखां वह्निं वमेच्च वा ॥
तदैव दुर्लभः खड्गो नान्यथा भयहेतुकः ॥८७॥
अङ्गं पिपीलिकाकारं भूमिर्धूम्रा तथासिता ॥
पिपीलिकाङ्ग इत्येष तत्क्षते कण्डुसम्भवः ।
स्वयं यदि भवेद्धूम्रः शाणे पूज्यतमस्तदा ॥८८॥
नलपत्त्रसमा भूमिरङ्गन्तत्कुसुमोपमम् ।
नलाङ्गमिति जानीयाद्भर्त्तुः सर्व्वार्थसाधकः ॥ ८९ ॥
निरङ्गा निर्म्मला भूमिर्घृष्टं दृष्टं वमेद्धनः ।
दृढा धारा भृशं स्थूला आघातं सहते न च ॥
रजोवच्चमिदं निन्द्यं शत्रूणां विजयावहम् ॥९०॥
कुशाण्डवीजसदृशमङ्गं भूमिः सितासिता ॥
कुशाण्डवच्चं जानीयात्तत्क्षते वेगनिग्रहः ॥९१॥
अङ्गं शरोमसदृशं भूमिर्धूम्रा सितासिता ।
रोमाङ्गमिति जानीयात्तत्क्षते पिड़कोद्गमः॥९२॥
भूमिः स्नुहीदलसमा अङ्गं तत्कण्टकोपमम् ॥
धारा तीक्ष्णा रक्तलौष्ठ्यो लघुमानं खरा स्पृशा ।
स्नुघाङ्गः खड्ग इत्येष तत्क्षते दाहरुड्भ्रमाः ॥
सुखाधिकर्म्मनाशानां दाहः पाकश्च जायते ।
अयं यदि च सर्पाणां फणास्पृपरि धियते ॥
फणामिदरभासोऽपि सर्पो लोटयते शिरः ।
अस्य क्षालनतोयेन कुष्ठरोगविनाशनम् ॥९३॥
कर्कन्धुदलसप्रभा भूमिरङ्गन्तु तत्समम् ।
कर्कन्धुवच्चं जानीयात्तत्क्षते दाहनाशनम् ॥
एष खड्गाधमस्त्याज्यो जेतया यदि विद्विषः ॥ ९४ ॥
रक्तं वकुलपुष्पाभं भूमिस्तत्फलसन्निभा ॥
वकुलाङ्गमिदं पूज्यं शाणे सुरभिगन्धवत् ।
तस्मान्निः जगतीमध्ये यदनेन न साध्यते ॥९५॥
अङ्गं समिश्रितं यस्मिन् किञ्चिद्रक्तमीक्ष्यते ।
सर्व्वेषां दर्शनं वापि तीक्ष्णाधारः खरखरः ॥
एष काम्बिकवच्चः स्यादृश्यस्तदेवोपलभ्यते ।
नैनं प्राप्यापि वर्द्धन्ते श्रेयःसिद्धिविवादयोऽपि च ॥ ९६ ॥
भूमिः श्यामा निरङ्गा चेद्धारा तीक्ष्णा दृढापि च ।
आघातं सहते घोरं रक्तं स्पर्शेन यो विशेत् ॥
शाणेन वह्निं वमति भुव वाप्यतिघर्षणात् ।
महिषाङ्गः स वै खड्गः पृथिव्यां नातिदुर्लभः ॥ ९७ ॥
अत्यन्तनिर्म्मला भूमिः शरीरं प्रतिबिम्बितम् ।
धारा तीक्ष्णा खरस्तौक्ष्णः खच्छाङ्गं तद्विनिर्द्दिशेत् ॥९८॥
तस्मिन् यदा भवेद्रेखा ऊर्द्ध्वा कल्याणकं तदा॥९९॥
अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत्॥१००॥
एतन्नितयमुद्दिष्टं खड्गानां प्रवरं बुधैः ।
प्रायशो लभ्यते लोके यदि सर्व्वगुणावहम् ॥
इतीदं निखिलं प्रोक्तं वज्राणां लक्षणं मया ।
प्रयत्नैर्लिखितं यत्तं सर्व्वेषां हितकाम्यया ॥
इतः परन्तु लौहानां लक्षणं यत्र लक्ष्यते ।
तस्य दाशो भवाम्येष प्रतिज्ञेति कृता मया ॥
द्विलिङ्गमिश्रमालोक्य मिश्राङ्गमिति निर्द्दिशेत् ।
सर्व्वेषामङ्गमालोक्य सर्व्वाङ्गमिति निर्द्दिशेत् ॥"
इति खड्गपरीक्षायामङ्गाध्यायो द्वितीयः ॥ * ॥
खड्गस्य रूपाणि यथा,—
"नीलीकलायकुसुमच्छविरञ्जनाभा
या चन्द्रनीलमणिकाचमणिप्रभा च ।
भूमिश्च या मरकतप्रतिमावभासा
खड्गस्य नीलमिति रूपमिदं वदन्ति ॥
तत्र चेन्निन्दितान्यङ्गान्यरिष्टानि वहून्यपि ।
दृश्यन्ते बहुदोषापि तथापि गुणवत्तरम् ॥१॥
या कालकाम्बुदमसीरसकालसर्प-
शृङ्गान्धकारकचभारसमा विभाति ।
भूमिश्च या भ्रमरबन्धुसमावभासा
खड्गस्य कृष्णमिति रूपमिदं वदन्ति ॥
अत्र नेत्राणि सम्पत्सौ अरिष्टान्यशुभानि च ।
साधारणमिदं रूपं प्राह नागार्ज्जुनो मुनिः ॥२॥
या शालवेश्यनवमेकसमानवर्णा
गोमेदरत्नसदृशापि च यस्य भूमिः ।
खड्गस्य पिङ्गमिति रूपमिदं वदन्ति
भर्त्तुर्यशोबलधनक्षयकारणाय ॥३॥
या मन्दधूमसदृशा च शिरीषपुष्प-
तुल्या विभाति मलिनापि च खड्गभूमिः ।
नागार्ज्जुनो वदति धूम्रमिदं हि रूपं
भर्त्तुर्यशोबलधनाबलिवर्द्धनाय ॥४॥
द्विरूपं मिश्रितं कृत्वा भङ्गुरं प्रवदेद्बुधः ।
त्रिभी रूपैः समेतन्तु खड्गं त्रिपुरवल्लभम् ।
रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गसुत्तमम् ॥"
इति लौहार्णवस्य खड्गपरीक्षायां वर्णाध्यायस्तृतीयः ॥ * ॥
"जातिश्चतुर्व्विधा प्रोक्ता खड्गानां या पुरा मया ।
सम्प्रत्यपि प्रयत्नेन तासां लक्षणमुच्यते ॥
शुद्धाङ्गः शुद्धवर्णश्च सुनेत्रः सुखरश्च यः ।
मृदुस्पर्शः सुसन्धेयस्तीक्ष्णधारो महागुणः ॥
खड्गं ब्राह्मणजातिं तं प्राह नागार्ज्जुनो मुनिः ।
अस्य क्षते भवेच्छोथो घोरः सर्व्वाङ्गगोचरः ॥
मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते ।
अदृष्टं निष्फलाकल्कमहंरात्रिन्दिवोषितम् ।
मलिनत्वं न सन्धत्ते निर्म्मलं कुरुते परम् ।
तरुणादित्यकिरणस्पर्शादेव क्षणे स्थितः ॥
दहेत् सर्व्वं न तु करं पुरुषस्य हि धारिणः ।
गायत्त्रुच्चारमात्रेण खरता श्रणति स्फुटम् ॥
एष खड्गवरः सर्व्वमरिष्टं नाशयेद्ध्रुवम् ।
अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत् ॥
तस्मादेष मनुष्याणां सुलभो न हि भूतले ।
दृश्यन्ते प्रायशः स्वर्गे कुशद्वीपे हिमालये ॥१॥
धूम्रवर्णं महासारं तीक्ष्णधारं खरस्वरम् ।
सर्व्वाघातसहं सर्व्वनेत्रवर्णखराकारम् ॥
खड्गं क्षत्त्रियजातिं तं जानीयात् खड्गकोविदः ।
अस्य क्षते भवेद्दाहस्तृषाघातो ज्वरो भ्रमः ॥
मृत्युश्च जायते शाणे वमेद्वह्निकणान् बहून् ।
संस्कारे चाप्यसंस्कारे नैर्म्मल्यं तस्य लक्ष्यते ॥
शाणेऽप्यशाणे खरता वृद्धिं चात्यन्ततीक्ष्णता ।
रक्तस्पर्शनमात्रेण विशेदन्तरमन्तरम् ॥
अयं खड्गवरः पूज्यो मनुष्यैरपि लभ्यते ॥२॥
नीलवर्णः श्यामवर्णः संस्कारे निर्म्मलो भवेत् ॥
शाणेन खरता चास्य घाततुल्यं निकृन्तति ।
वैश्यजातिरयं खड्गः क्षते लक्ष्मात्रदर्शनम् ॥
नात्युत्कृष्टो नातिहीनः सर्व्वत्रैवोपलभ्यते ॥३॥
सजलाम्भोदसङ्काशः स्थूलधारो मृदुस्वरः ॥
संस्कारे चैव मलिनः शाणे चापि खरेतरः ।
शूद्रजातिरयं खड्गः क्षते नास्त्यपि वेदना ॥
दूरादेषोऽधमस्त्याज्यो यदीच्छेद्धितमात्मनः ।
प्रायशः सर्व्वलोकेषु स्वयमेवोपदृश्यते ॥४॥
द्वयोर्लक्षणमालोक्य जारजं खड्गमादिशेत् ।
त्रयाणां लक्षणेनैव त्रिजातिं खड्गमादिशेत् ।
चतुर्णां लक्षणेनैव जातिसङ्करमुच्यते ॥"
इति लौहार्णवस्य खड्गपरीक्षायां जात्यध्यायः ॥ * ॥
अथ त्रिंशन्नेत्राणां लक्षणानि ।
"चक्राकारं यदा नेत्रं खड्गस्याङ्गे प्रदृश्यते ।
तं चक्रनेत्रं जानीयात् भर्त्तुः सर्व्वार्थसाधनम् ॥
अनेनैकेन खड्गेन कृत्स्नां साधयते महीम् ॥१॥
प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम् ॥
यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत् ।
अयं खड्गवरो यत्र तत्रैव कमलालया ॥२॥
ऊर्द्ध्वा स्थूला यदा रेखा गदाकारा प्रतीयते ।
गदानेत्रमिदं विद्धि सर्व्वशत्रुनिसूदनम् ॥३॥
धनुराकारं यदा नेत्रं खड्गमध्ये निदृश्यते ।

शङ्खनेत्रमिदं सर्व्वदेवानामपि दुर्लभम् ॥४॥
डमरुप्रतिमं नेत्रं यस्य भूमौ प्रतीयते ।
सर्व्वार्थसाधकं खड्गं तं विद्याद्विजयप्रदम् ॥५॥
धनुःस्वरूपं यन्नेत्रं धनुर्नेत्रं वदन्ति तम् ।
तस्य स्पर्शनमात्रेण मन्दोऽपि प्रसुखायते ॥
अथ निशीथे विजने खड्गो झाञ्झनायते ॥६॥
यन्नेत्रमङ्कुशाकारं तद्विद्यादङ्कुशं परम् ॥
खड्गमङ्कुशनेत्राख्यं भर्त्तुः सर्व्वार्थसाधकम् ।
अलक्ष्मीपापरक्षोघ्नं कृत्याग्रहनिवारणम् ॥७॥
छत्राकारं यदा नेत्रं छत्रनेत्रं वदन्ति तम् ।
अस्य प्रभावात् क्षीणोऽपि सार्व्वभौमो भवेन्नृप. ॥
दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः ।
महेश्वरोऽपि सचिवः सचिवो मण्डलेश्वरः ॥
मण्डलेशश्चक्रवर्त्ती भवेदत्र न संशयः ॥८॥
पताकाकृतिनेत्रञ्चेत् सर्व्वसम्पत्तिकारकम् ॥
पताकानेत्रमाहुस्तं संग्रामे विजयप्रदम् ॥९॥
नेत्रं वीणाकृति यदा वीणानेत्रं वदन्ति तम् ।
निशीथे विजने खड्गो वीणावत् स्वनमावहेत् ।
अस्य प्रभावात् सर्व्वेऽपि अपि वशा भवन्ति
हि ॥१०॥
मत्स्याकृति यदा नेत्रं मत्स्यनेत्रमिमं विदुः ।
अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते
महीम् ॥११॥
शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिमं विदु. ।
भर्त्तु. सर्व्वार्थसिद्ध्यै शत्रूणां नाशनाय च ॥
वामपार्श्वे तु यात्रायां वर्त्ततेऽथ तथा रणे १२।
अत्र ध्वजार्द्धचन्द्रकलसानां लक्षणानि पति-
तानि । १३ । १४ । १५ ।
शूलाकृति यदा नेत्रं शूलनेत्रं वदन्ति तम् ।
सर्व्वार्थसाधकः सर्व्वारिष्टानिष्टप्रणाशन. ॥१६॥
शार्द्दूलनेत्रं तं विद्यात् शार्द्दूलाकृतिनेत्रत' ।
शत्रुश्रेणीविनाशाय संग्रामे विजयाय च ॥१७॥
सिंहाकृति यदा नेत्रं सिंहनेत्रमिमं विदुः ।
अस्य प्रभावात् क्षीणोऽपि कृत्स्नां साधयते
महीम् ॥१८॥
तत् सिंहासननेत्रं स्यात् नेत्रे सिंहासनोपमे ।
अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते
महीम् ॥१९॥
गजाकृति यदा नेत्रं गजनेत्रं वदन्ति तम् ॥
अस्य प्रभावात् क्षीणोऽपि लभते राजसम्पदम् ॥
२० ॥
नेत्रं वृषाकृति यदा वृषनेत्रं वदन्ति तम् ।
अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम् ॥
२१ ॥
मयूराकृतिनेत्रे तु तन्नेत्रमिति निर्द्दिशेत् ॥
अस्य प्रभावान्मनुज. सर्पदर्पान्निसूदयेत् ॥२२॥
जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति च ॥
संग्रामखर्परेष्वेवं पिबेद्वैरिशिरोरजः ॥२३॥
दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम् ॥
अथ रिपुगणा मूर्द्धि चर्व्वयत्यतिभैरवम् ॥२४॥
खड्गाकारं यदा नेत्रं खड्गनेत्रं वदन्ति तम् ।
तस्य प्रभावान्मनुजस्त्रिलोकीं वशयेदपि ॥२५॥

मनुष्यपुत्रिकाकारा पुत्रिकानेत्रमुच्यते ॥
अथ सर्व्वेशां सङ्गीयां कृत्स्नां साधयेत् क्षितिम् ।
न चेयं पुत्रिका किन्तु जयलक्ष्मीरिहं स्वयम् ॥
तस्मान्नायं मनुष्याणामल्पभाग्येन लभ्यते ॥२६॥
चामराकृतिनेत्रत्वात्तन्नेत्रमिति निर्द्दिशेत् ।
अस्य प्रभावाज्जायन्ते चामरोत्सवसम्पदः ॥२७॥
एकानेकशिखे शैलनेत्रे तन्नेत्रसंज्ञकम् ।
अपि राष्ट्रभये युद्धे विषमे वैरिसङ्कटे ।
स्थिरीकरोति धरणीं धरणीं पर्व्वतो यथा ॥२८॥
पुष्पमालासमं नेत्रं पुष्पनेत्रं वदन्ति तम् ।
अस्य प्रभावात्तुष्यन्ति यक्षाः सर्व्वाश्च देवता' ॥
२९ ॥
भुजङ्गमसमे नेत्रे सर्पनेत्रमिदं मतम् ।
अयं शत्रुगणं हन्ति यथा मर्त्त्यं भुजङ्गम. ॥३०॥
सवर्णं समवर्णञ्च तत् सर्व्वं द्विविधं भवेत् ।
सवर्णं शान्तिसम्पत्त्यै रिपुनाशे तथापरम् ॥
द्वयोरेकञ्च पृष्ठे च तत् पुनर्द्विविधं भवेत् ।
एकलोकसुखं नेद ददाति द्विविधं द्वयोः ॥
मूलमध्याग्रसंस्थानात्तत् पुनर्द्विविधं भवेत् ।
अग्रे चाग्रफलं ज्ञेयं मध्ये मध्यफलं मतम् ॥
मूले फलं जघन्यं स्यात् प्राह नागार्ज्जुनो मुनिः ।
एकं द्वे त्रीणि नेत्राणि नात्र संख्या व्यतिक्रमः ॥
एकं धर्म्मे, स्वर्गकामौ द्वे त्रीणि च त्रिवर्गकम् ।
तत्फलानि प्रयच्छन्ति प्राह नागार्ज्जुनो मुनि' ॥
द्विनेत्रमिति जानीयात् स्वसंज्ञां नेत्रयोर्द्वयोः ।
त्रिनेत्रञ्च त्रिभिर्ज्ञेयं बहुनेत्रमत. परम् ॥
यथोत्तरं गुणवत्त्वं खड्गमाहुरनुत्तमम् ।
दिक्मात्रमिति निर्द्दिष्टं नेत्राणां शुभदायिनाम् ॥
तीव्राणां मङ्गलानाञ्च दर्शनञ्च शुभावहम् ॥”
इति खड्गपरीक्षायां नेत्राध्यायः पञ्चम' ॥५॥
“यथा नेत्रस्य संस्थानं तथारिष्टस्य लक्षयेत् ।
नेत्रेषु स्थाननियमो नारिष्टे स्थाननिर्णयः ॥
प्रशस्ताङ्गोऽपि यः खड्गोऽरिष्टेनैकेन
निन्दित. ॥”
अथ त्रिंशदरिष्टानां लक्षणानि ॥
“छिद्रवद्दृश्यते खड्गे स्वभावेन च लक्ष्यते ।
छिद्रारिष्टमिदं विद्धि भर्त्तुर्व्वीर्य्यबलापहम् ॥१॥
यदा काकपदाकारमरिष्टं दृश्यते क्वचित् ।
अयं काकपदारिष्टः सर्व्वाभीष्टविनाशनः ॥२॥
रेखाकारं यदारिष्टमूर्द्ध्वं वा तिर्य्यगेव वा ।
रेखारिष्टमिदं विद्धि भर्त्तुर्वीर्य्यबलापहम् ॥३॥
भिन्नभ्रान्तिकरं पापं भिन्नारिष्टमिदं विदुः ।
भर्त्तुः कुलं यशो राष्ट्रं नाहत्वा न प्रशेत्
स्वयम् ॥४॥
यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित् ।
भेकारिष्टमिदं नाम्ना संग्रामे भयदायकम् ५ ॥
अरिष्टे सूचिकाकारे सूचिकारिष्टमुच्यते ।
अयं खड्गाधम. कुर्य्यात् पत्युः पातालसङ्ग-
मम् ॥६॥
बिडालनयनाकारो विन्दुरेकोऽतिविस्तरः ।
बिडालारिष्टमेतत् स्यात् भर्त्तुः सर्व्वार्थनाश-
नम् ॥७॥

अरिष्टं शर्कराकारं यदा स्पर्शेन बुध्यते ।
शर्करारिष्टमेतत् स्याद्धनबुद्धिविनाशनम् ॥८॥
यदा मौलीरसाभासमरिष्टं दृश्यते क्वचित् ।
मौल्यरिष्टमिदं ज्ञेयं यशोलक्ष्मीविनाशनम् ॥९॥
अरिष्टे मशकाकारे मशकारिष्टमुच्यते ।
भर्त्तुः कुलं यशो बुद्धिं धृतिं प्रीतिञ्च नाशयेत् ॥
१० ॥
शृङ्गमात्रप्रतिमो विन्दुरेकोऽनेकोऽथवा यदा ।
शृङ्गमारिष्टं त्वेव धृतिस्फूर्तिविनाशन. ॥११॥
छत्रोरूपमरिष्टञ्चेदूर्द्ध्वं वा तिर्य्यगेव वा ।
छत्रारिष्टमिदं नाम भर्त्तुः कुलविनाशनम् ॥१२॥
त्रयश्चेद्विन्दवो राजन् । पङ्क्तयो विमलेऽथ वा ।
उपर्य्युपरि वाधोऽधश्चेद्विन्द्वाख्यमरिष्टकम् ॥
तस्य स्पर्शनमात्रेण सचेलः स्नानमाचरेत् ॥१३॥
काकिकारिष्टमित्येतद् धीधृतिस्फूर्तिनाशनम् ॥
१४ ॥
एकञ्च यदि न ज्ञेयं प्रयत्नेनापि सत्त्वतः ।
दारी नाम महारिष्टं सर्व्वाभीष्टविनाशनम् ॥
अनेकगुणसम्पन्न. खड्गो लोकैर्न पूज्यते ॥१५॥
कपोतपक्षप्रतिममरिष्टञ्चेत्तदाश्रयम् ।
भर्त्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत् ॥१६॥
काकाकृति यदारिष्टं काकारिष्टं तदोच्यते ।
अनेन भर्त्तुः संग्रामे भङ्ग एवोपजायते ॥१७॥
अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते ।
भर्त्तुर्यशो बलं वीर्य्यं बुद्धिं प्रीतिञ्च नाशयेत् ॥१८॥
यद्यान्यक्षोदशकलं तत्र स्यादिव लक्ष्यते ।
शकलीति स वै खड्गः सर्व्वाभीष्टनिसूदनः ॥१९॥
क्रोडीकुशपत्रकयोर्लक्षणे पतिते २० । २१ ।
यस्मिन्निम्नमिवाभाति मध्ये वा दृश्यते क्वचित् ।
जालारिष्टमिदं नाम भर्त्तु. कुलधनापहम् ॥२२॥
एकैकरेखा दीर्घाग्रा यदा पञ्चविंशी भवेत् ।
सर्व्वे वाथ करेणाथ करालारिष्टमुच्यते ॥
अयं हि क्षितिपालानां दृष्टियोग्यो भवेन्न हि ।
दर्शनादेव नश्यन्ति यशोलक्ष्मीजयादयः ॥२३॥
अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते ।
अस्य स्पर्शनमात्रेण नश्यत्यायुर्यशो बलम् ॥२४॥
खर्ज्जूरदृष्टप्रतिमं यदारिष्टन्तु लक्ष्यते ।
खर्ज्जूरारिष्टमेतत् स्याद्भर्त्तुः कुलधनापहम् ॥२५॥
गोश्रृङ्गाभमरिष्टञ्चेत् शृङ्गारिष्टं तदुच्यते ।
अनेन भर्त्तुर्नश्यन्ति लक्ष्मीबलकुलादयः ॥२६॥
गोपुच्छाकृति चेत् खड्गे अरिष्टं सम्प्रतीयते ।
पुच्छारिष्टमिदं नाम भर्त्तुः सर्व्वार्थनाशनम् ॥२७॥
खनित्राभमरिष्टञ्चेत् खनित्रारिष्टमुच्यते ।
शूराणामपि संग्रामे भङ्गमेतत् प्रयच्छति ॥२८॥
अरिष्टे लाङ्गलाकारे लाङ्गलारिष्टमुच्यते ।
अथ पापात् पापतरः प्रेक्षणीयो न भूभुजा ।
अयमायुः श्रियं हन्ति विद्यां बलमशेषतः ॥२९॥
वडिशारिष्टस्य लक्षणं पतितम् ॥३०॥
इत्यरिष्टानि प्रोक्तानि नागार्ज्जुनात् प्रयत्नतः ।
विचार्य्यैतानि मतिमान् खड्गं कोशे निवापयेत् ।
दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हितात्मनाम् ।
अमङ्गलानां मन्दानां दर्शनञ्चाशुभावहम् ॥

अरिष्टमेकमेव स्याद्द्विररिष्टं शुभावहम् ।
अन्योन्यमशुभं हन्याद्विषस्य हि विषं यथा ॥
एकमारभ्य सप्तान्तमरिष्टं प्राह नान्यथा।
यथोत्तरं द्विगुणितं फलमाहुर्मनीषिणः ॥
इति खड्गपरीक्षायामरिष्टाध्यायः षष्ठः ॥*॥
अथ द्विविधा भूमिः ।
दिव्यभौमविभागेन भूमिर्या द्विविधा मता ।
दिव्या दिवि समुद्भूता भौमा भूमिसमुद्भवा ॥
तल्लक्षणमशेषेण लिख्यते तन्निबोधत ।
देवदानवयोर्मध्ये खड्गस्त्वरिभूत् पुरा ॥
ते खड्गाः पुण्यदेशेषु केषु केषु प्रतिष्ठिताः ॥
दिव्यलक्षणं यथा,—
ये खड्गाः स्थूलधारा भृशमतिलघवो निर्म्मलाङ्गाः सुनेत्रा
ये रिष्टाख्याखरूपाः सुविमलतनवश्चाप्यसंस्कारयोगात् ।
दुर्भेद्या दुर्घटाश्च ध्वनिगुणगुरवो यत्नतो दाहपाकौ
ते दिव्याः कुर्व्वतेऽमी कुलधनविजयश्रीयशोवृद्धिमाशु ॥१॥
अथ भौमलक्षणं हृद्धारीते ।

पूर्व्वं महेशेन विषाणि यानि
भुक्तानि तेषां पतितास्तु विन्दवः ।
यस्मिन् प्रदेशे स स एव देशः
कालायसामाकरतां जगाम ॥
पुराथ तं क्षीरसमुद्रमध्या-
दुत्पाद्य संगृह्य ययुः सुरेन्द्राः ।
तद्विन्दवो यत्र निपेतुरेष
शुद्धायसामाकरतां जगाम ॥

ये विषोत्था भृशङ्काला खराङ्गाः सम्भवन्ति हि ।
मूर्च्छादाहज्वरानाहशोकहिक्कावमीकराः ॥
येऽमृतोत्थाः कर्वुराङ्गा मन्दाङ्गाः संभवन्ति च ।
वलीपलितमालिन्यजराव्याधिविनाशनाः ॥
यत्रैव पतितं यत्तु तत्तदाकरताङ्गताः ॥
तद्यथा,—

वाराणसीमगधसिंहलभूमिभागे
नेपालभूमिषु तथाङ्गमहीप्रदेशे ।
सौराष्ट्रिकेऽन्यतरधन्यमहीविभागे
शुद्धायसां क्षितिवरा. प्रवदन्ति जन्म ॥

तद्यथा,—
वाराणसेयाः सुस्निग्धास्तीक्ष्णधाराः सदङ्गिनः ।
लघव. सुखसन्धेया ज्ञेयाश्चाभेद्यशालिनः ॥
मागधाः कर्कशा' स्थूलधारा गूढतराङ्गिन' ।
गुरवो दुःखसन्धेयाः खड्गा ज्ञेया विचक्षणैः॥
नेपालदेशप्रभवा निरङ्गा निश्चलाश्च ये ।
ज्ञेया. सदङ्गा मलिना लघव स्थूलधारिणः ॥
कालिङ्गा गुरवः स्वच्छा व्यक्ताङ्गास्तनुहेतवः ।
सौराष्ट्रा निर्म्मलाः स्निग्धाः सुव्यक्ताङ्गा भृशं खराः ॥
सिंहलद्वीपजातानां चतुर्द्धा भेद उच्यते ।
केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः ॥
केचित् सदङ्गा लघव. सुस्निग्धा स्थूलधारिण.।
एषां रूपेण मिश्रेण ज्ञेया हि द्विजजातयः ॥
सामान्यात् द्विगुणश्चौड्रं कालिदेशगुणास्ततः ।
कले: शतगुणं भद्रं भद्राद्वङ्गं सहस्रधा ।
वङ्गात् षष्ठिगुणः पाण्डिर्निरविद्देशभिर्गुणैः ।
ततः कोटिसहस्रेण ह्ययस्कान्तः प्रशस्यते ॥”
इत्यादिकं रसायनौपयौगिकमेव न तु खड्गे दृष्टफलम् ॥ यदाह ।
आसान्तु लौहजातीनां वक्ष्यं खड्गाय युज्यते।
तथाच ।
ये खड्गास्तीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुभेद्याः
केचित् साङ्गा निरङ्गाः कति च न समला निर्म्मलाः केचिदेव ।
ते भौमाः कुर्व्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा वा
ते दुःखं शोकमुग्रं दधति मलकुलश्रीयशोनाशकास्ते ॥
इति खड्गपरीक्षायां भूम्यध्यायः सप्तमः ॥२*॥
अथाष्टधा ध्वनिः ।
ध्वनिरष्टविध. प्रोक्तो यः पूर्व्वं सूत्रसंग्रहे ।
तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम् ॥
तद्यथा,—
पूर्व्वं चत्वारः शुभदाः परे निन्दाप्रदास्तथा ।
विचार्य्य खड्गमानश्च कर्त्तव्यं खड्गकोविदैः ॥
घोरस्तार इति ख्यातो द्विविधः खड्गकोविदैः।
घोरः स्यात् सुखसम्पत्त्यै तार उच्चाटने मतः ॥
यत्र हंसरवस्येव खड्गे नखहते ध्वनिः ।
हंसध्वनिरयं खड्ग' सकलार्थप्रसाधनः ॥१॥
कांस्यशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
कांस्यध्वनिरयं खड्गः प्राह नागार्ज्जुनो मुनिः ॥२॥
अभ्रस्य लक्षणं पतितम् ॥३॥
ढक्काशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
ढक्काध्वनिरयं खड्गः सर्व्वशत्रुनिसूदनः ॥४॥
काकस्वर इवाभाति यस्मिन् खड्गे हते ध्वनिः।
काकस्वरोऽयं खड्गः स्यात् श्रीयशःकुलनाशनः ॥५॥
तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः।
तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः ॥६॥
खरस्येव ध्वनिर्यस्मिन् खरध्वनिरयं मतः ।
श्रीयशोज्ञानविज्ञानजयतेजोविनाशनः ॥७॥
प्रस्तरस्येव यः खड्गः स निन्द्यः खड्गलक्षणे ॥८॥
गभीरतारध्वनिता खड्गस्याशुभलक्षणम् ।
उत्तानमन्द्रध्वनिता खड्गस्याशुभलक्षणम् ॥
अपाङ्गनेत्रहीनोऽपि खड्गः सुध्वनिरुत्तमः ।
अन्ध कुरूपो मनुजो यथा भुवि सुगायनः ॥
सर्व्वलक्षणसम्पन्न. खड्गो यो ध्वनिवर्ज्जितः ।
स निन्द्य सुन्दराङ्गोऽपि यथा वाक्यविवर्ज्जितः ॥
नखेन वाथ दण्डेन तथा लौहशलाकया ।
लोष्टेन शर्कराभिर्व्वा ध्वनिविज्ञानमुच्यते ॥”
इति खड्गपरीक्षायां ध्वन्यध्यायोऽष्टमः ॥*॥
अथ द्विविधं मानम् ।
यन्मान द्विविधं प्रोक्तं तस्य लक्षणमुच्यते ।
उत्तमाधमभेदेन भेदो हि द्विविधो मत. ॥
उत्तमं यद्विशालं स्याल्लघुमानं प्रकीर्त्तितम् ॥१॥
अधमं तच्च यत् खर्व्वं गुरुमानं प्रकीर्त्तितम् ॥२॥
तत्पुनस्त्रिविध प्रोक्तमादिमध्यान्तभेदतः ।

यो मुष्टिविंशतिसमायततीव्रधारो
भर्त्तुर्भवेत् प्रसरतोऽपि षडङ्गुलीभिः ।
मानेन चाष्टपलिकः स हि खड्गमध्ये
नातिप्रकृष्टनिकृष्टफलप्रदः स्यात् ॥
यो द्वादशाष्टनवमुष्टिभिरायतः स्यात्
मन्दो भवेत् प्रसरतोऽपि चतुर्थभाग' ।
तावत्पलैः परिमितस्तु ततोऽधिको वा
खड्गाधमो धनयशःकुलनाशनाय ॥

नागार्ज्जुनोऽपि ।
यावत्यो मुष्टयो दैर्घ्ये तदर्द्धाङ्गुलयो यदा ।
प्रसरे तच्चतुर्थांशमिति वै मानमुत्तमम् ॥
यावत्यो मुष्टयो दैर्घ्ये प्रसरे तत्त्रिभागिकः ।
पलैस्तदर्द्धैस्तुलितः स खड्गो मध्य उच्यते ॥
यावत्यो मुष्टयो दैर्घ्ये तुर्य्यांशः प्रसरे तु तत् ।
अधमः कीर्त्तितः खड्गस्तत्समो वाधिकः पलैः ॥
भौमानामिदमुद्दिष्टं दिव्यास्तु लघवो मताः ॥”
इति खड्गपरीक्षायां मानाध्यायः ॥ * ॥
भोजस्तु ।
“दीर्घता लघुता चैव स्वरविस्तीर्णता तथा ।
दुर्भेद्यता सुघटता खड्गानां गुणसंग्रह. ॥
खर्व्वता गुरुता चैव मन्दता तनुता तथा ।
सुभेद्यता दुर्घटता खड्गाना दोषसंग्रहः ॥

इति निखिलमुदारमुक्तमत्र
बहुतन्त्रेषु निरूप्य खड्गयष्टेः ।
नृपतिरिति विचिन्त्य यो विधत्ते
स चिरतरा श्रियमुच्छ्रितां लभेत ॥”

इति युक्तिकल्पतरूक्तखड्गपरीक्षा समाप्ता ॥
तरसं, क्ली, (तॄ+बाहुलकात् असच् ।) मांसम् । इत्यमरः । २ । ६ । ६३ ॥ (यथा, कात्यायनश्रौतसूत्रे ।
“तरसमयाः पूर्व्वोक्तभागाः ॥”
“तरसमया मांसमयाः ।” इति कर्कः ॥)
तरस्थान, क्ली, (तराय अवतरणाय यत् स्थानम् । तरस्य स्थान वा ।) घट्ट. । इति जटाधरः ॥
तरस्वान्, [त्] त्रि, (तरो बलं वेगो वा अस्यास्तीति मतुप् । मस्य वः ।) शूरः । वेगी । इति व्याकरणम् ॥ (चतुर्थमनुपुत्त्रविशेष. । यथा, हरिवंशे । ७ । ८८ ।
“तरङ्गभीरुर्व्वुधश्च तरस्वानुग्र एव च ।
अभिमानी प्रवीरश्च जिष्णुः सङ्क्रन्दनस्तथा ॥”)
तरस्वी, [न्] त्रि, (तरो वेगः बलं वास्त्यस्य । तरस्+“अस्मायामेधास्रजो विनिः ।” ५।२। १२१ । इति विनिः ।) शूरः । वेगी । इत्यमरः । ३।३।१२७ । (यथा, भागवते । ८ । १० । ३१ ।
“राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः ।

निशुम्भशुम्भयोर्द्देवी भद्रकाली तरस्विनी ॥”) गरुडे वायौ च पुं। इति राजनिर्घण्टः ॥

तराम्बुः, पुं, (तराय तरणाय तरे तरणे वा अम्बुरिव अतिगभीरमध्यदेशत्वात् तथात्वम्।) नौकाविशेषः। भड़ इति भाषा। तत्पर्य्यायः। क्षोड़ः २ बघनम् ३ वार्व्वटः ४ बहित्रम् ५। इति त्रिकाण्डशेषः ॥

तरालुः, पुं, (तराय तरणार्थं अलति पर्य्याप्नोतीति। अल+उन्।) नौकाविशेषः। इति हारावली ॥

तरिः, स्त्री, (तरत्यनया इति। तॄ+“अच इः।” उणां। ४। १३८। इति इः।) नौका। इत्यमरः। १।१०।१०॥ (यथा, महाभारते। १। १००। ४८।

“साब्रवीद्दाशकन्यास्मि धर्म्मार्थं वाहये तरिम्॥”)

दशा। वस्त्रादिपेटकः। इति हेमचन्द्रः ॥

तरिकः, पुं, (तराय तरणाय स्थितः। तॄ+ठन्।) प्लवः। इति त्रिकाण्डशेषः ॥ (तरणे तरण-निमित्तकदेयशुल्केऽधिकारोऽस्त्यस्य। तरण-शुल्कग्रहणाधिकारी। यथा, याज्ञवल्क्ये। २। २६६।

“तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् [दश॥”)

तरिका, स्त्री, (तरिक+टाप्।) नौका। इति शब्दरत्नावली ॥

तरिणी, स्त्री, (तरणं तरः अत्यर्थेनास्त्यस्याः इति इनिः ङीप् च।) नौका। इति हेमचन्द्रः ॥

तरिता, स्त्री, (तर+इतच्।) तर्ज्जनी। इति शब्दचन्द्रिका ॥ लशुनम्। गाँजा इति भाषा। यथा, कुलार्णवतन्त्रे।

“सम्बिदा कालकूटश्च ताम्रकूटश्च धुस्तुरम्। अहिफेन खर्ज्जुरसस्तारिका तरिता तथा॥”

तरिरथ, पुं, (तरेर्नौकाया रथ इव तत्परि-चालनात्तथात्वम्।) अरित्रम्। इति हारा-वली ॥

तरीः, स्त्री, (तरत्यनया इति। तॄ+“अवितृस्तृ-तन्त्रिभ्य ईः।” उणां। ३। १५८। इति ईः।) नौका। (यथा, माघे। ३। ७६।

“तरीषु तत्रत्यमफल्गुभाण्डम्॥”)

गदा। वस्त्रादिपेटकः। इत्युणादिकोषः॥ धूमः। इति त्रिकाण्डशेषः॥ द्रोणी। इति जटाधरः। दशा। इति मेदिनी। रे, ४०॥

तरीषः पुं, (तॄ+“ऋतृभ्यामीषन्।” उणां।४। २६। इति ईषन्।) शोभनाकारः। भेलः। व्यवसायः। इत्युणादिकोषः॥ समुद्रः। समर्थः। इति सङ्क्षिप्तसारे उणादिवृत्तिः॥ स्वर्गः। इति मेदिनी। षे, ३७॥

तरीषी, स्त्री, (तरीष+संज्ञायां ङीष्।) इन्द्र-कन्या। इति मेदिनी। षे, ३८॥

तरुः, पुं, (तरति समुद्रादिकमनेनेति। तॄ+ उः, “भृमृशीतॄचरीति।” उणां। १। ७। इति उः।) वृक्षः। इत्यमरः। २। ४। ५॥ (यथा, रघुः। ३। ७०।

“मुनिवनतरुच्छायां देव्या तया सह शिश्रिये॥”)

तरुकुणिः, पुं, (तरौ वृक्षे कूणयतीति। कूण+ इन्।) यागगुदपक्षी। इति त्रिकाण्डशेषः॥

तरुणीयनं, क्ली, (तरोर्णीयनं जीवनकारणम्।) वृक्षमूलम्। इति शब्दचन्द्रिका ॥

तरुणं, क्ली, (तॄ+“तॄ चो रश्च लो वा।” उणां।३। ५४। इति उनन्।) कुब्जपुष्पम्। इति मेदिनी। णे, ४६॥

तरुणः, पुं, (तॄ+उनन्।) स्थूलजीरकः। एरण्डः। इति राजनिर्घण्टः॥

तरुणः, त्रि, (तरति प्लवते प्रमोदसलिले इति। तॄ+“तॄ चो रश्च लो वा।” उणां। ३। ५४। इति उनन्।) युवा। इति मेदिनी। णे, ४६। (यथा, महाभारते। १। ४०। २६।

“तरुणस्तस्य पुत्त्रोऽभूत्तिग्मतेजा महातपाः॥”) नूतनः। इति धरणिः॥ (यथा, छन्दोमञ्जर्य्याम्।

“तरुणं सर्षपशाकं नवौदनं पिच्छिलानि दधीनि।

स्वल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति॥”)

तरुणज्वरः, पुं, (तरुणश्चासौ ज्वरश्चेति।) सप्ता-हावधिज्वरः। (यथा, चक्रदत्तः।

“आसप्तरात्रं तरुणं ज्वरमाहुर्म्मनीषिणः॥”

तरुणदधि, क्ली, (तरुणं तरुणत्वमापन्नोक्तं दधीति।) पञ्चदिनातीतदधि। इति वैद्यकम्॥

“शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि। प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट्॥”

इति चाणक्ये। ६४॥

तरुणी, स्त्री, (तरुण+गौरादित्वात् ङीष्।) द्वितीयवयाः स्त्री। (यथा,—

“ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि। निदाघशरदोर्बाला हिता विषयिणी मता॥ तरुणी शीतसमये॥”

“नित्यबाला सेव्यमाना नित्यं वर्द्धयते बलम्। तरुणी ह्रासयेच्छक्तिम्॥”

“वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात्॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) भूयोभूयः प्रवर्त्तमानरजाः स्त्री। इत्यमरटीका-सारसुन्दरी॥ तत्पर्य्यायः। युवती २। इत्य-मरः। २। ६। ८॥ तलुनी ३ युवतिः ४। इति भरतः॥ यूनी ५ दिक्करी ६ धनिका ७ धनीका ८। इति शब्दरत्नावली॥ गृहकन्या। दन्तीवृक्षः। चीड़ानामगन्धद्रव्यम्। पुष्पविशेषः। सेउती इति भाषा॥ तत्पर्य्यायः। सहा २ कुमारी ३ गन्धाढ्या ४ चारुकेशरा ५ भृङ्गेष्टा ६ रामतरुणी ७ सुदला ८ बहुपत्रिका ९ भृङ्ग-वल्लभा १०। इति राजनिर्घण्टः॥ सेवती ११। यथा, मार्कण्डेयपुराणे।

“चम्पकात् पुष्पशतकादशोकः पुष्पमुत्तमम्। अशोकात् पुष्पसाहस्रात् सेवतीपुष्पमुत्तमम्। सेवतीपुष्पसाहस्रात् कुब्जकः पुष्पमुत्तमम्॥”

(यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

“शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा। महाकुमारी गन्धाढ्या लाक्षापुष्पातिमञ्जुला॥”

अस्या गुणाः। शिशिरत्वम्। स्निग्धत्वम्। पित्तदाहज्वरमुखपाकतृष्णाविस्फोटविनाशित्वम्। मधुरत्वञ्च। इति राजनिर्घण्टः॥

तरुणीकटाक्षमालः, पुं, (तरुणीनां कटाक्षाणां माला यत्र।) तिलकवृक्षः। इति राजनिर्घण्टः॥

तरुतूलिका, स्त्री, (तरुस्थिता तूलिका चित्रशलाका इव। यद्वा, तरौ वृक्षे दोलयतीति। तुल उन्माने +णवुल्। टापि अत इत्वम्। पृषोदरादित्वात् साधुः।) वातुलिः। इति हारावली॥ वाइड इति भाषा॥ तरुदूलिकापि पाठः॥

तरुनखः, पुं, (तरौ तरोर्वा नख इव।) कण्टकः। इति हारावली॥

तरुभुक्, [ज्] पुं, (तरुं भुनक्तीव। भुज+ क्विप्।) वन्दाकः। इति राजनिर्घण्टः॥

तरुमृगः, पुं, (तरौ तिष्ठन् मृग इव। शाक-पार्थिववत् मध्यपदलोपी समासः। यद्वा, तरुः प्रियो मृगः पशुः।) वानरः। इति शब्दरत्ना-वली॥

तरुरागः, क्ली, (तरो रागो रक्तिमाभा यस्मात्।) किशलयम्। नूतनपल्लवः। इति हारावली॥

तरुराजः, पुं, (तरूणां राजा अतुच्चत्वादस्य तथा-त्वम्। समासे टच्।) तालवृक्षः। इति राज-निर्घण्टः॥ (सर्व्वपूज्यत्वात् स्वर्लोकभोग्यत्वाच्च पारिजातपुष्पवृक्षः। यथा, हरिवंशे। १२४। ५५।

“यदेतदाहृतं स्वर्गात् तत् त्वदर्थं मया विभो!। देवोपभोग्यमेतद्धि तरुराजसमुद्भवम्॥”)

तरुरुहा, स्त्री, (तरौ रोहतीति। रुह+क। टाप्।) वन्दाकः। इति राजनिर्घण्टः॥

तरुरोहिणी, स्त्री, (तरुं रोहतीति। रुह+ णिनिः+ङीप्।) वन्दाकः। इति राजनिर्घण्टः॥

तरुवल्ली, स्त्री, (तरुं वल्लीव तरुर्वल्लीव वा।) जतुकालता। इति राजनिर्घण्टः॥

तरुशायी, [न्] पुं, (तरौ तरुकोठरे शाखायां वा शेते इति। शी+णिनिः।) पक्षी। इति हारावली॥

तरुसारः, पुं, (तरोः सारः।) कर्पूरः। इति हारावली॥ (यथा, सुश्रुते चिकित्सित-स्थाने ३५ अध्याये। “तत्रनेत्राणि सुवर्णरजत-ताम्रायोरीतिदन्तशृङ्गमणितरुसारमयानि शस्तानीति॥”कर्पूरशब्देऽस्य विवृतिर्ज्ञातव्या॥)

तरुस्था, स्त्री, (तरौ तिष्ठतीति। स्था+कटाप् च।) वन्दाकः। इति राजनिर्घण्टः॥

तरूटः, पुं, (तरोः कूट इव।) उत्पलकन्दः। अस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। शीतल-त्वञ्च। इति राजवल्लभः॥ (यथा, चरके सूत्र-स्थाने सप्तविंशेऽध्याये।

“तरूटविसशालूकक्रौञ्चादनकशेरुकम्। शृङ्गाटकं कलोङ्यञ्च गुरुविष्टम्भि शीतलम्॥”)

तर्क, क दीप्तौ। इति कविकल्पद्रुमः॥ (चुरां-पर-अक-सेट्।) क, तर्कयति। विसर्कोऽप्ययम्। (अत्र सक।) तर्कयत्यन्यगुणा सुधीः। इति दुर्गादासः॥

त पु, (तर्क+भावे घञ्।) आकाङ्क्षा। वितर्कः। अभिचार शङ्कानिवर्त्तकः। इति भाषापरिच्छेदः॥ (यथा महाभारते। ३। १६६। १०८।
"शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिं स्मृतिम्॥")
स च पञ्चविधः। यथा। आत्माश्रयः १ अन्योन्याश्रयः २ चक्रकः ३ अनवस्था ४ प्रमाणबाधितार्थकः ५। इति जगदीशः॥ एषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥ ऊहः। हेतुशास्त्रम्। तत्तु मीमांसादि। इति मेदिनी। के, २५। (यथा, मनुः। १२। १०६।
"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः॥"
न्यायशास्त्रम्। यथा, नैषधे।
"यत्कार्थं मधुवर्षिवर्षितपरास्तर्केषु यस्योक्तयः॥"
ध्यानम्। यथा, महाभारते। १। १६८। १८।
"तं वै फलार्थिनं मन्ये भ्रातरं तर्कचक्षुषा॥"
अर्थवाद इति कर्कोपाध्यायः। यथा, अक्ताः शर्करा उपदधातीति विधिः श्रूयते। तत्राञ्जनसाधनं घृतं तैलं वा तन्मध्ये केनाक्ता इति संशये तेजो वै घृतमित्यर्थवादात् घृतेनाक्ता इति निर्णीयते। अतस्तर्कोऽर्थवादः॥")
तर्ककः, पु, (तर्केण आकाङ्क्षया कायति प्रकाशते इति। कै+कः।) याचकः। इति हेमचन्द्रः॥ (यथा, महाभारते। १२। ४५। ६।
"तथानुजीविनो भृत्यान् संश्रितानतिथीनपि।
कामैः सन्तर्पयामास कृपणांस्तर्ककानपि॥"
तर्कयतीति। तर्क+ण्वुल्।) तर्ककारकश्च॥
तर्कविद्या, स्त्री, (तर्कोपदेष्ट्री विद्या तर्करूपा या विद्या वा।) न्यायविद्या। तत्पर्य्यायः। आन्वीक्षिकी २। इत्यमरः। १।६।५॥ (यथा, महाभारते। १३। ३७। १२।
"आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम्॥")
तर्कारी, स्त्री, (तर्कं ऋच्छतीति। ऋ+"कर्म्मण्यण्।" ३। २। १। इत्यण्। ङीप् च।) जयन्तीवृक्षः। इत्यमरः। ४। २। ६५॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम्।
"वैजयन्ती च तर्कारी जयन्ती विजया जया॥"
अस्या गुणा यथा,—
"तर्कारी वरणं स्वादु सतिक्तं कफवातजित्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥
अस्याः व्यवहारो यथा,—
"तर्कारी विम्बशिग्रुसुरसवत्सकनिम्बजैः।
पत्रमूलफलैस्तोय शृतसुष्णञ्च सेचनम्॥"
इति चरके चिकित्सास्थाने सप्तविंशेऽध्याये॥
इयं गणिकारिकापि वाच्या। तत्पर्य्याया यथा,
"अग्निमन्थो जयः स स्यात्श्रीपर्णी गणिकारिका।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तर्किणः, पु, चक्रमर्द्दवृक्षः। इतिरत्नमाला॥ तर्किलोऽपि पाठः॥ (चक्रमर्द्दशब्देऽस्य विवृतिर्व्याख्याता॥)

तर्की, [न्] त्रि, (तर्कयितुं शीलमस्य यद्वा तर्कयतीति। तर्क+णिनिः।) तर्कविशिष्टः। मीमांसकः। यथा,—
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा॥"
इति मनुः। १२। १११॥
तर्कुः, स्त्री, (कृत्+उः। निपातनात् साधुः।) सूत्रनिर्म्माणयन्त्रम्। टेको इति भाषा॥ तत्पर्य्यायः। कपालनालिका २। इति त्रिकाण्डशेषः॥ तर्कुटी ३ सूत्रला ४। इति हारावली॥ (कुम्भकारस्य चक्राकारशिलाभाण्डम्। यथा, अनर्घराघवे। २। ६।
"शृङ्गे सम्प्रति यावदभ्युदयते तत्तर्कुटङ्कोन्मिषत्-
रश्मिश्मश्रुरजश्छटावलयितो देवस्त्विषामीश्वरः॥")
तर्कुट, क्ली (तर्कयति सूत्रोत्पादकतया शोभते इति। तर्क दीप्तौ+बाहुलकात् उटन्।) कर्त्तनम्। इति त्रिकाण्डशेषः॥ काटनाकाटा इति भाषा॥
तर्कुटी, स्त्री, (तर्कुट+स्त्रियां गौरादित्वात् ङीष्।) तर्कुः। इति हारावली। २१३।
तर्कुपिण्डः पु, (तर्कुस्थितः पिण्डः। मध्यपदलोपिसमासः।) तर्कुस्थितमृत्पिण्डः। टेकोर वाँटुल इति भाषा॥ तत्पर्य्यायः। वर्त्तिनी २। इति जटाधरः॥ तर्कुपीठी ३ वर्त्तुला ४। इति हारावली। २१३॥
तर्कुपीठी, स्त्री, (तर्कुस्थिता पीठी स्वल्पो मृत्पिण्डः।) तर्कुपिण्डः। इति हारावली। २१३॥
तर्कुलासकः, पु, (लासयति शोभयतीति। लस कान्तौ+णिच्+ण्वुल्। तर्कुः सूत्रनिर्म्माणयन्त्रं तस्या लासकः।) फक्षोलः। इति हारावली। २१३॥ खरखा इति भाषा॥
तर्कुशाणः, पु, (तर्कोः शाणः।) सासकः। इति त्रिकाण्डशेषः॥ टेकोर शाण इति भाषा॥
तर्क्षुः, पु, (तरक्षुः पृषोदरादित्वात् साधुः।) तरक्षुः। इति शब्दरत्नावली॥
तर्क्ष्यः, पु, यवक्षारः। इति रत्नमाला॥
तर्ज्ज, भर्त्सने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सक-सेट्।) तर्ज्जति। इति दुर्गादासः॥
तर्ज्ज, क ङ भर्त्से। इति कविकल्पद्रुमः॥ (चुरां-आत्म सकं-सेट्।) क ङ, तर्ज्जयते। भर्त्सनम्। तामतर्ज्जयदम्बरे। इति रघुप्रयोगस्तु तर्ज्जनं तर्ज्जः। तर्ज्जं करोतीति णौ साध्यः। इति दुर्गादासः॥
तर्ज्जन, क्ली, (तर्ज्ज+भावे ल्युट्।) भर्त्सनम्। यथा। अधीरायास्तर्ज्जनताडनादि। इति रसमञ्जरी॥ (यथाच कुमारे। ६। ४५।
"भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्ज्जनैः।
यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः
प्रियाः॥")
तर्ज्जनी, स्त्री, (तर्ज्ज्यतेऽनयेति। तर्ज्ज भर्त्सने+करणे ल्युट्। ततः स्त्रियां ङीप्।) अङ्गुष्ठसमीपाङ्गुलिः। तत्पर्य्यायः। प्रदेशिनी २।

इत्यमरः। २। ६। ८१॥ सा तु गर्भस्थस्य चतुर्भिर्म्मासैर्भवति। इति मुखबोधः॥ (यथा, कथासरित्सागरे। १७। ८८।
"तच्छ्रुत्वा श्वशुरं तं सा वधूः सोमप्रभा क्रुधा।
विलोक्य भ्रामयामास यमाज्ञामिव तर्ज्जनीम्॥")
तर्ज्जिकः, पु, (तर्ज्जस्तर्ज्जनमस्त्यत्र। तर्ज्ज+ठन्।) देशविशेषः। तत्पर्य्यायः। तायिकः २। इति हेमचन्द्रः। ४। २४॥
तर्णः, पु, (तर्णोति तृणादिकं भक्षयतीति। तृण भक्षणे+अच्।) वत्सः। इति हेमचन्द्रः। ४। ३२६॥
तर्णकः, पु, (तर्ण एव। स्वार्थे कन्।) सद्योजातवत्सः। इत्यमरः। २। ९। ६१॥ कोमले वाछुर इति भाषा॥ (यथा, राजतरङ्गिण्याम्। ५। ४३६।
"स्नानक्षीरा वरा पत्नी रुद्धद्वारां निपात्यते।
आलिङ्ग्यमानां क्रन्दद्भिस्तर्णकैरिव दारकैः॥"
बालकः। यथा, अनर्घराघवे। २। २३।
"मुनिविनियोगलूनप्ररूढ़मृदुशाद्वलानि
वर्हींषि।
गोकर्णतर्णकोऽयं तर्णोत्युपकण्ठकच्छेषु॥")
तर्णिः, पु, (तरणिः पृषोदरादित्वादलोपः।) सूर्य्यः। प्लवः। इति शब्दार्थकल्पतरुः॥
तर्त्तरीकं, क्ली, (तीर्य्यतेऽनेनेति। तॄ+"फर्फरीकादयश्च।" उणां। ४। २०। इति ईकप्रत्ययेन निपातनात् साधुः।) नौका। (तरतीति। कर्त्तरि ईकः।) पारगे, त्रि। इति मेदिनी। के, १६१॥
तर्द्द, हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तर्द्दति। इति दुर्गादासः॥
तर्द्दूः, स्त्री, (तरति प्लवते इति। तॄ+"त्रो दुक् च।" उणां। १। ९१। इति ऊः दुगागमश्च।) दारुहस्तकः। इत्यमरः। २। ९। ३४। काठेर हाता इति भाषा॥
तर्पणं, क्ली, (तृप प्रीणने+भावे ल्युट्।) तृप्तिः। प्रीणनम्। इत्यमरः। २। ९। ५६॥ (यथा, कथासरित्सागरे। २६। २३६।
"तत्राहूय तरोर्मूले वेतालं नृकलेवरे।
पूजयित्वाकरोत्तस्य नृमांसबलितर्पणम्॥")
यज्ञकाष्ठम्। इति हेमचन्द्रः॥ (तृप्यन्ति पितरो येन। तृप्+करणे ल्युट्।) देवर्षिपितृमनुष्याणां जलाञ्जलिदानेन तृप्तिसम्पादनम्। यथा,
"एवं स्नात्वा पितॄन् देवान् मनुष्यांस्तर्पयेन्नरः।
नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्ध्वमानसः॥
आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम्।
त्रींस्त्रीनञ्जलाञ्जलीन्दद्यादाकाशे दक्षिणे तथा॥
वसित्वा वसनं शुष्कं स्थले चास्तीर्णवर्हिषि।
विधिज्ञास्तर्पणं कुर्य्युर्न पात्रे तु कदाचन॥
यदपां क्रूरमांसन्तु यदमेध्यन्तु किञ्चन।
अशान्तं मलिनं यच्च तत् सर्व्वमपगच्छतु॥
गृहीत्वानेन मन्त्रेण तोयं सव्येन पाणिना।
प्रक्षिपेद्दिशि नैरृत्यां रक्षोपहतयेऽच्युतम्॥
अनाचिकन्तु यदुक्तं मापादयश्च प्रतिग्रहम्।

दुष्कृतं यच्च मे किञ्चिद्वाङ्मनःकायकर्म्मभि ॥
पुनातु मे तदिन्द्रस्तु वरुणः सवृहस्पतिः ।
सविता च भगश्चैव मुनयः सनकादयः ॥
आब्रह्मस्तम्बपर्य्यन्तं जगत् तृप्यत्विति ब्रुवन् ।
क्षिपेदपोऽञ्जलींस्त्रींस्तु कुर्व्वन् सङ्क्षेपतर्पणम् ॥”
इति गारुडे २१५ अध्याय. ॥
तर्पणविशेषस्तु गारुडे २१८ अध्याये तथा वह्निपुराणे नित्याह्निकस्नानविधिनामाध्याये च द्रष्टव्यः ॥ * ॥ जीवत्पितृकस्य तर्पणनिषेधो यथा,—
“दर्शस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च ।
न जीवत्पितृको भूप! कुर्य्यात् कृत्वाघमाप्नुयात्॥”
इति कालिकापुराणे ८८ अध्यायः ॥
महायज्ञविशेषः । तत्तु पितृयज्ञः । पितृगणकृष्णतिलादीनाञ्च विधिना जलाञ्जदानेन तृप्तिसम्पादनम् । इत्यमरटीकायां भरत ॥ “तत् द्विविध प्रधानं अङ्गञ्च । तत्राद्यं यथा,—’
‘तर्पणञ्च शुचिः कुर्य्यात् प्रत्यह स्नातको द्विज. ।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥’
इति शातातप. ॥
विधवामधिकृत्य काशीखण्डे ।
‘तर्पण प्रत्यहं कार्य्यं भर्त्तु. कुशतिलोदकैः’ ।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकम् ॥’
द्वितीयं यथा, ब्रह्मपुराणे ।
‘नित्य नैमित्तिक काम्य त्रिविध स्नानमुच्यते ।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥’
तर्पणाकरणे दोषः । यथा, योगियाज्ञवल्क्यः ।
‘नास्तिक्यभावाद्यश्चापि न तर्पयति वै सुत. ।
पिबन्ति देहरुधिर पितरो वै जलार्थिनः ॥”
तस्य निषिद्धस्थानादि यथा । “नैष्कारचिते स्थाने पितॄंस्तर्पयेत् ।’ इति शङ्खलिखितौ ॥
‘यस्य सर्व्वाय चोत्सृष्टं यच्चाभोज्यनिपानजम् ।
तद्वर्ज्यं सलिल तात । सदैव पितृकर्म्मणि ॥’
इति मार्कण्डेयपुराणम् ॥ * ॥
तस्य विधानं यथा । स्नातश्चार्द्रवासा देवपितृतर्पणमम्भःस्थ एव कुर्य्यात् परिवर्त्तितवासाश्चेत तीरमुत्तीर्य्येति । इति विष्णुः ॥ तीर्थे विशेषो यथा, मत्स्यपुराणे ।
‘तिलोदकाञ्जलिर्द्देयो जलस्थैस्तीर्थवासिभि’ ॥’
तीर्थे सालस्थश्चेत् तर्पण करोति तदा जलेकचरणः स्थाप्यैव कुर्य्यात तस्य जले च तर्पणमविरुद्धम् । अग्रे तर्पण दर्भेषु कार्य्यम् । यथा,—
‘प्रागग्रेषु सुरांस्तर्प्येत् मनुष्यांश्चैव मध्यत ।
पितॄंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन् ॥’
इति आग्नेयपुराणम् ॥
अशुचिदेशे तु ।
‘यत्राशुचिस्थलं वा स्यादुदके देवतापितॄन् ।
तर्पयेत्तु यथाकाममप्सु सर्व्वं प्रतिष्ठितम् ॥
इति विष्णु’ ॥
‘प्रादेशमात्रं उद्धृत्य सलिल प्राङ्मुख’ सुरान् ।
उदङ्मुखांस्तर्प्येत पितॄन् दक्षिणतस्तथा ॥’
इति दक्षः ॥

उद्धृतोदके तु ।
‘पात्राद्वा जलमादाय शुभे पात्रान्तरे क्षिपेत् ।
जलपूर्णेऽथवा गर्त्ते न स्थले तु विवर्ज्जिते ॥’
इति हारीतः ॥
‘यन्तुद्धृतैः प्रसिञ्चेत्तु तिलान् संमिश्रयेज्जले ।
अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः ॥’
इति योगियाज्ञवल्क्यः ॥
“अङ्गुष्ठानामिकाभ्याञ्च दक्षिणस्येतरात् करात् ।
तिलान् गृहीत्वा वाचस्थान् ध्यायन् समर्पयेत् पितॄन् ॥
इति नारदः ॥ * ॥
देवतर्पणं यथा,—
‘ब्रह्माणं तर्पयेत् पूर्व्वं विष्णुं रुद्रं प्रजापतिम् ।
देवा यक्षास्तथा नागा गन्धर्व्वाप्सरसोऽसुराः ॥
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भकाः खगा. ।
विद्याधरा जलाधारास्तथैवाकाशगामिनः ॥
निराधाराश्च ये जीवाः पापे धर्म्मे रताश्च ये ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥’
इद उपवीतिना प्राङ्मुखेन देवतीर्थेन कार्य्यम् ॥
मनुष्यतर्पणं यथा,—
‘सनकश्च सनन्दश्च तृतीयश्च सनातन. ।
कपिलश्चासुरिश्चैव वोढु’ पञ्चशिखस्तथा ॥
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ॥’
इदं निवीतिना मनुष्यतीर्थेन सामगेन प्रत्यङ्मुखेन कार्य्यम् । अन्यवेदिना उदङ्मुखेन कार्य्यम् ॥ * ॥ तत ऋषितर्पणं प्राङ्मुखेन उपवीतिना देवतीर्थेन कार्य्यम् । ततो दिव्यपितृतर्पण दक्षिणामुखेन प्राचीनावीतिना सतिलजलेन पितृतीर्थेन कार्य्यम् । ततः पितृतर्पणम् ॥ * ॥ भीष्माष्टम्यां भीष्मतर्पणम् । तस्य मन्त्रो यथा,—
‘वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
अपुत्त्राय ददाम्येतत् सलिल भीष्मवर्म्मणे ॥’
प्रार्थनमन्त्रो यथा,—
‘भीष्म’ शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्त्रपौत्रोचितां क्रियाम् ॥’
प्रेतचतुर्द्दश्यां यमतर्पण यथा,—
‘यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औडुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नम. ॥’
प्रत्येकनामभिस्त्रींस्त्रीनञ्जलीन् दद्यात् ॥ * ॥
तिलतर्पणनिषेधो यथा,—
‘रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे ।
सप्तम्यां जन्मदिवसे न कुर्य्यात् तिलतर्पणम् ॥’
इति स्मृति’ ॥
‘सङ्क्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा ।
श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणम् ॥’
इति मत्स्यपुराणम् ॥
तत्र प्रतिप्रसवो यथा,—
‘अयने विषुवे चैव सङ्क्रान्त्यां ग्रहणेषु च ।
उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे ॥
सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे ।
तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्व्वदा ॥’
इति स्मृतिः ॥
‘तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात् तर्पण तिलमिश्रितम् ॥’
इति मरीचिवचनम् ॥ * ॥
तिलाभावे प्रतिनिधिर्यथा ।
‘तिलानामप्यभावे तु सुवर्णरजतान्वितम् ।
तदभावेऽपि सिञ्चेत्तु दर्भैर्मन्त्रेण वाप्यथ ॥’
इति याज्ञवल्क्य’ ॥ * ॥
अशक्तौ । आब्रह्मस्तम्बपर्य्यन्तं जगत्तृप्यतु । इत्यनेन त्रींस्तर्पयेत् ।” इत्याह्निकतत्त्वम् ॥
काशीखण्डमते तु ।
“आब्रह्मस्तम्बपर्य्यन्त देवर्षिपितृमानवा’ ।
तृप्यन्तु सर्व्वे पितरो मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥” ॥
जन्माष्टम्यां तर्पणस्य फल यथा,—
‘तस्यां तिथौ वारिमात्र पितॄणां य’ प्रयच्छति ।
गयाश्राद्ध कृतं तेन शताब्द’ नात्र संशय’ ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

तर्पणी, स्त्री, (तृप्यतेऽनयेति । तृप+करणे ल्युट् । स्त्रियां ङीप् ।) गुरुस्कन्धवृक्षः । स च श्लेष्मातकवृक्ष । इति शब्दमाला ॥ (सर्व्वजनतृप्तिप्रदायित्वात् गङ्गा । यथा, काशीखण्डे ।२९।७२।
“तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ॥”
प्रीतिप्रदे, त्रि । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“क्षुत्तृट्श्रमग्लानिहरी पेया वातानुलोमनी ।
विलेपी तर्पणी हृद्या ग्राहिणी बलवर्द्धिनी ॥”)

तर्पणेच्छु, पु, (तर्पणमिच्छतीति । इष+उ निपातनात् साधुः ।) भीष्मः । इति शब्दरत्नावली ॥ तर्पणाकाङ्क्षिणि, त्रि ॥

तर्पिणी, स्त्री, (तर्पयति प्रीणयतीति । तृप्+णिच्+णिनिः । ततो ङीप् ।) पद्मचारिणी । इति शब्दचन्द्रिका ॥

त(र्व्व)र्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां पर सक-सेट् ।) रेफोपधः । तर्वति । इति दुर्गादासः ॥

तर्वटः, पुं, (तर्वति द्रुतं गच्छतीति । तर्व+बाहुलकात् अटन् ।) वत्सरः । इति शब्दरत्नावली ॥ चक्रमर्द्दः । इति राजनिर्घण्ट ॥

तर्म्म, [न्] क्ली, (तरतीति । तॄ+“सर्व्वधातुभ्यो मनिन् ।” उणां ४ । १४४ । इति मनिन् ।) यूपाग्रम् । इत्यमरः । २ । ७ । १८ ॥

तर्ष, पु, (तृष पिपासायाम्+भावे घञ् ।) अभिलाषः । (यथा, महाभारते । १२ । २०४ । ६ ।
“तर्षच्छेदो न भवति पुरुषस्येह कल्मषात् ।
निवर्त्तते तदा तर्ष. पापमन्तगत यदा ॥”)
तृष्णा । इत्यमरः । २ । ६ । ५५ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४८० ।
“लवणार्णवपानेन तर्षोत्कर्षमिवोद्वहन् ।

धनुप्रतापो रिपुकर्णौ मनेयाभोगभञ्जमुखम् ॥” यथा, वैद्यकचक्रपाणिसंग्रहे हृष्याधिकारे।
“कासमर्दशर्करायुक्तं चन्दनोशीरमद्यकम्।
माषामद्भुकसंयुक्तं मिसर्दं जल पिबेत् ॥”
लीयतेऽनेनेति। लू ध्वनतरययो:+“हृतृ- नदिहनीति।” उणां ३। ६०। इति घ:।)
मय:। (तीर्यतेऽसौ इति कर्म्मणि घ:।) समुद्र:। इत्युणादिकोष:॥ सर्प:। इति संक्षिप्तसारे उणादिवृत्ति:॥
तर्पणं, क्ली, (तृप+भावे ल्युट्।) पिपासा। इति जटाधर:॥ (अभिलाष:। यथा, भागवते। ३। २५। ७।
“निर्विण्णा नितरां भूमन्नसदिन्द्रियतर्पणात्।
येन संभाव्यमानेन प्रपन्नान्धं तम: प्रभो!॥”)
तर्पित:, त्रि, (तर्षोऽस्य जात:। तर्ष+तारकादित्वात् इतच्।) तृषित:। इति त्रिकाण्डशेष:॥ (यथा, भागवते। ८। ६। २०।
“राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षित:।
दृष्ट्वा शयानान् विप्रांस्तान् पपौ मकलशं स्वयम्॥”
जाताभिलाष:। यथा, रामायणे।२।१०४।१।
“वशिष्ठ: पुरत: कृत्वा दारान् दशरथस्य च।
अभिचक्राम सं देशं रामदर्शनतर्षित:॥”)
तल, गर्त्ते। (भ्वा-परं-सकं-सेट्।) सौत्रधातुरयम्। तालिम:। इति दुर्गादास:॥
तल, कि प्रतिष्ठिती। इति कविकल्पद्रुम:॥ (चुरा-पक्षे भ्वा-परं-अकं-सेट्।) कि, तालयति तलति व्रतम्। संपूर्णं स्यादित्यर्थ:। इति दुर्गादास:॥
तलं, क्ली पुं, (तलतीति। तल प्रतिष्ठायाम्+ पचाद्यच्।) स्वरूपम्। यथा महीतलम्। (यथाच माघे। २। १११।
“तत्त्वा शत्रुविदस्तीर्णमन्त: प्रणिधय: पदम्।
विदाङ्कुर्वन्तु महतस्तलं विद्विषदम्भस:॥”
“तलं स्वरूपं प्रमाणमिति यावत्॥” इति तट्टीकायां मल्लिनाथ:॥) अधोभागम्। इति मेदिनी। ले, २१॥ (अध:। इत्यमर:। ३। ३। २०१॥ यथा, मनु:। २। ५९।
“अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते॥”
यथा च शाकिमुण्डले। ५। १८।
“याची स्फुटरमालर: किमुद्धयाम्योक- दारव्यां तलं
मनांसि यातरं मुग्धां गिरिदरीतीव उमावालये॥”
हस्तादीनामपरिमाणं। यथा,—
“तलं प्रकृतीनां यः स रा वाहुरुत्तमः।
वामो हर्म्यचकरी——————॥”
इति मायचक्रवर्त्तितिकद्वये वासवाणी॥
“तलं हस्तादीपरिमाण: तत्प्रमाणेन उदार- पवन: यदा भूतलमिति गदराम। तेनाद- मर्थ: वामो: इह वाहुरुहं तल आत्वाद इदं तलं तदपीत्येति॥” इति विस्तरदीपिकान्त- स्यानाम्।)

तलं, क्ली, (तलतीति। तल+अच्।) व्याघातवारणा। (यथा,—
“तत: समुत्पेतुरुदायुधास्ते
महीक्षितो बद्धतलाङ्गुलित्रा:॥”)
इति महाभारते। १। १९०। १५।
काननम्। कार्य्यबीजम्। इति मेदिनी। ले, २१॥ गर्त्त:। इति त्रिकाण्डशेष:॥ पादतलस्य मध्यम्। इति हेमचन्द्र:। ३। २८२॥ (यथा, भागवते। ८। २०। २३।
“इयामचक्रद्भुतवीर्य्य पादयो-
र्महीं महीध्रान् पुरुषस्य जङ्घयो:।
पतत्त्रिणो जानुनि विश्वमूर्त्ते-
रूर्व्वोर्गणं मारुतमिन्द्रसेन॥”
करतलस्य मध्यमपि। यथा, मनु:। ४। १४३।
“स्पृष्ट्वैतानशुचिर्नित्यमद्भि: प्राणानुपस्पृशेत्।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु॥”)
तल:, पुं, तालवृक्ष:। चपेट:। (यथा, मार्कण्डेये। ८०। १६।
“स मुष्टिं पातयामास हृदये दैत्यपुङ्गव:।
देव्यास्तञ्चापि सा देवी तलेनोरस्यताडयत्॥”
करतलाघातजन्यशब्द:। यथा, महाभारते। ३। २००। २४।
तत: प्रहसिता: सर्व्वे तेऽन्योन्यस्य तलान् ददु:॥”)
त्सरु:। खड्गमुष्टि:। इति मेदिनी। ले, २१॥ स्वभाव:। आधार:। इति हेमचन्द्र:॥ महादेव:। यथा, महाभारते शिवसहस्रनामस्तोत्रे। १३। १७। १२८।
“तलस्तालः करस्थाली ऊर्द्ध्वसंहननो महान्॥”)
तलकं, क्ली, (तलेन गभीरगर्त्तेन कायतीति। कै+क।) पुष्करिणी। इति हारावली। ४२॥ तलाओ इति हिन्दी भाषा॥
तलप्रहार:, पुं, (तलेन पाणितलेन प्रहारो यस्य।) चपेट:। तत्पर्य्याय:। चर्म्म २। इति हारावली। १६०॥ (यथा, मार्कण्डेये। ८०। १०।
“तलप्रहाराभिहतो निपपात महीतले॥
तलस्य प्रहार:।) तलाघात:॥
तलसारकं, क्ली, (तले सारो यस्य कप्।) घोटकस्याभोजनपात्रम्। इति शब्दचि॥ घोटकस्य वक्षस्थबन्धनचर्म्म:। तत्पर्य्याय:। वक्षपट: २ तलिका ३। इति हेमचन्द्र:। ४। ३१०॥
तलहृदयं, क्ली, (तलस्य पादतलस्य हृदयमिव।) पादतलस्य मध्यम्। इति हेमचन्द्र:। ३।२८२॥
तला, स्त्री, (तल+स्त्रियां टाप्।) गोधा। ज्याघातवारणा। इत्यमर:। २। ८। ८४।
तलाची, स्त्री, (तलमञ्चतीति। अञ्च+क्विन्। स्त्रियां ङीप्।) कटशर्मिरूपसन्नटः। इति हारावली। १००॥
तलातलं, क्ली, (न अतितलं यस्मिन् अतलम्। तलादपि अतलम्। पातालविशेषम् तदा- लम्।) पातालविशेष:। इति शब्दमाला। तत्र मयनामा दानवेन्द्र: त्रिपुराधिपतिर्भगवता

त्रिपुरारिणा त्रिलोकीशं शं चिकीर्षुणा निर्दग्ध- स्वपुरत्रयस्तत्प्रसादात् लब्धपदो मायाविनामा- चार्य्यो महादेवेन परिरक्षितो विगतसुदर्शन- भयो महीयते।” इति श्रीभागवतम्॥
तलिका, स्त्री, (तलं वक्षसोऽधोभागो इव्यस्यां- त्वेनास्त्यस्या इति। तल+ठन्।) तलसारकम्। इति हेमचन्द्र:। ४। ३१०॥
तलितं, क्ली, भृष्टमांसम्। यथा,—
“शुद्धमांसविधानेन मांसं सम्यक् प्रसाधितम्।
पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधै:॥”
अस्य गुणा:। यथा, भावप्रकाशे। १। १।
“तलितं बलमेधाग्निमांसौज:शुक्रवृद्धिकृत्।
तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम्॥”
तलिनं, क्ली, (तल्यते शयनार्थं गम्यतेऽत्र। तल+ “तलिपुलिभ्यां च।” उणा। २। ५३। इति इनन्।) शय्या। इति हारावली। १७१॥
तलिन:, त्रि, (तल+इनन्।) विरल:। स्तोक:। स्वच्छ:। इति मेदिनी। ने, ७०॥ दुर्ब्बल:। इति हेमचन्द्र:॥
तलिमं,क्ली,(तल+बाहुलकात् इमन्।) कुट्टिमम्। तल्पम्। चन्द्रहास:। वितानक:॥ इति मेदिनी। मे, ४४॥
तलुन:, पुं, (तरति येगेन गच्छतीति। तॄ+“कोरच लो वा।” उणां। ३। ५४। इति उनन् रस्य लश्च।) पवन:। युवा। इति मेदिनी। ने, ७०॥
तलुनी, स्त्री, (तलुन+गौरादित्वात् ङीष्।) तरुणी। युवती। इति शब्दरत्नावली॥
तलेक्षण:, पुं, (तले अधोभागे ईक्षणं दर्शनमस्य।) शूकर:। इति शब्दार्थकल्पतरु:॥
तलोदरी, स्त्री, (तलमतिगभीरमपूर्णमुदरमितिभाव: उदरं यस्या:। बहुव्रीहौऽपि “नासिकोदरौष्ठ- जङ्घादन्तकर्णशृङ्गाच्च।” ४। १। ५५। इति ङीष्। “आद्योर्विकल्पलक्षणो निषेधो बाधते पुरस्तादपवादन्यायात्।) भार्य्या। इति शब्दार्थ- कल्पतरु:॥
तलोदा, स्त्री, (तले उदकं यस्या:। उदकस्य उदादेश:।) नदी। इति त्रिकाण्डशेष:॥
तल्कं, क्ली, (तल+बाहुलकात् कन्।) वनम्। इति त्रिकाण्डशेष:॥
तल्पं, क्ली पुं, (तल्प्यते शयनार्थं गम्यतेऽत्र। तल+ “खष्पशिल्पशष्पवाष्परूपपर्पतल्पा:।” उणां। ३। २८। इति पप्रत्ययेन निपातनात् साधु:।) शय्या। (यथा, मनु:। ९। १।
“अनादिष्टं तस्य वाईौक्लमर्हति प्रथम क्वा।”)
अट्टालिका। दारा:। इत्यमरभरतौ। (यथा, रघुवंशे। १४८।
“पितुरनन्तरमेव कार्यमात्मार्थ।
गुरुतल्पगमं कुर्वाण गत्वा निष्कृतिमर्हति॥”)
तल्पकीट:, पुं, (तल्पे शय्यायां कीट:।) मत्कुण:। छारपोका इति भाषा। यथा,
“तल्पकीट तल्पकीटेव यदा मृतो आदृतम्॥”
इति कवैदीपिकायां हैमवतान्युक्तम्॥

तल्पनं, क्ली, (तल्प इवाचरति । तल्प+क्विप्+ल्युच ।) करिपृष्ठम् । इति भूरिप्रयोगः ॥ पृष्ठवंशस्य मांसम् । इति धारावली ॥

तलं, क्ली, (तस्मिन् भूदेशे लीयते इति । ली+डः ।) विलम् । इति त्रिकाण्डशेषः ॥

तल्ल, पु, (तस्मिन् लीयते इति । ली+डः ।) जलाधारविशेषः । इति मेदिनी । ले, २२ ॥ तलाओ इति हिन्दीभाषा ॥

तल्लजः, पु, (तत् प्रसिद्धं यथास्यात् तथा लजतीति । लज+अच् ।) प्रशस्तः । इत्यमरः ॥ अयं वाच्यलिङ्गः समासे उत्तरपदे भवति । यथा कुमारीतल्लजः । इत्यमरटीका ॥

तल्ली स्त्री, (तत् प्रसिद्धं यथा तथा लसतीति । लस +डः स्त्रियां ङीष् च ।) तरुणी । इति मेदिनी । ले, २२ ॥

तवक्षीर, क्ली, (तु+अच् । तवं क्षीरमिति नित्य-कर्म्मधारयः ।) तीयाक्षीर इति ख्यातम् । तत्-पर्य्यायः । पयःक्षीरम् २ यवजम् ३ यवजोद्-भवम् ४ । अस्य गुणाः । मधुरत्वम् । शिशिर-त्वम् । दाहपित्तक्षयकासकफश्वासास्रदोषनाशि-त्वञ्च । इति राजनिर्घण्टः ॥

तवक्षीरी, स्त्री, (तवक्षीर+ङीप् ।) गन्धपत्रा । इति राजनिर्घण्टः ॥

तवराजः, पु, (तु+अच् तवः पूर्णः सन् राजते । राज+अच् ।) यवासशर्करा । इति राज-निर्घण्टः ॥ (यवासशर्कराशब्देऽस्य विवृति-र्ज्ञातव्या ॥)

तवराजोद्भवखण्डः, पु, (उद्भवत्यस्मादिति । उत्+ भू+अच् । उद्भव उत्पत्तिस्थानम् । तवराज उद्भवोऽस्य । यद्वा, तवराजात् उद्भवतीति । उद्+भू+अच् ।) ततः कर्म्मधारयः । यवास शर्कराभवखण्ड । तत्पर्य्याय. । सुधामोदकज २ खण्डजोद्भवज, ३ सिद्धमोदक ४ अम्टतसारज: ५ सिद्धखण्ड ६ । अस्य गुणा । दाहतापतृष्णा-मोहमूर्च्छाश्वासनाशित्वम् । इन्द्रियतर्पणत्वम् । शीतत्वम् । सदासमधुरत्वञ्च । इति राज-निर्घण्टः ॥

तविषः, पुं, (तव+"तवेर्णिद्वा ।" उणां ।१।४८। इति टिषच् ।) स्वर्गः । समुद्रः । इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः ॥

तविषी, स्त्री, (तविष+सञ्ज्ञायां ङीष् ।) नदी । देवकन्या । भूमिः । इति सिद्धान्तकौमुद्या मुणादिवृत्ति ॥ (बलम् । यथा, ऋग्वेदे ।१।३५।४। "कृष्णारजांसि तविषीं दधान. ॥")

तष्टः, त्रि, (तक्ष+क्तः । पृषोदरात् कलोपे साधुः ।) तनूकृत. । इत्यमरः । ३ । १ । ९६ ।

त्वष्टा, [ऋ] पुं, (तक्षकार्श्ये+तृच् पृषोदरात् कलोपे साधुः ।) त्वष्टा । छुतार इति भाषा । विश्वकर्म्मा । आदित्यविशेषः । इत्यमरटीकायां रमानाथः ॥

तस, इ कि अलङ्कृतौ । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सक-सेट ।) इ, कर्म्मणि संस्यते । कि, तंसयति तंसति हारो जनम् । इति दुर्गादासः ॥

तस, य उ इर उत्क्षेपे । इति कविकल्पद्रुमः ॥ (भ्वां परं-सक-सेट् । उदित्वात् क्त्वावेट् ।) य, तस्यति धूलिं वायुः । उ, तसित्वा तस्त्वा । इर्, व्यतसत् । व्यतासीत् । व्यतसीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

तसरः, पुं, (तनोतीति । तन+"तन्नृषिभ्यां कृसरन् ।" उणां ३ । ७५ । इति सरन् किञ्च ।) त्रसरः । सूत्रवेष्टनम् । इत्युणादिकोषः ॥ (यथा, वाजस-नेयसंहितायाम् । १९ । ८३ । "रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥")

तस्करः, पुं, (तत् करोतीति । कृ+"दिवाविभेति ।" ३ । २ । २१ । इत्यस्य सूत्रस्य "किं यत्तद्-बहुषु कृञोऽज्विधानम् ।" इति वार्त्तिकोक्तेरच् । ततः । "तद्बृहतोः करपत्योः इति सुट्दलोपौ ।) चौरः । एकाशाकः । इति रत्नमाला ॥ मदन-वृक्षः । इति जटाधरः ॥ कर्णः । यथा, रघुः । १ । २७ । "धाहृता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥" "तस्करः कर्णचौरयोरिति कोषान्तरम् ।" इति तट्टीका ॥

तस्करस्नायुः, पुं, (तस्करस्य एकाशाकस्य स्नायु-रिव ।) काकनासालता । इति राजनिर्घण्टः ॥

तस्करी, स्त्री, (तद्+कृ+चौरान्यर्थे टः टित्वात् ङीप् । सुटि दलोपे च साधुः ।) कोपना नारी । इति शब्दार्थकल्पतरुः ॥

ताटङ्कः, पु, (ताडङ्क+पृषोदरात् साधुः ।) ताडङ्कः । इति द्विरूपकोषटीकायां भरतः ॥ (यथा, देवीभागवते । १२ । ६ । ७१ । "तलोदरी तिरोभाषा ताटङ्कप्रियवादिनी ॥")

ताटस्थ्य, क्ली, (तटस्थ+भावे ष्यञ् ।) उदा-सीनत्वम् । निकटस्थत्वम् । यथा, ताटस्थ्येन उदासीनत्वेन इति । तटस्थो निकटस्थः प्रसिद्ध-पूर्व्वप्रणय इति च काव्यप्रकाशटीकायां चण्डि-दास ॥

ताडः, पुं, (तड+भावे घञ् ।) ताडनम् । शब्दः । मुष्टिमेयतृणादि । इति मेदिनी । डे,१४ ॥ पर्व्वतः । इति हेमचन्द्रः ॥

ताडका, स्त्री, राक्षसीविशेषः । सा सुकेतुयक्ष-कन्या ब्रह्मवरेण सहस्रहस्तिबलयुता सुन्दैत्य-पुत्रस्य सुन्दस्य भार्य्या मारीचमाता सुन्दे निहते पुत्रेण सह अगस्त्यमृषिं घर्षयितुमुद्यता तस्य शापात् सपुत्रा राक्षसत्वं गता श्रीरामेण निहता । इति रामायणम् ॥

ताडकाफलं, क्ली, (तारकेव नक्षत्रमिव फलमस्य । रस्य डत्वम् ।) हृद्देला । इति रत्नमाला ॥

ताडङ्कः, पुं, (ताल तालपमिव अङ्कयति लक्ष्यते इति । अङ्क+घञ् । लस्य डत्वम् । शकन्ध्वा-दित्वात् साधुः ।) कर्णभूषा । कानतड़का इति भाषा ॥ तत्पर्य्याय. । कर्णदर्पणः २ । इति त्रिकाण्डशेषः ॥ ताटङ्कः ३ । इति द्विरूपकोष-टीकायां भरतः ॥ कर्णिका ४ तालपत्रम् ५ । इत्यमरः ॥ ताडपत्रम् ६ । इति हेमचन्द्रः । ३ । ३२० ॥ कर्णसुकुरः ७ । इति जटाधरः ॥ (यथा, मनसाध्याने । "ताडङ्काङ्गदमेखलागुणरणन्मञ्जीरतां प्रापितैः फेरार्त्ती वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे ।")

ताड़न, क्ली, (ताड़ि+भावे ल्युट् ।) आघातः । यथा, शृङ्गारतिलके । [तप. ॥" "श्लाघ्य नीरसकाष्ठताड़नशतं श्लाघ्यः प्रचण्डा-यथाच, गारुडे ९६ अध्याये । "श्रुतिस्मृत्युक्तमाचार कुर्य्यात्कर्म्माणि न त्यजेत् । न निन्दाताड़ने कुर्य्यात् सुत शिष्यञ्च ताडयेत् । आचरेत् सर्व्वदा धर्म्मं तद्विरुद्धन्तु नाचरेत् ॥" अपि च चाणक्ये । १२ । "लालने बहवो दोषास्ताड़ने बहवो गुणाः । तस्मात् पुत्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत् ॥"

ताडनी, स्त्री, (ताड्यतेऽनयेति । ताडि+करणे ल्युट् स्त्रियां ङीप् ।) अश्वताडनयष्टिः । तत्-पर्य्यायः । चर्म्मयष्टिः २ कशा ३ भीमा ४ चर्म्म-नालिका ५ । इति शब्दमाला ॥

ताडपत्रं, क्ली, (तालस्य पत्रमिव । लस्य डत्वम् ।) ताड़ङ्कः । इति हेमचन्द्रः । ३ । ३२० ॥

ताड़िः, स्त्री, (ताड़यति पत्रै. शोभते इति । तड़ दीप्तौ+णिच्+इन् ।) वृक्षविशेषः । इत्य-मरटीकायां भरतः ॥ ताड़ियात् इति भाषा ॥

ताड़ी, स्त्री, (ताडिः कृदिकारादिति वा ङीष् ।) पत्रद्रुमः । इत्यमरमेदिनीकरौ ॥ तत्पर्य्यायः । ताडिः २ ताली ३ तालिः ४ । इति भरत ॥ ताडियात् इति भाषा ॥ (यथा, राजतर-ङ्गिण्याम् । ३ । ३२८ । "शुष्यत्तमालपत्राणि शीर्णताड़ीदलानि च । तत्सेनार्णवतीराणि चक्रेऽरिस्त्रीमुखानि च ।") आभरणविशेषः । इति दुर्गसिंहः ॥

ताडुलः, पुं, (ताड़यतीति । तड+णिच्+उल ।) ताड़यिता । इति संक्षिप्तसारे उणादिवृत्तिः ॥

ताड्यमानः, पुं, (ताड्यते असौ । ताड़ि+कर्म्मणि शानच् ।) पटहादिः । इति त्रिकाण्डशेषः ॥ ताडनयुक्ते, त्रि । (यथा, कुमारे । १ । ४५ । "अध्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्व्वितन्त्रीरिव ताड्यमाना ॥")

ताण्डवं, क्ली, पुं, नृत्यम् । इत्यमरः । १ । ७ । १० ॥ ताण्डेन मुनिना कृत ताण्डि शृङ्गशास्त्रं तद-स्यास्तीति । इति भरतः ॥ तण्डुना प्रोक्तमिति स्वामी ॥ ("पुंनृत्य ताण्डव प्राहुः स्त्रीनृत्यं लास्यमुच्यते ॥" इति शब्दार्थचिन्तामणिधृतवचनेन पुंस्त्वम् ॥) तृणविशेषः । उद्धतनृत्यम् । इति मेदिनी । वे, ३६ ॥ (यथा, मत्स्यपुराणे । १ । १ । "प्रचण्डताण्डवाटोपे प्रक्षिप्ता येन दिग्गजाः । भवन्तु विघ्नभङ्गाय भवस्य चरणाम्बुजाः ॥")

ताण्डवतालिकः, पु, (ताण्डवे शिवनृत्यकाले यस्तालः स कार्य्यतयास्यस्येति । ठन् ।) नन्दी। स शिवद्वारी । इति त्रिकाण्डशेषः ॥

ताण्डवप्रियः, पु, (ताण्डव उद्धतनृत्यं प्रियमस्य ।) शिवः । इति शब्दमाला ॥

ताण्डि, स्त्री, (ताण्डिना मुनिना कृतम् । ताण्डि + बहुलवचनात् इञ् ।) नृत्यशास्त्रम् । इत्यमरटीकायां भरतः ॥

तातः, पु, (तनोति विस्तारयति गोत्रादिकमिति । तन + "दुतनिभ्यां दीर्घश्च ।" उणां । ३ । ९० । इति क्तः दीर्घश्च । अनुदात्तेति नलोपः ।) पिता । इत्यमरः । २ । ६ । २८ । (यथा, रघुः । ९ । ७५ ।
"हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
स्तस्यान्विष्यन् वेतसगूढं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्त्रं
तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥")
अनुकम्प्यः । इति मेदिनी । ते, २१ ॥ (यथा, भागवते । १ । १४ । ३६ ।
"कच्चित्तेऽनामयं तात । भ्रष्टतेजा विभासि मे । अलब्धमानोऽवज्ञातः किं वा तात ! चिरोषितः ॥")
पूज्ये, त्रि । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ७२ । वशिष्ठं प्रति दिलीपोक्तिः ।
"तस्मात् मुच्ये यथा तात । संविधातुं तथार्हसि । इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥")

तातगुः, पुं, (तातस्य पितुरिव गौर्वाचकशब्दो यत्र । गवान्तत्वात् गौणत्वे ह्रस्वः ।) क्षुद्रतातः । पितृव्यः । जनकस्य हिते, त्रि । इति मेदिनी । गे, ३६ ॥

तातजनयित्र्यौ, स्त्री, (तातश्च जनयित्री च ते ।) मातापितरौ । इत्यमरः ॥ द्विवचनान्तोऽयम् ॥

ताततुल्यः, त्रि, (तातस्य पितुस्तुल्यः ।) पितृसमः । तत्पर्य्यायः । मनोजवसः २ । इति हेमचन्द्रः । ३ । १५२ ॥ मनोजवः ३ पितृसन्निभः ४ । इत्यमरः । तातलः ५ इति मेदिनी ॥

तातनः, पु, (तातं मनोहरं यथा तथा नृत्यतीति । नृत् + बाहुलकात् डः ।) खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥

तातलः, पु, (तापं लातीति । ला + कः । पृषोदरादित्वात् पस्य तः ।) रोगः । पाकः । लौहकूटः । मनोजवः । इति मेदिनी । ले, ९८ ॥ तप्तमात्रे, त्रि । इत्यजयपालः ॥

तातिः, पु, पुत्त्रः । इति जटाधरः ॥

तात्कालिकः, त्रि, (तत्काले भवः । तत्काल + "व्यापदादिपूर्व्वपदात् कालान्तात् ।" ४ । २ । ११६ । इत्यस्य वार्त्तिकोक्त्या ठञ् ।) तत्कालभवः । यथा, शुद्धितत्त्वे भट्टः ।
"ततः आद्यमशुद्धौ तु कुर्य्यादेकादशे तथा । यस्तु तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥"

तात्पर्य्यं, क्ली, (तत्परस्य भावः । तत्पर + ष्यञ् ।) अभिप्रायः । इति शब्दार्थकल्पतरुः ॥ वक्तुरिच्छा । (यथा, भाषापरिच्छेदे । ८४ ।
"आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्यं परिकीर्त्तितम् ॥")

तादात्म्यं, क्ली, (तदात्मनो भावः । तदात्मन् + ष्यञ् ।) तत्स्वरूपम् । अभेदसम्बन्धः । इति न्यायशास्त्रम् ॥

तादृक्, [श्] त्रि, स इव दृश्यतेऽसौ । (तद् + दृश् + "त्यदादिषु दृशोऽनालोचने कञ् च ।" ३ । २ । ६० । इति क्विन् । "आ सर्व्वनाम्नः ।" ६ । ३ । ९१ । इति आत्वम् ।) तादृशः । ताद्दार मत इति भाषा ॥ इति मुग्धबोधम् ॥ (यथा, पञ्चतन्त्रे । १ । २७६ ।
"यादृशैः सेव्यते भृत्यैर्यादृशांश्चोपसेवते । कदाचिन्नात्र सन्देहस्तादृग् भवति पूरुषः ॥")

तादृक्षः, त्रि, (स इव दृश्यते इति । तद् + दृश् + त्यदादिष्विति कसोऽपि वाच्य इति कसः ।) तादृक् । इति मुग्धबोधम् ॥ (यथा, राजतरङ्गिण्याम् । ४ । २४२ ।
"ततः प्रभृति तादृक्षयोग्यार्थप्राप्तिलालसः । परिहासपुरे चक्रे स्थिरां गुर्व्वीं सपर्य्यिणीम् ॥")

तादृशः, त्रि, (स इव दृश्यते इति । तद् + दृश् + "त्यदादिष्विति ।" ३ । २ । ६० । इति कञ् ।) तादृक् । (यथा, पञ्चतन्त्रे । १।४३५ ।
"उपदेशो न दातव्यो यादृशे तादृशे जने ॥")

तानं, क्ली, (तन उ ञ विस्तारे + भावे घञ् ।) विस्तारः । ज्ञानविषयः । इति शब्दार्थकल्पतरुः ॥

तानः, पु, (तन्यते गीतमनेनेति । तन + घञ् ।) गानाङ्गविशेषः । यथा, सङ्गीतदामोदरे ।
"विस्तार्य्यन्ते प्रयोगा यैर्मूर्च्छनाशेषसंश्रयाः । तानास्तेऽपूर्णपञ्चाशत् सप्तस्वरसमुद्भवाः ॥ तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक् । ते स्युः पञ्चसहस्राणि त्रयस्त्रिंशच्छतानि च ॥"

तानवं, क्ली, (तनोर्भावः । तनु + "इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) गात्रे तनुता । यथा, उज्ज्वलनीलमणिः ।
"तानवं तनुता गात्रे दौर्ब्बल्यभ्रमणादिकृत् ॥" (यथा, आर्य्यासप्तशत्याम् । ३६३ ।
"परमतिनिर्दयपुरुषाटाशोषित शठ । नेर्ष्यया न कोपेन ।
दग्धसन्तोषतया गेहेऽस्मि तव तानवं वीक्ष्य ॥")

तानूरः, पुं, (तनु + [illegible] उरच् ।) पयसां भ्रमः । आवर्त्तः । इति भूरिप्रयोगः ॥

तान्तः, त्रि, (तम + क्तः ।) श्रान्तः । इति शब्दार्थकल्पतरुः ॥ (यथा, प्रद्युम्नविजये । २ अङ्के ।
"मान्द्यं श्रान्तिगिवान्ततान्तमतुलं सन्तोषयत्यान्टशन्
यत्राध्यगाघनच्छदैर्व्विटपिभिश्छन्ने निरस्तातपे ॥")

तान्त्रिकः, त्रि, (तन्त्रं सिद्धान्तं अधीते वेद वा । तन्त्र + "उक्थादित्वात् ठक् ।) ज्ञातसिद्धान्तः । शास्त्रतत्त्वज्ञः । इत्यमरः ।२।८।१५॥ तन्त्रशास्त्रवेत्ता तत्सम्बन्धी च । (यथा, भागवते ।८।३।९ ।
"मैयोरपिभिर्वैदिकतान्त्रिकैः ॥")

तापः, पु (तप + घञ् ।) सन्तापः । (यथा, भागवते । ३ । १४ । ४८ ।
"नैदाघजं तापमिवोडुराजः ॥") कृच्छ्रम् । इति मेदिनी । पे, ७ ॥ (त्रिविध दुःखम् । यथा देवीभागवते । १ । १ । ७ ।
"दीर्घायुर्भव सर्व्वज्ञ । तापत्रयविवर्ज्जितः ॥")

तापकः, पु, (तापयतीति । तप + णिच् + ण्वुल् ।) ज्वरः । इति शब्दरत्नावली ॥ तापकर्त्तरि त्रि ॥

तापत्यः, पु, (तपती सूर्य्यकन्या तस्या अपत्यं पुमान् । तपती + ण्यः ।) अर्ज्जुनः । इति पुराणम् ॥ (यथा, महाभारते । १।१६६।२ ।
"तस्मात्तापत्य । यत्किञ्चिन्नृपाणां श्रेय इहेप्सितम् । तस्मिन् कर्म्मणि योक्तव्या दान्तात्मानः पुरोहिताः ॥"
तपतीवंशोद्भवकौरवमात्रम् । यथा, तत्रैव । १ । १७१ । ६६ ।
"सोऽहं त्वयेह विजितः संख्ये तापत्यवर्द्धन ! ॥"
तपत्या उपाख्यानम् । तपती + ष्यञ् । तपत्युपाख्याने, क्ली । यथा, तत्रैव । १।२।१०६ ।
"तापत्यमथ वाशिष्ठमौर्व्वञ्चाख्यानमुत्तमम् ॥"
एतदुपाख्यानन्तु महाभारते आदिपर्व्वणि १७२ अध्याये द्रष्टव्यम् ॥)

तापनः, पु, (तापयतीति । तप + णिच् + कर्त्तरि ल्युः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ९ ॥ (यथा, महाभारते । ५ । ४६ । २ ।
"शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते । तच्छुक्रं ज्योतिषां मध्ये तप्तं तपति तापनम् । योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥")
कामवाणः । इति जटाधरः ॥ (यदुक्तं,—
"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा । स्तम्भनश्चेति कामस्य पञ्च वाणाः प्रकीर्त्तिताः ॥")
सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (क्ली, नरकविशेषः । यथा, याज्ञवल्क्ये । ३ । २२४ ।
"असिपत्रवनञ्चैव तापनञ्चैकविंशकम् ॥"
भावे ल्युट् । तापकरणम् । यथा, सुश्रुते ।१।४१ ।
"तद्दहनपचनदारणतापनप्रकाशनप्रभावर्णकरमिति ॥") तापयितरि, त्रि ॥ (यथा, महाभारते । १ । १९ । २१ ।
"ततोऽमरान्विस्मितमानमागतं
महाप्रभं चक्रममित्रतापनम् ॥")

तापसं, क्ली, तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तापसः, त्रि, (तपोऽस्यस्येति । तपस् + "अण् च ।" ५ । २ । १०३ । इति अण् । यद्वा, तपः शीलमस्य । "छत्रादिभ्यो णः ।" ४ । ४ । ६२ । इति णः ।) तपस्वी । इत्यमरः । २ ।७।४२ ॥ (यथा, मनुः । ६ । २७ ।
"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ॥"
तपःसम्बन्धी । यथा, गौः रामायणे । २।५२।५ ।
"तापसं व्रतमास्थाय वने गुहसहाय ह ॥")
पुं, दमनकवृक्षः । वकपक्षी । इति राजनिर्घण्टः ॥ (इक्षुविशेषः । यथा, सुश्रुते । १ । ४५ ।

"कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥"
"इत्येता जातयः स्थौल्यात् गुणान् वक्ष्याम्यतः परम् ॥"
"कान्तारतापसाविक्षू वंशकाद्गुणौ मतौ ॥")

तापसतरुः, पुं, (तापसप्रियस्तरुर्वृक्षः ।) इङ्गुदीवृक्षः । इत्यमरः । २ । ४ । ४६ ॥ (इङ्गुदीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

तापसद्रुमः, पुं, (तापसप्रियो द्रुमः ।) इङ्गुदीवृक्षः । इति हेमचन्द्रः । ४ । २०९ ॥ (पर्य्यायोऽस्य यथा,—
"इङ्गुदीऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तापसद्रुमसन्निभा, स्त्री, (तापसद्रुमस्य सन्निभा समा ।) गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

तापसप्रियः, पुं, (तापसानां प्रियः ।) प्रियालवृक्षः । इति राजनिर्घण्टः ॥ (इङ्गुदीवृक्षः । यथा, वैद्यकरत्नमालायाम् ।
"शीतपुष्पोऽङ्गारपुष्प इङ्गुदी तापसप्रियः ॥")

तापसप्रिया, स्त्री, (तापसानां प्रिया ।) द्राक्षा । इति राजनिर्घण्टः ॥ (द्राक्षाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

तापहरी, स्त्री, (तापं अरुचिजन्यसन्तापं हरतीति । हृ + बाहुलकात् टः । स्त्रियां ङीप् ।) व्यञ्जनविशेषः । यथा,—
"घृते हरिद्रासंयुक्ता माषाणां भर्जयेद्वटीः ।
तण्डुलांश्चापि निर्धौतान् सहैव परिभर्जयेत् ॥
सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत् ।
लवणार्द्रकहिङ्गूनि मात्रया तत्र निःक्षिपेत् ॥
एषां सिद्धिं समायाता प्रोक्ता तापहरी बुधैः ॥"
अस्या गुणाः ।
"भवेत्तापहरी बल्या वृष्या श्लेष्माणमाचरेत् ।
हृद्या तर्पणी रुच्या गुर्व्वी तत्र गुणाः स्मृताः ॥"
ताहरी इति लोके । इति भावप्रकाशः ॥
तापहारिण्यां त्रि ॥

तापिच्छः, पुं, (तापिनं सन्तप्तं छदति आच्छादयतीति । छद् + अन्येष्वपीति डः । पृषोदरादित्वात् साधुः ।) तमालवृक्षः । इत्यमरः । २ । ४ । ६८ ॥ (यथा, गीतगोविन्दे । ११ । ११ ।
"अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीम् ॥"
क्ली, तापिच्छस्य पुष्पम् । फले लुगिति तद्धितलुक् । क्लीवेन प्रसवे सर्व्वमिति नपुंसकत्वम् । तापिच्छपुष्पम् । यथा, माघे । १ । २२ ।
"प्रफुल्लतापिच्छनिभैरभीषुभिः
शुभैश्च सप्तच्छदपांशुपाण्डुभिः ॥")

तापिञ्जं क्ली, (तापिनं जयतीति । जि + डः ।) धातुमाक्षिकम् । इति राजनिर्घण्टः ॥

तापिञ्जः, पुं, तापिच्छः । इत्यमरटीकायां भरतः ॥

तापी, स्त्री, (तापयतीति । तप + णिच् + अच् । गौरादित्वात् ङीष् ।) तापिनी नदी । सा पश्चिमवाहिनी विन्ध्यान्तिके प्रसिद्धा । इति राजनिर्घण्टः ॥ (यथा, मात्स्ये । ११३ । २७ ।
"तापी पयोष्णी निर्व्विन्ध्या क्षिप्रा च ऋषभा नदी ।
विन्ध्यपादप्रसूतास्ताः सर्व्वाः शीतजलाः शुभाः ॥"
इयं सह्यपादोद्भवा इति विष्णुपुराणम् । २ । ३ । ११ ॥
"तापी तापा च गोलोमी गोमती शालिता नदी ।
सरस्वती युता नद्यो नर्म्मदा पश्चिमानुगाः ॥
आसां जलं घनं शीतं पित्तघ्नं कफनाशनम् ।
वातदोषहरं हृद्यं कण्डुकुष्ठविनाशनम् ॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥)
यमुना । इति त्रिकाण्डशेषः ॥

तापी, [न्] (तापोऽस्यास्तीति । ताप + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) बुद्धः । इति त्रिकाण्डशेषः ॥ तापयुक्ते, त्रि ॥

ताप्यं, क्ली, (तापे हितम् । ताप + यत् ।) धातुमाक्षिकम् । इति रत्नमाला ॥ हेमचन्द्रे पुंलिङ्गोऽयम् । ४२१ ॥ (यथा, भावप्रकाशे ।
"ताप्यस्य मलत्रितय हे लोहश्रावणीकायाः ॥")

ताप्यकं, क्ली, (ताप्यमेव । स्वार्थे कन् ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (माक्षिकशब्दे विवृतिरस्य ज्ञेया ॥)

ताप्युत्थसंज्ञकं, क्ली, (ताप्युत्थासंज्ञा यस्य । कप् ।) माक्षिकधातुः । इति रत्नमाला ॥

तामः, पुं, (ताम्यत्यनेनेति । तम + करणे घञ् ।) भीषणः । दोषः । इत्यजयपालः ॥

तामरं, क्ली, (तामं ग्लानिं रातीति । रा + कः ।) जलम् । घृतम् । इति भरतद्विरूपकोषः ॥

तामरसं, क्ली, (तामरे जले सतीति । सस् + डः । यद्वा, बाहुलकात् तनेरसच् । तस्य णित्वञ्च । धातोस्तुगागमश्च । णित्वात् वृद्धिः । इत्युज्ज्वलदत्तः । ३ । ११७ ॥) पद्मम् । (यथा, राजेन्द्रकर्णपूरे । ५४ ।
"जाता तामरसोदरे भगवती धातुः कलार्थां स्थितिः ॥")
सारसः । इत्यमरः । १ । १० । ४० ॥ स्वर्णम् । ताम्रम् । इति मेदिनी । से, ५३ ॥ (द्वादशाक्षरच्छन्दोविशेषः । तस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

तामलकी, स्त्री, भूम्यामलकी । इत्यमरः । २ । ४ । १२७ ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"कटुकेन्द्रयवोशीरसिद्धो तामलकीघनैः ॥")

तामलिप्तं, क्ली, } तामलिप्ती, स्त्री, } देशविशेषः । तमलुक् इति भाषा ॥ तत्पर्य्यायः । दामलिप्तम् २ तामलिप्ती ३ तमालिनी ४ स्तम्बपूः ५ विष्णुगृहम् ६ । इति हेमचन्द्रः । ४ । ४५ ॥ तमोलिप्ती ७ वेलाकूलम् ८ तमालिका ९ । इति त्रिकाण्डशेषः ॥

तामसः, त्रि, (तम एव । तमस् + स्वार्थे अण् ।) प्रकृतिगुणविशेषः । तद्धर्म्मा यथा,—
"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥
मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥"
इति श्रीभगवद्गीतायां १७ अध्यायः ॥ * ॥
किञ्च तत्रैव १८ अध्याये ।
"नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥
यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् ॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता ।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ । तामसी ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता ॥
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥"

तामसः, पुं, (तमस्तमोगुणः प्रधानत्वेनास्त्यस्येति । अण् ।) सर्पः । खलः । इति मेदिनी । से, २५ ॥ उलूकः । इति राजनिर्घण्टः ॥ चतुर्थमनुः । अस्मिन्नन्तरे हरिनामा विष्णोरवतारः । त्रिशिखनामा इन्द्रः । वैधृतयो देवाः । ज्योतिर्धामाद्यः सप्तर्षयः । दृषख्यातिनरादयो मनुसुताः । इति श्रीभागवतम् ॥ * ॥ तमोगुणयुक्ते, त्रि ॥ (यथा, मनुः । १२ । ३३ ।
"लोभः स्वप्नोऽधृतिः क्रौर्य्यं नास्तिक्यं भिन्नवृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥")
तामसमुनयो यथा । कणादः १ गौतमः २ शक्तिः ३ उपमन्युः ४ जैमिनिः ५ दुर्व्वासाः ६ मृकण्डुः ७ बृहस्पतिः ८ भार्गवः ९ जमदग्निः १० ॥ तामसशास्त्राणि यथा । असुरमोहनार्थशिवकृतशैवपाशुपतादि १ कणादकृतन्यायशास्त्रादि २ ब्राह्मणरूपिभगवत्कृतबौद्धशास्त्रम् ३ जैमिनिकृतनिरीश्वरसांख्यम् ४ ॥ तामसपुराणानि यथा । मात्स्यम् १ कौर्म्मम् २ लैङ्गम् ३ शैवम् ४ स्कान्दम् ५ आग्नेयम् ६ ॥ तामसस्मृतयो यथा । गौतमम् १ बार्हस्पत्यम् २ सांवर्त्तम् ३ यमम् ४ शाङ्खम् ५ औशनसम् ६ ॥ * ॥ राजसतामसकर्म्माणि यथा,—
"यत् शैवं दैवतं चैत्रमौपदैवं तथापरम् ।
शाक्तं शैवं गाणपत्यं यागहोमादिकं तथा ॥

पौरोहित्यं याजनञ्च देवलत्वं ग्रामयाजकम् ।
विष्णुसेवापराधञ्च तथा नामापराधकम् ॥
असत्प्रतिग्रहं देवि ! साङ्गत्वमाभिचारिकम् ।
पशुजीवादिहननं पातकञ्चोपपातकम् ॥
अतिपापं महापापमनुपातकमेव च ।
लोभं मोहमहङ्कारं कामं क्रोधं मदन्तथा ॥
एतद्वयदपरं कर्म्म गर्हितञ्च वरानने ।।
राजसं तामसं प्रोक्तं मया च मुनिभिः सदा ॥"
इति पाद्मोत्तरखण्डम् ॥

तामसिकं, त्रि, (तमसा तमोगुणेन निर्वृत्तम् । तमस्+ठञ् ।) तामसम् । तमोगुणकार्य्यम् ॥

तामसी, स्त्री, (तमोऽन्धकारः प्राधान्येन अस्ति अस्याम् । तमस्+अण् । स्त्रियां ङीप् ।) निशा । दुर्गा । इति मेदिनी । से, २५ ॥ जटामांसी । इति राजनिर्घण्टः ॥ (तमोगुणसम्बन्धिनी । यथा, देवीभागवते । ३ । ८ । ५ ।
"सात्त्विकी राजसी चैव तामसी च तथा परा ।
श्रद्धा तु त्रिविधा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥")

तामिस्रं, क्ली, (तमिस्रं अन्धकारततिरस्त्यस्येति । तमिस्र+अण् ।) अन्धकारमयनरकम् । इति मनुः ॥ परवित्तापत्यकलत्रापहर्त्ता यमदूतैर्निपात्यते यत्र । इति श्रीभागवतम् ॥ (अन्धकारमये, त्रि । यथा, महाभारते । ३ । १६२ । १० ।
"तामिस्रं प्रथमं पक्षं वीतशोकभयो वस ॥"
अन्धकारविधायिनि । यथा, रघुः । १५ । २ ।
"लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः ॥")

तामिस्रः, पु, (तमिस्रं तमोगुणोत्थः क्रोधः प्रचुरतयास्त्यस्येति । अण् ।) भोगेच्छाप्रतिघाते क्रोधः । इति श्रीभागवतटीकायां स्वामी ॥ (यथा, भागवते । ३ । १२ । २ ।
"ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् ॥")

ताम्बूलं, क्ली, (तम+"खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणां । ४ । ९० । इति ऊलच् बुगागमो दीर्घश्च ।) पर्णम् । पान इति भाषा । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । क्षारत्वम् । कषायत्वम् । वातकृमिकफदुःखदोषनाशित्वम् । कामाग्निसन्दीपनत्वम् । स्त्रीसम्भाषणभूषणत्वम् । धृतिवक्तृपाटवोत्साहकान्तिकारित्वम् । सुप्तोत्थिते भुक्ते च प्रशस्तत्वम् । दन्तास्यदृग्गदे त्याज्यत्वम् । स्वर्गेऽपि दुर्लभत्वञ्च । इति राजवल्लभः ॥ अपि च । तीक्ष्णत्वम् । पीनसकासनाशित्वम् । रुच्यत्वम् । दाहकारित्वञ्च ॥ * ॥ कृष्णपर्णस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । दाहवक्त्रजाड्यमलधारित्वञ्च ॥ * ॥ शुभ्रपर्णस्य गुणाः । श्लेष्मवातामयनाशित्वम् । पथ्यत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च ॥ * ॥ सद्यस्त्रोटितताम्बूलभक्षणगुणाः । मुखरोगजाड्यदोषवासारोचकरक्तमलविष्टम्भकान्तिकारित्वम् ॥ त्रिरात्रत्रोटितभूयोजलयोजितताम्बूलगुणाः । उत्तमत्वम् । रुचिबलकारित्वम् । त्रिदोषार्त्तिनाशित्वञ्च ॥ * ॥
"शिरापर्णन्तु शैथिल्यं कुर्य्यात्तस्मान्न चाहरेत् ।
शीर्णं त्वग्दोषदन्तस्य भक्षिते तु सितासिते ॥
अनिधाय मुखे पर्णं पूगं खादयते नरः ।
मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम् ॥"
इति राजनिर्घण्टः ॥ * ॥
"पर्णमूले वसेद्व्याधिः पर्णाग्रे पापसञ्चयः ।
चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी ॥
नाग्रमग्रे विषं मूले मध्येऽलक्ष्मीर्व्यवस्थिता ।
तस्मादग्रञ्च मूलञ्च मध्यं पर्णस्य वर्ज्जयेत् ॥
चूर्णाधिकं हरति गन्धमथाधिपूगं
रागं तथाधिकदलञ्च सुगन्धिकारि ।
ताम्बूलमुत्तममिदं रचनाग्रभिन्न-
पर्णं निशास्वधिकखण्डितपर्णमह्नि ॥
ताम्बूलं न हितं प्रोक्तं शरीरे रूक्षदुर्ब्बले ।
ज्वरास्रशोषपित्तास्रमदमूर्च्छादिरोगिषु ॥
ताम्बूलात्युपयोगात् स्याच्छोषः पित्तानिलास्रता ।
देहदृक्केशदन्ताग्निश्रोत्रवर्णबलक्षयः ॥"
इति राजवल्लभः ॥ * ॥
"विना पर्णं मुखे दत्त्वा गुवाकं भक्षयेद्यदि ।
तावद्भवति चण्डालो यावद्गङ्गां न गच्छति ॥"
इति कर्म्मलोचनम् ॥ * ॥
"ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
तपस्विनाञ्च विप्रेन्द्र । गोमांससदृशं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ * ॥
अस्य नामानि गुणाश्च । यथा, भावप्रकाशे ।
"ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ।
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ॥
वश्यं तिक्तकटुक्षारं रक्तपित्तकरं लघु ।
बल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ॥"
क्रमुकम् । इति मेदिनी । ले, ६७ ॥

ताम्बूलकरङ्कः, पुं, (ताम्बूलस्य ताम्बूलरक्षणाय वा करङ्कः ।) ताम्बूलपात्रम् । पानेर बाटा इति भाषा ॥ तत्पर्य्यायः । स्थगी २ । इति हेमचन्द्रः । ३ । ३८२ ॥

ताम्बूलदः, त्रि, (ताम्बूलं ददातीति । दा+कः ।) ताम्बूलदाता । तत्पर्य्यायः । वागुलिकः २ । इति त्रिकाण्डशेषः ॥

ताम्बूलपत्रः, पु, (ताम्बूलस्य पत्रमिव पत्रमस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (ताम्बूलपर्णे, क्ली । यथा, सुश्रुते । १ । ४६ ।
"ताम्बूलपत्रं तीक्ष्णोष्णं कटुपित्तप्रकोपनम् ॥")

ताम्बूलरागः, पु, (ताम्बूलस्य चर्व्वितताम्बूलस्य राग इव रागोऽत्र ।) मसूरः । इति हारावली । १३३ ॥ ताम्बूलस्य रङ्गश्च ॥

ताम्बूलवल्लिका, स्त्री, (ताम्बूलस्य वल्ली ततः स्वार्थे कन् टापि पूर्व्वह्रस्वश्च ।) ताम्बूली । इति शब्दरत्नावली ॥

ताम्बूलवल्ली, स्त्री, (ताम्बूलस्य वल्ली ।) ताम्बूललता । पानेर गाछ । इति भाषा ॥ तत्पर्य्यायः । ताम्बूली २ नागवल्ली ३ । इत्यमरः । २ । ४ । १२० ॥ पर्णलता ४ सप्तशिरा ५ सर्पलता ६ फणिवल्ली ७ भुजगलता ८ भक्ष्यपत्रा ९ । इति राजनिर्घण्टः ॥ ताम्बूलवल्लिका १० पर्णवल्ली ११ ताम्बूलिः १२ । इति शब्दरत्नावली ॥ नागिनी १३ नागवल्लरी १४ । इति भावप्रकाशः ॥

ताम्बूली, स्त्री, (ताम्बूल+गौरादित्वात् संज्ञायां वा ङीष् ।) ताम्बूलवल्ली । इत्यमरः । २ । ४ । १२० ॥ (यथा, कथासरित्सागरे । ९ । ८१ ।
"ताम्बूलीश्च महाम्लानिमालातिलकयुक्तिभिः ॥")

ताम्रं, क्ली, (तम्यते आकाङ्क्ष्यते इति । तमु काङ्क्षायाम्+"अमितम्योर्दीर्घश्च ।" उणां । २ । १६ । इति रक् उपधाया दीर्घश्च ।) तैजसधातुविशेषः । तामा इति ताँबा इति च भाषा ॥ तत्पर्य्यायः । ताम्रकम् २ शुल्बम् ३ म्लेच्छमुखम् ४ द्व्यष्टम् ५ वरिष्ठम् ६ उडुम्बरम् ७ । इत्यमरः । २ । ९ । ९७ ॥ द्विष्टम् ८ उदुम्बरम् ९ औदुम्बरम् १० उदुम्बरम् ११ औडुम्बरम् १२ । इति तट्टीका ॥ तपनेष्टम् १३ अम्बकम् १४ अरविन्दम् १५ रविलोहम् १६ रविप्रियम् १७ रक्तम् १८ नैपालिकम् १९ रक्तधातु २० मुनिपित्तलम् २१ अर्कम् २२ सूर्य्याङ्गम् २३ लोहितायसम् २४ । इति शब्दरत्नावली ॥ सुपक्वस्य तस्य गुणाः । मधुरत्वम् । कषायत्वम् । तिक्तत्वम् । विपाके कटुत्वम् । शीतलत्वम् । कफपित्तविबन्धशूलपाण्डूदरगुल्मनाशित्वञ्च । इति राजनिर्घण्टः ॥ अम्लत्वम् । सारकत्वम् । रोपणत्वम् । लघुत्वम् । लेखनत्वम् । अर्शोज्वरकुष्ठकासश्वासक्षयपीनसाम्लपित्तशोथकृमिनाशित्वम् । अल्पबृंहणत्वञ्च । इति भावप्रकाशः ॥ परिणामशूलप्लीहवायुामशूलवह्नुरोगनाशित्वम् । शुद्धिकारित्वम् । बलायुस्तेजःपुष्टितुष्टिकारित्वं नित्यसेवने वलीपलितनाशित्वञ्च ॥ * ॥ मृद्वेष्टितशूरणकन्दगर्भनिहितगोमयाग्निभस्मीकृतपश्चात्तद्वारा पञ्चपुटदत्तताम्रस्य गुणाः । वान्तिभ्रान्तिशूलाग्निमान्द्याम्लपित्तनाशित्वम् । मलकारित्वञ्च ॥ * ॥ अशोधितताम्रदोषाः । आयुःशुक्रबलनाशित्वम् । रोगवृद्धिच्छर्द्दिमूर्च्छाभ्रमक्लेदनानारोगकुष्ठशूलविदाहखेदारुचिचित्तसन्तापकारित्वम् । विषतुल्यत्वञ्च । इति सुखबोधः ॥ * ॥ तस्योत्पत्तिर्यथा,—
"शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले ।
तस्मात् ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥"
तस्य लक्षणं यथा,—
"जवाकुसुमसङ्काशं स्निग्धं मृदु घनं क्षमम् ।
लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥
कृष्णरूक्षमतिस्तब्धं श्वेतञ्चापि घनासहम् ।
लोहनागयुतञ्चेति शुल्बं दुष्टं प्रकीर्त्तितम् ॥"
तस्य शोधनविधिर्यथा,—
"पत्तलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं ताम्रस्य पत्राणां विशुद्धिः संप्रजायते ॥"
अथ तस्य मारणविधिर्यथा,—
"सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः

वासरत्रयमम्लेन ततः स्थाल्यां विनिःक्षिपेत् ॥
पादांशं सूतकं दत्त्वा याममम्लेन मर्द्दयेत् ।
तत उद्धृत्य पत्राणि लेपयेद्द्विगुणेन च ।
गन्धकेनाम्लघृष्टेन तस्य कुर्य्याच्च गोलकम् ॥
ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं सपुनर्नवाम् ।
तत्कल्केन बहिर्गोलं लेपयेद्‌ब्रह्मुलोन्मितम् ॥
धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत् ।
वालुकाभिः प्रपूर्य्याथ विभूतिलवणाम्बुभिः ॥
दत्त्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत् ।
क्रमवृद्ध्याग्निना सम्यक् यावद्यामचतुष्टयम् ॥
स्वाङ्गशीतं समुद्धृत्य मर्द्दयेच्छूरणद्रवैः ।
यामैकं गोलकं तच्च निःक्षिपेच्छूरणोदरे ॥
मृदा लेपस्तु कर्त्तव्यः सर्व्वतोऽङ्गुष्ठमात्रकः ।
पाच्यं गजपुटे क्षिप्रं मृतं भवति निश्चितम् ॥
वमनञ्च विरेकञ्च भ्रमं क्लममथारुचिम् ।
विदाहं स्वेदमुत्क्लेदं न करोति कदाचन ॥”
इति भावप्रकाशः ॥ * ॥

शुल्वनिभः । अरुणवर्णः । इति हेमचन्द्रः शब्दरत्नावली च ॥ तद्वति, त्रि ॥
(“न विषं विषमित्याहुस्ताम्रञ्च विषमुच्यते ।
एकदोषो विषे ताम्रे त्वष्टौ दोषाः प्रकीर्त्तिताः ॥
भ्रमो मूर्च्छा विदाहश्च उत्क्लेदशोषवान्तयः ।
अरुचिश्चित्तसन्ताप एते दोषा विषोपमाः ॥
तस्माद्विशुद्धं ताम्रं हि ग्राह्यं रोगोपशान्तये ।
पटुना रविदुग्धेन ताम्रपत्राणि लेपयेत् ॥
अग्नौ सन्ताप्य निर्गुण्डीरसे सिञ्चेत् पुनः पुनः ॥
मतान्तरम् ।
गोमूत्रेण पचेद्याम ताम्रपत्रं दृढाग्निना ।
शुध्यते नात्र सन्देहो मारणञ्चात्र कथ्यते ॥
इति ताम्रशोधनम् ॥ * ॥

अथ ताम्रमारणम् ।
सूतमेकं द्विधा गन्धं याम मर्द्दन्तु कन्यया ।
द्वयोस्तुल्य ताम्रपत्र लिप्त्वा स्थाल्यां निधापयेत् ।
सम्यक् चूरणे साद्धं पार्श्वे भस्म निधापयेत् ।
चतुर्याम पचेच्चुल्ल्यां पात्रपृष्ठे सगोमये ॥
जल पुनः पुनर्द्देय स्वाङ्गशीत विमर्द्दयेत् ।
म्रियते नात्र सन्देहः सर्व्वरोगेषु योजयेत् ॥
मतान्तरम् ।
जम्बुराम्भसा सैन्धवसयुतेन
सगन्धक स्थापय शुल्वपत्रम् ।
पक्वायमान पुटयेत् सुयुक्त्या
वालाविक यावदुपैति शान्तिम् ॥
अन्यतरमतम् ।
शुद्धं ताम्रदल विमर्द्द्य पटुना क्षारेण जम्बीरजे
नीरे चैतसमिद सुधार्कपयसा लिप्त धमेत् सप्तधा ।
निर्गुण्ड्याम्बुहिम रसेन्द्रकलितं दुग्धाब्ध्यगन्धेन तत्
तुल्येनाथ मृतं भवेत् सुपठितं पञ्चामृतेन त्रिधा ॥
गुणा यथा,—
वान्तिभ्रान्तिविवर्ज्जितं चयरुणाकुष्ठानि
पाण्ड्वामयं
शूलं मेहगुदाङ्कुरानिलगदाशुक्लानुपानैर्ज्जयेत् ।
गुञ्जामात्रमिदं ततो द्विगुणितं तच्छुद्धकायेन चेत्
युक्तः स्थौल्यजरापमृत्युशमनं पथ्याशिना वत्स-
रात् ॥
ताम्रसुधां गरहरं यकृत्प्लीहोदरामहम् ।
क्रिमिशूलामपातघ्नं ग्रहण्यर्शोऽम्लपित्तजित् ॥”
इति ताम्रमारणम् ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ॥)

ताम्रः, पुं, (ताम्रस्येव वर्णोऽस्त्यस्य । अच् । ताम्रवर्णत्वादस्य तथात्वम् ।) कुष्ठरोगविशेषः । इति कर्म्मविपाकः ॥ (द्वीपभेदः । यथा, महाभारते । २ । ३१ । ६५ ।
“द्वीप ताम्राह्वयञ्चैव पर्व्वतं रामकं तथा ॥”)

ताम्रकं, क्ली, (ताम्र+स्वार्थे संज्ञायां वा कन् ।) ताम्रम् । इत्यमरः । २ । ९ । ९७ ॥

ताम्रकर्णी, स्त्री, (ताम्रवर्णौ कर्णौ यस्याः स्त्रियां ङीप् ।) अञ्जना नाम पश्चिमदिग्हस्ति-पत्नी । इत्यमरः । १ । ३ । ५ ॥

ताम्रकारः, पुं, (ताम्रं करोति ताम्रधातुभि. पात्रादिकं निर्म्मातीति । कृ+अण् ।) वर्णसङ्करजातिविशेषः । तत्पर्य्यायः । ताम्रिकः २ शौल्विकः ३ ताम्रकुट्टकः ४ । इति शब्दरत्नावली ॥ अस्योत्पत्तिः कंसकारशब्दे द्रष्टव्या ॥

ताम्रकुट्टकः, पुं, (ताम्रं कुट्टयतीति । कुट्ट+ण्वुल् ।) ताम्रकारः । इत्यमरः । २ । १० । ८ ॥

ताम्रकूटः, पुं क्ली, (ताम्रनिर्म्मितं कूटमिव ताम्रस्य कूटमिव वा ।) क्षुपविशेषः । तामाक् इति भाषा । यथा,—
“सम्बिदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम् ।
अहिफेनं खर्ज्जुरस. तारिका तरिता तथा ॥
इत्यष्टौ सिद्धिद्रव्याणि यथा सूर्य्याष्टकं प्रिये ॥”
इति कुलार्णवतन्त्रम् ॥

ताम्रक्रिमिः, पुं, (ताम्रवर्णः क्रिमिः कीटः ।) इन्द्रगोपकीटः । इति भूरिप्रयोग हारावली च ॥

ताम्रगर्भं, क्ली, (ताम्रं गर्भं उत्पत्तिस्थानमस्य ।) तुत्थम् । इति राजनिर्घण्टः ॥

ताम्रचूडः, पुं स्त्री, (ताम्रा ताम्रवर्णा चूडा अस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (यथा, महाभारते । ३ । २२४ । २४ ।
“अपरेणाग्निदायादस्ताम्रचूडं भुजेन सः ।
महाकायमुपश्लिष्टं कुक्कुट बलिनां वरम् ॥”
यथा चोत्तरतन्त्रे ३८ अध्याये सुश्रुतेनोक्तम् ।
“ताम्रचूडस्य मांसेन पिवेद्वा मद्यमुत्तमम् ॥”)
कुक्कुरद्रुः । इति राजनिर्घण्टः ॥

ताम्रदुग्धा, स्त्री, (ताम्रं रक्तवर्णं दुग्धं क्षीरं रसोऽस्याः ।) गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

ताम्रपट्टं, क्ली, (ताम्रेण निर्म्मितं पट्टं पत्रम् ।) ताम्रनिर्म्मितलेखनपत्रम् । यथा,—
“दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यन्तु कारयेत् ।
आगामिभद्रनृपति. परिज्ञानाय पार्थिव. ॥
पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम् ॥”
इति मिताक्षरा ॥

ताम्रपत्रः, पुं, (ताम्रं ताम्रवर्णं पत्रमस्य ।) जीवशाकः । इति राजनिर्घण्टः ॥ ताम्रनिर्म्मितपत्रे, क्ली ॥

ताम्रपर्णी, स्त्री, दीर्घिकाभेदः । इति भूरिप्रयोगः ॥ नदीविशेषः । इति पुराणम् ॥ (यथा, रघुः । ४ । ५० ।
“ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ॥”)

ताम्रपल्लवः, पुं, (ताम्रवर्णं पल्लवमस्य ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
“अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

ताम्रपाकी, [न्] पुं, (पच्यते इति । पच+घञ् कुत्वञ्च । ताम्रः ताम्रवर्णः पाकः परिणतिरस्त्यस्येति । इनि. ।) गर्द्दभाण्डवृक्षः । इति रत्नमाला ॥

ताम्रपादी, स्त्री, (ताम्रौ रक्तवर्णौ पादौ मूलदेशोऽस्याः ।) हंसपदी । इति राजनिर्घण्टः ॥ (हंसपदीशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

ताम्रपुष्पः, पुं, (ताम्रवर्णं पुष्पमस्य ।) रक्तकाञ्चनः । इति जटाधरः ॥ (अस्य पर्य्याया यथा भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
“कोविदारश्चमरिक. कुद्दालो युगपत्रकः ।
कुण्डली ताम्रपुष्पश्च सम्लकः स्वल्पकेशरी ॥”)
भूमिचम्पकः । इति शब्दचन्द्रिका ॥

ताम्रपुष्पिका, स्त्री, (ताम्रवर्णं पुष्पमस्याः । कप् टापि अत इत्वञ्च ।) रक्तत्रिवृत् । इति राजनिर्घण्टः ॥ (रक्तत्रिवृत्शब्देऽस्या गुणादिकमस्या विवरणम् ॥)

ताम्रपुष्पी, स्त्री, (ताम्रवर्णं पुष्पमस्या इति । ङीष् ।) धातकी । (अस्याः पर्य्याया यथा,—
“धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
पाटलावृक्षः । इति राजनिर्घण्टः ॥ (पर्य्याया यथा,—
“पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

ताम्रफलः, पुं, (ताम्रं ताम्रवर्णं फलमस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

ताम्रमूला, स्त्री, (ताम्रं ताम्रवर्णं मूलमस्याः ।) दुरालभा । (यथा, भावप्रकाशे । ज्वराधिकारे श्वासचिकित्सायाम् ।
“सिंही व्याघ्री ताम्रपर्णी पटोली ॥”)
लज्जालुः । इति राजनिर्घण्टः ॥ कच्छुरा । इति रत्नमाला ॥ खिराइ इति भाषा ॥

ताम्रवर्णः, पुं, (ताम्रस्येव वर्णोऽस्य ।) मणिमाहात्म्यम् । इति राजनिर्घण्टः ॥ (भारतवर्षीयद्वीपभेदः । यथा, मात्स्ये । ११३ । ८ ।

"भारतस्यास्य वर्षस्य नव भेदान् निबोध मे ।
इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ॥")

ताम्रवर्णा, स्त्री, (ताम्रस्येव वर्णोऽस्या इति । टाप् ।) ओड्रपुष्पवृक्षः । इति शब्दचन्द्रिका ॥

ताम्रवल्ली, स्त्री, (ताम्रवर्णा वल्ली । मध्यपदलोपी समासः ।) मञ्जिष्ठा । इति रत्नमाला ॥ चित्रकूटदेशप्रसिद्धा लता । तत्पर्य्यायः । ताम्रा २ ताली ३ तमाली ४ तमालिका ५ सूक्ष्मवल्ली ६ सुलोमा ७ शोधनी ८ तालिका ९ । अस्या गुणाः । कषायत्वम् । कफदोषमुखकण्ठोत्थरोगनाशित्वम् । श्लेष्मशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

ताम्रवीजः, पुं, (ताम्रवर्णं वीजमस्य ।) कुलत्थः । इति राजनिर्घण्टः ॥

ताम्रवृक्षः, पुं, (ताम्रमिव रक्तवर्णो वृक्षः ।) रक्तचन्दनम् । कुलत्थः । इति रत्नमाला ॥

ताम्रवृन्तः, पुं, (ताम्रमिव रक्तवर्णं वृन्तमस्य ।) कुलत्थः । इति त्रिकाण्डशेषः ॥

ताम्रवृन्ता, स्त्री, (ताम्रमिव रक्तवर्णं वृन्तमस्याः इति टाप् ।) कुलत्थिका । इति हेमचन्द्रः । ४।२४१ ॥

ताम्रशिखी, [न्] पुं स्त्री, (ताम्रवर्णा शिखा चूडा अस्त्यस्य । इति इनिः ।) कुक्कुटः । इति जटाधरः ॥

ताम्रसारं, क्ली, (ताम्रवत् रक्तवर्णः सारोऽस्य ।) रक्तचन्दनम् । इति रत्नमाला ॥

ताम्रसारकं, क्ली, (ताम्रसार + स्वार्थे कन् ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥

ताम्रसारकः, पुं, (ताम्रवत् रक्तवर्णः सारोऽस्येति कप् ।) रक्तखदिरः । इति राजनिर्घण्टः ॥

ताम्रा, स्त्री, (ताम्र + टाप् ।) सैंहली । इति राजनिर्घण्टः ॥ (प्रजापतेः कश्यपस्य पत्नीनामन्यतमा । यथा, मात्स्ये । ६ । २ ।
"सुरभिर्विनता तद्वत्ताम्रा क्रोधवशा इरा ॥"
सप्तत्वगन्तर्गतचतुर्थत्वग्विशेषः । यथा,—
"चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना ॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

ताम्राकुः, पुं, उपद्वीपभेदः । इति शब्दमाला ॥

ताम्राक्षः, पुं, (ताम्रे रक्ताभे अक्षिणी यस्य । अक्षिन् + समासे षच् ।) कोकिलः । इति त्रिकाण्डशेषः ॥ (ताम्रनयने, त्रि । यथा, भागवते । १ । ७ । ३३ ।
"तत आसाद्य तरसा दारुणं गौतमीसुतम् ।
बबन्धामर्षताम्राक्षः पशुं रशनया यथा ॥")

ताम्राभं, क्ली, (ताम्रमिवाभातीति । आ + भा + कः । ताम्रवदाभा अस्येति वा रक्तवर्णत्वात् तथात्वम् ।) रक्तचन्दनम् । इति शब्दचन्द्रिका ॥ (पर्व्वतविशेषः । यथा, ब्रह्माण्डे ४७ अध्याये ।
"चषका निषधं प्राप्ता ताम्राभ निषधादपि ॥")

ताम्रार्द्धं, क्ली, (ताम्रस्यार्द्धं अर्द्धभागतया उत्पत्तिकारणमस्य ताम्रस्यार्द्धं उत्पादकोऽस्य इति वा ।) कांस्यम् । इति त्रिकाण्डशेषः ॥

ताम्रिकः, पुं, (ताम्रं तत्पात्रादिनिर्म्माणं कार्य्यत्वेनास्त्यस्य । ताम्र + ठन् ।) कंसकारः । इति शब्दरत्नावली ॥ ताम्रनिर्म्मिते, त्रि । यथा, कार्षिके ताम्रिके पणः । इत्यमरः । २ । ९ । ८८ ॥ (यथा, मनुः । ८ । १३६ ।
"कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥")

ताम्रिका, स्त्री, (ताम्रवद्वर्णाभा अस्त्यस्या इति ठन् ततः टाप् ।) गुञ्जा । इति राजनिर्घण्टः ॥ मानरन्ध्रावाद्यम् । इति भूरिप्रयोगः ॥

ताम्री, स्त्री, (ताम्रस्य विकारः । इति अण् ततो ङीप् ।) वाद्यविशेषः । तत्पर्य्यायः । मानरन्ध्रा २ विकारिका ३ । इति त्रिकाण्डशेषः ॥

ताय, ऋ ङ पालने । सन्ततौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सकं-सेट् ।) सन्ततिर्विस्तारः । ऋ, अततायत् । ङ, तायते विद्यां सुधीः । इति दुर्गादासः ॥

तायिकः, पुं, (ताये पालने साधुरिति ठण् ।) तर्ज्जिकाभिधदेशः । इति हेमचन्द्रः । ४।२४ ॥

तारं, क्ली, (तार्य्यते विस्तार्य्यते इति । तॄ + णिच् + घञ् ।) रूप्यम् । इति मेदिनी । रे, ४३ ॥
("दग्धोत्तीर्णं सुशीतं यन्निर्म्मलं कुन्दसन्निभम् ।
गुरुस्निग्धकुमारञ्च तारमुत्तममिष्यते ॥"
अशुद्धस्याप्यस्य गुणा यथा,—
"आयुः शुक्रं वलं हन्ति रोगसङ्घं करोति च ।
अशुद्धञ्चाप्यतस्तारं शुद्धमार्य्यमतो बुधैः ॥"
अस्य मारणं यथा,—
"कण्टवेध्यं तारपत्रं दिग्धाद्द्विगुणहिङ्गुलम् ।
पातयन्ते रसो याम्यो रजतं भस्ममुच्यते ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) मुक्ता । इति राजनिर्घण्टः ॥ (यथा, रसेन्द्रसारसंग्रहे त्रैलोक्यचिन्तामणिवटिकायाम् ।
"हारं सुवर्णं भस्मतञ्च तारम् ॥"
"तारं मौक्तिकम् । तारशब्देनात्र मौक्तिकमेवोच्यते न तु रजतम् ।" इति तट्टीका ॥
गौणसिद्धिभेदः । यथा, "विहन्यमानस्य दुःखस्य त्रित्वात् तद्विघातास्त्रय इति इमा मुख्यास्तिस्रः सिद्धयस्तदुपायतया इतरा गौण्यः पञ्चसिद्धयस्तत्रापि हेतुमत्त्या तिस्रः हेतुतया पञ्च व्यवस्थिताः । तास्वाद्या अध्ययनादिलक्षणाः सिद्धयो हेतवः मुख्यास्तु हेतुमत्यः । विधिवद्गुरुमुखादध्यात्मविद्यानां अक्षरस्वरूपग्रहणमध्ययनं प्रथमसिद्धिस्तारमुच्यते ॥" इति तत्त्वकौमुदी ॥ अक्षिमध्यम् । इति मेदिनी । रे, ४३ ॥)

तारः, पुं, वानरविशेषः । मुक्ताविशुद्धिः । शुद्धमौक्तिकः । इति मेदिनी । रे, ४३ ॥ (तार्य्यते उत्तार्य्यते भवसागरादनेन । तॄ + णिच् + घञ् । यद्वा तारयति स्वोपासकजपादिभिर्लोकान् । तॄ + णिच् + अच् । एतन्निरुक्तिर्यथा, काशीखण्डे । ७३ अध्याये ।
"तारयेद् यद् भवाम्भोधेः स्वजपासक्तमानसम् ।
ततस्तार इति ख्यातो यस्तं ब्रह्माप्यलोकयत् ॥")
प्रणवः । इति तन्त्रम् ॥ (यथा, महागणपतिस्तोत्रे । २ ।
"तारश्रीपरशक्तिकामवसुधारूपानुगं यं विदुस्तस्मै स्तात् प्रणतिर्गणाधिपतये यो रागिणाभ्यर्थ्यते ॥")
तरणम् । इति विश्वः ॥ कूर्च्चवीजम् । इति तन्त्रसारम् ॥ (नक्षत्रम् । इति मेदिनी । रे, ४३ ॥ अत्युच्चशब्दः । इति हेमचन्द्रः । ६।२८ ॥ यथा, हेमचन्द्रटीकायाम् ।
"नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनिः ।
स एव कण्ठमध्यः स्यात् तारः शिरसि गीयते ॥"
विष्णुः । यथा, महाभारते । १३।१४९।११७ ।
"अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥"
राक्षसविशेषः । यथा महाभारते ।३।२८४।९ ।
"युयुधे लक्ष्मणश्चापि तथैवेन्द्रजिता सह ।
विरूपाक्षेण सुग्रीवस्तारेण च निखर्व्वटः ॥"
दैत्यविशेषः । यथा, हरिवंशे । ४३ । ९ ।
"तारस्तु क्रोशविस्तारमायसं वायसध्वजम् ॥")
महादेवः ।
"काश्यां विश्वेश्वरोऽहं गिरिपतितनयासंयुतो वामभागे
मुण्डादण्डेन दण्डे त्रिपथगतटिनीतीरशुद्धाम्बुभागे ।
मायावीजञ्च कर्णे सुरमुनिसहितो ध्यानयुक्तं वदामि
प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते तारनाम ॥"
इति शब्दार्थचिन्तामणिः ॥)

तारः, त्रि, अत्युच्चशब्दविशिष्टः । इति मेदिनी । रे, ४४ ॥ स्फुरितकिरणः । निर्म्मलः । इति धरणिः ॥ (तारं मुक्तास्त्यत्रेति अच् । मुक्ताविशिष्टः । यथा, अमरुशतके । २८ ।
"उरसि निहितस्तारो हारः कृता जघने घने ॥")

तारकं, क्ली, (तारेण कनीनिकया कायतीति । कै + कः ।) चक्षुः । इति मेदिनी । के, १०० ॥

तारकं, क्ली, स्त्री, (तारमेव । स्वार्थे कन् ।) चक्षुस्तारा । नक्षत्रम् । इति मेदिनी । के, १०० ॥

तारकः, पुं, (तारयति दैत्यानिति । तॄ + णिच् + ण्वुल् ।) द्वादशमन्वन्तरीयेन्द्रशत्रुरसुरविशेषः । यथा,—
"मनोस्तु दक्षपुत्रस्य द्वादशस्यात्मजान् शृणु ।
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ॥
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान् ।
मित्रबाहुः सुवर्चाश्च दक्षपुत्रमनोः सुताः ॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः ।
तपोधृतिर्द्युतिश्चान्य ऋषयश्च तपोधनाः ॥
सुधर्म्माणः सुतपसो हरिता रोहितास्तथा ।
सुरारयो गणाः पञ्च प्रत्येकं दशको गणः ॥

अतधामा च तस्येन्द्रस्तारको नाम तद्रिपुः।
हरिर्नपुंसको भूत्वा घातयिष्यति शङ्कर!॥
इति गारुडे ८१ अध्याये॥
(असुरविशेषः। कार्त्तिकेयः एनं निहतवान्। यथा, मत्स्यपुराणे। १४५। ५—११।
"वज्राङ्गो नाम दैत्योऽभूत्तस्य पुत्त्रस्तु तारकः।
सुरानुद्वासयामास पुरेभ्यः स महाबलः॥
ततस्ते ब्रह्मणोऽभ्यासं जग्मुर्भयनिपीड़िताः।
भीतांश्च त्रिदशान् दृष्ट्वा ब्रह्मा तेषामुवाच ह॥
सन्त्यजध्वं भयं देवाः! शङ्करस्यात्मजः शिशुः।
तुहिनाचलदौहित्रस्तं हनिष्यति दानवम्॥
ततः काले तु कस्मिंश्चित् दृष्ट्वा वै शैलजां शिवः।
स्वरेतो वह्निवदने व्यसृजत्कारणान्तरे॥
तत्प्राप्तं वह्निवदने रेतो देवानतर्पयत्।
विदार्य्य जठराण्येषां व्यजीर्य्यं निर्गतं मुने!॥
पतितं तत् सरिद्वरे ततस्तु शरकानने।
तस्मात्तु स समुद्भूतो गुहो दिनकरप्रभः।
स सप्तदिवसो बालो निजघ्ने तारकासुरम्॥"
अस्य विशेषविवरणन्तु तत्रैव। १४६ अध्यायमारभ्य १५६ अध्यायेषु द्रष्टव्यम्॥ तारयतीति। तॄ + णिच् + ण्वुल्।) कर्णधारः। इति मेदिनी। के, ६६॥ भेलकः। इति शब्दरत्नावली॥ (तरणोपायः। यथा, हठयोगप्रदीपिकायाम्।४।४०।
"केचिदागमजालेन केचिन्निगमसङ्कुलैः।
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम्॥"
"तारयतीति तारकस्तं तारकं तरणोपायं नैव जानन्ति।" इति तट्टीका॥ महादेवः। यथा, महाभारते। १२। २८४। ३५।
"गर्भमांसशृगालाय तारकाय तराय च।
नमो यज्ञाय यजिने हुताय प्रहुताय च॥")
त्रातरि, त्रि। इति मेदिनी। के, १००॥ (यथा, प्रबोधचन्द्रोदये। २। १३।
"कथयति भगवान् इहान्तकाले
भवभयकातरतारक प्रबोधम्॥"
स्त्रियां टापि अत इत्वम्। यथा, गोः रामायणे। २। ६७। २३।
"नारीणां तारिका काश्चित् काश्चित् परमवाजिनाम्॥")
तारकजित्, पुं, (तारकं तारकासुरं जयतीति। जि + क्विप् तुगागमश्च।) कार्त्तिकेयः। इत्यमरः। १। १। ४२॥ (एतद्विवरणं मातृशब्दे १५६ अध्याये द्रष्टव्यम्॥)
तारकब्रह्म, क्ली, (तारकं संसारसागरपारकारकं ब्रह्म।) षडक्षरमन्त्रविशेषः। यथा,—
"षडक्षरं महामन्त्रं तारकं ब्रह्म उच्यते।
ये भजन्ति च मां भक्त्या तेषां मुक्तिर्न संशयः॥
रामाय नम इत्येवमुच्चार्य्यं मन्त्रमुत्तमम्।
सर्व्वदुःखहरश्चैतत् पापिनामपि मुक्तिदम्॥
इमं मन्त्रं जपन्नित्यममलश्च भविष्यसि।
भस्मास्थिधारणाद्यस्तु सम्भूतस्त्वामुपैष्यसि॥
मङ्गलं तद्भूतं सर्व्वं मन्मन्त्रोच्चारणात् शुभात्।
त्वमप्यनेन श्रीरामतारकाख्येन मन्त्रव.॥
भूत्वा काश्यां विश्वनाथो महाग्रामरिपालकः।
कृत्वा मुक्तान् जीवमात्रान् मातृपादीन् परं पदम्॥
अद्यतत् किन्ते भयं मन्त्रप्रभावात् प्राप्स्यसि।
इति सन्दिश्य मां विष्णुर्विससर्ज्ज मरुद्गणान्॥"
इति पाद्मोत्तरखण्डे श्रीशिवं प्रति श्रीविष्णुवाक्यम्॥ अपि च।
"सुमहर्षेर्मुनिकर्षांस्तु अर्द्धोदकनिवासिनः।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम्॥
ओँ श्रीरामरामरामेत्येतत्तारकमुच्यते।
अतस्त्वं जानकीनाथ! परं ब्रह्म विनिश्चितम्॥"
इति पाद्मोत्तरखण्डे श्रीरामं प्रति श्रीशिववाक्यम्॥
तारका, स्त्री, क्ली, (तरति तारयति वा। तॄ + णिच् + ण्वुल्। टाप्। "तारका ज्योतिषि।" ७।३।४५। इत्यस्य वार्त्तिकोक्त्या न अत इत्वम्।) नक्षत्रम्। (यथा, मार्कण्डेये।१५।७१।
"अप्-बिन्दवो यथाम्भोधौ यथा वा दिवि तारकाः।
यथा वा वर्षतो धारा गङ्गायां सिकता यथा॥")
कनीनिका। इति मेदिनी। के, १००॥ (यथा, रघुः। ११। ६९।
"राघवोऽपदग्धनार्चिषं ततः
सन्दधे दृशमुदग्रतारकाम्॥")
इन्द्रवारुणी स्त्री। इति राजनिर्घण्टः॥
तारकारिः, पुं, (तारकस्य तारकासुरस्य अरिः।) कार्त्तिकेयः। इति हेमचन्द्रः। २। १२३॥
तारकिणी, स्त्री, (तारकाः सन्त्यत्र। तारका + इनि, ङीप्।) रात्रिः। इति राजनिर्घण्टः॥
तारकित, त्रि, (तारकाः सञ्जाता अस्य। तारका + "तदस्य सञ्जातं तारकादिभ्य इतच्।" ५।२।३६। इति इतच्।) तारकायुक्तम्। यथा,—
"सितिनिशा इह्यदि स्फुटदुतपतत्
कथगणाधिपतारकिताम्बर॥"
इति नैषधम्॥
तारणः, पुं, (तारयतीति। तॄ + णिच् + ल्युः।) भेलकः। इति शब्दरत्नावली॥ (संसारसागरात् तारयतीति। विष्णुः। यथा, महाभारते।१३। १४९। ५०।
"अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः॥"
महादेवः। यथा, तत्रैव। १३। १७। ११७।
"तोरणस्तारणो वातः परिधीपतिखेचरः॥"
क्ली, भविष्यत्सरेषु षष्टाद्यवत्सरः। यथा, ज्योतिषतत्त्वे।
"अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति सामान्यं तारणे सुरवन्दिते!॥"
तथाच बृहत्संहितायाम्। ८। ३६।
"तारणं तदनु भूरिवारिदं
शस्यवृद्धिमुदितञ्च पार्थिवम्॥"
तॄ + णिच् + भावे ल्युट्। उत्तारणम्। उद्धारणम्। यथा, महाभारते। ४। ४। ५३।
"तारणायास्य दुःखस्य प्रस्थानाय जयाय च॥")
तारणकारयितरि,-त्रि॥
तारणिः, स्त्री, (तारयतीति। तॄ + णिच् + अनिः।)-नौका। इति हारावली। ५६॥
तारतण्डुलः, पुं, (तारं रूप्यमिव शुभ्रस्तण्डुलो यस्य।) श्वेतयावनालः। इति राजनिर्घण्टः॥
तारतम्य, क्ली, तरतमयोर्भावः। (तरतम + ष्यञ्।) न्यूनाधिक्यम्। यथा,—
"निह्नुत निधनमेतयोर्द्वयो-
स्तारतम्यविधिमुग्धचेतसा।
वोधनाय विधिना विनिर्मिता
रेफ एव जयवैजयन्तिका॥"
इत्युद्भटः॥
तारदी, स्त्री, (तरदी एव। स्वार्थे अण् ततो ङीप्।) तरदीवृक्षः। इति राजनिर्घण्टः॥
तारपुष्पः, पुं, (तारं रूप्यमिव शुभ्रं पुष्पं यस्य।) कुन्दवृक्षः। इति राजनिर्घण्टः॥
तारल्य, त्रि, (तरल एव। स्वार्थे ष्यञ्।) विटः। इति भूरिप्रयोगः॥
तारविमला, स्त्री, (तारं रूप्यमिव विमला।) धातुविशेषः। इति शब्दार्थकल्पतरुः॥
तारशुद्धिकरं, क्ली, (तारस्य रजतस्य शुद्धिं करोतीति। कृ + टः।) सीसकम्। इति राजनिर्घण्टः॥
तारा, स्त्री, पुं, (तारयतीति। तॄ + णिच् + अच्।) नक्षत्रम्। इत्यमरः। १। ३। २१॥ (यथा, महाभारते। १। २११। २६।
"चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः॥")
यथाच कर्म्मलोचने।
"एकतारं नभो दृष्ट्वा सशंयो नारदो मुनिः।
तावद्भवति चाण्डालो यावदन्यां न पश्यति॥"
अक्षिमध्यम्। इति मेदिनी। रे, ४३॥ शेषस्य पर्य्यायः। विम्बिनी २ कनीनिका ३। इति राजनिर्घण्टः॥ तारका ४। इत्यमरः।१।३।२१॥ (यथा, हठयोगप्रदीपिकायाम्। ४। ३६।
"तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद्भ्रुवौ॥")
तारा, स्त्री, (तारयति तापादिति। तॄ + णिच् + अच् + टाप्।) बुद्धदेवताभेदः। बृहस्पतिभार्य्या। इति मेदिनी। रे, ४३॥ (यथा, देवीभागवते। १। ११। ७५।
"ततः कालेन कियता तारासूत सुतं शुभम्॥")
वालिभार्य्या। सा सुषेणवानरकन्या। इति रामायणम्॥ (यथा, महाभारते।३।२७९।१८।
"हेममाली ततो वाली तारां ताराधिपाननाम्।
उवाच वचनं वाग्मी तां वानरपतिः पतिः॥")
मौडा। मुक्ता। इति राजनिर्घण्टः॥
द्वितीया शक्तिः। यथा,—
"लीलया वाक्प्रदा चेति तेन नीलसरस्वती।
तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी॥
उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्त्तिता॥"

अस्या ध्यानं यथा,—
"प्रत्यालीढ़पदार्पिताङ्घ्रिशववद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्तृखर्परभुजा हुङ्कारबीजोद्भवा।
खर्व्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा स्वयम्॥"
अपि च।
"प्रत्यालीढ़पदां घोरां मुण्डमालाविभूषिताम्।
खर्व्वां लम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ॥
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम्।
चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम्॥
खड्गकर्त्तृसमायुक्तसव्येतरभुजद्वयाम्।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम्॥
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम्।
बालार्कमण्डलाकारलोचनत्रयभूषिताम्॥
ज्वलच्चितामध्यगतां घोरदंष्ट्रां करालिनीम्।
सावेशस्मेरवदनां स्त्र्यलङ्कारविभूषिताम्॥
विश्वव्यापकतोयान्तः श्वेतपद्मोपरिस्थिताम्॥"
अस्या दशाक्षरमन्त्रोक्तध्यानं यथा—
"श्यामवर्णां त्रिनयनां द्विभुजां वरपङ्कजे।
दधानां बहुवर्णाभिर्विचित्ररूपाभिरावृताम्॥
शक्तिभिः स्मेरवदनां स्मेरमौक्तिकभूषणाम्।
रत्नपादुकयोर्न्यस्तपादाम्बुजयुगां स्मरेत्॥"
इति तन्त्रसारः॥
(अस्या बीजं यथा, "ह्रीँ स्त्रीँ हुँ फट्॥")

तारापतिः, पुं, (तारायाः पतिः।) शिवः। चन्द्रः। (यथा, राजेन्द्रकर्णपूरे। २७।
"भ्रान्तध्वान्तकलङ्क शङ्करशिखालङ्कार तारापते
राकाकान्त सविभ्रमं भ्रम सदा निःशङ्कमङ्के दिवः॥")
वृहस्पतिः। वाली। सुग्रीवः। इति पुराणम्॥
(यथा, नैषधे। १६। ८।
"भजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नवे दूरं तारापतौ च हतौजसि।
ननु रघुपतेर्भार्य्यां मायामयीमिव रावण-
स्तिमिरचिकुरग्राह रात्रिं हिनस्ति गभस्तिराट्॥")

तारापथः, पुं, (ताराणां नक्षत्राणां पन्थाः। समासे अः।) आकाशः। इति हलायुधः॥
(देशविशेषः। यथा, रघु। १५। ९०।
"अङ्गदं चन्द्रकेतुञ्च लक्ष्मणोऽप्यात्मसम्भवौ।
शासनात् रघुनाथस्य चक्रे तारापथेश्वरौ॥"
"कारापथेश्वरौ।" इति वा पाठः॥)

तारापीड़ः, पुं, (ताराणां नक्षत्राणां आपीड़ो भूषणमिव।) चन्द्रः। इति त्रिकाण्डशेषः॥
(स्वनामख्यातश्चन्द्रापीड़स्य राज्ञो भ्राता। यथा, राजतरङ्गिण्याम्। ४। ४३।
"तारापीड़ोऽपि तनयः क्रमात् तस्यामजायत।"
कादम्बरीकथितनायकविशेषः। यथा, कादम्बर्य्याम्। १०२ पत्रे। "अवतार इव धर्म्मस्य प्रतिनिधिरिव पुरुषोत्तमस्य महिपतप्रणतपीड़ो राजा तारापीड़ोऽभवत्॥")

ताराभूषा, स्त्री, (तारा नक्षत्राणि भूषा भूषणं यस्याः।) रात्रिः। इति राजनिर्घण्टः॥

ताराभ्रः, पुं, (तारो निर्म्मलोऽभ्र इव। शुभ्रवर्ण-त्वादस्य तथात्वम्।) कर्पूरः। इति राजनिर्घण्टः॥ (विवरणमस्य कर्पूरशब्दे ज्ञेयम्॥)

तारामण्डलः, पुं, (ताराणां मुक्तानां मण्डलं यत्र।) ईश्वरगृहविशेषः। इति शब्दरत्नावली॥
(नक्षत्रमण्डले क्ली॥)

तारारिः, पुं, (तारस्य रूप्यस्य अरिः। एतत्-संसर्गेण रूप्यस्य चाकचिक्यादिकं विनश्यतीत्यतोऽस्य तथात्वम्।) विटमाक्षिकः। इति हेमचन्द्रः। ४। १२१॥

तारावती, स्त्री, चन्द्रशेखरराजपत्नी। सा च ककुत्स्थराजेन तत्पत्न्यां मनोन्मथिन्यां जाता। असौ गिरिजांशजा। यथा,—
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः।
भोगवत्याञ्चयायान्तु पुर्य्यां रिपुनिसूदनः॥
सर्व्वलक्षणसम्पन्नो भूपालगुणसंयुतः।
तस्य भार्य्या महाभागा भर्गदेवस्य पुत्त्रिका॥
सा मनोन्मथिनी नाम्ना पूजिता पतिवल्लभा।
तस्याः पुत्त्रशतं जज्ञे देवगर्भसमद्युतम्॥
बलवीर्य्यसमायुक्तं ककुत्स्थनृपसत्तमात्।
पुत्त्री न विद्यते तस्यास्तदर्थं सा गृहान्तरे॥
निभृते स्थण्डिलं कृत्वा चण्डिकां समपूजयत्।
पूज्यमाना महादेवी चण्डिका राजभार्य्यया॥
प्रसन्ना सा त्रिभिर्व्वर्षैस्तां स्वप्ने चाब्रवीदिदम्।
योषिल्लक्षणसंयुक्ता सार्व्वभौमस्य भाविनी॥
नक्षत्रमालया युक्ता पुत्त्री तव भविष्यति।
सापि स्वप्ने वरं प्राप्य मुदिताभून्नृपाङ्गना॥
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह।
सा मनोन्मथिनी देवी प्रवृत्ते ऋतुसङ्गमे॥
गर्भं दधौ महाधत्त्वं चन्द्रिकेवाग्न्यतोत्करम्।
सम्पूर्णे तु ततः प्राप्ते तदा नक्षत्रमालिनीम्॥
सा मनोन्मथिनी देवी सुषुवे तनयां शुभाम्।
तां दृष्ट्वा हारसंयुक्तां शरत्ज्योत्स्नोपमां शुभाम्॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्।
सहजेनाथ हारेण भूषिता या ककुत्स्थजा॥
ववृधे मन्दिरे तस्य वर्षास्विव सुरापगा।
तेनैव हारचिह्नेन तस्यास्तारावतीति वै॥
नामाकरोत् पिता काले यथोक्ते नृपसत्तमः।
कालक्रमेण सा बाल्यं यतीत्य वरवर्णिनी॥
मञ्जुलं यौवनोद्भेदं प्राप श्रीरिव माधवे।
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह॥
ककुत्स्थः कारयामास समयेऽथ स्वयंवरम्।
माधवे मासि संप्राप्ते चन्द्रदृष्टौ शुभे दिने॥
स्वयंवरसभां चक्रे तारावत्याः पिता सुतैः।
पार्थिवान् सुबहून् राजा बहुभिः क्रमेण वै॥
तूर्णं प्रस्थापयामास नानादेशनृपान् प्रति।
ते राजानस्तया युक्ता यावता वै पार्थिवात्मजात्॥
तूर्णमेव समाजग्मुस्तारावत्याः स्वयंवरम्।
तत् श्रुत्वा पौष्यतनयश्चतुरङ्गबलैर्युतः॥
स्वयंवरं जगामाशु देवालङ्कारमण्डितः।
एतस्मिन्नन्तरे राज्ञः कुमारी वरवर्णिनी॥
दृष्ट्वा धात्रीं निजां सम्यक् सम्पूर्णज्ञानशालिनीम्।
स्वयंवरसभां हृष्टा प्राहिणोन्न सदृशं प्रति॥
स्वयंवरसभां गत्वा चारुरूपं सुलक्षणम्।
नृपं निरूप्य भो धात्रि। मह्यमेत्य निवेदय॥
अथ तां प्रेषयित्वाथ धात्रीं नृपतिपुत्त्रिका।
सा मनोन्मथिनी यत्र प्राराधयति चण्डिकाम्॥
तत्र प्रायान्महाभागा शुभा तारावती तदा।
तत्र गत्वा महादेवीं प्रणम्य कालिकाह्वयाम्॥
मातृवेशाय भावेन न ज्ञात्वात्मानमात्मना।
प्रणनाम महाभक्त्या वाक्यमेतदुवाच ह॥
प्रणमामि महामायां योगनिद्रां जगन्मयीम्।
सा मे प्रसीदतां गौरी चण्डिका भक्तवत्सला॥
यदि सत्यं जनन्या मे मदर्थे त्वं प्रपूजिता।
तेन सत्येन सुभगः पतिर्म्मम नृपोत्तमः॥
स्वयंवरेऽद्य भवतु प्रसीद हरवल्लभे।
इति तस्या वचः श्रुत्वा चण्डिका हरमोहिनी॥
मोहयन्ती नृपसुतां यथात्मानं न वेत्ति च।
अथ माहात्म्यमर्त्तेरिदं सा स्मृत वचः॥
श्रीदेव्युवाच।
पौष्यस्य तनयो योऽसौ नाम्ना तु चन्द्रशेखरः।
स मनोहररूपस्ते प्रियः स्वामी भविष्यति॥
तमिन्दुकलया शीर्षे चिह्नितं नृपसत्तमम्।
वरयस्व स्वयंवरे पार्व्वतीव हरध्वजम्॥
अथाजगाम सा धात्री निरूप्य सदृशं पतिम्।
तारावत्यास्तदाचष्ट रहस्यं नृपसत्तमम्॥
दृष्ट्वा तामागतां धात्रीं प्रहृष्टा नृपतेः सुता।
पप्रच्छ निभृतं कीदृक् को वा दृष्टस्त्वया नृपः॥
सा प्राह धात्री वचनात्तव भूपा विलोकिताः।
चारुरूपाः कुलीनाश्च शाक्ते शक्ते च मारगाः॥"
"नृपौ पुर्य्यामिहायातौ सिद्धस्कन्दौ हरदृशौ।
सर्व्वलक्षणसम्पन्नौ देवालङ्कारमण्डितौ॥
तयोरपि वयस्यत्वान् प्रशस्तश्चन्द्रशेखरः।
स एव ते पतिर्योग्यश्चिह्नेनानेन सुन्दरि॥
तं त्वं वरय राजानं तव योग्यं शुभोदयम्।
धात्र्यास्तदेव वचः श्रुत्वा राजपुत्त्री जगाद ताम्॥
मत्पार्श्वचारिणी भूत्वा निर्द्दिशाय नृपोत्तमम्।
यावतीयं तदा याप्ययाग्भास्तारावती तदा॥
धात्र्या चानुगया युक्ता चचार मदसोऽन्तरे।
सभामध्ये चिरं सा तु विहृत्य वरवर्णिनी॥
भाषितानियतैर्योगाश्चण्डिकायाः प्रसादतः।
ततो समन्तादेकत्वात्तया धात्र्या विलोकिता॥
इति खेदलपम्मांभ कलिकालिनिमानता।
मतिं पूर्व्वतरं पुत्त्री राज्ञस्तारावती सती॥
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम्।
वैवाहिकेन विधिना स राजा चन्द्रशेखरः॥
तारावतीं तदा भार्य्यां ककुत्स्थनृपतेः सुताम्।
संस्कृत्य श्रावयामास देवेभ्यो देविकैर्मखैः॥
पाणिग्रहणसंस्कारं कृत्वा तां सहचारिणीम्।
करवीरपुरायाथ प्रययौ चन्द्रशेखरः॥"
इति कालिकापुराणे ४८ अध्यायः॥

तारिका, स्त्री, (तारस्तीव्रतास्या अस्तीति । तार + "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) तालरसः । ताडी इति भाषा । यथा,—
"समिदा कालकूटञ्च ताम्रकूटञ्च घुस्तुरम् ।
अहिफेनं खर्ज्जुरसस्तारिका तरिता तथा ॥"
इति कुलार्णवतन्त्रम् ॥
(तरुणमल्ली, स्त्री । यथा, मनुः । ८ । ४०७ ।
"गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः ।
ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे ॥")
तारिणी स्त्री, (तारयतीति । तॄ + णिच् + णिनि । ङीप् च ।) बुद्धदेवताभेदः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओँकारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्दा १९ त्रिलोचना २० लोचना २१ । इति त्रिकाण्ड-शेषः ॥ * ॥ द्वितीया शक्तिः । यथा,—
"अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान् ।
येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः ॥
कवितां लभते शुद्धामनर्गलविजृम्भिणीम् ।
पाण्डित्यं सर्व्वशास्त्रेषु धनैर्धनपतिर्भवेत् ॥
राजद्वारे सभायाञ्च विवादे व्यवहारके ।
सर्व्वत्र जयमाप्नोति वृहस्पतिरिवापरः ॥"
इति तन्त्रसारः ॥
अस्या ध्यानं ताराशब्दे द्रष्टव्यम् ॥
("तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती ।
कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृता ॥"
इति मन्त्रकोषः ॥
त्रि, उद्धारकर्त्री । यथा, मार्कण्डेये ।
"तारिणी भवसंसारसागरस्य कुलोद्भवे ॥")
तारुण्य, क्ली, (तरुणस्य भावः । तरुण + ब्राह्मणादित्वात् ष्यञ् ।) यौवनम् । इत्यमरः । २ । ६ । ४० ॥ (यथा, मार्कण्डेये । २४ । ७ ।
"कृतकोटिसमं चित्तं तारुण्याद्विककोटिषु ॥")
तारेयः, पुं, (ताराया वालिपत्न्या अपत्यं पुमान् । तारा + ढक् ।) वालिपुत्रः । इति जटाधरः ॥ (यथा, रामायणे । ४ । २२ । १२ ।
"अनुरूपाणि कर्म्माणि विक्रम्य बलवान् रणे ।
करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः ॥"
वृहस्पतिपत्न्यास्तारायाः पुत्त्रो बुधोऽपि ॥)
तार्किक, त्रि, (तर्कं वेत्ति अधीते वा । तर्क + ठक् ।) तर्कशास्त्रवेत्ता । तर्काध्ययनकर्त्ता । इति व्याकरणम् ॥ स षड्विधो यथा । वैशेषिकः १ औलूक्यः २ वार्हस्पत्यः ३ नास्तिकः ४ लौकायतिकः ५ चार्व्वाकः ६ । इति हेमचन्द्रः ॥ (यथा, अप्पयदीक्षित-वैराग्यशतके । ६१ ।
"कोपो मैत्रावरुणेः शापो वा तार्किकस्य मुनेः ।
संस्मर्य्यते यदि सदा पश्चान्नोरपि मास्तु प्रक्रमदम् ॥")
तार्क्षः, पुं, (वृक्ष एव । स्वार्थे अण् ।) कश्यपः । यथा, श्रीभागवते ।
"प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ।
पश्यतां सर्व्वलोकानां तार्क्षपुत्त्रः सुधामिव ॥"
(विनतायां जातः कश्यपपुत्त्रविशेषः । यथा, महाभारते । १ । १२३ । ७० ।
"तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्चासितध्वजः ।
अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः ॥")
तार्क्षी, स्त्री, (तार्क्ष + गौरादित्वात् ङीष् ।) पातालगरुडीलता । इति राजनिर्घण्टः ॥
तार्क्ष्यं, क्ली, रसाञ्जनम् । इति मेदिनी । ये, २७ ॥ (यथास्य पर्य्यायाः वैद्यकरत्नमालायाम् ।
"तार्क्ष्यं शैलं नीलवर्णमञ्जनञ्च रसाञ्जनम् ॥")
तार्क्ष्यः, पुं, (तार्क्षस्य कश्यपस्य अपत्यम् । तार्क्ष + "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) अश्वः । सर्पः । गरुडाग्रजः । गरुडः । इति मेदिनी । ये, २७ ॥ (यथा, रघुः । ६ । ४९ ।
"त्रसेन तार्क्ष्यात् किल कालियेन
मणिं विसृष्टं यमुनौकसा यः ॥"
तथाच ऋग्वेदे । १ । ८९ । ६ ।
"स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः
स्वस्ति नो वृहस्पतिर्दधातु ॥"
"वृद्धस्य पुत्त्रो महत्वान् नोऽस्माकं स्वस्ति अविनाशं विदधातु ।" इति तद्भाष्ये सायनः ॥
"तार्क्ष्यो रथो गरुडो वा नः स्वस्ति दधातु ।"
इति वाजसनेयसंहिताभाष्ये महीधरः । २५ । १९ ॥ वृहन्नेमिर्मामात्यम् । यथा, महाभारते । ३ । १८४ । ८ ।
"अभ्युद्धारिष्टनेमोऽथ तार्क्ष्यस्याश्रममञ्जसा ।"
तथाच तत्रैव । १२ । २८८ । ४ ।
"एवमुक्तस्तदा तार्क्ष्यः सर्व्वशास्त्रविदां वरः ।
विबुध्य सम्पदं चाग्र्यां सद्वाक्यमिदमब्रवीत् ॥")
शालवृक्षः । स्वर्णम् । इति शब्दरत्नावली ॥
अश्वकर्णवृक्षः । स्यन्दनम् । इति हेमचन्द्रः । ४ । २६८ ॥ (पक्षिविशेषः । यथा, महाभारते । २ । ५१ । १५ । [सह ॥"
"अमला: कौकुरास्तार्क्ष्या वक्षपाः पक्षवैः
महादेवः । यथा, महाभारते । १३ । १७ । ९७ ।
"गन्धर्व्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ॥"
पर्व्वतविशेषः । इति कश्चित् ॥)
तार्क्ष्यजं, क्ली, (तार्क्ष्यः सुवर्णं तद्वत् जायते । यद्वा, तार्क्ष्ये पर्व्वते जायते इति । जन + डः ।) रसाञ्जनम् । इति भावप्रकाशः ॥
तार्क्ष्यध्वजः, पुं, (तार्क्ष्यो गरुडः ध्वजे यस्य ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥
तार्क्ष्यनायकः, पुं, (तार्क्ष्याणां सर्पाणां नायकः प्रापकः । स्वमातुर्दासत्वकाले विमातृपुत्त्रसर्पाणां वहनात् तथात्वम् ।) गरुडः । इति राजनिर्घण्टः ॥ (तार्क्ष्यनायकः । इति कश्चित् ॥)
तार्क्ष्यप्रसवः, पुं, (तार्क्ष्यः पर्व्वतः प्रसवोऽस्य ।) अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥
तार्क्ष्यशैलं, क्ली, (तार्क्ष्यशैले भवम् । अण् ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"सिन्दूरकं चक्रमर्द्दस्य बीज-
मित्यङ्कुरं केशवं तार्क्ष्यशैलम् ॥")
तार्क्ष्यी, स्त्री, (तार्क्ष्यस्य पक्षिणः प्रिया । अण् ङीप् च ।) वनलताविशेषः । इति शब्दरत्नावली ॥
तालं, क्ली, (तलत्यनेनेति । तल प्रतिष्ठायाम् + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) हरितालम् । (अस्य नामानि यथा,—
"हरितालं तालमाल्यं मालं शैलूषभूषणम् ।
पिञ्जकं रोमहरञ्च तालकं पीतमित्यपि ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)
तालीशपत्त्रम् । इति राजनिर्घण्टः ॥ दुर्गासिंहासनम् । इति हेमचन्द्रः । ४ । २०२ ॥ (तालस्य विकारः । "तालादिभ्योऽण् ।" ४ । ३ । १५२ । इत्यस्य तालाद्धनुषि इति वार्त्तिकोक्त्या अण् । धनुः । इति सिद्धान्तकौमुदी ॥ तालस्येदम् । अण् तस्य लुक् ।) तालफलम् ॥ (यथा, महाभारते । ३ । १०१ । ५ ।
"शिरोभिः प्रपतद्भिश्चाप्यन्तरीक्षात् महीतलम् ।
तालैरिव महाराज । वृन्ताद्भ्रष्टैरदृश्यत ॥")
तालः, पुं, (तलत्यत्र । तल + "हलश्च ।"३।३।१२१। इति घञ् ।) वृक्षविशेषः । तत्पर्य्यायः । तालद्रुमः २ पत्री ३ दीर्घस्कन्धः ४ ध्वजद्रुमः ५ वृक्षराजः ६ मधुरसः ७ मदाढ्यः ८ दीर्घपादपः ९ चिरायुः १० तरुराजः ११ दीर्घपत्रः १२ गुच्छपत्रः १३ आसवद्रुः १४ । इति राजनिर्घण्टः ॥ लेख्यपत्रः १५ महोन्नतः १६ । इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । पित्तदाहश्रमापहत्वञ्च ॥ * ॥ अस्य रसगुणाः । कफपित्तदाहशोफनाशित्वम् । मदकारित्वञ्च ॥ * ॥ तत्फलगुणाः । शीतलत्वम् । बल्यत्वम् । स्निग्धत्वम् । स्वादुरसत्वम् । गुरुत्वम् । विष्टम्भित्वम् । वातपित्तास्रक्षतदाहक्षयनाशित्वञ्च । इति राजनिर्घण्टः ॥ पित्तरक्तश्लेष्मविवर्द्धनत्वम् । दुर्ज्जरत्वम् । बहुमूत्रत्वम् । तन्द्राभिष्यन्दिशुक्रदात्वञ्च । इति भावप्रकाशः ॥ वातकृमिकुष्ठरक्तपित्तनाशित्वम् । वृंहणत्वम् । हृद्यत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥ * ॥ तद्बीजस्य अर्थात् तालशस्यस्य गुणाः । मूत्रकरत्वम् । मिष्टत्वम् । वातपित्तहरत्वम् । गुरुत्वञ्च ॥ * ॥ तदग्रिममज्जगुणाः । मधुरत्वम् । मूत्रलत्वम् । शीतलत्वम् । गुरुत्वञ्च ॥ * ॥ तालाम्बुगुणाः । पित्तनाशित्वम् । शुक्रसत्त्ववृद्धिकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥ तालजसरस्तोयगुणाः । अतिशयमदकारित्वम् । सदैवाम्लीभूतं पित्तवातदोषकृत् । इति भावप्रकाशः ॥ कफक्रमिघ्नत्वम् । रुच्यत्वम् । वातलत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ * ॥ तालप्रलम्बगुणाः । रूक्षत्वम् । स्वररोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ तालमस्तकमज्जगुणाः । किञ्चिन्मदकारित्वम् । लघुत्वम् ।

श्लेष्मकारित्वम् । वातपित्तनाशित्वम् । सस्नेहत्वम् । मधुरत्वम् । सारकत्वञ्च । इति भावप्रकाशः ॥ * ॥ तालशिरोगुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । मूत्रातङ्करोगनाशित्वम् । बलप्राणशुक्रवृद्धिकारित्वञ्च । इति । राजवल्लभः ॥ * ॥

गीतकालक्रियामानम् । अयं स्वर इयत् कालं गेयः इयत् कालं विलम्बितं इयत् कालं द्रुतं इयत् कालं मध्यमिति बोधयितुं ईङ्गुष्ठेहस्तेरङ्गुल्याकुञ्चनप्रसारणादिक्रियाभिर्नियतव्यं गातव्यमिति कालक्रिययोः प्रमाणं तालः ॥ साङ्गे इदमियत् कालं गेयमिति कालेनाङ्गुल्याद्याकुञ्चनादिक्रियामानं ताल इति ॥ कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियायाः परिस्पन्दात्मिकायाः परिच्छेदहेतुस्ताल इति मधुः ॥ कालेन नर्त्तनगानवादनक्रियाणां मानं तालः । तारादेककालमेषां विरामस्ताल इत्यन्ये । इत्यमरटीकायां भरतः ॥ * ॥ तस्योत्पत्तिर्यथा । गौरीहरयोर्नृत्येन तालो बभूव । तस्य कारणम् । क्रियाकालश्च । हरनृत्यस्य ताण्डवं गौर्य्या नृत्यस्य लास्यं इति संज्ञा अर्थात् पुरुषनृत्यस्य ताण्डव नाम्ना नृत्यस्य लास्यमिति नाम । ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलित्वा ताल इति संज्ञा जाता । इति सङ्गीतशास्त्रम् ॥ * ॥ तस्य भेदा यथा,—

"चच्चत्पुट१ चाचपुट२ षट्पितापुत्त्रकस्तथा३ ।
उद्घट्टकः४ सन्निपातः५ कङ्कणः६ कोकिलारवः७ ॥
राजकोलाहलो८ रङ्गविद्याधर९ शचीप्रियौ१० ।
पार्व्वतीलोचनो ११ राजचूडामणि १२ जयश्रियौ १३ ॥
वादकाकुल१४ कन्दर्प१५ नलकूवर१६ दर्पणाः१७ ।
रतिलीलो १८ मोक्षपति. १९ श्रीरङ्गः २० सिंहविक्रमः २१ ॥
दीपको २२ मल्लिकामोदो २३ गजलीलश्च २४ चर्च्चरी २५ ।
कुहक्को २६ विजयानन्दो २७ वीरविक्रम २८ टेङ्किके २९ ॥
रङ्गाभरण ३० श्रीकीर्त्ति ३१ वनमालि ३२ चतुर्म्मुखा. ३३ ।
सिंहनन्दन ३४ नन्दीश ३५ चन्द्रविम्ब ३६ द्वितीयकाः ३७ ॥
जयमङ्गल ३८ गन्धर्व्व ३९ मकरन्द ४० त्रिभङ्गयः ४१ ।
रतितालो ४२ वसन्तश्च ४३ जगझम्पो ४४ ऽथ गारुगिः ४५ ॥
कविशेखर ४६ घोषौ च ४७ हरवल्लभ ४८ भैरवौ ४९ ।
गतप्रत्यागतो ५० मल्लतालो ५१ भैरवमस्तकः ५२ ॥
सरस्वतीकण्ठाभरणः ५३ क्रीडा ५४ निःसारुरेव च ५५ ।
मुक्तावली ५६ रङ्गराज ५७ भरतानन्दा ५८ दितालकाः ५९ ॥
सम्पक्वेष्टाक ६० इत्यादि ताला भरतसंमताः ।
संक्षेपतो निगदिता अथैषां लक्षणं यथा ॥ * ॥
अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम् ।
द्विमात्रन्तु गुरु ज्ञेयं त्रिमात्रन्तु प्लुतं मतम् ॥
ताले चच्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुः प्लुतः १ ।
गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे ॥ २ ॥
गलगालगलाश्चैव षट्पितापुत्त्रके मताः ३ ।
उद्घट्टके तु गमगाः ४ सन्निपाते गुरुर्म्मतः ॥५॥
चतुर्व्विधः परिज्ञेयस्तालः कङ्कणनामकः ६ ।
पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते ॥
लचतुष्कं गलौ पूर्णे खण्डे विन्दुद्वयं गुरुः ।
यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत् ॥
खचतुष्कं सयत्यन्तं गुरुर्विन्दुचतुष्टयम् ।
सयत्यन्तं लघुश्चैव तालोऽयं कोकिलारवः ॥७॥
लचतुष्कं सयत्यन्तं खत्रयं खत्रयं लघुः ।
लघुर्विन्दुद्वयञ्चेति राजकोलाहलाभिधे ॥८॥
खद्वयं द्वौ प्लुतौ यत्र रङ्गविद्याधरः स तु ९ ।
लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै ॥
प्लुतद्वयञ्च यत्रास्ति स तालः स्याच्छचीप्रियः ॥१०॥
खद्वयं गुरुलौ विन्दुर्गौ प्लुतौ गौ प्लुतौ पुनः ।
यत्र तालः स विज्ञेयः पार्व्वतीलोचनाभिधः ॥११॥
राजचूडामणौ विन्दुर्लश्च विन्दुर्लगौ मतौ ॥ १२ ॥
रगणो नो गुरुश्चैव जयश्रीरिति कथ्यते ॥ १३ ॥
प्लुतौ लघुचतुष्कञ्च मौ नौ द्रुतयुगं लघुः ।
लचतुष्कं विना शब्दं तालः स्याद्वादकाकुल. ॥१४॥
द्रुतद्वयं यकारश्च कन्दर्पेऽपि प्रकीर्त्तितः ॥ १५ ॥
चत्वारो गुरवो यत्र चत्वारः प्लुतका अपि ।
लघ्वक्षराणि चत्वारि तालोऽयं नलकूवरः ॥१६॥
विन्दुद्वयं गुरुश्चैव भवेद्यत्र स दर्पणः ॥ १७ ॥
रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् ॥१८॥
आदौ षोडशगुरवो द्वात्रिंशल्लघवस्ततः ।
चतुःषष्टिर्द्रुता यत्र सोऽयं मोक्षपतिर्मत. ॥ १९ ॥
श्रीरङ्गसंज्ञके ताले मगणाल्लघुप्लुतौ मतौ ॥ २० ॥
सिंहविक्रमताले तु मगणो नलगाः लगौ ॥२१॥
प्लुतो लघुः प्लुतश्चैव ताले दीपकनामनि ॥ २२ ॥
ताले स्यान्मल्लिकामोदे लद्वय खचतुष्टयम् ॥२३॥
लचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम् ॥२४॥
अष्टधात्वस्तु चर्च्चर्य्यां विरामान्ते द्रुतौ लघुः ॥२५॥
द्रुतद्वन्द्वं भवेत्ताले कुहक्काख्ये लघुद्वयम् ॥२६॥
भवेयुर्विजयानन्दे लत्रयञ्च लघुत्रयम् ॥ २७ ॥
वीरविक्रमताले तु द्रुतौ लगौ ततः प्लुतः ॥ २८ ॥
टेङ्किका रगणेन स्यादेकेनैव कृतास्पदे ॥ २९ ॥
भगणो गप्लुतौ स्यातां रङ्गाभरणनामके ॥ ३० ॥
श्रीकीर्त्तिसञ्ज्ञके ताले गुरुद्वन्द्व लघुद्वयम् ॥३१॥
चतुर्द्रुता लघू द्वौ तु द्रुतो गो वनमालिनि ॥ ३२ ॥
चतुर्म्मुखाभिधे ताले यगणानन्तरं प्लुतः ॥ ३३ ॥
भगणः प्लुतो लगौ विन्दुद्वय गौ नः प्लुतस्तथा ।
लघुः प्लुतो द्रुतश्चैको लघुद्वयमथापि च ॥
निःशब्दं लचतुष्कञ्च ताले स्यात् सिंहनन्दने ॥३४॥
गो लघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरे मताः ॥३५॥
गो द्रुतौ नौ प्लुतद्वन्द्वं चन्द्रविम्बे प्रकीर्त्तितम् ॥३६॥
द्रुतद्वन्द्वं लघुश्चैकस्ताले स्यात्तु द्वितीयके ॥३७॥
लकारश्च यकारश्च जयमङ्गलनामनि ॥ ३८ ॥
चत्वारो गुरवो विन्दुश्चत्वारश्च प्लुता अपि ।
विन्दवो दशषट् लाश्च ताले गन्धर्व्वसंज्ञके ॥३९॥
मकरन्दे द्रुतद्वन्द्वं लघुद्वन्द्वमथो गुरुः ॥ ४० ॥
गुरुर्लघुः प्लुतश्चैव त्रिभङ्गिः परिकीर्त्तितः ॥४१॥
अत्र रतितालस्य लक्षणं पतितम् ॥ ४२ ॥
वसन्तताले कर्त्तव्यो नगणो मगनस्तथा ॥ ४३ ॥
जगझम्पे गुरुश्चैको विरामान्तश्च खद्वयम् ॥४४॥
गप्लुतौ लौ द्रुतौ लश्च प्लुतो गारुगिः । ४५ ।
शेखरे ॥ ४६ ॥
प्लुतः शून्ये नगौ लश्च खद्वयञ्च ततो लघुः ॥
खचतुष्कं विना शब्दं यत्र घोषः स उच्यते ॥४७॥
हरवल्लभताले च प्लुतो लो गौ च खद्वयम् ॥४८॥
भगणः प्लुतौ गनौ गयौ प्लुतो लघुश्च भैरवे ॥४९॥
गतप्रत्यागते ताले लो मौ गौ नौ प्रकीर्त्तितौ ॥५०॥
चतुर्लघुसंज्ञताले विरामान्तं द्रुतद्वयम् ।
लगौ गौ नो नगौ गश्च खद्वयं लद्वयं पुनः ॥५१॥
नचतुष्कं विना शब्दं ताले भैरवमस्तके । ५२ ।
सरस्वतीकण्ठाभरणे गौ लघुश्च द्रुतद्वयम् ॥५३॥
एक एव प्लुतो यत्र क्रीडातालः स उच्यते ॥५४॥
द्रुतद्वयं विरामान्तं ताले निःसारुके मतम् ॥५५॥
खत्रयं सविरामान्तं नौ पुनः खत्रयन्तथा ॥
प्लुतौ गः खयुगं गश्च यत्र मुक्तावली तु सा ॥५६॥
लगौ विन्दुयुगं गौ लो रङ्गराजे प्रकीर्त्तितः ॥५७॥
खद्वयं सविरामान्तं गुरुः प्लुतद्वयं लघुः ।
यत्र ताले स विज्ञेयो भरतानन्दसंज्ञकः ॥ ५८ ॥
आदिताले लघुश्चैक इत्याह भरतो मुनिः ॥५९॥
मगणश्च प्लुताद्यन्तः संपक्वेष्टाकतालके ॥ ६० ॥
एकाधिकशते ताले षष्टिर्मुख्यतमा इमे ॥" * ॥

अथ प्रस्तारः ।

"गुरुः प्लुताधोभागे तु गुर्व्वधोभागतो लघुः ।
द्रुत लघोरधोभागे तुल्येऽतुल्या तु पङ्क्तिका ॥
उद्दिष्टा च कला पश्चादित्थं प्रस्तारसंक्रमः ।
सर्व्वप्लुतात् समारभ्य मात्रानिवहनिर्म्मितात् ॥
तावत् प्रस्तारयेदन्ते यावत् सर्व्वं द्रुतं भवेत् ॥"

अत्र तालप्रस्तारे पिङ्गलवन्नष्टोद्दिष्टमेरुपताकादयः सन्ति बाहुल्यभयान्नोक्ताः ॥ * ॥

अथ प्लुतादिमात्राभेदेन तालघातनम् ।

"ताले निष्पातहस्तः प्लुतमनुघटयेद्घातमेकं सशब्दं
तत्पश्चात् द्वौ च घातौ निनदविरहितौ दर्शयेद्द्रुतोऽथ. ।
शून्यत्वात् पक्वतालाविति जगति पुनः सूत्रसिद्धौ सनन्दावित्थं घातत्रयं तत् त्रिकलतगुरुविवर्द्धयेद् द्वक्कारम् ॥
एको घात. सशब्दो द्विकल इह गुरौ शब्दहीनस्तथान्यः
सोऽपूर्व्वं याति लीलावलयवलयितोत्तान-हस्ताङ्गुलीभिः ।
क्षिप्तोऽधैकैकमात्रा समुदयिनि लघौ घात एको निनादी

घात्यो मात्रार्द्धभाजि द्रुतवपुषि लघोरर्द्धमानादेन घात' ॥

इति तालघातनप्रकारः ॥ * ॥

श्रीरङ्गो मणिवन्यकङ्कणवद्धो सुक्तावलीमण्डनः
क्रीडाहेतुवसन्तरक्तहृदयो गन्धर्वलीलारतः ।
साधाम्भोधपतिचतुर्मुखनतो यो राजचूडामणि
सोऽयं तालमयस्तृणोदुलयवत् संसारवन्ध हरिः ॥

अपि च ।

नन्दीशोऽर्द्धतनुर्मुखेन वनतस्तचन्द्रविम्बोदयः
कन्दर्पो नलकूवरस्य तुलितो यस्यातिरूपे तुले ।
कण्ठान्तः किल कोकिलारवभवो वाग्भीं जय-श्रीरङ्गो
तालात्मा सुरजिच्छिनत्तु सगुणः संसारपाशा-वलीम् ॥

ख्यातो यः कविचक्रवर्त्तिपदतो विद्याधनैरर्च्चितः
सौभद्रेयसिमं यमर्ज्जुनयशाः सोऽनीजनत्तं श्रीधरः ।
तस्य श्रीलसुभङ्करस्य भणितौ सङ्गीतदामोदरे
तालाद्यः स्तवकोत्थुतस्तवकृतौ यातस्तृतीय पटुः ॥” * ॥

अन्यच्च ।

“आदावष्टस्तथा रुद्रो ब्रह्म इन्द्रश्चतुर्द्दश' ।
दशावतारश्चादि नृत्यनाटा तत' परम् ॥
अथाष्टतालभेदाः । आड़ः १ दोज २ ज्योतिः ३ चन्द्रशेखर' ४ गञ्जनम् ५ पञ्चताल' ६ रूपकम् ७ समताल ८ ॥ अथ रुद्रतालस्य भेदा' । वीरविक्रम, १ विषमसमुद्रः २ धरणम् ३ वीर-दशक' ४ मण्डूक, ५ कन्दर्पः ६ डोम्बपाछिड़ ७ भुवचरणम् ८ दशकोषी ९ गजेन्द्रगुरु, १० छुटका ११ । अथ ब्रह्मतालभेदा' । ब्रह्म १ विराम ब्रह्म २ षट्कला ३ सप्तमात्रा ४ ॥ अथेन्द्रताल-भेदाः । देवसार १ देवशाली २ मदनदोला ३ गुरुगन्धर्व्व' ४ पञ्चाली ५ इन्द्रभाय, ६ ॥ अथ चतुर्द्दशतालभेदा. । चिह्नताल' १ चन्द्र-मात्रा २ देवमात्रा ३ अर्द्धज्योतिका ४ स्वर्ग-सार' ५ धमाट ६ धराधरा ७ वसन्तवाक् ८ काककला ९ कौरशब्दा १० ताण्डवी ११ हर्ष-धारिका १२ भाषा १३ अर्द्धमात्रा १४ ॥
तेषां लक्षणानि यथा,—
एकतालस्तत, शून्यं युगल तालिका परे ।
सङ्गीत, प्रथम, सार आड़ताल प्रकीर्त्तित १ ॥
एकतालश्च शून्यञ्च क्रमेणापि त्रिधा भवेत् ।
शेषशून्य कलाभेदे दोलाख्यश्च भवेत् पृथक् २ ॥
प्रथम युगल तालं एक एकस्तथापरे ।
कलाभेदे गानभेदे ज्योतिश्च परिकीर्त्तितम् ३ ॥
चन्द्रचन्द्रस्तथा युग्म तथा चन्द्रस्तथापरे ।
षट् ताला निभवन्त्येव चन्द्रशेखरभाषित' ४ ॥
एकतालो भवेच्छून्यः क्रमेणापि चतुष्टयम् ।
शेषशून्यं गञ्जनञ्च सर्व्वतो सुनिभाषितम् ५ ॥
प्रथम युगलश्चैव ततपर तालमेककम् ।
शेषे युग्म तथा शून्य पञ्चतालं प्रकीर्त्तितम् ६ ॥
युगल प्रथम ताल ततपरञ्चैकशून्यकम् ।

शेषे च युगलं ताल रूपकं परिकीर्त्तितम् ७ ॥
एकतालं तथा शून्यं क्रमेण द्विविधं भवेत् ।
शेषे युगलतालश्च समतालं भवेत् परम् ८ ॥
एकताल तथा शून्यं क्रमेण त्रिविधं भवेत् ।
ततपरं युगल तालमित्येव वीरविक्रमः १ ॥
युग्मतालं तथा शून्यं ततपरं द्वयतालकम् ।
शेषे च युगल तालं समुद्रविषमं स्मृतम् २ ॥
युग्मतालश्च शून्यञ्च एकतालश्च ततपरे ।
शेषैकत्र त्रिशून्यञ्च विषम धरणं भवेत् ३ ॥
एकताल तथा शून्यं क्रमेणापि त्रिधा भवेत् ।
युगल युगलं पश्चात् स वीरदशकः स्मृतः ४ ॥
प्रथम एकतालश्च ततपरं शून्यमेककम् ।
शेषैकत्र त्रितालश्च मण्डूकस्य गतिर्यथा ५ ॥
समतालं यथा दृष्टं तथा कन्दर्पसंज्ञितम् ।
समताले भवेत् शून्यं कन्दर्पे नास्ति तत् पुनः ६ ॥
पञ्चतालात् परं शून्यं डोम्बपाछिड़सत्तमम् ।
अत्यूर्द्धश्च भवेत् चस्तं सग्रामस्य यथा गतिः ७ ॥
एकतालं तथा शून्यं क्रमेणापि द्विधा भवेत् ।
शेषैकत्र त्रितालश्च भुवचरणभाषितम् ८ ॥
एकतालमेकशून्यमित्येवञ्च भवेत् क्रमात् ।
विराम एकतालश्च वाग्भेदे दशकोषिका ९ ॥
युगल युगल पश्चात् तदन्तेऽप्येकतालकम् ।
शेषे च युग्मशून्यञ्च गजेन्द्रगुरुभाषितम् १० ॥
युग्मशून्यं विरामे च एकताल भवेत् क्रमे ।
छुटकाख्यानक घीर सङ्गीतपरिनिष्ठितम् ११ ॥
युग्मञ्च चस्त प्रथमैकतालं
किञ्चिद्विरामे पुनरेकतालम् ।
ब्रह्मस्य तालञ्च सङ्गीतमध्ये
यथा कपोती हि करोति शब्दम् १ ॥
युग्मताल भवेत्तत्र एकतालश्च ततपरे ।
शेषे द्वितीयशून्ये च विरामब्रह्मतालकम् २ ॥
प्रथमश्चैकतालश्च युग्मशून्य तथा परे ।
शेषैकत्र त्रितालेति षट्कला खलु कथ्यते ३ ॥
आदौ युग्म तथा युग्म त्रितालश्च तथा परे ।
सप्तमात्रा भवत्येषा ब्रह्मतालान्तरे शुभे ४ ॥
सविराम त्रितालश्च एक शून्यन्तथापरे ।
शेषे चस्त त्रितालश्च देवसार इतीर्य्यते १ ॥
द्वितयशून्य विरामे भवति ततश्च त्रितालानि ।
शेषेण द्विशून्यमित्येवं देवशाली २ ॥
प्रथममेव युग्मताल ततपश्चादेकशून्य विरामे ।
शेषे त्रितयताल भवतीति मदनदोला ३ ॥
युग्मताल समारभ्य पञ्चताल भवेत्तथा ।
अत्यूर्द्धश्च तथा चस्त गुरुगन्धर्व्व ईरित' ४ ॥
श्रावणस्य यथा धारास्तथा तालो भवेद्दृन' ।
पञ्चतालान्तरायीति पञ्चालीति प्रकीर्त्तिता ५ ॥
सविराम चतुस्ताल त्रितालं शून्यमन्तत' ।
मेघारम्भे यथा केका रूयन्ते इन्द्रभाषितः ६ ॥
एकतालश्च शून्यञ्च क्रमेण त्रितय तत ।
शेषे चतुष्टय चस्त चिह्नताल इतीर्य्यते १ ॥
एकचन्द्रस्तथा युग्म ताल प्रत्येकतस्त्रयम् ।
शेषे त्रीणि च शून्यानि चन्द्रमात्रा भवेत् परा २ ॥
प्रथम षट्कतालश्च अत्यूर्द्धन्तु भवेत् क्रमे ।

शेषे युग्मं तथा शून्यं देवमात्रा च सोच्यते ३ ॥
चन्द्रशून्य त्रितालश्च विरामेण क्रमेण तु ।
अत्यूर्द्धन्तु भवत्येव अर्द्धज्योतिरिति स्थितिः ४ ॥
एकैकतालान्तरयुग्मतालात्
शून्यत्रयं ततपरमेकतालम् ।
कलाभिदा शून्यभिदा समाख्या
स स्वर्गसाराख्यनवीनतालः ५ ॥
युग्मशून्य विरामेण देवतालमिति क्रमात् ।
धमाटाख्योऽन्तरे शून्य इति सर्व्वत्र भाषितम् ६ ॥
नवाम्बुदे दामिनि शोभयानं
तथा सुसम्बद्धसुतालभावम् ।
युग्म सचस्तं क्रमतश्च ताल
शेषे त्रितालश्च धराधराख्यो ७ ॥
एकतालश्च शून्यञ्च क्रमेणापि चतुष्टयम् ।
क्रमात्तालत्रयश्चैव वसन्तवागुदाहृतं ॥ ८ ॥
सविराम द्वयं ताल युग्मताल तथा परे ।
शेषैकत्र त्रितालश्च भवेत् काककलेति सा ॥ ९ ॥
त्रितालश्च भवेत्चस्तं ततपर स्यैकतालकम् ।
शेषेऽपि च त्रितालश्चेत् कौरशब्दा प्रचक्ष्यते १० ॥
युग्मं युग्मं तथा युग्म तालञ्चैकं भवेत् क्रमात् ।
शेषशून्य कलाभेदे ताण्डवीति भवेत् पृथक ११ ॥
सविरामं द्वय ताल युग्मशून्यञ्च ततपरम् ।
शेषोर्द्धन्तु त्रितालश्च हर्षधारा प्रकीर्त्तिता १२ ॥
चन्द्रशून्यं विरामेण द्वय ताल भवेत् क्रमात् ।
अत्यूर्द्धन्तु भवेत्चस्तं भाषाख्यं तालसत्तमम् १३ ॥
अत्यूर्द्धन्तु त्रितालश्च द्वय ताल विरामकम् ।
इत्यर्द्धमात्रा विज्ञेया सङ्गीतस्तुति सर्व्वतः ॥”

इति सङ्गीतदामोदरः ।

दशावतारप्रवन्धलक्षणं प्रवन्धशब्दे निम्नलाघ प्रवन्धवाद्यलक्षण वाद्यशब्दे द्रष्टव्यम् ॥ * ॥
करतलम् । अङ्गुष्ठमध्यमाभ्यां सम्मितम् । करा-स्फालः । (यथा, मेघदूते । ७९ ।
“तालै. शिञ्जद्वलयसुभगैर्नर्त्तितः कान्तया मे यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥”)
कांस्यनिर्म्मितवाद्यभाण्डम् । तुमरः । इति मेदिनी । ले, २१ ॥ (महादेवः । यथा, महा भारते । १३ । १७ । १२८ ।
“तलस्तालः करस्थाली ऊर्द्धसंहननो महान् ॥”)
तालक, क्ली, (तालमेव । ताल+स्वार्थे कन् ।) हरितालम् । इति राजनिर्घण्टः ॥ (अथ ताल कस्याशुद्धस्य दोषमाह ।
“अशुद्धं तालमायुर्घ्नं तुकफमारुतमेहकृत ।
तापस्फोटाङ्गसङ्कोच कुरुते तेन शोधयेत् ।
अथ तालकस्य शोधनविधि' ।
तालकं कणशः कृत्वा तच्चूर्णे काञ्जिके पचेत् ।
दोलायन्त्रेण यामैकं ततः कुष्माण्डजैः रसैः ।
तिलतैले पचेद्यामं यामञ्च त्रिफलाजले ।
एवं यन्त्रे चतुर्यामं पक्वं शुध्यति तालकम् ।
अथ तालकस्य मारणविधिः ।
सदल तालक शुद्धं पौनर्नवरसेन तु ।
खल्वे विमर्द्दयेदेव दिनं पश्चाद्विशोषयेत ।
तत. पुनर्नवाक्षारै स्थाल्यामर्द्धं प्रपूरयेत् ।

तत्र तद्गोलकं छत्वा पुनस्तेनैव पूरयेत् ॥
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ।
स्थालीं चुल्ल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत् ॥
दिनान्यन्तरशून्यानि पञ्चवह्निं प्रदापयेत् ।
एवं तन्म्रियते तालं मात्रा तुल्येकरक्तिका ॥
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत् ॥"
अन्यच्च ।
"तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम् ।
शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुषम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
अन्यान्यविध हरितालमारणम् । यथा, वैद्यक
रसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।
"तालकं कणशः कृत्वा सुशुद्धं कुब्जिकान्तरे ।
चूर्णोदकेन संपिष्टमपामार्गजटोद्भवे ॥
क्षारोदकेश्च संपिष्टमूर्द्ध्वाधो यावभूकजम् ।
चूर्णं दत्त्वा निरुध्याथ कुष्माण्डेश्च प्रपूरयेत् ॥
पुनर्मुखं निरुध्याथ चतुर्याम क्रमाग्निना ।
पचेदेव हि तच्चूर्णं कुष्ठादौ परियोजयेत् ॥"
मतान्तरम् ।
"अश्वत्थोनीनलेर्भाव्यं तालं द्वादशयामकम् ।
तथैव निम्बनीरेण ततस्तूर्णोदकेन च ।
पश्चाच्च शाल्मलीक्षारैर्द्विगुणैः खातमध्यगम् ।
विधाय कवचीयन्त्रं वालुकाभिः प्रपूरयेत् ।
द्वादशप्रहरं पक्वा स्वाङ्गशीतञ्च चूर्णयेत् ।
खादयेद्रक्तिकामेकां कुष्ठशोषदशान्तये ॥"
इति हरितालमारणम् ॥)
(तालमिव कायतीति । कै+कः ।) द्वार-
यन्त्रम् । इति हेमचन्द्रः । ४ । ७१ ॥ ताला
इति भाषा ॥ तुवरिका । इति शब्दरत्नावली ॥
तालकाभः, पु, (तालकस्य हरितालस्य आभा
इव आभा यस्य ।) हरितवर्णः । इति हेम-
चन्द्रः । ६ । ३१ ॥ तद्वति, त्रि ॥
तालकी, स्त्री, (तालकस्य तालवृक्षस्य इयम् ।
तालक+अण्+ङीप् ।) तालसुरा । इति
त्रिकाण्डशेषः ॥ ताड़ी इति भाषा ॥
तालक्षीरक, क्ली, (तालजातं क्षीरमिव । ततः
इवार्थे स्वार्थे वा कन् ।) तालसम्भूततवक्षीरम् ।
इति राजनिर्घण्टः ॥
तालध्वजः, पु, (तालो ध्वजो यस्य ।) बलदेवः ।
इति हलायुधः ॥ (यथा, महाभारते । ८ ।
५४ । १० ।
"नातिदूरं ततो गत्वा नगं तालध्वजो बली ।
पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गतः ॥"
पर्व्वतविशेषः । यथा, शत्रुञ्जयमाहात्म्ये । १ । ३५२ ।
"शत्रुञ्जयो रैवतश्च सिद्धिक्षेत्रं सुतीर्थराट् ।
ढङ्कः कपर्द्दी लौहित्यस्तालध्वजकदम्बकौ ॥")
तालध्वजा, स्त्री, (तालस्तालवृक्षो ध्वजश्चिह्नं
यस्याः ।) पुरीविशेषः । यथा, क्रियायोगसारे ।
"अस्ति तालध्वजा नाम नगरी त्रिदिवोपमा ॥"
तालनवमी, स्त्री, (तालोपहारा नवमी । शाक-
पार्थिववत् समासः ।) भाद्रशुक्लनवमी । यथा,
"मासि भाद्रपदे या स्याच्छवमी बहुलेतरा ।
तस्यां संपूज्य वै दुर्गामश्वमेधफलं लभेत् ॥"
इति संवत्सरकौमुदीधृतगरुडपुराणवचनम् ॥
इयमेव तालनवमी ख्याता ॥ (अस्या नवम्यां
सौभाग्यफलकाङ्क्षिणीभिः स्त्रीभिर्यथाविधानं
नारायणलक्ष्मीश्च संपूज्य व्रतकथा श्रोतव्या ।
तत्कथा यथा,—
"मेरुपृष्ठे सुखासीनं शार्ङ्गं कमलया सह ।
उवाच मधुरं वाक्यं सितपूर्व्वं सुदाम्बिका ॥
शृणु मे वचनं देव! स्त्रीणां सौभाग्यकारणम् ।
केन वा सुभगा चासीत् केन वा दुर्भगा भवेत् ॥
किं कृतेन विमुच्येत किं कृतेन फलं लभेत् ।
तन्मे ब्रूहि सुरश्रेष्ठ ! नारीणां कारणं ध्रुवम् ॥
श्रीभगवानुवाच ।
पूर्व्वं हि मम भार्य्ये द्वे सत्यभामा च रुक्मिणी ।
रुक्मिणी सुभगा साध्वी सत्यभामा च दुर्भगा ॥
तस्याः कर्म्मविपाकेन सौभाग्यमन्यथा गतम् ।
केनचिद्वाक्यदोषेण सत्यभामा च दुर्भगा ॥
दुःखार्त्ता शोकसन्तप्ता रुदती बहुशो मुहुः ।
कियत्काले च सम्पन्ने व्रजन्ती च तपोवने ॥
अरण्ये विजने गत्वा कस्मिन्मुनिवराश्रमे ।
रुदित्वा च विधानेन सर्व्वं दुःखं न्यवेदयत् ॥
तच्छ्रुत्वा तु मुनिश्रेष्ठः प्रोवाच रुदतीं शुभाम् ।
भयं मुञ्चस्व । मा रोदीः सौभाग्यं ते भविष्यति ॥
सत्यभामोवाच ।
दुःखं मे बहुशस्तात । शरीरं दुर्भगं कथम् ।
कथ्यतां मुनिशार्दूल । स्वामिसौभाग्यकारणम् ॥
मुनिरुवाच ।
भाद्रे मासि सिते पक्षे नवमी या तिथिर्भवेत् ।
तस्यां नारायणं लक्ष्मीं पूजयेच्च विधानतः ॥
सत्यभामोवाच ।
विधानं कीदृशं तस्य किं दानं किञ्च पूजनम् ।
तन्मे ब्रूहि मुनिश्रेष्ठ । कारणं किन्तदुच्यताम् ॥
मुनिरुवाच ।
स्थण्डिले मण्डलं कृत्वा घटं तत्र निवेशयेत् ।
तत्र नारायणं लक्ष्मीं गन्धपुष्पादिनार्चयेत् ॥
नैवेद्येन सदा भक्त्या पूजयेत् भक्तवत्सलाम् ।
तालेन पूजयेत् देवीं तालेनैव विनिर्म्मितम् ॥
तस्य तत् पिष्टकं दत्त्वा ब्राह्मणायोपपादयेत् ।
गन्धमाल्यैः समभ्यर्च्य विप्रहस्ते समर्पितम् ॥
स्वस्तीति ब्राह्मणो ब्रूयात् व्रतं साङ्गं समाचरेत् ।
एवं क्रमेण साध्वीभिः कर्त्तव्यमतियत्नतः ॥
नवमं वत्सरं यावत् मासि भाद्रपदे तथा ।
पुत्त्रपौत्त्रैः परिवृता सौभाग्यमतुलं भवेत् ॥
धनधान्यसमृद्धिश्च अवैधव्यञ्च निश्चयः ।
अभीष्टफलमाप्नोति नवमीव्रतकारणात् ॥
सम्पूर्णे तु व्रते भूते प्रतिष्ठां तदनन्तरम् ।
विप्राय दक्षिणा देया सुभोज्यञ्च विधानतः ॥
एवं कुरु सदा विप्रे । शृणु भाषणमुत्तमम् ॥
तथा चक्रे च सा साध्वी मुनेर्व्वचनगौरवात् ।
व्रते सम्पूर्णतां याते केशवस्तामुपागतः ॥
उवाच प्रहसन् देवो वचनं मधुरं शुभम् ।
असौभाग्येन यद्दुःखं तत् ते सर्व्वं विनश्यतु ॥
सौभाग्यमतुलं प्राप्य यथा गौरी हरस्य च ।
शचीव पुरुहूतस्य रतीव मदनस्य च ॥
यथा नारायणे लक्ष्मीस्तथा त्वं भव शोभने ' ।
इति तस्यै वरं दत्त्वा गृहीत्वा तां पुरं ययौ ॥
इदं या कुरुते साध्वी व्रतं सा सुभगा भवेत् ।
एवं व्रतञ्च या नारी करोति धर्म्मतत्परा ॥
तस्याश्च भवने लक्ष्मीश्चञ्चला निश्चला भवेत् ।
जन्मान्तरे भवेत् साध्वी अवैधव्यं सदा पुनः ॥
पत्युश्च सुभगा साध्वी पुत्त्रपौत्त्रान्विता भवेत् ।
धनधान्यसमृद्धिश्च ततो मोक्षमवाप्नुयात् ॥"
इति भविष्यपुराणोक्ततालनवमीव्रतकथा
समाप्ता ॥ * ॥ व्रतेऽस्मिन् नवफलानि दातव्यानि ।
तानि यथा,—
"पिण्डखर्ज्जूरं जातिश्च एला चैव हरीतकी ।
नारिकेलं तथा पूगं रम्भापक्वफलन्तथा ।
तत्र मुख्यं प्रदातव्यं तालस्य फलमुत्तमम् ॥" * ॥)
तालपत्रं, क्ली, (तालस्य पत्रमिव ।) ताडङ्कः ।
इत्यमरः । २ । ६ । १०३ ॥ तालवृक्षस्य पर्णञ्च ॥
(एतस्य व्यजनगुणा यथा,—
"तालपत्रमरुद्रूक्षः कोष्णो वातस्य शान्तिकृत् ।
निद्राकरः प्रीतिकरः शोषरोगविकारहा ॥
दाहपित्तश्रमग्लानिनाशनो भ्रमशान्तिकृत् ।
मधुरोऽतिश्रमघ्नः स्यादार्द्रत्वे कफकोपनः ॥"
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)
तालपत्रिका, स्त्री, (तालपत्री+स्वार्थे कन् टाप्
ह्रस्वश्च ।) मुषली । तालमूली । इति राज-
निर्घण्टः ॥ (तालमूलीशब्देऽस्या विवृति-
र्ज्ञातव्या ॥)
तालपत्री, स्त्री, (तालस्य पत्रमिव पत्रमस्याः ।)
मूषिकपर्णी । इति मेदिनी । रे, २६३ ॥ (यथा,
"गोजी च पिष्टा सह तालपत्र्या
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥"
इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ॥)
तालपर्णं, क्ली, स्त्री, (तालः खड्गमुष्टिरिव पर्ण-
मस्य ।) मुरानामगन्धद्रव्यम् । इति शब्द-
चन्द्रिका ॥
तालपर्णी, स्त्री, (तालस्य पर्णमिव पर्णमस्याः ।
ङीष् ।) मधुरिका । इति जटाधरः ॥ मुरा ।
इत्यमरः । २ । ४ । १२३ ॥
तालपुष्पकं, क्ली, (तालस्य पुष्पमिव पुष्पमस्य ।
कप् ।) प्रपौण्डरीकम् । इति शब्दरत्नावली ॥
तालभृत्, पु, (तालं बिभर्त्ति ध्वजरूपेणेति । भृ
+क्विप् ।) बलदेवः । इति त्रिकाण्डशेषः ॥
तालप्रलम्बं, क्ली, (ताले तालवृक्षे प्रलम्बते इति ।
प्र+लम्ब+अच् ।) तालजटा । यथा,—
"तथा तालप्रलम्बश्च रूक्षः पित्तरुजापहः ॥"
इति राजवल्लभः ॥
तालमूलिका, स्त्री, (तालमूली+स्वार्थे कन् टाप्
ह्रस्वश्च ।) तालमूली । इत्यमरः । २।४।११६ ॥
तालमूली, स्त्री, (तालस्य मूलमिव मूलमस्याः ।
ङीष् ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः ।
अर्शोघ्नी २ मुषली ३ ताली ४ खलिनी ५ ।

इति रत्नमाला ॥ सुवहा ६ तालपत्रिका ७ गोधापदी ८ हेमपुष्पी ९ भूताली १० दीर्घकन्दिका ११ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । वृष्यत्वम् । पुष्टिबलकफप्रदत्वम् । पिच्छिलत्वम् । पित्तदाहश्रमहरत्वञ्च । इति राजनिर्घण्टः ॥ उष्णवीर्य्यत्वम् । बृंहणत्वम् । गुरुत्वम् । तिक्तत्वम् । रसायनत्वम् । गुदजरोगानिलनाशित्वञ्च । इति भावप्रकाशः ॥

"मुषली च द्विधा प्रोक्ता श्वेता चापरसंज्ञका ।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी ॥"
इति राजनिर्घण्टः ॥

(अस्या विषयो यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वरे महाराजवट्याम् ।

"मायद्वयमितं भागं तालमूल्या रसेन च ।
पिष्ट्वा च वटिका कार्य्या चतुर्गुञ्जाप्रमाणतः ॥")

ताललक्ष्मा, [न्] पु, (ताल एव लक्ष्म चिह्नं यस्य ।) बलदेवः । इति हेमचन्द्रः । २।१३८॥

तालवृन्त, क्ली, (तालस्य तालपत्रस्य वृन्तं कारणत्वेन अस्ति अस्य । अच ।) व्यजनम् । इति हेमचन्द्रः । ३ । ३५१ । तालपातार पाखा इति भाषा ॥ (यदुक्तम्,—

"परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम् ।
तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते ॥")

तस्य वायुगुणः । त्रिदोषशमनत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ (सोमविशेषे, पु । यथा,—

"एक एव खलु भगवान् सोमः स्थाननामाकृतिवीर्य्यविशेषैश्चतुर्व्विंशतिधा भिद्यते ।"
"प्रतानवांस्तालवृन्तः करवीरोऽंशवानपि ॥"
इति सुश्रुते चिकित्सितस्थाने २९ अध्याये ॥)

तालवृन्तक, क्ली, (तालवृन्तमेव । स्वार्थे कन् ।) व्यजनम् । इत्यमरः । २ । ७ । १४० ॥

तालवेचनक, पु, (तालस्य वेचनं पृथक्करणं सस्थानेन नियमनं यत्र । कप् ।) नटः । इति शब्दरत्नावली ॥ तालरेचनकोऽपि पाठः ॥

तालव्य, त्रि, (तालोर्जातम् । तालु+"शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ।) तालुजातम् । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १७ ।

"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥")

तालाख्या, स्त्री, (ताल तालपर्णं आख्या यस्याः ।) सुरा । इति शब्दचन्द्रिका ॥

तालाङ्क:, पुं (तालस्तालवृक्ष अङ्को ध्वजो यस्य।) बलदेवः । इत्यमरः । १ । १ । २५ ॥ करपत्रम् । शाकभेदः । महालक्षणसम्पन्नपुरुषः । पुस्तकम् । हरः । इति हेमचन्द्रः ॥

तालावचर, पु, (तालेन अवचरति नृत्यतीति । अव+चर+अच् ।) नटः । इति त्रिकाण्डशेषः ॥

तालि, स्त्री, (तालयति प्रतिष्ठां जनयति । तल प्रतिष्ठायाम्+ णिच् + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इतीन् ।) भूम्यामलकी । इति रत्नमाला ॥ (ताड्यते निहन्यते मतिरनयेति । तड ताडने+णिच्+करणे इन् । डस्य लत्वम् ।) ताली । इत्यमरटीकायां भरतः ॥

तालिक:, पु, (तलेन करतलेन निर्वृत्तः । तल+"तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) प्रसारिताङ्गुलिपाणिः । तत्पर्य्यायः । चपेटः २ प्रतलः ३ तलः ४ प्रहस्तः ५ तालः ६ । इति हेमचन्द्रः । ३ । २३० ॥ (यथा, पञ्चतन्त्रे । २ । १३७ ।

"यथैकेन न हस्तेन तालिका सम्प्रपद्यते ।
तथोद्यमपरित्यक्तं न फलं कर्म्मणः स्मृतम् ॥")

लिखितस्य निबन्धनम् । तत्पर्य्यायः । काचनी २ काचनकी ३ । इति शब्दरत्नावली ॥

तालिका, स्त्री, (तलेन निर्वृत्ता । तल+ठक् । स्त्रियां टाप् ।) चपेटः । तालमूली । इति शब्दरत्नावली ॥ ताम्रवल्ली । इति राजनिर्घण्टः ॥

तालितं, क्ली, (ताड्यते यदिति । तड् ताडने+णिच्+क्तः । डस्य लत्वम् ।) वाद्यभाण्डम् । तुलितपटः । गुणः । इत्यजयः ॥

तालिश:, पुं, (तलतीति । तल गतौ+"इशः कप्यविवाड़िभ्यस्तलेस्तु णित् ।" १ । १३९ । इत्युणादिकोषटीकाधृतसूत्रात् इशः णित्वात् वृद्धिश्च ।) पर्व्वतः । इत्युणादिकोषः ॥

ताली, स्त्री, (तालि+कृदिकारादिति वा ङीष् ।) ताड़ी । ताड़ियात् इति भाषा । तामलकी । इत्यमरः । २ । ४ । १२७ ॥ भूँइ आमला इति भाषा ॥ (अस्याः पर्य्याया यथा,—

"बहुपुष्पी जटाध्यक्षा ताली भूम्यामलक्यपि ।
तामलक्यजटा सूक्ष्मफला चेत्रामलक्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

तुवरिका । इति शब्दरत्नावली ॥ तालमूली । इति रत्नमाला ॥ प्रतिताली । कुञ्चिकाविशेषः । इति हेमचन्द्रः ॥ ताम्रवल्ली । इति राजनिर्घण्टः ॥ सुराभेदः । इति स्मृतिः ॥ ताड़ी इति भाषा ॥ (करास्फालनम् । यथा, अम्बाष्टके । ५ ।

"यालीभिरात्मतनुतालीसकृत् प्रियकपालीषु खेलति भय-
व्यालीनकुल्यसितचूलीभरा चरणधूलीलसन्मुनिवरा ॥")

तालीपत्र, क्ली, (ताल्याः पत्रमिव पत्रमस्य ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥

तालीशं, क्ली, (तालीव श्यति नाशयति रोगानिति । शो नाशे+डः ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥

तालीशपत्र, क्ली, (तालीशं रोगनाशकं पत्रं यस्य ।) वृक्षविशेषः । तत्पर्य्यायः । तालीशम् २ पत्राढ्यम् ३ शुकोदरम् ४ धात्रीपत्रम् ५ अर्कवेधम् ६ करिपत्रम् ७ करिच्छदम् ८ नीलम् ९ नीलाम्बरम् १० तालम् ११ तालीपत्रम् १२ तमाह्वयम् १३ तालीशपत्रकम् १४ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । कफवातकासहिक्काक्षयश्वासच्छर्द्दिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । अरुचिगुल्मामवह्निमान्द्यनाशित्वञ्च । इति भावप्रकाशः ॥ भूम्यामलकी । इति मेदिनी । शे, ३०३ ॥

तालु, क्ली, (तरन्त्यनेन वर्णा इति । तॄ+"त्रोरश्च लः ।" उणां । १ । ५ । इति ञुण् रस्य लश्च ।) जिह्वेन्द्रियाधिष्ठानम् । यथा, शौनकसंहितायाम् ।

"सुश्रुतस्तालु निर्भिद्य जिह्वा तत्रोपजायते ।
ततो नागरसो जज्ञे जिह्वया योऽधिगम्यते ॥"

तेलुया इति टाकरा इति च भाषा ॥ तत्पर्य्यायः । काकुदम् २ । इत्यमरः । २ । ६ । ९१ ॥ तालुकम् ३ । इति राजनिर्घण्टः ॥

तालुजिह्व:, पु, (तालु एव जिह्वा यस्य ।) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१५ ॥

तालूर:, पु, (तालयतीति । तल+णिच्+बाहुलकात् ऊरः ।) आवर्त्तः । इति हेमचन्द्रः । ४ । १४२ ॥

तावकीनं, त्रि, तव इदम् । (युष्मद्+"युष्मदस्मदोरन्यतरस्यां खञ्च ।" ४ । ३ । १ । इति खञ् । तस्, "तवकममकावेकवचने ।" ४ । ३ । ३ । इति तवकादेशः ।) त्वदीयम् । इति व्याकरणम् ॥ तोमार एइ इति भाषा ॥

तावत्, अ, (तत् परिमाणमस्य । तद्धिता इति बहुवचनेनाम्येऽयुक्ता अपि ज्ञापितास्तेन तावतु प्रत्ययः ।) साकल्यम् । अवधिः । मानम् । (यथा, कुमारे । ५ । ६७ ।

"त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ॥"

"तावत् इति मानार्थे यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः ॥" इति तट्टीकायां मल्लिनाथः ॥) अवधारणम् । इत्यमरः । ३।३।२४५॥ (यथा, माघे । २ । ६३ ।

"इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः ॥")

प्रशंसा । पक्षान्तरम् । इति शब्दरत्नावली॥ (तत्परिमाणमस्येति । "यत्तदेतेभ्यः परिमाणे वतुप् ।" ५ । २ । ३९ । इति वतुप् प्रत्ययेन तत्परिमाणे, त्रि । यथा, भागवते । ३।२६।१२।

"महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः ।
तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे ॥")

तावर, क्ली, धनुर्गुणः । इति भूरिप्रयोगः ।

ताविष:, पुं, (तव्यते गम्यते सत्कर्म्मिभिरत्र । तव सौत्रो धातुः+"तवेर्णिद्वा ।" उणां । १ । ४८ । इति टिषच् स च णित् ।) स्वर्गः । समुद्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

ताविषी, स्त्री, (तवति सौन्दर्य्यं गच्छतीति । तव+टिषच् स च णित् । टित्वात् ङीप् ।) देवकन्या । नदी । पृथिवी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

तावीष, पु, (ताविष+पृषोदरादित्वात् दीर्घः ।) स्वर्गः । अम्बुधिः । काञ्चनम् । इति मेदिनी । षे, ३७ ॥

तावीषी, स्त्री, (ताविषी+पृषोदरादित्वात् दीर्घः।) चन्द्रकन्या। इति मेदिनी। ते, ३८॥ (इन्द्रकन्या। इति कुत्रचित्॥)

तावुरिः, पु, वृषराशिः। इति दीपिका॥

तिक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ऋ, अतितिकत्। ङ, तेकते। इति दुर्गादासः॥

तिक, न आस्कन्दे। वधे। इति कविकल्पद्रुमः॥ (स्वा-परं-सकं-सेट्।) न, तिक्नोति। इति दुर्गादासः॥

तिक्तं, क्ली, (तेजयतीति। तिज+बाहुलकात् क्तः।) पर्पटिकौषधिः। इति हेमचन्द्रः॥

तिक्तः, पु, (तेजयतीति। तिज+सामान्यापेक्षज्ञापकात् चुरादीनां णिजभावे गत्यार्थाकर्म्मकेति क्तः।) रसविशेषः। तित इति भाषा॥ (यथा, सुश्रुते। १। ४२।
"यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिञ्चापादयति हर्षञ्च स तिक्तः॥")
स वाय्वाकाशगुणबाहुल्यात् भवति। इति शिवदासः॥ तस्य गुणाः। जन्तुकुष्ठज्वरारोचकासदाहनाशित्वम्। रोचनत्वम्। इति राजनिर्घण्टः॥ शीतलत्वम्। तृष्णामूर्च्छापित्तकफविषोत्क्लेशरक्तगदनाशित्वम्। स्वयमरोचिष्णुत्वम्। कण्ठस्तन्यास्यशोधनत्वम्। वातलत्वम्। अग्निकारित्वम्। नासाशोषणत्वम्। रूक्षत्वम्। लघुत्वञ्च। अतियुक्तस्य तस्य गुणाः। शिरःशूलमन्यास्तम्भश्रमार्त्तिकम्पमूर्च्छाभ्रमकारित्वम्। बलशुक्रक्षयप्रदत्वञ्च। इति भावप्रकाशः॥ *॥
("तिक्ताख्यो वत वातलोऽपि हि तृष्णा कुष्ठादि दोषापहः
सोऽन्तः सर्व्वरुजापहो भ्रमहरो रुच्योऽपि सन्दीदहृत्।
जिह्वास्फोटकनाशनोऽथ भवति चौषधताना हितो
वक्त्रोत्क्रान्तिहरः प्रशस्तगुणधृत् निम्बादिकाना रस॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥)
सुगन्धः। इति मेदिनी। ते, २१॥ (सुरभिः। यथा, माघे। ५। ३३।
"नादातुमन्यकरिमुक्तमदाम्बुतिक्तं
धूताङ्कुशेन न विहातुमपीच्छताम्भः॥"
तिक्तस्तिक्तरसोऽस्त्यस्येति। अर्श आदित्वात् अच्।) कुटजवृक्षः। इति शब्दचन्द्रिका॥ वरुणवृक्षः। इति शब्दमाला॥ तिक्तरसयुक्ते, त्रि। इत्यमरः। १। ५। ९॥

तिक्तकः, पु, (तिक्तेन तिक्तरसेन कायतीति। कै+कः।) पटोलः। इत्यमरः। २। ४। १५५॥ चिरतिक्तः। इति शब्दरत्नावली॥ चिरता इति भाषा॥ (यथा, वाभटे चिकित्सितस्थाने। ३।
"पित्तकासे तनुकफे त्रिवृता मधुरैर्युताम्।
युञ्ज्यात् विरेकाय युतां घार्श्वेणापि तिक्तकैः॥")
कृष्णखदिरः। इति शब्दमाला। इङ्गुदीवृक्षः। इति भावप्रकाशः॥ (तिक्तप्रधाने, त्रि। यथा, सुश्रुते। ४। २४।
"निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा॥")
इथागा गणः। यथा चक्रपाणिसंग्रहे ज्वराधिकारे।
"लभ्यते सलिलस्तोयं दद्याद्वातकफज्वरे।
मद्योत्थे पैत्तिके चापि शीतलं तिक्तकैः शृतम्॥"
"मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः।
शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये॥"
"तिक्तकैः शृतमिति यदुक्तं तदाह मुस्तेत्यादि।"
इति तट्टीका॥)

तिक्तकन्दिका, स्त्री, (तिक्तरसप्रधानः कन्दो मूलं सोऽस्त्यस्या इति। तिक्तकन्द+ठन्।) गन्धपत्रा। इति राजनिर्घण्टः॥

तिक्तका, स्त्री, (तिक्तेन रसेन कायतीति। कै+कः।) कटुतुम्बी। इति शब्दरत्नावली॥ (कटुतुम्बीशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तिक्तगन्धिका, स्त्री, (तिक्तो गन्धो यस्याः। कप् ततष्टाप् अत इत्वञ्च।) वराहक्रान्ता। इति शब्दमाला॥

तिक्तगुञ्जा, स्त्री, (गुञ्जेव तिक्ता। राजदन्तादित्वात् प्राङ्‌निपातः।) करञ्जः। तत्पर्य्यायः। क्षुद्ररसा २ रसघा ३ विह्वपर्कटी ४। इति हारावली। १०१॥

तिक्ततण्डुला, स्त्री, (तिक्तस्तण्डुलोऽन्तःशस्यं यस्याः।) पिप्पली। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—
"पिप्पली चपला शौण्डी वैदेही मागधी कणा।
कृष्णोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला॥"
इति वैद्यकरत्नमालायाम्॥)

तिक्ततुण्डी, स्त्री, (तिक्ततुम्बी। पृषोदरादित्वात् साधुः।) कटुतुम्बीलता। इति राजनिर्घण्टः॥

तिक्ततुम्बी, स्त्री, (तिक्ता तुम्बी।) कटुतुम्बी। इति रत्नमाला॥

तिक्तदुग्धा, स्त्री, (तिक्तं दुग्धं क्षीरं यस्याः।) क्षीरिणी। अजशृङ्गी। इति राजनिर्घण्टः॥

तिक्तधातुः, पु, (तिक्तस्तिक्तरसप्रधानो धातुः।) पित्तम्। इति राजनिर्घण्टः॥

तिक्तपत्त्रः, पु, (तिक्तानि पत्त्राणि यस्य।) काकोटकः। इति हेमचन्द्रः। ४। २५६॥ काकरोल इति भाषा॥

तिक्तपर्व्वा, [न्] पु, (तिक्तं पर्व्व ग्रन्थिर्यस्य।) दूर्व्वा। इति जटाधरः॥ स्त्री, हिलमोचा। गुडूची। यष्टिमधु। इति मेदिनी। ने, ७७॥

तिक्तपुष्पा, स्त्री, (तिक्तानि पुष्पाणि यस्याः।) पाठा। इति राजनिर्घण्टः॥ (पाठाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तिक्तफलः, पु, (तिक्तानि फलानि यस्य।) कतकवृक्षः। इति राजनिर्घण्टः॥

तिक्तफला, स्त्री, (तिक्तानि फलानि यस्याः।) यवतिक्तालता। वार्त्ताकी। षड्भुजा। इति राजनिर्घण्टः॥

तिक्तभद्रकः, पु, (तिक्तस्तिक्तरसप्रधानो भद्रो हितकारी चेति कर्म्मधारयः। ततः स्वार्थे कन्।) पटोलः। इति शब्दचन्द्रिका॥

तिक्तमरिचः, पु, (तिक्तो मरिच इव।) कतकवृक्षः। इति राजनिर्घण्टः॥

तिक्तरोहिणिका, स्त्री, (तिक्तरोहिणी+स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) कटुका। इति रत्नमाला॥

तिक्तरोहिणी, स्त्री, (तिक्ता सती रोहतीति। रुह+णिनि+ङीप्।) कटुका। इति राजनिर्घण्टः॥ (कटुरोहिणीशब्देऽस्या विवृतिर्ज्ञातव्या॥)

तिक्तवल्ली, स्त्री, (तिक्ता वल्ली।) मूर्व्वालता। इति रत्नमाला॥

तिक्तवीजा, स्त्री, (तिक्तं वीजमस्याः।) कटुतुम्बी। इति राजनिर्घण्टः॥

तिक्तशाकः, पु, (तिक्तः शाको यस्य।) खदिरवृक्षः। वरुणवृक्षः। (अस्य पर्य्याया यथा,—
"वरुणस्तिक्तशाकश्च सेतुवृक्षोऽश्मभित् मतः॥"
इति वैद्यकरत्नमालायाम्॥)
पत्रसुन्दरवृक्षः। इति मेदिनी। के, १९१॥

तिक्तसारं, क्ली, (तिक्तः सारो निर्य्यासो यस्य।) दीर्घरोहिषकतृणम्। इति राजनिर्घण्टः॥

तिक्तसारः, पु, (तिक्तः सारो निर्य्यासोऽस्य।) खदिरवृक्षः। इति रत्नमाला॥ (खदिरशब्देऽस्य गुणादयो ज्ञेयाः॥)

तिक्ता, स्त्री, (तिक्तस्तिक्तरसोऽस्त्यस्याः। अच् ततष्टाप्।) कटुरोहिणी। इति मेदिनी। ते, २२॥ (यथास्याः पर्य्यायाः।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
पाठा। इति रत्नमाला। यवतिक्तालता। षड्भुजा। इति राजनिर्घण्टः॥ छिक्किनी। इति भावप्रकाशः॥

तिक्ताख्या, स्त्री, (तिक्ता आख्या अभिधानं यस्याः।) कटुतुम्बी। इति राजनिर्घण्टः॥

तिक्ताङ्गा, स्त्री, (तिक्तं अङ्गं यस्याः।) पातालगरुडीलता। इति राजनिर्घण्टः॥

तिक्तिका, स्त्री, (तिक्ता+स्वार्थे कन्। टापि अत इत्वम्।) कटुतुम्बी। इति शब्दरत्नावली॥

तिग, न हिंसायाम्। आस्कन्दे। इति कविकल्पद्रुमः॥ (स्वा-परं-सकं-सेट्।) न, तिग्नोति। आस्कन्दं केचिन्न मन्यन्ते। इति दुर्गादासः॥

तिग्मं, क्ली, (तेजयति उत्तेजयतीति। तिज+"युजिरुचितिजां कुश्च।" उणां। १। १४५। इति मक् कवर्गश्चान्तादेशः।) तीक्ष्णम्। [illegible]। तद्वति, त्रि। इत्यमरः। ३। ४। ९५॥ (यथा, महाभारते। १। ३०। ११।
"तिग्मनाभिरिया [illegible] महायशाः॥"
वज्रम्। इति निघण्टुः। २। २०॥ पु, क्षत्रियविशेषः। यथा, विष्णुपुराणे। ४। २१। ३।

"ततो म्टदुसखात् तिग्मस्तिग्मात् हृद्दद्मथः ॥"
मत्स्यपुराणमते तु अय उर्व्वस्य सुतः । यथा, तत्रैव । ५० । ८४ ।
"उर्व्वो भार्यो सुतस्तस्य तिग्मात्मा तस्य चात्मजः ।
तिग्मात् हृद्दद्मथो भार्यो वसुदामा हृद्दद्मथात् ॥"
अय तिमिरित्याख्ययापि प्रसिद्धः । इति राजावली ॥ अस्य राज्यपालनकालादिक तिमिशब्दे द्रष्टव्यम् ॥)

तिग्मांशुः, पुं, (तिग्मास्तीक्ष्णा अंशवः किरणानि यस्य ।) सूर्य्यः । इति हलायुधः ॥ (यथा, महाभारते । १ । २ । १३६ ।
"धौम्योपदेशात् तिग्मांशुप्रसादादन्नसम्भवः ॥"
अग्निः । यथा, महाभारते । १ । २३३ । १८ ।
"इद वै सद्म तिग्मांशो वरुणस्य परायणम् ॥"
तीक्ष्णकिरणे, त्रि ॥)

तिघ, न घातने । इति कविकल्पद्रुमः ॥ (स्वां-परसक-सेट् ।) न, तिघ्नोति । तिव घाते इति जौमरा. पठन्ति । तेन तदर्थकथनमेवोचितम् । ततश्च घातनमिति हन्त्यर्थस्य णाधिकचुरादित्वेन हन्तेः स्वार्थे णौ रूपम् । हननमित्यर्थः । किञ्च । हिंसनपाठेनैवेष्टसिद्धे घातनपाठो हिंसाप्रेरणार्थः स्यान्न वेति काकदन्तान्वेषणवद्विफलं चयाणामेव कातन्त्राद्यसम्मतत्वात् । इति दुर्गादासः ॥

तिज, क ग्रिते । इति कविकल्पद्रुमः ॥ (चुरां-पर-सक-सेट् ।) क, तेजयति । ग्रितं तीक्ष्णीकरणम् । इति दुर्गादासः ॥

तिज, ड क्षान्तौ । निशाने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) क्षान्तिः सहनम् । ङ, तितिक्षते दुःख दीनः । तेजते । तत्र तिवादयो न प्रयुज्यन्ते । इति रमानाथ । इति दुर्गादासः ॥

तिजिलः, पु, (तेजयति तीक्ष्णीकरोति । यद्वा, तिज्यते सह्यते सर्व्वैरिति । तिज+"गुपादिभ्य कित् ।" उणां । १ । ५७ । इति इलच् स च कित् ।) चन्द्रः । इत्युणादिकोषः ॥ राक्षसः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तिष्टी, स्त्री, त्रिवृत् । इति शब्दचन्द्रिका ॥ (त्रिवृत्-शब्दे गुणादिरस्या ज्ञातव्यः ॥)

तितउः, पु, (तन्यन्ते भ्रष्टयवा अत्रेति । तन विस्तारे+"तनोतेर्डउः सन्वच ।" उणां । ५ । ५२ । इति डउः सन्वच तेन अभ्यासस्येत्वादिकार्य्यम् ।) चालनी । इत्यमरः । २ । ९ । २६ ॥ हेमचन्द्रस्र । ४ । ८४ ॥ (यथा, ऋग्वेदे । १० । ७१ । २ ।
"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ॥"
यथाच,—
"सूपवद्दोषसंत्यज्य गुणं गृह्णन्ति साधव ।
दोषग्राही गुणत्यागी असाधुस्तितउर्यथा ॥"
इत्युद्भटः ॥
"ह्रौदच्छिद्रसमोपेतं चालनं तितउ स्मृतम् ॥"

इत्युक्तेरस्य क्लीवत्वमपि ॥ छत्रम् । इति उज्ज्वलदत्तः । ५ । ५२ ॥)

तितिक्षा, स्त्री, (तिज+स्वार्थे सन्+"अ प्रत्ययात् ।" ३ । ३ । १०२ । इति अ ततष्टाप् ।) क्षान्तिः । इत्यमर. । १ । ७ । २४ ॥ (परापराधसहनम् । यथा, भागवते ।७।१९।३६।
"शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥")
शीतोष्णादिद्वन्द्वसहिष्णुता । इति वेदान्तसारः ॥ (यथा, भागवते । ४ । २२ । २४ ।
"यमैरकामैर्नियमैश्चाप्यनिन्दया
निरीहया द्वन्द्वतितिक्षया च ॥")

तितिक्षितः, त्रि, (तितिक्षा सञ्जातास्य । "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) क्षान्तः । इति जटाधरः ॥

तितिक्षुः, त्रि, (तितिक्षते इति । तिज क्षमायाम्+"गुप्तिज्किद्भ्यः सन् ।" ३ । १ । ५ । इति सन् । ततः तितिक्ष+"सनाशंसभिक्ष उ. ।" ३ । २ । १६८ । इत्युः ।) क्षमाशीलः । क्षान्तः । इत्यमरः । ३ । १ । ३१ ॥ (यथा, महाभारते । १ । ८७ । ६ ।
"अक्रोधनः क्रोधनेभ्यो विशिष्ट-
स्तथा तितिक्षुरतितिक्षोर्विशिष्टः ॥"
पुरुवंशीयस्य महामनसः पुत्त्रविशेषः । यथा, हरिवंशे । ३१ । २१ ।
"महामनास्तु पुत्त्रौ द्वौ जनयामास भारत ।
उशीनरञ्च धर्म्मज्ञ तितिक्षुञ्च महाबलम् ॥")

तितिभः, पु, (तितीति शब्देन भणतीति । भण+ड ।) इन्द्रगोपकीटः । इति हेमचन्द्रः ।४।२७५॥

तितिल, क्ली, (तिलति स्निह्यतीति । तिल+वाहुलकात् कः द्वित्वञ्च ।) नन्दकम् । नादा इति भाषा । वैतिलकरणम् । तिलपिष्टकम् । इत्यजयः ॥

तित्तिरः, पु (तित्ति इति शब्द राति ददातीति । रा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) तित्तिरिपक्षी । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ६ । ३८ ।
"निष्क्रामन्ति ततस्तेषु निष्क्रामन्ति शिरःस्वथ ।
कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सहशः ॥"
अस्य गुणाः । यथा,—
"तथैव तित्तिरो रुच्यो मेधाग्निबलवर्द्धनः ।
सर्व्वदोषहरो वर्ण्यो लावकैः समतागुणैः ॥
कृष्णगौरावभेदाश्च श्रेष्ठो गौरश्च तित्तिरः ।
तृतीयस्तित्तिरोऽन्योऽपि सामान्यगुणलक्षणैः ।
सवातलोऽतिवलकृद्घनः किञ्चिद्विदायनः ॥"
इति हारीते प्रथमे स्थाने ११ अध्याये ॥
जनपदविशेषः । तद्देशजाते बहुवचनान्तः । यथा, महाभारते । ६ । ४७ । ५० ।
"वाह्लीकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च भारत ॥)

तित्तिरिः, पु, (तरतीति । तॄ+"तरतेः सन्वल्लुक् चाभ्यासस्य ।" उणां । ४ । १४२ । इत्यत्र उज्ज्वलदत्तधृतसूत्रात् इः सन्वत्कार्य्यमभ्यासस्य । तुगागमश्च ।) पक्षिविशेषः । तितिरि इति

भाषा । तत्पर्य्यायः । तित्तिरः २ । इति शब्दरत्नावली ॥ तितिरिः ३ तैतिरः ४ याजुर्योदरः ५ । अस्य मांसस्य गुणाः । रुच्यत्वम् । लघुत्वम् । वीर्य्यबलप्रदत्वम् । कषायत्वम् । मधुरत्वम् । शीतत्वम् । त्रिदोषशमनत्वञ्च । इति राजनिर्घण्टः ॥
"तित्तिरिः कृष्णवर्णः स्यात् स तु गौरः कपिञ्जलः ।
तित्तिरिर्व्वर्णदो ग्राही हिक्कादोषत्रयापहः ।
श्वासकासज्वरहरस्तस्मादीरोऽधिको गुणः ॥"
इति भावप्रकाशः ॥
मुनिविशेषः । इति विश्वः ॥ (यथा, महाभारते । २ । ४ । १२ ।
"तित्तिरिर्याज्ञवल्क्यश्च ससुतो लोमहर्षणः ॥")
तैत्तिरीशाखा । इत्युणादिकोषः ॥ (नागविशेषः । यथा, महाभारते । १ । ३५ । १५ ।
"कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा ॥"
तथा च स्कान्दे सह्याद्रिखण्डे । ४ । ५ ।
"तित्तिरिर्हरिभद्रश्च जम्बुरङ्गो बलाहकः ॥")

तिथः, पु, (तेजयतीति । तिज+"तिथपृष्ठगूथयूथप्रोथाः ।" उणां । २ । १२ । इति थक्प्रत्ययेन निपातनात् साधुः ।) अग्निः । कामः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ कालः । इति त्रिकाण्डशेषः ॥ प्राष्टट्कालः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तिथि , स्त्री पु, (तनोति विस्तारयति चन्द्रकलामिति । तन्यते चन्द्रकलयेति वा । तन+वाहुलकात् इथिन् नादिलोपश्च । तदुक्तं "तन्यन्ते कलया यस्मात् तस्मात् तास्तिथयः स्मृताः ।" इति । यद्वा, अततीति । अत सातत्यगमने+"ऋतन्यञ्जीति ।" उणां । ४ । २ । इथिन् प्रत्ययेन अतिथिरिति सिद्धे वाहुलकात् अलोपः । इति वर्णविवेकः ।) चन्द्रकलाक्रियारूपा । चन्द्रकलाक्रियोपलक्षितः काल इति वा । तस्याः स्वरूपं यथा,—
"अमादिपौर्णमास्यन्ता या एव शशिनः कलाः ।
तिथयस्ताः समाख्याताः षोडशैव वरानने ॥
तत्र प्रथमकलाक्रियारूपा प्रतिपत् एव द्वितीयादिकलाक्रियारूपा द्वितीयादि । सा च वृद्धिरूपा चेत् शुक्ला ह्रासरूपा चेत् कृष्णा ॥ यथा,
"तत्र पक्षावुभौ मासे शुक्लकृष्णक्रमेण हि ।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षत्यादयस्तु तिथयः क्रमात् पञ्चदश स्मृताः ।
दर्शान्ता कृष्णपक्षे सा. पूर्णिमान्ताश्च शुक्लके ॥
गोभिलोक्तामावास्याघटकोपक्षयोभावापन्नसमसूत्रपातन्यायेन राश्येकावच्छेदेन सहावस्थानयुक्तार्कमण्डलाचन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकनिर्गमरूपवियोगेन शुक्लायाः प्रतिपदादितत्तत्तिथ्युत्पत्तिः । एव गोभिलोक्तपौर्णमासीघटकसप्तमराश्यवस्थानरूपपरमवियोगानन्तरमर्कमण्डलप्रवेशाय चन्द्रमण्डलस्य राशिद्वादशांशद्वादशांशभोगात्मकप्रवेशरूपसन्निकर्षेण कृष्णायास्तत्तत्तिथेरुत्पत्तिरिति ।

यथा,—

अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी।
भागैर्द्वादशभिस्तत् स्यात्तिथिश्चान्द्रमसं दिनम्॥
त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते।
आदित्याद्विप्रकृष्टस्तु भागं द्वादशकं यदा॥
चन्द्रमाः स्यात्तदा राम तिथिरित्यभिधीयते॥*॥

सा देवकृत्ये पूर्व्वाह्णयुता ग्राह्या। एकादश्युपवासातिरिक्तस्थले सर्व्वत्र त्रिसन्ध्यव्यापिनी ग्राह्या॥*॥

अथ प्रतिपत्।

सा च कृष्णा द्वितीयायुता ग्राह्या शुक्ला अमावस्यायुता ग्राह्या कृष्णाप्युपवासे द्वितीयायुता न ग्राह्या। अत्र तैलाभ्यङ्ग कुष्माण्डभक्षणं चौरञ्च न कार्य्यम्॥*॥

अथ द्वितीया।

सा च कृष्णा पूर्व्वयुता शुक्ला परयुता ग्राह्या। भ्रातृद्वितीया तु अष्टधाविभक्तदिनपञ्चमांशयुता ग्राह्या उभयदिने तल्लाभे परयुता ग्राह्या। तत्र वृहतीभक्षणं न कार्य्यम्॥*॥

अथ तृतीया।

सा च रम्भाव्रतेतरदैवकार्य्येषु चतुर्थीयुता ग्राह्या रम्भाव्रते तु द्वितीयायुता। तत्र मांसभक्षणं पटोलभक्षणञ्च न कार्य्यम्॥*॥

अथ चतुर्थी।

सा च पञ्चमीयुता ग्राह्या। विनायकव्रते तृतीयायुता ग्राह्या। मङ्गलवारे शुक्ला चतुर्थी अक्षया। अत्र मूलकभक्षणं चौरं प्रदोषे अध्ययनञ्च न कार्य्यम्। भाद्रमासे चतुर्थ्यां चन्द्रो न द्रष्टव्यः। प्रमाददृष्ट्वा,—

सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक। मा रोदीस्तव ह्येष स्यमन्तकः॥

अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम्॥*॥

अथ पञ्चमी।

सा च चतुर्थीयुता ग्राह्या अत्र विल्वं न भोक्तव्यम्॥*॥

अथ षष्ठी।

सा सप्तमीयुता ग्राह्या। स्कन्दषष्ठी तु पञ्चमीयुता ग्राह्या अस्यां शिरोऽभ्यङ्गो निम्बभक्षणञ्च न कर्त्तव्यम्॥*॥

अथ सप्तमी।

सा षष्ठीयुता ग्राह्या तत्र तालं न भक्षयेत्। शुक्लपक्षस्य सप्तम्यां यदि रविवारो भवेत् सा विजया सप्तमी। माघमासस्य शुक्लसप्तम्यां दिवाकरा रथमापुः तस्मात् सा रथसप्तमी॥ सा मन्वादिश्च। तस्यां अध्ययनं न कर्त्तव्यम्॥*॥

अथाष्टमी।

सा शुक्ला नवमीयुता ग्राह्या कृष्णा सप्तमीयुता। तत्राध्ययनं नारिकेलभक्षणञ्च न कर्त्तव्यम्॥ शनिवारे अथवा मङ्गलवारे कृष्णाष्टमी पुण्यदा। बुधवारे शुक्लाष्टमी अक्षया। दूर्व्वाष्टमी पूर्व्वविद्धा ग्राह्या। जन्माष्टमीव्यवस्था तच्छब्दे द्रष्टव्या॥*॥

अथ नवमी।

सा चाष्टमीयुता ग्राह्या। तत्रालाबुभक्षणं न कर्त्तव्यम्। माघस्य शुक्ला नवमी महानन्दा। रामनवमीव्यवस्था तच्छब्दे द्रष्टव्या॥*॥

अथ दशमी।

सा च शुक्ला एकादश्या कृष्णा तु नवम्या युता ग्राह्या। अत्र कलम्बीभक्षणं न कर्त्तव्यम्॥*॥ एकादशीव्यवस्था श्रीविष्णोः शयनव्यवस्था च तत्तच्छब्दे द्रष्टव्या॥*॥ अथ द्वादशी।

सा च एकादशीयुता ग्राह्या। अत्र पूतिकाभक्षणं न कर्त्तव्यम्। फाल्गुनस्य शुक्ला द्वादशी पुष्यनक्षत्रयुक्ता चेत् गोविन्दद्वादशी॥*॥

अथ त्रयोदशी।

सा च शुक्ला द्वादशीयुता कृष्णा परयुता ग्राह्या। अत्र वार्त्ताकीभक्षणं न कर्त्तव्यम्॥*॥

अथ चतुर्द्दशी।

सा शुक्ला पूर्णिमायुता कृष्णा त्रयोदशीयुता ग्राह्या। तत्र माषो न भोक्तव्यः। ज्यैष्ठकृष्णचतुर्द्दश्यां प्रदोषे सावित्रीव्रतं कर्त्तव्यम्। तत्र यदा त्रयोदशी दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि चतुर्द्दशी भवेत् तद्दिने व्रतं कर्त्तव्यम्। पूर्व्वाह्णे तद्विधत्वेऽपि पराह्णे त्रिसन्ध्यव्यापित्वे पराह्ण एव। यदा तु पूर्व्वापरयोर्न तथाविधा तदापि पराह्ण एव। भाद्रे मासि कृष्णा चतुर्द्दशी अघोरा। माघे कृष्णा चतुर्द्दशी रटन्ती। शिवरात्रिव्यवस्था तच्छब्दे द्रष्टव्या॥*॥

अथ पौर्णमासी।

तत्र मांसं न भोक्तव्यम्। सा च चतुर्द्दशीयुता ग्राह्या। सा तु माघर्क्षयुता चेत् तदा महती। कार्त्तिकमासे कृत्तिकानक्षत्रयुता पौर्णमासी महाकार्त्तिकी एवमन्यत्रापि। महाज्यैष्ठीव्यवस्था तच्छब्दे द्रष्टव्या। कोजागरव्यवस्था तच्छब्दे द्रष्टव्या॥*॥ अथामावस्या।

अत्र मांसं न भोक्तव्यम्। सा प्रतिपद्युता ग्राह्या। मङ्गलवारे यदि अमावस्या भवेत् तदा अरुणोदयमारभ्य मौनी भूत्वा यो गङ्गायां स्नायात् स सहस्रगोदानजन्यफलमाप्नुयात्। अमावस्याश्राद्धव्यवस्था श्राद्धशब्दे द्रष्टव्या। पौषमाघयोरमावास्या यदि रविवारविवारव्यतीपात-श्रवणनक्षत्रयुक्ता भवति तदा अर्द्धोदययोगः स्यात्। अयं कोटिसूर्य्यग्रहतुल्यः अत्र तावज्जलं गङ्गोदकतुल्यं यत्किञ्चिद्दानं मेरुसन्निभञ्च भवति। इति तिथ्यादितत्त्वम्॥ तिथिशान्तं माघशब्दे द्रष्टव्यम्॥

तिथिक्षयः, पु, (तिथीनां तिथ्युपलक्षितचन्द्रकलानां क्षयो यत्र।) अमावस्या। इति शब्दार्थकल्पतरुः॥ दिनक्षयः। म्रग्रहर्षः। यथा,—

“एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा।
तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्॥”

अपिच।

“शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये।”
इति तिथ्यादितत्त्वम्॥

तिथिप्रणी, पु, (तिथिं प्रणयति ह्रासवृद्धिरूपकलाक्रिययेति। प्र+नी+क्विप् णत्वञ्च।) चन्द्रः। इति हेमचन्द्रः। २। १८॥

तिथी, स्त्री, (तिथिः। कृदिकारादिति वा ङीष्।) तिथिः। इति भरतः॥ (यथा, महाभारते। १३। ८७। १८।

“कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्द्दशीम्।
श्राद्धकर्म्मणि तिथ्यस्तु प्रशस्ता न तथेतराः॥”)

तिनाशकः, पु, (तिनिश एव। स्वार्थे कन्। पृषोदरादित्वात् आत्वम्।) तिनिशवृक्षः। इति शब्दरत्नावली॥

तिनिशः, पु, (अतिशयेन नेशतीति। निश समाधौ+“इगुपधेति।” ३। १। ११५। इति कः। यद्वा, अतिक्रान्तो निशाः अत्यादय इति समासः। पृषोदरादित्वात् साधुः।) वृक्षविशेषः। मथुरादौ तिनाश इति ख्यातः। कुत्रचित् सादन इति ख्यातश्च। तत्पर्य्यायः। स्यन्दनः २ नेमी ३ रथद्रुः ४ अतिमुक्तकः ५ वञ्जुलः ६ चित्रकृत् ७। इत्यमरः। २।४।२६॥ चक्री ८ शताङ्गः ९ शकटः १० रथः ११ रथिकः १२ भस्मगर्भः १३ मेषी १४ जलधरः १५। (यथा, सुश्रुते चिकित्सितस्थाने। १९।

“शल्लकीवदरीविल्वपलाशतिनिशत्वचः॥”)

अस्य गुणाः। कषायत्वम्। उष्णत्वम्। कफरक्तातीसारवातामयनाशित्वम्। ग्राहकत्वम्। दाहजनकत्वञ्च। इति राजनिर्घण्टः॥

तिन्तिडः, पु, (तिम्यते क्लिद्यते मुखाद्यनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिडीकः। ततः पृषोदरादित्वात् साधुः।) चिञ्चा। वृक्षाम्लः। इति विश्वः॥ दैत्यभेदः। इति हेमचन्द्रः॥

तिन्तिडिका, स्त्री, (तिन्तिडी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च।) तिन्तिडी। इति शब्दरत्नावली॥

तिन्तिड़ी, स्त्री, (तिम्यते क्लिद्यते मुखाभ्यन्तरमनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिड़ीका। ततः पृषोदरादित्वात् साधुः।) वृक्षविशेषः। तेतुल् इति भाषा॥ तत्पर्य्यायः। चिञ्चा २ अम्लिका ३। इत्यमरः। २। ४। ४३॥ तिन्तिडिकः ४ तिन्तिडीकम् ५ तिन्तिड़ीका ६ अम्लीका ७ आम्लिका ८ आम्लीका ९। इति तट्टीका॥ तिन्तिली १० तिन्तिलिका ११ आम्लिका १२ चुक्रः १३ चुक्रा १४ चुक्रिका १५ अम्ला १६ अत्यम्ला १७ भक्ता १८ शुक्तिका १९ चारित्रा २० गुरुपत्रा २१ पिच्छिला २२ यमदूतिका २३। इति शब्दरत्नावली॥ शाकचुक्रिका २४ सुचुक्रिका २५ सुतिन्तिडा २६। अस्या आमफलस्य गुणाः। अत्यम्लत्वम्। पथ्यमितकारित्वञ्च। इति राजनिर्घण्टः॥ वातनाशित्वम्॥ अस्याः पक्वफलस्य गुणाः। दीपनत्वम्। रुचिकारित्वम्। भेदित्वम्। उष्णत्वम्। कफवातनाशित्वञ्च। इति राजवल्लभः॥ विष्टम्भनाशित्वम्। मधुराम्लत्वम्। मिष्टदाहस-

कफदोषप्रकोपणत्वञ्च । पक्वचिपिटाफलरसगुणाः । मधुरत्वम् । रुचिप्रदत्वम् । शोफपाककरत्वम् । लेपे व्रणदोषनाशित्वञ्च ॥ अस्याः मज्ज्ञो गुणाः । शोफरक्तशोषव्रणनाशित्वम् । अस्याः सुपक्वत्वकषायस्य गुणः । मूलमन्दाग्निनाशित्वम् । इति राजनिर्घण्टः ॥

"अम्लिकायाः फलं पक्वं मर्द्दितं वारिणा दृढम् । शर्करामरिचोन्मिश्रं लवङ्गेन्दुसुवासितम् ॥ अम्लिकाफलसम्भूतं पानकं वातनाशनम् । पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधकम् ॥" इति भावप्रकाशः ॥

वृक्षाम्लम् । इति विश्वः ॥

तिन्तिडीकं, क्ली, (तिम्यते क्लिद्यते मुखं येन । तिम + "फर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधु. ।) वृक्षाम्लम् । इत्यमरः । २ । ६ । ३५ ॥ (यथा, तन्त्रसारे पुरश्चरणप्रकरणे ।

"रम्भाफलं तिन्तिडीकं कमला नागरङ्गकम् । फलान्येतानि भोज्यानि रम्भोऽन्यानि विवर्ज्जयेत् ॥"

यथास्य पर्य्यायाः ।

"वृक्षाम्लन्तिन्तिडीकञ्च चुक्रं स्यादम्लवृक्षकम् ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

आमपक्वावस्थयोरस्य गुणा यथा,—

"वातापहं तिन्तिडीकमामं पित्तबलासकृत् । ग्राह्युष्णं दीपनं रुच्यं सम्पक्वं कफवातनुत् ॥" इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

तिन्तिडीकः, पुं, (तिम+ईकन् । निपातनात् साधुः ।) तिन्तिड़ी । इत्यमरटीकायां भरतः ॥

तिन्तिडीद्यूतम्, क्ली, (तिन्तिडीभिस्तिन्तिडीजातबीजैर्यद्द्यूतम ।) चुचुरी । इति शब्दरत्नावली ॥ कौँदवीचिर खेला इति भाषा ॥

तिन्तिलिका, स्त्री, (तिन्तिडिका । डस्य लत्वम ।) तिन्तिडी । इत्यमरटीका ॥

तिन्तिली, स्त्री, (तिन्तिडी । डस्य लत्वम ।) तिन्तिडी । इति शब्दरत्नावली ॥

तिन्तिलीका, स्त्री, (तिन्तिडीका । डस्य लत्वम् ।) तिन्तिडी । इत्यमरटीका ॥

तिन्दिश, पुं, टिण्डिशवृक्षः । इति राजनिर्घण्टः ॥

तिन्दुः, पुं, (तिम्यति आर्द्रीभवतीति । तिम आर्द्रीभावे + "मृगय्वादयश्च ।" इति कुप्रत्ययेन साधुः ।) तिन्दुकवृक्षः । इति शब्दरत्नावली ॥

तिन्दुक, क्ली, (तिन्दुरिव कायतीति । कै+कः ।) कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥ (यथा, शार्ङ्गधरे पूर्व्वखण्डे १ अध्याये ।

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमानिका । अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम् ॥"

यथास्य पर्य्यायाः ।

"विद्यादौदुम्बरौ कर्षं सुवर्णञ्चाक्षमेव च । विडालपदकञ्चैव पिचुम्पाणितलन्तथा ॥ तिन्दुकञ्च विजानीयात् कपर्द्दमक्षमेव च ॥"

इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम् ॥)

तिन्दुक, पुं, स्त्री, (तिन्दु+स्वार्थे संज्ञायां वा कन् ।) वृक्षविशेषः । गाव् इति ख्यातः । इत्यमरटीकायां सारसुन्दरी ॥ केन्दुकगाछ । इति भरतः ॥ इति राजनिर्घण्टश्च । तेँद इति भाषा ॥ तत्पर्य्यायः । स्फूर्जकः २ कालस्कन्धः ३ शितिसारकः ४ । इत्यमरः । २ । ४ । ३८ ॥ स्फूर्जक. ५ केन्दुः ६ तिन्दुः ७ तिन्दुलः ८ तिन्दुकि. ९ तिन्दुकी १० । इति शब्दरत्नावली ॥ नीलसारः ११ अतिमुक्तकः १२ रामकः १३ रामणः १४ स्फूर्जनः १५ स्यन्दनाख्यः १६ कालसारः १७ । (यथा, महाभारते ।३।६४।३ ।

"शालवेणुधवाश्वत्थतिन्दुकेङ्गुदकिंशुकैः । अर्ज्जुनारिष्टसञ्छन्नं स्यन्दनैश्च सशाल्मलैः ॥")

अस्य आमफलस्य गुणाः । कषायत्वम् । ग्राहित्वम् । वातकारित्वम् । शीतलत्वम् । लघुत्वञ्च । पक्वफलस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । दुर्ज्जरत्वम् । श्लेष्मदत्वम् । गुरुत्वम् । व्रणवातनाशित्वम् । पित्तप्रमेहास्रकारित्वम् । विषदत्वञ्च । इति राजनिर्घण्टः ॥ पित्तप्रमेहास्रश्लेष्मनाशित्वम् । इति भावप्रकाशः ॥ तत्सारः चिररोगजित ॥ विश्वतिन्दुकमप्येवं विशेषात् ग्राहि शीतलम् ॥ इति राजनिर्घण्टः ॥

तिन्दुकिः, स्त्री, (तिन्दुकी । निपातनात् ह्रस्व. ।) तिन्दुक । इति शब्दरत्नावली ॥

तिन्दुकिनी, स्त्री,(तिन्दुकस्तदाकारः फलेऽस्त्यस्याः । तिन्दुक+इनि+ङीप् ।) आवर्त्तकी । इति राजनिर्घण्टः ॥

तिन्दुकी, स्त्री, (तिन्दुक+गौरादित्वात् ङीष् ।) तिन्दुकः । इति शब्दरत्नावली ॥ (यथा, सुश्रुते चिकित्सितस्थाने २ अध्याये ।

"पियालबीजं तिन्दुक्याः कारणानि फलानि च । यथालाभं समाहृत्य तैलमेभिर्विपाचयेत् । सद्यो व्रणेषु देयानि तानि वैद्येन जानता ॥"

अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।

"कालस्कन्दस्तिन्दुकश्च स्फूर्ज्जकस्तिन्दुकीति च ॥")

तिन्दुल , पुं, तिन्दुकवृक्षः । इति शब्दरत्नावली ॥

तिप, ऋ क्ष ङ क्षरति । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अक-वेट् ।) ऋ, तेपिष्यति तेप्स्यते । क्ष, अतितेपत् । ङ, तेपते तितिपे । क्षरत् क्षरणम् । इति दुर्गादास. ॥

तिम, क्लेदने । आर्द्रीभाव इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां परं-अक-सेट् ॥)

तिम, य क्लेदने । इति कविकल्पद्रुम. ॥ (दिवां परं-अक-सेट् ।) य, तिम्यति । तितेम । क्लेदनमार्द्रीभाव. । इति दुर्गादासः ॥

तिमिः, पुं, (तिम्यतीति । तिम क्लेदने+इन् । यद्वा, ताम्यति व्याकाङ्क्षतीति । तमु काङ्क्षायाम्+"क्रमितमिशतिस्तम्भामत इच ।" उणा० ४ । १२१ । इति इन् अकारस्य इकारादेशश्च ।) मत्स्यविशेषः । इत्यमरः । १ । १० । १८ ॥ तिमिर्महाकायो मत्स्यः कश्चित् सामुद्रः । तथा च । अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः । इति भरतः ॥ (यथा च रघौ । १३ । १० ।

"ससत्त्वमादाय नदीमुखाम्भः सम्मीलयन्तो विवृताननत्वात् । अमी शिरोभिस्तिमयः सरन्ध्रैरूर्द्ध्वं वितन्वन्ति जलप्रवाहान् ॥")

समुद्रः । इति त्रिकाण्डशेषः ॥ (राजविशेषः । स तु दूर्व्वस्य पुत्रः । यथा, भागवते । ९।२२।४२ ।

"दण्डपाणिस्ततो दूर्व्वस्तिमिस्तस्माज्जनिष्यति ॥"

अयं हि नवमासाधिकसप्तचत्वारिंशतवर्षं यावत् राज्यं पालयामास । यथा, राजावल्याम् । १ परिच्छेदे ।

"तिमिं पुत्रं ततो राज्ये न्यस्य स्वर्गं स्वयं गतः । सप्तचत्वारिंशतं वर्षान् नवमासाधिकान् तिमिः ॥ पालयित्वाखिलं राज्यं भुक्त्वा भोगमनुत्तमम् । पुत्रं वृहद्रथं राज्ये सोऽभिषिच्य वनं ययौ ॥")

तिमिकोषः, पुं, (तिमेः कोष इव ।) समुद्रः । इति त्रिकाण्डशेष. ॥

तिमिङ्गिल., पुं, (तिमिं गिरतीति । गॄ+क. । रस्य ल । गिलेऽगिलस्येति मुम् ।) मत्स्यविशेष । इत्यमरः । १ । १० । २० ॥ (यथा, महाभारते । १ । २१ । ५ ।

"तिमिङ्गिलसमाकीर्णं मकरैरावृतं तथा ॥"

द्वीपविशेषः । तद्वासिजाते, त्रि । यथा, महाभारते । २ । ३१ । ६६ ।

"तिमिङ्गिलञ्च स नृपं वशे कृत्वा महामतिः ॥")

तिमिङ्गिलगिलः, पुं, (तिमिङ्गिलमपि गिरतीति । गॄ+कः । मुम् च ।) महामत्स्यविशेषः । इति हेमचन्द्रः । ४ । ४१३ ॥

तिमितः त्रि, (तिम+कर्त्तरि क्तः ।) निश्चलः । इति धरणिः ॥ (यथा, पञ्चदश्याम् । २ । ३५ ।

"अतस्तिमितगम्भीरं न तेजो न तमस्ततम् ॥")

क्लिन्नः । इत्यमरः । ३ । १ । १०५ ॥

तिमिरं, क्ली, (तिम्यतीति । तिम+"इषिमदिमुदीति ।" उणा० । १ । ५२ । इति किरच् ।) अन्धकारः । इत्यमरः । १ । १० । ३ ॥ (यथा, रामायणे । २ । २८ । १८ ।

"अतीववातस्तिमिरं बुभुक्षा चास्ति नित्यशः । भयानि च महान्त्यत्र अतो दुःखतरं वनम् ॥")

नेत्ररोगविशेषः । तस्य लक्षणमाह माधवकरः ।

"तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः । रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतः परम् ॥"

(अस्य लक्षणानि यथा,—

"दोषे मण्डलसंस्थाने मण्डलानीव पश्यति । द्विधैकं दृष्टिमध्यस्थे बहुधा बहुधास्थिते ॥ दृष्टेरभ्यन्तरगते ह्रस्ववृद्धविपर्य्ययम् । नान्तिकस्थमधःसंस्थे दूरगं नोपरिस्थितम् ॥ पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः । प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते ॥ तेनोर्द्ध्वमीक्षते नाधस्तनुचैलावृतोपमम् ।

यथा वर्णाश्च रज्येत दृष्टिर्हीयेत च क्रमात् ॥
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ।
लिङ्गनाशं मलः कुर्व्वन् छादयेद्दृष्टिमण्डलम् ॥
तत्र वातेन तिमिरे व्याविद्धमिव पश्यति ।
चलाविलारुणाभासं प्रसन्नञ्चेक्षते मुहुः ॥
जालानि केशान् मशकान् रश्मींश्चोपेक्षितेऽत्र च ।
काचीभूते दृगरुणा पश्यत्यास्यमनासिकम् ॥
चन्द्रदीपाद्यनेकत्वं वक्रमृज्वपि मन्यते ।
वृद्धः काचो दृशं कुर्य्याद्रजोधूमावृतामिव ॥
स्पष्टारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ।
स लिङ्गनाशो वाते तु सङ्कोचयति दृक्शिराः ॥
दृङ्मण्डलं विशत्यन्तर्गम्भीरा दृगसौ स्मृता ।
पित्तजे तिमिरे विद्युत् खद्योतद्योतदीपितम् ॥
शिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति ।
काचे दृक्काचनीलाभा तादृगेव च पश्यति ॥
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ।
भृङ्गनीला निरालोका दृक् स्निग्धा लिङ्गनाशतः ॥
दृष्टिः पित्तेन ह्रस्वाख्या सा ह्रस्वा ह्रस्वदर्शना ।
भवेत् पित्तविदग्धाख्या पीता पीताभदर्शना ॥
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ।
शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम् ॥
काचे तु निष्प्रभेन्द्वर्कं प्रदीपाद्यैरिवाचितम् ।
सिताभा सा च दृष्टिः स्याल्लिङ्गनाशे तु लक्ष्यते ॥
मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः ।
बिन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ॥
उष्णे सङ्कोचमायाति छायायां परिसर्पति ।
शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा ॥
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।
काचेन रक्ता कृष्णा वा दृष्टिस्तादृक् च पश्यति ॥
लिङ्गनाशेऽपि तादृक्दृङ्निष्प्रभा हतदर्शना ।
संसर्गसन्निपातेषु विद्यात् सङ्कीर्णलक्षणान् ॥
तिमिरादीनकस्माच्च तैः स्याद्व्यक्ताकुलेक्षणम् ।
तिमिरे शेषयोर्दृष्टौ चित्रो रागः प्रजायते ॥"
इति वाभटेनोत्तरस्थाने द्वादशेऽध्याये उक्तम् ॥
अस्य चिकित्सा यथा,—
"तिमिरं काचतां याति काचोऽप्यान्ध्यमुपेक्षया ।
नेत्ररोगेष्वतो घोरं तिमिरं साधयेद्द्रुतम् ॥
तुलां पचेत जीवन्त्या द्रोणेऽपां पादशेषिते ।
तत्क्वाथे द्विगुणं क्षीरे घृतप्रस्थं विपाचयेत् ॥
प्रपौण्डरीककाकोली पिप्पली लोध्रसैन्धवैः ।
शताह्वा मधुकद्राक्षा सितादारुफलत्रयैः ॥
कार्षिकैर्निशि तत् पीतं तिमिरापहरं परम् ॥"
"पटोलनिम्बकटुका दार्व्वीसेव्यवराद्वयम् ।
सधन्वयासत्रायन्ती पर्पटं पालिकं पृथक् ॥
प्रस्थमामलकानाञ्च क्वाथयेन्नल्वणेऽम्भसि ।
तदाढकेऽर्द्धपलिकैः पिष्टैः प्रस्थं घृतात् पचेत् ॥
मुस्तभूनिम्बयष्ट्याह्वकुटजोदीच्यचन्दनैः ।
सपिप्पलीकैस्तत्सर्पिर्घ्राणकर्णास्यरोगजित् ॥
विद्रधिज्वरदुष्टारुर्विसर्पापचिकुष्ठनुत् ।
शिरोऽक्षिशुक्रतिमिरनक्तान्ध्यशोषास्रदाहनुत् ॥"

"त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ।
शुल्वतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्त्रयम् ॥
अन्धमूषीकृतं ध्मातं पक्वं विमलमञ्जनम् ।
तिमिरान्तकरं लोके द्वितीय इव भास्करः ॥
गोमूत्रे छगलरसेऽम्लकाञ्जिके च
स्त्रीस्तन्ये हविषि विषे च माक्षिके च ।
यत्तुत्थं ज्वलितमनेकशो निषिक्तं
तत्कुर्य्यात् गरुडसमं नरस्य चक्षुः ॥"
"रसेन्द्रभुजगौ तुल्यौ तयोस्तुल्यमथाञ्जनम् ।
ईषत्कर्पूरसंयुक्तमञ्जनं नयनामृतम् ॥"
"सामान्यं साधनमिदं प्रतिदोषमतः शृणु ।
वातजे तिमिरे तत्र दशमूलाम्भसा घृतम् ॥
क्षीरे चतुर्गुणे श्रेष्ठाकल्कपक्वं पिबेत्ततः ॥"
"पित्तजे तिमिरे सर्पिर्जीवनीयफलत्रयैः ।
विपाचितं पाययित्वा स्निग्धस्य व्यधयेच्छिराम् ॥
श्लेष्मोद्भवेऽमृताक्वाथवराकणशृतं घृतम् ।
विध्येच्छिरां पीतवतो दद्याच्चानुविरेचनम् ॥"
"रक्तजे पित्तवत्सिद्धिः शीतैश्चास्य प्रसादयेत् ।"
"दद्याद्गुडीरनिर्य्यूहचूर्णितं कणसैन्धवम् ॥
तत् शृतं सघृतं भूयः पचेत् क्षौद्रं घने पिबेत् ।
शीते चास्मिन् हितमिदं सर्व्वजे तिमिरेऽञ्जनम् ॥"
"चक्षूरक्षायां सर्व्वकालं मनुष्यै-
र्यत्नः कर्त्तव्यो जीविते यावदिच्छा ।
व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां
पुंसामन्धानां विद्यमानेऽपि वित्ते ॥"
इति चोत्तरस्थाने त्रयोदशेऽध्याये वाभटेनोक्तम् ॥
"सौवीरमञ्जनन्तुत्थं ताप्यो धातुर्म्मनःशिला ।
चक्षुष्यं मधुकं लोध्रं मणयः पौष्पमञ्जनम् ॥
सैन्धवं शौकरीदंष्ट्रा कतकञ्चाञ्जनं शुभम् ।
तिमिरादिषु चूर्णं वा वर्त्तिर्व्वेयमनुत्तमा ॥"
"वदने कृष्णसर्पस्य निहितं मासमञ्जनम् ।
ततस्तस्मात् समुद्धृत्य सशुष्कं चूर्णयेद्बुधः ॥
सुमनःक्षारकैः शुष्कैरर्द्धांशैः सैन्धवेन च ।
एतन्मिश्राञ्जनं कार्य्यं तिमिरघ्नमनुत्तमम् ॥"
इति चरके चिकित्सास्थाने २६ अध्याये ॥)

तिमिरः, पुं, (तिम्यति क्लिद्यति चक्षुरनेन । तिम + "इषिमदिमुदीति ।" उणां । १ । ५२ । इति किरच् ।) चक्षूरोगविशेषः । तस्य निदानादि यथा । चतुर्थपटलगतदोषमाह ।
"तिमिराख्यः स यो दोषश्चतुर्थपटलं गतः ।
रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाश इति क्वचित् ॥
अस्मिन्नपि तमोभूते नातिरूढ़े महागदे ।
चन्द्रादित्यौ स नक्षत्रावन्तरीक्षे च विद्युतः ॥
निर्म्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः ॥
यो दोषः दोषोऽत्र रोगः चतुर्थपटलं वाह्यपटलं गतः स तिमिराख्यः । तिमिरदर्शनेन तिमिरमस्यास्तीति तिमिरः अर्श आदित्वात् । तस्य लक्षणमाह रुणद्धीत्यादि । स तिमिराख्यः । सर्व्वतः सर्व्वत्र । लिङ्गनाश इति क्वचित् तन्त्रान्तरे लिङ्गनाशसंज्ञः । तस्य निरुक्तिञ्च । लिङ्गत्वे चिह्नत्वे अनेनेति लिङ्गं दृष्टितेजः तस्य नाशोऽस्मिन् इति लिङ्गनाशः । अस्मिन्नपि तिमिरेऽपि तमोभूते तमस्तुल्ये । अत्र तु भूतशब्दस्तुल्यार्थः । भूतं प्राण्यतीति समे त्रिष्वित्यमरवचनात् । नातिरूढे अप्रौढ़े । चन्द्रादित्यौ नक्षत्राणि च पश्यति । अन्तरीक्षे अन्तरीक्षस्य प्रकाशमयत्वेन तमोऽभिभावात् । तेजांसि अग्न्यादेः । भ्राजिष्णूनि रत्नसुवर्णादीनि । अस्मिन् प्रौढ़े नीरजे च चन्द्रादित्यादीन्न पश्यतीत्यन्वयः । नीलिकाकाचसंज्ञितः नीलिकाकाचेति नामान्तराभ्यां युक्तः ॥ * ॥
दृष्टिरोगाणां सङ्ख्यानामानि चाह ।
दृष्ट्याश्रया षट् च षडेव रोगाः
षड्लिङ्गनाशा हि भवन्ति तत्र ।
वातेन पित्तेन कफेन सर्व्वै-
रक्तात् परिम्लाय्य विधिश्च षष्ठः ॥
दृष्ट्याश्रया षट् च षडेव रोगाः षट् षट् द्वादशेत्यर्थः । तत्र लिङ्गनाशाः षट् तान् विवृणोति वातेनेत्यादि ॥ * ॥
तथा नरः पित्तविदग्धदृष्टिः
कफेन चान्यस्तथ धूमदर्शी ।
यो ह्रस्वजात्यो नकुलान्धसंज्ञो
गम्भीरसञ्ज्ञा च तथैव दृष्टिः ॥
पित्तविदग्धदृष्ट्यादयः षट् । एव दृष्ट्यादयश्च षट् । एवं दृष्ट्याश्रया द्वादशरोगाः ॥ * ॥
तत्र द्वावन्यौ चाह ।
तत्रैवान्यौ गदौ बह्यौ सनिमित्तानिमित्तकौ ॥
तेषु वातजस्य लिङ्गनाशस्य लक्षणमाह ।
वातेन खलु रूपाणि भ्रमन्तीव च पश्यति ।
आविलान्यरुणाभानि व्याविद्धानीव मानवः ॥
आविलानि कलुषाणि । अरुणानि अव्यक्तलौहित्ययुक्तानि । व्याविद्धानीव कुटिलानीव ॥ * ॥
पैत्तिकमाह ।
पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् ।
नृत्यतश्चैव शिखिनः सर्व्वं नीलञ्च पश्यति ॥
आदित्यादीनां गुणान् रूपाणि ॥ * ॥
श्लैष्मिकमाह ।
कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ।
सलिलप्लावितानीव जालकानीव मानवः ॥ * ॥
सन्निपातजमाह ।
सन्निपातेन चित्राणि विपरीतानि पश्यति ।
बहुधाणि द्विधा वापि सर्व्वाण्येव समन्ततः ॥
हीनाधिका वान्यथा वा ज्योतींष्यपि च पश्यति ॥
चित्राणि नानावर्णानि । विपरीतानि वैपरीत्यं विवृणोति बहुधेत्यादि ॥ * ॥
रक्तजमाह ।
पश्येद्रक्तेन रक्तानि तमांसि विविधानि च ।
हरितान्यथ कृष्णानि पीतान्यपि च मानवः ॥ * ॥
परिम्लायिनमाह
रक्तेन मूर्च्छितं पित्तं परिम्लायिनमावहेत् ।
तेन पीता दिशः पश्येदुद्यन्तमिव भास्करम् ॥

विकीर्य्यमाणान् खद्योतैर्वृक्षांस्तेजांसि चैव हि ।
विकीर्य्यमाणान् पश्यमानान् अप्सरादिभिरिव ॥
वातादिजनितैर्नेत्रवर्त्मभिरपि स यश्च विधः ।
लिङ्गनाशो निगदितो वर्णो वातादितो यथा ॥
रागारुणो मारुततः प्रदिष्टो
म्लायी च नीलश्च तथैव पित्तात् ।
कफात् सितः शोणिततः सरक्तः
समस्तदोषप्रभवो विचित्रः ॥ * ॥
वातादिना हेतुभूतेन जनिते नेत्रविषये मण्डले रूपविशेषमाह ।
चरुणं मण्डलं वाताच्चलं परुषं तथा ।
पित्ततो मण्डलं नीलं कांस्याभं वा सपीतकम् ॥
श्वेतं पीनं वा कथमेतत् व्याधिप्रभावात् ॥
श्लेष्मणा बहलं स्निग्धं शङ्खकुन्देन्दुपाण्डरम् ।
चलत्पद्मपलाशस्थश्शुक्लो बिन्दुरिवाम्भसः ।
म्रद्यमाने तु नयने मण्डलं तद्विसर्पति ॥
बहलं स्थूलम् ।
मण्डलं तु भवेच्चित्रं लिङ्गनाशे त्रिदोषजे ।
प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम् ॥
चित्रं वातादिवर्णम् ।
रक्तजं मण्डलं दृष्टौ स्थूलकाचारुणप्रभम् ।
परिम्लायिनि रोगे स्यात् म्लानं नीलमथापि वा ॥
दोषक्षयात् स्वयं तत्र कदाचित् स्यात्तु दर्शनम् ॥
रक्तजं पित्तानुगामिरक्तजम् । स्थूलकाचारुणप्रभं स्थूलकाचस्येवारुणा प्रभा यस्य तत् । एतेन स्थौल्यमरुणत्वञ्च बोध्यते । दोषक्षयादित्यादि । तत्र परिम्लायिनि कालान्तरेण दोषक्षयात् कदाचित् स्वयमेव दर्शनं स्यात् ॥ * ॥ अनुक्तव्याधाद्यगौरवादिदोषलिङ्ग-संग्रहणार्थमाह ।
यथास्वं दोषलिङ्गानि सर्व्वेष्वेव भवन्ति हि ॥ * ॥
पित्तविदग्धदृष्टेर्लक्षणमाह ।
पित्तेन दुष्टेन गतेन दृष्टि
पीता भवेद्यस्य नरस्य दृष्टिः ।
पीतानि रूपाणि च तेन पश्येत्
सर्व्वो नरः पित्तविदग्धदृष्टिः ॥
पित्तेन गतेन दृष्टिं दृष्टावपि प्रथमद्वितीये पटले गतेनेति बोद्धव्यम् । तेन व्याधिना ॥ * ॥ तस्मिन्नेव पित्ते दृष्टौ तृतीयं पटलं गते रूपविशेषमाह ।
प्राप्ते तृतीयं पटलं तु दोषे
दिवा न पश्येन्निशि वीक्षते सः ।
रात्रौ स शीताङ्गगृहीतदृष्टिः
पित्ताल्पभावात् सकलानि पश्येत् ॥
दोषेऽत्र पित्ते ॥ * ॥ अथ श्लेष्मविदग्धदृष्टिलक्षणमाह ।
तथा नरः श्लेष्मविदग्धदृष्टिः
तान्येव शुक्लानि हि मन्यते तु ।
अत्रापि श्लेष्मणो दृष्टौ प्रथमद्वितीयपटलगतस्य तल्लिङ्गं बोद्धव्यम् ॥ * ॥ स एव श्लेष्मा दृष्टौ पटलत्रयं गतो नक्तान्ध्यं करोतीत्याह ।
त्रिषु स्थितो यः पटलेषु दोषो
नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्य्यांशुगृहीतदृष्टिः
पश्येत्तु रूपाणि कफाल्पभावात् ॥
दोषोऽत्र कफस्तस्योपक्रान्तत्वात् । नक्तान्ध्यस्य श्लेष्मविदग्धदृष्ट्यवान्तर्भूतत्वात्र पृथग्गणना ॥ * ॥
धूमदर्शिनमाह ।
शोकज्वरायासशिरोऽभितापै-
रभ्याहता यस्य नरस्य दृष्टिः ।
धूम्रांस्तु यः पश्यति सर्व्वभावान्
स धूमदर्शीति नरः प्रदिष्टः ॥
शिरोऽभितापः शिरसि घर्म्मादिना सन्तापः । एतस्य पित्तदोषो बोद्धव्यः ॥ * ॥
ह्रस्वजात्यमाह ।
यो वासरे पश्यति कष्टतोऽथ
रूपं महच्चापि निरीक्षतेऽल्पम् ।
रात्रौ पुनर्यः प्रकृतानि पश्येत्
स ह्रस्वजात्यो मुनिभिः प्रदिष्टः ॥ * ॥
नकुलान्ध्यमाह ।
विद्योतते यस्य नरस्य दृष्टि-
र्दोषाभिपन्ना नकुलस्य यद्वत् ।
चित्राणि रूपाणि दिवा स पश्येत्
स वै विकारो नकुलान्ध्यसंज्ञः ॥ * ॥
गम्भीरकमाह ।
दृष्टिर्विरूपा श्वसनोपसृष्टा
सङ्कुच्य याभ्यन्तरतः प्रयाति ।
रुजावगाढ़ा च तमक्षिरोगं
गम्भीरकेति प्रवदन्ति तज्ज्ञाः ॥
विरूपा विकृता । श्वसनोपसृष्टा वातोपद्रुता । रुजावगाढ़ा गम्भीरवेदनान्विता ॥ * ॥
बाह्यौ पुनर्द्वावपि सम्प्रदिष्टौ
निमित्ततश्चाप्यनिमित्ततश्च ।
निमित्ततस्तत्र शिरोऽभितापात्
ज्ञेयस्त्वभिष्यन्दनिदर्शनैः सः ॥
बाह्यौ सुश्रुतोक्तद्वादशसङ्ख्येभ्योऽधिकौ तत्र निमित्ततः आह शिरोऽभितापात् शिरोऽभिताप्यते येन विषकुसुमगन्धवद्धपवनसर्पर्शेन स शिरोऽभितापस्तस्मात् । अभिष्यन्दनिदर्शनैः रक्ताभिष्यन्दलिङ्गैरिति गदाधरः ॥ सन्निपाताभिष्यन्दलिङ्गैरिति कार्त्तिकः ॥ * ॥
अनिमित्तत आह ।
सुरर्षिगन्धर्व्वमहोरगाणां
सन्दर्शनेनापि च भास्करस्य ।
हन्येत दृष्टिर्मनुजस्य यस्य
स लिङ्गनाशस्त्वनिमित्तसंज्ञः ॥
अनुपलभ्यमानानां सुरादीनां दर्शननिमित्तमप्यनिमित्तं मन्यते ॥ * ॥
अनिमित्ततो लिङ्गनाशस्य लक्षणमाह ।
तत्राक्षिविस्पष्टमिवावभाति
वैदूर्य्यवर्णा विमला च दृष्टिः ।
विस्पष्टं ज्योतिर्युक्तम् । वैदूर्य्यवर्णा श्यामा विमला निर्म्मला । इति दृष्टिरोगाः ॥ * ॥
अथ तिमिरचिकित्सा ।
"शुक्लां पाणितलं दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥ * ॥
शङ्खनाभिर्विभीतस्य मध्यामज्जा मनःशिला ।
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥
छागीक्षीरेण संपिष्य वर्त्तीं कुर्य्याद्यवोन्मिताम् ।
हरेणुमात्रां सच्छाय जलेनाञ्जनमाचरेत् ॥
तिमिरं मांसवृद्धिञ्च काचं पटलमर्व्वुदम् ।
रात्र्यन्ध्यं वार्षिकं पुष्पं वर्त्ती चन्द्रोदया हरेत् ॥"
इति चन्द्रोदया वर्त्ती ॥ * ॥
काशा सलवणोषणा सहरसाञ्जना साञ्जना
सरित्पतिकफः शिला सितपुनर्नवा सम्भवा ।
रजन्यरुणचन्दनं मधु च तुल्यपथ्याशिला
अरिष्टदलसावरस्फुटिकशङ्खनाभीन्दवः ॥
इमानि तु विचूर्ण्य येऽक्षिनिहवाससा शोधये-
च्चायायसि विमर्दयेत् समधुताम्रखण्डेन तत् ।
इदं मुनिभिरीरितं नयनशोधनामाञ्जनं
करोति तिमिरक्षयं पटलपुष्पनाशं बलात् ॥
लवणं सैन्धवम् । अञ्जनं सुरमा इति लोके । सरित्पतिकफः समुद्रफेनः । शिला मनःशिला । सावरो लोध्रः । स्फुटिका फटकरी । इन्दुः कर्पूरः । नयनशोध तिमिरे नूतनकुसुमे नूतनपटले च ॥ * ॥
हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला ॥
सर्व्वमेतत् समं कृत्वा गव्यक्षीरेण पेषयेत् ।
नाशयेत्तिमिरं कण्डुं पटलान्यर्व्वुदानि च ॥
अपि त्रैवार्षिकं शुक्लं मासेनैकेन नाशयेत् ।
अधिकानि च मांसानि रात्र्यन्ध्यत्वमेव च ॥
चन्द्रोदया वर्त्ती पुष्पे तिमिरे च ॥ * ॥
रजनी निम्बपत्राणि पिप्पली मरिचानि च ।
विडङ्गं भद्रमुस्तञ्च सप्तमी त्वभया स्मृता ॥
अजामूत्रेण संपिष्य छायायां शोषयेद्वटीम् ।
वारिणा तिमिरं हन्ति गोमूत्रेण तु पिच्छिकाम् ॥
मधुना पटलं हन्ति नारीक्षीरेण पुष्पकम् ।
एषा चन्द्रप्रभावर्त्तिः स्वयं रुद्रेण निर्म्मिता ॥
इति चन्द्रप्रभावर्त्तिः ॥ * ॥
कथ्या छागयकृन्मध्ये पक्वा तत्समपेषिता ।
अचिराद्धन्ति नक्तान्ध्यं तद्वत् सचौद्रमूषणम् ॥
त्रिफलाया रसं प्रस्थं प्रस्थं भृङ्गरजस्य च ।
वृषस्य च रसं प्रस्थं शतावर्य्याश्च तत्समम् ॥
गुडूच्या आमलक्याश्च रसं छागीपयस्तथा ।
प्रस्थं प्रस्थं समाहृत्य सर्व्वैरेभिर्घृतं पचेत् ॥
कल्कः कथ्या सिता द्राक्षा त्रिफला नीलमुत्पलम् ।
मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका ॥
तत्पाद्युक्तं विज्ञाय शुभे भाण्डे निधापयेत् ।
ऊर्द्धं पानमधःपानं मध्ये पानं प्रशस्यते ॥
यावन्तो नेत्रजा रोगास्तान् पानादपकर्षति ।
सरक्ते रक्तदुष्टे च रक्ते वा विस्रुते तथा ॥
नक्तान्ध्ये तिमिरे काचे नीलिका पटलार्व्वुदे ।
अभिष्यन्देऽधिमन्थे च पक्ष्मकोपे सुदारुणे ॥
नेत्ररोगेषु सर्व्वेषु दोषत्रयकृतेष्वपि ।
भर हितमिदं प्रोक्तं त्रिफलाद्यं महाघृतम् ॥

भृङ्गरजः भृङ्गराजः भङ्गरा इति लोके ।
क्षीरकाकोल्या अलाभे अश्वगन्धामूलं ग्राह्यम् ॥
मधुपर्णेन जलज यष्टीमधु चक्षुष्यत्वात् । तद्-
लाभे सामान्यं यष्टीमधु ग्राह्यं तुल्यगुणत्वात् ॥
त्रिफलाद्यं घृतम् ॥ * ॥
शतमेकं हरीतक्या द्विगुणञ्च विभीतकम् ।
चतुर्गुणं त्वामलकं वृषमार्कवयोः समम् ॥
चतुर्गुणोदकं दत्त्वा शनैर्मृद्वग्निना पचेत् ।
भागं चतुर्थं सरस्य क्वाथं तमवतारयेत् ॥
शर्करा मधुकं द्राक्षा मधुयष्टिर्निदिग्धिका ।
काकोली क्षीरकाकोली त्रिफला नागकेशरम् ॥
पिप्पली चन्दनं सूक्ष्मं चायमाणामथोत्पलम् ।
घृतप्रस्थसमं क्षीरं कल्कैरेतैः शनैः पचेत् ॥
हन्यात् सतिमिरं काचं नक्तान्ध्यं शुक्रमेव च ।
तथा स्रावञ्च कण्डूञ्च श्वयथुञ्च कषायताम् ॥
कलुषत्वञ्च नेत्रस्य विधर्म्मपटलान्वितम् ।
बहुनात्र किमुक्तेन सर्व्वान् नेत्रामयान् हरेत् ॥
यस्य चोपहता दृष्टिः सूक्ष्माणिर्भ्भां प्रपश्यतः ।
तस्यैतद्भेषजं प्रोक्तं मुनिभिः परमं हितम् ॥
मार्ज्जितं दर्पणं यद्वत् परां निर्म्मलतां व्रजेत् ।
तद्वदेतेन पीतेन नेत्रं निर्म्मलतामियात् ॥
वारिद्रोणद्वयं चात्र वृषमार्कवयोस्तुले ।
काकोलीयुगलालाभे अश्वगन्धामूलं ग्राह्यम् ॥
द्वितीयं त्रिफलाद्यं घृतम् ॥ * ॥
वासाविश्वामृतादार्व्वीरक्तचन्दनचित्रकैः ।
भूनिम्बनिम्बकटुकापटोलत्रिफलामुदैः ॥
निशाकलिङ्गकुटजैः क्वाथः सर्व्वाक्षिरोगहा ।
वैस्वर्य्यं पीनसं श्वासं कासं नाशयति ध्रुवम् ॥
वासादिक्वाथः ।
इति नेत्ररोगाधिकारः ।" इति भावप्रकाशः ॥ * ॥
किञ्च । गारुडे १६८ अध्याये ।
"कतकस्य फलं शङ्खं सैन्धवं त्र्यूषणं वचा ।
फेनो रसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला ॥
एषा वर्त्तिर्हन्ति काचं तिमिरं पटलं तथा ॥"
तिमिररिपुः, पुं, (तिमिरस्य अन्धकारस्य रिपुः ।) सूर्य्यः । इति हलायुधः ॥
तिमिषः, पु, ग्राम्यकर्कटी । इति त्रिकाण्डशेषः ॥ नाटाम्रः । इति हारावली । १२६ ॥
तिमीः, पुं, (तिमिः पृषोदरादित्वात् साधुः ।) तिमिमत्स्यः । इति द्विरूपकोषः ॥ (तिमि + वा ङीष् । तिमिजातिस्त्री । इति केचित् ॥)
तिरः, [स्] व्य, (तरति दृष्टिपथमिति । तॄ + "सर्व्वधातुभ्योऽसुन् ।" उणां । ४ । १८८ । इति असुन् । क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति गुणविषये दर् ।) अन्तर्द्धानम् । (यथा, भागवते । २ । ६ । ४१ ।
"यदा तद्देयात्मरजस्तिरोधीयेत विप्लुतम् ॥")
तिर्य्यगर्थः । इत्यमरः । ३ । ४ । २५ ॥ तिरस्कारः । इति तट्टीकायां स्वामी ॥
तिरश्ची, स्त्री, (तिर्य्यक्जाति, स्त्रियां ङीप् ।) पशुपक्ष्यादीनां स्त्री । इति मुग्धबोधम् । मादी इति भाषा ॥

तिरस्करिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति । तिरस् + कृ + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः । सञ्ज्ञापूर्ब्बकविधेरनित्यत्वात् वृद्ध्यभावः । ततो ङीप् ।) अपवारकपटः । इत्यमरः । २ । ६ । १२० ॥ कानात् इति भाषा ॥ (यथा, कुमारे । १ । १४ ।
"यत्रांशुकाक्षेपविलज्जितानां
यदृच्छया किम्पुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बा-
स्तिरस्करिण्यो जलदा भवन्ति ॥")
तिरस्कारः, पु, (तिरस् + कृ + घञ् ।) अनादरः । इति हलायुधः ॥ (यथा, पञ्चदश्यां । ७ । ८ ।
"भ्रमांशस्य तिरस्कारात् अधिष्ठानप्रधानता ।
यदा तदा चिदात्माहमसङ्गोऽस्मीति बुध्यते ॥")
तिरस्कारिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति । तिरस् + कृ + णिनिः ङीप् ।) तिरस्करिणी । इत्यमरटीकायां नीलकण्ठः ॥
तिरस्कृतः, त्रि, (तिरस् + कृ + क्तः ।) अनादृतः । कृततिरस्कारः । यथा,—
"अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥"
इति भावप्रकाशः ॥
(तन्त्रसारोक्तमन्त्रविशेषे, पु । यथा,—
"यस्य मध्ये हकारोऽस्ति कवचं मूर्द्धनि द्विधा ।
अस्त्रं तिष्ठति मन्त्रः स तिरस्कृत उदीर्य्यते ॥")
तिरस्क्रिया, स्त्री, (तिरस्करणमिति । "कृञः श च ।" ३ । ३ । १०० । इति भावे शः ।) अनादरः । तिरस्कारः । इत्यमरः । १ । ७ । २२ ॥ (यथा, माघे । १ । ३६ ।
"हरे ! हिरण्याक्षपुरःसरासुर-
द्विपद्विषः प्रत्युत सा तिरस्क्रिया ॥")
तिरिटिः, पु, इक्षुग्रन्थिः । इति शब्दमाला ॥
तिरिमः, पु, शालिभेदः । इति राजनिर्घण्टः ॥
तिरियः, पु, शालिविशेषः । अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । शीतलत्वम् । दाहपित्तसर्व्वामयनाशित्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टः ॥
तिरीटं, क्ली, (तीर्य्यते शिरोविमर्दोऽनेनेति । तॄ + "कृतॄकृपिभ्यः कीटन् ।" उणां । ४ । १८४ । इति कीटन् ।) किरीटम् । इत्युणादिकोषः ॥
तिरीटः, पु, (तॄ + कीटन् ।) लोध्रः । इत्यमरः । २ । ४ । ३३ ॥ (यथा, भावप्रकाशे अर्शोरोगाधिकारे ।
"समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः ॥")
तिरोधानं, क्ली, (तिरस् + धा + भावे ल्युट् ।) अन्तर्धानम् । इत्यमरः । १ । ३ । १३ ॥ (यथा, भागवते । ३ । २८ । ४६ ।
"सिद्धान् विद्याधरांश्चैव तिरोधानेन
सोऽसृजत् ॥")
तिरोहितः, त्रि, (तिरस् + धा + क्तः ।) अन्तर्हितः । (यथा, मार्कण्डेये । ३८ । २४ ।
"अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ॥")
आच्छादितः । इत्यमरः । ३ । ८ । ११२ ॥

तिर्य्यक्, [च्] व्य, वक्रम् । तत्पर्य्यायः । साचि २ तिरः ३ । इत्यमरः । ३ । ४ । ३४ । (यथा, रामायणे । २ । २३ । ४ ।
"तिर्य्यगूर्द्ध्वं शरीरे च पातयित्वा शिरोधराम् ॥")
तिरोऽर्थः । निरुद्धार्थः । इति शब्दरत्नावली ॥
तिर्य्यक्स्रोताः, [स्] पु, (तिर्य्यक् वक्रं स्रोत आहारसञ्चारो यस्य । भुक्तान्नस्य तिर्य्यक्तया उदरे सञ्चारादस्य तथात्वम् ।) पशुपक्ष्यादिः । (यथा, विष्णुपुराणे । १ । ५ । ८ ।
"तस्याभिध्यायतः सर्गो तिर्य्यक्स्रोताभ्यवर्त्तत ।
यस्मात् तिर्य्यक्प्रवृत्तः स तिर्य्यक्स्रोतास्ततः
स्मृतः ॥")
स ब्रह्मणोऽष्टमः सर्गः । स तु अष्टाविंशतिविधः । यथा,—
"तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः ॥"
तेषां लक्षणं यथा,—
"अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥"
इति श्रीभागवते । ३ । १० । २१ ॥
"तिरश्चां तिर्य्यक्स्रोतसाम् । अविदः श्वस्तनादिज्ञानशून्याः । भूरितमसः आहारादिमात्रनिष्ठाः । घ्राणज्ञा घ्राणेनैव इष्टमर्थं जानन्ति । हृदि अवेदिनः दीर्घानुसन्धानशून्याः ।" इति तट्टीकायां श्रीधरस्वामी ॥ अष्टाविंशतिभेदा यथा,—
"गौरजो महिषः कृष्णः शूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ! ॥
खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ॥
श्वा शृगालो वृको व्याघ्रो मार्ज्जारः शश-
शल्यकौ ।
सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः ॥
कङ्कगृध्रबकश्येनभासभल्लूकवर्हिणः ।
हंससारसचक्राह्वकाकोलूकादयः खगाः ॥"
इति श्रीभागवते । ३ । १० । २२-२३ ॥
"गवादय उष्ट्रान्ता द्विशफा द्विखुरा नव । खरादयश्चमर्य्यन्ता एकशफाः षट् । श्वादयो गोधान्ताः पञ्चनखा द्वादश । एते भूचराः सप्तविंशतिः । मकरादयो जलचराः कङ्कादयः खगाः अभूचरत्वेनैकीकृत्य गृहीता एवमष्टाविंशतिभेदान् वदन्ति । अन्येषामपि तिर्य्यक्प्राणिनां यथायथमेतेष्वन्तर्भावः ।" इति तट्टीकायां श्रीधरस्वामी ॥
तिर्य्यग्यानः, पु, (तिर्य्यक् वक्रं यानं गमनं यस्य ।) कुलीरः । इति त्रिकाण्डशेषः ॥
तिर्य्यङ्, [च्] पु, (तिर्य्यगञ्चतीति । अञ्च + क्विप् । 'तिरसस्तिर्य्यलोपे ।" ६ । ३ । ९४ । इति तिरि.) विहङ्गादिः । इति मेदिनी ॥ (यथा, महाभारते । १३ । १११ । १२५ ।
"पापानि तु नरः कृत्वा तिर्य्यग् आदेश
भारत ! ॥"

यथाच मनुः । ५ । ४० ।
"ओषध्यः पशवो वृक्षास्तिर्य्यञ्चः पक्षिणस्तथा ॥"
"तिर्य्यञ्चः कूर्म्मादयः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) पशुः । इति हेमचन्द्रः । ३ ।१०८ ॥
(यथा, पञ्चतन्त्रे । ३ । ११९ ।
"तिर्य्यञ्चं मानुषं वापि यो मृतं संस्पृशेत् कुधीः ।
पञ्चगव्येन शुद्धिः स्यात् तस्य चान्द्रायणेन च ॥")
वक्रगामी । इति शब्दरत्नावली ॥

तिर्य्यञ्ची, स्त्री, (तिर्य्यञ्च + स्त्रियां ङीप् ।) तिरश्ची । स्त्रीपशुपक्ष्यादिः । इति मुग्धबोधम् ॥

तिल, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सक-सेट् ।) ह्रस्वी । तेलति । इति दुर्गादासः ॥

तिल, क श स्नेहे । इति कविकल्पद्रुमः ॥ (चुरां-तुदां च-पर-अक सेट् ।) स्नेहः स्निग्धीभावः । क, तेलयति । श, तिलति तैलेनाङ्गम् । इति दुर्गादासः ॥

तिलः, पुं, (तिलति स्निह्यति तैलेन पूर्णो भवतीति । तिल + "इगुपधज्ञेति ।" ३।१।१३५ । इति कः ।) स्वनामख्यातशस्यम् । तत्पर्य्यायः । होमधान्यम् २ पवित्रः ३ पितृतर्पणः ४ पापघ्नः ५ पूतधान्यम् ६ । इति राजनिर्घण्टः ॥ स्नेहफलः ७ स्नेहफलपूरफलः ८ । अस्य गुणाः । रसे कटुत्वम् । तिक्तत्वम् । मधुरत्वम् । तुवरत्वम् । गुरुत्वम् । विपाके कटुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफपित्तकारित्वम् । बल्यत्वम् । केशहितत्वम् । हिमस्पर्शत्वम् । त्वच्यत्वम् । स्तन्यत्वम् । व्रणे हितत्वम् । दन्त्यत्वम् । अल्पमूत्रकारित्वम् । ग्राहित्वम् । वातघ्नत्वम् । अग्निमतिप्रदत्वञ्च । इति भावप्रकाशः ॥ वर्णकारित्वम् ॥ * ॥

"कृष्णः पथ्यतमः सितोऽल्पगुणदः क्षीणास्तथान्ये तिलाः ॥"
इति राजनिर्घण्टः ॥

अपि च । भावप्रकाशे ।
"कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः ।
अन्ये हीनतराः प्रोक्तास्तज्ज्ञै रक्तादयस्तिलाः ॥"
तत्तैलगुणाः । अलङ्करत्वम् । केश्यत्वम् । मधुरत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । तीक्ष्णत्वम् । बलकारित्वम् । कफवातजन्तुखर्जुव्रणकण्डूतिनाशित्वम् । कान्तिदत्वम् । वस्त्यभ्यङ्गपाननस्यकर्णाक्षिपूरणेषु हितत्वञ्च । इति राजनिर्घण्टः ॥ (तिलप्रतिग्रहनिषेधो यथा, ब्रह्मपुराणे ।
"ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा ।
अत्यल्पमपि मातङ्गतिललोहांश्च वर्ज्जयेत् ॥"
तिलदाने फलमाह विष्णुः ।
"तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥"
तथा महाभारते ।
"कल्यमुत्थाय यो विप्रः स्नातः शुक्लेन वाससा ।
तिलपात्रं प्रयच्छन् वै सर्व्वपापैः प्रमुच्यते ॥"
शुद्धितत्त्वे ।
"प्रेतमुद्दिश्य यो दद्यात् हैमगर्भांस्तिलान्नृप ॥ ।
यावन्तस्ते तिलाः स्वर्गे तावत्कालं स मोदते ॥"
सप्तमीं नवमीं पर्व्वकालञ्च त्यक्त्वा तिलतैलेनाङ्गानि विमृश्य स्नानं कर्त्तव्यम् । यथा, मार्कण्डेये ।
"सर्व्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मनुः ।
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः ।
सप्तमीं नवमीञ्चैव पर्व्वकालञ्च वर्ज्जयेत् ॥"
तिथितत्त्वे जन्मतिथिकृत्ये ।
"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥"
रात्रौ तिलान्वितवस्तुमात्रं न भक्षयेत् । यथा, काशीखण्डे ।
"सर्व्वञ्च तिलसम्बद्धं नाद्यादस्तमिते रवौ ॥"
तिलैस्तर्पणनिषेधस्तत्प्रतिप्रसवादिकञ्च तर्पणशब्दे द्रष्टव्यम् ॥) तिलकालकः । यथा,—
"देवगुरुप्रसादेन जिह्वाग्रे मे सरस्वती ।
तेनाहं नृप जानामि भानुमत्यास्तिलं यथा ॥"
इति कालिदासः ॥
(स्वल्पप्रमाणम् । तिलतुल्यत्वादस्य तथात्वम् । यथा, राजतरङ्गिण्याम् । ४ । ३२८ ।
"तिलं तिलं तं कृत्वा च चिक्षिपुर्दिक्षु सर्व्वतः ।
नगरान्निर्गतैः सैन्यैर्हन्यमानाः पदे पदे ॥")

तिलकं, क्ली, (तिलति स्निह्यतीति । तिल + "क्वुन् शिल्पिसंज्ञयोः ।" इति क्वुन् ।) क्लोम । कृष्णवर्णसौवर्च्चलम् । इत्यमरः । २ । ६ । ६५ ॥ सौवर्च्चलम् । इति मेदिनी । के, १०० ॥

तिलकः, पुं, (तिल इव कायतीति । कै + कः ।) पुष्पवृक्षविशेषः । तत्पर्य्यायः । विशेषकः २ मुखमण्डनकः ३ पुण्ड्रकः ४ पुण्ड्रः ५ स्थिरपुष्पी ६ क्षुरकः ७ द्रवरुक् ८ मृतजीवः ९ तरुणीकटाक्षकामः १० वासन्तसुन्दरः ११ द्रुमरुक् १२ भालविभूषणसंज्ञः १३ पुन्नागः १४ रेठकः १५ । इति राजनिर्घण्टः ॥ क्षुरकः १६ श्रीमान् १७ पुरुषः १८ क्षत्रपुष्पकः १९ । इति भावप्रकाशः ॥ (यथा, रघुः । ९।४१ ।
"न खलु शोभयति स्म वनस्थलीं
न तिलकस्तिलकः प्रमदामिव ॥")
अस्य गुणाः । पाके कटुत्वम् । वातपित्तकफनाशित्वम् । बलपुष्टिमेदःकारित्वम् । हृद्यत्वम् । लघुत्वञ्च । तत्त्वग्गुणाः । कषायत्वम् । उष्णत्वम् । पुंस्त्वदन्तदोषकृमिशोफव्रणरक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ (तिल + स्वार्थे कन् ।) शरीरस्थतिलः । तत्पर्य्यायः । तिलकालकः २ । इत्यमरः ।२।६।४९ ॥ कालकः ३ पिप्लुः ४ जडुलः ५ । इति हेमचन्द्रः ॥ * ॥ मरुवकः । इति रत्नमाला ॥ अश्वभेदः । रोगभेदः । इति मेदिनी । के, १०० ॥ शेषस्य निदानलक्षणं यथा,—
"कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोच्छेकात् तान् विद्यात्तिलकालकान् ॥"
इति माधवकरः ॥
प्रधाने त्रि । इति नानार्थध्वनिमञ्जरी ॥ ध्रुवकभेदः । यथा,—
"पञ्चविंशतिवर्णाङ्घ्रिस्तिलको ध्रुवको भवेत् ।
दृष्टश्चचत्पुटे ताले रसे वीरेऽद्भुतेऽपि वा ॥"
इति सङ्गीतदामोदरः ॥

तिलकः, पुं क्ली, (तिलवत् तिलपुष्पवत् कायतीति । कै + कः ।) चन्दनादिना ललाटादिद्वादशाङ्गकर्त्तव्यचिह्नविशेषः । तत्पर्य्यायः । तमालपत्रम् २ चित्रकम् ३ विशेषकम् ४ । इत्यमरः । २ । ६ । १२३ ॥ (यथा, माघे । ३ । ६३ ।
"विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव ॥")
अथ द्वादशतिलकविधिः । पद्मपुराणे उत्तरखण्डे ।
"ललाटे केशवं ध्यायेन्नारायणमथोदरे ।
वक्षःस्थले माधवन्तु गोविन्दं कण्ठकूपके ॥
विष्णुञ्च दक्षिणे कुक्षौ बाहौ च मधुसूदनम् ।
त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥
श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे ।
पृष्ठे तु पद्मनाभञ्च कट्यां दामोदरं न्यसेत् ॥
तत्प्रक्षालनतोयन्तु वासुदेवेति मूर्द्धनि ॥"
किञ्च ।
"ऊर्द्ध्वपुण्ड्रं ललाटे तु सर्व्वेषां प्रथमं स्मृतम् ।
ललाटादिक्रमेणैव धारणन्तु विधीयते ॥ इति ।
एवं न्यासं समाचर्य्य सम्प्रदायानुसारतः ।
न्यसेत् किरीटमन्त्रञ्च मूर्द्ध्नि सर्व्वार्थसिद्धये ॥"
अथ किरीटमन्त्रः । ओम् श्रीकिरीटकेयूरहारमकरकुण्डलचक्रशङ्खगदापद्महस्तपीताम्बरधरश्रीवत्साङ्कितवक्षःस्थलश्रीभूमि-सहितस्वात्मज्योतिर्द्दीप्तिकराय सहस्रादित्यतेजसे नमो नमः ।" इति श्रीहरिभक्तिविलासे ४ विलासः ॥
तस्य धारणप्रकारो यथा,—
"द्वादशाङ्गे ललाटादौ तिलकं हरिमन्दिरम् ।
स्नानान्ते वैष्णवः कुर्य्यात् प्रत्येकं कृष्णनामभिः ॥
वामे वक्षसि नेत्रान्ते गण्डेऽंशे शङ्खचिह्नितम् ।
तथैव दक्षिणे कुर्य्याद्धरेश्चक्राङ्कितं शुभे ॥ * ॥
ललाटे केशवं विद्यात् कण्ठे श्रीपुरुषोत्तमम् ।
वामबाहौ वासुदेवं सव्ये दामोदरस्तथा ॥
नाभौ नारायणञ्चैव माधवं हृदये तथा ।
गोविन्दं दक्षिणे पार्श्वे वामे चैव त्रिविक्रमम् ॥
विष्णुं सव्ये कर्णमूले दक्षिणे मधुसूदनम् ।
शिरोमध्ये हृषीकेशं पद्मनाभञ्च पृष्ठतः ॥
हरेर्द्वादशनामानि पठित्वा तिलकानि तु ।
यः कुर्य्याद्वैष्णवो नित्यं स प्रेमभक्तिमाप्नुयात् ॥ * ॥
ये कण्ठलग्नतुलसीभयकाष्ठमाला
ये द्वादशाङ्गहरिनामकृतोर्द्ध्वपुण्ड्राः ।
ये कृष्णभक्तिसुदृढा धृतशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥ * ॥
तिलकन्तूर्द्ध्वपुण्ड्राख्यं मध्यच्छिद्रं हि नारद ॥
यदि कुर्य्याल्ललाटे तद्विज्ञेयं हरिमन्दिरम् ॥
घ्राणनासामूलमाश्रित्य शिरोमध्यगतं शुभे ।
हरिपादाकृतिं नाम्नस्तमारभ्य यत्नतः ॥

हरिमन्दिरवत् सर्व्वं तद्राधावल्लभीयकम् ।
श्रीराधावल्लभीय यत्तिलकं सुमनोहरम् ॥
यौगलं तत्तु विज्ञेयं यदि मध्यसुरञ्जितम् ॥ * ॥
यदूर्द्ध्वपुण्ड्रं तिलकं शोभनं तन्मनोहरम् ।
तन्मध्यपीतरेखश्च श्रीमद्रामानुज विदुः ॥ * ॥
श्रीरामोपासना यस्य तिलकं तूर्द्ध्वपुण्ड्रकम् ।
भ्रवोर्म्मध्ये सविन्दु स्यादयदि विप्र । मनोहरम् ॥
हरेः सर्व्वावताराणां मत्स्यादीनां विशेषतः ।
उपासकानां तिलकं केवलं हरिमन्दिरम् ॥ * ॥
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्त्रियाणां तथैव च ।
वैश्यानान्तु तथा विप्र । शूद्रादेर्म्मण्डलाङ्कितम् ॥
अच्छिद्रमूर्द्ध्वपुण्ड्रन्तु ये कुर्व्वन्ति जनाधमाः ।
तेषां ललाटे सततं शुनः पादो न संशयः ॥
दृष्ट्वा भाले द्विजातीनामच्छिद्रमूर्द्ध्वपुण्ड्रकम् ।
कार्य्यं कृष्णस्मृतिं कृत्वा वस्त्रेणाच्छादयेन्मुखम् ॥
ललाटदक्षिणे ब्रह्मा वसेद्वामे महेश्वरः ।
मध्ये विष्णुर्व्वसेन्नित्यं तस्मान्मध्यं न लेपयेत् ॥ * ॥
वर्त्तुलं तिर्य्यगच्छिद्रं ह्रस्वं दीर्घं ततं न तु ।
मङ्गलद्रव्यसंयुक्तं तिलकं यन्निरर्थकम् ॥
खनित्रयष्टिकुकुलत्रिशूलसुकुराङ्कितम् ।
त्रिपुण्ड्रमर्द्धचन्द्रञ्च तिलकं यन्निरर्थकम् ॥
प्रमाणन्तूर्द्ध्वपुण्ड्रस्य दीर्घं स्यात् कलिवर्द्धनम् ।
नासासामूलमारभ्य ब्रह्मरन्ध्रगतं यदि ॥
शूद्रस्यैकाङ्गुलं प्रोक्तमायतं द्व्यङ्गुलं विप्र ।
क्षत्त्रिये त्र्यङ्गुलं तद्वद्ब्राह्मणे चतुरङ्गुलम् ॥
नासिकायास्त्रिभागैको भागो मानेन यो भवेत् ।
भ्रुवोर्म्मध्यादग्रस्थानं मूलमाहुर्म्मनीषिणः ॥ * ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
कुर्य्यादयदूर्द्ध्वपुण्ड्रं तद्वैष्णवा हरिमन्दिरम् ॥
वैष्णवा विप्र । भूपाश्च वैश्यशूद्रान्त्यजाश्रमाः ।
यदूर्द्ध्वपुण्ड्रं विष्टयुक्तदेव हरिमन्दिरम् ॥
नरो वाप्यथवा नारी यदि कृष्णपथं लभेत् ।
यन्नतस्तुलसीमालां सन्धार्य्या हरिमन्दिरम् ॥
मध्यच्छिद्रं न कुर्य्यादयस्तिलकं यदि वैष्णवः ।
श्वपदं तच्चितातुल्यं भवेन्नारद । नान्यथा ॥ * ॥
दण्डाकारद्विरेखं यत्तिलकं मूलकोणकम् ।
मध्यच्छिद्रन्तु तत् प्राहुरूर्द्ध्वपुण्ड्रं मनोहरम् ॥
अधोमुखाब्जकलिकाकारं तिलकमुत्तमम् ।
मध्यच्छिद्रं युग्मरेखमूर्द्ध्वपुण्ड्रं प्रकीर्त्तितम् ॥ * ॥
तीर्थमृद्दयज्ञकाष्ठञ्च विल्वो मलयसम्भवम् ।
अश्वत्थतुलसीमूलमृत्तिका गोष्पदस्य च ॥
जाह्नवीमृन्महानिम्बतुलसीकाष्ठमेव च ।
कस्तूरी कुङ्कुमं फल्गु सिन्दूरं रक्तचन्दनम् ॥
गोरोचना गन्धकाष्ठं जलं चागुरु गोमयम् ।
धात्रीमूलस्य मृद्वल्मी हरिद्रा गोगृहस्य च ॥
स्नानान्ते सर्व्ववर्णानामाश्रमाणान्तथैव च ।
एतानि तिलकान्याहुः सन्ध्यादिसर्व्वकर्म्मसु ॥” * ॥
अपि च ।
“गङ्गामृत्तुलसीमूलमृत्तिका मलयोद्भवम् ।
साधोश्चरणसंलग्नं रजो मृद्गोष्पदस्य च ॥
यावश्वत्थमूलमृन्नोपीचन्दनं तीर्थमृत्तिका ।
कुङ्कुमं तुलसीकाष्ठं वैष्णवाद्धृतमृत्तिका ॥
गोरोचना च कस्तूरी हरिद्रागुरुचन्दनम् ।
वल्मीकमृत्तिका गन्धः पद्मकं हरिचन्दनम् ॥
गन्धकाष्ठं महानिम्बो यमुनातीरमृत्तिका ।
गुरुपादरजोवारिणी साध्वङ्घ्रिरजोजले ॥
कृत्वा प्रतिदिनं स्नानमेतैर्गन्धमृदादिभिः ।
चारु यत्तिलकं ग्राह्यं तन्नाम्ना वैष्णवेर्ध्रुवम् ॥ * ॥
काम्यं नैमित्तिकं नित्यं यत्किञ्चित् कर्म्म नारद ।
वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना ॥
कर्म्म वर्णाश्रमाणां स्यात् दैवं पैत्रं न तत्फलम् ।
स्नानं सन्ध्या पञ्चयज्ञान् पैत्रं होमादि कर्म्म यः ।
विना तिलकदर्भाभ्यां कुर्य्यात्तन्निष्फलं भवेत् ॥”
इति पाद्मोत्तरखण्डम् ॥ * ॥
“वीध्यादर्शे जले वापि यो विदध्यात् प्रयत्नतः ।
ऊर्द्ध्वपुण्ड्रं महाभागः स याति परमाङ्गतिम् ॥”
इति पाद्मे पातालखण्डम् ॥ * ॥
“शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् ।
विष्णागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत् ॥”
इति नागोजीभट्टधृततत्त्वसंहिता ॥
तिलकटः, पु, तिलस्य रजः । (तिल+“अलाबू-तिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् ।” ५ । २ । २६ । इत्यस्य वार्त्तिकोक्त्या कटच् ।) तिलचूर्णम् । इति शब्दार्थकल्पतरुः व्याकरणञ्च ॥
तिलका, स्त्री, (तिलस्तिलवीजकोष इव कायतीति । कै+कः ।) हारभेदः । इति जटाधरः ॥ (यदचरपादके छन्दोभेदे । शब्दार्थचिन्तामणिधृततल्लक्षणादिकं यथा,—
“सगणद्वितयं भवतीह यदा ।
रसवर्णपदा तिलकेति तदा ॥”
उदाहरणम् ।
“वनमालिकया सकलालि । तथा ।
पुनरेति कथं मम दृष्टिपथम् ॥”)
तिलकालकः, पु, (तिल इव कालकः कृष्णवर्णः ।) शरीरस्थतिलः । इत्यमरः । २ । ६ । ४९ ॥ तल्लक्षणानि यथा,—
“कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोद्रेकात्तान् विद्यात्तिलकालकान् ॥”
समानि अनुन्नतानि । अयं तिल इति लोके प्रसिद्धः । तच्चिकित्सा यथा,—
“चर्म्मकीलं जतुमणिं मशकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥”
इति भावप्रकाशः ॥
तिलयुक्तः । इत्यमरटीका ॥
तिलकाश्रयः, पु, (तिलकस्य आश्रयः ।) ललाटम् । इति शब्दार्थकल्पतरुः ॥
तिलकिट्टं, क्ली, (तिलस्य किट्टं मलम् ।) तिलमलम् । (खइल इति भाषा ॥) तत्पर्य्यायः । पिण्याकः २ तिलखलिः ३ । अस्य गुणाः । रूक्षत्वम् । रूक्षत्वम् । विष्टम्भित्वम् । दृष्टिदूषणत्वञ्च । इति भावप्रकाशः ॥
तिलकी, [न्] त्रि, (तिलकमस्यास्तीति । तिलक+इनिः ।) तिलकयुक्तः । यथा । शिखी तिलकी कर्म्म कुर्य्यात् । इति स्मृतिः ॥
तिलचित्रपत्रकः, पु, (तिलचित्राणि तिलवच्चित्रयुक्तानि पत्राणि यस्य । कप् ।) तैलकन्दः । इति राजनिर्घण्टः ॥
तिलचूर्णं, क्ली, (तिलस्य चूर्णम् ।) चूर्णीकृततिलः । तत्पर्य्यायः । तिलकल्कम् २ पललम् ३ पिष्टकम् ४ । अस्य गुणाः । मधुरत्वम् । रुच्यत्वम् । पित्तास्रबलपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, पञ्चतन्त्रे । २ । ८३ ।
“तत्स्तिलान् लुञ्चयित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामि ॥”)
तिलतण्डुलकं, क्ली, (तिलस्य तण्डुल इव संश्लेषणं नायतीति । कै+कः । तिलतण्डुलवत् दृढसंश्लेषणादस्य तथात्वम् ।) आलिङ्गनम् । इति शब्दमाला ॥ तिलमिश्रिततण्डुलम् ॥ (तिलस्य शस्यञ्च ॥)
तिलतैलं, क्ली, (तिलस्य स्नेहः । तिल+“स्नेहे तैलच् ।” ५ । २ । २९ । इत्यस्य वार्त्तिकोक्त्या तैलच् ।) तिलस्नेहः । तिलेषु तैलम् । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । ४५ ।
सर्व्वेभ्यस्त्विह तैलेभ्यस्तिलतैलं प्रशस्यते ॥”)
अस्य गुणाः तिलशब्दे द्रष्टव्याः ॥ (अपरे गुणाश्च । यथा, हारीते १ स्थाने नवमेऽध्याये ।
“तत्र ज्ञेयं समासेन यथायोगं यथाविधि ।
कषायानुरसं स्वादु सूक्ष्ममुष्णं व्यवायि च ॥
पित्तकृद्वातशमनं श्लेष्मरोगादिवर्द्धनम् ।
बल्यं रुचिकरं मेध्यं कण्डूकुष्ठविकारहृत् ॥
दृश्यं श्रमापहं ज्ञेयं तिलतैलं विदुर्बुधाः ।
छिन्ने भिन्ने च्युते दष्टे क्षते भग्नेऽभिदाहके ॥
वाताभिष्यन्दिस्फुटने चाभ्यङ्गे तिलतैलकम् ।
विधे व्यालशूनसर्प्पे सेकाभ्यङ्गावगाहने ॥
पाने वस्तौ च नस्ये च तथा कर्णप्रपूरणे ।
तिलतैलं विधेयं स्यात् सर्व्वरोगनिवारणम् ॥”
“तथा छिन्नभिन्नविद्धोत्पिष्टच्युतमथितक्षतपिच्छितभग्नस्फुटितक्षाराग्निदग्धविश्लिष्टदारिताभिहतदुर्भग्नमृगव्यालविदष्टप्रभृतिषु च परिषेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ।
तद्वस्तिषु च पाने च नस्ये कर्णाक्षिपूरणे ।
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये ॥”
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
तिलधेनुः, स्त्री, (तिलैर्विहिता धेनुः । शाकपार्थिवादिवत् समासः ।) तिलनिर्म्मिता धेनुः । यथा,—
“विधानं तिलधेनोस्त्वं ब्रूहि शीघ्रं द्विजोत्तम । ।
मुनिः प्राह विधानं यत् तच्छृणुष्व नराधिप ! ॥
षोडशाढ़मयी धेनुश्चतुर्भिर्व्वत्सको भवेत् ।
इक्षुदण्डमयाः पादा दन्ताः पुष्पमयाः शुभाः ॥
नासा गन्धमयी तस्या जिह्वा गुडमयी तथा ।
स्थितां कृष्णाजिने धेनुं वासोभिर्व्वासितां शुभाम् ॥
सूत्रेण वाधितां कृत्वा पञ्चरत्नसमन्विताम् ।
सर्व्वौषधिसमायुक्तां मन्त्रपूतान्तु दापयेत् ॥
अन्नं मे जायतां सद्यः पानं सर्व्वरसास्तथा ।
कामं सम्पादयास्माकं तिलधेनुसमाश्रिताम् ॥

यच्छामि त्वां देवि! भक्त्या कुटुम्बार्थे विशेषतः।
कुटुम्बकामं कुरुतां तिलधेनो। नमोऽस्तु ते॥
एवंविधां नरो दत्त्वा तिलधेनुं नृपोत्तम!।
सर्व्वकामसमाप्तिन्तु कुरुते नात्र संशयः॥"
इति पाद्मे सृष्टिखण्डम्॥

तिलपर्णं, क्ली, (तिलस्येव पर्णमस्य।) चन्दनम्। इति राजनिर्घण्टः॥ (रक्तचन्दनम्। यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम्।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्॥"
तिलस्य पर्णम्।) तिलदलपत्रञ्च॥

तिलपर्णः, पुं, (तिलस्य पर्णानीव पर्णान्यस्य।) श्रीवेष्टः। इति राजनिर्घण्टः॥

तिलपर्णिका, स्त्री, (तिलपर्णी+स्वार्थे कन् टाप् च।) रक्तचन्दनम्। इति हेमचन्द्रः॥ (यथा,—
"वैत्राग्रं दृश्यतो वासा कुन्तली तिलपर्णिका॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

तिलपर्णी, स्त्री, (तिलस्येव पर्णान्यस्याः। पाककर्णेति ङीष्। तिलपर्णी नदी आकरोऽस्त्यस्या इति अच् ङीष् च। इत्यमरटीका।) रक्तचन्दनम्। इत्यमरः। २।६।१३२॥ (यथा, सुश्रुते। १।४६।
"चित्रकस्तिलपर्णी च कफशोफहरी लघुः॥"
नदीविशेषः। इत्यमरटीका। २।६।१३२॥)

तिलपिष्टं, क्ली, (तिलस्य पिष्टकम्। पृषोदरादित्वात् साधुः।) तिलपिष्टकम्। इति केचित्॥ तिलकुटा इति भाषा॥

तिलपिञ्जः, पुं, (निष्फलस्तिलः। तिल+"तिलान्निष्फलात् पिञ्जपेजौ।" ४।२।३६। इत्यस्य वार्त्तिकोक्त्या पिञ्जः।) निष्फलतिलवृक्षः। इत्यमरः। २।६।१८॥

तिलपेजः, पुं, (निष्फलस्तिलः। "तिलान्निष्फलात् पिञ्जपेजौ।" ४।२।३६। अस्य वार्त्तिकोक्त्या पेजः।) निष्फलतिलः। इत्यमरः। २।६।१८॥

तिलमयूरः, पुं, (तिलाङ्कितवत् चित्रितो मयूरः। शाकपार्थिववत् समासः।) मयूरविशेषः। तत्पर्य्यायः। गुरुण्टकः २। इति त्रिकाण्डशेषः॥

तिलरसः, पुं, (तिलस्य रसः।) तिलतैलम्। इति शब्दार्थकल्पतरुः॥

तिलस्नेहः, पुं, (तिलस्य स्नेहः।) तिलतैलम्। इति शब्दार्थकल्पतरुः॥

तिलाङ्कितदलः, पुं, (तिलवदङ्कितानि दलानि यस्य।) तैलकन्दः। इति राजनिर्घण्टः॥

तिलापत्या, स्त्री, (तिलवत् कृष्णं क्षुद्रञ्चापत्यं बीजमस्याः।) कृष्णजीरकः। इति शब्दचन्द्रिका॥

तिलित्सः, पुं, गोनसस्सर्पः। इत्यमरः। १।८।५॥

तिलोत्तमा, स्त्री, (तिलैः तिलप्रमाणैः सर्व्वरत्नानामंशैरुत्तमा।) स्वर्व्वेश्या। इति शब्दचन्द्रिका॥ तस्या नामकारणं यथा, महाभारते। १।२१२।१७।
"तिलं तिलं समानीय रत्नानां यद्विनिर्म्मिता।
तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः॥"

तिलौदनं, क्ली, (तिलमिश्रितं ओदनम्।) कृशरः। इति हारावली। १६६॥ (यथा, रामायणे। २।६६।१०।
"ततस्तिलौदनं भुक्त्वा पुनः पुनरधःशिराः॥"
तिलोदनमिति पाठोऽपि दृश्यते॥)

तिल्यं, क्ली, (तिलानां भवनं क्षेत्रं वा। तिल+"विभाषा तिलमाषोमाभङ्गाणुभ्यः।" ५।२।४। इति यत्।) तिलक्षेत्रम्। तत्पर्य्यायः। तैलीनम् २। इत्यमरः। २।९।७॥ (तिलाय हितम्। "खलयवमाषतिलवृषब्रह्मणश्च।" ५।१।७। इति यत्। तिलहिते, त्रि॥)

तिल्ल, गतौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) लद्वयान्तः। इस्वी। तिल्लति। इति दुर्गादासः॥

तिल्वः, पुं, (तिलतीति। तिल+"उल्वादयश्च।" उणां। ४।९५। इति वन्प्रत्ययेन निपातनात् साधुः।) लोध्रः। इत्यमरः। २।४।३३॥ श्वेतलोध्रः। इति तट्टीकायां सुभूतिः॥ रक्तलोध्रः। इति स्वामी॥

तिल्वकः, पुं, (तिल्व+स्वार्थे कन्।) लोध्रः। इति राजनिर्घण्टः॥ (अस्य पर्य्याया यथा,—
"तिल्वकस्तु मतो लोध्रो बृहत्पत्रस्तिरीटकः॥"
अस्य विशिष्टव्यवहारो यथा,—
"तस्य मूलत्वचं शुष्कामन्तर्व्वल्कलवर्जिताम्।
चूर्णयेत्तु त्रिधा कृत्वा द्वौ भागौ स्रावयेत्ततः॥
लोध्रस्यैव कषायेण तृतीयं तेन भावयेत्।
भागं तु दशमूलस्य पुनः क्वाथेन भावयेत्॥
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्ध्वं प्रयोजयेत्।
दधितक्रसुरामण्डमूत्रैर्व्वदरसीधुना॥
रसेनामलकानां वा ततः पाणितलं पिबेत्॥"
"तिल्वकस्य कषायेण दशकृत्वः सुभाविताम्।
मात्रां काम्पिल्लकस्यैव कषायेण पुनः पिबेत्।
चतुरङ्गुलकल्पेन लेहोऽन्यः कार्य्य एव च॥"
"तिल्वकस्य कषायेण कल्केन च सशर्करः।
सघृतः साधितो लेहः स च श्रेष्ठं विरेचनम्॥"
इति चरके कल्पस्थाने नवमेऽध्याये॥)

तिष्ठद्गु, पुं, (तिष्ठन्ति गावो यस्मिन् काले दोहाय। "गावो हि रात्रिप्रथमनाडिकायामतीतायां विश्रान्ताः सत्यः उत्थाप्य दुह्यन्ते।" इति जयमङ्गलः। "तिष्ठद्गुप्रभृतीनि च।" २।१।१७। इति निपातनात् साधुः।) सन्ध्याकालः। यथा, भट्टिः। ४।१४।
"आतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम्॥"

तिष्यः, पुं, (तुष्यन्त्यस्मिन्निति। तुष+क्यप्। निपातनात् साधुः।) पुष्यनक्षत्रम्। इत्यमरः। १।३।२२॥ (यथा, महाभारते।३।१९०।९०।
"यदा सूर्य्यश्च चन्द्रश्च तथा तिष्यबृहस्पती।
एकराशौ समेष्यन्ति प्रवर्त्स्यति तदा कृतम्॥"
तिष्ये पुष्यनक्षत्रे पौर्णमास्यामस्त्यस्येति। अच्।) पौषमासः। इति शब्दरत्नावली॥ कलियुगम्। इति मेदिनी। ये,२९॥ (अत्र क्लीबेऽपि दृश्यते। यथा, महाभारते। ६।१०।४।
"चत्वारि भारते वर्षे युगानि भरतर्षभ!।
कृतं त्रेता द्वापरञ्च तिष्यञ्च कुरुवर्द्धन!॥")

तिष्यकः, पुं, (तिष्य एव। स्वार्थे कन्।) पौषमासः। इति शब्दरत्नावली॥

तिष्यपुष्पा, स्त्री, (तिष्ये पौषे पुष्पमस्याः।) आमलकी। इति शब्दचन्द्रिका॥

तिष्यफला, स्त्री, (तिष्ये पौषमासे फलमस्याः।) आमलकी। इत्यमरः। २।४।५७॥ (विवरणमस्या आमलकीशब्दे ज्ञातव्यम्॥)

तिष्या, स्त्री, (तिष्यः पौषमासः उत्पत्तिकालत्वेनास्त्यस्या इति। अच् टाप् च।) आमलकी॥ इति शब्दरत्नावली॥ (अस्याः पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"धात्री कर्षफला तिष्या वयस्यामलकी शिवा॥")

तिह्ना, [न्] पुं, व्याधिः। व्रीहिः। धनुः। सद्भावः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तीक्ष्णं, क्ली, (तेजयति तेज्यतेऽनेन वा। तिज निशाने+"तिजेर्दीर्घश्च।" उणां। ३।१८। इति क्स्न दीर्घश्च।) खरम्। विषम्। लौहम्। (यथास्य पर्य्याया वैद्यकरत्नमालायाम्।
"कृष्णायसं काललोहं रुक्मं तत्तीक्ष्णमन्यथा॥")
युद्धम्। इत्यमरः। ३।३।५३॥ मरणम्। शस्त्रम्। ग्रीष्मम्। इति तट्टीकासारसुन्दरी॥ सामुद्रलवणम्। मुष्ककः। इति मेदिनी। णे, १५॥ चव्यकम्। इति राजनिर्घण्टः॥ मरकम्। इति हेमचन्द्रः॥ *॥ तीक्ष्णवस्तूनि यथा।
प्रतिभा १ क्षीरकम् २ कटाक्षः ३ दुर्व्वाक्यम् ४ नखः ५ लवणम् ६ रविकरः ७। इति कविकल्पलता॥

तीक्ष्णः, पुं, (तिज+क्स्नः दीर्घश्च।) यवक्षारः। इति मेदिनी। णे, १५॥ (पर्य्याया यथा,—
"यावशूको यवक्षारो यवशूको यवाग्रजः।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः॥"
इति वैद्यकरत्नमालायाम्॥)
श्वेतकुशः। कुन्दुरुकः। इति राजनिर्घण्टः॥ तीक्ष्णगणो यथा। अश्लेषा आर्द्रा ज्येष्ठा मूला। इति ज्योतिषम्॥

तीक्ष्णः, त्रि, (तिज+क्स्नः दीर्घश्च।) तिग्मः। (उग्रः। यथा, मनुः। ७।१४०।
"तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः॥"
असह्यः। यथा, वाजसनेयसंहितायाम्।१६।३६। "नमस्तीक्ष्णेषवे चायुधिने।"
"तीक्ष्णा असह्या इषवो बाणा यस्य स तीक्ष्णेषुस्तस्मै नमः।" इति महीधरः॥) आत्मत्यागी। इति मेदिनी। णे, १५॥ निरालस्यः। सुबुद्धिः इति धरणी॥ योगी। इति जयपालः॥

तीक्ष्णकः, पुं, (तीक्ष्ण+संज्ञायां कन्।) मुष्ककः। गौरसर्षपः। इति राजनिर्घण्टः॥

तीक्ष्णकण्टकः, पुं, (तीक्ष्णानि कण्टकानि यस्य।) धुस्तूरः। इति जटाधरः॥ वर्व्वूरः। इङ्गुदी। करीरः। इति राजनिर्घण्टः॥

तीक्ष्णकण्टका, स्त्री, (तीक्ष्णं कण्टकं यस्याः ।) कन्थारीवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णकन्द, पु, (तीक्ष्णः कन्दोऽधोगेण्डुकोऽस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥

तीक्ष्णकर्म्मा, [न्] त्रि, (तीक्ष्णं कर्म्मास्य ।) तीव्रकर्म्मा । तत्पर्य्यायः । आयःशूलिकः २ । इति त्रिकाण्डशेषः ॥

तीक्ष्णकल्क, पु, (तीक्ष्णः कल्को यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णकान्ता, स्त्री, (तीक्ष्णा उग्रा कान्ता कमनीया च ।) मङ्गलचण्डिकाया रूपभेदः । यथा,—

"पीठे दिक्करवासिन्या द्विरूपा रमते शिवा ।
तीक्ष्णकान्ताह्वया लैका योगतारा प्रकीर्त्तिता ॥
पुरा ललितकान्ताख्या या श्रीमङ्गलचण्डिका ।
तस्यास्तु सततं रूपं तीक्ष्णकान्ताह्वयं शृणु ॥
कृष्णा लम्बोदरी या तु सा स्यादेकजटा शिवा ।
तेन रूपेण तां देवीं सततं परिपूजयेत् ॥
अङ्गाङ्गिमन्त्रौ रूपञ्च तस्याः प्राक् प्रतिपादितम् ।
त्रिकोणं मण्डलं चास्याः कर्त्तव्यं मन्त्रपूर्ब्बकम् ॥
आदौ रेखे ततः पश्चात् सुरेखेति पदं ततः ।
तथा पदं चाधिगत्य तिष्ठन्त्विति पदं ततः ॥
मण्डलन्यासमन्त्रोऽयं तीक्ष्णायाः परिकीर्त्तितः ।
नव त्रिपुरदेवादियमवेतालदुर्द्धरः ॥
गणाश्रमेऽत्यन्तकान्ता द्वारपालाः प्रकीर्त्तिताः ।
एतांस्तु पूजयेत् सम्यक् मण्डलस्याष्टदिक्षु वै ॥
आदौ सम्बोधनं कृत्वा वक्रपुष्पं ततः परम् ।
वह्निजाया ततः पश्चात् मन्त्रमेषां प्रकीर्त्तितम् ॥
पात्रोपकरणादीनां स्थानन्यासस्य सर्व्वतः ।
सर्व्वमुत्तरतन्त्रोक्तं ग्राह्यं रूपद्वयेऽपि च ॥
चामुण्डा च कराला च शुभगा भीषणा भगा ।
विकटेति च योगिन्यः प्रोक्तास्तस्यास्तु भूपते ॥
ह्रैं भगवत्येकजटे विद्महे पदमन्ततः ।
विकटदंष्ट्रे धीमहीति तन्नस्तारे प्रचोदयात् ॥
एषा तु तीक्ष्णा गायत्री पीठदेव्याः प्रकीर्त्तिता ।
निर्म्माल्यधारिणी चास्या देवी विकटचण्डिका ॥
माला तु स्फाटमयी प्रोक्ता रुद्राक्षसम्भवापि वा ।
विशेष एष देव्यास्तु पूजने परिकीर्त्तितः ॥
उपचारादिकं कार्य्यं बलिदानं जपादिकम् ।
सर्व्वन्तु पूर्ब्बवद्ग्राह्यं कामाख्यापूजने यथा ॥
पानेषु मदिरा शस्ता नरो बलिषु पार्थिव । ।
मोदको नारिकेलञ्च मांसं यच्चान्नमेव च ॥
नैवेद्येषु प्रियकरास्तीक्ष्णायाः परिकीर्त्तिताः ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

तीक्ष्णगन्ध, पुं, (तीक्ष्णः प्रचण्डो गन्धो यस्य ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥ रक्ततुलसी । इति रत्नमाला ॥ कुन्दुरुनामगन्धद्रव्यम् । इति जटाधरः ॥

तीक्ष्णगन्धकः, पु, (तीक्ष्णो गन्धोऽस्य । "शेषात् विभाषा ।" ५ । ४ । १५४ । इति कप् ।) शोभाञ्जनवृक्षः । इत्यमरः । २ । ४ । ३१ ॥

तीक्ष्णगन्धा, स्त्री, (तीक्ष्ण उग्रो गन्धो यस्याः ।) श्वेतवचा । कन्थारी । राजिका । इति राजनिर्घण्टः ॥ (पर्य्याया यथा,—

"राजी तु राजिका तीक्ष्णगन्धा क्षुजनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिकस्तु क्षवसर्षपः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वचा । इति मेदिनी । धे, ४६ ॥ जीवन्ती । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये ।

"उग्रा कुष्ठं तीक्ष्णगन्धा विडङ्गं
श्रेष्ठं नित्यं चावपीडे करञ्जम् ॥")

सूक्ष्मैला । इति रत्नमाला ॥

तीक्ष्णतण्डुला, स्त्री, (तीक्ष्णास्तण्डुला यस्याः ।) पिप्पली इति रत्नमाला ॥ (अस्याः पर्य्याया यथा,

"पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

तीक्ष्णतैलं, क्ली, (तीक्ष्णमुग्रं तैलं स्नेहो यस्य ।) सर्ज्जरसः । स्नुहीक्षीरम् । सुरा । इति शब्दरत्नावली ॥

तीक्ष्णदंष्ट्रः, पु, (तीक्ष्णा दंष्ट्रा यस्य ।) व्याघ्रः । इति राजनिर्घण्टः ॥

तीक्ष्णपत्र, पु, (तीक्ष्णानि पत्राणि यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णपुष्पं, क्ली, (तीक्ष्णानि पुष्पाणि यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥ (लवङ्गशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

तीक्ष्णपुष्पा, स्त्री, (तीक्ष्णं पुष्पं यस्याः ।) केतकी । इति राजनिर्घण्टः ॥

तीक्ष्णफलः, पु, (तीक्ष्णं फलं यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णमूल, पुं, (तीक्ष्णं मूलमस्य ।) शिग्रुः । कुलञ्जनः । इति राजनिर्घण्टः ॥ (शिग्रुशब्दे विवृतिरस्य ज्ञातव्या ॥)

तीक्ष्णरसः, पु, (तीक्ष्णो रसोऽस्य ।) यवक्षारः । इति रत्नमाला ॥

तीक्ष्णशूकः, पु, (तीक्ष्णः शूकोऽग्रभागो यस्य ।) यवः । इति हेमचन्द्रः । ४ । २३६ ॥

तीक्ष्णसारा, स्त्री, (तीक्ष्णः कठिनः सारो यस्याः।) शिंशपा । इति राजनिर्घण्टः ॥

तीक्ष्णा, स्त्री, (तीक्ष्ण+टाप् ।) वचा । सर्पकङ्कालिकावृक्षः । इति रत्नमाला ॥ कपिकच्छूः । महाज्योतिष्मती । अत्यम्लपर्णी । इति जटाधरः ॥

तीक्ष्णायसं, क्ली, (अय एव आयसम् । तीक्ष्णञ्च तत् आयसञ्चेति ।) लौहविशेषः । तीखा इति इस्पात इति च भाषा ॥ तत्पर्य्यायः । लोहम् २ शस्त्रायसम् ३ शस्त्रम् ४ पिण्डा ५ पिण्डायसम् ६ शठम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ मुण्डितम् १२ अयः १३ चित्रायसम् १४ चीनजम् १५ । अस्य गुणाः । रूक्षत्वम् । उष्णत्वम् । तिक्तत्वम् । वातपित्तकफप्रमेहपाण्डुशूलनाशित्वम् । तीक्ष्णत्वम् । मुण्डलोहाधिकत्वञ्च । इति राजनिर्घण्टः ॥ (अवचारोऽस्य यथा, रसेन्द्रसारसंग्रहे शूलाधिकारे त्रिफलालौहे ॥

"तीक्ष्णायश्चूर्णसंयुक्तं त्रिफला चूर्णमुत्तमम् ।
क्षीरेण पाययेद्धीमान् सद्यः शूलनिवारणम् ॥")

तीम, य क्लेदने । इति कविकल्पद्रुमः ॥ (दिवां-पर-अकं-सेट् ।) य, तीम्यति तितीम । क्लेदनमार्द्रीभावः । इति दुर्गादासः ॥

तीर, तृ क कर्म्मणां समाप्तौ । इति कविकल्पद्रुमः ॥ (अदन्तचुरां परं-सकं-सेट् ।) कर्म्मणामिति स्पष्टार्थः । अतितीरत् व्रतं लोकः समापितवानित्यर्थः । इति दुर्गादासः ॥

तीरं, क्ली, (तीरयति समापयति नद्यादिकमिति । तीर+अच् ।) नदीकूलम् । इत्यमरः ।१।१०।७॥ गङ्गातीरं यथा,—

"सार्द्धहस्तशतं यावत् गर्भतस्तीरमुच्यते ।
भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात् तदन्यत्तीरमुच्यते ॥"
इति प्रायश्चित्ततत्त्वम् ॥

शायकः । इति त्रिकाण्डशेषः ॥

तीरः, पु, (तीरयतीति । तीर+पचाद्यच् ।) त्रपु । इति मेदिनी । रे, ४५ ॥

तीरभुक्तिः, पु, (तीरे भुक्तिरस्य ।) देशविशेषः । तीरहोत् इति भाषा ॥ तत्पर्य्यायः । निच्छविः २ विदेहः ३ । इति त्रिकाण्डशेषः ॥

तीरितं, क्ली, (तीर कर्म्मणां समाप्तौ+भावे क्तः ।) कर्म्मणा समाप्तिः । इति व्याकरणम् ॥

तीर्णः, त्रि, (तॄ प्लवनतरणयोः+कर्त्तरि क्तः । उत्तीर्णः । (यथा, वह्निपुराणे कन्यादाननामाध्याये ।

"तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥")

अभिभूतः । प्लुतः । (तॄ+कर्म्मणि क्तः । अतोत्सरणः । यथा, महाभारते । १ । १ । १६२ ।

"यदाश्रौषं तीर्णां शन्तनुमध्ये च तेन
तदा नाशंसे विजयाय सञ्जय ! ॥")

तीर्णपदी, तालमूली । इति शब्दचन्द्रिका ॥

तीर्थं, क्ली, (तरति पापादिकं यस्मात् । तॄ+"पातृतुदिवचीति ।" उणां । २ । ७ । इति थक् ।) पुण्यस्थानादि । तीर्थतोयस्य स्नाने पुण्यत्वं यथा,—

"नदीदेवनिखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥
निपानादुद्धृतं पुण्यं ततः प्रस्रवणादिकम् ।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते ॥
तीर्थतोयं ततः पुण्यं गङ्गातोयं ततोऽधिकम् ॥"
इत्याद्ये वह्निपुराणे स्नानविधिर्नाम ४ अध्यायः ॥

जलसमीपस्थारत्निमात्रस्थानम् । यथा, आदित्यपुराणे ।

"अरत्निमात्रं जलं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते ।
पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत् ॥

तस्मिन् देशे शौचं कर्त्तव्य यस्मादरत्निमात्रव्यव-
स्थित जल तत् स्थलमेव तीर्थं जलसमीपत्वात् ।”
इत्याह्निकाचारतत्त्वम् ॥ * ॥
विप्रचरणयोस्तीर्थवासस्थानत्वं ब्राह्मणशब्दे
द्रष्टव्यम् ॥ * ॥ विप्रदक्षिणकर्णस्य तीर्थवास-
स्थानत्व यथा । पराशरः ।
“प्रभासादीनि तीर्थानि गङ्गाद्या' सरितस्तथा ।
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥”
इत्याह्निकाचारतत्त्वम् ॥
हस्तस्थिततीर्थानि यथा,—
“अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्योः पैत्रं मूले त्वङ्गुष्ठस्य ब्राह्मम् ॥”
इत्यमर. । २ । ७ । ५१ ॥
(यथा च, मार्कण्डेये ।३४ । १०३—१०६ ।
“कुर्य्यात् कर्म्माणि तीर्थेन स्वेन स्वेन यथाविधि ।
देवादीनां तथा कुर्य्याद् ब्राह्मेणाचमनक्रियाम ॥
अङ्गुष्ठोत्तरतो रेखा पाणेर्या दक्षिणस्य तु ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥
तर्ज्जन्यङ्गुष्ठयोरन्तः पैत्रं तीर्थमुदाहृतम् ।
पितॄणां तेन तोयादि दद्यान्नान्दीमुखादृते ॥
अङ्गुल्यग्रे तथा दैव तेन दिव्यक्रियाविधिः ।
तीर्थं कनिष्ठिका मूले काय तेन प्रजापतेः ॥
एवमेभि. सदा तीर्थैर्देवानां पितृभिः सह ।
सदा कार्य्याणि कुर्व्वीत नान्यतीर्थेन कर्हिचित् ॥
ब्राह्मेणाचमनं शस्तं पित्र्य पैत्रेण सर्व्वदा ।
देवतीर्थेन देवानां प्राजापत्य निजेन च ॥
नान्दीमुखानां कुर्व्वीत प्राज्ञ' पिण्डोदकक्रियाम् ।
प्राजापत्येन तीर्थेन यच्च किञ्चित् प्रजापतेः ॥”)
तीर्थं त्रिविधम् । यथा । जङ्गमम् १ मानसम् २
स्थावरम् ३ । तथा च ।
“ब्राह्मणा जङ्गम तीर्थं निर्म्मलं सार्व्वकामिकम् ।
येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनो जनाः ॥
अगस्तिरुवाच ।
शृणु तीर्थानि गदतो मानसानि ममानघे ! ।
येषु सम्यक् नरः स्नात्वा प्रयाति परमां गतिम् ॥
सत्य तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः ।
सर्व्वभूतदया तीर्थं सर्व्वत्रार्ज्जवमेव च ॥
दान तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते ।
ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता ॥
ज्ञान तीर्थं धृतिस्तीर्थं पुण्य तीर्थमुदाहृतम् ।
तीर्थानामपि तत्तीर्थं विशुद्धिर्म्मनसः परा ।
एतत्ते कथितं देवि ! मानसं तीर्थलक्षणम् ॥
भौमानामपि तीर्थानां पुण्यत्वे कारण शृणु ।
यथा शरीरस्योद्देशाः केचिन्मेध्यतमाः स्मृता' ।
तथा पृथिव्यामुद्देशाः केचित् पुण्यतमाः स्मृताः ॥
प्रभावादद्भुताद्भूमे. सलिलस्य च तेजसा ।
परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥
तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः ।
उभयेष्वपि यः स्नाति स याति परमां गतिम् ॥”
तीर्थागमने दोषो यथा,—
“अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्वा काञ्चनं गाञ्च दरिद्रो नाम जायते ॥”

तीर्थगमने फलं यथा,—
“अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ।
न तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ॥ * ॥
तीर्थान्यनुस्मरन् धीरः श्रद्दधानः समाहितः ।
कृतपापो विशुध्येत किं पुनः शुद्धकर्म्मकृत् ॥
तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते ।
न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति ॥
तीर्थफलभागिनो यथा,—
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥
प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् ।
अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते ॥
अदाम्भिको निरारम्भो लघ्वाहारो जितेन्द्रियः ।
विमुक्तः सर्व्वसङ्गैर्यः स तीर्थफलमश्नुते ॥
अकोपनोऽमलमति. सत्यवादी दृढव्रत. ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥
अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥”
इति काशीखण्डम् ॥ * ॥
तीर्थयात्राविधानं यथा,—
“यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे ।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात् ।
प्रत्यागतश्चापि पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥
एवं कुर्व्वतस्तस्य तीर्थे यदुक्त
फलं तत् स्यान्नात्र सन्देह एव ॥”
इति ब्रह्मपुराणम् ॥ * ॥
“प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ।
कचानां वपनं कुर्य्यात् वृथा न विकचो भवेत् ॥”
इति भविष्यपुराणम् ॥ * ॥
“तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च ।
वृद्धिश्राद्ध प्रकुर्व्वीत बहुसर्पिःसमन्वितम् ॥”
इति कूर्म्मपुराणम् ॥ * ॥
“ऐश्वर्य्यलाभमाहात्म्यात् गच्छेद्यानेन यो नरः ।
निष्फल तस्य तत्तीर्थं तस्माद्यान विवर्ज्जयेत् ॥”
इति मत्स्यपुराणम् ॥ * ॥
“सवत्सरं द्विमासोन पुनस्तीर्थं व्रजेद्यदि ।
मुण्डनञ्चोपवासञ्च तदा यत्नेन कारयेत् ॥”
इति गङ्गावाक्यावली ॥ * ॥
तीर्थप्राप्त्यनन्तरविधानं यथा,—
“न परीक्ष्यो द्विजस्तीर्थेष्वन्नार्थी भोज्य एव हि ।
सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च ॥
कर्त्तव्यमृषिभिर्दृष्टं पिण्याकेन गुडेन च ।
श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्ज्जितम् ॥
अकालेऽप्यथवा काले तीर्थश्राद्धन्तु तर्पणम् ।
अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत् ॥
यदह्नि तीर्थप्राप्तिः स्यात्ततोऽह्न' पूर्व्ववासरे ।
उपवासश्च कर्त्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत् ॥

तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा ।
शिरोगतानि पापानि यान्ति मुण्डनतो यत. ॥
तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत् ।
स्नानजं फलमाप्नोति तीर्थयात्राश्रितं न तु ॥”
इति काशीखण्डम् ॥
“मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वय विधिः ।
वर्ज्जयित्वा गयां गङ्गां विशालां विरजान्तथा ॥”
इति स्कान्दम् ॥ * ॥
“षोड़शांशं स लभते य' परार्थेन गच्छति ।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥”
इति पैठीनसिः ॥
“स्नापयेत् स्निग्धमित्रादीन् ज्ञातींस्तीर्थे नरोत्तमः ।
अन्यपापहरन्त्येते बलात्तीर्थभव फलम् ॥”
इति स्कान्दम् ॥
“मातरं पितरं जायां भ्रातरं सुहृदं गुरुम् ।
यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः ॥”
इति प्रायश्चित्ततत्त्वे मार्कण्डेयपुराणम् ॥ * ॥
कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा,—
“सरस्वती पुण्यक्षेत्रमाजगाम च भारतम् ।
गङ्गा शापेन कलया स्वयं तस्थौ हरेः पदे ॥
पश्चाद्भगीरथानीता मर्त्त्यं भागीरथी शुभा ।
समाजगाम कलया वाणी शापेन नारद ! ॥
पद्मा जगाम कलया सा च पद्मावती नदी ।
भारत भारती शापात् स्वय तस्थौ हरेः पदे ॥
कलेः पञ्चसहस्रञ्च वर्षं स्थित्वा च भारते ।
जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम् ॥
यानि सर्व्वाणि तीर्थानि काश्यां वृन्दावन विना ।
यास्यन्ति ताभि. सार्द्धञ्च वैकुण्ठमाज्ञया हरेः ॥”
तीर्थप्रतिग्रहे दोषो यथा,—
“तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे ॥
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे वदरपाचने ॥
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये ॥
एतेष्वन्येषु यो दान प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाक प्रयाति च ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
यानादिना गमने दोषो यथा,—
“पुण्यार्द्धं हरते याने तदर्द्धं छत्रपादुके ।
तदर्द्धं तैलमांसाभ्यां सर्व्वं हरति मैथुने ॥”
इति कर्म्मलोचनम् ॥ * ॥
युगभेदे तीर्थविशेषस्य श्रेष्ठत्व माह ।
“कृते तु पुष्करं तीर्थं त्रेतायां नैमिषन्तथा ।
द्वापरे तु कुरुक्षेत्र कलौ गङ्गां समाश्रयेत् ॥”
तीर्थसंख्या यथा,—
“तिस्र' कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवि ! ॥”
अथ भूमण्डलस्य प्रादक्षिण्येन तीर्थानि यथा
पुष्करम् १ तत्र ब्रह्मणः स्थान तीर्थराजेति नाम्ना
ख्यातं तत्र त्रिसन्ध्य दशकोटितीर्थान्यायान्ति ।
तस्य फल अश्वमेधतुल्य ब्रह्मलोकगमनञ्च । जम्बू-

मार्गः २ तस्य फलं अश्वमेधतुल्यं विष्णुप्राप्तिश्च ॥ तण्डुलिकाश्रमः ३ तस्य फलं दुर्गतिविनाशः ब्रह्मलोकप्राप्तिश्च ॥ अगस्त्यसरः ४ तत्र त्रिरात्रोपवासेन वाजपेयतुल्यं फलं शाकाहारेण कौमारलोकप्राप्तिश्च ॥ धर्म्मारण्यम् ५ तत्तु कण्वाश्रमः तस्य फलं प्रवेशमात्रेण पापक्षयः देवपितृपूजनेन अश्वमेधतुल्यं फलं विष्णुलोकप्राप्तिश्च ॥ ययातिपतनम् ६ तत्र गमनेन अश्वमेधयज्ञतुल्यं फलम् ॥ कोटितीर्थम् ७ तत्र महाकालस्तिष्ठति स्नानेन अश्वमेधतुल्यं फलम् ॥ भद्रवट. ८ तत्र उमापतिस्तिष्ठति तं दृष्ट्वा गोसहस्रदानफलं दशेकस्य गाणपत्यञ्च भवति ॥ नर्म्मदा नदी ९ तत्र पितृदेवतर्पणात् अग्निष्टोमतुल्यं फलम् । दक्षिणसिन्धुः १० तत्र ब्रह्मचर्य्येण अग्निष्टोमतुल्यं फलं त्रिदिवप्राप्तिश्च । चर्म्मण्वती नदी ११ तत्रेन्द्रियसंयमनेन ज्योतिष्टोमफलम् । हिमवत्सुतार्व्वुदः १२ तत्र वशिष्ठाश्रमः तस्मिन्नेकरात्रवासेन गोसहस्रदानफलम् । पिङ्गतीर्थम् १३ तत्रेन्द्रियसंयमनेन सवत्सशतकपिलादानफलम् । प्रभासः १४ तत्र हुताशनस्तिष्ठति तत्र स्नानेन अग्निष्टोमातिरात्रयोः फलम् । सरस्वतीसागरसङ्गमः १५ तत्र स्नानेन गोसहस्रदानफलं त्रिरात्रोपवासेन पितृदेवतर्पणेन च अश्वमेधफलम् । वरदानम् १६ यत्र विष्णवे दुर्व्वाससा वरो दत्तः तत्र स्नानेन गोसहस्रदानफलम् । द्वारवत्यां पिण्डारकतीर्थम् १७ तत्र पद्मचिह्नयुक्ता मुद्राः शूलचिह्नितानि पद्मानि अद्यापि दृश्यन्ते महादेवस्तिष्ठति स्नानेन बहुसुवर्णयज्ञफलम् । समुद्रसिन्धुसङ्गमः १८ तत्र स्नानेन पितृदेवतर्पणेन च वरुणलोकप्राप्तिः । शमीतीर्थम् १९ तत्र महादेवस्तिष्ठति तत्र स्नानेनाश्वमेधफलं महादेवदर्शनार्च्चनाभ्यां सर्व्वपापनाशः । वसुधारा २० तस्या दर्शनेन अश्वमेधफलं स्नानतर्पणाभ्यां विष्णुलोकप्राप्तिः । सिन्धूत्तमम् २१ तत्र स्नानेन बहुसुवर्णयज्ञफलम् । यद्रुतुङ्गम् २२ तत्र गमनेन ब्रह्मलोकप्राप्तिः । कुमारिकाशक्रतीर्थम् २३ तत्र स्नानेन विमलत्वं भवति । पञ्चनदः २४ तत्र पञ्चयज्ञफलम् । भीमास्थानम् २५ तत्र स्नात्वा नरो देवीपुत्रो भवति गोसहस्रदानफलञ्च लभते । गिरिकुञ्जम् २६ तत्र ब्रह्मा तिष्ठति तस्य नत्या गोसहस्रदानफलम् । विमलतीर्थम् २७ अद्यापि तत्र सौवर्णराजतमत्स्या दृश्यन्ते तत्र स्नानपानाभ्यां वाजपेयफलम् । वितस्ता नदी २८ तत्र तर्पणेन वाजपेयफलं स्वर्गप्राप्तिश्च । काश्मीरे वितस्ताख्यं तक्षकनागसदनम् २९ तत्र स्नानेन वाजपेयफल विष्णुलोकप्राप्तिश्च । शमपरा ३० तत्र सायंसन्ध्यायां स्नानेन सप्तार्च्चिषे चरुनिवेदनेन च अश्वमेधसहस्राधिकफलम् । रुद्रासदम् ३१ तत्र महादेवदर्शनात् अश्वमेधफलम् । मणिमान् पर्व्वतः ३२ तत्र त्रिरात्रोपवासेन ज्योतिष्टोमफलम् । देविका नदी ३३ तत्र महादेवस्थानम् तत्र स्नानमहादेवदर्शनाभ्यां महादेवाय चरुनिवेदनेन च सर्व्वकामप्राप्तिर्देवलोकप्राप्तिश्च । देविकाया रुद्रतीर्थं तत्र स्नानात् सिद्धिप्राप्तिः । एव देविकाया यजनयाजनब्रह्मवालुकपुष्पन्याससंज्ञकानि तीर्थानि तेषु स्नानात् मरणभयविनाशः । दीर्घसत्रम् ३४ तत्र गमनादेव दीर्घसत्रफलप्राप्तिः राजसूयाश्वमेधफलप्राप्तिश्च । विनशनम् ३५ मेरुपृष्ठे अन्तर्हिता सरस्वती यत्र याति सा चमसतीर्थे एव शिरोद्भेदे नागोद्भेदे च दृश्यते चमसे स्नानात् वाजपेयफलं नागोद्भेदे स्नानात् नागलोकप्राप्तिः । शशपानतीर्थम् ३६ तत्र स्नानात् शिववद्दीप्तिः गोसहस्रदानफलप्राप्तिश्च । कुमारकोटी ३७ तत्र स्नानेन पितृदेवपूजनेन च गवामययागफलप्राप्तिः । रुद्रकोटी ३८ यत्र कोटिऋषयो मिलिता अहमग्रे रुद्रं द्रक्ष्यामीति प्रस्थिताना तेषां सन्तोषार्थं एको रुद्रः कोटिमूर्त्तयोऽभवत् । तत्र स्नानात् अश्वमेधफलप्राप्तिः कुलोद्धरणञ्च । सरस्वतीसङ्गमः ३९ तत्र जनार्द्दनस्तिष्ठति तत्र स्नानात् बहुसुवर्णयागफलप्राप्तिः । सयावसानम् ४० तत्र गमनात् गोसहस्रदानफलप्राप्तिः । कुरुक्षेत्रम् ४१ तत्र गमनात् सर्व्वपापक्षयः ततो मचक्रुकद्वारपालस्य नमस्कारेण गोसहस्रदानफलप्राप्तिः । विष्णुस्थानं ४२ तत्र स्नानात् विष्णुदर्शनात् अश्वमेधफलं विष्णुलोकप्राप्तिश्च । परिप्लवम् ४३ तत्र अग्निष्टोमातिरात्रयागफलप्राप्तिः । पृथिवीतीर्थम् ४४ तत्र गोसहस्रदानफलम् । शालूकिनीतीर्थम् ४५ तत्र दशाश्वमेधिके स्नानात् गोसहस्रदानफलम् । सर्पिर्द्दर्व्वी ४६ सा नागतीर्थं तत्र गमनेन अग्निष्टोमफलं नागलोकप्राप्तिश्च । अवर्णकद्वारपालः ४७ तत्रैकरात्रवासात् गोसहस्रदानफलप्राप्तिः । पञ्चनदम् ४८ तत्र कोटितीर्थे स्नानात् अश्वमेधफलम् । अश्वितीर्थम् ४९ तत्र रूपप्राप्तिः । वराहतीर्थम् ५० यत्र वराहरूपी विष्णुः स्थित. तत्र स्नानात् अग्निष्टोमफलप्राप्तिः । जयन्त्यम् ५१ तत्र सोमतीर्थे स्नानात् राजसूयफलप्राप्तिः । एकहंसतीर्थम् ५२ तत्र गोसहस्रदानफलप्राप्तिः । कृतशौचम् ५३ तत्र गमनात् पुण्डरीकयज्ञफलप्राप्तिः । मुञ्जावटतीर्थम् ५४ तत्तु महादेवस्थानं तत्रैकरजनीवासात् गाणपत्यप्राप्तिः तत्रैव विशालाख्यायक्षीदर्शनात् सर्व्वकामप्राप्तिः । जामदग्न्याहृतपुष्करतीर्थम् ५५ तत्र स्नानपूजनाभ्यां हयमेधफलम् । रामह्रदः ५६ यत्र रामेण क्षात्रमुत्साद्य तेषां रक्तेन पञ्च ह्रदाः कृताः तेषु स्नानतर्पणाभ्यां पितृगणाद्वरप्राप्तिः बहुसुवर्णयज्ञफलप्राप्तिश्च । वंशमूलकम् ५७ तत्र स्नानात् स्वकुलोद्धरणम् । कायशोधनम् ५८ तत्र स्नानात् देहशुद्धिः । लोकोद्धारः ५९ तत्र स्नानात् स्वकीयलोकोद्धारः । श्रीतीर्थम् ६० तत्र गमनात् उत्तमश्रीप्राप्तिः । कपिलातीर्थम् ६१ तत्र स्नानदेवपितृपूजनाभ्यां कपिलासहस्रदानफलम् । सूर्य्यतीर्थम् ६२ तत्र स्नानोपवासपितृपूजनैरग्निष्टोमफलं देवलोकप्राप्तिश्च । गवां भवनम् ६३ तत्राभिषेकेण गोसहस्रदानफलम् । शङ्खिनीतीर्थम् ६४ तत्र स्नानात् उत्तमवीर्य्यप्राप्तिः । ब्रह्मावर्त्त. ६५ तत्र स्नानात् ब्रह्मलोकप्राप्तिः । सुतीर्थकम् ६६ तत्र पितृदेवाना सान्निध्यं तत्र स्नानपितृदेवपूजनैरश्वमेधफलं पितृलोकप्राप्तिश्च । अम्बुमती ६७ तत्र काशीश्वरतीर्थे स्नानात् सर्व्वरोगनाशः ब्रह्मलोकप्राप्तिश्च तत्रैव मातृतीर्थं तत्र स्नानात् सन्तानवृद्धिः श्रीप्राप्तिश्च ॥ शीतवनम् ६८ तत्र केशाभ्युक्षणेन पवित्रता ॥ श्वानलोमापहः ६९ तत्र स्नानात् परमगतिप्राप्तिः । दशाश्वमेधिकम् ७० तत्र स्नानात् निश्चलगतिप्राप्तिः ॥ मानुषतीर्थम् ७१ तत्र व्याधपीडिताः कृष्णमृगा विगाह्य मानुषत्वं प्राप्ताः तत्र स्नानात् सर्व्वपापमुक्तिः स्वर्गवसतिश्च ॥ आपगानदी ७२ तत्र देवपितृद्देशेनैकब्राह्मणभोजनेन कोटिब्राह्मणभोजनसिद्धिः ॥ ब्रह्मोडुम्बरः ७३ तत्र ब्रह्मा तिष्ठति तत्र सप्तर्षिकुण्डे स्नानात् सर्व्वपापनाशो ब्रह्मलोकप्राप्तिश्च । कपिलस्य केदारम् ७४ तत्र तपसा सर्व्वपापनाशः अन्तर्धानप्राप्तिश्च । सरकम् ७५ तत्र वृषध्वजप्रणामेन सर्व्वकामशिवलोकयोः प्राप्तिः । इलास्पदम् ७६ तत्र स्नानदेवपितृपूजनाभ्यां दुर्गतिविनाशः वाजपेयफलप्राप्तिश्च । किन्दानम् ७७ तत्र स्नानादप्रमेयदानफलम् । किंजप्यम् ७८ तत्र स्नानात् अप्रमेयजपफलम् ॥ अनाजन्मतीर्थम् ७९ तत् नारदस्थानं तत्र प्राणत्यागात् अनुत्तमलोकप्राप्तिः ॥ वैतरणी नदी ८० तत्र स्नानशूलपाणिपूजनाभ्यां सर्व्वपापमुक्तिः परमपदप्राप्तिश्च । फलकीतीर्थम् ८१ फलकीवने देवास्तपश्चरन्ति ॥ मिश्रकम् ८२ तत्र नारदेन सर्व्वतीर्थानि मिश्रितानि तत्र स्नानात् सर्व्वतीर्थस्नानफलम् ॥ मधुवटी ८३ सा देवीस्थानं तत्र स्नानदेवपितृपूजनाभ्यां गोसहस्रदानफलप्राप्तिः कौशिकीदृषद्वतीसङ्गमः ८४ तत्र स्नानात् सर्व्वपापमुक्तिः । किन्दत्तकूपः ८५ तत्र तिलप्रस्थदानात् ऋणत्रयमुक्तिः परमसिद्धिप्राप्तिश्च । वेदीतीर्थम् ८६ तत्र स्नानात् गोसहस्रदानफलप्राप्तिः ॥ अहः सुदिनं तीर्थद्वयम् ८७ तयोः स्नानात् सूर्य्यलोकप्राप्तिः । मृगधूमः ८८ तत्र विष्णुपदे स्नानात् वामनपूजनाच्च सर्व्वपापमुक्तिः रविलोकप्राप्तिश्च ॥ सरस्वत्यास्तीर्थं श्रीकुञ्जम् ८९ तत्र स्नानात् स्वर्गवसतिः ॥ नैमिषकुञ्जम् ९० तस्मिन् स्नानात् हयमेधफलप्राप्तिः । कन्यातीर्थम् ९१ तत्र स्नानात् ज्योतिष्टोमफलप्राप्तिः । ब्रह्मस्थानम् ९२ तत्र स्नानात् शूद्रस्यापि ब्राह्मणत्वं ब्राह्मणस्य परमगतिः ॥ सोमतीर्थम् ९३ तत्र स्नानात् सोमयागफलप्राप्तिः ॥ सप्तसारस्वततीर्थम् ९४ तत्र स्नानजपाभ्यां ब्रह्मलोकप्राप्तिः ॥ औशनसकम् ९५ तत्र त्रिसन्ध्यं कार्त्तिकेयस्य सन्निधानम् । कपालमोचनम् ९६ तत्र स्नानात् सर्व्वपापनाशः ॥ अग्नितीर्थम् ९७ तत्र स्नानात् वह्निलोकप्राप्तिः

कुलोद्धरणञ्च। विश्वामित्रतीर्थम् ९८ तत्र स्नानात् ब्राह्मण्यप्राप्तिः। ब्रह्मयोनिः ९९ तत्र स्नानात् ब्रह्मलोके वासः। पृथूदकम् १०० तत् कार्त्तिकेयस्थानं तत्राभिषेकात् अश्वमेधफलप्राप्तिः, यामिनामपि स्वर्गप्राप्तिः। मधुस्रवम् १०१ तत्र स्नानात् गोसहस्रदानफलप्राप्तिः॥ सरस्वत्यरुणासङ्गम १०२ तत्र त्रिरात्रोपवासस्नानाभ्यां ब्रह्महत्यापापनाशः। अवकीर्णम् १०३ तत् दर्भिमुनिनिर्म्मितं दर्भिणा चत्वारः समुद्रा आनीताः, तत्र स्नानात् दुर्गतिविनाशः। शतसहस्रकम् १०४ साहस्रकम् १०५ उभयत्र स्नानात् गोसहस्रदानफलं दानोपवासौ सहस्रगुणौ भवेत्॥ रेणुकातीर्थम् १०६ तत्राभिषेकपितृदेवपूजनाभ्यां सर्व्वपापनाशः अग्निष्टोमफलप्राप्तिश्च। विमोचनम् १०७ तत्र स्नानात् सर्व्वप्रतिग्रहकृतपापनाशः। पञ्चवटतीर्थम् १०८ तत्र गमनात् महापुण्यप्राप्तिः स्वर्गगमनञ्च॥ तैजसम् १०९ यत्र ब्रह्मादिभिः सैनापत्ये कार्त्तिकेयोऽभिषिक्तः। कुरुतीर्थम् ११० तत्र स्नानात् रुद्रलोकप्राप्तिः। स्वर्गद्वारम् १११ तत्र गमनात् स्वर्गलोकाग्निष्टोमफलप्राप्तिः। अनरकम् ११२ तत्र स्नानात् दुर्गतिनाशः। अस्थिपुरम् ११३ तत्र पितृदेवतर्पणात् अग्निष्टोमफलप्राप्तिः। गङ्गाह्रदकूपः ११४ तत्र स्नानात् ब्रह्मलोकप्राप्तिः। स्थाणुवटतीर्थम् ११५ तत्र स्नानैकरात्रवासाभ्यां रुद्रलोकप्राप्तिः। वदरीपाचनम् ११६ तत्तु वशिष्ठाश्रमः, तत्र त्रिरात्रोपवासवदरभक्षणाभ्यां अश्वमेधफलम् हरलोकप्राप्तिश्च। इन्द्रमार्गम् ११७ तत्राहोरात्रोपवासात् इन्द्रलोकप्राप्तिः। आदित्याश्रमः ११८ तत्र स्नानात् सूर्य्यलोकप्राप्तिः। सोमतीर्थम् ११९ तत्र स्नानात् सोमलोकप्राप्तिः। कन्याश्रमः १२० तत्र त्रिरात्रवासोपवासाभ्यां कन्याशतप्राप्तिः ब्रह्मलोकगमनञ्च। दधीचतीर्थम् १२१ तत्र स्नानात् वाजपेयफलप्राप्तिः। सन्निहितातीर्थम् १२२ तत्र अमावस्यायां सर्व्वाणि तीर्थान्यायान्ति एव सूर्य्यग्रहणे स्नानात् शताश्वमेधफलप्राप्तिः, स्नानदानाभ्यां स्वर्गलोकप्राप्तिश्च। तत्रामावस्यायां सूर्य्यग्रहणे स्नानश्राद्धाभ्यां अश्वमेधसहस्रफलप्राप्तिः। स्नानमात्रात् सर्व्वपापनाशः, ब्रह्मलोकप्राप्तिश्च॥ गङ्गाह्रदः १२३ तत्र स्नानात् राजसूयाश्वमेधफलप्राप्तिः। कुरुक्षेत्रम् १२४ तत् तरन्तुकारन्तुकयोः एव रामह्रदमचक्रुकयोरन्तरं एतत् स्यमन्तपञ्चकं पितामहस्योत्तरवेदिः॥ धर्म्मतीर्थम् १२५ तत्र स्नानादासप्तमकुलोद्धरणम्॥ कारापचनम् १२६ तत्र स्नानात् अग्निष्टोमफलं विष्णुलोकप्राप्तिश्च। सौगन्धिकवनम् १२७ यत्र ब्रह्मादयो देवाः प्रत्यहमायान्ति तद्वनप्रवेशमात्रेण सर्व्वपापनाशः॥ प्लक्षसरस्वती १२८ तत्र स्नानपितृदेवपूजनाभ्यां अश्वमेधफलप्राप्तिः। ईशानाध्युषितम् १२९ तत्र शाकम्भरी देवी तत्र त्रिरात्रोपवासशाकाहाराभ्यां द्वादशवर्षशाकाहारफलप्राप्तिः। सुवर्णाख्यम् १३० तत्र शिवस्तिष्ठति तस्य पूजनात् अश्वमेधफलगाणपत्ययोः प्राप्तिः। धूमावती १३१ तत्र त्रिरात्रोपवासात् मनस्कामप्राप्तिः। धूमावती दक्षिणार्द्धे रथावर्त्तः १३२ तत्रारोहणेन महादेवप्रसादात् परमगतिप्राप्तिः। धारा १३३ तत्र स्नानात् शोकनाशः। गङ्गाद्वारम् १३४ तत्र कोटितीर्थे स्नानात् पुण्डरीकयागफलप्राप्तिः कुलोद्धरणं एकरात्रवासेन गोसहस्रदानफलप्राप्तिश्च। सप्तगङ्गम् १३५ त्रिगङ्गम् १३६ सप्तावर्त्तः १३७ एतेषु पितृदेवतर्पणात् पुण्यलोकप्राप्तिः। गङ्गायमुनासङ्गमः १३८ तत्र स्नानात् दशाश्वमेधफलप्राप्तिः, कुलोद्धरणञ्च। कनखलः १३९ तत्र स्नानत्रिरात्रोपवासाभ्यां वाजिमेधफलब्रह्मलोकयोः प्राप्तिः॥ कपिलावटः १४० तत्रैकरात्रवासेन गोसहस्रदानफलप्राप्तिः। कपिलनागराजः १४१ तत्राभिषेकात् कपिलासहस्रदानफलप्राप्तिः। ललितिका १४२ सा शान्तनुतीर्थं तत्र स्नानात् दुर्गतिविनाशः॥ सुगन्धा १४३ तत्र गमनात् सर्व्वपापविशुद्धिः ब्रह्मलोकप्राप्तिश्च। रुद्रावर्त्तः १४४ तत्र स्नानात् ब्रह्मलोकप्राप्तिः॥ गङ्गासरस्वतीसङ्गमः १४५ तत्र स्नानात् अश्वमेधफलप्राप्तिः स्वर्गगमनञ्च॥ भद्रकर्णह्रदः १४६ तत्र स्नानशङ्करपूजनाभ्यां दुर्गतिनाशः विष्णुलोकप्राप्तिश्च। कुब्जाम्रकम् १४७ तत्र गमनात् स्वर्गप्राप्तिः। अरुन्धतीवटः १४८ तत्रैकरात्रवासात् गोसहस्रदानफलप्राप्तिः कुलोद्धरणञ्च। सामुद्रकम् १४९ तत्र त्रिरात्रोपवासेन गोसहस्रदानफलं कुलोद्धरणञ्च॥ ब्रह्मावर्त्तः १५० तत्र गमनात् अग्निष्टोमफलं ब्रह्मलोकप्राप्तिश्च। यमुनाप्रभवः १५१ तत्र स्नानात् अश्वमेधफलस्वर्गलोकयोः प्राप्तिः॥ दर्व्वीसंक्रमणम् १५२ तत्र गमनात् वाजिमेधफलप्राप्तिः ब्रह्मलोकगमनञ्च। सिन्धुप्रभवः १५३ तत्र पञ्चरात्रवासात् बहुसुवर्णयज्ञफलप्राप्तिः॥ अर्थवेदी १५४ तत्र गमनात् अश्वमेधफलस्वर्गयोः प्राप्तिः॥ वाशिष्ठी नदी तत्रैव ऋषिकुल्या १५५ वाशिष्ठी गमनात् सर्व्ववर्णानां द्विजत्वप्राप्तिः ऋषिकुल्याया स्नानैकमासवासशाकाहारैः ऋषिलोकप्राप्तिः॥ भृगुतुङ्गम् १५६ तत्र गमनात् वाजिमेधफलप्राप्तिः॥ वीरप्रमोक्षः १५७ तत्र गमनात् सर्व्वपापप्रणाशः॥ सन्ध्या सा विद्यातीर्थम् १५८ तत्र स्नानात् यत्र तत्रैव विद्याप्राप्तिः॥ महाश्रमः १५९ तत्रैककालनिराहारात् शुभलोकप्राप्तिः॥ महालयः १६० तत्र षष्ठकालोपवासेनैकमासवासात् आत्मना सहैकविंशतिपुरुषोद्धारः तत्रैव महेश्वरदर्शनात् सर्व्वपापमरणभययोर्विनाशः बहुसुवर्णयागफलप्राप्तिश्च॥ वेतसीका १६१ तत्र गमनात् अश्वमेधफलं औशनसगतिप्राप्तिश्च॥ सुन्दरिका १६२ तत्र गमनात् रूपप्राप्तिः॥ ब्राह्मणिका १६३ तत्र गमनात् ब्रह्मलोकप्राप्तिः। नैमिषम् १६४ तत्र ब्रह्मा तिष्ठति तत्र प्रवेशात् सर्व्वपापनाशः स्नानात् गवामययागफलप्राप्तिः सप्तकुलोद्धारः उपवासेन प्राणत्यागात् स्वर्गप्राप्तिश्च॥ गङ्गोद्भेदः १६५ तत्र त्रिरात्रोपवासात् वाजिमेधफलप्राप्तिः विष्णुलोकवासश्च। सरस्वती १६६ तत्र पितृदेवतर्पणात् सारस्वतलोकवासः॥ बाहुदा नदी १६७ तत्रैकरात्रिवासात् ब्रह्मलोकप्राप्तिः। गोप्रचारतीर्थम् १६८ तत्तु सरयूतीरे तत्र स्नानात् सर्व्वपापनाशः देवलोकप्राप्तिश्च॥ गोमत्यां रामतीर्थम् १६९ तत्र स्नानात् अश्वमेधफलप्राप्तिः निजकुलपावनञ्च। साहस्रकम् १७० तत्र गमनात् राजसूयाश्वमेधफलप्राप्तिः। राजगृहम् १७१ तत्र स्नानात् कुवेरवदाह्लादप्राप्तिः। मणिनागः १७२ तत्र गमनात् गोसहस्रदानफलप्राप्तिः एवं तत् समीपे नित्यकर्म्मकरणात् सर्पविषभयनाशः एकरात्रवासात् सर्व्वपापनाशश्च। गौतमवनम् १७३ तत्र अहल्याह्रदे स्नानात् परमगतिप्राप्तिः। श्रीदेवी १७४ तत्र गमनात् श्रीप्राप्तिः। उदपानम् १७५ तत्राभिषेकात् वाजिमेधफलप्राप्तिः। जनकराजकूपः १७६ तत्राभिषेकात् विष्णुलोकप्राप्तिः॥ विनशनम् १७७ तत्र गमनात् वाजपेयफलप्राप्तिः। विशल्या १७८ सा सर्व्वतीर्थजलोद्भवा तत्र गमनात् वाजपेयफलप्राप्तिः रविलोकगमनञ्च। तपोवनम् १७९ तत्राधिवासात् गुह्यकलोकवासः। कम्पना नदी १८० सा सिद्धनिषेविता तत्र गमनात् पुण्डरीकयागफलप्राप्तिः। विशल्या नदी १८१ तत्र गमनात् अग्निष्टोमफलं देवलोके चिरवासश्च। माहेश्वरी १८२ तत्र गमनात् अश्वमेधफलप्राप्तिः स्वकुलोद्धरणञ्च। दिवौकःपुष्करिणी १८३ तत्र गमनात् दुर्गतिविनाशः वाजिमेधफलप्राप्तिश्च। रामपदम् १८४ तत्र गमनात् अश्वमेधफलम्। माहेश्वरपदम् १८५ तत्र स्नानात् अश्वमेधफलं सप्त तीर्थकोटी तत्र स्नानात् पुण्डरीकयागफलप्राप्तिः। नारायणस्थानम् १८६ यत्र शालग्रामनामा हरिस्तिष्ठति तत्र गमनात् अश्वमेधफलं विष्णुलोकगमनञ्च। तत्रैव उदपानं यत्र चत्वारः समुद्राः सन्निहिताः तत्र स्नानात् दुर्गतिनाशः तत्र महादेवस्तिष्ठति तत्र गमनात् अश्वमेधफलप्राप्तिः इन्द्रलोकवासश्च॥ जातिस्मरः १८७ तत्र स्नानात् जातिस्मरत्वप्राप्तिः। वटेश्वरपुरम् १८८ तत्र केशवस्य दर्शनपूजनाभ्यामुपवासेन च वाञ्छितकामप्राप्तिः। वामनतीर्थम् १८९ तत्र गमनात् दुर्गतिविनाशः विष्णुलोकप्राप्तिश्च। तत्र कौशिकी तिष्ठति तस्याः सेवनात् राजसूययज्ञफलप्राप्तिः। चम्पकारण्यम् १९० तत्रैकरात्रवासात् गोसहस्रदानफलप्राप्तिः। गोष्ठानम् १९१ तत्रैकरात्रोपवासात् अग्निष्टोमफलप्राप्तिः। तत्र देव्या सह त्रिशू-

श्च रस्तिष्ठति तस्य दर्शनात् मित्रावरुणलोकवास:॥ कन्यासंवेद्यम् १९२ तत्राहारजयात् मनुलोकप्राप्ति: तत्रान्नदानमक्षयं भवति॥ निश्चीरा नदी १९३ तत्र गमनात् अश्वमेधफलप्राप्ति: स्वकुलोद्धरणञ्च। निश्चीरासङ्गमे अन्नदानेन ब्रह्मलोकगमनम्। तत्र वशिष्ठाश्रम: तत्राभिषेकात् वाजपेयफलप्राप्ति:॥ देवकूटम् १९४ तत्र गमनात् वाजिमेधफलप्राप्ति: कुलोद्धरणञ्च॥ कौशिकमुनिह्रद: १९५ तत्र मासवासात् अश्वमेधफलप्राप्ति:॥ सर्व्वतीर्थवरह्रद १९६ तत्र वासात् बहुसुवर्णयागफलप्राप्ति: दुर्गतिविनाशश्च॥ वीराश्रम: १९७ तत्र कुमारस्तिष्ठति तत्र गमनात् अश्वमेधफलप्राप्ति:। अग्निधारा १९८ तत्र गमनात् अश्वमेधफलप्राप्ति: कुलोद्धरणञ्च॥ पितामहसर: १९९ तत्र शैलराजप्रतिष्ठितौ शिवविष्णू तिष्ठत: तत्राभिषेकात् अग्निष्टोमफलप्राप्ति:। तत्रैव कुमारधारा तत्र स्नानात् कृतार्थता त्रिकालोपवासेन ब्रह्महत्यानाश:॥ गौरीशिखरम् २०० तत्रारोहणात् शुद्धता तत्र कुण्डे स्नानपितृदेवार्च्चनाभ्यां अश्वमेधफलप्राप्ति: स्वर्गगमनञ्च। ताम्रारुणा २०१ तत्र गमनात् वाजिमेधफलप्राप्ति: शक्रलोकगमनञ्च॥ नन्दिनी २०२ तत्र त्रिदशसेवित: कूप: तत्र गमनात् नरमेधफलप्राप्ति:॥ कौशिक्यारुणसङ्गम: २०३ तत्र त्रिरात्रोपवासात् सर्व्वपापमुक्ति:॥ उर्व्वशीतीर्थम् २०४ सोमाश्रम: २०५ कुम्भकर्णाश्रम: २०६ तेषु स्नानात् अश्वमेधफलप्राप्ति: स्वर्गगमनञ्च॥ कोकामुखम् २०७ तत्र स्नानात् जातिस्मरत्वम्॥ नन्दा २०८ तत्र गमनात् कृतार्थता सर्व्वपापनाश: स्वर्गगमनञ्च। ऋषभद्वीप: २०९ तत्र क्रौञ्चनिसूदनसेवनात् सरस्वत्या स्नानाच्च विमाने विराज:॥ औद्दालकतीर्थम् २१० तत्राभिषेकात् सर्व्वपापनाश:। ब्रह्मतीर्थम् २११ तत्र गमनात् वाजपेयफलप्राप्ति:। चम्पा २१२ तत्र गमनात् गोसहस्रदानफलप्राप्ति:। ललितिका २१३ तत्र गमनात् वाजपेयफलं विमानप्राप्तिश्च। संविदातीर्थम् २१४ तत्र स्नानात् विद्याप्राप्ति:। लौहित्यम् २१५ तत्र गमनात् बहुसुवर्णयागफलप्राप्ति:। करतोया २१६ तत्र त्रिरात्रोपवासात् ऋषभैकादशदानफलप्राप्ति:॥ कोशलायां कालतीर्थम् २१७ तत्र गमनात् गोसहस्रदानफलप्राप्ति: स्वर्गगमनञ्च। गङ्गासागरसङ्गम: २१८ तत्र गमनात् दशाश्वमेधफलप्राप्ति:। गङ्गाया: परद्वीप २१९ तत्र स्नानत्रिरात्रोपवासाभ्यां सर्व्वकामप्राप्ति:। वैतरणी २२० तत्र गमनात् सर्व्वपापनाश:॥ विरजम् २२१ तत्र गमनात् चन्द्रवद्दीप्ति:॥ प्रभव २२२ तत्र गमनात् सर्व्वपापनाश: गोसहस्रदानफलं स्वकुलपावनञ्च। शोणज्योतीरथ्यासङ्गम: २२३ तत्र पितृदेवतर्पणात् अग्निष्टोमफलप्राप्ति:॥ शोणप्रभव: २२४ नर्म्मदाप्रभव: २२५ वंशगुल्म: २२६ तत्र स्नानात् वाजिमेधफलप्राप्ति:। ऋषभ: २२७ तत्र गमनात् गोसहस्रदानफलप्राप्ति:। पुष्पवती २२८ तत्र स्नानत्रिरात्रोपवासाभ्यां गोसहस्रदानफलप्राप्ति: कुलोद्धरणञ्च॥ बदरिकम् २२९ तत्र स्नानात् दीर्घायुष्प्राप्ति: स्वर्गगमनञ्च। महेन्द्रपर्व्वत: २३० तत्र रामतीर्थे स्नानात् वाजिमेधफलप्राप्ति:। मतङ्गकेदारम् २३१ तत्र स्नानात् स्वर्गलोकप्राप्ति:। श्रीपर्व्वत: २३२ तत्र नदीतीरे स्नानात् अश्वमेधफलं परमसिद्धिप्राप्तिश्च तत्र महादेवो देव्या सह तिष्ठति तत्र देवह्रदे स्नानात् अश्वमेधफलप्राप्ति: शिवलोकगमनञ्च। पाण्ड्यदेशे ऋषभपर्व्वत: २३३ तत्र गमनात् वाजपेयफलप्राप्ति: स्वर्गगमनञ्च॥ कावेरी २३४ तत्र गमनात् गोसहस्रदानफलम्। समुद्रतीरे कन्यातीर्थम् २३५ तत्र स्नानात् सर्व्वपापनाश:। समुद्रमध्ये गोकर्णतीर्थम् २३६ तत्र शिवस्तिष्ठति तस्य पूजनात् त्रिरात्रोपवासाच्च दशाश्वमेधतुल्यफलङ्गाणपत्यप्राप्ति:। द्वादशरात्रोपवासात् कृतार्थता च। तत्र गायत्रीस्थानं तत्र त्रिरात्रोपवासात् गोसहस्रदानफलप्राप्ति: ब्राह्मणस्य गायत्रीपाठात् सदा सम्पन्नता अब्राह्मणस्य पाठात् तस्या विनाश:॥ संवर्त्तवापी २३७ तत्र गमनात् रूपसौभाग्यप्राप्ति:। वेणा २३८ तत्र पितृदेवतर्पणात् मयूरहंसयुक्तविमानप्राप्ति:॥ गोदावरी २३९ तत्र गमनेन गवामययज्ञफलप्राप्ति: वायुलोकगमनञ्च। वेणासङ्गम: २४० तत्र स्नानात् सर्व्वपापनाश:। वरदासङ्गम: २४१ तत्र स्नानात् वाजिमेधफलप्राप्ति:। ब्रह्मस्थूणा २४२ तत्र त्रिरात्रोपवासात् गोसहस्रदानफलप्राप्ति: स्वर्गगमनञ्च। कुशप्लवनम् २४३ तत्र स्नानत्रिरात्रोपवासाभ्यां चन्द्रलोकप्राप्ति:। देवह्रद: २४४ कृष्णवेणाजलसमुद्भवनम् २४५ ज्योतिर्मात्रह्रद: २४६ कन्याश्रम: २४७ तेषु गमनात् अग्निष्टोमफलप्राप्ति:। देवह्रदे स्नानात् गोसहस्रदानफलप्राप्ति:। ज्योतिर्मात्रह्रदे स्नानात् जातिस्मरत्वम्॥ पयोष्णी नदी २४८ तत्र स्नानतर्पणाभ्यां गोसहस्रदानफलप्राप्ति:। दण्डकारण्यम् २४९ तत्र महाराजे जलस्पर्शात् गोसहस्रदानफलप्राप्ति:। शरभङ्गाश्रम: २५० शुक्राश्रम: २५१ तत्र गमनात् दुर्गतिनाश: कुलपवित्रता च॥ शूर्पारकम् २५२ तत्र रामतीर्थम् तत्र स्नानात् बहुसुवर्णयज्ञफलप्राप्ति:। सप्तगोदावरम् २५३ तत्र स्नानात् महापुण्यप्राप्ति: देवलोकगमनञ्च। देवपथम् २५४ तत्र गमनेन देवसत्रफलप्राप्ति:॥ तुङ्गकारण्यम् २५५ तत्र प्रवेशात् सद्य: पापनाश: मासवासात् स्वकुलस्य पवित्रता ब्रह्मलोकगमनञ्च। मेधाविकम् २५६ तत्र पितृदेवतर्पणात् अग्निष्टोमफलस्मृतिमेधयो: प्राप्ति:॥ कालञ्जरपर्व्वत: २५७ तत्र देवह्रदे स्नानात् रुद्रलोकप्राप्ति:। चित्रकूटपर्व्वत: २५८ तत्र मन्दाकिन्यां स्नानपितृदेवतर्पणाभ्यां अश्वमेधफलप्राप्ति: परमगतिलाभश्च॥ भर्तृस्थानम् २५९ तत्र कार्त्तिकेयस्तिष्ठति तत्र गमनात् सर्व्वकामप्राप्ति:। कोटितीर्थे स्नानात् गोसहस्रदानफलप्राप्ति:। ज्येष्ठस्थानम् २६० तत्र महादेवस्तिष्ठति तद्दर्शनात् चन्द्रवद्दीप्ति:। तत्र कूपे चत्वार: समुद्रास्तिष्ठन्ति तत्र स्नानप्रदक्षिणाभ्यां परमगतिप्राप्ति:। शृङ्गवेरपुरम् २६१ यत्र रामो गङ्गामुत्तीर्ण: तत्र स्नानात् सर्व्वपापनाश: विष्णुलोकप्राप्तिश्च। मुञ्जावट: २६२ तत्र महादेवस्तिष्ठति तस्य पूजनप्रदक्षिणाभ्यां गाणपत्यप्राप्ति:। तत्तीर्थे जाह्नवीस्नानात् सर्व्वपापनाश:॥ प्रयाग: २६३ तत्र त्रीण्यग्निकुण्डानि तत्र यमुनया गङ्गा सङ्गता यत्र ब्रह्मादयो देवा सिद्धा: पितर: सनत्कुमारमुखा ऋषयो नागसुपर्णसिद्धक्रतुगन्धर्व्वाप्सरसस्तिष्ठन्ति एव वेदा यज्ञाश्च मूर्त्तिमन्त: ब्रह्माणमुपासते। स सर्व्वतीर्थेभ्योऽधिक:। तस्य नामसङ्कीर्त्तनश्रवणमृत्तिकालम्भनै: सर्व्वपापनाश: तत्र स्नानात् त्रिलोके एवं वेदविद्यासु यत् पुण्यं तत्प्राप्ति: राजसूयाश्वमेधफलप्राप्तिश्च तत्र मरणं महत्॥ भोगवती नाम वासुकितीर्थम् २६४ तत्राभिषेकात् अश्वमेधफलप्राप्ति:॥ * ॥

"अयोध्या मथुरा माया काशी काञ्ची
अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिका:॥
तासु वास प्रकुर्व्वन्ति ये मृता वा नरा: परम्।
लभन्ते न पुनर्जन्म मातृगर्भेषु कुत्रचित्॥"

इति पाद्मे भूमिखण्डम्॥

शास्त्रम्। अध्वर:। क्षेत्रम्। उपाय:। (यथा, महाभारते। ५। १२५। २६।

"वासुदेवेन तीर्थेन तात। गच्छस्व संशमम्॥"

"तीर्थेन उपायेन।" इति तट्टीकायां नीलकण्ठ:॥) अवसर:। यथा, भागवते। ३। १९। ४।

"स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम्।
मानयन् स मृधे धर्म्मं विष्वक्सेनं प्रकोपयन्॥")

नारीरज:। अवतार:। ऋषिजुष्टाम्बु। (यथा, रामायणे। १। २। ४।

"अकर्द्दममिदं तीर्थं भरद्वाज। निशामय।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा॥")

पात्रम्। (यथा, मनु:। ३। १३०।

"दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्।
तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथि: स्मृत:॥")

उपाध्याय:। (यथा, महाभारते। ८। ४०। १८।

"शिक्षितो ह्यसि नारण्ये तीर्थत: पुरुषर्षभ।॥"
"तीर्थतो गुरुत:।" इति नीलकण्ठ:॥)

मन्त्री। इति मेदिनी। थे, ८॥ (मन्त्रिप्रभृत्यष्टादशराष्ट्रसम्पत्। यथा, महाभारते। २। ५। ३८।

"कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकै:॥"
"तीर्थानि मन्त्रिप्रभृतीन्यष्टादश यान्यपराष्ट्र

राजा कृताकृत्यो भवति। तानि चोक्तानि नीतिशास्त्रे यथा,—

"मन्त्री पुरोहितश्चैव युवराजश्च भूपतिः।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वंशिकस्तथा॥
कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः॥
प्रदेष्टा नगराध्यक्षः कार्य्यनिर्म्माणकृत्तथा।
धर्म्माध्यक्षः सभाध्यक्षो दण्डपालस्त्रिपञ्चमः॥
षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः।
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु॥
चारान् विचारयेत्तीर्थे ष्वात्मनश्च परस्य च।
पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि॥
मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितम्॥"

इत्येषां तीर्थशब्दवाच्यत्वम्॥ हलायुधः।

योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि।
पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात् दर्शनेष्वपि॥"

इति तट्टीकायां नीलकण्ठः॥)

योनि। दर्शनम्। शास्त्रं। इति हेमचन्द्रः॥ विप्र.। आगमः। निदानम्। ऋषिः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (पुण्यकालः। इति स्वामी॥ यथा, भागवते। १। १२। १४।

"हिरण्यं गां महीं ग्रामान् हस्त्यश्वान् नृपतिर्वरान्।
प्रादात् स्वन्नञ्च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्॥"

गुरु सन्न्यासिनामुपाधिविशेषः। यथा, प्राणतोषिण्यां अवधूतप्रकरणे।

"निवेशोपगमे तीर्थे तत्त्वमस्यादिलक्षणे।
स्नायात् तत्त्वार्थभावेन तीर्थनामा स उच्यते॥")

तीर्थकर, पुं, (करोतीति करः। तीर्थस्य शास्त्रस्य पुण्यक्षेत्रस्य वा करः।) जिनः। इति हेमचन्द्रः। १। २४॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८७।

"मनोजवस्तीर्थकरो वसुरेता वसुप्रदः॥"

"चतुर्द्दशविद्यानां वाह्यविद्यासमयानाञ्च प्रणेता प्रवक्ता चेति तीर्थकरः।" इति तद्भाष्यम्॥)

तीर्थकृत्, पु, (तीर्थं करोतीति। कृ+क्विप् तुगागमश्च।) जिनः। इति धरणिः॥

तीर्थङ्करः, पु, (तीर्थं करोतीति। कृ+ख मुम् च।) जिनः। इति हेमचन्द्रः। १।२४॥

तीर्थयात्रा, स्त्री, (तीर्थे यात्रा गमनम्।) तीर्थगमनम्। तद्विधिनिषेधौ यथा,—

ऋषय ऊचुः।

"कथंया तीर्थयात्रास्मिन् लोके केन कथं द्विजैः।
श्रोतुं न एतदिच्छामो वद वह्निमतान् मुने।॥

सूत उवाच।

एतत् श्रुत्वा तत्. सूत पुराणे मुनिसत्तमः।
प्रोवाच तान् मुनिश्रेष्ठान् स्वधर्म्मं स्वगुणानघाः॥
यज्ञाधिकारे च गते द्विजेन्द्राः
सव्वस्वनाशे क्षितिपोऽथ वैश्यः।
शुश्रूषणायां बलवीर्य्यहीनः
शूद्रस्तु तीर्थानि भजेत् सुरान्त॥
यश्चत्वभिस्तीर्थगतिर्मुनीन्द्रैः
काम्या तथा तत्फलकाङ्क्षिभिश्च।
तां ब्रह्मचारी विधिवत् करोति
स्वयं यती गुरुणा सन्नियुक्तः॥
नित्यं गृहस्थाश्रमसंस्थितस्य
मनीषिभिस्तीर्थगतिर्निषिद्धा।
मातुः पितुर्भक्तिमना गृहस्थः
सुतो न कुर्य्यात् खलु तीर्थयात्राम्॥
गङ्गाजलेनागुदिनं मनुष्यो
ग्रङ्गोमयेनापि सदा मुनीन्द्राः।
स्नातीह सम्यक् यदि भावशुद्धः
फलं तदाप्नोति न चान्यदेतत्॥
सर्व्वाणि तीर्थानि हि यानि तानि
स्वर्गेऽन्तरीक्षेऽपि पुनः पृथिव्याम्।
तुल्यानि सम्यक् मुनयोऽभिवेष्टात्
सत्यं गृहस्थाश्रमसंश्रितस्य॥
यस्येह यज्ञेष्वधिकारितास्ति
गृहेऽन्नञ्च दानवतो मुनीन्द्राः।
अनुष्ठितं काल्कविवर्ज्जितस्य
तीर्थे गतिः पूर्व्वतरैर्निषिद्धा॥"

इति वह्निपुराणे १ अध्यायः॥

तीर्थराजी, स्त्री, (तीर्थानां राजी श्रेणिरिव। यद्वा, तीर्थेषु राजते शोभते इति। राज+इन्। ततो वा ङीष्।) काशी। इति त्रिकाण्डशेषः॥

तीर्थवाकः, पुं, (तीर्थस्येव वाको वचनमस्य। उत्तमाङ्गस्थितत्वा प्रशंसनीयत्वादस्य तथात्वम्।) केशः। इति हेमचन्द्रः। ३। २३१॥

तीर्थसेवी, [न्] पु स्त्री, (तीर्थं घट्टादिजलप्रान्तस्थानं सेवते इति। सेव+णिनिः।) वकपक्षी। इति राजनिर्घण्टः॥ तीर्थवासिनि, त्रि॥

तीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) तीवति। इति दुर्गादासः॥

तीवरः, पु, (तीव्यते इति। तृ प्लवनतरणयोः+ "छित्वरच्छत्वरेति।" उणा ३। १। इति ष्वरच्प्रत्ययेन निपातनात् साधुः।) समुद्रः। (तीरयति कर्म्मसमाप्तिं करोतीति। तीर+ष्वरच्। गुणाभावो रेफलोपश्च। इत्युज्ज्वलदत्तः।) व्याधः। इति मेदिनी। रे, १६३॥ वर्णसङ्करजातिविशेषः। तेओर इति भाषा। स तु राजपुत्रस्त्रियां क्षत्रियाज्जातः। इति ब्रह्मवैवर्त्तम्॥ शूद्रकभार्य्यायां पुक्कशाज्जातः। इति पराशरपद्धतिः॥

तीवरी, स्त्री, (तीवर+षित्वात् ङीष्।) व्याधपत्नी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

तीव्र, क्ली, (तीव स्थौल्ये+बाहुलकात् रक्। तिज निशाने+बाहुलकात् रन्। दीर्घत्वम्। जकारस्य वकारः। इत्युज्ज्वलदत्तः। २१२८॥) अतिशयः। इत्यमरः। १। १। ७०॥ तीरम्। तीक्ष्णम् अपु। इत्युणादिकोषः॥ लोहम्। इति राजनिर्घण्टः॥

तीव्र., त्रि, (तिज+बाहुलकात् रन्।) दीर्घत्वादिकञ्च।) अत्युग्रः। नितान्तः। (यथा, रघुः।८।६५।

"तान् हत्वा गजकुलबद्धतीव्रवैरान्
काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान्॥")

कटुः। इत्युणादिकोषः॥ (दुःसहः। यथा, आर्य्यासप्तशत्याम्। ६६१।

"हन्त विरहः समन्तात्जयति दुर्व्वारतीव्रसंवेगः॥"

तीक्ष्णम्। यथा, तत्रैव।१५२।

"कृतककोपं मदीयश्वासध्वनिदत्तकर्णां। किं तीव्रे। विध्यसि मां निश्वासैः स्मरः शरैः शब्दवेधीव॥")

शिवे, पु। इति शब्दरत्नावली॥

तीव्रकण्ठः, पुं, (तीव्रः कण्ठो यस्मात्। अस्य भक्षणेन हि कण्ठदेशे पीडोत्पत्तेस्तथात्वम्।) सूरणः। इति राजनिर्घण्टः॥

तीव्रगन्धा, स्त्री, (तीव्रः कटुर्गन्धो यस्याः।) यवानी। इति राजनिर्घण्टः॥

तीव्रज्वाला, स्त्री, (तीव्रं यथा स्यात् तथा ज्वालयति उत्तेजयति सेविनमिति। ज्वल+णिच्+अच् टाप् च।) धातकी। इति राजनिर्घण्टः॥

तीव्रवेदना, स्त्री, (तीव्रा अत्यन्ता वेदना।) यातना। अतिशयवेदना। इत्यमर.।३।१०३॥

तीव्रा, स्त्री, (तीव्र+टाप्।) कटुरोहिणी। गण्डदूर्व्वा। राजिका। इति मेदिनी। रे, ४५॥ नदीविशेषः। इति शब्दरत्नावली॥ महाज्योतिष्मती। तरदीदण्डः। तुलसी। इति राजनिर्घण्टः॥

तु, ङ हृतौ। हिंसायाम्। पूर्त्तौ। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सकं च-सेट्।) ङ, तौति तवीति। इति दुर्गादासः॥

तु, व, पादपूरणम्॥ (यथा, मनुः। ११। २०७

"अवगूर्य्य त्वब्दशतं सहस्रमभिहत्य च।
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते॥")

भेदः। अवधारणम्। इत्यमरः॥ समुच्चयः (यथा, मनुः। ११। २०२।

"उष्ट्रयानं समारुह्य खरयानन्तु कामतः।
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति॥")

पक्षान्तरम्। नियोगः। प्रशंसा। विनिग्रहः इति शब्दरत्नावली॥

तुक्, [ज्] पु, (तुञ्जति चोदयतिऽनेनेति। तुज प्राणे+क्विप्।) अपत्यम्। इति हेमचन्द्रः॥

तुकाक्षीरी, स्त्री, (तुगाक्षीरी+पृषोदरादित्वात् गस्य कः।) तुगाक्षीरी। इति हेमचन्द्रः।४।२२०॥

तुगा, स्त्री, (तुज+बाहुलकात् घ. किच्च।) वंशरोचना। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"स्याद्वंशरोचना वंशी तुगाक्षीरी तुगा शुभा।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी॥")

तुगाक्षीरी, स्त्री, (तुगा सा एव क्षीरी।) वंशरोचना। इति राजनिर्घण्टः॥ वंशलोचनाभेदः। अस्या गुणाः। कफश्वासकासनाशित्वम्। मधुरत्वम्। हिमत्वञ्च। इति राजवल्लभः। (यथा, भावप्रकाशे मध्यखण्डे २ भागे कासरोगाधिकारे।

"द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा।")

तुङ्गः, पुं, (तुजि हिंसायाम् + घञ् ।) पुन्नागवृक्षः । (यथा, वैद्यकरत्नमालायाम् ।
"कुम्भीकः पुरुषस्तुङ्गः पुन्नागो रक्तकेशरः ॥")
पर्व्वतः । बुधग्रहः । इति हेमचन्द्रः । ६ । ६४ ॥
नारिकेलः । गण्डकः । इति राजनिर्घण्टः ॥
योगभेदः । इति शब्दरत्नावली ॥ स तु ग्रहाणां उच्चराशिः । यथा,—
"सूर्य्यादुच्चान् क्रियवृषमृगस्त्रीकुलीरान्त्ययूके
दिग्वह्न्यष्टद्व्यतिथिशरान् सप्तविंशांश्च विद्यान् ।
चंशानेतान् वदति जवनस्त्वत्यतुङ्गान् सतुङ्गा-
स्तानेवांशान् मदनभवनेष्वाह नीचान् सुनी-
चान् ॥"
इति दीपिका ॥
"आदित्यमेषे वृषभे शशाङ्के
कन्यागते ज्ञे च गुरौ कुलीरे ।
मीने च शुक्रे मकरे महीजे
शनौ तुलायामिति तुङ्गगेहाः ॥"
इति समयामृतम् ॥ * ॥
अथ तुङ्गस्थग्रहफलम् ।
"तुङ्गेऽर्के शुभसंयुतः शुभकरैर्मित्रैश्च दृष्टो यदा
दैवात् पश्यति सोऽपि वा शुभकरानेकं द्विकं वा
त्रिकम् ।
वित्तेशः प्रथितो विमर्द्दितरिपुः चौणीशमान्यो
यदा
चापालार्च्चितपादपद्मयुगलो राजा त्रिकोणे
यदा ॥
तुङ्गे चन्द्रमसि प्रसन्नवपुषि प्रभादनष्टद्युतौ
प्रख्यातोऽरिविमर्द्दकोऽगदतनू राजेश्वरो रूप-
वान् ।
चापालार्च्चितपादपद्मयुगलो वा धर्म्मशीलो
महान्
सौम्यैरेव युतोऽथवा प्रियतमैर्दृष्टे त्रिकोणेऽपि
च ॥
यदि भवति मृगस्थो भूमिपुत्त्रस्तदा वै
न दिनकरमयूखाट्भ्रष्टरश्मिर्नरेन्द्रः ।
अगदततुरभीत. प्रचुरदर्पापहारी
प्रणतरिपुनरेन्द्रः स्यात्त्रिकोणेऽपि जातः ॥
कन्यास्थः शशलाञ्छनस्य तनयस्तिर्य्यंशके.
सयुतो
दृष्टो वा यदि संयुतः शुभकरैर्व्यातस्तदा
भूपतिः ।
धात्रायां तुरगोऽमत्तकरिणां यातैर्मही कम्पते
सम्भ्राम्भ्रदरणीरुहा विगलिता यान्ति त्रिकोणे-
ऽपि च ॥
तुङ्गे गुरौ मित्त्रखगेन दृष्टो
राजा भवेदिन्द्रसमानमूर्त्तिः ।
गजाश्वनौकानरपूर्णलक्ष्मीः
पृथ्वीपतिः स्वस्य त्रिकोणगेऽपि ॥
तुङ्गे भृगौ शुभसुहृत्प्रयुते च दृष्टे
दैवात् पुनः स यदि पश्यति मित्त्रसंघान् ।
भूपाधिपो भवति कीर्त्तिकरप्रधानो
दीर्घायुरग्रसुखसङ्गभृगुजे त्रिकोणे ॥
तुङ्गे शनौ मित्त्रखगेन दृष्टे
प्रचण्डदण्डो नृपतिप्रधानः ।
न दृश्यते दिग्गमने च धुर्व्यो
त्रिकोणगे चापि नरेन्द्रमूर्त्तिः ॥
भवति धरणिपालो नीचबुद्धिः प्रतापी
हयगजधनपूर्णो जातिवर्गे विरक्तः ।
कुटिलमतिरनीतो भूरिभाण्डारयुक्त-
स्तमसि मिथुनसंस्थे जायते मानवेन्द्रः ॥
मृगपतिवृषकन्याकर्कटस्थे च राहौ
भवति विपुललक्ष्मीः राजराजाधिपो वा ।
हयगजनरनौकामण्डितः सार्व्वभौमो
नृपतिरमरपूज्यो राहुतुङ्गे चिरायुः ॥
अरिनिधनव्ययतुङ्गे कीर्त्तितमेतत् फलं यथेष्टम् ।
केन्द्रत्रिकोणे लाभे वा तुङ्गफल यथोदितम् ॥"
इति कोष्ठीप्रदीपः ॥
तुङ्ग, त्रि, (तुजि हिंसायाम् + घञ् ।) उग्रः । प्रधानम् । उन्नतः । इति शब्दरत्नावली ॥ (यथा, रघुः । ६ । ३ ।
"शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह ॥"
प्रचुरः । यथा, तत्रैव । ४ । ७० ।
"तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ॥")
किञ्जल्के क्ली । इति राजनिर्घण्टः ॥
तुङ्गकः, पु, (तुङ्ग + स्वार्थे संज्ञायां वा कन् ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (अरण्यरूपतीर्थविशेषे, क्ली । यथा, महाभारते । ३ । ८५ । ४६-५४ ।
"तुङ्गकारण्यमासाद्य ब्रह्मचारी जितेन्द्रियः ।
वेदानध्यापयत् तत्र मुनीन् सारस्वतः पुरा ॥
तत्र वेदेषु नष्टेषु मुनेरङ्गिरसः सुतः ।
ऋषीणामुत्तरीयेषु सूपविष्टो यथासुखम् ॥
ओंकारेण यथान्यायं सम्यगुच्चारितेन च ।
येन यत् पूर्व्वमभ्यस्तं तत् सर्व्वं समुपस्थितम् ॥
ऋषयस्तत्र देवाश्च वरुणोऽग्निः प्रजापतिः ।
हरिर्नारायणस्तत्र महादेवस्तथैव च ॥
पितामहश्च भगवान् देवै. सह महाद्युतिः ।
भृगु नियोजयामास याजनार्थं महाद्युतिम् ॥
ततः स चक्रे भगवानृषीणां विधिवत्तदा ।
सर्व्वेषां पुनराधान विधिदृष्टेन कर्म्मणा ॥
आज्यभागेन तत्राग्निं तर्पयित्वा यथाविधि ।
देवा. स्वभवनं याता ऋषयश्च यथाक्रमम् ॥
तदरण्यं प्रविष्टस्य तुङ्गकं राजसत्तम ! ।
पापं प्रणश्यत्यखिल स्त्रिया वा पुरुषस्य वा ॥
तत्र मासं वसेद्धीरो नियतो नियताशनः ।
ब्रह्मलोकं व्रजेद्राजन् । कुलञ्चैव समुद्धरेत् ॥")
तुङ्गभद्रः, पुं, (तुङ्ग उच्चोऽपि भद्रः ।) मदोत्कटहस्ती । इति मेदिनी । रे, २६३ ॥
तुङ्गभद्रा, स्त्री, (तुङ्गा प्रधाना भद्रा निर्म्मला च ।) नदीविशेषः । सा दक्षिणे प्रसिद्धा । (यथा, मत्स्यपुराणे । ११३ । २६ ।
"तुङ्गभद्रा सुप्रयोगा वाह्या कावेरी चैव तु ।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृता ॥")
तस्या जलस्य गुणाः । स्निग्धत्वम् । निर्म्मलत्वम् । स्वादुत्वम् । गुरुत्वम् । कण्डुपित्तास्रदाहत्वम् । प्रायःसात्म्यत्वम् । मेधाकरत्वञ्च । इति राजनिर्घण्टः ॥
तुङ्गशेखरः, पु, (तुङ्गान्युच्चानि शेखराणि शृङ्गाणि यस्य ।) पर्व्वतः । इति शब्दमाला ॥
तुङ्गा, स्त्री, (तुङ्ग + टाप् ।) वंशलोचना । शमी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"शमी शक्तुफला तुङ्गा केशहन्त्री शिवा फला ।
मङ्गल्या च तथा लक्ष्मीः शमीरः सात्त्विका
स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तुङ्गिनी, स्त्री, (तुङ्गो वृक्षविशेषस्तद्वदाकृतिरस्त्यस्याः । तुङ्ग + इनिः । ङीप् ।) महाशतावरी । इति राजनिर्घण्टः ॥
तुङ्गी, स्त्री, (तुङ्ग + गौरादित्वात् ङीष ।) हरिद्रा । वर्व्वरी । इति मेदिनी । गे, ८ ॥ (अस्याः पर्य्याया यथा, भावप्रकाशस्य पूर्व्वखण्डे १भागे ।
"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका ।
पर्णाशस्तत्र कृष्णे तु कठिञ्जककुठेरकौ ॥"
रात्रिः । इति त्रिकाण्डशेषः ॥)
तुङ्गी, [न्] पु, (तुङ्गः उच्चस्थानं आश्रयत्वेन अस्त्यस्य । इनिः ।) तुङ्गस्थानस्थितः । उच्चस्थग्रहः । इति ज्योतिषम् ॥
तुङ्गीपतिः, पु, (तुङ्ग्या निशायाः पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥
तुङ्गीशः, पु, (तुङ्गी सर्व्वप्रधान ईशः प्रभुश्च ।) शिवः । कृष्णः । सूर्य्यः । इति शब्दरत्नावली ॥
तुच्छं, क्ली, (तौति असारत्वं गच्छतीति । तु + "छोऽदिकविभ्या शुतुभ्याञ्च कित् मौपूर्ःः खस्य ।" २ । ३३ । उणादिकोषटीकाधृतसूत्रात् छः स च कित् ।) पुलाकान्नम् । इत्युणादिकोषः ॥ भुषि इति भाषा ॥
तुच्छः, त्रि, (तुद् + क्विप् । तेन तं वा छ्यतीति । छो + कः ।) शून्यः । इत्यमरः । ३ । १ । ५६ ॥ हीनः । इत्युणादिकोषः ॥ (यथा, भागवते । ७ । ७ । ४५ । •
"किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ॥")
अल्पः । इति हेमचन्द्रः । ६ । ६२ ॥
तुच्छद्रुः, पुं, (तुच्छो हीनो द्रुर्वृक्षः ।) एरण्डवृक्षः । इति शब्दचन्द्रिका ॥
तुच्छधान्यकं, क्ली, (तुच्छं धान्यम् । अल्पार्थे कन् ।) पुलाकः । इति रत्नमाला ॥ आगडा इति भाषा ॥
तुच्छा, स्त्री, (तुच्छ + टाप् ।) तुत्था । नीलीवृक्षः । इति भावप्रकाशः ॥ (सूक्ष्मैला । गुजराट्देशीया एलाची । अस्याः पर्य्याया यथा,
"सूक्ष्मोपकुञ्चिका तुच्छा कोरङ्गी द्राविडी
त्रुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तुज, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सक-सेट् ।) तोजति । इति दुर्गादासः ॥

तुज, इ प्राणे। वधे। इति कविकल्पद्रुमः॥ (भ्वा-पर-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ, तुञ्जति। प्राणो जीवनम्। हिंसायाञ्चार्यामिति कश्चित्। इति दुर्गादासः॥

तुण, इ क भाषद्दार्थे। इति कविकल्पद्रुमः॥ (चुरां-पर-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ क, तुञ्जयति। भा दीप्तिः। यद्दार्थो निकेतनहिंसाबलदानानि। इति दुर्गादासः॥

तुट, शि कलहे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) शि, तुटति अतुटीत् नीचः परस्परं वचसा। तुतोट। इति दुर्गादासः॥

तुटुम., पुं, (तुटति नाशयति द्रव्यजातमिति। तुट+बाहुलकात् उमः।) उन्दुरुः। इति त्रिकाण्डशेषः॥

तुड, इ ङ वधे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-सकं-सेट्।) पञ्चमस्वरी। इ, तुण्डते। ङ, तुण्डते। वधो निष्पीडनमिति रमानाथ.। तुण्डते पान्थं पिकः। इति दुर्गादास.॥

तुड, ऋ वधे। इति कविकल्पद्रुमः॥ (भ्वां-पर-सक-सेट्।) पञ्चमस्वरी। ऋ, अतुतोड़त्। वधो हिंसाकरणमिति गोविन्दभट्टः। तोड़ति मल्लो मल्लाङ्गं भिनत्तीत्यर्थः। इति दुर्गादासः॥

तुड, शि भेदे। इति कविकल्पद्रुमः॥ (तुदां-पर-सकं-सेट्।) शि, तुड़ति अतुडीत् तुतोड। उपहनने इति कश्चित्। इति दुर्गादासः॥

तुड्ड, नादरे। इति कविकल्पद्रुमः॥ (भ्वां-पर-सक-सेट्।) पञ्चमस्वरी इदयान्तः। नादर अनादरः। तुड्डति। फलाभावान्न भ्रदद्रुवन्म। इति दुर्गादास॥

तुण, श कौटिल्ये। इति कविकल्पद्रुमः॥ (तुदां-पर-सक-सेट्।) कौटिल्यमिह कुटिलीकरणम्। श, तुणति तृणं वायुः। तोणिता। इति दुर्गादासः॥

तुणि, पु, (तुणति सङ्कोचयतीति। तुण कौटिल्ये+ "सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) कुणिः। तुन्नद्रुमः। इत्यमरटीकायां स्वामी॥ (अस्य पर्य्याया गुणाश्च यथा,—
"तुणिस्तुन्नक आपीनस्तुणिकः कच्छकस्तथा।
कुठेरकः कान्तलको नन्दिवृक्षश्च नन्दकः॥
तुणी रक्तः कटुः पाके कषायो मधुरो लघुः।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तुण्ड, क्ली, (तुण्डते निष्पीडयति अभ्यन्तरस्थद्रव्यमिति। तुण्ड+पचाद्यच्।) मुखम्। इत्यमरः। २। ६। ८९॥ (चञ्चुः। यथा, देवीभागवते। २। १। २६।
"आमिषं स तु विज्ञाय शीघ्रमभ्यद्रवत् खगम्।
तुण्डयुद्धमथाकार्षी तावुभौ समचक्रतुः॥"
पुं महादेवः। यथा, हरिवंशे भविष्यपर्व्वणि। १५। १५।
"नमस्तुण्डाय तुण्ड्याय नमस्तुटितुटाय च॥"
राक्षसविशेषः। यथा, महाभारते।३।२८४।६।
"तुण्डेन च नलस्तत्र पटुशः पनसेन च॥")

तुण्डकेरिका, स्त्री, कार्पासी। इति राजनिर्घण्टः॥

तुण्डकेरी, स्त्री, (प्रशस्तं तुण्डम्। प्रशंसायां कन्। तदीर्त ईरयति या तत्तुल्यशोभाधारणात्। ईर+कर्म्मण्यण्। स्त्रियां ङीप्।) बिम्बिका। इत्यमरटीकायां भरतः॥ तेलाकुचा इति भाषा॥

तुण्डिः, पुं, (तुण्डते निष्पीड़यति मध्यस्थद्रव्यमिति। तुण्ड+"सर्व्वधातुभ्य इन्।" उणां ४। ११७। इतीन्।) मुखम्। चञ्चुः। इत्युणादिकोषः॥ नाभौ स्त्री। इति शब्दरत्नावली॥

तुण्डिका, स्त्री, (तुण्डिरेव। तुण्डि+स्वार्थे कन् टाप् च।) नाभिः। बिम्बिका। इति शब्दरत्नावली॥ (अस्या गुणा यथा,—
"तुण्डिका चाग्निरुचिकृद्वातपित्तनिवारणी॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये॥)

तुण्डिकेरी, स्त्री, कार्पासी। बिम्बिका। इत्यमरः। २। ४। ११६॥ (अस्याः पर्य्याया, यथा,
"तुण्डी रक्तफला बिम्बी तुण्डिकेरी च बिम्बिका॥"
इति वैद्यकरत्नमालायाम्॥)
अस्या रूपान्तराणि। तुण्डिकेरिका तुण्डिकेरिः तुण्डकेरी तुण्डिकेशी। इत्यमरटीका॥

तुण्डिकेशी, स्त्री, बिम्बिका। इति शब्दचन्द्रिका॥

तुण्डिभ, त्रि, (तुण्डिर्वृद्धा नाभिरस्य। "तुन्दिवलिवटेर्भः।" ५।२।१४०। इति भ। "न्यूह्यन्योमघोऽय तुण्डिः।" इति माधवः।) वृद्धनाभिः। वृद्धनाभियुक्तः। इत्यमरः। २। ६। ६१॥

तुण्डिल., स्त्री, (तुण्डिरस्त्यस्येति। सिध्मादित्वात् इलच्।) वृद्धनाभि। इत्यमरः। २।६।६१॥ मुखर.। इत्युणादिकोषः॥

तुत्थ, तृ क स्तृतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरां-पर-सक-सेट्।) आद्यो पञ्चमस्वर शेषो दन्त्यवर्गाद्ययुक्तस्थकारः। तुत्थयति वुत्थापयति। स्तृतिराच्छादनम्। इति दुर्गादासः॥

तुत्थं, क्ली, (तुदति पीड़यत्यनेन। तुद+"पातृतुदेति।" उणा २। ७। इति थक्। यद्वा, तुत्थ आच्छादने+अच्।) खर्परीतुत्थम्। उपधातुभेदः। तुतिया इति भाषा। तत्पर्य्यायः। नीलाञ्जनम् २ हरिताश्मम् ३ तुत्थकम् ४ मयूरग्रीवकम् ५ ताम्रगर्भम् ६ अमृतोद्भवम् ७ मयूरतुत्थम् ८ शिखिकण्ठम् ९ नीलम् १०। इति राजनिर्घण्टः॥ तुत्थाञ्जनम् ११ शिखिग्रीवम् १२ वितुन्नकम् १३ मयूरकम् १४। इत्यमरः। २।९।१०१॥ सूतकम् १५ अमृतातुत्थम् १६ अमृतासदम् १७। इति शब्दचन्द्रिका॥ अस्य गुणाः। कटुत्वम्। कषायत्वम्। उष्णत्वम्। श्वित्रनेत्रामयनाशित्वम्। सर्व्वविषदोषशमनत्वम्। वान्तिकारकत्वञ्च। इति राजनिर्घण्टः॥ क्षारत्वम्। निर्म्मलत्वम्। लघुत्वम्। भेदकत्वम्। क्रिमिकण्डुकुष्ठकफनाशित्वञ्च। इति राजवल्लभः॥ *॥
"तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम्।
तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्॥
किञ्चित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणञ्च तत्।
तुत्थकं कटुकं क्षारं कषायं वामकं लघु॥
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूघ्नं खर्परं चापि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥
(अस्य शोधनविधिर्यथा,—
"ओतोर्विष्ठासमं तुत्थं सक्षौद्रं टङ्कणान्वितम्।
त्रिधा सपुटितं शुद्धं वान्तिभ्रान्तिविवर्जितम्॥"
अन्यच्च।
"गन्धकेन समं तुत्थं तुत्यार्द्धेनार्द्धयामकम्।
वान्तिभ्रान्ती यदा न स्तस्तदा सिद्धिं विनिर्दिशेत्॥"
शोधितस्यास्य गुणा यथा,—
"तुत्थं सकटुकक्षारं कषायं विशदं लघु।
लेखनं भेदि चक्षुष्यं कण्डूक्रिमिविषापहम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)
रसाञ्जनम्। ग्रावा। इत्युणादिकोषः॥ अग्नि। इति संक्षिप्तसारे उणादिवृत्तिः॥ अश्मा पुं। इति हेमचन्द्रः॥

तुत्थक, क्ली, (तुत्थमेव। स्वार्थे कन्।) तुत्थम्। इति शब्दचन्द्रिका॥ (अस्य गुणा यथा,—
"तुत्थकं कटुकं क्षारं कषायं वामकं लघु।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूघ्नं खर्परञ्चापि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तुत्था, स्त्री, (तुत्थ+टाप्।) नीलीवृक्षः। क्षुद्रैला। इत्यमरः। २। ४। ९५॥ महानीली। इति राजनिर्घण्टः॥

तुत्थाञ्जन, क्ली, (तुत्थयति तुत्थ्यते वा। तुत्थ+अच्। तुत्थञ्च तदञ्जनञ्चेति कर्म्मधारयः।) उपधातुविशेषः। तुत्थम्। इत्यमरः।२।९।१०१॥

तुद, ण श औ व्यथे। इति कविकल्पद्रुमः॥ (तुदां-उभ-सक-अनिट्।) ण श, तुदति तुदते। औ तोत्ता। व्यथ इह ण्यन्तस्य रूपम्। तुतोद गदया चारिम्। इति भट्टिः॥ विध्यति। इति दुर्गादासः॥

तुन्दं क्ली, (तुदतीति। तुद+"अन्दादयश्च।" उणां ४। ९८। इति दन् तुदेर्नुमच इत्युक्तेर्नुम् ततो दस्य लोप.।) उदरम्। इत्यमरः। २। ६। ७७॥

तुन्दकूपिका, स्त्री, (क्षुद्रः कूपः कूपिका। तुन्दस्य उदरस्य कूपिकेव।) नाभिः। इति हेमचन्द्रः। ३। २। ७०॥

तुन्दकूपी, स्त्री, (तुन्दस्य उदरस्य कूपी क्षुद्रकूप इव।) नाभिः। इति त्रिकाण्डशेषः॥

तुन्दपरिमार्ज्जः, त्रि, (तुन्दमुदरं परिमार्ष्टीति। परि+मृज+अण्।) तुन्दपरिमृजः। इत्यमरटीकायां रमानाथः॥ ("अलसात्तत्र तुन्दपरिमार्ज्ज एव।" इति सिद्धान्तकौमुदी। मां ३। २। ५॥)

तुन्दपरिमृज:, त्रि, (तुन्दमुदरं परिमार्ष्टीति । परि+मृज+"तुन्दशोकयो: परिमृजापनुदो:।" ३ । २ । ५ । इत्यत्र "आलस्यसुखाहरणयोरिति वक्तव्यम् ।" इति वार्त्तिकोक्त्या क: ।) अलस: । इत्यमर: । २ । १० । १८ ॥

तुन्दि, स्त्री, (तुद+इन् बाहुलकात् नुम् च ।) उदरम् । इति हेमचन्द्र: । ३ । २६८ ॥ गन्धर्व्वविशेषे, पु । इति जटाधर: ॥

तुन्दि:, स्त्री, (तुद्+इन् बाहुलकात् नुम् च ।) नाभि: । इति त्रिकाण्डशेष: ॥

तुन्दिक:, त्रि, (अतिशयितं तुन्दमुदरमस्त्यस्य । "तुन्दादिभ्य इलच ।" ५ । २ । ११७ । इति चकारात् ठन् ।) विशालजठरो जन: । इति शब्दरत्नावली ॥

तुन्दिका, स्त्री, (तुन्दमुदरं आश्रयत्वेनास्त्यस्या: । तुन्द+ठन् टाप् च ।) नाभि: । इति शब्दरत्नावली ॥

तुन्दित:, त्रि, तुण्डिल: । इति भरतस्य द्विरूपकोष: ॥

तुन्दिभ:, त्रि, (तुन्दि: वृद्धा नाभिरस्त्यस्येति । तुन्दि+"तुन्दिवलिवटेर्भ: ।" ५ । २ । १३९ । इति भ: ।) तुन्दिल: । इति शब्दरत्नावली ॥

तुन्दिल:, त्रि, (तुन्दं विशालमुदरमस्त्यस्येति । तुन्द+"तुन्दादिभ्य इलच ।" ५ । २ । ११७ । इतीलच् ।) विशालजठरो जन: । भुँडे इति भाषा ॥ तत्पर्य्याय: । पिचिण्डिल: २ बृहत्कुक्षि: ३ तुन्दिक: ४ तुन्दिभ: ५ तुन्दी ६ । इति शब्दरत्नावली ॥

तुन्दिलफला, स्त्री, (तुन्दिलवत् फलमस्या: ।) त्रपुषी । इति राजनिर्घण्ट: ॥

तुन्दी, स्त्री, (तुन्दि+वा ङीष् ।) नाभि: । इति शब्दरत्नावली ॥

तुन्दी, [न्] त्रि, (तुन्दं विशालमुदरमस्त्यस्येति । "तुन्दादिभ्य इलच ।" ५ । २ । ११७ । इति चकारात् इनि: ।) तुन्दिल: । इति शब्दरत्नावली अमरश्च ॥

तुन्न:, पु, (तुद्यते इति । तुद+क्त: ।) नन्दीवृक्ष: । तुँद इति भाषा । इत्यमर: । २ । ४ । १२७ ॥ त्रि, व्यथित: । (यथा, रामायणे । २ । १४ । २३ ।

"स तुन्न इव तीक्ष्णेन प्रतोदेन हयोत्तम: ।
राजा प्रचोदितोऽभीक्ष्णं कैकेयीमिदमब्रवीत् ॥"

छिन्ने । द्विधाकृते च ॥)

तुन्नवाय:, पुं, (तुन्नं छिन्नं वयतीति । वे+"ह्वावामश्च ।" ३ । २ । २ । इत्यण् ।) सौचिक: । इत्यमर: । २ । १० । ६ ॥ दरजी इति भाषा ॥ (यथा, मनु: । ४ । २१४ ।

"शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च ॥")

तुन्प, वधे । इति कविकल्पद्रुम ॥ (भ्वां-परं-सकं-सेट् ।) तुम्पति । इति दुर्गादास: ॥

तुन्प, श वधे । क्लेशे । इति कविकल्पद्रुम: ॥ (तुदां-सकं-अकं च-सेट् ।) श, तुपति तुतुम्प । तुप प श तुन्प श क्लिशि वधे इत्येताभ्यामेव तुम्पति तुपतीति सिद्धौ तुन्प वधे इत्यस्य भ्वादौ पाठस्तु वेदे शवन्तस्य शान्तस्य चोभयरूपभेदार्थ: । इति दुर्गादास: ॥

तुन्फ, वधे । इति कविकल्पद्रुम: ॥ (भ्वां-परं-सकं-सेट् ।) तुम्फति । इति दुर्गादास: ॥

तुन्फ, श वधे । क्लेशे । इति कविकल्पद्रुम: ॥ (तुदां-परं-सकं-अकं च-सेट् ।) श, तुफति तुतुम्फ । इति दुर्गादास: ॥

तुप, वधे । इति कविकल्पद्रुम: ॥ (भ्वां-परं-सकं-सेट् ।) तोपति । इति दुर्गादास: ॥

तुप, इ क अर्द्दने । इति कविकल्पद्रुम: ॥ (चुरां-परं-सकं-सेट् ।) पञ्चमस्वरी । इ क, तुम्पयति । अर्द्दनं वध: । इति दुर्गादास: ॥

तुप, प श क्लेशे । वधे । इति कविकल्पद्रुम: ॥ (तुदां-परं-अकं-सकं च-सेट् ।) प श, तुम्पति तुतोप । इति दुर्गादास: ॥

तुफ, वधे । इति कविकल्पद्रुम: ॥ (भ्वां-परं-सकं-सेट् ।) तोफति । इति दुर्गादास: ॥

तुफ, प श क्लेशे । वधे । इति कविकल्पद्रुम: ॥ (तुदां-परं-अकं-सकं च-सेट् ।) प श, तुम्फति तुतोफ । इति दुर्गादास: ॥

तुब, इ कि अर्द्दे । इति कविकल्पद्रुम: ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट् ।) तवर्गाद्यादि: । पञ्चमस्वरी । इ, तुम्बते । कि, तुम्बयति तुम्बति । अर्द्दो वध: । इति दुर्गादास: ॥

तुभ, ऌ ङ हिंसे । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऌ, अतुभत् । ङ, तोभते । इति दुर्गादास: ॥

तुभ, य श हिंसे । इति कविकल्पद्रुम: ॥ (दिवां-क्र्यां च-परं-सकं-सेट् ।) य, तुभ्यति । श, तुभ्नाति । तुतोभ । इति दुर्गादास: ॥

तुमुर:, पु क्ली, (तुमुल: । रस्य ल: ।) तुमुल: ॥ इत्यमरटीकायां रायमुकुट: ॥ (क्षत्त्रियजातिविशेष: । यथा, मात्स्ये । ११३ । ५३ ।

"तुमुरास्तुम्बराश्चैव पद्ममा नैषधै: सह ॥")

तुमुलं, क्ली, (तु सौत्रो धातु:+बाहुलकात् मुलक् ।) रणसङ्कुलम् । सङ्कीर्णयुद्धम् । इत्यमरमेदिनीकरौ ॥ परस्परसम्बाधो रणसंघट्ट: । इति भरत: ॥ (यथा, देवीभागवते । ५ । ४१ । २८ ।

"तथाभूत्तुमुलं युद्धं देवदानवसैन्ययो: ॥")

तुमुल:, पुं, (तु+बाहुलकात् मुलक् ।) कलिवृक्ष: । इति मेदिनी । ले, ९८ ॥ व्याकुलो रव: । इति त्रिकाण्डशेष: ॥ (प्रचण्डे उग्रे सङ्कुलमात्रे च त्रि । यथा, राजतरङ्गिण्याम् । ४ । ५४१ ।

"एकस्य करुणाक्रन्दै: सैन्यस्यान्यस्य गर्ज्जितै: ।
सरित्तरङ्गघोषैश्च बभूवुस्तुमुला दिश: ॥"

तथा, महाभारते । १ । ५३ । १२ ।

"ववौ गन्धश्च तुमुलो दह्यतामनिशं तदा ॥")

तुम्ब:, पु क्ली, (तुम्बति नाशयत्यरुचिमिति । तुम्ब अर्द्दने+अच् ।) अलाबु: । इत्यमरटीकायां भरत: ॥ (अलाबो: शुष्कत्वक् । यथा, हरिवंशे । ६४ । ५ ।

"सशिक्यतुम्बकरकौ गोपवेणुप्रवादकौ ॥")

तुम्बक:, पु, (तुम्बति अरुचिमिति । तुम्ब+ण्वुल् ।) अलावु: । इति शब्दरत्नावली ॥ राजालावु: । इति राजनिर्घण्ट: ॥

तुम्बा, स्त्री, (तुम्ब+टाप् ।) अलावु: । इति शब्दरत्नावली ॥ (यथा, अश्वाष्टके । ७ ।

"कुम्भावतीसमविडम्बा गलेन नवतुम्बाभवीणासविधा
शं बाहुलेयशशिविम्बाभिरामसुखसंवाधितस्तनभरा ॥")

गवी । इति त्रिकाण्डशेष: ॥

तुम्बि:, स्त्री, (तुम्बति नाशयत्यरुचिमिति । तुबि अर्द्दने+"सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इतीन् ।) अलावु: । इति शब्दरत्नावली ॥ (अलावुशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

तुम्बिका, स्त्री, (तुम्ब अर्द्दने+ण्वुल् । टापि अत इत्वम् ।) अलावु: । इति शब्दरत्नावली ॥ कटुतुम्बी । इति राजनिर्घण्ट: ॥

तुम्बिनी, स्त्री, (तुम्बति नाशयत्यरुचिमिति । तुम्ब+णिनि: ङीप् ।) कटुतुम्बी । इति राजनिर्घण्ट: ॥

तुम्बी, स्त्री, (तुम्बि+कृदिकारादिति वा ङीष् ।) अलावु: । इत्यमर: । २ । ४ । १५६ ॥ (यथा, शान्तिशतके । ३ । १६ ।

"अरे चेतोमीन ! भ्रमणमधुना यौवनजले
त्यज त्वं स्वच्छन्दं युवतिजनधौ पश्यसि न किम् ।
तनूजालीजाल स्तनयुगलतुम्बीफलयुगं
मनोभू: कैवर्त्त: क्षिपति परितस्त्वां प्रति मुहु: ॥"

"अलावु: कथिता तुम्बी द्विधा दीर्घा च वर्त्तुला ।
मिष्टं तुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु ॥
वृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कुलिकवृक्ष: । इति रत्नमाला ॥

तुम्बीपुष्प, क्ली, (तुम्ब्या: पुष्पमिव पुष्पमस्य ।) लताभूजम् । अलावुपुष्पम् । इति हारावली । २०२ ॥

तुम्बुकं, क्ली, (तुम्ब+बाहुलकात् उक: ।) अलावुफलम् । इति हेमचन्द्र: ॥

तुम्बुक:, पुं, (तुम्ब+बाहुलकात् उक: ।) अलावु: । इति भरतधृतहेमचन्द्र: ॥

तुम्बुरी, स्त्री, (तुम्बवदाकारं रातीति । रा+क: । ङीप् । पृषोदरादित्वात् ह्रस्वत्वम् ।) कुकुरी । धन्याकम् । इति मेदिनी । रे, १६३ ॥

तुम्बुरु, क्ली, कुस्तुम्बुरु । इत्यमरटीकायां भरत: ॥ (यथा, वैद्यके ।

"तुम्बुरुभङ्गपलाशकन्दकं कटुरोहिणी ॥"

अस्य तैलगुणा: ।

"तुम्बुरुत्थं करञ्जोत्थं ज्योतिष्मतुभवं तथा ।
अर्शकुष्ठकृमिश्लेष्मशुक्रमेदोऽनिलापहम् ॥"

इति हारीते प्रथमे स्थाने नवमे ऽध्याये ॥)

तुम्बुरुः, पुं स्त्री, गन्धर्व्वविशेषः । स्वर्गगायकः । इति जटाधरः ॥ (यथा, महाभारते । १।१२३।५५ ।
"गन्धर्व्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः ॥"
तपस्विविशेषः । यथा, हरिवंशे । १२६ । ८ ।
"अर्धिग्रस्तुम्बुरुश्चैव भारिच यदतां वरः ।
नैतारो देवदेवानामेते हि तपसान्विता. ॥")
अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥ फलवृक्षविशेषः । तत्फलन्तु धान्यकस्य मरीचवत् । तत्पर्य्यायः । शूलघ्नः २ । इति रत्नमाला ॥ सौरभः ३ सौरः ४ वनजः ५ सानुजः ६ द्विजः ७ तीक्ष्णकल्कः ८ तीक्ष्णफलः ९ तीक्ष्णपत्रः १० महातेजाः ११ स्फुटफलः १२ सुगन्धिः १३ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातशूलगुल्मोदराध्मानक्रिमिनाशित्वम् । वह्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥ तद्वृक्षपर्य्यायास्तत्फलगुणाश्च ।
"तुम्बुरुः सौरभः सौरो वनजः सानुजोऽन्धकः ।
तुम्बुरु प्रथितं तिक्तं कटुपाके हि तत् कटु ॥
रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च ।
वातश्लेष्मातिकर्णाक्षिशिरोरुग्गुरुताक्रिमीन् ॥
कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥"
इति भावप्रकाशः ॥

तुर, लि र वेगे । इति कविकल्पद्रुमः ॥ (ह्वा-पर-अकं-सेट् ।) ह्रस्वी । लि, तुतोर्त्ति । र, वैदिकः । वेगः शीघ्रगमनम् । अदादिवर्ज्जधातुभ्यः शपो विधानेनैव सिद्धे अदादेः शपं विधाय तल्लुक्करणं निष्ठायां भावादिकर्म्मणोर्द्वाऽव्वत इत्यनेन गुणार्थमिति चतुर्भुजः । तेन तोरितं तुरितमिति । तन्मते रुदेरपि रोदितं रुदितमिति स्यात् । इति दुर्गादासः ॥

तुरः, त्रि, (तुतोर्त्ति वेगेन गच्छतीति । तुर + कः ।) वेगवान् । इति तुरगशब्दटीकायां भरतः ॥ (यथा, ऋग्वेदे । ७ । ५६ । १९ ।
"इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति ॥"
"तुरं कर्म्मसु क्षिप्रवन्तम् ।" इति सायनः ॥ क्षिप्रस्तोत्रकारी । यथा, ऋग्वेदे । ८।२६।४ ।
"उपस्तोमान्तुरस्य दर्शथः श्रिये ॥"
"तुरस्य क्षिप्रं स्तोत्रं कुर्व्वतः ।"
इति सायनः ॥)

तुरगः, पुं, (तुर वेगे + भावे घञर्थे कः । तुरेण वेगेन गच्छतीति । गम + अन्येष्वपीति डः ।) चित्तम् । घोटकः । इति मेदिनी । गे, ३८ ॥ (यथा, रघुः । ३ । ५१ ।
"ततः प्रहस्यापभयः पुरन्दरं
पुनर्बभाषे तुरगस्य रक्षिता ॥")

तुरगगन्धा, स्त्री, (तुरगस्य गन्ध इव गन्धो यस्याः ।) अश्वगन्धा । इति रत्नमाला ॥ (अश्वगन्धाशब्देऽस्या विवरणमाख्यातम् ॥)

तुरगब्रह्मचर्य्यक, क्ली, (तुरगस्येव ब्रह्मचर्य्यम् । ततः स्वार्थे कन् ।) अभावादङ्गनात्यागः । इति त्रिकाण्डशेषः ॥

तुरगलीलकः, पुं, (तुरगस्येव लीला यस्य ततः कन् ।) तालप्रभेदः । यथा, सङ्गीतदामोदरः ।
"द्रुतद्वन्द्वं विरामान्तं लघुस्तुरगलीलके ॥"

तुरगी [न्] त्रि, (तुरगो घोटको वाहनत्वेनास्त्यस्येति । तुरग + इनिः ।) अश्वारोहः । इति हेमचन्द्रः । ३ । ४२५ ॥

तुरगी, स्त्री, (तुरगवत् गन्धोऽस्त्यस्याः । अर्श आदित्वात् अच् ततो गौरादित्वात् ङीष् ।) अश्वगन्धा । इति मेदिनी । गे, ३८ ॥ अश्वस्त्री । इति व्याकरणम् ॥

तुरङ्गः, पुं स्त्री, (तुरेण वेगेन गच्छतीति । तुर + गम् + "गमे सुपि वाच्यः ।" ३ । २ । ३८ । इत्यस्य वार्त्तिकोक्त्या खच् । "खच्च डिद्वा वाच्यः ।" इति डित् । "अरुर्द्विषदिति ।" ६ । ३ । ६७ । इति मुम् ।) घोटकः । इत्यमरः । २ । ८ । ४३ ॥ (यथा, पञ्चतन्त्रे । १ । ३१४ ।
"गजा गजैः पङ्गमगुमगन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः ॥")
चित्तम् । इति शब्दरत्नावली ॥

तुरङ्गकः, पुं, (तुरङ्ग इव कायतीति । कै + कः ।) घोषकालतिः । इति रत्नमाला ॥ हस्तिघोषा इति ख्यातः ॥

तुरङ्गद्वेषणी, स्त्री, (द्विष भावे ल्युट् । तुरङ्गेन सह द्वेषणं शत्रुता यस्य । ततो ङीप् ।) घोटकेन सह स्वभाववैरिभावादेवास्यास्तथात्वम् ।) महिषी । इति राजनिर्घण्टः ॥ (तुरङ्गद्विषणी तुरङ्गद्वेषिणी इत्यपि च क्वचित् दृश्यते ॥)

तुरङ्गप्रियः, पुं (तुरङ्गाणां घोटकानां प्रियः ।) यवः । इति राजनिर्घण्टः ॥

तुरङ्गमः, पु, स्त्री, (तुरेण वेगेन गच्छतीति । गम + खच् + मुम् च ।) घोटकः । इत्यमरः । २ । ८ । ४३ ॥ (यथा, रघुः । ७ । ४७ ।
"तुरङ्गमस्कन्धनिषण्णदेहं
प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥")

तुरङ्गवक्त्रः, पुं, (तुरङ्गस्येव वक्त्रं वदनं यस्य ।) किन्नरः । इति जटाधरः ॥

तुरङ्गवदनः, पुं, (तुरङ्गस्येव वदनं यस्य ।) किन्नरः । इत्यमरः । १ । २ । ७४ ॥

तुरङ्गारिः, पुं, (तुरङ्गस्य अरिः शत्रुः । अश्वनाशकत्वादस्य तथात्वम् ।) करवीरः । इति रत्नमाला ॥

तुरङ्गिका, स्त्री, (तुरङ्गवत् आकृतिरस्त्यस्य फलादौ । तुरङ्ग + ठन् ।) देवदालीलता । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या देवदालीशब्दे ज्ञातव्याः ॥)

तुरङ्गी, स्त्री, (तुरङ्गवद्गन्धोऽस्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) अश्वगन्धा । इति शब्दरत्नावली ॥ घोटिकाश्च । इति राजनिर्घण्टः ॥

तुरायणः, त्रि, (तुरेण वेगेन अयनं यत्र । "पूर्व्वपदात् संज्ञायामगः ।" ८।४।३ । इति णत्वम् ।) परायणः । इत्यमरटीकायां स्वामी ॥ (क्ली, यज्ञविशेषः । इति सिद्धान्तकौमुदी ॥ यथा, कात्यायनश्रौतसूत्रे । २४ । ८ । १ । २ ।
"तुरायणं वैशाखस्य पञ्चम्याम् । चैत्रस्य वा ॥"
यथा, महाभारते । १३ । १०३ । ३५ ।
तुरायणं हि व्रतमप्यधृष्य-
मक्रोधनोऽकरवं त्रिंशतोऽब्दान् ॥")

तुरासाट्, [ह्] पुं, (तुरं वेगवन्तं साहयति अभिभवतीति । सह + णिच् + क्विप् । "सहेः साडः सः ।" ८ । ३ । ५६ । इति षत्वम् । अन्येषामपीति पूर्व्वपदस्य दीर्घः ।) इन्द्रः । इत्यमरः । १ । १ । ४७ ॥ अस्य रूपान्तरम् । तुराषाड् ॥ (यथा, देवीभागवते ।२।१२।६३ ।
"तुराषाडपि तच्छ्रुत्वा क्रोधयुक्तो बभूव ह ॥")

तुरिः, स्त्री, (तुतोर्त्ति द्रुतं गच्छतीति । तुर + इन् ।) तुरी । इति शब्दरत्नावली ॥

तुरी, स्त्री, (तुरि + कृदिकारादिति वा ङीष् ।) तन्त्रवायस्य काष्ठनिर्म्मितोपकरणविशेषः । तत्पर्य्यायः । तन्त्रकाष्ठम् २ तुलिः ३ तुली ४ तुरिः ५ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ४४३ ।
"मेदिन्यां तव निपतति न पदं बहुवल्लभेति
गर्व्वेण ।
आश्लिष्य केर्ने तरुणैस्तुरीव वसनैर्विसृज्यसि ॥")

तुरीय, क्ली, (चतुर्णां पूरणम् । चतुर्थस्थानस्थितत्वादस्य तथात्वम् ।) ब्रह्म । इति वेदान्तसारः ॥
"अज्ञानतदुपहितचैतन्ययोराधारभूतं अनुपहितचैतन्यम् । यथा । वनवृक्षतदवच्छिन्नाकाशयोर्जलजलाशयतद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते । शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते । इत्यादि श्रुतेः ।" इति वेदान्तसारः ॥ (शुक्लयजुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि ।
"तुरीयातीतसन्न्यासपरिव्राजाक्षमालिका ॥")

तुरीय, त्रि, (चतुर्णां पूरणः । चतुर् + "चतुरश्छयतावाद्यक्षरलोपश्च ।" ५ । २ । ५१ । इत्यस्य वार्त्तिकोक्त्या छः । चस्य लोपश्च ।) चतुर्थः । इति मुग्धबोधम् ॥ (यथा, देवीभागवते । १ । १९ । ८ ।
"जाग्रत् स्वप्नसुषुप्तिश्च तव राजन् ! भवन्ति हि ।
अवस्थास्तु यथाकालं तुरीया तु कथं शृणु ॥"
तारकः । इति सायनः ॥ यथा, ऋग्वेदे । १ । ४ । ९ ।
"तमस्तुरीयमध पोषयित्नु
देव त्वष्टर्वि रराणः स्यस्व ॥")

तुरीयवर्णः, पुं, (तुरीयश्चतुर्थो वर्णः ।) शूद्रः । इति हलायुधः ॥

तुरुष्कः, पु, गन्धद्रव्यभेदः । शिलारस इति ख्यातः । तत्पर्य्यायः । यवनः २ धूम्रः ३ धूम्रवर्णः ४ सुगन्धिकः ५ सिह्लकः ६ सिह्लसारः ७ पीतसारः ८ कपिः ९ पिण्याकः १० कपिजः ११ कल्कः १२ पिच्छिल १३ पिच्छिलतैलकः १४ करेवरः १५ हविभकः १६ वेमगः १७ सिह्लः

१८ कपिञ्जलः १९ यावलः २० तैलाख्यः २१ पिच्छिकः २२ जावः २३ यावतः २४ । इति शब्दरत्नावली ॥ * ॥ अस्य गुणाः । सुरभित्वम् । तिक्तत्वम् । कटुत्वम् । स्निग्धत्वम् । कुष्ठकफपित्तास्रशैलक्ष्मूत्राघातज्वरार्त्तिनाशित्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च "अथ शिलारसः ।
सिह्लकस्तु तुरुष्कः स्याद्यतोऽयवनदेशजः ।
कपितैलञ्च स ख्यातस्तथा च कपिनामकः ॥
सिह्लकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत् ।
वृष्यः कण्डूस्वेदकुष्ठज्वरदाहग्रहापहः ॥"
इति भावप्रकाशः ॥
(अस्य शोधनविधिर्यथा,—
"तुरुष्को मधुना भाव्यः काश्मीरश्चापि सर्पिषा ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातरोगाधिकारे ॥) म्लेच्छजातिविशेषः । इति मेदिनी । के, १०२ ॥ तुरुक् इति भाषा । देशविशेषः । तुरुकस्थान् इति पारस्य भाषा । तत्पर्य्यायः । शाखिः २ । इति हेमचन्द्रः । ४ । २५ ॥ श्रीवासद्रवः । इति विश्वः ॥ (घोटकविशेषः । यथा, अश्ववैद्यके । ६ । ११ ।
"तुरुष्कः कीर्त्तितो वाजी स्थूलवक्त्रसुखश्च यः ॥")

तुर्य्यः, त्रि, (चतुर्णां पूरणः । चतुर् + "चतुरश्छयतावाद्यक्षरलोपश्च ।" ५ । २ । ५१ । इत्यस्य वार्त्तिकोक्त्या यत् चस्य लोपश्च ।) चतुर्थः । इति मुग्धबोधम् ॥ (यथा, भागवते । ७ । ९ । ३२ ।
"योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्य्ये स्थितो न तु तमो न गुणांश्च युङ्क्ते ॥")

तुर्व्व, ई हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ईखी । तूः तुर्वौ तुरः । ई, तूर्णः । इति दुर्गादासः ॥

तुर्व्वसुः, पुं, ययातिराजपुत्त्रः । (अयं हि देवयानीगर्भसम्भूतः । शापग्रस्तस्य पितुर्ययातेर्जरां नासौ गृहीतवान् ।) यथा,—
ययातिरुवाच ।
"यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् प्रजासमुच्छेदं तुर्व्वसो । तव यास्यति ॥
संकीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च ।
पिशिताशिषु लोकेषु नूनं राजा भविष्यसि ॥
गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च ।
पशुधर्म्मेषु म्लेच्छेषु पापेषु च भविष्यसि ॥"
इति मत्स्यपुराणम् ॥

तुल, कि उन्मितौ । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट् ।) उन्मितिः परिमाणम् । कि, तोलयति तोलति काञ्चनं वणिक् । त्वदीयं सौन्दर्य्यं तुहिनगिरिकन्ये । तुलयितुमिति शङ्करोक्तम् । तुलां करोति इति णौ साध्यम् । इति दुर्गादासः ॥

तुलसारिणी, स्त्री, (तुलेन वेगेन सरतीति । सृ + णिनि + ङीप् ।) तूणम् । इति शब्दमाला ॥

तुलसी, स्त्री, (तुलां सादृश्यं स्यति नाशयतीति । सो + कः । गौरादित्वात् ङीष् । सर्व्वोत्तमत्वादेव सादृश्याभावादस्यास्तथात्वम् । यदुक्तं ब्रह्मवैवर्त्ते प्रकृतिखण्डे । १५ । १५ ।
"नरा नार्य्यश्च तां दृष्ट्वा तुलनां दातुमक्षमाः ।
तेन नाम्ना च तुलसीं तां वदन्ति पुराविदः ॥"
अस्या अन्या निरुक्तिरुक्ता बृहद्धर्म्मपुराणे । ७ । ६३ ।
"तकारो मरणं प्रोक्तं तद्योगः स्यादुकारतः ।
म्टता लसति सेव्यैव तुलसीत्येव गीयते ॥")
स्वनामख्यातवृक्षः । तत्पर्य्यायः । सुभगा २ तीव्रा ३ पावनी ४ विष्णुवल्लभा ५ सुरेज्या ६ सुरसा ७ कायस्था ८ सुरदुन्दुभिः ९ सुरभिः १० बहुपत्त्री ११ मञ्जरी १२ हरिप्रिया १३ अपेतराक्षसी १४ श्यामा १५ गौरी १६ त्रिदशमञ्जरी १७ भूतघ्नी १८ भूतपत्त्री १९ । इति राजनिर्घण्टः ॥ पर्णासः २० वृन्दा २१ कठिञ्जरः २२ कुठेरकः २३ । इति शब्दरत्नावली ॥ वैष्णवी २४ पुण्या २५ पवित्रा २६ माधवी २७ अमृता २८ पत्रपुष्पा २९ सुगन्धा ३० गन्धहारिणी ३१ । इति भरतधृतमधुमित्रः ॥ सुरवल्ली ३२ प्रेतराक्षसी ३३ सुवहा ३४ ग्राम्या ३५ सुलभा ३६ बहुमञ्जरी ३७ देवदुन्दुभिः ३८ । इति भावप्रकाशः ॥ * ॥ क्षुद्रपत्रतुलस्याः पर्य्यायः । खरपत्रः १ जम्बीरः २ पत्रपुष्पः ३ फणिज्झकः ४ अल्पपत्रः ५ समीरणः ६ । इति रत्नमाला ॥ मरुवकः ७ प्रस्थपुष्पः ८ । इत्यमरः । २ । ४ । ७९ ॥ * ॥ गन्धतुलस्याः पर्य्यायः । सुगन्धकः १ गन्धनामा २ तीक्ष्णगन्धः ३ फणिज्झकः ४ गन्धफणिज्झकः ५ सुगन्धः ६ देवदुन्दुभिः ७ एते रक्ततुलस्याः पर्य्यायाः । इति लोकव्यवहारः ॥ * ॥ विल्वगन्धतुलस्याः पर्य्यायः । वैकुण्ठकः १ विल्वगन्धः २ अल्पमानकः ३ ॥ * ॥ श्वेततुलस्याः पर्य्यायः । अर्ज्जकः १ श्वेतपर्णासः २ गन्धपत्रः ३ कुठेरकः ४ अशार्ज्जकः ५ तीक्ष्णः ६ तीक्ष्णगन्धः ७ सितार्ज्जकः ८ ॥ * ॥ कृष्णतुलस्याः पर्य्यायः । कृष्णार्ज्जकः १ कृष्णवर्णा २ कालमानः ३ करालकः ४ कालपर्णी ५ सुरभिः ६ मानकः ७ कालमानकः ८ ॥ * ॥ बर्व्वरीतुलस्याः पर्य्यायः । सुरभिः १ तुलसीदेवी २ सुरसा ३ अपेतराक्षसी ४ । इति रत्नमाला ॥ बर्व्वरी ५ कवरी ६ तुङ्गी ७ खरपुष्पा ८ अजगन्धिका ९ । इत्यमरः । २ । ४ । १४९ ॥ * ॥ सामान्यतुलस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सुरभित्वम् । श्लेष्मवातजन्तुभूतक्रिमिवान्तिनाशित्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ दाहपित्तकारित्वम् । दीपनत्वम् । कुष्ठकृच्छ्रास्रपार्श्वरुङ्नाशित्वञ्च । शुक्ला कृष्णा च तुलसी गुणैस्तुल्या । इति भावप्रकाशः ॥ * ॥ अस्या उत्पत्तिर्यथा । गोलोके इयं तुलसी गोपी श्रीकृष्णप्रिया श्रीकृष्णेन सह अस्याः क्रीडां दृष्ट्वा राधा शशाप त्वं मानवीं योनिं याहि । तच्छ्रुत्वा सा खिन्ना । गोविन्दस्तामुवाच त्वं भारते तपस्तप्त्वा ममांशं नारायणं लभिष्यसि । सा पृथिव्यां धर्म्मध्वजराजपत्न्यां माधव्यां कार्त्तिकीपूर्णिमायां जाता नरा नार्य्यश्च तां दृष्ट्वा तुलनां दातुमयोग्यास्तेन इह लोकेऽपि तुलसीति नाम्ना ख्याता । सा तपस्तप्तुं वनं गता । तदानीं राधाशापात् सुदामगोपालो दानवीं योनिं प्राप्य शङ्खचूडनाम्ना ख्यातः । सोऽपि ब्रह्मणो वरात् सर्व्वावध्यत्वं प्राप्तवान् परन्तु यदा तव पत्न्याः सतीत्वनाशो भविष्यति तदा मरिष्यसीति ब्रह्मा तमुक्तवान् । स तुलसीमुवाह देवानामधिकारं जहार । देवाः ब्रह्मसभां गताः । ब्रह्मा तैः सार्द्धं शिवलोकं गतवान् । शिवस्तैः सार्द्धं वैकुण्ठं गतवान् । नारायणो ब्रह्माणमुवाच मम शूलं गृहीत्वा शिवो युद्धार्थं तत्र गच्छतु अहञ्च शङ्खचूडरूपेण तत्पत्न्याः सतीत्वभङ्गं करिष्यामीति श्रुत्वा शिवस्तत्र जगाम, स शिवेन सह युद्धे नियुक्तस्तदानीं नारायणस्तत्पत्नीं तद्रूपेण धर्षितवान् । पश्चात् सा नारायणं ज्ञात्वा शशाप त्वं पाषाणो भव जन्मान्तरे आत्मानं विस्मरिष्यसि इत्युक्त्वा तच्चरणे पपात रुरोद च । तदा नारायणस्तामुवाच त्वमिदं शरीरं त्यक्त्वा रमासदृशी भव मया सह क्रीड इयं तनुर्गण्डकी नदी भवतु तव केशसमूहस्तुलसीनामा पुण्यवृक्षो भवतु तदा तत् सर्व्वमभूत् । एतद्विवरणन्तु ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायमारभ्य विस्तरशो द्रष्टव्यम् ॥ * ॥ पद्मपुराणमते जलन्धरपत्नीवृन्दालावण्यदर्शनेन विष्णुर्मुग्धः । तन्मोहवारणार्थं देवा महादेवशरणङ्गताः । महादेवस्तानुवाच मायामाराधय । ते मायां तुष्टुवुः माया तानुवाच अहं रजःसत्वतमोगुणैर्गौरीलक्ष्मीस्वधारूपेण तिष्ठामि । ता युष्माकं कार्य्यं विधास्यन्ति तच्छ्रुत्वा देवास्तासां समीपमागत्य प्रणेमुः तास्तेभ्यो वीजानि ददुर्वाक्यानि जगदुश्च यत्र विष्णुस्तिष्ठति तत्रेमानि वीजानि वपत देवास्तथा चक्रुस्तद्वीजेभ्यस्त्रयो वृक्षा अभवन् धात्री मालती तुलसी च धात्री स्वधांशभूता मालती लक्ष्म्यंशभूता तुलसी गौर्य्यंशभूता ॥ * ॥ तुलस्या माहात्म्यं यथा ।
ब्रह्मोवाच ।
"तुलस्याः शृणु माहात्म्यं पापघ्नं सर्व्वकामदम् ।
यत् पुरा विष्णुना प्रोक्तं तत्ते वक्ष्याम्यशेषतः ॥
सम्प्राप्ते कार्त्तिके दृष्ट्वा नियमेन जनार्द्दनः ।
पूजनीयो महद्भिश्च कोमलैस्तुलसीदलैः ॥
दृष्टा स्पृष्टा तथा ध्याता कार्त्तिके नमितार्च्चिता ।
रोपिता सेविता नित्यं पापं हन्ति युगार्ज्जितम् ॥
अष्टधा तुलसी यैस्तु सेविता द्विजसत्तम ।
युगकोटिसहस्राणि ते वसन्ति हरेर्गृहे ॥
रोपिता तुलसी यावत् कुरुते मूलविस्तृतम् ।
तावद्युगसहस्राणि तनोति सुकृतं हरिः ॥
तुलसीदलपुष्पाणि यो दद्याद्धरये मुने ।
कार्त्तिके सकलं पापं सोऽत्र जन्मार्ज्जितं दहेत् ॥
रोपिता तुलसी यावत् वर्द्धते वसुधातले ।
तावत्कल्पसहस्राणि विष्णुलोके महीयते ॥
यत् फलं सर्व्वपुष्पेषु सर्व्वपत्रेषु यत् फलम् ।

तुलस्यास्तद्दलार्द्धेन पुण्यं स्याद्विष्णुपूजने ॥
तुलसीगन्धमादाय यत्र गच्छति मारुतः ।
दिशो दश पुनात्याशु भूतग्रामांश्चतुर्व्विधान् ॥
तुलसीकाननोद्भूता छाया यत्र भवेन्मुने ।।
तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे ॥
तुलसीबीजनिकरो यस्मिन् पतति वै मुने ।।
तत् स्थानं परमं ज्ञेयं पितॄणां प्रीतिवर्द्धनम् ॥
यस्मिन् गृहे द्विजश्रेष्ठ ! तुलसीतलमृत्तिका ।
तत्रैव नोपसर्पन्ति भूतले यमकिङ्कराः ॥
तुलसीमृत्तिकालिप्तो यदि प्राणान् परित्यजेत् ।
यमेन नेक्षितुं शक्यो मुक्तः पापशतैरपि ॥
तुलसीमृत्तिकालिप्तं ललाटं यस्य दृश्यते ।
कुलं स्पृशति नो तस्य कलिर्मुनिवरोत्तम ।॥
यः कश्चित्तुलसीमूले कार्त्तिके केशवप्रियः ।
दीपं ददाति विप्रेन्द्र ! स लभेद्वैष्णवं पदम् ॥
तुलसीकाननञ्चैव गृहे यस्यावतिष्ठते ।
तद्गृहं तीर्थभूतं हि नायान्ति यमकिङ्कराः ॥
दर्शनं नर्म्मदायास्तु गङ्गास्नानं तथैव च ।
तुलसीवनसंसर्गः सममेतत्त्रयं स्मृतम् ॥
रोपणात् पालनात् सेकाद्दर्शनात् स्पर्शनान्नृणाम्।
तुलसी दहते पापं वाङ्मनःकायसञ्चितम् ॥
तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्च्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
वासुदेवादयो देवा वसन्ति तुलसीदले ॥
तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति ।
यमो न वीक्षितुं शक्तो युक्तः पापशतैरपि ॥”
इति पाद्मोत्तरखण्डम् ॥ * ॥
“यत्रैकस्तुलसीवृक्षस्तिष्ठति द्विजसत्तम ! ।
तत्रैव त्रिदशाः सर्व्वे ब्रह्मविष्णुशिवादय ॥
केशवः पत्रमध्येषु पत्राग्रेषु प्रजापतिः ।
पत्रवृन्ते शिवस्तिष्ठेत् तुलस्याः सर्व्वदैव हि ॥
लक्ष्मीः सरस्वती चैव गायत्त्री चण्डिका तथा ।
शची चान्या देवपत्न्यस्तत्पुष्पेषु वसन्ति वै ॥
इन्द्रोऽग्निः शमनश्चैव नैरृतो वरुणस्तथा ।
पवनश्च कुवेरश्च तच्छाखायां वसन्त्यमी ॥
आदित्यादिग्रहाः सर्व्वे विश्वेदेवाश्च सर्व्वदा ।
वसवो मनवश्चैव तथा देवर्षयोऽखिलाः ॥
विद्याधराश्च गन्धर्व्वाः सिद्धाश्चाप्सरसस्तथा ।
तुलसीपत्रमाश्रित्य सर्व्वदा निवसन्ति ये ॥
चिन्वन्ति तृणजातीनि तुलसीमूलजानि वै ।
तद्देहस्था ब्रह्महत्याश्चिनोति तत्क्षणाद्धरिः ॥
ग्रीष्मकाले द्विजश्रेष्ठ ! सुगन्धैः शीतलैर्जलैः ।
तुलसीसेचनं कृत्वा नरो निर्व्वाणमाप्नुयात् ॥
चन्द्रातपं वा छत्रं वा तुलस्यै यस्तु यच्छति ।
विशेषतो निदाघेषु स मुक्तः सर्व्वपातकैः ॥
वैशाखेऽच्छतधाराभिरद्भिर्यस्तुलसीं जनः ।
सेचयेत् सोऽश्वमेधस्य फलं प्राप्नोति नित्यशः ॥
कदाचित्तुलसीं दुग्धैः सेचयेद्यो नरोत्तमः ।
तस्य वेश्मनि विप्रर्षे ! लक्ष्मीर्भवति निश्चला ॥
गोमयैस्तुलसीमूले यः कुर्य्यादनुलेपनम् ।
सम्मार्ज्जनञ्च कुरुते तस्य पुण्यफलं शृणु ॥
रजांसि तस्य यावन्ति दूरीभूतानि जैमिने ।।
तावत्कल्पसहस्राणि मोदते ब्रह्मणा सह ॥
यद्धर्म्मकर्म्म कुरुते सगुणः पृथिव्यां
नारायणप्रियतमां तुलसीं विना च ।
तत सर्व्वमेव विफलं भवति द्विजेन्द्र !
पञ्चामृतोऽपि न हि तुष्यति देवदेवः ॥
यस्य स्यात् तुलसीपत्रं मुखे शिरसि कर्णयोः ।
मृत्युकाले द्विजश्रेष्ठ ! तस्य स्वामी न भास्करिः ॥”
इति पाद्मे क्रियायोगसारः ॥ * ॥
“स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
तुलसीपत्रतोये च योऽभिषेकं समाचरेत् ॥
गवामयुतदानेन यत् फलं लभते नरः ।
तुलसीपत्रदानेन तत् फलं कार्त्तिके सति ॥
तुलसीतोयकणिकां मृत्युकाले च यो लभेत् ।
रत्नयानं समारुह्य वैकुण्ठं स प्रयाति च ॥
त्रिकालं तुलसीपत्रं शुद्धं पर्य्युषितं सति ।
श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्च्चने ॥
भूगतं तोयपतितं यद्दत्तं विष्णवे सति ।
शुद्धन्तु तुलसीपत्रं क्षालनादन्यकर्म्मणि ॥”*॥
तुलसीचयननिषेधकालो यथा,—
“पूर्णिमायाममायाञ्च द्वादश्यां रविसंक्रमे ।
तैलाभ्यङ्गे च स्नातेन मध्याह्ने निशिसन्ध्ययोः ॥
अशौचेऽशुचिकाले च रात्रिवासान्वितेऽपि वा ।
तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः
शिरः ॥” * ॥
तुलसीस्पर्शनेन मिथ्याप्रतिज्ञायां मिथ्याशपथे च दोषो यथा,—
“तुलसीं स्वकरे कृत्वा स्वीकारं यो न रक्षति ।
स याति कालसूत्रञ्च यावच्चन्द्रदिवाकरौ ॥
करोति मिथ्याशपथं तुलस्या यो हि मानवः ।
स याति कुम्भीपाकञ्च यावदिन्द्राश्चतुर्द्दश ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ।
तुलसीपत्रचयने मन्त्रा यथा,—
“मातस्तुलसि गोविन्दहृदयानन्दकारिणि ! ।
नारायणस्य पूजार्थं चिनोमि त्वां नमोऽस्तु ते ॥
कुसुमैः पारिजाताद्यैः सुगन्धैरपि केशवः ।
त्वया विना नैव तृप्तिं चिनोमि त्वामतः शुभे ॥
त्वया विना महाभागे समस्तं कर्म्म निष्फलम् ।
अतस्तुलसि देवि ! त्वां चिनोमि वरदा भव ॥
चयनोद्भवदुःखं यद्देवि ! ते हृदि वर्त्तते ।
तत् क्षमस्व जगन्मातस्तुलसि ! त्वां नमाम्यहम् ॥
कृताञ्जलिरिमान्मन्त्रान् पठित्वा वैष्णवो जनः ।
करतालत्रयं दत्त्वा चिनुयात्तुलसीदलम् ॥
शनैः शनैस्तथाकारेच्चीयते तुलसीदलम् ।
यथा न कम्पते शाखा तुलस्या द्विजसत्तम ! ॥
पत्राणां चयने विप्र ! भग्नशाखा यथा भवेत् ।
तथा हृदि व्यथा विष्णोर्द्दीयते तुलसीपतेः ॥”
इति पाद्मे क्रियायोगसारः ॥ * ॥
तुलसीकाष्ठमालामाहात्म्यं यथा,—
“तुलसीकाष्ठनिर्म्माणमालां गृह्णन्ति ये नराः ।
पदे पदेऽश्वमेधानां लभते निश्चितं फलम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
“सात्वतैस्तुलसीकाष्ठमाला कुञ्जसमुद्भवा ।
धार्य्या नित्यं प्रयत्नेन सेतद्भक्तस्य लक्षणम् ॥
हरिभक्तस्य तुलसीकुञ्जकाष्ठसमुद्भवा ।
चिह्नार्थमात्मनो माला पुरा कृष्णेन दर्शिता ॥”
इति पाद्मोत्तरखण्डम् ॥ * ॥
गणेशपूजने तुलसीनिषेधो यथा । तुलसीं प्रति गणेशवाक्यम् ।
“पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे ! ।
कलांशेन महाभागे ! स्वयं नारायणप्रिया ॥
प्रिया त्वं सर्व्वदेवानां कृष्णस्य च विशेषतः ।
पूजा विमुक्तिदा नॄणां मम त्याज्या च सर्व्वदा ॥”
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
तुलस्याः स्तवो यथा,—
नारायण उवाच ।
“वृन्दां वृन्दावनीं विश्वपूजितां विश्वपावनीम् ।
पुष्पसारां नन्दिनीञ्च तुलसीं कृष्णजीवनीम् ॥
एतन्नामाष्टकञ्चैतत् स्तोत्रं नामार्थसंयुतम् ।
यः पठेत्ताञ्च सम्पूज्य सोऽश्वमेधफलं लभेत् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
महादेवाय तस्याः पत्रदानफलं यथा,—
“गयाश्राद्धफलं दातुः पितॄणां परितोषदम् ।
तत्फलं स्याच्छतगुणं तुलसीपत्रदानतः ॥”
इति वृहद्धर्म्मपुराणे १० अध्यायः ॥*॥
तस्यास्तन्मञ्जर्य्याश्च हरिहरपूजने मुक्तिप्रदत्वं पाद्मे देवदूतविकुण्डलसंवादे ।
“तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्च्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥”
इति श्रीहरिभक्तिविलासे ७ विलासः ॥*॥
तत्पत्रैश्च शक्तिपूजाविधिर्यथा,—
“वाणिदन्तकपत्रैश्च पुष्पैरपि चण्डिकाम् ।
तुलसीकुसुमैः पत्रैरर्च्चयेच्छ्रीविवृद्धये ॥”
इति श्रीकालिकापुराणे ६८ अध्यायः ॥*॥
अथ तुलसीग्रहणविधिः । वायुपुराणे ।
“अस्नात्वा तुलसीं छित्त्वा यः पूजां कुरुते नरः ।
सोऽपराधी भवेत् सत्यं तत् सर्व्वं निष्फलं भवेत् ॥”
तत्रादौ मन्त्रः । स्कान्दे ।
“तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
केशवार्थे चिनोमि त्वां वरदा भव शोभने ॥
त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम् ।
तथा कुरु पवित्राङ्गि ! कलौ मलविनाशिनि ! ॥”
गारुडे च ।
“मोक्षैकहेतो धरणीप्रशस्ते
विष्णोः समस्तस्य गुरोः प्रियेति ।
आराधनार्थं वरमञ्जरीकं
लुनामि पत्रं तुलसि ! क्षमस्व ॥
इत्युक्त्वा तुलसीं नत्वा चित्वा दक्षिणपाणिना ।
पत्राण्येकैकशो न्यस्येत् सत्पात्रे मञ्जरीरपि ॥”
तन्माहात्म्यञ्च स्कान्दे ।
“मन्त्रेणानेन यः कुर्य्याद् गृहीत्वा तुलसीदलम् ।
पूजनं वासुदेवस्य लक्षकोटिफलं लभेत् ॥”
किञ्च ।
“शालग्रामशिलार्च्चार्थं प्रत्यहं तुलसीक्षितौ ।

तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः ॥"

इति ॥ * ॥

"संक्रान्त्यादौ निषिद्धोऽपि तुलस्यवचयः स्मृतः ।
परं श्रीविष्णुभक्तैस्तु द्वादश्यामेव नेष्यते ॥" * ॥

अथ तुलस्यवचयनिषेधकालः । विष्णुधर्म्मोत्तरे ।

"न छिन्द्यात् तुलसीं विप्रा द्वादश्यां वैष्णवः क्वचित् ॥"

गारुडे ।

"भानुवारं विना दूर्व्वां तुलसीं द्वादशीं विना ।
जीवितस्याविनाशाय न विचिन्वीत धर्म्मवित् ॥"

पाद्मे च ।

श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये ।

"द्वादश्यां तुलसीपत्रं धात्रीपत्रञ्च कार्त्तिके ।
लुनाति स नरो गच्छेन्निरयानतिगर्हितान् ॥"

अतएवोक्तम् ।

"देवार्थे तुलसीच्छेदो होमार्थे समिधान्तथा ।
इन्दुक्षये न दुष्येत गवार्थे तु तृणस्य च ॥
एवं कृत्वा महापूजामङ्गोपाङ्गादिकं प्रभोः ।
क्रमाद्यथा सम्प्रदायं तत्तत्स्थानेषु पूजयेत् ॥"

इति श्रीहरिभक्तिविलासे ७ विलासः ॥ * ॥

अथ तुलसीविवाहः प्रतिष्ठाविधिश्च ।

श्रीवशिष्ठ उवाच ।

"विवाहं संप्रवक्ष्यामि तुलस्यास्तु यथाविधि ।
यथोक्तं पञ्चरात्रे वै ब्रह्मणा भाषितं पुरा ॥
आदावेव वनेऽवाप्य तुलसीं स्वगृहेऽपि वा ।
वर्षत्रयेण पूर्णेन ततो यजनमारभेत् ॥
सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा ।
अथवा कार्त्तिके मासि भीष्मपञ्चदिनेषु च ॥
वैवाहिकेषु ऋक्षेषु पूर्णिमाया विशेषतः ।
मण्डपं कारयेत्तत्र कुण्डवेदीं तथा पुनः ॥
शान्तिकञ्च प्रकर्त्तव्यं मातॄणां स्थापनं तथा ।
मातृश्राद्धादिकं सर्व्वं विवाहवत् समाचरेत् ॥
ब्राह्मणांश्च शुचिस्नातान् वेदवेदाङ्गपारगान् ।
ब्रह्मा चादेशकश्चैव चत्वारश्च तदर्त्विजः ॥
वैष्णवेन विधानेन वर्द्धनीकलसं यजेत् ।
मण्डपं कारयेत्तत्र लक्ष्मीनारायणं शुभम् ॥
गृहयज्ञं पुरः कृत्वा मातृणां यजनं तथा ।
कृत्वा नान्दीमुखं श्राद्धं सौवर्णं स्थापयेद्धरिम् ॥
स्नत्वारोप्य च तुलसीं सम्यक् लग्नमिते रवौ ।
वास. शतेन मन्त्रेण वस्त्रयुग्मेन वेष्टयेत् ॥
यदा बध्नेति मन्त्रेण कङ्कणं पाणिपल्लवे ।
कोऽदादिति च मन्त्रेण पाणिग्राहो विधीयते ॥
तत. कुण्डे समागत्य आचार्य्यः सहसा द्विजैः ।
आचार्य्यो वेदिकाकुण्डे जुहुयाच्च नवाहुतीः ॥
विवाहकर्म्मवत् सर्व्वं वैष्णवं देशिकोत्तमैः ।
कर्त्तव्यञ्च ततो होमो विशेषाद्विधिपूर्व्वकम् ॥"

ॐ नमो भगवते केशवाय नमः स्वाहा । नारायणाय स्वाहा । माधवाय । गोविन्दाय । विष्णवे । मधुसूदनाय । त्रिविक्रमाय । वामनाय । श्रीधराय । हृषीकेशाय । पद्मनाभाय । दामोदराय । उपेन्द्राय । अनिरुद्धाय । अच्युताय । अनन्ताय । गदिने । चक्रिणे । विष्वक्सेनाय । वैकुण्ठाय । जनार्द्दनाय । सङ्कन्दाय । अघोक्षजाय स्वाहा । इति होमः ॥

यजमान. सपत्नीको ह्यन्ये ये गोत्रबान्धवाः ।
प्रदक्षिणाश्च कर्त्तव्याश्चत्वारो विष्णुना सह ॥
तुलस्याः पाणिग्रहणे वेदिकायां विभावसौ ।
शुक्लकुम्भं जपेत् सूक्तं पावमानीं विशेषतः ॥
तथैव शान्तिकाध्याय नवसूक्तं तथैव च ।
जीवसूक्तं पुनश्चैव तथा वैष्णवसंहिताम् ॥
शङ्खकाहलनिर्घोषैर्भेरीतूर्य्यस्य निस्वनैः ।
गायन्ते मङ्गला नार्य्यो माङ्गल्यं विधिमाचरेत् ॥
दद्यात् पूर्णाहुतिं पश्चादभिषेकविधिं ततः ।
ब्राह्मणे वृषभं दद्यादाचार्य्यं परिधाप्य च ॥
गां पटञ्च तथा शय्यामाचार्य्याय प्रदापयेत् ।
ऋत्विग्भ्यो दापयेद्द्रव्यमशेषां दद्याच्च दक्षिणाम् ॥
एवं प्रतिष्ठितां देवीं विष्णुना च समर्च्चयेत् ।
आजन्मोपार्ज्जितं पापं दर्शनेन प्रणश्यति ॥
रोपयेत्तुलसीं यस्तु सेवयेच्च प्रयत्नतः ।
प्रतिष्ठाप्य यथोक्तेन विष्णुना सह मानवः ॥
स मोक्षं लभते जन्तुर्विष्णुलोकं तथाक्षयम् ।
प्राप्नोति विपुलान् भोगान् विष्णुना सह मोदते ॥
प्रतिष्ठा श्रीतुलस्यास्तु लिखिता विष्णुयामले ॥"

इति श्रीहरिभक्तिविलासे २० विलासः ॥

तुलसीद्वेषा, स्त्री, (तुलसीं द्वेष्टि तुल्यगन्धत्वात् सहते इति । द्विष+अण् । ततष्टाप् ।) वर्व्वरी । इति रत्नमाला ॥ (वर्व्वरीशब्देऽस्या गुणादिकं ज्ञेयम् ॥)

तुला, स्त्री, (तोल्यतेऽनया । तुल उन्माने भिदादङ् । अतुलोपमाभ्यामिति निर्द्देशात् गुणाभावः ।) सादृश्यम् । (यथा, रघुः । ८ । १५ ।

"नभसा निभृतेन्दुना तुला-
मुदितार्कैण समारुरोह तत् ॥")

मानम् । (यथा, पञ्चतन्त्रे । २ । ८४ ।

"सकृदपि दृष्ट्वा पुरुषं विबुधा जानन्ति सारतां तस्य ।
हस्ततुलयापि निपुणाः पलपरिमाणं विजानन्ति ॥")

गृहाणां दारुबन्धाय पीठिका । पलशतम् । (यथा, अमरकोषे । २ । ९ । ८७ ।

"तुला स्त्रियां पलशतं भारः स्यात् विंशतिस्तुला ॥")

भाण्डम् । इति मेदिनी । ले, २५ ॥ मेषादिद्वादशराश्यन्तर्गतसप्तमराशिः । तत्पर्य्यायः । यूकः २ युक् ३ घटः ४ तौली ५ तुलाभृत् ६ । इति ज्योतिषम् ॥ सा चित्राशेषपादद्वयस्वातीसमुदाययुक्तविशाखाप्रथमपादत्रयेण भवति । तदधिष्ठातृदेवता तुलाधारिपुरुषः । अस्याः शिरश्च उदयः नानावर्णः उष्णस्वभावः । सा पश्चिमदिक्स्वामिनी वायुराशिः स्निग्धा चिक्कणा निःशब्दा वनचारिणी अल्पसन्ताना अल्पस्त्रीसङ्गा शूद्रवर्णा समानाङ्गा च । तत्र जातस्य फलम् । वक्ता विद्यावरः स्फीट्.खितः । इति जातकम् ॥ जन्मकालीनचन्द्राश्रिततद्राशिफलम् ।

"वृषतुरङ्गगजक्रयविक्रयी
द्विजसुरार्च्चनदानमनाः पुमान् ।
भवति यस्य तु जन्मनि तौलिगे
विभवसञ्चितसञ्चितविक्रमः ॥"

इति कोष्ठीप्रदीपः ॥

तस्या उदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं दशघटिकापलाधिकपञ्चाङ्गुलप्रमे देशे वर्त्तमानेनविशायनांशे षट्त्रिंशत् पलाधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ तत्र जातफलम् ।

"तुलाजन्मा पुमान् जातः सुधीः सत्कर्म्मतत्परः ।
विद्वान् सर्व्वकलाविज्ञो धनाढ्यो जनपूजितः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

परीक्षाविशेषः । यथा नारदः ।

"ब्राह्मणस्य घटो देयः क्षत्त्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारण. समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विषवर्ज्जं ब्राह्मणस्य सर्व्वेषान्तु तुला स्मृता ॥" *

अथ तस्या उत्पत्तिविधिः । यज्ञियं वृक्षं यूपवच्छन्त्रपूर्व्वकं छित्त्वा लोकपालेभ्यः प्रणम्य पण्डितैः चतुर्हस्ता चतुरस्रा ऋज्वी तुला कार्य्या तत्र त्रिषु स्थानेषु वलयानि दातव्यानि । तत्र पञ्चहस्तौ स्तम्भौ कृत्वा हस्तद्वयखननेन दक्षिणोत्तरयोर्दिशोर्हस्तद्वयनिखननं कृत्वा पट्टधारककीलकायस्तम्भयोरुपरि अन्तद्वयच्छिद्रं मध्यनिवेशितलौहाङ्कुशपट्टकं निधाय तत्पट्टकस्य मध्यस्थिताङ्कुशेन तुलामध्यवलयस्थलौहं संयुञ्ज्यात् । एवञ्च सति स्तम्भयोरन्तरतिर्य्यक् तुलादण्डस्थितिः तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्यद्वयरज्जुबन्धनं कुर्य्यात् । तुलायाः पार्श्वयोः प्राक्प्रत्यक्दिशोस्तोरणस्तम्भौ तुलातो दशाङ्गुलोच्छ्रायौ कार्य्यौ तोरणयोरुपरिस्तन्संनद्धौ स्पर्शनायावधोमुखौ घटमस्तकचुम्बिनावलम्बौ कार्य्यौ । तुलादण्डं पूर्व्वपश्चिमयोर्धार्य्यः । पूर्व्वशिक्ये शिला तोलयेत् पश्चिमे कर्त्तारं तुलाया उपरि जलं देयं यदि जलं न च्यवते तदा तुला समा ज्ञेया ॥ * ॥ अथैतत्प्रयोगः । कृतोपवासः कृतस्नानादिः प्राड्विवाको ब्राह्मणः कार्य्यं पृच्छेत् निवेदितं विवेचयेत् । ततोऽभियुक्तं तोलयित्वावतार्य्य धर्म्मावाहनादिकं कुर्य्यात् । ॐ तत् सदित्युच्चार्य्य ब्राह्मणत्रयं गन्धादिना पूजयित्वा तान् स्वस्तिपुण्याहऋद्धिं प्रत्येकं त्रिर्वाचयित्वा दिगङ्गभूतहोमार्थं ब्रह्मचतुष्टयं ऋत्विक्चतुष्टयञ्च पाद्यादिभिरभ्यर्च्य वृणुयात् । अशक्तावेकं ब्रह्माणमेकं ऋत्विजञ्च । ततस्तुलां सपताका ध्वजालङ्कृतां भूमौ निधाय तस्याः प्राङ्मुखः प्राड्विवाकः पुष्पाक्षतमादाय ॐ भूर्भुवः स्वरित्युच्चार्य्य । एह्येहि भगवन् धर्म्म ! दिव्ये ह्यस्मिन् समाविश ।

सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥

इति मन्त्रेण धर्म्ममावाह्य इदमर्घ्यं ओं धर्म्माय नमः इत्यादिप्रयोगेणार्घ्यपाद्याचमनीयमधुपर्काचमनीयवस्त्रयज्ञोपवीताचमनीयमुकुटकटकभूषणान्तं दत्त्वा तथैवार्घ्यादिभूषणान्तं प्रणवादिनमोऽन्तेन स्वस्वनाम्ना पूर्व्वस्यां इन्द्राय दक्षिणस्यां यमाय पश्चिमे वरुणाय उत्तरस्यां कुवेराय आग्नेय्यां अग्नये नैरृत्यां निरृतये धायव्यां वायवे ऐशान्यां ईशानाय। इन्द्रस्य दक्षिणपार्श्वे अष्टवसुभ्यः प्रत्येकं नामभिः। तत्र धवाय ध्रुवाय सोमाय आपाय अनिलाय अनलाय प्रत्यूषाय प्रभासाय। इन्द्रेशानयोर्म्मध्ये तथा द्वादशादित्येभ्यः तत्र धात्रे अर्य्यम्णे मित्राय वरुणाय अंशवे भगाय इन्द्राय विवस्वते पूष्णे पर्ज्जन्याय त्वष्ट्रे विष्णवे। अग्निपश्चिमभागे तथैकादशरुद्रेभ्यः तत्र वीरभद्राय शम्भवे गिरीशाय अजैकपदे अहिर्ब्रध्नाय पिनाकिने अपराजिताय भुवनाधीश्वराय कपालिने स्थाणवे भवाय। यमरक्षसोर्म्मध्ये तथा मातृभ्यः तत्र ब्राह्म्यै माहेश्वर्य्यै कौमार्य्यै वैष्णव्यै वाराह्यै माहेन्द्र्यै चामुण्डायै निरृत्युत्तरे गणेशाय वरुणोत्तरे अष्टमरुद्भ्यः तत्र श्वसनाय स्पर्शनाय वायवे अनिलाय मारुताय प्राणाय प्राणेशाय जीवाय घटोत्तरभागे दुर्गायै पाद्यादिभूषणान्तं दत्त्वा धर्म्माय गन्धपुष्पधूपदीपनैवेद्यानि पूर्व्ववद्दत्त्वा इन्द्रादिदुर्गान्तेभ्यो गन्धादिकं दद्यात्। ततश्चतुर्द्दिक्षु चतुर्भिरृत्विग्भिश्चतुरोऽग्नीन् अग्न्याधेयकर्त्तैकमपि प्राड्विवाकः गृह्योक्तविधिना संस्थाप्य प्रणवपुटितां सव्याहृतिकां गायत्रीं स्वाहान्ता-मुच्चार्य्य घृतेन पायसेन समिद्भिर्म्मिलिताभिरष्टोत्तरशत अष्टाविंशतिं अष्टौ वा जुहुयात्। ततो दक्षिणां दद्यात्। एवं हवनान्तां देवपूजां विधाय शोध्यं कृतोपवासं आर्द्रवाससं पश्चिमशिक्ये कृत्वा इष्टकाश्च पूर्व्वशिक्ये कृत्वा उत्तोल्य घटोपरि जलदानेन साम्यमवगम्य अवतारयेत्। ततः प्राड्विवाकः तद्दिनकज्ज्वलमस्या विच्छेदाद्यादिसूर्य्या पङ्क्तिद्वयेन समसङ्ख्याक्षरेण

> आदित्यचन्द्रावनिलोऽनलश्च
> द्यौर्भूमिरापो हृदयं यमश्च।
> अहश्च रात्रिश्च उभे च सन्ध्ये
> धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥

इति चतुश्चत्वारिंशदक्षरमन्त्रसमेतामभियुक्तार्थकरणाकरणरूपमिदमस्मै दत्तमिदमन्यस्मात् मया न गृहीतमित्यादिरूपां प्रतिज्ञां लिपिपत्रे विलिख्य तत् पत्रं शोध्य शिरोगत कुर्य्यात्। ततः प्राड्विवाको घटमामन्त्रयेदेभिः।

> त्वं घटो ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम्।
> धकाराद्धर्म्ममूर्त्तिस्त्वं टकारात् कुटिलं नरम् ॥
> धृतो धारयते यस्माद्घटस्तेनाभिधीयते।
> त्वं वेत्सि सर्व्वभूतानां पापानि सुकृतानि च ॥
> त्वमेव देव ! जानीषे न विदुर्यानि मानवाः।
> व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ॥

तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥"

तुलाधारकश्च नियमेदनेन। [माद्यिषः।

"ब्रह्मघ्ना ये स्मृता लोका ये लोकाः कूटतुलाधारस्य ते लोकास्तुलां धारयतो मृषा ॥"

शोध्यस्तु तुलामभिमन्त्रयेदनेन।

> त्वं तुले ! सत्यधामासि पुरा देवैर्विनिर्म्मिता।
> तत् सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥
> यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय।
> शुद्धश्चेद्गमयोर्द्ध्वं मां सर्व्वं वेत्सि कृताकृतम् ॥

ततः प्राड्विवाकः पूर्व्वोननं तं पूर्व्ववद्घटमारोपयेत्। आरोपितं मा कार्त्तं प्रस्तास्ते पर्य्याकाष्ठे देशे स्थाश्नीः कान्तं वक्रं इत्तं पूर्णं चक्रं मत्वा रात्रौ चेत्। घृतपाम: प्रार्तस्तीतेतो राहुः क्रूरः माद्यातसाक्रान्ते इमसंस्थाते प्रश्वेकान्ते कर्त्तया इत्यस्य पञ्चधा पाठकालस्तत्र शुद्धाशुद्धज्ञानाय स्थापयेत्। ततः प्रतिमानद्रव्यादूर्द्ध्वावस्थाने शुद्धः। अधोऽवस्थाने त्वशुद्धः। समावस्थाने अल्पदोषः। सन्देहे पुनःपरीक्षा देया। कक्षकीलकशिक्यपादाद्यादीनां द्वष्टकारणव्यतिरेकेण छेदे भङ्गे वाप्यशुद्धिमादिशेत्। ततः पुरोहिताचार्य्यादीन् दक्षिणादिभिस्तोषयेत्।" इति दिव्यतत्त्वम् ॥

तुलाकोटिः, स्त्री, (तुलां साद्दश्यं कोटयते इति। कुट + इन्।) नूपुरः। (यथा, माघे। १२।४४।

"लीलाचलत्स्त्रीचरणारुणोत्पलस्खलत्तुलाकोटिनिनादकोमलः ॥"

तुलया मानेन कुटतीति। कुट कौटिल्ये + इन्।) मानभेदः ॥ अर्व्वुदं। इति हेमचन्द्रः। ३।५२८ ॥

तुलाकोटी, स्त्री, (तुलाकोटि + कृदिकारादिति वा ङीष्।) तुलाकोटिः। इत्यमरटीकायां भरतः ॥

तुलाकोषः, पुं, (तुलायाः परिमाणस्य कोष इव।) तुलापरीक्षा। इति मिताक्षरा ॥

तुलाधारः, पुं, (तुलां धरति धारयति वा। तुला + धृ + "कर्म्मण्यण्।" ३।२।१। इत्यण्।) तुलाराशिः। वणिजि, त्रि। इति मेदिनी। रे, २६४ ॥ तुलागुणः। इति हेमचन्द्रः ॥ (स्वनामख्यातो वणिग्धर्म्मा पुरुषविशेषः। यथा, महाभारते। १२।२६०।८।

"तुलाधारो वणिग्धर्म्मा वाराणस्यां महायशाः।
सोऽप्येवं नार्हते वक्तुं यथा त्वं द्विजसत्तम ! ॥")

तुलापुरुषदानं, क्ली, (तुलापुरुषस्य तुलोन्मितपुरुषभारसमपरिमितद्रव्यस्य दानम्। यद्वा, तुलापुरुषविधिना दानम्।) षोड़शमहादानान्तर्गतदानविशेषः। यथा,—

"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम् ॥"

तस्य कालो यथा,—

> "नोक्तानि यानि गुह्यानि महादानानि षोड़श।
> तानि ते संप्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
> तुलापुरुषयागोऽयं येषामादौ विधीयते।
> अयने विषुवे चैव व्यतीपाते दिनक्षये ॥
> युगादिषूपरागेषु तथा मन्वन्तरादिषु।
> संक्रान्त्यां पौर्णमास्याञ्च द्वादशीष्वष्टकासु च ॥
> यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने।
> द्रव्यब्राह्मणलाभो वा श्रद्धा वा यत्र जायते ॥"

तस्य देशो यथा,—

> "तीर्थे वायतने गोष्ठकूपारामसरित्सु च।
> गृहे वाथ वने वापि तड़ागे रुचिरेऽथवा ॥
> महादानानि देयानि संसारभयभीरुणा ॥"

अस्य विधानं यथा,—

> "पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्।
> मण्डपं रचयेद्विद्वान् षोड़श द्वादश वा करान् ॥
> मण्डपं कारयेद्विद्वांश्चतुर्भद्रासनं बुधः।
> सप्तहस्ता भवेद्वेदी मध्ये पञ्चकराथ वा ॥
> तन्मध्ये तोरणं कुर्य्यात् सारदारुमयं शुभम्।
> कुर्य्यात् कुण्डानि चत्वारि चतुर्द्दिक्षु विचक्षणः ॥"

तुलारोपणप्रस्तावे।

> "रत्निभिस्तोरणाग्रे तु वक्ष्ये च विधानतः।
> सुमेखलायोनिसमायुतानि
> संपूर्णकुम्भानि सहासनानि।
> सुताम्रकुण्डद्वयसंयुतानि
> सयज्ञपात्राणि सहस्रुवाणि ॥
> हस्तप्रमाणानि तिलाज्यपूरपुष्पोपहाराणि सुशोभनानि।
> पूर्व्वोत्तरे हस्तमिता च वेदी
> ग्रहादिदेवेश्वरपूजनाय ॥
> अर्घ्यार्थं ब्रह्मशिवाच्युतानां
> तत्रैव कार्य्या फलवस्त्रमाल्यैः।"

ब्रह्मशिवाच्युतानां प्रतिमासु पूजा कार्य्या इतरेषां स्थण्डिले कार्य्या।

> लोकेशवर्णाः परितः पताकामध्ये ध्वज किङ्किणिकायुतं स्यात् ॥
> द्वारेषु कार्य्याणि च तोरणानि
> चत्वार्य्यपि क्षीरवनस्पतीनाम्।
> द्वारेषु कुम्भद्वयमत्र कार्य्यं
> स्रगन्धधूपाम्बररत्नयुक्तम् ॥ * ॥

यत्पूर्व्वं सारदारुमयं कुर्य्यादित्युक्तं तदेवानीमनुष्ठानमाह।

> शालेक्षुदीचन्दनदेवदारुश्रीपर्णिविल्वप्रियकाञ्जनोत्थम्।
> स्तम्भद्वयं हस्तयुगावखातं
> कृत्वा दृढ़ं पञ्चकरोच्छ्रितं तत् ॥
> तदन्तरं हस्तचतुष्टयं स्यादथोत्तरायाश्च तदङ्गमेव ॥ * ॥

चतुष्टस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ। अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव च ॥

> समानजातिश्च तुलावलम्बा
> हैमेन मध्ये पुरुषेण युक्ता।

हैमेन पुरुषेणेति सुवर्णनिर्म्मितवासुदेवाकृतिमेति मोक्षयम्।

> दैर्घ्येण सा हस्तचतुष्टयं स्यात्
> पूर्णत्वमस्यास्तु दशाङ्गुली स्यात् ॥
> सुवर्णपत्राभरणा च कार्य्या
> सुलोहपाशद्वयशृङ्खलाभिः।

युता सुवर्णेन तु रत्नमाला
विभूषिता माल्यविलेपनाढ्या ॥
चक्रं लिखेद्वारिजगर्भयुक्तं
नानारजोभिर्भुवि कीर्णपुष्पम् ।
वितानकञ्चोपरि पञ्चवर्णं
संस्थापयेत् पञ्चपताकशोभम् ॥
इति तुलानिर्म्माणसूक्तम् ॥ * ॥
अथ द्विजा वेदविदश्च कार्य्याः
सुवामवेशान्वयशीलयुक्ताः ।
विधानदक्षाः पटवोऽनुकूला
ये चार्य्यदेशप्रभवा द्विजेन्द्राः ।
गुरुश्च वेदाङ्गविदार्य्यदेश-
समुद्भवः शीलकुलाभिरूपः ।
कार्य्यः पुराणाभिरतोऽतिदक्षः
प्रसन्नगम्भीरसरस्वतीकः ॥
पूर्व्वेण ऋग्वेदविदौ यथास्तां
यजुर्व्विदौ दक्षिणतश्च शस्तौ ।
स्थाप्यौ द्विजौ सामविदौ च पश्चा-
दथर्व्वणावुत्तरतश्च कार्य्यौ ॥
विनायकादिग्रहलोकपाल-
वस्वष्टकादित्यमरुद्गणानाम् ।
ब्रह्माच्युतेशानवनस्पतीनां
स्वमन्त्रतो होमचतुष्टयं स्यात् ॥
जप्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथा स्वरूपम् ।
अभ्यर्च्चयेल्लोकपतीन् क्रमेण
मन्त्रैरमीभिर्यजमानयुक्तः ॥
इत्यावाह्य सुरान्दद्यादृत्विग्भ्यो हेमभूषणम् ।
कुण्डलानि च हैमानि सूत्राणि कटकानि च ॥
द्विगुणं गुरवे दद्याद्भूषणाच्छादनादिकम् ।
जपेयुः शान्तिकाध्याय जापकाः सर्व्वतो दिशम् ॥
उपोषितास्ततः सर्व्वे कृत्वैवमधिवासनम् ।
आदावन्ते च मध्ये च कुर्य्याद्ब्राह्मणवाचनम् ॥
ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ॥
शुक्लमाल्याम्बरो भूत्वा तां तुलामभिमन्त्रयेत् ।
नमस्ते सर्व्वदेवानां शक्तिस्त्वं शक्तिमास्थिता ।
साक्षीभूता जगद्धात्री निर्म्मिता विश्वयोनिना ॥
एकतः सर्व्वसत्यानि तथा भृतशतानि च ।
धर्म्माधर्म्मकृतां मध्ये स्थापितासि जगद्धिते ॥
त्वं तुले । सर्व्वभूतानां प्रमाणमिह कीर्त्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥
योऽसौ तत्त्वाधिपो देव पुरुषः पञ्चविंशकः ।
स एवाधिष्ठितो देवि । त्वयि तस्मान्नमोऽस्तु ते ॥
नमो नमस्ते गोविन्द ! तुलापुरुषसंज्ञक ! ।
त्वं हरे ! तारयस्वास्मानस्मात् संसारसागरात् ॥
पुण्यं कालमथासाद्य कृत्वाधिवासनं पुनः ।
पुनः प्रदक्षिणं कृत्वा तां तुलामारुहेद्बुधः ॥
सखड्गचर्म्मः कवची सर्व्वाभरणभूषितः ।
धर्म्मराजमथादाय हैमं सूर्य्येण संयुतम् ॥
कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन् हरेर्मुखम् ।
ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः ॥

सा स्यादभ्यधिकं यावत् काञ्चनं चातिनिर्म्मलम् ।
पुष्टिकामस्तु कुर्व्वीत भूमिसंस्थन्नरेश्वर ! ॥
क्षणमात्रं ततः स्थित्वा पुनरेवमुदीरयेत् ।
नमस्ते साक्षीभूतानां साक्षीभूते सनातनि । ॥
पितामहेन देवि । त्वं निर्म्मिता परमेष्ठिना ।
त्वया धृतं जगत् सर्व्वं सहस्थावरजङ्गमम् ॥
सर्व्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ।
ततोऽवतीर्य्य गुरवे पूर्व्वमर्द्धं निवेदयेत् ॥
प्राप्य तेषामनुज्ञाञ्च तथान्येभ्योऽपि दापयेत् ।
दीनानाथविशिष्टादीन् पूजयेत् ब्राह्मणैः सह ॥
न चिरं धारयेद्गेहे हेम संप्रोक्षितं बुधः ।
तिष्ठद्भयावहं यस्माच्छोकव्याधिकरं नृणाम् ॥
शीघ्रं परस्वीकरणात् श्रेयः प्राप्नोति पुष्कलम् ॥”
तस्य द्रव्यविशेषेण फलं यथा,—
“अष्टानामपि धातूनां यस्तुलां कुरुते नरः ।
सर्व्वपापैः प्रमुच्येत मनोवाक्कायसम्भवैः ॥
यावद्धातु स्थितं तत्र तावत् कोटिशतानि च ।
मोदते तत्र वर्षाणां स्वर्गलोके न संशयः ॥
अथ मानुष्यमाक्रम्य कदाचित् कालपर्य्यये ।
धनधान्यसमृद्धो वै जायते महतां कुले ॥
आत्मनस्तु तुलां कृत्वा सुवर्णं यः प्रयच्छति ।
स तारयेत् पितृगणान् दश पूर्व्वान् दशापरान् ॥
आत्मनस्तु तथा सद्यः फलभाग्जायते नरः ।
जन्मप्रभृति यत् पापं मातृकं पैतृकं तथा ॥
सुवर्णदानात् दारिद्र्यं न पश्यति कदाचन ।
रजतस्य तुलां कृत्वा सुकृती यः प्रयच्छति ॥
तावद्वर्षप्रमाणेन निर्म्मलः स्वर्गभाग्भवेत् ।
अनन्तरं भवेद्राजा पृथिव्यां नात्र संशयः ॥
सुवर्णहारी कुष्ठी वा सर्व्वव्याधियुतोऽपि वा ।
ताम्रस्य तु तुलां कृत्वा मुच्यते नात्र संशयः ॥
स तु वर्षसहस्रं वै स्वर्गलोके महीयते ।
कांस्यस्य तु तुलां कृत्वा विप्रेभ्यो यः प्रयच्छति ॥
स तु इन्द्रपदं प्राप्य शच्या सह मोदते ।
आयसस्य तुलां कृत्वा दाता रत्नाधिपो भवेत् ॥
लभते सुतमस्थान बलवान् जायते सदा ।
रैत्यस्य तु तुलां कृत्वा यो ददाति द्विजातये ॥
सोऽप्सर शतसंकीर्णे विमाने दिवि मोदते ।
सीसकस्य तुलां कृत्वा यो ददातीह मानवः ॥
स गन्धर्व्वपदं गच्छेत् नानाभरणभूषितः ।
रङ्गस्य तु तुलां कृत्वा विप्रेभ्यो यः प्रयच्छति ॥
विमुक्तः सर्व्वपापेभ्यश्चन्द्रसायुज्यमाप्नुयात् ।
घृतस्य तु तुलां कृत्वा ये प्रयच्छन्ति मानवाः ॥
तेजस्विनोऽभिजायन्ते गोभिश्च चिरजीविनः ।
तैलस्य तु तुलां कृत्वा यो वै दद्याद्द्विजा-
तये ॥
अरोगित्वं सुशीलं वै आयुष्मानपि जायते ।
अयुतः सर्व्वसौभाग्यं सर्व्वान् कामान् मधुप्रदः ॥
अनेन विधिना यस्तु तुलापुरुषमाचरेत् ।
प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ॥
कल्पकोटिशतं यावत्तस्मिँल्लोके महीयते ॥

कर्म्मक्षयादिह पुनर्भुवि राजराजो
भूपालमौलिमणिरञ्जितपादपीठः ।
श्रद्धान्वितो भवति यज्ञसहस्रयाजी
दीप्तप्रतापजितसर्व्वमहीपलोकः ॥
यो दीप्यमानमपि पश्यति तन्नियुक्तः
कालान्तरे स्मरति वाचयतीह लोके ।
यो वा शृणोति पठतीन्द्रसमानरूप.
प्राप्नोति वासवपुरं परदेवजुष्टम् ॥”
इति दानसागरः ॥

तुलावीजं, क्ली, (तुलायास्तोलनस्य वीजं मूलम् । यद्वा, तुलायै परिमाणाय वीजम् ।) गुञ्जा । इति त्रिकाण्डशेषः ॥

तुलिः, स्त्री, (तुरिः । रस्य लः ।) तुरी । इति शब्दरत्नावली ॥ तूलिका । इत्यमरटीकासारसुन्दरी ॥

तुलिका, स्त्री, (तोलयति सादृश्यं गच्छतीति । तुल+बाहुलकात् इकन् । स च कित् ।) खञ्जनिका । इति त्रिकाण्डशेषः ॥

तुलिनी, स्त्री, (तूलमस्ति फलेऽस्याः । तुल+इनिः । ङीप् । पृषो ह्रस्वः ।) शाल्मलिः । इति रत्नमाला ॥

तुलिफला, स्त्री, (तूलि तूलयुक्तं फलं यस्याः । पृषोदरादित्वात् ह्रस्वः ।) शाल्मलिः । इति रत्नमाला ॥

तुली, स्त्री, (तुरी+रस्य लः ।) तुरी । इति शब्दरत्नावली ॥

तुल्यः, त्रि, (तुलया सम्मितः । “नौवयोधर्म्मेति ।” ४ । ४ । ९१ । इति यत् ।) सादृश्ययुक्तः । तत्पर्य्यायः । सम. २ सदृक्षः ३ सदृशः ४ सदृक् ५ साधारणः ६ समानः ७ । इत्यमरः । २ । १० । ३७ ॥ सधर्म्मः ८ सम्मितः ९ स्वरूपः १० । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । २७८ ।
“तुल्यार्थं तुल्यसामर्थ्यं मर्म्मज्ञं व्यवसायिनम् ।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥”)
उत्तरपदस्थास्तुल्यवाचका यथा । निभः १ सङ्काशः २ नीकाशः ३ प्रतीकाशः ४ उपमा ५ । इत्यमरः । २ । १० । ३८ ॥ भूतः ६ रूपः ७ कल्पः ८ । इति भरतः ॥ प्रभः ९ । इति शब्दरत्नावली ॥ (पुं, स्वनामख्यातो गन्धर्व्वविशेषः । यथा, महाभारते । १ । १०१ । ७ ।
“गन्धर्व्वराजो बलवांस्तुल्याभामभ्ययात्तदा ॥”)

तुल्यपानं, क्ली, (तुल्यैरात्मीयजनैः सह पानम् ।) आत्मीयेन जनेन सह मिलित्वा एककाले क्रमपानम् । तत्पर्य्यायः । सपीतिः २ । इत्यमरः । २ । ९ । ५५ ॥

तुवरः, पुं क्ली, (तवति हिनस्ति रोगानिति । तु+बाहुलकात् ष्वरच्प्रत्ययेन साधुः ।) कषायरसः । इत्यमरः । १ । ५ । ८ ॥ त्रि, कषाययुक्तः । (यथा, सुश्रुते १ । ४४ ।
“नातिमात्रमद्य तक्रं शाकञ्च तुवरं रुक्षं ।”)
मत्स्यहीनं । इत्युणादिकोषः ॥

तुवरयावनालः, पुं, (तुवरः कषायो यावनालः ।) धान्यविशेषः । तत्पर्य्यायः । तुवरः २ कषाय-

यावनालः ३ रक्तयावनालः ४ लोहितक्षुद्रधान्यम् ५। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। विरेचकत्वम्। संग्राहित्वम्। वातशमनत्वम्। विदाहित्वम्। शोषकारित्वञ्च। इति राजनिर्घण्टः॥

तुवरिका, स्त्री, (तुवरः कषायरसोऽस्त्यस्याः। तुवर+ठन्।) सुराष्ट्रजमृत्तिका। इत्यमरः। २। ४। १३१॥ (तुवर्य्येव। तुवरी+स्वार्थे कन् ह्रस्वश्च।) आढ़की। इति भरतः॥

तुवरी, स्त्री, (तुवर+षित्वात् ङीष्।) आढ़की। (यथा, वैद्यकरत्नमालायाम्।
"आढ़की तुवरी ज्ञेया॥"
वर्व्वरी तुलसी। तत्पर्य्यायाश्च यथा,—
"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सौराष्ट्रमृत्तिका। तत्पर्य्यायः। मृत् २ सौराष्ट्री ३ मृत्स्ना ४ आढकी ५ सती ६ सुराष्ट्रजा ७ मृत्तालकम् ८ काक्षी ९ मृत्तिका १० सुरमृत्तिका ११ सुत्या १२ काम्बी १३ सुजाता १४। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। कषायत्वम्। उष्णत्वम्। लेखनत्वम्। चक्षुष्यत्वम्। ग्राहित्वम्। छर्द्दिपित्तजृम्भानाशित्वञ्च। इति राजनिर्घण्टः॥
"तुवरी ग्राहिणी शीता लघ्वी कफविषास्रजित्।
तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोठक्रिमिप्रणुत्॥"
इति भावप्रकाशः॥

तुवरीशिम्बः, पुं, (तुवरी आढकीव शिम्बः। तुवरीसदृशत्वात् तथात्वम्। यद्वा, तुवर्य्या इव शिम्बा फलत्वक् यस्य।) चक्रमर्द्दकवृक्षः। इति शब्दचन्द्रिका॥

तुवि, स्त्री, तुम्बी। इति शब्दमाला॥ (बहुशब्दार्थः। इति निघण्टुः। ३। १॥ "तवतिर्वृद्ध्यर्थः सौत्रो धातुः। 'अच इः।' उणां ४। १३८। इति इः। इस्विर्हि बहुः।" इति तट्टीका॥ "उरु। तुवि। पुरु। भूरि। शश्वत्। विश्वम्। परीणसा। व्यानशिः। शतम्। सहस्रम्। सलिलम्। कुविदिति द्वादश बहुनामानि॥" इति निघण्टुः। ३। १॥ यथा, ऋग्वेदे। ३। ३०।
"तुविकूर्म्मिर्ऋघावान्॥")

तुष, ष्ठ य औ ञि तुष्टौ। इति कविकल्पद्रुमः॥ (दिवां-पर-अक-अनिट्।) ष्ठ, अतुषत्। य, तुष्यति। औ, तोष्टा। ञि, तुष्टोऽस्ति। इति दुर्गादासः॥

तुषः, पुं, (तुष+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) धान्यत्वक्। (यथा, प्रबोधचन्द्रोदये द्वितीयाङ्के।
"व्रीहीन् जिघ्रासति सितोत्तमतण्डुलाढ्यान्
को नाम सोऽस्तुषकणोपहितान् हिताथी॥")
विभीतकवृक्षः। इत्यमरः। २। ४। ५८॥

तुषग्रहः, पुं, (तुषैरा गृह्यते इति। ग्रह+कर्म्मणि अप्।) अग्निः। इति त्रिकाण्डशेषः॥

तुषसारः, पुं, (तुषं सरति अनुसरतीति। सृ+अण्। तुषपुञ्जाभ्यन्तरे क्रमशः सञ्चारादस्य तथात्वम्।) अग्निः। इति शब्दमाला॥

तुषानलः, पुं, (तुषस्यानलः।) तुषाग्निः। तत्पर्य्यायः। कुकूलः २। इति हेमचन्द्रः। ४। १६७॥ (यथा, धूर्त्तसमागमे।
"तुषानलकल्पप्रायाश्च भूरेवम॥")

तुषारः, पुं, (तुष्यत्यनेन शस्यादिरिति। तुष तुष्टौ+"तुषारादयश्च।" उणां ३। १३९। इति आरन् स च कित्।) हिमम्। (यथा, ऋतुसंहारे। ४। १।
"विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतः प्रिये॥"
तौषारलक्षणगुणाश्च यथा,—
"अपि नद्याः समुद्रान्ते वह्निरापस्तदुद्भवाः।
धूमावयवनिर्मुक्तास्तुषाराख्यास्तु ताः स्मृताः॥
अपि नद्याः समुद्रान्ते वह्निः नदीमारभ्य समुद्रपर्य्यन्ते वह्निराप्ते तदुद्भवाः। वह्निभवा धूमावयवनिर्मुक्ता धूमांशरहिताः। आपस्तुषाराख्याः। तुष इति लोके। तुषार इति च।
अपथ्याः प्राणिनां प्रायः भूरुहाणान्तु न हिताः।
तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम्।
कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
देशभेदः। (तद्देशोद्भवे, पुं भूम्नि। यथा, मात्स्ये। १२०। ४५।
"तुषारान् बर्व्वरान् कारान् पह्लवान् पारदान् शकान्॥")
शीकरः। हिमभेदः। इति हेमचन्द्रः। ६। २१॥ (यथा, माघे। १। १५।
"न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्व्वताविव॥")
कर्पूरभेदः। इति राजनिर्घण्टः॥ शीतले, त्रि। यथा, नैषधे। ३। ९३।
"अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा॥"

तुषितः, पुं, (तुष्यतीति। तुष तुष्टौ+बाहुलकात् कितच्। यद्वा, तुष+क्विप्। तुट् सन्तोषो ऽस्य जातः। तारकादित्वात् इतच्।) देवगणविशेषः। इत्यमरः। १। १। १०॥ ते षट्त्रिंशत् स्मृताः। इति भरतः॥ केषाञ्चिन्मते द्वादश। ते तु मन्वन्तरभेदे विभिन्ननामानः। यथा,—
"प्राणापानसमानाश्च उदानो व्यान एव च।
चक्षुः श्रोत्ररसा घ्राणस्पर्शौ बुद्धिर्म्मनस्तथा।
द्वादशैते तु तुषिता देवाः स्वारोचिषेऽन्तरे॥"
इति सारसुन्दरी॥
(यथाच विष्णुपुराणे। १। १५। १२७-१३३।
"पूर्व्वमन्वन्तरे श्रेष्ठा द्वादशासन् सुरोत्तमाः।
तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे॥
उपस्थितेऽतियशसश्चाक्षुषस्यान्तरे मनोः।
समवायीकृताः सर्व्वे समागम्य परस्परम्॥
आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै।
मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति॥
एवमुक्त्वा तु ते सर्व्वे चाक्षुषस्यान्तरे मनोः।
मारीचात् कश्यपात् जातास्तेऽदित्या दक्षकन्यया॥
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च।
अर्य्यमा चैव धाता च त्वष्टा पूषा तथैव च॥
विवस्वान् सविता चैव मित्रो वरुण एव च।
अंशो भगश्चादितिजा आदित्या द्वादश स्मृताः॥
चाक्षुषस्यान्तरे पूर्व्वमासन् ये तुषिताः सुराः।
वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः॥"
तथा च मत्स्यपुराणे। ६। ३—४।
"तुषिता नाम ये देवाश्चाक्षुषस्यान्तरे मनोः।
वैवस्वतेऽन्तरे चैते आदित्या द्वादश स्मृताः॥
इन्द्रो धाता भगस्त्वष्टा मित्रोऽथ वरुणो यमः।
विवस्वान् सविता पूषा अंशुमान् विष्णुरेव च॥"
तथा, भागवते। ४। १। ७।
"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः।
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट्।
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे॥")

तुषोत्थ, क्ली, (तुषादुत्तिष्ठतीति। उत्+स्था+कः।) तुषोदकम्। इति राजनिर्घण्टः॥

तुषोदकं, क्ली, (तुषादुत्थितमुदकम्।) काञ्जिकम्। इति हारावली। ११५॥ काञ्जिकभेदः। अस्य लक्षणं यथा,—
"तुषोदकं यवैरामैः सतुषैः शकलीकृतैः॥"
यवैरुदकसहितैः सन्धानवर्गोक्तत्वात्॥
अस्य गुणाः। दीपनत्वम् हृद्यत्वम्। पाण्डुक्रिमिगदवस्तिशूलनाशित्वम्। तीक्ष्णत्वम्। उष्णत्वम्। पाचनत्वम्। पित्तरक्तकारित्वञ्च। इति भावप्रकाशः॥ (यथाच।
"तुषोदकं वातहरं प्रमेहि
प्रकोपयेद्रक्तपित्तं सदैव।
विपाचनं स्यात् जरणं हमिघ्न-
मजीर्णहन्तृ कटुकं विपाके॥"
इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये।)

तुष्टः, त्रि, (तुष+कर्त्तरि क्तः।) तोषप्राप्तः। यथा, पुराणे।
"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्॥"
(यथाच हितोपदेशे।
"सर्व्वाः सम्पदस्तस्य यस्य तुष्टं न मानसम्॥")

तुष्टिः, स्त्री, (तुष+भावे क्तिन्।) तोषः। (यथा, मनुः। २। ६।
"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥")
अधिगतार्थादन्यत्र तुच्छत्वबुद्धिः। इति चण्डीटीकायां नागोजीभट्टः॥ (सा च नवविधा। इति सांख्याचार्य्याः॥ तथाचोक्तम्।
"आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकाल-
भाग्याख्याः।
बाह्या विषयोपरमात् पञ्च नव तुष्टयोऽभिमताः॥"
इयमेव पुराणमते दक्षस्य प्रजापतेः कन्या धर्म्मस्य पत्नी च। यथा, मार्कण्डेये। ५०। १९। २१।

"प्रसूत्याश्च तथा दक्षश्चतस्रो विंशतिस्तथा।
ससर्ज्ज कन्यास्तासाञ्च सम्यङ्नामानि मे शृणु॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयो-
दशी॥
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः॥")
मातृकाविशेषः। इति भवदेवभट्टः॥ (शक्ति-
विशेषः। यथा, देवीभागवते। १। १५। ६१।
"तुष्टिः पुष्टिः क्षमा लज्जा जृम्भा तन्द्रा च शक्तयः।
संस्थिताः सर्व्वतः पार्श्वे महादेव्याः पृथक्
पृथक्॥")

तुष्टुः, पुं, (तुष+बाहुलकात् तुक्।) कर्ण-
मणिः। इति शब्दचन्द्रिका॥

तुस, ध्वाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-
अकं-सेट्।) तोसति। इति दुर्गादासः॥

तुसः, पु, (तुषः। पृषोदरादित्वात् सत्वम्।) तुषः।
इत्यमरटीकायां रमानाथः॥

तुस्तं, क्ली, धूलिः। इति लिङ्गादिसंग्रहे तुस्तशब्द-
टीकायां सारसुन्दरी॥

तुह, इर् अर्द्दने। इति कविकल्पद्रुमः॥ (भ्वां-
परं-सकं-सेट्।) इर्, अतुहत् अतोहीत्।
अर्द्दनमिह वधः। इति दुर्गादासः॥

तुहिनं, क्ली, (तोहति अर्द्दति तुह्यतेऽनेनेति वा।
तुह+"वेपितुह्योर्ह्रस्वश्च।" उणां। २। ५२।
इति इनन् गुणे हसे ह्रस्वस्य।) हिमम्। इत्य-
मरः। १। ३। १८॥ (यथा, आर्य्यासप्त-
शत्याम्। ६३२।
"सा श्यामा तन्वङ्गी दहता शीतोपचारतीव्रेण।
विरहेण पाण्डिमानं नीता तुहिनेन दूर्व्वेव॥")
चन्द्रतेजः। इत्युणादिकोषः॥ (यथा, पञ्च-
तन्त्रे। २। ५८।
"किं चन्दनैः सकर्पूरैस्तुहिनैः शीतलैश्च किम्।
सर्व्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीम्॥"
शीतले, त्रि। यथा, आर्य्यासप्तशत्याम्। ३६६।
"प्रसरतु शरत्त्रियामा जगन्ति धवलयतु धाम
तुहिनांशोः।
पञ्जरचकोरिकायाः कणिकाकल्पोऽपि न
विशेषः॥")

तुहिनांशुतैलं, क्ली, (तुहिनांशोः कर्पूरस्य तैलम्।)
कर्पूरतैलम्। इति राजनिर्घण्टः॥

तूड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वां-
पर-सकं-सेट्।) मलस्वरी। ऋ, अतुतूड़त्।
इति दुर्गादासः॥

तूण, क सङ्कोचे। इति कविकल्पद्रुमः॥ (चुरां-
परं-अक-सेट्।) इन्त्यवर्गाद्यादिः। क, तूणयति
चक्षुः सङ्कुचितं स्यादित्यर्थः। इति दुर्गादासः॥

तूण, क ङ पूरणे। इति कविकल्पद्रुमः॥ (चुरां-
आत्मं-सकं-सेट्।) क ङ, तूणयते। इति दुर्गा-
दासः॥

तूण, तु क सङ्कोचे। इति कविकल्पद्रुमः॥ (अदन्त-
चुरा-परं-अक-सेट्।) दीर्घी मूर्द्धन्योपधः।
अतुतूणत्। इति दुर्गादासः॥

तूणः, पुं स्त्री, (तूण्यते पूर्य्यते बाणैरिति। तूण+
पूरणे घञ्।) बाणाधारः। तत्पर्य्यायः। उपा-
सङ्गः २ तूणीरः ३ निषङ्गः ४ इषुधिः ५। इत्य-
मरः। २। ८। ८८॥ तूणी ६। इति शब्द-
रत्नावली॥ (यथा, महाभारते। ३। १७। ३।
"तूणखड्गधरः शूरो बद्धगोधाङ्गुलित्रवान्॥")

तूणकं, क्ली, (तूणयति सङ्कुचितं भवति समा-
निकापदद्वयमिति। तूण+ण्वुल्।) छन्दो-
विशेषः। यथा, छन्दोमञ्जर्य्याम्।
"तूणकं समानिकापदद्वयं विनान्तिमम्॥"

तूणी, स्त्री, (तूण्यते पूर्य्यते बाणैरिति। तूण+
कर्म्मणि घञ्। गौरादित्वात् ङीष्।) तूणः।
इति शब्दरत्नावली॥ (यथा, रघुः। ९। ५६।
"तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति॥"
वेदनाविशेषः। यथा, सुश्रुते निदानस्थाने
१ अध्याये।
"अधो या वेदना याति वर्च्चोमूत्राशयोत्थिता।
भिन्दन्तीव गुदोपस्थं सा तूणीत्युपदिश्यते॥")

तूणी, [न्] पु, (तूणवदाकृतिरस्त्यस्येति। तूण+
इनिः।) नन्दीवृक्षः। इति राजनिर्घण्टः॥
(अस्य पर्य्याया यथा,—
"तूणी तुन्नक आपीनस्तुणिकः कच्छकस्तथा।
कुठेरकः कान्तलको नन्दिवृक्षश्च नन्दकः॥"
गुणाश्चास्य यथा,—
"तुणी रक्तः कटुः पाके कषायो मधुरो लघुः।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्त-
जित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तूणयुक्ते, त्रि॥ (यथा, हरिवंशे भविष्यपर्व्वणि।
१८। ३५।
"आरुह्य भगवान् विष्णुर्गरुड़ं पक्षिपुङ्गवम्।
शङ्खी चक्री गदी खड्गी शार्ङ्गी तूणी तलत्र-
वान्॥")

तूणीकः, पुं, (तूणी तूण इव कायतीति। कै+
कः।) नन्दीवृक्षः। इति राजनिर्घण्टः॥

तूणीरः, पु, (तूण्यते पूर्य्यते बाणैरिति। तूण+
बाहुलकात् ईरन्।) तूणः। इत्यमरः। २। ८।
८८॥ (यथा, महाभारते। ७। २८। १६।
"तस्य पार्थो धनुश्छित्त्वा तूणीरान् सन्निकृत्य च।
त्वरमाणो द्विसप्तत्या सर्व्वमर्म्मस्वताड़यत्॥"
क्लीवलिङ्गेऽपि दृश्यते। यथा, तत्रैव। ६। ५१।
५१।
"तूणीराण्यथ यन्त्राणि विचित्राणि धनूंषि च॥")

तूतकं, क्ली, तुत्थम्। इति शब्दचन्द्रिका॥ तुतिया
इति भाषा॥ (तुत्थशब्देऽस्य गुणादिकं ज्ञात-
व्यम्॥)

तूदः, पु, (तुदतीति। तुद व्यथने+"इगुपधेति।"
३। १। १३५। इति कः। पृषोदरादित्वात्
दीर्घः।) तूलवृक्षः। इति राजनिर्घण्टः॥

तूर, य ङ ई हिंसे। वेगे। इति कविकल्पद्रुमः।
(दिवां-आत्मं-सकं-वेगे अकं-सेट्।) य ङ,
तूर्य्यते। ई, तूर्णः। इति दुर्गादासः॥

तूरं, क्ली, (तूर्य्यते ताड्यते इति। तूर+घञ्।)
वाद्यम्। इति हेमचन्द्रः। २। २००॥

तूरी, स्त्री, (तूरं वाद्यविशेषस्तदाकृतिः पुष्पादौ
अस्त्यस्येति। तूर+अच्। गौरादित्वात् ङीष्।)
धुस्तूरवृक्षः। इति भावप्रकाशः॥

तूर्णं, क्ली, (त्वर सम्भ्रमे+क्तः। पक्षे इड़भावः।
"ज्वरत्वरेति।" ६।४।२०। इत्यूट्। "रदाभ्यां
निष्ठातो नः पूर्व्वस्य च दः।" ८। २। ४२।
इति तस्य नः।) शीघ्रम्। (यथा, देवीभाग-
वते। १। १०। ३१।
"तां दृष्ट्वा चपलापाङ्गीं समीपस्थां वराप्सराम्।
पञ्चबाणपरीताङ्गस्तूर्णमासीद्धृतव्रतः॥")
तद्वति, त्रि। इत्यमरः। १। २। ६८॥

तूर्णिः, पुं, (त्वरते त्वरणं वा। त्वर+"वहिश्रिश्रु-
युद्रुग्लाहात्वरिभ्यो नित्।" उणां। ४। ५१।
इति निः स च नित्।) मनः। इत्युणादि-
कोषः। २। १४१॥ त्वरा। इति हेमचन्द्रः।
२। २३६॥ श्लोकः। मनः। इति संक्षिप्तसारे
उणादिवृत्तिः॥ (क्षिप्रे, त्रि। इति निघण्टुः।
२। १५॥ यथा, ऋग्वेदे। १०। ८८। ६।
"मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति
प्रजानन्॥"
"तूर्णिस्त्वरमाणः।" इति सायनः॥)

तूर्य्यं, क्ली, (तूर्य्यते ताड्यते इति। तूर्+ण्यत्।)
वाद्यम्। इति हेमचन्द्रः। २। २८६॥ (यथा,
महाभारते। १। ११३। ४४।
"स तूर्य्यशतशङ्खानां भेरीणाञ्च महास्वनैः।
हर्षयन् सर्व्वशः पौरान् विवेश गजसाह्व-
यम्॥")

तूर्य्यखण्डः, पु, (तूर्य्यस्य खण्ड इव।) मगड़वाद्यम्।
इति हारावली। २२२॥ (क्वचित् तूर्य्यगण्डोऽपि
पाठः॥)

तूल, क ङ पूरणे। इति कविकल्पद्रुमः॥ (चुरां-
आत्मं-सकं-सेट्।) दीर्घी। क ङ, तूलयते। इति
दुर्गादासः॥

तूल, क निष्कर्षे। इति कविकल्पद्रुमः॥ (चुरां-
परं-सकं-सेट्।) दीर्घी। निष्कर्ष इह इयत्ता-
परिच्छेदः। क, तूलयति काञ्चनं वणिक्। इति
दुर्गादासः॥ (क्वचित् तूल कि निष्कर्षे इति
पाठोऽपि दृश्यते। कि, तूलति तूलयति॥)

तूलं, क्ली, (तूलयते पूरयति सर्व्वं व्यापकत्वात्।
तूल पूरणे+कः।) आकाशम्। इति मेदिनी।
ले, २५॥ अश्वत्थाकारवृक्षविशेषः। पलाश-
पिपल इति तूल इति च भाषा॥ तत्पर्य्यायः।
तूदः २ ब्रह्मकाष्ठम् ३ ब्राह्मणेष्टः ४ पूषकः ५
ब्रह्मदारु ६ सुपुष्पम् ७ सुरूपम् ८ नीलवृन्त-
कम् ९ क्रमुकः १० विप्रकाष्ठम् ११ मदसारः १२।
इति राजनिर्घण्टः॥ पूगः १३। तत्पक्वफल-
गुणाः। गुरुत्वम्। स्वादुत्वम्। हिमत्वम्।
पित्तानिलनाशित्वञ्च। तदामफलगुणाः। गुरु-
त्वम्। सारकत्वम्। अम्लत्वम्। उष्णत्वम्।
रक्तपित्तकारित्वञ्च। इति भावप्रकाशः॥ मधु-

राम्यत्वम् । दाहप्रशमनत्वम् । रुच्यत्वम् । कषायत्वम् । कफनाशित्वञ्च । इति राजनिर्घण्टः ॥

तूल, क्ली पुं, (तूल्यते इयत्तया परिच्छिद्यते इति । तूल + कर्म्मणि घञ् । यद्वा तूलयति स्वल्पोऽपि बहुस्थानं पूरयतीति । तूल + "इगुपधेति ।" क ।) कार्पासादितूल. । (इति मेदिनी । ले, २६ ॥) तत्पर्य्यायः । पिचुः २ । इत्यमर. । २।९।१०६ ॥ पिचुलः ३ पिचुतूलः ४ तूलपिचुः ५ । इत्यमरटीका ॥ पिचुतूलम् ६ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ५ । १० । ३६ ।

"विपरीतं यदा दैव ब्रह्म्यं वज्रसम भवेत् ।
विधिश्चेत् सुमुखः कामं कुलिशं तूलवत्तदा ॥")

तूलक, क्ली, (तूल + स्वार्थे कन् ।) तूलः । इति हेमचन्द्रः । ४ । २० । ५ ॥

तूलकार्म्मुक, क्ली, (तूलाय तूलस्फोटनाय कार्म्मुकमिव ।) तूलस्फोटनार्थधनुः । धुनखरा इति भाषा । तत्पर्य्यायः । पिञ्जलम् २ । इति त्रिकाण्डशेषः ॥

तूलचापः, पुं, (तूलाय तूलस्फोटनाय चाप इव ।) तूलकार्म्मुकम् । इति शब्दरत्नावली ॥

तूलनालिका, स्त्री, (तूलनिर्म्मिता नालिका नाली ।) पिञ्जिका । इति त्रिकाण्डशेष. ॥ पाँइज इति भाषा ॥

तूलनाली, स्त्री, (तूलनिर्म्मिता नाली ।) तूलनालिका । इति भूरिप्रयोगः ॥

तूलपिचु., पु, (तूलप्रधान. पिचुस्तूलवृक्षः ।) तूलः । इत्यमरटीकायां भरत ॥

तूलवृक्षः, पुं, (तूलस्य तूलप्रधानो वा वृक्षः ।) शाल्मली । इति राजनिर्घण्टः ॥

तूलशर्करा, स्त्री, (तूलस्य शर्करेव ।) कार्पासवीजम् । इति शब्दमाला ॥

तूलसेचन, क्ली, (तूलस्य सेचनम् ।) सूत्रकर्त्तनम् । इति शब्दमाला ॥ काटना इति भाषा ॥

तूला, स्त्री, (तूलयते पूरयति स्थानमिति । तूल + अच् + तत स्त्रियां टाप् ।) कार्पासी । इति राजनिर्घण्ट ॥ वर्त्तिः । इति शब्दरत्नावली ॥

तूलि, स्त्री, (तूलतीति । तूल निष्कर्षे + "इगुपधात् कित् ।" उणां । ४ । ११९ । इति इन् स च कित् ।) स्वनामख्यातचित्रकरोपकरणम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

तूलिका, स्त्री, (तूलिरेव । स्वार्थे कन् ।) चित्रकरोपकरणम् । तूली इति भाषा । (यथा, कुमारे । १ । ३२ ॥

"उन्मीलितं तूलिकयेव चित्रं
सूर्य्यांशुभिर्भिन्नमिवारविन्दम् ॥")

तत्पर्य्यायः । ईषिका २ । इत्यमरः ।२।१०।३३॥ तुलिः ३ तूली ४ ईषीका ५ इषीका ६ । वीरणादिशलाका । इत्यन्ये । आवर्त्तितमनावर्त्तितं सुवर्णं शातुं यन्निक्षिप्यते तत्रेत्यन्ये । आवर्त्तितसुवर्णं द्रवाकारं यत्र निक्षिप्यते तत्रेति केचित् । इति भरतः ॥ (तूलमस्त्यस्या इति । तूल + ठन् ।) शय्योपकरणम् । इति मेदिनी । के, १०२ ॥ तोषक् इति भाषा । (यथा, कथासरित्सागरे । २६ । ७८ ।

"प्रविश्य चात्र सद्रत्नपर्य्यङ्के न्यस्ततूलिके ।
पटावगुण्ठिततनुं शयानां काञ्चिदैक्षत ॥"

तथा च काशीखण्डे । ४ । ६७ ।

"कञ्चुकं तूलगर्भञ्च तूलिकां स्वपवीतिकाम् ॥") वर्त्तिः । इति शब्दरत्नावली ॥

तूलिनी, स्त्री, (तूलोऽस्त्यस्याः । तूल + इनिः । ङीप् ।) शाल्मलीवृक्षः । इति राजनिर्घण्टः ॥ शाल्मलिवृक्षः । इति भावप्रकाशः ॥ (तद्यथा,

"ताम्बूलं कटुतैलमुष्णभवनं तूलीपटी तूलिनी ॥"
इति वैद्यकपथ्यापथ्यविधौ शिशिराद्याचारे ॥)

तूलिफला, स्त्री, (तूलि तूलयुक्तं फलमस्याः ।) शाल्मलिः । इति रत्नमाला ॥

तूली, स्त्री, (तूलयतीति । तूल + इन् कृदिकारादिति वा ङीप् ।) नीली । वर्त्तिः । इति शब्दरत्नावली ॥ तूलिका । इत्यमरटीकायां भरतः ॥ (यथा,—

"उच्चैस्तूलीविलासं सुललितशयनं शाखिनामाभिरामम् ॥"
इति वैद्यकपथ्यापथ्यविधौ हेमन्तकृत्ये ॥)

तूवरः पुं, (तु सौत्रो धातुः + बाहुलकात् ष्वरच् दीर्घश्च ।) काले व्यजातशृङ्गो गौः । नेडा गरु इति भाषा । अश्मश्रुपुरुषः । इत्यमरः । ३।३। १६४ ॥ माकुन्दिया इति भाषा । पुरुषलक्षनत्यक्तः । कषायरसः । इति मेदिनी । रे, १६४ ॥

तूवरिका, स्त्री, (तूवरी + स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) तुवरिका । इत्यमरटीकायां रमानाथः ॥

तूवरी, स्त्री, (तूवर + षित्वात् ङीष् ।) आढकी । सौराष्ट्रमृत्तिका । इत्यमरटीकायां भरतः ।

तूष, तुष्टौ । इति कविकल्पद्रुमः ॥ (भ्वां-पर-अक सेट् ।) दन्त्यस्वरी । तूषन्ति कुलदेवताः । इति दुर्गादासः ॥

तूष्णीं, [म्] व्य, मौनम् । इत्यमरः ।३ । ४ । ६ ॥ (यथा, मनुः । ८ । १४७ ।

"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥")

तूष्णींशीलः, त्रि, (तुष्णीं मौन शील स्वभावो यस्य ।) मौनी । तत्पर्य्यायः । तूष्णीक. २ । इत्यमरः । ३ । १ । ३६ ॥

तूष्णीक , त्रि, (तुष्णीं शीलं यस्य । "शीले को मलोपश्च ।" ५ । ३ । ७३ । इत्यस्य वार्त्तिकोक्त्या कः मलोपश्च ।) तूष्णींशील' । इत्यमर. ।३।१।३६॥ (यथा, महाभारते । ५ । ३४ । २३ ।

"आसीनमपि तूष्णीकमनुरज्यन्ति स प्रजाः ॥")

तूष्णीकां, [म्] व्य, (तूष्णीम् + अकच्प्रकरणे "तूष्णीम. काम् वक्तव्यः ।" इति वार्त्तिकोक्त्या काम् । चित्त्वादन्त्यादचः परः ।) मौनम् । इत्यमरः । ३ । ४ । ६ ॥

तूस्त, क्ली, (तुस शब्दे + बाहुलकात् तुसेरपि तन् दीर्घश्च । इत्युज्ज्वलदत्त. । ३ । ८६ ।) धूलिः । ("तूस्तानि विनिहन्ति वितूस्तयति पश्चात् वातः ।" इति मुग्धबोधम् ॥) जटा । इति मेदिनी । ते, २२ ॥ पापम् । खण्डम् । इति शब्दरत्नावली ॥

तृंह, इत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सक-सेट् ।)सप्तमस्वरी । तृंहति । इदां गतौ । इति दुर्गादासः ॥

तृक्ष, क्ली, जातीफलम् । इति शब्दचन्द्रिका ॥

तृट्, [ष्] स्त्री, (तृष + क्विप् ।) इच्छा । तृष्णा । (यथा, ऋतुसंहारे ।१।११ ।

"मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ॥")

कामकन्या । इति मेदिनी । षे १३ ॥

तृण, इ ञ उ भक्षे । इति कविकल्पद्रुमः ॥ (तनां-उभं-सक-सेट् । क्त्वावेट ।) इ ञ, तृणोति तर्णोति तृणुते तर्णुते । उ, तर्णित्वा तृण्वा । इति दुर्गादासः ॥

तृणं, क्ली, (तृण्यते भक्ष्यते गवादिभिरिति । तृण + घञ् । संज्ञापूर्व्वकत्वात् न गुणः । यद्वा, तृह हिंसायाम् + "तृहेः क्नो हलोपश्च ।" उणां ५।८ इति क्नप्रत्ययो हकारलोपश्च ।) नडादि । घिनाखड़ इति ख्यातम् । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । अर्ज्जुनम् २ । इत्यमरः । २ । ५ । १६७ ॥ त्रिणम् ३ खटम् ४ खेड्म् ५ हरितम् ६ शाड्वलम् ७ । इति शब्दरत्नावली ॥ ॥ (यथा, पञ्चतन्त्रे । १ । ३४ ।　[लम् ।

"जातस्य नदीकूले तस्य तृणस्यापि जन्म कल्या-
यत् सलिलमज्जनाकुलजनहस्तावलम्बनं भवति ॥")

गोभ्यस्तृणदानफल यथा,—

"तीर्थस्नानेषु यत् पुण्य यत् पुण्यं विप्रभोजने ।
यत् पुण्यञ्च महादाने यत् पुण्यं हरिसेवने ॥
सर्व्वव्रतोपवासेषु सर्व्वेष्वेव तपःसु च ।
भुवः पर्य्यटने यत्तु सत्यवाक्येषु यद्भवेत् ॥
यत् पुण्य' सर्व्वयज्ञेषु दीक्षायाञ्च लभेन्नरः ।
तत् पुण्य लभते प्राज्ञो गोभ्यो दत्त्वा तृणानि च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ ॥

धनिष्ठादिपञ्चनक्षत्रेषु गृहनिमित्ततृणकाष्ठाहरणे दोषा यथा,—

"अग्निचौरभय रोगो राजपीडा धनक्षतिः ।
संग्रहे तृणकाष्ठानां कृते वस्वादिपञ्चके ॥"
इति ज्योतिस्तत्वसारसंग्रह. ॥

(गन्धद्रव्यविशेष. । रामकर्पूर इति भाषा ॥ अस्य पर्य्याया यथा,—

"कुटङ्गञ्च सुगन्धञ्च तृण शीतं सुशीतलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

तृणकुङ्कुम, क्ली, (तृणसम्भूतं कुङ्कुमम् ।) सुगन्धद्रव्यभेदः । तत्पर्य्यायः । तृणाढ्यक २ गन्धि ३ तृणशोणितम् ४ तृणपुष्पम् ५ गन्धाधिकम् ६ तृणोत्थम् ७ तृणगौरम् ८ लोहितम् ९ । अस्य गुणा. । कटुत्वम् । उष्णत्वम् । कफमारुतशोषकण्डूतिपामाकुष्ठामदोषनाशित्वम् । परमभास्वरत्वम् । इति राजनिर्घण्ट. ॥

तृणकुटी, स्त्री, (तृणाच्छादिता कुटी ।) तृणाच्छादितगृहम् । तत्पर्य्यायः । कायमानम् २ । इति त्रिकाण्डशेषः ॥ तृणौकः ३ । इति हेमचन्द्रः ॥

तृणकूर्म्मः, पुं, (तृणस्य कूर्म्म इव ।) तुम्बी । इति शब्दमाला ॥

तृणकेतुः, पुं, (तृणेषु केतुर्ध्वज इव ।) वंशः । इति हारावली । १०८ ॥

तृणकेतुकः, पु, (तृणकेतु + स्वार्थे कन् ।) वंशः । इति राजनिर्घण्टः ॥

तृणगोधा, स्त्री, (तृणस्य गोधेव क्षुद्रत्वात् ।) चित्रकोलः । ककलासः । इति मेदिनी । धे, ४६ ॥ तृणजलौका । इति केचित् ॥

तृणग्रन्थिः, स्त्री, (तृणस्य ग्रन्थिरिव ग्रन्थिर्यस्य ।) स्वर्णजीवन्ती । इति राजनिर्घण्टः ॥

तृणग्राही, [न्] पुं, (तृणं गृह्णातीति । ग्रह + णिनिः ।) नीलमणिः । इति राजनिर्घण्टः ॥ मणिविशेषः । इति शब्दार्थकल्पतरुः ॥ कापुरदाना इति भाषा । तत्पर्य्यायः । शूकापुटः २ तृणमणिः ३ । इति हारावली ॥

तृणजम्भा, [न्] त्रि, (तृणं जम्भो भक्ष्यं यस्य । "जम्भा सुहरिततृणसोमेभ्यः ।" ५।४।१२५। इति निपातनात् साधुः ।) तृणभक्षकः । (तृणमिव जम्भो दन्तो यस्य ।) तृणवद्दन्तयुक्तः । इति सिद्धान्तकौमुदी ॥

तृणता, स्त्री, धनुः । (तृणस्य भावः । तृण + भावे तल् ।) तृणत्वम् । इति मेदिनी । ते, ११३ ॥

तृणद्रुमः, पु, (तृणप्रधानो द्रुमः । तृणमिव द्रुमो वा ।) तालः । गुवाकः । ताली । केतकी । खर्ज्जूरः । खर्ज्जूरी । नारिकेलः । हिन्तालः । एषां निर्य्यासगुणाः । शीतलत्वम् । लघुत्वम् । मोहनत्वम् । बलकारित्वम् । हृद्यत्वम् । तृष्णासन्तापनाशित्वञ्च । इति राजनिर्घण्टः ॥

तृणधान्य, क्ली, (तृणवज्जातं धान्यम् ।) धान्यविशेषः । उड़िधान इति भाषा । तत्पर्य्यायः । नीवारः २ । इत्यमरः । २ । ८ । २५ ॥

तृणध्वजः, पुं, (तृणेषु ध्वज इव दीर्घत्वात् ।) वंशः । इत्यमरः । २ । ४ । १६० ॥

तृणनिम्बः, पुं, (तृणाकारो निम्बः ।) नेपालनिम्बः । इति राजनिर्घण्टः ॥

तृणपत्रिका, स्त्री, (तृणस्येव पत्त्रमस्याः । ठन् टाप् च ।) इक्षुदर्भा । इति राजनिर्घण्टः ॥

तृणपत्री, स्त्री, (तृणमिव पत्त्रमस्याः । ङीप् ।) गुन्द्रासिनी । इति राजनिर्घण्टः ॥

तृणपुष्पं, क्ली, (तृणस्य पुष्पमिव ।) तृणकुङ्कुमम् । इति राजनिर्घण्टः ॥

तृणपुष्पी, स्त्री, (तृणमिव पुष्पमस्याः । ङीष् ।) सिन्दूरपुष्पीवृक्षः । इति राजनिर्घण्टः ॥

तृणपूली, स्त्री, (तृणस्य पूलः संहतिर्यत्र । ततो गौरादित्वात् ङीष् । तृणनिर्म्मितत्वादस्य तथात्वम् ।) कटः । इति हारावली । १८८ । चाँच इति भाषा ।

तृणमणिः, पुं, (तृणेषु मणिः ।) तृणग्राही । इति हारावली । ५१६ ॥

तृणमत्कुणः, पुं, लग्नकः । इति त्रिकाण्डशेषः ॥ जामिन् इति भाषा ॥

तृणराजः, पुं, (तृणेषु राजते शोभते इति । राज + अच् । तृणानां राजा वा समासे टच् ।) तालवृक्षः । इत्यमरः । २ । ४ । १६८ ॥ (यथा, आर्य्यासप्तशत्याम् । ५६७ । [लक्ष्मम् ।
"श्रीः श्रीफलेन राज्यं तृणराजेनाल्पसाम्यतो कुचयोः सम्यक् साम्यात् गतो घटस्तु क्रवर्त्तितम् ॥")
नारिकेलः । इति राजनिर्घण्टः ॥

तृणवल्कला, स्त्री, (तृणरूपा वल्कला ।) वल्कला । इति राजनिर्घण्टः ॥

तृणवीजः, पु, (तृणस्य वीजमिव वीजमस्य ।) श्यामाकः । इति रत्नमाला ॥

तृणवीजोत्तमः, पु, (तृणवीजेषु उत्तमः ।) श्यामाकः । इति राजनिर्घण्टः ॥

तृणशीतं, क्ली, (तृणेषु शीतं शीतलम् ।) कतृणम् । गन्धतृणम् । इति रत्नमाला ॥

तृणशीता, स्त्री, (तृणेषु शीता शीतला ।) जलपिप्पली । इति राजनिर्घण्टः ॥

तृणशून्यं, क्ली, (तृणेन शून्यम् ।) मल्लिका । केतकीफलम् । इति मेदिनी । ये, ११८ ॥
(एतद्गुणा यथा,—
"नीपं सभार्गं पीलु तृणशून्यं विकङ्कतम् ।
प्राचीनामलकञ्चैव दोषघ्नं गरहारि च ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥)
तृणरहिते, त्रि ॥

तृणषट्पदः, पु, (तृणमिव षट् पदा यस्य ।) वरोलः । इति हारावली । २१७ ॥ बोलता इति भाषा ॥

तृणसारा, स्त्री, (तृणवत् सारो यस्याः । अस्थिरत्वात् तथात्वम् ।) कदली । इति हारावली । १०५ ॥

तृणसिंहः, पुं, (तृणेषु सिंह इव तन्नाशकत्वात् ।) कुठारः । इति शब्दार्थकल्पतरुः ॥

तृणहर्म्म्यः, पु, (तृणाच्छादितो हर्म्म्यः ।) तृणयुक्ताट्टालिका । अट्टालिकोपरि तृणनिर्म्मितगृहम् । तत्पर्य्यायः । मयट. २ । इति हारावली । २२३ ॥

तृणहिमः, पु, (तृणरूपो हिमो यत्र ।) सन्ध्यानकतृणम् । इति राजनिर्घण्टः ॥

तृणाग्निः, पु, (तृणजातोऽग्निः । शाकपार्थिववत् समासः ।) तृणजातानिः । तत्पर्य्यायः । वतुसः २ । इति त्रिकाण्डशेषः ॥

तृणाञ्जनः, पुं, (तृणमिव अञ्जनो व्यक्ती । तृणवदाहतित्वादस्य तथात्वम् ।) ककलासः । इति त्रिकाण्डशेष ॥

तृणाढ्यं, क्ली, (तृणेषु आढ्यं पुरत्वात् ।) पर्व्वततृणम् । इति राजनिर्घण्टः ॥

तृणार्ज्जं, क्ली, (तृणेषु अर्ज्जम् ।) नलदतृणम् । इति राजनिर्घण्टः ॥

तृणालुक, [क्] पुं, (तृणेषु अलुगिव रक्तवर्णत्वात् ।) तृणकुङ्कुमम् । इति राजनिर्घण्टः ॥

तृणेक्षुः, पु, (तृणेषु इक्षुरिव ।) वल्कला । इति राजनिर्घण्टः ॥

तृणोत्तमः, पु, (तृणेषु उत्तमः ।) उखलवलतृणम् । इति राजनिर्घण्टः ॥

तृणोद्भव , पु, (तृणैः सह उद्भवतीति । उत् + भू + अच् ।) नीवारः । इति राजनिर्घण्टः ॥

तृणौकः, [स्] क्ली, (तृणनिर्म्मितमोको वसतिस्थानम् ।) कायमानम् । तृणनिर्म्मितगृहम् । इति हेमचन्द्रः । ४ । ६२ ॥ खड़ुया घर इति भाषा ॥

तृणौषधं, क्ली, (तृणात्मकं औषधम् ।) एलवालुकाख्यगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

तृण्या, स्त्री, (तृणानां समूहः । "पाशादिभ्यो यः ।" ४ । २ । ४६ । इति यः ।) तृणसमूहः । इत्यमरः । २ । ५ । १६८ ॥

तृतीयः, त्रि, (त्रयाणां पूरणः । त्रि + "त्रेः सम्प्रसारणञ्च ।" ५ । २ । ५५ । इति तीयः सम्प्रसारणञ्च ।) त्रयाणां पूरणः । इति व्याकरणम् ॥ तेसरा इत्यादि भाषा । (यथा, मनुः । २ । ३५ ।
"चूडाकर्म्म द्विजातीनां सर्व्वेषामेव धर्म्मतः ।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ॥")

तृतीयप्रकृतिः, स्त्री, तृतीया प्रकृतिः । इत्यमरटीकायां भरतः ॥

तृतीया, स्त्री, (त्रयाणां पूरणी । त्रि + "त्रेः सम्प्रसारणञ्च ।" ५ । २ । ५५ । इति तीयः सम्प्रसारणञ्च । ततष्टाप् ।) तिथिविशेषः । सा चन्द्रमण्डलस्य तृतीयकलाक्रियारूपा तत्क्रियोपलक्षितः कालो वा । इति तिथ्यादितत्त्वम् ॥
तस्यां जातस्य फलं यथा,—
"सकलगुणगभीरो भूमिपालानुरागी
पवनगरविगाही सर्व्वलोकोपकारी ।
परविषयनिवासी कौतुकी सत्यवादी
भवति निखिलविद्यो यस्तृतीयाप्रसूतः ॥"
इति कोष्ठीप्रदीपः ॥
सा वैशाखस्य शुक्ला अक्षयतृतीया । यथा, स्मृतिः ।
"वैशाखे मासि राजेन्द्र । शुक्लपक्षे तृतीयिका ।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता ॥
तस्यां दानादिकं पुण्यं अक्षयं समुदाहृतम् ॥"
भविष्ये ।
"या शुक्ला कृष्णपक्षे (?) वैशाखे मासि वै तिथिः ।
तृतीया साक्षया लोके गीर्व्वाणैरभिवन्दिता ।
योऽस्यां ददाति करकान् वारिगन्धसमन्वितान् ।
स याति पुरुषो वीर । लोकान् वै हेममालिनः ॥
करकान् कुम्भान् । वारिमग्नम् । हेममालिनः सूर्य्यस्य ॥ ब्रह्मपुराणे ।
"यः मानयति तृतीयायां कृष्णं चन्दनभूषितम् ।

वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥”
स्कन्दपुराणम् ।
“वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनैः ॥” * ॥
ब्रह्मपुराणम् ।
“वैशाखशुक्लपक्षे तु तृतीयायां जनार्द्दनः ।
यवानुत्पादयामास युगञ्चारब्धवान् कृतम् ॥
ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयत् ।
तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्च्चयेत् ॥
यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राशयेद्यवान् ।
पूजयेत् शङ्करं गङ्गां कैलासञ्च हिमालयम् ॥
भगीरथञ्च नृपतिं सागराणां सुखावहम् ।
स्नानं दानं तपः श्राद्धं जपहोमादिकञ्च यत् ॥
श्रद्धया क्रियते तत्र तदानन्त्याय कल्पते ॥
अत्रानन्त्यफलश्रुतेः पूर्व्ववचने नक्षत्रयोगः फलातिशयार्थः ।” इति तिथ्यादितत्त्वम् ॥ * ॥
पाद्मे श्रीवराहधरणीसंवादे ।
“त्रेतायुगं तृतीयायां शुक्लायां मासि माधवे ।
प्रवृत्ताश्च त्रयीधर्म्माः प्रवृत्तास्ते प्रवर्त्तिताः ॥
अक्षया प्रोच्यते लोके तृतीया हरिवल्लभा ।
स्नाने दानेऽर्च्चने श्राद्धे जपे पूर्व्वजतर्पणे ॥
येऽर्च्चयन्ति यवैर्विष्णुं श्राद्धं कुर्व्वन्ति यत्नतः ।
तस्यां ददति दानानि धन्यास्ते वैष्णवा नराः ॥”
इति श्रीहरिभक्तिविलासे १४ । १३४ ॥

तृतीयाकृतं, त्रि, (तृतीय कर्षणं कृतम् । “कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ।”५।४।५८ इति डाच् ।) वारत्रयकृष्टक्षेत्रम् । इत्यमरः ।२।९।९॥ तिनवार चाष देओया क्षेत इति भाषा ॥

तृतीयाप्रकृतिः, स्त्री, (तृतीया प्रकृतिः । “सञ्ज्ञापूरण्योश्च ।”६ । ३ । ३८ । इति न पुंवद्भावः ।) नपुंसकम् । इत्यमरः । २ । ६ । ३९ ॥

तृद, हिंसे । (भ्वां-पर-सक-सेट् ।) तर्द्दति । इति दुर्गादासः ॥

तृद, उ ञ ध इर् । अनादरे । हिंसे । इति कविकल्पद्रुमः ॥ (रुधां-उभ-सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, तर्द्दित्वा तृत्त्वा । ञ ध, तृणत्ति तृन्ते । इर्, अतृदत् अतर्द्दीत् । इति दुर्गादासः ॥

तृन्प, श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां पर-सक-सेट् ।) प्रीणनमिह प्रीतीभावः । श, तृपति तृम्पति वा लाभाल्लोकः । ततृम्प । इति दुर्गादासः ॥

तृन्फ, श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-पर-सक-सेट् ।) श, तृफति तृम्फति । ततृम्फ । इति दुर्गादासः ॥

तृन्ह, क्ष श हिंसे । इति कविकल्पद्रुमः ॥ (तुदां पर सकं-वेट् ।) सप्तस्वरी । क्ष, अतृंहीत् अतृङ्क्षीत् । श, तृहति । इति दुर्गादासः ॥

तृप, कि सन्दीपने । प्रीणने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-पर-सक-सेट् ।) कि, तर्पयति तर्पति । योऽमित्रय तर्पयतीति हलायुधः । इति दुर्गादासः ॥

तृप, न प्रीणने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सक-सेट् ।) प्रीणनं प्रीतीकरणम् । न, तृप्नोति पितरं पुत्रः । ततर्प । इति दुर्गादासः ॥

तृप, प श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प श, तृम्पति ततर्प । इति दुर्गादासः ॥

तृप, ञि ऌ य ऊ प्रीणने । इति कविकल्पद्रुमः ॥ (दिवां-पर-अक-सकं च वेट् ।) ञि, तृप्तोऽस्ति । ऌ, अतृपत् । अस्य ऌदित्वेऽपि कृषमृशस्पृशेत्यादिविशेषविधानात् पक्षे द्यांश्चित्त्वेन अताप्सीत् अत्राप्सीत् अतर्पीदित्यपि । य, तृप्यति । ऊ, तर्पिष्यति तप्स्यति । प्रीणनमिह प्रीतीभावः प्रीतीकरणञ्च । स्यन्दीनि तृप्यतु मधूनि पिबन्निवायमिति श्रीहर्षः । पितॄनतार्प्सीत्समपरत्नतोयैरिति भट्टिः । इति दुर्गादासः ॥

तृपत्, पुं, (तृप्नोति प्रीणयतीति । तृप+“संश्चत्तृपद्वेहत् ।”उणां २ । ८५ । इति अतिप्रत्ययेन निपातनात् साधुः ।) चन्द्रः । इत्युणादिकोषः ॥ छत्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (प्रीणयति, त्रि । यथा, ऋग्वेदे । २ । २२ । १ ।
“तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।”
“तृप प्रीणने तुदादिः । आगमानुशासनस्यानित्यत्वान्नुमभावः तृप्यन् इन्द्रः ॥”इति सायनः ॥)

तृपला, स्त्री, (तृप्यतीति । तृप प्रीणने+“कल स्तृपश्च ।” उणां १ । १०६ । इति कलः । ततष्टाप् ।) लता । इत्युणादिकोषः ॥ त्रिफला । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (क्षिप्रप्रहारिणि, त्रि । यथा, ऋग्वेदे । ९ । ६७ । ८ ।
“प्रहसासस्तृपलं मन्युमच्छामादस्त वृषगणाः
अयासुः ॥”
“तृपलशब्दः क्षिप्रवाची । तदुक्तं यास्केन । तृपलप्रभर्म्मा क्षिप्रप्रहारीति । क्षिप्रप्रहारिणं मन्युम् ।” इति सायनः ॥)

तृप्तः, त्रि (तृप प्रीणने+क्तः ।) तृप्तियुक्तः । इत्यमरः । ३ । १ । १०३ ॥ (यथा, नैषधे । ३ । ९३ ।
“शुद्धान्तसम्भोगनितान्ततुष्टे
न नैषधे कार्य्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ॥”)

तृप्तिः, स्त्री, (तृप प्रीणने+भावे क्तिन् ।) भक्षणादिनाकाङ्क्षानिवृत्तिः । तत्पर्य्यायः । सौहित्यम् २ तर्पणम् ३ । इत्यमरः । २ । ९ । ५६ ॥ प्रीणनम् ४ आसितम्भवम् ५ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते ।१।१।२० ।
“श्रुतान्यन्यानि सर्व्वज्ञ ! त्वन्मुखान्निःसृतानि च ।
नैव तृप्तिं व्रजामोऽद्य सुधापानेऽमरा यथा ॥”)

तृप्रः, पुं, (तृप्यत्यनेनेति । तृप+“स्फायितञ्चीति ।” उणां २ । १३ । इति रक् ।) घृतम् । इत्युणादिकोषः ॥ पुरोडाशः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (तर्पके, त्रि । यथा, ऋग्वेदे । ८ । २ । ५ ।
“न यं शुक्रो न दुराशीर्न्न तृप्रा उरुव्यचसम् ।
अपस्पृण्वते सुहार्द्दम् ॥” “तृप्रास्तर्पका अन्ये चरुपुरोडाशादयश्च यमिन्द्रं नापस्पृण्वते न न प्रीणयन्ति अपि तु प्रीणयन्त्येव तमिन्द्रं स्तुमः इति शेषः ।” इति तद्भाष्ये सायनः ॥)

तृफ, प श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प श, तृम्फति ततर्फ । इति दुर्गादासः ॥

तृफला, स्त्री, (तृम्फति प्रीणातीति । तृफ+“कलस्तृपश्च ।” उणां १ । १०६ । इति चकारात् तृफतेरपि कलः ।) त्रिफला । इति त्रिकाण्डशेषः ॥

तृफूः, पुं, (तृफति पीडयतीति । तृफ क्लेशे+“खर्ज्जादिभ्य ऊः ।”१ । ४६६ । इत्युणादिकोषटीकाधृतसूत्रेण ऊः । निपातनात् न गुणः ।) सर्पजातिः । इत्युणादिकोषः ॥

तृष, इर् य तृषि ञि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सक-सेट् ।) इर्, अतृषत् अतर्षीत् । अस्मात् पुषादित्वात् नित्य ङ इत्यन्ये । य, तृष्यति । ञि, तृषितोऽस्ति । तृट् आकाङ्क्षा । तथा च । इच्छाकाङ्क्षा स्पृहेहा तृट् वाञ्छा लिप्सा मनोरथः । इत्यमरसिंहः । तदुपस्थितमग्रहीदग्रजः पितुराज्ञेति न भोगतृष्णयेति रघुः । तृष्यति धनं लोकः । तृषि पिपासायामिति प्राञ्चः । तृष्यति तोयं पान्थः । इति रमानाथः । इति दुर्गादासः ॥

तृषा, स्त्री, (तृष+क्विप् पक्षे टाप् ।) तृष्णा । (अस्या निवारणोपायो यथा,—
“काश्मर्य्यं पद्मकोशीरं द्राक्षामधुकचन्दनम् ।
वालकं शर्करायुक्तं क्वाथं पित्ततृषापहम् ॥
वटद्रुमो रोध्रसिता च चन्दनं
सदाडिमं तण्डुलधावनेन ।
पिष्टं सुशीतेन जलेन वापि
पीतञ्च पित्तोत्थतृषापहञ्च ।”
इति हारीते चिकित्सितस्थाने चतुर्द्दशेऽध्याये ॥
भुक्तोद्भवायास्तृषाया हेतुर्यथा,—
“स्निग्धं तथाम्लं लवणञ्च भुक्तं
गुर्व्वन्नमेवाशु तृषां करोति ॥”
इति वैद्यकमाधवकरकृतरुग्विनिश्चये तृष्णाधिकारे ॥) इच्छा । (यथा, हितोपदेशे ।१।१६६ ।
“लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥”)
कामकन्या । इति शब्दरत्नावली ॥ लाङ्गलिकीवृक्षः । इति शब्दचन्द्रिका ॥

तृषाभूः, स्त्री, (तृषाया भूरुत्पत्तिस्थानम् ।) क्लोम । इति शब्दचन्द्रिका ॥

तृषाहं, क्ली, (तृषां हन्तीति । हन+डः ।) जलम् । इति शब्दचन्द्रिका ॥

तृषाहा, स्त्री, (तृषां हन्तीति । हन+डः+टाप् ।) मधुरिका । इति शब्दचन्द्रिका ॥

तृषितः, त्रि, (तृट् तृषा वा सञ्जातास्य । तारकादित्वात् इतच् ।) तृष्णायुक्तः । तत्पर्य्यायः ।

तर्षितः २ सतृट् ३। इति त्रिकाण्डशेषः॥
(यथा, देवीभागवते। २। ८। २०।
"तृषितस्य परिश्रान्तः क्षुधितश्चोत्तरात्ततः॥"
भावे क्तः।) तृषायाम्, स्त्री॥
तृषितोत्तरा, स्त्री, (तृषितः उत्तरो यस्याः।)
अश्मनपर्णी। इति शब्दचन्द्रिका॥
तृष्णक्, [ज्] त्रि, (तृष्यति आकाङ्क्षतीति। तृष्
+"स्वपितृषोर्नजिङ्।" ३। २। १७२। इति
नजिङ्।) लुब्धः। इत्यमरः। ३। १। २२॥
(तृषितः। यथा, ऋग्वेदे। १। ८५। ११।
"असिञ्चन्नुत्सं गोतमाय तृष्णजे॥")
तृष्णा, स्त्री, (तृष+"तृषिशुषिरादिभ्यः कित्।"
उणां ३। १२। इति नः स च कित्।) अना-
त्मीयस्वीकारेच्छा। इति चण्डीटीकायां नागोजी-
भट्टः॥ सा लिप्सा। (यथा, रघुः। ८। २।
"तदुपस्थितमग्रहीदजः
पितुराज्ञेति न भोगतृष्णया॥")
पानेच्छा। इति मेदिनी। णे, १६॥ तत्-
पर्य्यायः। उदन्या २ पिपासा ३ तृट् ४ तर्षः ५
इत्यमरः। ३।३।५१॥ तृषा ६। इति शब्द-
रत्नावली॥ तर्षणम् ७। इति जटाधरः॥*॥
रोगविशेषः। तन्निदानं यथा,—
"वातात् पित्तात् कफात् तृष्णा सन्निपातात्
द्रवक्षयात्।
षष्ठी स्यादुपसर्गाच्च वातपित्ते तु कारणम्॥
सर्व्वासु तत् प्रकोपो हि सौम्यधातुप्रशोषणात्।
सर्व्वदेहे भ्रमात् कम्पतापतृड्दाहमोहकृत्॥
जिह्वामूलगलक्लोमतालुतोयवहाः शिराः।
संशोष्य तृष्णा जायन्ते तासां सामान्यलक्ष-
णम्॥*॥
मुखशोषो जलातृप्तिरन्नद्वेषः स्वरक्षयः।
कण्ठोष्ठजिह्वाकार्कश्यं जिह्वानिष्क्रमणं श्रमः॥
प्रलापश्चित्तविभ्रंशो स्तृड्ग्रहोक्तास्तथामयाः।
मारुतः क्षामता दैन्यं शङ्खतोदः शिरोभ्रमः॥
गन्धाज्ञानास्यवैरस्यश्रुतिनिद्राबलक्षयाः।
शीताम्बुपानतद्वृद्धिश्च पित्तान्मूर्च्छास्यतिक्तता॥
रक्तेक्षणत्वं सततं शोषो दाहोऽतिधूमकः।
कफं रुणद्धि कुपितस्तोयवाहिषु मारुतः॥
स्रोतःसु स कफस्तेन पङ्कवच्छोष्यते ततः।
शूकैरिवाचितं कण्ठो निद्रामधुरवक्त्रता॥
आध्मानं शिरसो जाड्यं स्तैमित्यच्छर्द्यरोचकाः।
आलस्यमविपाकश्च यः स स्यात् सर्व्वलक्षणः॥
आमोद्भवा च भक्तस्य संरोधाद्वातपित्तजा।
उष्णक्लान्तस्य सहसा शीताम्भो भजतस्तृषा॥
तृष्णा चोर्द्धं गतं कोष्ठं कुर्य्यात् पित्तकृतैव सा।
या च पानातिपानोत्था तीक्ष्णाग्नेः स्नेह-
पाकजा॥
स्निग्धकट्वम्ललवणभोजनेन कफोद्भवा।
तृष्णारसक्षयोक्तेन लक्षणेन क्षयात्मिका॥
शोषमोहज्वराद्यस्य दीर्घरोगोपसर्गतः।
या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता॥"
इति गारुडे तृष्णानिदानम् १५६ अध्यायः॥*॥

तदौषधं यथा,—
"त्रिफलापिप्पलीचूर्णं भक्षितं मधुना युतम्।
भोजनादौ हि समधु पिपासां त्वरितं हरेत्॥"
इति तत्रैव १६४ अध्यायः॥*॥
अपि च। "अथ तृष्णाधिकारः। तत्र तृष्णाया
निदानपूर्व्विकां सम्प्राप्तिमाह।
भयश्रमाभ्यां बलसङ्क्षयाद्वा
ऊर्द्धं चितं पित्तविवर्द्धनैश्च।
पित्तं सवातं कुपितं नराणां
तालुप्रपन्नं जनयेत् पिपासाम्॥
स्रोतःस्वपां वाहिषु दूषितेषु
दोषैश्च तृट् सम्भवतीह जन्तोः।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथान्यामसमुद्भवा च॥
भक्तोद्भवा सप्तमिकेति तासां
निबोध लिङ्गान्यनुपूर्व्वशस्तु॥
नराणां चितं स्वस्थान एव सञ्चितं पित्तं
सवातं पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपि-
तम्। भयश्रमाभ्यां बलसङ्क्षयादुपवासादेश्च
वातः कुपितः। तद्द्वयं ऊर्द्धं प्रसरन् तालु-
प्रपन्नं सत् पिपासां जनयेत्। न केवलं तालु-
न्येव दूषिते तृषा भवति। किन्तु जलवाहि-
स्रोतःस्वपि। अत आह। स्रोतःस्वित्यादि।
नन्वत्र बहुवचनं युक्तम्। यतो जलवहे द्वे
स्रोतसी सुश्रुतेनोक्ते। उच्यते। तयोरेवानेक-
प्रतानयोगान्न दोषः। अपां वाहिषु स्रोतः-
स्विति जिह्वादेरप्युपलक्षणम्। यत आह चरकः
रसवाहिनीश्च धमनीर्जिह्वा हृदयगलतालुक्लोम
च। संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलौ
पित्तानिलाविति॥ सङ्ख्यामाह। तिस्र इत्यादि॥
तृष्णायाः सामान्यं लक्षणमाह।
सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति।
मुहुः काङ्क्षति तोयन्तु तं तृष्णार्द्दितमादिशेत्॥
वातजाया लक्षणमाह।
क्षामास्यता मारुतसम्भवायां
तोदस्तथा शङ्खशिरःसु चापि।
स्रोतोनिरोधो विरसञ्च वक्त्रं
शीताभिरद्भिश्च विवृद्धिमेति॥
शङ्खशिरःसु शङ्खयोः शिरसि च। स्रोतोनिरोधो
रसाम्बुवाहिधमनीनिरोधः॥*॥ पित्तजामाह।
मूर्च्छान्नविद्वेषविलापदाहा
रक्तेक्षणत्वं प्रततश्च शोषः।
शीताभिनन्दा मुखतिक्तता च
पित्तात्मिकायां परिधूपनञ्च॥
विलापः प्रलापः। प्रततश्च शोषः अविरतश्च
शोषः। शीताभिनन्दा शीतेच्छा। परिधूपनं
कण्ठाद्धूमनिर्गम इव॥
कफजामाह।
बाष्पावरोधात् कफसंवृतेऽग्नौ
तृष्णा बलासेन भवेन्नरस्य।
निद्रागुरुत्वं मधुरास्यता च
तयार्द्दितः शुष्यति चातिमात्रम्॥

अग्नौ जठराग्नौ। कफसंवृते स्वकारणकुपितेन
कफेनोपरिष्टादाच्छादिते। बाष्पावरोधात् अम्बु-
वहावरोधात्। अवरुद्धानलोष्मणाम्बुवहस्रोतः-
शोषणात् बलासेन कफेन नरस्य तृष्णा भवेत्।
तया तृष्णया अर्द्दितः पीडितः। शुष्यति कृशो
भवति॥*॥
क्षतजामाह।
क्षतस्य रुक्शोणितनिर्गमाभ्यां
तृष्णा चतुर्थी क्षतजा मता तु।
क्षतस्य शस्त्रादिक्षतयुक्तस्य। रुक् पीडा॥*॥
क्षयजामाह।
रसक्षयाद्या क्षयसम्भवा सा
तयाभिभूतस्तु निशादिनेषु।
पेपीयतेऽम्भः स सुखं न याति
तां सन्निपातादिति केचिदाहुः॥
रसक्षयोक्तानि च लक्षणानि
तस्यामशेषेण भिषग्व्यवस्येत्।
रसक्षयलक्षणानि सुश्रुतेनोक्तानि॥ रसक्षये
हृत्पीडा कम्पः शोषः शून्यता तृष्णा चेति।
व्यवस्येत् जानीयात्॥*॥
आमजामाह।
त्रिदोषलिङ्गामसमुद्भवा च
हृच्छूलनिष्ठीवनसादकर्त्री॥*॥
भक्तोद्भवामाह।
स्निग्धं तथाम्लं लवणञ्च भुक्तं
गुर्व्वन्नमेवाशु तृषां करोति।
लवणञ्चेति चकारात् कटु च॥*॥
उपसर्गजामाह।
क्षीणस्वरः प्रताम्यन् दीनाननहृदयशुष्कगलतालुः।
भवति खलु सोपसर्गात् तृष्णा सा शोषिणी कष्टा॥
शोषिणी धातुशोषिणी॥*॥
उपसर्गानाह।
ज्वरो मोहः क्षयः श्वासो बाधिर्य्यं कास एव च।
बहिर्निर्गतजिह्वात्वं सप्तैते तदुपद्रवाः॥*॥
तद्युक्ताया अरिष्टत्वमाह।
ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम्।
सर्व्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम्॥
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः।
आदिशब्दादतीसारादीनां ग्रहणम्। अति-
प्रसक्ताः निरन्तराः। घोरोपद्रवयुक्ताः अतीव-
मुखशोषादियुताः॥*॥
अथ तृष्णायाश्चिकित्सा।
वातघ्नमन्नपानं मृदु लघु शीतञ्च वाततृष्णायाम्।
तृष्णायां पवनोत्थायां सगुडं दधि शस्यते।
स्वादु तिक्तं द्रवं शीतं पित्ततृष्णापहं परम्॥*॥
मुस्तपर्प्पटकोदीच्यद्राक्षोशीरचन्दनैः।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये॥
छत्रा धान्याकम्। कश्चिद्रात्रौ च दद्यात्।
चन्दनमत्र धवलं दद्यात्तस्यातितृष्णाहरत्वात्।
शृतमर्द्धपक्वमत्र कर्त्तव्यम्। इति षडङ्गपानम्॥१॥
लाजोदकं मधुयुतं शीतं गुडविमर्द्दितम्।
काश्मरीशर्करायुक्तं पिबेत् तृष्णार्द्दितो नरः॥२॥

आस्तरणमार्द्रवासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां
नियतम् ॥ ३ ॥
गोस्तनीक्षुरसक्षीरयष्टीमधुमधूतपलैः ।
नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ॥४॥
वैशद्यं जनयत्यास्ये सन्दधाति मुखे जलम् ।
तृष्णादाहप्रशमनं मधुगण्डूषधारणम् ॥ ५ ॥
जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ॥ ६ ॥
दाडिमं वदरं लोध्रं कपित्थं वीजपूरकम् ।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः ॥७॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ॥ ८ ॥
प्रातः सशर्करः पेयो हिमो धान्याकसम्भवः ।
जयेत् तृष्णां तथा दाहं भवेत् स्रोतोविशो-
धनम् ॥ ९ ॥
श्यामलं कमलं कुष्ठं लाजाश्च वटरोहकम् ।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥
तृष्णां प्रवृद्धां हन्त्येषा मुखशोषञ्च दारुणम् ॥१०॥
वातोद्भवां वह्निनिवारणेन
जयेत् च सतानामस्तुजस्य पातैः ।११।
क्षयोत्थितां क्षीरजलं निहन्या-
न्मांसोदकं वा मधुरोदकं वा ॥ १२ ॥
आमोद्भवां विल्ववचायुतानां
जयेत् कषायैरथ दीपनानाम् ।१३।
गुर्व्वन्नजामुल्लिखनैर्ज्जयेच्च
क्षयं विना सर्व्वकृतांश्च तृष्णाम् ॥
उल्लिखनैः लेखनद्रव्यैः ॥ १४ ॥
स्निग्धेऽन्ने भुक्ते या तृष्णा स्यात्तां गुडाम्बुना
शमयेत् ।
अतिरोगदुर्ब्बलानां तृष्णां शमयेन्नृणामिहाशु
पयः ॥
पयोऽत्र दुग्धम् ॥ १५ ॥
मूर्च्छाच्छर्द्दितृषादाहस्त्रीमद्यभृशकर्षिताः ।
पिवेयुः शीतलं तोयं रक्तपित्ते मदात्यये ॥ १६ ॥
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुनः ।
तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्-
सितुम् ॥ १७ ॥ * ॥
तृष्यन् पूर्व्वामयक्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् ।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्व्विमुच्यते ॥
इति तृष्णाधिकारः ॥” इति भावप्रकाशः ॥
(अथास्याः पथ्यापथ्यनियमः ॥ पथ्यानि यथा,—
“शोधनं शमनं निद्रां स्नानं कवलधारणम् ।
शिराव्यधं,शिरोदाहौ दीपदग्धहरिद्रया ॥
कोद्रवाः शालयः पेया विलेपी लाजशक्तवः ।
वासमण्डो धन्वरसाः शर्करा वाणषाडवौ ॥
भृष्टैर्मुद्गैर्मसूरैर्व्वा चणकैर्व्वा कृतो रसः ।
रम्भापुष्पं तैलकूर्चं द्राक्षापर्पटपल्लवाः ॥
कपित्थं कोलमञ्जीका कुष्माण्डकसमोदिका ।
खर्ज्जूरं दाडिमं धात्री कर्कटी नलदाम्बु च ॥
जम्बीरं करमर्द्दश्च वीजपूरं गवां पयः ।
मधूकपुष्पं ह्रीवेरं तिक्तानि मधुराणि च ॥
बालतालाम्बु शीताम्बु पयः पेटीप्रपानकम् ।
माक्षिकं सरसां तोयं शताह्वा नागकेशरम् ॥
एलाजातीफलं पथ्या कुस्तुम्बुरु च टङ्कणम् ।
घनसारो गन्धसारः कौमुदी शिशिरानिलः ॥
चन्दनार्द्रप्रियाश्लेषो रत्नाभरणधारणम् ।
हिमाम्बुलेपनञ्च स्यात् पथ्यमेतत्तृषातुरे ॥”
अपथ्यानि यथा,—
“स्नेहाञ्जनस्वेदनधूमपान-
व्यायामनस्यातपदन्तकाष्ठम् ।
गुर्व्वन्नमम्लं लवणं कषायं
कटु क्षियं दुष्टजलानि तीक्ष्णम् ॥
एतानि सर्व्वाणि हिताभिलाषी
तृष्णातुरो नैव भजेत् कदाचित् ॥”
इति वैद्यकपथ्यापथ्यविधिग्रन्थे तृष्णाधिकारे ॥)

तृष्णाक्षयः, पुं, (तृष्णाया विषयलिप्सायाः क्षयो नाशो यत्र ।) शान्तिः । इति हेमचन्द्र । २ । २१८ ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम् । “यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम् । तृष्णाक्षयसुखस्यैव कलां नार्हति षोडशीम् ॥” तृष्णायाः पिपासायाः क्षयः ।) पिपासानाशश्च ॥

तृष्णारिः, पुं, (तृष्णायाः पिपासायाः अरिः शत्रुः ।) पर्पटः । इति राजनिर्घण्टः ॥

तृह, घ ऋ श हिंसे । इति कविकल्पद्रुमः ॥ (रुधां-तुदां च-पर सक-सेट् ।) सप्तमस्वरी । घ, तृणेढि । (यथा, भट्टिः ।
“तृणेढु रामः सह लक्ष्मणेन ॥”)
ऋ, अततर्हीत् अतृहत् । श, तृहति । इति दुर्गादासः ॥

तॄ, तरे । अभिभवे । प्लुत्याम् । इति कविकल्पद्रुम ॥ (भ्वां-पर-सक-प्लुतौ अक-सेट् ।) तरः । प्लवनपूर्व्वकदेशान्तरगमनम् । प्लुतिर्म्मज्जनाभावः । तरति नदीं भेलया पान्थः । तरति सकलदुःखं वामनं भावयेद्यः । तरति शुष्ककाष्ठं जले मज्जति नेत्यर्थः ॥ इति दुर्गादासः ॥

ते, त्व, त्वया । इति त्रिकाण्डशेषः ॥ (गौरी । यथा, सङ्गीतदामोदरः ।
“तेशब्देनोच्यते गौरी नशब्देनोच्यते हरः ।
तेन माङ्गलिकश्चायं शब्दस्तेन इति स्मृतः ॥”)

तेजः, [स्] क्ली, (तेजयति तेज्यतेऽनेन वा । तिज निशाने + “सर्व्वधातुभ्योऽसुन् ।” उणां । ४ । १८८ । इति असुन् ।) दीप्तिः । (यथा, माघे । २ । ६२ ।
“अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥”)
प्रभावः । (यथा, महाभारते । ६ । १४ । ४८ ।
“समाश्रित्य महावीर्य्याद्भार्गवाद्युद्धदुर्म्मदात् ।
तेजोवीर्य्यबलैर्भूयान् शिखण्डी द्रुपदात्मजः ॥”)
पराक्रमः । (यथा, महाभारते । ३ । २८ । ६ ।
“ न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा ।
इति तात ! विजानीहि द्वयमेतदसंशयम् ॥”)
रेतः । इति मेदिनी । से, २५ ॥ (यथा, रघुः ।
“अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ॥”
“तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्वायु-रुदीरयति । ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्त्तवेन ।”
“तत्र तेजोधातुः सर्व्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावब्धातुप्रायो भवति तदा गर्भं गौरं करोति पृथिवीधातुप्रायः कृष्णं पृथिव्याकाश-धातुप्रायः कृष्णश्यामं तोयाकाशधातुप्रायो गौरश्यामम् ॥” इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥ सारः । यथा, सुश्रुते ।१।१५।
“रसादीनां शुक्रान्तानां धातूनां यत् परं तेज-स्तत् खल्वोजस्तदेव बलमित्युच्यते स्वशास्त्र-सिद्धान्तात् ॥”
“यत् परं तेजः इति यदुत्कृष्टं सारः ।”
इति तट्टीका ॥
शारीराग्निसम्भूतपदार्थविशेषः । तद्यथा,—
“तेजोऽप्याग्नेयं क्रमशः पच्यमानानां धातूना-मभिनिर्व्वृत्तमन्तरस्थं स्नेहजातं वसाख्यं वीर्य्यं विशेषतो भवति तेन मार्द्दवसौकुमार्य्यमृदु-श्लक्ष्णरोमतोत्साहदृष्टिस्थितिपक्तिकान्तिदीप्तयो भवन्ति तत् कषायतिक्तशीतरूक्षविष्टम्भिवेग-विघातव्यवायव्यायामव्याधिकर्षणैश्च विक्रियते ।”
इति च सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये ।)
त्विट् । (देहजकान्तिः । यथा, वाजसनेय-संहितायाम् । १ । ३१ ।
“तेजोऽसि शुक्रमस्यमृतमसि ।
धामनामासि प्रियं देवानामनाधृष्टं देवयज-नमसि ॥”
“हे आज्य ! त्वं तेजोऽसि शरीरकान्तिहेतु-त्वात्तेजस्त्वम् ।” इति महीधरः ॥) नवनीतम् । अग्निः । इति हेमचन्द्रः । २ । १५ ॥ सुवर्णम् । मज्जा । पित्तम् । इति राजनिर्घण्टः ॥ अस-हनम् । यथा, साहित्यदर्पणे । ३ । ६४ ।
“अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥”
पञ्चमहाभूतान्तर्गततृतीयमहाभूतम् । यथा,—
“तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते ।
अधिभूतं ततो रूपं सूर्य्यस्तत्राधिदैवतम् ॥”
इत्याश्वमेधिकपर्व्व ॥
अस्य धर्म्माः । रूपम् १ द्रवत्वम् २ प्रत्यक्ष-योगित्वम् ३ ॥ अस्य गुणाः । स्पर्शः १ संख्या २ परिमाणम् ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ रूपम् ९ द्रवः १० वेगः ११ । अस्य नैमित्तिकद्रवत्वम् । अस्य स्पर्श उष्णः । रूपं शुक्लभास्वरम् । इदं द्विधा । परमाणुस्वरूपं नित्यम् । सावयवमनित्यम् । अनित्यं त्रिधा देहः इन्द्रियं विषयः । इति

भाषापरिच्छेदः ॥ (विष्णुः । यथा, महा-
भारते । १३ । १४९ । ४३ ।
"ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ॥"
शिवः । यथा, तत्रैव । १३ । १७ । ५२ ।
"तेजोऽपहारी बलहा मुदितोऽर्थोऽजितो-
ऽवरः ॥"
द्विसप्ततिसाध्यमौलिककायस्थानामन्यतमः । तत्र
अकारान्तोऽयम् । यथा, कुलदीपिकायाम् ।
"खामः चौमो घर वेंओमो
वीदस्तेजस्यार्णव आशः ॥")

तेजःफलः, पुं, (तेजसे बलाय तेजःप्रदं वा फल-
मस्य ।) वृक्षविशेषः । तेजफल इति भाषा ।
तत्पर्य्यायः । बहुफलः २ शाल्मलीफलः ३
स्रवकफलः ४ स्वेयफलः ५ गन्धफलः ६ कण्ट-
वृक्षः ७ । अस्य गुणाः । कटुत्वम् । तीक्ष्णो-
ष्णत्वम् । सुगन्धित्वम् । दीपनत्वम् । वातश्लेष्मा-
रुचिनाशित्वम् । बालरक्षाकरत्वञ्च । इति
राजनिर्घण्टः ॥

तेजनः, पुं, (तेजयति अग्निमिति । तिज + णिच्
+ ल्युः ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥
मुञ्जः । भद्रमुञ्जः । इति राजनिर्घण्टः ॥
(वाणादीनां फलके । यथा, मनुः । ७ । ९० ।
"न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥"
उद्दीपने, क्ली । यथा, सुश्रुते चिकित्सा-
स्थाने । २४ अध्याये ।
"सिरामुखविविक्तत्वं त्वक्स्थस्याग्नेश्च तेजनम् ॥")

तेजनकः, पुं, (तेजयतीति । तिज + णिच् + ल्युः
संज्ञायां कन् । यद्वा, तेजनेन फलकेन काय-
तीति । कै + कः ।) शरः । इत्यमरः ।२।४।१६२॥

तेजनी, स्त्री, (तेजयतीति । तिज + णिच् + ल्युः ।
गौरादित्वात् ङीष् ।) मूर्व्वा । इत्यमरः ।
२ । ४ । ८६ ॥ (अस्याः पर्य्याया यथा,—
"तेजनी पिशुनी देवा तिक्तवल्ली पृथक्त्वचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ।
पर्य्यायान्तरं यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥)
ज्योतिष्मती । इति शब्दरत्नावली ॥ (तेजवती ।
अस्याः पर्य्याया यथा,—
"तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तेजपत्रं, क्ली, (तेजयतीति । तिज + णिच् + अच् ।
तेज पत्रमस्य ।) स्वनामख्यातद्रव्य । तज इति
तेजपात इति च भाषा । तत्पर्य्यायः । गन्ध-
जातम् २ पत्रम् ३ पत्रकम् ४ । इति शब्दरत्ना-
वली । अस्य गुणाः । कफवायुविषश्लेष्मारुचि-
नाशित्वम् । इति राजवल्लभः ॥ अमरोक्त-
पर्य्यायास्त्वक्पत्रशब्दे द्रष्टव्याः ॥ तस्य नाम-
गुणाः ।
"त्वक्पत्रञ्च पत्राकं स्याद्भृङ्गं चोचं तथोत्कटम् ।
त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम् ॥
पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम् ।
हृद्बस्तिरोगवातार्शःकृमिपीनसशुक्रहृत् ॥"
इति भावप्रकाशः ॥

तेजलः, पुं, (तेजति अतिशयेन पालयति शावका-
निति । तेज पालने + बाहुलकात् कलच् ।)
कपिञ्जलपक्षी । इति राजनिर्घण्टः ॥

तेजस्कर, त्रि, (तेजः करोतीति । तेजस् + कृ +
ट ।) तेजोवृद्धिकारकद्रव्यम् । इति वैद्यकम् ॥

तेजस्विनी, स्त्री, (तेजो विद्यतेऽस्याः । तेजस् +
विनिः स्त्रियां ङीप् ।) ज्योतिष्मती । इति शब्द-
रत्नावली ॥ महाज्योतिष्मती । इति राज-
निर्घण्टः ॥ (तेजवल्कल इति च । तत्पर्य्याया
यथा,—
"तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ॥"
अस्या गुणा यथा,—
"तेजस्विनी कफश्वासकासास्यामयवातहृत् ।
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तेजस्वी, [न्] त्रि, (तेजोऽस्यस्येति । विनिः ।)
तेजोयुक्तः । यथा,—
"महातपस्वी तेजस्वी ब्रह्मचारी च सुव्रती ।
शुश्रावद्धिशोक्तं शास्त्रञ्च पठितान्यश्च पण्डितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
(इन्द्रस्य पुत्त्रविशेषः । यथा, महाभारते ।
१ । १९८ । २९ ।
"शान्तिश्चतुर्थस्तेषां वै तेजस्वी पञ्चमः स्मृतः ॥")

तेजितः, त्रि, (तिज + क्तः ।) तीक्ष्णीकृतः ।
शाणान इति भाषा । तत्पर्य्यायः । निशितः २
क्ष्णुतः ३ शाणितः ४ । इत्यमरः । ३ । १ । ९१ ॥
शाणः ५ शाणादिमार्ज्जितः ६ । इति शब्द-
रत्नावली ॥ क्ष्णुतः ७ निशातः ८ शितः ९
शातः १० । इति जटाधरः ॥

तेजीयान्, [स्] त्रि, (तेजो विद्यतेऽस्य । तेजस् +
ईयसुन् ।) तेजोयुक्तः । यथा,—
"अमानी पुरुषः शश्वज्ज्वलितश्च स्वकर्म्मणा ।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

तेजोमन्थः, पुं, (तेजो मथ्नातीति । मन्थ + कर्म्म-
ण्यण् ।) गणिकारिका । इति रत्नमाला ॥

तेजोरूपं, क्ली, (तेजः सर्व्वप्रकाशकं चैतन्यं रूपं
यस्य ।) ब्रह्म । यथा,—
"अशरीरं विग्रहवदिन्द्रियवदतीन्द्रियम् ।
यदसाधि सत्साधि तेजोरूपं नमाम्यहम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

तेजोवती, स्त्री, (तेजोऽस्त्यस्या इति । तेजस् +
मतुप् मस्य व ।) गजपिप्पली । इति शब्द-
रत्नावली ॥ चविका । इति रत्नमाला ॥ महा-
ज्योतिष्मती । इति राजनिर्घण्टः ॥ तेजल इति
तेजवल्कल इति च भाषा । तस्याः पर्य्यायगुणाः ।
"तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ।
तेजस्विनी कफश्वासकासास्यामयवातहृत् ॥
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
(स्वर्गविमानम् । यथा, ब्रह्माण्डे ३८ अध्याये ।
"महाविमानं प्रथितं भास्करं जातवेदसः ।
सा हि तेजोवती नाम हुताशस्य महासभा ॥")

तेजोवृक्षः, पुं, (तेजोयुक्तो वृक्षः । अग्न्युत्पादकत्वा-
दस्य तथात्वम् ।) क्षुद्राग्निमन्थः । इति राज-
निर्घण्टः ॥

तेन, अ, तद्धेतुना । इत्यमरटीकायां भरतः ॥ सेइ
निमित्ते इति भाषा ॥

तेनः, पुं, (ते गौरी न शिवो यत्र ।) गानाङ्ग-
विशेषः । यथा, सङ्गीतदामोदरे ।
"तेनेति शब्दस्तेनः स्यात् मङ्गलानां प्रदर्शकः ।
ते शब्देनोच्यते गौरी नशब्देनोच्यते हरः ॥
तेन माङ्गलिकश्चायं शब्दस्तेन इति स्मृतः ॥"

तेप, ऋ ङ कम्पे । च्युतौ । इति कविकल्पद्रुमः ॥
(भ्वा-आत्मं-अकं-सेट् ।) ऋ, अतितेपत् । ङ,
तेपते वृक्षः । तितेपे । इति दुर्गादासः ॥

तेमः, पुं, (तिम आर्द्रीभावे + भावे घञ् ।) आर्द्री-
भावः । इत्यमरः । ३ । २ । २९ ॥

तेमनं, क्ली, (तिम + भावे ल्युट् ।) आर्द्रीकरणम् ।
व्यञ्जनम् । इति मेदिनी । ने, ७२ ॥

तेमनी, स्त्री, (तिम्यतेऽनेनेति । तिम + ल्युट् + ङीप् ।)
चुल्लीभेदः । इति हेमचन्द्रः ॥

तेव, ऋ ङ देवने । इति कविकल्पद्रुमः ॥ (भ्वा-
आत्मं-अकं-सेट् ।) देवनमिह क्रीडा । ऋ,
अतितेवत् । ङ, तेवते । तेवते बालः कन्दुके-
नेत्यमिति हलायुधः । देवनमिह रोदनमिति
भट्टमल्लः । इति दुर्गादासः ॥

तेवनं, क्ली, (तेव्यते दीव्यतेऽस्मिन्निति । तेव क्रीडा-
याम् + अधिकरणे ल्युट् ।) केलिकाननम् ।
(भावे ल्युट् ।) क्रीडा । इति मेदिनी । ने, ७१ ॥
(यथा,शब्दार्थचिन्तामणिधृतरामायणवचनम् ।
"तेवनेन वनं गत्वा नदीस्तीर्त्त्वा मधूदकाः ॥")

तैक्ष्ण्यं, क्ली, (तीक्ष्णस्य भावः । तीक्ष्ण + ष्यञ् ।)
तीक्ष्णता । इति व्याकरणम् ॥ (यथा, सुश्रुते ।
१ । ५ ।
"शौर्य्यमाशुक्रियाशस्त्रतैक्ष्ण्यमस्वेदवेपथू ॥"
कठोरता । यथा, रामायणे । २ । २१ । ४४ ।
"तदेतां विसृजानार्य्यां क्षत्त्रधर्म्माश्रितां मतिम् ।
धर्म्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम् ॥"
क्रूरता । यथा, मनुः । ४ । १६३ ।
"द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत ॥"
"मात्सर्य्यं धर्म्मानुत्साहमभिमानकोपक्रौर्य्यादि-
त्यजेत् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)

तैजसं, क्ली, (तेजसो विकारः । तेजस् + "तस्य
विकारः ।" ४ । ३ । १३४ । इत्यण् ।) घृतम् ।
इति स्मृतिः ॥ धातुद्रव्यम् । इत्यमरः ।२।९।९९॥
(यथा, मनुः । ५ । १११ ।
"तैजसानां मणीनाञ्च सर्व्वस्याश्ममयस्य
तीर्थविशेषः । यथा, महाभारते ।९।४९।
"तैजसं नाम तत्तीर्थं यत्र पूर्व्वमपाम्प

अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ ।॥”
तैजःसम्बन्धिनि, त्रि । यथा, रघुः । ११ । ४३ ।
“तैजसस्य धनुषः प्रवृत्तये
तोयदानिव सहस्रलोचनः ॥”)
तैजसः, पुं, (तेजसो विकारः । तेजस्+अण् ।) सूक्ष्मशरीरव्यष्ट्युपहितचैतन्यम् । यथा,— “एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् ॥” इति वेदान्तसार. ॥ (तैजसाहङ्कारविशेषः । यथा, भागवते । २ । ५ । २४ ।
“सोऽहङ्कार इति प्रोक्तो विकुर्व्वन् समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥”
घोटकविशेषः । तल्लक्षणादिकं यथा, भोजराजकृतयुक्तिकल्पतरौ ।
“ये क्रोधशीला भृशवेगयुक्ता
सक्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥”
सुमतिपुत्त्रः । यथा, ब्रह्माण्डे ३६ अध्याये ।
“तैजसस्तत्सुतश्चापि प्रजापतिरभिन्नजित् ॥”)
तैजसावर्त्तनी, स्त्री, (आवर्त्ततेऽत्र । आ+वृत्+ल्युट् स्त्रियां ङीप् । तैजसानां धातुद्रव्याणां सुवर्णादीनां आवर्त्तनी ।) मूषा । इत्यमरः । २।१०।३३ ॥ तैजसगलान मूची इति भाषा ॥
तैतिल, क्ली, ववादिकादशकरणान्तर्गतचतुर्थकरणम् । तत्र जातफल यथा,—
“कलासु दक्षो ललनाभिलाषी
सुमूर्त्तिसन्तर्जितकामदेवः ।
वक्ता गुणज्ञः कुशलः सुशील-
स्तैतिलाख्यं करण प्रसूतौ ॥”
इति कोष्ठीप्रदीपः ॥
तैतिलः, पु, गण्डकः । इति मेदिनी । ले, ६६ ॥
तैत्तिर, क्ली, (तित्तिरीणां पक्षिणां समूहः । तित्तिरि+“अनुदात्तादेरञ् ।” ४ । २ । ४४ । इति अञ् ।) तित्तिरिगणः । इत्यमरः । २ । ६ । ४३ ॥ (यथा, गो रामायणे ।२।१००।६३।
“वाप्यो मैरेयपूर्णाश्च मृष्टमांसचयैर्वृता. ।
प्रतप्तैः पैठरैश्चैव मार्गमायूरतैत्तिरैः ॥”)
तैत्तिरः, पु, (तित्तिर एव । स्वार्थे अण् ।) तित्तिरिपक्षी । इति राजनिर्घण्टः ॥ (गर्भिणी एतन्मांसाशनाद्याद्दृशं सुतं जनयेत् तद्यथा,
“नित्यभीतञ्च तैत्तिरात् ॥”
इति सुश्रुते शारीरस्थाने तृतीयाध्याये ॥)
तैत्तिरीयकः, पुं, (तैत्तिरं तित्तिरिप्रोक्तयजुर्व्वेदीयशाखामधीते वेत्ति वा । छण् । ततः स्वार्थे कन् ।) तैत्तिरीयी । यजुर्व्वेदीयशाखाविशेषवेत्ता ॥ (उपनिषद्विशेषे, क्ली । तत्तु कृष्णयजुर्व्वेदान्तर्गतम् । इति मुक्तिकोपनिषत् ॥)
तैत्तिरीया, स्त्री, (तित्तिरिणा प्रोक्ता । छण् ।) यजुर्व्वेदस्य शाखाविशेषः । यथा,—
“देवरातसुतः सोऽपि छर्द्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतया ददुः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥”
इति श्रीभागवतम् ॥
तैरणी, स्त्री, (तीरे नमतीति । नम+डः । ततः स्वार्थे अण् । स्त्रियां गौरादित्वात् ङीष् ।) क्षुपविशेषः । तत्पर्य्यायः । तैरणः २ तैरः ३ कुनीली ४ रागदः ५ । अस्य गुणाः । शिशिरत्वम् । तिक्तत्वम् । व्रणनाशित्वम् । अरुणरङ्गदत्वञ्च । इति राजनिर्घण्टः ॥
तैलं, क्ली, (तेल तैलवत् स्नेहोऽस्त्यस्येति । अच् ।) सिह्लकः । इति रत्नमाला ॥ (तिलस्य तत्सदृशस्य वा विकारः । तिल+“तस्य विकारः ।” ४ । ३ । १३४ । इत्यण् ।) तिलादिजातस्नेहः । यथा, भावप्रकाशे ।
“तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ॥”
तत्पर्य्यायः । स्नेहनम् २ स्नेहः ३ अभ्यञ्जनम् ४ । इति हेमचन्द्रः । ३ । ८१ ॥ अस्य गुणाः । कषायत्वम् । मधुरत्वम् । त्वच्यत्वम् । उष्णत्वम् । व्यवायित्वम् । पित्तकारित्वम् । बद्धविण्मूत्रत्वम् । श्लेष्मावर्द्धकत्वम् । सर्व्ववातविकारनाशित्वम् । मेधाग्निबलवर्द्धनत्वञ्च ।
“नास्ति तैलात् परं किञ्चित् भेषजं मारुतापहम् ॥”
इति राजनिर्घण्टः ॥
पक्वपुरातनतैलस्य गुणः । महद्गुणत्वम् । किञ्चिद्गन्धहीनत्वञ्च । द्रव्यसयोगे संस्कृततैलस्य सर्व्वरोगनाशित्वम् ॥ अवगाहने युक्ततैलस्य गुणः । शरीरबलकारित्वम् । शिरासुखरोमकूपधमनीनाडीद्वारा तृप्तिकारित्वञ्च । नित्यं मस्तके अधिकतैलदानगुणाः । शिरःशूलखालित्यपालित्यनाशित्वम् । केशमूलस्य दृढताकारित्वम् । केशस्यापतनघनताकृष्णतादीर्घताकारित्वम् । इन्द्रियप्रसन्नताशिरःशुद्धिकारित्वञ्च ॥ नित्य कर्णे तैलपूरणस्य गुणाः । मन्याहनुसंग्रहोच्चैःश्रुतिबाधिर्य्यकर्णवातजरोगाजनकत्वम् ॥ मर्द्दने तैलस्य गुणः । घृतादष्टगुणगुरुत्वम् । इति राजवल्लभादि ॥ * ॥
“प्रातःस्नाने व्रते श्राद्धे द्वादश्यां ग्रहणे तथा ।
मद्यलेपसमं तैल तस्मात्तैल विवर्ज्जयेत् ॥”
इति कर्म्मलोचनम् ॥
“घृतञ्च सार्षपं तैलं यत्तैल पुष्पवासितम् ।
अदुष्टं पक्वतैलञ्च तैलाभ्यङ्गे च नित्यशः ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥
वारविशेषे तैलमर्द्दनफल यथा,—
रवौ हृद्रोगः सोमे कीर्त्तिलाभः कुजे मृत्युः बुधे पुत्त्राप्तिः गुरौ अर्थहानिः शुक्रे शोकः शनौ दीर्घायुः ॥ * ॥
अथ निषिद्धदिने तैलग्रहणदोषशान्त्यर्थदेयद्रव्यनियमः । रवौ पुष्पं गुरौ दूर्व्वा कुजे भूमिः शुक्रे गोमयम् । अस्य प्रमाणं यथा,—
“अर्के नूनं दहति हृदयं कीर्त्तिलाभश्च सोमे
भौमे मृत्युर्भवति नियतं चन्द्रजे पुत्त्रलाभः ।
अर्थग्लानिर्भवति च गुरौ भार्गवे शोकयुक्त-
स्तैलाभ्यङ्गात्तनयमरणं सूर्य्यजे दीर्घमायुः ॥”
इति ज्योतिःसारसंग्रहः ।
वारादिविशेषे तदभ्यङ्गे गुणदोषौ यथा,—
“सन्तापः कीर्त्तिरल्पायुर्धनं निधनमेव च ।
आरोग्य सर्व्वकामाप्तिरभ्यङ्गाद्भास्करादिषु ॥
उपोषितस्य व्रतिनः कृत्तकेशस्य नापितैः ।
तावत् श्रीस्तिष्ठति प्रीता यावत्तैल न संस्पृशेत् ॥”
इति गारुडे ११४ अध्यायः ॥ * ॥
अथ तैलवर्गः । तत्र तैलस्य स्वरूपनिरूपणम्
“तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ।
तत्तु वातहर सर्व्वं विशेषात्तिलसम्भवम् ॥” * ॥
अथ तिलतैलगुणाः ।
“तिलतैलं गुरु स्थैर्य्यं बलवर्णकर परम् ।
वृष्यं विकाशि विशद मधुर रसपाकयोः ॥
सूक्ष्मं कषायानुरस तिक्तं वातकफापहम् ।
वीर्य्येणोष्णं हिमं स्पर्शे वृंहणं रक्तपित्तकृत् ॥
लेखन बद्धविण्मूत्रत्वगामाशयशोधनम् ।
दीपनं बुद्धिद मेध्य व्यवायि व्रणमेहनुत् ॥
श्रोत्रयोनिशिरःशूलनाशन लघुताकरम् ।
त्वच्य केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥
छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते ।
भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते ॥
तथाभिहतनिर्भुग्नमृगव्याघ्रादिविक्षते ।
वस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ॥
सेकाभ्यङ्गावगाहेषु तिलतैल प्रशस्यते ॥” * ॥
ननु वृंहणलेखनयोः कथ सामानाधिकरण्यमित्याह ।
“सूक्ष्मादिगुणयुक्तं स्रोतःसु सङ्कोचयेद्यदा ।
रसेऽसम्यग्वहन् कार्श्यं कुर्य्यादन्नाद्यवर्द्धनम् ॥
तेषु प्रवेशु सरता सौक्ष्म्यस्निग्धत्वमार्द्दवैः ।
तैल सम रसं नेतु क्षमाणां तेन वृंहणम् ॥
व्यवायसूक्ष्मतीक्ष्णोष्णसरत्वैर्मेदसः क्षयः ।
शनैः प्रकुरुते तैलं तेन लेखनमीरितम् ॥
द्रुतं पुरीषं बध्नाति स्खलितं तत् प्रवर्त्तयेत् ।
ग्राहकं सारकं वापि तेन तैलमुदीरितम् ॥
घृतमन्दात् पर पक्व हीनवीर्य्यं प्रजायते ।
तैल पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ॥” *
अथ सर्षपराद्दतैलगुणाः ।
“दीपनं सार्षप तैल कटुपाकरस लघु ।
लेखन स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तासदूषकम् ।
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम् ।
कण्डूकोठकृमिश्वित्रकुष्ठदुष्टव्रणप्रणुत् ॥
तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत् ।
राजिकयोः कृष्णराइ आरक्तराइ इयोः ॥ * ॥
अथ तौरीतैलगुणाः ।
तीक्ष्णोष्णं तुवरीतैल लघु ग्राहि कफास्रजित् ।
वह्निकृद्विषहृत् कण्डूकुष्ठकोठकृमिप्रणुत् ॥
मेदोदोषापहञ्चापि व्रणशोथहर परम् ॥ * ॥
अथ तिसीतैलगुणाः ।
“अतसीतैलमाग्नेय स्निग्धोष्णं कफपित्तकृत ।
कटुपाकमचक्षुष्य बल्यं वातहर गुरु ॥

मलकृमिहरं स्वादु ग्राहि त्वग्दोषहृत् व्रणम्।
वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे ॥
अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥ * ॥
अथ वरटतैलगुणाः।
कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च।
चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम् ॥ * ॥
अथ खाखसबीजतैलगुणाः।
तैलं खाखसबीजानां बल्यं वृष्यं गुरु स्मृतम्।
वातहृत् कफकृच्छीतं स्वादुपाकरसञ्च तत् ॥ * ॥
अथ एरण्डतैलगुणाः।
एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु।
वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम् ॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम्।
विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम् ॥
विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलहृत्।
हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान् ॥
वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन्।
आमवातगजेन्द्रस्य शरीरवनचारिणः।
एक एव निहन्तायमेरण्डस्नेहकेशरी ॥ * ॥
अथ रालतैलगुणाः।
तैलं सर्ज्जरसोद्भूतं विस्फोटव्रणनाशनम्।
कुष्ठपामाक्रिमिहरं वातश्लेष्मामयापहम् ॥ * ॥
अथ सर्व्वतैलगुणाः।
तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम्।
अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥
इति भावप्रकाशे तैलवर्गः ॥ * ॥
अथ पुराणतैलगुणाः।
"याम कल्ककषायवीर्य्यमखिलं चूर्णञ्च पक्षत्रयं
षण्मासान् घृतमोदकौ सहगुडौ मासत्रयं
गुग्गुलोः।
सिद्धानां रसभस्मनां सुविपुलं वीर्य्यन्तु वर्षत्रय
किञ्चिद्गन्धविवर्ज्जितं गुणपरं तैलं पुराणं
महत् ॥"
इति नारायणदासकृतपरिभाषा ॥
तैलकं, क्ली, (स्वल्पं तैलम्। अल्पार्थे कन्।) अल्पपरिमाणतैलम्। इति व्याकरणम् ॥
तैलकन्दः, पुं, (तैलप्रधानः कन्दः।) कन्दविशेषः। तत्पर्य्यायः। द्रावककन्दः २ तिलाङ्कितदलः ३ करवीरकन्दसंज्ञः ४ तिलचित्रपत्रकः ५। अस्य गुणाः। लोहद्राविलम्। कटुत्वम्। उष्णत्वम्। वातापस्मारविषशोफनाशित्वम्। रसस्य बन्धकारित्वम्। देहसिद्धिकारित्वञ्च। इति राजनिर्घण्टः ॥
तैलकारः, पुं, (तैलं करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) वर्णसङ्करजातिविशेषः। कलु इति भाषा। स कोटकस्त्रीगर्भे कुम्भकाराज्जातः। इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ तत्पर्य्यायः। घूसरः २ चाक्रिकः ३ तैली ४। इति हेमचन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम्। ५६२।
"स्नेहमयान् पीडयतः किं चक्रेणापि तैलकारस्य।
चालयति पार्थिवानपि यः स कुलालः परं चक्री ॥"
यात्राकालेऽस्य दर्शनममङ्गलसूचकम्। यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये।
"ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ॥"
"कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् ॥")
तैलकिट्टं, क्ली, (तैलस्य किट्टं मलम्।) तैलमलम्। खलि इति ख्यातम्। तत्पर्य्यायः। पिण्याकः २ खलिः ३ तैलकल्कजः ४। अस्य गुणाः। कटुत्वम्। गौल्यत्वम्। कफवातप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः ॥
तैलङ्गः, पुं, देशविशेषः। इति शब्दरत्नावली ॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम्।
"श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः।
तैलङ्गदेशो देवेशि! ध्यानाध्ययनतत्परः ॥")
तैलचौरिका, स्त्री, (तैलस्य चौरिकेव। चौरवत् तैलपानादस्यास्तथात्वम्।) तैलपायिका। इति शब्दरत्नावली ॥
तैलद्रोणी, स्त्री, (तैलपूर्णा द्रोणी।) कण्ठपर्य्यन्तमज्जनार्थतैलपूर्णकाष्ठादिनिर्म्मितपात्रविशेषः। तत्रावस्थितिगुणाः। वातरोगव्याकुलरोगपङ्गुवाधिर्य्यमिन्मिनगद्गदधन्वङ्गस्तम्भपृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्त्रक्षयरुधिरभवमूत्रकृच्छ्रवस्तिरोगेषु शस्तत्वम्। इति राजवल्लभः ॥
तैलपर्णकं, क्ली, (तैलं तैलयुक्तमिव पर्णमस्य। कप्।) ग्रन्थिपर्णवृक्षः। इति भावप्रकाशः ॥
तैलपर्णिकं, क्ली, (तैलयुक्तं पर्णमस्त्यस्य। यद्वा, तिलपर्णी वृक्ष उत्पत्तिस्थानत्वेनास्त्यस्येति। ठन्।) हरिचन्दनम्। इत्यमरः। २।६।१३१ ॥ चन्दनविशेषः। तत्तु तिलपर्णवृक्षजातं धवलं सुशीतलम्। इति भरतः ॥ (अस्य पर्य्याया यथा,
"श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
वृक्षविशेषे, पुं। यथा, हरिवंशे। २२३। ६८।
"कदम्बाश्चैव भव्याश्च दाडिमा बीजपूरकाः।
कालीयका दुकूलाश्च हिङ्गवस्तैलपर्णिकाः ॥")
तैलपर्णी, स्त्री, (तिलपर्णो वृक्षे जातः। "तत्र जातः।" ४।३।२५। इत्यण् ततो ङीप्।) चन्दनम्। श्रीवासः। (पर्य्यायोऽस्या यथा,—
"तैलपर्णी दधिस्थाख्यः पिण्याको रक्तशीर्षकः।
वेष्टो रसाङ्कः श्रीवासः श्रीपिष्टसरलद्रवौ ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
सिल्हकः। इति मेदिनी। णी, ६६ ॥
तैलपा, स्त्री, (तैलं पिबतीति। पा पाने+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) तैलपायिका। इति राजनिर्घण्टः ॥
तैलपायिका, स्त्री, (तैलं पिबतीति। पा+ण्वुल्। टापि अत इत्वम्।) कीटविशेषः। तेलापोका इति आरसुला इति च भाषा। तत्पर्य्यायः। पयोष्णी २। इत्यमरः। २।५।२६ ॥ तैलचौरिका ३। इति शब्दरत्नावली ॥ तैलपा ४। इति राजनिर्घण्टः ॥ तैलाम्बुका ५ खलाधारा ६। इति जटाधरः ॥ (यथा, महाभारते। १३। १०४। १११।
"गृहे पारावता धन्याः शुकाश्च सहसारिकाः।
गृहेष्वेते न पापाय तथा वै तैलपायिकाः ॥")
तैलपिपीलिका, स्त्री, (तैलप्रिया पिपीलिका।) पिपीलिकाभेदः। तत्पर्य्यायः। उदया २ कपिजाह्निका ३। इति राजनिर्घण्टः ॥
तैलफलः, पुं, (तैलप्रधानं फलं यस्य।) इङ्गुदी। विभीतकः। इति राजनिर्घण्टः ॥
तैलभाविनी, स्त्री, (तैलं भावयति सद्गन्धं करोतीति। भू+णिच्+णिनि+ङीप्।) जातीपुष्पवृक्षः। इति राजनिर्घण्टः ॥
तैलमाली, स्त्री, (तैलानां माला समूहो यत्र। ततो गौरादित्वात् ङीष्।) वर्त्तिः। इति शब्दमाला ॥
तैलम्पाता, स्त्री, (तिलपातोऽस्यां वर्त्तते। "खचः साऽस्याङ्क्रियेति ञः।" ४।२।५८। इति ञः। "श्येनतिलस्य पाते ञे।" ६।३।७१। इति मुम्।) स्वधा। तिलपातोऽस्यां स्वधायां सा। इति लिङ्गादिसंग्रहे अमरभरतौ ॥
तैलसाधनं, क्ली, (तैलं साधयति निष्पादयति सुगन्धीकरोतीति। साध+णिच्+ल्युः।) गन्धद्रव्यविशेषः। काकला इति भाषा। तत्पर्य्यायः। काकोलम् २ कोलकम् ३ गन्धव्याकुलम् ४ कक्कोलकम् ५ कोषफलम् ६। इति शब्दचन्द्रिका ॥
तैलस्फटिकः, पुं, (तैलाक्तः स्फटिक इव। स्वच्छत्वात् तथात्वम्।) रत्नमणिः। इति हेमचन्द्रः। ४। १३४ ॥
तैलागुरु, क्ली, (तैलाक्तमिव अगुरु।) दाहागुरु। इति राजनिर्घण्टः ॥
तैलाटी, स्त्री, (तैलेन तैलप्रदानेन अटति दूरीभवतीति। अट गतौ+अच्+गौरादित्वात् ङीष्।) वरटा। इति हेमचन्द्रः। ४।२८१ ॥
तैलाम्बुका, स्त्री, (तैलं अम्बु जलमिव पेयं यस्याः। कप्। टाप् च।) तैलपायिका। इति जटाधरः ॥
तैलिकः, पुं, (तैलं पण्यत्वेनास्त्यस्य। तैल+ठन्।) तैलकारः। इति व्याकरणम् ॥ (अस्य अपाङ्क्तेयत्वमुक्तम्। यथा, मनुः। ३। १५८।
"समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥")
तैलिनी, स्त्री, (तैलं भक्ष्यत्वेन आश्रयत्वेन वा अस्त्यस्येति। तैल+इनि+ङीप्।) कीटभेदः। तत्पर्य्यायः। तैलकीटः २ बहुन्ध्या ३ दद्रुनाशिनी ४। इति राजनिर्घण्टः ॥ दशावर्त्तिः। इति शब्दमाला ॥
तैलिशाला, स्त्री, (तैलिनस्तिलसम्बन्धिनस्तैलकारस्य वा शाला गृहम्।) यन्त्रगृहम्। इति हेमचन्द्रः। ४। ६३ ॥ घाणिघर इति भाषा ॥
तैली, [न्] पुं, (तैलं निष्पाद्यत्वेन पण्यत्वेन वास्त्यस्येति। तैल+इनि।) तैलकारः। इति हेमचन्द्रः। ३। ५८१ ॥ तैलसम्बन्धिनि, त्रि ॥

तैलीनं, क्ली, (तिलानां भवनं क्षेत्रम् । तिल + "विभाषा तिलमाषेति ।" ५ । २ । ४ । इति पक्षे खञ् ।) तिलक्षेत्रम् । इत्यमरः ।२।६।७॥ (यथाच शब्दरत्नावल्याम् ।
"तिलोद्भवोचितं यत्तु तिल्यं तैलीनमित्यपि ॥")

तैष., पु, (तैषी तिष्यनक्षत्रयुक्ता पौर्णमासी अस्मिन्निति । तैषी + "सास्मिन् पौर्णमासीति ।" ४ । २ । २१ । इत्यण् ।) पौषमासः । इत्यमरः । १ । ४ । १५ ॥ (तिष्यनक्षत्रसम्बन्धिनि, त्रि । "तैषमहः । तैषी रात्रिः ।" इति सिद्धान्तकौमुदी ॥)

तैषी, स्त्री, (तिष्येण नक्षत्रेण युक्ता । "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।" ४ । ३ । १ । इत्यण् । "तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् ।" इति यलोपः । ङीप् ।) पुष्यनक्षत्रयुक्ता पौर्णमासी । इति मुग्धबोधम् ॥

तोकं, क्ली, (तौति पूरयति गृहमिति । तु पूर्त्तौ + बाहुलकात् कः ।) अपत्यम् । पुत्त्रो दुहिता च । इत्यमरः । २ । ६ । २८ ॥ (यथा, ऋग्वेदे । १ । ६४ । १४ ।
"तोकं पुष्येम तनयं शतं हिमाः ॥"
शिशुः । बालकः । यथा, भागवते । २ । ७ । २७ ।
"तोकेन जीवहरणं यदुलूकिकाया-
स्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ॥")

तोक्मं, क्ली, कर्णमलम् । इति हेमचन्द्रः ॥ मेघः । इत्यजयपालः ॥

तोक्म, पुं, (तकन्ति हसन्ति आनन्दिता भवन्ति लोका अनेनेति । तक + बाहुलकात् मः ओत्वञ्च ।) हरिद्यवः । अपक्वयवः । इत्यमरः । २ । ६ । १६ । ("यवास्तोक्मा भृष्टव्रीहयो लाजाः ।" इति वाजसनेयसंहितायां महीधरः । १६ । १ ॥ क्वचित् क्लीवलिङ्गोऽयम् । यथा, वाजसनेयसंहितायाम् । १६ । १३ ।
"दीक्षायै रूपं शष्पाणि प्रायणीयस्य
तोक्मानि ॥")
पल्लवाद्यङ्कुरः । यथा,—
"पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते ॥"
इति श्रीभागवते । १० । २२ । ३५ ॥
"निर्यासो घनरसः तोक्माः पल्लवाद्यङ्कुराः ।"
इति तट्टीकायां श्रीधरस्वामी ॥

तोटक, क्ली, द्वादशाक्षरपादच्छन्दः । इति छन्दोमञ्जरी ॥ (अस्य लक्षणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

तोड, ऋ नादरे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सक-सेट् ।) ऋ, अतुतोडत् । नादरोऽनादरः । इति दुर्गादासः ॥

तोत्त्र, क्ली, (तुद्यते ताड्यतेऽनेनेति । तुद + "दाम्नीशसयुयुजस्तुतुदेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) गवादिताडनदण्डः । पाँचनी इति ख्यातः । तत्पर्य्यायः । प्राजनम् २ तोदनम् ३ गजस्य तोदनदण्डः । तत्पर्य्यायः । वेणुकम् २ । इत्यमरः । २ । ८ । ४१ ॥ वेणुकम् ३ । इति भरतः ॥ (यथा, रामायणे । २ । ४० । ४१ ।
"न हि तत्पुरुषव्याघ्रो दुःखजं दर्शनं पितुः ।
मातुश्च सहितुं शक्तस्तोत्त्रैर्नुन्न इव द्विपः ॥")

तोदः, पुं, (तुद व्यथे + भावे घञ् ।) व्यथा । इति रत्नमाला ॥ (यथा, भागवते । ३ । १८ । ६ ।
"तोदं मृष्यन्निरगादम्बुमध्याद्-
ग्राहाहतः सकरेणुर्यथेभः ॥"
तुदतीति । तुद + अच् । पीडादायके, त्रि । यथा, ऋग्वेदे । ४ । १६ । ११ ।
"याहि कुत्सेन सरथमवस्युस्तोदो वातस्य
हर्य्योरीशानः ॥"
"तोदस्तोदकः ।" इति सायनः ॥)

तोदनं, क्ली, (तुद्यतेऽनेनेति । तुद + करणे ल्युट् ।) तोत्त्रम् । इत्यमरः । २ । ६ । १२ ॥ (तुद + भावे ल्युट् ।) व्यथा । इति मेदिनी ॥ ने, ७३ ॥ (यथा, सुश्रुते । १ । २२ ।
"तोदनभेदनताडनच्छेदनायमनमन्थनेत्यादि ॥"
वृक्षविशेषः । यथा, तत्रैव । १ । ४६ ।
"क्षीरवृक्षफलजामवराजादनतोदनतिन्दुकवकुलधन्वनाश्मन्तकाश्वकर्णफल्गुपरूषकगाङ्गेरुकीपुष्करवर्त्तिबिल्वबिम्बीप्रभृतीनि ॥")

तोमरः, पु क्ली, (तुम्पति हिनस्तीति । तुम्प + बाहुलकात् अरप्रत्ययेन साधुः । इत्युज्ज्वलदत्तोक्तम् । ३ । १३२ ।) अस्त्रविशेषः । शावली इति भाषा । तत्पर्य्यायः । शर्वला २ । इत्यमरः । २ । ८ । ९३ ॥ (यथा, देवीभागवते । ५ । ५ । २६ ।
"गदाभिः पट्टिशैः शूलैश्चक्रैश्च शक्तितोमरैः ॥")
हस्तक्षेप्यशल्यदण्डः । इति महाभारतटीका ॥ रायबाँश इति भाषा ॥ (अस्य व्याकृत्यादिकमुक्तं वैशम्पायनेन तद्यथा,—
"तोमरः काष्ठकायः स्यात् लौहशीर्षः
सपुच्छवान् ।
हस्तत्रयोन्नताङ्गश्च रक्तवर्णस्त्ववक्रगः ॥"
शार्ङ्गधरेण तु,—
"फणवत् शीर्षदेशः स्यात्तोमरस्त्वायसस्तथा ॥"
वैशम्पायनोक्तान्यस्य कार्य्याणि यथा,—
"उद्भ्रामं विनियुक्तिञ्च वेधनञ्चेति तत्त्रिकम् ।
बलशिल शस्त्रतत्त्वज्ञा कथयन्ति नराधिपाः ॥"
अग्निपुराणोक्तधनुर्वेदमतेऽस्य कार्य्याणि यथा,
"दृष्टिघातं भुजाघातं पार्श्वघातं द्विजोत्तम ।।
ऋजुपक्षेषुणा पातं तोमरस्य प्रकीर्त्तितम् ॥"
जनपदविशेषः । यथा, मात्स्ये । १२० । ५७ ।
"तोमरान् प्लावयन्ती च हंसमार्गान्
समूहकान् ॥"
नवाक्षरच्छन्दोविशेषे, क्ली । शब्दार्थचिन्तामणिधृत तल्लक्षणादिकं यथा,—
"प्रथमं सक विनिधाय
जगणद्वयञ्च निधाय ।
कुरु तोमरं सुखकारि
फणिराजवक्त्रविहारि ॥"
उदाहरणम्,—
"सखि ! माधवे मधुमासि
श्रण चत्वरं किमिहासि ।
सहते न किं विहरामि
किमु मावक प्रविशामि ॥")

तोमरधर, पु, (तोमर धरतीति । धृ + अच् । यद्वा, तोमरस्य अस्त्रविशेषस्य धरः ।) अग्निः । इति शब्दार्थकल्पतरुः ॥

तोमरिका, स्त्री, (तोमर + स्वार्थे कन् । स्त्रीलिङ्गत्वात् टाप् अत इत्वञ्च ।) तुवरिका । इति शब्दरत्नावली ॥

तोयं, क्ली, ("तपतेर्वृद्धिकर्म्मणः + 'अघ्न्यादयश्च' उणा ४ । १०८ । इति यत्प्रत्ययो निपातितो द्रष्टव्यः । वर्द्धते वर्षासु । 'तुदति तोयम्' इति क्षीरस्वामी । तुदते पूर्व्ववत् यत्प्रत्यये निपातनात् दकारलोपे गुणः । यद्वा, तुदि, सौत्र व्यावरणार्थः ।" इति निघण्टुनिर्वचने देवराजयज्वा । १ । १२ । ६२ ।) जलम् । इत्यमरः । १ । १० । ४ । (यथा, देवीभागवते । १ । ६ । ७६ ।
"तया ततमिदं तोयं तदाधारञ्च तिष्ठति ॥"
पूर्व्वाषाढ़ानक्षत्रम् । जलदेवतत्वादस्य तथात्वम् ॥)

तोयकाम., पुं, (तोयं जलं कामयते इति । कम् + अण् ।) परिव्याधः । जलवेतसः । इति जटाधरः ॥ जलाभिलाषिणि, त्रि ॥

तोयकृच्छ्र, क्ली, (तोयेन तोयमात्रपानेन यत् कृच्छ्रं व्रतम् ।) जलमात्रपानरूपव्रतविशेषः । इति मिताक्षरा ॥ (यथा, मार्कण्डेये ।
"मूलकृच्छ्रं स्मृतं मूलैस्तोयकृच्छ्रं जलेन तु ॥")

तोयडिम्भ, पुं, (तोयस्य जलस्य डिम्भ इव ।) घनोपलः । इति हारावली । ५८ ॥

तोयदः, पु, (तोयं ददातीति । दा + कः ।) मेघः । (यथा, महानिर्व्वाणतन्त्रे । ४ । ५३ ।
"यदा चौर्य्यी खल्पफला तोयदा लोकवर्षिणः
असम्यक्‌फलिनो वृक्षास्तदैव प्रबलः कलिः ॥")
मुस्तकम् । घृते, क्ली । इति मेदिनी । दे, ३० ॥ जलदातरि त्रि ॥ (यथा, महाभारते आनुशासनिके पर्व्वणि ।
"तोयदो मनुजव्याघ्र स्वर्गं गत्वा महाद्युते ।।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ॥")

तोयधर, पुं, (तोयं जलं धरतीति । धृ + अच् । तोयस्य धरो वा ।) मेघः । मुस्ता । सुनिषण्णकशाकः । इति मेदिनी । रे, २६५ ॥ (जलधारिणि, त्रि । यथा, रामायणे । २।६३।१० ।
"सुवन्ति कुसुमान्येते नगाः पर्व्वतसानुषु ।
नीलाः इवातपापाये तोयन्तोयधरा घनाः ॥")

तोयधिः, पु, (तोयानि धीयन्तेऽत्र । धा + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः । आतो लोपः ।) समुद्रः । इति पुराणम् ॥ (यथा, सूर्य्यसिद्धान्ते भूगोलाध्याये । ३७ ।
"समन्तात् मेरुमध्यात्तु तुल्यभागेषु तोयधिः ॥")

तोयधिप्रियं, क्ली, (प्रीणातीति। प्री+"इगुपधेति।" ३।१।१३५। इति कः। तोयधिः प्रियो यस्य।) लवङ्गम्। इति शब्दचन्द्रिका॥

तोयनिधिः, पु, (तोयानि निधीयन्तेऽत्र। नि+धा+किः। तोयानां निधिर्वा।) समुद्रः। इति शब्दरत्नावली॥ (यथा, कुमारे।१।१।
"पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः॥")

तोयपिप्पली, स्त्री, (तोये जले पिप्पलीव।) काँचडा इति ख्यातजलजशाकभेदः। तत्पर्य्यायः। लाङ्गली २ शारदी ३ शकुलादनी ४। इत्यमरः।२।४।१११॥

तोयपुष्पी, स्त्री, (तोयेन बहुजलप्रदानेन पुष्पाणि यस्याः।) पाटलावृक्षः। इति शब्दमाला॥

तोयप्रसादनं, क्ली, (प्रसादयतीति। प्र+सद्+णिच्+ल्युः। तोयस्य प्रसादनम्। अस्य फलयोगेन जलस्य निर्म्मलत्वं भवतीति तथात्वम्।) कतकम्। इति भूरिप्रयोगः॥

तोयप्रसादनफलं, क्ली, (तोयप्रसादनस्य तोयप्रसादनाय वा फलम्।) कतकफलम्। इति रत्नमाला॥

तोयफला, स्त्री, (तोयप्रधानं फलं यस्याः।) इर्व्वारुः। इति राजनिर्घण्टः॥

तोयवल्ली, स्त्री, (तोये जलप्रधानस्थाने वल्ली लतासन्ततिर्यस्याः।) कारवेल्लः। इति रत्नमाला॥ उच्छे इति भाषा॥

तोयशुक्तिका, स्त्री, (तोयजाता शुक्तिका। शाकपार्थिवादिवत् समासः।) जलशुक्तिः। इति राजनिर्घण्टः॥

तोयसूचकः, पु, (तोयं जलवर्षणं सूचयति रवेणेति। सूच्+ण्वुल्।) भेकः। इति शब्दार्थकल्पतरुः॥

तोयाधिवासिनी, स्त्री, (तोयं जलप्रधानस्थल अधिवसतीति। अधि+वस+णिनिः। यद्वा, तोयेन अधिवास इव संस्कारोऽस्यस्येति। इनिः।) पाटलावृक्षः। इति रत्नमाला॥ तोयादिवासिन्यपि पाठः॥ (पाटलाशब्देऽस्या विवृतिर्ज्ञातव्या॥)

तोरणं, क्ली, (तोलयति उन्नमयति मस्तकमिति। तुल+ल्युः। लस्य रः।) कन्धरा। कण्ठी। इति हारावली।१७४॥

तोरणः, पु क्ली, (तुतोर्त्ति त्वरया गच्छत्यनेनेति। तुर त्वरणे+करणे ल्युट्।) बहिर्द्वारम्। इत्यमरः।२।२।१६॥ (यथा, कुमारे।७।३।
"भासोज्ज्वलत्काञ्चनतोरणानां
स्थानान्तरं स्वर्ग इवावभासे॥")
मूलद्वाराद्वाह्यद्वारम्। इति कौकटादयः॥ द्वाराग्रे निखातस्तम्भयोरुपरिनिबद्धं नानावस्त्ररत्नादिमयं धनुराकारं यल्लक्ष्यं तत् तोरणमिति बहवः॥ उपरिखगादियुक्तस्तम्भादिद्वयनिर्म्मितपुरादिबहिर्द्वारम्। इति स्वामी॥

सम्भनमालेति ख्यातं इति केचित्। इत्यमरटीकायां भरतः॥ (महादेवे, पुं। यथा, महाभारते।१३।१७।११७।
"तोरणस्तारणो वातः परिधीपतिखेचरः॥")

तोलं, क्ली पुं, (तुल्यते परिमीयते इति। तुल+कर्म्मणि घञ्।) तोलकम्। यथा,—
"एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम्।
इतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम्॥"
इत्यागमः॥

तोलकं, क्ली पु, (तोलमेव+स्वार्थे कन्।) शाणद्वयमानम्। इति शब्दमाला॥ अशीतिरक्तिपरिमाणम्। तत्तु षोडशमासकः षण्णवतिरक्तिपरिमाणञ्च। तोला इति भरि इति च भाषा। तत्पर्य्यायः। कोलम् २ द्रङ्क्षणम् ३ वटकम् ४ कर्षार्द्धम् ५। इति वैद्यकपरिभाषा। कर्षम् ६। इति लीलावती॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे वृहज्ज्वरान्तके।
"रसं गन्धं तोलकञ्च जातीकोषफले तथा।"
"किराततिक्तकं बालं तोलकञ्च समाहरेत्॥")

तोषः, पु, (तुष सन्तोषे+भावे घञ्।) तुष्टिः। इति धरणिः॥ (यथा,—
"देवश्च परमं तोषं जगाम च सहोमया॥"
इति हरिवंशे।१७३।१३॥
स्वायम्भुवमन्वन्तरगततुषितानां देवानामन्यतमः। यथा, भागवते।४।१।७।
"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः।
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट्।
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे॥")

तौक्षिकः, पु, धनूराशिः। इति दीपिका॥ (यथा दीपिकायाम्।
"क्रियतावुरिजितुमकुलीरलेयपाथेययूककौर्प्याख्याः।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्॥")

तौतातिक, क्ली, (तुतातेन निर्वृत्तम्। तुतात+"तेन निर्वृत्तम्।" ५।१।७९। इति ठक्।) तुतातभट्टकृतशास्त्रम्। यथा,—
"नैवाश्रावि गुरोर्म्मतं न विदितं तौतातिकं दर्शनम्।
तत्त्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा॥"
इति प्रबोधचन्द्रोदये।२।३॥

तौतिकं, क्ली, मुक्ता। इति राजनिर्घण्टः॥

तौतिकः, पु, शुक्तिः। इति राजनिर्घण्टः॥

तौर्य्यं, क्ली, (तूर्य्ये मुरजादौ भवम्। तूर्य्य+अण्।) तूर्य्ये मुरजादौ भवं शब्दरूपम्। इत्यमरटीकायां भरतः॥

तौर्य्यत्रिकं क्ली, (त्रयोऽंशा यस्य तत्। त्रि+"संख्याया अतिशदन्तायाः कन्।" ५।१।२२। इति कन्। तौर्य्योपलक्षितं त्रिकम्।) नृत्यगीतवाद्यमिदं समुदितं त्रयं नाट्यञ्च। इत्यमरः।१।७।१०॥ नटसम्बन्धि नृत्यगीतवाद्यमिति त्रयम्। इति तट्टीकासारसुन्दरी॥

(यथा, मनुः।७।४७।
"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥")
विष्णुगृहे गीतवाद्यनृत्यफलं यथा,—
"गायनं ये प्रकुर्व्वन्ति मम कर्म्मपरायणाः।
तेषां यद्यत् फलं भूमे। शृणुष्व गदतो मम॥
यावन्ति चाक्षराण्येव गीयमाने यशस्विनि।।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते॥
रूपवान् गुणवान् सिद्धः सर्व्ववेदविदां वरः।
नित्यं पश्यति वै वज्रपाणिं देवं न संशयः॥
मद्भक्तश्चैव जायेत इन्द्रलोकपथे स्थितः।
सर्व्वकर्म्मगुणश्रेष्ठस्तत्रापि मम पूजकः॥
इन्द्रलोकात् परिभ्रष्टो मम गीतपरायणः।
प्रमुक्तः सर्व्वसंसारान्मम लोकाय गच्छति॥
यस्तु गायति सुश्रोणि! कौमुद्याश्चैव द्वादशीम्।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति॥
यस्तु गायति गीतानि मम जागरणे सदा।
सर्व्वसङ्गात् प्रमुक्तो वै मम लोकाय गच्छति॥
एतत्ते कथितं देवि। गायनस्य फलं महत्।
यस्य गीतस्य शब्देन तरेत् संसारसागरम्॥*॥
वादित्रस्य प्रवक्ष्यामि तत् शृणुष्व वसुन्धरे।।
प्राप्नवान्मनुजो येन देवेभ्यः समतां स्वयम्॥
सम्यक्कालप्रयोगेण सन्निपातेन वा पुनः।
नववर्षसहस्राणि नववर्षशतानि च॥
कुवेरभवनं गत्वा मोदते वै यदृच्छया।
कुवेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः॥
शम्यादितालसम्पातैर्मम लोकाय गच्छति॥*॥
नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे।।
मनुजा येन गच्छन्ति छित्त्वा संसारसागरम्॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः॥
फलं प्राप्नोति सुश्रोणि। मम कर्म्मपरायणः।
रूपवान् गुणवान् शूरः शीलवान् सुपथे स्थितः॥
मद्भक्तश्चैव जायेत संसारपरिमोचितः॥*॥
यस्तु जागरतो नित्यं गीतवाद्येन नर्त्तकः।
जम्बुद्वीप समासाद्य राजराजस्तु जायते॥
सर्व्वकर्म्मसमायुक्तो रक्षिता वै महीपतिः।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः॥"
इति वराहपुराणम्॥

तौलं, क्ली, (तुला एव। स्वार्थे अण्। स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेरस्य क्लीवत्वम्।) तुला। तुलाराशौ, पु। तौली। इति ज्योतिषम्॥

तौलिकः, पु, (तुल्या तुलिकया जीवतीति। तुलि+ठक्।) चित्रकारः। इति शब्दमाला॥ (तुलानिर्वृत्ते, त्रि। यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये।
"शतं शतं तुलायान्तु सहस्रं दशतौलिके॥")

तौलिकिकः, पु, (तुलिकया जीवतीति। तुलिका+ठक्।) चित्रकारः। तत्पर्य्यायः। रङ्गाजीवः २ चित्रकृत् ३। इति हेमचन्द्रः।३।५५५॥ तौलिकः ४। इति शब्दमाला॥

तौषारं, क्ली, (तुषारस्येदम्। तुषार+"तस्येदम्।" ४। ३। १२०। इत्यण्।) तुषारजलम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४५।
"धारं कारं तौषारं हैममिति॥")

त्यक्तं, त्रि, (त्यज्यते स्मेति। त्यज त्यागे+क्तः।) कृतत्यागम्। तत्पर्य्यायः। हीनम् २ विधुतम् ३ समुज्झितम् ४ धूतम् ५ उत्सृष्टम् ६। इत्यमरः। ३। १। १०७॥ विनाकृतम् ७ विरहितम् ८ निर्य्यूढम् ९। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। ३७। २।
"त्यक्तभोगस्य मे राजन्। वने वन्येन जीवतः।
किं कार्य्यमनुयात्रेण त्यक्तसङ्गस्य सर्व्वतः॥")

त्यज, औ हानौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-सक-अनिट्।) औ, अत्याक्षीत्। हानिर्व्वर्ज्जनम्। त्यजति दुष्टलोकं जनः। इति दुर्गादासः॥

त्यजनं, क्ली, (त्यज+भावे ल्युट्।) त्यागः। वर्ज्जनम्॥

त्यत्, [द्] त्रि, (त्यजति संसर्गमिति। त्यज्+"त्यजितनियजिभ्यो डित्।" उणां १। १३१। इति अदिः स च डित्।) तत्। सेइ इति भाषा। अस्य पुंलिङ्गस्त्रीलिङ्गयो रूपं स्यः स्या। सर्व्वनामशब्दोऽयम्। इति व्याकरणम्॥ (यथा, ऋग्वेदे। १। ६३। ४।
"त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन्
वृषकर्म्मन्नुभ्नाः॥")

त्यत्, [द्] क्ली, (त्यज्+"त्यजितनीति।" उणां। १। १३१। इति अदिः स च डित्।) वायुः। आकाशः। यथा,—
"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥"
इति भागवते। १०। २। २६॥
"सत्यव्रतमिति। सत्यं व्रतं सङ्कल्पो यस्य तम्। सत्यपरं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्व्वं प्रलयानन्तरं स्थितिसमये च सत्यं अव्यभिचारेण वर्त्तमानम्। तदेवाह. सत्यस्य योनिमिति। सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशौ एवं सच्च त्यच्च सत्यं भूतपञ्चकम्। 'तत् सत्यमित्याचक्षते।' इति श्रुतेः। तस्य योनिं कारणम्। अनेन सृष्टेः पूर्व्वं वर्त्तमानतोक्ता। तथा सत्ये तस्मिन्नेव निहितं अन्तर्यामितया स्थितम्। अनेन स्थितिसमयेऽपि सत्यत्वमुक्तम्। तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं नाशेऽप्यवशिष्यमाणरूपम्। अनेन प्रलयेऽप्यवधित्वे न सत्यत्वं दर्शितम्। एवं त्रिसत्यत्वमुपपादितम्। तथा ऋतसत्यनेत्रं ऋतं सूनृता वाणी सत्यं समदर्शनम्। तथा भगवता व्याख्यास्यमानत्वात्। सत्यञ्च समदर्शनम्। ऋतञ्च सूनृता वाणी कविभिः परिकीर्त्तिता इति। तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्त्तकमिति यावत्। एवं सर्व्वप्रकारेण सत्यात्मकं त्वां वयं शरणं प्रपन्ना इत्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥

त्यागः, पुं, (त्यज्+घञ्।) दानम्। इत्यमरः। २। ७। २९॥ (यथा, रघुः। १। ७।
"त्यागाय सम्भृतार्थानां सत्याय मित-
भाषिणाम्॥")
वर्ज्जनम्। इति मेदिनी। गे, ८॥ (यथा, मनुः। ८। ३८९।
"न माता न पिता न स्त्री न पुत्त्रस्त्याग-
मर्हति॥")
विवेकिपुरुषः। इति शब्दरत्नावली॥ सर्व्वकर्म्मफलविसर्ज्जनम्। यथा,—
"काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥
त्याज्यं दोषवदित्येके कर्म्म प्राहुर्म्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!।
त्यागो हि पुरुषव्याघ्र। त्रिविधः सम्प्रकीर्त्तितः॥
यज्ञो दानं तपः कर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि च कर्म्माणि सङ्गं त्यक्त्वा फलानि च।
कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्ज्जुन!।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥"
इति श्रीभगवद्गीतायाम्। १८। २-९॥
(त्रि, दाता। यथा, ऋग्वेदे। ४। २४। ३।
"मिथो यत्त्यागमुभयासो अग्मन् नरस्तोकस्य
तनयस्य सातौ॥"
"उभयास उभये यजमानाः स्तोतारश्च त्यागं त्यागकर्त्तारं दातारमिन्द्रं अग्मन् उपगच्छन्ति॥" इति सायनः॥)

त्यागिमः, त्रि, (त्यागेन निर्वृत्तः। भावप्रत्ययत्वादिमप्।) त्यक्तः। त्यागेन निष्पन्नः। इति व्याकरणम्॥

त्यागी, [न्] त्रि, (त्यजतीति। त्यज्+"सम्पृचानुरुधाङ्यमेति।" ३। २। १४२। इति घिनुण्।) दाता। (यथा, पञ्चतन्त्रे।१।२५९।
"त्यागिनि शूरे विदुषि च संसर्गरुचिर्जनो गुणी
भवति॥")
शूरः। इति मेदिनी। ने, ७१॥ वर्ज्जनशीलः। यथा,—
"यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति भगवद्गीता। १८। ११।
कर्म्मफलत्यागवान्। यथा,—
"न द्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥
न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति श्रीभगवद्गीतायां १८। १०-११।

त्याज्यः, त्रि, (त्यज्यते इति। त्यज+कर्म्मणि ण्यत्। "त्यजेश्च।" इति ७। ३। ६६। इत्यस्य वार्त्तिकोक्त्या न कुत्वम्।) त्यागयोग्यः। वर्ज्जनीयः। यथा, प्रायश्चित्ततत्त्वे।
"तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रयः॥"
(यथा च देवीभागवते। १। ११। ५९।
"तारामप्यनुरक्ता च यथा न तु तथा गुरौ।
अनुरक्ता कथं त्याज्या धर्म्मतो न्यायतस्तथा॥")

त्रक, इ ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सक-सेट्।) दन्त्यवर्गादिः। इ, त्रङ्क्यते। ङ, त्रङ्कते। इति दुर्गादासः॥

त्रग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, त्रङ्गते। इति दुर्गादासः॥

त्रङ्गः, पुं स्त्री, (त्रङ्गति शोभादिकं गच्छतीति। त्रङ्ग+अच्।) पुरविशेषः। इति त्रिकाण्डशेषः॥

त्रद, इ चेष्टे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अक-सेट्।) दन्त्यवर्गाद्यादिः। इ, त्रन्द्यते तत्रन्द। इति दुर्गादासः॥

त्रप, ऊ ष मि ङ ह्रियि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अक-वेट्।) ऊ, अत्रपिष्ट अत्रप्त। ष, त्रपा। मि, त्रपयति त्रापयति। ङ, त्रपते। ह्रियि लज्जायाम्। इति दुर्गादासः॥

त्रपा, स्त्री पुं, (त्रप्यते इति। त्रप+"षिद्भिदादिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। ततष्टाप्।) लज्जा। इत्यमरः। १। ७। २३॥ (यथा, रत्नावल्याम्।
"नीचैः सर्व्ववरैरनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं
वामनः॥"
त्रपते अनया अस्या वा। करणे अपादाने वा अङ्।) कुलटा। इति मेदिनी। पे, ७॥ कुलम्। कीर्त्तिः। इति शब्दरत्नावली॥

त्रपाकः, पुं, (त्रपते लज्जते इति। त्रप+"षाक् खनादेः।" १। २१९। इति उणादिकोषटीकाधृतसूत्रात् षाकः।) म्लेच्छविशेषः। इत्युणादिकोषः॥

त्रपारण्डा, स्त्री, (त्रपायां रण्डेव। लज्जाहीनत्वादेव तथात्वम्।) वेश्या। इति जटाधरः॥

त्रपिष्ठः, त्रि, (अयमेषामतिशयेन तृप्रः। तृप्र+"अतिशायने तमबिष्ठनौ।" ५। ३। ५५। इति इष्ठन्। "प्रियस्थिरेति।" ६। ४। १५७। इति तृप्रस्य त्रप्-आदेशः।) अतिलज्जितः। इति मुग्धबोधम्॥

त्रपीयान् [स्] त्रि, (अयमनयोरतिशयेन तृप्रः। तृप्र+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५। ३। ५७। इति ईयसुन्। "प्रियस्थिरेति।" ६। ४। १५७। इति तृप्रस्य त्रबादेशः।) त्रपिष्ठः। इति व्याकरणम्॥

त्रपु, क्ली, (त्रपते अग्निसंसर्गेण लज्जते इव । त्रप + "शॄस्वृस्निहित्रप्यसीति ।" उणां । १ । ११ । इति उ ।) सीसकम् । रङ्गम् । इति मेदिनी । पे, ६ ॥ (यथा, पञ्चतन्त्रे । १ । ८५ ।
"कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते ।
न स विरौति न चापि न शोभते
भवति योजयितुर्वचनीयता ॥")

त्रपुः, [स्] क्ली, (त्रपते वह्निं प्राप्य लज्जते इव । त्रप + "उस् स्यात्तपादेः स तु कित् ।" २।११० । इति उणादिकोषटीकाधृतसूत्रात् उस् ।) रङ्गम् । इत्युणादिकोषः ॥ (यथा, गरुडभावप्रकाशे ।
"भौमे त्रपुः शनौ लौहं राघावस्मानि कीर्त्तयेत् ॥"
रङ्गशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

त्रपुकर्कटी, स्त्री, (त्रपुवत् शुभ्रा कर्कटी ।) त्रपुषी । इति राजनिर्घण्टः ॥

त्रपुटी, स्त्री, सूक्ष्मैला । इति रत्नमाला ॥

त्रपुलं, क्ली, (त्रपते वह्निसंसर्गेण लज्जते इव । त्रप + बाहुलकात् उलच् ।) रङ्गम् । इति भरतकृतद्विरूपकोषः ॥

त्रपुषं, क्ली, (त्रप + बाहुलकादुषः ।) रङ्गम् । इति भरतकृतद्विरूपकोषः ॥ त्रपुषीफलम् । शशा इति भाषा । तत्पर्य्यायः । कण्टकिफलम् २ सुधावासम् ३ सुशीतलम् ४ । तद्बालफलगुणाः । शीतलत्वम् । वलतृड्भ्रमदाहपित्तरक्तपित्तनाशित्वम् । स्वादुत्वम् । शीतलत्वञ्च । तत्पक्वफलगुणाः । अम्लत्वम् । उष्णत्वम् । पित्तलत्वम् । कफवातनाशित्वञ्च । तद्बृहत्फलगुणाः । मूत्रलत्वम् । शीतलत्वम् । रूक्षत्वम् । पित्तासकृच्छ्रनाशित्वञ्च । इति भावप्रकाशः ॥ अस्य सामान्यगुणाः । स्वादुत्वम् । गुरुत्वम् । विष्टम्भित्वम् । शीतलत्वम् । सुखप्रियत्वम् । रूक्षत्वम् । अतिमूत्रलत्वञ्च । इति राजवल्लभः ॥

त्रपुषी, स्त्री, (त्रपुष + गौरादित्वात् ङीष् ।) कर्कटी । इति हेमचन्द्रः । ४ । २५५ ॥ (यथा,
"पटोलकैर्व्वारुत्रपुष्यलावूः ॥"
इति हारीते प्रथमेस्थाने दशमेऽध्याये ॥)
दन्त्यसान्तोऽपि पाठः ॥

त्रपुस, क्ली, (त्रपते वह्नियोगेन लज्जते इव । त्रप + बाहुलकात् उसः ।) रङ्गम् । इति राजनिर्घण्टः ॥ कर्कटी । अस्य गुणा यथा,—
"बाल सुनील त्रपुस तिक्तं पित्तहरं स्मृतम् ।
तत् पाण्डुकफकृज्जीर्णमम्लं वातकफापहम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

त्रपुसी, स्त्री, (त्रपुस + गौरादित्वात् ङीष् ।) महेन्द्रवारुणी । कर्कटी । लताविशेषः । शशा इति क्षीरा इति च भाषा । तत्पर्य्यायः । शीतपुष्पा २ काष्ठालु ३ मधुकर्कटी ४ बहुफला ५ कोषफला ६ तुन्दिलफला ७ मरुद्भीलता ८ सुधावासा ९ । अस्याः फलस्य गुणाः । रूक्षत्वम् । मधुरत्वम् । शिशिरत्वम् । गुरुत्वम् । भ्रमपित्तविदाहार्त्तिवान्तिनाशित्वम् । बहुमूत्रदत्वञ्च । काष्ठालुरित्यत्र कण्टालुरपि पाठः । इति राजनिर्घण्टः ॥ (अस्या व्यवहारो यथा, सुश्रुते उत्तरतन्त्रे ४५ अध्याये ।
"त्रपुसीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना ।
पिबेदक्षसमं कल्कं यष्टीमधुकमेव वा ॥")

त्रप्सं, क्ली, (द्रप्सं निपातनात् दस्य तः ।) द्रप्सम् । घनेतरदधि । इत्यमरटीकायां भरतधृतविद्याविनोदः ॥ पातला दइ इति भाषा ॥

त्रयं, क्ली, (त्रयोऽवयवा यस्य । त्रि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् । "द्वित्रिभ्यां तयस्यायज्वा ।" ५ । २ । ४३ । इति तयस्यायच् ।) त्र्यवयवम् । इति मुग्धबोधम् ॥ तिन इति भाषा ॥ (यथा, मनुः । २ । ७६ ।
"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः ।
वेदत्रयात् निरदुहत् भूर्भुवःस्वरितीति च ॥")

त्रयः, पु, (तरतीति । तॄ + "तरतेर्ड्रिः ।" उणा ५ । ६६ । इति ड्रिः ।) त्रिसंख्या । तिन इति भाषा । त्रिशब्दस्य बहुवचनान्तरूपोऽयम् । अस्य स्त्रीलिङ्गक्लीवलिङ्गयो रूपे तिस्रः त्रीणि । इति व्याकरणम् ॥ तद्वाचकानि यथा,—
कालः १ अग्निः २ भुवनम् ३ गङ्गामार्गः ४ शिवचक्षुः ५ गुणः ६ ग्रीवारेखा ७ कालिदासकाव्यम् ८ वलिः ९ सन्ध्या १० पुरम् ११ पुष्करम् १२ रामः १३ विष्णुः १४ ज्वरपादः १५ । इति कविकल्पलता ॥ त्रिसंख्याविशिष्टे, त्रि । इत्यमरः ॥
"तिस्रो भार्य्याः त्रिशालाश्च त्रयो भृत्याश्च बान्धवाः ।
ध्रुवं वेदविरुद्धाश्च न श्रुते मङ्गलप्रदाः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

त्रयी, स्त्री, (त्रय + "टिड्ढेति ।" ४ । १ । १५ । इति ङीप् ।) ऋक्सामयजुर्व्वेदाः एतत्त्रितयम् । इत्यमरः । १ । ६ । ३ ॥ (यथा, मनुः । ७।४३ ।
"त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः ॥")
पुरन्ध्री । सुमतिः । इति विश्वः ॥ सोमराजीवृक्षः । इति शब्दचन्द्रिका ॥ दुर्गा । यथा,—
"ऋग्यजुःसामभागेन साङ्गवेदगतापि वा ।
त्रयीति पठ्यते लोके दृष्टादृष्टार्थसाधिनी ॥"
इति देवीपुराणे ४५ अध्यायः ॥

त्रयीतनुः, पुं, (त्रयी वेदा एव तनुः शरीरं यस्य । "त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते ।" इति भागवतवाक्यात् । ५ । २० । ४ । अस्य तथात्वम् ।) सूर्य्यः । इति हलायुधः ॥

त्रयीधर्म्मः, पु, (त्रय्या वेदत्रयेण विहितो धर्म्मः ।) ऋग्यजुःसाम्नां विधानम् । त्रिवेदोक्तकर्म्म । इत्यमरः । १ । ६ । ३ ॥ (यथा, महाभारते । ३ । १५० । ३२ ।
"या वेदधर्म्मकृता न स्यात्त्रयीधर्म्मरते भुवि ॥")

त्रयीमुखः, पुं, (त्रयी वेदा मुखे यस्य ।) ब्राह्मणः । इति हेमचन्द्रः । ३ । ४ । ७५ ॥

त्रयोदश, [न्] त्रि, (त्राधिका दश इति कर्म्मधारयः । "त्रेस्त्रयः ।" ६ । ३ । ४८ । इति त्रयस् ।) संख्याविशेषः । १३ तेर इति भाषा । बहुवचनान्तोऽयम् । (यथा, मनुः । ९ । १२९ ।
"ददौ स दश धर्म्माय कश्यपाय त्रयोदश ॥")
तत्संख्यायुक्ताश्च । इत्यमरः ॥ तद्वाचकः । ताम्बूलगुणः १ । इति कविकल्पलता ॥

त्रयोदशः, त्रि, (त्रयोदशानां पूरणः । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) त्रयोदशानां पूरणः । इति व्याकरणम् ॥ तेरइ इत्यादि भाषा । (यथा, रामायणे । २।७७।२२ ।
"त्रयोदशोऽयं दिवसः पितुर्वृत्तस्य ते विभो ।
सावशेषास्थिनिचये किमिह त्वं विलम्बसे ॥")

त्रयोदशी, स्त्री, (त्रयोदश + टित्त्वात् ङीप् ।) तिथिविशेषः । सा चन्द्रस्य त्रयोदशकलाक्रियारूपा त्रयोदशकलाक्रियावच्छिन्नकालरूपा वा । इति तिथ्यादितत्त्वम् ॥ तत्र जातस्य फलं यथा,
"रूपान्वितः सात्त्विकभावहीनः
सुखी च बाल्ये जननीप्रियश्च ।
सदालसः शिल्पगुणैकवेत्ता
त्रयोदशी जन्मतिथिर्यदि स्यात् ॥"
इति कोष्ठीप्रदीपः ॥
इयं धर्म्मस्य तिथिः । इति वराहपुराणम् ॥

त्रस, क धृतौ । ग्रहे । निषेधे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) एतदाद्याश्चत्वारो रेफयुक्ताद्याः । क, त्रासयति स्वर्गं याच धर्षति गृह्णाति निराकरोति वा इत्यर्थः । इति दुर्गादासः ॥

त्रस, इ कि भासि । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट् ।) इ, त्रंसते । कि, त्रंसयति त्रंसति । भासि दीप्तौ । इति दुर्गादासः ॥

त्रस, ई श भये । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् । ईदित्वात् अनिड्निष्ठः ।) ई, त्रस्तः । श, त्रेसतुः तत्रसतुः । त्रसति । इति दुर्गादासः ॥

त्रस, य ई भये । इति कविकल्पद्रुमः ॥ (दिवा-परं-अकं-सेट् । ईदित्वादनिड्निष्ठः ।) य, त्रस्यति । ई, त्रस्तः । इति दुर्गादासः ॥

त्रसं, क्ली, (त्रस्यति बिभेत्यस्मिन् इति । त्रस भये + घञर्थे कः ।) वनम् । इति त्रिकाण्डशेषः ॥

त्रसः, त्रि, (त्रसतीति । त्रस भये + पचाद्यच् ।) जङ्गमः । इत्यमरः । ३ । १ । ७४ ॥ (यथा, महाभारते । १२ । ९ । १९ ।
"जन्तुः प्रतिहितो गर्भं त्रसस्थावरवर्ज्जकः ॥")

त्रसरः, पु, (त्रसन्ति धातूनामनेकार्थत्वात् सूत्राणि वेष्टयन्तीति । त्रस + बाहुलकात् अरन् ।) तन्तुवायोपकरणविशेषः । नाशनी इति भाषा । तत्पर्य्यायः । सूत्रवेष्टनम् २ । इत्यमरः । ३।२।२८ ॥ तसरः ३ । इति भरतः ॥

त्रसरेणुः, स्त्री, सूर्य्यभार्य्याविशेषः । इति त्रिकाण्डशेषः ॥

त्रसरेणुः, पुं, (त्रसश्चञ्चलत्वात् भीत इव रेणुः ।) त्रिंशत्परमाणुपरिमाणम् । स गवाक्षान्तर्गते सूर्य्यकिरणे दृश्यते । तत्पर्य्यायः । ध्वंसी २ । यथा, वैद्यकपरिभाषायाम् ।
"जालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते ।
त्रसरेणुस्तु विज्ञेयस्त्रिंशता परमाणुभिः ॥"
(द्व्यणुकत्रयात्मकरेणुः । यथा, ब्रह्मवैवर्त्ते ।
"परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः ॥"
तथाच मनुः । ८ । १३२ ।
"जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमन्तत् प्रमाणानां त्रसरेणुं प्रचक्षते ॥")

त्रसुरः, पुं, (त्रस्यतीति । त्रस भये + उरच् ।) भीरुकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

त्रस्तः, त्रि, (त्रस भये + क्तः ।) भीतः । इति जटाधरः ॥ (यथा, देवीभागवते ।१।५।२६।
"प्रत्यञ्चायां विमुक्तायां मुक्ता कोटिस्तथोत्तरा ।
शब्दः समभवद्घोरस्तेन त्रस्ताः सुरास्तदा ॥")
शीघ्रे, क्ली । यथा,—
"सविरामं त्रितालश्च एकं शून्यन्तथापरे ।
शेषे त्रस्तं त्रितालश्च देवसार इतीर्य्यते ॥"
इति सङ्गीतदामोदरः ॥

त्रस्नुः, त्रि, (त्रस्यतीति । त्रस भये + "त्रसिगृधिधृषिक्षिपेः क्नुः ।" ३ । २ । १४० । इति क्नुः ।) त्रासशीलः । इत्यमरः । ३ । १ । २६ ॥ (यथा, भट्टिः । ६ । ७ ।
"सीतां सौमित्रिणा त्यक्तां सध्रीचीं त्रस्नुमेकिकाम् ।
विज्ञायामंस्त काकुत्स्थः क्षये क्षेमं सुदुर्लभम् ॥")

त्रा, ङ पालने । इति कविकल्पद्रुमः ॥ (भ्वां आत्मं-सकं-अनिट् ।) त्रै ङ पालने इत्यत्र केचिददादौ त्रा पठन्ते । इति क्रमदीश्वरः ॥ इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

त्राण, क्ली, (त्रै + भावे ल्युट् क्तो वा । नुदविदेति पक्षे नत्वम् ।) रक्षणम् । (यथा, शाकुन्तले १ अङ्के ।
"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि ॥"
त्रायते इति कर्त्तरि ल्युः । रक्षिता । यथा, महाभारते । १ । २३ । १८ ।
"त्वं प्रभास्त्वमभिप्रेतं त्वं नस्त्राणमनुत्तमम् ॥"
तथाच रघौ । १५ । ३ ।
"अवेक्ष्य रामं ते तस्मिन् न प्रजह्रुः स्वतेजसा ।
त्राणाभावे हि शापास्त्राः कुर्व्वन्ति तपसो व्ययम् ॥"
त्रायतेऽनेनेति करणे ल्युट् । कवचम् । वर्म्म । यथा, महाभारते । ३ । १६८ । १४ ।
"दंशिता विविधैस्त्राणैर्विचित्रायुधपाणयः ॥")
त्रायमाणालता । रक्षिते, त्रि । इति मेदिनी । णे, १४ ॥

त्राणा, स्त्री, (त्रायते पालयतीति । त्रै + ल्युः । टाप् ।) त्रायमाणा । इति राजनिर्घण्टः ॥

त्रातं, त्रि, (त्रै + क्तः नुदविदेति नत्वाभावः ।) रक्षितम् । इत्यमरः । ३ । १ । १०६ ॥ (यथा, मार्कण्डेये । ८४ । २२ ।
"त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवन्नमस्ते ॥"
भावे क्तः ।) रक्षणे, क्ली ॥

त्रापुषं, त्रि, (त्रपुणा निर्वृत्तम् । त्रपुष + "तेन निर्वृत्तम् ।" ४ । २ । ६८ । इत्यण् ।) त्रपुषनिर्म्मितम् । इति व्याकरणम् ॥ (त्रपुणो विकारः । "त्रपुजतुनोः षुक् ।" ४ । ३ । १३८ । इत्यण् षुगागमश्च । रङ्गस्य विकारः । इति सिद्धान्तकौमुदी ॥)

त्रायन्ती, स्त्री, (त्रै + सम्पदादित्वात् क्विप् । त्रां त्राणं अयतीति । इ गतौ + शतृ । यद्वा, त्रै ङ पालने + ङित्त्वात् आत्मनेपदी धातुरपि परस्मैपदमिच्छतीति न्यायात् शतृ । "उगितश्च ।" इति ङीप् ।) त्रायमाणा लता । इत्यमरः । २ । ४ । १५० ॥ (यथा,—
"त्रायन्ती तु वरा तिक्ता सरा पित्तकफापहा ।
ज्वरहृद्रोगगुल्मार्शोभ्रमशूलविषप्रणुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) त्राणकर्त्री च ॥

त्रायमाण, त्रि, (त्रायते इति । त्रै + कर्म्मणि शानच् ।) रक्ष्यमाणम् । इति व्याकरणम् ॥ (यथा, अथर्व्ववेदे । ६ । ४ । १ ।
"त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्त्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रायमाणं सहः ॥")

त्रायमाणा, स्त्री, (त्रायते इति । त्रै + शानच् ।) बला इति बहुला इति च ख्याता । तत्पर्य्यायः । वार्षिकम् २ त्रायन्ती ३ बलभद्रिका ४ । इत्यमरः ।२।४।१०५॥ त्राता ५ त्रायमाणिका ६ बलभद्रा ७ सुकामा ८ वार्षिकी ९ गिरिजा १० अनुजा ११ माङ्गल्यार्हा १२ देवबला १३ पालिनी १४ भयनाशिनी १५ अवनी १६ रक्षणी १७ त्राणा १८ । इति राजनिर्घण्टः ॥ सुभद्राणी १९ भद्रनामिका २० । इति रत्नमाला ॥ अस्य गुणाः । शीतत्वम् । मधुरत्वम् । गुल्मज्वरकफास्रभ्रमतृष्णाक्षयग्लानिविषच्छर्द्दिविनाशित्वञ्च । इति राजनिर्घण्टः ॥ पित्तनाशित्वम् । इति राजवल्लभः ॥ (यथा,—
"पटोलं पिचुमर्द्दञ्च दार्व्वीं कटुकरोहिणीम् ।
यष्ट्याह्वां त्रायमाणाञ्च दद्याद्वीसर्पशान्तये ॥"
इति चरके चिकित्सास्थाने एकादशेऽध्याये ॥)

त्रास, पुं, (त्रस + भावे घञ् ।) भयम् । इत्यमरः । १।७।२१॥ (यथा आर्य्यासप्तशत्याम् । ३७६ ।
"प्रणयचलितोऽपि सकपटकोपकटाक्षैर्भयाचितस्तम्भः ।
त्रासतरलो गृहीतः सहासरभसं प्रिय कण्ठे ॥")
मणिदोषः । इति मेदिनी । से, ४ ॥

त्रासदायी, [न्] त्रि, (त्रासं भयं ददातीति । दा + णिनि ।) भयदाता । तत्पर्य्यायः । शङ्करः २ । इति हेमचन्द्रः । ३ । १६३ ॥

त्रिंश, त्रि, (त्रिंशत् + "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) त्रिंशतः पूरणः । इति व्याकरणम् ॥ (यथा, तिथ्यादितत्त्वे ।
"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते ॥")

त्रिंशकः, त्रि, त्रिंशत्सम्बन्धः । सम्बन्धार्थे वुक्प्रत्ययः । इति सुपद्मव्याकरणम् ॥ (त्रिंशता क्रीतः । त्रिंशत् + "विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ।" ५ । १ । २४ । इति असंज्ञायां ड्वुन् । त्रिंशत्संख्यकद्रव्येण क्रीतः । इति सिद्धान्तकौमुदी ॥)

त्रिंशत्, स्त्री, (त्रयोदशतः परिमाणमस्य । "पङ्क्तिविंशतित्रिंशदिति ।" ५ । १ । ५९ । इति निपातनात् साधुः ।) संख्याविशेषः । त्रिश इति भाषा । एकवचनान्तोऽयम् । त्रिंशद्द्वये त्रिंशतौ । त्रिंशतो बहुत्वे त्रिंशतः । इति व्याकरणम् ॥ (यथा, मनुः । १ । २२ ।
"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला ।
त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः ॥")

त्रिंशत्पत्रं, क्ली, (त्रिंशत्संख्यकानि पत्राणि दलानि यस्य ।) कुमुदम् । इति शब्दमाला ॥

त्रिक, क्ली, (त्रयाणां सङ्घः । "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ।" ५।१।५८। इति कन् ।) पृष्ठवंशाधरः । इत्यमरः ।२।६।७६॥ (यथा, माघे । १२ । १० ।
"नस्या गृहीतोऽपि धुवन्विषाणयो-
र्युगं ससूत्कारविवर्त्तितत्रिकः ॥")
त्रयम् । इति मेदिनी । के, २६ ॥ (यथा, मनुः । ७ । ५१ ।
"दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥")
त्रिपथसङ्गमम् । इति हेमचन्द्रः । ४ । ५२ ॥
त्रिफला । त्रिकटु । त्रिमदः । यथा, सुखबोधे ।
"गुडूचीसारसंयुक्तात्त्रिकत्रयसमन्वयात् ।
वातरक्तं निहन्त्याशु सर्व्वरोगहरस्त्वयः ॥"
(तृतीयेन रूपेण ग्रहणं यस्य । तृतीय + "तावतिथं ग्रहणमिति लुग्वा ।" ५ । २ । ७७ । इति कन् पूरणप्रत्ययस्य च लुक् । तृतीयके, त्रि । यथा, मनुः । ८ । १४२ ।
"द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम् ।
मासस्य वृद्धिं गृह्णीयात् वर्णानामनुपूर्व्वशः ॥")

त्रिककुत्, [द्] पुं, (त्रीणि ककुत्-सदृशानि उच्चतुङ्गानि शृङ्गाणि यस्य ।) त्रिकूटपर्व्वतः । इत्यमरः । २।३।२ ॥ (यथा, शतपथब्राह्मणे । ३ । १ । ३ । १२ । "यत्र वा इन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्तं गिरिं त्रिककुदमकरोत् ॥" विष्णोर्नामविशेषः । यथा, महाभारते । १२ । ३४२ । ९० ।
"तथैवासं त्रिककुदो वाराहं रूपमास्थितः ।
त्रिककुत्तेन विख्यातः शरीरस्य प्रमापणात् ॥"

दशरात्रसाध्ययज्ञविशेषः । यथा, तैत्तिरीयसंहितायाम् । ७ । २ । ५ । २ ।
"त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविंशः ककुत्त्रयस्त्रिंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति ।")

त्रिकटः, पु, (त्रीन् वातपित्तश्लेष्मदोषान् कटति नाशयतीति । कट + अच् ।) गोक्षुरकः । इति शब्दरत्नावली ॥

त्रिकटु, क्ली, (त्रयाणां कटूनां शुण्ठीमरीचपिप्पलीनां समाहारः।) मिश्रितशुण्ठीमरीचपिप्पल्यः। तत्पर्य्यायः । त्र्यूषणम् २ व्योषम् ३ । इत्यमरः । २ । ९ । १११ ॥ कटुत्रयम् ४ कटुत्रिकम् ५ । अस्य गुणाः । दीपनत्वम् । श्वासकासत्वगामयगुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसनाशित्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
"विश्वोपकुल्या मरिचं त्रयं त्रिकटु कथ्यते ।
कटुत्रयन्तु त्रिकटु त्र्यूषणं व्योषमुच्यते ॥
त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान् ।
गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान् ॥"
इति भावप्रकाशः ॥

त्रिकण्ट, क्ली, (त्रयाणां कण्टानां दुरालभादमनीदुस्पर्शारूपाणां समाहारः।) मिलितदुरालभादमनीदुस्पर्शात्रयरूपम् । तत्पर्य्यायः । कण्टकारीत्रयम् २ कण्टकत्रयम् ३ । इति राजनिर्घण्टः ॥

त्रिकण्टः, पुं, (त्रीणि कण्टानि कण्टकानि यस्य ।) गोक्षुरकः । इति शब्दरत्नावली ॥ मत्स्यभेदः । इति शब्दचन्द्रिका ॥ तेकाँटामाछ इति भाषा । मत्स्यभेदः । टेङ्गरा इति भाषा । अस्य गुणाः । पित्तकफनाशित्वम् । रूक्षत्वम् । अग्निदीपनत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ॥
"त्रिकण्ट. स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः ।
त्रिपुट. कण्टकफलः श्वदंष्ट्रा गोक्षुरः क्षुरः ॥")

त्रिकण्टक, पु, (त्रीणि कण्टकानि यस्य ।) लघुगर्गमत्स्यः । इति त्रिकाण्डशेषः ॥ गोक्षुरकवृक्षः । इति हेमचन्द्रः । ४ । २२२ ॥ (यथा,—
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः ॥"
इति वैद्यकरत्नमालायाम् ॥)

त्रिका, स्त्री, (तिस्रोऽस्रयो यस्याः । "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु च ।" ५ । १ । ५८ । इति कन् । ततष्टाप् ।) कूपोपरिस्थपट्टप्रान्तभागः । भूमिष्ठकूपपट्टम् । इत्यन्ये ॥ कूपस्य समीपे रज्जुधारणार्थं निखातदारुयन्त्रम् । इति स्वामी ॥ इत्यमरटीकायां भरतः ॥

त्रिकाय, पु, (त्रिकं आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयं अयति गच्छत्यस्मादिति । अय गतौ + अपादाने घञ् । यद्वा, त्रिकं त्रिकालं अयति वेत्तीति । अय + अच् ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥

त्रिकार्षिकं, क्ली, (कर्षाय हितम् कार्षिकम् । त्रयाणां कार्षिकाणां समाहारः ।) मिलितनागरातिविषामुस्तात्रयरूपम् । इति राजनिर्घण्टः ॥

त्रिकालज्ञ, पु, (त्रिकालं वर्त्तमानातीतभविष्यत्कालविवरणं जानातीति । ज्ञा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) बुद्धः । इति हेमचन्द्रः । २ । १४६ ॥ सर्व्वज्ञे, त्रि ॥ (यथा, बृहत्संहितायाम् । १७ । १ ।
"युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः ॥")

त्रिकालदर्शी, [न्] पु, (त्रिकालं वर्त्तमानातीतभविष्यद्रूपं पश्यतीति । दृश + णिनिः ।) ऋषिः । इति हलायुधः ॥ भूतभविष्यद्वर्त्तमानवेत्तरि, त्रि ॥ (यथा, बृहत्संहितायाम् । २१ । ४ ।
"अस्मिन्नपि काले त्रिकालदर्शी कलौ भवति ॥")

त्रिकालवित्, पु, (त्रिकालं वेत्तीति । विद् + क्विप् ।) बुद्धः । इति हलायुधः ॥ त्रिकालज्ञे, त्रि ॥

त्रिकूटं, क्ली, (त्रिकूटः पर्व्वतः उत्पत्तिस्थानत्वेनास्त्यस्येति अर्श आदित्वादच् ।) सिन्धुलवणम् । सामुद्रलवणम् । इति रत्नमाला ॥

त्रिकूटः, पु, (त्रीणि कूटानि शृङ्गाणि यस्य ।) पर्व्वतविशेषः । यस्योपरि लङ्का । (यथा, रामायणे । ५ । २ । १ ।
"स सागरमनाधृष्यमतिक्रम्य महाबलः ।
त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह ॥")
तत्पर्य्यायः । त्रिककुत् २ । इत्यमरः । २।३।२॥ सुवेलः ३ त्रिसकुटः ४ । इति हेमचन्द्रः ॥ त्रिशृङ्गः ५ । चित्रकूटकः ६ । इति शब्दरत्नावली ॥ (अयन्तु पीठस्थानानामन्यतमः । अत्र भगवती रुद्रसुन्दरीरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६६ ।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी ॥")
क्षीरोदसमुद्रतीरस्थपर्व्वतः । यथा,—
"सर्व्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्व्वत. ।
सुतः पर्व्वतराजस्य सुमेरोर्भास्करद्युतेः ॥
क्षीरोदजलवीच्याढ्यो धौतामलशिलातलः ।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः ॥
अप्सरोभिः परिवृतः श्रीमान् प्रस्रवणाकुलः ।
गन्धर्व्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः ॥
विद्याधरैः सपत्नीकैः संयतैश्च तपस्विभिः ।
वृकद्वीपिगजेन्द्रैश्च वृतगात्रो विराजते ॥
पुन्नागैः कर्णिकारैश्च बिल्वामलकपाटलैः ।
चूतनिम्बकदम्बैश्च चन्दनागुरुचम्पकैः ॥
शालैस्तालैस्तमालैश्च शरलार्ज्जुनपिप्पलैः ।
तथान्यैर्विविधैर्वृक्षैः सर्व्वतः समलङ्कृतः ॥
नानाधात्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः ।
शोभितो रुचिरप्रख्यैस्त्रिभिर्व्विस्तारसानुभिः ॥
मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः ।
जीवञ्जीवकसंघुष्टैश्चकोरशिखिनादितैः ॥
तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः ।
नानापुष्पसमायुक्तं नानागन्धाधिवासितम् ॥
द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः ।
पाण्डुराम्बुदसंकाशं तुषारचयसन्निभम् ॥
वज्रेन्द्रनीलवैदूर्य्यतेजोभिर्भासयन् दिशः ।
तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम् ॥
न तत् कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ।
नातप्ततपसो लोके ये च पापकृतो जनाः ॥
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम् ।
कारण्डवसमाकीर्णं राजहंसोपशोभितम् ॥
गजो यूथपसंकाशो मदाचलितलोचनः ।
तृषितः पातुकामोऽसावबतीर्णश्च तज्जलम् ॥
स लीनः पङ्कजवने यूथमध्यगतश्चरन् ।
गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्त्तिना ॥
गरुड़स्थो जगन्नाथो लोकाधारस्तपोधनः ।
ग्राहग्रस्तं गजेन्द्रं तं तञ्च ग्राहं जलाशयात् ॥
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः ।
स्थलस्थं दारयामास ग्राहं चक्रेण माधवः ॥
मोचयामास नागेन्द्रं पापेभ्यः शरणागतम् ॥"
इति वामनपुराणम् ॥
(घोटकविशेषः । यथा, नकुलकृताश्वचिकित्सिते । ४ । ६ ।
"त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः ।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः ॥")

त्रिकूटलवणं, क्ली, (त्रिकूटं सामुद्रमिव लवणम् ।) द्रौणीलवणम् । इति राजनिर्घण्टः ॥

त्रिकोण, क्ली, (त्रयः कोणा यस्य ।) योनिः । इति शब्दार्थकल्पतरुः ॥ (कामरूपपीठविशेषः । यथा, शब्दार्थचिन्तामणिधृतवचनम् ।
"करतोयां समारभ्य यावद्दिक्करवासिनी ।
शतयोजनविस्तारं त्रिकोणं सर्व्वसिद्धिदम् ॥")
लग्नात् नवमपञ्चमलग्ने । इति दीपिका ॥ (त्रिभुजक्षेत्रभेदः । इति लीलावती ॥) त्र्यस्रे, त्रि । त्रिकोणवस्तूनि यथा । हलः १ शिवचक्षुः २ कामाख्या ३ वह्निमण्डलम् ४ एकारः ५ वज्रम् ६ शृङ्गाटम् ७ शकटादि ८ योनिः ९ । इति कविकल्पलता ॥

त्रिकोणफलं, क्ली, (त्रिकोणं त्र्यस्रं फलं यस्य ।) शृङ्गाटकम् । इति भावप्रकाशः ॥

त्रिक्षारं, क्ली, (त्रयाणां क्षाराणां समाहारः ।) क्षारत्रयम् । मिलितसर्ज्जिकाक्षारयवक्षारटङ्कणक्षाराणि । इति राजनिर्घण्टः ॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे क्षारणमारणाधिकारे ।
"सर्ज्जिका टङ्कणञ्चैव यवक्षार उदाहृतः ॥")

त्रिक्षुरः, पु, (त्रीणि क्षुराणीवाग्राणि यस्य ।) कोकिलाक्षवृक्षः । इति रत्नमाला ॥ कुलेखाड़ा इति भाषा ॥

त्रिखं, क्ली, त्रपुषम् । इति शब्दचन्द्रिका ॥

त्रिखट्ट, क्ली, तिसृणां खट्टानां समाहारः । खट्टात्रयम् । इत्यमरः । ३ । ५ । ४१ ॥

त्रिखट्टी, स्त्री, (तिसृणां खट्टानां समाहारः । "द्विगोः ।" ४ । १ । २१ । इति ङीप् ।) त्रिखट्टम् । इत्यमरः । ३ । ५ । ४१ ॥

त्रिगणः, पुं, (त्रयाणां धर्म्मार्थकामानां गणो वर्गः ।) त्रिवर्गः । धर्म्मार्थकामाः । इत्यमरटीकायां नीलकण्ठः ॥ (यथा, किरातार्ज्जुनीये । १ । ११ ।
"गुणानुरागादिव सख्यमीयिवा-
न्न बाधतेऽस्य त्रिगणः परस्परम् ॥")
त्रिगर्त्तः, पुं, (त्रयो गर्त्ता यत्र ।) देशविशेषः । लाहोराख्यदेशैकभागः । तत्पर्य्यायः । जालन्धरः २ । इति हेमचन्द्रः । ४ । २४ ॥ (देशोऽयं कूर्म्मविभागे उत्तरस्यामुक्तः । यथा, बृहत्संहितायाम् । १४ । २५ ।
"उत्तरतः कैलासः" इत्युपक्रम्य,—
"त्रिगर्त्ततुरगाननाश्वमुखाः ॥"
इत्युक्तवान् ॥)
तद्देशस्थे पुं भूम्नि । (यथा, महाभारते । २ । २७ । १८ ।
"ततस्त्रिगर्त्तान् कौन्तेयं दार्व्वाः कोकनदास्तथा ।
क्षत्रिया बहवो राजन्नुपावर्त्तन्त सर्व्वशः ॥")
गणितान्तरम् । इति मेदिनी । ते, ११३ ॥
त्रिगर्त्तकः, पुं, (त्रिगर्त्त एव । स्वार्थे कन् ।) त्रिगर्त्तदेशः । इति त्रिकाण्डशेषः ॥
त्रिगर्त्ता, स्त्री, (त्रयो गर्त्ता यस्याः ।) घुर्घुरिका । (त्रयो बहवो गर्त्ता इव योनिद्वाराणि यस्याः ।) कामुकाङ्गना । इति मेदिनी । ते, ११३ ॥
त्रिगर्त्तिकः, पुं, (त्रयो गर्त्ताः सन्ति यत्र । त्रिगर्त्त + बहुलवचनात् ठन् ।) त्रिगर्त्तदेशः । इति भूरिप्रयोगः ॥
त्रिगुणं, क्ली, (त्रयाणां सत्त्वरजस्तमसां गुणानां समाहारः ।) सत्त्वरजस्तमांसि । इति श्रीभागवतम् ॥ (प्रधानः । यथा, भागवते ।४।२४।२८।
"यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ।"
"रंहसः सूक्ष्मात् त्रिगुणात् प्रधानात् जीवसंज्ञितात् पुरुषाच्च परम् ॥" इति तट्टीकायां स्वामी ॥) त्रयाणां पूरणे गुणत्रययुक्ते च त्रि ॥ (यथा, मनुः । १ । १५ ।
"महान्तमेव चात्मानं सर्व्वाणि त्रिगुणानि च ।
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च ॥"
त्रयो गुणा आवृत्तयो यस्य । त्रिभिर्गुणिते । यथा, रघुः । २ । २५ ।
"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")
त्रिगुणा, स्त्री, (त्रयो गुणा यस्याः ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"यदेभिस्त्रिभिर्व्वलिभिर्बद्धो रागादिचिपदाथ सा ।
उत्पत्तिस्थितिनाशेषु रजादिस्त्रिगुणा मता ॥"
(तथाच देवीभागवते । १२ । ६ । ६५ ।
"त्रिगुणा त्रिपदा तन्द्री तुलसी तरुणातरुः ॥"
स्वनामख्यातो बीजभेदः । इति तन्त्रसारः ॥)
त्रिगुणाकृतं, त्रि, (त्रिगुणा कर्षणं कृतम् । त्रिगुण + कृतम् । "संख्यायाश्च गुणान्तायाः ।" ५ । ४ । ५६ । इति डाच् ।) वारत्रयकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥

त्रिजटा, स्त्री, (तिस्रो जटा यस्याः ।) राक्षसीविशेषः । यथा,—
"सीतां ताभिरनार्य्याभिर्दृष्ट्वा सन्तर्ज्जितां सदा ।
राक्षसी त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत् ॥"
इति रामायणे सुन्दरकाण्डे २७ अध्यायः ॥ * ॥
बिल्ववृक्षः । यथा, ज्ञानभैरवतन्त्रे ६ पटले ।
"शृणु देवि ! प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम् ।
यत्रं ब्रह्ममयं देवि । अद्भुतं वरवर्णिनि । ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
विष्णुप्रीतिकरस्यैव मम प्रीतिकरः सदा ॥
ब्रह्मविष्णुशिवाः पत्रे वृन्तञ्च शक्तिरूपिणी ।
वृन्तमूले तु वश स्यात् पत्र ब्रह्म त्विद प्रिये ! ॥
एकञ्च त्रिजटापत्रैर्धरं या हरिमर्च्चयेत् ।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः ॥"
अन्यत् बिल्वशब्दे द्रष्टव्यम् ॥ (भगवती । सा च गायत्त्रीस्वरूपा । यथा, देवीभागवते ।१२।६।७२।
"त्रिजटा तित्तिरी तृष्णा त्रिविधा तरुणाकृतिः ॥")
त्रिजातकं, क्ली, (त्रिगुणितं जातं सुगन्धिद्रव्यरूपम् । ततः स्वार्थे कन् ।) मिलिततुल्यत्वगेलापत्राणि । यथा,—
"एलादित्रिभिरुद्दिष्टं त्रिजातं त्रिसुगन्धिकम् ।
चातुर्जातं सनागन्तु द्वय वातकफापहम् ॥"
अपि च ।
"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते ॥"
इति राजनिर्घण्टः ॥
(अस्य लक्षणपर्य्याया यथा,—
"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
तद्द्वय रेचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् ।
लघुपित्ताग्निकृद्बल्यं कफवातविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
त्रिण, क्ली, (तृण + पृषोदरादित्वात् साधु ।) तृणम् । इति शब्दरत्नावली ॥ (यथा, तृणशब्दव्युत्पत्तौ उज्ज्वलदत्तः । ५ । ८ ।
"रेफेकारसंयुक्तमप्युत्पन्नं शब्दान्तरमस्ति ।
'उत्थितत्रिणपत्रपांशुविहग' सौम्यस्वनः
पूजितः ।'
इति वराहः ॥")
त्रिणता, स्त्री, (त्रिषु स्थानेषु नता । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) धनुः । इति त्रिकाण्डशेषः ॥ (यथा, माघे । १९ । ६१ ।
"स्वगुणैराप्तफलप्राप्तेराकृष्य गणिका इव ।
कामुका इव नालीकास्त्रिणताः सहसामुचन् ॥"
त्रिणस्य भावः । त्रिण + तल् ।) त्रिणत्वञ्च । (त्रिषु स्थानेषु नते, त्रि । यथा, रामायणे । ६ । २० । २८ ।
"भिन्नमुष्टिपरिच्छेदं त्रिणतं रुक्मभूषितम् ।
बाणपातान्तरे रामः पतितं पुरुषर्षभम् ।
शयान लक्ष्मणो दृष्ट्वा निराशो जीवितेऽभवत् ॥")
त्रिणाचिकेतः, पुं, (त्रिकृत्वश्चितो नाचिकेतोऽग्निर्येन । पूर्व्वपदादिति णत्वम् ।) यजुर्व्वेदैकदेशो ग्रन्थः । तद्वेदाध्यायी । (यथा, मनुः । ३ । १८५ ।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥"
"त्रिणाचिकेतः अध्वर्य्युवेदभागस्तद्व्रतञ्च तद्योगात् पुरुषोऽपि त्रिणाचिकेतः ॥" इति तट्टीकायां कुल्लूकभट्टः ॥ नारायणस्य नामविशेषः । यथा, महाभारते १२ । ३३८ । ४ ।
"पञ्चाग्ने । त्रिणाचिकेत । षडङ्गनिधान । ॥")
त्रितक्षं, क्ली स्त्री, त्रयाणां तक्षाणां समाहारः । तक्षत्रयम् । इत्यमरः । ३ । ५ । ४१ ॥
त्रितयं, क्ली, (त्रयोऽवयवा अस्य । त्रि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् ।) त्रयम् । इति व्याकरणम् ॥ (यथा, महाभारते । १३ । १११ । १८ ।
"धर्म्मश्चार्थश्च कामश्च त्रितयं जीविते फलम् ।
एतत्त्रयमवाप्तव्यमधर्म्मपरिवर्ज्जितम् ॥"
त्रिप्रकारे, त्रि । यथा, पञ्चदश्याम् । १।४६ ।
"त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीम् ।
अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते ॥")
त्रिदण्डः, पुं, (त्रिदण्डं चतुरङ्गुलगोवालवेष्टनादन्योन्यसम्बन्धं अस्त्यस्येति । अर्श आदित्वात् अच् ।) सन्न्यासाश्रमः । यथा,—
"यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः ।
ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥"
इति श्रीभागवतम् ॥
(त्रयाणां दण्डानां समाहारः । यतित्रिदण्डे, क्ली । यथा, महाभारते । १२ । ३२० । १५५ ।
"सप्ताङ्गस्यास्य राज्यस्य त्रिदण्डस्येव तिष्ठतः ।
अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः ॥"
कायवाङ्मनोदण्डत्रये । यथा, मनुः । १२।११ ।
"त्रिदण्डमेतन्निक्षिप्य सर्व्वभूतेषु मानवः ।
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति ॥
"सत्त्वमात्मा शरीरञ्च त्रयमेतत्त्रिदण्डवत् ।
लोकास्तिष्ठति संयोगात्तत्र सर्व्वं प्रतिष्ठितम् ॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥)
त्रिदण्डी, [न्] पुं, (त्रिदण्डमस्त्यस्येति । इनि ।) त्रिदण्डधारियतिः । (यथा, महाभारते । १२ । ३२० । ८ ।
"तथा जगदिदं कृत्स्नमटन्त्या मिथिलेश्वरः ।
तत्र तत्र श्रुतो मोक्षे कथ्यमानस्त्रिदण्डिभिः ॥")
कायवाङ्मनोदण्डयुक्तः । इति श्रीभागवतम् ॥ (यथा, मनुः । १२ । १० ।
"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥")
यज्ञोपवीतम् । इति लोकप्रसिद्धिः ॥
त्रिदला, स्त्री, (त्रीणि त्रीणि दलानि पत्राणि यस्याः ।) गोधापदी लता । इति जटाधरः ॥
त्रिदलिका, स्त्री, (त्रीणि दलानि यस्याः । कापि अत इत्वम् ।) घर्म्मकषा । इति शब्दचन्द्रिका ॥
त्रिदशः, पुं, (तृतीया यौवनाख्या दशा यस्य । यद्वा, त्रिशब्दस्यात्र त्रिभागवत् तृतीयार्थकता । यद्वा, तिस्रो जन्मसत्ताविनाशाख्याः न तु मर्त्यानामिव

वृद्धिपरिणामक्षयाख्याः दशा यस्य। यद्वा, त्रीन् तापान् दशति नाशयतीति। दन्श+ मूलविभुजादित्वात् कः पृषोदरादित्वात् न-लोपः। यद्वा, त्र्यधिकास्त्रिरावृत्ताश्च दश परिमाणमस्य। समासे डच्। शाकपार्थि-वादिवत् मध्यलोपः।) देवः। इत्यमरः। १।१।७॥ (यथा, महाभारते। ३।८५।१६।
"न्यवसत् परमप्रीतो ब्रह्मा च त्रिदशैः सह॥"
ते च अर्का द्वादश १२ रुद्रा एकादश ११ वसवोऽष्टौ ८ विश्वेदेवौ द्वौ २ समुदायेन त्रय-स्त्रिंशत् ३३॥ त्रिंशत् परिमिते, त्रि। यथा, महाभारते। १।११३।२१।
"ततः स कौरवो राजा विहृत्य
त्रिदशा निशाः॥")

त्रिदशदीर्घिका, स्त्री, (त्रिदशानां देवानां दीर्घिका।) स्वर्गङ्गा। इति हेमचन्द्रः। ४। १४७॥

त्रिदशमञ्जरी, स्त्री, (त्रिदशप्रिया मञ्जरी यस्याः।) तुलसी। इति राजनिर्घण्टः॥ (तुलसीशब्देऽस्या गुणादयो व्याख्याताः॥)

त्रिदशायुधं, क्ली, (त्रिदशानां देवानां आयुधम्।) वज्रम्। इति त्रिकाण्डशेषः॥

त्रिदशारिः, पु, (त्रिदशानामरिः शत्रुः।) असुरः। इति शब्दरत्नावली॥

त्रिदशालयः, पु, (त्रिदशानां देवानां आलयः।) स्वर्गः। इत्यमरः। १।१।६॥ (यथा, महा-भारते। १।७६।६६।
"गुरोरुष्य सकाशे तु दशवर्षशतानि सः।
अनुज्ञातः कचो गन्तुमियेष त्रिदशालयम्॥")
सुमेरुपर्व्वतः। इति हलायुधः॥

त्रिदशावासः, पुं, (त्रिदशानां सुराणां आवासो वासस्थानम्।) स्वर्गः। इति हलायुधः॥

त्रिदशाहारः, पुं, (त्रिदशानां आहारः।) अमृ-तम्। इति हलायुधः॥

त्रिदशेश्वरी, स्त्री, (त्रिदशानामिन्द्रादिदेवाना-मीश्वरी।) दुर्गा। यथा,—
"सुराङ्गास्त्रिदशा देवा नन्दिनी दुन्दुभिर्म्मता।
तेषाञ्च नन्दिनी नन्दी ईशत्वात् त्रिदशेश्वरी॥"
इति देवीपुराणे ४५ अध्यायः॥
(गङ्गा। यथा, काशीखण्डे। २६। ७२।
"तपस्वी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी॥")

त्रिदिनस्पृक्, [श्] पुं, (त्रिदिनं चान्द्रदिनत्रयं स्पृशतीति। स्पृश्+क्विप्।) त्र्यहस्पर्शः। यथा,
"तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्-भवत्यवमदिनम्। त्रिदिनस्पृक् दिनत्रयसंस्पर्शा-दहः।" इति ज्योतिस्तत्त्वम्॥

त्रिदिवः, पु, (त्रयो ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति। दिव+"हलश्च।" ३।२।१२१। इति घञ्। संज्ञापूर्व्वकत्वात् न गुणः। यद्वा, दीव्यन्तीति दिवाः। इगुपधज्ञेति कः। त्रयः सत्त्वरजस्तमो-रूपाः दिवाः क्रीड़का विलासका इत्यर्थः यत्र।
"तृतीया द्यौस्त्रिदिवः। अन्यर्थे कविधानं इति-विषये संख्याशब्दस्य पूरणार्थत्वं त्रिभागवत्।"
इति शिशुपालवधटीकायां मल्लिनाथः। १। ३६।) स्वर्गः। इत्यमरः। १।१।६॥ (यथा, मनुः। ९। २५३।
"रक्षणादार्य्यवृत्तानां कण्टकानाञ्च शोधनात्।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः॥")
क्ली, आकाशः। इति हेमचन्द्रः॥

त्रिदिवा, स्त्री, नदीभेदः। इति मेदिनी। वे, ३७॥ (यथा, मत्स्यपुराणे। ११३। ३१।
"त्रिभामा ऋषिकुल्या च इक्षुदा त्रिदिवा-चला॥")

त्रिदिवेशः, पु, (त्रिदिवस्य स्वर्गस्य ईशः।) देवः। इत्यमरः। १।१।७॥

त्रिदिवोद्भवा, स्त्री, (त्रिदिवादुद्भवो यस्याः।) स्थूलैला। इति राजनिर्घण्टः॥ (गङ्गा। स्वर्गोद्भवमात्रे, त्रि। इति व्युत्पत्तिलब्धोऽर्थः॥)

त्रिदृक्, [श्] पु, (तिस्रः दृशो नेत्राणि यस्य।) शिवः। इति हेमचन्द्रः। २।११०॥

त्रिदोषं, क्ली, (त्रयाणां दोषाणां समाहारः।) दोषत्रयम्। वातपित्तकफरूपम्। इति राज-निर्घण्टः॥

त्रिदोषजः, त्रि, (त्रिदोषाज्जायते इति। जन+ "पञ्चम्यामजातौ।" ३।२।९८। इति डः।) त्रिदोषजनितः। सन्निपातरोगः। यथा —
"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः।
किराततिक्तादिगणः प्रयोज्यः
शुद्धार्थिने वा त्रिवृता विमिश्रः॥"
इति चक्रपाणिदत्तः॥
("दृष्ट्वा त्रिदोषजं घोरं ज्वरं प्राणापहारकम्।
तस्मादादौ कफस्यास्य शोषणं परिकीर्त्तितम्॥
न कुर्य्यात् पित्तशमनं यदीच्छेदात्मनो यशः।
कफो वातो बलीयांस्तु सद्यो हन्ति रुजातुरम्॥
लङ्घनं वमनं वारि ष्ठीवनं स्यात्त्रिदोषजे।
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा॥
लङ्घनञ्च समुद्दिष्टं ज्ञात्वा दोषबलाबलम्।
कफं विशोषितं ज्ञात्वा ततो वातनिवारणम्॥
पित्तसंशमनं कार्य्यं ज्ञात्वा पित्तस्य कोपनम्।
शोषणीयौ वातकफौ न तु पित्तं विनाशयेत्॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥)

त्रिधा, व्य, (त्रि+"संख्याया विधार्थे धा।" ५। ३।४२। इति धा।) त्रिप्रकारः। इति मुग्धबोधम्॥ यथा, वराहपुराणे।
"नारायणः परो देवः सत्त्वरूपो जनार्द्दनः।
त्रिधात्मानं स भगवान् ससर्ज परमेश्वरः॥"
(यथा, महाभारते। १३। १४१। ७८।
"धर्म्मेणार्थः समाहार्य्यो धर्म्मलब्धं त्रिधा धनम्।
कर्त्तव्यं धर्म्मपरमं मानवेन प्रयत्नतः॥")

त्रिधातु, पुं, (त्रीन् धर्म्मार्थकामान् दधाति पुष्णातीति। धा+तुन्।) गणेशः। इति त्रिकाण्ड-शेषः॥ (त्रयाणां धातूनां समाहारः।) धातु-त्रये, क्ली॥

त्रिधामा, [न्] पु, (त्रीणि भूरादीनि सत्त्वा-दीनि वा धामानि स्थानानि यस्य।) विष्णुः। (यथा, मुकुन्दमालायाम्। ११।
"तृष्णातोये मदनपवनोद्धूतमोहोर्म्मिमाले
दारावर्त्ते सहजतनयग्राहसङ्घाकुले च।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्।
पादाम्भोजे वरद! भवतो भक्तिनावं प्रसीद॥")
शिवः। अग्निः। मृत्युः। इति शब्दार्थकल्प-तरुः॥ (दशमद्वापरस्य व्यासः। यथा, देवी-भागवते। १।३।२८।
"सारस्वतस्तु नवमे त्रिधामा दशमे तथा॥")
धामत्रये, क्ली स्त्री च॥ (क्ली, स्वर्गः। यथा, भागवते। ३।२४।२०।
"हंसो हंसेन यानेन त्रिधाम परमं ययौ॥"
"त्रिधाम तृतीयं धाम स्वर्गः तस्य परां काष्ठां सत्यलोकम्॥" इति तट्टीकायां स्वामी॥)

त्रिधारकः, पुं, (त्रिस्रो धारा यस्य। ततः स्वार्थे संज्ञायां वा कन्।) गुण्डतृणम्। इति राज-निर्घण्टः॥ (त्रयाणां धारकाणां समाहारः।) धारकत्रये, क्ली॥

त्रिधारस्नुही, स्त्री, (त्रिषु भागेषु धारा यस्याः। सा एव स्नुही।) स्नुहीविशेषः। तत्पर्य्यायः। त्र्यस्रः २ धारास्नुही ३। इति राजनिर्घण्टः॥

त्रिनयनः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि नय-नानि यस्य। "क्षुभ्नादिषु च।" ८।४।३९। इति निषेधात् न णत्वम्।) शिवः। इति हला-युधः॥ (यथा, महाभारते। १४।८।२७।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम्॥")
नयनत्रये, स्त्री॥ (लोचनत्रयविशिष्टे, त्रि। यथा, मातृकासरस्वतीध्याने।
"मुद्रामोक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजे-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-माश्रये॥")

त्रिनयना, स्त्री, (त्रीणि नयनानि यस्याः। टाप्।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।
"पश्चिमां चोत्तरं लोकं तथा ब्रह्मायनं परम्।
नयं सम्मार्गधर्म्मत्वं दृष्टौ त्रिनयना मता॥"

त्रिनेत्रः, पुं, (त्रीणि नेत्राणि यस्य।) शिवः। यथा, नैषधे। १।६।
"दिगीशवृन्दांशविभूतिरीशिता
दिशां स कामप्रसराक्रोधिनीम्।
दधार शास्त्राणि दृशं द्वयाधिकां
निजत्रिनेत्रावतरत्वबोधिकाम्॥"
तस्य गणाः। यथा, मत्स्यपुराणे।
"ततः साध्यगणानीशस्त्रिनेत्रानसृजत् पुनः।
कोटयश्चतुराशीतिर्जरामरणवर्जिताः॥
वामः स्वजनमर्त्यांस्तान् ब्रह्मणा विनिवारितः।
नैवंविधा भवेत् सृष्टिर्जरामरणवर्जिता॥"

त्रिनेत्रचूडामणिः, पुं, (त्रिनेत्रस्य महादेवस्य चूड़ामणिः शिरोभूषणम्।) चन्द्रः। इति त्रिकाण्डशेषः॥

त्रिनेत्रा, स्त्री, (त्रीणि नेत्राणीव शरीरे यस्याः ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥ नेत्रत्रययुक्ता च ॥

त्रिपताकं, क्ली, (तिस्रः पताका इव रेखा यत्र ।) रेखात्रयाङ्कितभालम् । इति हारावली ।११४॥ (तिस्रः पताका इव अङ्गुलयो यत्र । त्रिपताकलक्षणान्विते हस्ते, पुं । यथा, साहित्यदर्पणे । ६ । १५४ ।

"त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते तज्जनान्तिकम् ॥"

"यः कश्चिदर्थो यस्माद्‌ गोपनीयस्तस्यान्तरत ऊर्द्ध्वं सर्व्वाङ्गुलिनामितानामिकं त्रिपताकलक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तज्जनान्तिकम् ॥")

त्रिपत्र, क्ली, (त्रीणि त्रीणि पत्राणि यत्र ।) दलत्रययुक्तबिल्वपत्रम् । यथा,—

विष्णुरुवाच ।

"ऊर्द्धपत्रं हरो ज्ञेयं पत्रं वामं विधिं स्वयम् । अह दक्षिणपत्रञ्च त्रिपत्रदलमित्युत ॥"

इति बृहद्धर्म्मपुराणे बिल्वपत्रमाहात्म्ये ११ अध्यायः ॥

त्रिपत्रः, पुं, (त्रीणि त्रीणि पत्राणि यस्य ।) बिल्वः । इति राजनिर्घण्टः ॥ पत्रत्रये स्त्री ॥

त्रिपत्रक, पुं, (त्रीणि त्रीणि पत्राणि यस्य ।) पलाशवृक्षः । इति हेमचन्द्रः । ४ । २०२ ॥ (त्रयाणां पत्राणां समाहारः । ततः कन् । तुलस्यादि पत्रत्रये, क्ली । यथा, देवीपुराणे ।

"तुलसीकुन्दमालूरपत्राणाञ्च त्रिपत्रकम् ॥")

त्रिपथं, क्ली, (त्रयाणां पथां समाहारः । "ऋक्पूरिति ।" ५ । ४ । ७४ । इत्य. ।) त्रिमार्गम् । तेमाथा पथ इति भाषा । तत्पर्य्यायः । त्रिकम् २ । इति हेमचन्द्रः । ४ । ५२ ॥

"शून्यागारे श्मशाने वा निर्ज्जने वा चतुष्पथे । बिल्वधात्रीद्रुमस्यान्ते त्रिपथे वा भवेन्निशि । स भवेत् सर्व्वसिद्धीशः सर्व्ववेदविदां वरः ॥"

इति गुप्तसाधनतन्त्रम् ॥

(तिसृणां नाडीनां पन्थाः । इति विग्रहे कपालकुहरे, पुं । यथा, हठयोगप्रदीपिकायाम् ।३।३७।

"कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत् । सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते ॥")

त्रिपथगा, स्त्री, (त्रिपथे स्वर्गमर्त्त्यपातालमार्गे गच्छतीति । गम+ड. ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥ (अस्या निरुक्तिरुक्ता यथा, रामायणे । १ । ४३ । ६ ।

"गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च । त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता ॥")

त्रिपदा, स्त्री, (त्रयः पादा मूलानि यस्याः । टापि पादस्य पद्भावः ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"गोधापदी तु सुवहा त्रिपदा हंसपद्यपि ॥"

इति वैद्यकरत्नमालायाम् ॥

(त्रयः पादाश्चरणानि यस्याः । त्रिपादयुक्ते, त्रि । यथा, मनुः । २ । ८१ ।

"ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः । त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")

त्रिपदिका, स्त्री, (त्रयः पादा अस्याः, इति त्रिपदी ततः सञ्ज्ञायां कन् ततष्टाप् ।) अर्घ्यार्थधातुनिर्म्मितत्रिपादयुक्तशङ्खाधारः । इति तन्त्रसारः ॥ ("तत्र त्रिपदिकामारोप्य तदुपरि शङ्खं स्थापयेत् ।" इति पूजापद्धतिः ॥)

त्रिपदी, स्त्री, (त्रयः पादा यस्याः । ङीपि पद्भावः ।) गोधापदी । इति रत्नमाला ॥ हस्तिगात्रबन्धः । इति हेमचन्द्रः ।४।२९६ ॥ (हस्तिपादबन्धनम् । इति यादवः ॥ यथा, रघुः । ४ । ४८ ।

"नाससत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥")

त्रिपादयुक्ता । पदत्रयम् । इति व्याकरणम् ॥ भाषाकवितायाश्छन्दोविशेषः । यथा,—

"मणिस्फटिकान्ता यदि यमकान्ता
द्वादश परिगतमात्रा ।
किन्नरगीतिः तदिति निवीतिः
स्याद्विसमाचरणात्रा ॥"

स्यपादान्त उदाहृतः ।

"येषा सङ्गीतके नित्यं निवीतिः किन्नराश्रिका । सैव स्यात् प्राकृते गाने त्रिपदीति परिस्मृता ॥"

इति काव्योदयः ॥

(त्रिषु मार्गेषु पादो गमनं यस्याः । गङ्गा । यथा, काशीखण्डे । २९ । ७६ ।

"त्रैलोक्यलक्ष्मीस्त्रिपदी तथा तिमिरचन्द्रिका ॥")

त्रिपर्णः, पुं, (त्रीणि त्रीणि पर्णानि यस्य ।) पलाशः । इति राजनिर्घण्टः ॥

त्रिपर्णिका, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः । सञ्ज्ञायां कन् । टापि अत इत्वञ्च ।) कन्दविशेषः । तत्पर्य्यायः । छिन्नपत्रा २ छिन्नग्रन्थिनिका ३ कन्दाढ्या ४ कन्दबहुला ५ अम्लवल्ली ६ विदारुहा ७ त्रिपर्णी ८ । अस्या गुणाः । मधुरत्वम् । शीतलम् । श्वासकासविषव्रणविनाशित्वम् । पित्तप्रकोपशमनत्वञ्च । इति राजनिर्घण्टः ॥

त्रिपर्णी, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः । गौरादित्वात् ङीष् ।) शालपर्णी । इति भावप्रकाशः ॥ (अस्या गुणा यथा,—

"यातुकः शालकल्याणी त्रिपर्णी पीलुपर्णिका । शाकङ्गुरु च रूक्षञ्च प्रायो विष्टभ्य जीर्य्यति । मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम् ॥"

इति चरके सूत्रस्थाने २७ अध्याये ॥)

वनकार्पासी । पृश्निपर्णीभेदः । इति रत्नमाला ॥

त्रिपात्, [द्] पुं, (त्रयः पादा अस्य । "सङ्ख्यासुपूर्व्वस्य ।" ५ । ४ । १४० । इति पादस्यान्त्यलोपः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (वेदादिमते संसाररहितो ब्रह्मस्वरूपः पुरुषः । यथा, ऋग्वेदे । १० । ९० । ४ ।

"त्रिपादूर्द्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ॥"

पुराणादिमते वामनावतारे त्रिपाद् भूत्वा बलिसकाशात् सर्व्वं राज्यादिकं गृहीतवानित्यतोऽस्य तथात्वम् । तथाच भागवते ।८।२०।३४।

"क्षितिं पदैकेन बलेर्विचक्रमे
नभः शरीरेण दिशश्च बाहुभिः ।
पदं द्वितीयं क्रमतस्त्रिविष्टपं
न वै तृतीयाय तदीयमण्वपि ।
उरुक्रमस्याङ्घ्रिरुपर्य्युपर्य्यथो
महर्जनाभ्यां तपसः परं गतः ॥")

ज्वरः । यथा,—

"विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥"

इति श्रीभागवतम् ॥

त्रिपादिका, स्त्री, (त्रयः पादाः मूलानि यस्याः । कप् ततष्टापि अत इत्वम् ।) हंसपदीलता । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"हंसपादी हंसपदी कीटमाता त्रिपादिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

त्रिपिष्टप, क्ली, (त्रिदशानां देवानां पिष्टपं वासस्थानम् । पृषोदरादित्वात् दशशब्दस्य लोपः । यद्वा, मर्त्त्यपातालापेक्षया तृतीयं पिष्टपम् भुवनम् । इत्थं त्रिशब्दस्य त्रिभागवत् पूरणार्थता ।) स्वर्गः । इत्यमरः । १ । १ । ६ ॥ (यथा, महाभारते । १ । २०८ । ३५ ।

"तत् त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत ॥")

आकाशम् । इति शब्दरत्नावली ॥

त्रिपिष्टपसत्, [द्] पुं, (त्रिपिष्टपे स्वर्गे सीदतीति । सद+क्विप् ।) देवता । इति हलायुधः ॥

त्रिपुट, पुं, (त्रीणि पुटानि यस्य ।) सतीलकः । तीरम् । इति मेदिनी । टे, ४५ । हस्तमेदः । तालकः । इति शब्दरत्नावली ॥ गोक्षुरवृक्षः ॥ इति रत्नमाला ॥ (कलायविशेषः । खेसारी इति भाषा ॥ अस्य पर्य्याया गुणाश्च यथा,—

"त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तद्गुणा अथ ।

त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् । कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा । किन्तु खञ्जत्वपङ्गुत्वकारी वातातिकोपनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"अम्यानि चैव शस्तानि कौलत्थान्युषितानि च । मसूरास्त्रिपुटा वल्लाः कलायाद्याश्च वर्जिताः ॥"

इति हारीते प्रथमे स्थाने नवमेऽध्याये ।)

त्रिपुटा, स्त्री, (त्रीणि पुटानि दलद्वयानि यस्याः ।) मल्लिका । सूक्ष्मैला । त्रिवृत् । इति मेदिनी । टे, ४५ ॥ कर्णस्फोटा । स्थूलैला । रक्ततिवृत् । इति राजनिर्घण्टः ॥ देवीविशेषः । यथा,—

"ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः । त्रिपुटाख्या द्विरुक्तैः सर्व्वैरङ्गानि षट् क्रमात् ॥"

अस्या रूपं यथा,—

"पारिजातवने रम्ये मण्डपे मणिकुट्टिमे । रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते । अधस्तात् कल्पवृक्षस्य निषण्णां देवतां स्मरेत् ।

चापं पाशाङ्कुशवरविशाख्यङ्कुशं पुष्पबाणान्
सविभ्राणा करवरमिहे रत्नमौलिं त्रिनेत्राम् ।
हेमाजाभां कुचभरनतां रत्नमञ्जीरकाञ्ची-
ग्रैवेयाद्यैर्विलसिततनुं भावयेच्छक्तिमाद्याम् ॥
चामरादर्शताम्बूलकरण्डकसमुद्गकान् ।
वहन्तीभिः कुमारीभिर्दूतीभिः परिवारिताम् ॥
करुणाद्रतवर्षिण्या पश्यन्तीं साधक दृशा ॥”

इति तन्त्रसारः ॥

त्रिपुटी, [न्] पुं, (त्रिपुट इव आकारोऽस्य-स्येति । त्रिपुट+इनि. ।) एरण्डवृक्षः । इति शब्दमाला ॥

त्रिपुटी, स्त्री, (त्रीणि पुटानि यस्याः । गौरादित्वात् ङीष् ।) त्रिवृता । इत्यमरटीकायां भरतः ॥ (त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां समाहारः । “द्विगोः ।” इति ङीप् । ज्ञातृज्ञानज्ञेयरूपपुटत्रयम् । यथा, पञ्चदश्याम् । ११ । १४ ।

“भूलोत्पत्तेः पुरा भूमा त्रिपुटीद्वैतवर्जनात् ।
ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो ॥”)

त्रिपुटीफलः, पुं, (त्रिपुटी पुटत्रयं फले यस्य ।) एरण्डः । इति हारावली । १०८ ॥

त्रिपुण्ड्रं, क्ली, (त्रयाणां पुण्ड्राणां इक्षुवदाकाराणां समाहारः ।) भस्मादिकृतकपालस्थ-तिर्य्यग्रेखात्रयम् । यथा,—

“विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
तस्मान्मृदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम् ॥”

इति तिथ्यादितत्त्वम् ॥

ब्रह्माण्डपुराणे ।

“ऊर्द्ध्वपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा ।
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया ॥
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम् ।
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः ॥”

इत्याह्निकाचारतत्त्वम् ॥

“शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक्त्रिपुण्ड्रकम् ।
विष्ण्वागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत् ॥”

इति नागोजीभट्टधृतस्मृतसंहिता ॥

(यथा, शब्दचिन्तामणिधृतदेवीभागवतम् ।
“यथा चपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम् ।
श्मशानसदृशं तत् स्यान्न प्रेक्ष्यं पुण्यकृज्जनैः ॥”
“त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते ।
धारयन्ति च ये भक्त्या धारयन्ति तमेव ते ॥
तिर्य्यग्रेखा प्रदृश्यन्ते ललाटे सर्व्वदेहिनाम् ।
तथापि मानवा मूर्खा न कुर्व्वन्ति त्रिपुण्ड्रकम् ॥”)

त्रिपुण्ड्रकं, क्ली, (त्रिपुण्ड्रमेव । स्वार्थे कः ।) त्रिपुण्ड्रम् । यथा,—
“वक्त्रा ललाटगात्रस्थो भस्मरेखात्रिपुण्ड्रकम् ॥”

इति हारावली । १२ ॥

त्रिपुरं, क्ली, (त्रयाणां पुराणां समाहारः । तद्धितार्थेति समासः । पात्रादित्वात् स्त्रीत्वाभावः ।) मयदानवनिर्म्मितं पुरत्रयम् । (यथा, महाभारते । ३ । ७१ । १८ ।

“महात्मना शङ्करेण त्रिपुरं निहतं यदा ।
तदैतदस्त्रं निर्म्मुक्तं येन दग्धा महासुराः ॥”)

पुरा असुरा देवैर्निर्जिताः सन्तो मायिनां परमाचार्य्यं मयं शरणमाययुः । स गमनागमने अदृश्या दुर्व्वितर्क्यपरिच्छदा हैमी रौप्यायसीति तिस्रः पुरो निर्म्माय तेभ्यो ददौ ते असुरास्ताभिः पुरीभिरलक्षिताः पूर्व्ववैरमनुस्मरन्तः सेश्वरान् त्रीन् लोकान् नाशयाञ्चक्रुस्ततः सेश्वरा लोका हरं उपासाञ्चक्रिरे । हरो मा भैष्टेति सुराननुगृह्य धनुषि शरं सन्धाय पुरेषु असृजत् । तैः शरैः स्पृष्टाः पुरौकसोऽसुरा असवः सन्तो निपेतुः । महायोगी मयस्तानसुरानानीय त्रिपुरस्थितसिद्धामृतरसकूपेऽक्षिपत् तेऽसुरास्तद्रसं स्पृष्ट्वा दृढशरीराः सन्त उत्तस्थुस्तदा विष्णुर्गौर्भूत्वा च वत्सो भूत्वा त्रिपुरं प्रविश्य रसकूपामृतं पपौ असुरा विष्णुमायया मोहिताः सन्तो न न्यषेधन् तदा विष्णुः स्वाभिः शक्तिभिः शम्भोर्युद्धोपकरणं रथसारथिधनुर्बाणादिकं अधात् । ततः शम्भुः सन्नद्धो रथमास्थाय शरन्धनुषि सन्धाय मध्याह्नकाले त्रिपुरं ददाह । इति श्रीभागवतम् ॥ (त्रीणि पुराणि यस्येति विग्रहे त्रिपुरासुरे, पुं । यथा, महाभारते । ७ । २०० । ७६ ।

“आरुह्य स रथं दिव्यं सर्व्वदेवमयं शिवः ।
त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः ॥”)

त्रिपुरदहनः, पुं, (त्रिपुरं दहतीति । दह+ल्युः ।) शिवः । इति हारावली । ८ ॥

त्रिपुरभैरवी, स्त्री, (त्रिपुरा धर्म्मार्थकामानां दात्री । सा चासौ भैरवी चेति ।) देवीविशेषः । तन्मन्त्रादि यथा,—

“वैष्णवी मन्त्रमुख्येषु त्रिपुरायास्ततः शृणु ।
तस्यास्तु सर्व्वमन्त्राणि त्रयोदशशतानि वै ॥
विंशतिस्तु सहस्राणि तत्राद्यं वाग्भवं स्मृतम् ।
द्वितीयं कामराजाख्यं मोहनञ्च तृतीयकम् ॥
आम्रेडितं वाग्भवन्तु चतुर्थं परिकीर्त्तितम् ।
नेत्रवीजं द्वितीयन्तु द्विरुक्तं वाग्भवं तथा ॥
आद्यं तत् पञ्चमं प्रोक्तं चतुर्भिरपि चाक्षरैः ।
नेत्रवीजं द्वितीयन्तु प्रथमं परिकीर्त्तितम् ॥
द्वितीयं कामराजन्तु तृतीयं वाग्भवं तथा ।
एभिस्त्रिभिश्च यन्मन्त्रं तत् षष्ठं परिकीर्त्तितम् ॥
नेत्रवीजद्वितीयेन वाग्भवान्तेन सप्तमम् ।
तदेव वाग्भवाद्यन्तु अष्टमं परिकीर्त्तितम् ॥
वाग्भवं कामराजञ्चैवैताभ्यां नवमं स्मृतम् ।
कामराजं तथैवाद्यं द्वितीयञ्चैव मोहनम् ॥
एकादशमिदं प्रोक्तं तदेवाद्यन्तु वाग्भवम् ।
द्वादशं कीर्त्तितं मन्त्रं शेषतस्त्रैपुरं महत् ॥
तस्माद्दन् त्रैपुरं मन्त्रं शृणुष्वैकमनास्थिरम् ।
शान्तादिकस्य चाण्डादिर्वह्निर्वाग्भवसंहितः ॥
आद्यं त्रिपुरभैरव्या बीजमाद्यं प्रकीर्त्तितम् ।
उमानन्दं तदादिञ्च यज्ञनादं तथान्तकं ॥
चतुर्थस्वरविन्दिन्दुयुक्तमेतत् द्वितीयकम् ।
उमानन्दं तदादिञ्च वह्नि शेषस्वरस्तथा ॥
समाप्तिर्विन्दुसहिता सहितास्तु तृतीयकम् ।
एतत्तत्त्वं विजानाति यो नरो भुवि भूमिप ॥
सिद्धविद्याधरेभ्यश्च सोऽधिको मन्मथो महान् ।
एतत्त्रयोदश प्रोक्ता मन्त्रा मन्त्रेषु चोत्तमाः ॥
विंशतेस्तु सहस्रेभ्यः परार्द्धेते प्रकीर्त्तिताः ।
विंशतेस्तु सहस्राणामाद्यमेतत् प्रकीर्त्तितम् ॥”

तस्या ध्यानं यथा,—

“चतुर्भुजा रक्तवर्णा रक्तवस्त्रविभूषिताम् ।
दक्षिणोर्द्ध्वे स्वचाधो बिभ्रतीं पुस्तकोत्तमम् ॥
अभयं वामहस्ताभ्यां वरञ्च दधतीं तथा ।
सहस्रसूर्य्यसङ्काशां त्रिनेत्रां गजगामिनीम् ॥
पीनोत्तुङ्गस्तनयुगां सितप्रेतासनस्थिताम् ।
स्मितप्रभिन्नवदनां सर्व्वालङ्कारसंयुताम् ॥
तिसृभिर्म्मुण्डमालाभिः शिरोवक्षःकटीषु च ।
त्रिगुणं त्रिगुणीभूतैः प्रत्येकं परिभूषिताम् ॥
मदिराघूर्णनयनां रक्तदन्तच्छदद्वयाम् ।
चिन्तयेद्वरदां देवीमेवं त्रिपुरभैरवीम् ॥”

इति कालिकापुराणे ७७ अध्यायः ॥

त्रिपुरमल्लिका, स्त्री, (त्रीणि पुराणि दलावृतयो यस्याः । सा चासौ मल्लिका चेति ।) पुष्पवृक्षविशेषः । त्रिपुरमालिका इति ख्याता । तत्-पर्य्यायः । शेफाली २ । इति त्रिकाण्डशेषः ॥

त्रिपुरा, स्त्री, (त्रीन् धर्म्मार्थकामान् पुरति पुरतो ददातीति । पुर अग्रगमने अत्र अग्रदाने+“इगुपधज्ञेति ।” ३।१।१३५ । इति कः । ततष्टाप् ।) देवीविशेषः । तन्मन्त्रध्यानादिकं यथा,—

“शृणुतं त्रिपुरामूर्त्तिं कामाख्यायास्तु पूजनम् ।
एतस्या मूलमन्त्रन्तु पूर्व्वमुत्तरतन्त्रके ॥
युवयोरिदयोः सम्यक् क्रमात्तु प्रतिपादितम् ।
वाग्भवं कामराजन्तु डामरञ्चेति तत्त्रयम् ॥
सर्व्वधर्म्मार्थकामादिसाधनं कुण्डलीयुतम् ।
त्रीन् यस्मात् पुरतो दद्यात् दुर्गा ध्याता महेश्वरी ॥
त्रिपुरेति ततः ख्याता कामाख्या कामरूपिणी ।
तस्यास्तु स्थापनं यादृक् कामाख्यायाः प्रकीर्त्तितम् ॥
तेनैव स्थापनं कुर्य्यात् मूलमन्त्रेण साधकः ।
त्रिकोणं मण्डलं चास्यास्त्रिपुरन्तु त्रिरेखकम् ॥
मन्त्रन्तु त्र्यक्षरं ज्ञेयं तथा रूपत्रयं पुनः ।
त्रिविधा कुण्डलीशक्तिस्त्रिदेवानाञ्च सृष्टये ॥
सर्व्वं त्रयं त्रयं यस्मात् तस्मात्तु त्रिपुरा मता ॥१॥
दहनं प्लवनं कृत्वा आद्यां मूर्त्तिं विचिन्तयेत् ।
त्रिधावर्ण्याय हृदये तां मूर्त्तिं शृणु भैरव ॥२॥
सिन्दूरपुञ्जसङ्काशां त्रिनेत्राञ्च चतुर्भुजाम् ।
वामोर्द्ध्वे पुष्पकोदण्डं धृत्वाधः पुस्तकं तथा ॥
दक्षिणोर्द्ध्वे पञ्चबाणानक्षमालां तथाप्यधः ।
चतुर्भ्यां कुणपानान्तु एतेनैव कुणपान्तरम् ॥
निधाय तस्य पृष्ठे तु समपादेन संस्थिताम् ।
जटाजूटार्द्धचन्द्रैस्तु समायुक्तशिरोरुहाम् ॥
नग्नां त्रिवलिभङ्गेन चारुमध्यां मनोहराम् ।
सर्व्वालङ्कारसम्पूर्णां सर्व्वाङ्गसुन्दरीं शुभाम् ॥
स्वयम्भुविन्दुसंयोगात् सर्व्वलक्षणसंयुताम् ।
एवन्तु प्रथमं ध्यात्वा शिवाख्यानञ्च चिन्तयेत् ॥३॥

द्वितीयं त्रिपुरारूपं तथैव तु तृतीयकम् ।
आवाहनार्थं देव्यास्तु चिन्तयेत् योगनिद्रया ॥
बन्धूकपुष्पसङ्काशां जटाजूटेन्दुमण्डिताम् ।
सर्व्वलक्षणसम्पूर्णां सर्व्वालङ्कारभूषिताम् ॥
उद्यद्रविप्रख्यवस्त्रां पद्मपर्य्यङ्कसंस्थिताम् ।
मुक्ताहारावलीयुक्तां पीनोन्नतपयोधराम् ॥
बलीविभङ्गचतुरामासवामोदमोदिताम् ।
नेत्राह्लादकरीं शुद्धां शोभिर्णीं जगतां तथा ॥
त्रिनेत्रां योगनिद्रां तामीषद्धाससमायुताम् ।
नवयौवनसम्पन्नां मृणालाभचतुर्भुजाम् ॥
वामोर्द्ध्वे पुस्तकं धत्ते अक्षमालान्तु दक्षिणे ।
वामेनाभयदां देवीं दक्षिणाधोवरप्रदाम् ॥
प्रसवद्रक्तसूर्य्याभां शिरोमालान्तु बिभ्रतीम् ।
आपादलम्बिनीं कल्पद्रुममासाद्य संस्थिताम् ॥
कदम्बोपवनान्तःस्थां कामाह्लादकरीं शुभाम् ।
द्वितीया त्रिपुरां ध्यायेदेवं रूपां मनोहराम् ॥*॥
तृतीयं त्रिपुरारूपं शृणु वेतालभैरव ! ।
जवाकुसुमसङ्काशां मुक्तकेशीं वराननाम् ॥
सदाशिवं हसन्तन्तु प्रेतवद्विनिधाय वै ।
हृदये तस्य देवस्य त्वर्द्धपद्मासनस्थिताम् ॥
रक्तोत्पलैर्म्मिश्रितान्तु मुण्डमालां पदानुगाम् ।
ग्रीवायां धारयन्तीन्तु पीनोन्नतपयोधराम् ॥
चतुर्भुजां तथा नग्नां दक्षिणोर्द्ध्वेऽक्षमालिनीम् ।
वरदां तदधो वामे जगन्मायां तथाभयम् ॥
अधस्तु पुस्तकं धत्ते त्रिनेत्रां हसिताननाम् ।
सवद्विषणभोगार्त्ता तथा सर्व्वाङ्गसुन्दरीम् ॥
एवंविधं तृतीयन्तु रूपं ध्यायेत्तु पूजकः ।
आद्यन्तु वाग्भवं रूपं द्वितीयं कामराजकम् ॥
डामरं मोहनञ्चापि तृतीयं परिकीर्त्तितम् ।
एकैकन्तु त्रिरूपाणि प्राग्विचिन्त्याथ साधकः ॥
मन्त्रत्रयेण प्रत्येकं हृदि योड्शकैस्तथा ।
पूजयेदुपचारैस्तु बहिर्येद्वत्तथैव च ॥"

इति कालिकापुराणे ६२ अध्यायः ॥

(अस्याः वीजम् । "ह्सरैं" "ह्सकलरीं" "ह्सरौं" इति मन्त्रकोषः ॥ ऋग्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि । "सहोवाच श्रीरामः । ऐतरेयकौषीतकीनादविन्द्वात्मप्रबोधनिर्व्वाणमुद्गलाक्षमालिकात्रिपुरासौभाग्यबह्वृचानामृग्वेदगतानां दशसङ्ख्यकानामुपनिषदां वाङ्मे मनसीति शान्तिः ॥" नगरीविशेषः । यथा, महाभारते । ३ । २५३ । ८ ।
"मोहनं पत्तनञ्चैव त्रिपुरां कोशलां तथा ।
एतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः ॥")

त्रिपुरान्तकः, पुं, (त्रिपुरस्य अन्तकः ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, काशीखण्डे १०० अध्याये ।
"लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ॥"
तथाच महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे ।
"आशुतोषो मित्रमध्ये शम्भूर्णां त्रिपुरान्तकः ॥")

त्रिपुरी, स्त्री, देशविशेषः । त्रिपुरा इति ख्याता । तत्पर्य्यायः । चेदिनगरी २ । इति हेमचन्द्रः । ४ । ४१ ॥

त्रिपुषा, स्त्री, (त्रीन् वातादिदोषत्रयान् पुष्णातीति । पुष + कः । ततष्टाप् ।) कृष्णत्रिवृत् । इति शब्दचन्द्रिका ॥

त्रिपृष्ठः, पुं, (त्रयो वंशाः पृष्ठे मध्यमप्रदेशेऽस्येति ।) राजभेदः । तत्पर्य्यायः । प्राजापत्यः २ । इति हेमचन्द्रः । ३ । ३५८ ॥

त्रिफला, स्त्री, (त्रयाणां फलानां समाहारः । अजादित्वात् "द्विगोः ।" ४ । १ । २१ । इति न ङीप् ।) मिलितसमभागहरीतकीविभीतकामलकीफलानि । तत्पर्य्यायः । त्रिफली २ फलत्रयम् ३ फलत्रिकम् ४ । इति राजनिर्घण्टः ॥ अस्या गुणाः । त्रिदोषनाशित्वम् । गात्रुपत्वम् । मलभेदित्वञ्च । इति राजवल्लभः ॥ तन्नामगुणाः ।
"पथ्याविभीतधात्रीणां फलैः स्यात्त्रिफला समैः ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥
त्रिफला कफपित्तघ्नी मेहकुष्ठहरा सरा ।
चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी ॥"

इति भावप्रकाशः ॥

("हरीतक्याश्चामलक्या विभीतस्य फलैस्तथा ।
त्रिफलेत्युच्यते वैद्यैर्वक्ष्यामि भागनिर्णयम् ॥
एकभागं हरीतक्या द्वौ भागौ च विभीतकम् ।
आमलक्यास्त्रिभागञ्च सह्यैकत्र प्रयोजयेत् ।
त्रिफला कफपित्तघ्नी महाकुष्ठविनाशिनी ॥
आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी ।
वर्णप्रदायिनी हृद्या विषमज्वरनाशिनी ॥
सर्व्वरोगप्रशमनी मेधास्मृतिकरी परा ।
वक्ष्यामि योगयुक्तिञ्च रोगे रोगे पृथक् पृथक् ॥
वाते घृतगुडोपेता पित्ते समधुशर्करा ।
श्लेष्मणि त्रिकटूपेता मेहे समधुवारिणा ॥
कुष्ठे च घृतसंयुक्ता सैन्धवेनाग्निमान्द्यहा ।
चक्षुर्षासमके क्वाथो नेत्ररोगनिवारणः ॥
घृतेन हरते कण्डूं मातुलुङ्गरसैर्वमिम् ।
गुल्मार्शःशूरणगुडैः सद्यः स्याद्गुणकारकः ॥
क्षीरेण राजयक्ष्माणं पाण्डुरोगं गुडेन च ।
भृङ्गराजरसेनापि घृतेन सह योजितः ॥
वलीपलितहन्ता च तथा मेधाकरः स्मृतः ।
सक्षीरः सगुडः क्वाथो विषमज्वरनाशनः ॥
सशर्करामृतक्वाथः सर्व्वजीर्णज्वरापहः ॥
एषा नराणां हितकारिणी च
सर्व्वप्रयोगे त्रिफला स्मृता च ।
सर्व्वामयानां शमनी च सद्यः
सतेजकान्तिं प्रतिभां करोति ॥
शोथे तथा कामलपाण्डुरोगे
तथोदरे मूत्रयुता हिता च ।
हितातिसारे ग्रहणीविकारे
हिता च सक्षौद्र फलत्रिका च ॥
क्षीणेन्द्रिये यक्ष्मणि जीर्णरोगे
क्षीरेण युक्ता त्रिफला हिता च ।
स्यान्नेत्ररोगे च शिरोगदे च
कुष्ठे च कण्ड्व्रणपीडिते च ।
मूत्रग्रहे कामलकेऽग्निमान्द्ये
हिता जलेन त्रिफला हि कल्कः ॥
स शीतकाले गुडनागरेण
सशर्करा क्षीरयुता तथोष्णे ।
वर्षासु शुण्ठी सहिता नराणां
फलत्रिका सर्व्वरुजापहा स्यात् ॥"

इति महर्ष्यात्रेयभाषिते हारीतोत्तरे कल्पस्थाने त्रिफलाकल्पोनाम द्वितीयोऽध्यायः ॥)

त्रिफली, स्त्री, त्रिफला । इति राजनिर्घण्टः ॥

त्रिबलीकं, क्ली, (तिस्रो वल्यो यत्र । कप् ।) पायुः । इति हेमचन्द्रः । ३ । २७६ ॥

त्रिभण्डी, स्त्री, (त्रीन् वातादिदोषान् भण्डति परिहसतीति । भण्ड परिहासे + अण् । ततो ङीप् ।) त्रिवृता । इत्यमरः । २ । ४ । १०८ ॥ (पर्य्यायोऽस्या यथा,—
"त्रिवृद्भाण्डी सुवहा त्रिभण्डी त्रिपुटा च सा ।
चाघादनी कूटरणा निःसृता त्रिवृता कथा ॥"

इति वैद्यकरत्नमालायाम् ॥

यथाच सुश्रुते चिकित्सितस्थाने । १७ ।
"श्यामा त्रिभण्डी त्रिफला सुसिद्ध
हरिद्रयो रोध्रकदम्बयोश्च ।
घृतं सदुग्धं प्रणसर्पणेन
हन्याद्गतिं कोष्ठगतापि या स्यात् ॥")

त्रिभद्रं, क्ली, (त्रिषु नखक्षतदन्तक्षतमर्द्दनेष्वपि भद्रं यस्मिन् ।) सुरतम् । इति त्रिकाण्डशेषः ॥

त्रिभुवनं, क्ली, त्रयाणां भुवनानां समाहारः । (तद्धितार्थेत्यादिना समासः । पात्रादित्वात् न ङीप् । पां २ । ४ । १७ ।) त्रिलोकी । इति व्याकरणम् ॥ (यथा, भागवते । ३ । ११ । ३० ।
"तावत्त्रिभुवनं सद्यः कल्पान्तैधितसिन्धवः ।
प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्म्मयः ॥")

त्रिमदः, पुं, (त्रयाणां मदानां समाहारः । अभिधानात् पुंस्त्वम् ।) मुस्ताचित्रकविडङ्गानि । इति वैद्यकम् ॥ (यथा, वैद्यकपरिभाषायाम् ।
विडङ्गमुस्तचित्रञ्च त्रिमदः समुदाहृतः ॥"
त्रिगुणितो मदः । विद्याधनाभिजनोत्पन्नं गर्व्वत्रयम् । यथा, भागवते । ३ । १ । ४२ ।
"नूनं नृपाणां त्रिमदोत्पथानां
महीं मुहुश्चालयतां चमूभिः ।
वधात् प्रपन्नार्त्तिजिहीर्षयेशो
ऽप्युपैक्षताघं भगवान् कुरूणाम् ॥")

त्रिमधु, क्ली, (त्रयाणां मधूनां मधुराणां समाहारः ।) मिलितसितामाक्षिकसर्पींषि । तत्पर्य्यायः । मधुरत्रयम् २ मधुत्रयम् ३ । इति राजनिर्घण्टः ॥

त्रिमधुः, पुं, (मधुवाता इत्यादयस्त्रयो मधुशब्दा यत्र ।) ऋग्वेदैकदेशः । (यथा, ऋग्वेदे । १ । ९० । ६—८ ।
"मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥")

मधुवातादिऋक्त्रयवेत्ता । यथा,—
"त्रिनाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित् ॥"
इति पङ्क्तिपावनवर्णने मार्कण्डेयपुराणम् ।
२१ । २३ ॥ तद्व्रतञ्च । तद्व्रताचरणेन यस्तद-
ध्यायी सोऽपि । इति विज्ञानेश्वरः ॥ * ॥ श्राद्धे
त्रिवारमधुशब्दोच्चारणविधिर्यथा,—
"गायत्रीं त्रिः सकृज्जप्त्वा जपेद्वा व्याहृति-
पूर्व्विकाम् ।
मधुवाता इति त्र्यृचं मध्वित्येतत् त्रिकं जपेत् ॥"
इति श्राद्धतत्त्वे मिताक्षराधृतपारस्करवचनम्॥)
त्रिमार्गी, स्त्री, त्रयाणां मार्गाणां समाहारः ।
त्रिपथम् । इति व्याकरणम् ॥
त्रिमुकुटः, पु, (त्रीणि मुकुटानीव शृङ्गान्यस्य ।)
त्रिकूटपर्व्वतः । इति हेमचन्द्रः । ४ । ९६ ॥
त्रिमुखः, पु, (त्रीणि मुखानि यस्य ।) बुद्ध-
विशेषः । इति हेमचन्द्रः । १ । ४१ ॥
त्रिमुखा, स्त्री, (त्रीणि मुखानि यस्याः ।) बुद्ध-
देवताभेदः । सा मायादेवी । तत्पर्य्यायः ।
मारीची २ वज्रकालिका ३ विकटा ४ वज्र-
वाराही ५ गौरी ६ पोत्रिरथा ७ । इति
त्रिकाण्डशेषः ॥
त्रिमूर्त्तिः, पु, (तिस्रो मूर्त्तयो यस्य ।) बुद्धः ।
इति त्रिकाण्डशेषः ॥ त्रि, ब्रह्मविष्णुशिवाख्य-
मूर्त्तित्रयवान् । यथा,—
"त्रिमूर्त्तिर्यः सर्गस्थितिविलयकर्म्माणि तनुते ।"
इति गङ्गेशोपाध्यायः ॥
(यथाच कुमारे । २ । ४ ।
"नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ॥")
त्रियष्टिः, पु, (त्रिषु वातपित्तकफात्मकेषु दोषेषु
यष्टिरिव तन्नाशकत्वात् ।) क्षेत्रपर्पटी । इति
रत्नमाला ॥
त्रियामकं, क्ली, (त्रीन् धर्म्मार्थकामरूपान्
त्रिवर्गानपि यमयति नाशयतीति । यम+
णिच्+ण्वुल् ।) पापम् । इति शब्दमाला ॥
त्रियामा, स्त्री, (त्रयो यामाः प्रहरा यस्याः ।
"त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ॥"
इति वचनात् आद्यन्तयोरर्द्धयामयोर्द्दिवाकाल-
त्वेन दिनप्रायत्वात् तथात्वम् ।) रात्रिः । (यथा,
हरिवंशे । १०२ । २६ ।
"स मत्तो बलिनां श्रेष्ठो रराजाघूर्णिताननः ।
शैशिरीषु त्रियामासु यथा खेदालसः शशी॥"
त्रिप्रहरान्विते, त्रि । यथा, गोः रामायणे ।
२ । १० । १७ ।
"त्रियामापि स्त्रशार्त्तस्य सा रात्रिरभवत्तदा ।
तथा विलपतस्तस्य राज्ञो वर्षशतोपमा ॥")
हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥ यमुना ।
नीली । कृष्णत्रिवृत् । इत्युणादिकोषः ॥
त्रियुगः, पु, (त्रीणि युगानि सत्यत्रेताद्वापर-
रूपाणि आविर्भावकालोऽस्य ।) विष्णुः । यथा,
भागवते । ७ । ९ । ३८ ।
"इत्थं नृतिर्य्यगृषिदेवझषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान् ।
धर्म्मं महापुरुष । पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥"
"एकत्वमेव इत्यादिभिरस्तैः श्लोकैर्यदुक्तं पक्ष-
पातेन रक्षणं तद्विपक्षवधश्च सत्त्वोपाधितो न
स्वत इति तदुपसंहरति इत्थमिति विभावयसि
पालयसि हंसि घातयसि । कलौ तु तन्न करोषि
यतस्तदा त्वं छन्नोऽभवः यतस्त्रिष्वेव युगेष्वावि-
र्भावात् स एवम्भूतस्त्वं त्रियुग इति प्रसिद्धः ।"
इति तट्टीकायां श्रीधरस्वामी ॥ (तथा च तत्रैव ।
३ । २४ । २६ ।
"स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् ।
विविक्त उपसंगम्य प्रणम्य समभाषत ॥"
वसन्तप्रावृट्शरद्रूपकालत्रये, क्ली । यथा, वाज-
सनेयसंहितायाम् । १२ । ७५ ।
"या ओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगं पुरा ॥"
"युगशब्दः कालवाची । त्रयाणां युगानां समा-
हारस्त्रियुगं त्रिकालं वसन्ते प्रावृषि शरदि
च ।" इति तद्भाष्ये महीधरः ॥ कृतत्रेताद्वापर-
रूपयुगत्रयम् । इति ऋग्वेदस्य । १० । ९७ । १ ।
भाष्ये सायनः ॥ षडैश्वर्य्यशालिनि, त्रि । यथा,
महाभारते । ३ । ८६ । ५ ।
"त्रियुगौ पुण्डरीकाक्षौ वासुदेवधनञ्जयौ ॥"
"त्रियुगौ धर्म्मस्य भार्य्यायां मूर्त्तिसञ्ज्ञायां कृत-
युगेऽवतीर्णौ नरनारायणौ तावेव द्वापरान्ते
केशवार्ज्जुनौ इति पुराणपुरुषावेतौ नासदादि-
वक्तारावित्ति भावः । यद्वा, त्रीणि युगानि
युगलानि षडैश्वर्य्याणि भगसञ्ज्ञानि वा षड-
ङ्गानि वा ययोस्तौ त्रियुगौ ।" इति तट्टी-
कायां नीलकण्ठः ॥)
त्रियूहः, पु, कपिलाश्वः । इति हेमचन्द्रः ॥ (यथा,
अश्ववैद्यके । ३ । १०२ ।
"नीलो नीलक एवाश्वस्त्रियूहः कपिलः
स्मृतः ॥")
त्रिरात्रं, क्ली, रात्रित्रयम् । तिसृणां रात्रीणां
समाहारः । इति लिङ्गादिसंग्रहटीकायां
भरतः ॥ (यथा, मनुः । ४ । ११९ ।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं
स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥")
त्रिरेखः, पु (तिस्रो रेखा यत्र ।) शङ्खः । इति
हेमचन्द्रः । ४ । २७२ ॥
त्रिलवणं, क्ली, (त्रयाणां लवणानां समाहारः ।
पात्रादित्वात् न ङीप् ।) सैन्धव विड्ं रुचकं
मिलितैतल्लवणत्रयम् । इति राजनिर्घण्टः ॥
("सिन्धुसौवर्च्चलञ्चैव विड्ं सामुद्रमौद्भिदम् ।
एक-द्वि-त्रि-चतुः-पञ्च लवणानि क्रमादिह ॥"
इति वैद्यकपरिभाषा ॥)
त्रिलोकी, स्त्री, त्रयाणां लोकानां समाहारः ।
("द्विगोः ।" ४ । १ । २१ । इति ङीप् ।)
लोकत्रयम् । यथा, भूर्लोकः भुवर्लोकः स्वर्लो-
कश्च । इति लिङ्गादिसंग्रहटीकायां भरतः ॥
(यथा, भागवते । १ । ५ । ७ ।
"त्वं पर्य्यटन्नर्क इव त्रिलोकी-
मन्तश्चरो वायुरिवात्मसाक्षी ॥")
त्रिलोकेशः, पु, (त्रयाणां लोकानामीशः ।) सूर्य्यः ।
इति शब्दचन्द्रिका ॥ (विष्णुः । यथा, महा-
भारते । १३ । १४९ । ८२ ।
"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा
हरिः ॥"
"त्रयो लोकास्तदात्मानः स्वेषु स्वेषु कर्म्मसु
वर्त्तन्त इति त्रिलोकेशः ।" इति शाङ्करभाष्यम् ॥
महादेवः । यथा, महाभारते । १४ । ८।२७ ।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ॥"
त्रिलोकाधिपतौ, त्रि । यथा, तत्रैव । ३ । ८४ ।
११७ ।
"अभिगम्य त्रिलोकेशं वरदं विष्णुमव्ययम् ।
अश्वमेधमवाप्नोति विष्णुलोकञ्च गच्छति ॥")
त्रिलोचनः, पु (त्रीणि चन्द्रसूर्य्याग्निरूपाणि
लोचनानि यस्य ।) शिवः । इत्यमरः ।१।१।३४॥
(यथा, कुमारे । ५ । ७२ ।
"वपुर्व्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि ! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥"
लोचनत्रयविशिष्टे, त्रि । यथा, माघे । १ । ७० ।
"स बाल आसीद्वपुषा चतुर्भुजो
मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ॥")
त्रिलोचना, स्त्री, (त्रीणि लोचनानि यस्याः ।)
बुद्धदेवीभेदः । इति त्रिकाण्डशेषः । दुर्गा च ॥
(सा च गायत्रीस्वरूपिणी । यथा, देवीभाग-
वते । १२ । ६ । ६७ ।
"त्रिकालज्ञानसम्पन्ना त्रिवली च त्रिलोचना॥")
त्रिलोचनाष्टमी, स्त्री, (त्रिलोचनाय त्र्यम्बक-
पूजायै या अष्टमी ।) गौणचान्द्रज्यैष्ठकृष्णा-
ष्टमी । यथा,—
"ज्यैष्ठे मासि नृपश्रेष्ठ ! कृष्णाष्टम्यां त्रिलोचनम् ।
यः पूजयति देवेशमीशलोकं स गच्छति ॥"
इति संवत्सरकौमुदीधृतभविष्यपुराणवचनम् ॥
अपि च ।
"ज्यैष्ठे मास्यसिते पक्षे अष्टम्याञ्च महेश्वरि ! ।
शिवार्च्चने च तल्लोकं लभते नात्र संशयः ॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥
त्रिलोचनी, स्त्री, (त्रीणि लोचनानि यस्याः ।)
दुर्गा । इति पुराणम् ॥
त्रिलौहकं, क्ली, (त्रयाणां लौहकानां समाहारः ।)
सुवर्णं रजतं ताम्रं एतद्धातुत्रयम् । इति राज-
निर्घण्टः ॥
त्रिलौही, स्त्री, (त्रीणि लौहानि साधनत्वेना-
स्त्यस्याः । अच् । गौरादित्वात् ङीष् ।)
मुद्राविशेषः । यथा, अथ मन्त्रिणां हितार्थाय
त्रिलौही मुद्रा निरूप्यते ।
"सोमसूर्य्याग्निरूपाः सुवर्णं लौहत्रयं तथा ।
रौप्यमिन्दुः स्मृतो हेम सूर्य्यस्ताम्रो हुताशनः ॥
लौहभागाः समुद्दिष्टाः खरायधरसंख्यया ।

सैलौंटैः कारयेन्मुद्रामसङ्गुलितमङ्गताम् ॥
एषु स्वराः स्मृताः सौम्याः याम्याः सौराः शुभोदयाः ।
आग्नेया व्यापकाः सर्वे सोमसूर्य्याग्निदैवताः ॥
स्वराः षोड़श विख्याताः ग्रासान्ते पञ्चविंशतिः ।
व्यापका दश ते कामधनधर्म्मप्रदायिनः ॥
सार्द्धं सहस्रं संगण्य यादृशा तां गुरुर्य्यातः ।
तस्यां सम्पातयेन्नाडीं सर्पिषा पूर्व्वमंशया ॥
निःक्षिप्य कुम्भे तां मुद्रामभिषेकोक्तवर्त्मना ।
ध्यायात्र पूजयेद्देवीमुपचारैर्व्विधानतः ॥
अभिषिच्य विनीताय दद्यात्तां दक्षिणां गुरुः ।
इयं मुद्रा क्षुद्ररोगविषज्वरविनाशिनी ॥
बालपीरग्रहादिभ्यो रक्षां कुर्य्याद्विशेषतः ।
युद्धे विजयमाप्नोति धारयन् मनुजेश्वरः ॥
मन्त्रसिद्धिकरी पुंसां चतुर्व्वर्गफलप्रदा ।
धारयन्मनुजो नित्यं देवसूत्री भवेद्भुवि ॥"
इति तन्त्रसारः ॥

त्रिवर्गः, पुं, (त्रयाणां वर्गः समूहः ।) धर्म्मकामार्थाः । इत्यमरः । २ । ७ । ५८ ॥ (यथा, महाभारते । १ । १२१ । ३ ।
"यो हि कारणतः क्रोधं संजातं क्षन्तुमर्हति ।
नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुम् ॥")
त्रिफला । त्रिकटु । (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।
"भागान् द्वयोरात् विपचेद्विधिज्ञो
दत्त्वा त्रिवर्गं मधुरञ्च सतत्रम् ॥")
वृद्धिस्थानक्षयाः । (यथा, महाभारते । १२ । ६९ । ६९ ।
"त्रिवर्गश्चापि यः प्रोक्तस्तमिहैकमनाः शृणु ।
क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नरसत्तम ॥")
सत्त्वरजस्तमांसि । इति मेदिनी । गे, ३७ ॥ सुनीतिः । इति शब्दरत्नावली ॥

त्रिवर्णक, क्ली, (त्रयो वर्णाः सत्वादयो यस्य । कप् ।) गोक्षुरक । त्रिफला । (यथा, सुश्रुते । १ । ४४ ।
"त्रिवर्णकत्र्यूषणयुक्तमेतद्
गुडेन लिह्यादनवेन चूर्णम् ॥")
त्रिकटु । इति मेदिनी । के, १६२ ॥ (ब्राह्मणादिवर्णत्रये, श्यामरक्तपीतात्मके वर्णत्रये च ॥)

त्रिवर्षिका, स्त्री, (त्रीणि वर्षाणि वयो यस्याः सा त्रिवर्षा । तत स्वार्थे कन् । टापि अत इत्वञ्च ।) त्रिहायणी । त्रिवर्षा गौः । इति हेमचन्द्रः । ४ । ३३८ ॥

त्रिवलि, स्त्री,(त्रिगुणिता वलिस्तत्कृतरङ्ग ।) जठरावयवविशेषः । (यथा, देवीभागवते । ५।८।७१ ।
"देहेन्द्रियास्यास्तथा मध्य जात त्रिवलिसंयुतम् ॥"
कृदिकारादिति पक्षे ङीपि त्रिवलीत्यपि ।) यथा,
"त्रिवलीवलयोपेताम् ॥"
इति जगद्धात्रीध्यानम् ॥

त्रिविक्रमः, पुं, (त्रीन् लोकान् विशेषेण क्रामति व्याप्नोतीति । वि+क्रम+अच् । यद्वा, त्रिषु लोकेषु बलिबञ्चनार्थं भूयोमखर्गेषु क्रमः पादन्यासो यस्य ।) विष्णुः । इत्यमरः । १ । १ । २० ॥
(यथा, महाभारते । १३ । १४९ । ६९ ।
"अनाद्यो नन्दनो नन्दः सत्यधर्म्मा त्रिविक्रमः ॥"
"त्रयो विक्रमास्त्रिषु लोकेषु यस्य स त्रिविक्रमः ।
'त्रीणि पदानि विचक्रमे' इति श्रुतेः ।
'त्रिरित्येव त्रयो लोकाः कीर्त्तिता मुनिसत्तमैः ।
तान् क्रामते सर्व्वांस्त्रिविक्रमोऽसि जनार्द्दन ॥'
इति हरिवंशे ॥" इति शाङ्करभाष्यम् ॥)

त्रिविष्टपं, क्ली, (तृतीयं विष्टपं भुवनम् ।) त्रिपिष्टपम् । स्वर्गः । इत्यमरटीकायां स्वामी ॥
(यथा, रामायणे । २ । १०९ । ६ ।
"त्रिदश समयोध्यायां यथा शक्रस्त्रिविष्टपे ॥")
त्रिभुवनम् ॥

त्रिविष्टपसत्, [द्] पुं, (त्रिविष्टपे स्वर्गे सीदतीति । सद्+क्विप् ।) त्रिपिष्टपसत् । (देवः ।) इति शब्दार्णवः ॥

त्रिवीज., पुं, (त्रीणि बीजानि यस्य ।) श्यामाकः । इति राजनिर्घण्टः ॥

त्रिवृत्, स्त्री, (त्रीनवयवान् वृणोतीति । वृ+क्विप् तुक् च ।) लताविशेषः । तेउड़ी इति भाषा । तत्पर्य्यायः । सर्व्वानुभूतिः २ सुवहा ३ त्रिपुटा ४ त्रिवृता ५ त्रिभण्डी ६ रेचनी ७ । इत्यमरः । २ । ४ । १०८ ॥ सरला ८ सरणा ९ सरसा १० त्रिपुटी ११ रोचनी १२ । एते त्रिवृता सामान्ये शुक्लत्रिवृतायामिति केचित् । इति भरतः ॥ मालविका १३ मसूरी १४ श्यामा १५ अर्द्धचन्द्रा १६ विदला १७ सुषेणी १८ कालिन्दिकम् १९ कालमेषी २० काली २१ त्रिवेला २२ त्रिवृत्तिका २३ । इति राजनिर्घण्टः ॥ श्वेता २४ सारा २५ । इति शब्दरत्नावली ॥
कृष्णायाः पर्य्यायः । श्यामा १ पालिन्दी २ सुषेणिका ३ काला ४ मसूरविदला ५ अर्द्धचन्द्रा ६ कालमेषिका ७ । इत्यमरः । २ । ४ । १०८ ॥ मालिन्यौ ८ कालमेषिका ९ । इति भरतः ॥ श्वेतायाः पर्य्यायः । त्रिवृत् १ एकाक्षी २ सुवहा ३ त्रिभण्डी ४ त्रिपुटा ५ ॥ अरुणायाः पर्य्यायः । व्याघ्रादनी १ कुटरणा २ निःसृता ३ त्रिवृता ४ अरुणा ५ । इति रत्नमाला ॥ सामान्यत्रिवृतागुणाः । कटुत्वम् । उष्णत्वम् । कृमिश्लेष्मोदरार्त्तिकुष्ठकण्डुप्रशमनाशित्वम् । विरेचने प्रशस्तत्वञ्च । इति राजनिर्घण्टः ॥ अरुणवर्णत्रिवृद्गुणाः । स्वादुत्वम् । कषायत्वम् । मृदुत्वम् । रेचनत्वम् । रूक्षत्वम् । कटुत्वम् । दोषपाके पित्तकफापहत्वञ्च ॥ अस्याश्चाप्यन्तरगुणा विज्ञेया त्रिवृता सिता । इति राजवल्लभः ॥
श्वेतत्रिवृद्गुणाः । विरेचनत्वम् । स्वादुत्वम् । उष्णत्वम् । वायुकारित्वम् । रूक्षत्वम् । पित्तज्वरश्लेष्मपित्तशोफोदरापहत्वञ्च ॥ कृष्णत्रिवृतागुणाः । श्वेताहीनगुणत्वम् । तीव्रत्वम् । विरेचनत्वम् । मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारित्वञ्च । इति भावप्रकाशः ॥ (त्रिभिर्वृत्ते, त्रि । यथा, ऋग्वेदे । १ । ३४ । ९ ।
"क त्री चक्रा त्रिवृतो रथस्य ॥"
यथा च मनु. । २ । ४२ ।
"मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ॥")

त्रिवृत्करण, क्ली, (त्रिवृतस्त्र्यवयवस्य करणं मिश्रीकरणम् ।) त्रिवयवानां मिश्रीकरणम् । यथा, "तेजोऽबन्नत्रिवृत् प्रत्येकं द्विधा विभज्य एकभागमर्द्धं स्वेतरयोरर्द्धं प्रक्षिपेत् ।" इति मोक्षधर्म्मटीकायां नीलकण्ठः ॥

त्रिवृत्पर्णी, स्त्री, (त्रीन् दोषान् नाशकत्वेन वृणोति प्राप्नोतीति त्रिवृत् त्रिदोषघ्नम् । त्रिवृत् पर्णं यस्याः । ङीप् ।) हिलमोचिका । इति शब्दचन्द्रिका ॥ (हिलमोचिकाशब्दे विवृतिरस्या ज्ञेया ॥)

त्रिवृता, स्त्री, (त्रिभिरवयवैर्वृता ।) त्रिवृत् । इत्यमरः । २ । ४ । १०८ ॥ (अस्याः पर्य्यायो यथा,—
"त्रिभण्डी त्रिवृता श्यामा सरला कोटरा तथा ।
सर्व्वानुभूतिः सुवहा शब्दैः पर्य्यायवाचकैः ॥"
"त्र्यूषणं त्रिफला हिङ्गु कार्षिकं त्रिवृतापलम् ।
सौवर्च्चलार्द्धकर्षञ्च पलार्द्धं चाभयैतयोः ॥
सशर्करं शर्करासमं मद्येनाम्लेन वा पिबेत् ।
गुल्मपार्श्वारितुर्न हितं जीर्णे चाद्यादसौरसम् ॥"
"तुल्याम्रत्रिवृताकल्कं सिद्धं गुल्महरं घृतम् ।
मूलं श्यामात्रिवृतयोः पचेदामलकैः सह ।
जले तेन कषायेण पक्त्वा सर्पिः पिबेन्नरः ॥"
इति चरके कल्पस्थाने सप्तमेऽध्याये ॥)

त्रिवेणी, स्त्री, (तिस्रो वेण्यः वारिप्रवाहा वियुक्ताः संयुक्ता वा यत्र ।) स्थानविशेषः । यत्र गङ्गया यमुनासरस्वत्योर्वियोगः । सा दक्षिणप्रयागः । तस्य सीमनिर्णयः । यथा,—
"प्रद्युम्नस्य ह्रदात् याम्ये सरस्वत्यास्तथोत्तरे ।
तद्दक्षिणप्रयागस्तु गङ्गातो यमुना गता ॥"
इति प्रायश्चित्ततत्त्वम् ॥
इयं मुक्तवेणीति कथ्यते । प्रयागे युक्तवेणी ॥
(अत्र गङ्गया यमुनासरस्वत्योः सङ्गमात् । अस्य हठयोगोक्तेडापिङ्गलासुषुम्नास्वपारिभाषिकनदीत्रयसङ्गमस्थानम् । यथा, हठयोगप्रदीपिकायाम् । ३ । २४ ।
"कालपाशमहाबन्धविमोचनविचक्षणः ।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः ॥"
इदन्तत्वाद्वा ङीपिति त्रिवेणिरपि पाठः ॥)

त्रिवेला, स्त्री, (तिस्रो वेला अवयवसीमानो यस्याः ।) त्रिवृत् । इति राजनिर्घण्टः ॥

त्रिशङ्कु., पुं, (त्रीणि शङ्कूनि पातकानि यस्य ।) सूर्य्यवंशीयराजविशेषः । स तु इक्ष्वाकुवंशोद्भवपृथुराजपुत्रः । (अस्य नामनिरुक्तिर्यथा, हरिवंशे । १३ । १६ ।
"एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महायशाः ।
त्रिशङ्कुरिति होवाच त्रिशङ्कुरिति स स्मृतः ॥")

एष वशिष्ठमाह अहं सशरीरेण स्वर्गं गन्तुं यजेयं वशिष्ठ एतदशक्यमित्याह ततो राजा तस्य पुत्त्रानुवाच सशरीरो यज्ञेन स्वर्गं यथाप्नुयां तथा कुरुत यदि भवद्भिः परित्यक्तस्तदान्यं गुरुमुपासिष्ये वशिष्ठपुत्त्रास्तच्छ्रुत्वा राजानमूचुर्वशिष्ठो भगवान् अशक्यमिति यत् प्राह तदस्माभिः कथं शक्यम्। राजोवाच यद्गुमन्यां गतिं गमिष्यामि तच्छ्रुत्वा ऋषिपुत्त्रा राजानं शेपुः श्वपाकस्त्वं भविष्यसि। ततस्तस्यां रात्र्यामतीतायां स चाण्डालदर्शनो भूत्वा विश्वामित्रं शरणमाययौ विश्वामित्रस्तं स्वीयदर्पेण याजयामास तस्मिन् यज्ञे देवा भागार्थं नागच्छन् ततो विश्वामित्रः क्रोधात् राजानमब्रवीत् मया बाल्यात् प्रभृति यत्तपः कृतं तेन त्वं दिवं व्रज तदा राजा सशरीरो दिवं ययौ। तदा शक्रस्तमुवाच त्रिशङ्को ! त्वं भूमौ पत ततोऽवाक्शिराः पतन् राजा पाहीति विश्वामित्रमुवाच विश्वामित्रस्तिष्ठेति तमुक्त्वा स्वर्गदक्षिणमार्गेऽपरान् सप्तर्षीन् सृष्ट्वापरं नक्षत्रचक्रं सृष्टमुपचक्रमे देवाः सम्भ्रान्ता ऋषिमूचुरयं सशरीरः स्वर्गं गन्तुं नार्हति विश्वामित्रस्तानुवाच अहमस्य स्वर्गारोहणं प्रतिज्ञाय कथमनृतं करिष्यामि असौ यावल्लोकाः स्थास्यन्ति तावदस्मिन् नक्षत्रमयत्रैव तिष्ठतु त्रिशङ्कुरप्यवाक्शिरास्तिष्ठतु। इति रामायणम्॥ * ॥ विडालः। शलभः। इति मेदिनी। के, १०१॥ चातकपक्षी। इति शब्दरत्नावली॥ खद्योतः। इति शब्दमाला॥ (महादेवः। यथा, महाभारते। १३। १७। १०२।

"अनेकपाच कापाली त्रिशङ्कुरजितः शिवः॥")

त्रिशङ्कुजः, पुं, (त्रिशङ्कोर्जायते इति। जन+ड।) हरिश्चन्द्रराजः। इति हेमचन्द्रः। ३। ३६५॥

त्रिशङ्कुयाजी, [न्] पुं, (त्रिशङ्कुं सूर्य्यवंशीयराजविशेषं याजयतीति। यज+णिच्+णिनिः।) विश्वामित्रः। इति हेमचन्द्रः। ३। ५१४॥

त्रिशरणः, पुं, (त्रीणि शरणान्यस्येति।) जिनः। इति त्रिकाण्डशेषः॥

त्रिशर्करा, स्त्री, (त्रिभिर्गुणिता शर्करा। शाकपार्थिवादित्वात् समासः।) मिलितगुडोत्पन्ना हिमोत्था मधुरा। इति राजनिर्घण्टः॥

त्रिशला, स्त्री, (तिस्रः शाला यस्याः। पृषोदरादित्वात् साधुः।) दृहार्हन्मातृविशेषः। सा वर्द्धमानमाता। इति हेमचन्द्रः। १। ४१॥

त्रिशाखपत्त्रः पुं, (त्रिशाखं त्रिदलं पत्त्रमस्य।) विल्वः। इति राजनिर्घण्टः॥

त्रिशिखं, क्ली, (तिस्रः शिखा यस्य।) त्रिशूलम्। किरीटम्। इति हेमचन्द्रः॥

त्रिशिखः, पुं, (तिस्रः शिखा अस्य।) राक्षसविशेषः। स रावणपुत्त्रः। इति हेमचन्द्रः॥ विल्वः। इति राजनिर्घण्टः॥ (तामसमन्वन्तरस्य इन्द्रः। यथा, भागवते। ८। १। २८।

"सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः।
ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे॥"

शिखात्रययुक्ते, त्रि,। यथा, महाभारते। २। ४२। ११।

"त्रिशिखां भ्रुकुटीञ्चास्य ददृशुः सर्व्वपार्थिवाः।
ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव॥")

त्रिशिखिदला, स्त्री, (तिस्रः शिखाः सन्त्यस्येति इनिः। त्रिशिखि दलं यस्याः।) मालाकन्दः। इति राजनिर्घण्टः॥

त्रिशिराः, [स्] पुं, (त्रीणि शिरांसि मस्तकानि यस्येति।) कुवेरः। इति हेमचन्द्रः। २। १०३॥ ज्वरः। यथा,—

"त्रिशिरास्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयम्।"
इति श्रीभागवतम्॥

रावणपुत्त्रविशेषः। (यथा, रामायणे। ६। १२५। ६।

"अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः।
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ॥")

खरसेनापतिः। इति रामायणम्॥ (यथा, रघुवंशे। १२। ४७।

"तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः॥"

स्वनामख्यातस्त्वष्टुः प्रजापतेः पुत्त्रः। यथा, महाभारते। ५। ६। २।

"त्वष्टा प्रजापतिर्ह्यासीद्देवश्रेष्ठो महातपाः।
सपुत्त्रं वै त्रिशिरसमिन्द्रद्रोहात् किलासृजत्॥"

असुरविशेषः। यथा, तत्रैव। ६। ३१। १२।

"वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो॥"

शिखात्रयविशिष्टे, त्रि। यथा, तत्रैव। २३। १४७। ५४।

"त्रिशिरास्तस्य देवस्य शातकुम्भमयो द्रुमः।
ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः॥")

त्रिशीर्षकं, क्ली, (त्रीणि शीर्षाणि यस्य। कप्।) त्रिशूलम्। इति हेमचन्द्रः। ३। ४५१॥

त्रिशूलं, क्ली, (त्रीणि शूलानि इव अग्राणि यस्य।) अस्त्रविशेषः। तत्पर्य्यायः। त्रिशिखम् २। इति मेदिनी। खे, ६॥ शूलम् ३ त्रिशीर्षकम् ४। इति हेमचन्द्रः॥ (यथा, महाभारते। २। ३०। ४६।

"चक्राणि परिघाश्चैव त्रिशूलानि परश्वधान्॥")

त्रिशूली, [न्] पुं, (त्रिशूलमस्त्रमस्यस्येति। त्रिशूल+इनिः।) शिवः। यथा,—

"प्राणोऽभेद्यस्त्रिशूली च वृषकेतुर्महाबलः॥"
इति स्कन्दपुराणे नीलकण्ठस्तव.॥

(त्रिशूलधारिणि, त्रि। स्त्रियां ङीप्। यथा, हरिवंशे। १६४। ११।

"त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम्॥")

त्रिशृङ्गः, पुं, (त्रीणि शृङ्गाणि यस्य।) त्रिकूटपर्व्वतः। इति शब्दरत्नावली॥ (यथा, ब्रह्माण्डे। ३६। १२।

"त्रिशृङ्गो जरधिश्चैव पर्व्वतावुत्तरौ वरौ॥")

त्रिकोणः। यथा, कुरङ्गैव हीनस्त्रिशृङ्गस्तदन्तरिति सारसुन्दरः॥

त्रिशृङ्गी, [न्] पुं, (त्रीणि शृङ्गाणीव सन्त्यस्येति। त्रिशृङ्ग+इनिः।) रोहितमत्स्यः। इति शब्दार्थकल्पतरुः॥

त्रिष्टुप्, [भ्] स्त्री, (त्रिषु स्थानेषु स्तुभ्यते जडीक्रियते इति। स्तुभ जडीकरणे+क्विप्। षत्वम्।) छन्दोविशेषः। इति छन्दोमञ्जरी॥ (यथा, वाजसनेयसंहितायाम्। ६। ३३।

"इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषम्॥") अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्। अस्योत्पत्तिविवरणं यथा, श्रीभागवते। ३। १२। ४६।

"तस्योष्णिगासील्लोमभ्यो गायत्त्री च त्वचो विभोः।
त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः॥
मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्॥"

त्रिसन्धिः, स्त्री, (त्रयः सन्धयो विकाशकाला यस्य।) पुष्पविशेषः। तत्पर्य्यायः। सान्ध्यकुसुमा २ सन्धिवल्ली ३ सदाफला ४ त्रिसन्ध्यकुसुमा ५ कान्ता ६ सुकुमारा ७ सन्धिजा ८। सा त्रिविधा। रक्ता १ सिता २ असिता च ३। अस्या गुणाः। कफकासहरत्वम्। रुच्यत्वम्। त्रिदोषशमनत्वञ्च। इति राजनिर्घण्टः॥

त्रिसन्ध्यं, क्ली, (तिसृणां सन्ध्यानां समाहारः। आसन्तोवेति पाक्षिकी क्लीवता।) पूर्व्वाह्णमध्याह्नापराह्णकालः। इत्यमरः। १। ४। ३॥ अस्य रूपान्तरम्। त्रिसन्ध्यी। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। ३। ८२। २१।

"सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन।
आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः।
गन्धर्व्वाप्सरसश्चैव नित्यं सन्निहिता विभो॥")

त्रिसन्ध्यव्यापिनी, स्त्री, (त्रिसन्ध्यं व्याप्नोतीति। वि+आप्+णिनि+ङीप्।) त्रिसन्ध्यघटकीभूतयावत्क्षणव्यापिनी तिथिः। यथा,—

"त्रिसन्ध्यव्यापिनी या तु सैव पूर्ण्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥"

इति पराशरीयेण त्रिसन्ध्यव्यापित्वेन नियमाभिधानं तदपवादकम्। इति तिथ्यादितत्त्वम्॥ तयोर्युग्मशास्त्रयोरपवादकं तदपवादकम्। इति तट्टीका॥

त्रिसमं, क्ली, (त्रीणि हरीतकीनागरगुडानि समानि यत्र।) समत्रयम्। समहरीतकीनागरगुडरूपम्। इति राजनिर्घण्टः॥

त्रिसरः, पुं, (त्रिभिः सीयते इति। सृ+अप्।) कृशरः। इति हेमचन्द्रः। ३। ६२॥

त्रिसवनं, क्ली, (त्रयाणां सवनानां कालानां समाहारः।) त्रिकालम्। इति प्रायश्चित्ततत्त्वम्॥

त्रिसवनस्नायी, [न्] पुं, (त्रिसवने त्रिकाले स्नातीति। स्ना+णिनिः।) त्रिकालस्नायी। इति स्मृतिः॥

त्रिसिता, स्त्री, (त्रिगुणिता सिता शर्करा।) त्रिशर्करा। इति राजनिर्घण्टः॥

त्रिसीत्यं, क्ली, (त्रिवारं सीतया सहितम्। "नौवयोधर्म्मेति।" ४। ४। ६१। इति यत्।) वारत्रयकृष्टक्षेत्रम्। इत्यमरः। २। ६। ६॥

त्रिसुगन्धि, क्ली, (त्रयाणां सुगन्धिद्रव्याणां समाहारः।) त्रिजातकम्। इति राजनिर्घण्टः॥ (यथा, धन्वन्तरौ। १२। ७३।
"त्वगेलापत्रसंयोगे त्रिसुगन्धि त्रिजातकम्।
नागकेसरसंयुक्तं चतुर्जातकमुच्यते॥")

त्रिसुपर्णः, पु, ऋग्वेदस्य वेदभागः। तद्व्रतञ्च। तद्योगात् पुरुषोऽपि त्रिसुपर्णः। इति मनुटीकायां कुल्लूकभट्टः॥ (यथा, मनुः। ३। १८५।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्॥")

त्रिस्रोताः, [स्] स्त्री, (त्रीणि स्रोतांसि यस्याः। यद्वा, त्रिषु लोकेषु स्वर्गमर्त्त्यपातालेषु स्रोतांसि यस्याः।) गङ्गा। (यथा, माघे। ३। १०।
"वभुस्तनिष्ठ्यूतमिवोच्चैस्त्वचे-
स्त्रिस्रोतसः सन्ततधारमम्भः॥")
नदीभेदः। इति मेदिनी। से, ५४॥

त्रिहल्यं, त्रि, (त्रिवारं हलेन कृष्टम्। हल+"मतजनहलात् करणजल्पकर्षेषु।" ४।४।९७। इति यत्।) वारत्रयकृष्टक्षेत्रम्। तत्पर्य्यायः। त्रिगुणाकृतम् २ तृतीयाकृतम् ३ त्रिसीत्यम् ४। इत्यमरः। २। ९। ९॥

त्रिहायणी, स्त्री, (त्रयो हायना यस्याः। "दामहायनान्ताच्च।" ४। १। २७। इति ङीप्। "त्रिचतुर्भ्यां हायनस्य।" इति णत्वम्।) त्रिवर्षा गौः। इत्यमरटीकायां रमानाथः॥ (यथा, कात्यायनश्रौतसूत्रे। २२। ९। १३।
"वत्सतर्य्यश्च त्रिहायण्योऽपीताः पञ्चवर्षा राजीव पृश्नयो नवनीतपृश्नयोऽरुणा पिशङ्गाः सारङ्गाः॥") द्रौपदी। यथा,—
"कृते युगे वेदवती त्रेतायां जनकात्मजा।
द्वापरे द्रौपदीच्छाया तेन कृष्णा त्रिहायणी॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥
(त्रिवत्सरे, त्रि। यथा, महाभारते। ३। २३९। ६।
"अथ सस्मारणां कृत्वा लक्षयित्वा त्रिहायनान्।
वृतो गोपालकैः प्रीतो व्यहरत् कुरुनन्दनः॥")

त्रुट, क ङ } छिदि। इति कविकल्पद्रुमः॥
त्रुट, य शि } (चुरां आत्मं-दिवां तुदां पर-अवयवद्विधाभावमात्रे अकं-छेदनमात्रे सक-सेट्।) द्वौ दन्त्यवर्गप्रथमादी। क ङ, त्रोटयते। य, त्रुट्यति त्रोटिष्यति। तुदाद्यन्तर्गणस्यैव कुटादित्वमिति। दिवादिपक्षे न कुटादित्वम्। शि, त्रुटति अत्रुटीत्। शेषस्तु विदीर्णभावेऽपि। यथा, त्रुट्यद्भीमधनुःकठोरनिनद इति महानाटकम्। मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थले। क्वचिन्न्यूनीभावेऽपि यथा। आरट्यति यदि न चक्षुष्यति वासस्तदा जघने इत्युद्भटः। इति दुर्गादासः॥

त्रुटिः, स्त्री, (त्रुट्यते इति। त्रुट्+"इगुपधात् कित्।" उणां। ४। ११९। इति इन् स च कित्।) सूक्ष्मैला। (यथा, सुश्रुते। उत्तरतन्त्रे। ५२।
"उत्कारिकां सर्पिषि नागराढ्यां
पक्त्वा सखण्डां त्रुटिकोषणाढ्याम्॥"
अस्याः पर्य्यायो यथा,—
"बहुला तीक्ष्णगन्धा च कपोता त्रिपुटा त्रुटिः॥"
इति वैद्यकरत्नमालायाम्॥) अल्पम्। संशयः। कालभेदः। स च द्वसरेणुचतुर्भागयुक्ततमात्मकः। इत्यमरः। ३। ३। ३७॥ क्षणद्वयात्मकः। इति तट्टीकायां स्वामी॥ यथा, भागवते। ३। ११। ५।
"अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्।
त्रसरेणुत्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृता॥")

त्रुटिवीजः, पु, (त्रुटिरिव वीजमस्य।) कचुः। इति शब्दमाला॥

त्रुटी, स्त्री, (त्रुटि+"कृदिकारादक्तिनः।" इति वा ङीष्।) त्रुटिः। इत्यमरटीकायां भरतः॥

त्रुनृप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-पर-सक-सेट्।) त्रुम्पति। इति दुर्गादासः॥

त्रुनृफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-पर-सकं-सेट्।) त्रुम्फति। इति दुर्गादासः॥

त्रुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां परं सकं-सेट्।) त्रोपति। इति दुर्गादासः॥

त्रुफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रोफति। इति दुर्गादासः॥

त्रेता, स्त्री, (त्रीन् भेदान् इता प्राप्नोतीति। यद्वा, त्रित्वमिता। पृषोदरादित्वात् साधुः। एतन्निरुक्तिर्यथा, हरिवंशे। २०५। ५।
"त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः।
अतस्त्रेतात्वमापन्नो यदेकस्त्रिविधः कृतः॥")
दक्षिणाग्निः गार्हपत्यः आहवनीयः एकोक्त्या इदमग्नित्रयम्। इत्यमरः। २। ७। २०॥ (यथा, हरिवंशे। २६। ४५-४६।
"मथित्वाग्निं त्रिधा कृत्वा अयजत् स नराधिपः।
इष्ट्वा यज्ञैर्बहुविधैर्गतस्तेषां सलोकताम्॥
गन्धर्व्वेभ्यो वरं लब्ध्वा त्रेताग्निं समकारयत्।
एकोऽग्निः पूर्व्वमेवासीदैलस्त्रेतामकारयत्॥")
द्वितीययुगम्। तस्य परिमाणं यथा,—
"त्रिचत्वारिंशल्लक्षैश्च विंशत्सहस्राधिकेन च।
चतुर्युगं परिमितं नरमानक्रमेण च॥
द्विषट्लक्षपरिमितं षण्णवतिसहस्रकम्।
त्रेतायुगं परिमितं कालविद्भिः प्रकीर्त्तितम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ ॥
तस्य धर्म्मा यथा,—
"त्रेतायुगे समायाते धर्म्मः पादोनतां गतः।
अल्पक्लेशान्विता लोकाः केचित् केचित् दयाश्रयाः॥
विष्णुध्यानरता लोका यज्ञदानपरायणाः।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः॥
चत्वा भूमिस्पृशः शूद्राः सर्व्वे ब्राह्मणसेविनः।
ब्राह्मणाश्च महाभागा वेदवेदाङ्गपारगाः॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः॥
कामवर्ज्जं तद्भार्य्याश्च स्त्रियः सर्व्वाः पतिव्रताः।
चतुर्भागश्च गर्भस्थाः पुत्राश्च पितृसेविनः॥"
इति पाद्मे क्रियायोगसारः॥

त्रेतायुगं, क्ली, (त्रेतैव युगम्।) द्वितीययुगम्। तस्योत्पत्त्यादि यथा,—
"कार्त्तिकशुक्लनवम्यां सोमवारे त्रेतायुगोत्पत्तिः। तत्र अवतारत्रयम्। वामनपरशुरामश्रीरामचन्द्राः। पुण्यं त्रिपादम्। पापमेकपादम्। पुष्करनामकं तीर्थम्। धार्म्मिको ब्राह्मणः। अस्थिगताः प्राणाः। चतुर्द्दशहस्तपरिमितो मानवदेहः। दशसहस्रवर्षं परमायुः। व्यवहार्य्यं रौप्यपात्रम्। तद्युगाब्दाः १२९६०००। तत्र राजानः सूर्य्यवंशीयबाहुकसगरांशुमदसमञ्जसदिलीपभगीरथाजदशरथश्रीरामचन्द्रकुशौ लवा एते चक्रवर्त्तिनः। तल्लक्षणम्।
दानधर्म्मरता नित्यं तपस्या तीर्थदर्शनम्।
अग्निहोत्रपरा लोका राजानो यज्ञकारिणः॥
तत्र तारकब्रह्मनाम।
रामनारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन॥"
इति सुद्राङ्कितपञ्जिकातः सङ्गृहीतम्॥

त्रेतायुगाद्या, स्त्री, (त्रेतायुगस्य आद्या प्रथमा तिथिः।) त्रेतायुगारम्भतिथिः। सा च कार्त्तिकशुक्लनवमी। तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम्॥

त्रेधा, व्य, (त्रिप्रकारम्। "संख्याया विधार्थे धा।" ५। ३। ४२। इति धा। "एधाच्च।" ५। ३। ४६। इति धा इत्येतस्य एधाच्।) त्रिधा॥ इति मुग्धबोधम्॥ (यथा, ऋग्वेदे। १। २२। १७।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पांसुरे॥")

त्रै, ङ पालने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सक-अनिट्।) दन्त्यवर्गाद्यादिः। ङ, त्रायते। चक्रिस्त्राहीत्यादौ त्राहीति त्रायते त्रा विच् पश्चात् त्रा इवाचरतीति क्वौ साध्यम्। केचिद्दादौ त्रा पठ्यते। इति क्रमदीश्वरः। इति दुर्गादासः॥

त्रैगुण्य, क्ली, (त्रिगुणानां भावः कर्म्म वा। त्रिगुण+ष्यञ्।) त्रिगुणधर्म्मः। सत्त्वरजस्तमस्त्वम्। यथा,—
"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्ज्जुन।"
इति श्रीभगवद्गीता॥
शैत्यसौगन्ध्यमान्द्यम्। यथा,—
"त्रैगुण्यललिते चारुमरुद्भिरुपवीणिते॥"
इति शिवरात्रिव्रतकथा॥
त्रिभिः पूरणञ्च॥

त्रैध, व्य, (त्रिप्रकारमिति त्रिधा। ततः "द्वित्र्योश्च धमुञ्।" ५। ३। ४५। इति धा इत्यस्य धमुञ्।) त्रिधा। इति मुग्धबोधम्॥ (यथा, महाभारते। ३। ३२। ३२।
"सर्व्वमेव हठेनैके दिष्टेनैके वदन्त्युत।
पुंसः प्रयत्नजं किञ्चित् त्रैधमेतन्निरुच्यते॥")

त्रैपुरः, पुं, (त्रिपुर एव । स्वार्थे अण् ।) त्रिपुर-देशः । तत्पर्य्यायः । डाहलः २ चैद्याः ३ चेदिः ३ । इति हेमचन्द्रः । ४ । २२ ॥ (देशोऽयं कामरूपस्य सीमाप्रदेशः । यथा, कामाख्या-तन्त्रे ।

"कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम् ।
कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि ॥"
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतं यावत् ॥

त्रिपुरस्य राजा । यथा, महाभारते । २ । ३१ । ५८ ।

"माद्रीसुतस्ततः प्रायाद्विजयी दक्षिणां दिशम् ।
त्रैपुरं स्ववशे कृत्वा राजानममितौजसम् ।
निजग्राह महाबाहुस्तरसा पौरवेश्वरम् ॥"

तद्देशवासिनि, पुभूम्नि । यथा, मात्स्ये । ११३ । ५३ ।

"कोशलाः कोसलाश्चैव त्रैपुरा वैदिशास्तथा ॥"

त्रिपुराधिष्ठितासुरभेदे । यथा, हरिवंशे । १२८ । ५४ ।

"येनोद्धृतास्त्रैपुरा मायिनो वै
दग्धा घोरेण वितथान्ताः शरेण ॥")

त्रैलोक्यं, क्ली, (त्रिलोकी एव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) त्रिलोकी । यथा, मार्कण्डेये ।

"त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा ॥"

त्रैलोक्यविजया, स्त्री, (त्रैलोक्यस्य विजयो यस्याः । एतस्याः सेवनेन हि त्रैलोक्यमधीनमिव प्रति-भातीति ज्ञानात् तथात्वम् ।) भङ्गा । इति शब्दचन्द्रिका ॥ भाङ् इति ख्याता ॥

त्रैविद्यः, पुं, (ऋग्वेदयजुर्व्वेदसामवेदरूपास्तिस्रो विद्या यस्येति त्रिविद्यस्ततः स्वार्थे अण् । यद्वा, तिस्रो विद्या अधीते वेद वा । "तदधीते तद्वेद ।" ४ । २ । ५९ । इति अण् ।) त्रिवेदज्ञः । त्रिविद्या-वेत्ता । यथा, मनुः । १२ । १११ ।

"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"

(व्रतविशेषे, क्ली । यथा, मनुः । २ । २८ ।

"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥"

"त्रैविद्याख्येन च व्रतेन ।" इति तट्टीकायां कुल्लूकभट्टः ॥ वेदत्रयप्रतिपाद्ये, त्रि । यथा, भागवते । ६ । २ । २४ ।

"धर्म्मं भागवतं शुद्धं त्रैवेद्यञ्च गुणाश्रयम् ॥"
"त्रैवेद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्म्मम् ।" इति तट्टीकायां स्वामी ॥)

त्रोटकी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

त्रोटिः, स्त्री, (त्रोट्यते भिद्यतेऽनयेति । त्रोटि + "अच इः ।" उणां । ४ । १३८ । इति इः ।) चञ्चुः । कट्फलम् । पक्षी । मीनभेदः । इति मेदिनी । टे, १८ ॥

त्रोटिहस्तः, पुं, (त्रोटिश्चञ्चुरेव हस्त इव ग्रहणसाधनं यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥

त्रोटी, स्त्री, (त्रोटि + कृदिकारादिति वा ङीष् ।) त्रोटिः । इति शब्दरत्नावली ॥

त्रोत्रं, क्ली, (त्रायते क्षिप्यते नियम्यतेऽनेनेति । त्रै पालने + "अशित्रादिभ्य इत्रोत्रौ ।" उणां । ४ । १७२ । इति उत्रः ।) गवादिताडनदण्डः । पाँचनी इति ख्यातः । तत्पर्य्यायः । प्राजनम् २ तोदनम् ३ प्रवयणम् ४ । गजस्य तोदनदण्डः । तत्पर्य्यायः । वैणुकम् २ वेणुकम् ३ इत्यमर-भरतौ ॥ अस्त्रम् । इति सिद्धान्तकौमुद्या-मुणादिवृत्तिः ॥ व्याख्यक्रिया । व्याधिभेदः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

त्रौक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) चतुर्दशस्वरी । रेफमध्यः । ऋ, अतुत्रौकत् । ङ, त्रौकते । इति दुर्गादासः ॥

त्र्यक्षः, पुं, (त्रीणि अक्षीणि नेत्राणि यस्य । ततः समासान्तषप्रत्ययः ।) शिवः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । १०६ । ११ ।

"आससाद महात्मानं त्र्यक्षं त्रिपुरमर्द्दनम् ॥"

दैत्यविशेषः । यथा, भागवते । ७ । २ । ४ ।

"भो भो दानवदैतेया द्विमूर्द्धंस्त्र्यक्ष । शम्बर । ।
शतबाहो ! हयग्रीव । नमुचे । पाक । इल्वल । ॥"

नेत्रत्रयविशिष्टे, त्रि । यथा, महाभारते । २ । ४३ । १ ।

"चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः ॥")

त्र्यक्षरः, पुं, (त्रीणि अक्षराणि यत्र ।) घटकः । इति त्रिकाण्डशेषः ॥ (त्रीणि अकारोकार-मकारात्मकानि अक्षराणि यत्र । प्रणवादौ, त्रि । यथा, मनुः । ११ । २६६ ।

"आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता ।
स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥"

छन्दोभेदे, स्त्री । यथा, वाजसनेयसंहिता-याम् । ९ । ३१ ।

"विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेषम् ॥"
"विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा तान् तादृशान् मनुष्यानुज्जेषमधिकं जयेयम् ।" इति वेददीपे महीधरः ॥)

त्र्यङ्गटं, क्ली, (त्रिभिरङ्गैरट्यते गम्यते इति । त्र्यङ्ग + अट् + घञ् । शकन्ध्वादित्वादलोपः ।) शिक्यभेदः । चौताङ्गनी । इति मेदिनी । टे, ४४ ॥

त्र्यङ्गटः, पुं, (त्रिभिरङ्गैरटतीति । अट् + अच् ।) चौताङ्गनी । शिक्यभेदः । ईश्वरः । इति हेम-चन्द्रः ॥

त्र्यञ्जनं, क्ली, (त्रयाणां अञ्जनानां समाहारः ।) अञ्जनत्रयम् । यथा, कालाञ्जनं पुष्पाञ्जनं रसा-ञ्जनम् । इति राजनिर्घण्टः ॥

त्र्यध्वगा, स्त्री, (त्रिषु अध्वसु मार्गेषु गच्छतीति । गम + डः ।) गङ्गा । इति त्रिकाण्डशेषः ॥

त्र्यम्बकः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि अम्ब-कानि नेत्राणि यस्य । शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, ऋग्वेदे । ७ । ५९ । १२ ।

"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ॥"
"त्रयाणां ब्रह्मविष्णुरुद्राणामम्बकः पिता ।" इति ऋग्वेदभाष्ये सायनः ।) एकादशरुद्राणामन्य-तमः । यथा, मात्स्ये । ५ । २९—३० ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥")

शिवाशचन्द्रशेखरनामकपौष्यराजपुत्रः । यथा,

"एवं तिसृणामम्बानां गर्भे जातो यतो हरः ।
अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः ॥
स राजपुत्रः कौमारावस्थां प्राप यदा तदा ।
सर्व्वशास्त्रार्थतत्त्वज्ञो जिष्णोस्तुल्यो बभूव ह ॥
बले वीर्य्ये प्रहरणे शास्त्रे शीले च तत्समः ।
नान्योऽभूत् पश्चाद्भूतले । नो वा भूमौ भविष्यति ॥
अभिषिच्याथ तं राजा कुमारं बलवत्तरम् ।
दशपञ्चैकवर्षीयं सर्व्वराजगुणैर्युतम् ॥
तिसृभिः सह भार्य्याभिर्व्वनं पौष्यो विवेश ह ।
वृद्धोचितक्रिया कर्त्तुं राजा परमधार्म्मिकः ॥
गते पितरि राजा स वनवासं महाबलः ।
सर्व्वां क्षितिं वशे चक्रेऽमात्यैः स चन्द्रशेखरः ॥
सार्व्वभौमो नृपो भूत्वा राजभिः परिषेवितः ।
अमरैरिव देवेन्द्रो विजहार श्रिया युतः ॥
एवं पौष्यसुतो भूत्वा त्र्यम्बकः प्राप्य निर्वृतिम् ।
ब्रह्मावर्त्ताह्वये रम्ये करवीराह्वये पुरे ॥
दृषद्वतीनदीतीरे राजा भूत्वा सुमोद ह ॥"
इति कालिकापुराणे ४९ अध्यायः ॥ * ॥

अन्यत् चन्द्रशेखरशब्दे द्रष्टव्यम् ॥

त्र्यम्बकसखः, पुं, (त्र्यम्बकस्य महादेवस्य सखा बन्धुः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) कुवेरः । इत्यमरः । १ । १ । ७१ ॥

त्र्यम्बका, स्त्री, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि अम्बकानि नेत्राणि यस्याः ।) दुर्गा । यथा,—

"सोमसूर्य्यानलास्त्रीणि यस्या नेत्राणि अम्बिका ।
तेन सा त्र्यम्बका देवी मुनिभिः परिकीर्त्तिता ॥")
इति देवीपुराणे ४५ अध्यायः ॥

त्र्यहस्पर्शः, पुं, (त्र्यहं चान्द्रदिनत्रयं स्पृशतीति । स्पृश + पचाद्यच् ।) त्रिदिनस्पृक् । तिथित्रय-स्पर्शयुक्ताहः । इति ज्योतिषम् ॥

त्र्यहस्पृक्, [श्] क्ली, (त्र्यहं स्पृशतीति । स्पृश + "स्पृशोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) त्र्यहस्पर्शः । तथा च वशिष्ठः ।

"एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा ।
तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम् ॥
फलमिति वैदिककर्म्मपरम् ॥
अधिमासे दिनपाते धनुषि रवौ मानुकह्निरी मासि ।
चक्रिणि सुप्ते कुर्य्यान्नो माङ्गल्यं विवाहञ्च ॥
इति भीमपराक्रमः ॥

दिनपाते दिनक्षये ।

त्र्यहस्पृशं नाम यदेतदुक्तं
तत्र प्रयत्नः सुविभिर्व्विधेयः ॥
विवाहयात्राशुभपुष्टिकर्म्म
सर्व्वं न कार्य्यं त्रिदिनस्पृशि तु ॥"
इति ज्योतिस्तत्त्वम् ॥

त्र्यैहिकः, त्रि, (ईहायां चेष्टायां भवमैहिक धनम्। "तत्र भवः।" ४।३।५३। इति ठञ्। त्र्यहे दिनत्रये पर्य्याप्तं ऐहिकं धनं यस्य।) दिनत्रयनिर्व्वाहोचितधनयुक्तः। यथा,
"कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।
त्र्यैहिको वापि भवेदश्वस्तनिक एव वा॥"
इति मानवे। ४। ७॥
"कुसूलधान्यक इति। कुसूलो ग्रीह्यागार स्यादत्याभिधानिकाः। इष्टकादिनिर्म्मितागार-धान्यसञ्चयो भवेत्। अत्र कालविशेषापेक्षायाम्।
यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति॥
इति मनूक्त एव कालो ग्राह्यः। तेन नित्य-नैमित्तिकधर्म्मकृत्यपोष्यवर्गसहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रय समधिकं वा निर्व्वाहो भवति तावद्धनः कुसूलधान्यक उच्यते। वर्षनिर्व्वाहोचितधान्यादिधनः कुम्भी-धान्यः। प्राक् सौमिकीः क्रियाः कुर्य्यात् यस्यान्नं वार्षिकं भवेदिति याज्ञवल्क्येन गृह-स्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात्। मनुरपि यदा वानप्रस्थस्यैव समानिचय एव वेत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसञ्चयः। मेधा-तिथिस्तु। यावता धान्यादिधनेन बहुभृत्य-दारादिमतस्त्रिसंवत्सरस्थितिर्भवति तावत् सुव-र्णादिधनवानपि कुसूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका याण्मासिकधान्यादिनिचयः कुम्भीधान्यक इति व्याख्यातवान्। गोविन्द-राजस्तु कुसूलधान्यक इत्येतद्व्याचष्ट कोष्ठ-प्रमाणधान्यसञ्चयो वा स्यात् द्वादशाह-मात्रपर्य्याप्तधनः। कुम्भीधान्यक इत्येतद्व्याचष्टे उष्ट्रिकाप्रमाणधान्यादिसञ्चयो वा षडहमात्र-पर्य्याप्तधनः।
द्वादशाहं कुसूलेन वृत्तिः कुम्भ्या दिनानि षट्।
इमाममूलां गोविन्दराजोक्तिं नानुरुन्महे।
ईहा चेष्टा तस्यां भवं ऐहिकं त्र्यहपर्य्याप्तमैहिकं धनं यस्य स त्र्यैहिकः तथा वा स्यात् दिन-त्रयनिर्व्वाहोचितधन इत्यर्थः। श्वोभवं श्वस्तनं भक्तं तदस्यास्तीति मत्वर्थीयमिकं कृत्वा नञ् समासः तथा वा भवेत्।" इति कुल्लूकभट्टः॥

त्र्यार्षेयाः, पुं, (ऋषेरयं आर्षेयं। ऋषि+ढक्। त्रय आर्षेयाः, ऋषिधर्म्मा नेत्रादीन्द्रियक्रिया-भावरूपा येषाम्।) अन्धवधिरमूकाः। यथा।
"अत्रोक्तानि वचनानि सर्व्वाणि तिर्य्यगधिकरण-न्यायमूलानि। तथा हि तिर्य्यगधिकरणे। तिर्य्यक्पङ्गुत्र्यार्षेयदेवतानामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः, तिरश्चां विशि-ष्टान्तःकरणविरहात् पङ्गोः प्रचरणविरहात् त्र्यार्षेयाणामन्धवधिरमूकानां अवेक्षणश्रवणो-च्चारणविरहादिति श्रीचन्द्रशेखरवाचस्पतिकृत-चन्दनधेनु-विधिधृततिर्य्यगधिकरणम्॥ (त्रय आर्षेया ऋषयो यत्र। त्रिप्रवरो गोत्रभेदः॥)

त्र्याहिकः, त्रि, (त्र्यहे भवः। त्र्यह+ठञ्।) तृतीयेऽह्नि भवः। यथा, ऐकाहिकद्व्याहिक-त्र्याहिकचातुर्थिकसततज्वरविषमज्वर इत्याद्य-पराजितास्तोत्रम्॥
("ऐकाहिको द्व्याहिकश्च त्र्याहिकश्च तथापरः।
वेलाज्वरश्चतुर्थोऽपि विज्ञानीयाच्च पञ्चमः॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥
अस्यौषधं यथा,—
"रसेन गन्धं शुद्धञ्च शिखिग्रीवञ्च पादिकम्।
गोजिह्वया जयन्त्या च तण्डुलीयैश्च भावयेत्॥
प्रत्येकं सप्तसप्ताह शुष्कं गुञ्जाचतुष्टयम्।
जरणेन घृतेनाद्यात् त्र्याहिकज्वरशान्तये॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥)

त्र्यूषण, क्ली, (त्रयाणां उषणानां समाहारः। पात्रादित्वात् क्लीत्वं न।) मिलितशुण्ठीपिप्पली मरिचम्। इत्यमरः। २। ९। १११। (यथा, गारुडे १९८ अध्याये।
"यमानी चित्रकं धान्यं त्र्यूषणं जीरकं तथा॥")

त्र्यूषणं, क्ली, (त्रयाणां ऊषणानां पिप्पलीमरिच-शुण्ठीनां समाहारः।) त्र्यूषणम्। इत्यमर-टीकायां भरतः॥
("पिप्पलीमरिचं शुण्ठीत्रयमेतद्विमिश्रितम्।
त्रिकटु त्र्यूषणं व्योषं कटुत्रयमथोच्यते॥"
इति वैद्यकपरिभाषायाम्॥
अस्य गुणा यथा,—
"त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान्।
गुल्ममेहकफस्थौल्यमेदश्लीपदपीनसान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
(घृतविशेषः। यथा, चरके चिकित्सास्थाने २२ अध्याये।
"त्र्यूषणं त्रिफलां द्राक्षां काश्मर्य्याणि परूषकम्।
द्वे पाठे सरलं यार्मीं स्वगुप्तां चित्रकं शटीम्॥
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम्।
त्रिकण्टकां विदारीञ्च पिष्ट्वा कर्षसमं घृतात्॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत्।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत्॥
कामलार्शोऽनिलाष्ठीलाक्षतशोषक्षयापहम्।
त्र्यूषणं नाम विख्यातमेतद्घृतमनुत्तमम्॥")

त्व, त्रि, (युष्मद्+क्विप्। "त्वाहौ सौ।" ७। २। ९४। इति त्वादेशः।) भवान्। तुमि इति भाषा। युष्मच्छब्दस्य प्रथमैकवचनान्तरूपोऽयं लिङ्गत्रये समानः। इति व्याकरणम्॥

त्वः, त्रि, (तनोति विस्तारयतीति। तन+"तनो-तेरनश्च वः।" उणां। २। ६३। इति चात् क्विप् अनश्च वः। आगमानित्यत्वात् नुमै-कल्पिकः।) भिन्नः। अन्यः। इत्यमरः। ३। १। ८२॥ (एकः। इति निरुक्तिः। १। ७॥ यथा, ऋग्वेदे। १०। ७१। ४।
"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः॥"
"त्वशब्द एकवाची। एकः। उतशब्दोऽप्यर्थे। पश्यन्नपि मनसा पर्य्यालोचयन्नपि वाचं न ददर्श। दर्शनफलाभावान्न पश्यति। त्व एकः शृण्वन्न-प्येनां वाचं न शृणोति श्रवणफलाभावात्। इत्यनेनार्थेनाविद्वानभिहितः॥" इति तद्भाष्ये सायनः॥)

त्वक्, [च्] स्त्री, (त्वचति संवृणोति मेदःशोणिता-दिकमिति। त्वच संवरणे+क्विप्। यद्वा तनोति विस्तारयतीति। तन+"तनोतेरनश्च वः।" उणां। २। ६३। इति चिक् अनश्च वः।) इन्द्रियविशेषः। यथा,—
"पूर्व्ववन्नित्यतायुक्तं देहव्यापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः॥"
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्॥
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्॥"
इति भाषापरिच्छेदः॥
वल्कलम्। (यथा, रघुः। २। ३७।
"कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य॥")
गुडत्वक्। (यथा, बृहत्संहितायाम्। ७७।१२।
"त्वगुशीरपत्रभागैः सूक्ष्मैलार्द्धेन संयुतैश्चूर्णः।
पटवासः प्रवरोऽयं मृगकर्पूरप्रबोधेन॥")
चर्म्म। इति मेदिनी। चे, ६॥ अस्य पर्य्यायः। असृग्धरा २। इत्यमरः॥ असृग्वरा ३। इति तट्टीका॥ त्वचम् ४ त्वचा ५ चर्म्म ६ कृत्ती ७ छल्ली ८। इति शब्दरत्नावली॥ (यथा, रघुः। ३। ३१।
"त्वचं स मेध्यां परिधाय रौरवी-
मशिक्षितास्त्रं पितुरेव मन्त्रवत्।
न केवलं तद्गुरुरेकपार्थिवः
क्षितावभूदेकधनुर्द्धरोऽपि सः॥"
कञ्चुकः। यथा, मनु.। २। ७९।
"महतोऽप्येनसो मासात् त्वचेवाहिर्विमुच्यते॥")
त्वचम्। इति राजनिर्घण्टः॥ दारचिनी इति भाषा॥

त्वक्कण्डुरः, पुं, (कण्डुं रातीति। रा+क। त्वचः कण्डुरः।) व्रणः। इति हारावली। १५६॥

त्वक्क्षीरा, स्त्री, (वंशत्वचः क्षीरमस्यत्र।) वंशरोचना। इत्यमरः। २। ९। १०९॥ (वंशरोचनाशब्देऽस्या विवृतिर्ज्ञातव्या॥)

त्वक्क्षीरी, स्त्री, (वंशत्वचः क्षीरमत्र। गौरा-दित्वात् ङीष्।) त्वक्क्षीरा। इति राज-निर्घण्टः॥ (यथा, सुश्रुते। १। ४४।
"सिताश्वगन्धा त्वक्क्षीरी विदारी त्रिवृता समाः॥"
(पर्य्यायोऽस्या यथा,—
"स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

त्वक्छद, पुं, (त्वगेव छदो यस्य।) क्षीरीशवृक्षः। इति रत्नमाला॥ क्षीरकञ्चुकी इति भाषा॥

त्वक्पत्रं, क्ली, (त्वगिव पत्राण्यस्य ।) गुडत्वक् । इत्यमरः ।२।४।१३४॥ तेजपत्रम् । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । उत्कटम् २ भृङ्गम् ३ त्वचम् ४ चोचम् ५ वराङ्गकम् ६ । इत्यमरः ।२। ४ । १३४ ॥ (यथा, महाभारते ।१२।१७०।१८। "चन्दनागुरुमुख्यानि त्वक्पत्राणां वनानि च ॥" यथा, सुश्रुते । १ । ४४ ।
"रेचनं सुकुमाराणां त्वक्पत्रमरिचांशकम् ॥")

त्वक्पत्री, स्त्री, (त्वक्पत्र + गौरादित्वात् ङीष् ।) हिङ्गुपत्री । तत्पर्य्यायः । कारवी २ पृथ्वी ३ वाष्पीका ४ कवरी ५ पृथुः ६ । इत्यमरः । २ । ६ । ४० ॥ तत्पत्री ७ । इति भरतः ॥

त्वक्पुष्पं, क्ली, (त्वचश्चर्म्मणः पुष्पमिव ।) रोमाञ्चः । इति त्रिकाण्डशेषः । किलासम् । इति हेमचन्द्रः । ३ । १३१ ॥

त्वक्पुष्पिका, स्त्री, (त्वक्पुष्पी + स्वार्थे कन् पूर्व्वह्रस्वः ।) किलासम् । इति त्रिकाण्डशेषः ॥ छुली इति भाषा ॥

त्वक्पुष्पी, स्त्री, (त्वक्पुष्प + गौरादित्वात् ङीष् ।) किलासम् । इति जटाधरः ॥

त्वच, त्वचोग्रहे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-सेट् ।) त्वचो ग्राहश्चर्म्मणो ग्रहणम् । त्वच त्वचने इति प्राञ्चः । त्वचनं संवरणमिति रमानाथः । त्वचति कायं वर्म्मणा भटः । इति दुर्गादासः ॥

त्वच, ज कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-वेट् ।) ज, त्वक्षिष्यति त्वक्ष्यति । कार्श्यं कृशीकरणम् । त्वचति काष्ठं तक्षा । इति दुर्गादासः ॥

त्वक्सारः, पु, (त्वचि सारो यस्य ।) वंशः । इत्यमरः । २ । ४ । १६० ॥ (यथा, मनुः ।१०।३७। "चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥"
वंशस्य त्वगपि । बाँचाडि इति भाषा ॥ यथा, सुश्रुते । १ । ८ ।
"अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकामिश्वारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुलय इति ॥") गुडत्वक् । इति शब्दचन्द्रिका । शौण्डकः । रन्ध्रवंशः । इति राजनिर्घण्टः ॥ (तल्तावाँश इति भाषा ॥ यथा, माघः । ४ । ६१ ।
"त्वक्साररन्ध्रपरिपूरितलब्धगीतिरस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः ॥")

त्वक्सारभेदिनी, स्त्री, (त्वचः सारं भिनत्तीति । भिद् + णिनिः + ङीप् ।) क्षुद्रचञ्चुवृक्षः । इति राजनिर्घण्टः ॥

त्वक्सारा, स्त्री, (त्वक्सारो वंश उत्पत्तिकारणत्वेनास्त्यस्याः अच् ततष्टाप् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (वंशरोचनाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

त्वक्सुगन्धः, पु, (त्वचि सुगन्धः सद्गन्धो यस्य ।) नारङ्गः । इति भावप्रकाशः ॥

त्वक्सुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः ।) एलवालुकनामगन्धद्रव्यम् । इति जटाधरः ॥

त्वग, इ कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-गतौ सकं-सेट् ॥)

त्वगङ्कुरः, पु, (त्वचश्चर्म्मणः अङ्कुर इव ।) रोमाञ्चः । इति त्रिकाण्डशेषः ॥

त्वगाक्षीरी, स्त्री, (त्वक्क्षीरी । पृषोदरादित्वात् साधुः ।) तुगाक्षीरी । वंशरोचना । इति जटाधरः ॥

त्वग्गन्धः, पु, (त्वचि गन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वग्जं, क्ली, (त्वचः जायते इति । जन + डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

त्वग्दोषः, पु, (त्वचो दोषो दूषणं यस्मात् ।) कोठरोगः । इति राजनिर्घण्टः ॥ त्वग्जातरोगः । तस्यौषधं यथा,—
"मन्दोष्णतोयेन गैरिकाचूर्णन्तु कनकस्य च ।
तिलोद्वर्त्तितदेहस्य हरेद्दुर्गौशप्रसारिकाम् ॥
त्वग्दोषश्चैव सेकश्च घर्म्मदोषश्च नश्यति ॥"
इति गारुडे १६४ अध्यायः ॥
स तु महारोगः । यथा, "महारोगिणः पापरोगाश्चकान्यतमरोगवतः । ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः ।" इति शुद्धितत्त्वम् ॥

त्वग्दोषापहा, स्त्री, (त्वग्दोषं रोगविशेषं अपहन्तीति । हन + डः ।) वाकुची । इति राजनिर्घण्टः ॥

त्वग्दोषारिः, पुं, (त्वग्दोषस्य रोगविशेषस्य अरिः शत्रुः । तन्नाशकत्वात् तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

त्वच, श ह्यतौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) वकारयुक्तः । दन्त्यवर्गाद्यादिः । श, त्वचती त्वचन्ती । इतिः संवरणम् । त्वचति कवचेन देहं वीरः । इति दुर्गादासः ॥

त्वचं, क्ली, (प्रशस्ता त्वगस्त्यस्येति । अर्श आदित्वात् अच् ।) वृक्षविशेषः । दारचिनी इति भाषा ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये । "सोमवल्काम्लता श्वेता मद्यं कालीयकं त्वचम् ॥") तत्पर्य्यायः । त्वक् २ वल्कलम् ३ भृङ्गम् ४ वराङ्गम् ५ मुखशोधनम् ६ शकलम् ७ सिंहलम् ८ वन्यम् ९ सुरसम् १० कामवल्लभम् ११ उत्कटम् १२ बहुगन्धम् १३ विप्लुलम् १४ वनप्रियम् १५ नटमण्डनम् १६ गन्धवल्कम् १७ वरम् १८ शीतम् १९ । अस्य गुणाः । कटुत्वम् । शीतलत्वम् । कफकासविनाशित्वम् । शुक्रामशमनत्वम् । कण्ठशुद्धिकरत्वम् । लघुत्वम् । इति राजनिर्घण्टः ॥ वल्कलम् । चर्म्म । (यथा, हरिवंशे । १७७ । १३६ ।
"श्रीवत्साङ्कोऽरविन्दाक्ष ऊर्द्ध्वरोमा मृदुत्वचः ॥" कञ्चुकः । खोलस् इति भाषा ॥ यथा, महाभारते । १२ । २४६ । ११ ।

"विमुक्तः सर्व्वपापेभ्यो मुक्तत्वच इवोरगः ॥") गुडत्वक् । इति धरणिः ॥

त्वचा, स्त्री (त्वच् + पचादेः टाप् । यद्वा, त्वचति संवृणोति सर्व्वशरीरमिति अच् ततष्टाप् ।) त्वक् । इति शब्दरत्नावली ॥

त्वचापत्रं, क्ली, (त्वचा त्वक् पत्रमिव यस्य ।) त्वक्पत्रम् । इति शब्दरत्नावली ॥

त्वचिष्ठः, त्रि, (अतिशयेन त्वग्वान् । त्वग्वत् + इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६४ । इति मतुपो लुक् ।) त्वचीयान् । अतिशयत्वग्विशिष्टः । इति व्याकरणम् ॥

त्वचिसारः, पु, (त्वचि सारो यस्य । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इति सप्तम्या अलुक् ।) वंशः । इत्यमरः । २ । ४ । १६० ॥

त्वचिसुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः । सप्तम्या अलुक् ।) क्षुद्रैला । इति हारावली ।६७॥

त्वत्, त्रि, (तनोतीति । तन + "तनोतेरनश्च वः ।" उणा २ । ६३ । इति चकारात् क्विप् तुक् अनश्च वः ।) भिन्नः । इति जटाधरः ॥ (युष्मद्शब्दस्य पञ्चम्येकवचनस्य रूपम् ।) भवतः । इति व्याकरणम् ॥ तोमा हइते इति भाषा ॥

त्वन्च, उ इतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् । क्त्वावेट् ।) वकारयुक्तादिः । उ, त्वचित्वा त्वक्त्वा । इतिर्गतिः । इति दुर्गादासः ॥

त्वन्च, उ ष सङ्कोचे । इति कविकल्पद्रुमः ॥ (रुधा-पर-सकं-सेट् । क्त्वावेट् ॥)

त्वदीय, त्रि, (तव इदम् । युष्मद् + छः । "प्रत्ययोत्तरपदयोश्च ।" ७ । २ । ९८ । इति मपर्यन्तस्य त्वादेशः ।) भवदीयम् । इति व्याकरणम् ॥ (यथा, रघुः । ३ । ५० ।
"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः ॥")

त्वर, ञि ष म ङ त्वरे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अकं-सेट् ।) ञि, त्वरितः तूर्णोऽस्ति । वा रुषामत्वरसंघुषास्वनिभ्यो निष्ठाया वेमत्वेऽपि वेदेषूच्चारणमेदार्थमेतदनुबन्धमन्ये मन्यन्ते । ष, त्वरा । म, त्वरयति । ङ, त्वरते । त्वरः इह शीघ्रमनुष्ठानम् । नानुनेतुमबलाः स तत्वरे । इति दुर्गादासः ॥

त्वरणं, क्ली, ('त्वर + भावे ल्युट् ।) त्वरा । इति व्याकरणम् ॥ (त्वरते शीघ्रं गच्छतीति । त्वर + ल्युः । द्रुतगामिनि, त्रि । यथा, अथर्व्ववेदे ।११। ८ । २८ ।
"आग्नेयीश्च वारुणीश्च त्वरणाः कृपणाश्च याः ॥")

त्वरा, स्त्री, (त्वरणमिति । त्वर + "घटादयः षितः ।" इति अङ् । ततः स्त्रीलिङ्गत्वात् टाप् ।) वेगः । तत्पर्य्यायः । सम्भ्रमः २ । इत्यमरः ।३। २ । २६ ॥ आवेगः ३ त्वरिः ४ तूर्णिः ५ संवेगः ६ । इति हेमचन्द्रः ।२।२३६॥ (यथा, महाभारते । ३ । २७९ । २७ ।
"व्यसहायं मया पूर्व्वं निर्ज्जितो जीवितप्रियः । सक्तो न्वासिरिति ज्ञात्वा का त्वरा मरणे पुनः ॥")

त्वरिः, स्त्री, (त्वरणमिति । त्वर+भावे इन् ।) त्वरा । इति हेमचन्द्रः । २ । ०३६ ॥

त्वरित, क्ली, (त्वर+क्तः ।) शीघ्रम् । (त्वरते स्मेति । त्वर+गत्यार्थाकर्म्मकेति कर्त्तरि क्तः । यद्वा, त्वरा सञ्जातास्य । त्वरा+तारकादित्वात् इतच् ।) तद्विशिष्टे, त्रि । इत्यमरः ।३।१।६८॥ (यथा, पञ्चतन्त्रे । ३ । १०२ ।
"बहुन्तराययुक्तस्य धर्म्मस्य त्वरिता गतिः ॥")

त्वरितोदितं, त्रि (त्वरितं शीघ्रं यथा तथा उदितं कथितम् ।) शीघ्रोच्चारितवचः । तत्पर्य्यायः । निरस्तम् २ । इत्यमरः । १ । ६ । २० ॥

त्वष्ट, त्रि, (त्वक्ष्यते तनूक्रियते स्मेति । त्वक्ष तनूकरणे+क्तः ।) तनूकृतः । चाँचा छोला इत्यादि भाषा । तत्पर्य्यायः । तष्टः २ । इत्यमरः । ३ । १ । ६६ ॥

त्वष्टा, [ऋ] पु, (त्वेषति दीप्यतीति । त्विष दीप्तौ+"नप्तृनेष्टृत्वष्टृहोत्रिति ।" उणां ।२।६६। इति तृच् इतोऽत्वञ्च ।) आदित्यविशेषः । (यथा, महाभारते । १ । ६५ । १४-१५ ।
"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः ।
ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत ॥
धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ।
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ॥"
एते तु चाक्षुषस्य मनोरन्तरे तुषिता नाम देवा आसन् वैवस्वतेऽन्तरे तु द्वादश आदित्याः । इति विष्णुपुराणे । १ । १५ । १३१—१३३ ॥ तथा मात्स्ये च । ६ । ३—५ ॥ त्वक्षति तनूकरोति काष्ठादिकं शिल्पकार्य्यत्वात् । त्वक्ष+तृच् ।) विश्वकर्म्मा । इति हेमचन्द्रः ।३।५८१॥ (यथा, माघे । ३ । ३५ ।
"त्वष्टुः सदाभ्यासगृहीतशिल्प-
विज्ञानसम्पत्प्रसवस्य सीमा ॥"
अयन्तु माघमासे सूर्य्यरथपरिभ्रमणाधिकारिणामन्यतमः । यथा विष्णुपुराणे । २ । १० । १५ ।
"त्वष्टाथ जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रोऽथ सप्तमः ।
माघमासे वसन्त्येते सप्त मैत्रेय । भास्करे ॥"
विश्वकर्म्मणः पुत्त्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।
"तस्य पुत्त्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ॥"
प्रजापतिविशेषः । यथा, महाभारते ।५।६।३।
"त्वष्टा प्रजापतिर्ह्यासीत् देवश्रेष्ठो महातपाः ।
स पुत्त्रं वै त्रिशिरसमिन्द्रद्रोहात् किलासृजत् ॥"
महादेवः । यथा, महाभारते । १३।१७।१०३ ।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")
वर्णसङ्करजातिविशेषः । इत्यमरः । २ ।१०।६ ॥ अस्य पर्य्यायः । काष्ठतट्शब्दे उत्पत्तिश्च सूत्रधारशब्दे द्रष्टव्या ॥ (इन्द्रः । इति ऋग्वेदभाष्ये सायनः । १ । ११७ । २२ ॥ असुरभेदः । इति तत्रैव सायनः । ३ । ४८ । ४ ॥)

त्वाचप्रत्यक्षं, क्ली, (त्वाचं त्वच्-सम्बन्धि प्रत्यक्षम् ।) स्पर्शज्ञानम् । घटादेः स्पर्शद्वारा बोधः । यथा, "अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिकाले त्वाचप्रत्यक्षं स्यात् ।" इति सिद्धान्तमुक्तावली ॥

त्वाष्टी, स्त्री, दुर्गा । यथा,—
"तुष तुष्टौ स्मृतो धातुस्तस्य तुष्टी निपातने ।
इज्यतेया प्रजास्तुष्टी त्वाष्टी तेन प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

त्वाष्ट्रः, पुं, (त्वष्टुरपत्यं पुमान् । अण् ।) वृत्रासुरः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ५ । ५ । ४ ।
"उद्यमेन हतस्त्वाष्ट्रो नमुचिर्बल एव च ॥"
विश्वरूपः । यथा भागवते । ६ । ८ । ३ ।
"हतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ॥"
त्वष्टृसम्बन्धिनि, त्रि । यथा, मार्कण्डेये ।२१।८५।
"ततोऽस्त्रं त्वाष्ट्रमादाय चिक्षेप प्रति दानवान् ॥"
तथा, भागवते । ६ । १४ । २७ ।
"श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥"
त्वष्टा अधिष्ठात्री देवतास्येति अण् । चित्रानक्षत्रम् । यथा, बृहत्संहितायाम् । ७ । ११ ।
"घोरा श्रवणस्त्वाष्ट्रं वसुदैवं वारुणञ्चैव ॥")

त्वाष्ट्री, स्त्री, (त्वष्टा अधिष्ठात्री देवतास्याः । त्वष्टृ+अण्+ङीप् ।) चित्रानक्षत्रम् । इति हेमचन्द्रः ॥ (त्वष्टुर्विश्वकर्म्मणोऽपत्यं स्त्री ।) सञ्ज्ञानाम्नी सूर्य्यपत्नी । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ६६ । ३५ ।
"त्वाष्ट्री तु सवितुर्भार्य्या वडवा रूपधारिणी ।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ ॥")
रथिका । क्षुद्ररथः । इति त्रिकाण्डशेषः ॥

त्विट्, [ष्] स्त्री, (त्विष दीप्तौ+सम्पदादित्वात् क्विप् ।) शोभा । (यथा, महाभारते । ३ । २० । २ ।
"अपश्यं द्वारकाञ्चाहं महाराज । हतत्विषम् ॥")
प्रभा । (यथा, माघे । १ । ३ ।
"चयस्त्विषामित्यवधारितं पुरः
सतः शरीरीति विभावितावृतिम् ॥")
वाक् । इति मेदिनी । षे, १३ ॥ व्यवसायः । जिगीषा । इति विश्वः ॥ (दीप्यमाने, त्रि । यथा, ऋग्वेदे । ४ । १७ । २ ।
"तव त्विषो जनिमन् रेजत द्यौ रेजद्भूमिर्भियसा स्वस्य मन्योः ॥"
"हे इन्द्र त्विषो दीप्यमानस्य तव त्वदीये जनिमन् जन्मनि सति ।" इति तद्भाष्ये सायनः ॥)

त्विष, औ ञ भासि । इति कविकल्पद्रुमः ॥ (भ्वां-उभ-दाने-सक-अन्यत्र अकं-अनिट् ।) औ, अत्विक्षत् । ञ, त्वेषति त्वेषते । भासो दीप्तिः । अवाप्रिवासे दाने च त्विषौ ञ अनुवर्त्तते । औ, अवात्विक्षत् । ञ, अवत्वेषति अवत्वेषते । जनो निवसति ददाति दीप्यते वा इत्यर्थः । इति दुर्गादासः ॥

त्विषा, स्त्री, (त्विष्+हलन्तात् वा टाप् ।) दीप्तिः । इति शब्दरत्नावली ॥

त्विषाम्पतिः, पु, (त्विषां प्रभाणां पतिः । षष्ठ्या अलुक् ।) सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥

त्विषिः, स्त्री, (त्विष दीप्तौ+"इगुपधात् कित् ।" उणां ४ । ११६ । इति इन् स च कित् ।) किरणम् । इति हेमचन्द्रः । २ । १४ ॥ (यथा, ऋग्वेदे । ६ । ७१ । ६ ।
"उच्छेव यूथा परियन्नरावीदधि
त्विषीरधित सूर्य्यस्य ॥")

त्सर, छद्मगतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अक-सकं च-सेट् ।) दन्त्यवर्गाद्यस्याद्यो दन्त्यसकारः । त्सरति धूर्त्तः छलेन गच्छतीत्यर्थः । इति दुर्गादासः ॥ (यथा, अथर्व्ववेदे । ८ । ६ । ८ ।
"यस्त्वा स्वपन्तीं त्सरति यस्त्वा दिप्सति जाग्रतीम् ॥")

त्सरुः, पु, (त्सरति कौटिल्यं गच्छतीति । त्सर+"भृमृशीतॄचरित्सरीति ।" उणां १ । ७ । इति उः ।) खड्गमुष्टिः । इत्यमरः । २ । ८ । ६० ॥ तत्पर्य्यायः । मुष्टिः २ तालतलः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । २४३ ।
"ज्योत्स्नाभिसारसम्भृतवेशे ! व्याकोषमल्लिकोत्तंसे ।।
विशसि मनो निशितेव स्मरस्य कुसुमत्सरुच्छुरिका ॥"
सर्पः । यथा, ऋग्वेदे । ५ । ५० । १ ।
"मा मां पद्येन रपसा विदत्त्सरुः ।"
"तथा त्सरुश्छद्मगामी जिह्मगः सर्प इत्यर्थः मां पद्येन पादभवेन रपसा । रपि शब्दकर्म्मा । शब्देन मा विदत् मा जानातु ।" इति तद्भाष्ये सायनः ॥)

थ

थ, थकारः । स व्यञ्जनसप्तदशवर्णः । तवर्गद्वितीयवर्णश्च । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १७ ।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥")
अस्य स्वरूपं यथा,—
"थकारं चञ्चलापाङ्गि ! कुण्डलीमोक्षरूपिणी ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
अरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"
इति कामधेनुतन्त्रम् ॥
(वङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,—
"कुञ्चिता कुण्डली भूत्वा वामाद्दक्षिणतस्ततः ।
वामतः कुञ्चिता भूत्वा दक्षाधोदक्षतो गता ॥
ऊर्द्ध्वं ऋज्वायता रेखा सुरा गङ्गादयः क्रमात् ।
वाणी भवानी लक्ष्मीश्च ध्यानमस्य प्रचक्षते ॥"

अस्य ध्यानादि यथा,—
"नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम्।
पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा थकारन्तु तन्मन्त्रं दशधा जपेत्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य नामानि यथा,—
"थः स्थिरामी महाग्रन्थिर्ग्रन्थिग्राही भयानकः।
शिली शिरश्चिणी दण्डी भद्रकाली शिलोच्चयः ॥
कम्पो बुद्धिर्विकर्म्मा च दक्षनाशाधिपोऽमरः।
वरदा भोगदा केशी वामजानुरथोऽनलः ॥
लोलोजयिनी गुह्यः शरचन्द्रविदारकः ॥"
इति नानातन्त्रशास्त्रम् ॥

थं, क्ली, रक्षणम्। मङ्गलम्। साध्वसम्। इति मेदिनी। थे, १ ॥

थः, पु, (थुड् संवृतौ+डः।) पर्व्वतः। भयरक्षकः। इति मेदिनी। थे, १ ॥ व्याधिभेदः। भयचिह्नम्। भक्षणम्। इति शब्दरत्नावली ॥

थुड, शि संवृतौ। इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट्।) शि, थुडति। अथुडीत् तुथोड। इति दुर्गादासः ॥

थुत्कारः, पु, (कृ+भावे घञ्। थुदित्यव्यक्तशब्दस्य कारः करणं यत्र।) निष्ठीवनत्यागानुकरणशब्दः ॥

थुर्व्व, ई वधे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी। थूः थुरौ थुरः। ई थूर्णः। इति दुर्गादासः ॥

थुर्व्वणं, क्ली, हननम्। थुर्व्वधातोर्भावे अनटि (ल्युटि) निष्पन्नम् ॥

थूथू, अ, निष्ठीवनत्यागानुकरणशब्दः। यथा,— थूथूकृत्य वमद्भिरध्वगजनैरिति सूक्तिकर्णामृतम् ॥

थैथै, अ, वाद्यानुकरणशब्दविशेषः। इति सङ्गीतदामोदरः ॥

थोडनं, क्ली, संवरणम्। इति थुडधातोर्भावेऽनट् प्रत्ययः (ल्युट्) ॥

द

द, दकारः। स व्यञ्जनाष्टादशवर्णः तवर्गतृतीयवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम् ॥ (यथा, शिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥")

अस्य स्वरूपं यथा,—
"दकारं शृणु चार्व्वङ्गि। चतुर्व्वर्गप्रदायकम्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ॥
त्रिशक्तिसहितं देवि। त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसंयुक्तं स्वयं परमकुण्डली ॥
रक्तविद्युल्लताकारं दकारं हृदि भावय ॥"
इति कामधेनुतन्त्रम् ॥

अस्य ध्यानादि यथा,—
"ध्यानमस्य दकारस्य वक्ष्यते शृणु पार्व्वति ।।
चतुर्भुजां पीतवस्त्रां नवयौवनसंस्थिताम् ॥
अनेकरत्नघटितहारनूपुरशोभिताम्।
एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
अस्य नामानि यथा, नानातन्त्रशास्त्रे।
"दोऽत्रीशो धातकिर्धाता दाता दत्तं कलत्रकम्।
दीनं ज्ञानञ्च दानञ्च भक्तिराह्ववनी धरा ॥
सुषुम्ना योगिनी सद्यः कुण्डली वामगुल्फकः।
कात्यायनी शिवा दुर्गा लज्जा ना त्रिकण्डकी ॥
स्वस्तिकः कुटिलारूपः क्षमाक्षोमा जितेन्द्रियः।
धर्म्मश्च कामदेवश्च भ्रमा मध्यसप्तजा ॥
हरिद्रापुरमन्त्री च दक्षपाणिस्थिरेखकः ॥"

दं, क्ली, (ददाति आनन्दमिति। दा+बाहुलकात् कः।) भार्य्या। इत्येकाक्षरकोषः ॥

दः, पु, (दै प शुद्धौ वा दा दाने+बाहुलकात् कः।) अचलः। दत्तः। दाता। इति मेदिनी दे, १ ॥ (दो छेदे+डः।) खण्डनम्। इति शब्दरत्नावली ॥ (यथा, माघे। १९। ११४।
"दाददोद्दुद्दुद्दादी दाददोदूददीददोः।
दुद्दादं दददे दुद्दे ददाददददोऽददः ॥"
"ददते इति दादो दानम्। दददाने कर्म्मणि घञ्। दादं ददातीति दाददो दानप्रदः।" इत्यादौ मल्लिनाथकृतटीकायामर्थविशेषा बोद्धव्याः ॥)

दंशः, पु, (दशतीति। दंश दंशने+पचाद्यच्।) कीटविशेषः। डाँश इति भाषा। तत्पर्य्यायः। वनमक्षिका २। इत्यमरः। २। ५। २७ ॥ गोमक्षिका ३ अरण्यमक्षिका ४ भम्भरालिका ५। इति शब्दरत्नावली ॥ पांशुरः ६ दंशकः ७। इति हारावली ॥ दुष्टसुखः ८ क्रूरः ९ क्षुद्रिका १०। इति राजनिर्घण्टः ॥ (यथा, मनुः। १। ४५।
"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
उष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम् ॥"
दशतीव शरीरमिति।) वर्म्म। (यथा, भागवते। ३। १८। ६।
"परानुषक्तं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम् ॥"
दश+भावे घञ्।) दशनम्। इति मेदिनी। शे, ७ ॥
("सुप्तता जायते दंशे कृष्णाचातिस्रवत्यसृक् ॥"
इति सुश्रुते कल्पस्थाने षष्ठेऽध्याये ॥)
दन्तः। इति हेमचन्द्रः। ३। २४८ ॥ खण्डनम्। (दन्तक्षतम्। यथा, आर्य्यासप्तशत्याम्। ५११।
"घर्म्मद्युतिर्न ललाटे न लुलितमङ्गं न चाधरे दंशः।
अतुपलमहारि वारि च न सृष्टसुपायचतुरेण ॥")
दोषः। मर्म्म। सर्पक्षतम्। इति विश्वः ॥ (यथा,
"सर्व्वैरेवार्दितः सर्पैः शाखादष्टस्य देहिनः।
दंशस्योपरि बध्नीयादरिष्टाश्चतुरङ्गुले ॥
शीतचर्म्मान्तवल्कानां मृदुनान्यतमेन च।
न गच्छति विषं देहमरिष्टाभिर्निवारितम् ॥"
इति सुश्रुते कल्पस्थाने पञ्चमेऽध्याये ॥
असुरविशेषः। यथा, महाभारते। १२। ३। १९।
"सोऽब्रवीदहमासं प्राक् दंशो नाम महासुरः ॥"
अयन्तु भृगुभार्य्यामपहरन् तच्छापात् मांसशोणिताशी कीटो जातः। ततः कदाचित् गुरोः परशुरामस्य निद्रां प्रतिपालयितुः कर्णस्य ऊरुदेशं निर्भिद्य शोणितं पीतवान्। ततः परशुरामेणायं शापात् निर्म्मोचितः ॥ एतद्विवरणन्तु तत्रैवाध्याये द्रष्टव्यम् ॥)

दंशकः, पु, (दशतीति। दन्श+ण्वुल्।) दंशः। इति हारावली। १२३ ॥ (नृपविशेषः। स तु कम्पनादेशाधिपतिः। यथा, राजतरङ्गिण्याम्। १७८।
"दंशकः कम्पनाधीशः प्रवृद्धे तत्र सक्रुधि।
विद्रुतो विषलाटायां निपत्य निहतः खशैः ॥")
दंशनकर्त्तरि, त्रि ॥

दंशन, क्ली, (दशतीव शरीरमिति। दश+ल्युः।) वर्म्म। (यथा, महाभारते। ३। २६८। १८
"संनह्यध्वं सर्व्व एवेन्द्रकल्पा
महान्ति चारूणि च दंशनानि ॥"
दन्श+भावे ल्युट्।) दन्तादिना खण्डनम्। इति हेमचन्द्रः ॥ कामड़ान हुलफुटान इति भाषा। (यथा, महाभारते। ८। ८३। ३४ ॥
"दशनचाहिभिः कृष्णैर्दीप्तस्य चतुर्वेक्षणि ॥")

दंशभीरुः, पु स्त्री, (दंशात् वनमक्षिकातः भीरुर्भयशीलः।) महिषः। इति त्रिकाण्डशेषः ॥

दंशमूलः, पुं, (दंशवदुग्रं मूलमस्य।) शिग्रुः। इति राजनिर्घण्टः ॥ (गुणादयोऽस्य शिग्रुशब्दे ज्ञातव्याः ॥)

दंशितः, त्रि, (दंशो वर्म्म सञ्जातोऽस्य परिहितत्वादिति। दंश+तारकादित्वात् इतच्।) वर्म्मितः। (यथा, महाभारते। २। २९। २।
"महता बलचक्रेण परराष्ट्रावमर्द्दिना।
हस्त्यश्वरथपूर्णेन दंशितेन प्रतापवान् ॥"
दंश्यते इति। दन्श+णिच्+भावे क्तः।) दष्टः। इति हेमचन्द्रः ॥ (भासमानः। यथा, महाभारते। ४। ४०। २।
"वारणा यत्र सौवर्णाः पृष्ठे भासन्ति दंशिताः।
सुपार्श्वं सुग्रहञ्चैव कस्यैतद्धनुरुत्तमम् ॥"
"दंशिता भासमानाः।" इति नीलकण्ठः ॥)

दंशी, स्त्री, (क्षुद्रो दंशः। स्वल्पार्थे ङीष्। यद्वा, दशतीति। दश+अच्। गौरादित्वात् ङीष्।) क्षुद्रदंशः। इत्यमरः। २। ५। २७। छोट-डाँश इति भाषा ॥

दंष्ट्रा, स्त्री, (दश्यतेऽनयेति। दन्श+"दाम्नीशसेति।" ३। २। १८२। इति करणे ष्ट्रन्। यद्वा, "सर्व्वधातुभ्यष्ट्रन्।" उणां ४। १५८। इति ष्ट्रन्। गौरादिपाठे पितामहीशब्दस्य पाठात् षित्वे ङीषोऽनित्यत्वात् टाप्।) दन्त-

विशेषः । तत्पर्य्यायः । दाढ़ा २ । इति हेमचन्द्रः । ३ । २४७ ॥ (यथा, साहित्यदर्पणे । १ । ३ ।
"यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलम् ।
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी ॥")

दंष्ट्रिका, स्त्री, (दंष्ट्रा विद्यतेऽस्याः । दंष्ट्रा + "ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) दाढ़िका । इति हेमचन्द्रः । ३ । २४७ ॥

दंष्ट्री, [न्] पुं स्त्री, (प्रशस्ता दंष्ट्रा अस्यस्येति । दंष्ट्रा + "ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥ सर्पः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ३३ । २३ ।
"विलानि दंष्ट्रिणः सर्व्वे सानूनि मृगपक्षिणः ।
त्यजन्त्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि ॥")
दंष्ट्राविशिष्टे, त्रि । यथा,—
"दंष्ट्रिभिः शृङ्गिभिर्व्वापि हता म्लेच्छैश्च तस्करैः ।
ये स्वाम्यर्थे हता यान्ति राजन् । स्वर्गं न संशयः ॥"
इति शुद्धितत्त्वे अग्निपुराणम् ॥

दकं, क्ली, (उदक + पृषोदरादित्वात् साधुः ।) जलम् । इति त्रिकाण्डशेषः ॥

दक्ष, ङ स्वदे । वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) स्वद इह शीघ्रकरणम् । ङ, दक्षते धनसद्व्योगी । शीघ्रमुत्पादयति इत्यर्थः । इति दुर्गादासः ॥ (सामर्थ्ये अकर्म्मकोऽयम् । यथा, ऋग्वेदे । २ । १।११।
"तमिळा शतमिद्वाखि दक्षसे ॥"
"दक्षसे दानाय समर्थो भवसि ॥" इति तद्भाष्ये सायनः ॥)

दक्ष, घ म ङ हन्त्यर्थे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सक-सेट् ।) म, अदक्षि अदाक्षि । दक्ष दक्षम् । दाक्षं दाक्षम् । माङनन्त्वपलादनुपधयोरपि दीर्घः । क्षमते तु दीर्घविधिरुपधां नापेक्षते । घ, दक्षा । तेमञ्चात् सरोदिगनेनेवेष्टसिद्धेऽस्य माङनन्त्वस्वरपर्य्यन्तघटादिभ्यो ङ इति प्राचीनमतानुवादार्थः । ङ, दक्षते । हन्त्यर्थे गतिवधयोः । इति दुर्गादासः ॥

दक्षः, पुं, (दक्षते वृद्धिप्रवृद्धये समर्थो भवतीति । दक्ष + अच् ।) प्रजापतिविशेषः । स ब्रह्मणो दक्षिणाङ्गुष्ठाज्जातः । ततः प्रभृति मैथुनेन प्रजा जाताः । यथा,—
"शरीरानथ वक्ष्यामि मातृहीनान् प्रजापतेः ।
अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत ॥"
इति मत्स्यपुराणे । ३ । ६ ॥
"यथा ससर्ज्ज चैवादौ तथैव शृणुत द्विजाः ॥
यदा तु सृजतस्तस्य देवर्षिगणपन्नगान् ॥
न वृद्धिमगमल्लोकस्तदा मैथुनयोगतः ।
दक्षः पुत्त्रसहस्राणि पाञ्चजन्यामजीजनत् ॥"
इति च तत्रैव । ५ । ३—४ ॥
अस्य भार्य्या स्वायम्भुवमनुकन्या प्रसूतिः । अस्य षोड़शकन्याः यथा, श्रद्धा १ मैत्री २ दया ३ शान्तिः ४ तुष्टिः ५ पुष्टिः ६ क्रिया ७ उन्नतिः ८ बुद्धिः ९ मेधा १० मूर्त्तिः ११ तितिक्षा १२ ह्रीः १३ स्वाहा १४ स्वधा १५ सती १६ । तस्य त्रिसहस्रपुत्राः । दक्षप्रजापतिर्द्वितीयजन्मनि दशप्रचेतसः सुतो भूत्वा षष्ठमन्वन्तरे प्रजास्सृष्टिञ्चकार । स असिक्न्यां पत्न्यां षष्टिं कन्या जनयित्वा प्रजापतिभ्यो दत्तवान् ।
धर्म्माय दश । कश्यपाय सप्तदश । चन्द्राय सप्तविंशतिः । कृशाश्वाय द्वे । भूताय द्वे । अङ्गिरसे द्वे । इति श्रीभागवतम् ॥ * ॥
ताम्रचूड़ः । (यथा, चरके सूत्रस्थाने २७ अध्याये ।
"धार्त्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि ।
चटकानाञ्च यानि स्युरण्डानि च हितानि च ॥")
मुनिभेदः । (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ४ । ६७ ।
"कणादो गौतमः कण्वः पाणिनिः शाकटायनः ।
ग्रन्थञ्चकार यत्कृत्वा दक्षः कात्यायनः स्वयम् ॥"
अयं हि धर्म्मशास्त्रप्रयोजकानामन्यतमः । यथा, याज्ञवल्क्ये । १ । ५ ।
"पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥")
हरवृषः । द्रुमभेदः । वह्निः । इति विश्वः ॥ महेशः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । १७ । ११३ ।
"धृतिमान् मतिमान् दक्षः सत्कृतश्च युगाधिपः ॥"
विष्णोर्नामविशेषः । यथा, महाभारते । १३ । १४९ । १११ ।
"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ॥"
बलम् । इति निघण्टुः । २ । ९ । "दक्ष शब्देन चकारात् वृद्धौ । दक्ष गतिहिंसनयोः । दक्षविरुत्साहार्थः । इति स्कन्दस्वामी । असुन् । शत्रुविजये क्षिप्रो भवत्यनेन हिंस्यन्ते वानेन शत्रवः प्रोत्साहितो वा भवति शत्रुविजये ।"
"दक्ष इति सकारान्तं बलनाम अकारान्तमपि तस्यैवमर्थान्तरे द्रष्टव्यम् ॥" इति तट्टीकायां देवराजयज्वा । यथा, ऋग्वेदे ।१।९५।६।
"स दक्षाणां दक्षपतिर्बभूव ॥"
"सोऽग्निर्दक्षाणां सर्व्वेषां बलानां दक्षपतिर्बलाधिपतिर्बभूव ।" इति तद्भाष्ये सायनः ॥
गरुड़स्य पुत्राणामन्यतमः । यथा, महाभारते । ५ । १०१ । १२ ।
"मेघकृत् कुमुदो दक्षः सर्पान्तः सोमभोजनः ॥")
त्रि, पटुः । इति मेदिनी । षे, १४ ॥ अस्य पर्य्यायः चतुरशब्दे द्रष्टव्यः ॥ (यथा, महाभारते । १ । ७४ । ३९ ।
"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती ।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता ॥"
समर्थः । यथा, ऋग्वेदे । १ । ५९ । ४ ।
"बृहती इव सूनवे रोदसी
गिरो होता मनुष्यो न दक्षः ॥"
प्रवृद्धः । यथा, तत्रैव । १ । १५ । ६ ।
"युवं दक्षं धृतव्रत मित्रावरुण दूळभम् ॥"
"दक्षं प्रवृद्धम् ।" इति तद्भाष्ये सायनः ॥
दक्षिणः । अपसव्यम् । यथा, महानिर्व्वाणे । ३ । ४४ ।
"प्राणायामं ततः कुर्य्यात् मूलेन प्रणवेन वा ।
मध्यमानामिकाभ्याञ्च दक्षहस्तस्य पार्व्वति ॥")

दक्षकन्या, स्त्री, (दक्षस्य प्रजापतेः कन्या ।) दुर्गा । इति त्रिकाण्डशेषः ॥ दक्षप्रजापतेः सुता । ताः पञ्चाशत्सङ्ख्यकाः । तासां नामानि यथा,—
"सती ख्यातिः स्मृतिः स्वाहा अनुसूया स्वधा तथा ।
प्रीतिः क्षमा च संभूतिः सन्नतिश्च अरुन्धती ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः सिद्धिस्तथा रतिः ॥
अरुन्धती वसुर्यामी तथा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः ॥
अदितिश्च दितिश्चैव दनुः काला दनायुषा ।
सिंहिका सुरसा कद्रुर्विनता सुरभिः खसा ॥
क्रोधा इरा च प्रोधा च दक्षकन्याः प्रकीर्त्तिताः ।
पञ्चाशत् सिद्धियोगिन्यः सर्व्वलोकस्य मातरः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(अथ द्वितीयजन्मनि प्राचेतसो भूत्वा षष्टिं कन्या जनयामास । यथा, मत्स्यपुराणे । ५।१२-१४ ।
"ततस्तेषु विनष्टेषु षष्टिं कन्याः प्रजापतिः ।
वैरिण्यां जनयामास दक्षः प्राचेतसस्तथा ॥
प्रादात् स दश धर्म्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमये ॥
द्वे चैव भृगुपुत्राय द्वे कृशाश्वाय धीमते ।
द्वे चैवाङ्गिरसे तद्वत्तासां नामानि विस्तरः ॥
शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः ॥"
एतासां नामानि तत्रैव द्रष्टव्यानि ॥)

दक्षजा, स्त्री, (दक्षात् प्रजापतेर्जायते इति । जन + "पञ्चम्यामजातौ ।" ३ । २ । ९८ । इति डः ।) दुर्गा । इति हेमचन्द्रः ॥ (अश्विन्यादिनक्षत्रे च ॥)

दक्षजापतिः, पुं, (दक्षजानां अश्विन्यादिदक्षकन्यानां पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥ •(दक्षजायाः सत्याः पतिः इति विग्रहे शिवः ॥)

दक्षसावर्णिः, पुं, नवममनुः । अस्मिन् मन्वन्तरे ऋषभनामा भगवदवतारः । अद्भुतनामा इन्द्रः । पारमरीचिगर्भाद्या देवाः । द्युतिमदाद्याः सप्तर्षयः । भूकेतुदीप्तिकेतुप्रभृतयो मनुपुत्रा भविष्यन्ति । इति श्रीभागवतम् ॥ (अस्य विशेषविवृतिस्तु मार्कण्डेयपुराणे ९४अध्याये द्रष्टव्या ॥)

दक्षा, स्त्री, (दक्षते वर्द्धते भारधारणे समर्था भवतीति वा । दक्ष + अच् । टाप् ।) पृथिवी । इति मेदिनी । षे, १५ ॥

दक्षाध्वरध्वंसकृत्, पु, (दक्षाध्वरस्य दक्षयज्ञस्य ध्वंसं नाशं करोतीति। कृ+क्विप् तुगागमश्च।) शिवः। इति हलायुधः॥

दक्षाय्यः, पुं, (दक्षते कार्य्येषु समर्थो भवतीति। दक्ष+"श्रुदक्षिस्पृहिगृहिभ्य आय्यः।" उणा० ३।९६। इति आय्यः।) गरुडः। गृध्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (दक्ष वृद्धौ+आय्यः। त्रि, वर्द्धकः। यथा, ऋग्वेदे। १।९१।३।

"शुचिष्टमसि प्रियो न मित्रो
दक्षाय्यो अर्य्यमेवासि सोम!॥"

"त्वमर्य्यमेवास्माभिरेष्यमाणः सूर्य्य इव दक्षाय्योऽसि सर्व्वेषां वर्द्धकोऽसि।" इति सायनः॥ पूजनीयः। यथा, तत्रैव। ७।१।२।

"दक्षाय्यो यो दम आस नित्यः॥"

"योऽग्निर्द्दमे गृहे दक्षाय्यः पूजनीयो हविभिः समर्धनीयो वा।" इति तद्भाष्ये सायनः॥)

दक्षिणः, त्रि, (दक्षते इति। दक्ष वृद्धौ+"द्रुदक्षिभ्यामिनन्।" उणा०। २।५०। इति इनन्।) दक्षिणोद्भूतः। (दक्षिणदिग्भवः। यथा, रघुः। ४।८।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥"

दक्षिणदिक्स्थितः। यथा, मनुः। ५।९२।

"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्॥")

सरलः। (यथा, महाभारते। ४।५।२७।

"दक्षिणं दक्षिणाचारो दिशं येनाजयत् प्रभुः॥")

परच्छन्दानुवर्त्ती। आरामः। इति मेदिनी णे, ५०॥

("दक्षिणः सरलावामपरच्छन्दानुवर्त्तिषु।
वाच्यवद्दक्षिणावाटीयज्ञदानप्रतिष्ठयोः॥"
इति विश्वधचनात्। णे, ४५॥)

दक्षः। अपसव्यम्। इति हेमचन्द्रः॥ डाहिन इति भाषा। (यथा, मनुः। २।६३।

"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः॥")

दक्षिणहस्तापदाने दोषो यथा,—

"दक्षहस्तप्रदाता च सर्पश्च सप्तजन्मसु।
ततो भवेद्धस्तहीनो मानवश्च ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ * ॥

दक्षिणहस्ते प्रतिग्रहो यथा,—

"ओंकारमुच्चरन् प्राज्ञो द्रविणं शक्तुमोदकम्।
गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत्॥"
इत्यादित्यपुराणम्॥

(प्रदक्षिणः। यथा, भागवते। १।१४।१३।

"शस्ताः कुर्व्वन्ति मां सव्यं दक्षिणं पशवोऽपरे।
वाहांश्च पुरुषव्याघ्र। लक्षये रुदतो मम॥")

पु, चतुर्धानायकान्तर्गतनायकविशेषः। तस्य लक्षणम्। (यथा, साहित्यदर्पणे। ३।४०।

"एषु त्वनेकमहिलासु समरागो दक्षिणः
कथितः॥")

यथा च "सकलनायिकाविषयसमसहजानुरागः।

अस्योदाहरणं यथा,—

"अन्तःपुरे स्फुरति मद्गृहिणी सहस्र-
मप्यहिस्यं कथय कुत्र निवेशयामि।
इत्याकलय्य नयनाम्बुरुहे निमील्य
रोमाञ्चितेन वपुषा स्थितमच्युतेन॥"
इति रसमञ्जरी॥ * ॥

(तन्त्रोक्ताचारविशेषे, क्ली। यथा, कुलार्णवे ५ खण्डे।

"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत्।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम्॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम्।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं न हि॥")

दक्षिणकालिका, स्त्री, (दक्षिणा अनुकूला कालिका।) आद्याशक्तिः। यथा,—

"ऊर्द्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधो
दक्षे चाभीवरञ्च त्रिजगदघहरे दक्षिणे कालिके च।" इति तन्त्रसारः॥

दक्षिणतः, अ, (दक्षिण+"दक्षिणोत्तराभ्यामतसुच्।"५।३।२८। इति अतसुच्।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥ (यथा, मनुः। ३।९१।

"पृष्ठवास्तुनि कुर्व्वीत बलिं सर्व्वात्मभूतये।
पितृभ्यो बलिशेषन्तु सर्व्वं दक्षिणतो हरेत्॥"

दक्षिण+तसिल्। दक्षिणभागे। यथा, महानिर्व्वाणतन्त्रे। ३।४८।

"पुनर्द्दक्षिणतः कुर्य्यात् पूर्व्ववत् सुरपूजिते॥")

दक्षिणतार, क्ली, दक्षिणतीरम्। यथा, "दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारं दक्षिणतीरं उत्तरतारं उत्तरतीरम्।" इति सिद्धान्तकौमुद्यां समासप्रकरणम्॥

दक्षिणपूर्व्वा, स्त्री, (दक्षिणस्याः पूर्व्वस्याश्च दिशोऽन्तरालम्। "दिङ्नामान्यन्तराले।" २।२।२६। इति समासः।) पूर्व्वदक्षिणकोणः। इति व्याकरणम्॥ (यथा, भागवते।८।१८।२२।

"दिशि दक्षिणपूर्व्वस्यां दृष्ट्वा दक्षिणतो यदुम्॥"

तद्दिग्भागस्थे, त्रि। यथा, आश्वलायनगृह्यसूत्रे। ४।२।११।

"दक्षिणपूर्व्व उद्धृतान्न आहवनीयं निदधाति॥")

दक्षिणस्थ', पुं, (दक्षिणे भागे तिष्ठतीति। स्था+कः।) सारथिः। इत्यमरः। २।८।६०॥ दक्षिणस्थिते, त्रि।

दक्षिणा, स्त्री, (दक्षते इति। दक्ष वृद्धौ+"द्रुदक्षिभ्यामिनन्।" उणा०। २।५०। इति इनन्। ततष्टाप्।) दक्षिणदिक्। तत्पर्य्यायः। अवाची २ शमनी ३ याम्या ४ वैवस्वती ५। इति राजनिर्घण्टः॥ (यथा, कुमारे। ३।२५।

"दिक् दक्षिणा गन्धवहं मुखेन
व्यलीकनिश्वासमिवोत्ससर्ज॥")

दक्षिणवायुगुणाः। मधुररसयुक्तत्वम्। चक्षुर्हितत्वम्। बलवर्द्धनत्वम्। रक्तपित्तप्रशमनत्वम्॥ सौख्यकान्तिमतिप्रदत्वम्। शस्तनाशित्वम्। विदाहित्वम्। अस्रमारुतकोपनत्वम्। गण्डूपदादिकीटानां जनकत्वञ्च। इति द्रव्यगुणः॥ * ॥ अस्या दिशोऽधिपतयः वृषकन्यामकरराशयः। इति ज्योतिषम्॥ यज्ञादिविधिदानम्। इति मेदिनी॥ प्रतिष्ठा। इति हेमचन्द्रः॥ यज्ञादिसम्पादकतदन्तविहितदानम्। सा यज्ञपत्नी श्रीकृष्णदक्षिणांशप्रभूता। यथा,—

"कार्त्तिकीपूर्णिमायान्तु रासे राधामहोत्सवे।
आविर्भूता दक्षिणांशात् कृष्णस्य तेन दक्षिणा॥"

दक्षिणाया अदाने तस्या वृद्धिर्यथा,—

"यज्ञो दक्षिणया सार्द्धं पुत्त्रेण च फलेन च।
कर्म्मिणां फलदाता चेत्येवं वेदविदो विदुः॥
कृत्वा कर्म्म च तस्यैव तूर्णं दद्याच्च दक्षिणाम्।
तत्कर्म्मफलमाप्नोति वेदैरुक्तमिदं मुने।॥
कर्त्ता कर्म्मणि पूर्णे च तत्क्षणं यदि दक्षिणाम्।
न दद्याद्ब्राह्मणेभ्यश्च दैवेनाज्ञानतोऽथ वा॥
मुहूर्त्ते समतीते तु द्विगुणा सा भवेद्ध्रुवम्।
एकरात्रे व्यतीते तु भवेत् शतगुणा च सा॥
त्रिरात्रे तद्दशगुणा सप्ताहे द्विगुणा ततः।
मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते॥
संवत्सरे व्यतीते तु सा त्रिकोटिगुणा भवेत्॥
कर्म्म तद्यजमानानां सर्व्वञ्च निष्फलं भवेत्।
स च ब्रह्मस्वापहारी न कर्म्मार्होऽशुचिर्नरः॥
दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी।
तद्गृहाद्याति लक्ष्मीश्च शापं दत्त्वा सुदारुणम्॥
पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणम्।
एवं सुराश्च तत्पूजां तद्दत्तामग्निराहुतिम्॥ * ॥
दाता न दीयते दानं ग्रहीता च न याचते।
उभौ तौ नरकं यातश्छिन्नरज्जुर्यथा घटः॥
नार्पयेद्यजमानश्चेद्याचिताराश्च दक्षिणाम्।
भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम्॥
वर्षलक्षं वसेत्तत्र यमदूतेन ताडितः।
ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः॥
पातयेत् पुरुषान् सप्त पूर्व्वाञ्च सप्तजन्मनः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ * ॥

नायिकाविशेषः। यथा,—

"या गौरवं भयं प्रेम सद्भावं पूर्व्वनायके।
न मुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैः॥"
इति विष्णुपुराणटीकायां स्वामी॥

(अ, दक्षिणस्यां दिशि दक्षिणा दिग् वा। "दक्षिणादाच्।" ५।३।३६। इति आच्। दक्षिणस्यां दिशि॥)

दक्षिणाग्निः, पु, (दक्षिणः अनुकूलोऽग्निः।) यज्ञाग्निविशेषः। इत्यमरः। २।७।१९॥ दक्षिणस्यां दिशोऽग्निर्द्दक्षिणाग्निः। इति भरतः॥ अस्य नामकरणम्। यथा,—

"दत्तासु दक्षिणास्वादौ त्वग्निर्भूत्वा यतोऽभरान्।
नयसे दक्षिणाभागं दक्षिणाग्निस्ततोऽभवत्॥"
इति वराहपुराणम्॥

दक्षिणाचल', पु, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे दक्षिणप्रदेशे वा स्थितोऽचलः पर्व्वतः।) मलयपर्व्वतः। इति हेमचन्द्रः। ४।९५॥

दक्षिणाचारः, पुं, (दक्षिणोऽप्रतिकूल आचारः।) आचारविशेषः। यथा,—
"स्वधर्म्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत्।
स एव दक्षिणाचारः शिवो भूत्वा शिवां यजेत्॥"
इत्याचारभेदतन्त्रम्॥
(एतदाचारोक्तकर्म्मादिकं वामाचारवत् कठोरतरं न। तथाच काश्मीरराजप्रणीतदक्षिणाचारतन्त्रे।
"दक्षिणाचारतन्त्रोक्तं कर्म्म तच्चतुर्वैदिकम्॥"
दक्षिणोऽनुकूलः साधुराचारो व्यवहारो यस्य। शिष्टाचारविशिष्टे, त्रि। यथा, महाभारते।४।५।२७।
"दक्षिणं दक्षिणाचारो दिशं येनाणयत् प्रभुः॥")

दक्षिणात्, व, (वसत्यागतो रमणीयं वा। दक्षिणस्यां दिशि दक्षिणस्या दिश दक्षिणा वा दिक् इति। "उत्तराधरदक्षिणादातिः।" ५।३।३४। इति आतिः।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥

दक्षिणापथजन्मा, [न्] पुं, (दक्षिणा दक्षिणस्यां दिशि यः पन्थाः तत्र जन्म यस्य।) जातिविशेषः। यथा, महाभारते।१२।२०७।४२-४५।
"दक्षिणापथजन्मानः सर्व्वे नरवरान्ध्रकाः।
गुहाः पुलिन्दाः शवराः चुचुका मद्रकैः सह॥
उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि।
यौनकाम्बोजगान्धाराः किराता वर्व्वरैः सह॥
एते पापकृतस्तात! चरन्ति पृथिवीमिमाम्।
श्वपाकबलगृध्राणां सधर्म्माणो नराधिप!॥
नैते कृतयुगे तात! चरन्ति पृथिवीमिमाम्।
त्रेताप्रभृति वर्त्तन्ते ते जना भरतर्षभ!॥"

दक्षिणामुखः, त्रि, (दक्षिणा दक्षिणस्यां दिशि मुखं यस्य।) दक्षिणदिङ्मुखः। यथा,—
"अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्॥"
इति तिथ्यादितत्त्वम्॥

दक्षिणायनं, क्ली, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे गोले वा अयनम्।) सूर्य्यस्य दक्षिणागतिः। सा श्रावणादिषट्सु मासेषु भवति। इत्यमरः॥ * ॥ यथा,—
"कर्कटावस्थिते भानौ दक्षिणायनमुच्यते।
उत्तरायणमप्युक्तं मकरस्थे दिवाकरे॥ इति।
अयनस्योत्तरस्यादौ मकरं याति भास्करः।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्॥"
इति विष्णुपुराणोक्तशूद्राचारमपरिग्रह. सौरेय।
दृश्यमानादिविरोधे तु सिद्धान्तादयनपरिग्रहः। इति।
क्रमसंक्रान्तितः पूर्व्वं पश्चात्तारादिमाम्बरे।
एकवर्षे चतुःपञ्चपलमानक्रमेण तु॥
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
उत्क्रमेण च सहस्रं स्यादुदगयनं रवेर्भुवम्॥
कर्कटसंक्रमणे तद्वदभितो दक्षिणायनम्।
अयनांशक्रमेणैव विषुवारम्भकं तथा॥"
इति च ज्योतिस्तत्त्वम्॥
तत्र जातस्य फलं यथा—
"याम्यायने यस्य भवेत् प्रसूतिः
शठः कठोरः पिशुनस्वभावः।
चतुष्पदाढ्यः कृषिमान् प्रसंग्य-
भोगाप्रशान्तो मनुजः प्रतापी॥"
इति कोष्ठीप्रदीपः॥ * ॥
कर्कटसंक्रान्तिः। यथा,—
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापराः॥"
इति तिथ्यादितत्त्वम्॥ * ॥
अयनचक्रं यथा,—
"चक्रं सार विलिख्य यदपतिरयने संक्रमर्क्षेन् करोति
यस्मिन् मूर्द्धे तदृक्षं मरणभयकरं शूलमूले निदध्यात्।
तत्पश्चाद्द्वारमूले विविधभयकरं शूलपार्श्वेऽर्थलाभः
सौख्यं स्याच्चक्रमध्ये विविधसुमितं विद्धि यामक्रमेण॥"
इति ज्योतिषम्॥
("त एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च। तयोर्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवानाप्यायते सोमोऽम्ललवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते॥"
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)

दक्षिणारुः, [स्] पुं, (दक्षिणे दक्षिणभागे अरुर्व्रणमस्य।) व्याधकर्त्तृकदक्षिणाङ्गव्रणितमृगः। इत्यमरः।२।१०।२४॥

दक्षिणार्हः, त्रि, (दक्षिणामर्हतीति। अर्ह+"अर्हः।" ३।२।१२। इत्यच्।) दक्षिणायोग्यः। कृत्स्नाशये दक्षिणामर्हति यः। इति भरतः॥ तत्पर्य्यायः। दक्षिणीयः २ दक्षिण्यः ३। इत्यमरः।३।१।५॥

दक्षिणावर्त्तकी, स्त्री, (दक्षिणे आवर्त्तते इति। आ+वृत+ण्वुल्। गौरादित्वात् ङीष्।) वृश्चिकालिः। इति राजनिर्घण्टः॥

दक्षिणाशापतिः, पुं, (दक्षिणाशाया दक्षिणस्या दिशः अधिपतिः।) यमः। इति हेमचन्द्रः।२।९८॥

दक्षिणीयः, त्रि, (दक्षिणामर्हतीति। दक्षिणा+"कडङ्गरदक्षिणाच्छ च।" ५।१।६९। इति छ।) दक्षिणार्हः। इत्यमरः।३।१।५।
(यथा, हरिवंशे।४८।७९।
"क्रतवः सम्प्रवर्त्तन्तां दक्षिणीयैर्द्विजातिभिः।
दक्षिणाश्चोपवर्त्तन्तां यथोक्ताः सर्व्वसत्त्विजः॥"
तथाच अथर्व्ववेदे।८।१०।४।
"यन्तीदक्षिणीयो वासतेयो भवति य एवं वेद॥")

दक्षिणेन, व, (दक्षिण+"एनबन्यतरस्यामदूरेऽपञ्चम्याः।" ५।३।३५। इति एनप्।) दक्षिणदिशि। इति रायमुकुटः॥ दक्षिणभागे। (अस्य योगेन द्वितीया भवति।) यथा,—
"दक्षिणेन हरिं रुद्रो गोविन्दमतिनेश्वरः।
येनेशं हरिरीशस्तं तेनेशमभितोऽघ्वका॥"
इति मुग्धबोधम्॥
(क्वचित् द्वितीयाप्रयोगाभावोऽपि दृश्यते। यथा, महाभारते।३।८३।४।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे॥")

दक्षिणेर्म्मा, [न्] पुं, (दक्षिणे ईर्म्म व्रणं यस्य। "दक्षिणेर्म्मा लुब्धयोगे।" ५।४।१२६। इति अनिच्।) व्याधप्रहाराघातात् दक्षिणाङ्गव्रणयुक्तमृगः। तत्पर्य्यायः। दक्षिणारुः २। इत्यमरः।२।१०।२४। (यथा, भट्टिः।४।४४।
"मृगयुमिव मृगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मरावुदन्यन्॥")

दक्षिण्य, त्रि, (दक्षिणामर्हतीति। "कडङ्गरदक्षिणाच्छ च।" ५।१।६९। इति चकारात् यत्।) दक्षिणार्हः। इत्यमरः।३।१।५॥ (यथा, भट्टिः।२।२८।
"दक्षिण्यदिष्टां कृतमार्जनीनै-
सद्यातुधानैश्चिचिते प्रसर्पत्॥")

दग्धं, क्ली, कतृणम्। इति रत्नमाला॥

दग्धः, त्रि, (दह्यते स्म इति। दह+क्त।) भस्मीकृतः। पोड़ा इति भाषा। तत्पर्य्यायः। प्लुष्टः २ प्रुष्टः ३ उषितः ४। इत्यमरः।३।१।९६॥ (यथा, मनुः।८।१९८।
"चौरैर्हृतं जलेनोढ़मग्निना दग्धमेव वा।
न दद्यात् यदि तस्मात् स न संहरति किञ्चन॥")
"पक्वामामामिषं पर्य्यम्।
गोर्षेर्व्यमामिषं चौरं पक्वे जलौरमामिषम्।
आमिषं रक्तशाकञ्च सर्व्वञ्च दग्धमामिषम्॥"
इति कर्म्मलोचनम्॥
(म्लानम्। यथा, अमरुशतके।२४।
"दृष्टायामपि वाचि सस्मितमिद दग्धाननं जायते॥"
चन्द्राश्रितराशिस्थलकपातिभाषिकयोगम्। यथा, ज्योतिषतत्त्वे।
"मृगसिंहौ तृतीयायां प्रथमायां तुलाङ्गनौ।
पञ्चम्यां वृषराशी द्वौ सप्तम्यां चापयत्कमी॥
नवम्यां सिंहकीटाख्यावेकादश्यां गुरोर्गृहे।
दृषमीनौ त्रयोदश्यां दग्धसञ्ज्ञाः क्रमी यथा।
दग्धसद्मनि यत् कर्म्म कृतं सर्व्वं विनश्यति॥")

दग्धकाकः, पुं, (दग्ध इव कृष्णवर्णः काकः।) द्रोणकाकः। इति हेमचन्द्रः।४।३९८॥

दग्धरथः, पुं, (दग्धो रथोऽस्य।) चित्ररथगन्धर्व्वः। इति महाभारतम्॥ (यथा, महाभारते।१।१७१।३६।
"अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्॥")

दग्धरुहः, पुं, (दग्धोऽपि रोहतीति । रुह + कः ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥

दग्धरुहा, स्त्री, (दग्धापि रोहतीति । रुह + कः टाप् ।) दग्धावृक्षः । इति राजनिर्घण्टः ॥

दग्धा, स्त्री, (दह्यते स्म इव या । दह + क्तः । ततष्टाप् ।) स्थितार्का दिक् । इति मेदिनी । धे, ७ ॥ वृक्षविशेषः । झुरुह इति ख्यातः ॥ तत्पर्य्यायः । दग्धरुहा २ दग्धिका ३ स्थलेरुहा ४ रोमशा ५ कर्कशदला ६ भस्मरोहा ७ सुदग्धिका ८ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । कफवातनाशित्वम् । पित्तप्रकोपनत्वम् । जठरानलदीपनत्वञ्च । इति राजनिर्घण्टः ॥ * ॥

मासदग्धा यथा,—सौरचैत्रपौषयोर्द्वितीया एवं ज्यैष्ठफाल्गुनयोश्चतुर्थी वैशाखश्रावणयोः षष्ठी आषाढाश्विनयोरष्टमी भाद्राग्रहायणयोर्दशमी कार्त्तिकमाघयोर्द्वादशी । अस्या. प्रमाणं यथा,

"द्वितीया मीनधनुषोश्चतुर्थी वृषकुम्भयोः ।
मेषकर्कटयोः षष्ठी कन्यामिथुनकेऽष्टमी ॥
दशमी वृश्चिके सिंहे द्वादशी मकरे तुले ।
एभिर्यातो न जीवेत यदि शक्रसमो भवेत् ॥"

अस्याः प्रतिप्रसवो यथा, वैशाखे शुक्ला षष्ठी ज्यैष्ठे कृष्णा चतुर्थी आषाढे शुक्लाष्टमी श्रावणे कृष्णा षष्ठी भाद्रे शुक्ला दशमी आश्विने कृष्णाष्टमी कार्त्तिके शुक्ला द्वादशी अग्रहायणे कृष्णा दशमी पौषे शुक्ला द्वितीया माघे कृष्णा द्वादशी फाल्गुने शुक्ला चतुर्थी चैत्रे कृष्णा द्वितीया । एतत्प्रमाणं यथा,—

"मेषे दिनेशे नृयुगे म्टगेन्द्रे
यूके धनुःस्थे कलसे च शुक्ला ।
कुलीरकन्यालिम्टगास्यमीन-
वृषेषु कृष्णास्तिथयः प्रदग्धा. ॥" * ॥

दिनदग्धा यथा,—रविवारे द्वादशी सोमे एकादशी मङ्गले दशमी बुधे तृतीया वृहस्पतौ षष्ठी शुक्रे पञ्चदशी शनौ सप्तमी । एततप्रमाणं यथा,

"माषा रुद्रा दिशो रामाः षट्पञ्चमुनयस्तथा ।
दह्यन्ते तिथयः सप्त सूर्य्यादेः सप्तसप्तभिः ॥"

इति ज्योतिःसारसंग्रहः ॥

दग्धिका, स्त्री, (कुत्सिता दग्धा । "कुत्सिते ।" ५ । ३ । ७४ । इति कन् ।) दग्धान्नम् । पोड़ा भात इति भाषा । चाँचो इति ख्याता इति केचिदिति भरतः ॥ तत्पर्य्यायः । भिस्सटा २ । इत्यमरः । २।६।४६ ॥ भिस्सिटा ३ भिस्सिटा ४ भिस्सिष्टा ५ भिस्सिका ६ । इति तट्टीकासारसुन्दरी ॥ दग्धावृक्षः । इति राजनिर्घण्टः ॥

दग्धेष्टका, स्त्री, (दग्धा इष्टका ।) झामकम् । इति हारावली । २१४ ॥

दघ, इ यागे । अवने । इति कविकल्पद्रुमः ॥ (भ्वा-पर सकं-सेट् ।) इ, दङ्घते । अवनं रक्षणम् । इति दुर्गादासः ॥

दघ, न घातने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) न, दघ्नोति । दघ घाते । इति चौमराः पठन्ति । तेन तदर्थकल्पनमेवोचितम् । ततश्च घातनमिति हन्त्यर्थस्य णाचिकचुरादित्वेन स्वार्थे णौ रूपं हननमित्यर्थः । किञ्च हिंसनपाठेनैवेष्टसिद्धे घातनपाठो हिंसाप्रेरणार्थः. स्यान्न वेति काकदन्तान्वेषणवद्विफलं त्रयाणामेव कातन्त्राद्यसम्मतत्वात् । इति दुर्गादासः ॥

दण्ड, तु क तत्पाते । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) तत्पातस्तद्दण्डपातनम् । क, दण्डयति दण्डापयति अपराधिनं राजा । इति दुर्गादासः ॥

दण्डः, पु क्ली, (दण्डयति अनेनेति । दण्ड + घञ् । यद्वा, दाम्यत्यनेनेति । दम् + "ञमन्तात् डः ।" उणां १ । ११३ । इति डः ।) लगुडः । इत्यमरः । ३ । ३ । ४१ ॥ (यथा, हठयोगप्रदीपिकायाम् । ३ । ११ ।

"यथा दण्डहतः सर्पो दण्डाकारः प्रजायते ॥")

तस्य धारणगुणाः । स्खलतः संप्रतिष्ठानत्वम् । शत्रुनिषेधनत्वम् । अवष्टम्भनत्वम् । आयुष्यत्वम् । भयघ्नत्वञ्च । इति राजवल्लभः ॥ (यथा, चिकित्सितस्थाने चतुर्व्विंशेऽध्याये सुश्रुतेनोक्तम् ।

"पुनः सरीसृपव्यालविषाणिभ्यो भयापहम् ।
श्रमस्खलनदोषघ्नं स्थविरे च प्रशस्यते ॥
सत्त्वोत्साहबलस्थैर्य्यधैर्य्यवीर्य्यविवर्द्धनम् ।
अवष्टम्भकरञ्चापि भयघ्नं दण्डधारणम् ॥")

शरणागतरक्षणादि । यथा,—

"शरणागतसंत्राणं भूतानामप्यहिंसनम् ।
बहिर्वेदि च यद्दानं दण्डमित्यभिधीयते ॥"

इति मोक्षधर्म्मः ॥

(दण्डाकारत्वात् छत्रादीनामङ्गविशेषः । यथा, वृहत्संहितायाम् । ७३ ।४,६ ।

"युवराजनृपतिपत्न्याः सेनापतिदण्डनायकानाञ्च ।
दण्डोऽर्द्धपञ्चहस्तः समपञ्चहतार्द्धविस्तारः ॥"
"अन्येषाञ्च नराणां शीतातपवारणन्तु चतुरस्रम् ।
समरूपदण्डयुक्तं छत्रं कार्य्यं तु विप्राणाम् ॥"

चामरादीनामङ्गविशेषस्य । यथा, तत्रैव । ७२ । ३-४ ।

"अध्यर्द्धहस्तप्रमितोऽस्य दण्डो
हस्तोऽथवारत्निसमोऽथवान्यः ।
सालाक्ष्कुभात् काञ्चनरूप्यगुप्तात्
रत्नैर्विचित्रैश्च हिताय राज्ञाम् ॥
यष्ट्यातपत्राङ्कुशवेत्रचाप-
वितानकुन्तध्वजचामराणाम् ।
चापीततन्त्रीमधुकृष्णवर्णा
वर्णक्रमेणैव हिताय दण्डाः ॥"

मन्थधारिधार्य्यलगुडाकारपदार्थः । यथा, देवीभागवते । १ । १८ । ३१ । शुकं प्रति जनकस्योक्तिः ।

"दण्डाजिनकृता चिन्ता यथा तव मनेऽपि च ।
तथैव राज्यचिन्ता मे चिन्तयानस्य वा न वा ॥"

वर्णभेदेन तत्प्रमाणादिकमुक्तम् । यथा, मनौ । २ । ४५-४७ ।

"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मतः ॥
केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः ।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः ॥
ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः ।
अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः ॥"

वाणनिक्षेपकालीन स्थानविशेषे, स्त्री । यथा, आग्नेयधनुर्व्वेदे ।

"तिर्य्यग्भूतो भवेद्वामो दक्षिणोऽपि भवेदृजुः ।
गुल्फौ पार्ष्णियुगौ चैव स्थितौ पञ्चाङ्गुलान्तरौ ॥
स्थानं दण्डं भवेदेतत् द्वादशाङ्गुलमायतम् ॥")

दण्डः, पु, (दण्डयत्यपराधिनमनेनेति । दण्ड + घञ् । यद्वा, दाम्यति शान्तं करोत्यनेन । दम + डः ।) राज्ञां चतुर्थोपायः । (यथा, देवीभागवते । १ । १७ । ३ ।

"विना दण्डं कथं राज्यं करोति जनकः किल ।
धर्म्मे न वर्त्तते लोको दण्डश्चेन्न भवेद्‌ यदि ॥")

स च त्रिविधः । वधः अर्थग्रहणं बन्धनताडनादिश्च । इत्यमरटीकासारसुन्दरी ॥ तत्पर्य्यायः । साहसम् २ दमः ३ । इत्यमरः । २ । ८ । २१ । (दण्ड + भावे घञ् । दमनम् । (यथा, मनुः । १२ । १० ।

"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ॥"

दण्ड इवाचरतीति । दण्ड + क्विप् । ततो भावे घञ् ।) ऊर्द्धस्थितिः । दाँड़ान इति भाषा । इति सारसुन्दरी ॥ व्यूहभेदः । (अस्य लक्षणभेदादिकं यथा, अग्निपुराणे २४१ अध्याये ।

"मण्डलासंहतौ भोगौ दण्डास्ते बहुधा शृणु ।
तिर्य्यग्वृत्तिस्तु दण्डः स्यात् भोगोऽन्या वृत्तिरेव च ॥
मण्डलः सर्व्वतोवृत्तिः पृथग्वृत्तिरसंहतः ।
प्रदरो दृढकोऽसह्यश्चापो वै कुक्षिरेव च ॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ ।
विशालो विजयः सूची स्थूणा कर्णचमूमुखौ ॥
सर्पास्यो वलयश्चैव दण्डभेदाश्च दुर्ज्जयाः ।
अतिक्रान्तः प्रतिक्रान्तः कक्ष्याभ्याञ्चैकपक्षतः ॥
अतिक्रान्तस्तु पक्षाभ्यां त्रयोऽन्ये तद्विपर्य्यये ।
पक्षोरस्यैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्य्ययः ॥
स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्द्धगः ।
द्विगुणोऽयन्त्वतिक्रान्तपक्षोऽन्यस्य विपर्य्ययः ॥
द्विचतुर्दण्ड इत्येते ज्ञेया लक्षणतः क्रमात् ।
गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा ॥")

प्रकाण्डः । अश्वः । कोणः । मन्थानः । सैन्यम् । कालः । घड़ी इति भाषा । मानभेदः । काठा इति भाषा । ("हस्तैश्चतुर्भिर्भवतीह दण्डः ।" इति लीलावती ॥) चण्डांशोः पारिपार्श्विकः । (यथा, महाभारते । ३ । ३ । ६८ ।

"ये च तेऽनुचराः सर्व्वे पादोपान्ते समाश्रिताः ।
माठराणदण्डाद्यास्तांस्तान् वन्देऽशनिक्षुभान् ॥")

यमः । अभिमानः । इति मेदिनी । डे, १६ ॥ ग्रह-

भेदः । इति हेमचन्द्रः ॥ इक्ष्वाकुराजपुत्त्रः । इति रामायणम् ॥ (यथा, हरिवंशे । १० । २२ ।
"इष्टकश्चाम्बरीषश्च दण्डश्चेति सुतास्त्रयः ।
यश्चकार महात्मा वै दण्डकारण्यमुत्तमम् ॥"
क्रोधहन्तुरसुरस्यांशेनावतीर्णः ख्यातनामा नृपविशेषः । यथा, महाभारते ।१।६७।४६।
"क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः ।
दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । १०५ ।
"धनुर्द्धरो धनुर्व्वेदो दण्डो दमयिता दमः ॥"
महादेवः । यथा तत्रैव । १२ । २८४ । १६ ।
"शत्रुन्दमाय दण्डाय पर्णचीरपटाय च ॥")
कालभेददण्डस्य प्रमाणं यथा,—
"षट्पलं पात्रनिर्म्माणं गभीरं चतुरङ्गुलम् ।
स्वर्णमाषैः कृतच्छिद्रं कुण्डेश्च चतुरङ्गुले ॥
यावज्जलप्लुतं पात्रं तत्कालं दण्डमेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
ब्राह्मणं प्रति दण्डोद्यमे दण्डनिपातने च दोषो यथा, प्रायश्चित्ततत्त्वे ।
विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने ॥"
"कौटसाक्ष्ये दण्डा यथा —
लोभान्मोहाद्भयान्मैत्रात् कामात् क्रोधात्तथैव च ।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥
एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् ।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्व्वशः ॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम् ।
भयाद्द्वौ मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम् ॥
कामाद्दशगुणं पूर्व्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञानात् द्वे शते पूर्णे बालिश्याच्छतमेव तु ॥
एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान्मनीषिभिः ।
धर्म्मस्याव्यभिचारार्थमधर्म्मनियमाय च ॥
कौटसाक्ष्यन्तु कुर्व्वाणान् त्रीन् वर्णान् धार्म्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत् ॥ * ॥
दण्डस्य स्थानानि यथा,—
दशस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् ।
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् ॥
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥
अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ॥*॥
अधर्म्मदण्डेषु दोषो यथा,—
अधर्म्मदण्डनं लोके यशोघ्नं कीर्त्तिनाशनम् ।
अस्वर्ग्यञ्च परत्रापि तस्मात्तत् परिवर्ज्जयेत् ॥
अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकञ्चैव गच्छति ॥ * ॥
दण्डस्य पौर्व्वापर्य्यनियमो यथा,—
वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम् ॥
तृतीयं धनदण्डन्तु वधदण्डमतः परम् ।
वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात् ॥
तदैषु सर्व्वमेवैतत् प्रयुञ्जीत चतुष्टयम् ॥

दण्डस्य भेदा यथा,—
पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः ।
मध्यमः पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः ॥
अर्थे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥ * ॥
दोषविशिष्टकन्यादाने दण्डो यथा —
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥
अकन्येति च यः कन्यां ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥ * ॥
गवादीनां शस्यभक्षणे दण्डो यथा,—
पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः ।
स पालः शतदण्डार्हो विपालान् वारयेत् पशून् ॥
क्षेत्रादिसीमाविवादे दण्डा यथा,—
क्षेत्रकूपतडागानामारामस्य गृहस्य च ।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः ॥
सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम् ।
सर्व्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥
गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः ॥*॥
वाक्पारुष्ये दण्डा यथा,—
शतं ब्राह्मणमाक्रुश्य क्षत्त्रियो दण्डमर्हति ।
वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्त्रियस्याभिशंसने ।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे ।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥
एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन् ।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ॥
नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्व्वतः ।
निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥
धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः ।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥
श्रुतं देशञ्च जातिञ्च कर्म्मशारीरमेव च ।
वितथेन ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं दमम् ॥
काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥
मातरं पितरं जायां भ्रातरं तनयं गुरुम् ।
आक्षारयन् शतं दाप्यः पन्थानं चाददद्गुरोः ॥
ब्राह्मणक्षत्त्रियाभ्यान्तु दण्डः कार्य्यो विजानता ।
ब्राह्मणे साहसः पूर्व्वः क्षत्त्रिये त्वेव मध्यमः ॥
विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः ।
छेदवर्ज्जं प्रणयनं दण्डस्येति विनिश्चयः ॥ * ॥
दण्डपारुष्ये दण्डा यथा,—
येन केनचिदङ्गेन हिंस्याच्चेत् श्रेष्ठमन्त्यजः ।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥
पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरन् कोपात् पादच्छेदनमर्हति ॥
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ।
कट्यां कृताङ्को निर्व्वास्यः स्फिचं वास्यावकर्त्तयेत् ॥
अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदम् ॥

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्दाढिकायाञ्च ग्रीवायां वृषणेषु च ॥
त्वग्भेदकः शतं दण्ड्यो लोहितस्य तु दर्शकः ।
मांसभेत्ता तु षण्णिष्कान् प्रवास्यस्त्वस्थिभेदकः ॥
वनस्पतीनां सर्व्वेषामुपभोगो यथा यथा ।
तथा तथा दमः कार्य्यो हिंसायामिति धारणा ॥
मनुष्याणां पशूनाञ्च दुःखाय प्रहृते सति ।
यथा यथा महद्दुःखं दण्डं कुर्य्यात्तथा तथा ॥
अङ्गावपीडनायाञ्च व्रणशोणितयोस्तथा ।
समुत्थानव्ययं दाप्यः सर्व्वं दण्डमथापि वा ॥
द्रव्याणि हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा ।
स तस्योत्पादयेत्तुष्टिं राज्ञो दद्याच्च तत्समम् ॥
चर्म्मचार्म्मिकभाण्डेषु काष्ठलोष्टमयेषु च ।
मूल्यात् पञ्चगुणो दण्डः पुष्पमूलफलेषु च ॥
यानस्यैव तु यातुश्च यानस्वामिन एव च ।
दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥
छिन्ननास्ये भग्नयुगे तिर्य्यक् प्रतिमुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥
छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च ।
आक्रन्दे चाप्यपेहीति न दण्डं मनुरब्रवीत् ॥
यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥
प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति ।
युग्यस्थाः प्राजकेनाप्ते सर्व्वे दण्ड्याः शतं शतम् ॥
स चेत्तु पथि संरुद्धः पशुभिर्व्वा रथेन वा ।
प्रमापयेत् प्राणभृतस्तत्र दण्डो विचारितः ॥
मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषी भवेत् ।
प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु ॥
क्षुद्रकाणां पशूनाञ्च हिंसायां द्विशतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्द्दभाजाविकानाञ्च दण्डः स्यात् पञ्चमाषकः ।
माषकस्तु भवेद्दण्डः श्वशूकरनिपातने ॥
भार्य्या पुत्त्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ॥
चौरस्य दण्डविधिर्यथा,—
यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ॥
तथाधरिममेयानां शतादभ्यधिके वधः ।
सुवर्णरजतादीनामुत्तमानाञ्च वाससाम् ॥
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ।
शेषेऽप्येकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥
पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः ।
मुख्यानाञ्चैव रत्नानां हरणे वधमर्हति ॥
महापशूनां हरणे शस्त्राणामौषधस्य च ।
कालमासाद्य कार्य्यञ्च राजा दण्डं प्रकल्पयेत् ॥
गोषु ब्राह्मणसंस्थासु छूरिकायाश्च भेदने ।
पशूनां हरणे चैव सद्यः कार्य्योऽर्द्धपादिकः ॥
सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च ।

दधः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ॥
वेणुवैदलभाण्डानां लवणानान्तथैव च ।
मृण्मयानाञ्च हरणे मृदो भस्मन एव च ॥
मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च ।
मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम् ॥
अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च ।
पक्वान्नानाञ्च सर्व्वेषां तन्मूल्याद्द्विगुणो दमः ॥
पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च ।
अन्येष्वपरिपूतेषु दण्डः स्यात् पञ्च कृष्णलः ।
परिपूतेषु धान्येषु शाकमूलफलेषु च ॥
निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः ।
स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम् ॥
निरन्वयं भवेत् स्तेयं हृत्वापव्ययते च यत् ।
यस्त्वेतान्युपकॢप्तानि द्रव्याणि स्तेनयेन्नरः ॥
तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात् ।
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥”*॥
परदारहरणे दण्डो यथा,—
परदाराभिमर्षेषु प्रवृत्तान् नॄन्महीपतिः ।
उद्वेजनकरैर्दण्डैश्चिह्नयित्वा प्रवासयेत् ॥
परस्य पत्न्या पुरुषः संभाषां योजयन् रहः ।
पूर्व्वमाचारितो दोषैः प्राप्नुयात् पूर्व्वसाहसम् ॥
परस्त्रियं योऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा ।
नदीनामपि संभेदे स संग्रहणमाप्नुयात् ॥
उपचारक्रिया केलिः स्पर्शो भूषणवाससाम् ।
सह खट्वासनञ्चैव सर्व्वं संग्रहणं तथा ॥
स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया ।
परस्परस्यानुमते सर्व्वं संग्रहणं स्मृतम् ।
अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति ॥
न सम्भाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् ।
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥
नैष चारणदारेषु विधिर्नात्मोपजीविषु ।
सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च ॥
किञ्चिदेव तु दाप्यः स्यात् सम्भाषां ताभिराचरन् ।
योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति ॥
सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ।
कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत् ॥
जघन्यं सेवमानान्तु संयतां वासयेद्गृहे ।
उत्तमां सेवमानस्तु जघन्यो वधमर्हति ॥
शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि ।
अभिषह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः ॥
तस्याशु कर्त्त्ये अङ्गुल्यौ दण्डञ्चार्हति षट्शतम् ।
सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात् ।
द्विशतन्तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥
कन्यैव कन्यां या कुर्य्यात् तस्याः स्याद्द्विशतो दमः ।
शुल्कञ्च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ॥
या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्य-
मर्हति ।
अङ्गुल्योरेव च च्छेदं खरेणोद्वहनं तथा ॥
भर्त्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ॥
पुमांसं दाहयेत् पापं शयने तप्त आयसे ।
अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ॥
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः ।
व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ॥
शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् ।
अगुप्तमङ्गसर्व्वस्वैर्गुप्तं सर्व्वेण हीयते ॥
वैश्यः सर्व्वस्वदण्ड्यः स्यात् संवत्सरनिरोधतः ।
सहस्रं क्षत्त्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति ।
ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्त्रियन्तु सहस्रिणम् ॥
उभावपि तु तावेव ब्राह्मण्या गुप्तया सह ।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥
सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् ।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ॥
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥
वैश्यश्चेत् क्षत्त्रियां गुप्तां वैश्यां वा क्षत्त्रियो
व्रजेत् ।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥
सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन् ।
शूद्रायां क्षत्त्रियविशोः साहस्रो वै भवेद्दमः ।
क्षत्त्रियायामगुप्तायां वैश्ये पञ्चशतं दमः ॥
मूत्रेण मौण्ड्यमृच्छेत्तु क्षत्त्रियो दण्डमेव वा ॥
अगुप्ते क्षत्त्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् ।
शतानि पञ्च दण्ड्यः स्यात् सहस्रन्त्वन्त्यज-
स्त्रियम् ॥ * ॥
ऋत्विजं यस्त्यजेद्याज्यो याज्यञ्चर्त्विक् त्यजेद्-
यदि ।
शक्तं कर्म्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम् ॥
न माता न पिता न स्त्री न पुत्त्रस्त्यागमर्हति ।
त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् ॥”
इति मनुः ॥ * ॥
दण्डस्य फलं यथा, युक्तिकल्पतरुः ।
“दण्डः संरक्षते धर्म्मं तथैवार्थं विधानतः ।
कामं संरक्षते यस्मात् त्रिवर्गो दण्ड उच्यते ॥
राजदण्डभयाल्लोकाः पापाः पापं न कुर्व्वते ।
यमदण्डभयादेके परलोकभयात्तथा ॥
दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधु वा ।
शूले मत्स्यानिव पचन् दुर्ब्बलान् बलव-
त्तराः ॥
अपराद्धेषु भूपालो दण्डं कुर्य्याद्यथाविधि ।
अन्यथाकरणात्तस्मात् राजा भवति किल्बिषी ॥
विरुद्धमपि जल्पन्तो दूता दण्ड्या न भूभृता ।
दूतहन्ता तु नरकमाविशेत् सचिवैः सह ॥
विपक्षवचनादन्यो भृत्यो दण्डं न चार्हति ।
विपक्षवचनाद्दण्डः स्वामिनं नरकं नयेत् ॥”

दण्डकः, पुं क्ली, (दण्ड इव कायतीति । कै + कः ।) श्लोकविशेषः । छन्दोभेदः । इत्यमरटीकासारसुन्दरी ॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् ॥ (ह्रस्वो दण्डः । “ह्रस्वे ।” ५ । ३ । ८६ । इति कन् । क्षुद्रलगुडः । सोंटा इति भाषा ॥ पुं, इक्ष्वाकुपुत्त्रः । यथा, भागवते । ६ । ६ । ४ ।
“क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ।
तस्य पुत्त्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ॥”
एतन्नृपसन्निवेशस्थानं दण्डकारण्यमितिख्यातम् । यथा, रामायणे । १ । १ । ४० ।
“रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥”)

दण्डकन्दकः, पुं, (दण्डवत् कन्दो मूलं यस्य । कप् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥

दण्डका, स्त्री, (दण्डक + स्त्रीलिङ्गत्वादत्र टाप् ।) जनस्थानम् । दण्डकारण्यम् । इति जटाधरः ॥ (यथा, रामायणे । २ । ३० । ३८ ।
“मम सन्ना मतिः सीते । नेतुं त्वां दण्डकावनम् ।
वसिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता ॥”)

दण्डकाकः, पुं, (दण्डो यमदण्ड इव काकः । अशुभसूचकत्वादस्य तथात्वम् ।) द्रोणकाकः इति हेमचन्द्रः ॥

दण्डढक्का, स्त्री, (दण्डताड्यमाना ढक्का ।) वाद्यविशेषः । दामामा इति नागरा इति च भाषा । तत्पर्य्यायः । नाली २ घटी ३ यामनाली ४ यमेरुका ५ यामघोषः ६ । इति त्रिकाण्डशेषः ॥ दम्ममः ७ दुन्दुभिः ८ दुन्दुः ९ गभीरिका १० । इति शब्दरत्नावली ॥

दण्डताम्री, स्त्री, (दण्डेन ताड्यमाना ताम्री ताम्रनिर्म्मितवाद्यम् ।) ताम्रीवाद्यम् । इति शब्दरत्नावली ॥

दण्डधरः, पुं, (दण्डस्य धरः । दण्डं धारयति । धृञ् धारणे + पचाद्यचि णिलुक् । इत्युज्ज्वलदत्तः । २।२२ ।) यमः । इत्यमरः । १।१।६२ ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६५८ ।
“ब्रह्मदण्डहतं दण्ड भुक्त्वा दण्डधराधिपः ।
अकाण्डदण्डसङ्घाथ ययौ दण्डधरान्तिकम् ॥”)
राजा । इति जटाधरः ॥ (यथा, रघुः । ९ । ३ ।
“बलनिषूदनमर्थपतिञ्च तं
श्रमनुदं मनुदण्डधरान्वयम् ॥”)
त्रि, लगुडधारकः ॥ (शासकः । यथा, महाभारते । १२ । २३ । ४३ ।
“एवमेतन्मया कार्य्यं नाहं दण्डधरस्तव ॥”
चतुर्थोपाययुक्तः । यथा, भागवते । ४।२१।२२ ।
“अह दण्डधरो राजा प्रजानामिव योजितः ॥”)

दण्डधारः, पुं, (दण्डं धरतीति । धृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) पृथ्वीनाथः । (यथा, गोः रामायणे । २ । ८८ । ७ ।
“उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केरलाः ।
दण्डधाराश्च सामुद्रा रत्नान्युपहरन्तु ते ॥”)
प्रेताधिपः । इति मेदिनी । रे, २६६ ॥ (स्वनामख्यातनृपविशेषः । स तु क्रोधवर्द्धनस्यासुरस्यांशेन जातः । यथा, महाभारते । १।६७।४७ ।
“क्रोधवर्द्धन इत्येव यस्त्वन्यः परिकीर्त्तितः ।
दण्डधार इति ख्यातः सोऽभवन्मनुजेश्वरः ॥”
धृतराष्ट्रपुत्त्राणामेकतमः । यथा, तत्रैव धृतराष्ट्रपुत्त्रनामकथने । १ । ६७ । १०२ ।
“निषङ्गी कवची पाशी दण्डधारो धनुर्ग्रहः ॥”)

त्रि, दण्डधर. । (शासकः । यथा, राजतरङ्गिण्याम् । ४ । १०८ ।
"दण्डधारे त्वयि चाप । चितिमेतां प्रशासति ।
को वैरक्लेशयोः पारमनासाद्यावसीदति ॥")

दण्डनायकः, पुं, (दण्ड राज्ञां चतुर्थोपाय नयतीति । नी + ण्वुल ।) सेनानीः । स चतुरङ्गबलाध्यक्षः । इति हेमचन्द्रः । ३ । ३८८ ॥ (यथा, राजतरङ्गिण्याम् । ७ । ६६६ ।
"कन्दर्पे कोटमन्त्र्याणां भिन्नानां सङ्कुलीकृते ।
क्रुध्यन् राजपुरीं राजा व्यस्जद्दण्डनायकम् ॥")

दण्डनीतिः, स्त्री, (दण्डेन नीयते या । यद्वा दण्डो नीयतेऽनयेति । नी + कर्म्मणि करणे वा क्तिन् ।) अर्थशास्त्रम् । इत्यमरः । १ । ६ । ५ ॥ तत् चाणक्यादिप्रणीतं नीतिशास्त्रम् । इति भरतः । तस्य निरुक्तिर्यथा,—
"दण्डेन नीयते चेदं दण्डं नयति वा पुनः ।
दण्डनीतिरिति ख्याता त्रीँल्लोकानभिवर्त्तते ॥
तच्च शतसहस्राणामध्यायपरिमितम् ।
तद्यथा,—
"ततोऽध्यायसहस्राणां शतञ्चक्रे सुबुद्धिजम् ।
यत्र धर्म्मस्तथैवार्थः कामश्चैवाभिवर्णित. ॥
त्रिवर्ग इति विख्यातो गण एष स्वयम्भुवा ।
चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः ॥
मोक्षस्यापि त्रिवर्गोऽन्य प्रोक्तः सत्त्वं रजस्तम. ।
स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः ॥
आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च ।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः ॥
त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ ।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ॥
अमात्यरक्षा प्रणिधी राजपुत्त्रस्य लक्षणम् ।
चारश्च विविधोपायः प्रणिधिश्च पृथग्विधः ॥
सामभेदप्रदानञ्च ततो दण्डश्च पार्थिव ।
उपेक्षा पञ्चमी चात्र कार्त्स्न्येन समुदाहृता ॥
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च ।
विभ्रमश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत् फलम् ॥
सन्धिश्च विविधाभिख्यो हीनो मध्यस्तथोत्तमः ।
भयं सत्कारवित्ताख्यं कार्त्स्न्येन परिवर्णितम् ॥
यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः ।
विजयो धर्म्मयुक्तश्च तथार्थविजयश्च ह ॥
आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः ।
लक्षणं पञ्चवर्गस्य त्रिविधञ्चात्र वर्णितम् ॥
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः ।
प्रकाशोऽष्टविधस्तत्र गुह्यश्च बहुविस्तरः ॥
रथा नागा हयाश्चैव पादाताश्चैव पाण्डव ।
विष्टिर्नावश्चराश्चैव देशिका इति चाष्टमम् ॥
अङ्गान्येतानि कौरव्य ! प्रकाशानि बलस्य च ।
जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः ॥
स्पर्शे चाभ्यवहार्य्ये चाप्युपांशुस्त्रिविधः स्मृतः ।
अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः ॥
कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च ह ।
आत्मरक्षणमाश्वासः स्पर्शानां चान्ववेक्षणम् ॥
कल्पना विविधाश्चापि नृनागरथवाजिनाम् ।
व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलम् ॥
उत्पाताश्च निपाताश्च सुयुद्धं सुपलायनम् ।
शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ ! ॥
बलव्यसनमुक्तिश्च तथैव बलहर्षणम् ।
पीडा चापत्कालश्च पत्तिज्ञानञ्च पाण्डव ! ॥
तथा खातविधानञ्च योगसञ्चार एव च ।
चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीडनम् ॥
अग्निदैरसदैश्चैव प्रतिरूपककारकैः ।
श्रेणिमुख्योपजापेन वीरुधच्छेदनेन च ॥
दूषणेन च नागानां आशङ्काजननेन च ।
आराधनेन भक्तस्य प्रत्ययोपार्जनेन च ॥
सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धी समञ्जसम् ।
दूतसामर्थ्ययोगाश्च राष्ट्रस्य च विवर्द्धनम् ।
अरिमध्यस्थमित्राणां सम्यक् प्रोक्तं प्रपञ्चनम् ॥
अवमर्द्दः प्रतीघातस्तथा चैव बलीयसाम् ।
व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनम् ॥
श्रमो व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः ॥
अभृतानाञ्च भरणं भृतानाञ्चान्ववेक्षणम् ।
अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता ॥
तथा राजगुणाश्चैव सेनापतिगुणाश्च ह ।
कारणञ्च त्रिवर्गस्य गुणदोषास्तथैव च ॥
दुश्चेष्टितञ्च विविधं वृत्तिश्चैवानुजीविनाम् ।
शङ्कितत्वञ्च सर्व्वस्य प्रमादस्य च वर्ज्जनम् ॥
अलब्धलाभो लब्धस्य तथैव च विवर्द्धनम् ।
प्रदानञ्च विवृद्धस्य पात्रेभ्यो विधिवत्तदा ॥
विसर्गोऽर्थस्य धर्म्मार्थे कामहेतुकमुच्यते ।
चतुर्थं व्यसनाघाते तथैवात्रानुवर्णितम् ॥
क्रोधजानि तथोग्राणि कामजानि तथैव च ।
दशोक्तानि कुरुश्रेष्ठ । व्यसनान्यत्र चैव ह ॥
मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ ! ।
कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयम्भुवा ॥
वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च ।
निग्रहोऽथात्मनस्त्यागमर्थदूषणमेव च ॥
यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्णिताः ।
अवमर्द्दः प्रतीघातः केतनानाञ्च भञ्जनम् ।
चैत्यद्रुमावमर्द्दश्च रोधः कर्म्मान्तनाशनम् ॥
उपस्कारोऽथ वसनं तथोपायाश्च वर्णिताः ।
पणवानकशङ्खानां भेरीणाञ्च युधिष्ठिर ! ॥
उपार्ज्जनञ्च द्रव्याणां परिमर्द्दश्च तानि षट् ।
लब्धस्य च प्रशमनं सताञ्चैवाभिपूजनम् ॥
विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता ।
मङ्गलालम्भनञ्चैव शरीरस्य प्रतिक्रिया ॥
आहारयोजनञ्चैव नित्यमास्तिक्यमेव च ।
एकेन च यथोत्थेयं सत्यत्वं मधुरा गिरः ॥
उत्सवानां समाजानां क्रियाः केतनजास्तथा ।
प्रत्यक्षाश्च परोक्षाश्च सर्व्वाधिकरणेष्वथ ॥
वृत्तिर्भरतशार्दूल ! नित्यञ्चैवान्ववेक्षणम् ।
अदण्ड्यत्वं च विप्राणां युक्त्या दण्डनिपातनम् ॥
अनुजीविस्वजातिभ्यो गुणेभ्यश्च समुद्भव ।
रक्षणञ्चैव पौराणां राष्ट्रस्य च विवर्द्धनम् ॥
मण्डलस्था च या चिन्ता राजन् ! द्वादशराजिका ॥
द्वासप्ततिविधा चैव शरीरस्य प्रतिक्रिया ।
देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः ॥
धर्म्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णित ।
उपायश्चात्र लिप्सा च विविधा भूरिदक्षिण ।
मूलकर्म्मक्रिया चात्र मायायोगश्च वर्णितः ।
दूषणं स्रोतसाञ्चैव वर्णितञ्च स्थिराम्भसाम् ॥
यैर्यैरुपायैर्लोकस्तु न चलेदार्य्यवर्त्मनः ।
तत् सर्व्वं राजशार्दूल ! नीतिशास्त्रेषु वर्णितम् ॥
एतत् कृत्वा शुभं शास्त्रं ततः स भगवान् प्रभु. ।
देवानुवाच संहृष्टः सर्व्वान् शक्रपुरोगमान् ॥
उपकाराय लोकस्य त्रिवर्गस्थापनाय च ।
नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता ॥
दण्डेन सहिता ह्येषा लोकरक्षणकारिका ।
निग्रहानुग्रहरता लोकाननुचरिष्यति ॥"
इति महाभारते राजधर्म्मे ॥

दुर्गा । यथा,—
"नयानयगता लोके विकल्पनिलयामला ।
दण्डनाम्नमनाद्यापि दण्डनीतिरिति स्मृता ॥"
इति देवीपुराणे ४५ अध्याय. ॥

दण्डपांशुलः, पुं, (दण्डेन दण्डधारणेन पांशुलो नीच ।) द्वारपालः । इति शब्दरत्नावली ॥

दण्डपाणि, पुं, (दण्डः पाणौ यस्य ।) यमः । (यथा, भागवते । १ । १७ । ३५ ।
"परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ।
तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम् ॥")
काशीस्थशिवगणविशेषः । स पूर्णभद्रयक्षपुत्त्र हरिकेशनामा शिवमाराध्य शिववरेण काश्यां दण्डनायकत्वमवाप्तवान् । यथा,—
"भक्तस्य धीरस्य तपोनिधेर्हरौ
हरो वराणां निकरं तदा ददौ ।
यत्तस्य यक्षात्र मम प्रियस्य भो
भवाधुना दण्डधरो वराक्षम ॥
त्वमस्य क्षेत्रस्य मतादि दुरात्मदण्डकः
सुपालकः पुण्यकृताञ्च मत्प्रियः ।
त्वं दण्डपाणिर्भव नामतोऽधुना
सर्व्वान् गणान् शाधि ममाज्ञयोत्कटान् ॥"
"त्वत्पार्श्वतः क्लृप्तसमं चरेऽत्र यच्च राट्
कश्चाममगाराध्य सुसक्तिभाग्जनः ।
समानन प्रागत एव वै परेत्
तत. समर्चो मम भक्त आदरात् ॥
मद्भक्तियुक्तोऽपि विना त्वदीयां
भक्तिं न काशीवसतिं लभेत ।
गणेषु देवेषु हि मानवेषु
सदग्रमान्यो भव दण्डपाणे ! ॥"
इति काशीखण्डे ३२ अध्यायः ।
(स्वनामख्यातचन्द्रवंशीयनृपविशेषः । यथा, मात्स्ये । ५० । ८७ ।
"वहीनरात्मजश्चैव दण्डपाणिर्भविष्यति ॥"
अयन्तु मासत्रयाधिकचत्वारिंशद्वर्षमेकं राज्यं चकार । यथा, राजावल्याम् १ परिच्छेदे ।
"चत्वारिंशत् समाश्चैव सोऽपि मासत्रयाधिका ।
बुभुजे पृथिवीमेतां दण्डपाणिर्महाबल ॥"

दण्डधरे, त्रि । यथा, महाभारते । १।१३६।२८।
"भीमसेनो महाबाहुर्द्दण्डपाणिरिवान्तकः ।
प्रविवेश महासेना मकरः सागरं यथा ॥")

दण्डपारुष्यं, क्ली, (दण्डेन यत् पारुष्यं परुषता । दण्ड्यतेऽनेनेति दण्डो देहस्तेन यत् पारुष्यं विरुद्धाचरणमिति मिताक्षरा ।) राज्ञां सप्तव्यसनान्तर्गतव्यसनविशेषः । इति हेमचन्द्रः । ३ । ४०३ ॥ अष्टादशविवादान्तर्गतविवादविशेषः । तत्तु ताडनादि । इति मनुटीकायां कुल्लूकभट्टः ॥ (यथा, मनुः । ८ । २७८ ।
"अत ऊर्द्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥")

दण्डपालः, पुं, (दण्डं शरीरं पालयतीति । पालि + अण् ।) अर्द्धशफरमत्स्यः । दाँडिका इति भाषा । इति हारावली । १६० ॥ (दण्डेन पालयतीति । पालि + अच् ।) द्वारपालः ॥

दण्डपालकः, पुं, (दण्डपालवत् कायतीति । कै + क ।) शकुलमत्स्यः । इति हारावली । १६१ ॥

दण्डवालधिः, पुं, (दण्ड इव वालधिर्यस्य ।) हस्ती । इति शब्दरत्नावली ॥

दण्डभृत्, पुं, (दण्डं चक्रभ्रामणार्थं लगुडादिकं बिभर्त्तीति । भृ + क्विप् तुगागमश्च ।) कुम्भकारः । इति त्रिकाण्डशेषः ॥ (दण्डं दमनं बिभर्त्तीति ।) दण्डधारके, त्रि ॥

दण्डयात्रा, स्त्री, (दण्डाय शत्रुदमनाय या यात्रा प्रयाणम् ।) दिग्विजयः । संयानम् । वरयात्रा । इति मेदिनी । रे २६५ ॥

दण्डयामः, पुं, (दण्डं यच्छतीति । यम + अण् ।) यमः । दिनम् । अगस्त्यः । इति मेदिनी । मे, ६० ॥

दण्डरी, स्त्री, डङ्गरीफलम् । इति राजनिर्घण्टः ॥

दण्डवादी, [न्] पुं, (दण्डेन वदतीति । वद + णिनिः ।) दर्व्वटः । द्वारपालः । इति हारावली । १२८ ॥ दण्डवक्तरि, त्रि ॥

दण्डवासी, [न्] पुं, (दण्डेन वसतीति । वस + णिनिः ।) द्वारपालः । इति त्रिकाण्डशेषः ॥ एकग्रामाधिकृतजनः । इति जटाधरः ॥

दण्डविष्कम्भः, पुं, (दण्डं मन्थानदण्डं विष्कभ्नाति निरुणद्धि यत्र । वि + स्कन्भ + अधिकरणे घञ् । वेः स्कभ्नातेर्नित्यमिति षत्वम् ।) यत्र स्तम्भादौ आकर्षणार्थं रज्ज्वा दण्डो निबध्यते सः । घोलमन्थोया खुँटी इति भाषा । तत्पर्य्यायः । कुठरः २ । इत्यमरः । २।६।७४ ॥

दण्डवृक्षकः, पुं, (पत्रविहीनत्वात् दण्ड इव वृक्षः । ततः स्वार्थे कन् ।) स्नुही । इति राजनिर्घण्टः ॥

दण्डहस्ता, स्त्री, (दण्ड इव हस्तो वृन्तरूपो यस्य ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

दण्डाजिनं, क्ली, शाठ्यम् । इति शब्दार्थकल्पतरुः ॥ (कपटिनां बहिर्वेशादिकं यतीनां दण्डाजिनवत् आर्य्यलिङ्गत्वेन प्रतीयमानत्वात् तदर्थोऽत्रोपचर्य्यते । दण्डश्च अजिनञ्च द्वयोः समाहारः । यतीनां दण्डं मृगचर्म्म च । यथा, देवीभागवते । १ । १६ । ३१ ।
"दण्डाजिनकृता चिन्ता यथा तव वनेऽपि च ।
तथैव राज्यचिन्ता मे चिन्तयानस्य वा न वा ॥")

दण्डादण्डि, अ, (दण्डैश्च दण्डैश्च प्रहृत्य प्रवृत्तं युद्धम् । "इच् कर्म्मव्यतिहारे ।" ५ । ४ । १२७ । इति इच् ।) परस्परदण्डकरणकप्रहाररूपयुद्धम् । इति व्याकरणम् ॥ लाठालाठि इति भाषा ॥

दण्डारः, पुं, (दण्डं ऋच्छतीति । ऋ + अण् ।) वाहनम् । मत्तहस्ती । शरयन्त्रकम् । कुम्भकारस्य चक्रम् । इति मेदिनी । रे, १६८ ॥

दण्डाहतं, क्ली, (दण्डेन आहतम् ।) घोलम् । इत्यमरः ।२।६।५३ ॥ (दण्डेन ताडिते, त्रि ॥)

दण्डिकः, पुं, (दण्डोऽस्त्यस्येति । दण्ड + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) दण्डधारकः । छडिबरदार इति आसाबरदार इति च भाषा । मत्स्यविशेषः । डानिकणा माछ इति भाषा । अस्य गुणाः । कफवायुपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ (दण्डदातरि नियामके, त्रि । यथा, महाभारते । ६ । ११ । ३६ ।
"न तत्र राजा राजेन्द्र । न दण्डो न च दण्डिकः ।
स्वधर्म्मेणैव धर्म्मज्ञ । ते रक्षन्ति परस्परम् ॥")

दण्डिका, स्त्री, (दण्डवदाकृतिरस्त्यस्याः । दण्ड + ठन् + टाप् ।) हारविशेषः । इति जटाधरः ॥ रज्जुः । यथा, अङ्गुल्योत्कर्षं दण्डिकां छिनत्ति । इति सुपद्मव्याकरणम् ॥ दण्डिका रज्जुरिति तट्टीकाकारः ॥

दण्डितः, त्रि, (दण्डः सञ्जातोऽस्येति । दण्ड + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५।२।३६। इति इतच् ।) कृतदण्डः । तत्पर्य्यायः । शासितः २ साधितः ३ । इति हेमचन्द्रः ॥

दण्डी, [न्] पुं, (दण्डोऽस्त्यस्येति । दण्ड + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) जिनविशेषः । इति त्रिकाण्डशेषः ॥ (स तु कवीनामन्यतमः काव्यादर्शदशकुमारचरितादिग्रन्थप्रणेता । शङ्कराचार्य्यसमकालीनोऽयम् । यथा, शङ्करविजये । १५ । १४० ।

> "स कथाभिरवन्तिषु प्रसिद्धान्
> विबुधान् बाणमयूरदण्डिमुख्यान् ।
> शिथिलीकृतदुर्म्मताभिमानान्
> निजभाष्यश्रवणोत्सुकांश्चकार ॥")

यथा, कालिदासः ।
"जाते जगति वाल्मीकौ कविरित्यभिधीयते ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥"
दमनकवृक्षः । इति राजनिर्घण्टः ॥ यमः । (यथा, महाभारते । १ । १६० । १७ ।

> "स वृक्षमादाय रिपुप्रमाथी
> दण्डीव दण्डं पितृराज उग्रम् ॥")

द्वाःस्थः । चतुर्थाश्रमी । (अस्य व्यवहारादिकं यदुक्तं मनौ । ६ । ४१-५८ ।
"आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥
अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसङ्कुसुको मुनिर्भावसमाहितः ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्द्देशं भृतको यथा ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत् ॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥
न तापसैर्ब्राह्मणैर्व्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्व्वान्यैरागारमुपसंव्रजेत् ॥
कॢप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्व्वभूतान्यपीडयन् ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥
अलाबु दारुपात्रञ्च मृण्मयं वैदलन्तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालञ्चरेद्भैक्षं न प्रसज्जेत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यात् मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्म्मुक्तोऽपि बध्यते ॥"
दण्डग्रहणादेव दण्डी । भार्य्यादिषु विद्यमानेषु दण्डग्रहणेन प्रत्यवायो जायते । यदुक्तं महानिर्व्वाणतन्त्रे १३ पटले ।
"स्थितायां यौवनयुतकान्तायां परमेश्वरि ! ।
सर्व्वं हि विफलं तस्य यः कुर्य्याद्दण्डधारणम् ॥
विद्यते पितरौ देवि ! यः कुर्य्याद्दण्डधारणम् ।
सन्न्यास विफलं तस्य रौरवाख्यं गमिष्यति ॥
विद्यते बालभावेन यस्य कान्ता सुतस्तथा ।
सन्न्यासधारणं तस्य वृथा हि परमेश्वरि ! ॥
सगुरुश्चापि शिष्यश्च रौरवाख्यं प्रपद्यते ॥"
अधुनातनदण्डिनस्तु प्रायशः शङ्कराचार्य्यसम्प्रदायान्तर्गता अतस्तेषां निर्गुणब्रह्मोपासनैव परमो धर्म्मः । एते तु मुण्डिनः प्रायशः परिहितरञ्जितवस्त्रा रुद्राक्षमालाधारिणश्च । दण्डिनस्तु द्वादशवर्षपर्य्यन्तं भिक्षापर्य्यटनादिकं विधाय दण्डान् परित्यज्य परमहंसाश्रममाश्र-

मन्दं स्यात् सर्वविभ्रमं दोषत्रयविदाहकृत् ॥
यत् सम्यक् घनतां यातं व्यक्तं स्वादुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवर्णितैः ॥
यत्तिरोहितमाधुर्य्यं व्यक्ताम्लत्वं तदम्लकम् ।
अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥
मन्दाम्लं दन्तरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तपित्तपुष्टिकरं परम् ॥”

इति भावप्रकाशः ॥ * ॥

“लवणमधुरमपि शर्करासुसंयातो
कुसुमरसविमिश्रं नैव दद्यन्ति नित्यम् ।
न च शरदि वसन्ते ग्रीष्मकाले न रात्रौ
न दधि कफविकारे पित्तदोषेऽपि नाद्यात् ॥
त्रिकटुकयुतमेतत् नागिकाचूर्णमिश्रं
कफहरमनिलघ्नं वह्निसन्दीपनञ्च ।
तुहिनशिशिरकाले सेवितञ्चातिपथ्यं
रचयति तनुदार्ढ्यं कान्तिसत्त्वं नृणाम् ॥
दधिमधुरमीषदम्लं चाधिकाम्लं तदम्लकम् ।
यावद्यावन्मधुरं दोषहरं तावदुक्तमिदम् ॥”

इति राजनिर्घण्टः ॥ * ॥

“दधि यत् स्वादु सन्मेदःकफाभिष्यन्दकारकम् ।
दध्यम्लमतिपद्रक्तदूषणं कफपित्तकृत् ॥
विदाहि सर्वविभ्रमं मन्दजातं त्रिदोषकृत् ।
दधि त्वसारं रूक्षन्तु ग्राहि विष्टम्भि वातलम् ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥”

इति राजवल्लभः ॥ * ॥

(ऋतुभेदे दधिविशेषगुणा यथा,—
“शारदं दधिगुल्मघ्नं रक्तपित्तविवर्द्धनम् ।
शोषं तृष्णां ज्वरं शूलं करोति विषमज्वरम् ॥

इति शारददधिगुणाः ॥ * ॥

गुरु स्निग्धञ्च मधुरं कफकृद्बलवर्द्धनम् ।
वृष्यं मेध्यञ्च हैमन्तं पुष्टिदं तुष्टिवर्द्धनम् ॥

इति हैमन्तदधिगुणाः ॥ * ॥

शैशिरं सघनञ्चाम्लं मधुरं गुरु एव च ।
वृष्यं बलकरं पित्तश्रमापहरणं परम् ।

इति शैशिरदधिगुणाः ॥ * ॥

वासन्तं मधुरं स्निग्धं किञ्चिदम्लं कफात्मकम् ।
बलकृद्दोषदा प्रोक्तं वसन्ते न प्रशस्यते ।

इति वासन्तदधिगुणाः ॥ * ॥

लघु चाम्लं भवेद्ग्रीष्मे वातघ्नं रक्तपित्तकृत् ।
शोषभ्रमपिपासाकृद्दधियुक्तं न ग्रीष्मके ॥

इति ग्रीष्मदधिगुणाः ॥ * ॥

वार्षिकं हितकृत् प्रोक्तं दधि शस्तं न दोषलम् ।
शोषवातभ्रमान् हन्ति श्रमातीसारनाशनम् ॥”

इति वार्षिकदधिगुणाः ॥ * ॥

“हिक्काश्वासशोषार्शानामतिसारे भगन्दरे ।
शस्तं प्रोक्तं दधि त्वेषां सर्वथैव विमृश्चितम् ॥

इति दधिभोजनविधिः ॥” * ॥

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥

“रोचनं दीपनं वृष्यं स्नेहनं बलवर्द्धनम् ।
पाकेऽम्लमुष्णं वातघ्नं मङ्गल्यं बृंहणं दधि ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥”
“निद्राग मन्दकं धारा पारगं दधि शुक्लम् ॥”

इति चरके सूत्रस्थाने २७ अध्याये ॥

“दधि तु मधुरमम्लमत्यम्लञ्चेति तत्कषायानुरसं
स्निग्धमुष्णं पीनसविषमज्वरातिसारारोचक-
मूत्रकृच्छ्रकार्श्यापहं वृष्यं प्राणकरं माङ्गल्यञ्च ॥
महाभिष्यन्दि मधुरं कफमेदोविवर्द्धनम् ।
कफपित्तकृदम्लं स्यादत्यम्लं रक्तदूषणम् ॥
विदाहि सर्वविभ्रमं मन्दजातं त्रिदोषकृत् ।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ॥
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदम् ।
दध्याजं कफपित्तघ्नं लघु वातक्षयापहम् ॥
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनम् ।
विपाके मधुरं वृष्यं वातपित्तप्रसादनम् ।
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषम् ।
विपाके कटु सक्षारं गुरु भेदोष्ट्रिकं दधि ॥
वातमर्शांसि कुष्ठानि क्रिमीन् हन्त्युदराणि च ।
कोपनं कफवातानां दुर्नाम्नाञ्चाविकं दधि ॥
रसे पाके च मधुरमत्यभिष्यन्दि दोषलम् ।
दीपनीयमचक्षुष्यं वाडवं दधि वातलम् ॥
रूक्षमुष्णं कषायञ्च कफमात्रापहञ्च तत् ।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु ॥
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरम् ।
लघु पाके बलाधानं वीर्य्योष्णं पित्तनाशनम् ॥
कषायानुरसं नाग्या दधि वर्चोविवर्द्धनम् ।
दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ॥
विज्ञेयमेषु सर्व्वेषु गव्यमेव गुणोत्तरम् ।
वातघ्नं कफकृत् स्निग्धं बृंहणं न च पित्तकृत् ॥
कुर्य्याद्भक्ताभिलाषञ्च दधि यत् सुपरिस्रुतम् ।
शृतात् क्षीरात्तु यज्जातं गुणवद्दधि तत् स्मृतम् ॥
वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनम् ।
दध्नः सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशनः ॥
वह्नेर्विधमनश्चापि कफशुक्रविवर्द्धनः ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलम् ॥
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ॥”

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

धारणकर्त्तरि, त्रि । इति मुग्धबोधम् ॥

दधिकूर्चिका, स्त्री, (दधिजाता कूर्चिका ।) क्षीरो-
दकोष्णदुग्धे दध्यम्लसंयोगात् जाता । इति
केचित् ॥ उष्णदुग्धे दध्यम्लसंयोगात् जाता
इत्यन्ये ॥ छेना इति भाषा । अस्या गुणाः ।
वातनाशित्वम् । ग्राहित्वम् । रूक्षत्वम् ।
दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायोऽस्या
यथा,—
“दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्चिका ॥”

इति वैद्यकरत्नमालायाम् ॥)

दधिचारः, पुं, (दधि चालयति विलोडयतीति ।
दधि+चल+णिच्+अण् । लस्य रत्वम् ।)
दधिमथनदण्डः । तत्पर्य्यायः । वैशाखः २
मन्थाटः ३ करघर्षणः ४ । इति हारावली ।२४॥

दधिजं, क्ली, (दध्नो जायते इति । जन+“पञ्च-
म्यामजातौ ।” ३ । २ । ९८ । इति डः ।)
नवनीतम् । इति राजनिर्घण्टः ॥ (नवनीत-
शब्देऽस्य विशेषो ज्ञातव्यः ॥)

दधित्थः, पुं, (दधिवर्णं स्थयिष्णुबीजमिति । स्था
+“सुपिस्थः ।” ३ । २ । ४ । इति कः । पृषो-
दरादित्वात् साधुः ।) कपित्थः । इत्यमरः ।
२ । ४ । २१ ॥ (यथा,—
“सद्दधित्थबिल्वाम्रजम्बुमध्यैः प्रपचयेत् ॥”
इति वाभटे चिकित्सास्थाने नवमेऽध्याये ॥
“दधित्थबिल्वचाङ्गेरी तक्रदाडिमसाधिता ।
पाचनी ग्राहिणी पेया सवाते पाञ्चमूलिका ॥”
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)

दधित्थाख्य, पुं, (दधित्थं आख्याति कपित्थदलं
अनुकरोतीति । आ+ख्या+कः ।) शरस-
लम् । इति रत्नमाला ॥ लोवान् इति भाषा ॥

दधिधेनुः, स्त्री, (दधिनिर्म्मिता धेनुः ।) दानार्थ-
दध्यादिनिर्म्मिता धेनुः । यथा, वराहपुराणे ।
“दधिधेनोर्म्महाराज ! विधानं शृणु साम्प्रतम् ।
अनुलिप्ते महीभागे गोमयेन नराधिप ! ॥
गोचर्म्ममात्रे तु पुनः पुष्पप्रकरशोभिते ।
कुशैरास्तीर्य्य वसुधां कृष्णाजिनकुशोत्तराम् ॥
दधिकुम्भं सुसंस्थाप्य सप्त धान्यचयोपरि ।
चतुर्थांशेन वत्सन्तु सौवर्णसुखमण्डितम् ॥
आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजिताम् ।
ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ॥
क्षमादिगुणयुक्ताय दद्यात्तां दधिधेनुकाम् ।
पुष्करदेशोपविष्टस्तु मुद्रिकाकर्णमात्रके ॥
पादुकोपानहौ छत्रं दत्त्वा मन्त्रमुदीरयेत् ।
दधिक्राव्णेतिमन्त्रेण दधिधेनुं प्रदापयेत् ॥
एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ! ।
एकाहारो दिनं तिष्ठेद्दध्ना च नृपनन्दन ! ॥
यजमानो वसेद्राजन् त्रिरात्रञ्च द्विजोत्तम ! ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥
यत्र क्षीरवहा नद्यो यत्र पायसकर्द्दमाः ।
मुनयः ऋषयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
य इदं श्रावयेद्भक्त्या शृणुयाद्वापि मानवः ।
सोऽश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति ॥”

दधिपुष्पिका स्त्री, (दधीव शुभ्रं पुष्पमस्याः ।
कप् । टापि अत इत्वम् ।) श्वेतापराजिता ।
इति राजनिर्घण्टः ॥

दधिपुष्पी, स्त्री (दधीव पुष्पमस्याः । जातित्वात्
ङीष् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

दधिफल, पुं, (दधीव शुभ्रो द्रवः फले यस्य ।)
कपित्थवृक्षः । इत्यमरः । २ । ४ । २१ ॥

दधिमण्डः पुं, (दध्नः मण्डः ।) मस्तु । इति रत्न-
माला ॥ मात् इति भाषा ॥

दधिमण्डोदः पुं, (दधिमण्ड इव उदकं यत्र ।
उदकस्य उदादेशः ।) दधिसमुद्रः । (यथा,
भागवते । ५ । १ । ३३ ।
“क्षीरोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोद-
शुद्धोदाः सप्त जलधयः ॥”)

दधिमुखः, पु, (दधिवत् शुभ्रं मुखं यस्य ।) वानरविशेषः । स सुग्रीवश्वशुरः तस्य मधुवनपालकश्च । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८२ । ७ । [वान् ॥"
"श्रीमान् दधिमुखो नाम हरिवृद्धोऽपि वीर्य्य-
नागविशेषः । यथा, महाभारते । १ । ३५ । ८ ।
"सुरामुखो दधिमुखस्तथा विमलपिण्डकः ॥"
अयन्तु दर्व्वी कराणां सर्पाणामन्यतमः । इति सुश्रुते कल्पस्थाने ४ अध्याये ॥)

दधिशोणः, पु, वानरः । इति त्रिकाण्डशेषः ॥

दधिस(श्र)क्तवः, पु, दध्युपसिक्ताः सक्तवः । करम्भः । इत्यमरः । २ । ९ । ४८ ॥ दइछातु इति भाषा ॥ नित्यबहुवचनान्तोऽयम् ॥ (यथा, महाभारते । १३ । १०४ । ९१ ।
"न पाणौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु ।
दधिसक्तून् न भुञ्जीत वृथामांसञ्च वर्जयेत् ॥")

दधिसारः, क्ली, (दध्नः सारम् ।) नवनीतम् । इति हेमचन्द्रः । ३ । ७२ ॥

दधिस्नेहः, पु, (दध्नः स्नेहः ।) दधिसरः । तत्पर्य्यायः । सरः २ दध्युत्तरगम् ३ कट्वरम् ४ । इति रत्नमाला ॥

दधिस्वेदः, पु, (दध्नः स्वेद इव ।) घोलम् । इति जटाधरः ॥

दधीचः, पु, दधीचिमुनिः । इति शब्दभेदप्रकाशः ॥ (यथा, महाभारते । १ । १३८ । १२ ।
"दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥")

दधीचिः, पु, मुनिविशेषः । स अथर्व्वमुनेरौरसात् कर्द्दमकन्यायां शान्तिनाम्न्यां जातः । वृत्रवधार्थं देवैरस्यास्थ्ना वज्रं निर्म्मितम् । इति श्रीभागवतम् ॥ यथा,—
"ततोऽस्थिभ्यो दधीचस्य निहन्तुं विदशद्विषः ।
तस्मात् यत्नार्द्दधिश्रेष्ठो याच्यतां सुरसत्तमाः ॥
दधीचेरस्थीनि देहीति तैर्व्वधिष्याम दानवान् ।
तत् श्रुत्वा सहसा देवैर्याचितो मुनिभिस्तथा ॥
ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्तदा ।
प्राणायामं ततः कृत्वा देहं त्यक्त्वा सुभास्वरान् ॥
सर्व्वलोकान् अयान् प्राप्तो येभ्यो नावर्त्तते पुनः ।
तस्यास्थिभिरथो शक्रः प्रहृष्टः सुमनास्तथा ॥
कारयामास दिव्यानि तानि प्रहरणान्युत ।
वज्राश्मिशूलचक्रञ्च परिघा विविधा गदाः ॥
विश्वकर्म्मा सुराणान्तु महिधाद्यायुधानि च ॥"
इति वह्निपुराणे दानवस्यानिर्य्यणनामाध्यायः ॥

दधीच्यस्थि, क्ली, (दधीचेरस्थि ।) वज्रम् । हीरकम् । इति त्रिकाण्डशेषः ॥

दधृक् [ष्] त्रि, (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृगिति ।" ३ । २ । ५९ । इति क्विन् द्वित्वादिकञ्च निपात्यते ।) धृष्टः । इति त्रिकाण्डशेषः ॥ (धर्षकः । यथा, ऋग्वेदे । ५।६६।३ ।
"रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥")

दध्रः, पु, (दधते जीवेभ्यः पापपुण्यफलामसं ददातीति । दध दाने + बाहुलकात् रः ।) यमः । इति शब्दरत्नावली ॥

दध्याकरः, पु, (दध्नः आकर इव ।) दधिसमुद्रः । इति शब्दार्थकल्पतरुः ॥

दध्यानी, स्त्री, (दधिवत् शुभ्रतां आनयतीति । आ + नी + क्विप् ।) सुदर्शना । इति रत्नमाला ॥ सुदर्शनगुलञ्च इति भाषा । दएखए इति केचित् । पुराति इति केचित् । मदनमस्त इति हिन्दी भाषा ॥

दध्युत्तरं, क्ली, (दध्नः उत्तरं शेषजातम् ।) दधिस्नेहः । इति शब्दचन्द्रिका ॥ (यथा, हरिवंशे । ७८ । ६२ ।
"पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च ।
यथाकाम प्रदानाय सौभ्यादिश्रयणाय च ॥")

दध्युत्तरगं, क्ली, (दध्नः उत्तरं चरमावस्थां गच्छतीति । गम + डः ।) दधिस्नेहः । इति रत्नमाला ॥

दध्युदः, पु, (दधिवदुदकं यस्य । उत्तरपदस्य च इत्युदकस्योदादेशः ।) दधिसमुद्रः । इति जटाधरः ॥

दनुः, स्त्री, कश्यपपत्नी । सा दक्षकन्या दानवमाता च । इति त्रिकाण्डशेषः ॥ (यथा, मत्स्यपुराणे ६ अध्याये ।
"कश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्रपौत्रकान् ।
अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥
सुरभिर्विनता तद्वत् ताम्रा क्रोधवशा इरा ।
कद्रुर्विश्वा मुनिस्तद्वत्तासां पुत्रान्निबोधत ॥"
"दनुः पुत्रशतं लेभे कश्यपाद् बलदर्पितम् ।
विप्रचित्तिः प्रधानोऽभूत् येषां मध्ये महाबलः ॥
द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिरोधरः ।
अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥
मरीचिर्म्मेघवांश्चैव इरा गर्भशिरास्तथा ।
विद्रावणश्च केतुश्च केतुवीर्य्यः शतह्रदः ॥
इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च ।
एकचक्रो महाबाहुर्वज्राक्षस्तारकस्तथा ॥
असिलोमा पुलोमा च विन्दुर्बाणो महासुरः ।
स्वर्भानुर्वृषपर्व्वा च एवमाद्या दनोः सुताः ॥"
दानवविशेषे, पु । यथा, गो रामायणे कबन्धस्तोत्रे । ३ । ७५ । २४ ।
"श्रियो मां मध्यम पुत्रं दनु नाम्ना च दानवम् ॥")

दनुजः, पु, (दनोर्जायते इति । जन + डः ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, भागवते । ६ । ९ । ४० ।
"तवैव विभूतयो दितिदनुजादयश्चापि ॥")

दनुजद्विट्, [ष्] पु, (दनुजानां असुराणां द्विट् शत्रुः । यद्वा, दनुजान् द्वेष्टीति । द्विष् + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (दानवशत्रौ, त्रि । यथा प्रयोगरत्नमालायां शब्दप्रकरणस्यादौ ।
"नमो नन्दकुमाराय दनुजद्विषे ॥")

दनुसुनुः, पुं, (दनोः सुनुः पुत्रः ।) असुरः । इति जटाधरः ॥

दन्तः, पुं, (दम + "हसिमृग्रिण्वितीति ।" उणां । ३ । ८६ । इति तन् ।) पर्व्वतकटकः । कुञ्जः । इति मेदिनी । ते, २३ ॥ शैलस्थलम् । इति त्रिकाण्डशेषः ॥ चर्व्वणसाधनास्थि । दाँत इति भाषा । गर्भस्थस्य षष्ठे मासि शुक्लदन्तपङ्क्तिर्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । रदनः २ दशनः ३ रदः ४ । इत्यमरः । २।६।९१ ॥ द्विजः ५ खरः ६ । इति शब्दरत्नावली ॥ * ॥ तत्शुक्लकारकौषधं यथा,—

हरिरुवाच ।

"हरितालं यवक्षारं पत्राङ्गं रक्तचन्दनम् ।
जाती हिङ्गुलकं लाक्षा पक्वतैलेन पेषयेत् ॥
हरीतकीकषायेन घृष्ट्वा दन्तान् प्रलेपयेत् ।
दन्ताः सुरलोहिताः पुंसः श्वेता रुद्र ! न संशयः ॥"
इति गारुड़े १९३ अध्यायः ॥ * ॥
"शङ्खमामलकीयच्च धातक्याः कुसुमानि च ।
पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे ॥
स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः ॥"
इति तत्रैव १९५ अध्यायः ॥ * ॥
"मूलं गोक्षुरकस्यैव चर्व्विला नीललोहित ! ।
दन्तकीटव्यथां नश्येद्वासुरविमर्द्दन ! ॥"
इति च गारुड़े १९३ अध्यायः ॥ * ॥

सदन्तजातस्य शुभाशुभफलं यथा,—
अथ जातभद्रादि । तत्र दन्तजन्मचिन्ता ।
"जातः सदन्तः पितृमातृहन्ता
तातं विहन्यात् प्रथमे तु मासे ।
भ्रातॄं द्वितीये सहजं तृतीये
मासे चतुर्थे शुभकारकः स्यात् ॥
मिष्टान्नभोजी सुभगः सुताख्ये
षष्ठे सुखी पण्डितकल्पबुद्धिः ।
ततोऽधिकः स्यात् बलवान् द्रुनाख्ये
मासेऽष्टमे वित्तसुखैर्विहीनः ॥
सुरप्रतापी नवमे च्युतश्च दशमे तथा ।
एकादशे द्वादशे च सुखी च सुभगो भवेत् ॥
चर्व्वी पुत्तलिकान् कृत्वा सुगन्धैर्गन्धकेस्तथा ।
स्रोतःसु संक्रमे चापि स्नापयेत् सुरपुष्पकैः ॥
स्नानं सङ्क्रमणस्याधः शशोर्द्दर्शनमन्ततः ।
होमं विप्रार्च्चनञ्चैवमशुभे दन्तदर्शने ॥"
इति ज्योतिस्तत्त्वम् ॥

रतिक्रीडायां तस्याघातस्थानानि यथा,—
"स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे ।
दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः ॥"
इति कामशास्त्रम् ॥ * ॥

अथ दन्तरोगाणां निदानादि यथा,—
"शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् ।
शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥ १ ॥
दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ २ ॥
स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥ ३ ॥
श्वयथुर्दन्तमूलेषु रुजावान् कफरक्तजः ।
लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥
कण्डूमान् शौषिरो गदः । इति च माटः ॥ ४ ॥

येषुः इति साम्प्रदायिकाः ॥ एतेषां काशी एव प्रधानतमं वासस्थानम् ॥ * ॥ महादेवः। यथा, महाभारते। १३। १७। १२६।
"मुण्डी विरूपो विकृतो दण्डी कुण्डी विकुर्व्वणः ॥"
योगाचार्य्यविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। उत्तरभागे। १०। ५।
श्रीकृष्ण उवाच।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यच्छलेन तु।
अवताराणि शर्व्वस्य शिष्यांश्च भगवन्। वद ॥"
उपमन्युरुवाच।
"महाकालस्य शूली च दण्डी मुण्डी स एव च ॥"
धृतराष्ट्रपुत्त्राणामेकतमः। यथा, महाभारते धृतराष्ट्रपुत्त्रनामकथने। १। ६७। १०२।
"निषङ्गी कवची दण्डी दण्डधारो धनुर्ग्रहः ॥"
दण्डीत्यत्र पाशीति केचित् ॥) दण्डयुक्ते त्रि। इति हेमचन्द्रः। ३। ३८५ ॥ (यथा, महाभारते। १३। १४। ३७४।
"दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः ॥")
दण्डोत्पल, क्ली, (दण्डयुक्तमुत्पलमिव।) क्षुपविशेषः। डानिपोला इति डानकुनि इति च भाषा। अस्य गुणाः। श्वयश्वासकासनाशित्वम्। अग्निदीपनत्वञ्च। इति राजवल्लभः ॥ तत्तु पीतरक्तश्वेतपुष्पभेदेन त्रिविधम्। पीतस्य पर्य्यायः। गोवन्दनी २ गन्धवल्ली ३ सहदेवी ४ सहा ५। रक्तस्य पर्य्यायः। विश्वदेवा १। श्वेतस्य। दण्डोत्पला १। इति रत्नमाला ॥
दण्डोत्पला, स्त्री, (दण्डोत्पल+टाप्।) श्वेतपुष्पदण्डोत्पलम्। इति रत्नमाला ॥
दण्ड्य, त्रि, (दण्ड्यते इति। दण्ड+कर्म्मणि यत्। यद्वा दण्डमर्हतीति। दण्ड+"दण्डादिभ्यो यत्।" ५। १। ६६। इति यत्।) दण्डनीयः। दण्डितव्यः। (यथा, मार्कण्डेये। २८। ३३।
"यस्त्वोत्सृज्य स्वकं धर्म्मं स्ववर्णाश्रमसञ्ज्ञितम्।
नरोऽन्यथा प्रवर्त्तेत स दण्ड्यो भूभृतो भवेत् ॥")
तत्पर्य्यायः। दण्डार्हः २। इति जटाधरः ॥ (यथा, रघुः। १। २५।
"स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ॥")
दत्, पु, दन्त। इति शब्दचन्द्रिका। अस्य बहुवचने दतः ॥
दत्तं, त्रि, (दीयते इति। दा+क्तः।) रक्षितम्। कृतदानम्। तत्पर्य्यायः। विहायम् २। इति त्रिकाण्डशेषः ॥ विश्राणितम् ३। इति शब्दरत्नावली ॥ (यथा, माघे। १। १५।
"स्वहस्तदत्ते मुनिमासने मुनि-
श्चिरन्तनस्तावदभिन्यवीविशत् ॥"
दा+भावे क्त।) दाने, क्ली। तत् सप्तविधं यथा,—
"दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम्।
पणमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥
अदत्तन्तु भयक्रोधशोकावेशरुगन्वितैः।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम्।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये चाधर्म्मसंहिते।
यद्दत्तं स्यादविज्ञानात् तददत्तमिति स्मृतम् ॥"
इति मिताक्षरा ॥
दत्त, पुं, राजविशेषः। स अभिषिक्तनन्दनः। इति हेमचन्द्रः। ३। ३६० ॥ (स तु जैनविशेषः।) अपरः। क्षत्त्रियवंशोत्पन्नो नृपविशेषः। यथा, महाभारते। १२। २९६। १५।
"आयुर्मतङ्गो दत्तश्च द्रुपदो मात्स्य एव च ॥"
यदुवंशीयस्य राजाधिदेवस्य पुत्त्रः। यथा, हरिवंशे। ३८। २।
"राजाधिदेवपुत्त्रास्तु जज्ञिरे वीर्य्यवत्तराः।
दत्तातिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः ॥")
वैश्यस्योपाधिविशेषः। यथा,—
"शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् ॥"
इत्युद्वाहतत्त्वम् ॥
अधुना कायस्थादेरुपाधिश्च। (यथा, कुलदीपिकायाम्।
"गौड़े श्रेष्ठौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धा
स्ते दत्ताः सेनदासाः करगुहसहिताः पालिताः सिंहदेवाः ॥")
भगवदवतारविशेषः। स अत्रिपुत्त्रः दत्तात्रेय इति नाम्ना ख्यातः। इति श्रीभागवतम् ॥ (पुत्त्रविशेषः। यथा, देवीभागवते। १। ६। ४८।
"कुण्डः सहोढ़ः कानीनः क्रीतः प्राप्तस्तथा वने।
दत्तः केनापि चाप्राप्तौ धनयोग्याः सुताः स्मृताः ॥"
तथा, महाभारते। १। १२०। ३४।
"दत्तः क्रीतः उपक्रीत उपगच्छेत् स्वयञ्च यः ॥")
दत्तकः, पुं, (दत्त एव। स्वार्थे कन्।) द्वादशविधपुत्त्रान्तर्गतपुत्त्रविशेषः। सपिण्डदत्तकस्य चाशौचव्यवस्था। यथा, "सापिण्ड्यस्य पुत्त्रीकरणे तु सपिण्डमरणादिनिमित्तं दत्तकस्य सम्भरणादिनिमित्तं सपिण्डानां दशरात्रमेव निर्व्विवादम्। इति अनन्तभट्टकृतदत्तकदीधितिः ॥ * ॥
औरसपुत्त्रेण सह तस्य समभागित्वम्। यथा,—
"दत्तपुत्त्रे यथाजाते कदाचिच्चौरसो भवेत्।
पितुर्व्वित्तस्य सर्व्वस्य भवेतां समभागिनौ ॥
इत्यपि वचनं शूद्रविषयम्।" इति दत्तकचन्द्रिका ॥ अन्यत् पोष्यपुत्त्रशब्दे द्रष्टव्यम् ॥
दत्तकपुत्त्र, पु, (दत्तक एव पुत्त्रः।) द्वादशविधपुत्त्रान्तर्गतपुत्त्रविशेषः। यथा, याज्ञवल्क्ये।
"दद्यान्माता पिता वा यं स पुत्त्रो दत्तको भवेत् ॥"
तत्परिग्रहणस्य प्रकारो यथा,—
"शुक्रशोणितसम्भवः पुत्त्रो मातापितृनिमित्तकः।
तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः ॥
नत्वेकं पुत्त्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्व्वेषाम्।
स्त्री पुत्त्रं न दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः ॥
पुत्त्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा प्रतिगृह्णीयादिति।" इति वशिष्ठः ॥ तस्य गोत्रधनप्राप्तिर्यथा,—
"गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥
पितुर्गोत्रेण यः पुत्त्रः संस्कृतः पृथिवीपते।
आचूडान्तं न पुत्त्रः स पुत्त्रतां याति चान्यतः ॥
चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥
ऊर्द्धन्तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप।
गृहीत्वा पञ्चवर्षीयं पुत्त्रेष्टिं प्रथमं चरेत् ॥"
इत्युद्वाहतत्त्वम् ॥
दत्तको द्विविधः। केवलदत्तकः द्व्यामुष्यायणदत्तकश्च। केवलदत्तको जनकेन प्रतिग्रहीत्रर्थमेव दत्तः तस्यैव पुत्त्रः। द्व्यामुष्यायणस्तु जनकप्रतिग्रहीतृभ्यामावयोरयमिति संप्रतिपन्नः स उभयोरपि पुत्त्रः।" इति मिताक्षरा ॥
दत्ताप्रदानिक, क्ली, (दत्तस्य अप्रदानं यत्रास्त्यस्य। दत्ताप्रदान+ठन्।) अष्टादशविवादपदान्तर्गतविवादपदविशेषः। दत्तस्य पुनराहरणं यस्मिन् विवादपदे तत्। यथा, नारदः।
"दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति।
दत्ताप्रदानिकं नाम व्यवहारपदं हि तत् ॥"
"असम्यगविहितमार्गेण।" इति मिताक्षरा ॥
दत्तात्मा, [न्] पुं, (दत्तः आत्मा येन।) पुत्त्रविशेषः। यथा,—
"दत्तात्मा तु स्वयं दत्तः।" इति कात्यायनः ॥ अस्य विवरणम्। "दत्तात्मा तु पुत्त्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्त्रो भवामीति स्वयं दत्तत्वमुपगतः।" इति मिताक्षरा। २। १३४ ॥ (विश्वदेवानामन्यतमः। यथा, महाभारते। १३। ९१। ३४।
"सोमपः सूर्य्यसावित्रो दत्तात्मा पुण्डरीयकः ॥")
दत्तानपकर्म्म, [न्] क्ली, (दत्तस्य अनपकर्म्म आदानं यत्र।) दत्ताप्रदानिकम्। इति मनुः ॥
दत्ति, स्त्री, (दा+भावे क्तिन्।) दानम्। इति शब्दरत्नावली ॥ (यथा, रघुः। ८। ८६।
"अपशोकमनाः कुटुम्बिनी-
मनुगृह्णीष्व निवापदत्तिभिः ॥")
दत्तेयः, पुं, (दत्ताया अपत्यं पुमान्। दत्ता+ढक्।) इन्द्रः। इति त्रिकाण्डशेषः ॥
दद, ङ दाने। धृतौ। इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-सक-सेट्।) ङ, ददते। इति दुर्गादासः ॥
ददन, क्ली, (दद+भावे ल्युट्।) दानम्। इति शब्दरत्नावली ॥
दद्रु, पु, कच्छपः। इति संक्षिप्तसारे उणादिवृत्तिः ॥ (ददाति कण्डूमिति। दद+बाहुलकात् रुः। यद्वा, दरिद्राति दुर्गच्छत्वमनेनेति। दरिद्रा+मृगय्वादित्वात् कुप्रत्ययेन साधु। इत्युज्ज्वलदत्तः। १। ८७।) रोगविशेषः। दाद

इति भाषा। तस्य रूपान्तराणि। दद्रूः २ दद्रु ३ दर्द्रूः ४। इति भरतधृतशब्दभेदः॥

तस्य लक्षणं यथा –

"सकण्डुरागपिडकं दद्रुमण्डलमुन्नतम्॥"

इति माधवकरः॥

तस्यौषधं यथा,—

"विडङ्गैडगजाकुष्ठनिशासिन्धूत्थसर्षपैः।
धत्त्राम्लपिष्टो लेपोऽयं दद्रुकुष्ठविनाशनः॥
प्रपुन्नाडस्य वीजानि धात्री सर्ज्जरसः स्नुही।
सौवीरपिष्टं दद्रूणामेतदुद्वर्त्तनं परम्॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत्।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च॥"

इति गारुडे १७५ अध्यायः॥ *॥

"एकश्च त्रिफलाभागस्तथा भागद्वयं शिव।।
सोमराजस्य वीजानां चाथ पथ्या च दद्रुजित्॥
अम्लतक्रं सगोमूत्रं कथितं लवणान्वितम्।
कासघ्नं खरं लेपात् कुष्ठदद्रुविनाशनम्॥
हरिद्रा हरितालञ्च दूर्व्वा गोमूत्रसैन्धवम्।
अयं लेपो हन्ति दद्रुं पामानं वै गरं तथा॥"

इति गारुडे १६४ अध्यायः॥ *॥

"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरञ्च अर्कक्षीरं शकृत्पलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत्॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥"

इति च गारुडे १६८ अध्यायः॥ *॥

अथ दद्रुचिकित्सा।

"कुष्ठकृमिघ्नो दद्रुघ्नो निशासैन्धवसर्षपाः।
अम्लपिष्टः प्रलेपोऽयं दद्रुकुष्ठनिसूदनः॥
दूर्व्वाभयासैन्धवचक्रमर्द्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः।
त्रिभिः प्रलेपैरपि बद्धमूला
दद्रुञ्च कुष्ठञ्च विनाशयन्ति॥"

कुठेरकः ममरी इति लोके।

लोके गण्डिलकाख्या सिद्धार्थकस्य स्नुहीक्षीरम्।
चयमिति समभागं स्यादेषा द्विगुणस्तु दद्रुघ्नः॥
अष्टगुणे गोतक्रे तानि प्रक्षतानि सन्दध्यात्।
दिवसत्रितयादूर्द्ध्वं सम्यक् निष्पेषयेत्तानि॥
वन्ध्योपलेन घृष्ट्वा दद्रूमालेपयेत्तेन।
सप्ताहाल्लेपोऽयं दद्रुकण्डूमवश्यं विनाशयति॥"

इति भावप्रकाशः॥

("लाक्षाकुष्ठं सर्षपा श्रीनिकेतं
रात्रिर्व्योषं चक्रमर्द्दस्य वीजम्।
तक्रेणैषां तक्रपिष्टः प्रलेपो
दद्रुयुक्तो मूलकाद्वीजयुक्तः॥
सिन्धूद्भूतं चक्रमर्द्दस्य वीज-
मिन्द्राह्वं केशरं तार्क्ष्यशैलम्।
पिष्टो लेपोऽयमुक्तपित्याद्दर्शन
दद्रूनूनं नाशयत्येष योगः॥

हेमक्षीरी व्याधिघातः शिरीषो
निम्बः सर्ज्जो वत्सकः साजकर्णः।
शीघ्रं तीव्रा नाशयन्तीह दद्रूः
स्नानालेपोद्घर्षणेषु प्रयुक्ताः॥"

इति च सुश्रुते चिकित्सितस्थाने नवमेऽध्याये॥)

दद्रुकः, पुं, (दद्रुरेव। स्वार्थे कन्।) दद्रुरोगः। इति शब्दरत्नावली॥

दद्रुघ्नः, पुं, (दद्रुं दद्रुरोगं हन्तीति। हन+टक्।) चक्रमर्द्दकः। इत्यमरः। २।४।१४०॥ (यथा, भावप्रकाशे क्षुद्रकुष्ठचिकित्सायाम्।

"वाकुची चाथ दद्रुघ्नः पिचुमर्द्दो हरीतकी॥"

अस्य गुणा यथा,—

"दद्रुघ्नपत्रं दोषघ्नमम्लं वातकफापहम्।
कण्डूकासकृमिश्वासदद्रुकुष्ठप्रणुल्लघु॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

दद्रुणः, त्रि, (दद्रुरस्त्यस्येति। दद्रु+"लोमादि-पामादिपिच्छादिभ्यः शनेलचः।" ५।२।१००। इति नः।) दद्रुरोगी। इत्यमरः। २।६।५६॥

दद्रुनाशिनी, स्त्री, (दद्रुं नाशयतीति। नश+णिच+णिनिः। ङीप्।) तैलिनीकीटः। इति राजनिर्घण्टः॥

दद्रुरोगी, [न्] त्रि, (दद्रुरोगोऽस्त्यस्येति। दद्रु-रोग+इनिः।) दद्रुरोगविशिष्टः। देदुया इति भाषा। तत्पर्य्यायः। दद्रुणः २। इत्यमरः। २।६।५६॥

दद्रूः, पुं, (दरिद्राति दुर्गं करोत्यङ्गमनेनेति। दरिद्रा+"दरिद्रातेर्यालोपश्च।" उणां १।६२। इति ऊः रकारेकाराकाराणां लोपश्च।) दद्रुः। इत्यमरटीकायां भरतः॥

दद्रूघ्नः, पुं, (दद्रूं हन्तीति। हन+टक्।) दद्रुघ्नः। इति शब्दरत्नावली॥

दद्रूणः, त्रि, (दद्रूरस्त्यस्येति। दद्रू+पामादित्वात् नः।) दद्रुणः। इत्यमरटीकायां रमानाथः॥

दध, ङ दाने। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-सकं-सेट्।) ङ, दधते। ददे दानधृत्योः। आदध्यादन्धकारे रतिमतिशयिनीमिति मयूर-भट्टोक्तम्। गणकृतानित्यात् अस्यैव धीमरस्यैपद-साध्यत्वमिति रमानाथः। वस्तुतस्तु धाञ्-धारणे इत्यस्यैव रूपं साध्यम्। इति दुर्गादासः॥

दधि, क्ली, (दधातीति। धा+"आदृगमहनजनः किकिनौ लिट् च।" ३।२।१७१। इत्यस्य वार्त्तिकोक्त्या किः स च लिड्वत्।) श्रीवासः। वसनम्। इति शब्दरत्नावली॥ क्षीरोत्तरा-वस्थाभावः। दइ इति भाषा। तत्पर्य्यायः। क्षीरजम् २ मङ्गल्यम् ३ विरलम् ४। इति राजनिर्घण्टः॥ पयस्यम् ५। घनेतरत् दधि द्रप्सम्। इत्यमरः॥ अस्य गुणाः। अम्लत्वम्। गुरुत्वम्। वातदोषप्रशमनत्वम्। संग्राहित्वम्। मूत्रावहत्वम्। बल्यत्वम्। शोफकफसंग्रहण्य-र्शोनाशित्वम्। वह्निशान्तिकारित्वम्। कासश्वास-पीनसविषमज्वरशीतज्वरहितत्वम्। रक्तपित्त-शुक्रवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ उष्ण-त्वम्। दीपनत्वम्। स्निग्धत्वम्। कषायानुरस-त्वम्। पाकेऽम्लत्वम्। पित्तमेदःप्रदत्वम्। मूत्र-कृच्छ्रप्रतिश्यायातीसाररुचिकार्श्येषु शस्तत्वञ्च। इति भावप्रकाशः॥ स्वादुत्वम्। हृद्यत्वम्। रोचनत्वम्। मङ्गल्यत्वम्। इति राजवल्लभः॥ *॥

अथ पक्वदुग्धदधिगुणाः। रुच्यत्वम्। स्निग्धत्वम्। उत्तमगुणत्वम्। पित्तानिलापहत्वम्। सर्व्व-धात्वग्निबलवर्द्धनत्वञ्च॥ *॥

निःसारदुग्धदधिगुणाः। संग्राहित्वम्। शीतल-त्वम्। वातलत्वम्। लघुत्वम्। विष्टम्भित्वम्। दीपनत्वम्। रुच्यत्वम्। ग्रहणीरोगनाशित्वञ्च॥ *॥

बद्धदधिगुणाः। सुस्निग्धत्वम्। मधुरत्वम्। नातिपित्तकरत्वञ्च॥ *॥

शर्करासहितदधिगुणाः। श्रेष्ठत्वम्। तृष्णा-पित्तास्रदाहनाशित्वञ्च॥ *॥

गुडयुक्तदधिगुणाः। वातनाशित्वम्। वृष्यत्वम्। वृंहणत्वम्। तर्पणत्वम्। गुरुत्वञ्च। इति भाव-प्रकाशः॥ *॥

वातजव्रणनाशित्वम्। इति चक्रदत्तः॥ *॥

रात्रौ दधिसेवने विशेषो यथा, रात्रौ दधि न भुञ्जीत किन्तु सघृतशर्करं समुद्गसूपं सक्षौद्रं उष्णं सामलकं भुञ्जीत। रक्तपित्तकफोत्थेषु विकारेषु च अघृतान्वितमपि दधि न हितम्॥ ऋतुविशेषे विधिनिषेधौ। हेमन्तशिशिरवर्षासु दधि शस्तं शरद्ग्रीष्मवसन्तेषु प्रायशो विगर्हि-तम्॥ *॥

अविधिना दधिसेवने दोषः। ज्वरासृक्पित्त-वीसर्पकुष्ठपाण्डुभ्रमकामलारोगप्राप्तिः॥ *॥

अथ गोदधिगुणाः। विशेषस्वादुत्वम्। बल्य-त्वम्। रुचिप्रदत्वम्। पवित्रत्वम्। दीपनत्वम्। स्निग्धत्वम्। पुष्टिकारित्वम्। वायुनाशित्वम्। अशेषदधिमध्ये गुणाधिकत्वञ्च॥ *॥

माहिषदधिगुणाः। सुस्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वम्। स्वादुपाकित्वम्। अभि-ष्यन्दित्वम्। गुरुत्वम्। रक्तकफदूषणत्वञ्च॥ *॥

छागीदधिगुणाः। उत्तमत्वम्। ग्राहित्वम्। त्रिदोषनाशित्वम्। श्वासकासार्शःक्षयकार्श्येषु शस्तत्वम्। दीपनत्वञ्च। इति भावप्रकाशः॥ *॥

आविकदधिगुणाः। दुर्नामकफवाग्निप्रकोपन-त्वम्॥ अश्वीदधिगुणाः। वातनाशित्वम्। दीपनत्वम्। चक्षुर्हितत्वञ्च॥ *॥

औष्ट्रकदधिगुणाः। क्षारत्वम्। अत्यम्लत्वम्। कटुपाकित्वञ्च॥ *॥

हस्तिनीदधिगुणाः। वीर्य्योष्णत्वम्। कषाय-त्वम्। कफवातनाशित्वञ्च॥ *॥

मानुष्यदधिगुणाः। मधुरत्वम्। बल्यत्वम्। स्निग्धत्वम्। सन्तर्पणत्वञ्च। इति राजवल्लभः॥ *॥

अथ दधिभेदाः।

"आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम्।
अम्लञ्चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा॥" *॥

मन्दादीनां लक्षणानि गुणाश्च।

"मन्दं दुग्धवदव्यक्तरसं किञ्चिद्घनं भवेत्।

दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
दन्तमांसानि पच्यन्ते मुखञ्च परिपूयते ॥
यस्मिन् स सर्व्वगो व्याधिर्महाशौषिरसंज्ञितः ॥ ५ ॥
दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥ ६ ॥
वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च ।
आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः ॥
आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते ।
यस्मिन् सोपकुशो नाम पित्तरक्तकृतो गदः ॥ ७ ॥
घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
भवन्ति दन्ताश्च चलाः स वैदर्भोऽभिघातजः ॥ ८ ॥
मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥ ९ ॥
शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः ।
करालान् विकटान् दन्तान् करालो न स सिध्यति ॥ १० ॥
हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥ ११ ॥
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।
शीर्य्यमाणेष्विव रुजा यस्य दन्तेषु जायते ॥
दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥ १२ ॥
कृष्णच्छिद्रश्चलः स्रावी ससंरम्भो महारुजः ।
अनिमित्तरुजो वातात् स ज्ञेयः कृमिदन्तकः ॥ १३ ॥
वक्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ १४ ॥
शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः ।
पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥ १५ ॥
(दन्तमांसैर्मलस्रावैर्बाह्यान्तः श्वयथुर्गुरुः ।
सदाहरुक्स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥)
मलो दन्तगतो यस्तु कफमारुतशोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ १६ ॥
कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा ।
कपालिकेति पठिता सदा दन्तविनाशिनी ॥ १७ ॥
योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः ।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः ॥" १८
इति माधवकरः ॥

दन्तकः, पुं, (दन्त एव । स्वार्थे कन् ।) पर्व्वतशृङ्गम् । नागदन्तः । इति हेमचन्द्रः । ४ । १०० ॥ (दन्तः । इति युक्तपस्तिलब्धोऽर्थः ॥ त्रि, दन्तेषु प्रसितः । दन्त + "स्वाङ्गेभ्यः प्रसिते ।" ५ । २ । ६६ । इति कन् ॥)

दन्तकर्षणः, पुं, (दन्तान् कर्षतीव यः । कृष् + ल्युः ।) जम्बीरः । इति शब्दरत्नावली ॥

दन्तकाष्ठं, क्ली, (दन्तधावनार्थं यत् काष्ठम् ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥ दन्तधावनार्थकाष्ठम् । तद्यथा नरसिंहपुराणे ।
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
महाभारते ।
"तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् ।
क्षीरिणो वृक्षगुल्माद्या भक्षयेद्दन्तधावनम् ॥"
निषिद्धकाष्ठानि यथा,—
"गुवाकतालहिन्तालास्तथा ताली च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति ॥"
तस्य स्थौल्यपरिमाणमाह विष्णुः ।
"कनिष्ठाग्रसमस्थौल्यं सकूर्च्चं द्वादशाङ्गुलम् ।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम् ॥"
मरीचिः ।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्त्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥
चतुरङ्गुलमानेन नारीणां विधिरुच्यते ।
अन्तरप्रभवाणाञ्च षडङ्गुलमुदाहृतम् ॥"
इत्याह्निकतत्त्वम् ॥

दन्तकाष्ठकं, क्ली, (ह्रस्वं काष्ठं काष्ठकम् । दन्तधावनयोग्यं काष्ठकम् ।) व्याहुल्यवृक्षः । इति राजनिर्घण्टः ॥

दन्तच्छदः, पुं, (दन्ताश्छाद्यन्तेऽनेनेति । छद संवरणे + णिच् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति ह्रस्वः ।) ओष्ठः । इति हलायुधः ॥ (यथा, ऋतुसंहारे हेमन्तवर्णनायाम् । १२ ।
"दन्तच्छदैर्दन्तविघातचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्द्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥")

दन्तच्छदोपमा, स्त्री, (दन्तच्छदस्य ओष्ठस्य उपमा सादृश्यं यत्र । यद्वा, उपमीयतेऽनयेति उपमा । दन्तच्छदस्य उपमा सादृश्यस्थलम् ।) बिम्बी । इति राजनिर्घण्टः ॥

दन्तधावनं, क्ली, (दन्तानां धावनम् ।) दन्तमार्ज्जनम् । (दन्तानां धावनं यस्मात् ।) दन्तकाष्ठम् । यथा, गारुडे २१४ अध्याये ।
"उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् ॥
मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥
कदम्बबिल्वखदिरकरवीरवटार्ज्जुनाः ।
तगरं बृहती जातिकरञ्जार्कातिमुक्तकाः ॥
जम्बूमधूकापामार्गशिरीषोडुम्बरासनाः ।
क्षीरकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने ॥
कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः ।
प्रक्षाल्य भुक्त्वा च शुचौ देशे त्यक्त्वा तदाचमेत् ॥
अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि ।
वर्ज्जयेद्दन्तकाष्ठन्तु तथैवार्कस्य वासरे ॥
अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैः कुर्व्वीत मुखशोधनम् ॥"
दन्तशुद्धिः । तस्य विधिर्यथा,—
"प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम् ।
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन् ॥" * ॥
तस्य काष्ठानि यथा,—
"कोऽप्यत्र करवीराम्रकरञ्जवकुलाशनान् ।
दन्तकाष्ठार्थमेते तु सर्व्वान् कण्टकिनोऽप्यधुः ॥
खदिरश्च कदम्बश्च करञ्जश्च वटस्तथा ।
तिन्तिडी वेणुपृष्ठञ्च आम्रनिम्बौ तथैव च ॥
अपामार्गश्च बिल्वश्च अर्कश्चोडुम्बरस्तथा ।
एते प्रशस्ताः कथिता दन्तधावनकर्म्मणि ॥" * ॥
तस्य निषिद्धकाष्ठानि यथा —
"गुवाकतालहिन्तालखर्ज्जूरैः केतकीयुतैः ।
नारिकेलेन ताल्या च न कुर्य्याद्दन्तधावनम् ॥" * ॥
तस्य दिग्भेदेन शुभाशुभफलं यथा,—
"मृत्युः स्याद्दक्षिणास्येन पश्चिमास्येन चामयः ।
पूर्व्वास्येनोत्तरास्येन सम्पदो दन्तधावनात् ॥" * ॥
तस्य तिथिविशेषे निषेधो यथा,—
"प्रतिपद्दर्शषष्ठीषु नवम्येकादशीषु च ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥" * ॥
दन्तघर्षणानन्तरं चक्षुःसेचनं यथा,—
"दन्तानुद्धर्षयो घृष्ट्वा प्रातः सिञ्चेच्च लोचने ।
तोयपूर्णमुखस्तेन दृष्टिरायुः प्रसीदति ॥" * ॥
रोगविशेषे दन्तकाष्ठवर्ज्जनं यथा,—
"अर्द्दिती कर्णशूली च दन्तरोगी नवज्वरी ।
शोषी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्ज्जयेत् ॥" * ॥
तस्य गुणा यथा,—
"निहन्ति वक्त्रवैरस्यं जिह्वादन्ताश्रितं मलम् ।
आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम् ॥"
इति राजवल्लभः ॥ * ॥
"कृतशौचस्ततः प्राज्ञः कुर्य्याद्दन्तस्य धावनम् ।
जिह्वाया मार्ज्जनञ्चापि रसालच्छदनादिभिः ॥
दक्षिणाभिमुखो भूत्वा पश्चिमाभिमुखस्तथा ।
न दन्तधावनं कुर्य्यात् कुर्य्याच्चेन्नारकी भवेत् ॥
मध्यमानामिकाभ्याञ्च वृद्धाङ्गुष्ठेन च द्विज ।
दन्तस्य धावनं कुर्य्यात् तर्ज्जन्या न कदाचन ॥
अश्वत्थवटबिल्वानां धात्र्या कालिकया बुधः ।
न दन्तधावनं कुर्य्यात्तथैवेन्द्रसुरस्य च ॥
नित्यक्रियाफलं प्रेप्सुस्त्वरया दन्तधावनम् ।
प्रभाते कुरुते प्राज्ञः सूर्य्योदयविवर्ज्जिते ॥
सूर्य्योदये द्विजश्रेष्ठ । यः कुर्य्याद्दन्तधावनम् ।
नित्यक्रियाफलं तस्य सर्व्वमेव विनश्यति ॥
यः स्नानसमये कुर्य्यात् जैमिने । दन्तधावनम् ।
निराशाः पितरो यान्ति तस्य देवाः सुरर्षयः ॥
दन्तस्य धावनं कुर्य्याद्यो मध्याह्नापराह्णयोः ।
तस्य पुष्पं न गृह्णन्ति देवताः पितरो जलम् ॥
स्नानकाले पुष्करिण्यां यः कुर्य्याद्दन्तधावनम् ।
तावज्ज्ञेयः स चाण्डालो यावद्गङ्गां न पश्यति ॥
भगवत्युदिते सूर्य्ये यः कुर्य्याद्दन्तधावनम् ।
तद्दन्तकाष्ठं पितरो भुक्त्वा गच्छन्ति दुःखिनः ॥
उपवासदिने विप्र । पितृश्राद्धदिने तथा ।
न च तत्फलमाप्नोति दन्तधावनकृन्नरः ॥
प्रभाते मार्ज्जयेद्दन्तान् वाससा रसनां तथा ।
कुर्य्याद्दश विप्रेन्द्र । कवलानि जलैर्बुध ॥
उपवासे पितृश्राद्धे विधिनानेन जैमिने । ।
दन्तधावनकृन्मर्त्यः सम्पूर्णं लभते फलम् ॥"
इति पाद्मे क्रियायोगसारः ॥

दन्तधावन', पु (धावयत्यनेनेति । धावि+ल्युट् । दन्तानां धावनं ।) खदिरवृक्षः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥ बकुलः । इति शब्दचन्द्रिका ॥
दन्तपत्र, क्ली, (दन्ता इव पत्राणि यस्य ।) कुन्दकुसुमम् । इति शब्दरत्नावली ॥ (यथा कुमारे । ७ । २३ ।
"कर्णावसक्तामलदन्तपत्रं
माता तदीयं मुखमुन्नमय्य ॥")
दन्तपत्रकं, क्ली, (दन्त इव शुभ्रं पत्रं दलं यस्य । कप् ।) कुन्दपुष्पम् । इति शब्दचन्द्रिका ॥
दन्तपुष्प, क्ली, (दन्त इव शुभ्रं पुष्पमस्य ।) कतकफलम् । इति शब्दचन्द्रिका ॥
दन्तफल, क्ली, (दन्त इव शुक्लं फलमस्य ।) कतकम् । इति शब्दचन्द्रिका ॥
दन्तफलः, पु, (दन्त इव शुभ्रं फलमस्य ।) कपित्थः । इति राजनिर्घण्टः ॥
दन्तफला, स्त्री, (दन्तवत् शुभ्रं फलं यस्याः । टाप् ।) पिप्पली । इति राजनिर्घण्टः ॥
दन्तभाग, पु, (दन्तसहितो भागः । शाकपार्थिवादिवत् समासः ।) गजाग्रभागः । गजस्य मुखतः स्कन्धपर्य्यन्तो योऽग्रभागः स दन्तसहितः । इत्यमरभरतौ ॥
दन्तमलं, क्ली, (दन्तलग्नं दन्तस्य वा मलम् ।) दन्तलग्नकल्कः । तत्पर्य्यायः । पुष्पिका २ । इति हारावली । १६५ ॥
दन्तमूलिका, स्त्री, (दन्त इव शुभ्रं मूलमस्याः । कप्+टापि अत इत्वञ्च ।) दन्तीवृक्षः । इति शब्दरत्नावली ॥
दन्तरोगः, पु, (दन्तस्य रोगः ।) रदनामयः । तन्निदानादि दन्तशब्दे द्रष्टव्यम् । तस्यौषधं यथा,
"काकजङ्घाशिग्रुमूले मुखेन विधृते शिव ! ।
चर्व्विता दन्तरोगाणां विनाशो हि भवेद्धर ॥"
दन्तरोगाणामित्यत्र दन्तकीटानामिति पुस्तकान्तरे पाठः ॥ इति गारुडे १९५ अध्यायः ॥
अपि च गारुडे १९८ अध्याये ।
"शुष्कमूलकशुण्ठीनां क्वाथो हिङ्गुलनागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवं तथा ।
भुजग्रन्थि विडं मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ।
बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य शमयः कर्णयोः क्रिमाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्ककृतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥"
अन्यच्च ।
"तैलं लाक्षारसं क्षीरं पृथक् प्रस्थमितं पचेत् ।
द्रव्यैः पलमितैरेतैः क्वाथैश्चापि चतुर्गुणैः ॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः ।
चन्दनोत्पलयष्ट्याह्वैस्तैलं वदने धृतम् ॥
दालनं दन्तचालञ्च दन्तमोक्षं कपालिकाम् ।
शीतादं पूतिवक्त्रञ्च विरसं विरसास्यताम् ॥
हन्यादाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान् ।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम् ॥
इति लाक्षाद्यं तैलम् ।
जयेद्विमार्गैः स्विन्नमवलं क्रिमिदन्तकम् ।
तथा च नीतैर्व्वातघ्नैः स्नेहगण्डूषधारणैः ॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः ।
क्रिमिदन्तापहं कोष्णं हिङ्गु दन्तान्तरे स्थितम् ॥
बृहतीभूमिकदम्बीपञ्चाङ्गुलकण्टकारिकाक्वाथः ।
गण्डूषस्तैलयुतः क्रिमिदन्तकवेदनाशमकः ॥
नीली वायसजङ्घा कटुतुम्बीमूलमेकैकम् ।
सचूर्णं दशनविधृतं दशनक्रिमिपातनं प्राहुः ॥
स्नेहानां कवलाः कोष्णाः सर्पिषस्त्रैवृतस्य च ।
निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्द्दनाः ॥
त्रैवृतस्य सर्पिषः, त्रिवृता पक्वस्य सर्पिषः, कवलद्रव्यं ।
स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च ।
पेया रसयवागूश्च क्षीरसन्तानिकाघृतम् ॥
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः ।
अत्र दन्तहर्षे ।
अच्छिद्रदन्तमूलानि शर्कराशुद्धरेद्भिषक् ।
लाक्षाचूर्णैर्मधुयुतैस्ततस्तान् प्रतिसारयेत् ॥
दन्तहर्षक्रिया चात्र कुर्य्याद्विरवशेषतः ।
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता ॥
अत्र दन्तशर्करायाम् । एषा क्रिया दन्तहर्षक्रिया ।
फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम् ।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्जयेत् ॥"
इति भावप्रकाशः ॥
दन्तवस्त्रं, क्ली, (दन्तानां वस्त्रमिवाच्छादकत्वात् ।) ओष्ठः । इति हेमचन्द्रः । ३ । २४५ ॥
दन्तवासः, [स्] पुं, (दन्तस्य वासो वस्त्रमिवावरकत्वात् ।) ओष्ठः । इति त्रिकाण्डशेषः ॥ (यथा, कुमारे । ५ । ३४ ।
"अपि त्वदावर्ज्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥")
दन्तवीजकः, पु, (दन्ता इव वीजानि यस्य । ततः स्वार्थे कन् ।) दाडिमः । इति राजनिर्घण्टः ॥
दन्तशट', पु, (दन्तेषु शट इव म्लानिजनकत्वात् ।) दन्तशठः । इत्यमरटीकायां मथुरानाथः ॥
दन्तशठः, पु, (दन्तेषु शठ इव म्लानिकारकत्वात् ।) जम्बीरः । कपित्थः । कर्म्मरङ्गः । नागरङ्गः । इति मेदिनी । ठे, १८ ॥ (यथा, सुश्रुते । १ । ४६ ।
"ऐरावतं दन्तशठमम्लं शोणितपित्तकृत् ।")
अम्लः । इति हेमचन्द्रः । ६ । २१ ॥
दन्तशठा, स्त्री, (दन्तेषु शठा ।) चाङ्गेरी । इति मेदिनी । ठे, १८ ॥ (यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ॥")
क्षुद्राम्लिका । इति राजनिर्घण्टः ॥
दन्तशर्करा, स्त्री (दन्तस्य शर्करेव ।) दन्तरोगविशेषः । कफवायुशोषितदन्तगतमलम् । पाथुरि इति भाषा ॥ (तस्य लक्षणं यथाह माधवकरः ।
"मलो दन्तगतो यस्तु कफमारुतशोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥"
यथा च सुश्रुते निदानस्थाने १६ अध्याये ।
"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै ।
सा दन्तानां गुणहरी तु विज्ञेया दन्तशर्करा ॥")
तस्यौषधम् यथा,—
"गोरक्षकर्कटीमूलं पिष्टं वास्योदकेन च ।
शीतं दिनत्रयेणैव नाशयेत दन्तशर्कराम् ॥"
इति गारुडे १९० अध्यायः ॥
दन्तशाणः, पु, (दन्तानां शाण इव । चिक्कणताजनकत्वात् ।) निम्बुक्षुपम् । इति त्रिकाण्डशेषः ॥ मिशि इति भाषा ॥
दन्तशिरा, स्त्री, (दन्तानां शिरा यत्र ।) माढ़ी । इति शब्दरत्नावली ॥
दन्तशूलः, पु, (दन्तस्य शूल इव । शूलवेधनवद्वेदनादायकत्वात् ।) दशनवेदना । तस्यौषधम् ॥ यथा,—
"त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैः शृतम् ।
पाययेन्मधुना मिश्रं दन्तशूलोपशान्तये ॥"
इति गारुडे १७४ अध्यायः ॥
दन्तहर्षः, पु, (दन्तानां हर्षो यस्मात् ।) दन्तरोगविशेषः । इति माधवकरः ॥ (अस्य लक्षणं यथा, सुश्रुते निदानस्थाने १६ अध्याये ।
"दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च ।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरजात् ॥"
दन्तग्लानिः । यथा,—
"यस्य वै स्नातमात्रस्य हृदयं पीड्यते भृशम् ।
जायते दन्तहर्षश्च तं गतायुषमादिशेत् ॥"
इति वायुपुराणम् ॥)
दन्तहर्षकः, पु (दन्तान् हर्षयतीति । हृष+णिच्+ण्वुल् ।) जम्बीरः । इति जटाधरः ॥
दन्तहर्षणः, पुं, (दन्तान् हर्षयतीति । हृष+णिच्+ल्युः ।) जम्बीरः । इति त्रिकाण्डशेषः ॥
दन्ताघातः, पु, (दन्तानाहन्तीति । आ+हन+अण् ।) निम्बूकः । इति राजनिर्घण्टः ॥ दशनाघातः । (यथा, गणेशध्याने ।
"दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम् ॥")
रतिक्रीडायां तस्य स्थानानि दन्तशब्दे द्रष्टव्यानि ॥
दन्तार्बुद, क्ली, पु, (दन्तस्य अर्बुदमिव ।) दन्तरोगभेदः । तत्पर्य्यायः । दन्तस्फवम् २ दन्तघोषः ३ छिद्रव' ४ । इति राजनिर्घण्टः ॥
दन्तायुध', पु, (दन्त इव आयुधं यस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥
दन्तालिका, स्त्री, (दन्तान् अलति पर्य्याप्नोतीति । अल+ण्वुल् । टापि अत इत्वम् ।) वल्गा । इति त्रिकाण्डशेषः ॥
दन्तावल, पु, (अतिशयितौ दन्तौ अस्य । दन्त+"दन्तशिखात् संज्ञायाम् ।" ५।२।११३ ।

इति वलच्। "वलौ।" ६।३।११८। इति दीर्घः।) हस्ती। इत्यमरः। २।८।३४॥ (यथा, मनुटीकायां कुल्लूकभट्टः। ७।१०६।
"सिंहः प्रबलमतिस्थूलमपि दन्तावलं हन्तुमाक्रमति॥")

दन्तिका, स्त्री, (दन्ती एव। स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) दन्तीवृक्षः। इत्यमरः। २।४।१४४॥

दन्तिजा, स्त्री, दन्तिका। इति शब्दरत्नावली॥

दन्तिनी, स्त्री, (दन्तस्तदाकारो मूलेऽस्त्यस्याः। दन्त + इनि + ङीप्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

दन्तिमदः, पुं, (दन्तिनो मदः।) हस्तिमदः। इति राजनिर्घण्टः॥

दन्ती, स्त्री, (दाम्यत्यनयेति। दम + "हसिमृग्रिण्वेति।" उणां। ३। ८६। इति तन्। ततो गौरादित्वात् ङीष्।) स्वनामख्यातवृक्षः। तत्पर्य्यायः। शीघ्रा २ श्येनघण्टा ३ निकुम्भी ४ नागस्फोता ५ दन्तिनी ६ उपचित्रा ७ भद्रा ८ रूक्षा ९ रेचनी १० अनुकूला ११ निशल्या १२ चक्रदन्ती १३ विशल्या १४ मधुपुष्पा १५ एरण्डफला १६ तरुणी १७ एरण्डपत्रिका १८ अनुरेवती १९ विशोधनी २० कुम्भी २१ उडुम्बरदला २२। इति राजनिर्घण्टः॥ निकुम्भ २३। दन्तिका २४ प्रत्यक्पर्णी २५ उदूम्बरपर्णी २६। इत्यमरः। २।४।३४॥ अस्या गुणाः। कटुत्वम्। उष्णत्वम्। शूलामत्वग्दोषार्शोव्रणाश्मरीशल्यशोधनत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अष्ठीलिकाध्मानगुल्मोदरनाशित्वम्। सारकत्वञ्च। इति राजवल्लभः॥ अथ लघुदन्ती।
"लघ्वी दन्ती विशल्या च स्यादुडुम्बरपर्ण्यपि।
अथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया॥
वाराहाङ्गी च कथिता निकुम्भश्च मकूलकः॥"
अथ वृहद्दन्ती।
"एरण्डपत्रविटपा द्रवन्ती शम्बरी वृषा।
चित्रोपचित्रा न्यग्रोधी प्रत्यक्पर्णाखुकर्ण्यपि॥*॥
दन्तीद्वयं सरं पाके रसे च कटु दीपनम्।
गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठविदाहनुत्॥
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन्॥
लघुदन्तीफलगुणाः।
स्याद्दन्तीफलं तु स्यान्मधुरं रसपाकयोः।
शीतलं हन्ति विष्मूत्रगरशोथकफापहम्॥"
इति भावप्रकाशः॥

दन्ती, [न्] पुं, (प्रशस्तौ दन्तौ स्तोऽस्येति। दन्त + इनि।) हस्ती। इत्यमरः। २।८।३४॥ (यथा, देवीभागवते। २।९।३५।
"मन्त्रिपुत्त्रं स्थितस्तत्र स्थापयामास दन्तिनम्॥"
स्त्रियां ङीप्। यथा, आर्य्यासप्तशत्याम्। ६५२।
"स्नेहस्थितिर्जिगीषा समरः प्राणव्ययावधिः करिणाम्।
न वितनुते कमनर्थं दन्तिनि। तव यौवनोद्भेदः॥")

दन्तीबीज, क्ली, (दन्त्या इव बीजमस्य।) जयपालः। इति राजनिर्घण्टः॥

दन्तुरः, त्रि, (उन्नता दन्ताः सन्त्यस्येति। "दन्त उन्नत उरच्।" ५।२।१०६। इति उरच्।) उन्नतदन्तः। दँतो इति भाषा॥
"कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमशः सुखी।
कदाचित् तुन्दिलो दुःखी कदाचिच्चपला सती॥"
इति सामुद्रकम्॥
उन्नतानतः। इति मेदिनी। रे, १६६॥

दन्तुरच्छद, पुं (दन्तुर उन्नतानतश्छदो यस्य।) बीजपूरः। इति राजनिर्घण्टः॥

दन्तोलूखलिकः, त्रि, (दन्त एव उलूखलः। सोऽस्त्यस्येति। "अत इनिठनौ।" ५।२।११५। इति ठन्।) वानप्रस्थविशेषः। दन्तमात्रेण छित्त्वा यो भक्षति सः। इति श्रीभागवतम्॥ (यथा, मनुः। ६।१७।
"अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा॥")

दन्त्यः, त्रि, (दन्तेषु भवः। दन्त + "शरीरावयवाच्च।" ४।३।५५। इति यत्।) दन्तोद्भवः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥"
दन्तेभ्यो हितः। "शरीरावयवाद्यत्।" ५।१।६। इति यत्। दन्तहितमञ्जनकः। यथा, सुश्रुते। १।४६।
"दन्त्योऽग्निमेधाजननोऽल्पमूत्र-
स्तन्योऽथ केश्योऽनिलहा गुरुश्च॥")

दन्दशूकः, पुं, (गर्हितं दशतीति। दन्श + यङ् + "यजजपदशां यङः।" ३।२।१६६। इति ऊकः।) सर्पः। (यथा, वैद्यकरत्नमालायाम्।
"चक्षुःश्रवा दन्दशूको गूढपात् पन्नगोरगाः॥")
राक्षसः। इति मेदिनी। के, १६३॥ (हिंस्रे, त्रि। यथा, भट्टिः। १।२६।
"इयमति रघुसिंहे दन्दशूकान् जिघांसौ धनुररिभिरसह्यं मुष्टिपीडं दधाने॥")

दन्भ, उ न दम्भे। इति कविकल्पद्रुमः॥ (स्वां-पर-अक-सेट्। उदित्वात् क्त्वावेट्।) दम्भः परवञ्चनहेतुव्यापारः। उ, दम्भित्वा दब्ध्वा। न दभ्नोति खलश्छलयति इत्यर्थः। इति दुर्गादासः॥

दन्भ, क ङ संघाते। इति कविकल्पद्रुमः॥ (चुरां-आत्म-सक-सेट।) क ङ, दम्भयते। संघातो राशीकरणम्। इति दुर्गादासः॥

दन्श, औ दशने। इति कविकल्पद्रुमः॥ (भ्वां-पर-सक-अनिट्।) औ, अदाङ्क्षीत्। दशति विम्बफलं शुकशावकः। दशनमित्यनुस्वारहीनं पठित्वा तन्निर्देशात् अनटि नकारलोप इत्याहुः। अतएव दशनो दन्तः। नाहिर्दश्यते कश्चिद्विद्यया गरुडाख्यया। इति हलायुधः। भट्टमल्लमते दशनमिह सम्बाहः। तेन अदशयन्नवहितशौर्य्यदशनास्तनूरयं मय इति दर्शिभूभृतः। इति माघः। तनूः कवचस्तत्ताञ्चक्रुरित्यर्थः। अत्र परस्मैपदं चिन्त्यमिति वल्लभः। वस्तुतस्तु दशं करोतीति णौ साध्यम्। इति दुर्गादासः॥

दभ, इ क नोदे। इति कविकल्पद्रुमः॥ (चुरां-पर-सक-सेट।) इ क दम्भयति। नोदः प्रेरणम्। इति दुर्गादासः॥

दभ, क नोदे। इति कविकल्पद्रुमः॥ (चुरां-पर-सक-सेट्।) क, दाभयति। इति दुर्गादासः॥

दभ्रं, त्रि, (दभ्नोतीति। दन्भ दम्भे + "स्फायितञ्चीति।" उणां। २।१३। इति रक्।) अल्पम्। इत्यमरः। ३।१।६१॥ (यथा, निघण्टौ। ३।२।
"अण्वन। हस्वः। निघृष्वः। मायुकः। प्रतिष्ठा। क्रुधः। वम्रकः। दभ्रम्। अर्भकः। क्षुल्लकः। अल्प इत्येकादशह्रस्वनामानि॥" यथा, ऋग्वेदे। ।८१।२।
"असि दभ्रस्य चिद्वृधः॥")
समुद्रे, पुं। इत्युणादिकोषः॥

दम, भ य उ इर् शमे। इति कविकल्पद्रुमः॥ (दिवां-पर-अक-सकञ्च-सेट। उदित्वात् क्त्वावेट्।) भ य, दाम्यति। उ, दमित्वा दान्त्वा। इर्, अदमत् अदमीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। शमः शान्तीभावः। दाम्यति मुनिः। शम इतिपदस्य भ्रान्तस्यापि सम्भवे शान्तीकरणेऽप्ययमिति धातुप्रदीपः। दमित्वाथारिसङ्घातान्। इति दुर्गादासः॥

दमः, पुं, (दमनमिति। दम + भावे घञ्। "नोदात्तोपदेशस्येति।" ७।३।३४। इति वृद्ध्यभावः।) दण्डः। इत्यमरः। २।८।२१॥
दण्डस्य लक्षणं यथा,—
"दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः।
यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भयः।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥"
इति मत्स्यपुराणम्॥
(यथा, मनुः। ८।१९२।
"निक्षेपस्यापहर्त्तारं तत्समं दापयेत् दमम्॥")
तपःक्लेशसहिष्णुता। तत्पर्य्यायः। दान्तिः २ दमथः ३। इत्यमरः। ३।२।३॥ दमनम्। तच्च बाह्येन्द्रियनिग्रहः। इति वेदान्तसारः॥ विषयाद्व्यावृत्तस्य मनसो यथेष्टविनियोगयोग्यता। इति केचित्॥ दमस्य लक्षणं यथा,—
"कुत्सितात् कर्म्मणो विप्र। यच्च चित्तनिवारणम्।
स कीर्त्तितो दमः प्राज्ञैः समस्ततत्त्वदर्शिभिः॥"
इति पाद्मे क्रियायोगसारः॥
(यथा, मनुः। ६।९२।
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्॥")
कर्द्दमः। इति मेदिनी। मे, १४॥ (गृहम्। इति निघण्टुः। ३।४॥ यथा, ऋग्वेदे। १।७५।५।
"अग्ने यक्षि स्वं दमम्॥"
महर्षिविशेषः। यथा, महाभारते। १३।२६।५।
"विश्वामित्रः स्थूलशिराः संवर्त्तः प्रमतिर्दमः॥"
मरुत्तस्य राज्ञः पुत्त्रः। यथा, भागवते। ९।२।२९।
"मरुत्तस्य दमः पुत्त्रस्तस्यासीद्राज्यवर्द्धनः॥"
मरुत्तस्य पौत्त्रः। इति मार्कण्डेयपुराणम्। यथा तत्रैव। १३४। १—५।

"एव स राजा धर्म्मात्मा नरिष्यन्तोऽभवत् पुरा ।
मरुत्ततनयो विप्र । विख्यातबलपौरुषः ॥"
"नरिष्यन्तस्य तनयो दुष्टारिदमनो दमः ।
शक्रस्येव बलं तस्य दयाशीलं मुनेरिव ॥
वाभ्रव्यामिन्द्रसेनायां स जज्ञे तस्य भूभृतः ।
नववर्षाणि जठरे स्थित्वा मातुर्म्महायशाः ॥
यद्ग्राहयामास दम मातरं जठरे स्थितः ।
दमशीलश्च भविता यतस्तस्य नृपात्मजः ॥
ततस्त्रिकालविज्ञानः स हि तस्य पुरोहितः ।
दम इत्यकरोत् नाम नरिष्यन्तसुतस्य तु ॥
स दमो राजपुत्त्रस्तु धनुर्व्वेदमशेषतः ।
जग्राहे नरराजस्य सकाशाद्वृषपर्व्वणः ॥"
अस्य विशेषविवरणन्तु तत्रैवाध्याये विशेषतो द्रष्टव्यम् ॥ भीमस्य राज्ञः पुत्त्रविशेषः । यथा, महाभारते । ३ । ५३ । ९ ।
"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ।
दमयन्तीं दम दान्तं दमनञ्च सुवर्च्चसम् ॥"
विष्णुः । यथा, तत्रैव । १३ । १४९ । १०५ ।
"धनुर्धरो धनुर्व्वेदो दान्तो दमयिता दमः ॥")

दमकः, त्रि, (दमयतीति । दम + णिच् + ण्वुल् ।) दमनकर्त्ता । इति व्याकरणम् ॥ (यथा मनुः । ३ । १६२ ।
"हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ॥")

दमघोषः, पुं, चन्द्रवंशीयराजविशेषः । स चेदिदेशपतिः शिशुपालपिता च । इति पुराणम् ॥ (यथा, भागवते । ९ । २४ । ३९ ।
"दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥")

दमघोषसुतः, पुं, (दमघोषस्य सुतः ।) शिशुपालः । इति त्रिकाण्डशेषः ॥

दमथः, पुं, (दम उपशमे + "वाहुलकात् दृशमिदमिभ्यश्च ।" ३ । ११४ । इति अथः । इत्युज्ज्वलदत्तः ।) दमः । दण्डः । इत्युणादिकोषः ॥

दमनं, क्ली, (दम + भावे ल्युट् ।) दण्डः । यथा,
"अत्युच्छ्रितस्य दमनमुचितञ्च श्रुतौ श्रुतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दमनः, पुं, (दाम्यतीति । दम + ल्युः ।) पुष्पविशेषः । दोना इति भाषा । तत्पर्य्यायः । पुष्पचामरः २ । इति त्रिकाण्डशेषः ॥ (यथा,
"दमनस्तु वरस्तिक्तो हृद्यो वृष्यः सुगन्धिकः ।
ग्रहण्यादिविषकुष्ठास्रक्लेदकण्डूत्रिदोषजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) वीरः । उपशान्तः । इति शब्दरत्नावली ॥ कुन्दवृक्षः । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । यथा, महाभारते । ३ । ५३ । ६ ।
"तमभ्यगच्छत् ब्रह्मर्षिर्दमनो नाम भारत ।
तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित् ॥"
अस्य भीमस्य पुत्त्रविशेषः । यथा, तत्रैव । ३ । ५३ । ९ ।
"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ।
दमयन्तीं दम दान्तं दमनञ्च सुवर्च्चसम् ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ३४ ।
"मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ॥"
"स्वाधिकारात् प्रमाद्यन्तीः प्रजा दमयितुं शीलं यस्य वैवस्वतादिरूपेण स दमनः ।" इति तद्भाष्ये शङ्कराचार्य्यः ॥ महादेवः । यथा, महाभारते । १३ । १७ । १३९ ।
"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥")

दमनकः, पुं, (दमन एव । स्वार्थे कन् ।) वृक्षविशेषः । दोना इति भाषा । तत्पर्य्यायः । दमनः २ दान्तः ३ गन्धोत्कटा ४ मुनिः ५ जटिला ६ दण्डी ७ पाण्डुरागः ८ ब्रह्मजटा ९ पुण्डरीकः १० तापसपत्री ११ पत्री १२ पवित्रकः १३ देवशेखरः १४ कुलपत्रः १५ विनीतः १६ तपस्विपत्रः १७ । इति राजनिर्घण्टः ॥ मुनिपुत्त्रः १८ तपोधनः १९ गन्धोत्कटः २० ब्रह्मजटी २१ कुलपुत्त्रकः २२ । इति भावप्रकाशः ॥ अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । कषायत्वम् । कटुत्वम् । कुष्ठदोषद्वन्द्वत्रिदोषविषविस्फोटविकारहरत्वञ्च । इति राजनिर्घण्टः ॥ हृद्यत्वम् । वृष्यत्वम् । सुगन्धित्वम् । ग्रहण्यस्रक्लेदकण्डूनाशित्वञ्च । इति भावप्रकाशः ॥ (क्ली, मङ्गलच्छन्दोविशेषः । यथा, चिन्तामणिधृतवचनम् ।
"द्विगुणगणमिह वितनु हि ।
दमनकमिति गदति शुचि हि ॥"
एकादशाक्षरच्छन्दोविशेषोऽपि । यथा, तत्रैव ।
"द्विजवरगणयुगममलं तदनु च कलय करतलम् ।
फणिपतिवरपरिगदितं दमनकमिदमतिललितम् ॥")

दमनकारोपणोत्सवः, पुं, (दमनकस्य आरोपणार्थं य उत्सवः ।) श्रीकृष्णस्य दमनकार्पणार्थमहापूजारूपोत्सवः । यथा,—
"चैत्रस्य शुक्लद्वादश्यां दमनारोपणोत्सवम् ।
विदध्यात्तद्विधिर्बोधायनादुक्तोऽत्र लिख्यते ॥
मधौ सितैकादश्याञ्च प्रातःकृत्यं समाप्य च ।
गत्वा दमनकारामं तत्राशोकं स्मरं यजेत् ॥
तत्र मन्त्रः ।
अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ! ।
शोकार्त्तिं हर मे नित्यमानन्दं जनयस्व मे ॥
नेष्यामि कृष्णपूजार्थं त्वां कृष्णप्रीतिकारकम् ।
इति संप्रार्थ्य नत्वा च गृह्णीयाद्दमनं शुभम् ॥
प्रोक्ष्य तत् पञ्चगव्येन प्रक्षाल्याद्भिः प्रपूज्य च ।
वस्त्रेणाच्छाद्य वेदादिघोषेण गृहमानयेत् ॥*॥
अथ दमनकाधिवासविधिः ।
कृष्णस्याग्रे समुद्धृत्य सर्व्वतोभद्रमण्डलम् ।
निधाय दमनं तत्र रात्रौ तदधिवासयेत् ॥
तत्र मन्त्रः ।
पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः ।
दमन ! त्वमिहागच्छ सान्निध्यं कुरु ते नमः ॥ इति
सवीजं कामदेवञ्च तथा भस्मशरीरकम् ।
अनङ्गं मन्मथञ्चैव वसन्तसखमेव च ॥
स्मरं तथेक्षुचापञ्च पुष्पवाणञ्च पूजयेत् ।
प्रागादिदिक्षु रत्याढ्यं विधिवद्दमने क्रमात् ॥
मध्ये स्मरमतं कामगायत्र्या चाभिमन्त्र्य तत् ।
दत्त्वा पुष्पाञ्जलिं कामदेवं वन्देत मन्त्रवत् ॥
मन्त्रश्चायम् ।
नमोऽस्तु पुष्पवाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने ॥ इति ॥
आमन्त्रितोऽसि देवेश । पुराणपुरुषोत्तम ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव । ॥
निवेदयाम्यहं तुभ्यं प्रातर्द्दमनकं शुभम् ।
सर्व्वथा सर्व्वदा विष्णो । नमस्तेऽस्तु प्रसीद मे ॥
इत्थमामन्त्र्य देवेशं दत्त्वा पुष्पाञ्जलिं पुनः ।
गीतनृत्यादिना रात्रौ कुर्य्याज्जागरणं मुदा ॥*॥
अथ दमनकार्पणविधिः ।
प्रातःस्नानादि निर्व्वर्त्य नित्यपूजां विधाय च ।
दमनारोपणार्थञ्च महापूजां समाचरेत् ॥
ततो दमनकं भक्त्या पाणिभ्यां परिगृह्य च ।
घण्टादिवाद्यघोषेण श्रीकृष्णाय समर्पयेत् ॥
तत्र मन्त्रः ।
देवदेव जगन्नाथ वाञ्छितार्थप्रदायक । ।
हृत्स्थान् पूरय मे कृष्ण कामान् कामेश्वरीप्रिय ॥
इद दमनकं देव गृहाण मदनुग्रहात् ।
इमां सांवत्सरीं पूजां भगवन्निह पूरय ॥ इति ॥
ततो दामनकीं मालां गन्धादीनि समर्प्य च ।
गीतादिनोत्सवं कृत्वा श्रीकृष्णं प्रार्थयेदिदम् ॥
मणिविद्रुममालाभिर्म्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज । ॥
वनमालां यथा देव । कौस्तुभं सततं हृदि ।
तद्वद्दामनकीं मालां पूजाञ्च हृदये वहेत्यादि ॥
भगवन्तं प्रणम्याथ गुरुं संपूज्य भक्तितः ।
संपूज्य ब्राह्मणान् शक्त्या भुञ्जीत सह वन्धुभिः ॥
पारणाहे न लभ्येत द्वादशी घटिकापि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रा दमनार्पणे ॥
न कृष्णे दमनारोपः स्यान्मधौ विघ्नतो यदि ।
वैशाख्यां श्रावणे मासि कार्त्तिके वा तदर्पणम् ॥
अतएवोक्तं ब्रह्मणा देवीपुराणे ।
चैत्रादौ कारयेत् पूजां सम्यग्वत्सं । यथाविधि ॥
गन्धधूपार्घ्यनैवेद्यैर्माल्यैर्द्दमनकोद्भवैः ।
सद्धोमैः पूजयेद्देवं सर्व्वान् कामानवाप्नुयात् ॥
सर्व्वतीर्थाभिषेकस्य फलं प्राप्नोति मानवः ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥

दमनी, स्त्री, (दम्यतेऽग्निरनया । दम + ल्युट् । स्त्रियां ङीप् ।) अग्निदमनीवृक्षः । इति राजनिर्घण्टः ॥

दमयन्ती, स्त्री, (दमयति नाशयति अमङ्गलादिकमिति । दम + णिच् + शतृ + ङीप् ।) भद्रमल्लिका । इति शब्दमाला ॥ नलराजपत्नी । सा विदर्भदेशीयभीमराजकन्या । (यथा, महाभारते । ३ । ५३ । ५-९ ।
"तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्व्वगुणैर्युक्तः प्रजाकामः स चाप्रजः ॥
स प्रजार्थे परं यत्नमकरोत् सुसमाहितः ।
तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत । ॥
तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित् ।

महिष्या सह राघवेन्द्र । पातृकारस सुमध्यमम् ॥
तस्मै प्रसन्नो दमन, सभार्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम् ।
उपपन्नान् गुणैः सर्व्वैर्भीमान् भीमपराक्रमान् ॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥"
अस्याः विशेषविवरणन्तु तस्मिन्नेवाध्यायमारभ्य विस्तरशो द्रष्टव्यम् ॥)

दमित, त्रि, (दम्यते स्म इति । दम + क्त । "वा दान्तशान्तेति ।" ७ । २ । २७ । इति पक्षे इट ।) दान्तः । इत्यमरः । ३ । १ । ८७ ॥ (यथा, हरिवंशे । ६७ । ४२ ।
"यथैव मत्रिदमितोदान्ते भवेच्छिक्षयाग्निना त्वया ।
त्वयोपभोग्या च यथा नागेन्द्रे दमिते मया ॥")
क्लेशितमात्रम् । इति भरतः ॥ आरस्वादमादि क्लेशसह । इति सुभूतिः ॥

दमी, [न्] त्रि, (दमोऽस्यास्तीति । दम + इनि ।) दमविशिष्टः । (तीर्थविशेषे, क्ली । तत्रत्य पीठ ऋषिभेदे, पुं । यथा, महाभारते । ३ । ८३ । ७१–७५ ।
"प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ।
तीर्थं कुरुवरश्रेष्ठ । त्रिषु लोकेषु विश्रुतम् ॥
दमीति नाम्ना विख्यातं सर्व्वपापप्रमोचनम् ।
यत्र ब्रह्मादयो देवा उपासन्ते महेश्वरम् ॥
तत्र स्नात्वार्च्चयित्वा च रुद्रं देवगणैर्वृतम् ।
जन्मप्रभृति यत् पापं तत् स्नातस्य प्रणश्यति ॥
दमी चात्र नरश्रेष्ठ । सर्व्वदेवैरभिष्टुतः ।
तत्र स्नात्वा नरश्रेष्ठ । हयमेधमवाप्नुयात् ॥"
दमीत्यत्र शिमीति क्वचित् पाठः ॥)

दमुना, [स्] पुं (दाम्यतीति । अन्तर्भावितण्यर्थात् दमधातो + "दमेरुनसि ।" उणां । ४ । २३४ । इति उनसि ।) अग्निः । इत्यमरः । १ । १ । ५८ ॥ शुक्राचार्य्यः । इत्युणादिकोषः ॥

दमूना, [स्] पुं, (दमुनस् + अन्येषामपि दृश्यते इति पक्षे दीर्घः । यद्वा, दमेरूनसिरिति पठित्वा ऊनसिप्रत्ययः ।) अग्निः । इति शब्दरत्नावली ॥ (त्रि, दमनीयः । यथा, ऋग्वेदे । १ । १४१ । ११ ।
"अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ॥"
दानमनाः । दान्तचित्तः । यथा, तत्रैव । ५ । ४ । ५ ।
"जुषाणो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् ॥")

दम्पती, पुं, (जाया च पतिश्च । राजदन्तादिगणे पाठात् जायाया दम्भावो वा निपात्यते ।) भार्य्यापती । इत्यमरः । २ । ६ । ३८ ॥ (यथा, मनुः । ३ । ११६ ।
"भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि ।
भुञ्जीयातां ततः पश्चादवशिष्टन्तु दम्पती ॥")

दम्भः, पुं, (दम्भते इति । दम्भ दम्भे + घञ् ।) कपटः । (यथा, पञ्चतन्त्रे । १ । २२२ ।
"सुगुप्तस्यापि दम्भस्य ब्रह्माप्यन्तं न गच्छति ॥"
अधर्म्मस्य पत्न्यां मृषायां जातः । यथा, भागवते । ४ । ८ । २ ।
"अधर्म्मस्य भार्य्यासीद्दम्भं मायाञ्च शत्रुहन् ।
असूत मिथुनं तत्तु निरृतिर्जगृहेऽप्रजः ॥")
आस्फालनम् । आटोपः इति । इति शब्दरत्नावली ॥ (यथा, गीतायाम् । १६ । १७ ।
"आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥"
धर्म्मानुष्ठानादि । यथा, मनुः । ४ । १६३ ।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् ।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत् ॥"
महादेवः । यथा, महाभारते । १३ । १७ । ७८ ।
"दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ॥")

दम्भोलि, पुं (दम्भ नोदे + भावे घञ् । दम्भमेव अलति पर्य्याप्नोतीति । अल + इन् ।) वज्रम् । इत्यमरः । १ । १ । ४७ ॥

दम्य, पुं, (दम्यते इति । दम + यत् ।) वत्सतरः । स तु प्रागदमनकार्य्यो गौः । इत्यमरः । २ । ९ । ६२ ॥ वत्सतरः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १३ । ६६ । ४ ।
"प्रकृष्ट दम्यसंयुक्तं दत्त्वा भवति चैव हि ॥")
दमनीये, त्रि ॥

दय, ङ दाने । गतौ । वधे । रक्षे । आदाने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) रक्षणं पालनम् । णि, दययति । ङ, दयते दीनं दयालुः । शौरी दयते न कमलाम् । अत्र कर्म्मणि षष्ठी । इति दुर्गादासः ॥

दय, पुं, (दय + भावे घञ् ।) दया । इति शब्दरत्नावली ॥

दया, स्त्री, (दय + भिदादित्वात् अङ् । ततष्टाप् ।) करुणा । अस्या लक्षणं यथा, पाद्मे क्रियायोगसारे ।
"यत्नादपि परक्लेशं हर्त्तुं या हृदि जायते ।
इच्छा भूमिसुरश्रेष्ठ । सा दया परिकीर्त्तिता ॥"
अपि च मत्स्यपुराणे ।
"आत्मवत् सर्व्वभूतेषु यो हिताय शुभाय च ।
वर्त्तते सततं हृष्टः क्रिया ह्येषा दया स्मृता ॥" ॥
"परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा ।
आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता ॥"
इत्येकादशीतत्त्वम् ॥
(दक्षदुहितृणामन्यतमा । यथा, देवीभागवते । १ । १५ । ६० ।
"श्रद्धा मेधा स्वधा स्वाहा क्षुधा निद्रा दया गतिः ।
"संस्थिता सर्व्वत पार्श्वे महादेव्याः पृथक् पृथक् ॥")

दयाकूर्च्चः, पुं, (दयायां कूर्च्चः श्मश्रुरिव प्रधानम् ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥

दयालु, त्रि, (दयते इति । दय + "स्पृहिगृहीति ।" ३ । २ । १५८ । इति आलुच् ।) दयायुक्तः । तत्पर्य्यायः । कारुणिकः २ कृपालुः ३ सूरतः ४ । इत्यमरः । ३ । १ । १५ ॥ (यथा, रघुः । १० । २६ ।
"दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥")

दयित, त्रि, (दय्यते स्मेति । दय + क्त ।) प्रियम् । इत्यमरः । ३ । १ । ५३ ॥ (यथा, [illegible] । १८८ ।
"[illegible] ।
[illegible] ॥"
यथा च [illegible] । २ । १८ ।
"दयितजन[illegible]
[illegible] स्यात् ॥")

दयित, पुं, (दय + क्त ।) पतिः । इति जटाधरः ॥

दयिता, स्त्री, (दयित + टाप् ।) भार्य्या । इति हलायुधः ॥ (यथा, रघुः । ८ । ७ ।
"[illegible] दयितो [illegible]
[illegible] ॥")

दर, म (दीर्य्यते इति । दृ + अप् ।) [illegible] । इति मेदिनी । रे, ३० ॥ (यथा, आर्य्यासप्तशत्याम् । ३०० ।
"दर[illegible] दरीमति मम हरि च दरदर्शितम् ।
[illegible] ॥"
"[illegible] ॥" इति [illegible] ॥)

दर, अव्य, ईषत् । यथा । किन्तु वन्दे दरहसन-कालोदिकोपदृष्टान्तमपि क्रमदीपिका ॥

दर, पुं क्ली (दृणाति यस्मात् । दृ + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) भयम् । (यथा, आर्य्यासप्तशत्याम् । २८५ ।
"दरनिद्रालस्यापि [illegible] निर्गतासून् मे ।
[illegible] ॥")
गर्त्तः । इत्यमरः । १ । ६ । १८४ ॥ (शङ्खः । यथा, भागवते । १ । ११ । २ ।
"स उच्चकाशे धवलोदरो दरो-
ऽप्युरुक्रमस्याधरशोणशोणिमा ।
दाध्मायमानः करकञ्जसम्पुटे
यथाब्जखण्डे कलहंस उत्स्वनः ॥")
कन्दरे पुं स्त्री । इत्यमरटीकायां भरतः ॥ (स्त्रियां ङीप् । यथा, ऋतुसंहारे । १ । २५ ।
"ध्वनति पवनविद्धः पर्व्वतानां दरीषु
स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ॥")

दरकवाटिका, स्त्री, (दरः ईषत् कवाटो यस्याः । कप् । टापि अत इत्वम् ।) शतावरी । इति राजनिर्घण्टः ॥

दरणि पुं, (दृ विदारणे + "ऋतेरनिः ।" २ । १०३ । इति उज्ज्वलदत्तोक्त्या अनिः ।) कूल-भङ्गः । भाङ्गन इति भाषा । तत्पर्य्यायः । कूलङ्कषः २ । इति शब्दरत्नावली ॥ कूल-तरङ्गः ३ । इति भूरिप्रयोगः ॥

दरत्, [द्] स्त्री, (दृणातीति । दॄ विदारणे + "शॄदृभसोऽदिः ।" उणां । १ । १२९ । इति अदि ।) प्रपातः । भयम् । पर्व्वतः । इति मेदिनी । दे, ३० ॥ म्लेच्छजातिः । इति लिङ्गादिसंग्रहे अमरः ॥ (देशविशेषः । यथा, राजतरङ्गिण्याम् । १५७ ।
"दरत्तुरुष्काधिपयोर्यः केशरिवराहयोः ।
हिमवद्विन्ध्ययोरासीदार्य्यावर्त्त इवान्तरे ॥")
कूलम् । तीरम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दरदं, क्ली, (दर ईषत् दायति शुध्यतीति । दै + क ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते । अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति वैद्यकरत्नमालायाम् ॥
पर्य्यायान्तरं यथा,—
"हिङ्गुलन्दरदं म्लेच्छं चित्राङ्गं चूर्णपारदम् ।
दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ॥
हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरम् ।
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः ॥
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"दरदं तण्डुलस्थूलं कृत्वा ग्वतपात्रके त्रिदिनम् ।
भाव्यं जम्बीररसैश्चाङ्गेर्य्या वा रसैर्बहुधा ॥
ततश्च जम्बीरवारिणा चाङ्गेर्य्या रसेन परिप्लुतम् ।
कृत्वा स्थालीमध्ये निधाय तदुपरि कठिनीपृष्ठम् ॥
चारु शराव तत्र त्रिशप्रहारं जल देय उष्णे देयं
तथैव तदूर्द्धपातनेन निर्म्मलं शिवज: ॥"
"हिङ्गुवे हिङ्गुलुर्याति दरद शुकतुण्डकः ।
रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः ॥
अम्लवर्गद्रवैः पिष्ट्वा दरदो माहिषेण च ।
दुग्धेन सप्तधा पिष्टः शुष्कीभूतो विशुध्यति ॥
अन्यच्च ।
मेषीदुग्धेन दरदमम्लवर्गैर्विभावितम् ।
सप्तवार प्रयत्नेन शुद्धिमायाति निश्चितम् ॥
अन्यमतम् ।
दरदं दोलिकायन्त्रे पक्व जम्बीरजैर्द्रवैः ।
सप्तवारमजामूत्रैर्भावितं शुद्धिमेति हि ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

दरद., पु, (दरं भय ददातीति । दा + क. ।) देशविशेष । भयम् । म्लेच्छजातिभेदः । इति शब्दरत्नावली ॥ (अयन्तु पूर्व्वं क्षत्त्रिय आसीत् पश्चात् क्रमशः उपनयनादिक्रियालोपात् शूद्रत्वादिकं प्राप्तः । यदुक्तं मनौ । १० । ४३-४४ ।
"शनकैस्तु क्रियालोपादिमाः क्षत्त्रियजातय. ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा जवनाः शकाः ।
पारदा पह्लवाश्चीनाः किराता दरदाः खशा. ॥")

दरि., स्त्री, (दॄ + इन् ।) दरी । इति शब्दरत्नावली ॥ (तक्षककुलोत्पन्ने सर्पे, पु । इति महाभारतम् ॥)

दरित', त्रि, (दरो भयमस्य सञ्जातः । दर + तारकादित्वात् इतच् ।) भीतः । इति हेमचन्द्रः । ३ । २९ ॥

दरिद्रः, पु, (दरिद्राति दुर्गच्छतीति । दरिद्रा + अच् ।) निर्धनः । तत्पर्य्याय. । निःस्वः २ दुर्विधः ३ दीनः ४ दुर्गतः ५ । इत्यमरः । ३।१। ४९ ॥ कीकटः ६ दुःस्थः ७ । इति जटाधरः ॥ अस्तमितः ८ । इति दानधर्म्मः । तस्य कारण यथा,—
"अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्त्वा हेमधेनूंश्च दरिद्रो जायते नरः ॥"
इति पाद्मे भूखण्डम् ॥
"दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः ॥"
इति श्रीभागवतम् ॥

दरिद्रा, च शु दुर्गत्याम् । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) दुर्गतिरकिञ्चनीभावः । च शु, उपर्य्युपरि पश्यन्तः सर्व्व एव दरिद्रति । इति दुर्गादासः ॥

दरिद्रायकः, त्रि, (दरिद्रातीति । दरिद्रा + ण्वुल् ।) दरिद्र. । इति मुग्धबोधम् ॥

दरिद्रित', त्रि, (दरिद्रा + कर्त्तरि क्तः ।) दरिद्रः । दारिद्र्ययुक्तः ॥

दरिद्रिता, [ऋ] त्रि, (दरिद्रा + तृच् ।) दरिद्रायकः । दरिद्राधातोः कर्त्तरि तृन्प्रत्ययः ॥

दरोदर, क्ली, (दरो भयं तज्जनकं उदरं यस्य । प्रायशः सर्व्वग्रासकत्वादेवास्य तथात्वम् ।) दुरोदरम् । इत्यमरटीकायां भरतः ॥

दरोदरः, पुं, (दरजनकमुदरं यस्य ।) दुरोदरः । इत्यमरटीकायां भरतः ॥ (यथा, उणादिसूत्रटीकायां उज्ज्वलदत्तधृतगोवर्द्धनः । ५ । १९ ।
"आश्रित्य दुर्गं गिरिकन्दरोदर
क्रीडन्त्यमुस्मिन् सततं दरोदरम् ॥")

दर्द्दरः, पु, पर्व्वतः । (यथा, रामायणे । २ । ९१ । २४ ।
"मलयं दर्द्दरञ्चैव ततः स्वेदनुदो निलः ॥"
क्वचित् दर्दुरोऽपि पाठः ॥) ईषद्भग्नभाजने, त्रि । इति मेदिनी । रे, १६६ ॥

दर्द्दराभ्रः, पु, अञ्जनविशेषः । तत्पर्य्यायः । मीनाम्नीयः २ । इति शब्दमाला ॥

दर्द्दरीकं, क्ली, (दारयतीव कर्णौ । दॄ + णिच् + "फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन साधुः ।) वाद्यम् । इत्युणादिकोषः ॥

दर्द्दरीकः, पुं, (दारयतीव कर्णौ इति । दॄ + णिच् + "फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन साधुः ।) मेघः । वाद्यभेद. । भेकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्दुर,क्ली, ग्रामजालम् । इति मेदिनी । रे, १६७ ॥

दर्दुर', पु, (दृणाति कर्णौ शब्देनेति । दॄ + "मकुरदर्दुरौ ।" उणां । १ । ४१ । इति उरच् प्रत्ययेन निपातनात् साधुः ।) भेकः । इत्यमरः । १ । १० । २४ ॥ (यथा,—
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्द्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥"
इत्युद्भटः ॥)
मेघः । वाद्यभाण्डभेदः । पर्व्वतविशेष' । इति मेदिनी । रे, १६७ ॥ (यथा, रघौ । ४ । ५१ ।
"स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥")
राक्षसः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (अभ्रकधातुभेदः । यथा, भावप्रकाशे ।
"पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्व्विधम् ॥"
"दर्दुरं त्वग्निनिक्षिप्तं कुरुते दर्दुरध्वनिम् ।
गोलकान् बहुशः कृत्वा स स्यान्मृत्युप्रदायकः ॥")

दर्द्दुरा, स्त्री, (दृणाति दारयति वा असुरानिति । दॄ + उरच् प्रत्ययेन निपातनात् साधुः । ततष्टाप् ।) चण्डिका । इति मेदिनी । रे, १६७ ॥

दर्द्रू', पु, (दरिद्राति दुर्गच्छत्यङ्गमनेनेति । दरिद्रा + "दरिद्रातेर्यालोप. ।" उणां ।१।९०। इति ऊ. । रकारेकारयकाराणां लोपश्च ।) दद्रुरोगः । इति शब्दरत्नावली ॥

दर्द्रुः, पु, (दरिद्रा + बाहुलकात् उः । यालोपश्च ।) दद्रुरोगः । इत्युणादिकोषः ॥

दर्द्रुघ्नः, पुं (दद्रुं हन्तीति । दर्द्रु + हन् + टक् ।) चक्रमर्द्दकः । इति शब्दरत्नावली ॥

दर्द्रुणः, त्रि, (दर्द्रुरस्यास्तीति । दर्द्रु + "लोमादिपामादिपिच्छादिभ्यः शनेलचः ।" ५।२।१०० । इति पामादिषु पाठात् न' । ततो णत्वञ्च ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्द्रूः, पु, (दरिद्रा + ऊः । यालोपश्च ।) दद्रुरोगः । इत्युणादिकोष. ॥

दर्द्रूणः, त्रि, (दर्द्रूरस्यास्तीति । दर्द्रू + नः ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्द्रूरोगी, [न्] त्रि, (दर्द्रूरोगोऽस्यास्तीति । दर्द्रूरोग + इनि. ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्पः, पु, (दृप्यते इति । दृप् + भावे घञ् ।) उच्छृङ्खलत्वम् । इति नीलकण्ठः । कस्तूरी । इति मेदिनी । पे, ७ ॥ उष्मा । इति त्रिकाण्डशेषः ॥ अहङ्कृतिः । तत्पर्य्यायः । गर्व्व' २ अहङ्कारः ३ अवलिप्तता ४ अभिमानः ५ ममता ६ मानः ७ चित्तोन्नति. ८ स्मयः ९ । इति हेमचन्द्र. । २ । २३१ ॥ * ॥
"अहङ्कारश्च सर्व्वेषां पापबीजममङ्गलम् ।
ब्रह्माण्डेषु च सर्व्वेषां गर्व्वपर्य्यन्तमुन्नतिः ॥
येषा येषां भवेद्दर्पो ब्रह्माण्डेषु परात्परे ।
विनाश सर्व्व सर्व्वात्मा तेषा शास्ताहमेव च ॥
क्षुद्राणां महताञ्चैव येषां गर्व्वो भवेन् पितः ।
एवंविधमहं तेषां चूर्णीभूतं करोमि च ॥
चकार दर्पभङ्गञ्च महाविष्णोः पुरा विभु. ।
ब्रह्मणश्च तथा विष्णोः शेषस्य च शिवस्य च ॥
धर्म्मस्य च यमस्यापि शास्तस्य चन्द्रसूर्य्ययोः ।
गरुडस्य च वह्नेश्च गुरोर्दुर्व्वाससस्तथा ॥
दौवारिकस्य भक्तस्य जयस्य विजयस्य च ।

सुराणामसुराणाञ्च भवतः कामशक्रयोः ॥
लक्ष्म्यास्यार्ज्जुनस्यापि वायस्य च भृगोस्तथा ।
सुमेरोश्च समुद्राणां वायोश्च वरुणस्य च ॥
सरस्वत्याश्च दुर्गायाः पद्मायाश्च भुवस्तथा ।
सावित्र्याश्चैव गङ्गाया मनसायास्तथैव च ॥
प्राणाधिष्ठातृदेव्याश्च प्रियायाः प्राणतोऽपि च ।
प्राणाधिकाया राधाया अन्येषामपि का कथा ।
हत्वा दर्पञ्च सर्व्वेषां प्रसादञ्च चकार सः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दर्पकः, पुं, (दर्पयति दर्पयति मोहयति वेति । दृप दर्पमोहनयोः + णिच् + ण्वुल् ।) कामदेवः । इत्यमरः । १ । १ । २३ ॥

दर्पण, स्त्री, (दर्पयति सन्दीपयतीति । दृप् + णिच् + ल्युः) चक्षुः । इति जटाधरः ॥ (भावे ल्युट् ।) सन्दीपनम् । इति दृपधात्वर्थदर्शनात् ॥

दर्पणः, पु, क्ली, (दर्पयति सन्दीपयतीति । दृप् + णिच् + “नन्द्यादिभ्यो ल्युः ।” ३ । १ । १३४ । इति ल्यु ।) रूपदर्शनाधारः । आर्शि इति भाषा । तत्पर्य्यायः । मुकुरः २ आदर्शः ३ । इत्यमर. । २ । ६ । १४० ॥ आत्मदर्श ४ मन्दरः ५ दर्शनम् ६ प्रतिविम्बातम् ७ । इति शब्दरत्नावली ॥ कर्कं ८ कर्कर. ९ । इति जटाधरः ॥ (यथा, चाणक्ये । १०६ ।
“यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥”)
अस्य गुणः । आयुःश्रीकारित्वम् । पापनाशित्वञ्च । इति राजवल्लभः ॥ पु, पर्व्वतभेदः । नदविशेष. । यथा,—
और्व्व उवाच ।
“तत' पूर्व्वे महाराज । दर्पणो नाम पर्व्वतः ।
कुबेरो यत्र वसति धनपालैः सम सदा ।
यस्मिन्नास्ते मध्यभागे रोहिणी रोहिताकृतिः ।
यस्मिँल्लोहादिकं स्पृष्ट स्वर्णतां याति तत्क्षणात् ॥
तस्मात्तिदूरे स्रवति दर्पणो नाम वै नदः ।
हिमाद्रिप्रभवो नित्यं लौहित्यसदृशः फले ॥
ससुत्पन्नं हि लौहित्यं सर्व्वेर्दृ वरुणेर्हरिः ।
सर्व्वतीर्थोदकैः सम्यक् स्नापयामास स सुतम् ॥
तस्य स्नानसमुद्भूतः पापदर्पस्य पाटनः ।
तेनायं दर्पणो नाम पुरा देवगणैः कृतः ॥
तस्मिन् स्नात्वा नदवरे योऽर्च्चयेद्दर्पणाचले ।
कुबेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः ॥
स याति अलकासदनमिह भूतिशतैर्युतः ॥”
इति कालिकापुराणे ८१ अध्यायः ॥

दर्पारम्भः, पुं, (दर्पस्य आरम्भः) अहङ्कारारम्भः । तत्पर्य्यायः । भटस्फाटिः २ । इति जटाधरः ॥

दर्भः, पुं, (दृणाति विदारयतीति । “दृदलिभ्यां भः ।” उणां ३ । १५१ । इति भः ।) कुशः । इत्यमरः । २ । ४ । १६६ ॥ उलपतृणम् । इति रत्नमाला ॥ काशः । इति शब्दरत्नावली ॥ * ॥
(“कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥
दर्भद्वयं त्रिदोषघ्नं मधुरन्तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
“हरिताः सपिञ्जलाश्चैव पुष्टाः स्निग्धाः समाहिताः ।
गोकर्णमात्रास्तु कुशाः सकृच्छिन्नाः समूलकाः ॥
पितृतीर्थेन देयाः स्युर्दूर्व्वाश्चश्यामाकमेव च ।
काशाः कुशा वल्वजाश्च तथान्ये तीक्ष्णरोमशाः ।
मौञ्जाश्च शाद्वलाश्चैव षड्दर्भाः परिकीर्त्तिताः ॥
सपिञ्जलाः साग्राः तीक्ष्णरोमशा इति वल्वजानां विशेषणम् । शाद्वला इति सर्व्वेषां विशेषणम् । तेन तेषामभावे शूकतृणशरशीर्यवल्वजनलशुण्ठवर्जं सर्व्वतृणानीति गोभिलेन तद्व्यतिरिक्तवल्वजानां निषेधो बोद्धव्यः । शूकानि फलपुष्पमञ्जर्य्यस्तानि येषां तृणानां सन्ति तानि शूकतृणानि इति भट्टनारायणचरणाः ॥ गोकर्णमिता वितृतातृकुष्ठानामिकापरिमाणाः ।
रत्निप्रमाणाः शस्ता वै पितृतीर्थेन संस्कृताः ।
उपमूले तथा लूनाः प्रस्तरार्थे कुशोत्तमाः ॥
इति वायुपुराणम् ॥ * ॥
पञ्चप्रतिप्रसवमाह हारीतः ।
पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु ।
स्तरणासनपिण्डेषु षड्दर्भान् परिवर्ज्जयेत् ॥
पिण्डार्थे ये स्तृता दर्भा यैः कृतं पितृतर्पणम् ।
मूत्रोच्छिष्टप्रलिप्ते च त्यागस्तेषां विधीयते ॥
हते. हते च विण्मूत्रे त्यागस्तेषां विधीयते ।
हतैरित्युपलक्षणेन हसीया हतैर्दर्भैरुपलक्षितेन पुष्पेण ॥
नीवीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये धृताः ।
पवित्रांस्तान् विजानीयाद्यथा कायस्तथा कुशाः ॥
आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमः ।
नोच्छिष्टन्तु भवेत्तत्तु भुक्तशेषं विवर्ज्जयेत् ॥
इत समापितमित्यर्थः ॥ * ॥
दर्भवटुलक्षणमाह रत्नाकरे यज्ञसंग्रहः ।
ऊर्द्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥
शान्तिदीपिकायाम् ।
सप्तभिर्नवभिर्वापि सार्द्धद्वितयवेष्टितम् ।
ॐकारेणैव मन्त्रेण द्विजः कुर्य्यात् कुशद्विजम् ॥
नवभिरित्यत्र पञ्चभिरिति कर्म्मोपदेशिन्यां पाठः । दर्भसंख्याविशेषाभिधानं छन्दोगेतरपरम् ।
यज्ञवास्तुनि मुष्ट्याञ्च स्तम्भे दर्भवटौ तथा ।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ॥
इति गोभिलपरिशिष्टीयवचनात् ।” इति आह्निकतत्त्वम् ॥

दर्भट, क्ली, (दृभ्यते निभृतस्थाने विरच्यते इति । दृभ ग्रन्थने + बाहुलकात् अटन् ।) निभृतगृहम् । इति त्रिकाण्डशेषः ॥

दर्भपत्रः, पुं, (दर्भस्य कुशस्येव पत्राणि यस्य ।) काशः । इति राजनिर्घण्टः ॥

दर्भाह्वयः, पु, (दर्भं आह्वयते स्पर्द्धते सदृशत्वात् । आ + ह्वे + अच् ।) मुञ्जः । इति राजनिर्घण्टः ॥ (मुञ्जशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दर्व्वः, पुं, (दृणाति विदारयतीति । दृ + “कृगशृदृभ्यो वः ।” उणां १ । १५५ । इति वः ।) राक्षस. । हिंस्रः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (जातिविशेषः । यथा, महाभारते । २ । ५१ । १३ ।
“कैरता दरदा दर्व्वाः शूरा वैयामकास्तथा ।
औदुम्बरा दुर्व्विभागा पारदाः सह वाह्लिकैः ॥”
स्त्रियां टाप् । उशीनरपत्नीभेदः । यथा, हरिवंशे । ३१ । २२ ।
“उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः ।
मृगा कृमी नवा दर्व्वा पञ्चमी च दृषद्वती ॥”)

दर्व्वरीकः, पुं, (दृ विदारे + “फर्फरीकादयश्च ।” उणां । ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधुः ।) इन्द्रः । वायुः । वाद्यभेदः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्व्वटः, पुं, (दर्व्वाय हिंसायै अटतीति । अट + अच् । शकन्ध्वादित्वात् अलोप. ।) दण्डवासी । इति हारावली । १२८ ॥

दर्व्विः, स्त्री, (दृणाति विदारयतीति । दृ + “दृदॄभ्यां विन् ।” उणां ४ । ५३ । इति विन् ।) यज्ञनादिदारक । हाता इति भाषा । तत्पर्य्यायः । कम्बिः २ खजाका ३ । इत्यमरः । २ । ९ । ३४ ॥ दर्व्वी ४ कम्बी ५ खजाकण ६ । यथा । इति शब्दरत्नावली ॥

दर्व्विकः, पुं, (दर्व्वि + स्वार्थे कन् । अभिधानात् पुंस्त्वम् ।) दर्व्वी । इति द्विरूपकोषः ॥

दर्व्विका, स्त्री, (दर्व्वि + स्वार्थे कन् + टाप् ।) दार्व्विका । इत्यमरटीकायां रायमुकुटः ॥ खजाका । इति द्विरूपकोषः ॥ कज्जलम् । यथा,
“सौवीरं जामलं तुत्थ मयूरग्रीवकं तथा ।
दर्व्विका मेघनीलञ्च अञ्जनानि भवन्ति षट् ॥”
तल्लक्षणम् यथा, कालिकापुराणे ६८ अध्याये ।
“सवह्नप्तु सौवीरं जामलं प्रस्तर तथा ।
मयूरग्रीवकं रत्नं मेघनीलम् तैजसम् ॥
दृष्ट्वा निष्पाद्य चैतानि शिलायां तैजसेऽथवा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ॥
घृततैलादियोगेन सञ्जातौ दीपवह्निना ।
यदञ्जन जायते तु दर्व्विका परिकीर्त्तिता ॥

दर्व्वी, स्त्री, (दर्व्वि + वा ङीष् ।) दर्व्विः । इति शब्दरत्नावली ॥ (यथा, उत्तरगीतायाम् । २ । १७ ।
“आलोच्य चतुरो वेदान् धर्म्मशास्त्राणि सर्व्वदा ।
योऽत्र ब्रह्म न जानाति दर्व्वी पाकरसं यथा ॥”)

दर्व्वीकरः, पुं, (दर्व्वीं फणां करोतीति कृ + “कृञो हेतुताच्छील्यानुलोम्येषु ।” ३ । २ । २० । इति ट । यद्वा, दर्व्वी फणा कर इवास्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।
“दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः ।
तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः ॥”

"रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ।
ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥"
तत्र दर्व्वीकरभेदा यथा,—
"दर्व्वीकराः कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो बलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किराः पुष्पाभिकीर्णो गिरिसर्प ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति ॥"
एतद्विषजनितलक्षणादिकं यथा,—
"तत्र दर्व्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्ब्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जडता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्द्ध्वंगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति ॥" दर्व्वीकरदष्टाना विषवेगादिकमाह यथा,—
"तत्र सर्व्वेषां सर्पाणां विषस्य सप्तवेगा भवन्ति। तत्र दर्व्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत् प्रदुष्टं कृष्णतामुपैति तेन कार्ष्ण्यंपिपीलिकापरिसर्पणमिव चाङ्गे भवति। द्वितीये मांसं दूषयति तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणञ्च। चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति। तेन तन्द्रा प्रसेकसन्धिविश्लेषा भवन्ति। पञ्चमे अस्थीन्यनुप्रविशति प्राणमग्निञ्च दूषयति तेन पर्व्वभेदो हिक्कादाहश्च भवति। षष्ठे मज्जानमनुप्रविशति ग्रहणीञ्चात्यर्थं दूषयति। तेन गात्राणां गौरवमतिसारो हृत्पीड़ा मूर्च्छा च भवति। सप्तमे शुक्रमनुप्रविशति व्यानञ्चात्यर्थं कोपयति। कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति तेन श्लेष्मवर्त्तिप्रादुर्भावः कटिपृष्ठभङ्गः सर्व्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति॥"
अथ दर्व्वीकरदष्टस्य चिकित्सामाह तत्रैव।
"फणिना विषवेगे तु प्रथमे शोणितं हरेत्।
द्वितीये मधुसर्पिर्भ्यां पाययेतागदं भिषक् ॥
नस्य कर्म्माञ्जने युञ्ज्यात् तृतीये विषनाशने।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ पाययेत् ॥
शीतोपचारं कृत्वादौ भिषक् पञ्चमषष्ठयोः।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम् ॥
सप्तमे त्ववपीड़ेन शिरस्तीक्ष्णेन शोधयेत्।
तीक्ष्णमेवाञ्जनं दद्यात् तीक्ष्णशस्त्रेण मूर्द्ध्नि च ॥
कुर्य्यात् काकपदं चर्म्म सासृग्वा पिशितं क्षिपेत् ॥")
खजाकाकारके, त्रि ॥
दर्शः, पुं, (दृश्येते उपर्य्यधोभावापन्नसमसूत्रपातन्यायेन राशेरकांशावच्छेदेन सहावस्थितौ चन्द्रसूर्य्यौ यत्र। दृश् + अधिकरणे घञ्।) अमावस्या। इत्यमरः। १। ४। ८ ॥
"अन्योऽन्यं चन्द्रसूर्य्यौ तु दर्शनाद्दर्श उच्यते ॥"
इति मत्स्यपुराणम् ॥
(अयं शिनीवाल्यां विधातृपत्न्यां तस्मात् जातः। यथा, भागवते। ६। १८। ३।
"धातुः कुहूः शिनीवाली राका चानुमतिस्तथा।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥"
दृश + भावे घञ्।) अवलोकनम्। इति मेदिनी। शे, ७ ॥ (यथा, महाभारते। १३। १४४। ४५।
"दुर्दर्शाः केचिदाभान्ति नराः काष्ठमया इव।
प्रियदर्शास्तथा चान्ये दर्शनादेव मानवा. ॥")
पक्षान्तकृतयागविशेषः। स यागत्रयात्मकः। यथा। "आग्नेयाष्टाकपालैन्द्रदध्यैन्द्रपयोयागास्त्रयोऽमावास्यायां स च यावज्जीवं कर्त्तव्यः कौण्डपायिकर्त्तव्यो माससाध्यस्तु।" इति मलमासतत्त्वम् ॥
दर्शकः, पुं, (दर्शयति नृपादिसमीपगमनपथमिति। दृश् + णिच् + ण्वुल्।) द्वारपालः। इत्यमरः। २। ८। ६ ॥ (जातिविशेषः। यथा, महाभारते। ६। ९। ५३। [स्तथा ॥")
"काश्मीरा सिन्धुसौवीरा गान्धारा दर्शका-
त्रि, दर्शयिता। (यथा, कुमारे। ६। ५२।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ॥")
प्रवीणः। इति मेदिनी। के, १०३ ॥ (प्रकाशकः। यथा, हितोपदेशे। १। ११।
"अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥"
दृश + ण्वुल्। द्रष्टा। यथा, महाभारते। १। १४१। १७।
"एकाग्रः स्यादविवृतो नित्यं विवरदर्शकः।
राजन्नाष्य सपत्नेषु नित्योद्विग्नः समाचरेत् ॥")
दर्शतः, पु, (दृश्यते गगनमार्गे इति। दृश + "भृमृदृशीति।" उणां। ३। ११०। इति अतच्।) सूर्य्यः। चन्द्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (दर्शनीये, त्रि। यथा, ऋग्वेदे। १। १४४। ७।
"यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितु मा इव क्षयः ॥")
दर्शनं, क्ली, (दृश्यतेऽनेनेति। दृश् + करणे ल्युट्।) नयनम्। स्वप्नः। बुद्धिः। धर्म्मः। उपलब्धिः। दर्पणः। (दृश्यते यथार्थतत्त्वमनेनेति।) शास्त्रम्। इति मेदिनी। ने, ७३ ॥ शास्त्रन्तु षड्विधम्। वैशेषिकन्यायमीमांसासांख्यपातञ्जलवेदान्तरूपम्। एतानि तत्त्वज्ञानार्थं वेदान् विचार्य्य कणादगौतमजैमिनिकपिलपतञ्जलिवेदव्यासाख्यैर्मुनिषट्कैः कृतानि ॥ इच्छा। इत्यजयः ॥ वर्णः। इति त्रिकाण्डशेषः ॥ चाक्षुषज्ञानम्। देखा इति भाषा। तत्पर्य्यायः। निर्व्वर्णनम् २ निध्यानम् ३ आलोकनम् ४ ईक्षणम् ५। इत्यमरः। ३। २। ३१ ॥ निभालनम् ६। इति जटाधरः ॥ * ॥ (यथा, भागवते। १। ६। २४।
"आकृत इव मे शीघ्रं दर्शनं यासि चेतसि ॥")
पुण्यदर्शनानि यथा,—
नन्द उवाच।
"येषाञ्च दर्शने पुण्यं पापञ्च यस्य दर्शने।
तत् सर्व्वं वद सर्व्वेश। श्रोतुं कौतूहलं हि मे ॥
श्रीभगवानुवाच।
सुब्राह्मणानां तीर्थानां वैष्णवानाञ्च दर्शने।
देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः ॥
सूर्य्यस्य दर्शने भक्त्या सतीनां दर्शने तथा।
सन्न्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम् ॥
भक्त्या गवाञ्च वह्नीनां गुरूणाञ्च विशेषतः।
गजेन्द्राणाञ्च सिंहानां श्वेताश्वानान्तथैव च ॥
शुकानाञ्च पिकानाञ्च खञ्जनानान्तथैव च।
हंसानाञ्च मयूराणां चासानां शङ्खपक्षिणाम्।
वत्सप्रयुक्तधेनूनामश्वत्थानां तथैव च।
पतिपुत्त्रवतीनाञ्च नराणां तीर्थयायिनाम् ॥
प्रदीपाना सुवर्णानां मणीनाञ्च विशेषतः।
मुक्तानां हीरकाणाञ्च माणिक्यानां महाशय ॥
तुलसीशुक्लपुष्पाणां दर्शनं पापनाशनम्।
फलानि शुक्लधान्यानि घृतं दधि मधूनि च ॥
पूर्णकुम्भञ्च लाजाञ्च राजेन्द्रं दर्पणं जलम्।
मालाञ्च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः ॥
गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम्।
पुष्पोद्यानं पुष्पितञ्च दृष्ट्वा पुण्यं लभेन्नरः ॥
देवाश्रितं देवघटं सुगन्धिपवनं तथा।
शङ्खञ्च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः ॥
शुक्लपक्षस्य चन्द्रस्य पीयुषं चन्दनं तथा।
कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द ! पुण्यं लभेन्नरः ॥
पताकामक्षयवटं तरुं देवोत्थितं शुभम्।
देवालयं देवखातं दृष्ट्वा पुण्यं लभेन्नरः ॥
शुक्तिं प्रवालं रजतं स्फाटिकं कुशमूलकम्।
गङ्गामृदं कुशं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः ॥
पुराणपुस्तकं शुद्धं सवीजं विष्णुयन्त्रकम्।
स्निग्धदूर्व्वाक्षतं रत्नं दृष्ट्वा पुण्यं लभेन्नरः ॥
तपस्विनं सिद्धमन्त्रं ससुद्रं कृष्णसारकम्।
यज्ञं महोत्सवं दृष्ट्वा सुपुण्यं लभते नरः ॥
गोमूत्रं गोमयं दुग्धं गोधूलिं गोष्ठगोष्पदम्।
पक्वशस्यान्वितं क्षेत्रं दृष्ट्वा पुण्यं लभेन्नरः ॥
रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम्।
सुवेशाढ्यां सुवसनां दिव्यभूषणभूषिताम् ॥
वेश्यां क्षेमङ्करीं गन्धं सदूर्व्वाक्षततण्डुलम् ॥
सिद्धान्नं परमान्नञ्च दृष्ट्वा पुण्यं लभेद्ध्रुवम् ॥
कार्त्तिकीपूर्णिमायाञ्च राधिकाप्रतिमां शुभाम्।
संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम् ॥
हिन्दुलायां तथाष्टम्यामिषे मासि सिते शुभे।
श्रीदुर्गाप्रतिमां दृष्ट्वा करोति जन्मखण्डनम् ॥
शिवरात्रौ च काश्याञ्च विश्वनाथस्य दर्शनम्।
कृत्वोपवासं पूजाञ्च करोति जन्मखण्डनम् ॥
जन्माष्टमीदिने भक्तो दृष्ट्वा मां विल्वमाधवम्।
प्रणम्य पूजां कृत्वा च करोति जन्मखण्डनम् ॥
उपोष्य व्रजभूमौ च भाण्डीरे मालतीवने।
संपूज्य राधां माञ्चैव करोति जन्मखण्डनम् ॥

पौषे मासि शुक्लरात्रौ यत्र तत्र स्थले नरः ।
मच्छायाप्रतिमां दृष्ट्वा करोति जन्मखण्डनम् ॥
सप्तजन्म भवेत्तस्य पुत्त्रः पौत्त्रो धनेश्वरः ॥
उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने ।
दृष्ट्वा काश्याममपूर्णां करोति जन्मखण्डनम् ॥
दत्त्वा विष्णुपदे पिण्डं विष्णुं यश्च प्रपूजयेत् ।
पितॄणां स्वात्मनश्चैव करोति जन्मखण्डनम् ॥
प्रयागे मुण्डनं कृत्वा यश्च पितॄन् प्रतर्पयेत् ।
उपोष्य नैमिषारण्ये करोति जन्मखण्डनम् ॥
उपोष्य पुष्करे स्नात्वा किंवा वदरिकाश्रमे ।
सपूज्य दृष्ट्वा मामेव करोति जन्मखण्डनम् ॥
सिद्धां कृत्वा च वदरीं भुक्त्वा वदरिकाश्रमे ।
दृष्ट्वा मत्प्रतिमां नन्द ! करोति जन्मखण्डनम् ॥
दोलायमानं गोविन्दं दृष्ट्वा वृन्दावने च माम् ।
दृष्ट्वा सपूज्य नत्वा च करोति जन्मखण्डनम् ॥
भाद्रे दृष्ट्वा च मथ्रस्य मामेव मधुसूदनम् ।
सपूज्य नत्वा भक्तश्च करोति जन्मखण्डनम् ॥
रथस्थञ्च जगन्नाथं यो द्रक्ष्यति कलौ नरः ।
सपूज्य भक्त्या नत्वा च करोति जन्मखण्डनम् ॥
उत्तरायणसंक्रान्त्यां प्रयागे स्नानमाचरेत् ।
सपूज्य नत्वा मामेव करोति जन्मखण्डनम् ॥
कार्त्तिकीपूर्णिमायाञ्च दृष्ट्वा मत्प्रतिमां शुभाम् ।
उपोष्य पूजां कृत्वा च करोति जन्मखण्डनम् ॥
चन्द्रभागासमीपे च माघ्याञ्च मां नयेत् शनैः ।
राधया सह मां दृष्ट्वा करोति जन्मनः क्षयम् ॥
रामेश्वरं सेतुबन्धे व्यासपौर्णमासीदिने ॥
उपोष्य दृष्ट्वा सपूज्य करोति जन्मनः क्षयम् ॥
दीननाथं दिनकरं लोलार्के कोणारायणे ।
उपोष्य दृष्ट्वा सपूज्य करोति जन्मनः क्षयम् ॥
काष्चिकोष्ठे सुवसने कलविङ्के सुगन्धरे ।
विरूपाक्षे राजकोष्ठे नन्दके पुण्यभद्रके ॥
पार्व्वतीप्रतिमां दृष्ट्वा कार्त्तिकेयं गणेश्वरम् ।
नन्दिनं शङ्करं दृष्ट्वा करोति जन्मनः क्षयम् ॥
त्रिकूटे मणिभद्रे च पश्चिमोदधिसन्निधौ ।
समुपोष्य दधि प्राश्य मां दृष्ट्वा मुक्तिमाप्नुयात् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दर्शनीयः, त्रि, (दृश्यते इति । दृश्+अनीयर् ।) मनोज्ञः । इति भरतः ॥ (यथा, महाभारते । ११ । १५ । ३०
"चक्षुस्त्रयाणि दद्दृशे देवी पटान्तरेण सा ।
ततः स कुनखीभूतो दर्शनीयनखो नृपः ॥")
दर्शनयोग्यः । इति व्याकरणम् ॥ (यथा, पञ्चतन्त्रे । ४ । ४० ।
"शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्त्रक ।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥")

दर्शयामिनी, स्त्री, (दर्शस्यामावास्याया इव यामिनी रात्रिः ।) तमिस्रा । अन्धकाररात्रिः । इति हेमचन्द्रः । २ । ५७ ॥ (दर्शस्य यामिनी इति विग्रहे । अमावास्यारात्रिश्च ॥)

दर्शयिता, [ऋ] त्रि, (दर्शयतीति । दृश्+णिच्+"ण्वुल्तृचौ ।" ३ । १ । १३३ । इति तृच् ।) दर्शकः । (यथा, महाभारते ।६।३।६१।

"प्रसादये त्वामतुलप्रभाव !
त्वं नो गतिर्दर्शयिता च धीरः ॥")
प्रतीहारः । इति भरतः ॥

दर्शविपत्, [द्] पुं, (दर्शे अमावस्यायां विपत् प्रणाशोऽदर्शनं यस्य ।) चन्द्रः । इति हारावली । १३ ॥

दर्शितः, त्रि (दृश्+णिच्+क्त ।) दर्शनं कारितः । तत्पर्य्यायः । प्रकाशितः २ आविष्कृतः ३ प्रकटितः ४ । इति हेमचन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । २८६ ।
"दर्शितयमुनोपक्रमे भूविभ्रमभाजि वलति तव नयने ।
चिप्तपदे स्मरधरं इव सर्व्वं पुरमर्ज्जितं सुतनु ॥")

दल, क भेदे । इति कविकल्पद्रुमः ॥ (चुरां-परसक-सेट् ।) क, दालयति गात्रं वाणः । इति दुर्गादासः ॥

दल, मि भेदे । इति कविकल्पद्रुमः ॥ (भ्वां-परसक-अक च सेट् ।) मि, दलयत्यरीन् कुलम्नाभृतः । इति मुरारिः । दालयति । भेदो विदारणम् । दलति कुठारः काष्ठम् । क्वचिद्विदीर्णीभावे विकसने चायम् । श्रीमद्राघववाहुदण्डविदलत्कोदण्डचण्डध्वनिरिति महानाटकम् । दरविदलितमल्लीवल्लिचञ्चत्परागेति जयदेवः । इति दुर्गादासः ॥

दलं, क्ली, (दलतीति । दल+अच् ।) उत्सेधः । खण्डम् । (यथा, मनुः । ८ । २६६ ।
"भार्य्या पुत्त्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥")
शस्त्रीच्छदः । अपद्रव्यम् । पत्रम् । इति मेदिनी । ले, २६ ॥ (यथा, आर्य्यासप्तशत्याम् । ६६२ ।
"हत्वा तटिनि ! तरङ्गैर्वेसितचक्रेषु नाश्रये निहितः ।
फलदलवल्कलरहितस्त्वयान्तरीचे तरुस्तक्तः ॥")
घनम् । इति शब्दरत्नावली ॥ तमालपत्रम् । इति राजनिर्घण्टः ॥ अर्द्धम् । इति लीलावती ॥ (पुं, इक्ष्वाकुकुलोत्पन्नपरिक्षिन्नामराजः पुत्त्रः । स च मण्डूकराजकन्यासम्भूतः । यथा, महाभारते । ३ । १९२ । ४४ ।
"अथ कस्यचित् कालस्य तस्यां कुमारास्त्रयस्तस्य राज्ञः सम्बभूवुः शलो दलो वलश्चेति ॥")
वृक्षविशेषः । तत्पर्य्यायो यथा,—
"वातपोतः पलाशः स्याद्ब्रह्मवृक्षश्च किंशुकः ।
राजादनो ब्रह्मतरुर्बृहत्कर्णो दलोऽमरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

दलकोषः, पुं, (दलान्येव कोषा यस्य । तस्य पुष्पेषु कोषाभावात् तथात्वम् ।) कुन्दपुष्पवृक्षः । इति शब्दमाला ॥

दलनिर्म्मोकः, पुं, (दलति विदारयतीति दलं वल्कलम् । तदेव निर्म्मोक इवास्य ।) भूर्ज्जवृक्षः । इति शब्दमाला ॥

दलनी, स्त्री, (दल्यते अनेनेति । दल+करणे ल्युट् । ङीप् ।) लोष्टम् । इति शब्दरत्नावली ॥ ढेला इति भाषा ॥ (दलति विदारयतीति । दल+कर्त्तरि ल्युः ङीप् च ।) भेदकर्त्तरि, त्रि । यथा,—
"सा दुर्गा भवभीतिरीतिशमनी लोकत्रयत्रायिणी
भूयाद्वः प्रतिपक्षपक्षदलनी वाञ्छाफलोल्लासिनी ॥"
इति विद्वन्मोदतरङ्गिणी ॥

दलपः, पुं, (दल्यते असौ दल्यते अनेन वा दल+"उषिकुटिदलिकटिखजिभ्यः कपन् ।" उणा । ३ । १४३ । इति कपन् ।) स्वर्णम् । शस्त्रम् । इत्युणादिकोषः ॥ (दलं यूथं पातीति पा+क । दलपतिः ॥)

दलपुष्पा, स्त्री, (दलानि पत्राणीव पुष्पाण्यस्याः ।) केतकी । इति राजनिर्घण्टः ॥ (केतकीशब्देऽस्या विवरणं विज्ञेयम् ॥)

दलसारिणी, स्त्री, (सारोऽस्त्यस्या इति । सार+इनि । ङीप् च । दले पत्रे सारिणी ।) केमुकः । इति रत्नमाला ॥

दलसूचिः, पुं, (दलस्य सूचिरिव ।) कण्टकम् । इति हारावली । ६१ ॥

दलस्नसा, स्त्री, (दलस्य स्नसा स्नायुः ।) पत्रशिरा । तत्पर्य्यायः । माढिः २ । इति हेमचन्द्रः । ४ । १९० ॥

दलाढकः, पुं, (दलैराढ्क इव ।) वन्य जाततिलः । हस्ती । गैरिकम् । फेनः । खावकम् । नागकेशरः । महत्तरः । इति मेदिनी । के, १८२ ॥ कुन्दः । करिकर्णः । शिरीषः । वात्या । इति हेमचन्द्रः ॥

दलाढ्यः, पुं (दलेन भेदेन आढ्यः ।) पङ्ककर्व्वटः । इति त्रिकाण्डशेषः ॥ दलदलि इति भाषा ॥

दलामलं, क्ली, (दलेन अमलम् ।) मरुवकवृक्षः । दमनकवृक्षः । इति मेदिनी । ले, १५५ ॥ मदनवृक्षः । इति शब्दरत्नावली ॥

दलाम्लं, क्ली, (दलेषु अम्लो रसो यस्य ।) चुक्रम् । इति राजनिर्घण्टः ॥

दलिः, स्त्री, पुं, (दल्यते इति । दल+"सर्व्वधातुभ्य इन् ।" उणां । ४।११७ । इति इन् ।) लोष्टम् । इति शब्दरत्नावली ॥ दला इति ढेला इति च भाषा ॥

दलिकं, क्ली, (दल्यते भिद्यते इति । दल+इन्+स्वार्थे कन् ।) काष्ठम् । इति हेमचन्द्रः । ४ । १८८ ॥

दलितं, त्रि, (दलमस्य जातम् । दल+तारकादित्वात् इतच् । प्रफुल्लम् । इति हेमचन्द्रः । ४ । १६४ ॥ (दल+क्त ।) खण्डितम् । यथा,—
दलिताञ्जनमेघपुञ्जेत्यादिकमदीपिका ॥ (यथा च प्रबोधचन्द्रोदये । २ । ३५ ।
"दलितकुचनखाङ्गमङ्गपालीं
रचय ममाङ्कमुपेत्य पीवरोरु ! ॥"
विचित्तम् । यथा, आर्य्यासप्तशत्याम् । ३०२ ।
"दलिते पलालपुञ्जे वृषभं परिभवति गृहपतौ कुपिते ॥")

दलेगन्धिः, पुं, (दले गन्धो यस्य समासान्त इत । सप्तम्या अलुक् च ।) सप्तपर्णवृक्षः । इति त्रिकाण्डशेषः ॥

दल्भः, पु, (दलति विशीर्णो भवत्यनेनेति । दल + "छदिभ्यां भः ।" उणा । ३ । १५१ । इति भः ।) प्रतारणा । पापम् । मुनिभेदः । इत्युणादिकोषः ॥ चक्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दल्मिः, पुं, (दलति विदारयति असुरानिति । दल + "दल्मिः ।" उणा ।४।४७। इति मिः ।) इन्द्रः । इति हेमचन्द्रः । २ । ८६ ॥ (दल्यते अनेनेति ।) वज्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दव, इ अर्णे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ, दन्वति । अर्णो गतिः । इति दुर्गादासः ॥

दवः, पु, (दुनोति पीडयतीति । दु + अच् ।) वनम् । वनाग्निः । इत्यमरः । ३ । ३ । २०५ ॥ (यथा, भागवते । ८ । ६ । १३ ।

"दृष्ट्वा गता निर्वृतिमद्य सर्व्वे
गजा दवार्त्ता इव गाङ्गमम्भः ॥")

अग्निः । इत्यमरटीकायां नीलकण्ठः ॥ (टु उपतापे + "ऋदोरप् ।"३ । ३ । ५७ । इत्यप् ।) उपतापः । इति केचित् ॥

दवथुः, पुं, (दवनमिति । टु टु उपतापे + "ट्वितोऽथुच् ।" ३।३।८९ । इति भावे अथुच् ।) परितापः । इति जटाधरः ॥ (यथा, काशीखण्डे । २९ । ८९ ।

"दुरोदरघ्नी दावाग्निर्द्दवज्येष्ठप्रयेकमिवधिः ।
दीनसन्तापशमनी दात्री दवथुवैरिणी ॥"

दूयतेऽनेनेति । करणे अथुच् ।) चक्षुरादिदाहः । इति राजनिर्घण्टः ॥

दवाग्निः, पु, (दवानां वनानां अग्निः । यद्वा, दव एवाग्निः ।) दावानलः । इति द्विरूपकोषः ॥ (यथा, मेघदूते । ५५ ।

"तञ्चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा-
बाधेतोल्का क्षपितचमरी बालभारो दवाग्निः ॥")

दविष्ठः, त्रि, (अयमेषामतिशयेन दूर इति । दूर + इष्ठन् । "स्थूलदूरयुवेति ।"६ । ४ । १५६ । इति रस्य लुप् ऊकारस्य च गुणः ।) सुदूर । अत्यन्तदूरवर्त्ती । इत्यमरः । ३ । १ । ६६ ॥

दवीयान्, [स्] त्रि, (इदमनयोरतिशयेन दूरम् । दूर + ईयसुन् । स्थूलदूरेत्यादिना साधुः ।) सुदूरः । इत्यमरः । ३ । १ । ६६ ॥ (यथा, प्रद्युम्नविजये । २ । १६ ।

"कोऽस्मिन् दवीयांसमपीन्दुबिम्बं
न वेद चूडामणिमिन्दुमौलेः ।
पातालधामानमपि प्रहृष्टं
न वाडवं सुन्दरि । वेद को वा ॥")

दश, इ क त्विषि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) इ क, दंशयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

दश, इ क ड दर्शे । दंशने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) इ क ड, दंशयते । दर्शो दर्शनम् । इति दुर्गादासः ॥

दश, [न्] त्रि, (दशयति दीप्यते इति । दनुशि + बाहुलकात् कनिन् । "दनुश दंशने । न लोपः ।" इत्युज्ज्वलदत्तः । १ । १५६ ।) संख्याविशेषः । द्विगुणितपञ्च १० । (यथा, महाभारते । ३ । १३४ । १७ ।

"दिशो दशोक्ताः पुरुषस्य लोके
सहस्रमाहुर्दशपूर्णं शतानि ।
दशैव मासान् बिभ्रति गर्भवत्यो
दशेरका दश दाशा दशार्हाः ॥")

दशवाचकानि यथा । हस्ताङ्गुलिः १, शम्भुबाहुः २ रावणमस्तकम् ३ कृष्णावतारः ४ दिक् ५ विश्वदेवः ६ अवस्था ७ चन्द्राश्वः ८ पंक्तिः ९ । इति कविकल्पलता ॥ बहुवचनान्तोऽयं शब्दः । ततसंख्याविशिष्टः । इत्यमरः । २ । ६ । ६१ ॥

दशकण्ठः, पु, (दश कण्ठा गला यस्य ।) रावणः । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । २९ ।

"दशपूर्व्वरथं यमाख्यया
दशकण्ठारिगुरुं विदुर्बुधाः ॥")

दशकन्धजित्, पु, (दशकन्धं रावणं जयतीति । जि + क्विप् तुक् च ।) रामः । इति त्रिकाण्डशेषः ॥

दशकन्धरः पु, (दश कन्धरा ग्रीवा यस्य ।) रावणः । इति हेमचन्द्रः । ३ । ३७० ॥ (यथा, भागवते । २ । ७ । २३ ।

"अस्मत्प्रसादसुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्त्तिमार्च्छत् ॥")

दशग्रीवः, पुं, (दश ग्रीवा यस्य ।) रावणः । इति शब्दमाला ॥ (यथा, महाभारते । ३।२७४।१० ।

"दशग्रीवस्तु सर्व्वेषां श्रेष्ठो राक्षसपुङ्गवः ।
महोत्साहो महावीर्यो महासत्त्वपराक्रमः ॥")

एकादशमन्वन्तरीयदशमनामकेन्द्रशत्रुविशेषः । यथा,—

"रुद्रपुत्त्रस्य ते पुत्त्रान् वक्ष्याम्येकादशस्य तु ।
सर्व्वत्रगः सुशर्म्मा च देवानीकः पुरुर्गुरुः ॥
क्षत्त्रवर्द्धा दृढायुश्च आर्द्रकः पुत्त्रकस्तथा ।
हविष्मांश्च हविष्यश्च वरुणो विश्वविस्तरः ॥
विष्णुश्चैवाग्नितेजाश्च ऋषयः सप्त कीर्त्तिताः ।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा ॥
एकैकस्त्रिंशकस्तेषां गणाश्चेन्द्रश्च वै वृषः ।
दशग्रीवो रिपुस्तस्य स्त्रीरूपी घातयिष्यति ॥"

इति गरुडे ८७ अध्यायः ॥

(असुरविशेषः । यथा महाभारते ।२।९।१४ ।

"दशग्रीवश्च बाली च मेघवासा दशावरः ॥"

दमघोषस्य पुत्त्रविशेषः । यथा, हरिवंशे । ११६ । २२ ।

"दमघोषस्य पुत्त्रास्तु पञ्च भीमपराक्रमाः ।
भगिन्यां वासुदेवस्य श्रुतश्रवसि जज्ञिरे ।
शिशुपालो दशग्रीवो रैभ्योऽथोपदिशो
बली ॥")

दशतिः, स्त्री, (दशावृत्ता दश । निपातनात् साधुः ।) शतम् । इति महाभारते दानधर्म्मः ॥ (यथा, महाभारते । १ । १६ । १३ ।

"काद्रेम महता कद्रुरण्डानां दशतीर्दश ।
जनयामास विप्रेन्द्र । द्वे चाण्डे विनता तथा ॥"

"यथा नव दशावृत्ता नवतिस्तथा दश दशावृत्ता दशतिः शतमित्यर्थः । दश दशतीर्दश-शतानीत्यर्थः ॥" इति तत्र नीलकण्ठः ॥)

दशधा, व्य, (दशानां प्रकारः । दश + "संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा ।) दश प्रकारम् । इति व्याकरणम् ॥ (यथा, मनु । ९ । १५२ ।

"सर्व्वं वा रिक्थजातन्तु दशधा परिकल्प्य च ।
धर्म्म्यं विभागं कुर्व्वीत विधिनानेन धर्म्म-
वित् ॥")

दशनं, क्ली, (दश्यते इव शरीरमनेनेति । दनुश + करणे ल्युट् । दंशदशेति निर्द्देशात् क्वचिदकित्यपि नलोपः ।) कवचम् । शिखरे, पु । इति मेदिनी । ने, ७४ ॥

दशनः, पु, क्ली, (दश्यतेऽनेनेति । दनुश + ल्युट् । दंशदशेति निर्द्देशात् अत्र अकित्यपि नलोपः ।) दन्तः । इत्यमरभरतौ ॥ (यथा, रघुः । ५ । ५२ ।

"उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥")

दशनवासः, [स्] क्ली, (दशनानां वास इव आच्छादकत्वात् ।) ओष्ठः । इत्यमरः । २ । ६ । ९० ॥

दशनाढ्या, स्त्री, (दशनः आढ्यो यस्याः । एतत् सेवनेन हि दन्तस्य दार्ढ्यात् अस्य तथात्वम् ।) चुक्रिका । इति शब्दचन्द्रिका ॥

दशनोच्छिष्टः, पुं, निश्वासः । (दशनेन उच्छिष्टः ।) अधरचुम्बनम् । इति मेदिनी । टे, ६३ । दन्तत्यक्ते, त्रि ॥

दशपारमिताधरः, पु, बुद्धः । इति हेमचन्द्रः । २ । १४७ ॥

दशपुरं, क्ली, (दश दिशः पिपर्त्तीति । पॄ + कः ।) कैवर्त्तीमुस्तकम् । इत्यमरः । २ । ४ । १३१ ॥ (दश पुरो यत्र । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) देशभेदः । स मालवदेशैकखण्डः । पुरभेदः । इति मेदिनी । रे, २६६ ॥ (यथा, मेघदूते । ४९ ।

"कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥")

दशपूरम् क्ली, (दश दिशः पूरयतीति । पूर + अण् ।) दशपुरम् । इत्यमरटीकायां भरतः ॥

दशबलः, पुं, (दशसु दिक्षु बलं यस्य । यद्वा,

"दानशीलक्षमावीर्य्यध्यानप्रज्ञा बलानि च ।

उपायः शक्तिसिद्धिनि दशगुल्मबलानि च ॥"
इति वचनात् दश बलान्यस्य ।) बुद्धः । इत्यमरः । १ । १ । १४ ॥

दशभुजा, स्त्री, (दश भुजा बाहवो यस्याः ।) दुर्गा । यथा, कालिकापुराणे ५८ अध्याये ।
"इतिहासं पुराकल्पे मनोः स्वायम्भुवेऽन्तरे ।
प्रादुर्भूता दशभुजा देवी देवहिताय वै ॥
सर्व्वा त्रेतायुगस्यादौ जगतां हितकाम्यया ।
पुराकल्पे यथा वृत्तं प्रतिकल्पं तथा तथा ॥
प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै ।
प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः ॥
तथैव जायते युद्धं तथा त्रिदशसङ्गम ।
एवं रामसहस्राणि रावणानां सहस्रशः ॥
भवितव्यानि भूतानि तथा देवी प्रवर्त्तते ।
पूजयन्ति सुराः सर्व्वे बलं नीराजयन्त्यपि ॥
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि ॥"
(दशबाहुविशिष्टे, त्रि । यथा, कात्यायनीतन्त्रे महाकाल्या ध्यानम् ।
"दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥")

दशभूमिगः, पुं, (दशसु भूमीषु दानादिषष्ठेषु गच्छतीति । गम + डः ।) बुद्धः । इति हेमचन्द्रः । २ । १४७ ॥

दशभूमीशः, पुं, (दशसु भूमीषु दानादिषु ईष्टे प्रभवतीति । ईश् + अच् ।) बुद्धः । इति त्रिकाण्डशेषः ॥

दशमः, त्रि, (दशानां पूरणः । दशन् + "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । "नान्तादसंख्यादेर्मट् ।" ५ । २ । ४९ । इति मट् ।) दशसंख्यायाः पूरणः । इति व्याकरणम् ॥ दशइ इत्यादि भाषा । (यथा, ऋग्वेदे । १ । १५८ । ६ ।
"दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे ॥")

दशमी, स्त्री, (दशम + ङीप् ।) तिथिविशेषः । सा चन्द्रस्य दशमकलाक्रियारूपा तदुपलक्षितकालपरा वा । इति तिथ्यादितत्त्वम् ॥ सा सर्व्वासां दिशामतिप्रिया । यथा,—
"दशमी च तिथिस्तासामतीव दयिताभवत् ।
तस्यां दध्याशनो यस्तु भवती भवते नरः ॥
तस्य पापक्षयं तास्तु कुर्व्वन्त्यहरहश्च ! ॥"
इति वराहपुराणम् ॥ * ॥
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"विद्याविनोदी धनपुत्त्रयुक्तः
प्रलम्बकण्ठो मदनाधिकश्रीः ।
उदारचित्तः सुमना दयालुः
प्रसूतिकाले दशमी यदि स्यात् ॥"
विमुक्तावस्था । मरणावस्था । अतिशेषवयोऽवस्था । इति नानार्थटीकायां भरतः ॥ (दशसंख्यायाः पूरणी । यथा, मनुः । २ । ९० ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥")

दशमी, [न्] त्रि, (दशम + "वयसि पूरणात् ।" ५ । २ । १३० । इति इनिः ।) अतिवृद्धः । नवतेरूर्द्ध्वं दशमोऽवस्थाविशेषः स विद्यतेऽस्येति । इत्यमरभरतौ ॥

दशमीस्थः, त्रि (दशम्यामवस्थायां तिष्ठतीति । स्था + कः ।) क्षीणरागः । स नष्टवीणः मरणावस्थापन्नः । वृद्धः । स च अतिवृद्धो नवतेरुपरि वर्त्तमानः । इत्यमरभरतौ ॥ गतराशनम् । इति हेमचन्द्रः ॥

दशरथ पुं, (दश रथानि यस्य ।) रावणः । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । ११ ।
"वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम् ॥")

दशरथान्तक,पुं, (दशमुखस्य रावणस्य अन्तकः ।) श्रीरामः । इति शब्दरत्नावली ॥

दशमूलक, स्त्री, (दशानां मूलकानां समाहारः ।) हरिमन्थिरुर्भयाश्रीपार्णिभ्यां बृहतीद्वयशालिपर्णीपृश्निपर्णीगोक्षुरकाणि दशानां मूलम् । इति राजनिर्घण्टः ॥ (एतद्गुणा यथा, सुश्रुते । १ । ४५ ।
"गोमहिषाजाविगजहयखरोष्ट्राणां तीक्ष्णानि कटूष्णानि तिक्तानि लवणानुरसानि लघूनि शोधनानि कफवातकृमिमेदोविषगुल्मार्शउदरकुष्ठशोफारोचकपाण्डुरोगहराणि हृद्यानि दीपनानि च सामान्यतः । भवन्ति चात्र ।
"तत् सर्वं कटुतीक्ष्णोष्णं लवणानुरसं लघु ।
शोधनं कफवातघ्नं कृमिमेदोविषापहम् ॥
अर्शोजठरगुल्मघ्नं शोफारोचकनाशनम् ।
पाण्डुरोगहरं भेदि हृद्यं दीपनपाचनम् ॥
गोमूत्रं कटु तीक्ष्णोष्णं सक्षारत्वान्न वातलम् ।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥
शूलगुल्मोदरानाहविरेकास्थापनादिषु ।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ॥
दुर्नामोदरशूलेषु कुष्ठमेहाविशुद्धिषु ।
आनाहशोफगुल्मेषु पाण्डुरोगे च माहिषम् ॥
कासश्वासापहं शोथकामलापाण्डुरोगनुत् ।
कटुतिक्तान्वितं छागमीषन्मारुतकोपनम् ॥
कासप्लीहोदरश्वासशोथवर्च्चोग्रहे हितम् ।
सक्षारतिक्तकटुकमुष्णं वातघ्नमाविकम् ॥
दीपनं कटुतीक्ष्णोष्णं वातचेतोविकारनुत् ।
आश्वं कफहरं मूत्रं कृमिदद्रुषु शस्यते ॥
सतिक्तं लवणं भेदि वातघ्नं पित्तकोपनम् ।
तीक्ष्णं क्षारे किलासे च नागं मूत्रं प्रयोजयेत् ॥
गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत् ।
दीपनं गार्द्दभं मूत्रं कृमिवातकफापहम् ॥
शोफकुष्ठोदरोन्मादमारुतक्रिमिनाशनम् ।
अर्शोघ्नं कारभं मूत्रं मानुषञ्च विषापहम् ॥")

दशमूल, क्ली, (दशानां मूलानां समाहारः । पात्रादित्वात् न ङीप् ।) पाचनविशेषः । यथा,—
"बिल्वश्योनाकगाम्भारीपाटलागणिकारिका ।
दीपनं कफवातघ्नं पञ्चमूलमिदं महत् ॥
शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् ।
वातपित्तहरं वृष्यं कनीयः पञ्चमूलकम् ॥
उभयं दशमूलन्तु सन्निपातज्वरापहम् ।
कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ॥
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम् ॥"
इति सुखबोधः ॥

दशयोगभङ्ग , पुं, (दशयोगस्य भङ्गः ।) संस्कारकर्म्मणि नक्षत्रवेधविशेषः । अयं खर्ज्जूरवेधः । यथा,—
"तिथ्यङ्गवेदैकदशोनविंश-
भैकादशाष्टादशविंशकस्थाः ।
रुद्रोडुना सूर्य्ययुतोडुना च
योगाद्गृहे दशयोगभङ्गः ॥
अस्यार्थः । कर्म्मकालीनरविचन्द्राद्युक्तनक्षत्रादरविभुक्तनक्षत्राद्यो योगे यदि एते अङ्काः स्युस्तदा दशयोगभङ्गः स्यात् ॥ अस्य प्रतिप्रसवो यथा,—
"आद्यपादे स्थिते सर्व्वं तुरीयांशं विवर्ज्जयेत् ।
द्वितीयस्मिं तृतीयश्च विपरीतमतोऽन्यथा ॥"
इति ज्योतिस्तत्त्वम् ॥

दशरथ, पुं, (दशसु दिक्षु गतो रथो यस्य ।) इक्ष्वाकुवंशीयराजविशेषः । स अयोध्याधिपतिः । अस्योत्पत्तिर्यथा,—
सौराष्ट्रदेशोद्भवभिक्षुनामद्विजपत्नी कलहा भर्त्रा सह सततं कलहात् गरला प्रेतत्वं गता सा कदाचित् भ्रमन्ती धर्म्मदत्तनामकं द्विजं दृष्ट्वा तत्समीपमागत्य तद्धस्तस्थतुलसीवारिसंसर्गात् पापभावं परित्यज्य तमुवाच हे द्विज । मयि कृपां कुरु अद्य कथं मुक्तिं प्रयास्यामि । धर्म्मदत्तस्तामुवाच तीर्थदानव्रतादिभिः पापानि नश्यन्ति । तेषु ते नाधिकारः तस्मादाजन्मपर्य्यन्तं यत्कृतं मया कार्त्तिकव्रतं तस्य तस्यार्द्धं ददामि इत्युक्त्वा तुलसीमिश्रितजलेन तामसेचयत् द्वादशाक्षरमन्त्रमश्रावयच्च । ततः सा दिव्यरूपा अभवत् । तदा सा दिव्यं विमानमपश्यत् विष्णुगणपुण्यशीलसुशीलाभ्यां सा तद्विमाने आरोहिता । धर्म्मदत्तस्तद्विमानं तौ गणौ च दृष्ट्वा अतिविस्मयेन भूमौ पपात पुण्यशीलसुशीलौ तमुत्थाप्य प्रशस्य ऊचतुः त्वमेतज्जन्मान्ते भार्य्याभ्यां सह वैकुण्ठं यास्यसि । तत्र बहुसहस्रवत्सराणि स्थित्वा पुण्यक्षये सूर्य्यवंशोद्भवदशरथनामा राजा भविष्यसि अनया कलहया सह भार्य्याद्वययुतं त्वां विष्णुः पितृत्वेन स्वीकरिष्यति । इति पाद्मे उत्तरखण्डम् ॥

दशरूपभृत्, पुं, (दश मत्स्यकूर्म्मवराहादीनि रूपाणि बिभर्त्तीति । भृ + क्विप् तुगागमश्च ।) विष्णुः । इति शब्दार्थकल्पतरुः ॥ (दशावतारशब्देऽस्य विशेषो ज्ञेयः ॥)

दशवाजी, [न्] पुं, (दश वाजिनो रथे यस्य ।) चन्द्रः । इति हेमचन्द्रः । २ । १८ ॥

दशहरा, स्त्री, (दश अदत्तोपादानहिंसादिदशविधानि दशजन्मजातानि वा पापानि हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इत्यच् ।

ततष्टाप् ।) ज्येष्ठशुक्लदशमी । यथा, ब्रह्मपुराणब्रह्मवैवर्त्तयोः ।

“ज्येष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता ।
तस्यां स्नानं प्रकुर्व्वीत दानञ्चैव विशेषतः ॥
यां काञ्चित् सरितं प्राप्य दद्याद्दर्भैस्तिलोदकम् ।
मुच्यते दशभिः पापैः सुमहापातकोपमैः ॥

अत्र केवलदशम्यां नदीमात्रे दर्भकरणकतिलतर्पणाङ्गकस्नानाद्दशविधपापक्षयः फलम् । एव दानादावपि । वस्तुतस्तु वक्ष्यमाणभविष्ये जाह्नवीपदश्रवणात् हेतुमन्निगदस्वरसाच्च ब्रह्मवैवर्त्तेऽपि सरित्पदं जाह्नवीपरम् । अन्यथा नानाविधिः स्यात् । यां काञ्चिदिति तु जाह्नवीस्तावकम् । अन्यथा कुल्यास्नानेऽपि दशविधपापक्षयः स्यात् । मन्त्रलिङ्गे जाह्नवीतिपदश्रवणाच्च । गङ्गामधिकृत्य ब्राह्मे ।

‘शुक्लपक्षस्य दशमी ज्येष्ठे मासि द्विजोत्तम ।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥’

अत्र केवलदशम्यां दशविधपापक्षयः फलम् । भविष्ये ।

‘ज्येष्ठशुक्लदशम्यान्तु हस्तयोगेन जाह्नवी ।
हरते दश पापानि तस्माद्दशहरोच्यते ॥’

दशपापानीति दशजन्मकृतानीति । विशेषणीयमाह पराशरभाष्ये यमः ।

‘ज्येष्ठे मासि सिते पक्षे दशम्यां हस्तयोगतः ।
दशजन्माघहा गङ्गा दशपापहरा स्मृता ॥’

अत्र दशजन्मकृतदशविधपापक्षयः फलम् ।

‘प्राप्ते कर्म्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥’

इति न्यायेन हस्तानक्षत्रगङ्गारूपगुणद्वयविशिष्टदशमीविधेर्यस्मिन्नहनि तल्लाभस्तत्र स्नानम् । उभयदिने तु तल्लाभे परदिन एव । अत्रापि पूर्व्वदिने वक्ष्यमाणकुजवारलाभे तत्रापि स्नानं वारस्योभयत्रालाभात् । ततश्च पूर्व्वदिने तथाविधस्नानं कृत्वा परदिने केवलदशम्यामपि दशविधपापक्षयकामेन स्नातव्यम् । ब्रह्म’ ।

‘ज्येष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां
हस्ते शैलान्निरगमदियं जाह्नवी मर्त्त्यलोकम् ।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्य्याः
पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य ॥’

भौमवारहस्तानक्षत्रयुक्तदशम्यां गङ्गास्नानाद्दशविधपापक्षयशतगुणवाजिमेधायुतजन्यपुण्यसमपुण्यं फलम् । राजमार्त्तण्डे वाल्मीकिः ।

‘अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥
एतानि दश पापानि प्रशमं यान्तु जाह्नवि ! ।
स्नातस्य मम ते देवि ! जले विष्णुपदोद्भवे ! ॥
विष्णुपादार्घसम्भूते गङ्गे ! त्रिपथगामिनि ! ।
धर्म्मद्रवीतिविख्याते पापं मे हर जाह्नवि ! ॥’

अत्र मन्त्रत्वेन प्रणवपूर्व्वकाण्येतानि सामान्यस्नानमन्त्रान्ते मज्जनस्यादौ पाठ्यानि । आगन्तुकानामन्ते अभिनिवेश इति न्यायात् मन्त्रान्ते कर्म्मसन्निपात इति न्यायात् मन्त्रान्ते कर्म्मादीनि सन्निपातयेत् इत्यापस्तम्बीयाच्च ॥ * ॥ हिंसापैशुन्यादिभेदमाह कामधेनौ देवलः ।

‘कायक्लेशं मनोदुःखं वधं वा प्राणिनां पुनः ।
यः प्रवर्त्तयति द्वेषात् सा हिंसेति समासतः ॥
यज्ञार्थं ब्राह्मणैर्व्वध्याः प्रशस्ता मृगपक्षिणः ।
भृत्यानाञ्चैव वृत्त्यर्थमगस्त्यो ह्याचरत् पुरा ॥’

यद्यपि परुषवचनमपवादः पैशुन्यमनृतं वृथालापो निष्ठुरवचनमिति वाङ्मयानि षट् । परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषम् ।

‘यच्चान्यत् क्रोधसन्तापत्राससंजननं वचः ।
परुषं तच्च विज्ञेयं यच्चान्यच्च तथाविधम् ॥
चक्षुष्मन्निति शुभाक्षं चण्डालं ब्राह्मणेति च ।
पशंसानिन्दनं द्वेषात् परुषान्न विशिष्यते ॥’ * ॥

तेषामेव परुषवचनानां परोक्षमुदाहरणमपवादः ॥ * ॥ गुरुनृपतिबन्धुमातृमित्रसकाशे अर्थोपघातार्थं दोषोपाख्यानं पैशुन्यम् ॥ * ॥ अनृतं द्विविधं असत्यमसंवादश्चेति ॥ * ॥

‘देशराष्ट्रप्रसङ्गाच्च परार्थपरिकल्पनात् ।
नर्म्महासप्रसङ्गाच्च भाषणं व्यर्थभाषणम् ॥ * ॥
गुह्याङ्गामेध्यसंज्ञानां वचनं निष्ठुरं विदुः ।
यदन्यद्वा वचो नीचं स्त्रीपुंसोर्म्मिथुनाश्रयम् ॥ * ॥
इत्येवं षड्विकल्पस्य दुर्वाक्यस्य भाषणात् ।
इह वामुत्र वा क्रूरमनर्थं प्रतिपद्यते ॥’

प्रशंसया निन्दनं प्रशंसानिन्दनम् । तथाप्यत्र चतुर्व्विधषड्विधयोरविरोधः । समक्षत्वासमक्षत्वभेदानादरेण पारुष्यापवादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च । असम्बद्धप्रलापव्यर्थभाषणयोः पर्य्यायत्वात् नार्थान्तरम् । अभिध्यानमपहरणार्थमिति शेषः । वितथे असत्यभूते वस्तुनि अभिनिवेशः पुनः पुनः सङ्कल्पः ।” इति तिथ्यादितत्त्वम् ॥ * ॥ अपि च ।

“अथ ज्येष्ठशुक्लदशमी दशहरा । तदुक्तं हेमाद्रौ ब्राह्मे ।

“ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ।
हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥

वाराहेऽपि ।

‘दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि ॥
अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा ॥
हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥ * ॥

स्कान्दे तु दशयोगा उक्ताः । यथा,—

‘ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
व्यतीपाते गरानन्दे कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्व्वपापैः प्रमुच्यते ॥’ इति ।

अत्र बुधभौमयोः कल्पभेदेन व्यवस्था । इयञ्च यत्रैव योगबाहुल्यं सैव ग्राह्या । योगाधिक्ये फलाधिक्यात् ॥ * ॥ ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्य्या न तु शुद्धे ।

‘दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।’
इति हेमाद्रौ ऋष्यशृङ्गोक्तेः ॥ * ॥

तथा स्कान्दे ।

‘या काञ्चित् सरितं प्राप्य दद्यादर्घ्यं तिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः ॥’

अत्र विशेषः काशीखण्डे ।

‘ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधिके स्नात्वा मुच्यते सर्व्वपातकैः ॥
एवं सर्व्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आशुक्लपक्षदशमीं प्रतिजन्माघसुत्सृजेत् ॥’

तथा ।

‘लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्ज्जितैः पापैस्त्यज्यते नात्र संशयः ॥’

तथा भविष्योत्तरकाशीखण्डयोः ।

‘निशायां जागरं कृत्वा समुपोष्य च भक्तितः ।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसङ्ख्यया ॥
तथा दीपैश्च ताम्बूलैः पूजयेत् श्रद्धयान्वितः ।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥
दशप्रसृतिकृष्णांश्च तिलान् सर्पिश्च वै जले ।
शक्तुपिण्डान् गुडपिण्डान् दद्याच्च दशसङ्ख्यया ॥
ततो गङ्गातटे रम्ये हेम्ना रूप्येण वा तथा ।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ॥
संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि वा ।
अथ तत्राप्यशक्तश्चेत् लिखेत् पिष्टेन वै भुवि ॥
वक्ष्यमाणेन मन्त्रेण कुर्य्यात् पूजां विशेषतः ।
नारायणं महेशञ्च ब्रह्माणं भास्करं तथा ॥
भगीरथञ्च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिः सम्यक् यथाशक्ति प्रपूजयेत् ॥
दशप्रस्थान् तिलान् दद्यात् दशविप्रेभ्य एव च ।
दशप्रस्थान् यवान् दद्यात् दशसङ्ख्यागवीस्तथा ॥’

प्रस्थाः षोडशपलानि । पलन्तु । मुष्टिमात्रं पलं स्मृतमिति महार्णवे उक्तम् ।

‘मत्स्यकच्छपमण्डूकमकरादिजलेचरान् ।
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ॥
तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः ।
गङ्गायां प्रक्षिपेदाज्यदीपांश्चैव प्रवाहयेत् ॥
पुष्पाद्यैः पूजयेद् गङ्गां मन्त्रेणानेन भक्तितः ।
ओँ नमः शिवायै नारायण्यै
दशहरायै गङ्गायै नमो नमः ।
इति मन्त्रन्तु यो मर्त्त्यो दिने तस्मिन् दिवानिशम् ।
जपेत् पञ्चसहस्राणि दशधर्म्मफलं लभेत् ॥’ * ॥

काशीखण्डे त्वन्यो मन्त्र उक्तः ।

‘नमः शिवायै प्रथमं नारायण्यै पदं ततः ।
दशहरायै पदमिति गङ्गायै मन्त्र एष वै ॥
स्वाहान्तः प्रणवादिश्च भवेद्विंशाक्षरो मनुः ।
पूजा दानं जपो होमस्तेनैव मनुना स्मृतः ॥’ इति

अत्र गङ्गास्तोत्रपाठमपि दशवारं कुर्य्यात् । तदुक्तं भविष्ये ।

‘तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः ।
यः पठेत् दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥

सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः ।' इति
ज्योतिष प्रतिपदादिदशमीपर्य्यन्तदिनवृद्धिसंख्यया
पठनीयमिति शिष्टाः ॥ अत्र सर्व्वोऽपि विस्तर'
स्तोत्रादिश्च भट्टकृतत्रिस्थलीसेतोरवधेयः ।
विस्तरभीतेस्तु न लिख्यते ॥ * ॥ एवं कुर्व्वतः
फलमुक्तं काशीखण्डे ।
'एवं कृत्वा विधानेन वित्तशाठ्यविवर्ज्जितः ।
उपवासी वक्ष्यमाणैर्दशपापैः प्रमुच्यते ॥
सर्व्वान् कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥'
इति ।
अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिनत्वात् विशे-
षेण पूजा कार्य्या । तदुक्तं स्कान्दे सेतुमाहात्म्ये ।
'ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥
दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम् ।
रामो वै स्थापयामास शिवलिङ्गमनुत्तममिति ॥"
इति निर्णयसिन्धुद्वितीयपरिच्छेदे संवत्सर-
कृत्यम् ॥ किञ्च ।
"अद्य हस्ते तु नक्षत्रे दशम्यां ज्यैष्ठके सिते ।
दशपापहरायाश्च अदत्तादानकल्मषम् ॥
विरुद्धाचरणं हिंसा परदारोपसेवनम् ।
पारुष्यानृतपैशुन्यमसम्बद्धञ्च भाषणम् ॥
परद्रव्याभिध्यानञ्च मनसानिष्टचिन्तनम् ।
एतद्दशाघघाताय गङ्गास्नानं करोम्यहम् ॥"
इति गारुडे २१५ अध्याय ॥ * ॥
अपरञ्च ।
"ज्यैष्ठे दशहरायान्तु विष्णोरिष्टिं नृप । शृणु ।
येन वा विधिना कार्य्या सेष्टिर्व्विष्णोर्नृपैः सदा ॥
प्रथमं पार्थिवः कुर्य्यात् प्रतिमां काञ्चनीं हरेः ।
अन्यतैजोमयीं वापि दारवीं वा शिलामयीम् ॥
प्रतिष्ठां विधिवत्तस्याः कुर्य्याद्विप्र पुरोहितः ।
तां संस्थाप्य सुरागारे स्वयं वा यत्नतः कृते ॥
वासुदेवस्य बीजेन पूर्व्वोक्तविधिना तथा ।
सर्व्वोपचारैर्भक्त्या तु वासुदेवं प्रपूजयेत् ॥
पूजान्ते संस्कृते वह्नौ कुण्डमध्ये स्थितो द्विजः ।
आज्यैः सहस्रं जुहुयादाहुतीनां हरेः कृते ॥
संपूज्य वासुदेवन्तु होमं कृत्वा ततो द्विज ।
नृपस्यानुमते तान्तु प्रतिमां मण्डलं नयेत् ॥
प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्व्वीत तस्यां देवस्य वै हरेः ॥
कृतायान्तु प्रतिष्ठायां प्राणानां नृपसत्तम ।
विष्णोः प्राणास्तु प्रतिमामायान्ति नियतं स्वयम् ॥
प्राणेष्वथागतेषु स्याद्देवत्वं नियतं भवेत् ।
अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ।
यथा पूर्व्वं तथा भावः स्वर्णादीनां न विष्णुता ॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ! ।
प्राणप्रतिष्ठा कर्त्तव्या तस्यां देवत्वसिद्धये ॥
सुवर्णन्तु सुवर्णं स्यात् शिला दारु तथा शिला ।
अन्यच्च शुद्धरूपं स्यात् प्राणस्थानन्तते सदा ॥
वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च ।
तथैवाङ्गाङ्गिमन्त्राभ्यां प्रतिष्ठामाचरेद्धरेः ॥
तथैव हृदयेऽङ्गुष्ठं दत्त्वा प्राणञ्च मन्त्रवित् ।
एभिर्म्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत् ॥
अस्मै प्राणाः प्रतिष्ठन्तु अस्मै प्राणाः क्षरन्तु च ।
अस्मै देवत्वसंख्यायै स्वाहेति यजुरुच्चरन् ॥
अङ्गमन्त्रैरङ्गिमन्त्रैर्व्वैदिकैरित्यनेन च ।
प्राणप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत् ॥
प्रतिमापूजने कुर्य्यादात्मन्यपि च मन्त्रवित् ।
प्राणप्रतिष्ठां प्रथमं पूजाभागविशुद्धये ॥
अस्थितं प्राणप्रतिष्ठान्तु प्रतिमापूजनाद्धरेः ।
न कश्चित्तु बुधः कुर्य्यात् कृत्वा मृत्युमवाप्नुयात् ॥
विष्णोरिष्टिमिमां कृत्वा दशम्यां पार्थिवोत्तमः ।
तस्यामेव तु पूर्णायां प्रतिमां स्थापयेत्ततः ॥
एवं दशहरायान्तु कृत्वेष्टिं पार्थिवो हरेः ।
सर्व्वान् कामानवाप्नोति निर्व्विघ्नोऽपि स जायते ॥"
इति कालिकापुराणे ८६ अध्यायः ॥

दशा, स्त्री, (दशतीव । दन्श + भूलविभुजादित्वात् कः । जपषभदहदशेति निर्द्देशात् अकित्यपि नलोपः । यद्वा, दश्यते इति । गुरोश्चेत्यङ् । ततष्टाप् ।) अवस्था । (यथा, पञ्चतन्त्रे ।१।३८९।
"आपदि येनोपकृतं येन च हसितं दशासु
विषमासु ।
उपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥")
दीपवर्त्तिः । (यथा, कुमारे । ४ । ३० ।
"अहमस्य दशेव पश्य मा-
मविषह्यव्यसनेन धूमिताम् ॥")
वस्त्रान्ते वहुवचनान्तोऽयं शब्दः । इति मेदिनी ।
शे, ८ ॥ (यथा, मनुः । ३ । ४४ ।
"वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ॥")
चेतः । इत्यजयपालः ॥ * ॥ शरीरस्य दश
दशा यथा,—
गर्भवासः १ जन्म २ बाल्यम् ३ कौमारम् ४ पौगण्डम् ५ यौवनम् ६ स्थाविर्य्यम् ७ जरा ८ प्राणरोधः ९ नाशः १० । इति मोक्षधर्म्मटीकायां नीलकण्ठः ॥ * ॥ कामजदशदशा यथा,
"चक्षूरागस्ततस्तु मनसः सङ्गतिर्भावना च
व्यावृत्तिः स्यात्ततस्तु विषयग्रामतश्चेतसोऽपि ।
निद्राच्छेदस्तदनु तनुता निस्त्रपत्वं ततोऽनू-
न्मादो मूर्च्छा तदनु मरणं स्युर्दशा प्रक्रमेण ॥"
इत्यलङ्कारशास्त्रम् ॥ * ॥
कलौ नराणां यथोक्तायुः सूर्य्यादयष्टग्रहभोग्याष्टभागविशेषः । तत्र नाक्षत्रिकी दशा यथा,—
"षट् सूर्य्यस्य दशा ज्ञेया शशिनो दशपञ्च च ।
अष्टावङ्गारके प्रोक्ता बुधे सप्तदश स्मृता ॥
शनैश्चरे दश प्रोक्ता गुरोरेकोनविंशतिः ।
राहोर्द्वादशवर्षाणि भृगोरेकविंशतिः ॥" * ॥
जन्मकालीननक्षत्रविशेषघटितग्रहाणां दशानियमो यथा,—
"कृत्तिकादित्रये सूर्य्यः शशी रौद्रचतुष्टये ।
मघादित्रितये भौमो बुधो हस्तचतुष्टये ॥
अनुराधात्रये शौरिर्गुरुः पूर्व्वचतुष्टये ।
धनिष्ठात्रितये राहुः शेषे शुक्रचतुष्टये ॥ * ॥
सूर्य्योपश्लवभौमार्किदशाऽतिकष्टदा नृणाम् ।
गुरुचन्द्रज्ञशुक्राणां यथेप्सितफलप्रदा ॥"
दशाफलन्तु ।
"उद्विग्नचित्तपरिखेदितवित्तनाश-
क्लेशप्रवासगदभीतिमहाभिघातैः ।
सञ्चोभित स्वजनबन्धुवियोगदुःखै-
र्भानोर्दशा भवति कष्टकरी नराणाम् ॥१॥
सौख्यं बिभर्त्ति वरवाहनयानरत्न-
कीर्त्तिप्रतापबलवीर्य्यशुभान्वितञ्च ।
मिष्टान्नपानशयनासनभोजनानि
चन्द्रो ददाति धनकाञ्चनभूमिसद्म ॥ २ ॥
शास्त्राभिघातवधबन्धनरेन्द्रपीडां
चिन्ताज्वरं विकलताञ्च गृहे करोति ।
चौराग्निदाहभयभङ्गविपत्तिरोग-
कीर्त्तिप्रतापधनहा च दशा कुजस्य ॥ ३ ॥
दिव्याङ्गनावदनपङ्कजषट्पदत्व
लीलाविलासशयनासनभोजनञ्च ।
नानाप्रकारविभवागमकोषवृद्धिः
क्षिप्रं भवेद्बुधदशासु हितार्थसिद्धिः ॥ ४ ॥
मिथ्यापवादवधबन्धनकार्य्यहानि-
र्मातृस्वसृसुतप्रियसुखद्रविणैर्विहीनः ।
मैत्रे च वैरमभिवाञ्छति वैरयुक्त'
कष्टासु पापदशासु शनैश्चरस्य ॥ ५ ॥
रम्य गृह विनयसञ्चयमानवृद्धि
प्राप्नोति सौख्यधनधान्यविभूतियुक्तम् ।
धर्म्मार्थकामसुखभोगवपुःप्रयोगं
यावद्गुरोरतिदशां पुरुषो हि तावत् ॥ ६ ॥
बुद्ध्या विहीनमतिनाशवियोगदुःख-
नष्टार्थसिद्धिभयभङ्गविपत्तिरोगम् ।
सन्तापशोकपरदेशगतं करोति
राहोर्दशा भवति जीवनसंशयाय ॥ ७ ॥
मन्त्रप्रभावनिपुणः प्रमदाविलास
श्वेतातपत्रनृपपूजितदेशलाभः ।
हस्त्यश्वलाभधनपूर्णमनोरथश्च
शौक्रीदशा भवति निश्चितराजलक्ष्मीः ॥८॥
रवेरन्तर्दशा मासाः ४ तस्य फलम् ।
उद्विग्नचित्तपरिखेदितवित्तनाश-
क्लेशप्रवासगदभीतिमहाभिघातान् ।
दुःखप्रयोगवधबन्धभयानि चैव
भानोर्दशा प्रकुरुते खलु राजपीडाम् ॥ १ ॥
सोमस्य मासाः १० फलम् ।
गदसङ्कटसन्त्रास खेच्छाहानि मनःक्षतिम् ।
कुरुते रजनीनाथो भानोरन्तर्दशां गतः ॥ २ ॥
मङ्गलस्य मासाः ५ दिनम् १० फलम् ।
सर्व्वेषां तिलको भूत्वा मणिरत्नप्रधानकम् ।
प्राप्नोति धनधान्यानि रवेरन्तर्गते कुजे ॥ ३ ॥
बुधस्य मासाः ११ दिनम् १० फलम् ।
व्याधि शत्रुभयं नित्यं सर्व्वगात्रे विचर्च्चिका ।
नश्यन्ति सर्व्वकार्य्याणि भानोरन्तर्गते बुधे ॥४॥
शनेर्मासाः ६ दिनम् २० फलम् ।
सन्ताप वित्तनाशञ्च बन्धुनाशं पराजयम् ।
सौरिः करोति वैकल्यं भानोरन्तर्दशां गतः ॥५॥

गुरोर्वर्षः १ दिनम् २० फलम् ।
धर्म्मार्थकामसौख्यानि ददाति विबुधार्चितः ।
कुजादित्याधिहन्ता च भानोःपाकदशां गतः ॥६॥
राहोर्मासाः ८ फलम् ।
अशुभाशुभवं द्वेषं व्याधिभीतिसुतक्षयान् ।
कुरुते सिंहिकासूनू रविपाकदशां गतः ॥ ७ ॥
शुक्रस्य वर्षः १ मासौ २ फलम् ।
कोष्ठग्रीवाशिरोरोगज्वरान् शूलादिदारुणान् ।
शोकं करोति भृगुजः सूर्य्यस्यान्तर्दशां गतः ॥८॥
एव वर्षाः ६ ॥ * ॥ चन्द्रस्य स्थूलदशावर्षाः १५
तस्यैवान्तर्दशावर्षौ २ मासः १ फलम् ।

कुर्य्याद्विभूतिवरवाहनमातपत्र-
क्षेमप्रतापबलवीर्य्यसमन्वितानि ।
मिष्टान्नपानशयनासनभोजनानि
चान्द्री दशा प्रचुरकाञ्चनभूमिदात्री ॥

कुजस्य वर्षः १ मास. १ दिनानि १० फलम् ।
पित्तशोणितपीडाश्च चौरादीनां भयन्तथा ।
मङ्गलः कुरुते नित्यं विधोरन्तर्दशां गत' ॥
बुधस्य वर्षौ २ मासाः ४ दिनानि १० फलम् ।
सर्व्वत्र द्रव्यलाभश्च गजाश्वगोधनानि च ।
चन्द्रजः कुरुते सौख्यं विधोरन्तर्दशाङ्गत. ॥
शनेर्वर्षः १ मासाः ४ दिनानि २० फलम् ।
बन्धुक्लेशं नृपाद्भीतिं व्यसन शोकसम्पदम् ।
विनाशं कुरुते सौरिश्चन्द्रस्यान्तर्दशाङ्गतः ॥
गुरोर्वर्षौ २ मासाः ७ दिनानि २० फलम् ।
दानसौख्यानि सम्भोग वस्त्रालङ्कारभूषणम् ।
कुरुते विबुधाचार्य्यो विधोरन्तर्दशाङ्गतः ।
राहोर्व्वर्षः १ मासाः ८ फलम् ॥
वह्निशत्रुभय दुःख शोक वन्धुधनक्षयम् ।
कुरुते राहुरत्यर्थं चन्द्रपाकदशाङ्गतः ॥
शुक्रस्य वर्षौ २ मासाः ११ फलम् ।
सेवते वरनारीभिर्नरो लक्ष्मीश्च वर्द्धते ।
मुक्ताहारमणिप्राप्तिर्विधोरन्तर्गते स्थिते ॥
रवेर्मासाः १० फलम् ।
ऐश्वर्य्यं बहुसौख्यञ्च व्याधिनाशमरिक्षयम् ।
नृपतेजो रविः कुर्य्याद्विधोः पाकदशाङ्गतः ॥
एवं वर्षाः १५ ॥*॥ कुजस्य स्थूलदशावर्षाः ८ ।
तस्यान्तर्दशामासाः ७ दिनानि ३।२०। फलम् ।

क्रूराभिघातवधबन्धभयानि धत्ते
चिन्ताज्वरं विकलशून्यगृहाश्रमञ्च ।
चौराग्निभीतिधनहानिनरेन्द्रपीडाः
कुर्य्याद्विनाशनिधनञ्च दशा कुजस्य ॥

बुधस्य वर्षः १ । ३ । ३ । २० । फलम् ।
परमैश्वर्य्यमतुल नानाविधसुखाश्रयम् ।
करोति सोमपुत्रश्च क्षितिजान्तर्दशाङ्गतः ॥
शनेर्मासाः ८ । २६ । ४० । फलम् ।
रिपुचौराग्निभीतिश्च रोगमन्तरसम्भवम् ।
महाजनकृतो द्वेषः कुजस्यान्तर्गते शनौ ॥
गुरोर्वर्षः १ । ४ । २३ । ४० । फलम् ।
पुष्पधूपान्नवस्त्राद्यैर्देवब्राह्मणपूजनम् ।
नृपतुल्यत्वमाप्नोति कुजस्यान्तर्गते गुरौ ॥
राहोर्मासाः १० । २० । फलम् ।
व्यात्मकार्य्यार्थमुद्वेगं बन्धचौरादिशाध्वसम् ।
कुरुते सिंहिकापुत्रो भौमस्यान्तर्दशाङ्गतः ॥
शुक्रस्य वर्षः १ । ६ । २० । फलम् ।
धनवृद्धिं सुखादींश्च नानावस्त्रं वरस्त्रियः ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते भृगौ ॥
रवेर्मासाः ५ । १० । फलम् ।
नानारत्नञ्च सौख्यञ्च भूमिलाभमथापि वा ।
नृपपूजामवाप्नोति कुजस्यान्तर्गते रवौ ॥
सोमस्य वर्षः १ । १ । १० । फलम् ।
धनलाभं सुख भोगं शरीरारोग्यमेव च ।
लोकानन्त्रमवाप्नोति क्षितिजान्तर्गते विधौ ॥
एवं वर्षाः ८ ॥*॥ बुधस्य स्थूलदशावर्षाः १७ ।
तस्यान्तर्दशा २ । ८ । ३ । २० । फलम् ।

दिव्याङ्गनावदनपङ्कजषट्पदत्वं
लीलाविलासवरभोगसुखोदयञ्च ।
नानाप्रकारविभवागमकोषवृद्धिं
क्षिप्रं तनोति बुधदशा प्रबलाश्च सिद्धिम् ॥

शनेर्वर्षः १ । ५ । २६ । ४० । फलम् ।
वातश्लेष्मकृता पीडा विरहो बन्धुभिः सह ।
विदेशगमनञ्चैव बुधस्यान्तर्गते शनौ ॥
गुरोर्वर्षौ २ । ११ । २६ । ४० । फलम् ।
व्याधिशत्रुभयत्यक्तो धनाढ्यो नृपवल्लभः ।
लभेद्भार्य्यां सुपुत्रञ्च बुधस्यान्तर्गते गुरौ ॥
राहोर्वर्षः १ । १० । २० । फलम् ।
बन्धुनाशं मनस्तापं देशत्यागञ्च बन्धनम् ।
करोति बहुदुःखानि बुधस्यान्तर्गतस्तमः ॥
शुक्रस्य वर्षाः ३ । ३ । २० । फलम् ।
धनाढ्य बन्धुपुत्रञ्च धर्म्मवत्त्वं धनागमम् ।
कुरुते दानवाचार्य्यो बुधपाकदशाङ्गतः ॥
रवेर्मासाः ११ दिनानि १० । फलम् ।
श्रिया परमया युक्तो गजवाजिधनान्वितः ।
प्रभाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
सोमस्य वर्षौ २ । ४ । १० । फलम् ।
कण्टकादिप्रवेशश्च शृङ्गिभ्यो भयमेव च ।
निशाकर' करोत्याशु बुधपाकदशाङ्गतः ॥
कुजस्य वर्षः १ । ३ । ३ । २० । फलम् ।
कफपित्तसमुद्भूता शिरःपीडा भयावहाम् ।
माहेयः कुरुते शोकं बुधस्यान्तर्दशाङ्गतः ॥
एव वर्षाः १७ ॥*॥ शनेः स्थूलदशावर्षाः १० ।
तस्यान्तर्दशामासाः ११ । ३ । २० । फलम् ।

मिथ्यापवादवधबन्धनिराश्रयत्वं
चौरादिभूपतिभुजङ्गमभीतिमुग्राम् ।
आशानिराशमथ चार्ज्जनकार्य्यहानिं
मन्दोदशा प्रकुरुते नियत नराणाम् ॥

गुरोर्वर्षः १ । ६ । ३ । २० । फलम् ।
देवतासुरतं शान्त नानाप्राप्तिं करोति च ।
तुङ्गसौख्यसमायुक्तं मन्दोरन्तर्गतो गुरुः ॥
राहोर्व्वर्षः १ । १ । १० । फलम् ।
नृपाद्भय ज्वरं घोरं दुःखञ्च प्रायसम्भयम् ।
धनक्षयञ्च कुरुते शनेरन्तर्गतस्तमः ॥
शुक्रस्य वर्षः १ । ११ । १० । फलम् ।
सुहृद्बन्धुधनैः पूर्णो भार्य्याविक्तसमन्वितः ।
स्वर्गं सुखञ्च लभते सौरस्यान्तर्गते स्थिते ॥
रवेर्मासाः ६ । २० । फलम् ।
परदाराभिगमनं करोति खरदीधितिः ।
जीवनस्य च सन्देहं शनेरन्तर्दशाङ्गतः ॥
सोमस्य वर्षः १ । ४ । २० । फलम् ।
स्त्रीनाशं कुक्षिरोगञ्च कफपित्तगदं शशी ।
बन्धुद्वेषञ्च कुरुते मन्दोरन्तर्दशाङ्गतः ॥
कुजस्य मासाः ८ । २६ । ४० । फलम् ।
देहक्लेशं महारोगं नानादुःखानि भूमिजः ।
धननाशञ्च कुरुते शनेरन्तर्दशाङ्गतः ॥
बुधस्य वर्षः १ । ६ । २६ । ४० । फलम् ।
आरोग्यं विजयं राज्यं बहुवित्तानि सोमजः ।
करोति त्वादरं लोके शनेरन्तर्दशाङ्गतः ॥
एव वर्षाः १० ॥*॥ गुरोः स्थूलदशावर्षाः १६ ।
तस्यैवान्तर्दशावर्षाः ३ । ४ । ३ । २० । फलम् ।

राज्याश्रद तनयवित्तविलासभोगान्
पर्य्याप्तसौख्यधनधान्यसमाश्रयञ्च ।
विद्याप्रसादवररत्नसुखार्थभोग-
सिद्धिं दशा सुरगुरोः कुरुते प्रियत्वम् ॥

राहोर्वर्षौ २ । १ । १० । फलम् ।
बन्धुद्वेषं त्वपवाद स्थानभ्रंशं निराश्रयम् ।
कलहं कारयेद्राहुर्गुरोरन्तर्दशाङ्गतः ॥
शुक्रस्य वर्षाः ३ । ८ । १० । फलम् ।
कलहं बन्धुभिः सार्द्धं वित्तनाशं मनःक्षतिम् ।
स्त्रीवियोगञ्च कुरुते जीवस्यान्तर्गतः स्थितः ॥
रवेर्वर्षः १ । दिनानि २० । फलम् ।
बहुमित्रं बहुधन सौभाग्यं राजवल्लभम् ।
कुरुते भास्करः शान्ति गुरोरन्तर्दशाङ्गतः ॥
सोमस्य वर्षौ २ । ७ । २० । फलम् ।
भोगाढ्यो बहुभार्य्यः स्याद्रिपुरोगविवर्ज्जितः ।
नृपतुल्यो भवेच्चैव गुरोरन्तर्दशाङ्गतः ॥
कुजस्य वर्षः १ । ४ । २६ । ४० । फलम् ।
तीक्ष्णरोषो रिपोर्हन्ता गजवह्नीमदर्शन' ।
सुखसौभाग्यसंयुक्तः कुजे चान्तर्गते गुरो' ॥
बुधस्य वर्षौ २ । ११ । २६ । ४० । फलम् ।
सुस्थोऽसुस्थःसुखी दुःखी शत्रुवृद्धिः पुनःपुनः ।
देवार्चनपरो नित्य जीवस्यान्तर्गते बुधे ॥
शनेर्वर्षः १ । ६ । ३ । २० । फलम् ।
वेश्याजनाश्रयात् सौख्य भवेद्वित्तविवर्ज्जितः ।
सुप्रनीतिमना नित्यं गुरोरन्तर्गते शनौ ॥
एव वर्षाः १६ ॥ * ॥ राहोः स्थूलदशावर्षाः
१२ । तस्यान्तर्दशावर्षः १ । ४ । फलम् ।

भार्य्यादिदूषण-निदानविवादबन्ध-
शस्त्राभिघातभयहीनपराक्रमञ्च ।
चप्राप्तसौख्यधनकाञ्चनदीनदेहो
राहोर्दशा भवति जीवनसंशयाय ॥

शुक्रस्य वर्षौ २ । मासा' ४ । फलम् ।
शिरोरोगं कुदेहञ्च कुर्य्याद्भार्य्याञ्च चञ्चलाम् ।
बान्धवे कलहो नित्य राहोरन्तर्गते भृगौ ॥
रवेर्मासाः ८ । फलम् ।
शिरोरोगभय घोरं मृत्यु शोकञ्च दारुणम् ।
दुष्टदग्निभय कुर्य्याद्राहोरन्तर्गतो रवि. ॥

सोमस्य वर्षः १ । ८ । फलम् ।
स्त्रीपुत्त्रकलत्रहर्षेण चित्तमाशां मनःप्रतिम् ।
करोति क्षेममत्यर्थं राहोरन्तर्गते विधुः ॥
कुजस्य मासाः १० । २० । फलम् ।
विषशस्त्राग्निचौरेभ्यो नियतं दारुणं भयम् ।
मासस्यान्तर्गतः कुर्य्याद्राहोर्भूमिनन्दनः ॥
बुधस्य वर्षः १ । १० । २० । फलम् ।
ज्वरस्तुद्धमिसपीडा कलहं स्वजनैः सह ।
भयापत्तिं विद्विषं कुर्य्यात् मासान्तरे बुध. ॥
शनेर्वर्षः १ । १ । १० । फलम् ।
स्त्रीपुत्रैः कलहो नित्यं बान्धवैः सह वैरिता ।
भवेत् बहुधा दुःख राहोरन्तर्गते शनौ ॥
गुरोर्वर्षौ २ । १ । १० । फलम् ।
व्याधिदुःखभयैस्त्यक्तो देवब्राह्मणपूजकः ।
कार्य्यसिद्धिर्भवेदिष्टा राहोरन्तर्गते गुरौ ॥
एव वर्षाः १२ ॥ ● ॥ शुक्रस्य स्वलदशावर्षाः २१ ।
तस्यान्तर्दशावर्षाः ४ । १ । फलम् ।
मत्तपचारवरतीवरप्रमदाविलास-
सम्मानदानदमपूजनकोषलाभान् ।
दद्यात्प्रयाणपरिपूर्णमनोरथञ्च
शौक्री दशा स्वजति नित्यवराजलक्ष्मीम् ॥
रवेर्वर्षः १ । फलम् ।
देहक्षीणत्वमाक्रान्तक्षीणतापो ज्वरान्वितः ।
व्यक्तः स्याद्बान्धवैः सर्व्वैर्भार्गवान्तर्गते रवौ ॥
सोमस्य वर्षौ २ । ११ । फलम् ।
सम्मानमाप्नो रोगश्च काम्यनाशश्च नित्यशः ।
शुक्रस्यान्तर्गते चन्द्रे क्षीणाशो नियतं भवेत् ॥
कुजस्य वर्षः १ । ६ । २० । फलम् ।
उत्साही धनधान्याढ्यः कल्याश्च सुमनाः सुखी ।
भूमिलाभो भवेच्चैव शुक्रस्यान्तर्गते कुजे ॥
बुधस्य वर्षाः ३ । ३ । २० । फलम् ।
सर्व्वत्र लभते सौख्यं मानसञ्चयभूषणम् ।
भार्य्या सुशीलतामेति भार्गवान्तर्गते बुधे ॥
शनेर्वर्षं १ । ११ । १० । फलम् ।
शत्रुक्षयमवाप्नोति मित्रवृद्धिश्च जायते ।
चौरादिभयस्य लाभ. स्यात् शुक्रस्यान्तर्गते शनौ ॥
गुरोर्वर्षाः ३ । ८ । १० । फलम् ।
राजपूजा सुखं प्रीतिः कन्याजननमेव च ।
भार्गवान्तर्गते जीवे चौराद्भयश्च लभ्यते ॥
राहोर्वर्षौ २ । ४ । फलम् ।
बन्धनं बन्धुपुत्राद्यैर्वन्धुनाशो रिपोर्भयम् ।
शरीरे दैन्यमाप्नोति भृगोरन्तर्गते तमः ॥
एवं वर्षाः २१ । इत्यन्तर्दशाकथनम् ॥ ● ॥
अथ प्रत्यन्तर्दशा ।
यदान्तरं दिन कृत्वा षष्टिलब्धं ध्रुवं भवेत् ।
ध्रुवाद्धि गणयेद्धीमान् रव्यादेः क्रमतो यथा ॥
रवौ च वेदा वसवः सुधांशौ
कुजे च बाणाः शशिजे तथाङ्काः ।
शनावतुर्दिक् च बृहस्पतौ स्या-
द्राहौ तुरङ्गा भृगुजे च रुद्राः ॥
प्रत्यन्तर्दशामासान् दिनीकृत्य गुणाद्धतान् ।
ध्रुवकेण विभाजीयात् प्रत्यन्तर्दशावासरान् ॥

इति प्रत्यन्तर्दशा ।” इति ज्योतिस्तत्त्वम् ॥ ● ॥
युगभेदे दशाविशेषा यथा,—
“सत्ये जयदशा चैव त्रेतायां हरगौरिका ।
द्वापरे योगिनी चैव कलौ नाक्षत्रिकी दशा ॥”
इति समयामृतम् ॥ ● ॥
दशधा दशा यथा,—
योगिनी १ पार्थिकी २ नाक्षत्रिकी ३ लाग्निकी
४ सकुन्दा ५ विंशोत्तरा ६ विंशोत्तरा ७
पताकी ८ हरगौरी ९ दिनदशा १० । इति
जातकरत्नम् ॥
दशाकर्षः, पुं (दशया वर्त्त्या आकर्षति तैलादिक-
मिति । आ+कृष्+घञ् ।) प्रदीपः । इति
हैमचन्द्रः । ३ । ३५१ ॥
दशाकर्षी, [न्] पुं, (दशया आकर्षतीति । दशा+
कृष्+णिनिः ।) प्रदीपः । इति हारावली ।२४॥
दशाङ्गुल, क्ली, (दश अङ्गुलय इव शिराविच्छदानि
फलत्वगुपरि सन्त्यस्येति । अच् ।) खर्ब्बूजम् ।
इति भावप्रकाशः ॥ (दश अङ्गुलयः परि-
माणमस्येति सङ्ख्यापूर्व्वत्वात् द्विगोः ठञ् तस्य लुक्
समासान्तः अच्प्रत्ययः । दशाङ्गुलपरिमिते,
त्रि । यथा, मनु । ८ । २७१ ।
“नामजातिग्रहं त्वेषामभिद्रोहेण कुर्व्वतः ।
निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥”
यथा च ऋग्वेदे । १० । ९० । १ ।
“सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥”
‘विश्वतः सर्व्वतो वृत्वा परिवेष्ट्य दशाङ्गुलं दशा-
ङ्गुलपरिमितं देशमत्यतिष्ठत् ।” इति तद्भाष्ये
सायनः ॥”)
दशानन., पु, (दश आननानि वदनानि यस्य ।)
रावणः । इति शब्दरत्नावली ॥ (दश आन-
नानि इति विग्रहे दशवदनेऽपि, क्ली । यथा,
“शुष्यत् कुले खञ्जनगञ्जनाचि !
शिरो मदीयं यदि याति यातु ।
नूनानि नूनं जनकात्मजार्थे
दशाननेनापि दशाननानि ॥”
इत्युद्भटः ॥)
दशानिकः, पुं, (अन्यते इति भावे घञ् आनो
जीवनम् । तस्मिन् हितः आनिक. । दशायां
अवस्थाविशेषे आनिकः ।) दन्तीवृक्षः । इति
शब्दचन्द्रिका ॥
दशारुहा, स्त्री, (दशसु दिक्षु आरोहति अङ्गै-
र्व्याप्नोतीति । आ+रुह+क. ।) कैवर्त्तिका ।
इति राजनिर्घण्टः ॥
दशार्णः, पु, (दश ऋणानि दुर्गभूमयो जलाधारा
वा यत्र । “ऋणेदशभ्यान्च ।” ६ । ४ । ९५ । इत्यस्य
“प्रवत्सतरकम्बलवसनार्णदशानामृणे ॥” इति
वार्त्तिकोक्त्या वृद्धिः ।) देशविशेषः । स विन्ध्य-
पर्व्वतस्य पूर्व्वदक्षिणस्यां दिशि वर्त्तते । (यथा,
हरिवंशे हरिवंशे । १४ । १० ।
“किष्किन्धकाटकमलकनिषादराष्ट्राणि पुलिक-
दशार्णाः ॥”

तदस्याभिजनः तस्य राजा वा अण् । तद्देश-
वासिनि तन्नृपतौ च त्रि । यथा, महाभारते ।
१ । ११३ । २५ ।
“पूर्व्वमागस्कृतो गत्वा दशार्णाः समरे जिताः ।
पाण्डुना नरसिंहेन कौरवाणां यशोऽभृता ॥”
दश अर्णांसि दुर्गाणि यत्र । दशार्णसमुद्र-
विशेषः । यथा, गौतमीयतन्त्रे । २ अध्याये ।
“दशानामपि सर्वार्णां मात्रा वेदा यथाक्रमम् ।
दशार्णर इति ख्यातो मन्त्रराजः परात्परः ॥
गुणबीजस्वभावत्वात् दशार्णं इति कथ्यते ॥”)
नदीविशेषे, स्त्री । इति शब्दार्थकल्पतरुः ॥
दशार्हः, पुं, (दशसु दानादिदशकेषु अर्हः ।)
बुद्धः । यदुदेशः । (क्रोष्टुवंशीयराजपुत्रविशेषः ।
यथा, हरिवंशे । ३६ । ७५ ।
“धृष्टस्य जज्ञिरे शूराश्रयः परमधार्म्मिकाः ।
आप्तनाम दशार्हश्च सर्वो विश्वहरश्च यः ॥”)
तद्देशस्थे, पुं भूम्नि । इति त्रिकाण्डशेषः ॥ (यथा,
महाभारते । ५ । १८ । २० ।
“तमर्च्चितं सर्व्वदशार्हपुङ्ग-
राशीविषाभिज्वलनप्रकाशम् ॥”)
दशावतार’, पु (दश अवतारा यस्य ।) विष्णुः ।
इति त्रिकाण्डशेषः ॥ तस्य दशावतारा यथा,—
मत्स्यः१ कूर्म्मः२ वराहः३ नृसिंहः४ वामनः५
जामदग्न्यः६ रामः७ कृष्णः८ बुद्धः९ कल्की१० ।
इति वराहपुराणम् ॥ अपि च ।
“धर्म्मान्नारायणस्यांशः संभूतश्चाक्षुषेऽन्तरे ।
यज्ञञ्च वर्त्तयामासुर्देवा वैवस्वतेऽन्तरे ॥
प्रादुर्भावे ततस्तस्य ब्रह्मा ह्यासीत् पुरोहितः ।
युगाख्यायाञ्च तुर्य्यायां आपन्नेषु सुरेषु वै ॥
सम्भूतः स समुद्रान्ते हिरण्यकशिपोर्वधे ।
द्वितीये नरसिंहाख्ये रुद्रो ह्यासीत् पुरोहितः ॥
बलिसंस्थेषु लोकेषु त्रेतायां सप्तमं प्रति ।
तृतीये वामनस्यार्थे धर्म्मेण तु पुरोधसा ॥
एतास्तिस्रः स्मृतास्तस्य दिव्याः सम्भूतयो द्विजाः ।
मानुष्याः सप्त येऽन्ये तु शापजास्तान्निबोधत ॥
त्रेतायुगे तु प्रथमे दत्तात्रेयो बभूव ह ।
नष्टे धर्म्मे चतुर्थांशे मार्कण्डेयपुरःसरः ॥
पञ्चमः पञ्चदश्यान्तु त्रेतायां सम्बभूव ह ।
मान्धाता चक्रवर्त्ती तु तस्थौ तथ्य पुरःसरः ॥
एकोनविंशे त्रेतायां सर्व्वक्षत्रान्तकृद्विभुः ।
जामदग्न्यस्तथा षष्ठो विश्वामित्रपुरःसरः ॥
चतुर्विंशे युगे रामो वशिष्ठेन पुरोधसा ।
सप्तमो रावणस्यार्थे जज्ञे दशरथात्मजः ॥
अष्टमे द्वापरे विष्णुरष्टाविंशे पराशरात् ।
वेदव्यासस्तथा जज्ञे जातूकर्ण्यपुरःसरः ॥
कर्त्तुं धर्म्मव्यवस्थानमसुराणां प्रणाशनम् ।
बुद्धो नवमके जज्ञे तपसा पुष्करेक्षणः ॥
देवक्यां वसुदेवेन द्वैपायनपुरःसरः ।
तस्मिन्नेव युगे क्षीणे सन्ध्यांशिष्टे भविष्यति ॥
कल्की विष्णुयशा नाम पाराशर्य्यपुरःसरः ।
दशमो भाव्यसम्भूतो याज्ञवल्क्यपुरःसरः ॥”
इति मत्स्यपुराणम् ॥

दशाश्वः, पुं, (दश अश्वा रथे यस्य।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, ग्रहयागतत्त्वे सोमध्याने।
"दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदैवतम्।
जलप्रत्यधिदेवञ्च सूर्य्याश्वमादरेत्तथा॥"
दशाकोर्देशमपुत्रः। यथा, महाभारते। १३। २। ६।
"दशमस्तस्य पुत्त्रोऽभूद् दशाश्वो नाम भारत।॥")
दशास्यः, पुं, (दश आस्यानि वदनानि यस्य।) रावणः। इति भूरिप्रयोगः॥ (यथा, रसिकरञ्जने। ५।
"अकलियुगमखर्व्वमत्र छन्दं
यवरदपापघनो यतः कुटुम्बी।
मम रुचिरिह लक्ष्मणाग्रजेन
प्रभवति शर्म्म दशास्यमर्द्दनेन॥")
दशास्यजित्, पुं, (दशास्यं जयतीति। दशास्य+जि+क्विप्। तुगागमश्च।) श्रीरामः। इति भूरिप्रयोगः॥
दशेन्धनः, पुं, (दशा वर्त्तिका इन्धनं काष्ठमिव यस्य।) प्रदीपः। इति त्रिकाण्डशेषः॥
दशेरः, पुं, (दशतीति। दन्श+"पतिकठिकुठिगडिगुडिदंशिभ्य एरक्।" उणां। १। ५९। इति एरक्।) हिंस्रः। इत्युणादिकोषः॥
दशेरकः, पुं, (दशति दुःखं ददातीति। दन्श+एरक्। ततः कन्।) मरुदेशः। तद्देशस्थे, पुं भूम्नि। इति हेमचन्द्रः॥ (यथा, महाभारते। ७। ६। १६। [कान्॥")
"आवन्त्यान् दाक्षिणात्यांश्च पार्व्वतीयान् दशेर-
दशेरुकः, पुं, (दशति दुःखानि ददातीति। दश+बाहुलकात् एरुक् ततः स्वार्थे कन्।) मरुदेशः। इति भूरिप्रयोगः॥
दस, द क भासि। इति कविकल्पद्रुमः॥ (चुरांपरं-अकं-सेट्।) द क, दसयति दंसति। भासि दीप्तौ। इति दुर्गादासः॥
दस, द ङ क दशौ। दंशे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) दशिरिति पश्यतेरौणादिककिप्रत्यये रूपम्। द ङ क, दंसयते फणिभिः, पश्यति दशति वेत्यर्थः। भट्टमल्लमते दंश दह सन्नाहः। इति दुर्गादासः॥
दस, य उ इर् उत्क्षेपे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) य, दस्यति धूलिं वायुः। उ, दसित्वा दस्त्वा। इर्, अदसत् अदासीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥
दस्मः, पुं, (दस्यति उत्क्षिपति दक्षिणादिकमिति। दस+"इषियुधीन्धिदसिश्याधू।"उणां। १। १४४। इति मक्।) यजमानः। चौरः। हुताशनः। इति मेदिनी। मे, १५॥ खलः। इति शब्दरत्नावली॥ (त्रि, उपक्षेपकः। यथा, ऋग्वेदे। १। १४८। ४।
"पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा॥"
"दस्मः उपक्षपयितायमग्निः।" इति तद्भाष्ये सायनः॥ दर्शनीयः। यथा, ऋग्वेदे। १। ७७। ३।
"तं मेधेषु प्रथमं देवयन्तीर्विश उपब्रुवते दस्ममारीः॥"
"दस्मं दर्शनीयं तमग्निमारीर्गमनवत्यः।" इति तद्भाष्ये सायनः॥)
दस्युः, पुं, (दस्यति परस्वान् नाशयतीति। दस+"यजिमनिशुन्धिदसिजनिभ्यो युच्।" उणां। ३। २०। इति युच्। बाहुलकादनादेशाभावः।) चौरः। (यथा, मनुः। ७। १४३।
"विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः।
संपश्यतः सभृत्यस्य मृतः स न तु जीवति॥")
रिपुः। (यथा, ऋग्वेदे। २। १२। १०।
"यः शर्द्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः॥"
"दस्योरुपक्षपयितुः शत्रोर्हन्ता घातकः॥" इति तद्भाष्ये सायनः॥) महासाहसिकः। इति शब्दरत्नावली॥ असुरः। यथा, तत्रैव। ६। ४७। २।
"हतानीदस्य कर्त्ता चेतति दस्युतर्हणा॥"
"दस्युतर्हणा दस्यूनामसुराणां तर्हणा॥" इति तद्भाष्ये सायनः॥ कर्म्मवर्ज्जिते, त्रि। यथा, ऋग्वेदे। ६। २४। ८।
"न वीळवे नमते न स्थिराय न शर्द्धते दस्युजूताय स्तवान्॥"
"शर्द्धते उत्सहमानाय दस्युजूताय कर्म्मवर्ज्जितैः प्रेरिताय।" इति तद्भाष्ये सायनः॥)
दस्रं, क्ली, (दंसयते तृणादीन् दशतीति। दसि दंशे+"स्फायितञ्चिवञ्चिशकीति।" उणां। २। १३। इति रक्।) शिशिरम्। इति संक्षिप्तसारे उणादिवृत्तिः॥
दस्रः, पुं, (दस्यति उत्क्षिपति पांशूनिति। दस उत्क्षेपे+"स्फायितञ्चीति।" उणां। २। १३। इति रक्।) खरः। (दस्यति रोगान् क्षिपतीति।) अश्विनीसुतः। इति मेदिनी। रे, ४७॥ (यथा, हरिवंशे। ६। ५३।
"नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनीसुतौ॥"
दर्शनीये, त्रि। यथा, ऋग्वेदे। ६। ६९। ७।
"इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम्॥"
"दस्रा हे दर्शनीयाविन्द्राविष्णू॥" इति तद्भाष्ये सायनः॥)
दस्रौ, पुं, (दस्यतः क्षिपतो रोगानिति। दस+"स्फायितञ्चीति।" उणां। २। १३। इति रक्।) अश्विनौ। इत्यमरः। १। १। ५४॥ द्विवचनान्तोऽयं शब्दः॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"दक्षादधीत्य दस्रौ भिषजौ संहितां स्वीयाम्।
सकलभिषक्‌लोकप्रतियत्तिविष्टव्ये धन्याम्॥
"देवासुररणे देवा दैत्यैर्ये समता: क्षताः।
अक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत्॥
वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः।
सोमाच्चिपतितश्चन्द्रस्ताभ्यामेव सुखीकृतः॥")
दस्रदेवता, स्त्री, (दस्रौ अश्विनौ अधिष्ठातृदेवते यस्याः।) अश्विनीनक्षत्रम्। इति हेमचन्द्रः। २। २२॥
दस्रसूः, स्त्री, (दस्रौ अश्विनौ सूते इति। सू प्रसवे+क्विप्।) संज्ञा। सा सूर्य्यपत्नी अश्विनीकुमारमाता च। इति त्रिकाण्डशेषः॥
दह, औ दाहे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) औ, अधाक्षीत्। दाहो भस्मीकरणम्। दहत्यग्निः काष्ठम्। इति दुर्गादासः॥
दह, इ क दीप्तौ। दाहे। इति कविकल्पद्रुमः॥ (चुरां-परं-दीप्तौ अकं-दाहे सकं-सेट्।) इ क, दंहयति। इति दुर्गादासः॥
दहनं, क्ली, (दह्यते दाहे+भावे ल्युट्।) दाहः। भस्मीकरणम्। पोड़ान इति भाषा॥ (यथा, रघु। ८। २०।
"इतरो दहने स्वकर्म्मणां
ववृते ज्ञानमयेन वह्निना॥")
दहनः, पुं, (दहतीति। दह दाहे+ल्युः।) अग्निः। (यथा, आर्य्यासप्तशत्याम्। ३०४।
"धूमैरश्रु निपातय दह शिखया दहन! मलिनयाङ्गारैः।
जागरयिष्यति दुर्गतगृहिणी त्वां तदपि शिशिरनिशि॥"
तृतीयसंख्या। यथा, सूर्य्यसिद्धान्ते। १२। ८५।
"खत्रयाब्धिदहनाः कक्षा तु हिमदीधितेः॥"
कृत्तिकानक्षत्रस्य अधिष्ठातृदेवत्वात् कृत्तिकानक्षत्रम्। यथा, ज्योतिस्तत्त्वे।
"दहनविधिशताख्या मैत्रभं सौम्यवारे॥")
चित्रकः। भल्लातकः। दुष्टचेतसि, त्रि। इति मेदिनी। ने, ७५॥ (दह्यते कामाग्निना इति, दह+ल्युट्।) कपोतः। इति राजनिर्घण्टः॥ (रुद्रविशेषः। यथा, महाभारते। १। ६६। ३।
"दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः।
स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः॥"
स्कन्दस्यानुचरविशेषः। यथा तत्रैव। ९। ४५। ३३।
"दहतिं दहनश्चैव प्रचण्डौ वीर्य्यसम्मतौ।
अंशोऽप्यनुचरौ पञ्च ददौ स्कन्दाय धीमते॥"
दाहकमात्रे, त्रि। यथा, भागवते। ८। ७। २१।
"त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात्॥")
दहनकेतनं, क्ली, (दहनस्य केतनं ध्वज इव।) धूमः। इति हेमचन्द्रः। ४। १७॥
दहनप्रिया, स्त्री, (दहनस्याग्नेः प्रिया।) स्वाहा। इति त्रिकाण्डशेषः॥
दहनागुरु, क्ली, (दहनाय अगुरु।) दाहागुरु। इति राजनिर्घण्टः॥
दहनारातिः पुं, (दहनस्याग्नेः अरातिः शत्रुः।) जलम्। इति राजनिर्घण्टः॥
दहनीयः, त्रि, (दह्यते इति। दह+कर्म्मणि अनीयर्।) दाह्यः। दहनार्हः॥
दहनोपलः, पुं, (दहनाय वह्न्युत्पादनाय य उपलः प्रस्तरखण्डः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः। ४। १३३॥ दहनोपमोऽपि पाठः॥

दहरं, क्ली, (दह + बाहुलकात् अरः।) सूक्ष्मम्। यथा, श्रीभागवते। १०। ८७। १८।
"उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः।
परिसरपद्धतिं हृदयमारुणयो दहरम्॥"
"आरुणयस्तु साक्षात् हृदयस्य दहरं सूक्ष्ममेवोपासते।" इति तट्टीकायां श्रीधरस्वामी॥

दहरः, पु, (दहति स्वच्छन्दचनाशनेन सन्तापयतीति। दह + अरः।) मूषिका। स्वल्पम्। भ्राता। बालकः। इति विश्वमेदिन्यौ॥

दह्रः, पुं, (दहतीति। दह + "स्फायितञ्चीति।" उणां २। १३। इति रक्।) अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ दावानलः। इत्युणादिकोषः॥ नरकम्। वरुणः। इति संक्षिप्तसारे उणादिवृत्तिः॥ हृदयाकाशम्। यथा, श्रीभागवते। ३। १२। ४४।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च।
एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः॥"
"दह्रतः हृदयाकाशात्।" इति तट्टीकायां श्रीधरस्वामी॥ * ॥ जठरम्। यथा, तत्रैव।४।१।३६।
"पुलस्त्योऽजनयत् पत्न्यामगस्त्यञ्च हविर्भुवि।
सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः॥"
"दह्राग्निः जठराग्निः।" इति श्रीधरस्वामी॥

दा, दाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) दा तु दाने दान दाने प्रसिद्धोऽयम्। अस्यैव यच्छादेशः। यच्छति। इति दुर्गादासः॥

दा, डु ञ लि दाने। इति कविकल्पद्रुमः॥ (ह्वां-उभ-सक-अनिट्।) डु, दत्रिमम्। ञ लि, ददाति दत्ते। इति दुर्गादासः॥

दा, प लूनौ। इति कविकल्पद्रुमः॥ (अदां-परं-सक-अनिट्।) प दाति। लूनिश्छेदः। केचित्तु दाप लवने इति पठित्वा पित्त्वाद्दासञ्ज्ञाभावे यथास्थौ दायते इत्यादि मन्यन्ते। स्वमते तु पित्त्वाभावाद्दासञ्ज्ञायां दीयते इत्येव। इति दुर्गादासः॥

दा, स्त्री, (दा + क्विप्।) शोधनम्। दानम्। छेदः। उपतापः। रक्षा। इति मेदिनी। दे, १॥

दाकः, पु, (ददाति दक्षिणामिति। दा + "कृदाधाराचिकलिभ्यः कः।" उणां ३।४०। इति कः।) यजमानः। इत्युणादिकोषः॥ दाता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

दाक्षक, क्ली, (दक्ष + वुञ्।) दक्षाणां समूहः। इत्यमरटीकायां रायमुकुटः॥ (दाक्षीणां विषयो देशः। दाक्षि + "राजन्यादिभ्यो वुञ्।" ४। २। ५३। इति वुञ्। दाक्षेर्विषये। इति व्याकरणम्॥)

दाक्षायणी, स्त्री, (दक्षस्यापत्यं स्त्री। दक्ष + फिञ्। गौरादित्वात् ङीष्।) अश्विन्यादयो रेवत्यन्ताः सप्तविंशतिस्ताराः। इत्यमरः। १। ३। २१॥ दुर्गा। इति मेदिनी। णे, ९६॥ रोहिणीनक्षत्रम्। इति हेमचन्द्रः॥ (दक्षकन्यामात्रम्। यथा, मार्कण्डेये। ५०। २१।
"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः॥"
अदितिः। यथा, महाभारते। १। ७५। ९।
"त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा।
मारीचः काश्यपस्तस्यामादित्यान् समजीजनत्॥"
कद्रूः। विनता। यथा, तत्रैव। १। २२। ५।
"जग्मतुः परया प्रीत्या परं पारं महोदधेः।
कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा॥")
"इदञ्च तेषामारभ्य प्रजाः सम्यग्विवर्द्धिताः।
तत्र दाक्षायणीपुत्त्राः सर्व्वे देवाः सवासवाः॥
वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा।
सापि दक्षाय सुश्रोणी गौरी दत्ताथ ब्रह्मणा॥
दुहितृत्वे पुरा यापि रुद्रेणोढ़ा महात्मना।
सा च दाक्षायणी देवी पुनर्भूत्वा नृपोत्तम!॥"
इति वराहपुराणम्॥
दन्तीवृक्षः। इति रत्नमाला॥ * ॥

दाक्षायणीपतिः, पु, (दाक्षायणीनां अश्विन्यादिनक्षत्राणां पतिः।) चन्द्रः। इति त्रिकाण्डशेषः॥

दाक्षायणीरमणः, पुं, (रमयतीति। रम + ल्युः। दाक्षायणीनां रमणः।) चन्द्रः। इति हलायुधः॥

दाक्षाय्यः, पु, (दक्षाय्य एव। स्वार्थे अण्।) गृध्रः। इत्यमरः। २। ५। २१॥

दाक्षिकन्था, स्त्री, (दाक्षीणां कन्था। "संज्ञायां कन्थोशीनरेषु।" २। ४। २०। इति उशीनरत्वाभावात् न क्लीवता।) वाहीकेषु ग्रामसञ्ज्ञा। इति नपुंसकलिङ्गसंग्रहटीकायां भरतः॥

दाक्षिणात्य, त्रि, (दक्षिणा दक्षिणस्यां दिशि भवः। दक्षिणा + "दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ९८। इति त्यक्।) दक्षिणदेशोद्भवः। इति शब्दार्थकल्पतरुः॥ (यथा, महाभारते। ३। २३६। ३।
"प्राच्याश्च दाक्षिणात्याश्च प्रतीच्योदीच्यवासिनः॥")
नारिकेलः। इति राजनिर्घण्टः॥

दाक्षिण्य, क्ली, (दक्षिणस्य भावः। दक्षिण + ष्यञ्।) अनुकूलता। इति हेमचन्द्रः। ६। १३॥ (सरलता। यथा, आर्य्यासप्तशत्याम्। ६०१।
"सौभाग्य दाक्षिण्यमेतदुपदिष्टं हरेण तरुणीनाम्।
वामार्द्धमेव देयाः स्ववपुःशिल्पे निवेशयता॥"
परच्छन्दानुवर्त्तनम्। यथा, रघुः। १। ३१।
"तस्य दाक्षिण्यरूढ़ेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥")
भावविशेषः। तत्तु दक्षिणाचाररूपम्। यथा,
"बालान्तु वामदाक्षिण्यभावाभ्यामपि पूजयेत्।
श्मशानभैरवीं देवीमुग्रतारां तथैव च॥"
अपि च।
"ऋषीन् देवान् पितॄंश्चैव मनुष्यान् भूतसङ्घयान्।
यो यजन् पञ्चभिर्यज्ञैः कर्म्माणि परिशोधयन्॥
विधिवत् स्नानदानाभ्यां कुर्व्वन् यज्ञविधिपूजनम्।
क्रियते सरहस्यस्तु तद्दाक्षिण्यमिहोच्यते॥
सर्व्वत्र पितृदेवादौ यस्माद्भवति दक्षिणः।
देवी च दक्षिणा यस्मात्तस्माद्दाक्षिण्यमुच्यते॥"
इति कालिकापुराणे ७७ अध्यायः॥

दाक्षिणार्हं, त्रि। इत्यमरः। ३। १। ५॥ (दक्षिणे भवम्। दक्षिण + ष्यञ्। दक्षिणभवे। दक्षिणदिक्सम्बन्धिनि च। यथा, आर्य्यासप्तशत्याम्। २८२।
"दाक्षिण्यात् म्रदिमानं दधतं सा भानुमेनमवमस्थाः॥")

दाक्षीपुत्त्रः, पु, (दाक्ष्याः पुत्त्रः।) पाणिनिमुनिः। इति त्रिकाण्डशेषः॥ (यथा, नैषधे। १९। ६१।
"दाक्षीपुत्त्रस्य तन्त्रे ध्रुवमयमभवत् कोऽप्यधीती कपोतः॥")

दाक्षेयः, पु (दाक्ष्या अपत्यं पुमान्। दाक्षी + "स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) पाणिनिमुनिः। इति हेमचन्द्रः। ३। ५१५॥

दाक्ष्यं, क्ली, (दक्षस्य भावः कर्म्म वा। दक्ष + ष्यञ्।) दक्षता। निपुणता। दक्षशब्दात् भावे ष्यञ्प्रत्ययः॥ (यथा, महाभारते। २। ३८। २०।
"दानं दाक्ष्यं श्रुतं शौर्य्यं ह्रीः कीर्त्तिर्बुद्धिरुत्तमा।
सन्नतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताच्युते॥")

दाडकः, पु, (दालयति मुखाभ्यन्तरस्थद्रव्यं विचूर्णीकरोतीति। दल + णिच् + ण्वुल्। लस्य डः।) दन्तः। इति शब्दार्थकल्पतरुः॥

दाडिमः, त्रि, (दलनमिति दालः। तेन निर्वृत्तः। भावप्रत्ययन्तादिमप्। डलयोरैकत्वम्।) एला। इति मेदिनी मे, ४४॥ फलवृक्षविशेषः। (यथा, देवीभागवते। १। १२। ८।
"दाड़िमैर्नारिकेलैश्च माधवीमण्डपावृतम्॥")
तत्पर्य्यायः। करकः २। इत्यमरः। २।४।६५॥ पिण्डपुष्पः ३ दाडिम्बः ४ पर्व्वरुक् ५ खाण्डवः ६ पिण्डीरः ७ फलशाड़वः ८ शुकवल्लभः ९। इति त्रिकाण्डशेषः॥ रक्तपुष्पः १०। इति रत्नमाला॥ दाड़िमीसारः ११ कुट्टिमः १२ फलषाड़वः १३ मूर्द्धन्यषमध्योऽपि। रक्तबीजः १४ सुफलः १५ दन्तबीजकः १६ मधुबीजः १७ कुचफलः १८ रोचनः १९ मणिबीजः २० कल्कफलः २१ दृढ़फलः २२ सुबीजः २३ नीलपत्रः २४। अस्य गुणाः। मधुराम्लत्वम्। कषायत्वम्। कासवातकफश्रमपित्तविनाशित्वम्। ग्राहित्वम्। दीपनत्वम्। लघुत्वम्। उष्णत्वम्। शीतलत्वम्। रुचिदायकत्वञ्च। इति राजनिर्घण्टः॥ हृद्यत्वम्। अम्लत्वम्। श्वासारुचिक्षयनाशित्वम्। कण्ठशोधनत्वम्। कफपित्तविरोधित्वञ्च॥ * ॥
"द्विविधं तत्तु विज्ञेयं मधुरञ्चाम्लमेव च।
मधुरं तत् त्रिदोषघ्नमम्लं वातकफापहम्॥"
इति राजवल्लभः॥
तापहारि मधुरं लघु पथ्यम्। इति राजनिर्घण्टः॥
"तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम्।

तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ॥
हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु ।
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ॥
स्वाद्वम्लं दीपनं रुच्यं किञ्चित् पित्तकरं लघु ।
अम्लन्तु पित्तजनकमम्लं वातकफापहम् ॥”
इति भावप्रकाशः ॥

दाडिमपुष्पकः, पुं, (दाडिमस्य पुष्पमिव पुष्पं यस्य । कन् ।) रोहितकवृक्षः । इत्यमरः । २ । ४ । ४९ ॥ रोहडा इति ख्यातः ॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
“रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ॥”)

दाडिमप्रियः, पुं, (दाडिमफलं प्रियं यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥

दाडिमभक्षणः, पुं, (भक्षयतीति । भक्षि + ल्युः । भक्षणो भक्षकः । दाडिमस्य भक्षणः ।) कीरपक्षी । इति शब्दचन्द्रिका ॥ (दाडिमभक्षके, त्रि ॥)

दाडिमीसारः, पुं, (दाडिमीं दाडिमीशब्दं सरति प्राप्नोतीति । दाडिमी + सृ + अण् ।) दाडिमः । इति राजनिर्घण्टः ॥

दाडिम्बः, पुं, दाडिमः । इति त्रिकाण्डशेषः ॥ (दाडिमशब्देऽस्य विशेषो ज्ञातव्यः ॥)

दाढा, स्त्री, (दैप शोधने, दा दाने वा + क्विप् । दे शुद्धेः दानाय वा ढौकते इति । ढौक + डः ।) दन्तविशेषः । तत्पर्य्यायः । दंष्ट्रा २ जम्भः ३ । इति हेमचन्द्रः ।३।२४७ ॥ प्रार्थना । समूहः । इति शब्दार्थकल्पतरुः ॥

दाढिका, स्त्री, (दाढायै केशसमूहाय प्रभवतीति । ठक् ततष्टाप् ।) मुखावयवविशेषः । दाड़ि इति भाषा । (यथा, मनुः । ८ । २८३ ।
“पादयोर्दाढिकायाञ्च ग्रीवायां वृषणेषु च ॥”
“दाढिकायां श्मश्रुणि ॥” इति तट्टीकायां कुल्लूकभट्टः ॥ दाढा + स्वार्थे कप कापि अत इत्वञ्च ।) दंष्ट्रिका । इति हेमचन्द्रः ।३।२४७ ॥

दाण्डाजिनिकः, त्रि, (दण्डाजिनेन शाठ्येन दम्भेन वा अर्थानन्विच्छतीति । दण्डाजिन + “अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ।” ५।२।७६ । इति ठञ् ।) कुहकः । इति हेमचन्द्रः । ३ । ४१ ॥

दातं, त्रि, (दायते स्म इति । दा लवने + क्तः) छिन्नम् । इत्यमरः । ३।१।१०३ ॥ (दैप् शोधने कर्त्तरि क्त । शुद्धम् ॥)

दाता, [ऋ] त्रि, (ददातीति । दा दाने + “ण्वुल्तृचौ ।” ३।१।१३३ । इति तृच् ।) दानकर्त्ता । तत्पर्य्यायः । दारुः २ सुचिरः ३ । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे ।७।२०।२।
“कर्त्ता सुदासे अह वा उ लोकं
दाता वसु मुहुरादाशुषे भूत् ॥”)

दात्यूहः, पुं स्त्री, (दाप् लवने + क्तिन् । दातिं मारणं ऊहते इति । दाति + ऊह + अण् । यद्वा, दो अवखण्डने क्तिन् । दितिं वहतीति । वह + क + ऊट् । दित्यूहः । ततः स्वार्थे अण् । ततः “देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥” ७।३।१ । इति आत्वम् ।) पक्षिविशेषः । डाउक इति भाषा । तत्पर्य्यायः । कालकण्ठकः २ । इत्यमरः ।२।५।२१॥ अत्यूहः ३ दात्यौहः ४ कालकण्ठः ५ मासहः ६ शितिकण्ठः ७ कच्चाटुरः ८ । इति शब्दरत्नावली ॥ काकमद्गुः ९ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ५ । १२ ।
“सारसं रज्जुवालञ्च दात्यूहं शुकसारिके ॥”
(अस्य गुणा यथा,—
“दात्यूहो मरुतस्य नाशनकरो हृष्योऽतिशुक्रप्रदः
श्रेष्ठः सर्व्वगुणः श्रमोपशमनः तुष्टिप्रदो वातहा ॥”
इति हारीते प्रथमेस्थाने एकादशेऽध्याये ॥)
“प्रावृट्काले सुखी भूत्वा को वा कुत्र न गच्छति ।
इति वदति दात्यूहः को वा को वा क्व वा क्व वा ॥”
इत्युद्भटः ॥)
जलकाकः । इति राजनिर्घण्टः ॥ चातकः । इति मेदिनी । हे, १७ । मेघः । इति शब्दरत्नावली ॥

दात्यौहः, पुं, स्त्री, (दित्यौह + स्वार्थे अण् । देविकाशिंशपेत्यादिना आत्वम् ।) दात्यूहः । इति शब्दरत्नावली ॥

दात्रं, क्ली, (द्यति दाति वानेनेति । दो अवखण्डने दा लवने वा + “दाम्नीशसेति ।” ३ । २ । १८२ । इति ष्ट्रन् । दादिभ्यश्छन्दसीति त्रन् वा ।) अस्त्रविशेषः । इति भरतः ॥ दा इति काস্তा इति च भाषा । तत्पर्य्यायः । लवित्रम् २ । इत्यमरः । २।९।१३॥ खड्गीकम् ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५।१५४।७ ।
“सशूर्पपिटकाः सर्व्वे सदात्राङ्कुशतोमराः ॥”
भावे त्रन् । दानम् । यथा, ऋग्वेदे ।१।११६।६।
“तद् वां दात्रं महि कीर्त्तेन्यम्” ।
“तद्दात्रं दानम् महि महदतिगम्भीरम् ।” इति तद्भाष्ये सायनः ॥ दानकर्त्तरि, त्रि । यथा, वाजसनेयसंहितायाम् । १० । ६ ।
“सोमस्य दात्रमसि ॥”)

दात्री, स्त्री, (ददातीति । दा + तृच् + ङीप् ।) दानकर्त्री । इति व्याकरणम् ॥ (गङ्गा । यथा, काशीखण्डे ।२९।८९। तस्याः सहस्रनामकीर्त्तने ।
“दीनसन्तापशमनी दात्री दवथुवैरिणी ॥”)

दात्वः, पुं, (ददातीति । दा + “जनिदाच्युसिति ।” उणां ४ । १०४ । इति त्वन् ।) दाता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (क्ली, यज्ञकर्म्म । इत्युज्ज्वलदत्तः ॥)

दाधिकं, त्रि, (दध्नि दध्ना वा संस्कृतं दध्ना चरति दधि + “चरति ।” ४।४।८। इति ठक् । (दध्ना उपसिक्तम् । “व्यञ्जनैरुपसिक्ते ।” ४ । ४ । २६ । इति ठक् वा ।) दधिसंस्कृतवस्तु । इति हेमचन्द्रः । ३ । ७४ ॥ (औषधविशेषे, क्ली । यथा, सुश्रुते उत्तरतन्त्रे । ४२ ।
“वीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित् ॥”)

दान, ञ आर्ज्जवे । छिदि । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सकं-सेट् ।) ऋजुरवक्रस्तस्य भाव आर्ज्जवं ऋजुकरणम् । ञ, दीदांसति दीदांसते काष्ठं वर्द्धकिः ऋजु करोतीत्यर्थः । ऋजुभावः इति विद्यानिवासः । दीदांसति साधु । ऋजुः स्यादित्यर्थः । छेदे दानति दानते । इति वोपदेवः । तत्र तिबादयो न स्युरिति रमानाथः । इति दुर्गादासः ॥

दानं, क्ली, (दा दाने दो अवखण्डने दैप शोधने भावादौ ल्युट् ।) गजमदः । (यथा, माघे । ५ । ३७ ।
“दानं ददत्यपि जलैः सहसाधिरूढे
को विद्यमानगतिरासितुमुत्सहेत ॥”
“दीयते इति दानं मदं गजमदस्य ।” इति तट्टीकायां मल्लिनाथः ॥) पालनम् । छेदनम् । शुद्धिः । इति मेदिनी । ने, १० ॥ वृक्षकोटरकीटजमधु । अस्य गुणाः । रूक्षत्वम् । दीपनत्वम् । कफच्छर्द्दिमेहनाशित्वञ्च । इति राजवल्लभः ॥ देवब्राह्मणादिसम्प्रदानकद्रव्यमोचनम् । तत्पर्य्यायः । त्यागः २ विहापितम् ३ उत्सर्जनम् ४ विसर्जनम् ५ विश्राणनम् ६ वितरणम् ७ स्पर्शनम् ८ प्रतिपादनम् ९ प्रादेशनम् १० निर्व्वपणम् ११ अपवर्जनम् १२ अंहतिः १३ । इत्यमरः ।२।७।२९॥ दायः १४ । इति त्रिकाण्डशेषः ॥ प्रदानम् १५ ददनम् १६ विश्रणनम् १७ दत्तिः १८ अंहती १९ उत्सर्गः २० अतिसर्जनम् २१ स्पर्शः २२ विसर्गः २३ त्यजनम् २४ प्रदेशनम् २५ । इति शब्दरत्नावली ॥ * ॥ तस्य लक्षणादि यथा,—
“अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्द्दिष्टं व्याख्यानं तस्य वक्ष्यते ॥
सम्प्रदानस्वत्वापादकद्रव्यत्यागो दानमिति ॥ * ॥
दाता प्रतिग्रहीता च श्रद्धादेयञ्च धर्म्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः ॥
मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत् ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥
परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् ।
गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु ॥
यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः ।
दद्यात् स्वजातिशिष्येभ्यस्तदभावेऽप्सु निःक्षिपेत् ॥
स्नात्वा शुद्धे समे देशे गोमयेनोपलेपिते ।
वसित्वा वसनं शुद्धं दानं दद्यात् सदक्षिणम् ॥ * ॥
एकां गां दशगुर्दद्यात् दश दद्याच्च गोशती ।
शतं सहस्रगुर्द्दद्यात् सहस्रं बहुगोधनः ॥
ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किन्न दीयते ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥
अपरावाधमक्लेशं प्रयत्नेनार्जितं धनम् ।
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते ॥ * ॥
विक्रयश्चैव दानञ्च न नेयाः स्युरनिच्छवः ।
दाराः पुत्राश्च सर्व्वस्वमात्मन्येव च योजयेत् ॥
आपत्काले च कर्त्तव्यं दानं विक्रय एव च ।
अन्यथा न प्रवर्त्तेत इति शास्त्रार्थनिश्चयः ॥ * ॥
यज्ञो दानं तपो जाप्य श्राद्धञ्च सुरपूजनम् ।

यद्‌गङ्गायां कृतं सर्व्वं कोटि कोटि गुणम्भवेत् ॥
शिवस्य विष्णोरर्थेच सन्निधौ दत्तमक्षयम् ।
शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ।
तत्र दानञ्च होमश्च कोटिकोटिगुणम्भवेत् ॥
यद्‌यत्र दुर्लभं द्रव्य यस्मिन् कालेऽपि वा पुनः ।
दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा ॥
पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं धर्म्मबुद्ध्या यद्धर्म्मदान प्रचक्ष्यते ॥
सहस्रगुणितं दान भवेद्दत्तं युगादिषु ।
कर्म्मश्राद्धादिकञ्चैव तथा मन्वन्तरादिषु ॥*॥
आहारं मैथुनं निद्रां सन्ध्याकाले विवर्ज्जयेत् ।
कर्म्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ ॥*॥
तामसेन तु यज्ञेन दानेन तपसा तथा ।
देवलोके ध्रुव वासो देवसायुज्यमेव च ॥*॥
गत्वा यद्दीयते दान तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचिते च तदर्द्धकम् ॥
आशां दत्त्वा ह्यदातारं दानकाले निषेधकम् ।
दत्त्वा सन्तप्यते यस्तु तमाहुर्ब्रह्मघातकम् ॥
योऽसङ्गः प्रतिगृह्यापि पुनः सङ्गः प्रयच्छति ।
आत्मान सक्रम कृत्वा परांस्तारयते हि सः ॥*॥
यस्य यद्दीयते वस्त्रमलङ्कारादि किञ्चन ।
तेषां दैवतमुच्चार्य कृत्वा प्रोक्षणपूजने ।
उत्सृज्य मूलमन्त्रेण प्रतिनाम्ना निवेदयेत् ॥
योऽर्च्चितः प्रतिगृह्णाति दद्यादर्च्चितमेव वा ।
तावुभौ गच्छत स्वर्गं नरकञ्च विपर्य्यये ॥"
इति शुद्धितत्त्वम् ॥*॥
दानं त्रिविधं सात्त्विकं राजस तामसञ्च ।
सात्त्विक यथा,—
"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दान सात्त्विक स्मृतम् ॥
राजसं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं विदुः ॥"
तामस यथा,—
"अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥"
इति श्रीभगवद्गीता ॥*॥
"हस्त्यश्वं गामनड्वाहं मणिमुक्तादिकाञ्चनम् ।
परोक्ष हरते यस्तु पश्चाद्दान प्रयच्छति ॥
न स गच्छति वै स्वर्गं दातारो यत्र भागिनः ।
अनेन कर्म्मणा युक्ताः पच्यन्ते नरकेऽधमाः ॥"
इति मत्स्यपुराणम् ॥*॥
नित्यनैमित्तिकादिभेदेन तच्चतुर्व्विध यथा,—
"नित्यं नैमित्तिकं काम्यं त्रिविधं दानमुच्यते ।
चतुर्थं विमल प्रोक्त सर्व्वदानोत्तमोत्तमम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलन्तत् स्याद्ब्राह्मणाय च नित्यकम् ॥
यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दान सद्भिरनुत्तमम् ॥
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानन्तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
यदीश्वरप्रीणनार्थं ब्रह्मवित्सु प्रदीयते ।
चेतसा धर्म्मयुक्तेन दानं तद्विमलं शिवम् ॥"
इति कूर्म्मपुराणम् ॥
रोगोपशमनाय दानविधिर्यथा,—
"गोदानं भूमिदानञ्च स्वर्णदानं सुरार्च्चनम् ।
कृत्वा पश्चात् प्रतीकार कुर्य्यात् पाण्डुप्रशान्तये ॥
महापापेषु सर्व्वेषु तदर्द्धं सुखदोषणे ।
अथवापि यदृच्छात् कल्पंश्च व्याधिबलाबलात् ॥
कुर्य्यात सर्व्वं कृतं कर्म्म कुष्ठरोगोपशान्तये ।
गोभूहिरण्यदानञ्च तथामिष्टान्नभोजनम् ॥
चतुर्व्विध दानमिद दत्त्वा कुर्य्यात प्रतिक्रियाम् ।
कदाचिदपि सिध्येत आयुषश्च बलक्रिया ॥
मेहे सुवर्णदानञ्च शूले श्वासे भगन्दरे ।
अशोभ्यश्वप्रदानेन श्वासात् कासाद्विमुच्यते ॥
ज्वरे चेश्वरपूजा च रुद्रजाप्यं समाचरेत् ।
मतिदानान्नदानञ्च शास्त्रदानं भ्रमातुरे ॥
अग्निहोमश्चाग्निमान्द्ये कन्यादानञ्च गुल्मके ।
मेहाश्मरीविनाशाय लवणञ्च प्रदापयेत् ॥
बहुभोजनदानेन मूत्ररोगाद्विमुच्यते ।
घृतमधुप्रदानेन रक्तपित्तं प्रशाम्यति ॥
चतुर्व्विधेन दानेन साध्य. स्याद् ग्रहणीगदः ।
सुवर्णदानात् कुनखी श्यावदन्तः सुखी भवेत् ॥
रौप्यदानाच्छिन्नकुष्ठं साध्यं वापि प्रदृश्यते ।
सिध्मले त्रपुदानञ्च बर्व्वरे लौहदानकम् ॥
सुखक्षयी ददेन्नाग गोदानं बहुमूत्रके ।
नेत्ररोगे घृत दद्यात् सुगन्धं नासिकागदे ॥
तैलदानं कण्डुरोगे रसदानञ्च शिश्नके ।
उष्ट्रं दद्यात् पित्तरोगे लूतारोगे च देवदः ॥"
इति हारीते द्वितीयस्थाने प्रथमेऽध्याये ॥)
दानकर्म्म, क्ली, (दानमेव कर्म्म ।) दानक्रिया । तत्पर्य्यायः । दाति १ दाशति २ दासति ३ राति ४ रासति ५ पृणक्ति ६ पृणाति ७ शिक्षति ८ तुञ्जति ९ मंहतः १० । इति दश दानकर्म्माणः । इति वेदनिघण्टौ ३ अध्यायः ॥
दानधर्म्म, पुं, (दानाख्यो धर्म्मः दानरूपो धर्म्मो वा मध्यलोपिसमासः ।) दानस्य फलम् । यथा,
ब्रह्मोवाच ।
"अथातः संप्रवक्ष्यामि दानधर्म्ममनुत्तमम् ।
अर्थानामुचिते पात्रे श्रद्धया प्रतिपादनम् ॥
दानन्तु कथितं तच्च भुक्तिमुक्तिफलप्रदम् ।
न्यायेनोपार्ज्जयेद्वित्तं दानभोगफलञ्च तत् ॥
अध्यापनं याजनञ्च वृत्तमाहुः प्रतिग्रहम् ।
कुसीद कृषिवाणिज्यं क्षत्रवृत्तोऽथ चार्ज्जयेत् ॥
यद्दीयते च पात्रेभ्यस्तद्दान परिकीर्त्तितम् ।
नित्यं नैमित्तिक काम्य विमल दानमीरितम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकम् ॥
यत्तु पापोपशान्त्यै च दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दान सद्भिरनुष्ठितम् ॥
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते ।
चेतसा सत्त्वयुक्तेन दान तत् विमलं स्मृतम् ॥
इक्षुभिः सन्ततां भूमिं यवगोधूमशालिनीम् ।
ददाति वेदविदुषे स न भूयोऽभिजायते ।
भूमिदानात् परं दानं न भूतं न भविष्यति ॥
विद्यां दत्त्वा ब्राह्मणाय ब्रह्मलोके महीयते ।
दद्यादहरहस्तान्तु श्रद्धया ब्रह्मचारिणे ।
सर्व्वपापविनिर्म्मुक्तो ब्रह्मस्थानमवाप्नुयात् ॥
वैशाख्यां पौर्णमास्यान्तु ब्राह्मणान् सप्त पञ्च च ।
उपोष्याभ्यर्च्चयेद्विद्वान् मधुना तिलकृष्णकैः ॥
गन्धादिभिः समभ्यर्च्च्य वाचयेद्वा स्वयं वदेत् ।
प्रीयतां धर्म्मराजेति यथा मनसि वर्त्तते ।
यावज्जीवकृत पाप तत्क्षणादेव नश्यति ॥
कृष्णाजिने तिलान् कृत्वा हिरण्यमधुसर्पिषा ।
ददाति यस्तु विप्राय सर्व्वं तरति दुष्कृतम् ॥
कृतान्नमुदकुम्भञ्च वैशाखाञ्च विशेषतः ।
निर्द्दिश्य धर्म्मराजाय विप्रेभ्यो मुच्यते भयात् ॥
द्वादश्यामर्च्चयेद्विष्णुमुपोष्याघप्रणाशिनीम् ।
सर्व्वपापविनिर्म्मुक्तो नरो भवति निश्चितम् ॥
यो हि यां देवतामिच्छेत् समाराधयितुं नरः ।
ब्राह्मणान् भोजयेद्‌यत्नात्तोगाय तोषिताः
सुराः ॥
सन्ततिकामः सततं पूजयेद्वै पुरन्दरम् ।
ब्रह्मवर्च्चसकामस्तु ब्राह्मणान् ब्रह्मनिश्चयात् ॥
आरोग्यकामोऽथ रवि धनकामो हुताशनम् ।
कर्म्मणां सिद्धिकामस्तु पूजयेद्वै विनायकम् ॥
भोगकामो हि शशिनं धनकामः समीरणम् ।
मुमुक्षुः सर्व्वसंसारात् प्रयत्नेनार्च्चयेद्धरिम् ॥
अकामः सर्व्वकामो वा पूजयेत्तु गदाधरम् ।
वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ॥
तिलप्रद. प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।
भूमिदः सर्व्वमाप्नोति दीर्घमायुर्हिरण्यद. ॥
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ।
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥
अनडुहः श्रिय पुष्टां गोदो ब्रध्नस्य विष्टपम् ।
यानशय्याप्रदो भार्य्यामैश्वर्य्यमभयप्रदः ।
धान्यदः शाश्वत सौख्यं ब्रह्मदो ब्रह्म शाश्वतम् ।
वेदवित्सु ददद्दान स्वर्गलोके महीयते ॥
गवां घासप्रदानेन सर्व्वपापैः प्रमुच्यते ।
इन्धनानां प्रदानेन दीप्ताग्निर्जायते नरः ॥
औषधं स्नेहमाहार रोगिणो रोगशान्तये ।
ददानो रोगरहितः सुखी दीर्घायुरेव च ॥
असिपत्रवन मार्गं क्षुरधारासमन्वितम् ।
तीव्रातपञ्च तरति छत्रोपानत्प्रदानत. ॥
यद्‌यदिष्टतमं लोके यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देय तदेवाक्षयमिच्छता ॥
अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः ।
संक्रान्त्यादिषु कालेषु दत्त भवति चाक्षयम् ॥
प्रयागादिषु तीर्थेषु गयायाञ्च विशेषतः ।
दानधर्म्मात् परो धर्म्मो भूतानां नेह विद्यते ॥
स्वर्गायुर्भूतिकामेन देय पापोपशान्तये ।
दीयमानन्तु यो मोहात् गोविप्राग्निसुरेषु च ।
निवारयति पापात्मा तिर्य्यग्योनिं व्रजेन्नरः ॥

यस्तु दुर्भिक्षवेलायामन्नाद्यं न प्रयच्छति ।
म्रियमाणेषु विप्रेषु ब्रह्महा स तु गर्हितः ॥”
इति गारुडे दानधर्म्मोनाम ५१ अध्यायः ॥ *॥
अन्यत् महाभारते शान्तिपर्व्वणि द्रष्टव्यम् ॥

दानपतिः, पुं, (दाने पतिः श्रेष्ठः ।) सततदाता । इति जटाधरः ॥ (यथा, महाभारते । ५ । ११६ । २२ ।
“जातो दानपतिः पुत्त्रस्तया शूरस्तथापरः ॥”) अक्रूरः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे । ७८ । ८४ ।
“गच्छ दानपते । क्षिप्रं तावेवानयितुं व्रजात् ।
नन्दगोपस्य गोष्ठं च करदान् मम शासनात् ॥”
दैत्यभेदः । यथा, हरिवंशे । २३२ । ७ ।
“सहस्रपादः सुमुखः कृष्णश्चैव महासुरः ।
रणोत्कटो दानपतिः शैलकम्पी कुलाकुलः ॥”)

दानफलं, क्ली, (दानस्य फलम्) दानजन्यफलम् । तद्विवरणं यथा,—
“गत्वा यद्दीयते दानं भक्त्या पात्रे विधानतः ।
तदनन्तफलं विद्धि अवस्थात्रितये नृप ! ॥
तमोद्दतस्तु यो दद्यात् भयात् क्रोधार्त्तएव च ।
नृप ! दानन्तु तत् सर्व्वं भुङ्क्ते गर्भस्थ एव तु ॥
ईर्षामन्युमनाश्चैव दम्भार्थं चार्थकारणात् ।
यो ददाति द्विजातिभ्यः स बाल्ये तु तदश्नुते ॥
वैश्वदेवविहीनश्च सन्ध्योपासनवर्ज्जितम् ।
यद्दानं दीयते तस्मै वृद्धकाले तदश्नुते ॥
वृथा जन्मानि चत्वारि वृथा दानानि षोडश ।
तान्यहं संप्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
अपुत्त्रस्य वृथा जन्म धर्म्मबाह्या नराः सदा ।
परपाकं सदाश्नन्ति परतापरताश्च ये ॥
देवपितृविहीनं यत् ईश्वरेभ्यः सदोषतः ।
दत्त्वानुकीर्त्तनाश्चैव वेदाग्निप्रत्यागिने ॥
चान्यायोपार्ज्जितं दानं वृथं ब्रह्महणे तथा ।
गुरवेऽनृतवक्रे च स्तेनाय पतिताय च ॥
कृतघ्नाय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
याचकाय च सर्व्वस्य वृषल्याः पतये तथा ॥
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च ।
इत्येतानि तु राजेन्द्र ! वृथादानानि षोडश ॥”
इत्याद्ये वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

दानवः, पुं, (दनोरपत्यम् । दनु + “तस्यापत्यम् ।” ४ । १ । ९२ । इति अण् ।) असुरः । इत्यमरः । १।१।१२ ॥ (यथा, ऋग्वेदे ।२।११।१० ।
“नि मायिनो दानवस्य माया
अपादयत् पपिवान्सुतस्य ॥”)
स दक्षकन्यादनुगर्भे कश्यपाज्जात एकषष्टिसंख्यकस्तेष्वष्टादश प्रधानास्तेषां नामानि यथा, द्विमूर्द्धा १ शम्बरः २ अरिष्टः ३ हयग्रीवः ४ विभावसुः ५ अयोमुखः ६ शङ्कुशिराः ७ स्वर्भानुः ८ कपिलः ९ अरुणः १० पुलोमा ११ वृषपर्व्वा १२ एकचक्रः १३ तापनः १४ धूम्रकेशः १५ विरूपाक्षः १६ विप्रचित्तिः १७ दुर्जयः १८ । इति श्रीभागवतम् ॥ (महाभारते चत्वारिंशद्दनोः पुत्त्रा उक्ताः । यथा, तत्रैव । १ । ६५ । २१—२२ ।
“चत्वारिंशद्दनोःपुत्त्राः ख्याताः सर्व्वत्र भारत ॥
तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ॥
शम्बरो नमुचिश्चैव पुलोमा चेतिविश्रुतः ।
असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥”
इत्यारभ्य तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

दानवज्रः, पुं, (दाने वज्र इव ।) वैश्यः । इति पुराणम् ॥ (वैश्यजातिको गान्धर्व्वो देवस्य अश्वविशेषः । यथा, महाभारते । १ । १७१ । ५१ ।
“वज्रपाणिर्ब्राह्मणः स्यात् चात्त्रं वज्ररथं स्मृतम् ।
वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः ॥”)

दानवारिः, पुं, (दानवानामरिः ।) देवता । इत्यमरः । १ । १ । ९ ॥ (विष्णुः । यथा, काशीखण्डे । २९ । ८० ।
“दर्शितानेककौतुका दुष्टदुर्ज्जयदुःखहृत् ।
दैन्यहृद्दुरितघ्नी च दानवारिपदाब्जजा ॥”
“दानवारिपदाब्जजा विष्णुपादाद्र्घसम्भूतेति स्मृतेः ।” इति तट्टीका ॥ दानमेव वारि इति विग्रहे गजमदजले, क्ली ॥)

दानविधिः, पुं, (दानस्य विधिः ।) दानस्य विधानम् । यथा,—
“अथ दानविधिं वक्ष्ये तं मे शृणुत सुव्रताः ।
अन्येभ्यो ब्राह्मणाः श्रेष्ठास्तेभ्यश्चैव क्रियापराः ॥
ब्रह्मवेत्ता च तेभ्योऽपि पात्रं विद्यातपोऽन्वितः ।
गोभूधान्यहिरण्यादि पात्रे दातव्यमर्च्चितम् ॥
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च ॥
दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतन्तु शक्तितः ॥
हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥
दशसौवर्णिकं शृङ्गं शफं सप्तपलैः कृतम् ।
पञ्चाशत्पलिकं पात्रं कांस्यं वत्सश्च कीर्त्त्यते ॥
स्वर्णपिप्पलपात्रेण वत्सो वा वत्सिकापि वा ।
तस्यास्तमपि च दातव्य अपत्यं रोगवर्ज्जितम् ॥
दाता स्वर्गमवाप्नोति वत्सरान् रोमसम्मितान् ।
कपिला चेत्तारयते भूयश्चासप्तमं कुलम् ॥
यावद्वत्सस्य द्वौ पादौ मुखं योन्यां प्रदृश्यते ।
तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥
यथाकथञ्चिद्दत्त्वा गां धेनुं वाधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥
श्रान्तसंवाहनं रोगिपरिचर्य्या सुरार्चनम् ।
पादशौचं द्विजोच्छिष्टमार्ज्जनं गोप्रदानवत् ॥
द्विजाय यदभीष्टन्तु दत्त्वा स्वर्गमवाप्नुयात् ।
भूदीपाश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ॥
गृहधान्यच्छत्रमासायानरत्नरत्नं जलम् ।
शय्यानुलेपनं दत्त्वा स्वर्गलोके महीयते ॥
ब्रह्मदाता ब्रह्मलोकं प्राप्नोति सुरदुर्लभम् ॥
वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि ।
मूल्येनापि लिखित्वापि ब्रह्मलोकमवाप्नुयात् ।
इतिहासं पुराणं च लिखित्वा यः प्रयच्छति ।

तस्मात् सर्व्वप्रयत्नेन कार्य्यो वेदार्थसंग्रहः ॥
इतिहासं पुराणं वा लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम् ।
लोकायतं कुतर्कञ्च प्राकृतं म्लेच्छभाषितम् ।
न श्रोतव्यं द्विजेनैव तदधो नयति द्विजम् ॥
समर्थो यो न गृह्णीयात् दातृलोकमवाप्नुयात् ॥
कुशाः शाकं पयो गन्धाः प्रत्याख्येयं न वारि च ।
अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मिणः ॥
अन्यत्र कुलटाषण्ढपतितेभ्यो द्विषस्तथा ।
देवातिथ्यर्च्चनकृते पितृभृत्यार्थमेव च ।
सर्व्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च ॥”
इति गारुडे ९८ अध्यायः ॥

दानशीलः, त्रि, (दाने शीलं स्वभावो यस्य । यद्वा, दानस्य शीलं सन्ततमनुष्ठानं यस्य ।) दाता । तत्पर्य्यायः । वदान्यः २ वदन्यः ३ । इति हेमचन्द्रः । ३ । १५ ॥ (यथा, महाभारते । ५ । १२२ । ५ ।
“यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥”)

दानशौण्डः, त्रि, (दानेषु शौण्डः अतिदक्षः । “सप्तमी शौण्डैः ।”२ । १ । ४० । इति समासः ।) बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा, माघे । १४ । ४६ ।
“निर्गुणोऽपि विमुखो न भूपते-
र्दानशौण्डमनसः पुरोऽभवत् ॥”)

दानसागरः, पुं, (दानानां सागर इव ।) षोडशमहाकायोडशः । यथा,—
“यः कश्चित् कुरुते देवि ! गृहणे दानसागरम् ।
वृषोत्सर्गं महादानं यत्किञ्चित् पृथिवीतले ।
पुरश्चरणं तथा होमं यः कुर्य्याद्विधिबोधितम् ।
सर्व्वं तस्य वृथा देवि ! श्रीगुरोरर्चनं विना ॥”
इति श्रीकामधेनुतन्त्रे आगमसन्दर्भे ज्ञानदर्पणे देवदेवीसंवादे २५ पटलः ॥

दानीयः, त्रि, (दीयतेऽस्मै इति । दा दाने + “कृत्यल्युटो बहुलम् ।” ३ । ३ । ११३ । इति सम्प्रदाने अनीयर् ।) सम्प्रदानम् । इति मुग्धबोधम् ॥ (यथा, तत्रैव कारकप्रकरणे ।
“सर्व्वोऽर्थ्यो जीवनः पाता दानीयः प्रभवो
लयः ॥”)

दानुः, त्रि, (ददातीति । दा + “दाभाभ्या नुः ।” उणा ।३।३२ । इति नुः ।) दाता । विक्रान्तः । इति मेदिनी । ने, १० ॥ पुंसि । वायुः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (पुं, दानवः । यथा, ऋग्वेदे । २ । १२ । ११ ।
“ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥”
दीयते इति कर्म्मणि नुः । देयः । यथा, ऋग्वेदे । ८ । २५ । ६ ।
“स या दानूनि येमथुर्दिव्याः पार्थिवीरिषः ॥”)

दान्तः, त्रि, (दाम्यतीति । दम + कर्त्तरि क्तः ।) तप क्लेशसहः । (यथा, मनुः । ६ । ३५ ।
“कृतप्रक्लेशस्तपसस्तुदान्तः ग्रासाम्रायः ग्रयः ॥”)

दमितः । इत्यमरः । २ । ७ । ४३ ॥ (यथा, महाभारते । १ । २२२ । ४६ ।
"तथैवाश्वतरीणाञ्च दान्तानां वातरंहसाम् ॥"
दन्तेन निर्वृत्तम् । दन्त + "तेन निर्वृत्तम् ।" ४ । २ । ६८ । इति अण् । दन्तनिर्म्मितम् । यथा, महाभारते । ५ । ४६ । ५ ।
"रुचिरैरासनैस्तीर्णां काञ्चनैर्दारवैरपि ।
अश्मसारमयैर्दान्तैः स्वास्तीर्णैः सोत्तरच्छदैः ॥")
दाता । इति संक्षिप्तसारे उणादिवृत्तिः ॥ पु, दमनकवृक्षः । शिशितवृक्षः । इति राजनिर्घण्टः ॥ (विदर्भराजपुत्त्रविशेषः । यथा, महाभारते । ३ । ५३ । ८—९ ।
"तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम् ॥"
स्त्री, अप्सरोविशेषः । यथा, महाभारते । १३ । १९ । ४५ ।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च ॥")
दान्तिः, स्त्री, (दम + क्तिन् । "अनुनासिकस्येति ।" ६ । ४ । १५ । इति दीर्घः ।) तपःक्लेशसहिष्णुता । तत्पर्य्यायः । दमथः २ दमः ३ । इत्यमरः । ३ । २ । ३ ॥
दापित, त्रि, (दाप्यते स्म इति । दा + णिच् + कर्म्मणि क्तः ।) साधितः । इत्यमरः । ३।१।४०॥ धनादिना आयत्तीकृतः । इति भरतः ॥ धुती इति ख्यातं यस्मै इत्स स इति रमानाथः ॥ दण्डितः । इति विद्याविनोदः ॥ शोधितद्रव्यम् । इति नयनानन्दः ॥ दायित इति पाठोऽपि । इति काशिकापुरुषोत्तमौ ॥
दाम, [न्] क्ली स्त्री, (दीयते इति । दा दाने दो अवखण्डने वा + "सर्व्वधातुभ्यो मनिन् ।" उणां । ४ । १४५ । इति मनिन् ।) यत्रैकस्मिन् बहुप्रग्रहयुक्ते अनेकगावो बध्यन्ते तत् । दाड़नि इति दोंका इति च भाषा । तत्पर्य्यायः । सन्दानम् २ । इत्यमरः । २ । ९ । ७३ ॥ रज्जुः । इति दामोदरदर्शनात् ॥ (यथा, भागवते । १ । ८ । ३१ ।
"गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति ॥"
माला । यथा, माघे । ४ । ५० ।
"श्यामलघुविलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानसूय्य ॥"
दातरि, त्रि । यथा, ऋग्वेदे । ६ । ४४ । २ ।
"यः शग्मस्तुविशग्म ते रायो दामा मतीनाम् ॥"
"रायो धनस्य दामा दाता भवति ।" इति तद्भाष्ये सायनः ॥)
दामनपञ्च, [न्] क्ली, (दमनो दमनवृक्षस्तस्येदमित्यण्प्रत्यये दामन तद्भञ्जनसम्बन्धि पञ्च यस्मिन् ।) दमनभञ्जनतिथिः । सा चैत्रशुक्लचतुर्द्दशी । इति तिथ्यादितत्त्वम् ॥

दामनी, स्त्री, (दामैव । दामन् + स्वार्थे प्रज्ञादित्वात् अण् । "अन् ।" ६ । ४ । १६७ । इति प्रकृतिभावः । "टिड्ढेति ।" ४ । १ । १५ । इति ङीप् ।) पशुबन्धनरज्जुः । तत्पर्य्यायः । पशुरज्जुः २ । इत्यमरः । २ । ९ । ७३ ॥ (यथा, हरिवंशे । ६५ । २४ ।
"कौबेरारोप्यमाणेषु दामनीपाशपाशितैः ॥")
दामलिप्त, क्ली, तमोलिप्तदेशः । इति हेमचन्द्रः । ४ । ४५ ॥
दामा, स्त्री, (दामन् + "डाबुभाभ्यामन्यतरस्याम् ।" ४ । १ । १३ । इति पक्षे डाप् ।) दाम । इति भरतः ॥
दामाञ्चन, क्ली, (दामाञ्चलम् । पृषोदरादित्वात् लस्य नः ।) अश्वादेः पादबन्धनरज्जुः । इति हेमचन्द्रः । ४ । ३१७ ॥
दामाञ्चल, क्ली, (दाम्नः अञ्चलमिव ।) एकप्रकाण्डिबन्धः । अश्वादिपादबन्धनरज्जुः । इति हारावली । ६१ ॥ (यथा, माघे । ५ । ६१ ।
"सस्रुः सरोषपरिचारकवार्य्यमाणा
दामाञ्चलस्खलितलोलपदं तुरङ्गाः ॥")
दामोदर, पुं, ("दमादिसाधनेनोदारा उत्कृष्टा मतिर्या तया गम्यते इति दामोदरः । 'दाम्ना दामोदरं विदुः ।' इति भगवद्वचनात् । यशोदया दाम्नोदरे बद्ध इति वा दामोदरः ।
'दामानि लोकनामानि तानि यस्योदरान्तरे ।
तेन दामोदरो देवः श्रीधरस्तु रमाश्रितः ॥'
इति वा ।" इति विष्णुसहस्रनामभाष्ये शङ्करः ॥ ५३ ॥ तथा, महाभारते । ५ । ७० । ८ ।
"देवानां स्वप्रकाशत्वात् दमाद्दामोदरो विभुः ॥")
विष्णुः । इत्यमरः । १ । १ । १८ ॥ (दाम रज्जुरुदरे यस्य । श्रीकृष्णः । यथा, महाभारते । १ । १९० । १९ ।
"दामोदरो भ्रातरमुग्रवीर्य्यं
हलायुधं वाक्यमिदं बभाषे ॥"
यशोदयास्य उदरदेशे दाम्ना बद्ध आसीत् अतोऽस्य तथा नाम । यथा, हरिवंशे ।६३।१४,२६ ।
"दाम्ना चैवोदरे बद्धा प्रत्यबन्धदुलूखले ।
यदि शक्तोऽसि गच्छेति तमुक्त्वा कर्म्म साकरोत् ॥"
"स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् ।
गोष्ठे दामोदर इति गोपीभिः परिगीयते ॥")
भूतार्हद्विशेषः । इति हेमचन्द्रः । २ । १३० ॥ (शालग्राममूर्त्तिविशेषः । तल्लक्षणं यथा, पद्मपुराणे ।
"स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रो भवेत्तु सः ।
चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा ॥"
अस्य अन्यद्विवरणन्तु शालग्रामशब्दे द्रष्टव्यम् ॥ ॥ काश्मीरस्य नृपविशेषः । यथा, राजतरङ्गिण्याम् । १ । ६४ ।
"गते प्रवीरसुलभां तस्मिन् सुचरिते गते ।
श्रीमान् दामोदरो नाम तत्सुतुरभूत् क्षितिम् ॥")
दाम्भिकः, पुं स्त्री, (दम्भेन चरतीति । दम्भ + "चरति ।" ४ । ४ । ८ । इति ठक् ।) वक

पक्षी । इति राजनिर्घण्टः ॥ दम्भयुक्ते, त्रि । (यथा, मनुः । ३ । १५९ ।
"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥")
दाय, ऋ ङ दाने । इति कविकल्पद्रुमः ॥ (भ्वां आत्मं-सकं-सेट् ।) ऋ, अददायत् । ङ, दायते । इति दुर्गादासः ॥
दायः, पु (दीयते इति । दा दाने + घञ् । "आतो युक्चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) यौतुकादिदेयधनम् । (यथा, महाभारते । २ । ५१ । १ ।
"दायन्तु विविधं तस्मै शृणु मे गदतोऽनघ ।
यज्ञार्थं राजभिर्दत्तं महान्तं धनसञ्चयम् ॥")
कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत् । इति भरतः ॥ तत्पर्य्यायः । हरणम् २ । इत्यमरः । २ । ८ । २८ ॥ यौतुकभागधनम् । विभक्तव्यपितृद्रव्यम् । (यथा, मनुः । ९ । १६४ ।
"औरसो विभजन् दायं पित्र्यं पञ्चममेव वा ॥"
विभागार्हधनमात्रम् । यथा, तत्रैव । ९ । ७७ ।
"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः ।
ऊर्द्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥"
दा दाने + भावे घञ् ।) दानम् । इति मेदिनी । ये, ३० ॥ (यथा मनुः । ८ । १९९ ।
"अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥")
स्थानम् । (दो छेदे + घञ् ।) खण्डनम् । इति शब्दरत्नावली ॥ लयः । इत्यजयपालः ॥ (ददातीति । दा + "श्याद्व्यधेति ।" ३ । १ । १४१ । इति णः । दातरि, त्रि । इति व्याकरणम् ।)
दायकः, त्रि, (ददातीति । दा + ण्वुल् ।) दाता । यथा । हृतारिगतिदायक इति भक्तिरसामृतसिन्धुः ॥ (यथाच महाभारते । ३ । १८३ । ३३ ।
"तावतां गोसहस्राणां फलं प्राप्नोति दायकः ॥")
दायबन्धु पुं, (दाये बन्धुः ।) भ्राता । इति शब्दरत्नावली ॥
दायभागः, पु, (दायस्य भागः ।) सम्बन्धिमात्रेण सम्बन्धिधनविभागः । पूर्व्वद्रव्यस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दस्तस्य विभागः । एकदेशगतस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतयाव्यवस्थितस्य गुटिकापातादिना व्यञ्जनम् । अथवा विशेषेण भजनं स्वत्वज्ञापनं वा । यत्र चैकदासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषवहनदोहनफलेन स्वत्वं व्यज्यते ॥ ॥ अथ दायाधिकारक्रमे पुंधनाधिकारिणः । तत्रादौ मृतधने औरसपुत्त्रस्याधिकारः । तदभावे पौत्त्रस्य । तदभावे प्रपौत्त्रस्य । मृतपितृकपौत्त्रमृतपितामहकप्रपौत्त्रयोः पुत्त्रेण सह तुल्याधिकारः । एषामभावे पत्नी धनाधिकारिणी । तत्राय विशेषः, पत्नी धनं भुञ्जीत

एव न तु तस्य दानाधमनविक्रयान् कर्त्तुमर्हति । किन्तु भर्त्तुरौर्द्ध्वदैहिकक्रियार्थं दानादिकमप्यनुमतम् । वर्त्तनाशक्तौ आधमनमप्यनुमतं तदशक्तौ विक्रयणमपि । भर्त्तुरौर्द्ध्वदैहिकक्रियार्थमर्थानुरूप भर्त्तृसपिण्डभर्त्तृगुरुभर्त्तृदौहित्रसन्तानभर्त्तृभागिनेयभर्त्तृमातुलेभ्यो दद्यात् । एतेषामभावे स्वपितृकुले दद्यात् ॥ पत्न्यभावे दुहिता । तत्रापि प्रथमं कुमारी । अत्राय विशेषः कन्या जाताधिकारा पश्चात् परिणीता सती अविद्यमानपुत्त्रा यदि मृता तदा तत्पितृदाये सपुत्त्राया सम्भावितपुत्त्रायाः भगिन्यास्तस्याधिकारः । कुमार्य्यभावे चोढाया. पुत्त्रवत्याः सम्भावितपुत्त्रायाश्च तुल्याधिकारः । एतयोरेकतराभावे अन्याधिकारिणी । एतयोरभावेऽपि वन्ध्यापुत्त्रहीनविधवयोर्नाधिकारः । सर्व्वदुहितृभावे दौहित्रस्याधिकारः । तदभावे पितुरधिकारः । तदभावे मातुरधिकारः । तदभावे सोदरस्याधिकारः । सोदराभावे सजातीयवैमात्रेयाधिकारः । संसर्ग्गे तदभावे सोदरभ्रातृपुत्त्राणामधिकारः । संसर्ग्गिसोदरभ्रातृपुत्त्रेषु संसर्ग्गिभ्रातृपुत्त्रस्याधिकारः । एवं संसर्ग्यसंसर्ग्गिवैमात्रेयभ्रातृपुत्त्रे सति संसर्ग्गिवैमात्रेयभ्रातृपुत्त्रस्याधिकारः । यदा त्वसंसर्गी सोदरभ्रातृपुत्त्रः संसर्गी चासोदरभ्रातृपुत्त्रस्तदा तयोर्युगपदधिकार । यदा पुनः सोदरवैमात्रेयभ्रातृपुत्त्रौ संसर्गिणावसंसर्गिणौ वा तदा उभयथैव सोदरभ्रातृपुत्त्रस्याधिकारः । भ्रातृपुत्त्राभावे भ्रातृपौत्त्रस्याधिकार. । अत्रापि सोदरवैमात्रेयभ्रातृपुत्त्रवत् क्रमो बोध्य. । भ्रातृपौत्त्राभावे पितृदौहित्रस्याधिकारः । अत्र सोदरभगिनीपुत्त्रवैमात्रेयभगिनीपुत्त्रयोस्तुल्यवदधिकार । पितुर्दौहित्राभावे पितामहस्याधिकारः । पितामहाभावे पितामह्या अधिकार । पितामह्यभावे पितृव्यस्याधिकार. । तदभावे पितृव्यपुत्त्रस्याधिकारः । तदभावे पितृव्यपौत्त्रस्याधिकार. । पितृव्यपौत्त्राभावे पितामहदौहित्रस्याधिकारः । पितामहदौहित्राभावे पितृव्यदौहित्रस्याधिकारः । तदभावे प्रपितामहस्याधिकारः । तदभावे प्रपितामह्या अधिकारः । ततः पितामहभ्राताधिकारी । तदभावे पितामहभ्रातृपुत्त्र । तदभावे पितामहभ्रातृपौत्त्रः । तत. प्रपितामहदौहित्रोऽधिकारी । तत पितामहभ्रातृदौहित्रोऽधिकारी । तदभावे मातामहः । तदभावे मातुलः । तदभावे मातृष्वस्रीयः । तदभावे मातुलपुत्त्रः । तदभावे मातुलपौत्त्रः । एषामभावे सकुल्यः । सकुल्योऽपि द्विविधः अधस्तन ऊर्द्ध्वतनश्च तत्र प्रपौत्त्रपुत्त्रादयोऽधस्तनास्त्रय. वृद्धप्रपितामहादिश्च ऊर्द्ध्वतनास्तत्राप्यादावधस्तनानां सकुल्यानां क्रमेणाधिकारः । तेषामभावे ऊर्द्ध्वतनानां क्रमेणाधिकारः । एवंविधसकुल्याभावे समानोदका. । तदभावे आचार्य्यः । तदभावे शिष्यः तदभावे सहवेदाध्यायिब्रह्मचारिणः ।

तदभावे ग्रामस्थाः सगोत्रा । तदभावे तथाविधा समानप्रवराः । उक्तपर्य्यन्ताभावे तद्ग्रामस्थाश्रोत्रियविद्यादिगुणयुक्ता ब्राह्मणा धनाधिकारिण. । एतेषामभावे ब्राह्मणधनवर्ज्जं राजाधिकारी । ब्राह्मणधनस्य तु गुणवद्ब्राह्मणपर्य्यन्ताभावे ब्राह्मणान्तरस्य ग्रामान्तरस्थस्यापि अधिकारः । वानप्रस्थयतिब्रह्मचारिणां धनं धर्म्मभ्रातृसच्छिष्याचार्य्या गृह्णीयुः । तदभावे एकतीर्थवासी एकाश्रमी वा गृह्णीयात् । ब्रह्मचारी च द्विविधः नैष्ठिक उपकुर्व्वाणश्च । तत्र नैष्ठिकधने आचार्य्यस्याधिकारः । उपकुर्व्वाणस्य तु धनं पित्रादिभिरेव ग्राह्यम् । इति पुंधनाधिकारिणः ॥ * ॥

अथ स्त्रीधनाधिकारक्रमः ।

तत्र कुमारीधने प्रथमं सोदरभ्राताधिकारी । तदभावे माता तदभावे पिता । वरदत्तधने वरोऽधिकारी ॥ * ॥

अथोढास्त्रीधनाधिकारक्रमनिरूपणार्थं तद्धनं निरूप्यते । विवाहकाले लब्धं यौतुकं धनम् १ भर्त्तृनीयमाना पितृमातृकुलात् यद्धन लभते तत् २ भर्त्तृदत्तम् ३ भ्रातृदत्तम् ४ पितृदत्तम् ५ मातृदत्तम् ६ द्वितीयविवाहार्थिना पूर्व्वस्त्रियै पारितोषिकं यद्दत्तं तत् ७ चान्नाच्छादनम् ८ अलङ्करणम् ९ गृहादिकर्म्मिरूपशिल्पिस्वभर्त्तृद्वारेणान्येषां गृहादिनिष्पादनाद्युत्कोचविषयान्येभ्यो यद्धन लब्धं तत् १० पुत्त्रदत्तम् ११ मातुलादिदत्तम् १२ विवाहात् परतः पित्रादिना भर्त्रादिना च यद्दत्तम् १३ । भर्त्तृदत्तस्थावरातिरिक्तानामेतेषां धनानां स्त्री दानादिकं कर्त्तुमर्हति ॥ * ॥

तदेव स्त्रीधने निरूपिते तस्यां मृताया तद्धनाधिकारी निरूप्यते । तत्र यौतुकधने कुमार्य्याः प्रथममधिकारः । तदभावे वाग्दत्तायाः तदभावे चोढायाः पुत्त्रवत्याः सम्भावितपुत्त्रायाश्च युगपदधिकारः । तदभावे वन्ध्याविधवयोस्तुल्यवदधिकार । तत्र कुमारी वाग्दत्ता जाताधिकारानन्तरं परिणीता सती पश्चाद्वन्ध्यात्वेनावधृता पुत्त्रमनुत्पाद्यैव विधवाभूता वा तदा तस्यां मृतायां तत्संक्रान्तमातृधने तद्भगिन्योः पुत्त्रवतीसम्भावितपुत्त्रयोरभावे वन्ध्याविधवयोरप्यधिकारः । सर्व्वदुहितृभावे पुत्त्रस्याधिकारः । पुत्त्राभावे दौहित्रोऽधिकारी दौहित्राभावे पौत्त्रः । तदभावे प्रपौत्त्र । तदभावे सपत्नीपुत्त्र. । तदभावे सपत्नीपौत्त्र । तदभावे सपत्नीप्रपौत्त्रः । एतत्पर्य्यन्ताभावे ब्राह्मदैवार्षगान्धर्व्वप्राजापत्याख्यविवाहपञ्चकलब्धयौतुकधने भर्त्तुरधिकारः । भर्त्तुरभावे भ्रातुः । तदभावे माताधिकारिणी । तदभावे पिता । सपत्नीप्रपौत्त्रपर्य्यन्ताभावे आसुरराक्षसपैशाचाख्यविवाहत्रिकलब्धयौतुकधने तु प्रथमं मातुरधिकारः । तदभावे पितु । पितुरभावे भर्त्तु ॥ अथायौतुकस्त्रीधनाधिकारिक्रमः । तत्र विवाह-

पूर्व्वापरकालपितृदत्तयौतुकाभ्यामतिरिक्तस्त्रीधने कन्यापुत्त्रयोर्युगपदधिकारः । तयोरेकतराभावे अन्यतरस्य तद्धनं तयोर्द्वयोरभावे ऊढायाः पुत्त्रवत्याः सम्भावितपुत्त्रायाश्च तुल्यवदधिकारः । एतयोरेकतराभावे अन्यस्या अधिकारः । एतयोर्द्वयोरभावे पौत्त्रः । पौत्त्राभावे दौहित्र । तदभावे प्रपौत्त्रः । तदभावे सपत्नीपुत्त्रः तदभावे सपत्नीपौत्त्रः । तदभावे सपत्नीप्रपौत्त्रोऽधिकारी । ततो वन्ध्या विधवा च तुल्यवदधिकारिण्यौ । एतयोरेकतराभावे चान्यतरस्याः । वन्ध्याविधवापर्य्यन्ताभावे यौतुकवत् ब्राह्मादिविवाहपञ्चकविवाहिताया धने भर्त्तृभ्रातृमातृपितॄणां क्रमशोऽधिकारः । विवाहकाले तत्पूर्व्वापरकाले वा स्त्रियै यद्धन पित्रा दत्तं तत्र धने प्रथमं कुमार्य्याः । तदनन्तरमूढयोः पुत्त्रवतीसम्भावितपुत्त्रयोः । तदनन्तरं वन्ध्याविधवयोस्त्वाधिकारः । सर्व्वदुहित्रभावे पुत्त्रादेर्यौतुकधनान्तरवत् क्रमेणाधिकारः । ततो ब्राह्मादिविवाहपञ्चकलब्धयौतुकधनेषु पितृपर्य्यन्ताभावे आसुरादिविवाहत्रिकलब्धयौतुकधनेषु च भर्त्तृपर्य्यन्ताभावे देवरादेरधिकारः । तदभावे देवरभ्रातृश्वशुरयोः सुतानां युगपदधिकारः । एतेषामभावे असपिण्डोऽपि भगिनीपुत्त्रः । तदभावे भर्त्तृभागिनेयः । तदभावे भ्रातृसुतः । तदभावे जामाता । जामातृपर्य्यन्ताभावे सपिण्डानन्तर्य्यक्रमेण श्वशुरभ्रातृश्वशुरादीनां सपिण्डानामधिकारः । सपिण्डाभावे सकुल्याः समानोदकाः सगोत्राः समानप्रवराश्च पुंधनवत् क्रमेणाधिकारिणः । एतत्सर्व्वाभावे ब्राह्मणीधने स्वग्रामश्रोत्रियादेरधिकारः । क्षत्त्रियादिधने राज्ञ एवाधिकारः । इति स्त्रीधनाधिकारिणः ॥ * ॥

अथ विभागानधिकारिणः ।

क्लीवपतिततज्जात्यन्धजन्मवधिर-उन्मत्तजड-मूकपङ्गुपितृद्विट्निरिन्द्रियौपपातिकाचिकित्स्यरोगार्त्ताः । पतितवर्ज्जं एते भरणीयाः । पतितपुत्त्रवर्ज्जमेतेषां पुत्त्रा यदि निर्दोषा तदंशभागिनः । क्लीवादीनां अपुत्त्रा भार्य्या यदि सद्वृत्तास्तदा भर्त्तव्याः । एषां दुहितरो विवाहपर्य्यन्तं भरणीयाः ॥ * ॥

अथ विभाज्याविभाज्यधननिर्णयः ।

तत्र पैतामह पित्रर्ज्जित साधारणधनोपघातेनार्ज्जितञ्चेति त्रिविधं धनं सर्व्वैरेव विभाज्यम् । किन्तु तत्रार्ज्जकस्य द्व्यंशो अन्येषामेकैकांशः साधारणधनानुपघातेन शौर्य्यप्राप्तं धनं एवं साधारणधनानुपघातेनार्ज्जितविद्याधनं पितृपितृव्यादिप्रसादादिना लब्धं धन भार्य्याप्राप्तिकाले लब्ध धन मित्रताप्राप्त धन आर्त्विज्यलब्धं एतान्यविभाज्यानि । विद्याधनन्तु समविद्याधिकविद्येभ्यो देयं एव यदि विद्यामभ्यस्यतो भ्रातु. कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्या विभर्त्ति तदा तद्विद्यार्ज्जितधने मूर्खस्यापि अपरभ्रातुरंशित्वम् । स्वकुलात् पित्रादितो

लब्धविद्यार्ज्जितधने तु सर्व्वेषां मूर्खामूर्खाणामंशित्वम् । विद्याधनं यथा, यदि भवान् भद्रमुपन्यस्यति तदा भवते एतावद्धनं दातव्यं इति पणिते तत्र भद्रोपन्यासेन यत् पणितं धनं लब्धं तत् । अध्यापितशिष्याद्यल्लब्धम् । आर्त्विज्यकर्म्मकरणेन यजमानाद्दक्षिणादिरूपं लब्धं धनम् । यत्किञ्चित् विद्यायाः प्रश्ने कृते तत्र सम्यगुत्तरेण परितोषादपणितमेव किञ्चिद्धनं ददाति तत् । यो ह्यस्मिन् शास्त्रार्थे मम संशयमपनयति तस्मै सुवर्णादिकमिदं दास्यामीत्युक्ते तस्य संशयमपनीय यल्लब्धम् । वादिनोः कृत्रपिद्वादविषयसन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धम् । शास्त्रादिषु स्वज्ञानं प्रकाश्य प्रतिग्रहादिना यल्लब्धम् । तथात्यर्थवादाद्वाद विचारे वा परं निर्ज्जित्य यल्लब्धम् । एकस्मिन् देये वस्तुनि बहूनां ब्राह्मणानां समुत्थाने येन प्रकृष्टं वेदमधीत्य यल्लब्धम् । चित्रकरसुवर्णकारादिभिः शिल्पिभिर्मूल्यादधिकं यल्लब्धम् । द्यूतेनापि परं निर्ज्जित्य यल्लब्धम् । एतानि अविभाज्यानि ॥ * ॥

क्रमादभ्यागतं द्रव्यमन्येन हृतं यदि दायादानामनुमत्या तेषामेकतरेण साधारणधनानुपघातेन इतरव्यापारनैरपेक्ष्येण च धनमुद्धरति तदा तद्धनमुद्धारकर्त्तुरेव । भूमिस्तु यदि अन्येर्हृता एकेनोद्धृता तदा स तुरीयांशं गृहीत्वा अवशिष्टभागत्रयं अन्यैः सह समं विभजेत् । अयं निष्कर्षः विभक्तेनाविभक्तेन वा साधारणधनानुपघातेनापरव्यापारनैरपेक्ष्येण येन यदर्ज्जितं तदर्ज्जकस्यैव न तु तद्विभाज्यमितरैः । किन्तु विद्यालब्धधनमात्रे विशेषः स च प्रागेवाभिहितः । अन्ययोजित वस्त्रालङ्कार अश्वादिवाहन लड्डुकादिकूपवाप्यादिगत पित्रादिसम्बन्धिजल दासीव्यतिरिक्ता स्त्री गोप्रचाररथ्या एतानि नान्यधनवद्विभाज्यानि किन्तु स्वव्यापारेण तद्गृहीतव्य एव स्वस्वव्यापारोपयुक्तशयनभोजनपात्रादि न विभजनीयं येन यद्गृहीतं तत्तस्यैव । पुस्तकन्तु मूर्खेण याह्यं किन्तु पण्डितेन तदन्तर्गतस्वांशतुल्यद्रव्यान्तरं मूल्यमेव वा दत्त्वा गृहीतव्यं एव शिल्पिनां शिल्पोपयुक्तद्रव्यं नाशिल्पिनां तत्रापि पुस्तकवद्व्यवस्था । पितरि जीवति यस्मिन् वास्तौ येन गृहोद्यानादिकं कृतं तस्य न विभागः यद्यपरेणापि वास्त्वन्तरे तथा कृतम् ॥ * ॥

अथ संसृष्टविभागक्रमार्थमादौ संसर्गो निरूप्यते ।

पितृभ्रातृपितृव्याणामन्यतरेण सह विभक्तः सन् पुनरन्योऽन्येच्छया पूर्व्वकृतविभागमपेक्ष्य यत्तव धनं तन्मम धनं यन्मम तत्तवापीति व्यवस्थया एकगृहस्थिरूपतयावस्थानं संसर्गः ॥ अथ संसृष्टविभागः । अत्र भ्रातृणां अन्येषां तुल्यसम्बन्धिनां वा संसर्ग्यसंसर्गिणां मध्ये संसर्गिणामेव प्रथमं मृतसंसर्गिधनेऽधिकारः । तदभावे तथाविधासंसर्गिणामिति क्रमः ॥ * ॥ एवं यदा पिता पुत्रान् विभज्य यथाशास्त्रं भागं गृहीत्वा पुत्रैः सहासंसृष्ट एव पुत्रान्तरमुत्पाद्य मृतस्तदा विभागानन्तरजात एव तद्धनाधिकारी न पूर्व्वविभक्तः एवं पूर्व्वभ्रातृविभागेऽपि विभक्तजस्य नांशित्वम् । यदि तु येन केनचित् पुत्रेण संसृष्टः सन् पिता मृतः तदा तद्धनं संसृष्टविभक्तजाभ्यां समं विभाज्यं यथा धने सवर्णेऽपि । यद्यविज्ञातगर्भायामेव स्त्रियां पुत्रा विभक्तास्तज्जन्मजातो विभक्तद्रव्याण्येकीकृत्य पुनर्व्विभज्य स्वांशं गृह्णीयात् न तु विभक्तजेन सह पितृद्रव्येंऽशित्वम् ॥ * ॥

अथ पितृकृतविभागो निरूप्यते ।

यत्र पितृकृतविभागस्तत्र स्वोपार्ज्जितधने पितुरिच्छैव नियामिका । पितामहधने तु मातृरजोनिवृत्तिसहकृता तदिच्छा नियामिका । स्वोपार्ज्जितधने पिता इच्छया धनं गृहीतुं शक्नोति कस्मैचिदधिकं कस्मैचिन्न्यूनं दातुमर्हति । पैतामहधनविभागे तु पिता स्वयमंशद्वयं गृहीत्वा पुत्रेभ्य एकैकांशं दद्यात् । किन्तु पैतामहमणिमुक्ताप्रवालादिषु पितुः स्वाच्छन्द्यं भूमिनिबन्धद्विपदान्यतमे न स्वाच्छन्द्यम् । स्वार्ज्जितधनविभागे पित्रा अपुत्रपत्नीभ्यः पुत्रतुल्यांशो देयः यदि ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते सति अर्द्धं देयम् । पुत्रकर्त्तृकविभागे तु विमातुरंशाभावः ॥ * ॥ शूद्रस्य दासीपुत्रोऽपि पितुरिच्छया परिणीतस्त्रीजातपुत्रेण सह तुल्याधिकारी मृते पितरि तदर्द्धांशाधिकारी । तथाविधभ्रात्रभावे दौहित्रे चासति पितुः सर्व्वधनाधिकारी सति दौहित्रे तेन सह तुल्याधिकारी ॥ * ॥ पितरि मृते मातरि जीवन्त्यां पुत्राणां विभागो न धर्म्म्यः यदि जीवन्त्यां मातरि विभागं कुर्व्वन्ति तदा मातापि पुत्रतुल्यांशभागिनी । विमातुरंशाभावः किन्तु सा ग्रासाच्छादनादिना भर्त्तव्या । एवं पितामहधने पौत्रैर्व्विभाज्यमाने पितामह्यः पौत्रतुल्यांशभागिन्यः ॥ * ॥ औरसेन दत्तकादीनां विभागे औरसस्य द्व्यंशित्वं सवर्णदत्तकादेरेकांशित्वम् । विभागस्तु पित्रादेर्ऋणिनः ऋणं परिशोध्य तदवशिष्टधनस्य करणीयः । उत्तमर्णेच्छया विभज्य वा तदृणं परिशोधनीयम् । एकेन भ्रात्रादिना बहुपोष्यतया यत्राधिकं भुक्तं तत्र न विभक्तांशो विभागमध्ये प्रवेशनीयः । किन्तु भुक्तावशिष्टस्य विद्यमानधनस्यैव विभागः कार्य्यः ॥ * ॥ असंस्कृतभ्रातृभगिनीनां पैतृकधनेन संस्कारः कर्त्तव्यः । विभागकाले केनचिच्छिद्गुप्तस्य पश्चात् प्राप्तस्य समभागः कर्त्तव्यः । भ्रमादिना कृताशास्त्रीयविभागधनस्य पुनः शास्त्रीयविभागः कार्य्यः ॥ * ॥

अथ विदेशागतस्य विभागः ।

विभक्ततादृशायां देशान्तरगतस्य चिरकालावसरागतस्य सप्तमपुरुषपर्य्यन्तं तत्सन्ततेरपि भोगसामन्तादिना वा स्वज्ञापनपूर्व्वकं क्रमागतधनात् यथाशास्त्रमंशभागित्वमिति स्थितं एषा व्यवस्था विदेशागतविषयिणी देशस्थविषये तु धनिनश्चतुर्थपर्य्यन्तं एव तद्धनविभागार्हता । साधारणधनेऽपि स्वांशदानं कर्त्तव्यम् । इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः ॥ * ॥

"देशस्य जातेः संघस्य धर्म्मो ग्रामस्य यो भवेत् ।
उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत् ॥"

इति दायतत्त्वम् ॥

दायविभागः, पुं, (दायस्य विभागः ।) दायभागः । यथा । "किं दायस्य विभागो विभक्तावयवत्वं किंवा दायेन सह विभागोऽसंयुक्तत्वम् ।" इति जीमूतवाहनः ॥

दायादः, पुं, (आदत्ते इति । आ+दा+"आतश्चोपसर्गे ।" ३।१।१३६ । इति कः । दायस्य आदः ग्राहकः ।) सपिण्डः । पुत्रः । इत्यमरः । ३।३।८८ ॥ (यथा, महाभारते । १ । ८५ । २ ।
"पुरुणा तु कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान् मम दायादो धृता येन जरा मम ॥")

दायादी स्त्री, (दायं अत्तीति । अद्+अण् । स्त्रियां ङीष् ।) कन्या । इति शब्दार्थकल्पतरुः ॥

दायितः, त्री, (दाय दाने+णिच्+क्तः ।) दापितः । इत्यमरटीकायां भरतः ॥

दारकः, पुं, (दारयति नाशयति जनकस्य पितृऋणमिति । दॄ+णिच्+ण्वुल् ।) पुत्रः । इति हेमचन्द्रः । ३ । २०६ ॥ (यथा, महाभारते । १ । ८३ । १३ ।
"कस्यैते दारका राजन् देवपुत्रोपमाः शुभाः ।
वर्चसा रूपतश्चैव सदृशा मे मतास्तव ॥")
बालकः । इति मेदिनी । के, १०३ ॥ (यथा, महाभारते । १ । ८३ । १६ ।
"शर्म्मिष्ठां मातरञ्चैव तथा चक्रुश्च दारकाः ॥")
दारुकः । इति शब्दार्थकल्पतरुः ॥ ग्राम्यशूकरः । इति राजनिर्घण्टः ॥

दारकः, त्रि, (दारयतीति । दॄ+णिच्+ण्वुल् ।) भेदकः । इति मेदिनी । के, १०३ ॥ (यथा,—
"अशेषदुर्नामकरोगदारकं
करोति वृद्धं सहसैव दारकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे ॥")

दारकर्म्म, क्ली, (दारार्थं मन्त्रार्थं यत् कर्म्म ।) विवाहः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । १ । १४ । २६ ।
"दारकर्म्म ततो व्यासः शुकस्य पर्य्यचिन्तयत् ॥")

दारणं, क्ली, (दारयति नाशयति जलमलमनेनेति । दॄ+णिच्+करणे ल्युट् ।) कतकम् । इति शब्दचन्द्रिका ॥ (दॄ+णिच्+भावे ल्युट् ।) विदारणम् । यथा, "दारुदारणपये" समाहृतम् । इति लीलावती ॥ (व्रणादिस्फोटनसम्पादक औषधविशेषः । यथा, सुश्रुते । १ । ३६ ।
"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः ।
कपोतगृध्रकङ्कानां पुरीषाणि च दारणम् ॥
क्षारद्रव्याणि वा यानि क्षारो वा दारणं परम् ॥"
दारयतीति । दॄ+णिच्+कर्त्तरि ल्युः । विदारके, त्रि । यथा, महाभारते । ८ । ४९ । १० ।
"समाधत्त शितं बाणं गिरीणामपि दारणम् ॥")

दारदः, पुं, (दरदे देशविशेषे भवः । दरद+अण् ।) दरददेशोद्भवविषभेदः । इत्यमरः । १ । ८ । ११ ॥ पारदः । हिङ्गुलम् । इति मेदिनी । दे, ३१ ॥ समुद्रः । इति हारावली । ५६ ॥

दारवलिभुक्, पु, (दारेण चञ्च्वाघातजन्यविदारणेन वलिं भुङ्क्ते इति । भुज+क्विप् ।) वकपक्षी । इति त्रिकाण्डशेषः ॥

दाराः, पु, (दारयन्ति भ्रातृन्सुहृदोऽपि? — दारयन्ति भ्रातृबन्धूनिति । दॄ+"दारजारौ कर्त्तरि णिलुक् च ।" ३ । ३ । २० । इत्यस्य वार्त्तिकोक्त्या घञ् णिलुक् च ।) भार्य्या । बहुवचनान्तोऽयम् । इत्यमरः । २ । ६ । ६ ॥ (यथा, महाभारते । १ । १५९ । २७ ।

"आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि ।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि ॥")

दारा, स्त्री, (दारयति भ्रातिबन्धूनिति । दॄ+णिच्+अच्+टाप् ।) दाराः । इत्यमरटीकायां भरतः ॥ (यथा, भागवते । ७ । १४ । ११ ।
"अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥")

दारिः, स्त्री, (दारयतीति । दॄ+णिच्+इन् ।) विदारकः । इति शब्दार्थकल्पतरुः ॥

दारिका, स्त्री, (दारक+टापि अत इत्वम् ।) कन्या । इति जटाधरः ॥ (यथा, हरिवंशे । ४१ । १५९ ।
"अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम् ॥")

दारितः, त्रि, (दार्य्यते स्मेति । दॄ+णिच्+क्तः ।) क्षतदारणः । तत्पर्य्यायः । भिन्न. २ भेदितः ३ । इत्यमरः । ३ । १ । १०० ॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । १०७ । ४९ ।
"अंशुमानेवमुक्तस्तु सगरेण महात्मना ।
जगाम दुःखात् तं देशं यत्र वै दारिता मही ॥"
ताडितः । यथा, कालिकापुराणे ९० अध्याये ।
"ततः सुदर्शनो राजा गदया दारितोऽपतत् ॥")

दारिद्र्यं, क्ली, (दरिद्रस्य भावः । दरिद्र+ष्यञ् ।) दरिद्रता । यथा,—
"प्रणीय दारिद्र्यदरिद्रतां नृपः ।"
इति नैषधे । १ । १५ ॥
(यथा, मृच्छकटिके १ अङ्के ।
"दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥")
नियेकारान्तोऽप्ययम् ॥

दारी, स्त्री, (दारयति पदतलमिति । दॄ+णिच्+"सर्व्वधातुभ्य इन् ।" उणा ४ । ११८ । इति इन् । कृदिकारादिति पक्षे ङीष् ।) क्षुद्ररोगविशेषः । बिवाई इति लोके । तल्लक्षणम् यथा,—
"परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः ।
पादयोः कुरुते दारीं सरुजां तलसंश्रिताम् ॥"
तच्चिकित्सा यथा,—
"पाददार्य्यां शिरां प्राज्ञो मोचयेत्तलशोधिनीम् ।
स्नेहस्वेदोपपन्नौ च पादौ वा लेपयेन्मुहुः ॥
मधूच्छिष्टवसामज्जाघृतैः क्षारविमिश्रितैः ॥
क्षारो यवक्षारः ।
सर्ज्जाङ्कसिन्धूद्भवयोश्चूर्णं मधुघृतप्लुतैः ।
निर्म्मथ्य कटुतैलाक्तं हितं पादप्रमार्ज्जने ॥
मधुसिक्थकगैरिकघृतगुडमहिषाख्य-सालनिर्यासैः ।
गैरिकसहितैर्लेपः पादस्फुटनापहः सिद्धः ॥
मधुसिक्थक मोम । प्रथमं गैरिकं शिलाजतु । द्वितीयं गैरिकं गेरु इति लोके । सालनिर्यास राल: ।
उन्मत्तकस्य बीजेन माणकक्षारवारिणा ।
विपक्वं कटुतैलन्तु हन्याद्दारीं न संशयः ॥
इति धत्तूरतैलम् ॥" इति भावप्रकाशः ॥

दारु, क्ली, पु, (दीर्य्यते इति । दॄ+"दृसनिजनीति ।" उणा । १ । ३ । इति ञुण् ।) काष्ठम् । इत्यमरभरतौ ॥ (यथा, महाभारते ।१।१४५।११।
"शणं तैलं घृतञ्चैव जतु दारूणि चैव हि ।
तस्मिन् वेश्मनि सर्व्वाणि निक्षिपेथाः समन्ततः ॥")

दारु, क्ली, (दॄ+ञुण् ।) देवदारु । (यथा, सुश्रुते उत्तरतन्त्रे । १७ ।
"दारुपद्मकमुस्तीभिरेवमेव कृतोऽपि वा ॥"
अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥")
पित्तलम् । इति मेदिनी । रे, ४७ ॥

दारुः, त्रि, (दॄ+ञुण् ।) शिल्पी । दारकः । इति धरणी ॥ (यथा, ऋग्वेदे । ७ । ६ । १ ।
"इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥"
"दारुं पुरां भेत्तारं वन्दे ।" इति तत्र सायनः ॥)
दाता । इति त्रिकाण्डशेषः ॥

दारुकं, क्ली, (दारु+स्वार्थे कन् ।) देवदारु । इति राजनिर्घण्टः ॥

दारुकः, पु, श्रीकृष्णसारथिः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । २ । २ । २८ ।
"दारुकेण च सूतेन सहितो देवकीसुतः ॥"
योगाचार्य्यविशेषः । स तु महादेवस्य अवतारविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । २ । १० । ४ ।
"जटामाली चाट्टहासो दारुको लाङ्गली तथा ॥")

दारुकदली, स्त्री, (दारुवत् कठिना कदली ।) वनकदली । इति राजनिर्घण्टः ॥

दारुका, स्त्री, (दारुणा काष्ठेन कायतीति । कै+क. । टाप् ।) काष्ठमयस्त्री । काठेर पुतुल इति भाषा । तत्पर्य्यायः । पुत्तिका २ दारुस्त्री ३ शालभञ्जिका ४ शालभञ्जी ५ शालाङ्गी ६ । इति शब्दरत्नावली ॥ दारुपुत्त्रिका ७ कुरुण्टी ८ दारुगर्भा ९ । इति हारावली । ७१ ॥

दारुगन्धा, स्त्री, (दारुणि गन्धो यस्याः ।) चीडानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

दारुगर्भा, स्त्री, (दारुमयो गर्भो यस्याः ।) दारुमयस्त्री । इति हारावली । ७१ ॥

दारुजः, पु, (दारुणो जायते इति । जन+डः ।) मर्द्दलः । इति शब्दरत्नावली ॥ काष्ठनिर्म्मिते, त्रि ॥ (यथा, कालिकापुराणे । ६७ अध्याये ।
"आसन प्रथमं दद्यात् पौष्पं दारुजमेव वा ॥")

दारुणः, पु (दारयतीति । दॄ+णिच्+"कॄवृदारिभ्य उनन् ।" उणा ३।५३। इति उनन् ।) चित्रकः । इति राजनिर्घण्टः ॥ भयानकरसः । (विष्णुः । यथा, महाभारते ।१३।१४९।७४
"सुधन्वा खण्डपरशुर्द्दारुणो द्रविणप्रदः ॥"
"सन्मार्गविरोधिनां दारुणत्वात् (खण्डकत्वात) दारुणः ।" इति तद्भाष्ये शङ्करः ॥) भयहेतौ, त्रि । इत्यमरः ।१।७।२०॥ (यथा, देवीभागवते । ५।४।२७ ।
"हाहाकारो महानासीत् सम्प्रहाराश्च दारुणः ।
उत्पपात ततः सिंहो नृपस्योपरि दारुणः ॥"
कठोरः । यथा, तत्रैव ।१।४।५२।
"दारुणं देहदमनं सर्व्वलोकभयङ्करम् ॥")

दारुणकं, क्ली, (दारुणवत् कायतीति । कै+कः ।) मस्तकजातक्षुद्ररोगविशेषः । लोके रूसी इति ख्यातः । तस्य लक्षणमाह ।
"दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते ।
मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत् ॥
दारुणा कर्कशा ॥"
तस्य चिकित्सा यथा,—
"कार्य्यो दारुणके मूर्द्ध्नि प्रलेपो मधुसंयुतः ।
पियालबीजमधुककुष्ठमाषैः ससैन्धवैः ॥
आम्रबीजं तथा पथ्या द्वयं स्यात् मात्रया समम् ।
दुग्धेन पिष्टं तल्लेपो दारुणं हन्ति दारुणम् ॥
दुग्धेन खाखसं बीजं प्रलेपाद्दारुणं हरेत् ।
गुञ्जाफलैः शृतं तैलं भृङ्गराजरसेन च ॥
कण्डुदारुणहृत् कुष्ठकपालव्याधिनाशनम् ॥"
इति गुञ्जातैलम् ।" इति भावप्रकाशः ॥
(अथ भृङ्गराजतैलम् ।
"भृङ्गराजत्रिफलोत्पलशारि
लौहपुरीषसमन्वितकारि ।
तैलमिदं पच दारुणहारि
कुञ्चितकेशघनस्थितकारि ॥"
इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥)

दारुनिशा, स्त्री, (दारुबहुला निशा हरिद्रा ।) दारुहरिद्रा । इति रत्नमाला ॥ (अस्या गुणा यथा,—
"दार्व्वीनिशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दारुपत्री, स्त्री, (दारुणः पत्रमिव पत्रमस्याः । ङीष् ।) हिङ्गुपत्री । इति राजनिर्घण्टः ॥

दारुपीता, स्त्री, (दारुणा पीतेव । काष्ठप्रधानत्वात् तथात्वम् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

दारुपुत्तिका, स्त्री, (दारुमयी पुत्तिका ।) दारुका । इति हारावली । ७१ ॥

दारुमुख्याह्वया, स्त्री, (दारुमुख्यमाह्वयते स्पर्द्धते इति । आ+ह्वे+अच् ।) गोधा । इति राजनिर्घण्टः ॥

दारुसिता, स्त्री, (दारुणि सिता शर्करेव ।) त्वक् । दारुचिनि इति भाषा । तन्नामगुणाः ।
"स्वकखाद्वी तु तनुत्वक् स्यात् तथा दारुसिता मता ।
उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् ॥
सुरभि शुक्रला वर्ण्या मुखशोषतृषापहा ॥"
इति भावप्रकाशः ॥

दारुस्त्री, स्त्री, (दारुमयी स्त्री ।) दारुका । इति त्रिकाण्डशेषः ॥

दारुहरिद्रा, स्त्री, (दारुप्रधाना हरिद्रा ।) स्वनामख्यातक्षुपविशेषः । तत्पर्य्यायः । पीतद्रुः २ कालीयकं ३ हरिद्रु ४ दार्व्वी ५ पचम्पचा ६ पर्ज्जनी ७ । इत्यमरः । २।४।१०२ ॥ पीतिका ८ पीतदारु ९ स्थिररागा १० कामिनी ११ कटङ्कटेरी १२ पर्ज्जन्या १३ पीता १४ दारुनिशा १५ कालीयकम् १६ कामवती १७ दारुपीता १८ कर्क्कटिनी १९ दारु २० निशा २१ हरिद्रा २२ । इति शब्दरत्नावली ॥ अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । व्रणमेहकण्डुविसर्पत्वग्दोषविषकर्णाक्षिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफपित्तशोथनाशित्वम् । विशेषेण कफाभिष्यन्दनाशित्वञ्च । इति राजवल्लभः ॥

दारुहस्तक, पुं, (हस्त इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५।३।९६। इति कन् । दारुणो हस्तकः ।) काष्ठनिर्म्मितहस्तः । काठेर हाता इति भाषा । तत्पर्य्यायः । तर्द्दूः २ । इत्यमरः । ६ । २ । ३४ ॥

दार्घसत्रः, त्रि, (दीर्घसत्रे भवः । दीर्घसत्र+अण् । "देविकाशिंशपेति ।" ७।३।१। इति आदाच आत् ।) दीर्घसत्रयागे भवः । इति सिद्धान्तकौमुदी ॥

दार्ढ्य, क्ली, (दृढस्य भावः । दृढ+"वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३। इति ष्यञ् ।) दृढता । (यथा, पञ्चदश्याम् । ६ । १०४ ।
"वाक्यान्यपि यथाप्रश्नं दार्ढ्यायोदाहरन्ति हि ॥")

दार्द्दुर, क्ली, दक्षिणावर्त्तशङ्खः । जतु । जलम् । इति शब्दार्थकल्पतरुः ॥ दर्द्दुरधर्म्मश्च ॥

दार्व्वट, क्ली, मन्त्रावेश्म । इति हारावली ।१६८॥

दार्व्वण्डः, पुं, (दारुवत् कठिनमण्डं यस्य ।) मयूरः । इति शब्दकल्पतरुः ॥

दार्व्वाघाटः, पुं, (दारु काष्ठं आघ्नन्तीति । आ+हन्+"दारावाहनोऽणन्तस्य च टः संज्ञायाम् ।" ३।२।४९। इत्यस्य वार्त्तिकोक्त्या अण टश्चान्तादेशः ।) शतपत्रकपक्षी । इत्यमरः । २ । ५ । १७ ॥ काठठोकरा इति भाषा । (यथा, महाभारते । १० । ७ । १८ ।
"दार्व्वाघाटस्तथाचापि चापवक्त्राश्च भारत ॥")

दार्व्वाघातः, पुं, (दारुणि आघातो यस्मात् ।) दार्व्वाघाटपक्षी । इति शब्दरत्नावली ॥

दार्व्विका, स्त्री, (दारयतीति । दॄ+उणादित्वात् साधुः । दार्व्वी दारुहरिद्राविकारः । ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) काथोद्भवतुत्थम् । गोजिह्वा । इत्यमरः । २ । ४ । ११६ ॥

दार्व्विपत्रिका, स्त्री, (दार्व्व्याः पत्रमिव पत्रमस्याः । दार्व्विपत्रा तत स्वार्थे कन् टापि अत इत्वञ्च ।) गोजिह्वा । इति रत्नमाला ॥

दार्व्वी, स्त्री, (दारयति । दॄ+"उल्वादयश्च ।" उणां ४ । ९७ । इति निपातनात् साधुः ।) दारुहरिद्रा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"कटङ्कटेरी दार्व्वी स्यात्तथा दारुनिशेति च ।
ख्याता दारुहरिद्रा च पर्ज्जनी च पचम्पचा ॥"
अस्या गुणा यथा,—
"दार्व्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गोजिह्वा । इति मेदिनी । वे, ११ ॥ देवदारु । हरिद्रा । इति विश्वः ॥

दार्व्वीकाथोद्भव, क्ली, (दार्व्व्या दारुहरिद्रायाः काथाद्भवो यस्य ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥ कृत्रिमरसाञ्जनम् । इति रत्नमाला ॥

दार्षद., त्रि, (दृषदि पिष्टः । दृषद्+"शेषे ।" ४ । २ । ९२ । इत्यण् ।) दृषद्भवः । इति सिद्धान्तकौमुदी ॥

दाल, क्ली, (दलेभ्यः संचितम् । दल+अण् । यदुक्तम्,—
"संसृत्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥")
वनमधु । इति शब्दार्थकल्पतरुः ॥ इन्द्रनीलदलाकारस्यश्मचिकोत्पन्नं वृक्षकोटरान्तरभवं मधु । अस्य गुणाः । कटुत्वम् । कषायत्वम् । अम्लत्वम् । मधुरत्वम् । पित्तदोषकारित्वञ्च । इति राजनिर्घण्टः ॥

दाल, पुं, (दले जातम् । दल+अण् ।) कोद्रवः । इति हेमचन्द्रः ॥

दालव, पुं, स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६६ ॥

दाला, स्त्री, (दल्यते स्थूलमतिभिरिति । दल+घञ्+टाप् ।) महाकाल । इति भावप्रकाशः ॥

दालिका, स्त्री, (दालेव । स्वार्थे कन् टाप् अत इत्वञ्च ।) महाकाल । इति भावप्रकाशः ॥

दालिमः, पुं, (दाड़िमः । डस्य लः ।) दाड़िमः । इत्यमरटीकायां भरतः ॥

दाली, स्त्री, (दाल्यते इति । दल+णिच्+इन् । कृदिकारादिति ङीष् ।) देवदाली लता । इति राजनिर्घण्टः ॥

दाल्भ्यः, पुं, (दल्भस्य मुनेर्गोत्रापत्यम् । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) मुनिविशेषः । (यथा, महाभारते ।२।४।११।
"बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः ॥")

दाल्मि, पुं, (दालयति असुरानिति । दल+णिच्+बाहुलकात् मिः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

दाव, पुं, (दुनोति उपतापयतीति । दु+"दुन्योरनुपसर्गे ।" ३।१।१४२ । इति णः ।) वनम् । (यथा, महाभारते ।१।२२४।६।
"इदमिन्द्रः सदा दावं खाण्डवं परिरक्षति ॥")
वनवह्निः । इत्यमरः । ३ । ३ । २०५ ॥ (यथा, महाभारते । ३ । ६६ । १ ।
"उत्सृज्य दमयन्ती तु नलो राजा विशाम्पते ।
ददर्श दावं दह्यन्तं महान्तं गहने वने ॥")
अग्निः । इत्यमरटीकायां नीलकण्ठः ॥ उपतापः । इति भरतधृतविश्वकोषः ॥

दावाग्नि, पुं, (दावोद्भवोऽग्निः । शाकपार्थिवादिवत् समासः ।) वनोद्भवाग्निः । तत्पर्य्यायः । दवाग्निः २ दावानलः ३ । इति शब्दरत्नावली ॥ दवः ४ दावः ५ । इत्यमरः । ३ । ३ । २०५ ॥ (यथा, महाभारते । १ । १५५ । १५ ।
"दावाग्निधूमसदृशं चक्रतुः पार्थिवं रजः ॥")

दावानल, पुं, (दावोद्भवः अनलः । दाव एवानलो वा ।) दावाग्निः । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । २६ । ६६ ।
"यद्दावानलतप्तस्य सुधाह्रदनिमज्जने ॥")

दाविकः, त्रि, (देविकायां भवः । अण् । "देविकाशिंशपेति ।" ७ । ३ । १ । इति आदाच आत् ।) देविकानदीसम्भवः । इत्यमरः । १ । १० । ३६ ॥

दाश, ऋ ङ ल दाने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सक-सेट् ।) द्वितीयस्वरी । ऋ, अददाशत् । क ङ, दाशयते । इति दुर्गादासः ॥

दाश, ऋ ञ दाने । इति कविकल्पद्रुमः ॥ (भ्वा-उभ-सक-सेट् ।) ऋ, अददाशत् । ञ, दाशति दाशते । इति दुर्गादासः ॥

दाश, म र हिंसने । इति कविकल्पद्रुमः ॥ (स्वा-पर-सक-सेट् ।) द्वितीयस्वरी । न, दाश्नोति । र वैदिकः । इति दुर्गादासः ॥

दाशः, पुं, (दाश्यते दीयते भृतिरस्मै । दाश दाने+सम्प्रदाने घञ् ।) भृत्यः । इत्यमरटीकायां रमानाथः ॥ (दशति हिनस्ति मत्स्यानिति । दन्श+"दशेश्च ।" उणां ५ । ११ । इति टः नस्य आश्च ।) धीवरः । यथा, देवीभागवते । २ । १ । ३९ ।
"मत्स्यगन्धेति नाम्ना वै गुणेन समभवत् ।
विवर्द्धमाना दाशस्य गृहे सा वासवी शुभा ॥")

दाशपुर, क्ली, (दाशान् कैवर्त्तान् पिपर्त्ति पालयतीति । पॄ+कः । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् ।) दशपुरम् । इत्यमरटीकायां स्वामी ॥

दाशरथः, पुं, (दशरथस्य अयम् । तस्येदमिति पितापुत्रसम्बन्धार्थे अण् ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा, महानाटके ।
"प्रदीयतां दाशरथाय मैथिली ॥"
दशरथसम्बन्धिनि, त्रि । यथा, भट्टिः । २ । ५३ ।
"अलीगणाद्दाशरथं न वाक्यम् ॥")

दाशरथि, पुं, (दशरथस्य अपत्यं पुमान् । "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) श्रीरामः ।

इति हेमचन्द्रः ॥ (यथा, रामायणे ।२।४५।११।
"यथा यथा दाशरथिर्धर्म्ममेवाश्रितोऽभवत् ।
तथा तथा प्रकृतयो रामं पतिमकामयन् ॥")

दाशार्ह, पु, (दाश दाने+भावे घञ् । दाशं दानमर्हतीति । अर्ह+अच् ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१३।१४६।६७।
"विजयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥")
दशार्हदेशजश्च ॥

दाशेरकः, पु, मालवदेशः । इति त्रिकाण्डशेषः ॥

दाश्वः, त्रि, (दाशति ददातीति । दाश+बाहुलकात् वन् ।) दाता । इति जटाधरः ॥

दाश्वान्, [स्] त्रि, (दाशृ दाने+"दाश्वान् साह्वान् मीढ्वांश्च ।" ६।१।१२। इति क्वसुप्रत्ययेन निपातनात् साधुः ।) दत्तवान् । इति मुग्धबोधम् ॥ (यथा, रघुः । १४ । ७१ ।
"तस्मै मुनिर्दोहदलिङ्गदर्शी
दाश्वान् सुपुत्राशिषमित्युवाच ॥")

दास, ऋ ञ दाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अददासत् । ञ, दासति दासते । इति दुर्गादासः ॥

दास, र न वधे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) र वैदिकः । न, दास्नोति । इति दुर्गादासः ॥

दासः, पु, (दसतीति । दसि+"दंसेष्टटनौ न आत् ।" उणां ५ । १० । इति टः नकारस्य चाकारः ।) शूद्रः । (यथा, ऋग्वेदे ।२।१२।४।
"यो दासं वर्णमधरं गुहाकः ॥"
अधुना कायस्थानां उपाधिभेदः । स तु अष्टसिद्ध-मौलिकानामन्यतमः । यथा, कुलदीपिकायाम् ।
"गौडेऽष्टौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धा-
स्ते दत्ता सेनदासाः करगुहसहिताः पालिताः सिंहदेवाः ॥")
ज्ञातात्मा । धीवरः । इति मेदिनी । से, ४ ॥ दानपात्रम् । इति विश्वः ॥ शूद्राणां नामान्त-प्रयोज्यपद्धतिविशेषः । यथा,—
"शर्म्मान्तं ब्राह्मणस्य स्यात् वर्म्मान्तं क्षत्त्रियस्य च ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
इत्युद्वाहतत्त्वम् ॥ ० ॥
दास्यते दीयते भृतिमूल्यादिकं यस्मै सः । चाकर इति भाषा । तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ गोप्यकः ५ चेटकः ६ नियोज्यः ७ किङ्करः ८ प्रेष्यः ९ भुजिष्यः १० परिचारकः ११ । इत्यमरः । २ । १० । १७ ॥ प्रैष्यः १२ प्रेषः १३ प्रैषः १४ । इति भरतः ॥ परिकर्म्मा १५ परिचरः १६ सहायः १७ उपस्थाता १८ सेवकः १९ अभिसरः २० अनुगः २१ । स चतुर्दशविधः । यथा नारदः ।
"गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोक्षितो महतश्चर्णात् युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाकृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥"
अस्यार्थः । गृहजातो दास्याम्सुत्पन्नः । दायादुपागतः क्रमागतः । अनाकालभृतः दुर्भिक्षपोषितः । स्वामिना आहितो बन्धकीकृतः । मोक्षितः ऋणमोचनेनाङ्गीकृतदास्यः । तवाहमित्युपगतः कस्याप्यदासः सन् स्वयं दासत्वेन दत्तरूपः । प्रव्रज्यावसितः सन्न्यासभ्रष्टः । कृतः केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । भक्तदासः सुभिक्षेऽपि भक्तार्थमङ्गीकृतदास्यः । वडवाकृतः वडवा दासी तल्लोभादङ्गीकृतदास्यः । इति श्रीकृष्णतर्कालङ्कारकृतक्रमसङ्ग्रहः ॥ तस्य कर्म्म यथा,—
"कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम् ॥
गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥
अशुभं कर्म्म विज्ञेयं शुभमन्यदतः परम् ॥"
इति मिताक्षरायां नारदः ॥
"विप्रस्य किङ्करो भूपो वैश्यो भूपस्य भूमिप ।
सर्व्वेषां किङ्कराः शूद्रा ब्राह्मणस्य विशेषतः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥

दासनन्दिनी, स्त्री, (दासस्य धीवरस्य नन्दिनी ।) सत्यवती । इति शब्दरत्नावली ॥

दासपूरं, क्ली, (दासान् धीवरान् पूरयतीति । पूर+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) कैवर्त्तीमुस्तकम् । इति शब्दरत्नावली ॥

दासिका, स्त्री, (दासति ददाति आत्मानमिति । दास दाने+ण्वुल् । टाप् अत इत्वञ्च ।) दासी । इत्यमरटीकायां भरतः ॥

दासी, स्त्री, (दासति ददात्यात्मानमिति । दास+अच् । गौरादित्वात् ङीष् ।) भुजिष्या । इति मेदिनी । से, ४ ॥ तत्पर्य्यायः । कर्म्मकरी २ । इति मुग्धबोधम् ॥ दासपर्य्यायशब्दाः स्त्रीलिङ्गे अस्याः पर्य्यायशब्दा भवन्ति ॥ (यथा, देवीभागवते । १ । २० । ७२ ।
"न गता च वधूस्तत्र प्रेष्या संप्रेषिता तया ।
तस्याञ्च विदुरो जातो दास्यां धर्म्मांशतः शुभः ॥")
काकजङ्घा । नीलाम्लानः । नीलझिण्टी । इति राजनिर्घण्टः ॥ पीतझिण्टी । इति रत्नमाला ॥ वेदी । इति विश्वः ॥ (दास+ङीप् ।) शूद्रपत्नी कैवर्त्तपत्नी च ॥ (नदीभेदः । यथा, महाभारते । ६ । ९ । ३१ ।
"सुरसां तमसां दासीं सामान्यां वरणामसीम् ॥")

दासीघटः, पु, (दासीपादनिक्षेप्यो घटः । मध्यपदलोपिसमासः ।) नवम्यां महापातकिनः परित्यागार्थं सपिण्डसमानोदकनियुक्तदक्षिणाभिमुखदासीपादनिःक्षेप्यजलपूर्णकलसः । तदनुष्ठानं यथा, मनुः । ११ । १८३—१८५ ।
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ॥
दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥
निवर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने ।
दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी ॥"
"पतितस्येति । महापातकिनो जीवत एव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्यृत्विग्गुरुसन्निधाने रिक्तायां नवम्यां तिथौ दिनान्ते कर्त्तव्या ॥ दासीति । सपिण्डसमानोदकनियुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् । यथा स निरुदको भवति तदनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः ॥ निवर्त्तेरन्निति । तस्मात् पतितात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनञ्च तस्मै ऋक्थप्रदानं सांवत्सरिकादौ निमन्त्रणादिरूपो लोकव्यवहार एतानि निवर्त्तेरन् ॥" इति कुल्लूकभट्टः ॥

दासीसभं, क्ली, (दासीनां सभा । "अशाला च ।" २ । ४ । २४ । इति क्लीवत्वम् ।) दास्याः सभा । इत्यमरः । ३ । ५ । २७ ॥

दासेयः, पु, (दास+स्वार्थे ढक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दासस्य अपत्यमिति ।) दासोत्पन्ने, त्रि ॥

दासेयी, स्त्री, (दासेय+स्त्रियां ङीप् ।) सत्यवती । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १०० । ४९ ।
"समीक्ष्य राजा दासेयीं कामयामास शान्तनुः ॥")

दासेरः, पु, (दास्या अपत्यम् । ढ्रक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दास+बाहुलकात् एरच् ।) उष्ट्रः । दासिकापत्ये, त्रि । इति मेदिनी । रे, १६९ ॥

दासेरकः, पुं, (दासेर+स्वार्थे कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे । ५ । ६६ ।
"दासेरकः सपदि सवलितं निषादै-
र्विप्रं पुरा पतगराडिव निर्जगार ॥")
दासीसुतः । इति हारावली । २४८ ॥ (जातिभेदः । यथा, महाभारते । ६ । ४७ । ४६ ।
"दशार्णकाः प्रयागाश्च दासेरकगणैः सह ॥")

दास्यं, क्ली, दासस्य भावः । (दास+ष्यञ् ।) दासत्वम् । यथा,—
"अर्च्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं शश्वद्गुणश्रवणमीप्सितम् ॥
निवेदनं तस्य दास्यं नवधा भक्तिलक्षणम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दास्यमानः, त्रि, दाधातोः कर्म्मणि स्यमानप्रत्ययेन निष्पन्नः । भविष्यद्दानसम्बन्धिवस्तु । इति व्याकरणम् ॥ "अपि च जनविंशतिदास्यमानपिण्डस्थानानि यथा ।" इति तिथ्यादितत्त्वम् ॥

दाहः, पुं, (दह+भावे घञ् ।) दहनम् । भस्मीकरणम् । (यथा, मार्कण्डेये । ३० । २३ ।
"तदभावे च नृपतिः कारयेत् खड्गटुम्बिना ।

तज्जातीयैर्नरैः सम्यक् दाहाद्याः सकलाः क्रियाः ॥”)
अथ शवदाहविधिर्यथा,—
“गतप्राणं ज्ञात्वा पुत्त्रादिः स्नात्वा धर्म्मं कृत्वा स्थापयेत्। ततो गतप्राणं स्नापयित्वा वाससा सर्व्वशरीरमाच्छाद्यास्तीर्णकुशायां भूमौ दक्षिणाशिरसं स्थापयेत्। ततो घृतेनाभ्यज्य,
ॐ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः।
कुरुक्षेत्रञ्च गङ्गाञ्च यमुनाञ्च सरिद्वराम् ॥
कौशिकीं चन्द्रभागाञ्च सर्व्वपापप्रणाशिनीम्।
भद्रावकाशां गण्डकीं सरयूं पनसां तथा ॥
वैणवञ्च वराहञ्च तीर्थं पिण्डारकं तथा।
पृथिव्यां यानि तीर्थानि सरितः सागरांस्तथा ॥
इति चिन्तयित्वा पुनः स्नापयेत्। वस्त्रान्तरं परिधाप्य उपवीतमुत्तरीयञ्च दत्त्वा चन्दनादिनोपलिप्य कर्णनासिकानेत्रद्वयमुखात्मकेषु सप्तच्छिद्रेषु सप्तसुवर्णखण्डिकास्तदभावे कांस्यादिखण्डिका निक्षिपेत् ततो वस्त्रान्तरेणाच्छाद्य वहेयुः। वहनकाले श्मशानस्य तदर्द्धमार्गे वर्त्मार्द्धे व्रजेत् अर्द्धे पिण्डार्थमवरोपयेत्। ततोऽग्निदाता पुत्त्रादिश्चिताभूमौ गत्वा तदर्द्धे तिलसहितं पिण्डदानेतिकर्त्तव्यतया उत्सृजेत्। सा यथा,—गोमयेनोपलिप्तायां भूमौ पातितवामजानुः प्राचीनावीती कुशमूलेन ॐ अपहता असुरा रक्षांसि वेदिषद इत्यनेन दक्षिणाग्ररेखां कुर्य्यात् तदुपरि कुशानास्तीर्य्य ॐ एहि प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्व्विणेभिर्देह्यस्मभ्यं द्रविणेह भद्रं रयिञ्च नः सर्व्ववीरं नियच्छ इत्यावाह्य सतिलजलपात्रं वामहस्ताद्दक्षिणहस्तेन गृहीत्वा ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नवनेनिक्ष्व इत्यवनेजयेत्। ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्तेऽन्नमुपतिष्ठतां इति वामहस्तगृहीतान्नपात्रादन्नं सतिलं दक्षिणहस्तेन गृहीत्वा कुशोपरि दद्यात्। पिण्डपात्रप्रक्षालनजलेन तदुपरि प्रत्यवनेजनं तूष्णीं गन्धादिदानं सामगेतरेषान्तु नावाहनमिति विशेषः। ततः पुत्त्रादिः स्नात्वा चितां रचयित्वा तत्र दारुचयं कुर्य्यात्। तदुपरि वस्त्रद्वयसहितं दक्षिणाशिरसं सामगमधोमुखं पुमांसं न्यसेत्। नार्य्यास्तूत्तानदेहत्वं सामगेतरेषां उत्तराशिरस्त्वम्। ततो देवाश्चाग्निमुखाः सर्व्वे हुताशनं गृहीत्वा एनं दहन्तु इति मनसा ध्यात्वाग्निं गृहीत्वा,
ॐ कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् ॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम्।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स गच्छतु ॥
इति पठित्वा त्रिः प्रदक्षिणीकृत्य दक्षिणामुखः शिरःस्थाने दद्यात्। स्त्रीदाहे नरमित्येव पाठः न नारीमित्यूहः। ततो दाहे वृत्ते प्रादेशप्रमाणाः सप्तकाष्ठिका गृहीत्वा चितामग्निं सप्तवारान् प्रदक्षिणीकृत्य सप्तकाष्ठिका एकैकक्रमेण चिताग्नौ प्रक्षिपेत्। ततः कुठारेण कयादाय नमस्तुभ्यमिति मन्त्रं सकृत् पठित्वा चितास्थज्वलद्दारूपरि सप्तप्रहारा देयाः तमग्निमपश्यद्भिर्वामावर्त्तेन स्नातुं नदी गन्तव्या। नग्नं शवं न दहेत् प्रवयमन्त्रियवस्त्रादि श्मशानवासिचाण्डालादिभ्यो दद्यात्। स्रतिकां रजस्वलाञ्च वस्त्रान्तरावृतां सतिलपञ्चगव्यजलपूर्णकुम्भं आपोहिष्ठीयवामदेव्यादिभिरभिमन्त्र्य स्नापयित्वा दहेदिति विशेषः। गर्भवत्यास्तु गर्भं निःसार्य्य स्थानान्तरे निक्षिप्य तस्या दाहः कार्य्यः। ततो जलसमीपं गत्वा पुत्त्रादयः प्रयोगदानाभिज्ञं श्यालकादिकं प्रार्थयेयुः। उदकं करिष्यामः इति तेन च कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते कुरुध्वमेवेत्यस्मिन्नुत्तरे दत्ते वृद्धपुरःसरमवतरणं जले। ततः परिहितवस्त्रं प्रक्षाल्य तदेव परिधाय प्राचीनावीतिनो दक्षिणामुखाः ॐ अपनः शोशुचदघमित्यनेन मन्त्रेण वामहस्तानामिकया जलं आलोड्य एकवस्त्राः सकृन्निमज्योन्मज्याचम्य दक्षिणामुखाः तर्पयेयुः। ततः ॐ अमुकगोत्र प्रेतममुकदेवशर्म्माणं तर्पयामीति सामगानां प्रयोगः यजुर्व्वेदिनान्तु अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं तृप्यस्वेति एकाञ्जलिदानमावश्यकं अञ्जलित्रयदाने फलातिशयः। ततः पुनः स्नात्वा जलादुत्थानं बालपुरःसरं कार्य्यम्। ततः शाद्वले उपविश्य,
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्।
यः करोति स सम्मूढो जलबुद्बुदसन्निभे ॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः।
कर्म्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च।
फेनप्रख्यः कथं नाशं मर्त्त्यलोको न यास्यति ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रिया कार्य्या विधानतः ॥
इति चिन्तयित्वा गृहद्वारं समागत्य निम्बपत्राणि दन्तैः खण्डयित्वा शमी पापं शमयत्विति शमीं स्पृष्ट्वा अश्मेव स्थिरो भूयासं इत्यश्मानं पदा स्पृष्ट्वा अग्निर्नः शर्म्म यच्छतु इति अग्निं स्पृष्ट्वा वृषभच्छागयोर्म्मध्ये स्थित्वा द्योगितिमन्त्रेण द्वावपि स्पृष्ट्वा गोमयमुदकं गौरसर्षपांश्च स्पृष्ट्वा बालपुरःसरा गृहं विशेयुः। दिवा चेद्दाहस्तदा रात्रौ ग्रामप्रवेशः रात्रौ चेत्तदा दिवसे। अशक्तौ ब्राह्मणानुमतिं गृहीत्वा कालप्रतीक्षया विना प्रवेष्टव्यम्।” इति शुद्धितत्त्वम् ॥

दाहकः, पुं, (दहतीति। दह + ण्वुल्।) चित्रकः। रक्तचित्रकः। इति राजनिर्घण्टः ॥ दाहकर्त्तरि, त्रि ॥ (यथा, याज्ञवल्क्ये। २। २८५।
“चैत्रवेश्मवनग्रामविवीतखलदाहकाः।
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना ॥”
उष्णगुणः। यथा, राजनिर्घण्टे।
“काञ्जिकं दधितैलन्तु वल्लीमांसमाशनम्।
दाहकं गात्रमर्द्धिल्यं वल्यं सन्तर्पणं परम् ॥”)

दाहज्वरः, पुं, (दाहप्रधानो ज्वरः।) गात्रज्वालायुक्तज्वररोगः। तस्यौषधम्। यथा,—
“पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै।
सार्द्धं विनाशयेद्दाहज्वरञ्च परमेश्वर ! ॥”
इति गारुडे १९७ अध्यायः ॥

दाहनं, क्ली, (दह + णिच् + भावे ल्युट्।) भस्मीकरणप्रेरणम्। दाहकरान इति भाषा ॥ (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। १। ६२।
“कलौ कलुषयुक्तेभदाहनायाग्निरूपिणी ॥”)

दाहसरः, पुं, (दाहार्थं स्रियते गम्यतेऽस्मिन्निति। सृ + अप्।) श्मशानम्। इति त्रिकाण्डशेषः ॥

दाहहरणं, क्ली, (दाहस्य हरणं यस्मात्।) वीरणमूलम्। इति शब्दचन्द्रिका ॥

दाहागुरु, क्ली, (दाहाय यदगुरु।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। दाहनागुरु २ दाहकाष्ठम् ३ धूपागुरु ४ तैलागुरु ५ पूरम् ६ वनवल्लभम् ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। केशवर्द्धनत्वम्। वर्ण्यत्वम्। केशदोषनाशित्वम्। सततसौगन्ध्यविस्तारकारित्वञ्च। इति राजनिर्घण्टः ॥

दिक्, [श्] स्त्री, (दिशति अवकाशं ददाति या। दिश + “ऋत्विगदधृगिति।” ३। २। ५९। इति क्विन्-प्रत्ययेन साधुः।) पूर्व्वपश्चिमदक्षिणोत्तरादिरूपा। तत्पर्य्यायः। ककुप् २ काष्ठा ३ आशा ४ हरित् ५। इत्यमरः। १। ३। ८। निर्देशिनी ६ दिशा ७ ककुभः ८ हरिता ९ गौः १०। इति शब्दरत्नावली ॥ अपि च। आताः १ आशाः २ उपराः ३ आष्ठाः ४ काष्ठा ५ व्योम ६ ककुभः ७ हरितः ८ इत्यष्टौ दिङ्नामानि। इति वेदनिघण्टौ १ अध्यायः ॥ अस्या व्युत्पत्तिर्यथा,—
“कृत्वैवमवधिं तस्मादिदं पूर्व्वञ्च पश्चिमम्।
इति देशो निदिश्येत यया सा दिगिति स्मृता ॥”
तस्या वायोर्गुणाः।
“विश्वमायुरनायुष्यं प्राणिनां नैकदोषकृत्।
सर्व्वर्त्तुनिन्दको ह्यन्ता कृत्योतुमातपुरःसरः ॥”
इति राजवल्लभः ॥ * ॥
सा दशधा यथा। पूर्व्वा १ आग्नेयी २ दक्षिणा ३ नैरृती ४ पश्चिमा ५ वायवी ६ उत्तरा ७ ऐशानी ८ ऊर्द्ध्वम् ९ अधः १० ॥ * ॥ तासां उत्पत्तिर्यथा,—
महातपा उवाच।
“शृणु राजन्नवहितः प्रजापाल ! कथामिमाम्।
यथा दिशः समुत्पन्नाः श्रोत्रेभ्यः पृथिवीपते ! ॥
ब्रह्मणः सृजतः सृष्टिमादिसर्गे समुत्थिते।
चिन्ताभूत्महती को मे प्रजाः सृष्टा धरिष्यति ॥
एवं चिन्तयतस्तस्य अवकाशं प्रचिन्तितः।
प्रादुर्ब्बभूवुः श्रोत्रेभ्यो दश कन्या महाप्रभाः ॥
पूर्व्वा च दक्षिणा चैव प्रतीची चोत्तरा तथा।
ऊर्द्धाध एव षण्मुख्याः कन्या ह्यासंस्तदा नृप ! ॥
तासां मध्ये चतस्रस्तु कन्याः परमशोभनाः।
याः पश्यन्त्यो महाभागा गाम्भीर्य्येण समन्विताः ॥

ता ऊचु: प्रणयाद्देवं प्रजापतिमकल्मषम् ।
अवकाशन्तु नो देहि देवदेव प्रजापते ! ॥
यत्र तिष्ठामहे सर्व्वा भर्त्तृभि: सहिता: सुखम् ।
पतयश्च महाभाग ! देहि नोऽव्यक्तसम्भव ! ॥
ब्रह्मोवाच ।
ब्रह्माण्डमेतत् सुश्रोण्य: शतकोटिप्रविस्तरम् ।
तस्यान्ते स्वेच्छया तुष्टा उष्यतां मा विलम्बथ ॥
भर्त्तृंश्च व: प्रयच्छामि सृष्ट्वा रूपस्विनोऽनघा: ।
यथेष्टं गम्यतां देशो यस्या यो रोचतेऽधुना ॥
एवमुक्तास्च ता: सर्व्वा यथेष्टं प्रययुस्तदा ।
ब्रह्मा ससर्ज तूर्णं तान् लोकपालान् महाबलान् ॥
दृष्ट्वा तु लोकपालांस्तु ता: कन्या: पुनराङ्ग्रयन् ।
विवाहं कारयामास ब्रह्मा लोकपितामह: ॥
एकामिन्द्राय स प्रादादग्नयेऽन्या यमाय च ।
निर्ऋताय च देवाय वरुणाय महात्मने ॥
वायवे धनदेशाय ईशानाय च सुव्रत ।।
ऊर्द्ध स्वयमधिष्ठाय शेषायाधोव्यवस्थिताम् ॥
एव दत्त्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशा पुन: ।
दशमीं भर्त्तृनाम्नस्तु अहंनाम्नोदन: प्रभु. ॥
तत:प्रभृति ता: देय: सेन्द्राद्या: परिकीर्त्तिता: ॥"
इति वराहपुराणम् ॥*॥

न्यायमते अस्या: सर्व्वगतत्वम् । परममहत्त्वपरिमाणम् । दूरान्तिकादिधीहेतुत्वम् । नित्यत्वम् । एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यपदेशभाक्त्वम् । अस्या गुणा: । संख्या १ परिमिति: २ पृथक्त्वम् ३ संयोग: ४ विभाग: ५ । इति भाषापरिच्छेद: ॥ (सामान्यम् । यथा, सुश्रुते । १ । ४३ ।
"वमनद्रव्ययोगानां दिगियं सम्यक्कीर्त्तिता ॥")

दिक्क:, पु, (दिशि कायते शब्दायते इति । कै+क: ।) करभ: । इति शब्दरत्नावली ॥

दिक्कर:, पु, (दिशं आदेशं करोति उत्साहान्वितत्वात् । कृ+ट: ।) युवा । इति माघटीकाधृतकोष: ॥ (महादेव: । यथा, कालिकापुराणे । ८२ अध्याये ।
"दिक्करस्तरुण: प्रोक्तस्तथा शम्भुश्च दिक्कर: ॥")

दिक्करवासिनी, स्त्री, (दिक्करे शम्भौ वसतीति । वस+णिनि:+ङीप् ।) देवीविशेष: । यथा,
"एव दिक्करवासिन्या: कथित: पूर्व्ववत् क्रम: ।
यं श्रुत्वा नाशुभं किञ्चिदाप्नोति श्रवणे रत: ॥
दिक्करस्तरुण: प्रोक्तस्तथा शम्भुश्च दिक्कर: ।
तस्मिन्नध्युषिता देवी तस्माद्दिक्करवासिनी ॥"
इति कालिकापुराणे ८२ अध्याय: ॥

दिक्करिका, स्त्री, (दिक्करिणो दिग्गजस्य सकाशात् कायते शोभते इति । दिक्करिन्+कै+क: । ततष्टाप् ।) नदीविशेष: । यथा,—
"अस्ति ताटकगणे तु सरो मानससन्निभम् ।
यत्र सार्द्धं शैलपुत्र्या जलक्रीडां सदा हर: ॥
कुरुते नरशार्दूल । स्वर्णपङ्कजशोभिते ।
तस्य मध्यात्पूर्व्वभागेऽभवत् सरिद्वरम् ॥
अवतीर्य्य प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ॥
दिग्गजक्षेत्रसंजाता तेन दिक्करिका स्मृता ॥"
इति कालिकापुराणे ८२ अध्याय: ॥

दिक्करी, स्त्री, (दिक्कर+ङीप् ।) युवती । इति हेमचन्द्र: । ३ । १७५ ॥

दिक्पति:, पु, (दिशां पति: ।) दिगधीश्वर: । तद्यथा । प्राच्यधिपो रवि: । अग्निकोणाधिप: शुक्र: । दक्षिणाधिप: कुज: । नैर्ऋतकोणाधिपो राहु: । प्रतीच्यधिप: शनि: । वायुकोणाधिपश्चन्द्र: । उत्तराधिपो बुध: । ईशानकोणाधिपो गुरु: । तस्य प्रमाणं यथा,—
"सूर्य्य: शुक्र: क्षमापुत्त्र: सैंहिकेय: शनि: शशी ।
सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वरा ॥"
इति ज्योतिस्तत्त्वम् ॥

दिक्पाल:, पुं, (दिश: पालयतीति । दिश्+पालि+अण् ।) पूर्व्वादिदशदिशां पालक: । यथा । पूर्व्वस्यां दिशि इन्द्र: । अग्निकोणे वह्नि: । दक्षिणस्यां दिशि यम: । नैर्ऋतकोणे निर्ऋत: । पश्चिमस्यां दिशि वरुण: । वायुकोणे मरुत् । उत्तरस्यां दिशि कुवेर: । ईशानकोणे ईश: । ऊर्द्धदिशि ब्रह्मा । अधोदिशि अनन्त: । इति पुराणम् ॥ यथा, पद्मपुराणे ।
"यत्रार्च्चयन्ति विधिना दिक्पालांस्तु कर्म्मिण: ।
तत्र प्रपूजयेदेनं विधि भागवत शुकम् ॥"

दिक्शूलं, क्ली, (दिशि शूलमिव ।) दिग्विशेषगमने निषिद्धवारा: । यथा,—
पश्चिमायां शुक्ररवी । उत्तरस्यां बुधमङ्गलौ । पूर्व्वस्यां शनिसोमौ । दक्षिणस्यां बृहस्पति: । तथा च ।
"शुक्रादित्यदिने न वारुणदिशं न ज्ञे कुजे चोत्तरां
मन्देन्दोश्च दिने न शक्रककुभं याम्यां गुरौ न व्रजेत् ।
शूलानीति विलङ्घ्य यान्ति मनुजा ये वित्तलाभाशया
भ्रष्टाशा: पुनरापतन्ति यदि ते शक्रेण तुल्या अपि ॥"
इति ज्योति:सारसंग्रह: ॥
केषाञ्चिन्मते ।
"————वौधे गुरौ दक्षिणाम् ।
ईशाने ज्वलने चैव नैर्ऋते मारुते तथा ।
न गन्तव्यं सुराचार्य्ये प्रतीच्यां रविशुक्रयो: ॥"
इति सुखबोध: ॥

दिगम्बर:, पुं, (दिगेव अम्बरं वस्त्रं यस्य । उलङ्गत्वात् तथात्वम् ।) शिव. । क्षपण: । (स तु जैनविशेष: । यथा, पञ्चदश्याम् । ६ । ८२ ।
"दिगम्बरा मध्यमत्वमाहुरापादमस्तकम् ।
चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ॥")
तम: । इति मेदिनी । रे, २६७ ॥ (नग्ने, त्रि । यथा, पञ्चतन्त्रे । ५ । १४ ।
"एकाकी गृहसन्त्यक्त: पाणिपात्रो दिगम्बर: ।
सोऽपि संवाह्यते लोके तृष्णया पश्य कौतुकम् ॥")

दिगम्बरी, स्त्री, (दिगम्बर+ङीप् ।) दुर्गा । दिगम्बरस्य पत्नी । इति कुलार्णव: ॥ नग्ने, त्रि । इत्यमर: । ३ । १ । ३६ ॥ (यथा, कालीध्याने ।
"महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ॥")

दिग्गज:, पु, (दिशो गज: ।) दिग्हस्ती । यथा,—
"ऐरावत: पुण्डरीको वामन: कुमुदोऽञ्जन: ।
पुष्पदन्त: सार्व्वभौम: सुप्रतीकश्च दिग्गजा: ॥"
इत्यमर: । १ । ३ । ४ ॥
एते क्रमेण पूर्व्वाद्यष्टदिशां हस्तिन: ॥

दिग्ध:, पु, (दिह्यते लिप्यते स्म विषादिना इति । दिह+क्त: ।) विषाक्तबाण: । तत्पर्य्याय: । लिप्तक: २ । इत्यमर । २ । ८ । ८८ ॥ (यथा, रामायणे । २ । ३० । २३ ।
"सा विद्धा बहुभिर्वाणै दिग्धैरिव गजाङ्गना ॥")
स्नेह: । अग्नि: । इति हेमचन्द्र: ॥ प्रबन्ध: । इत्यजयपाल: ॥

दिग्ध:, त्रि, (दिह+क्त: ।) लिप्त: । इति मेदिनी । धे, ७ ॥ (यथा, भट्टि: । ३ । २१ ।
"सचन्दनोशीरमृणालदिग्ध:
शोकाग्निनागाद् द्युनिवासभूयम् ॥")

दिग्वासा:, [स्] पुं, (दिगेव वासो वस्त्रं यस्य ।) शिव. । इति हेमचन्द्र: । २ । ११२ ॥ (यथा, महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासा: काम एव च ॥")
नग्ने, त्रि ॥ (यथा, मनु. । ११ । २०२ ।
"स्नात्वा तु विप्रो दिग्वासा: प्राणायामेन शुध्यति ॥")

दिग्विजय:, पु, (दिशां दिक्स्थितलोकानां विजय. ।) विद्यया युद्धेन वा दिशां विजय: । यथा शङ्करदिग्विजय: पाण्डवदिग्विजय इत्यादि ॥

दिङ्क:, पुं, (स्फोटनकाले दिङ् इति कृत्वा कायति शब्दायते इति । कै+क: ।) उत्कुणडिम्भ: । इति शब्दार्थकल्पतरु: ॥

दित, त्रि, (दीयते स्मेति । दो अवखण्डने+क्त: "द्यतिस्यतीति ।" ७ । ४ । ४० । इति इत्वम् ।) छिन्नम् । इत्यमर: । ३ । १ । १०३ ॥

दिति:, स्त्री, दैत्यमाता । सा दक्षकन्या (यथा, महाभारते । १ । ६५ । १२ ।
"अदितिर्दितिर्दनु: काला दनायु: सिंहिका तथा ॥")
इयं कश्यपपत्नी च । (दो+भावे क्तिन् ।) खण्डनम् । इति मेदिनी । ते, २४ ॥ राजविशेषे, पुं । इति शब्दार्थकल्पतरु: ॥ (दातरि, त्रि । यथा, ऋग्वेदे । ४ । २ । ११ ।
"राये च न: स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ॥"
"दितिं दातारं च रास्व देहि ।" इति तद्भाष्ये सायन: ॥)

दितिज:, पु, (दितेर्जायते इति । दिति+जन+ड: ।) दैत्य: । इति हेमचन्द्र: । २ । १५२ ॥ (यथा, महाभारते । १ । २३१ । १७ ।
"कृतस्य कर्त्ता दितिजान्तकर्त्ता
नेता रिपूणां प्रवर: सुराणाम् ॥")

दितिसुत., पु, (दितेः सुतः ।) दैत्यः । इत्यमरः । १ । १ । १२ ॥ (यथा, नैषधे । १६ । १५ ।
"दितिसुतगुरुः प्रायेणोक्तुं न किं कथयत्यमुम् ॥")

दित्यः, पु, (दितौ भवः । दिति+यत् ।) दैत्यः । इति शब्दार्थकल्पतरुः ॥ (छेदनार्हे धान्यादौ, त्रि । यथा, वाजसनेयसंहितायाम् ।१४।१०।
"दित्यवाड्वयो विराट् छन्दः ॥"
"दो॰ अवखण्डने क्तिन्प्रत्ययः । दितिं खण्डनमर्हतीति दित्यं धान्यं वहति दित्यवाट् ।" इति तद्भाष्ये महीधरः ॥)

दिद्युत्, त्रि, (द्योतते दीप्यतीति । द्युत्+"द्युतिगमिजुहोतीनां द्वे च ।" ३ । २ । १७८ । इत्यस्य वार्त्तिकोक्त्या क्विपि द्वित्वे "द्युतिस्वाप्योः सम्प्रसारणम् ।" ७ । ४ । ६७ । इत्यभ्यासस्य सम्प्रसारणम् ।) दीप्तिविशिष्टः । इति मुग्धबोधम् ॥ (स्त्री, दीप्तिः । यथा, ऋग्वेदे ।२।१३।७।
"यथासमा असनो दिद्युतो दिवः ।"
"असमा विषमा नानाप्रकारा दिद्युतः दीप्तीरजनः अजनयः ।" इति तद्भाष्ये सायनः ॥ वज्रम् । इति निघण्टुः ।२।२०॥ यथा, ऋग्वेदे । १ । ६६ । ७ ।
"अस्तुर्न दिद्युत्त्वेषप्रतीका ॥")

दिधिषाय्यः, पु, (दधाति आनन्दमिति । धा+"दिधिषाय्यः ।" उणा ३ । ९७ । इति आय्यः धातोर्द्वित्वं इत्वं षुक् च ।) आरोपितवस्तुः ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (धारके, त्रि । यथा, ऋग्वेदे । २ । ४ । १ ।
"मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥"
"दिधिषाय्यो धारयिता भूत ।" इति तद्भाष्ये सायन. ॥ उज्ज्वलदत्तस्तु "दधिषाय्य" इति उणादिसूत्रं कल्पयित्वा दधिपूर्व्वात् स्यतेराय्य. प्रत्यय इति व्याख्याय दधिषाय्यो घृतम् इत्युक्तवान् ॥)

दिधिषुः, पु, (दिधि धैर्य्यं स्यतीति । षो+बाहुलकात् कुः । यद्वा, दिधिषू आत्मन इच्छतीति । सुप आत्मन. क्यच् । क्विप् । बाहुलकात् इत्वं ।) द्विरूढापतिः । इत्यमरः ।२।६।२३॥ (गर्भाधानकर्त्ता । यथा, ऋग्वेदे । १० । १८ । ८ ।
"हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥"
"दिधिषोर्गर्भस्य निधातुः ।" इति तद्भाष्ये सायनः ॥ यथा च भागवते । ६ । ६ । ३५ ।
"ब्राह्मणीं वीक्ष्य दिधिषु पुरुषादेन भक्षितम् । शोचन्त्यात्मानमुर्व्वीशमशपत् कुपिता सती ॥"
"दिधिषु गर्भाधानकर्त्तारम् ।" इति श्रीधरः ॥)
द्विरूढायाम्, स्त्री । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, ऋग्वेदे । १० । ७८ । ५ ।
"अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्य सुदानवः ।"
"यथा दिधिषवो न वस्तूनां धारका इव ।" इति तद्भाष्ये सायनः ॥)

दिधिषूः, स्त्री, (दधाति पापं यद्वा दिधिं धैर्य्यं इन्द्रियदौर्बल्यात् स्यति त्यजतीति । दा या षो+"अन्दूदृन्भूजम्बूमि ।" उणां । १ । ९५ । इति कूप्रत्ययेन साधुः ।) द्विरूढा । वारद्वयविवाहिता स्त्री । तत्पर्य्यायः । दिधीषूः २ पुनर्भूः ३ दिधिषुः ४ । इति शब्दरत्नावली ॥ विवाहिवाहितायां कनिष्ठायां सत्यां अविवाहिता ज्येष्ठा भगिनी । यथा, उद्वाहतत्त्वे ।
"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा च दिधिषूः स्मृता ॥"
(धारके, त्रि । यथा, ऋग्वेदे । १ । ७१ । ८ ।
"दधन्नृत धनयन्नस्य धीतिमादिदर्य्यो दिधिष्वो विभृत्राः ॥")

दिधिषूपतिः, पु, दिधिषूर्द्विरूढा तस्याः पतिः स्वामी । द्विरूढापति । (यथा, मनु ।३।१७३।
"भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः । धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥")

दिन, क्ली, (द्यति खण्डयति महाकालमिति । दो छेदे+"बहुलमन्यत्रापि ।" उणां २ । ४८ । इति इनच् ।) कालविशेषः । तत्पर्य्यायः । घस्रः २ अहः ३ दिवसः ४ वासरः ५ । इत्यमरः ।१। ४ ।२॥ भास्वरः ६ दिवा ७ । इति राजनिर्घण्टः ॥ वारः ८ अग्रक ९ द्यु १० अग्रकम् ११ । इति शब्दरत्नावली ॥ (यथा, रघु. । ३।८।
"दिनेषु गच्छत्सु नितान्तपीवर तदीयमालीनमुख स्तनद्वयम् ॥")
तत्तु मनुष्यमाने षष्टिदण्डात्मकम् । पित्र्यमाने गौणचान्द्रमासात्मकम् । देवासुरमाने वत्सरात्मकम् । ब्रह्ममाने द्विसहस्रयुगात्मकम् । मनुष्यमाने ब्रह्मणो दिनस्य सङ्ख्या ।८,६४०,०००,००० । इति पुराणम् ॥ तदेव मनुष्याणां सौरसावनचान्द्रनाक्षत्रभेदेन चतुर्व्विधम् । यथा,—
सावन दण्डा. षष्टिरेव. स्वस्वखगुणांशाद्यागाद्येन भवेत । १ ।
उदयादोदयाद्भानोर्भौमसावनवासराः । २ ।
तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः । ३ ।
आयुर्दाये स्मृत प्राज्ञैर्नाक्षत्र मण्डिनादिकम् ॥४॥
ज्यौतिःसवाहनमते तु सूर्य्यकिरणावच्छिन्नचतुर्य्यामयुक्तम् ॥

दिनं, क्ली, (दो छेदे+इनच् ।) सूर्य्यकिरणावच्छिन्नकालः । तद्वैदिकपर्य्यायः । वस्तोः १ द्यु २ भानुः ३ वासरम् ४ स्वसराणि ५ घ्रंसः ६ घर्म्मः ७ घृणः ८ दिनम् ९ दिवा १० दिवेदिवे ११ द्यविद्यवि १२ । इति द्वादशाहर्नामानि । इति वेदनिघण्टौ १ अध्यायः ॥ ✱ ॥ सिंहकन्यातुलावृश्चिककुम्भमीनलग्नानि । यथा,—
"अजगोमतियुग्मञ्च कर्किधन्विमृगास्तथा । निशासञ्ज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥" इति ज्योतिस्तत्त्वम् ॥

दिनकर', पुं, (करोतीति । कृ+अच् । दिनस्य करः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (यथा, ऋतुसंहारे । १ । २२ ।
"दिनकरपरितापात् क्षीणतोयाः समन्तात् विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥")

दिनकरात्मजा, स्त्री, (दिनकरस्य सूर्य्यस्य आत्मजा।) यमुना । इति हलायुधः ॥

दिनकेशरः, पु, (दिनस्य केशर इव ।) अन्धकारः । इति शब्दरत्नावली ॥

दिनज्योतिः, [स्] क्ली, (दिनस्य ज्योतिः ।) आतपः । इति राजनिर्घण्टः ॥

दिनदुःखित', पुं, स्त्री, (दिने दिवसे दुःखितः । दिवाभागे वियोगित्वात्तथात्वम् ।) चक्रवाक. । इति शब्दरत्नावली ॥

दिनप्रणीः, पुं, (दिनं प्रणयतीति । प्र+नी+क्विप् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (अर्कवृक्षः । सूर्य्यपर्य्यायत्वात् ॥)

दिनबल , पुं, (दिने बल यस्य ।) पञ्चमषष्ठसप्तमाष्टमैकादशद्वादशराशयः । इति ज्योतिषम् ॥ (सूर्य्यगुरुशुक्रग्रहाः । इति इच्छ्यातकम् ॥)

दिनमणिः, पु, (दिनस्य मणिरिव ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे ।१।१८।
"दिनमणिमण्डलमण्डन । भवखण्डन । मुनिजनमानसहंस । जय जय देव हरे । ॥"
अर्कवृक्षः । सूर्य्यपर्य्यायत्वात् ॥)

दिनमूर्द्धा, [न्] पुं, (दिनस्य मूर्द्धा मस्तकमिव । दिनस्य आदिस्थानत्वादस्य तथात्वम् ।) पूर्व्वाद्रिः । उदयाचलः । इति त्रिकाण्डशेषः ॥

दिनांशः, पुं, (दिनस्य अंशः ।) प्राह्णमध्याह्नापराह्णसायाह्नादिः । इति राजनिर्घण्टः ॥

दिनादि., पु, (दिनस्य आदिः ।) प्रभातम् । इति राजनिर्घण्टः ॥

दिनान्त., पु, (दिनस्य अन्तः ।) सायम् । दिवावसानम् । इत्यमरः । १ । ४ । ३ । (यथा, ऋतुसंहारे । १ । १ ।
"दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागत. प्रिये । ॥")

दिनान्तक', पु, (दिनस्य अन्तक. नाशकः ।) अन्धकार । इति त्रिकाण्डशेषः ॥

दिनावसान, क्ली, (दिनस्य अवसानं यत्र ।) दिनान्तः । इति हेमचन्द्रः । २ । ५४ ॥ (यथा, रघुः । २ । ४५ ।
"दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥")

दिनिका, स्त्री, (दिनं कृत्यहेतुतया अस्त्यस्येति । दिन+ठन् ।) एकदिनकृतकर्म्ममूल्यम् । इति शब्दमाला ॥

दिन्भ, क ङ सङ्घाते । इति कविकल्पद्रुमः ॥ (चुरां आत्म सक-सेट् ।) क ङ, दिम्भयते । सङ्घातो राशीकरणम् । इति दुर्गादासः ॥

दिभ, इ क नोदे । इति कविकल्पद्रुमः ॥ (चुरांपर-सक-सेट् ।) इ क, दिम्भयति । नोदः प्रेरणम् । इति दुर्गादासः ॥

दिम्प, ष क सङ्घाते । इति कविकल्पद्रुमः ॥ (चुरांउभ-सक-सेट् ।) ओष्ठ्यवर्गप्रथमोपध. । इतीय-

खरी। च क, दिम्पयति दिम्पयते। सङ्घातो राशीकरणम्। एष. केश्चिन्न मन्यते। इति दुर्गादासः॥

दिलीपः, पुं, सूर्य्यवंशीयराजविशेषः। सूर्य्यवंशे दिलीपनामानौ द्वौ नृपौ जातौ एकः अंशुमतः पुत्त्रः भगीरथपिता अपरः दशरथप्रपितामहश्च। इति रामायणम्॥ (यथा च हरिवंशे। १५। १२१४,२३-२५।

"सुतः पञ्चजनस्यासीदंशुमानाम वीर्य्यवान्।
दिलीपस्तनयस्तस्य खट्टाङ्ग इति विश्रुतः॥
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम्।
त्रयोऽनुसन्धिता लोका बुद्ध्या सत्येन चानघ।॥
दिलीपस्य तु दायादो महाराजो भगीरथ.।
य. स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभुः॥"
"अनमित्रस्य धर्म्मात्मा विद्वान् दुलिदुहोऽभवत्।
दिलीपस्तनयस्तस्य रामस्य प्रपितामहः॥
दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाभवत् सुतः।
अयोध्यायां महाराजो रघुश्चासीत् महाबलः॥
अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्।
रामो दशरथात् जज्ञे धर्म्मात्मा सुमहायशाः॥")

दिलीपराट्, [ज्] पु, (दिलीप एव राट् राजा।) दिलीपराजः। इति त्रिकाण्डशेषः॥

दिलीर, क्ली, शिलीन्ध्रकम्। इति हारावली। २५॥

दिव, इ प्रीतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, दिन्वति। प्रीतिरिह प्रीतीकरणम्। दिन्वति लोकः पितरम्। इति दुर्गादासः॥

दिव, क अर्द्दे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, देवयति। अर्द्द इह पीडनमिति मैत्रेयः। यातनं गमनं वेति रमानाथः। इति दुर्गादासः॥

दिव, क ङ परिकूजने। इति कविकल्पद्रुमः॥ (चुरां-आत्म-अकं-सेट्।) क ङ, परिदेवयते कश्चित्तस्य राष्ट्रे न दुःखितः। इति हलायुधः। इति दुर्गादासः॥

दिव, य उ जिगीषेच्छयोः। पणौ। द्युतौ। क्रीडायाम्। गतौ। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सकं-च सेट्। उदित्त्वात् क्वावेट्।) य, दीव्यति। उ, देवित्वा द्यूत्वा। दीव्यमान शितान् बाणान्। इति भट्टौ ताच्छील्ये शतृ. शान.। पणिर्व्यवहारः स्तुतिश्च। व्यवहारस्तु क्रयविक्रयरूपः। द्युतामिवाकर्म्मकः। क्रीडायाम् दीव्यतेः करणस्य नित्यं कर्म्मत्वम्। तत्र तृतीयाविभक्तिरेव विभाष्यते। इति साम्प्रदायिकम्। तेन अक्षा दीव्यन्ते छात्त्रेण इति कर्म्मणि प्रत्ययः स्यात्। अक्षैर्दीव्यते छात्त्रेणेति भावे प्रत्ययो न स्यात् अक्षैर्देवयति छात्त्रेण गुरुरित्यत्राप्यण्यन्तस्य कर्त्तुः कर्म्मत्वं न स्यात्। तेनाहुद्युयदामं म्टगेण म्टगलोचना। इति भट्टौ तु तेनेतिकरण इट्प्राप्तेरेव न तु दीव्यतेः। तेनाकर्म्मकत्वात् राममित्यण्यन्तकर्त्तुः कर्म्मत्वम्। इति दुर्गादासः॥

दिवं, क्ली, (दीव्यन्त्यस्मिन्निति। दिवु क्रीडायाम्+ घञर्थे अधिकरणे कः।) स्वर्गः। (यथा, देवीभागवते। ५। ३। १०।

"गच्छ वीर। महाबाहो दूतत्वं कुरु मेऽनघ॥
वृहि शक्रं दिवं गत्वा निःशङ्कः सुरसन्निधौ॥")

आकाशम्। इति मेदिनी। वे, ११॥ वनम्। दिवा। इति हेमचन्द्रः।२। ५२॥

दिवस., पु, क्ली, (दीव्यन्त्यत्रेति। दिव+"दिवः कित्।" उणां। ३। १२१। इति असच् स च कित्।) दिनम्। इत्यमरः। १। ४। २॥ (यथा, आर्य्यासप्तशत्याम्। २७८।

"श्रापयता दिवसानि त्वदीयविरहेण तीव्रतापेन।
ग्रीष्मेणेव नलिन्या जीवनमस्थीकृतं तस्याः॥")

दिवसकरः, पु, (करोतीति। कृ+अच्। दिवसस्य करः।) सूर्य्यः। इति हेमचन्द्रः।२।११॥ (यथा, आर्य्यासप्तशत्याम्। ६३६।

"सुन्दर सखी दिवसकरबिम्बे तुहिनांशुरेखेव॥")

दिवसमुखं, क्ली, (दिवसस्य मुखम्।) प्रभातम्। इति हलायुध.॥

दिवस्पतिः, पु, (दिवः पतिः। अलुक्समासः।) इन्द्रः। इत्यमरः। १। १। ४५॥ (यथा, महाभारते। ५। १२। ६।

"इन्द्राणीमानयिष्यामो यथेच्छसि दिवस्पते॥")

दिवस्पृथिव्यौ, स्त्री, (द्यौश्च पृथिवी च। "दिवसश्च पृथिव्याम्।"६।३।३०। इति दिवो दिवसादेशः।) रोदसी। स्वर्गभूम्यौ। इति हेमचन्द्रः। ४। ४॥ द्विवचनान्तोऽयम्। (यथा, ऋग्वेदे।२।२।३।

"त देवा बुध्ने रजसः सुदस संदिवस्पृथिव्योररतिं न्येरिरे॥")

दिवा, य, दिनम्। इत्यमरः।३। ४। ६॥ (यथा, महाभारते। २। ११। ३४।

"क्षणा लवा मुहूर्त्ताश्च दिवा रात्रिस्तथैव च॥")

दिवा, [न्] पुं, (दिव्यत्यस्मिन्निति। दिव+"कनिन् युवृषीति।" उणां। १। १५६। इति सूत्रे "बहुलवचनात् केवलादपि कनिन्।" इति उज्ज्वलदत्तोक्त्या कनिन्।) दिनम्। इत्युणादिकोषः॥

दिवाकरः, पु, (दिवा दिनं करोतीति। कृ+"दिवाविभेति।" ३। २। २१। इति टः।) सूर्य्यः। (यथा, देवीभागवते। २। ६। १८।

"उदितश्च तदा भानुस्तया दृष्टो दिवाकरः॥")

अर्कवृक्षः। इत्यमरः॥ काकः। पुष्पविशेषः। इति शब्दचन्द्रिका॥

दिवाकीर्त्ति., पु, (दिवा दिवसे एव कीर्त्तिर्यस्य। रात्रौ क्षौरकर्म्मनिषेधात्।) नापितः। चण्डालः। ("रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च।
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥" १०। ५४। इति मनुवचनात् अस्य दिवाचरत्वात् तथात्वम्॥ यथा, मनुः। ५। ८५।

"दिवाकीर्त्तिमुदक्याञ्च पतितं सूतिकन्तथा।
शवन्तत् स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति॥"

तथाच काशीखण्डे। ७६। ८७।

"दीक्षितो वा दिवाकीर्त्तिः पण्डितो वाऽपण्डितः।
तुल्यो मे मोक्षदीक्षाया संप्राप्य मणिकर्णिकाम्॥")

उलूकः। इति हेमचन्द्रः। ३। ५६७॥

दिवाटनः, पु, (दिवा अटतीति। अट गतौ+ ल्युः।) काकः। इति शब्दार्थकल्पतरुः॥ (चाण्डालः। "दिवाचरेयुः कार्य्यार्थं चिह्निता राजशासनैः।"१०।५४। इति मनुशासनात्॥)

दिवातनः, त्रि, (दिवा भवः। दिवा+"सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।"४। ३। २३। इति ट्युः तुट् च।) दिनभव.। यथा, भट्टिः। ५। ६५।

"सायन्तनीं तिथिप्रण्यः पङ्कजानां दिवातनीम्।
कान्तिं कान्त्या सदातन्या ह्रेपयन्ती शुचिस्मिता॥"

दिवान्धः, पुं, (दिवा दिवसे अन्धः।) पेचकः। इति त्रिकाण्डशेषः॥ (यथा, पञ्चतन्त्रे। ३।७५।

"यत् मयूरहंसकोकिलचक्रवाकशुककारण्डवहारीतकसारसादिषु पक्षिप्रधानेषु विद्यमानेषु तस्य दिवान्धस्य करालवक्त्रस्याभिषेकः क्रियते नैतत् मम मतम्॥") दिनान्धे, त्रि। यथा,—

"दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः॥"

इति चण्डी॥

दिवान्धा, स्त्री, (दिवा दिवसे अन्धा।) वल्गुला पक्षी। इति राजनिर्घण्टः॥

दिवान्धकी, स्त्री, (दिवा अन्धकी दर्शनक्रियावर्जिता।) छुछुन्दरी। इति पुराणम्॥

दिवाभीतः, पु, (दिवा दिवसे भीत.।) उलूक। कुमुदाकर.। चौरः। इति मेदिनी। ते, १६७॥ (दिवसभीते, त्रि। यथा, कुमारे।१।१२।

"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्॥")

दिवाभीतिः, स्त्री, (दिवा दिवसे भीतिर्भयं यस्य।) पेचकः। इति शब्दरत्नावली॥

दिवामणिः, पु, (दिवा दिनस्य मणिरिव।) सूर्य्यः। इति शब्दरत्नावली॥

दिवामध्यं, क्ली, (दिवा दिवसस्य मध्यम्।) मध्याह्नः। इति हेमचन्द्रः।२।५३॥

दिवास्वापा, स्त्री, (दिवा दिवसे स्वापो निद्रा यस्याः।) वल्गुला पक्षी। इति राजनिर्घण्टः॥

दिवि., पु, (दीव्यतीति। दिवु क्रीडायाम्+ "इगुपधात् कित्।" उणां ४।११६। इति इन् स च कित्।) चासपक्षी। इति शब्दमाला॥

दिविजः, त्रि, (दिवि स्वर्गे जायते इति। दिवि+ जन+डः। "प्रावृट्शरत्कालदिवां जे।" ६। ३। १५। इति सप्तम्या अलुक्।) स्वर्गीयः। इति सङ्क्षिप्तसारः॥

दिविषत्, [द्] पु, (दिवि सीदतीति। सद्+ क्विप्। सप्तम्या अलुक्। षत्वञ्च।) देव.।

इत्यमरः ।१।१।८॥ (यथा, गीतगोविन्दे ।६।११।
"सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दी-
वरम् ॥"
स्वर्गवासिनि, त्रि । यथा, अथर्व्ववेदे ।१८।४।८०।
"स्वधा पितृभ्यो दिविषद्भ्यः ॥")

दिविष्ठः, त्रि, (दिवि स्वर्गे तिष्ठतीति । स्था+कः ।
अलुक् । "अम्बाम्बगोभूमीति ।" ८ । ३ । ९७ ।
इति षत्वम् ।) स्वर्गस्थः । इति संक्षिप्तसारः ॥)
(यथा, महाभारते ।३।१००।२४।
"ततो हतारिः सगणः सुखं वै
प्रशाधि शक्रस्त्रिदिवं दिविष्ठः ॥"
क्वचित् अकृतषत्वोऽपि दृश्यते । यथा, भाग-
वते ।४।२३।२२।
"नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य
विवेश वह्निं ध्यायती भर्त्तृपादम् ॥")

दिवी, स्त्री, (दिव+इन् । कृदिकारादिति वा
ङीष् ।) उपजिह्विकाकीटः । इति हारा-
वली । १६० ॥

दिवोकाः, [स्] पु, (द्यौः स्वर्ग आकाशो वा
ओको यस्य ।) देवः । चातकः । इति मेदिनी ।
से ५४ ॥

दिवोदासः, पु, (दिवः स्वर्गात् दासो दानं यस्य ।)
काशीराजः । स चन्द्रवंशीयभीमरथराजपुत्रः ।
इति मत्स्यपुराणम् ॥
("अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति
क्षितौ ॥"
"वत्स । वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति
बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्व्वेदविदांवरः ॥"
"अथ धन्वन्तरिं सर्व्वे वानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतञ्च इति स्माह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"अथ खलु भगवन्तममरवरमृषिगणपरिवृत-
माश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिं-
मौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुर
रक्षितसुश्रुतप्रभृतय ऊचुः ।"
इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

दिवोद्भवा, स्त्री, (दिवे वने उद्भवो यस्याः ।)
एला । इति शब्दार्थकल्पतरुः ॥ (दिवे स्वर्गे
उद्भवो यस्य ।) दिविजाते, त्रि ॥

दिवौकाः, [स्] पुं, (दिवं स्वर्ग आकाशो वा
ओको यस्य ।) देवः । इत्यमरः ।१।१।७॥
(यथा, महाभारते ।३।८४।११२।
"दिवौकसां पुष्करिणीं समासाद्य नराधिप । ।
न दुर्गतिमवाप्नोति वाजिमेधञ्च विन्दति ॥")
चातकः । इति मेदिनी । से, ५४ ॥ स्वर्ग-
वासिनि, त्रि । यथा, महाभारते ।१।६९।६।
"सा तु विध्वस्तवपुषः कश्मलाभिहताम्भृम ।
ददर्श पथि गच्छन्ती वसून् देवान् दिवौकसः ॥")

दिव्य, क्ली, (दिवे वने भवम् । दिव+यत् ।)
लवङ्गम् । इति मेदिनी । ये, ३१ ॥ हरिचन्द-
नम् । इति राजनिर्घण्टः ॥ शपथः । तद्भेदा
यथा, दिव्यतत्त्वे बृहस्पतिः ।
"घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् ।
षष्ठश्च तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥"
एषां विवरणं तत्तच्छब्दे केषाञ्चित् परीक्षाशब्दे
च द्रष्टव्यम् ॥*॥ गङ्गाजलस्पर्शपूर्ब्बकशपथस्तत्र
मिथ्याकथने दोषश्च यथा,—
"ब्रह्मणो वचनं श्रुत्वा ज्ञानेशो ज्ञानिनांवरः ।
गङ्गातोयं करे कृत्वा स्वीकारञ्च चकार सः ॥
गङ्गातोयमुपस्पृश्य मिथ्या यदि वदेज्जनः ।
स याति कालसूत्रञ्च यावद्वै ब्रह्मणो वयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥*॥
गङ्गाजलादिस्पर्शपूर्व्वकशपथे दोषो यथा ।
"तथा गङ्गोदकं ताम्रं गोमयं गोरजस्तथा ।
सत्यं वा यदि वासत्यं यदि दिव्यं करोति यः ॥
कर्त्ता च रौरवं याति तथा कारयिता प्रिये ।
उभयोः पुनरावृत्तिर्नरयोनिषु नास्ति वै ॥
तस्यास्ति पुनरावृत्तिर्याश्वशूकरयोनिषु ।
दिव्यं कर्त्तुं कारयितुं जपपूजा वृथा यथा ॥
गायत्रीरहितस्यापि नरकञ्चोत्तरोत्तरम् ॥"
इति गायत्रीतन्त्रे पञ्चमपटलः ॥

दिव्यः, त्रि, (दिवि भवः । यत् ।) मनोज्ञः । दिवि
भवः । इति मेदिनी । ये, ३१ ॥ (यथा, विष्णु-
पुराणे । १।९।१०४ ।
"दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्व्वदेवानां ययौ वक्षःस्थलं हरेः ॥")

दिव्य , पुं, (दिवे वने भवः । दिव+यत् ।) यवः ।
गुग्गुलुः । इति राजनिर्घण्टः ॥ भावविशेषः ।
यथा,—
"शृणु भावत्रयं देवि । दिव्यवीरपशुक्रमात् ।
दिव्यस्तु देववत् प्रायो वीरश्चोद्धतमानसः ॥
सत्यत्रेताद्वापर्य्यन्तं दिव्यभावविनिर्णयः ।
त्रेताद्वापरपर्य्यन्तं वीरभाव इतीरितम् ॥
मद्यं मत्स्यं तथा मांसं मुद्रा मैथुनमेव च ।
श्मशानसाधनं भद्रे । चितासाधनमेव च ॥
एतत्ते कथितं सर्व्वं दिव्यवीरमतं प्रिये । ।
दिव्यवीरमतं नास्ति कलिकाले सुलोचने । ॥"
इति कालीविलासतन्त्रम् ॥
नायकभेदः । यथा,—
"यत्तु तासां दिव्या अदिव्या दिव्यादिव्याभेदेन
गणनया त्रिपञ्चाशदधिकशतयुतश्चतुरस्रं भेदा
भवन्ति । दिव्या इन्द्राण्यादयः । अदिव्या
मालत्यादयः । दिव्यादिव्या द्रौपद्यादय इति
वदन्ति तन्न तत्र अवस्थाभेदेनैव नायिकानां
भेदात् जातिभेदेन भेदस्वीकारे अनन्तनायिका-
नामिव नायकानामप्यानन्त्यं स्यात् । तथा हि
इन्द्रादयो दिव्याः । अदिव्या माधवादयः ।
दिव्यादिव्या अर्ज्जुनादयः ।" इति रसमञ्जरी ॥
(सात्वतस्य पुत्राणामन्यतमः । यथा, भागवते ।
९ । २४ । ६ ।
"भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ।
सात्वतस्य सुताः सप्त महाभोजश्च मारिष ।॥")

दिव्यकुण्ड, क्ली, (दिव्यं पुण्यप्रदत्वाच्छ्रेष्ठं कुण्ड-
मिति कर्म्मधारयः ।) कामरूपे चोभकशैल-
पूर्व्वभागस्थपुष्करिणीविशेषः । यथा,—
"तद्दक्षिणे महाशैलः चोभको नाम नामतः ।
तस्मिन् गिरौ शिलापृष्ठे वक्रे देवी व्यवस्थिता ॥
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ।
एकत्र पञ्चभिर्दुर्गायोनिभिः पञ्चवक्त्रकम् ॥
स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिणा ।
तच्छैलपूर्व्वभागात्तु कान्ता नाम महानदी ॥
दक्षिणं सागरं याति प्रथमा चोत्तरस्रवा ।
दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकां गता ।
स स्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत् ।
दिव्यकुण्डे नरः स्नात्वा पञ्चपुष्करिणीं शिवाम् ॥
यः पूजयेन्महाभागः स योनौ न हि जायते ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यगन्ध, क्ली, (दिव्यो मनोहरो गन्धोऽस्य ।)
लवङ्गम् । इति राजनिर्घण्टः ॥ (लवङ्गशब्देऽस्य
विवरणं ज्ञातव्यम् ॥)

दिव्यगन्धः, पुं, (दिव्यः गन्धो यस्य ।) गन्धकः ।
इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य विवृति-
र्विज्ञेया ॥)

दिव्यगन्धा, स्त्री, (दिव्यो गन्धोऽस्याः ।) स्थूलैला ।
महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

दिव्यगायनः, पुं, (दिव्यः स्वर्गीयः गायनः ।)
गन्धर्व्वः । स्वर्गगायकः । इति शब्दरत्नावली ॥

दिव्यचक्षुः, [स्] त्रि, (दिव्यमलौकिकं चक्षुर्यस्य ।)
ज्ञानचक्षुः । यथा, नीलकण्ठस्तोत्रे ।
"नमस्तुभ्यं विरूपाक्ष । नमस्ते दिव्यचक्षुषे ।"
क्ली, ज्ञानात्मकचक्षुः । यथा,—
"न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥"
इति श्रीभगवद्गीतायाम् । ११ । ८ । "अतो
दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि ।"
इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ (दिवि
स्वर्गीयं मनोज्ञं वा चक्षुः ।) स्वर्गीयचक्षुः ।
सुन्दरलोचनम् । उपचक्षुः । चसमा इति
भाषा । इति लोकप्रसिद्धम् ॥ (पुं, दिव्यं मनोज्ञं
चक्षुर्यस्य । यद्वा, दिव्यं चक्षुर्ज्ञाननेत्रं यस्मात् ।
अर्णनाभस्य सूत्रसर्व्वगत्यगयनवलोकनेवस्य
सर्व्वजनवृत्तचरपरिज्ञानात् तथात्वम् ।) मर्कटः ।
इति शब्दमाला ॥ सुगन्धभेदः । त्रि, (दिवि
आकाशभूते चक्षुषी यस्य ।) अन्धः । (दिवे
सुन्दरे चक्षुषी यस्य ।) सुलोचनः । इति
मेदिनी । से, ६८ ॥

दिव्यतेजाः, [स्] स्त्री, (दिव्यं स्वर्गीयं देवतुल्यं तेजो यस्याः। अस्याः सेवनेन दिव्यतेजोवत्तेज-आप्यायकत्वात् तथात्वम्।) ब्राह्मी। इति राजनिर्घण्टः॥ (दिव्यं तेजो यस्य। अलौकिकतेजस्के, त्रि॥)

दिव्यदोहदं, त्रि, (दिव्यं स्वर्गीयं दोहदम् अभिलाषो यत्र।) उपयाचितम्। देवदेयवस्तु। इति त्रिकाण्डशेषः॥ यथा, हारावली। २१॥

"यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये।
उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः॥"

दिव्यपञ्चामृतं, क्ली, (पञ्चानां अमृतानां तत्तुल्यस्वादगुणवद्द्रव्यानां समाहारः पञ्चामृतम्। दिव्यं पञ्चामृतमिति कर्म्मधारयः।) मिलितगव्याज्यगव्यदधिगव्यक्षीरमाक्षिकशर्कराद्रूपम्। इति राजनिर्घण्टः॥

दिव्यपुष्पः, पु, (दिव्यं मनोरमं पुष्पं यस्य।) करवीरः। इति राजनिर्घण्टः॥

दिव्यपुष्पा, स्त्री, (दिव्यानि मनोज्ञानि पुष्पाण्यस्याः।) महाद्रोणा। इति राजनिर्घण्टः॥

दिव्यपुष्पिका, स्त्री, (दिव्यपुष्प+संज्ञायां कन् टाप् अत इत्वञ्च।) लोहितवर्णार्कवृक्षः। इति रत्नमाला॥

दिव्ययमुना, स्त्री, (दिव्या यमुना तत्तुल्यफलप्रदत्वात्।) कामरूपे दमनिकाया नद्याः पूर्व्वभागस्थसरिद्विशेषः। यथा,—

"तस्या नद्याः पूर्व्वभागे गङ्गेव फलदायिनी।
माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः॥
तथा दमनिकायाश्च परं निर्व्वाणमाप्नुयात्।
तत. पूर्व्वे परा देवी नाम्ना सा सरिदुत्तमा॥
महती दिव्ययमुना यमुनावत् फलप्रदा।
दक्षिणाद्रिसमुद्भूता दक्षिणोदधिगामिनी॥
तस्यान्तु कार्त्तिकं मासं स्नात्वा मोक्षमवाप्नुयात्॥"

इति कालिकापुराणे ८१ अध्यायः॥

दिव्यरत्नं, क्ली, (दिव्यं चिन्तामात्रं तदर्थप्रदायकत्वादलौकिकं रत्नम्।) चिन्तामणिः। इति शब्दार्थकल्पतरुः॥

दिव्यरथः, पु, (दिव्यः स्वर्गीयः अन्तरीक्षचरो वा रथः।) व्योमयानम्। देवविमानः। इति शब्दरत्नावली॥

दिव्यरसः, पुं, (दिव्यो रस इति नित्यकर्म्मधारयः।) पारदः। इति राजनिर्घण्टः॥

दिव्यलता, स्त्री, (दिव्या वनभवा लता।) मूर्व्वालता। इति राजनिर्घण्टः॥

दिव्यवस्त्रः, पु, (दिव्यं वस्त्रमिव। अभिधानात् पुस्त्वम्।) सूर्य्यशोभा। इति शब्दरत्नावली॥ (दिव्यं सुन्दरं वस्त्रमस्य।) सुन्दरवस्त्रयुक्ते, त्रि। (दिव्यं सुन्दरं वस्त्रम्।) क्ली, सुन्दरवस्त्रम्। (दिवि भवम्। यत्। दिव्यं वस्त्रमिति कर्म्मधारयः।) दिविभववस्त्रम्॥

दिव्यसारः, पुं, (दिव्यो मनोज्ञः सारो यस्य।) शालवृक्षः। इति राजनिर्घण्टः॥

दिव्या, स्त्री, (दिवि भवा। मनोज्ञत्वगुणवत्त्वात् दिव्येवेत्यर्थः।) धात्री। इति मेदिनी। ये ३१॥ वन्ध्या कर्कोटकी। शतावरी। महामेदा। ब्राह्मी। स्थूलजीरकं। श्वेतदूर्व्वा। हरीतकी। पुरा। इति राजनिर्घण्टः॥

दिव्या, स्त्री, (दिवि भवा। यत्। ततष्टाप्।) नायिकाभेदः॥ (सा च इन्द्राण्यादि.॥)

दिव्यादिव्यः, पुं, (दिव्य. स्वर्गीयः अदिव्यश्च।) नायकभेदः॥ (स च अर्ज्जुनादिः॥)

दिव्यादिव्या, स्त्री, (दिव्या अदिव्या च।) नायिकाभेदः। अस्याः प्रमाणं दिव्यशब्दे द्रष्टव्यम्॥ उपदेवीविशेषः। इति शब्दार्थकल्पतरुः॥

दिव्योदक, क्ली, (दिव्यमान्तरीक्ष्यमुदकम्।) आकाशजलम्। तत्पर्य्यायः। खवारि२ आकाशसलिलम्३ व्योमोदकम्४ अन्तरीक्षजलम्५। अस्य गुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। पथ्यत्वम्। परमरुच्यत्वम्। अमिदत्वम्। तृष्णाश्रममेहापहारकत्वम्। पात्रापेक्षिगुणत्वञ्च॥ अनार्त्तवस्य तस्य गुणः। सर्व्वेषां देहिनां त्रिदोषजनकत्वम्। सद्योभूमिलग्नस्य तस्य गुणः। कलुषत्वम्। दोषदायकत्वञ्च। चिरस्थितस्य गुणाः। लघुत्वम्। स्वच्छत्वम्। पथ्यत्वम्। स्वादुत्वम्। सुखावहत्वञ्च। इति राजनिर्घण्टः॥

दिव्योपपादुकः, त्रि, (दिवि भवः। दिव+"द्युप्रागपागुदक्प्रतीचो यत्।" ४।२।१०१। इति यत्। उपपद्यते इति। उप+पद+"लषपतपदस्थेति।" ३।२।१५४। इति उकञ्। ततो दिव्यश्चासौ उपपादुकश्चेति।) देवता। इत्यमरः।३।१।५०॥ ("मातृपित्रादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्यो जाता ये देवास्ते दिव्योपपादुका उच्यन्ते।" इति शब्दार्थचिन्तामणिः॥)

दिव्यौघः, पुं, (दिव्यानां स्वर्गीयगुणानामोघः समूहो यत्र।) गुरुविशेषः। यथा, शक्तिरत्नाकरतन्त्रे।

"महादेवो महाकालस्त्रिपुरश्चैव भैरवः।
दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते॥"

अपि च।

"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान्।
ऊर्द्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः॥
दिव्यौघान् सिद्धिदान् वत्स। शृणुष्वावहितो सदा॥"

अपिच।

"शृणु वत्स। महादेव। गुरून् दुर्गामनूक्तवान्।
परमात्मा परानन्दः परमेष्ठी शुभोदयः॥
छाया काल: कलानाथो दिव्यौघा भैरवादिकाः॥"

इति तन्त्रसारः॥

दिश, औ श श अोचे। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) औ, अदिक्षत्। श श, दिशति दिशते। अोच इति उच्चिर्य्य समवायने इत्यस्य अति रूपम्। धातूनामनेकार्थत्वादोच इह दानमाज्ञापनं वा। दिदेश कौत्साय समस्तमेवेति रघुः। कथनेऽप्ययम्। धर्म्मं दिशति दैशिकः। इति दुर्गादासः॥

दिशा, स्त्री, (दिश्+टाप्।) दिक्। इति व्याकरणम्॥ (यथा महाभारते। ४।५३।१६।

"अत्र मध्ये यथार्कस्य रश्मयस्तिग्मतेजसः।
दिशासु च तथा राजन्। न संख्याताः शरास्तदा॥")

दिशाः [स्] स्त्री, (दिशतीति। दिश+बाहुलकात् कसुन्।) दिक्। इत्यमरटीकायां मथुरानाथः॥

दिश्यं, त्रि, (दिशि भवमिति। दिश्+"दिगादिभ्यो यत्" ।४।३।५४। इति यत्।) दिग्भववस्तु। इत्यमरः।१।३।२॥

दिष्टं, क्ली, (दिशति इष्टानिष्टफल ददातीति। दिश्+"क्तिच्क्तौ च संज्ञायाम्।" ३।३।१७४। इति क्तः।) भाग्यम्। इत्यमरः।१।४।२८॥ (यथा, महाभारते। १४।५३।१६।

"ततस्ते निधनं प्राप्ताः सर्व्वे ससुतबान्धवाः।
न दिष्टमप्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा॥")

दिश+कर्म्मणि क्तः।) उपदिष्टे, त्रि। इति त्रिकाण्डशेषः॥ (कथिते च। यथा, भट्टौ।२।३२।

"गाधेयदिष्टं विरस रसन्तं
रामोऽपि मायाचनमक्षचुक्षुः॥")

दिष्टः, पु, (दिशतीति। दिश+संज्ञायां क्तः।) कालः। इत्यमरः।१।४।१॥ (वैवस्वतमनो. पुत्रविशेषः। यथा, भागवते। ८।१३।२।

"नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते॥")

दारुहरिद्रा। इति शब्दमाला॥

दिष्टान्तः, पु, (दिष्टस्य भाग्यस्य अन्तो यत्र।) मरणम्। इत्यमरः।२।८।११६॥ (यथा, महाभारते।१।५८।२७।

"मोचयित्वा तु भुजगान् सर्पसत्राद्द्विजोत्तमः।
जगाम काले धर्म्मात्मा दिष्टान्तं पुत्त्रपौत्त्रवान्॥")

दिष्टिः, स्त्री, (दिश+क्तिन् संज्ञायां क्तिच् वा।) हर्षः। परिमाणम्। इति मेदिनी। टे, १८॥

दिष्ट्या, व, (दिशतीति सम्पदादित्वात् भावे क्विप् दिशम्। देशनं स्त्यायति। स्त्यै+क्विप्। षत्वम्। संज्ञापूर्व्वकत्वात् जश्त्वं न। यद्वा, दिशतीति। दिश+"अघ्न्यादिभ्यश्चेति।"यक्प्रत्ययेन साधु।) आनन्दः। इत्यमरः।३।४।१०॥ भाग्येन। यथा,—

"दिष्ट्याम्ब। ते कुक्षिगतः परः पुमान्॥"

इति श्रीभागवतम्॥

दिष्णुः, त्रि, (ददातीति। दा+बाहुलकात् गिष्णु।) दाता। इत्युणादिकोषः॥

दिह, ल ञ औ लिपि। इति कविकल्पद्रुमः॥ (अदां-उभं-अकं-सकं च-अनिट्।) दिह उपचये इति प्राञ्चः। उपचयो वृद्धिस्तत्करणञ्च। ल ञ, देग्धि दिग्धे देहः प्रतिदिनमुपचित. स्यादित्यर्थः। देग्धि सौधं सुधया लेपकः। उपचितं करोतीत्यर्थः। औ, अधिक्षत् इति दुर्गादासः॥

दी, ओ ङ य क्षये । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट् ।) ओ, दीनः । ङ य, दीयते । इति दुर्गादासः ॥

दीक्ष, ङ मौण्ड्ये । इज्यायाम् । व्रतादेशे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-व्रतादेशे अकं-सकं च-सेट् ।) मौण्ड्यं मुण्डितमस्तकीभावः । इज्या यजनम् । व्रतादेशो नियमव्रतादेशोपनीतय. । ङ, दीक्षते वटुर्मुण्डितमस्तकः स्यादित्यर्थः । दीक्षते जनो यजतीत्यर्थः । दीक्षते याज्ञिको नियमी स्यादित्यर्थः । दीक्षते पण्डितो जनं व्रतमुपदिशतीत्यर्थः । दीक्षते पुत्त्रं विप्रः उपनयतीत्यर्थः । इति दुर्गादासः ॥

दीक्षणीयेष्टि, स्त्री, (दीक्षणीया इष्टिः ।) यज्ञविशेषः । तत्पर्य्यायः । सौमिकी २ । इति हेमचन्द्रः ।३।४८७॥

दीक्षा, स्त्री, (दीक्ष + भावे अ । स्त्रियां टाप् ।) यजनम् । पूजनम् । इत्यजयपालः ॥ व्रतसंग्रहः । इति हेमचन्द्रः ।३।४८७॥ गुरुमुखात् इष्टदेवमन्त्रग्रहणम् । (एतन्निरुक्तिर्यथा, गौतमीयतन्त्रे ।७।२।

"ददाति दिव्यतां तावत् क्षिणुयात् पापसन्ततिम् ।
तेन दीक्षेति विख्याता मुनिभिस्तन्त्रपारगैः ॥")

यथाच,—

"दीयते ज्ञानमत्यन्तं क्षीयते पापसञ्चयः ।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥
दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य सङ्क्षयम् ।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः ॥
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः ॥"

इत्यत्र गुरुशिष्ययोर्लक्षणं तत्तच्छब्दे द्रष्टव्यम् ॥ योगिनीतन्त्रे ।

"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥"

रुद्रयामले ।

"न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम् ।
न पुत्त्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत् ॥
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् ।
शक्तित्वेन वरारोहे । न च सा कन्यका भवेत् ॥"

तथा गणेशविमर्षिण्याम् ।

"यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः ।
विविक्ताश्रमिणो दीक्षा न सा कल्याणदायिका ॥"

इत्यादिनिषेधवचनादिभ्यो मन्त्रं न गृह्णीयादित्यर्थः । इति तु सिद्धेतरविषयम् । सिद्धमन्त्रो न दुष्यतीति वचनात् ॥ * ॥ शक्तियामले ।

"तीर्थाचारव्रतो मन्त्री ज्ञानवान् सुसमाहितः ।
नित्यनिष्ठो यतिः ख्यातो गुरुः स्याज्ञ्ञातिकोऽपि च ॥"

सिद्धयामले ।

"यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये ! ।
तदैव तान्तु दीक्षेत त्यक्त्वा गुरुविचारणम् ॥"

गणेशविमर्षिण्याम् ।

"प्रमादाद्वा तथाज्ञानात् पितुर्दीक्षां समाचरन् ।
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ॥"

पितुरित्युपलक्षणम् । मातामहादीनामपि । प्रायश्चित्तन्तु अयुतसावित्रीजपः । सर्व्वत्र तथा दर्शनात् । तथा च श्रुतिः ।

"दशसाहस्रजप्तेन सर्व्वकल्मषनाशिनी ।"

श्रीक्रमेऽपि ।

"मनुर्षिभ्यो दातव्यो ज्येष्ठपुत्त्राय धीमते ॥"

मत्स्यसूक्ते ।

निर्वीर्य्यञ्च पितुर्मन्त्रं शैवे शाक्ते न दुष्यति ॥"

इति कौलिकमन्त्रदीक्षापरम् । योगिनीतन्त्रे शक्त्यादिविद्यामधिकृत्य दीक्षानिषेधात् । यद्वा शाक्ते तारादिविद्यायां मत्स्यसूक्ते तथा प्रतिपादनात् । तथा च ।

"कृतसुकृतसहस्रानेकजन्मप्रभावैर्भवति यदि मनुष्यो गुर्व्वधीनश्चिराय ।
कथमपि मनुमेनं प्राप्य शिष्यः परस्मै
निजकुलतिलकाय ज्येष्ठपुत्त्राय दद्यात् ॥" इति ॥

महातीर्थे उपरागे सति सर्व्वत्र न दोषः । तथा च विष्णुमन्त्रमधिकृत्य ।

"साधु पृष्टं त्वया ब्रह्मन् । वक्ष्यामि सकलं तव ।
मद्यथा कथितं पूर्व्वं वशिष्ठाय महात्मने ॥
वशिष्ठोऽपि स्वपौत्त्राय मत्पित्रे दत्तवान् स्वयम् ।
प्रसन्नहृदयः स्वच्छः पिता मे करुणानिधिः ॥
कुरुक्षेत्रे महातीर्थे सूर्य्यपर्व्वणि दत्तवान् ॥"

इत्यादि वैशम्पायनसंहितायां शौनकं प्रति व्यासवाक्यम् ॥ * ॥ योगिनीतन्त्रे ।

"निर्वीर्य्यञ्च पितुर्मन्त्रं तथा मातामहस्य च ।
स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव शुध्यति ॥"

यत्तु ।

"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता ॥
गुरुयोग्या भवेत् सा हि विधवापरिवर्ज्जिता ।
स्त्रिया दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता ॥"

इदन्तु गुरोरुपासितमन्त्रपरम् । तथा च भैरवीतन्त्रे ।

"स्त्रीयमन्त्रोपदेशे तु न कुर्य्याद्गुरुचिन्तनम् ।"

मातुरित्युपासितेऽष्टगुणं अनुपासिते शुभफलदमित्यर्थः । सिद्धमन्त्रविषयं वा । वस्तुतस्तु योगिनीतन्त्रे स्त्रीपदं विधवापरम् । एकवाक्यताबलात् ॥ दीक्षायां विधवादीनामधिकारं विशेषयति कुलार्णवे ।

"विधवाया सुतादेशात् कन्यायाः पितुराज्ञया ।
नाधिकारः स्वतो नार्य्या भार्य्याया भर्त्तुराज्ञया ॥"

योगिनीतन्त्रे ।

"स्वप्नलब्धे तु कलसे गुरोः प्राणं निवेशयेत् ।
वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं शुभम् ॥
ततः सिद्धिमवाप्नोति चान्यथा विफलं भवेत् ॥"

इदन्तु सद्गुरोरभावे तत्सत्त्वे तस्मादेव गृह्णीयात् स्वप्ने तु नियमो न हीति नारदवचनात् ॥ * ॥ तथा विद्याधराचार्य्यधृतजावालवचनम् ।

"मध्यदेशकुरुक्षेत्रनाटकोङ्कणसम्भवाः ।
अन्तर्व्वेदिप्रतिष्ठाभा आवन्त्याश्च गुरूत्तमाः ॥
गौडाः शाल्वोद्भवाः सौरा मागधाः केरलास्तथा ।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः ॥
कर्णाटनर्म्मदारेवाकच्छातीरोद्भवास्तथा ।
कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चाधमा मताः ॥" * ॥

तथा ।

"वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके ।
शैवः शाक्तोऽपि सर्व्वत्र दीक्षास्वामी न संशयः ॥"

दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते ।

"दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य सङ्क्षयम् ।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः ॥"

मन्त्रलक्षणमाह । पिङ्गलामते ।

"मननं विश्वविज्ञानं त्राणं संसारबन्धनात् ।
यतः करोति संसिद्धेः मन्त्र इत्युच्यते ततः ॥"

अन्यच्च ।

"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः ॥"

सर्व्वाश्रमेषु दीक्षाया आवश्यकत्वम् । तथा च ।

"दीक्षामूलं जपं सर्व्वं दीक्षामूलं परं तपः ।
दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन् ॥
अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः ।
न भवन्ति प्रिये ! तेषां शिलायामुप्तबीजवत् ॥
देवि ! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः ।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ।
तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकात् ॥
ग्रन्थे दृष्ट्वा तु मन्त्रं वै यो गृह्णाति नराधमः ।
मन्वन्तरसहस्रेषु निष्कृतिर्नैव जायते ॥
नादीक्षितस्य कार्य्यं स्यात्तपोभिर्नियमव्रतैः ।
न तीर्थगमनेनापि न च शारीरयन्त्रणैः ॥"

मत्स्यसूक्ते ।

"अदीक्षितानां मर्त्त्यानां दोषं शृणु वरानने ! ।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम् ॥
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम् ॥"

शूद्रस्य मन्त्रविशेषनिषेधमाह ।

"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा ।
आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं चाजपसञ्ज्ञकम् ॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः ।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम् ॥"

श्रुतिरपि । "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रो यदि जानीयात् स मृतोऽधो गच्छति ।" इति ॥ * ॥ विशेषमाह वाराहीये ।

"गोपालस्य मनुर्देयो महेशस्यापि पार्व्वति ! ।
नृसिंहस्याथवापि सूर्य्यस्य गणेशस्य मनुस्तथा ॥
एषां दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत् ॥"

इति ॥ * ॥ गोविन्दवृन्दावने ।

"अदीक्षितस्य मरणे प्रेतत्वं न च मुक्तिः ॥"

नवरत्नेश्वरे ।

"सर्व्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम् ।
अविरोधात् भवन्त्येव प्रासङ्गिकास्तु भक्तयः ॥"

तथा।
“उपपातकलक्षाणि महापातककोटयः।
क्षणात् दहति देवेशि दीक्षा हि विधिना कृता॥”
यामले।
“आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः।
न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः॥”
अतः सद्गुरोराहितदीक्षः सर्व्वकर्म्माणि साधयेत्।*। तथाप्यनुकूलमन्त्रं दीक्षेत। तथा च नारदायाम्।
“स्वताराराशिकोष्ठानामनुकूलान् भजेन्मनून्॥”
तथा वाराहीये।
“ताराचक्रं राशिचक्रं नामचक्रं तथैव च।
अत्र चेत् सगुणो मन्त्रो नाम्यचक्रं विचारयेत्॥”
इति तु प्रधानतया बोद्धव्यम्। तथा च।
“धनिमन्त्र न गृह्णीयात् अकुलञ्च तथैव च।”
इत्यादिदर्शनात् तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते॥*॥ तत्र सिद्धसारस्वते।
“नृसिंहार्कवराहाणां प्रासादप्रणवस्य च।
सपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत्॥
स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च त्र्यक्षरे।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत्॥”*॥
मालामन्त्रस्तु वाराहीये।
“विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत्॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च।
एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत्॥
तथा एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति॥
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत्॥”*॥
तथा मुण्डमालातन्त्रे।
“काली तारा महाविद्या षोडशी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥”
मालिनीविजये।
“अथ वक्ष्याम्यहं या या महाविद्या महीतले।
दोषजालैरसंस्पृष्टास्ताः सर्व्वा हि फले सह॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः॥
कामाख्यावासिनी बाला मातङ्गी शैलवासिनी।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः।
तथा चैता महाविद्याः कलिदोषान्न वाधिताः॥”
चामुण्डातन्त्रे।
“कलौ काली तथा तारा भैरवी छिन्नमस्तका।
त्रिकूटा त्रिपुटा दुर्गा तथा महिषमर्द्दिनी॥
कात्यायनी च वासुका महाविद्याः प्रकीर्त्तिताः।
नात्र सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा॥
कालादिशोधनं नास्ति न चामित्रादिदूषणम्।
सिद्धविद्यातया नात्र युगसेवापरिश्रमः॥
नास्ति किञ्चिन्महादेवि। दुःखसाध्यं कथञ्चन॥”

इत्यादिवचनादेषु विचारो नास्ति। वस्तुतस्तु इदं प्रशंसापरम्। सर्व्वत्र विचारस्यावश्यकत्वम्। दुरदृष्टवशात् कदाचिदेरिमन्त्रस्य स्वप्नादौ प्राप्तौ तत्तद्दोषस्य दृष्टत्वात्।” इति तु साम्प्रदायिकाः॥*॥ अत्र कुलाकुलचक्रम्। राशिचक्रम्। नक्षत्रचक्रम्। अकथहचक्रम्। अकडमचक्रम्। ऋणिधनिचक्रम्। एतानि चक्रशब्दे तत्तच्छब्दे च द्रष्टव्यानि॥*॥

अथ दीक्षाकालनियमः।

“मन्त्रारम्भस्तु चैत्रे स्यात् समस्तपुरुषार्थदः।
वैशाखे रत्नलाभः स्यात् ज्यैष्ठे तु मरणं भवेत्।
आषाढ़े बन्धुनाशः स्यात् पूर्णायुः श्रावणे भवेत्।
प्रजानाशो भवेद्भाद्रे आश्विने रत्नसञ्चयः॥
कार्त्तिके मन्त्रसिद्धिः स्यात् मार्गशीर्षे तु तद्भवेत्।
पौषे तु शत्रुपीड़ा स्यात् माघे मेधाविवर्द्धनम्॥
फाल्गुने सर्व्वकामाः स्युर्मलमासं विवर्ज्जयेत्॥”
चैत्र इति गोपालविषयम्। गौतमीयोक्तत्वात्। मधुमासे भवेद्दीक्षा दुःखाय मरणाय चेति वचनान्तरान्यत्र। तथा,—
“ज्यैष्ठे मृत्युप्रदा विद्या आषाढ़े सुखसम्पदः।”
इति योगिनीहृदयादाषाढ़े श्रीविद्यायां न दोषः। अत्र च मासः सौर एव। सौरे मासि शुभा दीक्षा न चान्द्रे न च तारके। इति गौतमीयात् ५ अध्यायात्॥
वैशम्पायनसंहितायाम्।
“मन्त्रस्वारम्भणं मेषे धनधान्यप्रदं भवेत्।
वृषे मरणमाप्नोति मिथुनेऽपत्यनाशनम्॥
कर्कटे सर्व्वसिद्धिः स्यात् सिंहे मेधाविनाशनम्।
कन्यालक्ष्मीप्रदा नित्यं तुलायां सर्व्वसिद्धयः॥
वृश्चिके स्वर्णलाभः स्यात् धनुर्मानविनाशनम्।
मकरः पुण्यदः प्रोक्तः कुम्भो धनसमृद्धिदः॥
मीनो दुःखप्रदो नित्यं एवं मासविधिक्रमः॥”
प्रतिप्रसवमाह। रुद्रयामले।
“कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके।
फाल्गुने श्रावणे दीक्षा पुरश्चर्या प्रशस्यते॥”

अथ वारनियमः।

“रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत् किल।
आयुरङ्गारके हन्ति तत्र दीक्षां विवर्ज्जयेत्॥
बुधे सौन्दर्य्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ।
शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे॥”

अथ तिथिनिर्णयः।

आगमकल्पद्रुमे।
“प्रतिपदि कृता दीक्षा ज्ञाननाशकरी मता।
द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भवेत्॥
चतुर्थ्यां वित्तनाशः स्यात् पञ्चम्यां बुद्धिवर्द्धनम्॥
षष्ठ्यां ज्ञानक्षयं सौख्यं लभते सप्तमीदिने॥
अष्टम्यां बुद्धिनाशः स्यात् नवम्यां वपुषः क्षयः।
दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत्॥
द्वादश्यां सर्व्वसिद्धिः स्यात् त्रयोदश्यां दरिद्रता।
तिर्य्यग्योनिश्चतुर्दश्यां हानिर्मासावसानके॥
पक्षान्ते धर्म्मवृद्धिः स्यात् अस्वाध्यायं विवर्ज्जयेत्।
सन्ध्यागर्ज्जितनिर्घोषभूकम्पोल्कानिपातने॥
एतानन्यांश्च दिवसान् श्रुत्युक्तान् परिवर्ज्जयेत्।
द्वितीया पञ्चमी चैव षष्ठी चैव विशेषतः॥
द्वादशीमपि कर्त्तव्यं त्रयोदशीमथापि वा॥”
इति यत् त्रयोदशी विधानं तद्विष्णुविषयं रामार्च्चनचन्द्रिकादृष्टत्वात्।
“पञ्चमी सप्तमी षष्ठी द्वितीया पूर्णिमा सिता।
त्रयोदशी तु दशमी प्रशस्ता सर्व्वकामदा॥”
इति सनत्कुमारवचनाच्च॥*॥
शिवविषये सप्तम्योर्निषेधमाह।
“शुक्लपक्षस्य दशमी सप्तमी च विशेषतः।
निन्द्या सदैव षष्ठी स्यादिति शैवागमान्तरे॥”

अथ नक्षत्रनिर्णयः।

“अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवम्।
कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत्॥
मृगशीर्षे सुखावाप्तिरार्द्रायां बन्धुनाशनम्।
पुनर्व्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनम्॥
अश्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनम्।
सौन्दर्य्यं पूर्व्वफल्गुन्यां प्राप्नोति च न संशयः॥
ज्ञानञ्चोत्तरफल्गुन्यां हस्तायाञ्च धनी भवेत्।
चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनम्॥
विशाखायां सुखञ्चानुराधायां बन्धुवर्द्धनम्।
ज्येष्ठायां सुतहानिः स्यात् मूलायां कीर्त्तिवर्द्धनम्॥
पूर्व्वाषाढ़ोत्तराषाढ़े भवेतां कीर्त्तिदायिके।
श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता॥
बुद्धिः शतभिषायां स्यात् पूर्व्वभाद्रे सुखी भवेत्।
सौख्यं चोत्तरभाद्रे च रेवत्यां कीर्त्तिवर्द्धनम्॥”
आर्द्राकृत्तिकयोर्निषेधस्तु शिववह्नीतरविषये।
तथा च।
“आर्द्रायां कृत्तिकायाञ्च मन्त्रारम्भः प्रशस्यते।
यदीशस्य कृशानोर्वा मन्त्रारम्भो यथाक्रमम्॥”
तन्त्रान्तरे।
“अश्विनीभरणीस्वातीविशाखाहस्तभेषु च।
ज्येष्ठोत्तराश्रयेष्वेवं कुर्य्यान्मन्त्राभिषेचनम्॥”
इति ज्येष्ठाभरण्योर्व्विधानं तन्नामविषयं अगस्त्यसंहितोक्तत्वात्॥*॥

अथ योगादिनिर्णयो विश्वसारे।

“शुभः सिद्धस्तथायुष्मान् ध्रुवयोगस्ततः परम्।
प्रीतिः सौभाग्ययोगश्च वृद्धियोगस्ततः परम्॥
हर्षणश्च तथा योगः सर्व्वमन्त्रशुभावहः॥”
रत्नावल्याम्।
“योगाः प्रीतिरथायुष्मान् सौभाग्यः शोभनो धृतिः।
वृद्धिर्ध्रुवः सुकर्म्मा च साध्यः शुक्लश्च हर्षणः॥
वरीयांश्च शिवः सिद्धो ब्रह्म इन्द्रश्च षोड़श॥”

अथ करणनियमः।

“बबबालवकौलवतैतिलगरवणिजस्तदनन्तरम्।
करणानि शुभान्येव सर्व्वतन्त्रेषु भाविनि!॥”

अथ लग्ननिर्णयः।

“वृषे सिंहे च कन्यायां धनुर्म्मीनाख्यलग्नके।
चन्द्रताराशुभे च कुर्य्याद्दीक्षाप्रवर्त्तनम्॥”

तथा,—
"स्थिरलग्नं विष्णुमन्त्रे शिवमन्त्रे चरं शुभम्।
द्विःस्वभावगतं लग्नं शक्तिमन्त्रे प्रशस्यते॥"
अगस्त्यसंहितायाम्।
"त्रिषष्ठायगताः पापाः शुभाः केन्द्रत्रिकोणगाः।
दीक्षायान्तु शुभाः सर्व्वे रन्ध्रस्थाः सर्व्वनाशकाः॥"

अथ पक्षनियमः।

"शुक्लपक्षे भवेद्दीक्षा कृष्णेऽप्यापञ्चमाह्निनात्।
निषिद्धेष्वपि मासेषु विशेषो मुनिभेदतः॥"
रत्नावल्याम्।
"षष्ठी भाद्रपदे इषे तथा कृष्णचतुर्द्दशी।
कार्त्तिके नवमी शुक्ला मार्गे शुक्ला तृतीयिका॥
पौषे तु नवमी शुक्ला माघे शुक्ला चतुर्थिका।
फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्द्दशी॥
वैशाखे चाक्षया चैव ज्यैष्ठे दशहरा तिथिः।
आषाढे पञ्चमी शुक्ला श्रावणे कृष्णपञ्चमी॥
एतानि देवपर्व्वाणि तीर्थकोटिफलं लभेत्।
अत्र दीक्षा प्रकर्त्तव्या न मासञ्च परीक्षयेत्॥
न वारं न च नक्षत्रं न तिथ्यादिकदूषणम्।
न योगकरणञ्चैव शङ्करेण च भाषितम्॥"
अन्यच्च मतम्।
"चैत्रे त्रयोदशी शुक्ला वैशाखैकादशी सिता।
ज्यैष्ठे चतुर्द्दशी कृष्णा आषाढे नागपञ्चमी॥
श्रावणैकादशी भाद्रे रोहिणीसहिताष्टमी।
आश्विने च महापुण्या महाष्टम्यप्यभीष्टदा॥
कार्त्तिके नवमी शुक्ला मार्गशीर्षे सिते तथा।
षष्ठी चतुर्द्दशी पौषे माघेऽप्येकादशी सिता॥
फाल्गुने च सिता षष्ठी चेति कालविनिर्णयः॥"
योगिनीतन्त्रे।
"अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः।
रविसंक्रान्तिदिवसे युगाद्यायां सुरेश्वरि।॥
मन्वन्तरासु सर्व्वासु महापूजादिने तथा।
चतुर्थी पञ्चमी चैव चतुर्द्दश्यष्टमी तथा॥
तिथयः शुभदाः प्रोक्ता दीक्षाग्रहणकर्म्मणि॥"
इत्यादिवचनात् चतुर्द्दश्यष्टमीति शक्तिविषयम्। चतुर्थीति गणेशविषयम्। तत्तत्कल्पोक्तत्वात्।
"निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा।
सूर्य्यग्रहणकालस्य समानो नास्ति भूतले॥
विशेषतो महादेवि। दीक्षाग्रहणकर्म्मणि।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत्॥
रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा।
तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन॥
रविसंक्रमणे चैव नान्यदन्वेषितं भवेत्।
न वारतिथिमासादिशोधनं सूर्य्यपर्व्वणि॥"
एवं चन्द्रग्रहणेऽपि। तथा रुद्रयामले।
"न कुर्य्यात् शाक्तिकीं दीक्षामुपरक्ते विभावसौ।
न कुर्य्याद्वैष्णवीं तान्तु यदि चन्द्रमसो ग्रहः॥"
एतच्च गोमालश्रीविद्येतरविषयम्।
"अन्येषु पुण्ययोगेषु ग्रहणे चन्द्रसूर्य्ययोः।"
इति गौतमीयात्।
"सूर्य्यग्रहणकाले च नान्यदन्वेषितं भवेत्।"
इति योगिनीहृदयाच्च॥ *॥

तारादौ तु विशेषो यथा,—
"दीक्षाकालं प्रवक्ष्यामि नीलतन्त्रानुसारतः।
कृष्णपक्षस्य चाष्टम्यां शुभे लग्ने शुभे क्षणे॥
पूर्व्वभाद्रपदा युक्ते मित्रताराादिसंयुते।
अथवा अनुराधायां रेवत्यां वा प्रशस्यते॥
जानीयाच्छोभनं कालं मन्त्रस्य ग्रहणं प्रति।
इषे चैव विशेषेण कार्त्तिके च विशेषतः॥"
यामले।
"श्रीपरा कालीबीजानि लोपो दीर्घश्च यो मनुः।
सूर्य्यस्योपग्रहे लब्धो नृणां मुक्तिफलप्रदः॥
अमावास्या सोमवारे भौमवारे चतुर्द्दशी।
सप्तमी रविवारे च सूर्य्यपर्व्वशतैः समा॥"
कुलार्णवे।
"सप्तमी रविवारे च सोमे दर्शस्तथैव च।
चतुर्थी कुजवारे च अष्टमी च बृहस्पतौ॥
देवपर्व्वसमा ज्ञेयास्तासु दीक्षां समाचरेत्॥"
यामले।
"पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये।
प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत्॥"
विष्णुयामले।
"देवीबोधं समारभ्य यावत् स्यान्नवमी तिथिः।
कृता तासु शुभे दीक्षा सर्व्वाभीष्टफलप्रदा॥
शुक्लपक्षे विशेषेण तत्रापि तिथिरष्टमी।
तत्रापि शारदी दुर्गा यत्र देवी गृहे गृहे॥
तत्र दीक्षा प्रकर्त्तव्या मासर्क्षादीन्न शोधयेत्॥"
तथा।
"बोधने चैव दुर्गायाः कालाकालं न शोधयेत्॥
अशोकाख्याष्टमी यत्र रामाख्या नवमी तथा।
लग्ने वाप्यथवालग्ने यत्र स्यात्तिथिरष्टमी॥
गुरोराज्ञानुरूपेण दीक्षा कार्य्या विशेषतः॥"
समयाचारतन्त्रे।
"युगाद्यायां जन्मदिने विवाहदिवसे तथा।
विषुवायनयोर्द्वन्द्वे नैव किञ्चिद्विचारयेत्॥"
तथा,—
"शिष्यानाहूय गुरुणा कृपया दीयते यदा।
तदा लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन॥
सर्व्वे ताराः ग्रहाः सर्व्वे नक्षत्राणि च राशयः।
यस्मिन्नहनि सन्तुष्टो गुरुः सर्व्वे शुभावहाः॥"
सारसंग्रहे योगिनीतन्त्रे च।
"ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः।
गयायां भास्करक्षेत्रे विरजे चन्द्रपर्व्वते॥
चट्टले च मतङ्गे च तथा कन्याश्रमेषु च।
न गृह्णीयात्ततो दीक्षां तीर्थेष्वेतेषु पार्व्वति।॥"
वाराहीतन्त्रे।
"शुक्रोऽस्तो यदि वा वृद्धो गुर्व्वादित्यौ भवेद्यदि।
मेषवृश्चिकसिंहेषु तदा दोषो न विद्यते॥"*॥
महाविद्यासु सर्व्वासु कालादिविचारो नास्ति।
तदुक्तं मुण्डमालातन्त्रे।
"कालादिशोधनं नास्ति न चामित्रादिदूषणम्।"
अत्र मालानिर्णयो मालाशब्दे द्रष्टव्यः। पुरश्चरणं तच्छब्दे द्रष्टव्यम्। कलावतीदीक्षा कलावतीशब्दे द्रष्टव्या।

अथ पञ्चायतनीदीक्षा। यामले।
"भवानीन्तु यदा मध्ये ऐशान्यामच्युतं यजेत।
आग्नेय्यां पार्व्वतीनाथं नैरृत्यां गणनायकम्॥
वायव्यां तपनञ्चैव पूजाक्रम उदाहृतः।
यदा तु मध्ये गोविन्दं ऐशान्यां शङ्करं यजेत्॥
आग्नेय्यां गणनाथञ्च नैरृत्यां तपनं तथा।
वायव्यामम्बिकाञ्चैव भोगमोक्षैकभूमिकाम्॥
शङ्करञ्च यदा मध्ये ऐशान्यामच्युतं यजेत्।
आग्नेय्यां तपनञ्चैव नैरृत्यां गणनायकम्॥
वायव्यां पार्व्वतीञ्चैव स्वर्गमोक्षप्रदायिनीम्।
आदित्यञ्च यदा मध्ये ऐशान्यां शङ्करं यजेत्।
आग्नेय्यां गणनाथञ्च नैरृत्यां केशवं यजेत्॥
वायव्यामम्बिकां देवीं स्वर्गसाधनभूमिकाम्।
गणनाथं यदा मध्ये ऐशान्यां केशवं यजेत्।
आग्नेय्यामीश्वरञ्चैव नैरृत्यां तपनं तथा॥
वायव्यामीश्वरीञ्चैव पूजयेन्मोक्षसाधनीम्।
स्वस्थानवर्ज्जिता देवा दुःखशोकभयप्रदाः॥"
तथा च गणेशविमर्षिण्याम्।
"शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शङ्करे
भास्ये नागसुता रवौ हरगणेशाजाम्बिकाः
स्थापिताः।
देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरे
मार्य्याः शङ्करभागतोऽतिसुखदा व्यस्तास्तु ते
हानिदाः॥"
रामार्च्चनचन्द्रिकायां गौतमीये च।
"यदा तु मध्ये गोविन्दमाग्नेय्यां गणनायकम्।
नैरृत्यां हसमभ्यर्च्य वायव्यामर्च्चयेच्छिवाम्॥
ऐशान्यां शङ्करं चैव भोगमोक्षफलाप्तये॥" इति।
यदङ्गदेवतायाः पूजने आग्नेय्यादौ गणेशादिपूजनमुक्तं तद्रामगोपालविषयमिति केचित्। वस्तुतो वैकल्पिकमिति सम्प्रदायः। एतेषां पूजनन्तु गौतमीये।
"गन्धादिभिरथाभ्यर्च्य षडङ्गार्च्चनमेव च।
विशष्टत्वो जपेन्मन्त्रं नमस्कृत्य समापयेत्॥"*॥
अङ्गदेवतापूजाकालस्तु पीठपूजानन्तरम्।
तथा च सनत्कुमारतन्त्रे।
"पीठस्यार्च्चनमङ्गदेवयजनं प्राणप्रतिष्ठा तथा
आह्वानं निजमुद्रिकाविरचनं ध्यानं प्रभोः
पूजनम्।"
यत्तु देवे पुष्पाञ्जलिं दत्त्वा अङ्गदेवान् समर्च्चयेत्।
तत्तु प्रतिष्ठितयन्त्रादिविषयम्॥ *॥
यन्त्रातिरिक्ताधारे पूजने तु कुलावल्याम्।
"एकपीठे पृथक्पूजां विना यन्त्रं करोति यः।
अङ्गाङ्गित्वं परित्यज्य देवताशापमाप्नुयात्॥"
एवञ्च।
"आवाह्य देवतामन्यामर्च्चयं स्वान्यदेवताम्।
उभाभ्यां लभते शापं मन्त्री तरलदुर्म्मतिः॥"
तदेतदतिरिक्तविषयम्॥ *॥
सर्व्वेषामङ्गमन्त्राणां सिद्धादिविचारो नास्ति।
तथा च,
"सिद्धादिशोधनं नैषां अङ्गत्वे सति राघव॥"
श्यामादौ तु पञ्चायतनाभावः।

तथा च रुद्रयामले ।
"श्यामायां भैरवीताराच्छिन्नमस्तासु भैरवे ।
महाघोषे तथा रौद्रे षष्ठाङ्गं नेष्यते बुधैः ॥
उपविद्यासु सर्व्वासु षट्कर्म्मादिषु साधने ।
नात्र दीक्षाद्यपेक्षास्ति नाम्नाङ्गादिप्रपूजनम् ॥"
तन्त्रसारे ।
"उपविद्यासु सर्व्वासु तथा प्रयोगसाधने ।
दीक्षां विनैव कर्त्तव्य उपदेशः सदैव हि ॥"*॥
अथ सङ्क्षेपदीक्षा ।
"सुहूर्त्ते सर्व्वतोभद्रे नव कुम्भं निधाय च ।
सोदकं गन्धपुष्पाभ्यामर्च्चितं वस्त्रसंयुतम् ॥
सर्व्वौषधिनवरत्नपञ्चपल्लवसंयुतम् ।
ततो देवार्च्चनं कृत्वा जुहुयादष्टोत्तरं शतम् ॥"
पञ्चपल्लवमिति । पनसाम्राश्वत्थवटबकुलानि ।
तथा च वाशिष्ठे ।
"पनसाम्रं तथाश्वत्थं वटं बकुलमेव च ।
पञ्चपल्लवमित्युक्तं मुनिभिस्तन्त्रवेदिभिः ॥"*॥
नवरत्नमिति ।
"मुक्तामाणिक्यवैदूर्य्यं गोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥"*॥
निबन्धे ।
"शिष्यं स्वलङ्कृतं वेद्यामुपाविश्य प्रवेशयेत् ।
मन्त्रितं प्रोक्षणीतोयैः शान्तिकुम्भजलैस्तथा ॥
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ॥"
अष्टशतम् अष्टोत्तरशतम् ।
"अथ सम्पादयेन्मन्त्रं हस्तं शिरसि धारयन् ।
समोऽस्त्वित्यष्टतान् दद्यात् ततः शिष्योऽर्च्चयेद्गुरुम् ॥"
यद्वा दीक्षान्तरम् । शालमभ्यर्च्च्य साधत तदनु-
नादष्टवारं मूलेन शिरसि करं निधाय अष्टौ
वारान् कर्णे जपेत् । तथा च ।
"तत्राप्यशक्तः कश्चिच्चेदलमभ्यर्च्च्य साधतम् ।
तदनुनाभिषिच्याष्टवारं मूलेन केवलम् ॥
निधायाष्टौ जपेत् कर्णे उपदेशे त्वयं विधिः ॥"
इति सङ्क्षेपदीक्षा ॥
उपदेशान्तरमाह । विश्वसारे ।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥"
विश्वसारे ।
"महादीक्षा तथा दीक्षा उपदेशस्ततः परम् ।
युगे युगे च कर्त्तव्या उपदेशः कलौ युगे ॥"
इति कृष्णानन्दकृततन्त्रसारः ।

दीक्षान्तः, पुं, (दीक्षायाः प्रधानयज्ञस्य अन्तः अन्तोपलक्षितो यज्ञः ।) अवभृथः । इत्यमरः । २।७।२७ ॥ "प्रधानयागो दीक्षा तस्याः अन्तः समापको योऽपरो यज्ञो न्यूनत्वादिदोषशान्त्यर्थं प्रधानयागस्य पूरणार्थं प्रतिष्ठार्थं क्रियते सोऽवभृथ उच्यते । अवहीनं बिभर्त्ति पोषयतीति नाम्नीति थक् । यज्ञावशेषे स्नाने चावभृथः । यज्ञावशेषे स्नानं यत् तदेवावभृथं विदुरिति त्रिकाण्डशेषः ॥ यज्ञान्ते तमवभृथाभिषेकपूतमति रघुः ।" इत्यमरटीकायां भरतः ॥

दीक्षितः, त्रि, (दीक्ष + कर्त्तरि क्तः । यद्वा, दीक्षा सञ्जाता अस्येति । तारकादित्वात् इतच् ।) सोमपानविशिष्टयागकर्त्ता । यथा । स सोमवति दीक्षितः । इत्यमरः । २।७।८ ॥ "स व्रती सोमपानवति अध्वरे यजमानः सन् दीक्षित उच्यते । अन्यत्राप्युपचारात् । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु क्तः दीक्षाशब्दादितो वा ।" इति तट्टीकायां भरतः ॥ * ॥ गुरुमुखाद्गृहीतमन्त्रः । यथा,—
"अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः ।
न भवन्ति प्रिये ! तेषां शिलायामुप्तबीजवत् ॥
देवि ! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः ।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ॥"
इति तन्त्रसारः ॥ * ॥
काम्पिल्लनगरस्थयज्ञदत्तनामकब्राह्मणः । यथा,
"आसीत् काम्पिल्लनगरे सोमयाजिकुलोद्भवः ।
दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः ॥
वेदवेदाङ्गवेदार्थवेदोक्ताचारचञ्चुरः ।
राजमान्यो बहुधनो वदान्यः कीर्त्तिभाजनः ॥
अग्निशुश्रूषणरतो वेदाध्ययनतत्परः ॥"
इति स्कान्दे काशीखण्डे गन्धवत्यलकावर्णनं नाम १३ अध्यायः ॥*॥ (स्वीकृतदीक्षः । यथा, महाभारते । २ । ७३ । १ ।
"ततः पराजिताः पार्था वनवासाय दीक्षिताः ।
अजिनान्युत्तरीयाणि जगृहुश्च यथाक्रमम् ॥")

दीक्षिता, [ऋ] पुं, (दीक्ष + "सुदरदीपदीक्षश्च ।" ३।२।१५३। इति युचं बाधित्वा शीलार्थे तृन् ।) सोमयाजी । इति केचित् ॥ दीक्षाविशिष्टः । दीक्षधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥

दीक्षितायनी, स्त्री, (दीक्षितः स्वनामख्यातब्राह्मण एव अयनं गतिर्यस्याः । स्त्रियां टित्वात् ङीप् ।) काम्पिल्लनगरस्थदीक्षितनामकब्राह्मणपत्नी । यथा, काशीखण्डे १३ अध्याये ।
"महापतिव्रता सम्यक् पत्नी प्रोवाच तामथ ।
दीक्षितायनि ! क्वासि क्व ते गुणनिधिः सुतः ॥
अथ तिष्ठतु किन्तेन क्व सा मम शुभोर्म्मिका ।
अङ्गोद्वर्त्तनकाले या त्वया मेऽङ्गुलिका कृता ॥
नवरत्नमयीं शीघ्रं तामानीय प्रयच्छ मे ।
इति श्रुत्वाथ तद्वाक्यं भीता सा दीक्षितायनी ॥"

दीदिविः, पुं स्त्री, (दिव्यन्त्यनेनेति । दिव + "दिवो द्वे दीर्घश्चाभ्यासस्य ।" उणां । ४ । ५५ । इति क्विन् अभ्यासस्य दीर्घश्च ।) अन्नम् । इत्यमरः । २ । ९ । ४८ ॥ (दिव्यतीति क्विन् ।) बृहस्पतौ, पु । इति मेदिनी । वे, ३७ ॥ (स्वर्गे भक्ते च । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥)

दीदिविः, त्रि, (दिव् + क्विन् ।) उदितः । इति शब्दरत्नावली ॥ (पुनःपुनर्द्योतकः । यथा, ऋग्वेदे । १ । १ । ८ ॥
"राजन्तमध्वराणां गोपामृतस्य दीदिविम् ॥"
"दीदिवि पौनःपुन्येन भृशं वा द्योतकम् ।"
इति तद्भाष्ये सायनः ॥)

दीधितिः, स्त्री, (दीधीते दीप्यते इति । दीधी + संज्ञायां क्तिच् । इट् । "अग्रहादीनाम् ।" इति वार्त्तिकसूत्रात् "यीवर्णयोर्दीधीवेव्योः ।" ७।४।५३। इति अन्त्यस्य लोपः ।) किरणः । इत्यमरः । १ । ४ । ३३ ॥ (यथा, रघुः । ३ । २२ ।
"पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥")

दीधी, ङ लु च देवने । दीप्तौ । इति कविकल्पद्रुमः ॥ (अदां-आत्मं-अकं-सेट् ।) दीर्घमध्यः । ङ वैदिकः । ङ लु, दीधीते । च, अदीधयुः । बहुलं छन्दसीति परस्मैपदे अनुसृष्टिरिति अन् उस् गुरुस्वरणामिति गुणः । इति दुर्गादासः ॥

दीनं, क्ली, (दीयते स्म इति । दी + क्तः । तत. निष्ठातस्य न. ।) तगरपुष्पम् । इति राजनिर्घण्टः । (अस्य पर्य्यायो यथा,—
"कालानुसारिवा वक्र तगरं कुटिलं शठम् ।
महोरगं नतं जिह्मं दीनं तगरपादिकम् ॥ "
इति वैद्यकरत्नमालायाम् ॥)

दीनः, त्रि, (दीयते स्मेति । ओ दीङ् क्षये + "गत्यर्थाकर्म्मकेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः । यद्वा, दी + "इणसिञ्जिदीङुष्यविभ्यो नक् । " उणा । ३ । २ । इति नक् ।) दरिद्र. । इत्यमरः । ३ । १ । ४९ ॥ (यथा, मनौ । ६ । २३८ ।
"चरेयुः पृथिवीं दीनाः सर्व्वधर्म्मवहिष्कृताः ॥")
भीतः । इति मेदिनी । ने, २१ ॥ (दुःखितः । यथा, रघुः । २ । २५ ।
"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")

दीना, स्त्री, (दीन + टाप् । सततं भीतभीतेव दृश्यत्वात् तथात्वम् ।) मूषिकस्त्री । इति मेदिनी । ने, १० ॥

दीनारः, पु, (दीयते इति । दी + "दीङो नुट् च ।" उणां । ३ । १४० । इति आरन् नुट् च ।) स्वर्णभूषा । मुद्रा । इत्युणादिकोषः ॥ (यथा, पञ्चतन्त्र ३ । १३६ ।
"अथ प्रातर्यावदेत्य पश्यति तावद्दीनारमेकं शरावे दृष्टवान् ॥") निष्कपरिमाणम् । इत्यमरः । ३ । ३ । १४ ॥ सुवर्णकर्षद्वयम् । इति तट्टीकासारसुन्दरी ॥ सम्यग्व्यवहारार्थं मानवस्तु । लौकिकः । द्वात्रिंशद्रत्तिकापरिमितं काञ्चनम् । इति भरतः ॥

दीप, ईं ङ य ऋ दीपने । इति कविकल्पद्रुमः ॥ (दिवा-आत्मं-अक-सेट् ।) दीपनमुज्ज्वलीभावः । ईं, दीप्तः । ङ य, दीप्यते निशि चन्द्रमाः । ऋ, अदीदिपत् अदिदीपत् । इति दुर्गादासः ॥

दीपः, पु, (दीप्यते दीपयति वा स्वं परञ्चेति । दीप् दीपि वा + "इगुपधज्ञाप्रीकिरः कः ।" ३। १।१३५। इति कः ।) वर्त्तिस्थज्वलदग्निशिखा । तत्पर्य्यायः । प्रदीपः २ स्नेहाशः ३ दीपकः ४ कज्जलध्वजः ५ शिखातरुः ६ गृहमणिः ७

ज्योतिरथः ८ दशेन्धनः ६ दीपातिलकः १० दीपास्यः ११ नयनोत्सवः १२। इति शब्द-रत्नावली ॥ (यथा, मनौ। ४। २२६।
"वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥")
तदर्थे स्नेहादिनियमो यथा,—
"घृतं तैलञ्च दीपार्थे स्नेहानन्यानि वर्ज्जयेत्।"
इत्याद्ये वह्निपुराणे आह्निकतपोनामाध्यायः ॥
अन्यच्च।
"पुरश्चरणकृत्यञ्च दीपं प्रकल्पिष्ठ भैरव!।
दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ॥
चतुर्व्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये ॥"
इत्युपक्रम्य,—
"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः।
सार्षपः फलनिर्यासजातो वा राजिकोद्भवः ॥
दधिजश्चाब्जजश्चैव प्रदीपाः सप्त कीर्त्तिताः।
पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ॥
शणजा वादरी वापि फलकोषोद्भवाथवा।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधाः स्मृताः ॥ * ॥
तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम्।
तृणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥ * ॥
दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्यैश्च भैरव!।
वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वसहा वसुमती सहते न त्विदं द्वयम्।
अकार्य्यपादघातञ्च दीपतापं तथैव च ॥
तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा।
दीपं दद्यान्महादेवि अर्घ्येभ्योऽपि च भैरव! ॥
कुर्व्वन्ति पृथिवीतापं यो दीपस्तूत्सृजेन्नरः।
स ताम्रतापं नरकमाप्नोत्येव शतं समाः ॥
सुवृत्तवर्त्तिसंस्नेहपात्रेऽभग्ने सुदर्शने।
मृन्मये वृक्षकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात्।
न स दीप इति ख्यातो ओघवह्निस्तु स स्मृतः ॥
नेत्राह्लादकरः खर्च्चिर्दूरतापविवर्ज्जितः।
सुशिखः शब्दरहितो निर्धूमो नातिह्रस्वकः ॥
दक्षिणावर्त्तवर्त्तिस्तु प्रदीपः श्रीविवृद्धये।
दीपवृक्षस्थिते पात्रे शुद्धस्नेहप्रपूरिते ॥
दक्षिणावर्त्तवर्त्त्या तु चारुदीपः प्रदीपकः।
उत्तमः प्रोच्यते पुत्र! सर्व्वतुष्टिप्रदायकः ॥
वृक्षेण वर्ज्जितो दीपो मध्यमः परिकीर्त्तितः।
विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः ॥
शाणं वा वादरं वास्त्रं जीर्णं मलिनमेव वा।
उपयुक्तन्तु नो दद्यात् वर्त्तिकार्थन्तु साधकः ॥
उपादद्यान्मूलमेव सततं श्रीविवृद्धये ॥ * ॥
कौषजं रोमजं वस्त्रं वर्त्तिकार्थं न चाददेत्।
न मिश्रीकृत्य दद्यात्तु दीपं स्नेहान् घृतादिकान् ॥
कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत्।
वसामज्जास्थिनिर्यासैः स्नेहैः प्राण्यङ्गसम्भवैः ॥
प्रदीपं नैव कुर्य्यात्तु कृत्वा पङ्के विषीदति।
अशिपात्रेऽथवा गर्त्ते दुर्गन्धाद्युपवासिनि ॥
नैव दीपः प्रदातव्यो विबुधः श्रीविवृद्धये।
नैव निर्व्वापयेद्दीपं कदाचिदपि यत्नतः ॥
सततं लक्षणोपेतं देवार्थमुपकल्पितम्।
न हरेदज्ञानतो दीपं तथा लोभादिना नरः ॥
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत्।
उद्दीप्तदीपप्रतिमः काष्ठकाण्डसमुद्भवः ॥
बिल्वेभोद्भवमेवाथ दीपालाभे निवेदयेत्।
उल्मुकं नैव दीपार्थे कदाचिदपि चोत्सृजेत् ॥
प्रसन्नार्थन्तु न दद्यादुपचारार्द्धहि कृतम्।
एव वां कथितो दीपो धूपश्च शृणुतं सुतौ ॥"
इति कालिकापुराणे ६८ अध्यायः ॥
श्राद्धे वस्त्रवर्त्तियुक्तदीपनिषेधो यथा,—
"दीपं वर्ज्जयेत् वस्त्रवर्त्त्या प्रत्यक्षं तैलमेव च।"
इति योगिनीतन्त्रे प्रथमतमे २ भागे ५ पटलः ॥
कार्त्तिकमासे दीपदानस्य माहात्म्यं यथा,—
"शृणु दीपस्य माहात्म्यं कार्त्तिके च हरि-प्रिय!।
यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् ॥
सूर्य्यग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे।
तुलादानस्य यत् पुण्यं तदूर्द्ध्वे दीपदानतः ॥
घृतेन दीपकं यस्तु तिलतैलेन वा पुनः।
ज्वालयेन्मुनिशार्दूल! अश्वमेधेन तस्य किम् ॥
तेनेष्टं क्रतुभिः सर्व्वं कृतं तीर्थावगाहनम्।
दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥
तावद्गर्ज्जन्ति पापानि देहेऽस्मिन् मुनि-सत्तम!।
यावत् कार्त्तिकमासेन दीपदानं कृतं भवेत् ॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्त्ये रसातले।
यावत्तु ज्वलते दीपः कार्त्तिके केशवाग्रतः ॥
श्रूयतेऽत्रापि पितृभिर्गाथा गीता महामुने!।
भविष्यन्ति कुलेऽस्माकं कदाचित्ते सुता भुवि ॥
कार्त्तिके दीपदानैर्ये तोषयिष्यन्ति केशवम्।
अपि नस्ते भविष्यन्ति कुले सुचरिता गुणैः।
दीपदानं कार्त्तिके ये दास्यन्ति हरितुष्टिदम् ॥
गयायां पिण्डदानेन कृतं न प्रीणनं सुते।
येषामपि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः ॥
दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिनः।
कार्त्तिके तैर्मुनिश्रेष्ठ! नरकादुद्धृता वयम् ॥
मन्त्रहीनं क्रियाहीनं शुचिहीनं जनार्द्दनः।
व्रतं सम्पूर्णतां यातु कार्त्तिके दीपदानतः ॥
अनेनैव हि मन्त्रेण दीपं सङ्कल्पयेन्मुने!।
मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिपुङ्गवः ॥"
इति पाद्मे उत्तरखण्डः ॥
अपि च।
"शस्यते देवदेवाय दीपपुष्पानुलेपनम्।
अपि न स कुले भूयादेकादश्यां तिथौ नरः ॥
करिष्यत्युपवासन्तु सर्व्वपातकहानिदम्।
इत्थं पितॄणां वचनं श्रुत्वा नृपतिसत्तम! ॥
ददौ च दीपान् विधिवत् विष्णोरायतने बलिः।
सुगन्धतैलसम्पूर्णान् दीपान् सघृततैलकान् ॥
सर्षपस्य सुतैलेन मधुकातसिसम्भवैः।
दीपप्रदानान्नरकानन्धतामिस्रसंज्ञकान्।
तीर्त्वा सभार्य्यया ब्रह्मन्! विष्णुलोकमगात्ततः ॥"
इति वामनपुराणम् ॥
दीपं स्पृष्ट्वा वेधकर्म्मकरणे दोषो यथा,—
"दीपं स्पृष्ट्वा तु यो देवि! मम कर्म्माणि कारयेत्।
तस्यापराधाद्वै भूमे! पापं प्राप्नोति मानव!।
तच्छृणुष्व महाभागे! कथ्यमानं मयानघे! ॥
जायते षष्टिवर्षाणि कुष्ठी गात्रपरिप्लुतः।
चाण्डालस्य गृहे तत्र एवमेव न संशयः ॥
एवं भूत्वा तु सत् कर्म्म मम क्षेत्रे मृतो यदि।
मद्भक्तश्चैव जायेत शुद्धे भागवते गृहे ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्भुवि।
तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु ॥
यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी।
चतुर्थभक्तमाहारमाकाशशयने स्वपेत् ॥
दीपं दत्त्वापराधाद्धि तरन्ति मनुजा भुवि।
शुचिर्भूत्वा यथान्यायं मम कर्म्म पथे स्थितः ॥
एतत्ते कथितं देवि! स्पर्शनात् दीपकस्य तु।
संसारमोक्षणञ्चैव यत् कृत्वा लभते शुभम् ॥"
इति वराहपुराणम् ॥ * ॥
पुरुषस्य दीपनिर्व्वापणे दोषो यथा,—
"दीपनिर्व्वापणात् पुंसः कुष्माण्डच्छेदनात् स्त्रियः।
अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम् ॥ * ॥
देवार्थकल्पितदीपस्य निर्व्वापणे दोषो यथा,—
नैव निर्व्वापयेद्दीपं देवार्थमुपकल्पितम्।
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ॥"
इत्येकादशीतत्त्वे कालिकापुराणम् ॥
कार्त्तिककृष्णचतुर्द्दश्यां नरकनिवृत्तये दीपदानं यथा,—
"नरकाय प्रदातव्यो दीपः सम्पूज्य देवताः।"
इति तिथितत्त्वधृतलिङ्गपुराणम् ॥ * ॥
पृथिव्यां दीपो न संस्थाप्यः। यथा,—
"सर्व्वसहा वसुमती सहते न त्विदं द्वयम्।
अकार्य्यपादघातञ्च दीपतापस्तथैव च ॥"
इत्येकादशीतत्त्वधृतकालिकापुराणम् ॥

दीपकं, क्ली, (दीपयतीति। दीप् + णिच् + ण्वुल्।) वाक्यालङ्कारः। दीप्तिकारके, त्रि। इति मेदिनी। के, १०४ ॥ कुङ्कुमम्। इति शब्दरत्नावली ॥ * ॥
वाक्यालङ्कारस्य लक्षणं यथा,—
"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्।
एकधर्म्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥
यथा, माघे।
बलावलेपादधुनापि पूर्व्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥"
इति साहित्यदर्पणे ।१०।६०॥
अपि च काव्यचन्द्रिकायाम्।
"जातिक्रियागुणद्रव्यवाचकेन पदेन तु।
एकत्र वर्त्तिना सर्व्ववाक्यार्थो दीपकं भवेत् ॥"
यथा,—
भ्रमद्भ्रमरझङ्कारपुंस्कोकिलकलध्वनिः।
मन्दचन्दनवातोऽपि हरन्ति हृदयं नृणाम् ॥"

दीपकः, पुं, (दीपयति जठराग्निमिति । दीपि+ण्वुल् ।) यमानी । इति रत्नमाला ॥ (गुणाश्चास्य यमानीशब्दे ज्ञेयाः ॥) जोयमखरकः । इति शब्दरत्नावली ॥ दीपः । (यथा, ब्रह्माण्डपुराणे ।
"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः ॥")
श्येन पक्षिविशेषे पक्षिणो गृह्यन्ते स' । इति हेमचन्द्रः । ४ । ४०८ ॥ बाज् इति शिकरा इति च भाषा । रागविशेषः । अयं हनूमन्मते षड्रागेषु द्वितीयरागः । सूर्य्यनेत्रान्निर्गतः । अस्य जातिः सम्पूर्णा । ग्रहन्तु षड्जस्वरः । गानसमयस्तु ग्रीष्मर्त्तौ मध्याह्न । अस्य रूपं यथा । वर्णो रक्तः । वस्त्रं पाटलवर्णम् । गजभूषणं हृद्गन्धमुक्तामाल्यम् । मत्तहस्त्यारूढोऽयम् । बहुस्त्रीपरिवृतश्च । कस्यचिन्मते । लज्जया दीपनिर्व्वापणेनान्धकारमयं गृहं कृत्वा स्त्रीभी रमते । अस्य रागिण्यः पञ्च यथा । देशी १ कामोद् २ नट ३ केदारा ४ कानरा वा कर्णाटी ५ । पुत्राश्चाष्टौ यथा । कुन्तलः १ कमलः २ कलिङ्गः वा कलिन्द्रः ३ चम्पकः ४ कुसुम्भः वा कुसुमः ५ रामः ६ लहिलः ७ हिमालः ८ । भरतमते अस्य रागिण्यो यथा । केदारा १ गौरा २ गौण्ड ३ गुर्ज्जरी ४ रुद्राणी ५ । तन्मते पुत्रा यथा । कुसुमः १ टङ्कः २ नटनारायणः ३ विहागरा ४ किरोदस्तः ५ रहसमङ्गला वा रभसमङ्गला ६ मङ्गलाष्टकः ७ अडाणा वा आडाना ८ । इति तङ्फतोलहिन्दाख्यसंगीतशास्त्रसंग्रहः ॥ (तालविशेषः । यथा, सङ्गीतदामोदरे ।
"द्रुतो लघुः द्रुतश्चैव ताले दीपकनामनि ॥")

दीपकिट्टं, क्ली, (दीपस्य किट्टम् ।) दीपजातकज्जलम् । इति शब्दार्थकल्पतरुः ॥

दीपकूपी, स्त्री, (दीपस्य कूपीव तैलधारकत्वात् ।) दीपवर्त्तिः । शलिता इति भाषा । तत्पर्य्यायः । तैलमाली २ दीपखोरी ३ विदाहिका ४ । इति शब्दमाला ॥

दीपखोरी, स्त्री, (दीपं खोरयति गत्याघातं करोति स्थिरीकरोतीति । खोर् गत्याघाते + णिच् + अच् । गौरादित्वादित् ङीष् ।) दीपकूपी । इति शब्दमाला ॥

दीपध्वजः, पुं क्ली, (दीपस्य ध्वज इव ।) कज्जलम् । इति जटाधरः ॥

दीपनं, क्ली, (दीपयति वह्निमिति । दीप+णिच् +ल्यु ।) तगरमूलम् । इति रत्नमाला ॥ कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (मन्त्रस्य संस्कारविशेषः । यथा, शारदातिलके ।
"मन्त्राणां दश कथ्यन्ते संस्कारा सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥
अथाभिषेको विमलीकरणाप्यायने तथा ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥"
"तारमायारमायोगो मनोर्दीपनमुच्यते ॥")

दीपनः, पुं, (दीप्यते इति । दीप+ल्युः ।) मयूरशिखा । (दीप + णिच् + ल्युः ।) शालिञ्चशाकः । इति शब्दचन्द्रिका ॥ कासमर्द्दः । पलाण्डुः । इति राजनिर्घण्टः ॥ दीपयितरि, त्रि ॥ (यथा, ऋतुसंहारे । १ । ३ ।
"सुवासितं हर्म्यतलं मनोरमं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

दीपनी, स्त्री, (दीप्यते जठरवह्निरनया । दीप+णिच्+ल्युट् । स्त्रियां ङीप् ।) मेथिका । (अस्याः पर्य्याया यथा,—
"मेथिका मिथिनी मेथिर्दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पाठा । यवानी । इति राजनिर्घण्टः ॥

दीपनीयः, पुं, (दीप्यते जठरवह्निरनेनेति । दीप+णिच्+अनीयर् ।) यवानी । इति राजनिर्घण्टः ॥ दीपनयोग्ये, त्रि । (यथा सुश्रुते । १ । ४५ ।
"दीपनीयमचक्षुष्यं वाडवं दधि वातलम् ॥")
औषधवर्गविशेषः । यथा,—
"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥"
इति चक्रदत्तः ॥

दीपपादपः, पुं, (दीपस्य पादप इव ।) दीपवृक्षः । इति शब्दार्थकल्पतरुः ॥

दीपपुष्पः, पुं, (दीप इव पुष्पं यस्य ।) चम्पकवृक्षः । इति राजनिर्घण्टः ॥

दीपवती, स्त्री, (दीपवत् तेजस्वित्वं अस्त्यस्या इति । दीप+मतुप् । मस्य वः ।) कामाख्याया नदीविशेषः । यथा,—
और्व्व उवाच ।
"शाश्वती कथिता या तु नदी मत्स्यध्वजा स्थिता ।
तस्याः पूर्व्वे समाख्याता नदी दीपवती मता ॥
यथा च हिमवज्जाता छिन्दन्ती दीपवत्तमः ।
तेन देवमनुष्येषु नदी दीपवती स्मृता ॥
दीपवत्याः पूर्व्वतस्तु शृङ्गाटो नाम पर्व्वतः ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दीपवृक्षः, पुं, (दीपस्य वृक्ष इव आधारः ।) दीपाधारः । पिलसुज् इति देलका इति च भाषा । तत्पर्य्यायः । दीपतरुः २ ज्योतिर्वृक्षः ३ । इति त्रिकाण्डशेषः ॥ दीपपादपः ४ । इति शब्दार्थकल्पतरुः ॥ (यथा महाभारते ।१२।२०२।६।
"यथा प्रदीप्तः पुरतः प्रदीपः
प्रकाशमन्यस्य करोति दीप्यन् ।
तथेह पञ्चेन्द्रियदीपवृक्षा
ज्ञानप्रदीप्ताः परवन्त एव ॥")

दीपशिखा, स्त्री, (दीपस्य शिखा कारणत्वेन अस्त्यस्याः । अच् । टाप् ।) कज्जलम् । इति शब्दार्थकल्पतरुः ॥ (दीपस्य शिखा ।) प्रदीपज्वाला ॥ (यथा, रघुः । ६ । ६७ ।
"सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ॥")

दीपशृङ्खला, स्त्री, (दीपानां शृङ्खलेव ।) दीपाली । इति हारावली । १२४ ।

दीपान्विता, स्त्री, (दीपैरन्विता युक्ता ।) गौणचान्द्रकार्त्तिकस्यामावास्या । यथा, भविष्यपुराणम् ।
"येयं दीपान्विता राजन् ! ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितॄणां वै महालये ॥
पञ्चदशी अमावास्या । अमावास्यामधिकृत्य ।
दीपमालाश्च कर्त्तव्याः शक्त्या देवगृहेषु च ।
रथ्यापणश्मशानेषु नदीपर्व्वतसानुषु ॥
इति ब्रह्मपुराणोक्तनानास्थानदीपदानेन दीपान्विता ख्याता येयमिति विशेषणाच्च ।" इति श्राद्धतत्त्वम् ॥*॥ तत्र कर्म्माणि यथा,—
"प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि ॥
चतुष्पथे श्मशानेषु नदीपर्व्वतसानुषु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान् ।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृत्यैः सह ॥"
इति तिथितत्त्वम् ॥
तत्र श्यामापूजाप्रमाणं यथा,—
"दीपान्विता पार्व्वणाय स्मृता काल्यर्च्चनाय च ।
महानिशि द्वितीयं स्यात् पूर्व्वेद्युर्व्याप्तिनाशयोः ॥
महानिशि व्याप्तिनाशयोः पूर्व्वेद्युरेव द्वितीयं काल्यर्च्चनं स्यात् इत्यर्थः । प्रथमं पार्व्वणं द्वितीयं काल्यर्च्चनमिति द्वितीयशब्दस्य तात्पर्य्यार्थः ।" इति स्मृतिसारसंग्रहधृतश्यामकेशतन्त्रम् ॥*॥ अपरञ्च ।
"दीपोत्सवचतुर्द्दश्यां संमिश्रा या भवेत् कुहूः ।
तस्यां या तामसी रात्रिः सोच्यते कालरात्रिका ॥
तस्यां पूजा प्रकर्त्तव्या काली तारा प्रियङ्करी ॥"
इति कालीकुलसद्भावः ॥

दीपाली, स्त्री, (दीपानां आली श्रेणी ।) दीपमाला । तत्पर्य्यायः । दीपशृङ्खला २ । इति हारावली । १२४ ॥ (दीपानां आली यत्र ।) दीपान्वितामावास्या । तत्पर्य्यायः । यक्षरात्रिः २ । इति त्रिकाण्डशेषः ॥

दीपिका, स्त्री, (दीपयति प्रकाशयति ग्रहादीनिति । दीप+णिच्+ण्वुल् । टापि अत इत्वम् ।) महिन्तापनीयश्रीनिवासकृतज्योतिर्ग्रन्थविशेषः । यथा, अस्त गतवति मिहिरेऽतिमलिनदोषाकुले च गोविभवे । उद्वाहादिषु शुद्धिग्रहणार्थं दीपिका क्रियते ॥ एतद्भिन्ना भुवनचण्डजातकसूत्रादिदीपिकाः सन्ति ॥ रागिणी-

विशेषः । सा हिन्दोलरागस्य पत्नी । अस्या ध्यानं यथा —

"प्रदीपकाले गृहसम्प्रविष्टा
प्रदीपहस्तारुणगात्रवस्त्रा ।
सीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम् ॥"

तस्या गानकालः सायाह्नः । इति सङ्गीतदामोदरः ॥ (प्रदीपः । यथा, रघुः ।९।७० ।

" स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपिकासनाथाम् ॥")

प्रकाशिकायाम्, त्रि ॥

दीपिता, [ऋ] त्रि, (दीपयतीति । दीप + णिच् + तृच् ।) दीप्तिकर्त्ता । इति व्याकरणम् ॥

दीप्तं, क्ली, (दीपी दीप्तौ + क्तः । "श्वीदितो निष्ठायाम् ।" ७ । २ । १४ । इति नेट् ।) स्वर्णम् । हिङ्गु । इति राजनिर्घण्टः ॥ (स्वर्णशब्दे हिङ्गुशब्दे च विवृतिरस्य ज्ञेया ॥)

दीप्तः, पुं, (दीप + क्तः ।) निम्बुकः । सिंहः । इति राजनिर्घण्टः ॥ (नासागतरोगविशेषः । यथा, सुश्रुते उत्तरतन्त्रे २२ अध्याये ।

"घ्राणे भृशं दाहसमन्विते तु
विनिःसरेद्धूम इवेह वायुः ।
नासा प्रदीप्तेव च यस्य जन्तो-
र्व्याधिस्तु तं दीप्तमुदाहरन्ति ॥"

अस्य प्रतिषेधमाह तत्रैव २३ अध्याये ।

"दीप्ते रोगे पैत्तिकं संविधानं
कुर्य्यात् सर्व्वं स्वादु यच्छीतलञ्च ॥")

दीप्तः, त्रि, (दीप + क्तः ।) निर्भासितः । दग्धः । ज्वलितः । इति मेदिनी । ते, २५ ॥ (यथा, हरिवंशे । १६८ । ३ ।

"ततः शकुनयो दीप्ता मृगाश्च क्रूरभाषिणः ।
दीप्तायां दिशि भाषन्तो भयमावेदयन्ति मे ॥")

दीप्तकं, क्ली, (दीप्तमेव । स्वार्थे कन् ।) स्वर्णम् । इति राजनिर्घण्टः ॥

दीप्तजिह्वा, स्त्री पुं, (दीप्ता जिह्वा यस्याः ।) उल्कामुखी शृगाली । इति हारावली ।७९॥ (प्रदीप्तजिह्वे, त्रि । यथा, महाभारते । १ । २२९ । ३७ ।

"दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः ॥")

दीप्तपिङ्गलः, पुं, (दीप्तः पिङ्गलश्च । दीप्तः स्वर्णं तद्वत् पिङ्गलो वा ।) सिंहः । इति राजनिर्घण्टः ॥

दीप्तरसः, पुं, (दीप्त उज्ज्वलो रसो यस्य ।) किञ्चुलुकः । इति शब्दचन्द्रिका ॥

दीप्तलोचनः, पुं, (दीप्ते लोचने नेत्रे यस्य ।) विडालः । इति राजनिर्घण्टः ॥

दीप्तलोहं, क्ली, (दीप्तं लोहमिव ।) कांस्यम् । इति राजनिर्घण्टः ॥

दीप्ता, स्त्री, (दीप्त + टाप् ।) लाङ्गलिकावृक्षः । इति रत्नमाला ॥ ज्योतिष्मती । सातला । इति राजनिर्घण्टः ॥

दीप्ताक्षः, पुं, (दीप्ते अक्षिणी यस्य ।) विडालः । इति शब्दरत्नावली ॥ (प्रदीप्तनेत्रे, त्रि । यथा, महाभारते । १ । २२९ । ३७ ।

"दीप्ताक्षो दीप्तजिह्वश्च सम्प्रदीप्तमहाननः ॥")

दीप्ताग्निः, पुं (दीप्तः अग्निर्जठराग्निर्यस्य ।) अगस्त्यः । इति त्रिकाण्डशेषः ॥ (प्रदीप्तो वह्निः । यथा, भट्टिः । २ । २ ।

"सधूमदीप्ताग्निरुचीनि रेजु
स्ताम्रोत्पलान्याकुलषट्पदानि ॥")

तीक्ष्णजठरानलयुक्ते, त्रि ॥ (यथा, सुश्रुते । १ । २० ।

"बालप्रतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च ॥")

दीप्ताङ्गः, पुं, (दीप्तं भासितमङ्गमस्य ।) मयूरः । इति शब्दरत्नावली ॥

दीप्तिः, स्त्री, (दीप + क्तिन् ।) दीपनम् । तत्पर्य्यायः । प्रभा २ रुक् ३ रुचिः ४ त्विट् ५ भा ६ भाः ७ छविः ८ द्युतिः ९ रोचिः १० शोचिः ११ । इत्यमरः ।१।४।३४॥ बाणवेगस्य तीव्रता । स्त्रिया अयत्नजगुणः । इति हेमचन्द्रः ।२।१३॥

"कान्तिरेव वयोभोगदेशकालगुणादिभिः ।
उद्दीपितातिविस्तारं प्राप्ता चेद्दीप्तिरुच्यते ॥"

इत्युज्ज्वलनीलमणिः ॥

(यथा, साहित्यदर्पणे । ३ । १३१ ।

"कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥")

लाक्षा । कांस्यम् । इति राजनिर्घण्टः ॥

दीप्तिकः, पुं, (दीप्त्या कायतीति । कै + कः ।) दुग्धपाषाणवृक्षः । इति राजनिर्घण्टः ॥

दीप्तोपलः, पुं, (दीप्तः सूर्य्यकिरणसम्पर्कात् ज्वलितः उपलः ।) सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥

दीप्यः, पुं, (दीपाय अग्निदीपनाय हितमिति । दीप + "तस्मै हितम् ।" ५ । १ । ५ । इति अपूपादित्वात् पक्षे यत् ।) यमानी । (अस्य पर्य्यायो यथा,—

"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका ॥"

इति वैद्यकरत्नमालायाम् ॥)

जीरकः । इति राजनिर्घण्टः ॥ (दीपाय साधुरिति । दीप + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) मयूरशिखा । रुद्रजटा इति ख्याता । इत्यमरः । २ । ४ । १११ ॥

दीप्यकं, क्ली, (दीपाय हितं साधुरिति वा । दीप + यत् । ततः स्वार्थे कन् ।) अजमोदा । यमानी । (यथा भावप्रकाशे क्षुद्ररोगाधिकारे ।

"सैन्धवं चन्दनं कुष्ठं दीप्यकञ्च फलं पृथक् ॥")

बर्हिचूडा । इति मेदिनी । के, १०५ ॥

दीप्यकः, पुं, (दीप्य + संज्ञायां स्वार्थे वा कन् ।) अलङ्कारः । यमानी । (अस्य पर्य्याया यथा,—

"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका ॥"

इति वैद्यकरत्नमालायाम् ॥)

लोचमस्तकः । इति भरतद्विरूपकोषः ॥ (अजमोदा । तत्पर्य्यायो यथा,—

"अजमोदा खराश्वा च मायूरो दीप्यकस्तथा ।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

दीप्रः, त्रि, (दीप्यते इति । दीप + "नमिकम्पिस्म्यजसकमहिंसदीपो रः ।" ३ । २ । १६७ । इति रः ।) दीप्तिविशिष्टः । इति व्याकरणम् ॥ (यथा कथासरित्सागरे । २५ । १३५ ।

"क्वचित् क्वचिच्चिताज्योतिर्दीप्रदीपप्रकाशितम् ॥")

दीयमानः, त्रि, (दीयते इति । दा + कर्म्मणि शानच् ।) वर्त्तमानदानसम्बन्धिवस्तु । इति व्याकरणम् । यथा, कृत्यचिन्तामणौ ।

"विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके ।
पूर्व्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥"

इति तिथ्यादितत्त्वम् ।

दीर्घं, त्रि, (दृणातीति । दॄ विदारणे + बाहुलकात् घञ् ।) आयतम् । इत्यमरः । ३।१।६९। (यथा मेघदूते । १०३ ।

"दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती सङ्कल्पैस्तै र्विशति विधिना वैरिणा रुद्धमार्गः ॥")

दीर्घः, पुं, (दॄ + बाहुलकात् घञ् ।) तालशालवृक्षः । (यथा, वैद्यकरत्नमालायाम् ।

"तार्क्ष्योऽश्वकर्णः कुशिको वल्को दीर्घो लताद्रुमः ॥")

इत्कटः । इति रत्नमाला ॥ रामशरः । उष्ट्रः । इति राजनिर्घण्टः ॥ पञ्चमषष्ठसप्तमाष्टमराशयः । यथा । वृश्चिककन्यामृगपतिवणिजो दीर्घाः । इति ज्योतिषतत्त्वम् ॥ द्विमात्रवर्णः । तद्यथा । आ ई ऊ ॠ ए ऐ ओ औ । गुरुवर्णः । इति व्याकरणम् ॥ (दीर्घलक्षणं यथा,—

"एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम् ॥")

दीर्घकणा, स्त्री, (दीर्घा कणेति नित्यकर्म्मधारयः ।) गौरजीरकः ॥ इति राजनिर्घण्टः ॥

दीर्घकण्टकः, पुं, (दीर्घः कण्टकोऽस्य ।) वर्व्वुरः । इति राजनिर्घण्टः ॥

दीर्घकण्ठकः, पुं, (दीर्घः कण्ठोऽस्य । कप् ।) वकपक्षी । इति शब्दचन्द्रिका ॥

दीर्घकन्दकं, क्ली, (दीर्घः कन्दो यस्य । कप् ।) मूलकम् । इति राजनिर्घण्टः ॥ (मूलकशब्देऽस्य गुणादयो विज्ञेयाः ॥)

दीर्घकन्दिका, स्त्री, (दीर्घकन्दक + टाप् अत इत्वञ्च ।) मुषली । इति राजनिर्घण्टः ॥

दीर्घकन्धरः, पुं, (दीर्घः कन्धरो यस्य ।) वकः । इति राजनिर्घण्टः ॥

दीर्घकाण्डः, पुं (दीर्घः काण्डो यस्य ।) गुण्ड्रतृणम् । इति राजनिर्घण्टः ॥

दीर्घकाण्डा, स्त्री, (दीर्घः काण्डोऽस्याः ।) पातालगरुडीलता । इति राजनिर्घण्टः ॥

दीर्घकीलः, पुं, (दीर्घः कीलः शाखाङ्कुरो यत्र ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

दीर्घकीलकः, पुं, (दीर्घकील + स्वार्थे कन् ।) अङ्कोटवृक्षः । इति जटाधरः ॥

दीर्घकूरकं, क्ली, (दीर्घं कूरकमन्नम् ।) राजान्नम् । इति राजनिर्घण्टः ॥

दीर्घकेश, पु, (दीर्घा केशा इव लोमान्यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥ (देशभेदः । यथा, वृहत्संहितायाम् । १४ । २३ ।

"एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च ॥"

दीर्घाः केशा यस्य ।) आयतकचे, त्रि ॥ (स्त्रियां वा ङीष् स्वाङ्गत्वात् । यथा, महानाटके ।१६१।

"विम्बोष्ठी चारुनेत्रा गजमतिगमना दीर्घकेशी सुमध्या ॥")

दीर्घकोशिका, स्त्री, (दीर्घः कोशो यस्याः । ततः संज्ञायां कन् टाप् अत इत्वञ्च ।) दीर्घकोषिका । इत्यमरटीकायां भरतः ॥

दीर्घकोषिका, स्त्री, (दीर्घः कोषोऽस्याः । कापि अत इत्वम् ।) शुक्तिकाविशेषः । जलशुक्ति इति ख्याता । तत्पर्य्यायः । दुर्णामा २ । इत्यमरः । १ । १० । २५ ॥

दीर्घगतिः, पु, (दीर्घा आयतस्थानग्रहा गतिः पादविक्षेपो यस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥

दीर्घग्रन्थिः, पु, (दीर्घो ग्रन्थिः पर्व्वास्य ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवृतिरस्य गजपिप्पलीशब्दे विज्ञेया ॥)

दीर्घग्रीवः, पु, (दीर्घा ग्रीवास्य ।) उष्ट्रः । इति हेमचन्द्रः ।४।३२९॥ नीलक्रौञ्चः । इति राजनिर्घण्टः ॥(देशभेदः । यथा, वृहत्संहितायाम् । १४ । २३ ।

"एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च ॥")

दीर्घघाटिकः, पुं, (दीर्घा घाटास्यास्तीति । ठन् ।) उष्ट्रः । इति शब्दरत्नावली ॥

दीर्घजङ्घलः, पुं, (दीर्घं यथा तथा जङ्घलो गतिशीलः ।) भङ्गानमत्स्यः । इति शब्दमाला ॥

दीर्घजङ्घः, पुं, (दीर्घा जङ्घास्य ।) वकः । इति त्रिकाण्डशेषः ॥ उष्ट्रः । इति जटाधरः ॥ आयतजानुयुक्ते, त्रि ॥

दीर्घजिह्वः, पु, (दीर्घा जिह्वा यस्य ।) सर्पः । इति हेमचन्द्रः । ४ । ३६९ ॥ (दानवविशेषः । यथा, महाभारते । १ । ६५ । ३० ।

"शरभश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥"

स्त्रियां टाप् । राक्षसीविशेषः । यथा, महाभारते । ३ । २८६ । ४४ ।

"द्वयक्षी त्र्यक्षी ललाटाक्षी दीर्घजिह्वामजिह्विकाम् ॥")

दीर्घतरुः, पु, (दीर्घश्चासौ तरुश्चेति कर्म्मधारयः।) तालः । इति शब्दार्थकल्पतरुः ॥

दीर्घतिमिषा, स्त्री, (दीर्घस्तिमिषः । अभिधानात् स्त्रीत्वम् ।) कर्कटी । इति शब्दमाला ॥

दीर्घतुण्डा, स्त्री, (दीर्घं तुण्डं यस्याः ।) छुछुन्दरी । इति कौमारतन्त्रम् ॥

दीर्घतृणः, पु, (दीर्घं तृणमिति नित्यकर्म्मधारयः । अभिधानात् पुस्त्वम् ।) पल्लिवाहः । इति राजनिर्घण्टः ॥

दीर्घदण्डः, पु, (दीर्घो दण्ड इव काण्डावच्छेदेन ।) एरण्डवृक्षः । इति भावप्रकाशः ॥

दीर्घदण्डकः, पुं, (दीर्घदण्ड + स्वार्थे कन् ।) एरण्डवृक्षः । इति जटाधरः ॥

दीर्घदण्डी, स्त्री, (दीर्घदण्ड + गौरादित्वात् ङीष् ।) गोरक्षी । इति राजनिर्घण्टः ॥

दीर्घदर्शी, [न्] पुं, (दीर्घं दीर्घात् वा पश्यतीति । णिनिः ।) पण्डितः । इत्यमरः । २ । ७ । ६ ॥ गृध्रः । इति शब्दरत्नावली ॥ भल्लूकः । इति राजनिर्घण्टः ॥ दूरदर्शके, त्रि ॥ (यथा, महाभारते । २ । ४८ । ४३ ।

"स हि धर्म्मं पुरस्कृत्य दीर्घदर्शी परं हितम् ॥")

दीर्घदृष्टिः, पुं, (दीर्घा दृष्टिर्दर्शनमस्य ।) दीर्घदर्शी । इति हलायुधः ॥

दीर्घद्रुः, पुं, (दीर्घश्चासौ द्रुश्चेति कर्म्मधारयः ।) तालवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घद्रुमः, पु, (दीर्घो द्रुम इति नित्यकर्म्मधारय. ।) शाल्मलिः । इति राजनिर्घण्टः ॥

दीर्घनादः, पुं, (दीर्घो दूरगो नादोऽस्य ।) शङ्खः । इति राजनिर्घण्टः ॥

दीर्घनालं, क्ली, (दीर्घं नालमस्य ।) दीर्घरोहिषकम् । इति राजनिर्घण्टः ॥

दीर्घनालः, पु, (दीर्घं नालं यस्य ।) वृत्तगुण्डः । यावनालः । इति राजनिर्घण्टः ॥

दीर्घनिद्रा, स्त्री, (दीर्घा निद्रेति नित्यकर्म्मधारयः।) मृत्युः । इति हेमचन्द्रः । २ । २३८ ॥ (यथा, मार्कण्डेये । ७ । १३ ।

"सोऽयं मतुकार्मुकाक्षेपविक्षेपितदिगन्तरैः ।

शरैर्विभिन्नसर्व्वाङ्गो दीर्घनिद्रां प्रवेक्ष्यति ॥")

दीर्घपटोलिका, स्त्री, (दीर्घा पटोलिका ।) लताफलविशेषः । धुँधुल इति भाषा । अस्य गुणाः । स्निग्धत्वम् । कटुत्वम् । विष्टम्भित्वम् । गुरुत्वम् । वायुपित्तश्लेष्मरुचिभेदकारित्वम् । मधुरत्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

दीर्घपत्रः, पु, (दीर्घं पत्रमस्य ।) राजपलाण्डुः । विष्णुकन्दः । हरिदर्भः । कुन्दरः । तालः । इति राजनिर्घण्टः ॥ कुपीलुः । इति भावप्रकाशः ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।

"कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ।

नैपाली दीर्घपत्रश्च नीलपोरोऽथ कोषकृत् ॥")

दीर्घपत्रकः, पु, (दीर्घपत्र + संज्ञायां कन् ।) रक्तलशुनः । एरण्डः । हिज्जलः । वेतसः । इति राजनिर्घण्टः ॥ करीरवृक्षः । इति शब्दचन्द्रिका ॥ जलजमधूकः । इति जटाधरः ॥ लशुनः । इति हेमचन्द्रः । ४ । २५३ ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।

"सूचिपत्रो नीलपोरो नैपालो दीर्घपत्रकः ।

वातलाः कफपित्तघ्नाः सकषाया विदाहिनः ॥")

दीर्घपत्रा, स्त्री, (दीर्घपत्र + टाप् ।) चित्रपर्णिका । चाकुलियाभेदः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"शालिपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ।

विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांशुमत्यपि ॥")

दुःखजम् । इति रत्नमाला ॥ गन्धपत्रा । केतकी । डोडीक्षुपः । इति राजनिर्घण्टः ॥ (क्षिप्रापरपर्य्याय उद्भिद्भेदः । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।

"क्षिप्रा चक्षुष्चचुकी च दीर्घपत्रा सतिक्तका ॥")

दीर्घपत्रिका, स्त्री, (दीर्घपत्र + संज्ञायां कन् टाप् अत इत्वञ्च ।) श्वेतवचा । घृतकुमारी । शालपर्णी । इति राजनिर्घण्टः ॥

दीर्घपत्री, स्त्री, (दीर्घपत्र + गौरादित्वात् ङीष् ।) पलाशीलता । महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

दीर्घपर्णी, स्त्री, (दीर्घं पर्णमस्याः । गौरादित्वात् ङीष् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥ (पृश्निपर्णीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

दीर्घपल्लवः, पु, (दीर्घः पल्लवो यस्य ।) शणवृक्षः । इति राजनिर्घण्टः । आयतच्छदे, क्ली । तद्वति, त्रि ॥

दीर्घपात्, पु, (दीर्घौ पादावस्य । समासे अन्त्यलोपः ।) कङ्कपक्षी । इति शब्दरत्नावली ॥

दीर्घपाद, पुं, (दीर्घौ पादौ यस्य । समासान्तविधेरनित्यत्वात् अन्त्यलोपाभावश्च ।) कङ्कपक्षी । इति हेमचन्द्रः । ४ । ४०० ॥

दीर्घपादपः, पु, (दीर्घश्चासौ पादपश्चेति नित्यकर्म्मधारयः ।) तालः । पूगः । इति राजनिर्घण्टः ॥

दीर्घपृष्ठः, पुं, (दीर्घं पृष्ठं यस्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥

दीर्घफलः, पुं, (दीर्घं फलं यस्य ।) आरग्वधवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"आरग्वधो राजवृक्षः सम्पाकश्चतुरङ्गुलः ।

आरेवतो व्याधिघातः कृतमालः सुवर्णकः ॥

कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दीर्घफलकः,पु,(दीर्घफल + संज्ञायां कन् ।) अगस्त्यवृक्षः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या अगस्त्यशब्दे व्याख्याताः ॥)

दीर्घफला, स्त्री, (दीर्घाणि फलानि यस्याः ।) कपिलद्राक्षा । जतुका । इति राजनिर्घण्टः ॥

दीर्घबाला, स्त्री, (दीर्घः बालो यस्याः ।) चमरी । इति राजनिर्घण्टः ॥

दीर्घमारुतः, पु, (दीर्घः अधिकसमयव्यापी मारुतो निःश्वासवायुर्यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

दीर्घमूलं, क्ली, (दीर्घं मूलं यस्य ।) लामज्जकम् । इति राजनिर्घण्टः ॥

दीर्घमूलः, पुं, (दीर्घं मूलं यस्य ।) मोरटलता । बिल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

दीर्घमूलकं, क्ली, (दीर्घमूल + संज्ञायां कन् ।) मूलकम् । इति राजनिर्घण्टः ॥

दीर्घमूला, स्त्री, (दीर्घं मूलं यस्याः । टाप् ।) श्यामालता । शालपर्णी । इति रत्नमाला (यथा, सुश्रुते । १ । ३८ ।

"प्रियङ्गु समङ्गधातकी पुन्नागरक्तचन्दनकुचन्दन

मोचरसरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेसर-योजनवल्ल्यो दीर्घमूला चेति ॥”)

दीर्घमूली, स्त्री, (दीर्घं मूलमस्याः । ङीप् ।) दुरालभा । इति शब्दमाला ॥

दीर्घरदः, पुं, (दीर्घौ रदौ दन्तौ यस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ आयतदन्ते, त्रि ॥

दीर्घरसनः, पुं, (दीर्घा रसना जिह्वा यस्य ।) सर्पः । इति शब्दचन्द्रिका ॥

दीर्घरागा, स्त्री, (दीर्घः अधिककालस्थायी रागो यस्याः ।) हरिद्रा । इति राजनिर्घण्टः ॥

दीर्घरात्रं, क्ली, (दीर्घाः प्रचुरा रात्रयः सन्त्यत्र । अर्श आदित्वात् अच् ।) चिरकालम् । इति त्रिकाण्डशेषः ॥ (पु, दीर्घा चासौ रात्रिश्चेति विग्रहे ।“सर्व्वैकदेशसङ्ख्यातपुण्यवर्षाद्दीर्घाद्रात्रेः ।” इति मुग्धबोधसूत्रात् अः । पुंस्त्वमभिधानात् ।) दीर्घा निशा च ॥

दीर्घरोमा, [न्] पुं, (दीर्घाणि रोमाणि यस्य ।) भल्लुकः । इति शब्दार्थकल्पतरुः ॥ (महादेवस्य भूतानामन्यतम । यथा, हरिवंशे भविष्यपर्व्वणि ।१४।२।
“तस्याग्रे समपद्यन्त भूतसङ्घाः सहस्रशः ।”
“दीर्घरोमा दीर्घभुजो दीर्घबाहुर्गिरस्तनः ॥”)

दीर्घरोहिषक, क्ली, (दीर्घं रोहिषम् । ततः स्वार्थे सञ्ज्ञायां वा कन् ।) कतृणभेद । सुगन्धितृणविशेष । वड़ रोहिष इति भाषा । तत्पर्य्यायः । दृढ़काण्डम् २ दृढच्छदम् ३ यज्ञेष्टम् ४ दीर्घनालम् ५ तिक्तसारम् ६ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातभूतग्रहविषनाशित्वम् । व्रणव्रतविरोपणत्वञ्च । इति राजनिर्घण्टः ॥

दीर्घवंशः, पुं, (दीर्घो वंश इव ।) नलः । इति राजनिर्घण्टः ॥ आयते तृणध्वजे कुले च ॥

दीर्घवक्त्रः, पुं, स्त्री, (दीर्घं वक्त्रं मुखं यस्य ।) हस्ती । इति शब्दमाला ॥ (लम्बवदने त्रि ॥)

दीर्घवर्त्तिका, स्त्री, कुम्भीरः । इति शब्दार्थकल्पतरुः ॥

दीर्घवल्ली, स्त्री, (दीर्घा वल्ली ।) महेन्द्रवारुणी । पातालगरुड़ी । पलाशी । इति राजनिर्घण्टः ॥ आयता लता च ॥

दीर्घवृन्तः, पुं, (दीर्घं वृन्तं यस्य ।) श्योनाकवृक्षः । इत्यमरः ।२।४।५७॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
“श्योनाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो भल्लूकश्चुण्टुकोऽरलुः ॥”)

दीर्घवृन्तकः, पुं, (दीर्घवृन्त+स्वार्थे कन् ।) श्योनाकः । इति शब्दमाला ॥ श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (श्योनाकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दीर्घवृन्ता, स्त्री, (दीर्घं वृन्तं यस्या ।) इन्द्रचिर्भिटी । इति राजनिर्घण्टः ॥

दीर्घवृन्तिका, स्त्री, (दीर्घं वृन्तं यस्याः । कप् । टापि अत इत्वम् ।) एलापर्णी । इति शब्दचन्द्रिका ॥

दीर्घशरः, पु, (दीर्घः शरः ।) यावनालः । इति राजनिर्घण्टः ॥

दीर्घशाखः, पुं, (दीर्घा शाखा यस्य ।) शणवृक्षः । इति राजनिर्घण्टः ॥ शालवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घशाखिका, स्त्री, (दीर्घा शाखा यस्याः । कापि अत इत्वम् ।) नीलाम्लीक्षुपः । इति राजनिर्घण्टः ॥

दीर्घशिम्बिकः, पु, (दीर्घा शिम्बिर्यस्य । कप् ।) चणः । इति राजनिर्घण्टः ॥

दीर्घशूककं, क्ली, (दीर्घं शूकं यस्य । कप् ।) राजान्नम् । इति राजनिर्घण्टः ॥

दीर्घसक्थं, त्रि, (दीर्घे सक्थिनी यस्य । “बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।” ५ । ४ । ११३। इति षच् ।) दीर्घोरु । इति व्याकरणम् ॥

दीर्घसक्थि, क्ली, (दीर्घे सक्थिनी यस्य । स्वाङ्गादित्युक्तेरत्र न षच् ।) शकटम् । इति व्याकरणम् ॥

दीर्घसत्रं, क्ली, (दीर्घं बहुकालसाध्यं सत्रम् ।) यज्ञविशेषः । (यथा, भागवते । १ । १ । २१ ।
“कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् ।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥”)
तीर्थविशेषः । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते । ३ । ८२ । १०३—१०४ ।
“ततो गच्छेत राजेन्द्र ! दीर्घसत्रं यथाक्रमम् ।
तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः ।
दीर्घसत्रमुपासन्ते दीक्षिता नियमव्रताः ॥
गमनादेव राजेन्द्र । दीर्घसत्रमरिन्दम ! ।
राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥”)

दीर्घसुरत, पु, (दीर्घं बहुकालव्यापकं सुरतं मैथुनं यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

दीर्घसूत्रः, त्रि, (दीर्घेण बहुकालेन सूत्रं कार्य्यारम्भो यस्य ।) चिरक्रियः । इत्यमरः ।३।१।१७॥
“अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिव ।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत् ॥
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि ।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते ॥”
इति मत्स्यपुराणम् ॥
(आयततन्तुकम् । यथा, माघे । १० । ६१ ।
“मेखलागुणविलम्बमलक्ष्यं
दीर्घसूत्रमकरोत् परिधानम् ॥”)
विस्तृते तन्तौ, क्ली ॥

दीर्घसूत्री, [न्] त्रि, (दीर्घसूत्रं बहुकालं व्याप्य कर्म्मारम्भोऽस्त्यस्येति । दीर्घसूत्र+इनि ।) दीर्घसूत्र । इति हलायुधः ॥ (यथा, गीतायाम् । १८ । २८ ।
“विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥”)

दीर्घस्कन्ध, पु, (दीर्घः स्कन्धो यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

दीर्घा, स्त्री, (दीर्घ+टाप् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
“पृश्निपर्णी पृथक्पर्णी लाङ्गुली क्रोष्टुपुच्छिका ।
धामनिः कलशी तन्वी गुहा क्रोष्टुकमेखला ॥
दीर्घा शृगालविन्ना सा श्रीपर्णी सिंहपुच्छिका ।
दीर्घपत्रा त्वतिगुहा पृतिना चित्रपर्णिका ॥”
इति वैद्यकरत्नमालायाम् ॥)

दीर्घाध्वगः, त्रि, (दीर्घमध्वानं गच्छतीति । गम+डः ।) लेखहारः । धावड़िया इति भाषा । उष्ट्रे, पुं । इति मेदिनी ॥ गे, ५७ ॥

दीर्घायुः, [स्] पुं, (दीर्घं आयुर्यस्य ।) शाल्मलिवृक्षः । काकः । जीवकवृक्षः । मार्कण्डेयः । चिरजीविनि, त्रि । इति मेदिनी । सै, ५५ ॥ (यथा महाभारते । ७ । ५७ । १४ ।
“दीर्घायुषः प्रजाः सर्व्वा युवा न म्रियते तदा ॥”)
“तत्र महापाणि-पाद पार्श्वपृष्ठस्तनाग्रदशनवदनस्कन्धललाटं दीर्घाङ्गुलिपर्व्वोच्छ्वासप्रेक्षणबाहुं विस्तीर्णभ्रूस्तनान्तरोरस्कं ह्रस्वजङ्घामेढ्रग्रीवं गम्भीरसत्त्वस्वरनाभिमनुच्चैर्बद्धस्तनमुपचितमहारोमशकर्णं पश्चान्मस्तिष्कं स्नातानुलिप्तं मूर्द्धानुपूर्व्व्या विशुष्यमाणशरीरं पश्चाच्च विशुष्यमाणहृदयं पुरुषं जानीयाद्दीर्घायुः खल्वयमिति ।”
“गूढ़सन्धिशिरास्नायुः संहताङ्गः स्थिरेन्द्रियः ।
उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते ॥
गर्भात् प्रभृत्यरोगो यः शनैः समुपचीयते ।
शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥”
इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

दीर्घायुधः, पुं, (दीर्घं आयुधः ।) कुन्तास्त्रम् । इति त्रिकाण्डशेषः ॥ (दीर्घौ आयुधौ इव दन्तौ यस्य ।) शूकरः । इति शब्दमाला ॥

दीर्घायुष्यः, पुं, (दीर्घं आयुष्यं जीवनं यस्य ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घालर्कः, पुं, (दीर्घं अलर्क इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घिका, स्त्री, (दीर्घैव । दीर्घा+सञ्ज्ञायां कन् । टापि अत इत्वम् ।) विशालपरिमितजलाशयः । दीघि इति भाषा । तत्पर्य्यायः । वापी,२ । इत्यमरः ।१।१०।२८॥ (यथा, रघुः । १६ । १३ ।
“वनेरिदानीं महिषैस्तदम्भः
शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥”)
तज्जलगुणाः । गुरुत्वम् । कटुत्वम् । क्षारत्वम् । पित्तलत्वम् । कफवातनाशित्वञ्च । हिङ्गुपत्री । इति राजनिर्घण्टः ॥

दीर्घेर्व्वारुः, पुं, (दीर्घा इर्व्वारुः ।) कर्कटी । इति राजनिर्घण्टः ॥

दीर्णः, त्रि, (दॄ विदारे+क्तः ।) विदारितः । (यथा, गो: रामायणे । २ । ३६ । २६ ।
“आयसं हृदय नूनं राममातुः सुसंहतम् ।
यन्न दीर्णं प्रिये पुत्रे वनवासाय निर्गते ॥”)
भीत । इति मेदिनी । णे, १६ ॥ (यथा, महाभारते । ६ । ३ । ७६ ।
“एको दीर्णो दारयति सेनां सुमहतीमपि ।
तां दीर्णामनु दीर्य्यन्ते योधाः शूरतरा अपि ॥”)

दीवि, पुं, किकीदिविः । इति शब्दमाला ॥

दु, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-अनिट् ।) दवति । इति दुर्गादासः ॥

दु, टु ध्यो न उपतापे। इति कविकल्पद्रुमः॥ (स्वा-पर-सकं-अकं च-अनिट्।) टु, दवथुः। ध्यो, दूनः। न, दुनोति। उपताप इहोपतप्तौ-भावः उपतप्तीकरणञ्च। मन्मथेन दुनोमीति जयदेवः। वर्षप्रकर्षे सति कर्थिकारं दुनोति निर्गन्धतया स्म चेतः। इति कालिदासः। इति दुर्गादासः॥

दुः, [र्] व्य, निषेधः। दुःखम्। निन्दा। व्यवचेपणम्। इति दुर्गादासधृतपुरुषोत्तमदेवः॥

दुः, [स्] व्य, दुःखभावनम्। कोपः। इति दुर्गादासधृतमेदिनी॥

दुकूल:, पु, (दुर्दुःखं तज्जनकं कूलं रोधो यस्मात्। एतदुत्पत्त्या तटस्य विप्लवात् अस्य तथात्वम्।) चोरनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

दुःख, त क तत्क्रियायाम्। इति कविकल्पद्रुमः॥ (अदन्त चुरा-पर-सकं-सेट्।) विसर्गमध्य.। "काले तडिल्लतालोले घनमौनपयोधरे। कान्ता सर्व्वगुणोपेतो बालेन्दुः खे न लभ्यते॥" इति विन्दुच्युतकम्। अस्यार्थः। तडिल्लतासम्बन्धवति घनसम्पन्नमेघे काले कमनीयः सर्व्वगुणोपेतो बालेन्दुः खे आकाशे न लभ्यते पचे हे बाले सर्व्वगुणोपेतः कान्तः पतिर्दुःखेन लभ्यते। दुःखयति दुःखापयति। मध्यगमध्यः। इति केचित्। तत्क्रियादुःखकरणम्। इति दुर्गादासः॥

दुःखं, क्ली, (दुर् दुष्टं खनतीति। खन+डः। यद्वा, दुःखयतीति। दुःख+पचाद्यच्।) संसारः। इति त्रिकाण्डशेषः॥ (रोगः। यथा, भावप्रकाशे अर्शोरोगाधिकारे। "भेकाभः पीड्यते दुःखे शोणितक्षयसम्भवेः॥" "दुःखे रोगैः।" इति तट्टीका॥) मनोधर्म्मविशेषः। न्यायमते आत्मगुणभेदः। तत् अधर्म्मजन्यं सचेतनां प्रतिकूलम्। इति भाषापरिच्छेदः॥ तत्पर्य्यायः। पीड़ा २ बाधा ३ व्यथा ४ अमानस्यम् ५ प्रसूतिजम् ६ कष्टम् ६ कृच्छ्रम् ८ आभीलम् ६। इत्यमरः।१।१०।३॥ आर्त्तिः १० आर्त्तिः ११ पीड़नम् १२ अवबाधा १३ बाधनम् १४ आमनस्यम् १५ आमानस्यम् १६ विवाधनम् १७ पीड़ितम् १८ विहेठनम् १६। इति शब्दरत्नावली॥ * ॥ "सुखं दुःखञ्च हर्षञ्च शोकञ्च मङ्गलालयम्। मया दत्तञ्च तत्तञ्च योगिनामपि दुर्लभम्॥" इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥ * ॥ (दुःखन्तु आध्यात्मिकाधिदैविकाधिभौतिकभेदात् त्रिविधम्। यदुक्तं तत्त्वकौमुद्याम्। "दुःखत्रयाभिघातात्।" इति। "दुःखानां त्रयं दुःखत्रयं तत् खलु त्रिविधं आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च। तत्र आध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयाविशेषादर्शननिबन्धनम्। सर्व्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च। तत्र आधिभौतिकं मानुषपशुमृगपचिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यचरान्नसविनायकग्रहाद्यावेशनिबन्धनम्। तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखत्रिकेणान्तःकरणवर्त्तिना चेतनाशक्तेः प्रतिकूलतयाभिसम्बन्धोऽभिघातः इति। एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः॥")

"दुःखमेव प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।।
उच्चितेनोपचारेण दुःखं मोचविनाशनम्॥
अहङ्कारकृतो नित्यं नरो मोहेन चावृतः।
ये मां नैव प्रपद्यन्ते ततो दुःखतरन्नु किम्॥
सर्व्वाशी सर्व्वविक्रेता नमस्कारविवर्ज्जितः।
ये च मां न प्रपद्यन्ते ततो दुःखतरन्नु किम्॥
सर्व्वाङ्गानि तु चिह्नानि पाकमेदन्तु कारयेत्।
अवेश्वदेवं नरोऽश्नन्ति तत्र दुःखतरन्नु किम्॥
प्राप्तकाले वैश्वदेवे इष्टमतिथिमागतम्।
अदत्त्वा तस्य यो भुङ्क्ते तत्र दुःखतरन्नु किम्॥
असमुत्थस्तु वैषम्ये परदाराभिमर्द्दकः।
परोपतापी मन्दात्मा तत्र दुःखतरन्नु किम्॥
अल्पायुर्न्नरं कर्म्म गृहे संवसते नरः।
स्वल्पकालवयं प्राप्तस्तत्र दुःखतरन्नु किम्॥
हस्त्यश्वरथयानानि गच्छमानानि पश्यति।
न वै तस्याग्रतः पृष्ठे तत्र दुःखतरन्नु किम्॥
अश्नन्ति पिष्टितं केचित् घृतशालिसमन्वितम्।
शुष्कान्नं केचिदश्नन्ति तत्र दुःखतरन्नु किम्॥
वरवस्त्राङ्गना शय्या समासेवन्ति भूषिताः॥
केचित् टकेषु शेरन्ते ततो दुःखतरन्नु किम्॥
विद्वान् कश्चिद् गुणाढ्यश्च सर्व्वशास्त्रविशारदः।
केचिन्मूकाश्च दृश्यन्ते तत्र दुःखतरन्नु किम्॥
विद्यमाने धने केचित् कृपणा भोगवर्ज्जिताः।
दरिद्रो जायते दाता तत्र दुःखतरन्नु किम्॥
पुरुषस्य द्वये भार्य्ये तयोरेकां प्रशंसयेत्।
एकापि दुर्भगा तत्र ततो दुःखतरन्नु किम्॥
लब्ध्वा तु मानुषीं संज्ञां पञ्चभूतसमन्विताम्।
मामेव न प्रपद्यन्ते ततो दुःखतरन्नु किम्॥
लब्ध्वा ब्राह्मणभावन्तु त्रयो वर्णाः समधामे!।
पापकर्म्मरता ह्यासंस्ततो दुःखतरन्नु किम्॥
एतत्ते कथितं भद्रे! दुःखकर्म्म विनिश्चयम्।
सर्व्वभूतहितार्थाय यत्त्वया परिपृच्छ्यते॥"

इति वराहपुराणम्॥ * ॥

दुःखदानि यथा,— पारतन्त्र्यम् १ व्याधिः २ आधिः ३ मानच्युतिः ४ शत्रुः ५ कुमार्य्या ६ नैःस्वम् ७ कुग्रामवासः ८ कुस्वामिसेवनम् ६ बहुकन्या १० इल्लतम् ११ परगृहवासः १२ वर्षाप्रवासः १३ भार्य्याद्वयम् १४ कुभृत्यः १५ दुईलकरणकृषिः १६। इति कविकल्पलता॥ (तद्विशिष्टे, त्रि। इत्यमरः। १।४।२६॥ यथा, हरिवंशे। २२३। ४६। "सुसुखा न च दुःखा सा न शीता न च घर्म्मदा॥")

दुःखदोह्या, स्त्री, (दुःखेन दुह्यते इति। दुह+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) दुर्दोहगवी। तत्पर्य्यायः। करटा २। इति हेमचन्द्रः। ४। ३३५॥

दुःखितः, त्रि, (दुःखं सञ्जातमस्येति तारकादित्वादितच्।) यद्वा, दुःखधातोः कर्म्मणि क्तप्रत्ययः। दुःखी। (यथा, मनौ। ६।२८८। "बन्धनानि च सर्व्वाणि राजमार्गे निवेशयेत्। दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः॥") भावे क्त, दुःखम्। तत्र क्ली॥

दुःखी, [न्] त्रि, (दुःखमस्यास्तीति इनिः।) दुःखान्वितः। दुःखितः। यथा,— "दुःखिनोऽदुःखिनो वापि प्राणिनो लब्धचक्षुमः। आत्मवत् परिपश्यन्ति ते यान्ति परमां गतिम्॥ त्यक्तात्मसुखभोगेच्छाः सर्व्वसत्त्वसुखैषिणः। भवन्ति परदुःखेन साधवो नित्यदुःखिताः॥" इति वह्निपुराणे शिवेरयाख्यानामाध्यायः॥)

दुःषमम्, व्य, (दुर्दुष्टं समं यत्र। "तिष्ठद्गुप्रभृतीनि च।" इत्यव्ययीभावः। "सुविनिर्दुर्भ्यः सुपि।" ८।३।८८। इति षत्वम्।) निन्दनीयम्। तत्पर्य्यायः। निःषमम् २ गर्ह्यम् ३। इत्यमरः। ३।४।१४॥

दुःषमम्, त्रि, (दुःषमम्। बाहुलकात् षत्वाभावः।) असमञ्जसम्। इति त्रिकाण्डशेषः॥

दुःसहा, स्त्री, (दुःखेन सह्यतेऽसौ। दुः+सह+अच्। टाप् च।) नागदमनी। इति राजनिर्घण्टः॥ (दुःसहे, त्रि। यथा, रघुः।११।२०। "राममन्मथशरेण ताड़िता दुःसहेन हृदये निशाचरी। गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा॥")

दुःसाधी, [न्] पुं, (दुर्दुष्टं कर्म्म साधयतीति। दुः+साधि+णिनिः।) दौवारिकः। इति शब्दरत्नमाला॥

दुःसाध्यः, त्रि, (दुःखेन साध्यते इति। दुः+साध+ण्यत्।) दुःखनिष्पाद्यः। दुःखेन साधयति निष्पादयति यः॥ (यथा, पञ्चतन्त्रे। १। २५८। "ततो दुर्गस्थो दुःसाध्यो रिपुर्भवति॥")

दुःस्थः, त्रि, (दुर्दुःखेन दुष्टं वा तिष्ठतीति। स्था+कः।) दुर्गतः। मूर्खः। दुःखेन तिष्ठति यः। इति मेदिनी। थे, ८। (यथा, भागवते। १। १६। ३४। "त्वां दुःस्थमूनपदमात्मनि पौरुषेण सम्पादयन् यदुषु रम्यमबिभ्रदङ्गम्॥") लुब्धः। इति शब्दार्थकल्पतरुः॥

दुःस्पर्शः, पुं, (दुःखेन स्पृश्यते इति। दुः+स्पृश्+"ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्।" ३।३।१२६। इति कर्म्मणि खल्।) दुरालभा। इत्यमरः।२।४।६१॥ (अस्य पर्य्याया यथा,— "यासो यवासो दुःस्पर्शो धन्वयासो दुरालभा॥" इति वैद्यकरत्नमालायाम्॥) लताकरञ्जः। इति राजनिर्घण्टः॥ स्पर्शे, त्रि। इति मेदिनी। शे, २१॥ (यथा, भागवते। ३। १७। ५।

रवो वायुः सुदुःसर्शः फूत्कारानीरयन् मुहुः ।
उन्मूलयन्नगपतीन् वात्यानीको रथध्वजः ॥")

दुःस्पर्शा स्त्री, (दुःखेन स्पृश्यते इति । स्पृश्+खल+टाप् च ।) कपिकच्छुः । आकाशवल्ली । कण्टकारी । (अस्याः पर्य्याया यथा,—
"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टालिका कण्टकिनी धावनी वृहती तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
दुरालभा । इति राजनिर्घण्टः ॥

दुःस्फोटः पुं, (दुर्दुष्टं स्फोटयतीति । स्फोटि+अच् ।) शस्त्रभेदः । इति हेमचन्द्रः ।३। ४५१ ॥

दुकूलं, क्ली, (दुष्टं कूलति आवृणोतीति । कूल+"इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः । पृषोदरात् साधुः । यद्वा, दु+"खजिपिञ्जादिभ्य उरोलचौ ।" उणां । ४ । ९० । इति ऊलच् । धातोः कुक् च ।) क्षौमवस्त्रम् । (यथा, रघौ । ७ । १९ ।
"दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः ॥")
सूक्ष्मवस्त्रम् । इति मेदिनी । ले, ६६ ॥

दुगूलम्, क्ली, (दुकूल पृषोदरात् कस्य गः ।) दुकूलम् । पट्टवस्त्रम् । इति हेमचन्द्रः । ३ । ३३३ ॥

दुग्धम्, क्ली, (दुह्यते स्मेति । दुह+कर्म्मणि क्तः ।) स्त्रीजातिस्तननिःसृतद्रवद्रव्यविशेषः । दुध इति भाषा । तत्पर्य्यायः । क्षीरम् २ पीयूषम् ३ ऊधस्यम् ४ स्तन्यम् ५ पयः ६ अमृतम् ७ । इति राजनिर्घण्टः ॥ बालजीवनम् ८ । इति भावप्रकाशः ॥ अस्य सामान्यगुणाः । स्वादुरसत्वम् । स्निग्धत्वम् । ओजःकारित्वम् । धातुवर्द्धनत्वम् । वातपित्तहरत्वम् । वृष्यत्वम् । श्लेष्मलत्वम् । गुरुत्वम् । शीतलत्वम् । पिष्टकादृष्टगुणगुरुत्वञ्च ॥ * ॥ गोदुग्धगुणाः । प्राणधारकत्वम् । बलायुःपुरुषत्वशुक्रकारित्वम् । मेध्यत्वम् । रक्तपित्तरोगवायुनाशित्वम् । रसायनत्वञ्च ॥ * ॥ छागीदुग्धगुणाः । मधुरत्वम् । शीतत्वम् । मलबन्धाग्निकारित्वम् । रक्तपित्तविकारश्वासकाससर्व्वदोषनाशित्वञ्च ॥ * ॥ मेषीदुग्धगुणाः । गुरुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफपित्तनाशित्वञ्च ॥ * ॥ माहिषदुग्धगुणाः । अतिस्निग्धत्वम् । निद्राकारित्वम् । अग्निनाशित्वञ्च ॥ * ॥ उष्ट्रीदुग्धगुणाः । रूक्षत्वम् । उष्णत्वम् । शोथवातकफनाशित्वम् ॥ * ॥ अश्वीदुग्धगुणाः । लवणत्वम् । मधुराम्लरसत्वम् । लघुत्वञ्च ॥ * ॥ हस्तिनीदुग्धगुणाः । मधुरत्वम् । शुक्रकारित्वम् । कषायानुरसत्वम् । गुरुत्वञ्च ॥ * ॥ मानुष्यदुग्धगुणाः । प्राणधारकत्वम् । शरीरहितकारित्वम् । वृंहणत्वम् । तृप्तिजनकत्वञ्च ॥ * ॥ प्रत्यूषकाले गोदुग्धपानगुणाः । गुरुत्वम् । विष्टम्भित्वम् । दुर्जरत्वम् । तस्मात् सूर्य्योदयात् परं यामं यामार्द्धमेव वा उत्तार्य्य पयो ग्राह्यम् । तत्पथ्यं दीपनं लघु ॥ * ॥ विवत्साबालवत्सानां पयः दोषलम् । एकवर्णवत्सगोदुग्धं श्वेतवर्णकृष्णवर्णगोदुग्धञ्च प्रशस्तम् ॥ * ॥ इक्षुभक्षकमाषपर्णभक्षकोष्ट्रक्षगोदुग्धं पक्कमपक्कं वा हितकारकम् ॥ * ॥ पर्य्युषितदुग्धगुणाः । गुरुत्वम् । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ अपक्कदुग्धगुणाः । प्रायोऽभिष्यन्दित्वम् । गुरुत्वञ्च ॥ * ॥ शृतोष्णं कफवातनाशनम् । शृतशीतं पित्तनाशनम् । धारोष्णदुग्धं अमृततुल्यम् । स्त्रीस्तन्यदुग्धं विना सर्व्वमपक्कं दुग्धं त्याज्यम् । सलवणदुग्धं विग्रथितं नष्टं इति ख्यातं दुग्धञ्च त्याज्यम् ॥ * ॥ दुग्धान्नगुणाः । चक्षुर्हितत्वम् । बलकारित्वम् । पित्तनाशित्वम् । रसायनत्वञ्च ॥ * ॥
"शाकाम्लफलपिण्याककुलत्थलवणामिषैः ।
करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते ॥"
इति राजवल्लभः ।

अथ चतुर्व्विधक्षीरगुणाः ।
"केऽप्याविकं पथ्यतमं शृतोष्णं
क्षीरं लणानां शृतशीतमाहुः ।
दोहान्तशीतं महिषीपयस्तु
गव्यन्तु धारोष्णमिदं प्रशस्तम् ॥
वृष्यं वृंहणमग्निवर्द्धनकरं पूर्व्वाह्णपीतं पयो मध्याह्ने बलदायकं रतिकरं कृच्छ्रस्य विच्छेदनम् । बाल्ये वह्निकरं सतां बलकरं वीर्य्यप्रदं वार्द्धके रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्व्वदा ॥
क्षीरं मुहूर्त्तत्रितयोषितं य-
द्धतप्रमेतद्धितकृति प्रयाति ।
पश्चात्तु दोषं कुरुते तदूर्द्ध्वं
विषोपमं स्याद्दुषितं दशानाम् ॥
जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानुषम् ॥
क्षीरक्वाथगुणाः ।
चतुर्थभागं सलिलं निधाय
यत्नाद्यदावर्त्तितसप्तमं तत् ।
सर्व्वामयघ्नं बलपुष्टिकारि
वीर्य्यप्रदं क्षीरमतिप्रशस्तम् ॥
गव्यं पूर्व्वाह्णकाले स्यादपराह्णे तु माहिषम् ।
क्षीरं सशर्करं पथ्यं यद्वा सात्म्यञ्च सर्व्वदा ॥
क्षीरं न भुञ्जीत कदाप्यतप्तं
तप्तञ्च नैतल्लवणेन सार्द्धम् ।
पिष्टान्नसन्धानकमाषमुद्ग-
कोशातकीकन्दफलादिकैश्च ॥
तथा च,
मत्स्यमांसगुडमुद्गमूलकै
कुष्ठमावहति सेवितं पयः ।
शाकजाम्बवरसादिसेवितं
मारयत्यबुधमाशु सर्पवत् ॥ * ॥
स्निग्धं शीतं गुरु क्षीरं सर्व्वकालं न सेवयेत् ।
दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च ॥
नित्यन्तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः ।
पुष्यन्ति धातवः सर्व्वे बलपुष्टिविवर्द्धनम् ॥
क्षीरं गवाजकादेर्मधुरं क्षारं नवप्रसूतानाम् ।
रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते ॥ * ॥
मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम् ।
लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम् ॥
गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानाम् ।
मध्यमवयसां रसायनमुक्तमिदं दुर्व्वलस्तु वृद्धानाम् ॥
तासां मासत्रयादूर्द्ध्वं गुर्व्विणीनाञ्च यत् पयः ।
तद्वाहि लवणं क्षीरं मधुरं पित्तशोषकृत् ॥ * ॥
दुग्धान्नं शीतलं स्वादु दृष्यं वर्णकरं गुरु ।
वातपित्तापहं रुच्यं हृद्यं बलवर्द्धनम् ॥"
इति राजनिर्घण्टः ॥ * ॥

अथ भावप्रकाशोक्तसामान्यदुग्धगुणाः ।
"दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम् ।
सद्यःशुक्रकरं शीतं सात्म्यं सर्व्वशरीरिणाम् ॥
जीवनं वृंहणं बल्यं मेध्यं वाजीकरं परम् ।
वयःस्थापकमायुष्यं सन्धिकारि रसायनम् ॥
विरेकवान्तिवस्तीनां तुल्यमोजोविवर्द्धनम् ।
जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ॥
ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये ।
शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे ॥
रक्तपित्तातिसारे च योनिरोगे श्रमे क्लमे ।
गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ॥
बालवृद्धक्षतक्षीणाः क्षुद्व्यवायकृशाश्च ये ।
तेभ्यः सदातिशयितं हितमेतदुदाहृतम् ॥"
इति भावप्रकाशः ॥

(दुग्धोत्पत्तिविवृतिर्यथा,—
"यद् यदाहारजातन्तु रस क्षीरशिरागतम् ।
सर जलञ्च भुक्तञ्च तथा पित्तेन संयुतम् ॥
पाचितं जाठरे वह्नौ पित्तेन सह मूर्च्छितम् ।
पच्यमानं शिरामार्गे क्षीरं सद्भिर्हि पुत्रक ! ॥
तेन क्षीरमिति ख्यातमग्निसोमात्मकं पयः ।
अमृतं सर्व्वभूतानां जीवनं बलमुत्तमम् ॥
हारीतः संशयापन्नः पप्रच्छ पितरं पुनः ।
कथं रसस्य सम्पत्तिः कथं सञ्चीयते विभो ! ॥
कथं रक्तस्य संस्थाने क्षीरं पाण्डुत्वमीयते ।
कथं तत्र कुमारीणां बन्ध्यानां न कथं भवेत् ॥
एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः ।
अति हर्षप्रदं पुत्र ! परिपृष्टं भिषग्वर ! ॥
सितास्निग्धं तथा रक्तं पित्तेन पाकतां गतम् ।
रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत् ॥
क्षीरमाद्यः कुमारीणां बन्ध्यानां न कथं भवेत् ।
अल्पधातुबलं यस्मात्तस्मात् क्षीरं न जायते ॥
बन्ध्यानां क्षीरनाड्यस्तु वातेन परिपूरिताः ।
क्षीरञ्च न भवेत्तस्मादार्त्तवञ्चाधिकं यतः ॥
प्रसूतासु च नारीषु बलेन सह सूयते ।
तेन स्रोतो विशुद्धिः स्यात् क्षीरमाशु प्रवर्त्तते ॥
तस्मात् सद्यः प्रसूताया जायते श्लैष्मिकं पयः ।
तेन काठिन्यमायाति तस्मात्तत् परिवर्ज्जयेत् ॥
पयश्चाविकृतं नार्य्या बलकृद्दोषनाशनम् ॥"
इति हारीते प्रथमे स्थाने अष्टमेऽध्याये ॥)
(कट्फलम् । तत्पर्य्यायाश्च यथा,—
"कट्फलं श्यामकं दुग्धम् ।" इति च वैद्यकरत्नमालायाम् ॥

दुग्ध', त्रि, (दुह + क्तः ।) प्रपूरितः । इति मेदिनी । घे, ८ ॥ कृतदोहः । (यथा, हरिवंशे ।२।२५।
"तेनेयं गौर्महाराज । दुग्धा शस्यानि भारत ।॥"
दुह + भावे क्तः ।) दोहने, क्ली ॥

दुग्धकूपिका, स्त्री, (दुग्धकूपः साधनत्वेनास्त्यस्या इति । दुग्धकूप + ठन् । टाप् ।) पिष्टकविशेषः । यथा,—
"तण्डुलचूर्णविमिश्रितनवक्षीरेण सान्द्रपिष्टेन ।
दृढकूपिका विदध्यात्ताञ्च पचेत् सर्पिषा सम्यक् ॥
अथ तां क्षीरितमध्यां घनपयसा पूर्णगर्भाञ्च ।
शष्टकमुद्रितवदना तप्तघृतेन पक्ववदनाञ्च ।
अतिपाकखण्डपाके स्थपयेत् कर्पूरवासिते
कुशलः ॥"
अस्या गुणाः ।
"अथ दुग्धकूपिका सा बल्या पित्तानिलापहा ।
वृष्या शीता गुर्व्वी शुक्रकरी तर्पणी रुच्या ।
विदधाति कायपुष्टिं दृष्टिं दूरप्रसारिणीरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे २ भागे ॥

दुग्धतालीयं, क्ली, (दुग्धस्य तालाय प्रतिष्ठायै हितम् । दुग्धताल + छः ।) दुग्धाग्रम् । क्षीरफेनः । इति मेदिनी । ये, १३३ ॥ दुग्धाग्रम् । इति हेमचन्द्रः ॥

दुग्धपाचनं, क्ली, (पच्यतेऽस्मिन्निति । पच + अधिकरणे ल्युट् । दुग्धस्य पाचनं पात्रम् ।) दुग्धपाकपात्रम् । तत्पर्य्यायः । वक्षकम् २ । इति हारावली । २२० ॥

दुग्धपाषाणः, पु, (दुग्धं क्षीरं पाषाण इव कठिनं यस्य ।) द्रव्यविशेषः । शिरगोला इति भाषा । तत्पर्य्यायः । दुग्धपाषाणकः २ दुग्धाश्मा ३ क्षीरी ४ गोमेदसन्निभ. ५ वस्त्राभः ६ दीप्तिकः ७ दुग्धी ८ क्षीरस्रव. ९ । अस्य गुणाः । रुच्यत्वम् । ईषदुष्णत्वम् । ज्वरपित्तास्रदोषशूलकासाध्मानविनाशित्वञ्च । इति राजनिर्घण्टः ॥

दुग्धपुच्छी, स्त्री, (दुग्धवत् शुभ्रं पुच्छं मूलदेशो यस्याः । गौरादित्वात् ङीष् ।) वृक्षविशेषः । दुग्धपेया इति ख्याता । तत्पर्य्यायः । सेवकायुः २ निम्ना ३ भङ्गा ४ नवङ्करी ५ । इति शब्दचन्द्रिका ॥

दुग्धफेनः, पु, (दुग्धस्य फेन इव फेनो यत्र ।) क्षीरडिण्डीरः । तत्पर्य्यायः । शाकरः २ । इति राजनिर्घण्टः ॥

दुग्धफेनी, स्त्री, (दुग्धवत् शुभ्रः फेनो यस्याः । गौरादित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पयःफेनी २ फेनदुग्धा ३ पयस्विनी ४ लूतारिः ५ शशकेतुघ्नी ६ गोजापर्णी ७ । अस्या गुणाः । कटुत्वत् । तिक्तत्वम् । शिशिरत्वम् । विषव्रणनाशित्वम् । रुच्यत्वम् । शुक्रा रसायनत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धबीजा, स्त्री, (दुग्धवत् शुभ्रं बीजं यस्याः ।) यावनालादृक्षतातप्ततण्डुलचिपिटः । अस्या गुणाः । सुमधुरत्वम् । दुर्जरत्वम् । वीर्य्यपुष्टिदात्वत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धाक्षः, पुं, (दुग्धवत् शुभ्रं अक्षं नेत्रं चिह्नविशेषो यस्य ।) उपलविशेषः । इति शब्दार्थकल्पतरुः ॥

दुग्धाब्धितनया, स्त्री, (दुग्धाब्धेः क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति कविकल्पलता ॥

दुग्धाश्मा, [न्] पु, (दुग्धं क्षीरं अश्मा प्रस्तर इव कठिनं यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुग्धिका, स्त्री, (दुग्धं निर्य्यासो बहुलतया विद्यते यस्याः । दुग्ध + ठन् । टाप् च ।) वृक्षविशेषः । दुधी इति दुध्याक्षीर इति च भाषा । तत्पर्य्यायः । स्वादुपर्णी २ क्षीरावी ३ क्षीरिणी ४ दुग्धी ५ क्षीरी ६ क्षीरात्मिका ७ । इति शब्दरत्नावली ॥ अस्या गुणाः । उष्णत्वम् । गुरुत्वम् । रूक्षत्वम् । वातलत्वम् । गर्भकारित्वम् । स्वादुक्षीरत्वम् । कटुत्वम् । तिक्तत्वम् । मलमूत्रोपसर्गकारित्वम् । पटुत्वम् । स्वादुत्वम् । विष्टम्भित्वम् । वृष्यत्वम् । कफकुष्ठकृमिनाशित्वञ्च । इति भावप्रकाशः ॥ वृक्षभेदः । गन्धिका इति ख्याता । तत्पर्य्यायः । उत्तमा २ सुगन्धफला ३ उत्तमफलिनी ४ । इति रत्नमाला ॥

दुग्धिनिका, स्त्री, रक्तापामार्गः । इति राजनिर्घण्टः ॥

दुग्धी, स्त्री, (दुग्धं क्षीरं बहुलतया अस्त्यस्या इति । अर्श आद्यच् । ततो गौरादित्वात् ङीष् ।) क्षीरावी । इति मेदिनी । घे, ८ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि ॥")
दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुच्छुकः, पुं, (दु उपतापे + भावे क्विप् तुक् च । दुत् उपतापः । तन्निराकरणे शक्नोतीति । शक + पचाद्यच् ।) सुरानामगन्धद्रव्यम् । विश्वारादयवकाशकः । इति मेदिनी । के, १०५ ॥

दुडिः, स्त्री, (दुलिः + लस्य डः ।) दुलिः । कच्छपी । इत्यमरटीकाया रायमुकुट. ॥

दुण्डुकः, त्रि, दुष्टचित्तः । इति शब्दार्थकल्पतरुः ॥

दुण्डुभः, पु, (द्रोडति मज्जतीति । डुड मज्जने +
"उभः कित् कुकिदडिभ्यां कनुगुणौ रलोपश्च ।"
१ । ४४० । इति उणादिकोषटीकाधृतसूत्रात् उभः गुण् रलोपश्च ।) डुण्डुभसर्पः । इत्युणादिकोषः ॥ (यथा, महाभारते ।६।१५४।१७०।
"शरमीनां महारौद्रा प्राक्षशक्तापदुण्डुभाम् ।"
"शोणितौघवहां घोरां द्रोणिः प्रावर्त्तयन्नदीम् ॥")

दुद्रुमः, पु, (दुर् दुष्टो द्रुमः । पृषोदरादित्वात् रलोपः ।) हरितपलाण्डुः । इत्यमरः ॥ २ । ४ । १४८ ॥

दुन्दमः, पु, (दुन्द इत्यव्यक्तशब्देन मणति शब्दायते इति । मण शब्दे + डः ।) दुन्दुभिः । इति शब्दरत्नावली ॥

दुन्दुः, पु, वसुदेवः । इति त्रिकाण्डशेषः ॥ दुन्दुभिवाद्यम् । इति शब्दरत्नावली ॥

दुन्दुभि., पु, (दुन्दु इत्यव्यक्तशब्देन भातीति । भा + बाहुलकात् किः ।) ढक्काढक्का । तत्पर्य्यायः । भेरी २ आनकः ३ । इत्यमर । १ । ७ । ६ ॥ (यथा, महाभारते । १ । १२३ ।४६।
"आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ॥")
वरुणः । दैत्यभेदः । इति मेदिनी । भे, १६ ।
(दानवविशेषः । यथा, हरिवंशे । ३ । ८१ ।
"अभवन् दनुपुत्त्राश्च शतं तीव्रपराक्रमाः ।"
"शङ्कुकर्णो विदारश्च गवेष्ठो दुन्दुभिस्तथा ॥")
रक्षोभेदः । वाद्यभेदः । इति शब्दरत्नावली ॥ विषम् । इति हेमचन्द्रः । २ । २०७ ॥ (कुकुरवंशीयस्य अन्धकस्य पुत्त्रः । यथा,भागवते । ९ । २४ । २० ।
"अन्धकाद्दुन्दुभिस्तस्मादविद्योतः पुनर्व्वसुः ॥"
क्रौञ्चद्वीपाधिपतेर्द्युतिमतः पुत्त्राणामन्यतमः । क्रौञ्चद्वीपस्य देशभेदश्च । यथा, ब्रह्माण्डे ३६ अध्याये ।
"मुनिश्च दुन्दुभिश्चैव सुता द्युतिमतस्तु वै ।
तेषाञ्च नामभिर्देशाः क्रौञ्चद्वीपाश्रयाः स्मृताः ॥'
"मुनेस्तु मुनिर्देशो वै दुन्दुभेर्दुन्दुभिः स्मृतः ॥"
पर्व्वतविशेषः । यथा, मत्स्यपुराणे ।१२१।१३।
"स एव दुन्दुभिर्नाम श्यामपर्व्वतसन्निभः ।
शब्दस्तत्र पुरा तस्मिन् दुन्दुभिस्ताडितः
सुरैः ॥"
असुरविशेषः । यथा, रामायणे । ४ । ९ । ४ ।
"मायावी नाम तेजस्वी पूर्व्वजो दुन्दुभेः सुतः ।
तेन तस्य महद्वैरं वालिनः स्त्रीकृतं पुरा ॥")

दुन्दुभिः, स्त्री, अक्षः । पाशकः । इत्यमर. । ३ । ३ । १३५ ॥ अक्षे पाशकविषये दानविशेषो विन्ति इति ख्यातः । इति केचित् ॥ अक्षविन्दुत्रिकद्वयम् । इति रभसः ॥ विन्दन्वितचतुष्पार्श्वस्वर्णशृङ्गादिमयद्यूतोपकरणं पाशटी इति ख्याता । इतिकेचित् ॥ इति तट्टीकायां भरतः ॥

दुन्दुमारः, पु, धुन्धुमारः । इति शब्दार्थकल्पतरुः ॥

दुरदृष्टं, क्ली, (दुर्दुष्टमदृष्टम् ।) दुर्भाग्यम् । इति स्मृतितत्त्वे ॥

दुरध्वः, पु, (दुर्दुष्टोऽध्वा । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) कुपथः । इत्यमरः । २ । १ । १६ ॥

दुरभिग्रहः, पु, (दुर्दुःखेन अभिमुखेन गृह्यतेऽसौ इति । दुर् + अभि + ग्रह + खल् ।) अपामार्गः । इति राजनिर्घण्ट. ॥ (दुरभि + ग्रह + कर्म्मणि खल् ।) दुःखग्राह्ये, त्रि ॥

दुरभिग्रहा, स्त्री, (दुरभिग्रह + टाप् ।) कपिकच्छुः । दुरालभा । इति राजनिर्घण्ट. ॥

दुराकः, पुं, (दुनोतीति ।दु न उपतापे + "आकः । खजादेः स तु कित् ।"१ । २१६ । इति उणादिकोषटीकाधृतसूत्रात् आकप्रत्ययेन निपातनात् साधुः ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

दुराचारः, पुं, (आचर्य्यते इति भावे घञ् । दुर्दुष्ट आचारः इति प्रादिसमासः ।) विरुद्धाचरणम् । यथा, अध्यात्मरामायणे ।
"प्राप्ते कलियुगे घोरे नराः पुण्यविवर्ज्जिताः ।
दुराचाररताः सर्व्वे सत्यवार्त्तापराङ्मुखाः ॥"

(दुष्ट आचारो यस्य ।) निन्दिताचारयति, त्रि । (यथा, देवीभागवते । १ । ११ । १६ ।
"महापातकयुक्तश्च दुराचारोऽतिगर्हितः ।")

दुराधर्षः, पुं, (दुष्टान् यज्ञविघ्नकारिराक्षसादीन् आधर्षति दूरीकरोतीति । धृष् + अच् ।) गौरसर्षपः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ५२ ।
"अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ।"
"दैत्यादिभिर्धर्षयितुं न शक्यते इति दुराधर्षः ।"
इति तद्भाष्ये शङ्करः ॥ दुःखेन आ ईषदपि धर्षयितुमशक्यः इति । धृष् + "ईषद्दुःसु-ष्विति । ३ । ३ । १२६ । इति खल् ।) अधर्षणीये, त्रि ॥ (यथा, महाभारते । ६ । १८ । ३७ ।
"भीमसेनो गदां भीमां प्रकर्षन् परिघोपमाम् ।
प्रचकर्ष महासैन्यं दुराधर्षो महामनाः ॥")

दुराधर्षा, स्त्री, (दुराधर्ष + स्त्रियां टाप् ।) कुटुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥

दुरारुहः, पुं, (दुःखेन आरुह्यते इति । दुर् + आ + रुह + घञर्थे कर्म्मणि कः ।) बिल्वः । नारिकेलः । इति राजनिर्घण्टः ॥ (दुरारोहणीये, त्रि । यथा, महाभारते । ९ । १४० । ८१ ।
"क वा स्यात्तु गगनं प्रसृष्टि पुरुषर्षभ ! ।
अस्ति परमगम्योऽयं पर्व्वतः सुदुरारुहः ॥")

दुरारुहा, स्त्री (दुरारुह + टाप् ।) खर्ज्जुरी । इति राजनिर्घण्टः ॥

दुरारोहः, पुं स्त्री, (दुःखेन आरुह्यते इति । रुह + कर्म्मणि खल् ।) खर्ज्जूरः । इति राजनिर्घण्टः ॥ दुरारोहणीये, त्रि ॥ (यथा, महाभारते । ३ । ५ । १४ ।
"इष कूटे मनुष्येन्द्र । गहने महती शमी ।
भीमशाखा दुरारोहा श्मशानस्य समीपतः ॥")

दुरारोहा, स्त्री, (दुरारोह + टाप् ।) शाल्मलिवृक्षः । इति त्रिकाण्डशेषः ॥ श्रीवल्ली । इति राजनिर्घण्टः ॥

दुरालभा, स्त्री, (दुःखेन आलभ्यते स्पृश्यते कण्टकवत्त्वात् । दुर् + आ + लभ + खल् + टाप् । आगमविधेरनित्यत्वात् न नुम् ।) स्वनामख्यातकण्टकयुक्तक्षुद्रक्षुपविशेषः । स च यवासप्रभेदः । धमासा इति ख्याता । तत्पर्य्यायः । दुरालम्भा २ धन्वयासः ३ ताम्रमूला ४ कच्छुरा ५ दुःस्पर्शा ६ धन्वी ७ धन्वयवासकः ८ प्रबोधनी ९ सूक्ष्मदला १० विरूपा ११ दुरभिग्रहा १२ दुर्लभा १३ दुःप्रधर्षा १४ । इति राजनिर्घण्टः ॥ यासः १५ यवासः १६ दुःस्पर्शः १७ कुनाशकः १८ रोदनी १९ अनन्ता २० समुद्रान्ता २१ । इत्यमरः । २ । ४ । ९२ ॥ गान्धारी २२ कासाया २३ । इति भावप्रकाशः ॥ अधुयांसः २४ युवसः २५ कच्छुरा २६ । इति शब्दरत्नावली ॥ विकण्टकः २७ । इति जटाधरः ॥ (मध्यसखी २८ । इति शब्दचन्द्रिका ॥) अस्या गुणाः । सारकत्वम् । अरुच्छर्द्दिपित्तविस्फोटदोषनाशित्वञ्च । इति राजवल्लभः ॥ कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातत्वम् । अम्लत्वम् । मधुरत्वम् । वातगुल्मवमीच्छर्दिनाशित्वञ्च । इति राजनिर्घण्टः ॥
"यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा ॥"
इति भावप्रकाशः ॥
(गङ्गा । यथा, काशीखण्डे । २९ । ८८ ।
"दीर्घव्रता दीर्घदृष्टिर्दीर्घतोया दुरालभा ॥")
दुरालभनीये, त्रि ॥

दुरालम्भा, स्त्री, (दुःखेन आलभ्यते इति । दुर् + आ + लभ + खल् + नुम् च ।) दुरालभा । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १२ । ९८ । ३१ ।
"तीक्ष्णभीमांश्च भूतानां दुरालम्भाः सकण्टकाः ।
राजभूमिष्ठसर्व्वांश्च लब्ध्वाथैनीमदारयेत् ॥")

दुरालापः, पुं, (दुष्टः आलापः इति प्रादिसमासः ।) गालिः । इति शब्दार्थकल्पतरुः ॥

दुरासदः, त्रि, (दुःखेन आसाद्यते इति । दुर् + आ + सद् + "ईषद्दुःसुष्विति ।" ३।३।१२६ । इति खल् ।) दुष्प्राप्यः । यथा,—
"दुरासदो दुर्विषहो भूतानां न बभूव ह ॥"
इति श्रीभागवतम् ॥
(यथा च, देवीभागवते । १ । १० । ३२ ।
"धर्म्मार्थ पुरतः प्रांशे कामभावे दुरासदे ॥"
(दुष्प्रवेशः । यथा, माघे । १६ । १० ।
"घनजालनिभैर्दुरासदाः
परितो नागकदम्बकैरथ ।
नगरेषु भवन्तु योधयः
परिकोपा वनवर्म्मगादिभिः ॥")

दुरितं, क्ली, (इण् गतौ + क्तः । दुष्टमितं गमनं नरकादिदुर्गतिप्राप्तिर्यस्मात् ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, रघौ । ८ । २ ।
"दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत् ॥")
तद्युक्ते, त्रि ॥

दुरितदमनी, स्त्री, (दुरितं पापं दमयति यया इति । दम + करणे ल्युट् । ङीप् च ।) शमी । इति राजनिर्घण्टः ॥ (दम + ल्युः ।) पापनाशिनी च ॥

दुरिष्टकृत्, पुं, (दुरिष्टम् अभिचारयज्ञं करोतीति । दुरिष्ट + कृ + क्विप् तुगागमश्च ।) अभिचारकर्त्ता । तस्य नरकं यथा,—
"देवद्विजपितृन् द्वेष्टा रत्नदूषयिता च यः ।
स याति कृमिभक्ष्ये वै कृमीशे च दुरिष्टकृत् ॥"
इति विष्णुपुराणे । २ । ६ । १४ ॥
"दुरिष्टकृत् अभिचारकर्त्ता ।" इति तट्टीका ॥

दुरिष्ठः त्रि (दुर् + इष्ठन् ।) अतिमन्दः । अयमनयोरेषां वा अतिशयेन दुः निन्दितः । इति व्याकरणम् ॥

दुरीषणा, स्त्री, (दुष्टा ईषणा इच्छाभिशंसनम् । प्रादिसमासः ।) शापः । इति शब्दार्थकल्पतरुः ॥

दुरूहः, त्रि, (दुःखेन ऊह्यते इति । दुर् + ऊह + कर्म्मणि खल् ।) दुर्विज्ञेयः । यथा,—
"काव्यप्रकाशस्य दुरूहपदार्थौ
गदाधरो व्याकरुते प्रयत्नात् ।"
इति गदाधरभट्टाचार्यकृतकाव्यप्रकाशटीका ॥

दुरोदरं, क्ली, (दुष्टं दुःखमाजननादुदरं यस्य । दुष्टमुदरमस्य वा । पृषोदरादित्वात् साधुः ।) द्यूतम् । पाशकक्रीडा । इत्यमरः ।३।३।१७९ ॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । ७६ ।
"सर्व्वं किं तनुषे दुरोदरमिदं न व्यापृतिर्यं तव ।")

दुरोदरः, पुं, (दुष्टं वा पणत्वात् उदरं यस्य ।) द्यूतकृत् । (यथा, महाभारते । २ । ५६ । ८ ।
"दुरोदरा विहिता ये तु तत्र
महात्मना धर्म्मराजेन राज्ञा ।")
पणः । इति मेदिनी । रे, २६० ॥

दुर्गं, क्ली, (दुःखेन गम्यतेऽत्र । दुर् + गम + "सुदुरोरधिकरणे ।" ३ । २ । ४८ । इत्यस्य वार्त्तिकोक्त्या डः ।) पर्व्वतादिभिर्दुर्गमं पुरम् । इत्यमरः । २ । २ । १७ ॥ गड इति कोटा इति च भाषा ॥ तत्पर्य्यायः । कोट्टम् २ । यथा,—
"स्कन्धावारो राजधानी कोट्टदुर्गे पुनः समे ॥"
इति हेमचन्द्रः ॥
"अथ कोट्टो राजधानी राजधानकमित्यपि ।"
इति शब्दरत्नावली ।
"पुरं दुर्गमधिष्ठानं कोट्टोऽस्त्री राजधान्यपि ।"
इति जटाधरः ॥
तत्तु षड्विधम् । यथा,—
"तत्र दुर्गं नृपः कुर्य्यात् षण्णामेकतमं बुधः ।
धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च ॥
वार्क्षं चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव ! ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम् ।"
इति मात्स्ये १८१ अध्यायः ॥
राजस्तत्करणावश्यकत्वं तच्छुभाशुभलक्षणञ्च यथा,—
"दुर्गन्तु सततं कुर्य्यात् प्राकाराट्टालतोरणैः ।
दूषिता नगरा दाना दुर्गे दुर्गाश्रयं चरेत् ॥
दुर्गं यत्र नृपाणान्तु नित्यं दुर्गं प्रशस्यते ।
शतमेको योधयति दुर्गस्थो यो धनुर्धरः ॥
शतं दश सहस्राणि तस्मात् दुर्गं प्रशस्यते ।
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च ॥
अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम् ।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः ॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति ।
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत् ।
मृदङ्गाकृति दुर्गञ्च सततं कुलनाशनम् ॥
यथा रावणराजस्य लङ्कादुर्गा जिता पुरा ।
यदि पुरी शोभिताख्या तेनो दुर्गं प्रतिष्ठितम् ।
यतस्तत् वज्रकाकारमतो भ्रष्टश्रियो जनाः ॥
सौभाग्यं शाल्वराजस्य नगरं पञ्चकोणकम् ।
दिवि यद्वर्त्तते राजंस्तच्च भ्रष्टं भविष्यति ॥

यस्यायोध्याख्यं भूप। पुरमिक्ष्वाकुभूभुजाम्।
धनुराकृति तथापि ततोऽभूद्विजयप्रदम् ॥
दुर्गभूमौ यजेद्दुर्गां दिक्पालांश्चैव द्वारतः।
पूजयित्वा विधानेन जयं भूपः समाप्नुयात् ॥
यतो दुर्गं नृपः कुर्य्यात् सततं जयसिद्धये ॥"
इति कालिकापुराणे राजनीतिविशेषः ८५ अः ॥
(शैलभेदः। यथा, कालिकापुराणे। ७४ अः।
"यत्र दुर्गाख्यं शैलं शिवस्यास्ते मनोहरम् ॥")

दुर्ग, पु, असुरभेदः। यं हत्वा चण्डिकाया दुर्गेति नामाभूत्। इति काशीखण्डम् ॥ (यथा, हरिवंशे। १६४। ६।
"विन्ध्यवासिनीं दुर्गघ्नीं रणदुर्गां रणप्रियाम् ॥"
विष्णुः। यथा, महाभारते। १३। १४९। ९६।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥")
गुग्गुलुः। इति राजनिर्घण्टः ॥ (दुःखेन गम्यते अत्रेति। दुर+गम्+अधिकरणे डः।) दुर्गमे, त्रि। इति मेदिनी। गे, ९ ॥

दुर्गकारकं, क्ली, (निजकृतवेष्टनेन दुर्गं करोतीति। कृ+"ण्वुल्तृचौ।" ३। १। १३३। इति ण्वुल्।) वृक्षविशेषः। इति शब्दमाला। दुर्गकर्त्तरि, त्रि ॥

दुर्गतः, त्रि, (दुर् दुरवस्थां गच्छति स्मेति। दुर्+गम्+"गत्यर्थाकर्म्मकश्लिषेति।" ३। ४। ७२। इति कर्त्तरि क्तः।) दरिद्रः। इत्यमरः। ३। १। ४९ ॥ (यथा आर्य्यासप्तशत्याम्। २९६।
"दुर्गतगृहिणी तनये करुणार्द्रा प्रियतमे च
रागमयी।
मुग्धा रताभियोगं न मन्यते न प्रतिक्षिपति ॥")

दुर्गतिः, स्त्री, (दुष्टा क्लेशदायिनी गतिः।) नरकः। इत्यमरः। १। ९। १ ॥ (यथा, देवीभागवते। ३। १२। ६८।
"कृत्वा यज्ञ विधानेन दत्त्वा गव्यं मखाञ्चितम्।
ससुहृत् महाराज। पितरं दुर्गतिं गतम् ॥")
दारिद्रम्। इति मेदिनी। ते, ११५ ॥ (यथा, महाभारते। १३। ७०। ८।
"कथं भवान् दुर्गतिमीदृशीं गतो
नरेन्द्र तद्ब्रूहि किमेतदीदृशम् ॥")

दुर्गतिनाशिनी, स्त्री, (दुर्गतिं नाशयतीति। नश+णिच्+णिनि+ङीप्।) दुर्गा। यथा,—
"ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥

दुर्गन्धं, क्ली, (दुर्दुष्टो गन्धो यस्य।) सौवर्च्चलवणम्। इति हेमचन्द्रः। ६। २७ ॥

दुर्गन्धः, पु, (दुष्टो गन्धः।) दुष्टगन्धः। तत्पर्य्यायः। पूतिगन्धिः २। इत्यमरः। १। ५। १२ ॥ (यथा, सुश्रुते। १। ३०।
"सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्।
यो वा गन्धान्न जानाति गतासुं तं विनिर्द्दिशेत् ॥")
आम्रवृक्षः। इति शब्दचन्द्रिका ॥ पलाण्डुः। इति भावप्रकाशः ॥ (दुर्दुष्टो गन्धो यत्र।) दुष्टगन्धयुक्ते, त्रि ॥ (यथा, मार्कण्डेये। ८। ८१।
"अथाजगाम त्वरितो धर्म्मश्चाण्डालरूपधृक्।
दुर्गन्धो विकृतो रूक्षः श्मश्रुलो दन्तुरो घृणी ॥")

दुर्गन्धी, [न्] त्रि, (दुर्गन्धोऽस्यस्येति। दुर्गन्ध+इनिः।) दुर्गन्धयुक्तः। इत्यमरटीकायां रायमुकुटः ॥ (यथा, मनुः। ६। ७६।
"अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम्।
चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥")

दुर्गपुष्पी, स्त्री, (दुर्गं दुष्प्राप्यं पुष्पं यस्याः। जातित्वात् ङीष्।) वृक्षविशेषः। केशपुष्टा इति ख्याता। तत्पर्य्यायः। मानसी २ बालाक्षी ३ केशधारिणी ४। इति शब्दचन्द्रिका ॥

दुर्गमः, त्रि, (दुर्दुःखेन गम्यते इति। दुर्+गम+"ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्।" ३। ३। १२६। इति खल्।) दुर्गः। दुःखेन गमनीयस्थानादि। इति शब्दमाला ॥ (यथा, महाभारते। ६। १४। ३५।
"पार्थिवाः केऽभ्यरक्षन्त गच्छन्तो दुर्गमां गतिम् ॥"
दुर्दुःखेन गम्यते ज्ञायते इति। दुर्ज्ञेयः। यथा, महाभारते। १३। १४। २९५।
"नमो वृषभवाहाय गजेन्द्रगमनाय च।
दुर्गमाय नमस्तुभ्यमगम्यगमनाय च ॥"
पु, विष्णुः। यथा, तत्रैव। १३। १४९। ९६। विष्णुसहस्रनामकीर्त्तने।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥"
असुरविशेषः। यथा, मार्कण्डेये। ९१। ४४।
"तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥"
क्ली, वनम्। सङ्कटस्थलम्। यथा, महाभारते। १। ८१। ३०।
"राजायं नाहुषस्तात दुर्गमे पाणिमग्रहीत् ॥")

दुर्गलङ्घनः, पुं, (दुर्गं दुर्गमस्थानं मरुभूम्यादि लङ्घ्यतेऽनेनेति। लङ्घि+करणे ल्युट्।) उष्ट्रः। इति हेमचन्द्रः। ४। ३२० ॥

दुर्गसञ्चरः, पुं, (दुर्गं दुर्गमस्थानं नद्यादिपरपारं सञ्चर्य्यतेऽनेनेति। सम्+चर+पुंसीति घ.।) सङ्क्रमः। इत्यमरः। ३। २। २५ ॥ साँको इति भाषा ॥

दुर्गसञ्चार., पु, (दुर्गं नद्यादिपारदुर्गमस्थानं सञ्चर्य्यते गम्यतेऽनेनेति। सम्+चर+घञ्।) दुर्गसञ्चरः। इत्यमरटीकायां स्वामी ॥

दुर्गा, स्त्री, (दुर्दुःखेन गम्यते प्राप्यतेऽसौ। गम+अन्यत्रापि दृश्यते। इति डः। दुर्दुःखेन गम्यतेऽस्यामिति। दुर्+गम+"सुदुरोरधिकरणे।" ३।२।४८। इत्यस्य वार्त्तिकोक्त्या डः। ततष्टाप्।) नीली। इति मेदिनी। गे, ९ ॥ अपराजिता। इति शब्दचन्द्रिका ॥ श्यामापक्षी। इति राजनिर्घण्टः ॥ (नववर्षा कुमारी। यथा, देवीभागवते। ३। २६। ४३।
"नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी ॥"
अस्याः पूजाफलमाह। तत्रैव। ३। २६। ५०।
"दुःखदारिद्र्यनाशाय सङ्ग्रामे विजयाय च।
क्रूरशत्रुविनाशार्थं तथोग्रकर्म्मसाधने ॥
दुर्गाञ्च पूजयेद्भक्त्या परलोकसुखाय च ॥"
अस्याः पूजामन्त्रं यथा, तत्रैव। ३। २६। ६०।
"दुर्गा त्रायति भक्तं या सदा दुर्गार्त्तिनाशिनी।
दुर्ज्ञेया सर्व्वदेवानां तां दुर्गां पूजयाम्यहम् ॥")
हिमालयकन्या। सा शिवभार्य्या गणेशकार्त्तिकयोर्माता च। तत्पर्य्यायः।
उमा २ कात्यायनी ३ गौरी ४ काली ५ हैमवती ६ ईश्वरा ७ शिवा ८ भवानी ९ रुद्राणी १० सर्व्वाणी ११ सर्व्वमङ्गला १२ अपर्णा १३ पार्व्वती १४ मृडानी १५ चण्डिका १६ अम्बिका १७। इत्यमरः। १।१।३८ ॥ शारदा १८ चण्डी १९ चण्डवती २० चण्डा २१ चण्डनायिका २२ गिरिजा २३ मङ्गला २४ नारायणी २५ महामाया २६ वैष्णवी २७ महेश्वरी २८ महादेवी २९ हिण्डी ३० ईश्वरी ३१ कोट्टवी ३२ षष्ठी ३३ माधवी ३४ नगनन्दिनी ३५ जयन्ती ३६ भार्गवी ३७ रम्भा ३८ सिंहरथा ३९ सती ४० भ्रामरी ४१ दक्षकन्या ४२ महिषमर्द्दिनी ४३ हेरम्बजननी ४४ सावित्री ४५ कृष्णपिङ्गला ४६ वृषाकपायी ४७ लम्बा ४८ हिमशैलजा ४९ कार्त्तिकेयप्रसू. ५० आद्या ५१ नित्या ५२ विद्या ५३ शुभङ्करी ५४ सात्त्विकी ५५ राजसी ५६ तामसी ५७ भीमा ५८ नन्दनन्दिनी ५९ महामायी ६० शूलधरा ६१ सुनन्दा ६२ शुम्भघातिनी ६३। इति शब्दरत्नावली ॥ ह्रीः ६४ पर्व्वतराजतनया ६५ हिमालयसुता ६६ महेश्वरवनिता ६७। इति कविकल्पलता ॥ सत्या ६८ भगवती ६९ ईशाना ७० सनातनी ७१ महाकाली ७२ शिवानी ७३ हरवल्लभा ७४ उग्रचण्डा ७५ चामुण्डा ७६ विधात्री ७७ आनन्दा ७८ महामात्रा ७९ महामुद्रा ८० माकरी ८१ भौमी ८२ कल्याणी ८३ कृष्णा ८४ मानदात्री ८५ मदालसा ८६ मानिनी ८७ चार्व्वङ्गी ८८ वाणी ८९ ईशा ९० वलेशी ९१ भ्रमरी ९२ भूष्या ९३ फाल्गुनी ९४ यती ९५ ब्रह्ममयी ९६ भाविनी ९७ देवी ९८ अचिन्ता ९९ त्रिनेत्रा १०० त्रिशूला १०१ चर्च्चिका १०२ तीव्रा १०३ नन्दिनी १०४ नन्दा १०५ धरित्रिणी १०६ मातृका १०७ चिदानन्दस्वरूपिणी १०८ मनस्विनी १०९ महादेवी ११० निद्रारूपा १११ भवानिका ११२ तारा ११३ नीलसरस्वती ११४ कालिका ११५ उग्रतारा ११६ कामेश्वरी ११७ सुन्दरी ११८ भैरवी ११९ राजराजेश्वरी १२० भुवनेशी १२१ त्वरिता १२२ महालक्ष्मीः १२३ राजीवलोचनी १२४ धनदा १२५ वागीश्वरी १२६ त्रिपुरा १२७ ज्वालामुखी १२८ वगलामुखी १२९ सिद्धविद्या १३० अन्नपूर्णा १३१ विशालाक्षी १३२ सुभगा १३३ सगुणा १३४ निर्गुणा १३५ धवला १३६ गीतिः १३७ गीतवाद्यप्रिया १३८ अट्टालवासिनी १३९ अट्टहासिनी १४० घोरा १४१ प्रेमा १४२ वटेश्वरी १४३ कीर्त्तिदा १४४ बुद्धिदा १४५ अवीरा १४६ पण्डितालयवासिनी १४७ मण्डिता १४८ संवत्सरा १४९ कृष्णरूपा १५० वलि-

प्रिया १५१ सुहृत्ता १५२ कामिनी १५३ कामरूपा १५४ पुण्यदा १५५ विष्णुचक्रधरा १५६ पञ्चमा १५७ वृन्दावनस्वरूपिणी १५८ अयोध्यारूपिणी १५९ मायावती १६० जीमूतवसना १६१ जगन्नाथस्वरूपिणी १६२ कृत्तिवसना १६३ त्रियामा १६४ यमलार्ज्जुनी १६५ यामिनी १६६ यशोदा १६७ यादवी १६८ जगती १६९ कृष्णजाया १७० सत्यभामा १७१ सुभद्रिका १७२ लक्ष्मणा १७३ दिगम्बरी १७४ पृथुका १७५ तीक्ष्णा १७६ आचारा १७७ अक्रूरा १७८ जाह्नवी १७९ गण्डकी १८० ध्येया १८१ जृम्भणी १८२ मोहिनी १८३ विकारा १८४ अक्षरवासिनी १८५ अंशका १८६ पत्रिका १८७ पवित्रिका १८८ तुलसी १८९ अतुला १९० जानकी १९१ वन्द्या १९२ कामना १९३ नारसिंही १९४ गिरीशा १९५ साध्वी १९६ कल्याणी १९७ कमला १९८ कान्ता १९९ शान्ता २०० कुला २०१ वेदमाता २०२ कर्म्मदा २०३ सन्ध्या २०४ त्रिपुरसुन्दरी २०५ रासेशी २०६ दक्षयज्ञविनाशिनी २०७ अनन्ता २०८ धर्म्मेश्वरी २०९ चक्रेश्वरी २१० खञ्जना २११ विदग्धा २१२ कुब्जिका २१३ चित्रा २१४ सुलेखा २१५ चतुर्भुजा २१६ राका २१७ प्रज्ञा २१८ ऋद्धिदा २१९ तापिनी २२० तपा २२१ सुमन्त्रा २२२ दूती २२३ । इति तस्याः सहस्रनामान्तर्गतं ॥

अथ दुर्गानाम्नो व्युत्पत्तिर्यथा,—

"दुर्गो दैत्ये महाविघ्ने भवबन्धे कुकर्म्मणि ।
शोके दुःखे च नरके यमदण्डे च जन्मनि ॥
महाभयेऽतिरोगे चाप्याशब्दो हन्तृवाचकः ।
एतान् हन्त्येव या देवी सा दुर्गा परिकीर्त्तिता ॥"

अपि च ।

"दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः ।
उकारो विघ्ननाशस्य वाचको वेदसम्मतः ॥
रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः ।
भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः ॥
स्मृत्युक्तिश्रवणाद्यस्या एते नश्यन्ति निश्चितम् ।
ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता ॥
दुर्गेति दैत्यवचनोऽप्याकारो नाशवाचकः ।
दुर्गं नाशयति या नित्यं सा दुर्गा वा प्रकीर्त्तिता ॥
विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः ।
तं ननाश पुरा तेन बुधैर्दुर्गा प्रकीर्त्तिता ॥" * ॥

अस्याः स्वरूपं यथा, नन्दं प्रति श्रीकृष्णवाक्यम् ।

"आद्या नारायणी शक्तिः सृष्टिस्थित्यन्तकारिणी ।
करोमि च यया सृष्टिं यया ब्रह्मादिदेवताः ॥
यया जयति विश्वञ्च यया सृष्टिः प्रजायते ।
यया विना जगन्नास्ति मया दत्ता शिवाय सा ॥
दया निद्रा च क्षुत्तृप्तिस्तृष्णा श्रद्धा क्षमा धृतिः ।
तुष्टिः पुष्टिस्तथा शान्तिर्लज्जाधिदेवता हि सा ॥
वैकुण्ठे सा महालक्ष्मी गोलोके राधिका सती ।
मर्त्ये लक्ष्मीश्च क्षीरोदे दक्षकन्या सती च सा ॥
सा दुर्गा मेनकाकन्या दैन्यदुर्गतिनाशिनी ।
स्वर्गलक्ष्मीश्च दुर्गा सा शक्रादीनां गृहे गृहे ॥
सा वाणी सा च सावित्री विप्राधिष्ठातृदेवता ।
वह्नौ सा दाहिका शक्तिः प्रभाशक्तिश्च भास्करे ॥
शोभा शक्तिः पूर्णचन्द्रे जले च शीतता ।
शस्यप्रसूतिशक्तिश्च धारणा च धरासु सा ॥
ब्राह्मणशक्तिर्विप्रेषु देवशक्तिः सुरेषु सा ।
तपस्विनां तपस्या सा गृहिणां गृहदेवता ॥
मुक्तिशक्तिश्च मुक्तानां माया सांसारिकस्य सा ।
मद्भक्तानां भक्तिशक्तिर्मयि भक्तिप्रदा सदा ॥
नृपाणां राज्यलक्ष्मीश्च वणिजां लाभरूपिणी ।
पारे संसारसिन्धूनां तरी दुस्तरतारिणी ॥
सतां सद्बुद्धिरूपा च मेधाशक्तिस्वरूपिणी ।
व्याख्याशक्तिः श्रुतौ शास्त्रे दानशक्तिश्च दातृषु ॥
सतीनां विप्रभक्तिः पतिभक्तिः सतीषु च ।
एवंरूपा च या शक्तिर्मया दत्ता शिवाय सा ॥"

अपि च, शङ्करं प्रति पार्व्वतीवाक्यम् ।

"वैकुण्ठेऽहं महालक्ष्मीर्गोलोके राधिका स्वयम् ।
शिवाहं शिवलोकेऽपि ब्रह्मलोके सरस्वती ।
अहं निहत्य दैत्यांश्च दक्षकन्या सती पुरा ।
त्वन्निन्दया पुरा त्यक्ता सा चाहं शैलकन्यका ।
रक्तबीजस्य युद्धे च काली च कालभैरवी ॥
सावित्री वेदमाताहं सीता जनककन्यका ।
रुक्मिणी द्वारवत्याञ्च भारते भीष्मकन्यका ॥
सदांशा द्वापरे दैवात् वृषभानुसुताधुना ॥
धर्म्मपत्नी च कृष्णस्य पुण्ये वृन्दावने वने ॥" * ॥

अपरञ्च, कृष्णं प्रति पार्व्वतीवाक्यम् ।

'एकाहं राधिकारूपा गोलोके रासमण्डले ।
रासशून्यञ्च गोलोकं परिपूर्णं कुरु प्रभो ! ॥
परिपूर्णतमा चाहं तव वक्षःस्थलस्थिता ।
तवाज्ञया महालक्ष्मीरहं वैकुण्ठवासिनी ।
सरस्वती च तत्रैव वामपार्श्वे हरेरपि ॥
तवाहं मनसा जाता सिन्धुकन्या तवाज्ञया ।
सावित्री वेदमाताहं कलया विधिसन्निधौ ॥
तेजःसु सर्व्वदेवानां पुरा सत्ये तवाज्ञया ।
अधिष्ठानं कृतं तत्र धृतं दिव्यशरीरकम् ॥
शुम्भादयश्च दैत्याश्च निहता भावलीलया ।
दुर्गं निहत्य दुर्गाहं त्रिपुरा त्रिपुरे वधे ॥
निहत्य रक्तबीजञ्च रक्तबीजविनाशिनी ।
तवाज्ञया दक्षकन्या सती सत्यस्वरूपिणी ॥
योगेन त्यक्ता देहञ्च शैलजाहं तवाज्ञया ।
त्वया दत्ता शङ्कराय गोलोके रासमण्डले ॥
विष्णुभक्तिरहं तेन विष्णुमाया च वैष्णवी ।
नारायणस्य मायाहं तेन नारायणी स्मृता ॥
कृष्णप्राणाधिका चाहं प्राणाधिष्ठातृदेवता ।
महाविष्णोश्च रासे स्वे जननी राधिका स्वयम् ॥
तवाज्ञया पञ्चधाहं पञ्चप्रकृतिरूपिणी ।
कलाकलांशयाहञ्च देवपत्नी गृहे गृहे ॥" * ॥

अथ तस्याः पूजाप्रकाशः ।

"प्रथमे पूजिता सा च कृष्णेन परमात्मना ।
वृन्दावने च सृष्ट्यादौ गोलोके रासमण्डले ॥
मधुकैटभभीतेन ब्रह्मणा सा द्वितीयतः ।
त्रिपुरप्रेषितेनैव तृतीये त्रिपुरारिणा ॥
भ्रष्टश्रिया महेन्द्रेण शापाद्दुर्व्वाससः पुरा ।
चतुर्थे पूजिता देवी भक्त्या भगवती सदा ॥
तदा मुनीन्द्रैः सिद्धेन्द्रैर्देवैश्च मुनिमानवैः ।
पूजिता सर्व्वविश्वेषु बभूव सर्व्वतः सदा ॥
तेजःसु सर्व्वदेवानामाविर्भूता पुरा मुने ! ।
सर्व्वे देवा ददुस्तस्यै शस्त्राणि भूषणानि च ॥
दुर्गादयश्च दैत्याश्च निहता दुर्गया तया ।
दत्तं स्वराज्यं देवेभ्यो वरञ्च यदभीप्सितम् ॥
कल्पान्तरे पूजिता सा सुरथेन महात्मना ।
राज्ञा मेधसः शिष्येण मृण्मय्याञ्च सरित्तटे ॥
मेषादिभिश्च महिषैः कृष्णसारैश्च गण्डकैः ।
छागैर्मेषैश्च कुष्माण्डैः पक्षिभिर्बलिभिर्मुने ॥
वेदोक्तानि च दत्त्वा वस्तूपचाराणि षोडश ।
ध्यात्वा च कवचं धृत्वा सम्पूज्य च विधानतः ॥
नाना कृत्वा परीहारं वरं प्राप यथेप्सितम् ।
मुक्तिं सम्प्राप वैश्यश्च सम्पूज्य च सरित्तटे ॥
तुष्टाव गत्वा वैश्यश्च साश्रुनेत्रः पुटाञ्जलिः ।
विससर्ज्ज मृण्मयीं तां गम्भीरे निर्म्मले जले ॥
मृण्मयीं तामसर्व्वीं दृष्ट्वा अवधीतां नगाधिपः ।
रुरोद तत्र वैश्यश्च ततः स्थानान्तरं ययौ ॥
त्यक्त्वा देहञ्च वैश्यश्च पुष्करे दुष्करं तपः ।
कृत्वा जगाम गोलोकं दुर्गादेवीवरेण च ॥
राजा ययौ स्वराज्यञ्च पृथ्वीं निष्कण्टकां बली ।
भोगञ्च बुभुजे भूपः षष्टिवर्षसहस्रकम् ॥
भार्य्यां स्वराज्यं संन्यस्य पुत्रे स कालयोगतः ।
मनुर्बभूव सावर्णिस्तप्त्वा च पुष्करे तपः ॥
इत्येवं कथितं वत्स ! समासेन यथागमम् ।
दुर्गाख्यानं मुनिश्रेष्ठ ! किं भूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥

अथ दुर्गापूजाविधिः ।

"शरत्काले महापूजा क्रियते या च वार्षिकी ।
शारदीया महापूजा चतुःकर्म्ममयी शुभा ॥
तां तिथित्रयमासाद्य कुर्य्याद्भक्त्या विधानतः ॥

चतुःकर्म्ममयी स्नपनपूजनबलिदानहोमरूपा सा च प्रतिवर्षं कर्त्तव्या ।

'द्विशरीरे चरे चैव लग्ने केन्द्रगते रवौ ।
वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्ज्जनम् ॥
यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे ।
न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ! ॥
क्रुद्धा भगवती तस्य कामानिष्टान् निहन्ति वै ॥'

वीप्सा अकरणे प्रत्यवायश्रुतेश्च सा पूजा नित्या विधिसमभिव्याहृतफलश्रुतेः काम्या च ।

यथा,—

'कृत्वैव परमामापुर्निर्वृतिं त्रिदिवौकसः ।
एवमन्यैरपि सदा देव्याः कार्य्यं प्रपूजनम् ॥
विभूतिमतुलां लब्धुं चतुर्व्वर्गप्रदायकम् ।'

काम्यतया पूजने कृते प्रसङ्गान्नित्यपूजासिद्धिः । तत्सङ्कल्पनात् कृष्णनवम्यादिप्रतिपदादिषष्ठ्यादिसप्तम्यादिमहाष्टम्यादिकेवलमहाष्टमीकेवलमहानवमीपूजारूपाः कल्पा उन्नेयाः । तदनन्तरमशौचमपि न प्रतिबन्धकम् ॥ * ॥ सा पूजा त्रिविधा । यथा,—

'शारदी चण्डिकापूजा त्रिविधा परिगीयते ।

सात्त्विकी राजसी चैव तामसी चेति विश्रुतिः ॥
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम् ॥
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा ।
देवीसूक्तजपश्चैव यज्ञो वह्निषु तर्पणम् ॥
राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा ।
सुरामांसाद्युपाहारैर्जपयज्ञैर्विना तु या ॥
विना मन्त्रैस्तामसी स्यात् किरातानान्तु सम्मता ।
आगमे च सविधैर्वेद्यैः रुद्रैरन्यैश्च सेवके ॥
सर्व्वं नानाविधैर्मार्गैः पूज्यते सर्व्वदस्युभिः ।
स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेन वा ॥
वर्णकस्य सपोयोगाद्दर्शनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देव सान्निध्यमृच्छति ॥'

अथ नवम्यादिकल्पः ।

'इषे मास्यसिते पक्षे कन्याराशिगते रवौ ।
नवम्यां बोधयेद्देवीं क्रीडाकौतुकमङ्गलैः ॥
ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥
पूर्व्वाषाढ़ायुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यान्तु बलिभिः पूजयेच्छिवाम् ॥
श्रवणेन दशम्यान्तु प्रणिपत्य विसर्जयेत् ॥'
प्रतिवर्षं कन्यार्के कर्त्तव्यत्वानुपपत्तेः सिंहार्केऽपि बोधनं तुलार्केऽपि स्थापनादिकं क्रियते चान्द्रत्वात् कन्यार्के मलमासे न तदारभ्यते यदि पूर्व्वमारब्धं तदा मलमासेऽपि पूजादेवीमाहात्म्यपाठादिकं प्रत्यहं कर्त्तव्यमेव ।
'यावद्भूर्व्वायुराकाशं जलं वह्निशशिग्रहाः ।
तावच्च चण्डिकापूजा भविष्यति सदा भुवि ॥'
तत्र कृष्णनवम्यां देवपक्षत्वेन पूर्व्वाह्णे बोधनम् । उभयदिने पूर्व्वाह्णे नवमीलाभे पूर्व्वदिने आर्द्राणुरोधे तु पूर्व्वाह्णं विना दिवामात्रे युग्मादरं विनापि परदिने बोधनं उभयदिने पूर्व्वाह्णे नवम्यालाभे पूर्व्वदिने बोधनं युग्मात् ।
'कन्यादिमीनपर्य्यन्तं यत्र सम्प्राप्यते शिव ।
स च बोधः प्रकर्त्तव्यो देव्या राज्ञां शुभप्रदः ॥'
बोधनमन्त्रो यथा,—
इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः ।
श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम् ॥
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्विने तद्वद्बोधयामि सुरेश्वरीम् ।
शक्रेणापि च सम्बोध्य प्राप्तं राज्यं सुरालये ॥
तस्मादहं त्वां प्रतिबोधयामि
विभूतिराज्यप्रतिपत्तिहेतोः ॥
यथैव रामेण हतो दशास्य-
स्तथैव शत्रून् विनिपातयामि ॥
षष्ठीबोधने तु पञ्चम्यामाश्विने षष्ठ्यां सायाह्ने बोधयाम्यत इति पठनीयम् ॥ ॥

अथ प्रतिपदादिकल्पः ।

'आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥'
प्रतिपदादिकल्पतिथिषु तत्कर्म्माच भविष्ये ।

'केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे ।
दर्पणञ्च तृतीयायां सिन्दूरालक्तकं तथा ॥
मधुपर्कं चतुर्थ्यान्तु तिलकं नेत्रमण्डनम् ।
पञ्चम्यामङ्गरागञ्च शक्त्यालङ्करणानि च ॥
षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत् ।
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ॥
उपोषणमथाष्टम्यामष्टशक्तेः प्रपूजनम् ।
नवम्यामुग्रचण्डायाश्चैव देवार्च्चनं दिवा ॥
पूजा च बलिदानञ्च तद्दानात् प्रपूजयेत् ।
कुमारी पूजनीया च भूषणीया च भूषणैः ॥
सम्पूज्य प्रेषणं कुर्य्यात् दशम्यां शावरोत्सवैः ।
अनेन विधिना यस्तु देवीं प्रीणयते नरः ॥
स्कन्दवत् पालयेत्तन्तु देवी सर्व्वापदि स्थितम् ।
पुत्त्रदारधनर्द्धीनां संख्या तस्य न विद्यते ।
भुक्त्वेह परमान् भोगान् प्रेत्य देवीगणो भवेत् ॥'

अथ षष्ठ्यादिकल्पः ।

'बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च ।
सप्तम्यां बिल्वशाखान्तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरञ्च स्वयं कुर्य्यात् बलिदानं महानिशि ॥
प्रभूतबलिदानञ्च नवम्यां विधिवच्चरेत् ।
ध्यायेद्दशभुजां देवीं दुर्गामन्त्रेण पूजयेत् ॥
विसर्जनं दशम्यान्तु कुर्य्याद्वै शावरोत्सवैः ।
धूलिकर्द्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः ॥
भगलिङ्गाभिधानैश्च भगलिङ्गप्रगीतकैः ।
भगलिङ्गक्रियाभिश्च कुर्य्याच्च दशमीदिने ॥'॥
नवमीबोधनासामर्थ्ये षष्ठ्यां सायं बोधनं यथा,
'षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥'
षष्ठ्यां बोधनासम्भवेऽपि पत्रीप्रवेशपूर्व्वदिने सायं षष्ठीलाभे एकादशीभयकरणं यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभस्तदा पूर्व्वेद्युर्बोधनं परदिने सायमामन्त्रणम् । यदा तूभयदिने सायं षष्ठीलाभस्तदा परेऽह्नि षष्ठ्यां बोधनम् । उभयदिने सायं षष्ठ्यभावे पूर्व्वाह्णेऽपि षष्ठ्यां बोधनम् । आमन्त्रणमन्त्रस्तु ।
'मेरुमन्दरकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतव्योऽसि मया गच्छ पूज्यो दुर्गास्वरूपतः ॥
सायं षष्ठ्यान्तु कर्त्तव्यं पार्व्वत्या अधिवासनम् ।
षष्ठ्यभावेऽपि कर्त्तव्यं सप्तम्यामपि नारद ! ॥'॥

अथ सप्तम्यादिकल्पः ।

'आश्विने शुक्लपक्षे तु सप्तम्यादिदिनत्रये ।
तत्र पूजा विशेषेण कर्त्तव्या मम मानवैः ॥
विशेषं तत्र वक्ष्यामि शृणु पुत्रक । सत्तमम् ।
सप्तम्यां पत्रिकापूजा रम्भादिनवभिर्युता ॥
अर्द्धरात्रौ च शर्व्वर्य्यै पूजायुक्तं नवग्रहैः ।
अष्टमी वा महापुण्या तिथिः प्रीतिकरी मम ॥
कुर्य्यात्तत्र महास्नानं पञ्चगव्ययुतैस्तथा ।
नानातीर्थैः कषायैश्च सर्व्वौषधिरसैस्तथा ॥
ओषधीभिश्च सर्व्वाभिर्भृङ्गारैः कलसैस्तथा
पुष्परसादितोयैश्च गन्धैर्मलयजैस्तथा ॥
गीतवादित्रनादेन स्नापयेन्मां च भक्तितः ।
पूजा मद्भवधान्यैश्च नैवेद्यैश्च मनोहरैः ॥
विन्यस्तैर्घृतपात्रैश्च तिलधान्यादिसंयुतैः ।
कुर्य्याद्यस्तिथिं वत्स तस्य पुण्यफलं शृणु ॥
संसारे यानि सौख्यानि काम्यानि नरपुङ्गव ! ।
दीर्घमायुर्यशः पुत्रं विपुलं धनधान्यकम् ॥
लभते मत्प्रसादेन अन्ते मम पुरं व्रजेत् ।
बलिश्चात्र विशेषेण देयो मत्प्रीतये नरैः ॥
अनेन विधिना यस्तु नवमीमतिवाहयेत् ।
भुङ्क्ते च विपुलान् भोगानन्ते शिवपुरं व्रजेत् ॥
तत्र सप्तम्यां मूलयुक्तायां केवलायां वा पूर्व्वाह्णे पत्रीप्रवेशः उभयत्र पूर्व्वाह्णे सप्तमीलाभे परत्र
'शुक्लाख्या पर्व्वरहिता सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥'
पूर्व्वाह्णे नवपत्रिका शुभकरी सर्व्वार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं पत्रीप्रवेशे शुभा ।
मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा
सायाह्ने वधबन्धनानि कलहं सर्व्वत्र सर्व्वदा ॥
सप्तम्यामस्तगायां यदि विशति गृहं पत्रिका श्रीफलाढ्या
राज्ञः सप्ताङ्गराज्यं जनसुरमखिलं हन्ति मूलानुरोधात् ।
तस्मात् सूर्य्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहितां राज्यवृद्धिं विधाय ॥
लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ।
चित्रे च त्रिशिखे खड्गे जलस्थाञ्चापि पूजयेत् ॥'
स्नात्वा यथाविधि विधौतकरानर्बाहुराचम्य सम्यगमलाम्बरयुग्मधरः प्राणानमो यतहदिस्थदृशोऽपरापि वद्धाश्रमो नवमतिश्च गुरुश्च नत्वा ।
'कन्यासंस्थे रवावीशि शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥
पूजां समारभेद्देव्या नवम्यां वाऽष्टमेऽपि वा ।
पशुघातश्च कर्त्तव्यो गवलाजवधस्तथा ॥'
उक्तवचने पशुघातश्च कर्त्तव्य इति श्रुतिः ।
'अष्टम्यां रुधिरैर्मांसैः कुसुमैश्च सुगन्धिभिः ।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम् ॥'
इति [illegible]।
'अष्टम्यां बलिदानेन पुत्त्रनाशो भवेद्ध्रुवम् ।'
इति देवीपुराणीयं वचनं [illegible] ।
तत्पूजाया उभयसम्बन्धेन [illegible] नवम्यां मायकालकात् । तत्पूजाविधानन्तु कालिकापुराणे दर्शनान्तरम् ।
'अष्टमीनवमीसन्धौ कृतेया [illegible] ।
तत्र पूज्या अहं पुत्र ! [illegible] ।
उपचारं महादेव्या पूजयेत्तु [illegible] ।
यत्र तत्रैव पूजाया [illegible] देवीं [illegible] ।

भक्त्येव प्रतिपूजयेज्जगवतीं चण्डीं प्रपञ्चात्मिकाम्।
आश्विन्यां प्रतिपत्तिथौ यतधिया भक्त्या समाराध्य च।
नानापशुकमञ्जमांसरुधिरैः कृत्वा नवम्यां बलिं
नवम्च श्रवणे तिथिषु दशमीं सम्प्राप्य संप्रेषयेत्॥
भगवत्या प्रवेशादिविसर्गान्ताश्च याः क्रियाः।
तिथावुदयगामिन्यां सर्व्वास्ताः कारयेद्बुधः॥'
अत्रोदयकालीनघटिकामात्रतिथौ सम्यक्पूजनासामर्थ्ये कालिकापुराणम्।
'सम्यक् कल्पोदिता पूजा यदि कर्त्तुं न शक्यते।
उपचारांस्तदा दातुं यथेष्टान् वितरेत्तदा॥
गन्धं पुष्पञ्च धूपञ्च दीपं नैवेद्यमेव च।
अभावे गन्धपुष्पाभ्यां तदभावे च भक्तितः॥
सङ्क्षेपपूजा कथिता तथा वस्त्रादिकं पुनः॥
प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च सम्पूज्य प्रातरेव विसर्जयेत्॥'
अत्र प्रातःपदं दण्डाष्टकपरम्।
'व्रती प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये।
द्वाभ्यां चतुरहोभिर्व्वा शास्त्रदृष्टिवशात्तिथेः॥'
अष्टम्यामुपवासः पुत्रवतो गृहस्थस्य निषिद्धः। यथा कालिकापुराणम्।
'उपवासं महाष्टम्यां पुत्रवान् न समाचरेत्।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्॥
नवम्यां बलिदानन्तु कर्त्तव्यं वै यथाविधि।
जपं होमञ्च विधिवत् कुर्य्यात्तत्र विभूतये॥'
अत्र नवम्यां होमश्रुतेः पूर्व्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणं इति श्रुतेश्च उभयत्र एकतरस्मिन् वा होमः शारदापूजायां नवम्यामेव दक्षिणा देया॥ * ॥
अथाष्टम्यादिकेवलमहाष्टमी केवलमहानवमीकल्पो यथा,—
'भद्रकालीं पटे कृत्वा तत्र सम्पूजयेद् द्विजः।
आश्विने शुक्लपक्षस्य चाष्टम्यां नियतस्ततः॥
उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताम्॥'
इति विष्णुधर्म्मोत्तरम्॥
'यस्त्वेकस्यामथाष्टम्यां नवम्यां वाथ साधकः।
पूजयेद्वरदां देवीं शुद्धभावेन चेतसा॥'
इति कालिकापुराणम्॥ * ॥
दुर्गाया ध्यानं यथा,—
'जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्॥
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम्॥
मृणालायतसंस्पर्शदशबाहुसमन्विताम्।
त्रिशूलं दक्षिणे ध्येयं खड्गं चक्रं क्रमादधः॥
तीक्ष्णबाणं तथा शक्तिं दक्षिणे सन्निवेशयेत्।
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च॥
घण्टां वा परशुं वापि वामतः सन्निवेशयेत्।
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत्॥
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्।
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम्॥
रक्तरक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम्।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्॥
सपाशवामहस्तेन धृतकेशञ्च दुर्गया।
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत्॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम्।
किञ्चिदूर्द्ध्वं तथा वाममङ्गुष्ठं महिषोपरि॥
शत्रुक्षयकरीं देवीं दैत्यदानवदर्पहाम्।
प्रसन्नवदनां देवीं सर्व्वकामफलप्रदाम्॥
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत्॥
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम्।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम्॥'
इति ध्यात्वा महास्नानपूर्व्वकमोडशोपचारादिना बलिदानादिभिः पूजयित्वा आवरणं पूजयेत्॥ * ॥
अथ दशमीकृत्यम्।
'संपूज्य प्रेषणं कुर्य्याद्दशम्यां शावरोत्सवैः॥'
देवीयात्राकाले निर्म्मञ्छनविधिमाह पूजारत्नाकरे देवीपुराणम्।
'भक्त्या पिष्टप्रदीपाद्यैर्घृताश्वत्थादिपल्लवैः।
ओषधीभिस्तु मेध्याभिः सर्व्वबीजैर्यवादिभिः॥
नवम्यां पल्लकाले तु यात्राकाले विशेषतः।
यः कुर्य्यात् श्रद्धया वीर। दद्यान्नीराजनं नरः॥
शङ्खभेर्य्यादिनिनदैर्जयशब्दैश्च पुष्कलैः।
यावतो दिवसान् वीर। दद्यान्नीराजनं शुभम्॥
तावत्कालसहस्राणि दुर्गालोके महीयते।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोके महीयते॥' * ॥
तद्दिने अपराजितापूजनम्। यथा,—
'आश्विने शुक्लपक्षस्य दशम्यां पूजयेत्तथा।
एकादश्यां न कुर्व्वीत पूजनञ्चापराजितम्॥
तद्दिने राजा यात्रां कुर्य्यात्। यथा,—
'दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नृपः।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत्॥
स्वयमशक्तौ खड्गादियात्रा कर्त्तव्या। यथा,—
'कार्य्यवशात्स्वयमगमे भूभर्त्तुः केचिदाहुराचार्य्याः।
छत्रायुधादमिष्टं वैजयिकं निर्गमे कुर्य्यात्॥' * ॥
खञ्जनदर्शनफलादिर्यथा,—
'इत्यागते तु मित्रे यया दिशा खञ्जनं यान्तं नृपः पश्येत्।
तया प्रयातस्य क्षिप्रमरातिर्व्वशमेति॥
कृत्वा नीराजनं राजा बलवृद्ध्यै यथाबलम्।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ॥
पद्मेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः कुशलदः शुचिशाद्वलेषु।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति बहुशः खलु खञ्जरीटः॥
अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम्।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः॥'
अथ विसर्ज्जनम्।
'गीतावादित्रनिर्घोषैर्नीत्वा भगवतीं शिवाम्।
स्रोतोजले प्रक्षिपेयुः क्रीडाकौतुकमङ्गलैः॥
परैर्नाक्षिप्यते यस्तु परं नाक्षिपते तु यः।
तस्य रुष्टा भगवती शापं दद्यात् सुदारुणम्॥'
इति तिथ्यादितत्त्वदुर्गार्च्चनतत्त्वे॥
विसर्ज्जनमन्त्रो यथा,—
"दुर्गे देवि जगन्मातः। स्वस्थानं गच्छ पूजिते।
संवत्सरव्यतीते तु पुनरागमनाय वै॥
निमज्जाम्भसि देवि त्वं चण्डिकाग्रतिमा शुभा।
पुत्रायुर्धनवृद्ध्यर्थं स्थापितासि जले मया॥" * ॥
विसर्ज्जनानन्तरं गृहमागत्य अच्छिद्रावधारणं कृत्वा घटस्थजलेन ग्रभिषेक्तैर्षणमानमभिषिञ्चेत्। यथा,—
"ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञम्मेमहे उपप्रयन्तु मरुतः सुदानवे इन्द्रप्रायुर्भवासचा॥
ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः॥
ब्रह्मणा सहितो शेषो दिक्पालाः पान्तु ते सदा।
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः सुसंयताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽध्वरा नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च॥
औषधानि च रत्नानि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा ह्रदाः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
एते त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये॥"
इति बृहन्नन्दिकेश्वरपुराणपद्धतिः॥ * ॥
अथ दुर्गानाममाहात्म्यम्।
"सवर्गस्य तृतीयोऽर्थः पञ्चमस्वरसंयुतः।
कवर्गस्य तृतीयोऽर्थो वह्निस्तस्योपरि स्थितः॥
द्वितीयस्वरसंयुक्तं नामेदं परिकीर्त्तितम्।
आरोग्यस्य च सम्पत्तेर्ज्ञानस्य च महोदये।
नामेदं परमो हेतुर्मुक्तये भवसङ्गिनाम्।
कलिकाले विशेषेण महापातकिनामपि॥
निस्तारबीजं विज्ञेयं नामसंस्मरणं प्रिये।॥
परदाररतोऽपि स्यात् परद्रव्यापहारकः।
सोऽपि पापात् प्रमुच्येत यदि स्यादतिपातकी॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
एतेभ्योऽपि विमुच्येत यदि नाम स्मरेत् सुधीः॥"
इति रुद्रयामलः॥
"दुर्गा दुर्गेति दुर्गेति दुर्गानाम परं मनुम्।
यो जपेत् सततं चण्डि। जीवन्मुक्तः स मानवः॥
महोत्पाते महारोगे महाविपदि सङ्कटे।
महादुःखे महाशोके महाभयसमुत्थिते॥

यः स्मरेत् सततं दुर्गां जपेत यः परमं मनुम् ।
स जीवलोको देवेशि । नीलकण्ठत्वमवाप्नुयात् ॥"
इति मुण्डमालातन्त्रम् ।
दुर्गाध्यक्षः, पुं, (दुर्गस्य अध्यक्षः ।) दुर्गरक्षकः ।
तस्य लक्षणं यथा,—
"अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राज्ञस्तद्युक्तः सर्व्वकर्म्मसु ॥"
इति मत्स्यपुराणम् ॥
दुर्गानवमी, स्त्री, (दुर्गायाः पूजोपलक्षिता नवमी ।)
कार्त्तिकशुक्लनवमी । सा त्रेतायुगाद्या । तत्र
जगद्धात्रीपूजा कर्त्तव्या । यथा, योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्याञ्च विशेषतः ।
प्रगल्भाञ्च जगद्धात्रीं पूजयेद्दीपमालया ॥
तन्त्रान्तरे ।
'त्रिकालं पूजयेद्दुर्गां मनुनैकाक्षरेण च ।
नानाबलिविधानेन गीतवाद्यपुरःसरम् ॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः ।
कृत्वैव साधकश्रेष्ठो लभेद्राज्यमकण्टकम् ॥'
कुलिकातन्त्रे ।
'कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥'
शक्तिसङ्गमतन्त्रे ।
'कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् ।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् ॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः ।
पूजयित्वा परदिने प्रतिमां तां विसर्ज्जयेत् ॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तम. ।
पुत्त्रपौत्त्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी ॥
दासदासीगणैर्युक्तो मुक्तः स्यात् पापसङ्कटात् ।
विशेषतो मसुयुतां नवमीं प्राप्य साधकः ।
पूजयित्वा त्र्यम्बकीं तां लभते वाञ्छितं फलम् ॥'
भविष्ये ।
'मासैश्चतुर्भिर्यत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर । नवम्यां कार्त्तिकस्य च ॥"
इति तिथितत्त्वम् ॥
दुर्गाङ्कः, पुं, (दुर्गाया ध्याङ्का व्याख्या आङ्का
यस्य ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥
दुर्घोषः, पु, (दुर्दुष्टः घोषो निनादो यस्य ।) भल्लूकः ।
इति राजनिर्घण्टः ॥ निन्दितरवः । तद्वति, त्रि ॥
दुर्जनः, त्रि, (दुर्दुष्टो जनः । "कुगतिप्रादयः ।"
२ । २ । १८ । इति समासः ।) खलः । इत्य-
मरः । ३ । १ । ४७ ॥ (यथा, चाणक्यशतके ।
२४—२५ ।
"दुर्जन. प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥
दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सः ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥")
दुर्जय., पुं, (दुःखेन जीयतेऽसौ । जि जये+खल् ।)
कार्त्तवीर्य्यराजवंशोद्भवानन्तपुत्त्र. । इति कूर्म्म-
पुराणम् ॥ (विष्णुः । यथा, महाभारते । १३ ।
१४९ । ६६ ।
"धर्मावर्त्तो निरुतात्मा दुर्ज्जयो दुरतिक्रमः ॥"
दानवविशेषः । यथा, महाभारते ।१।६५।२२।
"अखिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥"
राक्षसविशेषः । यथा, रामायणे ।३।२६।३०।
"तं दृष्ट्वा निःसृतं पूर्व्वं राक्षसा अपि निःसृताः ।
दुर्जयः काळकाख्यश्च परुषः कालिकामुखः ॥")
त्रि, दुर्ज्जेयः । (यथा, देवीभागवते ।५।८।२२।
"वरदानेन धातुः स दुर्ज्जयो मधुसूदन । ॥")
दुर्जरा, स्त्री, (दुर्दुःखेन जीर्य्यतीति । दुर्+जॄ+
अच् । ततष्टाप् ।) ज्योतिष्मती लता । इति राज-
निर्घण्टः ॥ त्रि, दुर्जरः ॥ (यथा, सुश्रुते ।१।४६।
"स्वादु पाकरसं शाकं दुर्जरं हरिमन्थजम् ॥"
दुर्जयः । यथा, देवीभागवते । १ । १८ । २६ ।
"दुर्जरं वासनाजालं न शान्तिमुपजाति वै ॥")
दुर्जातं, क्ली, (दुर्दुष्टं यथा तथा जातम् । प्रादि-
समासः ।) व्यसनम् । (यथा, रघुः ।१३।७२।
"दुर्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरः प्रहर्त्ता ॥")
असमञ्जसम् । इति त्रिकाण्डशेषः ॥ असम्यग्-
जाते, त्रि । इति मेदिनी । ते, ११४ ॥ (यथा,
महाभारते । १२ । २२४ । ३३ ।
"दौष्कुलेयस्तथा म्लानो दुर्जातः शक्र दृश्यते ॥")
दुर्दान्तः, पु, (दुर्दुःखेन दान्तो दमितः ।) कलहः ।
वत्सतरः । इति राजनिर्घण्टः ॥ अशान्ते, त्रि ।
(यथा, माघे । १२ । २९ ।
"दुर्दान्तमुत्प्लुत्य निरस्तसादिनं
सहासहाकारमलोकयज्जनः ॥")
दुर्द्दिनं, क्ली, (दुर्दुष्टं दिनम् ।) मेघाच्छन्नदिनम् ।
इत्यमरः । १ । ३ । १२ ॥ (यथा, हरिवंशे ।
१६७ । १८ ।
"तुमुलं दुर्द्दिनञ्चासीत् सविद्युत्स्तनयित्नुमत् ।
तद्दुर्द्दिनतलं भित्त्वा नारदः प्रत्यदृश्यत ॥"
घनान्धकारः । यथा, कुमारे । ६ । ४३ ।
"यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः ।
अनभिज्ञास्तमिस्राणां दुर्द्दिनेष्वभिसारिकाः ॥")
वृष्टिः । यथाह साङ्खः ।
"घनान्धकारे वृष्टौ च दुर्द्दिनं कवयो विदुः ॥"
(यथा, रघुः । ४ । ४१ ।
"द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्द्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥"
कुत्सितदिनम् ।)
"सुदिनं दुर्द्दिनञ्चैव सर्व्वं कर्म्मोद्भवे भव ।
तत् कर्म्म तपसा साध्यं कर्म्मणाञ्च शुभाशुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
"यदच्युतकथालापरसपीयूषवर्ज्जितम् ।
तद्दिनं दुर्द्दिनं मन्ये मेघाच्छन्नं न दुर्द्दिनम् ॥"
इत्युद्भटः ॥
(दुर्द्दिनं वर्षः घनान्धकारो वा अस्त्यस्येति ।
अच् । वर्षयुक्ते घनान्धकारविशिष्टे च, त्रि ।
यथा, हरिवंशे । ६७ । ६६ ।
"सम्प्राप्ते दुर्द्दिने काले दुर्द्दिनं भाति वै नभः ॥"
तथा, महाभारते । ८ । ९१ । २३ ।
"जीमूतैश्च दिशः सर्व्वाश्चक्रे तिमिरदुर्द्दिनाः ॥")
दुर्दुरूटः, पु, (दोलयति उत्क्षिपति आस्तिकता-
मिति । दोलि+बाहुलकात् कूटप्रत्ययेन
साधुः ।) नास्तिकः । इति जटाधरः ॥
दुर्द्रिता, स्त्री, लताविशेषः । इति जटाधरः ॥
दुर्द्रुमः, पुं, (दुर्दुष्टो द्रुमः ।) हरित्पलाण्डुः । इति
राजनिर्घण्टः ॥
दुर्धरः(र्द्धरः), पु, (दुर्दुःखेन ध्रियते इति । दुर्+धृ+
"ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।" ३ । ३ ।
१२६ । इति खल् ।) नरकविशेषः । ऋषभौ-
षधिः । इति मेदिनी । रे, १९९ ॥ पारदः । भल्ला-
तकः । इति राजनिर्घण्टः ॥ महिषासुरस्य
सेनापतिविशेषः । यथा, मार्कण्डेये ।८३।१९।
"दुर्द्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्षयम् ॥"
(धृतराष्ट्रपुत्त्रभेदः । यथा, महाभारते । ७ ।
१३३ । ३० ।
"नाम्यधावन्त महेष्वासाः सोदर्य्याः पञ्च भारत ।
दुर्म्मर्षणो दुःसहश्च दुर्म्मदो दुर्धरो जयः ।
पाण्डवं चित्रसन्नाहास्तं प्रतीपमुपाद्रवन् ॥"
शम्बरासुरस्य मन्त्रिविशेषः । यथा, हरिवंशे ।
१६२ । १८ ।
"दुर्धरः केतुमाली च शत्रुहन्ता प्रमर्द्दनः ।
एतैः परिवृतोऽमात्यैर्युयुत्सुः प्रस्थितो रणे ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ८९ ।
तस्य सहस्रनामकथने ।
"दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥"
"न शक्या धारणा यस्य प्रणिधानादिषु
सर्व्वोपाधिविनिर्म्मुक्तत्वात्तथापि तत्प्रसादादतः
किञ्चिद्दुःखेन धार्य्यते जन्मान्तरसहस्रेषु भाव-
नात् तस्मात् दुर्धरः ।
'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥'
इति भगवद्वचनात् ॥" इति तद्भाष्ये शङ्करः ॥
तथा तत्रैव । ४२ श्लोके ।
"सुव्रतो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥"
"पृथिव्यादीनि धारकाण्यन्येन धारयितुमशक्य-
त्वात् न केनापि धारयितुं शक्यते इति दुर्धरः ।
दुःखेन ध्यानसमये मुमुक्षुभिर्हृदयेन धार्य्यते
इति दुर्धरः ।" इति तद्भाष्यम् ॥ एतेन युतपङ्क्ति-
भेदात् नामभेदोत्पत्त्या न द्विरुक्तिः सहस्रनाम-
पूर्त्तिश्च जाता ॥) दुःखधार्य्ये, त्रि । इति हेम-
चन्द्रः ॥ (यथा, महाभारते । १ । १३४ । ९८ ।
"अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ।
गृहाणेदं महाबाहो । विशिष्टमिति दुर्धरम् ॥
अस्त्रं ब्रह्मशिरो नाम सप्रयोगनिवर्त्तनम् ॥"
दुर्जये च । यथा, महाभारते । ७।११७।६ ।
"निर्जित्य दुर्धरं द्रोणं सपदानुगमाहवे ।
हार्द्दिक्यं योधवर्य्यञ्च प्राप्तं मन्ये धनञ्जयम् ॥")
दुर्धर्(र्द्ध)र्षा, स्त्री, (दुर्दुःखेन धृष्यतेऽसौ । दुर्+
धृष+खल् ।) नागदमनी । कन्थारीवृक्षः ।
इति राजनिर्घण्टः ॥ (पु, धृतराष्ट्रपुत्त्रविशेषः ।
यथा, महाभारते । १ । ११७ । ३ ।
"विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः ॥")

दुःसहधर्षणीये, त्रि ॥ (यथा, महाभारते । ६ । १९ । ८ ।
"सुनामा नाम दुर्धर्षो द्वितीयो देवमर्द्दनः ॥"
दुर्ज्जये । यथा, तत्रैव । १ । १३४ । ८० ।
"ततः प्रीतमना द्रोणो मृष्टवानिव स पुनः ।
प्रत्यभाषत दुर्धर्षः पाण्डवानां महारथम् ॥")

दुर्दुरूटः, पुं, (दोलयति उत्क्षिपति गुरुवाक्य-मिति । दुल क उत्क्षेपे + बाहुलकात् ऊट-प्रत्ययेन साधुः लस्य रः ।) युक्तिं विना गुरु-वाक्यमसहमानः । इति सत्त्वबोधिनी ॥

दुर्नाम, [न्] क्ली, (दुष्टं नाम यस्य ।) अर्शो-रोगः । इति राजनिर्घण्टः ॥ (यथा सुश्रुते । १ । ४५ ।
"दध्यम्लं कफपित्तघ्नं लघु वातबलापहम् ।
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनम् ॥"
पित्तश्लेष्मणयोरनयोर्हेतुर्यथा,—
"कट्वम्ललवणोष्णानि विदाहीनि गुरूणि च ।
सेवनादिसतोयेन श्रमाद्व्यायामपीडया ।
यानव्यायामदोषाद्वा दुर्नाम पित्तसम्भवम् ॥
अव्यायामाप्तस्य शीतादपन
शीताद्यभ्यञ्जनसेवनाच ।
गौण्याद्यनाप्तेलसम्भिधियेन
दुर्नामा सञ्जायते श्लेष्मदोषात् ॥"
इति हारीते चिकित्सितस्थाने द्वादशेऽध्याये ॥
चिकित्सास्य यथा,—
"योगाश्वयकृच्छ्रविडङ्गतिलाभयानां
चूर्णं गुडेन सहितन्तु सदोपयोज्यम् ।
दुर्नामकुष्ठगरशोथशकृद्विबन्धा-
नग्नेर्बलं यदवलतो क्रिमिपाण्डुतास्य ॥"
इति योगाद्यचूर्णम् ॥
पञ्चेन्द्रियचतुर्दोषे काथकावशेषताम्रतम् ।
तत्राग्नित्रिफलाघोषपूतिकत्वककालिङ्गकैः ॥
स काश्मर्य्यविडङ्गैस्तु सिद्धं दुर्नामभेषजुत् ।
घृतं सिद्धघृतं नाम बोधिसत्त्वेन भाषितम् ॥
इति सिद्धघृत घृतम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे ॥
"टङ्कणं शौरणं कन्दं पक्वा मौ पुटपाकवत् ।
अद्यात् सतैललवणं दुर्नामविनिवृत्तये ॥"
"चूर्णीकृता षोडश शूरणस्य
भागास्ततोऽर्द्धेन च चित्रकस्य ।
महौषधाद्द्वौ मरिचस्य चैको
गुडेन दुर्नामजयाय पिण्डी ॥"
इति शूरणपिण्डी ॥
इति वाभटे चिकित्सास्थाने अष्टमेऽध्याये ॥
"माणशूरणभल्लातत्रिवृद्दन्तीसमन्वितम् ।
त्रिकत्रयसमायुक्तं लौहं दुर्नामनाशनम् ॥
इति माणाद्यं लौहम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे अर्शोऽधिकारे ॥
"सर्व्वाः स्युर्वलयो येषां दुर्नामभिरुपद्रुताः ।
तेषु प्रतिहतो वायुरपानः सन्निवर्त्तते ॥
ततो व्यानेन सङ्गम्य ज्योतिर्मृद्गाति देहिनाम् ॥"
इति सुश्रुते निदानस्थाने तृतीयेऽध्याये ॥)

दुर्नामकं, क्ली, (दुर्नाम + स्वार्थे संज्ञायां वा कन् ।) अर्शोरोगः । इत्यमरः । २ । ६ । ५४ ॥ (यथा,—
"गजागजाख्यकरस्यदारक
गुडेन यो मोदकमत्युदारकम् ।
अशेषदुर्नामकरोगदारकं
करोति वृद्धं तरुणेव दारकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे ॥)

दुर्नामा, [न्] पुं, स्त्री, (दुर्निन्दितं नाम यस्य ।) दीर्घकोशिका । इत्यमरः । १ । १० । २५ ॥ झिनुक इति भाषा ॥

दुर्नामारिः, पुं (दुर्नाम्नः अर्शोरोगस्य अरिः शत्रुः ।) शूरणः । इति राजनिर्घण्टः ॥

दुर्नाम्नी, स्त्री, (दुर्निन्दितं नाम यस्याः । ङीप् ।) दुर्नामा । इति शब्दरत्नावली ॥

दुर्ब्बलः, त्रि, (दुर्निन्दितं बलं यस्य ।) कृशः । तत्-पर्य्यायः । अमांसः २ छातः ३ । इत्यमरः । ३ । १ । ४४ ॥ क्षामः ४ क्षातः ५ शितः ६ अबलः ७ । इति शब्दरत्नावली ॥ (यथा, देवीभाग-वते । १ । ८ । ५६ ।
"बलवान् जयमाप्नोति दैवाज्जयति दुर्ब्बलः ॥"
शिथिलः । यथा, रघुः । ५ । १२ ।
"आधोपवर्ति प्रति दुर्ब्बलाश-
स्तामित्यपोचद्वरतन्तुशिष्यः ॥"
दुःखर्म्मा । यथा, मनुः । ३ । १५१ ।
"जटिलञ्चानधीयानं दुर्ब्बलं कितवं तथा ।
याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥")

दुर्ब्बला, स्त्री, (दुर्दुष्टं स्वल्पमित्यर्थः, बलं यस्याः ।) अम्लशिम्बिका । इति भावप्रकाशः ॥

दुर्भगा, स्त्री, (दुर्दुष्टं भगं भाग्यं यस्याः ।) पति-स्नेहरहिता । दुया इति भाषा । तत्पर्य्यायः । विरक्ता २ । इति त्रिकाण्डशेषः ॥ विरक्ता ३ निन्द्या ४ सौभाग्यरहिता ५ । इति शब्दरत्ना-वली ॥ (यथा, भागवते । १ । १७ । २६ ।
"शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता सती ॥"
भाग्यहीने, त्रि । यथा, महाभारते । १ । १७० । ७ ।
"कर्म्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत ॥")

दुर्भिक्षं, क्ली, (भिक्षाया अभावः ।) भिक्षाया अप्राप्तिकालः । अकाल इति भाषा । यथा,
"दुर्भिक्षमत्र चरथं चिराय ।" इत्युद्भटः ॥
भिक्षायाः प्रायो निष्फलत्वमित्यव्ययीभावसमासः । यद्देशे यत्काले तद्देशतत्कालयोर्य्यथा शस्यादिकं न जायते तद्देशे तदा याच्यमानद्रव्यालाभात् दुर्भिक्षं जातमिति व्यवह्रियते सद्भिरिति । तत्-कारकवर्षाणि यथा,—
"राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैरुपपीडनम् ।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने ! ॥ १३ ॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम् ।
अनावृष्टिः समाख्याता वर्षे सवत्सरे प्रिये ॥ २० ॥
कचिद्वर्षति पर्ज्जन्यो देशे खण्डमण्डलः ।
दुर्भिक्षं सर्व्वदेशेषु व्यवहारो विपर्य्ययः ॥ ३४ ॥
दुर्भिक्षं जायते सर्व्वा मेदिनी दुःख्यति प्रिये ! ।
क्षये स्रवन्ति तोयानि पीडिता मानवा भुवि ॥ ३५ ॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीडनम् ।
अयने च समाख्याता नात्र कार्य्या विचारणा ॥ ५० ॥
देशभङ्गः सुदुर्भिक्षं समागात् कथयाम्यहम् ।
विश्वस्ते नात्र सन्देहः । दुर्भिक्षं नर्म्मदातटे ॥ ५१ ॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्दे मध्यमा वृष्टिर्दुर्म्मतौ समुपस्थिते ॥ ५५ ॥
दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीडनम् ।
पापरोगो भवेद्देवि ! रक्ताक्षेऽमरवन्दिते ॥ ५८ ॥
रोगो मरणदुर्भिक्षं विरोधोपद्रवाकुलम् ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ॥ ५९ ॥
मेदिनी चलते देवि ! सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये सञ्जायते प्रजा ॥
गौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ॥" ५० ॥
इति ज्योतिस्तत्त्वधृतषष्टिवर्षान्तर्गतवर्षविशेष-फलबोधकभविष्यपुराणीयवचनानि ॥ * ॥
अद्भुतेऽपि दुर्भिक्षं भवति यथा,—
"मांसास्थिनी समादाय श्मशानाद्वा श्ववायसाः ।
ग्रामं नगरमथवा मध्ये पुरस्य प्रविशन्ति चेत् ॥
विकिरन्ति गृहाद्रौ च श्मशानं सा मही भवेत् ।
चौरैश्च हन्यते लोकः परचक्रसमागमः ॥
सग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा ।
अद्भुतानि प्रदृश्यन्ते तत्र देशस्य विद्रवः ॥
अकाले फलपुष्पाणि देशविद्रवकारणम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
"तथाशौचविधिश्चाग्रहणे दोषाभाव इति हार-लताप्रभृतयः ॥ कौर्म्मे ।
सद्यः शौचं समाख्यातं दुर्भिक्षे चाप्युपप्लवे ।
डिम्बाहवे हतानाञ्च विद्युता पार्थिवैर्द्विजैः ॥
सद्यःशौचं समाख्यातं श्वापादिमरणे तथा ॥"
इति शुद्धितत्त्वम् ॥
अपि च गारुडे २२६ अध्याये ।
"दुर्भिक्षयुक्तराष्ट्रे च सूतके मृतकेऽपि वा ।
नियमाश्च न दुष्यन्ति दानधर्म्मरतास्तथा ॥
दीक्षिताश्चाभिषिक्ताश्च व्रततीर्थपरास्तथा ।
दीक्षाकाले विवाहादौ देवद्रोण्यां निमन्त्रिते ॥
पूर्व्वसङ्कल्पिते चापि नाशौचं मृतसूतके ॥"

दुर्म्मनाः, [स्] त्रि, (दुर्दुष्टं मनो यस्य ।) चिन्ता-दिव्याकुलचित्तः । तत्पर्य्यायः । विमनाः २ अन्तर्म्मनाः ३ । इत्यमरः । ३ । १ । ८ ॥ (यथा, भागवते । १ । ६ । १८ ।
"रूपं भगवतो यत्तन्मनःकान्तं शुचापहम् ।
अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्म्मना इव ॥"
शतावर्य्याम्, स्त्री । इति राजनिर्घण्टः ॥ (दुर्दुष्टं मनः इति विग्रहे । दुष्टचित्ते, क्ली । यथा, रामायणे । २ । ३१ । २० ।
"यदि दुःस्थो न रक्षेत भरतो राज्यमुत्तमम् ।
प्राप्य दुर्म्मनसा वीर गर्व्वेण च विशेषतः ॥")

दुर्म्मरा, स्त्री, (मृ + भावे अप् । दुर्दुःखेन मरः मृत्युर्यस्याः । छिन्नायामपि पुनरुत्पत्तेरस्या-स्तथात्वम् ।) दूर्व्वा । इति जटाधरः ॥ श्वेत-दूर्व्वा । इति राजनिर्घण्टः ॥

दुर्म्मुखः, पुं, (दुर्निन्दितं मुखं यस्य ।) वानरविशेषः । (यथा, रामायणे । ४ । ३९ । ३३ ।
"अयुतेन वृतश्चैव सहस्रेण शतेन च ।
ततो यूथपतिर्व्वीरो दुर्म्मुखो नाम वानरः ॥")
नागभेदः । इति मेदिनी । खे, १० ॥ (यथा, हरिवंशे । ३ । ११४ ।
"कुहरः पुष्पदंष्ट्रश्च दुर्म्मुखः ससुखस्तथा ॥")
अश्वः । इति हेमचन्द्रः ।४।२९५ ॥ (सर्पः । इति त्रिकाण्डशेषः । ३ । ३ । ५६ ॥) महिषासुरसेनापतिविशेषः । यथा, मार्कण्डेये । ८३ । १६ ।
"दुर्द्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्षयम् ॥"
(नृपविशेषः । यथा, महाभारते ।२ । ४ । २१ ।
"सङ्ग्रामजिद्दुर्म्मुखश्च उग्रसेनश्च वीर्य्यवान् ॥"
धृतराष्ट्रस्य पुत्त्रविशेषः । यथा,तत्रैव ।१।११७।३।
"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च ॥"
राक्षसविशेषः । यथा, भागवते ।९ । १० । १८ ।
"रक्षःपतिस्तदवलोक्य निकुम्भकुम्भधूम्राक्षदुर्म्मुखसुरान्तनरान्तकादीन् ॥"
यक्षविशेषः । इति ब्रह्मपुराणम् ॥ गणपतेर्गणानामन्यतमः । यथा, महागणपतिस्तोत्रे । ११ ।
"षट्कोणाश्रिषु षट्सु षड्गजमुखाः पाशाङ्कुशाभीरवान्-
बिभ्राणाः प्रमदासखाः पृथुमहाशोणाश्मसुक्ष्लिषः ।
आमोदः पुरतः प्रमोदसुमुखौ तं चाभितो दुर्म्मुखः
पश्चात्पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्त्तेति च ॥"
वर्षविशेषः । यथा, ज्योतिषतत्त्वधृतभविष्यपुराणवचनम् ।
"तुषधान्यक्षयो देवि ! सर्व्वशस्यमहार्घता ।
व्यवहाराश्च नश्यन्ति दुर्म्मुखे दुर्म्मुखाः प्रजाः ॥")
दुर्म्मुखः, त्रि, (दुर्दुःखजनकं मुखं मुखनिःसृतवचनादिकं यस्य ।) अप्रियवादी । तत्पर्य्यायः । मुखरः २ अबद्धमुखः ३ । इत्यमरः ।३।१।३६ ॥ (अप्रियदर्शनम् । यथा, कथासरित्सागरे । १२ । ५२ ।
"पश्ये वसन्तकस्यापि रूपं दन्तुरदुर्म्मुखम् ॥")
दुर्म्मूल्यं, क्ली, (दुर्दु स्थितं मूल्यम् । प्रादिसमासः ।) महार्घम् । इति लोकप्रसिद्धम् ॥
दुर्म्मेधाः, त्रि, (दुर्निन्दिता मेधा धारणावती बुद्धिर्यस्य । "नित्यमसिच् प्रजामेधयोः ।" ५ । ४ । १२२ । इति असिच् ।) मन्दमेधाः । इति व्याकरणम् । (यथा, महाभारते ।३।१०।२६।
"न किञ्चिदुक्ता दुर्म्मेधास्तस्थौ किञ्चिदवाङ्मुखः ॥")
दुर्म्मोहः, पुं, (दुर्निन्दितो मोहो यस्मात् ।) काकतुण्डी । इति राजनिर्घण्टः ॥
दुर्य्योधनः, पुं, (दुर्दुःखेन युध्यतेऽसौ । युध + "भाषायां शासियुधीति ।" युच् ।) स्वनामख्यातकुरुवंशभवराजविशेषः । स धृतराष्ट्रस्य ज्येष्ठपुत्त्रः कुरुपाण्डवयुद्धे भीमेन हतः । तत्पर्य्यायः । कुरुराट् २ गान्धारेयः ३ सुयोधनः ४ । इति त्रिकाण्डशेषः ॥ (अयं कलेरंशेन पृथिव्यामवतीर्णः । यथा, महाभारते ।१ । ६७।८८-८९।
"कलेरंशस्तु सञ्जज्ञे भुवि दुर्य्योधनो नृपः ।
दुर्बुद्धिर्दुर्म्मतिश्चैव कुरूणामयशस्करः ॥
जगतो यस्तु सर्व्वस्य विद्विष्टः कलिपूरुषः ।
यः सर्व्वां घातयामास पृथिवीं पृथिवीपतिः ॥")
दुर्लभः, त्रि, (दुर्दुःखेन लभ्यते इति । दुर + लभ + "ईषद्दुःसुष्विति ।" ३ । ३ । १२६ । इति खल् ।) दुष्प्रापः । इति मेदिनी । भे, १६ ॥ यथा,—
"दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः ।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः ॥"
इति चाणक्ये । ५४ ॥
अतिप्रशस्तः । इति शब्दरत्नावली ॥
"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥"
इति कूर्म्मपुराणम् ॥
प्रियः । इति हेमचन्द्रः ॥
दुर्लभः, पुं, (दुर + लभ + खल् ।) कच्चुरः । इति मेदिनी । भे,१६ ॥ कर्च्चूरः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ८६ ।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥"
"दुर्लभतया दुर्लभः ।
'जन्मान्तरसहस्रेषु तपोदानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णभक्तिः प्रजायते ।'
इति वचनात् भक्त्या लभ्य इति भगवद्वचनाच्च ।"
इति तत्र शाङ्करभाष्यम् ॥)
दुर्लभा, स्त्री, (दुर्लभ + टाप् ।) श्वेतकण्टकारी । दुरालभा । इति राजनिर्घण्टः ॥
दुर्व्व, ई वधे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट् । ईदित्त्वात् निष्ठायामनिट् ।) पञ्चमस्वरी । दूः दुरौ दुरः । ई, दूर्णः । इति दुर्गादासः ॥
दुर्व्वच, त्रि, (दुर्दुःखेन उच्यते । दुर + वच् + खल् ।) दुःखकथ्यम् । यथा, भारविः । २ । २ ।
"अपि वागधिपस्य दुर्व्वचं
वचनन्तद्विदधीत विस्मयम् ॥"
दुर्व्वचः, [स्] क्ली, (दुर्निन्दितं वचः ।) मन्दवाक्यम् । यथा —
"असह्यं दुर्व्वचो ज्ञातेर्मर्म्मान्तरितरौद्रवत् ॥"
इत्युद्भटः ॥
(दुष्टवक्तरि, त्रि ॥)
दुर्व्वर्णं, क्ली, (दुर्निन्दितं सुवर्णाद्यपेक्षयेत्यर्थः वर्णो यस्य ।) रजतम् । इत्यमरः । २ । ९ । ९६ ॥ (यथा, माघे । ४ । २८ ।
"दुर्व्वर्णभित्तिरिह सान्द्रसुधासवर्णा ॥")
एलवालुकम् । इति मेदिनी । णे, ५२ ॥ मन्दवर्णे, त्रि ॥ (यथा, भागवते । ३ । १४ । ४४ ।
"योगैर्हेमेव दुर्व्वर्णं भावयिष्यन्ति साधवः ॥")
दुर्व्वर्णक, क्ली, (दुर्व्वर्ण + स्वार्थे संज्ञायां वा कन् ।) रजतम् । इति हेमचन्द्रः ॥
दुर्व्वाक्, [च] त्रि, (दुर्दुष्टा वाक् यस्य ।) कद्वदः । इति हेमचन्द्रः । ३ । ११ ॥ (यथा, अथर्व्ववेदे । ४ । १७ । ५ ।
"दुर्णाम्नीः सर्व्वा दुर्व्वाचस्ता अस्मन्नाशयामसि ॥")
दुर्दुष्टा वाक् ।) दुष्टवाक्ये, स्त्री ॥ (यथा, महाभारते । २ । ७४ । ८८ ॥
"अतीव जल्पन् दुर्व्वाचो भवतीह विहेठकः ॥")
दुर्व्वादः, पुं, (दुर्दुष्टो वादः ।) स्तुतिपूर्व्वकदुर्व्वाक्यम् । इति जटाधरः ॥ निन्दितवाक्यञ्च ॥
दुर्व्वासाः, [स्] पुं, (दुर्दुष्टं निगूढ़मित्यर्थः वास इव धर्म्मावरणं यस्य । तथा च महाभारतवचनम् ।
"निगूढ़निश्चयं धर्म्मं यं तं दुर्व्वाससं विदुः ॥")
मुनिविशेषः । स अत्रिमुनिपुत्त्रः शङ्करांशजातः । इति श्रीभागवतम् ॥ (यथा, विष्णुपुराणे । १ । ९ । २ ।
"दुर्व्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम् ॥")
तत्पर्य्यायः । कुमारगिः २ । इति त्रिकाण्डशेषः ॥ तस्य भार्य्या और्व्वमुनिकन्या कन्दली । इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ६२ । तस्य सहस्रनामकीर्त्तने ।
"साक्षप्रसादो दुर्व्वासाः सर्व्वसाधुनिषेवितः ॥"
दुर्निन्दितं वासो वस्त्रं यस्य ।) मन्दवस्त्रयुक्ते, त्रि ॥ (यथा, ऋग्वेदे । ७ । १ । १९ ।
"मा नो अग्नेऽवीरते परा दा दुर्व्वाससेऽमतये मा नो अस्यै ॥")
दुर्व्विधः, त्रि, (दुर्दुष्टा विधा यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४९ ॥ खलः । इति मेदिनी । धे, ३१ ॥ मूर्खः । इति शब्दरत्नावली ॥ (यथा, गोः रामायणे । २ । १०६ । ३० ।
"प्राज्ञेष्वन्येषु सत्स्वेषु विद्यमानेषु दुर्व्विधाः ।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थान् प्रवदन्ति ते ॥")
दुर्व्विनीतः, पुं, (वि + नी + भावे क्तः । दुर्दुष्टं विनीतं विनयो यस्य । यद्वा, दुर + वि + नी + क्तः ।) अविनीताश्वः । तत्पर्य्यायः । शूकलः २ । इति हेमचन्द्रः । ४ । ३०१ । अविनीतमात्रे, त्रि ॥ (यथा, पञ्चतन्त्रे । ५ । १७ ।
"कुपुत्त्रोऽपि भवेत् पुंसां हृदयानन्दकारकः ।
दुर्व्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः ॥")
दुर्व्वृत्तः, त्रि, (दुर्दुष्टं वृत्तं चरित्रं यस्य ।) दुर्ज्जनः । यथा,—
"दुर्व्वृत्तवृत्तशमनं तव देवि ! शीलम् ॥"
इति चण्डी ॥
दुश्चरित्रे, क्ली । (यथा, महाभारते ।१।१।१००।
"दुर्व्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवानृषिः ॥")
दुर्हृत्, [द्] त्रि, (दुर्दुष्टं हृदयं यस्य । "सुहृद्दुर्हृदौ मित्रामित्रयोः ।"५।४।१५०। इति निपातनात् हृदयस्य हृद्भावः ।) शत्रुः । इत्यमरः । २ । ८ । १० ॥ (यथा, मार्कण्डेये । २६ । ३४ ।

"मित्राणामुपकाराय दुर्हृदां नाशनाय च ॥")
दुश्चित्ते, त्रि।(यथा, महाभारते ।३।१२।१२।
"अश्मसारमयं नूनं हृदयं मम दुर्हृद ।
यन्मौ यदेनौ दृष्ट्वाय पतितौ नावदीर्यते ॥")
दुर्हृदयः, त्रि, (दुष्टं हृदयं यस्य । अशुभत्वेन न हृद्भावः ।) दुष्टान्तःकरणः । इति शब्दार्थकल्पतरुः ॥
दुल, क उत्क्षेपे । इति कविकल्पद्रुमः ॥ (चुरां-पर-सक-सेट् ।) क, दोलयति धूलिं वायुः । इति दुर्गादासः ॥
दुलिः, पु, (दोलतीति । दुल+"इगुपधात् कित ।" उणां ४ । ११८ । इति इन् ।) मुनिविशेषः । कमठ्याम् स्त्री । इति मेदिनी । ले, २६ ॥
दुली, स्त्री, (दुल+इन् । वा ङीप् ।) दुलिः । इत्यमरटीकायां भरत ॥
दुश्चर', पु, (दुर्दुःखेन चरतीति । दुर्+चर+अच् ।) शम्बूक' । इति हारावली । ११२ ॥ भल्लूकः । इति राजनिर्घण्टः ॥ (दुर्दुःखेन चर्य्यते इति । खल् ।) दुर्गमे, त्रि । (यथा, रामायणे । ३ । २६ । ७ ।
"प्रविष्टो सीतया सार्द्धं दुश्चरं दण्डकं वनम् ॥"
दुश्चरणीये, त्रि । यथा, महाभारते । १२ । २३ । ६ ।
"लभ्यरात्र विधि पार्थ । दुश्चर दुर्ब्बलेन्द्रिये ॥")
दुश्चर्म्मा, [न्] पुं, (दुष्टं चर्म्म यस्य ।) अप्रावृत-मेढ्रः । "यथा, दुश्चर्म्मा गुरुतल्पगः ।" इति स्मृति ॥ तत्पर्य्यायः । द्विनग्नकः २ षण्डः ३ शिपिविष्टः ४ । इति हेमचन्द्रः । ३ । ११८ ॥ कोटरोग । इति राजनिर्घण्टः ॥
दुश्चिक्य, स्त्री, लग्नात् तृतीयस्थानम् । यथा,—
"ख मेषूरणमासाद मदनभे यामित्रमस्तात्मने द्यूनचापि सुहृद्गृहे तु हिबुक मातालमम्भोऽपि च ।
दुश्चिक्यं सहजे वदन्ति मुनयो रिपुफ ततो द्वादशे षट्कोण रिपुमन्दिरे नवममे त्राव त्रिकोण पुन. ॥"
इति दीपिका ॥
दुश्च्यवन , पु, (दुर्दुःखेन च्यवन बहुकालानन्तर पतन यस्य । दुर्दुश्च्यवन' शिवो यस्य । शिवेन अभिभूतत्वात् तथात्वम् । यद्वा, दुर्दुःखेन च्यूयते इति । च्यु ङ गतौ+"छन्दसि गत्यर्थेभ्य' ।" ३ । ३ । १२६ । इति युच् ।) इन्द्रः । इत्यमर । १ । १ । ४७ ॥ (अविचाल्ये, त्रि । यथा, ऋग-वेदे । १० । १०३ । २ ।
"युत्कारेण दुश्च्यवनेन धृष्णुना ॥")
दुष, ई र् य ज्ञौ वैकृते । इति कविकल्पद्रुमः ॥ (दिवां-पर-अक-अनिट् ।) वैकृतमशुद्धीभाव ॥ इर्, अदुषत् अदुक्षत् । अस्मात् पुषादित्वाश्रित्य ङ इत्यन्ये । य, दुष्यति लोक' पापात् । ज्ञौ, दोषः । इति दुर्गादास. ॥
दुष्कर, क्ली, (दुर्दुःखेन क्रियते इति । कृ+खल् ।) आकाशम् । इति शब्दार्थकल्पतरु. ॥ (भावे खल् ।) दुःखेन करणम् । (कर्म्मणि खल् ।) दुष्करणीय क्रियमाणे, त्रि । इति मुग्धबोधम् ॥ (यथा, देवीभागवते । ५ । १ । ३ ।
"वने गत्वा तपस्तप्तं वासुदेवेन दुष्करम् ।
विष्णोरवतारेण शिवस्याराधनं कृतम् ॥")
दुष्कर्म्म, [न्] क्ली, (दुष्टं कर्म्म ।) पापम् । यथा,
"दुष्कर्म्मणा तु या रोगा यान्ति चैव क्रमाच्छमम् ।
जपैः सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत् ॥"
इति शातातपीयकर्म्मविपाकः ॥
(निन्दितकर्म्म ॥ दुष्ट कर्म्म यस्येति विग्रहे । दुष्कर्म्मकारके, त्रि । यथा, महाभारते । ५ । १३२ । २० ।
"ततो वसति दुष्कर्म्मा नरके शाश्वती' समा ॥")
दुष्कुलीन', पुं, चोरनामगन्धद्रव्यम् । इति शब्द-रत्नावली ॥ (दुष्कुले भव । दुष्कुल+पक्षे ख' । दुष्कुलोद्भवे, त्रि । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते । ५ । ३६ । ४६ ।
"दुष्कुलीन कुलीनो वा मर्य्यादां यो न लङ्घयेत् ॥")
दुष्कृत, क्ली, (दुष्ट कृतम् ।) पापम् । इत्यमर. । १ । ४ । २३ ॥ तत्तु तत्कर्त्तुर्मरणानन्तरं तेन सह गच्छति । यथा,—
"गृहादर्था निवर्त्तन्ते श्मशानादपि बान्धवाः ।
सुकृत दुष्कृत लोके गच्छन्तमनुगच्छति ॥
तस्माद्वित्त समासाद्य दैवाद्वा पौरुषादथ ।
दद्यात् सम्यक् द्विजातिभ्यः कीर्त्तनानि च कार-येत् ॥"
इति वह्निपुराणे यमानुशासननामाध्यायः ॥
(दुष्कृते, त्रि । यथा, महाभारते ।८।४३।२० ।
"युष्माकमप्रसादेन दुष्कृतेन च कर्म्मणा ।
यत् पाप वर्द्धतेऽस्माक यत. सो ब्रह्मराक्षसः ॥")
दुष्क्रीत त्रि, (दुर्दुःखेन क्रीयते स्म इति । दुर् + क्री+क्त ।) महार्घम् । यथा,—
"क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीत मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत् तस्मिन्नेवाह्न्यविक्षतम् ॥"
इति प्रायश्चित्ततत्त्वे नारदः ॥
दुष्ख क्ली, (दुष्ट खनति आविष्करोतीति । खन +डः । "डप' च ।" ८ । ३ । ३६ । इति विसर्गस्य ष ।) दुःखम् । इत्यमरटीकायां भरत ॥
दुष्खदिर' पुं, (दुष्ट. खदिर इति प्रादिसमासः ।) खदिरवृक्षभेद. । तत्पर्य्यायः । कान्बोणी २ । कालस्कन्ध ३ गोरटः ४ अमरज ५ पत्रतरु ६ बहुसार ७ सारखदिरः ८ महासारः ९ क्षुद्रखदिर' १० । अस्य गुणा' । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । रक्तप्रसादोत्थदोषकण्डूति विषवीसर्पज्वरकुष्ठोन्मादभूतनाशित्वञ्च । इति राजनिर्घण्ट. ॥
दुष्ट, क्ली, (दुष+क्त ।) कुष्ठम् । इति शब्द चन्द्रिका ॥ कुड़ इति ख्यातम् ॥
दुष्ट,' त्रि, (दुष्यतीति+दुष+कर्त्तरि क्तः ।) दुर्वृत्त । अधम । इति विश्वः ॥ (यथा, महा-भारते ।३।२३३।११ ।
"महाकुलीनाभिरपापिकाभिः
स्त्रीभिः सतीभिस्तव सख्यमस्तु ।
चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्च चलाश्च वर्ज्ज्याः ॥)
दुष्टव्रण, पु, (दुष्टो व्रण इति कर्म्मधारयः ।) शस्त्रो-त्थघुर्घुर' । गड़ा गर इति भाषा । तत्-पर्य्याय' । गलिः २ । इति हेमचन्द्र' ।४।३२८॥
दुष्टा, स्त्री, (दुष्यति स्म योनिदोषैर्येति । दुष+क्त+टाप् ।) पुंश्चली । इति शब्दरत्नावली ॥
दुष्ठु, व, (दुर् निन्दित तिष्ठतीति+दुर्+स्था+"अपदु.सुषु स्थः ।" उणां । १।२६ । इति कुः । "सुषमादिषु च ।" ८।३।८८ । इति सुषमादि-त्वात् षत्वम् ।) निन्दा । इत्यमर' । ३ । ४ । १६ ।
दुष्ठुः, त्रि, (दुर्निन्दितस्तिष्ठतीति+दुर्+स्था+कु. षत्वञ्च ।) अविनीतः । इत्युणादिकोष. ॥
दुष्पत्रः, पु, (दुष्टानि पत्त्राणि यस्य ।) चोरनाम-गन्धद्रव्यम् । इत्यमर' ।२।४।१२८ ॥
दुष्प्रधर्षणी, स्त्री, (दुर्दुःखेन प्रधृष्यते इति । धृष् +कर्म्मणि ल्युट् स्त्रियां ङीप् । यद्वा, भावार्थां दुष्प्रधर्षतीति युच ।) वार्त्ताकी । इत्यमर. । २ । ४ । ११४ ॥ (पु, धृतराष्ट्रपुत्त्रभेदः । यथा, महाभारते । १ । ६७ । ९४ ।
"विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः ॥"
दुःखेन धर्षणीये, त्रि । यथा, रामायणे । ३ । १८ । ६ ।
"प्रविश्य चाग्निशरण तस्यर्षि दुष्प्रधर्षणम् ।
तदेत्युक्त्वाश्रमपद प्रविवेश निवेदितुम् ॥")
दुष्प्रधर्षा, स्त्री, (दु.खेन प्रधृष्यते इति । प्र+धृष +घञ्+टाप् ।) दुरालभा । खर्ज्जूरी । इति राजनिर्घण्टः ॥ (पुं, धृतराष्ट्रपुत्त्रभेदः । यथा, महाभारते । ६ । ६१ । २५ ।
"उग्रो भीमरथो भीमो वीरबाहुरलोलुप' ।
दुर्म्मुखो दुष्प्रधर्षश्च विवित्सुर्विकटः सम' ॥"
(दुःखेन पराभवनीये, त्रि । यथा, महाभारते । ५ । १५१ । ४६ ।
"सारवद्बलमस्माकं दुष्प्रधर्षं दुरासदम् ॥")
दुष्प्रधर्षिणी, स्त्री, (पौनःपुन्येन दुःखेन धृष्यते इति । धृष्+आभीक्ष्ण्ये णिनिः ।) दुष्प्रधर्षणी । इत्यमरटीकायां भरत. ॥ कण्टकारी । इति राजनिर्घण्ट' ॥ इड़ली । इति भावप्रकाश. ॥
दुष्प्रवेशा, स्त्री, (दु खेन प्रविश्यते इति । प्र+विश+कर्म्मणि अच् । टाप् च ।) कन्थारी-वृक्षः । इति राजनिर्घण्ट' ॥ (दुष्प्रवेशनीये, त्रि । यथा, रामायणे । ३ । ६ । २ ।
"प्रांशुप्राचीरपरिक्षिप्त भाकाश नगर समावृतम् ।
दुष्प्रवेश दुरालक्ष्य सूर्य्यमण्डलवर्चसम् ॥")
दुष्मन्त , पुं, (दुष् दोषवती मन्यते शकुन्तलामिति । दुष्+मन्+क्त । निपातनात् साधु ।) चन्द्र-वंशीयराजविशेषः । स ऐलिपुत्त्रः । तस्य पुत्त्रो भरतराजचक्रवर्त्ती । पत्नी शकुन्तला । इति श्रीभागवतम् ॥ (यथा, महाभारते ।१।६८।३।
"पौरवाणां वंशकरो दुष्मन्तो नाम वीर्य्यवान् ।

पृथिव्याश्चतुरन्ताया गोप्ता भरतसत्तम ! ॥”
विवरणमस्य तदध्यायात् विस्तरशो द्रष्टव्यम् ।
दुष्यन्त इत्यपि पाठः ॥)

दुस्पर्शा, स्त्री, पु, (दुःखेन स्पृश्यते इति । दुर्+स्पृश+कर्म्मणि खल् । विसर्गस्य वा लोपः ।) दुरालभा । इत्यमरटीकायां भरतः ॥ (पर्य्यायोऽस्य यथा,
“यासो यवासो दुस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
दुःखस्पर्शे, त्रि ॥

दुस्स्थः, पुं, (दुःखेन तिष्ठतीति । दुः+स्था+कः ।) कुक्कुरः । कुक्कुटः । इति शब्दार्थकल्पतरुः ॥ (दुःस्थिते, त्रि । यथा, भट्टौ । २ । ३८ ।
“वलिर्बबन्धे जलधिर्ममन्थे
जह्रेऽमृतं दैत्यकुलं विजिग्ये ।
कल्पान्तदुस्स्था वसुधा तथोहे
येनैष भारोऽति गुरुर्न तस्य ॥”)

दुह, दर अर्द्दने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) दर, अदुहत् अदोहीत् । अर्द्दनमिह वधः । इति दुर्गादासः ॥

दुह, ल ञ औ दुहि । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-अनिट् ।) धुक् दोहनम् । तच्च यत्नीकरणमिति धातुपारायणिकाः । ञ ल, दोग्धि दुग्धे गां दुग्धं गोमः । स्वयं प्रदुग्धास्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनीति किराते वसूनीति कर्म्मणो विद्यमानतया कर्म्मकर्त्तृत्वाभावात् स्खलितमित्येके । दुहादेरप्रधानकर्म्मविषये कर्म्मकर्त्तृत्वे प्रधानकर्म्मप्रयोगो दुर्निवारः । इति कुलचन्द्रः ॥ स्वमते तु अतएवानयोरौऽपि ढवत्स्वमिति वचनात् प्रपदुग्धेः कर्म्मणि विद्यमानेऽपि कर्म्मकर्त्तृत्वम् । इति दुर्गादासः ॥

दुहिता, [ऋ] स्त्री, (दोग्धि विवाहादिकाले धनादिकमाकृष्य गृह्णातीति । यद्वा, दोग्धि गा इति । आर्षकाले कन्यासु एव गोदोहनभारस्थितेस्तथात्वम् । दुह+“नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।” उणां । २ । ९६ । इति तृच् । निपातनात् गुणाभावः ।) कन्या । इत्यमरः । २ । ६ । २८ ॥ कन्यादानपात्रापात्रं यथा,—
“कृत्वा परीक्षां कान्तस्य दृश्योति कामिनी वरम् ।
वराय गुणहीनाय वृद्धायाज्ञानिने तथा ॥
दरिद्राय च मूर्खाय योगिने कुतसिताय च ।
अत्यन्तकोपयुक्ताय चात्यन्तदुर्मुखाय च ॥
पापलायाङ्गहीनाय चान्धाय वधिराय च ।
जडाय चैव मूर्खाय क्लीवतुल्याय पापिने ॥
ब्रह्महत्या लभेत् सोऽपि यः स्वकन्या ददाति च ।
शान्ताय गुणिने चैव यूने च विदुषेऽपि च ॥
वैष्णवाय सुतां दत्त्वा दशवापीफलं लभेत् ॥”
कन्याविक्रये दोषो यथा,—
“यः कन्यापालनं कृत्वा करोति विक्रयं यदि ।
विपदा धनलोभेन कुम्भीपाकं स गच्छति ॥
कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी ।
कृमिभिर्दंशितः काकैर्यावदिन्द्राश्चतुर्द्दश ॥
मृतश्च व्याधयोनौ च स लभेज्जन्म निश्चितम् ।
विक्रीणीते मांसभारं वहत्येवं दिवानिशम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

कन्यादानफलं यथा,—
“दशवापीसमा कन्या दीयते ब्राह्मणाय तत् ।
वेदज्ञाय पवित्राय चाप्रतिग्रहशालिने ॥
सत्याय च वेदपाठकारिणे सत्यवादिने ।
यस्मै प्रदत्ता कन्या च दशवापीफलप्रदा ॥
त्रिसन्ध्याकारिणे सत्यवादिने गृहशालिने ।
वेदज्ञाय च विप्राय दत्तार्द्धफलदायिनी ॥
प्रतिग्रहगृहीताय सन्ध्याहीनाय निश्चयः ।
मूर्खाय दत्ता कन्या च सा चतुःफलदायिनी ॥
परदाररतायैव याचकाय द्विजाय च ।
शठाय सन्ध्याहीनाय वार्षिकफलदा सुता ॥
सर्व्वसन्ध्याखगायत्रीविहीनाय शठाय च ।
विप्रोद्भवाय दत्ता या वार्षिकफलदा सुता ॥
पापिने शूद्रयाताय विप्रश्चैवोद्भवाय च ।
दत्ता चाण्डालतुल्याय कन्या सा नरकप्रदा ॥
विष्णुभक्ताय विदुषे विप्राय सत्यवादिने ।
जितेन्द्रियाय दत्ता या विंशद्वापीफलप्रदा ॥
षष्टिवर्षसहस्राणि दिव्यरूपं विभाय च ।
एवम्भूताय दत्ता च मोदते विष्णुमन्दिरे ॥
दत्त्वा कन्यां सुशीलाय हराय हरयेऽथवा ।
नारायणस्वरूपश्च भवेदेव श्रुतौ श्रुतम् ॥
विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये ।
स लभेद्धरिदास्यञ्च ध्रुवं विप्रोद्भवाय च ॥” * ॥
विवाहादनन्तरं कन्याया भर्तृगृहगमनसमये पित्रादीनां रोदनं शास्त्रसिद्धम् । यथा दुर्व्वासस और्व्वकन्यायाः कन्दल्या विवाहे ।
“कन्यासमर्पणं कृत्वा मोहादुच्चै रुरोद च ।
मूर्च्छामवाप स मुनिः स्वकन्याविरहातुरः ॥
अपत्यभेदशोकौघः स्वात्मारामं न मुञ्चति ।
क्षणेन चेतनां प्राप्य बोधयामास कन्यकाम् ॥
मूर्च्छितां तातविच्छेदाद्दाहदग्धां शोकसंयुताम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे श्रीकृष्णजन्मखण्डे ॥

दुहितृपतिः, पु, (दुहितुः सुतायाः पतिः । “विभाषा-स्वसृपत्योः ।” ६ । ३ । २४ । इति विभक्तेरलुक् ।) जामाता । इत्यमरटीकासारसुन्दरी ॥

दुह्यं, क्ली, (दुह्यते इति । दुह+“एतिस्तु शासू वृदृजुषः क्यप् ।” ३ । १ । १०६ । इत्यत्र “शंसि दुहिगुहिभ्यो वा ।” इति काशिकोक्तेः क्यप् ।) दोहनयोग्यम् । दोह्यम् । इति व्याकरणम् ॥

दू, ओ ङ य खेदे । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सकं च-सेट् ।) खेद इह उपतप्तीकरणमुपतप्तीभावश्च । ओ, दूनः । ङ य, दूयते दैन्यं जनम् । इति चतुर्भुजः । मां कथं मन्मथ दूयसे इति रघुः । इति दुर्गादासः ॥

दूडभः, त्रि, (दुर्दुःखेन दभ्यते इति । दुर्+दभ+खल् । “दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वञ्च ।” ६ । ३ । १०९ । इत्यस्येति वार्त्तिकोक्त्या उत्वं डत्वञ्च ।) धर्षनशक्तः । विपद्युक्तः । इति संक्षिप्तसारः ॥ (दुर्द्दम्भः । यथा, ऋग्वेदे । १ । १५ । ६ ।
“युवं दक्षं धृतव्रतमित्रावरुणदूलभम् ॥”
“दूडभं दुर्द्दम्भं शत्रुभिर्द्दग्धुं विनाशयितुमशक्यमित्यर्थः ।” “दूडभं दह भस्मीकरणे दुःखेन दह्यते इति दुर्द्दहं ईषद्दुःसुष्विन्यादिनादुरि दभ्युपपदे दभेः खल् अत्ययो बहुलमित्युकारस्य उकारो रेफस्य लोपः दकारस्य डकारो हकारस्य च भकारः ॥” इति तद्भाष्ये सायनः ॥)

दूडाशः, त्रि, (दुःखेन दाश्यते यः । दुर्+दाशि+खल् । “पृषोदरादीनि यथोपदिष्टम् ।” ६ । ३ । १०९ । इत्यस्य “दुरो दाशनाशेति ।” वार्त्तिकोक्त्या उत्वं डत्वञ्च ।) पीडायुक्तः । इति सिद्धान्तकौमुदी ॥ (यथा, अथर्व्ववेदे ।१।१३।१।
“नमस्ते अस्त्वशने येना दूडाशे अस्यसि ॥”)
इन्द्रसाम्नोऽपि ॥

दूढ्यः, त्रि, (दुःखेन ध्यायतीति । दुर्+ध्यै+खल् । “दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वञ्च ।” ६ । ३ । १०९ । इत्यस्य वार्त्तिकोक्त्या उत्वं ढत्वञ्च ।) अधमः । इति सिद्धान्तकौमुदी ॥

दूणाशः, त्रि, (दुःखेन नाश्यते ऽसौ । दुर्+नाशि+खल् । “दुरो दाशनाशेति ।”।६।३।१०९ इत्यस्य वार्त्तिकोक्त्या उत्वं णत्वञ्च ।) दुःखेन नष्टः । इति सिद्धान्तकौमुदी ॥ (नाशयितुमशक्यः । यथा, ऋग्वेदे । ८ । ६३ । ११ ।
“यो दूणाशो वनुष्यता ॥”)

दूतः, पुं, (दूयते वार्त्तावहनादिनेति । दू+“दूसनिभ्यां दीर्घश्च ।” उणां । ३ । ९० । इति क्तः दीर्घश्च ।) वार्त्ताहरः । तत्पर्य्यायः । सन्देशहरः २ । इत्यमरः । २ । ८ । १६ ॥ सन्दिष्टकथकः ३ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
“यथोक्तवादी दूतः स्याद्देशभाषाविशारदः ।
शक्तः क्लेशसहो वाग्मी देशकालविभागवित् ॥
विज्ञातदेशकालश्च दूतः स्यात् स महीक्षितः ।
वक्ता नयस्य यः काले स दूतो नृपतेर्भवेत् ॥”
इति मत्स्यपुराणम् ॥

अपि च ।
“मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः ।
धीरो यथोक्तवादी च एष दूतो विधीयते ॥”
इति चाणक्ये । १०६ ॥

अन्यच्च ।
“परेङ्गितज्ञः परवाक्यकार्य्यस्यापि तत्त्ववित् ।
सदोत्पन्नमतिर्धीरो दूतः स्यात् पृथिवीपतेः ॥
दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम् ।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥
अनुरक्तः शुचिर्द्दक्षः स्मृतिमान्देशकालवित् ।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥
दूत एव हि सन्धत्ते भिनत्त्येव च संहतान् ।
निसृष्टार्थो मितार्थश्च तथा शासनहारकः ॥

दूताख्ययोरमात्यगुणैः समैः पादार्द्धवर्ज्जितैः ।
विम्वध्यार्थं कार्य्यवशात् शासनं न करोति यः ॥
मितार्थः कार्य्यमात्रोक्तौ न कुर्य्यादुत्तरोत्तरम् ।
यथोक्तवादी सन्देशहारको लेखहारकः ॥
तत्र दूतो व्रजन्नेव चिन्तयेदुत्तरोत्तरम् ।
वार्त्ताविशेषं भूपाय झटिति व्यक्तवेश्मनि ॥
दूतो हि न लिखेत् किञ्चित् निर्णेता विनि-
संशयम् ।
पृच्छ्यमानोऽपि न ब्रूयात् स्वामिनः क्वापि
वैशसम् ॥”

इति युक्तिकल्पतरुः ॥ * ॥

अथ दूते वर्ज्जनीयानि । निजप्रसूतेन, श्रीविक्रमो-
न्नयकरवाक्यम् १ प्रभुशोभाकरचेष्टा २ अधर्म-
शीलता ३ दक्षता ४ निर्भयत्वम् ४ । इति कवि-
कल्पलता । (वैद्यकोक्तदूतो यथा,—
“आसुरोपक्रमार्थन्तु दूतो याति भिषग्गृहे ।
तस्य परीक्षणं कार्य्यं येन संलक्ष्यते गदः ॥
खञ्जान्धलस्य वधिरस्य वामनं
खिन्नस्य कुब्जं लघितस्य जीर्णम् ।
श्रान्तं क्षुधार्त्तं भ्रमितस्य दीनं
शस्तं न वै वेदविदो वदन्ति ॥”
“य. कर्कशः क्रोधनपाशपाणि-
र्भिषग्विगर्हीक्षतशीलश्च ।
एते न शस्ताः प्रवदन्ति धीरा
दूता विकारं प्रतिवर्द्धयन्ति ॥
य. काष्ठहस्तोऽश्मपाशपाणि-
र्व्यथातुरो दीनवचाश्च रोदितः ।
प्रक्षिप्तभैक्षोऽगमनोत्सुकोऽपि
वर्ज्ज्यास्तथार्त्तोऽशुभकारिदूतः ॥”
“मकूटहस्तोऽथवा वक्रपादेन तिष्ठति ।
तस्मादाकुञ्चवादी यो न शस्तो वैद्यकर्म्मणि ॥
यथा गच्छति शीघ्रेण व्याधिशोऽत्याय सृज्यति ।
पादौ प्रसार्य्य विशति मस्तके विन्यसेत् करम् ॥
भिनत्ति लोष्टकाष्ठञ्च तृणं स्फोटयते क्वचित् ।
अथवा स्पृशते नासां स्तनं वा स्पृशते पुनः ॥
भूमिं लिखति पादेन रेखां वापि करोति यः ।
निद्रां वा कुरुते यस्तु स दूतोऽरिष्टकारकः ॥
य. श्वेतवस्त्रावृतपूर्णपाणिः
सम्पूर्णसाम्बूलमुखः प्रशस्त. ।
द्विजस्तथा माधवकः सुशील.
प्रशाधिकश्चागते सुखाय ॥”
“आगत्योदीच्यपूर्व्वं मथ वरुणदिशमेशमाश्रित्य
शान्तो
दृष्ट्वा वैद्यं प्रहृष्टः प्रवदति निपुणं नातिनीचं
न चोच्चम् ।
उत्तिष्ठेति प्रसादं कुरु वचनमिदं सौख्यवार्त्तां
तनोति
प्राच्यं स्वार्थं प्रहृष्टं सुखमानदहरं रोगिणां
वैद्यलाभम् ॥
पूर्व्वां दिशं समाश्रित्य प्रशान्तः शान्तया गिरा ।
वदन्ति वैद्यलाभाय रोगिणश्च सुखावहम् ॥
यश्चागत्योपविष्टोऽपि श्लोक वाथ सुभाषितम् ।
वदते शान्तया वाचा वैद्यलाभश्च शान्तये ॥
योऽभिवाद्याशिष वैद्यस्य धर्म्मं संपृच्छती पुनः ।
फलं ददाति पुष्पं वा रोगिणाञ्च सुखावहम् ॥
तस्य सौख्यं वदेत् शान्तिर्यस्य दूता इह विद्धः ।
किमत्र बहुनोक्तेन रम्यो दूत सुखावहः ।”

इति हारीते द्वितीयस्थाने षष्ठोऽध्याये ।)

दूतघ्नी, स्त्री, (दु उपतापे + भावे औणादिकक्तः
दीर्घश्च । दूतं उपतापं हन्तीति । हन + टक् ।
ङीप् ।) कदम्बपुष्पी । इति शब्दचन्द्रिका ॥

दूतिः, स्त्री, (दूयते नायकादिवार्त्ताहरणा-
दिनेति । दु + बाहुलकात् तिः दीर्घश्च । उज्ज्व-
लदत्तः । ४।१७६ ।) दूती । इति शब्दरत्ना-
वली । (यथा, रघुः । १८ । ५३ ।
“प्रतिक्रियाविरचनाभ्यो दूतिसन्दर्शिताभ्यः
समधिकतररूपाः शुद्धसन्तानकामैः ।”)

दूतिका, स्त्री, (दूतिरेव । स्वार्थे कन् । ततष्टाप् ।)
दूती । इति शब्दरत्नावली । (यथा, पञ्च-
तन्त्रे । १ । १७८ ।
“जम्बुको हुडुयुद्धेन वयं चाषाढ़भूतिना ।
दूतिका परकार्य्येण त्रयो दोषाः स्वयं कृताः ॥”)

दूती, स्त्री, (दूति । कृदिकारादिति वा ङीष् ।)
सारिका । इति राजनिर्घण्टः । दौत्यकर्म्मणि-
नियुक्ता स्त्री । स्त्रीपुंसयोः सन्देशप्रापिका । तत्-
पर्य्यायः । सञ्चारिका २ । इत्यमरः । २ । ६ ।
१७ ॥ दूतिः ३ दूतीका ४ दूतिका ५ । इति
शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । २८० ।
“दयितप्रहिता दूतीमालम्ब्य करेण तमसि
गच्छन्ती ।
खेदकुलत्वमनामिदूरादुगौराङ्गि! हनासि ॥”)
दौत्यकामास्वपाञ्छुमा । तस्याः संघट्टनविरह-
निवेदनादीनि कर्म्माणि । इति रसमञ्जरी ॥
(तद्भेदगुणा यथा, साहित्यदर्पणे । ३ । १२६-
१२७ ।
“दूत. सखी नटी दासी धात्रेयी प्रतिवेशिनी ।
बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं
तथा ॥
कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ।
माधुर्य्यं नर्म्मविज्ञानं वाग्मिता चेति तद्गुणाः ।
एता अपि यथौचित्यादुत्तमाधममध्यमाः ॥”)

दूतीका, स्त्री, दूती । इति शब्दरत्नावली ॥

दूत्यं, क्ली, (दूतस्य भावः कर्म्म वा । दूत + “दूत-
वणिग्भ्याञ्च ।” ५।१।१२६। इत्यस्येति वार्त्ति-
कोक्त्या य । वैदिके तु “दूतस्य भागकर्म्मणी ।”
४ । ४ । १२० । इति यः ।) दूतकर्म्म । (यथा,
हरिवंशे । १०६ । ४१ ।
“वचनञ्च यथाज्ञामिद्दूत्ये नः श्लाघयिष्यते ॥”
तथा च ऋग्वेदे । १ । १६१ । १ ।
“किमीयते दूत्यम् ।”) दूतस्य भाव. । इत्यमरः ।
२।८।१६ ॥ दूतस्वभावः । इति मेदिनी । ये,३२॥

दूनः, त्रि, (श्वो दू ङ य खेदे + क्तः । “ओदि-
तश्च ।” ८ । २ । ४५ । इति निष्ठातस्य न ।
यद्वा, दु गतौ + क्त । “दुग्वोर्दीर्घश्च ।” इति
वार्त्तिकोक्त्या तस्य नः दीर्घश्च ।) अधादिना
श्रान्तः । इत्यमरः । ३ । १ । १०२ ॥ उपतप्तः ।
यथा, नैषधे । ३ । ६४ ।
“पिसिन दूने रसने सितापि
तित्तायते हंसकुलावतंस ॥”

दूरं, त्रि, (दुर्दुःखेनेयते प्राप्यते इति । दुर् +
इन् + “दुरीणो लोपश्च ।” उणां २ । २० । रक्
धातोर्लोपश्च ।) अनिकटम् । असन्निकृष्टम् ।
तत्पर्य्याय' । विप्रकृष्टम् २ । इत्यमरः । ३ । १ ।
६८ ॥ व्यवहितम् ३ । इति शब्दरत्नावली ॥
(यथा, हितोपदेशे । १ । ४३ ।
“शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥”)
आके १ पराके २ पराचैः ३ आरे ४ परा-
वतः ५ । इति पञ्च दूरनामानि । इति वेद-
निघण्टौ ३ अध्यायः ॥

दूरदर्शनः, पुं (दूरेऽपि दर्शनं इन्द्रियंस्य ।) गृध्रः ।
इति राजनिर्घण्टः ॥ (दुर्लभे, त्रि । यथा, भाग-
वते । १ । ११ । ८ ।
“अहो सनाथा भवता स्म यद्वयं
त्रैविष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्व्वसौभगम् ॥”)

दूरदर्शी, [न्] पुं, (दूरात् दूरमपि वा पश्यतीति ।
दृश् + णिनिः ।) पण्डितः । इत्यमरः । २।८।४।
गृध्रः । इति त्रिकाण्डशेषः । दीर्घदर्शके, त्रि ॥

दूरदृक्, [श्] पुं, (दूरं दूराद्वा पश्यतीति । दृश् +
क्विप् ।) पण्डितः । इति शब्दरत्नावली ॥ गृध्रः ।
इति हेमचन्द्रः । ४ । ४०१ । दीर्घदर्शके, त्रि ॥

दूरमूलः, पुं, (दूरे असन्निकटे मूलं यस्य ।) मुञ्ज-
तृणम् । इति राजनिर्घण्टः ॥

दूरवेधी, [न्] त्रि, (वेधोऽस्यास्तीति । इनिः ।
दूरात् वेधी ।) दूरात् लक्ष्यभेदकः । तत्पर्य्यायः ।
दूरापाती २ । इति हेमचन्द्रः । ३ । ४३९ ॥

दूरेरितेक्षणः, त्रि, (दूरे ईरिते ईक्षणे यस्य ।)
केकरः । इति शब्दमाला ॥

दूर्य्यं, क्ली, (दूरे परित्याज्यम् । दूर + यत् ।) विष्ठा ।
इति शब्दरत्नावली । (दूराय रोगदूरीकर-
णाय साधु इति यत् ।) शटी । इति राज-
निर्घण्टः ॥

दूर्व्वा, स्त्री, (दुर्व्वते दुर्व्व्यते वा । दुर्व्व हिंसायाम् +
अच् घञ् वा । “उपधायाञ्च ।” ८।२।७८ ।
इति दीर्घः ।) स्वनामख्यातघास. । तत्पर्य्याय. ।
शतपर्व्विका २ सहस्रवीर्य्या ३ भार्गवी ४ रुहा ५
अनन्ता ६ । इत्यमरः ।२।४।१५८॥ तिक्तपर्व्वा ७
दुर्म्मरा ८ । बहुवीर्य्या ९ हरिता १० हरि-
ताली ११ कच्छरुहा १२ ॥ शुक्लायाः पर्य्यायः ।
शतवीर्य्या १ गण्डाली २ शकुलाक्षक. ३
गोलोमी ४ । इति जटाधर' ॥ श्वेतपर्णा ५
सितदूर्व्वा ६ सिता ७ । इति रत्नमाला । मन्दा ८
महावरा ९ । इति शब्दरत्नावली । (यथा,
महाभारते । ३ । ११० । १० ।

"कृष्णाकारेव दूर्व्वेयं संकीर्त्तेव च भूरियम् ॥")
अस्या गुणः । रक्तपित्तकफत्वग्दोषनाशित्वम् ।
इति राजवल्लभः ॥

दूर्व्वाष्टमी, स्त्री, (दूर्व्वा तद्रूपा गौरी तत्प्रिया अष्टमी ।) भाद्रशुक्लाष्टमी । तत्र कर्त्तव्यव्रतविधिर्यथा —
"श्रावणे भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः ।
दूर्व्वां गौरीं गणेशञ्च फलाकारं शिवं यजेत् ॥
फलपुष्पादिभिः सर्व्वैः शम्भुं नमः शिवाय च ।
यजमिमपक्वमन्त्रीयाभ्युच्यते मन्त्रकल्पया ॥"
इति संवत्सरकौमुदीधृतभविष्यपुराणवचनम् ॥ * ॥
तद्व्रतप्रयोगविधिर्यथा,—
पूर्व्वदिने संयमं विधाय तद्दिने प्रातः स्नानाचारादि कृत्वा आसने चोपविश्याचम्य ब्राह्मणान् स्वस्तिवाच्य सूर्य्यार्घ्यं दत्त्वा सङ्कल्पं कुर्य्यात् । विष्णुर्नमोऽद्य भाद्रे मासि शुक्ले पक्षे अष्टम्यां तिथावारभ्यामुकगोत्रा श्रीअमुकी मर्त्यलोकाधिकरणकसुखसौभाग्याविच्छिन्नपुत्रपौत्रादिलाभपूर्व्वकब्रह्मलोकप्राप्तिकामा श्रीविष्णुप्रीतिकामा वा भविष्यपुराणोक्ताष्टवर्षनित्यादिदूर्व्वाष्टमीव्रतमहं करिष्ये । इति सङ्कल्प्य सूक्तं पठित्वा सामान्यार्घ्यादिकं विधाय गणेशादिदेवताः संपूज्य ध्यानं कुर्य्यात् । * । यथा,—
"नीलोत्पलदलश्यामं चतुर्ब्बाहुं किरीटिनम् ।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ॥
श्रीवत्सलक्षणोपेतं श्रिया वाण्या समन्वितम् ॥"
इति ध्यात्वा स्वशिरसि पुष्पं दत्त्वा मानसैरुपचारैः संपूज्यार्घ्यस्थापनं कृत्वा पुनर्ध्यात्वावाह्य पाद्यादिभिः पूजयेत् । एतत् पाद्यं ॐ कृष्णाय नमः । एव क्रमेण संपूज्य आवरणदेवताः पूजयेत् । यथा ॐ शच्यै नमः । एवं दुर्गायै गौर्य्यै श्रियै सरस्वत्यै गङ्गायै दित्यै अदित्यै सुधियायै स्वरस्वत्यै मन्दोदर्य्यै सुभद्रायै शाकम्भर्य्यै जयायै विजयायै रमायै दीप्तायै रेवत्यै दमयन्त्यै शीलायै सुकेश्यै रम्भायै वासुदेवाय देवक्यै विष्णवे महादेवाय सर्व्वेभ्यो देवेभ्यः सर्व्वाभ्यो देवीभ्यः । ततो दूर्व्वां ध्यायेत् । * ।
ॐ नीलोत्पलदलश्यामां सर्व्वदेवैरधिष्ठिताम् ।
विष्णुदेहोद्भवां पुण्यामप्सरोभिरभिष्टुताम् ॥
सर्व्वदेवात्मिकां दूर्व्वाममरां विष्णुरूपिणीम् ।
दिव्यस्त्रीजनधारिणीं सर्व्वार्थकामसम्पदाम् ॥
एवं ध्यात्वा षोडशोपचारैः पूजयेत् ।
इदमासनं ॐ दूर्व्वायै नमः । एवं क्रमेण संपूज्य अष्टधान्ययुक्तक्षीरेण फलानि पक्वान्नं नैवेद्यादिकं दत्त्वा प्रणमेत् ।
"त्वं दूर्व्वेऽमृतनामासि पूजितासि सुरासुरैः ।
सौभाग्यसन्ततिं दत्त्वा सर्व्वकार्य्यकरी भव ॥
यथा शाखाप्रशाखाभिर्व्विस्तृतासि महीतले ।
तथा ममापि सन्तानं देहि त्वमजरामरम् ॥"
ततो भोजनमाचरेत् । नौरक्तं प्रातरेव मङ्गलं कर्म्म महत्पात् । * ।
अथ कथा ।
युधिष्ठिर उवाच ।
"व्रतमेकं समाचक्ष्व विचार्य्य मधुसूदन ! ।
येन सन्ततिविच्छेदो जायते न कदाचन ॥
श्रीकृष्ण उवाच ।
मासि भाद्रपदेऽष्टम्यां शुक्लपक्षे युधिष्ठिर ! ।
दूर्व्वाष्टमीव्रतं नाम या करोति पतिव्रता ॥
न तस्याः क्षयमाप्नोति सन्तानं साप्तपौरुषम् ।
नन्दते वर्द्धते नित्यं यथा दूर्व्वा तथा कुलम् ॥
युधिष्ठिर उवाच ।
कथमेषा समुत्पन्ना कस्माद्दूर्व्वा चिरायुषी ।
कस्माद्वन्द्या पवित्रा च लोके धन्या महीतले ॥
केन वा तद्व्रतं देव । चरितं केन हेतुना ॥
श्रीकृष्ण उवाच ।
क्षीरोदसागरे पूर्व्वं मथ्यमानेऽमृतार्थिना ।
विष्णुना बाहुजङ्घाभ्यां विधृतो मन्दरो गिरिः ॥
भ्रमता तेन वेगेन लोमान्याघर्षितानि वै ।
ऊर्म्मिभिस्तानि रोमाणि क्षीतूक्षिप्तानि तटान्तरे ॥
अजायत शुभा दूर्व्वा रम्या हरितशाद्वला ।
एवमेषा समुत्पन्ना दूर्व्वा विष्णुतनूद्भवा ॥
तस्या उपरि विन्यस्तं मथितामृतमुत्तमम् ।
देवदानवगन्धर्व्वयक्षविद्याधरोरगैः ॥
तत्र येऽमृतकुम्भस्य निपेतुर्व्वारिबिन्दवः ।
तैरियं स्पर्शमासाद्य दूर्व्वा चैवाजरामरा ॥
वन्द्या पवित्रा देवैस्तु सर्व्वदाभ्यर्च्चिता तथा ।
पूजयेत्तां प्रयत्नेन दध्यन्नाद्यैविधैरपि ॥
अष्टम्यां फलपुष्पैस्तु गुवाकैर्नारिकेलकैः ।
द्राक्षाहरीतकीभिश्च मोचकैर्जायकैस्तथा ॥
नागरङ्गैश्च जम्बीरैर्बीजपूरैश्च शोभनैः ।
दध्यक्षतैः पयोभिश्च धूपनैवेद्यदीपकैः ॥
मन्त्रेणानेन राजेन्द्र ! शृणुष्व कथितं मया ।
त्वं दूर्व्वेऽमृतनामासि वन्दितासि सुरासुरैः ॥
सौभाग्यं सन्ततिं दत्त्वा सर्व्वकार्य्यकरी भव ।
यथा शाखाप्रशाखाभिर्व्विस्तृतासि महीतले ॥
तथा ममापि सन्तानं देहि त्वमजरामरम् ।
एवमेव पुरा पार्थ ! पूजिता विदशोत्तमैः ॥
तेषां पत्नीभिरनिशं भगिनीभिस्तथैव च ।
पूजिता च तथा गौर्य्या देव्या रत्या श्रिया तदा ॥
सरस्वत्या गङ्गया च दित्यादित्या शचीसया ।
विन्ध्यवत्या वेदवत्या रुक्मवत्या शचीतया ॥
मन्दोदर्य्या चण्डिकया गायत्र्या दीप्तया तथा ।
मर्त्त्यलोके च वेदवत्या दमयन्त्या शचीतया ॥
सुरभ्या घृताच्या च रम्भया मिश्रकेश्या ।
अप्सरसा मेनकया तथैव नागिकादिभिः ॥
स्त्रीभिरभ्यर्च्चिता दूर्व्वा सौभाग्यसुखदायिनी ।
ब्राह्मीभिः क्षत्रियाभिर्दूर्व्वा संपूजिता शुभे ॥
दत्त्वा पिष्टानि दिव्यानि फलानि विविधानि च ।
तिलपिष्टानि गोधूमचूर्णपिष्टानि पायसम् ॥
भोजयित्वा गुरुश्रेष्ठं ब्राह्मणमपरं तदा ।
ततो सुपूर्णे तद्दिने व्रतं भक्त्या समाहिता ॥
नारी वैश्य शूद्रजाति चापि स्त्रीमहोत्तमम् ।
सर्व्वत्र सुखसौभाग्यपुत्रपौत्रादिभिर्युता ॥
मर्त्त्यलोके चिरं स्थित्वा चतुर्व्वर्गं गता पुनः ।
वसते रमया सार्द्धं यावच्चन्द्रदिवाकरौ ॥
मेघाश्रितेऽमरलक्षे विषदे च मघे
याचाष्टमीमनमदी नभसीव कुर्य्युः ।
दूर्व्वां सदक्षततिलैः प्रतिपूजयेयु-
स्ताः प्राप्नुयुः सकलसिद्धिसमृद्धिसिद्धिम् ॥"
इति भविष्योत्तरे दूर्व्वाष्टमीव्रतकथा समाप्ता ॥

दूलिका, स्त्री, (दूली + स्वार्थे कन् । टाप् पूर्व्वह्रस्वश्च ।) नीली । इति शब्दरत्नावली ॥

दूली, स्त्री, (दूरं दूरत्वमस्या अस्तीति । दूर + अच् । रस्य लः । गौरादित्वात् ङीष् ।) नीली । इति शब्दरत्नावली ॥

दूष्यं, स्त्री, (दूष्यते इति । भावे क्विप् । दूः खेदस्तां श्यायते अन्तर्भूतण्यर्थाद्गमयतीति । दूः + श्यै + कः ।) दूष्यम् । वस्त्रगृहम् । इत्यमरटीकासारसुन्दरी ॥

दूषकः, त्रि, (दूषयतीति । दुष् + णिच् + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) दोषोत्पादकः । तत्पर्य्यायः । पांशनः २ । इति त्रिकाण्डशेषः ॥ (यथा, मनौ । ८ । २६७ ।
"कूटशासनकर्तॄंश्च प्रकृतीनाञ्च दूषकान् ।
स्त्रीबालब्राह्मणघ्नांश्च हन्याद्विट्सेविनस्तथा ॥")

दूषणः, पुं (दूषयतीति । दूषि + ल्यु ।) रावणभ्रातृखरसेनापतिः । इति रामायणम् ॥ (यथा, रघुः । १२ । ४६ ।
"असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥"
दूषि + भावे ल्युट् ।) दोषे, क्ली ॥ (यथा, देवीभागवते । १ । १० । ७४ ।
"वञ्चितोऽहं त्वया पित्रा दूषणं कस्य दीयते ॥")

दूषणारिः, पुं, (दूषणस्य राक्षसस्य अरिः ।) श्रीरामः । इति शब्दरत्नावली ॥

दूषिः, स्त्री, (दूषयतीति । दुष + णिच् + "सर्व्वधातुभ्य इन् ।" उणा । ४ । ११७ । इति इन् ।) दूषिका । इति शब्दरत्नावली ॥

दूषिका, स्त्री, (दूषि + स्वार्थे कन् । टाप् । यद्वा, दूषि + ण्वुल् + टाप् अत इत्वञ्च ।) नेत्रमलम् । इत्यमरः । २ । ६ । ९० । पिचुटि इति भाषा ॥ तत्पर्य्यायः । पिञ्चोटिका २ दूषिः ३ दूषी ४ । इत्यमरटीकायां भरतः ॥ दृषीका ५ पिच्चटः ६ पिच्चटः ७ । इति शब्दरत्नावली ॥ (यथा, मनौ । ५ । १३५ ।
"वसाशुक्रमसृङ्मज्जामूत्रविट्घ्राणकर्णविट् ।
श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः ॥")
तूलिका । इति मेदिनी । षे १०४ । (दूषणकर्त्री स्त्री । यथा, महाभारते । १३ । ११ । ६ ।
"अवदातापवदातायां निवसामि ... - दूषिका ।
यानि या दूषयते ... ॥")

दूषितः, त्रि, (दुष + णिच् + क्त ।) जातदोषः । (यथा, महाभारते । १ । ११० । २६ ।

"ततो गर्व्वमिति ख्यातं विज्ञाय दृढ़धन्विनाम् ।
दूषितः सहसा भावो धृतराष्ट्रस्य पाण्डुषु ॥")
मिथ्यापवादयुक्तः । तत्पर्य्यायः । अभिशस्तः २ वाच्यः ३ चारितः ४ । इति हेमचन्द्रः । ३ । १०० ॥ आचारितः ५ । इति शब्दरत्नावली ॥

दूषिता, स्त्री, (दूषित+टाप् ।) दूषणप्राप्ता कन्या । तत्पर्य्यायः । सक्षता २ धर्षकारिणी ३ प्रमादिका ४ । इति शब्दरत्नावली ॥

दूषी, स्त्री, (दूषि+"कृदिकारादक्तिनः ।" वा ङीष् ।) दूषिका । इत्यमरटीकायां भरतः ॥

दूषीका, स्त्री, (दूषयतीति+दूषि+"कषिदूषिभ्यामीकन् ।" उणां ४ । १६ । इति । ईकन् ततष्टाप् ।) दूषिका । इति शब्दरत्नावली ॥

दूषीविष, क्ली, (दूषयतीति । दूषि+बाहुलकात् ईः । ततः कर्म्मधारयः ।) औषधादिभिरवीर्य्यं विषम् । इति हेमचन्द्रः । ४ । २८० ॥ आदिपदात् दावाग्निवायुरौद्रशोषितविषम् । स्वभावतो गुणहीनं विषम् । अस्य गुणः । उदररोगशोफगल्लकुष्ठप्रमेहनाशित्वम् । इति राजवल्लभः ॥ यथा,—
"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितं वा ।
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति ॥"
इति माधवकरः ॥

दूष्यं, क्ली, (दूष्यते इति । दुष्+णिच्+"अचो यत् ।" ३ । १ । ९७ । इति यत् । "दोषो णौ ।" ६ । ४ । ९० । इति उपधाया ऊत्वम् ।) वस्त्रम् । वस्त्रगृहम् । इति मेदिनी । ये, ३१ ॥ पूयम् । इति हेमचन्द्रः । ३ । २८८ ॥

दूष्यः, त्रि, (दुष+णिच्+यत् ।) दूषणीयः । इति मेदिनी । ये, ३१ ॥ (यथा, महाभारते । १२ । १६५ । ३२ ।
"क्षीरञ्च दुग्धमात्रापि विवत्सायास्तथा पिबेत् ।
अदूष्या हि स्त्रियो रत्नमाप इत्येव धर्म्मतः ॥"
निन्द्यः । इति त्रिकाण्डशेषः । ३ । ३ । ३१३ ॥ यथा, कामन्दकीयनीतिसारे । ६ । ६ ।
"राज्योपघातं कुर्व्वाणा ये पापा राजवल्लभाः ।
एकैकशः संहता वा दूष्यास्तान् परिचक्षते ॥")

दूष्या, स्त्री, (दूष्यते इति । दुष+णिच्+यत्+टाप् ।) हस्तिकक्षरज्जुः । काचदड़ि इति भाषा ॥ तत्पर्य्यायः । कक्ष्या २ वरत्रा ३ । इति हेमचन्द्रः । ४ । २९८ ॥ चूषा ४ । इत्यमरः । २ । ८ । ४२ ॥

दृ, ङ श आदरे । इति कविकल्पद्रुमः । (तुदां-आत्मं-सकं-अनिट् ।) आदरः प्रीत्या सम्भ्रमः । ङ श, द्रियते गुरुं लोकः । मा सुवन्तोऽप्यमित्रेण । इति दुर्गादासः ॥

दृक्, [श्] स्त्री, (पश्यत्यनेनेति । दृश्+करणे क्विप् ।) चक्षुः । इत्यमरः । २ । ६ । ९४ ॥ (यथा, साहित्यदर्पणे ।
"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥"
भावे क्विप् ।) दर्शनम् । बुद्धिः । इति मेदिनी । शे, ८ ॥ (यथा, भागवते । २ । ९ । ५ ।
"तां नाध्यगच्छद्दृशमत्र सम्मतां
प्रपञ्चनिर्म्माणविधिर्यया भवेत् ॥")

दृक्, [श्] त्रि, (पश्यतीति । दृश्+कर्त्तरि क्विन् ।) बोधकः । इति मेदिनी । शे, ८ ॥ (यथा, भागवते । ४ । २२ । ९ ।
"यथा सर्व्वदृशं सर्व्व आत्मानं येऽस्य हेतवः ॥")
ज्ञाता । इति शब्दरत्नावली ॥

दृक, क्ली, (दीर्य्यते इति । दृ विदारे+बाहुलकात् कक् ह्रस्वश्च ।) छिद्रम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दृक्काणः, पुं, द्रेक्काणः । इति जातकम् ॥

दृक्कर्णः, पुं, (दृशौ नेत्रे एव कर्णौ यस्य ।) सर्पः । इति हेमचन्द्रः । ४ । ३६९ ॥ यदाह कश्चित् ।
"दृक्कर्णो मशकः शिला सरसिजं बाणो जलौकाः शुकः
शुभ्रांशुर्गणको कुलोत्तमवधी मान्यो नभश्चातकः ।
वादी चक्रधरो बको मधुलिहो श्वा नाटिको लम्पटः
श्रीमद्भोज ! भवन्तु विंशतिरमी त्वद्वैरिणां सेवकाः ॥")

दृक्काणः, पुं, द्रेक्काणः । इति ज्योतिषम् ॥

दृक्प्रसादा, स्त्री (दृशौ नेत्रौ प्रसादयतीति । दृश्+प्र+सद्+णिच्+अच् ।) कुलत्था । कुलत्थाञ्जनम् । इति राजनिर्घण्टः ॥

दृक्प्रिया, स्त्री, (दृशोर्नेत्रयोः प्रिया ।) शोभा । इति राजनिर्घण्टः ॥

दृक्श्रुतिः, पुं, (दृशौ एव श्रुती कर्णौ यस्य ।) सर्पः । इति हलायुधः ॥

दृगध्यक्षः, पुं, (दृशोर्नेत्रयोरध्यक्षः अधिष्ठातृदेवः ।) सूर्य्यः । इति शब्दार्थकल्पतरुः ॥

दृग्गोलः, पुं, खगोलान्तर्गतगोलविशेषः । यथा,
"खस्वस्तिके चाधःस्वस्तिके चाक्ष कीलकौ कृत्वा तयोः प्रोतं अथ दृङ्मण्डलं कार्य्यं तत् पूर्व्ववृत्तवत् । किञ्चिन्न्यूनं कार्य्यं यथा खगोलान्तर्भ्रमति यद्येक एव ग्रहगोलस्तदेकमेव दृङ्मण्डलम् । यो यो ग्रहो यत्र यत्र वर्त्तते तस्य तस्योपरि परिभ्रमेदेव विन्यस्य दृग्ज्याशङ्क्वादिकं दर्शनीयम् । अथवा पृथक् पृथगष्टौ दृङ्मण्डलानि रचयेत् । तत्राष्टम विचित्रमण्डलस्य तत्र दृक्क्षेपमण्डलं तस्मिन् खगोले ध्रुवचिह्नयोर्नलिकाद्वय बद्धा तन्नलिकाधारमेव खगोलाद्बहिरङ्गुलचयान्तरे दृग्गोलं रचयेत् । कथितैः खगोलवृत्तैर्वक्ष्यमाणैर्भगोलवृत्तैः क्रान्तिमण्डलाद्यैर्यो निबध्यते स दृग्गोलः । यतोऽस्या कुण्डासमशङ्कुवाच्यस्तेनाक्षि दृग्गोलजातानि भगोलवृत्तानि खगोलवृत्तमिलितानि उत्पद्यन्ते गोलबन्धे सम्यङ्नोपलभ्यत इति दृग्गोलः कृतः ।" इति सिद्धान्तशिरोमणिः ॥

दृग्विष, पुं, (दृशि नेत्रे विषं यस्य ।) नागः । इति हेमचन्द्रः । ४ । ३७८ ॥

दृढं, क्ली, (दृह वृद्धौ+क्तप्रत्ययेन निपातनात् साधुः ।) लौहम् । इति शब्दचन्द्रिका ॥ अतिशयः । इत्यमरः । ३ । १ । ७६ ॥

दृढ़ः, त्रि, (दृह+क्तः । निपातनात् साधुः ।) स्थूलः । अतिशयः । प्रगाढ़ः । (यथा, देवीभागवते । १ । ६ । ३१ ।
"तदाकाशे श्रुतं ताभ्यां वाग्बीजं सुमनोहरम् ।
गृहीतञ्च ततस्ताभ्यां तस्याभ्यासो दृढ़ः कृतः ॥")
बलवान् । इति मेदिनी । ढे, २ ॥ कठिनः । इत्यमरः । ३ । ३ । ४४ ॥

दृढ़ः, पुं, रूपकभेदः । यथा,—
"दृढ़ः प्रौढ़ोऽथ खचरो विभवश्चतुरङ्गमः ।
निःशारुकः प्रतितालः कथिताः सप्त रूपकाः ॥"
तल्लक्षणं यथा,—
"दृढ़ाख्यः स्यात् लघुद्वन्द्वं ताले च हंसलीलके ।
चतुर्दशाक्षरैर्युक्तः शृङ्गारे परिकीर्त्तितः ॥"
इति सङ्गीतदामोदरः ॥
(त्रयोदशमनो रौच्यस्य पुत्रविशेषः । यथा, हरिवंशे । ७ । ८३ ।
"सुनेत्रः क्षत्रवृद्धिश्च सुतपा निर्भयो दृढ़ः ।
रौच्यस्यैते मनोः पुत्रा अन्तरे तु त्रयोदशे ॥")

दृढ़कण्टकः, पुं, (दृढ़ानि कठिनानि कण्टकानि यस्य ।) क्षुद्रफलकवृक्षः । इति शब्दचन्द्रिका ॥ घकाँकड़ा इति भाषा ॥

दृढ़काण्ड, क्ली, (दृढ़ं काण्डं यस्य ।) दीर्घरोहिषकम् । इति राजनिर्घण्टः ॥

दृढ़काण्डः, पुं, (दृढ़ः कठिनः काण्डो यस्य ।) वंशः । इति राजनिर्घण्टः ॥

दृढ़काण्डा, स्त्री, (दृढ़ः कठिनः काण्डो यस्याः ।) पातालगरुडीलता । इति राजनिर्घण्टः ॥

दृढ़क्षुरा, स्त्री, (दृढ़ः क्षुर इवाग्रभागो यस्याः । यद्वा, दृढ़ः क्षुर इव पत्रमस्त्यस्या इति अर्श आदिभ्योऽच् ततष्टाप् ।) वल्वजा । इति राजनिर्घण्टः ॥

दृढ़गात्रिका, स्त्री, (दृढ़ं गात्रमस्याः । कप् । ततष्टापि अत इत्वम् ।) मत्स्यण्डी । इति शब्दचन्द्रिका ॥

दृढ़ग्रन्थिः, पुं, (दृढ़ो ग्रन्थिर्यस्य ।) वंशः । इति राजनिर्घण्टः ॥

दृढ़च्छद, क्ली, (दृढ़श्छदो यस्य ।) दीर्घरोहिषकम् । इति राजनिर्घण्टः ॥

दृढ़तरुः, पुं, (दृढ़स्तरुश्च ।) धववृक्षः । इति राजनिर्घण्टः ॥

दृढ़त्वचः, पुं, (दृढ़ं कठिनं त्वक् यस्य ।) मुञ्जतृणम् । इति राजनिर्घण्टः ॥

दृढ़त्वचा, स्त्री, (दृढ़ं त्वक् यस्याः ।) वल्वजा । इति राजनिर्घण्टः ॥

दृढ़त्वक्, [च्] पुं, (दृढ़ा त्वक् यस्य ।) यावनालशरः । इति राजनिर्घण्टः ॥

दृढ़दंशकः, पुं, (दृढ़ं यथा तथा दशतीति । दन्श+ण्वुल् ।) जलजन्तुविशेषः । इति शब्दार्थकल्पतरुः ॥ हाङ्गर इति भाषा ॥

दृढनीरः, पुं, (दृढं प्रचुरं नीरं यस्मिन्निति ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

दृढपत्रः, पुं, (दृढानि कठिनानि पत्राणि यस्य ।) वंशः । इति राजनिर्घण्टः ॥

दृढपत्री, स्त्री, (दृढानि पत्राणि यस्याः । गौरादित्वात् ङीष् ।) वल्वजा । इति राजनिर्घण्टः ॥

दृढपादा, स्त्री, (दृढः पादो मूलं यस्याः ।) यवतिक्ता । इति राजनिर्घण्टः ॥

दृढपादी, स्त्री, (दृढः कठिनः पादो मूलं यस्याः । गौरादित्वात् ङीष् ।) भूम्यामलकी । इति राजनिर्घण्टः ॥

दृढप्ररोहः, पुं, (दृढः प्ररोहोऽङ्कुरो यस्य ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

दृढफलः, पुं, (दृढं कठिनं फलं यस्य ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

दृढबन्धिनी, स्त्री, (दृढं यथा तथा बध्नातीति । बन्ध+णिनिः । ङीप् ।) श्यामालता । इति शब्दचन्द्रिका ॥

दृढमुष्टिः, पुं, (दृढा मुष्टिर्धारणाय यस्य ।) खड्गादिः । (दृढा दानाद्यभावात् कठिना मुष्टिर्यस्य ।) कृपणे, त्रि । इति विश्वः । टे, ६५ ॥ (दृढमुष्टिधारकः । यथा, हरिवंशे । २० । ६८ । "निगृहीतः कन्धरायां शिशुना दृढमुष्टिना ॥")

दृढमूलः, पुं, (दृढं मूलं यस्य ।) मुञ्जतृणम् । मन्थानकतृणम् । इति राजनिर्घण्टः ॥ नारिकेलः । इति शब्दार्थकल्पतरुः ॥

दृढरङ्गा, स्त्री, (दृढः स्थिरः रङ्गो रागो यस्याः ।) स्फटी । इति राजनिर्घण्टः ॥

दृढलता, स्त्री, (दृढा कठिना लता ।) पातालगरुडी । इति राजनिर्घण्टः ॥

दृढलोमा, [न्] पुं, (दृढानि लोमानि यस्य ।) शूकरः । इति शब्दचन्द्रिका ॥ कठिनलोमयुक्ते, त्रि ॥

दृढवल्कलः, पुं, (दृढं वल्कलं त्वग् यस्य ।) लकुचः । पूगः । इति राजनिर्घण्टः ॥

दृढवल्का, स्त्री, (दृढं वल्कं यस्याः ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

दृढबीजः, पुं, (दृढं बीजमस्य ।) चक्रमर्द्दः । बदरः । वर्व्वूरः । इति राजनिर्घण्टः ॥

दृढसन्धिः, त्रि, (दृढः स्थूलः सन्धिर्यस्य ।) निश्छिद्रः । तत्पर्य्यायः । संहतः २ । इत्यमरः । ३ । १ । ७५ ॥

दृढसूत्रिका, स्त्री, (सूत्रमस्त्यस्या इति । सूत्र+ठन् । दृढा कठिना सूत्रिका चेति कर्म्मधारयः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

दृढस्कन्धः, पुं, (दृढः स्कन्धो यस्य ।) क्षीरिकावृक्षः । इति जटाधरः ॥ (दृढस्कन्धविशिष्टे, त्रि ॥)

दृढाङ्गं, क्ली, (दृढं अङ्गं यस्य । तादृशपदार्थस्य कठिनत्वात् तथात्वम् ।) हीरकम् । इति राजनिर्घण्टः ॥ (कठिनाङ्गविशिष्टे, त्रि ॥)

दृतः, त्रि, (दृ+क्तः ।) आदृतः । आदरार्थदृधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥

दृता, स्त्री, (द्रियते स्मेति । दृ+कर्म्मणि क्तः । टाप् । भिषग्भिर्बहुधाधिप्रयोगेषु कृतादरत्वादस्यास्तथात्वम् ।) जीरकः । इति शब्दचन्द्रिका ॥

दृतिः, पुं, (दृणातीति । दॄ विदारे+"दृणातेर्ह्रस्वश्च ।" उणां ।४।१८३। इति तिः ह्रस्वश्च ।) चर्म्मपुटकः । अस्य पर्य्यायः । खल्लः २ । इति हेमचन्द्रः । ४ । ६१ ॥ (यथा, मनुः ।२ । ९९ ।
"इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम् ॥")
मत्स्यः । इति मेदिनी । ते, २६ ॥ (गलकम्बलः । यथा, महाभारते । १३ । ७९ । १८ ।
"सवत्सां पीवरीं दत्त्वा दृतिकण्ठामलङ्कृताम् ।
वैश्वदेवमसंबाधं स्थानं श्रेष्ठं प्रपद्यते ॥"
"दृतिकण्ठीं प्रलम्बगलकम्बलाम् ।" इति तट्टीकायां नीलकण्ठः ॥ मेघः । इति निघण्टुः ।१।१०॥ यथा ऋग्वेदे । ७ ।१०३ । २ ।
"दिव्या आपो अभि यदेनमायन्
दृतिं न शुष्कं सरसी शयानम् ॥")

दृतिधारकः, पुं, (दृतिश्चर्म्मपुटकस्तदाकारं धारयतीति । धारि+"ण्वुल् तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) वृक्षविशेषः । आकनपाता इति भाषा । तत्पर्य्यायः । आनन्दी २ ऋषिकाराधूः ३ वामनः ४ । इति शब्दचन्द्रिका ॥

दृतिहरिः, पुं, (दृतिं चर्म्ममयद्रव्यं हरतीति । दृति+हृ+"हरतेर्दृतिनाथयोः पशौ ।" ३ । २ । २५ । इति इन् ।) कुक्कुरः । इति मुग्धबोधव्याकरणम् ॥

दृन्, य, हिंसा । इति मुग्धबोधटीकायां दुर्गादासः ॥

दृन्फ, प श उत्क्लेशे । इति कविकल्पद्रुमः ॥ (तुदां परं सकं सेट् ।) दन्त्यवर्गतृतीयादिः । सप्तमस्वरी । प श, दृम्फति । श, दृफति चौरं राजा क्लिश्नातीत्यर्थः । ददृम्फ ददर्फ । इति दुर्गादासः ॥

दृन्भूः, स्त्री, (दृम्फतीति । दृन्फ+"अन्दूदृन्भूजम्बूकम्बूकफेलूकर्कन्धूदिधिषूः ।" उणां ।१।९५। इति कूप्रत्ययान्तो निपातितः ।) सर्पः । चक्रम् । इति मेदिनी । मे, ५ ॥ (क्वचित् दृन्फूरिति पाठोऽपि दृश्यते ॥)

दृन्भूः, पुं, (दृन्फ+कूः । निपातनात् साधुः ।) वज्रम् । सूर्य्यः । इति हेमचन्द्रः ॥ राजा । इति शब्दरत्नावली ॥ अन्तकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दृप, कि सन्दीपने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे-भ्वां-परं-सकं-सेट् ।) कि, दर्पयति दर्पति । इति दुर्गादासः ॥

दृप, ष य ऌ इर् हर्षे । गर्व्वे । इति कविकल्पद्रुमः ॥ (दिवां-उभं-अकं-वेट् ।) ष, दृप्तोऽस्ति । य, दृप्यति । ऌ, दर्पिष्यति दर्प्स्यति । इर्, अदृपत् अद्राप्सीत् अदार्प्सीत् अदर्पीत् । इति दुर्गादासः ॥

दृप, श वाधने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, दृपति दर्पिता । बाधनं विहतिः । इति दुर्गादासः ॥

दृप्तः, त्रि, (दृप्यतीति । दृप्+वर्त्तमाने कर्त्तरि क्तः ।) गर्व्वितः । इति धरणिः ॥ (यथा, महाभारते । १ । १ । १६२ ।
"यदाश्रौषं कालकेयास्ततस्ते
पौलोमानो वरदानाच्च दृप्ताः ।
देवैरजेया निर्ज्जितास्त्वार्ज्जुनेन
तदा नाशंसे विजयाय सञ्जय ॥")

दृप्रः, त्रि, (दृपति वाधते इति । दृप्+"स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् ।) दृप्रः । इत्युणादिकोषः ॥ (बलवान् । इत्युज्ज्वलदत्तः ॥)

दृफ, प श उत्क्लेशे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प श, दृम्फति । श, दृफति चौरं राजा क्लिश्नातीत्यर्थः । ददर्फ । इति दुर्गादासः ॥

दृब्धः, त्रि, (दृभ्यते ग्रथ्यते इति । दृभ+कर्म्मणि क्तः ।) ग्रथितः । इत्यमरः । ३ । १ । ८६ ॥ (दृभ+कर्त्तरि क्तः ।) भीतः । इति भयार्थदृभधातुदर्शनात् ॥

दृभ, ई कि भये । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-अकं-सेट् ।) कि, दर्भयति दर्भति । ई, दृब्धः । रमानाथस्तु दृ भी इति धातुद्वयं मत्वा दारयति दरति भाययति भयति इत्याह । इति दुर्गादासः ।

दृभ, श ई कि गुम्फने । इति कविकल्पद्रुमः ॥ (तुदां-चुरां पक्षे भ्वां-सकं-सेट् ।) श, दृभति । ई, दृब्धः । कि, दर्भयति दर्भति । गुम्फनं ग्रन्थनम् । इति दुर्गादासः ॥

दृम्प, ष क ङ संघाते । इति कविकल्पद्रुमः ॥ (चुरां-उभं-आत्मं च-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । सप्तमस्वरी । ष क, दृम्पयति दृम्पयते । ङ, दृम्पयते । संघातो राशीकरणम् । एषः केश्चिन्न मन्यते । इति दुर्गादासः ॥

दृन्फूः, स्त्री, (दृम्फति क्लिश्नातीति । दृन्फ+"अन्दूदृम्भूजम्बूति ।" उणां । १ । ९५ । इति कूः । निपातनात् साधुः ।) सर्पः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दृम्भूः, स्त्री, (दृम्फतीति+दृन्फ्+कूः । निपातनात् साधुः ।) दृन्भूः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दृश, इर् औ प्रेक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) इर्, अदर्शत् अद्राक्षीत् । औ, द्रष्टा । प्रेक्षश्चाक्षुषज्ञानम् । पश्यति चन्द्रं लोकः । ततः स ददृशे च तौ इति अतीहारे आत्मनेपदम् । कदा द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागरथि । स्व वपुरिति गणकृतानित्यत्वात् । इति दुर्गादासः ॥

दृशत्, [द्] स्त्री, (दृषत् । पृषोदरादित्वात् साधु ।) पाषाणः । इत्यमरः । २ । ३ । ४ ॥ निष्पेषणशिलापट्टम् । इति मेदिनी । दे, ३२ ॥

दृषद्वती, स्त्री, (दृषत् पाषाणोऽस्यास्तीति । दृषत्+मतुप् मस्य वः ।) नदीविशेषः । सा आर्य्यावर्त्तस्य पूर्व्वसीमा । (यथा, महाभारते । ३ । ८३ । ४ ।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च ।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे ॥")
कात्यायनी । इति मेदिनी । ते, १६८ ॥

दृशा, स्त्री, (दृश्+पाचिकटाप् ।) चक्षुः । इति शब्दचन्द्रिका ॥

दृशाकाङ्क्ष्यं, क्ली, (दृशा दृशया वा आकाङ्क्ष्यं अभिलषणीयम् ।) पद्मम् । इति शब्दचन्द्रिका ॥

दृशान, क्ली, (दृश्यते अनेनेति । दृश्+आनच् ।) ज्योतिः । इति मेदिनी । ने, ७५ ॥

दृशानः, पुं, (पश्यतीति । दृश्+"युधिबुधिदृशः किच ।" उणां । २ । ६० । इति आनच् । स च कित् ।) आचार्य्यः । इत्युणादिकोषः ॥ लोकपालः । ब्राह्मणः । उपाध्यायः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ विरोचनः । इति मेदिनी । ने, ७५ ॥ (दृश्यते इति । कर्म्मणि आनच् । दृश्यमाने, त्रि । यथा, ऋग्वेदे ।१०। ४५ । ८ ।
"दृशानो रुक्म उर्विया व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ॥")

दृशिः, } स्त्री, (दृश्यतेऽनयेति । दृश्+इन् । स च
दृशी, } कित् । वा ङीष् ।) चक्षुः । इति शब्दरत्नावली ॥ (यथा,—
"किं सम्भृतं रुचिरयोर्द्विजशृङ्गयोस्ते
मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ॥"
इति भागवते । ५ । २ । १२ ।
चैतन्यं पुरुषः । यथा, पातञ्जलसूत्रम् । २।२५ ।
"तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम् ।"
"तस्या अविद्याया अभावात् नाशात् संयोगाभाव, संयोगस्य नाशो भवतीति शेषः । तत् हानं संयोगविगमः । दृशेः पुरुषस्य कैवल्य मुक्तिरिति बोध्यते ॥" दृकशक्तिः । यथा, तत्रैव ।२ । २० ।
"द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ।"
दृशिमात्र इति दृक्शक्तिरेव विशेषेण परामृष्टेत्यर्थः ।" इति भाष्यम् ॥ दर्शनम् । यथा, ऋग्वेदे । ५ । ८० । ५ ।
"एषा शुभ्रा न तन्वो विदानोर्द्धेव स्नाती दृशये नो अस्थात् ॥"
"दृशये दर्शनाय" इति तद्भाष्ये सायन ॥")

दृशोपमं, क्ली, (दृशायाः नेत्रस्य उपमा यत्र ।) श्वेतपद्मम् । इति शब्दचन्द्रिका ॥

दृश्यं त्रि, (दृश्यते इति । दृश्+कर्म्मणि क्यप् ।) दर्शनीयम् । द्रष्टव्यम् । इति व्याकरणम् ॥ (यथा, महाभारते । ३ । १३० । ५ ।
"एष वै चमसोद्भेदो यत्र दृश्या सरस्वती ॥"
काव्यविशेषे, क्ली । यथा, साहित्यदर्पणे । ६।१।
"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् ॥")

दृषत्, [द्] स्त्री, (दीर्य्यते असाविति । दॄ+"दृणातेः षुग् ह्रस्वश्च ।" उणां १ । १३१ । इति अदिः षुक् ह्रस्वश्च ।) पाषाणः । (यथा, मेघदूते । ५७ ।
"तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ॥")
निष्पेषणशिला । इति मेदिनी । दे, ३२ ॥
("मांसं निरस्थि सुस्विन्नं पुनर्दृषदि पेषितम् ।"
इति सुश्रुते सूत्रस्थाने ४६ अः ।)

दृषत्सारं, क्ली, (दृषदः पाषाणस्य सार इव सारो यत्र ।) लौहायसम् । इति राजनिर्घण्टः ॥

दृष्टं, क्ली, (दृश्+कर्म्मणि क्तः ।) स्वपरचक्रजभयम् । इत्यमरः । २ । ८ । १० ॥ ईक्षिते, त्रि । यथा, मार्कण्डेये ।
"दृष्टदोषेऽपि विषये ममत्वाकृष्टचेतसः ॥"

दृष्टरजाः, [स्] स्त्री, (दृष्टं रजो यस्याः ।) प्राप्तरजस्का । तत्पर्य्यायः । मध्यमा २ । इत्यमरः । २ । ६ । ८ ॥ प्रौढा । इति राजनिर्घण्टः ॥

दृष्टान्तः, पुं (दृष्टः अन्तो निश्चयो यस्मिन् ।) उदाहरणम् । (यथा, माघे । २ । ३१ ।
"त्वत्प्रयोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ॥")
शास्त्रम् । मरणम् । इति मेदिनी । ते, ११५ ॥ (अलङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ६८ ।
"दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिविम्बनम् ॥"
सधर्म्मस्येति प्रतिवस्तूपमाव्यवच्छेदः । अयमपि साधर्म्म्यवैधर्म्म्याभ्यां द्विधा । क्रमेणोदाहरणं यथा,—
"अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥")

दृष्टिः, स्त्री, (पश्यत्यनेनेति । दृश्+करणे क्तिन् ।) चक्षुः । इत्यमरः । २ । ६ । ९३ ॥ (यथा, साहित्यदर्पणे । ३ । ६८ ।
"दृष्टा दृष्टिमधोददाति कुरुते नालापमाभाषिता ॥")
बुद्धिः । (दृश्+भावे+क्तिन् ।) दर्शनम् । इति मेदिनी । टे,१० ॥ (यथा, मनुः । ६ । ४६ ।
"दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ॥")
ग्रहाणां दृष्टिकथनम् । यथा,
तृतीयभे दशमभे च शनेः पूर्णदृष्टिरन्येषां पाददृष्टिः । पञ्चमभे नवमभे च गुरोः पूर्णदृष्टिरन्येषामर्द्धदृष्टिः । चतुर्थभे अष्टमभे च कुजस्य पूर्णदृष्टिरन्येषां त्रिपाददृष्टिः । सप्तमभे सर्व्वेषां पूर्णदृष्टिः । पञ्चमभे सप्तमे नवमे द्वादशे च राहोः पूर्णदृष्टिः । द्वितीये दशमे च त्रिपाददृष्टिः । तृतीये षष्ठे चतुर्थे अष्टमे चार्द्धदृष्टिः ॥ ॥ ग्रहाणां दृष्ट्यभावनिर्णयो यथा,—
क्षितिभवने एकादशे च राहोर्दृष्ट्यभावः । क्षितिभवने द्वितीये षष्ठे एकादशे द्वादशे चान्येषां दृष्ट्यभाव ॥ ॥ एषां प्रमाणं यथा,—
"तृतीये दशमे चैव पाददृष्टिर्दिवाकरात् ।
अर्द्धदृष्टिश्च नवमे पञ्चमे च प्रकीर्त्तिता ॥
चतुर्थे चाष्टमे चैव पादोना परिकीर्त्तिता ।
सप्तमे परिपूर्णा च क्रमशैवं प्रकाश्यते ॥
तृतीयदशमावार्किः पश्यन् पूर्णफलप्रदः ।
त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमगान् कुजः ॥
सुतमदननवान्ते पूर्णदृष्टिः सुरारे-
र्युगलदशमगेहेऽर्द्धदृष्टिर्बुधाद्याः ।
सहजरिपुचतुर्थेष्वष्टमे चार्द्धदृष्टिः
क्षितिभवनमुपान्त्यं नैव दृष्टं हि राहोः ॥
स्वस्थानञ्च द्वितीयञ्च षष्ठमेकादशं तथा ।
द्वादशाख्यं न पश्यन्ति शेषं पश्यन्ति ते ग्रहाः ॥"
इति ज्योतिषतत्त्वम् ॥

दृष्टिकृत्, क्ली, (दृष्टिं दृष्टिप्रसादं करोतीति । कृ+क्विप् तुगागमश्च । अतीवशोभया लोकानां नेत्राकर्षकत्वादस्य तथात्वम् ।) स्थलपद्मम् । इति शब्दचन्द्रिका ॥ (दर्शनकारके, त्रि ।)

दृष्टिकृतं, क्ली, (दृष्टेः दर्शनाय कृतमिव । अतीवशोभाकरत्वात् तथात्वम् ।) स्थलपद्मम् । इति शब्दरत्नावली ॥

दृष्टिगुणः, पुं, (दृष्ट्या गुण्यते अभ्यस्यते यत्र । गुणत् क अभ्यासे+घञ् ।) वाणादिलक्ष्यम् । इति शब्दमाला ॥

दृष्टिबन्धुः, पुं, (दृष्टेर्बन्धुरिव ।) खद्योतः । इति शब्दरत्नावली ॥

दृष्टिविक्षेपः, पुं, (दृष्टेर्विक्षेपः ।) कटाक्षः । इति हलायुधः ॥

दृह, दृहौ । इति कविकल्पद्रुमः । (भ्वां-परं-अकं-सेट् ।) सप्तमस्वरी दर्हति । इति दुर्गादासः ॥

दृंह, द दृहौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) सप्तमस्वरी । द, दृंहते । इति दुर्गादासः ॥

दृहितः, त्रि, दृहधातोः कर्त्तरि क्तेन निष्पन्नः । वृद्धिप्राप्तः ॥

दॄ, गि भिये । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-सेट् ।) गि, दृणाति दीर्णः दीर्णिः । भियि भये । इति दुर्गादास ॥

दॄ, म भिये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) म, दरयति । भियि भये । इति दुर्गादासः ॥

दॄ, य गि विदारे । इति कविकल्पद्रुमः ॥ (दिवां-क्र्यां च-परं-सकं-सेट् ।) य, दीर्य्यति । गि, दृणाति दीर्णः दीर्णिः । इति दुर्गादासः ॥

दे, ङ पालने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) ङ, दीनान् यो दयते नित्यम् । इति हलायुधः । इति दुर्गादासः ॥

देदीप्यमानः, त्रि, पुनःपुनरतिशयेन वा दीप्यते यः । (दीप+यङ्+शानच् ।) अतिशयदीप्तिविशिष्टः । इति व्याकरणम् ॥

देय, त्रि, (दा+"अचो यत् ।" ३ । १ । ९७ । इति यत् । "ईद्यति ।" ६ । ४ । ६५ । इति

ईत्।) दातव्यम्। दानीयम्। इति व्याकरणम्॥ यथा, हितोपदेशे। १। ३६।
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति॥")

देव, ऋ ङ देवने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) देवनमिह क्रीड़ा। ऋ अदिदेवत्। ङ, देवते बालः कन्दुकैर्नित्यमिति हलायुधः। देवनमिह रोदनमिति भट्टमल्लः। इति दुर्गादासः॥

देवं, क्ली, (दीव्यत्यनेनेति। दिव+करणे घञ्।) इन्द्रियम्। इति मेदिनी। वे, १२॥ (यथा, मुण्डकोपनिषदि। ३। १। ८।
"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्म्मणा वा।
ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः॥")

देव, पुं (दीव्यति आनन्देन क्रीड़तीति। दिव+अच्।) देवता। (यथा, मनुः। ३। ११७।
"देवानृषीन् मनुष्यांश्च पितॄन् गृह्याश्च देवताः।
पूजयित्वा ततः पश्चात् गृहस्थः शेषभुग् भवेत्॥")
नाट्योक्तौ राजा। इत्यमरः। १। ७। १३॥ राजा। (यथा, कादम्बरी। १८।
"सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः। सर्व्वरत्नानामुदधिरिव देवो भाजनमिति त्वेनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता स्वयमात्मीयः क्रियतामिति॥")
मेघः। इति मेदिनी। वे, १२॥ (यथा, महाभारते। ३। २३५। २३।
"स्नेते सुकृते कुपिते च वीजे
देवे च वर्षत्यृतुकालयुक्तम्॥"
केचित्तु देवशब्देन इन्द्र इति व्याचक्षते॥)
पारदः। इति राजनिर्घण्टः॥ ब्राह्मणानामुपाधिभेदः। यथा, स्मृतिः।
"देवपूर्ब्बं नराख्यं स्यात् शर्म्मवर्म्मादिसंयुतम्॥"
(ऋत्विक्। यथा, ऋग्वेदे। ६। ८६। ६।
"ब्रह्मा देवानां पदवीः कवीना-
मृषिर्विप्राणां महिषो मृगाणाम्॥"
"देवानां स्तोत्रकारिणामृत्विजां ब्रह्मा ब्रह्माख्यर्त्विक्स्थानीयो भवति।" इति तद्भाष्ये सायनः॥) कायस्थादीनां पद्धतिविशेषः। तस्य विवरणं कायस्थशब्दे द्रष्टव्यम्॥ (त्रि, दाता। द्योतयिता। दीपयिता। यथा, ऋग्वेदे। १।१।१।
"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्॥"
"देवशब्दो दानदीपनद्योतनानामन्यतममर्थमाचष्टे। यज्ञस्य दाता दीपयिता द्योतयिता यजमानस्येत्युक्तं भवति।" इति तद्भाष्ये सायनः॥
विष्णुः। यथा, महाभारते। १३। १४६। ५४।
"उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः॥"
"दीव्यति यत् क्रीड़ति सर्गादिति विजिगीषति असुरान् व्यवहरति सर्व्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः सर्व्वत्र गच्छति तस्माद्देवः। एको देव इति मन्त्रवर्णात्॥" इति तद्भाष्ये शङ्करः॥
महादेवः। यथा, महाभारते। १३। १७। ६८।
"परश्वधायुधो देवः अनुकारी सुबान्धवः॥")

देवकः, पुं, यदुवंशीयराजविशेषः। स श्रीकृष्णस्य मातामहः। इति श्रीभागवतम्॥ (अयन्तु गन्धर्व्वपतेरंशावतारः। यथा, महाभारते। १। ६७। ६८।
"यस्त्वासीद्देवको नाम देवराजसमद्युतिः।
स गन्धर्व्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः॥")

देवकर्द्दमः, पुं, (देवप्रियः कर्द्दम इव।) सुगन्धिद्रव्यविशेषः। स श्रीखण्डागुरुकर्पूरकुङ्कुमसर्व्वमिश्रितैर्भवति। इति राजनिर्घण्टः॥

देवकात्मजा, स्त्री, (देवकस्य आत्मजा कन्या।) देवकी। इति शब्दरत्नावली॥

देवकाष्ठं, क्ली, (देवप्रियं काष्ठम्।) देवदारु। इति रत्नमाला॥ देवदारुप्रभेदः। तत्पर्य्यायः। पूतिकाष्ठम् २ भद्रकाष्ठम् ३ सुकाष्ठकम् ४ स्निग्धदारुकम् ५ काष्ठदारु ६। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। रूक्षत्वम्। श्लेष्मानिलापहत्वञ्च। इति राजनिर्घण्टः॥

देवकिरी, स्त्री, (देवं मेघं किरतीति। कॄ+"इगुपधज्ञेति।" ३। १। १३५। इति कः। गौरादित्वात् ङीष्।) मेघरागस्य भार्य्या। यथा,—
"ललिता मालसी गौरी नाटी देवकिरी तथा।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः॥"
अस्याः स्वरूपं यथा,—
"भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा।
ख्याता देवकिरी सोमा करार्पितसखीकरा॥"
इति सङ्गीतदामोदरः॥

देवकी, स्त्री, (देवक+ङीष्।) देवकराजकन्या। सा वसुदेवपत्नी श्रीकृष्णमाता। तत्पर्य्यायः। देवकी २ कृष्णजननी ३ देवकात्मजा ४। इति शब्दरत्नावली॥ इयं कश्यपपत्नी अदित्यंशजाता। यथा,—
"देवकी रोहिणी चेमे वसुदेवस्य धीमतः।
रोहिणी सुरभिर्देवी अदितिर्देवकी त्वभूत्॥"
अपि च।
"कश्यपो वसुदेवश्च देवमाता च देवकी।
पूर्ब्बपुण्यफलेनैव संप्राप श्रीहरिं सुतम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

देवकीनन्दनः, पुं, (देवक्या नन्दनः।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, भागवते। १। ८। २१।
"कृष्णाय वासुदेवाय देवकीनन्दनाय च।
नन्दगोपकुमाराय गोविन्दाय नमो नमः॥"
क्वचिदीकारस्य ह्रस्वोऽपि दृश्यते। यथा, महाभारते। २। २४। ३१।
"नैतच्चित्रं महाबाहो। त्वयि देवकिनन्दने॥")

देवकीसूनुः, पुं, (देवक्याः सूनुः पुत्त्रः।) श्रीकृष्णः। इति हेमचन्द्रः। २। १३२॥ (यथा, भविष्ये।
"तुष्ट्यर्थं देवकीसूनोर्जयन्ती संज्ञकं व्रतम्।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह॥")

देवकुसुमा, स्त्री, महाशोणा। इति राजनिर्घण्टः॥

देवकुलं, क्ली, (देवाय कोलतीति। कुल सङ्घाते+कः।) विनासुखम्। इति हारावली। १८८॥ देउल इति भाषा॥ (यथा, कथासरित्सागरे। १२। १२७।
"सोऽहं दारिद्र्यसन्तप्तस्तत्र नारायणाग्रतः।
निराहारः स्थितोऽकार्षं गत्वा देवकुलं तपः॥")
अस्य विवरणं चैत्यशब्दे द्रष्टव्यम्॥

देवकुसुमं, क्ली, (देवप्रियं कुसुमं पुष्पं यस्य।) लवङ्गम्। इत्यमरः। २। ६। १२५॥

देवखातं, क्ली, (देवेन खातम्। अकृत्रिमत्वादस्य तथात्वम्।) देवखातकम्। इत्यमरटीकायां भरतः॥ (यथा, मनुः। ४। २०३।
"नदीषु देवखातेषु तड़ागेषु सरःसु च।
स्नानं समाचरेन्नित्यं गर्भप्रस्रवणेषु च॥")

देवखातक, क्ली, पुं, (देवखातमेव। स्वार्थे कन्।) अकृत्रिमजलाशयः। अपौरुषेयं देवकुण्डमित्यर्थः। इति सुभूतिः॥ नागादिकुण्डमकृत्रिममिति स्वामी॥ तत्पर्य्यायः। आखातम् २। इति भरतः॥ अखातम्। इत्यमरः। १। १०। २७॥ देवविनिर्म्मितम् ४। इति शब्दरत्नावली॥ गुहा। इत्यमरटीकायां भरतः॥

देवखातबिलं, क्ली, (देवखातं अकृत्रिमं बिलम्। नित्यकर्म्मधारयः।) गुहा। इत्यमरः। २।३।६॥

देवगन्धा, स्त्री, (देवप्रियो गन्धो यस्याः।) महामेदा। इति राजनिर्घण्टः॥

देवगान्धारी, स्त्री, श्रीरागस्य भार्य्या। यथा,—
"गान्धारी देवगान्धारी मालवश्रीश्च सारवी।
रामकिर्य्यपि रागिण्यः श्रीरागस्य प्रिया इमाः॥"
इति सङ्गीतदामोदरः॥
अस्या गानसमयः शिशिर ऋतौ तृतीयप्रहरावधिरात्रार्द्धपर्य्यन्तम्॥

देवगायनः, पुं, (देवानां गायनः।) गन्धर्व्वः। इति हेमचन्द्रः। २। ६७॥

देवगिरी, स्त्री, रागिणीविशेषः। इति हलायुधः॥ सा सोमेश्वरमते वसन्तरागस्य भार्य्या वसन्तऋतौ सदा गेया। भरतमते हिन्दोलरागपुत्त्रनागध्वनिभार्य्या। सङ्गीतदर्पणमते तु नटकल्याणभार्य्या। अस्याः स्वरूपं यथा, अत्यभिरामघनश्यामतनुः उत्तुङ्गपीनस्तनी हारकण्ठभूषणा स्त्रीपङ्क्तिमध्यस्था मत्तचकोरनयना सुभङ्गाङ्गी च। अस्या गानसमयः हेमन्ते दिवाचतुर्थप्रहरावधिरात्रार्द्धपर्य्यन्तम्॥

देवगुरुः, पुं, (देवानां गुरुः।) वृहस्पतिः। इति पुराणम्॥ (देवानां गुरुः पिता। कश्यपः। यथा, हरिवंशे। २४६। ८।
"अपश्यन् कश्यपं तत्र मुनिं दीप्ततपोनिधिम्।
आद्यं देवगुरुं दिव्यं दीप्तं त्रिभुवनात्मभिः॥")

देवगृहं, क्ली, (देवानां सूर्य्यादीनां गृहमिव।) सूर्य्यचन्द्रादीनां ज्योतिर्मण्डलानि। यथा,—
"मन्वन्तरेषु सर्व्वेषु ऋक्षे सूर्य्यग्रहाश्रयात्।
तानि देवगृहाणि स्युः स्थानाख्यानि भवन्ति हि॥"
इति मत्स्यपुराणम्॥

देवालय.। (यथा, कथासरित्सागरे। ४।१०२।
"शून्ये देवगृहे देहमिन्द्रदत्तस्य रक्षितुम्॥")

देवचिकित्सकौ, पु, (देवानां चिकित्सकौ।) अश्विनीकुमारौ। इति हलायुध.॥ द्विवचनान्तोऽयम्॥

देवच्छन्द, पु, (देवैश्छन्द्यते आकाङ्क्ष्यते इति। छन्द+घञ्।) हारविशेष। स शतयष्टिकः। इत्यमरः। २।६।१०५॥ अष्टोत्तरशतयष्टिकोऽयमिति केचित्। इति भरत.॥ (यथा, बृहत्संहितायाम्। ८१।३२।
"शतमष्टयुत हारो देवच्छन्दो ह्यशीतिरेकयुता। अष्टाष्टकोऽर्द्धहारो रश्मिकलापश्च नवषट्कः॥")

देवजग्धं, क्ली, (देवैरद्यते इति। अद्+क्तः। "अदोजग्धिर्ल्यप्तिकिति।" २।४।३६। इति जग्धादेशः।) देवजग्धकम्। इति हेमचन्द्रः। ४।२५७॥

देवजग्धक क्ली, (देवजग्ध+स्वार्थे कन्।) कत्तृणम्। इत्यमर। २।४।१६६।

देवटः, त्रि, (दिव्यतीति। दिव+"शकादिभ्योऽटन्।" उणां। ४।८१। इति अटन्।) शिल्पी। इत्युणादिकोषः॥

देवट्टी, स्त्री, (देवं देवगृहं अट्टते अतिक्रामतीति। अट्ट+अण्। शकन्ध्वादित्वादलोपः। गौरादित्वात् ङीष्।) गङ्गाचिल्ली। इति हारावली। ८५॥

देवतरुः, पुं, (देवानां तरुः।) मन्दारः। पारिजातः। सन्तानः। कल्पवृक्षः। हरिचन्दनम्। इत्यमरः।१।१।५३॥ चैत्यवृक्षः। इति त्रिकाण्डशेषः॥

देवता, स्त्री, (देव एव। स्वार्थे तल्।) देवं द्युति क्रीडां वा तनोति या। तत्पर्य्यायः। अमरः २ निर्जरः ३ देवः ४ त्रिदशः ५ विबुधः ६ सुरः ७ सुपर्व्वा ८ सुमनाः ९ त्रिदिवेशः १० दिवौकाः ११ आदितेयः १२ दिविषत् १३ लेखः १४ अदितिनन्दनः १५ आदित्यः १६ ऋभुः १७ अस्वप्नः १८ अमर्त्यः १९ अमृतान्धाः २० वहिर्मुखः २१ क्रतुभुक् २२ गीर्व्वाणः २३ दानवारिः २४ वृन्दारकः २५ दैवतम् २६। इत्यमरः।१।१।८॥ स्वाहाभुक् २७ दनुजद्विट् २८ द्युसत् २९ दैवत् ३० स्वर्गी ३१ शोभः ३२ निलिम्पः ३३ सुचिरायुः ३४ स्थिरः ३५। इति शब्दरत्नावली॥ तस्याः सङ्ख्या त्रयस्त्रिंशत्कोटयः। यथा,—
"सदारा विबुधाः सर्व्वे स्वांशा स्वांशा गणैः सह। त्रैलोक्ये तत्त्रयस्त्रिंशत्कोटीसंख्या यथा भव॥"
इति पाद्मोत्तरखण्डम्॥ *॥

गणदेवता यथा,—
"आदित्यास्तुषिता विश्वसाध्याभास्वरमारुताः। महाराजिकरुद्राश्च वसवो गणदेवताः॥
आदित्या द्वादश प्रोक्तास्तुषिताख्यास्तथैव हि। विश्वेदेवा दश प्रोक्ताः साध्या द्वादश कीर्त्तिताः॥
आभास्वरास्तु षष्टिस्ताः पञ्चाशदूनकाः। महाराजिकनामानो द्वे शते विंशतिस्तथा।
रुद्रा एकादश प्रोक्ता वसवोऽष्टौ समीरिताः॥"
इति शब्दरत्नावली॥ *॥

तेषां चत्वारो वर्णा यथा,—
"आदित्या क्षत्त्रियास्तेषां विशश्च मरुतस्तथा। अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समाश्रितौ॥
स्मृतास्त्वङ्गिरसो देवा ब्राह्मणा इति निश्चयः। इत्येतत् सर्व्वदेवानां चातुर्व्वर्ण्यं प्रकीर्त्तितम्॥"
इति महाभारते मोक्षधर्म्मः॥ *॥

वैष्णवानां पञ्चदेवता यथा,—
"यत्र यत्र सुराः पूज्या गणेशाद्यास्तु कर्म्मिणाम्। विष्वक्सेने तत्र तत्र वैष्णवानां हि वैष्णवाः॥
विष्वक्सेन सनकं सनातनमतःपरम्। सनन्द सनत्कुमारञ्च पञ्चैव पूजयेत्ततः॥"
इति पाद्मे उत्तरखण्डम्॥ *॥

देवषट्कं यथा,—
"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम्। देवषट्कञ्च सम्पूज्य नमस्कृत्य विचक्षणः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

अपि च।
"आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम्। नारायणं विशुद्धाख्यमन्ते च कुलदेवताः॥"
इत्याह्निकतत्त्वम्॥ *॥

व्यक्तिविशेषस्य उपास्यदेवता यथा,—
"या यस्याभिमता पुंसः सा हि तस्यैव देवता। किन्तु कार्य्यविशेषेण पूजिता चेष्टदा नृणाम्॥
विशेषात् सर्व्वदा नायं नियमो ह्यन्यथा नृपाः। नृपाणां दैवतं विष्णुस्तथैव च पुरन्दरः॥
विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृक्। देवानां दैवतं विष्णुर्दानवानां त्रिशूलभृत्॥
गन्धर्व्वाणां तथा सोमो यक्षाणामपि कथ्यते। विद्याधराणां वाग्देवी साध्यानां भगवान् हरिः॥
रक्षसां शङ्करो रुद्रः किन्नराणाञ्च पार्व्वती। ऋषीणां दैवतं ब्रह्मा महादेवश्च शूलभृत्॥
मनूनां स्यादुमा देवी तथा विष्णुः सभास्करः। गृहस्थानाञ्च सर्व्वे स्युर्ब्रह्मा वै ब्रह्मचारिणाम्॥
वैखानसानामर्क्कः स्याद्यतीनाञ्च महेश्वरः। भूतानां भगवान् रुद्रः कुष्माण्डानां विनायकः॥
सर्व्वेषां भगवान् ब्रह्मा देवदेवः प्रजापतिः। इत्येवं भगवान् ब्रह्मा स्वयं देवोऽभ्यभाषत॥"
इति कूर्म्मपुराणम्॥ *॥

सामान्यदेवपूजनदिनं यथा,—
सत्त्वोत्थानवचनानि। उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदरोहिणी चित्रानुराधा मृगशिरो रेवती पुष्योऽश्विनी हस्ता शतभिषा अवणा स्वाती पुनर्व्वसुधनिष्ठा। तत्र तिथयः शुभाः। तत्र चन्द्रस्तृतीयदशमषष्ठमसप्तमैकादशस्थः शोभनः। अथ सामान्यदेवप्रतिष्ठादिनम्। तत्र मासा। माघफाल्गुनचैत्रवैशाखज्यैष्ठा हरिशयनात् पूर्व्वमाषाढश्च। तत्र नक्षत्राणि धनिष्ठाशतभिषापुष्यामघापुनर्व्वस्वश्विनीभरणीकृत्तिकाविशाखाभिन्नानि। तत्र तिथयः शुभाः। तत्र लग्नानि वृषमिथुनकन्याधनुर्मीनसंज्ञकानि। तत्र चन्द्रः शोभनः। लग्नापेक्षया बृहस्पतिः केन्द्रस्थः शोभनः लग्नापेक्षया शुक्रस्तृतीयषष्ठैकादशस्थः शोभनः। इति ज्योतिषम्॥

(देव+भावे तल्। देवत्वम्। यथा, ऋग्वेदे। १०।२४।६।
"मधुमन्मे परायणं मधुमत् पुनरायनम्। ता नो देवा देवतया युवं मधुमतस्कृतम्॥"
"हे देवा देवौ द्योतमानौ ता तौ युवं युवां नोऽस्मान् मधुमतः प्रीतियुक्तान् कृतम् कुरुतम्। केनेति उच्यते। देवतया देवत्वेन अणिमादिदेवतश्वर्य्ययोगेनेत्यर्थः।" इति तद्भाष्ये सायनः॥)

देवताडः, पु, (देवो दीप्तस्ताल इति। लस्य डः।) वृक्षविशेषः। देताड़ा इति ख्यातः। तत्पर्य्यायः। वेणी २ खरा ३ गरी ४ जीमूत ५। इत्यमरः। २।४।६९॥ अगरी ६ खरागरी ७ गरागरी ८। इति सट्टीकायां भरत.॥ देवताड़ी ९ आखुविषहा १०। इति जटाधरः॥ घाण्टः ११ विषजित् १२ महाच्छदः १३ कदम्बः १४ खुल्लाकः १५ देवताडकः १६। इति रत्नमाला॥ (देवौ चन्द्रार्कौ ताडयतीति। ताडि+कर्म्मणि अण्।) राहुः। अग्निः। इति मेदिनी। डे, १९॥ घोषकलता। इति विश्वः॥

देवताडकः, पुं, (देवताड+स्वार्थे कन्।) देवताड़ः। इति रत्नमाला॥

देवताधिपः, पु, (देवतानां अधिपः।) इन्द्रः। इति शब्दरत्नावली॥

देवत्वं, क्ली, (देवस्य भावः कर्म्म वा। "तस्य भावस्त्वतलौ।" ५।१।११९। इति त्वप्रत्ययः।) देवभूयम्। देवसायुज्यम्। इत्यमरः।२।७।५२॥ देवस्य भावः कर्म्म वा। इति संक्षिप्तसारव्याकरणम्॥

देवदत्ता, स्त्री, (देवात् मेघाद्दत्तोऽस्याः।) नागवला। इति राजनिर्घण्टः॥

देवदत्त, पुं, शुल्कार्जुनः। इति त्रिकाण्डशेषः। अर्ज्जुनशङ्खः। (यथा, महाभारते।६।२४।१५।
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः। पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः॥")
शरीरवाह्यपञ्चवायन्तर्गतवायुविशेषः। इति शब्दार्थकल्पतरुः॥ विजृम्भयो देवदत्तः शुद्धस्फटिकसन्निभः। इति सारदातिलकटीका॥ (देवा एन देयासुरिति। "क्तिच्क्तौ च संज्ञायाम्।" ३।३।१७४। इति आशिषि क्तः। "दो दद्घोः।" ७।४।४६। इति ददादेशश्च।) संज्ञाविशेषः। यथा, देवदत्तादिषु शब्देषु सम्बन्धिशब्दाभावात् वा तिरमयासि। इति दुर्गादासः॥ (नागभेदः। यथा, भागवते।५।२४।३१। "ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षाः निवसन्ति॥" देवेन दत्ते, त्रि। यथा,
"अम्बमाशुगमादाय देवदत्तं जगत्पतिः।

व्यसिनासाधुदमनमष्टैश्वर्य्यगुणान्वित: ॥”
इति कल्किपुराणेऽनुभागवते भविष्ये कल्कि-
अक्षोपनयने २ अध्याय: ॥)
देवदत्ताग्रज', पुं, (देवदत्तस्य अग्रजो ज्येष्ठ' ।)
बुद्ध: । इति हेमचन्द्र: । २ । १५१ ।
देवदानी, स्त्री, (दैप शोधने+भावे ल्युट् । देव-
स्येव दानं शुद्धिर्यस्या' । गौरादित्वात् ङीष् ।)
घोषकाकृति: । इक्षिघोषा इति भाषा । इति
रत्नमाला ॥
देवदारु, क्ली, (देवानां दारु । तेषां प्रियत्वात् ।)
वृक्षविशेष. । (यथा, महाभारते । ३ ।
१७८ । १० ।
“वनानि देवदारूणां मेघानामिव वागुरा ॥”)
तत्पर्य्याय: । शक्रपादप: २ परिभद्रक: ३ भद्र-
दारु ४ द्रुकिलिमम् ५ पीतदारु ६ दारु ७
पूतिकाष्ठम् ८ । इत्यमर. । २ । ४ । ५४ ॥ सुर-
दारु ९ दारुकम् १० स्निग्धदारु ११ अमरदारु
१२ शिवदारु १३ शाम्भवम् १४ भूतहारि १५
भवदारु१६ भद्रवत्१७ इन्द्रदारु१८ मस्तदारु१९
सुरभूरुह: २० । इति भावप्रकाश: ॥ सुराह्वम्
२१ देवकाष्ठम् २२ । इति रत्नमाला ॥ अस्य
गुणा: । तिक्तत्वम् । रूक्षत्वम् । श्लेष्मानिलभूत-
दोषनाशित्वञ्च । इति राजनिर्घण्ट: ॥ लघुत्वम् ।
स्निग्धत्वम् । उष्णत्वम् । कटुपाकित्वम् । विब-
न्धाध्मानशोथामतन्द्राहिक्काज्वरास्रप्रमेहपीनस-
श्लेष्मश्वासकासकण्डूसमीरनाशित्वञ्च । इति भाव-
प्रकाश: ॥ तस्य लेपनगुण: । कान्तिदत्वम् ।
आमदोषविबन्धार्श:प्रमेहज्वरनाशित्वञ्च । इति
राजनिर्घण्ट: ॥ ज्वररूक्षतालक्ष्मीरक्षोविघ्न-
नाशित्वम् । इति राजवल्लभ: ॥
देवदारु:, पुं, (देवप्रियं दारु यस्य ।) स्वनामख्यात-
वृक्ष: । स च पार्व्वतीप्रिय: । यथा,—
“अमुं पुर: पश्यसि देवदारु
पुत्त्रीकृतोऽयं वृषभध्वजेन ।
यो हेमकुम्भस्तननि:सृतानां
स्कन्दस्य मातु: पयसां रसज्ञ: ॥”
इति रघौ । २ । ३६ ॥
देवदालिका, स्त्री, (देवदालीव कायतीति । कै+
क । टाप् पूर्व्वह्रस्व: ।) महाकाल. । इति
राजनिर्घण्ट: ॥
देवदाली, स्त्री, (देवेन मेघोदयेन दाली दलनं
यस्या: । गौरादित्वात् ङीष् ।) लताविशेष: ।
घघरबेल इति सोनैया इति च हिन्दीभाषा ।
खरखसावत्पुष्पवृन्ता । (यथा, सुश्रुते, सूत्रस्थाने ।
३९ अध्याये ।
“कोशातकी सप्तला शङ्खिनी देवदालीकार-
वेल्लिका चेत्युभयतो भागहराणि ॥”)
तत्पर्य्याय: । जीमूतक २ कर्कटफला ३ गरा ४
गरी ५ वेणी ६ महाकोषफला ७ कर्कटिका ८
घोरा ९ कदम्बी १० विषघ्ना ११ कर्कोटी १२
सारम्भिका १३ दन्तकोषा १४ आखुविषघ्ना
१५ दाली १६ रोमशपत्रिका १७ कुरङ्गिका १८
सूतकारी १९ देवताड २० ॥ अस्या गुणा: ।
तिक्तत्वम् । उष्णत्वम् । कटुत्वम् । पाण्डुकफ-
दुर्नामश्वासकासकामलाभूतनाशित्वञ्च । तस्या:
फलस्य गुणा' । तिक्तत्वम् । कृमिश्लेष्मगुल्मशूला-
र्शोवातनाशित्वम् । संवमनत्वञ्च ।
“पीता गरा खरस्पर्शा विषघ्नी गरनाशिनी ॥”
इति राजनिर्घण्ट: ॥
तन्नामगुणा: । यथा, भावप्रकाशे ।
“देवदाली तु वेणी स्यात् कर्कटी च गरागरी ।
देवताडो दन्तकोशस्तथा जीमूत इत्यपि ॥
पीतामरा खरस्पर्शा विषघ्नी गरनाशिनी ।
देवदाली रसे तिक्ता कफार्श:शोथपाण्डुता: ॥
नाशयेद्वामनी तिक्ता क्षयहिक्काकृमिज्वरान् ।
देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनम् ॥
ससनं गुल्मशूलघ्नमर्शोघ्नं वातजित् परम् ॥”
देवदासी, स्त्री, (देवं इन्द्रियं दासते इति हन्तीति ।
देव+दास्+अण् । गौरादित्वात् ङीष् ।) वन-
वीजपूरक: । इति राजनिर्घण्ट: । (देवाय
क्रीड़ार्थे दासी इव ।) वेश्या । इति शब्दार्थ-
कल्पतरु: ॥ (देवपरिचारिका च ॥)
देवदीप:, पुं, (देवं दीप्तिशील दीपयति प्रकाश-
यति बुद्धिस्थ करोतीति । दीप्+णिच्+अण् ।
यद्वा, देवेषु इन्द्रियेषु दीप: प्रकाशक: ।) लोच-
नम् । इति शब्दरत्नावली ॥
देवदुन्दुभि., पु, (देवानां दुन्दुभिरिव हर्षजनक-
त्वात् ।) गन्धपर्णास: । स रक्ततुलसी । इति
रत्नमाला ॥ देवानां दुन्दुभिवाद्यञ्च ॥
देवदूती, स्त्री, (देवानिन्द्रियाणि दूयन्ते अवसाद-
यन्तीति । दू ङ उपतापे+“क्तिच्क्तौ च सञ्ज्ञा
याम् ।” ३ । ३ । १७४ । इति क्तिच् ततो
ङीष् ।) वनवीजपूरक. । इति राजनिर्घण्ट' ॥
देवदेव., पु (दीव्यतीति । दिव्+अच् । देवानां
देवेषु वा देव. श्रेष्ठत्वात् ।) शिव. । (यथा,
महाभारते । १ । १ । १६० ।
“यदाश्रौषमर्ज्जुनं देवदेवं
किरातरूपं त्र्यम्बकं तोष्य युद्धे ॥”)
ब्रह्मा । इति शब्दरत्नावली ॥ (यथा, देवी-
भागवते । १ । ५ । १८ ।
“स वर्ज्जो सन्दिदेशाथ देवदेव' सनातन. ॥”
“देवदेवो ब्रह्मेति ।” तट्टीका ॥ विष्णु: । यथा
देवीभागवते । १ । ४ । ३५ ।
“कारणं सर्व्वलोकानां देवदेवं जगद्गुरुम् ।
वासुदेवं जगन्नाथं तप्यमानं महत्तप. ॥”
गणेश: । यथा, कथासरित्सागरे । २० । ५५ ।
“अस्तीह प्रमदोद्याने तरुमण्डपमध्यग. ।
इष्टप्रभावो वरद: देवदेवो विनायक: ॥”)
देवद्रोणी, स्त्री, देवयात्रा । इति हारावली ।१२६॥
(देवानां द्रोणी द्रोण्याकारस्थात् अवस्थान-
गह्वरम् । शिवलिङ्गादीनामवस्थानगह्वरम् ।
यथा, प्रायश्चित्ततत्त्वे रघुनन्दनधृतसम्वर्त्तवचनम् ।
“देवद्रोण्यां विवाहे च कूपेष्वायतनेषु च ।
एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते ॥”
“देवद्रोणी स्वयम्भूलिङ्गाद्यवस्थानगह्वरम् ।”
इति रघुनन्दन: ॥)
देवद्र्यङ्, [च्] त्रि, (देवानञ्चति पूजयतीति ।
अञ्चु गतिपूजनयो:+“ऋत्विग्दधृक् इति ।”
३ । २ । ५९ । इति क्विन् । “विष्वग्देवयोश्च
टेरद्र्यञ्चतावप्रत्यये ।” ६ । ३ । ९२ । इति
अद्र्यादेश: ।) देवपूजक: । देवसमीपगन्ता ।
इत्यमर' । ३ । १ । ३४ ॥
देवधान्यं, क्ली, (देवयोग्यं धान्यमिति मध्यलोपी
समास: ।) धान्यविशेष: । देधान इति भाषा ।
जोयार इति हिन्दीभाषा । तत्पर्य्याय । यव-
नाल: २ योनल: ३ जूर्णाह्वय: ४ जोन्नाला ५
बीजपुष्पिका ६ । इति हेमचन्द्र' । ४ । २४४ ॥
देवधूप, पु, (देवप्रियो धूप इति मध्यलोपी
समास: ।) गुग्गुलु: । इति रत्नमाला ॥
देवन, क्ली, (दिव्+भावे ल्युट् ।) व्यवहार ।
जिगीषा । क्रीडा । इति मेदिनी । ने, ९६ ॥
(दीव्यति अस्मिन्निति अधिकरणे ल्युट् ।) लीलो
द्यानम् । इति त्रिकाण्डशेष ॥ (दीव्यति अने-
नेति । दिव्+करणे ल्युट् ।) पद्मम् । इति
शब्दचन्द्रिका ॥ परिदेवनम् । इत्यमरटीकायां
भरत. ॥ द्युति' । स्तुति: । कान्ति' । गति' ।
शोक' । इत्यमरटीकायां मथुरेश: ॥ द्यूतम् ।
इति स्वामी ॥ (यथा, मनौ । ९ । २२२ ।
“प्रकाशमेतत् तास्कर्य्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतिघाते नृपतिर्यत्नवान् भवेत् ॥”)
देवन:, पु (दीव्यत्यनेनेति । दिव्+करणे ल्युट् ।)
पाशक. । इत्यमर. । २ । १० । ४५ ॥
देवनन्दी, [न्] पु (देवमिन्द्र नन्दयतीति ।
नन्दि+णिनि. ।) इन्द्रद्वारपाल: । इति हेम-
चन्द्र. । २ । ९० ॥
देवनल., पु, (देव: आकारवर्णोत्कर्षेण श्रेष्ठो
नल: ।) नलभेद: । तत्पर्य्याय: । देवनाल २
महानल: ३ वंश: ४ नलोत्तम' ५ स्थूलनाल' ६
स्थूलदण्ड: ७ सुरनाल: ८ सुरद्रुम' ९ । अस्य
गुणा: । अतिमधुरत्वम् । दृष्यत्वम् । ईषन-
कषायत्वम् । नलादधिकवीर्य्यत्वम् । रसकर्म्मणि
प्रशस्तत्वञ्च । इति राजनिर्घण्ट ॥
देवना, स्त्री, (दिव्+भावे युच् टाप् च ।) क्रीडा ।
सेवा । इति शब्दरत्नावली ॥
देवनाल: पु, (देवो दीप्तिशील. श्रेष्ठो वा नाल' ।)
देवनल: । इति राजनिर्घण्ट: ॥
देवपति:, पु, (देवानां पति: ।) इन्द्र: । इति
हेमचन्द्र: । २ । ८७ ॥ (यथा, महाभारते ।
४ । २१ । ३३ ।
“सत्यं भ्रात' श्च धर्म्मञ्च पुरस्कृत्य ब्रवीमि ते ।
कीचकं निहनिष्यामि वृत्रं देवपतिर्यथा ॥”)
देवपत्नी, स्त्री, (देवानां पत्नीव प्रियदर्शनादित्वात् ।)
मध्वालुकम् । इति त्रिकाण्डशेष: । (देवानां
पत्नी ।) देवभार्य्या ॥ (यथा, महाभारते ।
१३ । १४ । ३६३ ।
“देवानां मातर: सर्व्वा देवपत्न्य: सकन्यका: ॥”)

देवपथ', पुं, (देवानां पन्थाः । "ऋक्पूरब्धूः पथा-मानक्षे । ५ । ४ । ७४ । इति अः ।) देवानां पन्थाः । तत्पर्य्यायः । छायापथ, २ सोमधारा ३ नभःसरित् ४ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । १४८ । २० ।
"दिव्यो देवपथो ह्येष नात्र गच्छन्ति मानुषा ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । ४५ ।
"ततो देवपथं गत्वा नियतो नियताशनः ।
देवसत्रस्य यत् पुण्यं तदवाप्नोति मानव. ॥")

देवपर्णं क्ली, (देवानां प्रियं पर्णमस्य ।) सुर-पर्णम् । इति राजनिर्घण्टः ॥

देवपुत्त्रिका, स्त्री, (देवानां पुत्त्रिकेव प्रियत्वात् ।) एला । इति राजनिर्घण्टः ॥

देवपुत्त्री, स्त्री, (देवानां पुत्त्रीव प्रियत्वात् ।) एला । इति जटाधरः ॥

देवपू', [र्] स्त्री, (देवानां पूः पुरी ।) अमरा-वती । इति जटाधरः ॥

देवप्रश्नः पुं, (देवानां ग्रहदेवतानां प्रश्नः ।) ग्रह-नक्षत्रादिघटितजिज्ञासा । तत्पर्य्यायः । उप-श्रुतिः २ । इति हेमचन्द्रः । २ । १७७ ॥

देवप्रिय', पुं, (देवानां प्रियः ।) पीतभृङ्गराजः । वकपुष्पः । इति राजनिर्घण्टः ॥

देवबला, स्त्री, (देवप्रिया बला ।) सहदेवी । त्रायमाणा । इति राजनिर्घण्टः ॥

देवब्रह्मा, [न्] पुं, (देवेषु ब्रह्मा इव । देवर्षित्वा-दस्य तथात्वम् ।) नारदमुनिः । इति हेम-चन्द्रः । ३ । ५१३ ॥

देवभवन क्ली, (देवानां भवनं गृहमिव । देवानां आश्रयत्वादस्य तथात्वम् ।) अश्वत्थः । इति शब्दचन्द्रिका ॥ स्वर्गः ॥ (देवप्रतिमा-निके-तनञ्च ॥)

देवभू', पुं (देवं देवत्वं भवति प्राप्नोतीति । भू प्राप्तौ + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (देवानां भूर्निवासभूमिरुत्पत्तिर्वा यत्र ।) स्वर्गश्च ॥

देवभूतिः, स्त्री, (देवात् देवलोकात् भूतिरुत्पत्ति-र्यस्याः ।) मन्दाकिनी । इति शब्दरत्नावली ॥ (देवानां भूतिरिति विग्रहे । देवैश्वर्य्यम् ॥)

देवभूय, क्ली, (देवस्य भाव । भू+"भुवो भावे।" ३ । १ । १०७ । इति क्यप् ।) देवत्वम् । देव-सायुज्यम् । इत्यमरः । २ । ७ । ५२ ॥

देवमणि , पु, (देवेषु मणिरिव ।) भर्गः । (देवो-द्योतनशीलो मणिः ।) कौस्तुभः । अश्वरोमा-वर्त्तः । इति मेदिनी । णे, ६७ ॥ (यथा, शिशुपालवधे । ५ । ४ ।
"आवर्त्तिनः शुभफलप्रदशुक्तियुक्ता. सम्पन्नदेवमणयो भृतरन्ध्रभागाः ।
अश्वाः प्रयुर्वसुमतीमतिरोचमाना-सूर्यां पयोधय इवोर्म्मिभिरापतन्तः ॥")
महामेदा । इति राजनिर्घण्टः ॥

देवमाता, [ऋ] स्त्री, (देवानां माता ।) अदितिः । इति त्रिकाण्डशेषः ॥ (यथा, भागवते ।३।१।३३।
"कच्चिच्छिव देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः ॥"
देवमातृमात्रम् । यथा, महाभारते ।१३।१४।३८।
"देवपत्न्यो देवकन्या देवमातर एव च ॥")

देवमातृकः, त्रि, (देवो दृष्टिर्मातेव प्रश्योत्पाद-नेन पालकत्वात् जननीव यस्य । कप् ।) वृष्ट्यम्बु-सम्पन्नव्रीहिपालितदेशः । इत्यमरः ।२।१।१०॥ (यथा, महाभारते । २ । ५ । ७८ ।
"कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहन्ति च । भागशो विनिविष्टानि न कृषिर्देवमातृका ॥")

देवमानक', पु (देवेषु मानो यस्य । कप् । संज्ञायां कन् वा ।) कौस्तुभमणिः । इति शब्द-रत्नावली ॥

देवमासः, पुं, (देवाय भूयस्य क्रीडनाय यो मास. । अत्र हि स्मृतेरोजसस्य प्रादुर्भावात् गर्भस्य क्रीडनादित्वात् तथात्वम् ।) गर्भस्याष्टममासः । तत्पर्य्यायः । गर्भाष्टम.२ । इति त्रिकाण्डशेषः ॥ देवानां मासः । स मनुष्यमाने त्रिंशद्वर्षात्मकः ॥

देवयजिः, पु, (देवान् यजते इति । यज+"सर्व्व-धातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) देवपूजकः । मुनिः । यथा, भट्टिः । २ । ३४ ।
"अधो द्विजान् देवयजीन् निहन्म ॥"

देवयज्ञ', पुं, (देवानां यज्ञः ।) होमः । इति हेम-चन्द्र. । ३ । ४८५ ॥ (यथा, मनु. । ४ । २१ ।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ॥")

देवयात्रा, स्त्री, (देवानां यात्रा ।) देवगमनम् । तत्पर्य्याय । देवदोलो २ । इति हारावली । १२६ ॥ देवोत्सवादि ॥ (यथा, कथासरित्-सागरे । २५ । १२१ ।
"एकदा देवयात्रायां तत्र मल्लसमागमे । अगादेको महामल्लः ख्यातिमान् दक्षिणा-पथात् ॥")

देवयानं, क्ली, (देवानां यानम् ।) देवविमानम् । देवरथ. । इति शब्दार्थकल्पतरुः ॥ (त्रि, देव-प्रापनीयम् । यथा, ऋग्वेदे । १ । १६२ । ४ ।
"यद्धविष्यमृतुशो देवयान त्रिर्मानुषाः पर्य्यश्वं नयन्ति ॥"
देवप्रापकम् । यथा, तत्रैव । ७ । ७६ । २ ।
"प्र मे पन्था देवयाना अदृश्रन्न-मर्द्धन्तो वसुभिरिष्कृतासः ॥")

देवयानी, स्त्री, शुक्राचार्य्यकन्या । सा ययातिराज-पत्नी । इति श्रीभागवतम् ॥ (पुरा किल बृहस्पतिपुत्त्रः कचो देवकार्य्यार्थं सञ्जीवन-विद्यार्थी असुरगुरुमुपागमत् । देवयानीयं त युवानं मनोहरश्चावलोक्य तेन सङ्गता भवितुमि-येष । कचस्तु गुरुकन्यामेनां ज्ञात्वा पाणिमस्या गृहीतुं न स्वीचकार । अस्मादेवासौ देवयानी प्राप्तविद्यं "न ते विद्या सिद्धिमेषा गमिष्यति" इति शशाप । कचस्तु निरपराधोऽपि शापाहत क्रुद्धश्च "ऋषिपुत्रो न ते कश्चिज्जातु पाणिं गृहीष्यति" इत्येनां शप्तवान् । अयमेवास्या ब्राह्मणकन्याया अपि क्षत्त्रियपत्नीत्वे हेतुः ।

अथ कदाचित् क्रीडन्तीनां कन्यानां वस्त्र-वैपरीत्यं जातम् । देवयानी स्वीयवस्त्रग्रह-णेन वृषपर्व्वणोऽसुरराजस्य सुतां शर्म्मिष्ठां चुक्रोश । शर्म्मिष्ठा तु तदसहमाना तां कूप-मध्ये प्राक्षिपत् । अथ गच्छति काले ययाति-र्मृगया गतस्तृषार्त्तो जलमन्विष्यन् तत्रैव कूपसमीपमागत्य देवयानीं तन्मध्यस्थां दृष्ट्वा तस्या दक्षिणं पाणिं गृहीत्वा उत्थापयामास । अथ देवयानी कूपात् मुक्ता पितृसमीप मागत्य सर्व्वं विज्ञापितवती । अथ शुक्रे क्रोधा-दसुरराज्यात् गन्तुमुद्यते वृषपर्व्वासुरराज स्वीयकन्यां शर्म्मिष्ठां कन्यासहस्रपरिवृतां परि-चारकत्वेन प्रदाय स्वगुरुं देवयानीञ्च प्रसा-दयामास । अथ कदाचित् देवयानी पितु-राज्ञया नाहुषं ययातिं पतित्वेन स्वीकृत्य तेन सह विजहार । अस्याः पुत्त्रौ द्वौ यदुस्तुर्व्वसुश्च । गच्छति काले देवयानी राज्ञा सह वनं गत्वा त्रीनपरान् कुमारान् क्रीडतस्तत्र दृष्ट्वा नृपौ-रसात् शर्म्मिष्ठागर्भे जातांश्च तान् विज्ञाय क्रोध-परवशा पितृसमीपं प्रस्थितवती । शुक्रस्तु दुहि-तरमवमानितां विदित्वा राजानं जरया योजया-मास ॥ एतद्विशेषविवरणविस्तृतिस्तु महा-भारते । १।७६ प्र । अध्यायेषु द्रष्टव्या ॥ ॥)

देवयुः, त्रि, (देवं याति उपास्यत्वेन प्राप्नोतीति । या+"मृगय्वादयश्च ।" उणां ।१।३८ इति कुः ।) धार्म्मिकः । (यथा, ऋग्वेदे । १ । १५४ । ५ ।
"तदस्य प्रियमभिपाथो अश्यां नरो यत्र देव-यवो मदन्ति ॥"
"देवयवो देव द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तो नरः ।" इति तद्भाष्ये सायनः ॥) लोकयात्रिकः । इति मेदिनी । ये ८४। देवे,पुं । इति शब्दरत्नावली ॥

देवयोनि , पु, स्त्री, देव एव योनिर्निदानभूतो यस्य सः । तद्यथा, विद्याधराः १ अप्सरसः २ यक्षाः ३ राक्षसाः ४ गन्धर्व्वाः ५ किन्नराः ६ पिशाचाः ७ गुह्यकाः ८ सिद्धाः ९ भूतगणः १० । इत्य-मरः । १ । १ । ११ ॥ (देवानां योनिः । देव-स्थानम् । यथा, महाभारते । ३ । ११४ । २८ ।
"अन्यथा हि कुरुश्रेष्ठ ! देवयोनिरपांपतिः । कुशाग्रेणापि कौन्तेय । न स्प्रष्टव्यो महोदधिः ॥")

देवरः, पु, (दीव्यत्यनेनेति । दिवु क्रीडायाम्+ "अर्त्तिकमिभ्रमीति ।" उणां ३ । १३२ । इति अरः ।) पत्युः कनिष्ठभ्राता । देओर इति भाषा । ("देवरः कस्मात् द्वितीयो वर उच्यते ।" इति निरुक्ते । ३ । १५ ॥) तत्पर्य्यायः । देवा २ । इत्यमरः । २ । ६ । ३२ ॥ देवृ ३ देवार ४ देवान ५ । इति जटाधरः ॥ तुरागावः ६ देवल्लौ ७ । इति शब्दरत्नावली ॥ (यथा, मनुः । ९ । ५९ ।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया । प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥") मनुर्ज्येष्ठो भ्राता तु श्वशुरः । इति भरतः ॥

देवरथः, पुं, (देवानां रथः ।) देवानां विमानः । इति हलायुधः ॥ स च पुष्पकादिः ॥

देवराजः, पुं, (देवानां राजा । "राजाहःसखि-भ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।१।८६।७।
"देवराजसमो ह्यासीत् ययातिः पृथिवीपतिः ॥")
तस्य नामानि यथा,—
"इन्द्रः सुरपतिः शक्रो दितिजः पवनाग्रजः ।
सहस्राक्षो भगाङ्कश्च कश्यपाङ्गज एव च ॥
विडौजाश्च सुनासीरो मरुत्वान् पाकशासनः ।
जयन्तजनकः श्रीमान् शचीशो दैत्यसूदनः ॥
वज्रहस्तः कामसखा गौतमीव्रतनाशनः ।
वृत्रहा वासवश्चैव दधीचिदेहभिक्षुकः ॥
जिष्णुश्च वामनभ्राता पुरुहूतः पुरन्दरः ।
दिवस्पतिः शतमखः सुत्रामा गोत्रभिद्विभुः ॥
लेखर्षभो बलारातिर्जम्भभेदी सुराश्रयः ।
सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ॥
आखण्डलो हरिहयो नमुचिप्राणनाशनः ।
वृद्धश्रवा वृषश्चैव दैत्यदर्पनिसूदनः ॥
षट्चत्वारिंशन्नामानि पापघ्नानि विनिश्चितम् ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥

देवरातः, पुं, (देव + क्त । देवेन श्रीकृष्णेन रातः रक्षितः ।) परिक्षित् राजा । इति श्रीभागवतम् ॥ सारसपक्षिविशेषः । इति शब्दार्थकल्पतरुः ॥ (विश्वामित्रपुत्त्रः । यथा, हरिवंशे । २७ । ४७ ।
"विश्वामित्रस्य पुत्त्रास्तु देवरातादयः स्मृताः ॥"
एतन्निरुक्तिर्यथा भागवते । ९ । १६ । ३२ ।
"यो रातो देवयजने देवैर्गाधिषु तापसः ।
देवरात इति ख्यातः शुनःशेफस्तु भार्गवः ॥"
निमेर्ज्येष्ठः पुत्त्रः । यथा, रामायणे । १ । ६६ । ८ ।
"देवरात इति ख्यातो निमेर्ज्येष्ठो महीपतिः ॥"
युधिष्ठिरस्य सभास्थक्षत्रियाणामन्यतमः । यथा, महाभारते । २ । ४ । २६ ।
"चाणूरो देवरातश्च भोजो भीमरथश्च यः ॥")

देवर्षिः, पुं, (देव ऋषिश्च । देवानां ऋषिर्वा ।) सुरर्षिः । तद्यथा । नारदः १ अत्रिः २ मरीचिः ३ भरद्वाजः ४ पुलस्त्यः ५ पुलहः ६ क्रतुः ७ भृगुः ८ वशिष्ठः ९ प्रचेताः १० । इत्यमरटीका-सारसुन्दरी ॥ (यथा, महाभारते । १२ । २१० । २१ ।
"देवर्षिचरितं गार्ग्यः कृष्णात्रेयश्चिकित्सितम् ॥"
तुम्बुरुभरतादिः । इति तट्टीकायां भरतः ॥ कश्यपादिः । इति त्रिकाण्डशेषः ॥ (महादेवः । यथा, महाभारते । १३ । १७ । १४३ ।
"देवादिदेवो देवर्षिर्देवासुरवरप्रदः ।")

देवलः, पुं, (देवं लाति गृह्णाति निजजीविकार्थमिति । देव + ला आदाने + "आतोऽनुपेति ।" ३ । २ । ३ । इति कः ।) देवाजीवः । जीविकार्थं यो देवान् वहति (?) । इत्यमरः । २ । १० । ११ ॥ पूजारि बामन इति भाषा ॥ देवोपजीवजीवी । यथा,—
"देवोपजीवजीवी च देवलश्च प्रकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥"
इति मनुः । ३ । १५२ ॥
"देवलः प्रतिमापरिचारकः वर्त्तनार्थत्वेनैतत् कर्म्म कुर्व्वतोऽयं निषेधः न तु धर्म्मार्थम् । देवकोशोपजीवी च नाम्ना देवलको भवेदिति देवलवचनात् ।" इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥
(दीव्यति आनन्देनेति । दिव + "वृषादिभ्यश्चित् ।" उणां १ । १०८ । इति कलच् ।) धार्म्मिकः । इत्युणादिकोषः ॥ नारदमुनिः । इति त्रिकाण्डशेषः ॥ (रलयोरैक्यात् ।) देवरः । इति शब्दरत्नावली ॥ धर्म्मशास्त्रवक्ता मुनिविशेषः । इति भगवद्गीता ॥ स असितमुनिपुत्त्रः रम्भाशापेनाष्टावक्रो बभूव । इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ (अयन्तु वेदव्यासस्य शिष्यः । यथा, देवीभागवते । १ । २० । ३ ।
"असितो देवलश्चैव वैशम्पायन एव च ।
जैमिनिश्च सुमन्तुश्च गताः सर्व्वे तपोधनाः ॥"
प्रत्यूषस्य ऋषेः पुत्त्रः । यथा, विष्णुपुराणे । १ । १५ । ११५ ।
"प्रत्यूषस्य विदुः पुत्त्रं ऋषिं नाम्नाथ देवलम् ॥")

देवलकः, पुं, (देवल एव । स्वार्थे कन् ।) देवलः । इति जटाधरः ॥ (यथा, महाभारते ।१२।७६।६।
"आह्वायका देवलका नक्षत्रग्रामयाजकाः ।
एते ब्राह्मणचाण्डाला महापथिकपञ्चमाः ॥")

देवलता, स्त्री, (देवप्रिया लता ।) नवमल्लिका । इति शब्दचन्द्रिका ॥

देवलाङ्गुलिका, स्त्री, (देवयति परिदेवयत्यनेनेति । देव + णिच् + अच् । देवः लाङ्गुलिकः शूको यस्याः ।) वृश्चिकालिः । इति राजनिर्घण्टः ॥

देवलोकः, पुं, (देवानां लोकः ।) स्वर्गः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते ।५।३।४६।
"तस्मात् सज्जा भवन्त्वद्य देवलोकजयाय वै ॥")
अपि च । मत्स्यपुराणे ।
"भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः ।
तपः सत्यञ्च सप्तैते देवलोकाः प्रकीर्त्तिताः ॥")

देववक्त्र, क्ली, (देवानां वक्त्रम् । तद्द्वारैव यज्ञादौ हव्यादिभोजनात् तथात्वम् ।) अग्निः । इति शब्दचन्द्रिका ॥ देवानां मुखञ्च ॥

देववर्द्धकिः, पुं, (देवानां वर्द्धकिस्तक्षा ।) विश्वकर्म्मा । इति हेमचन्द्रः । २ । ९६ ॥

देववल्लभः, पुं, (देवानां वल्लभः प्रियः ।) पुन्नागवृक्षः । इत्यमरः । २ । ४ । २५ ॥

देववृक्षः, पुं, (देवप्रियो वृक्षः ।) सप्तपर्णवृक्षः । मन्दारवृक्षः । गुग्गुलुः । इति मेदिनी । षे, ५२ ॥ अवशिष्टा देवतरुशब्दे मु दृष्टव्याः ॥

देवव्रतः, पुं, (देवं अपरिग्रहादिरूपत्वात् द्योतनशीलं व्रतं यस्य । यद्वा, देवस्येव व्रतं स्थिरप्रतिज्ञा यस्य ।) भीष्मः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । १ । २० । १९ ।
"चित्राङ्गदं ततो राज्ये स्थापयामास वीर्य्यवान् ।
स्वयं न कृतवान् राज्यं तस्माद्देवव्रतोऽभवत् ॥")
देवानां व्रतञ्च ॥

देवशेखरः, पुं, (देवः क्रीडाप्रदः शेखरो यस्य ।) दमनकः । इति राजनिर्घण्टः ॥ देवानां मस्तकञ्च ॥

देवश्रुतः, पुं, (देवेषु श्रुतः विख्यातः ।) ईश्वरः । शास्त्रम् । नारदः । इति शब्दार्थकल्पतरुः ॥ (शुकस्य पुत्त्रविशेषः । यथा, देवीभागवते । १ । १९ । ४१ ।
"स तस्याञ्जनयामास पुत्त्रांश्चतुर एव हि ।
कृष्णं गौरप्रभञ्चैव भूरिं देवश्रुतं तथा ॥")

देवश्रेणी, स्त्री, (देवानां श्रेणीव ।) मूर्व्वा । इति राजनिर्घण्टः ।

देवसभा, स्त्री, (देवानां सभा ।) देवानां समाजः । तत्पर्य्यायः । सुधर्म्मा २ । इत्यमरः । १ । १ । ५१ ॥ शुभा ३ । सुधर्म्मा [न्] ४ । इति शब्दरत्नावली ॥ सुधर्म्मी ५ । इत्यमरटीकायां भरतः ॥

देवसभ्यः, त्रि, (देवस्य क्रीडायाः सभा तस्यां सीदतीति । यत् ।) क्रीडासभास्थः । तत्पर्य्यायः । सभिकः २ । इति त्रिकाण्डशेषः ॥ देवसामाजिकश्च ॥

देवसर्षपः, पुं, (देवप्रियः सर्षपः ।) वृक्षप्रभेदः । तत्पर्य्यायः । अश्वाक्षः २ वदरः ३ रक्तमूलकः ४ सुरसर्षपकः ५ सूक्ष्मदलः ६ निर्व्विरसर्षपः ७ क्षुरराट्ः ८ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातदोषरक्तामयनाशित्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टः ॥

देवसहा, स्त्री, (सहते या । सह + अच् + टाप् । देवस्य सहा ।) दण्डोत्पलौषधिः । भिक्षाखन्नम् (?) । इति विश्वः ॥

देवसात्, अ, (देवाय देयं देवाधीनं वा करोतीति । देव + सात् ।) सकलजना देवभावाश्रयाः । देवाधीनम् । देवदेयम् । यथा,—
"साकल्याधीनत्वदेवार्थेषु असत्पूर्व्वपदकभूधातुषु परेषु चसात्प्रत्ययो भवति । देवेऽर्थे पूर्व्वोक्तधातुषु परेषु त्राप्रत्ययोऽपि । यथा देवाय देयं करोति देवत्राकरोति ।" इति मुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । ७ । १८७ । ५८ ।
"जित्वा या बहुभिर्यज्ञैरजस्रं भूरिदक्षिणैः ।
कृता मा देवसात्कृत्वा लोकान् प्राप्याथ पुण्यकान् ॥")

देवसायुज्यं, क्ली, (देवैः सायुज्यं संमिलनम् ।) देवत्वम् । इत्यमरः । २ । ७ । ५२ ॥

देवसृष्टा, स्त्री, (देवाय क्रीडार्थं सृष्टा ।) मद्यम् । इति हेमचन्द्रः । ३ । ५६७ ॥

देवसेना, स्त्री, इन्द्रकन्या । इति मेदिनी । ने, १८७ ॥ (प्रजापतिः कन्या । इति महाभारतम् । ३ । २२३ । १ ॥) षा षष्ठी । (यथा, ब्रह्मवैवर्त्ते-पुराणे प्रकृतिखण्डे । १ । ७१—७२ ।

"प्रधानांशस्वरूपा या देवसेना च नारद ।।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥"
इयं हि यथा यथा कार्त्तिकेयस्य पत्नी जाता तद्विवरणं महाभारते ।३।२२९ अध्यायमारभ्य विस्तरशो द्रष्टव्यम् ॥) देवानां सेना । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । २२२ । ५ ।
"देवसेनां दानवैर्यो भग्नां दृष्ट्वा महाबलः ।
पालयेद्वीर्य्यमाश्रित्य स ज्ञेयः पुरुषो मया ॥")

देवसेनापतिः, पुं, (देवसेनायाः पतिः ।) कार्त्तिकेयः । इति शब्दरत्नावली ॥

देवस्वं, क्ली, (देवस्य स्वं धनम् ।) देवसम्बन्धि धनम् । यथा,—
"ब्रह्मस्वञ्च गुरोर्द्रव्यं देवस्वञ्च हरेत्तु यः ।
कन्यां ददाति शुल्केन स प्रेतो जायते ध्रुवम् ॥"
इति महाभारते पञ्चप्रेतोपाख्यानम् ॥
(यथा च मनुः । ११ । २६ ।
"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥"
यज्ञशीलधनम् । यथा, मनुः । ११ । २० ।
"यज्वनां यज्ञशीलानां देवस्वं तद्विदुर्बुधाः ॥")

देवहूः, पुं, (ह्वे + भावे क्विप् । देवानां हूराह्वानमनेनेति ।) वामकर्णः । यथा,
"आपणो व्यवहारोऽत्र चित्रमन्धो बहूदनम् ।
पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥"
इति श्रीभागवते । ४ । २९ । १२ ॥
(त्रि, देवानाह्वयतीति । ह्वे + कर्त्तरि क्विप् । देवानां आह्वाता । यथा, वाजसनेयसंहितायाम् । १७ । ६२ ।
"देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षत् ॥")

देवृ, [ऋ] पुं, (दीव्यत्यनेनेति । दिव + "दिवेॠः ।" उणां २ । १०० । इति ॠः ।) देवरः । इत्यमरः । २ । ६ । ३२ ॥ (यथा, ऋग्वेदे । १० । ८५ । ४६ ।
"ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥")
रक्षापतिः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

देवा, स्त्री, (दीव्यतेऽनया । दिव + घञ् । ततष्टाप् ।) पद्मचारिणी । अशनपर्णी । इति शब्दचन्द्रिका ॥ (मूर्व्वा । अस्याः पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
"तेजनी पिशुनी देवा तिक्तवल्ली पृथक्त्वचा ।
मधुश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥")

देवाजीवः, त्रि, (देवेन देवप्रतिमासेवनेन आजीवतीति । आ + जीव + अच् ।) देवलः । इत्यमरः । २ । १० । ११ ॥

देवाजीवी, [न्] त्रि, (देवेन आजीवतीति । आ + जीव + णिनिः ।) देवलः । इत्यमरटीकायां रमानाथः ॥

देवाटः, पुं, (अट गतौ + भावे घञ् । देवानां आटो गमनं यत्र ।) हरिहरक्षेत्रम् । यथा,
"यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः ।
स्थितवान् तद्दिनादेव क्षेत्रं हरिहरात्मकम् ॥
देवानामटनाच्चैव देवाट इतिसंज्ञितम् ॥"
इति वराहपुराणम् ॥

देवात्मा, [न्] पुं, (देव आत्मा अधिष्ठातृदेवता यस्य ।) अश्वत्थः । इति शब्दचन्द्रिका ॥

देवानांप्रियः, पुं स्त्री, (देवानां प्रियः । "देवानां प्रिय इति च मूर्खे ।" ६ । ३ । २१ । इत्यस्येति वार्त्तिकोक्त्या षष्ठ्या अलुक् । छागस्य पशुत्वादेव मूर्खत्वं बोध्यम् ।) छागः । इति त्रिकाण्डशेषः ॥ त्रि, जाल्मः । इति हेमचन्द्रः । ३ । १७ ॥

देवापिः, पुं, प्रतीपराजः पुत्त्रः । स सुमेरुसमीपे कलापग्रामे योगी भूत्वा आस्ते स कलौ लुप्तं चन्द्रवंशं पुनः सत्ययुगे भावयिष्यति । इति श्रीभागवतम् ॥ स च कुष्ठी प्रजाभिरपध्वस्तः । इति मत्स्यपुराणम् ॥ (यथा, महाभारते । १ । ९५ । ४४—४५ ।
"प्रतिश्रवसः प्रतीपः प्रतीपः खलु शैब्यामुपयेमे सुनन्दां नाम तस्यां पुत्त्रानुत्पादयामास देवापिं शान्तनुं बाह्लीकञ्चेति । देवापिः खलु बाल एवारण्यं विवेश शान्तनुस्तु महीपालो बभूव ॥"
वैदिकमते तु अयं ऋष्टिषेणस्य पुत्त्रः । यथा, निरुक्ते । २ । १० ।
"देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः । स शन्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रतिपेदे । ततः शन्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष । तमूचुः ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात् ते देवो न वर्षतीति । स शन्तनुर्देवापिं शिशिक्ष राज्येन । तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति । तस्यै तद्वर्षकामसूक्तम् ॥" तथा च ऋग्वेदे । १० । ९८ । ५ ।
"आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान् ॥")

देवाभीष्टा, स्त्री, (देवानामभीष्टा प्रिया ।) ताम्बूली । इति शब्दचन्द्रिका ॥

देवायतन, क्ली, (देवानामायतनं गृहम् ।) देवालयः । यथा, कूर्म्मपुराणे ।
"न देवायतनं गच्छेत् कदाचिद्वाप्रदक्षिणम् ।
न पीडयेद्वा वस्त्राणि न देवायतनेष्वपि ॥")

देवायुध, क्ली, (देवस्य इन्द्रस्य आयुधम् ।) शक्रधनुः । इति हेमचन्द्रः ।२।९३ ॥ देवानामस्त्रञ्च ॥

देवार्हं, क्ली, (देवमर्हतीति । अर्ह + अण् ।) सुरपर्णम् । इति राजनिर्घण्टः ॥

देवार्हा, स्त्री, (देवार्ह + टाप् ।) सहदेवी लता । इति राजनिर्घण्टः ॥

देवालयः, पुं, (देवानामालय आवासः ।) स्वर्गः । (यथा, देवीभागवते । ५ । ४ । ४ ।
"त्यज देवालयं शक्र ! यथेष्टं व्रज वासव ! ॥")
देवगृहम् । इति शब्दार्थकल्पतरुः ॥ (यथा, साहित्यदर्पणे । ३ । ८६ ।
"क्षेत्र वाटी भवद्देवालयो कूपीगृहं वनम् ॥")

देवाला, स्त्री, (देवानपि आलाति स्वायत्तीकरोतीति । आ + ला + कः ।) रागिणीविशेषः । इति हलायुधः ॥

देवावासः, पुं, (देवानां आवासो वासस्थानम् ।) अश्वत्थवृक्षः । इति त्रिकाण्डशेषः ॥

देवाश्वः, पुं (देवस्य इन्द्रस्य अश्वः ।) इन्द्रघोटकः । उच्चैःश्रवाः । इति हलायुधः ॥

देविका, स्त्री, (दीव्यतीति । दिव + ण्वुल् । टापि अत इत्वम् ।) नदीविशेषः । इति शब्दरत्नावली ॥ तस्याः परिमाणं यथा,—
"अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् ।
एतावद्देविकामाहुर्देवर्षिपरिसेविताम् ॥"
इति पाद्मे भूमिखण्डम् ॥
(इयं हिमवत्पादनिःसृता । इति मत्स्यपुराणम् । ११३ ।२१॥ अनया सह सरयूः सङ्गता । इति कालिकापुराणम् । ७३ अः ॥ इयन्तु तीर्थस्थानानामन्यतमा । अत्र नरः स्नात्वा महादेवं समभ्यर्च्य यथाशक्ति चरुं निवेद्य च सर्व्वकामसमृद्धस्य यज्ञस्य फलं लभते । इति महाभारतम् । ३ । ८२ । ९९ ॥ इयं हि पीठस्थानानाम् अन्यतमा । अत्र भगवती नन्दिनी रूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६९ ।
"शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ॥"
युधिष्ठिरस्य पत्नीविशेषः । यथा, महाभारते । १ । ९५ । ७६ ।
"युधिष्ठिरस्तु गोवासनस्य शैब्यस्य देविकां नाम कन्यां स्वयंवरे लेभे । तस्यां पुत्त्रं जनयामास यौधेयं नाम ॥") धुस्तूरः । इति भावप्रकाशः ॥ देवसम्बन्धिनि, त्रि ॥

देविलः, त्रि, (दीव्यति आनन्देनेति । दिव + "गुपादिभ्यः कित् ।" उणां १ । ५७ । इति इलच् ।) धार्म्मिकः । इत्युणादिकोषः ॥

देवी, स्त्री, (दीव्यतीति । दिव + अच् ततो ङीष् ।) दुर्गा । इति धरणी ॥ (यथा, मार्कण्डेये ।८४।२।
"देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्त्या ॥")
नाट्योक्तौ कृताभिषेका राजपत्नी । इत्यमरः । १।७।१३॥ मूर्व्वा । (यथा, भावप्रकाशे ।१।१।
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ॥")
पृक्का । इति मेदिनी । वे १२ ॥ (देवानां पत्नी । ङीष् ।) सामान्यदेवपत्नी । यथा, देवीनां दक्षिणायने इति स्मृतिः ॥ ब्राह्मणस्त्रीणामोपपदम् । यथा, देव्यन्ता हि स्त्रियो मताः । इत्युद्वाहतत्त्वम् ॥ अपि च, कर्म्मविपाके ।
"देव्यन्ताश्च स्त्रियः सर्व्वा दास्यन्ताः शूद्रयोनयः ॥"
आदित्यभक्ता । लिङ्गिनी । वन्ध्याकर्कोटकी । शालिपर्णी । महाद्रोणी । पाठा । नागरमुस्ता । स्टगोर्व्वारुः । हरीतकी । अतसी । श्यामानाम-मणिजातिः । इति राजनिर्घण्टः ॥ (उपनिष

गौडदेशः समाख्यातः सर्व्वविद्याविशारदः ।
गोकर्णेशात् पूर्व्वभागे आर्य्यावर्त्तात्तु चोत्तरे ॥
तैरभुक्तात् पश्चिमे तु महापूर्य्याश्च सत्वतः ।
महाकोशलदेशश्च सूर्य्यवंशपरायणः ॥
व्यासेश्वरं समारभ्य तप्तकुण्डान्तकं शिवे ।
मगधाख्यो महादेशो यात्रायां न हि दुष्यति ॥
दक्षोत्तरक्रमेणैव क्रमात् कीकटमागधौ ।
चरणाद्रिं समारभ्य गृध्रकूटान्तकं शिवे ॥
तावत् कीकटदेशः स्यात्तदन्तर्मागधो भवेत् ।
जगन्नाथप्रान्तदेशश्चोत्कलः परिकीर्त्तितः ॥
कामगिरिं समारभ्य द्वारकान्तं महेश्वरि ।
श्रीकुन्तलाभिधो देशो हूण शृणु महेश्वरि ॥
कामगिरेर्दक्षभागे मरुदेशात्तथोत्तरे ।
हूनदेशः समाख्यातः शूरास्तत्र रमन्ति च ॥
अथाभ्यङ्गं समारभ्य कोटिदेशस्य मध्यगे ।
समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः ॥
ब्रह्मपुत्रात् कामरूपात् मध्यभागे तु केकयः ।
मागधाद्दक्षभागे तु विन्ध्यात् पश्चिमतः शिवे ॥
सौरसेनाभिधो देशः सूर्य्यवंशप्रकाशकः ।
हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे ॥
पाञ्चालपूर्व्वभागे तु कुरुदेशः प्रकीर्त्तितः ।
मरुदेशात् पूर्व्वभागे कामाद्रेर्दक्षिणे शिवे ॥
सिंहलाख्यो महादेशः सर्व्वदेशोत्तमोत्तमः ।
शिलहट्टात् पूर्व्वभागे कामरूपात्तथोत्तरे ॥
पुलिन्द्रदेशो देवेशि ! नरनारायणः परः ।
गणेश्वरात् पूर्व्वभागे समुद्रादुत्तरे शिवे ॥
कच्छदेशः समाख्यातः सुदेशं शृणु सादरम् ।
पुलिन्दादुत्तरे भागे कच्छाच्च पश्चिमे शिवे ॥
मत्स्यदेशः समाख्यातो मत्स्यबाहुल्य-
कारकः ।
वैराटपाण्ड्ययोर्म्मध्ये पूर्व्वदक्षक्रमेण तु ॥
मद्रदेशः समाख्यातो माद्रीशा तत्र तिष्ठति ।
शूरसेनात् पूर्व्वभागे गण्डक्याः पश्चिमे शिवे ॥
सौवीरदेशो देवेशि ! सर्व्वदेशाधमाधमः ।
अवन्तीतः पश्चिमे तु वैदर्भाद्दक्षिणोत्तरे ॥
नाटदेशः समाख्यातो वर्व्वरं शृणु पार्व्वति ॥
मायापुरं समारभ्य सप्तशृङ्गात्तथोत्तरे ॥
वर्व्वराख्यो महादेशः वेम्बवं शृणु सादरम् ।
लङ्काप्रदेशमारभ्य मक्कान्तं परमेश्वरि ॥
सैन्धवाख्यो महादेशः पर्व्वते तिष्ठति प्रिये ॥
एते षटपञ्चाशद्देशा मया प्रोक्ता महेश्वरि ॥
एतन्मध्येऽपि देवेशि ! देशभेदा ह्यनेकशः ।
कोटिशः सन्ति देवेशि । एते मुख्याः प्रकीर्त्तिताः ॥
रहस्यातिरहस्यञ्च गोप्यं पशुसङ्कटे ।
इति सङ्क्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥

देशकः, त्रि, (दिशतीति । दिश आदेशे + "ण्वुल्तृचौ।" ३ । १ । १३३ । इति ण्वुल् ।) शास्ता । इति हेमचन्द्रः । ३ । १५२ ॥
"तथोन्मार्गप्रवृत्तस्य चास्तु सन्मार्गदेशकः ।
सन्तु मेऽतिथयः श्लाघ्या विसदाने तथाश्रये ॥"
इति मार्कण्डेये । १८ । १७ ॥

देशकारी, स्त्री, रागिणीविशेषः । हनूमन्मते मेघरागस्य भार्य्या । अस्या जातिः सम्पूर्णा, ग्रहः षड्जस्वरः गानसमयः वर्षर्त्तौ निशान्तः । अस्याः स्वरूपं सुन्दरस्त्री तिलयुक्तानना कमलपत्राक्षी दाडिमस्तनी गौराङ्गी विम्बोष्ठी मुक्ताहारकण्ठी कर्पूरचन्दनलिप्ताङ्गी सालङ्कारा नायकेन सहोपविश्य हावभावकटाक्षान् कुर्व्वती । सङ्गीतदर्पणमते अस्या गानसमयः प्रातर्व्वैराटीरागिण्या सह । अस्याः स्वरूपं नायकेन सह केलिकौतुकरता श्यामकेशभारा जितशरत्पूर्णचन्द्रानना अनङ्गराजिताङ्गी काञ्चनकलसद्युतिहारिकुचा कमलनयना मृदुभाषिणी । इति सङ्गीतशास्त्रम् ॥

देशरूपं, क्ली, (दिश्यते इति । दिश् + कर्म्मणि घञ् । देशस्य हेतुयुक्तिदेशकालपात्रादिभिर्दिश्यमानस्य रूपम् । यद्वा, देशस्य देशानुरूपाचारस्य रूपम् ।) उचितम् । इत्यमरः । २ । ८ । २४ ॥ (यथा, महाभारते । १२ । १०७ । ५ ।
"चीर्णश्चाद्यापत्सिद्ध यथा धर्म्मः प्रकीर्त्तितः ।
तत्तुना देशरूपेण ग्रन्थयोगेन भारत ॥")

देशाखी, स्त्री, रागिणीविशेषः । हनूमन्मते हिन्दोलरागस्य द्वितीयरागिणी । तस्या जातिः षाड्वः ग्रहः गान्धारस्वरः गानसमयः वसन्तर्त्तौ पूर्व्वाह्णः । अस्याः स्वरूपम् । सुरूपा नारी चन्द्रवदना क्रोधना कलहप्रिया रोमहर्षा निष्कोषकरवालकरा मल्लवत् धूम्रवगुण्ठितबाहुमध्याः सबलमर्द्दितकक्षस्थापितशत्रुपक्षा सर्व्वदा स्वसमीपस्थापितनायका च । रागमालामते तु तस्याः स्वरूपं मल्लवत् परस्परमल्लक्रीडायां नियुक्ता । सा क्रीडामल्लकाष्ठोत्क्षेपणप्रस्तरादुत्तोलनभूमिलुण्ठनादिरूपा । कल्लिनाथमते वसन्तरागस्य भार्य्या । सङ्गीतदर्पणमते अस्या जातिः सम्पूर्णः । अस्याः स्वरूपं कर्पूरादपि कमनीयाङ्गी कमलराजितनयना हर्षयुक्ता रसिका अतिधीरा किञ्चित्सङ्कुचिता दीर्घस्तना मलद्युतिमोचिनी च । इति सङ्गीतशास्त्रम् ॥

देशान्तरं, क्ली, (अन्यो देशः । मयूरव्यंसकादिवत् समासः ।) सुमेरुलङ्कयोर्म्मध्यरेखास्वरूपदेशस्वदेशयोरन्तरयोजनम् । इति सिद्धान्तरहस्यम् ॥ ये उदयान्तरकर्म्मणा लङ्कायामौदयिका ग्रहा जातास्ते देशान्तरकर्म्मणा स्वपुरोदयिकाः स्युः । तच्च द्विविधं एकं पूर्व्वापरं द्वितीयं याम्योत्तरं तच्चरसंज्ञमुक्तम् । यथा,—
"येऽनेन लङ्कोदयकालिकास्ते
देशान्तरेण स्वपुरोदये स्युः ।
देशान्तरं प्रागपरं तथान्यत्
याम्योत्तरं तच्चरसंज्ञमुक्तम् ॥"
इति सिद्धान्तशिरोमणिः ॥*॥
देशान्तरपरिभाषायां वृहस्पतिः ।
"वाचो यत्र विभिद्यन्ते गिरिर्व्वा व्यवधायकः ।
महानद्यन्तरं यत्र तद्देशान्तरमुच्यते ॥
देशनामनदीभेदान्निकटोऽपि भवेद्यदि ।
तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा ॥
दशरात्रेण या वार्त्ता यत्र न श्रूयतेऽथवा ॥
वृहस्पतिः ।
देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च ॥"
इत्युद्वाहतत्त्वम् ॥
"सुनिश्चयवचनोक्तवागादियोजनादिभेदसामञ्जस्यार्थम् एव व्याख्यायते त्रितयवैशिष्ट्ये त्रिंशद्योजनाभ्यन्तरे द्वितयवैशिष्ट्ये तदुपरि एकवैशिष्ट्ये चत्वारिंशद्योजनोपरि वाणीगिरिमहानद्यन्तरितत्वभेदाभावेऽपि षष्टियोजनोपरि वैदेश्यम् ।" इति शुद्धिचिन्तामणिः ॥

देशिकः, पुं, (देशे प्रचितः इति । देश + ठक् ।) पथिकः । इति हेमचन्द्रः । ३ । १५७ ॥ (यथा, महाभारते । ७ । ५ । १० ।
"अदेशिको यथा सार्थः सर्व्वं कृच्छ्रं समृच्छति ।
अनायका तथा सेना सर्व्वान्दोषान् समृच्छति ॥")
गुरुः । यथा देशिको मूलमन्त्रेण इत्यागमः ॥
(यथा, महाभारते । १३ । १४७ । ४२ ।
"धर्म्माणां देशिकः साक्षात् स भविष्यति धर्म्म-
भाक् ।
धर्म्मविद्भिः सदैवेशो नमस्कार्य्यः सदोद्यतैः ॥")

देशिनी, स्त्री, (दिशतीति । दिश् आदेशे + णिनिः । स्त्रियां ङीप् ।) तर्ज्जनी । इति शब्दरत्नावली ॥ (यथा, याज्ञवल्क्यसंहितायाम् । १ । १९ ।
"कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥")

देशी, स्त्री, रागिणीविशेषः । हनूमन्मते दीपकरागस्य भार्य्या । अस्या जातिः षाड्वः ग्रहः ऋषभस्वरः गानसमयः ग्रीष्मर्त्तौ मध्याह्नः । अस्याः स्वरूपं सुरूपा नारी हरिद्वसना अलङ्कृता यौवनमदेन कामासक्ता सती नायकशयनागारमागत्य निधुवनरता च । भरतमते तु मेघरागस्य पत्नी । सङ्गीतदर्पणमते हिन्दोलरागस्य भार्य्या । तस्या गानसमयः यामयुगलम् । तस्याः स्वरूपम् । निद्रायुक्तनयना आलस्ययुक्ता प्रियाभिमुखी नायकस्य निद्राभङ्गार्थं मनोरञ्जनतानं गायन्ती रमणेच्छया रचितवेशा । भूषणगणशोभिता गौराङ्गी परिहितहरिद्वर्णशाटिका । इति सङ्गीतशास्त्रम् ॥ (सङ्गीतभेदः । यथा, सङ्गीतदर्पणे । १ । ३—६ ।
"गीतं वाद्यं नर्त्तनञ्च त्रयं सङ्गीतमुच्यते ।
मार्गदेशी विभागेन सङ्गीतं द्विविधं मतम् ॥
द्रुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च ।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ॥
तत्तद्देशस्थया रीत्या यत् स्याल्लोकानुरञ्जनम् ।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते ॥")

देश्यं, क्ली, (दिश्यते इति । दिश् + कर्म्मणि ण्यत् ।) पूर्व्वपक्षः । इति शब्दरत्नावली ॥ देश्यः, त्रि ॥ (देशे भवः । देश + "दिगादिभ्यो यत् ।" ४ ।

३ । ५४ । इति यत् ।) देशभवे । यथा, राजतरङ्गिण्याम् । ३ । ६ ।
"भोगाय देश्यभिषूर्णां वक्षभास्याम्तप्रभा ॥")

देष्णुः, त्रि, (ददातीति । दा+-"गादाभ्यामिष्णुच् ।" उणां ३ । १६ । इति इष्णुच् ।) दाता । दुर्द्दमः । इति हेमचन्द्रः ॥ रणकः । इति सचिप्रसारे उणादिवृत्तिः ॥

देहः, पु क्ली, (देग्धि प्रतिदिनम् । दिह वृद्धौ + घञ् ।) शरीरम् । इत्यमरः । २ । ६ । ७१ । न्यायमते पृथिव्या देहं योनिजम् अयोनिजञ्च । योनिजं जरायुजमण्डजञ्च । अयोनिजं स्वेदजोद्भिदादिकम् । नारकिणां शरीरमप्ययोनिजम् । जलीय देहमयोनिजं वरुणलोके प्रसिद्धम् । तैजसं देहमयोनिजं सूर्य्यलोके प्रसिद्धम् । वायोर्देहमयोनिज तदेव पिशाचादीनाम् । इति सिद्धान्तमुक्तावली ॥ * ॥

अथ नरकभोगदेहविवरणम् । तत्र यम प्रति सावित्रीप्रश्नः ।

"स्वदेहे भस्मसाद्भूते यान्ति लोकान्तरं नराः ।
केन देहेन वा भोग भुञ्जते च शुभाशुभम् ॥
सुचिरं क्लेशभोगेन कथ देहो विनश्यति ।
देहो वा किंविधो ब्रह्मन् । तन्मे व्याख्यातुमर्हसि ॥"

यमस्योत्तरम् ।

"शृणु देहविवरणं कथयामि यथागमम् ।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम् ॥
देहिना देहवीजञ्च स्रष्टुः सृष्टिविधौ परम् ।
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत् ॥
स कृत्रिमो नश्वरश्च भस्मसाच्च भवेदिह ॥
वृद्धाङ्गुष्ठप्रमाणश्च यो जीवपुरुषः कृतः ।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे ॥
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये ।
जले न नष्टो देही वा प्रहारे सुचिरे कृते ॥
न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा ।
तप्तद्रवे तप्तलौहे तप्तपाषाण एव च ॥
प्रतप्तप्रतिमाश्लेषेऽप्यत्यूर्द्ध्वं पतनेऽपि च ।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च ॥
कथितं देहवृत्तान्तकारणञ्च यथागमम् ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥

ईश्वरदेहस्य प्रमाणं यथा,—

"यस्मै गुह्यतमं देह सर्व्वगं तत्त्वदर्शिनः ।
प्रविष्टा मम सायुज्यं लभन्ते योगिनोऽव्ययम् ॥"

इति कूर्म्मपुराणम् ॥

देहकोषः, पुं, (देहस्य कोष इव आवरकत्वात् ।) च. । इति शब्दचन्द्रिका ॥ पाखा इति भाषा ॥

देहक्षयः, पुं, (देहस्य क्षयो हानिर्यस्मात् ।) रोग. । इति शब्दचन्द्रिका ॥

देहदः, पु, (देह ददाति यद्वा दायति स्वतादे. शोधयतीति । दा दाने दैप शोधने वा+ "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) पारद' । इति राजनिर्घण्टः ॥ (देहदातरि,त्रि ॥)

देहदुर्गन्धता, स्त्री, (देहस्य दुर्गन्धता) शरीरदौर्गन्ध्यम् । तन्नाशकौषध यथा,—

"अर्ज्जुनस्य च पुष्पाणि जम्बुपत्रयुतानि च ।
सलोध्राणि च तत्क्षेपो देहदुर्गन्धता हरेत् ॥"

इति गारुडे १६४ अध्यायः ॥

देहधारकं, क्ली स्त्री, (देहं धारयतीति । धारि + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) अस्थि । इति हेमचन्द्रः । ३ । २६० ॥

देहधिः, पु, (देहो धीयते अस्मिन्निति । देह + धा + आधारे किः ।) पक्षः । इति शब्दचन्द्रिका ॥ पाखा इति भाषा ॥

देहधृक्, [च्] पु, (देहे धर्ज्जति सञ्चरतीति । धृज् + क्विप् ।) वायुः । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते । २ । १ ।
"वायुर्य्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक् ॥")

देहभृत्, पुं, (देहं बिभर्त्तीति । देह + भृ + क्विप् तुगागमश्च ।) जीवः । इति हेमचन्द्रः । ६ । २ ॥ (यथा, रघौ । ८ । ५१ ।
" धिगिमां देहभृतामसारताम् ॥ ")

देहयात्रा, स्त्री, (देहस्य यात्रा लोकान्तरगमनम् ।) यमपुरीगमनम् । मरणम् । (देहाय देहरक्षणाय या यात्रा उद्यमादिः ।) भोजनम् । इति मेदिनी । रे, २६८ ॥ (यथा, भागवते । ४ । २३ । २० ।

"अतीव भर्त्तुर्व्रतधर्म्मनिष्ठया
शुश्रूषया चारषदेहयात्रया ।
नाविन्दतार्त्तिं परिकर्षितापि सा
प्रेयस्करस्पर्शनमाननिर्वृ ति. ॥")

देहला, स्त्री, (देहं लाति देहस्य पुष्टिं ददातीति । देह + ला + कः टाप् । सेवनेन प्रथम पुष्टिवर्णादिप्रदानादस्यास्तथात्वम् ।) मद्यम । इति शब्दचन्द्रिका ॥

देहलिः, पुं, (दिह + भावे घञ् । देहो लेपस्तं लाति गृह्णातीति । देह + ला + बाहुलकात् किः ।) देहली । इति शब्दरत्नावली ॥

देहली, स्त्री, (देहं लेपं लातीति । देह + ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । गौरादित्वात् ङीष् ।) गृहावग्रहणी । इत्यमरः । २ । २ । १३ ॥ द्वारपिण्डिका । द्वाराग्रस्थानम् । इति केचित् ॥ छातिना इति ख्याता इति केचित् ॥ अध उडुम्बरम् । तदृशिलाया अधोदारुपाषाणो वा । इति स्वामी ॥ इत्यमरटीकायां भरतः ॥ (यथा, मेघदूते । ८७ ।
"शेषान् मासान् गमनदिवसस्थापितस्यावधेर्वा विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः ॥")

देहसारः, पु, (देहस्य सारः ।) मज्जा । इति राजनिर्घण्ट ॥

देहात्मवादी, [न्] त्रि, (देहमेवात्मानं परब्रह्म वदतीति । वद् + णिनिः ।) चार्व्वाक' । तस्येदं मतम् । शरीरमेवात्मा प्रज्वलितगृहात् स्वपुत्त्र परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहमित्यनुभवाच्च । अत्र प्रमाणम् । देहमात्र चैतन्यविशिष्टमात्मेति प्राकृता. । इति शारीरिकसूत्रभाष्यम् ॥

अपि च ।

"आत्मास्ति देहाद्व्यतिरिक्तमूर्त्ति-
र्भोक्ता स लोकान्तरितः फलानाम् ।
आशेयमाकाशतरोः प्रसूनात्
प्रथीयसः स्वादुफलप्रसूतौ ॥"

इति प्रबोधचन्द्रोदयः ॥

देहिका, स्त्री, (देग्धीति । दिह वृद्धौ + ण्वुल् । टापि अत इत्वम् ।) कीटविशेषः । तत्पर्य्यायः । वटिः २ उपादिकः ३ । इति त्रिकाण्डशेषः ॥ उपजिह्विका ४ उत्पादिका ५ उद्देहिका ६ दिवी ७ । इति हारावली ॥

देही, [न्] (देहोऽस्त्यस्येति । देह + इनिः ।) शरीरी । प्राणी । अस्य गुणा यथा,—

"बुद्ध्यादिषट्क संख्यादिपञ्चकं भावना तथा ।
धर्म्माधर्म्मौ गुणा एते आत्मनः स्युश्चतुर्द्दश ॥"

अय इन्द्रियाद्यधिष्ठाता पुण्यपापाश्रयः । ज्ञानसुखादियोगतो मानसप्रत्यक्षविषय. । परदेहादौ प्रवृत्त्यादिनानुमेय. । अहमित्याकारप्रत्ययाश्रयः । मनोमात्रस्य गोचरः । विभुः परममहत्त्ववान् । इति भाषापरिच्छेदः ॥ तथा च । श्रीभगवद्गीतायाम् ।

"देही नित्यमवध्योऽय देहे सर्व्वस्य भारत ।
तस्मात् युद्धाय युज्यस्व नेनं पापमवाप्स्यसि ॥"

अपि च ।

"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥"

दै, च शोधने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-अनिट् ।) पित्त्वाद्दाञ्ज्ञाभावे यगादौ दायते इत्यादि । शोधनमिह शुद्धीकरणम् । दायति ताम्रमम्लेन लोकः । अवपूर्व्वः शुक्ली भावे (अत्र अकर्म्मकः ।) श्विन्दते श्वेतते व्रीणि स्युः शुक्लान्यवदायति । इति भट्टमल्लः । इति दुर्गादासः ।

दैतेय', पुं, (दितेरपत्य पुमान् । दिति + "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) दैत्यः । इत्यमरः । १ । १ । १२ ॥ (यथा, हरिवंशे । १८२ । ७६ ।
"जय बाण महाबाहो । दैतेयं देवपूजित ।
यदर्थमवतीर्णोऽसि तत् कर्म्म सफलीकुरु ॥")

दैत्यः, पु, दितेरपत्यं ("दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।" ४ । १ । ८५ । इति ण्यः ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, मनुः । १२ । ४८ ।
"तापसा यतयो विप्रा ये च वैमानिका गणाः ।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ॥")
दितिसम्बन्धिनि, त्रि ॥

दैत्यगुरु', पु, (दैत्यानां गुरुः ।) शुक्र. । इत्यमर । १।३।२५ ॥ (यथा, वृहत्संहितायाम् । १०४।३४।
"आद्यार्यमानासदभूतिवस्त्र-
शस्तुचयान् दैत्यगुरुस्तृतीये ॥")

दैत्यदेव., पु, (दैत्याना देव. ।) वरुण. । इति त्रिकाण्डशेष. ॥ वायुः । इति हेमचन्द्र. । ४।१७८ ॥

दैत्यनिसूदनः, पुं, (निसूदयतीति । नि+सूदि+ल्युः । दैत्यानां निसूदनः नाशकः ।) विष्णुः । इति पुराणम् ॥

दैत्यपुरोधाः, [स्] पुं, (दैत्यानां पुरोधाः पुरोहितः ।) शुक्रः । इति हारावली । ३६ ॥

दैत्यमाता, [ऋ] स्त्री, (दैत्यानां माता ।) दितिः । इति त्रिकाण्डशेषः ॥ (दैत्यमातृमात्रम् । यथा, हरिवंशे । १६६ । १२ ।
"अदितिर्दितिर्दनुश्चैव सिंहिका दैत्यमातरः ॥")
दैत्यपरिमाणकर्त्तरि, त्रि ॥

दैत्यमेदजः, पुं, (दैत्यमेदात् जायते इति । दैत्यमेद+जन्+डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ पृथिव्याम्, स्त्री । मधुकैटभमेदजातत्वात् ॥

दैत्ययुग, क्ली, (दैत्यानां युगम् ।) दैत्यानां युगविशेषः । तत्तु दैवपरिमाणेन द्वादशसहस्रवर्षाणि । मनुष्यमानेन चतुर्युगसहस्रम् । इति शब्दार्थकल्पतरुः ॥

दैत्या, स्त्री, (दितेरियमिति यण् । ततष्टाप् ।) मुरानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२३ ॥ चण्डौषधिः । इति मेदिनी । ये, ३२ ॥ मद्यम् । इति त्रिकाण्डशेषः ॥ दैत्यभार्य्या च ॥

दैत्यारिः, पुं (दैत्यानामरिः ।) विष्णुः । इत्यमरः । १ । १ । १९ ॥ (यथा, प्रबोधचन्द्रोदये । २ । २८ ।
"दैत्यारिः कमलाकपोलमकरीलेखाङ्कितोरःस्थलः ।
शेतेऽब्धाविति रम्य जगुश्च पुनः का नाम शान्तेः कथा ॥")
देवता । इति मेदिनी । रे, १७० ॥

दैत्याहोरात्रः पुं, (दैत्यानामहोरात्रः ।) दैत्यानां दिवानिशम् । स मनुष्यमानेन वर्षमेकम् । इति शब्दार्थकल्पतरुः ॥

दैन, क्ली, (दीनस्य भावः । अण् ।) दीनता । (दिनस्य दिवसस्य इदम् । दिन+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) दिनसम्बन्धिनि, त्रि ॥

दैनन्दिन, त्रि, (दिने दिने भव इत्यण् निपातनात् साधुः ।) दिनेदिने भवम् । (यथा, भागवते । ३ । ११ । २६ ।
"एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः ।
तिर्य्यङ्नृपितृदेवानां सम्भवो यत्र कर्म्मभिः ॥")
क्लीबम् प्रतिदिनम् । इति निपातनसाध्यम् ॥

दैनन्दिनप्रलयः, पुं, (दैनन्दिनश्चासौ प्रलयश्चेति कर्म्मधारयः ।) प्रलयविशेषः । यथा,—
"चतुर्द्दशेन्द्रावच्छिन्ने ब्रह्मणो दिनमुच्यते ।
तावती ब्रह्मणो रात्रिः सा च ब्राह्मी निशा नृप ॥
कालरात्रिश्च सा ज्ञेया वेदेषु परिकीर्त्तिता ।
एवं सप्तकल्पजीवी मार्कण्डेयो महातपाः ॥
ब्रह्मलोकादधः सर्व्वे लोका दग्धाश्च तत्र वै ।
उत्थितेनैव सहसा सङ्कर्षणमुखाग्निना ॥
चन्द्रार्कब्रह्मपुत्राश्च ब्रह्मलोकं गता ध्रुवम् ।
ब्रह्मरात्रे व्यतीते तु पुनश्च सृजते विधिः ॥
तस्य ब्राह्मीनिशायाश्च क्षुद्रप्रलय उच्यते ।
देवाश्च मुनयश्चैव तत्र दग्धा नरादयः ॥
एवं त्रिंशद्दिवारात्रैर्ब्रह्मणो मास एव च ।
वर्षं द्वादशमासैश्च ब्रह्मसम्बन्धि चैव हि ॥
एवं पञ्चदशाब्दे च गते च ब्रह्मणो नृप ।
दैनन्दिनस्तु प्रलयो वेदेषु परिकीर्त्तितः ॥
अष्टौ रात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः ।
तत्र सर्व्वे प्रनष्टाश्च चन्द्रार्कादिदिगीश्वराः ॥
आदित्या वसवो रुद्रा मन्विन्द्रा मानवादयः ॥
ऋषयो मुनयश्चैव गन्धर्व्वा राक्षसादयः ॥
मार्कण्डेयो लोमशश्च पेचकश्चिरजीविनः ।
इन्द्रद्युम्नश्च नृपतिश्चाकूपारश्च कच्छपः ।
नाडीजङ्घो वकश्चैव सर्व्वे नष्टाश्च तत्र वै ॥
ब्रह्मलोकादधः सर्व्वे लोका नागालयास्तथा ।
ब्रह्मलोकं ययुः सर्व्वे ब्रह्मलोकादयस्तथा ॥
गते दैनन्दिने ब्रह्मा लोकांश्च सृजते पुनः ।
एवं शतायुःपर्य्यन्तं परमायुश्च ब्रह्मणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दैनार, त्रि, दीनारमितस्वर्णजातवस्तु । दीनारे भव दीनारस्येदं वेति (अण्) अणप्रत्ययः ॥

दैनिकी, स्त्री, (दिने भवः । दिन+"कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् । गौरादित्वात् ङीष् ।) दिनभृतिः । एकदिनकर्म्ममूल्यम् । इति शब्दमाला ॥ (दिनभवे, त्रि ।)

दैन्य, क्ली, (दीनस्य भावः । दीन+ष्यञ् ।) कार्पण्यम् । इति हेमचन्द्रः ।२।२३३॥ दीनता । यथा,
"याच्ञादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु
त्वं वृणु इत्यभितो मुखानि स दशग्रीवः कथं कथ्यताम् ॥"
इति मुरारिमिश्रः ॥
(व्यलङ्कारोक्तव्यभिचारिगुणभेदः यथा, साहित्यदर्पणे । ३ । १४१ ।
"दौर्गत्याद्यैरनौजस्य दैन्यं मलिनतादिकृत् ॥")

दैप, त्रि दीपसम्बन्धि । दीपस्येदमित्यर्थे (अण्) अणप्रत्ययः ॥

दैर्घ्य, क्ली, (दीर्घस्य भावः । दीर्घ+ष्यञ् ।) दीर्घत्वम् । तत्पर्य्यायः । आयामः २ । आरोहः ३ । इत्यमरः । २ । ६ । ११४ ॥ आरोहस्थाने आनाहः इति भरतः ॥ (यथा, वृहत्संहितायाम् । ११ । ३२ ।
"अपरस्यां चलकेतुः
शिखया याम्याग्रयाङ्गुलोच्छ्रितया
गच्छेद्यथा यथोदक्
तथा तथा दैर्घ्यमायाति ॥")

दैलीपि, पुं, दिलीपराजपुत्रो रघुः । दिलीपस्यापत्यमिति णिप्रत्ययः (इञ्) ॥

दैव, क्ली, (देवस्येदम् । देव+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) देवतीर्थम् । तत् दक्षिणहस्ताङ्गुल्यग्रवर्त्ति । इत्यमरः । २ । ७ । ५१ ॥ (यथा, मनुः । २ । ५९ ।
"कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ॥")
दैवसम्बन्धिनि, त्रि । यथा,—
"प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ।
नापि दैवं न वा पित्र्यं यावत् पूर्णो न वत्सरः ॥"
इति शुद्धितत्त्वम् ॥
विवाहविशेषे, पुं । इत्युद्वाहतत्त्वम् ॥ अस्य विवरणं उद्वाहशब्दे द्रष्टव्यम् । (दिवि भवः । दिव्+अण् ।) दिविभवे त्रि ॥

दैव, क्ली, पुं (देवात् नियतादागतम् । देव+अण् ।) भाग्यम् । इत्यमरः । १ । ४ । २८ ॥
"दैवाधीनं जगत् सर्व्वं जन्मकर्म्मशुभाशुभम् ।
संयोगाश्च वियोगाश्च न च दैवात् परं बलम् ॥
कृष्णायत्तञ्च तद्दैवं स दैवात् परतस्ततः ।
भजन्ति सततं सन्तः परमात्मानमीश्वरम् ॥
दैवं वर्द्धयितुं शक्तः क्षयं कर्त्तुं स्वलीलया ।
न दैववद्धस्तद्भक्तश्चाविनाशी च निर्गुणः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
मनुरुवाच ।
"दैवे पुरुषकारे च किं ज्यायस्तद्ब्रवीतु मे ।
अत्र मे संशयो देव । छेत्तुमर्हस्यशेषतः ॥
मत्स्य उवाच ।
स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्ज्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥
प्रतिकूलं यथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशालिनाम् ॥
येषां पूर्व्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ॥
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् । मार्गितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्ज्जिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवं तु सफलं भवेत् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ।
त्रयमेव मनुष्यस्य पिण्डितं स्यात् फलावहम् ॥
कृषेर्वृष्टिसमायोगात् दृश्यन्ते फलसिद्धयः ।
तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं नृभिः ।
एवन्ते प्राप्नुवन्तीह परलोके फलं ध्रुवम् ॥
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सदैव यत्नेन पौरुषे यत्नमाचरेत् ॥
त्यक्त्वालसान्दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नाद्वृणुते नृपेन्द्र ।
तस्मात् सदोत्थानवता हि भाव्यम् ॥"
इति मत्स्यपुराणे १९५ अध्यायः ॥

दैवकी, स्त्री, (देवकी एव । स्वार्थे अण् । ततो ङीप् ।) कृष्णमाता । वसुदेवपत्नी । इति श्रीभागवतम् ॥

दैवकीनन्दनः, पुं, (दैवक्याः नन्दनः पुत्त्रः ।) श्रीकृष्णः । इत्यमरः । १ । १ । २१ ॥ (यथा, पाद्मोत्तरखण्डे १११ अध्याये ।
"दैवकीनन्दन श्याम श्रीराधाप्राणवल्लभ ॥")

दैवकोविदा, स्त्री, (दैवे दैवनिमित्तशुभाशुभज्ञाने कोविदा विज्ञा ।) दैवज्ञा । इति शब्दरत्नावली ॥ दैवपक्षिते, त्रि ॥

दैवज्ञः, त्रि, (दैवं जानातीति । ज्ञा+कः ।) गणकः । इत्यमरः । २ । ८ । १४ ॥ (यथा, देवीभागवते । १ । २० । ३४ ।
"दैवज्ञान् वेदविदुषः पप्रच्छ शुभं दिनम् ॥")
अस्योत्पत्तिर्यथा, दैवज्ञाख्यधनापहारी धूमान्धनरकं भुक्त्वा शतजन्मस्वधिक-नानाविधपक्षिजन्मभिः स्वभार्य्यावर्ज्जितहीनयाधियुतश्चवरस्वर्णकारसवर्णं वणिग्यवनसेविविप्रब्राह्मणगणका भूत्वा दैवज्ञो गणनोपजीविविप्रो भवति ॥ * ॥
अपि च ।
"लाक्षालोहादियापारी रसादिविक्रयी च यः ।
स याति नागवेष्टञ्च नागैर्वेष्टित एव च ॥
वसेत् खलोममानाब्दं तत्रैव नागदंशितः ।
ततो भवेत् स गणको वैद्यश्च सप्तजन्मसु ॥
गोपश्च चर्म्मकारश्च शङ्खकारस्ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दैवज्ञा, स्त्री, (दैवं जानातीति । ज्ञा+क । ततष्टाप् ।) दैवज्ञभार्य्या । प्रश्नादिना शुभाशुभज्ञा । अङ्गुष्ठादिना शुभाशुभनिरूपिणी । तत्पर्य्यायः । विप्रश्निका २ ईक्षणिका ३ । इत्यमरः । २।६।२०॥

दैवत, पु क्ली, (देवता एव । स्वार्थे अण् ।) देवता । इत्यमरः । १ । १ । ६ ॥ (यथा, रामायणे । २ । ५० । २ ।
"आपृच्छे त्वां पुरिश्रेष्ठे । काकुत्स्थपरिपालिते ॥
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च ॥"
देवतानां समूहः । देवता+अण् ।) देवतासमूहे, क्ली । (देवताया इदम् । अण् ।) देव सम्बन्धिनि, त्रि ॥

दैवदीपः, पुं, (देवः सूर्य्याधिष्ठातृको दीप । दर्शनेन्द्रियस्य सूर्य्याधिष्ठातृत्वात्तथात्वम् ।) चक्षुः । इति त्रिकाण्डशेषः ॥ देवसम्बन्धिप्रदीपश्च ॥

दैवपरः, त्रि, (दैवमेव परं प्रधानं यस्य ।) दैवनिष्ठः । तत्पर्य्यायः । यद्भविष्य २ । इति हेमचन्द्रः । ३ । ४७ ॥ (यथा, मार्कण्डेये ।३४।५८।
"सार्द्धं न ?जभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः ।
न सर्व्वज्ञेभिर्मित्रं न च दैवपरैर्नरैः ।
कुर्व्वीत साधुभिर्मैत्रीं सदाचारावलम्बिभिः ॥")

दैवप्रश्नः, पुं, (दैवे दैवनिमित्तशुभाशुभविषये यः प्रश्नः ।) प्राक्तनशुभाशुभकर्म्मजिज्ञासा । तत्पर्य्यायः । उपश्रुतिः २ । इति त्रिकाण्डशेषः ॥ (दैववाणी । यदुक्तं हारावल्याम् । २२ ।
"नक्तं निर्गत्य यत्किञ्चित् शुभाशुभकरं वचः ।
श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम् ॥")

दैवयुग, क्ली, (दैवं देवसम्बन्धि युगम् ।) देवानां युगम् । तच्च दैवमानेन द्वादशसहस्रवर्षम् । मनुष्यपरिमाणेन चतुर्युगमानम् । इति शब्दार्थकल्पतरुः ॥ (यदुक्तं मनौ । १ । ७१ ।
"यदेतत् परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥")

दैवलकः, पु, (देवल इव कायतीति । कै+कः । ततः स्वार्थे अण् ।) भौतः । भूतसेवकः । इति हारावली । १५० ॥ देवलसम्बन्धिनि, त्रि ॥

दैवलेखकः, पुं, (दैवं दैवनिमित्तशुभाशुभं लिखतीति । लिख+ण्वुल् ।) मौहूर्त्तः । गणकः । इति त्रिकाण्डशेषः ॥

दैववाणी, स्त्री, (दैवी आकाशसम्बन्धिनी वाणी ।) आकाशवाणी । अमानुषी वाक् । तत्पर्य्यायः । चिरोक्तिः २ पुष्पशकटी ३ दैवप्रश्नः ४ उपश्रुतिः ५ । इति त्रिकाण्डशेषः ॥ संस्कृतवाक्यम् । यथा, दण्डी ।
"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ॥"
"गीर्वाणवाणीवदन सुकुन्द-
संकीर्त्तनं चेत्युभयं हि लोके ।
सुदुर्लभं तच्च न मुग्धबोधा-
द्व लभ्यतेऽतः पठनीयमेतत् ॥"
इति वोपदेवः ॥

दैवाकरिः, पुं, (दिवाकरस्य अपत्यं पुमान् । दिवाकर+इञ् ।) शनिः । यमः । यमुनायां, स्त्री । एतेषामुदाहरणं यथा,—
"सम्प्रति दैवाकरितः पारमिताद्दरितारुण्यकारितः ।
नायं कोऽपि विशेषः स्वाहितराशिवशात्तद्विशेषः ॥"
इति काव्योदयधृतपद्धतिकम् ॥

दैवात्, अ, हठात् । यथा, "दैवादभाङ्क्षलनं किल मानवत्याः ।" इति काव्योदयः ॥

दैवाहोरात्रः, पु, (दैवः देवसम्बन्धी अहोरात्रः ।) देवानामेकदिवसः । स मनुष्याणां संवत्सरः । इति शब्दार्थकल्पतरुः ॥

दैविकः, त्रि, (दैवस्य अयं दैवे भवो वा । दैव+ठक् ।) देवसम्बन्धी । (यथा, मनुः । १ । ६५ ।
"अहोरात्रे विभजते सूर्य्यो मानुषदैविके ।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्म्मणामहः ॥")
दैवे भवः । इति व्याकरणम् ॥

दैवी, स्त्री, (दैवस्य इयम् । दैव+अण् अञ् वा । ततो ङीप् ।) देवसम्बन्धिनी । यथा,—
"मत्तोपास्यमिति स्फुरत्यपि हृदि यावत्त्विका वासना
का नामेयमतर्क्यमेतुगहना दैवी सतां यातना ।"
इति शान्तिशतके । ७ ॥
चिकित्साविशेषः । यथा, वैद्यके ।
"आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता ॥"

दैव्यं, क्ली, (दैवस्य इदम् । "दैवाद्यञञौ ।" ४ । १ । ८५ । इत्यस्य वार्त्तिकोक्त्या यञ् ।) दैवम् । भाग्यम् । इत्यमरटीकायां भरतः ॥ (देवसम्बन्धे, त्रि । यथा, ऋग्वेदे । २ । ३० । ११ ।
"त व. शर्द्धं मारुत सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ॥")

दैशिकं, त्रि, (देशे भवं देशस्य इदं वा । देश+ठञ् ।) देशसम्बन्धि । भवार्थे णिकप्रत्ययेन सिद्धम् । सम्बन्धविशेषः । यथा । कालभावयोः सप्तमीति सूत्रे भावः सत्त्वं तच्च द्विविधं कालिकं दैशिकञ्चेति कारकचक्रे भवानन्दसिद्धान्तवागीशः ॥ देशनिष्ठविशेषणता । इति नैयायिकाः ॥

दैष्टिकः, पु, दिष्टेन भवः । (दिष्ट+ठक् ।) भाग्याधीनजातः । कालेन जातः । इति व्याकरणम् ॥ (दिष्टं भागधेयमिति मतिर्यस्य । "अस्ति नास्ति दिष्टं मतिः ।" ४ । ४ । ६० । इति ठक् । दैवपरः । इति सिद्धान्तकौमुदी ॥)

दैहिकं, त्रि, (देहस्य इदं देहे भवं वा । देह+ठञ् ।) देहसम्बन्धि । यथा,—
"भैरूण्यां भैरवाणां भवति सुविहिता दैहिकी गोपितार्च्चा ।"
इति कूर्च्चिकातन्त्रेऽस्मयाग ॥

दो, य छेदे । इति कविकल्पद्रुमः ॥ (दिवां-परसकं-सेट् ।) य, शिरोऽवद्यति विद्विषां चः । इति दुर्गादासः ॥

दोः [स्] पुं, (दाम्यत्यनेनेति । दमु उपशमे+ "दमेर्डोसिः ।" उणां २ । ६८ । इति डोसि ।) बाहुः । इत्यमरः । २ । ६ । ८० ॥ (यथा, अनर्घराघवे । २ । ४४ ।
"ह्रातलेयमवज्ञयेव दुहिता कस्मैचिदेनामसौ
दोर्लीलामधरीकृतत्रिभुवनो लङ्कापतिर्याचते ॥")

दोःशिखरं, क्ली, (दोषः शिखरम् ।) स्कन्धः । इति राजनिर्घण्टः ॥

दोःसहस्रभृत्, पुं, (दोःसहस्रं बाहुसहस्रं बिभर्त्तीति । भृ+क्विप् ।) कार्त्तवीर्य्यार्ज्जुनः । इति हेमचन्द्रः । ३ । ३६६ ॥ बाणराजा च ॥

दोग्धा, [ऋ] पुं, (दोग्धीति । दुह+तृच् ।) अर्थोपजीविकविः । वत्सः । गोपालः । इति मेदिनी । धे, ८ ॥ दोहनकर्त्तरि, त्रि ॥ (यथा, कुमारे ।१।२।
"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे ॥")

दोग्ध्री, स्त्री, (दोग्धृ+ङीप् ।) गौः । इति राजनिर्घण्टः ॥ (यथा, रघुः । २ । २३ ।
"दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥")

दोदुल्यमानः, त्रि, (दुल+यङ्+शानच् ।) पुनःपुनरतिशयेन वा दोलनविशिष्टः । इति व्याकरणम् ॥

दोधः, पुं, (दोग्धीति । दुह+अच् । निपातनात् साधुः ।) गोवत्सः । यथा,—
"देव सदोधकदम्बतलस्थ-
श्रीधर तारकनामपदं मे ।
कण्ठतलेऽसुविनिर्गमकाले
स्वप्नमपि प्रणमेष्यति योगम् ॥"
इति छन्दोमञ्जरी ॥

दोधकः, पु, छन्दोविशेषः । यथा, श्रुतबोधे ।
"आद्यचतुर्थमहीननितम्बे
सप्तमकं दशमञ्च तथान्त्यम् ।"

यत्र गुरु प्रकटस्मरराग
तत् कथितं तव दोधकवृत्तम् ॥"

दोधूयमानः, त्रि, (पुनः पुनरतिशयेन वा धूयते । धु कम्पने + "धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ।" ३।१।२२ । इति यङ् । "गुणो यङ्लुकोः ।" ७ । ४ । ८२ । इति अभ्यासस्य गुणः । ततः अभ्यासस्वत्रानुसारेण दोधूयधातुः । यङन्तत्वादात्मनेपदम् । ततः शानच् ।) पुनःपुनरतिशयेन वा कम्पविशिष्टः । यथा,—

"नभस्वदासङ्गभयेव साध्वी
दोधूयमाना वडभीपताका ।"
इति छन्दोमञ्जरी ॥

"प्रलयेऽपि दोधूयमानाः परमाणवः तिष्ठन्ति ।"
इति शिरोमणिः ॥

दोरक, पुं, (डोरक + निपातनात् डस्य द ।) वीणादिवन्धनरज्जुः । इति शब्दार्थकल्पतरुः ॥

दोर्गडु, पुं, (दोषा बाहुना गडुः कुण्ठितः ।) कुण्ठितहस्तः । तत्पर्य्यायः । कुण्यः २ बाहुकुब्जः ३ । इति जटाधरः ॥

दोर्ग्रह, त्रि, (दोर्गृह्यते अनेनेति । ग्रह + करणे अप् ।) बलवान् । तत्पर्य्यायः । करालः २ स्थाम, ३ । इति हारावली । १२७ ॥ (दोष्णो ग्रहः ।) भुजस्य ग्रहणं तस्य यथा च ॥

दोर्दण्ड, पुं, (दोर्दण्ड इव ।) बाहुरूपदण्डः । यथा । "दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयम् ।" इत्युद्भट ॥

दोर्मध्य, क्ली, (दोष्णो मध्यम् ।) बाहुमध्यभागः । इति शब्दार्थकल्पतरुः ॥ पाखु इति भाषा ॥

दोर्मूल, क्ली, (दोषो मूलम् ।) कक्षः । बगल इति भाषा । तत्पर्य्यायः । भुजकोटरः २ खण्डिकः ३ कक्षा ४ । इति हेमचन्द्रः । ३ । २५३ ॥

दोल, पुं दोलनम् । दुलधातोर्भावे घञ्प्रत्ययेन निष्पन्नः । (दोल्यते अस्मिन् कृष्णेनेति । दोलि + अधिकरणे घञ् ।) श्रीकृष्णस्य यात्राविशेषः । अस्य प्रमाणं यथा, पाद्मे पातालखण्डे ।

"विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्द्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसन्मितौ ।
पूजयित्वा विधिवद्भक्त्या फल्गुचूर्णैश्चतुर्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ।
हरिद्राचारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम् ।
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ॥
पञ्चाहानि त्र्यहाणि स्युर्दोलोत्सवो विधीयते ।
दक्षिणाभिमुखं कृष्णं दोलयानं सकृन्नरा ॥
दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः ॥"

अपि च ।

जैमिनिरुवाच ।

"फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमम् ।
यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै ॥
प्रत्यर्च्चां देवदेवस्य गोविन्दाख्यान्तु कारयेत् ।
प्रासादं पुरतः कुर्य्यात् षोडशस्तम्भसंस्कृतम् ॥
चतुरस्रं चतुर्द्वारं मण्डपं वेदिकान्वितम् ।
चारुचन्द्रातपं माल्यचामरध्वजशोभितम् ॥
भद्रासनं वेदिकायां श्रीपर्णीकाष्ठनिर्म्मितम् ।
चलनोत्सवं प्रकुर्व्वीत पञ्चाहानि त्र्यहाणि वा ॥
फाल्गुन्याः पूर्व्वतो विप्राश्चतुर्द्दश्यां निशामुखे ।
वह्न्युत्सवं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः ॥
एतत् सर्व्वं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः ।
गोविन्दानुग्रहीतस्तु यात्राङ्गं तत् प्रकीर्त्तितम् ॥
आचार्य्यवरणं कृत्वा वह्निं निर्म्मथनोद्भवम् ।
भूमिं संस्कृत्य विधिवत् तृणराशिं महोच्छ्रितम् ॥
सपर्णं कारयित्वा तु वह्निं तत्र विनिक्षिपेत् ।
पूजयित्वा विधानेन कुष्माण्डविधिना हुनेत् ॥
गोविन्दं पूजयित्वा तु भ्रामयेत् सप्त स विभुम् ।
तस्मिन् काले हरिं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥
यत्नात्तं रक्षयेद्वह्निं यावद्यात्रा समाप्यते ॥*॥
प्रान्तयामे चतुर्द्दश्यां गोविन्दप्रतिमां शुभाम् ।
वासयित्वा हरेरग्रे पूजयेत् पुरुषोत्तमम् ।
उपचारावशिष्टैस्तु प्रत्यर्च्चामपि पूजयेत् ॥
ततो वरश्च चवन मालाश्च द्विजसत्तमाः ।
अर्च्चायां विन्यसेन्मन्त्रं परं ज्योतिर्विभावयन् ॥
ततश्च प्रतिमा साक्षात् जायते पुरुषोत्तमः ।
रत्नान्दोलिकया तां वै नयेत् स्नानस्य मण्डपम् ॥
नानातूर्य्यनिनादैश्च शङ्खध्वनिपुरःसरम् ।
जयशब्दैस्तथा स्तोत्रैः पुष्पवृष्टिभिरेव च ॥
छत्रध्वजपताकाभिश्चामरव्यजनैस्तथा ।
निरन्तरं दीपिकाभिस्तथा कुर्य्यान्महोत्सवम् ॥
आगच्छन्ति तदा देवाः पितामहपुरोगमाः ।
द्रष्टुमभिगयो, सार्द्धं गोविन्दस्य महोत्सवम् ॥
भद्रासनेऽधिवास्यैनं पूजयेदुपचारकैः ॥
महास्नानस्य विधिना स्नपनं तस्य कारयेत् ।
पश्चात्तैश्च सर्व्वैर्वा तेषामन्यतमेन वा ।
स्नानान्ते गन्धतोयेन श्रीसूक्तेनाभिषेचयेत् ॥
संप्रोक्ष्य भूषयेद्देवं वस्त्रालङ्कारमाल्यकैः ।
नीराजयित्वा संपूज्य प्रासादं परिवेष्टयेत् ॥
सम्भ्रमत्वस्ततो देवं दोलमण्डपमानयेत् ।
सुसंस्कृतायां रथ्यायां पताकातोरणादिभिः ॥
अधोदेशे मण्डपं तं सप्तशो भ्रामयेत्ततः ।
ऊर्द्ध्वदेशे पुनः सप्तस्तम्भवेद्यान्तु सप्त वै ॥
यात्रावसाने च पुनर्भ्रामयेदेकविंशतिम् ।
इय लीला भगवतः पितामहमुखेरिता ॥
राजर्षिणेन्द्रद्युम्नेन कारिता पूर्व्वमेव हि ।
फलपुष्पावनम्रेषु शाखासु परिकल्पिते ॥
वृन्दावनान्तरे रम्ये मत्तसारसवारिणि ।
कोकिलारावमधुरे नानापक्षिगणाकुले ॥
नानोपशोभारचिते कालागुरुसुधूपिते ।
प्रफुल्लकेतकीचम्पकगन्धामोदि-दिगन्तरे ॥
मल्लिकाशोकपुन्नागचम्पकैरुपशोभिते ।
सत्काननान्तर्घटिते मण्डपे चारुतोरणे ॥
भूषिते माल्यवसनचामरैरुपशोभिते ।
रत्नखट्वान्दोलिकायां तन्मध्ये वासयेत् प्रभुम् ॥
अनर्घरत्नघटितकुण्डलोद्भासितश्रुतिम् ।
यथास्थानं यथाशोभं दिव्यालङ्काररञ्जनम् ॥
विकचाम्बुजमध्यस्थं विश्वधात्र्या श्रिया युतम् ।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ॥
सुप्रसन्नं सुनासाभ्रूपीनवक्षःस्थलोज्ज्वलम् ।
पुरो व्योमस्थितैर्देवैर्ब्रह्माद्यैर्नतकन्धरैः ॥
कृताञ्जलिपुटैर्भक्त्या जयशब्दैरभिष्टुतम् ।
गन्धर्व्वैरप्सरोभिश्च किन्नरैः सिद्धचारणैः ॥
हाहाहूहूप्रभृतिभिः सस्वरं दिव्यगायनैः ।
अहम्पूर्व्विकया नृत्यगीतवाद्यविकारिभिः ॥
नेत्राम्बुजसहस्रैश्च पूज्यमानं मुदान्वितैः ।
विकिरद्भिः सर्व्वदिक्षु गन्धचन्दनजं रजः ॥
उपवेश्याथ गोविन्दं पूजयेदुपचारकैः ।
बल्लवीवृन्दमध्यस्थं कदम्बतरुमूलगम् ॥
हावहास्यविलासैश्च क्रीडमानं वनान्तरे ।
गोपीभिश्चैव गोपालैर्लीलान्दोलिकया नगम् ॥
चिन्तयित्वा जगन्नाथं विकिरेद्गन्धचूर्णकैः ।
सकर्पूरैः रक्तपीतशुक्लैर्दिक्षु समन्ततः ॥
दिव्यैर्वस्त्रैर्दिव्यमाल्यैर्दिव्यगन्धैः सुधूपकैः ।
चामरान्दोलनैर्गानैः स्तुतिभिश्च समर्च्चितम् ॥
आन्दोलयेत् दोलिकास्थं सप्तवारान् शनैः शनैः ।
तदा पश्यन्ति ये कृष्णं मुक्तिस्तेषां न संशय ॥
ब्रह्महत्यादिपापानां पञ्चानां संक्षयो भवेत् ।
त्रिवारं दोलयेद्देवं सर्व्वपापापनोदनम् ॥
भक्तानुग्राहकं पुंसां मुक्तिसन्तोषकारणम् ।
लीलाविचेष्टितं यस्य कृत्रिमं सहजं यथा ॥
अघक्षयकरं मूलाविद्यानिवर्त्तकम् ।
पश्यन् द्वितीयं हरति गोहत्याद्युपपातकम् ॥
त्रिधोत्थशेषपापानि तृतीये नात्र संशयः ।
दृष्ट्वा दोलास्थितं देवं सर्व्वपापैः प्रमुच्यते ॥
आध्यात्मिकैराधिदैवैराधिभूतैर्विमुच्यते ।
इमां यात्रां कारयित्वा चक्रवर्त्ती भवेन्नृप ॥
ब्राह्मणस्तु चतुर्वेदी ज्ञानवान् जायते ध्रुवम् ॥"
इति स्कान्दे उत्कलखण्डे ४२ अध्याय ॥*॥

तस्य सङ्क्षेपव्यवस्था यथा,—यदा अरुणोदयकाले पौर्णमासीलाभस्तदैव दोलयात्रा । उभयदिने अरुणोदयकाले पौर्णमासीलाभे पूर्व्वदिने । सङ्गवमध्याह्नकालव्यापित्वात् त्रिसन्ध्याव्यापित्वेन तिथेर्बलवत्त्वाच्च । यदा तिथिक्षयवशादरुणोदयकाले न पौर्णमासीलाभस्तदा कदाचित् सहायभावेन चतुर्द्दश्यादरः । एतेन पूर्व्वदिने अरुणोदयं विना पूर्व्वाह्णे पौर्णमासीलाभः परदिने सम्पूर्णाम्पूर्णतिथिलाभस्तदा फलगूत्सवः पूर्व्वदिने युग्मवचनानुरोधादिति निरस्तम् । उभयदिने कर्म्मयोग्यप्रशस्तकालप्राप्ततिथिसन्देह एव युग्मवचनप्रवृत्तेः । एवं पञ्चमीपर्य्यन्तासु तिथिषु तत्करणे अनयैव दिशा व्यवस्थोन्नेयेति । इति दोलयात्रातत्त्वम् ॥*॥

चैत्रे मासि दोलस्य प्रमाणं गारुडे ।
"चैत्रे मासि सिते पक्षे दक्षिणाभिमुखं हरिम् ।
दोलारूढं समभ्यर्च्च्य मासमान्दोलयेत् कलौ ॥"
तन्नित्यता च पद्मपुराणे ।
"ऊर्ज्जे रथं मधौ दोलां श्रावणे तन्तु पर्व्व च ।
चैत्रे मदनकारोहमकुर्व्वाणो व्रजत्यधः ॥

विष्णुं दोलास्थितं दृष्ट्वा त्रैलोक्यस्योत्सवो भवेत्।
तस्मात् कार्य्यमुतं त्यक्त्वा दोलायां उत्सवं कुरु ॥"
अथ दोलोत्सवविधिः।
"चैत्रस्य शुक्लद्वादश्यां प्रातःकृत्यं समाप्य च।
नित्यपूजां विधायाथ कुर्य्याद्दोलोत्सवं व्रती ॥
तदर्थञ्च विशेषेण नैवेद्यादिकमर्पयेत्।
समाप्य वैष्णवांस्तैश्च गीतनृत्यादि कारयेत् ॥
महानीराजनं कृत्वा प्रक्षिपेद्‌ध्वजतोपरि।
गन्धानुलेपचूर्णानि विचित्राणि विभागशः ॥
सन्तोष्य वैष्णवांस्तैश्च गीतनृत्यादिभिः प्रभुम्।
नत्वाभ्यर्थ्याप्रमत्तः सन् दोलामारोहयेच्छुभाम् ॥
गीत्वा वह्निर्वैदिकायासनुज्ञाया यथाविधि।
अभ्यर्च्यान्दोलयेत् कृष्णं सत्त्वलोकावलोकितम् ॥
एवमभ्यर्च्चयन् यामे यामे त्वान्दोलयन् प्रभुम्।
महोत्सवेन गमयेद्दिनं रात्रिञ्च यत्नतः ॥
एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः।
प्रणम्य प्रार्थ्य निर्म्माल्यं कृष्णं स्वालयमानयेत् ॥
चैत्रे मासि सिते पक्षे तृतीयायां रमापतिम्।
दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ ॥
यत् फाल्गुनस्य राकायामुत्तराफाल्गुनी यदा।
तदा दोलोत्सवः कार्य्यस्तत्र श्रीपुरुषोत्तमे ॥"
इति हरिभक्तिविलासः ॥

दोला, स्त्री, गौजिनी। (दोल्यते अस्यामिति। दोलि+घञ्+टाप्।) उद्यानादिषु क्रीडार्थं काष्ठादिमयो हिन्दोलकः। हिँदला इति भाषा। वाह्यखट्वा। डुली इति भाषा। तत्पर्य्यायः। प्रेङ्खा २। इत्यमरः। २। ८। ५३ ॥ दोली ३ खट्वाला ४ दोलिका ५। इति शब्दरत्नावली ॥ प्रेङ्खः ६। इति भरतधृतरत्नकोषः ॥ हिन्दोला ७। इति हारावली। २१४ ॥ (यथा, महाभारते। ३। ६२। २७।
"द्विधेव हृदयं तस्य दुःखितस्याभवत् तदा।
दोलेव मुहुरायाति याति चैव सभां प्रति ॥")
दोलाहाराभ्रमणगुणः। वातकोपनत्वम्। अङ्गस्थैर्य्यबलाग्निकारित्वञ्च। इति राजवल्लभः ॥ अस्य विवरणं चतुर्दोलशब्दे द्रष्टव्यम् ॥

दोलायमानः, त्रि, (दोलां करोतीति। दोला+क्यङ्। ततः शानच्।) दोलनविशिष्टः। यथा,
"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम्।
रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"
इत्युत्कलखण्डम् ॥

दोलिका, स्त्री, (दोला+स्वार्थे कन्। टापि अत इत्वम्।) हिन्दोला। इति हारावली। १८१ ॥

दोली, स्त्री, (दोल्यते अनयेति। दोलि+इन्। कृदिकारादिति वा ङीष्।) दोला। इति शब्दरत्नावली॥ डुली इति भाषा ॥

दोषः, पुं, (दूष्यते इति। दुष वैकृत्ये+णिच्+भावे घञ्।) दूषणम्। यथा,—
"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥"
इति चाणक्यम्। ४८ ॥
(दुष्यत्यनेनेति करणे घञ्।) पापम्। इति मेदिनी। षे, ४ ॥ वातपित्तकफाः। इति शब्दचन्द्रिका ॥ (यथा,—
"नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥"
इति सुश्रुते। १। ३५ अध्यायः ॥)
गोवत्सः। इति शब्दरत्नावली ॥ (दुष्यतेऽन्धकारेणेति। दुष्+घञ्। प्रदोषः। यथा, भागवते। ६। ८। १६।
"देवोऽपराह्णे मधुहोग्रधन्वा
सायं त्रिधामावतु माधवो माम्।
दोषे हृषीकेश उतार्द्धरात्रे
निशीथ एकोऽवतु पद्मनाभः ॥")
काव्यगुणेतरः। स च रसापकर्षकः। यथा,
"मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रया-
द्वाच्यः।"
तत्र पददोषा यथा,—
"दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम्।
निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधा-
श्लीलम् ॥
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम्।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगत-
मेव ॥"
वाक्यदोषो यथा,—
"प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हत-
वृत्तम्।
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम्॥
अर्द्धान्तरैकवाचकमभवन्मतयोगमनभिहित-
वाच्यम्।
अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम्॥
भग्नप्रक्रममक्रममतपरार्थञ्च वाक्यमेवं तथा ॥"
अर्थदोषा यथा,—
"अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः।
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ॥
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्तः।
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ॥
विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः ॥"
रसदोषा यथा,—
"व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः ॥
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्य्ययः।
अनङ्गस्याभिधानञ्च रसे दोषाः स्युरीदृशाः ॥"
उक्तपदादिदोषाः स्थानविशेषे क्वचित् गुणा भवन्ति। इति काव्यप्रकाशः ॥ * ॥ दोषविशेषा यथा, राजधर्म्मे।
"यतः प्रभवति क्रोधः कामो वा भरतर्षभ।
शोकमोहौ विधित्सा च परासुत्वञ्च तद्वद ॥
लोभो मात्सर्य्यमीर्ष्या च कुत्सासूया कृपा
भयम्॥"
आचमनं विना भक्षणे दोषाभावो यथा,—
"मधुपर्के च सोमे च ताम्बूलस्य च भक्षणे।
फलमूले चेक्षुदण्डे न दोषं प्राह वै मनुः ॥"
इति कूर्म्मपुराणम् ॥ * ॥
द्वात्रिंशत्प्रकारा दोषा यथा,—
"यानैर्व्वा पादुकैर्व्वापि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम्।
एकहस्तप्रणामश्च तथा चैकं प्रदक्षिणम् ॥
पादप्रसारणञ्चाग्रे तथा पर्य्यङ्कबन्धनम्।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च ॥
उच्चैर्भाषो मिथोजल्पो रोदनादि च विग्रहः।
निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणम् ॥
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ॥
अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः ॥"
इति पाद्मे पातालखण्डम् ॥ * ॥
(आततायिमारणे अधर्म्मदण्डो दोषो न भवति। यथा, मनुः। ८। ३५१।
"नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति ॥"
"न कश्चिदपि अधर्म्मदण्डः प्रायश्चित्ताख्यो दोषो वा भवति।" इति तट्टीकायां कुल्लूकभट्टः ॥ अष्टवसूनामन्यतमः स च षष्ठः। यथा, भागवते। ६। ६। ११।
"द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः ॥")

दोषकः, पुं, (दोष एव। स्वार्थे कन्।) गोवत्सः। इति शब्दरत्नावली ॥

दोषग्राही, [न्] त्रि, (दोषं गृह्णातीति। ग्रह+णिनिः।) दोषग्रहणकर्त्ता। तत्पर्य्यायः। खलः २ पुरोभागी ३ द्विजिह्वः ४ मत्सरी ५। इति हलायुधः ॥
"विसृज्य शूर्पवद्दोषान् गुणान् गृह्णन्ति साधवः।
दोषग्राही गुणत्यागी चालनीव हि दुर्ज्जनः ॥"
इत्युद्भटः ॥

दोषज्ञः, त्रि, (दोषं जानातीति। दोष+ज्ञा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पण्डितः। इत्यमरः। २। ७। ५ ॥ (यथा, रघुः। १। ९३।
"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सूनुः सूनृतवाक् स्रष्टुः विससर्जोर्जितश्रियम् ॥"
दोषान् वातपित्तकफान् जानातीति। कः।) चिकित्सकः। इति हेमचन्द्रः। ३। ५ ॥ दोषविषयकज्ञानयुक्तश्च ॥

दोषत्रयं, क्ली, (दोषाणां वातपित्तकफानां त्रयम्।) वातपित्तकफाः। इति राजनिर्घण्टः ॥ (दोषाणां त्रयम्। यथाह व्यासः।
"रूप रूपविवर्ज्जितस्य भवतो ध्यानेन यद्वर्णितं
स्तुत्यानिर्व्वचनीयताखिलगुरोर्दूरीकृतं यन्मया।
व्यापित्वञ्च विनाशितं भगवतो यत्तीर्थयात्रादिना
क्षन्तव्यं जगदीश। तत् विकलतादोषत्रयं मामकम् ॥")

दोषा स्त्री, (दुष्यतेऽन्धकारेणेति । दुष्+घञ्+टाप् ।) रात्रिः । (यथा, आर्य्यासप्तशत्याम् । ७८८ ।
"दोषदशा कुलयुवतिर्वैदग्ध्येनैव मलिनतामेति ।
दोषा अपि भूषायै गणिकाया: शशिकलायाश्च ॥"
दाम्यत्यनेनेति । दम्+"दमेर्डोसि ।" उणां । २ । ६८ । इति डोषि: । भागुरिमते टाप् ।) भुजः । इति मेदिनी । षे, १५ ॥
दोषा, व, (दुष्यत्यनेति । दुष्+"च्चा: समिध्-निकषिभ्याम् ।" उणां । ४ । १७४ । इत्यच "बाहुलकात् दिविदुषिभ्याच ।"इत्युज्ज्वलदत्तोक्तेः आ ।) "स्वरादिनिपातमव्ययम् ।" १ । १ । ३७ । इति स्वरादिपाठात् अव्ययत्वम् ।) नक्तम् । रजन्याम् इत्यर्थः । इत्यमर: । ३।४।६ ॥ (यथा, माघे । ४ । ४६ ।
"दोषापि नूनमहिमांशुरसौ किलेति
व्याकोशकोकनदतां दधते नलिन्य: ॥")
निशामुखम् । इति हेमचन्द्र: ॥
दोषाकर:, पु, (दोषा रात्रौ करो यस्य । यद्वा, दोषां करोतीति । दोषा+कृ+बाहुलकात् ट. ।) चन्द्र: । यथा, ज्योतिषतत्त्वे ।
"स्वत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रवर्गसौम्यग्रहगोऽथ तदीक्षितो वा ।
यामित्रवैधविहितानयपञ्चत्य दोषान्
दोषाकर. सुखमनेकविधं विधत्ते ॥"
(यथा च, प्रद्युम्नविजये । ६ । ३ ।
"दोषाकराङ्कमलिनाम्बरभिन्नता ते
पञ्चप्रसूनशरता च मनोभवस्य ।
प्राणत्वमस्य जगतां च समीरणस्य
मन्येऽद्य पुण्यजनतैव निशाचराणाम् ॥")
दोषाणामाकरश्च ॥
दोषाक्लेशी, स्त्री, (दोषां भुवं क्लिश्नातीति । क्लिश्+अण् । गौरादित्वात् ङीष् ।) वनवल्वरिका । इति राजनिर्घण्ट: ॥
दोषातन:, त्रि, (दोषा रात्रौ भव इति । दोषा+"सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।" ४ । ३ । २३ । इति ट्यु, तुट् च ।) रात्रिभव. । इति व्याकरणम् ॥
दोषातिलक:, पु, (दोषाया रजन्यास्तिलक इव ।) प्रदीप: । इति त्रिकाण्डशेष. ॥
दोषास्य., पु, (दोषा रात्रिरास्यमिव यस्य । दोषातिलकत्वादस्य तथात्वम् ।) प्रदीप: । इति शब्दचन्द्रिका ॥
दोषिक पु, (दोषा: वातपित्तकफा: कारणत्वेन सन्त्यस्येति । ठन् ।) रोग: । इति शब्दचन्द्रिका ॥
दोषी, [न्] त्रि, (दुष्यतीति । दुष्+"सम्पृचा-नुरुधाङ्यमाङ्यसपरिसृसंसृजेति ।" ३ । २ । १४२ । इति घिनुण् ।) दोषयुक्त । अपराधी । दोषशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्न इति वा ॥
दोषैकदृक्, [श्] त्रि, (दोषे एवैकस्मिन् न तु गुणसङ्घे दृक् ज्ञानमस्येति । यद्वा, दोषमेव एक केवल पश्यतीति । दृश्+क्विप् ।) दोषमात्र-दर्शी । यो गुणं त्यक्त्वा केवलं दोषमेव पश्यति स: । दोषे एकस्मिन्नेव भावं यस्य स: । इति भरत: ॥ तत्पर्य्याय: । पुरोभागी २ । इत्यमर: । ३ । १ । ४६ ॥
दोस्थ:, पु, (दोषि हस्ते समयया दोर्षोपरि वा तिष्ठतीति । स्था+क: ।) क्रीडा । क्रीडक: । सेवा । सेवक: । इति त्रिकाण्डशेष: ॥ दो.स्थिते, त्रि ॥
दोह., पु, (दोग्धि अस्मिन्निति । दुह्+आधारे घञ् ।) दोहनपात्रम् । इति शब्दचन्द्रिका ॥ (यथा, भागवते । ४ । १८ । २७ ।
"एवं पृथ्वादय: पृथ्वीमन्नादा: स्वन्नमात्मन: ।
दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ॥"
दुह्यते इति । दुह्+कर्म्मणि घञ् ।) दुग्धम् । ("दुह्यते इति दोह: क्षीर स्यो गोदोहस्य विकार: हैयङ्गवीनम् ।" इति सिद्धान्तकौमुदी ॥ दुह्+भावे घञ् ।) दोहनम् ॥ (यथा, रघु. । २ । २३ ।
"दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥")
दोहजं, क्ली, (दोहात् दोहनाज्जायते इति । दोह+जन्+ड: ।) दुग्धम् । इति शब्दार्थ-कल्पतरु: ॥
दोहडिका, स्त्री, छन्दोविशेष: । इति छन्दो-मञ्जरी ॥ दोहा इति भाषा । अस्य विवरणं छन्द:शब्दे द्रष्टव्यम् ॥
दोहद, क्ली, (दोहमाकर्षं ददातीति । दोह+दा+"आतोऽनुपसर्गे क: ।" ३ । २ । ३ । इति क: ।) इच्छा । इत्यमर: । १ । ७ । २७ ॥
दोहद:, पु, क्ली, (दोहमाकर्ष ददातीति । दा+क ।) गर्भिण्यभिलाष: । साद इति भाषा । तत्पर्य्याय: । दौर्हृदम् २ श्रद्धा ३ लालसा ४ । इति हेमचन्द्र: । ३ । २०५ ॥ आसुत ५ । इति रत्नकोष: ॥ (यथा, याज्ञवल्क्यसंहितायाम् । ३ । ७८ ।
"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ।
वैरूप्यं मरणं वापि तस्मात् कार्य्यं प्रियं स्त्रिया: ॥")
गर्भचिह्नम् । इति भरतद्वयकोषान्तरम् ॥ (पुष्पोद्गमकौषधम् । यथा, रघौ । ८ । ६२ ।
"कुसुमं कृतदोहदस्त्वया
यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत्
तव नेष्यामि निवापमाल्यताम् ॥"
यथा च, मेघदूते । ७८ ।
"रक्ताशोकश्चलकिसलय: केशरश्चात्र कान्त:
प्रत्यासन्नौ कुरुवकवृतेर्माधवीमण्डपस्य ।
एक: सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्या: ॥"
अत्र यस्य यो दोहद: स उक्तो मल्लिनाथेन यथा,—
"स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति बकुल: शीधुगण्डूषसेकात्
पादाघातादशोकस्तिलककुरुवकौ वीक्षणालिङ्ग-
नाभ्याम् ।
मन्दारो नर्म्मवाक्यात् पटुमृदुहसनात् चम्पको
वक्त्रवातात्
चूतो गीतान्नमेरुर्विकसति च पुरो नर्त्तनात् कर्णि-
कार: ॥")
दोहदलक्षण, क्ली, (दोहदस्य गर्भस्य लक्षणं यत्र ।) वय:सन्धि: । गर्भ: । इति मेदिनी । णे, ११७ ॥
दोहदवती, स्त्री, (दोहदो गर्भिण्यभिलाषोऽस्त्यस्या इति । दोहद+मतुप् मस्य व: । ङीप् च ।) अमपाकादिद्रव्यविशेषाभिलाषवती गर्भवती । इति भरत: ॥ तत्पर्य्याय: । श्रद्धालु: २ । इत्यमर: । २ । ६ । २१ ॥ ॥ गर्भिणीकर्त्तव्याकर्त्तव्यं यथा,—
"दित्या गर्भमथाधत्त कश्यप: प्राह तां पुन: ।
त्वया यत्नो विधातव्य: अस्मिन् गर्भे वरानने ॥
संवत्सरशतं त्वेकमस्मिन्नेव तपोवने ।
सन्ध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि ॥
न स्थातव्यं न गन्तव्यं वृक्षमूलेषु सर्व्वदा ।
नोपस्करेषु विशेन्मुषलोलूखलादिषु ॥
जलञ्च नावगाहेत शून्यागारञ्च वर्जयेत् ।
वल्मीकेषु न तिष्ठेत न चोद्विग्नमना भवेत् ॥
विलिखेन्न नखैर्भूमिं नाङ्गारेण न भस्मना ।
न शयालु: सदा तिष्ठेद्व्यायामञ्च विवर्जयेत् ॥
न तुषाङ्गारभस्मास्थिकपालेषु समाविशेत् ।
वर्ज्जयेत् कलहं लोके गात्रभङ्गञ्च वर्ज्जयेत् ॥
न मुक्तकेशी तिष्ठेत नाशुचि: स्यात् कदाचन ।
न शयीतोत्तरशिरा न चापरशिरा: क्वचित् ॥
न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती ।
नामङ्गल्यां वदेद्वाचं न च हास्याधिका भवेत् ॥
कुर्य्याच्च गुरुशुश्रूषां नित्यमङ्गलतत्परा ।
सर्व्वौषधीभि. कोष्णेन वारिणा स्नानमाचरेत् ॥
कृतरक्षा सुभूषा च वास्तुपूजनतत्परा ।
तिष्ठेत् प्रसन्नवदना भर्त्तु: प्रियहिते रता ॥
दानशीला तृतीयायां पार्व्वत्या नक्तमाचरेत् ।
इतिवृत्ता भवेन्नारी विशेषेण तु गर्भिणी ॥
यस्तु तस्या भवेत् पुत्र: शतायुर्बलसंयुत: ।
अन्यथा गर्भपतनमवाप्नोति न संशय: ॥
तस्मात्त्वमनया वृत्त्या गर्भेऽस्मिन् यत्नमाचर ।"
इति मत्स्यपुराणम् ॥
दोहदान्विता, स्त्री, (दोहदेन गर्भजनिताभि-लाषेण अन्विता ।) दोहदवती । इति हेम-चन्द्र: । ३ । २०३ ॥
दोहनं, क्ली, (दुह्+भावे ल्युट् ।) स्तनाद्दुग्ध-नि:सारणम् । दोया इति भाषा । दुहधातो-र्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥ (दुह्यतेऽस्मि-न्निति । दुह्+आधारे ल्युट् ।) दोहनपात्रम् । यथा, महाभारते । १३ । ६४ । ४१ ।
"बालसेन निदानेन कांस्यं भवतु दोहनम् ।
दुह्येत परवत्सेन यस्ते हरति पुष्करम् ॥")
दोहनी, स्त्री, (दुह्यते अस्यामिति । दुह्+आधारे ल्युट् । ङीप् ।) दोहनपात्रम् । तत्पर्य्याय. ।

क्षेपनम् २ मारी ३ दोहः ४ दोहनम् ५ । इति शब्दरत्नावली ।

दोहलः, पुं, (दोहमाकर्षं लातीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) दोहदः । इच्छा । इति शब्दार्थकल्पतरुः ॥ (यथा, मालविकाग्निमित्रनाटके । ८ । ४७ ।

"अशोक । यदि सद्य एव सुकुलैर्न सम्पत्स्यते मुधा वहसि दोहलं ललितकामिसाधारणम् ॥")

दोहलवती, स्त्री, (दोहलोऽस्त्यस्या इति मतुप् । मस्य वः । ङीप् ।) दोहदवती । इति शब्दार्थकल्पतरुः ॥

दोहली, स्त्री, (दोहं लातीति । ला + कः । गौरादित्वात् ङीष् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अशोकशब्देऽस्या विवरणं ज्ञेयम् ॥)

दोहापनयः, पुं, (दोहं दोहनमपनयति खनिःसरणेनेति । अप + नी + अच् ।) दुग्धम् । इति त्रिकाण्डशेषः ॥

दोहीयान्, [स्] त्रि, (अयमनयोरतिशयेन दोग्धा । "तुश्छन्दसि ।" ५ । ३ । ५९ । इति ईयसुन् । "तुरिष्ठेमेयःसु ।" ६।४।१५४ । इति तृशब्दस्य लोपः ।) अतिशयदोहकः ॥

दोह्यं, त्रि, (दुह्यते इति । दुह् + ण्यत् ।) दोहनीयम् । दुग्धम् । दोग्धव्यम् । इति व्याकरणम् ॥ (दुह्यतेऽस्या इति । गोमहिष्यादि । इति मिताक्षरा ॥ यथा, याज्ञवल्क्ये । २ । १८० ।

"दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम् । बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥")

दौःसाधिकः, पुं, (दुर्दुःसाधः कर्म्म तत्र नियुक्तः । ठक् ।) द्वाःस्थितः । द्वारपालः । इति त्रिकाण्डशेषः ॥

दौकूलं, त्रि, (दुकूलेन परिवृतो रथ इति । "परिवृतो रथः ।" ४ । २ । १० । इति अण् ।) दुकूलेनावृतरथादि । इत्यमरटीकायां भरतः ॥

दौत्यं, स्त्री, (दूतस्य भावः कर्म्म वा । ष्यञ् ।) दूत्यम् । दूतस्य भावः । दूतस्य कर्म्म । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । १७२ । १८ ।

"दौत्यञ्च सत् कृतं घोरे विग्रहे जनमेजय । ॥")

दौरात्म्यं, स्त्री, दुर्निन्दित आत्मा यस्य धृतिः बुद्धिः स्वभावः शरीरं वा यस्य स दुरात्मा । तस्य भावकर्म्मार्थे ष्यञ्प्रत्ययः । (ष्यञ् ।) दुरात्मनो भावः । दुरात्मनः कर्म्म । (यथा, महाभारते । २ । १५ । ७ ।

"शङ्किताः स्म महाभाग ! दौरात्म्यात् तस्य मागध ! ॥")

दौर्गन्ध्यं, स्त्री, (दुर्दुष्टो गन्धोऽस्य दुर्गन्धः । ततो भावे ष्यञ् ।) दुर्गन्धता । (यथा, महाभारते । ३ । २६० । १३ ।

"न स्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव वा ॥")

तन्नाशकतैलं यथा,—

"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका । जातीकक्कोलपूगानां लवङ्गस्य फलानि च ॥ अगुरुश्चीरकाश्मर्यः कुष्ठं तगरनालिका । गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम् ॥ सरलः सप्तपर्णश्च लाक्षा चामलकी तथा । कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ॥ प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ॥"

इति गारुडे १९८ अध्यायः ॥

दौर्ग्यं, स्त्री, दुर्गवृत्तिधर्म्मः । दुर्गसम्बन्धि । दुर्गस्य भावः दुर्गस्येदं वेत्यर्थे ष्यञ्प्रत्ययः (ष्यञ्)॥

दौर्ज्जन्यं, स्त्री, दुर्ज्जनस्य भाव इदं वेत्यर्थे ष्यञ्प्रत्ययः (ष्यञ् ।) दुर्ज्जनत्वम् । (यथा, महाभारते । ६ । १८ । ७६ ।

"तदिदं मम दौर्ज्जन्यं बालिशस्य महीयसि । अनुमर्हति मातस्त्वं दिष्ट्या गर्भो स्वतोऽस्थितः ॥")

दौर्ब्बल्यं, स्त्री, दुर्ब्बलस्य भाव इत्यर्थे ष्यञ्प्रत्ययः (ष्यञ्)। दुर्ब्बलता । अबलत्वम् । (यथा, मनुः । ८ । १७१ ।

"अनादेयस्य चादानादादेयस्य च विवर्ज्जनात् । दौर्ब्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ॥")

दौर्भागिनेयः, पुं, (दुर्भगाया अपत्यं पुमान् । दुर्भगा + "कल्याण्यादीनामिनङ् च ।" ४ । १ । १२६ । इति ढक् इनङादेशश्च ।) दुर्भगापुत्त्रः । इति शब्दरत्नावली ॥ दुर्भगायाः कन्या दौर्भागिनेयी ॥

दौर्भाग्यं, स्त्री, दुर्भगस्य दुर्भगाया वा भावः । (ष्यञ् । "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च ।" ७ । ३ । १९ । इत्युभयपदवृद्धिः ।) दुर्भगत्वम् । यथा, ज्योतिस्तत्त्वे ।

"शुक्ला पिबति या नारी भुङ्क्ते स्वामिरते यदि । दौर्भाग्यं जायते तस्याः शपन्ति कुलदेवताः ॥"

दुर्भाग्यमेव दौर्भाग्यम् । इति स्वार्थे ष्यञ्प्रत्ययः ॥

दौर्म्मनस्यं, स्त्री, दुर्म्मनसो भावः (ष्यञ्) । दुःखनिबन्धनचित्तावसादः । इति चण्डीटीकायां नागोजीभट्टः ॥ (यथा, मार्कण्डेये । ८१ । २६ ।

"तेषां ज्ञाते मे निःश्वासा दौर्म्मनस्यञ्च जायते ॥")

दौर्व्वं, स्त्री, (दूर्व्वाया इदम् । दूर्व्वा + अण् ।) दूर्व्वापर्णम् । दूर्व्वारसः । इति मेदिनी । वे,५३ ॥

दौर्हृदं, स्त्री, (दुर्हृदो भावः । युवादित्वात् अण् । बाहुलकात् न द्विपदवृद्धिः ।) इच्छा । दोहदम् । इति हेमचन्द्रः ।३।२०५॥ ("तस्मद्दौर्हृदाद्धि वीर्यवन्तं चिरायुषञ्च पुत्त्रं जनयति ।" इति सुश्रुते ॥ दूषितहृदयत्वम् । यथा, महाभारते । ५ । २९ । १४ ।

"दुर्म्मर्षियो मन्युवशानुगश्च कामात्मनो दौर्हृदे भाविनश्च ॥")

दौलेयः, पुं, (दुलेरपत्यमिति । "इतश्चानिञः ।" ४ । १ । १२२ । इति ढक् ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१५ ॥

दौष्मिः, पुं, (दुष्मस्यापत्यम् । दुष्म + इञ् ।) इन्द्रः । इति शब्दार्थकल्पतरुः ॥

दौवारिकः, पुं, (द्वारि नियुक्तः । "तत्र नियुक्तः ।" ४ । ४ ।६९। इति ठक् । ततः "द्वारादीनाञ्च ।" ७ । ३ । ४ । इति ऐच् वृद्धिः यौ-आगमश्च ।) द्वाररक्षकः । (यथा, राजतरङ्गिण्याम् । ५।२८।

"राजदौवारिकः श्रीमान् शूरस्तत्राभवन्महोदयः ।")

तत्पर्य्यायः । द्वाःस्थः २ क्षत्ता ३ दर्शकः ४ वेत्रधरः ५ । इति हलायुधः ॥ प्रतीहारः ६ प्रतिहारः ७ दर्शकः ८ द्वारी ९ वेतालः १० द्वारपालकः ११ दौःसाधिकः १२ वर्णकूटः १३ गर्ब्बाटः १४ दण्डपांशुलः १५ । इति शब्दरत्नावली ॥ द्वाःस्थितः १६ वेत्रधारकः १७ वर्णकूटः १८ दण्डवासी १९ । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—

"प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः । चित्तग्राहश्च सर्व्वेषां प्रतीहारो विधीयते ॥"

इति मत्स्यपुराणम् ॥

"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः । अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥"

इति चाणक्यम् । १०८ ॥

दौष्कुलेयः, त्रि, (दुष्कुलस्यापत्यम् । "दुष्कुलात् ढक् ।" ४ । १ । १४२ । इति ढक् ।) दुष्कुलोद्भवः । निन्दितवंशजातः । दुष्कुलशब्दात् भवार्थे वा ढक्प्रत्ययः ॥ (यथा, महाभारते । ३ । १६३ । २३ ।

"कुले जाताश्च क्लिश्यन्ते दौष्कुलेयवशानुगाः ॥")

दौष्मन्तिः, पुं, (दुष्मन्तस्यापत्यं पुमान् । दुष्मन्त + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) दुष्मन्तराजपुत्त्रः । स तु भरतराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।१।७४।२।

"रूपौदार्य्यगुणोपेतं दौष्मन्तिं जनमेजय । ॥")

दौहित्रः, पुं,स्त्री, (दुहितृ + "अनृष्यानन्तर्य्ये बिदादिभ्योऽञ् ।" ४ । १ । १०४ । इति अञ् ।) दुहितुरपत्यम् । इति हेमचन्द्रः । ३ । २०८ ॥ तत्पर्य्यायः । कुतुपः २ । इति शब्दरत्नावली ॥

"त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपस्तिलाः । दौहित्रं खड्गमित्याहुः पात्रं दुहितुस्तिलाः ॥ कपिलाया घृतञ्चैव दौहित्रमिति चोच्यते ॥"

इति मार्कण्डेयपुराणम् ॥

"पौत्रदौहित्रयोर्लोके विशेषो नास्ति कश्चन । तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"

इति दायभागः ॥

दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्त्रवदिति मनुः ॥ तदुत्पत्तौ कन्याया पितुर्भोजने दोषाभावो यथा,—

"कन्यायां प्राग्देवादिषु सुतं सुखमश्नुते । अथ सुतमिति यो मोहात् स याति नरकं व्रजेत् ॥ अप्रजायाश्च कन्यायां न भुञ्जीयात् कदाचन । दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥ महारौरवसमाकीर्णात् नास्ति ते नरकाद्भयम् ॥ तीर्णश्च सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि । दौहित्रस्य तु दानेन तृप्तास्ति पितरः सदा ॥ यत्किञ्चित् कुरुते दानं सदानन्ताय कल्पते ॥ मातुः पितुश्च विज्ञेयं तच्छुभस्याभिगामिनः । मातुः पितुर्हिरण्यस्य दौहित्रोऽक्षयमवाप्नुते ॥"

इत्याद्ये वह्निपुराणे कन्यादाननामाध्यायः ॥

शूद्रमात्रस्य दौहित्रो दत्तको भवति । यथा,—
"दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयसुतः क्वचित् ॥"
इति दत्तकमीमांसाधृतशौनकवचनम् ॥
तस्य मातामहधनाधिकारित्वम् । यथा,—
"दुहित्रभावे दौहित्रः ।
'पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥'
इति मनुवचने पौत्रतुल्यत्वाभिधानेन यथा पुत्राभावे पौत्रस्तथा दुहित्रभावे दौहित्रः ।
अतएव गोविन्दराजधृतो विष्णुः ।
अपुत्रपौत्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥
अपि च, सर्व्वदुहित्रभावे दौहित्रस्य अधिकारः ।
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ।
स एव दद्यात् द्वौ पिण्डौ पित्रे मातामहाय च ॥
इत्यादिवचनात् । अपुत्रस्य इति दुहितृपर्य्यन्ताभावोपलक्षणम् ॥ १ ॥ भ्रातृपौत्रस्याभावे पितृदौहित्रस्याधिकारः । धनिपित्रादित्रयपिण्डदातृत्वात् ॥२॥ पितृदौहित्राभावे भ्रातृदौहित्रोऽधिकारी । धनिभोग्यपितृपितामहपिण्डदातृत्वात् ॥३॥ पितृव्यपौत्राभावे पितामहदौहित्रस्य अधिकारः धनिभोग्यपितामहप्रपितामहपिण्डदातृत्वात् ॥४॥ पितामहदौहित्रस्याभावे पितृव्यदौहित्रस्याधिकारः । धनिभोग्यवत्पितामहप्रपितामहपिण्डद्वयदातृत्वात् ॥ ५ ॥ तदभावे पितामहभ्राता तदभावे पितामहभ्रातृपुत्रः, तदभावे पितामहभ्रातृपौत्रः । तेषां धनिभोग्यतत्प्रपितामहपिण्डदातृत्वात् । ततः प्रपितामहदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥६॥ प्रपितामहदौहित्राभावे पितामहभ्रातृदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥७॥ पितामहभ्रातृदौहित्राभावे मातामहः । तदभावे मातुलः । तदभावे मातुलपुत्रः । तदभावे मातुलपौत्रः । तदभावे मातामहदौहित्रोऽधिकारी ॥ ८ ॥ मातामहदौहित्राभावे प्रमातामहः । तदभावे प्रमातामहपुत्रः । तदभावे प्रमातामहपौत्रः । तदभावे प्रमातामहप्रपौत्रः । तदभावे प्रमातामहदौहित्रोऽधिकारी ॥ ९ ॥ प्रमातामहदौहित्राभावे वृद्धप्रमातामहोऽधिकारी । तदभावे वृद्धप्रमातामहपुत्रः । तदभावे वृद्धप्रमातामहपौत्रः । तदभावे वृद्धप्रमातामहप्रपौत्रः । तदभावे वृद्धप्रमातामहदौहित्रोऽधिकारी ॥१०॥ स्त्रीधने तु पुत्राभावे दौहित्रोऽधिकारी । पुत्राधिकारात् प्राक् दुहित्रधिकारश्रुतेः । तत्राधिकाया दुहितुः पुत्रेण वाध्यपुत्राभावस्यैव न्याय्यत्वात् ॥११॥
इति श्रीकृष्णतर्कालङ्कारकृतदायक्रमसंग्रहः ॥
श्राद्धे दौहित्रभोजनप्राशस्त्यम् । यथा,—
"व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् ।
कुतपञ्चासने दद्यात्तिलैश्च विकिरेन्महीम् ॥"
इति मात्स्ये । १ । २३४ ॥

द्यावाक्षमे, स्त्री, (द्यौश्च क्षमा च । "दिवो द्यावा ।" ६ । ३ । २९ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ४ । ४ ॥ द्विवचनान्तोऽयम् ॥

द्यावापृथिव्यौ, स्त्री, (द्यौश्च पृथिवी च । "दिवश्च पृथिव्याम् ।" ६ ।३। ३० । इति चात् दिवो द्यावा ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः ।४।४॥ (यथा, मनुः । ३ । ८६ ।
"कुह्वै चैवानुमत्यै च प्रजापतय एव च ।
सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः ॥")
तद्वैदिकपर्य्यायः । स्वधे १ पुरन्धी २ धिषणे ३ रोदसी ४ चोणी ५ अम्भसी ६ नभसी ७ रजसी ८ सदसी ९ सद्मनी १० घृतवती ११ बहुले १२ गभीरे १३ गम्भीरे १४ ओमण्यौ १५ चम्वौ १६ पार्थ्वौ १७ मही १८ उर्व्वी १९ पृथ्वी २० अदिती २१ अह्नी २२ दूरे २३ अन्ते २४ अपारे २५ अरे २६ पारे २७ । इति सप्तविंशतिर्द्यावापृथिव्योर्नामधेयानि । इति वेदनिघण्टौ ३ अः ॥

द्यावाभूमी, स्त्री, (द्यौश्च भूमिश्च । "दिवो द्यावा ।" ६ । ३ । २९ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ४ । ४ ॥ (यथा, ऋग्वेदे । ४ । ५५ । १ ।
"को वस्त्राता वसवः को वरूता
द्यावाभूमी अदिते त्रासीथां नः ॥")

द्यु, ल अभिसर्पणे । इति कविकल्पद्रुमः ॥ (अदां-पर-सक-अनिट् ।) अभिसर्पणम् आभिमुख्येन गमनम् । ल, द्यौति सिंहो मृगानिव । इति दुर्गादासः ॥

द्यु, क्ली, (द्योतीति । द्यु+क्विप् ।) दिनम् । गगनम् । स्वर्गः । इति विश्वः ॥ [वि, २ ॥

द्युः, पुं, (द्यु+क्विप् ।) अग्निः । इति मेदिनी ।

द्युगः, पुं, (द्युनि गगने गच्छतीति । गम+डः ।) पक्षी । इति राजनिर्घण्टः ॥

द्युगणः पुं, (द्युनां दिनानां गणः ।) अहर्गणः । तस्यानयनमाह ।
"कथितकल्पगतोऽर्कसमा गणा
रविगुणा गतमाससमन्विताः ।
खदहनैर्गुणितास्तिथियुताः
पृथगतोऽधिकमाससमाहतात् ॥
रविदिनाप्तगताधिकमासकैः
स्वतदिनैः सहितो द्युगणो विधोः ।
पृथगतः पठितावमसंगुणा-
च्छशिदिनाप्तगतावमवर्ज्जितः ॥
भवति भास्करवासरपूर्व्वको
दिनगणो रविमध्यमसावनः ।
अधिकमासदिनक्षयशेषतो
द्युचटकादिकमत्र न गृह्यते ॥"
इति सिद्धान्तशिरोमणिः ॥

द्युत्, ल ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अक-सेट् ।) ल, अद्युतत् । ङ, द्योतते दिद्युते । इति दुर्गादासः ॥

द्युत्, पुं, (द्युत् दीप्तौ+क्विप् ।) किरणः । इति हेमचन्द्रः । २ । १४ ॥ (द्योतमाने, त्रि । यथा, ऋग्वेदे । १० । ९९ । २ ।
"स हि द्युता विद्युता वेति साम ॥"
द्यु ल अभिसर्पणे+क्विप् तुगागमश्च । अभिगामिनि । यथा, भट्टिः । ५ । ४७ ।
"हरामि रामसौमित्री मृगो भूत्वा मृगद्युतौ ॥")

द्युतिः, स्त्री, (द्योततेऽनयेति । द्युत् दीप्तौ+"इगुपधात् कित् ।" उणां ४ । ११९ । इति इन स च कित् ।) दीप्तिः । शोभा । इत्यमरः । १ । ३ । १७ ॥ (यथा, भागवते । ८ । ५ । ४२ ।
"लोभोऽधरात् प्रीतिरुपर्य्यभूद्द्युति-र्नस्तः पशव्यः स्पर्शेन कामः ॥")
रश्मिः । इति मेदिनी । ते, २५ ॥ (पुं, चतुर्थस्य मनोः ऋषिविशेषः । यथा, हरिवंशे । ७ । ७५ ।
"चतुर्थस्य तु सावर्णेऋषीन् सप्त निबोध मे ।
द्युतिर्वशिष्ठपुत्रश्च आत्रेयः सुतपास्तथा ॥"
तामसस्य मनोः पुत्रविशेषः । यथा, तत्रैव । ७ । २३ ।
"पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोरपि ।
द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोशनः ॥")

द्युतिकरः, पुं, (करोतीति । कृ+अच् । द्युतेः करः ।) ध्रुवः । इति भूरिप्रयोगः । दीप्तिकारके, त्रि ॥

द्युतितः, त्रि, (द्युत+क्तः । बाहुलकात् न गुणः ।) दीप्तिविशिष्टम् । द्योतितम् । इति मुग्धबोधव्याकरणम् ॥

द्युन, क्ली, लग्नात् सप्तमराशिः । इति ज्योतिषतत्त्वम् ॥

द्युनिशं, क्ली, (द्यु च निशा च द्वयोः समाहारः ।) अहोरात्रः । इति व्याकरणम् ॥ यथा,—
"भवति किं द्युनिशं द्युनिवासिनाम् ।"
इति सिद्धान्तशिरोमणिः ॥

द्युनिवासी, [न्] पुं, (द्युनि स्वर्गे निवसतीति । नि+वस+णिनि ।) देवता । स्वर्गवासी । इति सिद्धान्तशिरोमणिः ॥

द्युपतिः, पुं, (द्युनो दिनस्य पतिः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (द्युनो स्वर्गस्य पतिः ।) इन्द्रः ॥

द्युमणिः, पुं, (द्युनो गगनस्य मणिरिव ।) सूर्य्यः । (यथा, भागवते । ८ । १० । ३८ ।
"रेणुर्दिशः खं द्युमणिञ्च छादयन्
न्यपतंस्तास्तथाक्रुतिभिः परिप्लुतात् ॥")
अर्कवृक्षः । इत्यमरः ॥ (परिशोधितताम्रम् । यथा,—
"विषमहौषधभागमधिकोषणा
द्युमणिरक्तकमार्द्दकमर्द्दितम् ॥
द्युमणिः मारित ताम्रम् ॥" इति भावप्रकाशस्य मध्यखण्डे १ भागे वातज्वराधिकारे ॥)

द्युमयी, स्त्री, विश्वकर्म्मकन्या । सा सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥

द्युम्नं, क्ली, (द्युम्नमर्थं मनति अभ्यस्यन्ते इति। म्ना+कः। "धनमिच्छेन द्युताशनात्।" इति वचनात् धनकामानां अग्न्याराधनादस्य तथात्वम्।) धनम्। इत्यमरः। २।९।९०॥ (यथा, ऋग्वेदे। ७।२।१०।
"अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरम्॥"
द्यु तेजो मनतीति।) बलम्। इति मेदिनी। ने, ११॥ (बलाधायकत्वात् अन्नम्। यथा, ऋग्वेदे। ६।८।८।
"इदं दिवः परि सव द्युम्नं पृथिव्या अधि॥")

द्युवा [न्] पुं, (द्योतीति। द्यु+"कनिन् युवृषीति।" उणां १।१५६। इति कनिन्।) सूर्य्यः। इत्युणादिकोषः॥ द्यौः। इति संक्षिप्तसारे उणादिवृत्तिः॥

द्युष(स)त्, [द्] पु, (दिवि स्वर्गे सीदतीति। सद्+क्विप्। छन्दसि षत्वम्। लोकेऽपत्वम्।) देवः। इति त्रिकाण्डशेषः॥ (यथा, माघे। १।४३।
"भयस्य पूर्व्वावतरन्तरस्विना
मनःसु येन द्युसदां न्यधीयत॥")
ग्रहः। इति गोलाध्यायः॥

द्यूतः, पुं, क्ली, (देवनमिति। दिवु क्रीडायाम्+भावे+क्तः। ऊठ् च।) पाशकादिक्रिया। अप्राणिकरणकक्रीडा। जुया इति भाषा। तत्पर्य्यायः। अक्षवती २ कैतवम् ३ पणः ४। इत्यमरः। २।१०।४५॥ (यथा, देवीभागवते। १।१८।५१।
"द्यूतक्रीडा तथा प्रोक्ता व्यसनानि विविधानि च॥")
"द्यूतं समाह्वयञ्चैव राजा राष्ट्रान्निवर्त्तयेत्।
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्॥
प्रकाशमेतत्तास्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥
द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः॥
द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं महत्।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्॥"
इति मनुः। ९।२२१-२२७॥
कङ्क उवाच।
"किन्ते द्यूतेन राजेन्द्र! बहुदोषेण मानद!।
देवने बहवो दोषास्तस्मात्तत् परिवर्ज्जयेत्॥
श्रुतस्ते यदि वा दृष्टः पाण्डवो हि युधिष्ठिरः।
स राज्यं सुमहत् स्फीतं भ्रातॄंश्च त्रिदशोपमान्॥
द्यूते हारितवान् सर्व्वं तस्माद्द्यूतं न रोचये॥"
इति महाभारते। ४।५१।३३-३५॥

द्यूतकरः, त्रि, (करोतीति। कृ+अच्। द्यूतस्य करः।) द्यूतकर्त्ता। जुयारी इति भाषा। तत्पर्य्यायः। धूर्त्तः २ द्यूतः ३ अक्षधूर्त्तः ४ अक्षदेवी ५ दुरोदरः ६ द्यूतकृत् ७ कितवः ८ [illegible] ९। इति शब्दरत्नावली॥

द्यूतकारः, त्रि, (द्यूतं कारयतीति। कृ+णिच्+अण्।) द्यूतकारयिता। सभियार इति ख्यातः। इति भरतः॥ तत्पर्य्यायः। सभिकः २। इत्यमरः। २।१०।४४॥ सभीकः ३। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे। १।४३१।
"मुहुर्व्विप्रितकर्म्माणं द्यूतकारं पराजितम्॥")

द्यूतकारकः, त्रि, (द्यूतं कारयतीति। द्यूत+कृ+णिच्+ण्वुल्।) द्यूतकारयिता॥

द्यूतकृत्, त्रि, (द्यूतं करोतीति। कृ+क्विप् तुगागमश्च।) द्यूतकरः। अक्षक्रीडकः। इत्यमरः। २।१०।४४॥

द्यूतपूर्णिमा, स्त्री, (द्यूताय या पूर्णिमा।) कोजागरपूर्णिमा। इति त्रिकाण्डशेषः॥

द्यूतपौर्णमासी, स्त्री, (द्यूताय या पौर्णमासी।) द्यूतपूर्णिमा। इति भूरिप्रयोगः॥

द्यूतप्रतिपत्, [द्] स्त्री, (द्यूताय क्रीडार्थं या प्रतिपत्।) कार्त्तिकशुक्लप्रतिपत्। सा च कौमुदी। यथा,—
"तुलार्के कार्त्तिके मासि शुक्ला या प्रतिपत्तिथिः।
विष्णोर्दत्ता मही तत्र कौमुदी सा स्मृता बुधैः॥
कुशब्देन मही ज्ञेया मुदा हर्षे च वै द्विज!।
धातुज्ञैः सन्वशब्दज्ञैः सा च वै कौमुदी स्मृता॥"
इति पाद्मोत्तरखण्डम्॥ ७॥
अत्र तिथौ बलिदैत्यपूजादि कार्य्यम्। तद्यथा,
"वामनपुराणे कार्त्तिकशुक्लपक्षमधिकृत्य बलिं प्रति भगवद्वाक्यम्।
वीरप्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरशार्दूल! हृष्टाः पुष्टाः स्वलङ्कृताः॥
पुष्पदीपप्रदानेन पूजयिष्यन्ति मानवाः॥
अत्र मन्त्रः।
बलिराज! नमस्तुभ्यं विरोचनसुत! प्रभो!।
भविष्येन्द्र! सुराराते! पूजेयं प्रतिगृह्यताम्॥
ब्रह्मपुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम्।
मन्त्रेणानेन राजेन्द्र! समन्त्री सपुरोहितः॥
इत्यर्द्धम्। महार्णवे।
एवं पूजां नृप! कृत्वा रात्रौ जागरणं चरेत्।
इत्युक्तम्। पुनर्ब्रह्मपुराणे।
शङ्करश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते!॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोषिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विरुद्धश्च लब्धनाशकरो भवेत्॥
भविष्योत्तरे।
यो यो यादृग्भावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि॥
महापुण्या तिथिरियं बलिराज्यप्रवर्त्तिनी।
स्नानं दानं शतगुणं कार्त्तिकेऽस्यां तिथौ भवेत्॥"
इति तिथितत्त्वम्॥

द्यूतवीजं, क्ली, (द्यूतस्य वीजं कारणम्।) वराटकः। इति त्रिकाण्डशेषः॥ द्यूतस्य कारणत्व।

द्यूनं, क्ली लग्नात् सप्तमराशिः। यथा,—
"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम्।
द्यूनं द्यूतं तथास्ताख्यं षष्ठकोणं रिपुमन्दिरम्॥"
इति ज्योतिस्तत्त्वम्॥
(दिव्+क्तः। "दिवोऽविजिगीषायाम्।" ८।२।४९। इति निष्ठातस्य नः। च्छ्वोरित्यूठ्। क्षीणे, त्रि॥)

द्यै, न्यक्करणे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सक-अनिट्।) अन्यस्मादयुक्तः। द्यायति दुष्टं लोकः। इति दुर्गादासः॥

द्योतः, पुं, (द्युत्+भावे घञ्।) प्रकाशः। (यथा, हरिवंशे। २३३।२४।
"विद्युद्द्योतनिकाशेन सकुण्डलार्कवर्च्चसा॥")
आतपः। इत्यमरः। १।४।३४॥

द्योतनं, क्ली, (द्युत्+भावे ल्युट्।) दर्शनम्। इति हेमचन्द्रः। ३।२४१॥ प्रकाशनम्॥ (द्युत्+युच्। द्योतमाने, त्रि। यथा, भट्टिः। ७।१५।
"विलोक्य द्योतनं चन्द्रं लक्ष्मणः शोकगाढवदन॥")

द्योतनः, पुं, (द्योततीति। द्युत्+"बहुलमन्यत्रापि।" उणां २।७८। इति युच्।) दीपः। इत्युणादिकोषः॥

द्योतितः, त्रि, (द्युत्+क्त।) द्युतितम्। दीप्तम्। इति मुग्धबोधव्याकरणम्॥ (यथा, रामायणे। २।८२।२।
"वस्त्राङ्गरागप्रभया द्योतिता सा सभोत्तमा॥")

द्योभूमिः, पुं, (द्यौराकाशं भूमिरिव यस्य।) पक्षी। इति शब्दचन्द्रिका॥ स्वर्गपृथिव्योः स्त्री। तत्र द्विवचनान्तः॥

द्योसत्, [द्] पुं, (दिवि स्वर्गे सीदतीति। सद्+क्विप्।) देवः। इति शब्दरत्नावली॥

द्यौः, [द्यो] स्त्री, (द्योतन्ते देवा यत्र। द्युत्+बाहुलकात् डो।) स्वर्गः। (यथा, महाभारते। १।७४।२८।
"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मश्च जानाति नरस्य वृत्तम्॥")
आकाशम्। इत्यमरः। १।२।१॥ (पुं, अष्टवस्वन्यतमः। यथा, देवीभागवते। २।३।४५।
"पृथ्वादीनां वसूनाञ्च मध्ये कोऽपि वसूत्तम!।
द्यौर्नामा तस्य भार्य्या या नन्दिनीं गां ददर्श ह॥"
अयमेव वशिष्ठशापात् पृथिव्यां जन्म परिग्रहन् भीष्म इति नाम्ना विख्यात आसीत्॥ अस्य विवरणन्तु देवीभागवते २ स्कन्धे ३ अध्याये तथा महाभारते। १।९९ अध्याये द्रष्टव्यम्॥)

द्रौणं, क्ली, ([illegible]। [illegible]। "[illegible]" उणां ४। १४०। इति [illegible]।) ज्योतिः। इति संक्षिप्तसार उणादिवृत्तिः॥

द्रगडः, पुं, वाद्यविशेषः। दगड़ इति भाषा। तत्पर्य्यायः। [illegible] २। इति त्रिकाण्डशेषः॥

द्रङ्क्षणं, क्ली, (द्राङ्क्ष्यतेऽनेनेति । द्राक्षि आकाङ्क्षायाम् +ल्युट् । पृषोदरादित्वात् ह्रस्वः ।) तोलकम् । इति शब्दमाला ॥ तत्पर्य्यायः । कोलम् २ वटकम् ३ कर्षार्द्धम् ४ । इति वैद्यकपरिभाषा ॥ (पुलिङ्गेऽपि । यथा,—

"————————तदयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

द्रङ्गः, त्रि, पुरी । इति हेमचन्द्रः ।४।३७॥ (यथा, राजतरङ्गिण्याम् । ८ । २०११ ।

"तेन स्वनाम्ना भाण्डेषु द्रङ्गे सिन्धुरसद्रणा ॥")

द्रढिमा, [न्] पुं, (दृढस्य भावः । दृढ+"पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । "र ऋतो हलादेर्लघोः ।" ६।४।१६१ । इति ऋकारस्य रकारः ।) दृढता ॥ (यथा, शिवशतके । ४३ ।

"लघुगुरुतुलनातुलाप्रकाश
द्रढिमगुणः स भवद्गुणाञ्चयस्य ॥")

द्रढिष्ठ त्रि, अयमनयोरेषां वा अतिशयेन दृढः । इत्यर्थे इष्ठप्रत्ययेन साध्यः । द्रढीयान् ॥

द्रप्सं, क्ली, (दृप्यन्त्यनेनेति । दृप+"अञ्ज्यादयश्च । इति निपातनात् साधुः ।) घनेतरदधि । यथा दइ इति भाषा । इत्यमरः । २ । ९ । ५१ ॥ अस्य रूपान्तराणि । द्रप्यम् २ दाप्सम् ३ द्रप्सम् ४ । इति तट्टीकायां भरतः ॥ (शुक्रम् । इति निरुक्तम् । ५ । १४॥ त्रि, द्रुतगमनशीलः । द्रुतदहनशीलः । यथा, ऋग्वेदे । ९ । ६९ । २ ।

"पवमानः सन्तनिः प्रघ्नतामिव
मधुमान् द्रप्सः परिवारमर्षति ॥")

द्रम, गतौ । इति कविकल्पद्रुमः । (भ्वां-पर-सकसेट् ।) दन्त्यवर्गतृतीयादिः । द्रमति । इति दुर्गादासः ॥

द्रव, पुं (द्रु+"ऋदोरप् ।" ३।३।५७ । इति भावे अप् ।) परीहासः । पलायनम् । इत्यमरः । ३ । ३ । ३२ ॥ (यथा, हरिवंशे । २११ । १० ।

"ततो दैत्यद्रवकर पौराश्च प्रहसुस्तमम् ॥")

रसः । गतिः । इति विश्वः ॥ वेगः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १८३ । ५ ।

"तत्र शब्दगतिर्भूत्वा मारुतद्रवसम्भवः ॥"

द्रवत्वरूपो गुणविशेषः । यथा, भाषापरिच्छेदे । २८ ।

"गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥"

आर्द्रे, त्रि । यथा, रघुः । ७ । ७ ।

"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् द्रवरागमेव ॥")

द्रवजः, पुं,(द्रवात् जायते इति । जन्+ड ।) गुडः । इति राजनिर्घण्टः ॥ द्रवजातवस्तुमात्रञ्च ॥

द्रवणं, क्ली, (द्रु+भावे ल्युट् ।) गमनम् । (यथा, हरिवंशे । १८६ । ३९ ।

"ते रुदन्तो द्रवन्तश्च भगवन्तं पितामहम् ।
रोदनाद्द्रवणात् चैव ततो रुद्रा इति स्मृताः ॥")

क्षरणम् । अनुताप ॥ द्रुधातोर्भावेऽनट् ॥

द्रवत्वं, क्ली, (द्रव+त्व ।) द्रवस्य भावः । तद्द्विविधम् । यथा,—

"सांसिद्धिकं द्रवत्वं स्यात् नैमित्तिकमुदाहृतम् ।
सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः ॥
परमाणौ जले नित्यमन्यतोऽनित्यमुच्यते ।
नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ॥
द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तत् ॥"

इति भाषापरिच्छेदः ॥

द्रवत्पत्री, स्त्री, (द्रवत् पत्रं यस्याः । ङीप् ।) शिल्हकीवृक्षः । इति राजनिर्घण्टः ॥

द्रवन्ती, स्त्री, (द्रवतीति । द्रु+शतृ+ङीप् ।) नदी । इति शब्दरत्नावली ॥ मूषिकपर्णी । मषाकाणी छोटा इति भोयनी इति च हिन्दी भाषा । तत्पर्य्यायः । शम्बरी २ चित्रा ३ न्यग्रोधी ४ शतमूलिका ५ प्रत्यक्श्रेणी ६ वृषा ७ चण्डा ८ पत्रश्रेणी ९ आखुकर्णिका १० मूषिककर्णी ११ प्रतिपर्णशिफा १२ सहस्रमूली १३ विक्रान्ता १४ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । रसबन्धकारित्वम् । ज्वरक्रिमिनाशित्वम् । शूलशमनत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

द्रवरसा, स्त्री, (द्रवो रसो यस्याः ।) लाक्षा । इति राजनिर्घण्टः ॥

द्रवाधारः, पुं, (द्रवाणां द्रव्याणामाधारः ।) चुलुकः । इति शब्दार्थकल्पतरुः ॥ द्रवद्रव्यरक्षापात्रञ्च ॥

द्रविडी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

द्रविणं, क्ली, (द्रवति गच्छति द्रूयते प्राप्यते वेति । द्रु+"द्रुदक्षिभ्यामिनन् ।" उणां । २ । ५० । इति इनन् ।) धनम् । (यथाह कश्चित् ।

"द्रविणं परिमितममितव्ययिनं जनमाकुलीकुरुते ।
सौधाञ्चलमिव पीनस्तनजघनायाः कुलीनायाः ॥")

काञ्चनम् । बलम् । इत्यमरमेदिनीकरौ ॥ (यथा, महाभारते । १ । १०३ । १९ ।

"एवमुक्ता तु पुत्रेण भूरिद्रविणतेजसा ।
माता सत्यवती भीष्ममुवाच तदनन्तरम् ॥"

पुं धरनाम्नो वसोः पुत्रविशेषः । यथा, महाभारते । १ । ६६ । २१ ।

"धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ॥"

पृथोः पुत्रविशेषश्च । यथा, भागवते ।४।२२।५४।

"पुत्रानुत्पादयामास पञ्चार्च्चिष्यात्मसम्मतान् ।
विजिताश्वं धूम्रकेशं हर्य्यक्षं द्रविणं वृकम् ॥"

कुशद्वीपस्थितसीमागिरिभेदः । यथा, भागवते । ५ । २० । १५ ।

"तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव वभ्रुश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण इति ॥" क्रौञ्चद्वीपस्थवर्षपुरुषविशेषः । यथा, भागवते ।५।२०।२२।

"यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषर्षभद्रविणदेवकसञ्ज्ञा वर्षपुरुषाः ॥")

द्रविणनाशनः, पुं, (नाशयतीति । नाशि+ल्युः । द्रविणानां नाशनः । तत्सेवनेन धनविनाशात्

अस्य तथात्वम् ।) शोभाञ्जनवृक्षः । इति शब्दरत्नावली ॥

द्रविणोदाः, [स्] पुं, अग्निः । अस्य निरुक्तिर्यथा,—

"द्रविणं बलमित्युक्तं धनञ्च द्रविणं ततः ।
ददाति तद्भवानेव द्रविणोदास्ततो भव ॥"

इति वराहपुराणम् ॥

(धनप्रदे, त्रि । यथा, ऋग्वेदे । १ । १५ । ७ ।

"द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे ॥"

"कीदृश इव द्रविणोदाः धनप्रदम् । यद्वा, धनप्रदेऽग्नि सोमं पिबत्विति शेषः । तमेतं मन्त्रं यास्क एवं निर्वक्ति,—द्रविणोदाः कस्मात् धनं द्रविणमुच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति द्रविणोदा द्रविणस इत्यादि सोऽयं यास्कोक्तो निर्वचनप्रपञ्चः तस्मिन्नेव ग्रन्थेऽवगन्तव्यः । द्रविणोदा द्रुदक्षिभ्यामिनन् निष्पादितो द्रविणशब्दः तद्ददातीति द्रविणोदाः । क्विप् चेति क्विप् । पूर्व्वपदस्य सकारोपजनश्छान्दसः । रुत्वोत्वे । कृदुत्तरपदप्रकृतिस्वरत्वम् । देवविशेषणत्वेनैकवाक्यतापक्षे द्वितीयायाः सुपांसुलुगित्यादिना सु आदेशः । अथवा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति । सुप आत्मनः क्यच् सर्व्वप्रातिपदिकेभ्यो लालसायां सुगसुकौ च इति क्यचि परतः सुगागमः द्रविणस्यते सम्पदादित्वाद्भावे क्विप् । अतो लोपः । लौकिकं न स्थानिवद्भवतीति तस्य स्थानिवत्त्वप्रतिषेधाद्यलोपः एवं द्रविणसशब्दो धनेच्छावचनः । द्रविणेच्छान्दस्यति यष्टृधनप्रदानेनोपक्षयतीत्यर्थः तस्य उपक्षये इत्यस्माद्धातोरन्तर्भावितण्यर्थात् क्विप् चेति क्विप् । एवं द्रविणोदःशब्दः सकारान्तो भवति । तथा द्राविणोदसः प्रवादा भवन्तीति नैरुक्तो व्यवहार उपपद्यते अतो द्रविणोदस्शब्दः भिन्नवाक्यत्वे स्वार्थे प्रथमा । एकवाक्यत्वे तु व्यत्ययेन द्वितीयार्थो भवति द्रविणसः इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे सकारोपजनश्छान्दसः । आद्युदात्तत्वन्तु नियमेन स्थितम् । ऋत्विग्विशेषणत्वेनैकवाक्यत्वपक्षे तु व्यत्ययात् क्विप् । अतो लोपादि पूर्व्ववत् । अत्र तु पक्षे क्यचश्चित्त्वेनान्तोदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् ॥" इति सायनः ॥)

द्रवीकरणं क्ली, अद्रवस्य द्रवकरणम् । इति च्विप्रत्ययेन साध्यम् ॥ गलान इति भाषा ॥

द्रव्यं, क्ली, (द्रोरिव । द्रु+"द्रव्यञ्च भव्ये ।" ५ । ३ । १०४ । इति यत्प्रत्ययेन निपातनात् साधुः ।) वस्तु । (यथा, मनुः । ७ । ९ ।

"एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥")

तस्य क्रियाविशेषे नवपुराणमेदेन प्रशस्तत्वं यथा,—

"द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ ।
ऋते गुडघृतक्षौद्रधान्यकृष्णाविडङ्गतः ॥"

इति नारायणदासकृतपरिभाषा ॥

द्रावकरं, क्ली, (द्राव सुवर्णादेर्द्रव करोति स्वसंयोगेनेति । द्राव+कृ+टः ।) श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥

द्रावणं, क्ली, (द्रावयति जलमलं स्वसम्पर्केणेति । द्रु+णिच्+युच् ।) कतकफलम् । इति रत्नमाला ॥ निर्म्मली इति भाषा ॥ (द्रावि+ल्युट् ।) विद्रावणञ्च ॥ (द्रावयतीति । द्रावि+ल्यु । पलायनकारयितरि, त्रि । यथा, महाभारते । ८ । ३४ । ६८ ।
"स देवयुक्तो रथसत्तमो नो
दुराधरो द्रावणः पार्थिवानाम् ॥")

द्राविका, स्त्री, (द्रावक+टाप् । अत इत्वञ्च ।) लाला । इति शब्दरत्नावली ॥

द्राविडः, त्रि, (द्राविडो देशोऽभिजनोऽस्येति । अण् ।) देशविशेषजातः । (यथा, महाभारते । ८ । १२ । १४ ।
"सात्यकिर्द्धैकितानश्च द्राविडैः सैनिकैः सह ॥")
पञ्चद्राविडाः । यथा, द्रविड, १ कर्णाट २ गुर्ज्जराट ३ महाराष्ट्र ४ तैलङ्ग ५ । यथा, स्कन्दपुराणे ।
"कार्णाटाश्चैव तैलङ्गा गुर्ज्जरा राष्ट्रवासिनः ।
आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः ॥"
सङ्कीर्णभेदः । वेधसुतः । इति मेदिनी । डे, ३० ॥ कर्च्चूरः । इति राजनिर्घण्टः ॥

द्राविडकं, क्ली, (द्रविडे देशे भवं । अण् ततः सञ्ज्ञायां कन् ।) विड्लवणम् । इति राजनिर्घण्टः ॥

द्राविडकः, पुं, (द्राविड एव । स्वार्थे कन् ।) वेधमुख्यकः । इत्यमरः । २ । ४ । १३५ । शियच षठी इति भाषा ॥

द्राविडभूतिकः, पुं, (द्राविड एव भूतिरुत्पत्तिस्थानं यस्य । कप् ।) द्राविडकः । इति शब्दरत्नावली ॥

द्राविड़ी, स्त्री, (द्रविडे भवा । द्रविड+अण् । ङीप् ।) एला । इति राजनिर्घण्टः ॥ (इयं एला तु गुजराती इति ख्याता । अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"स्थूलोपकुञ्चिका तुच्छा कोरङ्गी द्राविड़ी त्रुटिः ॥")

द्राव्य, त्रि, (द्रु+ण्यत् ।) अवश्यगमनीयम् । अवश्यद्रवणीयम् । अवश्यानुतपनीयम् । इति द्रुधातोरवश्यम्भावार्थे घ्यण्प्रत्ययः ॥

द्राह, ऋ ङ जागरे । निक्षेपे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट् ।) ऋ, अदद्राहत् । ङ, द्राहते । इति दुर्गादासः ॥

द्रु, स्रुतौ । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-अनिट् ।) द्रवति । इति दुर्गादासः ॥

द्रु, ऋ न उपतापे । इति कविकल्पद्रुमः ॥ (स्वा-परं-अक सक च-अनिट् ।) र, वैदिकः । न, द्रुणोति । उपताप इह उपतप्तीभावः उपतप्तीकरणञ्च । इति दुर्गादासः ॥

द्रुः, पुं (द्रवति ऊर्द्ध्वं गच्छतीति । द्रु+मितद्र्वादित्वात् डुः ।) वृक्षः । इत्यमरः । २ । ४ । ५ ॥ (यथा, मनुः । ७ । १३१ ।
"आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ॥")
गतौ, स्त्री । इति शब्दरत्नावली ॥

द्रुकिलिमं, क्ली, (किलतीति नेनेति । किल श्वैत्यक्रीडनयोः+बाहुलकात् किमच् । द्रुषु वृक्षेषु किलिमम् ।) देवदारुवृक्षः । इत्यमरः । २ । ४ । ५३ ॥ (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
"देवदारुद्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥")

द्रुघणः, पुं, (द्रुपः एध्यतेऽनेनेति । हन+"करणेऽयोविद्रुषु ।" ३ । ३ । ८२ । इति अप् घनादेशश्च । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् । द्रुममयो घन इति वा ।) मुद्गरः । इत्यमरः । २ । ८ । ९१ ॥ खड्गधारादिसुन्दराकारलौहमयास्त्रभेदः । इति भरतः ॥ (वैशम्पायनोक्तधनुर्व्वेदमतेऽयं परशुवल्लौहास्त्रम् । यदुक्तम् ।
"द्रुघणस्त्वायताङ्गः स्यात् पक्रग्रीवो दृढच्छिरा । पञ्चाशदङ्गुलोत्सेधो मुष्टिसम्मितमस्तकः ॥"
अस्य चतस्रः क्रियाः । यथा —
"उन्नामनं प्रपातश्च स्फोटनं दारणं तथा । चत्वार्य्येतानि द्रुघणे वल्गितानि श्रितानि वै ॥"
द्रुः संसारवृक्षो हन्यतेऽनेनेति ।) ब्रह्मा । कुठारः । इति मेदिनी । णे, ५३ ॥ भूमिचम्पकः । इति शब्दचन्द्रिका ॥ दन्त्यान्तोऽपि ॥

द्रुड, मज्जने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) रेफयुक्तः । मज्जनमिति मस्जधातोरूपम् । द्रोडति प्रस्तरी जले । दुद्रोड़िषति । इति दुर्गादासः ॥

द्रुड, शि मज्जने । इति कविकल्पद्रुमः ॥ (तुदा-पर-अक सेट् ।) शि, द्रुडति अद्रुडीत् दुद्रोड । एष कैश्चिन्न मन्यते । क्रमदीश्वरस्तु कुटादिमेव मन्यते । इति दुर्गादासः ॥

द्रुण, श कौटिल्ये । गतौ । वधे । इति कविकल्पद्रुमः ॥ (तुदा पर सक-सेट् ।) दन्त्यवर्गतृतीयादिः । श, द्रुणति दुद्रोणिषति । जैह्म्यं कुटिलीकरणम् । इति दुर्गादासः ॥

द्रुणं, क्ली, (द्रुणति हिनस्तीति । द्रुण+"इगुपधेति ।" ३ । १ । १३५ । इति कः ।) धनुः । खड्गः । इति हेमचन्द्रः ॥ ४ । २०७ ॥

द्रुणः, पुं, (द्रुणति हिनस्तीति । द्रुण+क ।) वृश्चिकः । भृङ्गः । इति हेमचन्द्रः । ४ । २७७ ॥ त्रि, पिशुनः । इति शब्दमाला ॥

द्रुणसः त्रि, (द्रुरिव दीर्घा नासिका यस्य । "अण्नासिकायाः सञ्ज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इति अच् । नसादेशश्च । "पूर्व्वपदात् सञ्ज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) दीर्घनासिकायुक्तः । इति संक्षिप्तसारव्याकरणम् ॥

द्रुणहः, पुं (द्रुणं खड्गं हन्ति गच्छतीति । हन् गतौ+ड ।) खड्गपिधानम् । इति हारावली । १२५ ॥

द्रुणा, स्त्री, (द्रुणं धनुराश्रयत्वेनास्त्यस्याः । अच् । टाप् ।) ज्या । इति हेमचन्द्रः । ३ । ४५८ ॥

द्रुणिः, स्त्री, (द्रुणति जलादिकमिति । द्रुण गतौ+"इगुपधात् किन् ।" उणां । ४ । ११८ । इति इन् ।) द्रोणी । इत्यमरटीकायां भरतः ॥

द्रुणी, स्त्री, (द्रुण+इन् । वा ङीप् ।) कर्णजलौका । कच्छपी । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ काष्ठाम्बुवाहिनी । इति द्रोणीशब्दटीकायां भरतः ॥

द्रुतं, त्रि, (द्रवति स्मेति । द्रु+गत्यर्थेति कर्त्तरि क्तः ।) जातद्रवीभावघृतसुवर्णादि । तत्पर्य्याय । अवदीर्णम् २ विलीनम् ३ विद्रुतम् ४ । इत्यमरः । ३ । १ । १०० ॥ शीघ्रम् । (यथा, महाभारते । १३ । ७६ । ८१ ।
"वायोरिताभिः सुमनोहराभि-
र्द्रुताभिरत्यर्थसमुत्थिताभिः ।
गङ्गोर्म्मिभिर्भानुमतीभिरिद्धा
सहस्ररश्मिप्रतिमा भवन्ति ॥")
विद्राणम् । पलायितम् । इति मेदिनी । ते, २५ ॥ (यथा रघु । ९ । ५६ ।
"जग्राह स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः ॥")

द्रुतं, क्ली, (द्रु+क्त ।) नृत्यविषयकशीघ्रगमनम् । तत्पर्य्यायः । ओघः २ । इत्यमरः १ । २ । ६८ ॥ शीघ्रलयः । इति मधुः ॥ नृत्यगीतादौ द्रवन्ति गच्छन्ति समुदायगतिप्रदर्शनार्थं करादयोऽत्र । इति भरतः ॥ शास्त्रे ।
"द्रुतामध्ययने वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थं विलम्बितां समाचरेत् ॥"
इति वेदव्यवस्था ॥
(क्षिप्रम् । यथा मनुः । ६ । १०२ ।
"अभ्याघातेषु मध्यस्थान् शिष्याञ्चौरानिव
द्रुतम् ॥"
क्रियाविशेषणत्वादस्य क्लीवता ॥)

द्रुतः, पुं, (द्रवति स्म ऊर्द्ध्वमिति । द्रु+क्तः ।) द्रुमः । इति धरणिः ॥

द्रुनखः, पुं, (द्रोर्वृक्षस्य नख इव । अस्य संज्ञात्वात् णत्वाभावः ।) कण्टकम् । इति त्रिकाण्डशेषः ॥

द्रुपदः, पुं, पञ्चालदेशीयचन्द्रवंशीयराजविशेषः । तस्य कन्या द्रौपदी । पुत्रौ शिखण्डिधृष्टद्युम्नौ । इति महाभारतम् ॥ (क्ली, यूपैकदेशः । यथा, ऋग्वेदे । १ । २४ । १३ ।
"शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।"
"द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः ।" इति तद्भाष्ये सायनः ॥ काष्ठपादुका । यथा, वाजसनेयसंहितायाम् । २० । २० ।
"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ॥"
"द्रुः काष्ठमयं पदं द्रुपदं पादुका तस्मान्मुमुचानः पृथग् भवन् ।" इति वेददीपः ॥)

द्रुपदा, स्त्री, ऋक् । सा च वैदिकमन्त्रविशेषः । यथा, उच्छिष्टस्य चाण्डालादिस्पर्शे आपस्तम्बः ।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा ।
प्रमादात स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम् ॥
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत् ॥"

इत्याह्निकाचारतत्त्वम् ॥

द्रुम, पु, (समुदाये वृक्षाः शब्दा अवयवेष्वपि वर्त्तन्ते इति न्यायात् द्रुः शाखा विद्यतेऽस्य । "द्युद्रुभ्यां मः ।" ५ । २ । १०८ । इति मः ।) वृक्षः । इत्यमरः । २ । ४ । ५ ॥ (यथा, मनुः । ८ । २५५ ।
"निर्भयन्तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम् ।
तस्य तद्वर्द्धते नित्यं सिच्यमान इव द्रुमः ॥")
पारिजातः । कुवेरः । इति मेदिनी । मे, १५ ॥ (स्वनामख्यातः किम्पुरुषेश्वरः । यथा, महाभारते । २ । १० । २८ ।
"द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम् ॥"
स्वनामख्यातनृपविशेषः । स तु शिबिनामदैत्यस्यांशात् जातः । यथा, तत्रैव । १ । ६७ । ८ ।
"यस्तु राजन् ! शिविर्नाम दैतेयः परिकीर्त्तितः ।
द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः ॥"
रुक्मिणीगर्भजातः कृष्णस्य पुत्त्रविशेषः । यथा, हरिवंशे । १६० । ६ ।
"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च ॥")

द्रुमनखः, पुं, (द्रुमस्य नख इव ।) कण्टकम् । इति हारावली ॥

द्रुमरः, पु, (द्रुम्रियतेऽनेनेति । मृ + करणे अप् ।) कण्टकम् । इति हारावली । ८१ ॥

द्रुमव्याधिः, पु, (द्रुमस्य व्याधिरिव ।) लाक्षा । इति राजनिर्घण्टः ॥

द्रुमशीर्ष, क्ली, (द्रुमस्य शीर्षमिव शीर्षं यस्य ।) कुट्टिमभेदः । यथा,—
"कपिशीर्षं द्रुमशीर्षं तथा चाखोटशीर्षकम् ।
इति कुट्टिमभेदाः स्युः शाब्दिकैः समुदाहृताः ॥"

इति शब्दरत्नावली ॥

(द्रुमस्य शीर्षम् इति विग्रहे वृक्षाग्रम् ॥)

द्रुमश्रेष्ठः, पुं, (द्रुमेषु तृणवृक्षेषु श्रेष्ठः ।) तालवृक्षः । इति शब्दार्थकल्पतरुः ॥ वृक्षश्रेष्ठश्च ॥

द्रुमामयः, पु, (द्रुमस्य आमयो व्याधिः ।) लाक्षा । इत्यमरः । २ । ६ । १२५ ॥

द्रुमारिः, पु, (द्रुमस्य अरिः । वृक्षनाशकत्वात् तथात्वम् ।) हस्ती । इति राजनिर्घण्टः ॥

द्रुमाश्रयः, पु, (द्रुमः आश्रयो यस्य ।) सरटः । इति राजनिर्घण्टः ॥ वृक्षाश्रितमात्रेषु, त्रि ॥

द्रुमेश्वरः, पु, (द्रुमेषु ईश्वरः श्रेष्ठः ।) तालवृक्षः । इति शब्दार्थकल्पतरुः ॥ (द्रुमाणां ओषधीनामीश्वरः ।) चन्द्रः । इति हरिवंशः ॥

द्रुमोत्पलः, पु, (द्रुमे उत्पलमिव पुष्पं यस्य ।) कर्णिकारवृक्षः । इत्यमरः । २ । ४ । ६० ॥

द्रुवय, क्ली, (द्रोर्वृक्षस्य विकारभूतं प्रस्थादिपरिमाणम् । द्रु + "माने वयः ।" ४ । ३ । १६२ । इति वयः ।) परिमाणम् । इत्यमरः । २ । ९ । ८५ ॥ (पुलिङ्गेऽपि । यथा, अथर्ववेदे । ५ । २० । २ ।
"सिंह इवास्तानीद्द्रुवयो विबद्धः ॥")

द्रुसल्लकः, पुं, (द्रुषु सल्लक इव ।) पियालवृक्षः । इति शब्दरत्नावली ॥

द्रुह, ल य ऊ जिघांसे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-वेट् ।) जिघांस इष्टानिष्टाचरणमिति विद्यानिवासः । लृ, अद्रुहत् । य, द्रुह्यति खलः साधवे । ऊ, द्रोहिष्यति ध्रोक्ष्यति । इति दुर्गादासः ॥

द्रुहः, पु, (द्रुह्यति धनादिलाभाशया पितृविनाशं चिन्तयतीति । द्रुह + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) पुत्त्रः । इति शब्दार्थकल्पतरुः ॥ (द्रोहकारके, त्रि । यथा, ऋग्वेदे । ७ । १०४ । १७ ।
"नक्तमप द्रुहा तन्वं गूहमाना ।"
"या राक्षसी नक्तं रात्रौ द्रुहा द्रोहेन युक्ता ।"
इति तद्भाष्ये सायनः ॥)

द्रुहणः, पुं, (द्रुं संसारगतिं हन्तीति । हन् + अप् । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) ब्रह्मा । इति भरतद्विरूपकोषः ॥

द्रुहिणः, पु, (द्रुह्यति दुष्टेभ्य इति । द्रुह + "बहुलमन्यत्रापि ।" उणां २ । ४९ । इति इनन् । गुणाभावश्च ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा, देवीभागवते । १ । ८ । २८ ।
"द्रुहिणे सृष्टिशक्तिश्च हरौ पालनशक्तिता ॥")

द्रुही, स्त्री, (द्रुह्यति पित्रे विवाहकालीनधनापहरणादिना । द्रुह + कः । ततो ङीष् ।) दुहिता । इति शब्दार्थकल्पतरुः ॥

द्रू, न ग ष वधे गतौ । इति कविकल्पद्रुमः ॥ (क्र्यां-क्र्यां प-उभं-सकं-सेट् ।) न ष, द्रूणाति द्रूणीते । ग ष, द्रूणासि द्रूणीते । इति दुर्गादासः ॥

द्रूः, पुं, (द्रवति स्रवतीति । द्रु + "क्विप् वचिप्रच्छीति ।" उणां २ । ५७ । इति क्विप् दीर्घश्च ।) स्वर्णम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

द्रूघणः, पु, (द्रुघणः । पृषोदरादित्वात् दीर्घः ।) द्रुघणः । इति भरतद्विरूपकोषः संक्षिप्तसारश्च ॥

द्रूणः, पु, (द्रुणः । पृषोदरादित्वात् दीर्घः ।) द्रुणः । वृश्चिकः । इति शब्दार्थकल्पतरुः ॥

द्रेक, ऋ ङ स्वनोत्साहे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) तवर्गतृतीयादिः । रेफयुक्तः । द्वावर्थौ । उत्साहो वृद्धिरिति चन्द्र । औन्नत्यमिति क्षीरस्वामी । ऋ, अदिद्रेकत् । ङ, द्रेकते लोकः शब्दायते उत्सहते वेत्यर्थः । स्वनेनोत्साहः स्वनोत्साहः । इति केचित् । तन्मते शब्देनोत्सहते इत्यर्थः । इति दुर्गादासः ॥

द्रेक्क., द्रेक्काण., पु, लग्नतृतीयभागैकभागः । यथा, ज्योतिस्तत्त्वे ।
"स्वपञ्चनवमाना ये राशीनामधिपा ग्रहाः ।
ते द्रेक्काणाधिपा ज्ञेया द्रेक्काणाख्याय एव हि ॥"

द्रै, स्वप्ने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) द्रायति । इति दुर्गादासः ॥

द्रोणः, पु, क्ली, (द्रवतीति । द्रु गतौ + "कृवृजृषिद्रुपन्यनिस्वपिभ्यो नित् ।" उणां ३ । १० । इति नः ।) आढकपरिमाणम् । आढकचतुष्टयम् । इति शब्दरत्नावली ॥ ३२ शेर इति लौकिकमानम् । तत्पर्य्यायः । घटः २ कलसः ३ उन्मानम् ४ लक्षणः ५ अर्म्मणः ६ । इति वैद्यकपरिभाषा ॥ "द्रोणस्तु खार्य्याः खलु षोड़शांशः ।" इति लीलावती ॥ (अरणीकाष्ठम् । यथा, ऋग्वेदे । ६ । २ । ८ ।
"क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः ।"
"हे अग्ने क्रत्वा कर्म्मणा मन्थनरूपेण द्रोणे द्रुमे काष्ठेऽरण्यां विद्यमानस्तमज्यसे हि ।" इति तद्भाष्ये सायनः ॥ काष्ठनिर्म्मितकलसः । यथा, तत्रैव । ६ । ३७ । २ ।
"प्रो द्रोणे हरयः कर्म्माग्मन् पुनानास ऋज्यन्तो अभूवन् ॥"
"द्रोणे द्रोणकलशे ऋज्यन्त ऋजु गच्छन्तोऽभूवन् ।" इति सायनः ॥ द्रुममयरथः । इति निरुक्तम् । ५ । २६ ॥ यथा, ऋग्वेदे । ६ । ४४ । २० ।
"आ ते वृषन् वृषणो द्रोणमस्थुः ।"
"द्रोणं द्रुममयं रथमस्थुः ।" इति सायनः ॥)

द्रोणः, पुं, (द्रोणः कलस उत्पत्तिस्थानत्वेनास्त्यस्य । द्रोण + अच् ।) द्रोणाचार्य्यः । (अयं कुरुपाण्डवानां आचार्य्यः । अस्य पिता भरद्वाजः । अस्य जन्मवृत्तान्तं यदुक्तं महाभारते । १ । १३१ । ९-१६ ।
"गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं संशितव्रतः ॥
सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम् ।
महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा ॥
ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतामृषिः ।
रूपयौवनसम्पन्नां मददृप्तां मदालसाम् ॥
तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत ।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
ततोऽस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥
ततः समभवद्द्रोणः कलसे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः ॥
अग्निवेशं महाभागं भरद्वाजः प्रतापवान् ।
प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदांवरः ॥
अग्नेस्तु जातः स मुनिस्ततो भरतसत्तम ! ।
भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत् ॥"
अस्य पत्नी कृपाचार्य्यभगिनी कृपी पुत्त्रस्तु अश्वत्थामा । अयं हि भारतयुद्धे दुर्य्योधनस्य पक्षमवलम्ब्य पञ्चदशदिनं यावत् युद्धमकरोत् । तत्र पूर्व्वं दशदिनं भीष्मदेवस्याधीनत्वेन स्थित्वा पश्चादस्य शरशय्याग्रहणानन्तरं एकादशदिनात् स्वयं सेनापतिरभवत् । तत एनं अधर्म्मे युद्धनिरतं दृष्ट्वा ऋषयः समागत्य सम्प्राप्तं मृत्युकालं विज्ञापयामास । यथा, महाभारते । ७ । १९० । ३६-५२ ।
"त एनमब्रुवन् सर्व्वे द्रोणमाहवशोभिनम् ।
अधर्म्मतः कृतं युद्धं समयो निधनस्य ते ॥
न्यस्यायुधं रणे द्रोण ! समेत्यास्मानवस्थितान् ।
नातः क्रूरतरं कर्म्म पुनः कर्त्तुमिहार्हसि ॥

वेदवेदाङ्गविदुषः सततधर्मरतस्य ते ।
ब्राह्मणस्य विशेषेण सर्वेनन्नोपपद्यते ॥
त्वमायुधममोघेषो । तिष्ठ वर्त्मनि शाश्वते ।
परिपूर्णश्च कालस्ते वस्तु लोके ह्यमानुषे ॥
ब्रह्मास्त्रेण त्वया दग्धा अनस्त्रज्ञा नरा युधि ।
यदेतदीदृशं विप्र । कृतं कर्म्म न साधु तत् ॥
न्यस्यायुधं रणे विप्र द्रोण । मा त्वं चिरं कृथाः ।
मा पापिष्ठतरं कर्म्म करिष्यसि पुनर्द्विज । ॥"
अथ हि जमदग्निप्रभृतिभिरुक्तो न्यस्तशस्त्रश्च द्रुपदपुत्त्रेण धृष्टद्युम्नेन निहतः । यथा, तत्रैव । ७ । १९० । ३९—४० ।
"तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः प्रतापवान् ।
सशरं तद्धनुर्घोरं सन्न्यस्याथ रथे तत ।
खड्गी रथादवप्लुत्य सहसा द्रोणमभ्ययात् ॥
हाहाकृतानि भूतानि मानुषाणीतराणि च ।
द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतम् ॥
हाहाकारं भृशं चक्रुरहो धिगिति चाब्रुवन् ।
द्रोणोऽपि शस्त्राण्युत्सृज्य परमं साम्यमास्थित ॥
तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपा ।
पुराणं पुरुषं विष्णुं जगाम मनसा परम् ॥
मुखं किञ्चित्समुन्नाम्य विष्टभ्य उरमग्रतः ।
निमीलिताक्षः सत्त्वस्थो निक्षिप्य हृदि धारणाम् ॥
ओम् इत्येकाक्षरं ब्रह्म ज्योतिर्भूतो महातपा ।
स्मरित्वा देवदेवेशमक्षरं परमं विभुम् ॥
दिवमाक्रामदाचार्य्यः सद्भिः सह दुराक्रमम् ।
द्वौ सूर्य्याविव नो बुद्धिरासीत्तस्मिंस्तथागते ॥
एकाग्रमिव चासीच्च ज्योतिर्भिः पूरितं नभः ।
समपद्यदयार्काभे द्रोणस्य निधने तथा ॥
निमेषमात्रेण च तज्ज्योतिरन्तरधीयत ।
आसीत् किलकिलाशब्दः प्रहृष्टानां दिवौकसाम् ।
ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते ॥
वयमेव तदाद्राक्ष्म पञ्च मानुषयोनयः ।
योगयुक्तं महात्मानं गच्छन्तं परमां गतिम् ॥
अहं धनञ्जयः पार्थः कृपः शारद्वतस्तथा ।
वासुदेवश्च वार्ष्णेयो धर्म्मपुत्त्रश्च पाण्डव ॥
अन्ये तु सर्व्वे नापश्यन् भारद्वाजस्य धीमतः ।
महिमानं महाराज । योगयुक्तस्य गच्छतः ॥
ब्रह्मलोकं महद्दिव्यं देवगुह्यं हि तत्परम् ॥
गतिं परमिकां प्राप्तमजानन्तो नृयोनयः ।
नापश्यन् गच्छमानं हि तं सार्द्धमृषिपुङ्गवैः ।
आचार्य्यं योगमास्थाय ब्रह्मलोकमरिन्दमम् ॥
वितुन्नाङ्गं शरशतैर्न्यस्तायुधमसृक्क्षरम् ।
धिक्कृतः पार्थिवैस्तत्र सर्व्वभूतैः परामृशत् ॥
तस्य मूर्द्धानमालम्ब्य गतसत्त्वस्य देहिनः ।
किञ्चिदब्रुवतः कायाद्विचकर्त्तासिना शिरः ॥"
"क्रोशमानेऽर्ज्जुने चैव पार्थिवेषु च सर्व्वशः ।
धृष्टद्युम्नोऽवधीद्द्रोणं रथतल्पे नरर्षभम् ॥
शोणितेन परिक्लिन्नो रथाद्भूमिमरिन्दमः ।
लोहिताङ्ग इवादित्यो दुर्द्दर्शः समपद्यत ॥" ॥)
द्रोणकाकः । इति मेदिनी । णे, १७ ॥ (यदुक्तम् ।
"केशव पतितं दृष्ट्वा द्रोणो हर्षमुपागतः ।
रुदन्ति पाण्डवाः सर्व्वे हा हा केशव केशव ॥")
वृश्चिक । इति राजनिर्घण्टः ॥ चतुःशतधनुःपरिमितजलाशयः । यथा, शतेन धनुर्भिः पुष्करिणी । त्रिभिः शतैर्दीर्घिका । चतुर्भिर्द्रोणः । पञ्चभिस्तडागः । द्रोणाद्दशगुणा वापी । इति जलाशयतत्त्वम् ॥ मेघनायक । यथा,—
"म्रियते शाकवर्षे तु चतुर्भिः शेषित क्रमात् ।
आवर्त्त विद्धि सम्वर्त्त पुष्कर द्रोणमम्बुदम् ॥
आवर्त्तो निर्जलो मेघः सम्वर्त्तश्च बहूदकः ।
पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः ॥"
इति ज्योतिस्तत्त्वम् ॥
श्वेतवर्णक्षुद्रपुष्पवृक्षविशेषः । घलघसिया इति घलकसिया इति च भाषा ॥ यथा,—
"मत्स्यविष्णुशिवादीनां द्रोणपुष्पं महाप्रियम् ।
तत्ते दुर्गे । प्रयच्छामि पवित्रन्ते सुरेश्वरि । ॥"
इति स्मार्त्तोक्तदुर्गार्च्चाप्रयोग ॥
(शाकद्वीपान्तर्गतपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ५६ ।
"चतुर्थः पर्व्वतो द्रोणो यत्रौषध्यो महागिरौ ।
विशल्यकरणी चैव मृतसञ्जीवनी तथा ॥"
वसुपुत्त्रविशेष । यथा भागवते । ६ । ६ । ११ ।
"वसवोऽष्टौ वसोः पुत्त्रास्तेषां नामानि मे शृणु ।
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभावसुः ॥")
द्रोणकाकः, पुं, (द्रोण एव काक ।) वनकाक । दाँडकाक इति भाषा । तत्पर्य्याय । काकोलः २ । इत्यमरः । २ । ५ । २१ ॥ द्रोणः ३ अरण्यवायसः ४ वनवासी ५ महाप्राणः ६ क्रूररावी ७ पलप्रियः ८ । इति राजनिर्घण्टः ॥ काकलः ९ । इति शब्दरत्नावली ॥
द्रोणगन्धिका, स्त्री, (द्रोणस्य द्रोणपुष्पस्य गन्ध इव गन्धो यस्याः । कप् । टापि अत इत्वम् ।) रास्ना । इति जटाधरः ॥
द्रोणघा, स्त्री, (द्रोणदुघा । पृषोदरादित्वात् दुलोपः ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥
द्रोणदुग्धा, स्त्री, (द्रोणपरिमितं दुग्धं यस्याः ।) द्रोणक्षीरा । इति हेमचन्द्रः । ४ । ३३५ ॥
द्रोणदुघा, स्त्री, (द्रोणं दोग्धीति । दुह + "दुहः कप् घश्च ।" ३।२।७०। इति कप् घश्चान्तादेशः ।) द्रोणपरिमितदुग्धदात्री गवी । तत्पर्य्याय । द्रोणक्षीरा २ । इत्यमरः । २।९।७२ ॥ द्रोणमाना ३ द्रोणघा ४ पयस्विनी ५ । इति शब्दचन्द्रिका ॥ द्रोणदुग्धा ६ । इति हेमचन्द्रः । ४ । ३३५ ॥ द्रोणमानपयस्विनी ७ । इति शब्दरत्नावली ॥
द्रोणपुष्पी, स्त्री, (द्रोणवत् पुष्पं यस्याः । ङीष् ।) क्षुद्रक्षुपविशेषः । गूमा इति ख्याता । तत्पर्य्याय । खर्व्वपत्रा २ कुम्भयोनिः ३ कुरुम्बिका ४ चित्रक्षुपः ५ कुरुम्बा ६ सुपुष्पा ७ चित्रपत्रिका ८ । इति राजनिर्घण्टः ॥ द्रोणा ९ फलेपुष्पा १० । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रुच्यत्वम् । वातकफाग्निमान्द्यपक्षवातनाशित्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । स्वादुत्वम् । रूक्षत्वम् । वातपित्तकारित्वम् । सक्षारलवणत्वम् । स्वादुपाकित्वम् । भेदकत्वम् । श्वासकामलाशोथतमकश्वासजन्तुनाशित्वञ्च । इति भावप्रकाशः ॥ गोशीर्षकतृणः । इति रत्नमाला ॥ घलघसिया इति भाषा । अस्य गुणाः । कषायत्वं कामलाक्रिमिशोथनाशित्वम् । इति राजवल्लभः ॥
द्रोणमाना, स्त्री, (द्रोणो मानं दुग्धस्य यस्याः ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥
द्रोणमुख, क्ली, चतुःशतग्राममध्ये मनोहरग्राम । इति हारावली । १२० ॥
द्रोणम्पच, त्रि, (द्रोणं द्रोणपरिमितं पचतीति । द्रोण + पच + "परिमाणे पचः ।" ३ । २ । ३३ । इति खश् ।) द्रोणपरिमितवस्तुपाककर्त्ता । इति मुग्धबोधव्याकरणम् ॥
द्रोणा, स्त्री, (द्रोण + टाप् ।) द्रोणपुष्पी । इति भावप्रकाशः ॥
द्रोणाचार्य्य, पुं, (द्रोण एव आचार्य्यः ।) भरद्वाजपुत्त्र । स चाश्वत्थामपिता कृपीपतिः । पाण्डवानामस्त्रशिक्षागुरुश्च । तत्पर्य्याय । द्रोण २ गुरु ३ आचार्य्य ४ कीर्त्तिभाक् ५ भारद्वाज ६ कुम्भयोनि ७ द्रोणाचार्य्यक ८ । इति शब्दरत्नावली ॥ (विशेषविवरणमस्य द्रोणशब्दे द्रष्टव्यम् ॥)
द्रोणि, स्त्री, (द्रवतीति । द्रु गतौ + "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।" उणां ४।५१ । इति नि स च नित् ।) द्रोणी । इत्यमरटीकायां भरत ॥ (पुं, अश्वत्थामा । स तु अष्टममन्वन्तरगतानां ऋषीणामन्यतम । यथा, मार्कण्डेये । ८० । ४ ।
"ऋष्यशृङ्गस्तथा द्रोणिस्तत्र सप्तर्षयोऽभवन् ॥")
द्रोणिका, स्त्री, (द्रोणिरिव कायति प्रकाशते इति । कै + क + टाप् ।) नीलीवृक्ष । इति शब्दरत्नावली ॥
द्रोणी, स्त्री, (द्रोणि + कृदिकारादिति वा ङीष् ।) देशविशेष । काष्ठाम्बुवाहिनी । गवादनी । इति मेदिनी । णे, १७ ॥ (काष्ठाकारपात्रविशेषः । यथा, महाभारते । १ । ६३ । १०७ ।
"भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्द्धत ॥")
नीलीवृक्ष । इति शब्दरत्नावली ॥ शैलभेद । शैलयोः सन्धिः । इति हेमचन्द्रः । ४ । १०० ॥ इन्द्रचिर्भिटी । द्रोणीलवणम् । इति राजनिर्घण्टः ॥ नदीविशेषः ॥ इत्युणादिकोष ॥ द्विशूर्पपरिमाणम् । १२८ सेर इति भाषा । तत्पर्य्याय । वाह २ गोणी ३ । इति वैद्यकपरिभाषा ॥
द्रोणीदल, पुं, (द्रोण्या इव दलं यस्य ।) केतकीपुष्पः । इति हारावली । ६२ ॥
द्रोणीमुख, क्ली, (द्रोणीव मुखं यस्य ।) द्रोणमुखम् । इति भूरिप्रयोगः ॥
द्रोणीलवण, क्ली, (द्रोणीसम्भूतं लवणम् ।) उपकर्णाटदेशप्रसिद्धलवणविशेषः । तत्पर्य्याय । द्रोणेयम् २ वार्द्धेयम् ३ द्रोणीषम् ४ वारिणम्

५ वाह्निभवम् ६ द्रौणी ७ त्रिकूटलवणम् ८। अस्य गुणाः। पाकेनात्युष्णत्वम्। अविदाहित्वम्। भेदनत्वम्। स्निग्धत्वम्। शूलनाशित्वम्। अल्पपित्तलत्वञ्च। इति राजनिर्घण्टः॥

द्रोहः, पुं, (द्रुह + भावे घञ्।) जिघांसा। अनिष्टचिन्तनम्। तत्पर्य्यायः। अपक्रिया २। इति हेमचन्द्रः।६।१५१॥ यथा, कूर्म्मपुराणे।
"देवद्रोहाद्गुरोर्द्रोहः कोटिकोटिगुणाधिकः॥"
(छद्मवधः। यथा, मनौ। ७।४८।
"पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥"
"द्रोहश्छद्मवधः।" इति तट्टीकायां कुल्लूकभट्टः॥)

द्रोहचिन्तनं, क्ली, (द्रोहस्य चिन्तनम्।) पराऽनिष्टचिन्ता। तत्पर्य्यायः। व्यापादः २। इत्यमरः। १।५।४॥

द्रोहाटः, पुं, (द्रोहाय अटतीति। अट् + अच्।) गाथाप्रभेदः। मृगलुब्धकः। वैडालव्रतिकः। इति मेदिनी। टे, ४६॥

द्रोही, [न्] पु, (द्रोहोऽस्त्यस्येति इनिः। यद्वा, द्रुह्यतीति णिनिः।) द्रोहकः। परानिष्टचिन्तकः। यथा,—
"मित्रद्रोही कृतघ्नश्च ये च विश्वासघातकाः।
ते नरा नरके यान्ति यावच्चन्द्रदिवाकरौ॥"
इति सत्येमिरोपाख्यानम्॥
(यथा च, कथासरित्सागरे। ५। ६३॥
"तच्छ्रुत्वाचिन्तयद्राजा नूनं द्रोही स एव मे॥")

द्रौणायन., पु, (द्रोणस्यापत्यम्। द्रोण + फक्।) अश्वत्थामा। इति त्रिकाण्डशेषः॥

द्रौणिः, पु, (द्रोणस्यापत्यम्। द्रोण + इञ्।) अश्वत्थामा। इति शब्दरत्नावली॥ (यथा, महाभारते। ४। ५६। ७४।
"व्यावृत्य तु महाबाहुर्यतो द्रौणिस्ततो हयान्॥"
अयं हि एकोनत्रिंशद्द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। २३।
"एकोनत्रिंशत् संप्राप्ते द्रौणिर्व्यासो भविष्यति॥")

द्रौणिक., त्रि, (द्रोणस्य द्रोणपरिमितबीजस्य वापः इति। द्रोण + "तस्य वापः।" ५। १। ४५। इति ठक्।) द्रोणपरिमितबीजवपनयोग्यक्षेत्रम्। इत्यमरः।२।६।१०॥ (द्रोणेन क्रीतः। निष्कादित्वात् ठक्। द्रोणक्रीतः॥ द्रोण द्रोणपरिमितद्रव्यं पचतीति। द्रोण + "संभवत्यव हरति पचति।" ५। १। ५२। इति ठञ्। द्रोणपाचकः। इति सिद्धान्तकौमुदी॥)

द्रौपदी, स्त्री, (द्रुपदस्यापत्यं स्त्री। द्रुपद + अण्। ङीप्।) द्रुपदराजकन्या। तत्पर्य्यायः। पाञ्चाली २ कृष्णा ३ सैरिन्ध्री ४ नित्ययौवना ५ वेदिजा ६ याज्ञसेनी ७। इति हेमचन्द्रः। ३। ३७४॥ अस्याः पञ्चस्वामिकारणं यथा,—
वह्निरुवाच।
"शृणु राम। महाभाग। सीतासंगोपनं कुरु।
समाहाभ्यन्तरे चैव रावणो दुष्टराक्षसः।
दुर्निवार्य्यः प्राक्तनेन जानकीञ्च हरिष्यति॥
राम उवाच।
सीतां गृहीत्वा त्वं गच्छ छायात्रैव तु तिष्ठतु।
कालत्रवर्ज्जनं कर्म्म सर्व्वेषाञ्च जुगुप्सितम्॥
सीतां गृहीत्वा प्रययौ रुदन्तीञ्च हुताशनः।
सीतायाः सदृशी छाया तस्थौ श्रीरामसन्निधौ॥
सा च छाया हृता पूर्व्वं रावणेन बलीयसा।
समुद्दधार तां रामो निहत्य त सबान्धवम्॥
वह्नौ परीक्षाकाले च छाया वह्नौ विवेश ह।
अग्निश्छायाञ्च संरक्ष्य ददौ रामाय जानकीम्॥
सा च छाया तपश्चक्रे नारायणसरोवरे।
तपश्चकार दिव्यञ्च शतवर्षञ्च शूलिनः॥
वरं वृणुष्व भद्रे। तमुवाच शङ्करश्च ताम्।
उवाच सा शिव व्यग्रा भर्त्तृदुःखेन दुःखिता॥
पतिन्देहि पञ्चधा सा वरं वव्रे त्रिलोचनम्।
सर्व्वसम्पत्प्रदस्तुष्टस्तस्यै शर्व्वो वरं ददौ॥
महादेव उवाच।
साध्वि। त्वं पञ्चधा ब्रूहि पतिन्देहीति व्याकुला।
पञ्चेन्द्राश्च हरेरंशा भविष्यन्ति प्रियास्तव॥
ते च सर्व्वे च पञ्चेन्द्राश्चाधुना पञ्च पाण्डवाः।
सा च छाया द्रौपदी च यज्ञकुण्डसमुद्भवा॥
कृते युगे वेदवती त्रेतायां जनकात्मजा।
द्वापरे द्रौपदी छाया तेन कृष्णा त्रिहायणी॥
वैष्णवी कृष्णभक्ता च तेन कृष्णा प्रकीर्त्तिता।
स्वर्गलक्ष्मीर्महेन्द्राणां सा च पश्चाद्भविष्यति॥
राजा ददौ फाल्गुनाय कन्यायाश्च स्वयंवरे।
पप्रच्छ मातरं वीरो वस्तु प्राप्तं मयाधुना॥
तमुवाच स्वयं माता गृहाण भ्रातृभिः सह।
शम्भोर्वरेण पूर्व्वञ्च परत्र मातुराज्ञया॥
द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपाण्डवाः।
चतुर्द्दशानामिन्द्राणां पञ्चेन्द्राः पञ्चपाण्डवाः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

द्वन्दं क्ली, (द्वन्द्वं पृषोदरादित्वात् वस्य लोपः।) मिथुनम्। इति शब्दरत्नावली॥

द्वन्द्वं, क्ली, (द्वौ द्वौ सहाभिव्यक्तौ। "द्वन्द्वं रहस्यमर्य्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोगाभिव्यक्तिषु।" ८। १। १५। इति द्विशब्दस्य द्विर्वचनं पूर्व्वपदस्याम्भावोऽत्वञ्चोत्तरपदस्य नपुंसकत्वञ्च निपात्यते।) रहस्यम्। कलहः। (यथा, हितोपदेशे। ३। ३२।
"शतं दद्यान्न विवदेदिति प्राज्ञस्य सम्मतम्।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणम्॥")
मिथुनम्। (यथा, रघुः। १। ४०।
"परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु॥")
युग्मम्। इति मेदिनी। वे, १०॥ (यथा, महाभारते। १। १३०। १५।
"द्वन्द्वयुद्धञ्च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो।॥"
शीतोष्णादि। यथा, माघे। ४। ६४।
"सर्व्वर्त्तुनिर्वृतिकरे निवसन्नुपैति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि॥")
दुर्गम्। (अत्र पुंस्त्वमपि।) अथ द्वन्द्वयुक्तिः।
"राज्ञो बलं न हि बलं द्वन्द्वमेव बल बलम्।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्॥"
तथा च।
"एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्।
यद्दैवरचितं द्वन्द्वं गिरिनद्यादिसंश्रितम्।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम्॥
प्राकारपरिखारण्यसश्रयं यन्नवेदिह।
कृत्रिमं नाम विज्ञेयं सच्चालच्चान्तु वैरिणाम्॥"
तत्राकृत्रिमद्वन्द्वयुक्तिर्यथा,—
"अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः।
सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम्।
नद्यो गभीरविस्तीर्णास्वसुदिक्षु व्यवस्थिता॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते।
यदन्यचिरकालीनं दुर्लङ्घ्यविपिनादिकम्॥
तन्मध्यरचिता भूमिर्द्वन्द्वत्वेनोपतिष्ठते।
वनद्वन्द्वमिति ख्यातं यथापूर्व्वं महत्तरम्॥"
कृत्रिमद्वन्द्वयुक्तिर्यथा,—
"यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत्॥
गर्भेरलब्धा विस्तीर्णा गम्भीराः पूर्णवारयः
द्वन्द्वत्वेन समादिष्टाः परिखा बहुयादसः॥
विशालशालं सुघनं बहुकण्टकिसङ्कटम्।
द्वन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम्॥
अधोऽधोवध्यमानोऽपि कन्दरोऽल्पजलं स्रवन्।
द्वन्द्वत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥
सर्व्वतः परिखां कृत्वा निबन्धोपरि कन्दरम्।
सञ्जलप्लुतदेशत्वात् जलद्वन्द्वं तदुच्यते॥
एषामभावे निम्नस्य भूप्रदेशस्य बन्धनात्।
वर्षासु भवते वारि जलद्वन्द्वं ततो भवेत्॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि॥
अन्यत्र कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्वसेत्।
रथपतिर्यदा वैरी स्थलद्वन्द्वं सदाचरेत्॥
गजाश्वनायको वैरी जलद्वन्द्वं सदाचरेत्।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्विविधो रिपुः॥
सर्व्वो हि विविधो युद्धः समायाद्युपदिश्यते।
प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च॥
राज्यान्ते सैनिकान् रचेत् प्रकटे निवसेत् स्वयम्।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः॥"
अथ सामान्यतो गुणाः।
तथा हि। नीतिशास्त्रम्।
"सप्रवेशापसरणं द्वन्द्वसुखमहत्यहो।
अन्यत्र वह्निशाखेव न तादृग्यद्धमाश्रयेत्॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च।
मनुष्यद्वन्द्वसंसर्गं वरद्वन्द्वञ्च तानि षट्॥"
अन्ये तु।
"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्धृद्वन्द्वं प्रकीर्त्तितम्।
योद्धृशून्यं हि यत् द्वन्द्वं न्यस्तज्ञानसमं हि तत्॥"

अथान्यत्रापि ।

"यावत् प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्यम् ।
त्रिंशत्तदर्द्धार्द्धगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम् ॥"

गर्गस्तु ।

"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम् ।
साध्यमेवातिरिच्येत मन्त्रद्वन्द्वं विशेषतः ॥
अन्येषु दैवाद् भिन्नेषु मन्त्रद्वन्द्वात् जयेन्नृप ।
मन्त्रद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम् ॥"

भोजस्तु ।

"यद्देव वैरिदुर्लक्ष्यं विस्तीर्णं विषमञ्च तत् ।
सप्रवेशापसरणं तद्वन्दुत्तमं विदुः ॥"

इति भोजराजकृतयुक्तिकल्पतरुः ॥

द्वन्द्व, पु, (द्वौ द्वौ सहाभिव्यक्तौ इति । निपातनात् साधुः । चार्थे द्वन्द्वः इति निर्द्देशात् पुंस्त्वम् ।) रोगविशेषः । समासभेदः । इति शब्दरत्नावली ॥ स तु भिन्नार्थानां पदानां समासः । वोपदेवेनास्य चसंज्ञा कृता । स इतरेतरयोगसमाहारभेदेन द्विधा भवति । इतरेतरद्वन्द्वो यथा । हरिश्च हरश्च हरिहरौ । अत्र प्रत्येकपदप्राधान्यात् द्वित्वं बहुत्वं शेषशब्दलिङ्गभाक्त्वञ्च भवति । समाहारद्वन्द्वो यथा । वाक् च त्वक् च द्वयोः समाहारः वाकत्वचम् । अत्र सहतैरेकत्वादेकवचनं नित्यक्लीवलिङ्गत्वञ्च भवति । इति मुग्धबोधम् ॥ (यदुक्तं,— [भावः ॥")

"द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यमव्ययी

द्वन्द्वचर, पुं, (द्वन्द्वेन चरतीति । चर + अच् ।) चक्रवाकः । इति हेमचन्द्रः । ४ । ३६६ ॥ (यथा, रघुः । १६ । ६३ ।

आवर्त्तशोभा नतनाभिकान्ते-
र्भङ्गो भ्रुवां द्वन्द्वचराः स्तनानाम् ।
जातानि रूपावयवोपमाना-
न्यदूरवर्त्तीनि विलासिनीनाम् ॥")

द्वन्द्वचारी, [न्] पु, (द्वन्द्वेन चरतीति । चर + णिनि ।) चक्रवाकः । इति त्रिकाण्डशेषः ॥

द्वन्द्वज, पु, (द्वन्द्वात् जायते इति । जन + डः ।) द्विदोषजरोगः । इति निदानम् ॥ कलहाज्जाते त्रि ॥

द्वय क्ली, (द्वौ अवयवौ यस्य । द्वि + "सङ्ख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् । "द्वित्रिभ्यान्तयस्यायज्वा ।" ५ । २ । ४३ । इति तयस्यायच् ।) द्व्यात्मकम् । दुइ इति भाषा । तत्पर्य्यायः । उभौ २ द्वौ ३ युगलम् ४ द्वितयम् ५ युगम् ६ द्वैतम् ७ यमम् ८ द्वन्द्वम् ९ युग्मम् १० यमलम् ११ यामलम् १२ । इति हेमचन्द्रः । ६ । ५६ ॥

द्वयाग्नि, पु, (द्वयो द्विरूपोऽग्निर्यत्र ।) वृक्षभेदः । राचिता इति भाषा । तत्पर्य्यायः । माठी २ दृढाग्निः ३ । इति शब्दचन्द्रिका ॥

द्वयातिग, त्रि, (द्वयं अतिगच्छति अतिक्रामतीति । अति + गम + डः ।) रजस्तमोगुणशून्यः । सत्त्वगुणयुक्तः । इत्यमरः । ३ । १ । ४५ ॥

द्वा, [र्] स्त्री, (द्वारयतीति । द्वृ वरणे + णिच् + बाहुलकात् क्विप् ।) द्वारम् । इत्यमरः । २ । २ । १३ ॥ (यथा, भागवते । ३ । ५ । १ ।

"द्वारि द्युनद्या ऋषभः कुरूणां
मैत्रेयमासीनमगाधबोधम् ॥")

उपायः । यथा, ज्ञानद्वारा भवेन्मुक्तिरिति ज्ञानशास्त्रम् ॥

द्वाःस्थ, पु (द्वारि तिष्ठतीति । स्था + कः ।) द्वारपालः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १८ । ३४ ।

"आपन्नैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः ।
स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति ॥")

नन्दिकेश्वरः । इति भूरिप्रयोगः ॥

द्वाःस्थित, त्रि, (द्वारि स्थितः ।) द्वारपालः । इत्यमरकोषशब्दरत्नावल्यौ ॥

द्वाःस्थितदर्शक, त्रि, (द्वाःस्थितः सन् पश्यतीति । दृश् + ण्वुल् ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वाःस्थितदर्शी, [न्] त्रि, (द्वारि स्थितः सन् पश्यतीति । दृश् + णिनि ।) द्वारपालः । इति भरतधृतरभसः रमानाथश्च ॥

द्वाचत्वारिंशत्, स्त्री, (द्व्यधिका चत्वारिंशत् । दिग्शब्दस्य वा आत्वम् ।) द्विचत्वारिंशत् । इति व्याकरणम् ॥ ४२ बेयाल्लिश इति भाषा ॥

द्वात्रिंशत्, स्त्री, (द्व्यधिका त्रिंशत् । "द्व्यष्टनः संख्यायामिति ।" ६ । ३ । ४७ । इति आत्वम् ।) द्व्यधिकत्रिंशत् संख्या । तत्सङ्ख्येयाश्च । ३२ बत्रिश इति भाषा । यथा, द्वात्रिंशत्प्रसवे नार्य्याः चतुस्त्रिंशद्गमे नृणामित्यादि ज्योतिस्तत्त्वम् ॥

द्वात्रिंशदक्षरी, [न्] पु, (द्वात्रिंशदक्षराणि सन्ति अत्र । बाहुलकात् इनिः ।) मन्त्रः । इति त्रिकाण्डशेषः ॥

द्वात्रिंशल्लक्षणोपेत, पु, (द्वात्रिंशल्लक्षणैरुपेतः ।) महापुरुषः । इति शब्दार्थकल्पतरुः ॥ लक्षणानि यथा,—

"रागः सप्तसु हन्त षट्स्वपि शिशोरङ्गेष्वलं तुङ्गता
विस्तारस्त्रिषु खर्व्वता त्रिषु तथा गम्भीरता च त्रिषु ।
दैर्घ्यं पञ्चसु किञ्च पञ्चसु सखे सम्प्रेक्ष्यते सूक्ष्मता
द्वात्रिंशद्वरलक्षणः कथमसौ गोपेषु सम्भाव्यते ॥"

इति श्रीहरिभक्तिरसामृतसिन्धुः ॥

"राग इति । श्रीमद्व्रजेश्वरं प्रति कस्यचित् सहयसो गोपस्य वाक्यमिदम् । सप्तसु नेत्रान्तपादकरतलतालुधरौष्ठजिह्वानखेषु षट्सु वक्षः-स्कन्धनखनासिकाकटिमुखेषु । त्रिषु कटिललाटवक्षःसु । केचित् कटिस्थाने शिरः पठन्ति ।

पुनस्त्रिषु ग्रीवाजङ्घामेढ्रेषु । पुनस्त्रिषु नाभिस्वरसत्त्वेषु । पञ्चसु नासाभुजनेत्रहनुजानुषु । पुनः पञ्चसु त्वक्केशाङ्गुलिदन्ताङ्गुलिपर्व्वसु । सर्व्वेव महापुरुषलक्षणं सामुद्रकप्रसिद्धिः । द्वात्रिंशद्वराणि तत्तल्लक्षणेभ्योऽन्येभ्योऽपि श्रेष्ठानि लक्षणानि यस्य न गोपेषु कथमिति भगवद्वचनादिषु अथेतादृशत्वात्सम्भवनादिति भावः ।" इति श्रीजीवगोस्वामिविरचिता दुर्गमसङ्गमनी नाम्नी टीका ॥

द्वादशन्, [न्] त्रि, (द्व्यधिका दश । "द्व्यष्टन इति ।" ६ । ३ । ४७ । इति आत्वम् ।) द्व्यधिका दश । १२ बार इति भाषा । द्वादशमस्या तत्सङ्ख्येयाश्च । अयं नित्यबहुवचनान्तः । त्रिलिङ्गे समानरूपः । इति व्याकरणम् ॥ द्वादशवाचकानि यथा । सूर्य्यः १ मासः २ राशिः ३ सङ्क्रान्तिः ४ गुहबाहुः ५ सारिकोष्ठः ६ गुहनेत्रम् ७ राजमण्डलम् ८ । इति कविकल्पलता ॥

द्वादश, त्रि, (द्वादशानां पूरणः । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) द्वादशानां पूरणः । इति व्याकरणम् ॥ बारइ इति भाषा । (यथा, मनुः ।

"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥"

महादेवः । यथा, महाभारते । १३ । १७ । ६३ ।

"द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ॥")

द्वादशकर, पु, (द्वादश कराः भुजा यस्य ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥ कार्त्तिकेयश्च ॥

द्वादशपत्रक, क्ली, (द्वादश अक्षराणि पत्राणि इव यस्य ।) योगविशेषः । यथा,—

"पितामहोऽपि तं पुत्रं साध्यं सदिनये रतम् ।
सनत्कुमारं प्रोवाच योगं द्वादशपत्रकम् ॥
शिखासस्थम् ॐकारं मेषोऽस्य शिरसि स्थितः ।
मासो वैशाखनामा च प्रथमं पत्रकं स्मृतम् ॥
नकारः शिरसि प्रोक्तो वृषोऽस्य शिरसि स्थितः ।
ज्यैष्ठमासश्च तत् पत्रं द्वितीयं परिकीर्त्तितम् ॥
मोकारो भुजयोर्युग्मं मिथुनं तत्र संस्थितम् ।
माषः आषाढ़नामा च तृतीयं पत्रकं स्मृतम् ॥
भकारो नेत्रयुगलं कर्कटस्तत्र संस्थितः ।
मासः श्रावण इत्युक्तश्चतुर्थं पत्रकं स्मृतम् ॥
गकारो हृदयं प्रोक्तं सिंहो वसति तत्र च ।
मासो भाद्रस्तथा प्रोक्तः पञ्चमं पत्रकं स्मृतम् ॥
वकारं कवचं विद्यात् कन्या तत्र प्रतिष्ठिता ।
मासश्चाश्वयुजो नाम षष्ठं तत्पत्रकं स्मृतम् ॥
तेकारमस्त्रग्रामश्च तुलाराशिकृताश्रयः ।
मासश्च कार्त्तिको नाम सप्तमं पत्रकं स्मृतम् ॥
वाकारो नाभिसंयुक्तः स्थितस्तत्र च वृश्चिकः ।
मासो मार्गशिरो नाम त्वष्टकं पत्रकं स्मृतम् ॥
सुकारो जघनं प्रोक्तस्तत्रस्थश्च धनुर्द्धरः ।
पुष्येति गदितो मासो नवमं परिकीर्त्तितम् ॥
देकारश्चोरुयुगलं मकरोऽप्यत्र संस्थितः ।
माघो निगदितो मासः पत्रकं दशमं स्मृतम् ॥
वाकारो जानुयुग्मञ्च कुम्भस्तत्रापि संस्थितः ।

पत्रकं फाल्गुनं प्रोक्तं तदेकादशमुत्तमम् ॥
माघौ यकारौ मीनो हि स चैत्रे वसते मुने ।।
इदन्तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि ॥
द्वादशारन्तथा चक्रं यत्राभिदिशुजन्तथा ।
नियच्छन्त्येकमर्म्मस्थि तथोक्तः परमेश्वर. ॥
एतत्तवोक्तं देवस्य रूपं द्वादशपत्रकम् ।
यस्मिन् ज्ञाते मुनिश्रेष्ठ । न भूयो मरणं भवेत् ॥"
इति वामनपुराणे द्वपञ्चाशत्तमोऽध्यायः ॥

द्वादशलोचनः, पुं, (द्वादश लोचनानि नेत्राणि यस्य । षडाननत्वादेवास्य तथात्वम् ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥

द्वादशांशुः, पुं, (द्वादश अंशवः किरणानि यस्य ।) वृहस्पतिः । इति भूरिप्रयोगः ॥ (यदुक्तं मात्स्ये । १२७ । ५५ ।
"लोहितो नवरश्मिस्तु स्थानमापन्न तस्य वै ।
हृष्टस्तु द्वादशरश्मीक हरिद्राभस्तु वेधस. ॥")

द्वादशाक्षः, पुं, (द्वादश अक्षीणि यस्य ।) कार्त्तिकेय । (द्वादशविषयेषु अक्षिणी यस्य ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥ (कार्त्तिकेयस्य अनुचरविशेषः । यथा, महाभारते । ९।४५।५६ ।
"एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभु ॥")

द्वादशाक्षरमन्त्रः, पुं, (द्वादश अक्षराणि यस्य । तादृशो मन्त्रः ।) द्वादशवर्णात्मकविष्णुविषयकमन्त्रविशेषः । यथा,—
"नमो भगवते वासुदेवायोङ्कारपूर्ब्बकम् ।
महामन्त्रमिमं प्राहुस्तत्त्वज्ञा द्वादशाक्षरम् ॥"
इति पाद्मे क्रियायोगसारः ॥

द्वादशाख्यः, पुं, (द्वादश ज्ञानकर्म्मादिविषयान् आख्यातीति । ख्या कथने + क. ।) बुद्धः । इति त्रिकाण्डशेषः ॥

द्वादशाङ्गुलः, पुं, (द्वादश अङ्गुलयः परिमाणमस्य । "तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः ।"५ । ४ । ८६ । इति अच् ।) वितस्तिः । इत्यमरः । २ । ६ । ८४ ॥

द्वादशात्मा, [न्] पुं, (द्वादश आत्मानो मूर्त्तयो यस्य ।) सूर्य्यः । (यथा, महाभारते ।३।३।२६।
"द्वादशात्मारविन्दाक्षः पिता माता पितामह. ॥")
अर्कवृक्ष. । इत्यमरः ॥

द्वादशायुः [स्] पुं, (द्वादशवर्षपर्य्यन्तं आयुर्यस्य ।) कुक्कुरः । इति शब्दमाला ॥

द्वादशार्चिः [स्] पुं. (द्वादश अर्च्चींषि किरणानि यस्य ।) वृहस्पति । इति हेमचन्द्रः । २ । ३२ ॥

द्वादशी, स्त्री, (द्वादश + टित्त्वात् ङीप् ।) तिथिविशेष । सा चन्द्रस्य द्वादशकलाक्रियारूपा । सा च विष्णुतिथि । यथा,—
"त्रैलोक्यगामिनी देवी लक्ष्मीस्तस्य सदा प्रिया ।
द्वादशी च तिथिस्तस्य कामरूपी च जायते ॥
एतासां भवेद्यस्तु द्वादश्यां तत्परायणः ।
स्वर्गगामी स भवतु पुमान् स्त्री वा विशेषतः ॥"
मार्गशीर्षीया शुक्लद्वादशी मत्स्यद्वादशी १ पौषी कूर्म्मद्वादशी २ माघी वराहद्वादशी ३ फाल्गुनी नृसिंहद्वादशी ४ चैत्री वामनद्वादशी ५ वैशाखी जामदग्न्यद्वादशी ६ ज्यैष्ठी रामद्वादशी ७ आषाढी कृष्णद्वादशी ८ श्रावणी बुद्धद्वादशी ९ भाद्री कल्किद्वादशी १० आश्विनी पद्मनाभद्वादशी ११ कार्त्तिकी नारायणद्वादशी १२ । एतासां नाम धरणीव्रतम् । एतत्करणे महाफलम् । इति वराहपुराणम् ॥

अथ पिपीतकद्वादशी । नारदीये ।
"वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथि. ।
तस्यां शीतलतोयेन स्नापयेत् केशवं शुचि. ॥"
इह पिपीतकद्वादशी । अत्र ।
"गण्डीसमेता कर्त्तव्या सप्तमी नागमीयुता ।
एतद्गोपासनाविह षष्ठ्यामाहुरुपोषणम् ॥
एकादश्यां प्रकुर्व्वन्ति उपवासं मनीषिणः ।
उपासनाय द्वादश्यां विष्णोर्यद्यपीदृशं तथा ॥"
इति भविष्यपुराणेन एकादश्युपवासानन्तर द्वादश्यां विष्णूपासनाया उक्तत्वात् । अत्रापि तथा व्यवहरन्तीति नात्र शुभादर. । द्वादशीघाये तूपवासानन्तर्य्यं विनापि पूजेति । इय पूर्व्ववचनोक्ता षष्ठीयुता सप्तमी ॥ आषाढादिद्वादशीषु शयनादिकम् ॥ * ॥

अथ श्रवणद्वादशी ।
सा भाद्रशुक्लद्वादश्यामेव सम्भवति । "भविष्योत्तरे ।
'द्वादशी श्रवणोपेता सर्व्वपापहरा तिथि. ।
बुधवारसमायुक्ता तत. शतगुणा भवेत् ।
तामुपोष्य समाप्नोति द्वादशद्वादशीफलम् ॥'
उभयदिने तल्लाभे तु एकादशीयुतैव ग्राह्या ।
'द्वादशी च प्रकर्त्तव्या एकादश्यान्विता विभो ।
सदा कार्य्या च विद्वद्भिर्विष्णुभक्तैश्च मानवै. ॥'
इति स्कान्दात् ॥
यदा त्वेकादश्यामेव श्रवणा तदा तामुपवसेत् ।
तथा च नारद ।
'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगत ।
तास्वेव तद्व्रतं कुर्य्यात् श्रवणद्वादशीं विना ॥'
भविष्योत्तरेऽपि ।
'एकादशी यदा तु स्यात् श्रवणेन समन्विता ।
विजया सा तदा प्रोक्ता भक्तानां विजयप्रदा ॥
तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावदेकस्य संक्षयः ॥
विशेषेण महीपाल । श्रवणं वर्त्तते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥'
तिथिक्षयेण एकादशीतिथिक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः. । अत्र हेतुर्द्वादशीमित्यादि । यदा त्वेकादश्युपवासदिने श्रवणं नास्ति परदिने द्वादश्यां श्रवणं तदोपवासद्वय माह ब्रह्मवैवर्त्ते ।
'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोप स्यादुभयोर्देवता हरि. ॥'
च । ग्रहणभे व्रते पूर्व्वे नैव कुर्य्याद्व्रतान्तरमिति स्मृतेः ॥ पारणस्याकरणेन पूर्व्वोपवाससमाप्तावुपवासान्तरारम्भे विधिलोपो न भवेदित्यर्थं हेतुमाह उभयोरित्यादि । उभयोरुपवाससामर्थ्ये तु श्रवणद्वादश्येवोपोष्या । तथा च स्मृतिः ।
'वरमेकादशी भुक्ता द्वादशी समुपोषयेत् ।
पूर्व्वोपवासजं पुण्यं सर्व्वं प्राप्नोत्यसंशयम् ॥
उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भव पुण्यं नरः प्राप्नोत्यसंशयम् ॥'
द्वादश्युपवास काम्य. । तथा च मार्कण्डेयपुराणम् ।
'द्वादश्यामुपवासेन शुद्धात्मा नृप । सर्व्वश. ।
चक्रवर्त्तित्वमतुलं सम्प्राप्नोत्यतुलां श्रियम् ॥'
कार्त्तिकशुक्लद्वादशी मन्वन्तरा । "तथा च भविष्यमनस्यवो ।
'अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।'
इत्यादिवचनात ।" इति तिथ्यादितत्त्वम् ॥ * ॥
"अग्रहायणशुक्लद्वादशी अखण्डद्वादशी । तत्रोपोष्य विष्णुपदप्राप्तिकामोऽखण्डद्वादश्यां विष्णुं पूजयिष्ये इति संकल्प्य पञ्चगव्येन स्नापयित्वा यथाशक्त्युपचारेण सम्पूज्य यवव्रीहिपूर्णपात्रं गृहीत्वा ।
'ॐ सप्तजन्मसु यत्किञ्चिन्मया खण्डव्रतं कृतम् ।
भगवंस्त्वत्प्रसादेन तदखण्डमिहास्तु मे ॥
यथा खण्ड जगत् सर्व्वं त्वमेव पुरुषोत्तम ।।
ततोऽखिलान्यखण्डानि व्रतानि मम सन्तु वै ॥'
इति प्रार्थ्य दक्षिणां दद्यात् ।" इति कृत्यचन्द्रिका ॥
भैमीपरद्वादश्यां षट्तिलाचरणम् । यथा विष्णुधर्म्मोत्तरे ।
"मृगशीर्षे शशधरे माघे मासि प्रजापते ।।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रिय ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात प्रमुच्यते ॥
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसीदति ॥
सकृत्तु षट्तिली भूत्वा सर्व्वपापै. प्रमुच्यते ।
त्रिंशद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"

अथ गोविन्दद्वादशी ।
"फाल्गुने शुक्लपक्षस्य पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥"
अत्र गङ्गायां पद्मपुराणीयो मन्त्र ।
"महापातकसञ्ज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि ॥"
इति तिथ्यादितत्त्वम् ॥

अथ द्वादशीजातफलम् ।
"बहुप्रज. सज्जनानुरागी
भूपालमान्यश्च निधिप्रियः स्यात् ।
येन द्वादशी यस्य जनस्य जन्म
प्रवासशीलो व्यवहारदक्ष. ॥"
इति कोष्ठीप्रदीप. ॥

द्वापरः, पुं, (द्वयोर्विषययो परस्तत्पर आसक्त इत्यर्थः । पृषोदरादित्वात् साधु. ।) सन्देह । (द्वौ सत्यत्रेतायुगौ परौ श्रेष्ठौ यस्मात् ।) युगविशेष । इत्यमरः । ३ । ३ । १४१ । तद्युगपरिमाणं यथा,—

"अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥"
८६४,००० ॥ तस्य धर्म्मो यथा,—
"अत ऊर्द्ध्वं प्रवक्ष्यामि द्वापरस्य विधिं पुनः ।
तत्र त्रेतायुगे क्षीणे द्वापरं प्रतिपद्यते ॥
द्वापरादौ प्रजानान्तु सिद्धिस्त्रेतायुगे तु या ।
परिवृत्ते युगे तस्मिंस्ततः सा विप्रणश्यति ॥
ततः प्रवर्त्तते तासां प्रजानां द्वापरे पुनः ।
लोभो धृतिर्वणिग्युद्धं तत्त्वानामविनिश्चयः ॥
प्रध्वंसश्चैव वर्णानां कर्म्मणाञ्च विपर्य्ययः ।
याच्ञा वधः पणो दण्डो मानो दर्पः क्षमा बलम् ॥
तथा रजस्तमो भूयः प्रवृत्ते द्वापरे पुनः ।
आद्ये कृते न धर्म्मोऽस्ति स त्रेतायां प्रवर्त्तितः ॥
द्वापरे व्याकुलो भूत्वा प्रणश्यति कलौ पुनः ।
वर्णानां द्वापरे ध्वंसः सङ्कीर्य्यन्ते तथाश्रमाः ॥
द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृतौ ।
द्विधा श्रुतिः स्मृतिश्चैव निश्चयो नाधिगम्यते ॥
अनिश्चयोऽधिगमनाद्धर्म्मतत्त्वं न विद्यते ।
धर्म्मतत्त्वे ह्यविज्ञाते मतिभेदस्तु जायते ॥
परस्परविभिन्नैस्तैर्दृष्टीनां विभ्रमेण तु ।
ततो दृष्टिविभिन्नैस्तैः कृतं शास्त्राकुलं त्विदम् ॥
एको वेदश्चतुष्पादस्त्रेतास्विह विधीयते ।
संक्षेपादायुषश्चैव व्यस्यते द्वापरे त्विह ।
वेदश्चैकश्चतुर्द्धा तु व्यस्यते द्वापरादिषु ॥
ऋषिपुत्त्रैः पुनर्भेदाद्भिद्यन्ते दृष्टिविभ्रमैः ।
मन्त्रब्राह्मणविन्यासैः स्वरक्रमविपर्य्ययैः ॥
संहिता ऋग्यजुःसाम्नां संहितास्तैः श्रुतर्षिभिः ।
सामान्याद्वैकृताश्चैव दृष्टिभिन्नैः क्वचित् क्वचित् ॥
ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च ।
अन्ये तु प्रस्थितास्ते वै केचित्तान् प्रत्यवस्थिताः ॥
द्वापरेषु प्रवर्त्तन्ते भिन्नार्थैस्तैः स्वदर्शनैः ।
एकमाध्वर्य्यवं पूर्व्वमासीद्द्वैधं ततः पुनः ॥
सामान्यविपरीतार्थैः कृतं शास्त्राकुलं त्विदम् ।
आध्वर्य्यवस्य प्रस्थानैर्बहुधा व्याकुलीकृतम् ॥
तथैवाथर्व्वणां साम्नां विकल्पैः स्वस्य संक्षयैः ।
व्याकुलो द्वापरेष्वर्थः क्रियते भिन्नदर्शनैः ॥
द्वापरे सन्निवृत्तास्ते वेदा नश्यन्ति वै कलौ ।
तेषां विपर्य्ययोत्पन्ना भवन्ति द्वापरे पुनः ॥
अवृष्टिर्मरणञ्चैव तथैव व्याध्युपद्रवाः ।
वाङ्मनःकर्म्मभिर्दुःखैर्निर्वेदो जायते ततः ।
निर्व्वेदाज्जायते तेषां दुःखमोक्षविचारणा ।
विचारणायां वैराग्यं वैराग्याद्दोषदर्शनम् ॥
दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिश्च जायते ।
तेषां मेधाविनां पूर्व्वमाद्ये स्वायम्भुवेऽन्तरे ।
उत्पद्यन्तीह शास्त्राणां द्वापरे परिपन्थिनः ॥
आयुर्व्वेदविकल्पाश्च अङ्गानां ज्योतिषस्य च ।
अर्थशास्त्रविकल्पाश्च हेतुशास्त्रविकल्पनम् ॥
प्रक्रियाकल्पसूत्राणां भाष्यविद्याविकल्पनम् ।
स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक् ॥
द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणाम् ।
मनसा कर्म्मणा वाचा कृच्छ्राद्वार्त्ता प्रसिध्यति ॥
द्वापरे सर्व्वभूतानां कायक्लेशपुरस्कृतः ।
लोभो धृतिर्वणिग्युद्धं तत्त्वानामविनिश्चयः ॥
वेदशास्त्रप्रणयनं धर्म्माणां सङ्करस्तथा ।
वर्णाश्रमपरिध्वंसः कामद्वेषौ तथैव च ॥
पूर्णे वर्षसहस्रे द्वे परमायुस्तदा नृणाम् ।
निःशेषे द्वापरे तस्मिन् तस्य सन्ध्या तु पादतः ॥
गुणहीनाश्च तिष्ठन्ति धर्म्मस्य द्वापरस्य तु ।
तथैव सन्ध्यापादेन अंशस्तस्य प्रतिष्ठितः ॥"

इति मत्स्यपुराणे १२० अध्यायः ॥

द्वापरयुग, क्ली, (द्वापरं एव युगम् ।) तृतीय-युगम् । तस्योत्पत्त्यादि यथा । "भाद्रकृष्णत्रयो-दश्यां गुरुवासरे द्वापरयुगोत्पत्तिः । तत्र अव-तारद्वयम् । कृष्णबुद्धौ । पुण्यमर्द्धम् । पापमर्द्धम् । नैमिषारण्यं तीर्थम् । नाड़ीस्थो प्राणः । रक्तगताः प्राणाः । सप्तहस्तपरिमितो मानव-देहः । सहस्राब्दमायुः । ताम्रपात्रे भोजनम् । इति द्वापरयुगस्य लक्षणम् । द्वापरयुगाब्दा ८६४,००० । द्वापरयुगस्य राजानः शाल्व-विराटहंसध्वजकंसध्वजमयूरध्वजवभ्रुवाहन-रुक्माङ्गदजरासन्धदुर्य्योधनयुधिष्ठिराः ।
धर्म्माधर्म्मरतो लोकः प्रजामी चपलः सदा ।
ज्ञाननिष्ठः कपटवाक् द्वापरे राजविस्तरः ॥
तत्र तारकब्रह्मनाम ।

हरे ! मुरारे मधुकैटभारे
गोपाल गोविन्द मुकुन्द शौरे ।
यज्ञेश नारायण कृष्ण विष्णो ।
निराश्रयं मां जगदीश ! रक्ष ॥'

इति मुद्राङ्कितपञ्जिकातः सङ्ग्रहीतम् ॥

द्वापरयुगाद्या, स्त्री, (द्वापरयुगस्य आद्या आर-म्भिका तिथिः ।) द्वापरयुगारम्भतिथिः । सा च गौणभाद्रकृष्णत्रयोदशी । तत्प्रमाणं युगाद्या-शब्दे द्रष्टव्यम् ॥

द्वारं, क्ली, (द्वरति निर्गच्छति गृहाभ्यन्तरादने-नेति । द्वृ + घञ् ।) निर्गमनम् । अभ्युपाय । इति मेदिनी । रे ४८ ॥ आयस्य पर्य्यायः । द्वा २ प्रतीहारः ३ । इत्यमरः । २ । २ । १६ ॥ वारकम् ४ । इति शब्दरत्नावली ॥
"गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ।
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिकं शुभम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकः, पुं, (द्वारेण प्रशस्तप्रतीहारेण कायति शोभते इति । कै + कः) द्वारका । इति शब्द-रत्नावली ॥

द्वारकण्टकः, पुं, (द्वारस्य कण्टक इव ।) कवा-टम् । इति शब्दरत्नावली ॥

द्वारका, स्त्री, (द्वारेण बहुना प्रशस्तेन च प्रती-हारेण कायतीति । कै + कः । स्त्रियां टाप् ।) स्वनामख्यातपुरी । तत्पर्य्यायः । द्वारावती २ द्वारवती ३ वनमालिनी ४ द्वारिका ५ अब्धि-नगरी ६ द्वारकः ७ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ११२ । ४६ ।
"सत्यकं प्रेषयामास द्वारकां द्वारमालिनीम् ॥")
तस्या निर्म्माणप्रकारो यथा,—

श्रीकृष्ण उवाच ।

"हे समुद्र महाभाग । स्थलञ्च शतयोजनम् ।
देहि मे नगरार्थञ्च पश्चाद्दास्यामि निश्चितम् ॥
नगरं कुरु हे कारो त्रिषु लोकेषु दुर्लभम् ।
रमणीयञ्च सर्व्वेषां कमनीयञ्च योषिताम् ॥
वाञ्छितञ्चापि भक्तानां वैकुण्ठसदृशं परम् ।
सर्व्वेषामपि स्वर्गाणां परं परमभीप्सितम् ॥
दिवानिशं खगश्रेष्ठ । सन्निधौ विश्वकर्म्मणः ।
स्थितिं कुरु महाभाग । यावन्निर्म्माति द्वारकाम् ॥

विश्वकारुरुवाच ।

द्वारकाञ्च किमाकारां करोमि जगतां विभो ! ।
कथयस्व महाभाग । निर्म्माणक्रममीश्वर ! ॥

भगवानुवाच ।

शतयोजनपर्य्यन्तं नगरं सुमनोहरम् ।
पद्मरागैर्मरकतैरिन्द्रनीलैरनुत्तमैः ॥
रुचकैः पारिभद्रैश्च पालङ्कैश्च स्यमन्तकैः ।
गन्धकैर्गालिभैश्चैव चन्द्रकान्तादिभिस्तथा ॥
सूर्य्यकान्तादिभिश्चैव शुभ्रैश्च स्फटिकाकृतैः ।
हरिद्वर्णैश्च मणिभिः श्यामैर्गौरैसुरैश्च वै ॥
गोरोचनाभैः पीतैश्च दाड़िम्बबीजरूपकैः ।
पद्मबीजनिभैश्चैव नीलैः कमलवर्णकैः ॥
मणिभिः कज्जलाकारैरुज्ज्वलैश्च परिष्कृतैः ।
श्वेतचम्पकवर्णाभैस्तप्तकाञ्चनसन्निभैः ॥
स्वर्णमूल्यशतगुणैरीषद्रक्तैश्च रूपकैः ।
गरिष्ठैश्च वरिष्ठैश्च मणिश्रेष्ठैश्च पूजितैः ॥
यथाविधानं यद्योग्यं यत्र यद्युक्तमीप्सितम् ।
मणीनां हरणञ्चैव यक्षस्था हिमालयात् ॥
दिवानिशं करिष्यन्ति यावन्निर्म्माणपूर्व्वकम् ।
यक्षैश्च सप्तभिर्लक्षैः कुवेरप्रेरितैरपि ॥
वेतालक्षैः कुष्माण्डलक्षैः शङ्करयोजितैः ।
दानवैर्नश्वरकोभिः शेलकन्यानियोजितैः ॥
कुरु दिव्यञ्च पत्नीनां सहस्राणाञ्च षोड़श ।
अन्यपत्नीजनस्यापि चाष्टाधिकशतस्य च ॥
शिविरं परिखायुक्तमुच्चैःप्राकारवेष्टितम् ।
युक्तं द्वादशद्वारैश्च सिंहद्वारपुरस्कृतम् ॥
युक्तं चित्रैर्विचित्रैश्च कृत्रिमैश्च कवाटकैः ।
निषिद्धद्वारहिंस्र प्रविष्टैश्च पुरस्कृतम् ॥
सुलक्षणं चन्द्रवेधं प्राङ्गणञ्च तथैव च ।
यदूनामाश्रमं दिव्यं किङ्कराणां तथैव च ॥
सर्व्वप्रसिद्धं निलयमुग्रसेनस्य भूभृतः ।
आश्रमं सर्व्वतोभद्रं वसुदेवस्य मत्पितुः ॥
कथितः लोकशिक्षार्थं कुरु कार्ष्ठं विना पुरीम् ।
शुभक्षणञ्चाप्यधुना गच्छ वत्स । यथासुखम् ॥
विश्वकर्म्मा हरिं नत्वा जगाम पक्षिणा सह ।
समुद्रस्य समीपञ्च वटमूलं मनोहरम् ॥
सुष्वाप तत्र नक्तञ्च कारुश्च पक्षिणा सह ।
स्वप्ने द्वारवतीं रम्यां ददर्श गरुड़स्तथा ॥
यत्किञ्चित् कथितः कारुः कृष्णेन परमात्मना ।
तदेव लक्षणं सर्व्वं ददर्श नगरे मुने ! ॥
कारुं हसन्ति स्वप्ने च सर्व्वे ते शिल्पकारिणः ।
गरुड़ं गरुड़ाश्चान्ये बलवन्तश्च पक्षिणः ॥
बुद्धा ददर्श गरुड़ो विश्वकर्म्मा च लज्जितः ।

अतीव द्वारकां रम्यां शतयोजनविस्तृताम् ॥
ब्रह्मादीनाञ्च नगरं विजित्य च विराजिताम् ।
तेजसाच्छादितां सूर्य्यं रत्नानाञ्च परिष्कृताम् ॥
वासुदेव उवाच ।
पैल्वकीतीर्थतुल्या सा किं तीर्थं द्वारकापरम् ।
सर्व्वतीर्थपरा श्रेष्ठा द्वारका बहुपुण्यदा ॥
यस्याः प्रवेशमात्रेण नराणां जन्मखण्डनम् ॥
दानञ्च द्वारकायाञ्च आह्लञ्च देवपूजनम् ।
चतुर्गुणञ्च तीर्थानां गङ्गादीनाञ्च भूमिप ।॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकेशः, पु, (द्वारकाया नगर्य्या ईशः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥

द्वारदातुः, पुं, (द्वारं ददातीति । दा + तुन् ।) वरदातुः । भूमीसहदृक्षः । इति भावप्रकाशः ॥

द्वारपालः, त्रि, (द्वारं पालयतीति । पालि + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) द्वाररक्षकः । दरवान् । इति पारस्य भाषा । तत्पर्य्यायः । प्रतीहारः २ द्वाःस्थः ३ द्वाःस्थितः ४ दर्शकः ५ । इत्यमरः । २ । ८ । ६ ॥ वेत्रधारकः ६ दौःसाधिकः ७ वर्त्तरूकः ८ गर्व्वाटः ९ दण्डवासी १० । इति त्रिकाण्डशेषः ॥ द्वारस्थः ११ क्षत्ता १२ द्वारपालकः १३ दौवारिकः १४ वेत्री १५ उत्सारकः १६ दण्डी १७ । इति हेमचन्द्रः ॥ अस्य विवरणं दौवारिकशब्दे द्रष्टव्यम् ॥

द्वारपालकः, पु, (पालयतीति ण्वुल् । द्वाराणां पालकः । यद्वा, द्वारपाल + स्वार्थे कन् ।) द्वारपालः । इति शब्दरत्नावली ॥

द्वारपिण्डी, स्त्री, (द्वारस्य पिण्डी पिण्डिकेव ।) देहली । इति जटाधरः ॥

द्वारबलिभुक्, [ज्] पु, (द्वारदत्तं बलिं भुङ्क्ते इति । भुज् + क्विप् ।) बकः । इति त्रिकाण्डशेषः ॥

द्वारयन्त्रं, स्त्री, (द्वारबन्धकं यन्त्रं मध्यलोपी समासः ।) तालकम् । इति हेमचन्द्रः । ४ । ७१ ॥ ताला इति कुलुप इति च भाषा ॥

द्वारवती, स्त्री, (द्वाराणि सन्त्यत्र । यद्वा, चतुर्व्वर्णानां मोक्षद्वाराणि सन्ति अत्रेति । द्वार + मतुप् । मस्य वः ।) द्वारका । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । १० । ३४ ।
“कृता द्वारवतीं नाम बहुद्वारां मनोरमाम् ॥”
तथा च तत्रैव,—
“चतुर्णामपि वर्णानां यत्र द्वाराणि सर्व्वतः ।
अतो द्वारवतीत्युक्ता विद्वद्भिस्तत्त्ववेदिभिः ॥”
इयं हि पीठस्थानानामन्यतमा । यत्र भगवती रुक्मिणीरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६६ ।
“रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥”)

द्वारस्थः, पु, (द्वारे तिष्ठतीति । स्था + कः ।) द्वारपालः । इति हेमचन्द्रः । ३ । ३९५ ॥ (द्वारस्थिते, त्रि । यथा, कथासरित्सागरे । १८ । ११६ ।
“सुप्ते च तस्मिन् द्वारस्थो जागरामास स द्विषः ॥”)

द्वारावती, स्त्री, (द्वाराणि प्रशस्तबहुलप्रतीहाराः सन्त्यत्र । द्वार + मतुप् मस्य वः । निपातनात् पूर्व्वदीर्घश्च ।) द्वारका । इति हेमचन्द्रः । ४ । ४६ ॥
“अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥
एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन ।
पुरी द्वारावती विष्णोः पाञ्चजन्योपरिस्थिता ॥
मुक्तिदा एताः सर्व्वाश्च एकत्र गणिताः सुरैः ।
यानि यानि च क्षेत्राणि काशीप्राप्तिकराणि मत् ॥”
इति भूतशुद्धितन्त्रम् ॥

द्वारिकः, पुं, (द्वारं पालकत्वेनास्त्यस्येति ठन् ।) द्वारपालः । इत्यमरटीकासारसुन्दरी ॥ (यथा, पञ्चतन्त्रे । ३ । ८५ ।
“यो मूर्खं लौल्यसम्पन्नं राजद्वारिकमाचरेत् ।
मिथ्यावादं विशेषेण तस्य कार्य्यं न सिध्यति ॥”)

द्वारिका, स्त्री, (प्रशस्तानि द्वाराणि सन्त्यास्यामिति । ठन् टाप् च ।) द्वारकापुरी । इति शब्दरत्नावली ॥

द्वारी, [न्] त्रि, (द्वारं पालकतयास्त्यस्येति इनिः ।) द्वारपालः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १२६ । १० ।
“द्वारिणं तापसा जग्मू राजानञ्च प्रकाशय ॥”)

द्वाविंशतिः, स्त्री, (द्व्यधिका विंशतिरिति । “द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ।” ६ । ३ । ४७ । इति आत्प्रत्ययः ।) द्व्यधिकविंशतिः । इति व्याकरणम् ॥ बाइश इति भाषा । (यथा, महाभारते । ७ । ४६ । १८ ।
“कर्णो द्वाविंशतिं भल्लान् कृतवर्म्मा चतुर्द्दश ॥”)

द्वासप्ततिः, स्त्री, (द्व्यधिका सप्ततिरिति । “विभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।” ६ । ३ । ४९ । इति पाक्षिक आत्प्रत्ययः ।) द्विसप्ततिः । यथा, द्वासप्ततिश्च वन्ध्यायामिति ज्योतिस्तत्त्वम् ॥

द्वाःस्थः, पु, (द्वारि तिष्ठतीति । स्था + “सुपि स्थः ।” ३ । २ । ४ । इति कः । “खर्परे शरि वा विसर्गलोपो वक्तव्यः ।” ८ । ३ । ३६ । इत्यस्य वार्त्तिकोक्त्या विसर्गस्य पाक्षिकलोपः ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वाःस्थितः, पु, (द्वारि स्थितः । विसर्गस्य पाक्षिकलोपः ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वाःस्थितदर्शकः, पु, (पश्यतीति । दृश् + ण्वुल् । द्वाःस्थितः सन् दर्शकः ।) दौवारिकः । इत्यमरटीकायां भरतः ॥

द्विः, व, द्वौ वारौ, इति सुच्प्रत्ययेन साध्यम् । (यथा, रामायणे । २ । १८ । ३० ।
“करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥”)
सर्व्वनामान्तर्गतद्विशब्दस्य पुंसि रूपं द्वौ । स्त्रियां क्लीवे च द्वे । तद्वाचकानि यथा, पक्षः १ नदीकूलम् २ अक्षिधारा ३ रामपुत्रः ४ चक्षुः ५ हस्तः ६ स्तनः ७ । इति कविकल्पलता ॥ सहचरौ यथा, इन्द्राग्नी १ नारदपर्व्वतौ २ अश्विनीकुमारौ ३ भार्य्यापती ४ । इति महाभारते वनपर्व्व ॥

द्विकं, क्ली, (द्वाभ्यां कायतीति । कै + कः ।) द्वयम् । यथा,—
“अशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शतात् ।
द्विकं शतं वा गृह्णानो न भवेदर्थकिल्विषी ॥”
इत्याह्निकतत्त्वम् ॥
(द्वितीयेन रूपेण ग्रहणमिति । “तावतिथं ग्रहणमिति लुग्वा ।” ५ । २ । ७७ । इति कन् पूरणप्रत्ययस्य च लुक् । द्वितीयके, त्रि । इति सिद्धान्तकौमुदी ॥)

द्विकः, पु, (द्वौ कौ ककारवर्णौ यत्र ।) काकः । कोकः । इति मेदिनी । के, २६ ॥

द्विककारः, पु, (द्वौ ककारौ यत्र ।) काकः । इति शब्दरत्नावली ॥

द्विककुत्, [द्] पु, (द्वे ककुदौ यस्य ।) उष्ट्रः । इति हेमचन्द्रः । ४ । ३२० ॥

द्विगुः, पुं, षट्समासान्तर्गतसमासविशेषः । स तु सङ्ख्यापूर्व्वपदानां समासः । वोपदेवेनास्य गसंज्ञा कृता । स च त्रिविधः । तद्धितार्थः १ समाहारः २ उत्तरपदपरश्च ३ । तद्धितार्थोऽपि द्विविधः । तद्धितप्रत्ययमात्रस्य ष्णजादेरीसादेर्वा अर्थे विषये इत्येकः । अपत्यार्थण्यादिकं त्यक्त्वा ष्णजादेस्तद्धितस्यार्थे वाच्ये इत्यपरः । तद्धितार्थविषयो यथा, द्वयोर्मात्रोरपत्यं द्वैमातुरः । पञ्चानां नापितानामपत्यं पाञ्चनापितिः ॥ तद्धितार्थवाच्यो यथा, पञ्चभिर्गोभिः क्रीतः पञ्चगुः ॥ समाहारो यथा, त्रयाणां सखीनां समाहारः त्रिसखम् । समाहारे अदन्तानां स्त्रीत्वं पात्रादिषु क्लीवत्वम् ॥ उत्तरपदपरो यथा — पञ्च गावो धनं यस्य स पञ्चगवधन इत्यादि । इति मुग्धबोधटीकायां दुर्गादासः ॥ (द्वौ द्वे वा गावौ यस्य इति विग्रहे गौणत्वे गोशब्दस्य ह्रस्वः । द्विगवस्वामिके, त्रि । यथा,—
“द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ।
तत् पुरुष कर्म्म धारय येनाहं स्यां बहुव्रीहिः ॥”
इत्युद्भटः ॥)

द्विगुणं, त्रि, द्वाभ्यां पूरणम् । अङ्कद्वयाभ्यां घातः । इति लीलावती ॥ (यथा, आर्य्यासप्तशत्याम् । ४६१ ।
“कुह्वरसप्रसवस्यालिभिरये नतं प्रियं प्रति मे ।
स्रोतस इव निम्नप्रतिरागस्य द्विगुण आवेगः ॥”)

द्विगुणाकृतं, त्रि, (द्विगुणं कर्षणं कृतम् । “संख्यायाश्च गुणान्तायाः ।” ५ । ४ । ५९ । इति डाच् ।) वारद्वयकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥ दोचषा भूँइ इति भाषा ॥

द्विजः, पुं, (द्विर्जायते इति । जन + “अन्येष्वपि दृश्यते ।” ३ । २ । १०१ । इति डः ।) संस्कृतब्राह्मणः । यथा,—
“जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।”
इति स्मृतिः ॥
सद्वृत्तब्राह्मणः । तल्लक्षणं यथा,—

अम्बरीष उवाच ।
"कीदृशाय प्रदातव्यं महादानं द्विजातये ।
विदुषे वा निराधारे साधारेऽविदुषे मुने ! ॥
एतन्मे सर्व्वमाख्याहि यथातथ्य द्विजोत्तम ।
उत्तारयति यस्तस्य दातारं दानमेव हि ॥
वशिष्ठ उवाच ।
जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्तिष्ठेत् नित्यं स द्विज उच्यते ॥
न जातिर्न्न कुलं राजन् ! न स्वाध्यायः श्रुतं न च ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥
क्षत्त्रियः । वैश्यः । इति मेदिनी । जे, १० ॥
(यथा, याज्ञवल्क्ये । १ । ३९ ।
"मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्त्रियविशस्तस्मादेते द्विजाः स्मृताः ॥"
दन्तः । (यथा,—
"न च्छित्वा द्विजैर्भक्षयेत् ॥" इति चरके सूत्रस्थानेऽष्टमेऽध्याये ॥) अण्डजः । स पक्षिसर्पमत्स्यादिः । इत्यमरः । ३ । ३ । ३० ॥ (यथा, रघुः । १२ । २२ ।
"ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ॥")
तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ द्विजाते, त्रि ॥
द्विजकुत्सित, पुं, (द्विजानां द्विजेषु वा कुत्सितः । द्विजानां तद्भक्षणनिषेधात् तथात्वम् ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः, शब्दमाला च ॥
द्विजदासः, पुं, (द्विजानां दासः ।) शूद्रः । इति राजनिर्घण्टः ॥ द्विजानां दासे, त्रि ॥
द्विजन्मा, [न्] पुं, (द्वे जन्मनी यस्य ।) ब्राह्मणः । (यथा, देवीभागवते । ५ । ५ । ३ ।
"यतीनां भूषणं ज्ञानं सन्तोषो हि द्विजन्मनाम् ॥")
दन्तः । पक्षी । इति शब्दरत्नावली ॥ क्षत्त्रियः । वैश्यश्च । त्रि, द्विवारजन्मयुक्तः । (द्वाभ्यां जायमानः । यथा, ऋग्वेदे । १ । १४० । २ ।
"अभिद्विजन्मा त्रिवृदन्नमृज्यते ।
संवत्सरे वावृधे जग्धमीपुनः ॥"
"द्वाभ्यामरणीभ्यां जायमानत्वात् यद्वा मथनेनाधानसंस्कारेण चोत्पन्नत्वात् द्विजन्मत्वम् ।"
इति तद्भाष्ये सायनः ॥)
द्विजपतिः, पुं, (द्विजानां पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते ।१।१९।२६।
"क्रूराणि चैवमादीनि भाषणानि बृहस्पतेः ।
श्रुत्वा द्विजपतिः शीघ्रं निर्गतः सदनाद्बहिः ॥")
द्विजप्रपा, स्त्री, (द्विजानां पक्षिणां प्रपा ।) आलवालम् । तत्पर्य्यायः । तल्लम् २ विल्लम् ३ तलम् ४ । इति त्रिकाण्डशेषः ॥
द्विजप्रिया, स्त्री, (द्विजानां याज्ञिकब्राह्मणादीनां प्रिया ।) सोमलता । इति राजनिर्घण्टः ॥ द्विजस्य प्रियवस्तुनि, त्रि ॥
द्विजबन्धुः, पुं, (द्विजस्य बन्धुरिव ।) अब्राह्मणः स भक्तदेवशादिः । यथा,—
"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।"
इति स्मृतिः ॥

द्विजभुवः, पुं, (आत्मानं द्विज ब्रूते इति । ब्रू + कः ।' ब्राह्मणब्रुवः । स च जातिमात्रोपजीवी ब्राह्मणः । इति हेमचन्द्रः । ३ । ५१९ ॥ यथा,—
"सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
अधीते शतसाहस्रमनन्तं वेदपारगे ॥"
इति स्मृतिः ॥
द्विजराजः, पुं, (द्विजानां राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९ । इति टच् ।) चन्द्रः । (यथा, देवीभागवते । १ । ११ । ७२ ।
"द्विजराजस्तु तच्छ्रुत्वा भृगोर्व्वचनमद्भुतम् ।
ददावतत्प्रियां भार्य्यां गुरोर्गर्भवतीं शुभाम् ॥")
कर्पूरः । इत्यमरः ॥ अनन्तः । गरुडः । इति मेदिनी । जे, ३२ ॥
द्विजलिङ्गी, [न्] पुं, (द्विजस्य लिङ्गं चिह्नमस्यास्तीति । इनिः ।) क्षत्त्रियः । इति त्रिकाण्डशेषः ॥ ब्राह्मणवेशधारिणि, त्रि ॥ (यथा, मनुः । ९ । २२४ ।
"द्यूतं समाह्वयं चैव यः कुर्य्यात् कारयेत वा ।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥")
द्विजव्रणः, पुं, (द्विजस्य दन्तस्य व्रणः ।) दन्तार्ब्बुदः । इति राजनिर्घण्टः ॥
द्विजशप्तः, पुं, (द्विजैः शप्तः ।) राजमाषः । इति शब्दचन्द्रिका ॥ बरबटी इति भाषा ॥
द्विजसेवकः, पुं, (द्विजानां सेवकः ।) शूद्रः । इति शब्दरत्नावली ॥ द्विजसेवाकर्त्तरि, त्रि ॥
द्विजा, स्त्री, (द्विर्जायते इति । जन् + डः । टाप् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः । २।४।१२०॥ (अस्याः पर्य्यायो यथा,—
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री स्मृता कौन्ती हरेणुका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भार्गी । इति मेदिनी । जे, १० ॥ पालङ्की । इति शब्दचन्द्रिका ॥
द्विजाङ्गी, स्त्री (द्विजस्य पक्षिणोऽङ्गमिव अङ्गं यस्याः । ङीप् ।) कटुका । इति राजनिर्घण्टः ॥
द्विजातिः, पुं, (द्वे जाती यस्य ।) ब्राह्मणः । इत्यमरः । २ । ७ । ४ ॥ (यथा, महाभारते । १ । ७४ । ६१ ।
"वेदेष्वपि वदन्तीम मन्त्रजातं द्विजातयः ॥")
अण्डजः । इति मेदिनी । ते, ११४ ॥ क्षत्त्रियः । वैश्यः । यथा,—
"शूद्रो द्विजातिभिर्जातो न भूमेर्भागमर्हति ।"
इति स्मृतिः ॥
(यथा च मनुः । १० । ४ ।
"ब्राह्मणः क्षत्त्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥")
द्विजायनी, स्त्री, (द्विजः अयते प्राप्यतेऽनयेति । अय + करणे ल्युट् । स्त्रियां ङीप् ।) यज्ञोपवीतम् । इति शब्दरत्नावली ॥
द्विजालयः, पुं, (द्विजानां पक्षिणामालयः ।) कोटरम् । इति शब्दचन्द्रिका ॥ द्विजानां गृहञ्च ॥

द्विजिह्वः, पुं, (द्वे जिह्वे यस्य ।) सर्पः । (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
"व्यालस्त्वाशीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः ।
चक्षुःश्रवा दन्दशूको गूढपात् पन्नगोरगाः ॥")
सूचकः । इत्यमरः । ३ । ३ । १४३ ॥ (यथा, माघे । १ । ६३ ।
"परस्य मर्म्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः ॥")
खलः । इति मेदिनी । वे, १२ ॥ चौरः । दुःसाध्यः । इति शब्दरत्नावली ॥ (रोगविशेषः । यथा, सुश्रुते निदानस्थाने १४ अध्याये ।
"ज्ञेयो द्विजिह्वः खलु रोग एष विवर्ज्जयेदागतपाकमेनम् ॥"
त्रि, द्विजिह्वाविशिष्टः । यथा, महाभारते । १ । ३४ । २४ ।
"द्विजिह्वाश्च कृता सर्पा गरुडेन महात्मना ॥")
द्विजोत्तमः, पुं, (द्विजेषु उत्तमः ।) ब्राह्मणः । इति हलायुधः ॥ (यथा, मनुः । २ । ४९ ।
"भवत्पूर्व्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ॥")
द्विट्, [ष्] पुं, (द्वेष्टीति । द्विष् + क्विप् ।) शत्रुः । इत्यमरः । २ । ८ । ११ ॥ (यथा, महाभारते । ४ । २६ । ७ ।
"तस्मिन् जीवति पापिष्ठे सेनावाहे मम द्विषि ।
तत् कर्म्म कृतवत्यद्य कथं निद्रां निषेवसे ॥")
द्वेष्टरि, त्रि । (यथा, रघौ । ३ । ४५ ।
"त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा ॥")
द्विठः, पुं, वह्निजाया । स्वाहा । विसर्गः । इति मेदिनीकारीयतन्त्रम् ॥ ठकारद्वयम् ॥
द्वितय, क्ली, (द्वौ अवयवौ अस्य । द्वि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् ।) द्वयम् । इति हेमचन्द्रः । २ । ५० । १२ ॥ (यथा, भागवते । ५ । २२ । ४ ।
"अत ऊर्द्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुङ्क्ते ॥" द्वित्वसंख्याविशिष्टे, त्रि । यथा, रघुः । ८ । ९० ।
"इममतनुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥")
द्वितीयं, त्रि, (द्वयोः पूरणम् । द्वि + "द्वेस्तीयः ।" ५ । २ । ५४ । इति तीयः ।) द्वयम् । इति हेमचन्द्रः । ३ । १०७ ॥ (यथा, रघुः ।२।४९।
"तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ॥")
द्वितीयः, पुं, (द्वयोः पूरणः । आत्मनो द्वितीयत्वादेवास्य तथात्वम् ।) पुत्रः । इति त्रिकाण्डशेषः ॥
द्वितीया, स्त्री, (द्वितीय + टाप् ।) गेहिनी । भार्य्या । इत्यमरः । २ । ६ । ५ । तिथिविशेषः । सा चन्द्रस्य द्वितीयकलाक्रियारूपा । शुक्लपक्षे २ कृष्णपक्षे १७ एतदङ्कबोधिता । इति ज्योतिषम् ॥ ● ॥ सा च अश्विनीकुमारयोर्जन्मतिथिः । यथा,—

ब्रह्मोवाच ।
"रूपं कान्तिरनौपम्यं भिषक्त्वं सर्व्ववस्तुषु ।
सोमपत्न्यश्च लोकेषु सर्व्वमेतद्भविष्यति ॥
महातपा उवाच ।
एतत् सर्व्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा ।
दत्तं यस्मात्ततस्तेयं तिथीनामुत्तमा तिथिः ॥
एतस्यां रूपकामस्तु पुष्पाहारी भवेन्नरः ।
संवत्सरं शुचिर्नित्यं सुखरूपी भवेन्नरः ॥
अश्विभ्यां ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च ॥"
इति वराहपुराणम् ॥
अत्र जातफलम् ।
"निखिलगुणगभीरो दानशीलो दयालुः
स्वकुलकुमुदचन्द्रः स्वच्छचित्तोऽतिशूरः ।
निजभुजबलगर्व्वाच्छादितारातिवर्गो
भवति विपुलकीर्त्तिर्यो द्वितीयाप्रसूतः ॥"
इति कोष्ठीप्रदीपः ॥
अथ रथद्वितीया । स्कन्दपुराणे ।
"आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेच्च द्विजान् बहून् ।
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ॥
सा यात्रा । मां जगन्नाथम् ॥
अथ मनोरथद्वितीया ।
सा श्रावणशुक्लद्वितीया । 'मनोरथद्वितीयायां दिवा वासुदेवार्च्चनं रात्रौ चन्द्रोदयेऽर्घ्यदान नक्तञ्च भोजनादिकम् ॥' यथा विष्णुधर्म्मोत्तरे ।
'देवमभ्यर्च्य पुष्पैस्तु धूपदीपानुलेपनैः ।
उदगच्छतश्च बालेन्दोर्दद्यादर्घ्यं समाहितः ॥
नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः ।
अस्तं गते न भुञ्जीत व्रतभङ्गभयान्नरः ॥'
अथ भ्रातृद्वितीया । लिङ्गपुराणे ।
'कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम् ।
या न कुर्य्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि ॥'
तस्या इति शेषः ॥ महाभारते ।
'कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्व्वं भोजितः स्वगृहे स्वयम् ॥
तस्यां निजगृहे पार्थ ! न भोक्तव्यमतो बुधैः ।
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः ॥'
तथा ।
'यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः ॥'
सहजद्वयैर्भगिनीभ्रातृभिः । अर्घ्यमन्त्रः ।
ॐ एह्येहि मार्त्तण्डज पाशहस्त
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥
प्रणाममन्त्रः ।
ॐ धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्त्र नमोऽस्तु ते ॥
यमुनाञ्च संपूज्य नमस्कुर्य्यात् ।
ॐ यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्त्रि ! नमोऽस्तु ते ॥
अन्नं दत्त्वा पठति ।
भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥
ज्येष्ठा तवाग्रजाताहमिति वदेत् ।
तथा यमद्वितीयायां यात्रायां मरणं भवेत् ॥
अनध्यायद्वितीया यथा ।
प्रे-को-पै-चाद्वितीयास्ताः प्रेतपक्षे गते तु या ।
या च कोजागरे जाते चैत्रावल्याः परेऽपि या ॥
चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
पराश्चिताश्चानध्यायः पुराणैः परिकीर्त्तितः ॥"
इति तिथितत्त्वम् ॥
"पक्षयोर्माघमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
इति विष्णुपुराणम् ॥

द्वितीयाकृतं, त्रि, (द्वितीयं कर्षणं कृतमिति । "कृष्णो द्वितीयतृतीयशम्बबीजात् कृषौ । ५ । ४ । ५८ । इति डाच् ।) वारद्वयकृष्टक्षेत्रम् । इत्यमरः ।२।९।९॥ दोचसा भूँइ इति भाषा ॥

द्वितीयाभा, स्त्री, (द्वितीया हरिद्रावत् आभातीति । आ+भा+कः ।) दारुहरिद्रा । इति शब्दचन्द्रिका ॥

द्वित्राः, त्रि, (द्वौ वा त्रयो वा । "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये ।" २ । २ । २५ । इति समासः । "बहुव्रीहौ संख्येये डजबहुगणात् ।" ५ । ४ । ७३ । इति डच् ।) द्वौ वा त्रयो वा इमे । इति संक्षिप्तसारः । नित्यबहुवचनान्तोऽयम् ॥ (यथा, रघुः । ५ । २५ ।
"द्वित्राण्यहान्यर्हसि सोढुमर्हन्
यावद्यते साधयितुं त्वदर्थम् ॥")

द्विदन्, [त्] त्रि, (द्वौ दन्तौ यस्य । "वयसि दन्तस्य दतृ ।"५।४।१४१। इति दन्तस्य दतृ-आदेशः ।) दन्तद्वययुक्तशिश्वादिः । इति हेमचन्द्रः ।४।३२८॥

द्विदाम्नी, स्त्री, (द्वे दामनी बन्धनरज्जू यस्याः । "दामहायनान्ताच्च ।" ४।१।२७। इति ङीप् ।) रज्जुद्वययुक्ता गौः । इति मुग्धबोधव्याकरणम् ॥

द्विदेहः, पुं, (द्वाभ्यां देहोऽस्येति । गजाननत्वादेवास्य तथात्वम् ।) गणेशः । इति त्रिकाण्डशेषः ॥ (द्व्यात्मकराशिः । इति ज्योतिषम् ॥)

द्विधा, व्य, (द्वि+"संख्याया विधार्थे धा ।" ५।३।४२ । इति धा ।) द्विप्रकारम् । इति मुग्धबोधम् ॥ (यथा, देवीभागवते । ३ । ६ । ५ ।
"यथा दीपस्तथोपाधेर्योगात् सञ्जायते द्विधा ।
छायेवादर्शमध्ये वा प्रतिबिम्बं तथावयोः ॥")

द्विधागतिः, पु, (द्विधा द्विप्रकारा गतिर्यस्य ।) कुम्भीरः । इति हेमचन्द्रः ।४।४१८॥ द्विप्रकारगतियुक्ते, त्रि ॥

द्विधातु', पु, (द्वौ धातू यस्य । देवगजदेहत्वादेवास्य तथात्वम् ।) गणेशः । इति शब्दरत्नावली ॥ (द्वौ धातू ताम्रादिधातुद्वयं यत्र ।) धातुद्वये, स्त्री ॥

द्विधात्मकं, क्ली, (द्विधा आत्मा यस्य । कप् ।) जातीकोषम् । इति शब्दचन्द्रिका ॥

द्विधालेख्यः, पु, (द्विधा लिख्यते यत्र । लिख+आधारे ण्यत् ।) हिन्तालवृक्षः । इति राजनिर्घण्टः ॥ द्विप्रकारलेखनीये, त्रि ॥

द्विनग्नकः, पु, (द्विर्द्वितीयो नग्नक इव ।) दुश्चर्म्मा । इति हेमचन्द्रः ॥

द्विपः, पुं (द्वाभ्यां शुण्डमुखाभ्यां पिबतीति । पा+कः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, माघे । ३ । ६७ ।
"तेजोमहद्भिस्तमसेव दीपै-
र्द्विपैरसम्बाधमयाम्बभूवे ॥")
पुं, नागकेशरः । इति रत्नमाला ॥

द्विपथं, क्ली, (द्वयोः पथोः समाहारः । तद्धितार्थेत्यादिना समासः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) पथद्वयम् । दोमाता पथ इति भाषा । तत्पर्य्यायः । चारपथः २ । इति हेमचन्द्रः । ४ । ५२ ॥ द्वौ पन्थानौ यत्रेत्यर्थे, त्रि

द्विपदः, पु, (द्वे पदे यस्य ।) मनुष्यः । (यथा, महाभारते । १ । ७४ । ५६ ।
"ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठश्चतुष्पदाम् ॥")
देवः । पक्षी । राक्षसः । यथा, प्रश्नसारे ।
"द्विपदेऽपि चतुर्भेदा नृदेवपक्षिराक्षसाः ॥"

द्विपदराशिः, पु, (द्वे पदे यस्य । स चासौ राशिश्चेति ।) मिथुनम् । तुला । कुम्भः । कन्या । धनुषः पूर्व्वार्द्धम् । यथा, ज्योतिस्तत्त्वे ।
"मिथुनतुलाघटकन्याद्विपदाख्याश्चापपूर्व्व-
भागश्च ॥"

द्विपमदः, पु, (द्विपस्य हस्तिनो मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥

द्विपर्णी, स्त्री, (द्वे द्वे पर्णे यस्याः । ङीप्) वनकोली । इति रत्नमाला ॥ पर्णद्वययुक्ते, त्रि ॥

द्विपात, [द्] त्रि, द्वौ पादौ यस्य सः । (पादस्य पाद्भावः ।) पादद्वययुक्तः । इति मुग्धबोधव्याकरणम् ॥

द्विपाद्यं, क्ली, (द्वौ पादौ परिमाणमस्य । "पणपादमाषशताद् यत् ।" ५।१। ३४ । इति यत् ।) द्विगुणदण्डः । इत्यमरः । २ । ८ । २७ ॥

द्विपायी, [न्] पु, (द्वाभ्यां मुखशुण्डाभ्यां पिबतीति । पा+णिनिः ।) हस्ती । इति हारावली । १४ ॥

द्विपृष्ठ', पु, (द्वौ पृष्ठौ यस्य ।) राजभेदः । तत्पर्य्यायः । ब्रह्मसम्भवः २ । इति हेमचन्द्रः । ३ । ३५६ ॥

द्विबिन्दु', पु, (द्वौ बिन्दू यत्र ।) विसर्गवर्णः । यथा, विन्दुद्विविन्दुमात्रौ वर्णौ क्रमात्नुवी संज्ञौ स्तः । इति मुग्धबोधव्याकरणम् ॥ शुन्यद्वयञ्च ॥

द्विमातृजः, पु, (द्वाभ्यां मातृभ्यां जायते इति । जन+डः ।) गणेशः' । इति हेमचन्द्रः ।३।१२०॥

द्विमुखः, पु, (द्वे मुखे यस्य ।) राजसर्पः । इति हलायुधः ॥ मुखद्वययुक्ते, त्रि ॥

द्विमुखा, स्त्री, (द्वे मुखे यस्याः ।) कर्करी । इति शब्दचन्द्रिका ॥ गाडु इति भाषा । जलौकाः ।

इति हलायुधः ॥ जोँक इति भाषा ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ५४ अध्याये ।
"पूरणो द्विमुखाश्चैव सप्तैवेते पुरीषजाः ॥")

द्विमुखाहिः, पुं, (द्विमुखः अहिः सर्पः ।) सर्पविशेषः । दोँमुखिनी इति भाषा । तत्पर्य्यायः । अहीरणिः २ राजाहिः ३ राजसर्पः ४ द्विमुखः ५ सर्पभुक् ६ । इति हलायुधः ॥

द्विमुखोरगः, पुं, (द्विमुखः उरगः सर्पः ।) राजसर्पः । इति जटाधरः ॥

द्विमूर्द्ध, त्रि, (द्वौ मूर्द्धानौ यस्य । "द्वित्रिभ्यां ष मूर्द्धः ।" ५ । ४ । ११५ । इति ष ।) मस्तकद्वययुक्तः । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ४ । ४१ ।
"बहुमूर्द्धा द्विमूर्द्धोऽथ त्रिमूर्द्धोऽप्याहतो रघे ॥")

द्विरदः, पुं स्त्री, (द्वौ रदौ दन्तौ प्रधानतया यस्य ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, महाभारते । ७ । २६ । २७ ।
"क्षोभयन्तं तथा सेनां द्विरदं नलिनीमिव ।
धनञ्जय भूतगणाः साधु साध्वित्यपूजयन् ॥")

द्विरदान्तकः, पुं, (द्विरदानां हस्तिनां अन्तकः ।) सिंहः । इति राजनिर्घण्टः ॥

द्विरशन, क्ली (द्विर्वारमशनं भोजनम् ।) वारद्वयभोजनम् । यथा,—
"मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्त्यवासिनां नित्यम् ।
अहनि च तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"
इति तिथ्यादितत्त्वम् ॥

द्विरसनः, पुं, (द्वे रसने जिह्वे यस्य ।) सर्पः । इति हारावली । १५ ॥

द्विरागमन, क्ली, (द्विर्वारं विवाहात् परं आगमनं स्वामिगृहे इत्यर्थः ।) विवाहानन्तरं वध्वाः पितृगेहात् पतिगृहे पुनरागमनम् । यथा, नारायणप्रहस्ते ।
"इते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्द्विरागमनं विदुः ॥"
तस्य शुभकालदिनादि यथा । दीपिकायाम् ।
"स्त्रीशुक्राजिघटाजसयुतरवौ काले विशुद्धे भृगौ सत्यज्य प्रतिलोमगं शुभदिने यात्राप्रवेशोचिते ।
त्यक्त्वाहस्तु निरंशकं नववधूयात्राप्रवेशौ मतिः कुर्य्यादिकपुरादिषु प्रतिभृगोर्न च्छन्ति दोषं बुधाः ॥
मैत्रागारे कुम्भकुसुमयोः सम्भवो वा यदि स्यात् काले शुक्रो न भवति यदा संमुखो वापि शुक्रः ।
मेषे कुम्भेऽलिनि च न भवेत् भास्करश्चेत्तथापि स्वामी भर्त्रेऽहनि नववधूं वेशयेन्मन्दिरं स्वम् ॥
भर्त्तर्गोचरशोभने दिनपतौ नास्तं गते भार्गवे सूर्य्ये कीटघटाजगे शुभदिने पक्षे च कृष्णेतरे ।
हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा
चानीता गुणशालिनी नववधूर्नित्योत्सवा मोदते ॥
शकयामे चतुष्पादे दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नीयमानायाः पुरः शुक्रो न दुष्यति ॥"
तथा,—
"काश्यपेषु वशिष्ठेषु भृग्वादित्याङ्गिरःसु च ।
भारद्वाजेषु वात्स्येषु प्रतिशुक्रो न दोषभाक् ॥"
श्रीपतिसंहितायां प्रणेताः ।
"पुष्याश्विन्यसमीरणादिति वसुत्वष्टुत्तरारेवती-
तारानायकरोहिणीषु शुभदे मेषालिकुम्भे रवौ ।
वारेष्विज्यसितेन्दुवित्सु शुभदे तारे प्रशस्ते विधौ
कन्यामन्मथमीनतौलिमृगगामे स्यादङ्गना-
द्विरागमः ॥"
ज्योतिःसारसंग्रहे ।
"विवाहमासि प्रथमे वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्य युग्माब्दं विषमाब्दके ॥"
ज्ञानचिन्तामणौ ।
"श्वश्रूं हन्त्यष्टमे वर्षे श्वशुरञ्च दशाब्दिके ।
सम्प्राप्ते द्वादशे वर्षे पतिं हन्ति द्विरागमे ॥"
मत्स्यसूक्ते ।
"शुक्रा पितृगृहे कन्या भुङ्क्ते स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः प्रपन्ति कुलनायिकाः ॥"
इति ज्योतिस्तत्त्वम् ॥
निष्कर्षस्तु ।
"विवाहमासि प्रथममनागताया वध्वा अष्टमदशमद्वादशेतरवर्षे कालशुद्धौ वैशाखमार्गशीर्षफाल्गुनान्यतममासे रविशुद्धौ सोमबुधगुरुशुक्रान्यतमवारे चन्द्रताराशुद्धौ रोहिणीपुनर्व्वसुमृगशिरःपुष्योत्तरात्रयहस्तस्वातीधनिष्ठारेवतीषु विष्टिभिन्नकरणेषु निषिद्धेतरयोगेषु कन्यामिथुनतुलामीनलग्नेषु द्विरागमनम् । काश्यपमते बुधवारोऽपि निषिद्धः ।
दक्षिणदिङ्मुखगमनं गमनमभिनववनारीणाम् ।
अयमपि धान्यादीनां न बुधो बुधवासरे कुर्य्यात् ॥"
इति सत्कृत्यमुक्तावली ॥

द्विरापः, पुं, (द्विर्द्विवारं मुखशुण्डाभ्यामित्यर्थः । आ सम्यक् पिबतीति । पा + कः ।) हस्ती । इति शब्दमाला ॥

द्विराषाढ़ः, पुं, (द्वि आषाढ़ः ।) मिथुनस्थरवारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वयम् । स च आषाढ़मलमासे भवति । यथा, ज्योतिषे ।
"मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
मिहिरश्च ।
"माधवादिषु षट्स्वेव मासि दर्शद्वयं यदा ।
द्विराषाढ़ः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥"
इति मलमासतत्त्वम् ॥
अन्यच्च ।
"पौर्णमास्या द्वयं यत्र पूर्व्वाषाढ़ाद्वयं भवेत् ।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
इति गारुड़े ६० अध्यायः ॥

द्विरुक्तः, त्रि, (द्विर्द्विवारं यथा तथा उक्तः ।) द्विवारकथितः । यथा । द्विरुक्तप्रचादौ द्विः । इति मुग्धबोधलक्षणम् ॥

द्विरुक्तिः, स्त्री, (वच + क्तिन् । द्विर्द्विवारं उक्तिः ।) द्विवारकथनम् । इति संक्षिप्तसारः ॥

द्विरूढ़ा, स्त्री, (उह्यते इति । वह + कर्म्मणि क्तः । द्विः ऊढ़ा विवाहिता ।) द्विवारविवाहिता । तत्पर्य्यायः । दिधिषूः २ पुनर्भूः ३ । इति हेमचन्द्रः । ३ । १९८ ॥

द्विरूपः, पुं, (द्वौ रूपौ आकारौ यत्र ।) द्व्याकारशब्दादिः । यथा । द्विरूपकोषादिः । द्विप्रकारग्रन्थादिः । यथा । द्विरूपचक्रादिपाठः । रूपद्वययुक्ते, त्रि ॥

द्विरेफः, पुं स्त्री, (द्वौ रेफौ रकारवर्णौ यस्य भ्रमरशब्दस्य ।) भ्रमरः । (यथा, कुमारे । ३ । २७ ।
"निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")
वर्व्वरे, त्रि । इत्यमरः ॥

द्विवर्षा, स्त्री, (द्वौ वर्षौ वयःपरिमाणमस्याः । द्विवर्ष + आर्हीयठक् तस्य लुक् च ।) द्विहायनी । द्विवर्षवयस्का गौः । इत्यमरः ।२।९।६९॥

द्विवर्षिका, स्त्री, (द्विवर्षैव । स्वार्थे कन् । टापि "प्रत्ययस्थादिति ।" ७ । ३ । ४४ । इति अत इत्वम् ।) द्विवर्षा गौः । इति हेमचन्द्रः ।४।३३५॥

द्विवर्षीणः, त्रि, (द्वौ वर्षौ वयःपरिमाणमस्य । द्विवर्ष + खः ।) द्विवार्षिकः । द्विवर्षवयस्कः । इति पाणिनीयव्याकरणम् ॥

द्विवार्षिकः, त्रि, (द्विवर्षे भवः । ठक् ।) द्विवर्षभवः । वत्सरद्वयजातः । इति व्याकरणम् ॥

द्विवाहिका, स्त्री, (द्वाभ्यां मार्गाभ्यां वाहयतीति । वह + णिच् + ण्वुल् । टापि अत इत्वम् ।) दोला । इति शब्दमाला ॥

द्विविदः, पुं, वानरविशेषः । इति हेमचन्द्रः ॥ (अयं हि नरकासुरस्य मित्रम् । यथा, विष्णुपुराणे । ५ । ३६ । २ ।
"नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सखाभवन्महावीर्य्यो द्विविदो नाम वानरः ॥"
स तु बलरामेण हतः । यथा, तत्रैव ।५।३६।२०।
"ततो बलेन कोपेन मुष्टिना मूर्द्ध्नि ताड़ितः ।
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः ॥"
श्रीरामस्य सचिववानराणामन्यतमः । यथा, महाभारते । ३ । २७५ । २३ ।
"मैन्दश्च द्विविदश्चैव हनूमांश्चानिलात्मजः ।
जाम्बवानृक्षराजश्च सुग्रीवः सचिवाः स्मृताः ॥")
"समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः ।
ऐकाहिकज्वरं हन्ति तस्य नामानुकीर्त्तनात् ॥"
इति ज्योतिषम् ॥

द्विवेशरा, स्त्री, (द्वौ वेशौ गमनावस्थानरूपौ राति ददातीति । रा दाने + कः ।) लघुरथः । तत्पर्य्यायः । गन्त्री २ कम्बी ३ । इति हारावली । १६२ ॥

द्विशः, [स्] अ, (द्वि + "संख्यैकवचनाच्च वीप्सायाम् ।" ५ । ४ । ४३ । इति वीप्सायां शस् ।) द्वौ द्वौ । इति वीप्सार्थे शस्प्रत्ययः ॥ (यथा, सुश्रुते । १ । ४१ ।
"द्विशो वा बहुशो वापि मात्रा दोषेऽवचारयेत् ॥")

द्विशफः, पुं, (द्वौ द्वौ शफौ यस्य ।) द्विखुरपशुः । यथा, श्रीभागवते । ३ । १० । २२ ।
"गौरजो महिषः कृष्णः शूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥"

द्विष, ल ज औ वैरे । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-अनिट् ।) ल ज, द्वेष्टि द्विष्टे । औ, अद्विषत् । द्विषन्ति मन्दाश्चरितं महात्मनाम् । इति कुमारः । इति दुर्गादासः ॥

द्विषतीतापः, त्रि, (द्विषतीं तपति तापयतीति वा । द्विषती+तप+खच् । तप+णिच्+खच् वा ।) स्त्रीशत्रुतापकः । इति संक्षिप्तसारव्याकरणम् ॥

द्विषन्, [त्] त्रि, (द्वेष्टीति । द्विष+"द्विषोऽमित्रे ।" ३ । २ । १३१ । इति शतृ ।) शत्रुः । इत्यमरः ।२।८।१० ॥ (यथा, माघे । २ । १ ।
"यियक्षमाणेनाहूतः पार्थेनाथ द्विषन् मुरम् ॥")

द्विषन्तपः, त्रि,(द्विषन्तं तापयतीति । तप+णिच्+"द्विषत्परयोस्तापेः ।" ३ । २ । ३९ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ । इति ह्रस्वः । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३।६७। इति मुम् । ततः संयोगान्ततकारलोपः ।) शत्रुतपः । शत्रुतापजनकः । इति संक्षिप्तसारव्याकरणम् ॥

द्विष्टं, क्ली, (द्विष+क्तः ।) ताम्रम् । ताम्रम् । इत्यमरटीकासारसुन्दरी ॥ द्वेषविषये, त्रि । (यथा, भाषापरिच्छेदे । १५१ ।
"निवृत्तिस्तु भवेद्द्वेषात् द्विष्टसाधनताधियः ॥"
तथाच ।
"अपोर्ण्ण दुष्टसुच्छिष्टं पाषाणतृणलोष्टवत् ।
द्विष्टं युषितमस्वादु पूति चान्नं विवर्ज्जयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥

द्विष्ठः, त्रि, द्वयोस्तिष्ठति यः । (द्वि+स्था+कः ।) उभयस्थः । यथा । संयोगस्य द्विष्ठतयेति जगदीशः ॥

द्विसप्ततिः, स्त्री, (द्व्यधिका सप्ततिः । "विभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।" ६ । ३ । ४९ । इति पक्षे न आत्वम् ।) द्व्यधिकसप्ततिः । इति ज्योतिषम् ॥ ७२ बाओयात्तर इति भाषा ॥ (यथा, मनुसंहितायाम् । ७ । १५७ ।
"प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥")

द्विसहस्राक्षः, पु,(द्विसहस्रं अक्षीणि यस्य । षच् समासे ।) अनन्तदेवः । इति हेमचन्द्रः ॥

द्विसीत्यं, त्रि, (द्विवारं सीतया सहितम् । द्विसीता+"नौ वयोधर्म्मेति ।"४ । ४ ।९१ । इति यत् ।) वारद्वयकृष्टक्षेत्रम् । दोचसा भूँइ इति भाषा । तत्पर्य्यायः । द्विगुणाकृतम् २ द्वितीयाकृतम् ३ शम्बाकृतम् ४ सम्बाकृतम् ५ द्विहल्यम् ६ । इत्यमरभरतौ ॥

द्विसृक्विमांसं, क्ली, (द्विसृक्विनं द्विःपक्वं अन्नं सकुलम् ।) द्विःसिद्धसक्तुकम् । यथा,—
"द्विस्विन्नमन्नं पृथुकं शुष्कं देशविशेषके ।
ताम्रपात्रस्थं विप्राणां भक्ष्ये च निवेदने ।
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् । तथैते वस्तुनी ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥

द्विहल्यं, त्रि, (द्विवारं हलेन कृष्टम् । द्विहल+"मतजनहलात्करणजल्पकर्षेषु ।" ४ । ४ ।९७। इति यत् ।) द्विधाकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥

द्विहा, [न्] पुं, (द्वाभ्यां शुण्डदन्ताभ्यां हन्तीति । हन+क्विप् ।) हस्ती । इति शब्दरत्नावली ॥

द्विहायनी, स्त्री, (द्वौ हायनौ वत्सरौ वयःक्रमौ यस्याः ।"दामहायनान्ताच्च ।" ४।१।२७ । इति ङीप् ।) द्विवर्षा गौः । इत्यमरः । २ । ९ । ६८ ॥ (द्विवर्षवयस्के,, त्रि । यथा, मनुः । ११।१३४ ।
"शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम् ॥")

द्वीन्द्रियग्राह्यः, पु, (द्वाभ्यामिन्द्रियाभ्यां ग्राह्यः ।) इन्द्रियद्वयग्रहणीयगुणः । स तु संख्यादिसप्तद्रवत्वस्नेहस्वरूपः । यथा,—
"संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ।
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ॥"
इति भाषापरिच्छेदः ॥

द्वीपं, क्ली, (द्वौ वर्णौ ईयते इति । इ गतौ+बाहुलकात् पः ।) व्याघ्रचर्म्म । इति द्वीपिशब्दटीकायां भरतः ॥

द्वीपः, पु क्ली, (द्विर्गता द्वयोर्दिशोर्वा गता आपो यत्र । काकाक्षिगोलकन्यायेन द्वयोरित्युक्तेऽपि चतुर्दिक्षु इति सिद्धिः ।"ऋक्पूरब्धूरिति ।"५।४। ७४ । इति अत् । "द्व्यन्तरुपसर्गेभ्योऽप ईत् ।" ६।३।९७ । इति ईत् ।) वारिमध्यतटम् । जलवेष्टितभूमिः । तत्पर्य्यायः । अन्तरीपम् २ । इत्यमरः ।१।१०।८॥ द्वीपोत्पत्तिर्यथा । सूर्य्यः सुमेरुं प्रदक्षिणीकुर्व्वन् अर्द्धां पृथ्वीं प्रकाशयति अर्द्धां तमसा आवृणोति । तदा भगवदुपासनोपचितातिक्रान्तपुरुषप्रभावः प्रियव्रतो राजा सूर्य्यरथसमवेगेन ज्योतिर्म्मयरथेन रजनीमपि दिनं करिष्यामीति प्रतिज्ञां कृत्वा सप्तवारं द्वितीयसूर्य्य इव सूर्य्यमनुपर्य्यक्रामत् । अस्य रथचरणनेमिपरिखाताः सप्तसिन्धव आसन् । यैरेव सिन्धुभिः पृथिव्याः सप्त द्वीपाः कृताः । ते जम्बु १ प्लक्ष २ शाल्मलि ३ कुश ४ क्रौञ्च ५ शाक ६ पुष्कर ७ संज्ञकाः । तेषां पूर्व्वस्य यद्विस्तारमानं उत्तरतस्ततो द्विगुणेन विस्तारमानेन परिमाणम् । ते सिन्धुभ्यो बहिःसमं रचिताः । यथा सिन्धुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपानामपि बहिःसिन्धवः । स प्रियव्रतः बर्हिष्मतीगर्भजानसुगवानात्मजान् आग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञकान् यथासंख्येन एकैकस्मिन् द्वीपे एकैकमधिपतिं विदधे । इति श्रीभागवतीयपञ्चमस्कन्धात् संगृहीतम् ॥ * ॥
अपि च ।
"मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः ।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ॥
ससमुद्राकरवती प्रतिवर्षं निवेशिता ।
स्वायम्भुवेऽन्तरे पूर्व्वमाद्ये त्रेतायुगे तदा ॥
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु ।
प्रियव्रतात् प्रजावन्तो वीरात् कान्याभ्यजायत ॥
कन्या सा तु महाभागा कर्द्दमस्य प्रजापतेः ।
कन्ये द्वे दशपुत्राश्च सम्राट् कुक्षिश्च ते उभे ॥
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः ।
जातिस्मरा महाभागा न राज्याय मनो दधुः ॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे ॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः ॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम् ॥
पुष्कराधिपतिञ्चैव सवनं कृतवान् सुतम् ॥"
इति मार्कण्डेयपुराणम् ॥

"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

द्वीपकर्पूरजः, पुं, (द्वीपकर्पूरवत् जायते इति । जन+डः ।) चीनकर्पूरः । इति राजनिर्घण्टः ॥

द्वीपखर्ज्जूरं, क्ली, (द्वीपजातम् खर्ज्जूरम् ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपजं, क्ली, (द्वीपात् जायते इति । जन+डः ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपवती, स्त्री, (द्वीपः अस्त्यस्या इति । द्वीप+मतुप् मस्य वः । ङीप् ।) नदी । (यथा, महाभारते । १ । ७० । २८ ।
"अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया ॥")
भूमिः । इति मेदिनी । ते, १९८ ॥

द्वीपवान्, [त्] पुं, (द्वीपोऽस्त्यस्य इति । द्वीप+मतुप् मस्य वः ।) समुद्रः । नदः । इति मेदिनी । ते, १९८ ॥

द्वीपशत्रुः, पुं, (द्वीपस्य द्वीपिनः शत्रुः ।) शतावरी । इति राजनिर्घण्टः ॥ (शतमूलीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

द्वीपिका, स्त्री, (द्वीपी द्वीपी नाशयतया अस्त्यस्या इति । द्वीप+ठन् ।) शतावरी । इति राजनिर्घण्टः ॥

द्वीपिनखः,पुं,(द्वीपिनो व्याघ्रस्य नखः ।) व्याघ्रनखः । इति राजनिर्घण्टः ॥ (स तु बालानां कण्ठभूषणविशेषः । यथा, अध्यात्मरामायणे ।१।३।४८ ।
"कण्ठे व्याघ्रमणिव्रातमध्यद्वीपिनखाञ्चितम् ॥")

द्वीपिशत्रुः, पुं, (द्वीपिनो व्याघ्रस्य शत्रुः ।) शतमूली । इति जटाधरः ॥

द्वीपी, [न्] पुं, (द्वीपं चर्म्म अस्त्यस्येति । द्वीप+"अत इनिठनौ ।" ५।२।११५ । इति इन् ।)

चित्रकः । व्याघ्रः । इति राजनिर्घण्टः ॥ (यथा, रामायणे । २ । ६४ । ७ ।
"नानामृगगणैर्द्दीपितरक्षृक्षगणैस्तथा ॥")
द्वीप्यः, त्रि, द्वीपे भव इत्यर्थे यत्प्रत्ययः ॥ ("तत्र भवः ।" ४ । ३ । ५३ । इति यत् ।) द्वैप्यः । (यथा, वाजसनेयसंहितायाम् । १६ । ३१ ।
"नमो नादेयाय च द्वीप्याय च ॥")
द्वृ स्थगने । इति कविकल्पद्रुमः ॥ (भ्वां-पर सक-अनिट् ।) वकारोपधः । द्वरति । स्थगन संवरणम् । वरणे इति प्राञ्चः । वरण स्वीकारः स्थगनञ्चेति गोविन्दभट्टः । इति दुर्गादासः ॥
द्वेधा, अ, (द्वि+"संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा । "एधाच ।" ५ । ३ । ४५ । इति तस्य एधाच् ।) द्विप्रकारम् । इति व्याकरणम् ॥
द्वेषः, पुं, (द्विष+भावे घञ् ।) शत्रुता । तत्पर्यायः । वैरम् २ विरोधः ३ विद्वेषः ४ द्वेषणम् ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ४ । १६३ ।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् । द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत् ॥")
अस्य कारणं द्विष्टसाधनताज्ञानम् । इति भाषापरिच्छेदः ॥ स च आत्मनो विशेषगुणः । इति सिद्धान्तमुक्तावली ॥ तदप्रवर्त्तित्वनिषेधो यथा, श्रीभगवद्गीतायाम् । ३ । ३४ ।
"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥"
"इन्द्रियस्येन्द्रियस्येति वीप्सया सर्व्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम् । अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेषः इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ ।" इति तट्टीकायां श्रीधरस्वामी ॥
द्वेषण, क्ली, (द्विष+भावे ल्युट् ।) द्वेषः । इति शब्दरत्नावली ॥ (यथा, महाभारते ।५।६१।२७।
"अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते ॥")
द्वेषणः, त्रि, (द्विष+"क्रुधमण्डार्थेभ्यश्च ।" ३ । २ । १५१ । इति युच् ।) शत्रुः । इत्यमरः । २।८।१०॥ (यथा, महाभारते ।१२।१६८।१५।
"पानपो द्वेषणः क्रोधी निर्घृणः परुषस्तथा ॥")
द्वेषी, [न्] त्रि, (द्वेष्टि तच्छीलः । द्विष+"सम्पृचानुरुधेति ।" ३ । २ । १४२ । इति घिनुण् ।) शत्रुः । इति हेमचन्द्रः । ३ । ३६३ ॥ (यथा, रघुः । १० । ७३ ।
"तथापि वदृधे तस्य तत्कारिद्वेषिणो यशः ॥")
द्वेष्टा, [ऋ] त्रि, (द्वेष्टीति । द्विष+तृच् ।) विद्वेषकर्त्ता । इति द्विषधातोस्तृन्प्रत्ययेन साध्यः ॥ (यथा, महाभारते । १ । ४६ । ६ ।
"द्वेष्टारस्तस्य नैवासन् स च द्वेष्टि न कञ्चन ॥")
द्वेष्यः, त्रि, (द्वेष्टुमर्हः । यत् ।) द्वेषविषयः । विद्वेषार्हः । तत्पर्यायः । अक्षिगतः २ । इत्यमरः । ३ । १ । ४५ ॥ (यथा, महाभारते । ४ । १६ । १८ ।
"सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम् ।
यथावत् सर्व्वमाचक्ष्व श्रुत्वा ज्ञास्यामि यत्क्षमम् ॥"
द्विष्यतेऽसाविति । द्विष+ण्यत् । शत्रुः । यथा, रघुः । १ । २८ ।
"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम् । त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥")
द्वैगुणिकः, त्रि, (द्विगुणार्थं द्रव्यं द्विगुणम् । तत् प्रयच्छति द्विगुणं ग्रहीतुमेकगुणं ददातीत्यर्थः । द्विगुण+"प्रयच्छति गर्ह्यम् ।" ४ । ४ । ३० । इति ठक् ।) वृद्ध्याजीवः । इति हेमचन्द्रः । ३ । ५४४ ॥ द्विगुणं गृह्णाति यः इत्यर्थे णिकप्रत्ययः ॥
द्वैतं, क्ली, (द्विधा इतं द्वीतम् । तस्य भावः । युवादित्वात् अण् । स्वार्थे अण् वा ।) द्वयम् । इति हेमचन्द्रः ।६।६०॥ (यथा, भागवते ।१।१५।३०।
"विशोको ब्रह्मसम्पत्त्या सञ्छिन्नद्वैतसंशयः । लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः ॥")
शोकादिरूपम् । एकायनोऽसाविति श्लोकव्याख्यायां श्रीधरस्वामी ॥ (वनविशेषः ॥ गतद्विके, त्रि । यथा, किराते । १ । १ ।
"सवर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥"
"द्वैतवने द्वैताख्ये तपोवने । यद्वा, द्वे इते गते यस्मात् तत् द्वीतम् । द्वीतमेव द्वैतं तच्च तद्वनञ्चेति तस्मिन् । शोकमोहादिरहिते इत्यर्थः ॥" इति तट्टीकायां मल्लिनाथः ॥)
द्वैतवादी, [न्] त्रि, (द्वैतं जीव ईश्वरश्चेति द्वय वदतीति । वद+णिनिः ।) जीवेश्वरयोर्भेदवादी । ईश्वरातिरिक्तजीववक्ता । तस्य मत यथा, परमात्मनो जीवात्मा पृथक् तन्मध्ये केषाञ्चिन्मते प्रकृतिरतिरिक्ता केषाञ्चिन्मते प्रकृतिरदृष्टमात्रे पर्य्यवसिता एवं जीवश्च पृथक् । अत्र प्रमाणम् ।
जन्मकर्म्ममरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव ॥
इति साङ्ख्यमतम् ॥
तत्रेश्वरः सर्व्वज्ञः परमात्मा एक एव । जीव प्रतिशरीरं भिन्नः विभुर्नित्यश्च । इति गोतममतम् ॥
इह ब्रह्मणो जीवेतरत्वप्रतिपादनात् तयोरद्वैत नाभिमतम् । नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्च सत्तोऽप्यस्य व्यपदेशादाकाशोऽर्थान्तरत्वादिव्यपदेशाद्भोगमात्रसाम्यलिङ्गाच्चेति सूत्रैर्मोक्षेऽपि तयोर्द्वैतनिरूपणाच्च । इति गोविन्दभाष्यमतम् ॥
यतो द्वैतमते युक्तिरेव प्रमाणं युक्त्या यत् फलति तदेव सर्व्वाध्यात्मविद्याप्रतिपादकश्रुतीनां तात्पर्य्यम् । इति रामानुजमतञ्च ॥
द्वैतीयीकं, त्रि, (द्वितीय+तीयादीकक् । स्वार्थे वा ईकक् ।) द्वितीयः । यथा,—
"द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥"
इति नैषधम् । २ । ११० ॥
द्वैधं, अ, (द्वि+"संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा । "द्वित्र्योश्च धमुञ् ।" ५ । ३ । ४५ । इति धा इत्यस्य धमुञ् ।) द्विप्रकारम् । इति व्याकरणम् ॥ (यथा, हरिवंशे । १ । ३० ।
"तदण्डमकरोद्द्वैधं दिवं भुवमथापि च ॥"
क्ली, "धमुञन्तात् स्वार्थे डदर्शनम् ।" इति वार्त्तिकोक्त्या डः । राज्ञां षड्गुणानामन्यतम । इत्यमरः । २ । ८ । १८ ॥) एकेन सन्धिरपरेण विग्रह इति द्वौ प्रकारौ द्वैधं निपातितम् । इत्यमरटीकायां भरतः ॥ (तच्च द्विविधम् । यथा, मनुः । ७ । १६७ ।
"बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये । द्विविधं कीर्त्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥")
विवादः । इति त्रिकाण्डशेषः ॥ (द्विप्रकारम् । यथा, मनुः । ८ । ७३ ।
"बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः । समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥"
त्रि । यथा, "पथि द्वैधानि तृणानि ।" इति सिद्धान्तकौमुदी ॥)
द्वैपः,पुं,(द्वीपिनो विकारः द्वैपम् । द्वीप+"प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति अण् । तेन परिवृतः । "द्वैपवैयाघ्रादञ् ।" ४ । २ । १२ । इत्यञ् ।) द्वीपिचर्म्मावृतरथः । इत्यमरः । २ । ८ । ५३ ॥ द्वीपसम्बन्धिनि व्याघ्रचर्म्मसम्बन्धिनि च त्रि ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"द्वैपं दग्धं चर्म्म मातङ्गजं वा
भिन्ने स्फोटे तैलयुक्तं प्रलेपः ॥")
द्वैपायनः, पुं, (द्वीपं अयनं उत्पत्तिस्थानं यस्य । स एव । स्वार्थे प्रज्ञादित्वात् वा अण् ।) व्यासः । इति हेमचन्द्रः । ३ । ५११ ॥ (सनिरुक्तिरस्य जन्मकथा यथा महाभारते ।१।६३।८३—८५।
"इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम् । पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा ॥ जज्ञे च यमुनाद्वीपे पाराशर्य्यः स वीर्य्यवान् । स मातरमनुज्ञाप्य तपस्येव मनो दधे ॥ स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत् ॥ एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात् । न्यस्तो द्वीपे स यद्बालस्तस्माद्द्वैपायनः स्मृतः ॥"
ह्रदविशेषः । अत्र दुर्य्योधनः पाण्डवभयात् आत्मानं स्तम्भयित्वा स्थितः । यथा, महाभारते । ६ । ३१ । २ ।
"आसाद्य च कुरुश्रेष्ठ ! तदा द्वैपायनं ह्रदम् । स्तम्भितं धार्त्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम् । वासुदेवमिदं वाक्यमब्रवीत् कुरुनन्दनः ॥")
द्वैप्यं, त्रि, (द्वीपे भवम् द्वीपस्य इदम् वा । द्वीप+"द्वीपादनुसमुद्रं यञ् ।" ४ । ३ । १० । इति यञ् ।) द्वीपसम्बन्धि । द्वीपशब्दात् इदमर्थे

ण्यप्रत्ययेन साध्यम्। इति व्याकरणम्॥ (यथा, माघे। ३। ७६।

"विक्रीय दिश्यानि धनान्युरूणि
द्वैप्यानसावुत्तमलाभभाजः।
तरीषु तत्रत्यमफल्गुभाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत्॥",

द्वैमातुरः, पु, (द्वयोर्मात्रोरपत्यम्। द्विमातृ + "मातुरुत्संख्यासंभद्रपूर्व्वायाः।" ४। १। ११५। इति अण् उत्वञ्च।) गणेशः। इत्यमरः। १। १। ४०॥ (अस्य द्विमातृत्वकथा स्कन्दपुराणे गणेशखण्डे उक्ता यथा,—

"आविर्भविष्ये सदने वरेण्यस्य महीपतेः।
त्रैलोक्यरक्षणार्थाय विघ्नस्यास्य प्रशान्तये।
पालनाय स्वभक्तानां साधुत्राणाय भूसुराः॥
शिव उवाच।
इत्युक्त्वा पुष्पकागर्भं प्रविवेश तदैव सः।
आगते नवमे मासि प्रासूत पुष्पका शिशुम्॥
चतुर्बाहुमिभास्यञ्च दन्तुरं सुन्दरेक्षणम्।
आयुधानि च चत्वारि बिभ्रतं तेजसान्वितम्॥
दृष्ट्वा सा क्रन्दनं चक्रेऽरिष्टमेतत् किमागतम्।
श्रुत्वा चाक्रन्दनं तस्या वरेण्यः सगणो ययौ॥
ददर्श बालकं सोऽपि विस्मितः सह तैर्गणैः।
उवाच सेवकान् राजा त्यजतैनं सरोवरे॥
शिशुमादाय ते याताः पार्श्वस्यैवाश्रमे शुभे।
कासारे तं शिशुं त्यक्त्वा ययुः सर्वे निजं पुरम्॥
अपरस्मिन् दिने पार्श्वमुनिः स्नानाय चागतः।
तदैव दृष्टो तेन बालकोऽद्भुतदर्शनः॥
आश्चर्यमकरोत्तत्र भयभीतस्तथाभवत्।
आश्रमे केन मे त्यक्तमरिष्टसुखदायिनीम्॥
तपसा तु फलं दातुमीदृशौ धृतवांस्तनुम्।
रचितु सर्व्वलोकानां परमात्मा निजेच्छया॥
सुन्दरो बालकः केन त्यक्तोऽयमीदृशो वधिः।
नीत्वा स्वमाश्रमं चैनं पालयिष्ये प्रयत्नतः॥
इत्युक्त्वा जगृहे बालमालिलिङ्ग मुदा मुनिः।
समानीतं मुनेः पत्नी ददर्श दीपवत्सला।
उवाच निजभर्त्तारं सुप्रसन्नाननाम्बुजा॥
दीपवत्सलोवाच।
किमानीत महत् स्वामिन् भृशमाश्चर्यकारकम्।
इदं वैनायकं रूपं ममाभाति द्विजर्षभ।॥
इदमेव श्रियः स्थानं इदमेव तपःफलम्।
इदमेव परं ब्रह्म योगिध्येयं सनातनम्।
इदमेव परं तेज आदित्ये यदधिष्ठितम्।
इदमेव हि वेदान्ता नेति नेति प्रचक्षते॥
शिव उवाच।
इत्युक्त्वा हर्षसम्पन्ना भर्तुरादाय बालकम्।
स्तनपानं ददौ तस्मै सतः सा दीपवत्सला।
द्वितीयाचन्द्रवद्बालो हर्षं यातो दिने दिने॥")

जरासन्धः। इति मेदिनी। रे, २१८॥ (अस्य द्विमातृत्वकारणं जरासन्धशब्दे द्रष्टव्यम्॥) द्विमातृजे, त्रि। इति हेमचन्द्रः। ३। २१०॥ (यथा, राजतरङ्गिण्याम्। ४। ३५५।

"भिन्नशीला तयोर्भ्रात्रोर्द्वैमातुरयोः पुनः॥")

द्वैमातृकः, पु, (द्वे मातृके इव यस्यासौ द्विमातृकः। स एव स्वार्थे अण्।) नदीवृष्टिजलोद्भूतधान्यभृतो देशः। इति राजनिर्घण्टः॥

द्वैषणीया, स्त्री, (द्वेषणं द्वेषमर्हतीति। छः।) नागवल्लीभेदः। इति राजनिर्घण्टः॥

द्व्यक्षरं, क्ली, (द्वयोरक्षरयोः समाहारः।) वर्णद्वयम्। द्वयोरक्षरम्। (द्वे अक्षरे यत्र।) अक्षरद्वययुक्तशब्दादौ, त्रि॥ (यथा, भागवते। २। ८। ६।

"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोत् द्विर्गदितं वचो विभुः॥")

द्व्यङ्गुलं, त्रि, (द्वे अङ्गुली प्रमाणमस्य। "तत्पुरुषस्याङ्गुलेरिति।" ५। ४। ८६। इति अच्।) अङ्गुलिद्वयपरिमितम्। यथा, ज्योतिषतत्त्वे।

"अर्काङ्गुलाथ स्थग्ना काष्ठी द्व्यङ्गुलस्थलिका।
शङ्कुच्छाया भवेत्तत्र तच्छायां परिकल्पयेत्॥"

द्वयोरङ्गुल्योः समाहारः इति वाक्ये अङ्गुलिद्वयमात्रे, क्ली। इति मुग्धबोधम्॥ (द्वे अङ्गुली यस्य इति विग्रहे। "अङ्गुलेर्दारुणि।" ५। ४। ११४। इति षच्। द्व्यङ्गुलं दारु॥ इति व्याकरणम्॥)

द्व्यञ्जल, त्रि, (द्वावञ्जली परिमाणमस्य ("द्वित्रिभ्यामञ्जलेः।" ५। ४। १०२। इति टच्।) अञ्जलिद्वयपरिमितम्। द्वयोरञ्जल्योः समाहारः इति वाक्ये अञ्जलिद्वयमात्रे, क्ली। इति मुग्धबोधम्॥

द्व्यणुकं, क्ली, (द्वौ अणू कारणे यस्य। कप्।) परमाणुसमवेतद्रव्यम्। परमाणुद्वयात्मकम्। तच्च प्रत्यक्षादिविषयम्। यथा, भाषापरिच्छेदे। ३८।

"विषयो द्व्यणुकादिस्तु महदाद्यन्त उदाहृतः॥"

तस्य परिमाणमनित्यम्। यथा,—

"अनित्ये द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्॥"

इति भाषापरिच्छेदे। ११२॥

द्व्यन्यः, त्रि, द्वाभ्यामन्यः इति पञ्चमीतत्पुरुषे कृते। द्विभिन्नः॥ द्वे अन्ये यस्य। इति बहुव्रीहौ। द्विभिन्नकः। द्वयोरन्ययोः समाहारः। इति वाक्ये, क्ली॥

द्व्यर्थः, त्रि, (द्वौ अर्थौ यस्य।) अर्थद्वययुक्तशब्दादिः। अस्य प्रमाणं राघवपाण्डवीयादिग्रन्थे द्रष्टव्यम्॥

द्व्यष्टं, क्ली, (हेमरूप्ये द्वे अश्नुते इति। अश + गत्यर्थेति क्तः। इडभावः।) ताम्रम्। इत्यमरः। २। ९। ९७॥

द्व्यहः, पुं, अहर्द्वयम्। द्वे अहनी समाहृते। इति पुंलिङ्गसंग्रहे भरतः॥

द्व्यात्मकः, पु, (द्वौ रूपौ आत्मानौ यस्य।) मिथुनकन्याधनुर्मीनराशयः। यथा, ज्योतिस्तत्त्वे।

"चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

द्व्याह्निकः, त्रि, (द्व्यह्ने भवः। ठञ्। बाहुलकात् न ऐच्।) दिनद्वयभवः। द्व्यह्ने भव इत्यर्थे ठिकप्रत्ययः॥

ध

ध, धकारः। स तवर्गचतुर्थो वर्णो व्यञ्जनवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।

"दन्त्या ऌतुलसाः स्मृताः।" इति॥) अस्य स्वरूपं यथा —

"धकारं परमेशानि। कुण्डली मोक्षरूपिणी।
आत्मादितत्त्वसंयुक्तं पञ्चदेवमयं सदा॥
पञ्चप्राणमयं देवि। त्रिशक्तिसहितं सदा।
त्रिबिन्दुसहितं वर्णं धकारं हृदि भावय॥
पीतविद्युल्लताकारं चतुर्व्वर्गप्रदायकम्॥"

इति कामधेनुतन्त्रम्॥

"त्रिकोणरूपरेखायां त्रयो देवा वसन्ति च।
विश्वेश्वरी विश्वमाता वामतः स्कन्धतः स्थिता॥"

इति वर्णोद्धारतन्त्रम्॥

अस्य ध्यानं यथा,—

"षड्भुजां मेघवर्णाञ्च रक्ताम्बरधरां पराम्।
वरदां शोभनां रम्यां चतुर्व्वर्गप्रदायिनीम्॥
एवं ध्यात्वा धकारन्तु तन्मन्त्रं दशधा जपेत्॥"

अस्य नामानि यथा—

"धो धनार्थो रविः स्थाणुः सात्वतो योगिनीप्रियः।
मीनेशः शङ्खिनी तोयं नागेशो विश्वपावनी॥
धिषणा धरणी चिन्ता नेत्रयुग्मं प्रियो मतिः।
पीतवासा त्रिवर्णा च धाता धर्म्मप्रवल्लभः॥
सन्दर्शो मोहनो लज्जा वचतुण्डाधरं धरा।
वामपादाङ्गुलेर्म्मूलं ज्येष्ठा सुरपुरं भवः॥
साश्वात्मा दीर्घजङ्घा च धनेशो धनसञ्चयः॥"

इति नानातन्त्रशास्त्रम्॥

धं, क्ली, (दधाति सुखमिति। धा + डः।) धनम्। इति मेदिनी। धे, १॥

धः, पुं, (दधाति धरति विश्वमिति। धा + डः।) ब्रह्मा। (दधाति निधिमिति।) कुबेरः। (दधाति जीवानां शुभाशुभमिति।) धर्म्मः। इति मेदिनी। धे, १॥

धक, क नाशने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) कोपधः। नाशनं नष्टीकरणम्। क, धकयति पापं गङ्गा। इति दुर्गादासः॥

धटः, पुं, (धं धनं अटति गच्छति प्राप्नोति तोलनेनेति। ध + अट् + अच्। शकन्ध्वादित्वात् साधुः।) तुला। इत्यमरः। ३। ५। १०॥ तराजु इति धाङ्‌गा इति च भाषा। (इतःशिरुक्तिर्यथा,—

"धकाराद्धर्म्ममुद्दिष्टं टकारात् कुटिलं नरम्।
धृतो धारयसे यस्माद्धटस्तेनाभिधीयते॥"

इति दिव्यतत्त्वधृतवचनम्॥)

तुलाराशिः। यथा, ज्योतिस्तत्त्वे।

"सिंहो रवेश्च मेषश्च कन्या मन्नो धटो घटः।
अर्कादीनां त्रिकोणानि भवन्ति राशयः
) क्रमात्॥"

तुलापरीक्षा। इति परीक्षातत्त्वम्॥

अस्य विवरणं तुलाशब्दे द्रष्टव्यम् ॥ (धर्म्मः । इति विष्णुनारदौ ॥ यथा,—

"अर्घ्यमेतु घटं पूर्व्वं ततः शिरसि पूजयेत् ॥"।

इति दिव्यतत्त्वधृतवचनम् ॥)

घटक', पुं, (घटेन तुलया कायतीति । कै+कः ।) चतुर्द्दशवल्लपरिमाणम् । द्विचत्वारिंशद्रक्तिका । इति लीलावती ॥ नन्दिद्रुमः' । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"धवो घटो नन्दितरु' स्थिरो गौरो धुरन्धरः ॥"

घटपरीक्षा, स्त्री, (घटस्य तुलायाः परीक्षा ।) तुलापरीक्षा । तत्र घटोत्पत्तिविधिर्यथा । "पितामहः ।

'छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम् । प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः' ॥'

यूपवदिति यूपच्छेदनविहितसर्व्वेतिकर्त्तव्यतातिदेशः । सा च ॐ खधिते मैनं हिंसीरिति-च्छेदनमन्त्रविशेषादिरूपा इति व्यवहारप्रदीपः ॥

मन्त्र' सौम्यो वानस्पत्यच्छेदने जप्य एव च । चतुरस्रा तुला कार्य्या दृढ़ा ऋज्वी तथैव च ॥ कटकानि च देयानि त्रिषु स्थानेषु पार्थिवत् ॥'

कटकानि वलयानि ।

'चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ ॥'

अत्र साधारणत्वेन शारदातिलकोक्तो हस्तो ग्राह्यः । यथा —

'चतुर्विंशत्यङ्गुलाढ्य हस्तं तन्त्रविदो विदुः । यवानामष्टभिः कॢप्त मानाङ्गुलमितीरितम् ॥'

यवानां तण्डुलीकृतानाम् ।

'यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् । षट्त्रिंशेर्योषितैर्हस्तश्चतुर्विंशतिरङ्गुलैः ॥'

इति कालिकापुराणात् ॥

प्रमाणन्तु पार्श्वेन यवानाम् । 'षड्यवा पार्श्वसम्मिताः ।' इति कात्यायनवचनात् ॥ ● ॥

अनयोर्व्यवस्थामाह कापिलपञ्चरात्रम् ।

'अष्टभिस्तैर्भवेज्ज्येष्ठ मध्यम सप्तभिर्यवैः । कन्यस षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तम ! ॥'

कन्यस कनिष्ठम् । पादौ स्तम्भौ । उपरि स्तम्भोपरि । तत्समौ चतुर्हस्तावित्यर्थः । वस्तुतस्तु उपरितत्समौ उपरि तत्सम काष्ठान्तर ययोः पादयोस्तौ ॥ ● ॥ स्तम्भप्रमाणमाह व्यासः ।

'हस्तद्वय निखेयन्तु प्रोक्त स्तम्भकयोर्द्वयोः । षड्हस्तन्तु तयोः प्रोक्त प्रमाणं परिमाणत ॥'

स्तम्भकयोः स्तम्भयोः । षड्हस्तं निखातहस्तद्वयेन सम अथान्मृत्तिकोपरि हस्तचतुष्टयमित्यर्थः ।

'अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव वा ।'

तयोः स्तम्भयोः । हस्तावन्तर हस्तद्वयपरिमितमध्यमित्यर्थः । अध्यर्द्ध सार्द्धहस्तद्वयम् । एतत्तु शालहस्तोऽङ्कवा कार्य्या पञ्चहस्तायता तुला । इति विष्णूक्तपञ्चहस्तायततुलाविषयम् । व्यवहारदीपिकाप्येवम् ॥ ● ॥

अथ घटारोपणविधिः । पितामह.

'हस्तद्वयं निखेयन्तु पादयोरुभयोरपि ।'

अत्र हस्तद्वय मृत्तिकाभ्यन्तरे । हस्तचतुष्टय मृत्तकोपरि । तथा,—

'तोरणे च तथा कार्य्ये पार्श्वयोरुभयोरपि ॥ घटाद्दशतरे स्यातां नित्यं दशभिरङ्गुलैः' । अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ ॥ मृत्तमयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनौ । प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे घटस्तथा ॥' नारदः ।

'शिक्यद्वय समासाद्य घटककंटयोर्दृढम् । एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥'

पितामहः ।

'प्राङ्मुखान् कल्पयेत दर्भान् शिक्ययोरुभयोरपि । पश्चिमे तोलयेत् कर्त्तृ नन्यस्मिन् मृत्तिकां शुभाम् ॥ पिटक पूरयेत्तस्मिन् इष्टकाग्रावपांशुभिः ॥'

अत्र मृत्तिकेष्टकाग्रावपांशूनां विकल्पः ।

'परीक्षका नियोक्तव्यास्तुलामानविशारदाः । वणिजो हेमकाराश्च कांस्यकारास्तथैव च । कार्य्यः परीक्षकैर्नित्यमवलम्बसमो घटः ॥ उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः । यस्मिन् प्लवते तोय स विज्ञेयः समो घटः ॥ तोलयित्वा नरं पूर्व्वं पश्चात्तमवतार्य्य तु । घटस्तु कारयेन्नित्य पताकाध्वजशोभितम् ॥ तत आवाहयेद्देवान् विधिनानेन मन्त्रवित् । वादित्रतूर्य्यघोषैश्च गन्धमाल्यानुलेपनैः ॥ प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥'

प्राड्विवाकसमाख्या तु पृच्छतीति प्राट् विवेचयतीति विवाकः । इति व्यवहारमातृका ॥ ● ॥

यथा च बृहस्पतिः ।

'विवादे पृच्छति प्रश्न प्रतिप्रश्नं तथैव च । प्रियपूर्व्वं प्रागवदति प्राड्विवाकस्ततः स्मृतः ॥'

वस्तुतस्तु प्राड्विवाकसमाख्यामाह कात्यायनः ।

'व्यवहाराश्रितं प्रश्न पृच्छति प्राडिति स्थितिः । विवेचयति यस्तस्मिन् प्राड्विवाक इति स्मृतः ॥'

अभिशस्त पृच्छतीति प्राट तदनुरूप दिव्य विविनक्ति इति विवाक । प्राट् चासौ विवाकश्चेति कर्म्मधारयः ॥ ● ॥

अस्य काम्यत्वेन नवग्रहपूजामाह मत्स्यपुराणम् ।

'नवग्रहमख कृत्वा तत' कर्म्म समारभेत् । अन्यथा फलदं पुंसां न काम्य जायते क्वचित् ॥'

ततश्च प्राड्विवाक' पूर्व्वं कार्य्यं पृच्छेत् निवेदितञ्च विवेचयेत् । ततोऽभियुक्तं तोलयित्वा अवतार्य्य धर्म्मावाहनादि कुर्य्यात् । पितामहः ।

'एह्येहि भगवन् धर्म्म दिव्ये ह्यस्मिन् समाविश । सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥ आवाह्य च घटे धर्म्मं पश्चादङ्गानि विन्यसेत् ॥'

अङ्गानि परिवारदेवता ।

'इन्द्र पूर्व्वे तु सम्स्थाप्य प्रेतेशं दक्षिणे तथा । वरुण पश्चिमे भागे कुबेर उत्तरे तथा ॥ अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥ ● ॥ इन्द्रः पीतो यमः श्यामो वरुणः स्फाटिकप्रभः । कुबेरश्च सुवर्णाभो वह्निश्चापि सुवर्णभः ॥

तथैव निरृतिः श्यामो वायुर्धूम्रः प्रशस्यते । ईशानस्तु भवेत् शुक्ल अनन्तः शुक्ल एव च ॥ ब्रह्मा चैव भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ॥ इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः । धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनल. ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ ● ॥ देवेशेशानयोर्मध्ये आदित्यानां तथायनम् । धाताऽर्य्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा ॥ इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशम स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ इत्येते द्वादशादित्या मनुना परिकीर्त्तिता ॥'

अजघन्यो जघन्यजः । इति विष्णोर्विशेषणम् ॥ ● ॥

'अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः । वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ॥ अजैकपादहिर्ब्रध्नः पिनाकी चापराजितः । भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः ॥ स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृता ॥'

महायशाः विशाम्पतिर्भगवांश्चेति विशेषणानि ॥

'प्रेतेशरक्षसोर्मध्ये मातृस्थान प्रकल्पयेत् । ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ॥'

गणसंयुतेति विशेषणम् ॥ ● ॥

'निरृतेरुत्तरे भागे गणेशायतन विदुः । वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥ श्वसनः स्पर्शनो वायुरनिलो मारुतस्तथा । प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिता. ॥ घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः । एतासां देवतानाञ्च स्वनाम्ना पूजन विदुः ॥'

विशेषमाह ब्रह्मपुराणम् ।

'ओङ्कारादिसमायुक्त नमस्कारान्तकीर्त्तितम् । स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥ अनेनैव विधानेन गन्धपुष्पे निवेदयेत् । एकैकस्य प्रकर्त्तव्य यथोद्दिष्टं क्रमेण तु ॥'

मन्त्र इत्यभिधानादनेनैवेत्येवकारश्रुतेश्च इद द्रव्यं ओंमरुताय नमः इति योज्यं न तु धर्म्मायार्घ्यं प्रकल्पयामि नमः इति मिताक्षरोक्तम् । प्रमाणाभावादनन्वयाच्च । पितामहः ।

'भूषावसानं धर्म्माय दत्त्वा चार्घ्यादिक क्रमात् । अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् ॥ गन्धादिकां नैवेद्यान्तां परिचर्य्यां प्रकल्पयेत् ।'

एतत् सर्व्वं प्राड्विवाकः कुर्य्यात् । यथा,—

'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारग. । श्रुतवृत्तोपपन्नश्च शान्तचित्तो विमत्सरः ॥ सत्यसन्ध शुचिर्दक्षः सर्व्वप्राणिहिते रतः । उपोषित शुद्धवासा' कृतदन्तादिधावनः ॥ सर्व्वासां देवतानाञ्च पूजा कुर्य्याद्यथाविधि ॥'

रक्तगन्धपुष्पादीनाह नारदः ।

'रक्तैर्गन्धैश्च माल्यैश्च धूपदीपाक्षतादिभिः । अर्च्चयेत् घट पूर्व्वं तत. शिरसि पूजयेत् ॥'

घटं धर्म्मम् । यथा च विष्णुनारदौ ।

'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।'

शिलामित्रादीन् । अविशेषात् सर्व्वत्र रक्ता-

न्वय: । मिताक्षरायान्तु धर्म्मपूजन एव रक्तत्वनियम: । तथा,—
‘चतुर्द्दिक्षु ततो होम: कर्त्तव्यो वेदपारगै: ।
आज्येन हविषा चैव समिद्भिर्होमसाधनै: ॥
सावित्र्या प्रणवेनैव स्वाहान्तेनैव होमयेत् ॥’
सावित्र्या गायत्र्या । तेन प्रणवादिकां गायत्त्रीमुच्चार्य्य पुन: स्वाहाकारान्तं प्रणवमुच्चार्य्य समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादिति मिताक्षरा । वस्तुतस्तु गायत्त्रीहोमे योगियाज्ञवल्क्य: ।
‘प्रणवव्याहृतिभ्याञ्च स्वाहान्ते होमकर्म्मणि ।
तेन प्रणवादिकां सव्याहृतिकां गायत्त्रीमुच्चार्य्य स्वाहाकारान्तं पुन: प्रणवमुच्चार्य्य आज्यपायससमिधो मिलित्वा अष्टोत्तरशतं जुहुयात् लाघवात् । अतएव दैवतैक्ये हि दधिपयसोस्तन्त्रेणानुष्ठानम् । ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति श्राद्धविवेक: ॥ * ॥
यत्तु पञ्चलाङ्गलमहादाने ।
‘पर्ज्जन्यादित्यरुद्रेभ्य: पायसं निर्व्वपेच्चरुम् ।
एकस्मिन्नेव कुण्डे च गुरुर्यस्मै निवेदयेत् ॥
पलाशसमिधस्तद्वदाज्यं कृष्णतिलास्तथा ॥’
इति मत्स्यपुराणात् ॥
चतुर्णां होतॄणां मध्ये यस्मै गुरु: पर्ज्जन्यादिभ्यो होमं कुर्व्वीति आज्ञां करोति स एव पर्ज्जन्याय आदित्याय रुद्रेभ्यस्तत्तन्मन्त्रै: पायसं पलाशसमिदाज्यकृष्णतिलांश्च प्रत्येकं जुहुयादिति भूपालप्रभृतिभिरुक्तम् । तद्युक्तं तद्वदिति तथेत्याभ्यां प्रत्येकद्रव्येण होमविधानात् । अतएव रत्नाकरकल्पतरू जुहुयादित्युक्त्वा तद्वदिति पलाशादि जुहुयादित्युक्तम् । अतएव वृषोत्सर्गे वाचस्पतिमिश्रप्रभृतिभिर्ग्रहादिहोमशेषपायसपूषहोमशेषपिष्टकाभ्यां मिलिताभ्यां सकृत् स्विष्टकृद्धोमो विहित: । अशक्तौ तु ।
‘होमो ग्रहादिपूजायां शतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा शक्त्यपेक्ष्यमथापि वा ॥’
इति देवीपुराणीयादिपददर्शनात् अत्राप्यन्या सङ्ख्या उन्नेया । एवं मत्स्यपुराणे ।
‘शृणु राजन् महाबाहो तडागादिषु यो विधि: ।
वेद्यास्तु परितो गर्त्तारत्निमात्रास्त्रिमेखला: ॥
नव सप्ताथवा पञ्च योनिवक्त्रा नृपात्मज ।
इति नवादिकुण्डान्युक्त्वा,—
‘स्वल्पेऽप्येकाग्निमत्कार्य्यो वित्तशाठ्याद्दृते नृभि: ॥’
इति दर्शनादत्रापि अशक्तावेकाग्निविधिरिति वदन्ति । अत्र प्राड्विवाकगृह्येणैव होम: ।
‘दिव्येषु सर्व्वकार्य्याणि प्राड्विवाक: समाचरेत् ।
अध्वरेषु यथाध्वर्य्यु: सोपवासो नृपाज्ञया ॥’
इति मिताक्षराधृतपितामहवचनात् । अध्वर्य्युर्यजमानमात्रम् । न चात्र भिन्नशाखिनामृत्विजां रथकारवह्निविद्याप्रयुक्तिकल्पनेति वाच्यम् । ब्राह्मणमात्रस्य नानाशाखापाठविधानेन कल्पनानुपपत्ते: । तथा च मनु: ।
‘षडानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाचरेत् ॥’ इति ।
प्रायश्चित्तहोमस्तु सामगानां महाव्याहृतिभि: ।
‘यत्र व्याहृतिभिर्होम: प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र कर्त्तव्या: स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुति: ।
होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधि: स्मृत: ॥’
इति छन्दोगपरिशिष्टात् ॥
न तु शाट्यायनहोमो भवदेवभट्टोक्त: । त्रिविकल्प इत्यनेन तस्य निरासात् । भट्टनारायणादिभिरप्रमाणीकृतत्वाच्च ॥ * ॥ पितामह: ।
‘तोलयित्वा नरं पूर्व्वं तस्मात्तमवतार्य्य च ।
प्राङ्मुख: प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥
एह्येहि भगवन् धर्म्म ! दिव्ये ह्यस्मिन् समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणै: ॥
तस्यार्थमभियुक्तस्य लेखयित्वा तु पत्रकं ।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोगतम् ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥
इमं मन्त्रविधिं कृत्स्नं सर्व्वदिव्येषु योजयेत् ।
आवाहनञ्च देवानां तथैव परिकल्पयेत् ॥ * ॥
घटमामन्त्रयेच्चैवं विधिनानेन मन्त्रवित् ।
त्वं घटो ब्रह्मणा सृष्ट: परीक्षार्थं दुरात्मनाम् ॥
धकाराद्धर्म्ममुद्दिष्टं टकारात् कुटिलं नरम् ।
धृतो धारयसे यस्माद्घटस्तेनाभिधीयते ॥
त्वं वेत्सि सर्व्वभूतानां पापानि सुकृतानि च ।
त्वमेव देव ! जानीषे न विदुर्यानि मानवा: ॥
व्यवहाराभिशस्तोऽयं मानुष: शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥’ * ॥
लेखनप्रकारमाह नन्दिपुराणम् ।
‘शुभे नक्षत्रदिवसे शुभे राशिदिनग्रहे ।
लेखयेत् पूज्यदेवेशान् रुद्रब्रह्मजनार्द्दनान् ॥
पूर्व्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तम: ।
निरोधो हस्तयोश्चैव मसीपत्रविधारणे ॥
मत्स्यपुराणञ्च ॥
‘शीर्षोपेतान् सुसम्पन्नान् समश्रेणिगतान् समान् ।
अक्षरान् लेखयेद्यस्तु स नरो लेखक: स्मृत: ॥’
इति दानसागर: ॥
धारयसे इत्यत्र भावयसे इति पाठोऽनुपयुक्त: । तथा हि । कुटिलं पापिनं संशयोपपन्नं वा । आद्ये पापिनमित्येतावन्मात्राभिधानमनुपपन्नं अर्द्धगत्या शुद्धस्यापि ज्ञापनात् द्वितीये पूर्व्वसिद्धत्वेन ज्ञापनानुपपत्ति: । तस्मात् कुटिलं व्यवहाराभिशस्तं धारयसे इत्येवार्थ: । अतएव उपसंहारे संशयादस्मादित्युक्तम् । अतएव कालिकापुराणेऽपि । मानुषस्तोल्यते त्वयीत्युक्तमिति ॥ * ॥ स्मृतिसमुच्चयव्यवहारदीपिकयोर्विष्णु: । घटञ्च समयेन ग्राहयेत् तुलाधारकञ्च ।
‘धर्म्मपर्य्यायवचनैर्घट इत्यभिधीयते ।
त्वमेव घट जानीषे न विदुर्यानि मानवा: ॥
व्यवहाराभिशस्तोऽयं मानुष: शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥
ब्रह्मघ्ने ये स्मृता लोका ये लोका: कूटसाक्षिण: ।
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा ॥’
समयेन त्वमेव घट इत्यादिनियमेन । घटं ग्राहयेत् योजयेत् । तुलाधारकञ्च ब्रह्मघ्ने ये इत्यादिना नियमेनेत्यर्थ: । अत्र नानामुनिप्रणीतमन्त्राणाम् एकतरपाठेनैव समानप्रयोजनानां व्रीहियववद्विकल्प इति ग्रन्थगौरवात्ते न लिखिता: । अभिशस्तप्राड्विवाकपाठ्यानान्तु दृष्टार्थानां समुच्चय: । पितामह: ।
‘नित्यं देयानि दिव्यानि शुचये चार्द्रवाससे ।’
शुचये जननमरणाशौचरहिताय । व्रतिनं प्रति याज्ञवल्क्यदीपकलिकायां नारद: ।
‘हस्तक्षतेषु सर्व्वेषु कृष्णाहंसपदानि च ।
तान्येव पुनरालक्ष्य हस्तौ बिन्दुविचित्रितौ ॥’
इत्यग्निविधौ हस्तक्षतिनो हस्तक्षतमलक्तादिना चिह्नितं कृत्वा क्षतान्तरं जातं न वा इति ज्ञातव्यमिति सुतरां क्षतिनो दिव्याधिकार: । नारद: ।
‘अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे ।
पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानमनुकीर्त्तितम् ॥’ * ॥
घटानुमन्त्रणात् प्रागपि पुनस्तोलनमाह कालिकापुराणम् ।
‘उपोषितं तथा स्नातं धृतसमं प्रथमं तुलाम् ।
सन्तोल्य कारयेद्रेखामवतार्य्यानुमन्त्रयेत् ॥’
याज्ञवल्क्य: ।
‘तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रित: ।
प्रतिमानसमीभूतो रेखां कृत्वावतारित: ॥
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्म्मिता ।
तत् सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ।
शुद्धश्चेत् गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥’
तुलाधारणाभिज्ञैर्व्वणिगादिभि: पाषाणादिप्रतिमानसमीकृतस्तुलाधिरूढ: अभिशस्तो दिव्याधिकारी । येन सन्निवेशेन प्रतिमानसमीकरणदशायां यत्र पादादयो व्यवस्थिता: शिक्यरज्ज्वश्च तत्र पाण्डुलेखेनाङ्कयित्वा पिटकादवतारित: त्वन्तुलेति मन्त्रेण तुलां प्रार्थयेत् । सत्यं सन्दिग्धार्थस्य स्वरूपं वद दर्शय । पापकृत् सत्यवादी शुद्धश्च सत्यवादी । मन्त्रश्चायं स्मार्त्त: पौराणिकत्वात् शूद्रैरपि पाठ्य: । वेदमन्त्रवर्ज्जं शूद्रस्येति छन्दोगाह्निकधृतस्मृतौ वेदेति विशेषणात् श्राद्धविश्वदेवादौ तु विशेषतो नमस्कारमन्त्रविधानात् स्मार्त्तमन्त्रोऽपि निषिद्ध: । प्रपञ्चस्तु तिथितत्त्वेऽनुसन्धेय: । स्त्रीपरीक्षायामपि अविकृत एव प्रयोज्य: । दिव्यानीह विशुद्धये इत्यनेन सन्दिग्धार्थसन्देहनिवृत्तिफलकतयाविशेषेण स्त्रीपुरुषकर्त्तृकदिव्यविधानेन मानुष: शुद्धिमिच्छतीत्यनेन च प्रकृतावूहायोगात् । अतएव पत्नी सन्नह्यस्व नो धेहीति मन्त्रे द्विवहुपत्नीकयजमानकर्त्तृकप्रयोगेऽपि न द्विवहुवचनोह इत्युक्तम् ॥ * ॥ पत्रस्यप्रतिज्ञेयार्थस्य शोध्याय

तस्य सत्यस्य बोधाय श्रावणमाह नारदः।
'असमर्थश्च पत्रस्थमभियुक्त यथार्हतः।
संश्राव्य मूर्द्धि तस्यैव न्यस्य देयो यथाक्रमम्॥'
देयो दिव्यविशेषः प्राड्विवाकेनेति शेषः॥ * ॥ ततः शिरोऽवस्थितपत्रक शोध्य नर घटे पुनरारोपयेत्। पुनरारोपयेत्तस्मिन् शिरोऽवस्थितपत्रकमिति स्मरणात्। तुलारोपितश्च नर विनाडीपञ्चककालं शतत्रयगुर्व्वक्षरोच्चारणयोग्यम्।
'मा कान्ते पक्षस्यान्ते पर्य्याकाशे देशे स्वाक्षीः।
कान्त वक्त्रं वृत्त पूर्णं चन्द्रं मत्वा रात्रौ चेत्।
क्षुत्क्षाम' प्राटंस्तेतस्तेतो राहुः क्रूरः प्राप्तात्तस्माद्धान्ते हर्म्यस्यान्ते शय्येकान्ते कर्त्तव्या॥'
इति श्लोकस्य पञ्चधा पाठयोग्यकाल पञ्चपलात्मकं यावत् तावत् स्थापयेत्॥ यथा, स्मृति'।
'ज्योतिर्विद्ब्राह्मणः श्रेष्ठः कुर्य्यात् कालपरीक्षणम्।
विनाड्यः पञ्च विज्ञेया' परीक्षाकालकोविदैः॥'
तत्कालश्च ज्योतिषि।
'दशगुर्व्वक्षराः प्राणःषट् प्राणाः स्याद्विनाडिका।
तासां षष्ट्या घटी ज्ञेयाहोरात्र घटिकास्तथा॥'
तथा षष्ट्या॥ * ॥ पितामहः।
'साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिन'।
ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु॥
शंसन्ति साक्षिणः सर्व्वे शुद्ध्यशुद्धी नृपे तथा।
तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः॥
समो वा हीयमानो वा न विशुद्धो भवेन्नरः।
अल्पदोष' समो ज्ञेयो वहुदोषस्तु हीयते॥'
अल्पत्व व्यभिचारे चालिङ्गनादिना। चौर्य्ये सद्दैशगमनादिना॥ * ॥ तत्र पुनस्तोलनमाह वृहस्पतिः।
'घटेऽभियुक्तस्तुलितो हीनस्तेद्धानिमाप्नुयात्।
तत्समस्तु पुनस्तोल्यो वर्द्धितो विजयी भवेत्॥'
शोध्य' स्वल्पदोषाङ्गीकारेऽपि प्रधानदोषनिर्णयार्थं तत्रैव पुनस्तोलनीय.। अङ्गवैगुण्यसम्भावनायान्तु प्रयोगान्तरमिति। यदा चानुपलभ्यमानदृष्टकारणक एव कक्षादीनां छेदनादिस्तदाप्यशुद्धि'।
'कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा।
रज्जुच्छेदेऽक्षभङ्गे च तथैवाशुद्धिमादिशेत्॥'
इति वृहस्पतिवचनात्॥
कक्ष शिक्यतलम्। घटकर्कटौ तुलान्तयो. शिक्याधारावीषद्वक्रावायसकीलकौ कर्कटशृङ्गनिभौ। अक्ष. पाद। स्तम्भयोरुपरिनिविष्टस्तुलाधारमङ्ग इति मिताक्षरा॥ शाटप्रयोजक' कीलक। इति हलायुध.॥ मध्यकटकमिति पारिजात॥ यदा तु दृश्यमानकारणक एवैषां भङ्गस्तदा पुनरारोपयेत्। शिक्यादिच्छेदभङ्गेषु पुनरारोपयेन्नरमिति स्मृते। तत्तश्च।
'ऋत्विक्पुरोहिताचार्य्यान्दक्षिणाभिश्च तोषयेत्।
एवं कारयिता राजा भुक्त्वा भोगान् मनोरमान्।
महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते॥ *॥

तदय सङ्क्षेपः। प्राड्विवाको लोकपालादिनमस्कारपूर्व्वकं यथोक्तलक्षणां तुलां कुर्य्यात्। तत. षड्हस्तौ सुदृढौ स्तम्भौ कृत्वा हस्तद्वय व्यवधानेन दक्षिणोत्तरयोर्दिशोर्हस्तद्वयनिखनन कृत्वा षड्धारकीलकाग्रस्तम्भयोरुपरि मध्ये पार्श्वद्वये च विहितच्छिद्रं मध्यच्छिद्रनिवेशितलोहाङ्कुशपट्टक निधाय उपरि कीलकस्य तत्पट्टकस्य मध्यस्थिताङ्कुशेन तुलामध्यवलयस्थलौहाङ्कुशं संयुञ्ज्यात्। एवञ्च मध्ये स्तम्भयोरन्तरा तिर्य्यक तुलादण्डस्तिष्ठति तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्यद्वयरज्जुबन्धन कुर्य्यात्। तुलायाः पार्श्वयोः प्राक्प्रत्यक्दिशोस्तोरणस्तम्भौ तुलातो दशाङ्गुलोच्छ्रायौ कार्य्यौ तोरणयोरुपरि सूत्रसम्बद्धौ मृण्मयावधोमुखौ घटमस्तकचुम्बितौ च्यवलम्बौ कार्य्यौ। यथावलम्बविशेषाभ्यां तुला यामवनतिरुन्नतिश्च ज्ञेया तथा जलद्वारापि।"
इति दिव्यतत्त्वम्॥ * । अस्य प्रयोगस्तुलाशब्दे द्रष्टव्यः॥

घटी, स्त्री, (घन+अच्। निपातनात् नस्य टः। गौरादित्वात् ङीष्।) चीरवस्त्रम्। इति मेदिनी। टे, १६॥ कौपीनम्। इति त्रिकाण्डशेषः॥

घटीदानं, क्ली, (घट्या चीरवस्त्रस्य दानम्।) गर्भाधानानन्तरस्त्रीसम्प्रदानकचीरवस्त्रदानम्। यथा, ज्योतिःसारसंग्रहे।
"मूलश्रवणहस्तेषु पुष्यादित्युत्तरासु च।
मृगपौष्णे घटी देया सौम्यवारे शुभे तिथौ॥"

घण, ध्वाने। इति कविकल्पद्रुमः॥ (भ्वां-परअक-सेट्।) घणति मृदङ्गः। इति दुर्गादासः॥

घत्तूरः पुं, (घयति पिबतीव प्रकृतिम्। धे+बाहुलकात् उरच्। पृषोदरादित्वात् साधुः।) धुस्तूरः। इति हेमचन्द्रः। ४। २१७॥ (यथा, काशीखण्डे। २६। ६४।
"धर्म्माधर्म्मगुणच्छेत्ता धत्तूरकुसुमप्रिया॥")

घन, रवे। इति कविकल्पद्रुम'॥ (भ्वां-परं-अकं-सेट्।) धनति मृदङ्ग.। इति दुर्गादासः॥

धन, लि र धान्ये। इति कविकल्पद्रुमः॥ (ह्रां-पर-अक-सेट।) धान्यमिह धान्यक्रिया। र, वैदिक.। लि, दधन्ति भूमिर्धान्यमुत्पादयति इत्यर्थः। इति दुर्गादासः॥

धनं, क्ली, (धनति रौतीति। धन रवे+पचाद्यच्।) स्नेहपात्रम्। इति शब्दरत्नावली॥ गोधनम्। इति मेदिनी। ने,१२॥ (यथा, हरिवंशे।७३।३३।
"अनुजग्मुश्च गोपालाः कालयन्तो धनानि च॥")
जीवनोपायः। (दधन्ति धान्यादिकमुत्पादयतीति। धन+अच्। यद्वा, दधाति सुखमिति। धा+"कृपृवृजिमन्दिनिधाञ्भ्यः क्युः।"उणां२।८१। इत्यत्र"बाहुलकात् केवलादपि क्युः।"इत्युज्ज्वलदत्तोक्तेः क्युः।) द्रविणम्। (यथा, उद्भटे।
"धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति।
धनेभ्य. परो नास्ति बन्धुर्हि लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम्॥")

तत्पर्य्याय.। द्रव्यम् २ वित्तम् ३ स्वापतेयम् ४ रिक्थम् ५ ऋक्थम् ६ वसु ७ हिरण्यम् ८ द्रविणम् ९ द्युम्नम् १० अर्थः ११ राः १२ विभव १३। इत्यमरः। २। ९। ९०॥ काञ्चनम् १४ लक्ष्मीः १५ भोग्यम् १६ सम्पत् १७ वृद्धि. १८ श्री' १९ व्यवहार्य्यम् २०। इति राजनिर्घण्ट"॥ रैः २१ भोगः २२। इति जटाधरः॥ स्वम् २३। इति शब्दरत्नावली॥ तस्य वैदिकपर्य्यायाः। मघम् १ रेक्णः २ रिक्थम् ३ वेदः ४ वरिवः ५ श्वात्रम् ६ रत्नम् ७ रयिः ८ क्षत्रम् ९ भग' १० मीळ्हम् ११ गयः १२ द्युम्नम् १३ इन्द्रियम् १४ वसु १५ रायः १६ राधः १७ भोजनम् १८ तना १९ नृम्णम् २० बन्धुः २१ मेधा' २२ यशः २३ ब्रह्म २४ द्रविणम् २५ श्रवः २६ वृत्रम् २७ वृतम् २८। इत्यष्टाविंशतिरेव धननामानि। इति वेदनिघण्टौ २ अध्यायः॥ * ॥
तत्त्रिविध यथा,—
"धनन्तु त्रिविधं ज्ञेय शुक्लं शवलमेव च।
कृष्णञ्च तस्य विज्ञेयो विभाग. सप्तधा पृथक्॥
क्रमायत्त प्रीतिदाय प्राप्तञ्च सह भार्य्यया।
अविशेषेण सर्व्वेषां वर्णानां त्रिविध धनम्॥
वैशेषिक धन दृष्ट ब्राह्मणस्य त्रिलक्षणम्।
याजनाध्यापने नित्य विशुद्धाच्च प्रतिग्रह.॥
त्रिविध क्षत्रियस्यापि प्राहुर्व्वैशेषिकं धनम्।
युद्धार्थंलब्ध करणं दण्डवध्यापहारत'॥
वैशेषिक धन दृष्टं वैश्यस्यापि त्रिलक्षणम्।
कृषिगोरक्षवाणिज्य शूद्रस्तेभ्यस्त्वनुग्रहात्॥
कुसीदकृषिवाणिज्य प्रकुर्व्वीत स्वय कृतम्।
आपत्काले स्वय कुर्व्वन्नेनसा युज्यते द्विज.॥"
इति गारुडे २१६ कुत्रचित् २१० अध्यायः॥ * ॥
धनभागिनो दायशब्दे द्रष्टव्याः। धनाभागिनो यथा,—
"कुब्जवामनखञ्जानां क्लीवानां श्वित्रिणामपि।
उन्मत्तानां तथान्धानां धनभागो न विद्यते॥
शय्यासनस्थानमात्रच्छाया चान्न' शुचिक्रिया।
एतावद्दीयते तेषु नार्थभागहरा हि ते॥"
इति वामनपुराणे ७५ अध्यायः॥ * ॥
अधना यथा,—
"त्रय एवाधना राजन्! भार्य्या दासस्तथा सुत।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥"
इति मात्स्ये ३१ अध्याय.॥ * ॥
धनस्य प्राणतुल्यत्वमुक्त यथा,—
"यदेतद्द्रविण नाम प्राणा एते बहिश्चरा'।
स तस्य हरते प्राणान् यो यस्य हरते धनम्॥"
इति कूर्म्मे २९ अध्याय'॥ * ॥
"अपराबाधमक्लेश प्रयत्नेनार्जित धनम्।
स्वल्प वा बहुलं वापि देयमित्यभिधीयते॥"
अपराबाध परपीडारहितम्। अक्लेश पात्रक्लेशाजनकम्॥ * ॥ तामसधन यथा,—
"पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसै।
व्याजेनोपार्जित यत्तु तत् कृष्ण समुदाहृतम्॥"
पार्श्विक. पाशतया योऽर्थयति। आर्त्तिरा पर-

पीड़या। प्रतिरूपेण कृत्रिमरत्नादिना। साहसेन मसुद्रयाननिर्य्यारोहणादिना। व्याजेन ब्राह्मणवेशेन शूद्रादिना। कृष्णं तामसम् ॥ * ॥ राजसधनं यथा,—

‘कुसीदकृषिवाणिज्यशुल्कगानानुवृत्तिभिः।
कृतोपकारादाप्तञ्च राजसं समुदाहृतम् ॥’

अनुवृत्त्या सेवया ॥ * ॥ सात्त्विकधनं यथा,—

‘श्रुतशौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम्।
धनं सप्तविधं शुक्लं मुनिभिः समुदाहृतम् ॥’

श्रुतेनाध्ययनेन। शौर्य्येण जयादिना। तपसा जपहोमदेवार्च्चादिना। कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धम्। शिष्यागतं गुरुदक्षिणादिना। याज्यागतं आर्त्विज्यलब्धम्। अन्वयागतं दायादेभ्यो लब्धम्। शुक्लं सात्त्विकम्।” इति शुद्धितत्त्वे देवलनारदौ ॥ * ॥ धनप्रयोगनक्षत्राणि यथा, अश्विनी। पुनर्व्वसुः। पुष्यः। उत्तरफल्गुनी। हस्ता। पूर्व्वाषाढा। उत्तराषाढ़ा। श्रवणा। धनिष्ठा। शतभिषा। उत्तरभाद्रपत्। रोहिणी। इति ज्योतिषम् ॥ * ॥ धनप्रयोगनिषेधो यथा,

“आर्द्रं यमद्वन्द्वमहित्रयञ्च
शक्रद्वयं वातयुगं महेशः।
कार्य्यो न चैतेषु धनप्रयोगो
दत्तौ गतो ग्राह्यदृशां न देयम् ॥”

इति समयप्रदीपः ॥

अर्थप्रशंसा यथा,—

“अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः।
क्रियाः सर्व्वाः प्रवर्त्तन्ते पर्व्वतेभ्य इवापगाः ॥
अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः।
विच्छिद्यन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा ॥
सोऽयमर्थं परित्यज्य सुखकामः सुखैधितः।
पापमाचरते कर्त्तुं तदा दोषः प्रवर्त्तते ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥
यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान्।
यस्यार्थाः स महाभागो यस्यार्थाः स गुणाधिकः ॥
अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया।
राज्यमुत्सृजता धीर! येन बुद्धिस्त्वया कृता ॥
यस्यार्था धर्म्मकामार्थास्तस्य सर्व्वं प्रदक्षिणम्।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥
हर्षः कामश्च दर्पश्च धर्म्मः क्रोधः शमो दमः।
अर्थादेतानि सर्व्वाणि प्रवर्त्तन्ते नराधिपे ॥
येषां नश्यत्ययं लोकश्चरतां धर्म्मचारिणाम्।
तेऽर्थास्त्वयि न दृश्यन्ते दुर्द्दिनेषु यथा ग्रहाः ॥

इति रामायणे युद्धकाण्डे श्रीरामं प्रति श्रीलक्ष्मणवाक्यम् ॥ * ॥

अर्थनिन्दा यथा,—

“अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः
सर्व्वत्रैषा विहिता नीतिः ॥”

इत्यादि मोहमुद्गरे द्रष्टव्यम् ॥ * ॥

अनुग्रहार्थं भगवता धनहरणम्। यथा,—

“राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः।
ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ॥”

इति श्रीभागवतम् ॥

धनकेलिः, पुं, (धनैः केलिः क्रीडा यस्य।) कुवेरः। इति त्रिकाण्डशेषः ॥

धनच्छूः, स्त्री, (धनं छ्यति नाशयतीति। छो छेदने+बाहुलकात् ऊः।) करेटुपक्षी। इति त्रिकाण्डशेषः ॥

धनञ्जयः, पुं, (धनं जयति सम्पादयतीति। जि+खच्+मुम्। “धनमिच्छेत् हुताशनात्।” इत्युक्तेरस्य तथात्वम्।) अग्निः। चित्रकवृक्षः। इत्यमरः। १।१।५६ ॥ (धनं जयति अरीन् निर्जित्य अर्ज्जयतीति। जि+खच्+मुम् च।) अर्ज्जुनः। (अस्य निरुक्तिर्यथा, महाभारते। ४।४२।१३।

“सर्व्वान् जनपदान् जित्वा वित्तमाश्रित्य केवलम्।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम् ॥”)

नागभेदः। स तु जलाशयाधिपतिः। (यथा, महाभारते। २।९।९।

“कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ।
मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ ॥”)

देहमारुतः। स च शरीरवाह्यपञ्चवाय्वन्तर्गतः। इति मेदिनी। ये, १२० ॥ (“धनञ्जयः शोषणकरः।” इति वेदान्तसारः। ३३ ॥

“न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः ॥”

इति सुबोधिनी ॥)

“धनञ्जयस्तथा घोषे महारजतवर्णकः।
ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु ॥”

इति शारदातिलकटीकायां राघवभट्टः ॥ अर्ज्जुनवृक्षः। इति रत्नमाला ॥ * ॥ (गोत्रविशेषः। तद्वंशीये, त्रि। यथा, महाभारते। २।३३।३४।,

“धनञ्जयानामृषभः सुसामा सामगोऽभवत् ॥”)

विष्णुः। यथा, महाभारते। १३। १४९। ८३।

“अनिर्द्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥”

“यत् दिग्विजये धनं प्रभूतमजयत्तेन धनञ्जयः। ‘पाण्डवानां धनञ्जयः।’ इति भगवद्वचनात्।” इति शाङ्करभाष्यम् ॥ षोड़शद्वापरस्य व्यासः। यथा, देवीभागवते। १।३।३०।

“त्र्यारुणिः पञ्चदशे षोड़शे तु धनञ्जयः ॥”)

धनदः, पुं, (धनं द्यति पालयतीति। दै ङ पालने+“आतोऽनुपसर्गे कः।” ३।२।३। इति कः।) कुवेरः। इत्यमरः। १।१।७२ ॥ (यथा, देवीभागवते। ५।३।४०।

“त्रिविष्टपं ग्रहीष्यामि जित्वेन्द्रं वरुणं यमम्।
धनदं पावकञ्चैव चन्द्रसूर्य्यौ विजित्य च ॥”

ब्रह्मा अस्य तपसा सन्तुष्ट एनं धनेशं चकार। यथा, अध्यात्मरामायणे। ७।१।३८।

“ददौ तत्तपसा तुष्टो ब्रह्मा तस्मै वरं शुभम्।
मनोऽभिलषितं तस्य धनेशत्वमखण्डितम् ॥”)

हिज्जलवृक्षः। इति राजनिर्घण्टः ॥ (धनं ददातीति। दा+कः।) दातरि, त्रि। इति मेदिनी। दे, ३२ ॥ (यथा, कामन्दकीयनीतिसारे। ३।२३।

“उद्वेजयति भूतानि क्रूरवाक् धनदोऽपि सन् ॥”)

आश्रयित्वेनास्त्यस्येति अच्। हिमवत एकदेशः। यथा, महाभारते। १३।१९।१६।

“धनदं समतिक्रम्य हिमवन्तञ्च पर्व्वतम् ॥”

धनदाक्षी, स्त्री, (धनदस्य कुवेरस्य अक्षि इव पिङ्गलं पुष्पं यस्याः। षच् समासे। स्त्रियां ङीष्।) लताकरञ्जः। इति राजनिर्घण्टः ॥

धनदानुजः, पुं, (धनदस्य कुवेरस्य अनुजः कनिष्ठः।) रावणः। इति शब्दरत्नावली ॥ (यथा, रघुः। १२।५३।

“निग्रहात् स्वसुराप्तानां वधाच्च धनदानुजः।
रामेण निहितं मेने पदं दशसु मूर्द्धसु ॥”)

धनदायी, [न्] पुं, (धनं ददाति उपासकायेति। दा+णिनिः। “धनमिच्छेत् हुताशनात्।” इति वचनादेवास्य तथात्वम्।) अग्निः। इति शब्दरत्नावली ॥ धनदातरि, त्रि ॥

धनन्दा, स्त्री, (येन धनेन नन्दं आनन्दं ददातीति। दा+कः।) बुद्धशक्तिभेदः। इति त्रिकाण्डशेषः ॥

धनपतिः, पुं, (धनानां पतिः।) कुवेरः। इति धनञ्जयः ॥ (यथा, महाभारते। २।१२।३।

“तथा धनपतेर्यक्षा गुह्यका राक्षसास्तथा ॥”)

अस्य उत्पत्तिर्यथा,—

महातपा उवाच।

“शृणु चान्यां वसुपतेरुत्पत्तिं पापनाशिनीम्।
यथा वायुः शरीरस्थो धनदः सम्बभूव ह ॥
आद्यं शरीरं यत्तस्मिन् वायुरन्तःस्थितोऽभवत्।
प्रयोजनान्मूर्त्तिमत्त्वमादिशन् क्षेत्रदेवताः ॥
तन्मूर्त्तस्य वायोस्तु उत्पत्तिः कीर्त्त्यते मया।
तां शृणुष्व महाभाग! कथ्यमानां मयानघ! ॥
ब्रह्मणः सृजतः सृष्टिं मुखाद्वायुर्विनिर्ययौ।
प्रचण्डशर्करावर्षी तं ब्रह्मा प्रत्यषेधयत् ॥
मूर्त्तो भवस्व शान्तश्च तत्रोक्तो मूर्त्तिमान् भवन्।
सर्व्वेषाञ्चैव देवानां यद्वित्तं फलमेव च ॥
तत् सर्व्वं पाहि येनोक्तं तस्माद्धनपतिर्भवेत्।
तस्य ब्रह्मा ददौ तुष्टस्तिथिमेकादशीं प्रभुः ॥
तस्यामनग्निपक्काशी यो भवेन्नियतः शुचिः।
तस्मात्तु धनदो देवस्तुष्टः सर्व्वं प्रयच्छति ॥
एषा धनपतेर्मूर्त्तिः सर्व्वकिल्विषनाशिनी।
य एतां शृणुयाद्भक्त्या पुरुषः पठतेऽपि वा ॥
सर्व्वकाममवाप्नोति स्वर्गलोकञ्च गच्छति ॥”

इति वराहपुराणम् ॥

धनपिशाचिका, स्त्री, (धने पिशाचिकेव।) धनाशा। तत्पर्य्यायः। तृष्णा २। इति हारावली। १२५ ॥

धनपिशाची, स्त्री, (धने पिशाचीव।) तृष्णा। धनलोभः। इति त्रिकाण्डशेषः ॥

धनप्रिया, स्त्री, (धनवत् प्रिया।) काकजम्बूः। इति राजनिर्घण्टः ॥

धनफल, क्ली, (धनानां फलम् ।) दानभोगादि । यथा, अग्निपुराणे ।
"अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् ।
रतिपुत्रफला दारा शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे दानविधिनामाध्यायः ॥

धनवती, स्त्री, (धनमस्या अस्तीति । धन + मतुप् । मस्य वः । स्त्रियां ङीप् ।) धनिष्ठानक्षत्रम् । इति जटाधरः ॥

धनवान्, [त्] त्रि, (धनमस्यास्तीति । धन + मतुप् । मस्य वः ।) धनविशिष्टः । धनी । इति हलायुधः ॥ (यथा, रामायणे ।२।६७।१८।
"नाराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥")

धनस्यक, पुं, गोक्षुरः । इति शब्दचन्द्रिका ॥ (लालसया धनमिच्छतीति । धन + क्यच् । "सर्व्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ ।" ३ । १ । ५१ । इत्यस्य वार्त्तिकोक्त्या सुक् । ततो धनस्य इति नामधातु + ण्वुल् । लालसया धनेच्छौ, त्रि ॥)

धनहरी स्त्री, (धनं हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इति अच् । गौरादित्वात् ङीष् ।) चोरनामगन्धद्रव्यम् । तत्पर्य्यायः । राक्षसी २ चण्डा ३ चेमः ४ दुष्पत्रः ५ गणहासकः ६ । इत्यमरः । २ । ४ । १२८ ॥ दुष्कुलीनः ७ विरोधः ८ क्रोधमूर्च्छितः ९ । इति शब्दरत्नावली ॥ क्षेमकः १० कितवः ११ कोरकः १२ । इति जटाधरः ॥ धनहारके हन्तृ, त्रि ॥

धनाधिप, पुं (धनानामधिपः ।) कुवेरः । इत्यमरः । १ । १ । ७२ ॥ (यथा, देवीभागवते । ५ । ७ । १८ ।
"सङ्गरं सम्परित्यज्य गते शक्रे शचीपतौ ।
यमो धनाधिपः पाशी जग्मुः सर्व्वे भयातुराः ॥")
अस्य ध्यानं यथा, —
"कुवेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं शुभम् ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकैः परिवारितम् ।
महोदरं महाकायं अष्टाष्टकसमन्वितम् ॥
गुह्यकैर्बहुभिर्युक्तं धनव्यग्रकरैस्तथा ॥"
इति मत्स्यपुराणम् ॥

धनाध्यक्ष, पुं (धनानामध्यक्षः ।) कुवेरः । इति हलायुधः ॥ (यथा अध्यात्मरामायणे । ७ । ८ । ४७ ।
"ततः क्रुद्धो दशग्रीवो जगाम धनदालयम् ।
विनिर्ज्जित्य धनाध्यक्षं जहारोत्तमपुष्पकम् ॥")
धनाधिकृतः । तहविलदार इति खाजाञ्चि इति च भाषा । तस्य लक्षणं यथा, —
"लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ।
विज्ञाता फल्गुसाराणामनाहार्य्यः शुचिः सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः ॥

व्ययद्वारेषु सर्व्वेषु धनाध्यक्षसमा नराः ।
व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवीक्षिता ॥"
इति मत्स्यपुराणे १८९ अः ॥

धनाशा, स्त्री, (धनानां आशा ।) धनलोभः । यथा, विष्णुपुराणे तथा हरिवंशे । ३० । ४६ ।
"जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ॥"

धनाश्रीः, स्त्री, रागिणीविशेषः । धानसी इति भाषा । हनूमन्मते श्रीरागस्य तृतीयभार्य्या । अस्या जातिः षाड़वः । रिषभवर्ज्जिता । षड्जस्वरः । गानसमयः शिशिरर्त्तौ द्वितीयप्रहरः कस्यचिन्मते दिवावसानम् । रागमालायामस्या रूपं वियोगिनी रमणी रक्तवसना विरहवेदनया दुर्ब्बला कृशा च एकाकिनी वकुलवृक्षतलोपविष्टा रुदन्ती । कल्लिनाथमते मेघरागस्य चतुर्थभार्य्या । भरतमते मालकौषपुत्त्रगान्धाररागस्य पत्नी । इति सङ्गीतशास्त्रम् ॥

धनिकः, पुं, (धनिना कायतीति । कै + कः ।) धन्याकम् । इति मेदिनी । के, १०६ ॥ अस्मिन्नर्थे क्लीवमिति राजनिर्घण्टः ॥ (धनमस्यास्तीति । ठन् ।) धवः । इति हेमचन्द्रः ॥

धनिकः, त्रि, (धनं अस्यास्तीति । "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) साधुः । धनी । इति मेदिनी । के, १०६ ॥ (यथा, कलाविलासे ।१।१८।
"धूर्त्तकरकन्दुकानां वारवधूचरणनूपुरमणीनाम् ।
धनिकगृहोतपन्नानां मुक्तिर्नास्त्येव मुग्धानाम् ॥"
उत्तमर्णः । यथा, मनुः । ८ । ४७ ।
"अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥")

धनिका, स्त्री, (धनिक + टाप् ।) साधुनारी । इति मेदिनी । के, १०६ ॥ वधूः । इति हेमचन्द्रः ॥ युवती । इति शब्दरत्नावली ॥ प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

धनिष्ठा, स्त्री, (अतिशयेन धनवती । धन + इष्ठन् + टाप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतत्रयोविंशनक्षत्रम् । तत्पर्य्यायः । अविष्ठा २ । इत्यमरः । १ । ३ । २२ ॥ वसुदेवता ३ । इति ज्योतिषम् ॥ भूतिः ४ निधानम् ५ धनवती ६ । इति जटाधरः ॥ अस्याः स्वरूपं यथा, —
"मस्तकोपरि समागते धने
मर्द्दलाकृतिनि पञ्चतारके ।
यान्ति कान्तिमति मेषलग्नतः
सारसाधिरसपलिप्तिकाः ॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥
तत्र जातस्य फलम् ।
"आचारजातादरचारुशीलो
धनाधिशाली बलवान् दयालुः ।
यस्य प्रसूतौ च भवेद्धनिष्ठा
महत्प्रतिष्ठासहितो नरः स्यात् ॥"
इति कोष्ठीप्रदीपः ॥

धनी, [न्] त्रि, (धनमस्यास्तीति । धन + इनिः ।) धनवान् । (यथा, देवीभागवते । ९ । २५ । १३ ।
"गत्वा च धनिनां कार्य्यं स्तुतिं सर्व्वात्मना बुधैः ॥")
तत्पर्य्यायः । इभ्यः २ आढ्यः ३ । इत्यमरः । ३ । १ । १० ॥ यथा, कूर्म्मपुराणे १२० अः ।
"आढ्यो वा दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो भवत्पूर्व्वकन्त्वेनमभिभाषेत धर्म्मवित् ॥"
"गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ।"
इति श्रीभागवतम् ॥
(उत्तमर्णः । यथा, मनुः । ८ । ६१ ।
"यादृशा धनिभिः कार्य्या व्यवहारेषु साक्षिणः ।
तादृशान् सम्प्रवक्ष्यामि यथावाच्यमृतञ्च तैः ॥")

धनीका, स्त्री, युवती । इति शब्दरत्नावली ॥

धनीयक क्ली (धनाय हितम् । धन + छः । स्वार्थे कन् ।) धन्याकम् । इति शब्दरत्नावली ॥

धनुः, पुं, (धनतीति । धन + "भृमृशीतृचरीति ।" उणां । १ । ७ । इति उः ।) चापः । (यथा, हितोपदेशे ।
"धनुर्व्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति ॥")
राशिविशेषः । पियालवृक्षः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

धनुः, [स्] पुं, (धन + "अर्त्तिपृवपीति ।" उणां २ । ११८ । इति उसिः स च नित् ।) पियालवृक्षः । धनुर्द्धरे, त्रि । इति मेदिनी । से, २६ ॥

धनुः, [स्] क्ली, (धनतीति । धन शब्दे + "अर्त्तिपृवपीति ।"उणां २ । ११८ । इति उसिः स च नित् ।) शरनिक्षेपयन्त्रम् । धनुक इति भाषा । तत्पर्य्यायः । चापः २ धन्व ३ शरासनम् ४ कोदण्डम् ५ कार्म्मुकम् ६ इष्वासः ७ । इत्यमरः । २ । ८ । ८३ ॥ स्थावरम् ८ गुणी ९ शरावापः १० दृढ़ता ११ त्रिणता १२ । इति त्रिकाण्डशेषः ॥ अस्त्रम् १३ धनूः १४ । इति जटाधरः ॥ तारकम् १५ काण्डम् १६ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा, —
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं शाङ्गं तथैव च ।
कोमलं वर्णदृढ़ता तयोर्गुण उदाहृतः ॥
सुखसम्पत्तिकरणं समसुश्यामतं धनुः ।
विपरीतं सुखवैषम्ये तदङ्गे भङ्गमावहेत् ॥"
इति युक्तिकल्पतरुः ॥
धनुर्विद्यारम्भदिनं यथा, —
"शनिभौमबुधान्येषु वारेषु सुतिथौ हरौ ।
प्रशस्ते चापविद्याया आरम्भः शुभदो मतः ॥"
इति ज्योतिःसारसंग्रहः ॥
विद्यारम्भोक्तनक्षत्राणि सर्व्व शुभानि ॥
(एतदस्त्रविद्यां ब्रह्मा पृथुनाम्ने महीपतये प्रथमं दत्तवान् । असौ एव लोकेषु अस्याः प्रचारमकरोत् । यदुक्तम् वैशम्पायनेन ।
"ऋषिः पूर्व्वं मया दृष्टो दुष्टनिग्रहकारणात् ।
भवादृशस्तमीशस्यो लोकान् शिक्षन् चरत्यसौ ॥
धनुराद्यायुधयुक्तौ लमेवादिः स्मृतो मया ।

तस्मात् शस्त्राणि चास्त्राणि ददानि तव पुत्रक ॥"
अस्य प्रमाणं यथा, वृद्धशार्ङ्गधरे ।
"चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ।
तद्वर्षेन्मानवं चाप सर्व्वलक्षणसंयुतम् ॥"
तथा आग्नेयधनुर्व्वेदे ।
"चतुर्हस्तं धनुः श्रेष्ठ त्रिभिः सार्द्धैस्तु मध्यमम् ।
कनिष्ठन्तु त्रिभिः प्रोक्तं नित्यमेव पदातिनः ॥"
धनुस्तु शार्ङ्गवांशभेदेन द्विविधम् । यथा, युक्तिकल्पतरौ ।
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं वांशं तथैव च ॥"
एतयोः प्रकारमाह धनुर्व्वेदे ।
"शार्ङ्गिकं त्रिणतं प्रोक्तं वैणव सर्व्वनामितम् ॥"
शार्ङ्गधनुषः प्रमाणमाह वृद्धशार्ङ्गधरे ।
"शार्ङ्गं पुनर्धनुर्दिव्यं तद्विष्णोः परमायुधम् ॥
वितस्तिसप्तमं मानं निर्म्मित विश्वकर्म्मणा ॥
न स्वर्गे न च पाताले न भूमौ कस्यचित् करे ।
तद्धनुर्वशमायाति त्यक्तैकं पुरुषोत्तम् ॥
पौरुषेयन्तु यच्छार्ङ्गं बहुवत्सरशोभितम् ।
वितस्तिभिः सार्द्धषड्भिर्निर्म्मितं धनुषोऽधमम् ॥
प्रायो योग्य धनुः शार्ङ्गं गजयोधाश्वसादिनाम् ।
रथिनाञ्च पदातीना वांशं चाप प्रकीर्त्तितम् ॥"
वांशधनुषः प्रमाणमाह तत्रैव ।
"त्रिपर्व्वं पञ्चपर्व्वं वा सप्तपर्व्वं प्रकीर्त्तितम् ।
नवपर्व्वञ्च कोदण्डं चतुर्णां शुभकारणम् ॥
चतुष्पर्व्वञ्च षट्पर्व्वं अष्टपर्व्वं विवर्ज्जयेत् ॥"
"अतिजीर्णमपक्वञ्च ज्ञातिघृष्टं तथैव च ।
दग्धं छिद्रं न कर्त्तव्य बाह्याभ्यन्तरहस्तकम् ॥
गुणहीनं गुणाक्रान्त वास्तुदोषसमन्वितम् ।
गजग्रन्थिनं कर्त्तव्या तलमध्ये तथैव च ॥"
"अपक्वं भङ्गमायाति अतिजीर्णन्तु कर्कशम् ।
ज्ञातिघृष्टन्तु सोद्वेगं कलहो बान्धवे. सह ॥
दग्धेन दह्यते वेश्म छिद्र युद्धविनाशनम् ।
बाह्ये लक्ष्यं न लभ्येत तथैवाभ्यन्तरेऽपि च ॥
हीने तु सन्धिते बाणे सग्रामे भङ्गकारकम् ।
आक्रान्ते च पुन॰ क्वापि न लक्ष्य प्राप्यते दृढम् ॥"
"गलग्रन्थितलग्रन्थिधनहानिकरं धनु. ।
एभिर्दोषैर्विनिर्मुक्तं सर्व्वकार्य्यकरं स्मृतम् ॥"
उपलक्षेपकधनुषः प्रकारमाह तत्रैव ।
"उपलक्षेपक चापं वैणव तद्विरज्जुकम् ।
भिन्नत्वोत्सेधसहितं द्व्यङ्गुलीविस्तृतं तु सत् ॥"
आसनविशेषः । यथा, हठयोगप्रदीपिकायाम् । १ । २५ ।
"पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षणं कुर्य्याद्धनुरासनमुच्यते ॥"*॥
चतुर्हस्तपरिमाणम् । काठा इति भाषा । यथा,
"चतुर्विंशाङ्गुलो हस्तश्चतुष्क धनु स्मृतम् ॥"
इति जलाशयतत्त्वम् ॥
मेषादिद्वादशराशन्तर्गतनवमराशिः । तत्पर्य्याय. । तौक्षिक॰ २ । इति दीपिका । अस्य देवता पूर्व्वार्द्धंमनुष्याकारशेषार्द्धाश्वाकारधनुर्धारी पुरुषः । स मूलापूर्व्वाषाढासमुदायोत्तराषाढाप्रथमपादेन भवति । स च शीर्षोदयः पीतः स्वर्णवर्णो वा पर्व्वतचरः महाशब्दकर पूर्व्वदिक्स्वामी दृढाङ्गः रूक्षः क्षत्रियवर्णः उग्रः पित्तप्रकृतिरिक्तार्थः अल्पसन्तानः अल्पस्त्रीसङ्गः अग्निराशिः ॥ * ॥ एतद्राशिजातफल यथा, "क्रोधी द्रुतवाक् पुण्यमतिः शुचिः प्राज्ञः सुखी सर्व्वलोकालापी च ॥" इति जातकचन्द्रिकादयः ॥ * ॥ अपि च ।

"बहुकलाकुशलः प्रबलो महान्
विमलताकलितः सरलोक्तिभाक् ।
शशधरे हि धनुर्धरगे नरो
धनकरो न करोति धनव्ययम् ॥"

तल्लग्नजातफलं यथा,—
"धनुर्लग्ने सुतपक्षो नीतिमान् धनवान् सुखी ।
कुलमध्ये प्रधानश्च प्राज्ञः सर्व्वस्य पोषक. ॥"
इति कोष्ठीप्रदीपः ॥

धनु.पटः, पु, (धनुष इव पटो विस्तारो यस्य ।) पियालवृक्षः । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा,—
"पियालस्तु खरस्कन्धश्चारो बहुलवल्कलः ।
राजादनस्तापसेष्टः सन्नकद्रुर्धनुःपटः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

धनुःशाखा, स्त्री, (धनुरिव शाखा यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

धनुःश्रेणी, स्त्री, (धनुषः श्रेणीव ।) मूर्व्वा । महेन्द्रवारुणी । इति राजनिर्घण्टः ॥ (यथास्या. पर्य्यायो वैद्यकरत्नमालायाम् ।
"तेजनी पिलुनी देवा तिक्तवल्ली पृथक्त्वचा ।
धनु श्रेणी मधुरसा मूर्व्वा निर्दहनीति च ॥")

धनुर्गुणा, स्त्री, (धनुषो गुणो यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥ (मूर्व्वाशब्देऽस्या गुणादयो ज्ञातव्या ॥)

धनुर्द्रुमः, पुं, (धनुषो द्रुमः ।) वंश. । इति राजनिर्घण्टः ॥

धनुर्धर , पुं, (धरतीति । धृ+अच् । धनुषो धरः ।) धनुर्धारी । तिरन्दाज इति भाषा । तत्पर्य्यायः । धन्वी २ धनुष्मान् ३ धानुष्कः ४ निषङ्गी ५ अस्त्री ६ तूणी ७ धनुर्भृत ८ । इति हेमचन्द्रः । ३ । ४३५ ॥ (यथा, महाभारते । १ । १३४ । २० ।
"प्रयतिष्ये तथा कर्त्तुं यथा नान्यो धनुर्धरः ।
तत्समो भविता लोके सत्यमेतत् ब्रवीमि ते ॥"
स्वनामख्यातो धृतराष्ट्रस्य पुत्रविशेषः । यथा, महाभारते । १ । ११७ । ११ ।
"कवची निषङ्गी कुण्डी च कुण्डधारो धनुर्धरः ॥")

धनुर्धारी, [न्] त्रि, (धनुर्धरतीति । धृ+णिनिः ।) धनुर्धर । तस्य लक्षणं यथा,—
"शूरश्च बलयुक्तश्च सर्व्वास्त्रकोविदः ।
धनुर्धारी भवेद्राज्ञः सर्व्वक्लेशसहः शुचि. ॥"
इति मत्स्यपुराणे १८९ अ ॥

धनुर्भृत्, पु, (धनुर्बिभर्त्तीति । भृ+क्विप ।) धनुर्धरः । इति हेमचन्द्रः । ३ । ४३५ ॥ (यथा, रघुः । ९ । ११ ।
"अवनिमेकरथेन वरूथिना
जितवतः किल तस्य धनुर्भृतः ॥")

धनुर्मध्यं, क्ली, (धनुषो मध्यम् ।) चापमध्यभागः । तत्पर्य्यायः । लस्तकः २ । इत्यमरः ।२।८।८५॥

धनुर्माला, स्त्री, (धनुषो माला श्रेणीव ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

धनुर्य्यासः, पु, (धनुरिव यासः ।) धन्वयासः । दुरालभा । इत्यमरटीकायां रायमुकुटः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"यासो यवासो दुस्पर्शो धनुर्य्यासो दुरालभा ॥")

धनुर्लता, स्त्री, (धनुषो लतेव ।) सोमवल्ली । इति राजनिर्घण्टः ॥

धनुर्वृक्षः, पुं, (धनुषो वृक्षः ।) धन्वनवृक्षः । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वनः पिच्छिलत्वक् च धनुर्वृक्षश्च धर्म्मणः ॥")
वंश. । भल्लातकः । अश्वत्थः । इति राजनिर्घण्टः ॥

धनुर्व्वेद., पु, (धनूंषि उपलक्षणेन धनुरादीन्यस्त्राणि विद्यन्ते ज्ञायन्तेऽनेनेति । विद+करणे घञ् ।) धनुर्व्विद्याबोधकशास्त्रम् । तत्तु यजुर्व्वेदस्योपवेदः । इति चरणव्यूहः ॥ (यथा, मधुसूदनसरस्वतीकृतप्रस्थानभेदे ।
"यजुर्व्वेदस्योपवेदो धनुर्व्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमो दीक्षापादः । द्वितीयः संग्रहपादः । तृतीयः सिद्धिपादः । चतुर्थः प्रयोगपादः । तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणञ्च कृतम् । तत्र धनुःशब्दश्चापे रूढोऽपि चतुर्विधायुधवाचको वर्त्तते । तच्च चतुर्विधम् । मुक्तममुक्तं मुक्तामुक्तं यन्त्रमुक्तञ्च । तत्र मुक्तं चक्रादि । अमुक्तं खड्गादि । मुक्तामुक्तं शल्यावान्तरभेदादि । यन्त्रमुक्तं शरादि । तत्र मुक्तमस्त्रमित्युच्यते । अमुक्तं शस्त्रमित्युच्यते । तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादिभेदादनेकविधम् । एवं साधिदैवतेषु समन्त्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनाञ्च ते सर्व्वे चतुर्विधाः । पदातिरथगजतुरगारूढाः । एव दीक्षाभिषेकशाकुनमङ्गलकरणादिकञ्च सर्व्वमपि प्रथमे पादे निरूपितम् । सर्व्वेषामस्त्रशस्त्रविशेषाणां आचार्य्यस्य लक्षणपूर्व्वकं संग्रहणं संग्रहपादे द्वितीये दर्शितम् । गुरुसम्प्रदायसिद्धानां शास्त्रविशेषाणां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणादिकं तृतीये पादे । एवं देवतार्च्चनाभ्यासादिभिः सिद्धानां अस्त्रशस्त्रविशेषाणां प्रयोगश्चतुर्थे पादे निरूपितः ॥")

धनुष्कर, पु, (धनुः करोतीति । धनुस्+कृ+ "दिवाविभेति ।" ३ । २ । २१ । इति टः ।) धनु. करे यस्य इति व्यधिकरणबहुव्रीहिसमासो वा । धानुष्कः ॥

धनुष्पट., पु, (धनुष इव पटो विस्तारो यस्य ।) पियालवृक्षः । इत्यमरः । २ । ४ । ३५ ॥

धनुष्मान्, [त्] पुं. (धनुर्विद्यते यस्य । धनुस्+मतुप् ।) धनुर्धरः । इत्यमरः । २ । ८ । ७० ॥

(यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ॥")
धन्, स्त्री, (धा धारणे शब्दे वा ।+"ऋषिधर्षिमिताभि-
धभीति ।" उणां १ । ८२ । ...) धनु ।
इति जटाधरः ॥ धान्यमयये धनुषि च पुं ।
इति संक्षिप्तसारोणादिवृत्तिः ॥
धनेयक, क्ली, धान्यकम् । इत्यमरटीकायां भरतः ॥
धनेश्वरः, पुं, (धनानामीश्वरः ।) कुबेरः । इति
हेमचन्द्रः । २ । १०४ ॥ (यथा, महाभारते ।
१ । २२८ । ३० ।
"जगत् सर्वाणि भूतानि यानि यानि सुरासुराः ।
कालदण्डः यमो राजन् । गदायैव धनेश्वरः ॥"
शिवः । यथा, तत्रैव । १३ । १४८ । ६३ ।
"सत्वगो सत्वलो सत्वी रत्नगर्भो धनेश्वरः ॥"
सम्प्रबोधप्रमेयतुर्यपदस्य गुरुः । यदुक्तम् ।
"विद्गुणैस्तपस्यानो भिषक्केशवान्तः ।
बोपदेवस्तकारेदं विप्रो वेदपदास्पदम् ॥")
धन्य, पुं, (धनाय हितः । धन+यत् ।) अश्वकर्ण-
वृक्षः । इति राजनिर्घण्टः ॥
धन्य, त्रि (धनाय हितः । धन+यत् ।) पुण्य-
वान् । सुकृती । इत्यमरः । ३ । १ । ३ ॥
"सनामा पुरुषो धन्यः पितृनामा च मध्यमः ।
अधमो मातृनामा च मातुलनामाधमाधमः ॥"
इति गोपीचन्द्रधृतपद्यम् ॥
धन्यत्वकथनं यथा —
सनत्कुमार उवाच ।
"विस्तीर्णवालुकामध्ये कच्छपः शतयोजनः ।
भीतस्य कम्पितस्तत्र दृष्टो दूरी च दुःखितः ॥
निःसारितो राघवेण भीमेन च महात्मना ।
धन्योऽसीति मयोक्तश्च नाद धन्य उवाच सः ॥
क्षीरोदसागरो धन्यो यत्रको यत्र मद्विधाः ।
भवान् धन्योऽसि क्षीरोद ! तेनोक्तो नादमेव च ॥
धन्या वसुन्धरा देवी यत्रैव सप्त सागराः ।
धन्यासि वसुधेत्युक्ता नादमेवेत्युवाच सा ॥
धन्योऽनन्तो ममाधारः शेषाख्यो नागराड्विभुः ।
धन्योऽसीत्युक्तः परमो धन्यो नादसुवाच स ॥
धन्यश्च भगवान् ब्रह्मा विधाता जगतामपि ।
धन्योऽसि तत्र धाता च धन्यो नादसुवाच सः ॥
धन्यो महेश्वरो देवो योगीन्द्राणां गुरोर्गुरुः ।
धन्योऽसीत्युक्तः प्रभुश्च धन्यो नादसुवाच स ॥
धन्यो गणेश्वरो देवो देवानां प्रवरः परः ।
देवेषु धन्यो मान्योऽसीत्युक्तो गणपतिर्मया ॥
नाद धन्यो सुनिश्रेष्ठ ! सस्मितश्चेत्युवाच सः ।
धन्या वेदाश्च चत्वारः कर्माणि यद्व्यवस्थया ॥
तस्माद्धन्याश्च ते वेदा गच्छ तत्र मनीषिणः ।
वयं धन्याश्च मान्याश्चेत्युक्ता वेदा मया ततः ॥
ऊचुस्ते न वयं धन्या यज्ञश्च धन्य साम्प्रतम् ।
यज्ञ व्यवस्थाकर्त्तारो यज्ञौघफलदः स्वयम् ।
तस्माद्धन्यः स एवापि गच्छ गच्छ महामुने ! ॥
धन्योऽसि यज्ञस्त्वं चोऽसीत्युक्तस्तत्र मया विभो ! ।
ऊचुस्ते न वयं धन्या धन्यं कर्म शुभं सुने ! ॥
शुभकर्माणि धन्यं स धर्मं धन्यमुवाच तम् ।
श्रीकृष्णः परमात्मा च धर्मो मां सर्वसिद्धिदम् ॥
धन्योऽसीति मयोक्तश्च दक्षिणाभिः सहेति च ।
इत्युक्तो भगवान् धन्य कथितं सर्वकारणम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८७ अ. ॥
(धन गत्या । धन ।+"धनगर्त्तं मत्या ।" ४ । ४ ।
८७ । इति यत् । धनलाभः ॥ पुं धनस्य निमित्त
संयोगो उत्पातो वा । "गोद्व्यचोऽसंख्यापरि-
माणाश्वादेर्यत् ।" ५ । १ । ३९ । इति यत् ॥)
धन्यमन्न, क्ली, (धन धनरक्षकं नगम् ।) गन्ध-
मादनपर्वतविशेषः । कुबेरः पूर्वं यत्र आसीत्
तत्रदन्त तस्मात् धनपतिरभूत् । इति वराह-
पुराणम् ॥
धन्या, स्त्री, (धन्य+टाप् ।) आमलकी । इति
मेदिनी । ये, १३ ॥ धन्याकम् । इति हेमचन्द्रः ।
४ । ८३ ॥ (सती कन्या । स्वयं भुवस्य पत्नी ।
यथा, मत्स्यपुराणे । ४ । ३८ ।
"धन्या नाम मनोः कन्या ध्रुवात् शिष्टमजीजनत् ॥")
धन्याकं, क्ली, (धन्यमेव अन्नाधिकमिति । धन ।+
"पिनाकादयश्च ।" उणां ४ । १५ । इत्याकप्रत्ययेन
निपातनात् साधुः ।) धनिया इति ख्यात शस्यम् ।
तत्पर्य्यायः । छत्रा २ वितुन्नकम् ३ कुस्तुम्बुरु ४ ।
इत्यमरः । २ । ९ । ३८ ॥ धान्यकम् ५ धन्यम् ६
धनिकम् ७ धनीयकम् ८ कुस्तुम्बुरी ९ धान्या-
कम् १० तुम्बुरु ११ धन्या १२ तुम्बुरी १३ धने-
यकम् १४ । इति भरतधृतकोषान्तरम् ॥ धान्य-
कम् १५ धान्यम् १६ धानेयम् १७ धनिका १८
सूक्ष्मपत्रकम् १९ सुगन्धि २० शाकयोग्यम् २१
सूक्ष्मपत्रम् २२ जनप्रियम् २३ धान्यबीजम् २४
बीजधान्यम् २५ वेधकम् २६ । इति राज-
निर्घण्टः ॥ कुलटी २७ धीनिका २८ धान्यकम्
२९ धाना ३० धानेयकम् ३१ । इति भावप्रकाशः ॥
अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । कषा-
यत्वम् । पित्तज्वरकासदाहवान्तिकफनाशित्वम् ।
दीपनत्वञ्च । इति राजनिर्घण्टः ॥ स्निग्धत्वम् ।
तृष्यत्वम् । मूत्रलत्वम् । लघुत्वम् । तिक्तत्वम् ।
कटुत्वम् । वीर्य्योष्णकारित्वम् । पाचनत्वम् । रोच-
नत्वम् । ग्राहित्वम् । स्वादुपाकित्वम् । त्रिदोष-
दाहश्वासार्शःक्रिमिनाशित्वञ्च ॥
"आर्द्रन्तु तद्गुणं स्वादु विशेषात् पित्तनाशनम् ॥"
इति भावप्रकाशः ॥
"शिलायां साधु संपिष्टं धान्यकं वस्त्रगालितम् ।
शर्करोदकसंमिश्रं कर्पूरादिसुसंस्कृतम् ॥
नवीने मृण्मये पात्रे स्थितं पित्तहरं परम् ॥"
राजनिर्घण्टः ॥
धन्व, [न्] क्ली, (धन्वति गम्यते दुर्गमादिस्थले-
ऽनेनेति । धन्व गतौ सौत्रो धातुः+कनिन् ।)
धनुः । (धन्वति गम्यतेऽत्र इति ।) स्थलम् ।
इति मेदिनी । ने, ७८ ॥ (यथा,—
"चरोऽनूपजलाकाशधन्वाद्यो भवसंविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः ।
लघुभक्ष्यास्तु लघवो धन्वजा धन्वचारिणः ॥"
इति चरके सूत्रस्थाने २७ अ. ।)
धन्वं, स्त्री, (धन्वतीति । धन्व गत्यां+"उख्यादयश्च ।"
उणां ४ । ५४ । इति यत्प्रत्ययेन निपातनात्
साधु ।) धनुः । इत्यमरटीकायां भरतः ॥
(यथा, महाभारते । ७ । २०० । ८३ ।
"धनुर्धराय देवाय प्रियधन्वाय धन्विने ।
धन्वन्तराय धनुषे धन्वाचार्य्याय ते नमः ॥")
धन्वनः, पुं, (धन्वेव वृक्ष इव यस्य ।) धन्वन-
वृक्षः । इति भावप्रकाशः ॥ धामिनी इति
हिन्दी भाषा । तत्पर्य्यायगुणाः ।
"धन्वनस्तु धनुर्वृक्षो गोत्रवृक्षः सुतेजनः ।
धन्वनः कफपित्तास्रकासघ्नस्तुवरो लघुः ।
द धन्वो धन्वजाङ्गलपित्तदृग्दाहरोगमयः ॥"
इति भावप्रकाशः ॥
पुस्तकान्तरे धन्वनोऽपि पाठः ॥
धन्वदुर्गं, क्ली, (धन्वना निर्जलप्रदेशेन वेष्टितं
दुर्गम् ।) चतुर्दिक्षु सर्व्वतोदिक्तयोजनपरि-
मितमरुदेशत्वम् । निर्जलदेशः । इति महा-
भारते राजधर्मः ॥ (यथा, मनुः । ७ । ७० ।
"धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥")
धन्वन, पुं, (धन्वति उद्दर्त्तं गच्छतीति । धन्व गतौ
सौत्रधातुः+क्युः ।) वृक्षविशेषः । इति रत्न-
माला ॥ धामनि इति भाषा । (यथा, रामा-
यणे । २ । ९४ । ९ ।
"भल्लातामलकैर्नीपैर्वेत्रधन्वनबीजकैः ॥")
तत्पर्य्यायः । रक्तकुसुमः २ धनुर्वृक्षः ३ महा-
बलः ४ इत्वासः ५ पिच्छिलकः ६ कच्छादु-
फलः ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् ।
कषायत्वम् । कफनाशित्वम् । दाहशोषकरत्वम् ।
ग्राहित्वम् । कण्ठामयशमनत्वञ्च । इति राज-
निर्घण्टः ॥ (फले, क्ली । यथा, महाभारते ।
३ । १९९ । २३ ।
"कल्याकायोदुदधन्वनानि
पिप्पलानां कामकारं कुरुष्व ।")
धन्वन्तरिः, पुं, (धनुरुपलक्षणत्वात् शल्यादि-
चिकित्साशास्त्रं तस्य अन्तं पारमृच्छतीति ।
ऋ गतौ+"अच इः ।" उणां ४ । १३८ । इति
इः ।) देववैद्यः । स भगवदवतारः । यथा,—
"धन्वन्तरिश्च भगवान् स्वयमेव कीर्त्ति-
र्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुन्ध
आयुष्यवेदमनुशास्त्यवतीर्य्य लोके ॥
स वै भगवतः साक्षात् विष्णोरंशांशसम्भवः ।
धन्वन्तरिरिति ख्यात आयुर्व्वेददृगिज्यभाक् ॥"
इति श्रीभागवतम् ॥
"नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान् ।
पुरा समुद्रमथने समुत्तस्थौ महोदधेः ॥
सर्व्ववेदेषु निष्णातो मन्त्रतन्त्रविशारदः ।
शिष्यो हि वैनतेयस्य शङ्करस्योपशिष्यकः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५१ अध्यायः ॥

अथच। "काशस्य काशिराजः तस्य दीर्घतमाः पुत्त्रोऽभूत्। धन्वन्तरिस्तु दीर्घतमसोऽभूत्। न हि संसिद्धकार्य्यकरणः सकलसम्भूतिष्वशेषज्ञानवित्। भगवता नारायणेन चातीतसम्भूतौ तस्मै वरो दत्तः। काशिराजगोत्रेऽवतीर्य्य त्वमष्टधा सम्यगायुर्व्वेदं करिष्यसि। यज्ञभाक् त्वं भविष्यसीति। तस्य च धन्वन्तरेः पुत्त्रः केतुमान् केतुमतो भीमरथः। तस्यापि दिवोदासः।" इति विष्णुपुराणम्।४।८।२-५॥ अस्यार्थः।"संसिद्धकार्य्यकरणं जरादिरहितदेहेन्द्रियः। सयतदेहेन्द्रिय इति वा। सकलसम्भूतिषु सर्व्वेष्वपि जन्मसु। अशेषज्ञानवित् सर्व्वशास्त्रवित्। अतीतसम्भूतौ क्षीराब्धौ जन्मनि। अष्टधा अष्टाङ्गमायुर्व्वेदम् तदुक्तं लघुवाग्भटे। कायबालग्रहोर्द्धाङ्गशल्यदंष्ट्राजराविषम्। अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संस्थितेति।" इति तट्टीकायां स्वामी॥ * ॥ दिवोदासः। इति त्रिकाण्डशेषः॥ (धन्वन्तरिप्रादुर्भावो यथा,

"एकदा देवराजस्य दृष्टिर्निपतिता भुवि।
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीड़िताः॥
तान् दृष्ट्वा हृदयन्तस्य दयया परिपीड़ितम्।
दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह॥
धन्वन्तरे। सुरश्रेष्ठ। भगवन्। किञ्चिदुच्यते।
योग्यो भवसि भूतानामुपकारपरो भव॥
उपकाराय लोकानां केन किन्न कृतं पुरा।
त्रैलोक्याधिपतिर्विष्णुरभूम्मत्स्यादिरूपवान्॥
तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव।
प्रतीकाराय रोगाणामायुर्व्वेदं प्रकाशय॥
इत्युक्ता सुरशार्द्दूलः सर्व्वभूतहितेप्सया।
समस्तमायुषो वेदं धन्वन्तरिमुपादिशत्॥
अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा।
आगत्य पृथिवीं काश्यांजातो बाहुजवेश्मनि।
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ।
बाल एव विरक्तोऽभूच्चचार समहत्तपः॥
यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्।
ततो धन्वन्तरिर्लोके काशीराजोऽभिधीयते॥
हिताय देहिनां स्वीयां संहितां विहितात्मना।
अयं विद्यार्थिनो लोकान् संहितान्तामपाठयत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) विक्रमादित्यराजस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"

इति नवरत्नम्॥

(धनोर्धनुर्व्वेदस्य अन्तमृच्छतीति। महादेवः। यथा, महाभारते। १३।१७।१०३।

"धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा॥")

धन्वन्तरियष्टा, स्त्री, (धन्वन्तरिणा यष्टा।) कटुकी। इति शब्दचन्द्रिका॥

धन्वयवासः, पु, (धन्वदेशोद्भवो यवासः।) दुरालभा। इत्यमरटीकायां भरतः॥ (दुरालभाशब्देऽस्य विवरणं ज्ञातव्यम्॥)

धन्वयवासकः, पु, (धन्वयवास+स्वार्थे कन्।) दुरालभा। इति राजनिर्घण्टः॥

धन्वयासः, पु, (धन्वदेशोद्भवो यासः यवासः।) दुरालभा। इत्यमरः।२।४।९१॥

धन्वा, [न्] पु, (धन्वति जलाभावं गच्छतीति। धन्व+"कनिन् युवृषीति।" उणा १।१५६। इति कनिन्।) मरुदेशः। इत्यमरः।२।१।५॥ (यथा, ऋग्वेदे।६।३४।४।

"जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः॥"

अन्तरिक्षम्। स्रवणात् उदकमपि। यथा, ऋग्वेदे।१।१६८।५।

"धन्वच्युत इषां न यामनि पुरुप्रेषा अहन्योनैतशः॥"

"धन्वच्युतो न धन्वनृशब्दोऽन्तरिक्षस्य वचनः तेन ततस्त्रुतमुदकं लक्ष्यते उदकस्राविणो मेघा इव।" इति तद्भाष्ये सायनः॥)

धन्वी, [न्] त्रि, (धनुरस्यास्तीति। व्रीह्यादित्वात् इनिः।) धनुर्धरः। इत्यमरः।२।८।६९॥ (यथा, कुमारे।३।१०।

"कुर्य्यां हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये॥")

विदग्धः। इति विश्वः॥

धन्वी, [न्] पुं, (धन्वमस्त्यस्येति। धन्व+इनिः।) दुरालभा। अर्ज्जुनवृक्षः। (अस्य पर्य्यायो यथा,—

"धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्ज्जुनः।"

इति वैद्यकरत्नमालायाम्॥)

वकुलः। इति राजनिर्घण्टः॥ पार्थः। इति विश्वः॥ (विष्णुः। यथा, महाभारते।१३।१४९।२२।

"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः॥"

महादेवः। यथा, तत्रैव।१३।१७।४२।

"कमण्डलुधरो धन्वी बाणहस्तः कपालवान्॥"

तामसमनोः पुत्त्रविशेषः। यथा, हरिवंशे।७।२४।

"तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः।
तामसस्य मनोरेते दश पुत्रा महाबलाः॥")

धम, ध्माने। ध्वाने। इति कविकल्पद्रुमः॥ (भ्वा-पर-अकं-सेट्।) धमति। सौत्रधातुरयम्। इति दुर्गादासः॥

धमः, त्रि, (धमतीति। धम+अच्।) अग्निसंयोगकर्त्ता। शब्दकर्त्ता। इति धमधातोः पचादित्वादच्प्रत्ययेन साध्यः॥

धमकः, पु, (धमतीति। ध्मा शब्दाग्निसंयोगयोः+"ध्मो धम च।" उणा २।३५। इति क्वुन् धमादेशश्च।) कर्म्मकारः। इत्युणादिकोषः॥

धमनः, पु, (धम्यतेऽग्निरनेनेति। धम+करणे ल्युट्।) नलः। इत्यमरः।२।४।१६२॥ (अस्य पर्य्यायो यथा,—

"नलः पोटगलः शून्यमध्यश्च धमनस्तथा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

धमतीति। धम+ल्युः।) भस्त्राध्मापके क्रूरे च त्रि। इति मेदिनी। ने, ७८॥

धमनिः, स्त्री, (धम्यते इति। धम+"अर्त्तिसृधृधमीति।" उणा २।१०३। इति अनिः।) धमनी। इति शब्दरत्नावली॥ (यथा, अथर्व्ववेदे।६।९०।२।

"यास्ते शतं धमनयोऽङ्गान्यनु विष्ठिताः॥"

प्रह्रादभ्रातुर्ह्रादस्य पत्नी। सा तु वातापिरिल्वलस्य च जननी। यथा, भागवते।६।१८।१५।

"ह्रादस्य धमनिर्भार्य्यासूत वातापिरिल्वलम्॥"

धमतिर्गतिकर्म्मा। गत्यर्था बुद्ध्यर्थाः। गम्यते ज्ञायतेऽर्थोऽनया। ज्ञायते वा विद्वद्भिः साध्वसाधुविभागेन। यद्वा, 'धमति' इति वधकर्म्मस्वपि पठ्यते धमति हन्त्यनया शापाक्रोशादिरूपयेति। वाक्। शब्दः। इति निघण्टु।१।११॥ यथा, ऋग्वेदे।२।११।८।

"दूरे पारे वाणीं वर्धयन्त
इन्द्रेषिता धमनिं पप्रथन्नि॥")

धमनी, स्त्री, (धमनि+वा ङीष्।) नाड़ी। (यथा, महाभारते।१२।२१४।१७।

"दश विद्यात् धमन्योऽत्र पञ्चेन्द्रियगुणावहाः।
याभिः सूक्ष्माः प्रतायन्ते धमन्योऽन्याः सहस्रशः॥"

यथा,—

"ओजोवहाः शरीरे वा विधम्यन्ते समन्ततः।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः॥
यदृते सर्व्वभूतानां जीवितं नावतिष्ठते।
यत्सारमादौ गर्भस्य यौऽसौ गर्भरसाद्रसः॥
संवर्त्तमानं हृदयं समाविशति यत् पुरा।
यस्य नाशात्तु नाशोऽस्ति धारि यद्धृदयाश्रितम्॥
यच्छरीररसं देहः प्राणा यत्र प्रतिष्ठिताः।
तत्फला विविधा वाताः फलन्तीति महाफलाः॥
ध्मानाद्धमन्यः स्रवणात् स्रोतांसि सरणात्
शिराः॥"

इति चरके सूत्रस्थाने त्रिंशेऽध्याये॥

"चतुर्व्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः। तत्र केचिदाहुः शिरा धमनी स्रोतसामविभागः शिराविकारा एव धमन्यः स्रोतांसि चेति। तत्तु न सम्यक्। अन्या एव हि धमन्यः स्रोतांसि च शिराभ्यः कस्माद्व्यञ्जनान्यत्वान्मूलसन्नियमात् कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् सदृशागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मणामप्यविभाग इव कर्म्मसु भवति॥ तासान्तु नाभिप्रभवानां धमनीनामूर्द्धगा दश दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः। ऊर्द्धगाः शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुद्धसितकथितरुदितादीन्विशेषानभिवहन्त्यः शरीरं धारयन्ति। तास्तु हृदयमभिप्रपन्नास्त्रिधा

जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफ-शोणितरसान् द्वे द्वे वहतस्ता दश शब्दरूपरस-गन्धानष्टाभिर्गृह्णीते। द्वाभ्यां भाषते च द्वाभ्यां घोषं करोति द्वाभ्यां स्वपिति द्वाभ्यां प्रतिबुध्यते द्वे चाश्रुवाहिन्यौ। द्वे स्तन्यं स्त्रिया वहतः स्तनसंश्रिते। ते एव शुक्रं नरस्य स्तनाभ्यामभि-वहतः। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याता एताभिरूर्द्धं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवा-बाहवो धार्य्यन्ते याप्यन्ते च॥"

"अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तास्तु पित्ताशयमभिप्रतिपन्नास्तत्रस्थ-मेवान्नपानरसं विपक्वमौष्ण्याद्विवेचयन्त्योऽभि-वहन्त्यः शरीरं तर्पयन्त्यर्पयन्ति चोर्द्ध्वगतानां तिर्य्यग्गतानां रसस्थानञ्चाभिपूरयन्ति मूत्रपुरीष-स्वेदांश्च विरेचयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफ-शोणितरसान् द्वे द्वे वहतस्ता दश द्वे अन्न-वाहिन्यावन्त्राश्रिते तोयवहे द्वे मूत्रवस्तिमभि-प्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभिवहतो नारीणा-मार्त्तवसञ्ज्ञम्। द्वे वर्च्चो निरसन्यौ स्थूलान्त्रप्रति-बद्धे। अष्टावन्यास्तिर्य्यग्गानां धमनीनां स्वेदमर्प-यन्ति। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याता एताभिरधोनाभेः पक्वाशयकटीमूत्रपुरीषगुद-वस्तिमेढ्रसक्थीनि धार्य्यन्ते याप्यन्ते च॥"

"तिर्य्यग्गानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्त्वसंख्येया-स्ताभिरिदं शरीरं गवाक्षितं विबद्धमाततञ्च। तासां मुखानि रोमकूपप्रतिबद्धानि यैः स्वेद-मभिवहन्ति रसञ्चापि सन्तर्पयन्त्यन्तर्बहिश्च तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याण्यन्तः शरीरमभिप्रतिपद्यन्ते त्वचि विपक्वानि तैरेव स्पर्शं सुखमसुखं वा गृह्णाति। तास्त्वेताश्चतस्रो धमन्यः सर्व्वाङ्गगताः सविभागा व्याख्याताः॥"

इति सुश्रुते शरीरस्थाने नवमेऽध्याये॥ *॥)

हट्टविलासिनी। इत्यमरः॥ हरिद्रा। ग्रीवा। इति हेमचन्द्रः। ३। २६५॥ पृश्निपर्णी। इति राजनिर्घण्टः॥ नलिका। इति भावप्रकाशः॥

धम्मिल्लः, पुं, (धमतीति। धम+क्विप्। मिल-तीति। मिल+कः। पृषोदरादित्वात् साधुः। ततः कर्म्मधारयः।) संयताः कचाः। इत्य-मरः। २।६।९७॥ खोपा इति भाषा। कुसुम-गर्भो मौक्तिकपद्मरागलतिकादिना बहिःसंयतो बद्धः केशकलापः। इति भरतः॥ (यथा, गीत-गोविन्दे। २। २१।

"साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-भ्रूवल्लीकमलीकदर्शितभुजावालाङ्गहस्तस्तनम्॥")

धरः, पुं, (धरति पृथिवीमिति। धृ+अच्।) पर्व्वतः। (यथा, माघे। ४। १८।

"उत्तुङ्गं धरं द्रष्टुमवेक्ष्य शौरिम्
उत्कन्धरं दारुक इत्युवाच॥")

कार्पासतूलकः। कूर्म्मराजः। वसुभेदः। इति मेदिनी। रे, ४८॥ (यथा, हरिवंशे। ३। ३६।

"आपो ध्रुवश्च सोमश्च धरश्चैवानिलानलौ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः॥"

महादेवः। यथा, महाभारते।१३।१७।१०३।

"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः॥"

विष्णुः। श्रीकृष्णः। यथा, तत्रैव।६।६३।३३।

"सर्व्वशोकमयो नित्यः शास्ता धाता धरो ध्रुवः॥"

धारके, त्रि॥ यथा, काकपक्षधरः॥)

धरणं, क्ली, (धरतीति। धृ+ल्युः।) मानभेदः। स तु चतुर्विंशतिरक्तिकारूपः। इति लीला-वती॥ पलदशमांशः। इति वैद्यकम्॥ ("अथ सध्यमनिष्पावा वा एकोनविंशतिर्धरणम्॥"

इति सुश्रुते चिकित्सितस्थाने ३१ अः॥

धृ+ल्युट्।) धारणम्। इति मेदिनी। णे, ५४॥ (यथा, कुमारे। १। १७।

"यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च॥")

धरणः, पुं, (धृ+ल्युः।) अद्रिपतिः। लोकः। स्तनः। धान्यम्। दिवाकरः। इति हेमचन्द्रः॥ सेतुः। इति त्रिकाण्डशेषः॥ (वैद्यकमानविशेषः। यथा, पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम्।

"माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते॥")

धरणिः, स्त्री, (धरति जीवादीनिति। धृ+"अर्त्ति-सृधृधमीति।" उणा २।१०२। इति अनि।) पृथिवी। इत्यमरः। २। १। २॥ (यथा, महाभारते। १२। ३४२। ४।

"ज्योतिर्धरणिवायुरहिते अन्धे तमसि जलैकार्णवे लोके॥")

धरणिधरः, पुं, (धरतीति। धृ+अच्। धरण्या धरः।) विष्णुः। इति हलायुधः॥ (कच्छपः। पर्व्वतः। शेषः। इति व्युत्पत्तिलब्धोऽर्थः॥)

धरणी, स्त्री, (धरणि+वा ङीष्।) पृथिवी। इति मेदिनी। णे, ५४॥ (यथा, विष्णुपुराणे। १। ९। १४१।

"यदा तु भार्गवो रामस्तदाभूद्धरणीत्वियम्॥")

शाल्मलिवृक्षः। इति शब्दचन्द्रिका॥ नाड़ी। कन्दविशेषः। तत्पर्य्यायः। धारणीया २ क्षीर-पत्री ३ सुकन्दकः ४ कन्दालुः ५ वनकन्दः ६ कन्दाढ्यः ७ दण्डकन्दकः ८। अस्या गुणाः। मधुरत्वम्। कफपित्तामयरक्तदोषकुष्ठकण्डूति-नाशित्वञ्च। इति राजनिर्घण्टः॥

धरणीकन्दः, पुं, (धरणी एव कन्दः।) धरणी-नामभूलविशेषः। इति राजनिर्घण्टः॥

धरणीकीलकः, पुं, (धरण्याः पृथिव्याः कीलक इव।) पर्व्वतः। इति शब्दरत्नावली॥

धरणीधरः, पुं, (धरण्या धरः।) विष्णुः। इति हेमचन्द्रः। २। १३१॥ (यथा, महाभारते। १३। १४९। ३८।

"अहः संवर्त्तको वह्निरनिलो धरणीधरः॥")

कच्छपः। इति राजनिर्घण्टः॥ पर्व्वतः। यथा, "यो जातो धरणीधरेन्द्रतनयानाथाङ्घ्रिपाथोरुहा-सक्तः।" इत्यादि गोपीनाथतर्काचार्य्यः॥ (पृथिवी-धारके, त्रि। यथा, हरिवंशे। ५३। ६८।

"देवानचोदयद्ब्रह्मा निग्रहार्थं सुरद्विषाम्।
नरश्चैव पुराणर्षिं शेषञ्च धरणीधरम्॥")

धरणीपूरः, पुं, (धरणीं पूरयति प्लावयतीति। पूर+अण्।) समुद्रः। इति शब्दरत्नावली॥

धरणीप्लवः, पुं, (प्लु+भावे अप्। धरण्याः पृथिव्याः प्लवः प्लावो यस्मात्।) समुद्रः। इति त्रिकाण्डशेषः॥

धरणीश्वरः, पुं, (धरण्या ईश्वरः।) शिवः। इति शब्दरत्नावली॥

धरणीसुता, स्त्री, (धरण्याः सुता।) सीता। इति हेमचन्द्रः। ३। ३६७॥ (एतदुत्पत्तिकथा यथा कालिकापुराणे ३७ अध्याये।

"नारदस्योपदेशेन यज्ञभूमिं ततो नृपः।
हलेन दारयामास यज्ञवाटावधिं स्वयम्॥
तद्भूमिजातसीतायां शुभां कन्यां समुत्थिताम्।
लेभे राजा मुदा युक्तः सर्व्वलक्षणसंयुताम्॥
तस्यान्तु जातमात्रायां पृथिव्यन्तर्हिता स्वयम्।
जगाद वचनञ्चेदं गौतमं नारदं नृपम्॥—
पृथिव्युवाच।
एषा सुता मया दत्ता तव राजन्! मनोहरा।
एनां गृहाण सुभगां कुलद्वयशुभावहाम्॥")

धरा, स्त्री, (धरति जीवजातानिति। धृ+अच्। यद्वा, ध्रियते शेषेण इति। धृ+अप्। टाप्।) पृथिवी। इत्यमरः। २। १। २॥ (यथा, देवी-भागवते। ३। १३। ८।

"धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")

गर्भाशयः। मेदः। इति मेदिनी। रे, ४९॥ नाड़ी। इति राजनिर्घण्टः॥ महादानविशेषः। तद्यथा,—

"अथातः संप्रवक्ष्यामि धरादानमनुत्तमम्।
पापक्षयकरं नृणाममङ्गल्यविनाशनम्॥
कारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीम्।
मर्य्यादापर्व्वतवतीं मध्ये मेरुसमन्विताम्॥
लोकपालाष्टकोपेतां नववर्षसमन्विताम्।
नदीनदशतोपेतां सप्तसागरवेष्टिताम्॥
महारत्नसमाकीर्णां वसुरुद्रार्कसंयुताम्।
हेम्नः पलसहस्रेण तदर्द्धेनाथ शक्तितः।
शतत्रयेण वा कुर्य्यात् द्विशतेन शतेन वा।
कुर्य्यात् पञ्चपलादूर्द्धमशक्तोऽपि विचक्षणः॥
तुलापुरुषवत् कुर्य्याल्लोकेशावाहनं बुधः।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्॥
वेद्यां कृष्णाजिनं कृत्वा तिलानुपरि विन्यसेत्।
तथाष्टादशधान्यानि रसांश्च लवणादयः॥
तथाष्टौ पूर्णकलसान् समन्तात् परिकल्पयेत्।
वितानकञ्च कौशेयं फलानि विविधानि च॥
तथांशुकानि रम्याणि श्रीखण्डशकलानि च।
इत्येवं रचयित्वा तामधिवासनपूर्व्वकम्॥
शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः।
प्रदक्षिणं ततः कृत्वा गृहीतकुसुमाञ्जलिः॥
पुण्यं कालमथासाद्य मन्त्रानेतानुदीरयेत्।
नमस्ते सर्व्वदेवानां त्वमेव भवनं यतः॥
धात्री च सर्व्वभूतानामतः पाहि वसुन्धरे!।

यस्त्वं धारयसे यस्माद्वसुधातीव निर्म्मला ॥
वसुन्धरा ततो जाता तस्मात् पाहि भवार्णवात् ।
चतुर्मुखोऽपि नागच्छेत्तस्माद्यन्त तवाचले ॥
अनन्तायै नमस्तस्मात् पाहि संसारकर्द्दमात् ।
त्वमेव लक्ष्मीर्गोविन्दे शिवे गौरीति संस्थिता ॥
गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा ।
बुद्धिर्बृहस्पतौ ख्याता मेधा मुनिषु संस्थिता ॥
विश्वं व्याप्य स्थिता यस्मात्ततो विश्वम्भरा स्थिता ।
धृतिः क्षमा स्थिरा चौणी पृथ्वी वसुमती रसा ॥
एताभिर्मूर्त्तिभिः पाहि देवि । संसारकर्द्दमात् ।
एवमुच्चार्य्य तां देवीं ब्राह्मणेभ्यो निवेदयेत् ॥
धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत् ।
शेषञ्चैवाथ ऋत्विग्भ्यः प्रणिपत्य विसर्ज्जयेत् ॥
अनेन विधिना यस्तु दद्याद्देवीं धरां बुधः ।
पुण्यकाले तु संप्राप्ते स पदं याति वैष्णवम् ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
नारायणपुरं गत्वा कल्पत्रयमथो वसेत् ॥
पितृपुत्त्रप्रपौत्त्रांश्च तारयेदेकविंशतिम् ॥
इति पठति य इत्थं यः शृणोतीह नित्यं
गतकलुषविमानैर्मुक्तदेहः समन्तात् ।
दिवममरवधूभिर्याति संप्रार्थ्यमानः
पुरममरसहस्रैः सेवितं चन्द्रमौलेः ॥"

इति मत्स्यपुराणे २५८ अः ॥

धराकदम्बः, पुं, (धरायां वर्षाकाले जातः कदम्बः ।) धाराकदम्बवृक्षः । इति हारावली । १७७ ॥

धरात्मजः, पु, (धराया आत्मजः ।) मङ्गलग्रहः । इति हेमचन्द्रः ॥ (नरकासुरः । इति कालिका पुराणे ३७ अध्यायः ॥ स्त्रियां टाप् । सीता ॥)

धराधरः, पु, (धरायाः धरो धारकः ।) विष्णुः । (यथा, महाभारते । १३ । १४९ । ६३ ।
"सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥"
"अङ्गैरशेषैः शेषादिरशेषां धरां धरतीति धराधरः ।" इति शाङ्करभाष्यम् ॥) पर्व्वतः । इति मेदिनी । रे, २६९ ॥ (यथा, हरिवंशे । २०४ । २१ ।
"चराचराश्च वसुधा धातारश्च धराधराः ॥"
धराया उद्धारकर्त्तरि, त्रि । यथा, भागवते । ४ । १७ । ३५ ।
"स वीरमूर्त्तिः समभूद्धराधरो
यो मां पयस्युग्रशरो जिघांससि ॥")

धरामरः, पु, (धरायाः पृथिव्या अमरो देवः ।) ब्राह्मणः । यथा,—
"येन श्रुतं भागवतं पुराणं
नाराधितो यैः पुरुषः पुराणः ।
मुखे हुतं यैर्न धरामराणां
तेषां वृथा जन्म नराधमानाम् ॥"

इति पौराणिकाः ॥

धरित्री, स्त्री, (धरति जीवजातमिति ध्रियते शेषेण वा । धृ + "अर्त्तिलूधूसूखनसहचर इत्रः ।" उणां ४।१७२। इति इत्र । गौरादित्वात् ङीष् ।) पृथिवी । इत्यमरः । २ । १ । २ ॥ (यथा, रघुः । १४ । ५४ ।
"स्वमूर्त्तिलाभप्रकृतिं धरित्रीं
लतेव सीता सहसा जगाम ॥")

धरिमा, [न्] पु, (ध्रियते दृश्यतेऽनेनेति । धृ + "हृभृधृसृस्तृशृभ्य इमनिच् ।" उणां ४ । १४७। इति इमनिच् ।) रूपम् । इत्युणादिकोषः ॥ तुला । यथा, मनुः । ८ । ३२१ ।
"तथा धरिममेयानां शतादभ्यधिके वधः ॥"

धरुणः, पुं, (धरतीति । धृ + बाहुलकात् उनन् । "धृञ् धारणे । हेतुमति च इति णिच् । धारेर्णिलुक् क्युन्प्रत्ययः । धारयति जगत् ।" इति देवराजयज्वा । १ । १२ । २४ ।) ब्रह्मा । स्वर्गः । नीरम् । (निघण्टुमते, क्ली । यथा, ऋग्वेदे । १० । ५ । ६ ।
"पथां विसर्गे धरुणेषु तस्थौ ॥")
सम्मतम् । इति मेदिनी । णे, ५५ ॥ (अग्नि. । यथा, वाजसनेयसंहितायाम् । ८ । ५१ ।
"उपहूतनृधरुणं मात्रे धरुणो मातरं धयन् ॥"
धारके, त्रि । यथा, ऋग्वेदे । १० । १११ । ४ ।
"दाधार यो धरुणं सत्यताता ॥"
"सत्ये द्युलोके धरुणं धारकं बलं दाधार अधारयत् ।" इति तद्भाष्ये सायनः ॥)

धर्त्तव्यं, त्रि, धृधातोः कर्म्मणि तव्यप्रत्ययेन साध्यम् । धारणीयम् । स्थातव्यम् । पतनीयम् । भावे, क्ली ॥

धर्त्रं, क्ली, (धरति ध्रियते वा । धृ + "गुधृवीपचीति ।" उणां ४ । १६६ । इति त्रः ।) गृहम् । इत्युणादिकोषः ॥ क्रतु. । धर्म्मः । इति संक्षिप्तसारोणादिवृत्ति. ॥ (धारके, त्रि । यथा, वाजसनेयसंहितायाम् । १ । १८ ।
"धर्त्रमसि दिवं दृंह ब्रह्मवनि वधाय ।"
"हे कपाल । त्वं धर्त्रं धारकमसि ।" इति वेददीपः ॥)

धर्म्म , पु क्ली, (धरति लोकान् ध्रियते पुण्यात्मभिरिति वा । धृ + "अर्त्तिस्तुहुसृ इति ।" उणां १ । १३९ । इति मन् ।) शुभादृष्टम् । (यथा, हितोपदेशे । १ । ५९ ।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति ॥")
तत्पर्य्यायः । पुण्यम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ न्यायः । स्वभाव. । आचारः । उपमा । क्रतुः । (यथा, महाभारते । १४ । ८८ । २१ ।
"कृत्वा प्रवर्ग्यं धर्म्माख्यं यथावत् द्विजसत्तमाः ।
चक्रुस्ते विधिवद्राजंस्तथैवाभिषवं द्विजाः ॥")
अहिंसा । उपनिषत् । इति मेदिनी । मे, १६ । दानादिके, क्ली । इति हेमचन्द्र. ॥ (यथा, योगसारे ।
"प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
स्मरणञ्चैव योगेऽस्मिन् पञ्च धर्म्माः प्रकीर्त्तिताः ॥")

धर्म्मः, पु, (धृ + मन् ।) धनुः । यमः । सोमपः । इति मेदिनी । मे, १६ ॥ सत्सङ्गः । अर्हन् । इति हेमचन्द्रः । ६ । १५ ॥ देवताविशेषः । स ब्रह्मणो दक्षिणस्तनाज्जातः । (यथा, मत्स्यपुराणे । ३ । १० ।
"अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत ।
धर्म्मस्तनान्तादभवत् हृदयात् कुसुमायुधः ॥")
तस्य भार्य्या दक्षस्य त्रयोदशकन्याः । तस्य चतुर्द्दशापत्यानि यथा । पत्न्यां श्रद्धायां ऋतम् १ मैत्र्यां प्रसादः २ दयाया अभयम् ३ शान्त्या सुखम् ४ तुष्ट्यां मुतं ५ पुष्ट्यां गर्व्वः ६ क्रियायां योगः ७ उन्नतौ दर्पः ८ बुद्ध्यां अर्थः ९ मेधायां स्मृतिः १० मूर्त्त्यां नरनारायणौ ११ । १२ तितिक्षायां क्षेमम् १३ ह्रीसंज्ञायां प्रश्रयः १४ । इति श्रीभागवतम् ॥ * ॥ अपि च ।
"श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रिया ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी ।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥"
विष्णुपुराणमते सिद्धिस्थाने ऋद्धिरन्यत् तुल्यम् ॥ तासामपत्यानि यथा —
"श्रद्धा कामञ्च श्रीर्दर्पं नियमं धृतिरात्मजम् ।
सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरसूयत ॥
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ॥
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ।
सुखं सिद्धिर्यशः कीर्त्तिरित्येते धर्म्मसूनवः ॥
कामो नन्दी सुतं हर्षं धर्म्मपौत्त्रमसूयत ॥" * ॥
अधर्म्मवंशो यथा, मार्कण्डेयपुराणे ।
"हिंसा भार्य्या त्वधर्म्मस्य तस्यां जज्ञे तथानृतम् ।
कन्या च निकृतिस्ताभ्यां सुतौ द्वौ नरकं भयम् ॥
माया च वेदना चैव मिथुनं द्वयमेतयोः ।
भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥
वेदना स्वसुतञ्चापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधिर्जराशोकतृष्णाः क्रोधश्च जज्ञिरे ॥
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ।
नैषां भार्य्यास्ति पुत्त्रो वा सर्व्वे ते ह्यूर्द्ध्वरेतसः ॥"
धर्म्मोत्पत्तिर्यथा, वराहपुराणे ।
"अथोत्पत्तिं प्रवक्ष्यामि धर्म्मस्य महतो नृप ।
माहात्म्यञ्च तिथिञ्चैव तन्निबोध नराधिप ॥
सर्व्वं ब्रह्माव्ययः शुद्धपरादपरसंज्ञितः ।
स सिसृक्षुः प्रजास्त्वादौ पालनञ्च व्यचिन्तयत् ॥
तस्य चिन्तयतस्त्वङ्गाद्दक्षिणाच्छ्वेतकुण्डलः ।
प्रादुर्बभूव पुरुषः श्वेतमाल्यानुलेपनः ॥
तं दृष्ट्वोवाच भगवांश्चतुष्पात् स्यात् कृते युगे ।
त्रेतायां त्रिपदश्चासौ द्विपदो द्वापरेऽभवत् ॥
कलावेकेन पादेन प्रजाः पालयते प्रभुः ।
षड्गेहो ब्राह्मणानां स त्रिधा क्षत्त्रे व्यवस्थितः ॥
द्विधा विश्येकधा शूद्रे स्थितः सर्व्वगतः प्रभुः ।
गुणद्रव्यक्रियाजातिचतुष्पादः प्रकीर्त्तितः ॥
त्रिशृङ्गोऽसौ स्मृतो वेदे ससंहितपदक्रमः ।
तथा आद्यन्त ओङ्कारद्विशिराः सप्तहस्तवान् ॥
उदात्तादित्रिभिर्बद्ध एव धर्म्मो व्यवस्थितः ॥
ब्रह्मोवाच ।
अद्यप्रभृति ते धर्म्म । तिथिरस्तु त्रयोदशी ॥
यस्तामुपोष्य पुरुषो भवन्तं समुपार्ज्जयेत् ।
कृत्वा पापसमाचारं तस्मान्मुच्यति मानवः ॥"
तस्य पुत्त्रा यथा, वामनपुराणे ।

"धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्त्रचतुष्टयम्।
सम्प्राप्तं मुनिशार्दूल। योगशास्त्रविचारकम्॥
ज्येष्ठः सनत्कुमारोऽभूद्‌द्वितीयश्च सनातनः।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम्।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्॥
ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपि कनीयसाम्॥"
(चतुर्द्दशद्वापरे वेदव्यासनारायणमेव व्यास आसीत्। यथा, देवीभागवते। १। ३। २८।
"त्रयोदशे चान्तरिक्षो धर्म्मश्चापि चतुर्द्दशे॥"
यथा, च ब्रह्माण्डे। २७ अध्याये।
"धर्म्मो नारायणो नाम व्यासस्तु भविता यदा।
तदाप्यहं भविष्यामि भविष्यामि महामुनिः॥
बालखिल्याश्रमे पुण्ये पर्व्वते गन्धमादने।
तत्रापि मम ते पुत्त्रा भविष्यन्ति तपोधनाः॥
सुधामा काश्यपश्चैव कनिष्ठा विरजास्तथा।
मम योगबलोपेता विमना ऊर्द्ध्वरेतसः॥
प्राप्य माहेश्वरं तेजो रुद्रलोकाय संस्थिताः॥"
क्वचित् युगस्य वैपरीत्यकथनन्तु कल्पभेदादविरुद्धमित्यधिगन्तव्यम्॥) धर्म्मलक्षणं यथा,—
"पात्रे दानं मतिः कृष्णे मातापित्रोश्च पूजनम्।
श्रद्धा बलिर्गवां ग्रासः षड्‌विधं धर्म्मलक्षणम्॥"
इति पाद्मोत्तरखण्डम्॥ * ॥
धर्म्माङ्गानि यथा, पाद्मभूमिखण्डे।
"ब्रह्मचर्य्येण सत्येन तपसा च प्रवर्त्तते।
दानेन नियमेनापि क्षमाशौचेन वल्लभ।॥
अहिंसया सुशान्त्या च अस्तेयेनापि वर्त्तते।
एतैर्द्दशभिरङ्गैस्तु धर्म्ममेव प्रसूचयेत्॥"
धर्म्ममूलं यथा, मत्स्यपुराणे।
"अद्रोहश्चाप्यलोभश्च दमो भूतदयातपः।
ब्रह्मचर्य्यं ततः सत्यमनुक्रोशः क्षमा धृतिः।
सनातनस्य धर्म्मस्य मूलमेतदुरासदम्॥"
कलेर्द्दशसहस्रवर्षान्ते धर्म्मादयो हरेः पदं गमिष्यन्ति। यथा,—
"शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम्।
कलेर्द्दशसहस्रान्ते ययौ त्यक्त्वा हरेः पदम्॥
सत्त्वञ्च धर्म्मः सत्यञ्च वेदाश्च ग्रामदेवताः।
व्रतं तपश्चानशनं ययुस्ते सार्द्धमेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ * ॥
धर्म्माधारस्थानानि यथा,—
"यत्र स्थाने तवाधारो वदामि श्रूयतां विभो।।
वैष्णवेषु च सर्व्वेषु यतिषु ब्रह्मचारिषु॥
पतिव्रतासु शान्तेषु वानप्रस्थेषु भिक्षुषु।
नृपेषु धर्म्मशीलेषु सत्सु सद्‌ब्राह्मणातिषु॥
द्विजसेविषु शूद्रेषु सत्सु सर्गास्थितेषु च।
एषु त्वं सन्ततं पूर्णो धर्म्मराज। विराजसे॥
युगे युगे तवाधारा एते पुण्यतमा जनाः॥"
अपि च।
"अश्वत्थवटबिल्वेषु तुलसीचन्दनेषु च।
देवार्च्चेषु च पुण्येषु विद्यमानोऽसि शाखिषु॥
देवालयेषु तीर्थेषु सतां शश्वद्‌गृहेषु च।
वेदवेदाङ्गश्रवणजनेषु च सभासु च॥
श्रीकृष्णगुणनामोक्तश्रुतिगीतस्थलेषु च।
व्रतपूजातपोध्यानयज्ञशालास्थलेषु च॥
दीक्षापरीक्षाशपथगोष्ठगोष्पदभूमिषु।
गवां गृहेषु गोष्ठेषु विद्यमानो हि पश्यसि॥
कुशलं ते न भविता धर्म्मैतेषु स्थलेषु च॥
धर्म्मागम्यस्थानानि यथा,—
"एतदन्येषु कुशलं यदगम्यञ्च तत् शृणु।
पुंश्चलीषु तद्‌गृहेषु गृहेषु नरघातिनाम्॥
नरघातिषु नीचेषु मूर्खेषु च खलेषु च।
देवतागुरुविप्रेषु पात्राणां धनहारिषु॥
चासमरेषु धूर्त्तेषु चौरेषु रतिभूमिषु।
दुरोदरसुरापानकलहानां स्थलेषु च॥
शालग्रामसाधुतीर्थपुराणरहितेषु च।
दस्युग्रस्तेषु देशेषु तालच्छायासु गर्व्विषु॥
असिजीविमसीजीविदेवलग्रामयाजिषु।
वृषवाहस्वर्णकारजीवहिंसोपजीविषु॥
भर्त्तृनिन्दितनारीषु स्त्रीजितेषु च पुंसु च।
दीक्षासन्धिविष्णुभक्तिविहीनेषु द्विजेषु च॥
स्वाङ्गकन्याविक्रयिषु स्वयोषिद्विक्रयिष्वथ।
शालग्रामसुरग्रन्थभूमिविक्रयिषु प्रभो।॥
मित्रद्रोहिकृतघ्नेषु सत्यविश्वासघातिषु।
शरणागतहीनेषु आश्रितघ्नेषु तेषु च॥
शश्वन्मिथ्योक्तिशीलेषु तथा सीमापहारिषु।
कामात्क्रोधात्तथा लोभान्मिथ्यासाक्षिप्रवादिषु॥
पुण्यकर्म्मविहीनेषु पुण्यकर्म्मविरोधिषु।
स्थानमेतेषु निन्द्येषु नाधिकारस्तव प्रभो।॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४२ अध्यायः॥
देवादीनां धर्म्मो यथा,—
सुकेशिरुवाच।
"किंलक्षणो भवेद्धर्म्मः किमाचरणसत्क्रियः।
यमाश्रित्य न सीदन्ति देवाद्यास्तु तदुच्यताम्॥
ऋषय ऊचुः।
देवानां परमो धर्म्मः सदा यज्ञादिकाः क्रियाः।
स्वाध्यायवेदवेत्तृत्वं विष्णुपूजारतिः स्मृतिः॥
दैत्यानां बाहुशालित्वं मात्सर्य्यं युद्धसत्क्रिया।
वेदनं नीतिशास्त्राणां हरभक्तिरुदाहृता॥
सिद्धानामुदितो धर्म्मो योगयुक्तिरनुत्तमा।
स्वाध्यायं ब्रह्मविज्ञानं भक्तिर्द्वाभ्यामपि स्थिरा॥
उत्कृष्टोपासनं ज्ञेयं नृत्यवाद्येषु वादिता।
सरस्वत्यां स्थिरा भक्तिर्गान्धर्व्वो धर्म्म उच्यते॥
विद्याधरत्वमतुलं विज्ञानं पौरुषे मतिः।
विद्याधराणां धर्म्मोऽयं भवान्यां भक्तिरेव च॥
गान्धर्व्वविद्यावेदित्वं भक्तिः सूर्य्ये तथा स्थिरा।
कौशल्यं सर्व्वशिल्पेषु धर्म्मः किम्पुरुषः स्मृतः॥
ब्रह्मचर्य्यममानित्वं योगाभ्यासरतिर्दृढा।
सर्व्वत्र कामचारित्वं धर्म्मोऽयं पैतृकः स्मृतः॥
ब्रह्मचर्य्यं यताशित्वं जप्यज्ञानञ्च राक्षस।।
नियमाद्धर्म्मवेदित्वमार्षं धर्म्मं प्रचक्षते॥
स्वाध्यायं ब्रह्मचर्य्यञ्च दानं यजनमेव च।
अकार्पण्यमनायासं दयाहिंसाक्षमादयः॥
जितेन्द्रियत्वं शौचञ्च माङ्गल्यं भक्तिरच्युते।
शङ्करे भास्करे देव्यां धर्म्मोऽयं मानवः स्मृतः॥
धनाधिपत्यं भोगानि स्वाध्यायं शङ्करार्च्चनम्।
अहङ्कारमशौचञ्च धर्म्मोऽयं गुह्यकेष्विति॥
परदाराभिमर्षित्वं परार्थेऽपि च लोलुपा।
स्वाध्यायस्त्र्यम्बके भक्तिर्धर्म्मोऽयं राक्षसः स्मृतः॥
अविवेकमथाज्ञानं शौचहानिरसत्यता।
पिशाचानामयं धर्म्मः सदा चामिषगृध्नुता॥
योनयस्तु द्वादशैताः सह धर्म्माश्च राक्षस।।
ब्रह्मणा कथिताः पुण्या द्वादशैव गतिप्रदाः॥"
इति वामनपुराणे ११ अध्यायः॥
धर्म्माधर्म्मलक्षणम्। यथा,—
"अहिंसालक्षणो धर्म्मो हिंसा चाधर्म्मलक्षणा॥"
इति महाभारतम्॥
"वेदप्रणिहितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्ययः॥"
इति श्रीभागवतम्॥
"विहितक्रियया साध्यो धर्म्मः पुंसां गुणो मतः।
प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म्म उच्यते॥"
इति धर्म्मदीपिका॥
(द्रुह्युवंशीयनृपविशेषः। यथा, भागवते।९।२३।१४।
"द्रुह्योस्तु तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः।
आरब्धस्तस्य गान्धारस्तस्य धर्म्मस्ततो धृतः॥")

धर्म्मकर्म्म, [न्] क्ली, (धर्म्माय धर्म्मस्य वा कर्म्म कार्य्यम्।) धर्म्मकार्य्यम्। शुभादृष्टप्रतिपादकक्रिया। यथा,—
"वेदप्रणिहितं धर्म्मकर्म्म तन्मङ्गलं परम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

धर्म्मकायः, पुं, (धर्म्मार्थं कायो देहो यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥

धर्म्मकीलः, पुं, (धर्म्मस्य कील इव।) शासनम्। राजशासनम्। इति पुरवर्गे त्रिकाण्डशेषः॥

धर्म्मकीलकः, पुं, (धर्म्मकील + स्वार्थे कन्।) ब्रह्मशासनम्। इति पुरवर्गे शब्दरत्नावली॥

धर्म्मकेतुः, पुं, (अहिंसारूपो धर्म्मः केतुरिव यस्य।) बुद्धः। इति शब्दरत्नावली॥

धर्म्मक्षेत्र, क्ली, (धर्म्मस्य क्षेत्रम्।) कुरुक्षेत्रम्। यथा,—
"ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्।
धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि॥"
इति हेमचन्द्रः॥
अपि च।
"तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानाञ्च मचक्रुकस्य च।
एतत् कुरुक्षेत्रसमन्तपञ्चकं
प्रजापतेरुत्तरवेदिरुच्यते॥"
इति भारतपाद्मे॥
धर्म्माधारे, त्रि॥

धर्म्मघट, पुं, (धर्म्माय घटः सुगन्धोदकपरिपूर्णकलसः।) वैशाखे प्रत्यहदातव्यसुगन्धोदकपूरितकलसः। यथा, काशीखण्डे १२ अध्याये।
"दद्युर्धर्म्मघटांश्चापि सुगन्धोदकपूरितान्॥"
तद्विधिर्यथा। अथ धर्म्मघटव्रतम्।
तत्र प्रथमं स्वस्तिवाचनं कृत्वा सूर्य्यः सोम इति पठित्वा सङ्कल्पं कुर्य्यात्। यथा,—

अद्येत्यादि वैशाखे मासि अमुकपक्षे अमुक तिथौ महाविषुवसंक्रान्त्या अमुकगोत्रा श्री- अमुकी देवी यमालयगमननिवारणपूर्व्वकश्री- विष्णुप्रीतिकामा अद्यारभ्य वर्षचतुष्टयं यावत् प्रतिवर्षीयमेषस्थरवौ प्रत्यहं गणपत्यादिनाना- देवतापूजापूर्व्वक-श्रीविष्णुपूजा-सभोज्यघटदान- कथाश्रवण-ब्राह्मणभोजनरूपधर्म्मघटव्रतमहं करिष्ये ॥ * ॥ पारान्तरे अद्येत्यादि महा- विषुवसंक्रान्त्यां मतसंकल्पितधर्म्मघटव्रतकर्म्मणि यथाविधिकगणपत्यादिनानादेवतापूजापूर्व्वकं श्री- विष्णुपूजासभोज्यघटदानकथाश्रवणमहं करिष्ये । इति सङ्कल्प्य तत्सूक्तं पाठयेत् । ततो ब्राह्मणः प्रतिनिधीभूतः सामान्यार्घ्यासनशुद्धिभूतशुद्ध्या- दिकं विधाय शालग्रामादौ घटे वा गणेशा- दीन् नवग्रहान् दिक्पालांश्च संपूज्य वां हृदयाय नमः इत्याद्यङ्गन्यासकरन्यासौ कृत्वा ॐ ध्येयः सदा इत्यादिना विष्णुं ध्यात्वा स्वशि- रसि पुष्पं दत्त्वा मानसोपचारैः संपूज्यार्घ्यं संस्थाप्य पुनर्ध्यात्वावाह्य षोडशोपचारैः ॐ भगवते विष्णवे नम इति मन्त्रेण संपूज्य यथा- शक्ति ॐ विष्णवे नम इति मन्त्रं जप्त्वा जपं समर्प्य ॐ नमो ब्रह्मण्यदेवायेत्यादिना प्रणम्य लक्ष्मीं सरस्वतीं आवरणदेवताश्च पूजयेत् । ततः एते गन्धपुष्पे ॐ सभोज्यवारिपूर्णघटाय नमः । इति त्रिरभ्यर्च्य—

“ॐ घट त्वं धर्म्मरूपोऽसि ब्रह्मणा निर्म्मितः पुरा ।
त्वयि लिप्ते सन्तु लिप्ताश्चन्दनैः सर्व्वदेवताः ॥”

इति चन्दनेनानुलिप्य अद्येत्यादि अमुकगोत्रा श्रीअमुकी देवी श्रीविष्णुप्रीतिकामा धर्म्मघट- व्रतकर्म्मणि इमं सभोज्यवारिपूर्णघटमर्च्चित श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे । इत्युत्सृज्य कृताञ्जलिः पठेत् ।

“ॐ धर्म्म त्वं घटरूपेण ब्रह्मणा निर्म्मितः पुरा ।
त्वयि दत्तेऽक्षया लोका मम सन्तु निरामयाः ॥
यथा त्वं शीतलो नित्यं संपूर्णः शीतवारिणा ।
तथा मां सुरशार्दूल ! शीतलं कुरु धर्म्मराट् ॥
एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः ॥
पानीयं प्राणिनां प्राणाः पानीयं पावनं महत् ।
पानीयस्य प्रदानेन तृप्तिर्भवतु शाश्वती ॥”

इति पठित्वा दक्षिणां दत्त्वाच्छिद्रावधारणं कृत्वा कथां शृणुयात् ॥ * ॥

अथ कथा । श्रीकृष्ण उवाच ।

“शृणु राजन् ! प्रवक्ष्यामि व्रतानां व्रतमुत्तमम् ।
चन्द्रकेतुरिति ख्यातो राजासीद्धार्म्मिकः सुधीः ॥
सुशीला तस्य भार्य्यासीत् मालावत्यतिविश्रुता ।
सा सर्व्वगुणसंयुक्ता साध्वीयं द्रौपदी यथा ॥
एकस्मिन् समये राजन् ! लोमशस्य च सन्निधौ ।
सैषा पुटाञ्जलिर्भूत्वा लोमशं परिपृच्छति ॥

मालावत्युवाच ।

ब्रह्म त्वं मुनिशार्दूल ! सर्व्वधर्म्मपरायण ! ।
यमालयं न गच्छामि तदुपायं वदस्व मे ॥

समाख्याहि व्रतं देव ! सफलं पापनाशनम् ॥

लोमश उवाच ।

शृणु राज्ञि ! महाभागे ! येन तत्र न गच्छति ।
तदुपायं प्रवक्ष्यामि शृणु त्वं हि समाहिता ॥
जन्मजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
विष्णुस्मरणमात्रेण हन्ति पापं पुराकृतम् ॥
येन धर्म्मप्रसादेन तुष्टो देवो जनार्द्दनः ।
पूजयेद्देवदेवेशं सर्व्वकामफलप्रदम् ॥
समारोप्य ततो देवं चन्दनेन विलेपितम् ।
पूजयेत् परया भक्त्या गन्धपुष्पादिभिस्तथा ॥
अयने कोटिगुणितं लक्षं विष्णुपदीषु च ।
षड़शीतिसहस्रन्तु षडशीत्यामुदाहृतम् ॥
विषुवे शतसाहस्रं व्रतं तत्र समाचरेत् ॥

मालावत्युवाच ।

मम तत् कथितं सर्व्वं यद्व्रतञ्च त्वया प्रभो ! ।
किं विधानं फलं किं वा केन लोके कृतं पुरा ॥

लोमश उवाच ।

शृणु देवि ! महाभागे ! पूर्व्वकालस्य या कथा ।
विनिष्क्रान्ते ततश्चैत्रे यदा मेषगतो रविः ॥
दोषादिरहिते काले चतुर्व्वर्षं समाचरेत् ।
तत्र नित्यं घटं दद्यात् मासमेकं सभोज्यकम् ॥
चन्दनेन समालिप्तं दक्षिणादिभिरन्वितम् ।
व्रतमेतत् समाकुर्य्यात् यावत् वर्षचतुष्टयम् ॥
अनेनैव विधानेन या व्रतञ्च समाचरेत् ।
सर्व्वं कुलं समुद्धृत्य स्वर्गलोके महीयते ॥
द्रौपद्याचरितं यत्तत् शृणु त्वं ध्यानतत्परा ।
द्रौपद्या तदिदं पूर्व्वं न कृतं व्रतमुत्तमम् ॥
एतत् गता च सा साध्वी न लभेत दिवं पुनः ।
अथ शीघ्रं समागत्य तामूचुर्यमकिङ्कराः ॥
विषुवे च त्वया साध्वि ! न कृतं तद्व्रतं किल ।
ततो मरणकाले स्यात् स्वर्गद्वारं निरोधितम् ॥
यमदूतैः समासाद्य गले पाशो नियोजितः ॥

द्रौपद्युवाच ।

के यूयमिति तद्ब्रूत कुत्र वा नीयतेऽधुना ।
कथं पाशो गले दत्तः कथयध्वं मम ध्रुवम् ॥

यमदूता ऊचुः ।

मा भैषीर्नीयते देवि ! धर्म्मराजस्य सन्निधौ ।
पृथिव्यां यानि तीर्थानि व्रतानि विविधानि च ॥
यज्ञदानविधानञ्च त्वया सर्व्वं प्रतिष्ठितम् ।
किन्त्वत्र न कृतं पूर्व्वं माधवे-मासि सुव्रते ! ॥
व्रतं धर्म्मघटं नाम तेन-यासि यमालयम् ॥

द्रौपद्युवाच ।

यमदूता महात्मानो नयन्तु मां यमालयम् ।
तत्प्रसादेन मे शीघ्रं गले पाशो विलुप्यतु ॥
ततो विहस्य स्वकरे समानीता यमान्तिकम् ॥

यम उवाच ।

शृणु त्वं द्रौपदी साध्वि ! सर्व्वं त्वया प्रतिष्ठितम् ।
न कृतो देवदेवस्य व्रतं धर्म्मघटस्त्वया ॥
तथापि तुष्टो भद्रेऽहं वरं वृणु यथेप्सितम् ॥

द्रौपद्युवाच ।

वरं ददस्व मे नाथ ! गच्छामि पुनरालयम् ।
यथाहं सन्निधानेन व्रतं तव प्रसादतः ॥

यम उवाच ।

व्रतं धर्म्मघटं देवि ! कुरु गत्वा निजालयम् ।
नागन्तव्यं त्वया देवि ! पुनर्म्मम पुरीं शुभे ! ॥
ततो गता च सा चैव तुष्टोऽभूदन्तकस्तदा ।
भूयो भूमितलं प्राप्य तदैव च तथा सती ॥
सा तत्र तद्व्रतञ्चक्रे दानं होमं यथाविधि ।
संपूर्णे तु व्रते तत्र प्रतिष्ठामाचरत् सती ॥
ददौ द्वादशविप्रेभ्यो दानानि द्वादशानि च ।
चत्वारि जलपात्राणि वस्त्रेण सहितानि च ॥
दानानि च ततो दत्त्वा ततः सच्छत्रकघटास्तथा ।
आसनानि च चत्वारि पादुकासहितानि च ॥
दक्षिणान्तु ततो दत्त्वा वस्त्राणि विविधानि च ।
तद्व्रतञ्च सुसम्पन्नं विष्णुस्तोऽभ्यसत्तः ॥
एवं कृत्वा व्रतं साध्वी द्रौपदी सुसमाहिता ।
अन्तकालं समासाद्य सा गता वैष्णवं पुरम् ॥
इत्युक्त्वा लोमशेनाथ कन्या मालावती तथा ।
कृत्वा चैव व्रतं साध्वी देवाराधनपूर्व्वकम् ॥
सा नित्यं गर्गरीं दत्त्वा सभोज्यदक्षिणान्विताम् ।
देवोद्देशेन विप्राय श्रद्धया प्रत्यपादयत् ॥
एवं या कुरुते नारी पुत्रपौत्रसमन्विता ॥

पुस्तकान्तरे ।

‘एवं करोति या नारी नरो वा व्रतमुत्तमम् ।’

इति वा पाठः ।

आयुरारोग्यमैश्वर्य्यं श्रियञ्च लभते सुखम् ।
अन्ते याति परं स्थानं यत्र देवो निरञ्जनः ॥”

इति भविष्यपुराणोक्ता धर्म्मघटव्रतकथा समाप्ता ॥

क्वचित् क्वचित् पद्धतौ विष्णुधर्म्मोत्तरयमपुरा- णोक्ता च लिखिता ॥

धर्म्मचक्रः, पुं, (धर्म्मस्य चक्रं समूहो यत्र ।) बुद्धः । इति शब्दरत्नावली (धर्म्मस्य चक्रं समूहः । धर्म्मकाण्डे, क्ली । यथा, महा- भारते । १ । १०६ । १४ ।

“भीष्मेण विहितं राष्ट्रे धर्म्मचक्रमवर्त्तत ॥”

अस्त्रविशेषः । यथा, हरिवंशे । २२४ । ७ ।

“धर्म्मचक्रं महाचक्रमचिरं नाम नामतः ॥”)

धर्म्मचक्रभृत्, पुं, (धर्म्मचक्रं धर्म्मचयं बिभर्त्तीति । भृ + क्विप् । तुगागमश्च ।) जिनः । इति धरणिः ॥

धर्म्मचारिणी, स्त्री, (धर्म्मं चरतीति । चर + णिनि + ङीप् ।) जाया । इति शब्दरत्नावली ॥

धर्म्मचिन्तनं, क्ली, (धर्म्मस्य चिन्तनं भावना ।) धर्म्मचिन्ता । इति हेमचन्द्रः । ६ । १७ ॥

धर्म्मचिन्ता, स्त्री, (धर्म्मस्य चिन्ता भावना ।) पुण्यभावना । तत्पर्य्यायः । उपाधिः २ । इत्य- मरः । १ । ७ । २८ ॥

धर्म्मज्ञः, त्रि, (धर्म्मं जानातीति । ज्ञा + कः ।) धर्म्मज्ञानविशिष्टः । यथा,—

“धर्म्मज्ञश्च कृतज्ञश्च शैनिपेयो हढ़व्रतः ॥”

इति-विराटपर्व्व ॥

धर्म्मदः, पुं, (धर्म्मेऽपि धार्म्मिकधरित्र्याः नम- तीति । नम + अन्येभ्योऽपीति डः ।) वृक्षभेदः ।

धामिनिया इति भाषा। (यथास्य पर्य्यायः।
"धन्वनः पिच्छिलत्वक् च धनुर्वृक्षश्च धर्म्मणः॥"
इति वैद्यकरत्नमालायाम्॥)
सर्पविशेषः। इति मेदिनी। णे, ५३॥ ढेमना।
इति भाषा॥

धर्म्मत्व, क्ली, (धर्म्मस्य भावः। धर्म्म+त्व।)
वृत्तिमत्त्वम्। आधेयत्वमिति यावत्। यथा,
गगनादेर्वृत्तिमत्त्वसत्त्वधर्म्मत्वाभावादिति जग-
दीशः॥

धर्म्मदान, क्ली, (धर्म्माय दानम्।) प्रयोजनमन-
पेक्ष्य केवलधर्म्मबुद्ध्या पात्रेभ्यो दानम्। यथा,
देवलः।
"पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।
केवलं धर्म्मबुद्ध्या यत् धर्म्मदानं प्रचक्षते॥"
इति शुद्धितत्त्वम्॥

धर्म्मद्रवी, स्त्री, (धर्म्मजनको द्रवो वारिरूपो
यस्याः। गौरादित्वात् ङीष्।) गङ्गा। इति
त्रिकाण्डशेषः॥ (यदुक्तं गङ्गास्तोत्रे।
"विष्णुपादाग्रसम्भूते गङ्गे त्रिपथगामिनि!।
धर्म्मद्रवीति विख्याते पापं मे हर जाह्नवि!॥")

धर्म्मधातु, पुं, (अहिंसारूपो धर्म्म एव धातुः
प्रकृतिर्यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥

धर्म्मध्वजी, [न्] त्रि, (धर्म्मो ध्वजश्चिह्नम्।
स एवास्त्यस्येति। धर्म्मध्वज+इनि।) जीवि-
कार्थं जटादिधारी न तु परमार्थतो धर्म्मानुष्ठान-
कारी। तत्पर्य्यायः। लिङ्गवृत्तिः २। इत्यमरः।
२।७।५४॥ (यथा, मनुः। ४।१९५।
"धर्म्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः।
वैडालव्रतिको ज्ञेयो हिंस्रः सर्व्वाभिसन्धकः॥")

धर्म्मपत्तन, क्ली, (धर्म्मपत्तने जातम्। "तत्र
जातः।" ४।३।२५। इत्यण्। संज्ञापूर्व्वक-
त्वात् न वृद्धिः।) मरिचम्। इत्यमरः।२।
९।३६॥ (पर्य्यायोऽस्य यथा—
"रेणुकं मरिचं कृष्णमूषणं धर्म्मपत्तनम्॥"
इति वैद्यकरत्नमालायाम्॥
धर्म्मस्य पत्तनम्।) धर्म्मपुरी। तत्पर्य्यायः।
आवन्ती २। इति त्रिकाण्डशेषः॥

धर्म्मपत्र, क्ली, (धर्म्माय यज्ञादिकार्य्यार्थं पत्रं
यस्य।) यज्ञोडुम्बरः। इति शब्दचन्द्रिका॥

धर्म्मपुत्त्र, पुं, (धर्म्मस्य पुत्त्रः।) युधिष्ठिरराजः।
इति त्रिकाण्डशेषः॥ (यथा, महाभारते।३।
२३५।१८।
"न मामकं धास्यति धर्म्मपुत्त्रो
धनञ्जयश्चाप्यनुवर्त्स्यते तम्॥")
नरनारायणऋषी। इति पुराणम्॥ (यथा,
देवीभागवते।४।७।१८।
"तापसौ धर्म्मपुत्त्रौ द्वौ सुशान्तमनसावुभौ॥")
धर्म्मतः क्षत्रपुत्त्रः। धरमबेटा इति भाषा॥
यथा,—
"यावद्दुर्जटिधर्म्मपुत्त्रपरशुच्छुन्नाखिलक्षत्त्रिय-
श्रेणीशोणितपिच्छिला वसुमती कोऽस्यामधा-
स्यत् पदम्।
त्रैलोक्याभयदानदक्षिणभुजावष्टम्भदिव्यौजसो
देवोऽयं दिनकृत्कुलैकतिलको न प्राभविष्यद्
यदि॥"
इति महानाटके।२।२५॥

धर्म्मवाणिजिकः, पुं, (धर्म्मे वाणिजिक इव। फल-
कामनया धर्म्माचरणादेवास्य तथात्वम्।)
पुण्यकर्म्मफलकामी। यथा,—
"धर्म्मवाणिजिका मूढाः फलकामा नराधमाः।
अर्च्चयन्ति जगन्नाथं ते कामानाप्नुवन्त्युत॥"
इति मलमासतत्त्वधृतविष्णुधर्म्मोत्तरतृतीय-
काण्डीयवचनम्॥

धर्म्मभाणक, पुं, (धर्म्मार्थं भणतीति। भण+
ण्वुल्।) भारतादिपाठकः। इति त्रिकाण्डशेषः॥

धर्म्ममूल, क्ली, (धर्म्मस्य मूलम्।) शुभादृष्टकार-
णम्। पुण्यहेतुः। यथा,—
"इदं मूलं फलं शाकमुदपात्रं तपोधनाः।
दानं विभवतो दत्त्वा नराः स्वर्यान्ति धर्म्मिणः॥
एष धर्म्मो महांस्त्यागो दानं भूतदया तथा।
ब्रह्मचर्य्यं सदा सत्यं अनुक्रोशो धृतिः क्षमा॥
सनातनस्य धर्म्मस्य मूलमेतत् सनातनम्॥"
इति वह्निपुराणे स्नानविधिनामाध्यायः॥
(यथा च मनुः।२।६।
"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥")

धर्म्मयु, त्रि, (धर्म्मं याति गच्छतीति। या+
मृगय्वादित्वात् कुः।) धर्म्मविशिष्टः। धार्म्मिकः।
धर्म्मशब्दादस्त्यर्थे युप्रत्ययेन निष्पन्नः इति
मुग्धबोधः॥

धर्म्मयुक्, [ज्] त्रि, (धर्म्मं युनक्तीति। युज्+क्विप्।)
धर्म्मयुक्तः। धार्म्मिकः। (यथाह देवलः।
"दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्म्मयुक्।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः॥")

धर्म्मराज, पुं, (धर्म्मेण राजते इति। राज+
अच्।) जिनः। (धर्म्मस्यासौ राजा चेति।
समासे टच्।) यमः। इत्यमरः।१।१।२१॥
(यथा, महाभारते।३।२९६।५७।
"धर्म्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत्॥")
नरपतिः। युधिष्ठिरः। इति शब्दरत्नावली॥
(यथा, हरिवंशे।१६।८।
"अपृच्छत्तं धर्म्मराजो हि शरतल्पगतं पुरा॥"
धर्म्मप्रधाने, त्रि। यथा, महाभारते।१।५५।९१।
"दृष्ट्वा च ते प्रीतमनाः सदाहं
त्वं वा वरुणो धर्म्मराजो यमो वा॥")

धर्म्मराजपरीक्षा, स्त्री, (धर्म्मराजस्य परीक्षा।)
धर्म्माधर्म्मपरीक्षणम्। यथा,
अथ धर्म्मराजविधिः। बृहस्पतिः।
"पत्रद्वये लेखनीयौ धर्म्माधर्म्मौ सितासितौ।
जीवदानादिकैर्म्मन्त्रैर्गायत्र्याद्यैश्च सामभिः॥
आमन्त्र्य पूजयेद्गन्धैः कुसुमैश्च सितासितैः।
अभ्युक्ष्य पञ्चगव्येन मृत्पिण्डान्तरितौ ततः॥
समौ कृत्वा नवे कुम्भे स्थाप्यौ चानुपलक्षितौ।
ततः कुम्भात् पिण्डमेकं गृह्णीयादविलम्बितः॥
धर्म्मे गृहीते शुद्धः स्यात् स पूज्यश्च परीक्षकैः॥
जीवदानमन्त्रस्तु शारदायाम्।
'पाशाङ्कुशपुटा शक्तिर्म्मायुर्विन्दुविभूषितः।
याद्याः सप्तसकारान्ता व्योमसत्येन्दुसंयुतम्॥
तदन्ते हंसमन्त्रः स्यात् ततोऽमुष्य पदं वदेत्।
प्राणा इति वदेत् पश्चादिह प्राणास्ततःपरम्॥
अमुष्य जीव इह स्थितस्ततोऽमुष्य पदं वदेत्।
सर्व्वेन्द्रियाण्यमुष्यान्ते वाङ्मनश्चक्षुरन्ततः॥
श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम्।
तिष्ठन्त्विमिमधूरन्ते प्राणमन्त्रोऽयमीरितः॥
प्रत्यमुष्य पदात् पूर्व्वं पाशाद्यानि प्रयोजयेत्।
प्रयोगेषु समाख्यातः प्राणमन्त्रो मनीषिभिः॥'
पाशाङ्कुशपुटा शक्तिरित्यनेन प्रथमं पाशबीजं
आम्। ततः शक्तिबीजं ह्रीँ। ततोऽङ्कुशबीजं
क्रोम्। वायुर्यकारो विन्दुविभूषितः। तेन यं।
याद्याः सप्तसकारान्ता उद्धृतयकारमादाय
सप्त। अङ्कुशबायुनलावनी वरुणबीजानीत्यन्य-
त्रोक्तेः। अत्र वायोरेकस्य पूर्व्वं पृथगुपन्यासः
सप्तानां सविन्दुत्वार्थं। अतएवान्यत्र बीजानी-
त्युक्तम्। व्योमसत्येन्दुसंयुतम्। व्योम हकारः।
सत्यं ओकारः। इन्दुर्विन्दुः। तेन हों। अमुष्य
इति षष्ठ्यन्तदेवतानामोपलक्षणम्।
'अदः पदं हि यद्रूपं यत्र मन्त्रे प्रदृश्यते।
साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्॥'
इति नारायणीयात्। अग्निवधूः स्वाहा॥ * ॥
गायत्र्यादिसामाम्नाने तु सप्रणवव्याहृति
गायत्रीमात्रं पठितव्यम्। जपहोमादि यत्-
किञ्चित् कृतं स्मोक्तं सम्भवेन्न चेत् सर्व्वं व्याहृतिभिः
कुर्य्यात् गायत्र्या प्रणवेन च॥ इति मिताक्षरा-
धृतषट्त्रिंशन्मतवचनदर्शनात् अत्रापि तथा
कल्प्यते॥ * ॥ पितामहः।
'अधुना सम्प्रवक्ष्यामि धर्म्माधर्म्मपरीक्षणम्।
हन्तृणां याचमानानां प्रायश्चित्तार्थिनां नृणाम्॥
राजतं कारयेद्धर्म्ममधर्म्मं सीसकायसम्।
लिखेद्भूर्ज्जे पटे वापि धर्म्माधर्म्मौ सितासितौ॥
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्च्चयेत्।
सितपुष्पस्तु धर्म्मः स्यात् अधर्म्मोऽसितपुष्पकः॥
एवं विधायोपलिप्य पिण्डयोस्तौ निधापयेत्।
गोमयेन मृदा वापि पिण्डौ कार्य्यौ समौ ततः॥
मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ।
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ॥
आवाहयेत्ततो देवान् लोकपालांश्च पूर्व्ववत्।
धर्म्मावाहनपूर्व्वन्तु प्रतिज्ञापत्रकं लिखेत्॥
यदि पापविमुक्तोऽहं धर्म्मस्त्वायातु मे करम्।
अभियुक्तस्तयोश्चैकं प्रगृह्णीतविलम्बितः॥
धर्म्मे गृहीते शुद्धः स्यादधर्म्मे स तु हीयते।
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम्॥'
हन्तृणामिति साहसाभियोगेषु। याचमाना-
नामिति अत्यन्तार्थाभियोगेषु। प्रायश्चित्ता-
र्थिनामिति पातकाभियोगेषु॥ * ॥
तत्र प्रयोगः। पत्रद्वये शुक्लं धर्म्मं कृष्णमधर्म्मं
पुरुषाकारद्वयरूपं विधाय ओम् आं ह्रीं क्रों यं

रं लं वं शं षं सं ह्रौं हंसः धर्म्मस्य प्राणा इह प्राणाः । पुनः आमित्यादि धर्म्मस्य जीव इह स्थितः । पुनः आमित्यादि धर्म्मस्य सर्व्वेन्द्रियाणि । पुनः आमित्यादि धर्म्मस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इत्यनेन जीवदानं धर्म्मप्रतिमायां एवमधर्म्मप्रतिमायां कृत्वा गायत्र्यादिनामस्थाने तेनैव नो चेत् सप्रणवयाहृतिगायत्रीं पठित्वा धर्म्मस्यावाहनादि कृत्वा यथाक्रमं शुक्लकृष्णपुष्पाभ्यां धर्म्माधर्म्मौ संपूज्य प्रणवेन पञ्चगव्यमुपादायाभ्युक्ष्य शुक्लपुष्पयुक्तं धर्म्मं कृष्णपुष्पयुक्तमधर्म्मं मृत्पिण्डद्वये कृत्वा नवे कुम्भे स्थापयेत् । प्राड्विवाकस्ततो देवब्राह्मणसन्निधौ धर्म्मावाहनादिहवनान्तं कर्म्म कृत्वा दक्षिणां दत्त्वा समन्त्रकप्रतिज्ञापत्रं लिखित्वा शोध्यशिरसि दद्यात् । शोध्यस्तु ओम् यदि पापविमुक्तोऽहं धर्म्मस्त्वायातु मे करं इत्युच्चार्य्य कुम्भात्तयोरेकं गृह्णीयात् । धर्म्मे गृहीते शुद्धः अन्यथा अशुद्धः ।”

इति दिव्यतत्त्वम् ॥

धर्म्मवान् [त्] त्रि, (धर्म्मोऽस्यास्तीति । धर्म्म + मतुप् । मस्य वः ।) धर्म्मविशिष्टः । पुण्यवान् । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । १०४ । २६ ।

“जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रजम् ॥”)

धर्म्मवासरः, पुं, (धर्म्मस्य धर्म्माचरणस्य वासरः ।) पौर्णमासी । इति त्रिकाण्डशेषः ॥

धर्म्मवाहनः, पुं, (धर्म्मं वाहयतीति । वह + णिच् + ल्युः । यद्वा, धर्म्मो वृषो वाहनं यस्य । धर्म्मस्य वृषरूपत्वादेव तथात्वम् ।) शिवः । इति त्रिकाण्डशेषः ॥ धर्म्मस्य याने, क्ली ॥

धर्म्मवैतंसिकः, पुं, (धर्म्मे वैतंसिक इव । आत्मनो धार्म्मिकत्वविज्ञापनाय पाशिकः कपटाचारी वेत्यर्थः ।) पापकर्म्मणा धनमासाद्यात्मनो धार्म्मिकत्वख्यापनाय दानकर्त्ता । तत्पापफलं यथा,—

“धर्म्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा ।
ददाति दानं विप्रेभ्यो लोकविश्वासकारणम् ॥
पापेन कर्म्मणा विप्रो धनं लब्ध्वा निरङ्कुशः ।
रागमोहान्वितोऽश्रान्तः कलुषां योनिमाप्नु-
यात् ॥”

इति वह्निपुराणे स्नानविधिनामाध्यायः ॥

धर्म्मव्याधः, पुं, (धर्म्मप्रधानो व्याधः । शाकपार्थिवादिवत् मध्यपदलोपिसमासः ।) पापपुरुषविशेषः । स तु काश्मीरदेशाधिपवसुनामनृपदेहनिर्गतव्याधरूपिब्रह्महत्यात्मकः । तस्य राज्ञो वरेण तस्य धर्म्मव्याध इति सञ्ज्ञाभूत् । यथा,—

“ततः पुत्त्रं विवस्वन्तं श्रेष्ठं ज्ञात्वात्मनस्य च ।
अभिषिच्य स्वके राज्ये तपोवनमुपागमत् ॥
पुष्करं नाम तीर्थानां प्रवरं यत्र केशवः ।
पुण्डरीकाक्षनामा तु पूज्यते सत्पुरायणैः ॥
तत्र गत्वा स राजर्षिः काश्मीराधिपतिर्व्वसुः ।
अतितीव्रेण तपसा स्वशरीरमशोषयत् ॥
पुण्डरीकाक्षपारं तु स्तवं भक्त्या जपन् बुधः ।
नमस्ते पुण्डरीकाक्ष नमस्ते मधुसूदन ।।
नमस्ते सर्व्वलोकेश । नमस्ते तिग्मचक्रिणे ॥”
इत्यादि ।
“एवन्तु वदतस्तस्य मूर्त्तिमान् पुरुषः किल ।
निर्गत्य देहान्नीलाभो घनचण्डो भयङ्करः ॥
उवाच प्राञ्जलिर्भूत्वा किं करोमि नराधिप । ॥
राजोवाच ।
कोऽसि किं कार्य्यमिह ते कस्मादागतवानसि ।
एतन्मे कथय व्याध ! एतदिच्छामि वेदितुम् ॥
व्याध उवाच ।
पूर्व्वं कलियुगे राजन् । राजा त्वं दक्षिणामुखे ।
अरण्यमागतो हन्तुं श्वापदानि विशेषतः ॥
तत्र त्वयान्यकामेन मृगवेशधरो मुनिः ।
दण्डयुग्मेन दूरे तु पातितो धरणीतले ॥
ततस्त्वया महाराज ! सकृन्नारायणं प्रभुम् ।
सचिन्त्य द्वादशी शुद्धा त्वया राजन् ! उपोषिता ॥
गौरैस्ता विधिना सद्यो मृतोऽस्युदरमूलतः ।
अहञ्च तव देहस्थः सर्व्वं जानामि वाच्यम् ॥
स्वर्गस्थस्यापि राजेन्द्र ! स्थितोऽहं स्वेन तेजसा ।
इदानीमादिष्टौ तु कृते नृपतिसत्तम ! ॥
सम्भूतस्त्वं महाराज । राज्ञः सुमनसो गृहे ।
इदानीं यत् त्वया स्तोत्रं पुण्डरीकाक्षपारगम् ॥
पठितं तत्प्रभावेण विहायाङ्गं गृहाण्यहम् ।
एकीभूतः पुनर्ज्जातो व्याधरूपो नृपोत्तम ! ॥
एतत् श्रुत्वा वचो राजा परं विस्मयमागतः ।
वरेण छन्दयामास तं व्याधं राजसत्तमः ॥
राजोवाच ।
तारितोऽस्मि महाव्याध । त्वया जन्मान्तरं गतम् ।
तथा त्वं मत्प्रसादेन धर्म्मव्याधो भविष्यसि ॥”

इति वाराहे आदिकृतवृत्तान्तनामाध्यायः ॥

(अपरो धार्म्मिको व्याधविशेषः । अस्य विवरणन्तु महाभारते । ३ । २०६ अध्यायमारभ्य विशेषतो द्रष्टव्यम् ॥)

धर्म्मशास्त्रं, क्ली, (धर्म्मस्य धर्म्माय वा शास्त्रम् ।) मन्वादिप्रणीतशास्त्रम् । तत्पर्य्यायः । स्मृतिः २ धर्म्मसंहिता ३ । इति हेमचन्द्रः ॥ धर्म्मशास्त्रप्रयोजका यथा, याज्ञवल्क्ये । १ । ४-५ ।

“मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगोतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥”

एते प्रधानानि अन्येऽपि सन्ति ॥ रघुनन्दनकृतधर्म्मशास्त्राणि यथा,—

“मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये ।
प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते ॥
दुर्गोत्सवे व्यवहारवेकादश्यादिनिर्णये ।
तडागभवनोत्सर्गे वृषोत्सर्गाह्निके व्रते ॥
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुयागके ।
दीक्षायामाह्निके छन्दे क्षेत्रे श्रीपुरुषोत्तमे ॥
सामश्राद्धे यजुःश्राद्धे शूद्रधर्म्मविचारके ।
इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः ॥”

इति रघुनन्दनभट्टाचार्य्यः ॥

धर्म्मशीलः, त्रि, (धर्म्मे धर्म्माचरणे शीलं स्वभावो यस्य ।) धार्म्मिकः । यथा, विराटपर्व्वणि ।

“धर्म्मशीलो वदान्यश्च दृढश्च सुमहाधनः ॥”

धर्म्मसंहिता, स्त्री, (धर्म्मस्य संहिता ।) स्मृतिशास्त्रम् । इत्यमरः । १ । ६ । ६ ॥

धर्म्मसावर्णिः, पुं, (धर्म्म एव सावर्णिः सूर्य्यपुत्त्रो मनुः ।) एकादशो मनुः । यस्मिन्मन्वन्तरे धर्म्मसेतुरवतारः । वैधृत इन्द्रः । विहङ्गमकामगमाद्या देवाः । अरुणादयः सप्तर्षयः । सत्यधर्म्मादयो मनुपुत्त्रा भविष्यन्ति । इति श्रीभागवतम् ॥ * ॥

“भविष्यधर्म्मपुत्त्रस्य सावर्णस्यान्तरं शृणु ।
विहङ्गमाः कामगमा निर्म्माणरतयस्तथा ॥
त्रिप्रकारा भविष्यन्ति एकैकस्मिंश्च त्रिंशको गणः ।
मासर्त्तुदिवसा ये तु निर्म्माणरतयस्तु ते ॥
विहङ्गमा रात्रयोऽथ मुहूर्त्ताः कामगो गणः ।
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः ॥
हविष्मांश्च वरिष्ठश्च ऋषिरन्यस्तथारुणिः ।
निश्चरश्चानघश्चैव वृष्टिश्चान्यो महामुनिः ॥
सप्तर्षयोऽन्तरे तस्मिन्नग्नितेजाश्च सप्तमः ॥
सर्व्वागुगः सुशर्म्मा च देवानीकः पुरूद्वहः ॥
क्षेमधन्वा दृढायुश्च विभानुस्तत्सुता नृपाः ॥”

इति मार्कण्डेयपुराणम् ॥

धर्म्मसारः, पुं, (धर्म्मस्य सारः ।) श्रेष्ठपुण्यकर्म्म । यथा । ब्रह्मोवाच ।

“धर्म्मसारमहं वक्ष्ये सङ्क्षेपाच्छृणु शङ्कर ।।
भुक्तिमुक्तिप्रदं सूक्ष्मं सर्व्वपापविनाशनम् ॥
श्रुतं व्रतं बलं धैर्य्यं सुखसुत्याग एव च ।
शोको हरति वै नृणां तस्माच्छोकं परित्यजेत् ॥
कर्म्मदेवाः कर्म्मलोकाः कर्म्मबन्धनिबान्धवाः ।
कर्म्माणि प्रेरयन्तीह पुरुषं सुखदुःखयोः ॥
दानमेव परो धर्म्मो दानात् सर्व्वमवाप्यते ।
दानात्मुक्तिश्च राज्यञ्च दद्याद्दानं ततो नरः ॥
एकतः क्रतवः सर्व्वे समग्रवरदक्षिणाः ।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥
तपसा ब्रह्मचर्य्येण यज्ञैस्त्यागेन वा पुनः ।
गतिन्तु लभते जन्तुर्गङ्गां संसेव्य यां लभेत् ॥
अश्रद्धा परमं पापं श्रद्धा पापप्रणाशिनी ।
जहाति पापं श्रद्धावान् जीर्णां त्वचमिवोरगः ॥
न पुराकृतपुण्यानां नराणामिह शङ्कर ।।
क्षीयन्ते सर्व्वपापानि श्रद्धादानपरायणैः ॥
दूरादतिथयो यस्य गृहमायान्त्यपारिताः ।
स गृहस्थ इति प्रोक्तः शेषास्तु गृहरक्षकाः ॥
न चिन्तयन्ति ये विष्णुं नार्च्चयन्ति च ये नराः ।
धर्म्मस्य नाशका ये च ते वै निरयगामिनः ॥
ये च होमजपस्नानदेवतार्च्चनतत्पराः ।
सत्यक्षान्तिदयायुक्तास्ते नराः स्वर्गगामिनः ॥
न दाता सुखदुःखानां न च दाताऽस्ति कश्चन ।
स्वकृतान्येव भुज्यन्ते दुःखानि च सुखानि च ॥
धर्म्मार्थे जीवितं येषां सन्तानार्थञ्च मैथुनम् ।

देवार्थं तर्पणं येषां दुर्गाण्यभितरन्ति ते ॥
सन्तुष्टः को न शक्नोति फलमूलैश्च जीवितुम् ।
सर्व्व एव हि साम्येन शक्टान्यवगाहते ॥
लोभात् क्रोधः प्रभवति लोभाद्द्रोहः प्रवर्त्तते ।
लोभान्मोहश्च माया च मानो मत्सर एव च ॥
रागद्वेषानृतक्रोधलोभमोहमदोज्झितः ।
यः स शान्तः परं लोकं याति पापविवर्ज्जितः ॥
देवता मुनयो नागा गन्धर्व्वा गुह्यका नराः ।
धार्म्मिकं पूजयन्तीह न धनाढ्यं न कामिनम् ॥
न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण वा ।
अलभ्यं लभते मर्त्त्यस्तत्र का परिदेवना ॥
यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैव तथा सर्व्वत्र वित्तवान् ॥
सर्व्वसत्त्वदयालुत्वं सर्व्वेन्द्रियविनिग्रहः ।
सर्व्वत्रानित्यबुद्धित्वं श्रेयः परमिदं स्मृतम् ॥
पशूनिवाग्रतो मृत्युं यो धर्म्मं नाचरेन्नरः ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥
ब्रह्मघ्ना ब्रह्महा गोघ्नः पितृघ्नो गुरुतल्पगः ।
भूमिं सर्व्वगुणोपेतां दत्त्वा पापैः प्रमुच्यते ॥
न गोदानात् परं दानं किञ्चिदस्तीति मे मतिः ।
सा गौर्न्यायार्ज्जिता दत्त्वा कृत्स्नं तारयते कुलम् ॥
नान्नदानात् परं दानं किञ्चिदस्ति द्विजोत्तम ।
अन्नेन धार्य्यते सर्व्वं चराचरमिदं जगत् ॥
कन्यादानं वृषोत्सर्गो जपस्तीर्थं श्रुतं तथा ।
हस्त्यश्वरथदानानि मणिरत्नवसुन्धराः ॥
अन्नदानस्य सर्व्वाणि कलां नार्हन्ति षोडशीम् ।
अन्नात् प्राणो बलं तेजश्चान्नाद्वीर्य्यं धृतिः स्मृतिः ॥
कूपवापीतडागादि आरामाणि च कारयेत् ।
त्रिःसप्तकुलमुद्धृत्य विष्णुलोके महीयते ॥
साधूनां दर्शनं पुण्यं तीर्थादपि विशिष्यते ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥
सत्यं दमस्तपः शौचं सन्तोषः क्षान्तिरार्ज्जवम् ।
ज्ञानं शमो दया दानमेष धर्म्मः सनातनः ॥”
इति गारुडे २२५ अध्यायः ॥

धर्म्मसुतः, पुं, (धर्म्मस्य सुतः ।) युधिष्ठिरराजः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । २ । ७ । १६ ।
“एकान्ते विदुरेणोक्तो राजा धर्म्मसुतः शुचिः ॥”
नरनारायणमुनी । यथा, देवीभागवते । ४ । ७ । १२ ।
“इति सञ्चिन्त्यमानं स भ्रातरं दीनमानसम् ।
उवाच वचनं तथ्यं नरो धर्म्मसुतोऽनुजः ॥”)

धर्म्मसूः, पुं, (धर्म्मं सूते इति । सू + क्विप् ।) धर्म्याटपक्षी । इति शब्दरत्नावली ॥ (धर्म्मप्रेरके, त्रि । यथा, तैत्तिरीयब्राह्मणे । १।७।८।३।
“सोमो राजा वरुणः । देवा धर्म्मसुवश्च ये ॥”)

धर्म्मात्मा, [न्] पुं, (धर्म्मे आत्मा स्वभावो यस्य ।) कुमारपालः । स तु आर्हतविशेषः । इति हेमचन्द्रः ।३।३७७।) त्रि, धर्म्मशीलः । यथा,—
“महर्षिर्भगवान् व्यासः कृत्वेमां संहितां पुरा ।
श्लोकैश्चतुर्भिर्धर्म्मात्मा पुत्त्रमध्यापयत् शुकम् ॥”
इति महाभारतम् ॥

धर्म्माधर्म्मपरीक्षणं, क्ली, (धर्म्मश्च अधर्म्मश्च तयोः परीक्षणम् ।) परीक्षाविशेषः । यथा,—
“अधुना सम्प्रवक्ष्यामि धर्म्माधर्म्मपरीक्षणम् ।
कृत्स्नानां याचमानानां प्रायश्चित्तार्थिनां नृणाम् ॥
राजतं कारयेत् धर्म्ममधर्म्मं सीसकायसम् ।
लिखेत् भूर्ज्जे पटे वापि धर्म्माधर्म्मौ सितासितौ ॥
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्च्चयेत् ।
सितपुष्पस्तु धर्म्मः स्यादधर्म्मोऽसितपुष्पधृक् ॥
एवं विधायोपलिप्य पिण्डयोस्तौ निधापयेत् ।
गोमयेन मृदा वापि पिण्डौ कार्य्यौ समन्ततः ॥
मृद्भाण्डके उपहिते स्थाप्यौ चानुपलक्षितौ ।
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ ॥
आवाहयेत् ततो देवान् लोकपालांश्च पूर्व्ववत् ।
धर्म्मावाहनपूर्व्वन्तु प्रतिज्ञापत्रकं लिखेत् ।
यदि पापविमुक्तोऽहं धर्म्मस्त्वायातु मे करे ॥
अशुद्धश्चेन्मम करे पापमायातु धर्म्मतः ।
अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः ॥
धर्म्मे गृहीते शुद्धः स्यादधर्म्मे तु स हीयते ।
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम् ॥”
इति मिताक्षरा ॥

धर्म्माधिकरणं, क्ली, (अधिक्रियते अस्मिन्निति । अधि + कृ + अधिकरणे ल्युट् । धर्म्मस्य अधिकरणम् ।) राज्ञो विचारस्थानम् । यथा,—
“धर्म्मशास्त्रानुसारेण अर्थशास्त्रनिरूपणम् ।
यत्राधिक्रियते स्थाने धर्म्माधिकरणं हि तत् ॥”
इति वीरमित्रोदये कात्यायनवचनम् ॥*॥
“पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः ।
धर्म्माधिकरणे कार्य्या जनाह्लानकरा नराः ॥”
इति मत्स्यपुराणे १८६ अध्यायः ॥

धर्म्माधिकरणः, पुं, (धर्म्माधिकरणम् आश्रयत्वेनास्त्यस्येति । अच् ।) धर्म्माध्यक्षः । तस्य लक्षणम् । यथा, मत्स्यपुराणे १८६ अध्याये ।
“समः शत्रौ च मित्रे च सर्व्वशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणो भवेत् ॥”

धर्म्माधिकरणी, [न्] पुं, (धर्म्माधिकरणं विचार्य्यस्थानत्वेनास्त्यस्येति । धर्म्माधिकरण + इनि ।) धर्म्माधिकरणविशिष्टः । जज् इति इंराजी भाषा । तत्पर्य्यायः । धर्म्माध्यक्षः २ धार्म्मिकः ३ । इति हेमचन्द्रः । ३ । ३८६ ॥ प्राड्विवाकः ४ अक्षदर्शकः ५ । इत्यमरः । २ । ८ । ५ ॥

धर्म्माध्यक्षः, पुं, (धर्म्मे धर्म्माधिकरणे अध्यक्षः ।) धर्म्माधिकरणी । इति हेमचन्द्रः । ३ । ३८८ ॥
“कुलशीलगुणोपेतः सर्व्वधर्म्मपरायणः ।
प्रवीणः प्रेषणाध्यक्षो धर्म्माध्यक्षो विधीयते ॥”
इति चाणक्ये । १०२ ॥
(विष्णुः यथा, महाभारते । १३ । १४६।२८ ।
“लोकाध्यक्षः सुराध्यक्षो धर्म्माध्यक्षः कृताकृतः ॥”
“धर्म्माधर्म्मौ साक्षादीक्षते अनुरूपं फलं दातुम् । तस्माद्धर्म्माध्यक्षः ।” इति शाङ्करभाष्यम् ॥)

धर्म्मारण्यं, क्ली, (धर्म्माय धर्म्मस्य वा यदरण्यम् ।) पुण्यवनविशेषः । तस्य नामकारणं यथा,—
“स धर्म्मः पीडितः सर्व्वैः सोमेनाकुलकर्म्मणा ।
तारां जिहीर्षता पत्नीं भ्रातुराङ्गिरसस्य च ॥
सोऽप्ययाद्दीपितस्तेन बलिना क्रूरकर्म्मणा ।
अरण्यं गहनं घोरं प्रविवेश तदा प्रभुः ॥
ब्रह्मोवाच ।
यच्चारण्यमिदं धर्म्म ! त्वया व्याप्तं चिरं विभो ! ।
नाम्ना भविष्यसि ख्यातं धर्म्मारण्यमिति प्रभो ! ॥”
इति वराहपुराणम् ॥
(गयास्थतीर्थविशेषः । यथा, वायुपुराणे गयामाहात्म्ये ।
“प्रथमेऽह्नि विधिः प्रोक्तो द्वितीयदिवसे व्रजेत् ।
धर्म्मारण्यं तत्र धर्म्मो यस्माद्यज्ञमकारयत् ॥”)

धर्म्मासनं, क्ली, (धर्म्माय व्यवहारकार्य्यसाधनाय यदासनम् ।) विचारासनम् । बेञ्च इति इंराजी भाषा । यथा,—
“धर्म्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ॥”
इति मनुः । ८ । २३ ॥

धर्म्मिणी, स्त्री, (धर्म्मोऽस्या अस्तीति । इनिः । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥

धर्म्मी, [न्] (त्रि, धर्म्मोऽस्यास्तीति । धर्म्म + “अत इनिठनौ ।” ५ । २ । ११५ । इति इनिः ।) धर्म्मवान् । पुण्यशीलः । इति शब्दरत्नावली ॥ (पुं, विष्णुः । यथा, महाभारते ।१३।१४६।६४।
“धर्म्मगुप् धर्म्मकृद्धर्म्मी सदसत्क्षरमक्षरम् ॥”
“धर्म्माधारतया धर्म्मी ।” इति शाङ्करभाष्यम् ॥)

धर्म्मोपदेशकः, पुं, (धर्म्ममुपदिशतीति । उप + दिश + ण्वुल् ।) गुरुः । इति हेमचन्द्रः ।१।७७।

धर्म्म्यः, त्रि, (धर्म्म + “धर्म्मपथ्यर्थन्यायादनपेते ।” ४ । ४ । ९२ । इति यत् ।) धर्म्मादनपेतः । धर्म्मयुक्तः । यथा, श्रीभगवद्गीतायाम् ।
“धर्म्म्याद्धि युद्धात् श्रेयोऽन्यत् क्षत्त्रियस्य न विद्यते ॥”
“न्यूनाधिकविभक्तानां धर्म्म्यः पितृकृतः स्मृतः ॥”
इति दायभागः ।
(धर्म्मेण प्राप्यः । “नौवयोधर्म्मेति ।” ४।४।९१ । इति यत् धर्म्मलभ्यः । इति सिद्धान्तकौमुदी ।)

धर्म्म्यविवाहः, पुं, (धर्म्म्यः धर्म्मादर्नपेतः विवाहः ।) विवाहविशेषः । स च पञ्चविधः । ब्राह्मदैवार्षगान्धर्व्वप्राजापत्यरूपः । अधर्म्म्यविवाहस्त्रिविधः । आसुरराक्षसपैशाचरूपः । यथा,
“धर्म्म्येष्वेव विवाहेषु नाकपरीक्ष्य नाधर्म्म्येषु ॥”
इत्युद्वाहतत्त्वम् ॥ (यस्य वर्णस्य यो विवाहो धर्म्म्यः स उक्तो यथा, मनौ । ३ । २१—२६ ।
“ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
यो यस्य धर्म्म्यो वर्णस्य गुणदोषौ च यस्य यौ ।
तद्वः सर्व्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् ॥
षडानुपूर्व्व्या विप्रस्य क्षत्त्रस्य चतुरोऽवरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्म्यान् राक्षसान् ॥
चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।
राक्षसं क्षत्त्रियस्यैकमासुरं वैश्यशूद्रयोः ॥
पञ्चानान्तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविह ।

पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन ॥
पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्व्वचोदितौ ।
गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्त्रस्य तौ स्मृतौ ॥")

धर्षः, पुं, (धर्षणमिति । धृष्+भावे घञ् ।) प्रागल्भ्यम् । (यथा, महाभारते ।१।१५६।७।
"यदीव दर्पाद् धर्षाद्वाप्यथ ब्राह्मणचापलात् ।
प्रस्थितो धनुरायन्तुं वार्य्यतां साधु मागमत् ॥")
अमर्षः । शक्तिबन्धनम् । संहतिः । हिंसा । इति धृषधातोर्भावेऽल्प्रत्ययेन साध्यः ॥

धर्षकः, पुं, (धृष्णोति प्रगल्भो भवतीति । धृष्+ण्वुल् ।) नटः । इति शब्दरत्नावली ॥ (अभिभवकर्त्तरि, त्रि । यथा, हरिवंशे ।१५३।२४।
"विधार्य्या सर्व्वे गृह्यन्तां ममेते गृहधर्षकाः ॥")

धर्षकारिणी, स्त्री, (धर्षं कुलदूषणं करोतीति । कृ+णिनि+ङीप् ।) दूषिता कन्या । इति शब्दरत्नावली ॥

धर्षणं, क्ली, (धृष्+ल्युट् ।) परिभवः । (यथा, महाभारते । १ । २१४ । १६ ।
"सर्व्वमन्यत् परिहृतं धर्षणन्तु महीपतेः ॥")
रतिः । इति मेदिनी । णे, ५४ ॥ धर्षशब्दार्थोऽप्यत्र ॥

धर्षणिः, स्त्री, (कर्षतीति । कृष+"कृषेरादेश्च धः ।" उणां । २ । १०५ । इति अनिः आदेश्च ध. ।) बन्धकी । वृषलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धर्षणी, स्त्री, (धर्षणि+कृदिकारादिति वा ङीष् ।) धर्षिणी । असती । इत्यमरटीकायां भरतः ॥

धर्षिणी, स्त्री, (धर्षति छिनत्ति कुलमिति । धृष+णिनि+ङीप् ।) पुंश्चली । इत्यमरः । २ । ६ । १० ॥

धर्षितं, क्ली, (धृष्यतेऽनेनेति । धृष+क्तः ।) रतिः । मैथुनम् । इति त्रिकाण्डशेषः ॥ (धृष+कर्म्मणि क्तः ।) कृतधर्षणे, त्रि ॥ (अभिभूतः । यथा, महाभारते । ३ । ५५ । १५ ।
"आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः ॥")

धर्षिता, स्त्री, (धृष्यतेऽसौ । धृष+क्त. । टाप् ।) असती । इति शब्दरत्नावली ॥

धलण्डः, पुं, (दधातीति । धा+डः । धं धारकं लण्डति उत्क्षिपतीति । लडि उत्क्षेपे+अच् । कण्टकान्वितत्वादस्य तथात्वम् ।) हटकण्टकवृक्षः । इति शब्दचन्द्रिका ॥ धलआँकुडा इति भाषा ॥

धव, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ, धन्वति । गतौ गतिः । इति दुर्गादासः ॥

धवः, पुं, (धुनोति धवतीति वा । धु धू वा+अच् ।) पतिः । (यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ४५ ।
"मा विद्या च हरे. प्रोक्ता तस्या ईशो यतो भवान् ।
तस्मान्माधवनामासि धवः स्वामीति शब्दितः ॥")
नरः । इत्यमरः । ३ । ३ । २०५ ॥ (यथा,— पञ्चतन्त्रे । २ । १०६ ।
"शौचविशिष्टयाप्यस्ति किञ्चित् कार्य्यं क्वचिन्मृदा ।
निर्द्धनेन धवेनेह न तु किञ्चित् प्रयोजनम् ॥")
धूर्त्तः । इति मेदिनी । वे, १३ ॥ स्वनामख्यातवृक्षः । (यथा, महाभारते । १ । ६६ । १७ ।
"बिल्वार्कखदिराकीर्णं कपित्थधवसङ्कुलम् ॥")
तत्पर्य्यायः । धुरन्धरः २ शकटाख्यः ३ । इति रत्नमाला ॥ दृढतरुः ४ गौरः ५ कषायः ६ मधुरत्वक् ७ शुक्लवृक्षः ८ पाण्डुतरुः ९ धवलः १० पाण्डुरः ११ । अस्य गुणाः । कषायत्वम् । कटुत्वम् । कफानिलनाशित्वम् । पित्तप्रकोपणत्वम् । रुच्यत्वम् । दीपनत्वञ्च । अन्यच्च । शीतत्वम् । प्रमेहार्शःपाण्डुपित्तकफापहत्वम् । मधुरत्वम् । तुवरत्वम् । तिक्तत्वञ्च । तन्नामगुणाः ।
"धवो धटो नन्दितरुः स्थिरो धौरो धुरन्धरः ।
धवः शीतप्रमेहार्शःपाण्डुपित्तकफापहः ॥
मधुरस्तुवरस्तस्य फलञ्च मधुरं मनाक् ॥"
इति भावप्रकाशः ॥
तत्फलं ईषन्मधुरम् । इति राजनिर्घण्टः ॥ (धु कम्पने+"ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् । कम्पनम् ॥)

धवलः, पुं, (धावतीति । धाव ऊ गतिशुद्ध्योः+"धावतेर्वाहुलकात् ह्रस्वत्वञ्च ।" १ । १०८ । इत्युज्ज्वलदत्तोक्त्या कल ह्रस्वश्च ।) धवदृक्षः । चीनकर्पूरः । इति राजनिर्घण्टः ॥ रागविशेषः । भरतमते हिन्दोलरागस्याष्टमपुत्त्रः । इति सङ्गीतशास्त्रम् ॥ वृषश्रेष्ठः । शुक्लः । सुन्दरे, त्रि । इत्युणादिकोषः ॥ श्वेतगुणयुक्ते, त्रि । इत्यमरः । १ । ५ । १३ ॥ (यथा, आर्य्यासप्तशत्याम् । ३०६ ।
"धवलनखलक्ष्म दुर्ब्बलमकलितनेपथ्यमलकपिहिताख्याः ॥")
श्वेतमरिचे, क्ली । इति राजनिर्घण्टः ॥

धवलपक्षः, पुं, (धवलौ शुक्लौ पक्षौ यस्य ।) हंसः । इति राजनिर्घण्टः ॥ (धवलः शुक्लः पक्षः ।) शुक्लपक्षश्च ॥ (शुक्लपक्षविशिष्टे, त्रि । यथा, माघे ।
"धवलपक्षविहङ्गमकूजितैः ॥")

धवलपाटली, स्त्री, (धवला पाटली ।) सितपाटलिका । इति राजनिर्घण्टः ॥

धवलमृत्तिका, स्त्री, (धवला मृत्तिका ।) खटिनी । इति राजनिर्घण्टः ॥

धवलयावनालः, पुं, (धवलो यावनालः ।) यावनालविशेषः । तत्पर्य्यायः । पाण्डुरः २ तारतण्डुलः ३ नक्षत्रकान्तिविस्तारः ४ दृष्टः ५ मौक्तिकतण्डुलः ६ । अस्य गुणाः । गौल्यत्वम् । बल्यत्वम् । वृष्यत्वम् । रुच्यप्रदत्वम् । पथ्यत्वम् । त्रिदोषार्शोगुल्मव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

धवला, स्त्री, (धावतीति । धाव+कलः ह्रस्वश्च । अनुदात्तत्वाभावात् न ङीष् ।) शुक्ला गौः । इत्यमरः । २ । ९ । ६७ ॥

धवली, स्त्री, (धवल+गौरादित्वात् ङीष् ।) शुक्ला गौः ॥ इत्यमरः । २ । ९ । ६७ ॥

धवलोत्पलं, क्ली (धवलमुत्पलम् ।) कुमुदम् । इति राजनिर्घण्टः ॥

धवाणकः, पुं, (धुनाति कम्पयति वृक्षादीनीति । धू+"आणको लूधूशिङ्घिधाञ्भ्यः ।" उणां ३ । ८३ । इति आणकः ।) वायुः । इत्युणादिकोषः ॥

धवित्रं, क्ली, (धूयतेऽनेनेति । धू+"अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) मृगचर्म्मरचितव्यजनम् । इत्यमरः । २ । ७ । २३ ॥

धा, डु ञ जि धारणे । पुष्टौ । दाने । इति कविकल्पद्रुमः ॥ (ह्वां-उभं-सकं अनिट् ।) डु, धित्रिमम् । ञ जि, दधाति धत्ते । धारणं धरणम् । दाने, द्वियता विहितं त्वयाथवेति किराते विहितं दत्तमित्यर्थः । इति दुर्गादासः ॥

धाः, पुं, (दधातीति । धा+क्विप् ।) ब्रह्मा । धारकः । इति मेदिनी । धे, १ ॥ बृहस्पतिः । इत्येकाक्षरकोषः ॥

धाकः, पुं, (दधातीति । धा+"कृदाधारार्चिकलिभ्यः कः ।" उणां ३ । ४० । इति कः ।) वृषः । आहारः । इत्युणादिकोषः ॥ अन्नम् । स्तम्भः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (आधारः । इत्युज्ज्वलदत्तः ॥)

धाटी, स्त्री, शत्रुसम्मुखगमनम् । तत्पर्य्यायः । प्रपातः २ अभ्यवस्कन्दः ३ अभ्यासादनम् ४ । इति हेमचन्द्रः । ३ । ४६४ ॥

धाणकः, पुं, (दधातीति । धा+"आणको लूधूशिङ्घिधाञ्भ्यः ।" उणां ३ । ८३ । इति आणकः ।) दीनारभागः । इत्युणादिकोषः ॥

धातकी, स्त्री, (धातुं करोतीति । धा+तत्करोतीति णिच् । टिलोपः । ततः क्कुन् । ततः पिप्पल्यादित्वात् ङीष् ।) पुष्पविशेषः । धाइफुल इति भाषा । तत्पर्य्यायः । वह्निपुष्पी २ ताम्रपुष्पी ३ धावनी ४ अग्निज्वाला ५ सुभिक्षा ६ पार्व्वती ७ बहुपुष्पिका ८ कुमुदा ९ सीधुपुष्पी १० कुञ्जरा ११ मद्यवासिनी १२ गुच्छपुष्पी १३ संघपुष्पी १४ दोग्रपुष्पिणी १५ तीव्रज्वाला १६ वह्निशिखा १७ मद्यपुष्पा १८ । इति राजनिर्घण्टः ॥ धातृपुष्पी १९ धातुपुष्पी २० धातृपुष्पिका २१ धात्री २२ धातुपुष्पिका २३ । इति शब्दरत्नावली ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । मदकारित्वम् । विषप्रवाहिकातिसारविसर्पव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ शीतत्वम् । रक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

धाता, [ऋ] पुं, (दधातीति । धा+तृच् ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा, रघुः । १० । ४३ ।
"धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।
दैवात् सर्गादवध्यत्वं मर्त्तेष्वास्थापराङ्मुखः ॥")

विष्णुः । इति हलायुधः ॥ (यथा, महाभारते । १३ । १४९ । ११५ ।
"आधारनिलयो धाता पुष्पहासः प्रजागरः ॥"
"संहारसमये सर्व्वाः प्रजा धयति पिबतीति वा धाता । धेट् पाने इति धातुः ।" इति शाङ्करभाष्यम् ॥ महादेवः । यथा, तत्रैव ।१३।१७।१०३।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")
भृगुमुनिपुत्त्रः । तस्य भार्य्या मेरुकन्या आयतिः । तस्य सुतः मृकण्डुः तस्य च मार्कण्डेयः । इति श्रीभागवतम् ॥ ऊनपञ्चाशद्वायुमध्यगतवायुविशेषः । यथा, वह्निपुराणे गणभेदनामाध्याये ।
"धाता दुर्गो धृतिर्भीमस्त्वभियुक्तस्तथापातृसहः ।
द्युतिर्वपुरनाधृष्योऽथवासः कामो जयो विराट् ॥
इत्येकोनाश्च पञ्चाशन्मरुतः पूर्व्वसम्भवाः ॥"
(आदित्यविशेषः । यथा, महाभारते । १ । ६५ । १४-१५ ।
"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः ।
ये राजन् । नामतस्तांस्ते कीर्त्तयिष्यामि भारत ॥
धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ॥"
ब्रह्मणः पुत्त्रविशेषः । यथा, महाभारते । १ । ६६ । ५१ ।
"द्वौ पुत्त्रौ ब्रह्मणस्त्वन्यौ ययोस्तिष्ठति लक्षणम् ।
लोके धाता विधाता च यौ स्थितौ मनुना सह ॥")
आत्मभूः, त्रि । इति मेदिनी । ते, २७ ॥ धारकः । इति धरणिः ॥

धातुः, पुं, (धीयते सर्व्वमस्मिन्निति । धा + "सितनिगमीति ।" उणां १ । ७० । इति तुन् ।) शरीरधारकवस्तूनि । तद्यथा । कफः । वातः । पित्तम् ।
"शरीरदूषणाद्दोषा मलिनीकरणान्मलाः ।
धारणाद्धातवस्ते स्युर्वातपित्तकफास्त्रयः ॥"
इति वैद्यकम् ॥
("रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ।
सप्त दूष्याः मलामूत्रशकृत्स्वेदादयोऽपि च ॥"
इति वाभटे सूत्रस्थाने प्रथमेऽध्याये ॥
धातुशब्देनात्र शुक्रार्थेऽप्युच्यते तद् यथा ।
"तथाहि पुष्पमुकुलस्थो गन्धो न शक्यमिहास्तीति वक्तुं नैव नास्तीत्यथवास्ति सतां भावानामभिव्यक्तिरिति ज्ञात्वा केवलं सौक्ष्म्यान्नाभिव्यज्यते स एव गन्धो विवृतपत्त्रकेशरे कालान्तरेणाभिव्यक्तिं गच्छत्येव बालानामपि वयःपरिणामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोऽर्त्तवादयश्च विशेषा नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिर्भवति । स एवान्नरसो वृद्धानां जरापक्वशरीरत्वाम् प्रीणनो भवति । त एते शरीरधारणाद्धातव इत्युच्यन्ते ॥" इति सुश्रुते सूत्रस्थाने १४ अध्यायः ॥
अथ धातुशब्दस्य निरुक्तिमाह ।
"एते सप्त स्वयं स्थित्वा देहं दधति यन्नृणाम् ।
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ॥"
अथ धातूनां कर्म्माण्याह ।
"प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे ।
गर्भोत्पादश्च कर्म्माणि धातूनां कथितानि हि ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रसः । रक्तम् । मांसम् । मेदः । अस्थि । मज्जा । शुक्रम् । महाभूतानि । तद्यथा । पृथिवी । जलम् । तेजः । वायुः । आकाशः । तद्गुणाः, यथा । गन्धः । रसः । रूपम् । स्पर्शः । शब्दः । इन्द्रियाणि यथा । चक्षुः । श्रोत्रम् । घ्राणम् । जिह्वा । त्वक् ॥ ग्रावविकृतिः । सा तु गैरिकमनःशिलादि । (यथा, कुमारे । १ । ४ ।
"अकालसन्ध्यामिव धातुमत्ताम् ॥")
शब्दयोनिः । सा च साधुशब्दप्रकृतिः । भूपचपठप्रभृतिः । स्वर्णादिः । इत्यमरभरतौ ॥ * ॥
यथा, शब्दमालायाम् ।
"सुवर्णरूप्यमाणिक्यहरितालमनःशिलाः ।
गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः ॥
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः ॥"
नव धातवो यथा, सुखबोधे ।
"हेमताराभनागाश्च ताम्ररङ्गे च ती- - =
कांस्यकं कान्तलौहञ्च धातवो नव कीर्त्तिताः ॥"
अष्टधातवो यथा, दानसागरे ।
"हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च ।
रङ्गमायसरैत्यञ्च धातवोऽष्टौ प्रकीर्त्तिताः ॥"
अपि च वैद्यके ।
"सुवर्णं रजतं ताम्रं लौहं कुप्यञ्च पारदम् ।
वङ्गञ्च सीसकञ्चैव इत्यष्टौ देवसम्भवाः ॥"
सप्तधातवो यथा, भावप्रकाशे ।
"स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशदमेव च ।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः ॥"
ताम्राद्युत्पत्तिर्यथा,—
"शृणु तत्त्वेन मे भूमे ! कथ्यमानं मयानघे ! ।
एकाग्रं चित्तमाधाय येन ताम्रं मम प्रियम् ॥
पूर्व्वं कमलपत्राक्षि ! गुडाकेशो महासुरः ।
ताम्ररूपं समादाय ममैवाराधने रतः ॥
तञ्च दृष्ट्वा मया प्रोक्तं प्रसन्नेनान्तरात्मना ।
गुडाकेश ! महाभाग ब्रूहि किं करवाणि ते ॥
चक्रेण वधमिच्छामि त्वया मुक्तेन केशव ! ।
वैशाखस्य तु मासस्य शुक्लपक्षे तु द्वादशीम् ॥
मम तेजोमयं चक्रं पातयिष्यत्यसंशयम् ।
तदेव चक्रेण विपाटितोऽसौ
प्राप्तोऽपि मां भागवतप्रधानः ॥
ताम्रन्तु तन्मांससमस्तकं सुवर्ण-
मस्थीनि रूप्यं बहुधातवश्च ।
रङ्गञ्च सीसं त्रपुधातुसत्त्व
कांस्यञ्च रीतिश्च मलस्तु तेषाम् ॥
एतद्भागवते कार्य्यं मम प्रियकरं सदा ।
एवं ताम्रं समुत्पन्नमिति मे रोचते हि तत् ॥"
इति वराहपुराणम् ॥ * ॥
"हरितालं हरेर्वीर्य्यं लक्ष्मीवीर्य्यं मनःशिला ।
पारदं शिववीर्य्यं स्यात् गन्धकः पार्व्वतीरजः ॥"
इति वैद्यकम् ॥ * ॥
सप्तोपधातवो यथा,—
"माक्षिकं तुत्थकाभ्रे च नीलाञ्जनशिलालकाः ।
रसकश्चेति विज्ञेया एते सप्तोपधातवः ॥" * ॥
शरीरस्थसप्तधातुभवसप्तोपधातवो यथा,—
"स्तन्यं रजश्च नारीणां काले भवति गच्छति ।
शुद्धमांसभवः स्नेहो यः सा सकीर्त्त्यते वसा ॥
स्वेदो दन्तास्तथा केशास्तथैवौजश्च सप्तमम् ।
इति धातुभवा ज्ञेया एते सप्तोपधातवः ॥"
इति सुखबोधः ॥

धातुकासीसं, क्ली, (धातुरूपं कासीसम् ।) कासीसम् । इति हेमचन्द्रः । ४ । १२२ ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"कासीसं धातुकासीसं हरितं तच्च लोहितम् ॥")

धातुघ्नं, क्ली, (धातुं स्वर्णादिकं हन्तीति । हन + टक् ।) काञ्जिकम् । इति हेमचन्द्रः ।३।८०॥

धातुनाशनं, क्ली (धातुं स्वर्णादिकं नाशयतीति । नश् + णिच् + ल्युः ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

धातुपः, पुं, (धातुं अस्थिमज्जामांसोत्पादकपदार्थविशेषं पाति रक्षतीति । पा + कः ।) शरीरस्थप्रथमधातुः । रस इति ख्यातः । इति शब्दचन्द्रिका ॥

धातुपुष्पिका, स्त्री, (धातुरिव पुष्पं यस्याः । जातौ ङीष् । स्वार्थे कन् पूर्व्वह्रस्वः । यद्वा कप् । टापि अत इत्वम् ।) धातृपुष्पिका । इति शब्दरत्नावली । धाइफुल् इति भाषा ॥

धातुपुष्पी, स्त्री, (धातुरिव पुष्पमस्याः । जातित्वात् ङीष् ।) धातकी । इति भावप्रकाशः ॥

धातुभृत्, पुं, (धातुं गैरिकादिकं बिभर्त्तीति । भृ + क्विप् । तुगागमश्च ।) पर्व्वतः । इति शब्दरत्नावली ॥ धातुपोषके, त्रि ॥

धातुमाक्षिकं, क्ली, (धातुरूपं माक्षिकम् ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"माक्षिकं धातुमाक्षिकं ताप्यं ताप्युत्थसञ्ज्ञकम् ॥")

धातुमारिणी, स्त्री, (धातुं सुवर्णादिकं मारयतीति । मृ + णिच् + णिनि + ङीप् ।) सर्ज्जिका । इति शब्दचन्द्रिका । सोहागा इति भाषा ॥

धातुराजकं, क्ली, (धातुषु राजते इति । राज + ण्वुल् । यद्वा, धातूनां राजा इति समासान्त टच् । ततः स्वार्थे कन् ।) रेतः । इति शब्दचन्द्रिका ॥

धातुवल्लभं, क्ली, (धातुषु वल्लभम् ।) टङ्कणम् । इति राजनिर्घण्टः ॥ (टङ्कणशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

धातुवादी, [न्] पुं, (धातुं वदति उपायान्तरेण कार्त्स्न्यं कथयतीति । वद + णिनिः ।) कारन्धमी । इति हारावली । १८५ ॥

धातुवैरी, [न्] पुं, (धातूनां वैरीव दूषकत्वात् ।) गन्धकः । इति शब्दचन्द्रिका ॥

धातुशेखरं, क्ली, (धातूनामुपधातूनां शेखरमिव श्रेष्ठत्वात् ।) कासीसम् । इति हेमचन्द्रः । ४ । १२२ ॥

धातूपल, पु, (धातु उपधातुरूप उपल: पाषाण:।) कठिनिका। इति हारावली।२१२॥

धातृपुत्र, पु, (धातुर्ब्रह्मण: पुत्र:।) सनत्कुमार:। इति शब्दरत्नावली॥ ब्रह्मण: सुतमात्रञ्च॥

धातृपुष्पिका, स्त्री, (धातृपुष्पी। स्वार्थे कन् पूर्व्व-ह्रस्व:। यद्वा, कप्। टापि अत इत्वम्।) धातकी। इत्यमर:।२।४।१२४॥

धातृपुष्पी, स्त्री, (धातृ पुष्टिकर्त्तृ पुष्पमस्या:। ङीप्।) धातकी। इति शब्दरत्नावली॥

धात्रं, क्ली, (धीयते अस्मिन्नन्नेति। धा+आधारे ष्ट्रन्।) भाजनम्। इति संक्षिप्तसारोणादिवृत्ति:॥

धात्रिका, स्त्री, (धात्री। स्वार्थे कन् टाप् पूर्व्व-ह्रस्वश्च।) आमलकी। इति राजनिर्घण्ट:॥

धात्री, स्त्री, (धीयते पीयते इति। धेट पाने+"सर्व्वधातुभ्य: ष्ट्रन्।" उणा ४।१५८। इति कर्म्मणि ष्ट्रन्। षित्वात् ङीष्। अस्या: स्तनदुग्ध-पानात्तथात्वम्। यद्वा, दधाति धरतीति। धा+तृच्+ङीप्।) माता। (यथा, याज्ञवल्क्य-संहितायाम्।३।८२।
"पुनर्धात्री पुनर्गर्भमोजस्तस्य प्रधावति।
अष्टमे मास्यतो गर्भो जात: प्राणैर्वियुज्यते॥")
उपमाता। (यथा, रघु:।१०।७८।
"कुमारा: कृतसंस्कारास्ते धात्रीस्तनपायिन:।
आनन्देनाग्रजेनेव समं ववृधिरे पितु:॥"
(कुमाररक्षाकर्त्री। धाइ इति भाषा॥ तस्या: परीक्षा यथा,"अतो धात्रीपरीक्षामुपदेक्ष्याम:। अथ ब्रूयात् धात्रीमानयेति समानवर्णां यौव-नस्थां निभृतामनातुरामव्यङ्गामव्यसनामवि-रूपामजुगुप्सितां देशजातीयामक्षुद्रामक्षुद्र-कर्म्मिणीं कुले जातां वत्सलामरोगां जीववत्सां पुंवत्सां दोग्ध्रीमप्रमत्तामनुच्चारशायिनीमशुचारशायिनीमन-न्तावशायिनीं कुशलोपचारां शुचिमशुचि-द्वेषिणीं स्तनस्तन्यसम्पदुपेतामिति।"
"धात्री तु यदा स्यात् स्वक्षीरसंपद्युक्ता तदा स्नातानुलिप्ता शुक्लवस्त्रं परिधायैन्द्रीं ब्राह्मीं शतवीर्य्यां सहस्रवीर्य्याममोघामव्यथां शिवा-मरिष्टां वाट्यपुष्पीं विष्वक्सेनकान्तामिति बिभ्र-त्यौषधी: कुमारं प्राङ्मुखं प्रथमं दक्षिणं स्तनं पाययेदिति धात्रीकर्म्म।" इति चरके शारीर-स्थानेऽष्टमेऽध्याये॥) (दधाति धारयति सर्व्व-मिति। धा+तृच्+ङीप्।) क्षिति:। (गायत्त्री-स्वरूपिणी भगवती। यथा, देवीभागवते।१२।६।७८।
"धात्रीधनुर्धरा धेनुर्धारिणी धर्म्मचारिणी॥")
गङ्गा। यथा, काशीखण्डे।२९।९२।
"धर्म्मोत्सिन्धोर्वादिनी धुर्य्या धात्री धात्रीविभूषणम्॥")
आमलकीवृक्ष:। इति मेदिनी। रे, ४८॥ (अस्या: पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"धात्री वृष्यफला तिष्या वयस्यामलकी शिवा॥")
अथ धात्र्यादुत्पत्तिकारणम्।
"इन्द्रामरगणाभ्यस्य विष्णोर्मोहापनोदाय वद-त्याकाशवाणी शक्तिं शरणं देवाः प्रति वा व्रजत।

"अहमेवास्मि त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणै:।
गौरी लक्ष्मी: स्वधा चेति रज:सत्त्वतमोगुणै:॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ते च ता: सुरा:।
तास्तथा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्-सला:॥
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तदा।
इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठते॥
निर्वपध्वं तत: कार्य्यं भवतां सिद्धिमेष्यति।
क्षिप्तेभ्यस्तत्र बीजेभ्यो वनस्पत्य: स्त्रियोऽभवन्॥
धात्री च मालती चैव तुलसी च नृपोत्तम।।
धात्र्युद्भवा स्मृता धात्री माभवा मालती स्मृता॥
गौरीभवा च तुलसी तम:सत्त्वरजोगुणा:।
स्त्रीरूपिण्यो वनस्पतीर्दृष्ट्वा विष्णुस्तदा नृप॥
उदतिष्ठत् सम्भ्रमात् वृन्दारूपातिशयविभ्रमात्॥"
अस्या माहात्म्यं यथा,—
"शृणुष्व धात्रीमाहात्म्यं सर्व्वपापहरं शुभम्।
यत् पुरा हरिणा प्रोक्तं वशिष्ठं प्रति नारद॥
धात्री वत्स। कृत्वा धात्री मातृवत् कुरुते कृपाम्।
इयादायु: पय: पानं स्नानादि धर्म्मसञ्चयम्॥
अलक्ष्मीनाशनं सद्योऽत्यन्तं निर्व्वाणमेव च।
विज्ञानि नैव स्नायन्ते धात्रीस्नानेन वै कृतम्॥
तस्मात् त्वं कुरु विप्रेन्द्र। धात्रीस्नानं हि यत्नत:।
प्रयास्यसि हरेर्धाम देवत्वं प्राप्य नारद॥
यत्र यत्र मुनिश्रेष्ठ। धात्रीस्नानं समाचरेत्।
तीर्थे वापि गृहे वापि तत्र तत्र श्रिय: स्थिता:॥
धात्रीस्नातानि दिवसे यस्यास्थीनि कलेवरे।
प्रक्षालितानि विप्रेन्द्र। न स स्याद्गर्भसम्भव:॥
धात्रीफलेन विप्रेन्द्र। येषां केशाश्च रञ्जिता:।
ते नरा: केशव यान्ति नाशयित्वा कलिमलम्॥
धात्रीफलं महापुण्यं स्नाने पुण्यतरं स्मृतम्।
पुण्यात् पुण्यतरं वत्स। भक्षणे मुनिपुङ्गव॥
न गङ्गा न गया पुण्या न काशी न च पुष्करम्।
एकैव च यथा पुण्या धात्री माधववासर॥
कार्त्तिके मासि विप्रेन्द्र। धात्रीस्नानं समाचरेत्।
यश्च तच्छ्रद्धया कुर्य्यात् सोऽश्वमेधमवाप्नुयात्॥
धात्रीफलं स्मरेद्यस्तु सदैव मुनिसत्तम।।
प्राग्जन्मनि कृतात् पापात् मुच्यते नात्र संशय:।
संस्मरेद्यस्तु धात्रीं तामहन्यहनि मानव:॥
मुच्यते पातकै: सर्व्वैर्मनोवाक्कायसम्भवै:॥
धात्रीफलान्यमावास्यामष्टमीनवमीषु च।
रविवारे च संक्रान्तौ वर्ज्जयेन्मुनिपुङ्गव॥
यस्य गेहे मुनिश्रेष्ठ। धात्री तिष्ठति सर्व्वदा।
तस्य गेहे न गच्छन्ति प्रेतकुष्माण्डराक्षसा:॥
धात्रीस्नाने हरेर्वासे वासरे हरिवासरे।
जगन्मन्त्रो विनश्येत शतमेधायुतं फलम्॥
छायायामलकैर्यस्तु कार्त्तिके हरिवत्सल।।
परितोषं समायाति तस्य वै माधव: स्वयम्॥
धात्रीच्छायां समासाद्य कुर्य्यात् श्राद्धन्तु यो मुने।।
मुक्तिं प्रयान्ति पितर: प्रसादात्तस्य वै हरे:॥
मूर्द्ध्नि धात्री मुखे कण्ठे देहे च मुनिसत्तम।।
धत्ते धात्रीफलं यस्तु स महात्मा हि दुर्लभ:॥

धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषित:।
धात्रीफलकृताहारो नरो नारायणो भवेत्॥
य: कश्चिद्वैष्णवो लोके धत्ते धात्रीफलं मुने।।
प्रियो भवति विष्णो: स मनुष्याणाञ्च का कथा॥
धात्रीफलानि यो नित्यं वहते करसंपुटे।
तस्य नारायणो देवो वरमेकं प्रयच्छति॥
धात्रीफलं न मोक्तव्य कदाचित् करसंपुटात्।
य इच्छेद्विपुलान् भोगानन्ते यो मुक्तिमिच्छति॥
धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि।
स वैष्णवो न विज्ञेयो विष्णुभक्तिपरोऽपि च॥
न त्याज्या तुलसीमाला धात्रीमाला विशेषत:।
तथा रुद्राक्षमालापि धर्म्मकामार्थसिद्धिदा॥
यावत्तिष्ठति कण्ठस्था धात्रीमाला नरस्य हि।
तावत्तस्य शरीरेऽपि सदा तुष्यति केशव:॥
यावद्दिनानि वहते धात्रीमालां करे नर:।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत्॥
सर्व्वदेवमयी धात्री वासुदेवमन:प्रिया।
आरोपणीया सेव्या च सेचनीया सदा बुधै:॥
एतत्ते सर्व्वमाख्यातं धात्र्या माहात्म्यमुत्तमम्।
श्रोतव्यञ्च सदा सद्भिश्चतुर्व्वर्गफलप्रदम्॥"
इति पाद्मोत्तरखण्डे १२० अध्याय:॥
अपि च।
"तुलसीवृक्षमाश्रित्य या यास्तिष्ठन्ति देवता:।
आमलक्या अपि प्राज्ञ। तास्ता एव वसन्ति च॥
अशुभं वा शुभं वापि यत् कर्म्मामलकीतले।
क्रियते मानवैर्विप्र। भवेत्तत् सर्व्वमक्षयम्॥
पवित्रैर्नूतनै: पत्रैर्धात्र्या य: पूजयेद्धरिम्।
स मुक्त: पापजालेन सायुज्यं लभते हरे:॥
धात्री च तुलसी देवी न तिष्ठेद्यत्र जैमिने।।
स्थानं तदपवित्रं स्यान्न च पुण्यक्रिया फलेत्॥
धात्र्या हीनं तुलस्या च निलयं यस्य भूसुर।।
अलक्ष्मी: पातकं सर्व्वं कलिश्च तेन तोषित:॥
धात्रीकाष्ठस्य मालाश्च यो वहेन्मस्तिकाम्बर।
तत् सर्व्वमक्षयं प्रोक्तं शुभं वाशुभमेव वा॥
यस्तु धात्रीफलं भुङ्क्ते मानवोऽखिलतत्त्ववित्।
तद्देहाभ्यन्तरस्थापि सर्व्वं पापं विनश्यति॥
धात्रीफलमयीं मालां वहते द्विजसत्तम।
ब्रवीमि शृणु माहात्म्यं सर्व्वपापहरं शुभम्॥
श्मशानेऽपि यदा मृत्युस्तस्य स्याद्दैवयोगत:।
गङ्गामरणजं पुण्यं स प्राप्नोति न संशय:॥
नित्यं ददाति यो धात्र्यां तुलसीमञ्जरीसमम्।
दिने दिने लभेत् पुण्यं सोऽश्वमेधशतोद्भवम्॥
धात्रीतरुं यो हन्ति सर्व्वदेवतनाश्रयम्।
स दहति हरेरङ्गं नात्र कार्य्या विचारणा संशय:॥
सर्व्वदेवमया धात्री विशेषात् वैष्णवप्रिया।
तस्मात्तु गुणं तस्या वक्तुं नापि न शक्यते॥"
इति क्रियायोगसारे १९ अध्याय:॥
यथा स्कान्दे।
"न धात्री सदृशा वृक्षो न विष्णोस्तुलसीसमम्।
न विष्णुसदृशं वन्द्यं न पत्नी सदृशी गति:॥")
इति काशीखण्डम्॥

अथ धात्रीशैवपापफलम् ।
"पिता पितामहश्चान्ये अपुत्रा ये च गोत्रिणः ।
तृणयोनिं गता ये च ये च कीटत्वमागताः ॥
रौरवे नरके ये च महारौरवसंज्ञके ।
तिर्य्योनिषु गता ये च ये च मत्स्यत्वमागताः ॥
पिशाचत्वं गता ये च ये च प्रेतत्वमागताः ॥
ते पितरो मया दत्तं धात्रीतले पयः पयः ॥
ते सर्व्वे तृप्तिमायान्तु धात्रीमूलमिषेचनात् ॥
इति धात्र्यां चाभिषिञ्च पारानष्टौत्तरं शतम् ।
नाथ प्रदक्षिणीकृत्य कुर्य्यान्नीराजनं ततः ॥
नागरान्तु प्रकाशेन प्रसन्नवियम् ।" इति श्रीहरिभक्तिविलासे १८ विलासः ॥

धात्रीपत्त्र क्ली, (धात्रीपत्त्रमिव पत्त्रमस्य ।) तालीशपत्त्रम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"तालीशं पत्त्रकं प्रोक्तं धात्रीपत्त्रञ्च तत् स्मृतम् ॥"
धात्र्याः पत्त्रम् ।) आमलकीदलञ्च ॥

धात्रीपुत्त्र पुं, (धात्र्या उपमातुः पुत्त्रः ।) नटः । इति हेमचन्द्रः । ३।२४२ । उपमातृसुतश्च ॥

धात्रीफल, क्ली, (धात्र्या आमलक्याः फलम् ।) आमलकी । इति जटाधरः ॥ (विवरणमामलकीशब्देऽस्य ज्ञातव्यम् ॥)

धात्रेयिका, स्त्री, (धात्रेयी + स्वार्थे कन् टाप् । पृषोदरात् ।) धात्री । धाइ इति भाषा । यथा सिद्धान्तकौमुद्यां चतुर्थीप्रकरणे ।
"पत्रेऽधात्रेयिकायाश्च प्राङ्गुले यायुदङ्गुले ॥"

धात्रेयी, स्त्री, धात्रीशब्दात् स्वार्थे (ढक्) इप्(ङीप्)-प्रत्ययेन निष्पन्ना ॥ धात्रेयिका । (यथा, देवीभागवते । ३ । ६ । ३२ ।
"करे धृत्वाथ धात्रेयी तामुवाच मुखस्मितनाम् ।
का चिन्ता करभोरु ! त्वमाधत्सेऽद्य स्मितानाम्-एम् ॥")

धानक क्ली, (धन्याक पृषोदरादित्वात् साधुः ।) धन्याकम् । इति राजनिर्घण्टः ॥ (अस्य विषयो यथा वाभटे चिकित्सितस्थाने नवमेऽध्याये ।
"श्लेष्मातिसारवातोक्तं विधिनादामपाचनम् ।
कलशमनुवत्सस्य पिबेत् पथ्याविदीपनम् ॥
बिल्वकर्कटिकामुस्तप्राव्यदा वि भेषजम् ।
वचाविडङ्गभूतीकधानकामरदारु वा ॥")

धाना, स्त्री, (धीयते इति । धा + "धापृवस्यत्यतिभ्यो नः ।" उणा । ३ । ६ । इति नः टाप् च ।) भृष्टयवः । धानाकम् । (पर्य्याया यथा,
"धान्यकं धानकं धान्यं धाना धानेयकन्तथा ।
कुस्तुम्बुरु धेनुकाच्छत्रा कुस्तुम्बुरु वितुन्नकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) अभिनवः । अङ्कुरः । भिन्नः । पूर्व्वसक्तवः । इति मेदिनीहेमचन्द्रौ ॥

धाना, स्त्री (धीयन्ते इति । धा + "धापृवस्यत्यतिभ्यो नः ।" उणा । ३ । ६ । इति नः टाप् च ।) भृष्टयवः । बहुवचनान्तोऽयं शब्दः । इत्यमरः । २ । ९ । ४७ ॥ (यथा, ऋग्वेदे । ३ । ३५ । ३ ।
"प्रयोगामन्नापि पृथ्वी शोका दिवे दिवेम हरी इति धानाः ॥"
"तव मद्यपीरेककपात् धाना भक्षयमान् दिवे दिवे प्रतिदिवसमाशु भक्षय ।" इति तद्भाष्ये सायनः ।)
"यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति स्त्रियाम् ।
धाना, रूक्षा दुर्जरा तृष्णाकृद्गुरवश्च ताः ॥
तथा मेदःकफच्छर्द्दिनाशनाः संप्रकीर्त्तिताः ॥"
इति राजनिर्घण्टः ॥
("धानानां दुर्जरास्ते तु वाताः प्रायशो विरमाल्का ।
सुष्कलागर्भा चैव विष्टम्भिताश्च दुर्ज्जराः ॥
विरूढधाना शष्कुल्यो मधुक्रोडाः सपिण्डकाः ।
पूपाः पूपलिकाद्याश्च गुरवः पैष्टिकाः परम् ॥"
"धाना पर्पटपूपाद्यास्तान् बुद्धा निर्दिशेद्भिषक् ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

धानाका, स्त्री, (धाना + स्वार्थे कन् टाप् ।) धाना । निस्तुषभृष्टयवयोर्न शब्दः । इति शब्दरत्नावली ॥

धानाचूर्ण, क्ली (धानानां चूर्णम् ।) भृष्टयवचूर्णम् । सक्तवः । इति हेमचन्द्रः । ३ । ६५ ॥

धानी स्त्री, (धीयते धार्य्यतेऽत्र । धा + आधारे ल्युट् । टित्वात् ङीप् ।) आधारः । यथा, मत्स्यधानी राजधानी । इत्यादि भरतः ॥ पीलुवृक्षः । इति राजनिर्घण्टः ॥

धानुष्क, त्रि, (धनुः प्रहरणमस्येति । धनुः + तदस्य इत्यधिकृत्य "प्रहरणम् ।" ४ । ४ । ५७ । इति ठक् । यद्वा, धनुषा जीवतीति । "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् ।
"इसुसुक्तान्तात् कः ।" ७ । ३ । ५१ । इति ठस्य कः ।) धनुर्द्धरः । इत्यमरः । २ । ८ । ६८ ॥
(यथा, महाभारते । ६ । २० । १७ ।
"अक्षौहिणी दश धानुष्का धानुष्के दश चार्मिकः ।
एवं पाञ्चाल्यनीकानि भीष्मेण तव भारत ॥")

धानुष्का, स्त्री, (धनुरिव अवयवोऽस्या इति ठक् टाप् च ।) अपामार्गवृक्षः । इति शब्दचन्द्रिका ।
(अपामार्गशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

धानुष्य, पुं, (धनुषि साधुरिति । धनुष् + ष्यञ् ।) वंशः । इति राजनिर्घण्टः ॥

धानेय, क्ली, (धाना एव । स्वार्थे ढक् ।) धन्याकम् । इति राजनिर्घण्टः ॥

धानेयक, क्ली, (धानेय + स्वार्थे कन् ।) धन्याकम् । इति जटाधरः ॥

धान्या स्त्री, एलवालुका । इति शब्दचन्द्रिका ॥ एलाइच इति भाषा ॥

धान्य, क्ली, चतुस्तिलपरिमाणम् । इति शुभङ्करः । धन्याकम् । धनीया इति यस्य भाषा । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्याकं धान्यकं धानं कुस्तुम्बुरु च धनीयकम् ।
धन्या कुस्तुम्बुरी धान्या वेसवारा वितुन्नकम् ॥")
यवादिकम् । (धान्ये पोषणे साधु इति । धान + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।

यद्वा, दधातीति । धा + "धायेर्यन् तुट् च ।" उणां । ५ । ४८ । इति यन् तुट् च ।) सतुषशस्यादि । धान इति भाषा ॥ तत्पर्य्यायः । ब्रीहिमम् २ शस्याहम् ३ अन्नम् ४ अदम् ५ जीवसाधनम् ६ स्तम्बकरि ७ व्रीहिः ८ ।
(यथा, ऋग्वेदे । ६ । १३ । ४ ।
"विप्र स देव प्रति वारमग्ने धत्ते धान्यं पत्यते वसव्यैः ॥")
तस्य शूकधान्यगुणाः । त्रिदोषशमनत्वम् । तिक्तोष्णत्वम् । पित्तप्रशमनत्वञ्च ॥ * ॥ शमीधान्यगुणाः । गुरुत्वम् । शिशिरत्वम् । विष्टम्भित्वञ्च ॥ * ॥ तृणधान्यगुणाः । वातलत्वम् । ग्राहित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ धान्यं त्रिविधम् । हैमन्तिकम् १, शारदम् २, ग्रैष्मम् ३, वार्षिक ४ । प्राहट कालभवम् ॥ * ॥ एतेषां गुणाः तन्नामे द्रष्टव्याः ॥ * ॥ नवधान्यगुणाः । गुरुत्वम् ॥ पुराणधान्यगुणः । नातिगुणान्न किञ्चिहीनाः ॥ * ॥ रोपातिरोपितधान्यगुणाः । लघुत्वम् । शीघ्रपाकित्वम् । गुणोत्तरत्वम् । अदाहित्वम् । दोषघ्नत्वम् । बल्यत्वम् । मूत्रविवर्द्धनत्वञ्च ॥ * ॥ छिन्नं धान्यं अभिष्यन्दि । चवनरोहितं धान्यं लघु । सतनदेशादूर्द्ध्वं धान्यं वातप्रकोपनं रूक्षं लघुनं पुष्पघाति । सूक्ष्मधान्यं शमीधान्यं समसराद्दूर्द्ध्वं प्रशस्तम् । शमीधान्यं यथाक्रमेण वातघ्नं रूक्षम् । अभिनवं सतमायेन गुरु । तथा पत्रणोधूममामतिला हिताः । पुरायाः विरसा रूक्षा न तथार्थकराः ॥ अकालजं व्याधिहतमपर्य्यागतं अभूमिजं नवञ्च धान्यं न गुणवत् ॥ अकालजातं धान्यं विरसं सत्त्ववातुप्रदूषकञ्च । इति राजवल्लभः ॥ * ॥ व्रतादौ अग्राह्यवर्ज्जनीयधान्यानि यथा,—
"एकादश्यां विशेषेण त्वन्नमात्रं परित्यजेत् ।
फल मूल जलादीनि किञ्चिद्द्रव्यं प्रकल्पयेत् ॥
अन्नन्तु धान्यसम्भूतं गिरिशे यदि जायते ।
धान्यानि विविधानीह जगत्यां सन्ति यत्नतः ॥
श्याममाषमसूराश्च धान्यकोद्रवसर्षपाः ।
सप्तकौ राजमाषाश्च तुवरी कुमरस्तथा ॥
यवगोधूमसुद्गाश्च तिलकङ्गुकुलत्थकाः ।
गवेधुकाश्च नीवारा श्यामकाश्च कलायकाः ॥
माषकौ चणकोरङ्गौ कोषकौ वककस्तथा ।
तिलकाद्यणकाद्याश्च धान्यानि कथितानि वै ॥
एवकाद्यन्नसम्भूतमन्नं भवति शोभने ।
तस्मात्तानि व्रते भद्रे सम्यक्नैव विवर्ज्जयेत् ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥

अथ धान्यच्छेदनदिनम् । तत्र तिथयः रिक्ता निरिक्ता । वाराः रविशुक्रसोमबुधबृहस्पतीनाम् । नक्षत्राणि कृत्तिका भरणी अश्लेषा पूर्व्वभाद्रपत् धनिष्ठा पूर्व्वाषाढा ज्येष्ठा चित्रा उत्तरफल्गुनी उत्तराषाढा उत्तरभाद्रपत् एतानि । तत्र चन्द्र शोभनः । लग्नानि वृषसिंहवृश्चिककुम्भमिथुनतुलाकन्याधनुःपूर्व्वार्द्ध-

स्वकीयजन्मलग्नमकरसंज्ञकानि ॥*॥ अथ धान्यस्थापनदिनम्। तत्र नक्षत्राणि। भरण्यश्लेषार्द्राकृत्तिकाविशाखापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपज्ज्येष्ठामघाभिन्नानि। तत्र वाराः शुभग्रहाणाम्। लग्नानि मकरवृषसिंहवृश्चिककुम्भमिथुनकन्याधनुर्मीनसंज्ञकानि ॥*॥ अथ धान्यादिवृद्धिदानदिनम्। तत्र नक्षत्राणि श्रवणा धनिष्ठा शतभिषा विशाखा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी रेवती पुनर्व्वसुः पुष्यः अश्विनी ज्येष्ठा एतानि। वाराः बुधभिन्नाः। इति ज्योतिषम् ॥

धान्यकं, क्ली, (धान्यमिव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) धान्याकम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये। "लङ्घनानन्तरं चान्नकाले धान्यकजीरकादिदीपनसिद्धान्यन्नानि ॥" अस्य गुणा यथा,—

"धान्यकञ्चाजगन्धा च सुमुखाश्चेति रोचनाः।
सुगन्धा नातिकटुका दोषानुत्क्लेशयन्ति तु ॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥ धान्यमेव स्वार्थे कन्। धान्यम्। पु, चत्रियनृपतिविशेषः। यथा, राजतरङ्गिण्याम्।८।१०७५। "राजन्याविच्छिटक्कुलोद्भूतावुदयधान्यकौ ॥")

धान्यकोष्ठकं, क्ली, (धान्याय धान्यरक्षणाय यत् कोष्ठकं गृहम्।) धान्यरक्षार्थगृहम्। इति हलायुधः॥ गोला इति भाषा ॥

धान्यचमसः, पु, (चम्यते भक्ष्यते इति। चम+असच्। धान्यं खिन्नधान्यमेव चमसः।) चिपिटकः। इति त्रिकाण्डशेषः॥

धान्यधेनुः, स्त्री, (धान्यनिर्म्मिता धेनुः।) दानार्थधान्यनिर्म्मितधेनुः। यथा,—

"विषुवे चायने वापि कार्त्तिक्यान्तु विशेषतः।
तदिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम् ॥
यां दत्त्वा सर्व्वपापेभ्यः शशाङ्क इव राहुतः ॥
दशधेनुप्रदानेन यत् फलं राजसत्तम।।
तत् सर्व्वमेवमाप्नोति व्रीहिधेनुप्रदो नरः॥
कृष्णाजिनं ततः कृत्वा प्रागवदत् संन्यसेद्बुधः।
गोमयेनानुलिप्तायां शोभनां वस्त्रसंयुताम् ॥
पूजयेद्वेदिमध्ये तु वेदनिर्घोषमङ्गले ॥
उत्तमा धान्यधेनुः स्याद्द्रोणस्यापि चतुष्टयैः।
मध्यमा च तदर्द्धेन वित्तशाठ्यं न कारयेत् ॥
चतुर्थांशेन धेन्वा वै वत्सन्तु परिकल्पयेत्।
कर्त्तव्ये रुक्मशृङ्गे तु राजतखुरसंयुता ॥
गोरुचः पूर्व्ववद्घ्राणमगुरुश्चन्दनन्तथा।
मुक्ताफलमया दन्ता घृतक्षौद्रमयं मुखम् ॥
प्रशस्तपत्रश्रवणा कांस्यदोहनकान्विता।
इक्षुयष्टिमयाः पादाः क्षौमपुच्छसमन्विता ॥
नानाफलसमोपेता रत्नगर्भसमन्विता।
पादुकोपानहौ छत्रं भाजनं तर्पणं तथा ॥
इत्येवं रचयित्वा तां कृत्वा दीपार्चनादिकम्।
पुण्यकालञ्च संप्राप्य स्नातः शुक्लाम्बरी शुची।
त्रिः प्रदक्षिणमावृत्य मन्त्रेणानेन कीर्त्तयेत् ॥
त्वं विप्र। महाभाग। वेदवेदाङ्गपारग।।
यामेताञ्च मया दत्तां गृह्णीष्व त्वं द्विजोत्तम।।
प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥
त्वमेका लक्ष्मीर्गोविन्दे स्वाहा या च विभावसौ।
शक्रे शचीति विख्याता मेधा मुनिषु सत्तम।॥
तस्मात् सर्व्वमयी देवी धान्यरूपेण संस्थिता।
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
दत्त्वा प्रदक्षिणं कृत्वा तं समाप्य द्विजोत्तमम्।
यावच्च पृथिवी सर्व्वा वसुरत्नानि भूपते।।
तावत् पुण्यं समाधिक्यं व्रीहिधेनोश्च तत् फलम् ॥
तस्मान्नरेन्द्र। दातव्या भुक्तिमुक्तिफलप्रदा।
इह लोके च सौभाग्यमायुरारोग्यवर्द्धनम् ॥
विमानेनार्कवर्णेन किङ्किणीरत्नमालिना।
स्तूयमानोऽप्सरोभिश्च प्रयाति शिवमन्दिरम् ॥
यावच्च स्मरते जन्म तावत् स्वर्गे महीयते।
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
एवं हरेण चोद्दिष्टं श्रुत्वा वाक्यं नरोत्तम।
सर्व्वपापविशुद्धात्मा रुद्रलोके महीयते ॥"

इति वराहपुराणम् ॥

धान्यबीजं, क्ली, (धान्यस्य बीजमिव बीजं यस्य।) धन्याकम्। इति राजनिर्घण्टः॥

धान्यमायः, पु, (धान्यं मातीति। मा+"ह्वावामश्च।" ३।२।२। इति अण्।) धान्यविक्रयी। इति संक्षिप्तसारव्याकरणम् ॥

धान्यराजः, पु, (धान्यानां राजा। टच् समासे। यद्वा, धान्येषु राजते इति। राज दीप्तौ+अच्।) यवः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य यवशब्दे ज्ञातव्याः॥)

धान्यवर्द्धनं, क्ली, (धान्यस्य वर्द्धनं वृद्धिर्यस्मात्।) वार्द्धुष्यम्। इति त्रिकाण्डशेषः॥ धानेर वाड़ी इति भाषा ॥

धान्यवीरः, पु, (धान्येषु वीर इव बलाधायकत्वात्।) माषः। इति राजनिर्घण्टः॥

धान्यशीर्षकं, क्ली, (धान्यस्य शीर्षकं अग्रभागः।) धान्यमञ्जरी। इति जटाधरः॥ धानेर शीष इति भाषा ॥

धान्याकं, क्ली, (धान्यमकति स्वादुत्वेन प्राप्नोतीति। अक गतौ+अण्।) धन्याकम्। इति हेमचन्द्रः।३।८३ ॥

धान्याचलः, पुं, (धान्यनिर्म्मितोऽचलः पर्व्वतः।) दानार्थधान्यनिर्म्मितपर्व्वतः। तस्य विधानं यथा,—

"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः।
गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वद्दशमः शर्कराचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥
धान्यशैलादयो येऽपि देयाः शास्त्रं विजानता।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम्।
प्रागुदक्प्रवणं तद्वत् प्राङ्मुखञ्च विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
तन्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥
मेरुर्महाव्रीहिमयस्तु मध्ये
सुवर्णवृक्षत्रयसंयुतः स्यात्।
पूर्व्वेण मुक्ताफलवज्रयुक्तो
याम्ये च गोमेदकपुष्परागैः ॥
पश्चाच्च गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवाल-
लतान्वितः शुक्तिशिलातलः स्यात् ॥
ब्रह्माथ विष्णुर्भगवान् पुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात्।
मूर्द्धन्यवस्थानगतमत्सरेण
कार्य्यास्त्वनेकैश्च पुनर्द्विजौघाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेष्वपि राजतः स्यात्।
तथेक्षुवंशावृतकन्दरस्तु
घृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराण्यम्बुधरावली स्यात्
पूर्व्वेण नीलानि च दक्षिणेन।
वासांसि पश्चादथ कर्व्वुराणि
रक्तानि चैवोत्तरतो घनाली ॥
रौप्यान्महेन्द्रप्रमुखानथाष्टौ
संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलाली च समन्ततः स्या-
न्मनोरमं माल्यविलेपनञ्च ॥
वितानकञ्चोपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितञ्च।
इत्थं निवेश्यामरशैलमग्र्यं
मेरोस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेन चतुर्द्दिशञ्च
संस्थापयेत् पुष्पविलेपनाढ्यान् ॥
पूर्व्वेण मन्दरमनेकफलावलीभि-
र्युक्तं यवैः कनकभद्रकदम्बचिह्नैः।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरारुणोदसरसाथ वनेन चैव
रौप्येण शक्तिघटितेन विराजमानम्।
याम्येन गन्धमदनश्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजो वा ॥
हैमेन यक्षपतिनाह्नमासनेन
वस्त्रैश्च राजतवनेन च संयुतः स्यात् ॥
पश्चात्तिलाचलमनेकसुगन्धिपुष्प-
सौवर्णपिप्पलहिरण्मयहंससंयुक्तम्।
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे ॥

संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि माषमयं सवस्त्रम्
पुष्पैश्च हैमवटपादपशेखरान्त-
माकारयेत् कनकधेनुविराजमानम् ॥
माध्वीकभद्रसरसा च वनेन तद्व-
द्रौप्येण भास्करवता च युतं विधाय ।
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरिताकृतिभिर्द्विजेन्द्रैः ॥
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यस्तिलैर्यवघृतेन समित्कुशैश्च ।
रात्रौ च जागरमनुद्धतगीततूर्य्यै-
रावाहनञ्च कथयामि शिलोच्चयानाम् ॥
त्वं सर्व्वदेवगणधामनिधे । विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत नाशयाशु ।
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
सम्पूजितः परमभक्तिमता मया हि ॥
त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्त्तामूर्त्तजगद्बीज ! त्वं नः पाहि सनातन ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादशून्यममरैर्नारीभिश्च शिवस्य च ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥
एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माच्चैत्ररथेन त्वं भद्राश्वेन विशेषतः ॥
शोभसे मन्दर ! क्षिप्रमतस्तुष्टिकरो भव ॥
यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन ! ।
गन्धर्व्ववनशोभावानतः कीर्त्तिर्दृढास्तु मे ॥
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च ।
हिरण्मयाश्वत्थशिरस्तस्मात् पुष्टिर्ध्रुवास्तु मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरक्षयास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।
स्नात्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम् ॥
विष्कम्भपर्व्वतान् दद्यादृत्विग्भ्यः क्रमशो मुने ! ॥
गाश्च दद्याच्चतुर्विंशदथवा दश नारद ! ।
शक्तितः सप्त वाष्टौ वा पञ्च दद्याद्दशक्तिमान् ॥
एकापि गुरवे देया कपिला च पयस्विनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
त एव पूजने मन्त्रास्त एवोपस्कराः मताः ।
ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा ॥
स्वमन्त्रेणैव सर्व्वेषु होमः शैलेषु पठ्यते ॥
उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ।
विधानं सर्व्वशैलानां क्रमशः शृणु नारद ! ॥
दानकाले च ये मन्त्राः पर्व्वतेषु च यत्फलम् ।
अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रकीर्त्तिताः ॥
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते ।
अन्नमेव ततो लक्ष्मीरन्नमेव जनार्द्दनः ॥
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम ! ।
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ॥
मन्वन्तरशतं साग्रं देवलोके महीयते ।
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजता ॥
विमानेन दिवः पृष्ठमायाति सुरसेवितः ।
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः ॥"
इति मत्स्यपुराणम् ॥

धान्याम्ल, क्ली, (धान्यात् धान्यविकारात् जातं अम्लम् ।) काञ्जिकम् । इत्यमरः ।२।९।३९ ॥
"धान्याम्लं शालिचूर्णाद्यैः कोद्रवादिकृतं भवेत् ।
धान्याम्लं धान्ययोनित्वात् प्रीणनं लघु दीपनम् ॥
अरुचौ वातरोगेषु सर्व्वेष्वास्थापने हितम् ॥"
इति भावप्रकाशः ॥
("धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत् स्पर्श-
शीतलम् ।
श्रमक्लमहरं रुच्यं दीपनं वस्तिशूलनुत् ।
शस्तमास्थापने हृद्यं लघुवातकफापहम् ॥"
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

धान्यारि, पुं, (धान्यस्य अरिः ।) मूषिकः । इति राजनिर्घण्टः ॥ त्रि, धान्यस्य शत्रुश्च ॥

धान्योत्तम, पुं, (धान्येषु उत्तमः ।) शालिधान्यम् । इति राजनिर्घण्टः ॥

धाम, [न्] क्ली (दधाति गृहस्थादिकं धीयते ऽस्मिन् वा । धा+"सर्व्वधातुभ्यो मनिन् ।" उणां ४ । १४४ । इति मनिन् ।) गृहम् । (यथा, मेघदूते । ३१ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य ॥")
देहः । त्विट् । प्रभावः । इत्यमरः । ३ । ३ । १२३ ॥ (यथा, किराते । २ । ४७ ।
"सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥")
रश्मिः । (यथा, माघे । १ । २ ।
"गतं तिरश्चीनमनूरुसारथेः" ...
"पतत्यधो धाम विसारि सर्व्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥")
स्थानम् । (यथा, पञ्चदश्याम् । ७ । २१४ ।
"त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदा-
शिवः ॥")
जन्म । इति मेदिनी । ने, ८० ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ३६ ।
"गुरुर्गुरुतरो धाम सत्यः सत्यपराक्रमः ॥"
"धाम ज्योतिः नारायणः परं ज्योतिरिति मन्त्र-वर्णात् । सर्व्वलोकानामास्पदत्वात् वा धाम । परं ब्रह्म परं धाम इति श्रुतेः ॥" इति तद्भाष्यम् ॥

धामक, पुं, माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥

धामनिधि, पुं, (धामानि किरणानि निधीयन्ते ऽत्र । नि+धा+किः ।) सूर्य्यः । इति जटाधरः ॥

धामनी, स्त्री, (धमन्येव । धमनी+स्वार्थे अण् । ततो ङीप् ।) धमनी । इति शब्दचन्द्रिका ॥

धामार्गव, पुं, (धाम्नो मार्गं पन्थानं वातीति । वा गतौ+कः ।) अपामार्गः । इत्यमरः ।२।४।८८॥ (रक्तापामार्गोऽयम् । अस्य पर्य्यायो यथा,—
"रक्तोऽन्यो वशिरो हस्तपर्णी धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
घोषकः । इति मेदिनी । वे, ५९ ॥ (अस्य पर्य्यायो यथा,—
"महाकोषातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतघोषा । इति रत्नमाला ॥

धाय, त्रि, (दधाति धारयतीति । धा+"श्याद्व्य-धेति ।" ३ । १ । १४१ । इति णः ।) धारण-कर्त्ता । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टि । ६ । ७९ ।
"ददे दुःखस्य मादृग्भ्यो धायैरामोदमुत्तमम् ॥")

धायस्, [स्] त्रि, (दधातीति । धा+"वहि-हाधाञ्भ्यश्छन्दसि ।" उणां ४ । २२० । इत्य-सुन् बाहुलकात् युक् ।) धारणकर्त्ता । पोषण-कर्त्ता । यथा, वाजसनेयसंहितायाम् ।१३।१८।
"भूरसि भूमिरस्यदितिरसि विश्वस्य धाया ॥"

धाय्य, पुं, (धीयते आश्रियते मङ्गलार्थमिति । धा+कर्म्मणि ण्यत् ततो युक् ।) पुरोहितः । इति मुग्धबोधव्याकरणम् ॥

धाय्या, स्त्री, (धीयतेऽनया समित् । धा+करणे ण्यत् ।) अग्निसमिन्धनार्थं ऋक् । अग्निप्रज्वा-लनमन्त्रः । इत्यमरः । २ । ७ । २२ ॥

धार, क्ली, (धाराया इदम् । धारा+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वर्षाद्भवं जलम् । तद्द्विविधम् । गाङ्गम् १ सामुद्रञ्च २ । यथा,—
"यदा स्यादाश्विने मासि सूर्य्यः स्वातीविशाखयोः ।
तदाम्बु जलदैर्मुक्तं गाङ्गमुक्तं मनीषिभिः ॥
अन्यदा मृगशीर्षादिनक्षत्रेषु यदम्बुदैः ।
अभिवृष्टमिदं तोयं सामुद्रमिति सञ्ज्ञितम् ॥"
तयोर्गुणाः । यथा,—
"गाङ्गं जलं स्वादु सुशीतलञ्च
रुचिप्रदं पित्तकफापहञ्च ।
निर्दोषमिष्टं लघु तच्च नित्यं
गुणाधिकं व्योम्नि गृहीतमाहुः ॥
सामुद्रसलिलं शीतं कफवातकरं गुरु ।
चित्रायामाश्विने तच्च गुणाढ्यं गाङ्गवद्भवेत् ॥
पतितं भुवि तत्तोयं गाङ्गं सामुद्रमेव वा ।
स्वस्वाश्रयवशाज्जह्देदथ्यदन्यद्रसादिकम् ॥"
इति राजनिर्घण्टः ॥

धार, पुं, (धार्य्यते इति । धृ+णिच्+घञ् ।) ऋणान्तरम् । ऋणम् । इति मेदिनी । रे, ५१ ॥ जलधरासारवर्षणम् । इति हेमचन्द्रः ॥ प्रान्तः । गम्भीरः । इति शब्दरत्नावली ॥

धारक, पुं, (धरति जलादिकमिति । धृ+ण्वुल् ।) कलसः । तस्योत्पत्त्यादि यथा,—
ब्रह्मोवाच ।
"उत्पत्तिं लक्षणं मानं कथयामि महामुने ! ।
धारका कलसाश्चैव येन लोके प्रकीर्त्तिताः ॥
अमृते मथ्यमाने तु सर्व्वदेवैः सदानवैः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥
उत्पन्नममृतं तत्र महावीर्य्यपराक्रमम् ।
तस्याथ धारणार्थाय कलसः परिकीर्त्तितः ॥

कलां कलां गृहीत्वा वै देवानां विश्वकर्म्मणा ।
निर्म्मितोऽयं सुरैर्यस्मात् कलसस्तेन उच्यते ॥
कलसस्य मुखे ब्रह्मा ग्रीवायान्तु महेश्वरः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
शेषास्तु देवताः सर्व्वा वेष्टयन्ति चतुर्द्दिशम् ।
कुक्षौ तु सागराः सप्त सप्त द्वीपास्तु संश्रिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ।
हिमवान् हेमकूटश्च निषधो मेरुरेव च ॥
रोहितो माल्यवन्तश्च सूर्य्यकान्तिश्च पर्व्वताः ।
गङ्गा सरस्वती सिन्धुः सुभगा यमुना नदी ॥
ऐरावती शतहृदा तथा वैतरणी नदी ।
गोदावरी नर्म्मदा च मही नाम महानदी ॥
कुरुक्षेत्रं प्रयागञ्च एकहंसं पृथूदकम् ।
अमरेश्वरं पुण्डरीकं गङ्गासागर एव च ॥
पृथिव्यां यानि तीर्थानि कलसे निवसन्ति ते ।
ग्रहाः शान्तिश्च पुष्टिश्च प्रीतिर्गायत्त्रिरेव च ॥
ऋग्वेदोऽथ यजुर्व्वेदः सामवेदस्तथैव च ।
अथर्व्ववेदसहिताः सर्व्वे कलससंस्थिताः ॥
नवैव कलसाः पुण्याः शम्भुमूर्त्तिसमुद्भवाः ।
गोष्ठोपगोष्ठ्यो मरुतः खखदस्र तथा परः ॥
मनोहरः खलुभद्रः पञ्चमः परिकीर्त्तितः ।
विरजस्सुदूषश्च षष्ठसप्तमकावुभौ ॥
अष्टमस्त्विन्द्रियोपेतो नवमो विजयः स्मृतः ।
नवैव कलसाः ख्याता अधिदेवं निबोधत ॥
शृणु वत्स । यथा तेषां दिशां न्यासो व्यवस्थितः ।
नवमो यः समाख्यातो विजयो नाम नामतः ॥
शिवस्तत्र स्थितः साक्षात् सर्व्वपापहरः शुभः ।
क्षितीन्द्रो ज्येष्ठकलसो द्वितीयो जलसम्भवः ॥
तृतीयः पवनश्चैव चतुर्थस्तु हुताशनः ।
पञ्चमो यजमानस्तु षष्ठश्चाकाशसम्भवः ॥
सोमस्तु सप्तमः प्रोक्त आदित्यश्च तथाष्टमः ।
एते चोत्पादिता देवा शिवेनाधिष्ठिताः पुरा ॥
इन्द्रस्य मूर्त्तयश्चाष्टौ सूर्य्याद्या नवमः शिवः ।
क्षितीन्द्रः पूर्व्वतो न्यास्यः पश्चिमे जलसम्भवः ॥
वायव्ये वायवो न्यास्य आग्नेये अग्निसम्भवः ।
नैर्ऋते यजमानस्तु ऐशान्याकाशसम्भवः ॥
सौम्यस्तूत्तरतो योज्य सौरं दक्षिणतो न्यसेत् ।
न्यस्यैव कलसानान्तु पूर्व्वरूपं विचिन्तयेत् ॥
कलसानां मुखे ब्रह्मा ग्रीवायां विष्णुरेव हि ।
मध्ये मातृगणाः सर्व्वे सेन्द्रा देवाश्च पन्नगाः ॥
कुक्षौ तु सागरास्तेषां सप्तद्वीपा च मेदिनी ।
श्रिया चैव तथोमा च गन्धर्व्वा अप्सरास्तथा ॥
पञ्चभूतास्तथा धारास्तेषामवक्रताः स्थिताः ।
पूर्णाः पूतेन तोयेन सिद्धाश्चैकान्ततो मुने ॥
सरित्सरःसहातेन तडागेन नवेन वा ।
वापीकूपोदधियेन सासद्रेण सुखावहाः ॥
सर्व्वमङ्गलमाङ्गल्याः सर्व्वकिल्बिषनाशकाः ।
अभिषेके सदा ग्राह्याः कलसा ईदृशाः शुभाः ॥
यात्राविवाहकाले वा प्रतिष्ठायज्ञकर्म्मणि ।
योजनीया विशेषेण सर्व्वकामप्रसाधकाः ॥
ग्रहान् धारयते यस्मान्मातरा विविधास्तथा ।
दुरितांश्च महाघोरांस्तेन ते धारकाः स्मृताः ॥
एकैकान्तु कलां मूर्त्तौ चित्वादीनां यथाक्रमम् ।
सङ्कल्प संस्थिता यस्मात्तेन ते कलसाः स्मृताः ॥
हैमराजतताम्रा वा मृण्मया लक्षणान्विताः ।
पञ्चमाङ्गुलवैपुल्यमुत्सेधः षोडशाङ्गुलः ॥
कलसानां प्रमाणन्तु मुखमष्टाङ्गुलं भवेत् ॥”
इति देवीपुराणम् ॥

धारणकर्त्तरि, त्रि ॥ (यथा, पञ्चतन्त्रे ।२।१७५।
“अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥”)

धारणं, क्ली, (धृ+णिच्+भावे ल्युट् ।) विधारणम् । इति मेदिनी । णे, ५६ ॥ धरण इति भाषा ॥ (यथा, सुश्रुते । १ । ४६ ।
“तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात् ॥”
पु, कश्यपपुत्त्रो नागविशेषः । यथा, महाभारते । ५ । १०३ । १६ ।
“विरजा धारणश्चैव सुबाहुर्मुखरो जयः ॥”
धारयतीति । धृ+णिच्+ल्युः । धारके, त्रि । यथा, महाभारते । १२ । ३३५ । ५४ ।
“जग्मुर्यथेप्सितं देशं तपसे कृतनिश्चयाः ।
धारणाः सर्व्वलोकानां सर्व्वधर्म्मप्रवर्त्तकाः ॥”)

धारणा, स्त्री, (धार्य्यते या सा । धृ+णिच्+युच् । टाप् ।) बुद्धिः । इति राजनिर्घण्टः ॥ (यथा, याज्ञवल्क्ये । ३ । ७३ ।
“इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाहङ्कार एव च ॥”)
न्याय्यपथस्थितिः । तत्पर्य्यायः । संस्था २ मर्य्यादा ३ स्थितिः ४ । इत्यमरः । २।८।२६ ॥ (यथा, मनुः । ४ । ३८ ।
“न लङ्घयेद्वत्सतन्त्रीं न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥”)
योगाङ्गविशेषः । इति मेदिनी । णे, ५६ ॥
“स तु अद्वितीयवस्तुन्यन्तरेन्द्रियधारणम् ।” इति वेदान्तसारः ॥ ध्येये चित्तस्य स्थिरबन्धनम् । इति हेमचन्द्रः ॥
“तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥”
इति विष्णुपुराणे । ६ । ७ । ७४ ॥
ब्रह्मणि मनोधारणम् । यथा,—
“ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥”
इति गारुडे ४६ अध्यायः ॥
अष्टादशप्राणायामादिरूपधारणा यथा,—
“प्राणायामा दशाष्टौ च धारणा साभिधीयते ।
द्वे धारणे स्मृतो योगो मुनिभिस्तत्त्वदर्शिभिः ॥
प्राङ्नाभ्यां हृदये चात्र तृतीया च तथोरसि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणाः परमाः स्मृताः ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥”
इति गारुडे २३० अध्यायः ॥
अपि च ।
“प्राणायामैर्द्वादशभिर्यावत्कालो हृतो भवेत् ।
यस्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादशधारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु स यतो युक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलते यस्य मनोऽभिध्यायतो भृशम् ।
प्राणावधि कृतं कालं यावत् सा धारणा स्मृता ॥”
इति च गारुडे २४० अध्यायः ॥

धारणी, स्त्री, (धार्य्यते शरीरमनया । धृ+णिच्+ल्युट् । स्त्रियां ङीप् ।) नाडिका । बुद्धोक्तमन्त्रभेदः । इति मेदिनी । णे, ५५ ॥ श्रेणी । इति हेमचन्द्रः ॥

धारणीया, स्त्री, (धार्य्यतेऽसाविति । धृ+णिच्+अनीयर् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥ धार्य्ये, त्रि ॥

धारयित्री, स्त्री, (धारयति सर्व्वमिति । धृ+णिच्+तृच् । स्त्रियां ङीप् ।) पृथिवी । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, महाभारते । ५ । ६५ । ८ ।
“त्वं हि धारयिता श्रेष्ठः कुरूणां कुरुसत्तम ॥”)

धारा, स्त्री, (धार्य्यन्ते अश्वा यया । धृ+णिच्+अङ् । स्त्रियां टाप् ।) अश्वानां पञ्चधागतिः । तद्यथा । आस्कन्दितम् १ धौरितकम् २ रेचितम् ३ वल्गितम् ४ प्लुतम् ५ । इत्यमरः । २ । ८ । ४८ ॥ (यथा, माघे । ५ । ६० ।
“अव्याकुलं प्रकृतमुत्तरधेयकर्म्म
धाराः प्रसाधयितुमव्यतिकीर्णरूपाः ।
सिद्धं मुखे नवसु वीथिषु कश्चिदश्वं
वल्गाविभागकुशलो गमयाम्बभूव ॥”
“अव्यतिकीर्णरूपा असंकीर्णरूपा धारा गतिभेदाः ।
‘अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा ।
आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥
इति वैजयन्ती ॥
‘गतयोऽमूः पञ्च धाराः ।’ इत्यमरश्च ॥ अश्वशास्त्रे तु सिद्धान्तरेणोक्ताः ।
‘गतिः पुला चतुष्का च तद्वन्मध्यजवा परा ।
पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः ॥
एकैका त्रिविधा धारा हयशिक्षाविधौ मता ।
लघ्वी मध्या तथा दीर्घा ज्ञात्वैता योजयेत् क्रमात् ॥
तथा च पञ्चदशविभेदा भवन्ति । ना. पञ्च धाराः प्रसाधयितुं परिचेतुं नवसु वीथिषु सञ्चारस्थानेषु गमयाम्बभूव ॥” इति तट्टीकायां मल्लिनाथः ॥) सैन्याग्रिमस्कन्धः । घटादिच्छिद्रम् । सन्ततिः । (यथा, महाभारते । ६ । ११८ । २४ ।
“उत्पपात ततो धारा वारिणो विमला शुभा ॥”)
द्रवस्य प्रपातः । (यथा, महाभारते । १ । २२ । ५ ।
“त्वया द्वादश वर्षाणि वसोर्धाराहुतं हविः ।
उपयुक्तं महाभाग । तेन त्वां ग्लानिराविशत् ॥”)
खड्गादेर्निशितमुखम् । इति मेदिनी । रे, ५० ॥

(यथा, शाकुन्तले १ अङ्के ।
"भुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
उत्कर्षः । रथचक्रम् । इति हेमचन्द्रः ।३।४१८॥
(यथा, रघुः । १३ । १५ ।
"आभाति वेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥")
यशः । अतिवृष्टिः । (यथा, पञ्चतन्त्रे । २।६२ ।
"पर्ज्जन्यस्य यथा धारा यथा च दिवि तारकाः ।
सिकतारेणवो यद्वत् सङ्ख्यया परिवर्ज्जिताः ।
गुणाः सङ्ख्यापरित्यक्तास्तद्वदस्य महात्मनः ॥")
समूहः । इति शब्दरत्नावली ॥ घनासारवर्ष-
णम् । सहशः । इति विश्वः ॥ (प्रवाहः । यथा,
याज्ञवल्क्ये । १ । २८० ।
"सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥")
दक्षिणदेशस्थपुरीविशेषः । इति विक्रमचरि-
तम् ॥ ● ॥ (तीर्थविशेषः । यथा, महा-
भारते । ३ । ८४ । २३ ।
"प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ।।
धारां नाम महाप्राज्ञ । सर्व्वपापप्रमोचनीम् ।
तत्र स्नात्वा नरव्याघ्र । न शोचति नराधिप ॥")
अथ ज्वरादिशान्त्यर्थं श्रीनरसिंहादिमूर्द्धि जल-
धारापातनविधिः । यथा, नृसिंहपुराणे ।
"तथा महाज्वरग्रस्ते धारां देवस्य मूर्द्धनि ।
सन्ततां नारसिंहस्य कुर्य्याद्वा कारयेत् द्विजैः ॥
होमञ्च भोजनञ्चैव तस्य दोषः प्रशाम्यति ॥"
धाराकदम्बः, पुं, (धारा कालोपलक्षितः कदम्बः ।
वर्षाकाले जायमानत्वादस्य तथात्वम् ।) कदम्ब-
वृक्षप्रभेदः । केलिकदम् इति भाषा ॥ तत्-
पर्य्यायः । प्रावृष्यः २ पुलकी ३ भृङ्गवल्लभः ४
मेघाख्यः ५ प्रियकः ६ नीपः ७ प्रावृषेण्यः ८
कलम्बकः ९ । इति राजनिर्घण्टः ॥ धाराकद-
म्बकः १० । इति त्रिकाण्डशेषः ॥
धाराङ्कुरः, पुं, (धाराया वृष्टेः अङ्कुर इव ।)
शीकरः । घनोपलः । नाशीरः । इति मेदिनी ।
रे, २६६ ॥
धाराङ्गः, पुं, (धारा उत्कर्ष एव अङ्गं यस्य ।
श्रेष्ठत्वादस्य तथात्वम् ।) तीर्थम् । (धारा
न्वितमङ्गमस्य ।) खड्गः । इति हेमचन्द्रः ॥
धाराटः, पुं, (धारायै वृष्ट्यर्थं अटतीति । अट+
अच् ।) चातकः । (धारामटति वर्षणीयत्वेन
प्राप्नोतीति ।) मेघः । (धारां गतिं अटतीति ।)
तुरङ्गः । मत्तहस्ती । इति शब्दरत्नावली ॥
धाराधरः, पुं, (धरतीति । धृ+अच् । धारायाः
धरः ।) मेघः । (यथा, उत्तरचातकाष्टके । ४ ।
"रे धाराधर । धीरनीरनिकरैरेषा रसा नीरसा
शेषा पूषकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्तमन्तरगतं स्वान्तेन सञ्चिन्तयन्
आश्चर्य्यं परिपीडितोऽभिरमते यच्चातक-
स्तृष्णया ॥"
खड्गः । इति मेदिनी । रे, २६६ ॥

धाराफलः, पुं, (धारा फले यस्य ।) मदनवृक्षः ।
इति राजनिर्घण्टः ॥ (मदनशब्देऽस्य गुण-
पर्य्याया ज्ञातव्याः ॥)
धारावनिः, पुं, (धाराया वृष्टेः अवनिः पृथ्वीव ।
अभिधानात् पुंस्त्वम् ।) वायुः । इति त्रिकाण्डशेषः ॥
धाराविषः, पुं, (धारा एव विषमिव यस्य प्राण-
नाशकत्वात् ।) खड्गः । इति त्रिकाण्डशेषः ॥
धारासम्पातः, पुं, (धाराणां सम् सम्यक् पातो यत्र ।)
महावृष्टिः । तत्पर्य्यायः । धारा १ सम्पातः २
आसारः ३ । यथा,—
"धारा सम्पात आसारश्छितस्थापि कुत्रचित् ॥"
इति शब्दरत्नावली ॥
(यथा, प्रबोधचन्द्रोदये ५ अङ्के ।
"ततो देवि ! परस्पर करितुरगरथपदातीनां
निरन्तर-शरनिकर-धारासम्पातोपदर्शितदुर्द्दि-
नानां तेषामस्माकं च योधानां तुमुलः सम्प्र
हारः प्रावर्त्तत ॥")
धारास्नुही, स्त्री, (धारान्विता स्नुही ।) त्रिधार-
स्नुही । इति राजनिर्घण्टः ॥ तेकाँटासिज
इति भाषा ॥
धारिणी, स्त्री (धरतीति । धृ+णिनिः+ङीप् ।)
धरणी । इति शब्दरत्नावली ॥ शाल्मलिवृक्षः ।
इति शब्दचन्द्रिका ॥ चतुर्द्दशदेवयोषित्सु ।
यथा,—
"शची वनस्पती गार्गी धूम्रोर्णा रुचिराकृतिः ।
सिनीवाली कुहू राका तथा चानुमतिः शुभा ॥
आयतिर्न्नियतिः प्रज्ञा वेला वेला च नामतः ।
एताश्चतुर्द्दश प्रोक्ता धारिण्यो देवयोषितः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(धारणकर्त्री । यथा, विष्णुपुराणे । १।१३।८८।
"प्राणप्रदानात् स पृथुर्यस्मात् भूमेरभूत् पिता ।
ततस्तु पृथिवीसञ्ज्ञामवापाखिलधारिणी ॥"
आधारस्वरूपा । यथा, तत्रैव । १ । १३ । ९१ ।
"सैषा धात्री विधात्री च धारिणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥"
"धात्री माता विधात्री कर्त्री धारिणी आधार
पोषणी पोषणकर्त्री ।" इति तट्टीकायां श्रीधर-
स्वामी ॥)
धारी, [न्] पुं, (धरतीति । धृ+णिनिः ।) पीलु-
वृक्षः । इति जटाधरः ॥ त्रि, धारविशिष्टः ॥
(धारकः । यथा, महाभारते ।५ । ३९ । ११ ।
"तथैव विदुर ब्रूयाः कुरूणां मन्त्रधारिणम् ॥"
ग्रन्थतात्पर्य्यज्ञः । यथा, मनुः । १२ । १०३ ।
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥")
धारुः, त्रि, (धयति पिबतीति । धे ट पाने+
"दाधेट्सिशदसदो रुः ।" ३ । २ । १५९ । इति
रुः ।) पानकर्त्ता । इति जटाधरः ॥ (यथा,
अथर्व्ववेदे । ४ । १८ । २ ।
"वत्सो धारुरिव मातरं तं प्रत्यगुपपद्यताम् ॥")
धारोष्ण, क्ली, (धारायां दोहनप्रपाते उष्णम् ।)
दोहनेनोष्णधारया पतितदुग्धम् । तस्य गुणाः ।
"धारोष्णममृतं पयो भ्रमहरं निद्राकरं कान्तिदं
वृष्यं बृंहणमग्निवर्द्धनमतिस्वादु त्रिदोषापहम् ॥"
इति राजनिर्घण्टः ॥
("धारोष्णं गोपयो बल्यं लघु शीतं सुधासमम् ।
दीपनञ्च त्रिदोषघ्नं तद्धाराशिशिरं त्यजेत् ॥
धारोष्णं शस्यते गव्यं धाराशीतन्तु माहिषम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
धार्त्तराष्ट्रः, पुं, कृष्णवर्णचञ्चुचरणयुक्तहंसः । गेडि
हाँस इति भाषा ॥ इत्यमरः । २ । ५ । २४ ॥
(यथा, वेणीसंहारे १ अङ्के सूत्रधारस्य शर-
द्वर्णनायाम् ।
"सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धता
रम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥")
सर्पविशेषः । धृतराष्ट्रपुत्रः । इति मेदिनी ।
रे, २७० ॥ (यथा, वेणीसंहारे १ अङ्के ।
"लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः ॥")
धार्त्तराष्ट्रपदी, स्त्री, (धार्त्तराष्ट्रस्य पाद इव पादो
मूलं यस्याः । ङीप् पद्भावः ।) हंसपदी । इति
राजनिर्घण्टः ॥ (विवृतिविशेषो हंसपदीशब्दे
ज्ञातव्यः ॥)
धार्म्मिकः, त्रि, (धर्म्मं चरतीति । धर्म्म+"धर्म्मं
चरति ।" ४ । ४ । ४१ । इति ठक् । यद्वा,
धर्म्ममधीते वेद वा । "क्रतूक्थादिसूत्रान्तात्
ठक् ।" ४ । २ । ६० । इति ठक् ।) धर्म्मशीलः ।
तत्पर्य्यायः । वृषः २ । इति जटाधरः ॥
(यथा, महाभारते । १ । १२२ । ४१ ।
"धार्म्मिकश्च कुरूणां स भविष्यति न संशयः ॥")
धार्य्यं, त्रि, (ध्रियते इति । धृ+ण्यत् ।) धारणी-
यम् । यथा,—
"धातानुराधवसुपुष्यविशाखहस्ता-
श्चित्रोत्तराश्विपवनादितिरेवतीषु ।
जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरविप्रतुष्ट्यै ॥"
इति समयप्रदीपः ॥
(ध्रियते परिधीयते इति । वस्त्रे, क्ली । यथा,
भागवते । ६ । १८ । १४ ।
"वयं तत्रापि भगवन् शिष्योऽस्या नः पितामहः ।
असकृद्धार्य्यं धृतवती शूद्रो वेदमिवासती ॥")
धाव, उ ञ जवे । भ्वादिः । इति कविकल्पद्रुमः ॥
(भ्वां उभ-अक-शुद्धीकरणे सकं-सेट् । उदि-
त्वात् क्त्वावेट् ।) उ, धावित्वा धौत्वा । ञ
धावति धावते । जवः शीघ्रगतिः । पाशपाणि
पुनस्तत्र यमदूतोऽपि धावतीति हलायुधः ।
भ्वादिः शुद्धिभावः शुद्धीकरणञ्च । धावति ताम्रं
भस्मेन शुध्यतीत्यर्थः ।
'दधावङ्क्षितचक्षुः सुग्रीवस्य विभीषणः ।
अस्य जवे निष्ठाया अप्रयोगः । धौतं वासः ।
इति दुर्गादासः ॥

धावकः, त्रि, (धावति शीघ्रं गच्छतीति । धाव + ण्वुल् ।) धावनकर्त्ता । शीघ्रगमनकर्त्ता । धाउ-ड़िया इति भाषा । धावधातोर्ण्वकप्रत्ययेन निष्पन्नः ॥ (यथा, गो. रामायणे ।२।३२।२२ ।
"सवाहकाः सलिलदाः पुरतो धावकाश्च ये ।
तेषां निष्कसहस्रं त्वं वृत्त्यर्थमुपकल्पय ॥")
धावन, क्ली, (धाव + भावे ल्युट् ।) गमनम् । (यथा, राजतरङ्गिण्याम् । ६ । ११४ ।
"ग्रामे ग्रामे स्थितैरन्यैर्धावनं प्रतिषिद्धवान् ॥")
शुद्धिः । इति मेदिनी । ने, ७६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने । २२ ।
"पटोलनिम्बाजानिम्बकषायाश्चात्र धावने ॥"
"पाके गते व्रणे वापि गम्भीरे सव्रणेऽथवा ।
सरन्ध्रे शोधनं कार्य्यं धावनञ्च भिषग्वरैः ॥"
इति हारीते चिकित्सितस्थाने ३५ अध्यायः ॥)
धावनि, स्त्री, (धाव + बाहुलकात् अनिः ।) पृश्निपर्णी । इत्यमरः ।२।४।९३॥ (पर्य्यायोऽस्या यथा,
"पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्ण्यपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनिर्गुहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
कण्टकारी । इति राजनिर्घण्टः ॥)
धावनिका, स्त्री, (धावनिरिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् । यद्वा, स्वार्थे कन् ।) कण्टकारिका । इति रत्नमाला ॥
धावनी, स्त्री, (धावनि + कृदिकारादिति वा ङीष् ।) पृश्निपर्णी । इति मेदिनी । ने, ७६ ॥ कण्टकारी । धातकी । इति राजनिर्घण्टः ॥
धावितः, त्रि, (धाव + क्तः ।) गतः । (यथा, कथासरित्सागरे । ३ । ५२ ।
"एवमस्त्विति तौ मूढौ धावितौ सोऽपि पादुके ।
अध्यास्योदपतद्व्योम गृहीत्वा यष्टिभाजने ॥")
मार्ज्जितः ॥
धासः, [स्] पु, (दधाति पृथिवीमिति । धा + "वहिहाधाञ्भ्यश्छन्दसि ।" उणां । ४ । २२० । इति असुन् तस्य सुट् च ।) पर्व्वतः । इति वैदिकप्रयोगः ॥
धि, श धृतौ । इति कविकल्पद्रुमः ॥ (तुदा-परं-सक-अनिट् ।) श, धियति । इति दुर्गादासः ॥
धिक, य निर्भर्त्सनम् । निन्दा । इत्यमरः । ३ । ३ । २३६ ॥ (यथा, विष्णुपुराणे । १ ।१५।३५।
"धिङ्मां धिङ्मामतीवेत्थं निनिन्दात्मान-मात्मना ॥")
धिक्कारः, पुं (धिक् इत्यस्य कारः करणम् ।) धिक् । तत्पर्य्यायः । नीकारः २ अवहेलम् ३ अमाननम् ४ चेपः ५ निकारः ६ अनादरः ७ । इति शब्दरत्नावली ॥ (यथा, भागवते ।४।१४।१३।
"लोकधिक्कारसन्दग्धं दहिष्यामः स्वतेजसा ॥")
धिक्कृतः, त्रि, (धिक् + कृ + कर्म्मणि क्तः ।) निर्भर्त्सितः । असत्करणादिना धिगित्यस्य करणं धिक्कारो निन्दा धिगित. धिक्कृतः धिक् त्वां इति भर्त्सितो धिक्कृत इति यावत् । इति भरतः ॥ तत्पर्य्यायः । अपध्वस्तः २ । इति प्राणिवर्गे अमरः । ३ । १ । ३६ ॥ (यथा, भागवते । ७ । ८ । ५३ ।
"वयं किम्पुरुषास्त्वन्तु महापुरुष ईश्वरः ।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिः सदा ॥")
निन्दितमात्रम् । कृतधिक्कारस्य प्राणिवर्गोक्तस्य पर्य्यायान्तरमिदम् अप्राणिविषयार्थम् । धिगस्तु त्वां इति कृतः शब्दितो धिक्कृतः । इति भरतः ॥ तत्पर्य्याय. । अवगीतः २ । इति विशेष्यनिघ्नवर्गे अमरः । ३ । १ । ६४ ॥
धिक्क्रिया, स्त्री, (धिगित्युच्चारणमेव क्रिया ।) निन्दा । इति हेमचन्द्रः । २ । १९५ ॥
धिष, उ सन्दीप्ते । क्लेशे । जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अक-सेट् ।) तृतीयस्वरी । उ, धिषते वह्निः सन्दीप्यते इत्यर्थः । जनः क्लिश्यति जीवतीति वा अर्थः । इति दुर्गादासः ॥
धिग्वणः, पु, वर्णसङ्करविशेषः । तस्य चर्म्मकार्य्यं वृत्तिः । स तु ब्राह्मणादायोगव्यां जातः । इति मनुः ॥
धियाम्पतिः, पु, (धियां बुद्धीनां पतिः । अलुक् समासः ।) पूर्व्वजिनविशेषः । मञ्जघोष इति ख्यातः । इति त्रिकाण्डशेषः । आत्मा । ध्यातः एव धियाम्पतिरिति प्रयोगदर्शनात् ॥
धिव, इ न प्रीतौ । गतौ । इति कविकल्पद्रुमः ॥ (स्वा परं-सकं-सेट् ।) प्रीतिरिह प्रीतीकरणम् । इ, धिन्व्यते । न, धिनोति हर्षेण हिरण्यरेतसमिति किराते । गतिः केचिन्न मन्यते । इति दुर्गादासः ॥
धिष, र लि रवे । इति कविकल्पद्रुमः ॥ (ह्वां-परं-अक-सेट् ।) र, वैदिक. । लि, दिधेष्टि । रवः शब्दः । इति दुर्गादासः ॥
धिषणः, पु, (धृष्णोति प्रागल्भ्यं ददातीति । धृष् + "धृषेर्धिष च संज्ञायाम् ।" उणां २ । ८२ । इति क्युः ।) बृहस्पतिः । इत्यमरः । १ । ३ । २४ ॥
धिषणा, स्त्री, (धृष्णोत्यनयेति । धृष प्रागल्भ्ये + क्यु. । धिषादेशश्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, ऋग्वेदे । ३ । ३२ । १४ ।
"विवेष यन्मा धिषणा जजान स्तवै. पुरा पार्य्यादिन्द्रमह्नः ॥"
स्तुतिः । यथा, ऋग्वेदे । ८ । १५ । ७ ।
"तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥"
"धिषणा स्तुतिः ।" इति तद्भाष्ये सायनः ॥
वाक् । यथा, ऋग्वेदे । ३ । ४९ । ४ ।
"धर्त्ता वस्त्रा जनिता सूर्य्यस्य विभक्ता भागं भागं धिषणेव वाजम् ॥"
"धिषणेव । यथाऽग्नीनां वाक् अस्येदमिति विभागं करोति तद्वत् ।" इति तद्भाष्ये सायनः ॥
प्रस्तर. । यथा, ऋग्वेदे । ६ । ५९ । २ ।
"पवस्व धिषणाभ्यः ।"
"किञ्च धिषणाभ्यो ग्रावभ्यः पवस्व क्षर ॥" इति तद्भाष्ये सायनः ॥
धारयित्री । द्यावापृथिव्योः द्विवचनान्तः । यथा, ऋग्वेदे । ३ । ४९ । १ ।
"यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः ॥"
"धिषणे देवमनुष्यादीनां धारयित्र्यौ । यद्वा प्रगल्भे समर्थे स्वाश्रितान् रक्षितुमिति धिषणे द्यावापृथिव्यौ ॥" इति तद्भाष्ये सायनः ॥ *॥
हविर्द्धानस्य पत्नी । यथा, मात्स्ये । ४ । ४५ ।
"हविर्द्धानात् षडाग्नेयी धिषणा जनयत् सुतान् ।
प्राचीनवर्हिषं साङ्गं यमं शुक्रं बलं शुभम् ॥"
स्त्री । स्थानम् । यथा, भागवते । ३ । १९ । ३२ ।
"तदा विकुण्ठधिषणात् तयोर्निपतमानयो. ।
हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥"
"विकुण्ठस्य धिषणात् स्थानात् ।" इति तट्टीकायां श्रीधरस्वामी ॥)
धिष्टं, क्ली, (धिष्ण्य + निपातनात् णस्य टः ।) स्थानम् । गृहम् । नक्षत्रम् । अग्निः । इत्यमरः । ३ । ३ । १५४ ॥ शक्तिः । इति मेदिनी ॥
धिष्ण्यः, पु, (धृष्णोति प्रगल्भो भवतीति । धृष + ण्य । निपातनात् साधु. ।) अग्निः । शुक्राचार्य्यः । इति पुरुषोत्तमरदत्तः ॥
धिष्ण्यं, क्ली, (धृष्णोति प्रगल्भो भवतीति । धृष् + "सानसिवर्णसिपर्णसीति ।" उणां । ४ । १०७ । इति ण्यप्रत्ययः निपातनात् ऋकारस्य च इकारः । स्थानम् । (यथा, भागवते ।२।१।३० ।
"द्यौरक्षिणी चक्षुरभूत् पतङ्गः
पक्ष्माणि विष्णोरहनी उभे च ।
तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्य-
मापोऽस्य तालू रस एव जिह्वा ॥"
"परमेष्ठिधिष्ण्यं ब्रह्मपदम् ॥" इति तट्टीकायां स्वामी ॥ गृहम् । (यथा, महाभारते ।१७।३।१० ।
"स्वर्गे लोके श्ववतां नास्ति धिष्ण्य-मिष्टापूर्त्तं क्रोधवशा हरन्ति ॥")
नक्षत्रम् । (यथा, सूर्य्यसिद्धान्ते । ११ । २१ ।
"सार्पेन्द्रपौष्णधिष्ण्यानामन्त्या. पादाः भसन्धय. ॥")
अग्निः । इत्यमर. । ३।३।१५४ ॥ (यथा अथर्व्ववेदे । २ । ३५ । १ ।
"ये भक्षयन्तो न वसून्यानृधुर्यानग्नयो अन्वतप्यन्त धिष्ण्याः ॥")
शक्तिः । इति मेदिनी । ये, ३४ ॥ (उल्काभेदः । यथा, बृहत्संहितायाम् । ३३ । १ ।
"दिविभुक्तशुभफलानां
पततां रूपाणि यानि तान्युल्काः ।
धिष्ण्योल्काशनिविद्युत्तारा
इति पञ्चधा भिन्ना. ॥"
प्राणाभिमानी देवः । यथा, ऋग्वेदे ।३।२।३।
"अग्ने । दिवो अर्णमच्छा जिगास्यच्छा देवा ऊचिषे धिष्ण्या ये ॥"
"धियं बुद्धिमर्हितं देहं उपयान्ति उष्णीकुर्व्वन्तीति धिष्ण्या. प्राणाभिमानिनो देवाः ।" इति तद्भाष्ये सायनः ॥)

धुस्तूरः, पुं, (धुनोति कम्पयति शिरः सेवमेन । धु कम्पने + “खर्जिपिञ्जादिभ्य उरोलचौ ।” उणां ४ । ९० । इति ऊरः । “धुनोतेः सुट् च ।” इत्युज्ज्वलदत्तोक्त्या सुट् ।) क्षुपविशेषः । धुतुरा । इति भाषा । तत्पर्य्यायः । उन्मत्तः २ कितवः ३ धूर्त्तः ४ कनकाह्वयः ५ मातुलः ६ मदनः ७ । इत्यमरः । २ । ४ । ७७ ॥ धत्तूरः ८ । इति हेमचन्द्रः ॥ शठः ९ मातुलकः १० श्यामः ११ शिवशेखरः १२ खर्ज्जूघ्नः १३ काण्डलापुष्पः १४ खलः १५ कण्टफलः १६ मोहनः १७ कलभः १८ मत्तः १९ शैवः २० । इति राजनिर्घण्टः ॥ देविका २१ तूरी २२ महामोही २३ शिवप्रियः २४ धुस्तुरः २५ धुत्तुरः २६ । इति शब्दरत्नावली ॥ अस्य गुणाः ॥ मदवर्णाग्निवातकारित्वम् । ज्वरकुष्ठकफालिख्याव्रणश्लेष्मकण्डूकृमिविषनाशित्वम् । कषायत्वम् । मधुरत्वम् । तिक्तत्वम् । उष्णत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥ कटुत्वम् । कान्तिकारित्वम् । त्वग्दोषखर्ज्जूभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ मूर्च्छाकारित्वम् । वह्निपित्तनाशित्वञ्च । इति राजवल्लभः ॥ (उपविषविशेषोऽयम् । तद्यथा,—

“अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका ।
करवीरकधुस्तूरौ पञ्च चोपविषाणि तत् ॥
अर्कक्षीरं स्नुहीक्षीरं लाङ्गलीकरवीरकम् ।
गुञ्जाहिफेनधुस्तूरौ सप्तोपविषजातयः ॥”

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥)

धृ ञ कम्पे । इति कविकल्पद्रुमः ॥ (भ्वा-उभ-सक-वेट् ।) स चेहापि कम्पप्रेरणमेव । ञ, धवति धवते । धवति चन्दनमञ्जरीश्चेति हलायुधः । इति दुर्गादासः ॥

धू, न ञ गि कम्पे । इति कविकल्पद्रुमः ॥ (स्वा-क्र्या च-उभ-सक-वेट ।) स चेहापि कम्पप्रेरणम् । न ञ, धूनोति धूनुते । गि ञ, धुनाति धुनीते । धूनं धूनि । धूनोति चम्पकवनानीति हलायुधः । धुनाति वायुरश्वत्थम् । धुनीते बन्धूक तिलकुसुमजन्मा हि पवनः । इति दुर्गादासः ॥

धू, श्वि क कम्पे । इति कविकल्पद्रुमः ॥ (तुदा-चुरा-च सक सेट् ।) कम्प इह भ्रान्तस्य रूपम् । श्वि, धुवति मारुतो मालतीलताम् । अधुवीत् । क, धावयति । वायुर्विधूनयति केशरपुष्परेणूक, निति धुरादौ हलायुधः । प्रीधूणोनं वा इत्यत्र निति धुरादौ हलायुधः । स्वार्थविधिमूलग्रहणादस्य कथं नमिति चेन्न । स्वार्थविधितस्य णेर्नकारेण सम्बन्धस्य आप्यत्वात् । अन्यथा कम्पप्रेरणे धूनयति इत्यादिप्रयोगा न स्युः । धूनोतीत्यादीनां साध्या इति चेत् स्वभावात् कम्पप्रेरणायां तेषां णौ कृते कम्पप्रेरणस्य प्रेरणमेवार्थः स्यात् । किञ्च कम्पनायां धूनयतीत्यादीनामनवश्यकत्वात् तत्सूत्रे नकारप्राचीनमतानुवादार्थं एव । इति दुर्गादासः ॥

धूः, [र्] स्त्री, (धुर्व्वतीति । धुर्व्व + क्विप् ।) यानमुखम् । रथादेरग्रभागः । इत्यमरः । २ । ८ । ५५ ॥ (यथा, महाभारते । १ । १९६ । २१ ।

“तस्मात् प्रांशुः पताकाङ्कः पताका रथधूर्गतः ॥”)

भारः । (यथा, रघुः । १ । ३४ ।

“तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ॥”)

चिन्ता । इत्येकाक्षरकोषः ॥ (अयम् । यथा, रघुः । २ । २ ।

“अपांशुलानां धुरि कीर्त्तनीया ॥”

हिंसके त्रि । यथा, ऋग्वेदे । १० । ९४ । ७ ।

“दशधुरो दशयुक्ता वहद्भ्यः ॥”

“दशभिर्धुरो धूर्भिर्हिंसिद्भिः । तृतीयार्थे प्रथमा ।” इति तद्भाष्ये सायनः ॥)

धूक, पुं, (धूनोति कम्पयतीति । धू + “अजियुधूनीभ्यो दीर्घश्च ।” उणां ३ । ४७ । इति कन् ।) वायुः । इत्युणादिकोषः ॥ धूर्त्तः । कालः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धूतः, त्रि, (धू + क्तः ।) कम्पितः । (यथा, मेघदूते । ३५ ।

“धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥”)

भर्त्सितः । इति मेदिनी । ते, २८ ॥ त्यक्तः । इत्यमरः । ३ । १ । १०७ ॥ तर्कितः । इति धरणिः ॥

धूनं, त्रि, (धू + “ल्वादिभ्यः ।” ८ । २ । ४४ । इति निष्ठातस्य नः ।) कम्पितः । धूधातोः क्तस्वादित्वात्तस्य नादेशः । इति संक्षिप्तसारव्याकरणम् ॥

धूनकः, पुं, (धूनयति संधुक्षयति अग्निमिति । धू + णिच् + ण्वुल् ।) वह्निवल्लभः । इति त्रिकाण्डशेषः ॥ धूना इति भाषा ॥

धूननं क्ली, (धू + णिच् + ल्युट् ।) कम्पनम् । काँपान । इति भाषा । इति ञान्तधूधातोरनटा साध्यम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । १२ ।

“कुर्व्वाणा भक्तिशैलश्रीनिषेधं मूर्द्धधूननैः ॥”)

धूनिः, स्त्री, कम्पनम् । धूधातोः क्तिस्थाने स्वादित्वान्निः । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

धूप, तापे । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सक-सेट् ।) मध्वस्वरी । धूपायति धूपायते । आयत्वादुभयपदमिति वोपदेवः । अरे तु आयस्याप्रामिपक्षे परस्मैपदमेव । अधूपीत् दुन्दुभ इत्यादि । तापः सन्तापीकरणम् । इति दुर्गादासः ॥

धूप, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अक-सेट् ।) क, धूपयति । इति दुर्गादासः ॥

धूपः, पुं, (धूपयति सुगन्धेन प्रीणयित्वा दीप्यतीति । धूप + अच् ।) गन्धद्रव्यविशेषोत्थधूमस्तत्सङ्गश्च । तत्पर्य्यायः । गन्धपिशाचिका २ । इति हेमचन्द्रः । ३ । २१३ ॥ यथा —

“एवं वां कथितो दीपो धूपश्च शृणुत सुतौ ।
नासाविवरमनुसुखद सुगन्धोऽतिमनोहरः ॥
दह्यमानस्य काष्ठस्य प्रयत्नस्येतरस्य वा ।
मनागस्यायवा धूमो निस्तापो यस्य जायते ॥
स धूप इति विज्ञेयो देवानां तुष्टिदायकः ।
दाराग्निसन्ने चैकत्र तेदैवैः परिधूपयेत् ॥
ओघाग्निवत्तथा कृत्वा न तत्फलमवाप्नुयात् ।
श्रीचन्दनञ्च सरलं सालं कालागुरुस्तथा ॥
उदयं, सुरयं, कन्दी रक्तविद्रुम एव च ।
सीतसालं, परिमलो विमर्द्दोत्कासनस्तथा ॥
नमेरुर्देवदारुश्च विल्वसारोऽथ खादिरः ।
सन्तानं, पारिजातश्च हरिचन्दनवल्लभौ ॥
इत्येषु धूपाः सर्व्वेषां प्रीतिदाः परिकीर्त्तिताः ।
चरालं सह सुतग्न श्रीवास, पटवासकः ॥
कर्पूरः श्रीकरश्चैव मरागः श्रीहरामलौ ।
सर्व्वौषधिरजोजातो वाराहश्चर्ष्म उत्कलः ॥
जातीकोषस्य चर्षश्च गन्धः कस्तूरिका तथा ।
मोदे इत्ते च गादता धूपा एते उदाहृताः ॥
यक्षधूपो एकधूपः श्रीपिष्टोऽगुरुमर्कटः ।
मत्रिवाहः पिष्टधूप सुगोलः काष्ठ एव च ॥
अन्योन्ययोगनिर्म्मासा धूपा एते प्रकीर्त्तिताः ।
एतैर्विधूपयेद्देवान् धूमभिः कथ्यमानगा ॥
येषां धूपोऽङ्गवैद्राश्चेसुरिं गर्च्छन्ति जन्मनः ।
निर्य्यासश्च मरागश्च काष्ठं गन्धं तथैव च ॥
कृत्रिमश्चेति पञ्चैते धूपाः प्रीतिकरा मताः ।
न यक्षधूमं वितरेत् माधवाय कदाचन ॥
न रक्तविद्रुमं मह्यं सुरयं स्कन्दिनं तथा ।
यक्षधूपं मत्रिवाहं पिष्टधूमः सुगोलकः ॥
कृष्णागुरुः सकर्पूरो महामायाप्रियः स्मृतः ।
यक्षधूपेन वा देवीं महामायां प्रपूजयेत् ॥
यक्षधूपेनेत्यत्र एकधूपेनेति च पाठः ॥
मेदोमज्जासमायुक्तान् न धूपान् विनिवेदयेत् ।
परकीयांस्तथा प्रातान् स्नेनोक्रत्याभिमर्द्दितान् ॥
पुष्पं धूमश्च गन्धश्च उपचारांस्तथापरान् ।
प्रातानिवेद्य देवेभ्यो नरो नरकमाप्नुयात् ॥
न भूमौ वितरेद् धूपं नासने न घटे तथा ।
यथा तथाधारगतं कृत्वा तद्विनिवेदयेत् ॥
रक्तविद्रुमशालौ च सुरयं सरलस्तथा ।
सन्तानको नमेरुश्च कालागुरुसमन्वितः ॥
जातीकोषादयस्युक्तो धूपः कामेश्वरीप्रियः ।
त्रिपुरायास्तथैवाय मातॄणामपि नित्यशः ॥
सर्व्वेषां पीठदेवानां कामादीनाञ्च पुत्रक ! ।
एष वां कथितो धूपः शृणु त नेत्ररञ्जनम् ॥”

इति कालिकापुराणे ६८ अध्यायः ॥

अपि च ।

“पुष्पाणि च सुगन्धीनि धूपञ्च घृतसंयुतम् ।
गुग्गुलुं कुन्दुरुं चैव देवदारु तुरुष्ककम् ॥
सिह्लकं चन्दनं काष्ठं श्रीवासं चागुरुं तथा ।
सर्व्वरसं नखं चैव देवे पैत्रे च कर्म्मणि ॥”

इति वह्निपुराणे भोजनविधाननामाध्यायः ॥

रोगनाशकधूपो यथा,—

“कूर्म्ममत्स्याखुसर्पहिषगोऽश्वगालाश्ववानराः ।
विडालबर्हिकाकाश्च मराहोलूककुक्कुटाः ॥
हंस एषाञ्च विण्मूत्रं मांसं वा रोम शोणितम् ।
धूप इत्यात्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये ॥

—

एतान्यौषधजातानि धूपितानि महेश्वर ।
निघ्नन्ति रोगजातानि दृष्यमिन्द्राशनिर्यथा ॥”
इति गारुडे १६६ अध्यायः ॥
(यथा,—
“पुरध्यामवचासर्ज्जनिम्बार्काग्गुरुदारुभिः ।
सर्व्वज्वरहरो धूपः कार्य्योऽयमपराजितः ॥”
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
षडङ्गधूपो यथा,—
“गुग्गुल्ग्वगुरुउशीरशर्क्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नैवेद्यैर्देवस्य देशिक. ॥”
अन्यच्च ।
“सिताज्यमधुसंमिश्रं गुग्गुल्ग्वगुरुचन्दनम् ।
षडङ्गधूपमेतत्तु सर्व्वदेवप्रियं सदा ॥”
दशाङ्गो यथा,—
“रोगरोगहरीरोगदकेशा.
सुरतरुजतुलधुपत्रविशेषाः ।
वक्रविवर्ज्जितवारिजसुद्रा
धूपवरैरिह सुन्दरि । भद्रा ॥”
अन्यच्च ।
“मधु मुस्तं घृतं गन्धो गुग्गुल्वागुरुशैलजम् ।
सरलं सिह्लसिद्धार्थं दशाङ्गो धूप उच्यते ॥”
षोडशाङ्गो यथा,—
“गुलगुलु सरलं दारु पत्रं मलयसम्भवम् ।
ह्रीवेरमगुरु कुष्ठं गुड सर्ज्जरसं घनम् ॥
हरीतकीं नखीं लाक्षा जटामांसीञ्च शैलजम् ।
षोडशाङ्गं विदुर्धूपं देवे पित्र्ये च कर्म्मणि ॥”
इति तन्त्रसारः ॥ * ॥
केशवार्च्चायां षोडशाङ्गधूपो यथा,—
“सुस्तक गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम् ।
देवदारु जटामांसी जातीकोषञ्च वालकम् ॥
मुरा मांसी ह्यगुरुकं लघुशीरञ्च केशरम् ।
एला तथा तेजपत्रं सर्व्वमेतद्घृताक्तकम् ॥
धूपोऽयं षोडशाङ्गः स्याद्गोविन्दप्रीतिकारकः ॥”
द्वादशाङ्गो यथा,—
“गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम् ।
जातीकोषञ्च कर्पूरं जटामांसी च वालकम् ।
लघुशीरश्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः ॥”
दशाङ्गो यथा,—
“कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम् ।
केशरं वालकं पत्रं लघुजातीकोषमुत्तमम् ॥
सर्व्वमेतद्घृतयुतं दशाङ्गो धूप ईरितः ॥”
अष्टाङ्गो यथा,—
“गुग्गुल्वगुरुक तेजपत्र मलयसम्भवम् ।
कर्पूरं वालकं कुष्ठं नूतन कुङ्कुमं तथा ॥
अष्टाङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः ॥”
पञ्चाङ्गो यथा,—
“चन्दनं कुङ्कुमं नूलं कर्पूर गुग्गुलोऽगुरु ।
धूपोऽयं घृतसंयुक्तः पञ्चाङ्गः समुदाहृतः ॥”
सकुन्दधूपे वर्ज्जनीयद्रव्यम् । यथा,—
“ऐश्वर्य्यं शालनिर्य्यासं मत्रकं सरलञ्च तु ।
वचा मधुरिका तैलं गन्धकाष्ठं कलम्बकम् ॥
गन्धकं टङ्कणं तालं हिङ्गुलञ्च मनःशिला ।
कक्कोलम्लक्षरं दार्व्वी गन्धमादी रसाञ्जनम् ॥
अष्टवर्गः शटी मेथी शिलाजिन्नक्तचन्दनम् ।
कुन्दुरु रेणुकं रास्नाजमोदा शतपुष्पिका ॥
हरिद्रा जीरकं द्रव्यञ्चौरश्च रक्तचन्दनम् ।
कर्च्चूरकं मरुवकं यवानी ग्रन्थिकन्तथा ॥
शैलजं धातकीपुष्पं नखी मोचरसादिकम् ।
सुकुन्दधूपे देवर्षे । सर्व्वमेतद्विवर्ज्जयेत् ॥”
इति पाद्मोत्तरखण्डम् ॥
धूपदानविधिर्यथा,—
“मध्यमानामिकाभ्यान्तु मध्यपर्व्वणि देशिकः ।
अङ्गुष्ठाग्रेण देवेशि । धृत्वा धूपं निवेदयेत् ॥
धूपस्थानं समभ्यर्च्च्य तर्ज्जन्या वामयास्पृशन् ।
धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्च्य हृदाणुना
उत्तोर्य्य इष्टियन्त्रं घण्टां वामदिशि स्थिताम् ॥
वादयन् वामहस्तेन दक्षहस्तेन चार्पयेत् ॥”
इति तन्त्रसार. ॥
गन्धमाल्यमदत्त्वा धूपदाने दोषो यथा,—
“अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।
कूर्म्मो जायते भूमे यातुधानो न संशय. ॥
वर्षाणि चैकविंशानि अयस्कारनिवासक. ।
तिष्ठतेऽत्र महाभागे । एवमेतन्न संशयः ॥”
इति वराहपुराणम् ॥ * ॥
विषघ्नधूपो यथा,—
“सक्तुः सर्ज्जरसोपेतः सर्षपा एलवालुके. ।
सुवर्णा तस्करतरोः कुसुमैरर्ज्जुनस्य तु ॥
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम् ।
न तत्र कीटा न विषं न दर्दुरसरीसृपाः ॥
न कृत्या कर्म्मणास्तत्र धूपोऽयं यत्र दह्यते ॥” * ॥
सर्पनिर्म्मोचनधूपो यथा,—
“कार्पासास्थिभुजङ्गस्य यथा निर्म्मोचनं भवेत् ।
सर्पनिर्म्मोचनो धूपः प्रशस्तः सततं गृहे ॥”
इति मत्स्यपुराणे १६२ अध्यायः ॥
धूपनः, पु, (धूपयति संधुक्षयति वह्निमिति । धूप+ल्युः ।) शालवृक्षनिर्य्यासः । धूना इति भाषा । तत्पर्य्याय. । शालवेष्टः २ सर्ज्जरस ३ वह्निवल्लभः ४ । इति शब्दमाला ॥ (यथा, मनुः । ७ । २१६ ।
“परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेषाभरणसंशुद्धा. स्पृशेयुः सुसमाहिताः ॥”
क्ली, धूप+ल्युट् । धूपादिना सन्धुक्षणम् । यथा, महाभारते । १३ । ६६ । ७ ।
“अग्निकार्य्याणि समिधः कुशाः सुमनसस्तथा ।
वलयश्चामलाजाभिर्धूपनं दीपकर्म्म च ॥”)
धूपवृक्षः, पुं, (धूपोत्पादको वृक्षः ।) सरलवृक्षः । इति त्रिकाण्डशेषः ॥ (सरलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)
धूपवृक्षकः, पु, (धूपवृक्ष+स्वार्थे कन् ।) सरलवृक्षः । इति शब्दरत्नावली ॥
धूपागुरु, क्ली, (धूपाय सन्धुक्षणाय यदगुरु ।) दाहागुरु । इति राजनिर्घण्टः ॥
धूपाङ्गः, पुं, (धूपसाधनमङ्गं यस्य ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥
धूपायितः, त्रि, (धूप्यते स्मेति । धूप सन्तापे+ “आयादय आर्धधातुके वा ।” ३ । १ । ३१ इति आयः । ततः क्तः ।) सन्तप्तः । अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपगृहादि । यथा, तन्त्रप्रमोदे ।
“प्रदीपपरिदीपिते विविधधूपधूपायिते ॥”
धूपार्हं, क्ली, (धूपाय अर्हति पूज्यते इति । अर्ह पूजायाम्+अच् ।) कृष्णागुरु । इति राजनिर्घण्टः ॥ धूपयोग्ये, त्रि ॥
धूपितः, त्रि, (धूप्यते स्मेति । धूप+क्तः ।) सन्तापित' । (यथा, हरिभक्तिविलासे ।
“ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥”)
अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपः । यथा,—
“यवादिना दोहदधूपितो द्रुमः ।”
इति वृक्षायुर्वेद' ॥
धूमः, पु, (धूनोति धूयते वा । धू न कम्पे+“इषियुधीन्धीति ।” उणां १ । १४४ । इति मक् ।) आर्द्रेन्धनप्रभवः । धूँया इति भाषा । तत्पर्य्याय' । भस्म. २ मरुद्वाहः ३ खतमालः ४ शिखिध्वजः ५ अग्निवाहः ६ तरी ७ । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । ७ । २६ ।
“हविःशमीपल्लवलाजगन्धी
पुण्यः कृशानोरुदियाय धूमः ॥”)
अस्य गुणा. । वातपित्तहृद्विकारित्वम् । इति राजवल्लभः ॥ स च मेघाञ्जनयोर्जनकः ॥ (यथा, मेघदूते । ५ ।
“धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः ॥”
भौमादिवद्ग्रहपदलोपे धूमकेतुः । यथा, गर्गः ।
“उल्कापाते च त्रिदिनं धूमे पञ्चदिनानि च ॥”
उद्गारजवायुविशेषः । चोँया ढेँकुर इति भाषा ॥ यथा, आह्निकतत्त्वधृतवचनम् ।
“धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने ॥”
चिकित्साविशेषः । यथा,—
“श्वेता ज्योतिष्मती चैव हरितालं मनःशिला ।
गन्धाश्चागुरुपत्राद्या धूमो मूर्द्धविरेचनम् ॥
गौरवं शिरसः शूलं पीनसार्द्धावभेदकौ ।
कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः ॥
दन्तदौर्ब्बल्यमास्रावः स्रोतोघ्राणाक्षिदोषजः ।
पूतिघ्राणास्यगन्धश्च दन्तशूलमरोचकः ॥
हनुमन्याग्रहः कण्डूः क्रिमयः पाण्डुता मुखे ।
श्लेष्मप्रसेको वैस्वर्य्यं गलशुण्ड्युपजिह्विका ॥
खालित्यं पिञ्जरत्वञ्च केशानां पतनन्तथा ।
क्षवथुश्चातितन्द्रा च बुद्धेर्मोहोऽतिनिद्रता ॥
धूमपानात् प्रशाम्यन्ति बलं भवति चाधिकम् ।
शिरोरुहकपालानामिन्द्रियाणां स्वरस्य च ॥”
“स्नात्वा भुक्त्वा समुल्लिख्य क्षुत्वा दन्तान् विघृष्य च ।
नावनाञ्जननिद्रान्ते चात्मवान् धूमपो भवेत् ॥
तथा वातकफात्मानो न भवन्त्यूर्द्ध्वजत्रुजाः ।
रोगास्तस्य तु पेयाः स्युरापानास्त्रिस्त्रयस्त्रयः ॥

धुस्तूरः, पुं, (धुनोति कम्पयति चित्तं सेवनेन । धु कम्पने + “खर्जिपिञ्जादिभ्य उरोलचौ ।” उणां ४ । ९० । इति उरः । “धुनोतेः सुट् च ।” इत्युज्ज्वलदत्तोक्त्या सुट् ।) क्षुपविशेषः । धुतुरा । इति भाषा । तत्पर्य्यायः । उन्मत्तः २ कितवः ३ धूर्त्तः ४ कनकाह्वयः ५ मातुलः ६ मदनः ७ । इत्यमरः । २ । ४ । ७७ ॥ धत्तूरः ८ । इति हेमचन्द्रः ॥ शठः ९ मातुलकः १० श्यामः ११ शिवशेखरः १२ खर्ज्जूघ्नः १३ काहलापुष्पः १४ खलः १५ कण्टफलः १६ मोहनः १७ सलभः १८ मत्तः १९ शैवः २० । इति राजनिर्घण्टः ॥ देविका २१ तूरी २२ महामोही २३ शिवप्रियः २४ धुत्तुरः २५ धुत्तुरः २६ । इति शब्दरत्नावली ॥ अस्य गुणाः ॥ मदवर्णाग्निवातकारित्वम् । ज्वरकुष्ठकृकालिक्षाव्रणश्लेष्मकण्डुक्रिमिविषनाशित्वम् । कषायत्वम् । मधुरत्वम् । तिक्तत्वम् । उष्णत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥ कटुत्वम् । कान्तिकारित्वम् । त्वग्दोषखर्ज्जूभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ मूर्च्छाकारित्वम् । वह्निपित्तनाशित्वञ्च । इति राजवल्लभः ॥ (उपविषविशेषोऽयम् । तद्यथा,—

“अर्कक्षीरं स्नुहीक्षीरं तथैव कालिहारिका ।

करवीरकधुस्तूरौ पञ्च चोपविषाणि तत् ॥

अर्कक्षीरं स्नुहीक्षीरं लाङ्गलीकरवीरकम् ।

गुञ्जाहिफेनधुस्तूरौ सप्तोपविषजातयः ॥”

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥)

धृ ञ कम्पे । इति कविकल्पद्रुमः ॥ (भ्वा-उभ-सक-सेट् ।) स चेहापि कम्पप्रेरणमेव । ञ, धवति धवते । धवति चन्दनमञ्जरीश्चेति हलायुधः । इति दुर्गादासः ॥

धू, न ञ गि कम्पे । इति कविकल्पद्रुमः ॥ (स्वां-क्र्यां च-उभ-सकं वेट् ।) स चेहापि कम्पप्रेरणम् । न ञ, धूनोति धूनुते । गि ञ, धुनाति धुनीते । धूनः धूनि । धूनोति चम्पकवनानीति हलायुधः । धुनाति पापुरश्वत्थम् । धुनीते बन्धूकतिलकुसुमगन्धा हि पवनः । इति दुर्गादासः ॥

धू, शि क कम्पे । इति कविकल्पद्रुमः ॥ (तुदां-चुरां-च सकं सेट् ।) कम्प इह ण्यन्तस्य रूपम् । शि, धुवति मारुतो मालतीलताम् । अधुवीत् । क, धावयति । वायुर्विधूनयति केशरपुष्परेणूनिति पुरारौ हलायुधः । शीघ्रूणोनेन वा इत्यत्र धूञ्ग्रहणादस्य कथं नमिति चेन्न । स्वार्थविहितस्य णेर्णकारेण समन्वस्य जाध्यत्वात् । अन्यथा कम्पप्रेरणे धूनयति इत्यादिप्रयोगा न स्युः । धूनोतीत्यादीनां साध्या इति चेत् स्वभावात् कम्पप्रेरणार्थानां तेषां णौ कृते कम्पप्रेरणस्य प्रेरणमेवार्थः स्यात् । किञ्च कम्पनाया धूनयतीत्यादीनामावश्यकत्वात् ततस्त्रे नकारः प्राचीनमतानुवादार्थं एव । इति दुर्गादासः ॥

धूः, [र्] स्त्री, (धुर्व्वतीति । धुर्व्व + क्विप् ।) यानमुखम् । रथादेरग्रभागः । इत्यमरः । २ । ८ । ५५ ॥ (यथा, महाभारते । १ । १३६ । २१ ।

“चक्रात् प्रांशुः चक्राङ्गस्तः चक्राच्च रथधूर्गतः ॥”)

भारः । (यथा, रघुः । १ । ३४ ।

“तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ॥”)

चिन्ता । इत्येकाक्षरकोषः ॥ (अग्रम् । यथा, रघुः । २ । २ ।

“धर्माश्रुलाता धुरि कीर्त्तनीया ॥”

हिंसके त्रि । यथा, ऋग्वेदे । १० । ९४ । ७ ।

“दशधुरो दशयुक्ता वहद्भ्यः ॥”

“दशभिर्धूरो धूर्भिर्हिंसिद्भिः । तृतीयार्थे प्रथमा ।” इति तद्भाष्ये सायनः ॥)

धूकः, पुं, (धूनोति कम्पयतीति । धू + “अजियुधूनीभ्यो दीर्घश्च ।” उणां ३ । ४७ । इति कन् ।) वायुः । इत्युणादिकोषः ॥ धूर्त्तः । कालः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धूतः, त्रि, (धू + क्त ।) कम्पितः । (यथा, मेघदूते । ३५ ।

“धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्यास्तोयक्रीड़ानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥”)

भर्त्सितः । इति मेदिनी । ते, २८ ॥ त्यक्तः । इत्यमरः । ३ । १ । १०७ ॥ तर्कितः । इति धरणिः ॥

धूनः, त्रि, (धू + “स्वादिभ्यः ।” ८ । २ । ४४ । इति निष्ठातस्य नः ।) कम्पितः । धूधातोः क्तः स्वादित्वात्तस्य नादेशः । इति संक्षिप्तसारव्याकरणम् ॥

धूनकः, पुं, (धूनयति संधुक्षयति अग्निमिति । धू + णिच् + ण्वुल् ।) वह्निवल्लभः । इति त्रिकाण्डशेषः ॥ धूना इति भाषा ॥

धूननं, क्ली, (धू + णिच् + ल्युट् ।) कम्पनम् । काँपान । इति भाषा । इति णान्तधूधातोरनटा साध्यम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । १२ ।

“कुर्व्वाणा भक्तिशीलश्रीनिषेधं मूर्द्धधूनने ॥”)

धूनिः, स्त्री, कम्पनम् । धूधातोः क्तिस्थाने स्वादित्वान्निः । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

धूप, तापे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सक-सेट् ।) षष्ठस्वरी । धूपायति धूपायते । आयन्तत्वादुभयपदमिति वोपदेवः । अन्ये तु आयस्याप्राप्तिपक्षे परस्मैपदमेव । अधूपीत् दुधूप इत्यादि । तापः सन्तापीकरणम् । इति दुर्गादासः ॥

धूप, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परसक-सेट् ।) क, धूपयति । इति दुर्गादासः ॥

धूपः, पुं, (धूपयति स्वगन्धेन प्रीणयित्वा दीप्यतीति । धूप + अच् ।) गन्धद्रव्यविशेषोत्थधूमस्तद्द्रव्यञ्च । तत्पर्य्यायः । गन्धपिशाचिका २ । इति हेमचन्द्रः । ३ । ३१३ ॥ * ॥ यथा —

“एवं वां कथितो दीपो धूपञ्च शृणुतं सुतौ ।

नासाचिरन्ध्रसुखदः सुगन्धोऽतिमनोहरः ॥

दह्यमानस्य काष्ठस्य प्रयतस्येतरस्य वा ।

पराग्स्याथवा धूमो निर्यासो यस्य जायते ॥

स धूप इति विज्ञेयो देवानां तुष्टिदायकः ।

राशीकृतेन चैकत्र तेद्रव्ये परिधूपयेत् ॥

चोघाग्निवत्तथा कृत्वा न तत्फलमवाप्नुयात् ।

श्रीचन्दनञ्च सरलः सालः कालागुरुस्तथा ॥

उदयः सुरथः कन्दी रक्तविद्रुम एव च ।

शीतशालः परिमलो विमर्द्दीकासनस्तथा ॥

नमेरुर्द्देवदारुश्च विल्वसारोऽथ खादिरः ।

सन्तानः पारिजातश्च हरिचन्दनवल्लभौ ॥

एतेषु धूपाः सर्व्वेषां प्रीतिदाः परिकीर्त्तिताः ।

अरालः सह सूत्रञ्च श्रीवासः पटवासकः ॥

कर्पूरः श्रीकरश्चैव परागः श्रीहरामलौ ।

सर्व्वौषधिरजोजातो वाराहधूपं उत्कलः ॥

जातीकोषस्य चर्णञ्च गन्धः कस्तूरिका तथा ।

चोदे दर्शे च गदिता धूपा एते उदाहृताः ॥

यक्षधूपो दृकधूपः श्रीपिष्टोऽगुरुमर्मरः ।

पञ्चवाहः पिण्डधूपः सुगोलः कष्ठ एव च ॥

अन्योन्ययोगनिर्य्यासा धूपा एते प्रकीर्त्तिताः ।

एतैर्विधूपयेद्देवान् धूमिभिः कृष्णपत्रगा ॥

येषां धूपोद्भवैर्भागैस्तुष्टिं गच्छन्ति जन्तव ।

निर्य्यासश्च परागश्च काष्ठं गन्धं तथैव च ॥

कृत्रिमश्चेति पञ्चैते धूपाः प्रीतिकरा मताः ।

न यक्षधूपं वितरेत् माधवाय कदाचन ॥

न रक्तविद्रुमं मह्यं सुरथं स्कन्दिनं तथा ।

यक्षधूपः पञ्चवाहः पिण्डधूपः सुगोलकः ॥

कृष्णागुरुः सकर्पूरो महामायाप्रियः स्मृतः ।

यक्षधूपेन वा देवीं महामायां प्रधूपयेत् ॥

यक्षधूपेनेत्यत्र दृकधूपेनेति च पाठः ॥

मेदोमज्जासमायुक्तान् न धूपान् विनिवेदयेत् ।

परकीयांस्तथा शावान् स्तेनीकृत्याभिमर्हितान् ॥

पुष्पं धूपञ्च गन्धञ्च उपचारांस्तथापरान् ।

शतानिवेद्य देवेभ्यो नरो नरकमाप्नुयात् ॥

न भूमौ वितरेत् धूपं गासने न घटे तथा ।

यथा तथाधारगतं कृत्वा तद्विनिवेदयेत् ॥

रक्तविद्रुमशालौ च सुरथः सरलस्तथा ।

सन्तानको नमेरुश्च कालागुरुसमन्वितः ॥

जातीकोषादयसंयुक्तो धूपः कामेश्वरीप्रियः ।

त्रिपुरायास्तथैवाय मातॄणामपि नित्यशः ॥

सर्व्वेषां पीठदेवानां कान्तादीनाञ्च पुत्रक ।

एष वां कथितो धूपः शृणु त नैवरक्षनम् ॥”

इति कालिकापुराणे ६८ अध्यायः ॥

अपि च ।

“पुष्पाणि च सुगन्धीनि धूपञ्च घृतसंयुतम् ।

गुग्गुलुं कुन्दुरुञ्चैव देवदारु तुरुष्ककम् ॥

सिह्लकं चन्दनं काष्ठं श्रीवासं चागुरुं तथा ।

सर्ज्जरसं नखं चैव दैवे पैत्रे च कर्म्मणि ॥”

इति वह्निपुराणे भोजनविधाननामाध्यायः ॥ * ॥

रोगनाशकधूपो यथा,—

“कुम्भमत्स्याखुमहिषगोश्रृगालाश्ववानराः ।

बिडालबर्हिकाकाश्च वराहोलूककुक्कुटाः ॥

हंस एषाञ्च विण्मूत्रं मांसं वा रोम शोणितम् ।

धूपं दद्याज्ज्वरार्त्तस्य उन्मत्तस्य च शान्तये ॥

एतान्यौषधजातानि धूपितानि महेश्वर ।।
निघ्नन्ति रोगजातानि वृक्षमिन्द्राशनिर्यथा ॥”
इति गारुडे १९६ अध्यायः ॥
(यथा,—
“पुरध्यामवचासर्ज्जनिम्बार्कागुरुदारुभिः ।
सर्व्वज्वरहरो धूपः कार्य्योऽयमपराजितः ॥”
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
षडङ्गधूपो यथा,—
“गुग्गुल्वगुरुउशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्गोमेदैर्देवस्य देशिकः ॥”
अन्यच्च ।
“सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम् ।
षडङ्गधूपमेतत्तु सर्व्वदेवप्रियं सदा ॥”
दशाङ्गो यथा,—
“रोगरोगहरोरोगदकेशाः
सुरतरुजतुजधुपत्रविशेषा ।
वक्रविवर्ज्जितवारिजसुद्रा
धूपवर्त्तिरिह सुन्दरि । भद्रा ॥”
अन्यच्च ।
“मधु मुस्तं घृतं गन्धो गुग्गुलागुरुशैलजम् ।
सरल सिह्लसिद्धार्थं दशाङ्गो धूप उच्यते ॥”
षोडशाङ्गो यथा,—
“गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम् ।
ह्रीवेरमगुरुं कुष्ठं गुडं सर्ज्जरसं घनम् ॥
हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् ।
षोडशाङ्गं विदुर्धूपं दैवे पित्र्ये च कर्म्मणि ॥”
इति तन्त्रसारः ॥ * ॥
केशवार्चायां षोडशाङ्गधूपो यथा,—
“मुस्तकं गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम् ।
देवदारु जटामांसी जातीकोषञ्च वालकम् ॥
मुरा मांसी त्वगुरुकं त्वगुशीरञ्च केशरम् ।
एला तथा तेजपत्रं सर्व्वमेतद्घृताक्तकम् ॥
धूपोऽयं षोड़शाङ्गः स्याद्गोविन्दप्रीतिकारकः ॥”
द्वादशाङ्गो यथा,—
“गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम् ।
जातीकोषञ्च कर्पूरं जटामांसी च वालकम् ।
त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः ॥”
दशाङ्गो यथा,—
“कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम् ।
केशरं वालकं पत्रं त्वग्जातीकोषमुस्तकम् ॥
सर्व्वमेतद्घृतयुतं दशाङ्गो धूप ईरितः ॥”
अष्टाङ्गो यथा,—
“गुग्गुल्वगुरुकं तेजपत्र मलयसम्भवम् ।
कर्पूरं वालकं कुष्ठं नूतनं कुङ्कुमं तथा ॥
अष्टाङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः ॥”
पञ्चाङ्गो यथा,—
“चन्दनं कुङ्कुमं नूत्नं कर्पूरं गुग्गुलोऽगुरु ।
धूपोऽयं घृतसंयुक्तः पञ्चाङ्गः समुदाहृतः ॥”
मुकुन्दधूपे वर्ज्जनीयद्रव्यम् । यथा,—
“ऐरावतं शालनिर्य्यासं पद्मकं सरलञ्च तु ।
वचा मधुरिका तैलं गन्धकाष्ठं कलम्बकम् ॥
गन्धकं टङ्कणं तालं हिङ्गुलञ्च मनःशिला ।
कक्कोलमूषरं दार्व्वीं गन्धमाद्री रसाञ्जनम् ॥
अष्टवर्गः शटी मेथी शिलाजिन्नञ्चचन्दनम् ।
कुन्दुरू रेणुकं रास्नाजमोदा शतपुष्पिका ॥
हरिद्रा जीरकं वृक्षचौरञ्च रक्तचन्दनम् ।
कर्चूरकं मरुवकं यवानी ग्रन्थिकस्तथा ॥
शैलजं धातकीपुष्पं नखी मोचरसादिकम् ।
मुकुन्दधूपे देवर्षे ! सर्व्वमेतद्विवर्ज्जयेत् ॥”
इति पाद्मोत्तरखण्डम् ॥
धूपदानविधिर्यथा,—
“मध्यमानामिकाभ्यान्तु मध्यपर्व्वणि देशिकः ।
अङ्गुष्ठाग्रेण देवेशि । दत्वा धूपं निवेदयेत् ॥
धूपस्थानं समभ्यर्च्च्य तर्ज्जन्या वामयास्पृशन् ।
धूपभाजनमन्त्रेण प्रोक्ष्याभ्यर्च्च्य हृदाणुना
उत्तोल्य दृष्टिपर्य्यन्तं घण्टां वामदिशि स्थिताम् ॥
वादयन् वामहस्तेन दक्षहस्तेन चारयेत् ॥”
इति तन्त्रसार. ॥
गन्धमाल्यमदत्त्वा धूपदाने दोषो यथा,—
“अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।
कूणपो जायते भूमे यातुधानो न संशयः ॥
वर्षाणि चैकविंशानि अयस्कारनिवासकः ।
तिष्ठतेऽत्र महाभागे ! एवमेतन्न संशय. ॥”
इति वराहपुराणम् ॥ * ॥
विषघ्नधूपो यथा,—
“सक्तुः सर्ज्जरसोपेतः सर्षपा एलबालुके. ।
सुवर्णा तस्करतरोः कुसुमैरर्ज्जुनस्य तु ॥
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम् ।
न तत्र कीटा न विषं न दर्दुरसरीसृपाः ॥
न कृत्या कर्म्मणस्तत्र धूपोऽयं यत्र दह्यते ॥” * ॥
सर्पनिर्म्मोचनधूपो यथा,—
“कार्पासास्थिभुजङ्गस्य यथा निर्म्मोचनं भवेत् ।
सर्पनिर्म्मोचनो धूपः प्रशस्त. सततं गृहे ॥”,
इति मत्स्यपुराणे १९२ अध्यायः ॥

धूपनः, पु, (धूपयति संधुक्षयति वह्निमिति । धूप+ल्युः ।) शालवृक्षनिर्यासः । धूना इति भाषा । तत्पर्य्यायः । शालवेष्टः २ सर्जरस ३ वह्निवल्लभः ४ । इति शब्दमाला ॥ (यथा, मनुः । ७ । २१९ ।
“परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥”
क्ली, धूप+ल्युट् । धूपादिना सन्धुक्षणम् । यथा, महाभारते । १३ । ९९ । ७ ।
“अग्निकार्य्याणि समिधः कुशाः सुमनसस्तथा ।
बलयश्चामलाजाभिर्धूपनं दीपकर्म्म च ॥”)

धूपवृक्षः, पुं, (धूपोत्पादको वृक्ष. ।) सरलवृक्षः । इति त्रिकाण्डशेषः ॥ (सरलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

धूपवृक्षकः, पु, (धूपवृक्ष+स्वार्थे कन् ।) सरलवृक्षः । इति शब्दरत्नावली ॥

धूपागुरु, क्ली, (धूमाय सन्धुक्षणाय यदगरु ।) दाहागुरु । इति राजनिर्घण्टः ॥

धूपाङ्गः, पुं, (धूपसाधनमङ्गं यस्य ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

धूपायितः, त्रि, (धूप्यते स्मेति । धूप सन्तापे+“आयादय आर्धधातुके वा ।” ३ । १ । ३१ इति आयः । ततः क्तः ।) सन्तप्तः । अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपगृहादि । यथा, तन्त्रप्रमोदे ।
“प्रदीपपरिदीपिते विविधधूमधूपायिते ॥”

धूपार्हं, क्ली, (धूपाय अर्ह्यते पूज्यते इति । अर्ह पूजायाम्+घञ् ।) कृष्णागुरु । इति राजनिर्घण्टः ॥ धूपयोग्ये, त्रि ॥

धूपितः, त्रि, (धूप्यते स्मेति । धूप+क्तः ।) सन्तापितः । (यथा, हरिभक्तिविलासे ।
“ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥”)
अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपः । यथा,—
“यवादिना दोहदधूपितो द्रुमः ।”
इति वृक्षायुर्वेदः ॥

धूमः, पु, (धूनोति धूयते वा । धू न कम्पे+“इषियुधीन्धीति ।” उणां १ । १४४ । इति मक् ।) आर्द्रेन्धनप्रभवः । धूँया इति भाषा । तत्पर्य्यायः । भस्म. २ मरुद्वाहः ३ खतमालः ४ शिखिध्वजः ५ अग्निवाहः ६ तरी ७ । इति त्रिकाण्डशेष. ॥ (यथा, रघुः । ७ । २६ ।
“हविःशमीपल्लवलाजगन्धी
पुण्यः कृशानोरुदियाय धूमः ॥”)
अस्य गुणः । वातपित्तवृद्धिकारित्वम् । इति राजवल्लभः ॥ स च मेघाञ्जनयोर्जनकः ॥ (यथा, मेघदूते । ५ ।
“धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः ॥”
भीमादिवदुत्तरपदलोपे धूमकेतुः । यथा, गर्गः ।
“उल्कापाते च त्रिदिनं धूमे पञ्चदिनानि च ॥”
उद्गारणवायुविशेषः । चोँया ढेँकुर इति भाषा ॥ यथा, आह्निकतत्त्वधृतवचनम् ।
“धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने ॥”
चिकित्साविशेषः । यथा,—
“श्वेता ज्योतिष्मती चैव हरितालं मनःशिला ।
गन्धाश्चागुरुपत्राद्या धूमो मूर्द्धविरेचनम् ॥
गौरवं शिरसः शूलं पीनसार्द्धावभेदकौ ।
कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः ॥
दन्तदौर्ब्बल्यमास्रावः स्रोतोघ्राणाक्षिदोषजः ।
पूतिघ्राणास्यगन्धश्च दन्तशूलमरोचकः ॥
हनुमन्याग्रहः कण्डूः क्रिमयः पाण्डुता मुखे ।
श्लेष्मप्रसेको वैस्वर्य्यं गलशुण्ड्युपजिह्विका ॥
खालित्यं पिञ्जरत्वञ्च केशानां पतनन्तथा ।
क्षवथुश्चातितन्द्रा च बुद्धेर्मोहोऽतिनिद्रता ॥
धूमपानात् प्रशाम्यन्ति बलं भवति चाधिकम् ।
शिरोरुहकपालानामिन्द्रियाणां स्वरस्य च ॥”
“स्नात्वा भुक्त्वा समुल्लिख्य क्षुत्वा दन्तान्
विघृष्य च ।
नावनाञ्जननिद्रान्ते चात्मवान् धूमपो भवेत् ॥
तथा वातकफात्मानो न भवन्त्यूर्द्ध्वजत्रुजाः ।
रोगास्तस्य तु पेयाः स्युरापानास्त्रिस्त्रयस्त्रय. ॥

ी, ङो ङ य अनादरे । नादरे । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सक-अनिट ।) अनादर इति कातन्त्रादौ । ङो, धीनः । ङ य, धीयते खल लोकः । इति दुर्गादासः ॥

धी, स्त्री, (ध्यै चिन्तने + भावे क्विप् । सम्प्रसारणञ्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, मनौ । ६ । ९२ ।
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥")

धीत, त्रि, पीतः । इति धेधातोः क्तप्रत्ययेन निष्पन्नः ॥

धीति,, स्त्री, (धेट पाने + क्तिन् ।) पिपासा । इति हेमचन्द्रः । ३ । ५८ ॥

धीदा, स्त्री, (धियं ददातीति । दा + क. । स्त्रियां टाप् ।) कन्या । मनीषा । इति हेमचन्द्रः ॥

धीन्द्रिय, क्ली, (धीजनकमिन्द्रियम् ।) ज्ञानेन्द्रियम् । तद्यथा । मनः १ नेत्रम् २ श्रोत्रम् ३ त्वक् ४ रसना ५ घ्राणम् ६ । इत्यमरः । १ । ५ । ८ ॥

धीमान्, [त्] पु, (धीरस्यास्तीति । धी + मतुप् ।) बृहस्पतिः । पण्डिते, त्रि । इति मेदिनी । तं, ११५ ॥ (यथा, मनु । १ । १०२ ।
"तस्य कर्म्मविवेकार्थं शेषाणामनुपूर्व्वशः ।
स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ॥"
नरपुत्रस्य विराजः पुत्रः । यथा,—
"नरो नयस्य तनयः तत्पुत्रोऽभूत् विराट् ततः ।
तस्य पुत्त्रो महावीर्य्यो धीमांस्तस्मादजायत ॥"
इति विष्णुपुराणे । २ । १८ ।
पुरूरवसः उर्व्वशीगर्भजातः पुत्त्रविशेषः । यथा, महाभारते । १ । ७५ । २४ ।
"षट्सुता जज्ञिरेऽथैलादायुर्धीमानमावसुः ।
दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः ॥")

धीमती, स्त्री, (धीमत् + स्त्रियां ङीप् ।) बुद्धिमती । इत्यमरः । २ । ६ । १२ ॥

धीर क्ली, (धियं रातीति । रा + क ।) कुङ्कुमम् । इति मेदिनी । रे ५१ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥")

धीर, पु, (धियं राति ददाति रक्षतीति वा । रा + कः ।) ऋषभौषधिः । इति राजनिर्घण्टः ॥ बलिराजः । इति शब्दरत्नावली ॥

धीर,, त्रि, (धियं ईरयतीति । ईर + अण् । यद्वा, धियं रातीति । रा + कः ।) धैर्य्यान्वितः । स्वैरः । पण्डितः । इति मेदिनी । रे, ५१ ॥ (यथा, भागवते । ३ । ६ । ४५ ।
"तथापरे चात्मसमाधियोग-
बलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ति
तेषां श्रमः स्यान्न तु सेवया ते ॥"
बलयुतः । इति शब्दरत्नावली ॥ मन्दः । इति त्रिकाण्डशेषः ॥ (यथा,—

"देहि समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥"
इति रसमञ्जर्य्याम् ।)
विनीतः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (गम्भीरः । यथा, रघुः । ९ । ४४ ।
"जगर्ज्ज गम्भीरं गगनस्पृशा रवं
करेण धीरेण निषण्णवानिव ॥")

धीरत्व, क्ली, (धीरस्य भावः । धीर + त्व ।) धीरता । यथा,—
"प्रागल्भ्यौदार्य्यमाधुर्य्यशोभाधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावहावहेला त्रयोऽङ्गजाः ॥"
इति हेमचन्द्रः । ३ । १७३ ॥

धीरपत्नी, स्त्री, (धीरं मनोहरं पत्रमस्याः । स्त्रियां ङीप् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥

धीरस्कन्ध,, पु, (धीरः अचपलः भारसह इति यावत् स्कन्धो यस्य ।) महिषः । इति हेमचन्द्रः । ४ । ३४८ ॥

धीरा, स्त्री, (धीर + टाप् ।) काकोली । महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (गुडूची । अस्याः पर्य्याया यथा,—
"गुडूची मधुपर्णी स्यादमृताऽमृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासा वयस्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मानावस्थायां मध्याप्रगल्भानायिकाभेदः । अस्या लक्षणम् । व्यङ्ग्यकोपप्रकाशा धीरा । मध्याया धीरायाः कोपव्यञ्जिका गीः । प्रौढाधीरायास्तु रतावौदास्यम् । सा द्विविधा । ज्येष्ठा कनिष्ठा च । मध्या धीरा यथा,—
"लोलालिपुञ्जे व्रजतो निकुञ्जे
स्फारा बभूवुः श्रमवारिधाराः ।
देहि समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥
प्रौढा धीरा यथा,—
"नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशच्छलात् ।
इत्थं केतकगर्भगौरि । दयिते कोपस्य सङ्गोपनं
किं स्यादेव न चेत् पुनः सहचरी कुर्व्वीत साचिस्मितम् ॥"
इति रसमञ्जरी ॥

धीराधीरा, स्त्री, (धीरा अधीरा च ।) मानावस्थायां मध्याप्रगल्भा नायिकाभेदः । अस्या लक्षणम् । व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा । मध्याया धीराधीरायाः कोपव्यञ्जिके वचनरुदिते । प्रौढाधीराधीराया रतावौदास्यं तर्ज्जनताडनादि च कोपस्य प्रकाशकम् । सा द्विविधा । ज्येष्ठा कनिष्ठा च । मध्याधीराधीरा यथा,—

"कान्तानागसकृत्करोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि ।
इत्थं निगद्य सुदृशा वदनं प्रियस्य
निःश्वस्य बाष्पसुचिता निहिता दृगन्ताः ॥
प्रौढाधीराधीरा यथा,—
"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचिवाचि दमितस्फुर्ज्जत्कपोलश्रिया ।
हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसक्षालित-
प्रोढो प्रेमधुरन्धरस्य निभृतं विस्फारिता दृष्टयः ॥"
इति रसमञ्जरी ॥

धीलटि, स्त्री, (धिया बुद्ध्या लटति बालोक्त्या मोदयतीति । लट् + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) दुहिता । इति हारावली ॥ २१८ ॥

धीवा, [न्] पु स्त्री, (ध्यायतीति । ध्यै + "ध्याप्योः सम्प्रसारणञ्च ।" उणां । ४ । ११५ । इति क्वनिप् । सम्प्रसारणञ्च ।) धीवरः । यथा, बहुधीवरी बहुधीवा । इति मुग्धबोधम् ॥

धीवर, पुं, (दधाति मत्स्यानिति । धा + "छित्वरच्छत्वरधीवरपीवरेति ।" उणां । ३ । १ । इति ष्वरच् प्रत्ययेन निपातनात् साधुः ।) कैवर्त्तः । इत्यमरः । २ । १० । १५ ॥ (यथा, महाभारते । २ । २० । १७ ।
"यतो हि निम्नं भवति नयन्ति हि ततो जलम् ।
यतश्छिद्रं ततश्चापि नयन्ते धीवरा जलम् ॥")

धीवरी, स्त्री, (धीवर + ङीप् ।) धीवरपत्नी । कैवर्त्ती । इति मुग्धबोधम् ॥ मत्स्यवेधिनी । इत्युणादिकोषः ॥

धीशक्ति, स्त्री, (धियः शक्तिः ।) बुद्धिसामर्थ्यम् । तत्पर्य्यायः । निष्क्रमः २ । इत्यमरः । ३ । २ । २५ ॥ सा चाष्टधा । यथा,—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा ।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः ॥"
इति भरतः ॥

धीसख,, पुं, (धियः सखा सहायः । "राजाहःसखिभ्यष्टच् ।" इति टच् ।) मन्त्री । इति हेमचन्द्रः । ३ । ३८३ ॥

धीसचिव, पुं, (धियि बुद्धौ मन्त्रणादौ सचिवः सहायः ।) मन्त्री । इत्यमरः । २ । ८ । ४ ॥

धु ञ न कम्पे । इति कविकल्पद्रुमः ॥ (स्वां-उभ-सक-अनिट् ।) ञ न, धुनोति धुनुते । कम्प इह ण्यन्तस्य रूपम् । धुनोति चम्पकवनानि धुनोत्यशोकं वायुरिति हलायुधः । इति दुर्गादासः ॥

धुः, स्त्री, (धवनमिति । धु कम्पने + भावे डुः ।) कम्पनम् । इत्येकाक्षरकोषः ॥

धुक्ष, ङ सन्दीपने । क्लेशे । जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अक सेट् ।) पञ्चमस्वरी । ङ, धुक्षते वह्निः सन्दीप्यते इत्यर्थः । धुक्षते जनः क्लिश्यति जीवति चेत्यर्थः । इति दुर्गादासः ॥

धुत', त्रि, (धु+क्तः ।) त्यक्त' । विधूत' । इति मेदिनी । ते, २८ ॥ (यथा, रघुः । ११ । १६ ।

"तीव्रवेगधुतमार्गवृक्षया
प्रेतचीवरवसा स्वनोग्रया ।
अभ्यभावि भरताग्रजस्तया
वात्ययेव पितृकाननोत्थया ॥")

धुनिः, स्त्री, (धुनोति वेतसादिनदीजातवृक्षा-निति । धु कम्पने+बहुलवचनात् निः स च कित् ।) नदी । इत्यमरटीकायां भरतः ॥ (यथा, ऋग्वेदे । २ । ३० । २ ।

"पयोदरन्तीरनुजोषमस्मै
दिवे दिवे धुनयो यन्त्यर्थम् ॥"

पु, जलप्रतिरोधकोऽसुरविशेषः । यथा, तत्रैव । १ । १७४ । ६ ।

"त्व धुनिरिन्द्रधुनिमतीर्ऋणोरपः सीरान-स्रवन्तीः ॥"

"हे इन्द्र त्वं धुनिः कम्पयिता शत्रूणामसि अतो धुनिमतीः कम्पनोपेततरङ्गवतीः अथवा धुनि-र्नामजलप्रतिरोधकाऽसुरः स एव प्रतिबन्धक-तया यासां तादृशीरपः ॥" इति तद्भाष्ये सायनः । धूनयति कम्पयति शत्रूनिति । मरु-द्विशेषः । यथा, वाजसनेयसंहितायाम् ।३९।७।

"उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ॥"

कम्पयितरि, त्रि । यथा, ऋग्वेदे । १ । ७९ । १ ।

"हिरण्यकेशो रजसोविसारेऽहिर्धुनिर्वात इव ध्रजीमान् ॥")

धुनी, स्त्री, (धुनि+कृदिकारादिति वा ङीष् ।) नदी । इत्यमरः । १ । १० । ३० ॥ (यथा, भागवते । ४ । २९ । ५५ ।

"सत्व विचक्ष्व मृगचेष्टितमात्मनोऽन्त-श्चित्त नियच्छ हृदि कर्णधुनीष चित्ते ॥")

धुनीनाथः, पुं, (धुनीनां नदीनां नाथः ।) समुद्र । इति राजनिर्घण्टः ॥

धुन्धुमारः, पु, (धुन्धु तन्नामकं राक्षसं मारय-तीति । मारि+अण् ।) कुवलयाश्वराजः । स तु बृहदश्वपुत्त्रः । इति पद्मपुराणम् ॥ (अस्य धुन्धुमारणकथा यथा, हरिवंशे ।११।३९—५५।

"स एवमुक्तो राजर्षिरुतङ्केन महात्मना ।
कुवलाश्व सुतं प्रादात् तस्मै धुन्धुनिवारणे ॥
बृहदश्व उवाच ।
भगवन् ! न्यस्तशस्त्रोऽहमयन्तु तनयो मम ।
भविष्यति द्विजश्रेष्ठ । धुन्धुमारो न संशय. ॥
स त व्यादिश्य तनय राजर्षिर्धुन्धुमारणे ।
जगाम पर्वतायैव तपसे संशितव्रत. ॥
कुवलाश्वस्तु पुत्त्राणां शतेन सह पार्थिव ।।
प्रायादुतङ्कसहितो धुन्धोस्तस्य परिग्रहे ॥
तमाविशत्तदा विष्णुर्भगवांस्तेजसा विभु. ।
उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया ॥
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत् ।
एष श्रीमानृपसुतो धुन्धुमारो भविष्यति ॥
दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन् ।
देवदुन्दुभयश्चापि प्रणेदुर्भरतर्षभ । ॥
स गत्वा जयतां श्रेष्ठस्तनयैः सह वीर्य्यवान् ।
समुद्र खानयामास वालुकार्णवमव्ययम् ॥
नारायणेन कौरव्य ! तेजसाप्यायितः स वै ।
बभूव सुमहातेजा भूयो बलसमन्वितः ॥
तस्य पुत्त्रैः खनद्भिस्तु वालुकान्तर्हितस्तदा ।
धुन्धुरासादितो राजन् ! दिशमाश्रित्य पश्चिमाम् ॥
मुखजेनाग्निना क्रोधाल्लोकानुद्वर्त्तयन्निव ।
वारि सुस्राव वेगेन महोदधिरिवोदये ॥
सोमस्य भरतश्रेष्ठ । धारोर्म्मिकलिलं महत् ।
तस्य पुत्त्रशतं दग्ध त्रिभिरूनन्तु रक्षसा ॥
ततः स राजा कौरव्य ! राक्षसं तं महाबलम् ।
आससाद महातेजा धुन्धुं धुन्धुनिबर्हणः ॥
तस्य वारिमयं वेगमापीय स नराधिपः ।
योगी योगेन वह्निञ्च शमयामास वारिणा ॥
निहत्य त महाकायं बलेनोदकराक्षसम् ।
उतङ्कं दर्शयामास कृतकर्म्मा महायशाः ॥
उतङ्कस्तु वरं प्रादात् तस्मै राज्ञे महात्मने ।
अददाच्चाक्षयं वित्तं शत्रुभिश्चापराजयम् ॥
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाक्षयम् ।
पुत्त्राणाञ्चाक्षयांल्लोँकान् स्वर्गे ये राक्षसा हताः ॥"*॥)

शक्रगोपः । गृहधूमः । पटालिकः । इति मेदिनी । रे, २७० ॥

धुरन्धरः, पुं, धववृक्षः । इति रत्नमाला ॥ (पर्य्यायोऽस्य यथा,—

"धवो धटो नन्दितरु. स्थिरो गौरो धुरन्धरः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ धुर धरतीति । धृ+खच्+मुम् ।) रथ-लाङ्गलादिभारवोढ़ा । तत्पर्य्यायः । धुर्व्वहः २ धुर्य्य. ३ धौरेयः ४ धुरीणः ५ । इत्यमरः ।२। ९ । ६५ ॥ यथा,—

"धुरन्धरो धुरीणश्च धौरेयधुर्य्यधुर्व्वहा' ।
यत्र काम्यरथस्यापि लाङ्गलस्यापि वा धुरम् ॥
वहत्येकधुरीणः स्यात्तथा चैकधुरोऽपि च ।
स तु सर्व्वधुरीणः स्यात् सर्व्वा वहति यो धुर ॥"
इति शब्दरत्नावली ॥

(आदित्यनृपस्य मन्त्री । स तु कौशलेन राजानं हत्वा स्वयमेव राज्यमकरोत् ॥ यथा, राजा-वल्याम् २ परिच्छेदे ।

"आदित्यस्य तदा मन्त्री अदूरान्वयसम्भवः ।
धुरन्धराभिधो धीरो बलबुद्धिनिकेतन. ॥
सेनापतीन् वशीचक्रे धनमानप्रदानतः ।
एकदा स तमादित्यमादित्यसमवर्चसम् ॥
एकान्ते नृपमासीनं हत्वा हतमतिस्तदा ।
तदासन समारुह्य राज्यं शशासद्धुरन्धर. ॥
भूमिवेदमितान्वर्षाननुभुक्त्वा भोगानगुत्तमान् ।
सेनोद्धतं सुत राज्ये स्थापयित्वा लय गत. ॥"

राक्षसविशेष. । स तु प्रहस्तस्य सचिवविशेष. । यथा, गौः रामायणे । ६ । ३२ । १५ ।

"एतस्मिन्नन्तरे शूराः प्रहस्तस्य यशानुगाः ।
धुरन्धर' कुम्भहनुर्महानादः समुन्नदः ।
इते प्रहस्तसचिवाः सर्व्वे जग्मुर्यमक्षयम् ॥")

धुर्व्वाहकमात्रे, त्रि ॥ (यथा, महाभारते । ३ १८६ । १० ।

"अनड्वाहं सुव्रतं यो ददाति
हलस्य वोढ़ारमनन्तवीर्य्यम् ।
धुरन्धरं बलवन्त युवान
प्राप्नोति लोकान् दशधेनुदस्य ॥"

श्रेष्ठः । यथा, तत्रैव । १३ । १२७ । ३१ ।

"दत्त्वा तु सततं तैस्तु कौरवाणां धुरन्धर । ।
दानयज्ञक्रियायुक्ता बुद्धिर्धर्म्मोपचायिनी ॥")

धुरा, स्त्री, (धुर्+पक्षे टाप् ।) धूः । भार । इत्यमरटीकायां भरत. ॥

धुरीणः, त्रि, (धुरं वहतीति । "खः सर्व्वधुरात् ।" ४ । ४ । ७८ । इत्यत्र योगविभागवत् ख' ।) भारवाहः । इत्यमरः । २ । ९ । ६५ ॥ (श्रेष्ठः । यथा, पञ्चतन्त्रे । ३ । २०७ ।

"हे महाव्रतधराणां धुरीण । त्वयापि मय्युप-कृतमित्याद्युक्त्वा स्कन्धादुत्तार्य्य यत्र यत्र स्वजन-गृहद्वारादिषु बभ्राम ॥")

धुरीय', पु, (धुरमर्हतीति । छः ।) अनड्वान् । इति राजनिर्घण्टः ॥ भारयोग्ये, त्रि ॥

धुर्य्यः, त्रि, (धुरं वहतीति । धुर्+"धुरो यड्-ढकौ ।" ४ । ४ । ७७ । इति यत् । "न भकु-र्छुराम् ।" ८ । २ । ७९ । इति न दीर्घ. ।) धुरन्धर' । इत्यमरः । २ । ९ । ६५ ॥ (यथा रघुः । ५ । ६६ ।

"तामेकतस्तव विभर्त्ति गुरुर्विनिद्र-स्तस्या भवानपरधुर्य्यपदावलम्बी ॥"

श्रेष्ठ. । यथा, भागवते । ४ । २२ । ४९ ।

"वरेण्यस्तु धुर्य्यो महतां स्थित्याध्यात्मशिक्षया ॥'

ऋषभौषधौ अनडुहि च पु । इति राजनिर्घण्ट. ॥ (अश्वादिरपि । यथा, महाभारते । ५ । १९७ । १२ । "पुनरपि चान्योऽप्यश्वार्थी ब्राह्मण आगच्छत् । त्वरितोऽथ तस्मै अपनह्य वाम धुर्य्यमददत् अथ प्रायात् ॥")

धुर्व, ई हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-स्मै-सकं सेट् ।)ह्रस्वी । धू. धुर्वौ धुरः । ई, धूर्ण । कितये वाच्ये धूर्त्तः । इति मनीषादित्वाच्छिपात्य । इति दुर्गादासः ॥

धुवका, स्त्री, (धवति पुन. पुनरुच्चारणेन गानं कम्पयतीवेति । धू कम्पने+"कुन् शिल्पिसञ्ज्ञयो-रपूर्व्वस्यापि ।" उणा' २ । ३२ । इति कुन् । ततष्टाप् ।) ध्रुवका । इत्युणादिकोष. ॥ धुया इति भाषा ॥

धुवन', पु, (धवतीति । धू+ "भूसूधूभ्रस्जिभ्य-श्छन्दसि ।" उणा २ । ८० । इति क्युन् ।) अग्निः । इति सिद्धान्तकौमुदी ॥ (यथा, शत-पथब्राह्मणे । १३ । २ । ८ । ४ ।

"वे यज्ञे धुवनं तन्वते ॥")

धुवित्रं, क्ली, (धूयतेऽनेनेति । धू+इत्र ।) यज्ञा-ग्निज्वालनार्थं मृगचर्म्मरचितव्यजनम् । इत्य-मरः । २ । ७ । २३ ॥

धुस्तुर, पु धुस्तूर । इत्यमरटीकायां भरतः ॥

पर द्विकालपायी स्यादह्नः कालेषु बुद्धिमान् ।
प्रयोगे स्नैहिके त्वेकं वैरेच्य त्रिचतुःपिबेत् ॥
हृत्कण्ठेन्द्रियसंशुद्धिर्लघुत्व शिरसः शमः ।
यथेरितानां दोषाणां सम्यक् पीतस्य लक्षणम् ॥
बाधिर्य्यमान्ध्य मूकत्व रक्तपित्त शिरोभ्रमम् ।
अकाले चातिपीतश्च धूम' कुर्य्यादुपद्रवान् ॥”
“न विरिक्तः पिबेद्धूम न कृते वस्तिकर्म्मणि ।
न रक्ती न विषेणार्त्तो न शोची न च गर्भिणी ॥
न श्रमे न मदे नामे न पित्ते न प्रजागरे ।
न मूर्च्छा भ्रमतृष्णासु न क्षीणे नापि च क्षते ॥
न मद्यदुग्धे पीत्वा च न स्नेह नच माक्षिकम् ।
धूम न भुक्त्वा दध्ना च न रूक्ष' क्रुद्ध एव च ॥
न तालुशोषे तिमिरे शिरस्यभिहते न च ।
न शङ्खके न रोहिण्यां न मेहे न मदात्यये ॥
एषु धूममकालेषु मोहात् पिबति यो नरः ।
रोगास्तस्य प्रवर्द्धन्ते दारुणा धूमविभ्रमात् ॥”
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
“धूम' पञ्चविधो भवति तद्यथा, प्रायोगिकः स्नेहनो वैरेचन' कासघ्नो वामनीयश्चेति । तत्रैलादिना कुष्ठतगरवर्ज्येन श्लक्ष्णपिष्टेन द्वादशाङ्गुलं शरकाण्डं क्षौमेणाष्टाङ्गुलं वेष्टयित्वा लेपयेदेषा वर्त्ति' प्रायोगिके । स्नेहफलसारमधूच्छिष्टसर्ज्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नेहने । शिरोविरेचनद्रव्यैर्वैरेचने । बृहतीकण्टकारिकात्रिकटुकासमर्द्दहिङ्गुङ्गुदीत्वङ्मन'शिलाच्छिन्नरुहाकर्कटशृङ्गीप्रभृतिभिः कासहरैश्च कासघ्ने । स्नायुचर्म्मखुरशृङ्गकर्कटकास्थिशुष्कमत्स्यवल्लूरकृमिप्रभृतिभिर्वामनीयैश्च वामनीये ॥”
“मुखेन त पिबेत् पूर्ब्ब नासिकाभ्यां ततः पिबेत् ।
मुखपीत मुखेनैव वमेत् पीतञ्च नासया ॥
मुखेन धूममादाय नासिकाभ्यां न निर्हरेत् ।
तेन हि प्रतिलोमेन दृष्टिस्तत्र विहन्यते ॥”
“अकालपीत' कुरुते भ्रममूर्च्छाशिरोरुज' ।
घ्राणश्रोत्राक्षिजिह्वानाशमुपघातञ्च दारुणम् ॥”
“तत्र स्नेहनो वातं शमयति स्नेहादुपलेपाच्च । वैरेचन श्लेष्माणमुत्क्लेश्यापकर्षति रौक्ष्यात्तैक्ष्ण्यादौष्ण्याद्वैशद्याच्च । प्रायोगिक श्लेष्माणमुत्क्लेशयत्युत्क्लिष्ट चापकर्षति साधारणत्वात् पूर्ब्बाभ्यामिति ॥”
“नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः ।
दृढकेशद्विजश्मश्रुसुगन्धिविशदाननः ॥”
“प्रायोगिक त्रींस्त्रीनुच्छ्वासानाददीत । मुखनासिकाभ्याञ्च पर्य्यायांस्त्रींश्चतुरो वेति ॥ स्नैहिक यावदश्रुप्रवृत्ति' वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पातव्यो वामनीय' ग्रासान्तरेषु कासघ्न इति ।” इति सुश्रुते चिकित्सितस्थाने ४० अध्याय ॥

धूमकेतन, पु, (धूम केतनं ध्वजश्चिह्न यस्य ।) अग्नि. । (यथा, रघु' । ११ । ८१ ।
“निष्प्रभश्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः ॥”) केतुग्रहः । इति मेदिनी । ने, २३८ ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८२ ।
“वृषभ' शङ्करो नित्यं वर्च्चस्वी धूमकेतनः ॥”)

धूमकेतुः, पु, (धूम' केतुश्चिह्नं यस्य ।) अग्नि. । (यथा, महाभारते । १ । १०३ । १७ ।
“प्रभां समुत्सृजेदर्को धूमकेतुस्तथोष्मताम् ॥”) उत्पातविशेषः । स धूमाभा तारका । इत्यमरभरतौ ॥ (यथा, कुमारे । २ । ३२ ।
“भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थित' ॥”) ग्रहभेद' । इति विश्वः ॥ * ॥ केतवश्च शिखावन्ति ज्योतींषि स्थिराण्युत्पातरूपाणि । तदुदये कालाशुद्धिर्यथा,—
“धूमकेतौ समुत्पन्ने ग्रहणे चन्द्रसूर्य्ययो ।
ग्रहाणां सङ्गरे चैव न कुर्य्यान्मङ्गलक्रियाम् ॥
उल्कापाते च त्रिदिनं धूमे पञ्च दिनानि च ।
वज्रपाते दिनञ्चैक वर्ज्जयेत् सर्व्वकर्म्मसु ॥”
इति गर्गवचनम् ॥
भोजराज ।
“ग्रहे रवीन्द्वोर्द्धरणीप्रकम्पे
केतूद्गमोल्कापतनादिदोषे ।
शते दशाहानि वदन्ति तज्ज्ञा-
स्त्रयोदशाहानि वदन्ति केचित् ॥
वज्रकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्य्ययोः ।
प्रयाणन्तु त्यजेत् प्राज्ञः सप्तरात्रमतः परम् ॥
ब्राह्मणः क्षत्त्रियो वैश्यस्त्यजेत् कर्म्म त्रिरात्रकम् ।
शूद्रस्त्यक्त्वा चैकरात्रं सर्व्वकर्म्म समाचरेत् ॥”
इति मलमासतत्त्वम् ॥
अथ केतूनां संस्थानम् ।
“शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारद केतुम् ॥”
तथा च पराशरः । “शतमेकोत्तर केतूनां भवन्ति तेषां षोड़श मृत्युनिश्वासजाः । द्वादशादित्यसम्भवा' । दश दक्षमखविलयने रुद्रक्रोधजा' । सप्त पैतामहाः । पञ्चदश वर्षे औद्दालिकस्य पुत्त्राः । सप्तदश मरीचिकश्यपललाटजाः । पञ्च च प्रजापतिसहजाः । त्रयो विभावसुजाः । धूमोद्भवश्चैकः । चतुर्द्दश मथ्यमानेऽमृते सोमेन सह सम्भूताः । एकस्तु ब्रह्मकोपजः ॥” * ॥ गर्गादय. सहस्र वदन्ति । तथा च गर्ग' ।
“अभिव्योदयचाराणामशुभानाञ्च दर्शनम् ।
आगन्तूनां सहस्रं स्याद्ग्रहाणां सन्निबोध मे ॥”
नारदाख्यो मुनिरेकमेव केतु' बहुरूप प्राह । यथा,—
“दिव्यान्तरीक्षभौमस्य एकः केतु' प्रकीर्त्तितः ।
शुभाशुभफल लोके ददात्यस्तमयोदये ॥”
तत्र धूमकेतुलक्षणम् ।
“उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः ।
इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा ॥”
“ह्रस्वतनुः प्रसन्न इत्यस्मादुक्तात् यो विपरीतो विशेषतः शक्रचापरूपकेतुरुत्पन्नः स धूमकेतुः स च न शुभकरः पाप करोतीत्यर्थः इन्द्रधनुःसदृशो न शुभकर एव तथा द्विशिखस्त्रिशिखश्च विशेषतः पापफलदः । तथा च समयसंहितायाम् । अचिरस्थितोऽतिदृष्टस्तामितः स्निग्धमूर्त्तिरुदगुदितः । ह्रस्वतनुः प्रसन्न' केतुर्लोकस्याभावाय न शुभो विपरीतो विशेषतः शक्रचापसङ्काशः । द्वित्रिचतुश्चूलो वा दक्षिणसंस्थश्च मृत्युकरः ।” इति भट्टोत्पलकृतवराहसंहिताटीका ॥ (अश्वविशेष. । यथा, नकुलकृताश्ववैद्यके । ४ । २६ ।
“पुच्छदेशे यदावर्त्तो वाजिन' संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥”
तथाच युक्तिकल्पतरौ ।
“पृष्ठवंशे यदावर्त्त एक' समदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥”
महादेवः । यथा, महाभारते । १३।१७।१०३।
“धन्वन्तरिर्धूमकेतुस्कन्दो वैश्रवणस्तथा ॥”)

धूमगन्धिकं, क्ली, (धूमस्येव गन्धो यस्य । समासे इत् । ततः स्वार्थे कन् ।) रोहिषतृणम् । इति भावप्रकाशः ॥

धूमजाङ्गनं, क्ली, (धूमजस्य मेघस्य अङ्गम् धूमजाङ्गं वज्र तस्माज्जायते इति । जन+डः ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥

धूमध्वजः, पुं (धूमः ध्वजश्चिह्न यस्य ।) अग्नि' । इति हेमचन्द्रः । ४ । १६३ ॥ (यथा, सर्व्वदर्शनसंग्रहे चार्व्वाकदर्शने ।
“कथमन्यथा धूमोपलम्भानन्तर धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत ॥”)

धूमप्रभा, स्त्री, (धूमस्य प्रभा इव प्रभा यस्याः ।) धूमान्धकारनरक. । इति हेमचन्द्रः । ५ । ३ ॥

धूममहिषी, स्त्री, (धूमस्य महिषीव ।) कुज्झटी । इति त्रिकाण्डशेष. ॥

धूमयोनिः, पुं, (धूम एव योनिरुत्पत्तिकारण यस्य ।) मेघ. । (धूमविशेषोद्भवमेघफल यथोक्त शिल्पशास्त्रविहितवचने ।
“यज्ञधूमोद्भव त्वभ्रं द्विजानाञ्च हितं स्मृतम् ।
दावाग्निधूमसम्भूतमभ्र वनहितं स्मृतम् ॥
मृतधूमोद्भवं त्वभ्रमशुभाय भविष्यति ।
अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजाः ॥”) मुस्तकः । इत्यमर' ॥

धूमलः, पुं, (धूमवद्वर्णं लातीति । ला+कः ।) कृष्णलोहितवर्ण' । (यथा, नैषधे । १९ । ५ ।
“अपि मधुकरी कालिमन्या विराजति धूमलच्छविरिव रवेर्लोकालक्ष्मीं करैरतिमातुके. ॥”) तद्युक्ते, त्रि । इत्यमरः । १ । ५ । १६ ॥

धूमसंहतिः, स्त्री, (धूमस्य संहति. समूह' ।) धूमसमूहः । इति हलायुधः ॥

धूमसी, स्त्री, रोटिकाविशेषः । यथा, भावप्रकाशे ।
“माषाणा दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः ।
आतपे शोषिताः पात्रे पिष्टास्ता धूमसी स्मृता ॥
धूमसी रचिता सैव प्रोक्ता मुर्म्मुरिका बुधैः ।
मुर्म्मुरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥”

धूमाभ, पु, (धूमस्य आभा इव आभा यस्य ।) धूम्रवर्णः । इति शब्दमाला ॥ तद्वति, त्रि ॥

धूमावती, स्त्री, दशमहाविद्यान्तर्गतविद्याविशेषः । अस्या ध्यानं यथा,—
"विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा ।
विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा ।
काकध्वजरथारूढ़ा विलम्बितपयोधरा ॥
सूर्पहस्तातिरुक्षाक्षी धूतहस्तवरान्विता ।
प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा ॥
क्षुत्पिपासार्दिता नित्यं भयदा कलहास्पदा ।
जपेत् शत्रुचतुर्दश्यां पुरश्चरणसिद्धये ॥"
इति तन्त्रसारः ॥
(अस्या मन्त्रो यथा, मन्त्रकोषे ।
"दान्तावर्णोऽरविन्दस्थौ ततो धूमावसाहित' ।
धूमावती मनुः प्रोक्तो वैरिनिग्रहकारकः ॥"
धूँ धूँ धूमावती स्वाहा ॥)

धूमिका, स्त्री, (धूम इव जलीयपदार्थोऽस्त्यस्या इति । धूम+ठन् । स्त्रियां टाप् ।) कुज्झटिका । इति त्रिकाण्डशेषः ॥ (पक्षिविशेषः । फिङ्गा इति ख्याता । तद्यथा,—
"शशघ्नी भासकुररगृध्रोलूककुलिङ्गकाः ।
धूमिका मधुहा चेति प्रसहा मृगपक्षिणः ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)

धूमोत्थं, क्ली, (धूमादुत्तिष्ठति परम्परासम्बन्धेनेति । धूम+स्था+कः । धूमयोनिमेघोत्पन्नजलजातत्वात् परम्परासम्बन्धत्वम् ।) वयस्थारम् । इति राजनिर्घण्टः ॥ (धूमोत्थिते, त्रि ॥)

धूमोर्णा, स्त्री, यमपत्नी । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १३ । १६५ । ११ ।
"शक्रः शचीपतिर्देवो यमो धूमोर्णया सह ।
वरुणः सह गौर्य्या च सहर्द्ध्या च धनेश्वरः ॥")

धूमोर्णापतिः, पुं, (धूमोर्णायाः पतिः ।) यमः । इति हारावली । ५७ ॥

धूम्या, स्त्री, (धूमानां समूहः इति । धूम+पाशादित्वात् यः ।) धूमसमूहः । इत्यमर । ३।२।४३॥

धूम्याट', पु, (धूम्या इव अटतीति । अट+अच् ।) पक्षिविशेषः । फिङ्गा इति भाषा । तत्पर्य्यायः । कलिङ्गः २ भृङ्गः ३ । इत्यमरः । २ । ५ । १६ ॥

धूम्रः, पु, (धूमं धूमवर्णं रातीति । रा+कः । पृषोदरादित्वात् साधुः ।) श्यामरक्तमिश्रितवर्णः । तत्पर्य्यायः । धूमलः २ कृष्णलोहितः ३ । तद्वति, त्रि । इत्यमरः । १ । ५ । १६ ॥ (यथा, रघौ । १५ । १६ ।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ।
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः ॥")
तुरुष्कः । इति राजनिर्घण्टः ॥ (असुरविशेषः । यथा हरिवंशे । २६२ । ८ ।
"समुद्रो दमघण्टो धूम्रश्चैव महासुरः ॥"
स्कन्दस्य सैनिकविशेषः । यथा, महाभारते । ९ । ४५ । ६२ ।
"एवं नामानि चान्येषां येऽन्ये स्कन्दस्य सैनिकाः ॥"
"धूम्रः श्वेतकलिङ्गश्च सिद्धार्थो वरदस्तथा ॥")

धूम्रकः, पु, (धूम्रवर्णेन कायतीति । कै+कः ।) उष्ट्रः । इति जटाधरः ॥

धूम्रपत्रा, स्त्री, (धूम्रं धूम्रवर्णं पत्रं यस्याः । गजादेराकृतिगणत्वात् टाप् ।) क्षुपविशेषः । तत्पर्य्यायः । धूम्राक्षी २ सुलभा ३ स्वयम्भुवा ४ गृध्रपत्रा ५ गृध्राणी ६ कामिनी ७ श्रीमलापत्रा ८ । अस्या गुणाः । रसे तिक्तत्वम् । शोफकृमिकासनाशित्वम् । उष्णत्वम् । रूक्षत्वम् । अग्निदीपनकारित्वञ्च । इति राजनिर्घण्टः ॥

धूम्रमूलिका, स्त्री, (धूम्रं मूलमस्याः । कप् । टापि अत इत्वम् ।) मूलीतृणम् । इति राजनिर्घण्टः ॥

धूम्रलोचनः, पु, (धूम्रे लोचने यस्य) कपोतः । इति राजनिर्घण्टः ॥ शुम्भासुरसेनापतिः । यथा, मार्कण्डेयपुराणे । ८६ । ३ ।
"हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥"

धूम्रवर्णः, पु (धूम्रं वर्णमस्य ।) तुरुष्कः । इति राजनिर्घण्टः ॥ (पर्व्वतविशेषः । यथा, हरिवंशे । २२८ । ७३ ।
"देवावृतपर्व्वतश्चैव तथा वै वालुको गिरिः ।
क्रौञ्चः सप्तर्षिशैलश्च धूम्रवर्णश्च पर्व्वतः ॥")
कृष्णलोहितवर्णयुक्ते, त्रि ॥ (यथा, महाभारते । ३ । २८३ । २६ ।
"भार्य्यायां धूम्रवर्णानां तिस्रः कोट्यो व्यवस्थिताः ॥")

धूम्रवर्णा, स्त्री, (धूम्रं वर्णमस्याः टाप् ।) अग्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः । इति जटाधरः ॥ (यदुक्तं मुण्डकोपनिषदि । २ । ४ ।
"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः ॥")

धूम्रा, स्त्री, (धूम्र+टाप् ।) शशाण्डुली । इति राजनिर्घण्टः ॥ (धरनामवसोर्माता यथा, महाभारते । १ । ६६ । १८ ।
"धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा ॥")

धूम्रिका, स्त्री शिंशपावृक्षः । इति राजनिर्घण्टः ॥

धूर, ई ङ य वधे । गतौ । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-सेट् ।) दीर्घी । ई, धूर्णः । ङ य, धूर्य्यते । इति दुर्गादासः ॥

धूर्जटिः, पुं, (धूः भारभूता जटा यस्य । यद्वा, जट संघाते+इन् । धूर्गङ्गा जटिरस्येति । धुरलोलेवधिन्ताया जटिः संघातो यत्र वा ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, भागवते । ४ । ५ । २ ।
"क्रुद्धः सुदष्टोष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषम् ॥")

धूर्त्तं, क्ली, (धूर्व्वतीति । धूर्व्व+"हसिमृग्रिण्" इति । उणा ३ । ८६ । इति तन् ।) विड्लवणम् । इति राजनिर्घण्टः ॥ लौहकिट्टम् । इति हेमचन्द्रः । ३ । १० ॥

धूर्त्तः, पुं, (धूर्व्वति हन्तीति । धूर्व्व+तन् ।) धुस्तूरवृक्षः । इति मेदिनी । ते, २८ ॥ चोरकः । इति राजनिर्घण्टः ॥ (खण्डलवणम् । इति विश्वः । ते, २२ ॥)

धूर्त्तः, त्रि, (धूर्व्वति हिनस्तीति । धूर्व्व+"हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् ।" उणां । ३ । ८६ । इति तन् ।) द्यूतकृत् । वञ्चक । शेषस्य पर्य्यायः । मायी २ । इति हेमचन्द्रः । ३ । १४८ ॥ विटः १ । इति मेदिनी । ते, २८ ॥ (यथा, महाभारते । ४ । ६ । १२ ।
"प्रिया हि धूर्त्ता मम देविनः सदा
भवांश्च देवोपम । राज्यमर्हति ॥"
यथा च पञ्चतन्त्रे । ३ । ७३ ।
"नराणां नापितो धूर्त्तः पक्षिणां चैव वायसः ।
दंष्ट्रिणाञ्च शृगालश्च श्वेतभिक्षुस्तपस्विनाम् ॥"

धूर्त्तकः, पु, (धूर्त्त+कन् स्वार्थे ।) शृगालः । इति शब्दरत्नावली ॥ धूर्त्तश्च ॥ (नागभेदः । यथा, महाभारते । १ । ५७ । १३ ।
"वाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम् ॥")

धूर्त्तकृत, पु, (धूर्व्व+भावे तन् । धूर्व्वनं हिंसनं करोतीति । कृ+क्विप् । तुगागमश्च ।) धुस्तूर । इति शब्दमाला ॥ वञ्चककारके, त्रि ॥

धूर्त्तजन्तुः, पु, (धूर्त्तश्चासौ जन्तुश्चेति ।) मानुष । इति शब्दचन्द्रिका ॥

धूर्त्तमानुषा, स्त्री, (धूर्त्ता हिंसितो मानुषोऽनयेति ।) रास्ना । इति शब्दचन्द्रिका ॥

धूर्द्धरः, पु, (धरतीति । धृ+अच् । धुरां धरः । पृषोदरादित्वात् दीर्घः ।) धुरन्धरः । इत्यमरटीकायां रमानाथः ॥

धूर्व्वह, त्रि, (वहतीति । वह+अच् । धुरां वहः । पृषोदरादित्वात् दीर्घः ।) धुरन्धर । इत्यमरः । २ । ८ । ६५ ॥

धूर्व्वी, स्त्री, (धुर अजतीति । अज+क्विप् । तत अजो वीभावः ।) रथाग्रभागः । तत्पर्य्यायः । यानमुखम् २ धूः ३ । इति हेमचन्द्रः । ३ । ४२१ ॥

धूलकं, क्ली, (धू+बाहुलकात् ऊकः ।) विषम् । इति शब्दचन्द्रिका ॥

धूलि', स्त्री, (धुवति धूयते चेति । धू+बाहुलकात् लिः ।) पार्थिवपूर्णम् । धूला इति भाषा ॥ (यथा, भागवते । ३ । १४ । २४ ।
"स्मशानचक्रानिलधूलिधूम्र-
विकीर्णविद्योतजटाकलापः ।
भस्मावगुण्ठामलरुक्मदेहो
देवस्त्रिभिः पश्यति देवरस्ते ॥")
तत्पर्य्यायः । रेणुः २ पांशुः ३ रजः ४ । इत्यमरः । २ । ८ । ९८ ॥ धूली ५ पांशुः ६ । इति भरतः ॥ क्षितिजः ७ पौरः ८ चूर्णम् ९ रजसम् १० महीरज ११ वातकेतुः १२ नभःकेतुः १३ क्षमा १४ पिशिलिका १५ । इति मन्दरमालायाम् ॥

न्यैपखड्गातनुच्छायाछिन्नकेशनखादिकम् ।
अजमार्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ॥”
इति कर्म्मलोचनः ॥
“अजरजः खररजस्तथा सम्मार्ज्जनीरजः ।
स्त्रिय पादरजो राजन् ! शक्रादपि हरेत् श्रियम् ॥”
इति लक्ष्मीचरित्रम् ॥
धूलिका, स्त्री, (धूलिरिव प्रतिकृति । “इवे प्रतिकृतौ ।” ५।३।९६ । इति कन् । टाप् ।) कुज्झटिका । इति शब्दरत्नावली ॥ (नीहारः । यथा, नीहारे बाणशब्दे चेति इत्यत्र नीहारे धूलिकायामिति मनुटीकायां कुल्लूकभट्टः ॥)
धूलिकेदार, पु, (धूलिप्रधानः केदारः । इति मध्यलोपिसमासः ।) वप्रः । क्षेत्रम् । इति त्रिकाण्डशेषः ॥
धूलिगुच्छक', पुं, (धूलीनां गुच्छक इव । स्वार्थे कन् ।) पटवासक. । फल्गुचूर्णम् । इति त्रिकाण्डशेष. ॥
धूलिध्वज', पु, (धूलिरेव ध्वजो यस्य ।) पवनः । इति त्रिकाण्डशेषः ॥
धूलिपुष्पिका, स्त्री, (धूलि परागस्तत्प्रचुरं पुष्पं यस्या' । कापि अत इत्वम् ।) केतकी । इति राजनिर्घण्ट ॥
धूलीकदम्ब , पु, (धूलीनां कदम्बमत्र ।) नीपः । तिनिशः । वरुणवृक्षः । इति मेदिनी । बे, ९७ ॥ (धूलिसमूहे, क्ली ॥)
धूलीकदम्बक , पु, (धूलीकदम्ब+स्वार्थे कन् ।) नीप' । इति जटाधर ॥
धूलीपटल , पु, (धूलीनां पटल यत्र ।) उड्डीयमानधूलीसमूहः । यथा धूलीपटले धूमलभ्रमे तत्रासता धूमत्वेन । इत्यादि सामान्यलक्षणायां शिरोमणि ॥ (धूलीसमूहे, क्ली ॥)
धूश, क कान्तिकृतौ । इति कविकल्पद्रुम ॥ (चुरां-पर-सक-सेट् ।) षष्ठस्वरी । कान्तिकृति शोभितकरणम् । चन्दनो धूशयत्यङ्गम् । इति दुर्गादास ॥
धूष, क धूषे । इति कविकल्पद्रुमः ॥ (चुरां पर-सक सेट् ।) षष्ठस्वरी । धूष. कान्तिकृतिः । चन्दनो धूषयत्यङ्गम् । इति दुर्गादास ॥
धूस, क धूषे । इति कविकल्पद्रुम ॥ (चुरां-पर-सक-सेट ।) षष्ठस्वरी । धूस कान्तिकृति । क, धूसयत्यङ्ग चन्दनम् । मणिधूसरित सरितमटमिति जानकीहरणयमकादन्त्याम्त एवायमिति रमानाथ. । स्वमते तालव्यमूर्द्धन्यान्तोऽप्ययम् । इति दुर्गादासः ॥
धूसर., पु, (धुनातीति । धू+“कृधूमदिभ्य कित् ।” उणां ३ । ७३ । इति सरन् । स च कित् ।) ईषत्पाण्डुवर्णः । तद्वति, त्रि । इत्यमर. । १ । ५ । १३ ॥ (यथा, रघौ । ११ ।६० ।
“घ्नेनपक्षिपरिधूसरालकाः
सान्ध्यमेघरुधिरार्द्रवाससः ॥”)
उष्ट्रः । गर्द्दभ. । कपोतः । इति राजनिर्घण्ट. ॥ तैलकार. । इति हेमचन्द्रः । ६ । २९ ॥ * ॥
धूसरवस्तूनि यथा । धूलिः १ लूता २ करभः ३ गृहगोधिका ४ कपोतः ५ धूपिक' ६ रङ्गम् ७ काककण्ठः ८ खरादिः ९ । इति कविकल्पलता ॥
धूसरच्छदा, स्त्री, (धूसर ईषत् पाण्डुवर्णश्छदो यस्याः ।) श्वेतबुह्ना । इति रत्नमाला ॥
धूसरपत्रिका, स्त्री, (धूसर पत्रमस्याः । ङीप् । स्वार्थे कन् । टापि पूर्व्वह्रस्वः ।) हस्तिशुण्डीक्षुप. । इति राजनिर्घण्टः ॥
धूसरा, स्त्री, (धूसर+टाप् ।) पाण्डुरफलीक्षुपः । इति राजनिर्घण्टः ॥
धूसरी, स्त्री (धूसर+ङीप् ।) किन्नरीभेदः । इति मेदिनी । रे, १७० ॥
धूस्तूरः, पुं, (धूस् कान्तिकरणे+भावे क्विप् । तं तूर्य्यति हिनस्तीति । तूर हिंसे+“इगुपधज्ञेति ।” ३ । १ । १३५ । इति कः ।) धूस्तूरवृक्ष' । इत्यमरटीकायां भरतः ॥
धृ, क ध्रत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-पर-सक अनिट् ।) क, धारयति । इति दुर्गादास' ॥
धृ, ङ अवध्वसे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म'-अक-अनिट् ।) अवध्वसः पतनम् । ङ, धरते पत्र वृक्षात् । गोविन्दभट्टस्तु अविध्वंसने इति पठित्वा विध्वसन ध्वसन तस्याभावोऽविध्वसन स्थापनमिति व्याख्याति । इति दुर्गादास' ॥
धृ, ङ श स्थितौ । धृतौ । इति कविकल्पद्रुम ॥ (तुदां-आत्म'-स्थितौ अक-धृतौ सक-अनिट् ।) ङ श, ध्रियते । इति दुर्गादास. ॥
धृ, ञ ध्रत्याम् । इति कविकल्पद्रुम ॥ (भ्वां-उभ-सक-अनिट् ।) ञ, धरति धरते । इति दुर्गादासः ॥
ध्रज, गतौ । इति कविकल्पद्रुम' ॥ (भ्वां-परं-सकं सेट् ।) धर्ज्जति । इति दुर्गादासः ॥
ध्रज, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सक-सेट् । इदित् ।) सप्तमस्वरी । इ, ध्रञ्जति । इति दुर्गादासः ॥
धृत', त्रि, धृधातोः कर्म्मणि कर्त्तरि च क्तप्रत्ययेन निष्पन्नः ॥ धारणविशिष्ट' । धरा इति भाषा । (यथा, महाभारते । १ । ७४ । १०३ ।
“अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यति ॥”)
अवध्वस्त । पतित इति यावत् । स्थित । (स्थिरीकृतः । निश्चित' । यथा, महाभारते । ७ । १९ । २८ ।
“धृतो धनञ्जयवधे प्रतिज्ञाश्चापि चक्रिरे ॥”
पु, त्रयोदशमनो रौच्यस्य पुत्रविशेष' । यथा, हरिवंशे । ७ । ८२ ।
“चित्रसेनो विचित्रश्च नयो धर्म्मभृतो धृत. ।
सुनेत्र' क्षत्रवृद्धिश्च सुतपा निर्भयो दृढ. ।
रौच्यस्यैते मनोः पुत्त्रा अन्तरे तु त्रयोदशे ॥”
द्रुह्युवंशीयधर्म्मस्य पुत्त्रः । यथा, भागवते । ९ । २३ । १४ ।
“द्रुह्योश्च तनयो बभ्रु सेतुस्तस्यात्मजस्ततः ।
आरब्धस्तस्य गान्धारस्तस्य धर्म्मस्ततो धृत ॥”)
धृतराष्ट्र', पु, (धृत राष्ट्र येन ।) दुर्य्योधनपिता । स च अम्बाया व्यासपुत्त्रः विचित्रवीर्य्यक्षेत्रे जाताः । इति महाभारते । १ । ९५ । ५५ ॥ (अयं हि गन्धर्व्वपतेर्हंसस्य अंशावतार. । यथा, महाभारते । १ । ६७ । ८४ ।
“अरिष्टायास्तु यः पुत्त्रो हंस इत्यभिविश्रुत. ।
स गन्धर्व्वपतिर्जज्ञे कुरुवंशविवर्द्धन' ॥”)
सुराणा । नागभेद. । इति मेदिनी । रे, २७१ ॥ (यथा, महाभारते । २ । ९ । ९ ।
“कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ ॥”)
पक्षिभेदः । इति विश्वहेमचन्द्रौ ॥ (गन्धर्व्वविशेष. । यथा, विष्णुपुराणे । २ । १० । १५ ।
“अश्वापेतोऽथ कृतजित् धृतराष्ट्रोऽथ सप्तम ॥”
बलिराजस्य पुत्त्रविशेष' । यथा, हरिवंशे । ३ । ७४ ।
“बभौ. पुत्त्रशतश्चासीद्बाणज्येष्ठ नराधिप । ।
धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापन ॥”
जनमेजयस्य ज्येष्ठपुत्त्रः । यथा, महाभारते । १ । ९४ । ५४ ।
“जनमेजयस्य तनया भुवि ख्याता महाबलाः ।
धृतराष्ट्र' प्रथमज. पाण्डुर्व्वाह्लीक एव च ॥”)
धृतराष्ट्री, स्त्री, (धृतराष्ट्रस्य पत्नी । ङीप् ।) हंसपत्नी । इति मेदिनी । रे, २७२ ॥ (यथा, महाभारते । १ । ६६ । ५७, ५९ ।
“काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् ।
ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुता' ॥”
“धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्व्वश' ।
चक्रवाकांश्च भद्र ति जनयामास सैव तु ॥”
हंसपदीलता । इति हेमचन्द्र ॥)
धृति', पु, (ध्रियते इति । धृ+क्तिन् । अभिधानात् पुस्त्वम् ।) दृष्टि. । इति मेदिनी । ति,२५ ॥ (विश्वेदेवविशेषः । यथा, महाभारते । १३ । ९१ । ३० ।
“बल धृतिर्व्विपाप्मा च पुण्यकृत् पावनस्तथा ॥”
चन्द्रवंशीयनृपविशेषस्य विजयस्य पुत्त्र. । यथा, हरिवंशे । ३१ । ५५ ।
“विजयस्य धृति' पुत्त्रस्तस्य पुत्त्रो धृतव्रत' ॥”
निमिवंशीयानामेकतम. । यथा, भागवते । ९ । १३ । २६ ।
“शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्तत' ॥”
यदुवंशीयबभ्रो पुत्त्र । इति विष्णुपुराणे । ४ । १२ । १५ । “रोमपादाद्बभ्रु बभ्रोः पुत्त्रो धृति ॥”)
धृति , स्त्री, (धृ+क्तिन् ।) तुष्टि । (यथा, मनु । ६ । ९२ ।
“धृति क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रह ।
धीर्व्विद्या सत्यमक्रोधो दशक धर्म्मलक्षणम् ॥”)
योगभेदः । धैर्य्यम् । (यथा, वाजसनेयसंहितायाम् । ३४ । ३ ।

"यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ॥")
धारणम्। इति मेदिनी। ते, २८ ॥ सुखम्। इति हेमचन्द्रः। २। २२२ ॥ (क्रतुः। यथा, कात्यायनश्रौतसूत्रे। २०। २। ८।
"राजन्यो धृतिषु युद्धजपयुक्ताः ॥")
षोडशमातृकान्तर्गतत्रयोदशमातृका। इति भवदेवः ॥ अष्टादशाक्षरपादवृत्तिच्छन्दोमात्रम्। इति छन्दोमञ्जरी ॥ * ॥ धृतियोगजातफलं यथा,—
"धृतियोगसमुत्पन्नः प्राज्ञः संहृष्टमानसः।
वावदूकः सभायाञ्च सुशीलो विनयान्वितः ॥"
इति कोष्ठीप्रदीपः ॥
धारणा। सा त्रिधा। यथा,—
"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥
यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्ज्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ। राजसी ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता ॥"
इति श्रीभगवद्गीतायाम्। १८।३३-३५ ॥

धृत्वरी स्त्री, (धृत्वन्+"वनो र च।" ४। १। ७। इति ङीप् रश्चान्तादेशः।) भूमिः। इति संक्षिप्तसारोणादिवृत्तिः ॥

धृत्वा, [न्] पुं, (धरतीति। धृ+"शीङ्क्रुशिरुहिजिचीति।" उणा ४।११३। इति क्वनिप्।) धर्म्मः। विप्रः। समुद्रः। अन्तरीक्षम्। मेधावी। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः ॥

धृष, आ कि अमर्षे। क्रोध इति यावत्। इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) आ, धर्षितं धृष्टं तेन। कि, धर्षयति धर्षति। अमर्ष इह अभिभवः। इति भट्टमल्लः। न धर्षति निजाः प्रजाः। तमेव धर्षयत्येक यस्तासु प्रतिकूलतीति हलायुधः। इति दुर्गादासः ॥

धृष उ संहतौ। हिंसे। इति कविकल्पद्रुमः ॥ (भ्वां परं-संहतौ अकं-हिंसे सकं-सेट्। उदित्वात् क्त्वावेट्।) उ, धर्षित्वा धृष्ट्वा। संहतिः। समूहः। इति दुर्गादासः ॥

धृष, क ङ शक्तिबन्धे। इति कविकल्पद्रुमः ॥ (चुरा-आत्मं-सकं-सेट्।) शक्तेर्ब्बन्धनं शक्तिबन्धः। क ङ, धर्षयते वह्निं पयः। इति दुर्गादासः ॥

धृष, ञि आ न प्रागल्भ्ये। इति कविकल्पद्रुमः ॥ (स्वा-परं-अकं-सेट्।) ञि, धृष्टोऽस्ति। आ, धर्षितं धृष्टं तेन। न, धृष्णोति गुरोरग्रे यः। इति हलायुधः। इति दुर्गादासः ॥

धृषुः, पुं, (धृष्णोतीति। धृष्+"पृभिदिव्यधीति।" उणां १। २४। इति कुः।) दक्षः। इत्युणादिकोषः ॥ संघातः। प्रगल्भः। इति संक्षिप्तसारोणादिवृत्तिः ॥

धृष्टः, त्रि, (धृष+क्तः।) प्रगल्भः। इति मुग्धबोधव्याकरणम् ॥ (यथा, भागवते। ५। १२। ७।
"जनस्य गोप्तासि विकत्थमानो
न शोभसे वृद्धसभासु धृष्टः ॥")
निर्लज्जः। तत्पर्य्यायः। धृष्णक् २ वियातः ३। इत्यमरः। ३। १। २५ ॥ धृष्णुः ४ दृष्टक् ५। इति त्रिकाण्डशेषः। धर्षितः ६। इति शब्दरत्नावली ॥ चतुर्विधपत्यन्तर्गतपतिविशेषे, पुं। तस्य लक्षणं यथा, "भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणः।" इति रसमञ्जरी ॥ (चेदिवंशीयकुन्तेः पुत्रः। यथा, हरिवंशे। ३६। २४।
"कुन्तेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवान् ॥"
सप्तममनोः पुत्रविशेषः। यथा, भागवते। ८। १३। २।
"मनुर्व्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः।
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्य्यातिरेव च ॥"
धृष्णुरिति क्वापि दृश्यते ॥)

धृष्टा, स्त्री, (धृष्यते स्मेति। धृष् शक्तिबन्धे+क्तः। टाप्।) असती। इति शब्दरत्नावली ॥

धृष्णक्, [ज्] त्रि, (धृष्णोतीति। धृष प्रागल्भ्ये+"स्वपितृषोर्नजिङ्।" ३। २। १७२। इत्यत्र "धृषेश्च।" इति काशिकोक्तेर्नजिङ्।) निर्लज्जः। इत्यमरः। ३। १। २५ ॥

धृष्णि, पुं, (धर्षति अभिभवति अन्धकारमिति। धृष् अमर्षे+बाहुलकात् निः। स च कित्।) किरणः। इत्यमरः। १। ४। ३३ ॥

धृष्णुः, त्रि, (धृष्णोतीति। धृष्+"त्रसिगृधिधृषिक्षिपेः क्नुः।" ३। २। १४०। इति क्नुः।) धृष्टः। इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे। ६। २५। ५।
"न हि त्वा शूरो न तुरो न धृष्णु
र्न त्वा योधो मन्यमानो युयोध ॥")
पुं, कर्षिका। इति शब्दचन्द्रिका ॥ (वैवस्वतमनुपुत्रः। यथा, हरिवंशे। १०। १।
"मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः।
इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्यातिरेव च ॥"
सावर्णस्य मनोः पुत्रविशेषः। यथा, तत्रैव। ७। ६०।
"वरिष्णुरार्य्यो धृष्णुश्च राजः सुमतिरेव च।
सावर्णस्य मनोः पुत्रा भविष्या दश भारत ॥"
चन्द्रवंशोद्भवकुकुरराजस्य सुतः। यथा, तत्रैव ३७। १८।
"कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा।
कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत् ॥"
कवेः पुत्रविशेषः। यथा, महाभारते। १३। ८५। १३३।
"कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा।
भृगुश्च विरजाश्चैव काशी चोग्रश्च धर्म्मवित् ॥
अष्टौ कविसुता ह्येते सर्व्वमेभिर्जगत्ततम् ॥")

धे, ट पाने। इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-अनिट्।) धयति। टः स्त्रियामीवर्थः। स्तनन्धयी। इति दुर्गादासः ॥

धेनः, पुं, (धीयते इति धयत्यस्मादिति वा। धेट पाने+"धेट इच्च।" उणां ३। ११। इति न इश्चान्तादेशः।) समुद्रः। इति हेमचन्द्रः ॥ नदः। इति मेदिनी ॥

धेना, स्त्री, (धेन+टाप्। "टित्त्वेऽपि स्वस्येव ङीप्। इति हरदत्तोक्तेर्न ङीप्।" इति केचित्।) नदी। (दधातेर्लटः शानचि व्यत्ययेन एत्वाभ्यासलोपौ दधाना स्वमभिधेयं वर्षप्रदानेन लौकिकाय वा। यद्वा, धेट पाने 'धेट इच्च' इति नप्रत्ययः इकारश्चान्तादेशः गुणः। धयन्ति तामिति धेना। पानमत्र स्वीकारः। यद्वा आस्वादः। धीयते पीयते आस्वाद्यते वानेन धयन्ति प्राणमिति धेना।" इति देवराजयज्वा। १। ११। ३८।) भारतीभेदः। इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे। ३। १। ८।
"यस्य धारा असृजद्धि धेनाः।"
"धेना माध्यमिका वाचश्च विसृजति।" इति तद्भाष्ये सायनः ॥)

धेनिका, स्त्री, (धेनो नदः। लक्षणया जलसमीपस्थानम्। स उत्पत्तिस्थानत्वेनास्त्यस्या इति। धेन+ठन्। टाप्।) धन्याकम्। इति भावप्रकाशः ॥

धेनुः, स्त्री, (धयति वेढि सुतान् धीयते वत्सैरिति वा। धेट पाने+"धेट इच्च।" उणां ३। ३४। इति नुः इश्चान्तादेशः।) नवप्रसूता गौः। तत्पर्य्यायः। नवसूतिका २। इत्यमरः। २। ९। ७१ ॥ नवप्रसूतिका ३। इति शब्दरत्नावली ॥ दानीयदशधेनवो यथा,—
"यास्तु पापविनाशिन्यः पठ्यन्ते दशधेनवः।
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ॥
प्रथमा गुडधेनुः स्याद्घृतधेनुरथापि वा।
तिलधेनुस्तृतीया च चतुर्थी जलसञ्ज्ञिका ॥
क्षीरधेनुश्च विख्याता मधुधेनुरथापि वा।
सप्तमी शर्कराधेनुर्दधिधेनुरथाष्टमी ॥
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः ॥
कुम्भाः स्युर्द्रवधेनूनामितरासान्तु राशयः।
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः ॥
नवनीतेन तैलेन तथान्ये तु महर्षयः।
एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः ॥
मन्त्रावाहनसंयुक्ताः सदा पर्व्वणि पर्व्वणि।
यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः ॥
गुडधेनुप्रसङ्गेन सर्व्वास्तव मयोदिताः।
अशेषयज्ञफलदाः सर्व्वपापहराः शुभाः ॥
व्रतानामुत्तमा यस्माद्विशोकद्वादशीव्रतम्।
तदङ्गत्वेन चैवात्र गुडधेनुः प्रशस्यते ॥
अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः।
गुडधेन्वादयो देयास्तूपरागादिपर्व्वसु ॥"
इति मत्स्यपुराणे ७६ अध्यायः ॥
पूर्व्वोक्तधेनूनां दानविधयस्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
अथ कपिलाधेनुदानादिफलम्।
होतोवाच।
"अथातः संप्रवक्ष्यामि कपिलाधेनुमुत्तमाम्।

यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥
पूर्व्वोक्तेन विधानेन दद्याद्धेनुं सवत्सकाम् ।
सर्व्वालङ्कारसंयुक्तां सर्व्वरत्नसमन्विताम् ॥
कपिलायाः शिरोग्रीवे सर्व्वतीर्थानि भामिनि ! ।
पितामहनियोगाच्च निवसन्ति हि नित्यशः ॥
प्रातरुत्थाय यो मर्त्त्यः कपिलागलमस्तकात् ।
च्युतन्तु भक्त्या पानीयं शिरसा वन्दते शुचिः ॥
स तेन पुण्यतोयेन तत्क्षणाद्दग्धकिल्बिषः ।
त्रिंशद्वर्षकृतं पापं दहत्यग्निरिवेन्धनम् ॥
कल्यमुत्थाय यो मर्त्त्यः कुर्य्यात्तासां प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी स्यात् वसुन्धरे ! ॥
प्रदक्षिणेन चैकेन श्रद्धायुक्तेन तत्क्षणात् ।
दशजन्मकृतं पापं तस्य नश्यत्यसंशयम् ॥
कपिलायास्तु मूत्रेण स्नात्वा चैव शुचिव्रतः ।
स गङ्गादिषु तीर्थेषु स्नातो भवति मानवः ॥
तेन स्नानेन चैकेन भावयुक्तेन वै नरः ।
यावज्जीवकृतात् पापात् मुच्यते नात्र संशयः ॥
गोसहस्रन्तु यो दद्यादेकाञ्च कपिलां नरः ।
सममेतत् पुरा प्राह ब्रह्मा लोकपितामहः ॥
गवामस्थि न लङ्घेत मृते गन्धं न दूषयेत् ।
यावज्जिघ्रति तं गन्धं तावत् पुण्येन युज्यते ॥
गवां कण्डूयनं श्रेष्ठं तथा च परिपालनम् ।
तुल्यं गोशतदानस्य भयरोगादिपालने ॥
तृणोदकानि यो दद्यात् क्षुधितानां गवाह्निकम् ।
सोऽश्वमेधफलं दिव्यं लभते मानवोत्तमः ॥
विमानैर्विविधैर्दिव्यैः कन्याभिरभिरर्च्चितैः ।
सेव्यमानस्तु गन्धर्व्वैर्दीप्यमानो यथाग्नयः ॥" ॥
एकादशप्रकारकपिलालक्षणं यथा,—
"सुवर्णकपिला पूर्व्वं द्वितीया गौरपिङ्गला ।
तृतीया चैव रक्ताक्षी चतुर्थी गुडपिङ्गला ॥
पञ्चमी बहुवर्णा स्यात् षष्ठी च श्वेतपिङ्गला ।
सप्तमी श्वेतपिङ्गाक्षी अष्टमी कृष्णपिङ्गला ॥
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ।
एकादशी खुरश्वेता एतासां सर्व्वलक्षणा ॥
सर्व्वलक्षणसंयुक्ता सर्व्वालङ्कारसुन्दरी ।
ब्राह्मणाय च दातव्या सर्व्वमुक्तिप्रदायिनी ।
भुक्तिमुक्तिप्रदा तेषां विष्णुमार्गप्रदायिनी ॥"
इति कपिलामाहात्म्यम् ॥ * ॥
अथोभयमुखीधेनुदानादिविधानम् ।
होता उवाच ।
"अतःपरं महाराजोभयमुख्याः समासतः ।
विधानं यद्वरारोहे ! धरण्याः कथितं पुरा ।
तदहं संप्रवक्ष्यामि तव पुण्यफलञ्च यत् ॥
धरण्युवाच ।
यत्त्वया कपिला नाम पूर्व्वमुत्पादिता प्रभो ! ।
होमधेनुः सदा पुण्या सा ज्ञेया कतिलक्षणा ।
कियन्त्यः कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा ॥
प्रदीयमाना दानेन किं पुण्यं स्याच्च माधव ! ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण जगद्गुरो ! ॥
श्रीवराह उवाच ।
शृणुष्व भद्रे ! तत्त्वेन पवित्रं पापनाशनम् ।
यं श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥
कपिला अग्निहोत्रार्थे यज्ञार्थे च वरानने ! ।
उद्धृत्य सर्व्वतेजांसि ब्रह्मणा निर्म्मिता पुरा ॥
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला च वसुन्धरे ! ॥
तपसान्तु तप एवाग्र्यं व्रतानां व्रतमुत्तमम् ।
दानानामुत्तमं दानं निधीनां निधिरक्षयम् ॥
पृथिव्यां यानि तीर्थानि गुह्यान्यायतनानि च ।
पवित्राणाञ्च पुण्यानि सर्व्वलोकेषु सुन्दरि ! ॥
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ।
कपिलाया घृतेनैव दध्ना क्षीरेण वा पुनः ॥
जुहुते ह्यग्निहोत्राणि मतैश्च विविधैः सदा ।
पूजयन्तितिथींश्चैव परां भक्तिमुपागताः ॥
ते यान्त्यादित्यवर्णैश्च विमानैर्द्विजसत्तमाः ।
सूर्य्यमण्डलमध्ये च ब्रह्मणा निर्म्मिता पुरा ॥
कपिला या पिङ्गलाक्षी सर्व्वसौख्यप्रदायिनी ।
सिद्धिबुद्धिकरी देवी कपिलागन्धरूपिणी ॥
पूर्व्वोक्ता यास्तु कपिलाः सर्व्वलक्षणलक्षिताः ।
एतादृश्यः समाख्याताः कपिलास्ते वरानने ! ॥
सर्व्वा होताः महाभागास्तारयन्ति न संशयः ।
सङ्गमेषु प्रशस्ता च सर्व्वपापप्रणाशिनी ॥
अग्निपुच्छा अग्निमुखी अग्निलोमानलप्रभा ।
तथाग्नेयी सदा देवी सुवर्णाख्या प्रवर्त्तते ॥" ॥
शूद्रात् कपिलाप्रतिग्रहे दोषो यथा,—
"गृहीत्वा कपिलां शूद्रात् कामतः सदृशो भवेत् ।
पतितः स द्विजातीनां चाण्डालसदृशो हि सः ॥
न तस्मात् प्रतिगृह्णीयात् शूद्रादपि प्रतिग्रहम् ।
दूरात्तैः प्रतिहन्तव्या श्वभिस्तुल्या द्विजाध्वरे ॥
सर्व्वकाले हि सर्व्वे वै वर्ज्जिताः पितृदैवते ।
असम्भाष्याप्रतिग्राह्याः शूद्रास्ते पापकर्म्मिणः ॥
पिबन्ति यावत् कपिलां तावत्तेषां पितामहाः ।
भूमेर्म्मलं समश्नन्ति जायन्ते विड्भुजश्चिरम् ॥"*
शूद्रस्य कपिलाक्षीरादिपाने दोषो यथा,—
"तासां क्षीरं घृतं वापि नवनीतमथापि वा ।
उपजीवन्ति ये शूद्रास्तेषां गतिमथो शृणु ॥
कपिलाजीविनः शूद्राः क्रूरा गच्छन्ति रौरवम् ।
रौरवे तु महारौद्रे वर्षकोटिशतं धरे ! ॥
ततोऽपि मुक्ताः कालेन श्वानयोन्यां व्रजन्ति ते ।
श्वानयोन्या विमुक्तास्तु विष्ठायां जायते क्रिमिः ॥
विष्ठास्थानेषु पापिष्ठा दुर्गन्धिषु च नित्यशः ।
भूयो भूयो जायमानास्तन्मोक्तारं न विन्दति ॥
ब्राह्मणश्चैव यो विद्वान् कुर्य्यात्तेषां प्रतिग्रहम् ।
ततः प्रभृत्यमेध्यान्नाः पितरस्तस्य शेरते ॥
न स विप्रस्तु सम्भाषेन्न चैकासनं विशेत् ।
स नित्यं वर्ज्जनीयो हि दूरात्तु ब्राह्मणोऽध्वरे ॥
यस्तेन सह सम्भाषेत्तथा चैकासनं व्रजेत् ॥
प्राजापत्यं चरेत् कृच्छ्रं तेन शुध्यति स द्विजः ॥"
अथासन्नप्रसवकपिलादानफलादि ।
"एकस्य गोप्रदानस्य सहस्रेण तु पूर्य्यते ॥
किमन्यैर्बहुभिर्दानैः कोटिसंख्यातविस्तरैः ।
श्रोत्रियाय दरिद्राय सुदृत्तायाहिताग्नये ॥
आसन्नप्रसवां धेनुं दानार्थं प्रतिपालयेत् ।
कपिलार्द्धप्रसूता वै दातव्या च द्विजन्मने ॥
जायमानस्य वत्सस्य मुखं योन्यां प्रदृश्यते ।
तावत् सा पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥
धेन्वा यावन्ति रोमाणि सवत्साया वसुन्धरे ! ॥
तावन्त्यो वर्षकोट्यस्तु ब्रह्मणादिभिरर्च्चिताः ।
वसन्ति ब्रह्मलोके वै ये च वै कपिलाप्रदाः ॥
सुवर्णशृङ्गीं यः कृत्वा रौप्यमुक्ताखुरां तथा ।
ब्राह्मणस्य करे दत्त्वा सुवर्णं रौप्यमेव च ॥
कपिलायास्तदा पुच्छं ब्राह्मणस्य करे न्यसेत् ।
उदकञ्च करे दद्याद्वाचया शुद्धयादिते ॥
ससमुद्रान्तिका तेन सशैलवनकानना ।
रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ॥
पृथिवीदानतुल्येन दानेनैतेन वै नरः ।
नन्दितो याति पितृभिर्विष्ण्वाख्यं परमं पदम् ॥
ब्रह्मस्वहारी गोघ्नश्च भ्रूणहा पापदेहकः ।
महापातकयुक्तोऽपि पञ्चको ब्रह्मदूषकः ॥
निन्दको ब्राह्मणानाञ्च तथा कर्म्मोपदूषकः ।
एते पातकयुक्तोऽपि गवां दानेन शुध्यति ।
यश्चोभयमुखीं दद्यात् प्रभूतकनकान्विताम् ।
तद्दिनं पयसाहारः पायसेनापि वा भवेत् ॥
सुवर्णस्य सहस्रेण तदर्द्धेनापि भामिनि ! ।
तस्याप्यर्द्धशतेनापि पञ्चाशच्च तदर्द्धकम् ॥
यथाशक्ति प्रदातव्या वित्तशाठ्यं विवर्ज्जयेत् ॥
इमां गृहोभयमुखीमुभयत्र शुभोऽस्तु वै ।
मम वंशविरुद्धार्थं सदा स्वस्तिकरी भव ॥"
गोशरीरे देवतानिर्देशो यथा,—
"दन्तेषु मरुतो देवा जिह्वायान्तु सरस्वती ।
खुरमध्ये तु गन्धर्व्वाः खुराग्रेषु तु पन्नगाः ॥
सर्व्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ।
ककुदि सर्व्वनक्षत्रं लाङ्गूले धर्म्म आश्रितः ॥
अपाने सर्व्वतीर्थानि प्रस्रावे जाह्नवी नदी ।
नानाद्वीपसमाकीर्णाश्चत्वारः सागरास्तथा ॥
ऋषयो रोमकूपेषु गोमये पद्मधारिणी ।
रोमसु सन्ति विद्याश्च त्वक्केशेष्वयनद्वयम् ॥
धैर्य्यं धृतिश्च शान्तिश्च पुष्टिर्वृद्धिस्तथैव च ।
स्मृतिर्मेधा तथा लज्जा वपुः कीर्त्तिस्तथैव च ॥
विद्या शान्तिर्म्मतिश्चैव सन्ततिः परमा तथा ।
गच्छन्तीमनुगच्छन्ति एता गां वै न संशयः ॥
यत्र गावो जगत्तत्र देवदेवपुरोगमाः ।
यत्र गावस्तत्र लक्ष्मीः साङ्ख्यधर्म्मश्च शाश्वतः ॥
सर्व्वरूपेषु ता गावस्तिष्ठन्त्यभिमताः सदा ॥
गावः पवित्रा मङ्गल्या देवानामपि देवताः ।
यस्ताः शुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते ॥"
इति वराहपुराणम् ॥

धेनुकः, पुं, (धेनुरिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) असुरविशेषः । स बलरामेण हतः । इति श्रीभागवते १५ अध्यायः ॥ (अयन्तु गर्द्दभरूपी गोवर्द्धनस्योत्तरपार्श्वस्थतालवनवासी । यथा, हरिवंशे । ६९ । २—२३ ।
"आजन्मसुहृदौ हृष्टौ गोधने सहगामिनौ ।
गिरिं गोवर्द्धनं रम्यं वसुदेवसुतावुभौ ॥
गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितम् ।

दृष्टवातेऽथ तौ वीरौ रम्यं तालवनं महत् ॥
तौ तालपर्णप्रकरे रम्ये तालवने रतौ ।
चेरतुः परमप्रीतौ वृषपोताविवोन्नतौ ॥
स तु देशः समः स्निग्धः सुमहान् कृष्णमृत्तिकः ।
दर्भप्रायस्थलीभूतो लोष्टपाषाणवर्जितः ॥
तालैस्तैर्विपुलस्कन्धैरुच्छ्रितैः श्यामपत्रिभिः ।
फलाग्रशाखिभिर्भाति नागहस्तैरिवोच्छ्रितैः ॥
तत्र दामोदरो वाक्यमुवाच वदतांवर ।
अहो तालफलैः पक्वैर्व्वासितेयं वनस्थली ॥
स्वादून्यार्य्य ! सुगन्धीनि श्यामानि रसवन्ति च ।
पक्वतालानि सहितौ पातयामो लघुक्रमौ ॥
यद्येषामीदृशो गन्धो माधुर्य्यघ्राणतर्पणः ।
रसेनाम्रतकल्पेन भवितव्यञ्च मे मतिः ॥
दामोदरवचः श्रुत्वा रौहिणेयो हसन्निव ।
पातयन् पक्वतालानि चालयामास तांस्तरून् ॥
तत्तु तालवनं नृणामसेव्य दुरतिक्रमम् ।
निर्म्माणभूतमौरिणं पुरुषादालयोपमम् ॥
दारुणो धेनुको नाम दैत्यो गर्द्दभरूपधृक् ।
खरयूथेन महता वृतः समनुवर्त्तते ॥
स तत्तालवनं घोरं गर्द्दभः परिरक्षति ।
नृपक्षिश्वापदगणांस्त्रासयानः सुदुर्म्मतिः ॥
तालशब्दं स तं श्रुत्वा संघुष्टं फलपातनात् ।
नामर्षयत संक्रुद्धस्तालस्वनमिव द्विपः ॥
शब्दानुसारी सक्रुद्धो दर्पाविद्धसटाननः ।
स्तब्धाक्षो हेषितपटुः खुरैर्निर्द्दारयन्महीम् ॥
आविद्धपुच्छो हृषितो व्यात्ताननः इवान्तकः ।
आपतन्नेव ददृशे रौहिणेयमुपस्थितम् ॥
तालानां तमधो दृष्ट्वा सध्वजाकारमव्ययम् ।
रौहिणेयं खरो दुष्टः सोऽदशद्दशनायुधः ॥
पद्भ्यामुभाभ्याञ्च पुनः पश्चिमाभ्यां पराङ्मुखः ।
जघानोरसि दैत्येन्द्रो रौहिणेयं निरायुधम् ॥
ताभ्यामेव स जग्राह पद्भ्यां तं दैत्यगर्द्दभम् ।
आवर्ज्जितमुखस्कन्धं प्रैरयंस्तालमूर्द्धनि ॥
स भग्नोरुकटिग्रीवो भग्नपृष्ठो दुराकृतिः ।
खरस्तालफलैः सार्द्धं पपात धरणीतले ॥
तं गतासुं गतश्रीकं पतितं वीक्ष्य गर्द्दभम् ।
ज्ञातींस्तथापरांस्तस्य क्षणरानि सोऽक्षिपत् ॥
सा भूर्गर्द्दभदेहैश्च तालैः पक्वैश्च पातितैः ।
वभासे छन्नजलदा द्यौरिवाव्यक्तशारदी ॥
तस्मिन् गर्द्दभदैत्ये तु सानुगे विनिपातिते ।
रम्यं तालवनं तद्धि भूयो रम्यतरं वभौ ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । ८१—८३ ।
"ततो गच्छेत राजेन्द्र ! धेनुकं लोकविश्रुतम् ।
एकरात्रोषितो राजन् ! प्रयच्छेत्तिलधेनुकाम् ॥
सर्व्वपापविशुद्धात्मा सोमलोकं व्रजेद्ध्रुवम् ।
तत्र चिह्नं महाराज ! अद्यापि हि न संशयः ।
कपिला सह वत्सा वै पर्व्वते विचरत्युत ॥
सवत्सायाः पदान्यस्या दृश्यन्तेऽद्यापि भारत ! ।
तेषूपस्पृश्य राजेन्द्र ! पदेषु नृपसत्तम ! ।
यत् किञ्चिदशुभं पाप तत् प्रणश्यति भारत ! ॥")
षोडशरतिबन्धान्तर्गतद्वादशबन्धः । यथा,—
"सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः ।
लघुलिङ्गं चालयेद्यो बन्धोऽयं धेनुकः स्मृतः ॥"
इति रतिमञ्जरी ॥
(अपरविधलक्षणं यथा,—
"न्यस्तहस्तयुगला निजे पदे
योषिदेति कटिरूढवल्लभा ।
अग्रतो यदि शनैरधोमुखी
धेनुकं वृषवदुन्नते प्रिये ! ॥")

धेनुकसूदनः, पुं, (धेनुकं गोवर्द्धनोत्तरपार्श्वस्थतालवनवासिनमसुरं निसूदयति बलरामद्वारेति । सूद + णिच् + ल्युः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (बलरामः । इति पुराणम् ॥)

धेनुका, स्त्री, (धेनुरिव प्रतिकृतिः । धेनु + कन् । टाप् ।) हस्तिनी । (धेनुरेव । स्वार्थे कन् ।) गौः । इति मेदिनी । के, १०६ ॥ (यथा, महाभारते । १ । ७६ । १८ ।
"इमा ते तरुणीं भार्य्यां त्वदाधिभिरभिप्लुताम् ।
कथं सन्धारयिष्यामि विवत्सामिव धेनुकाम् ॥")

धेनुदुग्धं, क्ली, (धेनोर्दुग्धमिव शुभ्रं फलमस्य ।) चिर्भिटः । इति राजनिर्घण्टः ॥ (धेनोर्दुग्धम् ।) गोक्षीरम् ॥

धेनुदुग्धकरः, पुं, (करोति वर्द्धयतीति । कृ + अच् । धेनोर्दुग्धन्तस्य करः । एतद्भक्षणेन धेनुदुग्धवर्द्धनादस्य तथात्वम् ।) गर्ज्जरः । इति राजनिर्घण्टः ॥

धेनुष्या, स्त्री, (धेनु + "सञ्ज्ञायां धेनुष्या ।" ४ । ४ । ८९ । इति सुगागमो यत्प्रत्ययश्च निपात्यते ।) बन्धके स्थिता गौः । इत्यमरः । २ । ९ । ७२ ॥ या बन्धकेन दत्ता अर्थं नीतवान् सा । गर्म्मिणी वा या दुग्धबन्धके स्थिता सा धेनुष्यति वृद्धा । इति भरतः ॥

धैनुकं, क्ली, (धेनूनां समूहः । "अचित्तहस्तिधेनोष्ठक् ।" ४ । २ । ४७ । इति ठक् ।) धेनुसमूहः । इत्यमरः । २ । ९ । ६० ॥ (स्त्रीणां करणभेदः । इति मेदिनी । के, १०६ ॥)

धैर्य्यं, क्ली, (धीरस्य भावः कर्म्म वा । धीर + ष्यञ् ।) धीरता । धीरस्य भाव इत्यर्थे ष्यञ्प्रत्ययः ॥ तस्य लक्षणं यथा,—
"स्थिरचित्तोन्नतिर्या तु तद्धैर्य्यमिति कीर्त्त्यते ॥"
इत्युज्ज्वलनीलमणिः ॥
(इदं नायकसत्त्वजगुणानामन्यतमः । यथा, साहित्यदर्पणे । ३ । ५८ ।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी ।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"
तल्लक्षणं यथा, तत्रैव । ३ । ६३ ।
"व्यवसायादचलनं धैर्य्यं विघ्ने महत्यपि ॥"
उदाहरणं यथा,—
"श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥")

धैवतः, पुं, (धीमतामयम् । धीमत् + अण् । पृषोदरादित्वात् मस्य वत्वम् ।) सप्तस्वरान्तर्गतषष्ठस्वरः । स तु नारदमते अश्वस्वरतुल्यः । (अश्वस्तु धैवतं रौतीति वचनात् ॥) तानसेनमते भेकस्वरतुल्यः । अस्योच्चारणस्थानं ललाटम् । व्याकरणमते दन्तः । अयं क्षत्रियवर्णः । अस्य जातिः षाडवः । अस्य तानम् ७२० प्रत्येकतानम् ४८ समुदायेन ३४,५६० भवन्ति । इति संगीतशास्त्रम् ॥
"गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्धगः पुनः ।
धावन्निव च यो याति कण्ठदेशं स धैवतः ॥"
अस्य श्रुतयस्तिस्रः । इति संगीतदामोदरः ॥
(यथा च सङ्गीतदर्पणे । १ । ५५ ।
"मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः ॥"
अस्य ऋषिकुले उद्भवः । क्षत्रियो जातिः । पीतो वर्णः । श्वेतद्वीपे जन्म । ऋषिस्तुम्बुरुः । गणेशो देवता । उष्णिक् छन्दः । वीभत्सभयानकरसयोरुपयोगित्वम् । इति सङ्गीतदर्पणम् ॥)

धोडः, पुं, (धोरति चातुर्य्येण गच्छतीति । धोर गतिचातुर्य्ये + अच् । रस्य डत्वम् ।) सर्पविशेषः । धोडा इति भाषा । तत्पर्य्यायः । राजिलः २ डुण्डुभः ३ डुण्डुभः ४ । इति शब्दरत्नावली ॥

धोर, ऋ गतिचातुर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं-सेट् ।) ऋ, अदुधोरत् । गतौ चातुर्य्यं गतिचातुर्य्यम् । धोरन्त्या धोरणाक्रान्ता विनीता यस्य वारणाः । इति दुर्गादासः ॥

धोरणं, क्ली, (धोरति गच्छत्यनेनेति । धोर + करणे ल्युट् ।) सर्व्ववाहनम् । हस्त्यश्वरथदोलादि । इत्यमरः । २ । ८ । ५८ ॥ (धोर + भावे ल्युट् ।) अश्वप्रथमगतिः । तत्पर्य्यायः । धौरितकम् २ धौर्य्यम् ३ धोरितम् ४ । इति हेमचन्द्रः । ४ । ३१२ ॥

धोरणिः, स्त्री, (धोरति क्रमशः प्राप्नोतीति । धोर + अनिः ।) परम्परा । इति जटाधरः ॥

धोरितं, क्ली, (धोर + क्तः ।) धोरणम् । अश्वप्रथमगतिः । इति हेमचन्द्रः । ४ । ३१२ ॥

धोरितकं, क्ली, (धोरितमश्वप्रथमगतिस्तेन कायतीति । कै + कः ।) धौरितकम् । इत्यमरटीकायां रमानाथः ॥

धौतं त्रि, (धाव्यते स्मेति । धाव + कर्म्मणि क्तः ।) मार्ज्जितम् । धोया इति भाषा । तत्पर्य्यायः । निर्णिक्तम् २ शोधितम् ३ मृष्टम् ४ क्षालितम् ५ । इति हेमचन्द्रः । ६ । ७३ ॥ * ॥
"ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च ।
अधौतं तद्विजानीयाद्दशा दक्षिणपश्चिमे ॥"
इति कर्म्मलोचनम् ॥

धौतं, क्ली, (धाव + क्तः ।) रूप्यम् । इति राजनिर्घण्टः ॥

धौतकटः, पुं, (धौतः कटः । नित्यकर्म्मधारयः ।) सूत्ररचितभाण्डम् । थोकडा इति ख्यातः । तत्पर्य्यायः । स्योनः २ स्यूतः ३ प्रसेवकः ४ । इति

जटाधरः ॥ स्थूनः ५ स्रोत. ६। इति भरत-धृतकोषान्तरम् ॥

धौतकोषजं, क्ली, (कोषाज्जायते इति। कोष+जन+डः। धौतं कोषजम्।) पत्रोर्णम्। इति शब्दरत्नावली ॥

धौतकौषे(शे)यं, क्ली, (धौत क्षालितं कौषेयम्।) पत्रोर्णम्। इत्यमरः। २। ६। ११३ ॥ कौषेय-मेव धौतं प्रक्षालित पत्रोर्णाख्यं वटलकुचादि-पत्रेषु क्रिमिभिरूर्णायाः कृतत्वात् पत्रसम्बन्धिनी ऊर्णा अत्रेति पत्रोर्णम्। इति भरतः ॥

धौतशिलं, क्ली, (धौतेव शिला यस्य।) स्फाटि-कम्। इति त्रिकाण्डशेषः ॥

धौमक, पु, (धूमे धूमप्रधानदेशे भव.। धूम+"धूमादिभ्यश्च।" ४। २। १२७। इति वुञ्।) देशविशेषः। इति केचित ॥

धौर, पु धवक्षः। इति भावप्रकाशः ॥

धौरितक, क्ली, (धोरितक+प्रज्ञादित्वादण्।) अश्वानां पञ्चविधगत्यन्तर्गतगतिविशेष.। इत्य-मरः। २। ८। ४८ ॥ तत्र सम्यक गतिरा-स्कन्दित नाम इति ख्यातं ततोऽधिका चतुरा गति। इति भरतः ॥

धौरेय., त्रि, (धुर वहतीति। "धुरो यड्ढकौ।" ४। ४। ७७। इति ढक्।) रथलाङ्गलादि-भारवोढा। इत्यमर.। २।६।६५ ॥ अनडुहि, पु। इति राजनिर्घण्टः ॥

धौर्त्तिक, त्रि, धूर्त्तस्येदम्। धूर्त्तस्य भावः। इति धूर्त्तशब्दात् ष्णिकप्रत्ययेन निष्पन्नम् ॥

धौर्य्य, क्ली, (धुर्य्यस्य कर्म्म। धुर्य्य+ष्यञ्।) अश्वस्य प्रथमगतिः। इति हेमचन्द्रः। ४। ३१२ ॥

ध्मा अग्निसंयुतौ। ध्वनौ। इति कविकल्पद्रुमः ॥ (भ्वां-पर-सक-अनिट्।) युतिरिति बाहुल्यात्र दीर्घः। अग्नियुतिरग्निसंयोग। ध्वनि शब्दोत-पत्तिहेतुभावः। धमति सुवर्णं वणिक् अग्नि-संयुक्तं करोतीत्यर्थः। धमति शङ्खं जन सशब्दं करोतीत्यर्थः। अग्निफुत्कृतौ च। मुखेनैव धमे दग्निम्। इति दुर्गादासः ॥

ध्माकार, पु, (ध्मा अग्निसंयोगस्तं करोतीति। कृ+अण्।) लोहकारकः। इति हलायुधः ॥

ध्मामा, [न्] पुं, (ध्मा+"नामन्सीमन्निति।" उणा ४। १५०। इति मनिन्प्रत्ययेन निपा-तनात् साधुः। उज्ज्वलदत्तस्तु ध्यायतेर्मनिन् इत्युक्ता ध्यामन् इति शब्दमिच्छति।) परि-माणम्। आलोकः। ध्यानम्। इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः ॥

ध्मात, त्रि, (ध्मै चिन्तने+क्तः।) चिन्तितम्। यथा, शान्तिशतके। ६। [तम् ॥"

"ध्यात वित्तमहर्निशं न च पुनर्विष्णोः पदं शाश्व-

ध्यान, क्ली, (ध्यै+भावे ल्युट्।) चिन्तनम्। (यथा, मनुः। १। १२।

"तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्।
स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा ॥")

धारणाविषये एकप्रत्ययसन्तति.। इति हेम-चन्द्रः। २। २३४ ॥ अद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरेन्द्रियवृत्तिप्रवाहः। इति वेदान्त-सारः ॥ * ॥ यथा, विष्णुपुराणे।

"तद्रूपप्रत्यये चैकसन्ततिश्चान्यनिस्पृहा।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप। ॥"

अस्यार्थः। "तद्रूपस्य धारणाविषयस्य वस्तुनः प्रत्यया यस्यां सन्ततौ सा एकाग्रचिन्ता सन्ततिः। अन्यनिस्पृहा विषयान्तरेणाव्यव-धीयमाना। विजातीयप्रत्ययान्तरित सजातीय प्रत्ययप्रवाहो ध्यानमित्यर्थः। तच्च प्रथमैर्यमा-दिभिर्धारणान्तै. षड्भिरङ्गैर्निष्पाद्यते।" इति तट्टीका ॥ * ॥

श्रीकृष्ण उवाच।

"सर्व्वे देवाः प्राकृतिका यावन्तो मूर्त्तिधारिणः।
अहमात्मा नित्यदेही भक्तध्यानानुरोधतः ॥"

इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥

ब्रह्मचिन्ता। यथा, गारुडे ४८ अध्याये।

"ब्रह्मात्मचिन्ता ध्यान स्यात् धारणा मनसो
धृति।
अहं ब्रह्मेत्यवस्थान समाधिर्ब्रह्मण स्थिति. ॥"

अपि च।

"प्राणायामैर्द्वादशभिर्यावत्कालो कृतो भवेत्।
यस्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत्।
तस्यैव ब्रह्मणा प्रोक्तं ध्यान द्वादश धारणा ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः।
तुष्टे तु स यतो युक्त समाधि सोऽभिधीयते ॥
ध्येयान्न चलते यस्य मनोऽभिध्यायतो भृशम्।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्मृता ॥
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनोनिश्चलतां याति ध्येय विचिन्तयन्।
यत्तद्ध्यान परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्याता तन्मयतां गत।
पश्यति द्वैतरहित समाधि सोऽभिधीयते ॥"

इति गारुडे २४० अध्यायः ॥

ध्यानयोग, पुं, (ध्यानमेव योग।) ध्यानरूप-योगः। यथा —

"विविक्तसेवी लघ्वाशी यतवाक्कायमानस।
ध्यानयोगपरो नित्य वैराग्य समुपाश्रितः ॥"

इति श्रीभगवद्गीताया १८ अध्याय ॥

ध्यामं, क्ली, (ध्यायते पशुभिरिति। ध्यै चिन्तने+बाहुलकात् मक्।) दमनकवृक्षः। गन्धतृणम्। (यथा, सुश्रुते। १। ३८।

"ध्यामकुङ्कुमकङ्कुष्ठसवर्णाः पित्तकोपतः ॥")

श्यामले, त्रि। इति मेदिनी। मे, १७ ॥

ध्यामकं, क्ली, (ध्याममिव प्रतिकृतिः। ध्याम+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) रोहिषतृणम्। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते। १। ३८।

"एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्प-प्रियङ्गुहरेणुका-व्याघ्रनख शुक्तिचण्डास्थौणेयक-श्रीवेष्टकचोचचोरकवालकगुग्गुलुसर्ज्जरसतु-रुष्ककुन्दुरुकागुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति ॥")

ध्यामा, [न्] पु, (ध्यै+"नामन्सीमन्निति।" उणा ४। १५०। इति मनिन्प्रत्ययेन निपा-तनात साधु।) परिणामः। चिन्तायाम्, क्ली। इत्युणादिकोषः ॥

ध्येय, त्रि, (ध्यायते इति। ध्यै+यत्।) ध्यातव्यः। ध्यानीयः। चिन्तनीयः। यथा,—

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः।"

इति श्रीनारायणध्यानम् ॥

ध्यै, चिन्तने। इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-अनिट्।) ध्यायति विष्णु वैष्णव। इति दुर्गादास ॥

ध्रज, गतौ। इति कविकल्पद्रुमः ॥ (भ्वां पर सक-सेट्।) ध्रजति। इति दुर्गादास ॥

ध्रज, इ गतौ। इति कविकल्पद्रुम ॥ (भ्वा-पर-सकं-सेट्। इदित्।) इ, ध्रञ्जते। इति दुर्गा-दासः ॥

ध्रण, ध्वाने। इति कविकल्पद्रुमः। (भ्वा-पर-अक-सेट्।) ध्रणति मृदङ्गः। इति दुर्गा-दासः ॥

ध्रस, क उत्क्षेपे। उञ्छे। इति कविकल्पद्रुम ॥ (चुरा-परं-सक-सेट्।) क, ध्रासयति। इति दुर्गादासः ॥

ध्रस, ग उ उञ्छे। इति कविकल्पद्रुम ॥ (क्र्यां-पर-सकं-सेट्। उदित्वात् क्त्वावेट्।) ग, ध्रस्नाति शस्य दीन। उ, ध्रसित्वा ध्रस्त्वा। इति दुर्गादासः ॥

ध्राघ, इ काङ्क्षे। घोररुते। इति कविकल्पद्रुमः ॥ (भ्वां-पर-अक-सेट्।) रेफयुक्तः। घोररुतमिह तिरश्चामेव घोरशब्द। इ, ध्राङ्क्षति पक्षी। नमध्यपाठेनैवेष्टसिद्धे अस्य इदनुबन्धो वैदेय-धारणभेदार्थ.। इति दुर्गादासः ॥

ध्राख, ऋ शोषार्थे। इति कविकल्पद्रुम ॥ (भ्वां-पर-अक सेट।) रेफयुक्त.। ऋ, अदध्राखत्। शोषार्थे शोषासमर्थयोः। इति दुर्गादासः ॥

ध्राघ, ङ ऋ शक्तौ। इति कविकल्पद्रुम ॥ (भ्वां-आत्म-अक-सेट्।) ङ, ध्राघते। ऋ अद-ध्राघत्। इति दुर्गादास. ॥

ध्राजि, स्त्री, (ध्राजयतीति। ध्रज गतौ+णिच्+इन्।) वातालिः। इत्युणादिकोषः ॥ घूरब वाताश इति भाषा ॥ (ध्राजि+भावे इन्। गतिः। यथा, ऋग्वेदे। १०। १३६। २।

"मुनयो वातरशनाः पिशङ्गा वसते मला।
वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥"

"वातस्य वायोर्ध्राजिं गतिमनुयन्ति अनु-गच्छन्ति ॥" इति तद्भाष्ये सायनः ॥)

ध्राड, ऋ ङ शीर्णौ। इति कविकल्पद्रुमः ॥ (भ्वां आत्मं-सक-सेट्।) रेफयुक्तः। ऋ, अदध्राडत्। ङ, ध्राडते। शीर्णिः विभेदः। इति दुर्गादासः ॥

ध्राडिः, पुं, (ध्राड्ते शीर्णो भवतीति । ध्राड्+ "सर्व्वधातुभ्य इन् ।" उणां ।४।११८। इति इन् ।) पुष्पचयः । इत्युणादिकोषः ॥

ध्रिज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ध्रेजति । इति दुर्गादासः ॥

ध्रु, ञि } स्थैर्य्ये । सर्पणे । इति कविकल्पद्रुमः ॥
ध्रु, शि } (भ्वां-तुदां च-स्थैर्य्ये अकं-सर्पणे सकं-परं-अनिट् ।) द्वौ रेफयुक्तौ । आद्यो दीर्घान्त इति कश्चित् । ञि, ध्रुतोऽस्ति । शि, ध्रुवति अध्रुवीत् । ध्रुवति शैलः । इति दुर्गादासः ॥

ध्रुव, स्त्री, (ध्रुवति स्थिरीभवतीति । ध्रु+"सुवः कः ।" उणां । २ । ६१ । इत्यत्र । "बाहुलकात् ध्रु स्थैर्य्ये अतोऽपि कः ।" इत्युज्ज्वलदत्तोक्त्या कः ।) निश्चितम् । (यथा, शाकुन्तले १ अङ्के ।
"ध्रुव स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
तर्कः । इति मेदिनी । वे, १३ ॥ आकाशम् । इति हेमचन्द्रः ॥

ध्रुवं, त्रि, (ध्रु गतिस्थैर्य्ये+बाहुलकात् कः ।) सन्ततम् । शाश्वतम् । इति मेदिनी । वे, १३ ॥ स्थिरम् । निश्चितम् । इति हेमचन्द्रः ।६।७८ ॥ (यथा, चाणक्यशतके । ६३ ।
"यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥")

ध्रुवः, पुं, (ध्रुवति स्थिरीभवतीति । ध्रु+बाहुलकात् कः ।) शङ्कुः । हरः । (यथा, महाभारते । १३ । १७ । १०३ ।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")
विष्णुः । (यथा, महाभारते । १३ ।१४९।१९ ।
"विश्वकर्म्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥")
वटः । उत्तानपादजः । (अस्य विवरणन्तु पश्चात् द्रष्टव्यम् ॥) वसुभेदः । (यथा, मात्स्ये । ५ । २१ ।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")
योगभेदः । इति मेदिनी । वे, १३ ॥ (यथा, ज्योतिषे ।
"गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥")
स्थाणुः । इत्यमरः । २ । ४ । ८ ॥ शरारि-पक्षी । इति त्रिकाण्डशेषः ॥ ध्रुवकः । इति सङ्गीतदामोदरः ॥*॥ (रोहिणीगर्भे वसुदेवा-ज्जातः पुत्त्रविशेषः । यथा, भागवते ।९।२४।४६।
"बलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥"
पाञ्चपञ्चीयः कश्चित् क्षत्त्रियवीरः । इति महाभारते । ७ । १५६ । ३७ ॥ नहुषस्य पुत्त्र-विशेषः । यथा, महाभारते । १ । ७५ । ३० ।
"यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट् सुतान् प्रियवाससि ॥"
पुरुवंशीयरन्तिनावस्य पुत्त्रविशेषः । यथा, भागवते । ९ । २० । ६ ।
"ऋतेयो रन्तिनावोऽभूत् त्रयस्तस्यात्मजा नृप । ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥"
रोमावर्त्तविशेषः । यथा, शब्दार्थचिन्तामणौ ।
"आवर्त्तसाम्याद्‌वावर्त्तो रोमसंस्थानमङ्गिनाम् ॥"
ते च दशधा यथा,—
"द्वावुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोप-
रन्ध्रयोः ।
एको भाले ह्यपाने च दशावर्त्ता ध्रुवाः
स्मृताः ॥"
यज्ञीयग्रहपात्रविशेषः । यथा, कात्यायनश्रौत-सूत्रे । ९ । ५ । १७ ।
"यजमानस्ततो ग्रहग्रहणमा ध्रुवात् ॥")
नासाग्रम् । तत्तु आसन्नमृत्युर्न पश्यति । यथा,
"अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च ।
आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम् ॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते ।
विष्णोः पदानि भ्रूमध्यं नेत्रयोर्म्मातृमण्डलम् ॥"
इति काशीखण्डे । १२ । १३—१४ ॥

ध्रुवलोकोत्पत्तिर्यथा,—
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्त्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
अभीष्टायामभूद्‌ब्रह्मन् । पितुरत्यन्तवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज । ।
स नातिप्रीतिमांस्तस्यां तस्याश्चाभूद्‌ध्रुवः सुतः ॥
राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम् ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पुत्त्रं पितुस्तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥
एतद्राजासनं सर्व्वभूभृत्संश्रयकेतनम् ।
योग्यं ममैव पुत्त्रस्य किमात्मा क्लिश्यते त्वया ॥
उत्सृज्य पितरं बालस्तत् श्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज । मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्त्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयेदमभाषत ॥
वत्स । कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥
इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्व्विता ॥
सुनीतिरुवाच ।
सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्त्रक । ।
न हि पुण्यवतां वत्स । सपत्नैरेवमुच्यते ॥
यदि चेद्‌ दुःखमत्यर्थं सुरुच्या वचनात्तव ।
तत् पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे ॥
पराशर उवाच ।
निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निर्गम्य ततस्तद्बाह्योपवनं ययौ ॥
स ददर्श मुनींस्तत्र सप्त पूर्व्वागतान् ध्रुवः ।
निर्जगाम वनात्तस्मात् प्रणिपत्य स तानृषीन् ॥
मधुसंज्ञं महापुण्यं जगाम यमुनातटम् ।
यत्रैव देवदेवस्य सान्निध्यं हरिमेधसः ॥
सर्व्वपापहरे तस्मिन् तपस्तीर्थे चकार सः ।
पदाङ्गुष्ठेन संपीड्य यदा च वसुधां स्थितः ।
तदा समस्तवसुधा चचाल सह पर्व्वतैः ॥
भगवानपि सर्व्वात्मा तन्मयत्वेन तोषितः ।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥
औत्तानपादे भद्रन्ते तपसा परितोषितः ।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत । ॥
ध्रुव उवाच ।
भगवन् सर्व्वभूतेश । सर्व्वस्यास्ते भवान् हृदि ।
किमज्ञातं तव स्वामिन् । मनसा यन्मयेप्सितम् ॥
नैतद्राजासनं योग्यमजातस्य ममोदरात् ।
इति गर्व्वादवोचन्मां सपत्नी मातुरुच्चकैः ॥
आधारभूतं जगतः सर्व्वेषामुत्तमोत्तमम् ।
प्रार्थयामि प्रभो । स्थानं त्वत्प्रसादादतोऽव्ययम् ॥
श्रीभगवानुवाच ।
त्रैलोक्यादधिके स्थाने सर्व्वताराग्रहाश्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद्भवान् ध्रुव । ॥
सूर्य्यात् सोमात् तथा भौमात् सोमपुत्त्राद्‌बृह-
स्पतेः ।
सितार्कतनयादीनां सर्व्वर्क्षाणां तथा ध्रुवम् ॥
सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः ।
सर्व्वेषामुपरि स्थानं तव दत्तं मया ध्रुव । ॥"
इति विष्णुपुराणे १ अंशे ११ अध्यायः ॥*॥

ध्रुवयोगजातफलं यथा,—
"नरीनर्त्ति वाणी सदा वक्त्रपद्मे
चरीकर्त्ति कार्य्यं भरीभर्त्ति बन्धून् ।
ध्रुवाख्ये प्रसूतिर्ध्रुवा तस्य कीर्त्ति-
र्दिगन्ते नितान्तं भवेच्चारुमूर्त्तिः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

ध्रुवगणो यथा । उत्तरफल्गुनी १ उत्तराषाढा २ उत्तरभाद्रपद् ३ रोहिणी ४ । इति ज्योतिषम् ॥ * ॥ ताराविशेषः । यथा,—
"मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते ।
निरक्षदेशसंस्थानामुभये क्षितिजाश्रिते ॥
भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः ।
पर्य्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥"
इति सूर्य्यसिद्धान्ते १२ अध्यायः ॥

ध्रुवकः, पुं, (ध्रुव+स्वार्थे कन् ।) स्थाणुः । इति हेमचन्द्रः । ४ । १८८ ॥ गीताङ्गविशेषः । ध्रुपद इति भाषा । तस्य लक्षणं यथा,—
"उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चमः स्मृतः ।
कनिष्ठश्च चतुर्भिः स्याद्‌ध्रुवकोऽयं मयोदितः ॥
उक्तं द्विखण्डमुद्ग्राहे द्विखण्डं ध्रुवके मतम् ।
ततो द्विखण्डमाभोगे तालमानरसैः सह ॥
आभोगे कविनाम स्यात्तथा नायकनाम च ।
उद्‌ग्राहं प्रथमं गीत्वा ध्रुवं गायेत्ततः परम् ॥
ततोऽन्तरा ध्रुवस्तस्मादाभोगध्रुवकौ ततः ।
उद्‌ग्राहः प्रथमः पादः कथितः पूर्व्वसूरिभिः ॥
गीत्वा पूर्व्वपदं न्यासो यत्र स ध्रुवको मतः ।
यत्रैव कविनाम स्यात् स आभोग इतीरितः ॥
ध्रुवकादिषु सर्व्वेषु भवेदेवंविधः क्रमः ॥"
स तु षोड़शविधः । यथा,—)
"जयन्तः शेखरोत्साहौ मधुरो निर्म्मलस्तथा ।

असाध्यं सहजं क्लैब्यं मर्म्मच्छेदोद्भवञ्च यत् ।
असाध्यानां विशिष्टानां कार्य्यो वाजिकरो विधिः ॥
तस्य चिकित्सा यथा, वैद्यके ।
"सुवर्णासुवत्सासुभाधेनुधन्या-
च्छृत योगयोगे प्रशस्तं सप्रस्थम् ।
न्दही वा दशाही भवेत् पाकशूर-
स्तदा तेजपत्रं हरिद्रासुपिष्टम् ॥
विधौ शुद्धिहेतौ ससुस्त सुपिष्ट
विधेयं सुगन्धाय वृद्धोपदेशात् ।
समूलाम्बगन्धासप्रस्थं विचूर्ण्य
शुभ वारि दत्त्वा शुभं वेदयुक्तम् ॥
यदा शेषभूतं तदा योगयोगे
पचेत् पाकविज्ञो भृशं दर्व्विचालात् ।
पचेन्नाविदुग्ध घृतस्यापि तुल्य
विदारी सप्रस्था तथा तेन वैद्यः ॥
तथा शाल्मलीतोयदत्तं सप्रस्थ
वितार्य्याथतिष्ठेद्दृष्टतं योगराज ॥"

ध्वजवान्, [त्] त्रि, (ध्वजोऽस्यास्तीति । ध्वज+मतुप् । मस्य वः ।) केतनयुक्तः । ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपालमादाय तीर्थान्यनुसञ्चरेत् । यथा,—
'शिरःकपाली ध्वजवान् भिक्षाशी कर्म्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥
ध्वजवान् कृत्वा शवशिरोध्वजमिति मनुस्मरणात् अन्यच्छिरःकपालन्दण्डाग्रसमारोपितध्वजशब्दवाच्य गृह्णीयात् ॥" इति मिताक्षरा ॥
(ध्वजः शौण्डिकविपणिपताका विद्यतेऽस्येति । शौण्डिकः । यथा, मनुः । ४ । ८४ ।
"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥")

ध्वजिनी, स्त्री, (ध्वजोऽस्त्यस्याः । ध्वज+इनिः । ङीप् ।) सेना । इत्यमरः । २ । ८ । ७८ ॥ (यथा रघुः । ७ । ४० ।
"मत्स्यध्वजा वायुवशाद्विदीर्णै-
र्मुखैः प्रवृद्धध्वजिनीरजांसि ।
बभुः पिबन्तः परमार्थमत्स्याः
पर्य्याविलानीव नवोदकानि ॥")

ध्वजी, [न्] पुं, (ध्वजोऽस्त्यस्येति । ध्वज+"अत इनिठनौ ।" ५।२।११५।। इति इनिः ।) ब्राह्मणः । पर्व्वतः । रथः । सर्पः । घोटकः । इति मेदिनी । ने ७७ ॥ मयूरः । इति राजनिर्घण्टः ॥ शौण्डिकः । इति हेमचन्द्रः ॥ (यथा, याज्ञवल्क्ये ।१।१४१ ।
"प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ॥"
ध्वजविशिष्टे, त्रि । यथा, महाभारते । १ । २२६ । २८ ।
"कृतास्त्रौ शस्त्रसम्पन्नौ रथिनौ ध्वजिनावपि ॥"
चिह्नयुक्ते च । यथा, मनुः । ११ । ९३ ।
"सुरापानापनुत्यर्थं बालवासा जटी ध्वजी ॥")

ध्वजोत्थानं, क्ली, (ध्वजस्य इन्द्रध्वजस्य उत्थानम् ।) शक्रोत्सवः । इति त्रिकाण्डशेषः ॥ एतत्तु भाद्रशुक्लद्वादश्यां भवति । इति स्मृतिः ॥

ध्वण, ध्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-पर-अकं-सेट् ।) वकारयुक्तः । ध्वणति मृदङ्गः । इति दुर्गादासः ॥

ध्वन, त् क शब्दे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां पर-अकं-सेट् ।) दन्त्योपधः । भागवतादीनां प्रयोगादन्यत्र शब्दे ध्वनाचित्यादि यत्र श्रूयते प्रायेण तत्राव्यक्तशब्दे इति बोध्यम् । ध्वनयति मृदङ्गः । इति दुर्गादासः ॥

ध्वन, मि रवे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-अकं-सेट् ।) वकारयुक्तः । मि, ध्वनयति ध्वानयति मृदङ्गः । इति दुर्गादासः ॥

ध्वनः, पुं, (ध्वन ध्वाने+भावे बाहुलकात् अप् ।) शब्दः । इति भरतद्विरूपकोषः ॥

ध्वनमोदी, [न्] पुं, (ध्वनेन शब्देन मोदयतीति । मुद+णिनि ।) भ्रमरः । इति शब्दरत्नावली ॥

ध्वनिः, पुं, (ध्वननमिति । ध्वन+"खनिकष्यज्यसिवसि ।" उणां ४ । १३९ । इति इः ।) शब्दः । इत्यमरः । १ । ७ । २२ ॥ मृदङ्गादिशब्दः । यथा,—
"शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवध्वनिः ।
कण्ठसंयोगजन्मानो वर्णास्ते कादयो मताः ॥"
इति भाषापरिच्छेदः ॥
(ध्वन्यतेऽस्मिन्निति । ध्वन+अधिकरणे इः ।) उत्तमकाव्यम् । यथा,—
"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥"
इति काव्यप्रकाशः ॥
(यथाच साहित्यदर्पणे । ४ । २—३ ।
"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ।
वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तम काव्यम् ॥
भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ॥
तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः । लक्षणामूलत्वादेवात्र वाच्यमविवक्षित बाधितस्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अतएवात्र वाच्यं विवक्षितम् । अन्यपरं व्यङ्ग्यनिष्ठम् । अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य । अभिधामूलस्य बहुविषयतया पश्चान्निर्द्देशः ॥" अस्य बहवो भेदाः सन्ति । ते तु तत्रैव चतुर्थपरिच्छेदे विस्तरशो द्रष्टव्याः ॥)

ध्वनिग्रहः, पुं, (ग्रह+भावे अप् । ध्वनेः शब्दस्य ग्रहो ग्रहणं यस्मात् ।) श्रोत्रम् । इति त्रिकाण्डशेषः ॥ शब्दज्ञानञ्च ॥

ध्वनितः, त्रि, (ध्वन्यते स्मेति । ध्वन+क्तः ।) शब्दितः । कृतस्वनमृदङ्गादिः । इति भरतः ॥ तत्पर्य्यायः । स्वनितः २ । इत्यमरः । ३ । १ । ९४ ॥ (यथा, राजतरङ्गिण्याम् । २ । ७९ ।
"समीरणसमाकीर्णसुरन्ध्रध्यायनिर्गतैः ।
ध्वनितैरनुशोचन्तमिवावस्थां तथाविधाम् ॥")
ध्वनिकाव्ययुक्तवाक्यादिश्च ॥

ध्वनिनाला, स्त्री, (ध्वन्युत्पादकं नालं यस्याः ।) वीणा । वेणुः । काहलः । इति मेदिनी । ले, १५५ ॥

ध्वनिविकारः, पुं, (ध्वनेर्विकारः ।) काकुः । शोकभयादिना शब्दविकृतिः । इति हेमचन्द्रः । ६ । ४६ ॥

ध्वन्स, उ ऌ ङ गतौ । भ्रंशे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-गतौ सक-भ्रंशे अक-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, ध्वंसित्वा ध्वस्त्वा । ऌ, अध्वसत् । ङ, ध्वंसते । भ्रंशः अधःपतनम् । इति दुर्गादासः ॥

ध्वस्तं, त्रि, (ध्वस्यते स्मेति । ध्वन्स भ्रंशे+क्तः ।) च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥ (यथा, भागवते । ७ । २ । ३० ।
"प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ॥")
नष्टम् । (यथा, पञ्चदश्याम् । ७ । १४१ ।
"क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति ।
मिष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति ॥")

ध्वा(ध्मा)च, इ काङ्क्षे । घोररुते । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-अकं-च सेट् ।) घोररुतमिह तिरश्चामेव घोरशब्दः । इ, ध्वा(ध्मा)ङ्क्षति काकः । नमध्यपाठेनैव सिद्धे अस्येदनुबन्धो वेदे मूर्द्धारणभेदार्थः । इति दुर्गादासः ॥

ध्वा(ध्मा)ङ्क्षः, पुं, (ध्वा(ध्मा)ङ्क्षति उच्चैः रौतीति । ध्वा(ध्मा)क्षि घोररुते+अच् ।) काकः । (यथा, मृच्छकटिके ९ अङ्के ।
"शुष्कवृक्षस्थितो ध्वा(ध्मा)ङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥")
मत्स्यभक्षकपक्षी । इत्यमरः । ३ । ३ । २१८ ॥ तक्षकः । भिक्षुकः । इति मेदिनी । क्षे, १६ ॥

ध्वाङ्क्षजङ्घा, स्त्री, (ध्वाङ्क्षस्य जङ्घेव आकृतिर्यस्याः ।) काकजङ्घा । इति राजनिर्घण्टः ॥

ध्वाङ्क्षजम्बूः, स्त्री, (ध्वाङ्क्षः काकस्तद्वत् कृष्णवर्णा जम्बूः । यद्वा, ध्वाङ्क्षप्रिया जम्बूः ।) काकजम्बूः । इति राजनिर्घण्टः ॥

ध्वाङ्क्षतुण्डी, स्त्री, (ध्वाङ्क्षस्य तुण्डमिवाकृतिः फलेऽस्त्यस्याः । ध्वाङ्क्षतुण्ड+अच् । ततो ङीष् ।) काकनासालता । इति राजनिर्घण्टः ॥

ध्वाङ्क्षदन्ती, स्त्री, (ध्वाङ्क्षस्य दन्त इवाकृतिरस्त्यस्याः । अच् । ङीष् ।) काकतुण्डी । इति राजनिर्घण्टः ॥

ध्वाङ्क्षनखी, स्त्री, (ध्वाङ्क्षस्य नखमिवाकृतिरस्त्यस्याः । अच् । ङीष् ।) काकतुण्डी । इति राजनिर्घण्टः ॥

ध्वाङ्क्षनाम्नी, स्त्री, (ध्वाङ्क्षस्य नाम नाम यस्याः ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

ध्वाङ्क्षनाशिनी, स्त्री, (ध्वाङ्क्षं नाशयतीति । नश+णिनि । ङीप् ।) हपुषा । इति भावप्रकाशः ॥

ध्वाङ्क्षनासा, स्त्री, (ध्वाङ्क्षस्य नासा इव फलमस्याः ।) काकनासालता । इति राजनिर्घण्टः ॥

ध्वाङ्क्षनासिका, स्त्री, (ध्वाङ्क्षस्य नासिका इव फलमस्याः ।) काकनासालता । इति राजनिर्घण्टः ॥

ध्वाङ्क्षपुष्टः, पुं, (ध्वाङ्क्षेण काकेन पुष्टः प्रतिपालितः ।) कोकिलः । इति हारावली । ४४ ॥

ध्वाङ्क्षमाची, स्त्री, (ध्वाङ्क्षान् काकान् मचति पूजयति फलदानेनेति । मच पूजायाम् + अण् । गौरादित्वात् ङीष् ।) काकमाची । इति राजनिर्घण्टः ॥

ध्वाङ्क्षवल्ली, स्त्री, (ध्वाङ्क्षवत् वल्ली लता ।) काकनासा । इति राजनिर्घण्टः ॥

ध्वाङ्क्षादनी, स्त्री, (अद्यते भक्ष्यते या सा । अद + ल्युट् । स्त्रियां ङीप् । ध्वाङ्क्षाणां काकानामदनी ।) काकतुण्डी । इति राजनिर्घण्टः ॥

ध्वाङ्क्षारातिः, पुं, (ध्वाङ्क्षाणामरातिः शत्रुः ।) पेचकः । इति हलायुधः ॥

ध्वाङ्क्षी, स्त्री, (ध्वाङ्क्षवदाकृतिरस्त्यस्याः । अच् । ङीष् ।) काकोलिका । इति मेदिनी । षे, १६ ॥

ध्वाङ्क्षोली, स्त्री, काकोली । इति राजनिर्घण्टः ॥

ध्वानः, पुं, (ध्वन + भावे घञ् ।) शब्दः । इत्यमरः । १ । ७ । २२ ॥ (यथा, राजतरङ्गिण्याम् । ३ । १८ ।
"श्मशानाक्रन्दितध्वानो न च चौरो यमाययत ॥")

ध्वान्तं, क्ली, (ध्वन + "क्षुब्धस्वान्तध्वान्तेति ।" ७ । २ । १८ । इति क्तप्रत्ययेन निपातनात् साधुः ।) अन्धकारः । इत्यमरः । १ । ८ । ३ ॥ (यथा, भागवते । ३ । ८ । २४ ।
"प्रयातपत्रायुतसङ्कुलं रत्न-
द्युभिर्हतध्वान्तयुगान्ततोये ॥")

ध्वान्तचित्तः, पुं, (ध्वान्ते अन्धकारे चित्तः प्रथितः ।) खद्योतः । इति शब्दरत्नावली ॥

ध्वान्तशात्रवः, पुं, (ध्वान्तस्य शात्रवः ।) श्योणाकवृक्षः । इति शब्दचन्द्रिका ॥ सूर्य्यचन्द्राग्नयश्च ॥

ध्वान्तारातिः, पुं, (ध्वान्तस्य अरातिः ।) सूर्य्यः । इति हेमचन्द्रः । २ । १० ॥ चन्द्राग्नी च ॥

ध्वान्तोन्मेषः, पुं, (ध्वान्ते उन्मेषः प्रकाशो यस्य ।) खद्योतः । इति त्रिकाण्डशेषः ॥

ध्वृ, कौटिल्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) ऋकारोपधः । कौटिल्यमिह कुटिलीकरणम् । ध्वरति तृणं वायुः । इति दुर्गादासः ॥

न

न, नकारः । तवर्गपञ्चमवर्णः व्यञ्जनविंशवर्णश्च । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १७ । "दन्त्या लृतुलसाः स्मृताः ॥") तत्पर्य्यायः । मेषः २ दीर्घो ३ सौरिः ४ । इति बीजाभिधानम् ॥ तत्स्वरूपम् । यथा,—
"नकारं शृणु चार्व्वङ्गि ! कोटिविद्युल्लताकृतिम् ।
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली ॥
पञ्चप्राणात्मकं वर्णं हृदि भावय पार्व्वति ! ॥"
इति कामधेनुतन्त्रम् ॥
"वामतः कुण्डली रेखा ऊर्द्ध्वाधःक्रमतः स्थिता ।
चन्द्रसूर्य्याग्निरूपा सा मात्रा वाणी प्रकीर्त्तिता ॥"
तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे ।
"ध्यानमस्य नकारस्य वक्ष्यते शृणु भाविनि ! ।
दलिताञ्जनवर्णाभां ललज्जिह्वां सुलोचनाम् ॥
चतुर्भुजां कोटराक्षीं चारुचन्दनचर्चिताम् ।
कृष्णाम्बरपरीधानामीषद्धास्यमुखीं सदा ॥
एवं ध्यात्वा नकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
अस्य नामानि यथा,—
"नो गर्ज्जिनी क्षमा सौरिर्व्वारुणी विश्वपावनी ।
मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः ॥
ऊर्द्ध्वगामी द्विरण्डश्च वामपादाङ्गुलेर्मुखम् ।
वैनतेयस्तुतिर्व्वर्त्मस्तरणिर्व्वाणिरागमः ॥
वामनो ज्वालिनी दीर्घो निरीहः सुगतिर्व्वियत् ।
शब्दात्मा दीर्घघोणा च हस्तिनापुरभेषकौ ॥
गिरिनायकनीलौ च शिवोऽनादिर्म्मेषामतिः ॥"
इति नानातन्त्रशास्त्रम् ॥
(अनुबन्धविशेषः । यथा, कविकल्पद्रुमे ।
"नः स्वादिः षो सुषादिः ।" इति ॥ काथादौ अस्य प्रथमप्रयोगे फलं यथा, वृत्तरत्नाकरटीकायाम् ।
"दो धः सौख्यं मुदं नः सुखभयमरणक्लेशदुःखं पवर्गः ॥")

न, व्य, निषेधः । (यथा, मनुः । ६ । ४७ ।
"अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥")
उपमा । इति मेदिनी । ने, १ ॥ आद्यस्य पर्य्यायः । नहि २ अ ३ नो ४ अभावः ५ । इत्यमरः । ३ । ४ । ११ ॥ अना ६ ना ७ । इति भरतः ॥ नञर्थश्च ॥

नंशुकः, त्रि, (नश्यतीति । नश + "पचिनशोर्णुकन्कनुमौ च ।" उणां २ । ३० । इति णुकन् नुमागमश्च ।) नाशकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

नंष्टा, [ऋ] त्रि, (नश + तृच् । "मस्जिनशोर्झलि ।" ७ । १ । ६० । इति नुम् ।) नाशाश्रयः । इति नशधातोस्तृणि नुमागमनिष्पन्नः ॥

नः, पुं, (नमतीति । नम + अन्येष्वपीति डः ।) सुगतः । बन्धः । द्विरण्डः । स्तुतः । इति मेदिनी । ने, १ ॥ रत्नम् । इत्येकाक्षरकोषः ॥ द्वितीयाचतुर्थीषष्ठीबहुवचनान्तस्यास्मच्छब्दस्य सान्तरूपोऽयञ्च ॥ (यथा, मुग्धबोधे ।
"पुष्णातु मो नोऽपि हरिर्धनं वो
ददातु नो हन्त्वशुभानि वो नः ॥")

नःक्षुद्रः, त्रि, (नसा नासिकया क्षुद्रः ।) क्षुद्रनासिकः । इति हेमचन्द्रः । ३ । ११५ ॥

नकुटं, क्ली, नासिका । इति शब्दमाला ॥

नकुलः, पुं, (नास्ति कुलं यस्य । "नभ्राण्नपादिति ।" ६ । ३ । ७५ । इति नञो न लोपादि ।) जन्तुविशेषः । नेउल । इति वेजी इति च भाषा । तत्पर्य्यायः । पिङ्गलः २ सर्पहा ३ बभ्रुः ४ । इति हेमचन्द्रः । ४ । ३६८ ॥ सूचीवदनः ५ सर्पारिः ६ लोहितानन: ७ । (यथा, महाभारते । १२ । १५ । २० ।
"सत्त्वैः सत्त्वा हि जीवन्ति दुर्ब्बलैर्ब्बलवत्तराः ।
नकुलो मूषिकानत्ति बिडालो नकुलन्तथा ।
बिडालमत्ति श्वा राजन् ! श्वानं व्यालमृगस्तथा ॥")
तस्य मांसगुणाः । पिच्छिलत्वम् । वातनाशित्वम् । श्लेष्मपित्तकारित्वञ्च । इति राजनिर्घण्टः ॥ पाण्डुराजस्य चतुर्थपुत्त्रः स माद्रीगर्भे अश्विनीकुमाराभ्यां जातः । इति महाभारतम् ॥ पुत्त्रः । इति शब्दमाला ॥ शिवः । यथा, विदग्धमुखमण्डने ।
"युधिष्ठिरस्य या कन्या नकुलेन विवाहिता ।
पूजिता सहदेवेन सा कन्या वरदा भवेत् ॥"
कुलरहिते, त्रि ॥

नकुलाढ्या, स्त्री, (नकुलेन नकुलगन्धेन आढ्या प्रचुरा ।) गन्धनाकुली । इति राजनिर्घण्टः ॥

नकुली, स्त्री, (नकुल + ङीष् ।) कुक्कुटी । मांसी । इति मेदिनी । ले, १०० ॥ शङ्खिनी । इति धरणिः ॥ कुङ्कुमम् । इति हेमचन्द्रः ॥ हकारः । इति बीजाभिधानम् ॥ नकुलस्य भार्य्या च ॥

नकुलीशः, पुं, (नकुल्या ईशः ।) भैरवविशेषः । यथा, पीठमालायाम् ।
"नकुलीशः कालिपीठे दक्षपादाङ्गुली मम ॥"
हकारः । यथा,—
"हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः प्रिये ! ।
महेशो नकुली चैव वराहो गगनं रविः ॥
लिङ्गः शून्यो महाशून्यः प्राणश्च परमेश्वरि ! ॥"
इति हकारपर्य्याये बीजाभिधानम् ॥

नकुलेष्टा, स्त्री, (नकुलानामिष्टा प्रिया ।) रास्ना । इत्यमरः । २ । ४ । ११५ ॥ मेदनाहे इति भाषा । एतत्पर्य्यायो यथा,—
"नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नक्क, क नाशने । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कोपधः । नाशनं नष्टीकरणम् । क, नक्कयति पापं गङ्गा । इति दुर्गादासः ॥

नक्त, [म्] व्य, रजनी । इत्यमरः । ३ । ४ । ६ ॥ (यथा, माघे । १ । २१ ।
"रथाङ्गपाणेः पटलेन रोचिषा-
मृषित्विषः संवलिता विरेजिरे ।
चलत्पलाशान्तरगोचरास्तरो-
स्तुषारमूर्त्तेरिव नक्तमंशवः ॥")

नक्तं, क्ली, (नज + क्तः ।) रात्रिः । लक्षणया नक्तव्रतम् । यथा,—
"उपवासात् परं भैक्ष्यं भैक्ष्यात् परमयाचितम् ।

अयाचितात् परं नक्तं तस्माद्भक्तेन वर्त्तयेत् ॥
देवैस्तु भुक्तं पूर्व्वाह्णे मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे पितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः ॥
सर्व्ववेलामतिक्रम्य नक्ते भुक्तमभोजनम् ।
वामाचारी महादेवो नक्तेनैवोद्धरेन्नृणाम् ॥"
इति देवीपुराणम् ॥

व्रतविशेषः । यथा,—
"दशम्याञ्चैकभक्तन्तु शुद्धचित्तो दृढ़व्रतः ।
नक्तं वापि तथा कृत्वा दशम्यां नियतः सदा ॥
क्रियते चासमर्थेन नक्तमेकादशीदिने ।
नक्ते चापि विधिः प्रोक्तः फलाहारे तथैव च ॥
दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ।
नक्तं तच्च विजानीयात् न नक्तं निशि भोजनम् ॥
नक्षत्रदर्शनान्नक्तं गृहस्थेन विधीयते ।
यतेर्दिनाष्टमे भागे रात्रौ तस्य निषेधनम् ॥"
इति मात्स्ये एकादशीमाहात्म्यम् ॥ * ॥

अथ नक्तव्रतम् ।
"तथा च स्कन्दपुराणे ।
'प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः ।
उदयास्तु सदा पूज्या हरेर्नक्तव्रते तिथिः ॥'
नियमश्च सामान्यव्रतधर्मत्वेनोक्तः ।
'ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्ज्जनम् ॥'
इत्यादिर्ग्राह्यः ॥
नक्तलक्षणञ्च भविष्यदेवीपुराणयोः ।
'हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्यां नक्तभोजी सदाचरेत् ॥'
एवं नक्तव्रतस्य गुरुत्वेन प्रागुक्तवायुपुराण-वचने नक्तमिति हविष्यान्नादिभोजनस्य काल-परं न तु नक्तव्रतपरं तथात्वे उत्तरोत्तरगुरु-व्रतोपदेशप्रस्तावे तदनन्तरं केवलं हविष्यान्नोप-देशानुपपत्तेः । स्मृतिः ।
'नक्तं निशायां कुर्व्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्य्यात्तत् सदिवाकरम् ॥
सदिवाकरन्तु तत् प्रोक्तमन्तिमे घटिकाद्वये ।
निशानक्तन्तु विज्ञेयं यामार्द्धे प्रथमे सदा ॥'
मार्कण्डेयः ।
'एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन नैवाद्वादशिको भवेत् ॥'
अत्र विष्णुपूजापारणयोरङ्गान्तरापेक्षया प्राधा-न्यमवगम्यते । आनुकल्पिकेऽपि आवश्यक-त्वात् ।" इत्येकादशीतत्त्वम् ॥ * ॥ सौरनक्तकालो यथा,—
"कुशमूलं यवमात्रं स्वच्छायाद्विगुणे चणे ।
भक्ष्यं मितौदनं नक्तं शुद्धोपवसनं तथा ॥"
इति विधानसप्तमीप्रकरणे तिथ्यादितत्त्वम् ॥
(महादेवः । यथा, महाभारते ।१३।१७।८३।
"नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥"
पुं, पृथोः पुत्त्रः । यथा, ब्रह्माण्डे । ३६ ।
"पृथोश्चापि सुतौ नक्तौ नक्तस्यापि गयः स्मृतः ॥")

नक्तकः, पुं, (नक्तमिव कायति मलिनतयेति । कै+कः । यद्वा, नज+क्तः । ततः स्वार्थे कन् ।) कर्पटः । इत्यमरटीकायां भरतः ॥ न्याकड़ा इति भाषा ॥

नक्तचारी, [न्] पुं, (नक्ते रात्रौ चरतीति । चर+णिनिः ।) बिड़ालः । पेचकः । इति त्रिकाण्डशेषः ॥ राक्षसः ॥ रात्रिचरमात्रे, त्रि ॥

नक्तञ्चरः, पुं, (नक्तं चरतीति । चर+"चरेष्टः ।" ३ । २ । १६ । इति टः ।) राक्षसः । इति हलायुधः ॥ गुग्गुलुः । इति जटाधरः ॥ चौरः । पेचकः । (रात्रिचरमात्रे, त्रि । यथा, मार्क-ण्डेयपुराणे । २९ । २० ।
"नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत् ॥")

नक्तमालः, पुं, (नक्तं रात्रौ आ सम्यक्प्रकारेण अलति पर्य्याप्नोतीति । आ+अल+अच् ।) करञ्जभेदः । इत्यमरः । २ । ४ । ४७ ॥ (यथा, रघुः । ५ । ४२ ।
"स नर्म्मदारोधसि सीकरार्द्रै-
र्मरुद्भिरानर्त्तितनक्तमाले ॥")

नक्तमुखा, स्त्री, (नक्तं नक्षत्रवाञ्छं मुखं आदि-भागो यस्याः ।) रात्रिः । इति हलायुधः ॥

नक्तव्रतं, क्ली, (नक्ते रात्रौ भोजनरूपं यद्व्रतम् ।) दिवाभोजनाभावविशिष्टरात्रिभोजनम् । यथा,
"हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्यां नक्तभोजी षडाचरेत् ॥"
इति भविष्यपुराणम् ॥

नक्ता, स्त्री, (अनिष्टकारित्वात् नक्तवत् मलिन-त्वमस्त्यस्येति । अच् । टाप् ।) कलिकारी । इति राजनिर्घण्टः ॥ ईशलाङ्गला इति भाषा ॥ (कलिकारीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

नक्रं, क्ली, (नक्रवत् आकृतिरस्त्यस्येति । अच् ।) अग्रदारु । न्यायकाठ इति भाषा । नासिका । इति मेदिनी । रे, ५२ ॥

नक्रः, पुं, (न क्रामति दूरस्थलमिति । क्रम+ अन्येभ्योऽपीति डः । नभ्राडिति नलोपो न ।) कुम्भीरः । इत्यमरः । १ । १० । २१ ॥ (यथा, पञ्चतन्त्रे । ३ । ४३ ।
"नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥"
मकरः । यथा, कादम्बर्य्याम् । "तथा चैनाचरेय नयेत नक्रकेतनः चणेनैकेनाकीर्त्तनीयां दशां जनं चैनम् ॥" माहः । यथा, रघुः । १६।५५।
"स तीरभूमौ विहितोपकार्य्या-
मानायिभिस्तामपकृष्टनक्राम् ॥")

नक्रराजः, पुं, (नक्राणां कुम्भीरादीनां राजा श्रेष्ठत्वात् । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) जलजन्तुविशेषः । हाङ्गर इति भाषा । तत्पर्य्यायः । ग्राहः २ जलकिराटः ३ जलाटकः ४ । इति हारा-वली । ७७ ॥

नक्रा, स्त्री, (नक्रवदाकृतिरस्त्यस्या इति अच् । टाप् ।) नासिका । इति शब्दरत्नावली ॥

नक्षत्रं, क्ली, (नक्षति शोभां गच्छति स्थानात् स्थानान्तरं गच्छति वा । नक्ष गतौ+"अमि-नक्षियजिवधिपतिभ्योऽत्रन् ।" उणां । ३ ।१०५। इति अत्रन् ।) सत्ता । इति राजनिर्घण्टः । तारा । तत्पर्य्यायः । ऋक्षम् २ भम् ३ तारा ४ तारका ५ उडु ६ । इत्यमरः । १ । ३ । २१ । तारकम् ७ । इति शाश्वतः ॥ तारः ८ । इति व्याड़िः ॥ दाक्षायण्यः । तास्तु अश्विनी १ भरणी २ कृत्तिका ३ रोहिणी ४ मृगशिरः ५ आर्द्रा ६ पुनर्व्वसुः ७ पुष्यः ८ अश्लेषा ९ मघा १० पूर्व्वफल्-गुनी ११ उत्तरफल्गुनी १२ हस्ता १३ चित्रा १४ स्वाति: १५ विशाखा १६ अनुराधा १७ ज्येष्ठा १८ मूला १९ पूर्व्वाषाढा २० उत्तराषाढा २१ श्रवणा २२ धनिष्ठा २३ शतभिषा २४ पूर्व्व-भाद्रपदा २५ उत्तरभाद्रपदा २६ रेवती २७ इत्यमरः ज्योतिषञ्च ॥ एता अभिजिता सह अष्टाविंशतिनक्षत्राणि भवन्ति ॥ * ॥ आसां क्रमेणाधिदेवता यथा । अश्वि १ यम-२ दहन-३ कमलज ४ शशि ५ शूलभृत् ६ अदिति ७ जीव ८ फणि-९ पितरः-१० । योन्य-११ र्य्यमा-१२ दिनकृत्-१३ त्वष्टृ-१४ पवन-१५ शक्राग्नि-१६ मित्राश्च १७ ॥ शक्रो १८ निरृ‌ति १९ स्तोयम् २० विश्वविरिञ्ची २१ हरि-२२ र्व्वसु २३ र्व्वरुणः-२४। अजपदो २५ ऽहिर्ब्रध्नः २६ पूषा २७ चेतीश्वरा भानाम् ॥ * ॥ आसां गणा यथा ।
"उग्रः पूर्व्वमघान्तकाः ११ । २० । २५ । १० । २ । ध्रुवगणस्त्वौत्तराणि स्वभू-१२ । २१।२६ । ४ । स्वातादित्यहरित्रय चरगणः १५ ।७। १२ । २३ । २४। पुष्याश्विहस्ता ८ । १ । १३ । लघु । चित्रामित्रमृगान्त्यभम् १४ । १७ । ५ । २७ । मृदुगणस्तीक्ष्णोऽहिरुद्रेन्द्रयुक् ९ । ६ । १८ ।१९। मिश्रोऽग्निः सविशाखभः । ३ । १६ । शुभफला सर्व्वे स्वकृत्ये गणाः ॥" * ॥
अधोमुखनक्षत्राणि यथा ।
"अश्लेष-९ वह्नि-३ यम-२ पित्र्य-१० विशाख-१६ युक्तम्
पूर्व्वात्रयम् ११ । २० । २५ शतभिषा २४ च नवाप्युडूनि ।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्यार्थभूमिखननेषु च भूषितानि ॥" * ॥
स्वनक्षत्रावधिनक्षत्राणां जन्मसम्पदादिकथनं यथा,—
"जन्म सम्पद्विपत् क्षेमः प्रत्यरिः साधको वधः ।
मित्रं परममित्रञ्च जन्मभाच्च पुनः पुनः ॥
सर्व्वमङ्गलकार्य्याणि मित्रे जन्मसु कारयेत् ।
विवाहश्राद्धभैषज्ययात्राक्षौराणि वर्ज्जयेत् ॥
यात्रायां पथि मन्त्रणं कृषि विधौ सर्व्वार्थनाशो भवेत्
भैषज्ये मरणं तथा सुनियतं दाहो गृहारम्भणे ।
क्षौरे रोगसमागमो बहुविधः श्राद्धेऽर्थनाश-स्तथा
वादे बुद्धिविनाशनन्त्वरिभयं प्राप्नोत्यसौ जन्मभे ॥
नक्षत्रोत्पन्नरोगेषु भोगादि यथा,—

"जन्माधाने निधनभे प्रत्यरौ च विपत्करे ।
यदि व्याधिः समुत्पन्नः क्लेशाय मरणाय वा ॥
कृत्तिकासु यदा व्याधिर्नृणाञ्च प्रतिपद्यते ।
नवरात्रं भवेत् पीडा त्रिरात्रं रोहिणीषु च ॥
मृगशीर्षे पञ्चरात्रमार्द्रायां मुच्यतेऽसुभिः ॥
पुनर्व्वसौ तथा पुष्ये सप्तरात्रं विधीयते ।
नवरात्रं तथाश्लेषे मासमेकं मघासु च ॥
द्वौ मासौ पूर्व्वफल्गुन्यामुत्तरासु त्रिपक्षकम् ।
हस्तेषु सप्तमे मोक्षश्चित्रायामर्द्धमासकम् ॥
मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिम् ।
मैत्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम् ॥
मूले न जायते मोक्षः पूर्व्वाषाढे त्रिपक्षकम् ।
उत्तरा दिनविंशत्या श्रवणे द्वौ च मासकौ ॥
धनिष्ठायामर्द्धमासं वारुण्याञ्च दशाहकम् ।
न च भाद्रपदे मोक्ष उत्तरासु त्रिपक्षकम् ॥
रेवत्यां दिनविंशत्या चाहोरात्रं तथाश्विनी ।
प्राणैर्व्वियुज्यते नित्यं भरण्यां नात्र संशयः ॥
कौशिकेन सदादिष्टा नक्षत्रव्याधिसम्भवाः ।
नक्षत्रे प्रतिकर्त्तव्यं नक्षत्रपथजानता ॥"
नक्षत्रचतुर्भागबोधकानि चत्वारि नामाद्याक्षराणि यथा । अ इ उ ए ३ । ओ व वि वु ४ । वे वो क कि ५ । कु घ ङ छ ६ । के को ह हि ७ । हु हे हो ड ८ । डि डु डे डो ९ । म मि मु मे १० । मो ट टि टु ११ । टे टो प पि १२ । पु ष ण ठ १३ । पे पो र रि १४ । रु रे रो त १५ । ति तु ते तो १६ । न नि नु ने १७ । नो य यि यु १८ । ये यो भ भि १९ । भु ध फ ढ २० । भे भो ज जि २१ । जु जे जो ख ।० अभिजित् । खि खु खे खो २२ । ग गि गु गे २३ । गो श शि शु २४ । शे शो द दि २५ । दु थ झ ञ २६ । दे दो च चि २७ । चु चे चो ल १ । लि लु ले लो २ । ऋ ऌ युक्ताकारयुक्तेन ज्ञेयः । ह्रस्वेन दीर्घो ज्ञेयः । तालव्यशकारेण दन्त्यसकारो ज्ञेयः ।" इति ज्योतिस्तत्त्वम् ॥

नक्षत्रकान्तिविस्तारः, पु, (नक्षत्राणां कान्तिस्तस्या विस्तारो यत्र ।) धवलयावनालः । इति राजनिर्घण्टः ॥

नक्षत्रचक्रं, क्ली, (नक्षत्राणां चक्रं यत्र ।) मन्त्रग्रहणोक्तषट्चक्रान्तर्गतचक्रविशेषः । तथा च रुद्रयामले ।
"उत्तरादक्षिणाग्रान्तु रेखां कुर्य्याच्चतुष्टयीम् ।
दश रेखाः पश्चिमाग्राः कर्त्तव्या वीरवन्दिते ! ॥
अकारादिचकारान्तान् द्विचन्द्रवह्निवेदकान् ।
भूमीन्दुनेत्रचन्द्रांश्च अश्विन्यादौ लिखेत् प्रिये ! ॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्दुनेत्राग्निचन्द्रकान् ।
मघादिज्येष्ठपर्य्यन्तं द्वितीयं नवतारकम् ॥
वह्निभूमीन्दुचन्द्रांश्च युग्मेन्दुनेत्रवह्निकान् ।
वेदेन भेदिता वर्णा रेवत्यंशगताः क्रमात् ॥"
निबन्धे ।
"पूर्व्वोत्तरात्रयञ्चैव भरण्यार्द्रा च रोहिणी ।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः ॥
ज्येष्ठा शतभिषामूलाधनिष्ठाश्लेषकृत्तिकाः ।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः ॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः ।
अनुराधा मृगशिरः श्रवणा देवतारकाः ॥"
तथा ।
"स्वजातौ परमा प्रीतिर्म्मध्यमा भिन्नजातिषु ।
रक्षोमानुषयोर्न्नाशो वैरं दानवदेवयोः ॥"
गणापवादमाह गवाक्षतन्त्रे ।
"प्रणवश्चाम्बरी माया व्योमव्यापी षडक्षरः ।
प्रासादो बहुरूपी च सप्त साधारणाः स्मृताः ॥"
शारदायाम् ।
"जन्म सम्पत् विपत् क्षेमः प्रत्यरिः साधको वधः ।
मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः ॥"
जन्मत्रिपञ्चसप्तानि वर्ज्जनीयानि नक्षत्राणि ।
तथा च राघवभट्टः ।
"रसाष्टनवभद्राणि युग्मयुग्मगतान्यपि ।
इतराणि न भद्राणि नक्षत्राणि ॥" स्वनक्षत्रादेव नक्षत्रं गणनीयम् । तदज्ञाने स्वनामाद्याक्षरसम्बन्धिनक्षत्राद्गणनीयम् । तथा च ।
"शादक्षिण्येन गणयेत् साधकाद्यक्षरात् सुधीः ॥"
इति तन्त्रसारः ॥

नक्षत्रनेमिः, पु, (नक्षत्रस्य नक्षत्रचक्रस्य नेमिरिव ।) विष्णुः । (यथा, महाभारते । १३ । १४९ । ६० ।
"नक्षत्रनेमिर्न्नक्षत्री क्षमः क्षामः समीहनः ॥"
"नक्षत्रैस्तारकैः सार्द्धं चन्द्रसूर्य्यादयो ग्रहाः ।
वाय्वाकाशमयैर्बन्धैर्न्निबद्धा ध्रुवसञ्ज्ञितैः ॥
स ज्योतिषां चक्रं भ्रामयंस्तारामयस्य शिशुमारस्य पुच्छदेशे ध्रुवस्तस्य शिशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवत् प्रवर्त्तकः स्थितो विष्णुरिति नक्षत्रनेमिः शिशुमारवर्णने विष्णुर्हृदयमिति श्रुतेः ॥" इति शाङ्करभाष्यम् ॥) चन्द्रः । ध्रुवः । रेवत्यां स्त्री । इति मेदिनी । मे, ६३ ॥

नक्षत्रपः, पु, उडुपः । चन्द्रः । नक्षत्रं पातीति व्युत्पत्त्या । (नक्षत्र + पा + कः ॥)

नक्षत्रपुरुषः, पु, (नक्षत्रैः पुरुष इव ।) व्रतविशेषः । यथा,—
"श्रूयतां कथयिष्यामि नक्षत्रपुरुषव्रतम् ।
नक्षत्राङ्गानि देवस्य यानि यानीह नारद । ॥
मूलर्क्षे चरणौ विष्णोर्ज्जङ्घे द्वे रोहिणी स्थिता ।
द्वे जानुनी तथाश्विन्यौ संस्थिते रूपधारिणः ॥
आषाढे द्वे तथा चोरू गुह्यस्य फल्गुनीद्वयम् ।
कटिस्थाः कृत्तिकाश्चैव वासुदेवस्य संस्थिताः ॥
प्रोष्ठपद्द्वयं पार्श्वे कुक्षिभ्यां रेवती स्थिता ।
उरःसस्था त्वनुराधा श्रविष्ठा पृष्ठसंस्थिता ॥
विशाखा भुजयोर्हस्तः करद्वयमुदाहृतम् ।
पुनर्व्वसुरथाङ्गुल्यो नखाः सर्व्वे तथोच्यते ॥
ग्रीवास्थिता तथा ज्येष्ठा श्रवणः कर्णयोः स्थितः ।
मुखसंस्थस्तथा पुष्यः स्वातिर्द्दन्ताः प्रकीर्त्तिताः ॥
हनू द्वे वारुणश्चोक्तो नासा पैत्र्यमुदाहृतम् ।
प्राजापत्यञ्च नेत्राभ्यां रूपधाम्नः प्रतिष्ठितम् ॥
शिरो रौद्रस्तथा चैव नक्षत्राङ्गमिदं हरेः ।
विधानं संप्रवक्ष्यामि यथायोगेन नारद । ॥
संपूजितो हरिः कामान् विदधाति यथेप्सितान् ।
चैत्रे मास्यसिताष्टम्यां यदा मूलगतः शशी ॥
भगवन्तं सह लक्ष्म्या पूजयेच्च विधानतः ।
नक्षत्रसन्निधौ दद्याद्विप्रेन्द्राय च भोजनम् ॥
जानुनी चाश्विनीयोगे पूजयेदथ भक्तितः ।
दोहदे च हविष्यान्नं पूर्व्ववद्द्विजभोजनम् ॥
आषाढाभ्यां तथा द्वाभ्यां द्वावूरू पूजयेद्बुधः ।
सलिलं शिशिरं तत्र दोहदे च प्रकीर्त्तितम् ॥
फल्गुनीद्वितये गुह्यं पूजनीयं विचक्षणैः ।
दोहदे च पयो गव्यं देयञ्च द्विजभोजनम् ॥
कृत्तिकासु कटिः पूज्या सोपहारैर्ज्जितेन्द्रियैः ।
देयञ्च दोहदे विष्णोः सुगन्धिकुसुमोदकम् ॥
पार्श्वे भाद्रपदायुग्मे पूजयित्वा विधानतः ।
गुडं सशालिकं दद्याद्दोहदे देवप्रीतिदम् ॥
द्वे कुक्षी रेवतीयोगे दोहदे मुद्गमोदकम् ।
अनुराधासु जठरं कुलत्थांस्तत्र दोहदे ॥
श्रविष्ठायां तथा पृष्ठं शालिभक्तञ्च दोहदे ।
पुष्ये मुखं पूजयेत दोहदे घृतपायसम् ॥
स्वातियोगे च दशनान् दोहदे तिलशक्तुनी ।
भुजयुग्मं विशाखासु दोहदे परमोदनम् ॥
हस्ते हस्तौ तथा पूज्यौ यावकं दोहदे स्मृतम् ।
पुनर्व्वसावङ्गुलीश्च पटोलं तत्र दोहदे ॥
दातव्य केशवप्रीत्यै ब्राह्मणस्य च भोजनम् ।
हनू शतभिषायां वै पूजयेत्तु प्रयत्नतः ॥
प्रियङ्गुरक्तशाल्यन्नं दोहदञ्च मधुद्विषः ।
मघासु नासिका पूज्या मधु दद्याच्च भोजनम् ॥
मृगोत्तमाङ्गे नयने मृगमांसञ्च दोहदे ।
चित्रायोगे ललाटञ्च दोहदे चारु भोजनम् ॥
भरणीषु शिरः पूज्य चारु भक्तञ्च दोहदे ।
सम्पूजनीया विद्वद्भिरार्द्रायोगे शिरोरुहाः ॥
विप्रांश्च भोजयेद्भक्त्या दोहदे च गुडार्द्रकम् ।
नक्षत्रयोगेष्वेतेषु संपूज्य जगतः पतिम् ॥
ततस्तु दक्षिणां दद्यात् स्त्रीपुंसोश्चारु वाससम् ।
छत्रोपानद्युगञ्चैव सप्त धान्यानि काञ्चनम् ॥
घृतपात्रञ्च गां दोग्ध्रीं ब्राह्मणाय निवेदयेत् ।
प्रतिनक्षत्रयोगेन पूजनीया द्विजातयः ॥
नक्षत्रज्ञाय विप्राय पृथग्दद्याच्च दक्षिणाम् ।
नक्षत्रपुरुषाख्यं हि व्रतानां व्रतमुत्तमम् ॥
एवं विधानतो ब्रह्मन् । नक्षत्राङ्गो जनार्द्दनः ।
पूजितो रूपधारी यैस्तैः प्राप्ता च सुकामिता ॥
एतत्तवोक्तं परमं पवित्रं
धन्यं यशस्यं शुभरूपदायि ।
नक्षत्रपुंसः परम विधानं
शृणुष्व पुण्यामिह तीर्थयात्राम् ॥"
इति वामनपुराणे ७७ अध्यायः ॥

नक्षत्रमाला, स्त्री, (नक्षत्रसंख्यिका माला ।) सप्तविंशतिमौक्तिककृतहारः । इत्यमरः ।२।६।१०६।
"सप्तविंशतिरूपाढ्या रूपके रूपरूपकैः ।
नृत्ये नक्षत्रमाला स्यान्मुक्तावलिरिवोज्ज्वला ॥"
इति सङ्गीतदामोदरः ॥
(नक्षत्राणां माला समूहः ।) नक्षत्रश्रेणी ।

(यथा, बृहत्संहितायाम् । १०५ । १३ ।
"यावन्नक्षत्रमाला विचरति गगने भूषयन्तीह भासा
तावन्नक्षत्रभूतो विचरति सह तैर्नक्षत्रगो लब्धो ब्रह्मलोकम् ।")
नक्षत्रेशः, पुं, (नक्षत्राणामीशः ।) चन्द्रः । (यथा, साहित्यदर्पणे । २ । २० ।
"नक्षत्रेशकृतेक्षणो गिरिगुरोर्गाढां रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥")
कर्पूरं । इत्यमरः । २ । ६ । १३० ॥
नख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) प्रनखति । इति दुर्गादासः ॥
नखं, क्ली, पुं, (नह्यते इव शरीरे । नह बन्धे + "नहेर्ह्लोपश्च ।" उणां ५ । २३ । इति ख, हलोपश्च ।) अङ्गुलीकण्टकः । नह इति हिन्दी भाषा । तत्तु उपधातुविशेषः गर्भस्थबालकस्य षष्ठमासे भवति । इति सुखबोधः ॥ तत्पर्य्यायः । पुनर्भवः २ कररुहः ३ नखरः ४ इत्यमरः । २ । ६ । ८३ ॥ कामाङ्कुशः ५ करजः ६ पाणिजः ७ अङ्गुलीसम्भूतः ८ पुनर्न्नवः ९ । इति राजनिर्घण्टः ॥ करायजः १० करकण्टकः ११ स्मराङ्कुशः १२ रतिरथः १३ करचन्द्रः १४ कराङ्कुशः १५ । इति शब्दरत्नावली ॥ * ॥ रतिक्रीड़ायां नखाघातस्थानानि यथा,—
"नखाघात प्रदातव्यो यथास्थानानि कर्म्मसु ।
पार्श्वयोः स्तनयोश्चैव ऊरौ चैव नितम्बके ॥
कक्षस्थले च कर्णाग्रे कपाले बाहुमूलके ।
ग्रीवायां कण्ठदेशे च नखाघातं समाचरेत् ॥
तथा सर्व्वशरीरेषु नखं दद्यात् शनैः शनैः ॥"
इति कामशास्त्रम् ॥
"न नखैर्विलिखेद्भूमिं गाञ्च संवेशयेन्नहि ।
न खाङ्गे नखवाद्यं वै कुर्य्यान्नाञ्जलिना पिबेत् ॥"
इति कूर्म्मे उपविभागे १५ अध्यायः ॥
नख, क्ली, स्त्री, (नखमिव आकृतिरस्त्यस्येति । अच् ।) नखीनामगन्धद्रव्यम् । नखी इति ख्यातं । तत्पर्य्यायः । शुक्तिः २ शङ्खः ३ खुरः ४ कोलदलम् ५ । इत्यमरः । २ । ४ । १३० ॥ करजाख्यः ६ अम्बखुरः ७ नखं ८ व्याघ्रनखं ९ नखी १० ।
"द्विधा शङ्खनखाख्योऽन्यः शुक्त्याख्यो बदरीच्छदः ।"
इति रत्नमालायाम् । १४४ ॥
कररुहं ११ सिम्बी १२ शफं १३ चल १४ कोशी १५ करजः १६ हनुः १७ नागहनु १८ पाणिजं १९ बदरीपत्रः २० रूप्यं २१ [illegible] विलासिनी २२ सस्मिनाल २३ पाणिरुहः २४ । इति राजनिर्घण्टः ॥ व्याघ्रायुधम् २५ चक्रकारकम् २६ शङ्खनखः २७ नखरी २८ । इति शब्दरत्नावली ॥ अपि च । अथ नखनखीगन्धद्रव्यम् ।
"नख व्याघ्रनख व्याघ्रायुधं तच्चक्रकारकम् ।
नखं खल्वं नखी प्रोक्ता हनुर्हट्टविलासिनी ॥
नखद्वय ग्रहश्लेष्मवातास्रज्वरकुष्ठहृत् ।
लघूष्णा शुक्रलं वर्ण्यं स्वादुव्रणविषापहम् ॥
अलक्ष्मीमुखदौर्गन्ध्यं हृत्पाकरसयो कटु ॥"
इति भावप्रकाशः ॥
खल्पनखस्य पर्य्यायः । नखी १ हनुः २ हट्टविलासिनी ३ । तयोर्गुणाः । ग्रहश्लेष्मवातास्रज्वरकुष्ठनाशित्वम् । लघुत्वम् । उष्णत्वम् । शुक्रलत्वम् । वर्ण्यत्वम् । स्वादुत्वम् । व्रणविषालक्ष्मीमुखदौर्गन्ध्यनाशित्वम् । पाकरसयोः कटुत्वञ्च । इति भावप्रकाशः ॥ कण्डुभूतविनाशित्वम् । इति राजनिर्घण्टः ॥ रुचोष्णत्वम् । इति राजवल्लभः ॥ * ॥
"शैलरुह व्याघ्रनखं हनुर्हट्टविलासिनी ।
सुषिराञ्जनकेशी च कपोताङ्घ्रिर्नली खुरः ॥
खल्पपत्रखसौ शुक्तिर्नखरी बदरीच्छदा ।
महाखसौ शङ्खनखः शङ्खाख्यो गन्धसारणः ॥"
इति भरतधृतवाचस्पति ॥
नख, पु, (नह्यतेऽनेनेति । नह + खः । हस्य लोपः ।) खड्गम् । इति हेमचन्द्रः । ३ । २५८ ॥ (नखीनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥)
नखकुट्टः, पुं, (नख कुट्टयति छिनत्तीति । कुट्ट + अण् ।) नापितः । इति त्रिकाण्डशेषः ॥
नखनिष्पावः, पु, (नख निष्पवते फलसादृश्येन अनुकरोतीति । निर् + पू + अण् । यद्वा, नखवत् निष्पावः शिम्बी यस्य ।) निष्पावीभेदः । तत्पर्य्यायः । अङ्गुलिफला २ श्वेतनिष्पाविका ३ ग्राम्या ४ नखगुच्छफला ५ ग्रामजनिष्पावी ६ नखफलिनी ७ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । कण्ठशुद्धिकरत्वम् । मेध्यत्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥
नखपर्णी, स्त्री, (नख इव पर्णमस्याः । ङीष् ।) वृश्चिकाक्षुप । इति राजनिर्घण्टः ॥
नखपुष्पी, स्त्री, (नख इव पुष्पमस्याः । ङीष् ।) पृक्का । इति राजनिर्घण्टः ॥
नखमुचं, क्ली, (नख मुञ्चतीति । मुच + "कप्रकरणे मूलविभुजादिभ्य उपसङ्ख्यानम् ।" ३ । २ । ५ । इत्यस्य वार्त्तिकोक्त्या कः ।) धनुः । इति संक्षिप्तसारव्याकरणम् ॥ नखस्य मोचके, त्रि ॥
नखरः, पु, क्ली, (नख रातीति । रा + कः ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ (यथा, साहित्यदर्पणे ।
"किं पुनरलङ्कृतस्त सम्प्रति नखरक्षतैस्तस्याः ॥"
अस्त्रविशेषः । यथा, महाभारते । ७ । २६ । १७ ।
"सकम्पनर्ष्टिनखरा मुषलानि परश्वधाः ॥"
तथा, तत्रैव । ६ । १८ । १७ ।
"पादाताश्चाग्रतोऽगच्छन् धनुश्चर्म्मासिपाणयः ।
अनेकशतसाहस्रा नखरप्रासयोधिनः ॥")
नखरञ्जनी, स्त्री, (रज्यतेऽनयेति । रञ्ज + ल्युट् । ङीप् । नखस्य रञ्जनी ।) नखच्छेदनास्त्रविशेषः । नरुण इति भाषा । यथा,—
"अनन्तचरणोपान्तचारिणी मलहारिणी ।
पुनर्भवच्छेदकरी गङ्गेव नखरञ्जनी ॥"
इति उद्भटः ॥
नखरायुधः, पु, (नखरमेव आयुधं यस्य ।) सिंहः । व्याघ्रः । कुक्कुटः । इति राजनिर्घण्टः ॥
नखराह्वः, पु, (नखर आह्वयते स्पर्द्धते इति । आ + ह्वे + कः ।) करवीरवृक्षः । इति राजनिर्घण्टः ॥
नखरी, स्त्री, (नखरः आकृतिसादृश्येनास्त्यस्या इति । अच् । गौरादित्वात् ङीष् ।) नखी । इति शब्दमाला ॥ क्षुद्रनखी । इति काचिद्रत्नमाला ॥
नखवृक्षः, पुं, (नख सर्पणे + अच् । नखो वृक्षः । इति नित्यकर्म्मधारयः ।) नीलवृक्षः । इति राजनिर्घण्टः ॥ (नीलवृक्षशब्देऽस्य विवरणं ज्ञातव्यम् ॥)
नखशङ्खः, पुं, (नख इव शङ्खः ।) क्षुद्रशङ्खः । इति शब्दरत्नावली ॥
नखाङ्कः, क्ली, (नखमिव अङ्कं यस्य ।) व्याघ्रनखी । इति शब्दरत्नावली ॥
नखाङ्गं, क्ली, (नखस्य अङ्गमिव अङ्गं यस्य ।) नखी । इति काचिद्रत्नमाला ॥
नखायुधः, पु, (नखमेव आयुधं यस्य ।) व्याघ्रः । इति राजनिर्घण्टः ॥ सिंहकुक्कुटौ च ॥
नखालिः, पु, (नखमिव अलतीति । अल पर्य्याप्तौ + इन् ।) क्षुद्रशङ्खः । इति शब्दचन्द्रिका ॥ (नखस्य आलिः ।) नखश्रेणी च ॥
नखालुः, पु, (नखतीति । नख सर्पणे + आलुच् ।) नीलवृक्षः । इति राजनिर्घण्टः ॥
नखाशी, [न्] पु, (नखमश्नातीति । अश भोजने + णिनिः ।) पेचकः । इति त्रिकाण्डशेषः ॥ नखभक्षकमात्रे, त्रि ॥
नखी, स्त्री, (नख + गौरादित्वात् ङीष् ।) नखनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १३० ॥ (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"करजाख्यस्त्वाम्बखुरो नखो व्याघ्रनखो नखी ॥")
नखी, [न्] पुं, (नखमस्त्यस्येति । नख + इनि ।) सिंहः । इति राजनिर्घण्टः ॥ विदारणक्षमनखयुक्तपशुमात्रम् । यथा, चाणक्ये । २७ ।
"नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥"
नगः, पुं, (न गच्छतीति । न + गम् + डः । यद्वा, इज्यते इति । इज + "इजेर्गो लोपो इश्च नः ।" उणां ५ । ६१ । इति गः, धातोरन्त्यलोपः । इश्च नः ।) पर्व्वतः । (यथा, कुमारे । ७ । ७२ ।
"नवे दुकूले च नगोपनीतं
प्रत्यग्रहीत् सर्व्वमसन्त्रवर्ज्जम् ।")
वृक्षः । इत्यमरः । ३ । ३ । १६ ॥ (यथा, महाभारते । १ । ४३ । ६ ।
"स दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत् ।
कुरु यत्नं द्विजश्रेष्ठ । जीवयैनं वनस्पतिम् ॥"
स्थावरमात्रम् । यथा, विष्णुपुराणे । १ । ५ । ६ ।
"मुख्या नगा यतश्चोक्ता मुख्यसर्गस्ततस्त्वयम् ।"
"नगाः स्थावराः ।" इति तट्टीकायां स्वामी ॥)

नगजः, पु, (नगे पर्व्वते जायते इति । जन+ड ।) हस्ती । इत्यमरटीकासारसुन्दरी ॥ पर्व्वतजातवस्तुमात्रे, त्रि ॥

नगजा, स्त्री, (नगे जायते या । जन+डः । टाप् ।) क्षुद्रपाषाणभेदा । इति राजनिर्घण्टः ॥

नगणा, स्त्री, (नास्ति गणो यस्याः ।) लताविशेषः । नयाफट्की इति भाषा । तत्पर्य्यायः । पारावतपदी २ पिण्या ३ स्फुटवल्कली ४ ज्योतिष्मती ५ पूतितैला ६ इङ्गुदी ७ । इति रत्नमाला ॥

नगनन्दिनी, स्त्री, (नगस्य हिमालयस्य नन्दिनी । दुर्गा । इति शब्दरत्नावली ॥

नगपतिः, पु, (नगानां पतिः ।) हिमालयपर्व्वतः । इति त्रिकाण्डशेषः ॥ (नगानां ओषधीनां पतिः ।) चन्द्रः ॥

नगभित्, पु, (नगं भिनत्तीति । भिद्+क्विप् ।) पाषाणभेदनः । इति राजनिर्घण्टः ॥ इन्द्रश्च ॥

नगभूः, पु, (नगे भूरुत्पत्तिर्यस्य ।) क्षुद्रपाषाणभेदा । इति राजनिर्घण्टः ॥ पर्व्वतजाते, त्रि ॥

नगरं, क्ली, नगा इव प्रासादादयः सन्ति यत्र । ("नगपांसुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिकोक्त्या रः ।) बहुलोकवासस्थानम् । शहर इति भाषा । तत्पर्य्यायः । पूः २ पुरी ३ पुरिः ४ पुरम् ५ नगरी ६ पत्तनम् ७ पट्टनम् ८ पट्टनी ९ पुटभेदनम् १० पटभेदनम् ११ स्थानीयम् १२ निगमः १३ इत्यमरभरतौ ॥ कटकम् १४ पट्टम् १५ । इति शब्दरत्नावली ॥ केचित्तु नगरपत्तनस्थानीयानां भेदमाहुः । तत्र पुरादित्रयं पुरे । पत्तनादिद्वयं पत्तने । स्थानीयादिद्वयं स्थानीये । इति मन्यन्ते । यत्राष्टशतग्रामीयव्यवहारस्थानं मध्यवर्त्ति तत् नगरम् । यत्र राजा तत्परिवारकाश्च तिष्ठन्ति तत् पत्तनम् । प्राकारादिना दुर्गं योजनविस्तीर्णं नगरं स्थानीयम् । केचित्तु पुरनगरयोरपि भेदमाहुः । बहुग्रामीयव्यवहारस्थानं पुरम् । तत्र प्रधानभूतं नगरम् । इति भरतः ॥ * ॥

अथ नगरनिर्म्माणकालः ।

"स्थिरराशिगते भानौ चन्द्रे च स्थिरभोदये ।
शुद्धे काले दिने चैव नगरं कारयेन्नृप. ॥"* ॥

तस्य लक्षणं भविष्योत्तरे ।

"दीर्घं वा चतुरस्रं वा नगरं कारयेन्नृपः ।
त्र्यस्रं वर्त्तुलं वापि कदाचिदपि कारयेत् ॥
दीर्घं पादैकप्रसरश्चतुरस्रं समोचितम् ।
त्रिभिः पादैः समं त्र्यस्रं वर्त्तुलं वलयाकृति ॥
दीर्घं स्याद्दीर्घकालाय सुखसम्पत्तिहेतवे ।
चतुरस्रं चतुर्वर्गफलाय पृथिवीभुजः ॥
त्र्यस्रं त्रिशक्तिनाशाय वर्त्तुलं बहुरोगकृत् ।
राज. खहस्तैर्दशभी राजहस्त उदाहृत ॥
राजहस्तैश्च दशभी राजदण्ड उदाहृतः ।
राजदण्डैश्च दशभी राजक्षेत्रमुदाहृतम् ॥
राजक्षेत्रैश्च दशभी राजकाण्ड उदाहृतः ।
राजकाण्डैश्च दशभी राजपुरुष उच्यते ॥
राजधानी तु कथिता दशभी राजपुरुषैः ।
राजधानी दशगुणा राजक्षेत्रमुदाहृतम् ॥
सप्तैव परिमाणानि प्रोक्तानि पुरपत्तने ।
भयत्राणभोगसम्पत्तिमर्त्त्यकीर्त्तिसुखार्थिनाम् ।
राजक्षेत्रेण नृपतिः पुरपत्तनमारभेत् ॥
लक्ष्मीर्जयः क्षमा सौख्यं प्रबलं भङ्ग एकता ।
सन्तुष्टिर्वित्तं नाशश्च मङ्गलञ्च बलं क्षयः ।
साम्राज्यं भोगसम्पत्तिरिति षोडश कीर्त्तिताः ॥
यथार्थसंज्ञा नगरा मुनिना तत्त्ववेदिना ॥"

इति युक्तिकल्पतरुः ॥ * ॥

अपि च ।

"नृपावासः पुरी प्रोक्ता विशाम्पुरमपीष्यते ।
एकतो यत्र तु ग्रामो नगरञ्चैकतः स्थितम् ॥
मिश्रन्तु खर्व्वटं नाम नदीगिरिसमाश्रयम् ।
विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि ॥
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च ।
पण्यक्रियादिनिपुणैश्चातुर्वर्ण्यजनैर्युतम् ॥
अनेकजातिसम्बन्धं नैकशिल्पिसमाकुलम् ।
सर्व्वदैवतसम्बन्धं नगरन्त्वभिधीयते ॥"

इति विष्णुपुराणटीकायां श्रीधरस्वामिधृतभृगुवचनम् ॥ * ॥

अन्यच्च ।

"नगरं सर्व्वतोभद्रं कर्त्तव्यं रोधकं हि वा ।
स्वस्तिकं मध्यगं कार्य्यं कुमारीपुरमेव वा ॥
चतुष्पथचतुर्युक्तं सर्व्वकामसुखावहम् ।
छिन्नकर्णं विनाशश्च दुःस्थितं क्षयदुर्व्वलम् ॥
नगरं न प्रशंसन्ति गर्त्तविद्धं विभेदितम् ।
अग्रतः स्वल्पप्रासादं छिन्नशाखं विदुर्बुधाः ॥
द्विमुखं कर्णहीनन्तु क्षयमध्यं क्षयं विदुः ।
दुःस्थितं निम्नयाम्यन्तु नैर्ऋतं धनदुर्व्वलम् ॥
सौम्यं सर्व्वसुखाह्लादपूरितं वारुणं वरम् ।
याम्यमायुःप्रदं पूर्णनगरं प्रीतिवर्द्धनम् ॥
ईशावासवसंपूर्णं सर्व्वारोग्यसुखप्रदम् ।
मध्यचतुष्पथोपेतं न च तं पीडयेत् क्वचित् ॥
ब्रह्मस्थानं हि त विप्र शिवस्तत्र सदा स्थितः ।
चतुर्व्विंशतिनाथस्तु हस्तान्यष्टशत परम् ॥
अत्र मध्य प्रशंसन्ति हृल्लोतुकष्टविवर्ज्जितम् ।
अथ किष्कुशतान्यष्टौ प्राङ्मुखं निवेशनम् ॥
नगरार्द्धञ्च विष्कम्भं खेटं ग्रामं ततोऽर्द्धतः ।
नगराद्योजनं खेटं खेटाद्ग्रामोऽर्द्धयोजनः ॥
द्विक्रोशं परमा सीमा क्षेत्रसीमा चतुर्धनुः ।
विंशद्धनूंषि विस्तीर्णो देशो मार्गास्तु तैः कृतः ॥
विशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु ।
धनूंषि दश विस्तीर्णः श्रीमान्राजपथ. कृतः ॥
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ।
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ॥
त्रिकरश्चोपरथ्यास्तु द्विकरास्त्वुपरथ्यिका ।
जङ्घापथस्तु चतुष्पादस्त्रिपादस्य गृहान्तरम् ॥
तृतीयपादस्त्वर्द्धं पादः प्राग्वंशपादकः स्मृतः ॥"

इति देवीपुराणम् ॥

नगरकीर्त्तनं, पु, (नगरे कीर्त्तनं नगरपरिभ्रमणेन हरिनामसङ्घोषणम् ।) नगरादिभ्रमणकरणकहरिसङ्कीर्त्तनम् । यथा,—

"नाचारो नाधिकारी च न स्थाननियमस्तथा ।
ग्रामे वा नगरे साधुर्व्वने वा कीर्त्तयेद्धरिम् ॥"

इति हरिनाममाहात्म्यम् ॥

नगरघातः, पु, (नगरं हन्तीति । हन+अण् ।) हस्ती । इति संक्षिप्तसारर्थ्याकरणम् ॥

नगरी, स्त्री स्त्री, (नगर+ङीप् ।) नगरम् । इत्यमरः । २ । १ । १ ॥ (यथा, महाभारते । १२ । ५ । ६ ।

"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ ।
अङ्गेषु नरशार्द्दूल । स राजासीत् सपत्नजित् ॥")

नगरीवकः, पु, (नगर्य्यां वक इव ।) काकः । इति त्रिकाण्डशेषः ॥

नगरोत्था, स्त्री, (नगरादुत्तिष्ठतीति । उत्+स्था+कः । टाप् ।) नगरमुस्ता । इति राजनिर्घण्टः ॥

नगरौषधिः, स्त्री, (नगरजाता ओषधिः फलपाकान्तत्वात् ।) कदली । इति शब्दचन्द्रिका ॥

नगाटनः, पु, (नगे वृक्षे अटति भ्रमतीति । अट+ल्युः ।) वानरः । इति त्रिकाण्डशेषः ॥ (पर्व्वतचारिणि, त्रि ॥)

नगाधिपः, पु, (नगानां पर्व्वतानामधिपः ।) हिमालयपर्व्वतः । इति जटाधरः ॥

नगाश्रयः, पु, (नगः पर्व्वतः आश्रय उत्पत्तिस्थानं यस्य ।) हस्तिकन्दः । इति राजनिर्घण्ट. ॥ नगवासिनि, त्रि ॥

नगौकाः, [स्] पु, (नगो वृक्षः पर्व्वतो वा ओक आश्रयस्थानं यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ सरभः । सिंहः । इति मेदिनी । से, ५६ ॥ काकः । इति शब्दचन्द्रिका ॥ नगरवासिनि, त्रि ॥

नग्नः, त्रि, (नजते स्मेति । ओ नज व्रिडि+अकर्म्मकत्वात् कर्त्तरि क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य न ।) विवस्त्रः । नेंटो इति भाषा ॥ तत्पर्य्यायः । अवासाः २ दिगम्बरः ३ । इत्यमरः । ३ । १ । ३६ ॥ तथा च भृगुः ।

"विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव वा ।
श्रौतं स्मार्त्तं तथा कर्म्म न नग्नश्चिन्तयेदपि ॥
विकचः परिधानासंवृतकच्छः । तथा च योगियाज्ञवल्क्यः ।

"परिधानाद्बहिःकच्छा निबद्धा ह्यासुरी भवेत् ॥"

स्मृतिः ।

"वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम् ।
एभिः कच्छैः परीधत्ते यो विप्रः स शुचिः स्मृतः ॥"

बौधायनः ।

"नाभौ धृतश्च यद्वस्त्रमाच्छादयति जानुनी ।
अन्तरीयं प्रशस्तं तदाच्छन्नमुभयोस्तयोः ॥"

आचारचन्द्रिकायाम् ।

"द्विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैव च ।
एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः ॥"

इत्याह्निकतत्त्वम् ॥

"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन ।
न च मूत्रं पुरीषं वा न वै संसृष्टमैथुनम् ॥

नोच्छिष्टं सविशेन्नित्य न नग्नं स्नानमाचरेत्।
न गच्छेन्न पठेद्वापि न चैव स्वशिरं स्पृशेत्॥"
इति कूर्म्मपुराणे उपरिभागे १५ अध्यायः॥
पारिभाषिकनग्ना यथा,—
"येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम्।
ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम्॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥
"ऋग्यजुःसामसंज्ञेयं त्रयी वर्णावृतिर्द्विज।
एतामुज्झति यो मोहात् स नग्नः पातकी स्मृत.॥
यस्तु सत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते।
परिव्राडपि मैत्रेय! स नग्नः पापकृन्नरः॥"
इति विष्णुपुराणे १८ अध्यायः॥

नग्नः, पुं, (नज+क्तः। निष्ठातस्य न.।) वन्दी।
(यथा, नैषधे।१६।२१।
"रतिरतिपतिद्वैतश्रीकौ धुरं विभ्रमसारां
प्रियवचसि यमग्नाचार्य्या वदामतमां तत॥")
क्षपणकः। इति विश्वमेदिन्यौ॥ शेषस्य पर्य्यायः।
नग्नाटकः २ निर्ग्रन्थकः ३ भदन्त ४ दिगम्बरकः ५। इति हारावली।११५॥

नग्नकः पुं, (नग्न एव। स्वार्थे कन्।) नग्नः। नजते लज्जते इति नग्नक. ओ नज त्री व्रीडि इत्यस्मात् क्तः सुख्वाद्योदिदिति नः मनीयादित्वात् जस्य गः स्वार्थे कः। इति व्याकरणम्॥

नग्नजित्, पुं, राजविशेषः। स च श्रीकृष्णपत्न्या नाग्नजित्या जनक.। यथा, श्रीभागवते।१०।५८।२३।
"नग्नजिन्नाम कौशल्य आसीद्राजातिधार्म्मिकः।
तस्य सत्याभवत् कन्या देवी नाग्नजिती नृप॥"

नग्नहुः, [क] स्त्री, (नग्नं ह्वयति स्पर्द्धते अनेनेति। ह्वे+करणे क्विप्।) नग्नहूः। इति भरतधृतामरमाला॥ (बाहुलकात्कुप्रत्यये कृते पुंलिङ्गेऽपि दृश्यते। यथा, वाजसनेयसंहितायाम्।१६।१४।
"आतिथ्यरूपं मासरं महावीरस्य नग्नहुः॥"
"सर्ज्जत्वक्त्रिफला गुडूचीपुनर्नवाचतुर्जातकपिप्पली-गजपिप्पलीमग्नावकाष्ठहब्बाचित्रकेन्द्रवारुण्यश्वगन्धाधान्यकयवानीजीरकद्वयहरिद्राद्वयवि-रूढयवघोदय एकीकृता नग्नहुः॥" इति।१६।१। मन्त्रटीकायां वेददीपः॥)

नग्नहूः, पुं, (नग्नं ह्वयति स्पर्द्धते येनेति। ह्वे+क्विप्।) नानाद्रव्यकृतसुराबीजम्। वाखर इति ख्यातम्। इति भरत॥ तत्पर्य्यायः। किण्वम् २ इत्यमरः।२।१०।४२॥ कण्वम् ३ नग्नहु ४ इति तट्टीका॥

नग्ना, स्त्री, (नग्न+टाप्।) विवस्त्रा नारी। तत्पर्य्यायः। कोट्टवी २ कोटवी ३ नग्निका ४ नग्नयोषित् ५। इति शब्दरत्नावली॥ (अनुद्भिन्नकुचा कन्या। यथा, पञ्चतन्त्रे।३।२१७।
"ऋतुमत्यान्तु तिष्ठन्त्यां स्वेच्छादानमुदीयते।
तस्मादुद्वाहयेन्नग्नां मनुः स्वायम्भुवोऽब्रवीत॥")

नग्नाटः, पुं, (नग्नः सन् अटतीति। अट्+अच्।) दिगम्बर.। इति हलायुधः॥

नग्नाटकः, पुं, (नग्नाट एव। स्वार्थे कन्।) दिगम्बरयोगी। इति हारावली।११५॥

नग्निका, स्त्री, (नग्नेव। स्वार्थे कन्। टापि अत इत्वम्।) विवस्त्रा। तत्पर्य्यायः। कोट्टवी २ कोटवी ३ कोटरी ४। अप्राप्तरजस्का। तत्पर्य्यायः। गौरी २ अनागतार्त्तवा ३। इत्यमरटीका च। गौरिका ४। इति शब्दरत्नावली॥ (अजातकुचा कन्या। यथा, पञ्चतन्त्रे।३।२१३।
"यावच्चना भवेत् कन्या कुचहीना तु नग्निका॥")

नङ्गः, पुं, (नं नतिं गच्छतीति। गम+डः। बाहुलकात् मुम्।) जारः। इति जटाधर.॥ नां इति भाषा॥

नच, ओ ई ड व्रीडि। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-अक-सेट्। ईदित्वात् निष्ठायामनिट्।) ओ ई नग्न.। ड, नजते। व्रीडि लज्जायाम्। इति दुर्गादास.॥

नञ्, अ, अभाववाचकम्। समासे स्थितस्यास्य स्थाने स्वरे परेऽन् व्यञ्जने परे अकारो विकल्पेन भवति। यथा। अनन्त. नान्त.। अच्युतः नच्युत.। अस्यार्थाः षट्। सादृश्यम् १ यथा अब्राह्मणः॥ अभावः २ यथा अपापम्॥ अन्यत्वम् ३ यथा अघटः पटः॥ अल्पत्वम् ४ यथा अनुदरी कन्या॥ अप्राशस्त्यम् ५ यथा अकेशी॥ विरोध. ६ यथा असुर। इति मुग्धबोधटीकायां दुर्गादास.॥ यथा, मेदिनी।
"नञभावे निषेधे च स्वरूपार्थेऽप्यतिक्रमे।
ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः॥"
नकारश्च॥

नट, नृत्ये। हिंसे। इति कविकल्पद्रुमः॥ (भ्वा-पर-नृत्ये अक-हिंसे सक-सेट्।) नटति। इति दुर्गादास.॥

नट, क भ्रंशे। लिपि। इति कविकल्पद्रुमः॥ (चुरा-पर-अक-सेट्।) भ्रंशोऽध पतनम्। सान्दनार्थोऽयमिति राम। क, नाटयति। इति दुर्गादास.॥

नट, म नृतौ। इति कविकल्पद्रुमः॥ (भ्वा-पर-अक-सेट्।) म, प्रणटयति। इति दुर्गादास॥

नट पुं, (नमतीति। नम+"जनिदाच्युसिति।" उणा ४।१०४। इति डटः।) शोणाकवृक्षः। (नटति नृत्यतीति।नट+अच्। यद्वा, नमतीति। नम+डट) नर्त्तकः। नेटुया इति भाषा। (यथा, देवीभागवते।१।७।४२।
"नं क्रीडसे निजविनिर्म्मितमोहजाले
नाय्यो यथा विहरते स्वकृते नटो वै॥")
तत्पर्य्यायः। शैलाली २ शैलूष ३ जायाजीव. ४ कृशाश्वी ५ भरतः ६। इत्यमरः।२।१०।१२॥ सर्व्ववेशी ७ भरतपुत्त्रकः ८ धात्रीपुत्त्र ९ रङ्गजीव १० रङ्गावतारक. ११। इति हेमचन्द्रः।२।२४२॥ अशोकवृक्षः। इति मेदिनी। टे, २०॥ किण्वपुष्पा। इति जटाधर.॥ नल इति भाषा। (मदनवृक्षम्।

तत्पर्य्यायो यथा,—
"मदनश्छर्द्दनः पिण्डी नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शल्यको विषपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
अशोकः। अस्य पर्य्यायो यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लव.।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा॥")
वर्णसङ्करजातिविशेषः। यथा, पराशरपद्धतौ।
"शौण्डिक्यां शौण्डिकाज्जातो नटो वरुड एव च।"
व्रात्यायां क्षत्त्रियाज्जात.। (यथा, मनुः।१०।२२।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड एव च॥"
हनूमन्मते दीपकरागस्य रागिणी। अस्या जातिः सम्पूर्णा। ग्रहं षड्जस्वर। ग्रीष्मर्त्तौ दिवसान्तो गानसमयः। रागमालायामस्याः स्वरूपं रक्तवर्णा नारी नवयौवना सालङ्कृता अश्वारूढा पुरुषवत् परिहितवसना निष्कोषकरवाल धृत्वा शत्रूनाक्रममाणा। इति सङ्गीतशास्त्रम्॥ नारदपुराणमते श्रीरागस्य पुत्त्रः॥

नटन, क्ली, (नट+भावे ल्युट्।) नृत्यम्। इत्यमरः।१।७।१०॥ (यथा, पञ्चतन्त्रे।३।२१७।
"किं गाण्डीवस्फुरगुरुधनास्फालनक्रूरपाणिर्नासीछ्रीलानटनविलसन्मेखली सव्यसाची॥")

नटनारायणः, पुं, (नटानां नारायण इव।) रागविशेष.। हनूमन्मते मेघरागस्य तृतीयपुत्त्रः। भरतमते दीपकरागस्य तृतीयपुत्त्रः। सोमेश्वरमते कल्लिनाथमते च षड्रागाणां शेषराग.। तस्य भार्य्याः षट्। यथा, त्रोटकी १ त्रिभङ्गी २ पूर्व्वी ३ गान्धारी ४ वराभा ५ सिन्धुमल्लारी ६। सोमेश्वरमते तस्य रागिण्यो यथा। कामदा १ कल्याणी २ आभीरी ३ नाटकी ४ सारङ्गी ५ नटहम्मीरी ६। रागिणीभिः सहास्य हिमर्त्तौ गानसमयः। इति सङ्गीतशास्त्रम्॥

नटभूषण, क्ली, (नटानां भूषणं मण्डनं यस्मात्।) हरितालम्। इति रत्नमाला॥

नटमण्डन, क्ली, (नटानां मण्डनं यस्मात्।) हरितालम्। इति हेमचन्द्रः।४।१२५॥

नटवरः, पुं (नटेषु वरः श्रेष्ठः।) नटश्रेष्ठः। यथा,
"बर्हापीडं नटवरवपु. कर्णयो. कर्णिकारम्॥"
इति श्रीभागवतम्॥

नटसंज्ञक पुं, (नटस्य संज्ञा संज्ञा यस्य। कप्।) गोदन्ताख्यहरितालम्। इति त्रिकाण्डशेष.॥ (स्वार्थे कन्) नटश्च॥

नटान्तिका, स्त्री, (अन्तयति नाशयतीति। अन्त+ण्वुल्+टापि अत इत्वम्। नटस्य नटकार्य्यस्य अन्तिका।) लज्जा। इति हारावली।१५३॥

नटी, स्त्री, (नटति शोभते इति। नट्+अच्। ङीष्।) नलीनामगन्धद्रव्यम्। इत्यमरः।२।४।१२८॥ (नटति नृत्यतीति। नट्+अच्। ङीष्।) वेश्या। इति शब्दरत्नावली॥ नटपत्नी च॥ (यथा, भागवते।८।८।१२।

"जगुर्भद्राणि गन्धर्व्वा नटाश्च ननृतुर्जगुः ॥"
इयं हि मध्यमकारपुण्यकुलनायिकान्तर्गता।
यथा, तन्त्रसारे।
"नटी कापालिनी वेश्या रजकी नापिताङ्गना।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्या च नव कन्याः प्रकी-
र्त्तिताः ॥")

नटेश्वरः, पुं, (नटानामीश्वरः। नृत्यप्रियत्वात् तथात्वम्।) शिवः। इति हेमचन्द्रः।२।११२॥

नड, क भ्रंशे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, नाडयति। भ्रंशोऽधःपतनम्। इति दुर्गादासः॥

नडः, पुं, (नलतीति। नल+अच्। लस्य डत्वम्।) नलतृणम्। इत्यमरः।२।४।१६५॥ (यथा, वेदे।६।१३८।५।
"यथा नडं कशिपुने स्त्रियो भिन्दन्त्यश्मना॥")
जातिभेदः। इति पुनपुस्तकसंग्रहटीकायां मधुव्यथर्व्वरेशः॥

नडकीयः, त्रि, (नडाः सन्त्यत्र। नड+"नडादीनां कुक् च।" ४।२।९१। इति छः कुगागमश्च।) नलसमूहदेशः। इति हेमचन्द्रः।४।२०॥

नडप्रायः, त्रि, (नडः प्रायेण यत्र।) नलबहुलदेशः। तत्पर्य्यायः। नडकीयः २ नड्वान् ३ नड्वलः ४। इति हेमचन्द्रः।४।२०॥

नडमीनः, पुं, (नलस्थितो मीनः। लस्य डत्वम्।) चिलिचिममत्स्यः। नलमीन इत्यमरदर्शनात् डलयोरैक्यम्॥

नडसंहतिः, स्त्री, (नडानां संहतिः समूहः।) नडसमूहः। तत्पर्य्यायः। नड्या २। इत्यमरः।२।५।१६८॥ नड्सञ्चयः ३। इति शब्दरत्नावली॥

नडह, त्रि, (नडं अपरिस्कृतस्थानं हन्तीति। हन+डः।) कान्तः। ललितः। इति भूरिप्रयोगः॥

नड्या, स्त्री, (नडानां समूहः। "पाशादिभ्यो यः।" ४।२।४९। इति यः।) नडसमूहः। इत्यमरः।२।५।१६८॥

नड्वलः, त्रि, (नडाः सन्त्यत्र। नड+"नड्शादात् ड्वलच्।"४।२।८८। इति ड्वलच्।) नलबहुलदेशः। इत्यमरः।२।१।९॥ (यथा, रघुः।१८।५।
"यो नड्वलानीव गजः परेषां
बलान्यमृद्नान्नलिनाभवक्त्रः॥")

नड्वान्, [त्] त्रि, (नडाः सन्त्यत्र। नड+"कुमुदनडवेतसेभ्यो ड्मतुप्।" ४।२।८७। इति ड्मतुप्। डित्वात् टिलोपः। मस्य वः।) नलबहुलदेशः। इत्यमरः।२।१।९॥

नड्वाभूः, स्त्री, कुट्टिमः। इति भूरिप्रयोगः॥

नत, क्ली, (नम+क्तः।) तगरपादी। तगरमूलम्। इति मेदिनी। ते, २९॥ (पर्य्यायोऽस्य यथा,—
"कालानुशारिवावक्रं तगरं कुटिलं शठम्।
महोरगं नतं जिह्मं दीनं तगरपादिकम्॥"
इति वैद्यकरत्नमालायाम्॥)

नतः, पुं, (नमति स्मेति। नम+क्तः।) जन्मनाडिकाविशेषः। तद्यथा,—
"असत्कृतकर्म्मणा येन यान्ति हक्तुल्यतां दिवि।
नतोन्नतौ ततः साध्यौ भावा. खेटबलानि च॥
दिनार्द्धान्तरिता जन्मनाड़िका नतनाड़िका।
पूर्व्वापरार्द्धे जातस्य प्राक्पराख्या दिने भवेत्॥
रात्रेर्गतघटीशेषघटीदिनार्द्धसंयुता।
परपूर्व्वाभिधा ज्ञेया रजन्यां नतनाडिका॥"
इति कोष्ठीप्रदीपः॥

नतः, त्रि, (नम+क्तः।) कुटिलः। नम्रः। इति मेदिनी। ते, २९॥ (यथा, हरिवंशे। २०१।३९।
"पतन्ति युगपत् सर्व्वे पादयोर्मूर्द्धभिर्नताः॥")

नतद्रुमः, पु, (नतो द्रुमः।) लताशालः। इति रत्नमाला॥

नतनासिकः, त्रि, (नता नासिका यस्य।) अल्पनासिकायुक्तः। खाँदा इति भाषा। तत्पर्य्यायः। अवटीटः २ अवनाटः ३ अवभ्रटः ४। इत्यमरः।२।६।४५॥

नताङ्गी, स्त्री, (नतमङ्गमस्याः। ङीष्।) नारी। इति राजनिर्घण्टः॥

नतिः, स्त्री, (नम+भावे क्तिन्।) नमनम्। नम्रता। यथा,—
"नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृतिर्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो
गिराम्।
लावण्यं वपुषः स्मृतिः सुमनसः शान्तिर्द्विजस्य
क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्ड-
नम्॥"
इति नवरत्नम्॥
(नतिलक्षणादिकन्तु नमस्कारशब्दे द्रष्टव्यम्॥)

नद, टु इ संद्धि। इति कविकल्पद्रुमः॥ (भ्वां परं अक-सेट्।) टु, नन्दथुः। इ, नन्द्यते। संद्धि आनन्दयुक्तभावे। ननन्द पारिप्लवनेत्रया नृपः। नन्दते च कुलं पुंसाम्। इति गणकृतानित्यत्वात्। इति दुर्गादासः॥

नदः, पु, (नदति प्रवाहवेगेन शब्दायते इति। नद+अच।) पूर्व्वपश्चिमखातावच्छिन्नजलप्रवाहः। (यथा, मनुः।६।९०।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिनः सर्व्वे गृहस्थे यान्ति संस्थितिम्॥")
स च सिन्धुभैरवशोणघर्घरभीमोदरब्रह्मपुत्त्रादिः। तत्पर्य्यायः। पुनर्व्वहः २ भिद्यः ३ उद्यः ४ सरस्वान् ५। इति हेमचन्द्रः।४।१५६॥
"अष्टषष्टिस्तु तीर्थानि नदाश्च दशकोटयः॥"
इति पाद्मे भूखण्डे ८५ अध्यायः॥

नदनुः, पु, (नदतीति। नद+"अनुङ् नदेश्च।" उणां ३।५२। इति अनुङ्।) मेघः। इत्युणादिकोषः॥ (यथा ऋग्वेदे।८।२१।१४।
"यदा कृणोषि नदनुं समूहस्यादित् पितेव
हूयसे॥")
सिंहः। इति शब्दमाला॥ (नद+भावे अनुङ्। शब्दः। यथा, ऋग्वेदे।६।१८।२
"स युध्मः सत्वा खजकृत्समद्वा
तुविम्रक्षो नदनुमाँ ऋजीषी॥")

नदी, स्त्री, (नदतीति। नद+अच्। पचादिगणे नदट् इति निर्द्देशात् टिड्ढेति ङीप्।) अष्टसहस्रधनुरन्यूनथाप्ततोया। सा च गङ्गायमुनासरस्वतीकावेरीगोदावरीप्रभृतिः। तस्या लक्षणमाह छन्दोगपरिशिष्टम्।
"धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते।
न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः॥"
इति तिथितत्त्वम्॥
तत्पर्य्यायः। सरित् २ तरङ्गिणी ३ शैवलिनी ४ तटिनी ५ ह्रदिनी ६ धुनी ७ स्रोतस्वती ८ द्वीपवती ९ स्रवन्ती १० निम्नगा ११ आपगा १२। इत्यमरः।१।१०।३०॥ ह्रादिनी १३ धुनिः १४ स्रोतस्विनी १५ स्रोतोवहा १६ सागरगामिनी १७ अपगा १८। इति भरतः॥ निर्झरिणी १९ सरस्वती २० समुद्रगा २१ कूलङ्कषा २२ कूलवती २३ शैवालिनी २४ सिन्धुः २५ समुद्रकान्ता २६ सागरगा २७ कर्षा २८ रोधोवती २९ वाहिनी ३०। तज्जलगुणाः। स्वच्छत्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। रुच्यत्वम्। तृष्णापहत्वम्। पथ्यत्वम्। मधुरत्वम्। ईषद्गुणत्वञ्च॥ *॥
"सर्व्वा गुर्व्वी प्राङ्मुखी वाहिनी स्या-
ल्लघ्वी पश्चाद्वाहिनी निश्चयेन।
देशे देशे तद्गुणा सा विशेषा-
न्नैषा धत्ते गौरवं लाघवञ्च॥
प्रायो मृदुवहा गुर्व्वी लघ्वः शीघ्रवहाः स्मृताः।
नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः॥
हिमवत्प्रभवा याश्च जलं तास्वमृतोपमम्॥
विन्ध्यात् प्राची प्राच्यवाची प्रतीची
या चोदीची स्यान्नदी सा क्रमेण।
वातारोग्यं श्लेष्मपित्तार्त्तिलोपं
पित्तोद्रेकं पथ्यपाकञ्च धत्ते॥
पारियात्रभवा याश्च विन्ध्याख्यप्रभवाश्च याः।
शिरोहृद्रोगकुष्ठानां ता हेतुः श्लीपदस्य च॥"
इति राजनिर्घण्टः॥
(यथा च।
"तथा प्राच्यां गमाश्चान्याः पश्चिमानुगमास्तथा।"
"ससैकता सपाषाणा द्विविधा चाम्बुवाहिनी।
एवं चतुर्व्विधा नद्यो वातपित्तकफात्मिकाः॥
सदावहायास्तनवद्यसूर्णां
मरुत्कफानां शमनञ्च तस्याः।
नीरं वसन्ते हितकृद्विशेषात्
नदीभवं नैव हिमागमे च॥
घनविमलशिलानां स्फालनाभ्यातफेनं
बहुलसजलवीचिक्षुन्नसंक्षोभक्षमम्।

नतु लघु च सुशीतं नैव चोष्णं घनञ्च
हरति पवनपित्तं श्लेष्मकृद्वारि सम्यक् ॥
इति पाषाणनदीवारिगुणाः ॥ * ॥
सुघनविमलतोयं सैकतायाः प्रवाहे
न च भवति लघुत्वं श्लेष्मकृद्धन्ति पित्तम् ।
भवति मधुरमेवं किञ्चिदुष्णं कषायं
भवति च सुखकृत्तच्छोषकृच्छ्रौ निहन्ति ॥
इति सवालुकानदीवारिगुणाः ॥ * ॥
हिमवत्प्रभवा नद्यः पुण्या देवर्षिसेविताः ।
घनपाषाणसिकतावाहिन्यो विमलोदकाः ॥
हन्ति वातकफं तोयं श्रमशोषविनाशनम् ।
किञ्चित् करोति वा पित्तं त्रिदोषशमनाक्षमम् ॥
मलयप्रभवा नद्यः शीततोयाऽमृतोपमाः ।
हन्ति वातञ्च पित्तञ्च भ्रमशोषश्रमापहम् ॥
गङ्गा सरस्वती शोनं यमुना सरयुः सची ।
वेणा इरावती नीला उत्तरात् पूर्व्ववाहिनी ॥
हिमवत्प्रभवा ह्येता हिमसम्भवशीतलाः ।
समाः सर्व्वगुणैर्नद्यो वातश्लेष्महरा नृणाम् ॥
आसां नवशतैर्युक्ता गङ्गा पूर्व्वसमुद्रगा ।
तथा चर्म्मण्वती वेत्रवती पारावती तथा ॥
सिप्रा महाप्रदीपा च ऋषिकुल्या पयस्विनी ।
शैवन्ती शैवलिन्यश्च सिन्धुयुक्ताः समुद्रगाः ॥
वातपित्तहरं नीरं त्रिदोषघ्नमतः परम् ।
श्रमग्लानिहरं हृद्यं उत्तराशानुगामिनी ॥
इति नद्य उत्तरानुगाः ॥ * ॥
तापी तापा च गोलोमी गोमती शालिता मही ।
सरस्वतीयुता नद्यो नर्म्मदा पश्चिमानुगा ॥
आसां जलं घनं शीतं पित्तघ्नं कफकृत्तथा ।
वातदोषहरं हृद्यं कण्डूकुष्ठविनाशनम् ॥
पश्चिमादिसमुद्भूता गौतमी पुण्यभावना ।
अस्याः शीतं जलं वापि कफवातविकारकृत् ॥
पित्तप्रशमनं बल्यं सर्व्वदोषविकारहृत् ।
पुण्या पयस्विनी वेता प्रणीता च वरानना ॥
द्रोणा गोवर्द्धनी चान्या गौतम्यानुगता इमाः ।
आसां जलं घनं नातिवातश्लेष्मविकारकृत् ॥
पूर्व्वसागरगाश्चैव नद्यो नवशतैर्युताः ॥
कावेरी वीरकान्ता च भीमा चैव पयोष्णिका ।
विभावरी विशाला च गौरोदा मदनस्वसा ॥
पार्व्वती चापरा नद्यो दक्षिणादिग्गमा इमाः ।
प्रत्येकशो न सेवेत युक्तायाश्च पृथक् पृथक् ॥
सर्व्वासां परिसङ्ख्या च शतानाञ्चैकविंशतिः ।
क्रोशं क्रोशं भवेत् कुल्या योजने योजने नदी ॥
योजनद्वयतो ज्ञेया महानीरा बुधैर्नदी ॥”
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥
“पश्चिमोदधिगाः शीघ्रवहा याश्चामलोदकाः ।
पथ्याः समासात्ता नद्यो विपरीतास्ततोऽन्यथा ।
उपलास्फालनाक्षेपविच्छेदैः खेदितोदकाः ॥
हिमवन्मलयोद्भूताः पथ्यास्ता एव च स्थिराः ।
कृमिश्लीपदहृत्कण्ठशिरोरोगान् प्रकुर्व्वते ॥
प्राच्यावन्त्यपरान्त्योत्था दुर्नामानिमहेन्द्रजाः ।
उदरश्लीपदातङ्कान् सह्यविन्ध्योद्भवाः पुनः ॥
कुष्ठपाण्डुशिरोरोगान् दोषघ्न्यः पारियात्रजाः ।
बलपौरुषकारिण्यः——————॥”
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥
“तत्र नद्यः पश्चिमाभिमुखाः पथ्या लघूदकत्वात् ।
पूर्व्वाभिमुखास्तु न प्रशस्यन्ते गुरूदकत्वात् ।
दक्षिणाभिमुखा नातिदोषलाः साधारणत्वात् ।”
“प्रायेण नद्यो मरुषु सतिक्ता लवणान्विताः ।
ईषत्कषाया मधुरा लघुपाका बले हिताः ॥”
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥
“वसुधा कीटसर्पाखुमलसन्दूषितोदकाः ।
वर्षाजलवहा नद्यः सर्व्वदोषसमीरणाः ॥”
इति चरके सूत्रस्थाने २७ अध्याये ॥)

भारतवर्षे नद्यो यथा । गङ्गा सिन्धुः सरस्वती शतद्रुः वितस्ता विपाशा चन्द्रभागा सरयूः यमुना इरावती देविका कुहूः गोमती धूतपापा बाहुदा दृषद्वती कौशिकी निम्नीरा गण्डकी चक्षुष्मती लोहिता । इत्येता हिमवत्पादनिर्गताः ॥ वेदस्मृती वेदवती सिन्धुः अपर्णा चन्दना सदानीरा रोहिपारा चर्म्मण्वती विदिशा वेत्रवती वयन्ती । इत्येताः पारियात्रोद्भवाः ॥ शोणा ज्योतीरथा नर्म्मदा सुरसा मन्दाकिनी दशार्णा चित्रकूटा तमसा पिप्पला करतोया पिशाचिका चित्रोत्पला विशाला वञ्जुका वालुका वाहिनी शुक्तिमती विरजा पङ्किनी रिरी । इत्येता ऋक्षप्रसूताः ॥ मणिजाला शुभा तापी पयोष्णी शीघ्रोदा वेणा पाशा वैतरणी वेदी पाला कुमुद्वती तोया दुर्गा अन्या गिरा । एता विन्ध्यपादोद्भवाः ॥ गोदावरी भीमरथी कृष्णा वेणा वञ्जुला तुङ्गभद्रा सुप्रयोगा बाह्यकावेरी शतमाला ताम्रपर्णी पुष्पावती उत्पलावती । इत्येता मलयजाः ॥ त्रियामा ऋषिकुल्या इक्षुरा त्रिदिवाला लाङ्गलिनी वंशवरा महेन्द्रतनया ऋषिका सुधती मन्दगामिनी पलाशिनी । इत्येताः शुक्तिमत्प्रभवाः ॥ एताः प्राधान्येन कुलपर्व्वतनद्यः । शेषाः क्षुद्रनद्यः । इति वराहपुराणम् ॥ * ॥

“कैलासपादसम्भूतं पुण्यं शीतजलं शुभम् ।
मन्दोदकं नाम सरः पयस्तु दधिसन्निभम् ॥
तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा ।
दिव्यञ्च नन्दनन्तत्र तस्यास्तीरे महद्वनम् ॥
प्रागुत्तरेण कैलासात् दिव्यं सौगन्धिकं गिरिम् ।
सर्व्वधातुमयं दिव्यं शबलं पर्व्वतं प्रति ॥
चन्द्रप्रभो नाम गिरिः सशुक्लो रत्नसन्निभः ।
तत्समीपे सरो दिव्यमच्छोदन्नाम विश्रुतम् ॥
तस्मात् प्रभवते दिव्या नदी ह्यच्छोदका शुभा ।
तस्यास्तीरे वनं दिव्यं महच्चैत्ररथं शुभम् ॥
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ।
यक्षसेनापतिः क्रूरैर्गुह्यकैः परिवारितः ॥
पुण्या मन्दाकिनी चैव नदी ह्यच्छोदका शुभा ।
महीमण्डलमध्ये तु प्रविष्टे ते महोदधिम् ॥
कैलासाद्दक्षिणप्राच्यां शिवं सर्व्वौषधिं गिरिम् ।
मनःशिलामयं दिव्यं शबलं पर्व्वतं प्रति ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्य्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत् सरः ॥
तस्मात् प्रभवते पुण्यो लौहित्यश्च नदो महान् ।
देवारण्यं विशोकञ्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो वशी ।
सौम्यैः सधार्म्मिकैश्चैव गुह्यकैः परिवारितः ॥
कैलासात् पश्चिमोदीच्यां ककुद्मानौषधीगिरिः ।
ककुद्मति च रुद्रस्य उत्पत्तिश्चककुद्मतः ॥
तदञ्जनन्त्रैककुदं शैलं त्रिककुदं प्रति ।
सर्व्वधातुमयस्तत्र सुमहान् वैद्युतो गिरिः ॥
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ।
यस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ॥
कैलासात् पश्चिमामाशां दिव्यः सर्व्वौषधिर्गिरिः ।
अरुणः पर्व्वतश्रेष्ठो रुक्मधातुविभूषितः ॥
भवस्य दयितः श्रीमान् पर्व्वतो हेमसन्निभः ।
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ॥
तस्य पादात् प्रभवति शैलोदं नाम तत् सरः ।
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा ॥
सा चक्षुःशीतयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ।
अभ्युत्तरेण कैलासं शिवं सर्व्वौषधिं गिरिम् ॥
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति ।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ॥
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः ।
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥
सोमपादात् प्रसूता सा सप्तधा प्रतिभज्यते ।
भवस्य साङ्गे पतिता संरुद्धा योगमायया ॥
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गया ।
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव च ॥
स्रोतांसि त्रिपथायास्तु प्रत्यपद्यन्त सप्तधा ।
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ॥
शीता वङ्क्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ।
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ॥
तस्माद्भागीरथी सापि प्रविष्टा दक्षिणोदधिम् ।
सप्तैताः प्लावयन्ति स्म वर्षन्तद्धिमसाह्वयम् ॥
प्रसूताः सप्त नद्यस्तु शुभा बिन्दुसरोद्भवाः ।
तान् देशान् प्लावयन्ति स्म म्लेच्छप्रायांश्च सर्व्वशः ॥
सशिलान् कुस्तुरांश्चीनान् वर्व्वरान् यवनान् खसान् ।
स्तनकुलांश्च कुलत्थांश्च अङ्गलौक्यवराश्च यान् ॥
कृत्वा द्विधा हिमवन्तं प्रविष्टा दक्षिणोदधिम् ।
अथ चीनमरूंश्चैव कालकांश्चैव चूलकान् ॥
तुषारान् वर्व्वरान् कारान् पह्लवान् पारदान् शकान् ।
एतान् जनपदान् वङ्क्षुः प्लावयन्त्युदधिं गता ॥
दरदान् कूटजांश्चैव गान्धारानौरसान् कुहून् ।
शिवशैलानिन्द्रमरून् वसातीन् समतेजसा ॥
सैन्धवारङ्कवैरान् कुपथान् भीमरौरुकान् ।
सुनामुखांश्चोर्द्धमरून् सिन्धुरेतान्निषेवते ॥
गन्धर्व्वान् किन्नरान् यक्षान् रक्षोविद्याधरोरगान् ।
कलापग्रामकांश्चैव तथा किंपुरुषान्नरान् ॥

किरातांश्च पुलिन्दांश्च कुरून् वै भरतानपि ।
पाञ्चालकौशिकान् मत्स्यान्मागधाङ्गास्तथैव च ॥
ब्रह्मोत्तरांश्च वङ्गांश्च तामलिप्तांस्तथैव च ।
एतान् जनपदानार्य्यान् गङ्गा तारयते शुभा ॥
ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम् ।
ततस्तु ह्लादिनी पुण्या प्राचीमभिमुखा ययौ ॥
प्लावयन्त्युपकांश्चैव निषादानपि सर्व्वशः ।
धीवरानृषिकांश्चैव तथा नीलमुखानपि ॥
केकरानेकवर्णांश्च किरातानपि चैव हि ।
कालन्दरान् विवर्णांश्च कुशिकान् स्वर्गभूमिकान् ॥
सा मण्डले समुद्रस्य तिरोभूत्वा तु सर्व्वशः ।
ततस्तु पावनी चैव प्राचीमेव दिशं ययौ ॥
कुपथान् प्लावयन्ती सा इन्द्रद्युम्नसरांस्यपि ।
तथा खरपदान् देशान् वेत्रशङ्कुपथानपि ॥
मध्ये चोज्जानकमरून् कुथप्रावरणानपि ।
इन्द्रद्वीपात् समुद्रं सा प्रविष्टा लवणोदधिम् ॥
ततस्तु पावनी प्रायात् प्राचीमाशां जवेन तु ।
तोमरान् प्लावयन्ती सा हंसमार्गान् सहूहकान् ॥
पूर्व्वान् दर्भांश्च सेवन्ती भित्त्वा सा बहुधा गिरिम् ।
कर्णप्रावरणान् प्राप्य गता साश्वमुखानपि ॥
सिकतापर्व्वतमरून् गत्वा विद्याधरान् ययौ ।
वामिमण्डलकोष्ठन्तु सा प्रविष्टा महत् सरः ॥
तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः ।
उपगच्छन्ति ता नद्यो यतो वर्षति वासवः ॥
हेमकूटस्य पृष्ठे तु सर्पाणामुत्सवः स्मृतः ।
सरस्वती प्रभवति तस्मात् ज्योतिष्मती तु या ॥
अवगाहेतोभयतः समुद्रौ पूर्व्वपश्चिमौ ।
सरो विष्णुपदं नाम निषधे पर्व्वतोत्तमे ॥
तस्मात् द्वयं प्रभवति गन्धर्व्वी नकुला च ते ।
मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान् ॥
जम्बूश्चैव नदी पुण्या यस्यां जाम्बुनदं स्मृतम् ।
पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान् ॥
पुण्डरीका पयोदा च तस्माद्वे संप्रसूयते ।
सरस्तु सरसश्चैव स्मृतमुत्तरमानसम् ॥
मृग्या च मृगकान्ता च तस्माद्द्वे संप्रसूयते ।
ह्रदाः कुरुषु विख्याताः पद्ममीनकुलाकुलाः ॥
नाम्ना ते विजया नाम द्वादशोदधिसन्निभाः ।
तेभ्यः शान्ता च माध्वी च द्वे नद्यौ सम्प्रसूयतः ॥"

इति मत्स्यपुराणे १०१ अध्यायः ॥ * ॥

अथ शिप्रादिसप्तनद्युत्पत्तिकारणम् ।
"एवं विवाह्य विधिवत् सौवर्णे मानसाचले ।
अरुन्धती वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे ।
विवाहावभृथार्थाय शान्त्यर्थं ब्रह्मणा कृतम् ॥
ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम् ।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हेमाद्रेः कन्दरे सानौ सरस्याश्च पृथक् पृथक् ।
तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे ॥
तेन शिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम् ।
महाकोषीप्रपाते च यद्वारि पतितन्तु वै ॥
कौशिकी नाम सा जाता विश्वामित्रावतारिता ।
उमाक्षेत्रे यत् पतितं तोयं तेन महानदी ॥
कावेरी नाम सा जाता तदा कावेरसंस्तुता ।
महाकाले सरःश्रेष्ठे पतितं तज्जलं गिरेः ॥
हिमाद्रेः पार्श्वभागे तु दक्षिणे शम्भुसन्निधौ ।
गोमन्ति नाम तज्जाता नदी गोमत्युदीरिता ॥
मैनाको नाम यः पुत्त्रः शैलराजस्य च प्रियः ।
यस्तु तस्मिन् समुत्पन्नो मेनकोदरतः पुरा ॥
तत्तत्र पतित तोयं तस्माज्जाता महानदी ।
देविकाख्या महादेवप्रेरिता सागरं प्रति ॥
तत्तोयं सङ्गतं कुर्य्यात्तया वडवसन्निधौ ।
तेनाभूत् सरयूर्नाम्ना नदी पुण्यतमा शुभा ॥
यान्यम्भांसि महापार्श्वे खाण्डवारण्यसन्निधौ ।
हिमवत्कन्दरे याम्ये इरावद्ध्रदमन्यतः ।
इरावती नाम नदी तेस्तु जाता सरिद्वरा ॥
एताः सर्व्वाः स्नानपानात् स्मरणैर्जाह्नवी यथा ।
फलं ददति मर्त्यानां दक्षिणोदधिगाः सदा ॥
धर्म्मार्थकाममोक्षाणां बीजभूताः सनातनाः ।
महानद्यस्तु सप्तैताः सर्व्वदा देवभोगदाः ॥
एवं नद्यः सप्त जाताः सदा पुण्यतमोदकाः ।
अरुन्धत्या वशिष्ठस्य विवाहे देवसन्निधौ ॥"

इति कालिकापुराणे २३ अध्यायः ॥ * ॥

नद्यादीनां रूपद्वय यथा,—
"नद्यश्च पर्व्वताः सर्व्वे द्विरूपाश्च स्वभावतः ।
तोयं नदीना रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूप कायस्तथापरः ।
शुक्तीनामथ कम्बूनां तथैवान्तर्गता तनूः ॥
वहिरस्थिस्वरूपन्तु सर्व्वदेव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आप्याय्यते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्याय्यते सदा ।
नदीनां कामरूपित्वं पर्व्वतानान्तथैव च ।
जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः ॥
तोयहानौ नदीदुःखं जायते सततं द्विजाः ।
विशीर्णे स्थावरे दुःखं जायते गिरिकायगम् ॥"

इति कालिकापुराणे २२ अध्याय. ॥

तस्या वैदिकपर्य्याय' । अवनय. १ यह्वा २ खाः ३ सीराः ४ स्रोत्याः ५ एन्यः ६ धुनयः ७ रुजानाः ८ वक्षणाः ९ खादोअर्णाः १० रोधचक्राः ११ हरितः १२ सरितः १३ अग्रुवः १४ नभन्वः १५ वध्वः १६ हिरण्यवर्णाः १७ रोहितः १८ ससुतः १९ अर्णाः २० सिन्धवः २१ कुल्याः २२ वर्य्यः २३ उर्व्यः २४ इरावत्यः २५ पार्वत्यः २६ स्रवन्त्यः २७ ऊर्ज्जस्वत्यः २८ पयस्वत्यः २९ सरस्वत्यः ३० तरस्वत्यः ३१ हरस्वत्यः ३२ रोधस्वत्यः ३३ भास्वत्यः ३४ अजिराः ३५ मातरः ३६ नद्य. ३७ । इति सप्तत्रिंशन्नदीनामानि । इति वेदनिघण्टौ । १ । १३ ॥
(चतुर्द्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा,—
"ननतजगुरुगैः सप्तयतिर्नदी स्यात् ॥")

नदीकदम्बः, पु, (नदीनां कदम्बं समूहो यत्र ।) महाश्रावणिका । इति राजनिर्घण्टः ॥ (नदीनां कदम्बम् ।) नदीसमूहे, क्ली ॥

नदीकान्तः, पु (नदीनां कान्तः पतिः ।) समुद्रः । (नदी कान्ता प्रिया यस्य ।) हिज्जलवृक्षः । सिन्धुवारकः । इति मेदिनी । ते, २०० ॥

नदीकान्ता, स्त्री, (नदी कान्ता यस्याः ।) जम्बुवृक्षः । काकजङ्घौषधिः । इति मेदिनी । ते, २०१ ॥ (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) लता । इति हेमचन्द्रः ॥

नदीकूलप्रियः, पुं, (नदीकूलं प्रियं यस्य । नदीकूलजातत्वादस्य तथात्वम् ।) जलवेतसः । इति जटाधरः ॥

नदीजं, क्ली, (नद्या जायते इति । जन + डः ।) स्रोतोऽञ्जनम् । इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
"स्रोतोऽञ्जनं नदीजञ्च कृष्णं स्रोतोजलाञ्जनम् ॥")

नदीजः, पु, (नद्या जायते इति । जन + डः ।) अर्ज्जुनवृक्षः । इति रत्नमाला ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्ज्जुनः॥")
यावनालशरः । हिज्जलवृक्षः । इति राजनिर्घण्टः ॥ (विटमाक्षिकः । इति हेमचन्द्रः । ४ । १२१ ॥ यथा, सुश्रुते उत्तरतन्त्रे । १७ ।
"नदीजशङ्खौकटुकान्यथाञ्जनं
मनःशिला द्वे च निशे यकृद्रसे ॥"
नृपतिविशेषः । यथा, महाभारते । ५ ।४।१९।
"सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ॥"
भीष्मः । गङ्गागर्भजातत्वात् तथात्वम् । यथा, तत्रैव । ५ । १४८ । ३२ ।
"अयन्तु धर्म्मशतया महात्मा
न राज्यकामो नृपरो नदीज. ॥")
नदीजाते, त्रि ॥ (यथा, महाभारते ।७।१०२।८।
"पार्व्वतीयैर्नदीजैश्च सैन्धवैश्च महाहयैः ॥")

नदीजा, स्त्री, (नद्या जायते या सा । जन + डः + टाप् ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

नदीतरस्थानं, क्ली, (नद्यास्तरस्थानमपतरणस्थलम् ।) घट्ट' । इति भूरिप्रयोगः ॥ (नद्या इतरस्थानम् ।) नदीभिन्नस्थानम् ॥

नदीनः, पु, (नदीनां इन' पतिः ।) समुद्र' । इति त्रिकाण्डशेषः ॥ वरुण. । यथा । अयं नदीन इत्याद्युत्तरनैषधः ॥ (अनेनोनशीयस्य सहदेवस्य पुत्त्रः । यथा, हरिवंशे । २९ । ४ ।
"सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः ।
नदीनस्य जयत्सेनो जयत्सेनस्य सत्कृतिः ॥"
न दीनः इति नञ्समासे दरिद्रभिन्ने, त्रि ॥)

नदीनिष्पावः, पु, (नदीसम्मुखजातो निष्पाव. ।) धान्यभेदः । तत्पर्य्यायः । कटनिष्पावः २ कर्बुर' ३

नदीश: ४। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। अग्निप्रदत्वम्। गुरुत्वम्। वातलत्वम्। कफदत्वम्। रूक्षत्वम्। कषायत्वम्। विषदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

नदीमातृकः, त्रि, (नदी मातेव पोषिका यस्य। कप्।) नद्यम्बुसम्पन्नव्रीहिपालितदेशः। इत्यमरः। २। १। १२॥

नदीवङ्कः, पुं, (नद्या वङ्कः।) पङ्कुरः। इति शब्दमाला॥ बाँक इति भाषा॥

नदीवटः, पुं, (नदीसमीपजातो वटः।) वटी वृक्षः। इति राजनिर्घण्टः॥

नदीष्णः, त्रि, (नद्यां स्नातीति। स्ना+ "सुपि स्थः।"३।२।४। इति कः। "निनदीभ्यां स्नातेः कौशले।" ८। ३। ८९। इति षत्वम्।) नद्यवगाहनदक्षः। नदीस्नानकुशलः। इति भट्टिटीकायां पुण्डरीकाक्षः॥ नदीश। इति पुरुषोत्तमः॥ यथा,—
"ततो नदीष्णान् पथिकान् गिरिज्ञान्॥"
इति भट्टिः॥

नदीसर्जः, पुं, (नद्याः सर्ज इव। नदीतीरजातत्वादस्य तथात्वम्।) अर्ज्जुनवृक्षः। इत्यमरः। २। ४। ४५॥ (पर्य्यायोऽस्य यथा,—
"ककुभोऽर्ज्जुननामाख्यो नदीसर्ज्जश्च कीर्त्तितः।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नदेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक्। पृषोदरादित्वात् ह्रस्वः।) नादेयी। भूमिजम्बुः। इति शब्दचन्द्रिका॥

नद्ध, त्रि, (नह्यते स्मेति। नह+क्त।) बद्धः। (यथा, हरिवंशे। २३२। १७।
"दिवेव कवचैर्नद्धा दिवेवोष्णिकृतैर्ध्वजैः॥")
उद्दृत्त। इति मेदिनी। धे, ८॥

नद्ध्री, स्त्री, (नह्यतेऽनया। नह+दाम्नीति ष्ट्रन्। ततो ङीष्।) चर्म्मरज्जुः। इत्यमरः।२।१०।३२॥ (यथा, प्रद्युम्नविजये चतुर्थाङ्के।
"अत्रापि धिग् नद्ध्रयि पुत्त्रकलत्रमित्र-
नद्ध्रावनद्धहृदयो न च त स्मरामि॥")

नद्याम्र, पुं, (नद्या आम्र इव।) समष्ठिलावृक्षः। इति राजनिर्घण्टः॥

नद्युत्क्षष्ट, त्रि, (नद्या उत्कृष्टः।) नदीकमृकत्वक्तवस्तु। तद्रूपभूखण्डस्य चर इति चढ़ा इति च भाषा॥ नद्युत्कृष्टा भूमिस्तु यस्याधिकारे जाता तस्यैव भवति। यथा,—
"नद्युत्कृष्टा राजदत्ता यस्य तस्यैव सा मही।
अन्यथा न भवेल्लाभो नराणां राजदैविकः॥
क्षयोदयौ जीवनञ्च दैवराजवशान्नृणाम्।
तस्मात् सर्व्वेषु कार्य्येषु तत्कृतं न विचालयेत्॥"
इति विवादचिन्तामणिविवादरत्नाकरवीरमित्रोदयप्रभृतिग्रन्थधृतवचनम्॥

ननन्दा, [ऋ] स्त्री, (न नन्दति तुष्यति सेवयापि। नञ्+नन्द+"नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ।" उणां २।९६। इति ऋन्। केचित्त्वस्मतेन ह्रस्वः। भाषा।) भर्तृभगिनी। ननद इति भाषा॥ तत्पर्य्यायः। ननान्दा २ नन्दिनी ३ नन्दा ४ पतिस्वसा ५। इति शब्दरत्नावली॥

ननान्दा, [ऋ] स्त्री, (न नन्दति सेवयापि। नञ्+"नप्तृ च नन्देः।" उणां २। ९६। इति धातुः वृद्धिश्च।) ननन्दा। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०। ८५। ४६।
"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥")

ननु, व्य, (न नुदति प्रेरयतीति। नुद्+मितद्र्वादित्वात् डुः।) प्रश्नः। दृष्टा। अवधारणम्। (यथा, रघुः। १। ६०।
"उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे।
दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्॥")
विषयः। (यथा, महाभारते। १३। ६। १८।
"लोके दैवं समालम्ब्य उदासीनो भवन्ननु॥")
अनुज्ञा। (यथा, शिशुपालवधे। ८। ६१।
"ननु सन्दिशेति सुदृशोदितया
त्रपया न किञ्चन किलाभिदधे॥")
अनुमतिः। अनुनयः। सान्त्वनम्। आमन्त्रणम्। सम्बोधनम्। (यथा, कुमारे। ४। ३२।
"विधुरां ज्वलनातिसर्ज्जनात्
ननु मां प्रापय पत्युरन्तिकम्॥")
एषामुदाहरणानि यथा,—
"प्रश्ने ननु ब्रवीम्यहं। अवधारणे ननु गच्छामः। अनुज्ञायां सर्व्वेषु ध्यायताम्। अनुनये ननु चण्डि। प्रसीद। आमन्त्रणे ननु चैत्र। विरोधोक्तिः। इत्यमरभरतौ। विनिग्रहः। अनुग्रहः। परकृतिः। अधिकारः। सम्भ्रमः। इति मेदिनी। ने, ४४॥ आक्षेपः। प्रत्युक्तिः। वाक्यारम्भः। इति हेमचन्द्रः। ६। १७८॥ उत्प्रेक्षालङ्कारव्यञ्जकम्। यथा,—
"मन्ये शङ्के ध्रुवं नूनं किंवा प्रायोऽनुयेमि च।
ननु नाम हि जानामि उत्प्रेक्षाव्यञ्जकानि च॥"
इति काव्यचन्द्रिका॥

ननुच, व्य, विरोधोक्तिः। इत्यमरः।३। ४। १४॥ ननुचेति समुदितं विरोधवचने ननुशब्दो विरोधोक्तौ चकारात् ननुचेति वा। इति भरतः॥

नन्दः, पुं, (नन्दतीति। नन्द+पचाद्यच्।) विष्णुः। यथा। "आनन्दो नन्दनो नन्दः।"इति महाभारते। १३। १४९। ६९॥ नरपतिभेदः। स तु महानन्दिसुतः क्षत्त्रियवंशान्तः। (यथा, भागवते। १२। १। ७—११।
"महानन्दिसुतो राजन्। शूद्रागर्भोद्भवो बली।
महापद्मपतिः कश्चिन्नन्दः क्षत्त्रविनाशकृत्।
ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्म्मिकाः॥
स एकच्छत्त्रां पृथिवीमनुल्लङ्घितशासनः।
शासिष्यति महापद्मो द्वितीय इव भार्गवः॥
तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः।
य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः॥
नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति।
तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ॥")
आनन्दः। निधिविशेषः। इति पुराणशब्दरत्नावल्यौ॥ गोपभेदः। स च श्रीकृष्णपिता।
नन्दः पुरा द्रोणनामा वसुरासीत्। यथा,—
"द्रोणो वसूनां प्रवरो धरया सह भार्य्यया।
करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह॥
जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ।
भक्तिः स्यात् परमा लोके ययाञ्जो दुर्गतिन्तरेत्॥
अस्त्वित्युक्तः स भगवान् व्रजे द्रोणो महायशाः।
जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत्॥"
इति श्रीभागवते। १०। ८। ४८—५०॥
वेणुविशेषः। यथा,—
"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा।
चत्वार उत्तमा वंशा मातङ्गमुनिसम्मताः॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः॥"
इति सङ्गीतदामोदरः॥
(मृदङ्गविशेषः। यथा, महाभारते।९।२२।८५।
"मृदङ्गौ चात्र विपुलौ दिव्यौ नन्दोपनन्दकौ॥"
स्कन्दस्यानुचरविशेषः। इति महाभारते। ९। ४५। ६१॥ नागविशेषः। इति महाभारते। ५। १०३। १२॥ यक्षेश्वरस्यानुचरविशेषः। यथा, भागवते। ४। ७। २२।
"इदं हवीर्यार्हविश्वादनोत्तम
यज्ञेश्वर विश्वहर्त्ता परं गुरुम्।
सुनन्दनन्दाद्यनुगैर्वृतः सदा
गृणन् प्रपद्ये प्रयतः कृताञ्जलिः॥"
धृतराष्ट्रस्य पुत्त्राणामन्यतमः। इति महाभारतम्। १। ६७। ९६॥ मदिरागर्भजातो वसुदेवस्य पुत्त्रविशेषः। इति भागवतम्। ९। २४। ४८॥ क्रौञ्चद्वीपस्य वर्षपर्व्वतविशेषः। इति भागवतम्। ५। २०। २१॥ स्वनामख्यातो दत्तकमीमांसाग्रन्थप्रणेता। यथा,—
"अभिवन्द्य जगद्वन्द्यपदद्वन्द्वविनायकम्।
पुत्त्रीकरणमीमांसा क्रियते नन्दपण्डितैः॥")

नन्दकः, पुं, (नन्दयतीति। नन्द+ण्वुल्।) विष्णुखड्गः। इत्यमरः। १। १। ३०॥ (यथा, हरिवंशे। १२७। ४४।
"रथाङ्गेनाथ शार्ङ्गेण गदया नन्दकेन च।
प्रहारार्त्तस्य गरुडः स्थितो भूत्वा जनार्द्दन॥")
भेकः। इति त्रिकाण्डशेषः॥ हर्षके कुलपालके च त्रि। इति मेदिनी। के, १०९॥ कृष्णपिता आनन्द। आनन्दकारकश्च॥ (नागविशेषः इति महाभारतम्। ५। १०३। ११॥ स्कन्दस्यानुचरविशेषः। इति महाभारतम्। ९। ४५। ६६॥ धृतराष्ट्रस्य पुत्त्रविशेषः। इति महाभारतम्। १। १८७। ३॥)

नन्दकि, स्त्री, पिप्पली। इति शब्दचन्द्रिका॥

नन्दकी, [न्] पुं, (नन्दकः खड्गोऽस्यास्तीति। नन्दक+इनिः।) विष्णुः। यथा,—
"शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः॥"
इति महाभारते शान्तिपर्व्व॥

नन्दगोपिता, स्त्री, (नन्दाय हर्षाय गोपिता रक्षिता।) रास्ना। इति शब्दचन्द्रिका॥

विशुद्धन्ते नरा देवि यान्ति देव्याः प्रसादतः ॥"
इति देवीपुराणम् ॥
(कामधेनुविशेषः । यथा, वह्निपुराणे कामधेनु-प्रदानामाध्याये ।
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा ।
निर्गता मथ्यमानेऽब्धौ उग्रं स्थानं शुभप्रदम् ॥"
अस्या दानविधिस्तु कामधेनुशब्दे द्रष्टव्यः ॥
धर्म्मपुत्त्रस्य हर्षस्य पत्नी । आनन्दस्वरूपतया एवास्यास्तथात्वम् । यथा, महाभारते । १ । ६६ । ३३ ।
"नन्दा तु भार्य्या हर्षस्य यासु लोकाः प्रति-ष्ठिताः ॥"
शाकद्वीपान्तर्गतनदीविशेषः । यथा, मात्स्ये । १२१ । ३१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥"
"एताः सप्त महाभागाः प्रतिवर्षं शिवोदकम् ।
भावयन्ति जनं सर्व्वं शाकद्वीपनिवासिनम् ॥"
द्विशालगृहविशेषः । यथा, विश्वकर्म्मप्रकाशे ७ अध्याये ।
"नन्दाख्यं तद्विशालञ्च धनदं शोभनं स्मृतम् ॥")

नन्दात्मजः, पुं, (नन्दस्य आत्मजः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, पाद्मोत्तरखण्डे १११ अध्याये ।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥")
दुर्गायाम्, स्त्री ॥

नन्दि, पुं, स्त्री, (नन्दयतीति । नन्दि + "सर्व्व-धातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) द्यूताङ्गम् । (भावे इन् ।) आनन्दः । (यथा, महाभारते । २ । १८ । ११ ।
"सोऽवर्द्धत महातेजा मगधाधिपतेः सुतः ।
मातापित्रोर्नन्दिकरः शुक्लपक्षे यथा शशी ॥"
एतदर्थे स्त्रीलिङ्गेऽपि दृश्यते । यथा, तत्रैव । ५ । १४५ । २० ।
"अतो मे भूयसी नन्दिर्यद्देवमनुपश्यसि ॥")
नन्दिकेश्वरे, पुं । इति मेदिनी । दे, ६ ॥ (यथा, महाभारते । १३ । १४ । २७५ ।
"पुरस्ताच्चैव देवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शङ्करम् ॥")
विष्णुः । यथा, महाभारते । १३ । १४९ । ७९ ।
"स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥"
(महादेवः । यथा, तत्रैव । १३ । १७ । ७४ ।
"निमित्तस्थो निमित्तञ्च नन्दिर्नन्दिकरो हरिः ॥")

नन्दिकः, पुं, (नन्द आनन्दः हेतुतयास्त्यस्येति । नन्द + ठन् ।) नन्दीवृक्षः । इति शब्दरत्ना-वली ॥ (नन्दिरेव । स्वार्थे कन् ।) आनन्दः ॥

नन्दिका, स्त्री (नन्द आनन्द अस्त्यस्यामिति । ठन् ।) इन्द्रक्रीडास्थानम् । इति शब्दमाला ॥ (नन्दा + स्वार्थे कन् । टापि अत इत्वम् ।) अलिञ्जरः । इति शब्दरत्नावली ॥ षष्ठीतिथिः । यथा, तिथितत्त्वे ।
"कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम् ॥"
प्रतिपदेकादश्यौ च ॥

नन्दिकेश्वरः, पुं, (नन्दिक ईश्वरश्च ।) शिवद्वार-पालः । तत्पर्य्यायः । नन्दी २ शालङ्कायनः ३ ताण्डवतालिकः ४ । इति त्रिकाण्डशेषः ॥ नन्दीश्वरः ५ तण्डुः ६ । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १८२ । ८६ ।
"ततो नन्दिं महादेवः प्राह गम्भीरया गिरा ।
नन्दिकेश्वर ! गच्छाद्य यतो बाणो रणे स्थितः ॥")
उपपुराणविशेषश्च ॥

नन्दिघोषः, पुं, (नन्दिरानन्दजनको घोषो यस्य ।) अर्ज्जुनस्य रथघोषः । वन्दिजनघोषः । इति मेदिनी । षे, ५३ ॥ मङ्गलघोषणा च ॥ (हर्ष-घोषयुक्ते, त्रि । यथा, महाभारते । १३ । १०७ । १०५—१०८ ।
"पक्षपक्षे तु दिवसे यः प्राशेदेकभोजनम् ।
सदा द्वादशमासांस्तु पुष्कलं यानमारुहेत् ॥
सिंहव्याघ्रप्रयुक्तैस्तु मेघनिस्वननादितैः ।
स रथैर्नन्दिघोषैश्च पृष्ठतोऽप्यनुगम्यते ॥
देवकन्यासमारूढे काञ्चनैर्विमले शुभे ।
विमानमुत्तमं दिव्यमास्थाय सुमनोहरम् ॥
तत्र कल्पसहस्रं वै वसते स्त्रीशतावृते ।
सुधारसोपजीवममृतोपममुत्तमम् ॥")

नन्दितरुः, पुं, (नन्दिरानन्दजनकस्तरुः ।) धव-वृक्षः । इति भावप्रकाशः ॥

नन्दिनी, स्त्री, (नन्दयतीति । नन्दि + णिनिः । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशे ।
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ॥")
जटामांसी । तत्पर्य्यायो यथा, वैद्यकरत्न-मालायाम् ।
"नलदं नन्दिनी पेशी मांसी कृष्णजटा जटी ।
किराततिक्ता जटिला लोमशा तु तपस्विनी ॥")
उमा । गङ्गा । ननान्दा । वशिष्ठधेनुः । इति मेदिनी । ने, ८१ ॥ सा च धेनुः सुरभिकन्या । यथा, दिलीपं प्रति वशिष्ठवाक्यम् ।
"पुरा शक्रमुपस्थाय तवोर्व्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥
इमां देवीमृतुस्नातां स्मृत्वा सपदि सत्वरः ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥"
"इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥"
इति रघुः । १ । ७५-८२ ॥
इमामेवाराध्य लब्धवरो दिलीपो रघुनामानं वंशतिलकं पुत्त्रं लब्धवान् ॥ * ॥
द्योनामा वसुः पत्नीवाक्यात् एनां हृत्वा वशिष्ठ-शापतः पृथिव्यां भीष्मनाम्ना विख्यात आसीत् । एतत्कथा यथा, महाभारते । १ । ९९ । ११-३९ ।
"अथ तद्वनमाजग्मुः कदाचिद्भरतर्षभ ।
पृथ्वाद्या वसवः सर्व्वे देवा देवर्षिसेवितम् ॥
ते सदारा वनं तच्च व्यचरन्त समन्ततः ।
रेमिरे रमणीयेषु पर्व्वतेषु वनेषु च ॥
तत्रैकस्याथ भार्य्या तु वसोर्वासववविक्रम ॥
सञ्चरन्ती वने तस्मिन् गां ददर्श सुमध्यमा ॥
नन्दिनीं नाम राजेन्द्र ! सर्व्वकामधुगुत्तमाम् ॥
सा विस्मयसमाविष्टा शीलद्रविणसम्पदा ।
द्यवे वै दर्शयामास तां गां गोवृषभेक्षणाम् ॥
स्वापीनाञ्च सुदोग्ध्रीञ्च सुवालधिखुरां शुभाम् ।
उपपन्नां गुणैः सर्व्वैः शीलेनानुत्तमेन च ॥
एवं गुणसमायुक्तां वसवे वसुनन्दिनी ।
दर्शयामास राजेन्द्र ! पुरा पौरवनन्दन ॥
द्यौस्तदा तां तु दृष्ट्वैव गां गजेन्द्रेन्द्रविक्रम ॥
उवाच राजन् तां देवीं तस्या रूपगुणान् वदन् ॥
एषा गौरुत्तमा देवी वारुणेरसितेक्षणा ।
ऋषेस्तस्य वरारोहे ! यस्येदं वनमुत्तमम् ॥
अस्याः क्षीरं पिबेन्मर्त्त्यः स्वादु यो वै सुमध्यमे ।
दशवर्षसहस्राणि स जीवेत् स्थिरयौवनः ॥
एतत् श्रुत्वा तु सा देवी नृपोत्तम ! सुमध्यमा ।
तमुवाचानवद्याङ्गी भर्त्तारं दीप्ततेजसम् ॥
अस्ति मे मानुषे लोके नरदेवात्मजा सखी ।
नाम्ना जिनवती नाम रूपयौवनशालिनी ॥
उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः ।
दुहिता प्रथिता लोके मानुषे रूपसम्पदा ॥
तस्या हेतोर्महाभाग ! सवत्सां गां ममेप्सिताम् ।
आनयस्वामरश्रेष्ठ ! त्वरितं पुण्यवर्द्धन ॥
यावदस्याः पयः पीत्वा सा सखी मम मानद ! ।
मानुषेषु भवत्वेका जरारोगविवर्ज्जिता ॥
एतन्मम महाभाग ! कर्त्तुमर्हस्यनिन्दित ! ।
प्रियं प्रियतरं ह्यस्मान्नास्ति मेऽन्यत् कथञ्चन ॥
एतत् श्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया ।
पृथ्वाद्यैर्भ्रातृभिः सार्द्धं द्यौस्तदा तां जहार गाम् ॥
तया कमलपत्त्राक्ष्या नियुक्तो द्यौस्तदा नृप ! ।
ऋषेस्तस्य तपस्तीव्रं न शशाक निरीक्षितुम् ।
हृता गौः सा तदा तेन प्रपातस्तु न तर्कितः ॥
अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः ।
न चापश्यत् स गां तत्र सवत्सां काननोत्तमे ॥
ततः स मृगयामास वने तस्मिंस्तपोधनः ।
नाध्यगच्छच्च मृगयंस्तां गां मुनिरुदारधीः ॥
ज्ञात्वा तथापनीतां तां वसुभिर्दिव्यदर्शनः ।
ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा ॥
यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुवालधिम् ।
तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः ॥
एवं शशाप भगवान् वसूंस्तान् भरतर्षभ ! ।
वशं क्रोधस्य संप्राप्त आपवो मुनिसत्तमः ।
शप्त्वा च तान् महाभागस्तपस्येव मनो दधे ॥
एवं स शप्तवान् राजन् ! वसूनष्टौ तपोधनः ।
महाप्रभावो ब्रह्मर्षिर्देवान् क्रोधसमन्वितः ॥
अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः ।
शप्ताः स्म इति जानन्त ऋषिं तमुपचक्रमुः ॥
प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ ! ।
लेभिरे न च तस्मात्ते प्रसादमृषिसत्तमात् ।
आपवात् पुरुषव्याघ्र ! सर्व्वधर्म्मविशारदात् ॥
उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः ।
अनुसंवत्सरात् सर्व्वे शापमोक्षमवाप्स्यथ ॥

अयन्तु यतस्ते यूयं मया शप्ताः स वत्स्यति ।
द्यौस्ततो मानुषे लोके दीर्घकालं स्वकर्म्मणा ॥
नानृतं तच्चिकीर्षामि युष्मान् क्रुद्धो यदब्रवम् ।
न प्रजास्यति चाप्येष मानुषेषु महामनाः ॥
भविष्यति च धर्म्मात्मा सर्व्वशास्त्रविशारदः ।
पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्ज्जयिष्यति॥")
तस्याः प्रभावो यथा,—
"वशिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमम् ।
अपश्यज्जयतां श्रेष्ठो विश्वामित्रो महामनाः ॥
ततो वशिष्ठो भगवान् कथान्ते मुनिसत्तमः ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥
आतिथ्यं कर्त्तुमिच्छामि बलस्यास्य महाबल ।
तव चैवाप्रमेयस्य यथार्हं प्रतिगृह्यताम् ॥
वाढमित्येव गाधेयो वशिष्ठं प्रत्युवाच ह ।
एवमुक्तो महातेजा वशिष्ठो जपतां वरः ॥
आजुहाव ततः प्रीतः कल्माषीं धुतकल्मषाम् ।
भोजनेन महार्हेण सत्कारं तद्विधत्स्व मे ॥
एवमुक्ता वशिष्ठेन शवला शत्रुसूदन ॥
विदधे विविधान् कामान् यस्य यस्य यथेप्सितान् ॥
सान्तःपुरजनो राजा सब्राह्मणपुरोहितः ।
युक्तः परमहर्षेण वशिष्ठमिदमब्रवीत् ॥
गवां शतसहस्रेण दीयतां शवला मम ।
एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः ॥
विश्वामित्रेण धर्म्मात्मा प्रत्युवाच महीपतिम् ।
कारणैर्बहुभी राजन्न दास्ये नन्दिनीं तव ॥
कामधेनुं वशिष्ठोऽसौ न तत्याज यदा मुनिः ।
ततोऽस्य शवलां राजा विश्वामित्रस्तदाहरत् ॥
तस्या हम्भारवाज्जाताः काम्बोजा रविसन्निभाः ।
ऊधसश्चाभिसञ्जाताः पह्नवाः शस्त्रपाणयः ॥
योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथा ।
रोमकूपेषु च म्लेच्छास्तथा रामकिरातकाः ॥
तैस्तन्निसूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ।
सपदातिगजं साश्वं सरथं रघुनन्दन ॥"
इति रामायणे आदिकाण्डम् ॥
(एतद्विवरणं महाभारते । १।१७७। अध्याये च विस्तरशो द्रष्टव्यम् ॥ कन्या यथा, हरिवंशे । १७६ । ७ ।
"मेध्यां गोकुलसम्भूतां नन्दगोपस्य नन्दिनीम् ॥"
आनन्दजननात् पत्न्यपि । यथा, महाभारते । १ । ६६ । १६ ।
"एवं गुणसमायुक्तां वसवे वसुनन्दिनी ।
दर्शयामास राजेन्द्र ! पुरा पौरवनन्दनः ॥"
"वसुनन्दिनी वसुप्रिया ।" इति नीलकण्ठः ॥
स्कन्दानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । ५ ।
"शृणु मातृगणान् राजन् ! कुमारानुचरानिमान् ॥"
"वसुदामा सुदामा च विशोका नन्दिनी तथा ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । १३५ ।
"नन्दिन्याञ्च समासाद्य कूपं देवनिषेवितम् ।
नरमेधस्य यत् पुण्यं तदाप्नोति नराधिप ॥"

व्याडिमुनिमाता । इति हेमचन्द्रः । ३ । ५१६ ॥ त्रयोदशाक्षरवृत्तिविशेषः । अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् । दुर्गा । इयन्तु देविकातटे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३३ । ६६ ।
"शिवकुण्डे शुभा नन्दा नन्दिनी देविकातटे ॥")

नन्दिनीतनयः, पुं, (नन्दिन्यास्तनयः ।) व्याडिमुनिः । स च अभिधानकारकः । इति हेमचन्द्रः । ३ । ५१६ ॥

नन्दिनीसुतः, पुं, (नन्दिन्याः सुतः ।) व्याडिमुनिः । इति जटाधरः ॥

नन्दिवर्द्धनः, पुं, (नन्दिं वर्द्धयतीति । वृध् + णिच् + ल्युः ।) शिवः । (नन्दि आनन्दं वर्द्धयतीति ।) पक्षान्तः । पुत्त्रः । इति मेदिनी । ने, २३८ ॥ (यथा, गोः रामायणे । २ । ६६ । १४ ।
"सुषुवे यममित्रघ्नं कौशल्या नन्दिवर्द्धनम् ॥")
मित्रम् । इति शब्दरत्नावली ॥ (विमानविशेषः । यथा, विश्वकर्म्मप्रकाशे । ६ अध्याये ।
"विमानं छन्दकं तद्वदनेकशिखराततः ।
स चाष्टभूमिकस्तद्वत् सप्ततिर्नन्दिवर्द्धनः ॥"
निमिवंशीयविशेषः । इति भागवतम् । ९ । १३ । १४ ॥) आनन्दवर्द्धके, त्रि ॥ (यथा, हरिवंशे । ६८ । २९ ।
"कृष्ण कृष्ण महाबाहो गोपानां नन्दिवर्द्धन ॥
दृश्यतामेष वै शीघ्रं सर्पराजो विषायुधः ॥")

नन्दिवृक्षः, पुं, (नन्दिरानन्दस्तज्जनको वृक्षः । यद्वा, नन्द + इन् । तस्याः वृक्षः ।) नन्दीवृक्षः । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"नन्दिवृक्षो मेषशृङ्गी तथा मेषविषाणिका ।
चक्षुर्व्वहनचक्षुष्य मेढ्रशृङ्गी ग्रहद्रुमाः ॥")

नन्दी, स्त्री, दुर्गा । यथा, देवीपुराणे ।
"सुराः स्तुवन्ति दशा देवा नन्दिनी दुन्दुभिर्मता ।
तेषाञ्च वादिनी नन्दी ईशत्वात् त्रिदशेश्वरी ॥"

नन्दी, [न्] पुं, (नन्द आनन्दोऽस्यास्तीति । इनिः ।) गर्द्दभाण्डवृक्षः । (यथा,—
"करीरं कुलकं नन्दी कुचेला शकुलादनी ।
कठिल्लं केम्बुकं शीतं सकोशातककर्कशम् ॥
तिक्तं पाके कटुग्राही वातलं कफपित्तजित् ॥"
इति वाभटे । १ । ६ अध्याये ॥)
वटवृक्षः । इति मेदिनी । ने, ८१ ॥ शिवगणविशेषः । स च त्रिविधः । यथा,—
"आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः ।
सोमनन्दी तृतीयस्तु विज्ञेया नन्दिनस्त्रयः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
शिवद्वारपालः । स शिवांशः शालङ्कायनमुनिपुत्त्रः । यथा,—
"अन्यच्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे ॥
तप्यतस्तस्य तु मुनेरीश्वरेण समं सुतम् ॥
तं प्राप्नोमि परं भावं ज्ञात्वा देवो महेश्वरः ।
सुन्दरञ्चापरं रूपं धृत्वा दृष्टिसुखावहम् ॥
शालङ्कायनपुत्त्रत्वं योगमायासुपाश्रितः ।
प्राप्नोति तं न जानाति दक्षिणं पार्श्वमास्थितः ॥
मायायोगबलोपेतस्त्र्यक्षो वै शूलपाणिधृक् ।
रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः ॥
स त न ज्ञायते जातं ममैवाराधने स्थितः ।
अथ नन्दी प्रहस्याह महादेवाज्ञया मुनिम् ॥
उत्तिष्ठ मुनिशार्दूल ! सफलस्ते मनोरथः ।
त्वद्दक्षिणाङ्गाज्जातोऽस्मि पुत्त्रस्ते शाधि मां प्रभो ! ॥
त्वया तपः समारब्धमीश्वरेण समं सुतम् ।
प्राप्स्यामीति ततो मह्यं सदृशोऽन्यो न कश्चन ॥
विचार्य्येति तदाहं वै जातोऽस्मि स्वयमेव हि ॥"
इति वराहपुराणम् ॥
स एष कल्पान्तरे शिवांशजशिलादमुनेः पुत्त्रः । यथा,—
"जगाम रुद्रमनिशं यत्र नन्दी महागणः ।
प्रीतस्तस्य महादेवो देव्या सह पिनाकधृक् ॥
दत्त्वा चात्मसमानत्वं मृत्युवञ्चनमेव च ।
अभूदृषिः स धर्म्मात्मा शिलादो नाम धर्म्मवित् ॥
आराधयन् महादेवं पुत्त्रार्थं वृषभध्वजम् ।
तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत् ॥
शर्व्वः सोमौघविष्टतो वरदोऽस्मीत्यभाषत ।
स वव्रे वरमीशानं वरेण्यं गिरिजापतिम् ॥
अयोनिजं मृत्युभीतं तया चैवोमया समम् ।
तथास्त्वित्याह भगवान् देव्या सह महेश्वरः ॥
पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो विभुः ।
ततो ययाचुः स्वां भूमिं शिलादो धर्म्मवित्तमः ॥
चकर्ष लाङ्गलेनोर्व्वीं भित्त्वादृश्यत शोभनः ।
संवर्त्तकानलप्रख्यः कुमारः प्रहसन्निव ॥
रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशम् ।
कुमारतुल्योऽप्रतिमो मेघगम्भीरया गिरा ॥
शिलादं तात तातेति प्राह नन्दी पुनः पुनः ।
तं दृष्ट्वा नन्दिनं जातं शिलादः परिषस्वजे ॥
मुनिभ्यो दर्शयामास ये तदाश्रमवासिनः ॥"
इति कूर्म्मे ४० अध्यायः ॥
(द्विसप्ततिसाध्यमौलिककायस्थानामन्यतमः । यथा, घटककारिकायाम् ।
"गुहः कीर्त्तिर्यशः कुण्डुर्नन्दी शीलो धनुर्गणः ॥")

नन्दीमुखी, स्त्री, (नन्दी सुखे यस्याः । ङीष् ।) तन्द्रा । इति हेमचन्द्रः । २ । २२७ ॥

नन्दीवृक्षः, पुं, (नन्दि + वा ङीष् । नन्द्याः वृक्षः । नन्दीजनको वृक्षो वा ।) कोङ्कणदेशप्रसिद्धसुगन्धिवृक्षविशेषः । तत्पर्य्यायः । तूणीकः २ तूणिकः ३ तूणी ४ पीतकः ५ कच्छपः ६ नन्दी ७ कुबेरकः ८ कान्तः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतलत्वम् । पित्तरक्तदाहशिरोऽर्त्तिखेदकुष्ठनाशित्वम् । सुगन्धित्वम् । पुष्टिवीर्य्यदातृत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अश्वत्थाकारः क्षीरवान् स्वनामप्रसिद्धो वृक्षः । इति भरतः ॥ तुंद इति ख्यातो वृक्ष इति केचित् ॥ तत्पर्य्यायः । तुन्नः २ कुबेरकः ३ कुणिः ४ कच्छः ५ कान्तलकः ६ । इत्यमरः । २।४।१२९ ॥ तुणिः ७ । इति भरतः ॥ नन्दिवृक्षः ८ कुणिः ९ तुन्दः १०

नन्दिक ११ नन्दिस्वस्तिक १२। इति शब्दरत्नावली ॥*॥ मेषशृङ्गीवृक्षः। इति रत्नमाला ॥ स्थालीवृक्षः। इति भावप्रकाशः ॥

नन्दीशः, पुं, (नन्दी ईशोऽस्य।) नन्दी। इति हेमचन्द्रः।२।१२४॥ भरतोक्ततालप्रभेदः। यथा,—
"सिंहनन्दननन्दीशचन्द्रबिम्बद्वितीयकाः॥"
तस्य लक्षणं यथा,—
"गो लघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरे मता।"
इति सङ्गीतदामोदरः ॥
(नन्दिनो नन्दिगणस्य ईशः। इति विग्रहे शिवः॥)

नन्दीश्वरः, पुं, (नन्दिनो गणविशेषस्य ईश्वरः।) शिवः। इति शब्दरत्नावली ॥ नन्दीशतालः। इति सङ्गीतदामोदरः॥ (नन्दी ईश्वरस्य।) शिवद्वारपालः। तस्य शिवपार्श्वदत्वकारणं यथा,—
"तस्मिंस्त्रेतायुगे काले नन्दी नाम महामुनिः।
आरिराधयिषुः शर्व्वं तपस्तेपे सुदारुणम् ॥
ततस्तु भगवान् प्रीतस्तस्मै विप्राय शङ्करः।
उवाच च वचः साक्षात्तस्मिन् वरदः प्रभुः ॥
वरान् वृणीष्व विप्रेन्द्र। यानिच्छसि महामुने॥
तांस्ते सर्व्वान् प्रयच्छामि दुर्लभानपि मारिष ॥
इत्युक्तोऽसौ भगवता शर्व्वेण मुनिपुङ्गवः।
प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना ॥
यदि प्रीतोऽसि भगवन्। अनुक्रोशतया मम।
अनुग्राह्यो ह्यहं देव त्वयावश्यं सुराधिप।॥
यथा नान्ये भवेद्भक्तिस्त्वयि नित्यं महेश्वर।।
तथाहं भक्तिमिच्छामि सर्व्वभूताशये त्वयि ॥
एतत्तु वचनं श्रुत्वा नन्दिनः स महेश्वरः।
प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा ॥
मद्रूपधारी मत्तेजास्त्र्यक्षः सर्व्वगुणोत्तम।
भविष्यसि न सन्देहो देवदानवपूजितः॥
अनेनैव शरीरेण जरामरणवर्ज्जितः।
दुष्प्राप्यैयमवाप्या ते देवैर्गाणेश्वरी गतिः॥
पार्श्वदानां वरिष्ठश्च मामकानां द्विजोत्तम।।
नन्दीश्वर इति ख्यातो भविष्यसि न संशयः॥
अद्यप्रभृति देवाग्र्य। देवकार्य्येषु सर्व्वतः।
त्वं प्रभुर्भविता लोके मत्प्रसादान्मुनीश्वर।॥
त्वामेवाभ्यर्च्चयिष्यन्ति सर्व्वभूतानि सर्व्वतः।
मत्तः समभिवाञ्छन्तः प्रसादं मार्कण्डेयाधिप।॥
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
नावयोरन्तरं किञ्चिदम्बरानिलयोरिव ॥
द्वारे तु दक्षिणे नित्यं त्वया स्थेयं गणाधिप।।
वामेन विभुना वापि महाकालेन सर्व्वदा॥"
इति वराहपुराणम् ॥

नन्दीसरः, [स्] क्ली, (नन्द+इन्+वा ङीष्। नन्द्यै आनन्दार्थं यत् सरः।) इन्द्रसरोवरः। इति शब्दमाला ॥

नन्द्यावर्त्तः, पुं, (नन्दिजनक आवर्त्तो यत्र।) ईश्वरगृहविशेषः। इत्यमरः।२।२।१०॥ तस्य लक्षणं यथा,—
"दक्षिणानुगतालिन्दत्रयं यत् पश्चिमामुखम्।
पूजनीयोत्तरस्फाय नन्द्यावर्त्तं वदन्ति तत् ॥"
इति भरतधृतशास्त्रम् ॥
तगरद्रुमः। इति विश्वः॥ मत्स्यभेदः। तस्य गुणाः। सग्राहित्वम्। कफपित्तविनाशित्वञ्च। इति राजवल्लभः॥

नपुंसकं, क्ली (न स्त्री न पुमान्। "नभ्राण्नपान्नवेदेति।" ६।३।७५। इति निपातनात् स्त्रीपुंसयोः पुंसक-आदेशः।) क्लीवम्। इत्यमरः। २।६।३९॥ हिजिड़ा इति भाषा॥ तस्य कारणं यथा,—
"उभयोर्व्वीजसामान्ये जायते वै नपुंसकम् ॥"
इति सुखबोधः॥ *॥
(नपुंसको भवेदिति भाष्यप्रयोगात् पुंलिङ्गोऽपि भवति। तथा, च पञ्चतन्त्रे। १। ३६४।
"परदेशभयाद्भीता बहुमाया नपुंसकाः।
स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः॥")
नपुंसकगर्भस्य चिह्नं यथा,—
"नपुंसकं यदा गर्भो भवेद्गर्भोऽर्बुदाकृतिः।
उन्नते भवतः पार्श्वे पुरस्तदुदरं महत् ॥"*॥
नपुंसकविशेषानाह।
"आसेक्यश्च सुगन्धिश्च कुम्भीकश्चेर्षकस्तथा।
अमी सशुक्रा बोद्धव्या अशुक्रो षण्डसंज्ञकः॥"
तेषां लक्षणान्याह।
"पित्रोस्तु स्वल्पवीर्य्यत्वादासेक्यः पुरुषो भवेत्।
स शुक्रं प्राश्य लभते ध्वजोच्छ्रितिमसंशयम् ॥
यः पूतियोनौ जायेत स हि सौगन्धिको भवेत्।
स गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते।
स कुम्भीक इति ज्ञेयो गुदयोनिस्तु स स्मृतः॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते।
ईर्षकः स तु विज्ञेयो दृष्टियोनिश्च स स्मृतः॥
यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते।
ततः स्त्रीचेष्टिताकारो जायते षण्डसंज्ञकः॥"
इति भावप्रकाशः॥
(अस्य विवृतिर्यथा,—
"समवीर्य्यरजस्त्वेन नरः स्त्रीप्रकृतिर्भवेत्।
नपुंसकमिति ख्यातं न स्त्री न पुरुषो वदेत् ॥"
"समदोषबलेनापि प्रसत्या विकृतेरपि।
सम्भवेदस्रक् शुक्रो नपुंसकसमुद्भवः॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये॥)

नप्ता, [ऋ] पुं, (न पतन्ति पितरो येनेति। पत+"नप्तृनेष्टृत्वष्टृ।" उणां २।९६। इति तृच्प्रत्ययेन निपातनात् साधुः।) पुत्त्रकन्ययोः पुत्त्रः। नाति इति भाषा। तत्पर्य्यायः। पौत्त्रः २ सुतस्य सुतः ३। इति हेमचन्द्रः॥ (यथा, महाभारते। १। ८५। २०।
"कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो।।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यसि॥")

नप्त्री, स्त्री, (नप्तृ+"ऋन्नेभ्यो ङीप्।" ४।१।५। इति ङीप्।) पुत्त्रकन्ययोः पुत्त्री। नातिनी इति भाषा। तत्पर्य्यायः। पौत्त्री २ सुतात्मजा ३। इत्यमरः। २। ६। २९॥ नप्ता ४ पौत्रिका ५। इति रभसः॥ सुतस्य सुतायाञ्चात्मजायां नप्त्री पुत्त्रस्य पुत्त्र्याञ्चापत्यं पौत्त्री अतएव पौत्त्रोऽपि नप्ता। इत्यमरटीकायां भरतः॥

नभः, पुं, (नभति छिनत्ति कीटादीनिति। नभ हिंसायाम्+पचाद्यच्।) श्रावणमासः। इति शब्दरत्नावली॥ (द्वितीयमनोः स्वारोचिषस्य पुत्त्रविशेषः। इति हरिवंशे। ७। १४॥ तृतीय-मन्वन्तरदेवविशेषः। इति च तत्रैव। ७। १९॥ कृशप्रपौत्त्रनलस्य पुत्त्रः। इति च हरिवंशे। १५। २७॥)

नभः, [स्] क्ली, (नह्यते मेघैरिति। नह बन्धने+"नहेर्दिवि भश्च।" उणां ४।२१०। इति असुन् भश्चान्तादेशः।) आकाशम्। इत्यमरः। १। २। १॥ (यथा, मनुः। ४। ३७।
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥")

नभःक्रान्ती, [न्] पुं, (नभः क्रान्तं गगनाक्रमण-मस्त्यस्येति। इनिः।) सिंहः। इति शब्दमाला॥

नभःप्राणः, पुं, (नभसः प्राण इव।) पवनः। इति त्रिकाण्डशेषः॥

नभःसत्, [द्] पुं, (नभसि सीदतीति। सद्+क्विप्।) देवः। इति त्रिकाण्डशेषः॥

नभःसरित्, स्त्री, (नभसः सरित् नदी।) स्वर्गङ्गा। इति त्रिकाण्डशेषः॥

नभःस्थितः, पुं, (नभसि स्थितः।) नरकविशेषः। इति हेमचन्द्रः। ५।२॥ आकाशस्थिते, त्रि॥

नभश्चक्षुः, पुं, (नभसश्चक्षुरिव।) सूर्य्यः। इति शब्दमाला॥

नभश्चमसः, पुं, (नभसश्चमस इव।) चन्द्रः। चित्रापूपः। इन्द्रजालम्। इति मेदिनी। से, ३८॥

नभश्चरः, पुं, (नभसि चरतीति। चर+टः।) पक्षी। विद्याधरः। (गन्धर्व्वादिः। यथा, रघुः। १८। ६।
"नभश्चरैर्गीतयशाः स लेभे
नभस्तलश्यामतनुं तनूजम् ॥")
मेघः। वायुः। इति मेदिनी। रे, २०२॥
(आकाशचारिणि, त्रि। यथा, कुमारे। ५। २३।
"निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा॥")

नभसः, क्ली, (नभते व्याप्नोतीति। नभ+"अत्यवि-चमितमीति।" उणां। ३। ११७। इति असच्।) आकाशम्। यथा। नभसं स मेघ-मलं विहायसमिति निगमः॥ (पुं, दशम-मन्वन्तरीयसप्तर्षीणामन्यतमः। यथा, हरि-वंशे। ७। ६७।
"अङ्गिरा नभसः सत्यं सप्तैव परमर्षयः॥")

नभसङ्गमः, पुं, (नभसं गच्छतीति। गम+गमेः सुपीति खच्। ततो मुम्।) पक्षी। इत्यमरः। २। ५। ३४॥

नभस्तलं, पु क्ली, (नभसस्तलम्।) गगनमण्डलम्। यथा, नैषधे। २। ६६।

"तदुदीधितिधारया रयाद्-
गतया लोकविलोकनामसौ।
छुदहेमकषमिवालसत्
कषपाषाणनिभे नभस्तले॥"

नभस्यः, पु, (नभसे मेघाय साधुः। नभस्+"तत्र साधुः।" ४। ४। ९८। इति यत्।) भाद्रमासः। इत्यमरः। १। ४। १७॥ (यथा, हरिवंशे। १५२। १।

"नभो नभस्योऽथ निरीक्ष्य मासि
कामस्तदा सोऽयदनन्दकीर्यम्॥")

नभस्वान्, [त्] पु, (आकाशाद्वायुरिति श्रुतेः नभः उत्पत्तिकारणत्वेनास्त्यस्येति। नभस्+मतुप् मस्य वः।) वायुः। इत्यमरः। १। १। ६६॥ (यथा, रघुः। ४। ८।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥")

नभाः, [स्] पुं, (नभति हिनस्ति कीटादीनिति। नभ+"सर्व्वधातुभ्योऽसुन्।" उणा ४। १८८। इति असुन्।) श्रावणमासः। (यथा, रघुः। १२। २९।

"स जहार तयोर्मध्ये मैथिलीं लोकशोषणः।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे॥")

मेघः। घ्राणम्। वर्षाः। विसतन्तुः। पतद्ग्रहः। इति मेदिनी। से, २६॥ पलितशीर्षम्। इति धरणी॥

नभाकं, क्ली, (नभाति व्याप्नोतीति। नभ+"पिनाकादयश्च।" उणा। ४। १५। इति आकः।) तमः। इत्युणादिकोषः॥

नभोगजः, पु, (नभसि आकाशे गज इव।) मेघः। इति त्रिकाण्डशेषः॥

नभोगतिः, स्त्री, (नभसि गतिर्गमनम्।) आकाशगमनम्। यथा,—

"प्रडीनोड्डीनसण्डीनडयनानि नभोगतौ॥"
इति हेमचन्द्रः। ४। ३८४॥

नभोदुहः, पु, (नभसः शोषं प्रपूरयति मद्यादिकमिति। दुह प्रपूरणे+कः।) मेघः। इति शब्दमाला॥

नभोद्वीपः, पु (नभसि द्वीप इव।) मेघः। इति शब्दमाला॥

नभोधूमः, पुं, (नभसि धूम इव।) मेघः। इति शब्दमाला॥

नभोनदी, स्त्री, (नभसो नदी।) स्वर्गङ्गा। इति भूरिप्रयोगः॥

नभोमणिः, पु, (नभसो मणिरिव।) सूर्य्यः। इति हेमचन्द्रः। २। ८॥

नभोमण्डलदीपः, पुं, (नभोमण्डले दीप इव।) चन्द्रः। यथा, तिथ्यादितत्त्वे।

"नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे॥"

नभोऽम्बुपः, पुं, (नभसः अम्बु जलं पिबतीति। पा+कः।) चातकपक्षी। इति हेमचन्द्रः। ४। ३९५॥

नभोरजः, [स्] क्ली, (नभसो रज इव।) अन्धकारः। इति शब्दमाला॥

नभोरेणुः, स्त्री, (नभसि रेणुरिव।) कुज्झटिका। इति त्रिकाण्डशेषः॥

नभोलयः, पु (नभसि लयो यस्य।) धूमः। इति शब्दरत्नावली॥

नभ्यं, त्रि, नभसेदमित्यर्थे यण्प्रत्ययः। नभसम्बन्धि। (नाभये हितम्। नाभि+"उगवादिभ्यो यत्।" ५। १। २। इति यत्। "नाभि नभञ्च।" इति नभादेशः। रथाङ्गम्। "नभ्योऽक्षः। नभ्यमञ्जनम्। रथनाभावेवेदम्॥" इति सिद्धान्तकौमुदी॥)

नभ्राट्, [ज्] पु (न भ्राजते इति। भ्राज दीप्तौ+क्विप्।) मेघः। इति हेमचन्द्रः। २। ७८॥

नमः, [स्] अ, (नम शब्दनत्योः+भावे असुन्।) नतिः। इत्यमरः। ३। ४। १८॥ (यथा, मार्कण्डेये।

"नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥"

क्लीवलिङ्गेऽपि दृश्यते। यथा, भागवते। ३। १३। ४२।

"विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः॥")

त्यागः। स्तवम्। इत्युणादिकोषः॥ (क्ली, अन्नम्। इति निघण्टुः। २। ७॥ वज्रम्। इति निघण्टुः। २। २०॥ स्तोत्रम्। यथा, ऋग्वेदे। ७। १६। १।

"एना वो अग्निं नमसोर्ज्जो नपातमा हुवे॥")

नमतः, पु, (नम्यते इति। नम+"भृमृदृशियजीति।" उणा। ३। ११०। इति अतच्।) प्रभुः। धूमः। नटः। इत्युणादिकोषः॥

नमसः, पु, (नमतीति। नम+"अत्यविचमितमीति।" उणा। ३। ११७। इति असच्।) अनुकूलः। इत्युणादिकोषः॥

नमसितः, त्रि, (नमः कृतमिति। नमस्+"नमोवरिव।" ३। १। १९। इति क्यच्। क्तः। "अस्य विभाषा।" ६। ४। ५०। इति वा यलोपः।) कृतनमस्कारः। पूजितः। तत्पर्य्यायः। नमस्यितः २ अर्हितः ३ अपचायितः ४ अर्चितः ५ अपचितः ६। इत्यमरः। ३। १। १०१॥

नमस्कारः, पु, (नमः शब्दस्य कारः करणं यत्र।) विषभेदः। इति शब्दचन्द्रिका॥ (नमः करणम्। नमस्+कृ+घञ्।) नतिः। स च त्रिविधः। कायिकः वाचिकः मानसिकश्च। यथा,—

"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः॥"

कायिकादिरपि त्रिविधो यथा,—

"प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ।
जानुभ्यां धरणीं गत्वा शिरसा स्पृश्य मेदिनीम्॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः॥
जानुभ्याञ्च क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीम्।
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः॥
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा।
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते॥
या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः।
क्रियते भक्तियुक्तैर्व्वा वाचिकस्तूत्तमः स्मृतः॥
पौराणिकैर्व्वैदिकैर्व्वा मन्त्रैर्या क्रियते नतिः।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा॥
यत्तु मानुषवाक्येन नमनं क्रियते सदा।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्त्रकौ॥
इष्टमध्यानिष्टगतैर्म्मनोभिस्त्रिविधं पुनः।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम्॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्तवः।
कायिकैस्तु नमस्कारैर्द्देवास्तुष्यन्ति नित्यशः॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः।
प्रणाम इति विज्ञेय. स पूर्व्वप्रतिपादितः॥"
इति कालिकापुराणे ७० अध्यायः॥ * ॥

रात्रौ तन्निषेधो यथा,—

"रात्रौ नैव नमस्कुर्य्यात्तेनाशीरभिचारिका।
अतः प्रातःपदं दत्त्वा प्रयोक्तव्ये च ते उभे॥"
इति महाभारतमिति केचित्॥

नतिकरणम्। तत्तु करशिरःसंयोगादि। स्वापकर्षबोधकव्यापारविशेषः। इति मुग्धबोधटीकायां दुर्गादासः॥

"सर्व्वे चापि नमस्कुर्य्युः सर्व्वावस्थासु सर्व्वदा॥"

अभिवादयेदित्यनुवृत्तौ शङ्खः। नाप्रयतायाप्रयतश्च। इति शुद्धितत्त्वम्॥

"स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः॥"
इति स्मृत्यर्थसारः॥ * ॥

"देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात्।
स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ॥
ब्राह्मणञ्च गुरुं दृष्ट्वा न नमेद्यो नराधमः।
यावज्जीवनपर्य्यन्तमशुचिर्य्यवनो भवेत्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

"देवतायतनं दृष्ट्वा दृष्ट्वा तु दण्डिनन्तथा।
नमस्कारं न कुर्य्याद्यः प्रायश्चित्ती भवेन्नरः॥
सभायां यज्ञशालायां देवतायतनेषु च।
प्रत्येकन्तु नमस्कारो हन्ति पुण्यं पुराकृतम्॥
उपविश्य नमेत् शूद्रो दीर्घायुर्ब्राह्मणो वदेत्।
स शूद्रो नरकं याति ब्राह्मणो यात्यधोगतिम्॥
दूरस्थं जलमध्यस्थं धावन्तं मदगर्व्वितम्।
क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्ज्जयेत्॥
पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गी जलस्थितः।
आशीःकर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत्॥"
इति कर्म्मलोचनम्॥ * ॥

"मातुः पितुः कनीयांसं न नमेद्वयसाधिकः।
नमस्कुर्य्याद्गुरोः पत्नीं भ्रातृजायां विमातरम्॥"
यमः।

"अभिवादयतः पूर्व्वमाशिषं न प्रयच्छति।
यद्दुष्कृतं भवेत्तस्य तस्माद्भागं प्रपद्यते॥
स्वस्तीति ब्राह्मणे ब्रूयात् चायुष्मानिति राजनि।
सर्व्वतामिति वैश्येषु शूद्रे त्वारोग्यमेव च॥"
इति मलमासतत्त्वम्॥ * ॥

"गुरुपत्नीन्तु युवतीं नाभिवादयेत पादयोः ।
कुर्व्वीत वन्दनं भूयो भगो वोऽहमिति ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
अभिवादनशीलः स्यान्नित्यं वृद्धेषु धर्म्मतः ।
असावहम्भो नामेति सम्यक् प्रणतिपूर्व्वकम् ॥
आयुरारोग्यसिद्ध्यर्थं तन्द्रादिपरिवर्ज्जितः ।
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ॥
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्व्वाक्षरः प्लुतः ।
यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥
सव्यसव्यपाणिना कार्य्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥
ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु ॥"*॥
अभिवादनीया गुरवो यथा,—
"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ।
वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ॥
माता मातामही गुर्व्वी पितुर्मातुश्च सोदराः ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम् ।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः ॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ।
गुरून् दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ॥"
इति कूर्म्मपुराणे ११ अध्यायः ॥ *॥
अथ सप्तधा नतिलक्षणानि ।
"त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम् ।
दण्डमष्टाङ्गमुग्रञ्च सप्तधा नतिलक्षणम् ॥
ऐशानीं वाथ कौवेरीं दिक कामाख्याप्रपूजने ।
प्रशस्ता स्थण्डिलादौ च सर्व्वमूर्त्तिषु सर्व्वतः ॥
त्रिकोणादियवस्थाश्च यदि पूर्व्वमुखो यजेत् ।
पश्चिमात् शाम्भवीं गत्वा यवस्थां निर्द्दिशेत्तदा ॥
यदोत्तरामुखः कुर्य्यात् साधको देवपूजनम् ।
तदा याम्यात्तु वायव्यां गत्वा कुर्य्यात्तु संस्थितिम् ॥
दक्षिणादायवीं गत्वा दिशं तस्माच्च शाम्भवीम् ।
ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत् ।
त्रिकोणो यो नमस्कारस्त्रिपुराप्रीतिदायकः ॥१॥
दक्षिणादायवीं गत्वा वायव्यात् शाम्भवीं ततः ।
ततोऽपि दक्षिणं गत्वा तां त्यक्त्वाग्नौ प्रविश्य च ॥
अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम् ।
उत्तराच्च तथैशैर्यां भ्रमणं द्विस्त्रिकोणवत् ।
षट्कोणो यो नमस्कारः प्रीतिदः शिवदुर्गयोः ॥२॥
दक्षिणाद्वायवीं गत्वा तस्मादावृत्य दक्षिणम् ।
गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकी-
र्त्तितः ॥ ३ ॥
सकृत् प्रदक्षिणं कृत्वा वर्त्तुलाकृतिसाधकः ।
नमस्कारः कथ्यतेऽसौ प्रदक्षिण इति द्विजैः ॥४॥
त्यक्त्वा स्वमाननस्थानं पश्चान्नत्वा नमस्कृतिः ।
प्रदक्षिणं विना या तु निपत्य भुवि दण्डवत् ।
दण्ड इत्युच्यते देवैः सर्व्वदेवौघमोददः ॥ ५ ॥
पूर्व्ववद्दण्डवद्भूमौ निपत्य हृदयेन तु ।
चिबुकेन मुखेनाथ नासया ललिकेन च ॥
ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमिस्पर्शनं क्रमात् ।
तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः ॥६॥
प्रदक्षिणत्रयं कृत्वा साधको वर्त्तुलाकृतिः ।
ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यः स्यान्नमस्कृतौ ।
स उग्र इति देवौघैरुच्यते विष्णुतुष्टिदः ॥ ७ ॥
नदानां सागरो याद्दग्द्विपदां ब्राह्मणो यथा ।
नदीनां जाह्नवी याद्दग्देवानामिव चक्रधृक् ।
नमस्कारेषु सर्व्वेषु तथैवोग्रः प्रशस्यते ॥
त्रिकोणाद्यैर्नमस्कारैः कृतैरेव तु भक्तितः ।
चतुर्वर्गं लभेद्भक्तो न चिरादेव साधकः ॥
नमस्कारो महायज्ञः प्रीतिदः सर्व्वतः सदा ।
सर्व्वेषामपि देवानामन्येषामपि भैरव ! ॥
योऽष्टाङ्गो नमस्कारः प्रीतिदः सततं हरेः ।
महामायाप्रीतिकरः स नमस्करणोत्तमः ॥"
इति कालीपुराणम् ॥

नमस्कारी, स्त्री, (नमस्कारस्तदञ्जलिरिव पत्र-सङ्कोचोऽस्त्यस्या इति । अच् । गौरादित्वात् ङीष् ।) खदिरिकाशाकः । लाजालु इति ख्यात इति केचित् ॥ किन्तु रभसेन वराहक्रान्ता लज्जालुः समङ्गा जलकारिकेति खदिरिकायाम् । सङ्कोचपत्री लज्जालुरिति लज्जालुकाया पठितम् । अञ्जलिरूपपत्त्रत्वादञ्जलेर्नमस्कारयत्नकत्वात् नमस्कारधीत्वेव नमस्कारी । इत्यमरटीकायां भरतः ॥ (यथास्याः पर्य्यायो वैद्यकरत्नमालायाम् ।
"गण्डकाली नमस्कारी समङ्गा खदिरी कथित् ॥")

नमस्यः, त्रि (नमस्य नामधातुः+कर्म्मणि यत् ।) नमस्कारयोग्यः । यथा,—
"स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः ।"
इति मलमासतत्त्वम् ॥

नमस्या, स्त्री, (नमस्य+भावे अ । स्त्रियां टाप् ।) पूजा । इत्यमरः । २ । ७ । ३५ ॥

नमस्यितः, त्रि, (नमः कृतमिति । नमस्+"नमोवरिवः इति ।" ३ । १ । १९ । इति क्यच् ।) पूजितः । इत्यमरः । ३ । १ । १०१ ॥

नमितः, त्रि, नमोऽस्य जात इत्यर्थे इतच्प्रत्ययनिष्पन्नः । जातनमस्कारः । नामितः । यथा,—
"अथ प्राज्यग्रामाञ्चनगरिमोद्गारचरणा
सुधीः को वा कौपीरपि नमितमूर्द्धा न पिबति ।"
इति विदग्धमाधवनाटकम् ॥

नमुचिः, पु, (न मुञ्चतीति । मुच+इन् । स च कित् ।) कन्दर्पः । दैत्यभेदः । इति मेदिनी । चे, १४ ॥ यथा,—
"कश्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम ! ।
तस्यास्तु द्वौ सुतावास्तां सहस्राक्षादबलाधिकौ ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः ।
तृतीयो नमुचिर्नाम महाबलसमन्वितः ॥"
इति वामने ५२ अध्यायः ॥
(इन्द्र एनं निहतवान् । यथा, महाभारते । ९ । ४३ । ३३—३६ ।
"नमुचिर्वासवाद्भीतः सूर्य्यरश्मिं समाविशत् ।
तेनेन्द्रः सख्यमकरोत् समयञ्चेदमब्रवीत् ॥
न चार्द्रेण न शुष्केण न रात्रौ नापि चाहनि ।
वधिष्याम्यसुरश्रेष्ठ ! सखे ! सत्येन ते शपे ॥
एवं स समयं कृत्वा दृष्ट्वा नीहारमीश्वरः ।
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः ॥
तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वयात् ।
भो मित्रहन् ! पापेति ब्रुवाणं शक्रमन्तिकात् ॥")

नमुचिद्विट्, [ष्] पु, (नमुचिं द्वेष्टीति । द्विष्+"सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) इन्द्रः । यथा, माघे । १ । ५१ ।
"विरोधि चक्रे नमुचिद्विषा वशी
य इत्थमस्वास्थ्यमहर्द्दिवं दिवः ॥"

नमुचिसूदनः, पुं, (नमुचिं दैत्यविशेषं सूदयतीति । सूदि+ल्युः ।) इन्द्रः । इत्यमरः । १ । १ । ४६ ॥

नमेरुः पुं, (नम्यते इति । नम+बाहुलकात् एरुः ।) रुद्राक्षः । इति भूरिप्रयोगः ॥ सुरपुन्नागः । इति राजनिर्घण्टः ॥ (यथा, रघुः । ४ । ७४ ।
"विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ॥")

नमोगुरुः, पु, (नमस्करणीयो गुरुः ।) नमस्कारेर्गुरुः । ब्राह्मणः । इति काचित् शब्दरत्नावली ॥

नम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) ओष्ठ्यवर्गशेषोपधः । नम्बति । इति दुर्गादासः ॥

नम्रः त्रि, (नमतीति । नम+"नमिकम्पीति ।" ३।२।१६७। इति रः ।) नत । इति हलायुधः ॥ (यथा, पञ्चतन्त्रे । २ । १९८ ।
"यस्मिन् सरलञ्चापि तच्चापत्सु न सीदति ।
धनुर्मित्रं कलत्रञ्च दुर्लभं शुद्धवंशजम् ॥")

नम्रक, पु, (नम्र इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) वेतस । इति भावप्रकाशः ॥ (नम्र एव । स्वार्थे कन् । नतः, त्रि ॥)

नय, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् ।) ङ, नयते । इति दुर्गादासः ॥

नयः, पुं, (नीयतेऽनेनेति । नी+"एरच् ।" ३ । ३ । ५६ । इत्यच् ।) नीतिः । तत्पर्य्यायः । नायः २ इत्यमरः । ३।२।१८ ॥ (यथा, पञ्चतन्त्रे ।१।३८५ ।
"कथञ्चिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः ॥")
द्यूतविशेषः । इति मेदिनी । ये, ३४ ॥ नैगमादिः । इति हेमचन्द्रः ॥ न्याय्ये नेतरि च त्रि । इति शब्दरत्नावली ॥

नयन, क्ली, (नीयते दृष्टिविषयोऽनेनेति । नी+करणे ल्युट् ।) चक्षुः । इत्यमरः । २ । ६ । ९३ ॥ (यथा, मार्कण्डेये । १८ । ४० ।
"नीलोत्पलाभनयनां पीनश्रोणिपयोधराम् ॥")
नी ञ प्रापणे इत्यस्माद्भावे ल्युट्प्रत्ययः ॥ प्रापणम् । (आनयनम् । यथा, हरिवंशे । १२७ । ११ ।
"तस्य त्विंशच्च देवेश ! शृण्वतां वदतो मम ।
नयनं पारिजातस्य द्वारकां मम रोचते ॥")

नयनी, स्त्री, (नीयतेऽनयेति । नी + करणे ल्युट् + ङीप् ।) कनीनी । इति शब्दचन्द्रिका ॥

नयनोत्सवः, पुं, (नयनयोरुत्सवो यस्मात् ।) प्रदीपः । इति शब्दरत्नावली ॥ चक्षुरुत्सवश्च ॥

नयनोपान्तः, पुं, (नयनयोरुपान्तः प्रान्तभागः ।) अपाङ्गः । इति राजनिर्घण्टः ॥

नयनौषधं, क्ली, (नयनयोरौषधम् ।) पुष्पकासीसम् । इति हेमचन्द्रः । ४ । १२३ ॥

नयपीठी, स्त्री, (नयस्य पीठीव ।) अष्टकाष्ठम् । इति त्रिकाण्डशेषः ॥ छक् इति भाषा ॥

नयविशारद, पुं, (नये नीतौ विशारदो विज्ञः ।) नीतिशास्त्रज्ञः । यथा,—

"षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ।

सान्धिविग्रहिकः कार्य्यो राज्ञा नयविशारदः ॥"

इति मात्स्ये २६ अध्यायः ॥

नरं, क्ली, (नृणाति प्रापयति आनन्दमिति । नृ प्रापणे + अच् ।) रामकर्पूरतृणम् । इति मेदिनी । रे, ५२ ॥

नरः, पुं, (नृणातीति । नृ + अच् ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, मनुः ।१ । ६६ ।

"बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥")

पुरुषः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । ५ । २ । १४ ।

"यदा कदापि दैत्येन्द्र ! नार्य्यास्ते मरणं ध्रुवम् ।

न नरेभ्यो महाभाग । स्त्रीतस्ते महिषासुर । ॥")

विष्णुः । (महादेवः । यथा, महाभारते । १३ । १७ । ११५ ।

"गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः ॥")

अर्ज्जुनः । इति मेदिनी । रे, ५२ ॥ (नरमुनेरंशजातत्वादस्य तथात्वम् ।) शङ्कुः । इति लीलावती ॥ * ॥ अथ नरजन्मकारणम् । "पितृ-मुक्तोषारी नरः ।" अन्यच्च । सुखबोधे ।

"विषमायां तिथौ विप्र कुर्य्याद्गौजन्तु कन्यकाम् ।

समायां पुरुषं नूनं केचिदाहुर्मनीषिणः ॥

चतुरशीतिमत्यास्ते गोचरा तत्परः नरः ।

ततस्तु ब्राह्मणश्च स्यादत्र नात्र संशयः ॥"

इति पाद्मोत्तरखण्डे १५ अध्यायः ॥

(नरनामख्यातो हरेरंशभूतो धर्म्मपुत्त्र ऋषिः । यथा, देवीभागवते । ४ । ५ । १५ ।

"हरेरंशौ स्थितौ तत्र नरनारायणावृषी ।

पूर्णं वर्षसहस्रन्तु चक्राते तप उत्तमम् ॥"

अस्य विवरणन्तु तत्रैव विशेषतो द्रष्टव्यम् ॥ * ॥ देवयोनिविशेषः । यथा, विष्णुपुराणे ।१।५।५८।

"गन्धर्वनरयक्षांसि वयःपशुमृगोरगान् ॥")

नरक, पुं, (नृणाति क्लेशं प्रापयतीति । नॄ + "कृञादिभ्यः संज्ञायां वुन् ।" उणां । ५ । ३५ । इति वुन् ।) दैत्यविशेषः । इन्दुकादिदोषः । (नरस्य मनुष्यस्य कं शिरो यत्र ।) दैत्यविशेष । अयं पृथिव्या गर्भे वराहदेवाज्जातः । यथा,—

"रजस्वलायां तोयायां गर्भे धर्षितेन योधितम् ।

यतो जातस्ततो भूमौ दैत्यश्चोऽपि चोऽसुरः ॥"

तस्य नामकारणं यथा,—

"मानुषस्य शिरस्तत्र स्ततस्य प्राप्य बालकः ।

स्वशिरस्तत्र विन्यस्य ददर्शस्याँ चरणं तदा ॥

नरस्य शीर्षे स्वशिरो निधाय स्थितवान् यतः ।

तस्मात्तस्य मुनिश्रेष्ठो नरकं नाम वै व्यधात् ॥"

तस्य राज्यं यथा,—

श्रीभगवानुवाच ।

"करतोया सत्यगङ्गा पूर्व्वभागावधिश्रिता ।

यावल्ललितकान्तास्ति तावद्देशं पुरं तदा ॥

अत्र देवी महामाया योगनिद्रा जगत्प्रसूः ।

कामाख्यारूपमादाय सदा तिष्ठति शोभना ॥

अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुत ।

अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः ॥

अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा ।

चन्द्रः सूर्य्यश्च सततं वसतोऽत्रैव पुत्त्रक ॥

सर्व्वे क्रीडार्थमायाता रहस्यं देशमुत्तमम् ।

अत्र श्रीः सर्व्वतोभद्रा भोग्यमत्र सदा बहु ॥

अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज्ज ह ।

ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा ॥

अत्र त्वं वस भद्रन्ते त्वभिषिक्तो मया स्वयम् ।

सतदारः सहामात्यो राजा भूत्वा महाबल ॥"

तस्य महिषी माया यथा,—

"ततो विदर्भराजस्य पुत्त्रीं मायाङ्यां हरिः ।

पुत्त्रार्थे वरयामास नरकस्य समां गुणैः ॥

सामुद्वाह्य हृषीकेशस्तस्मिन् पुरवरे स्वयम् ।

तया समं स्वतनयं राजत्वेनाभ्यषेचयत् ॥"

तस्य पुत्त्रा यथा,—

"चतुरस्त्वाथ मायाया कालेन नरकः क्रमात् ।

भगदत्तं महाशीर्षं मदवन्तं सुमालिनम् ॥

चतुरो जनयामास पुत्त्रांस्तांश्च क्षितेः सुतः ।

महासत्त्वान् महावीर्य्यान् देवैरन्यैर्दुरासदान् ॥"

इति कालीपुराणे ३८ अध्यायः ॥

पापिनां यातनास्थानम् । तत्संस्था यथा,—

"पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् ।

सचिरं तानि कथ्यन्ते भुवनानि चतुर्द्दश ॥

अष्टाविंशति विख्यातास्ततो नरककोटयः ।

नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः ॥

तस्याधस्तादनन्ताख्यो यः सर्व्वमयो महान् ।

तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत् ॥"

इति वह्निपुराणे गणभेदनामाध्यायः ॥

तत्पर्य्यायः । नारकः २ निरयः ३ दुर्गतिः ४ । इत्यमरः । १ । ८ । १ ॥ * ॥ नरकसंख्या यथा,—

"उक्तोऽयं नरकः शक्र । कोटाः सप्तसमन्ततः ।

चत्वारिंशत्तु तेषां प्रधानं तन्निबोधत ॥"

उक्तार्द्ध पातालं कालाग्निरुद्रस्य पुरोर्द्ध ।

"अवीचि कुम्भिपाकञ्च तथा वैतरणी महान् ।

कूटशाल्मलिरत्युग्रं ... पर्व्वतारोहणम् ॥

... कृमिमांसं ... जलम् ।

... सप्तायसगुडादिकम् ॥

प्रतिपूर्णकथा ... रुधिरं यथा ।

... ।

... भीमा ... ।

कुम्भीपाकः क्षुरस्येयः सञ्जीवनसुनामकम् ॥

कालसूत्रं महापद्मं शीतोष्णं क्षुरमेव च ।

अमरीषं तथा घोरं महारौरवसंज्ञकम् ॥

सूचीमुखेक्षुयन्त्रञ्च तैलं तप्तकुम्भकम् ।

असिपत्रं तथा शाल्मं भूमिर्व्वागप्रधारिका ॥"

इति देवीपुराणम् ॥

नरकागामिनो यथा,—

यम उवाच ।

"न गच्छन्ति नरा घोरान् बहवोऽधर्म्मनिर्म्मितान् ।

यथाश्च सुबहूंस्तत्र प्राप्नुवन्ति तपोधन ॥

विस्तरेण तु तत् सर्व्वं ब्रवीमि मुनिसत्तम ।

श्रूयतां तन्महाभाग । श्रुत्वा चैवोपधारय ॥

नास्तिचिन्नरकं याति न सतुपुत्री न भूमिदः ।

सूरश्च शतवर्षी च वेदानाञ्चैव पारगः ॥

पतिव्रता न गच्छन्ति सत्यवाक्याश्च ये नराः ।

अजिताश्चाशठाश्चैव स्वामिभक्ताश्च ये नराः ॥

तिलं गाञ्च हिरण्यञ्च पृथिवीञ्चापि शाश्वतीम् ।

ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥

स्वदारनिरता दान्ताः परदारविवर्ज्जकाः ।

सर्व्वभूतात्मभूताश्च सर्व्वभूतानुकम्पकाः ॥

न गच्छन्ति तु तं देशं पापिष्ठं तमसावृतम् ।

यातनास्थानसंपूर्णं घोरप्रतिभयस्वनम् ॥

ज्ञानवन्तो द्विजा ये च ये च विद्यापरं गताः ।

उदासीना न गच्छन्ति स्वाम्यर्थे च हता नराः ॥

न गच्छन्त्यत्र दातारः सर्व्वभूतहिते रताः ।

शुश्रूषका मातृपित्रोर्न गच्छन्ति न संशयः ॥

अहिंसका न गच्छन्ति ब्रह्मचर्य्यव्यवस्थिताः ।

पतिव्रता दानवन्तो द्विजभक्ताश्च ये नराः ॥

यथोक्तं यजमानाश्च सत्रयाजिन एव च ।

चातुर्म्मास्यकरा ये च ये द्विजा आहिताग्नयः ॥

गुरुवित्तानुपालाश्च व्रतिनो मौनयन्त्रिताः ।

नित्यस्वाध्यायिनो दान्ताः सदा सन्ध्याश्च ये नराः ॥

मानवान् पूजयन्तो वै आत्मभावेन भाविताः ।

अपव्यमैथुना ये च न गच्छन्ति द्विजोत्तमाः ॥

ब्राह्मणा अमरत्वञ्च प्राप्नुवन्ति न संशयः ॥

निराशाः सर्व्वकामेभ्यो निराशा सुजितेन्द्रियाः ।

न गच्छन्ति हि तं घोरं यत्र ते पापकर्म्मिणः ॥"

इति वराहपुराणम् ॥ * ॥

नरकगामिनो यथा,—

नारद उवाच ।

"इष्टक्रमागतमपि वक्ष्यामि नरकं ये प्रयान्ति हि ।

सर्व्वेष्वेव तु कार्य्येषु देवपूर्व्वेषु भूमिप ॥

... ।

गुर्व्वर्थे वा भयार्त्ते वा ... ।

येऽनृतं वादयन्ति ... ।

... ।

... ।

... ।

... ।

... ।

अक्षतज्ञाश्च मित्राणां ते वै निरयगामिनः ॥
पाषण्डा दूषकाश्चैव समयानाञ्च दूषकाः ।
ये प्रत्यवस्थितास्चैव ते वै निरयगामिनः ॥
वृत्तिच्छेदं गृहच्छेदं दानच्छेदञ्च पार्थिव ।।
मित्रच्छेदं तथाशायाः कृत्वा नरकगामिनः ॥
विषमव्यवहाराश्च विषमाश्चैव बुद्धिषु ।
लाभेषु विषमाश्चैव नरा निरयगामिनः ॥
क्षताश्च क्षतनिर्व्वेशः क्षतभक्तं क्षतश्रमम् ।
भेदैर्ये व्यवकर्षन्ति ते वै निरयगामिनः ॥
द्यूतसंव्यवहाराश्च निष्परीषाश्च मानवाः ।
प्राणिहिंसाप्रवृत्ताश्च ते वै निरयगामिनः ॥
वेदविक्रयिणश्चैव वेदानाञ्चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥
केशविक्रायका राजन् । विषविक्रायकाश्च ये ।
क्षीरविक्रायकाश्चैव ते वै निरयगामिनः ॥
चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः ।
विकर्म्मभिश्च जीवन्ति ते वै निरयगामिनः ॥
ब्राह्मणानां गवाञ्चैव कन्यानाञ्च महामते ! ।
येऽन्तरं यान्ति कार्य्येषु ते वै निरयगामिनः ॥
शस्त्रविक्रायकाश्चैव कर्त्तारश्च महीपते ! ।
शल्यानां धनुषाश्चैव ते वै निरयगामिनः ॥
शिलाभिः शङ्कुभिर्व्वापि श्वभ्रैर्व्वा मनुजर्षभ ! ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिनः ॥
अगोप्तारश्च राजानो बलिषड्भागतस्कराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ॥
शान्तान् दान्तानथ प्राज्ञान् दीर्घकालसहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ॥
बालानामथ वृद्धानां दासानाञ्चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ॥
इत्येतत् कथितं राजन् । धर्म्माधर्म्मविनिर्णयम् ।
विमृष्य पुरुषः कर्म्म धर्म्ममेव समाचरेत् ॥”

इति पाद्मे स्वर्गखण्डे ३४ अध्यायः ॥

नरकविशेषगामिपापिनो यथा,—
“कूटसाक्षी तथा सम्यक् पक्षपातेन यो वदेत् ।
यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ॥
भ्रूणहा पुरहर्त्ता च गोघ्नश्च मुनिसत्तम ! ।
यान्ति ते नरके रोधे यश्चोच्छ्वासनिरोधकः ॥
सुरापो ब्रह्महा हर्त्ता सुवर्णस्य च शूकरे ।
प्रयाति नरके यश्च तैः संसर्गमुपैति वै ॥
राजन्यवैश्यहा ताले तथैव गुरुतल्पगः ।
तप्तकुम्भे स्वसृगामी हन्ति राजभटांश्च यः ॥
साध्वीविक्रयकृद्बन्धपालः केशरिविक्रयी ।
तप्तलौहे तु पच्यन्ते यश्च भक्तं परित्यजेत् ॥
‘केशरी अश्वः ।’
स्नुषां सुताञ्चापि गत्वा महाज्वाले निपात्यते ।
अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः ॥
वेददूषयिता यश्च वेदविक्रायकश्च यः ।
अगम्यागामी यश्च स्यात्ते यान्ति लवणं द्विज ! ॥
चौरो विमोहे पतति मर्य्यादादूषकस्तथा ।
देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ॥
स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत् ।
पितृदेवातिथीन् यस्तु पर्य्यश्नाति नराधमः ।
लालाभक्षे स यात्युग्रे शरकर्त्ता च रोधके ॥”
‘पर्य्यश्नाति परित्यज्य आदौ भुङ्क्ते ।’
करोति कर्णिनो यस्तु यस्तु खड्गादिकृन्नरः ॥
प्रयान्ति ते विशसने नरके भृशदारुणे ।
असत्प्रतिग्रहीतारो नरके यान्त्यधोमुखे ॥
अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः ।
वेगी पूयवहश्चैको याति मिष्टान्नभुङ्नरः ॥
‘वेगी साहसकारी । पुत्त्रादीन् वर्ज्जयित्वा एक एव मिष्टान्नभुक् ।’
लाक्षामांसरसानाञ्च तिलानां लवणस्य च ।
विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! ॥
मार्ज्जारकुक्कुटच्छागान् श्ववराहविहङ्गमान् ।
पालयन्नरकं याति तमेव द्विजसत्तम ! ॥
रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा ।
सूची माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥
‘पत्यौ जीवति जाराज्जातः कुण्डः तदन्नभोजी माहिषो महिष्युपजीवी । यद्वा,—
महिषीत्युच्यते भार्य्या भगेनोपार्ज्जितं धनम् ।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः ॥

इति स्मृतिः ॥

पर्व्वकारी धनादिलोभेनापर्व्वसु अमावास्यादिक्रियाप्रवर्त्तकः ।’
आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः ।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥
मधुहा ग्रामहन्ता च याति वैतरणीं नरः ।
रेतःपानादिकर्त्तारो मर्य्यादाभेदिनश्च ये ॥
ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये ।
असिपत्रवनं याति वनच्छेदी वृथैव यः ॥
औरभ्रिको मृगव्याधो वह्निज्वाले पतन्ति वै ।
यान्त्येते द्विज ! तत्रैव यश्चापाकेषु वह्निदः ॥
व्रतेषु लोपको यश्च स्वाश्रमाद्विच्युतश्च यः ।
सन्दंशयातनामध्ये पततस्तावुभावपि ॥
दिवास्वप्नेषु स्कन्दन्ति ये नरा ब्रह्मचारिणः ।
पुत्त्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥
एते चान्ये च नरकाः शतशोऽथ सहस्रशः ।
येषु दुष्कृतकर्म्माणः पच्यन्ते यातनागताः ॥
तथैव पापान्येतानि तथान्यानि सहस्रशः ।
भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥
वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः ।
कर्म्मणा मनसा वाचा निरयेषु पतन्ति ते ॥
अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः ।
देवाश्चाधोमुखान् सर्व्वानधःपश्यन्ति नारकान् ॥
स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः ।
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ॥
सहस्रभागाः प्रथमा द्वितीयानुक्रमास्तथा ।
सर्व्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः ॥
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः ।
पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ॥”

इति विष्णुपुराणे । २ । ६ । ७—३२ ॥

अपि च ।
“कथयामि विचित्राणां कर्म्मणां विविधा गतीः ।
ताः शृणुष्व महाराज ! याः श्रुत्वा मोहमाप्नुयात् ॥
परवित्तं परापत्यं कलत्रं पारकञ्च यः ।
हरते बुद्धिमोहेन सोऽन्ते मृत्युवशं गतः ॥
कालपाशेन सम्बद्धो यमदूतैर्महाबलैः ।
तामिस्रे पात्यते तावत् यावद्वर्षसहस्रकम् ॥
तत्र ताडनमुद्धृताः कुर्व्वन्ति यमकिङ्कराः ।
पापभोगेन सन्तप्तस्ततो योनिषु शौकरीम् ॥
तत्र भुक्ता महादुःखं मानुषत्वं गमिष्यति ।
रोगादिचिह्नितं तत्र दुर्यशोज्ञापकं स्वकम् ॥
भूतद्रोहं विधायैवं केवलं स्वकुटुम्बकम् ।
पुष्णाति पापनिरतः सोऽन्धतामिस्रके पतेत् ॥
ये नरा इह जन्तूनां वधं कुर्व्वन्ति वै मृषा ।
ते रौरवे निपात्यन्ते खाद्यन्ते रुरुभिर्यतः ॥
यः स्वोदरार्थं भूतानां वधमाचरति स्फुटम् ।
महारौरवसंज्ञे तु पात्यते स यमाज्ञया ॥
यो वै निजन्तु जनकं ब्राह्मणं द्वेष्टि पापकृत् ।
कालसूत्रे महादुष्टे योजनायतविस्तृते ॥
यावन्ति पशुरोमाणि गवां देहे करोति यः ।
तावद्वर्षसहस्राणि पच्यते यमकिङ्करैः ॥
यो भूमौ भूपतिर्भूत्वा दण्डायोग्यन्तु दण्डयेत् ।
करोति ब्राह्मणस्यापि देहदण्डं विलोलुपः ।
स शूकरमुखे दुष्टे पीड्यते यमकिङ्करैः ॥
पश्चाद्दृष्टासु योनीषु जायते पापसन्ततये ।
ब्राह्मणानां गवां ये तु द्रव्यं वित्तं तथाल्पकम् ॥
वृत्तिं वा गृह्णते मोहाल्लुम्पन्ति स्ववलान्नराः ।
ते परत्रान्धकूपे च पात्यन्ते च महाहिंसाः ॥
योऽर्थं स्वयमुपाहृत्य मधुरञ्चात्ति लोलुपः ।
न देवाय न सुहृदे ददाति रसनातुरः ॥
स पतत्येव नरके कृमिभोजनसंज्ञके ।
अनापदि नरो यस्तु हिरण्यादीनपाहरेत् ॥
ब्राह्मणस्य वा महादुष्टः स दग्धे नरके पचेत् ।
यः स्वदेहं प्रपुष्णाति नान्यं जानाति मूढधीः ॥
मनसा कल्पितं द्रव्यं विदुषे यो ददाति न ।
स पुमान्नरकं याति यावदिन्द्राश्चतुर्दश ॥
पश्चाद्दुष्टासु योनीषु जायते वर्णसङ्करः ।
दानानि वाडवे दत्त्वा पुनः शुद्धो भविष्यति ॥
वाचा दत्तं मनोदत्तमिति साधु वदेद्यदि ।
कम्पन्ते पितरस्तस्य नरकाय ससुतसुताः ॥
वाचा दत्तं मनोदत्तं दत्तं पाणिकुशोदकम् ।
एतद्दत्तमदत्तं स्यात् जिह्वासुतृपाटयेद्यमः ॥
स यात्यते तैलतप्ते कुम्भीपाकेऽतिदारुणे ॥
यो नगम्यां स्त्रियं मोहाद्योषिद्वाथ कामयेत् ।
तं तया किङ्करा शूर्म्यां परिवद्धञ्च कुर्व्वते ॥
ये बलाद्वेदमर्य्यादां लुम्पन्ति स्ववलोद्धताः ।
ते वैतरण्यां पतिता मांसशोणितभक्षकाः ॥
वृषली यः स्त्रियं कृत्वा तया गार्हस्थ्यमाचरेत् ।
पूयोदे निपतत्येव महादुःखसमन्वितः ॥
ये दम्भानाश्रयन्ते वै धूर्त्ता लोकस्य वञ्चने ।
वैशसे नरके मूढ़ा पतन्ति यमताड़िताः ॥
ये सवर्णां स्त्रियं मूढ़ाः पाययन्ति स्वरेतसम् ।

नैतःकृत्याग् ते पात्या नैतःपानेषु तत्परा ॥
ये चौरा वह्निना दुष्टा गरदा ग्रामतुण्डका ।
सारमेयादने ते वै पात्यन्ते यातनान्विता: ॥
कूटसाक्ष्यं वदत्यज्ञा पुरुष: पापसम्भृत: ।
पारकीयञ्च सर्व्वं यो रक्षति प्रनभं वशी ॥
स वीचिनरके पापी ह्यवाक्‌शिरा पतत्यध: ।
तत्र दुःखं महद्भुङ्क्ते पापिष्ठा योनिमाव्रजेत् ॥
यो नरो रसनास्वादात् सुरां पिबति मूढधी ।
तम्पाययति लौहस्य रसं धर्म्मस्य किङ्करा ॥
यो गुरून्‌ह्यवमन्येत स्वविद्याचारदर्पित: ।
स मृत: पात्यते क्षारकर्द्दमेऽधोमुख: पुमान् ॥
विश्वासघातं कुर्व्वन्ति ये नरा धर्म्मनिष्कृता: ।
शूलप्रोते तु नरके पात्यन्ते बहुयातना: ॥
येन श्रुता रामकथा न परोपकृति: कृता ।
तेषां सहस्राणि दु:खानि भवन्ति नरकान्तरे ॥
यत्र यस्य सुखं भूयस्तस्य स्वर्ग इतीर्य्यते ।
ये दु:खिनो रोगयुता नरकादागतास्तु ते ॥”
इति पाद्मे पातालखण्डे ४८ अध्याय: ॥
(अथ महारौरवादिनरकाख्यानम् । यथा,मार्क-
ण्डेये । १२ । ३-३८ ।
पुत्र उवाच ।
“रौरवस्ते समाख्यात: प्रथमं नरको मया ।
महारौरवसञ्ज्ञन्तु शृणुष्व नरकं पित: ॥
योजनानां सहस्राणि सप्त सप्त समन्तत: ।
तत्र ताम्रमयी भूमिरधस्तस्य हुताशन: ॥
तत्तापतप्ता सर्व्वाशा प्रोद्यदिन्दुसमप्रभा ।
विभाव्यते महारौद्रा दर्शनस्पर्शनादिषु ॥
तस्यां बद्ध: कराभ्याञ्च पद्भ्याञ्चैव यमानुगै: ।
मुच्यते पापकृन्मध्ये लुठमान: स गच्छति ॥
काकैर्बकैर्वृकोलूकैर्वृश्चिकैर्मशकैस्तथा ।
भक्ष्यमाणस्तथा गृध्रैर्द्रुतं मार्गे विकृष्यते ॥
दह्यमान: पितर्मातर्भ्रातस्तातेति चाकुल: ।
वदत्यसकृदुद्विग्नो न शान्तिमधिगच्छति ॥
एवं तस्मान्नरैर्मोक्षो व्यतिक्रान्तैरवाप्यते ।
वर्षायुतायुतै: पाप यै: कृतं दुष्टबुद्धिभि: ॥
तथान्यस्तु तमो नाम सोऽतिशीत: स्वभावत: ।
महारौरववद्दीर्घस्तथा स तमसा वृत: ॥
शीतार्त्तास्तत्र धावन्तो नरास्तमसि दारुणे ।
परस्परं समासाद्य परिरभ्याश्रयन्ति च ॥
दन्तास्तेषाञ्च भज्यन्ते शीतार्त्तिपरिकम्पिता: ।
क्षुत्तृष्णा प्रबला तत्र तथैवान्येऽप्युपद्रवा: ॥
हिमखण्डवहो वायुर्भिनत्त्यस्थीनि दारुण: ।
मज्जासृग्गलितन्तस्मादश्नुवन्ति क्षुधान्विता: ॥
लेलिह्यमाना भ्राम्यन्ते परस्परसमागमे ।
एवं तत्रापि सुमहान् क्लेशस्तमसि मानवै: ॥
प्राप्यते ब्राह्मणश्रेष्ठ । यावद्दुष्कृतसंक्षय: ॥
निकृन्तन इति ख्यातस्ततोऽन्यो नरकोत्तम: ।
तस्मिन् कुलालचक्राणि भ्राम्यन्त्यविरतं पित: ॥
तेष्वारोप्य निकृत्यन्ते कालसूत्रेण मानवा: ॥
यमानुगाङ्गुलिस्थेन ह्यापादतलमस्तकम् ।
नचैषां जीवितभ्रंशो जायते द्विजसत्तम ॥
छिन्नानि तेषां शतश: खण्डान्यैक्यं व्रजन्ति च ।
एवं वर्षसहस्राणि छिद्यन्ते पापकर्म्मिण: ॥
तावद्यावदशेषं वै तत्पापं हि क्षयं गतम् ।
अप्रतिष्ठञ्च नरकं शृणुष्व गदतो मम ॥
यत्रस्थैर्नारकैर्दु:खमसह्यमनुभूयते ।
तान्येव तत्र चक्राणि घटीयन्त्राणि चान्यत: ॥
दु:खस्य हेतुभूतानि पापकर्म्मकृतां नृणाम् ।
चक्रेष्वारोपिता: केचिद्भ्राम्यन्ते तत्र मानवा: ॥
यावद्वर्षसहस्राणि न तेषां स्थितिरन्तरा ।
घटीयन्त्रेषु चैवान्यो बद्धस्तोये यथा घटी ॥
भ्राम्यन्ते मानवा रक्तमुद्गिरन्त: पुन: पुन: ।
अन्त्रैर्मुखविनिष्क्रान्तैर्नेत्रैरन्त्रविलम्बिभि: ॥
दु:खानि ते प्राप्नुवन्ति यान्यसह्यानि जन्तुभि: ॥
असिपत्रवनं नाम नरकं शृणु चापरम् ।
योजनानां सहस्रं यो ज्वलदग्न्यास्तृतावनि: ॥
तप्ता: सूर्य्यकरैश्चण्डैर्यत्रातीव सुदारुणै: ।
प्रपतन्ति सदा तत्र प्राणिनो नरकौकस: ॥
तन्मध्ये च वनं रम्यं स्निग्धपत्रं विभाव्यते ।
पत्राणि तत्र खड्गानां फलानि द्विजसत्तम ! ॥
श्वानश्च तत्र सबला: स्वनन्त्ययुतशोभिता: ।
महावक्त्रा महादंष्ट्रा व्याघ्रा इव भयानका: ॥
ततस्तद्वनमालोक्य शिशिरच्छायमग्रत: ।
प्रयान्ति प्राणिनस्तत्र तीव्रतृट्परिपीडिता: ॥
हा मातर्हा तात । इति क्रन्दन्तोऽतीव
दु:खिता: ।
दह्यमानाङ्घ्रियुगला धरणीस्थेन वह्निना ॥
तेषां गतानां तत्रासिपत्रपाती समीरण: ।
प्रवाति तेन पात्यन्ते तेषां खड्गान्यथोपरि ॥
तत: पतन्ति ते भूमौ ज्वलत्पावकसञ्चये ।
लेलिह्यमाने चान्यत्र व्याप्ताशेषमहीतले ॥
सारमेयास्तत: शीघ्रं शातयन्ति शरीरत: ।
तेषामङ्गानि रुदतामनेकान्यतिभीषणा: ॥
असिपत्रवनं तात । मयैतत् कीर्त्तितं तव ।
अत: परं भीमतरं तप्तकुम्भं निबोध मे ॥
समन्ततस्तप्तकुम्भा वह्निज्वालासमावृता: ।
ज्वलदग्निचयोद्वृत्ततैलायश्चूर्णपूरिता: ।
तेषु दुष्कृतकर्म्माणो याम्यै: क्षिप्ता ह्यधोमुखा: ॥
क्वाथ्यन्ते विस्फुटद्गात्रगलन्मज्जजलाविला: ।
स्फुटत्कपालनेत्रास्थिच्छिद्यमाना विभीषणै: ॥
गृध्रैरुत्पाट्य मुच्यन्ते पुनस्तेष्वेव वेगिनै: ।
पुन निमिमिमायन्ते तैलेनैक्यं व्रजन्ति च ॥
द्रवीभूतै: शिरोगात्रस्नायुमांसत्वगस्थिभि: ।
ततो याम्यैर्नरैराशु दर्व्व्या घट्टनघट्टिता: ॥
क्वाथवर्त्ते महातैले मथ्यन्ते पापकर्म्मिण: ।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पित: ॥”)

नरककुण्डं, क्ली, (नरकस्य कुण्डम् ।) यातनास्थानम् । तद्यथा, यम उवाच । “नरकाणाञ्च कुण्डानि सन्ति नानाविधानि च । नानापुराणभेदेन नामभेदानि तानि च ॥ विस्तृतानि गभीराणि क्लेशदानि च जीविनाम् । भयङ्कराणि घोराणि हे वत्से । कुत्सितानि च ॥ षडशीतिश्च कुण्डानि संयमन्याञ्च सन्ति च । निबोध तेषां नामानि प्रसिद्धानि श्रुतौ सति ॥” इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । २७ । २८ अध्यायौ ॥

तत्र नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिन:	
वह्निकुण्डम्	१	कटुवाचा बान्धवदग्धसत्	१
तप्तकुण्डम्	२	ब्राह्मणातिथिभोजनाप्रद:	२
क्षारकुण्डम्	३	निषिद्धदिने वस्त्रे क्षारसंयोजक:	३
विट्कुण्डम्	४	मक्षत्रशाव्यपहारक:	४
मूत्रकुण्डम्	५	परतडागं खनित्वोत्सृष्टक:	५
श्लेष्मकुण्डम्	६	एकाकी मिष्टभोजी	६
गरकुण्डम्	७	पितृमातृगुरुभार्याद्यपोषक:	७
दूषिकाकुण्डम्	८	अतिथि दृष्ट्वा वक्रचक्षु:कारी	८
वसाकुण्डम्	९	[illegible]	९
शुक्रकुण्डम्	१०	परस्त्रीगामी परपुत्रालिङ्गी च	१०
असृक्कुण्डम्	११	गुर्व्वादिताडक: [illegible]	११
अश्रुकुण्डम्	१२	[illegible]	१२
गात्रमलकुण्डम्	१३	[illegible]	१३
कर्णविट्कुण्डम्	१४	बधिरोपहासकृत्	१४
मज्जाकुण्डम्	१५	लोभात् [illegible]	१५

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिन:	
मांसकुण्डम्	१६	अर्थलोभात् कन्याविक्रायक:	१६
नखकुण्डम्	१७	आशौचवासादिषु नखमलत्यागी	१७
लोमकुण्डम्	१८		१८
केशकुण्डम्	१९	सकेशपार्थिवशिवलिङ्गार्च्चक:	१९
अस्थिकुण्डम्	२०	विष्णुपदे पितृपिण्डादाता	२०
ताम्रकुण्डम्	२१	[illegible]	२१
लौहकुण्डम्	२२	ऋतुस्नातावीरयोरन्नभुक्	२२
तीक्ष्णकण्टककुण्डम्	२३	कटुवाचा स्वामिताडिका	२३
विषकुण्डम्	२४	[illegible]	२४
घर्म्मकुण्डम्	२५	[illegible]	२५
तप्तसुराकुण्डम्	२६	[illegible]	२६
प्रतप्ततैलकुण्डम्	२७	[illegible]	२७
दन्तकुण्डम्	२८	[illegible]	२८
कृमिकुण्डम्	२९	[illegible] सुप्त च	२९

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः	
पूयकुण्डम्	३०	शूद्रयाजी तत्श्राद्धभुक् तद्देवदायी च ब्राह्मणः	३०
सर्पकुण्डम्	३१	श्रीकृष्णपदचिह्नमस्तकस्य सर्पस्य हन्ता	३१
मशकुण्डम्	३२	विधिं दत्त्वा क्षुद्रजन्तुहन्ता	३२
दंशकुण्डम्	३३	विधिं दत्त्वा जीवहन्ता	३३
गरलकुण्डम्	३४	मक्षिकां हत्वा मधुग्राही	३४
वज्रदंष्ट्रकुण्डम्	३५	अदण्ड्यविप्रयोर्दण्डकृत्	३५
वृश्चिककुण्डम्	३६	अर्थलोभात् प्रजादण्डकृत्	३६
शरकुण्डम्	३७	शस्त्रधारी धावकः सन्ध्याहरिभक्तिहीनश्च ब्राह्मणः	३७
शूलकुण्डम्	३८		३८
खड्गकुण्डम्	३९		३९
गोलकुण्डम्	४०	अपराधेन कारायां प्रजाबन्धनकृत्	४०
नक्रकुण्डम्	४१	जलादुत्थितनक्रादि हन्ता	४१
काककुण्डम्	४२	कामेन परस्त्रीवक्षःश्रोण्यास्यद्रष्टा	४२
सञ्चानकुण्डम्	४३	स्वर्णचौरः	४३
वाजकुण्डम्	४४	ताम्रलौहचौरः	४४
वज्रकुण्डम्	४५	देव देवद्रव्ययोश्चौरः	४५
तप्तपाषाणकुण्डम्	४६	देव द्विजयो रौप्य गो वस्त्राणां चौरः	४६
तीक्ष्णपाषाणकुण्डम्	४७	देव द्विजयोः पित्तल कांस्यपात्रचौरः	४७
लालाकुण्डम्	४८	वेश्यान्नभुक् तद्वृत्तिजीवी च	४८
मसीकुण्डम्	४९	म्लेच्छसेवी मसीजीवी च ब्राह्मणः	४९
चूर्णकुण्डम्	५०	देव द्विजयोः शस्यताम्बूलासनचौरः	५०
चक्रकुण्डम्	५१	विप्रद्रव्यं हृत्वा चक्रकारी	५१
वक्रकुण्डम्	५२	विप्र-बान्धवयोर्वक्रताकारी	५२
कूर्म्मकुण्डम्	५३	हरिशयने कूर्म्ममांसभुक् ब्राह्मणः	५३
ज्वालाकुण्डम्	५४	देवद्विजयोर्घृततैलादिहृत्	५४
भस्मकुण्डम्	५५		५५
दग्धकुण्डम्	५६	देवद्विजयोर्धात्रीगन्धतैलद्रव्याणामपहर्त्ता	५६
तप्तसूर्म्मीकुण्डम्	५७	बलछलत्वादिना परभूमिहरः	५७
असिपत्रकुण्डम्	५८	अर्थलोभात् खड्गेन जीवच्छेदी नरघाती च	५८
क्षुरधारकुण्डम्	५९	ग्रामनगरादिदाहकृत्	५९

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः	
सूचीमुखकुण्डम्	६०	परकर्णे मुखं दत्त्वा परनिन्दकः परदोषश्रावी देवब्राह्मणनिन्दकश्च	६०
गोधामुखकुण्डम्	६१	गृहं भित्त्वा वस्तुगोच्छागमेषचौरः	६१
नक्रमुखकुण्डम्	६२	सामान्यद्रव्यचौरः	६२
गजदंशकुण्डम्	६३	गजतुरगनरचौरः	६३
गोमुखकुण्डम्	६४	जलपिबद्गोवारकः	६४
कुम्भीपाककुण्डम्	६५	गो स्त्री-भिक्षु-भ्रूण-ब्रह्महा अगम्यागामी दीक्षासन्न्यासीगतीर्थप्रतिग्राही ग्रामयाजी देवलः शूद्रसूपकारी वृषलीपतिश्च	६५
कालसूत्रकुण्डम्	६६	वेश्यान्नभुक् तत्संसर्गी च	६६
अवटोदकुण्डम्	६७	कुलटादिगत वेश्यागामी द्विजः	६७
अरुन्तुदकुण्डम्	६८	चन्द्रसूर्य्यग्रहणे निषिद्धकालभोजी	६८
पांशुभोजकुण्डम्	६९	एकस्मै वाग्दत्तकन्याया अन्यस्मै दाता	६९
पाशवेष्टकुण्डम्	७०	दत्तापहारी	७०
शूलप्रोतकुण्डम्	७१	अभक्त्या शिवलिङ्गपूजकः	७१
प्रकम्पाकुण्डम्	७२	विप्रदण्डकृत् तत्कम्पसभयदायी च	७२
उल्कामुखकुण्डम्	७३	सकोपवदना स्वामिनि कटुवादिनी	७३
अन्धकूपकुण्डम्	७४	शूद्रभोग्या ब्राह्मणी	७४
वेधनकुण्डम्	७५	वेश्या। सा च षट्पुंगमनाद्भवति	७५
दण्डताडनकुण्डम्	७६	युङ्गी। सा च सप्ताष्टपुंगमनाद्भवति	७६
जालबद्धकुण्डम्	७७	महावेश्या। साचाष्टाधिकपुंगमनाद्भवति	७७
देहचूर्णकुण्डम्	७८	कुलटा। सा च पुंद्वयगमनाद्भवति	७८
दलनाकुण्डम्	७९	स्वैरिणी। वृषली। सा चतुःपुंगमनाद्भवति	७९
शोषणकुण्डम्	८०	धृष्टा। पुंश्चली। सा च त्रिपुंगमनाद्भवति	८०
कषकुण्डम्	८१	सवर्णपरदारी	८१
सूर्पकुण्डम्	८२	ब्राह्मणीगामी क्षत्रियो वैश्यश्च	८२
ज्वालामुखकुण्डम्	८३	करे तुलसीगङ्गाजलदेवशिलाश्च कृत्वा प्रतिज्ञाकृतापालको मिथ्याशपथी मित्रद्रोही विश्वासघाती मिथ्यासाक्ष्यदश्च	८३
जिह्मकुण्डम्	८४	नित्यक्रियाहीनो देववागनास्तिको मन्त्रोपहासी च	८४
धूमान्धकुण्डम्	८५	देवविप्रयोर्धनहारी	८५
नागवेष्टनकुण्डम्	८६	वैद्यदेवग्रहशिल्पकारी लाक्षालोहव्यापारी रसादिविक्रयी च ब्राह्मणः	८६

नरकजित्, पुं, (नरकं तन्नाम्ना विख्यातमसुरं जयतीति। जि + क्विप्। तुक् च।) विष्णुः। इति त्रिकाण्डशेषः॥

नरकदेवता, स्त्री, (नरकस्य अधिष्ठात्री देवता।) निरयदेवी। तत्पर्य्यायः। अलक्ष्मीः २ निर्ऋतिः ३ कालपर्णी ४। इति शब्दरत्नावली॥

नरकमुक्त, त्रि, (नरकात् मुक्तः।) नरकागतः। यथा,—

"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते।
पतितात् प्रतिगृह्याथ खरयोनिं व्रजेद्बुधः॥
नरकात् प्रतिमुक्तस्तु कृमिर्भवति पातकी।
उपाध्याय व्यलीकन्तु कृत्वा श्वा भवति द्विजः॥
तज्जायां मनसा वाञ्छन् तद्द्रव्यं चाप्यसंशयम्।
गर्द्दभो जायते जन्तुर्मित्रस्यैवापमानकृत्॥
पित्रोरितरमाक्रुश्य शारिका सम्प्रजायते।
पितरौ पीडयित्वा तु कच्छपत्वञ्च जायते॥
भर्त्तुः पिण्डसमाश्रितो हितान्यानि च सेवयेत्।
सोऽपि मोहसमापन्नो जायते वानरो मृतः॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः।
असूयकश्च नरकान्मुक्तो भवति राक्षसः॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते।
यवधान्यानि हृत्वा तु जायते मूषिको मृतः॥
परदाराभिमर्षात्तु वृको घोरोऽभिजायते।
भ्रातृभार्य्याप्रसङ्गात्तु कोकिलो जायते नरः॥
गुर्व्वादिभार्य्यागमनाच्छूकरो जायते नरः।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः॥
देवतापितृविप्राणामदत्त्वा योऽन्नमश्नुते।
प्रमुक्तो नरकाच्चापि वायसः स प्रजायते॥
ज्येष्ठभ्रातृवमानाच्च क्रौञ्चयोनौ प्रजायते।
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत्।
कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा॥
अशस्त्रं पुरुषं हत्वा नरः सञ्जायते खरः।
कृमिः स्त्रीवधकर्त्ता च बालहन्ताभिजायते॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः।
हृत्वान्नञ्चैव मार्ज्जारस्तिलञ्चैव मूषिकः॥
घृतं हृत्वा च नकुलः काको मद्गुरमामिषम्।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः॥
अपो हृत्वा तु पापात्मा वायसः सम्प्रजायते।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता वकस्तथा॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते।
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः॥
छुच्छुन्दरिः शुभान् गन्धान् वस्त्रं हृत्वा शशो भवेत्।
षण्डः फलापहरणी काष्ठहृत् काष्ठकीटकः॥
पुष्पापहृद्दरिद्रस्तु पङ्गुर्यैवापहृन्नरः।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः॥
गृहहृन्नरकान् गत्वा रौरवादीन् सुदारुणान्।
तृणगुल्मलतावल्लीत्वक्सारतरुतां भवेत्॥

ग्य एव क्रमो ह्यो गोसुवर्णादिहारिणाम् ।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून् ॥
अश्वमिहिर्यो श्रुते च मन्दाग्निः सम्प्रजायते ।
परनिन्दाकृतघ्नत्वं परमर्म्मावघातनम् ।
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ॥
निकृत्या वञ्चनं नृणां कार्पण्यञ्च नृणां वधः ।
उपलक्षणादि जानीयात् मुक्तानां नरकाद्गु ॥"
प्रसङ्गात् स्वर्गागतलक्षणमप्याह ।
"दया भूतेषु संवादः परलोकं प्रतिक्रिया ।
सत्यं भूतहिता चोक्तिर्वेदप्रामाण्यदर्शनम् ॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः ।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः ॥
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं लयम् ॥"
इति गारुडे कर्म्मविपाकः २२८ अध्यायः ॥

नरकस्था, स्त्री, (नरके तिष्ठतीति । स्था+"सुपि स्थः ।"३।२।४। इति कः ।) वैतरणी नदी । इति हेमचन्द्रः । ४ । १५२ ॥ निरयस्थिते, त्रि । यथा,
"नरकस्थोऽपि देहं वै न पुनस्त्यक्तुमिच्छति ॥"
इति श्रीभागवतम् ॥

नरकान्तकः, पुं, (नरकस्य तन्नाम्ना ख्यातस्यासुरस्य अन्तकः ।) विष्णुः । इति पुराणम् ॥ (यथा, मुकुन्दमालायाम् । ७ ।
"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक ! प्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ॥")

नरकामयः, पुं, (नरकः आमय इव यस्य ।) प्रेतः । इति शब्दरत्नावली ॥ (नरकरूप आमयः ।) निरयरोगश्च ॥

नरकीलकः, पुं, (नरेषु कीलक इव निन्द्यत्वात् ।) गुरुघ्नः । तत्पर्य्यायः । गुरुहा २ । इति हेमचन्द्रः । ३ । ५२२ ॥

नरगणः पुं, (नरस्य गणो यस्मात् ।) नक्षत्रविशेषः । तज्जातजनः । यथा,—
"हस्तास्वातिमृगाश्विनीहरिगुरुः पौष्णानुराधादिति-
स्वाती रोहिणि चोत्तराणि भरणी पूर्व्वाणि भानि त्रयम् ।
ज्येष्ठाश्लेषविशाखमूलवरुणावस्विचित्रामघाः
कथ्यन्ते मुनिभिर्यथाक्रमवशाद्देवा नरा राक्षसाः ॥"
इति दीपिका ॥

अस्य फलम् । यथा, कोष्ठीप्रदीपे ।
"मानुष्ये मृदुकर्म्मसङ्गतमनाः श्रीलान्वितो धीयुतः ॥"
(नराणां गणः ।) नरसमूहः ॥

नरङ्गः, पु, (शृणाति प्रापयतीति । नॄ+"पतादेरङ्गच् ।" इति उणादिकोषटीकाधृतसूत्रात् अङ्गच् ।) वरकः । नारङ्गा इति भाषा ॥ (नु पुरुषस्य अङ्गम् ।) मेहने, क्ली । इत्युणादिकोषः ॥

नरदेवः, पु, (नरो देव इव ।) राजा । इति हलायुधः ॥ (यथा, हरिवंशे । ३२ । १२ ।
"रेतोधाः पुत्त्र उन्नयति नरदेव ! यमक्षयात् ॥")

नरनारायणौ, पु, (नरश्च नारायणश्च तौ ।) ऋषिविशेषौ । तावेव श्रीकृष्णार्ज्जुनौ सम्भूतौ । इति महाभारतम् ॥ (यथा, देवीभागवते । ४ । ५ । १३ ।
"नरनारायणौ चैव चेरतुस्तप उत्तमम् ।
प्रालेयाद्रिं समागत्य तीर्थे बदरिकाश्रमे ॥")

तयोरुत्पत्तिर्यथा,—
"अथ चिन्तयतस्तस्य स्वान्तं गत्वा जनार्द्दनः ।
तत् सर्व्वं ज्ञापयामास वराहवपुषो हितम् ॥
ततो देहपरित्यागं कर्त्तुं समभवद्यदा ।
तदा दंष्ट्राग्रघातेन नरसिंहं महाबलम् ॥
सरभो भगवान् भर्गो द्विधा मध्ये चकार ह ।
नरसिंहे द्विधाभूते नरभागेन तस्य तु ॥
नर एव समुत्पन्नो दिव्यरूपी महानृषिः ।
तस्य पश्चात्सभागेन नारायण इति श्रुतः ॥
अभवत् स महातेजा मुनिरूपी जनार्द्दनः ।
नरो नारायणश्चोभौ दृष्टिहेतू महामती ॥
ययोः प्रभावो दुर्द्धर्षः प्राज्ञे वेदे तपःसु च ॥"
इति कालिकापुराणे २६ अध्यायः ॥

कल्पभेदे तौ धर्म्मपुत्त्रौ । यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्त्यां
नारायणो नर इति स्वतपःप्रभावः ।
दृष्ट्वात्मनो भगवतो नियमावलोपं
देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥"
इति श्रीभागवते । २ । ७ । ६ ॥

(अनयोर्व्विशेषविवरणन्तु देवीभागवते ४ स्कन्धस्य ५ अध्यायमारभ्य द्रष्टव्यम् ॥)

नरपतिः, पु, (नरान् पातीति । पा+डतिः । नराणां पतिर्व्वा ।) राजा । इति शब्दरत्नावली ॥ (यथा, रघुः । २ । ७५ ।
"नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥")

नरप्रियः, पु, (नराणां प्रियः ।) नीलवृक्षः । इति राजनिर्घण्टः ॥ नरस्य प्रियवस्तुनि, त्रि ॥

नरभूः, स्त्री, (नराणां मनुष्याणां भूर्भूमिः ।) भारतवर्षः । इति त्रिकाण्डशेषः ॥ नरोत्पत्तिश्च ॥

नरभूमि, स्त्री, (नराणां मनुष्याणां भूमिः ।) भारतवर्षः । इति शब्दरत्नावली ॥

नरमानिनी, स्त्री, (नरं पुरुषमिव मन्यते इति । मन+णिनिः+ङीप् ।) श्मश्रुयुक्तनारी । इति त्रिकाण्डशेषः ॥

नरमानिका, स्त्री, (नरं मन्यते या । मन+ण्वुल् । टापि अत इत्वम् ।) नरमानिनी । इति शब्दरत्नावली ॥

नरमाला, स्त्री, (नराणां तन्मुण्डानां माला ।) मनुष्यमुण्डमाला । यथा, मार्कण्डेये । ८७ । ६ ।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥"

नरमालिनी, स्त्री, (नरस्येव माला केशसमूहो मुखेऽस्त्यस्या इति । इनिः+ङीप् । यद्वा, नरमानिनी प्रयोगानुरोधात् निपातनेन नस्य लत्वम् ।) श्मश्रुयुक्तनारी । इति हेमचन्द्रः । ३ । १९५ ॥ (नरस्य तन्मुण्डस्य मालास्त्यस्या इति ।) नरमालायुक्ता ॥

नरमेधः, पु, (मिध हिंसायाम्+भावे घञ् । नराणां पुरुषाणां मेधो हिंसनं यत्र ।) नरवधात्मकयज्ञविशेषः ॥ (यज्ञोऽयं वाजसनेयसंहितायाम् ३०—३१ अध्याययोर्दर्शितः । तत्र अधिकार्य्यादिकं ३० अध्याये वेददीपे उक्तम् । यथा,—
"ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति । सर्व्वभूतान्यतिक्रम्य स्थानमतिष्ठा । चैत्रशुक्लदशम्यामारम्भः । अत्र त्रयोविंशतिदीक्षा भवन्ति द्वादशोपसदः पञ्च सुत्या इति चत्वारिंशद्दिनैः सिध्यति । अत्र यूपैकादशिनी भवति एकादशाग्निषोमीयाः पशवो भवन्ति तेषाञ्च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम् । आज्येन सकृद्गृहीतेन देव सवितरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति ॥") स तु कलौ वर्ज्जनीयः । यथा,—
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च ।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखः ।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः ॥"
इत्युद्वाहतत्त्वे बृहन्नारदीयम् ॥

नरवाहनः, पुं, (नरो वाहनं यस्य । "छन्दस्यादिषु च ।" ८ । ४ । ३६ । इति न णत्वम् ।) कुवेरः । इत्यमरः ।१।१।७२ ॥ (यथा, रघु । ६ । ११ ।
"विजयदुन्दुभितां ययुरर्णवा
घनरवा नरवाहनसम्पदः ॥"
नृपतिविशेषः । यथा, राजतरङ्गिण्याम् । ५ । २१३ ।
"सोऽनुगैः सह निर्द्दोषं जघान क्रोधमूढया ।
शूरं दार्व्वाभिसारेषु शर्म्मर्थ्यां नरवाहनम् ॥")
पुरुषयानविशिष्टे, त्रि ॥ (यथा, महाभारते । ३ । ५८ । ५ ।
"जज्ञे धनपतिर्यत्र कुवेरो नरवाहनः ॥")

नरविष्वणः, पु, (नरं विष्वणति भक्षयतीति । वि+स्वन+अच् ।) राक्षसः । इति त्रिकाण्डशेषः ॥

नरसारः, पु, (नरवत् शुद्धः सारो यस्य ।) वणिग्द्रव्यविशेषः । नौसादर इति निशादल इति च भाषा । तस्य पर्य्यायः । यथा, रत्नमालायाम् ।
"दिव्यलो गोमकः पिष्टो चौमो गन्धरसो रसः ।"
तस्य शुद्धिर्यथा,—
"नरसारो भवेच्छुद्धश्चूर्णतोये विपाचितः ।
दोलायन्त्रेण यत्नेन भिषग्भिर्योगसिद्धये ॥"
इति सारचन्द्रिका ॥

स तु द्रव्यान्तरयोगेन महाद्रावको भवति यथा,
"नरसारयवक्षारस्फटिकारित एव काचवकयन्त्रे ।
वह्निग' पाच्य सत्त्वं तद्धि महाद्रावक नाम ॥"
इति रसावली ॥
यथाच वैद्यकभैषज्यधन्वन्तरिग्रन्थे यकृत्प्लीहा-
धिकारे ।
"इयचित्रकपामार्गं चिञ्चा कुष्माण्डनाडिका ।
स्नुही तालस्य पुष्पाणि वर्षाभूर्वेतसस्तथा ॥
एतेषां क्षारमाहृत्य शिग्रुकाखरसेन च ।
चालयित्वा क्षारतोयं वस्त्रपूतञ्च कारयेत् ॥
चण्डातपेन संशोध्य ग्राह्यन्तद्द्रव्ययोचितम् ।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम् ॥
स्फटिकारिपलञ्चैव नरसारपलन्तथा ।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम् ॥
कासीसं तोलकञ्चैव मुद्राशङ्खञ्च तोलकम् ।
दारुमोचं कर्षकञ्च तोलं समुद्रफेनकम् ॥
सर्व्वमेकत्र संचूर्ण्य वकयन्त्रेण साधयेत् ।
महाद्रावकमेतद्धि योज्यञ्च रसकारणे ॥
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि
च ॥")
नरसिंह', पु, (नर इव सिंह इव च आकृति-
र्यस्य ।) विष्णुः । इति शब्दरत्नावली ॥ स तु
हिरण्यकशिपुवधार्थं भगवद्दशावतारान्तर्गत-
श्चतुर्थः पूर्णावतारः । इति वराहपुराणम् ॥
(नरेषु सिंह' । नर' सिंह इव इत्युपमित-
समासो वा ।) नरश्रेष्ठः । यदुक्तम् ।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जरा ।
सिंहशार्द्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ॥"
इति विशेष्यनिघ्ने अमरः ॥
(यथा, महाभारते । १० । १० । १६ ।
"क्रुद्धस्य नरसिंहस्य संग्रामेष्वपलायिन ।
ये वसुञ्चन् कर्णस्य प्रमादात्त इमे हताः ॥")
नरहरि', पु (नर इव हरि सिंह इव च
आकृतिर्यस्य ।) नृसिंहावतारः । यथा,—
"केशव धृतनरहरिरूप जय जगदीश हरे ॥"
इति गीतगोविन्दे । १ । ८ ॥
नराधिप , पु, (नराणामधिप' ।) नराधिपतिः ।
राजा । यथा, "नराणाञ्च नराधिपम् ।" इति
श्रीभगवद्गीता । (वृक्षविशेषः । यथा, सुश्रुते
चिकित्सितस्थाने ३७ अध्याये ।
"काकोलीद्वयवत्साक्षमेदायुग्मनराधिपै ॥")
नरान्तक पु, (नराणां अन्तको नाशक ।)
राक्षसविशेषः । स तु रावणपुत्रः । इति रामा-
यणम् ॥ (यथा, भागवते । ६ । १० । १८ ।
"रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्मुखसुरान्तनरान्तकादीन् ।")
नरायण, पुं, (नराणां जीवानां अयनं आश्रय-
स्थानम् ।) श्रीनारायणः । इति शब्दरत्नावली ॥
नरी, स्त्री, (नरस्य पत्नी । ङीष् ।) नारी । इति
जटाधरः ॥
नरेन्द्र', पु, (नर इन्द्र इव नराणामिन्द्रो वा ।)
राजा । (यथा, मनुः । ६ । २५३ ।
"रक्षणादार्य्यवृत्तानां कण्टकानाञ्च शोधनात् ।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः ॥")
विषवैद्य' । इति मेदिनी । रे, १७१ ॥ (यथा,
माघे । २ । ८८ ।
"मुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रव. ॥"
वृक्षविशेषः । यथा, सुश्रुते चिकित्सितस्थाने ।
६ अध्याये ।
"पूतीकार्कनृपरेन्द्रद्रुमाणां
मूत्रैः पिष्टा. पक्ववा सौमनाञ्च ॥"
एकविंशत्यक्षरवृत्तिविशेषः । इति चिन्तामणिः ॥
यथा,—
"चामररत्नरज्जुवरपरिगतसविग्रहाणाञ्चितशोभः
पाणिविराजिपुष्पयुगविरचितकञ्चुकसङ्गतगन्धः ।
चारुसुवर्णकुण्डलयुगलसरोचिरलङ्कृतवर्णः
पिङ्गलपन्नगेश इति निगदति राजति वृत्तनरेन्द्रः ॥")
नर्कुटकं, क्ली, नासिका । इति हेमचन्द्रः ॥
नर्त्तक , पुं, (नृत्यतीति । नृत् + "शिल्पिनि ष्वुन् ।"
३ । १ । १४५ । इति ष्वुन् ।) नटः । पोट-
गल. । चारणः । केलकः । नटपर्य्यायः । सर्व्व-
वेशी २ लयालम्बः ३ तालरेचनकः । इति
शब्दरत्नावली ॥ हस्ति । इति हेमचन्द्रः ॥
नृत्यकर्तुर्लक्षणं यथा.—
"यादृश नृत्यमात्र स्यान्नीतं योज्यञ्च तादृशम् ।
नृत्यस्य धारणात् पात्रं नर्त्तकः परिकीर्त्तितः ॥"
अपि च ।
"असम्बद्धप्रलापी च सदा भ्रूकुटितत्परः ।
हास्यप्रहासचतुरो वाचालो नृत्यकोविदः ॥"
इति सङ्गीतदामोदरः ॥
(नर्त्तयतीति । नृत् + णिच् + ण्वुल् । नृत्यकारके,
त्रि । यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"तर्को विचारः सन्देहात् भ्रूशिरोङ्गुलि-
नर्त्तकः ॥")
नर्त्तकी, स्त्री, (नृत्यतीति । नृत् + ष्वुन् । षित्वात्
ङीष् ।) नृत्यकारिणी । वाइ इति भाषा ॥ तत्
पर्य्यायः । लासिका २ । इत्यमर । १ । ७ । ८ ॥
लयपुत्त्री ३ नटी ४ नर्त्तकी ५ । इति शब्द-
रत्नावली ॥ (यथा, रघुः । १६ । १४ ।
"नर्त्तकीरभिनयातिलङ्घिनीः
पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥")
करेणुः । इति मेदिनी । के, १०८ ॥ नलिका-
नामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
नर्त्तनं, क्ली, (नृत् + भावे ल्युट् ।) नृत्यम् । इत्य-
मरः । १ । ७ । १० ॥ (यथा, मनुः । २।१७८
"कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम् ।"
नृत्यतीति । नृत् + ल्यु । नर्त्तके, त्रि । यथा,
महाभारते । ४ । ३५ । २२ ।
"गायनो नर्त्तनो वापि वादनो वा पुनर्भव ।
क्षिप्रं मे रथमास्थाय नियच्छाश्च हयोत्तमान् ।")
नर्द्द, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
अकं-सेट् ।) नर्द्दति । इति दुर्गादासः ॥
नर्द्द, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
सकं-सेट् ॥)
नर्द्दटकं, क्ली, छन्दोविशेषः । तस्य लक्षणं यथा,—
"यदि भवतो नजौ भजजला गुरुनर्द्दटकम् ॥"
इति छन्दोमञ्जरी ॥
नर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां पर-सक-
सेट् ।) रेफोपधः । नर्ब्बति । इति दुर्गादासः ॥
नर्म्म, [न्] क्ली, (नृ नये + "सर्व्वधातुभ्यो
मनिन् ।" उणां ४ । १४६ । इति मनिन् ।)
परीहासः । इत्यमरः । १ । ७ । ३२ ॥ (यथा,
महाभारते । १ । ८२ । १७ ।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥")
नर्म्मकील., पुं, (नर्म्मणः परीहासस्य कील इव ।)
पति । इति त्रिकाण्डशेषः ॥
नर्म्मट , पुं, (नर्म्मणेव अटति गच्छतीति । अट +
अच् । शकन्ध्वादित्वात् साधुः ।) खर्पर ।
सूर्य्य. । इति हारावली ॥ २५४ ॥
नर्म्मठः, पु, (नर्म्मणि कुशलः । नर्म्म + अठन् ।)
चूचुकम् । चिबुकः । परीहासरतः । इति शब्द-
रत्नावली ॥
नर्म्मद', पु, (नर्म्म ददातीति । दा + कः ।) केलि-
सचिवः । इति मेदिनी । दे, ३३ ॥
नर्म्मदा, स्त्री, (नर्म्म ददातीति । दा + क. । स्त्रियां
टाप् ।) पुरुका । इति हेमचन्द्र । ४ । १४६ ॥
नदीविशेष. । सा विन्ध्यपर्व्वतान्निःसृता पश्चिमे
समसागरा प्रविष्टा । तस्या. पर्य्याय । रेवा २
मेकलकन्या ३ सोमसुता ४ । अस्या जलगुणा' ।
लघुत्वम् । शीतलत्वम् । सुपथ्यत्वम् । दाह-
पित्तशमनत्वम् । वातदाहत्वञ्च । इति राज-
निर्घण्टः ॥✱॥ तस्या जल दर्शनेमात्रेण शौच्यति ।
यथा,—
"त्रिभिः सारस्वत तोयं सप्तभिस्तच यामुनम् ।
नार्म्मदं दर्शनमात्रेण गाङ्गं स्पर्शेण शौच्यति ॥"
इति प्रायश्चित्ततत्त्वम् ॥
तस्या उत्पत्तिमाहात्म्ये यथा,—
"नर्म्मदा सरितां श्रेष्ठा रुद्रदेहाद्विनिःसृता ।
तारयेत् सर्व्वभूतानि स्थावराणि चराणि च ॥
सर्व्वपापहरा नित्य सर्व्वदेवनमस्कृता ।
संस्तुता देवगन्धर्व्वैरप्सरोभिस्तथैव च ।" ✱ ॥
तस्याः स्तवो यथा,—
"नमः पुण्यजले । आद्ये ! नमः सागरगामिनि !
नमस्ते पापशमनि ! नमो देवि ! वरानने । ॥
नमोऽस्तु ते ऋषिगणसंसेविते !
नमोऽस्तु ते शङ्करदेहनि स्सृते ! ।
नमोऽस्तु ते धर्म्मभृतां वरप्रदे ।
नमोऽस्तु ते सर्व्वपवित्रपावने ! ॥
यश्चेदं पठते स्तोत्रं नित्य शुद्धमना नर' ।
ब्राह्मणो वेदमाप्नोति क्षत्रियो विजयी भवेत् ॥
वैश्यस्तु लभते लाभ शूद्रश्चैव शुभां गतिम् ।
अन्नार्थी लभते ह्यन्नं स्मरणादेव नित्यश. ॥
नर्म्मदां सेवते नित्यं स्वयन्देवो महेश्वरः ।

तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी ॥
नर्म्मदाया जलं पीत्वा अर्च्चयित्वा वृषध्वजम् ।
दुर्गतिञ्च न पश्यन्ति तस्य तीर्थप्रभावतः ॥
एततीर्थं समासाद्य यस्तु प्राणान् परित्यजेत् ।
सर्व्वपापविशुद्धात्मा व्रजते रुद्रमन्दिरम् ॥
जलप्रवेशं यः कुर्य्यात् तस्मिंस्तीर्थे नराधिप ।।
हंसयुक्तेन यानेन रुद्रलोकं स गच्छति ॥
यावच्चन्द्रश्च सूर्य्यश्च हिमवांश्च महोदधिः ।
गङ्गाद्याः सरितो यावत्तावत् स्वर्गे महीयते ॥
अनशनन्तु यः कुर्य्यात्तस्मिंस्तीर्थे नराधिप ।।
गर्भवासे तु राजेन्द्र । न पुनर्जायते नरः ॥”
इति मात्स्ये १९५ । १९६ अध्यायौ ॥
सा च पुरुकुत्सभार्य्या । तस्याः स्मरणे विषनाशो भवति । यथा, “सकलपन्नगपतयश्च नर्म्मदायै वरं ददुः । यस्तेऽनुस्मरणसमवेत नामग्रहणं करिष्यति न तस्य सर्पविषं भविष्यतीति । अत्र च ।
“नर्म्मदायै नमः प्रातर्न्नर्म्मदायै नमो निशि ।
नमोऽस्तु नर्म्मदे तुभ्यं त्राहि मां विषसर्पतः ॥”
इति विष्णुपुराणे । ४ । ३ । ९—१० ॥
नल, अ बन्धे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ॥)

नल, ञ गन्धे । इति नलशब्दस्य धातुपक्षे भरतः ॥ (भ्वां-परं-सकं-सेट् ॥)
नलं, क्ली, (नलतीति । नल + अच् ।) पद्मम् । इति राजनिर्घण्टः ॥
नल., पु, (नल बन्धे + पचाद्यच् ।) तृणविशेषः । तत्पर्य्यायः । धमनः २ पोटगलः ३ । इत्यमरः । २ । ४ । १६२ ॥ नालः ४ नडः ५ कुच्छिरन्ध्र. ६ कीचकः ७ दीर्घवंशः ८ शून्यमध्यः ९ विभीषणः १० छिद्रान्तः ११ मृदुपत्रः १२ वंशपत्रः १३ मृदुच्छदः १४ नालवंशः १५ । अस्य गुणाः । शीतत्वम् । कषायत्वम् । मधुरत्वम् । रुचिकारित्वम् । रक्तपित्तप्रशमनत्वम् । दीपनत्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
“नलः पोटगल. शून्यमध्यश्च धमनस्तथा ।
नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ॥
उष्णो हृद्वस्तियोन्यर्त्तिदाहपित्तविसर्पहृत् ॥”
इति भावप्रकाशः ॥
सूर्य्यवंशीयनिषधराजपुत्रः । यथा,—
“अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ।
नलस्तु नैषधस्तस्मान्नभस्तस्मादजायत ॥”
वीरसेनराजपुत्रः । यथा, मात्स्ये १२ अध्याये ।
“नलौ द्वावेव विख्यातौ वंशे कश्यपसम्भवे ।
वीरसेनसुतस्तद्वन्नैषधश्च नराधिपः ॥”
(तथा, हरिवंशे । १५ । २४ ।
“नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ ।।
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः ॥”
एतौ द्वावेव सूर्य्यवंशीयौ ॥) चन्द्रवंशीयनिषधराजपुत्रः । (अयन्तु दमयन्तीपतिः ।) यथा, दमयन्तीं प्रति नलवाक्यम् ।
“सुधांशुवंशस्य करीरमेव मां
निशम्य किमासि यतेयहि यहा ॥”
इति नैषधः ॥
(यथा, महाभारते । ३ । ५३ । १ ।
“आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवानश्वकोविदः ॥”
अयं वीरसेनस्तु सूर्य्यवंशीयवीरसेनाद्भिन्न एवेत्यवगन्तव्यम् ॥ * ॥
आसीत् पुरा निषधाधिपतिश्चन्द्रवंशीयो नलो नाम राजा । गच्छति काले स हि हंसमुखात् विदर्भेश्वरभीमराजकन्यां दमयन्तीं त्रिभुवनैकसुन्दरीमाकर्ण्य हंसमुखादेवावगतनलसौन्दर्य्यां तन्मनस्कां दमयन्तीं स्वयंवरविधिना इन्द्रादिदेवसन्निधावेव उपयेमे । अस्य इन्द्रसेननामा पुत्र आसीत् । दमयन्तीपरिणयकामुकः कलिस्तु दमयन्तीमलभमान एनं प्रति रुष्टः सञ्जातः । अथ कलिप्रविष्टशरीरोऽयं भ्रात्रा पुष्करेण सह द्यूतक्रीडनात् सर्व्वस्वमहारयत् । ततः स राज्यच्युतो दमयन्त्या सह वनं गतवान् । कलिस्तु अस्य दमयन्तीसहवाससुखमसहिष्णु, दमयन्त्या सह एनं वियोजयितुमियेष । अथ कदाचित् कल्याविष्टचित्तोऽयं नलः सुप्तां दमयन्तीं निष्ठुरवत् परित्यज्य पलायाञ्चक्रे । दमयन्ती तु प्रबुध्य बहु विलप्य च पथिकसार्थवाहेन सह मातृष्वसृगृहं गतवती । नानाविधक्लेशात् शीर्णदेहा सा मातृष्वसापि अविज्ञाता तद्भवने तस्थौ । अथ दमयन्तीपिता भीमनृपतिर्दमयन्त्या अन्वेषणाय दूतान् नियोजयामास । दूतास्तु चिह्नविशेषैर्दमयन्तीं परिज्ञाय भीमाय न्यवेदयन् । भीमस्तु तां स्वगृहमानयत् । नलस्तु दमयन्तीं परित्यज्य गच्छन् दावानलमध्यगत कर्कोटकनाग विपद उज्जहार । कर्कोटकस्तु नलस्य प्रत्युपकर्त्तुमिच्छन् शरीरस्थमस्य कलिं दृष्ट्वा कलिमेव भृशं सन्तापयामास । नलस्तु केवलं रूपान्तरत्वमाप्तवान् । ततोऽसौ ऋतुपर्णस्य राज्ञ. सारथ्ये नियुक्त आसीत् । अथ गच्छति काले दमयन्ती पितृगेहस्था नलान्वेषणाय ब्राह्मणान् संप्रेष्य कथञ्चित् ऋतुपर्णसारथिं नलत्वेनावगम्य पुनः स्वयंवरमिषेण ससारथिं ऋतुपर्णं पितृवेश्मनि आनयामास ॥ दमयन्ती तु पाकादिकौशलेनान्यजनावेद्येन ऋतुपर्णसारथिं नलं विज्ञाय स्वसमीपमानयामास । अथ कलिपरित्यक्तेन नलेन स्वसौन्दर्य्ये गृहीते भैम्या सह मेलनं सञ्जातम् । भीमनृपतिस्तु एतत् सर्व्वमाकर्ण्यातिशयसन्तोषमाप्तवान् प्रेषयामास च तं बहुसमारोहेण निषधदेशान् प्रति । ततोऽयं स्वदेशमागम्य भ्रातरं पुष्करं पुनर्द्यूताय आहूय पराजित्य च सं पुनर्लब्धराज्यो दमयन्त्या सह सुखमुवास । एतद्विवरणविस्तृतिस्तु महाभारते वनपर्व्वणि ५३—७९ अध्यायेषु विशेषतो द्रष्टव्या ॥ * ॥)
वानरविशेषः । स तु ऋतध्वजमुनिशापात् वानररूपविश्वकर्म्मणः शौरसेन इत्याख्यघृताचीगर्भे गोदावरीतीरे जातः । इति वामने ६२ अध्यायः ॥ (अयन्तु रामवाक्येन समुद्रमध्ये सेतुं बबन्ध । यथा, अध्यात्मरामायणे ।६।३। ८४—८६ ।
“ततोऽब्रवीत् रघुश्रेष्ठं सागरो विनयान्वितः ।
नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्म्मजः ॥
सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः ।
कीर्त्तिं जानन्तु ते लोकाः सर्व्वलोकमलापहाम् ॥
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् ।
ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः ।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने ॥”)
पितृदेवः । इति मेदिनी । ले, २७ ॥ दैत्यविशेषः । यथा,—
“दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः ।
सैंहिकाया इति ख्यातास्त्रयोदश महाबलाः ॥
वंश्य शल्यश्च बलवान् नलश्चैव तथा बलः ।
वातापिर्न्नमुचिश्चैव इल्वलः खसृमस्तथा ॥
अञ्जको नरकश्चैव कालनाभस्तथैव च ।
सवमानस्तथा चैव सरकल्पश्च वीर्य्यवान् ॥”
इति ब्रह्मपुराणे २ अध्यायः ॥
नलकं, क्ली, (नल इव प्रतिकृतिः । “इवे प्रतिकृतौ ।”५ । ३ । ९६ । इति कन् ।) शाखास्थि । इति हेमचन्द्रः । ३ । २९१ ॥ (यथा, सुश्रुते निदानस्थाने १५ अध्याये ।
“तरुणास्थीनि नम्यन्ते भज्यन्ते नलकानि तु ॥”)
नलकिनी, स्त्री, (नलकानि सन्त्यस्याः । नलक + इनिः । ङीप् ।) जङ्घा । इति हेमचन्द्रः । ३ । २७८ ॥
नलकीलः, पुं, (नलवत् कीलो यत्र ।) जानुः । इति हेमचन्द्रः । ३ । २७८ ॥
नलकूवरः, पुं, कुवेरपुत्रः । इत्यमरः । १ । १ । ७१ ॥ (यथा, राजेन्द्रकर्णपूरे । ९८ ।
“विलोकनकथापि मे न नलकूवरे न स्मरे
किमन्यदन्तद्युतिरपि न दर्शनं प्रार्थये ।
अथ नयनगोचरं व्रजति चेद्गृहशासुतस्य
समग्ररमणीमनो मधुपमाधव. माधवः ॥”)
स भ्रात्रा मणिग्रीवेण सह वारुणीं पीत्वा कैलासोपवने गङ्गायां स्त्रीजनैः क्रीडितवान् । असंवृतवस्त्रौ तौ दृष्ट्वा नारदः शशाप । तच्छापेन तौ यमलार्ज्जुनौ भूत्वा श्रीवृन्दावने आसतुः । ततो दामोदरेण शापनिर्म्मुक्तौ तं नुत्वा स्वगृहं अगमतु. । इति श्रीभागवतीयदशमस्कन्धः ॥
नलदं, क्ली, (नलं द्यति अवखण्डयतीति । दो + कः ।) पुष्परसः । उशीरम् । (यथा, किराते । ५ । २५ ।
“इह सिन्धवश्च वरणावरणाः
करिणां मुदे सनलदानलदाः ॥”)
जटामांसी । इति मेदिनी । दे, ३३ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
“नलद नन्दिनी पेपी मांसी कृष्णजटा जटी ।
किराविनी च जटिला लोमशा तु तपस्विनी ॥”
नलं ददातीति । दा + आतोऽनुपेति कः ।) नलदातरि, त्रि, ॥

नलदम्', पु, निमन्त्रपः । इति भूरिप्रयोगः ॥

नलदा, स्त्री, (नलद+टाप् ।) जटामांसी । इति हेमचन्द्रः ॥

नलपट्टिका, स्त्री, (नलनिर्म्मिता पट्टिका ।) तलाची । इति हारावली । १७७ ॥ दरमा इति भाषा ॥

नलमीन., पु, (नलाश्रयो मीनः ।) चिलिचिम- मत्स्यः । इत्यमरः । १ । १० । १८ ॥ ("नल- मीन कफात्मकः ।" इति हारीते प्रथमे स्थाने ११ अध्याये ॥)

नलिका, स्त्री, (नल इव आकारोऽस्त्यस्या इति । नल+ठन् ।) नाडी । नली इति ख्यातः । सा च उत्तरापथे प्रसिद्धा सुगन्धा प्रवाला- कृतिः प्रवालीति क्वचित् प्रसिद्धा । पँठारी इति क्वचित् प्रसिद्धा । तत्पर्य्यायः । विद्रुम- लतिका २ कपोतचरणा ३ नलिनी ४ निर्म्मध्या ५ सुषिरा ६ धमनी ७ सुत्या ८ रक्तदला ९ नर्त्तकी १० नटी ११ । अस्या गुणाः । तिक्त- त्वम् । कटुत्वम् । तीक्ष्णत्वम् । मधुरत्वम् । कृमिवातोदरार्त्त्यर्शःशूलनाशित्वम् । मलशोध- नत्वञ्च । इति राजनिर्घण्टः ॥ सन्नामगुणाः ।
"नलिका विद्रुमलता कपोतचरणा नटी ।
धमन्यञ्जनकेशी च निर्म्मध्या सुषिरा नली ॥
नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत् ।
कृच्छ्राश्मवातष्ठीलास्रकुष्ठकण्डूज्वरापहा ॥"
इति भावप्रकाशः ॥
(अस्त्रविशेषः । यथा, आर्य्यासप्तशत्याम् । ४३७ ।
"मधुमथनवदनविनिर्गतवंशीस्वरानुसारिणी रागा ।
हन्त हरन्ति मनो मम नलिकाविशिखाः स्मर- स्येव ॥"
इयं हि आकृतिक्रियादिना आधुनिकनला- स्त्रस्य 'वन्दुक' इति ख्यातस्य सादृश्यं गच्छति । यथा, वैशम्पायनोक्तधनुर्वेदे ।
'नलिका ऋजुदेहा स्यात्तन्वङ्गी मध्यरन्ध्रिका ।
मर्म्मच्छेदकरी नीला——————॥"
ग्रहणं स्थापनञ्चैव मोक्षणञ्चेति गतित्रयम् ।
नामाश्रित विदित्वा तु जेतास्मान् रिपून् युधि ॥"
अस्या विशेषविवरणन्तु नालिकशब्दे द्रष्टव्यम् ॥
कल्पितजलनिर्गमपथः । यथा, यन्त्रविधि- शतके १ अध्याये ।
"वेदाङ्गुलं मस्तकोर्द्धे कार्य्यं तोयस्य धारणे ।
समर्था तत्र नलिका कुर्य्यात्तोयविमोचनीम् ॥")

नलितः, पु, (नल्यते इति । नल ज बन्धे+क्त ।) शाकविशेषः । नालिता इति भाषा ॥ अस्य गुणाः । मधुरत्वम् । पित्तनाशित्वम् । शुक्र- वहत्वञ्च । इति द्रव्यगुणः ॥

नलिन, क्ली, (नल्यते इति । नल बन्धे+"बहुल- मन्यत्रापि ।" उणा । २ । ४९ । इति इनच् ।) पद्मम् । इत्यमरः । १ । १० । ३९ ॥ (यथा, भागवते । २ । ६ । २२ ।
"यदास्य नाभ्यान्नलिनादहमासं महात्मनः ।
नाविदं यज्ञसम्भारान् पुरुषावयवादृते ॥")
नीलिका । जलम् । इति हेमचन्द्रः । ४ । २२९ ॥

नलिनः, पुं, (नल+इनच् ।) सारसपक्षी । इत्य- मरः । १ । १० । ४० ॥ लघ्वाक्षफलः । इति शब्दचन्द्रिका ॥ मानीश्यामला इति भाषा ॥

नलिनी, स्त्री, (नलानि पद्मानि सन्त्यत्र । नल+ "पुष्करादिभ्यो देशे ।" ५।२।१३५ । इति इनिः । ङीप् ।), पद्मयुक्तदेशः । (नलानां पद्मानां समूहः । "खलादिभ्यः इनिर्वक्तव्यः ।" ४।२।५१। इत्यस्य वार्त्तिकोक्त्या इनिः ।) पद्मसमूहः । पद्म- लता । इति भरतः ॥ (अस्याः पर्य्यायो यथा,—
"नलिनी स्यात् पङ्कजिनी बिशिनी च सरोजिनी ।
पद्मिनीति च पर्य्यायः पद्मषण्डे नदाकरे ॥"
इति वैद्यकरत्नमालायाम् ॥)
पद्ममात्रम् । इति रायमुकुटादयः ॥ तत्- पर्य्यायः । बिसिनी २ पद्मिनी ३ । इत्यमरः । १ । १० । ३९ ॥ (यथा, भ्रमराष्टके । ८ ।
"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")
व्योमनिम्नगा । (इयन्तु गङ्गायाः पूर्व्वदिग्गत- शाखानामन्यतमा । यथा मात्स्ये । १२० । ४० ।
"नलिनी प्राचीमभिमुखं प्रतीचीं चीरण्येव च ।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा ॥
नलिनी ह्रादिनी चैव पावनी चैव प्राच्यगा ॥")
कमलाकरः । इति मेदिनी । ने, ८२ ॥ नलिका । इति राजनिर्घण्टः ॥ नारिकेलसुरा । इति त्रिकाण्डशेषः ॥ (वामनासिका । यथा, भाग- वते । ४ । २५ । ४८ ।
"नलिनी नालिनी च प्राग्द्वारावेकत्र निर्म्मिते ॥"
"नलनालशब्दौ छिद्रवचनौ तद्वती नलिनी नालिनी च वामदक्षिणनासिके ॥" इति तट्टी- कायां स्वामी ॥)

नलिनीरुह, क्ली, (नलिन्यां रोहतीति । रुह+ क ।) मृणालम् । इति राजनिर्घण्टः ॥ ब्रह्मणि, पुं ॥

नलिनेशय, पुं, (नलिने शेते इति । शी+अच् ।) विष्णुः । इति त्रिकाण्डशेषः ॥

नली, स्त्री, (नल+अच् । गौरादित्वात् ङीष् ।) मनःशिला । इति विश्वः ॥ नलिका । इति भाव- प्रकाशः ॥ तत्पर्य्यायः । सुषिरा २ विद्रुमलता ३ कपोताङ्घ्रिः ४ नटी ५ । इत्यमरः । २ । ४ । १२९ ॥ (एतद्गुणा मनःशिलानलिकाशब्दयो- र्ज्ञातव्याः ॥)

नलोत्तम, पु, (नलेषु उत्तमः ।) देवनलः । इति राजनिर्घण्टः ॥

नल्व, पु, (नल्यते इति । नल+उल्वादयश्चेति वः ।) किष्कुचतुःशतम् । चतुःशतहस्तपरिमित- देशः । इत्यमरभरतौ ॥ (यथा, हरिवंशे । २२४ । १ ।
"तस्यां सभायां दैत्येन्द्रो हिरण्यकशिपुस्तदा ।
आसीन आसने चित्रे नल्वमात्रे प्रमाणतः ॥")

नल्वपर्तंगा, स्त्री, (नल्वपरिमितं वर्त्म गच्छतीति । गम्+डः ।) काकाङ्गी । इति शब्दचन्द्रिका ॥ नल्वपरिमितपथगामिनि, त्रि ॥

नव, [न्] त्रि, (नूयते स्तूयते प्रधानसंख्या- वाचकत्वेन । णु स्तवने+बाहुलकात् कनिन् गुणश्च । इत्युज्ज्वलदत्तः । १ । १५६ ।) संख्या- विशेषः । ९ नय इति भाषा । बहुवचनान्तो- ऽयम् । इति व्याकरणम् ।(यथा, रघुः । ३।६९।
"इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ॥")
नववाचका यथा । छिद्रद्वारम् १ भूखण्डम् २ सुतारावर्णमसंख्या. ३ सुधाकुण्डम् ४ व्याघ्री- स्तनः ५ सेवधिः ६ अङ्कम् ७ रसः ८ ग्रहः ९ । इति कविकल्पलता ॥ (तद्वति, त्रि । यथा, मनुः । ३ । २६९ ।
"षण्मासान् छागमांसेन पार्षतेन च सप्त वै ।
अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥")

नवः, पुं, (णु ञि स्तवने+"ऋदोरप् ।" ३।३।५७। इति भावे अप् ।) स्तवः । इति मेदिनी । वे, १५ ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

नव, त्रि (नूयते स्तूयते इति । णु स्तुतौ+"ऋदो- रप् ।" ३ । ३ । ५७ । इति अप् ।) नूतनः । इत्यमरः ।३।१।७७॥ (यथा, हितोपदेशे।१।२३४।
"न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥")
अभिनवान्यौषधानि प्रशस्तानि । यथा,—
"सर्व्वाण्यभिनवान्येव प्रशस्तानि क्रियाविधौ ।
ऋते घृतगुडक्षौद्रधान्यकृष्णाविडङ्गतः ॥"
इति नारायणदासकृतवैद्यपरिभाषा ॥
तद्वैदिकपर्य्यायः । "नवम् १ नूतम् २ नूतनम् ३ नव्यम् ४ इदा ५ इदानीम् ६ । षट् नवनामानि ।"
इति वेदनिघण्टौ ३ अध्यायः ॥

नवकारिका, स्त्री, (नवं करोतीति । कृ+ण्वुल् । टापि अत इत्वम् ।) नवोढ़ा । इति शब्द- माला ॥ नूतन, वंशिष्टो विवरणश्लोकः । नवीन कार्य्ये च ॥

नवकालिका, स्त्री, (नवं कलति प्राप्नोतीति । कल+ण्वुल् । टाप् । अत इत्वम् ।) नवीनः । इति हारावली । १७६ ॥

नवग्रहा, पुं, (नव ग्रहाः ।) सूर्य्यादयो नव । यथा, तिथितत्त्वे ।
"नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥"
(यथा च,—
"सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति नवग्रहाः ॥")
तेषां स्थानम् । यथा,—
"भूमेर्योजनलक्षे तु सौरं मैत्रेय ! मण्डलम् ।
लक्षे दिवाकरस्यापि मण्डलं शशिनः स्थितम् ॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात् ।

नक्षत्रमण्डलं कृत्स्नमपरिष्टात् प्रकाशते ॥
द्विलक्षे चोत्तरे ब्रह्मन् ! बुधो नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना: स्थित: ॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थित: ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहित: ॥
सौरिर्बृहस्पतेश्चोर्द्ध्वं द्विलक्षे समवस्थित: ॥"
इति विष्णुपुराणे । २ । ७ अध्याय: ॥

तेषां रथादि यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव ।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ! ॥
सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि वै ।
योजनानान्तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् ॥
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो व्यवस्थित: ।
पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य महामते ॥
अक्षप्रमाणमुभयो: प्रमाणं तद्युगार्द्धयो: ।
ह्रस्वोऽक्षस्तद्युगार्द्धेन ध्रुवाधारो रथस्य वै ।
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले ॥
हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिग्जगती त्रिष्टुबेव च ॥
अनुष्टुप् पंक्तिरित्युक्ताश्छन्दांसि हरयो रवे: ।
स रथोऽधिष्ठितो देवैरादित्यैरृषिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसै: ॥
स्तुवन्ति मुनय: सूर्य्यं गन्धर्व्वैर्गीयते पुर: ।
नृत्यन्त्यप्सरसो यान्ति सूर्य्यस्यानु निशाचरा: ॥
वहन्ति पन्नगा यक्षै: क्रियते भीषुसंग्रह: ।
वालखिल्यास्तथैवैनं परिवार्य्य समासते ॥
सोऽयं सप्तगण: सूर्य्यमण्डले मुनिसत्तम ! ।
हिमोष्णवारिवृष्टीनां हेतुत्वं समुपागत: ॥
रथस्त्रिचक्र: सोमस्य कुन्दाभास्तस्य वाजिन: ।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ ॥ * ॥
वाय्वग्निद्रव्यसम्भूतो रथश्चन्द्रसुतस्य च ।
पिशङ्गैस्तुरगैर्युक्त: सोऽष्टाभिर्वायुवेगिभि: ॥*॥
सवरूथ: सानुकर्षो युक्तो भूसम्भवैर्हयै: ।
सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान् ॥*॥
अष्टाश्व: काञ्चन: श्रीमान् भौमस्यापि रथो महान् ।
पद्मरागारुणैरश्वै: संयुक्तो वह्निसम्भवै: ॥ * ॥
अष्टाभि: पाण्डरैर्युक्तो वाजिभि: काञ्चने रथे ।
तस्मिंस्तिष्ठति वर्षान्ते राशौ राशौ बृहस्पति: ॥
आकाशसम्भवैरश्वै: शबलै: स्यन्दनं युतम् ।
समारुह्य शनैर्याति मन्दगामी शनैश्चर: ॥ * ॥
स्वर्भानोस्तुरगा ह्यष्टौ भृङ्गाभा धूसरं रथम् ।
सकृद्युक्तास्तु मैत्रेय ! वहन्त्यविरतं सदा ॥*॥
तथा केतुरथस्याश्वा अष्टौ ते वातरंहस: ।
पलालधूमवर्णाभा लाक्षारसनिभारुणा: ॥ * ॥
एते मया ग्रहाणां वै तवाख्याता रथा नव ।
सर्व्वे ध्रुवे महाभाग ! प्रबद्धा वायुरश्मिभि: ॥"
इति विष्णुपुराणे २ अंशे ८।१०।१२ अध्याया: ॥

ग्रहाणामशुभप्रतीकार: । राजमार्त्तण्डे ।
"दोषो न स्याद्ग्रहाणामशिशिरकिरणे ताम्रमिन्दौ च शङ्खं
पृथ्वीपुत्रे प्रवालं भृगुधरतनये शातकुम्भं भुजेन ।
देवाचार्य्ये च मुक्तां मणिमसुरगुरौ सीसकं सूर्य्यसूनौ
राहौ लौहं ललिष्टे कमलजतनये राजपट्टं विभर्त्तु ॥"
शातकुम्भं सुवर्णम् । राजपट्टं कर्पूरमणीति ख्यातम् । अपि च । बुद्धिप्रकाशे ।
"त्रिमूर्लीं चौरिकामूलं गोजिह्वा वृद्धदारकम् ।
ब्रह्मयष्टिं शिखिपुच्छीं वाथालं चन्दनं सितम् ।
अश्वगन्धां क्रमात् सूर्य्याद्ग्रहदोषोपशान्तये ॥"
इति ज्योतिषतत्त्वम् ॥

स्वजन्मराशावधिनवग्रहशुद्धिर्यथा,—
"केतूपप्लवभौममन्दगतय: षष्ठस्त्रिसंस्था: शुभाश्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्र: पुन: सप्तम: ।
जीव: सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मज: शुक्र: षड्दशसप्तवर्ज्जमितरे सर्व्वेऽप्युपान्ते शुभा: ॥"
इति दीपिका ॥

रवि: ३।६।१०।११।राशय: । सोम: ३।६।७।१०। ११ शुक्लपक्षे २।५।९ । जन्मर्क्षवर्ज्जितजन्मचन्द्र: शुभ: । मङ्गल: ३।६।१०।११ । बुध: २।४।६।८। १०।११।१२ । बृहस्पति: २।५।७।९।११ । शुक्र: १।२।३।४।५।८।९।११।१२ । शनि: ३।६।१०।११। राहु: ३।६।१०।११ । केतु: ३।६।१०।११राशय: ॥

ग्रहाणां राशिभोगनिर्णय: । यथा,—
"रविर्म्मासं निशानाथ: सपाददिवसद्वयम् ।
पक्षत्रयं भूमिपुत्त्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यस्त्वष्टाविंशदिनं भृगु: ।
शनि: सार्द्धद्वयं वर्षं स्वर्भानु: सार्द्धवत्सरम् ॥"
रवि: १ मास: । सोम: २।० दिनम् । कुज: ४५ दिनम् । बुध: १८ दिनम् । बृहस्पति: १ वत्सर: । शुक्र: २८ दिनम् । शनि: २।० वत्सर: । राहु: १।० वत्सर: । केतु: १।० वत्सर: । इति ज्योतिषम् ॥ * ॥ अथ चन्द्रादिषड्ग्रहाणामस्तोदयज्ञानम् । यथा,—
"अथोदयास्तमययो: परिज्ञानं प्रकीर्त्त्यते ।
दिवाकरकराक्रान्तमूर्त्तीनामल्पतेजसाम् ॥
सूर्य्यादभ्यधिका: पश्चादस्तं जीवकुजार्कजा: ।
ऊना: प्रागुदयं यान्ति शुक्रज्ञौ वक्रिणौ तथा ॥
ऊना विवस्वत: प्राच्यामस्तं चन्द्रज्ञभार्गवा: ।
व्रजन्त्यभ्यधिका: पश्चादुदयं शीघ्रयायिन: ॥"*॥
एषां कालांशा यथा,—
"एकादशामरेज्यस्य तिथिसंख्यार्कजस्य च ।
अस्तांशा भूमिपुत्रस्य दशसप्ताधिकास्तत: ॥
पश्चादस्तमयोऽष्टाभिरुदय: प्राङ्महत्तया ।
प्रागस्त उदय: पश्चादल्पत्वाद्दशभिर्भृगो: ॥
एवं बुधो द्वादशभिश्चतुर्द्दशभिरर्क्कत: ।
वक्रशीघ्रगतौ चार्कात् करोत्यस्तमयोदयौ ॥
एभ्योऽधिकै: कालभागैर्दृश्या न्यूनैरदर्शना: ।
भवन्ति लोके खचरा भानुभाग्रस्तमूर्त्तय: ॥"
इति सूर्य्यसिद्धान्त: ॥

तेषामस्तोदयदिनसंख्याज्ञानम् । यथा,—
"मुलाश्विचन्द्रा-१२२ स्त्रिदशाश्च ३३ दन्ता ३२ वेदाचला ४७ रामकृते ४३ क्रमेण ।
भौमादिकस्यास्तदिनानि वक्रे बुधस्य भूमा १६ दश भार्गवस्य ॥"
एषां एकस्मादस्तमयादुदयाद्वा अभ्युदयास्तज्ञानम् । यथा,—
"तथास्तवक्रात् क्रमतोऽस्तवक्रे जात्य-२२ ब्धि ४ विश्वे-१३ द्विगि-१० नेत्र १२ मासै: ।
महास्तवक्रास्तविधौ सितस्य क्रमेण वक्रास्तु नवेन्दुमासै: १९ ॥"
गुरोरुदयस्य प्राक् पश्चात् शुक्रस्य तु उदयवक्रमहास्तानां प्राक् पश्चात् बाल्यवृद्धदिनज्ञानम् । यथा,—
"वृद्ध: पुरस्तादुदयस्य पश्चात्
बालश्च पक्षं १५ वचसां पति: स्यात् ।
एवं सित: पञ्चदिनानि वृद्धो
बालो भवेत्त्रीणि दिनानि वक्रे ॥
वृद्धस्तु पक्षं १५ भृगुजो महास्ते
बाल: पुनस्तत्र दशाहमेव ॥"
इति सिद्धान्तमञ्जरी ॥

अथ नवग्रहस्तोत्रम् ।
"जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं भक्त्या शम्भोर्मुकुटभूषणम् ॥
धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सर्व्वगुणोपेतं नमामि शशिन: सुतम् ॥
देवतानामृषीणाञ्च गुरुं कनकसन्निभम् ।
वन्द्यभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥
नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहम् ।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
अर्द्धकायं महाघोरं चन्द्रादित्यविमर्द्दकम् ।
सिंहिकाया: सुतं रौद्रं तं राहुं प्रणमाम्यहम् ॥
पलालधूमसङ्काशं तारागृहविमर्द्दकम् ।
रौद्रं रुद्रात्मजं क्रूरं तं केतुं प्रणमाम्यहम् ॥
व्यासेनोक्तमिदं स्तोत्रं य: पठेत् प्रयत: शुचि: ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशय: ॥
ऐश्वर्य्यमतुलञ्चापि आरोग्यं पुष्टिवर्द्धनम् ।
नरनारीप्रियत्वञ्च नित्यं तस्योपजायते ॥
तस्करोऽग्निर्यमो वायुर्ये चान्ये ग्रहपीडका: ।
ते सर्व्वे प्रशमं यान्ति व्यासो ब्रूयान्न संशय: ॥"
इति श्रीव्यासभाषितं नवग्रहस्तोत्रं समाप्तम् ॥
(ग्रहाणामन्यद्विवरणन्तु ग्रहशब्दे द्रष्टव्यम् ॥*॥
नवं नूतनं ग्रहो ग्रहणं यस्येति विग्रहे नवग्रहे, त्रि । यथा, रामायणे । २ । ५८ । ३ ।
"दृष्ट्वा परमसन्तप्त नवग्रहमिव द्विपम् ॥")

नवच्छात्र', पुं, (नवो नूतनश्छात्र' ।) प्रथममध्ययने प्रवृत्तः । नवीनविद्यार्थी । तत्पर्य्यायः । क्रियाकारः २ । इति त्रिकाण्डशेष' ॥

नवत', पुं, (नूयते स्तूयते इति । णु+बाहुलकात् अतच् ।) कुथः । करिकम्बलः । इति हेमचन्द्र. । ३ । ३४४ ॥

नवति., स्त्री, (नव दशतः परिमाणमस्य। "पङ्क्ति विंशतित्रिंशदिति।" ५ । १ । ५९ । इति निपातनात् साधुः ।) संख्याविशेषः । इति शब्दरत्नावली ॥ ९० नव्वइ इति भाषा ॥ (यथा, रघु. । ३ । ६९ ।

"इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये
ततान सोपानपरम्परामिव ॥"

नवतिसंख्यान्विते च । यथा, मनुः । ३।१७१ ।
"वीरुत्तरान्बो नवतेः काण. षष्टेः श्वित्री शतस्य तु ।
पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥")

नवतिका, स्त्री, (नव नूतन तेकते करोतीति । तिक+क' । टाप् ।) तूलिका । इति हारावली । १३७ ॥ (नवतिरेव । स्वार्थे कः । तत-ष्टाप् । नवतिसंख्या ॥)

नवतिश', [स्] त्र, बहुनवति । नवति नवतीति वीप्सायां चशप्रत्यय. ॥

नवती, स्त्री, (नवति.+कृदिकारादिति वा ङीष् ।) नवतिः । इति शब्दरत्नावली ॥

नवदण्ड, क्ली, (नवो दण्डो नव दण्डा वा यत्र ।) राज्ञां छत्रविशेषः । यथा, युक्तिकल्पतरु. ।
"मनोहर त्रिकनकदण्डश्च नवदण्डकम् ।
छत्रञ्च त्रिविधं ज्ञेयं त्रिविधानां महीभुजाम् ॥"
अस्य विवरणं छत्रशब्दे द्रष्टव्यम् ॥

नवदल, क्ली, (नवं दलमिति कर्म्मधारय. ।) पद्मस्य केशरसमीपस्थदलम् । पद्मादीनां जटिकाकारनवपत्रम् । तत्पर्य्याय' । संवर्त्तिका २ । इत्यमर' । १ । १० । ४३ ॥ सवर्त्ति. ३ संवर्त्ती ४ । इति भरत ॥ सामान्यनूतनपत्रम् । इति हड्डचन्द्र ॥ दलमात्रम् । इति मधु ॥

नवदीधिति., पुं, (नव दीधितयः किरणानि यस्य ।) मङ्गलग्रहः । इति जटाधर. ॥

नवदुर्गा, स्त्री, (नवसंख्यान्विता दुर्गा ।) नवपत्रिका । (यदुक्तम् ।
"कदली दाडिमी धान्यं हरिद्रा मानकं कचुः ।
विल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")
यथा, दुर्गन्द्रिकेश्वरपुराणे ।
"पत्रिके नवदुर्गे त्वं महादेवमनोरमे ।
पूजां समस्तां संगृह्य रक्ष मां त्रिदशेश्वरि ! ॥"
कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ काली ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ भद्रा ९ इति नवनामिका कन्या । यथा,—
"मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥"
इति निर्णयसिन्धुः ॥

नवदोला, स्त्री, (नवा नूतना दोला ।) नूतनप्रेङ्खा । अस्या विवरणं चतुर्द्दोलशब्दे द्रष्टव्यम् ॥ तदारोहणादिर्न यथा,—

"उग्रेन्द्रमूलादितिशायविवर्ज्जं
शस्तेन्दुतारातिथिलग्नयोगे ।
विष्टिव्यमापुष्यमाद्यवर्ज्जं
दोलादिकारोहणमाद्यमिष्टम् ॥"

इति समयप्रदीपः ॥

नवधा, अ, (नव+प्रकारे धाच् ।) नवप्रकार. । यथा,—
"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम् ॥"

नवनाडीचक्र, क्ली, (नवनाडीयुक्तं नाडीचक्रम् ।) राज्ञो नवनक्षत्रयुक्तवक्ररेखात्रयात्मकचक्रम् । यथा, ज्योतिषतत्त्वे ।
"जन्माद्यं कर्म्म ततोऽपि दशमं सांघातिकं षोडशभम् ।
समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
नाथः स्यु पञ्चविंशं मानसमेवं नरः षडक्षः स्यात् ।
नवनक्षत्री नृपतिः स्वधातिदेशाभिषेकर्क्षैः ॥"

नवनी, स्त्री, (नव नीयते इति । नी+ड: । गौरादित्वात् ङीष् ।) नवनीतम् । यथा,—
"यथा हैयङ्गवीनानां नवनीनां परं मुदा ।
लड्डुकानां शर्करायां स्वस्तिकानाञ्च यत्नतः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४५ अध्यायः ॥

नवनीत, क्ली, (नव नीयतेऽनेनेति । नी+क्त' ।) गव्यविशेष' । माखन् इति ननी इति च भाषा । तत्पर्य्यायः । नवोद्धृतम् २ । इत्यमरः । २ । ९ । ५२ ॥ सरजम् ३ मन्थजम् ४ हैयङ्गवीनम् ५ । इति रत्नमाला ॥ दधिजम् ६ सारम् ७ हैयङ्गवीनकम् ८ । अस्य सामान्यगुणाः । शीतलत्वम् । वर्णबलावहत्वम् । सुमधुरत्वम् । वृष्यत्वम् । संग्राहकत्वम् । कफरुचिकारकत्वम् । वातसर्व्वाङ्गशूलकासश्रमनाशित्वम् । सुखकरत्वम् । कान्तिपुष्टिप्रदत्वम् । चक्षुष्यत्वम् । सर्व्वदोषापहरत्वञ्च ॥ * ॥ नवोद्भवगव्यमाहिषनवनीतगुणाः । बालवृद्धानां प्रशस्तत्वम् । बलकारित्वम् । वातवर्द्धनत्वञ्च ॥ * ॥ माहिषनवनीतगुणाः । कषायत्वम् । मधुरत्वम् । शीतत्वम् । वृष्यत्वम् । बल्यत्वम् । ग्राहित्वम् । पित्तघ्नत्वम् । तुन्दहत्वञ्च ॥ * ॥ छागनवनीतगुणाः । क्षयकासनेत्रामयकफनाशित्वम् । बल्यत्वम् । दीपनत्वञ्च ॥ * ॥ आविकनवनीतगुणाः । हिमत्वम् । लघुत्वम् । योनिशूले कफे वाते गुदशूले हितत्वञ्च ॥ * ॥ रौडकनवनीतगुणाः । स्निग्धगन्धत्वम् । शीतलत्वम् । मेधानाशित्वम् । गुरुत्वम् । पुष्टिस्थौल्यकारित्वम् । मन्दाग्निदीपनत्वञ्च ॥*॥ हस्तिनीनवनीतगुणा' । कषायत्वम् । शीतलत्वम् । लघुत्वम् । तिक्तत्वम् । विष्टम्भित्वम् । जन्तुपित्तकफकृमिनाशित्वञ्च ॥ * ॥ आश्वीनवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । चक्षुष्यत्वम् ।

कटुत्वम् । उष्णत्वम् । ईषद्दाहापहारकत्वञ्च ॥ गार्द्दभीनवनीतगुणा' । कषायत्वम् । कफवातनाशित्वम् । बल्यत्वम् । दीपनत्वम् । पाके लघुत्वम् । मूत्रदोषनाशित्वञ्च ॥ * ॥ औष्ट्रनवनीतगुणाः । पाके शीतलत्वम् । अस्रक्रिमिकफामवातनाशित्वञ्च ॥ * ॥ नारीनवनीतगुणा' । पथ्यत्वम् । पाके लघुत्वम् । चक्षुष्यत्वम् । दीपनत्वम् । सर्व्वरोगविषनाशित्वञ्च ॥ * ॥
अथ साधारणनवनीतगुणाः ।
"शीतं वर्णबलावहं सुमधुरं वृष्यञ्च वातापहं कासघ्नं क्रिमिनाशनं कफहरं संग्राहि शूलापहम् ।
बल्यं पुष्टिकरं क्षयार्शशमनं सन्तापविच्छेदनं चक्षुष्यं श्रमहारि तर्पणकरं दध्युद्भवं पित्तजित् ॥
एकाहाद्युषितं प्रोक्तमुत्तरोत्तरगन्धदम् ।
अरुच्यं सर्व्वरोगाढ्यं दधिजं तद्धितं स्मृतम् ॥"
इति राजनिर्घण्टः ॥
अपि च । गव्यनवनीतगुणाः ।
"नवनीतं हितं गव्यं वृष्यं वर्णबलाग्निकृत् ।
संग्राहि वातपित्तासृक्क्षयार्शोऽर्द्दितकासहृत् ॥
तद्धितं बालके वृद्धे विशेषादमृतं शिशो' ॥" * ॥
माहिषनवनीतगुणा' ।
"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"
अथ पयसो नवनीतस्य गुणा ।
"दुग्धोत्थं नवनीतन्तु चक्षुष्यं रक्तपित्तनुत् ।
वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ॥"
अथ सद्य.समुद्धृतनवनीतगुणा. ।
"नवनीतञ्च सद्यस्कं स्वादु ग्राहि हिमं लघु ।
मेध्यं किञ्चित् कषायाम्लमीषत्तक्रांशसङ्क्रमात् ॥"
अथ चिरन्तननवनीतगुणाः ।
"सक्षारकटुकाम्लत्वाच्छर्द्यर्शःकुष्ठकारकम् ।
श्लेष्मलं गुरुमेदस्यं नवनीतं चिरन्तनम् ॥"
इति भावप्रकाश. ॥
"नवनीतं नवं वृष्यं ग्राहि वर्णबलाग्निकृत् ।
चक्षुष्यं हृद्यं स्निग्धं ग्रहण्यर्शोविकारनुत् ॥
क्षीरोत्थितं हिमं ग्राहि रक्तपित्ताक्षिरोगनुत् ॥"
इति राजवल्लभ ॥

नवनीतक, क्ली, (नवनीतात् कायति प्रकाशते इति । कै+कः ।) घृतम् । इति राजनिर्घण्टः ॥ (नवनीत+स्वार्थे कन् । नवनीतम् । यथा, हारीते चिकित्सितस्थाने १० अध्याये ।
"सर्पिः प्रयुक्तं नवनीतकञ्च ॥"
पर्य्यायोऽस्य यथा,—
"म्रक्षणं सरजं हैयङ्गवीनं नवनीतकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

नवनीतधेनु', स्त्री, (नवनीतेन कृता धेनु' । मध्यपदलोपिकर्म्मधारय ।) दानार्थकृतनवनीतमयधेनुविशेषः । यथा,—
"नवनीतमयीं धेनुं शृणु राजन् ! प्रयत्नत' ।
यां श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशय ॥
गोमयेनानुलिप्तायां भूमौ गोचर्म्ममात्रतः ।

कृष्णचर्म्ममृगस्यैव तस्योपरि च धारयेत् ॥
कुम्भन्तु नवनीतस्य प्रस्थमात्रस्य धारयेत् ।
वत्सं चतुर्थभागस्य तस्या उत्तरतो न्यसेत् ॥
कृत्वा विधानेन च राजसिंह-
सुवर्णशृङ्गी सुमुखी च कार्य्या ।
नेत्रे च तस्या मणिमौक्तिकैस्तु
कृत्वा तथान्यच्च गुडेन जिह्वाम् ॥
ओष्ठौ च पुष्पैश्च फलैश्च दन्ता:
प्रकल्प्य सास्नाञ्च सितैश्च सूत्रै: ॥
नवनीतस्तनीं राजन्निक्षुपादां प्रकल्पयेत् ।
ताम्रपृष्ठीं कांस्यदोहां दर्भरोमकृतच्छवीम् ॥
स्वर्णशृङ्गीं रौप्यखुराम् पञ्चरत्नसमन्विताम् ।
चतुर्भिस्तिलपात्रैस्तु संयुता सर्व्वतो दिश. ॥
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलङ्कृतम् ।
दिक्षु दीपांश्च प्रज्वाल्य ब्राह्मणाय निवेदयेत् ॥
वेदवेदाङ्गविदुषे आहिताग्निर्जितात्मवान् ।
मन्त्रास्त एव जप्तव्या: सर्व्वधेनुषु ये स्मृता. ॥
पुरा देवासुरै: सर्व्वै. सागरस्य तु मन्थने ।
उत्पन्नं दिव्यममृतं नवनीतमिदं शुभम् ॥
आप्यायनञ्च भूतानां नवनीत । नमोऽस्तु ते ।
एवमुच्चार्य्य ता दद्यात् ब्राह्मणाय कुटुम्बिने ॥
धेनुञ्च दत्त्वा सुमुदा सोपधाना
नयेद्गृहं विप्रवर्य्यस्य भूय: ।
हविष्यमेव सरसञ्चोपभुक्ता
तिष्ठेद्दिनं धेनुदस्त्रीणि विप्र: ॥
य. प्रपश्यति तां धेनुं दीयमाना नरोत्तम ।
सर्व्वपापविनिर्मुक्त: शिवसायुज्यतां व्रजेत् ॥
पितृभि पूर्व्वजै: सार्द्धं भविष्यद्भिश्च मानव' ।
विष्णुलोकं व्रजत्याशु यावदाहूतसंप्लवम् ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानव: ।
सर्व्वपापविशुद्धात्मा विष्णुलोके महीयते ॥”
इति वराहपुराणम् ॥

नवपाठक', पु, (नवो नूतन' पाठकोऽध्यापक: ।) नूतनाध्यापक: । इति सिद्धान्तकौमुदी ॥

नवफलिका, स्त्री, (नव फल यस्या' । कापि अत इत्वम् ।) नवम् । नवजातरजोऽङ्गना । इति मेदिनी । के, २३० ॥

नवम:, त्रि, (नवन्+“तस्य पूरणे डट् ।” ५ । २ । ४८ । इति डट् । ततो “नान्तादसंख्यादेर्म्मट् ।” ५ । २ । ४९ । इति डटो मट् ।) नवानां पूरण: । इति व्याकरणम् ॥ नयइ इत्यादि भाषा ॥

नवमल्लिका, स्त्री, (नवा नूतना स्तुत्या वा मल्लिका ।) नवमालिका । इति शब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । १ । १२ ।
“रम्य हर्म्म्यतल नवा: सुनयना गुञ्जद्द्विरेफा लता' ।
प्रोन्मीलन्नवमल्लिका: सुरभयो वाता: सचन्द्रा निशा: ॥”)

नवमालिका, स्त्री, (नवा नूतना मालिका मल्लिकापुष्पम् ।) नवमल्लिकापुष्पम् । वासन्ती नेवारी इति लोके । नेयालि इति नेम्नोयार इति च भाषा । तत्पर्य्याय: । अतिमोदा २ शेफी ३ ग्रीष्मोद्भवा ४ सप्तला ५ सुकुमारी ६ सुरभि: ७ शुचिमल्लिका ८ सुगन्धा ९ शिखरिणी १० नवाली ११ । इति राजनिर्घण्ट: ॥ भद्रवर्म्मा १२ देवलता १३ । इति शब्दचन्द्रिका ॥ गन्धनिलया १४ मालिका १५ नवमल्लिका १६ । इति शब्दरत्नावली ॥ तस्या गुणा: । अतिशैत्यत्वम् । सुरभित्वम् । सर्व्वरोगहरत्वञ्च । इति राजनिर्घण्ट: ॥ तन्नामगुणा: ।
“नेपाली कथिता तज्ज्ञै: सप्तला नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापजित् ॥”
इति भावप्रकाश: ॥

नवमी, स्त्री, (नवम+टित्त्वात् ङीप् ।) तिथिविशेष: । सा चन्द्रस्य नवमकलाक्रियारूपा । शुक्लपक्षे ९ कृष्णपक्षे २४ पञ्जिकाकारसङ्केतेन एतदङ्कबोधिता ॥ अथ नवम्यावस्था । “सा चाष्टमीयुता ग्राह्या युग्मात् । भविष्ये ।
‘मासैश्चतुर्भिर्यत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फल लभते वीर नवम्यां कार्त्तिकस्य च ॥’
तथा भविष्ये ।
‘माघे मासि तु या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम् ॥
स्नानं दानं जपो होमो देवार्च्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरै: ॥’
तथा कालिकापुराणम् ।
‘नवम्यां नववर्षाणि राजन् । पिष्टाशनो भवेत् ।
तस्य तुष्टा भवेद्गौरी सर्व्वकामप्रदा शुभा ॥’
अद्येत्यादि नवम्यान्तिथावारभ्य नव वर्षाणि यावत् प्रतिशुक्लनवम्यां पिष्टेतरभोजननिवृत्तिव्रतमिति सङ्कल्पे विशेष: । सर्व्वकामप्रदगौरीतोष: फलम् ।” इति तिथितत्त्वम् ॥ श्रीरामनवम्यावस्था तच्छब्दे द्रष्टव्या ॥*॥ इयं दुर्गातिथि: । तत्र तस्या: पूजा कर्त्तव्या । यथा,—
ब्रह्मोवाच ।
“इयं देवी वरारोहा यातु शैलं हिमाचलम् ।
तत्र यूयं सुरा: सर्व्वे गत्वा नन्दत माचिरम् ॥
नवम्याञ्च सदा पूज्या इयं देवी समाधिना ।
वरदा सर्व्वलोकानां भविष्यति न संशय: ॥
नवम्यां यश्च पिष्टाशी भविष्यति हि मानव: ।
नारी वा तस्य सम्पन्नं भविष्यति मनोगतम् ॥”
इति वराहपुराणम ॥
कार्त्तिकशुक्लनवम्यां जगद्धात्रीपूजाप्रमाणानि यथा,—
“प्रपूजयेज्जगद्धात्रीं कार्त्तिके शुक्लपक्षके ।
दिनोदये च मध्याह्ने सायाह्ने नवमेऽहनि ॥”
इति मायातन्त्रे १७ पटल: ॥
“कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उषस्यर्द्धोदितो भानुर्दुर्गामाराध्य यत्नवान् ॥
पुत्त्रारोग्यधनं क्षेमे लोकसाक्षित्वमेव च ।
तां तिथिं प्राप्य मनुज: शनिभौमदिने यदि ।
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ॥”
इति कात्यायनीतन्त्रे ७८ पटल: ॥
“कार्त्तिके शुक्लपक्षे तु त्रेतायाः प्रथमेऽहनि ।
त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्पत्प्रवृद्धये ॥”
इत्युत्तरकामाख्यातन्त्रे ११ पटल: ॥
अथ नवमीजातफलम् । यथा, कोष्ठीप्रदीपे ।
“विरोधकर्त्ता सुजनैरगम्य:
परापकारार्थमति. कुशील: ।
आचारहीन: कृपण. कठोर:
प्रसूतिकाले नवमी यदि स्यात् ॥”

नवयौवना, स्त्री, (नव यौवनं यस्या. ।) युवती । तत्पर्य्याय: । दिक्करी २ । इति हारावली । १५४ ॥ तालुनी ३ कुहेली ४ । इति शब्दमाला ॥

नवरङ्गं, क्ली, (नव रङ्गा यस्मात् ।) कायस्थमुख्यकुलीनानां पञ्चदानचतुर्ग्रहणात्मककुलविशेष: । तद्यथा,—
“समाने प्रथमं दानं द्वितीयञ्च कनिष्ठके ।
षड्भ्रातरि तृतीयञ्च मध्यश्रेष्ठे चतुर्थकम् ॥
तेजोजे पञ्चमं दानं कुर्य्यादेतद्विधानत: ।
ग्रहणं जन्मनि समे कनिष्ठे च द्वितीयकम् ॥
तृतीयं जन्ममध्यांशे तेजोजेऽपि चतुर्थकम् ।
नवरङ्गमिति प्रोक्तं मुख्याना हि महागुणम् ॥”
इति कुलाचार्य्यकारिका ॥

नवरत्नं, क्ली, (नवानां रत्नाना समाहार: ।) नवप्रकारमणय' । तद्यथा,—
“मुक्तामाणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥”
इति तन्त्रसार: ॥
(यथा च,—
“वज्रञ्च मौक्तिकञ्चैव माणिक्यं नीलमेव च ।
तथा मरकतं ज्ञेयं महारत्नानि पञ्चधा ॥
गोमेद: पद्मरागश्च वैदूर्य्यञ्च प्रवालकम् ।
चत्वारि उपरत्नानि नवरत्नमिदं स्मृतम् ॥”
“रत्नं गारुत्मतं पुष्पं रागो माणिक्यमेव च ।
इन्द्रनीलञ्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिक विद्रुमश्चेति रत्नान्युक्तानि वै नव ॥
रत्नं हीरा । गारुत्मतं पान्ना । माणिक्य पद्मराग. । इन्द्रनील: नीला ।” इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नवग्रहदोषशान्त्यै धार्य्याणि नव रत्नानि यथा,—
“वैदूर्य्यं धारयेत् सूर्य्ये नीलञ्च मृगलाञ्छने ।
आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे ॥
गुरौ मुक्तां भृगौ वज्रं शनौ नीलं विदुर्बुधा: ।
राहौ गोमेदक धार्य्यं केतौ मरकतन्तथा ॥”
इति दीपिका ॥
विक्रमादित्यराजसभास्थनवसंख्यकपण्डिता. । यथा,—
“धन्वन्तरिक्षपणकामरसिंहशङ्कु
वेतालभट्टघटकर्परकालिदासा: ।
ख्यातो वराहमिहिरो नृपते: सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥”
इति नवरत्नम् ॥
नव श्लोका: । यथा,—
“मित्रमर्थों तथा नीतिर्धर्म्मकार्म्मण्यमूर्खिका. ।

क्षोणीं विद्वान् सघोत्खातान् नवरक्षमिदं क्रमात् ॥
मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्य्येण द्विजमादरेण युवतीं प्रेम्णा समैर्बान्धवान् ।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्य्याद्वशम् ॥ १ ॥
अर्थी लाघवमुच्छ्रितो निपतनं कामातुरो लाञ्छनं
लुब्धोऽकीर्त्तिमसङ्गरः परिभवं दुष्टोऽन्यदोषे रतिम् ।
निःस्वो बन्धनमुन्मना विकलतां शोकाकुलः संशयं
दुर्व्वागप्रियतां दुरोदरवशः प्राप्नोति कष्टं खलु ॥ २ ॥
नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृतिर्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्मृतिः सुमनसां शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम् ॥ ३ ॥
धर्म्मः प्रागेव चिन्त्यः सचिवमतिगतिर्भावनीया सदैव
ज्ञेयं लोकानुवृत्तं वरचरनयनैर्मण्डलं वीक्षणीयम् ।
पक्षाद्यौ रागरोषौ मृदुपरुषगुणौ योजनीयौ च काले
ज्ञात्वा यत्नेन रक्ष्यो रणशिरसि पुनः सोऽपि नापेक्षणीयः ॥ ४ ॥
कार्पण्येन यशः क्रुधा गुणचयो दम्भेन सत्यं क्षुधा
मर्य्यादा व्यसनैर्धनानि विपदा स्थैर्य्यं प्रमादैर्द्विजः ।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनादरो ममतया चात्मप्रकाशो हतः ॥ ५ ॥
मूर्खो शान्तस्तपस्वी क्षितिपतिरलसो मत्सरो धर्म्मशीलो
दम्भी मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः ।
आज्ञाहीनो नरेन्द्रः सुचिरमपि सततं यः पराभोपभोगी
वृद्धो रोगी दरिद्रः स च युवतिपतिर्धिग्विडम्बप्रकारम् ॥ ६ ॥
क्षोणी यौवनमर्थिनामनुगमो राज्ञां प्रतापः सतां
मत्तः स्वल्पधनस्य सञ्चितिरसद्वृत्तस्य वागडम्बरः ।
साधारस्य मनोदमः परिणतेर्विद्या कुलस्त्रीकता
सेवाया धनसम्मतेर्गुणचयः शान्तेर्विवेको बलम् ॥ ७ ॥
विद्वान् संसदि पाचिकः परवशो मानी दरिद्रो गृही
वित्ताढ्यः कृपणः सुखी परवशो वृद्धो न तीर्थाश्रितः ।
राजा दुःसचिवः प्रियः कुलभवो मूर्खः पुमान् स्त्रीजितः
वेदान्ती हतसत्क्रियः किमपरं हास्यास्पदं भूतले ॥ ८ ॥
उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन् शिशून् वर्द्धयन्
प्रोत्तुङ्गान् नमयन् नतान् समुदयन् विश्लेषयन् संहतान् ।
तीव्रान् कण्टकिनो बहिर्नियमयन् म्लानान् मुहुः सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नन्दतु ॥ ९ ॥)

नवरात्र क्ली, (नवानां रात्रीणां समाहारः । ततः साधारणेनास्त्यस्येति अच् ।) आश्विनशुक्लप्रतिपदादिनवमीपर्य्यन्तनवदिनकर्त्तव्यदुर्गाव्रतविशेषः । तस्यारम्भः । देवीपुराणे डामरतन्त्रे च देवीवचः ।
"अमायुक्ता न कर्त्तव्या प्रतिपत् पूजने मम ।
मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता ॥"
मार्कण्डेयदेवीपुराणयोः ।
"पूर्व्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी ।
नवरात्रव्रतं तस्यां न कार्य्यं शुभमिच्छता ॥"
अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये ।
"एवञ्च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ॥
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥"
मदनरत्ने देवीपुराणेऽपि ।
"कन्यासंस्थे रवौ शक्र ! शुक्लामारभ्य नन्दिकाम् ।
अयाची त्वथवैकाशी नक्ताशी वाथ वायुदः ॥
भूमौ शयीत चामन्त्र्य कुमारीर्भोजयेन्मुदा ।
वस्त्रालङ्कारदानैश्च सन्तोष्याः प्रतिवासरम् ॥
बलिञ्च प्रत्यहं दद्यादोदनं माषमांसवत् ।
त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ॥"
स्कान्दे ।
"मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।
सम्पूज्य नवदुर्गाञ्च नक्तं कुर्य्यात् समाहितः ॥
नवरात्राभिधं कर्म्म नक्तव्रतमिदं स्मृतम् ।
तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ॥
अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षये ॥"*॥
तत्र पूजाविधिः । सा च जयन्तीत्यादिमन्त्रेण नवाक्षरेण वा कार्य्या । यथा । सङ्कल्पं विधाय घटं संस्थाप्य तत्र देवीमावाह्य षोडशोपचारैः पूजयित्वा माषभक्तबलिं कुष्माण्डादिबलिं वा निवेदयेत् ॥ * ॥ ततः कुमारीपूजा । यदुक्तं हेमाद्रौ स्कान्दे ।
"एकैकां पूजयेत् कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकन्तु वा ॥"
तथा,—
"नवभिर्लभते भूमिमैश्वर्य्यं द्विगुणेन तु ।
एकवृद्ध्या लभेत् क्षेममेकैकेन श्रियं लभेत् ॥"
अथ कुमारीनिर्णयः ।
"एकवर्षा तु या कन्या पूजार्थं तां विवर्ज्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"
तेन द्विवर्षमारभ्य दशवर्षपर्य्यन्तम् । कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ काली ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ सुभद्रा ९ इति नवनामभिस्ताः पूजनीयाः । आसामावाहनमन्त्रः । यथा,—
"मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥
अथमभ्यर्च्चनं कुर्य्यात् कुमारीणां प्रयत्नतः ।
कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यैर्भोजयेत् पायसादिभिः ॥"
तासां त्याज्यत्वमाह ।
"ग्रन्थिस्फुटितशीर्णाङ्गीं रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरां काणीं कुरूपां तनुरोमशाम् ।
सन्त्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥"
तासां जातिविशेषे फलविशेषो यथा,—
"ब्राह्मणीं सर्व्वकार्य्ये च जयार्थे नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ॥
दारुणे चान्त्यजातानां पूजयेद्विधिना नरः ॥"
अत्र वेदपारायणचण्डीपाठ उक्तः । रुद्रयामले ।
"एवं चतुर्व्वेदविदो विप्रान् सर्व्वान् प्रसादयेत् ।
तेषाञ्च वरणं कार्य्यं वेदपारायणाय वै ॥"
तथा,—
"एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि ।
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥"*॥
अत्राश्ववतोऽश्वपूजनमुक्तम् । मदनरत्ने देवीपुराणे ।
"अश्वयुक्शुक्लप्रतिपत्स्वातियोगे शुभे दिने ।
पूर्व्वमुच्चैःश्रवा नाम प्रथमं श्रियमाहरत् ॥
तस्मात् साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धया सह ।
पूजनीयाश्च तुरगा नवमीं यावदेव हि ॥
शान्तिः स्वस्त्ययनं कार्य्यं तथा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्ठं वचा सिद्धार्थकास्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिन्तेषान्तु बन्धयेत् ।
वायव्यैर्वारुणैः सौरैः शाक्रैर्मन्त्रैः सवैष्णवैः ।
वैश्वदेवैस्तथाग्नेयैर्होमः कार्य्यो दिने दिने ॥"
तत्र गजपूजापि । कल्पतरौ ।
"ज्येष्ठायोगे पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमवहन् पूर्व्वं सशैलवनकाननाम् ॥
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥"
अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरङ्गिण्यां भविष्ये ।
"केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे ॥
दर्पणञ्च तृतीयायां सिन्दूरालक्तकन्तथा ।

मधुपर्कं चतुर्थ्यान्तु तिलकं नेत्रमञ्जनम् ॥
पञ्चम्यामङ्गरागञ्च शक्त्यालङ्करणानि च ।
षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥
सप्तम्यां प्रातरानीय गृहमध्ये प्रवेशयेत् ।
उपोषणमथाष्टम्यामात्मशक्त्या तु पूजनम् ॥
नवम्यामुग्ररूपायाः पूजां कुर्य्याद्बलिन्तथा ।
सपूज्योपोषणं कुर्य्यात् दशम्यां शावरोत्सवैः ॥
अनेन विधिना यस्तु देवीं प्रीणयते नरः ।
स्कन्दवत् पालयेद्देवी तं पुत्त्रधनकीर्त्तिभिः ॥”
आश्विनशुक्लपक्षे मूलनक्षत्रे सरस्वतीस्थापनम् । यथोक्तं निर्णयामृते देवीपुराणे ।
“मूलेषु स्थापनं देव्याः पूर्व्वाषाढ़ासु पूजनम् ।
उत्तरासु बलिं दद्यात् श्रवणेन विसर्ज्जयेत् ॥”
रुद्रयामलेऽपि ।
“मूलऋक्षे सुराधीश पूजनीया सरस्वतीम् ।
पूजयेत् प्रत्यहं देव यावद्वैष्णवमृक्षकम् ॥
नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देवि ! विद्याकामो द्विजोत्तमः ॥”
स्त्रीणाञ्च नवरात्रे ताम्बूलचर्व्वणादिकं न निषिद्धम् । तदुक्तं व्रतहेमाद्रौ गारुडे ।
“गन्धालङ्कारताम्बूलपुष्पमालानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥”
एतत् सभर्तृकोपवासविषयम् ॥ * ॥ हेमाद्रौ । आश्विनमाघचैत्रश्रावणमासचतुष्टये कृष्णाष्टम्यादिपक्षदशरात्रव्रतमभिधाय अथवा नवरात्रञ्च सप्तपञ्चत्रिकं दिवा । इत्युक्तम् । देवीपुराणे ।
“नवरात्रव्रतेऽशक्तस्त्रिरात्रञ्चैकरात्रकम् ।
व्रतञ्चरति यो भक्त्या तस्मै दास्यामि वाञ्छितम् ॥”*
(यथाच देवीभागवते । ३ । २६—२७ ।
“शृणु राजन् ! प्रवक्ष्यामि नवरात्रव्रतं शुभम् ।
शरत्काले विशेषेण कर्त्तव्यं विधिपूर्व्वकम् ॥
वसन्ते च प्रकर्त्तव्यं तथैव प्रेमपूर्व्वकम् ।
द्वावृतू यमदंष्ट्राख्यौ नूनं सर्व्वजनेषु वै ॥
शरद्वसन्तनामानौ दुर्गमौ प्राणिनामिह ।
तस्माद्यत्नादिदं कार्य्यं सर्व्वत्र शुभमिच्छता ॥
द्वावेव सुमहाघोरावृतू रोगकरौ नृणाम् ।
वसन्तशरदावेव जननाशकरावुभौ ॥
तस्मात्तत्र प्रकर्त्तव्यं चण्डिकापूजनं बुधैः ।
चैत्राश्विने शुभे मासे भक्तिपूर्व्वं नराधिप ! ॥
अमावास्याञ्च सम्प्राप्य सम्भारं कल्पयेच्छुभम् ।
हविष्यञ्चाशनं कार्य्यमेकभक्तन्तु तद्दिने ॥
मण्डपस्तु प्रकर्त्तव्यः समे देशे शुभे स्थले ।
हस्तषोडशमानेन स्तम्भध्वजसमन्वितः ॥
गौरमृद्गोमयाभ्याञ्च लेपनं कारयेत्ततः ।
तन्मध्ये वेदिका शुभ्रा कर्त्तव्या च समा स्थिरा ॥
चतुर्हस्ता च हस्तोच्चा पीठार्थं स्थानमुत्तमम् ।
तोरणानि विचित्राणि वितानञ्च प्रकल्पयेत् ॥
रात्रौ द्विजानथामन्त्र्य देवीतत्त्वविशारदान् ।
आचारनिरतान् दान्तान् वेदवेदाङ्गपारगान् ॥
प्रतिपद्दिवसे कार्य्यं प्रातः स्नानं विधानतः ।
नद्यां नदे तड़ागे वा वाप्यां कूपे गृहेऽथ वा ॥
प्रातर्नित्यं पुरः कृत्वा द्विजानां वरणं ततः ।
अर्घ्यपाद्यादिकं सर्व्वं कर्त्तव्यं मधुपूर्व्वकम् ॥
वस्त्रालङ्करणादीनि देयानि च स्वशक्तितः ।
वित्तशाठ्यं न कर्त्तव्यं विभवे सति कर्हिचित् ॥
विप्रैः सन्तोषितैः कार्य्यं सम्पूर्णं सर्व्वथा भवेत् ।
नव पञ्च त्रयश्चैको देव्याः पाठे द्विजाः स्मृताः ॥
वरयेद्ब्राह्मणं शान्तं पारायणकृते तदा ।
स्वस्तिवाचनकं कार्य्यं वेदमन्त्रविधानतः ॥
वेद्यां सिंहासनं स्थाप्य क्षौमवस्त्रसमन्वितम् ।
तत्र स्थाप्याम्बिका देवी चतुर्हस्तायुधान्विता ॥
रत्नभूषणसंयुक्ता मुक्ताहारविराजिता ।
दिव्याम्बरधरा सौम्या सर्व्वलक्षणसंयुता ॥
शङ्खचक्रगदापद्मधरा सिंहे स्थिता शिवा ।
अष्टादशभुजा वापि प्रतिष्ठाप्या सनातनी ॥
अर्च्चाभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम् ।
स्थापयेत् पीठपूजार्थं कलसं तत्र पार्श्वतः ॥
पञ्चपल्लवसंयुक्तं वेदमन्त्रैः सुसंस्कृतम् ।
सुतीर्थजलसम्पूर्णं हेमरत्नैः समन्वितम् ॥
पार्श्वे पूजार्थसम्भारान् परिकल्प्य समन्ततः ।
गीतवादित्रनिर्घोषान् कारयेन्मङ्गलाय वै ॥
तिथौ हस्तान्वितायाञ्च नन्दायां पूजनं वरम् ।
प्रथमे दिवसे राजन् ! विधिवत् कामदं नृणाम् ॥
नियमं प्रथमं कृत्वा पश्चात् पूजां समाचरेत् ।
उपवासेन नक्तेन चैकभक्तेन वा पुनः ॥
करिष्यामि व्रतं मातर्नवरात्रमनुत्तमम् ।
साहाय्यं कुरु मे देवि ! जगदम्ब ! ममाखिलम् ॥
यथाशक्ति प्रकर्त्तव्यो नियमो व्रतहेतवे ।
पश्चात् पूजा प्रकर्त्तव्या विधिवन्मन्त्रपूर्व्वकम् ॥
चन्दनागुरुकर्पूरैः कुसुमैश्च सुगन्धिभिः ।
मन्दारकरणाशोकचम्पकैः करवीरकैः ॥
मालतीब्रह्मकापुष्पैस्तथा बिल्वदलैः शुभैः ।
पूजयेज्जगतां धात्रीं धूपैर्दीपैर्विधानतः ॥
फलैर्नानाविधैरर्घ्यं प्रदातव्यञ्च तत्र वै ।
नारिकेलैर्मातुलिङ्गैर्दाड़िमैः कदलीफलैः ॥
नारङ्गैः पनसैश्चैव तथा पूर्णफलैः शुभैः ।
अन्नदानं प्रकर्त्तव्यं भक्तिपूर्व्वं नराधिप ! ॥
नैवेद्यानि विचित्राणि सर्व्वान्नसंयुतानि च ।
ओदनं पायसञ्चैव पूपांश्च वटकांस्तथा ॥
मांसाशनं ये कुर्व्वन्ति तैः कार्य्यं पशुहिंसनम् ।
महिषाजवराहाणां बलिदानं विशिष्यते ॥
देव्यग्रे निहता यान्ति पशवः स्वर्गमव्ययम् ।
न हिंसा पशुजा तत्र निघ्नतां तत्कृतेऽनघ ! ॥
अहिंसा याज्ञिकी प्रोक्ता सर्व्वशास्त्रविनिर्णये ।
देवतार्थे विसृष्टानां पशूनां स्वर्गतिर्ध्रुवा ॥
होमार्थञ्चैव कर्त्तव्यं कुण्डञ्चैव त्रिकोणकम् ।
स्थण्डिलं वा प्रकर्त्तव्यं त्रिकोणं मानतः शुभम् ॥
त्रिकालं पूजनं नित्यं नानाद्रव्यैर्मनोहरैः ।
गीतवादित्रनृत्यैश्च कर्त्तव्यश्च महोत्सवः ॥
नित्यं भूमौ च शयनं कुमारीणाञ्च पूजनम् ।
वस्त्रालङ्करणैर्दिव्यैर्भोजनैश्च सुधामयैः ॥
एकैकां पूजयेन्नित्यमेकवृद्ध्या तथा पुनः ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकञ्च वा ॥
विभवस्यानुसारेण कर्त्तव्यं पूजनं किल ।
वित्तशाठ्यं न कर्त्तव्यं राजञ्छक्तिमखे सदा ॥
एकवर्षा न कर्त्तव्या कन्या पूजाविधौ नृप ! ।
परमज्ञा तु भोगानां गन्धादीनाञ्च बालिका ॥
कुमारिका तु सा प्रोक्ता द्विवर्षा या भवेदिह ।
त्रिमूर्त्तिश्च त्रिवर्षा च कल्याणी चतुरब्दिका ॥
रोहिणी पञ्चवर्षा च षड्वर्षा कालिका स्मृता ।
चण्डिका सप्तवर्षा स्यादष्टवर्षा च शाम्भवी ॥
नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी ।
अत ऊर्द्ध्वं न कर्त्तव्या सर्व्वकार्य्यविगर्हिता ॥
एभिश्च नामभिः पूजा कर्त्तव्या विधिसंयुता ।
तासां फलानि वक्ष्यामि नवानां पूजने सदा ॥
कुमारी पूजिता कुर्य्याद्दुःखदारिद्र्यनाशनम् ।
शत्रुक्षयं धनायुष्यबलवृद्धिं करोति वै ।
त्रिमूर्त्तिपूजनादायुस्त्रिवर्गस्य फलं भवेत् ।
धनधान्यागमश्चैव पुत्त्रपौत्रादिवृद्धयः ॥
विद्यार्थी विजयार्थी च राज्यार्थी यश्च पार्थिवः ।
सुखार्थी पूजयेन्नित्यं कल्याणीं सर्व्वकामदाम् ॥
रोहिणीं रोगनाशाय पूजयेद्विधिवन्नरः ।
कालिकां शत्रुनाशार्थं पूजयेद्भक्तिपूर्व्वकम् ॥
ऐश्वर्य्यधनकामस्तु चण्डिकां परिपूजयेत् ।
पूजयेच्छाम्भवीं नित्यं नृप ! संमोहनाय च ॥
दुःखदारिद्र्यनाशाय संग्रामे विजयाय च ।
क्रूरशत्रुविनाशार्थं तथोग्रकर्म्मसाधने ॥
दुर्गाञ्च पूजयेद्भक्त्या परलोकसुखाय च ।
वाञ्छितार्थस्य सिद्ध्यर्थं सुभद्रां पूजयेत् सदा ॥
श्रीरस्त्विति च मन्त्रेण पूजयेद्भक्तितत्परः ।
श्रीयुक्तमन्त्रैरथवा वीजमन्त्रैरथापि वा ॥
कुमारस्य च तत्त्वानि या सृजत्यपि लीलया ।
कादीनपि च देवांस्तां कुमारीं पूजयाम्यहम् ॥
सत्त्वादिभिस्त्रिमूर्त्तिर्या तैर्हि नानास्वरूपिणी ।
त्रिकालव्यापिनी शक्तिस्त्रिमूर्त्तिं पूजयाम्यहम् ॥
कल्याणकारिणी नित्यं भक्तानां पूजिताऽनिशम् ।
पूजयामि च तां भक्त्या कल्याणीं सर्व्वकामदाम् ॥
रोहयन्ती च वीजानि प्राग्जन्मसञ्चितानि वै ।
या देवी सर्व्वभूतानां रोहिणीं पूजयाम्यहम् ॥
काली कालयते सर्व्वं ब्रह्माण्डं सचराचरम् ।
कल्पान्तसमये या तां कालिकां पूजयाम्यहम् ॥
चण्डिकां चण्डरूपाञ्च चण्डमुण्डविनाशिनीम् ।
तां चण्डपापहरिणीं चण्डिकां पूजयाम्यहम् ॥
अकारणात् समुत्पत्तिर्यन्मयैः परिकीर्त्तिता ।
यस्यास्तां सुखदां देवीं शाम्भवीं पूजयाम्यहम् ॥
दुर्गात् त्रायति भक्तं या सदा दुर्गार्त्तिनाशिनी ।
दुर्ज्ञेया सर्व्वदेवानां तां दुर्गां पूजयाम्यहम् ॥
सुभद्राणि च भक्तानां कुरुते पूजिता सदा ।
अभद्रनाशिनीं देवीं सुभद्रां पूजयाम्यहम् ॥
एभिर्मन्त्रैः पूजनीयाः कन्यकाः सर्व्वदा बुधैः ।
वस्त्रालङ्करणैर्माल्यैर्गन्धैरुच्चावचैरपि ॥”
“हीनाङ्गीं वर्ज्जयेत् कन्यां कुष्ठयुक्तां व्रणाङ्किताम् ।
गन्धस्फुरितहीनाङ्गीं विशालकुलसम्भवाम् ॥
जात्यन्धां केकरां काणीं कुरूपां बहुरोमशाम् ।
सन्त्यजेद्रोगिणीं कन्यां रक्तपुष्पादिनाङ्किताम् ॥

दासीगर्भसमुद्भूतां गोलकां कन्यकोद्भवाम् ।
वर्ज्जनीयाः सदा चैताः सर्व्वपूजादिकर्म्मसु ॥
अरोगिणीं सुरूपाङ्गीं सुन्दरीं व्रणवर्ज्जिताम् ।
एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूजयेत् ॥
ब्राह्मणी सर्व्वकार्य्येषु जयार्थे नृपवंशजा ।
लाभार्थे वैश्यवंशोत्था चेमे च शूद्रवंशजा ॥
ब्राह्मणैर्ब्राह्मणाः पूज्या राजन्यैर्ब्रह्मवंशजाः ।
वैश्यैस्त्रिवर्गजाः पूज्याश्चतस्रः पादसम्भवैः ॥
कारुभिश्चैव वंशोत्था यथायोग्य प्रपूजयेत् ।
नवरात्रविधानेन भक्तिपूर्व्वं सदैव हि ॥
अशक्तो नियत पूजां कर्त्तुं चेन्नवरात्रके ।
अष्टम्याञ्च विशेषेण कर्त्तव्य पूजनं सदा ॥
पुराष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
अतोऽष्टम्यां विशेषेण कर्त्तव्यं पूजन सदा ।
नानाविधोपहारैश्च गन्धमाल्यानुलेपनैः ॥
पायसैरामिषैर्होमैर्ब्राह्मणानाञ्च भोजनैः ।
फलपुष्पोपहारैश्च तोषयेज्जगदम्बिकाम् ॥
उपवासे ह्यशक्तानां नवरात्रव्रते पुन ।
उपोषणत्रय प्रोक्तं यथोक्त फलदं नृप । ॥
सप्तम्याञ्च तथाष्टम्यां नवम्या भक्तिभावतः ।
त्रिरात्रकरणात् सर्व्वं फलं भवति पूजनात् ॥
सम्पूर्णं तद्व्रतं प्रोक्त विप्राणाञ्चैव भोजनैः ।
व्रतानि यानि चान्यानि दानानि विविधानि च ॥
नवरात्रव्रतस्यास्य नैव तुल्यानि भूतले ।
धनधान्यप्रद नित्यं सुखसन्तानवृद्धिदम् ॥
आयुरारोग्यदञ्चैव स्वर्गद मोक्षद तथा ।
विद्यार्थी वा धनार्थी वा पुत्त्रार्थी वा भवेन्नरः ।
तेनेद विधिवत् कार्य्यं व्रत सौभाग्यद शिवम् ॥
विद्यार्थी सर्व्वविद्यां वै प्राप्नोति व्रतसाधनात् ।
राज्यभ्रष्टो नृपो राज्य समवाप्नोति सर्व्वथा ॥
पूर्व्वजन्मनि यैर्नूनं न कृत व्रतमुत्तमम् ।
ते व्याधिनो दरिद्राश्च भवन्ति पुत्त्रवर्ज्जिताः ॥
वन्ध्या च या भवेन्नारी विधवा धनवर्ज्जिता ।
अनुमा तत्र कर्त्तव्या नेय कृतवती व्रतम् ॥
नवरात्रव्रतं प्रोक्त न कृत येन भूतले ।
स कथ विभवं प्राप्य मोदतेऽत्र तथा दिवि ॥
रक्तचन्दनसमिश्रैः कोमलैर्विल्वपत्रकैः ।
भवानी पूजिता येन स भवेन्नृपतिः चितौ ॥" * ॥)
अथ नवरात्रपारणानिर्णयः । सा च दशम्यां कार्य्या ॥ * ॥ दशम्यां विशेषस्तु भार्गवार्च्चनदीपिकायां भविष्ये ।
"शमीयुक्त जगन्नाथ भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीवृक्षमर्च्चयेच्च तत पुन ॥"
शमीमन्त्रः । स्कान्दे हेमाद्रौ गोपथब्राह्मणे ।
"अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ॥"
तथा भविष्ये ।
"शमी शमयते पाप शमी शत्रुविनाशिनी ।
अर्ज्जुनस्य धनुर्द्धारी रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकाल सुख मया ।
तत्र निर्व्विघ्नकर्त्री त्व भव श्रीरामपूजिते ॥"

अथ बलनीराजनम् । कल्पतरौ । तत्र मन्त्रः ।
"चतुरङ्ग बल मह्यं निररिष्टं ममास्तु ह ।
सर्व्वत्र विजयो मेऽस्तु त्वत्प्रसादात् सुरेश्वरि ॥"
गौड़निबन्धे ज्योतिषे ।
"कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम् ।
शोभनं खञ्जनं पश्येत् जलगोष्ठस्य सन्निधौ ॥"
इति निर्णयसिन्धुः ॥

नवरात्रिकं, क्ली, (नवरात्रेण निर्वृत्तम् । नवरात्र + "तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) नवरात्रम् । यथा, भविष्योत्तरे ।
"आश्विने शुक्लपक्षे तु कर्त्तव्य नवरात्रिकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥"

नववधू, स्त्री, (नवा नूतना वधूः ।) नवोढ़ा । नवीना भार्य्या । यथा,—
"असम्भयद्गुनरसा शतालिगणसेविता ।
कर न सहते राजन् ! भूमिर्नववधूरिव ॥"
इति हास्यार्णवम् ॥ * ॥
नववध्वागमनदिनं यथा । तत्र चाष्टमदशमद्वादशषष्ठचतुर्थवर्षाणि निषिद्धानि । (यदुक्त ज्योतिषे ।
"श्वश्रुं हन्त्यष्टमे वर्षे श्वशुरञ्च दशाब्दिके ।
सम्प्राप्ते द्वादशे वर्षे पति हन्ति द्विरागमे ॥
विवाहमासि प्रथम वध्वा नागमन यदि ।
तदा सर्व्वमिद चिन्त्यं युग्माब्दादि विचक्षणैः ॥")
मासा मार्गफाल्गुनवैशाखा विहिताः । पक्ष शुक्लः । विहितनक्षत्राणि पुष्यस्वातीहस्ताधनिष्ठोत्तराषाढ़ोत्तरफल्गुन्युत्तरभाद्रपदारेवतीमृगशिरोरोहिणीपुनर्व्वसुपूर्व्वाषाढ़ाः । वाराः वृहस्पतिबुधशुक्रसोमानाम् । तिथयो यात्राप्रकरणोक्ताः । त्र्यहस्पर्शवारवेलादिकशूलादीन् परित्यज्य ताराचन्द्रशुद्धौ कालशुद्धौ च कार्य्यम् ॥ इति ज्योतिषम् ॥ अपि च ।
"स्वातीमूलपुनर्व्वसूत्तरकराश्विन्यनुराधाश्विनी रोहिण्यः श्रवणा द्विरागमविधौ पुष्या धनिष्ठा तथा ।
भर्त्तुर्गोचरशोभने दिनपतौ काले पुन शोभने कुम्भाजालिरवौ शुभे शुभतिथौ वारादियाम्यो दिते ॥
वैशाखे मार्गशीर्षे हि फाल्गुने हि शुभे रवौ ।
नववध्वागम कुर्य्यादन्यमासे विवर्ज्जयेत् ॥"
इति मथुरेशचक्रवर्त्तिकृतसारसग्रहः ॥
(अन्यद्विरागमनशब्दे द्रष्टव्यम् ॥)

नववध्वागमनं, क्ली, (नववध्वा आगमनम् ।) नवोढ़ाया प्रथमपतिगृहगमनम् । तद्दिन यथा,
"स्त्रीशुद्धौ गजघटालिसंयुतरवौ काले विशुद्धे भृगुं सन्त्यज्य प्रतिलोमग शुभदिने यात्राप्रवेशोचिते ।
त्यक्त्वाहस्तु निरंशक नववधूयात्राप्रवेशौ पति. कुर्य्यादिकपुरादिषु प्रतिभृगोर्नेच्छन्ति दोषं बुधाः ॥
एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नीयमानायाः पुरः शुक्रो न दुष्यति ॥"
इति दीपिका ॥
अन्यत् नववधूशब्दे द्रष्टव्यम् ॥

नववरिका, स्त्री, (नवो वरोऽस्त्यस्या इति । नववर + ठन् ।) नवोढ़ा । इति हारावली । १५४ ॥

नववल्लभं, क्ली, (नवानां नवीनानां वल्लभम् ।) दाहागुरु । इति राजनिर्घण्टः ॥ (नवो वल्लभो यस्य ।) नवीनप्रिये, त्रि ॥

नववस्त्र, क्ली, (नव वस्त्रम् ।) नवीनवसनम् । नूतन कापड़ इति भाषा ॥ तत्पर्य्यायः । अनाहतम् २ आहतम् ३ अहतम् ४ तन्त्रकम् ५ निष्प्रवाणि ६ । इति शब्दरत्नावली ॥ नवाम्बरम् ७ इत्यमरः । २ । ६ । ११२ ॥
अथ नववस्त्रपरिधानदिनम् ।
तत्र वाराः बुधवृहस्पतिशुक्राणाम् । नक्षत्राणि रोहिणीमृगशिरोमघानुराधाधनिष्ठापुष्यविशाखाहस्ताचित्रोत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदाश्विनीस्वातीपुनर्व्वसुरेवत्यः ॥
"धनिष्ठा रोहिणी हस्ता विशाखा चोत्तरास्तु च ।
ज्येष्ठा पुनर्व्वसुस्वाती चित्राश्विनी च रेवती ॥"
इति सारसग्रहः ॥
अपि च ।
"धातानुराधवसुपुष्यविशाखहस्ता-
चित्रोत्तराश्विपवनादितिरेवतीषु ।
जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरविप्रतुष्ट्यै ॥
शीर्य्यं रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुच बुधदिने च भवेद्धनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मलाय च नवाम्बरधारण स्यात् ॥"
इति समयप्रदीप. ॥

नवशायकः, पुं, (नवविधः शायक इव ।) नवधा गोपादिजातिविशेषः । नवशाक इति भाषा ॥ यथा, पराशरसंहितायाम् ।
"गोपमाली तथा तैली तन्त्री मोदकवारुजी ।
कुलालः कर्म्मकारश्च नापितो नवशायकाः ॥"

नवसूतिका, स्त्री, (नवा सूतिः प्रसवो यस्याः । कप् ।) धेनुः । इत्यमरः । २ । ९ । ७१ ॥ नूतनप्रसवायाञ्च ॥

नवांशः, पुं, (नवमोऽशः ।) मेषादिद्वादशलग्नानां नवभागः । यथा, दीपिकायाम् ।
"चराणां स्वत्रिकोणानां स्थिरराद्या नवांशकाः ॥"
"मेषकेशरिधनुषां मेषाद्यास्तु नवांशकाः ।
वृषकन्यामृगाणाञ्च मकरादिनवांशकाः ॥
तुलामिथुनकुम्भानां तुलाद्याः समुदाहृताः ।
कर्किवृश्चिकमीनानां कर्कटाद्या नवांशकाः ॥
स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृत ॥"
इति ज्योतिस्तत्त्वम् ॥
(नवभागमात्रम् ॥)

नवाङ्गा, स्त्री, (नवमिव अङ्गं यस्याः । टाप् ।) कर्कोटशृङ्गी । इति राजनिर्घण्टः ॥ (नवविधेन द्रव्येण अङ्गं यस्येति विग्रहे ।) पाचनविशेषे, क्ली । यथा, वैद्यके ।
"विश्वाम्टताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः ।
कृतः कषायो हन्त्याशु वातपित्तोत्थितं ज्वरम् ॥"

नवान्नं, क्ली, (नव नूतनं अन्नम् ।) नूतनान्नम् । तन्निमित्तश्राद्धम् । यथा,—

वराह उवाच ।

"अकृत्वा यो नवान्नानि मम कर्म्मपरायणः ।
भुञ्जन्ति ये नवान्नानि परैः भुक्तानि केन च ॥
नाहं लोभेन चेच्छामि पुनर्भोगेन सुन्दरि ।
अयज्ञमेव कर्त्तव्यं मम कर्म्मपरायणैः ॥
ततो भागवतो भूत्वा नवान्नं यो न कारयेत् ।
पितरस्तस्य नाश्नन्ति वर्षाणि दश पञ्च च ॥
अदत्त्वा यस्तु भुञ्जीत नवान्नानि कथञ्चन ।
न तस्य धर्म्मो विद्येत एवमेतन्न संशयः ॥
अन्यच्च ते प्रवक्ष्यामि येन तत्र प्रमुच्यते ।
प्रायश्चित्तं महाभागे । मम भक्तसुखावहम् ॥
उपवासं त्रिरात्रन्तु तत एकेन वा पुनः ।
आकाशशयनं कृत्वा चतुर्थेऽहनि शुध्यति ॥
एव तत्र विधिं कृत्वा उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्बिषात् ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वसङ्गान् परित्यज्य मम लोकाय गच्छति ॥"

इति नवान्नभोजनापराधप्रायश्चित्तम् ॥ इति वराहपुराणम् ॥*॥ तस्य निषिद्धदिनं यथा,—

"सूर्य्ये चैव विशाखगे स्मरतिथौ पापे त्रिजन्मान्विते
नन्दामन्दमहीजकायदिवसे पौषे मघौ कार्त्तिके ।
भेषूग्रादिध्रुवेषु विष्णुशयने कृष्णे शशिन्यष्टमे
श्राद्धं भोजनकं नवान्नविहितं पुत्त्रार्थनाशप्रदम् ॥"

सूर्य्ये चैव विशाखगे मार्गशीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयावस्थिते सूर्य्ये । स्मर तिथौ त्रयोदश्याम् । पापे पञ्चमतारात्रये । उग्रः पूर्व्वात्रयमघाभरण्यः । ध्रुविरश्लेषा । श्रिय आर्द्रा ।

"ज्येष्ठाशेषार्द्धगे सूर्य्ये त्वगनेचानिशात्मके ।
नवान्नेभोजनं श्राद्धं जन्मचन्द्रे तिथौ न च ॥
अश्लेषासक्तिकार्ण्योसाम्ललाजपदकेषु च ।
भृगुभौमदिने रिक्ततिथौ नाद्यान्नवौदनम् ॥"

तस्य विधिर्य्यथा —

"प्राशीयाद्दधिसंयुक्तं नवं विप्राभिमन्त्रितम् ॥"

दीपिकायाम् ।

"भेषूग्रादिश्रियान्येषु विभौमशनिवासरे ।
अप्रभाशाचवत् कुर्य्यान्नवान्नफलभक्षणम् ॥"

अधिकन्तु ।

"हस्ता स्वातिपुनर्व्वसू मृगशिरःपुष्यानुराधा तथा
मूलायां श्रवणे च रेवतिधने चित्रामले वारुणे ।
भागे शक्रविशाखयोश्च तुरगे सौम्येन्दुजीवाहके
चन्द्रे शोभनतारके च शुभदं श्राद्धं नवान्ने स्मृतम् ॥"

भोगराज ।

"भद्रा विष्णुदशस्तथी शशधरो मार्त्तण्डपौष्णादितौ
मैत्रे चैव विशाखवायुधनभे मूलाश्विवह्नौ तथा ।
शुक्रे वारुण ऋक्षके शुभदिने श्राद्धं नवं शस्यते
नन्दाभार्गवभूमिजेषु न भवेच्छ्राद्धं नवान्नोद्भवम् ॥"

इति ज्योतिस्तत्त्वम् ॥

आश्विनाधिकारे ।

"शुक्लपक्षे नव धान्यं ज्ञात्वा पक्वं सुशोभनम् ।
गच्छेत् पैत्री विधानेन गीतवाद्यपुरःसरः ॥"

इत्यादिना ब्रह्मपुराणेन श्राद्धविधानात् ॥

अपि च ।

"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"

इति मलमासतत्त्वम् ॥

नवाम्बरं, क्ली, (नवं नूतनमम्बरं वस्त्रम् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११२ ॥ (यथा, समयप्रदीपे ।

"शौर्य्ये रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुच बुधदिने च भवेद्धनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मराय च नवाम्बरधारणं स्यात् ॥")

नवार्च्चिः, [स्] पु, (नव अर्च्चींषि यस्य ।) मङ्गलग्रहः । इति त्रिकाण्डशेषः ॥ (क्ली, नव नूतनं अर्च्चिः ।) नवशिखा ॥ (नव अर्च्चींषि इति विग्रहेण तु नवसंख्यकार्कार्थे बहुवचनम् ॥)

नवाहः, पु, (नवं अहः । समासे टच् ।) नवदिनम् । प्रतिपत्तिथिः । इति विश्वः ॥

नविका, स्त्री, (नवोऽस्त्यस्या इति । नव+ठन्+टाप् । नवि नव कायति इति वा ।) नवशब्दयुक्ता । इति स्त्रीप्रत्ययप्रकरणे दुर्गादासः ॥

नवीनं, त्रि, (नवमेव । नव+"नवस्य न्वादेशो- त्नप्तनप्खाश्च प्रत्यया वक्तव्याः ।"५ । ४ । २५ । इत्यस्य वार्त्तिकोक्त्या खः न्वादेशश्च ।) नूतनम् । इत्यमरः । ३ । १ । ७७ ॥ (यथाह गदाधरः ।

"गदाधरविनिर्म्मिता विविधदुर्गतर्काटवी
नवीनपदवीसदं वितनुतां सतां धीमताम् ॥")

नवोढ़ा, स्त्री, (नवा नूतना ऊढ़ा) नवविवाहिता । तत्पर्य्यायः । वधूः २ जनी ३ । इति जटाधरः ॥ नववरिका ४ दिकरी ५ नवयौवना ६ । इति हारावली । १५४ ॥ मुग्धानायिकाभेदः । तस्या लक्षणं यथा । "लज्जाभयपराधीनरतिर्नवोढ़ा ।" तस्या उदाहरणं यथा, रसमञ्जर्य्याम् ।

"बलान्नीता पार्श्वं सुखमनुसुखं नैव कुरुते
धुनानान्मूर्द्धानं क्षिपति वदनं चुम्बनविधौ ।
हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना
नवोढ़ा वोढ़ारं रमयति च सन्तापयति च ॥"

नवोदक, क्ली, (नवमुदकम् ।) नूतनजलम् । यथा, मिताक्षरायां स्मृतिः ।

"काले नवोदकं शुद्धं न पातव्यञ्च तत् त्र्यहम् ।
अकाले तु दशाहानि पीत्वा नाद्यादहर्निशम् ॥"

इति शुद्धितत्त्वम् ॥

तन्निमित्तकं श्राद्धं कर्त्तव्यम् । यथा, शातातपः ।

"नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ॥
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥

नवोदके वर्षोपक्रमे । आर्द्रागते रवाविति यावत् ।

'आर्द्रादितो विशाखान्तं रविचारेण वर्षति ।'

इति नयवर्द्धमानधृतात् ॥

'प्राविट्काले समायाते रौद्रऋक्षगते रवौ ।
नाडीषेधसमायोगे जलयोगं वदाम्यहम् ॥

इति रुद्रयामलाच्च ॥

रौद्रमार्द्रा ॥*॥ नवोदकश्राद्धस्य सावकाशत्वात् त्रयोदश्यादिकनिषेधमाह दीपिकायाम् ।

'त्रयोदशी जन्मदिनञ्च नन्दा
जन्मर्क्षतारा सितवासरश्च ।
त्यक्त्वा हरीज्येन्दुकरान्त्यमैत्र-
ध्रुवेषु च श्राद्धविधानमिष्टम् ॥'

सितवासरं शुक्रवारम् । ऋक्षं राशिः । हर्य्यादय श्रवणपुष्यमृगशिरोहस्तारेवत्यनुराधोत्तरात्रितयरोहिण्यः । कृष्णपक्षे चैन्नवोदकश्राद्धकालस्तदोभयोः श्राद्धयोस्तन्त्रात् सिद्धिः ।" इति तिथ्यादितत्त्वम् ॥

नवोद्धृतं, क्ली, (नवमुद्धृतम् ।) नवनीतम् । इत्यमरः । २ । ९ । ५२ ॥ नूतनोत्थिते, त्रि ॥

नव्यं, त्रि, (नूयते स्तूयते इति । णु स्तुतौ+"अचो यत् ।" ३ । १ । ९७ । इति यत् । यद्वा, नवमेव । "शाखादिभ्यो यत् ।" ५ । ३ । १०३ । इति स्वार्थे यत् ।) नूतनम् । इत्यमरः ।३।१।७७॥ (यथा, ऋग्वेदे । ३ । ५५ । १६ ।

"नव्या नव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम् ॥"

स्तुत्यम् । यथा, ऋग्वेदे । ५ । १३ । ३ ।

"कया नो अग्न ऋतयन्नृतेन
भुवो नवेदा उचथस्य नव्यः ॥")

स्त्री, स्तुतिः । णु ल स्तुतौ भावे अल् नवशब्दात् स्वार्थे ये नियमः ॥

नव्यः, पुं, (नूयते इति । णु+यत् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

नशाक., पु, (नश्यतीति । नश नाशे+"शाकिः खजादेः स तु कित् ।" १।२२४। इति उणादिकोषटीकाधृतसूत्रात् आकः ।) काकभेदः । इत्युणादिकोषः ॥

नशिता, [ऋ] त्रि, नाशाश्रयः । इति नशधातोः कर्त्तरि तृच्प्रत्ययनिष्पन्नः ॥

नश्यत्प्रसूतिका, स्त्री, (नश्यन्ती प्रसूतिः सन्ततिर्यस्याः । कप् । ततष्टाप् ।) मृतवत्सा । तत्पर्य्यायः । नन्दुः २ मृतपुत्त्रिका ३ । इति हेमचन्द्रः । ३ । १९५ ॥

नश्वर, त्रि, (नश्यतीति । नश+"इण्नशजिसर्त्तिभ्यः क्वरप् ।"३ । २ । १६३ । इति क्वरप् ।) नाशप्रतियोगी । ध्वंसयोग्य । इति नशधातोः कर्त्तरि वरप्रत्ययनिष्पन्नः ॥ (यथा, भागवते । ५ । १९ । ४ ।

"वदन्ति विश्वं कवयः स्म नश्वरं
पश्यन्ति चाध्यात्मविदो विपश्चितः ।
तथापि मुह्यन्ति तवाज मायया
सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥")

नष्टः, त्रि, (नश + क्तः ।) अदर्शनविशिष्टः । तत्पर्य्यायः । तिरोहितः २ । इत्यमरः । ३ । १ । ११२ ॥ (यथा, पञ्चतन्त्रे । १ । ३७८ ।
"नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
पण्डितानाञ्च मूर्खाणां विशेषोऽयं यतः स्मृतः ॥"
अधमः । यथा, चाणक्ये । ८० ।
"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः ।
सलज्जा गणिका नष्टा निर्लज्जास्तु कुलस्त्रियः ॥"
प्रचलितः । यथा, हरिवंशे । १७४ । १२३ ।
"तृतीये तु मुहूर्त्ते सा नष्टा बाणपुरात् तदा ।
मखोऽप्रियं चिकीर्षन्ती पूजयन्ती तपोधनान् ॥"
पलायितः । यथा, रत्नावल्याम् ।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम् ॥"
निष्फलः । यथा, मनुः । ३ । १८० ।
"नष्टं देवलके दत्तमप्रतिष्ठन्तु वार्द्धुषौ ॥")
नाशाश्रयः । यथा । "योगो नष्टः परन्तप ॥"
इति श्रीभगवद्गीता ॥ नाशे, क्ली ॥

नष्टचन्द्रः, पुं, (नष्टो दृष्टश्चन्द्रः ।) सौरभाद्रस्योभयपक्षे चतुर्थ्यामुदितश्चन्द्रः । यथा,—
नष्टश्चन्द्रो न द्रष्टव्यो भाद्रे मासि सितासिते ।
चतुर्थ्यामुदितोऽप्यङ्ग प्रतिषिद्धो मनीषिभिः ॥
चन्द्रस्तारापहरणं कलङ्कमतिदुष्करम् ।
तस्मै ददाति हे नन्द । कामतो यदि पश्यति ॥
अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत् ।
तदा शुद्धो भवेत् सद्यो निष्कलङ्की महीतले ॥
सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक । मारोदीस्तव ह्येष स्यमन्तकः ॥'
इति मन्त्रेण पूतञ्च जलं साधु पिबेद्ध्रुवम् ॥
पुरा तारा गुरोः पत्नी नवयौवनसंयुता ।
रत्नभूषणभूषाढ्या रत्नसूक्ष्माम्बरा सती ॥
सुश्रोणी सुस्मिता रम्या सुन्दरी सुमनोहरा ।
कनीयकवरीरम्या मालतीमाल्यभूषिता ॥
सिन्दूरबिन्दुना साकं चारुचन्दनबिन्दुभिः ।
कस्तूरीबिन्दुनाधश्च भालमध्यस्थलोज्ज्वला ॥
रत्नेन्द्रसारनिर्म्माणक्वणन्मञ्जीररञ्जिता ।
सुवक्रलोचना श्यामा सुचारुकज्जलोज्ज्वला ॥
सुचारुचारुमुक्ताभदन्तपङ्क्तिमनोहरा ।
रत्नकुण्डलयुग्मेन चारुगण्डस्थलोज्ज्वला ॥
कामिनीज्वतुला बाला गजेन्द्रमन्दगामिनी ।
सुकोमला चन्द्रमुखी कामाधारा च कामुकी ॥
स्वर्गमन्दाकिनीतीरे स्नाता स्निग्धाम्बरा वरा ।
आयान्ती गुरुपादं सा स्वगृहं गमनोन्मुखी ॥
दृष्ट्वा तस्याश्च सर्व्वाङ्गमनङ्गबाणपीडितः ।
भाद्रे चतुर्थ्यां चन्द्रश्च जहार चेतनं व्रज ! ॥
यानं रथेन संप्राप्य रहस्यो रसिको बली ।
रथमारोपयामास करे धृत्वा च तारकाम् ॥
कामोन्मत्तः कामिनीं तां समाश्लिष्य चुचुम्ब सः ।
शृङ्गारं कर्त्तुमुद्युक्तं तमुवाच गुरुप्रिया ॥

तारकोवाच ।
त्यज मां त्यज मां चन्द्र ! सुरेषु कुलपांसक ! ।
गुरुपत्नीं ब्राह्मणीञ्च पतिव्रतपरायणाम् ॥
गुरुपत्नीसङ्गमने ब्रह्महत्याशतं लभेत् ।
पुत्त्रस्त्वं तव माताहं धैर्य्यं कुरु सुरेश्वर । ॥
धिक् त्वां श्रुत्वा सुरगुरुर्भस्मीभूतं करिष्यति ।
गुरुपत्नी विप्रपत्नी यदि सा च पतिव्रता ॥
ब्रह्महत्यासहस्रञ्च तस्याः सङ्गमने लभेत् ।
पुत्त्राधिकश्च शिष्यश्च प्रियो मत्स्वामिनो भवान् ॥
स्वधर्म्मं रक्ष पापिष्ठ । मामेव मातरं त्यज ।
दास्यामि स्त्रीवधं तुभ्यं यदि मां संग्रहीष्यसि ॥
विलङ्घ्य तारावचनं तां च सम्भोक्तुमुद्यतम् ।
शशाप तारा कोपेन निष्कामा सा पतिव्रता ॥
राहुग्रस्तो घनग्रस्तः पापयुक्तो भवान् भव ।
कलङ्की यक्ष्मणा ग्रस्तो भविष्यसि न संशयः ॥
चन्द्रमेव तदा तूर्णं कामदेवं शशाप सा ।
तेजस्विना केनचित्त्वं भस्मीभूतो भविष्यसि ॥
चन्द्रस्तारां गृहीत्वा च छलेन च रमणं व्रज ! ।
क्रोडे निधाय प्रययौ रुदन्तीं तां शुचिस्मिताम् ॥
निर्जने निर्जने रम्ये शैले शैले मनोहरे ।
तत्र दृष्ट्वा सुरगुरुं बलिगेहात् समागतम् ॥
प्रणम्य सर्व्वमुक्त्वा च चन्द्रस्तु शरणं ययौ ।
शुक्रस्तं बोधयामास वचनं नीतियुक्तितः ॥

शुक्र उवाच ।
शृणु वत्स । प्रवक्ष्यामि गुरवे देहि तारकाम् ।
गुरुपत्नीं मातृपरां त्यज मद्वचनाद्विधो ! ॥
कुरु पापक्षयोपायं निष्कृतिस्तु महाफला ।
सतीनां गुरुपत्नीनां ग्रहणेन बलेन च ॥
ब्रह्महत्यासहस्राणां पातकं लभते जनः ।
कुम्भीपाके पच्यते च यावद्वै ब्रह्मणः शतम् ॥
बृहस्पतिश्च तेजस्वी त्वां भस्मीकर्त्तुमीश्वरः ।
न चकार कृपालुश्चेत् प्रियशिष्येण हेतुना ॥
उतथ्यपत्नीं दृष्ट्वा स पुरा रेमे सकामतः ।
तत्पतेः शापतोऽस्यैव परग्रस्ता प्रिया सती ॥"
"एतस्मिन्नन्तरे ब्रह्मा बोधयित्वा कविं विभुः ।
समानीय निशानाथं तारकासहितं व्रज ! ।
शम्भोश्च चरणाम्भोजे चकार च समर्पणम् ॥
शम्भुस्तं प्रीतियुक्तश्च वासयामास वक्षसि ॥
दत्त्वा तस्मै पादरेणुं निष्पापञ्च चकार सः ।
दत्त्वा तन्मस्तके हस्तं कृपालुरभयं ददौ ॥
क्षीरोदे स्नापयित्वा च प्रायश्चित्तेन शङ्करः ।
चकार चन्द्रं निष्पापं ब्रह्मणा सहितः शुचिम् ॥
योगेन चन्द्रं योगीन्द्रो द्विखण्डञ्च चकार सः ।
ररक्षार्द्धं ललाटे च सोऽप्यर्द्धं ब्रह्मणः पुरः ॥
अतएव महादेवो बभूव चन्द्रशेखरः ।
मृगाङ्को लज्जितस्तत्र कलङ्की देवसंसदि ॥
लज्जया च स्वयोगेन देहत्यागञ्चकार सः ।
तच्छरीरञ्च क्षीरोदे ब्रह्मणा च समर्पितम् ॥
चरोदाच्चिच्च कृपया श्रुत्वा क्षीरोदधेस्तटे ।
अत्रेश्चक्षुर्जलं तस्य पपात च जले व्रज ! ॥
भस्माद्बभूव चन्द्रश्च निष्पापो देवसंसदि ।
ब्रह्मा च भगवान् शम्भुरभिषेकञ्चकार तम् ॥
उवाच च महादेवो निर्भयं देवसंसदि ॥

महादेव उवाच ।
स्वस्थानं गच्छ पुत्त्र ! त्वं कुरु स्वविषयं सदा ।
पश्चात् श्वशुरशापेन यक्ष्मग्रस्तो भविष्यसि ॥
वधं पतिव्रताशापं कर्त्तुमीशश्च को भुवि ।
ममाशिषा यक्ष्मणश्च प्रतिकारो भविष्यति ॥
यस्माद्भाद्रचतुर्थ्यान्तु गुरुपत्नी हृता त्वया ।
तस्मात्तस्मिन्दिने वत्स ! पापदृश्यो युगे युगे ॥
मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम् ॥
देहत्यागेन हे वत्स ! कर्म्मभोगो न नश्यति ।
प्रायश्चित्तान्न सन्देहो त्वत्तमेव भविष्यति ॥
तारापहरणं वत्स ! कलङ्कश्चन्द्रमण्डले ।
मृगाङ्कतं विलम्बञ्च भविष्यति युगे युगे ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ८०-८१ अः ॥

नष्टचेष्टता, स्त्री, (नष्टा चेष्टा यस्य । तस्य भावः । तल् ।) प्रलयः । इत्यमरः । १ । ७ । ३३ ॥ शोकादिना परिस्पन्दनाशो नष्टचेष्टता तत्र प्रलयः प्रलीयतेऽनेन प्रलयः. ली ङ य श्लो शिषि अल् । प्रलयः सात्त्विको भावः मूर्च्छेत्यर्थः । इति सर्व्वस्वम् ॥ हर्षशोकादिभिरशेषचेष्टानाशः प्रलय इत्यर्थः । इति भरतः ॥ ईहाशून्यता च ॥

नष्टाग्निः, पुं, (नष्टः प्रमादात् निर्व्वाणमाप्तः अग्निर्यस्य ।) यस्याग्निहोत्रिणः प्रमादादिना कारणान्तरेण वा अग्निर्नष्टो निर्व्वाणः स्यात् सः । तत्पर्य्यायः । वीरहा २ । इत्यमरः । २ । ७ । ५३ ॥

नष्टाशिसूत्र, स्त्री, (नष्टस्य चौरेणापहृतस्य वस्तुनः आप्तिः तस्याः सूत्रमिव ।) किञ्चित्प्राप्तचौरनीतद्रव्यम् । तत्पर्य्यायः । लोप्त्रम् २ । इति हारावली । १५८ ॥

नष्टेन्दुकला, स्त्री, (नष्टा इन्दुकला यस्याम् ।) कुहूः । इत्यमरः । १ । ४ । ६ ॥

नसा, स्त्री, (नस् + वा टाप् । यद्वा, नसते कुटिलतां प्रकाशयतीति । नस कौटिल्ये + अच् । टाप् ।) नासिका । इति त्रिकाण्डशेषः ॥

नस्तः, पुं, (नसते कुटिलतां प्रकाशयत्यनेनेति । नस् + क्तः । बाहुलकात् इडभावः ।) नासिका । इति शब्दमाला ॥ (यथा, महाभारते । ५ । १३१ । १० ।
"नेत्राभ्यां नस्ततश्चैव श्रोत्राभ्याञ्च समन्ततः ।
प्रादुरासन् महारौद्राः सधूमाः पावकार्च्चिषः ॥")
नस्ये, क्ली । इति रत्नमाला ॥ पञ्चविधनस्यकर्म्माणि यथा —
"प्रतिमर्शोऽवपीडश्च नस्यं प्रधमनन्तथा ।
शिरोविरेचनञ्चैव नस्तःकर्म्म तु पञ्चधा ॥
ईषदुच्छ्वसनात् स्नेहो यावान् वक्त्रं प्रपद्यते ।
नस्तो निषिक्तस्तं विद्यात् प्रतिमर्शं प्रमाणतः ॥
प्रतिमर्शश्च नस्यार्थं करोति च न दोषभाक् ।
शोधनः स्तम्भनस्तु स्यादवपीडो द्विधा मतः ॥
अवपीड्य दीयते यस्मादवपीडस्ततः स्मृतः ।

स्नेहार्थं शून्यशिरसां ग्रीवास्कन्धोरसां तथा ॥
बलार्थं दीयते स्नेहो नस्तशब्दोऽत्र वर्त्तते ।
नस्यस्य स्नैहिकस्यात्र देयास्त्वष्टौ तु विन्दवः ॥
प्रत्येकशो नस्तकयोर्नृणामिति विनिश्चयः ॥”
इति वैद्यकपरिभाषा ॥
“शुक्तिश्च पाणिशुक्तिश्च मात्रास्तिस्रः प्रकी-
र्त्तिताः ।
द्वात्रिंशद्विन्दवस्त्वत्र शुक्तिरित्यभिधीयते ॥
द्विशुक्ती पाणिशुक्तिश्च देयास्तु कुशलैर्नरैः ।
तैलं कफे च वाते च केवले पवने वसाम् ॥
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्ज्ञां समारुते ।
ध्मापनं रेचनं चूर्णं युञ्ज्यात्तत् मुखवायुना ॥
षडङ्गुलद्विमुखया नाड्या भेषजगर्भया ।
स हि भूरितरं दोषं चूर्णत्वादपकर्षति ॥
शिरोविरेचनद्रव्यैः स्नेहैर्वातैः प्रसाधितैः ।
शिरोविरेचनं दद्यात् रोगेष्वेतेषु बुद्धिमान् ॥
गौरवे शिरसः शूले जाड्ये स्यन्दे गलामये ।
शोथगण्डक्रिमिग्रन्थिकुष्ठापस्मारपीनसे ॥
तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ।
भुक्तभक्तशिरः स्नातस्नातुकामसुतास्रजाम् ॥
नवपीनसरोगार्त्तसूतिकाश्वासकासिनाम् ।
शुद्धानां दत्तवस्तीनां तथा नार्त्तवदुर्द्दिने ॥
अन्यत्रात्ययिके व्याधौ नैषां नस्यं प्रयोजयेत् ।
न नस्यं न्यूनसप्ताब्दे नातीताशीतिवत्सरे ।
न चोनष्टादशे धूमः कवडो नोनपञ्चमे ॥
न शुद्धिर्न्यूनदशमे न चातिक्रान्तसप्ततौ ।
आजन्ममरणं शस्तं प्रतिमर्षन्तु वस्तिवत् ॥”
इति सारकौमुदी ॥

नस्ता, स्त्री, (नस्त+टाप् ।) नासाक्षतं छिद्रम् । इति नस्तितशब्दटीकायां भरतः ॥
“नस्ताभेदनदाहाभ्यां कर्णदाहादिभेदनैः ।
अनिदाहातिवाहाभ्यां वधे चान्द्रायणञ्चरेत् ॥”
इति स्मृतिः ॥

नस्तितः, पुं, (नस्ता नासाच्छिद्रं जाता अस्य । तारकादित्वादितच् ।) नासानिहितरज्जुबलीवर्द्दादि । नाकफोंडा वलद इति भाषा । तत्पर्य्यायः । नस्योतः २ । इत्यमरः । २ । ९ । ६३ ॥

नस्योत, पुं, (षे ञ तन्तुसन्ताने+भावे क्तः । नस्ते नासिकायां ऊतं वयनं यस्य ।) नस्तितः । इत्यमरटीकायां रमानाथः ॥

नस्य, क्ली, (नासिकायै हितम् । नासिका+यत् । नसादेशश्च ।) नासिकादेयचूर्णादि । तत्पर्य्यायः । नस्तम् २ नावनम् ३ । इति रत्नमाला ॥ यथा, वैद्यकपरिभाषायाम् ।
“वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।
एवं पञ्चविधं कर्म्म मात्रा तस्य प्रवक्ष्यते ॥”
नासाद्वारा देयौषधविशेषः । यथा,—
“प्रस्थे द्वे गण्डमालानां क्वाथयेत् द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
वार्त्ताकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ।
पुनर्नवां गोक्षुरकं सैन्धवं त्र्यूषणं वचा ॥
सरलं सुरदारुञ्च बृहती कण्टकारिका ।
नस्यपानाद्धरत्येव कर्णशूलं हनुग्रहम् ॥”
इति गारुडे १९८ अध्यायः ॥
अपि च ।
“सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥”
इति गारुडे १९९ अध्यायः ॥
(यथा च ।
“नस्यन्तत् कथ्यते धीरैर्नासाग्राह्यं तदौषधम् ।
नावनं नस्यकर्म्मेति तस्य नामद्वयं मतम् ॥
नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनन्तथा ।
रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतम् ॥
कफपित्तानिलध्वंसे पूर्व्वमध्यापराह्णके ।
दिनस्य गृह्यते नस्यं रात्रौ वाप्युत्कटे गदे ॥
नस्यं त्यजेद्भोजनान्ते दुर्द्दिने चापि तर्पणे ।
तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ॥
अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः ।
क्रुद्धः शोकाभिभूतश्च तृषार्त्तो वृद्धबालकौ ॥
वेगावरोधी तापी च स्नातुकामश्च वर्ज्जयेत् ।
अष्टवर्षस्य बालस्य नस्यकर्म्म समाचरेत् ॥
अशीतिवर्षादूर्द्ध्वञ्च नावनं नैव दीयते ।
अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः ॥
तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथै रसैस्तथा ।
नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च विन्दवः ॥
प्रत्येकं रेचने योज्या मुख्यमध्यान्तमात्रया ।
नस्यकर्म्मणि दातव्यं शाणैकं तीक्ष्णमौषधम् ॥
हिङ्गु स्याद्यवमात्रन्तु माषैकं सैन्धवं मतम् ।
क्षीरञ्चैवाष्टशाणं स्यात् पानीयञ्च त्रिकार्षिकम् ॥
कार्षिकं मधुरं द्रव्यं नस्यकर्म्मणि योजयेत् ॥
अवपीडः प्रधमनं द्वौ भेदावपरौ स्मृतौ ।
शिरो विरेचनस्थाने तौ तु देयौ यथायथम् ॥
कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः ।
सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥
षडङ्गुला द्विवक्त्राया नाडी चूर्णं तया धमेत् ।
तीक्ष्णकोलमितं वक्त्रवातैः प्रधमनं हितम् ॥
ऊर्द्ध्वजत्रुगते रोगे कफजे स्वरसङ्क्षये ।
अरोचके प्रतिश्याये शिरःशूले च पीनसे ॥
शोफापस्मारकुष्ठेषु नस्यं वैरेचनं हितम् ।
भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते ॥
गलरोगे सन्निपाते निद्रायां विषमज्वरे ।
मनोविकारे क्रिमिषु युज्यते चावपीडनम् ॥
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ।
चूर्णं प्रधमनं धीरैस्तद्धि तीक्ष्णतरं यतः ॥
नस्यं स्याद्गुडशुण्ठीभ्याम्पिप्पल्या सैन्धवेन च ।
जलपिष्टेन तेनाक्षिकर्णनासाशिरोगदाः ॥
हनुमन्यागलोद्भूता नश्यन्ति भुजपृष्ठजाः ।
मधूकसारकृष्णाभ्यां वचा मरिचसैन्धवैः ॥
नस्यं कोष्णजले पिष्टं दद्यात् संज्ञाप्रबोधनम् ॥
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके ॥”
इति मध्यखण्डे विंशेऽध्याये शार्ङ्गधरेणोक्तम् ॥
“नस्यकर्म्म यथाकालं यो यथोक्तं निषेवते ।
न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते ॥
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः ।
न च केशाः प्रलुप्यन्ते वर्द्धन्ते च विशेषतः ।
मन्यास्तम्भः शिरःशूलमर्द्दितं हनुसंग्रहः ॥
पीनसार्द्धावभेदौ च शिरःकम्पश्च शाम्यति ।
सिराः शिरःकपालानां सन्धयः स्नायुकण्डराः ॥
नावनप्रीणिताश्चास्य लभन्तेऽभ्यधिकं बलम् ॥
मुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महान् ।
सर्व्वेन्द्रियाणां वैमल्यं बलं भवति चाधिकम् ॥
न चास्य रोगाः सहसा प्रभवन्त्यूर्द्ध्वजत्रुजाः ।
जीर्य्यतश्चोत्तमाङ्गे च जरा न लभते बलम् ॥”
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
“औषधमौषधसिद्धो वा स्नेहो वा नासिकाभ्यां दीयत इति नस्यं तद्द्विविधं शिरोविरेचनं स्नेहनञ्च । तद्द्विविधमपि पञ्चधा । तद्यथा । नस्यं शिरोविरेचनं प्रतिमर्षोऽवपीडः प्रधमनञ्च । तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्शः शिरोविरेचनविकल्पोऽवपीडः प्रधमनञ्च । ततो नस्यशब्दः पञ्चधा निपातितः । तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसां बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन् वैशेषिको नस्यशब्दः । तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्यशोषापबाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु वातपैत्तिकेषु मुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति ॥”
“तत्रैतद्द्विविधमभुक्तवतोऽन्नकाले पूर्व्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम् ॥”
इति सुश्रुते चिकित्सितस्थाने ४० अध्याये ॥) नासाया हिते तत्सम्बन्धिनि च, त्रि । शब्दे, पुं । इति संक्षिप्तसारव्याकरणम् ॥

नस्या, स्त्री, (नासिकायै हिता । नासिका+“शरीरावयवात् यत् ।” ५ । १ । ६ । इति यत् ततो नसादेशः ।) नासिका । यथा,—
“घ्राणं गन्धवहा नासा नसा नस्या च नासिका ॥”
इति भरतधृतसाहसाङ्कः ॥
(नासाकृतछिद्रम् । इति कश्चित् ।)

नस्योतः, पुं, (नस्यया नासारज्ज्वा ऊतः ।) नस्तितः । इत्यमरः । २ । ९ । ६३ ॥ (यथा, महाभारते । ३ । ३० । २६ ।
“मणिः सूत्र इव प्रोतो नस्योत इव गोवृषः ॥”)

नहि, अ, निषेधः । (यथा,—
“इयं सन्ध्या दूरादुपगतो हन्त मलयात्
तदेकां त्वद्गेहे विनयवति । नेष्यामि रजनीम् ।
समीरेणोक्तैवं नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥”
इत्युद्भटः ॥)

अभाव:। तत्पर्य्याय:। अ २ नो ३ न ४।
इत्यमर: ॥ अन ५ अना ६ मा ७। इति
भरत: ॥ (यथा, महाभारते । ४ । ७४ । १३ ।
"नहि विप्रो गतिं तेषां यास हि नरसत्तम ! ॥)
नहुष, पु, (नह्यते इति । नह+"पृनहिकलिभ्य
उषच् ।" उणां । ४ । ७५ । इति कर्त्तरि
कर्म्मणि वा उषच् ।) नागभेद. । (यथा,
महाभारते । १ । ३५ । ६ ।
"आप्त: करोटकश्चैव शङ्खो वालिशिखस्तथा ।
निष्टानको हेमगुहो नहुष: पिङ्गलस्तथा ॥")
चन्द्रवंशीयराजभेद: । इति मेदिनी । षे, ३८ ॥
स च पुरूरवसो ज्येष्ठपुत्त्रस्यायुष: सुत: । इति
पुराणम् ॥ (अयं हि अगस्त्यशापात् अजा-
गरत्वमाप्तो वनमध्ये बहुकाल स्थितवान् तत.
कदाचित भीमं प्रगृह्य युधिष्ठिरात् मुक्तिमाप ।
एतद्विवरणं यथा, महाभारते । ३ । १८१ ।
३३—४५ ।
"अहं हि दिवि दिव्येन विमानेन चरन् पुरा ।
अभिमानेन मत्त. सन् किञ्चिन्नान्यदचिन्तयम् ॥
ब्रह्मर्षिदेवगन्धर्व्वयक्षराक्षसपन्नगा: ।
करान्मम प्रयच्छन्ति सर्व्वे त्रैलोक्यवासिन: ॥
चक्षुषा य प्रपश्यामि प्राणिनं पृथिवीश्वर ।।
तस्य तेजो हराम्याशु तद्धि दृष्टेर्बल मम ॥
ब्रह्मर्षीणां सहस्रं हि उवाह शिविकां मम ।
स मामपनयो राजन् । भ्रंशयामास वै श्रिय: ॥
तत्र ह्यगस्त्य. पादेन वहन् स्पृष्टो मया मुनि: ।
अगस्त्येन ततोऽस्म्युक्तो ध्वस सर्पेति वै रुषा ॥
ततस्तस्माद्विमानाग्रात् प्रच्युतश्च्युतभूषण. ।
प्रपतन् बुबुधेऽऽत्मान व्यालीभूतमधोमुखम् ॥
अयाचन्तमह विप्र शापस्यान्तो भवेदिति ।
प्रमादात् संप्रमूढस्य भगवन् । क्षन्तुमर्हसि ॥
तत स मामुवाचेद प्रपतन्त कृपान्वित: ।
युधिष्ठिरो धर्म्मराज. शापात्त्वां मोचयिष्यति ॥
अभिमानस्य घोरस्य पापस्य च नराधिप ।।
फले क्षीणे महाराज । फल पुण्यमवाप्स्यसि ॥
ततो मे विस्मयो जातस्तद्दृष्ट्वा तपसो बलम् ।
ब्रह्म च ब्राह्मणत्वञ्च येन त्वाहमचूचुदम् ॥
सत्य दमस्तपो दानमहिंसा धर्म्मनित्यता ।
साधकानि सदा पुंसां न जातिर्न कुल नृप ! ॥
अरिष्ट एष ते भ्राता भीमसेनो महाबल: ।
स्वस्ति तेऽस्तु महाराज । गमिष्यामि दिव पुन: ॥
वैशम्पायन उवाच ।
इत्युक्त्वाजगर देह मुक्त्वा स नहुषो नृप ।
दिव्य वपु: समास्थाय गतस्त्रिदिवमेव हि ॥"*॥
(नह्यति सर्व्वाणि भूतानि माययेति । विष्णु: ।
यथा, महाभारते । १३ । १४६ । ४७ ।
"इष्टो विशिष्ट. शिष्टेष्ट शिखण्डी नहुषो
वृष. ॥")
नहुषाख्या, स्त्री, (नहुष आख्या यस्य ।) तगर-
पुष्पम् । इति राजनिर्घण्ट ॥
नहुषात्मज , पुं, (नहुषस्य आत्मज: ।) ययाति-
राजा । इति पुराणम् ॥ (माध्यन्दिनेऽपि
दृश्यते । तथाहि महाभारते । १ । ७८ । १४ ।
"अथ स देशमभ्यागाद्ययातिर्नहुषात्मज: ॥")
ना, अ, (नह बन्धे+बाहुलकात् डा ।) नहि ।
अभाव: । इत्यमरटीकायां भरत: ॥
ना, [ऋ] पुं, (नयति नीयते वा । नी प्रापणे+
"नयतेर्डिच्च ।"उणां २।१०१ । इति ऋ प्रत्यय: ।
स च डित् ।) पुरुष । इत्यमर: । २ । ६ । १ ॥
(यथा, माघ: । २ । ४२ ।
"विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥")
नाक:, पुं, (न कं सुखमिति अकं दुःखम् । तन्नास्त्य-
त्रेति ।) स्वर्ग: । इत्यमर: । १ । १ । ६ ॥ (यथा,
भट्टि: । १ । ४ ।
"सन्तर्पणो नाकसदां वरेण्य: ॥"
नभ: । इति निघण्टु । १ । ४ ॥ यथा, महा-
भारते । १ । १७२ । ६ ।
"य एष दिवि धिष्ण्येन नाकं व्याप्नोति तेजसा ॥"
स्त्री, अश्वजातिविशेष: । यथा, महाभारते ।
५ । ८६ । ४० ।
"काकुदीक शुक नाकमक्षिसन्तर्जनं तथा ।
सन्तानं नर्त्तकं घोरमास्यमोदकमष्टमम् ॥
एतैर्विद्धा: सर्व्व एव मरणं यान्ति मानवा: ॥"
क्षत्त्रियजातिविशेष । यथा, वायुपुराणे ।
"नव नाकास्तु भोक्ष्यन्ति पुरीं चम्पावतीं नृपा: ॥")
नाकनाथ., पुं, (नाकस्य स्वर्गस्य नाथ: ।) इन्द्र: ।
इति त्रिकाण्डशेष: ॥
नाकनायक., पु, (नाकस्य नायक: ।) इन्द्र. ।
यथा, नैषधे ५ सर्गे ।
"स व्यतीत्य वियदन्तरगाध
नाकनायकनिकेतनमाप ॥"
नाकनायकपुरोहित:, पुं, (नाकनायकस्य इन्द्रस्य
पुरोहित. ।) बृहस्पति: । यथा,—
"स्वीयधर्म्मतनयद्युनस्थितो
नाकनायकपुरोहित शुभ. ॥"
इति ज्योतिषतत्त्वम् ॥
नाकी, [न्] पुं, (नाक: स्वर्गो वासस्थानत्वेना-
स्त्यस्येति । नाक+इनि: ।) देवता । इति
हेमचन्द्र: ॥ (यथा, राजेन्द्रकर्णपूरे । ६ ।
"देवाकर्णय नाकिनां पुरि नृणां लोके पुरे
भोगिनाम् ॥")
नाकु , पुं, (नम्यतेऽनेनेति । नम+"फलिपाटि-
नमिमनिजनां गुक्पटिनाकिधतश्च ।" उणां
१ । १८। इति उ: धातोर्नाकि: । इकार उच्चा-
रणार्थ: ।) वल्मीक: । इत्यमर: । २ । १ । १४ ॥
मुनिविशेष । पर्व्वत: । इति मेदिनी के, २७ ॥
नाकुल , पुं, (नकुलस्य गोत्रापत्यम् । नकुल+
"ऋष्यन्धकवृष्णिकुरुभ्यश्च ।" ४ । १ । ११४ ।
इत्यण् ।) नकुलपुत्त्र. । इति सिद्धान्तकौमुदी ॥
(यथा, महाभारते । ६ । ४७ । ५१ ।
"शवरा. कुक्कुटाश्चैव वत्साश्च सह नाकुलै: ।
नकुल: सहदेवश्च वाम पक्ष समाश्रिता. ॥"
तन्त्रविशेषे, स्त्री । यथा, कूर्म्मपुराणे ।
"एवं सम्बोधितो रुद्रो माधवेन सुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरित: ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रश: ॥"
नकुलस्येदम् । तस्येदमित्यण् ।) नकुलसम्बन्धिनि,
त्रि ॥ (न आकुल: इति विग्रहे । अनाकुलश्च ।)
नाकुली, स्त्री, (नकुलेन दृष्टा पीता वा । नकुल+
अण+ङीप् ।) कुक्कुटीकन्द: । रास्ना । चविका ।
इति मेदिनी । ले, १०१ ॥ यवतिक्ता । श्वेतकण्ट-
कारी । कन्दविशेष: । नाइ इति ख्याता ॥
तत्पर्य्याय. । सर्पगन्धा २ सुगन्धा ३ रक्त-
पत्रिका ४ ईश्वरी ५ नागगन्धा ६ अहिभुक् ७
सरसा ८ सर्पादनी ९ व्यालगन्धा १० । अस्या
गुणा: । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् ।
त्रिदोषानेकविषनाशित्वञ्च । इति राजनिर्घण्ट ॥
नाक्षत्र, क्ली (नक्षत्रस्येदमिति । नक्षत्र+"तस्ये-
दम् ।" ४ । ३ । १२० । इति अण् ।) नक्षत्र-
सम्बन्धि । (यथा, सूर्य्यसिद्धान्ते । १४ । १५ ।
"भचक्रभ्रमण नित्यं नाक्षत्रं दिनमुच्यते ।
नक्षत्रनाम्ना मासास्तु ज्ञेया. पर्व्वान्तयोगत: ॥")
मासविशेषे, पुं । स च द्विविध: । सप्तविंशति-
नक्षत्रात्मक एक: । यथा, विष्णुधर्म्मोत्तरे ।
"नक्षत्रसत्त्राण्ययनानि चेन्दो-
र्मानेन कुर्य्याद्भगणात्मकेन ।"
सप्तविंशतिनक्षत्रात्मकेन ।
"सर्व्वर्क्षपरिवर्त्तैश्च नाक्षत्र इह चोच्यते ।"
सप्तविंशतिनक्षत्रावच्छिन्नो नाक्षत्र. । अस्य
प्रयोजन नक्षत्रसत्त्रादौ । जन्मनक्षत्रे शनिभौम
वारयोगे मनोदुःखदाने च । यथा, दीपि-
कायाम् ।
"जन्मनक्षत्रे यदि स्यातां वारौ भौमशनैश्चरौ ।
स मास. कलुषो नाम मनोदुःखप्रदायक: ॥"
द्वितीय: षष्टिदण्डात्मकनक्षत्रभोगकालरूपदिन-
त्रिंशदात्मक: । यथा, सूर्य्यसिद्धान्ते । १ । १२ ।
"नाडीषष्ट्या तु नाक्षत्रमहोरात्र प्रचक्षते ।
तत्त्रिंशता भवेन्मास: सावनोऽर्कोदयैस्तथा ॥"
द्वितीयस्य प्रयोजन आयुर्गणनायाम् । यथा,
"आयुर्दाये स्मृत प्राज्ञैर्नाक्षत्र षष्टिनाडिकम् ॥"
इति मलमासतत्त्वम् ॥
नाक्षत्रिक , पु, (नक्षत्रादागत: । नक्षत्र+ठञ् ।)
नाक्षत्रमास. । यथा, शब्दरत्नावल्याम् ।
"नक्षत्रगणनेनैव नाक्षत्रिक उदाहृत ॥"
नाक्षत्रिकी, स्त्री, (नाक्षत्रिक+ङीप् ।) नक्षत्र-
दशा । यथा ।"कलौ नाक्षत्रिकी दशा ।" इति
ज्योतिषम् । अस्या विवरणं दशाशब्दे द्रष्टव्यम् ॥
नक्षत्रसम्बन्धिनि, त्रि ॥
नाग, क्ली, (नगे पर्व्वते भवम् । नग+अण ।)
रङ्गम् । सीसकम् । (अस्य पर्य्यायो यथा,—
"नाग महाबल चीन पिष्ट योगेष्टसीसकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
करणविशेष: । इति मेदिनी । गे, ६ ॥ नाग
करणनामकम् । तथा,—

"नागोद्भवो नागधनाभिलाषी
वक्रोक्तिजालो नितरां कुशीलः ।
क्रोधाग्निसन्तापितबन्धुवर्गो
भर्गोपमः स्यात् किल रङ्गभूमौ ॥"
इति कोष्ठीप्रदीपः ॥

रङ्गसीसकार्थे क्वचित् पुंलिङ्गोऽपि दृश्यते । पाकहीनयोस्तयोर्दोषो यथा,—
"पाकहीनौ नागवङ्गौ कुष्ठगुल्मरुजाकरौ ।
मेहपाण्डुकरौ वातकफमृत्युकरौ पुनः ॥"
तयोर्मारणं यथा,—
"अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत् ।
मृतपात्रे विद्रुते नागे लौहदर्व्या च चालयेत् ॥
यामैकेन भवेद्भस्म तत्तुल्यांश्च मनःशिलाम् ।
काञ्जिकेन द्वयं पिष्ट्वा पचेद्‌दृढपुटेन च ॥
स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च ॥
पुनः पुटेच्छरावाभ्यामेव षड्भिः पुटैर्मृतिः ॥"
नागः सिन्दूरवर्णाभो म्रियते सर्व्वकार्य्यकृत् ।
सतिक्तमधुरो नागो मृतो भवति भस्मसात् ॥
आयुःकीर्त्तिं वीर्य्यवृद्धिं करोति सेवनात् सदा ।
रोगान् हन्ति मृतो नागो वङ्गवद्‌गुणकारकः ॥"
इति सुखबोधः ॥

नागः, पुं, (नगे भवः । नग+अण् । यद्वा, दह्यत्यस्मात् विषाग्निनेति । दह+"दहेर्गो लोपो दस्य नः ।" उणां ५ । ६१ । गः । अन्तलोपः । दस्य नः । बाहुलकात् नकारस्य ना ।) पन्नगः । (यथा, विष्णुपुराणे । १ । ६ । ६६ ।
"जग्मुश्च विषं नागाः क्षीरोदाच्च समुत्थितम् ॥")
हस्ती । (यथा, रघुः । ४ । ८३ ।
"भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥")
क्रूरचारी । मेघः । नागकेशरः । पुन्नागः । नागदन्तकः । मुस्तकः । देहानिलप्रभेदः ।
"उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः ॥"
इति शारदातिलकटीका ॥
उत्तरपदस्थिते श्रेष्ठः । इति मेदिनी । गे, १० ॥ (सीसकम् । अस्योत्पत्तिर्नामानि गुणाश्च । यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत् ।
वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम् ॥"
"नागस्तु नागशततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति ।
वह्निं प्रदीपयति कामबलं करोति
मृत्युञ्च नाशयति सन्ततसेवितः सः ॥
पाकेन हीनौ किलवङ्गनागौ
कुष्ठानि गुल्मांश्च तथातिकष्टान् ।
कण्डूं प्रमेहानिलसादशोथ-
भगन्दरादीन् कुरुतः प्रयुक्तौ ॥")
ताम्बूली । देशभेदः । इति नानार्थटीकायां भरतः ॥ पर्व्वतविशेषः । (यथा, विष्णुपुराणे । २ । २ । २८ ।
"शङ्खकूटोऽथ ऋषभो हंसो नागस्तथापरः ।
कालाञ्जराद्याश्च तथा उत्तरे केसराचलाः ॥")
नगे गिरौ चन्दनादितरौ वा भवः । न गच्छतीति अगः न अगः नागः इति वा । तक्षककर्कोटप्रभृतिर्देवयोनिर्मनुष्याकारः फणालाङ्गुलयुक्तः । इति भरतः ॥ तत्पर्य्यायः । काद्रवेयः । २ । इत्यमरः । १ । ८ । ४ ॥ नागोत्पत्तिर्यथा,—
"सृजता ब्रह्मणा सृष्टिं मरीचिः सूतिकारणम् ।
प्रथमं मनसा ध्यातस्तस्य पुत्त्रस्तु कश्यपः ॥
तस्य दाक्षायणी भार्य्या कद्रुर्नाम शुचिस्मिता ।
मारीचो जनयामास तस्यां पुत्त्रान्महाबलान् ॥
अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम् ।
कर्कोटकञ्च राजेन्द्र । पद्मं चान्यं सरीसृपम् ॥
महापद्मं तथा शङ्खं कुलिकञ्चापराजितम् ।
एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः ।
एतेषान्तु प्रसूत्या तु इदमापूरितं जगत् ॥
कुटिला हीनकर्म्माणस्तीक्ष्णास्यास्तीव्रविषोल्वणाः ।
दृष्ट्वा संदश्य मनुजान् भस्म कुर्य्युः क्षणाद्‌ध्रुवम् ॥
शब्दगामी यथा सर्पो मनुष्याणां नराधिप ! ।
अहन्यहनि जायेत क्षयः परमदारुणः ॥
आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्व्वाः समन्ततः ।
जग्मुः शरण्यं शरणं परन्तु परमेश्वरम् ॥
इमं सेवार्थमुद्दिश्य प्रजाः सर्व्वा महीपते ! ।
ऊचुः कमलजं देवं पुराणं ब्रह्मसंज्ञितम् ॥
देवा ऊचुः ।
देव देवेश लोकानां प्रसूतिः परमेश्वर ।
त्राहि नस्तीक्ष्णदंष्ट्रेभ्यो भुजङ्गानां महात्मनाम् ॥
अहन्यहनि ये देव । पश्येयुरुरगा दृशा ।
मनुष्यं मृगयूथं वा तत सर्व्वं भस्मसाद्भवेत ॥
त्वया सृष्टिः कृता देव नीयते सा भुजङ्गमैः ।
एतज्ज्ञात्वा तु दुर्वृत्तं तत् कुरुष्व महामते ॥
ब्रह्मोवाच ।
अहं रक्षां विधास्यामि भवतीनां न संशयः ।
व्रजध्वं स्वानि धिष्ण्यानि प्रजापालाः ससाध्वसाः ॥
एवमुक्ताः प्रजास्तेन ब्रह्मणाव्यक्तमूर्त्तिना ।
आगतास्तु प्रजास्तावत्तानाहूय भुजङ्गमान् ॥
शशाप परमक्रुद्धो वासुकिप्रमुखांस्तथा ।
ब्रह्मोवाच ।
यतो मत्प्रभवान्नित्थं क्षय नयत मानुषान् ॥
भवान्तरे तथान्यस्मिन्मातुः शापात् सुदारुणात् ।
भविताति क्षयो घोरो नूनं स्वायम्भुवान्तरे ॥
एवमुक्तास्तु वेपन्तो ब्रह्मणा भुजगोत्तमाः ।
निपत्य पादयोस्तस्य इदमूचुर्व्वचस्तदा ॥
नागा ऊचुः ।
भगवन् । कुटिला जातिरस्माकं भवता कृता ।
विषोल्बणत्व क्रूरत्व दृक्शस्त्रत्वञ्च नस्तथा ॥
सम्पादितं त्वया देव इदानीं शमयाच्युत । ॥
ब्रह्मोवाच ।
यदि नाम मया सृष्टा भवन्तः कुटिलाशयाः ।
ततः किं मनुजान्नित्य भक्षयध्वं गतव्यथाः ॥
नागा ऊचुः ।
मर्य्यादां कुरु देवेश । स्थानञ्चैव पृथक् पृथक् ।
नागानां वचनं श्रुत्वा देवो वचनमब्रवीत् ॥
अहं करोमि वो नागाः समयं मनुजैः सह ।
तदेकमनसः सर्व्वे शृणुध्वं मम शासनम् ॥
पातालं वितलञ्चैव सुतलाख्यं तृतीयकम् ।
दत्तं वै वसुकामानां गृहं तत्र गमिष्यथ ॥
तत्र भोगान् बहुविधान् भुञ्जध्वं मम शासनात ।
तिष्ठध्वं सप्तमं यावद्रात्रमन्तन्ते पुनः पुनः ॥
ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ ।
दायादाः सर्व्वदेवानां सपर्णस्य च धीमतः ॥
तदा प्रसूतिर्व्वः सर्व्वा भोक्ष्यते चित्रभानुना ।
भवतां नैव दोषोऽयं भविष्यति न संशयः ॥
ये वै क्रूरा भोगिनो दुर्विनीता-
स्तेषामन्तो भविता नान्यथैतत् ।
कालं प्राप्तं भक्षयध्वं दशध्वं
तथा परान् चापकृतो मनुष्यान् ॥
मन्त्रौषधैर्गारुडमण्डलैश्च
बद्धैर्दृष्टा मानवा ये चरन्ति ।
तेषां भीतैर्व्वर्त्तितव्यं नचान्य-
च्चिन्त्यं कार्य्यं चान्यथा वो विनाशः ॥
इतीरिते ब्रह्मणा ते भुजङ्गा
जग्मुः स्थानं क्ष्मातलाख्यं हि सर्व्वे ।
तस्थुर्भोगान् भुञ्जमानाः समग्रान्
रसातले लीलया संस्थितास्ते ॥
एवं शापं ते तु लब्ध्वा प्रसादञ्च चतुर्मुखात् ।
तस्थुः पातालनिलये मुदितेनान्तरात्मना ॥
एतत् सर्व्वञ्च पञ्चम्यां तेषां जातं महात्मनाम् ।
अतस्त्वियं तिथिर्धन्या सर्व्वपापहरा शुभा ॥
एतस्यां संयतो यस्तु अम्लन्तु परिवर्ज्जयेत् ।
क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम् ॥"
इति वराहपुराणम् ॥

एषां शिवभूषणप्रमाणं यथा,—
"वासुक्याद्याश्च ये सर्पा यथास्थानञ्च ते हरम् ।
भूषयाञ्चक्रुरुद्गम्य शिरोबाह्वादिषु द्रुतम् ॥"
इति कालिकापुराणे शिवविवाहे १८ अः ।

कम्बलाश्वतरनागयोः सरस्वत्या गानवरप्राप्तिविवरणं यथा,—
"एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती ।
प्रत्युवाच महात्मानं नागमश्वतरं ततः ॥
सरस्वत्युवाच ।
वरन्ते कम्बलभ्रातः । प्रयच्छाम्युरगाधिप । ।
तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते ॥
अश्वतर उवाच ।
सहायं देहि देवि । त्वं पूर्व्वं कम्बलमेव मे ।
समस्तस्वरसम्बद्धमुभयोः संप्रयच्छ च ॥
सरस्वत्युवाच ।
सप्त स्वरा ग्रामरागाः सप्त पन्नगसत्तम । ।
गीतकानि च सप्तैव तावत्यश्चापि मूर्च्छनाः ॥
तानाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत ।
एतत् सर्व्वं भवान् गाता कम्बलश्चैव ते सखा ॥
ज्ञास्यते मत्प्रसादेन भुजङ्गेन्द्र परन्तथा ।
चतुर्व्विध पद ताल त्रिप्रकार लयत्रयम् ॥
यतित्रयं तथा तोद्यं मया दत्तं चतुर्व्विधम् ॥
एतद्भवान् मत्प्रसादात् पन्नगेन्द्रापरञ्च यत् ।
अस्यान्तर्गतमापन्नं स्वरव्यञ्जनयोश्च यत् ॥
तदशेषं मया दत्तं भवतः कम्बलस्य च ।

यथा नान्यस्य भूर्लोके पाताले वापि पन्नग ॥
प्रणेतारौ भवन्तौ च सर्व्वस्यास्य भविष्यतः ।
पाताले देवलोके च भूर्लोके चैव पन्नगौ ॥
इत्युक्ता सा तदा देवी सर्व्वजिह्वा सरस्वती ।
जगामादर्शनं सद्यो नागस्य कम्बलेच्छया ॥”

इति मार्कण्डेयपुराणम् ॥

कालियवंशनागहनने दोषो यथा,—
“नरः श्रणातान् सर्पांश्च हन्ति यो मानवाधमः ।
ब्रह्महत्यासमं पापं भविता तस्य निश्चितम् ॥
मत्पादपद्मचिह्ने यः करोति दण्डताड़नम् ।
द्विगुणं ब्रह्महत्याया भविता तस्य किल्बिषम् ॥
नश्यमीर्यास्यति तद्देहात् श्रापं दत्त्वा सुदारुणम् ।
वंशायुर्यशसां हानिर्भविता तस्य निश्चितम् ॥
पुत्र वर्षशतं कालस्तत्र यास्यति मत्प्रिया ॥”
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे १९ अः ॥

वास्तुनागशुद्धिर्यथा,—
“वास्तुप्रमाणेन तु गात्रकेण
वामेन शेते खलु नित्यकालम् ।
त्रिभिस्तु मासैः परिवृत्य पार्श्वं
त वास्तुनागं प्रवदन्ति सिद्धाः ॥
भाद्रादिके वासवदिकशिरा स्या-
न्मार्गादिकेषु त्रिषु याम्यमूर्द्धा ।
प्रत्यक्शिराः स्यात् खलु फाल्गुनादौ
ज्येष्ठादिकौवेरशिराः स नागः ॥
मूर्द्ध्नि घाते भवेन्मृत्युः पृष्ठे स्यात् पुत्त्रभार्ययोः ।
जघनेऽर्थक्षयं विद्यात् सर्व्वसम्पत्तथोदरे ॥
एक नागोऽसम्भृष्टौ द्वे चेद्दक्षिणपश्चिमे ।
त्रिशालं पूर्व्वतो हीनं कुर्याद्वा सौम्यवर्ज्जितम् ॥
केचिद्दक्षिणभागे तु वदन्त्येकं गृहं बुधाः ।
न कोणेषु गृहं कुर्य्यान्नाप्यन्त्ये नापि मध्यतः ॥
कोणे च धनहानिः स्यादन्ते रिपुभयं भवेत् ।
मध्ये च सर्व्वनाशः स्यात्तस्मादेतद्विवर्ज्जयेत् ॥”

इति ज्योतिस्तत्त्वम् ॥

नागकन्दः, पुं, (नाग इव कन्दं मूलं यस्य । दृढ-मूलत्वादेव तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

नागकर्णः, पुं, (नागकर्ण इव आकृतिः पर्णेऽस्य-स्येति । अच् ।) रक्तैरण्डः । इति राज-निर्घण्टः ॥

नागकिञ्जल्क, क्ली, (नागस्येव किञ्जल्को यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥

नागकुमारिका, स्त्री, (नागस्य कुमारीव । कन् टाप् पूर्व्वह्रस्वश्च ।) गुडूची । मञ्जिष्ठा । इति राजनिर्घण्टः ॥

नागकेशरः, पुं, (नागस्येव केशरोऽस्य ।) नाग-केसरवृक्षः । इति भरतः ॥ (यथा, हारीते चिकित्सितस्थाने १० अध्याये ।
“नलप्रैवेयकं पृक्का पद्मकं नागकेशरम् ॥”)

नागकेसर, पुं, (नागस्येव केसरो यस्य ।) पुष्पवृक्ष-विशेषः । नागेश्वर इति भाषा ॥ तत्पर्य्यायः । चाम्पेयः२ केसरः३ काञ्चनाह्वयः ४ । इत्यमरः । २।४।६५ ॥ केशरः ५ नागकेशरः ६ । इति भरतः ॥ किञ्जल्कः ७ नागकिञ्जल्कः ८ नागीयः ९ काञ्चनम् १० सुवर्णम् ११ हेमकिञ्जल्कः १२ रुक्मम् १३ हेम १४ पिञ्जरः १५ फणिकेसरः १६ पन्नगकेसरः १७ । तत्पुष्पगुणाः । अल्पोष्ण-त्वम् । लघुत्वम् । तिक्तत्वम् । कफपित्तविषामय-कण्डूशीर्षरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥
तन्नामगुणाः ।
“नागपुष्पः स्मृतो नागः केसरो नागकेसरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ।
ज्वरकण्डूतृषास्वेदच्छर्द्दिहृल्लासनाशनम् ॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥”
त्रिजातकं नागकेशरसंयुक्तं चतुर्ज्जातकं भवति यथा,—
“त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धित्रिजातकम् ।
नागकेशरसंयुक्तं चतुर्ज्जातकमुच्यते ॥
तद्द्वयं रोचकं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् ।
लघु पित्ताग्निकृद्वर्ण्यं कफवातविषापहम् ॥”

इति भावप्रकाशः ॥

नागगन्धा, स्त्री, (नागस्य गन्ध इव गन्धो यस्याः ।) नाकुलीकन्दः । इति राजनिर्घण्टः ॥ (नाकुली-शब्देऽस्या विशेषो ज्ञातव्यः ॥)

नागगर्भं, क्ली, (नागः सीसकं गर्भ उत्पत्ति-कारणं यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागच्छत्रा, स्त्री, (नागस्य फणेव छत्रं छादनं पत्रं यस्याः ।) नागदन्ती । इति राजनिर्घण्टः ॥

नागज, क्ली, (नागात् सीसकात् जायते इति । जन+डः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ रङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥ नाग-जाते, त्रि ॥

नागजिह्वा, स्त्री, (नागस्य सर्पस्य जिह्वेव ।) शारिवा । अनन्तमूलम् । इति रत्नमाला ॥

नागजिह्विका, स्त्री, (नागस्य जिह्वेव रक्तता यस्याः । कप् । टापि अत इत्वम् ।) मन-शिला । इत्यमरः । २ । ९ । १०८ ॥ (यथास्याः पर्य्यायः ।
“मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका ।
नैपाली कुनटी गोला शिला दिव्यौषधि
स्मृता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नागजीवन, क्ली, (नागः सीसकं जीवनं यस्य ।) वङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥

नागदन्तः, पुं, (नागस्य गजस्य दन्तः ।) हस्ति-दन्तः । (यथा, महाभारते । १२ । ९८ । १९ ।
“द्वीपिचर्म्मावनद्धश्च नागदन्तकृतत्सरुः ॥”
नागदन्तः साधनत्वेनास्त्यस्येति अच् ।) गृहान्त-र्गतदारु । इति मेदिनी । ते, २०१ ॥ दाँतिया इति दाण्डा इति च भाषा ॥

नागदन्तकः, पुं (नागदन्त+स्वार्थे कन् ।) नाग-दन्तः । (नागदन्तेन कायतीति । कै+कः ।) भित्तिदारुद्वयम् । तत्पर्य्यायः । निर्यूहः २ । इति जटाधरः ॥

नागदन्तिका, स्त्री, (नागस्य सर्पस्य दन्त इव पीड़ादायकं पत्रं यस्याः । कापि अत इत्वम ।) वृश्चिकाली । इति रत्नमाला ॥ विछिटी इति भाषा ॥

नागदन्ती, स्त्री, (नागस्य गजस्य दन्त इव फलाद्याकारो यस्याः । ङीप् ।) कुम्भा । श्रीह-स्तिनी । इति मेदिनी । ते, २०१ ॥ हाति शुण्डा इति भाषा ॥ शेषस्य पर्य्यायः । विशल्या २ पत्रपुष्पी ३ विषौषधी ४ शुक्लपुष्पा ५ इभ-दन्ताख्या ६ काकेरी ७ कामदूतिका ८ । इति रत्नमाला ॥ श्वेतपुष्पा ९ मधुपुष्पा १० विशो-धिनी ११ नागस्फोता १२ विशालाक्षी १३ नागच्छत्रा १४ विषघ्नी १५ सर्पपुष्पी १६ शुक्लपुष्पी १७ स्वादुका १८ शतदन्तिका १९ सितपुष्पी २० सर्पदन्ती २१ नागिनी २२ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । रूक्ष-त्वम् । वातकफगुल्मशूलोदरव्याधिकण्ठदोष-नाशित्वञ्च । इति राजनिर्घण्टः ॥

नागदमनी, स्त्री, (नागो दम्यतेऽनयेति । दम+ ल्युट्+ङीप् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । जम्बूः २ जाम्बवती ३ दृढा ४ रक्तपुष्पा ५ जाम्बवी ६ मलघ्नी ७ दुर्द्धर्षा ८ दु सहा ९ । अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कटु-त्वम् । त्रिदोषोदराध्मानदोषनाशित्वम् । कोष्ठ-शोधनकारित्वञ्च । इति राजनिर्घण्टः ॥*॥
तन्नामगुणाः ।
“विज्ञेया नागदमनी बला मोटा विषापहा ।
नागपुष्पी नागपत्रा महायोगेश्वरीति च ॥
बला मोटा कटुस्तिक्ता लघुः पित्तकफापहा ।
मूत्रकृच्छ्रव्रणान् घ्नो नाशयेज्जालगर्द्दभम् ॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी ।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा ॥”

इति भावप्रकाश ॥

नागदलोपमं, क्ली, (नागदलस्य ताम्बूल्या उपमा यत्र ।) परूषफलम् । इति रत्नमाला ॥ (परूष शब्देऽस्य गुणादयो ज्ञातव्याः ॥)

नागद्रुः, पुं, (नागप्रियो द्रुर्वृक्षः ।) समन्तदुग्धा । इति शब्दचन्द्रिका ॥ सिज इति भाषा ॥

नागनिर्य्यूहः, पुं, (नाग इव निर्य्यूहो नागदन्तः ।) नागदन्तक । इति जटाधरः ॥

नागपञ्चमी, स्त्री, (नागप्रिया पञ्चमी । शाक पार्थिवादिवत् समासः ।) आषाढ़ी कृष्णा पञ्चमी । तत्र मनसापूजा कर्त्तव्या । यथा,—
“देवीपुराणे ।
‘सुप्ते जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥
मनसादेवीं विषहरीम् । स्नुही सिजवृक्षः ।
देवैरिति सहार्थे तृतीया ।
‘देवीं सम्पूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागानन्ताद्यान् महोरगान् ॥

क्षीरं सर्पिस्तु नैवेद्यं देयं सर्वविषापहम् ॥'
मनसाध्यानम्। यथा, पद्मपुराणे।
'देवीममामहीनां शशधरवदनां चारुकान्तिं वदान्यां
हंसारूढ़ामुदारामरुणितवसनां सर्व्वदां सर्व्वदैव।
स्मेरास्यां मण्डिताङ्गीं कनकमणिगणैर्नागरत्नैरनेकै-
र्वन्देऽहं साष्टनागामुरुकुचयुगलां भोगिनीं कामरूपाम् ॥'
पुराणान्तरे।
'अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः॥
शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः ॥
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥'
गारुड़ेऽपि।
'अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम् ॥
कालीयं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्।
यजेत्तानर्चितान्नागान् दष्टको दिवं व्रजेत्॥'
अन्यच्च।
'योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम्।
पुष्पवद्धारयेन्मूर्द्ध्नि तस्मै नित्यं नमो नमः॥'
इत्यनेन प्रणवपूर्व्वेण मत्स्यपुराणोक्तेनानन्तं पूजयेत् ॥ रत्नाकरे।
'पिचुमर्द्दस्य पत्राणि स्थापयेद्भवनोदरे।
स्वयञ्चापि तदश्नीयात् ब्राह्मणांश्चैव भोजयेत्॥'
पिचुमर्द्दस्य निम्बस्य ॥" इति तिथ्यादितत्त्वम् ॥

नागपत्रा, स्त्री, (नागदमनं पत्रं यस्याः। टाप्।) नागदमनी। इति भावप्रकाशः॥

नागपत्री, स्त्री, (नागवत् पत्रं यस्याः। ङीष्।) लक्ष्मणा। इति राजनिर्घण्टः॥

नागपदः, पुं, (नागवत् पदं स्थानं यस्य।) षोडशरतिबन्धान्तर्गतद्वितीयबन्धः। तस्य लक्षणं यथा,—
"पादौ स्कन्धे तथा हस्ते क्षिपेल्लिङ्गं भगे लघु।
कामयेत् कामुको नारीं बन्धो नागपदो मतः॥"
इति रतिमञ्जरी॥

नागपाशः, पुं, (नागपाश इव व्याकृतिरस्यास्तीति। अच्।) स्त्रीणां करणम्। (नागः पाश इव।) वरुणायुधम्। इति मेदिनी। शे, ३५॥
"साहंद्दयावर्त्तनात् नागपाश इति स्मृतः।
ब्रह्मग्रन्थिमयो दद्यान्नागपाशमथापि वा॥"
इत्यागमः॥
"वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्॥"
इति देवीपुराणीयदुर्गाध्यानम्॥

नागपाशकः, पुं, (नागपाश इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्। यद्वा, नागपाश इव कायतीति। कै+कः।) रतिबन्धविशेषः। तस्य लक्षणं यथा,—
"खट्वाद्वयमध्यस्थां हस्ताभ्यां धारयेत् कुचौ।
रमेत्तिः शङ्कितः कामी बन्धोऽयं नागपाशकः॥"
इति रतिमञ्जरी॥

नागपुरं, क्ली, (नागनामकं पुरम्। शाकपार्थिवादिवत् समासः।) देशविशेषः। तद्विवरणं यथा,—
"जटाजूटात् पपातोर्व्व्यां मेरौ तस्मात्ततोऽगमत्।
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम्॥
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम्।
तामायान्तीन्तु रोधाय खलीलो नाम दानवः॥
पार्व्वतं रूपमास्थाय वर्षाणान्तु शतैर्द्दिशाः।
ततो भगीरथो राजाराधयामास कौशिकम्॥
स तुष्टः प्रददौ नागं वाहनं तं भगीरथः।
समारुह्यागमत्तत्र यत्र रुद्धा भगीरथी'॥
तेन नागेन तं दैत्यं संविदार्य्य स सत्तमः।
शतधा तं समाधाय मूर्द्धन्यैरावतो गजः॥
महीतलं समापेदे स यावन्नागसाह्वयम्॥
तस्मात् चाघटनाद्विप्रा अभून्नागपुरं वरम्॥"
इति वह्निपुराणे गङ्गावतरणनामाध्यायः॥

नागपुष्पः, पुं, (नागस्य हस्तिनो मदगन्धयुक्तं पुष्पं यस्य।) पुन्नागवृक्षः। नागकेशरः। (यथा, महाभारते। १।२०८।४०।
"पुन्नागैर्नागपुष्पैश्च लकुचैः पनसैस्तथा॥")
चम्पकः। इति मेदिनी। पे, २५॥ (पुन्नागपुष्पे तु क्ली। तत्र गुणा यथा,—
"नागपुष्पं कषायोष्णं रुक्षं लघ्वामपाचनम्।
ज्वरकण्डूतृषास्वेदच्छर्द्दिहृल्लासनाशनम्॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नागपुष्पफला, स्त्री, (नागस्य नागकेशरस्येव पुष्पफले यस्याः।) कुष्माण्डी। इति राजनिर्घण्टः॥

नागपुष्पिका, स्त्री, (नागस्य पुष्पमिव पुष्पं यस्याः। कप्। टापि अत इत्वम्।) स्वर्णयूथी। इति राजनिर्घण्टः॥

नागपुष्पी, स्त्री, (नागस्य नागकेशरस्य पुष्पमिव पुष्पं यस्याः। ङीष्।) नागदमनी। इति भावप्रकाशः॥ (पर्य्यायोऽस्या यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"नागपुष्पी श्वेतपुष्पा नागिनी रामदूतिका।"
अस्या गुणा। यथा,—
"नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तनुत्॥")

नागफलः, पुं, (नागस्य पुन्नागस्येव फलं यस्य।) पटोलः। इति राजनिर्घण्टः॥

नागबन्धुः, पुं, (नागानां हस्तिनां बन्धुरिव प्रियत्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥ नागानां बान्धवश्च॥

नागबलः, पुं, (नागानामिव बलं यस्य।) भीमसेनः। इति त्रिकाण्डशेषः॥ (अस्य नागबलाप्तिकथा। यथा, महाभारते। १।१२८। ६५—७०।
"एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत।
यदि नागेन्द्र! तुष्टोऽसि किमस्य धनसञ्चयैः॥
रसं पिबेत् कुमारोऽयं त्वयि प्रीते महाबलः।
बलं नागसहस्रस्य यस्मिन् कुण्डे प्रतिष्ठितम्॥
यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम्।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत॥
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः।
प्राङ्मुखश्चोपविष्टः स रसं पिबति पाण्डवः॥
एकोच्छ्वासात्ततः कुण्डं पिबति स्म महाबलः।
एवमष्टौ स कुण्डानि ह्यपिबत् पाण्डुनन्दनः॥
ततस्तु शयने दिव्ये नागदत्ते महाभुजः।
अशेत भीमसेनस्तु यथासुखमरिन्दमः॥"
तथा च तत्रैव। १।१२९। १६—२१।
"ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः।
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली॥
तं दृष्ट्वा प्रतिबुध्यन्तं पाण्डवं ते भुजङ्गमाः।
सान्त्वयामासुरव्यग्रा वचनञ्चेदमब्रुवन्॥
यत्ते पीतो महाबाहो। रसोऽयं वीर्य्यसंभृतः।
तस्मान्नागायुतबलो रणेऽधृष्यो भविष्यति॥")
हस्तितुल्यबलवति, त्रि॥

नागबला, (नागस्येव बलं यस्याः।) बलाप्रभेदः। गोरक्षचाउलिया इति गुलशकरी इति कांकहो इति च भाषा॥ (यथा, गारुडे १७६ अध्याये।
"जग्ध्वा नागबला चूर्णं श्वासकासादिनुद्भवेत्॥")
तत्पर्य्यायः। गाङ्गेरुकी २ झषा ३ ह्रस्वगवेधुका ४। इत्यमरः। २।४।११७॥ गाङ्गेरुही ५ गोरक्षतण्डुला ६। इति भरतः॥ भद्रौदनी ७ खरगन्धा ८ चतुःपला ९ महोदया १० महापत्रा ११ महाशाखा १२ महाफला १३ विश्वदेवा १४ अरिष्टा १५ देवदण्डा १६ महागन्धा १७ घण्टा १८। अस्या गुणाः। मधुराम्लत्वम्। कषायत्वम्। उष्णत्वम्। गुरुत्वम्। कण्डूतिकुष्ठवातव्रणपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥ स्निग्धत्वम्। आयुष्यत्वम्। वृष्यत्वम्। ग्राहित्वम्। कृच्छ्रक्षीणक्षयरोगेषु हितत्वञ्च। इति राजवल्लभः॥

नागभित्, पुं, (नागः क्रूरचारी सन् बिभर्त्ति आत्मानमिति। भृ+क्विप्।) डुण्डुभसर्पः। इति त्रिकाण्डशेषः॥

नागमल्लः, पुं, (नागेषु हस्तिषु मल्लः।) ऐरावतः। इति शब्दरत्नावली॥

नागमाता, [ऋ] स्त्री, (नागानां हस्तिनां मातेव भूषकत्वात्।) मनःशिला। इति हेमचन्द्रः। ४। १२९॥ (नागानां सर्पाणां माता।) मनसादेवी। इति शब्दरत्नावली॥ (यथा, ब्रह्मवैवर्त्ते। २। १। ६७।
"नागेश्वरस्यानन्तस्य भगिनी नागपूजिता।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी॥"
सुरसा। इयं हि सागरोल्लङ्घनसमये हनुमतः परीक्षार्थं देवैरादिष्टा तस्य विघ्नमाचरितुं गता तेन वञ्चिता च। यथा, रामायणे। ५।१।१३६।
"ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः।
अब्रुवन् सूर्य्यसङ्काशां सुरसां नागमातरम्॥"
यथा, च अध्यात्मरामायणे। ६। १। ८—२४।

"दृष्ट्वानिलसुतं देवा गच्छन्तं वायुवेगतः ।
परीक्षणार्थं सत्त्वस्य वानरस्येदमब्रुवन् ॥
गच्छत्येष महासत्त्वो वानरो वायुविक्रमः ।
लङ्कां प्रवेष्टुं शक्तो वा न वा जानीमहे बलम् ॥
एवं विचार्य्य नागानां मातरं सुरसाभिधाम् ।
अब्रुवन् देवतास्तत्र कौतूहलसमन्विताः ॥
गच्छ त्वं वानरेन्द्रस्य किञ्चिद्विघ्नं समाचर ।
ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता ॥
इत्युक्ता सा ययौ शीघ्रं हनुमद्विघ्नकारणात् ।
आवृत्य मार्गं पुरतः स्थित्वा वानरमब्रवीत् ॥
एहि मे वदनं शीघ्रं प्रविशस्व महामते ! ।
देवैस्त्वं कल्पितो भक्ष्यः क्षुधासम्पीडितात्मनः ॥
तामाह हनुमान् मातरहं रामस्य शासनात् ।
गच्छामि जानकीं द्रष्टुं पुनरागम्य सत्वरः ॥
रामाय कुशलं तस्याः कथयित्वा त्वदाननम् ।
निवेक्ष्ये देहि मे मार्गं सुरसायै नमोऽस्तु ते ॥
इत्युक्ता पुनरेवाह सुरसा क्षुधितास्म्यहम् ।
प्रविश्य गच्छ मे वक्त्रं नोचेत् त्वां भक्षयाम्यहम् ॥
इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय ।
प्रविश्य वदनं तेऽद्य गच्छामि त्वरयान्वितः ॥
इत्युक्त्वा योजनायामदेहो भूत्वा पुरः स्थितः ।
दृष्ट्वा हनुमतो रूपं सुरसा पञ्चयोजनम् ।
मुखं चकार हनुमान् द्विगुणं रूपमादधत् ॥
ततश्चकार सुरसा योजनानाञ्च विंशतिम् ।
वक्त्रं चकार हनुमांस्त्रिंशद्योजनसम्मितम् ॥
ततश्चकार सुरसा पञ्चाशद्योजनायतम् ।
वक्त्रं तदा हनूमांस्तु बभूवाङ्गुष्ठसन्निभः ॥
प्रविश्य वदनं तस्याः पुनरेत्य पुरः स्थितः ।
प्रविष्टो निर्गतोऽहं ते वदनं देवि ! ते नमः ॥
एवं वदन्तं दृष्ट्वा सा हनुमन्तमथाब्रवीत् ।
गच्छ साधय रामस्य कार्य्यं बुद्धिमतां वर ! ॥
देवैः सम्प्रेषिताहं ते बलं जिज्ञासुभिः कपे ! ।
दृष्ट्वा सीतां पुनर्गत्वा रामं द्रक्ष्यसि गच्छ भोः ॥"
कद्रूः । इति महाभारतम् ॥)

नागमारः, पुं, (नागं मारयतीति । मृ + णिच् + अण् ।) केशराजः । इति त्रिकाण्डशेषः ॥ हस्तिमारके सर्पमारके च त्रि ॥

नागयष्टिः, स्त्री, (नागाधिष्ठिता यष्टिः ।) पुष्करिण्यादिस्थितकाष्ठविशेषः । इन्द्रकाठ इति भाषा ॥ तत्पर्य्यायः । नागाचला २ । इति जटाधरः ॥ (यथा, हयशीर्षे ।
"वैणवं वारुणञ्चैव पुन्नागं नागकेशरम् ।
वकुलं चम्पकञ्चैव बिल्वञ्चैवाथ खादिरम् ॥
एतेषामेव दारूणां नागयष्टिं प्रकीर्त्तिता ।
सवक्रकोटरं त्यक्त्वा तस्मात् कुर्य्यात् यथेप्सितम् ॥")

नागरं, क्ली, (नगरे भवम् । नगर + अण् ।) शुण्ठी । इत्यमरः । २ । ९ । ३८ ॥ (अस्य गुणा यथा,—
"नागरं दीपनं वृष्यं ग्राहि हृद्यं विबन्धनुत् ।
रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
यथा च गारुडे । १६९ अध्याये ।
"शुण्ठीतकफवातयुक्तं मरीचं नागरं तथा ।
चर्व्वित्वा च इमं सद्यो जिह्वया व्यजनं लिहेत् ॥")
मुस्ता । इति मेदिनी । रे, १०२ ॥ रतिबन्धः । इति विश्वः ॥ (कश्चित् पुं ।) नागरदेशीयाचारश्च ॥

नागरः, पुं, (नागरी विदग्धस्त्रीश्रामोऽस्त्यस्येति । अच् ।) देवरः । इति त्रिकाण्डशेषः ॥ नागरङ्गः । इति शब्दरत्नावली ॥ त्रि, (नगरे भवः । "तत्र भवः ।" ४।३।५३ । इत्यण् ।) विदग्धः । (यथा, आर्य्यासप्तशत्याम् । ३२३ ।
"नागर गीतिरियासौ ग्रामस्थित्यापि भूषिता सुतनुः ।
कस्तूरी न स्फोटदरवासवशाङ्कितामेति ॥")
नगरोद्भवः । इति मेदिनी । रे, १०२ ॥ (यथा, देवीभागवते । २ । ६ । ६६ ।
"नागरा धृतराष्ट्रस्य सर्व्वे तत्र समाययुः ॥"
नगरहितश्च । यथा, महाभारते । २।५।१२२ ।
"धनुर्व्वेदस्य सूत्रं वै यन्त्रसूत्रञ्च नागरम् ॥")

नागरकः, पुं, (नागर एव । स्वार्थे कन् । यद्वा, नागरेण कायतीति । कै + कः ।) रतिबन्धविशेषः । यथा,—
"ऊरुमूलोपरि स्थित्वा योषिदूरुद्वयं यदि ।
ग्रीवां धृत्वा कराभ्याञ्च बन्धो नागरको मतः ॥"
इति रतिमञ्जरी ॥

नागरक्तं, क्ली, (नागकृत रक्तम् ।) सिन्दूरम् । इति हेमचन्द्रः । ४।१२७ ॥ नागस्य शोणितञ्च ॥

नागरघनः, पुं, (नागर एव घनो मुस्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥ (नागरमुस्ताशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

नागरङ्गः, पुं, (नागस्य नागसम्भूतस्य सिन्दूरस्येव रङ्गो यस्य ।) वृक्षविशेषः । नारङ्गीलेबुर गाछ इति भाषा ॥ इत्यमरः । २ । ४ । ३८ ॥ तत्पर्य्यायः । नारङ्गः २ नार्य्यङ्गः ३ नागरः ४ ऐरावतः ५ नागरकः ६ चक्राधिवासी ७ । इति शब्दरत्नावली ॥ तत्फलगुणाः । सुरभित्वम् । विपाके गुरुत्वम् । दुर्ज्जरत्वम् । अत्यम्लत्वम् । ईषन्मधुरत्वम् । हृद्यत्वम् । वातविनाशित्वञ्च । तत्केशरगुणः । रुच्यत्वम् । वान्तिहरत्वञ्च । इति राजवल्लभः ॥

नागरमुस्ता, स्त्री, (नागर इव मुस्ता ।) मुस्ताप्रभेदः । नागरमुता इति भाषा ॥ तत्पर्य्यायः । नागरोत्था २ नागरादिघनसञ्ज्ञका ३ चक्राङ्का ४ नादेयी ५ चूडाला ६ पिण्डमुस्ता ७ शिशिरा ८ कच्छोत्था ९ कच्छरुहा १० वाहकेसरा ११ उच्चटा १२ पूर्णकोष्ठका १३ कलापिनी १४ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । कषायत्वम् । शीतलत्वम् । कफपित्तज्वरातिसाराऽरुचितृष्णादाहश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

नागराजः, पुं, (नागानां राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) शेषः । अनन्तः । यथा, कविकल्पद्रुमे ।
"पाताले नागराजं भुजगयुवतयो यस्य गायन्ति कीर्त्तिम् ॥"

नागराह्वं, क्ली, (नागरमिति आह्वा आख्या यस्य ।) शुण्ठी । इति राजनिर्घण्टः ॥ (विवृतिरस्या शुण्ठीशब्दे ज्ञातव्या ॥)

नागरी, स्त्री, (नगरे भवा । नगर + अण् + ङीप् ।) स्नुही । इति शब्दचन्द्रिका ॥ विदग्धा नारी । यथा, उद्भटः ।
"इत्थमाभीरी स्मरतु स कथं सङ्गतो नागरीभिः ॥"
नागरपत्नी । नगरभवे, त्रि ॥

नागरुकः, पुं, (नाग इव रुवते शब्दायते प्राप्नोतीति । रु गतौ + बाहुलकात् कप्रत्ययेन साधुः ।) नागरङ्गः । इति शब्दरत्नावली ॥

नागरेणुः, पुं, (नागस्य सीसकस्य रेणुः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागरेयकः, त्रि, (नगरे भवः नगरस्याय वा । "कत्र्यादिभ्यो ढकञ् ।" ४ । २ । ९५ । इति ढकञ् ।) नगरसम्बन्धी । नगरस्यायमिति ष्णेयप्रत्ययान्तात् स्वार्थे कः ॥

नागलता, स्त्री, (नागः सर्पस्तद्वत् लता ।) लिङ्गम् । इति त्रिकाण्डशेषः ॥

नागलोकः, पुं, (नागानां लोकः ।) पातालम् । इत्यमरः । १।८।१ ॥ (यथा, हरिवंशे । ८२ । ८४ ।
"रसातले स ददृशे नागलोकमिमं यथा ॥")

नागवल्लरी, स्त्री, (नाग इव दीर्घा वल्लरी ।) नागवल्ली । इति भावप्रकाशः ॥

नागवल्लिका, स्त्री, (नागवल्ली + स्वार्थे कन् ।) नागवल्ली । इति रत्नमाला ॥

नागवल्ली, स्त्री, (नाग इव दीर्घा वल्ली लता ।) ताम्बूली । इत्यमरः । २ । ४ । १२० ॥ अस्याः पर्य्यायास्ताम्बूलवल्लीशब्दे गुणाश्च ताम्बूलशब्दे द्रष्टव्याः । सा च श्रीवाटाम्लवाटादिनामायामस्य स्थानभेदादेव भिन्ना ।
"एकाप्येषा देशभेदात्तत्तद्विशेषा-
न्नानाकारं याति काये गुणे च ॥
श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा ।
रसाढ्या च रसा रुच्या विपाके शिशिरा स्मृता ॥
स्वादम्लवाटी कटुकाम्लतिक्ता
तीक्ष्णा तथोष्णा मुखपाककर्त्री ।
विदाहपित्तास्रविकोपनी च
विष्टम्भदा वातनिबर्हणी च ॥
सप्तमी मधुरा तीक्ष्णा कटुरुच्या च पाचनी ।
गुल्मोदराध्मानहरा रुचिकृद्दीपनी परा ॥"
अन्यच्च ।
"गुहागरे सप्तशिरा प्रसिद्धा
तत्पर्णचूर्णातिरसातिरुच्या ।
सुगन्धितीक्ष्णा मधुरातिहृद्या
सन्दीपनी पुंस्त्वकरा च बल्या ॥
विरेचनी सत्सुरगन्धिकारिणी ।
मात्रा याचसरा सुतीव्रममधुरा रुच्या हिमा दाहनुत्
पित्तोद्रेकहरा सुदीपनकरी बल्या सदामोदिनी ।

स्त्रीसौभाग्यविवर्द्धिनी मदकरी ज्ञेया सदा वल्लभा
गुल्माध्मानविबन्धजिच्च कथिता सा मालवे तु
स्थिता ॥
अन्या पुष्कलिका नाम कषायोष्णा कटुस्तथा ।
मलापकर्षा कण्ठस्य पित्तद्दृद्दाहनाशिनी ॥
देवर्णीया कटुस्तीक्ष्णा हृद्या दीर्घदला च सा ।
कफवातहरा रुच्या कटुर्दीपनपाचनी ॥”
इति राजनिर्घण्टः ॥

नागवारिकः, पुं, (नागानां हस्तिनां वारो वारणम् । स कार्य्यत्वेनास्त्यस्येति । नागवार+ठन् ।) राजकुञ्जरः । हस्तिपः । गणस्यराजः । (नागानां सर्पाणां वारो वारणमस्त्यस्येति ।) गरुडः । मयूरः । इति मेदिनी । के, २३० ॥

नागवीटः, पुं, (नाग इव विशेषेण अटति इतस्ततो भ्रमतीति । वि+इट गतौ+“इगुपधज्ञेति ।” ३ । १ । १३५ । इति कः ।) टाङ्करः । इति त्रिकाण्डशेषः ॥ थाकरा इति ख्यातः ॥

नागवीथी, स्त्री, (नागस्येव वीथी पन्थाः ।) अश्विन्यादिनक्षत्रत्रयघटितग्रहस्थानत्रयान्तर्गतोत्तरस्थानस्थपथविशेषः । यथा,—
“सर्व्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ।
स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् ।
वैश्वानरं दक्षिणतो निर्द्दिष्टमिह सत्वतः ॥
तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । तथाहि त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । तथाचोक्तम् ।
अश्विनी कृत्तिका याम्या नागवीथीति
शब्दिता ॥”
इति विष्णुपुराणे । २ । ८ । ७६ श्लोकटीकायां श्रीधरस्वामी ॥ कश्यपपत्नीविशेषः । यथा,—
“नागवीथी च यामिन्याम् ।” इति ब्रह्मपुराणे द्वितीयोऽध्यायः ॥ (धर्म्मस्य यामिपत्नीगर्भजाता कन्या । यथा, मत्स्यपुराणे । ५ । १८ ।
“लम्बायां घोषनामानो नागवीथी तु यामिजा ॥”)

नागमुण्डी, स्त्री, (नागस्य मुण्डवत् आकृतिरस्यस्येति । अच् । ततो गौरादित्वात् ङीष् ।) डङ्गरीफलम् । इति राजनिर्घण्टः ॥

नागसम्भवं, क्ली, (नागात् सीसकात् सम्भवो यस्य ।) सिन्दूरम् । इत्यमरः । २ । ६ । १०५ ॥

नागसुगन्धा, स्त्री, (नागस्येव सु शोभनो गन्धो यस्याः ।) भुजङ्गाक्षी । सर्पसुगन्धा । इति भरतधृतस्वामी ॥ (रास्नाभेदः । तत्पर्य्यायो यथा,—
“नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नागस्तोकक, क्ली, (नागस्य नागविषस्य स्तोक-स्वल्पता यत्र । कप् । स्थावरविषत्वादेवास्य तथात्वम् ।) वत्सनाभः । इति राजनिर्घण्टः ॥

नागस्फोता, स्त्री, (नाग इव स्फोता ।) दन्ती । नागदन्ती । इति राजनिर्घण्टः ॥

नागहनुः, पुं, (नागस्य हस्तिनो हनुरिव ।) नखनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

नागहन्त्री, स्त्री, (नागान् हन्तीति । हन+तृच्+ ङीप् ।) वन्ध्याककर्कोटकी । इति राजनिर्घण्टः ॥

नागाख्यः, पुं, (नाग एव आख्या यस्य ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

नागाञ्चला, स्त्री, नागयष्टिः । इति जटाधरः ॥

नागाञ्जना, स्त्री, हस्तिनी । (नागस्येव अञ्जनं कृष्णवर्णत्वं यस्याः ।) नागयष्टिः । इति मेदिनी । ने, १८८ ॥

नागाधिपः, पुं, (नागानां अधिपः ।) अनन्तः । इति हेमचन्द्रः । ४ । ३७३ ॥

नागान्तकः, पुं, (नागानां अन्तको विनाशकः ।) गरुडः । इत्यमरः । १ । १ । ३१ ॥

नागारातिः, पुं, (नागानां अरातिः शत्रुः ।) वन्ध्याककर्कोटकी । इति राजनिर्घण्टः ॥

नागालाबुः, स्त्री, (नाग इव अलाबुः ।) कुम्भतुम्बी । इति राजनिर्घण्टः ॥

नागाशनः,पुं,(अश्नातीति । अश+ल्युः । नागानां अशनो भक्षकः ।) गरुडः । इति हारावली ।१०॥

नागाह्वं, क्ली, (नागस्य आह्वा नाम आह्वा यस्य ।) हस्तिनापुरम् । इति त्रिकाण्डशेषः ॥

नागाह्वा, स्त्री, (नागं नागकेशरं आह्वयते स्पर्द्धते इति । आ+ह्वे+अच् । टाप् ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

नागी, स्त्री, (नागस्य स्थूला पत्नी । नाग+जानपदेति स्थौल्यार्थे ङीष् ।) नागपत्नी । इति मुग्धबोधम् ॥ (अस्याः दधिगुणा यथा,—
“लघु पाके बलासघ्नं वीर्य्योष्णं पक्तिनाशनम् ।
कषायानुरसं नाग्या दधि वर्च्चो विवर्द्धनम् ॥”
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

नागोदं, क्ली, (नागवदुदरं यस्मात् । पृषोदरादित्वात् रलोपः ।) उदरत्राणम् । इति हेमचन्द्रः । ३ । ४३२ ॥

नागोदरं, क्ली, (नागवत् दृढमुदरं यस्मात् ।) उरस्त्राणम् । इति हारावली ।१६८॥ (गर्भिण्या गर्भोपद्रवविशेषः । यथा, सुश्रुते शारीरस्थाने । १० अध्याये ।
“शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाध्मापयत्युदरं तत् कदाचित् यदृच्छया उपशान्तं नैगमेषापहृतमिति भाषन्ते । तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुः । तत्रापि लीनवत् प्रतीकारः ॥”)

नाचिकेतः, पुं, नचिकेताः । अग्निः । यथा,—
“स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो
प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त
एतद्द्वितीयेन वृणे वरेण ॥
प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेतं निहितं गुहायाम् ॥
लोकादिमग्निं तमुवाच तस्मै
या इष्टका यावतीर्व्वा यथा वा ।
स चापि तत्प्रत्यवदद्यथोक्त-
मथास्य मृत्युः पुनरेवाह तुष्टः ।
तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण ॥
त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत्तरति जन्ममृत्यू ।
ब्रह्मयज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति ॥
त्रिणाचिकेतस्त्रयमेतद्विदित्वा
य एवं विद्वांश्चिनुते नाचिकेतम् ।
स मृत्युपाशान् पुरतः प्रणोद्य
शोकातिगो मोदते स्वर्गलोके ॥”
इति कठोपनिषदि प्रथमा वल्ली । १३-१८ ॥
(ऋषिविशेषः । अस्य विवरणं यथा, महाभारते । १३ । ७१ । २—२१ ।
“अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषेरुद्दालकेर्व्वाक्यं नाचिकेतस्य चोभयोः ॥
ऋषिरुद्दालकिर्दीक्षामुपगम्य ततः सुतम् ।
त्वं मामुपचरस्वेति नाचिकेतमभाषत ॥
समाप्ते नियमे तस्मिन् महर्षिः पुत्त्रमब्रवीत् ।
उपस्पर्शनसक्तस्य स्वाध्यायाभिरतस्य च ॥
इध्मा दर्भाः सुमनसः कलसश्चातिभोजनम् ।
विस्मृतं मे तदादाय नदीतीरादिहाव्रज ॥
गत्वानवाप्य तत् सर्व्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येव पितरं सोऽब्रवीन्मुनिः ॥
क्षुत्पिपासाश्रमाविष्ट ऋषिरुद्दालकिस्तदा ।
यमं पश्येति तं पुत्त्रमशपत् स महातपाः ॥
तथा स पित्राभिहितो वाग्वज्रेण कृताञ्जलिः ।
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥
नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्च्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ॥
तस्य दुःखपरीतस्य स्वं पुत्त्रमनुशोचतः ।
व्यतीतं तदहःशेषं सा चोग्रा तत्र शर्व्वरी ॥
पित्र्येणाश्रुप्रपातेन नाचिकेतः कुरूद्वह ।
प्रास्पन्दच्छयने कौश्ये वृष्ट्या शस्यमिवाप्लुतम् ॥
स पर्य्यपृच्छत्तं पुत्त्रं श्लाघ्यं प्रत्यागतं पुनः ।
दिव्यैर्गन्धैः समादिग्धं क्षीणस्वप्नमिवोत्थितम् ॥
अपि पुत्त्र जिता लोकाः शुभास्ते स्वेन कर्म्मणा ।
दिष्ट्या चासि पुनः प्राप्तो नहि ते मानुषं
वपुः ॥
प्रत्यक्षदर्शी सर्व्वस्य पित्रा पृष्टो महात्मना ।
स तां वार्त्तां पितुर्म्मध्ये महर्षीणां न्यवेदयत् ॥
कुर्व्वन् भवच्छासनमाशु यातो
ह्यहं विशालां रुचिरप्रभावाम् ।
वैवस्वतीं प्राप्य सभामपश्यं
सहस्रशो योजनहैममाभाम् ॥
दृष्ट्वैव मामभिमुखमापतन्तं
देहीति स ह्यासनमादिदेश ।

वैवस्वतोऽर्घ्यादिभिरर्च्चयेष
भवत्कृते पूजयामास मां स ॥
ततस्त्वहं तं प्रश्नकैरवोचं
वृत. सदस्यैरभिपूज्यमान: ।
प्राप्तोऽस्मि ते विषय धर्म्मराज ।
लोकानर्हयानहं तान् विधत्स्व ॥
यमोऽब्रवीन्मां न मतोऽसि सौम्य
यम पश्यैत्याह स त्वामपस्वी ।
पिता प्रदीप्ताग्निसमानतेजा
न तच्छक्यमनृतं विप्रकर्त्तुम् ॥
दृष्टस्तेऽहं प्रतिगच्छस्व तात
शोचत्यसौ तव देहस्य कर्त्ता ।
ददानि किञ्चापि मन:प्रणीतं
प्रियातिथेस्तव कामान् वृणीष्व ॥
तेनैवमुक्तस्तमहं प्रत्यवोचं
प्राप्तोऽस्मि ते विषय दुर्निवर्त्त्यम् ।
इच्छाम्यहं पुण्यकृतां समृद्धान्
लोकान् द्रष्टुं यदि तेऽहं वरार्हः ॥
यान समारोप्य तु मां स देवो
वाहैर्युक्तं सुप्रभ भानुमत्तत् ।
सन्दर्शयामास सदात्मलोकान्
सर्व्वांस्तथा पुण्यकृतां द्विजेन्द्र ! ॥")

नाचिकेतु, पु, अग्नि । इति त्रिकाण्डशेष: ॥

नाट, पुं, (नट+भावे घञ् ।) नृत्यम् । देशविशेष । कर्णाटक इति ख्यात. । इति शब्दरत्नावली ॥ (तद्देशवासिनि, त्रि । यथा, राजतरङ्गिण्याम् । १ । ३०२ ।
'शास्त्य चोलकर्णाटनाटार्दीश्च नरेश्वरान् ॥")

नाटक, क्ली, (नाटयतीति । नट+णिच्+ण्वुल् ।) गद्यपद्यप्राकृतभाषादिमयग्रन्थविशेष. । तत्पर्याय. । महारूपकम् २ । इति त्रिकाण्डशेष. ॥ तस्य लक्षण यथा,—
"नाटकं ख्यातवृत्त स्यात् पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवत् युक्तं नानाविभूतिभि: ॥
सुखदु:खसमुद्भूतिनानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राङ्का: परिकीर्त्तिता. ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्त. प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मत. ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसा: सर्व्वे कार्य्यं निर्व्वहणेऽद्भुतम् ॥
चत्वार. पञ्च वा मुख्या. कार्य्यव्यापृतपूरुषा: ।
गोपुच्छाग्रसमाग्रन्तु बन्धन तस्य कीर्त्तितम् ॥"
इति साहित्यदर्पणे । ६ । २७७ ॥

अपि च ।
"नाटक स्यात् प्रकरणं व्यायोगोऽङ्कस्तथा डिम: ।
ईहामृग, प्रहसन भाण. समवकारक. ॥
वीथीति भरत: प्राह नाट्येषु दशरूपकम् ।
नाटिका प्रेक्षणश्चैव त्रोटक प्राकट तथा ॥
गोष्ठीसंलापशिल्पानि भाणीदुर्मल्लीरासकौ ।
उल्लाप्यकं श्रीगदित प्रस्थानं नाट्यरासकम् ॥
दुर्म्मल्लिका लासिका च काव्यश्चेत्युपरूपकम् ।
स्यात् षण्णाम सलक्ष्म लक्ष्यलक्षण कथ्यते ॥
प्रख्यातोत्तमनायकं रसमय राजर्षिवंशोद्भव
साङ्कं भञ्जनयान्वितं जयमयं सत्तत्पुराणाश्रयम् ।
भाषावैभवसुन्दरं प्रविलसन्नानाविलास यत्तद्
दृश्यैर्ल्पप्रमशेषसन्धियचित सद्भिर्ब्रुवन्नाटकम् ॥"
अन्ये तु ।
"देवताना मनुष्याणां राज्ञां लोके महात्मनाम् ।
पूर्व्ववृत्तानुचरित प्रख्यातोदात्तनायकम् ॥
प्रवेशकाविष्कम्भादिभि: सन्धिभिरन्वितम् ।
हर्षविषादकथोद्भूत सुखदु:खोदयैर्युतम् ॥
षट्पञ्चदशसम्भाषणवाक्यैरनुभूषितम् ।
नानाविलासलीलाभि. सर्व्वसिद्धिभिरन्वितम् ॥
नानाभावरसैराढ्य नाटकं सूरयो विदु: ।
किञ्चिदङ्गविहीनमपि न त्याज्य नाटकं क्वचित् ॥
आरम्भस्तु प्रयत्नश्च प्राप्ति: सम्भव एव च ।
नियता च फलप्राप्ति: फलयोगस्तथापर: ॥
इत्यवस्थापञ्चक स्यात् नाटके कार्य्यवस्तुन' ।
संस्कृत प्राकृतं भूतभाषापभ्रंशिका गिर: ।
नाटके नियता: प्रोक्ता यथा भाषा रसावहा ॥
भाषाविभाषाभेदेन प्राकृतन्तु चतुर्द्दश ॥
मागध्यावन्तिका प्राच्या शौरसेन्यर्द्धमागधी ।
वाह्लीका दाक्षिणात्याश्च भाषा. सप्त च प्राकृते ॥
शकाराभीरचाण्डालशवरद्रमिडोड्रजा. ।
वर्णौकसीविभाषाणां विभाषा. सप्त कीर्त्तिता: ॥
कैकेयी शौरसेनी च काची पाञ्चालमागधी ।
द्राविड़ी पाण्डुदेशी च भूतभाषा प्रकीर्त्तिता' ॥
वैदर्भी मागधी नाटी काम्बोजी चोपनागरी ।
पाञ्चाली षडपभ्रंशभाषा स्युर्द्देशभेदत: ॥
देवतादर्शनान्तञ्च कर्त्तव्यं नाटक बुधै. ।
राजर्षिदर्शनान्त या तेऽपि देवै: समा मता: ॥
उदाहरणम् । मुरारिकवेरनर्घराघवं भवभूतेरुत्तररामचरित कालिदासस्याभिज्ञानशकुन्तलञ्चेत्यादि । इति नाटकलक्षणम् ।" इति सङ्गीतदामोदर: ॥

नाटक, पुं, (नटति नृत्यति देवयोनिभिरत्र । नट+घञ् । तत. स्वार्थे कन् । यद्वा, नाटयतीति नट+णिच्+ण्वुल् ।) कामाख्यास्यपर्व्वतभेद । यथा,—
"ऐशान्यां नाटके शैले शङ्करस्य महाश्रमम् ।
नित्य वसति तत्रैशस्तदधीना तु पार्व्वती ॥"
इति कालिकापुराणम् ॥
(नाटकशाला । यथा रामायणे । १ । ५ । १२ ।
"वधूनाटकसङ्घैश्च संयुक्तां सर्व्वत. पुरीम् ॥"
नटतीति । नट+ण्वुल् ।) नर्त्तके, त्रि । इति व्याकरणम् ॥

नाटाम्र:, पुं, तरम्बुज. । तत्पर्याय: । पेचाल: २ चित्रफल: ३ सुखाश: ४ राजतेमिष' ५ लतापनस. ६ सेतु. ७ । इति त्रिकाण्डशेष: ॥

नाटार:, पुं, (नट्या नटस्य वा अपत्यम् । "आरगुदीचाम् ।" ४ । १ । १३० । इति आरक् ।) नट्या अपत्यम् । इति मुग्धबोधव्याकरणम् ॥

नाटिका, स्त्री, (नाटक+टापि अत इत्वम् ।) नाटकविशेष: । यथा,—
"कैशिकीवृत्तिसंयुक्ता नारीपरिजनोज्ज्वला ।
चतु:सन्धिविहीना च नाटिका नृपनायिका ॥
इय शृङ्गारबहुला तत: स्यात् कैशिकीमयी ।
त्र्यङ्कीय कैशिकीवृत्तिर्न स्यादन्यरसाश्रया ॥
न कृच्छ्रकराघातमात्र प्राप्नोति कन्दली ।
तास्तां विट. पीठमर्द्द. सचयो वाद्यसचय: ॥
अन्त:पुरचरो राज्ञ ईर्षादियो विदूषक' ।
अत्र भार्य्याविलो राजा निभृत: काममाचरेत् ॥
अन्त:पुरगतां कन्यां देवीगुप्तां पियासति ।
मन्त्रिभि अन्तराव्यस्तु सुखसंस्थापित प्रभु' ॥
युवा भूमिपति: प्रायो निभृत: काममाचरेत् ॥
कन्यामिह परिणयविषयां देवीगुप्तां महिषीं ज्ञानविरहेण ॥ एके तु ।
चतुर्भिरङ्कैरुत्पाद्यमितरैभिर्नृपनायकम् ।
यत् कैशिकीरसप्रायं नाटक सैव नाटिका ॥
पूर्व्वक्रमान्नाटककमादन्तावली नाटिका ।
एवमन्यथेहोदय. ।" इति सङ्गीतदामोदर: ॥
(अस्या लक्षण यथा, साहित्यदर्पणे । ६ । ५३६ ।
"नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृप. ॥
स्यादन्त.पुरसम्बन्धा सङ्गीतव्यापृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥
सम्प्रवर्त्तेत नेतास्यां देव्यास्त्रासेन शङ्कित: ।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥
पदे पदे मानवती तद्वश: सङ्गमो द्वयो: ।
वृत्ति: स्यात् कौशिकी स्वल्पविमर्षा. सन्धय पुन. ॥")

नाटेय:, पुं, (नट्या अपत्यम् । नटी+ढक् ।) नटीसुत: । इति मुग्धबोधव्याकरणम् ॥

नाटेर, पु, (नट्या अपत्यमिति । नटी+ढ्रक् ।) नटीसुत: । इति हेमचन्द्र: । ३ । २१२ ॥

नाट्य, क्ली, (नटानां कार्य्यम् । नट+"छन्दोगौक्थिकयाज्ञिकवह्वृचनटात् ञ्य: ।" ४ । ३ । १२९ । इति ञ्य: ।) नृत्यगीतवाद्यम् । तत्पर्य्याय. । तौर्य्यत्रिकम् २ । इत्यमर: । १ । ७ । १० ॥
(यथा, देवीभागवते । १ । ७ । ३० ।
"नाट्य सतोऽपि सगुणा विविधप्रकार
नो वेत्ति कोऽपि तव कल्पविधानयोगम् ॥")
नटानां धर्म्म' । इति व्याकरणम् ॥ नाट्यारम्भनक्षत्राणि यथा । अनुराधा १७ धनिष्ठा २३ पुष्य. ८ हस्ता १३ चित्रा १४ स्वाती १५ ज्येष्ठा १८ शतभिषा २४ रेवती २७ ॥ इति ज्योतिषम् ॥ * ॥ नाट्यफल यथा,—
"देवर्षिक्षितिपालपूर्व्वचरिताभ्यासोक्तधर्म्मोदय
स्तद्भावाश्रितभूमिकाभिनयने स्यादर्थसिद्धि: परा ।
सङ्गीतामृतचित्तवृत्तिभरत: प्राञ्जा भवत्सज्जना
भाव शृङ्गरसेवयेति कथित नाट्यं चतुर्व्वर्गदम् ॥
यो यस्य दयितो भाव: स त नाट्ये निरीक्षते ।
अत: सर्व्वमनोहारि नाट्यं कस्य न रञ्जकम् ॥"

नाट्योत्पत्तिर्यथा,—
"इत्याशुश्रूयते ब्रह्मा शक्रेणाभ्यर्थितः पुरा ।
चकाराकृष्य वेदेभ्यो नाट्यवेदन्तु पञ्चमम् ॥
उपवेदोऽथ वेदाश्च चत्वारः कथिताः स्मृतौ ।
तत्रोपवेदो गान्धर्व्वः शिवेनोक्तः स्वयम्भुवे ॥
तेनापि भरतायोक्तस्तेन मर्त्ये प्रचारितः ।
शिवाजयोनिभरतास्तस्मादस्य प्रयोजकाः ॥"
इति सङ्गीतदामोदरः ॥

नाट्यधर्म्मिका, स्त्री, (नाट्यधर्म्मोऽस्त्यस्याः क्रियाया इति ठन् ।) दर्शं गार्थशास्त्रोक्तनाट्यम् । यथा, हेमचन्द्रः ।
"गीतवाद्यनृत्यत्रयं नाट्यं तौर्य्यत्रिकञ्च तत् ।
संगीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्म्मिका ॥"

नाट्यप्रियः, पुं, (नाट्यं प्रियं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११२ ॥

नाट्यशाला, स्त्री, (नाट्यस्य नृत्यगीतादेः शाला गृहम् ।) प्रासादद्वारसमीपगृहम् । नाटमन्दिर इति भाषा । यथा,—
"नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया ॥"
इति गरुडपुराणम् ॥

नाट्यालङ्कारः, पु, (नाट्यस्य अलङ्कारः ।) नाट्यभूषणहेतुः । स तु अष्टषष्टिप्रकारः । यथा,—
"सिद्धिर्म्मनोरथोऽभ्रेशो निरुक्तिश्च विशेषणम् ।
गुणाभिपात उद्दिष्टविचारप्राप्तिनीतयः ॥
अभिप्रायः परीहारो गर्हणानुनयौ तथा ।
अर्थापत्तिः प्रसिद्धिश्च दाक्षिण्यं प्रियभाषणम् ॥
अभिमानाख्यानगर्व्वा हर्षक्षोभोद्यमाश्रयाः ।
पश्चात्तापः स्पृहाक्रन्दौ कपटश्च प्रवर्त्तनम् ॥
उत्तेजनञ्च दृष्टान्तः शोभोदाहरणे अपि ।
संशयोऽक्षरसंघातो विमलोक्तिः पदोच्चयः ॥
परीवादोऽनुक्तसिद्धिरक्षमाध्यवसायकौ ।
प्रोत्साहनं तुल्यतर्क उपपत्त्यनुतर्कणे ॥
निवेदनञ्च साहाय्यं याच्ञा पृच्छा विशेषणम् ।
अभिज्ञानञ्च सारूप्यं गुणकीर्त्तनसृक्तयः ॥
विपर्य्ययश्चातिशयो भूषाहेतुर्निदर्शनम् ।
मानाक्षेपश्च सन्देहसमीहाशीर्विसर्पकाः ॥
उल्लेख उपदिष्टी चेत्यष्टषष्टिमिता अमी ।
अलङ्कारा मता नित्यं नाटकादिषु सूरिभिः ॥"
इति सङ्गीतदामोदरः ॥
(साहित्यदर्पणमते त्रयस्त्रिंशत् नाट्यालङ्काराः । यथा, तत्रैव । ६ । २००—२३२ ।
"आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः ।
उत्प्रासनं स्पृहाक्षोभपश्चात्तापोपपत्तयः ॥
आशंसाध्यवसायौ च विसर्पोल्लेखसञ्ज्ञितौ ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम् ॥
प्रोत्साहनञ्च साहाय्यमभिमानोऽनुवर्त्तनम् ।
उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम् ॥
प्रवर्त्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम् ।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः ॥
आशीरिष्टजनाशंसाक्रन्दः प्रलपितं शुचा ।
कपटं मायया यत्र रूपमन्यद्विभाव्यते ॥
अक्षमा सा परिभवः स्वल्पोऽपि नाभिसह्यते ।
गर्व्वोऽवलेपजं वाक्यं कार्य्यस्यारम्भ उद्यमः ॥
ग्रहणं गुणवत्कार्य्यहेतोराश्रय उच्यते ।
उत्प्रासनन्तूपहासो योऽसाधौ साधुमानिनि ॥
आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा ।
अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु ॥
मोहावधीरितार्थस्य पश्चात्तापः स एव तु ।
उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये ॥
आशंसनं स्यादाशंसा प्रतिज्ञाध्यवसायकः ।
विसर्पो यत्समारब्धं कर्म्मानिष्टफलप्रदम् ॥
कार्य्यदर्शनमुल्लेख उत्तेजनमितीष्यते ।
स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक् ॥
भर्त्सना तु परीवादो नीतिः शास्त्रेण वर्त्तनम् ॥
उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा ।
उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम् ॥
प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम् ।
साहाय्यं सङ्कटे यत् स्यात् सानुकूल्यं परस्य च ॥
अभिमानः स एव स्यात् प्रश्रयादनुवर्त्तनम् ।
अनुवृत्तिर्भूतकार्य्याख्यानमुत्कीर्त्तनं मतम् ॥
याच्ञा तु क्वापि याच्ञायाः स्वयं दूतमुखेन वा ।
परीहार इति प्रोक्तः कृतानुचितमार्ज्जनम् ॥
अवधीरितकर्त्तव्यकथनन्तु निवेदनम् ।
प्रवर्त्तनन्तु कार्य्यस्य यत् स्यात् साधुप्रवर्त्तनम् ॥
आख्यानं पूर्व्ववृत्तोक्तिः युक्तिरर्थावधारणम् ।
प्रहर्षः प्रमदाधिक्यं शिक्षा स्यादुपदेशनम् ॥"
एतेषामुदाहरणन्तु तत्रैव द्रष्टव्यम् ॥)

नाट्योक्तिः, स्त्री, (नाट्ये नृत्यगीतादौ या उक्तिः ।) नाटकविषयकवचः । नटानां कर्म्म नाट्यं तत्रोक्तिः नाट्योक्तिः । इति भरतः ॥ तद्यथा । आर्य्येति ब्राह्मणम् । क्षत्रियं महाराजेति । सखीं हलेति । नीचं हण्डे इति । चेटीं हञ्जे इति । स्वामिनमार्य्यपुत्त्रेति । राजश्यालं राष्ट्रियेति । समानं हंहो इति । राजानं देवेति । सार्व्वभौमं भट्टेति । भगिनीपतिमावुत्तेति सम्बोधयेत् । इति सङ्गीतदामोदरः ॥ गणिकायां अज्जुका । विद्वति भावः । जनके आवुकः । कुमारे युवराजभर्त्तृदारकौ । राज्ञि देवभट्टारकौ । राजसुताया भर्त्तृदारिका । कृताभिषेकायां राज्ञ्यां देवी । इतरासु राज्ञीषु भट्टिनी । अवध्योक्तौ अब्रह्मण्यम् । मातरि अम्बा । बालायां वासू । आर्य्ये मारिषः । ज्येष्ठाभगिन्यां अत्तिका । निष्ठाया निर्व्वहणम् । इत्यमरः । १।७।११—१५ ॥ (यथाच साहित्यदर्पणे । ६ । १५४—१६० ।
"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।
सर्व्वश्राव्यं प्रकाशं स्यात्तद्भवेदपवारितम् ॥
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते ।
त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ॥
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ।
किं ब्रवीषीति यत् नाट्ये विना पात्रं प्रयुज्यते ॥
श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम् ॥
दर्त्तां सिद्धाश्च सेनाश्च वेश्यानां नाम दर्शयेत् ।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः ॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत् ॥
नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम् ।
नायिकानायकाख्यानां संज्ञाप्रकरणादिषु ॥
नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ।
प्रायेण ण्यन्तकः साधिर्गमैः स्थाने प्रयुज्यते ॥
राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ।
राजर्षिभिर्वयस्येति तथा विदूषकेण च ॥
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च ।
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः ॥
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ।
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम् ॥
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ।
सूत्रधारो मारिषेति हण्डे इत्यधमैः समाः ॥
वयस्येत्युत्तमैर्हंहो मध्यैरार्य्येति चाग्रजः ।
भगवन्निति वक्तव्याः सर्व्वे देवर्षिलिङ्गिनः ॥
वदेद्राज्ञीञ्च चेटीञ्च भवतीति विदूषकः ।
आयुष्मन्रथिनं सूतो वृद्ध तातेति चेतरैः ॥
वत्स पुत्त्रक तातेति नाम्ना गोत्रेण वा सुतः ।
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः ॥
विप्रैरयममात्येति सचिवेति च भण्यते ।
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः ॥
अगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते ।
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः ॥
स्वामीति युवराजस्तु कुमारो भर्त्तृदारकः ।
सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः ॥
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका ॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः ।
हलेति सदृशी प्रेष्या हञ्जे वेश्याऽज्जुका तथा ॥
कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरतीजनैः ।
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः ॥
शकादयश्च सम्भाष्या भद्रदत्तादिनामभिः ।
यस्य यत् कर्म्म शिल्पं वा विद्या वा जातिरेव वा ॥
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम् ॥")

नाडिः, स्त्री, (नाडयतीति । नड भ्रंशे + णिच् + इन् ।) नाडी । इत्यमरटीकायां भरतः ॥

नाडिक, क्ली, (नाडिरिव प्रतिकृतिः । नाडि + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) कालशाकम् । इति भावप्रकाशः ॥

नाडिका, स्त्री, (नाडी एव । स्वार्थे कन् ।) घटद्वयः । घड़ि इति भाषा । तत्पर्य्यायः । साधारिका २ घटिका ३ । इति हेमचन्द्रः ।२।५१ ॥ घटिकाज्ञानोपायो यथा,—
"निमेषो मानुषो योऽयं मात्रामात्रप्रमाणकः ।
तैः पञ्चदशभिः काष्ठा त्रिंशत् काष्ठास्तथा कला ॥
नाडिका तु प्रमाणेन कला दश च पञ्च च ।
उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश ॥
हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः ।
मागधेन प्रमाणेन यत्प्रस्थस्तु संस्कृतः ॥"
इति विष्णुपुराणम् ॥

"नैमित्तिकलयं प्रपञ्चयिष्यन्निमेषादिक्रमेण प्रथमो-
ऽोक्तमेव कल्पप्रमाणमनुसारयति निमेष इति
सप्तभिः। मात्रैव मात्रं प्रमाणं यस्य। एक-
मात्रलघ्वक्षरोच्चारणकालसंमितो हि निमेषः।
निमेषकालतुल्या हि मात्रा लघ्वक्षरञ्च यदिति
मत्स्याद्युक्तेः। नाडिकाज्ञानोपायमाह।
उन्मानेनेति सार्द्धेन। अम्भस उन्मानेन उन्मी-
यते अनेनेत्युन्मानं पात्रम्। अर्द्धेन योगे त्रयो-
दशसार्द्धद्वादशेत्यर्थः। उन्मानरूपेण घटितानि
सार्द्धद्वादशपलानि सा नाडिका। सार्द्धद्वादश-
पलताम्रनिर्म्मितपात्रेण सा नाडिका ज्ञातव्ये-
त्यर्थः। किं प्रमाणं तत् पात्रं कार्य्यं तदाह
मागधेन प्रमाणेन जलप्रस्थस्तु संस्कृत इति।
सार्द्धद्वादशपलजलेन हि मागधदेशप्रस्थः पूर्य्यते।
तत्प्रमाणं पात्रं कार्य्यमित्यर्थात् सिद्धम्। ननु
तथापि पात्रेण कथं नाडिकाज्ञानं क्रियापरि-
च्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये॥
प्रस्थादि विशिनष्टि हेमेति। माषः पञ्चगुञ्जः।
हेम्नो माषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण
रचितैः कृतच्छिद्रा। एतदुक्तं भवति सार्द्ध-
द्वादशपलताम्रमयं मागधप्रस्थसमितमर्द्धायत
पात्रं चतुर्म्माषचतुरङ्गुलहेमशलाकया कृताध-
श्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन
पूर्य्यते तावान् कालो नाडिकेति। तथा च शुकः।
द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः।
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतमिति॥")
इति तट्टीकायां श्रीधरस्वामी॥ (यथा, सूर्य्य-
सिद्धान्ते। १। ११।
"षड्भिः प्राणैर्विनाड़ी स्यात् तत् षष्ट्या नाड़िका
स्मृता॥"
"षड्भिरिति। षट्प्रमाणैरसुभिः पानीयपलं
भवति पलानां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः॥"
इति तट्टीका॥)

नाड़िकेल, क्ली, (नारिकेल। रस्य ड़त्वम्।)
नारिकेल.। इत्यमरटीकायां भरतः॥

नाडिचीर, क्ली, (नाडिरिव चीरं यत्र।) निर्व्वे-
ष्टनम्। इति हारावली। २१४॥ नली इति
भाषा॥

नाडिन्धमः, पु, (नाड़ीं वंशनलीं धमतीति। ध्मा
शब्दाग्निसंयोगयोः+"नाड़ीमुष्ट्योश्च।" ३।
२। ३०। इति खश्। "पाघ्राध्मास्थेति।" ७।
३। ७८। इति धमादेशः। "खित्यनव्ययस्य।"
६। ३। ६६। इति पूर्व्वपदस्य ह्रस्वः।) स्वर्ण-
कारः। इत्यमरः। २। १०। ८॥ (उच्चनीचा-
धिरोहणात् सद्धर्मुहुर्निश्वासैर्नाड़ीं धमति उप-
तापयतीति। श्वासकारके, त्रि। यथा, भट्टिः।
६। ६४।
"स्तनमेजयसिंहाघ्राणान् स्तनन्धयसमत्विषौ।
कथं नाड़िन्धमान् मार्गानागतौ विषमो-
पलान्॥")

नाडिन्धयः, त्रि, (नाड़ीं धयतीति। धेट पाने+
"नाड़ीमुष्ट्योश्च।" ३। २। ३०। इति खश्।
"खित्यनव्ययस्य।" ६। ३। ६६। इति ह्रस्वः।)
नाड़ीपानकर्त्ता। इति मुग्धबोधव्याकरणम्॥

नाडिपत्रं, क्ली, (नाड़िरिव पत्रं यस्य।) नाडी-
चम्। इति शब्दमाला॥

नाड़ी, स्त्री, (नाड़ि+"कृदिकारादक्तिनः।"
इति वा ङीष्।) नालम्। व्रणान्तरम्। (नाली
घा इति भाषा। यथा, सुश्रुते निदानस्थाने १०
अध्याये।
"तस्यातिमात्रगमनाद्गतिरित्यतश्च
नाडीव यद्वहति तेन मता तु नाड़ी॥"
दन्तमूलगता नाल्यो यथा, तत्रैव १६ अध्याये।
"नालासावी कफकृतो विज्ञेयः सोऽधिमांसकः।
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः॥")
शिरा। गण्डदूर्व्वा। कुहनचर्य्या। षट्क्षण-
कालः। इति मेदिनी। डे, १६॥ शिरार्थे
पर्य्यायः। धमनिः २ सिरा ३। इत्यमरः। २।
६। ६५॥ नाडि. ४ नालि. ५ नाली ६ धमनी
७ शिरा ८। इति भरतः॥ धरणी ९ धरा १०
तन्तुकी ११ जीवितज्ञा १२ सिहा १३। इति
राजनिर्घण्टः॥ *॥ कायनाड़ी त्रिविधा।
एका वायुवहा। अपरा मूत्रविडस्रिरस-
वाहिनी। अपरा आहारवाहिनी। इति
भरतः॥ "सा तु गर्भस्थबालकस्य सप्तभिर्मासै-
र्भवति।" इति सुखबोधः॥ (यथा, तोडलतन्त्रे
८ उल्लासे।

श्रीदेव्युवाच।
"सार्द्धत्रिकोटिनाड़ीनामालयञ्च कलेवरम्।
क्रमेण श्रोतुमिच्छामि तद्वदस्व मयि प्रभो!॥
श्रीशिव उवाच।
लोम्नि कूपे सपादार्द्धकोटयश्चैव सुन्दरि!।
हस्तास्ये च तथा पादेऽप्यलक्षनाड्य स्थिताः॥
उदरे च तथा पायौ पञ्चलक्षा. प्रकीर्त्तिताः।
हृदादिसर्व्वगात्रेषु नवलक्षा प्रकीर्त्तिताः॥
अथ पार्श्वे तथा चर्म्मे तथैव सर्व्वसन्धिषु।
रुद्राण्यून स्थित लक्ष शरीरे नाड्यः प्रिये!॥
ईड़ा च पिङ्गला चैव सुषुम्ना चित्रिणी तथा।
ब्रह्मनाडी च यन्मध्ये पञ्च नाड्यः प्रकीर्त्तिता.॥
कुहूश्च शङ्खिनी चैव गान्धारी हस्तिजिह्विका।
नर्द्दिनी च तथा निद्रा रुद्रसंख्या व्यवस्थिता॥
एता नाड्यः परेशानि! सुषुम्नायाः प्रजायते॥")
नाड़ीक्रममाह।
"सार्द्धत्रिकोट्यो नाड्यो हि स्थूलाः सूक्ष्माश्च
देहिनाम्।
नाभिकन्दनिबद्धास्तास्तिर्य्यगूर्द्ध्वमधः स्थिताः॥
द्विसप्ततिसहस्राणि तासां स्थूला. प्रकीर्त्तिताः।
देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहा.॥
तासाञ्च सूक्ष्मशुषिराणि शतानि सप्त
स्युस्तानि यैरसकृदन्नरस वहद्भिः।
आप्याय्यते वपुरिद हि नृणाममीषा-
मम्भःस्रवद्भिरिव सिन्धुशते. समुद्र.॥
आपादतः प्रततगात्रमशेषमेषा-
मामस्तकादपि च नाभिपुर.स्थितेन।
एतन्मृदङ्ग इव चर्म्मचयेन नद्धं
काय नृणामिह शिराशतसप्तकेन॥
सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटा
तासां एका परीक्षणीया या दक्षिणकरचरण
विन्यस्ता। चतुरधिकेति तदुक्तम्।
तिर्य्यक् कूर्म्मो देहिनां नाभिदेशे
वामे वक्त्रं तस्य पुच्छञ्च याम्ये।
ऊर्द्ध्वे भागे हस्तपादौ च वामौ
तस्याधस्तात् संस्थितौ दक्षिणौ तौ॥
वक्त्रे नाडीद्वयं तस्य पुच्छे नाडीद्वयन्तथा।
पञ्च पञ्च करे पादे वामदक्षिणभागयोः॥
तासां मध्ये एकेति एकस्या एव पादादूर्द्ध्वगम-
नात् दक्षिणेति प्राधान्ये पुरुषाश्रया। यदुक्तम्।
वामे भागे स्त्रिया योन्या नाडी पुंसस्तु दक्षिणे।
इति प्रोक्तो मया देवि! सर्व्वदेहेषु देहिनाम्॥"
नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटता-
मपेक्ष्य परीक्षा। साम्यन्तु न स्यादेव। कृत्रि-
मस्य तु प्रकृतिस्थता। चरणेति वामस्य तु
दक्षिणग्रन्थिपश्चात् पार्श्वस्था दक्षिणस्य तु वाम-
ग्रन्थिपश्चात् पार्श्वस्थैव सदुपदेशात्। करस्था
तु वक्ष्यते॥ *॥
परीक्षाप्रकारमाह।
सव्येन रोगहृतिकूर्परभागभाजा
पीड्याथ दक्षिणकराङ्गुलिकात्रयेण।
अङ्गुष्ठमूलमधिपश्चिमभागमध्ये
नाड़ीं प्रभञ्जनगतिं सततं परीक्षेत॥
सव्येन करेण। रोगहृतिर्गदधारणमित्यापीडने
हेतुः। रोगाणां वातादिपिशुनवायूनां धारणं
यथा स्यात्तथा पीड्येति कश्चित्। भाग इति
समुदितकफोणिपरं भाजेति परीक्षाकालेऽपि
तत्र हस्तस्थितये। आपीड्येत्यर्थान्नाड़ीं एतच्च
पीडन वातादिपौर्व्वापर्य्यबोधनाय। अथेत्या-
पीड़नानन्तर न तु परीक्षाकालेऽप्यापीड़न-
स्थितिः। दक्षिणेति प्रायिकं स्वपरीक्षाया-
मन्यथात्वात्। त्रयेति योग्यतया तर्ज्जनीमध्यमा-
नामिकाग्रहणम्। पश्चिमेत्यङ्गुष्ठस्याधोभागः।
मूलेति तदुक्तम्।
अङ्गुष्ठस्य तु मूले या धमनी जीवसाक्षिणी।
तस्या गतिवशाद्विद्यात् सुखं दुःखञ्च देहिनाम्॥
प्रभञ्जनगतिर्येनेति नाड्यन्तरनिरास। सतत-
मिति सुस्थदशायामपि। तदुक्तम्। भावि-
रोगाभिबोधाय सुस्थनाड़ीपरीक्षणमिति॥ *॥
परीक्षणीयमाह।
वात पित्त कफ द्वन्द्व सन्निपातस्तथैव च।
साध्यासाध्यविवेकञ्च सर्व्वं नाड़ी प्रकाशयेत्॥
सन्निपातमिति सामान्यतः। साध्यासाध्यमिति
विशेषतश्चेत्यर्थः। सर्व्वमित्येतदन्यञ्च रोगादिक-
मित्युपसंहारः।" इति नाडीप्रकाशे प्रथमो-
द्योतः॥ *॥ अथ नाडीज्ञानसमयमाह।
"प्रात कृतसमाचारः कृताचारपरिग्रहम्।
सुखासीनः सुखासीन परीक्षार्थमुपाचरेत्॥
प्रातरिति प्रायिक मध्याह्ने उष्णता इत्युक्तेः॥*॥

निषिद्धकालमाह ।

सद्यः स्नातस्य भुक्तस्य चुत्तृष्णातपसेविनः ।
व्यायामाक्रान्तदेहस्य सम्यङ्नाडी न बुध्यते ॥
तैलाभ्यङ्गे च सुप्ते च तथा च भोजनान्तरे ।
तथा न ज्ञायते नाडी यथा दुर्गतरा नदी ॥

सुप्ते निद्राकाले भोजनान्तरे भोजनमध्ये भोजनावसानमात्रे च । वातमूर्च्छादिक्षणिकरोगे नायं विधिः ॥ * ॥

अथ वातादिस्वभावक्रममाह ।

आदौ च वहते वातो मध्ये पित्तं तथैव च ।
अन्ते च वहते श्लेष्मा नाडिकात्रयलक्षणम् ॥

आदाविति कफोणिपीडितद्वितीयपर्व्वणि । न तु तर्ज्जनीनिवेशस्थले स्थानभेदस्य कुत्राप्यवक्ष्यमाणत्वात् ॥ * ॥

सुस्थताज्ञानार्थमाह ।

भूलतागमनप्राया स्वच्छा स्वास्थ्यमयी शिरा ।

प्रायेति बाहुल्येन । स्वच्छा परितो जाड्यरहिता । स्वास्थ्यमयी सुस्थतात्मिका च । तथा ।

प्रात. स्निग्धमयी नाडी मध्याह्ने चोष्णतान्विता ।
सायाह्ने धावमाना च चिराद्रोगविवर्ज्जिता ॥

चिरादिति अतीतानागतयोर्द्वयोरप्युक्तिः पथ्याशितानामेव ॥ * ॥

वातादीना क्रमेण गतिमाह ।

वाताद्वक्रगता नाड़ी चपला पित्तवाहिनी ।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत् ॥

वक्रेति वायोस्तिर्य्यग्गमनात्तिरो वहन्तीति । एव तत्प्रकोपादिना वार्त्तादिगतिरपि ज्ञातथा । चपलेति वह्नेरूर्द्ध्वज्वलनादूर्द्ध्वचपला । स्थिरेति जलस्य नीचगमनादनुल्बणा । मिश्रिते मिश्रचिह्ना भवति । तेन द्विदोषजे उभयचिह्ना । सर्व्वजे सर्व्वचिह्नेति । चपलता स्थिरतयोः समयभेदेनाविरोधः ॥ * ॥

उक्तवक्रादिसामान्यस्य क्रमेण विशेषमाह ।

सर्पजलौकादिगति वदन्ति विबुधा. प्रभञ्जनेन
नाड़ीम् ।
पित्ते च काकलावकभेकादिगतिं विदु. सुधिय. ॥
राजहंसमयूराणा पारावतकपोतयोः ।
कुक्कुटादिगति धत्ते धमनी कफसंवृता ॥

आदिना वाते वृश्चिकगतिर्दोलायिता । आदिशब्देन पित्ते कलिङ्ककलविङ्कादिगतिः । कफे गजवराङ्गनादिगतिः ॥ * ॥

द्वन्द्वजस्यापि क्रमेणैव भेदानाह ।

मुहुः सर्पगति नाड़ीं मुहुर्भेकगतिं तथा ।
वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥
भुजगादिगतिञ्चैव राजहंसगतिं धराम् ।
वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥
मण्डूकादिगतिं नाड़ीं मयूरादिगतिं तथा ।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः ॥

त्रिदोषजामप्याह ।

उरगादिलावकादिहंसादीनाञ्च बिभ्रती गमनम् ।
वातादीनाञ्च सम धमनीसम्बन्धमाधत्ते ॥

सममिति न्यूनाधिकतानिरासः ॥ क्रमगत्या तु नासाध्यत्वम् । तथा,—

लावतित्तिरिवार्त्तीकगमनं सन्निपातत. ।
कदाचिन्मन्दगा नाडी कदाचिच्छीघ्रगा भवेत् ॥
त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः ।

पित्तक्रमतया कृच्छ्रसाध्यत्वमसाध्यत्वञ्च ॥ * ॥

सामान्यतः सुखसाध्यत्वमाह ।

यदायं धातुमाप्नोति तदा नाडी तथा गतिः ।
तथाहि सुखसाध्यत्वं नाडीज्ञानेन बुध्यते ॥

अयमर्थः । अपराह्णादौ नाड़ी वातोल्बणा प्रथमं वातगत्यैव वहति ततो यथायथं पित्तादिगत्या न तु पित्तोल्बणत्वे वातादिगत्या तदा सुखसाध्यत्व व्यतिरेकेण व्यतिरेकः । तदुक्तमन्यैः ।

नाडी यथाकालगतिस्तथायां
प्रकोपशान्त्यादिभिरेव भूयः ॥ * ॥

तथासाध्यरूपमाह ।

मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा
स्थित्वा स्थित्वा वहति धमनी याति नाशञ्च
सूक्ष्मा ।
नित्यं स्थानात् स्खलति पुनरप्यङ्गुलिं संस्पृशेद्वा
भावैरेव बहुविधविधैः सन्निपातादसाध्या ॥

मन्दं मन्दं मुहुरनुद्भटं अप्रखरमिति यावत् । शिथिलेति स्खलद्गतिरूपम् । व्याकुलेति त्रस्तवदितस्तत. । वाशब्दः समुच्चये । स्थित्वा स्थित्वेत्यावृत्त्या च तद्रूपैव गतिः । नाशमदर्शनम् । गच्छति कदाचिन्नाड़ीस्पन्दोऽपि न सम्भाव्यते इत्यर्थ. । सूक्ष्मेति यदि लभ्यते तदा तथैवानित्यं प्रायः स्थानमङ्गुष्ठमूलं तस्मात् स्खलति कदापि तत्र न स्पन्दत इत्यर्थः । तदुक्तम् । हन्ति च स्थानविच्युतेति किञ्चित् स्फुरती कुत्रापि । पुनरपीति कियद्दूरविलम्बन अङ्गुलीमङ्गुलीमूलमेवमित्यवरूपर्बहुभिर्भावैर्धर्म्मैः । उक्तञ्चान्यत्र ।

महातापेऽपि शीतत्वं शीतत्वे तापिता शिरा ।
नानाविधगतिर्यस्य तस्य मृत्युर्न संशयः ॥

महेत्याशयात्कष्टपित्तादिकृततापनिरास. शीतत्व इत्यत्रापि महेति सम्बध्यते । तथा,—

त्रिदोषे स्पन्दते नाडी मृत्युकालेऽपि निश्चला ।

निश्चला स्पन्दसामान्याभाववती । अतीसारादौ हस्तपादादिस्वेदादिना स्पन्दोपलम्भात् । तथा ।

पूर्व्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माणमाबिभ्रतीं
सन्तानभ्रमण मुहुर्व्विदधतीं चक्राधिरूढामिव ।
तीव्रत्वं दधतीं कलामपि गतिकां सूक्ष्मत्वमातन्वतीं
नोऽसाध्यां धमनीं वदन्ति सुधियो नाडीगतिज्ञानिनः ॥

अयमर्थः । पूर्व्वमिति क्रमविपर्य्यये पित्तादिगतिमतीं वारं वारमेव क्रमेण चक्रोपरिभ्राम्यमाणामिव । तथा तीव्रत्वमतिशयवेगं एवञ्च कदाचिन्मयूरवक्रगमनाम् । तयोत्तरोत्तरं कृशतामापादयन्तीति विशिष्टो हेतुः । तथा चान्यत्र ।

“यात्युच्चा च स्थिरात्यन्ता या चेयं मांसवाहिनी ।
या च सूक्ष्मा च वक्रा च तामसाध्यां विदुर्बुधाः ॥

अत्युच्चा सहजतोऽप्युच्चतरा पृथगिवोन्नता वा कदाचिदिति स्थिरा प्रणिधानेनैव गम्यमानस्पन्दा च । मांसवाहिनी मांसाहार इव गतिमती लगुडप्रायेति । तदुक्तं मांसेन लगुडाकृतिः । मांसेन समं वहतीति न युक्तं तद्रूपपरिज्ञापकप्रकारस्यानुक्तत्वात् । इयमपि विशिष्टबोधनाय । या च सूक्ष्मा च वक्रा चेति पृथगिव वाक्यान्तरमिति ॥ * ॥

असाध्यत्वापवादमाह ।

भारप्रवाहमूर्च्छाभयशोकप्रमुखकारणान्नाडी ।
संमूर्च्छितापि गाढं पुनरपि सा जीवितं धत्ते ॥

चिरतरबहुलभारोद्वहनेन वा विषवेगधारावाहिरुधिरदर्शनादिजनितमूर्च्छया वा राक्षसादिसन्दर्शनादिभयेन वा पुत्रादिविरहजनितशोकातिरेकेण वा संमूर्च्छितापि अतिनिस्पन्दापि । गाढमिति सुतरां कार्श्यादियोगेऽपीत्यर्थः । पुनरिति साध्यतां यातीत्यर्थ. । भावानां रत्यादीनां प्रवाह इति न युक्तं भयशोकयोः पृथग्विधानात् । प्रमुखेत्यनेन हेत्वन्तराभिधानम् । तदुक्तम् ।

पतितः सन्धितो भेदी नष्टशुक्रश्च यो नरः ।
शाम्यते विस्मयस्तस्य न किञ्चिन्मृत्युकारणम् ॥

पतित. उच्चादितः सन्धितः अस्थ्यादिसन्धानेन संहितः भेदी अतीसारवान् नष्टशुक्रो यक्ष्मादिनातिरमणेन वा शुक्रक्षयवान् । विस्मयोऽसाध्यत्वानुमानं शाम्यति नावतरति । कारणं प्रागुक्त तत्तदेव । अन्यत्रापि ।

तथा भूताभिषङ्गेऽपि त्रिदोषवदुपस्थिता ।
समाङ्गा वहते नाडी तथा च न क्रमं गता ॥
अपमृत्युन रोगाङ्गा नाडी तत्सन्निपातवत् ।

भूताभिषङ्गे तथा भूतसामान्याभिषङ्गे च देवजुष्टादौ नाडी सन्निपातधर्म्मशालिनी उपस्थिता । आपातत एव भवति न तु तत्फलप्रदा । भेदमाह । समेति वातपित्तकफस्वभावक्रमवती तथाक्रमं व्यतिक्रम न गता । तस्मादेव अपमृत्युः अपगतो मृत्युर्यस्याः सा तथा । परमार्थतः सन्निपातवदपि सन्निपातजन्या न स्यात् इति । तदुक्तम् ।

स्वस्थानहीने शोके च हिमाक्रान्ते च निर्गदा ।
भवन्ति निश्चला नाड्यो न किञ्चित्तत्र दूषणमिति ॥

स्वस्थानहीन उच्चादितः पतने । अङ्गुष्ठमूलनस्वरण इति तुल्यार्थः । निर्गदा इत्यसङ्गति' निर्गदा अपि निश्चला भवन्ति । दूषणमसाध्यत्वम्रम' । अन्ये त्वाहुः ।

स्तोकं वातकफं दुष्टं पित्तं वहति दारुणम् ।
पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति ॥

अयमर्थः । वातकफाभ्यां नाडी किञ्चिद्वहति दुष्ट चीणत्वाधिकत्वाभ्यामपि विशेषादुल्बणं

पित्तं विषमवेगेन वहति तदा तत्प्रतिकारार्थं भेषजं कुर्य्यात् । असाध्यता न स्यादिति यावत् ।
अत्र कश्चित् ।
स्वस्थानच्यवनं यावन्नाड्या नोपजायते ।
तावच्चिकित्सासत्त्वेऽपि नासाध्यत्वमिति स्थितिरिति ।

तच्च प्रायिकं बहुधा व्यभिचारदर्शनात् । हन्ति च स्थानविच्युतेत्यत्र चकारस्यायोगव्यवच्छेदकत्वमित्यर्थः ॥ * ॥ प्रसङ्गात् कालनिर्णयमाह ।
भूलताभुजगाकारा नाडी देहस्य संक्रमात् ।
विशीर्णा क्षीणतां याति मासान्ते मरणं भवेत् ॥
कदाचित् महीलतावत् कृशा तद्गतिवदति-मन्दवक्रगमना च । कदाचित् सर्पवत् परिपुष्टा तद्गतिवद्बलवत्तरवक्रगमना च इति वैशिष्ट्येन तत्सदृशासौ भेदः । इत्यञ्च कदाचिदलघुतामतिकृशतां च यदा गच्छति । देहेऽतिदेहक्रममपेक्ष्य तेन देहोऽपि यदा स्थूलः शोथादिना कदाचिच्च लघुः स्यात् तदा द्वितीये मासि म्रियत इति । तथा,—
क्षणाद्गच्छति वेगेन शान्ततां लभते क्षणात् ।
सप्ताहान्मरणं तस्य यद्यङ्गे शोथवर्ज्जितः ॥
क्षणादिति द्रुतं द्रुतं न तु कदाचिदिति । शान्तता-मनुपलभ्यमानत्वम् । शोथेति तस्मात्तत्सम्बन्धे तु नाचिरं मरणाय चिरमेवेत्यर्थः । तथा,—
हिमवद्विशदा नाडी ज्वरदाहेन तापिनाम् ।
त्रिदोषस्पर्शभजतां तदा मृत्युर्दिनत्रयात् ॥
यदा निरन्तरं ज्वरदाहतापौ शैत्यञ्च नाड्याः । त्रिदोषेति । सन्निपातलक्षणसत्त्व एव भवति ॥
तदा,—
निरीक्ष्या दक्षिणे पादे तदा चैषा विशेषतः ।
मुखे नाडी वहेन्नित्यं ततस्तु दिनतुर्य्यकम् ॥
गतिस्तु भ्रमरस्येव वहेदेकदिनेन तु ।
कन्देन स्पन्दते नित्यं पुनर्लगति चाङ्गुलौ ॥
मध्ये द्वादशयामानां मृत्युर्भवति निश्चितम् ।
दक्षिण इति पुंसः । स्त्रियास्तु वाम एव तथेति करस्यैव विशेषतो विशेषज्ञानाय । यदि चोभयनाड्यपि मुखे पुरोभागे नित्यं सदा वहति तदा दिनचतुष्टयं प्राप्य भ्रमरस्य परिभ्रमण-रूपं गमनमिव मुख एव यदि वहति तदैक-दिनेन । कन्दे मूले स्पन्दनस्थाने कदाचित् न स्पन्दते स्वल्पं स्पन्दत इति सम्भाव्यते । नित्यं प्राय पुनश्चाङ्गुलौ तन्मूले कदापि लगति तदा तस्मादारभ्य द्वादशप्रहरमध्य एव मृत्युरिति ।
तथा,—
स्थिरा नाडी मुखे यस्य विद्युद्द्योतिरिवेक्ष्यते ।
दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम् ॥
स्थिरेत्यादिस्तत्र स्थिरा स्थिरा विद्युत्स्फुरण-मिव लक्ष्यते द्वितीय इत्यष्टप्रहरादूर्द्ध्वमित्यर्थः ।
तथा,—
स्वस्थानविच्युता नाडी यदा वहति वा न वा ।
ज्वाला च हृदये तीव्रा तदा ज्वालावधि-स्थितिः ॥

न वेति स्थिरा स्थिरेत्यर्थः । इत्यञ्च यदसाध्य-लक्षणमुक्तमवस्थानादपवादविरहे सति तस्यार्थ-प्रवेशो यथायथमार्ष्यमतिभिरवगन्तव्य इति नेह प्रतन्यते ग्रन्थगौरवभयात् । मन्दं मन्दमिति अनेन न च भूलतागमनाकारेति विरुध्यते तस्य तात्कालिकमरणविषयत्वात् । सर्व्वमिदं सर्व्वरोग एव वेदितव्यं ज्वरमात्रे तु भ्रम एवेति।”
इति नाडीप्रकाशे द्वितीयोद्योतः ॥ * ॥
अथ रोगेषु निरूपणीयेषु प्रधानतया प्रथमं ज्वरनिरूपणमाह । तत्र ज्वरपूर्व्वरूपे ।
“अङ्गग्रहेण नाडीनां भवन्ति मन्थराः प्लवाः ।
प्लवः प्रबलतां याति ज्वरदाहोऽभिभूतये ॥
सान्निपातिकरूपेण भवन्ति यन्त्रवेदनाः ॥
ज्वररूपमाह ।
ज्वरकोपे च धमनी सोष्मा वेगवती भवेत् ।
उष्णा पित्ताद्वते नास्ति ज्वरो नास्त्युष्मणा विना ॥
उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते ॥
अन्यत्र च ।
ज्वरे च वक्रा धावन्ती तथा च मरुतः प्लवे ।
रमणान्ते निशि प्रातस्तथा दीपशिखा यथा ॥
तत्रापि विशेषमाह ।
सौम्या सूक्ष्मा स्थिरा मन्दा नाडी सहज-वातजा ।
स्थूला च कठिना शीघ्रा स्पन्दते तीव्रमारुते ॥
द्रुता च सरला शीघ्रा दीर्घा पित्तज्वरे भवेत् ।
शीघ्रमाहनन नाड्याः काठिन्याच्च चला तथा ॥
मलाजीर्णनातितरां स्पन्दनञ्च प्रकीर्त्तितम् ।
नाडी तन्तुसमा मन्दा शीतला श्लेष्मदोषजा ॥
द्वन्द्वजमाह ।
चञ्चला तरला स्थूला कठिना वातपित्तजा ।
ईषच्च दृश्यते तूष्णा मन्दा स्यात् श्लेष्मवातजा ॥
निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातजम् ।
रूक्षवातभवे तस्य नाडी स्यात् पित्तसन्निभा ॥
सूक्ष्मा शीता स्थिरा नाडी पित्तश्लेष्मसमुद्भवा ॥
प्रसङ्गादाह ।
मध्ये करे वहेन्नाडी यदि सन्तापिता ध्रुवम् ।
तदा नूनं मनुष्यस्य रुधिरापूरिता मलाः ॥
आगन्तुकरूपभेदमाह ।
भूतज्वरे सेक इवातिवेगा
धावन्ति नाड्यो हि यथाब्धिगामाः ।
तथा,—
ऐकाहिकेन क्वचन प्रदूरे
क्षणान्तगामा विषमज्वरेण ।
द्वितीयके वापि तृतीयतुर्य्ये
गच्छन्ति तप्ता भ्रमिवत् क्रमेण ॥
अन्यत्रापि ।
उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते ।
उद्वेगक्रोधकामेषु भयचिन्ताश्रमेषु च ॥
भवेत् क्षीणगतिर्नाडी ज्ञातव्या वैद्यसत्तमैः ॥
प्रसङ्गादाह ।
व्यायामे भ्रमणे चैव चिन्तायां श्रमशोकतः ।
नानाप्रभावगमना शिरा गच्छति विज्वरे ॥

अजीर्णरूपमाह ।
अजीर्णे तु भवेन्नाडी कठिना परितो जडा ।
प्रसन्ना च द्रुता शुद्धा त्वरिता च प्रवर्त्तते ॥
तत्र विशेषमाह ।
पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेज्जडा ।
असृक्पूर्णा भवेत् कोष्णा गुर्व्वी सामा गरीयसी ॥
प्रसङ्गाद्भक्ष्यज्ञानमाह ।
पुष्टिस्तैलगुडाहारे मांसे च लगुडाकृतिः ।
क्षीरे च स्तिमिता वेगा मधुरे भेकवद्गतिः ॥
रम्भागुडवटाहारे रूक्षशुष्कादिभोजने ।
वातपित्ताग्निरूपेण नाडी वहति निष्क्रमम् ॥
अथ रसज्ञानम् ।
मधुरे बर्हिगमना तिक्ते स्याद्भूलतागतिः ।
अम्ले कोष्णा प्लवगतिः कटुके भृङ्गसन्निभा ॥
कषाये कठिना म्लाना लवणे सरला द्रुता ।
एवं द्वित्रिचतुर्योगे नानाधर्म्मवती धरा ॥
तथा,—
द्रवेऽतिकठिना नाडी कोमला कठिनाशने ।
द्रवद्रव्यस्य काठिन्ये कोमला कठिनापि च ॥
क्षौद्रे पृथग्ग्रन्थिलेव पिष्टे पुष्टेव जायते ॥
अग्निमान्द्यधातुक्षयलक्षणमाह ।
मन्दाग्नेः क्षीणधातोश्च नाडी मन्दतरा भवेत् ॥
तदुक्तम् ।
क्षीणधातौ च मन्दाग्नौ नाडी क्षीणसमा ध्रुवम् ॥
तथा,—
मन्देऽग्नौ क्षीणतां याति नाडी हंसाकृति-स्तथेति ॥
अन्ये तु ।
आमाश्रये पुष्टिविवर्द्धनेन
भवन्ति नाड्योऽसृगुणाभिदृष्टाः ।
आहारमान्द्यादुपवासतो वा
तथैव नाड्यो भुजगायमानाः ॥
प्रसङ्गाद्दीप्ताग्निज्ञानमाह ।
लघ्वी भवति दीप्ताग्नेस्तथा वेगवती मता ।
प्रसङ्गाद्गर्भिणीमप्याह ।
पादे च हंसगमना करे मण्डूकसम्प्लवा ।
तस्याग्नेर्मन्दता देहे लथवा मदक्षीगदे ॥
तथा,—
भेदेन शान्ता ग्रहणीगदेन
निर्वीर्य्यरूपा त्वतिसारभेदे ।
विलम्बिकायां प्लवगा कदाचि-
दामातिसारे पृथुला जडा च ॥ * ॥
अथ विसूचिकाज्ञानम् ।
निरोधे मूत्रशकृतोर्विड्ग्रहे त्वितराश्रिताः ।
विसूचिकाभिभूते च भवन्ति भेकवत् क्रमाः ॥ * ॥
प्रसङ्गादानाहमूत्रकृच्छ्रज्ञानमाह ।
आनाहे मूत्रकृच्छ्रे च भवेन्नाडी गरिष्ठता ॥ * ॥
शूलज्ञानमाह ।
वातेन शूलेन मरुत्प्लवेन
सदैव वक्रा हि शिरा वहन्ती ।
ज्वालामयी पित्तविचेष्टितेन
साध्या न शूले न च पुष्टरूपा ॥ * ॥

अथ प्रमेहज्ञानम्।
प्रमेहे ग्रन्थिरूपा सा सुतप्ता त्वामदूषयेत् ॥*॥
विषविष्टम्भगुल्मज्ञानमाह।

उत्पित्सुरूपा विषदिग्धिकायां
विष्टम्भगुल्मेन च वक्ररूपा।
अत्यर्थवातेन अधः स्फुरन्ती
उत्तानमेदिन्यसमाप्तिकाले ॥*॥

गुल्मे विशेषमाह कश्चित्।

गुल्मेन कम्पोऽथ पराक्रमेण
पारावतस्येव गतिं करोति ॥*॥

अथ भगन्दरज्ञानम्।
व्रणार्द्धे कठिने देहे प्रयाति पैत्तिकं क्रमम्।
भगन्दरानुरूपेण नाडीव्रणनिवेदने।
प्रयाति वातिकं रूपं नाडी पावकरूपिणी ॥
अथ वान्तादिज्ञानम्।

वान्तस्य शल्याभिहतस्य जन्तो-
र्वेगावरोधाकुलितस्य भूय.।
गतिं विधत्ते धमनी गजेन्द्र-
मरालमानेव कफोल्वणेन ॥

स्त्रीरोगादिकमपि रक्तादिज्ञानक्रमेण ज्ञातव्यम्।
क्वचित्प्रकरणोल्लेखात् क्वचिदौचित्यमात्रतः।
क्वचिद्देशात् क्वचित् कालात् सङ्कीर्णगदनिर्णयः ॥
नाडीपरिचयज्ञानं प्रायशो नैव दृश्यते।
तेन धार्य्या मयोक्ता यत्नात् समाधेयसत्तमैः ॥"
इति श्रीशङ्करसेनकविराजकृते नाडीप्रकाशे तृतीयोद्योतः ॥

नाडीकः, पुं, (नाडीव कायतीति। कै+कः।) शाकविशेषः। पाटशाक इति नालिताशाक इति च भाषा ॥ तत्पर्य्यायः। पट्टशाकः २ नाडीशाकः ३। अस्य गुणाः। रक्तपित्तनाशित्वम्। विष्टम्भित्वम्। वातकोपनत्वञ्च। इति भावप्रकाशः ॥

नाडीकलापकः, पुं, (नाडीनां नाडीवन्नालानां कलापः समूहो यत्र। कप्।) सर्पाक्षी। इति भावप्रकाशः ॥

नाडीकेलः, पुं, (नारिकेलः। पृषोदरादित्वात् साधुः।) नारिकेलः। इति शब्दरत्नावली ॥

नाडीचः, पुं, (नाड्या चीयते इति। चि+बाहुलकात् डः।) शाकविशेषः। नालिता इति भाषा। तत्पर्य्यायः। केमुकम् २ पेमुली ३ पेमुः ४ विषरोपनः ५। इति त्रिकाण्डशेषः ॥ "नाडीचशाकं द्विविधं तिक्तं मधुरमेव च। रक्तपित्तहरं तिक्तं क्रिमिकुष्ठविनाशनम्। मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृत् ॥" इति राजवल्लभः ॥

नाडीचरणः, पुं, (नाडीवच्चरणौ यस्य।) पक्षी। इति त्रिकाण्डशेषः ॥

नाडीजङ्घः, पुं, (नाडीवत् जङ्घा यस्य।) काकः। इति त्रिकाण्डशेषः ॥ मुनिविशेषः। यथा। "नाडीजङ्घः सुरगुरुसनिर्व्वक्ति दृष्टेरकालौ मायावन्तौ च शुभफलदौ पौषमाघौ च शेषान्।" इति मलमासतत्त्वम् ॥ बकविशेषः। यथा, महाभारते। १२। १६९। १६—२०।

"ततोऽस्तं भास्करे याते सन्ध्याकाल उपस्थिते।
आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः ॥
नाडीजङ्घ इति ख्यातो दयितो ब्रह्मणः सखा।
बकराजो महाप्राज्ञः कश्यपस्यात्मसम्भवः ॥"

नाडीतरङ्गः, पुं, (नाड्यां नालायां तरङ्गो यत्र।) काकोलः। हिण्डकः। रतहिण्डकः। इति मेदिनी। गे, ५६ ॥

नाडीतिक्तः, पुं, (नाड्या तिक्तः।) नेपालनिम्बः। इति राजनिर्घण्टः ॥ (नेपालनिम्बशब्देऽस्य विशेषो ज्ञेयः ॥)

नाडीदेहः, पुं, (नाडीसारो देहो यस्य। कृशत्वात् तथात्वम्।) भृङ्गी। इति त्रिकाण्डशेषः ॥

नाडीनक्षत्रं, क्ली, (नाडीस्थितं नक्षत्रम्।) नरस्य जन्मदशमषोडशाष्टादशत्रयोविंशपञ्चविंशनक्षत्राणि। राज्ञः पूर्व्वोक्तानि जातिदेशाभिषेकनक्षत्राणि च। यथा,—

"जन्माद्यं कर्म्म ततोऽपि दशमं साङ्घातिकं षोडशभम्।
समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
आद्यात्तु पञ्चविंशं मानसमेवं नरः षड्भश्च स्यात्।
नवनक्षत्रो नृपतिः स्वजातिदेशाभिषेकर्क्षैः ॥"*॥

जात्यृक्षन्तु।

"पूर्व्वात्रयं सानलमग्रजानां
राज्ञान्तु पौष्णेन सहोत्तराणि।
सपौष्णमित्रं पितृदैवतञ्च
प्रजापतेर्भञ्च कृषीवलानाम् ॥
आदित्यहस्ताभिजिदश्विभानि
तान्यन्त्यजातेः प्रभविष्णुतायाम्।

देशभं देशनामर्क्षम्। नाडीनक्षत्राणि ॥*॥

हृष्टा देहार्थहानिः स्याज्जन्मर्क्षे उपतापिते।
कर्म्मर्क्षे कर्म्मणां हानिः पीडा मनसि मानसे ॥
मूर्त्तिद्रविणबन्धूनां हानिः साङ्घातिके तथा।
सप्तमे सामुदायिके मित्रभृत्यार्थसङ्क्षयः।
वैनाशिके विनाशः स्याद्देहद्रविणसम्पदाम् ॥
नाडीनक्षत्रफलम् ॥*॥
जातिभे कुलनाशः स्याद्बन्धनञ्चाभिषेकभे।
देशभे देशभङ्गः स्यात् क्रूरैरेव शुभैः शुभम् ॥
यस्मिन् राजाभिषेको भवति तदाभिषेचनिकभम्। अ इ उ ए कृत्तिका। ओ व वि वु रोहिणीत्यादि देशभम्।
सर्व्वेषां पीडायां दिनमेवमुपोषितोऽनलं जुहुयात्।
सावित्र्या क्षीरतरोः समिद्भिरमरद्विजागुरतः ॥"
इति ज्योतिस्तत्त्वम् ॥

नाडीविग्रहः, पुं, (नाडीसारो विग्रहो यस्य। अतिकृशत्वात् तथात्वम्।) भृङ्गी। इति हेमचन्द्रः। २। १२४ ॥

नाडीव्रणः, पुं, (नाडीसंलग्नो व्रणः।) सर्व्वदागलद्व्रणः। नाली घा इति भाषा। इत्यमरः। २। ६। ५४ ॥ तस्य निदानं यथा,—

"यः शोथमाममिति पक्कमुपेक्षतेऽज्ञो
यो वा व्रणं प्रचुरपूयमसाधुवृत्तः।
अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य
स्थानानि पूर्व्वविहितानि ततः सपूयः ॥
तस्यातिमात्रगमनाद्गतिरिष्यते तु
नाडीव यद्वहति तेन मता तु नाडी ॥"*॥

वातादिदोषभेदेन तस्य रूपाणि यथा,—

"दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संमूर्च्छितैरपि च शल्यनिमित्ततोऽन्या।
तत्रानिलात् परुषसूक्ष्ममुखी सशूला
फेनानुविद्धमधिकं स्रवति क्षपासु ॥
पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकमुष्णमहःसु चापि।
ज्ञेया कफाद्बहुघनार्ज्जुनपिच्छिलास्रा
स्तब्धा सकण्डुररुजा रजनीप्रवृद्धा ॥
दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि।
तामादिशेत् पवनपित्तकफप्रकोपात्
घोरामसुक्षयकरीमिव कालरात्रिम् ॥
दोषद्वयाभिहितलक्षणदर्शनेन
तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात् ॥"

शल्यनिमित्तलक्षणं यथा,—

"नष्टं कथञ्चिदनुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति।
सा फेनिलं मथितमच्छमसृग्विमिश्र-
मुष्णं करोति सहसा सरुजञ्च नित्यम् ॥"

असाध्यकृच्छ्रसाध्ययोर्लक्षणं यथा,—

"नाडी त्रिदोषप्रभवा न सिध्येत्
शेषाश्चतस्रः खलु यत्नसाध्याः ॥"

इति माधवकरः ॥*॥

"विडङ्गत्रिफला कृष्णाचूर्णं लीढं समाक्षिकम्।
हन्ति कुष्ठं कृमीन् मेहनाडीव्रणभगन्दरान् ॥"

इति गरुडपुराणम् ॥

(अस्य चिकित्साप्रकारं यथा,—

"नाडीनां गतिमन्विष्य शस्त्रेणापाट्य कर्म्मवित्।
सर्व्वव्रणक्रमं कुर्य्यात् शोधनं रोपणादिकम् ॥
नाडीं वातकृतां साधु पाटितां लेपयेद्भिषक्।
प्रत्यक् पुष्पीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत् ॥
पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशायुगैः।
श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः।
शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम्।
आरग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुता।
सूत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशिनी ॥

घोण्टाफलत्वङ्मदनात् फलानि
पूगस्य च त्वक् लवणञ्च मुख्यम्।
स्नुह्यर्कदुग्धेन सहैष कल्को
वर्त्तीकृतो हन्त्यचिरेण नाडीम् ॥
वर्त्तीकृतं माक्षिकसंप्रयुक्तं
नाडीघ्नमुक्तं लवणोत्तमं वा।

नानावर्णः, पुं, (नानाविधो वर्णः ।) बहुविधशुक्लादिवर्णः । इति भरतः ॥ तत्पर्य्यायः । चित्रम् २ किर्म्मीरः ३ कल्माषः ४ शबलः ५ एतः ६ कर्व्वुरः ७ । इत्यमरः ।१।५।१७॥ चित्रम् ८ शारङ्गम् ९ कम्बरः १० कर्म्मारः ११ चित्रलः १२ । इति शब्दरत्नावली ॥ नानाजातियादिश्च ॥ (नानाविधो वर्णो यस्येति । विचित्रवर्णयुक्ते, त्रि । यथा, सुश्रुते । ६ । १८ । ‘नानावर्णा लघ्वायती प्रचिरमाल्पमांसुरत्त-प्रदोषाचिसुषभूयिष्ठा ॥”)

नानाविध, त्रि, (नाना विधा प्रकारा यस्य ।) अनेकप्रकारः । विविधः । यथा,—
“तथा नानाविधैः पुष्पैर्द्देवेशौरक्रयार्च्चते ॥”
इति हरिभक्तिविलासे १६ विलासः ॥

नानुलेय, त्रि, (न अनुलेयम् ।) अननुलेयम् । अकर्त्तव्यम् । इति व्याकरणम् ॥

नान्ता, स्त्री, (नमत्यनेनेति । नम+“असिसञ्जिगमि-नमिहनिविश्यशां वृद्धिश्च ।” उणां । ४ । १५८। इति ष्ट्रन् वृद्धिश्च ।) स्तोत्रम् । इत्युणादिकोषः ॥

नान्दिकर पुं, (करोतीति । कृ+अच् । नान्द्याः नान्दीश्लोकस्य करः पाठकः । “दृष्टापि सत्रान्दर्शोर्व्वहुलम् ।” ६ । ३ । ६३ । इति ह्रस्वः ।) नान्दीकरः । इत्यमरटीकायां रमानाथः ॥

नान्दी, स्त्री, (नन्दन्त्यनयेति । नन्द+घञ् । निपातनात् दीर्घः । ततो ङीप् ।) नाटकाद्यादौ मङ्गलार्था देवद्विजादीनामाशीः । यथा,—
“आशीर्व्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्त्तते ।
देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता ॥
केचित्तु । भेरीप्राया नान्दी ।” इत्यमरटीकायां भरतः ॥ * ॥ नाटके विघ्नविघातायादौ नान्दी कार्य्या । यदाह भरतः ।
“यद्यप्यङ्गानि भूयांसि पूर्व्वरङ्गस्य नाटके ।
तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नप्रशान्तये ॥
देवद्विजनृपादीनामाशीर्व्वादपरायणा ।
नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिता ॥”
अन्यच्च ।
‘देवद्विजनृपादीनामाशीर्व्वन्दनपूर्व्विका ।
नान्दी कार्य्या बुधैर्यत्नान्नमस्कारेण संयुता ॥
गङ्गा नागपतिः सोमः सुधा नन्दा जयाश्रयः ।
एभिर्नामपदैः कार्य्या नान्दी धाराभिरङ्किता ॥
प्रशस्तपदविन्यासा चन्द्रसङ्कीर्त्तनान्विता ।
आशीर्व्वादपरा नान्दी योज्येयं मङ्गलात्मिका ॥
काचिद्द्वादशपदा नान्दी काचिदष्टपदा तथा ।
सूत्रधारः पठेन्नान्दीं मध्यमस्वरमाश्रितः ॥”
इति मालतीमाधवटीका ॥
समृद्धिः । यथा । “नान्दी समृद्धिरिति कथ्यते ।” इत्युदाहृतत्त्वे ब्रह्मपुराणम् ॥

नान्दीकः, पुं, (नान्द्यै नान्द्यर्थं कायतीति । कै+कः ।) तोरणस्तम्भः । इति त्रिकाण्डशेषः ॥

नान्दीकरः, त्रि, (नान्दीं करोतीति । कृ+“दिवा-विभेति ।” ३ । २ । २१ । इति टः ।) नान्दीश्लोकपाठकारी । तत्पर्य्यायः । नान्दीवादी २ । इत्यमरः । १ । ६ । १८ ॥ “केचित्तु भेरीप्राया नान्दी तद्वादनशीलः अत्र वदितव्यौ नाद-नार्थाविवाह ।” इति भरतः ॥

नान्दीपटः, पुं, (नान्द्यै वृद्ध्यर्थं पटो यत्र ।) कूपादिमुखबन्धनम् । तत्पर्य्यायः । नान्दीमुखः २ पीनाहः ३ । इति हेमचन्द्रः । ४ । १५८ ॥

नान्दीमुख, पुं (नान्द्यै वृद्ध्यर्थं मुखं यस्य ।) कूपादिमुखबन्धनम् । इति हेमचन्द्रः । ४।१५८॥ वृद्धिश्राद्धभुक् पितृगणः । यथा,—
“नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥”
इति विष्णुपुराणम् ॥
स च पितादित्रिकं मातामहादित्रिकञ्च । इति गोभिलसूत्रम् ॥ (नान्द्या वृद्धेर्मुखम् ।) वृद्धिश्राद्धे, स्त्री । यथा —
“नान्दीमुखे विवाहे च प्रपितामहपूर्व्वकम् ।
अथ नान्दीमुखपदस्य श्राद्धपरत्वे इत्युदाहृत-तत्त्वे नान्दीमुखपदस्य श्राद्धपरत्वम् ।” तदितिकर्त्त-व्यता यथा । “तत्र गोभिलः । अथाभ्युदयिक-श्राद्धे युग्मानाशयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः सम्पन्नमिति तृप्तिप्रश्नः दधिबदराक्षतमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दी-मुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तामिति न स्वधाञ्च प्रयुञ्जीतेति ॥ अपि च ।
स्वधेतिपदस्थाने पुष्ट्यास्त्विति वदेदिह ।
पितृनितिपदात् पूर्व्वं वदेन्नान्दीमुखानिति ॥
कर्म्मादिषु च सर्व्वेषु मातरः सगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥
प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु ।
अपि चाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः ॥
कुड्यलग्नां वसोर्धारां सप्तधारां घृतेन तु ।
कारयेत् पञ्च धारां वा नातिनीचां न चोच्छ्रिताम् ॥
आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥
वशिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्योऽत्र निरा-मिषः ।

अतः परं प्रवक्ष्यामि विशेष इह यो भवेत् ॥
प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा ।
उपवेश्य कुशान् दद्यादृजुनैव हि पाणिना ॥
निपातो न हि सव्यस्य जानुनो विद्यते क्वचित् ।
सदा परिचरेद्भक्त्या पितृनप्यत्र देववत् ॥
पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान् ।
गोत्रनामभिरामन्त्र्य पितृनर्घ्यं प्रदापयेत् ॥
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते ।
पात्राणां पूरणादीनि दैवे नैव तु कारयेत् ॥
ज्येष्ठोत्तरकरान् युग्मान् कराग्र्याग्रपवित्रकान् ।
कृत्वार्घ्यं सम्प्रदातव्यं नैकैकस्यात्र दीयते ॥
मधु मध्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम् ।
गायत्र्यानन्तरं सोऽत्र मधुमन्त्रविवर्ज्जितः ॥
न चाश्नत्सु जपेदत्र कदाचित् पितृसंहिताम् ।
अन्य एव जपः कार्य्यः सोमसामादिकः शुभः ॥
यस्तत्र प्रकरोऽन्नस्य तिलवद्यववत्तथा ।
उच्छिष्टसन्निधौ सोऽत्र तृप्तेषु विपरीतकः ॥
सम्पन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते ।
सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् ॥
प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्व्ववत् ।
अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निम्नगाः ॥
द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः ।
मातामहप्रभृतींस्तु एतेषामेव वामतः ॥
सर्व्वमादाय सूक्तञ्च पद्मजं सममिश्रं च ।
संयोज्य यवकर्कन्धुदधिभिः प्राङ्मुखस्ततः ॥
अवनेजनवत् पिण्डान् दत्त्वा बिल्वप्रमाणकान् ।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् ॥
उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरम् ।
भवेदधश्चाधरश्चादधोऽधः श्राद्धकर्म्मसु ॥
तस्मात् श्राद्धेषु सर्व्वेषु वृद्धिमत्स्वितरेषु च ।
मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्व्वपेत् ॥
गन्धादीन्निक्षिपेत्तूष्णीं तत आचामयेद्
द्विजान् ॥”
“अथाग्रभूमिमासिञ्चेत् सुसंप्रोक्षितमस्त्विति ।
शिवा आपः सन्त्विति च युग्मानेवोदकेन च ॥
सौमनस्यमस्त्विति च पुष्पादानमनन्तरम् ।
अक्षतञ्चारिष्टञ्चास्त्वित्यक्षतानपि दापयेत् ॥
अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते ।
षष्ठ्यैव नित्यं तत् कुर्य्यान्न चतुर्थ्या कदाचन ॥
प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः ।
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत् ॥
युग्मानेव स्वस्तिवाच्यानङ्गुष्ठग्रहणं सदा ।
कृत्वा धूर्त्तस्य विप्रस्य प्रणम्यानुव्रजेत्ततः ॥” * ॥
तन्निमित्तानि यथा, विष्णुपुराणे ।
“कन्यापुत्त्रविवाहे च प्रवेशे नववेश्मनः ।
नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा ॥
सीमन्तोन्नयने चैव पुत्त्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥”
मत्स्यपुराणे ।
“अन्नप्राशे च सीमन्ते पुत्त्रोत्पत्तिनिमित्तके ।
पुंसवने निषेके च नववेश्मप्रवेशने ॥
देववृक्षजलादीनां प्रतिष्ठायां विशेषतः ।
तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् ॥”
कूर्म्मपुराणे ।
“तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ।
वृद्धिश्राद्धं प्रकुर्व्वीत बहुसर्पिःसमन्वितम् ॥”
इति श्राद्धतत्त्वम् ॥

नान्दीमुखी, स्त्री, (नान्द्यै वृद्ध्यर्थं मुखं यस्याः । ङीप् ।) सामगेतरवृद्धिश्राद्धस्थमातृगणः । इति यजुर्व्वेदीयवृद्धिश्राद्धपद्धतिः ॥ (कुधान्यविशेषः । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“कोरदूषकश्यामाकनीवारशान्तनुवरकोद्दा-लकप्रियङ्गुमधूलिकानान्दीमुखीकुरुविन्दगवे-धुकवरुकतोदपर्णीमुकुन्दकवेणुयवप्रभृतयः कुधा-न्यविशेषाः ॥” चतुर्द्दशाक्षरवृत्तिविशेषः । अस्य लक्षणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥*॥ नान्दी

सुखं करिष्यमाणत्वेनाख्यस्येति । यच् । अभ्युदयप्रारम्भयुक्ते, त्रि । यथा, रामायणे । २ । ८१ । १ ।

"ततो नान्दीमुखीं रात्रिं भरतं सूतमागधाः । तुष्टुवु सविशेषज्ञाःस्तवैर्मङ्गलसंस्तवैः ॥")

नान्दीवादी, [न्] त्रि, (नान्दीं वदतीति । वद+णिनिः ।) नान्दीश्लोकपाठकारी । नान्दीवदनशीलः । भेरीवादनशीलः । इत्यमरटीकायां भरतः ॥

नापितः, पुं, (न आप्नोति सरलतामिति । न+आप्+"नञ्याप इट् च ।" उणा ३ । ८७ । इति तन् इट् च ।) वर्णसङ्करजातिविशेषः । स तु पट्टिकायां कुवेरिणो जातः । इति पराशरपद्धतिः ॥ शूद्रायां क्षत्रियाज्जातः । इति विवादार्णवसेतुः ॥ तस्य क्षौरं कर्म्म । तत्पर्य्यायः । क्षुरी २ मुण्डी ३ दिवाकीर्त्तिः ४ अन्तावसायी ५ । इत्यमरः । २ । १० । १० ॥ क्षुरी ६ वातसीसुतः ७ नखकुट्टः ८ ग्रामणीः ६ । इति शब्दरत्नावली ॥ चण्डिलः १० मुण्डः ११ भाण्डपुटः १२ । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । ३ । ७३ ।

"नराणां नापितो धूर्त्तः पक्षिणाञ्चैव वायसः । दंष्ट्रिणाञ्च शृगालस्तु श्वेतभिक्षुस्तपस्विनाम् ॥")

नापितशालिका, स्त्री, (नापितस्य शालिका गृहम् ।) नापितशाला ॥ नापितगृहम् । तत्पर्य्यायः । खरकुटी २ । इति त्रिकाण्डशेषः ॥

नाभिः, पुं, (नह्यते बध्नाति विपद्यादीनिति । नह बन्धे+"नहो भश्च ।" उणा ४ । १२५ । इति इञ् भश्चान्तादेशः ।) मुख्यनृपः । चक्रमध्यम् । (यथा, पञ्चतन्त्रे । १ । ८३ ।

"अरैः सन्धार्य्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः । स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्त्तते ॥")

क्षत्रियः । इति मेदिनी । भे, ५ ॥ प्रियव्रतराजपौत्रः । (अग्नीध्रस्य पुत्रः । यथा, ब्रह्माण्डे । ३५ अध्याये ।

"तस्य पुत्त्रा बभूवुस्तु प्रजापतिसमा नव । ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः ॥"

"नाभये दक्षिणं वर्षं हिमवन्तं पिता ददौ ॥")

गोत्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (प्रधानम् । इति विश्वः ॥ यथा, रघुः । १८ । २० ।

"सुतोऽभवत् पङ्कजनाभकल्पं कृतत्स्नस्य नाभिर्नृपमण्डलस्य ॥"

महादेवः । यथा, महाभारते । १३ । १७ । ६२ ।

"नाभिर्नन्दिकरो भावः पुष्करः स्थपतिः स्थिरः ॥")

नाभिः, पुं स्त्री, (नह बन्धे+इञ् भश्चान्तादेशः ।) प्राण्यङ्गम् । इति मेदिनी । भे, ६ ॥ नाइ इति भाषा । तत्पर्य्यायः । नाभीः २ तुन्दकूपी ३ । इति शब्दरत्नावली ॥ उदरावर्त्तः ४ । इति राजनिर्घण्टः ॥ (यथा, मत्स्यदशमम् । ६ । ११७ ।

"विष्णुर्नाभिः समुद्भूतो वेधाः कमलजस्ततः । विष्णुरेवेश इत्याहुर्लोके भागवता जनाः ॥")

"स च गर्भस्थस्य सप्तभिर्मासैर्भवति ।" इति सुखबोधः ॥ ("तस्य चेन्नाभिः पच्येत तां लोध्रमधुकप्रियङ्गुदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यज्याद्देशमेवर्त्तैलौषधाना चूर्णेनावचूर्णयेदेयनाडीकल्पनविधिरुक्तः सम्यक् ॥" इति चरके शरीरस्थाने अष्टमेऽध्याये ॥) अस्मिन् स्थाने मणिपुरनामदशदलपद्ममस्ति । यथा,—

"तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् । मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ॥ मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते । दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् । शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम् ॥" इति तन्त्रम् ॥

कस्तूरिकामदे, स्त्री । इति मेदिनी । भे, ६ ॥

नाभिकण्टकः, पु, (नाभेः कण्टक इव ।) आवर्त्तः । इति शब्दरत्नावली ॥ गोँड़ इति भाषा ॥

नाभिका, स्त्री, (नाभिरिव कायतीति । कै+कः ।) कटभीवृक्षः । इति राजनिर्घण्टः ॥

नाभिगुडकः, पु, (नाभौ गुडको गोलः ।) स्फीतनाभिः । गोँड इति भाषा । तत्पर्य्यायः । गर्भेण्डः २ । इति त्रिकाण्डशेषः ॥ नाभिकण्टकः ३ आवर्त्तः ४ । इति शब्दरत्नावली । गोण्डः ५ नाभिगोलकः ६ । इति जटाधरः ॥

नाभिगोलकः, पुं, (नाभौ गोलकः ।) नाभिगुडकः । इति जटाधरः ॥

नाभिजः, पुं, (नाभौ जायते इति । जन्+ड ।) ब्रह्मा । इति धरणिः ॥

नाभिजन्मा, [न्] पु, (नाभौ जन्म यस्य ।) ब्रह्मा । इति त्रिकाण्डशेषः ॥

नाभिनाला, स्त्री, (नाभिस्थिता नाला नाडी ।) नाभिसम्बन्धिनी नाडी । तत्पर्य्यायः । अमला २ । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । ५ । ७ ।

"तदङ्कशय्याच्युतनाभिनाला कच्चित् मृगीणामनघा प्रसूतिः ॥")

नाभिभूः, पु, (नाभौ भूरुत्पत्तिर्यस्य ।) ब्रह्मा । इति हेमचन्द्रः । १ । १२७ ॥

नाभिवर्षः, पु, (नाभेरग्नीध्रपुत्रस्य वर्षः ।) भारतवर्षः । यथा, "योऽसौ मनुपुत्त्रः प्रियव्रतो नाम सप्तद्वीपाधिपतिर्बभूव तस्य चाग्नीध्रादयो दश पुत्त्रा बभूवुः त्रयः प्रव्रजिताः शिष्टानां सप्तानां सप्त द्वीपाः पित्रा दत्ताः । तत्र जम्बूद्वीपाधिपतेश्चाग्नीध्रस्य नव पुत्त्रा बभूवुः ।

नाभिः किंपुरुषश्चैव हरिवर्ष इलावृत । रम्यो हिरण्मयश्चैव कुरुर्भद्राश्वकेतुमान् ॥

नव वर्षाणि तेभ्यः पित्रा दत्तानि वनं प्रविशता चाग्नीध्रेण । हिमालयस्याधिपतेर्नाभेऋषभः पुत्त्रो बभूव ऋषभाद्भरत. भरतेन चिरकाल धर्म्मेण शासितत्वादिद भारत वर्षमभूत् ।" इति नारसिंहे ३० अध्यायः ॥

नाभी, स्त्री, (नाभि+वा ङीष् ।) नाभिः । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ६०८ ।

"समनखपदमधिकगौरं नाभीमूलं निरंशुकं कृत्वा । अनया सेवित पवन त्वं किं कृतमलयभृगुपातः ॥")

नाभीलं, क्ली, (नाभीं लातीति । ला+कः ।) नार्य्या वङ्क्षणः । कृच्छ्रम् । गर्भाण्डम् । इति मेदिनी । ले, १०१ ॥ नाभिगाम्भीर्य्यम् । इति हेमचन्द्रः ॥

नाभ्यं, त्रि, (नाभेरिदमिति । नाभि+यत् ।) नाभिसम्बन्धि । इति व्याकरणम् ॥ (यथा, भागवते । ३ । ४ । १३ ।

"पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ॥"

नाभये हितम् । "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् । "नाभि नभञ्च ।" ५ । १ । २ । इत्यस्य वार्त्तिकोक्त्या नाभेर्नभादेशस्तु न भवति । अस्य गवादितया सन्नियोगशिष्टत्वात् रथनाभावेव प्रवृत्तेः । नाभिहिते च ॥ महादेवे, पु । यथा, महाभारते । १२ । २८४ । १६ ।

"नमो नाभाय नाभ्याय नमः कटकटाय च ॥")

नाम, व्य,(नामयतीति नाम्यतेऽनेन वा । नम+णिच्+बाहुलकात् डः ।) प्राकाश्यम् । सम्भावना । क्रोधः । उपगमः । कुत्सनम् । इत्यमरः । ३ । ३ । २५० ॥ प्रकाश्ये यथा । हिमालयो नाम नगाधिराजः । हिमालयः प्रकाशोऽतिप्रसिद्ध इत्यर्थः ॥ सम्भाव्ये सम्भावनायाम् इह नाम सीता भविष्यति ॥ क्रोधे ममापि नाम दशाननस्य परैरभिभवः ॥ उपगमः स्वाङ्गोऽङ्गीकारः एव नामास्तु ॥ कुत्सने को नामाय सवितुरुदये स्नानमेवं विधत्ते ॥ विस्मये च । अन्धो नाम गिरिमारोहति ॥" इति तट्टीकायां भरतः ॥ स्मरणम् । विकल्पः । इति मेदिनी । मे, ५३ ॥

नाम, [न्] क्ली, म्नायते अभ्यस्यते यत् तत् । (म्ना अभ्यासे+"नामन् सीमन् व्योमन्निति ।" उणा ४ । १५० । इति मनिन्प्रत्ययेन निपातनात् साधुः ।) संज्ञा । तत्पर्य्यायः । आख्या २ आह्वा ३ अभिधानम् ४ नामधेयम् ५ । इत्यमरः । १ । ६ । ८ ॥ आह्वानम् ६ लक्षणम् ७ अपदेशः ८ व्याह्वयः ६ संज्ञा १० गोत्रम् ११ अभिख्या १२ । इति शब्दरत्नावली ॥ लिङ्गम् । तच्च स्यादिविभक्त्यर्हः शब्दः । तत्तु पञ्चविधं यथा,—

"उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम् । शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम् ॥" इति गोयीचन्द्रः ॥

अवक्तव्यनामानि यथा,—

"आत्मनाम गुरोर्नाम नामानि कृपणस्य च । श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः ॥" इति कर्म्मलोचनम् ॥

नामकरणं, क्ली, (नाम्नः करणं यत्र ।) संस्कारविशेषः । तन्नोक्तनक्षत्राणि यथा । अश्विनी १ रोहिणी ४ मृगशिराः ५ पुनर्वसुः ७ उत्तरफल्गुनी १२ स्वाती १५ अनुराधा १७ उत्तरा-

षाढ़ा२१ श्रवणा २२ धनिष्ठा २३ शतभिषा२४ उत्तरभाद्रपदा २६ रेवती २७ ॥ तत्र लग्न यथा। यल्लग्नस्य प्रथमचतुर्थसप्तमदशमस्थाने शुभग्रहा-स्तिष्ठन्ति तल्लग्ने नामकरणं कार्य्यम् ॥ तत्र दिननियमः । दश १० एकादश ११ द्वादश १२ शत १०० दिनानि । इति ज्योतिःसारसंग्रहः ॥ संवत्सरे वेति गोभिलः ॥ एतच्च प्रशस्ततरतम-परपरकालकर्म्मेतरपरम् । एकादशाह इति मुख्यः कल्प इति रघुनन्दनमतम् ॥ * ॥ तदनु-ष्ठानं यथा । "जन्मशताभ्यन्तरे चन्द्रदर्शनात् प्राक् माता शुचिना वस्त्रेण कुमारमाच्छाद्य भर्त्तुर्दक्षिणतः स्थित्वा प्रयच्छत्युदक्शिरस पश्चिमदेशं गत्वा उत्तरत उदग्रेषु कुशेषु उपविशति अतः पितैवाधिकारी। अथ जुहोति प्रजापतये कुमारस्य तिथये नक्षत्राय। तिथि-नक्षत्रयोर्द्दैवताये तास्य ब्रह्मत्वष्टृविष्णुयमसोम-कुमारसुनिवसुपिशाचधर्म्मरुद्रवायुमन्मथयक्ष-पितरः पौर्णमास्यां विश्वेदेवाः। एषां होमे विशेषमाह छन्दोगपरिशिष्टम् ।

'नामधेये मुनिवसुपिशाचा बहुवत् सदा ।

यत्राश्च पितरो देवा यस्यास्तिथिदेवता' ॥'

तेन मुन्यादयो बहुवचनान्ता होतव्या' । शेषा एकवचनान्ता होतव्या' । नक्षत्राणि अश्वि-न्यादीनि । तद्देवताश्च ज्योतिषे । अश्वियमेत्या द्य. । नक्षत्रहोमे छन्दोगपरि शिष्टम् ।

'आग्नेयादेऽथ सर्पादि विशाखादि तथैव च ।

आषाढ़ादि धनिष्ठादि अश्विन्यादि तथैव च ॥

द्वन्द्वान्यतानि बहुवच्चाणां जुहुयात् सदा ।

द्वन्द्वद्वयं द्विवच्चैषमवशिष्टान्यथैकवत् ॥'

तद्देवताहोमे विशेषः ।

'देवता अपि हूयन्ते बहुवत् सर्पवस्तवः ।

देवाश्च पितरश्चैव द्विवद्भाश्विनौ तथा ॥'

देवा' विश्वेदेवाः । कवर्गादिपञ्चतृतीयादि-वर्णान्यतमवर्णाद्यन्तरस्य यरलवाद्यन्यतमवर्णा-मध्य विश्वम्भरादिवत् कृदन्त सम्बोधनान्त दीर्घ-विसर्गान्त च नाम कुर्य्यात् । एतच्च स्मृत्योक्त-त्वात् प्रशस्तपरम् । कुलदेवतानक्षत्राभि-सम्बन्धं च नाम कुर्य्यात् । तत्र शङ्खलिखितवच-नाद्नामान्तरकरणव्यवहार' । अत्र नक्षत्र-सम्बन्धेन नामकरण शतपदचक्रानुरोधात स्वनक्षत्रपादानुसारेण । ततश्च कुमारस्य सुख-भवान् प्राणनिर्गमोपायभूतान् छिद्रविशेषान् सप्त सुखमक्षिणी नासिके कर्णाविति आभि-मृशेन स्पृशन् कोऽसि कतमोऽसीति मन्त्र जपेत् ॥ तच्च नाम शर्म्मवर्म्माद्युपपदान्तत्वेन कर्त्तव्यम् । यथा,—

'ततस्तु नाम कुर्व्वीत पितैव दशमेऽहनि ।

देवपूर्ब्बं नराख्यं हि शर्म्मवर्म्मादिसंयुतम् ॥

शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्त्रसंश्रयम् ।

गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥

नार्थहीनं न चाशस्तं नापशब्दयुतं तथा ।

नामाङ्गल्यं जुगुप्स्यं वा नाम कुर्य्यात् समाक्षरम् ॥

नातिदीर्घं नातिह्रस्वं नातिगुर्व्वक्षरान्वितम् ।

सुखोच्चार्य्याक्षरं नाम कुर्य्याच्च प्रवणाक्षरम् ॥'

इति विष्णुपुराणे ३ अंशे १० अध्यायः ॥

प्रवणाक्षरं लघूत्तराक्षरम् । इति तट्टीकाकारः॥ गोभिलः । 'अयुग्मकदान्तं तथा स्त्रीणाम् ।' अयुग्मकम् अयुगाक्षरम् । दान्तं दकारान्तम् । यथा यशोदेत्यादि ॥ * ॥ तस्य श्रीपूर्व्वकत्व यथा,—

'देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् ।

सिद्धं सिद्धाधिकारांश्च श्रीपूर्ब्बं समुदीरयेत् ॥'

इति राघवभट्टधृतप्रयोगदर्शनात् स्वर्गकामि-त्वादिना सिद्धोऽधिकारो येषां नराणामित्यनेन जीवतां श्रीशब्दादित्वं नाम्नो न मृतानां तथेति शिष्टाचार' ॥ * ॥ गोभिल' । माघे चैव प्रथमं नामधेयमाख्याय यथार्थसुदीर्घं वामदेव्यगानान्तं कुर्य्यात् गौर्दक्षिणा।" इति संस्कारतत्त्वम् ॥

नामद्वादशी, स्त्री, (नाम्नः द्वादशी ।) व्रतविशेषः । यथा,—

"गौरी काली उमा भद्रा दुर्गा कान्तिः सर-स्वती ।

मङ्गला वैष्णवी लक्ष्मीः शिवा नारायणी क्रमात् ।

मार्गतृतीयामारभ्य पूर्व्वोक्तं लभते फलम् ॥

पूर्व्वोक्तं फलं मार्गादिद्वादशमासे कृष्णाष्टमी-व्रतफलम् ।

अर्द्धनारीश्वरं रुद्रमथवा उमशङ्करम् ॥

पूजयेद्विधिवन्नारी न वियोगमवाप्नुयात् ।

अथवा विष्णुरूपेण पूजयेच्छ्वरं सदा ॥

शङ्करं वामभागस्थं सर्व्वकाममवाप्नुयात् ।

मार्गशिराद्ये केशवनारायणमाधवान् पूजयेत् ।

धूपस्रग्दीपाद्यैरुपोष्य संपूज्य दक्षिणाभिश्च नामभिः । अश्वमेधगृपस्तयवाजपेयमतिरात्र-नत्तमथाग्निष्टोमोपवासमेव । पुरुषमेवसौत्रा मणिं पञ्चयज्ञहोमगोसन्ध सर्व्वमथाप्याप्त्यन्ते नित्य स्मरणार्थेनात्तनाम्ना । इत्याद्ये नाम द्वादशी ।" इति देवीपुराणम् ॥

नामधेयं, क्ली, (नामैव । नाम+"भागरूप नामभ्यो धेयः ।" ५ । ४ । २५ । इत्यस्य वार्त्ति-कोक्त्या धेयः ।) नाम । इत्यमरः । १ । ६ । ८ ॥ (यथा, मनुः । २ । ३० ।

"नामधेयं दशम्यान्तु द्वादश्यां वास्य कारयेत् ।

पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते ॥")

नामशेषः, त्रि, (नाम्नः शेषो यस्य । नाम व्याख्या एव शेषो यस्येति वा ।) मृतः । इति हेम चन्द्रः । ३ । ३८ ॥ मरणे, पु ।

नामापराधः, पुं, (नाम्नि नामविषये अपराधः । नाम्नः सकाशात् अपराधो वा ।) साधुनिन्दा-दिरूपदुरदृष्टजनकव्यापारविशेषः । यथा,—

श्रीनारद उवाच ।

"के तेऽपराधा विप्रेन्द्र । नाम्नो भगवत कृताः ।

विनिन्दन्ति नृणां कृत्यं प्राकृतं ह्यागयन्ति च ॥

तत् कथ्यतां महाभागापराध नाम्नि केशवे ।

केन केन प्रकारेण भवेद्धै तच्चनादिष्ट ॥

सनत्कुमार उवाच ।

सतां निन्दा नाम्नः परममपराधं वितनुते

यतः ख्यातिं यातस्तमुपहसते गर्हयति च ।

तथा विष्णोरिष्ट य इह गुणनामादि सकल

धिया भिन्न पश्येत् स खलु हरिनामाहितकरः॥

गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं

तथार्थवादो हरिनाम्नि कल्पनम् ।

नाम्नां बलाद्यस्य हि पापबुद्धि-

र्न विद्यते तस्य शठस्य शुद्धिः ॥

दिवौकसां गुरो' पित्रोर्भूसुराणाञ्च गर्हनम् ।

नामापराध यत्तत् स्याद्वैष्णवानां तथा नृणाम् ॥

गोऽश्वत्थतुलसीधात्रीर्नृपान्निन्दन्ति नारद ।।

नामापराधी स भवेन्नाम गोविन्दवैष्णवान् ॥

सर्व्वतीर्थानि क्षेत्राणि चावमन्यति निन्दति ।

गङ्गासरस्वतीयामीचापराधी भवेन्नर' ॥

श्रीमद्भागवतं महाभारतं ब्राह्मणान् गुरुम् ।

मन्त्र महाप्रसादञ्च योऽवमन्यति नारकी ॥

अवतारान् हरेस्तन्नामभक्तांश्च निन्दति ।

अवमन्यति देवर्षे नारकी स जनोऽधमः ॥

गोविन्दस्यार्च्चन कुर्य्यादवमन्यति वैष्णवान् ।

निन्दतीह च नामानि स नाम्नोऽप्यपराधकृत् ॥

वर्णाश्रमानन्त्यजांश्च जातिबुद्ध्यावमन्यति ।

वैष्णवान् कुरुते निन्दामपराधी नराधम ॥

द्विजबन्धुं स्त्रियं शूद्रं जातिभेदेन वैष्णवम् ।

येऽवमन्यन्ति निन्दन्ति ते वै निरयगामिन' ॥

अर्च्चे विष्णोः शिलाधीर्गुरुषु नरमतिर्वैष्णवे जाति बुद्धि-

र्विष्णोर्व्वा वैष्णवानां कलिमलमथने पादतीर्थे-ऽम्बुबुद्धि' ।

विष्णोर्निर्म्माल्यनाम्नोः कलुषदहनयोरन्य-सामान्यबुद्धि-

र्विष्णौ सर्व्वेश्वरेशे तदितरसमधीर्य्यस्य वा नारकी स ॥

पूज्यते देवतामान्ध कृत्वा नारायण नर ।

नामापराधी स भवेद्वैष्णवान् यो न सेवते ॥

नारद उवाच ।

नामापराधा ह्यपरा' कति सन्ति तपोधन ।।

तत् कथ्यतां मे सकलं यदि योग्यो भवामि ते ॥

सनत्कुमार उवाच ।

वैष्णवे शठतां विष्णौ गुरौ पित्रोश्च भूसुरे ।

निन्दां य कुरुते मोहादपराधी स नारकी ॥"

इति पाद्मोत्तरखण्डे । १०२—१०३ अध्यायौ ॥ अपि च ।

"धर्म्मव्रतत्यागहुतादिसर्व्व-

शुभक्रियासाम्यमपि प्रमाद' ।

अश्रद्दधाने विमुखेऽप्यशृण्वति

यश्चोपदेश, शिवनामापराधः ॥

श्रुत्वापि नाममाहात्म्य य. प्रीतिरहितो नर ।

अहं ममादि परमो नाम्नि सोऽप्यपराधकृत् ॥"

अपराधभञ्जनमाह ।

"जाते नामापराधेऽपि प्रमादेन कथञ्चन ।

सदा सङ्कीर्त्तयेन्नाम तदेकशरणो भवेत् ॥

नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च ॥
नामैकं यस्य वाचि स्मरणपथगतं श्रोत्रमूलं गतं वा
शुद्धं वाशुद्धवर्णं व्यवहितरहितं तारयत्येव सत्यम् ।
तच्चेद्देहद्रविणजनतालोभपाषण्डमध्ये
निक्षिप्तं स्यान्न फलजनकं शीघ्रमेवात्र विप्र ।॥'
इति श्रीहरिभक्तिविलासः ॥

नामापराधी, [न्] त्रि, (नामापराधोऽस्यास्तीति । इनिः ।) नामापराधकृत् । यथा,—
"नाम्नो जनार्द्दनस्यापराधान् यः कुरुतेऽनिशम् ।
नामापराधकृल्लोको याति सत्यमधोगतिम् ॥
विनाशयति नामस्योऽपराधं नामतो जनः ।
नामापराधी कष्णो स्यादात्मनश्चेति नारकी ॥
पाषण्डो दुर्ज्जनः पापी भवेन्नाम्नो हरेः खलः ।
नामापराधी मनुजो मुने । भवति नारकी ॥
अपराधान्मुकुन्दस्य विदूरयति नामभि' ।
नाम्नीह लोकः कुर्व्वंस्तान्महापाप्यधमाधम. ॥"
इति पाद्मोत्तरखण्डे १०२ अध्यायः ॥

नायः, पुं, (नीयतेऽनेनेति । नी + "श्रिणीभुवो ऽनुपसर्गे ।" ३ । ३ । २४ । इति करणे घञ् ।) नयः । नीतिः । इत्यमरः । ३ । २ । ८ ॥ (यथा, भट्टिः । ७ । ३६ ।
"यात यूयं यमेनायं दिशं नायेन दक्षिणाम् ॥"
नी + भावे घञ् ।) प्रापणम् । इति नीधातुदर्शनात् ॥ (नयति प्रापयतीति । नी + "दुन्योरनुपसर्गे ।" ३ । १ । १४२ । इति णः । उपाय. । यथा, भट्टिः । ६ । ८२ ।
"नायः कोऽत्र स येन स्यां वताहं विगतज्वरः॥"
नेतरि, त्रि । यथा, ऋग्वेदे । ६ । २४ । १० ।
"सचस्व नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः ॥")

नायकः, पु, (नयति प्रापयतीति । नी + ण्वुल् ।) नेता । (यथा, गीतायाम् । १ । ७ ।
"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते॥")
श्रेष्ठः । (यथा, भागवते । ४ । ७ । १६ ।
"तमुपागतमालक्ष्य सर्व्वे सुरगणादयः ।
प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥")
हारमध्यमणिः । इति मेदिनी । के, ११० ॥ अग्रे सरिकः । सेनापतिः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । २२२ । ४ ।
"वध्यमानं बलं दृष्ट्वा बहुशस्तैः पुरन्दरः ।
स्वसैन्यनायकाभाव चिन्तामाप भृशं तदा ॥")
शृङ्गारसाधकः । स च त्रिविधः । पतिरुपपतिर्वैशिकश्चेति । विधिवत् पाणिग्राहकः पतिः । अनुकूलदक्षिणधृष्टशठभेदात् पतिश्चतुर्द्धा । सार्व्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः । सकलनायिकाविषयसमसहजानुरागो दक्षिणः । भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः । कामिनीविषयकपटपटुः शठः । आचारहानिहेतुः पतिरुपपतिः । बहुलवेश्याभोगोपरसिको वैशिकः । वैशिकस्तूत्तममध्यमाधमभेदात् त्रिविधः । दयिताश्रमप्रकोपेऽपि उपचारपरायण उत्तम. । प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः । भयलज्जापालत्यागशून्यः कामक्रीडायामकृतकृत्याकृत्यविचारोऽधमः॥*॥ मानी चतुरश्च शठ एवाप्यर्भवति । वाक्चेष्टाव्यङ्ग्यसमागमश्चतुरः । प्रोषितपतिरुपपतिर्वैशिकश्च भवति । अनभिज्ञनायको नायकाभास एव । तेषाञ्च नर्म्मसचिवपीठमर्द्दविटचेटकविदूषकभेदाच्चतुर्धा । कुपितस्त्रीप्रसादकः पीठमर्द्दः । नर्म्मसचिवोऽप्ययमेव । कामतन्त्रकलाकोविदो विट. । सन्धानचतुरश्चेटकः । अङ्गादिवैकृतैर्हासकारी विदूषकः ॥ * ॥ तेषामष्ट सात्त्विकगुणाः । यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका गुणाः ॥"*॥
तेषां दशावस्था यथा,—
"अभिलाषस्तथा चिन्ता स्मृतिश्च गुणकीर्त्तनम् ।
उद्वेगश्च प्रलापश्च उन्मादो व्याधिरेव च ।
जड़ता निधनान्येव दशावस्थाः प्रकीर्त्तिताः ॥"
इति रसमञ्जरी ॥
(अस्य लक्षणभेदादिकं यथा, साहित्यदर्पणे । ३ । ३३—३८ ।
"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ॥
धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥
अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान् निगूढ़मानो धीरोदात्तो दृढ़व्रतः कथितः॥
मायापर. प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः ।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथित. ॥
निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ।
सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् ॥"
एषाञ्च शृङ्गारिरूपत्वे भेदानाह तत्रैव । ३ । ३६—४४ ।
"एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा ।
एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः ॥
कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जित. ।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः ॥
अनुकूल एकनिरतः शठोऽयमेकत्र बद्धभावो यः ।
दर्शितवहिरनुरागो विप्रियमन्यत्र गूढ़माचरति॥
एषाञ्च त्रैविध्यात् सर्व्वेषामुत्तममध्याधमत्वेन ।
उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च ॥"
एषामुदाहरणादिकं तत्रैव द्रष्टव्यम् ॥)

नायकाधिपः, पु, (नायकानां नेतृणां सेनापतीनां वा अधिपः ।) नरेन्द्रः । राजा । इति शब्दरत्नावली ॥

नायिका, स्त्री, (नयति या । नी + ण्वुल् । टाप् अत इत्वञ्च ।) दुर्गाशक्तिः । सा अष्टधा । यथा,—
"ततोऽष्टनायिका देव्या यत्नतः परिपूजयेत् ॥
उग्रचण्डां प्रचण्डाञ्च चण्डोग्रां चण्डनायिकाम् ।
अतिचण्डाञ्च चामुण्डां चण्डां चण्डवतीन्तथा ॥
पद्मे चाष्टदले चैताः प्रागादिक्रमतस्तथा ।
पञ्चोपचारैः संपूज्य भैरवान्मध्यदेशतः ॥"
इति प्रकृतिखण्डे ६१ अध्यायः ॥
शृङ्गाररसालम्बनविभावरूपा नारी । सा च त्रिविधा । स्वीया परकीया सामान्यवनिता चेति । तत्र स्वामिन्येवानुरक्ता स्वीया । स्वीयापि त्रिविधा । मुग्धा मध्या प्रगल्भा च । तत्र अङ्कुरितयौवना मुग्धा । सा च ज्ञातयौवना अज्ञातयौवना च । सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढ़ा । सैव क्रमशो जातप्रश्रया विश्रब्धनवोढ़ा । समानलज्जामदना मध्या । एषैव चातिप्रश्रयादतिविश्रब्धनवोढ़ा । पतिमात्रविषयकेलिकलापकोविदा प्रगल्भा । मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे । धीरा अधीरा धीराधीरा चेति । व्यङ्ग्यकोपप्रकाशा धीरा । अव्यङ्ग्यकोपप्रकाशा अधीरा । व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा धीराधीरा । एते धीरादयस्त्रयो भेदा द्विधा भवन्ति । ज्येष्ठा कनिष्ठा च । परिणीतत्वे सति भर्त्तुरधिकस्नेहा ज्येष्ठा । परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा॥ अप्रकटपरपुरुषानुरागा परकीया । सा च द्विविधा । परोढ़ा कन्यका च । गुप्ता विदग्धा लक्षिता कुलटा अनुशयानामुदिताप्रभृतीनां परकीयायामेवान्तर्भावः । गुप्ता त्रिविधा । वृत्तसुरतगोपना च । वर्त्तिष्यमाणसुरतगोपना । वर्त्तमानसुरतगोपना च । विदग्धा द्विविधा । वाग्विदग्धा क्रियाविदग्धा चेति । अनुशयाना त्रिविधा । वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्तुर्गमनानुमानेन ॥*॥ वित्तमात्रोपाधिकसकलपुरुषाभिलाषा सामान्यवनिता । एता अन्यसम्भोगदुःखिता । वक्रोक्तिगर्व्विता मानवत्यश्च तिस्रो भवन्ति । वक्रोक्तिगर्व्विता द्विविधा । प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च । मानवती यथा । प्रियापराधसूचिका चेष्टा मान' । स च लघुर्मध्यमो गुरुश्चेति । अल्पापनेयो लघु' । कष्टापनेयो मध्यमः । कष्टतमापनेयो गुरु. ॥ * ॥ एताः षोडश अष्टाभिरवस्थाभिः प्रत्येकमष्टविधा । प्रोषितभर्त्तृका खण्डिता उत्कण्ठिता कलहान्तरिता विप्रलब्धा वासकसज्जा स्वाधीनपतिका अभिसारिका चेति गणनादष्टाविंशत्यधिकं शत भेदा भवन्ति । तासामुत्तममध्यमाधमगणनया चतुरधिकाशीतिशतत्रयं भेदा भवन्ति । तत्रापि दिव्य-अदिव्य-दिव्यादिव्यभेदेन गणनया द्विपञ्चाशदधिकशतयुतसहस्रं भेदा भवन्ति । इति रसमञ्जरी ॥ * ॥

(यथा च साहित्यदर्पणे । ३ । ६५—६३ ।
"अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता ॥
विनयार्ज्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।
सापि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति॥
प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥
मध्या विचित्रसुरता प्ररूढस्मरयौवना ।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता ॥
स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका ॥
ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे ।
प्रिय सोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्रुषा ॥
धीराधीरा तु रुदितैरधीरा परुषोक्तिभि. ।
प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा ॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहि ।
धीराधीरा तु सोल्लुण्ठभाषितै खेदयेदमुम् ॥
तर्जयेत्ताडयेदन्या प्रत्येक ता अपि द्विधा ।
कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥
मध्याप्रगल्भयोर्भेदास्तस्माद् द्वादश कीर्त्तिता: ।
मुग्धा त्वेकैव तेन स्यु स्वीयाभेदास्त्रयोदश ॥
परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।
यात्रादिनिरताऽन्योढा कुलटा गलितत्रपा ॥
कन्या त्वजातोपयमा सलज्जा नवयौवना ।
धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका ॥
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि ।
वित्तमात्र समालोक्य सा राग दर्शयेद् बहि. ॥
काममङ्गीकृतमपि परिक्षीणधन नरम् ।
मात्रा निष्कासयेदेषा पुन. सन्धानकाङ्क्षया ॥
तस्करा पण्डका मूर्खा सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या आसा प्रायेण वल्लभा ॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥
अवस्थाभिर्भवन्त्यष्टावेता षोडशभेदिता ।
स्वाधीनभर्त्तृका तद्वत् खण्डिताऽथाभिसारिका ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥
कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्त्तृका ॥
पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नित ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥
अभिसारयते कान्त या मन्मथवशंवदा ।
स्वय वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका ॥
सलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसवीता कुलजाऽभिसरेत् यदि ॥
विचित्रोज्ज्वलवेशा तु रणन्नूपुरनिस्वना ।
प्रमोदस्मेरवदना स्याद् वेश्याऽभिसरेत् यदि ॥
मदस्खलितसलापा विभ्रमनफुल्ललोचना ।
आविद्धगतिसञ्चारा स्यात् प्रेष्याभिसरेद् यदि ॥*
प्रसङ्गादभिसारस्थानानि कथ्यन्ते ।
क्षेत्र वाटी भग्नदेवालयो दूतीगृह वनम् ।
मालयश्च श्मशानश्च नद्यादीनां तटी तथा ॥
एवं कृताभिसाराणां पुश्चलीनां विनोदने ।
स्थानान्यष्टौ तथा ध्वान्तच्छन्नेषु क्वचिदाश्रय: ॥*॥
चाटुकारमपि प्राणनाथ रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥
प्रिय: कृत्वापि सङ्केतं यस्या नायाति सन्निधिम् ।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥
नानाकार्य्यवशाद् यस्या दूरदेशं गत: पति. ।
सा मनोभवदु:खार्त्ता भवेत् प्रोषितभर्त्तृका ॥
कुरुते मण्डन यस्या: सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥
आगन्तु कृतचित्तोऽपि दैवान्नायाति यत्प्रिय: ।
तदनागमदु:खार्त्ता विरहोत्कण्ठिता तु सा ॥
इति साष्टाविंशतिशतमुत्तममध्यमाधमस्वरूपत ।
चतुरधिकाशीतियुतं शतत्रय नायिकाभेदाना
स्यात् ॥
क्वचिदन्योन्यसाङ्कर्य्यमासां लक्ष्येषु दृश्यते ।
इतरा अप्यसख्यास्ता नोक्ता विस्तरशङ्कया ॥"
एतासामुदाहरणानि तत्रैव विस्तरशो द्रष्टव्यानि॥
अथासामलङ्कारा: । यथा, तत्रैव । ३ । ६४ ।
"यौवने सत्त्वजास्तासामष्टाविंशतिसङ्ख्यका: ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजा. ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यञ्च प्रगल्भता ।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजा: ॥
लीलाविलासौ विच्छित्तिर्विव्वोक किलकिञ्चितम्।
मोट्टायित कुट्टमित विभ्रमो ललित मद' ॥
विहृत तपन मौग्ध्य विक्षेपश्च कुतूहलम् ।
हसित चकित केलिरित्यष्टादशसङ्ख्यका ।
स्वभावजाश्च भावाद्या दश पुंसा भवन्त्यपि ॥"
अथ मुग्धाकन्ययोरनुरागेङ्गितानि । यथा, तत्रैव । ३ । १२३ ।
"दृष्ट्वा दर्शयति व्रीडां सम्मुख नैव पश्यति ।
प्रच्छन्न वा भ्रमन्त वा तिर्यक् त पश्यति प्रियम्॥
बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी ।
सगद्गदस्वर किञ्चित् प्रिय प्रायेण भाषते ॥
अन्ये प्रवर्त्तितां शश्वत् सावधाना च तत्कथाम् ।
शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी ॥"
अथ सकलानामपि नायिकानामनुरागेङ्गितानि। यथा, तत्रैव । ३ । १२४—१२५ ।
"चिराय सविधे स्थान प्रियस्य बहु मन्यते ।
विलोचनपथञ्चास्य न गच्छत्यनलङ्कृता ॥
क्वापि कुन्तलसव्यानसयमव्यपदेशत ।
बाहुमूल स्तनौ नाभिपङ्कज दर्शयेत् स्फुटम् ॥
आच्छादयति वागाद्यै प्रियस्य परिचारकान् ।
विश्वसित्यस्य मित्रेषु बहुमान करोति च ॥
सखीमध्ये गुणान् ब्रूते स्वधन प्रददाति च ।
सुप्ते स्वपिति दु:खस्य दु:ख धत्ते सुखे सुखम् ॥
स्थिता दृष्टिपथे शश्वत् प्रिये पश्यति दूरत ।
आभाषते परिजन सम्मुखे स्मरविक्रियम् ॥
यत् किञ्चिदपि सवीक्ष्य कुरुते हसित मुधा ।
कर्णकण्डूयन तद्वत् कबरीमोक्षसयमौ ॥
जृम्भते स्फोटयत्यङ्ग बालमाश्लिष्य चुम्बति ।
भाले तथा वयस्याया आरभेत् तिलकक्रियाम् ॥
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते ।
दशति स्वाधर चापि ब्रूते प्रियमधोमुखी ॥
न मुञ्चति च त देशं नायको यत्र दृश्यते ।
आगच्छति गृह चास्य कार्य्यव्याजेन केनचित् ॥
दत्त किमपि कान्तेन धृत्वाङ्गे मुहुरीक्षते ।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ॥
मन्यते बहु तच्छील तत्प्रिय मन्यते प्रियम् ।
प्रार्थयतेऽल्पमूल्यानि सुप्ता न परिवर्त्तते ॥
विकारान् सात्त्विकानस्य सम्मुखी नाधिगच्छति।
भाषते सूनृत स्निग्धमनुरक्ता नितम्बिनी ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रिया ।
मध्यव्रीडानि मध्याया: स्रसमानत्रपाणि तु ॥
अन्यस्त्रिया' प्रगल्भायास्तथा स्युर्वारयोषित ॥
सेवप्रस्थापनै: स्निग्धैर्वीक्षितैर्मृदुभाषितै ।
दूतीसम्प्रेषणैर्नार्य्या भावाभिव्यक्तिरिष्यते ॥"६॥)
कस्तूरीविशेष: । यथा, राजनिर्घण्टे ।
"चूर्णाकृतिस्तु खरिका तिलका तिलाभा
कौलत्थबीजसदृशी च कुलत्थिकाख्या ।
स्थूला यत: कियदिय किल पिण्डिका स्या-
त्तस्याश्च किञ्चिदधिकापि च नायिकैषा ॥"

नार, क्ली, (नराणां समूह । नर+समूहे अण् ।) नरसमूह । इति व्याकरणम् ॥ (नरस्येदमिति । नर+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) नरसम्बन्धिनि, त्रि । यथा —
"मलमूत्रपुरीषास्थिनिर्गतं ह्यशुचि स्मृतम् ।
नारं स्पृष्ट्वा तु सस्नेह सचैलो जलमाविशेत् ॥"
इति सामान्यनिरुक्तौ जराशौचष्टतस्मृतिवचनम्॥

नार: पु, (नरस्यायमिति । नर+अण् ।) तर्णक' । जलम् । इति मेदिनी । रे, ५३ ॥

नारक:, पु, (नरक एव । प्रज्ञाद्यण् ।) नरक' । (नरके भव: । "तत्र भव. ।"४।३।५३। इत्यण् ।) नरकस्थप्राणिनि, त्रि । इत्यमर' । १ । ६ । १ ॥ (यथा, मार्कण्डेये । १५ । ७३ ।
"अनुकम्पामिमामद्य नारकेष्विह कुर्व्वत ।
तदेव शतसाहस्र सङ्ख्यामुपगत तव ॥")

नारकी, [न्] त्रि, (नरको भोग्यतया अस्त्यस्येति । नरक+इनि ।) नरकस्थ । यथा,—
"परेण विहित कर्म्म स्वकर्म्मेति वदेच्च य ।
स उच्यते ब्रह्मघाती महानारकिनारकी ॥"
इति वृहद्धर्म्मपुराणे उत्तरखण्डे ७८ अध्याय' ॥

नारकीट , पु, अश्मकीट. । (नारेषु नरसमूहेषु कीट इव घृणार्हत्वात् ।) स्वदत्ताशाविहन्ता । इति मेदिनी । टे ६३ ॥

नारङ्ग, क्ली, (नृणातीति । नॄ नये+बाहुलकात् अङ्गच् धातोर्वृद्धिश्च । इत्युज्ज्वलदत्त । १।१२१।) गर्जरम् । इति राजनिर्घण्ट ॥

नारङ्ग , पु, (नॄ नये+अङ्गच् । वृद्धिश्च ।) पिप्पलीरस । यमजप्राणी । विट: । इति मेदिनी । गे, ३६ ॥ फलवृक्षविशेष । नारङ्गी इति भाषा ॥ तत्पर्य्याय । नागरङ्ग' २ सुरङ्ग: ३ त्वगन्ध ४ ऐरावत ५ वक्त्रवास: ६ योगारङ्ग. ७ योगरङ्ग' ८ सरङ्ग. ९ गन्धाढ्य. १० गन्धपत्र ११

वरिष्ठः १२ । अस्य गुणाः । मधुरत्वम् । अम्लत्वम् । गुरुत्वम् । उष्णत्वम् । रोचनत्वम् । वातामक्रमिशूलश्रमनाशित्वम् । वल्यत्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥ तत्केशरगुणाः ।
'अत्यम्लमीषन्मधुरं दृश्यं वातविनाशनम् ।
रुच्यं वातहरञ्चैव नागरङ्गस्य केशरम् ॥"
इति राजवल्लभः ॥

नारदः, पुं, (नारं परमात्मविषयकं ज्ञानं ददातीति । दा+कः । यद्वा, नारं नरसमूहं द्यति खण्डयति कलहेनेति । दो+कः । नारं जलं ददाति पितृभ्य इति वा । तदुक्तम्,—
"नारं पानीयमित्युक्तं तत् पितृभ्यः सदा भवान् ।
ददाति तेन ते नाम नारदेति भविष्यति ॥")
देवर्षिविशेषः । स तु भोगाशी ब्रह्मशापादुपवर्हणनामा गन्धर्व्वो भूत्वा पुनर्ब्रह्मवीर्य्यात् शूद्रपत्न्या जातः । यथा,—
शौनक उवाच ।
"ब्रह्मवीर्य्याच्छूद्रपत्न्यां गन्धर्व्वश्चोपवर्हणः ।
जातः केन प्रकारेण तद्भवान् वक्तुमर्हति ॥
सौतिरुवाच ।
कान्यकुब्जे च देशे च द्रुमिलो गोपराजकः ।
कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता ॥
स्वामिदोषेण सा वन्ध्या काले च भर्त्तुराज्ञया ।
उपस्थितं वने घोरे नारदं काश्यपं मुनिम् ॥
क्रोशमानञ्च श्रीकृष्णं ज्वलन्तं ब्रह्मवर्च्चसा ।
तस्थौ सुवेशं कृत्वा सा ध्यानान्तञ्च मुनेः पुरः ॥
उवाच विनयेनैव कृत्वा च श्रीहरिं हृदि ।
गोपिकाहं द्विजश्रेष्ठ । द्रुमिलस्य च कामिनी ।
पुत्त्रार्थिनी चागताहं तन्मूलं भर्त्तुराज्ञया ॥
वीर्य्याधानं कुरु मयि । स्त्री नोपेक्ष्या ह्युपस्थिता ।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा ॥
वृषलीवचनं श्रुत्वा चुकोप मुनिपुङ्गवः ।
वृषली तत्पुरस्तस्थौ शुष्ककण्ठौष्ठतालुका ॥
एतस्मिन्नन्तरे तेन पथा यास्यति मेनका ।
तस्या जघनस्थलं दृष्ट्वा मुनिर्वीर्य्यं पपात ह ॥
ऋतुस्नाता च वृषली कृत्वा तद्भक्षणं मुदा ।
सा विप्र ! गेहे साध्वी च सुषुवे तनयं वरम् ॥
तप्तकाञ्चनवर्णाभं ज्वलन्तं ब्रह्मतेजसा ।
अनावृष्ट्यवशेषे च काले बालो बभूव ह ॥
नारं ददौ जन्मकाले तेनायं नारदाभिधः ॥
ददाति नारं ज्ञानञ्च बालकेभ्यश्च बालकः ।
जातिस्मरो महाज्ञानी तेनायं नारदाभिधः ॥
वीर्य्येण नारदस्यैव बभूव बालको मुने ! ।
मुनीन्द्रस्य वरेणैव तेनायं नारदाभिधः ॥
कल्पान्तरे ब्रह्मकण्ठाद्बभूवुर्बहवो नराः ।
नरान्ददौ तत्कण्ठश्च तेन तन्नारदः स्मृतः ॥
ततो बभूव कालस्य नारदात् कण्ठदेशतः ।
ततो ब्रह्मा नाम चक्रे नारदश्चेति मङ्गलम् ॥
एतस्मिन्नन्तरे विप्रा आययुर्विप्रमन्दिरम् ।
शिशवः पञ्चवर्षीया महातेजस्विनो यथा ॥
चतुर्व्विंशो मुनिस्तस्मै आज्ञयाश्च कृपालवः ।
ब्रह्मपुत्त्रः शिशुं ज्ञात्वा विष्णुमन्त्रं ददौ मुदा ॥
महाज्ञानी शिशुस्तस्थौ गङ्गातीरे मनोहरे ।
तत्र स्नात्वा विप्रदत्तं विष्णुमन्त्रं जजाप सः ॥
दिव्यं वर्षसहस्रञ्च निराहारः कृशोदरः ।
ददर्श बालकं ध्याने दिव्यं लोकञ्च बालकम् ॥
द्विभुजं मुरलीहस्तं चन्दनेन विचर्च्चितम् ।
विरराम च शोकार्त्तो यदा यद्द्रुमसत्तमः ॥
रुरोदाश्वत्थमूले च न दृष्ट्वा बालकं शिशुः ।
बभूवाकाशवाणीति रुदन्तं बालकं प्रति ॥
सकृद्दृष्टं यद्दर्शितं रूपं तदेव नाधुना पुनः ।
पुनर्द्रक्ष्यसि गोविन्दं जन्मान्तरे हरिम् ॥
इति श्रुत्वा बालकश्च विरराम मुदान्वितः ।
काले तत्याज तीर्थे च तनुं कृष्णं हृदि स्मरन् ॥
बभूव शापमुक्तिश्च नारदस्य महामुने ! ।
तनुं त्यक्त्वा स जीवश्च विलीनो ब्रह्मविग्रहे ॥
कतिकल्पान्तरेऽतीते स्रष्टुः सृष्टिविधौ पुनः ।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः ॥
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २१—२२ अध्यायौ ॥
तस्य सर्व्वदा भ्रमणकारणं यथा,—
"नाशयापि नष्टान् विज्ञाय पुत्त्रान् दक्षप्रजापतिः ।
क्रोधञ्चक्रे महाभाग । नारद स शशाप च ॥"
नारदशापश्च श्रीभागवतोक्तः ।
"तस्माल्लोकेषु ते मूढ़ न भवेद्भ्रमतः पदम् ।"
इति विष्णुपुराणे १ अंशे १५ अध्यायस्तट्टीका च ॥ (पञ्चविंशतिसहस्रश्लोकात्मक उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । ६ ।
"श्रीहयग्रीव सहस्राणि पुराणस्याग्नेरर्च्चितम् ।
पञ्चविंशतिसाहस्रं नारदं परमं मतम् ॥"
शाकद्वीपस्य पर्व्वतविशेषः । यथा, मात्स्ये । १२२ । ११ ।
"नारदो नाम चैवोक्तो दुर्गशैलो महाचितः ।
तत्राचले समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ ॥"
विश्वामित्रपुत्त्रविशेषः । यथा, महाभारते । १३ । ४ । ५८ ।
"ऊर्ज्जयोनिरुदापेक्षी नारदश्च महानृषिः ।
विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः ॥")

नारा, स्त्री, (नरस्य मुनेरियम् । नर+"तस्येदम् ।" ४ । ३ । १२० । इति अण् । ततष्टाप् । "यद्यपि अणि कृते ङीप्प्रत्ययः प्राप्तस्तथापि छान्दसलक्षणेरपि स्मृतिषु व्यवहारात् सर्व्वे विधयश्छन्दसि विकल्प्यन्ते इति पाणिनौ ङीप् प्रत्ययः । तस्याभावपक्षे सामान्यलक्षणप्राप्ते टापि कृते नारा इति रूपसिद्धिः ।" इति मनुसंहिताटीकायां कुल्लूकभट्टः ।१।१०।) जलम् । इति शब्दरत्नावली ॥ (यथा, मनुः । १ । १० ।
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः ॥")

नाराचः, पुं, (नारं नरसमूहं आचामतीति । चमु अदने+"अन्येष्वपि दृश्यते ।" ३।२।१०१। इति डः ।) समुदायलौहमयवाणः । तत्पर्य्यायः । प्रक्ष्वेडनः २ । इत्यमरः । २ । ८ । ८७ ॥ लौहनालः ३ । इति शब्दरत्नावली ॥ (यथा, हृदनुशार्ङ्गधरे ।
"सर्व्वलौहास्तु ये वाणा नाराचास्ते प्रकीर्त्तिताः ।
पञ्चभिः पृथुलैः पक्षैर्युक्ताः सिध्यन्ति कस्यचित् ॥')
दुर्द्दिनम् । इति शब्दमाला ॥ (अष्टादशाक्षरवृत्तिविशेषः । इति छन्दोमञ्जरी ॥ अस्य लघुगुर्व्वादिकं छन्दःशब्दे द्रष्टव्यम् ॥ वैद्यकोक्तघृतविशेषः । यथा, भावप्रकाशे उदररोगाधिकारे ।
"स्नुक्क्षीरदन्तीत्रिफलाविडङ्ग-
सिंहीत्रिवृच्चित्रकसर्व्वकल्कैः ।
घृतं विपक्वं कुडवप्रमाणं
तोयेन तस्याक्षसमेन कर्षम् ॥
पीतोष्णमम्भोऽनुपिबेद्विरेके
पेयं रसं वा प्रपिबेद्विविक्तः ।
नाराचमेतं जठरामयानां
मुक्तं प्रयुक्तं प्रवदन्ति सन्तः ॥"
इति नाराचघृतम् ॥ * ॥)

नाराचिका, स्त्री, (नाराचस्तदाकारोऽस्त्यस्याः इति । नाराच+ठन् । टाप् ।) नाराची । इति शब्दरत्नावली ॥ (अष्टाक्षरवृत्तिविशेषः । तल्लक्षणं यथा,—
"नाराचिका तरौ लगौ ॥")

नाराची, स्त्री, (नाराचवदाकृतिरस्त्यस्या इति । अच् । गौरादित्वात् ङीष् ।) स्वर्णकारादीनां नाराचाकृतिलौहतुला । निक्ति इति भाषा । तत्पर्य्यायः । नाराचिका २ एषणिका ३ एषणी ४ । इति शब्दरत्नावली ॥

नारायणः, पुं, (नारा जलं अयनं स्थानं यस्य । अय गतौ+भावे ल्युट् । सर्व्वे गत्यर्थाः प्राप्त्यर्थाश्च इति नियमात् नारस्य ज्ञानस्य मुक्तेर्वा अयनं प्राप्तिर्यस्मात् इति वा । "नराणां समूहो नारं तदयनं स्थानं यस्य नारायणः रेफात् परनकारस्य णत्वविधानात् सर्व्वप्राणिबुद्धिगुहानिवासाच्छुद्धचैतन्यमित्यर्थः ।" इति शङ्करविजये नवमप्रकरणम् ।) विष्णुः । तस्य चत्वारो व्यूहाः । वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्याः । इति महाभारतम् ॥ वेदान्तमते । सुत्रात्मान्तर्यामिसूत्रविराडाख्याः । तन्नामव्युत्पत्तिर्यथा,—
"सारूप्यमुक्तिवचनो नारेति च विदुर्बुधाः ।
यो देवोऽप्ययनं तस्य स च नारायणः स्मृतः ॥
नारञ्च कृतपापाञ्चाप्ययनं गमनं स्मृतम् ।
यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः ॥
नारञ्च मोक्षणं पुण्यमयनं ज्ञानमीप्सितम् ।
तयोर्ज्ञानं भवेद्यस्मात् सोऽयं नारायणः स्मृतः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०६ अः ॥
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः ॥"
इति विष्णुपुराणम् ॥
यद्वा ।
"नाराजातानि तत्त्वानि नाराणीति विदुर्बुधाः ।
तान्येव चायनं तस्य तेन नारायणः स्मृतः ॥"

तथा ।
"यच्च किञ्चिज्जगत् सर्व्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्व्वं व्याप्य नारायणः
स्थितः ॥"

तथा ।
"प्रकृतेः परः एवान्यः स नरः पञ्चविंशकः ।
तस्येमानि च भूतानि नाराणीति प्रचक्षते ॥
तेषामप्ययनं यस्मात्तस्मान्नारायणः स्मृतः ॥"
क्वचिन्मन्वन्तरे नरनामऋषेरपत्यत्वं गत इति नारायण ॥ इत्यमरटीकायां भरतः ॥ * ॥
("नराणामयनाच्चापि ततो नारायणः स्मृतः ॥"
इति महाभारते । ५ । ७० । १० ॥)
तस्य स्वरूपो यथा,—
"श्रीकृष्णश्च द्विधारूपो द्विभुजश्च चतुर्भुजः ।
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥
चतुर्भुजस्य पत्नी च महालक्ष्मीः सरस्वती ।
गङ्गा च तुलसी चैव देवी नारायणप्रिया ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६४ अध्यायः ॥
तस्य ध्यानं यथा,—
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥"
इत्यादित्यहृदयम् ॥

अपि च ।
"शङ्खचक्रगदापद्मधरं कमललोचनम् ।
शुद्धस्फटिकसङ्काशं क्वचिन्नीलाम्बुजच्छविम् ॥
गरुडोपरिसुस्थानपद्मासनगतं हरिम् ।
श्रीवत्सवक्षसं शान्तं वनमालाधरं परम् ॥
केयूरकुण्डलधरं किरीटमुकुटोज्ज्वलम् ।
निराकारं ज्ञानगम्यं साकारं देहधारिणम् ॥
नित्यानन्दं निरानन्दं सूर्य्यमण्डलमध्यगम् ।
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ॥"
इति कालिकापुराणे २२ अध्यायः ॥
तन्नाममाहात्म्यं यथा,—
"नारायणाच्युतानन्तवासुदेवेति यो नरः ।
सततं कीर्त्तयेत् भूमे ! याति मल्लयतां प्रिये ! ॥"
इति वराहपुराणम् ॥
"सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति निश्चितम् ॥"
इति श्रीकृष्णजन्मखण्डे १०८ अध्यायः ॥
"नारायणेति शब्दोऽस्ति वागस्ति वशवर्त्तिनी ।
तथापि नरके मूढाः पतन्तीह किमद्भुतम् ॥"
इति महाभारतम् ॥
तस्य तुष्टिजनककर्म्माणि यथा —
श्रीकृष्ण उवाच ।
"कर्म्मणा येन विप्रेन्द्र ! तुष्टिर्मे हृदि जायते ।
कोऽपि च तत् समस्तं ते कथयामि समासतः ॥
यो दयालुर्द्विजश्रेष्ठ ! सर्व्वभूतेषु सर्व्वदा ।
अहङ्कारेण हीनश्च तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्म कुर्य्यात्सदर्थं यो धर्म्मं भक्तिसमन्वितः ।
ब्रूते यथार्थं एवोक्तं यस्य तुष्टोऽस्म्यहं सदा ॥
मिष्टं यस्तु समासाद्य दत्त्वा मे योऽत्ति मानवः ।
मानापमानसदृशस्तस्य तुष्टोऽस्म्यहं सदा ॥
सर्व्वभूतशरीरस्थं यो मां जानाति मानवः ।
परहिंसाविहीनो यस्तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्माणि कुरुते यस्तु सुविचार्य्य पुनः पुनः ।
गोब्राह्मणहितैषी च तस्य तुष्टोऽस्म्यहं सदा ॥
स्वयं निरुक्तं वचनं यत्नाद् यः परिपालयेत् ।
प्रपन्नं पाति यत्नाद्यस्तस्य तुष्टोऽस्म्यहं सदा ॥
दानान्युपकारिभ्यो यो ददाति द्विजोत्तम ! ।
मयि चित्तं सदा यस्य तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्मणा येन तुष्टोऽस्मि निरुक्तं तत् समासतः ॥"
तस्य रोषजनककर्म्माणि यथा,—
"रुष्टोऽस्मि कर्म्मणा येन विप्र ! वच्मि शृणुष्व तत् ॥
परहिंसारतो यस्तु निर्दयः सर्व्वजन्तुषु ।
अहङ्कुः सर्व्वदा क्रुद्धः स मां नयति शत्रुताम् ॥
असत्यभाषी क्रूरश्च परनिन्दापरस्तु यः ।
परवर्त्तनविध्वंसी स मां नयति शत्रुताम् ॥
अहष्टदोषौ पितरौ स्त्रीभ्रातृभगिनीस्तथा ।
मोहात्त्यजति मूढो यः स मां नयति शत्रुताम् ॥
पितृनिर्भर्त्सनं यस्तु कुरुते मूढधीर्नरः ।
गुर्व्ववज्ञाञ्च विप्रेन्द्र ! स मां नयति शत्रुताम् ॥
दम्पत्योर्भेदनं यस्तु हेतुमात्रेण केनचित् ।
कुरुते ब्राह्मणश्रेष्ठ ! स मां नयति शत्रुताम् ॥
विप्रस्व देवताद्रव्यं परद्रव्यञ्च मानवः ।
हरते यस्तु विप्रेन्द्र ! स मां नयति शत्रुताम् ॥
आरामच्छेदिनो ये च जलाशयविलोपिनः ।
ग्रामनाशकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
परस्त्रियं समालोक्य विषादं यान्ति ये जनाः ।
प्रशंसन्ति पापचर्य्यां ये तेषां रुष्टोऽस्म्यहं सदा ॥
छिन्दन्त्यनाथं ये मूढा अनाथस्वं हरन्ति ये ।
विश्वासघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ये च गोवीथ्यहन्तारो वृषलीपतयश्च ये ।
अश्वत्थघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ब्रह्मविष्णुमहेशानां मध्ये ये भेदकारिणः ।
वेदनिन्दाकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
एकादश्यां भुञ्जते ये मोहात् पापधियो नराः ।
परदारानुरक्ता ये तेषां रुष्टोऽस्म्यहं सदा ॥
पापबुद्धिप्रदा ये च ये च मित्रद्रुहो द्विज ! ।
धात्रीतरुञ्च ये घ्नन्ति तेषां रुष्टोऽस्म्यहं सदा ॥
दिवसे मैथुनं ये च कुर्व्वते काममोहिताः ।
रजस्वलां स्त्रियं यान्ति तेषां रुष्टोऽस्म्यहं सदा ॥
ये च दृष्ट्वातुरां नारीं मोहाद्गच्छन्ति सत्तम ! ।
व्रतस्थाश्च सदा ते मां नयन्ति शत्रुतां भुवि ॥
अमावास्यातिथौ ये च कुर्व्वते निशिभोजनम् ।
भोजनद्वयमेकार्के तेषां रुष्टोऽस्म्यहं सदा ॥
आमिषं मैथुनं तैलममावास्यादिने द्विजाः ।
न ये त्यजन्ति विप्रेन्द्र ! तेषां रुष्टोऽस्म्यहं सदा ॥
बहुनात्र किमुक्तेन सङ्क्षेपात्ते वदाम्यहम् ।
निन्दन्ति वैष्णवान् ये च तेषां रुष्टोऽस्म्यहं
सदा ॥"
इति क्रियायोगसारे १८ अध्यायः ॥
अजामिलपुत्त्रः । यथा,—
"कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥
तस्य प्रवयसः पुत्त्रा दश तेषान्तु योऽवमः ।
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥
दूरे क्रीडनकासक्तं पुत्त्रं नारायणाह्वयम् ।
प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥
निशम्य म्रियमाणस्य मुखतो हरिकीर्त्तनम् ।
भर्त्तुर्नाम महाराज ! पार्षदाः सहसापतन् ॥
विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम् ।
यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ॥"
इति श्रीभागवते षष्ठस्कन्धे प्रथमाध्यायः ॥
सैन्यविशेषः । यथा,—
"मत्संहननतुल्यानां गोपानामर्ब्बुदं महत् ।
नारायणा इति ख्याताः सर्व्वे संग्रामयोधिनः ॥"
"दुर्य्योधनस्ततः सैन्यं सर्व्वमावारयत्तदा ।
सहस्राणां सहस्रञ्च योधानां प्राप्य भारत ! ॥"
इति महाभारते । ५ । ७ अध्यायः ॥
धर्म्मपुत्त्रर्षिविशेषः । यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्त्यां
नारायणो नर इति स्वतपःप्रभावः ॥"
इति श्रीभागवते । २ । ७ । ६ ॥
"दण्डग्रहणमात्रेण नरो नारायणो भवेत् ॥"
इति यतिधर्म्मः ॥
(कृष्णयजुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा मुक्तिकोपनिषदि ।
"गर्भो नारायणो हंसो विन्दुर्नादशिरःशिखा ॥"
चूर्णौषधिविशेषः । यथा, भावप्रकाशे उदररोगाधिकारे ।
"यवानी हपुषा धान्यं त्रिफला चोपकुञ्चिका ।
कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥
शताह्वा जीरको व्योषं स्वर्णक्षीरी च चित्रकम् ।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥
विडङ्गञ्च समांशानि दन्त्या भागत्रयं भवेत् ।
त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा ॥
एष नारायणो नाम्ना चूर्णो रोगगणापहः ।
एनं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः ॥
तक्रेणोदरिभिः पेयो गुल्मिभिर्व्वदराम्बुना ।
आनद्धवाते सुरया वातरोगे प्रसन्नया ॥
दधिमण्डेन विड्बन्धे दाडिमाम्बुभिरर्शसे ।
परिकर्त्तेषु वृक्षाम्लैरुष्णाम्बुभिरजीर्णके ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ।
हृद्रोगे ग्रहणीरोगे कुष्ठे मन्देऽनले ज्वरे ॥
दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे ।
यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम् ॥")
नारायणक्षेत्र, क्ली, (नारायणस्य क्षेत्रं स्थानम् ।) गङ्गाप्रवाहावधिहस्तचतुष्टयमितनारायणस्वामिकस्थानम् । यथा, ब्रह्मपुराणे ।
"प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥"
"अत्र किञ्चिन्न दद्याच्च साक्षात् मात्राय पुण्यवान् ।

अत्र प्रतिग्रहे राजन्। विक्रीता जाह्नवी भवेत्॥
विक्रीतायाश्च जाह्नव्यां विक्रीतोऽभूज्जनार्द्दनः।
जनार्द्दने च विक्रीते विक्रीतं भुवनत्रयम्॥
कोऽपि न त्राणकर्त्तास्य निःसम्बन्धप्रसङ्गतः॥"

तत्र कर्त्तव्यानि यथा,—

"दीक्षाच देवपूजाच जपं गङ्गातटे चरेत्।
शुष्कवास पिधायापि सावित्रीजपमाचरेत्॥
श्राद्धञ्च तर्पणञ्चैव परोपकारकर्म्म च।
परोद्देशञ्च मनसा व्यक्तद्रव्यस्य दापने।
स्तवपाठश्च मौनञ्च नीचालापविवर्ज्जनम्॥
केवलं वारिपानञ्च कर्त्तव्य नक्तभावतः।
एतानि किल कर्म्माणि चैत्रे नारायणे चरेत्॥"

इति वृहद्धर्म्मपुराणे ४५ अध्यायः॥

अवशिष्टं गङ्गाशब्दे द्रष्टव्यम्॥

नारायणतैलं, क्ली, (नारायणाख्यं तैलम्।) औषधपक्वतैलप्रभेदः। तत्त्रिविधम्। स्वल्पं वृहत् महच्च। यथा,—

"विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः।
प्रसारण्यश्वगन्धा च वृहती कण्टकारिका॥
वला चातिवला चैव श्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्॥
पादशेष परिस्राव्य तैलपात्रं प्रदापयेत्।
शतपुष्पा देवदारु मांसी शैलेयकं वचा॥
चन्दनं तगरं कुष्ठं एलापर्णी चतुष्टयम्।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्॥
एषां द्विपलिकान् भागान् पेषयित्वा विनिक्षिपेत्।
शतावरी रसञ्चैव तैलतुल्यं प्रदापयेत्॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्॥
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते।
अश्वो वा वातसभग्नो गजो वा यदि वा नरः॥
पङ्गुल पीठसर्पी च तैलेनानेन सिध्यति।
अधोभागे च ये वाताः शिरोमध्यगताश्च ये।
दन्तशूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे॥
यस्य शुष्यति चैकाङ्ग गतिर्यस्य च विह्वला।
क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः॥
वधिरा लल्लजिह्वाश्च मन्दमेधस एव च।
स्वल्पप्रजा च या नारी या च गर्भं न विन्दति॥
वातार्त्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा।
एतत्तैलवरं तेषां नाम्ना नारायणं स्मृतम्॥"

इति स्वल्पनारायणतैलम्॥ १॥ *॥

"शतावरी चांशुमती पृश्निपर्णी शटी वला।
एरण्डस्य च मूलानि वृहत्यो' पूतिकस्य च॥
गवेधुकस्य मूलानि तथा सहचरस्य च।
एषां दशपलान् भागान् जलद्रोणे विपाचयेत्॥
पादशेषे रसे पूते गर्भं चैनं समावपेत्।
पुनर्नवा वचा दारु शताह्वा चन्दनागुरु॥
शैलेय तगरं कुष्ठं एला मांसी स्थिरा वला।
अश्वाह्वा सैन्धवं रास्ना पलार्द्धानि च पेषयेत्।
गव्याजपयसः प्रस्थौ द्वौ दावत्र प्रदापयेत्॥
शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्।
अस्य तैलस्य सिद्धस्य शृणु वीर्य्यमतःपरम्॥
अश्वानां वातभग्नानां कुञ्जराणां तथा नृणाम्।
तैलमेतत् प्रयोक्तव्यं सर्व्ववातनिवारणम्॥
आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत्।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी तथा॥
हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्।
अपचीं गण्डमालाञ्च वातरक्तं हनुग्रहम्॥
कामलां पाण्डुरोगञ्च अश्मरीञ्चापि नाशयेत्।
तैलमेतद्भगवता विष्णुना परिकीर्त्तितम्।
नारायणमिति ख्यातं वातान्तकरणं शुभम्॥"

इति वृहन्नारायणतैलम्॥ २॥ *॥

"विल्वाश्वगन्धा वृहती श्वदंष्ट्रा
श्योनाकवाट्यालकपारिभद्रम्।
क्षुद्रा कठिल्यातिवलाग्निमन्थं
मूलानि चैषां सरलीयुतानाम्॥
मूलं विदध्यादथ पाटलीनां
प्रत्येकमेषां प्रवदन्ति तज्ज्ञाः।
सपादप्रस्थं विधिनोद्धृताश्च
द्रोणैरपामष्टभिरेव पक्वाः॥
पादावशेषेण रसेन तेन
तैलाढकाभ्यां सममेव दुग्धम्।
छागस्य मांसद्रवमेव तुल्य-
मेकत्र सम्यग्विपचेत् सुबुद्धिः॥
दद्याद्रसञ्चैव शतावरीणां
तैलेन तुल्यं पुनरेव तत्र।
रास्नाश्वगन्धा द्रुमदारु कुष्ठं
पर्णीं चतुष्कागुरुकेशराणि॥
सिन्धूत्थमांसी रजनीद्वयञ्च
शैलेयकं चन्दनपुष्कराणि।
एला सयष्टी तगराब्दपत्रं
भृङ्गाष्टवर्गास्तु वचा पलाशम्॥
स्थौणेयवृश्चीरकचोरकाख्य-
मेभिः समस्तैर्द्विपलप्रमाणैः।
कर्पूरकाश्मीरमृगाण्डजानां
दद्यात् सुगन्धाय वदन्ति केचित्॥
प्रस्वेददौर्गन्ध्यनिवारणार्थं
चर्ण्णीकृतानां द्विपलप्रमाणम्।
आलोड्य सम्यग्विधिवद्विपक्वं
नारायणं नाम महच्च तैलम्॥ *॥
सर्व्वैः प्रकारैर्विधिवत् प्रयोज्य-
मभ्यस्य पुंसां पवनार्द्दितानाम्।
ये पङ्गवः पीठविसर्पिणश्च
एकाङ्गहीनार्द्दितवेपमानाः।
वाधिर्य्यशुक्रक्षयपीडिताश्च
मन्याहनुस्तम्भशिरोगदार्त्ताः।
मुक्ता नरास्ते बलवर्णयुक्ताः
सप्तेव तैलं सहसा भवन्ति॥
वन्ध्या च नारी लभते च पुत्त्रं
वीरोपमं सर्व्वगुणोपपन्नम्।
शाखाश्रिते कोष्ठगते च वाते
वृद्धौ विधेयं पवनार्द्दितानाम्॥
जिह्वानिले दन्तगते च शूले
ग्रीष्मादकौले ज्वरकम्पितानाम्।
प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वं
जीवेच्चिरं चापि भवेद्युवेव॥
देवासुरे युद्धवरे समीक्ष्य
स्वायुश्विभग्नानसुरैः सुरांश्च।
नारायणेनापि स्वदृंढणार्थं
स्वनामतैलं विहितन्तु तेषाम्॥"

इति महानारायणतैलम्॥३॥ इति सुखबोधः॥

नारायणप्रियः, पुं, (नारायणस्य प्रियः। नारायणः प्रियो यस्य इति वा।) शिवः। यथा,—

"नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम्॥"

इति शिवस्तोत्रम्॥

नारायणबलि, पुं, (नारायणाय नारायणमुद्दिश्य देयो वलिः।) मृतपतितादीनां प्रायश्चित्तात्मककर्म्मविशेषः। यथा। "नारायणवलिस्तु हेमाद्र्याद्यनुसारेणोच्यते। तत्रादौ क्रियानिबन्धे गारुडे तर्पणमुक्तम्।

'कार्य्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि।
दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्॥
अनादिनिधनो देवः शङ्खचक्रगदाधरः।
अक्षयः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥

इति शुक्लैकादश्यां देशकालौ सङ्कीर्त्त्य अमुकगोत्रस्यामुकस्य दुर्म्मरणात्मघातजदोषनाशाद्यौर्द्धदेहिके सम्प्रदानत्वयोग्यतासिद्ध्यर्थं नारायणवलिं करिष्ये। इति सङ्कल्प्य ब्रह्माणं विष्णुं शिवं यमं प्रेतं पञ्चकुम्भेषु स्थापयेत्।

'विष्णुः स्वर्णमयः कार्य्यो रुद्रस्ताम्रमयस्तथा।
ब्रह्मा रौप्यमयस्तत्र यमो लौहमयो भवेत्॥
प्रेतो दर्भमयः कार्य्यः। इति गारुडोक्तासु सर्व्वासु हैमीषु वा प्रतिमासु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्चनाणि प्रतिष्ठाप्य चरुं पुरुषसूक्तेन प्रत्यृचं नारायणायेदमिति हुत्वा देवानामग्रे दक्षिणाग्रदर्भेषु विष्णुरूपं प्रेतं स्मरन् नामगोत्राभ्यां मधुघृततिलयुतान् दशपिण्डान् दच-पवीत्येव अमुकगोत्र अमुकशर्म्मन् प्रेत विष्णुरूपाय ते पिण्ड उपतिष्ठतामिति दत्त्वा कृष्णपुरुषसूक्तेनाभिमन्त्र्य यत्ते यममिति सूक्तेन पिण्डाननुमन्त्र्य शङ्खोदकेन चाभिषिच्याभ्यर्च्च्यामुकशर्म्माणममुकगोत्रं विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एकमामान्नं ब्रह्मादिपञ्चभ्यो दद्यात्। मन्त्रस्तु।
ब्रह्मविष्णुमहादेवा यमश्चैव सकिङ्करः।
वलिं गृहीत्वा कुर्व्वन्तु प्रेतस्य च शुभां गति-
मिति॥'

मिताक्षरायान्तु होमबल्यादिना उक्तम्। ततः प्रतिदैवतं त्रिविधं फलं शर्करामधुगुडघृताणि च निवेद्य पिण्डानभ्यर्च्च्य नद्यां क्षिप्त्वा रात्रौ नव सप्त पञ्च वा विप्रान्निमन्त्र्योपोषितेन जागरणं कृत्वा श्वोभूते पुनर्व्विष्णुं यमं संपूज्यैकोद्दिष्टविधिना श्राद्धपञ्चकं करिष्ये इत्युक्त्वा ब्रह्मविष्णुशिवयमप्रेतान् स्मरन् विप्रान् उपविश्य प्रेतस्थाने चैकं विष्णुं स्मरन् आवाहनादर्घ्यवृत

नमिप्रशान्तं कृत्वोल्लेखनादि कृत्वाग्नप्रशेषेण
मध्वना विष्णवे शिवाय यमाय सपरिवाराय
चतुरः पिण्डान् दत्त्वा प्रेतनामगोत्रे स्मृत्वा विष्णु-
नाम्ना पञ्चमं दत्त्वाभ्यर्च्याचान्तेभ्यो दक्षिणां
दत्त्वैकं प्रेतं स्मृत्वा विशेषतः सतोयं विप्रे
प्रनायेद तिलोदकमुपतिष्ठतामिति सतिलमुदकं
दापयित्वा भुञ्जीतेति। अत्र विशेषान्तरं भट्ट-
कृतान्त्येष्टिपद्धतौ ज्ञेयम् ॥ * ॥ सर्पहते तु वर्ष-
पर्य्यन्तं पूर्व्वं एकभक्तपूर्व्वं शुक्लपञ्चम्यामुपवासं
नक्तं वा कृत्वा पिष्टमयं नागमनन्तवासुकिशङ्ख-
पद्मकम्बलकर्कोटकाश्वतरधृतराष्ट्रशङ्खपालका-
लियतक्षककपिलेति नामभिः प्रतिमासं सम्पूज्य
पायसेन विप्रान् सम्भोज्य वत्सरान्ते हैमं नागं
गाञ्च प्रत्यक्षाञ्च दत्त्वा नारायणबलिं कुर्य्यात्।
तत्तु हेमाद्रौ ज्ञेयम् ॥ * ॥ बौधायनसूत्रे
सर्पहतानां नमोऽस्तु सर्पेभ्य इति तिस्र आहु-
तीर्हुत्वोदके मृतानां समुद्राय वरुणाय हुत्वेति
क्रिया कुर्य्यादिति शेषः। व्यासः।
सौवर्णभारनिष्पन्नं नागं कृत्वा तथैव गाम्।
व्यासाय दत्त्वा विधिवत् पितुरानृण्यमाप्नुयात् ॥'
हेमाद्रौ भविष्ये।
'पञ्चम्यां पन्नगं हैमं स्वर्णनैकेन कारयेत्।
नाराज्यपात्रमध्यस्थं पूज्यविप्राय दापयेत् ॥
प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शम्भुनेति ॥'
अपरार्कस्मृत्यन्तरे।
'नैव शुध्यति प्रेतो नारायणबलौ कृते।
यो ददाति क्रियापिण्डं तस्मै प्रेताय वै सुत।
तस्यैवाशौचमुद्दिष्टं त्र्यहमेव न संशयः ॥
विष्णुश्राद्धसमाप्तौ तु त्रयोदश्यां दिनत्रयम्।
अशौचं पिण्डदः कुर्य्यान्न तु तद्बन्धुगोत्रजाः ॥
यस्य वै मृत्युकाले तु व्युच्छिन्ना सन्ततिर्भवेत्।
स वसेन्नरके नित्यं पङ्कमग्नः करी यथा ॥'
इत्युपक्रम्य,—
'बलिं नारायणं कुर्य्यात्तस्योद्देशेन भक्तिमान् ॥'
इति गारुडोक्तेरपुत्रस्यापि पक्षादौ कार्य्य
इत्युक्तं द्वैतयाज्ञिकेन।" इति निर्णयसिन्धौ ५
परिच्छेदः ॥

नारायणास्त्रं, क्ली, (नारायणस्यास्त्रम्।) विष्णो-
रस्त्रभेदः। तत्स्वरूपं यथा, देवीपुराणे।
"तथा दानवनाशेन युक्तं नारायणं शरम्।
शङ्खचक्रगदाहस्तं खड्गपृष्ठव्यवस्थितम् ॥"
अपि च।
"ततो हरिहरं युद्धमभवद्रोमहर्षणम्।
रुद्रः पाशुपतास्त्रेण विव्याध हरिमोजसा ॥
हरिर्नारायणास्त्रेण रुद्रं विव्याध कोपवान्।
नारायणं पाशुपतसमेऽस्त्रे व्योम्नि रोधिते ॥
युयुधाते भृशं दिव्यं परस्परजिघांसया।
दिव्यं वर्षसहस्रन्तु तयोर्युद्धमभूत्तदा ॥
तत्रैकं मुकुटोद्भद्धं मूर्द्धन्यजटजालकम्।
एकः प्रशापयच्छङ्खमन्यः डमरुकं शुभम् ॥
एकः खड्गधरस्तत्र तथान्यो दण्डधारिणम्।
एकः कौस्तुभशोभाङ्गमन्यो भूतिविभूतिकम् ॥
एकं गदां भ्रामयन्तं द्वितीयं दण्डमेव च।
एकः शोभति कण्ठस्थैर्मणिभिस्त्वस्थिभिः परः।
एकः पीताम्बरस्तत्र द्वितीयः सर्पमेखलम् ॥
एवन्तौ सङ्गिनावस्तौ रुद्रनारायणात्मकौ।
अन्योन्यातिशयोपेतौ तदा लोकपितामहः ॥
उवाच शाम्यतामस्त्रे स्वस्वभावेन सुव्रते।
एवन्तो ब्रह्मणा प्रोक्ते शान्तभावं प्रजग्मतुः ॥
तथा विष्णुहरौ ब्रह्मा वाक्यमेतदुवाच ह।
उभौ हरिहरौ देवौ लोके ख्यातिं गमिष्यतः ॥"
इति वराहपुराणम् ॥

नारायणी, स्त्री, (नारायणस्येयमिति। नारायण
+अण्+ङीप्।) दुर्गा। (यथा, मार्कण्डेये।
९१। ९।
"सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि। नमोऽस्तु ते ॥"
इयं सुपार्श्वाख्यपीठस्थाने एतन्मूर्त्त्या विराजते।
यथा, देवीभागवते। ७। ३०। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी ॥")
लक्ष्मीः। शतावरी। इति हेमचन्द्रः ॥ * ॥
तस्या निरुक्तिर्यथा,—
"यशसा तेजसा रूपैर्नारायणसमा गुणैः।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः ॥
अपि च।
"नारायणार्द्धाङ्गभूता तेन तुल्या च तेजसा।
तदा तस्य शरीरस्था तेन नारायणी स्मृता ॥"
इति तत्रैव श्रीकृष्णजन्मखण्डे २७ अध्यायः ॥ * ॥
गङ्गा। यथा, तत्रैव।
"गङ्गायै विश्वमुख्यायै शिवामृतायै नारायण्यै
नमः ॥"
(यथा च काशीखण्डे। २९। ९७।
"नभोऽङ्गनचरी नूतिर्नम्या नारायणी नुता ॥")
मुद्गलमुनिपत्नी। इति पुराणम् ॥ (स्वनाम-
ख्याता श्रीकृष्णसम्बन्धिनी सेना। इयं हि
भारतयुद्धे दुर्य्योधनपक्षमाश्रितवती ॥)

नारिकेरः, पुं, (नारिकेल + लस्य रः।) नारि-
केलः। इति शब्दरत्नावली ॥

नारिकेलः, पुं, (किल श्वैत्ये क्रीडने च+भावे
घञ्। नार्य्या रमण्या केल इव सुखदायी
केलो यस्य। पृषोदरादित्वात् ह्रस्वः।) स्वनाम-
प्रसिद्धफलवृक्षविशेषः। तत्पर्य्यायः। लाङ्गली २।
इत्यमरः। २। ४। १६८ ॥ नारिकेरः ३ नाड़ि-
केलः ४ नारीकेलः ५ नारीकेली ६ नारि-
केरी ७। इत्यादि भरतः। नारिकेलिः ८
सदापुष्पः ९ शिरःफलः १०। इति शब्दमाला ॥
नालिकेरः ११ रसफलः १२ सुतुङ्गः १३ कूर्च्च-
शेखरः १४ दृढ़नीलः १५ नीलतरुः १६ मङ्गल्यः
१७ उच्चतरुः १८ तृणराजः १९ स्कन्धतरुः २०
दाक्षिणात्यः २१ दुरारुहः २२ त्र्यम्बकफलः २३
दृढ़फलः २४। इति राजनिर्घण्टः ॥ कूर्च्च-
शीर्षकः २५ तुङ्गः २६ स्कन्धफलः २७ उच्चः
२८ सदाफलः २९। इति भावप्रकाशः ॥ शिरा-
फलः ३० करकाम्भाः ३१ पयोधरः ३२ मन-
कुष्ठः ३३ कौशिकफलः ३४ फलमुण्डः ३५ घटा
फलः ३६ सुखफलः ३७ विश्वामित्रप्रियः ३८।
इति शब्दरत्नावली ॥ नारकेरः ३९ सुभङ्गः
४० फलकेसरः ४१। इति जटाधरः ॥ अस्य
गुणाः। गुरुत्वम्। स्निग्धत्वम्। शीतत्वम्।
पित्तनाशित्वञ्च ॥ * ॥ अर्द्धपक्वस्य तस्य गुणौ।
तृषाशोषशमनत्वम्। दुर्ज्जरत्वञ्च ॥ * ॥ बाल-
नारिकेलजलगुणाः। लघुत्वम्। शीतलत्वम्।
रसपाके मधुरत्वम्। पित्तपीनसतृषास्रविदाह
भ्रान्तिशोषशमनत्वम्। सुखदायित्वञ्च ॥ * ॥
पक्वनारिकेलजलगुणाः। किञ्चित्पित्तकारित्वम्।
रुचिदत्वम्। मधुरत्वम्। दीपनत्वम्। बल
करत्वम्। गुरुत्वम्। हृद्यत्वम्। वीर्य्यवर्द्धन-
त्वञ्च। इति राजनिर्घण्टः ॥ * ॥
"नारिकेलफलं शीतं दुर्ज्जरं वस्तिशोधनम्।
विष्टम्भि बृंहणं बल्यं वातपित्तास्रदाहनुत् ॥
विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरमूत्रदोषान्।
तदेव जीर्णं गुरु पित्तकारि
विदाहि विष्टम्भि मतं भिषग्भिः ॥
तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु।
पिपासापित्तजित् स्वादु वस्तिशुद्धिकरं परम् ॥"
तस्य मस्तिष्कगुणाः।
"नारिकेलस्य तालस्य खर्ज्जूरस्य शिरांसि तु।
कषायस्निग्धमधुरबृंहणानि गुरूणि च ॥"
इति भावप्रकाशः ॥ * ॥
"बालस्य नारिकेलस्य जलं प्रायो विरेचनम् ॥"
इति राजवल्लभः ॥ * ॥
कांस्यपात्रे तज्जलं मद्यतुल्यम्। यथा,—
"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ॥"
इति कर्म्मलोचनम् ॥

नारिकेलक्षीरी, स्त्री, (नारिकेलोद्भवा क्षीरी।)
सितागव्याज्यसंयुक्तगोदुग्धपक्वचूर्णीकृतनारि
केलखण्डम्। यथा,—
"नारिकेलं तनूकृत्य छिन्नं पयसि गोः क्षिपेत्।
सितागव्याज्यसंयुक्तं तत्पचेन्मृदुनाग्निना ॥"
तस्या गुणाः।
"नारिकेलोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा।
गुर्व्वी सुमधुरा वृष्या रक्तपित्तानिलापहा ॥"
इति भावप्रकाशः ॥

नारी, स्त्री, (नुर्नरस्य वा धर्म्म्या। नृ+"ऋतो-
ऽञ्।" ४।४।४९। इति अञ्। नर+"नरा
च्चेति वक्तव्यम्।" इति वार्त्तिकोक्त्या अञ्।
"शार्ङ्गरवाद्यञो ङीन्।" ४। १। ७३। इति
ङीन्।) नुर्नरस्य वा धर्म्माचारोऽस्याम्। नु-
र्नरस्य वेयम्। नरधर्म्माचारयुक्ता। तत्पर्य्यायः।
स्त्री २ योषित् ३ अबला ४ योषा ५ सीम-
न्तिनी ६ वधूः ७ प्रतीपदर्शिनी ८ वामा ९
वनिता १० महिला ११। इत्यमरः। २। ६। २।
प्रिया १२ रामा १३ जनिः १४ जनी १५

योषिता १६ जोषित् १७ जोषा १८ जोषिता १९ धनिका २० महेलिका २१ महेला २२ । इति शब्दरत्नावली ॥ शर्व्वरी २३ योषीत् २४ सिन्दूरतिलका २५ सुभ्रूः २६ । इति जटाधरः ॥
अस्या उत्पत्तिकारणं यथा,—
"मातृरक्ताधिका नारी ।" अन्यच्च ।
"विषमायां तिथौ क्षिप्तं कुर्य्यात्स्त्रीजन्तु कन्यकाम् ॥"
इति सुखबोधः ॥
तस्याश्चतस्रो जातयः । यथा,—
"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
चतस्रो जातयो नार्य्या रतौ ज्ञेया विशेषतः ॥"
इति रसमञ्जरी ॥
(आसां लक्षणादिकं यदुक्तं रतिमञ्जर्य्याम् । ४—१३ ।
"भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा
अविरलकुचयुग्मा चारुकेशी कृशाङ्गी ।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥
भवति रतिरसज्ञा नातिखर्व्वा न दीर्घा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी ।
घनकठिनकुचाढ्या सुन्दरी बद्धशीला
सकलगुणसमेता चित्रिणी चित्रवक्त्रा ॥
दीर्घातिदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता ।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला ।
कामोत्सुका गाढरतिप्रिया या
नितान्तभोक्त्री करिणी मता सा ॥
शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम् ।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी ।
शङ्खिनी क्षारगन्धा च मदगन्धा च हस्तिनी ॥
बाला च तरुणी प्रौढा वृद्धा भवति नायिका ।
गुणयोगेन रन्तव्या नारी वश्या भवेत्सदा ॥
आ षोडशाद्भवेद्बाला तरुणी त्रिंशका मता ।
पञ्चपञ्चाशिका प्रौढा भवेद्वृद्धा ततः परम् ॥
फलमूलादिभिर्बाला तरुणी रतियोगतः ।
प्रेमदानादिभिः प्रौढा वृद्धा च दृढताडनात् ॥
बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥")
सा त्रिविधा यथा,—
"योषितस्त्रिविधा ब्रह्मन् ! गृहिणा मूढचेतसाम् ।
साध्वी भोग्या च कुलटा ताः सर्व्वाः स्वार्थतत्पराः ।
परलोकभयात् साध्वी तथेह यशसात्मनः ।
कामस्नेहाच्च कुरुते भर्त्तुः सेवाञ्च सन्ततम् ॥१॥
भोग्या भोग्यार्थिनी शश्वत् कामस्नेहेऽथ केवलम् ।
कुरुते पतिसेवाञ्च न च भोग्या दृढेच्छया ॥

वस्त्रालङ्कारसम्भोग सुस्निग्धाहारसत्तमम् ।
यावत् प्राप्नोति सा भोग्या तावच्च वशगा प्रिया ॥२॥
कुलाङ्गारसमा नारी कुलटा कुलकामिनी ।
कपटात् कुरुते सेवां स्वामिनो न च भक्तितः ॥
सदा पुंयोगमाशंसुर्मनसा मदनातुरा ।
आहारादधिकं जारं प्रार्थयन्ती नव नवम् ॥
जारार्थे स्वपतिं तात । हन्तुमिच्छति पुंश्चली ।
तस्यां यो विश्वसेन्मूढो जीवनन्तस्य निष्फलम् ॥
कथिता योषितः सर्व्वा उत्तमाधममध्यमाः ।
स्वात्मारामा विजानन्ति मनसा तां न पण्डिताः ॥" ३ ॥
तस्याः स्वभावो यथा —
"हृदयं क्षुरधाराभं शरत्पद्मोत्सवं मुखम् ।
सुधोपमं सुमधुरं वचनं स्वार्थसिद्धये ॥
प्रकोपे विषतुल्यं तदनूढं शीलकुत्सितम् ।
दुर्ज्ञेयं तदभिप्रायं निगूढं कर्म्म केवलम् ॥
तथा तासामविनयं प्रबलं साहसं परम् ।
ददौ कार्य्यच्छलात् कार्य्यं शश्वन्मायां दूरत्ययाम् ॥
पुंसस्त्वष्टगुणः कामः शश्वत्कामो जगद्गुरो ॥
आहारो द्विगुणो नित्यं नैष्ठुर्य्यञ्च चतुर्गुणम् ।
कोपः पुंसः षड्गुणश्च व्यवसायश्च निश्चितम् ॥
यत्रेमे दोषनिवहाः काङ्क्षा तत्र पितामह ॥
का क्रीडा किं सुखं पुंसो विण्मूत्राश्रयवेश्मनि ॥
तेजः प्रनष्टं सम्भोगे दिवालापे यशःक्षयः ।
धनक्षयस्त्वतिप्रीतौ रत्यासक्तौ वपुःक्षयः ॥
साहित्ये पौरुषं नष्टं कलहे माननाशनम् ।
सर्व्वनाशश्च विश्वासे ब्रह्मन्नारीषु किं सुखम् ॥
यावद्धनी च तेजस्वी सश्रीको योग्यतापरः ।
पुमान्नारीं वशीकर्त्तुं समर्थस्तावदेव हि ॥
रोगिणं निर्गुणं वृद्धं योषिन्नापेक्षते प्रियम् ।
लोकाचारतया तस्मै ददात्याहारमल्पकम् ॥"
इति ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २३ अध्यायः ॥
(नारीचरित्रदूषणकारणानि यथा, हितोपदेशे । १ । १३१—१३२ ।
"स्वातन्त्र्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गतिः
गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा ।
संसर्गः सह पुंश्चलीभिरसकृत् वृत्तेर्निजायाः क्षतिः
पत्युर्वार्द्धकमीर्षितं प्रवसनं नाशस्य हेतुः स्त्रियाः ॥"
अपरञ्च,—
"पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥"
इयन्तु यथानियमं प्रतिपालिता कल्याणकारी श्रीवृद्धिकारिणी च । यदुक्तं मनौ ।३।५५—६० ।
"पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफलाः क्रियाः ॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् ।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा ॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ।
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥")
अगम्या नार्य्यो यथा,—
"माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा ॥
भागिनेयी तथा चैव राजपत्नी तथैव च ।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च ॥
इत्यगम्यास्तु निर्द्दिष्टास्तासान्तु गमने नरः ।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति ॥"
इति मत्स्यपुराणे २०१ अध्यायः ॥
तस्याः शुभलक्षणं यथा,—
"निगूढगुल्फौ पतितौ पद्मकान्तितलौ शुभौ ।
अस्वेदिनौ मृदुतलौ मत्स्याङ्कमकरान्वितौ ॥
यस्या जलचरचिह्नौ च दास्याः पादौ ततोऽन्यथा ।
जङ्घे च रोमरहिते सुवृत्ते विशिरे शुभे ॥
अनुल्वणं सन्धिदेशं समं जानुद्वयं शुभम् ।
ऊरू करिकराकारावरोमौ च समौ शुभौ ॥
अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम् ।
श्रोणीललाटकं स्त्रीणामुरु कूर्म्मोन्नतं शुभम् ॥
गूढो मणिश्च शुभदो नितम्बश्च गुरुः शुभः ।
विस्तीर्णमांसोपचिता गम्भीरा विपुला शुभा ॥
नाभिः प्रदक्षिणावर्त्ता मध्यं त्रिवलिशोभनम् ।
अरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ ॥
कठिनावरोम उरो मृदुग्रीवा च कम्बुता ।
आरक्ताधरौ श्रेष्ठौ मांसलं वर्त्तुलं सुखम् ॥
कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम् ।
दाक्षिण्ययुक्तमशठं हंसशब्दसुखावहम् ॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा ।
नीलोत्पलनिभं चक्षुर्नासंलग्नौ न लम्बकौ ॥
न पृथू बालेन्दुनिभे भ्रुवौ चाथ ललाटकम् ।
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम् ॥
अमांसलं कर्णयुगं समं मृदु समाहितम् ।
स्निग्धा नीलाश्च मृदवो मूर्द्धजाः कुञ्चितैकजाः ॥
स्त्रीणां समं शिरः श्रेष्ठं पादे पाणितले तथा ।
नागिकुञ्जरश्रीवृक्षयूपेषु यवतोमरैः ॥
ध्वजचामरमालाभिः शैलकुण्डलवेदिभिः ।
शङ्खातपत्रपद्मैश्च मत्स्यस्वस्तिकसद्रथैः ।
लक्षणैरङ्कुशाद्यैश्च स्त्रियः स्यू राजवल्लभाः ॥
निगूढमणिबन्धौ च पद्मगर्भोपमौ करौ ।
न निम्नं नोन्नतं स्त्रीणां भवेत् करतलं शुभम् ॥
रेखान्विताम्लविधवां कुर्य्यात् सम्भोगिनीं स्त्रियम् ।
रेखा या मणिबन्धोत्था गता मध्याङ्गुलीं करे ॥
गता पाणितले या च योर्द्ध्वा पादतले स्थिता ।
स्त्रीणां पुंसां तथा सा स्याद्राज्याय च सुखाय च ॥
कनिष्ठिका मूलरेखा कुर्य्याच्चैव शतायुषम् ।
प्रदेशिनीमध्यमाभ्यामन्तरानगता सती ॥
ऊना ऊनायुषं कुर्य्याद्रेखा चाङ्गुष्ठमूलगा ।

दृष्टव्यः पुत्त्रास्तन्वास्तु प्रमदाः परिकीर्त्तिताः ॥
अल्पायुषि लघु छिन्ना दीर्घा छिन्ना महायुषे ।
शुभन्तु लक्षणं स्त्रीणां प्रोक्तं त्वशुभमन्यथा ॥”*॥
तस्या अशुभलक्षणं यथा,—
“कनिष्ठिकानामिका वा यस्या न स्पृशते महीम् ।
अङ्गुष्ठं वा गतौ यस्यास्तर्ज्जनी कुलटा च सा ॥
जङ्घाभ्यां पिण्डिकाभ्यां जङ्घे चातिशिरालके ।
रोमशे चातिमांसे च कुम्भाकारं तथोदरम् ॥
वामावर्त्तं निम्नमल्पं तु खिन्नानाञ्च गुह्यकम् ।
ग्रीवया ह्रस्वया निस्वा दीर्घया च कुलक्षयः ॥
पृथुलया प्रचण्डाश्च स्त्रियः स्युर्नात्र संशयः ।
केकरे पिङ्गले नेत्रे श्यावे लोलेक्षणासती ॥
सिते कूपे गण्डयोश्च सा ध्रुवं व्यभिचारिणी ।
प्रलम्बिनि ललाटे च देवरं हन्ति चाङ्गना ॥
उदरे श्वशुरं हन्ति पतिं हन्ति स्फिचोर्द्वयोः ।
या तु रोमोत्तरौष्ठी स्यान्न शुभा भर्त्तुरेव हि ॥
स्तनौ सरोमावशुभौ कर्णौ च विषमौ तथा ।
करालविषमा दन्ता क्लेशाय च भयाय च ॥
चौर्य्याय कृष्णमांसाश्च दीर्घा भर्त्तुश्च मृत्यवे ।
क्रव्यादरूपैर्हस्तैश्च वृककाकादिसन्निभैः ॥
सिरालैर्विषमैः शुष्कैर्वित्तहीना भवन्ति हि ।
समुन्नतोत्तरोष्ठी या कलहे रूक्षकेशिनी ॥
स्त्रीषु दोषा विरूपाश्च । यत्राकारो गुणास्ततः ॥”
इति गरुडपुराणम् ॥
(त्र्यक्षरवृत्तिविशेषः । इति छन्दोमञ्जरी ॥)

नारीकवच, पुं, (नार्य्यः कवचं सन्नाह इव यस्य ।) सूर्य्यवंशीयमूलकराजः । स च अश्मक-पुत्त्रः । सौदासपौत्त्रश्च । “योऽसौ निःक्षत्त्रे क्ष्मातलेऽस्मिन् क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य्य रक्षितः । ततस्तं नारीकवचमुदा-हरन्ति ।” इति विष्णुपुराणे । ४ । ४ । ३८ ॥

नारीकेल, पुं, (किल क्रीडने + भावे घञ् । नार्य्याः केल इव केलो सम्भोगो यत्र ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीकेली, स्त्री, (नारीकेल + गौरादित्वात् ङीष् ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीच, स्त्री, (नाडीच + डस्य रत्वम् ।) शाक-विशेषः । नालिता इति भाषा ॥ तद्द्विविधं तिक्तं मधुरञ्च । तिक्तस्य गुणाः । रक्तपित्तहर-त्वम् । क्रिमिकुष्ठविनाशित्वञ्च । मधुरस्य गुणाः । पिच्छिलत्वम् । शीतलत्वम् । विष्टम्भिकफवात-कारित्वञ्च । इति राजवल्लभः ॥

नारीतरङ्गक, पुं, (नारीं तरङ्गयति चञ्चलचित्तां करोतीति । तरङ्ग + कृतौ णिच् + ण्वुल् ।) विटः । इति शब्दमाला ॥

नारीदूषण, क्ली, (नारीणां दूषणम् ।) स्त्रीणां दोषः । स च षड्विधः । यथा,—
“पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥”
इति मनुः ॥

नारीष्टा, स्त्री, (नारीणां इष्टा प्रिया ।) मल्लिका । इति राजनिर्घण्टः ॥

नार्य्यङ्ग, पुं, (नारीणामङ्गमिव शोभनं अङ्गं यस्य ।) नागरङ्गः । इति शब्दरत्नावली ॥ (नार्य्या अङ्गे, क्ली ॥)

नाल, क्ली, (नलतीति । नल बन्धे + “ज्वलिति-कसन्तेभ्यो णः ।” ३ । १ । १४० । इति णः ।) उत्पलादिदण्डः । तत्पर्य्यायः । नाला २ । इत्यमरः । २ । ६ । २१ ॥ नाली ३ नालिका ४ । इति भरतः ॥ (यथा, रघुः । ६ । १३ ।
“कश्चित् कराभ्यामुपगूढनाल-
मालोलपत्त्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषबन्धि
लीलारविन्दं भ्रमयाञ्चकार ॥”
अर्द्धर्चादित्वात् पुंलिङ्गोऽपि ॥) हरितालम् । इति स्वामी ॥ नलः, पुं । इति राजनिर्घण्टः ॥

नालवंश, पुं, (नालो वंश इव ।) नलः । इति राजनिर्घण्टः ॥

नाला, स्त्री, (नल बन्धे + णः । ततष्टाप् ।) नालम् । इत्यमरभरतौ ॥ डाँटा इति नाड़ा इति च भाषा । (नलति जलादिर्निर्गच्छत्यनयेति । नल + करणे घञ् । जलनिर्गममार्गः । यथा, मार्कण्डेये । ३ । ४१ ।
“यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥”)

नालि, स्त्री, (नालयतीति । नल + णिच् + इन् ।) नाड़ी । सिरा । इति द्विरूपकोषः ॥

नालिक, पुं, (नल एव नालस्तृणविशेषः । स भोक्तव्यत्वेनास्त्यस्येति ठन् ।) महिषः । इति त्रिकाण्डशेषः ॥ क्ली, (नालमस्त्यस्येति ।) पद्मम् । इति शब्दरत्नावली ॥ (नाल कार्य्यसाधनत्वे-नास्त्यस्येति । नाल + “अत इनिठनौ ।” ५ । २ । ११५ । इति ठन् । अस्त्रविशेषः । तत्तु आकृतिकार्य्यादिना अधुनातनस्य ‘बन्दूक’ इति ख्यातस्य अस्त्रस्य सादृश्यं लभते । अस्य आकृ-त्यादिकन्तु शुक्रनीतौ उक्तम् । तद्यथा,—
“अस्त्रन्तु द्विविधं ज्ञेयं नालिकं मान्त्रिकं तथा ।
यदा तु मान्त्रिकं नास्ति नालिकं तत्र धारयेत् ॥
नालिकं द्विविधं ज्ञेयं वृहत्क्षुद्रप्रभेदतः ।
तिर्य्यगूर्द्ध्वच्छिद्रमूलं नालं पञ्चवितस्तिकम् ॥
मूलाग्रयोर्लक्ष्यभेदि तिलबिन्दुयुतं सदा ।
यन्त्राघाताग्निकृत् ग्रावचूर्णधृक् कर्णमूलकम् ॥
सुकाष्ठोपाङ्गबुध्नञ्च मध्याङ्गुलविलान्तरम् ।
स्वान्तेऽग्निचूर्णसन्धातृ शलाकासंयुतं दृढम् ॥
लघुनालिकमप्येतत् प्रधार्य्यं पत्तिसादिभिः ।
यथा यथा तु त्वक्सारं यथा स्थूलविलान्तरम् ॥
यथा दीर्घं वृहत् गोलं दूरभेदि तथा तथा ।
मूलकीलभ्रमात् लक्ष्यसमसन्धानभाजि यत् ॥
वृहन्नालिकसंज्ञन्तत् काष्ठबुध्नविवर्ज्जितम् ।
प्रवाह्यं शकटाद्यैस्तु सुयुक्तं विजयप्रदम् ॥”
अस्य कार्य्यं यथा,—
“नालास्त्रं शोधयेदादौ दद्यात्तत्राग्निचूर्णकम् ।
निवेशयेत्तु दण्डेन नालमूले यथादृढम् ॥
ततः सुगोलकं दद्यात् ततः कर्णेऽग्निचूर्णकम् ।
कर्णचूर्णाग्निदानेन गोलं लक्ष्ये निपातयेत् ॥
लक्ष्यभेदी यथा बाणो धनुर्ज्यावििनियोजितः ।
भवेत्तथा तु सन्धाय————————॥”)

नालिका, स्त्री, (नाला एव । स्वार्थे कन् । टापि अत इत्वम् ।) नाला । इति शब्दरत्नावली ॥ नालिताशाकः । इति शब्दमाला ॥ (यथा सुश्रुते । १ । ४६ ।
“वातलं नालिकाशाकं पित्तघ्नं मधुरञ्च तत् ॥”) चर्म्मकषा । इति जटाधरः ॥ हस्तिकर्णवेधनिका । इति हारावली । ३० ॥ (यथा, माघे । १७ । ३५ ।
“गजाः सहतृकरतलबोलनालिका
हता मुहुः प्रणदितघण्टमाययुः ॥”)

नालिकेर, पुं, (नारिकेलः । रलयोरैक्यात् रस्य लः । लस्य रश्च ।) नारिकेलः । इत्यमरटीकायां रमानाथः ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथास्य गुणाः ।
“नालिकेरं सुमधुरं गुर्व्वास्निग्धञ्च शीतलम् ।
हृद्यं संवृंहणं वस्तिशोधनं रक्तपित्तनुत् ॥
विष्टम्भि पक्वं मतिमन्नपक्वं कफवातलम् ।
वृंहणं शीतलं वृष्यं नालिकेरफलं विदुः ॥”
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
अस्य तोयगुणा यथा,—
“नालिकेरोदकं स्निग्धं स्वादु वृष्यं हिमं लघु ।
तृष्णापित्तानिलहरं दीपनं वस्तिशोधनम् ॥”
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

नालिजङ्घ, पुं, द्रोणकाकः । इति हारावली । ८४ ॥

नालिता, स्त्री, (नालमिता प्राप्ता ।) स्वनाम-ख्यातशाकः । यथा,—
“नालिता पट्टशाकञ्च सिंहपर्णे तु नालिका ॥”
इति शब्दमाला ॥
अस्य गुणा नारीचशब्दे द्रष्टव्याः ॥

नाली, स्त्री, (नालि + वा ङीष् ।) शाककाण्डकः । डाँटा इति भाषा । इति मेदिनी । ले २८ ॥ हस्तिकर्णवेधनी । घटी । इति त्रिकाण्ड-शेषः ॥ नाडी । इत्यमरटीकायां भरतः ॥ (यथा,—
“रसवाहिनीश्च नालीर्जिह्वामूलगलतालुक्लोम्न ।
संशोष्य नृणां देहे कुरुतस्तृष्णां महाबलावेतौ ।
पीतं पीतं हि जलं शोधयतस्तमतो न याति
शमम् ॥”
इति चरके चिकित्सास्थाने चतुर्विंशेऽध्याये ॥) पद्मम् । इति शब्दरत्नावली ॥

नालीक, पुं, (नाल्या नलयन्त्रात् कायति शब्दायते इति । कै + क । घोरशब्देन निर्गमनादेवास्य तथात्वम् ।) शरः । (यथा, महाभारते । ३ । ३१० । १७ ।
“कर्णिनालीकनाराचानुत्सृजन्तो महारथाः ।
नाविध्यन् पाण्डवास्तत्र पश्यन्तो मृगमन्ति-
कात् ॥”
तथा च शार्ङ्गधरसंगृहीतधनुर्वेदे ।
“नालीका लघवो बाणा नलयन्त्रेण नोदिताः ।
अत्युच्चदूरपातेषु दुर्गयुद्धेषु ते मताः ॥”)

शल्याङ्गम्। अजघण्डे, क्ली। इति मेदिनी। के, ११०॥ (न अलीकमिति। सत्यम्। यथा, वक्रोक्तिपञ्चाशिकायाम्। ४२।

"नालीकाश्रयमेतदत्र वचनं वाणाश्रय किं वचः॥")

नालीकिनी, स्त्री, (नालीकमस्त्यस्या इति। नालीक+इनिः। ङीप्।) पद्मसमूहः। इति शब्दरत्नावली॥

नालीव्रणः, पु, (नालीगतो व्रणः।) नाडीव्रणः। इति शब्दरत्नावली॥

नाविकः, पु, (नावा तरतीति। नौ+"नौद्व्यच-ष्ठन्।" ४।४।७। इति ठन्। नौरस्त्यस्येति। "व्रीह्यादिभ्यश्च।" ५।२।११६। इति ठन् वा।) कर्णधारः। इत्यमरः। १।१०।१२॥ (यथा, महाभारते। ८।७७।७५।

"भिन्ननौका यथा राजन्! द्वीपमासाद्य निर्वृताः।
भजन्ति पुरुषव्याघ्र। नाविकाः कालपर्य्यये॥")

नाव्यं, त्रि, (नावा तार्य्यम्। नौ+"नौवयो-धर्म्मेति।" ४।४।९१। इति यत्।) नौकागम्यदेशादि। इत्यमरः।१।१०।१०॥ (यथा, रघुः। ४।३१।

"मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदी.।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः॥"

नवस्य भावः। नव+ष्यञ्।) नवत्वञ्च॥

नाश, पुं, (नश+भावे घञ्।) पलायनम्। निधनम्। (यथा, महाभारते। १।१२०।१६।

"पित्र्यादृणादनिर्मुक्तास्तेन तप्ये तपोधनाः।
देहनाशे ध्रुवो नाशः पितॄणामेष निश्चयः॥")

अनुपलम्भः। अदर्शनम्। इति मेदिनी। शे, ६॥ परिध्वस्तिः। इति हेमचन्द्रः। २। २३८॥

जीवानां नाशहेतुर्यथा,—

"सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभि-
जायते।
क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥"
इति श्रीभगवद्गीता॥

कुलनाशकारणं यथा,—

"अनृतात् पारदार्य्याच्च तथाभक्ष्यस्य भक्षणात्।
अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम्॥
अश्रोत्रिये वेददानात् वृषलेषु तथैव च।
विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥

नश्यतां पूर्व्वरूपाणि यथा,—

अत्रिरुवाच।

"नश्यतां पूर्व्वरूपाणि जनानां कथयस्व मे।
नगराणां तथा राज्ञां त्वं हि सर्व्वं वदिष्यसि॥
गर्ग उवाच।
पुरुषाचारनियमात् परित्यजति देवता।
ततोऽपरागाद्देवानामुपसर्गः प्रवर्त्तते॥
दिव्यान्तरीक्षे भौमञ्च त्रिविधं परिकीर्त्तितम्।
ग्रहर्क्षवैकृतं दिव्यमन्तरीक्षं निबोध मे॥
उल्कापातो दिशां दाहः परिवेशस्तथैव च।
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता च या।
एवमादीनि लोकेऽस्मिन् नाकेशानां विनिर्द्दिशेत्॥
चरः स्थिरस्तु भूमौ च भूकम्पश्चापि भूमिजः।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम्॥"
इति मात्स्ये २०३ अध्यायः॥

नाशी, [न्] त्रि, (नाशोऽस्त्यस्येति। नाश+इनिः।) नाशविशिष्टः। नाशशब्दादस्त्यर्थे इन्प्रत्ययनिष्पन्नः॥

नासत्यौ, पु, (नास्ति असत्यं ययोस्तौ। "नभ्राण्नपादिति।" ६।३।७५। इति नञः प्रकृतिभावः।) अश्विनीकुमारौ। नित्यद्विवचनान्तोऽयम्। इत्यमरः। १।१।५४॥ एतौ शूद्रौ। यथा,

"आदित्याः क्षत्त्रियास्तेषां विशश्च मरुतस्तथा।
अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ॥
स्मृतास्त्वाङ्गिरसो देवा ब्राह्मणा इति निश्चयः॥"
इति महाभारते मोक्षधर्म्मः॥

("सन्दृश्य दस्रयोरिन्द्रः कर्म्माण्येतानि यत्नवान्।
आयुर्व्वेदं निरुद्वेगं तौ ययाचे शचीपतिः॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ।
आयुर्व्वेदं यथाधीतं ददतुः शतमन्यवे॥
नासत्याभ्यामधीत्यैष आयुर्व्वेदं शतक्रतुः।
अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नासा, स्त्री, (नासते शब्दायते इति। नास शब्दे+"गुरोश्च हलः।" ३।३।१०३। इति अः। ततष्टाप्। नास्यतेऽनयेति। नास+करणे घञ् वा।) नासिका। नाक् इति भाषा। सा च गर्भस्थबालकस्य पञ्चभिर्मासैर्भवति। इति सुखबोधः॥ तस्याः शुभाशुभलक्षणं यथा,—

"शुकनासः सुखी स्याच्च शुष्कनासोऽतिजीवनम्।
छिन्नाग्ररूपनासः स्यादगम्यागमने रतः॥
दीर्घनासे च सौभाग्यं चौरः आकुञ्चितेन्द्रियः।
स्त्रीमृत्युश्चिपिटनासः ऋजुर्भाग्यवतां भवेत्॥
अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे।
क्रूरे दक्षिणवक्रा स्याद्धनिनाञ्च च्युतं सकृत्॥"
इति गरुडपुराणम्॥

द्वारोपरिस्थितदारु। भ्यान् काठ इति कपालि इति च भाषा। इत्यमरः। २।२।१३॥ वासकवृक्षः। इति राजनिर्घण्टः॥

नासाच्छिन्नी, स्त्री, (छिद+भावे क्तः। नासायां छिन्नं छेदो यस्याः। ङीष्।) पूर्णिकापक्षी। इति त्रिकाण्डशेषः॥

नासादारु, क्ली, (नासायै यद्दारु। नासेव दारु इति वा।) द्वारोर्द्ध्वस्थितकाष्ठम्। इत्यमरटीकायां स्वामी॥ कपालि इति भाषा॥

नासारोगः, पु, (नासाया रोगः।) नासिकाव्याधिः। "अथ नासारोगाधिकारः। तत्र नासारोगाणां नामानि संख्याञ्चाह।

घ्राणे च पीनसः प्रोक्तः पूतिनस्यस्ततः परम्।
नासापाकोऽत्र गणितः पूयशोणितमेव च॥
क्षवथुर्भ्रंशथुर्दीप्तिः प्रतीनाहः परिस्रवः।
नासाशोषः प्रतिश्यायाः पञ्च सप्तार्व्वुदानि च॥
चत्वार्य्यर्शांसि चत्वारः शोथाश्चत्वारितानि च।
रक्तपित्तानि नासायां चतुस्त्रिंशन्नदाः स्मृताः॥

तेषु पीनसस्य लक्षणमाह।

आनह्यते शुष्यति यस्य नासा
प्रक्लेदमायाति च धूप्यते च।
न वेत्ति यो गन्धरसांश्च जन्तु-
र्जुष्टं व्यवस्येदिह पीनसेन॥

आनह्यते श्वासशोषितकफेनावध्यते अवरुद्धा इति यावत्। प्रक्लेदं आर्द्रताम्। धूप्यते सन्ताप्यते। गन्धरसान् गन्धान् सुरभीनसुरभींश्च न वेत्ति। नासाया आनद्धत्वं तत्र हेतुः। तथा रसान् मधुरादींश्च न वेत्ति। नासारोगारम्भकदोषेण रसनाया अपि दुष्टेः। व्यवस्येत जानीयात्। अपीनसपीनसौ द्वावपि शब्दौ स्तः॥ * ॥ अनुक्तसंग्रहार्थमाह।

तञ्चानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम्।

तं विकारं पीनसं प्रतिश्यायसमानलिङ्गं वातश्लेष्मकप्रतिश्यायतुल्यलक्षणम्॥

पूतिनस्यमाह।

दोषैर्व्विदग्धैर्गलतालुमूले
सन्दूषितो यस्य समीरणस्तु।
निरेति पूतिर्म्मुखनासिकाभ्यां
तं पूतिनस्यं प्रवदन्ति रोगम्॥

दोषैः पित्तकफरक्तैः। अत्र रक्तस्यापि दोषत्वं दोषसाहचर्य्यात्। विदग्धैर्दुष्टैः। सन्दूषितः पूतिभावं नीतः। पूतिनस्यं नासायां भवो नस्यो वायुः पूतिर्नस्यो यत्र स पूतिनस्यस्तम्॥ * ॥

नासापाकमाह।

घ्राणाश्रितं पित्तमरूंषि कुर्य्यात्
यस्मिन् विकारे बलवांश्च पाकः।
तं नासिकापाकमिति व्यवस्येत्
विक्लेदकोथावथवापि यत्र॥

विक्लेद आर्द्रता। कोथः पूतिभावः॥ * ॥

पूयरक्तमाह।

दोषैर्व्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तैः।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम्॥

क्षवथुमाह।

घ्राणाश्रिते मर्म्मणि संप्रदुष्टो
यस्यानिलो नासिकया निरेति।
कफानुजातो बहुशोऽतिशब्द-
स्तं रोगमाहुः क्षवथुं गदज्ञाः॥

घ्राणाश्रिते मर्म्मणि शृङ्गाटके॥ * ॥

दोषजं क्षवथुमभिधायागन्तुजं क्षवथुमाह।

तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान् कटूनर्कनिरीक्षणाद्वा।
सूत्रादिभिर्व्वा तरुणास्थिमर्म्म-
ण्युद्घट्टितेऽन्यः क्षवथुर्निरेति॥

तीक्ष्णोपयोगात् राजिकादिभक्षणात्। अर्कनिरीक्षणात् सूर्य्यदर्शनात् तेन कफविलेपनात्,

तरुणास्थि नासायं प्रास्थि। मर्म्माणि शृङ्गाटकं।
इन्द्रे नैकलम्। अन्य आगन्तुज. ॥ * ॥
भ्रंशथुमाह।

प्रभ्रश्यते नासिकया तु यस्य
सान्द्रो विदग्धो लवणः कफस्तु।
प्राक् सञ्चितो मूर्द्धनि पित्ततप्ते
त भ्रंशथु व्याधिमुदाहरन्ति ॥

दीप्तिमाह।

घ्राणे भृशं दाहसमन्विते तु
विनिःसरेत् धूम इवेह वायुः।
नासाप्रदीप्तेव च यस्य जन्तो-
र्व्याधिन्तु दीप्तिं तमुदाहरन्ति ॥

प्रदीप्तेव प्रज्वलितेव ॥ * ॥
प्रतीनाहमाह।

उच्छ्वासमार्गन्तु कफः सवातो
रुन्ध्यात् प्रतीनाहमुदाहरेत्तम् ॥

स्रावमाह।

घ्राणाद्घनः पीतसितस्तनुर्व्वा
दोषः स्रवेत् स्रावमुदाहरेत्तम् ॥

नासाशोषमाह।

घ्राणाश्रिते श्लेष्मणि मारुतेन
पित्तेन गाढं परिशोषिते च।
कृच्छ्रादुच्छ्वसित्यूर्द्ध्वमधश्च जन्तु-
र्यस्मिन् स नासापरिशोष उक्तः ॥

प्रतिश्यायमाह। तस्य निदान द्विविधम्। एकं सद्योजनकं तद्बल वत्त्वेन चय नापेक्षते। यत उक्तम्।
न केवलं चय प्राप्य दोषाः कुप्यन्ति देहिनाम्।
अन्यदापि हि कुप्यन्ति हेतुबाहुल्यतोरणात् ॥
हेतूनां बाहुल्येन त्वराकरणात्। अपरं चयादिक्रमेण जनकम्। चयादिक्रमो यथा। निदानात् सञ्चयं सञ्चयात् प्रकोपं प्रकोपात् प्रसरः प्रसरात् स्थानसंश्रयं। ततो व्यक्ति। ततो भेद इति ॥ * ॥ तत्र प्रतिश्यायस्य सद्योजनकनिदानपूर्व्विकां सम्प्राप्तिमाह।

सन्धारणा जीर्णरजोऽतिभाषात्
क्रोधर्त्तुवैषम्यशिरोऽभितापैः।
सजागरातिस्वपनाम्बुशीता-
वश्यायकैर्मैथुनवाष्पसेकैः ॥
संस्त्यानदोषे शिरसि प्रवृद्धो
वायुः प्रतिश्यायमुदीरयेत्तु।

सन्धारणा मूत्रपुरीषधारणा। रजो धूलिः। तच्च नासाप्रविष्टं हेतु। ऋतुवैषम्यं ऋतुचर्य्याविपरीताचरणम्। शिरोऽभितापं शिरसोऽभितापो येन धूमादिना सः। अवश्याय तुषारः। वाष्पसेको रोदनम्। संस्त्यानदोषे शिरसि संहतकफे ॥ * ॥ चयादिक्रमजनकनिदानपूर्व्विकां सम्प्राप्तिमाह।

चयं गता मूर्द्धनि मारुतादयः
पृथक् समस्ताश्च तथैव शोणितम्।
प्रकोप्यमाणा विविधैः प्रकोपणै-
स्ततः प्रतिश्यायकरा भवन्ति ह ॥

पूर्व्वरूपमाह।

क्षवप्रवृत्तिः शिरसोऽभिपूर्णता
स्तम्भोऽङ्गमर्द्दः परिहृष्टरोमता।
उपद्रवाश्चाप्यपरे पृथग्विधा
नृणां प्रतिश्यायपुरःसराः स्मृताः ॥

शिरसोऽभिपूर्णता शिरसो भारेणेव व्याप्तिः। अपरे पृथग्विधाः व्राणधूमायनतालुविदारणनासास्रवणस्रावादयो विदेहोक्ता बोद्धव्याः ॥ * ॥
वातिकस्य प्रतिश्यायस्य लक्षणमाह।
आनद्धा पिहिता नासा तनुस्रावप्रसेकिनी।
गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा ॥
क्षवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च।
भवेत् स्वरोपघातश्च प्रतिश्यायेऽनिलात्मके ॥
आनद्धा ऽऽक्रान्ता। पिहिता न पिहिता। अत एव तनुस्रावप्रसेकिनी ॥ * ॥
पैत्तिकमाह।
उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके।
कृशोऽतिपाण्डुः सन्तप्तो भवेत्तृष्णाभिपीडितः।
नासया तु सधूमाग्निं वमतीव स मानवः ॥
सपीतकः ईषत्पीतकः ॥ * ॥
श्लैष्मिकमाह ॥
घ्राणात् कफकृते श्वेतः कफः शीतः स्रवेद्बहुः।
शुक्लावभासः शूनाक्षो भवेद्गुरुशिरा नरः ॥
गलताल्वोष्ठशिरसां कण्डूभिरतिपीडितः ॥ * ॥
सान्निपातिकमाह।
भूत्वा भूत्वा प्रतिश्यायो योऽकस्मात् सन्निवर्त्तते।
सपक्वो वाप्यपक्वो वा स सर्व्वप्रभवः स्मृतः ॥
अत्र यद्यपि दोषत्रयलिङ्गानि नोक्तानि तथापि तानि ज्ञेयानि त्रिदोषजत्वात्। अयमसाध्य। अतएवाह।
नृणां दुष्टः प्रतिश्यायः सर्व्वजश्च न सिध्यति ॥
दुष्टप्रतिश्यायलिङ्गमाह।
प्रक्लिद्यति मुहुर्नासा पुनश्च परिशुष्यति।
पुनरानह्यते वापि पुनर्विव्रियते तथा ॥
निःश्वासो वाति दुर्गन्धो नरो गन्धान् न वेत्ति च।
एवं दुष्टं प्रतिश्यायं जानीयात् कृच्छ्रसाधनम् ॥
आनह्यते विबद्धा भवति। विव्रियते अविबद्धा स्यात्। क्लेदशोषविबन्धा नैककालं भवन्ति किन्तु यदा यदा यद्यत् दोषाधिक्यं भवति तदा तदा तत्तद्दोषकृतः स स बोद्धव्यः इति न विरोधः। कृच्छ्रसाधनं असाध्यं कष्टसाध्यञ्च ॥ * ॥
रक्तजमाह।
रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते।
पित्तप्रतिश्यायकृतैर्लिङ्गैश्चापि समन्वितः ॥
ताम्राक्षश्च भवेत् जन्तुरुरोघातप्रपीडितः।
दुर्गन्धोच्छ्वासवक्त्रश्च गन्धानपि न वेत्ति सः ॥
उरोघातप्रपीडितः उरोघातेनेव प्रपीडितः ॥
अप्रतीकारेण कालान्तरे सर्व्व एव प्रतिश्याया असाध्या भवन्तीत्याह।
सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः।
दुष्टतां यान्ति कालेन तदासाध्या भवन्ति हि ॥
प्रतिश्यायेषु क्रमशोऽपि भवन्तीत्याह।

मूर्च्छन्ति कृमयश्चात्र श्वेताः स्निग्धास्तथाणवः।
कृमितो यः शिरोरोगस्तुल्यं तेनात्र लक्षणम् ॥
अत्र एषु प्रतिश्यायेषु कफस्य प्राधान्यात् सर्व्वेषु प्रतिश्यायेषु कफजा एव कृमयो भवन्तीति ॥ * ॥ श्वेताः स्निग्धाश्च दुष्टा प्रतिश्याया अपरानपि विकारान् कुर्व्वन्ति तानाह।
वाधिर्य्यमान्ध्यमघ्रत्वं घोरांश्च नयनामयान्।
शोथाग्निमान्द्यकासांश्च दुष्टाः कुर्व्वन्ति पीनसम् ॥
घोरांश्च नयनामयान् इति वचनेऽप्यान्ध्यग्रहणं विशेषार्थम्। अघ्रत्वं न जिघ्रतीत्यघ्रस्तस्य भावः अघ्रत्वम् ॥ * ॥ चतुर्विंशतेश्चापूरणायाह।
अर्ब्बुदं सप्तधा शोथाश्चत्वारोऽर्शश्चतुर्व्विधम्।
चतुर्व्विधं रक्तपित्तमुक्तं घ्राणेऽपि तद्विदुः ॥
अर्ब्बुदानि सप्त वातपित्तकफसन्निपातरक्तमांसमेदोजानि। शोथाश्चत्वारो वातपित्तश्लेष्मसन्निपातजाः। अर्शांसि चत्वारि वातपित्तश्लेष्मसन्निपातजानि। रक्तपित्तानि चत्वारि वातपित्तश्लेष्मसन्निपातजानि। एतानि यथोक्तलिङ्गानि घ्राणेऽपि सम्भवन्ति ॥ * ॥ चिकित्सामेदात् पीनसस्यामस्य लक्षणमाह।
शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः।
क्षामः ष्ठीवति चाभीक्ष्णमामपीनसलक्षणम् ॥
नासास्रावस्तनुस्वरः क्षाम इत्यन्वयः ॥ * ॥
अथ पक्वस्य पीनसस्य लक्षणमाह।
आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति।
स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणम् ॥
आमलिङ्गान्वितः श्लेष्मा आमलिङ्गैः शिरोगुरुत्वादिभिर्युक्तः पश्चात् घनः निविडः अथच खेषु नासारन्ध्रेषु निमज्जति सक्तो भवति। वर्णविशुद्धिः श्लेष्मणः प्रकृतिवर्णता ॥ * ॥
अथ नासारोगाणां चिकित्सा।
सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु।
मरिचं गुडेन दध्ना भुञ्जीत नरः सुखं लभते ॥ १ ॥
कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी।
एषां चूर्णं कषायं वा दद्यादार्द्रकजे रसे ॥
पीनसे स्वरभेदे च नासास्रावे हलीमके।
सन्निपाते कफे वाते कासे श्वासे च शस्यते ॥ २ ॥
कलिङ्गहिङ्गुमरिचलाक्षासुरसकट्फलैः।
कुष्ठोग्राशिग्रुजन्तुघ्नैरवपीडः प्रशस्यते ॥
पीनसादिषु ॥ ३ ॥
व्योषचित्रकतालीशतिन्तिडीकाम्लवेतसम्।
सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकम् ॥
व्योषादिकमिदं चूर्णं पुराणगुडमिश्रितम्।
पीनसश्वासकासघ्नं रुचिस्वरकरं परम् ॥
इति व्योषादिवटी ॥ ४ ॥
व्याघ्रीदन्तीवचाशिग्रुसुरसाव्योषसिन्धुजैः।
सिद्धं तैलं नसि क्षिप्तं पूतिनस्यगदापहम् ॥
इति व्याघ्रीतैलम् ॥ ५ ॥
शिग्रुसिंहीनिकुम्भानां बीजैः सव्योषसैन्धवैः।
बिल्वपत्ररसैः सिद्धं तैलं स्यात् पूतिनस्यनुत् ॥
निकुम्भा दन्ती। पूतिनस्यनुत् नस्यात्। इति शिग्रुतैलम् ॥ ६ ॥

घृतगुग्गुलुमिश्रस्य सिक्थकस्य प्रयत्नतः ।
धूमं क्षवथुरोगघ्नं भ्रंशथुघ्नञ्च निर्द्दिशेत् ॥ ७ ॥
शुण्ठीकुष्ठकणाविल्वद्राक्षाकल्ककषायवत् ।
तैलं पक्वमथाज्यं वा नस्यात् क्षवथुनाशनम् ॥ ८ ॥
नस्यं हितं निम्बरसाञ्जनाभ्यां
दीप्ते शिरःखेदनमल्पशस्तु ।
नस्ये कृते क्षीरजलावसेकान्
शंसन्ति भुञ्जीत च मुद्गयूषैः ॥ ९ ॥
नासास्रावे घ्राणयोश्चूर्णमुक्तं
नाड्या देयं ये च पीडाश्च पथ्याः ।
तीक्ष्णा धूमा देवदार्व्वग्निकाभ्यां
मांसं त्वाजं पथ्यमत्रादिशन्ति ॥ १० ॥
प्रतिश्यायेषु सर्व्वेषु गृहं वातविवर्ज्जितम् ।
वस्त्रेण वारुणोत्थेन शिरसो वेष्टनं हितम् ॥ ११ ॥
विडङ्गं सैन्धवं हिङ्गुगुग्गुलुः समनःशिला ।
वचैतच्चूर्णमाघ्रातं प्रतिश्यायं विनाशयेत् ॥ १२ ॥
घृततैलसमायुक्तं शक्तुधूमं पिबेन्नरः ।
स धूमः स्यात्प्रतिश्यायकासहिक्काहरः परः ॥ १३ ॥
प्रतिश्यायेषु सर्व्वेषु शीतलं परमौषधम् ।
प्रतिश्याये पिबेद्धूमं सर्व्वगन्धसमायुतम् ॥ १४ ॥
चातुर्यातश्चर्णं वा श्रेयं वा कृष्णजीरकम् ।
कृष्णजीरकमत्र कलौञ्जी ॥ १५ ॥
पुटपक्वं जयापत्रं तैलसैन्धवसंयुतम् ।
प्रतिश्यायेषु सर्व्वेषु शीलितं परमौषधम् ॥
जयात्र विजया भङ्गेति यावत् । शिलितं सुक्तम् ॥ १६ ॥
पिप्पल्यः शिग्रुबीजानि विडङ्गमरिचानि च ।
अवपीडः प्रशस्तोऽयं प्रतिश्यायनिवारणे ॥ १७ ॥
शिरसोऽभ्यञ्जनैः स्वेदैर्नस्यैर्मन्दोष्णभोजनैः ।
वमनैर्घृतपानैश्च नान्यथा समुपाचरेत् ॥ १८ ॥
कृमिघ्ना ये क्रमाः प्रोक्तास्तान् वै कृमिषु योजयेत् ।
नावनानि कृमिघ्नानि भेषजानि च बुद्धिमान् ॥ १९ ॥
रक्तपित्तानि शोथांश्च तथार्शांस्यर्व्वुदानि च ।
नासिकाया स्युरेतेषां स्वं स्वं कुर्य्यात् चिकित्सितम् ॥
गृहधूमकणादारुक्षारनक्ताह्वसैन्धवैः ।
सिद्धं शिखरिबीजैश्च तैलं नासार्शसां हितम् ॥”
इति भावप्रकाशे मध्यखण्डे चतुर्थभागः ॥
(अथातो नासारोगविज्ञानीयमध्यायं व्याख्यास्यामः ।
“अवश्यायानिलरजोभाष्यातिस्वप्नजागरैः ।
नीचात्युच्चोपधानेन पीतेनान्येन वारिणा ॥
अत्यम्बुपानरमणच्छर्द्दिवाष्पग्रहादिभिः ।
क्रुद्धा वातोल्वणा दोषा नासायां स्त्यानतां गताः ॥
जनयन्ति प्रतिश्यायं वर्द्धमानं क्षयप्रदम् ।
तत्र वातात् प्रतिश्याये मुखशोषो भृशं क्षवः ॥
घ्राणोपरोधनिस्तोददन्तशङ्खशिरोव्यथाः ।
कीटका इव सर्पन्ति मन्यते परितो भ्रुवौ ॥
स्वरसादश्चिरात् पाकः शिशिराच्छकफस्रुतिः ।
पित्तात्तृष्णाज्वरघ्राणपिटिकासम्भवभ्रमाः ॥
नासाग्रपाको रूक्षोष्णताम्रपीतकफस्रुतिः ।
कफात् कासोऽरुचिः श्वासो वमथुर्गात्रगौरवम् ॥
माधुर्य्यं वदने कण्डूः स्निग्धशुक्लघना स्रुतिः ।
सर्व्वजो लक्षणैः सर्व्वैरकस्माद्वृद्धिशान्तिमान् ॥
दुष्टं नासा शिराः प्राप्य प्रतिश्यायं करोत्यसृक् ।
उरसः सुप्तता ताम्रनेत्रत्वं श्वासपूतिता ॥
कण्डूः श्रोत्राक्षिनासासु पित्तोक्तञ्चात्र लक्षणम् ।
सर्व्व एव प्रतिश्याया दुष्टतां यान्त्युपेक्षिताः ॥
यथोक्तोपद्रवाधिक्यात् स सर्व्वेन्द्रियतापनः ।
साग्निसादज्वरश्वासकासोरःपार्श्ववेदनः ॥
कुप्यत्यकस्माद्बहुशो मुखदौर्गन्ध्यशोफकृत् ।
नासिकाक्लेदसंशोषशुद्धिरोधकरो मुहुः ॥
पूयोपमासितारक्तग्रथितश्लेष्मसंस्रुतिः ।
मूर्च्छन्ति चात्र कृमयो दीर्घस्निग्धसिताणवः ॥
पक्वलिङ्गानि तेष्वङ्गलाघवं क्षवथोः शमः ।
श्लेष्मा सचिक्कणः पीतो ज्ञानञ्च रसगन्धयोः ॥
तीक्ष्णघ्राणोपयोगार्करश्मिसूत्रतृणादिभिः ।
वातकोपिभिरन्यैर्वा नासिकातरुणास्थनि ॥
विघट्टितेऽनिलः क्रुद्धो रुद्धः शृङ्गाटकं व्रजेत् ।
निवृत्तः कुरुतेऽत्यर्थं क्षवथुं स भृशं क्षवः ॥
शोषयन्नासिकास्रोतः कफञ्च कुरुतेऽनिलः ।
शूकपूर्णाभनासात्वं कृच्छ्रादुच्छ्वसनन्ततः ॥
स्मृतोऽसौ नासिकाशोषो नासानाहे तु जायते ।
नद्धत्वमिव नासायाः श्लेष्मरुद्धेन वायुना ॥
निःश्वासोच्छ्वाससंरोधात् स्रोतसी संवृते इव ।
पचेन्नासापुटे पित्तं त्वङ्मांसं दाहशूलवत् ॥
स घ्राणपाकः स्रावस्तु तत्संज्ञः श्लेष्मसम्भवः ।
अच्छो जलोपमोऽजस्रं विशेषान्निशि जायते ॥
कफः प्रवृद्धो नासायां रुद्ध्वा स्रोतांस्यपीनसम् ।
कुर्य्यात् सघुर्घुरं श्वासं पीनसाधिकवेदनम् ॥
अवेरिव स्रवत्यस्य प्रक्लिन्ना तेन नासिका ।
अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम् ॥
रक्तेन नासादग्धेव बाह्यान्तःस्पर्शनासहा ।
भवेद्धूमोपमोच्छ्वासा सा दीप्तिर्द्दहतीव च ॥
तालुमूले मलैर्दुष्टैर्मारुतो मुखनासिकात् ।
श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनासं वदन्ति तम् ॥
निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥
पित्तश्लेष्मावरुद्धोऽन्तर्नासायां शोषयेन्मरुत् ।
कफं स शुष्कपुटतां प्राप्नोति पुटकन्तु तत् ॥
अर्शोऽर्व्वुदानि विभजेत् दोषलिङ्गैर्यथायथम् ।
सर्व्वेषु कृच्छ्रादुच्छ्वसनं पीनसः प्रततं क्षवः ॥
सानुनासिकवादित्वं पूतिनासः शिरोव्यथा ।
अष्टादशानामित्येषां यापयेद्दुष्टपीनसम् ॥”
इत्युत्तरस्थाने एकोनविंशेऽध्याये वाभटेनोक्तम् ॥
“शुद्धसूतं समादाय गन्धभागद्वयं ततः ।
त्रिभागं टङ्कणञ्चापि विषभागचतुष्टयम् ॥
पञ्चभागं यथा देयं मरिचस्य प्रयत्नतः ।
शृङ्गवेररसैः पिष्ट्वा गुडिका पञ्चरक्तिका ॥
अनुपानं हितं योज्यं सर्व्वरोगप्रशान्तये ।
जलदोषोद्भवे रोगे महत्युग्रे जलोदरे ॥
सन्निपातेषु रोगेषु नासायाञ्च सपीनसे ।
व्रणशोथे व्रणे चैव उपदंशे भगन्दरे ॥
नीडीव्रणे ज्वरे चैव नखदन्तविघातके ।
पञ्चामृतरसो योज्यः सर्व्वरोगप्रशान्तये ॥
इति पञ्चामृतो रसः ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे नासारोगाधिकारः ॥)

नासालु, पुं, (नासाये अलतीति । अल + उण् ।) कट्फलवृक्षः । इति शब्दचन्द्रिका ॥ (कट्फलशब्दे विवरणमस्य ज्ञातव्यम् ॥)

नासासंवेदनः, पुं, (संविद्यतेऽनेनेति । सं + विद् + ल्युट् । नासायाः संवेदनः पीडादायकः ।) काण्डीरलता । इति राजनिर्घण्टः ॥

नासिकन्धमः, त्रि, (नासिकां धमति शब्दायमानां करोतीति । नासिका + ध्मा + “नासिकास्तनयोर्ध्माधेटोः ।” ३ । २ । २९ । इति खश् । “खित्यनव्ययस्य ।” ६ । ३ । ६६ । इति पूर्व्वपदस्य ह्रस्वः । ततो मुम् ।) नासिका शब्दायमाना करोति यः । नासिकया शब्दकर्त्ता च, नासिकोपपदात् ध्माधातोः खश्प्रत्यये धमादेशनिष्पन्नः । इति व्याकरणम् ॥

नासिकन्धयः, त्रि, (नासिकां नासास्थजलं धयति पिबतीति । नासिका + धेट पाने + “नासिकास्तनयोर्ध्माधेटोः ।” ३ । २ । २९ । इति खश् । ततो पूर्व्वपदस्य ह्रस्वस्ततो मुम् च ।) नासिकया पिबति यः । नासिकया पानकर्त्ता । नासिकोपपदाद्धेटधातोः खश्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

नासिका, स्त्री, (नासते शब्दायते इति । नास शब्दे + “ण्वुल्तृचौ ।” ३ । १ । १३३ । इति ण्वुल् । टापि अत इत्वम् ।) घ्राणेन्द्रियम् । नाक् इति भाषा । तत्पर्य्यायः । घ्राणम् २ गन्धवहा ३ घोणा ४ नासा ५ । इत्यमरः । २ । ६ । ८९ ॥ शिङ्घिणी ६ । इति राजनिर्घण्टः ॥ नासिक्यम् ७ नस्या ८ गन्धनाली ९ गन्धवन्धा १० नक्रा ११ । इति शब्दरत्नावली ॥ (यथा, मनुः । २ । ९० ।
“श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥”)
तस्याः शब्दो घोतकारः । यथा,—
“शयानं रावणं दृष्ट्वा तस्थे मर्द्दति वानरः ।
नासायूथैस्तु घोतकारैर्विशद्भिर्वायुसेवके ॥”
इति नारसिंहे ४५ अध्यायः ॥

नासिकामलं, क्ली, (नासिकाया मलम् ।) नासास्थितमलम् । शिकनि इति भाषा । तत्पर्य्यायः । शिङ्घाणकम् २ शिङ्घाणम् ३ शिङ्घणम् ४ । इति शब्दरत्नावली ॥ सिङ्घानम् ५ । इति भरतः ॥

नासिक्यं, क्ली, (नासिका एव । नासिका + स्वार्थे ष्यञ् ।) नासिका । इति त्रिकाण्डशेषः ॥ (त्रि, नासिका + “वुञ्छण्केति ।” ४ । २ । ८० । इति संकाशादित्वात् ण्य । नासिकानिर्वृत्तादौ ॥ नासिकायां भवम् । “शरीरावयवात् यत् ।” ५ । १ । ६ । इति यत् । नासाभवे च ॥)

नासिकाक, स्त्री, (नासिक्यमेव । नासिक्य+स्वार्थे कन् ।) नासिका । इति शब्दमाला ॥

नासिक्यौ, पु, (नासिकायां भवौ । नासिका+"शरीरावयवात् यत् ।"५ । १ । ६ । इति यत् ।) अश्विनीकुमारौ । द्विवचनान्तोऽयम् । इति हेमचन्द्रः । २ । ८६ ॥

नासीर, क्ली, (नास् शब्दे+भावे क्विप् । नासा शब्देन ईर्त्ते गच्छतीति । ईर गतौ+क । जयशब्दाद्युच्चारणेन गमनादेवास्य तथात्वम् ।) नायकस्याग्रेसारिका सेना । (यथा, श्रीकण्ठचरिते । २१ । ४४ ।

"नासीरपार्षदभटेषु ततः प्रतोलीं
लोलीकृतासिषु हठादधिरूढवत्सु ।
वामभ्रुवः पुरपुरेष्वभवन्नकाण्डे
मग्ना भियेव निजवाप्यजलह्रदेषु ॥"

तथा च, राजेन्द्रकर्णपूरे । ६८ ।

"नासीरप्रसरन्ति दिक्परिसरे भूमण्डले मौक्तिक-
प्रस्तारन्ति सुधाकरन्ति गगनोत्सङ्गे भवत्-कीर्त्तयः ॥")

अग्रसरे, पु । इति शब्दरत्नावली ॥

नास्ति, अ, अस्तित्वाभाववत् । अविद्यमानता । इति नास्तिकताशब्दटीकायां भरतः ॥ नाइ इति भाषा । यथा, चाणक्ये ।

"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च ।
अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः ॥"

नास्तिक, पु, (नास्ति परलोक ईश्वरो वेति मतिर्यस्य । "अस्तिनास्तिदिष्टं मतिः ।" ४।४।६०। इति ठक् । यद्वा, नास्ति परलोको यज्ञादिफलं ईश्वरो वेत्यादिवाक्येन कायति शब्दायते इति । कै शब्दे+ड ।) पाषण्डः । ईश्वरनास्तित्ववादी । वेदाप्रामाण्यवादी । (यथा, मनुः । २ । ११ ।

"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्य्यो नास्तिको वेदनिन्दकः ॥"

तथा च तत्रैव । ३ । १५० ।

"ये स्तेनपतितक्लीवा ये च नास्तिकवृत्तयः ।
तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥"

तथाच तत्रैव । ८ । २२, ३०९ ।

"यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम् ।
विनश्यत्याशु तत् कृत्स्नं दुर्भिक्षव्याधिपीडितम् ॥"
"अनवेक्षितमर्य्यादं नास्तिकं विप्रलुम्पकम् ।
अरक्षितारमत्तारं नृपं विद्यादधोगतिम् ॥")

तत्पर्य्यायः । बार्हस्पत्यः २ चार्व्वाकः ३ लौकायतिकः ४ । इति हेमचन्द्रः । ३ । ५२६ ॥ स च षड्विधः । माध्यमिकः १ योगाचारः २ सौत्रान्तिकः ३ वैभाषिकः ४ चार्व्वाकः ५ दिगम्बरः ६ ॥

नास्तिकता, स्त्री, (नास्तिकस्य भावः । नास्तिक+तल् ।) कर्म्मफलापवादकज्ञानम् । तत्पर्य्यायः । मिथ्यादृष्टिः २ । इत्यमरः । १ । ५ । ४ ॥ "नास्ति यज्ञफलं नास्ति परलोक इत्यादिकं कायति नास्तिकः । सदसत्त्वे अस्ति नास्तीत्यव्ययं कै शब्दे ड. । नास्तीति मन्यते इति ठिको वा तस्य भावो नास्तिकता त्वतौ भावे इति तः । नास्ति सुकृतं नास्ति परलोक इति बुद्धिर्नास्तिकता ।" इति भरतः ॥ (यथा, महाभारते । १२ । १२३ । १५ ।

"पश्चान्नाशात्मको मोहस्तथा धर्म्मार्थनाशकः ।
तस्मान्नास्तिकता चैव दुराचारश्च जायते ॥")

नास्तिद., पुं, चाम्रवृक्षः । इति शब्दचन्द्रिका ॥

नास्यं, त्रि, नासायां भवम् । (नासा+"शरीरावयवात् यत् ।"५ । १ । ६ । इति यत् ।) नासाभवम् । यथा, मनुः । ८ । २९१ ।

"छिन्ननास्ये भिन्नयुगे तिर्य्यक्प्रतिमुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥"

नाह., पुं, (नह बन्धने+भावे घञ् ।) बन्धनम् । कूटम् । इति मेदिनी । हे, ५ ॥

नाहलः, पुं, (नाह पर्व्वतशिखरादिकं लाति आश्रयत्वेन गृह्णातीति । ला+कः ।) म्लेच्छजातिविशेषः । इति हेमचन्द्रः । ४ । ५९८ ॥

नाहुषि, पु, (नहुषस्य अपत्यं पुमानिति । नहुष+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) ययातिराजः । इति भूरिप्रयोगः ॥

नि, अ, उपसर्गविशेषः । अस्यार्था यथा । निषेधः । निश्चयः । इति मुग्धबोधटीकायां दुर्गादासः ॥ निवेशः । भृशार्थः । नित्यार्थः । संशयः । क्षेपः । कौशलम् । उपरमः । सामीप्यम् । आश्रयः । दानम् । मोक्षः । अन्तर्भावः । बन्धनम् । राश्यधोभावः । विन्यासः । इति मेदिनी । ने, ४० ॥

निः, [र्] अ, (नृणातीति । नॄ नये+क्विप् । "ऋत इद्धातोः ।" ७ । १ । १०० । इति धातो रङ्गस्य इत् ।) निर्णयः । निषेधः । इति मेदिनी । रे, ६६ ॥ (अभावः । यथा, हरिवंशे । भविष्यपर्व्वणि । ८ । ८७ ।

"नासिकाग्रं समालोक्य पठन् ब्रह्म सनातनम् ।
निर्व्वातस्थो यथा दीपः प्रोच्चरेत् प्रणवं सदा ॥")

निः, [स्] अ, निश्चयः । निषेधः । साकल्यम् । अतीतम् । इति मेदिनी । से, ८० ॥

निःकासित, त्रि, (निर् वा निस्+कस्+णिच्+क्त ।) निष्कासितः । बहिष्कृतः । से तु कखपफे वेति विभाषया विसर्गस्य सकाराभावः । इति व्याकरणम् ॥

निःक्रामित, त्रि, (निर् वा निस्+क्रम+णिच्+क्त ।) निष्क्रामितः । इत्यमरटीकासारसुन्दरी ॥

निःक्षत्त्र, त्रि, (निर्नास्ति क्षत्त्रं क्षत्त्रियो यत्र ।) क्षत्त्रियशून्यदेशादि । यथा,—

"अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्त्रामकरोन्महीम् ॥"
इति श्रीभागवतप्रथमस्कन्धः ॥

निःप्रभ, त्रि, निष्प्रभः । निर्नास्ति प्रभा यस्येति समासे से तु कखपफे वेति विभाषया विसर्गस्य सकाराभावः । इति व्याकरणम् ॥

निःशब्द, त्रि (निर्गतः शब्दो यस्मात् ।) शब्दरहितः । चुप् इति भाषा ॥ यथा, मार्कण्डेयपुराणे ।

"निःशब्दं कारयित्वा तत्सदः प्राह महामुने ॥"
(यथा च हठयोगप्रदीपिकायाम् । ४ । १०२ ।
"तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते ।
निःशब्दं तत् परं ब्रह्म परमात्मेति गीयते ॥")

निःशलाक, त्रि, (निर्गता शलाका यस्मात् शलाकाया निर्गतो वा ।) रहः । निर्ज्जनम् । इत्यमरः । २ । ८ । २२ ॥

निःशल्या, स्त्री, (निर्गतं शल्यं यस्याः ।) दन्तीवृक्षः । इति राजनिर्घण्टः ॥

निःशूक., पु, (निर्नास्ति शूको यस्य ।) सुकशालिः । इति राजनिघण्टः ॥

निःशेष, त्रि, (निर्गतः शेषो यस्मात् ।) समस्तम् । सम्पूर्णम् । इत्यमरः । ३ । १ । ६५ ॥ (यथा, हठयोगप्रदीपिकायाम् । ४ । ३२ ।

"उच्छिन्नसर्व्वसङ्कल्पो निःशेषाशेषचेष्टितः ।
स्वावगम्यो लयः कोऽपि जायते वागगोचरः ॥")

शेषरहितश्च ॥

निःशोध्य, त्रि, (निर्गतं शोध्यं यस्मात् । शोध्यान्निर्गतमिति वा । निरादय इति समासः ।) शोधितम् । मृष्टम् । इत्यमरः । ३ । १ । ५६ ॥

निःश्रयणी, स्त्री, (निर्निश्चितं श्रीयते आश्रीयतेऽनयेति । श्रि+करणे ल्युट् । टित्वात् ङीप् ।) काष्ठघटितसोपानम् । काठेर सिँड़ी इति भाषा । तत्पर्य्यायः । निःश्रेणिः २ अधिरोहिणी ३ निःश्रेणी ४ निःश्रयिणी ५ । इति शब्दरत्नावली ॥

निःश्रयिणी, स्त्री, (निःश्रयति आश्रयति प्राङ्गनादिस्थानमिति । श्रि+णिनि+ङीप् ।) निःश्रयणी । इति शब्दरत्नावली ॥

निःश्रेणिः, स्त्री, (निर्निश्चिता श्रेणिः सोपानपङ्क्तिः यत्र ।) अधिरोहिणी । (यथा, रघुः । १५ । १०० ।

"चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम् ॥")

खर्ज्जूरीवृक्षः । इति मेदिनी । णे, ५७ ॥ (पु घोटकविशेषः । यथा, नकुलकृताश्वचिकित्सिते ४ अध्याये ।

"उपर्य्युपरि यस्य स्युरावर्त्ता अलिके त्रयः ।
निःश्रेणिः स तु विज्ञेयो राष्ट्रवृद्धिकरः परः ॥")

निःश्रेणिका, स्त्री, (निःश्रेणिरिव कायतीति । कै+कः । टाप् ।) तृणविशेषः । निःश्रेणी इति कोङ्कणे प्रसिद्धा । तत्पर्य्यायः । श्रेणिबला २ निरसा ३ वनवल्लरी ४ । अस्या गुणाः । नीरसत्वम् । उष्णत्वम् । पशूनामबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (निःश्रेणिरेव । स्वार्थे कन् । अधिरोहिणी । यथा, देवीभागवते । ४।१३।४०।

"मानुष्यं दुर्लभं प्राप्य सेविता न महेश्वरी ।
निःश्रेणिकाग्रात् पतिता अध इत्येव विद्महे ॥")

निःश्रेणी, स्त्री, (निःश्रेणि+कृदिकारादिति वा ङीष् ।) निःश्रयणी । इति शब्दरत्नावली ॥

निःश्रेयस, क्ली, (निर्निश्चितं श्रेयः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) शुभम् । (यथा, भागवते । १।३।४० ।
"इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
उत्तमःश्लोकचरितं चकार भगवानृषिः ।
निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं परम् ॥")
मोक्षः । (यथा, मनुः । १२ । ८३ ।
"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥")
विद्या । अनुभावः । भक्तिः । इति शब्दरत्नावली ॥

निःश्रेयसः, पु, (निर्निश्चितं श्रेयो मङ्गलं यस्मात् ।) शङ्करः । इति मेदिनी । से, ५६ ॥

निःषमम, व्य, (निर्गतं समं यत्र । "तिष्ठद्गुप्रभृतीनि च ।" २ । १ । १७ । इत्यव्ययीभावत्वम् । सुविनिर्दुर्भ्यः इति षत्वम् ।) निन्दा । तत्पर्य्यायः । गर्हम् । दुःषमम् ३ । इत्यमरः । ३ । ४ । १४ ॥ शोकः । इति शब्दरत्नावली ॥

निःसङ्गः, त्रि, (निर्नास्ति सङ्गो यत्र ।) मेलनरहितः । यथा, विष्णुपुराणे । ४ । २ । ५१ ।
"मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरागो मुषितोऽस्मि तेन ।
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ॥"
फलानभिनिवेशवान् । यथा,—
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यसिद्धिं लभते रोचनार्था फलश्रुतिः ॥"
इति मलमासतत्त्वे श्रीभागवतैकादशस्कन्धवचनम् ॥

निःसन्धिः, त्रि, (निर्नास्ति सन्धिर्यत्र ।) दृढः । इति त्रिकाण्डशेषः ॥ सन्धिरहितश्च ॥

निःसम्पातः, पु (निर्नास्ति सम्पातो गमनागमनं यत्र ।) निशीथः । इति त्रिकाण्डशेषः ॥ (गमनागमनपरिशून्ये, त्रि । यथा, हरिवंशे । ८० । १३—१४ ।
"तेन दुष्टप्रचारेण दूषितं तद्वनं महत् ।
न नृभिर्गोधनैर्वापि सेव्यते वनवृत्तिभिः ।
निःसम्पातं क्षतं पश्चात्तेन तद्विषयाश्रयः ॥")

निःसरणं, क्ली, (निर + सृ + ल्युट् ।) मरणम् । उपायः । गेहादिमुखम् । निर्व्वाणम् । निर्गमः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । ४ । २ । २८
"गर्भवासे महद्दुःखं दशमासनिवासनम् ।
तथा निःसरणे दुःखं योनियन्त्रेऽतिदारुणे ॥")

निःसारः, पु, (निर्गतः सारो यस्मात् ।) शाखोटवृक्षः । इति शब्दचन्द्रिका ॥ श्योनाकभेदः । इति राजनिर्घण्टः ॥ साररहिते, त्रि । यथा,—
"मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
यः करोति स सम्मूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वम् ॥
"जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते क्षणादेतत् क्षणादेवहि नश्यति ॥
यथैवोत्पद्यते सारान्निःसारं जगदञ्जसा ।
पुनस्तस्मिन् निलीयन्ते महाप्रलयसङ्गमे ॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निःसारतां हरिः ।
अस्मिवे दर्शयामास भावेन जगतां पतिः ॥"
इति कालिकापुराणे २७ अध्यायः ॥

निःसारणं, क्ली, (निर् + सृ + णिच् + भावे ल्युट् ।) निःसरणम् । (निःसार्य्यतेऽनेनेति । निर् + सृ + णिच् + करणे ल्युट् ।) गृहादीनां प्रवेशनिर्गमादिपथः । इति शब्दरत्नावली ॥

निःसारा, स्त्री, (निर्नास्ति सारो यस्याः ।) कदलीवृक्षः । इति राजनिर्घण्टः ॥

निःसारितः, त्रि, (निर् + सृ + णिच् + कर्म्मणि क्तः ।) वहिष्कृतः । तत्पर्य्यायः । अवकृष्टः २ निष्कासितः ३ । इति जटाधरः ॥ साराभाववांश्च ॥

निःस्नेहः, त्रि, (निर्नास्ति स्नेहो यस्य ।) स्नेहशून्यः । यथा । निःस्नेह कीटदूषितमित्यादिस्मृतिः ॥ (यथा, रामायणे । २ । ४८ । ७ ।
"अहो दशरथो राजा निःस्नेहः स्वसुतं प्रति ॥"
रसहीनः । यथा, मनुः । ५ । ८७ ।
"नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥"
तैलविहीनः । यथा, पञ्चतन्त्रे । १ । ८१ ।
"शिरसा विधृता नित्यं स्नेहेन परिपालिताः ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥")

निःस्नेहा, स्त्री, (निर्गतः स्नेहः रसो यस्याः ।) अतसी । इति त्रिकाण्डशेषः ॥ (अनुरागरहिते, त्रि । यथा, पञ्चतन्त्रे । ४ । ४७ ।
"यदर्थे स्वकुलं त्यक्तं जीवितार्द्धञ्च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥")

निःस्रावः, पुं, (निःस्रवतीति । निर् + स्रु + णः ।) भक्तरसः । भक्तसमुद्भवमण्डः । माड इति फेन् इति च भाषा ॥ तत्पर्य्यायः । आचामः २ मासरः ३ । इत्यमरहेमचन्द्रौ ॥

निःस्वः, त्रि, (निर्नास्ति स्वं धनं यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४८ ॥ तस्य लक्षणं यथा,—
"शूर्पाकारौ विरूक्षौ च वक्रौ पादौ शिरालकौ ।
संशुष्कौ पाण्डरनखौ निःस्वस्य विरलाङ्गुली ॥"
इति गारुडे सामुद्रकम् ॥
ज्ञातिरहितश्च ॥

निकट, त्रि, (नि समीपे कटतीति । नि + कट + अच् ।) अदूरम् । तत्पर्य्यायः । समीपम् २ आसन्नम् ३ सन्निकृष्टम् ४ सनीडम् ५ । इत्यमरः । ३ । १ । ६६ ॥ अभ्यासः ६ सवेशः ७ अन्तः ८ अन्तिकः ९ समर्य्यादः १० सदेशः ११ अभ्यसः १२ अभ्यर्णः १३ सविधा १४ उपकण्ठ १५ अभितः १६ । इति शब्दरत्नावली ॥ (यथा, शान्तिशतके । ३ । २ ।
"दिवसरजनीकूलच्छेदैः पतद्भिरनारतं
वहति निकटे कालः स्रोतःसमस्तभयावहम् ।
इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनं
तदिह महतां कोऽयं मोहो यदेष मदाविलः ॥')
तद्वेदिव ःर्थायः । तलिन् १ आसात् २ अम्बरम् ३ ओर्व्वसे ४ अस्तमीके ५ आके ६ उपाके ७ अर्व्वाके ८ अन्तमानाम् ९ अवमे १० उपमे ११ । इत्येकादशान्तिकनामानि । इति वेदनिघण्टौ २ अध्यायः ॥

निकरः, पु, (निकरोति व्याप्नोतीति । नि + कृ + अच् ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥ (यथा, कलाविलासे । २ । १६ ।
"इत्यादिमुग्धबुद्धेरसमञ्जसवर्णनं रहः कृत्वा ।
गृह्णाति कनकनिकरं धूर्त्तस्तत्तन्मनोरथैः पापः ॥")
सारः । न्यायदेयधनम् । निधिः । इति मेदिनी । रे, १७२ ॥

निकर्षणं, क्ली, (निर्नास्ति कर्षणं यत्र ।) सन्निवेशः । इत्यमरः । २ । ३ । १९ ॥ पत्तनादिषु दिगादिपरिच्छिन्नप्रदेशः । इति भरतः ॥ पूर्व्वदिगाद्यवच्छिन्नगृहाणामपीति कलिङ्गः ॥ पुरादेर्बहिर्विहरणभूमिः । इति स्वाम्यादय. ॥ प्राङ्गणादिसन्निवेशः । इति सारसुन्दरी ॥

निकषः, पु, (निकषति पिनष्टि स्वर्णादिकं यत्रेति । नि + कष + "गोचरसञ्चरेति ।" ३ । ३ ।११९ । इति चकारात् घः ।) शाणः । इत्यमरः । २ । १० । ३२ ॥ कष्टिपातर इति भाषा) (यथा, रघुः । १७ । ४६ ।
"निकषे हेमरेखेव श्रीरासीदनपायिनी ॥") ।

निकषा, स्त्री,(निकषति हिनस्तीति । कष हिंसे + पचाद्यच् । ततष्टाप् ।) राक्षसमाता । इत्यमरः ॥ सा सुमालिकन्या विश्रवसो भार्य्या च । इति रामायणम् ॥

निकषा, व्य, (नि + कष गतौ + "आः समिण्निकषिभ्याम् ।" उणा । ४ । १७४ । इति आः ।) निकटम् । इत्यमरः । ३ । ४ । १९ ॥ (यथा, माघे । १ । ६८ ।
"पयोधिमाबद्धचलज्जलाविलं
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥")
मध्यम् । इति मेदिनी । षे, ७६ ॥

निकषात्मजः, पु, (निकषाया आत्मजः ।) राक्षसः । इत्यमरः । १ । १ । ६३ ॥

निकसः, पु, (निकसति पिनष्टि स्वर्णादिकं यत्र । नि + कस + घः ।) निकषः । इत्यमरटीकायां भरतः ॥

निकामं, क्ली, (नि + कम इच्छायाम् + घञ् ।) इष्टम् । यथेप्सितम् । इत्यमरः । २ । ९ । ५७ ॥ (यथा, देवीभागवते । १ । ७ । ४० ।
"कुर्व्वन्ति देवि । भजनं सकलं निकामं
ज्ञात्वा समस्तजननीं किल कामधेनुम् ॥")

निकायः, पु, (निचीयते इति । नि + चि + "सङ्घे चानौत्तराधर्य्ये ।" ३ । ३ । ४२ । इति घञ् । आदेश्च कः ।) लक्ष्यम् । सधर्म्मिप्राणिसंहतिः । (यथा, महाभारते । १ । १२३ । ४५ ।
"तथा देवनिकायानां सेन्द्राणाञ्च दिवौकसाम् ॥")

सङ्घातानां समुच्चयः। (यथा, श्रीकण्ठचरिते। ६। १८।

"नीरन्ध्रनिर्यतसुमनोनिकाय-
कायायपङ्कप्रणयादशोक॥")

निलयः। (यथा, मनुः। १। ३६।
"एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः।
देवान् देवनिकायांश्च महर्षींश्चामितौजसः॥")
परमात्मा। इति मेदिनी। ये, ८७॥

निकाय्यः, पु, (निचीयतेऽस्मिन् धान्यादिकमिति। नि+चि+"पाय्यसान्नाय्यनिकाय्येति।" ३। १। १२९। इति ण्यत्प्रत्ययेन निपातनात् साधु।) गृहम्। इत्यमरः। २। २। ५॥ (यथा, भट्टिः। ६। ६६।
"न प्रणाय्यो जनः कश्चिन्निकाय्यं तेऽधितिष्ठति।
देवकार्य्यविघाताय धर्म्मद्रोही महोदये॥")

निकारः, पुं, (नि+कृ+घञ्।) विप्रकारः। अपकारः। उत्कारः। धान्यस्योर्द्ध्वक्षेपणम्। इत्यमरभरतौ॥ खलीकारः। इति स्वामी॥ धिक्कारः। इति शब्दमाला॥

निकारणम्, क्ली, (निकारयति क्षिपत्यनेनेति। नि+कृ+णिच्+ल्युट्।) मारणम्। वधः। इत्यमरः। २। ८। ११२॥

निकाशः, त्रि, (निकाशते शोभतेऽनेन इति। काशृ दीप्तौ+करणे ल्युट्।) नीकाशः। इत्यमरटीका॥ (तालव्यशकारान्तोऽपि दृश्यते॥)

निकुञ्चकः, पु, (निकुञ्चतीति। नि+कुन्च कौटिल्ये+ण्वुल्।) परिमाणविशेषः। कुडवपादः। स च प्रसृत इति ख्यातः। इति भरतधृतसत्यखण्डम्॥ वानीरवृक्षः। इति भावप्रकाशः॥ जलवेतसः। तत्पर्य्यायो यथा,—
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

निकुञ्चितम्, क्ली, (नि+कुञ्च+क्त।) व्यङ्गशरान्तर्गतशिरोविशेषः। यथा —
"आकम्पितं कम्पितञ्च धुतं विधुतमेव च।
परिवाहितमाधूतमवधूतं तथाञ्चितम्॥
निकुञ्चितं परावृत्तमुत्क्षिप्तञ्चाप्यधोगतम्।
लोलितं प्रसृतञ्चेति चतुर्द्दशविधं शिरः॥"
इति सङ्गीतदामोदरः॥

निकुञ्जः, पुं क्ली, (नितरां कौ पृथिव्यां जायते इति। जन्+ड.। पृषोदरादित्वात् मुमागमे साधुः।) कुञ्जम्। इत्यमरः। २। ३। ८॥ (यथा, आर्य्यासप्तशत्याम्। ४६३।
"रचिते निकुञ्जपत्रैर्भिक्षुकपात्रे ददाति साध्वन्नम्।
पर्य्युषितमपि सतीनां भावसकरुणया वधूरन्नम्॥")

निकुञ्जिकाम्ला, स्त्री, (निकुञ्जिका कुञ्जोद्भवा अम्ला।) कुञ्जिकावृक्षभेदः। तत्पर्य्यायः। कुञ्जिका २ कुञ्जवल्लरी ३। अस्य गुणाः। शीतत्वं मष्टत्वं। इति राजनिर्घण्टः॥

निकुम्भः, पु, कुम्भकर्णपुत्त्रः। (यथा, रामायणे। ६। ७५। ४६।
"स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ।
प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह॥")
दन्तिकावृक्षः। इति मेदिनी। भे, १७॥
(अस्य पर्य्यायो यथा,—
"चित्रादन्ती निकुम्भः स्यादुपचित्रा मकूलकः।
शम्बरापर्णी विशल्या च तयोडुम्बरपर्ण्यपि॥"
इति वैद्यकरत्नमालायाम्॥)
(प्रह्लादस्य पुत्त्रविशेषः। यथा, महाभारते। १। ६५। १९।
"प्रह्लादस्य त्रयः पुत्त्राः ख्याताः सर्व्वत्र भारत।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत॥"
दनोः पुत्त्राणामन्यतमः। यथा, तत्रैव। १। ६५। २५।
"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा।
शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा।
एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः॥"
स्वनामख्यातः क्षत्त्रियविशेषः। इति सह्याद्रिखण्डे। ३४। ४४॥ महादेवस्य पार्श्वानुचरविशेषः। यथा, हरिवंशे। २९। ४५।
"पार्श्वे तिष्ठन्तमाहूय निकुम्भमिदमब्रवीत्।
गणेश्वरपुरीं गत्वा शून्यां वाराणसीं कुरु॥"
तथा च रघुः। २। ३५।
"अवेहि मां किङ्करमष्टमूर्त्ते
कुम्भोदरं नाम निकुम्भमित्रम्॥"
स्कन्दस्य सैनिकविशेषः। यथा, महाभारते। ९। ४५। ५३।
"शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः।
त्रिविधायुधसम्पन्नाश्चित्राभरणवर्म्मिणः।
शङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च॥"
इक्ष्वाकुपुत्त्रविशेषः। यथा, हरिवंशे। १२। २।
"धौन्धुमारिर्दृढाश्वस्तु हर्य्यश्वस्तस्य चात्मजः।
हर्य्यश्वस्य निकुम्भोऽभूत् क्षत्त्रधर्म्मरतः सदा॥")

निकुम्भाख्यबीजः, क्ली, (निकुम्भाख्यस्य दन्तिकावृक्षस्य बीजवत् बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥ (जयपालशब्देऽस्य गुणादिकं ज्ञेयम्॥)

निकुम्भितम्, क्ली, नृत्यविषयकाष्टोत्तरशतकरणान्तर्गतकरणविशेषः। यथा, सङ्गीतदामोदरे।
"करणानान्तु सर्व्वेषां सामान्यं लक्षणन्त्विदम्।
प्रायो वामकरो वक्षःस्थितोऽन्यः पुरतोऽशुगः॥
पादाभ्यां करणं ज्ञेयं तद्दिहाष्टोत्तरं शतम्।
निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तकम्॥
विद्युद्भ्रान्तं गजक्रीडं क्रान्तञ्च गरुडप्लुतम्॥"

निकुम्भी, स्त्री, (निकुम्भ+गौरादित्वात् ङीष्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

निकुरम्बम्, क्ली, (निकुरतीति। नि+कुर+बाहुलकात् अम्बच्।) समूहः। इत्यमरः। २। ५। ४०॥ (पुंलिङ्गेऽपि दृश्यते। यथा, श्रीकण्ठचरिते। १८। ४०।
"आरक्तगण्डरुचिविद्रुमदण्डभाजो
यस्यास्ति फेननिकुरम्ब इवाट्टहासः॥")

निकृतः, त्रि, (नि+कृ+क्तः।) प्रत्याख्यातः। शठः। इत्यमरः। ३। १। ४६॥ वञ्चितः। नीचः। इति मेदिनी। ते, ११६॥

निकृतिः, स्त्री, (नि+कृ+क्तिन्।) भर्त्सनम्। क्षेपः। शठः। शाठ्यम्। इति मेदिनी। ते ११६॥ (यथा, किराते। १। ४५।
"न समयपरिरक्षणं क्षमन्ते
निकृतिपरेषु परेषु भूरिधाम्नः॥")
दैन्यम्। इति शब्दरत्नावली॥

निकृष्टः, त्रि, (नि+कृष+क्त।) अधमः। इत्यमरः। ३। १। ५४॥ आत्माचारादिनिन्दितः। इति भरतः॥

निकेतः, पुं, (निकेतति निवसत्यस्मिन्निति। नि+कित निवासे+अधिकरणे घञ्।) निकेतनम्। इत्यमरटीकायां भरतः॥ (यथा, देवीभागवते। ४। ११। १२।
"तदद्य विनयं कृत्वा सामपूर्व्वं छलेन वै।
तिष्ठध्वं स्वनिकेतेषु मदागमनकाङ्क्षया॥")

निकेतनम्, क्ली, (निकेतति निवसत्यस्मिन्निति। नि+कित+अधिकरणे ल्युट्।) गृहम्। इत्यमरः। २। २। ४॥ (यथा, देवीभागवते। १। २०। ४२।
"विसर्ज्जिताथ सा तेन गता शास्त्रनिकेतनम्।
उवाच तं वरारोहा राजानं मनसेप्सितम्॥")
पलाण्डौ, पु। इति शब्दचन्द्रिका॥

निकोचकः, पु, (निकोचति शब्दायते। नि+कुच शब्दे+वुन्।) अङ्कोटवृक्षः। इत्यमरः। २। ४। २९॥ (यथा, सुश्रुते। १। ४६।
"वातामाभिषोडाभिषुकनिचुलपिचुनिकोचकोरुमाणप्रभृतीनि॥" क्वचित् क्लीवलिङ्गेऽपि दृश्यते। यथा,—
"वातामाभोडाभिषुकं मकूलकनिकोचकम्।
उरुमाणं प्रियालञ्च वृष्यं गुरुशीतलम्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

निकोठकः, पुं, (निकोचकः+पृषोदरादित्वात् चस्य ठः।) निकोचकः। इत्यमरटीकायां भरतः॥ (यथा,—
"तिल पियालाभिषुकौ विभीतका-
श्चित्राभयैरण्डमधूकसर्षपाः।
कुसुम्भबिल्वारुकमूलकातसी-
निकोठकाक्षोडकरञ्जशिग्रुजाः॥
स्नेहाशयास्तावरसञ्जितास्तथा-
सुर्व्वङ्गमा मतुस्वस्त्गाः सपक्षिणः॥"
इति चरके सूत्रस्थाने त्रयोदशेऽध्याये॥)

निक्वाणः, पु, (नि+क्वण शब्दे+"क्वणो वीणायाञ्च।" ३। ३। ६५। इति अप्।) वीणाया अन्यस्य च किम्नरादेः शब्दः। तत्पर्य्यायः। निक्वाणः २ क्वाणः ३ क्वणः ४ क्वणनम् ५। इत्यमरः। १।७। २४॥ प्रादेरप्युपसर्गादुत्तरस्य क्वणधातोः प्रक्वाणः ६ प्रक्वणः ७ इत्यादयः प्रयोगा भवन्ति। व्याडिना सुक्वाणः सुक्वणः उपक्वाणः उपक्वणः इत्यादयः। इति भरतः॥

निकाणः, पु, (नि+कण शब्दे+भावे घञ् ।) निक्वणः । इत्यमरः । १ । ७ । २४ ॥

निखर्व्वं, क्ली, (निखर्व्वति बहुलसंख्यां गच्छतीति । नि+खर्व्व गर्त्तौ+पचाद्यच् ।) दशखर्व्वसंख्या । दशसहस्रकोटयः । इति लीलावती हेमचन्द्रश्च ॥ (यथा, महाभारते । २ । ६१ । ३ ।
"शङ्खश्चैव महापद्मं निखर्व्वं कोटिरेव च ॥")
पुलिङ्गोऽप्ययम् । यथा । वृन्दः खर्व्वो निखर्व्वश्चेत्यादि ॥

निखर्व्वः, त्रि, (नितरां खर्व्वः ।) वामनः । इति हेमचन्द्रः । ३ । ११८ ॥

निखिलं, त्रि, (निवृत्तं खिलं शेषो यस्मात् ।) समस्तम् । इत्यमरः । ३ । १ । ६५ ॥ (यथा, देवीभागवते । १ । २ । ४० ।
"निखिलमलगणानां नाशहेतुं कामकन्दं
प्रकटय भगवत्या नामयुक्तं पुराणम् ॥")

निगडः, पु क्ली, (निगलति बध्नातीति । नि+गल+अच् । लस्य डत्वम् ।) हस्तिनां लौहमयपादबन्धोपकरणम् । इति भरतः ॥ ग्याँडु इति दाँडुका इति च ख्यातः ॥ तत्पर्य्यायः । शृङ्खलः २ अन्दुकः ३ । इत्यमरः । २ । ८ । ४१ ॥ हिञ्जीरः ४ अन्दुः ५ । इति शब्दरत्नावली ॥ (यथा, माघे । ५ । ४८ ।
"बद्धापराणि परितो निगडान्यलावीत्
स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः ॥")

निगडितः, त्रि, (नि+गल+क्तः । लस्य डत्वम् । यद्वा, निगडो जातोऽस्येति । तारकादित्वात् इतच् ।) बद्धः । इति हेमचन्द्रः । ३ । १०३ ॥

निगणः, पु, होमधूमः । इति त्रिकाण्डशेषः ॥

निगदः, पु, (नि+गद भाषे+"नौ गदनदपठस्वनः ।" ३ । ३ । ६४ । इति अप् ।) भाषणम् । कथनम् । तत्पर्य्यायः । निगादः २ । इत्यमरः । ३ । २ । १२ ॥ (यथा, भागवते । ५ । ३ । १६ ।
"इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥") उच्चैर्जपः । यथा । निगदस्तु जनैर्वेद्य इत्यागमः ॥

निगमः, पु, (निगमे पुर्य्यां भवः । निगम+"तत्र भवः ।" ४।३।५३ । इत्यण् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः ।) वणिक् । (निगम्यतेऽत्रेति । नि+गम+"गोचरसञ्चरेति ।" ३।३।११९ । इति घप्रत्ययेन साधुः ।) पुरी । कटः । (निगम्यते ज्ञायतेऽनेनेति ।) वेदः । (यथा, देवीभागवते । १ । ५ । ६१ ।
"कथङ्कारं यान्ति सकलनिगमागोचरगुणप्रभावं स्वं यस्मात् स्वयमपि न जानासि परमम् ॥")
वणिक्पथः । हट्ट इति यावत् । इति मेदिनी । मे, ३४ ॥ निश्चयः । (यथा, "तस्या एव प्रतिज्ञाया हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना ॥" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
अध्वा । इति हेमचन्द्रः । ४ । ३८ ॥ (उपदेशः । यथा, भागवते । १ । ५ । ३६ ।
"इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम् ।
अदान्मे ज्ञानमैश्वर्य्यं स्वस्मिन् भावञ्च केशवः ॥")

निगरः, पु, (नि+गॄ+"ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् ।) भोजनम् । इति राजनिर्घण्टः ॥

निगरणं, क्ली, (नि+गॄ भक्षणे+भावे ल्युट् ।) भक्षणम् । इति मेदिनी । णे, ८८ ॥

निगरणः, पु, (निगीर्य्यते भक्ष्यतेऽनेनेति । नि+गॄ+करणे ल्युट् ।) गलः । इति मेदिनी । णे, ८८ ॥ होमधूमः । इति शब्दरत्नावली ॥

निगादः, पु, (नि+गद भाषे+भावे घञ् ।) कथनम् । इत्यमरः । ३ । २ । १२ ॥

निगारः, पुं, (नि+गॄ भक्षणे+भावे घञ् ।) निगरणम् । भक्षणम् । इत्यमरः । ३ । २ । ३७ ॥

निगालः, पु, (निगलति भक्षयत्यनेनेति । नि+गल भक्षणे+करणे घञ् ।) अश्वगलोद्देशः । इत्यमरः । २।८।४८ ॥ (यथा, अश्ववैद्यके । २।१४ ।
"घण्टाबन्धसमीपस्थो निगालः परिकीर्त्तितः ।
अधस्ताच्च निगालस्य गलमाहुर्मनीषिणः ॥")

निगालवान्, पु, (निगालोऽस्त्यस्येति । निगाल+मतुप् मस्य व ।) अश्वः । इति शब्दचन्द्रिका ॥

निगुः, पु, (निगम्यते विद्यतेऽनेनेति । नि+गम+बाहुलकात् डुः ।) मनः । इति त्रिकाण्डशेषः ॥ मलम् । मूलम् । मनोज्ञम् । चित्रकर्म्म । इति संक्षिप्तसारोणादिवृत्तिः ॥

निगूढः, पु, (निगुह्यते संव्रियते इति । नि+गुह+क्तः । "यस्य विभाषा ।" ७ । २ । १५ । इति । नेट् ।) वनसूरणः । इति हेमचन्द्रः । ४ । २३६ ॥ गुप्ते, त्रि । यथा,—
"आस्ते विधुः परमनिर्वृत एव मौलौ
शम्भोरिति त्रिजगतीजनचित्तवृत्तिः ।
अन्तर्निगूढनयनानलदाहदुःखं
जानाति कः क्षयगते बत शीतरश्मेः ॥"
इत्युद्भटः ॥

निग्रहः, पु, (नियमेन ग्रहणमिति । नि+ग्रह+"ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) अनुग्रहाभावः । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मनुः । ७ । १७५ ।
"निग्रहं प्रकृतीनाञ्च कुर्य्याद् योऽरिबलस्य च ।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा ॥")
बन्धनम् । (यथा, महाभारते । १ । १।१०४ ।
"यदाश्रौषं कर्णदुर्य्योधनाभ्यां
बुद्धिं कृतां निग्रहे केशवस्य ॥")
भर्त्सनम् । सीमा । इति मेदिनीकरहेमचन्द्रौ ॥ (निराकरणम् । यथा, रघुः । ९ । २५ ।
"दिनमुखानि रविर्हिमनिग्रहै-
र्विमलयन् मलयं नगमत्यजत् ॥"
दण्डः । यथा, रघुः । ११ । ५५ ।
"ते चतुर्थसहितास्त्रयो बभुः
सूनवो नववधूपरिग्रहात् ।
सामदानविधिभेदनिग्रहाः
सिद्धिमन्त इव तस्य भूपतेः ॥")
चिकित्सा । इति राजनिर्घण्टः ॥ विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।
"प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥"
("सर्व्वं प्रलये निगृह्णातीति निग्रहः ।" इति शाङ्करभाष्यम् ॥ महादेवः । इति महाभारतम् । १३ । १७ । ६४ ॥)

निग्राहः, पु, (नि+ग्रह+"आक्रोशेऽवन्योर्ग्रहः ।" ३।३।४५ । इति घञ् ।) निग्रहः । आक्रोशः । यथा । निग्राहस्ते भूयात् । इति संक्षिप्तसारव्याकरणम् ॥ (यथा च भट्टिः । ७ । ४३ ।
"संदृष्टायान्तु वैदेह्यां निग्राहो वीर्य्यवानरे ॥")

निघः, पु, (नियमितं निर्व्विशेषेण वा हन्यते ज्ञायते इति । नि+हन+"निघो निमितम् ।" ३ । ३ । ८७ । निपातनात् साधुः ।) विश्वक्समः । समन्तात् तुल्यारोहपरिणाहः । इत्यमरभरतौ ॥

निघण्टिका, स्त्री, गुलञ्चकन्दः । इति राजनिर्घण्टः ॥

निघण्टुः, पु, (निघण्टति शोभते इति । घण्ट दीप्तौ+"मृगय्वादयश्च ।" उणा । १ । ३८ । इति कुप्रत्ययेन साधुः ।) नामसंग्रहः । इति हेमचन्द्रः । २ । १७२ ॥

निघसः, पु, (न्यदनमिति । नि+अद भक्षणे+"नौ ण च ।" ३ । ३ । ६० । इति अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घस्लादेशः ।) आहारः । इत्यमरः । २ । ९ । ५६ ॥

निघातिः, स्त्री, (निहन्यतेऽनयेति । नि+"हसिवपियजीति ।" उणा । ४ । १२४ । इति इञ् । ततः कुत्वम् ।) लौहधानी । लौहमयदण्डः । इत्युणादिकोषः ॥

निघुष्टं, क्ली, (निघुष्यते स्मेति । नि+घुष+भावे क्तः ।) घुष्टम् । घोषणम् । इति शब्दरत्नावली ॥

निघृष्वः, पु, (नि+घृष संघर्षे+"सर्व्वनिघृष्वरिष्वेति ।" उणा । १ । १५३ । इति वन्प्रत्ययेन निपातनात् साधुः ।) खुरः । इत्युणादिकोषः ॥ वायुः । खरः । मार्गः । वराहः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (ह्रस्वः । इति निघण्टुः । ३ । २ ॥)

निघ्नः, त्रि, (निहन्यते निगृह्यते इति । नि+हन+घञर्थे कः । नियम्यत्वादेवास्य तथात्वम् ।) अधीनः । इत्यमरः । ३ । १ । १६ ॥ (यथा, रघुवंशे । १४ । ५८ ।
"आश्वास्य रामावरजः सतीं ता-
माख्यातवाल्मीकिनिकेतमार्गः ।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं
देवि । क्षमस्वेति बभूव नम्रः ॥")
गुणकरणम् । इति लीलावती ॥ (यथा, सूर्य्यसिद्धान्ते । ३ । २८ ।
"पुनर्द्वादशनिघ्नाद्वा लभ्यते यत् फलं बुधैः ।"

पुं। सूर्य्यवंशीयनृपभेदः। यथा, हरिवंशे। १५। २९।
"अनरण्यसुतो निघ्नो निघ्नपुत्त्रौ बभूवतुः॥")

निचय, पुं, (नि+चि+"एरच्।" ३। ३। ५६। इत्यच्।) समूहः। (यथा, महाभारते।४।२।३।
"आहरिष्यामि दारूणां निचयान् महतोऽपि च॥")
निश्चयः। इति शब्दरत्नावली॥

निचिकी, स्त्री, (निचिना कायति शोभते इति। कै+क। गौरादित्वात् ङीष्।) नैचिकी। उत्तमा गौः। इत्यमरटीकायां भरतः॥

निचित, त्रि, (निचीयते स्मेति। नि+चि+क्त।) पूरितम्। व्याप्तम्। इति हेमचन्द्रः। ६। १०६॥ (यथा, महाभारते।८।१२९।४।
"पश्य नानाविधाकारैरग्निभिर्निचितां महीम्॥")
सञ्चितम्। यथा, भावप्रकाशे अतिसाराधिकारे।
"वायुः प्रवृद्धो निचितं बलाश
नुदत्यधस्तादहिताशनस्य॥"
नदीभेदे, स्त्री। यथा, महाभारते।६।९।१८।
"कौशिकीं त्रिदिवां कृत्यां निचितां लोहितारणीम्॥")

निचुल., पुं, (निचोलति समुच्छ्रयतीति। नि+चुल+"इगुपधज्ञेति।" ३। १। १३५। इति क।) हिज्जलवृक्षः। इत्यमरः। २। ४। ६१॥ (पर्य्यायोऽस्य यथा,—
"इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) वेतसवृक्षः। इति राजनिर्घण्टः॥ निचोलः। इति हेमचन्द्रः।४। २११॥

निचुलक, क्ली, (निचुल इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) निचोलकम्। इति हारावली। १९२॥

निचोल, पुं, (निचोल्यते इति। नि+चुल+घञ्।) येन स्यूतेनास्यूतेन वा वस्त्रान्तरमाच्छाद्यते। इत्यमरभरतौ॥ पाछुड़ि इति ख्यातः। तत्पर्य्यायः। निचुलः २। उत्तरच्छदः ३ प्रच्छदपटः ४॥ इति हेमचन्द्रः। ३। ३४०॥ (यथा, राजतरङ्गिण्याम्। ३। २९९।
"सन्ततध्वान्तमिषतस्तीव्रशीतवशीकृता।
आशाश्वकाशिरे नीलनिचोलाच्छादिता इव॥")

निचोलक, पुं, (निचोल इव कायतीति। कै+क।) भटादेश्चोलाकृतिसन्नाहः। तत्पर्य्यायः। कूर्पासः २ वारवाणः ३ कञ्चुकः ४। इति हेमचन्द्रः। ३। ४३१॥

निच्छवि, स्त्री, (निकृष्टा छविः साहश्यं यत्र।) तीरभुक्तिदेशः। इति त्रिकाण्डशेषः॥ त्रिहुत इति भाषा॥

निच्छिवि, पुं, वर्णसङ्करजातिभेदः। इति जटाधरः॥ यथा,—
"झल्लो मल्लश्च राजन्याद्व्रात्यात् निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड़ एव च॥"
इति मनुः। १०। २२॥

निजं, त्रि, (निश्चयेन जायते इति। नि+जन+ड।) स्वकीयम्। (यथा, हितोपदेशे।
"अयं निजः परो वेति गणना लघुचेतसाम्॥")
नित्यम्। इत्यमरः। ३। ३। ३२॥

निट, [श्] स्त्री, (नितरां श्यति तनूकरोति व्यापारानिति। शो+क। पृषोदरादित्वात् साधुः।) निशा। यथा,—
"यामवती निशाख्या च वासतेयी तमा-
निशौ॥"
इति रात्रिपर्य्याये त्रिकाण्डशेषः॥
(यथा, मनुः। ९। ६०।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत् पुत्त्रं न द्वितीयं कथञ्चन॥")

निडीन, क्ली, (नीचैर्डीनं पतनमस्त्यस्मिन्।) पक्षिगतिविशेषः। (यथा, महाभारते।८।४१।२६।
"निडीनमथ संडीनं तिर्य्यग्डीनगतानि च॥")
शनैर्यानम्। इति जटाधरः॥

निणका, स्त्री, कलायविशेषः। तेओड़ा इति भाषा॥ तत्पर्य्यायः। सतीला २ तिपुटी ३। इति शब्दचन्द्रिका॥

नितम्बः, पुं, (निभृतं तम्यते आकाङ्क्ष्यते कामुकैरिति। तमु आकाङ्क्षायाम्+उल्वादयश्चेति साधुः। यद्वा, नितम्बति पीड़यति नायकचित्तमिति। नि+तम्ब पीड़ायाम्+अच्।) स्त्रीकट्याः पश्चाद्भागः। इत्यमरः।२।६।७४॥ पाछा इति भाषा॥ (यथा, माघे। ११। ५।
"विपुलतरनितम्बाभोगरुद्धे रमण्या
शयितुमनधिगच्छन् जीवितेशोऽवकाशम्॥")
स्कन्धः। रोधः। कटकः। (यथा, भट्टिकाव्ये। २। ८।
"गिरेर्नितम्बे मरुता विभिन्नं
तोयावशेषेण हिमाभमभ्रम्॥")
कटिमात्रम्। इति मेदिनी। बे, १२॥ (यथा, विदग्धमुखमण्डने।
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥")

नितम्बिनी, स्त्री (अतिशयितो नितम्बोऽस्त्यस्या इति। नितम्ब+"अत इनिठनौ।"५।२।११५। इति इनि स्त्रियां ङीप्।) प्रशस्तनितम्बविशिष्टा। इत्यमरः।२।६।३॥ (यथा, आर्य्यासप्तशत्याम्। ५५४।
"वैगुण्येऽपि महता विनिर्म्मितं भवति कर्म्म
शोभायै।
दुर्वहनितम्बमन्थरमपि हरति नितम्बिनी-
नृत्यम्॥")
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा, कुमारसम्भवे। ३। ७।
"नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयं ग्राहनिषक्तबाहुम्॥"
नितम्बविशिष्टे, त्रि। यथा, रघुः।१९।२६।
"क्षोभ्यमाननयनः श्लथांशुकैर्मेखलागुणपदैर्नितम्बिभिः॥")

नितरां, [म्] अव्य, (नि+तरप्+"किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" इति। ५।४।११। आमुप्रत्ययः।) सुतराम्। यथा,—
"नागोऽयं नागधनाभिलाषी
यक्षोऽप्यजस्रो नितरां कृशाङ्गः॥"
इति कोष्ठीप्रदीपः॥

नितलं, क्ली (नितरां तलमधोभागो यस्मिन्।) सप्तपातालान्तर्गतपातालविशेषः। इति शब्दरत्नावली॥

नितान्त, क्ली, (निताम्यतीति। तम+कर्त्तरि क्तः। "अनुनासिकस्येति।" ६।४।१५। इति दीर्घः।) अतिशयः। (यथा, कुमारसम्भवे। ३। ४।
"केनाभ्यसूया पदकाङ्क्षिणा ते
नितान्तदीर्घैर्जनिता तपोभिः॥")
तद्वति, त्रि। इत्यमरः। १। १। ७०॥

नित्य, क्ली, (नियमेन भवम्। नि+"अव्ययात् त्यप्।"४।२।१०४। इति त्यप्।) निरन्तरक्रियावचनम्। तत्पर्य्यायः। सततम् २ अनारतम् ३ अश्रान्तम् ४ सन्ततम् ५ अविरतम् ६ अनिशम् ७ अनवरतम् ८ अजस्रम् ९। इत्यमरः। १। १। ६९॥ प्रसक्तम् १० आसक्तम् ११ अलहन् १२। इति जटाधरः॥ तद्वति, त्रि। इत्यमरः॥ प्रत्यवायजनकीभूताभावप्रतियोगि। यथा एकादश्यामुपोषणं नित्यम्। ध्वंसप्रागभावाप्रतियोगि। यथा, गगनं नित्यम्। अहरहर्व्वर्त्तमानम्। यथा, नित्यं क्रीड़न्ति कुमाराः। अहरहः क्रियमाणत्वेन विधिबोधितम्। यथा, स्नानतर्पणादिकं नित्यम्। अनवच्छिन्नपरम्पराकः। यथा, वर्णा नित्याः॥

नित्य, त्रि, (नियमेन भवः। नि+"अव्ययात् त्यप्।" ४। २। १०४। इत्यत्र "त्यप् नेर्ध्रुव इति वक्तव्यम्।" इति वार्त्तिकोक्त्या त्यप्।) कालत्रयव्यापी। तत्पर्य्यायः। शाश्वतः २ ध्रुवः ३ सदातनः ४ सनातनः ५। इत्यमरः। ३।१।७२॥ (यथा, महाभारते। १। १००। २।
"दमो दानं क्षमा बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम्।
नित्यान्यासन् महासत्त्वे शान्तनौ पुरुषर्षभे॥")
समुद्रे, पुं। इति राजनिर्घण्टः॥

नित्यकर्म्मन्, [न्] क्ली, (नित्यं कर्म्म।) प्रत्यवायजनकाभावप्रतियोगिकार्य्यम्। इति स्मृतिः॥ तद्यथा,—
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकं तथा।
गृहस्थस्य त्रिधा कर्म्म तन्निशामय पुत्त्रक॥
पञ्चयज्ञाश्रितं नित्यं यदेतत् कथितं तव।
नैमित्तिकं तथा चान्यत् पुत्त्रजन्मक्रियादिकम्॥
नित्यनैमित्तिकं ज्ञेयं पर्व्वश्राद्धादि पण्डितैः॥"
इति मार्कण्डेयपुराणम्॥ *॥
तत्त्यागे दोषो यथा,—
"नित्यानां कर्म्मणां विप्र! तस्य हानिरहर्निशम्।
अकुर्व्वन् विहितं कर्म्म शक्तः पतति तद्दिने॥
प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि।
पश्च नित्यक्रियाहाने, कर्त्ता मैत्रेय। मानव॥

पशुमण्डूकमार्ज्जारश्वसर्पनकुलाखुभिः ।
अन्तरागमने विद्यादनध्यायमहर्न्निशम् ॥
द्वावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः ।
स्वाध्यायभूमिञ्चाशुद्धामात्मानञ्चाशुचिं द्विजः ॥"
इति मानवे । ४ । १०९—१२७ ॥

नित्यानित्यवस्तुविवेक, पुं, (नित्यानित्ये वस्तुनी तयोर्व्विवेकः विवेचनम् ।) ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् । इति वेदान्तसार' ॥

नित्याभैरवी, स्त्री, (नित्या तदाख्यया प्रसिद्धा भैरवी ।) भैरवीविशेषः । अस्या ध्यानादिक षट्कूटाभैरवीध्यानादिवत् ॥ ध्यान यथा,—
"बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम् ।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम् ॥
सुवर्णकलसाकारपीनोन्नतपयोधराम् ।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम् ॥"
दधतीमिति शेषः । इति तन्त्रसारः ॥ (अस्या बीजं यथा, 'ह्सकलरडें' 'ह्सकलरडीं' 'ह्सकलरडौं' ॥')

निदं, स्त्री, (नेदतीति । णिद कुत्सायाम् + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) विषम् । इति शब्दचन्द्रिका ॥

निदद्रुः पुं, (निदात् विषात् द्राति पलायते इति । द्रा + मृगय्वादित्वात् कुप्रत्ययेन साधुः ।) मनुष्यः । इति शब्दचन्द्रिका ॥ (निनास्ति दद्रु-र्यस्येति विग्रहे । दद्रुरोगरहिते, त्रि ॥)

निदर्शन, क्ली, (निदर्श्यतेऽनेनेति । नि + दृश् + ल्युट् ।) दृष्टान्त । उदाहरणम् । यथा,—
"उक्तं प्राग्भेऽपि दृष्टान्तावुभे शास्त्रनिदर्शने ॥"
इति नानार्थटीकायां भरत' ॥
("दृष्टान्तेनार्थं प्रसाध्यते यत्र तन्निदर्शनम् ॥ यथाग्निर्वायुना सहितः कोष्ठे वृद्धिं गच्छति तथा वातपित्तकफदुष्टो व्रण इति ॥" इत्युत्तरतन्त्रे षष्ठ-षष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥)

निदर्शना, स्त्री, (निदर्शयतीति । नि + दृश् + णिच् + ल्यु । टाप् ।) काव्यालङ्कारविशेष. । तस्य लक्षणम् ।
"अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम् ।
सदसत्त्वान्निदर्श्येत यदि सा स्यान्निदर्शना ॥"
उदाहरण यथा, दण्डी ।
"उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयितुमृद्धीनां फल सुहृदनुग्रहम् ॥"
(यथा च साहित्यदर्पणे । १० । ७० ।
"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना ॥
अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना । यथा,—
'कोऽत्र भूमिवलये जनान् मुधा
तापयन् सुचिरमेति सम्पदम् ।
वेदयन्निति दिनेन भानुमा
नाससाद चरमाद्रिं सत्न ॥'
अत्र रवेरीदृशार्थवेदनक्रियायां कर्त्तृत्वेनान्वय सम्भवत्येव ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्ति-रूपधर्म्मवत्त्वात् । स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति । असम्भवद्वस्तुसम्बन्धनिदर्शना लेक-वाक्यानेकवाक्यगतत्वेन द्विविधा । तत्रैकवाक्यगा यथा,—
'कलयति कुवलयमाला-
ललितं कुटिलः कटाक्षविक्षेप. ।
अधरः किसलयलीला-
माननमस्याः कलानिधेर्व्विलासम् ॥'
अत्रान्यस्य धर्म्मं कथमन्यो वहतीति कटाक्ष-विक्षेपादीनां कुवलयमालादिगतललितादीनां कथमसम्भवत् तल्ललितादिसदृशं ललितादिक मवगमयत् कटाक्षविक्षेपादे कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति । यथा वा ।
'प्रयाणे तव राजेन्द्र । मुक्ता वैरीमृगीदृशाम् ।
राजहंसगतिः पद्भ्यामाननेन शशिद्युति ॥'
अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागो-ऽनुपपन्न इति तयोस्तत्सम्बन्ध. कल्प्यते । स चासम्भवन् राजहंसगतिमिव गतिं बोधयति । अनेकवाक्यगा यथा,—
'इदं किलाव्याजमनोहरं वपु-
स्तपः क्षमं साधयितुं य इच्छति ।
ध्रुव स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥'
अत्र यत्तच्छब्दनिर्द्दिष्टवाक्यार्थयोरभेदेनान्वयो-ऽनुपपद्यमानस्तादृशवपुषस्तपः क्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति । यथा वा ।
'जन्मेदं वन्ध्यतां नीत भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्म्मया ॥'
अत्र भवभोगलोभेन जन्मनो व्यर्थतानयन काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यव-सानम् । एवम् ।
'क सूर्य्यप्रभवो वंशः क चाल्पविषया मति ।
तितीर्षुर्दुस्तर मोहादुडुपेनास्मि सागरम् ॥'
अत्र मन्मत्या सूर्य्यवंशवर्णनमुडुपेन सागर तरणमिवेति पर्य्यवसानम् । इय क्वचिदुपमेय-वृत्तस्योपमानेऽसम्भवेऽपि भवति । यथा,—
'योऽनुभूत' कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे ।
समाख्यादि स मृद्वीकारसे रसविशारदैः ॥'
अत्र प्रकृतस्याधरस्य मधुरिमधर्म्मस्य द्राक्षा-रसेऽसम्भवात् । पूर्व्ववत् साम्ये पर्य्यवसानम् ।
मालारूपापि यथा मम ।
'क्षिपसि शुक छ्वदशकवदने
मृगमर्पयसि मृगादनरदने ।
वितरसि तुरगं महिषविषाणे
निदधच्चेतो भोगवितानै ॥'
इह बिम्बप्रतिबिम्बताक्षेप विना वाक्यार्थापर्य्य-वसानम् । दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बताप्रत्यायनम् । नापीय-मर्थापत्तिस्तत्र 'हारोऽयं हरिणाक्षीणाम् ।' इत्यादौ साहश्यपर्य्यवसानाभावात् ॥)

निदाघः, पु, (नितरां दह्यतेऽत्र अनेन वा । नि + दह + घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) ग्रीष्म-कालः । (यथा, रघुः । १० । ८३ ।
"ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ।
मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥")
उष्ण । घर्म्म' । इत्यमरमेदिनीकरौ ॥ (यथा, रघु' । १२ । ३२ ।
"रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ॥")
निदाघे वर्णनीयानि यथा । पाटलपुष्पम् १ मल्लिकापुष्पम् २ ताप ३ सर ४ पथिकशोषः ५ वायु. ६ सेक. ७ मृगतृष्णा ८ प्रभा ९ स्त्री १० मृग-तृष्णा ११ आम्रादिफलपाकः १२ । इति कवि-कल्पलता ॥
("ता एवौषधयो निदाघे निःसारा रुक्षा अति-मात्र लघ्व्यो भवन्त्यापश्च ता उपयुज्यमाना सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्या-ल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति स सञ्चय प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षेरितो वाति-कान् व्याधीन् जनयति ॥" इति सुश्रुते सूत्र-स्थाने षष्ठेऽध्याये ॥
"निदाघोपचितश्चैव प्रकुप्यन्त समीरणम् ।
निहन्यादनिलघ्नेन विधिना विधिकोविदः ।
नदीजल रूक्षमुष्णमुदमन्थ तथातपम् ॥
व्यायाममथ दिवास्वप्न व्यवायञ्चात्र वर्ज्जयेत् ॥"
इति चोत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुते-नोक्तम् ॥)

निदाघकर., पु, (निदाघा उष्णा करा किरणानि यस्य । निदाघस्य उष्णस्य करो वा ।) सूर्य्य । इति हारावली । ११ ॥

निदाघकाल', पुं, (निदाघ एव काल । निदा-घस्य कालो वा ।) ग्रीष्मर्त्तुः । स तु ज्यैष्ठा-षाढमासौ । यथा,—
"प्रचण्डसूर्य्य' स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चय' ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकाल. समुपागतः प्रिये । ॥"
इति ऋतुसंहारे । १ । १ ॥

निदान, क्ली, (नि निश्चय दीयतेऽनेनेति । नि + दा + करणे ल्युट् ।) आदिकारणम् । इत्य-मर. । १ । ४ । २८ ॥ (यथा, रघु' । ३ । १ ।
"निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौर्हृदलक्षण दधौ ॥")
कारणम् । वत्सदामादि । (यथा, ऋग्वेदे । ६ । ३२ । २ ।
"उदुस्रियाणामसृजन्निदानम् ॥"
नि + दो छेदे + भावे ल्युट् ।) कारणञ्च । इति मेदिनी । ने, ८३ ॥ (नि + दै प शोधने + भावे ल्युट् ।) शुद्धिः । तप.फलयाचनम् । अवसा-नम् । इति हेमचन्द्र. । ६ । १५० ॥ रोग-निर्णयः । इति विश्व. ॥ तत्पर्य्याय. । रोग

लक्षणम् २ आदानम् ३ रोगहेतुः ४ । इति राजनिर्घण्टः ॥ * ॥

"निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा ।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ॥"
इति माधवकरः ॥

("इति कर्त्तव्यताको रोगोत्पादकहेतुर्निदानम् ।"
इति रुग्विनिश्चयव्याख्याने विजयेनोक्तम् ॥

"इह खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम् । तत्त्रिविधं असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेत्यतस्त्रिविधविकल्पा व्याधयः प्रादुर्भवन्त्याग्नेयसौम्यवायव्याः ।" इति निदानस्थाने प्रथमेऽध्याये चरकेणोक्तम् ॥ पैलमुनिकृतचिकित्साग्रन्थविशेषः । यथा, ब्रह्मवैवर्त्ते । १ । १६ । २१ ।

"पैलो निदानं कारथस्तन्त्रं सर्व्वधरं परम् ।
द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः ॥")

निदिग्धं, त्रि, (निदिह्यते स्मेति । दिह उपचये + क्तः ।) लेपादिना वर्द्धितम् । तत्पर्य्यायः । उपचितम् २ । इत्यमरः । ३ । १ । ८९ ॥

निदिग्धा, स्त्री, (निदिग्ध + टाप् ।) एला । इति शब्दचन्द्रिका ॥ (विवृतिरस्या एलाशब्दे ज्ञातव्या ॥)

निदिग्धिका, स्त्री, (निदिग्धा + स्वार्थे संज्ञायां वा कन् । कापि अत इत्वम् ।) एला । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते । ३ । १७ ।
"कपित्थबृहतीबिल्वपटोलेषु निदिग्धिका ॥")
कण्टकारिका । इत्यमरः । २ । ४ । ९३ ॥
(अस्याः पर्य्यायो यथा,—
"अनाक्रान्ता स्पृही व्याघ्री भण्डाकी च निदिग्धिका ।
सिंही धामनिका क्षुद्रा दृहती कण्टकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

निदिध्यासनं, क्ली, (पुनः पुनरतिशयेन वा निध्यायतीति । नि + ध्यै + सन् । ततो भावे ल्युट् ।) पुनःपुनः स्मरणम् ॥ अद्वितीयवस्तुनि तदाकाराकारितायाः बुद्धेः सजातीयप्रवाहः । इति वेदान्तसारः ॥

निदेशः, पुं, (नि + दिश + घञ् ।) आज्ञा । इत्यमरः । २ । ८ । २५ ॥ (यथा, देवीभागवते । २ । १० । ४९ ।
"प्रत्युपुस्तान् द्विजान् मत्वा निदेशं भूपतेर्यथा ॥")
कथनम् । उपान्तम् । इति मेदिनी । शे, २३ ॥ (यथा, मनुः । २ । १९७ ।
"पराङ्मुखस्याभिमुखो दूरस्थस्येत्य चान्तिकम् ।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥")
भाजनम् । इति धरणिः ॥

निदेशिनी, स्त्री, (निदिशतीति । नि + दिश + णिनि ङीप् ।) दिक् । इति राजनिर्घण्टः ॥

निदेष्टा, [ऋ] त्रि, (निदिशतीति । नि + दिश + तृच् ।) निदेशकर्त्ता । निदिशति इति व्युत्पत्त्या तृणा निष्पन्नः । इति मुग्धबोधमतम् ॥

निद्रा, स्त्री, (निन्द्यते इति । निदि कुत्सायाम् + "निन्देर्नलोपश्च ।" उणां । २ । १७ । इति रक् नलोपश्च ।) मेध्यामनःसंयोगः । इति जगदीशः ॥ सुषुप्त्यवस्थास्वप्नावस्था । इति चण्डीटीकायां नागभट्टः ॥ घुम इति भाषा ॥ तत्पर्य्यायः । शयनम् २ स्वापः ३ स्वप्नः ४ संवेशः ५ । इत्यमरः । २ । ७ । ३६ ॥ सुप्तिः ६ स्वपनम् ७ । इति शब्दरत्नावली ॥ यथाकाले सेवितनिद्रागुणाः । धातुसाम्यत्वम् । अतन्द्रितत्वम् । पुष्टिवर्णबलोत्साहाग्निदीप्तिकारित्वञ्च ॥ * ॥ दिवास्वप्नगुणः । स्निग्धत्वम् । तृट्शूलहिक्काजीर्णातिसारिणां हितत्वञ्च ॥ * ॥ आसीनप्रचलायितस्य उपविश्य निद्रावशाद्दोलायमानस्य गुणः । अरूक्षत्वम् । अनभिष्यन्दित्वञ्च ॥ * ॥ निद्रा सात्म्यीकृतानां दिवा रात्रौ च स्वपतां जाग्रतां वा दोषो न भवति । इति राजवल्लभः ॥ * ॥ निद्रारहिता यथा,—
"कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च ।
परनारीप्रसक्तस्य परद्रव्यहरस्य च ॥" * ॥
सुखसुप्ता यथा,—
"सुखं स्वपित्यनृणवान् व्याधिमुक्तश्च यो नरः ।
सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न शङ्कितः ॥"
इति गारुडे नीतिसारः ॥

("सत्त्वाच्च तम एव स्यात् जाग्रते स्वपते प्रभुः ।
तमसा प्रावृतो देही योम्ना च शून्यताङ्गतः ॥
देहे विश्रमते यस्मात्तस्मान्निद्रा प्रकीर्त्तिता ।
नासार्द्धे च भ्रुवोर्म्मध्ये लीयते चान्तरात्मना ॥
तस्माच्चेतो भवेत्तत्र निद्रायालीयते नृणाम् ॥"
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम् ॥
"निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् ।
वृषता क्लीवता ज्ञानमज्ञानं जीवितं न च ॥
अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता ।
सुखायुषी पराकुर्य्यात् कालरात्रिरिवापरा ॥"
इति वाभटे सूत्रस्थाने सप्तमेऽध्याये ॥
"पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम् ।
जाग्रतस्तद्विकशति स्वपतश्च निमीलति ॥
निद्रान्तु वैष्णवीं पाप्मानमुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिस्पृशति ॥ तत्र यदा संज्ञावहानि स्रोतांसि तमोभूयिष्ठः श्लेष्मा प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले । तमोभूयिष्ठानामहःसु निशासु च भवति । रजोभूयिष्ठानामनिमित्तम् । सत्त्वभूयिष्ठानामर्द्धरात्रे । क्षीणश्लेष्मणामनिलबहुलानां मनःशरीराभितापवताञ्च नैव सा वैकारिकी भवति ॥
हृदयञ्चेतनास्थानमुक्तं सुश्रुत । देहिनाम् ।
तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम् ॥
निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते ।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्तते ॥
पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः ।
रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान् ॥
करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते ।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते ॥
सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

निद्राणः, त्रि, (नि + द्रा + क्तः । "संयोगादेरातो धातोर्यण्वतः ।" ८ । २ । ४३ । इति तस्य नः ।) निद्रागतः । तत्पर्य्यायः । शयितः २ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, आर्य्यासप्तशत्याम् । ५२६ ।
"विहितविविधानुबन्धो मानोन्नतयावधीरितो मानी ।
लभते कुतः प्रबोधं स जागरित्वेव निद्राणः ॥")

निद्रालुः, त्रि, (निद्रातीति । नि + द्रा + "स्पृहिगृहीति ।" ३ । २ । १५८ । इति आलुच् ।) निद्राशीलः । निद्रा विद्यते अस्य गोष्ठ्येत्यादिना आलुः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । स्वप्नक् २ शयालुः ३ । इत्यमरः । ३ । १ । ३३ ॥ तन्द्रालुः ४ । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । ५ । ४१ ।
"काशी विवर्ज्जयेच्चौर्य्यं निद्रालुश्चर्म्मचौरिकाम् ।
जिह्वालौल्यञ्च रोगाढ्यो जीवितं योऽत्र वाञ्छति ॥")

निद्रालुः, स्त्री, (निद्रा हेयत्वेनास्त्यस्या इति । निद्रा + बाहुलकात् आलुः ।) वार्त्ताकी । वनबर्व्वरिका । इति राजनिर्घण्टः ॥ नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

निद्रावृक्षः, पुं, (निद्राया वृक्ष इव ।) अन्धकारः । इति शब्दमाला ॥

निद्रासंजननं, क्ली, (निद्रां संजनयतीति । सं + जन + णिच् + ल्युः ।) श्लेष्मा । इति शब्दमाला ॥

निधनं, क्ली, (नि + धा + "कृपृवृजिमन्दिनिधाञः क्युः ।" उणां । २ । ८१ । इति क्युः ।) नाशः । तत्तु अदर्शनं मरणञ्च । (यथा, विष्णुपुराणे । १ । १३ । ७३ ।
"एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥")
कुलम् । तत्तु कुलस्थानं कुलमुख्यश्च । इत्यमरभरतौ ॥

निधनः, पुं क्ली, (नि + धा + क्युः ।) मरणम् । इत्यमरः । २ । ८ । ११६ ॥ वधतारा । सा तु जन्मनक्षत्रात् सप्तमी तारा । यथा, जन्म सम्पद्विपत् क्षेमः प्रत्यरिः साधको वध इत्यादि । प्रत्यरौ लवणं दद्यान्निधने तिलकाञ्चनम् । इति ज्योतिस्तत्त्वम् ॥ (निवृत्तं धनं यस्य ।) धनहीने, त्रि ॥

निधानं, क्ली, (निधीयतेऽत्रेति । नि + धा + आधारे ल्युट् ।) निधिः । इति हेमचन्द्रः । २ । १०६ ॥ (यथा, पञ्चतन्त्रे । २ । १६४ ।
"कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥")
आधारः । यथा,—

महादेवः। यथा, महाभारते। १३। १७।४३।
"ध्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः॥")
निधिनाथः, पु, (निधीनां नाथः।) कुवेरः। इति त्रिकाण्डशेषः॥ निधीशः। निधीश्वरः। निधिप्रभुः। इत्यादयः॥
निधुवन, क्ली, (नितरां धुवनं हस्तपदादिकम्पनं यत्र।) मैथुनम्। इत्यमरः। २। ७। ५७॥ (यथा, शिशुपालवधे। ११। १८।
"अनिमिषमविरामा रागिणां सर्व्वरात्रं
नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य।
इदमुदवसितानामस्फुटालोकसम्पत्
नयनमिव सनिद्रं घूर्णते दैपमर्च्चिः॥")
नर्म्म। केलिः। इति शब्दरत्नावली॥ (नितरां धुवनं कम्पनम्।) कम्पः। इति मेदिनी। ने, १८८॥
निध्यान, क्ली, (नि+ध्यै+ल्युट्।) दर्शनम्। इत्यमरः। ३। २। ३१॥
निध्वान, पु, (नि+ध्वन शब्दे+घञ्।) शब्दः। इति शब्दरत्नावली॥
निनदः पु, (नि+नद+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) शब्दः। इत्यमरः। १।६।२२॥ (यथा, देवीभागवते। ३।१२।३७।
"शृण्वन्तु तूर्य्यनिनदान् किल वाद्यमानान्॥")
निनादः, पु, (नि+नद+पक्षे घञ्।) शब्दः। इत्यमरः। १।६।२२॥ (यथा, रामायणे। २।३४।१८।
"स्त्रीसहस्रनिनादश्च संजज्ञे राजवेश्मनि॥")
निन्दक, त्रि, (निन्दति तच्छीलः। निदि कुत्सायाम्+"निन्दहिंसेति।" ३। २। १४६। इति वुञ्।) निन्दाकारकः। यथा,—
"न भारा पर्व्वता भारा न भाराः सप्तसागराः।
निन्दका हि महाभारा भारा विश्वासघातकाः॥"
इति कर्म्मलोचनम्॥
निन्दतल, त्रि, (निन्द्यं निन्दार्हं तलं हस्ततलं यस्य।) निन्दितहस्तः। इति शब्दरत्नावली॥
निन्दन, क्ली, (निदि कुत्सायाम्+भावे ल्युट्।) निन्दा। इति शब्दरत्नावली॥
निन्दा, स्त्री, (निन्दनमिति। निदि+"गुरोश्च हलः।" ३। ३। १०३। इति स्त्रियां अः।) अपवादः। दुष्कृतिः। इति शब्दरत्नावली॥ निन्दनम्। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ कुत्सा ९ गर्हणम् १०। इत्यमरः॥ गर्हा ११ कुत्सनम् १२ परिवादः १३ जुगुप्सनम् १४ अपक्रोशः १५ भर्त्सनम् १६ अववादः १७। इति शब्दरत्नावली॥ गर्हणा १८ धिक्क्रिया १९। इति हेमचन्द्रः॥ (यथा, मनुः। २। २००।
"गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥")
हरकेशवभक्तादिनिन्दायां दोषो यथा,—
"हरकेशवयोर्भक्तान् ये च निन्दन्ति पापिनः।
भूदेवान् ब्राह्मणांश्चैव स्वगुरूंश्च पतिव्रताः॥
यतिभिक्षुकब्रह्मचारिस्त्रीवीजान् सुरांस्तथा।
पच्यन्ते कालसूत्रे ते यावच्चन्द्रदिवाकरौ॥
श्लेष्ममूत्रपुरीषेषु शेरते ते दिवानिशम्।
भक्षिताः कीटनिकरैः शब्दं कुर्व्वन्ति कातराः॥
ये निन्दन्ति च ब्रह्माणं स्रष्टारं जगतां गुरुम्।
शिवं सुराणां प्रवरं दुर्गां लक्ष्मीं सरस्वतीम्॥
सीताञ्च तुलसीं गङ्गां वेदांश्च वेदमातरम्।
व्रतं तपस्यां पूजाञ्च मन्त्रं मन्त्रप्रदं गुरुम्॥
ते पच्यन्तेऽन्धकूपे वै यावद्वर्षं विधेरहो।
भक्षिताः सर्पसङ्घैश्च शब्दं कुर्व्वन्ति सन्ततम्॥
यो निन्दन्ति हृषीकेशं देवसाम्यं विधाय च।
विष्णुभक्तिप्रदञ्चैव पुराणञ्च श्रुतेः परम्॥
राधा तदङ्गजा गोपीर्ब्राह्मणांश्च सदार्च्चितान्।
ते पच्यन्तेऽवटे देव। विधातुरायुषा समम्॥
अधोमुखा ऊर्द्ध्वपद्मा सर्पसङ्घैश्च वेष्टिताः।
भक्षिता विकृताकारैः कीटैः सर्पैः समावृतैः॥
अतीवकातरा भीताः शब्दं कुर्व्वन्ति सन्ततम्।
श्लेष्ममूत्रपुरीषाणि भुवं भक्षन्ति क्षोभिताः॥
उल्का ददति वक्त्रेषु तन्मुखे यमकिङ्कराः।
त्रिसन्ध्यं तर्ज्जनं कृत्वा कुर्व्वन्ति दण्डताड़नम्॥
कुर्व्वन्ति मूत्रपानञ्च प्रहारैस्तृषिता भिया।
तदा कल्पान्तरे सृष्टे सृष्टेश्च प्रथमे पुनः॥
तेषां भवेत् प्रतीकार इत्याह कमलोद्भवः।
परनिन्दा विनाशाय स्वनिन्दा यशसे परम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ४०। ४१ अः॥
"वेदनिन्दारतान् मर्त्यान् देवनिन्दारतांस्तथा।
द्विजनिन्दारतांश्चैव मनसापि न चिन्तयेत्॥
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्ज्जयेत्।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्ज्जयेत्॥
यस्तु देवानृषींश्चैव वेदं वा निन्दति द्विजः।
न तस्य निष्कृतिर्दृष्टा शास्त्रेष्विह मुनीश्वराः॥
निन्दयेद्वै गुरुं देवं वेदं वा सोपबृंहणम्।
कल्पकोटिशतं साग्रं रौरवे पच्यते नरः॥
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम्।
कर्णौ पिधाय गन्तव्यं न चैनानवलोकयेत्॥
वर्ज्जयेद्वै परेषान्तु रहस्यं गर्हणां बुधः।
न निन्देद्योगिनः सिद्धान् व्रतिनो वा यतींस्तथा॥
देवतायतनं प्राज्ञो देवानामाकृतिन्तथा॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
निन्दास्तुति, स्त्री, (निन्दया स्तुतिः।) व्याजस्तुतिः। यथा,—
"निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः।"
निन्दया स्तुतिर्गम्यत्वे व्याजेन स्तुतिरिति च व्युत्पत्त्या व्याजस्तुतिः। इति साहित्यदर्पणः। अपि च।
"यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ मता।"
उदाहरणम्।
"तापसेनापि रामेण जितेयं भूतधारिणी।
त्वया राज्ञापि सैवेयं जिता माभून्मदस्तव॥"
इति दण्डी॥
"कथमवनिप। दर्पो यन्निशातासिधारा-
दलनगलितमूर्द्ध्ना विद्विषां स्वीकृता श्रीः।
ननु तव निहतारेरप्यसौ किन्न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः॥
इत्यादौ निन्दास्तुतिवपुषां स्वरूपस्य।" इति काव्यप्रकाशः॥
निन्दित, त्रि, (निन्दास्य जातेति। निन्दा+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) निन्दायुक्तः। तत्पर्य्यायः। धिक्कृतः २ अपध्वस्तः ३ निर्भर्त्सितः ४। इति जटाधरः॥ (यथा, देवीभागवते। ४। ७। ४९।
"मधु पश्यति मूढात्मा प्रपातं नैव पश्यति।
करोति निन्दितं कर्म्म नरकान्न बिभेति च॥")
निन्दुः स्त्री, निन्द्यतेऽप्रजस्त्वेनासौ। निदि कुत्सायामित्यादौ औणादिकः उप्रत्ययः। मृतवत्सा। इति हेमचन्द्रः। ३। १९५॥
निपः, पु क्ली, (नियतं पिबत्यनेनेति। नि+पा+घञर्थे कः।) कलसः। इत्यमरः। २। ९। ३२॥ कदम्बवृक्षे, पु। इति शब्दचन्द्रिका॥
निपठः, पु, (निपठनमिति। नि+पठ+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) पाठः। इत्यमरः। ३। २। २९॥
निपत्या, स्त्री, (निपतत्यस्यामिति। नि+पत+"संज्ञायां समजनिषदनिपतेति।" ३। ३। ९९। इति क्यप्। ततष्टाप्।) युद्धभूमिः। इति मुग्धबोधटीकायां दुर्गादासः॥ (पिच्छिला भूमिः। इति सिद्धान्तकौमुदी॥)
निपाक, पु, (नियमेन पचनमिति। नि+पच+घञ्।) पाकः। इति शब्दरत्नावली॥
निपाठ, पु, (नि+पठ+पक्षे घञ्।) पठनम्। इत्यमरः। ३। २। २९॥
निपातः, पुं, (नितरां पतनमिति। नि+पत+घञ्।) मृत्युः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ५। १२२। ९।
"सङ्गरेषु निपातेषु तथापद्व्यसनेषु च॥")
पतनम्। यथा, आनन्दलहर्य्याम्। ५७।
"वने वा हर्म्म्ये वा समकरनिपातो हिमकरः॥"
निपातन, क्ली, (निपात्यतेऽनेनेति। नि+पत+णिच्+करणे ल्युट्।) खलीकारः। इति भरतः॥ अधोनयनम्। इति सर्व्वस्वम्। तत्पर्य्यायः। अवनायः २। इत्यमरः। ३। २। २९॥ निपातनम् ३। इति नयनानन्दः॥ व्याकरणलक्षणानुपपन्नपदसाधनम्। यथा, निपातनादिष्टसिद्धिः। यल्लक्षणेनानुपपन्नं तत् सर्व्वं निपातनात् सिद्धमिति भाष्यम्॥ निपातलक्षणं यथा,
"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम्॥
इति प्राच.।" इति दुर्गादासः॥ तद्यथा,—
"वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्य्ययः।

भोडशादौ विकार स्यात् वर्णनाशः पृषोदरे ॥”

इति कलापपञ्जी ॥

निपान, क्ली (निपीयते ऽस्मिन्निति। नि+पा+आधारे ल्युट्।) कूपसमीपशिलादिनिबद्धपशुपानार्थकृतकूपोद्धृताम्बुस्थानम्। इति भरतः ॥ तत्पर्य्याय। आहाव। इत्यमरः। १।१०।२६॥ निपानकम् ३। इति शब्दरत्नावली॥ गोदोहनपात्रम्। इति त्रिकाण्डशेषः॥ (जलाशयमात्रम्। यथा, विष्णुसंहितायाम्। ६४। १।

“परनिपानेषु न स्नानमाचरेत॥”)

निपुण, त्रि, (नि+पुण राशीकरणे+क।) कार्य्यक्षम। (यथा, नागानन्दे सूत्रधारोक्तिः।

“श्रीहर्षो निपुण कविः परिषदप्येषा गुणग्राहिणी॥”

अन्यच्च, देवीभागवते। १।५।५६।

“न ते रूपं वेत्ति सकलभुवने कोऽपि निपुणो न नाम्नां सङ्ख्यां ते कथयितुमिह योग्योऽस्ति पुरुषः॥”)

तत्पर्य्याय। प्रवीण २ अभिज्ञ ३ विज्ञ ४ निष्णात ५ शिक्षित ६ वैज्ञानिक ७ कृतमुख ८ कृती ९ कुशल १०। इत्यमरः। ३।१।४॥ सङ्ख्यावान् ११ मतिमान् १२ कुशाग्रीयमति १३ कृष्टि १४ विदुर १५ बुधः १६ दक्ष १७ नदिष्ठ १८ कृतधी १९ सुधीः २० विद्वान् २१ कृतकर्म्मा २२ विचक्षण २३ विदग्ध २४ चतुर २५ प्रौढ २६ वोढा २७ विशारद २८ सुमेधा २९ सुमति ३० तीक्ष्णः ३१ प्रेक्षावान् ३२ विबुध ३३ विदन् ३४। इति राजनिर्घण्टः॥ विज्ञानिकः ३५ कुशली ३६। इति शब्दरत्नावली॥

निफला, स्त्री, (निवृत्तं फलं यस्याः।) ज्योतिष्मती। इति भावप्रकाशः॥ (ज्योतिष्मतीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

निफेन, क्ली, (निवृत्तः फेनो यस्मादिति।) अफेनम्। इति राजनिर्घण्टः॥

निबन्ध, क्ली, (नितरां बध्यते तालल्याद्यादिविहितबन्धनं यत्र।) गीतम्। इति शब्दरत्नावली॥

निबन्ध, पु, (निबध्नातीति। नि+बन्ध घञ्।) आनाहरोगः। ग्रन्थस्य वृत्तिः। इति हेमचन्द्रः॥ निबन्धः। इति जटाधरः॥ बन्धनम्। यथा —

“दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता॥”

इति श्रीभगवद्गीता॥

(यथा, भागवते। ६।२।४६।

“नातः परं कर्म्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानुकीर्त्तनात्॥”)

निबन्धन, क्ली, (निबध्यतेऽनेनास्मिन् वा। नि+बन्ध ल्युट्।) हेमचन्द्रः॥ उपनाहः।

... भाग। इत्यमरः।

भावे ल्युट्।)

निबन्धा, [ऋ] पु, निबन्धकर्त्ता। ग्रन्थकर्त्ता। इति व्याकरणम्॥

निबन्धित, त्रि, बद्धः। निबन्धोऽस्य जातः इत्यर्थे इतच्प्रत्ययनिष्पन्नः॥

निबर्हण, क्ली, (निबर्ह्यते इति। नि+बर्ह+ल्युट्।) मारणम्। इत्यमरः। २।८।११२॥ (यथा, मार्कण्डेयपुराणे। ६२।२२।

“युद्धेषु चरितं यस्मै दुष्टदैत्यनिबर्हणम्॥”)

निभ, त्रि, (नियतं भातीति। नि+भा+क।) सदृशः। इत्यमरः। २।१०।३८॥ (यथा, रघुवंशे। १०।६।

“प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्। दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥”)

प्रकाशः। व्याजे, पुं। इति शब्दरत्नावली॥

निभालन, क्ली, (नि+भल+णिच्+भावे ल्युट्।) दर्शनम्। इति त्रिकाण्डशेषः॥

निभूत, त्रि, (नि+भू+क्त।) अतीतम्। भूतकालः। इति राजनिर्घण्टः॥

निभृत, त्रि, (नि+भृ+क्त।) विनीतः। निर्जनः। यथा,—

“निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्।”

इति श्रीजयदेवः। २।११॥

(अस्तमयासन्नः। यथा, रघुवंशे। ८।१५।

“नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत्॥”)

निमज्जथु, पु, (नि+मस्ज+अथुच्।) शयनम्। यथा, भट्टिः।

“तल्पे कान्तान्तरे सार्द्धं मन्येऽहं धिङ्निमज्जथुम्॥”

निमज्जन, क्ली, (निमज्ज्यतेऽनेनेति। नि+मस्ज+भावे ल्युट्।) स्नानम्। अवगाहनम्। यथा,

“नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः। वीक्ष्य वः खलु तनुममृतादौ हृन्निमज्जनमवैमि सुधायाम्॥”

इति नैषधे पञ्चमसर्गः॥

निमन्त्रण, क्ली, (निमन्त्र्यते इति। नि+मन्त्र+ल्युट्।) नियोजनविशेषः। “यत्र यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम्। यथा, इह भुञ्जीत भवान्। यस्याकरणे प्रत्यवायो न स्यात् तदामन्त्रणम्। यथा, इह शयीत भवान्। इति निमन्त्रणामन्त्रणयोर्भेदः।” इति मुग्धबोधटीकायां दुर्गादासः॥

निमय, पु, (निमीयतेऽनेनेति। नि+मि+“एरच्।” ३।३।५६। इत्यच्।) विनिमयः। इत्यमरः। २।९।८०॥ (यथा, महाभारते। १२।७८।७।

“पक्वेनामस्य निमयं न प्रशंसन्ति साधवः। निमयेत पक्वमामेन भोजनार्थाय भारत।॥”)

निमि, पुं, इक्ष्वाकुराजपुत्रः। तस्य निमेषे स्थितिकारणं यथा,—

“निमिर्नाम नृपः स्त्रीभिः पुरा द्यूतमदीव्यत।

तत्रान्तरेऽभ्याजगाम वशिष्ठो ब्रह्मसम्भवः॥ तस्य पूजामकुर्व्वन्तं शशाप स मुनिर्नृपम्। विदेहस्त्वं भवस्वेति शप्तस्तेनाप्यसौ पुनः॥ अन्योन्यशापाच्च तयोर्विशरीरे विचेतसौ। जग्मतुः शापनाशाय ब्रह्माणं जगतः पतिम्॥ अथ ब्रह्मण आदेशाल्लोचनेषु वसन्निमिः। निमेषाः सुखं लोकानां तद्विश्रामाय नारद॥”

इति मत्स्यपुराणे ५५ अध्यायः॥ *॥

मतान्तरं यथा,—

“निमिः सहस्रसंवत्सरं सत्रमारेभे। वशिष्ठञ्च होतारं वरयामास। तमाह वशिष्ठः। अहमिन्द्रेण पञ्चवर्षशत यागार्थं प्रथमतरं वृत। अनन्तरं प्रतिपाल्यतामागतस्तवापि ऋत्विग् भविष्यामीत्युक्ते सोऽपि तत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत्। समाप्ते चामरपतियागे त्वरावान् वशिष्ठ आजगाम। तत्कर्म्मकर्त्तृत्वं गौतमस्य दृष्ट्वा अथ विदेहो भविष्यतीति शापं ददौ। निमेः शरीरं सद्यो मृतमिव तस्थौ। यज्ञसमाप्तौ भागग्रहणायागतान् देवान् ऋत्विज ऊचुः। यजमानाय वरो दीयतामिति। देवैश्च छन्दितो निमिराह। नह्येतावति जगत्यन्यद्दुःखमस्ति यच्छरीरात्मनोर्वियोगे भवति। तदहमिच्छामि सकललोचनेषु वस्तुम्। न पुनः शरीरग्रहणं कर्त्तुमित्येवमुक्ते देवैरसावशेषभूतानां नेत्रेष्ववासं कारितः। ततो भूतान्युन्मेषनिमेषं चक्रुः।” इति विष्णुपुराणे ४ अंशे ५ अध्यायः॥

निमित्त, क्ली, (नि+मिद्+क्त। सत्तापूर्व्वकालानन्तत्वम्।) हेतुः। (यथा, देवीभागवते। १।१८।५।

“किं निमित्तं महाभाग! निःस्पृहस्य च मां प्रति। जातं त्वागमनं ब्रूहि कार्य्यं तन्मुनिसत्तम॥”)

चिह्नम्। इत्यमरः। ३।३।७६॥ शकुनः। यथा,

“निमित्तानि च पश्यामि विपरीतानि केशव॥”

इति श्रीभगवद्गीता॥

निमित्तकं, क्ली (निमित्त+सञ्ज्ञायां कन्।) निमित्तनिश्चयादागतम्। चुम्बनम्। इति शब्दमाला॥ निमित्तञ्च॥

निमित्तकारण, क्ली, (निमित्तं कारणम्।) समवायिकारणासमवायिकारणाभ्यां भिन्नम्। तृतीयकारणम्। यथा। घटं प्रति कुलालदण्डचक्रसलिलसूत्रादि। इति भाषापरिच्छेदसिद्धान्तमुक्तावली॥

निमित्तकृत्, पुं, (निमित्तं स्फुटेन शुभाशुभशकुनं करोतीति। कृ+क्विप्।) काकः। इति राजनिर्घण्टः॥

निमित्तवित्, [द्] पुं, (निमित्तं शुभाशुभलक्षणं वेत्तीति। विद्+क्विप्।) दैवज्ञः। गणकः। इति हेमचन्द्रः। ३। १४६॥

निमिष, पु, विष्णुः। यथा, महाभारते। १३।१४९।३६।

“निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः॥”

(निमिषतीति। नि+मिष+“इगुपधेति।”

३।१।१३५। इति कः।) कालविशेषः। चक्षुर्निमीलनम्। इति मेदिनी। षे, ३६॥ (यथा, महाभारते। १। १८८। १६।
"सव्यश्च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशार्द्धसंख्यान्॥")
वर्त्मगतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे ३ अध्याये।
"निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः।
चालयेदतिवर्त्मानि निमिषः स गदो मतः॥")

निमीलनं, क्ली, (निमील्यतेऽनेनेति। नि+मील+करणे ल्युट्।) मरणम्। (नि+मील+भावे ल्युट्।) निमेषः। इति हेमचन्द्रः। ३। २४२॥ (यथा, कलाविलासे। १। ४७।
"नयननिमीलनमूलः सुचिरं स्नानार्द्रचूलजलसिक्तः।
दम्भतरुः शुचिकुसुमः सुखशतशाखाशतैः फलितः॥"
कालविशेषः। यथा, सूर्य्यसिद्धान्ते। ४। १७।
"तदेव विमर्दार्द्धनाडिकाहीनसंयुते।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे॥")

निमीलिका, स्त्री, (निमीलयतीति। नि+मील+णिच्+ण्वुल्। टापि अत इत्वम्।) व्याजः। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्। ६। ७३।
"नीतस्य मण्डलेशत्वं वेलावित्तस्य भूभुजा।
देवीः कामयमानस्य चक्रे गजनिमीलिका॥")
निमीलनञ्च॥

निमेयः, पुं, (निमीयते परिमीयते इति। नि+मा माने+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति ईत्।) नैमेयः। परीवर्त्तः। इत्यमरटीकायां भरतः॥ (परिवर्त्तनीये, त्रि। यथा, महाभारते। १३। ५१। ६।
"नाहं शतसहस्रेण निमेयः पार्थिवर्षभ।
दीयतां सदृशं मूल्यममात्यैः सह चिन्त्य॥")

निमेषः, पुं, (नि+मिष+भावे घञ्।) पक्ष्मस्पन्दनकालः। पलक् इति भाषा॥ तत्पर्य्यायः। निमिषः २ दृष्टिनिमीलनम् ३। इति शब्दरत्नावली॥ पुंसो यावत्कालमक्ष्णश्च विकाशानन्तरं पक्ष्माकुञ्चनं जायते स निमेषः। इत्यमरटीकायां भरतः॥ *॥
"अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः॥"
इत्यग्निपुराणम्॥
(पक्ष्मस्पन्दनम्। यथा, रघुः। २। १९।
"पपौ निमेषालसपक्ष्मपङ्क्ति-
रुपोषिताभ्यामिव लोचनाभ्याम्॥"
रोगविशेषः। यथा, सुश्रुते चिकित्सितस्थाने। ३६ अध्याये।
"नेत्रस्तम्भं निमेषं वा तृष्णां कासं प्रजागरम्।
लभते दन्तधावन तांस्तांश्चाप्याशुपद्रवान्॥"
स्वनामख्यातयक्षविशेषः। इति नीलकण्ठः॥ यथा, महाभारते। १। ३२। १६।
"उलूकश्वसनाभ्याञ्च निमेषेण च पक्षिराट्।
प्ररुजेन च संग्रामं चकार पुलिनेन च॥")

निमेषकृत्, स्त्री, (निमेषं करोतीति। कृ+क्विप्। यद्वा, कृ+भावे क्विप्। निमेषे निमेषमात्रकाले कृत् स्फुरणकार्य्यं यस्याः।) विद्युत्। इति शब्दमाला॥

निमेषरुक्, [च्] पुं, (निमेषेण निमेषकालं व्याप्येत्यर्थः रोचते दीप्यते इति। रुच दीप्तौ+क्विप्।) खद्योतः। इति त्रिकाण्डशेषः॥

निम्न, त्रि, निकृष्टा म्ना अभ्यासः शीलमत्र। (यद्वा, निकृष्टं म्नातीति। म्ना+कः।) नीचम्। निचु इति नावाल इति च भाषा॥ तत्पर्य्यायः। गभीरम् २ गम्भीरम् ३। इत्यमरः।३।१०।१५॥ गभीरकम् ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। ५।
"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्॥"
पुं, अनमित्रपुत्त्रः। स तु सत्राजितप्रसेनयोः पिता। यथा, भागवते। ९। २४। १२।
"शिनिस्तस्यानमित्रस्य निम्नोऽभूदनमित्रतः।
सत्राजितः प्रसेनश्च निम्नस्याथासतुः सुतौ॥")

निम्नगा, स्त्री, (निम्नं गच्छतीति। गम+ड। टाप्।) नदी। इत्यमरः। १। १०। ३०॥ (यथा, मनुः। ९। २२।
"यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥")
नीचगामिनि, त्रि॥

निम्बः, पुं, (निम्बति स्वास्थ्यं ददातीति। निम्ब+अच्।) वृक्षविशेषः। निम् इति भाषा। तत्पर्य्यायः। अरिष्टः २ सर्व्वतोभद्रः ३ हिङ्गुनिर्य्यासः ४ मालकः ५ पिचुमर्द्दः ६। इत्यमरः।२।४।६२॥ अर्कपादपः ७। इति हेमचन्द्रः॥ कैटर्य्यः ८ वरत्वचः ९ छर्द्दिघ्नः १० इति रत्नमाला॥ प्रभद्रः ११ पारिभद्रकः १२ काकफलः १३ कीरेष्टः १४ नेता १५ सुमना १६ विशीर्णपर्णः १७ यवनेष्टः १८ पीतसारकः १९ शीतः २०। इति राजनिर्घण्टः॥ पिचुमन्दः २१ तिक्तकः २२। इति भावप्रकाशः॥ कीकटः २३ शूकमालकः २४। इति जटाधरः॥ अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। कफव्रणक्रिमिवमिशोफशान्तिकारित्वम्। बलासबहुविधपित्तदोषहृदयविदाहशमित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। ग्राहित्वम्। कटुपाकित्वम्। अग्निवातकारित्वम्। अहृद्यत्वम्। श्रमतृट्कासज्वरारुचिच्छर्द्दिकुष्ठहृल्लासमेहनाशित्वञ्च। तत्पत्रगुणाः। नेत्रहितकारित्वम्। क्रिमिपित्तविषसर्व्वारोचककुष्ठनाशित्वम्। वातलत्वम्। कटुपाकित्वञ्च। तत्फलगुणाः। रसे तिक्तत्वम्। पाके कटुत्वम्। भेदनत्वम्। स्निग्धत्वम्। लघुत्वम्। उष्णत्वम्। कुष्ठगुल्मार्शःक्रिमिमेहनाशित्वञ्च।
"निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातनुत्।
अहृद्यः श्रमतृट्कासज्वरारुचिक्रिमिप्रणुत्॥
व्रणपित्तकफच्छर्द्दिकुष्ठहृल्लासमेहनुत्।
निम्बपत्रं स्मृतं नेत्र्यं क्रिमिपित्तविषप्रणुत्॥
वातलं कटुपाकञ्च सर्व्वारोचककुष्ठनुत्।
नैम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्॥
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःक्रिमिमेहनुत्॥"
इति भावप्रकाशः॥*॥
तत्तैलगुणाः। नात्युष्णत्वम्। क्रिमिकुष्ठकफत्वग्दोषव्रणकण्डूतिशोफहारित्वम्। पित्तलत्वञ्च। इति राजनिर्घण्टः॥*॥
"निम्ब पित्तकफच्छर्द्दिव्रणहृल्लासकुष्ठनुत्।"
निम्बपत्रं इति वा पाठः॥*॥
"करञ्जनिम्बजफलं क्रिमिकुष्ठप्रमेहजित्।
निम्बतैलन्तु कुष्ठघ्नं तिक्तं क्रिमिहरं परम्॥"
इति राजवल्लभः॥
अथ महानिम्बः। वकाइन इति हिन्दीभाषा॥ तत्पर्य्यायगुणाः। यथा, भावप्रकाशे।
"महानिम्बः स्मृतो द्रेका रम्यको विषमुष्टिकः।
केशमुष्टिर्निम्बरकः कार्मुकः क्षीर इत्यपि॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः।
कफपित्तक्रमिच्छर्द्दिकुष्ठहृल्लासरक्तजित्॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः॥"
(षष्ठ्यां तिथौ तद्भक्षणे तिर्य्यग्योनित्वं स्यात्। इति तिथितत्त्वम्॥)

निम्बकः, पुं, (निम्ब एव। स्वार्थे कन्।) निम्बवृक्षः। इति भूरिप्रयोगः॥ (षष्ठ्यां तद्भक्षणनिषेधो यथा, तिथितत्त्वे।
"कलङ्की जायते विल्वे तिर्य्यग्योनिश्च निम्बके॥")

निम्बतरुः, पुं, (निम्ब इव तरुर्वृक्षः।) मन्दारवृक्षः। इत्यमरः। २। ४। २९॥

निम्बवीजः, पुं, (निम्बस्य वीजमिव वीजं यस्य।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

नि(म्बु)म्बूक, क्ली, (निम्बति सिञ्चतीव रसेनेति। निम्ब सेचने+बाहुलकात् ऊकः। माघिको ह्रस्वश्च। ततः कन्।) वृक्षविशेषः। कागजी लेबु इति भाषा॥ तत्पर्य्यायः। अम्लजम्बीरः २ दन्तिः ३ दीप्यः ४ वह्निवीजः ५ अम्लसारः ६ दन्ताघातः ७ शोधनः ८ जन्तुमारी ९ निम्बूः १० रोचनः ११। (यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे।
"निम्बूः स्त्री निम्बुकं क्लीबे निम्बूकमपि कीर्त्तितम्॥")
तत्फलगुणाः। अम्लरसत्वम्। कटुत्वम्। उष्णत्वम्। गुल्मामवातकासकफार्शःकण्ठविच्छर्द्दिहरत्वम्। अग्निवृद्धिकारित्वम्। चक्षुष्यत्वम्। परिपक्वे अतीव रुच्यत्वञ्च। इति राजनिर्घण्टः॥ पाचनत्वम्। लघुत्वम्। क्रिमिसमूहोदरग्रहनाशित्वम्। तीक्ष्णत्वम्। वातपित्तकफशूलिनो हितत्वम्। कष्टनष्टरुचिरोचनत्वम्। त्रिदोषवह्निक्षयवातरोगनिपीडितानां विषविक्लवानां मलग्रहे बद्धगुदे विसूचिकायाञ्च प्रदेयम्। इति भावप्रकाशः॥*॥

"भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम् ।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥
निम्बूफलभवं पानमत्यम्लं वातनाशनम् ।
वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥"
इति राजनिर्घण्टः ॥

नियत, त्रि, (नि+यम+क्तः ।) संयतः । यथा,
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां नराधिप ।
पुष्पाहारी वर्षमेकं तत्रैव नियतात्मवान् ॥"
इति भविष्यपुराणे द्वितीयकल्पः ॥
(सेवापर । यथा, रामायणे । १ । २ । ७ ।
"प्रायच्छत सुनेस्तस्य वल्कलं नियतो गुरोः ॥")
नित्यः । यथा,—
"अन्यथासिद्धिशून्यस्य नियता पूर्ब्बवर्त्तिता ।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम् ॥"
इति भाषापरिच्छेदे । १६ ॥
(यथा च कश्चित् ।
"चन्द्रे लक्ष्मीः प्रभा सूर्य्ये गतिर्वायौ भुवि क्षमा ।
एतत्तु नियतं सर्व्वं त्वयि चानुत्तमं यशः ॥"
निपूर्ब्बयमधातोर्बन्धार्थकत्वात् बद्धोऽपि । यथा, नियताञ्जलिः ॥ संयुक्तः । आसक्तः । यथा, महाभारते । १ । १३४ । ५८ ।
"प्रतिज्ञामात्मनो रक्षन् सत्ये च नियतः सदा ॥")

नियतिः, स्त्री, (नियम्यते आत्मा अनयेति । नि+यम+करणे क्तिन् ।) भाग्यम् । दैवम् । इत्यमरः ।१।४।२८॥ (यथा, माघे । ४ । ३४ ।
"आसादितस्य तमसा नियतेर्नियोगा-
दाकाङ्क्षतः पुनरपक्रमणेन कालम् ॥")
नियमः । इति मेदिनी । ते, १२० ॥ (चतुर्द्दशाधारिणीदेवयोषिद्गणानामन्यतमा । इति वह्निपुराणे गणभेदनामाध्यायः ॥)

नियती, स्त्री, (नियम्यते कालो यया । नि+यम+क्तिच् । वा ङीष् ।) दुर्गा । यथा,—
"स्तुतिः संसारवाद्देवी नियती च नियामता ॥"
इति देवीपुराणे निरुक्ताध्यायः ॥

नियतेन्द्रिय, त्रि, (नियतानि संयतानि इन्द्रियाणि येन ।) संयतेन्द्रियः । इन्द्रियदमनशीलः । यथा, मार्कण्डेये । ८४ । ८ ।
"अभ्यस्यसे मुनियतेन्द्रियतत्त्वसारे ॥"

नियन्ता, [ऋ] पुं, (नियच्छति अश्वादीनिति । नि+यम+तृच् ।) सारथिः । इत्यमरः । २ । ८ । ५६ ॥ (यथा, महाभारते । ७ । १३ । २२ ।
"स नियन्तृध्वजरथं विव्याध निशितैः शरैः ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । १०५ ।
"अपराजितः सर्व्वसहो नियन्ता नियमो यमः ॥")
त्रि, शास्ता । यथा, रघुः । १ । १७ ।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥"

नियन्त्रित, त्रि, (नि+यन्त्रि+क्तः ।) अबाधः । अनर्गलः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । २ । ६ । ५२ ।
"आगच्छेत् सर्व्वथा सो वै मम पार्श्वे नियन्त्रितः ॥")

नियमः, पुं, (नियमनमिति । नि+यम+"यमः समुपनिविषु च ।" ३ । ३ । ६३ । इति अप् ।) शौचं सन्तोषः तपः स्वाध्यायः ईश्वरप्रणिधानञ्च । इति वेदान्तसारः ॥ प्रतिज्ञा । अङ्गीकार इति यावत् । व्रतम् । तच्चोपवासादि । अनित्यमागन्तुसाधनं कर्म्म । इत्यमरः ।२।७।३८ ॥ (सङ्कल्पः । यथा, देवीभागवते । ३ । २६ । २५ ।
"नियमं प्रथमं कृत्वा पश्चात् पूजां समाचरेत् ॥"
बन्धनम् । यथा, मनुः । ८ । १२२ ।
"धर्म्मस्याव्यभिचारार्थमधर्म्मनियमाय च ॥")
मन्त्रणा । निश्चयः । इति मेदिनी । मे, ४६ ॥ ३ ॥
"नियमाः पञ्च सत्यात्मा वाह्यमाभ्यन्तरं द्विधा ।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः ॥
स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः ।
तपः क्रोधो गुरौ भक्तिः शौचञ्च नियमाः स्मृताः ॥
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम् ।
सन्तोषस्तपसा जप्यं वासुदेवार्च्चनं दम ॥"
इति गरुडपुराणम् ॥
"ब्रह्मचर्य्यमहिंसाञ्च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वमनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ।
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥
"तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम् ।
सिद्धान्तश्रवणञ्चैव ह्रीर्म्मतिश्च जपो हुतम् ।
दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः ॥"
इति तन्त्रसारे (हठयोगप्रदीपिकायाञ्च । १ । १७ ॥ कवितानियमाः । यथा,—
"वर्णयेन्न सदप्येतन्नियमोऽथ प्रदर्श्यते ।
भूर्ज्जत्वग्घिमवत्येव मलये ह्येव चन्दनम् ॥
सामान्यवर्णने शौक्ल्यं कृत्वाम्भःपुष्पवाससाम् ।
कृष्णत्वं केशकाकाहिपयोनिधिपयोमुचाम् ॥
रक्तत्वं रत्नबन्धूकविद्रुमाम्भोजविवस्वताम् ।
तथा वसन्त एवान्यपुष्टानां कलकूजितम् ॥
वर्षास्वेव मयूराणां रुतं नृत्यञ्च वर्णयेत् ।
नियमस्य विशेषोऽथ पुनः कश्चित् प्रकाश्यते ॥
कमलासम्पदोः कृष्णहरितोर्नागसर्पयोः ।
पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु ॥
चन्द्रेशशैलयोः कामध्वजे मकरमत्स्ययोः ।
दानवासुरदैत्यानामैक्यमेवाभिसम्मतम् ॥
बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता ।
मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः ॥"
इति कविकल्पलतायाम् १ स्तबके वर्ण्यस्थितिर्नाम तृतीयं कुसुमम् ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ३० ।
"अतीन्द्रः सग्रहः सर्गो धृतात्मा नियमो यमः ॥"
महादेवः । यथा, तत्रैव तस्य सहस्रनामकीर्त्तने । १३ । १७ । ३५ ।
"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः ॥")

नियमन, क्ली, (नि+यम+भावे ल्युट् ।) नियमः । यथा । "न तत्राभिधानियमनात्तस्याः ।" इति काव्यप्रकाशे द्वितीयोल्लासः ॥ बन्धनम् । यथा । सर्व्वेषांनियमनमित्युत्कटः ॥ (निग्रहः । यथा, रघुः । ९ । ६ ।
"समतया वसुवृष्टिविसर्ज्जनै-
र्नियमनादसताञ्च नराधिपः ॥"
नियच्छतीति । नि+यम+ल्युः । नियामके, त्रि । यथा हरिवंशे । १८१ । ५३ ।
"दस्युवधविनाशाय सर्व्वेर्नियमनाय च ॥")

नियमसेवा, स्त्री, (नियमेन भगवतः सेवा ।) कार्त्तिकमासे नियमपूर्ब्बकभगवदाराधना । यथा
"अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः ।
जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद ॥"
किञ्च ।
"नियमेन विना चैव यो नयेत् कार्त्तिकं मुने ।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कुलाधमः ॥"
तत्रोपक्रमकालश्चोक्तः श्रीकृष्णसत्यासम्वादीयकार्त्तिकमाहात्म्ये ।
"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः ॥"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥ अन्यत् कार्त्तिकशब्दे द्रष्टव्यम् ॥

नियमितः, त्रि, (नि+यम+णिच्+क्तः ।) कृतनियमः । बद्धः । यथा,—
"क्षुद्राः सन्त्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी शायका निष्पतन्तः ।
सौमित्रे । तिष्ठ पात्रं त्वमपि न हि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥"
इति महानाटकम् ॥

नियातन, क्ली, (नि+यत+णिच्+ल्युट् ।) निपातनम् । इत्यमरटीकायां नयनानन्दः ॥

नियाम, पुं, (नि+यम+पक्षे घञ् ।) नियमः । इति शब्दरत्नावली ॥

नियामकः, पुं, (नियामयतीति । नि+यम+णिच्+ण्वुल् ।) पोतवाहः । इत्यमरः । १ ।१०।१२ ॥ त्रि, । नियन्ता । इति मेदिनी । के, १६४ ॥ (यथा, महाभारते । ३ । २७१ । ३४ ।
"ततोऽग्निं नाशयामासुः सम्भ्रान्ताग्निनियामकाः ॥")

नियुक्तः, त्रि, (नि+युज+क्तः ।) नियोगविशिष्टः । (यथा, मनुः । ९ । ६० ।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्त्रं न द्वितीयं कथञ्चन ॥")
अवधारितः । आज्ञप्तः । यथा,—
"जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः ।
त्वया हृषीकेश ! हृदिस्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥"
इत्याह्निकतत्त्वम् ॥

नियुतं, क्ली, (नियूयते बहुसंख्या प्राप्यतेऽनेनेति । नि+यु+क्त ।) लक्षम् । इत्यमरः । ३ । ५ । २४ ॥ यथा । "धेनूनां नियुते प्रादादिति नियुते लक्षे ।" इति श्रीधरस्वामी ॥

"शतं सहस्रमयुतं नियुतं प्रयुतं मतम् ।
स्त्री कोटिरर्व्वुदमिति क्रमाद्दशगुणोत्तरम् ॥
इति रत्नकोषः ।" इति भरतः ॥ दशलक्षम् । यथा,—
"एकं दश शतञ्चैव सहस्रमयुतन्तथा ।
लक्षञ्च नियुतञ्चैव कोटिरर्व्वुद एव च ॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः ।
अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथोत्तरम् ॥"
इति पुराणम् ॥

नियुद्धं, क्ली, (नि+युध्+क्त ।) बाहुयुद्धम् । इत्यमरः । २ । ८ । १०६ ॥ (यथा, हरिवंशे । १४२ । ७१ ।
"नियुद्धकुशलान् मल्लान् देवो मल्लप्रियस्तदा ।
योधयित्वा ददौ भूरि वित्तं वस्त्राणि चात्म-वान् ॥")

नियोगः, पुं, (नि+युज्+घञ् ।) अवधारणम् । इति दुर्गादासः ॥ (निश्चयः । यथा, रघुः । १० । ४६ ।
"तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥")
आज्ञा । इति हेमचन्द्रः । २ । १६० ॥ (यथा, रामायणे । २ । २१ । ४६ ।
"त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।
पितुर्नियोगे स्थातव्यमेष धर्म्मः सनातनः ॥"
अपुत्त्रभ्रातृपत्नीपुत्त्रार्थं नियोजनम् । यथा, मनुः । ९ । ६२ ।
"विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥")

नियोगी, [न्] त्रि, (नियोगोऽस्यास्तीति । नियोग+इनि. ।) नियोगविशिष्टः । नियुक्तः । तत्पर्य्यायः । कर्म्मसचिवः २ आयुक्तः ३ व्यापृतः ४ । इति हेमचन्द्रः । ३ । ३८३ ॥ (यथा, राजतरङ्गिण्याम् । ६ । ८ ।
"कृष्यध्यक्षत्वमुतस्तस्य कृतं नान्यनियोगि-नाम् ॥")

नियोग्यः, त्रि, (नियोक्तुमर्हः । नि+युज+ण्यत् ।) नियोगार्हः । प्रभुः । इति मुग्धबोधव्याकरणम् ॥ (यथा, प्रद्युम्नविजये । ५ अङ्के ।
"एते वय नियोज्या नियोजयतु नियोग्य ॥")

नियोजनं, क्ली, (नि+युज+ल्युट् ।) नियोगः । (यथा, महाभारते । १२ । ३६३ । २ ।
"सारथीयोऽस्मि भवता सप्रेमानियोजने. ।") प्रेरणम् । यथा । त्वयैतत् क्रियतामिति क्रियासु नियोजनं प्रेरणम् । इति दुर्गादासः ॥

नियोज्य, त्रि (नियोक्तुं शक्यः । नि+युज+ "प्रयोज्यनियोज्यौ शक्यार्थे ।" ७ । ३ । ६८ । इति ण्यत्प्रत्ययेन निपातनात् साधुः ।) प्रेष्यः । किङ्करः । इत्यमरः । २ । १० । १७ ॥ (यथा, भागवते । ४ । १८ । २८ ।
"निशम्य वैकुण्ठनियोज्यमुख्ययो-र्म्मधुच्युतं वाचमुरुक्रमप्रियः ॥"
नियोजनीये, त्रि । यथा, महाभारते । १२ । ३२७ । ४६ ।
"न नियोज्याश्च वः शिष्या अनियोगे महा-भये ॥")

नियोद्धा, [ऋ] पु, (नियुध्यते इति । नि+युध +तृच् ।) कुक्कुटः । इति राजनिर्घण्टः ॥ बाहु-युद्धकारी च ॥

निरक्षदेशः, पु, (निरक्षो देशः ।) यत्रदेशः । पलभाशून्यस्थानम् । स तु पूर्व्वे भद्राश्ववर्षे यमकोटिः । दक्षिणे भारतवर्षे लङ्का । पश्चिमे केतुमालवर्षे रोमकः । उत्तरे कुरुवर्षे सिद्धपुरी । एता. भूवृत्तपादविवराः अन्योऽन्यं प्रतिष्ठिताः । तासामुपरितो विषुवस्थो दिवाकरो याति । तासु विषुवच्छाया ध्रुवस्योन्नतिश्च न दृश्यते । तत्र दिवामानं रात्रिमानञ्च त्रिंशन्नाडिकाः । इति सूर्य्यसिद्धान्तमतम् ॥ (यथा, सिद्धान्तशिरोमणौ गोलाध्याये । १५ ।
"निरक्षदेशात् क्षितिषोडशांशे
भवेदवन्ती गणितेन यस्मात् ॥")

निरङ्कुशः, त्रि, (निर्नास्ति अङ्कुश इव प्रतिबन्धको यस्य ।) अनिवार्य्यः । बाधाशून्यः । इति जटाधरः ॥ (यथा, भागवते । १ । १७ । १५ ।
"अनागःस्विह भूतेषु य आगस्कृन्निरङ्कुशः ।
आहर्त्तास्मि भुजं साक्षादमर्त्त्यस्यापि साङ्ग-दम् ॥")

निरञ्जना, स्त्री, (निर्नास्ति अञ्जनमिव अन्धकारो यत्र ।) पूर्णिमा । इति शब्दमाला ॥ (निर्नास्ति अञ्जनं यत्र ।) अञ्जनशून्ये, त्रि ॥ (निर्गत अञ्जनमिवाज्ञान यत्र । अज्ञानरहिते च । यथा, देवीभागवते । १ । १८ । ३६ ।
"स कथं बध्यते ब्रह्मन्निर्व्विकारो निरञ्जनः ॥"
पु, योगिविशेष. । यथा, हठयोगप्रदीपिकायाम् । ७ ।
"कानेरी पूज्यपादश्च नित्यनाथो निरञ्जन. ॥"
महादेवः । यथा, हरिवंशे भविष्यपर्व्वणि । १४ । २ ।
"दीर्घरोमा दीर्घशृणो दीर्घबाहुर्निरञ्जनः ॥")

निरतं, त्रि, (नि+रम+क्तः ।) नियुक्तम् । यथा । दानरत्नाकरे देवलः ।
"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च ।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित् ॥"
इति व्यवहारतत्त्वम् ॥

निरन्तरं, त्रि, (निर्नास्ति अन्तरं यस्मिन् यस्माद्वा ।) निबिडम् । घनम् । इत्यमर. । ३ । १ । ६६ ॥ अनवकाश । (यथा, आर्य्यासप्तशत्याम् । ४३८ ।
"सज्जनयो. स्तन्योरिव निरन्तरं सङ्गतं भवति ॥")
अनवधि । अपरिधानम् । अनन्तर्धानम् । अभेद । अतादर्थ्यम् । अच्छिद्रम् । (यथा, कुमारसम्भवे । ५ । २५ ।
"शिलाशयान्तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु ॥")
अविना । अवधिः । अनात्मीयम् । अनवसर । असमध्यम् । अनन्तरात्मा । एते निरुपसर्गपूर्व्वकान्तरशब्दार्थाः ॥

निरन्तराभ्यासः, पुं, (निरन्तरः सततोऽभ्यासो यत्र ।) स्वाध्यायः । इति त्रिकाण्डशेष. । सतताभ्यासश्च ॥

निरपत्रपः, त्रि, (निर्गता अपत्रपा लज्जा यस्येति ।) धृष्टः । निर्लज्जः । इति जटाधरः ॥ (यथा, भागवते । ३ । २० । २४ ।
"ततो हसन् स भगवानसुरैर्निरपत्रपैः ।
अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् ॥")

निरपेक्षः त्रि, (निर्गता अपेक्षा यस्य ।) अनपेक्षः । यथा, मलमासतत्त्वे ।
"अभिधातु पदेऽन्यस्मिन् निरपेक्षरवा श्रुति. ॥"
(यथा, रामायणे । ६ । ६६ । ४२ ।
"कलत्रनिरपेक्षैश्च चेष्टितैरस्य दारुणै. ॥")

निरयः, पु, (निकृष्टः अयो गमनं यत्र ।) नरकः । इत्यमर. । १ । ९ । १ ॥ (यथा, हरिवंशे । १६ । १६ ।
"कथञ्च शक्तास्ते दातुं निरयस्थाः फलं पुनः ॥")

निरर्गलः, त्रि, (निर्नास्ति अर्गलमिव प्रतिबन्धको यत्र ।) अनर्गलः । अबाध । इत्यमरः । ३ । १ । ८३ ॥ (यथा, महाभारते । ७ । ९ । ६२ ।
"दशाश्वमेधानाजह्रे स्वन्नपानाप्तदक्षिणान् ।
निरर्गलान् सर्व्वमेधान् पुत्त्रवत् पालयन् प्रजा. ॥")

निरर्थकं, त्रि, (निर्गतोऽर्थो यस्मात् । कप् ।) निष्फलम् । तत्पर्य्यायः । मोघम् २ । इत्यमरः । ३ । १ । ८१ ॥ विफलम् ३ । इति जटाधर. ॥ (यथा, भागवते । ४ । १६ । १९ ।
"अयन्तु साक्षाद्भगवांस्त्र्यधीशः
कूटस्थ आत्मा कलयावतीर्णः ।
यस्मिन्नविद्यारचितं निरर्थकं
पश्यन्ति नानात्वमपि प्रतीतम् ॥")

निरवः, पु, (नि+रु+"ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् ।) नीरव. । रवाभाव. । इति निपूर्व्वरुधातोरलि निष्पन्नः । अपालनञ्च ॥ (निर्गतरक्षकः । यथा, ऋक्संहितायाम् । १ । १२२ । ११ ।
"नभो जुवो यन्निरवस्य राधः ।"
"निरवस्य निर्गतरक्षकस्य ।" इति तद्भाष्ये सायन. ॥)

निरवग्रहः, पु, (निर्गतोऽवग्रहः प्रतिबन्धो यस्मात् ।) स्वतन्त्र. । इत्यमरः । ३ । १ । १५ ॥ (यथा, हरिवंशे । ८० । ९ ।
"दुर्द्दम. कामचारी च स केशी निरवग्रह. ।")
इष्टप्रतिबन्धाभावश्च । (महादेव. । यथा, महाभारते । १३ । १७ । ८२ ।
"नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ॥")

निरवशानिका, स्त्री, (निर् + अव + शो + ल्युट् । टापि अत इत्वम् ।) प्राचीरम् । इति शब्दमाला ॥

निरशनं, क्ली, (निर् + अश + ल्युट् ।) भोजनाभाव । अनशनम् । (निर्गतं अशनं भोजनादिकं यस्मात् । भोजनरहिते त्रि ॥)

निरस', त्रि, (निर्गतो रसो यस्मात् ।) नीरसः । पु, रसाभावः । रसस्य अभावः इति तत्पुरुषसमासनिष्पन्न' ॥

निरसन, क्ली, (निरस्यते क्षिप्यते इति । निर् + अस + ल्युट् ।) प्रत्याख्यानम् । इत्यमरः ।३।२। ३१ ॥ (यथा, महाभारते । १४ । ४ । १० ।
"स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनञ्च तत् ।
नियतो वर्द्धयामास प्रजाहितचिकीर्षया ॥")
वध. । निष्ठीवनम् । इति मेदिनी । ने, १६१ ॥

निरसा, स्त्री, (निर्गतो रसो यस्याः ।) निःश्रेणिकातृणम् । इति राजनिर्घण्टः ॥

निरस्त', त्रि, (निर् + अस् + क्तः ।) प्रहितबाण. । त्यक्तशरः । त्वरितोदितम् । शीघ्रोच्चारितवच. । निराकरणविशिष्ट' । तत्पर्य्यायः । प्रत्यादिष्टः २ प्रत्याख्यात' ३ निराकृत' ४ निहत. ५ विप्रकृत. ६ । इत्यमर. । ३।१।४० ॥ प्रतिक्षिप्तम् ७ अपविद्धम् ८ । इति हेमचन्द्र. ॥ निष्ठ्यूतः । प्रेषित. । सत्यक्त' । प्रतिहत. । इति मेदिनी । ते, ११७ ॥ (यथा, हितोपदेशे । १ । ४८ ।
"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥"
यथाच मार्कण्डेयपुराणे । ८६ । २३ ।
"आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥")

निराकरणं, क्ली, (निर् + आ + कृ + ल्युट् ।) निवारणम् । निरसनम् । इति निराकरिष्णुशब्दटीकायां भरतः ॥

निराकरिष्णु, त्रि, (निराकरोति तच्छीलः । निर् + आ + कृ + "अलङ्कृञ्निराकृञिति ।" ३ । २ । १३६ । इति इष्णुच् ।) निराकरणशील' । तत्पर्य्याय' । क्षिप्नुः २ । इत्यमरः । ३ । १ । ३० ॥ (यथा, भट्टिकाव्ये । ५ । १ ।
"निराकरिष्णुर्वर्त्तिष्णुर्वर्द्धिष्णु. परितो रणम् ॥")

निराकारः, पु, (निर्गत आकारो देहादिदृश्यस्वरूप यस्मादिति । निरादय इति समास ।) परमेश्वरः । ब्रह्म । यथा,—
"साकारञ्च निराकार सगुण निर्गुण प्रभुम् ।
सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम् ॥"
अपि च ।
"तेज'स्वरूपो भगवान् निराकारो निराश्रयः ।
निर्लिप्तो निर्गुणः साक्षी स्वात्माराम. परात्परः ॥
ध्यायन्ति योगिनस्तेजस्त्वदीयमशरीरिणम् ।
वैष्णवास्तैव साकार कमनीय मनोहरम् ॥
केचिच्चतुर्भुज शान्तं लक्ष्मीकान्त मनोहरम् ।
शङ्खचक्रगदापद्मधर पीताम्बर परम् ॥
द्विभुजं कमनीयञ्च किशोर श्यामसुन्दरम् ।
शान्त गोपाङ्गनाकान्त रत्नभूषणभूषितम् ॥
एव तेजस्विनं भक्ता सेवन्ते सततं मुदा ।
ध्यायन्ति योगिनो यत्तु कुतस्तेजस्विन विना ॥"
अपि च ।
"यो निर्गुण' स निर्लिप्तः शक्तिभ्यो नहि सगुण' ।
सिसृक्षुराश्रित. शक्तौ निर्गुणः सगुणो भवेत् ॥
यावन्ति च शरीराणि भोगार्हाणि महामुने ।
प्राकृतानि च सर्व्वाणि श्रीकृष्णविग्रहं विना ॥
ध्यायन्ति योगिनस्तञ्च शुद्ध ज्योतिःस्वरूपिणम् ।
हस्तपादादिरहितं निर्गुण प्रकृतेः परम् ॥
वैष्णवास्तं न मन्यन्ते तद्भक्ताः सूक्ष्मदर्शिनः ।
कुतो बभूव तज्ज्योतिरहो तेजस्विन विना ॥
ज्योतिरभ्यन्तरे नित्य शरीरं श्यामसुन्दरम् ।
अतीवामूल्यसद्रत्नभूषणेन विभूषितम् ॥
एवं भक्ताश्च ध्यायन्ति शश्वच्चरणसेविन. ।
योगिनो योगरूपञ्च काले भक्तिविपाकत' ॥
ज्योतिरभ्यन्तरे मूर्त्तिं पश्यन्ति कृपया प्रभोः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे । ३२।७।४२ अः ॥
तस्य द्विचत्वारिंशन्नामानि यथा,—
"जगद्योनिरयोनिस्त्वमनन्तोऽव्यय एव च ।
ज्योति'स्वरूपो ह्यनघ. सगुणो निर्गुणो महान् ॥
भक्तानुरोधात् साकारो निराकारो निरङ्कुशः ।
निर्व्यूहो निखिलाधारो नि'शङ्को निरुपद्रवः ॥
निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः ।
स्वात्माराम' पूर्णकामोऽनिमेषो नित्य एव च ॥
सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्यय' ।
वेदहेतुश्च वेदाश्च वेदाङ्गो वेदविद्विभु' ॥
द्विचत्वारिंशन्नामानि प्रातरुत्थाय य. पठेत् ।
दृढ़ां भक्तिं हरेर्दास्यं लभते वाञ्छितञ्च यत् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
आकारशून्ये, त्रि ॥

निराकृत' त्रि, (निर् + आ + कृ + क्त. ।) प्रत्याख्यात' । निरस्त' । इत्यमर. । ३ । १ । ४० ॥

निराकृति, स्त्री, (निर् + आ + कृ + क्तिन् ।) निरसनम् । निराकरणम् । इत्यमरः । ३ । २ ।३१॥ (निर्गता आकृतिर्यस्मादिति ।) अनाकारे अस्वाध्याये च त्रि । इति मेदिनी । ते, २०३ ॥ (पुं, पञ्चमहायज्ञानुष्ठानरहित' । यथा, मनु' । ३ । १५४ ।
"यक्ष्मी च पशुपालश्च परिवेत्ता निराकृति. ॥"
"निराकृति' पञ्चमहायज्ञानुष्ठानरहितः ।
तथा च छन्दोगपरिशिष्टम् ।
निराकर्त्तामरादीनां स विज्ञेयो निराकृतिः ॥"
इति कुल्लूकभट्ट' ॥
"निराकृति सत्यधिकारे महायज्ञानुष्ठानरहित. । मनुष्या निराकृतिरुच्यते । एव हि शतपथे । यो न देवानर्च्चति न पितॄन् न मनुष्यानिति । येस्तु पठ्यते अस्वाध्यायश्रुतधर्मैर्निराकृतिरुदाहृत ।" इति मेधातिथि' ॥ * ॥ रोहितमनुपुत्र' । यथा, हरिवंशे । ७ । ६३ ।
"दक्षपुत्रस्य पुत्रास्ते रोहितस्य प्रजापते' ।
मनो पुत्रो धृष्टकेतु पञ्चहोत्रो निराकृतिः ॥")

निराधार', त्रि, निर्न विद्यते आधारो यस्य स । अनाधार. । आधारशून्य ॥

निरातपा, स्त्री, (निर्गत आतपो यस्या' ।) रात्रिः । इति शब्दचन्द्रिका ॥ आतपशून्ये, त्रि ॥

निराबाधः, त्रि, (निर्गता आबाधा प्रतिबन्धो यस्मात् ।) पक्षाभासविशेषः । यथा,—
"अप्रसिद्ध निराबाधं निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्ध वा पक्षाभासं विवर्ज्जयेत् ॥
निराबाध अस्मद्गृहप्रदीपप्रकाशेनायं स्वगृहे व्यवहरति ।" इति मिताक्षरा ॥

निरामयः, त्रि, (निर्गत आमयो व्याधिर्यस्मात् ।) रोगरहितः । तत्पर्य्यायः । वार्त्त. २ कल्यः ३ । इत्यमरः । २ । ६ । ५७ ॥ नीरुजः ४ पटुः ५ उल्लाघः ६ लघु' ७ अगदः ८ निरातङ्कः ९ । अनातङ्कोऽपि पाठ' । इति राजनिर्घण्ट. ॥ (यथा, सुश्रुते । १ । ४६ ।
"निरामयाणां चित्रन्तु भक्तमध्ये प्रकीर्त्तितम् ॥"
उपद्रवादिशून्यः । यथा, महाभारते । १ । १५७ । ११ ।
"इदं नगरमभ्यासे रमणीय निरामयम् ।
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिण. ॥"
रोगनाशक' । यथा, मुकुन्दमालायाम् । २१ ।
"किमौषधं. क्लिश्यसि मूढ दुर्म्मते ।
निरामय कृष्णरसायन पिब ॥")

निरामय', पुं, (निर्गतः आमयो यस्मात् ।) इङ्गिक । वनच्छगल. । इति मेदिनी । ये, १२१ ॥ शूकर' । इति शब्दमाला ॥ (नृपविशेषः । यथा, महाभारते । १ । १ । २३४ ।
"धृष्टकेतुर्हतकेतुर्दीप्तकेतुर्निरामयः ॥"
महादेवः । इति महाभारतम् ।१३।१७।१४८॥ क्ली, कुशलम् । यथा, तत्रैव । ५ । ७८ । ८ ।
"कुरुष्वा पाण्डवानाञ्च प्रतिमतृञ्च निरामयम् ॥")

निरामालु, पुं, (नितरां रमतेऽनेनेति । नि + रम + बाहुलकात् आलु दीर्घश्च ।) कपित्थः । इति शब्दचन्द्रिका ॥ (विवरणमस्य कपित्थशब्दे ज्ञातव्यम् ॥)

निरालम्बा, स्त्री, (निर्नास्ति आलम्बो यस्या' ।) आकाशमांसी । इति राजनिर्घण्ट. ॥ (शुक्लयजुर्व्वेदान्तर्गतोपनिषद्विशेष' । इति मुक्तिकोपनिषत् ॥ अवलम्बनशून्ये, त्रि । यथा, हठयोगप्रदीपिकायाम् । ३ । ५४ ।
"एको देवो निरालम्ब एकावस्था मनोन्मनी ॥")

निराशः, त्रि, (निर्गता आशा यस्मादिति ।) आशाशून्यः । यथा, तिथितत्त्वे ।
"भूताहे ये प्रकुर्व्वन्ति उल्काग्रहणमचेतसः ।
निराशा. पितरो यान्ति शापं दत्त्वा सुदारुणम् ॥"

निरासन, क्ली, (निर् + आस + ल्युट् ।) निरसनम् । (निर्गत आसन यस्मात् ।) आसनाभावविशिष्टे, त्रि ॥

निराहार., त्रि, (निर्गत आहारो यस्य ।) आहाररहितः । यथा,—
"निराहाराश्च ये जीवा' पापे धर्म्मे रताश्च ये ।"
इति तर्पणप्रकरणीयाह्निकाचारतत्त्ववचनम् ॥

निरिङ्गिणी, स्त्री, (निर्निश्चितं जनं इङ्गति प्राप्नोतीति । निर्+इङ्ग+णिनिः ततो ङीप् ।) तिरस्करिणी । तत्पर्य्यायः । यवगुण्ठिका २ पटी ३ यवनिका ४ । इति त्रिकाण्डशेषः ॥

निरिन्द्रियः, त्रि, (निर्गतानि इन्द्रियाणि यस्मात् ।) इन्द्रियशून्यः । यथा, मनुः । ९ । २०१ ।
"अनंशौ क्लीवपतितौ जात्यन्धवधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥"

निरीक्षणं, क्ली, (निर्+ईक्ष+भावे ल्युट् ।) दर्शनम् । यथा,—
"अवाततापाग्निनिषि सेविताच
विण्मूत्रवातक्रमनिग्रहाच ।
वाक्सग्रहात् सूर्य्यनिरीक्षणाच
नेत्रे विकारान् जनयन्ति दोषाः ॥"
इति माधवकरः ॥
(निरीक्षते इति । निर्+ईक्ष+ल्युः । दर्शके, त्रि । यथा, भागवते । ७ । १५ । ३२ ।
"प्राणापानौ संनिरुन्ध्यात् पूरकुम्भकरेचकैः ।
यावन् मनस्त्यजेत् कामान् स्वनासाग्रनिरीक्षणः ॥")

निरीक्षितं, त्रि, (निर्+ईक्ष+क्तः ।) अवलोकितम् । यथा,—
"निरीक्षितं चाङ्गमवीक्षितञ्च
दृशा पिबन्ती रभसेन तस्य ।
समानमानन्दमियं दधाना
विवेद भेदं न विदर्भसुभ्रूः ॥"
इति नैषधः ॥

निरीशं, क्ली, (निर्गता ईशा यस्मात् ।) फालः । इत्यमरः । २ । ९ । १३ ॥ (निर्नास्ति ईशः ईश्वरो यस्य ।) ईशशून्ये नास्तिके च त्रि ॥

निरीषं, क्ली, (निर्गता ईषा यस्मात् । निरादय इति समासः ।) निरीशम् । इत्यमरटीकायां भरतः ॥

निरीहः, पुं, (निर्गता ईहा चेष्टा यस्मात् ।) विष्णुः । यथा,—
"निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे चत्वारिंशन्नामकथने ७ अध्यायः ॥ ईहाशून्ये, त्रि ॥ (यथा, देवीभागवते । ४ । १० । ११ ।
"निरीहः पुरुषः कस्मात् प्रकुर्य्याद् युद्धमीदृशम् ॥")

निरुक्तं, क्ली, (निर्निश्चयेन उक्तम् ।) वेदवेदाङ्गशास्त्रविशेषः । यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषन्तथा ।
छन्दश्चेति षडङ्गानि वेदानां वैदिका विदुः ॥"
इति शब्दरत्नावली ॥
(तथाहि,—
"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम् ॥"
यदुक्तं देवराजयज्वना निर्व्वचने, तद्यथा,—
"अत उक्ताध्ययनविधेरुक्तच्छन्दःप्रविभागस्योक्तर्षिविनियोगस्योपलक्षितकर्म्माङ्गभूतकालस्योपदर्शितलक्षणस्यैतैरङ्गैर्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते । प्रधानञ्चेदमितरेभ्योऽङ्गेभ्यः सर्व्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानम् । तद्गुणः शब्दः । स चेतरेषु व्याकरणादिषु चिन्त्यते । कल्पे खल्वपि विनियोगश्चिन्त्यते । स च पुनरर्थाभिधानवशेन मन्त्राणाम् । यो यमर्थमभिधानेन संस्कर्त्तुं समर्थो मन्त्रः स तत्र विनियुज्यते । तदुक्तं अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात् इति । न च निरुक्तादृतेऽन्यदङ्गमन्यद्वा शास्त्रं शास्त्रमस्ति तात्पर्य्येण यदशेषान् शब्दान् निर्ब्रूयात् । यद्यपि च कचित् कचिदन्यशास्त्रे शब्दनिर्व्वचनम् । अतएव तदित्युपलक्ष्यम् । यथा शब्दलक्षणपरिज्ञानं सर्व्वशास्त्रेषु व्याकरणात् एवं शब्दार्थनिर्व्वचनपरिज्ञानं निरुक्तात् । वस्तुमात्रमेव हि इतरेषु शास्त्रेषु स्वाभिमतबुद्धिविषयमेव किञ्चिच्चिन्त्यते ब्राह्मणमपि च विध्यर्थवादरूपमशेषमन्त्रार्थशेषभूतमेव । मन्त्रब्राह्मणार्थपरिज्ञानवद्व्याध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्म्मार्थकाममोक्षाख्योऽखिलपुरुषार्थः । न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति । तस्मादर्थपरिज्ञानाभिनिवेशादिदमेव प्रधानमित्युपपन्नम् । अथास्यैवमखिलपुरुषार्थोपकारवृत्तिसमर्थस्य सङ्ग्रहः । तद्यथा,—
नामाख्यातोपसर्गनिपातलक्षणम् । भावविकारलक्षणम् । नामान्याख्यातजानि सर्व्वाणि च यथोपन्यस्य पक्षप्रतिपक्षतो विचार्य्यावधारणम् । सर्व्वाण्याख्यातजानि कानिचिदेवानेक-धातुजान्यपीति मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्त्वावधारणम् । पदविभागपरिज्ञानप्रतिज्ञानबोधावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदैवतलिङ्गसङ्कटेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण दैवतापरिज्ञानप्रतिज्ञा । अर्थज्ञप्रशंसा । अनर्थज्ञावधारणम् । वेदवेदाङ्गव्यूहः । सप्रयोजननिघण्टुसमाम्नायविरचनम् । प्रकरणत्रयविभागेन नैघण्टुकप्रधानदैवताभिधानप्रविभागलक्षणम् । निर्व्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः । अर्थप्राधान्यात् लोपोपधाविकारवर्णलोपविपर्य्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपविपर्य्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदाहरणचिन्ता । अन्तस्थान्तर्द्धातुनिमित्तेन सम्प्रसार्य्यासम्प्रसार्य्योभयप्रकृतिधातुनिर्व्वचनोपदेशः । भाषिकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः । नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थप्रसिद्धिः । देशव्यवस्थया शब्दरूपव्यपदेशः । तद्धितसमासनामनिर्व्वचनलक्षणम् । शिष्यलक्षणम् । विशेषेण व्याख्यया तत्पर्य्यायभेदसङ्ख्यासन्दिग्धोदाहरणान्निर्व्वचनव्यवस्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणम् । अनेकार्थानवगतसंस्कारानुक्रमणम् । परोक्षकृताध्यात्मिकमन्त्रलक्षणम् । स्तुत्याशीःशपथाभिशापाभिख्यापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्यक्तिहेतूपदेशः । निदानपरिज्ञानव्याख्यापनायानादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रकृतिभूमत्वम् । इतरेतरजन्मत्वम् । स्थानत्रयभेदतः तिसृणामेकैकस्या माहाभाग्यकृतोऽनेकनामधेयप्रतिलम्भः । पृथगभिधानस्तुत्युपलिप्साम्नाहा । देवतानामाकारचिन्तनम् । भक्तिसाहचर्य्यसवनकर्म्मछन्दोभाक्त्वविभाक्त्वव्यञ्जनभाक्तानि । पृथिव्यन्तरिक्षद्युस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यस्तुत्युदाहरणम् । तन्निर्व्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय दैवतप्रकरणनिर्णयः । विद्यापारप्राप्त्युपायोपदेशः । मन्त्रार्थनिर्व्वचनद्वारेण देवताभिधाननिर्व्वचनफलं देवतासाक्षात्त्वम् । इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः ॥"* ॥
"वर्णागमो वर्णविपर्य्ययश्च इत्यादिना निश्चये नोक्तं निरुक्तम् ।" इत्यमरटीकायां भरतः ॥ पदभञ्जनम् । यथा,—
"प्रस्तावस्तु प्रकरणं निरुक्तं पदभञ्जनम् ॥"
इति हेमचन्द्रः ॥
कथिते, त्रि । यथा । "निरुक्ता प्रकृतिर्द्वेधा ।"
इति जगदीशः ॥

निरुद्धः, त्रि, (नि+रुध+क्तः ।) संरुद्धः । रोधविशिष्टः । इति अनिरुद्धशब्दटीकायां भरतः ॥
(यथा, देवीभागवते । ३ । २९ । १५ ।
"मया निरुद्धः पापात्मा पतितोऽहं स्वधे पुनः ॥")

निरुद्धप्रक(का)शः, पुं, मेढ्रजातक्षुद्ररोगविशेषः । तल्लक्षणमाह ।
"वातोपसृष्टे मेढ्रे तु चर्म्म संश्रयते मणिम् ।
मणिश्चर्म्मोपनद्धश्च मूत्रस्रोतो रुणद्धि च ॥
निरुद्धप्रकशे तस्मिन्मन्दधारमवेदनम् ।
मूत्रं प्रवर्त्तते जन्तोर्म्मणिर्व्विव्रियते न च ॥
निरुद्धप्रकशं विद्यात् सरुजं वातसम्भवम् ।
निरुद्धप्रकाश इत्यस्य स्थाने निरुद्धप्रकशपदमार्षत्वात् ॥ * ॥
अथ तस्य चिकित्सा ।
"निरुद्धप्रकशे नाडीं लौहीमुभयतोमुखीम् ।
दारवीं वा जतुकृतां घृताक्तां संप्रवेशयेत् ॥
परिषिञ्चेद्वसां मज्जां शिशुमारवराहयोः ।
चक्रतैलं तथा योज्यं वातघ्नद्रव्यसंयुतम् ॥
त्र्यहात् स्थूलतरां सम्यक् नाडीं गर्भे प्रवेशयेत् ।
स्रोतो विवर्द्धयेदेवं स्निग्धमन्नञ्च भोजयेत् ॥
भित्त्वा वा सेवनीं मुक्त्वा सद्यः क्षतवदाचरेत् ॥"
इति भावप्रकाशः ॥

निरुद्योगः, त्रि, (निर्नास्ति उद्योगो यस्य ।) निरुद्यमः । उद्योगाभावविशिष्टः । (यथा, भागवते । ८ । ८ । २९ ।
"निःसत्त्वा लोलुपा राजन् । निरुद्योगा गतत्रपाः ।
यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥")

निरुपद्रव, त्रि, (निर्गत उपद्रवो यस्मादिति ।) उत्पातरहितः । यथा,—
"जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यग्रहनिरीक्षिता लिकन्ये च शुभं वदेत् ॥"
इति ज्योतिस्तत्त्वम् ॥

निरुपम, त्रि, (निर्गता उपमा सादृश्यं यस्मात् ।) उपमारहितः । अनुपमः । यथा,—
"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी ।"
इति प्रबोधचन्द्रोदयः ॥

निरुपेक्ष, त्रि, (निर्गता उपेक्षा यस्मात् ।) यद्वा नास्ति उपेक्षा यस्य सः । अनुपेक्षः । उपेक्षाशून्यः ॥

निरूढ़ः, पुं, (नि + रुह + क्त ।) निरूढ़लक्षणाकः शब्दः । यथा,—"पूर्व्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढ़ो दायशब्दः ।" इति दायभागः ॥

निरूढ़लक्षणा, स्त्री, (निरूढ़ा लक्षणा ।) शक्तितुल्यलक्षणा । यथा,
"निरूढ़लक्षणाः काश्चित् सामर्थ्यादभिधानवत् ।"
इति काव्यप्रकाशटीकायां महेश्वरः ॥

निरूढ़ा स्त्री, (निरूढ़ + स्त्रियां टाप् ।) लक्षणाविशेषः । यथा । "काचित् लक्षणापरम्परातौ भूतशक्त्यैव पूर्व्वपूर्व्वं प्रत्यायकत्वात् निरूढ़ा । यथा कारकादिप्रकारेण तदाश्रयलक्षणानुभावकत्वाद्रथ्यादिपदस्य ।" इति शब्दशक्तिप्रकाशिका ॥

निरूपण, क्ली, (नि + रूप + णिच् + ल्युट् ।) आलोकः । विचारः । निदर्शनम् । इति मेदिनी । णे, ८८ ॥ (यथा, महाभारते । ३ । ७१ । ३१ ।
"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम् ।
दैवेन विधिना युक्ताः शास्त्रोक्तैश्च निरूपणैः ॥"
निरूपयतीति । नि + रूप + णिच् + ल्यु । निरूपके, त्रि । यथा, मार्कण्डेये । ९१ । ९८ ।
"एते देवा महेन्द्राद्या मामुपागम्य दुःखिताः ।
तद्भाग्यपालनपराः कर्म्मदिननक्तनिरूपणाः ॥
यावन्तो दैवनिष्ठाः संस्थां यथावदवसाधिताम् ॥")

निरूपित, त्रि, (नि + रूप + णिच् + क्तः ।) कृतनिरूपणः । नियुक्तः । इति श्रीधरस्वामी ॥ यथा, श्रीभागवते । ३ । ५ । २२ ।
"निरूपितो बालक एव योगिनां
शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥"

निरूह, पुं, (निर् + ऊह मूर्ये + घञ् ।) वस्तिभेदः । यथा,—
"वस्तिर्द्विधानुवासाख्यो निरूहश्चेति सञ्ज्ञितः ।
यः स्नेहैर्दीयते स स्यादनुवासननामकः ।
कषायक्षीरतैलैर्यो निरूहः स निगद्यते ॥"
इति सारकौमुदी ॥

अथ निरूहवस्तिकर्म्मविधिः ।
आत्रेय उवाच ।
"चतुरङ्गुलां वेणुमयीं नाड़ीं प्रतिमञ्चं कृत्वा तथा वस्तिप्रतिकर्म्म कुर्य्यात् ।
नातिकोष्णे च काले च न शीते नच भोजिते ।
न निदाघे न गतार्त्ते निरार्त्ते नच मेदसाक ॥
वस्तिकर्म्म निरूहञ्च कारयेत्तं विरेच्य च ।
नारी सर्व्वविधानज्ञा कृत्वा गृहं प्रयत्नतः नातिनिम्नशय्यायां शाययित्वा वामाङ्गे पार्श्व-मात्रं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य वक्षो-परि संस्थाप्य गुदाभ्यन्तरे दक्षिणमात्रां नाड़ीं सुधीः सञ्चारयेत् । तत्र शनैः शनैः मुष्टिं निष्पीड्य द्विमनपरिमिततैलेन निरूहं कुर्य्यात् । निरूहदानानन्तरं शनैः शनैरुत्थाय ग्रामाधिपतीश्वरीं लग्नञ्च पथात् सङ्कोच्य पाणिभिः पञ्चमात्राम् स्फिक्प्रदेशात् स्फोटयेत् । तत्र मात्रं कृत्वा सर्व्वाङ्गाभ्यासात् शयनं शोधयति । सञ्चु-दरगतान् दोषान् निवारयति । पश्चात्तत्र वस्तिनिरूहं तदतिक्रमेण च विदुः ।" इति हारीतोत्तरे सप्तमोऽध्यायः ॥
"वरो विरिक्तस्तु निरूहदानं
विवर्ज्जयेत गतदिनान्तरम् ।
शुद्धो विरेकेण निरूहदानं
सद्यस्तु गच्छ विनाशयेच्छरीरम् ॥"
"विलङ्घितं दोषचय निरस्य
सर्व्वान् विकारान् शमयेन्निरूहः ।
देहे निरूहेण विशुद्धमार्गे
सनेहेन सर्व्वं गदमेव ॥"
इति सिद्धिस्थाने प्रथमेऽध्याये ॥
"सर्व्वेषु चापि दस्तुरा(?) सर्व्वेषो
देयो निरूहो बलवर्णकारी ।
स्यागादमाज्ञामनयोर्निदोषात्
गत्वानुदायमरुणव दद्यात् ॥
यथाम्बु गत्वा नहिपेन निहः
मयः प्रसाद्य मलविषयाणीभिः ।
युक्तं यथाग्निं मधुमारतः
वैरस्यमोचयं दिशो निरूहः ॥"
इति सिद्धिस्थाने तृतीयेऽध्याये चरकेणोक्तम् ॥)
रूपशून्यः । निश्चितम् । इति मेदिनी । हे, १८ ॥ निग्रहः । तर्कः । इति हेमचन्द्रः ॥

निर्ऋतिः, स्त्री, (निर्गियता ऋतिर्घृणा अशुभं वा यस्य ।) अलक्ष्मीः । इत्यमरः । १ । ८ । २ ॥ (यथा, महाभारते । ५ । ८७ । ८ ।
"अवनाद् यस्य तीक्ष्णपाचं
वाक्यसदैर्विनिदन्तं मनुष्यान् ।
विषादलक्ष्मीकृतम जनानां
सुखे निबद्धां निर्ऋतिं वदन्ताम् ॥")
अस्या उपाख्यानं यथा,—
"समुद्रमथनादृत्थानि रत्नान्यापुः सुरोत्तमाः ।
श्रेष्ठञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः ॥
यावद्गृहीष्यकाराशी लक्ष्मीं भार्य्यार्थमात्मनः ।
तावद्विज्ञापयामास लक्ष्मीस्तु चक्रपाणिनम् ॥
लक्ष्मीरुवाच ।
अकृत्वा कथं ज्येष्ठां कनिष्ठा परिणीयते ।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन ! ॥
विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः ।
तस्मात्कर्म्मव्यतिक्रामं न कुर्व्वा मधुसूदन ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ।
उद्दालकाय तामर्थे सुदोर्गनयी गदा ।
आदमास्वादनाधिन नामलक्ष्मीं ददौ किल ॥
सुभौमी शुष्कवदना निम्ना निम्नां नदुम् ।
प्रवरासनदन्ता रूक्षपिङ्गशिरोरुहाम् ॥
स मुनिर्विष्णुवाक्यात्तामग्नीहत्य समाप्नुत् ।
वेदध्वनिनिनादाढ्यमानिनाय धर्म्मवित् ॥
होमधूमसुगन्धाढ्यं वेदघोषेण नादितम् ।
आश्रमं तं निरीक्ष्याथ बधिरा नाब्रवीदिदम् ॥
ज्येष्ठोवाच ।
नहि मामाश्रमोऽयं वेदध्वनियुतो मम ।
नागन्तव्यं मया नक्तम् । नयस्वान्यत्र मां मुने ॥
उद्दालक उवाच ।
कथं नायासि निश्चाय वर्त्तते नमन तव ।
तव योग्या च वसतिः का भवेत्तद्वदस्व माम् ॥
ज्येष्ठोवाच ।
वेदध्वनिर्नैव नहि हविर्नित्यो मानिपूजनम् ।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम् ।
परस्पराद्गुरुतरिह दाम्पत्त्य यत्र विद्धि ।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम् ।
दाम्पत्ये न विदेते परमच्यापहारिके ।
परदाररता यत्र तत्र स्थाने रतिर्म्मम ॥
वृद्धशुक्रविप्राणां यत्र स्यादपमानतम् ।
निष्ठुर भाषणं यत्र तत्र गच्छामि यास्यहम् ॥
सूत उवाच ।
इति तद्वचनं श्रुत्वा विमनस्कमनोऽभवत् ।
उद्दालकस्ततो वाक्यं तामसत्यमुवाच ह ॥
उद्दालक उवाच ।
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि त्वमस्ति चवम् ।
आश्रममस्थानमालोक्य यावदायाम्यहं पुनः ॥
सूत उवाच ।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः ।
प्रतीक्षन्ती चिरं तत्र यदा स न ददर्श सा ॥
तदा करोद करुणं भर्त्तुस्त्यागेन दुःखिता ।
ततस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् ।
तदा विज्ञापयामास विष्णुं हृदयमानसा ॥
लक्ष्मीरुवाच ।
स्वामिन्मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता ।
तामाश्वासयितुं याहि कृपालो । यद्यहं प्रिया ॥
सूत उवाच ।
लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः ।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत् ॥
विष्णुरुवाच ।
अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव ।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः ॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति ।
असूयोऽसौ भवेत्तस्मान्मन्दवारं विना किल ॥
प्रत्यब्दमर्च्चयिष्यन्ति त्वां ज्येष्ठां गृहधर्म्मिणः ।
तैर्न्नियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया ॥"
इति पाद्मोत्तरखण्डे १९९ अध्यायः ॥

(पापदेवता । यथा, ऋग्वेदे । १० । १६५ । १ ।
"दूतो निर्ऋत्या इदमाजगाम ।"
"निर्ऋत्याः पापदेवताया दूतोऽनुचरः ।" इति तद्भाष्ये सायनः ॥)

निर्ऋतिः, त्रि, (निर्गता ऋतिरशुभं यस्मात् ।) निरुपद्रवः । इति धरणिः ॥ दिक्पालविशेषे, पुं । इति मेदिनी । ते, ११६ ॥ स तु नैर्ऋतकोणाधिपतिः । तस्य विवरणं यथा,—
"पूर्व्वस्यान्तु सुकान्तस्य रत्नकूटाह्वयो गिरिः ।
यत्रास्ते सततं देवो निर्ऋती राक्षसेश्वरः ॥
खड्गहस्तो महाकायो वामे चर्म्मधरस्तथा ।
जटाजूटसमायुक्तः प्रांशुकृष्णाचलोपमः ॥
द्विभुजः कृष्णवस्त्रस्तु गर्द्दभोपरिसंस्थितः ।
प्रान्तोपान्तौ विन्दुसर्गसहितौ वादिरेव च ॥
नैर्ऋत्यं कथितं वीजं तेन तं परिपूजयेत् ।
रत्नकूटं समारुह्य निर्ऋतिं राक्षसेश्वरम् ॥
यः पूजयेद्विधानेन चण्डिकां राक्षसेश्वरीम् ।
न तस्य राक्षसेभ्योऽस्ति भयं वापि कदाचन ॥
राक्षसाश्च पिशाचाश्च वेताला गणनायकाः ।
तं दृष्ट्वा पुरुषं राजन् ! सर्व्वदैव प्रविभ्यति ॥"
इति कालिकापुराणे ८१ अध्यायः ॥
(राक्षसः । यथा, ऋग्वेदे । ८ । २४ । २४ ।
"वेत्था हि निर्ऋतीनां वज्रहस्तपरिवृजम् ॥"
मृत्युः । यथा, भागवते । १ । १६ । ४ ।
"स चिन्तयन्नित्थमथाशृणोद्यथा
मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ॥")

निर्ऋथः, पु, (निरन्तरं ऋच्छतीति । निर् + ऋ गतौ + "अर्त्तेर्निरि ।" उणां २ । ८ । इति थक् ।) सामवेदः । इत्युणादिकोषः । २ । १०८ ॥ (हिंसा । यथा, ऋग्वेदे । ७ । १०४ । १४ ।
"किमस्मभ्यं जातवेदो हृणीषे
द्रोघवाचस्ते निर्ऋथं सचन्ताम् ।"
"द्रोघवाचोऽनृतवाचो राक्षसास्ते तव निर्ऋथम् । नि पूर्व्वोऽर्त्तिर्हिंसायां वर्त्तते । निर्ऋथं निःशेषेणार्त्तिं हिंसां सचन्तां सेवन्ताम् ।" इति तद्भाष्ये सायनः ॥)

निरोद्धव्य, त्रि, (नि + रुध + तव्य ।) रक्षणीयम् । (यथा, महाभारते । १२ । ८६ । १५ ।
"आश्रयाश्चोपदानाश्च प्रभूतसलिलाकराः ।
निरोद्धव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः ॥")

निरोधः, पुं, (नि + रुध + घञ् ।) नाशः । (यथा, हरिवंशे । २ । ५४ ।
"उत्पत्तिश्च निरोधश्च नित्यं भूतेषु पार्थिव ! ।
क्षयवोऽत्र न मुह्यन्ति विद्वांसश्चैव ये नराः ॥")
रोधः । इति मेदिनी । धे, १२ ॥ (यथा, पञ्चतन्त्रे । २ । १६७ ।
"निरोधाच्चेतसोऽक्षाणि निरुद्धान्यखिलान्यपि ।
आच्छादिते रवौ मेघैराच्छन्नाः स्युर्गभस्तयः ॥")
निग्रहः । इति हेमचन्द्रः । ६ । १४४ ॥ (यथा, मनुः । ६ । ६० ।
"इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥")

निर्गः, पु, (निरन्तरं गच्छत्यनेनेति । निर् + गम + "अन्यत्रापि दृश्यते इति वक्तव्यम् ।" इति डः ।) देशः । इति हेमचन्द्रः । ४ । १३ ॥

निर्गतः, त्रि, निःशेषेण गतः । वहिःप्राप्तः । यथा, मार्कण्डेये । ८२ । १० ।
"निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥"

निर्गन्ध, त्रि, (निर्नास्ति गन्धो यत्र ।) गन्धशून्यम् । यथा, चाणक्ये । ७ ।
"रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥"

निर्गन्धनं, क्ली, (निर् + गन्ध अर्द्दने + भावे ल्युट् ।) निर्ग्रन्थनम् । मारणम् । इत्यमरटीकायां स्वामी ।

निर्गन्धपुष्पी, स्त्री, (निर्गन्धं गन्धशून्यं पुष्पं यस्याः । ङीष् ।) शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥ (शाल्मलिशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

निर्गुणः, पु, (निर्गता गुणा यस्मात् ।) सत्त्वरजस्तमोगुणातीतः । परमेश्वरः । यथा,—
"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम् ।
सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम् ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे १३ अध्यायः ॥
"गुणश्रेष्ठो निर्गुणो महान् ।" इति महाभारते । १३ । १४६ । १०३ ॥ विद्यादिशून्ये, त्रि । यथा,—
"सगुणो निर्गुणो वापि सहायो बलवत्तरः ।
तुषेणापि परिभ्रष्टस्तण्डुलो नाङ्कुरायते ॥"
इत्युद्भटः ॥
(ज्यारहिते । यथा, निर्गुणं धनुः ॥)

निर्गुण्डी, स्त्री, (निर्गता गुण्डात् गुण्डनात् । गौरादित्वात् ङीष् ।) निर्गुण्डी । इत्यमरटीकायां मधुः । २ । ४ । ६८ ॥

निर्गुण्डी, स्त्री, (निर्गतं गुण्डं वेष्टनं यस्याः । ङीष् ।) नीलशेफालिका । तत्पर्य्यायः । शेफालिका २ शेफाली ३ नीलिका ४ मल्लिका ५ सुवहा ६ रजनीहासा ७ निशिपुष्पिका ८ । इति शब्दरत्नावली ॥ वृक्षविशेषः । निसिन्दा इति भाषा ॥ तत्पर्य्यायः । सिन्दुकः २ सिन्दुवारः ३ इन्द्रसुरिषः ४ इन्द्राणिका ५ । इत्यमरः । २ । ४ । ६८ ॥ सिन्धुकः ६ सिन्धुवारः ७ इन्द्रसुरसः ८ निर्गुण्डी ९ । इति भरतः ॥ इन्द्राणी १० । इति साञ्जः ॥ पौलोमी ११ शक्राणी १२ कासनाशिनी १३ । इति रत्नकोषः ॥ विसृमरकः १४ सिन्धकम् १५ सुरसः १६ सिन्धुवारितः १७ सुरसा १८ सिन्धुवारकः १९ । इति च शब्दरत्नावली ॥ करहाटः । इति विश्वः । टे, ३६ ॥

निर्गूढः, पु, (निर्निश्चयेन गुह्यते संव्रियते आत्मा अत्रेति । निर् + गुह + अधिकरणे क्तः ।) वृक्षकोटरम् । इति शब्दरत्नावली ॥ (संवृते, त्रि ॥)

निर्ग्रन्थः, पुं, (ग्रन्थेभ्यः शुत्यादिनियमेभ्यो निर्गतः ।) क्षपणकः । निःस्वः । बालिशः । इति मेदिनी । थे, २० ॥ मुनिः । इति हेमचन्द्रः ॥ १।७६ ॥ द्यूतकारः । इति जटाधरः ॥ त्रि, ग्रन्थिभ्यो निर्गतः । निवृत्तहृदयग्रन्थिः । यथा, भागवते । १ । ७ । १० ।
"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ॥"
("निर्ग्रन्था ग्रन्थेभ्यो निर्गताः । तदुक्तं गीतासु ।
'यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च ॥'
इति । "यद्वा, ग्रन्थिरेव ग्रन्थः निवृत्तः क्रोधाहङ्काररूपो ग्रन्थिर्येषां ते निवृत्तहृदयग्रन्थय इत्यर्थः ।" इति तट्टीकायां स्वामी ॥)

निर्ग्रन्थकः, पुं, (निर्ग्रन्थ एव । स्वार्थे कन् ।) क्षपणः । निष्फलः । अपरिच्छदः । इति मेदिनी ॥ के, १९५ ॥

निर्ग्रन्थनं, क्ली, (निर् + ग्रथि कौटिल्ये + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११३ ॥

निर्ग्रन्थिकः, पुं, (निर्गतो ग्रन्थिर्हृदयग्रन्थिर्यस्य । कप् ।) क्षपणः । निपुणे हीने च त्रि । इति शब्दरत्नावली ॥

निर्घटं, क्ली, वहुमानुषसङ्कीर्णहट्टम् । इति हारावली । ७० ॥ करशून्यहट्टम् । इति शब्दरत्नावली ॥ घटशून्यञ्च ॥ (निर्गतो घटो यस्मादिति विग्रहे । घटशून्यदेशादौ, त्रि ॥)

निर्घण्टः, पु, (निर् + घण्ट दीप्तौ + घञ् ।) निर्घण्टनम् । निघण्टुः । गणसंग्रहः । ग्रन्थानां सूचीति ख्यातः । यथा,—
"धन्वन्तरीयमदनादिहलायुधादीन्
विश्वप्रकाशमरकोषमशेषराजान् ।
आलोक्य लोकविदितांश्च विचिन्त्य शब्दान्
द्रव्याभिधानगणसंग्रह एष सृष्टः ॥
निर्द्दिष्टलक्षणपरीक्षणनिर्णयेन
नानाविधौषधविचारपरायणो यः ।
सोऽधीत्य यत् सकलमेनमवैति सर्व्वं
तस्मादयं जगति भाति निघण्टुराजः ॥"
इति राजनिर्घण्टः ॥

निर्घातः, पुं, (निर् + हन + घञ् ।) वायुभिहतवायुप्रपतनजन्यशब्दविशेषः । यथा,—
"वायुनाभिहते वायौ गगनाच्च पतत्यधः ।
प्रचण्डघोरनिर्घोषो निर्घात इति कथ्यते ॥"
इति शब्दमाला ॥
अपि च ।
"यदान्तरीक्षे बलवान् मारुतो मरुताहतः ।
पतत्यधः स निर्घातो जायते वायुसम्भवः ॥"
इति ज्योतिषम् ॥
(एतस्य लक्षणादिकं यथा, वृहत्संहितायां ३६ अध्याये ।
"पवनः पवनाभिहतो गगनादवनौ यदा समापतति ।
भवति तदा निर्घातः स च पापो दीप्तविहगरुतः ॥
अर्कोदयेऽधिकरणिकनृपधनियोधाङ्गनावणिग्वेश्याः ।
आप्रहरांशेऽजाविकमुपहन्याच्छूद्रपौरांश्च ॥
आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीडयति ।
वैश्यजलदांस्तृतीये चौरान् प्रहरे चतुर्थे ॥

अस्त्र याति शीघ्रात् प्रथमे यामे निहन्ति
शस्त्राणि ।
रात्रौ द्वितीययामे पिशाचसङ्घान्निपीड़यति ॥
तुरगकरिरथस्तृतीये विनिहन्याद्दुर्यायिनश्चतुर्थे
च ।
भैरवजर्जरशब्दे याति यतस्तां दिशं हन्ति ॥")
निर्घोष, पुं, (निर् + घुष शब्दे + घञ् ।) शब्द-
मात्रम् । इत्यमरः । १ । ६ । २३ ॥ (यथा,
रघुः । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ॥"
निनास्ति घोषो यत्रेति । शब्दशून्ये, त्रि । यथा,
महाभारते । १४ । १९ । ३६ ।
"स नियम्येन्द्रियग्राम निर्घोषे निर्ज्जने वने।
कायमभ्यन्तरं कृत्स्नमेकाग्रः परिचिन्तयेत् ॥")
निर्ज्जन त्रि (निर्गतो जनो यस्मात् ।) जन-
शून्यस्थानादिः । विजनः । इति विविक्तादिशब्द-
टीकायां सारसुन्दरी ॥ (यथा, देवीभाग-
वते । २ । ६ । ५८ ।
"एकस्मिन् समये पाण्डुर्माद्रीं दृष्ट्वाथ निर्ज्जने ।
आश्रमे चातिकामार्त्तो जग्राहागतवेपथुः ॥")
निर्ज्जर, पु, (जराया निष्क्रान्तः । निरादयः
क्रान्ताद्यर्थे पञ्चम्या इति समासः ।) देवः ।
इत्यमरः । १ । १ । ७ ॥ (यथा, देवीभाग-
वते । ५ । ८ । १८ ।
"विशन्तु निर्ज्जराः सर्व्वे कुशलं कथयन्तु वः ॥")
जरारहिते, त्रि । इति मेदिनी । रे, १७३ ॥
सुधायाम्, स्त्री । इति शब्दरत्नावली ॥
निर्ज्जरसर्षप, पु, (निर्ज्जरप्रियः सर्षपः । शाक-
पार्थिववत् समासः ।) देवसर्षपवृक्षः । इति
राजनिर्घण्टः ॥
निर्ज्जरा, स्त्री, (निर्ज्जर + टाप् ।) गुडूची । ताल-
पर्णी । इति मेदिनी । रे, १७३ ॥
निर्ज्जल, त्रि, (निर्गतं जलं यस्मात् ।) जलशून्य-
देशादि । इति मुग्धबोधटीकायां भरतः । २ ।
१ । ५ ॥ यदुक्तम् ।
"सम्प्राप्ता वृषमध्वजाद्यगतिना संस्पर्शिता
निर्ज्जवे
तुर्य्यद्वादशवद्द्वितीयमतिमन्नेकादशाभस्तनी ।
सा षष्ठी नृपपञ्चमस्य नवमञ्च सप्तमीवर्ज्जिता
प्राप्नोत्यष्टमवेदतां प्रथम हे तस्मात्तृतीयो भव ॥"
इति वल्लालसेन ॥
निर्ज्जलैकादशी, स्त्री, (निर्ज्जला एकादशी ।)
ज्यैष्ठमासीयशुक्लैकादशी । यथा, पाद्मे ।
श्रीभीमसेन उवाच ।
"पितामह । अशक्तोऽहमुपवासे करोमि किम् ।
अतो बहुफलं ब्रूहि व्रतमेकमपि प्रभो ॥
श्रीव्यास उवाच ।
वृषस्थे मिथुनस्थेऽर्के शुक्ला ह्येकादशी हि या ।
ज्यैष्ठे मासि प्रयत्नेन सोपोष्या जलवर्ज्जिता ॥
स्नाने चाचमने चैव वर्ज्जयित्वोदकं बुधः ।
उपयुञ्जीत नैवान्यद्व्रतभङ्गोऽन्यथा भवेत् ॥
उदयादुदयं यावद्वर्ज्जयित्वा जलं बुधः ।
अप्रयत्नादवाप्नोति द्वादशद्वादशीफलम् ॥
ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् ।
जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि ॥
भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी ।
एवं कृते तु यत् पुण्यं भीमसेन । शृणुष्व तत् ॥
संवत्सरस्य या मध्ये एकादश्यो भवन्ति हि ।
तासां फलमवाप्नोति पुत्त्र । मे नात्र संशयः ॥
इति मां केशवः प्राह शङ्खचक्रगदाधरः ॥"
किञ्च ।
"धनधान्यवहा पुण्या पुत्त्रभाग्यसुखप्रदा ।
उपोषिता नरव्याघ्र । इति सत्यं ब्रवीमि ते ॥
यमदूता महाकायाः करालाः कामरूपिणः ।
दण्डपाशधरा रौद्रा नोपसर्पन्ति तं नरम् ॥
पीताम्बरधराः शङ्खचक्रहस्ता मनोजवाः ।
अन्तकाले नयन्त्येनं वैष्णवा वैष्णवीं पुरीम् ॥"
किञ्च ।
"तोयस्य नियमं यस्तु कुरुते वैष्णवोत्तम ।
पलकोटिसुवर्णस्य यामे यामे स पुण्यभाक् ॥
स्नानं दानं जपं होमं यदस्यां कुरुते नरः ।
तत् सर्व्वञ्चाक्षयं प्राप्तमेतत् कृष्णस्य भाषितम् ॥
किमापरेण धर्म्मेण निर्ज्जलैकादशीं नृप ।
उपोष्य सम्यग्विधिना वैष्णवं पदमाप्नुयात् ॥"
किञ्च ।
"ये कृता भीमसेनेषा निर्ज्जलैकादशी शुभा ।
स्वकुलं तारितं सर्व्वं कुलातीतं तथा शतम् ॥
आत्मना सह तैर्नीतं वासुदेवस्य मन्दिरे ॥"
किञ्च ।
"आत्मद्रोहः कृतस्तैस्तु यैरेषा नह्युपोषिता ।
पापात्मानो दुराचारा दुष्टास्ते नात्र संशयः ॥"
किञ्च ।
"यश्चेमां शृणुयाद्भक्त्या यश्चापि परिकीर्त्तयेत् ।
उभौ तौ स्वर्गमाप्नौ हि नात्र कार्य्या विचा-
रणा ॥"
अथ निर्ज्जलव्रतविधिः । यथा,—
"यथाप्राग्लिखितं कृत्वा सङ्कल्पनियमं व्रते ।
जलमादाय गृह्णीयान्मन्त्रेणानेन वैष्णव ॥
एकादश्यां निराहारो वर्ज्जयिष्यामि वै जलम् ।
केशवप्रीणनार्थाय अत्यन्तदमनेन च ॥" इति ॥
"वर्ज्जयेच्चाम्बु हीराम्र विना चाचमनार्थकम् ।
विना च प्राशनं पादोदकस्यात्यन्तपावनम् ॥
एकादश्यां निशायान्तु नित्यपूजां विधाय हि ।
हैमीं त्रैविक्रमीं मूर्त्तिं स्नापयेत् पयआदिभिः ॥
वस्त्रादिकं समर्प्याथाभ्यर्च्य गन्धादिभिश्च ताम् ।
प्रणम्य जागरं कुर्य्यात् तदग्रे नर्त्तनादिना ॥
प्रातःस्नानादि निर्व्वर्त्य तं त्रिविक्रममर्च्चयेत् ।
शक्त्याम्बुकुम्भान् विप्रेभ्यो दद्यात् गन्धाद्यल-
ङ्कृतान् ॥"
तत्र मन्त्रः ।
"देवदेव हृषीकेश संसारार्णवतारक ।
जलकुम्भप्रदानेन यास्यामि परमाङ्गतिमिति ॥
दद्याच्च कनकं छत्रं वस्त्रयुग्मसुपानहौ ।
जलपात्राणि दिव्यानि विभवे सति वैष्णवः ॥
शक्त्या विप्रान् भोजयित्वा पीत्वा माल्यकरा-
म्बलम् ।
स्वयं वानीय मौनी सन् भुञ्जीत सह बन्धुभिः ॥"
इति श्रीहरिभक्तिविलासे १५ विलास ॥
निर्ज्जितः, त्रि, (निर् + जि जये + क्तः ।) प्राप्त-
पराजयः । तत्पर्य्यायः । पराजितः २ परा-
भूतः ३ विजितः ४ जितः ५ । इति शब्दरत्ना-
वली ॥ वशीकृतः । यथा,—
"ध्यायतश्चरणाम्भोजं भावनिर्ज्जितचेतसा ।"
इति श्रीभागवते ।१।६। अध्यायटीकायां स्वामी ॥
निर्ज्जितेन्द्रियग्रामः, त्रि, (निर्ज्जितः पराजित
इन्द्रियग्राम इन्द्रियसमूहो येन ।) यतिः । इत्य-
मरः । २ । ७ । ४४ ॥
निर्ज्जीवः, त्रि, (निर्गतो जीवो जीवात्मा यस्मात् ।)
जीवात्मरहितः । प्राणिशून्यः । यथा,—
"चिता चिन्ता द्वयोर्म्मध्ये चिन्ता एव गरीयसी ।
चिता दहति निर्ज्जीवं चिन्ता दहति जीवितम् ॥"
इति प्राचः ॥
निर्झरः, पु, (निर्झृणाति जीर्णीभवति उच्च-
स्थानपतनादिति । निर् + झॄ + अच् ।) पर्व्वता-
वतीर्णजलप्रवाहः । इति भरतः ॥ सुत्या
अन्यथा वा गिरौ जलप्रवाहः । इति मधु ॥
पर्व्वतादेगेन पतज्जल झोरा इति ख्यातम् ।
इति कोकटः ॥ तत्पर्य्यायः । झरः २ । इत्य-
मरः । २।३।५ ॥ निर्झरी ३ । इति शब्दरत्ना-
वली ॥ (यथा, महाभारते । ३ । ६४ । ८ ।
"सरितो निर्झरांश्चैव ददर्शाद्भुतदर्शनान् ॥")
तज्जलगुणाः । लघुत्वम् । पथ्यत्वम् । दीपन-
त्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥
(यथा च ।
"शैलसानुस्रवद्वारि प्रवाहे निर्झरो झरः ।
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥
नैर्झरं रुचिकृत्तीरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकञ्च वातं स्यादतिपित्तलम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
सूर्य्यघोटकः । तुषानलः । इति मेदिनी । रे, १७ ॥
निर्झरी, स्त्री (निर्झृणाति उच्चस्थानपातात्
जीर्णीभवतीति । निर् + झॄ + अच् । गौरादि-
त्वात् ङीष् ।) निर्झरः । इति शब्दरत्नावली ॥
(निर्झर उत्पत्तिकारणत्वेनास्त्यस्या इति । अच् ।
ङीष् ।) नदी । यथा,—
"जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥"
इति रावणकृतशिवस्तोत्रम् ॥
निर्झरी, [न्] पु, (निर्झरोऽस्यास्तीति । निर्झर
+ इनिः ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥
निर्झरिणी, स्त्री, (निर्झर उत्पत्तिकारणत्वेना-
स्त्यस्या इति । इनि । ङीप् ।) नदी । इति
त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे ।
१७ । ७ ।

"सोऽपि तां वीक्ष्य लावण्यरसनिर्झरिणीं नृपः ।
यत्न प्राप परिष्वङ्गं स्मराक्रान्तो मुमूर्च्छ तत् ॥")

निर्णयः, पुं, (निर्णयनमिति । निर् + नी + "एरच् ।" ३ । ३ । ५६ । इति भावे अच् ।) अवधारणम् । तत्पर्य्यायः । निश्चयः २ । इत्यमरः । १ । ५ । ३ ॥ निर्णयनम् ३ निश्चयः ४ । इति शब्दरत्नावली ॥ (यथा, मनुः । १२ । २ ।
"स तानुवाच धर्म्मात्मा महर्षीन् मानवो भृगुः ।
अस्य सर्व्वस्य शृणुत कर्म्मयोगस्य निर्णयम् ॥")
विचारः । तत्पर्य्यायः । तर्कः २ गुक्षा ३ चर्च्चा ४ । इति त्रिकाण्डशेषः ॥ विरोधपरिहारः । इति मिताक्षरा ॥ चतुष्पाद्व्यवहारान्तर्गतशेषपादः । फयसला इति आरवीयभाषा ॥ डिक्री इति इङ्गरेजीयभाषा ॥ तद्विवरणं यथा । "अथ निर्णयः । तत्र नारदः ।
'यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
स्वयमभ्युपपन्नोऽपि स्वचर्य्यावसितोऽपि सन् ।
क्रियावसन्नोऽप्यर्हेत परं सभ्यावधारणम् ॥
सभ्यैरवहृतः पश्चात् राज्ञा शास्यः स शास्त्रतः ॥'
यस्य वादिनः प्रतिवादिनो वा साक्षिण इत्युपलक्षणम् । साक्षिलिखितभुक्तिशपथानां मध्येऽन्यतमप्रमाणं यस्य प्रतिज्ञायाः सत्यत्वप्रतिपादकं स एव जयी अन्यथा पराजित इति प्रत्येतव्यम् । स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृतस्वपराजयः । स्वचर्य्यावसितः कम्पस्वेदवैवर्ण्यादिना पराजितत्वेनावहृतः । क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः । परमनन्तरम् । सभ्यावधारणं सभासदां मिलितानामयं पराजित इति निर्णयं अर्हेत । स शास्त्रविधिना शास्यः ॥ * ॥ निर्णयस्य फलमाह वृहस्पतिः ।
'प्रतिज्ञाभावनाद्वादी प्राड्विवाकादिपूजनात् ।
जयपत्रस्य चादानात् जयी लोके निगद्यते ॥'
जयपत्रस्य लेखनप्रकारमाह स एव ।
'यद्वृत्तं व्यवहारेषु पूर्व्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ॥
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते ॥'
कात्यायनः ।
'अर्थिप्रत्यर्थिवाक्यानि प्रतिसाक्षिवचस्तथा ।
निर्णयश्च तथा तस्य यथा चावहृतं स्वयम् ॥
एतद्यथाक्षरं लेख्यं यथापूर्व्वं निवेशयेत् ।
सभासदश्च ये तत्र धर्म्मशास्त्रविदस्तथा ॥'
ततश्च भाषोत्तरे क्रिया च पत्रसाक्ष्यादिकं निर्णयो जयपराजयावधारणं निर्णयकालावस्थितमध्यस्थाश्च इत्यादिकं सर्व्वं लेखनीयं निरूपणस्य सम्यक्प्रदर्शनार्थम् । तथाहि भाषोत्तरलेखनं छेलान्तरेण पुनर्न्यायप्रत्यवस्थाननिषेधार्थम् । नहि न गृहीतमिति मिथ्योत्तरेण पराजितस्य पुनः परिशोधितं मयेति प्रत्यवस्थानं सम्भवति । प्रमाणलेखनन्तु पुनः प्रमाणा-
न्तरोपन्यासनिरासार्थम् । तदाह कात्यायनः ।
'क्रियां बलवतीं त्यक्त्वा दुर्ब्बलां योऽवलम्बते ।
स जयेऽवहृते सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्ब्बमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहाराणां प्रमाणमफलन्तथा ॥'
निर्णयोत्तरकृत्यमाह मनुः ।
'अर्थे त्वमन्यमानन्तु कारणेन विभावितम् ।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः ॥'
अमन्यमानं अपलपन्तम् । कारणेन साक्ष्यादिप्रमाणेन । याज्ञवल्क्यः ।
'ज्ञात्वापराधं देशञ्च कालं बलमथापि वा ।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु दापयेत् ॥' * ।
मनुः ।
'तीरितं चानुशिष्टञ्च यत्र क्वचन सम्भवेत् ।
कृतं तद्धर्म्मतो विद्यात् न तद्भूयो निवर्त्तयेत् ॥'
अनुशिष्टं साक्ष्यादिनिर्णीतम् । अतएव तीरितं प्राड्विवाकादिभिः समापितम् । तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः ॥ यत्र तु तीरितानुशिष्टयोरप्यधर्म्मकृतत्वम्मत्वा पराजयी पुनर्द्विगुणदण्डमङ्गीकृत्य प्रत्यवतिष्ठते तत्र पुनर्न्यायदर्शनमाह नारदः ।
'तीरितं चानुशिष्टञ्च यो मन्येत विधर्म्मतः ।
द्विगुणं दण्डमादाय तत् कार्य्यं पुनरुद्धरेत् ॥'
असद्विचारे तु विचारान्तरमाह स एव ।
'असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम् ।
असम्मतमतैर्दृष्टं पुनर्दर्शनमर्हति ॥'
असाक्षिकमित्यप्रमाणोपलक्षणम् ॥ * ॥
याज्ञवल्क्यः ।
'दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु ।
सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम् ॥
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः ।
स्वचर्य्यावसितानान्तु नास्ति पौनर्भवो विधिः ॥'
साक्षिवचनेन सभ्यावधारितेन च प्राप्तावसादानां दोषदर्शने पुनर्न्यायदर्शनम् । स्वव्यापारेण विरुद्धभाषादिना प्राप्तावसादानान्तु नास्ति पुनर्न्याय. ॥
वृहस्पतिरपि ।
'पलायनानुत्तरत्वादन्यपक्षाश्रयेण च ।
हीनस्य गृह्यते वादो न स्ववाक्यजितस्य च ॥'
मनुः ।
'बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितम् ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥'
याज्ञवल्क्यः ।
'बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत् ।
स्त्रीनक्तमन्तरागारबहिर्ग्रामकृतांस्तथा ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः ।
असम्बन्धकृतश्चैव व्यवहारो न सिध्यति ॥'
उपाधिश्छलमिति शूलपाणिः । उपाधिर्भयादिरिति विज्ञानेश्वरः । सम्मते भीतादियोजितः इत्युक्तवचनेनन पौनरुक्त्यम् । बहिर्ग्रामः बहिर्देशः । मत्तो मद्यादिना । उन्मत्तो वाता-
दिना । व्यसनी द्यूताद्यासक्तः । असम्बन्धो वादितन्नियुक्तव्यतिरिक्त उदासीनः । आदिपदादस्वतन्त्रदासपुत्रादेर्ग्रहणम् । तथा च नारदः ।
'स्वतन्त्रोऽपि हि यत्कार्य्यं कुर्य्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वातन्त्र्यस्य हेतुतः ॥
कामक्रोधाभिभूता ये भयव्यसनपीडिताः ।
रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥
तथा दासकृतं कार्य्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ॥
पुत्त्रेण च कृतं कार्य्यं यत् स्यादस्वच्छन्दतः पितुः ।
तदप्यकृतमेवाहुर्दासपुत्त्रौ च तौ समौ ॥'
एतच्च कुटुम्बभरणातिरिक्तविषयम् ।
'कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् ॥
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥'
इति मनुवचनात् ।
कुटुम्बमवश्यं भरणीयम् । अध्यधीनः परतन्त्रपुत्रदासादिः । व्यवहारमृणादिकम् । ज्यायान् स्वतन्त्रः । न विचालयेत् अनुमन्येतेत्यर्थः । तथा च नारदः ।
'स्वातन्त्र्यन्तु स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ।
अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः ॥
अस्वतन्त्रः स्मृतः शिष्य आचार्य्यस्य स्वतन्त्रता ।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्रा दासाः परिग्रहाः ॥
स्वतन्त्रस्तत्र तु गृही यस्य तत् स्यात् क्रमागतम् ।
गर्भस्थैः सदृशो ज्ञेयः आष्टमाद्वत्सराच्छिशुः ॥
बाल आषोडशाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते ॥
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः ।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ॥
अभावे बीजिनो माता तदभावे च पूर्व्वजः ॥'
परिग्रहाः अनुजीविप्रभृतयः । तथा च वृहस्पतिः ।
'पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः ।
यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति ॥'
कात्यायनः ।
'कुटुम्बार्थमशक्तौ तु गृहीतं व्याधितेऽथवा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत् ॥
कन्यावैवाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम् ।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥'
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः ॥ वृहस्पतिः ।
'यः स्वामिना नियुक्तोऽपि धनाय व्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु सम्मतः ॥
प्रमाणं तत्कृतं सर्व्वं लाभालाभव्ययोदयम् ।
स्वदेशे वा विदेशे वा स्वामी तन्न विसंवदेत् ॥
सम्मतस्तस्य स्वामिन इत्यर्थः ।" इति व्यवहारतत्त्वम् ॥ अधिकरणविशेषः । यथा,—
"विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥"
इति स्मृतिमीमांसा ॥
न्यायमते तदभावाप्रकारकत्वे सति तत्प्रकारक-

ज्ञानम्। यथा। वह्निमान् पर्व्वत इत्यादि-बोधः। इति भाषापरिच्छेदः॥ तद्धर्म्मावच्छिन्न-प्रकारताऽन्यप्रकारतानिरूपितपक्षतावच्छेदका-वच्छिन्नविशेष्यताशालिज्ञानम्। इति जगदीशः॥

निर्णयनं, क्ली, (निर्+नी+भावे ल्युट्।) निर्णयः। इति शब्दरत्नावली॥

निर्णयपादः, पुं, (निर्णयात्मकः पादो भागविशेषः।) चतुष्पाद्व्यवहारान्तर्गतव्यवहारविशेषः। तस्य रूपम्। मिलितानां सभासदां पराजितोऽय-मित्यवधारणम्। इति व्यवहारतत्त्वम्॥

निर्णायनं, क्ली, (निर्+नी+णिच्+ल्युट्।) मातङ्गापाङ्गदेशः। तत्पर्य्यायः। निर्याणम् २। इति शब्दरत्नावली॥

निर्णिक्त, त्रि, (निर्णिज्यते शुध्यते स्मेति। निर्+णिज्+क्तः।) अपनीतमलम्। शोधितम्। इत्यमरः। ३। १। ५६॥ (यथा, चिन्तामणि-धृतस्कन्दवचनम्।
"जलदेवगृहस्यैव श्मशानं गोद्विजालयम्।
निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कदाचन॥")

निर्णीत, त्रि, (निर्+नी+क्तः।) कृतनिर्णयः। निश्चयीकृतः। यथा,—
"निर्णीते व्यवहारे तु प्रमाणमफलं भवेत्।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत्॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः।
निर्णीतव्यवहाराणां प्रमाणमफलं तथा॥"
इति व्यवहारतत्त्वम्॥
तद्वैदिकपर्य्यायः। "निण्यम् १ सस्वः २ सनुतः ३ हिरुक् ४ प्रतीच्यम् ५ अपीच्यम् ६। इति षण्णिर्णीतान्तर्हितनामधेयानि।" इति वेद-निघण्टौ। ३। २५॥

निर्णेजकः, पुं, (निर्णेनेक्ति निर्म्मलीकरोति वस्त्र-मिति। निर्+णिज शौचे+ण्वुल्।) रजकः। इत्यमरः। २। १०। १०॥ (यथा, मनुः। ४। २१६।
"कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च।
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति॥")

निर्द्दटः, त्रि, परापवादरक्तः। दयाशून्यः। तीव्रः। मत्तः। निष्प्रयोजनः। इति शब्दरत्नावली॥

निर्द्दयः, त्रि, (निर्गता दया यस्मात्।) दयाशून्यः। इति जटाधरः॥ (यथा, रघुः। ११। ८४।
"न प्रहर्त्तुमलमस्मि निर्द्दयं
विप्र इत्यभिभवत्यपि त्वयि॥"
निर्गता दया यस्मै यमुद्दिश्य दया तिरोहिता इत्यर्थः। अदयाहः। यथा, मनुः। ९। २३९।
"ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः।
निर्द्दया निर्न्नमस्कारास्तन्मनोरनुशासनम्॥")

निर्द्दरं, क्ली, (निर्+दॄ+अप्।) निर्भरम्। (निर्गतो दरश्छिद्रं यस्मात्।) सारम्। त्रि, कठिनम्। (यथा, रामायणे। २। ८५। १९।
"ध्याननिर्द्दरशैलेन विनिःश्वसितधातुना॥")
अपत्रपे च त्रि। इति मेदिनी। रे, १०५॥

(निर्दीर्य्यति विदीर्य्यति पतनस्थलमिति। निर्+दॄ विदारे+अच्। निर्झरः। इति कश्चित्॥ निर्गतोऽस्ति दरो भयो यस्येति निर्भये, त्रि॥)

निर्द्दहनः, पुं, (नितरां दहतीति। निर्+दह+ल्युः।) भल्लातकः। इति राजनिर्घण्टः॥ (भल्लातकशब्देऽस्य गुणादिकं ज्ञातव्यम्॥ निर्गतोऽस्ति दहनो वह्निर्यत्र।) अग्निशून्यश्च॥

निर्द्दहनी, स्त्री, (निर्गतं दहनं यस्याः। स्त्रियां ङीप्।) मूर्व्वालता। इति रत्नमाला॥ (यथा,
"सुरां वचां तिक्तकरोहिणीञ्च
तथाभयां निर्द्दहनीञ्च तुल्याम्।
पिबेच्च गोमूत्रयुतां कपोत्थे
शूले तथामस्य च पाचनार्थम्॥"
इति वैद्यकचक्रपाणिसंग्रहे शूलाधिकारे॥)

निर्द्दिग्धः, त्रि, (निर्+दिह+क्तः।) बली। मांसलः। इति हेमचन्द्रः। ३। ११३॥

निर्द्दिष्टः, त्रि, (निर्+दिश+क्तः।) निश्चितः। यथा,—
"निर्द्दिष्टविषयं किञ्चिदुपात्तविषयन्तथा।
अपेक्षितक्रियञ्चैव त्रिधापादानमिष्यते॥"
इति रामतर्कवागीशः॥
(आदिष्टः। यथा, रघुः। १। ९५।
"निर्द्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः॥")

निर्द्देशः, पुं, (निर्+दिश+भावे घञ्।) आज्ञा। इत्यमरः। २। ८। २५॥ (यथा, भागवते। ६। १। ३८॥
"यूयं वै धर्म्मराजस्य यदि निर्द्देशकारिणः।
ब्रूत धर्म्मस्य नस्तत्त्वं यच्च धर्म्मस्य लक्षणम्॥")
कथनम्। (यथा, गीतायाम्। १७। २३।
"ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः॥")
उपान्तः। इति मेदिनी। शे, २३॥

निर्द्देष्टा, [ऋ] त्रि, (निर्द्दिशतीति। निर्+दिश+तृच्।) निर्द्देशकर्त्ता। यथा, "तथाहि अर्थी नाम साध्यस्य अर्थस्य निर्द्देष्टा तत्प्रतिपक्ष-स्तदभाववादी प्रत्यर्थी।" इति मिताक्षरायां व्यवहाराध्याये साक्षिप्रकरणम्॥

निर्द्दोषः, त्रि, (निर्गतो दोषो यस्मात्।) दोष-रहितः। यथा,—
"निर्द्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु॥"
इति मिताक्षरा॥

निर्धनः, पुं, (निर्गतं धनं यस्मात्।) जरद्गवः। इति शब्दचन्द्रिका॥ धनशून्ये, त्रि। यथा,—
"अकुलीनोऽपि नरः पूज्यो यस्यास्ति विपुलं धनम्।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते॥"
इति चाणक्ये। ८२॥

निर्धर्म्मः, त्रि, (निर्गतो धर्म्मो यस्मात्।) धर्म्म-रहितः। यथा,—
"महापराधे निर्धर्म्मे कृतघ्ने क्लीवकुत्सिते।
नास्तिकमात्यदासेषु कोशपानं विवर्ज्जयेत्॥"
इति मिताक्षरा॥

निर्द्धारः, पुं, (निर्द्ध्रियतेऽनेनेति। निर्+धृ+घञ्।) निश्चयः। "जातिगुणक्रियाभिः समुदायादेक-स्यापकर्षेण वा सजातीयात् पृथक्करणम्। यथा। मनुष्याणां ब्राह्मणः श्रेष्ठः। गवां कृष्णा बहुक्षीरा। अध्वगानां धावन्तः शीघ्रतमाः।" इति दुर्गादासः॥ धारणञ्च॥

निर्द्धारणं, क्ली, (निर्द्धार्य्यते इति। निर्+धृ+णिच्+भावे ल्युट्।) निश्चयः। निर्धारः। यथा, निर्द्धारणे षष्ठ्याः समासो न स्यादिति दुर्गा-दासः॥

निर्द्धारितं, त्रि, (निर्द्धार्य्यते स्थिरीक्रियते इति। निर्+धृ+णिच्+कर्म्मणि क्तः।) कृत-निश्चयः। यथा। "किन्त्वनिर्द्धारितैकतानेकत्व-विशेषस्य।" इति विजयरक्षितः॥

निर्द्धार्य्यं, त्रि, (निर्द्ध्रियते इति। निर्+धृ+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। धारि+यत् वा।) निर्द्धारणीयम्। निर्द्धारि-तव्यम्। निर्भेयकर्म्मकर्त्ता। इति विशेष्यनिघ्ने निर्वार्य्यशब्दटीकायां रमानाथः॥

निर्धूतं, त्रि, (निर्+धू+क्तः।) खण्डितम्। (यथा, मार्कण्डेये। ८५। ७४।
"केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि॥")
परित्यक्तम्। यथा, ज्योतिषतत्त्वे।
"नित्यं निर्धूतबुद्धिं प्रबलरिपुभयं वित्तनाशञ्च
जीवः॥"
(निरस्तम्। यथा, अध्यात्मरामायणे। १। ३।
"पठन्ति ये नित्यमनन्यचेतसः
शृण्वन्ति चाध्यात्मकसंज्ञितं शुभम्।
रामायणं सर्व्वपुराणसम्मतं
निर्धूतपापा हरिमेव यान्ति ते॥")
भर्त्सितम्। यथा, रामायणे। ४। ८। ३२।
"पुराहं वालिना राम! राज्यात् स्वाद
वरोपितः।
परुषाणि च संश्राव्य निर्धूतोऽस्मि बलीयसा॥")

निर्धौतं, त्रि, (निर्+धाव+कर्म्मणि क्तः। "च्छ्वोः शूडनुनासिके च।" ६। ४। १९। इति वकारस्योठादेशः। "एत्येधत्यूठ्सु।" ६।१।८९। इति वृद्धिः।) प्रक्षालितम्। यथा,—
"तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धौतोऽधरशोणिमा विलुलितस्रस्तस्रजो
मूर्द्धजाः॥"
इति श्रीजयदेवः॥

निर्बन्धः, पुं, (निर्+बन्ध+भावे घञ्।) अभि-निवेशः। निबन्धोऽपि पाठः। इति हेमचन्द्रः। ६। १३६॥ (यथा, भागवते। ३। १४। २९।
"स विदित्वाथ भार्य्यायास्तं निर्बन्धं विकर्म्मणि।
नत्वा दिष्टाय रहसि तयाथोपविवेश ह॥")
अभिलषितप्राप्तौ भूयो यत्नः। (यथा, च कुमारसम्भवे। ५। ६६।
"अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः॥")

यथा शिशुग्रहः। शिशूनां रोगविशेषः। आखटि इति ख्यातः। इति केचित्। इति ग्रहशब्दटीकायां भरतः॥

निर्व्वर्हणं, क्ली, (निर्+वर्ह+भावे ल्युट्।) निवर्हणम्। मारणम्। इत्यमरटीकायां नीलकण्ठः॥

निर्भटः, त्रि, (निर्+भट+अच्।) दृढः। इति त्रिकाण्डशेषः॥

निर्भयः, त्रि, (निर्गतं भयं यस्य यस्माद्वा।) भयरहितः। तत्पर्य्यायः। अजानेयः २। इति त्रिकाण्डशेषः॥ (यथा, हरिवंशे। ८३। ११।
"रजकः स तु तौ प्राह युवां कस्य वनेचरौ।
राज्ञो वासांसि यौ मौढ्यादयाचेते निर्भया-
वुभौ॥"

पु, रौच्यमनुपुत्रे। यथा, हरिवंशे। ७। ८१।
"सुनेत्रः क्षत्रवृद्धिश्च सुतपा निर्भयो दृढः।
रौच्यस्यैते मनोः पुत्रा अन्तरे तु त्रयोदशे॥")

निर्भरं, क्ली, (निःशेषेण भरो भरणं यत्र।) अतिशयः। (यथा, गीतगोविन्दे। १। ४६।
"रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः
पातु वः॥")

तद्वति, त्रि। इत्यमरः। ३। ४। २॥ (यथा, भागवते। ६। १८। २०।
"तं वीरमाहौशनसी प्रेमनिर्भरया गिरा॥")

निर्भर्त्सनं, क्ली, (नितरां भर्त्सनम्। निर्+भर्त्स+ल्युट्।) खलीकारः। अलक्तकम्। इति मेदिनी। ने, १८६॥ भर्त्सनञ्च॥ (यथा, महाभारते। ३। ३०४। ५।
"निर्भर्त्सनापवादैश्च तथैवाप्रियया गिरा।
ब्राह्मणस्य पृथा राजन्। न चकाराप्रियन्तदा॥")

निर्भर्त्सित, त्रि, (निर्+भर्त्स+क्त।) कृतनिर्भर्त्सनः। तत्पर्य्यायः। निन्दितः२ धिक्कृत. ३ अपध्वस्तः ४। इति जटाधरः॥ (यथा, कुमारसम्भवे। ३। ५३।
"अशोकनिर्भर्त्सितपद्मरागम्॥")

निर्भाग्य', त्रि, (निष्क्रान्तं भाग्यं यस्य।) भाग्यरहितः। यथा, "कृताल्पापटुनिर्भाग्या मन्दाः स्युः।" इत्यमरः। ३। ३। १४॥

निर्म्मदः, पु, (निर्गतो मदो दानवारि गर्व्वो वा यस्मात्।) कालवशान्निर्गलितमदहस्ती। तत्पर्य्याय.। उद्दान्तः २। इत्यमरः। २। ८। ३६॥ मदशून्ये, त्रि॥ (यथा, महाभारते। ३। ६६। ६६।
"ततः संवत्सरेऽतीते हृतौजसमवस्थितम्।
निर्म्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन्॥")

निर्म्मध्या, स्त्री, (निर्गतं मध्यं यस्याः। शून्यमध्यत्वादेवास्यास्तथात्वम्।) नलिका। इति भावप्रकाश.॥ (नलिकाशब्देऽस्या विवृतिविशेषो ज्ञातव्यः॥)

निर्म्मन्थ्यदारु, क्ली, (निर्म्मन्थ्यं यज्ञार्थं घर्षणीयं दारु।) अरणिः। यज्ञे अग्न्युत्थापनार्थं घर्षणीयकाष्ठम्। इत्यमरः। २। ७। १६॥

निर्म्मल, क्ली, (निर्गतं मलमस्मात्।) निर्म्माल्यम्। अभ्रकम्। त्रि, मलहीने। इति मेदिनी। ले, १०२॥ (यथा, महाभारते। ३। ६५। ४।
"निर्म्मलस्वादुसलिलं मनोहारि सुशीतलम्॥"
निष्पापे। यथा, मनुः। ८। ३१८।
"राजनिर्धूतदण्डास्तु कृत्वा पापानि मानवाः।
निर्म्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥"
यथा, देवीभागवते। १। १८। ३७।
"मनस्तु सुखदुःखानां महतां कारणं द्विज।।
जाते तु निर्म्मले ह्यस्मिन् सर्व्वं भवति निर्म्मलम्॥")

निर्म्मलोपलः, पु, (निर्म्मलः विशुद्धः उपलः।) स्फटिकः। इति राजनिर्घण्ट.॥

निर्म्माणं, क्ली, (निर्मीयते इति। निर्+मा ल्युट्।) निर्म्मितिः। (यथा, भागवते। २। ५। ३२।
"यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः।
यदायतननिर्म्माणे न शेकुर्ब्रह्मवित्तम!॥")
सारः। समञ्जसम्। इति मेदिनी। णे, ५८॥

निर्म्माल्यं, क्ली, (निर्+मल+ण्यत्।) देवोच्छिष्टद्रव्यम्। देवस्वत्वनिवृत्तिविशिष्टं देवदत्तं वस्तु। यथा,—
"अर्व्वाक् विसर्ज्जनाद्द्रव्यं नैवेद्यं सर्व्वमुच्यते।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति क्षणात्॥"
इति गरुडपुराणम्॥*॥

तस्य स्थापनं चैपणञ्च यथा। "ऐशान्यां मण्डलं कृत्वा निर्म्माल्यशेषं दद्यादिति। वैष्णवे तु ॐ विश्वक्सेनाय नमः। शक्तौ तु ॐशेषिकायै नमः। शिवे ॐचण्डेश्वराय नमः। सूर्य्ये ॐ तेजश्चण्डाय नम.। गणेशे ॐउच्छिष्टगणेशाय नमः। कालिकादौ ॐउच्छिष्टचाण्डालिन्यै नमः। तथा च विद्यानन्दनिबन्धे।
'सूर्य्ये गणपतावुग्रे शाक्ते शैवेऽथ वैष्णवे।
तेजश्चण्डमथोच्छिष्टमोजमुच्छिष्टपूर्व्विकाम्॥
चाण्डालीं शेषिकां चण्डं विश्वक्सेनं क्रमाद्यजेत्॥'

सोजो गणेशः।
'हृदये च वह्निर्देवीं समर्प्य विधिवत्ततः।
निर्म्माल्यञ्च शुचौ देशे नैवेद्यं भक्षयेत् सुधीः॥'
तन्त्रान्तरे।
निर्म्माल्यं शिरसा धार्य्यं सर्व्वाङ्गे चानुलेपनम्।
नैवेद्यञ्चोपभुञ्जीत दत्त्वा तद्भक्तशालिने॥"
इति तन्त्रसारः॥*॥

"उदके तरुमूले वा निर्म्माल्यं तत्र संत्यजेत्॥"
इति कालिकापुराणे ५५ अध्यायः॥

निर्म्माल्यकालो यथा,—
"मणिमुक्तासुवर्णानां देवदत्तानि यानि च।
न निर्म्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च॥
पटी शाटी च षण्मास नैवेद्यं दत्तमात्रतः।
मोदकं प्रहरञ्चैव यामार्द्धेन महेश्वरि!॥
पट्टवस्त्रं त्रिमासञ्च मन्त्रसूत्रन्त्वहः स्मृतम्
यावदन्नं भवेद्दुग्धं परमान्नन्तथैव च॥"
इत्येकादशीतत्त्वे योगिनीतन्त्रम्॥

शिवनिर्म्माल्ये विशेषो यथा, स्कान्दे।
"निर्म्माल्यं यो हि मे भक्त्या शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः।
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते॥
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते।॥
शुचिः स्नानादिनेति शेष.। एवञ्च स्पृष्टारुद्रस्य निर्म्माल्यं सवासा आप्लुत. शुचिरिति कालिकापुराणं अशुचिविषयम्॥ अनुपनीतविषयमिति श्रीदत्तः। बह्वृचगृह्यपरिशिष्टम्।
अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम्॥"
इति तिथितत्त्वम्॥

तस्य उत्तारणकालो यथा,—
अथ निर्म्माल्योत्तारणम्। अत्रिस्मृतौ।
"प्रातःकाले सदा कुर्य्यान्निर्म्माल्योत्तारणं बुधः।
दूषिताः पशवो वत्साः कन्यका च रजस्वला॥
देवता च सनिर्म्माल्या हन्ति पुण्यं पुराकृतम्॥
नारसिंहे श्रीयमोक्तौ।
देवमाल्यापनयनं देवागारे समूहनम्।
स्नापनं सर्व्वदेवानां गोप्रदानसमं स्मृतम्॥
नारदपञ्चरात्रे।
य. प्रातरुत्थाय विधाय नित्यं
निर्म्माल्यमीशस्य निराकरोति।
न तस्य दुःखं न दरिद्रता च
नाकालमृत्युर्न च रोगमात्रम्॥
अरुणोदयवेलायां निर्म्माल्यं शल्यतां व्रजेत्।
प्रातस्तु स्यान्महाशल्यं घटिकामात्रयोगतः॥
अतिशल्यं विजानीयात्ततो वज्रप्रहारवत्।
अरुणोदयवेलाया शल्यं तत् क्षमते हरिः॥
घटिकायामतिक्रान्तौ क्षुद्रं पातकमावहेत्।
मुहूर्त्ते समतिक्रान्ते पूर्णं पातकमुच्यते॥
अतिपातकमेव स्यात् घटिकानां चतुष्टये।
मुहूर्त्तत्रितये पूर्णे महापातकमुच्यते॥
ततः परं ब्रह्मवधो महापातकपञ्चकम्।
प्रहरे पूर्णतां याते प्रायश्चित्तं ततो न हि॥
निर्म्माल्यस्य विलम्बे तु प्रायश्चित्तमथोच्यते।
अतिक्रान्ते मुहूर्त्तार्द्धे सहस्रं जपमाचरेत्॥
पूर्णे मुहूर्त्ते सञ्जाते सहस्रं सार्द्धमुच्यते॥
सहस्रद्वितयं कुर्य्यात् घटिकानां चतुष्टये।
मुहूर्त्तत्रितयेऽतीते अयुतं जपमाचरेत्॥
प्रहरे पूर्णतां याते पुरश्चरणमुच्यते।
प्रहरे समतिक्रान्ते प्रायश्चित्तं न विद्यते॥"
इति श्रीहरिभक्तिविलासे ६ विलासः॥

निर्म्माल्या, स्त्री, (निर्मल्यते इति। निर्+मल्+ण्यत्। ततष्टाप्।) पृक्का। इति शब्दरत्नावली॥

निर्म्मितं, त्रि, (निर्+मा+क्तः।) कृतनिर्म्माणम्। गठितम्। रचितम्। यथा, सिद्धान्तमुक्तावल्याम्।

निर्व्वर्णनं, क्ली, (निर् + वर्ण + "सत्यापपाशेति ।" ३ । १ । २५ । इति णिच् + भावे ल्युट् ।) दर्शनम् । इत्यमरः । ३ । २ । ३१ ॥

निर्व्वहणं, क्ली स्त्री, (निर् + वह + भावे ल्युट् ।) निष्ठा । इत्यमरः । १ । ७ । १५ ॥ तत्तु प्रक्रान्ताभिनयनिर्व्वाहः । किंवा नाटके पञ्च सन्धयो भवन्ति । यथा,—

"मुख प्रतिमुखञ्चैव गर्भो विमर्श एव च ।
तथा निर्व्वहणञ्चेति नाटके पञ्च सन्धयः ॥"

तत्र पञ्चमस्य सन्धेः संज्ञाद्वयमिदम् । इति भरतः ॥ मुकुटस्त्वाह द्वे पञ्चमसन्धिसमाप्तौ । प्रस्तुतकथासमाप्ताविति यावत् । यथैतद्दशुद्दस्तौ शब्दार्णवः । निर्व्वहणन्तु निष्ठा स्त्री संहारश्च समापने । प्रक्रान्तकथानिर्व्वाह । इति मधुमाधवादयः ॥

निर्व्वाणं, क्ली, (निर् + वा गमने + क्तः । तस्य नः ।) अस्तगमनम् । निर्वृतिः । गजमज्जनम् । (यथा, रघुः । १ । ७१ ।

"असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः ॥")

सङ्गमः । अपवर्गः । इति मेदिनी । णे, ५८ ॥ (यथा, भागवते । ३ । २८ । ३५ ।

"मुक्ताश्रयं यर्हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मनः सहसा यथार्च्चिः ॥")

विश्रान्तिः । इति हेमचन्द्रः ॥ (समाप्तिः । यथा, भागवते । १ । ६ । २९ ।

"आरब्धकर्म्मनिर्व्वाणो न्यपतत् पाञ्चभौतिकः ॥")

निश्चलम् । शून्यम् । विद्योपदेशनम् । इति शब्दरत्नावली ॥ नाभिदेशे जप्यप्रणवपुटितमातृकापुटितमूलमन्त्रम् । यथा,—

"कुल्लुकां मूर्द्ध्नि संजप्य हृदि सेतुं विचिन्तयेत् ।
महासेतुं विशुद्धे तु षोडशारे समुद्धरेत् ॥
मणिपूरे तु निर्व्वाणं महाकुण्डलिनीमधः ।
स्वाधिष्ठाने कामबीजं राकिणी मूर्द्ध्नि संस्थितम् ।
विचिन्त्य विधिवद्देवि । मूलाधारान्तिकाश्रये । ॥
विशुद्धान्तं स्मरेद्देवि । विद्युत्तन्तुतनीयसीम् ।
देवीस्थानं हि जिह्वान्तं मन्त्रमूलात्परं प्रभुः ॥"

निर्व्वाणं यथा,—

"अथ वक्ष्यामि निर्व्वाणं शृणु सावहितानघे ।।
प्रणवं पूर्व्वमुच्चार्य्य मातृकाद्यं समुच्चरेत् ॥
मातृकायां समस्तायां पुनः प्रणवमुच्चरेत् ।
एवं पुटितमूलन्तु प्रजपेन्मणिपूरके ॥
एवं निर्व्वाणमीशानि । यो न जानाति पामरः ।
कल्पकोटिसहस्रेषु तस्य सिद्धिर्न जायते ॥"

इत्यागमतत्त्वविलासः ॥

(विष्णुः । यथा, महाभारते । १३ । १४९ । ७५ ।

"त्रिसामा सामगः साम निर्व्वाणं भेषजं
भिषक् ॥")

निर्व्वाणः, त्रि, (निर् + वा + क्त । "निर्व्वाणोऽवाते ।" ८ । २ । ५० । इति निष्ठातस्य नः ।) मुक्तः । यथा । निर्व्वाणो मुनिः । नष्टः । यथा । निर्व्वाणो वह्निः । (यथा, कुमारे । ३ । ५२ ।

"निर्व्वाणभूयिष्ठमथास्य वीर्य्यं
सन्धुक्षयन्तीव वपुर्गुणेन ॥")

निमग्नः । यथा । निर्व्वाणो हस्ती । इति विशेष्यनिघ्ने अमरः । ३ । १ ९६ ॥ वाणशून्यश्च ॥

निर्व्वातः, त्रि, (निर्गतो वातो वायुर्यस्मात् ।) वायुरहितः । इत्यमरः । ३ । १ । ९६ । (यथा, महाभारते । २ । ३६ । २८ ।

"असूर्य्यमिव सूर्य्येण निर्व्वातमिव वायुना ।
भासितं ह्लादितञ्चैव कृष्णेनेदं सदो हि नः ॥"

निर्व्वाति स्मेति । निर् + वा + गत्यर्थेति क्तः । "निर्व्वाणोऽवाते ।" ८ । २ । ५० । इति निष्ठातस्य न नः ।) गते वायौ, पुं ॥

निर्व्वादः, पुं, (निर्व्वदनमिति । निर् + वद + भावे घञ् ।) परीवादः । जनवादः । इत्यमरः । ३ । ३ । ८९ ॥ (यथा, रघुः । १४ । ३४ ।

"किमात्मनिर्व्वादकथामुपेक्षे
जायामदोषामुत सन्त्यजामि ॥")

अवज्ञा । (निर्निश्चितं वादः कथनम् ।) निश्चितवादः । वादाभावः । इति भरतः ॥

निर्व्वापः, पु, (निर्व्वपणमिति । निर् + वप + घञ् ।) निवापः । प्रेतमिन्नमृतपित्रुद्देश्यकदानम् । इत्यमरटीकायां तर्कवागीशः ॥ (यथा, देवीभागवते । २ । ७ । १६ ।

"पुत्त्रेभ्योऽहं ददाम्यद्य निर्व्वापं विधिपूर्व्वकम् ॥"

भिक्षार्थदानम् । यथा, पञ्चतन्त्रे । ५ । २० ।

"एतस्मिन्नवसरे ब्राह्मणोऽपि कुतश्चित् गृहीतनिर्व्वापः परिभ्रम्य यावदागतः पश्यति तावत् पुत्त्रशोकाभिभूता ब्राह्मणी विलपति ॥" भक्षणम् । इति रामानुजः ॥ यथा, रामायणे । २ । ९१ । ८० ।

नीलवैदूर्य्यवर्णांश्च मृदून् यवससञ्चयान् ।
निर्व्वापार्थं पशूनां ते ददृशुस्तत्र सर्व्वशः ॥")

निर्व्वापणं, क्ली, (निर् + वप + णिच् + ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११४ ॥ दानम् । इति हलायुधः । २ । ३२३ ॥ (निर्व्वाणतासम्पादनम् । निवान इति भाषा ॥ यथा, तिथितत्त्वे ।

"दीपनिर्व्वापणात् पुंसः कुष्माण्डच्छेदनात्
स्त्रियः ।"

स्वार्थे णिच् । वपनम् । यथा, पञ्चतन्त्रे । १ । ४०५ । "मया तावन्नीतिबीजनिर्व्वापणं कृतम् । परतस्तद्दैवपर्य्यायायत्तम् ॥")

निर्व्वार्य्यः, त्रि, (निश्चयेन व्रियते इति । निर् + वृ + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) सत्त्वसम्पदा सम्पतन् कार्य्यकर्त्ता । इत्यमरः । ३ । १ । १३ ॥ "भयविक्रमव्यसनाभ्युदयादौ निर्व्विकारं मनः सत्त्वं तत्सम्पदा सम्पतन् उद्यम कुर्व्वन् यो निःशङ्को भूत्वा कर्म्म कुरुते स निर्व्वार्य्य उच्यते ।" इति भरतः ॥ अवारणीयश्च ॥

निर्व्वासनं, क्ली, (निर् + वस + णिच् + ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११३ ॥ नगरादेर्व्वहिष्करणम् । इति मेदिनी । ने, १९८ ॥ (यथा, महाभारते । ५ । ९० । ५८ ।

"निर्व्वासनञ्च नगरात् प्रव्रज्या च परन्तप ।।
नानाविधानां दुःखानामभिज्ञास्मि जनार्द्दन ॥")

निर्व्वाहः, पु, (निर् + वह + घञ् ।) निष्पत्तिः । समाप्तिः । यथा । "स्वतिथ्या कर्म्मानिर्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशादुपवासाद्याचरणाञ्च ।" इति तिथितत्त्वम् ॥ अपि च ।

"यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात्तावदर्थवित् ।
आधिक्ये न्यूनतायाञ्च च्यवते परमार्थतः ॥"

इति भक्तिरसामृतसिन्धौ नारदीयपुराणम् ॥

निर्व्वाहणं, क्ली, (निर् + वह + स्वार्थे णिच् + ल्युट् ।) निर्व्वहणम् । नाट्योक्तौ प्रस्तुतकथासमाप्तिः । इत्यमरटीकायां भरतः ॥

निर्व्विकल्पकं, क्ली, (निर्गतो विकल्पो नानाविधकल्पना यस्मात् । कप् ।) प्रकारताविशेष्यतानापन्नसम्बन्धानवगाह्यतीन्द्रियज्ञानम् । यथा,—

"तत्प्रमाणाप्रमाणापि ज्ञानं यन्निर्व्विकल्पकम् ।
प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत् ॥"
"ज्ञान यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते ॥"

इति च भाषापरिच्छेदः ॥

निर्व्विकल्पसमाधिः, पु, (निर्व्विकल्पः समाधिः ।) ज्ञातृज्ञानादिभेदलये अद्वितीयवस्तुनि तदाकाराकारितायाः बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । इति वेदान्तसारः ॥

निर्व्विकारः, त्रि,(निर्गतो विकारो विकृतिर्यस्मात् ।) विकारशून्यः । यथा,—

"रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् ।
आनन्दं निर्म्मलं शान्तं निर्व्विकारं निरञ्जनम् ॥"

इत्यध्यात्मरामायणम् ॥

निर्व्विण्णः, त्रि (निर् + विद + क्तः । निर्व्विण्णस्योपसंख्यानात् परस्य णत्वम् पूर्व्वस्य ष्टुत्वम् ।) निर्व्वेदविशिष्टः । निर्व्वेदयुक्तः । यथा,—

"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥"

इति भक्तिरसामृतसिन्धुः ॥

निर्व्विन्ध्या, स्त्री, (निर्गता विन्ध्यादिति नित्यसत्पुरुषः ।) विन्ध्यपर्व्वतनिःसृतनदीविशेषः । इति श्रीभागवते । ५।१९ अः ॥ (यथा, मेघदूते । ३० ।

"निर्व्विन्ध्यायाः पथि भव रसाभ्यन्तरं सन्निपत्य ॥")

निर्व्विषा, स्त्री, (निर्गतं विषं यस्याः ।) तृणविशेषः । निर्विषी इति भाषा । तत्पर्य्यायः । अपविषा २ निर्विषी ३ विषहा ४ विषापहा ५ विषहन्त्री ६ विषाभावा ७ अविषा ८ विषवैरिणी ९ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कफवातास्रदोषनाशित्वम् । अनेकविषहन्तृत्वम् । व्रणनिर्मूलकारित्वञ्च । इति राजनिर्घण्टः ॥

निर्व्विष्टः, त्रि, (निर् + विश + क्तः ।) कृतनिर्व्वेशः । प्राप्तः । यथा, श्रीभागवते ।

"यत्र निर्व्विष्टमरणं कृतान्तो नाभिमन्यते ॥"

निर्व्वर्णनं, क्ली, (निर् + वर्ण + "सत्यापपाशेति ।" ३ । १ । २५ । इति णिच् + भावे ल्युट् ।) दर्शनम् । इत्यमरः । ३ । २ । ३१ ॥

निर्व्वहण, क्ली स्त्री, (निर् + वह + भावे ल्युट् ।) निष्ठा । इत्यमरः । १ । ७ । १५ ॥ तत्तु प्रक्रान्ताभिनयनिर्व्वाहः । किंवा नाटके पञ्च सन्धयो भवन्ति । यथा,—

"मुखं प्रतिमुखञ्चैव गर्भो विमर्श एव च ।
तथा निर्व्वहणञ्चेति नाटके पञ्च सन्धयः ॥"

तत्र पञ्चमस्य सन्धेः संज्ञाद्वयमिदम् । इति भरतः ॥ मुकुटस्तात्तु द्वे पञ्चमसन्धिसमाप्तौ । प्रस्तुतकथासमाप्तावित्ति यावत् । यथैतदनुदृष्तौ शब्दार्णवः । निर्व्वहणन्तु निष्ठा स्त्री संहारश्च समापने । प्रक्रान्तकथानिर्व्वाहः । इति मधुमाधवादयः ॥

निर्व्वाण, क्ली, (निर् + वा गमने + क्तः । तस्य न. ।) अस्तगमनम् । निर्वृतिः । गजमज्जनम् । (यथा, रघुः । १ । ७१ ।

"अवस्यपीड् भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः ॥")

सङ्गमः । अपवर्गः । इति मेदिनी । णे, ५८ ॥ (यथा, भागवते । ३ । २८ । ३५ ।

"मुक्ताश्रयं यर्हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मनः सहसा यथार्च्चिः ॥")

विश्रान्तिः । इति हेमचन्द्रः ॥ (समाप्तिः । यथा, भागवते । १ । ६ । २९ ।

"आरब्धकर्म्मनिर्व्वाणो न्यपतत् पाञ्चभौतिकः ॥")

निश्चलम् । शून्यम् । विद्योपदेशनम् । इति शब्दरत्नावली ॥ नाभिदेशे जप्यप्रणवपुटितमातृकापुटितमूलमन्त्रम् । यथा,—

"कुण्डलीं मूर्द्ध्नि संनयेत् हृदि सेतुं विचिन्तयेत् ।
महासेतुं विशुद्धे तु षोडशारे समुद्धरेत् ॥
मणिपुरे तु निर्व्वाणं महाकुण्डलिनीमधः ।
स्वाधिष्ठाने कामबीजं राकिणी मूर्द्ध्नि संस्थितम् ।
विचिन्त्य विधिवद्देवि ! मूलाधारान्तिकाच्छिवे ! ॥
विशुद्धान्तं स्मरेद्देवि । विद्युतन्तुतनीयसीम् ।
देवीस्थानं हिनिकान्तं मन्त्रमूलाष्टकं मुहुः ॥"

निर्व्वाणं यथा,—

"अथ वक्ष्यामि निर्व्वाणं शृणु सावहितानघे ! ।
प्रणवं पूर्व्वमुच्चार्य्य मातृकाद्यं समुच्चरेत् ॥
मातृकायां समस्ताञ्च पुनः प्रणवमुच्चरेत् ।
एवं पुटितमूलन्तु प्रणपेन्मणिपूरके ॥
एवं निर्व्वाणमीशानि ! यो न जानाति पामरः ।
कल्पकोटिसहस्रेषु तस्य सिद्धिर्न जायते ॥"

इत्यागमतत्त्वविलासः ॥

(विष्णुः । यथा, महाभारते । १३ । १४९ । ७५ ।

"भिषामा सामगः साम निर्व्वाणं भेषजं
भिषक् ॥")

निर्व्वाण', त्रि, (निर् + वा + क्तः । "निर्व्वाणोऽवाते ।" ८ । २ । ५० । इति निष्ठातस्य नः ।) मुक्तः । यथा । निर्व्वाणो मुनिः । नष्टः । यथा । निर्व्वाणो वह्निः । (यथा, कुमारे । ३ । ५२ ।

"निर्व्वाणभूयिष्ठमथास्य वीर्य्यं
सन्धुक्षयन्तीव वपुर्गुणेन ॥")

निमग्नः । यथा । निर्व्वाणो हस्ती । इति विशेष्यनिघ्ने अमरः । ३ । १ । ९६ ॥ वाणशून्यश्च ॥

निर्व्वात', त्रि, (निर्गतो वातो वायुर्यस्मात् ।) वायुरहितः । इत्यमरः । ३ । १ । ९६ । (यथा, महाभारते । २ । ३६ । २८ ।

"असूर्य्यमिव सूर्य्येण निर्व्वातमिव वायुना ।
भासितं ह्लादितञ्चैव कृष्णेनेदं सदो हि नः ॥"

निर्व्वाति स्मेति । निर् + वा + गत्यर्थेति क्तः । "निर्व्वाणोऽवाते ।" ८ । २ । ५० । इति निष्ठातस्य न नः ।) गते वायौ, पुं ॥

निर्व्वादः, पु, (निर्व्वदनमिति । निर् + वद् + भावे घञ् ।) परीवादः । जनवादः । इत्यमरः । ३ । ३ । ८९ ॥ (यथा, रघुः । १४ । ३४ ।

"किमात्मनिर्व्वादकथामुपेक्षे
जायामदोषामुत सन्त्यजामि ॥")

अवज्ञा । (निर्निश्चितं वादः कथनम् ।) निश्चितवादः । वादाभावः । इति भरतः ॥

निर्व्वापः, पु, (निर्व्वपणमिति । निर् + वप + घञ् ।) निवापः । प्रेतभिन्नमृतपितृद्देश्यकदानम् । इत्यमरटीकायां तर्कवागीशः ॥ (यथा, देवीभागवते । २ । ७ । १६ ।

"पुत्त्रेभ्योऽहं ददाम्यद्य निर्व्वापं विधिपूर्व्वकम् ॥"

भिक्षार्थदानम् । यथा, पञ्चतन्त्रे । ५ । २० । "एतस्मिन्नवसरे ब्राह्मणोऽपि कुतश्चित् गृहीतनिर्व्वापः परिभ्रम्य यावदागतः पश्यति तावत् पुत्त्रशोकाभिभूता ब्राह्मणी विलपति ॥" भक्षणम् । इति रामानुजः ॥ यथा, रामायणे । २ । ९१ । ८० ।

नीलवैदूर्य्यवर्णांश्च मृदून् यवससञ्चयान् ।
निर्व्वापार्थं पशूनां ते ददृशुस्तत्र सर्व्वशः ॥")

निर्व्वपणं, क्ली, (निर् + वप + णिच् + ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११४ ॥ दानम् । इति हलायुधः । २ । ३२३ ॥ (निर्व्वाणतासम्पादनम् । निवान इति भाषा ॥ यथा, तिथितत्त्वे ।

"दीपनिर्व्वापणात् पुंसः कुष्माण्डच्छेदनात्
स्त्रियः ।"

स्वार्थे णिच् । वपनम् । यथा, मत्स्यतन्त्रे । १ । ४०५ । "मया तावन्नीतिबीजनिर्व्वापणं कृतम् । परतस्तद्दैवपर्य्यायायत्तम् ॥")

निर्व्वार्य्यः, त्रि, (निश्चयेन व्रियते इति । निर् + वृ + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) सत्त्वसम्पदा सम्पतन् कार्य्यकर्त्ता । इत्यमरः । ३ । १ । १३ ॥ "भयविक्रमव्यसनाभ्युदयादौ निर्व्विकारं मनः सत्त्वं तत्सम्पदा सम्पतन् उद्यम कुर्व्वन् यो निःशङ्को भूत्वा कर्म्म कुरुते स निर्व्वार्य्य उच्यते ।" इति भरतः ॥ अवारणीयश्च ॥

निर्व्वासनं, क्ली, (निर् + वस + णिच् + ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११३ ॥ नगरादेर्व्वहिष्करणम् । इति मेदिनी । ने, १९९ ॥ (यथा, महाभारते । ५ । ९० । ५८ ।

"निर्व्वासनञ्च नगरात् प्रव्रज्या च परन्तप ! ।
नानाविधानां दुःखानामभिज्ञासि जनार्द्दन ॥")

निर्व्वाहः, पु, (निर् + वह + घञ् ।) निष्पत्तिः । समाप्तिः । यथा । "स्वतिथ्या कर्म्मानिर्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशादुपवासाद्याचरणञ्च ।" इति तिथितत्त्वम् ॥ अपि च ।

"यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात्तावदर्थवित् ।
आधिक्ये न्यूनतायाञ्च च्यवते परमार्थतः ॥"

इति भक्तिरसामृतसिन्धौ नारदीयपुराणम् ॥

निर्व्वाहणं, क्ली, (निर् + वह + स्वार्थे णिच् + ल्युट् ।) निर्व्वहणम् । नाट्योक्तौ प्रस्तुतकथासमाप्तिः । इत्यमरटीकायां भरतः ॥

निर्व्विकल्पकं, क्ली, (निर्गतो विकल्पो नानाविधकल्पना यस्मात् । कप् ।) प्रकारताविशेष्यतानापन्नसम्बन्धानवगाह्यतीन्द्रियज्ञानम् । यथा,—

"तत्प्रमाणाप्रमाणापि ज्ञानं यन्निर्व्विकल्पकम् ।
प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत् ॥"
"ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते ॥"

इति च भाषापरिच्छेदः ॥

निर्व्विकल्पसमाधि', पु, (निर्व्विकल्पः समाधिः ।) ज्ञातृज्ञानादिभेदलये अद्वितीयवस्तुनि तदाकाराकारितायाः बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । इति वेदान्तसारः ॥

निर्व्विकारः, त्रि, (निर्गतो विकारो विकृतिर्यस्मात् ।) विकारशून्यः । यथा,—

"रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् ।
आनन्दं निर्म्मलं शान्तं निर्व्विकारं निरञ्जनम् ॥"

इत्यध्यात्मरामायणम् ॥

निर्व्विणः, त्रि (निर् + विद + क्तः । निर्व्विणस्योपसंख्यानात् परस्य णत्वम् पूर्व्वस्य टुत्वम् ।) निर्वृत्तिविशिष्टः । निर्व्वेदयुक्तः । यथा,—

"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्व्विणो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥"

इति भक्तिरसामृतसिन्धुः ॥

निर्व्विन्ध्या, स्त्री, (निर्गता विन्ध्यादिति नित्यसत्पुरुषः ।) विन्ध्यपर्व्वतनिःसृतनदीविशेषः । इति श्रीभागवते । ५।१९ अः ॥ (यथा, मेघदूते । ३० ।

"निर्व्विन्ध्यायाः पथि भव रसाभ्यन्तरं सन्निपत्य ॥")

निर्व्विषा, स्त्री, (निर्गतं विषं यस्याः ।) तृणविशेषः । निर्विषी इति भाषा । तत्पर्य्यायः । अपविषा २ निर्व्विषी ३ विषहा ४ विषापहा ५ विषहन्त्री ६ विषाभावा ७ अविषा ८ विषवैरिणी ९ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कफवातास्रदोषनाशित्वम् । अनेकविषहन्तृत्वम् । व्रणनिर्मूलकारित्वञ्च । इति राजनिर्घण्टः ॥

निर्व्विष्टः, त्रि, (निर् + विश + क्तः ।) कृतनिर्व्वेशः । प्राप्तः । यथा, श्रीभागवते ।

"यत्र निर्व्विष्टमरणं कृतान्तो नाभिमन्यते ॥"

"निजनिर्म्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकात् ननु राजीवदयावशंवदः ॥"

निर्म्मितिः, स्त्री, (निर् + मा + क्तिन् ।) निर्म्माणम् । गठनम् । रचनम् । यथा,—
"नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्म्मितिमादधती भारती कवेर्जयति ॥"
इति काव्यप्रकाशः ॥

निर्म्मुक्तः, पुं, (निर् + मुच् + क्तः ।) मुक्तकञ्चुकः । अचिरात् त्यक्तत्वक् सर्पः । इत्यमरः ।१।८।६॥ त्यक्तसङ्गे, त्रि । इति मेदिनी । ते, ११७ ॥ (यथा, देवीभागवते । ३ । ८ । २० ।
"रागद्वेषाच्च निर्म्मुक्तः कामक्रोधसमावृतः ।
पुनरेव गृहं प्राप्तो यथा पूर्व्वं तथा स्थितः ॥")

निर्म्मुटं, क्ली, (निर्म्मुटति चाक्षिपतीति । निर् + मुट आक्षेपे + कः ।) करशून्यहट्टः । तत्पर्य्यायः । मण्डपाजिरम् २ कवल्लनम् ३ । इति शब्दरत्नावलीत्रिकाण्डशेषौ ॥

निर्म्मुटः, पुं, (निर् + मुट + "इगुपधेति ।" ३ । १ । १३५ । इति कः ।) वनस्पतिः । अपुष्पवृक्षः । इति त्रिकाण्डशेषः ॥ सूर्य्यः । खर्परः । इति हारावली । २५५ ॥

निर्म्मोकः, पुं, (नितरां मुच्यते इति । निर् + मुच् + घञ् ।) सर्पत्वक् । तत्पर्य्यायः । अहिकोषः २ निर्ल्लयनी ३ कञ्चुकः ४ । इति हेमचन्द्रः । ४ । ३८२ ॥ (यथा, आर्य्यासप्तशत्याम् । ३२८ ।
"निजगात्रनिर्व्विशेषस्थापितमपि सारमखिलमादाय ।
निर्म्मोकञ्च भुजङ्गी मुञ्चति पुरुषञ्च वारवधूः ॥"
त्वङ्मात्रम् । यथा, महाभारते । १३ । १४१ । १०२ ।
"त्वङ्निर्म्मोकवसनाश्चीरवल्कलवाससः ।
निर्द्वन्द्वाः सत्पथं प्राप्ता वालिखिल्यास्तपोधनाः ॥"
भावे घञ् ।) मोचनम् । आकाशः । सन्नाहः । इति मेदिनी । के, १११ ॥ (सावर्णिमनोः पुत्त्रविशेषः । यथा, भागवते । ८ । १३ । ११ ।
"अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः ।
निर्म्मोकविरजस्काद्याः सावर्णितनया नृप ! ॥")

निर्म्मोक्षः, पुं, (नितरां मोक्षः ।) त्यागः । इति नानार्थशब्दार्थे अमरः ॥ (यथा, रघुः । १० । २ ।
"न चोपलेभे पूर्व्वेषामृणनिर्म्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यः शोकतमोऽपहम् ॥")

निर्यन्त्रणं, त्रि, (निर् + यन्त्र + ल्युट् ।) अबाधम् । निरर्गलम् । उच्छृङ्खलम् । इति जटाधरः ॥ (यन्त्रणाशून्यम् । यथा, सुश्रुते । १ । ३४ ।
"तत्र, खादेदुष्णतोयसेवी निर्यन्त्रणाविमे ॥")

निर्याणं, क्ली, (निर्याति निर्गच्छति मदोऽनेनेति । निर् + या + करणे ल्युट् ।) गजापाङ्गदेशः । (यथा, माघे । ५ । ४१ ।
"प्रत्यन्यदन्तिनिशिताङ्कुशदूरभिन्ननिर्याणनिर्यदसृजं चलितं निषादी ॥")
मोक्षः । अध्वनिर्गमः । इति मेदिनी । णे, ५७ ॥ (यथा, महाभारते । १३ । ५५ । ६ ।
"निर्याणञ्च रथेनाशु सहसा यत् कृतं त्वया ॥"
पशुपादबन्धनरज्जुः । इति वैजयन्ती ॥ यथा, माघे । १२ । ४१ ।
"निर्याणहस्तस्य पुरो दुधुक्षतः ॥")

निर्यातनं, क्ली, (निर् + यत + णिच् + ल्युट् ।) वैरशुद्धिः । प्रतीकारः । (यथा, हरिवंशे । १७७ । ४७ ।
"तस्मान्निरुद्धहरणं कृतं भवता स्वयम् ।
न ह्यन्यस्य भवेच्छक्तिर्व्वैरनिर्यातनं प्रति ॥")
दानम् । त्यागः । न्यासार्पणम् । न्यस्तद्रव्यस्य समर्पणम् । इत्यमरः । ३ । ३ । ११८ ॥ ऋणादिशुद्धिः । इति भरतः ॥ मारणम् । इति हेमचन्द्रः । ३ । ४४८ ॥

निर्यामः, पुं, (निर्यम्यतेऽनेनेति । निर् + यम + घञ् ।) पोतवाहः । इति हेमचन्द्रः ।३।५४०॥

निर्यासः, पुं, (निर् + यस + घञ् ।) कषायः । क्वाथः । इति शब्दमाला ॥ वृक्षादिक्षीरम् । आटा इति भाषा ॥ तत्पर्य्यायः । वेष्टकः २ । इति रत्नमाला ॥ (यथा, मनुः । ५ । ६ ।
"लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥"
अर्द्धर्चादित्वात् क्लीवेऽपि दृश्यते ॥ ॥
क्वचित् स्वरसोऽपि वाच्यः । यथा, वैद्यकचिकित्सासारसंग्रहे श्लीपदाधिकारे ।
"कदलीकन्दनिर्यासे तत्प्रसूनतुलां पचेत् ।
चतुर्भागावशेषेऽस्मिन् घृतप्रस्थं विपाचयेत् ॥")

निर्युक्तिकं, त्रि, (निर्गता युक्तिर्यस्मात् । कप् ।) युक्तिरहितम् । यथा । "नहि क्रियारहितं वाक्यमस्तीति प्राचां प्रवादो निर्युक्तिकत्वादश्रद्धेयः ।" इति शब्दशक्तिप्रकाशिका ॥

निर्यूषः, पुं, (नितरां यूषः ।) निर्यासः । इति शब्दमाला ॥

निर्यूहः, पुं, शेखरम् । आपीडम् । द्वारम् । निर्यासः । क्वाथरसः । (यथास्य पर्य्यायो वैद्यकरत्नमालायाम् ॥ "क्वाथ कषायो निर्यूहः ॥") नागदन्तः । अवलम्बनार्थं गेहादिभित्तिनिर्गतं काष्ठद्वयम् । इत्यमरमेदिनीकारौ ॥

निर्लक्षणः, त्रि, (निर्गतं लक्षणं यस्मात् ।) लक्षणहीनः । तत्पर्य्यायः । पाण्डुरपृष्ठः २ । इति हेमचन्द्रः । ३ । १०१ ॥ (यथा, गोः रामायणे । २ । ११८ । ५ ।
"निर्लक्षणो लक्षणवान् दुःशीलः शीलवानपि ॥")

निर्लिप्तः, पुं, (निर् + लिप + क्तः ।) श्रीकृष्णः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्याये ।
"निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः ॥"
लेपरहिते, त्रि ॥ (यथा, ब्रह्मवैवर्त्ते ।२।१।१६।
"निर्गुणा च निराकारा निर्लिप्तात्मस्वरूपिणी ॥")

निर्लेपः, त्रि, (निर्गतो लेपो यस्मात् ।) लेपशून्यः । आसङ्गरहितः । यथा,—
"निर्लेपः कृपणकुलो स्मरदशा हारावली निर्गुणा
नैष्ठाम्भोरुहमञ्जनेन रचितं नीरागमोष्ठाधरम् ॥"
इत्यानन्दचम्पूग्रन्थे विश्रुतिस्तवकः ॥
पापशून्यः । यथा, "लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रोऽसि महापाशुपतः ।" इति कुसुमाञ्जलिः ॥

निर्ल्लयनी, स्त्री, (नितरां लीयते संलीनो भवति अचिरस्थायिनीति । निर् + ली + ल्युट् । एषोदरादित्वात् णागमः ।) कञ्चुकः । सर्पत्वक् । इति हेमचन्द्रः । ४ । ३८२ ॥

निर्व्वचनं, क्ली, (निर् + वच + भावे ल्युट् ।) निरुक्तिः । निश्चयकथनम् । यथा, श्रीभागवते । ६ । २० । ३७ ।
"नामनिर्व्वचनं तस्य श्लोकमेकं सुरा जगुः ।"
(प्रशंसा । यथा, महाभारते । १ ।१०८।२३।
"प्रनष्टः शान्तनोर्वंशः समीक्ष्य पुनरुद्धृतम् ।
ततो निर्व्वचनं लोके सर्व्वराष्ट्रेष्ववर्त्तत ॥"
निर्गतं वचनं यत्र । तूष्णीम् । यथा, कुमारे । ७ । १९ ।
"पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्व्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्व्वचनं जघान ॥"
वाक्यातीते, त्रि । यथा, महाभारते ।३।१९९।१६।
"येषां तडागानि महोदकानि
वाप्यश्च कूप्याश्च प्रतिश्रयाश्च ।
अन्नस्य दानं मधुरा च वाणी
यमस्य ते निर्व्वचना भवन्ति ॥")

निर्व्वपणं, क्ली, (निर् + वप + भावे ल्युट् ।) दानम् । इत्यमरः । २ । ७ । ३० ॥ (यथा, मनुः । ३ । २४८ ।
"अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः ॥"
पिण्डदानम् । यथा, तत्रैव । ३ । २६० ।
"एवं निर्व्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम् ।
गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् ॥"
यथा च गोः रामायणे । ६ । १०८ । ४२ ।
"एषा मन्दाकिनी पुण्या नदी सुविमलोदका ।
पितुर्निर्व्वपणं यत्र मया मूलफलैः कृतम् ॥"
पिण्डः । यथा, महाभारते । १३ । ८४ । १४ ।
"ततः समाप्य यथोद्दिष्टं पूर्व्वकर्म्म समाहितः ।
दातुं निर्व्वपणं सम्यक् यथावदुपचक्रमे ॥"
अन्नादिसंविभागः । इति श्रीधरस्वामी ॥ यथा, भागवते । ५ । १२ । १२ ।
"रहूगणैतत् तपसा न याति
न चेज्यया निर्व्वपणाद् गृहाद् वा ॥")

निर्व्वर्णनं, क्ली, (निर् + वर्ण + "सत्यापपाशेति ।" ३ । १ । २५ । इति णिच् + भावे ल्युट् ।) दर्शनम् । इत्यमरः । ३ । २ । ३१ ॥

निर्व्वहणं, क्ली स्त्री, (निर् + वह + भावे ल्युट् ।) निष्ठा । इत्यमरः । १ । ७ । १५ ॥ तत्तु प्रक्रान्ताभिनयनिर्व्वाहः । किंवा नाटके पञ्च सन्धयो भवन्ति । यथा,—
"मुखं प्रतिमुखञ्चैव गर्भो विमर्ष एव च ।
तथा निर्व्वहणञ्चेति नाटके पञ्च सन्धयः ॥"
तत्र पञ्चमस्य सन्धेः संज्ञाद्वयमिदम् । इति भरतः ॥ मुकुटस्त्वाह द्वे पञ्चमसन्धिसमाप्तौ । प्रस्तुतकथासमाप्ताविति यावत् । यथैतदनुक्तौ शब्दार्णवः । निर्व्वहणन्तु निष्ठा स्त्री संहारश्च समापने । प्रक्रान्तकथानिर्व्वाह. । इति मधुमाधवादयः ॥

निर्व्वाणं, क्ली, (निर् + वा गमने + क्तः । तस्य नः ।) अस्तगमनम् । निर्वृतिः । गजमज्जनम् । (यथा, रघु । १ । ७१ ।
"अवन्ध्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः ॥")
सङ्गमः । अपवर्गः । इति मेदिनी । णे, ५८ ॥ (यथा, भागवते । ३ । २८ । ३५ ।
"मुक्ताश्रयं यर्हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मन. सहसा यथार्च्चिः ॥")
विश्रान्तिः । इति हेमचन्द्रः ॥ (समाप्तिः । यथा, भागवते । १ । ६ । २६ ।
"आरब्धकर्म्मनिर्व्वाणो न्यपतत् पाञ्चभौतिक. ॥")
निश्चलम् । शून्यम् । विद्योपदेशनम् । इति शब्दरत्नावली ॥ नाभिदेशे जप्यप्रणवपुटितमातृकापुटितमूलमन्त्रम् । यथा,—
"कुलकुण्डली मूर्द्धि सजप्य हृदि सेतुं विचिन्तयेत् ।
महासेतुं विशुद्धे तु मोडशारे समुद्धरेत् ॥
मणिपुरे तु निर्व्वाणं महाकुण्डलिनीमथः ।
स्वाधिष्ठाने कामवीजं राकिणी मूर्द्धि संस्थितम् ।
विचिन्त्य विधिवद्देवि । मूलाधारान्तिकाङ्क्षिवे । ॥
विशुद्धान्तं स्मरेद्देवि । विप्रतन्तुतनीयसीम् ।
देवीस्थानं द्विजिह्वान्त मन्त्रमूलाश्रितं मुहुः ॥"
निर्व्वाणं यथा,—
"अथ वक्ष्यामि निर्व्वाणं शृणु सावहितानघे ! ।
प्रणवं पूर्व्वमुच्चार्य्य मातृकाद्यं समुच्चरेत् ॥
मातृकाणां समस्ताश्च पुनः प्रणवमुच्चरेत् ।
एवं पुटितमूलन्तु प्रणपेन्मणिपूरके ॥
एवं निर्व्वाणमीशानि ! यो न जानाति पामरः ।
कल्पकोटिसहस्रेषु तस्य सिद्धिर्न जायते ॥"
इत्यागमतत्त्वविलासः ॥
(विष्णुः । यथा, महाभारते । १३ । १४९ । ७५ ।
"त्रिसामा सामगः साम निर्व्वाणं भेषजं भिषक् ॥")

निर्व्वाण, त्रि, (निर् + वा + क्त. । "निर्व्वाणोऽवाते ।" ८ । २ । ५० । इति निष्ठातस्य नः ।) मुक्तः । यथा । निर्व्वाणो मुनि. । नष्टः । यथा । निर्व्वाणो वह्निः । (यथा, कुमारे । ३ । ५२ ।
"निर्व्वाणभूयिष्ठमथास्य वीर्य्यं
सन्धुक्षयन्तीव वपुर्गुणेन ॥")
निमग्नः । यथा । निर्व्वाणो हस्ती । इति विशेष्यनिघ्ने अमरः । ३ । १ ९६ ॥ वाणशून्यश्च ॥

निर्व्वातः, त्रि, (निर्गतो वातो वायुर्यस्मात् ।) वायुरहितः । इत्यमरः । ३ । १ । ९६ । (यथा, महाभारते । २ । ३६ । २८ ।
"असूर्य्यमिव सूर्य्येण निर्व्वातमिव वायुना ।
भासितं ह्लादितञ्चैव कृष्णेनेदं सदो हि नः ॥"
निर्व्वाति स्मेति । निर् + वा + गत्यर्थेति क्तः । "निर्व्वाणोऽवाते ।" ८ । २ । ५० । इति निष्ठातस्य न नः ।) गते वायौ, पुं ॥

निर्व्वादः, पु, (निर्व्वदनमिति । निर् + वद + भावे घञ् ।) परीवादः । जनवादः । इत्यमरः । ३ । ३ । ८९ ॥ (यथा, रघुः । १४ । ३४ ।
"किमात्मनिर्व्वादकथामुपेक्षे
जायामदोषामुत सन्त्यजामि ॥")
अवज्ञा । (निर्निश्चितं वादः कथनम् ।) निश्चितवादः । वादाभावः । इति भरतः ॥

निर्व्वापः, पु (निर्व्वपणमिति । निर् + वप + घञ् ।) निवापः । प्रेतभिन्नमृतपित्रुद्देश्यकदानम् । इत्यमरटीकायां तर्कवागीशः ॥ (यथा, देवीभागवते । २ । ७ । १६ ।
"पुत्रेभ्योऽहं ददाम्यद्य निर्व्वापं विधिपूर्व्वकम् ॥"
भिक्षार्थदानम् । यथा, पञ्चतन्त्रे । ५ । २० ।
"एतस्मिन्नवसरे ब्राह्मणोऽपि कुतश्चित् गृहीतनिर्व्वापः परिभ्रम्य यावदागतः पश्यति तावत् पुत्रशोकाभिभूता ब्राह्मणी विलपति ॥" भक्षणम् । इति रामानुजः ॥ यथा, रामायणे । २ । ९१ । ८० ।
नीलवैदूर्य्यवर्णांश्च मृदून् यवससञ्चयान् ।
निर्व्वापार्थं पशूनां ते ददृशुस्तत्र सर्व्वशः ॥")

निर्व्वापणं, क्ली, (निर् + वप + णिच् + ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११४ ॥ दानम् । इति हलायुधः । २ । ३२३ ॥ (निर्व्वाणतासम्पादनम् । निवान इति भाषा ॥ यथा, तिथितत्त्वे ।
"दीपनिर्व्वापणात् पुंसः कुष्माण्डच्छेदनात् स्त्रियः ॥"
स्वार्थे णिच् । वपनम् । यथा, पञ्चतन्त्रे । १ । ४०५ । "मया तावन्नीतिवीजनिर्व्वापणं कृतम् । परतस्तद्दैवपर्य्यायायत्तम् ॥")

निर्व्वार्य्य', त्रि, (निश्चयेन ध्रियते इति । निर् + वृ + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) सत्त्वसम्पदा सम्पतन् कार्य्यकर्त्ता । इत्यमरः । ३ । १ । १३ ॥ "भयविक्रमव्यसनाभ्युदयादौ निर्व्विकारं मन. सत्त्वं तत्सम्पदा सम्पतन् उद्यमं कुर्व्वन् यो निःशङ्को भूत्वा कर्म्म कुरुते स निर्व्वार्य्य उच्यते ।" इति भरतः ॥ अवारणीयश्च ॥

निर्व्वासनं, क्ली, (निर् + वस + णिच् + ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११३ ॥ नगरादेर्बहिष्करणम् । इति मेदिनी । ने, १८९ ॥ (यथा, महाभारते । ५ । ९० । ५८ ।
"निर्व्वासनञ्च नगरात् प्रव्रज्या च परन्तप ! ।
नानाविधानां दुःखानामभिज्ञास्मि जनार्द्दन ॥")

निर्व्वाहः, पु, (निर् + वह + घञ् ।) निष्पत्तिः । समाप्तिः । यथा । "स्वतिथ्या कर्म्मानिर्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशादुपवासाद्याचरणञ्च ।" इति तिथितत्त्वम् ॥ अपि च ।
"यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात्तावदर्थवित् ।
आधिक्ये न्यूनतायाञ्च च्यवते परमार्थतः ॥"
इति भक्तिरसामृतसिन्धौ नारदीयपुराणम् ॥

निर्व्वाहणं, क्ली, (निर् + वह + स्वार्थे णिच् + ल्युट् ।) निर्व्वहणम् । नाट्योक्तौ प्रस्तुतकथासमाप्तिः । इत्यमरटीकायां भरतः ॥

निर्व्विकल्पकं, क्ली, (निर्गतो विकल्पो नानाविधकल्पना यस्मात् । कप् ।) प्रकारताविशेष्यतानामसम्बन्धानवगाह्यतीन्द्रियज्ञानम् । यथा,—
"तत्प्रमाणाप्रमाणापि ज्ञानं यन्निर्व्विकल्पकम् ।
प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत् ॥"
"ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते ॥"
इति च भाषापरिच्छेदः ॥

निर्व्विकल्पसमाधिः, पु, (निर्व्विकल्पः समाधिः ।) ज्ञातृज्ञानादिभेदलये अद्वितीयवस्तुनि तदाकाराकारितायाः बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । इति वेदान्तसारः ॥

निर्व्विकारः, त्रि, (निर्गतो विकारो विकृतिर्यस्मात् ।) विकारशून्यः । यथा,—
"रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् ।
आनन्दं निर्म्मलं शान्तं निर्व्विकारं निरञ्जनम् ॥"
इत्यध्यात्मरामायणम् ॥

निर्व्विण्णः, त्रि (निर् + विद + क्तः । निर्व्विण्णस्योपसंख्यानात् परस्य णत्वम् पूर्व्वस्य ष्टुत्वम् ।) निर्वेदविशिष्टः । निर्वेदयुक्तः । यथा,—
"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥"
इति भक्तिरसामृतसिन्धुः ॥

निर्व्विन्ध्या, स्त्री, (निर्गता विन्ध्यादिति नित्यसत्पुरुषः ।) विन्ध्यपर्व्वतनिःसृतनदीविशेषः । इति श्रीभागवते । ५ । १९ अः ॥ (यथा, मेघदूते । ३० ।
"निर्व्विन्ध्यायाः पथि भव रसाभ्यन्तरं सन्निपत्य ॥")

निर्व्विषा, स्त्री, (निर्गतं विषं यस्याः ।) तृणविशेषः । निर्विषी इति भाषा । तत्पर्य्यायः । अपविषा २ निर्विषी ३ विषहा ४ विषापहा ५ विषहन्त्री ६ विषाभावा ७ अविषा ८ विषवैरिणी ९ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कफवातास्रदोषनाशित्वम् । अनेकविषहन्तृत्वम् । व्रणनिर्मूलकारित्वञ्च । इति राजनिर्घण्ट. ॥

निर्व्विष्टः, त्रि, (निर् + विश + क्तः ।) कृतनिर्व्वेशः । प्राप्तः । यथा, श्रीभागवते ।
"यत्र निर्व्विष्टमरणं कृतान्तो नाभिमन्यते ॥"

स्थितः । यथा, भागवते । १ । २ । ३३ ।
"स्वनिर्म्मितेषु निर्व्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥"
विवाहितः । कृतनिर्वेशः । यथा । "ज्येष्ठे-निर्व्विष्टे कनीयान् निर्व्विशन् परिवेत्ता भवति ।" इत्युद्वाहतत्त्वम् ॥

निर्व्वीजा, स्त्री, (निर्गतं वीजं यस्याः ।) काकली-द्राक्षा । इति राजनिर्घण्टः ॥

निर्व्वीर, त्रि, (निर्गतो वीरो यस्मात् ।) वीर-शून्यम् । यथा,—
"नाकृष्टं न च टङ्कितं न नमितं नोत्थापितं स्थानतः
केनापीदमहो महद्धनुरतो निर्व्वीरमुर्व्वीतलम् ॥"
इति महानाटकम् ॥

निर्व्वीरा, स्त्री, (निर्गतो वीरवत् पतिः पुत्त्रो वा यस्याः ।) अवीरा । पतिपुत्त्रविहीना । इति हेमचन्द्रः । ३ । १६८ ॥

निर्वृतिः, स्त्री, (निर् + वृ + क्तिन् ।) सुस्थितिः । अस्तङ्गमनम् । सुखम् । इति मेदिनी । ते, १२० ॥ (यथा, देवीभागवते । १ । १९ । ३९ ।
"जनकस्य दशां दृष्ट्वा राज्यस्थस्य महात्मनः ।
स निर्वृतिं परां प्राप्य पितुराश्रमसंस्थितः ॥")
मोक्षः । मृत्युः । इति हेमचन्द्रः । १ । ७५ ॥
(प्राप्तिः । यथा, सुश्रुते । १ । ४१ ।
"भूतेजोवारिजैर्द्रव्यैः शमं याति समीरणः ।
भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्वृतिम् ॥"
विदर्भराजपुत्त्र्यां पुत्त्रे, पुं । यथा, भागवते । ९ । २४ । ३ ।
"क्रथस्य कुन्तिः पुत्त्रोऽभूत् वृष्णिस्तस्याथ निर्वृतिः ॥")

निर्वृत्तः, त्रि, (निर् + वृत् + क्तः ।) निष्पन्नः । इत्यमरः । ३ । १ । १०० ॥ (यथा, रघुः । १७ । १८ ।
"सा तस्य कर्म्मनिर्वृत्तैर्दूरं पश्चात् कृता फलैः ॥")

निर्वृत्तिः, स्त्री, (निर् + वृत् + क्तिन् ।) निष्पत्तिः । तथा च ।
"यथा दुष्टेन दोषेण यथा चानुविसर्पता ।
निर्वृत्तिरामयस्यासौ संप्राप्तिर्ज्जातिरागतिः ॥"
इति माधवकरः ॥
(निर्गता वृत्तिर्यस्मादिति ।) वृत्तिरहिते, त्रि ॥

निर्व्वेदः, पुं, (निर् + विद् + घञ् ।) स्वावमाननम् । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । ४ । १० । ६७ ।
"दैवेनैव कृतं वीर्य्यं प्रल्हादस्तु पराजितः ।
निर्व्वेदं परमं प्राप्तो मत्वा धर्म्मं सनातनम् ॥")
स तु त्रयस्त्रिंशद्व्यभिचारिभावानामादिमः । शान्तरसस्य स्थायिभावश्च । यथा,—
"निर्व्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ॥"
इति काव्यप्रकाशः ॥
तस्य लक्षणं यथा,—
"तत्त्वज्ञानापदीर्ष्यादेर्निर्व्वेदः स्वावमाननम् ॥"
तदुदाहरणम् । यथा,—
"मृत्पिण्डवालुकारन्ध्रपिधानरचनार्थिना ।
दक्षिणावर्त्तशङ्खोऽयं हन्त चूर्णीकृतो मया ॥"
इति साहित्यदर्पणम् ॥
परवैराग्यम् । यथा,—
"तत कदाचिन्निर्व्वेदान्निराकाराश्रितेन च ।
लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृशं मया ॥"
इति मोक्षधर्म्मः ॥
वैराग्यम् । यथा, श्रीभगवद्गीतायाम् ।
"तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च ॥"
(निर्गतो वेदो यस्मादिति ।) वेदरहिते, त्रि ॥

निर्व्वेशः, पुं, (निर् + विश् + भावे घञ् ।) भृतिः । भोगः । इत्यमरः । ३ । ३ । २१९ ॥
"भृतिर्निर्व्वेश भोगः सुख पालनमभ्यवहारो वा ।" इति भरतः ॥ (यथा, भागवते । ६ । २ । ७ ।
"अयं हि कृतनिर्व्वेशो जन्मकोट्यंहसामपि ।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥")
मूर्च्छनम् । इति मेदिनी । शे, २२ ॥ विवाहः । निर्पूर्व्वविशधातुर्व्विवाहार्थे । इति स्मृतिः ॥

निर्व्वेष्टनं, क्ली, (नितरां वेष्टनमत्र ।) नाडि-चीरम् । इति हारावली । २१४ ॥ (निर्गतं वेष्टनं यस्मात् ।) वेष्टनरहिते, त्रि ॥

निर्व्यथनं, क्ली, (निर् + व्यथ + भावे ल्युट् ।) छिद्रम् । इत्यमरः । १ । ८ । २ ॥ व्यथाभावः । निश्चयेन व्यथनञ्च ॥

निर्व्यूढ़, त्रि, (निर् + वि + वह + क्तः ।) त्यक्तम् । इति त्रिकाण्डशेषः ॥ समाप्तम् । यथा,—
"अवदानन्तु यत् कर्म्म निर्व्यूढ़मतिशोभनम् ॥"
इति जटाधरः ॥
(स्थिरम् । यथा, "स्त्रीणां पतिपुत्त्रादिधने न निर्व्यूढं स्वत्वं पुंसान्तु तन्निर्व्यूढ़ अप्रतिबन्धकतया यथेष्टविनियोगार्हत्वात् ॥" तथा च राज-तरङ्गिण्याम् । ३ । ४७२ ।
"स एव भूपतिर्भूत्वा भुवं वर्षशतत्रयम् ।
निर्व्याजशौर्य्यनिर्व्यूढ़पातार्केश्वरमासदत् ॥")

निर्हरणं, क्ली, (निश्चयेन हरणम् । निर् + हृ + ल्युट् ।) शवदाहः । यथा, शुद्धितत्त्वे ।
"तस्य निर्हरणादीनि सम्परेतस्य भार्गव ! ।
युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोऽभवत् ॥"
(दहनम् । यथा, भागवते । ७ । ७ । २९ ।
"वीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥")
निःशेषेण हरणञ्च ॥

निर्हारः, पुं, (निर् + हृ + घञ् ।) शल्यादेरुत्-पाटनम् । इति भरतः ॥ तत्पर्य्यायः । अभ्यव-कर्षणम् २ । इत्यमरः । ३ । २ । १७ ॥ मल-मूत्रादित्यागः । यथा, आह्निकतत्त्वे ।
"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः ॥"
दाहः । इति स्मृतिः ॥ (शवदाहार्थं नयनम् । इति स्वामी ॥ यथा, भागवते । ७ । २ । ३५ ।
"एवं विलपतीनां वै परिगृह्य मृतं पतिम् ।
अनिच्छतीनां निर्हारमर्कोऽस्तं सन्न्यवर्त्तत ॥")
यथेष्टविनियोगः । यथा,—
"न निर्हारं स्त्रियः कुर्य्युः कुटुम्बाद्बहुमध्यगात् ।
स्वकादपि च वित्ताद्धि स्वस्य भर्त्तुरनाज्ञया ॥"
इति मनुः ॥

निर्हारी, [न्] त्रि, (निःशेषेण हरति दूरं गच्छतीति । निर् + हृ + णिनि ।) दूरगामिगन्धः । इत्यमरः । १ । ५ । ११ ॥ (यथा, महाभारते । १२ । १८४ । २८ ।
"इष्टश्चानिष्टगन्धश्च मधुरः कटुरेव च ।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च ॥")

निर्ह्रादः, पुं, (निर् + ह्राद अव्यक्तशब्दे + घञ् ।) ध्वनिः । इत्यमरः । १ । ६ । २३ ॥ (यथा, रघुवंशे । १ । ४१ ।
"श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥")

निलयः, पुं, (निलीयते अस्मिन्निति । नि + ली + "एरच् ।" ३।३।५६ । इति अधिकरणे अच् ।) गृहम् । इत्यमरः । २ । २ । ५ ॥ (यथा, रघुवंशे । २ । १५ ।
"सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुम् ॥"
आश्रयस्थानम् । यथा, भागवते । ८ । १ । ११ ।
"तं भूतनिलयं देवं सुपर्णमुपधावत ॥")

निलिम्पः, पुं, (निलिम्पतीति । नि + लिप + "नौ लिम्पेर्वाच्यः ।" ३।१।१३८ । इत्यस्य वार्त्तिकोक्त्या शः । मुचादित्वान्नुम् ।) देवः । इति त्रिकाण्ड-शेषः ॥

निलिम्पनिर्झरी, स्त्री, (निलिम्पानां देवानां निर्झरी नदी ।) गङ्गा । यथा,—
"जटाकटाहसम्भ्रमद्भ्रमन्निलिम्पनिर्झरी ॥"
इत्यादिरावणकृतशिवस्तोत्रम् ॥

निलिम्पा, स्त्री, (नि + लिप + श । मुचादित्वा-न्नुम् । स्त्रियां टाप् ।) स्त्रीगवी । इति त्रिकाण्डशेषः ॥

निलिम्पिका, स्त्री, (निलिम्पा एव । स्वार्थे कन् टापि अत इत्वम् ।) सौरभेयी । इति हेम-चन्द्रः । ४ । ३३२ ॥

निलीनं, त्रि, (निःशेषेण लीनं सङ्गमम् । नि + ली + क्तः ।) निःशेषेण लीनम् । सङ्गतम् ।
(यथा, भट्टिः । २ । ५ ।
"वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः ।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥"

निवपनं, क्ली, (नि + वप + भावे ल्युट् ।) पितृ-द्देशकदानम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । ९२ । २ ।
"ऋषयो धर्म्मनित्यास्तु कृत्वा निवपनान्युत ।
तर्पणञ्चाप्यकुर्व्वन्त तीर्थाम्भोभिर्यतव्रताः ॥")

निवरा, स्त्री, (नितरां व्रियत इति । नि + वृ + "ग्रहवृदृनिश्चिगमश्च ।" ३।३।५८ । इति कर्म्म-ण्यप् । ततष्टाप् ।) कुमारी । अविवाहिता । इति सिवाधरा ॥

निवसतिः, स्त्री, (निवसन्त्यत्रेति । नि+वस्+
"वहिवस्यर्तिभ्यश्चित् ।" उणां ४ । ६० । इति
अतिच् ।) गृहम् । इति शब्दरत्नावली ॥
निवसथः, पु, (निवसन्त्यत्रेति । नि+वस् आधारे
अथच् ।) ग्रामः । इति हेमचन्द्रः । ४ । २३ ॥
निवसनं, क्ली, (न्युष्यतेऽत्र । नि+वस्+आधारे
ल्युट् ।) गृहम् । इति शब्दरत्नावली ॥ वस्त्रम् ।
इति हलायुधः ॥ (यथा, गौः रामायणे ।२।३७।
"द्वितीयं च परीदधौ चीरमादाय मैथिली ।
चीरस्याकुशला देवी सम्यग्निवसने शुभा ॥")
निवहः, पु, (नितरामुह्यते इति । नि+वह+
पुंसीति घः ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥
(यथा, पञ्चतन्त्रे । ५ । ८ ।
"सकुलं कुशलं सुजनं
विहाय कुलकुशलशीलविकलेऽपि ।
आढ्ये कल्पतराविव
नित्यं रज्यन्ति जननिवहाः ॥"
नितरां वहतीति । नि+वह+पचाद्यच् ।)
सप्तवायुमार्गगतवायुविशेषः । यथा,—
"निवहो यत्र वातेशः केशाविश्च सुखप्रदः ।
न प्रचण्डो न च स्वल्पः प्रमादी च प्रभञ्जनः ॥"
इति ज्योतिषम् ॥
निवातः, त्रि, (नितरां वाति गच्छत्यत्र । नि+वा
+अधिकरणे क्तः ।) आश्रयः । निवासः ।
(निवृत्तो वातो यस्मिन् ।) अवातः । वातशून्यः ।
(यथा, रघुवंशे । ३ । १७ ।
"निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥")
शस्त्राभेद्यं वर्म्म । शस्त्रेण न भिद्यते यत् वर्म्म
कवचम् । इत्यमरभरतौ । ३ । ३ । ८४ ॥
निवातकवचः, पुं, दैत्यविशेषः । स तु हिरण्य-
कशिपोः पौत्रः संह्रादपुत्त्रः । इत्यग्निपुराणम् ॥
(निवातं शस्त्राभेद्यं कवचं येषामिति । दानव-
विशेषे, पुंलिङ्गो बहुवचनान्तः । ते तु इन्द्रादि-
देवैरर्ज्जुनेन निहताः । यथा, महाभारते । ३ ।
१६८ । ७०—७२ ।
"ततो मामब्रवीद्राजन् । प्रहृष्ट बलवृत्रहा ।
नाविषह्यन्तवास्तीति त्रिषु लोकेषु किञ्चन ॥
निवातकवचा नाम दानवा देवशत्रवः ।
समुद्रकुक्षिमाश्रित्य दुर्गे प्रतिवसन्त्युत ॥
तिस्रः कोट्यः समाख्याता तुल्यरूपबलप्रभाः ।
तांस्तत्र जहि कौन्तेय । गुरुस्तेन भविष्यसि ॥"
एतद्विवरणविस्तृतिस्तु तत्रैव विशेषतो द्रष्टव्या ॥)
निवापः, पु,(नितरामुप्यते इति । नि+वप+घञ् ।)
पितॄनुद्दिश्य दानम् । तत्पर्य्यायः । पितृदानम् २ ।
इत्यमरः ।२।७।३१॥ पितृतर्पणम् ३ । इति हेम-
चन्द्रः ।३। ४० ॥ निवपनम् ४ पितृदानकम् ५ ।
इति शब्दरत्नावली ॥ (यथा, रघुवंशे ।८। ८६।
"अपशोकमनाः कुटुम्बिनीं
अनुगृह्णीष्व निवापदत्तिभिः ॥")
दानमात्रम् । यथा । "येभ्यो निवापाञ्जलयः
पितॄणाम् ।" इति भरतः ॥ (न्युप्यते बीज-
मस्मिन्निति । क्षेत्रम् । इति नीलकण्ठः ॥ यथा,
महाभारते । ३ । ३०६ । ६ ।
"अवनिं प्रमदा गाश्च निवापं बहुवार्षिकम् ।
तत्ते विप्र । प्रदास्यामि न तु वर्म्म सकुण्डलम् ॥")
निवारः, पुं, निवारणम् । इति निपूर्ब्बवृधातो-
र्भावे घञ्प्रत्ययनिष्पन्नः ॥
निवारणं, क्ली, (नि+वृ+णिच्+करणे ल्युट् ।)
निश्चयेन वारणम् । निराकरणम् । यथा,—
"यदाश्रयतो धर्म्म इतीतरस्थितो
न मन्यते तस्य निवारणं जनः ॥"
इति श्रीभागवते प्रथमस्कन्धः ॥
निवारितः, त्रि, (नि+वृ+णिच्+क्तः ।) कृत-
निवारणः । यथा,—
"निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितेऽतिवृष्टयः ॥"
इति नैषधे । १ । ११ ॥
निवास, न क स्मृत्याम् । इति कविकल्पद्रुमः ॥
(अदन्त चुरां-परं-सकं-सेट् ।) अनिनिवासत् ।
स्मृतिराच्छादनम् । निवासयति यश्चित्रं चीनां-
शुकमिति हलायुधः । इति दुर्गादासः ॥
निवासः, पुं, (निवसति अस्मिन् । नि+वस्+
अधिकरणे घञ् ।) गृहम् । इति हेमचन्द्रः ।
४ । ५७ ॥ (यथा, विष्णुपुराणे ।१।१३।८४।
"तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥"
आश्रयस्थानम् । यथा, भागवते । १ । ११ । २७ ।
"श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् ।
बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् ॥"
वस्त्रम् । यथा, हरिवंशे । १८२ । ४८ ।
"नमश्चर्म्मनिवासाय नमस्ते पीतवाससे ॥"
भावे घञ् । वासः । यथा, महाभारते ।
१ । १८६ । ६ ।
"कुम्भकारस्य शालायां निवासं चक्रिरे तदा ॥")
निवासी, [न्] त्रि, (निवसतीति । नि+वस्+
णिनि ।) निवासविशिष्टः । निवासकर्त्ता । यथा,—
"ते तु कासरमश्नन्ति देवराः पवितृकवे ।
यमाः कालीनदीतीरे कान्यकुब्जनिवासिनः ॥"
इति कायोदय ॥
निविडं, त्रि, (नितरां विडतीति । नि+विड
आक्रोशे+क ।) निरवकाशम् । तत्पर्य्यायः ।
निरन्तरम् २ निविरीसम् ३ घनम् ४ सान्द्रम् ५
नीरन्ध्रम् ६ बहुलम् ७ दृढम् ८ गाढम् ९
अविरलम् १० । इति हेमचन्द्रः ।६ । ८२ ॥
(यथा, घार्य्यासप्तशत्याम् । ३२० ।
"निबिडघटितोरुयुगलां श्वासोत्कम्पस्तनार्पित-
वसनाम् ॥"
यथा, च रघुवंशे । ६ । ५८ ।
"तस्यापरेष्वपि मृगेषु शरान् मुमुक्षोः
कर्णान्तमेत्य बिभिदे निबिडोऽपि मुष्टिः ॥"
नासिकाया नतम् । नि+"नेर्बिडच्बिरी-
सचौ ।" ५ । २ । ३२ । इति बिडच् । अव-
टीटम् । "तद्योगात् नासिका निविडा ।" इति
सिद्धान्तकौमुदी ॥)
निविरीसं, त्रि, (नि नता नासिका यस्य । "नेर्बि-
डच्बिरीसचौ ।" ५ । २ । ३२ । इति बिरी-
सच् । अवटीटः । इति व्याकरणम् ॥) निवि-
डम् । इति जटाधरः ॥ (यथा, माघे ।७।२० ।
"उरुनिविरीसनितम्बभारखेदि ॥")
निविष्टः, त्रि, (नि+विश+क्तः ।) निवेशयुक्तम् ।
(यथा, कुमारसम्भवे । ५ । ३१ ।
"भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्व्विशेषेष्वतिगौरवाः क्रियाः ॥")
आविष्टम् । प्रविष्टम् । यथा,—
"उडुगणपरिवारो नायकोऽप्योषधीना-
ममृतमयशरीरः कान्तियुक्तोऽपि चन्द्रः ।
भवति विकलमूर्त्तिर्म्मण्डलं प्राप्य भानोः
परसदननिविष्टः को लघुत्वं न याति ॥"
इत्युद्भटः ॥
(आबद्धम् । यथा, देवीभागवते ।९।१५।४५ ।
"बद्धोऽहमिति मे बुद्धिर्नापयाति निरन्तरः ।
संसारवासनाजाले निविष्टा दुःखगामिनी ॥"
स्थितम् । यथा, रामायणे । १ । ५ । ५ ।
"कोशलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥")
निवीतं, त्रि, (निवीयते स्मेति । नि+व्ये आच्छा-
दने+क्तः । सम्प्रसारणम् ।) आच्छादनवस्त्रम् ।
उड़नी इति भाषा ॥ तत्पर्य्यायः । प्रावृतम् २ ।
कण्ठलम्बितयज्ञसूत्रे, क्ली । इत्यमरः । २ । ७ ।
५० ॥ यथा,—
"उपवीतं भवेन्नित्यं निवीतं कण्ठसज्जनम् ॥"
इति कूर्म्मपुराणम् ॥
निवीती, [न्] पुं, (निवीतमस्यास्तीति ।)
निवीतयुक्तः । कण्ठलम्बितयज्ञसूत्रविशिष्टः ।
यथा,—
"कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ।
मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्त्रानृषींस्तथा ॥"
इत्याह्निकतत्त्वम् ॥
निवृतं, त्रि, (निव्रियते आच्छाद्यते स्मेति । नि+
वृ+क्त ।) निवीतम् । उड़नी इति भाषा ॥
इत्यमरटीकायां स्वामी ॥ परिवेष्टितम् । इति
हेमचन्द्रः ॥
निवृत्तः, त्रि, (नि+वृत्+क्त ।) निवृत्ति-
विशिष्टः । विरतः । यथा, श्रीभागवते ।१०।१।४।
"निवृत्ततर्षैरुपगीयमाना-
द्भवौषधाच्छ्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात् ॥"
निवृत्तात्मा, [न्] पुं, (शरीरयन्त्रणात् निवृत्त
आत्मा स्वरूपं यस्येति ।) विष्णुः । (यथा,
महाभारते । १३ । १४९ । ३८ ।
"आत्मवान् निवृत्तात्मा ... संप्रमर्द्दनः ॥"
निवृत्तिः, स्त्री, (नि+वृत्+क्तिन् ।) निवृत्तिः ।
अप्रवृत्तिः । तत्पर्य्यायः । उपरमः २ विरतिः ३

अपरतिः ४ उपरतिः ५ आरतिः ६। इति हेम-
चन्द्रः॥ (यथा, गरुडपुराणे १६६ अध्याये।
"वास्तोदकञ्च समधु पीतमम्लगोलस्य वै।
पामरोगस्य सन्तापनिवृत्तिं कुरुते प्रियः॥")
प्रवृत्तिप्रागभावः। यथा, "प्रवृत्त्युपाधिना
विनाश्य प्राप्त्यन् प्रागभाव एव स्वनिवृत्तिनिरा-
करणात् साध्यमानो निवृत्तिरुच्यते।" इत्येका-
दशीतत्त्वे कलञ्जाधिकरणविचारः॥

निवेदनं, क्ली, (निविद्यते विज्ञाप्यतेऽनेनेति। नि+
विद्+ल्युट्।) आवेदनम्। विज्ञापनम्।
समर्पणम्। यथा,—
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा॥"
इति श्रीभागवतम्। ७। ५। २३॥

निवेदितं, त्रि, (नि+विद्+कर्म्मणि क्तः।)
कृतनिवेदनम्। यथा, नन्दिकेश्वरपुराणे।
"मया निवेदितं भक्त्या गृहाण परमेश्वरि।॥"

निवेशः, पुं, (नि+विश्+घञ्।) विन्यासः।
(निविशत्यस्मिन्निति। अधिकरणे घञ्।)
शिविरम्। (यथा, महाभारते। ५। ८। २।
"तस्य सेनानिवेशोऽभूदर्द्धमिव योजनम्॥")
उद्वाहः। इति मेदिनी। शे, २१॥ (यथा,
महाभारते। १। १४। १।
"ततो निवेशाय तदा स विप्रः संशितव्रतः।
महीं चचार दारार्थी न च दारानविन्दत॥")
निवेशनम्। इति शब्दरत्नावली॥ (यथा,
देवीभागवते। ३। १६। ४४।
"निवेशार्थं गृहं दत्तमन्नपानादिकं तथा।
सेवकं समनुज्ञाप्य परिचर्य्यार्थमेव च॥")

निवेशनं, क्ली, (निविशत्यस्मिन्निति। नि+विश्
+अधिकरणे ल्युट्।) गृहम्। इति जटा-
धरः॥ (यथा, देवीभागवते। ३। २४। ४६।
"स्त्रियोपसंयुतः सोऽथ प्राप्यायोध्यां सुदर्शनः।
सम्मान्य सर्व्वलोकांश्च ययौ राजा निवेशनम्॥")
नगरम्। इति हेमचन्द्रः॥ (यथा, रामायणे।
७। ७५। १८।
"यो हि यत्र समुत्पाद्य पार्थिवस्य निवेशने।
न विधत्ते नृप तत्र नरकं स हि गच्छति॥")
प्रवेशः। निवेशनमस्य यात्ववृत्तिभिर्द्धत्तेति
स्मृतिः॥ (नि+विश्+णिच्+भावे ल्युट्।
स्थापनम्। यथा, रामायणे। ७। ७५। १७।
"निवेशय महाबाहो भरत यद्यपेक्षसे।
शूरस्त्वं कृतविद्यश्च समर्थश्च निवेशने॥"
प्रवेशके, त्रि॥ यथा, हरिवंशे भविष्य-
पर्व्वणि। १८। १३।
"आकाशेऽवस्थितः शब्दः सर्व्वश्रोत्रनिवेशनः।
नमस्ते भगवन्! विष्णो तुभ्यं शब्दात्मने नमः॥")

निवेशनीयः, त्रि, (नि+विश्+अनीयर्।) निवेश-
नार्हः। यथा। तत्पुरुषीयसाधारण्यादिशरीरे
निवेशनीय इति नायं दोषः। इति सव्यभि-
चारे गदाधरः॥

निवेश्यः, त्रि, (नि+विश्+ण्यत्।) निवेशनीयः।
यथा, वादटीकायां गदाधरः। प्रतिबन्धक-
तायां निवेश्यत्वादिति शङ्कते॥ (यथा, हरि-
वंशे। ११५। ८९।
"तदियं पूः प्रकाशार्थं निवेश्या मयि सुव्रत।॥"
शोधनीयः। यथा महाभारते। ३। ३६। १४।
"अवश्यं राजपिण्डस्तैर्निवेश्य इति मे मतिः॥"
"निवेश्यः आनृण्यार्थं शोधनीयः।" इति तट्टी-
कायां नीलकण्ठः॥ विवाहार्हः। यथा, महा-
भारते। १। १६२। ८।
"भवान्निवेश्यः प्रथमं ततोऽयं
भीमो महाबाहुरचिन्त्यकर्म्मा॥"
"निवेश्यः विवाह्यः।" इति तत्र नीलकण्ठः॥)

निशठः, पुं, बलदेवपुत्त्रः। यथा, "बलदेवोऽपि
रेवत्यां निशठोल्मुकौ पुत्त्रावजनयत्।" इति
विष्णुपुराणे। ४ अंशे १५ अध्यायः॥

निशमनं, क्ली, (नि+शम+णिच्+ल्युट्।)
दर्शनम्। श्रवणम्। इति मेदिनी। ने, १६०॥

निशा, स्त्री, (नितरां श्यति तनूकरोति व्यापारा-
निति। नि+शो+कः। टाप्।) रात्रिः।
तत्पर्य्यायः। रात्री २ रजोजननी ३ शर्व्वरी ४
चक्रभेदिनी ५ घोरा ६ श्यामा ७ याम्या ८
दोषा ९ तुङ्गी १० भौती ११ शताक्षी १२
वास्तवा १३ उषा १४ वासतेयी १५ तमा १६
निट् १७। इति त्रिकाण्डशेषः॥ अवशिष्टो
रात्रिशब्दे द्रष्टव्यः॥ (यथा, ऋतुसंहारे।
१। ९।
"सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः।
विलोक्य नियन्त्रणमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम्॥")
हरिद्रा। दारुहरिद्रा। इति मेदिनी। शे, ८॥
(अस्याः पर्य्यायो यथा,—
"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका॥"
इति वैद्यकरत्नमालायाम्॥)
मेषवृषमिथुनकर्कटधनुर्मकरलग्नानि। यथा,—
"अजगोमितयुग्मञ्च कर्किधन्विमृगास्तथा।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः॥"
इति ज्योतिस्तत्त्वम्॥

निशाकरः, पुं, (निशां करोतीति। निशा+
कृ+"दिवाविभानिशेति।" ३। २। २१। इति
टः।) चन्द्रः। इत्यमरटीका॥ (यथा, पञ्च-
तन्त्रे। २। २०।
"रविनिशाकरयोर्ग्रहपीडनं
गजभुजङ्गविहङ्गमबन्धनम्।
मतिमताञ्च निरीक्ष्य दरिद्रतां
विधिरहो बलवानिति मे मतिः॥")
कुक्कुटः। इति शब्दरत्नावली॥ (निशाकरश्चन्द्रः
शिरोदेशेऽस्यास्तीति। अच्। महादेवः। यथा,
महाभारते। १३। १७। ७७।
"इतिहासः सकल्पश्च गौतमोऽथ निशाकरः॥")

निशागणः, पुं, (निशानां रात्रीणां गणः।)
रात्रिसमूहः। तत्पर्य्यायः। गणरात्रम् २।
इति हेमचन्द्रः॥

निशाचरः, पुं, (निशायां रात्रौ चरतीति।
निशा+चर+"चरेष्टः।" ३। २। १६। इति
टः।) राक्षसः। (यथा, रघुः। १०। ४५।
"अचिरात् यज्वभिर्भागं कल्पितं विधिवत् पुनः।
मायाविभिरनालोच्यमादास्यध्वे निशाचरैः॥")
शृगालः। पेचकः। सर्पः। इति मेदिनी। रे,
२७२॥ चक्रवाकः। इति शब्दरत्नावली॥
भूतः। इति धरणिः॥ चोरकः। इति राज-
निर्घण्टः॥ (अयन्तु ग्रन्थिपर्णस्य भेदः। भटे
उर इति नेपालदेशे भवति।
"निशाचरो धनहरः कितवो गणहासकः।
रोचको मधुरस्तिक्तः कटुपाके कटुर्लघुः॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफा-
निलान्।
रक्षाश्रीस्वेदमेदोऽस्रज्वरगन्धविषव्रणान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
महादेवः। यथा, महाभारते। १३।१७।६७।
"बहुवेगो महावेगो मनोवेगो निशाचरः॥")
रात्रिचरमात्रे, त्रि॥

निशाचरी, स्त्री, (निशायां चरतीति। चर+
टः। स्त्रियां ङीप्।) कुलटा। इति मेदिनी।
रे, २७३॥ केशिनीनामगन्धद्रव्यम्। इति जटा-
धरः॥ राक्षसी। यथा,—
"अनिवृत्तिनिशाचरी मम महान्तरायं स्थिता
निहन्ति निगमागमस्मृतिपुराणशास्त्रोदिताम्।
क्रियां तदनुगा सखी हृदय एव चिन्ताविशु-
न्तयोर्दमनकारणं त्वमसि केवलं श्रूयते॥"
इत्युद्भटः॥
(यथा च रघुः। ११। २०।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा॥"
"अत्र ताडकायाः अभिसारिकया समाधि-
रभिधीयते रामेति। निशासु चरतीति
निशाचरी राक्षसी अभिसारिका च।" इति
तत्र मल्लिनाथः॥)

निशाचर्म्म, [न्] क्ली, (निशायाश्चर्म्मेव आवर-
कत्वात्।) अन्धकारः। इति त्रिकाण्डशेषः॥

निशाजलं, क्ली, (निशोद्भवं जलम्। मध्यपद-
लोपिसमासः।) हिमम्। इति त्रिकाण्डशेषः॥

निशाटः, पुं, (निशायां रात्रौ अटतीति। अट+
अच्।) पेचकः। इति हेमचन्द्रः। ४। ३६०॥
निशाचरे, त्रि॥

निशाटकः पुं, (निशायां अटति निशावत् कृष्णत्व
अटतीति वा। अट+क्वुन्।) गुग्गुलुः। इति
राजनिर्घण्टः॥ (क्रूराचिचरे, त्रि॥)

निशाटनः, पुं (निशायां अटतीति। अट गतौ+
ल्युः।) पेचकः। इति हलायुधः॥ निशाचरे, त्रि॥

निशातः, त्रि, (नि + शो निशाने + क्तः । "शाच्छो-रन्यतरस्याम् ।" ७ । ४ । ४१ । इति पक्षे इत्वाभावः ।) शाणितः । इति हेमचन्द्रः ॥

निशादः, पुं, (निशायां अत्ति भक्षयतीति । अद + अच् ।) निषादः । इत्यमरटीकायां रमानाथः ॥ त्रि, निशाभुक् ॥

निशादिः, स्त्री, (निशाया आदिर्यत्र ।) सन्ध्या । इति राजनिर्घण्टः ॥

निशान्तं, क्ली, (निशाम्यते विश्रम्यतेऽस्मिन्निति । नि + शम + अधिकरणे क्तः ।) गृहम् । इत्यमरः । २ । २ । ५ ॥ (यथा, रघुः । १६ । ४० ।
"तस्याः स राजोपपदं निशान्तं
कामीव कान्ताहृदयं प्रविश्य ॥"
निशाया अन्तो यत्र ।) उषा । (यथा, मनुः । ४ । ९९ ।
"न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः
स्वपेत् ॥")
शान्ते, त्रि । इति मेदिनी । ते, ११९ ॥

निशान्धा, स्त्री, (निशायां अन्धयति उपसंहरति आत्मानमिति । अन्ध उपसंहारे + अच् + टाप् ।) जतुकालता । इति राजनिर्घण्टः ॥ (निशायां अन्धः ।) रात्र्यन्धे, त्रि ॥

निशापतिः, पुं, (निशायाः पतिः ।) चन्द्रः । (यथा, सूर्य्यसिद्धान्ते । २ । ४७ ।
"स्वमन्दभुक्तिसंशुद्धा मध्यभुक्तिर्निशापतेः ।
दोर्ज्यान्तरादिकं कृत्वा भुक्तावृणधनं भवेत् ॥")
कर्पूरः । इत्यमरः ॥ (निशायामेव पतिरिति विग्रहे क्वचित् यज्ञनाशक्या उपपतिरपि । यथा, आर्य्यासप्तशत्याम् । ३५२ ।
"प्राङ्गणकोणेऽपि निशापतिः स तापं सुधा-
मयो हरति ।
यदि मां रजनिज्वर इव सखि ! स न निरु-
णद्धि गेहपतिः ॥")

निशापुष्पं, क्ली, (निशायां रात्रौ पुष्यति विक-सतीति । पुष्प विकासे + अच् ।) उत्पलम् । इति राजनिर्घण्टः ॥

निशाबलः, पुं, (निशायां रात्रौ बलं यस्य ।) मेषवृषमिथुनकर्कटधनुर्मकरराशयः । इति ज्योतिषम् ॥

निशाभङ्गा, स्त्री, (निशा हरिद्रा तद्वत् भङ्गो यस्याः ।) दुग्धपुच्छी । इति शब्दचन्द्रिका ॥ दुग्धपेया इति भाषा ॥

निशामणिः, पुं, (निशाया मणिरिव ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

निशामनं, क्ली, (नि + शम + णिच् + ल्युट् ।) दर्शनम् । आलोचनम् । इति मेदिनी । ने, १९० ॥ श्रवणम् । इति हेमचन्द्रः । ३ । २४० ॥

निशामृगः, पुं, (निशाचरो मृगः पशुः ।) शृगालः । इति शब्दरत्नावली ॥

निशारणं, क्ली, (नि + शॄ हिंसे + णिच् + ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११२ ॥ (निशाया रणम् ।) रात्रियुद्धम् ॥ (निशाया रणः शब्दः ।) रात्रिशब्दे, पुं ॥

निशारत्नं, क्ली, (निशाया निशायां वा रत्नमिव ।) चन्द्रः । इति हेमचन्द्रः । २ । १९ ॥

निशारुकः, पुं, रूपकभेदः । यथा,—
"दृढः प्रौढोऽथ खचरो विभवश्चतुरक्रमः ।
निशारुकः प्रतितालः कथिताः सप्त रूपकाः ॥"
तस्य लक्षणं यथा,—
"लघुद्वन्द्वं गुरुद्वन्द्वं तन्न्यासतालकः स्मृतः ।
चतुर्विंशतिवर्णैस्तु रसे हास्ये निशारुकः ॥"
तालविशेषः । यथा,—
"प्रविश्य नर्त्तको रङ्गं विकीर्य्य कुसुमादिकम् ।
निशारुकेण तालेन कोमलं नृत्यमाचरेत् ॥"
इति सङ्गीतदामोदरः ॥

निशावनः, पुं, (निशावत् अन्धकारजनकं वनं यत्र ।) शणः । इति राजनिर्घण्टः ॥

निशावृन्दं, क्ली, (निशानां वृन्दं समूहः ।) रात्रिगणः । बहुनिशाः । इति शब्दरत्नावली ॥

निशावेदी, [न्] पुं, (निशां निशापरिमाणं वेत्ति वेदयति वा । विद वा वेदि + णिनिः ।) कुक्कुटः । इति हेमचन्द्रः । ४ । ३९० ॥

निशाहसः, पुं, (निशाया रात्रौ हसो हासो विकासो यस्य ।) कुमुदम् । इति त्रिकाण्डशेषः ॥

निशाह्वा, स्त्री, (निशाया आह्वा आख्या आह्वा यस्याः ।) हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥

निशितं, क्ली, (नि + शो + क्तः । "शाच्छोरन्य-तरस्याम् ।" ७ । ४ । ४१ । इति इत्वम् ।) लौहम् । इति राजनिर्घण्टः ॥

निशितः, त्रि, (नि + शो + क्तः ।) शाणितः । इत्यमरः । ३ । १ । ९१ ॥ (यथा, महाभारते । १ । १३४ । ६५ ।
"तद्वाक्यसमकालन्तु वीभत्सुर्निशितैः शरैः ।
अवार्य्यैः पञ्चभिर्ग्राहं मग्नमभ्यस्यताडयत् ॥")

निशिपुष्पा, स्त्री, (निशि पुष्यति विकाशते इति । पुष्प + अच् । टाप् ।) शेफालिका । इति त्रिकाण्डशेषः ॥

निशिपुष्पिका, स्त्री, (निशिपुष्पा + स्वार्थे कन् ।) शेफालिका । इति शब्दरत्नावली ॥

निशिपुष्पी, स्त्री, शेफालिका । निशि रात्रौ विक-शितं पुष्पमस्या इति व्युत्पत्त्या मध्यपदलोपः सप्तम्या अलुक् च ततो जातेरत इति ङीप् ॥

निशीथः, (निसरां शेतेऽत्रेति । नि + शी + "निशीथगोपीथावगथाः ।" उणां । २ । ९ । इति थक्प्रत्ययेन निपातनात् साधुः ।) अर्द्ध-रात्रः । इत्यमरः । १ । ४ । ६ ॥ (यथा, रघुः । ३ । १५ ।
"निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव ॥")
रात्रिमात्रम् । इति मेदिनी । थे, २० ॥ (यथा, ऋतुसंहारे । १ । ३ ।
"सुतन्त्रीगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

निशीथिनी, स्त्री, (निशीथोऽस्त्यस्या इति । इनिः । ङीप् ।) रात्रिः । इत्यमरः । १ । ४ । ४ ॥

निशीथिनीनाथः, पुं, (निशीथिन्या नाथः ।) चन्द्रः । इति हलायुधः ॥

निशीथ्या, स्त्री, रात्रिः । इति भूरिप्रयोगः ॥

निशुम्भः, पुं, (नि + शुम्भ हिंसायाम् + भावे घञ् ।) वधः । इति हेमचन्द्रः । ३ । ३६३ ॥ दानवविशेषः । यथा,—
"कश्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम ।
तस्यास्तु द्वौ सुतावास्तां सहस्राक्षाद्बलाधिकौ ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरासुरः ।
तृतीयो नमुचिर्नाम महाबलसमन्वितः ॥"
इति वामनपुराणे ५२ अध्यायः ॥
(अयं हि भगवत्या निहतः । इति मार्कण्डेय-पुराणम् ॥ अपरोऽसुरविशेषः । यदुक्तं मार्क-ण्डेये । ९१ । ३६—३७ ।
"वैवस्वतेऽन्तरे प्राप्तेऽष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥")

निशुम्भनं, क्ली, (नि + शुम्भ हिंसायाम् + भावे ल्युट् ।) मारणम् । इति हलायुधः ॥

निशुम्भमर्द्दिनी, स्त्री, (निशुम्भं मर्द्दयतीति । मृद + णिनिः । ङीप् ।) दुर्गा । इति हेमचन्द्रः ॥

निशुम्भशुम्भमथनी, स्त्री, (निशुम्भं शुम्भञ्च मथ्नातीति । मन्थ विलोडने + ल्युः । नलोपः । ततो ङीप् ।) दुर्गा । यथा, देवीपुराणे ।
"निशुम्भशुम्भमथनी देवी वेदेषु गीयते ॥"

निशुम्भी, [न्] पुं, (निशुम्भो मोहनाशोऽस्त्य-स्येति । इनिः ।) बुद्धविशेषः । तत्पर्य्यायः । हेरम्बः २ हेरुकः ३ चक्रसम्बरः ४ देवः ५ वज्र-कपाली ६ शशिशेखरः ७ वज्रटीकः ८ । इति त्रिकाण्डशेषः ॥

निशैतः, पुं, (निशायामपि एतं ईषद्गमनं यस्य ।) बकः । इति त्रिकाण्डशेषः ॥

निश्चयः, पुं (निश्चीयतेऽनेनेति । निर् + चि + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) निःसंशयज्ञानम् । तत्पर्य्यायः । निर्णयः २ । इत्यमरः । १ । ५ । ३ ॥ निर्णयनम् ३ निचयः ४ । इति शब्दरत्नावली ॥ (यथा, देवी-भागवते । १ । १९ । ३५ ।
"देहोऽयं मम बन्धोऽयं न ममेति च मुक्तता ।
तथा धनं गृहं राज्यं न ममेति च निश्चयः ॥")
"तदभाववदप्रकारा धीस्तत्प्रकारा तु निर्णयः ॥"
इति भाषापरिच्छेदः ॥
(अर्थालङ्कारविशेषः । तल्लक्षणादिकं यथा, साहित्यदर्पणे । १० । ५६ ।
"अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः ॥"
उदाहरणं यथा,—
"वदनमिदं न सरोजं नयने नेन्दीवरे एते ।
इह सविधे मुग्धदृशो मधुकर । न मुधा परि-
भ्राम्य ॥")

निश्चला, स्त्री, (निश्चलतीति । निर् + चल + अच् । टाप् ।) शालपर्णी । इति राजनिर्घण्टः ॥

पृथिवी ॥ (नदीविशेषः । यथा, मात्स्ये । ११३ । २२ ।
"कौशिकी तु तृतीया च निश्चला गण्डकी तथा ।
इक्षुर्लोहितमित्येता हिमवत्पार्श्वनिःसृताः ॥")
अचले, त्रि । यथा,—
"निवसतु तव गेहे निश्चला सिन्धुपुत्री ॥"
इत्याद्युद्भटः ॥

निश्चलाङ्गः, पुं, (निश्चलवत् अङ्गं यस्य ।) वकः । इति राजनिर्घण्टः ॥ पर्व्वतादिः । स्पन्दरहिते, त्रि ॥

निश्चायकः, त्रि, (निश्चिनोतीति । निर्+चि+ण्वुल् ।) निश्चयकर्त्ता । निर्णायकः । यथा, अनुपाधित्वनिश्चायकदर्शनस्य न हेतुत्वमिति व्याप्तिग्रहमाथुरी ॥

निश्चारकः, पुं, (निश्चरतीति । निर्+चर+ण्वुल् ।) पुरीषचयः । वायुः । स्वच्छन्दम् । इति मेदिनी । के, १६५ ॥

निश्चिन्त, त्रि, (निर्गता चिन्ता यस्मात् ।) चिन्तारहितः । यथाह कश्चित् ।
"मूर्खत्वं सुलभं भजस्व कुमते ! मूर्खस्य चाष्टौ गुणा
निश्चिन्तो बहुभोजकोऽतिमुखरो रात्रिन्दिवा स्वप्नभाक् ।
कार्य्याकार्य्यविचारणादिरहितो मानापमाने समे
दत्त्वा सर्व्वजनस्य मूर्द्ध्नि चरणौ मूर्खश्चिरं जीवतु ॥"

निश्चीयमान, त्रि, (निर्+चि+कर्म्मणि शानच् ।) निश्चयविषयः । यथा । ननु तथापि एवकारस्य निश्चीयमानस्यैव सार्थकत्वाभावात् कुतः प्रकृतित्वमिति शब्दशक्तिप्रकाशिकाटीकायां रामभद्रः ॥

निश्चुक्कणं, क्ली, (निःशेषेण चुक्कणम् ।) दन्तशाणम् । इति त्रिकाण्डशेषः ॥ मिसी इति भाषा ॥

निश्चेष्ट, त्रि, (निर्गता चेष्टा यस्मात् ।) चेष्टारहितः । निश्चेष्टितः । यथा,—
"गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ।
अव्यक्तरावो न्यपतत् सहबालो व्यसुर्व्रजे ॥"
इति श्रीभागवते दशमे ॥

निश्वासः, पुं, (नि+श्वस+भावे घञ् ।) बहिर्मुखश्वासः । तत्पर्य्यायः । प्राणः २ एतनः ३ । इति हेमचन्द्रः ॥ (यथा, ब्रह्मवैवर्त्ते । २।१।८६ ।
"महत्तं सर्व्वब्रह्माण्डं प्रोक्ता निःश्वासमात्रतः ॥")

निश्वाससंहिता, स्त्री, (निश्वासाख्या संहिता ।) शिवप्रणीतशास्त्रविशेषः । यथा,—
"एवमभ्यर्थितस्तैस्तु पुराह द्विजसत्तमाः ।
वेदक्रियासमायुक्तां कृतवानस्मि संहिताम् ॥
निश्वासाख्यां ततस्तस्यां लीना वाभ्रव्यशाण्डिलाः ।
निश्वाससंहितायां हि लक्षमात्रप्रमाणतः ॥
सैव पाशुपती दीक्षा योगः पाशुपतस्य हि ।
एतस्मादिदमार्गाद्धि यदन्यदिह जायते ॥
तत् क्षुद्रकर्म्म विज्ञेय रौद्रं शौचविवर्ज्जितम् ॥"
इति वराहपुराणम् ॥

निषङ्ग, पुं, (नितरां सजन्ति शरा यत्र । नि+सन्ज+अधिकरणे घञ् ।) तूणीरः । इत्यमरः । २ । ८ । ८८ ॥ (यथा, रघुः । २ । ३० ।
"ततो मृगेन्द्रस्य मृगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः ॥")
सङ्गः । इति मेदिनी । गे, ४० ॥

निषङ्गथिः, पुं, (नि+सन्ज+"गौ सन्जेर्थिन् ।" उणां । ४ । ८७ । इति भावे थिन् । चित्वात् कुत्वम् । ततः षत्वम् ।) समालिङ्गः । आलिङ्गनम् । इत्युणादिकोषः । १ । १९१ ॥ धन्वी । रथः । स्कन्धः । तृणम् । सारथिः । इति सङ्क्षिप्तसारोणादिवृत्तिः ॥ (आलिङ्गके, त्रि । इत्युज्ज्वलदत्तः ॥)

निषङ्गी, [न्] पुं स्त्री, (निषङ्गोऽस्यस्येति । निषङ्ग+इनिः ।) धनुर्धरः । इत्यमरः । २ । ८ । ६९ ॥ (यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ॥"
स्वनामख्यातो धृतराष्ट्रपुत्त्रः । इति महाभारतम् । १ । ११७ । ११ ॥)

निषण्णः, त्रि, (निषीदति स्मेति । नि+सद्+गत्यर्थेति क्तः । "रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः ।" ८ । २ । ४२ । इति निष्ठातस्य धातोर्दकारस्य च नः ।) उपविष्टः । यथा,—
"पादावसुच्चयन्तौ श्रीर्देवकवाम्बरणान्तिके ।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रिया इति ॥"
इति तिथ्यादितत्त्वम् ॥

निषण्णकं, क्ली, (निषण्ण+संज्ञायां कन् ।) सुनिषण्णकम् । इति शब्दरत्नावली ॥

निषदः, पुं, (निषीदन्ति षड्जादयः स्वरा यत्र । नि+सद्+बाहुलकात् अप् ।) निषादस्वरः । इत्यमरटीकायां स्वामी ॥ (स्वनामख्यातनृपविशेषः । यथा, महाभारते । २ । ८ । १५ ।
"भङ्गासुरिः सुनीथश्च निषदोऽथ वहीनरः ॥")

निषद्या, स्त्री, (निषीदन्त्यस्यामिति । नि+सद्+"संज्ञायां समजनिषदेति ।" ३ । ३ । ९९ । इति अधिकरणे क्यप् ।) पण्यविक्रयशाला । इत्यमरः । २ । २ । २ ॥ हट्टः । इत्यन्ये । इति भरतः ॥ क्षुद्रखट्वा । इति त्रिकाण्डशेषः ॥

निषद्वर, पुं, (निषीदन्ति विषण्णा भवन्ति जना अत्रेति । नि+सद विषादे गतौ+"गौ सदे. ।" उणां । २ । १२४ । इति ष्वरच् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) कर्द्दमः । इत्यमरः । १ । १० । ९ ॥

निषद्वरी, स्त्री, (नि+सद विषादे+अधिकरणे ष्वरच् । चित्वात् ङीप् ।) रात्रिः । इति मेदिनी । रे, २७३ ॥

निषधः, पुं, पर्व्वतविशेषः । इत्यमरः । २ । ३ । ३ ॥ स तु इलावृतस्य दक्षिणे हरिवर्षस्य सीमापर्व्वतः । नागायतः । अयुतयोजनोत्सेधः । द्विसहस्रयोजनविस्तीर्णः । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥ कठिनम् । देशविशेषः । (यथा, महाभारते । ३ । ५३ । ३ ।
"ब्रह्मण्यो वेदवित् शूरो निषधेषु महीपतिः ॥")
तद्देशीयराजः । इति मेदिनी । धे, ३३ ॥ निषादस्वरः । इति हेमचन्द्रः । ६ । ३७ ॥ (रामप्रपौत्त्रे सूर्य्यवंशीयनृपभेदे । यथा, हरिवंशे । १५ । २६ ।
"रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः ।
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ॥")

निषादः, पुं, (निषद्यते ग्रामशेषसीमायाम् । यद्वा, निषीदति पापमत्र । नि+सद्+कर्म्मणि अधिकरणे वा घञ् ।) चण्डालः । इत्यमरः । २ । १० । २० ॥ वेणशरीरोद्भववर्णविशेषः ॥ यथा, अग्निपुराणे ।
"मथ्यमाने ततो राज्ञस्तस्मिन्नूरौ प्रजज्ञिवान् ।
ह्रस्वोऽतिपरुषः कृष्णस्तस्मयात् प्राञ्जलिः स्थित ॥
तं मन्त्रिविह्वलं दृष्ट्वा निषीदेत्यब्रुवंस्तदा ।
निषादवंशकर्त्ता स बभूव मुनिसत्तमाः ! ॥
धीवरानसृजत् चापि वेणकल्मषसम्भवान् ।
ये चान्ये विन्ध्यनिलयाः शवरा नाहलादयः ॥
अधर्म्मरुचयो ये च विद्धि तान् वेणसम्भवान् ॥"
पारिभाषिकचण्डालो यथा, मार्कण्डेयपुराणे ।
"आशाकर्त्तुस्तदाता च दातुश्च प्रतिषेधकः ।
शरणागतं यस्त्यजति स चण्डालोऽधमो नरः ॥"
धीवरविशेषः । इति मेदिनी । दे, ३४ ॥ (निषीदन्ति षड्जादयः स्वरा यत्र । नि+सद्+घञ् ।) सप्तस्वरान्तर्गतशेषस्वरः । स तु नारदमते हस्तिस्वरतुल्यस्वरः । अस्योच्चारणस्थानं ललाटम् । व्याकरणमते दन्तः । अथ वैश्यवर्णः । सर्व्वस्वराणां मध्ये उच्चः । अस्य जातिः सम्पूर्णा । अस्य कूटतानाः ५०४० । प्रत्येकतानम् ५६ समुदायेन २८२४० भवन्ति । अस्य स्वरूपः गणेशतुल्यः । कृष्णश्वेतवर्णः । स्थानं पुष्करद्वीपः । देवता सूर्य्यः । वारः शनिः । समय निशान्ते ८ दण्ड—३४ पलानि । अस्य श्रुतिः उग्रा क्षोभिनी च । मूर्च्छना मन्द्रस्थाने सखा । मध्यस्थाने अहङ्कृता । तारस्थाने कोपना च । निषादवर्ज्जिता रागिणी आसावरी मल्लारी च । नादपुराणमते । नि सप्तमोऽयम् वीणायां धैवतावधिषड्जस्थानपर्य्यन्तं प्रथमसप्तकतृतीयांशस्य शेषसमुदायबीणातन्त्रीनिषादस्थानं भवति । इति सङ्गीतशास्त्रम् ॥ * ॥
"षड्जादयः षडेतेऽत्र स्वराः सर्व्वे मनोहराः ।
निषीदन्ति यतो लोके निषादस्तेन कथ्यते ॥
चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।
ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके ॥"
इति सङ्गीतदामोदरः ॥
(अस्य असुरवंशे उत्पत्तिः । वैश्यो जातिः । विचित्रो वर्णः । पुष्करद्वीपे जन्म । ऋषिस्तुम्बुरुः । सूर्य्यो देवता । जगती छन्दः । करुणे उपयोगित्वम् ॥ इति सङ्गीतदर्पणम् ॥)

निषादी, [न्] पुं, (निषीदत्यवश्यमिति। नि+सद्+आवश्यके णिनिः।) हस्त्यारोहः। इत्यमरः। २।८।५९॥ माहुत् इति ख्यातः॥ (यथा, माघे। ५।४१।
"प्रत्यन्यदन्तिनिशिताङ्कुशदूरभिन्न-
निर्याणनिर्यदसृजं चलितं निषादी॥"
उपविष्टे, त्रि। यथा, रघुः। १।५२।
"आतपात्ययसंक्षिप्तनीवारासु निषादिभिः।
मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु॥")

निषिद्धं, त्रि, (निषिध्यते स्मेति। नि+षिध+क्त।) निषेधविषयम्। यथा,—
"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम्॥"
इति तिथितत्त्वम्॥

निषिद्धकर्म्माणि यथा,—
मान्धातोवाच।
"ब्रूहि कर्म्मान् सुखोपायान् मद्विधानां सुखावहान्।
निषिद्धमपि यद्विप्र तदेव प्रथमं वद॥
नारद उवाच।
व्याकर्षणं शत्रुनिवर्हणञ्च
कृषिर्वणिज्या पशुपालनञ्च।
शुश्रूषणञ्चापि तथार्थहेतो-
रकार्य्यमेतत् परमं ब्राह्मणस्य॥
राजप्रेष्यं कृषिधनं जीवनञ्च वणिज्यया।
कौटिल्यं कौलटेयञ्च कुशीदञ्च विवर्ज्जयेत्॥
शूद्री राजन्! स भवति धर्म्मापेतो दुराचरः।
वृषली रमते यस्तु पिशुनो नर्त्तनस्तथा॥
ग्रामप्रेष्यो विकर्म्मा च यो द्विजश्चरिताव्रतः।
वेदानपि जपन् शूद्रे समः स परिकीर्त्तितः।
कृत्येषु वर्ज्जनीयोऽसौ वैदिके तान्त्रिकेऽपि च॥
निर्म्मर्य्यादे चाशुचौ क्रूरवृत्ते
हिंसात्मके त्यक्तधर्म्मे प्रवृत्ते।
हव्यञ्च कव्यञ्च न देयमेव
दानञ्च दत्तं विफलं नरेन्द्र!॥
राजन्यानां कराधान विना वैवाहिकञ्च यः।
प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः॥
युद्धे पलायनञ्चैव तथा कातरताधिषु।
अपालनं प्रजानाञ्च दाने धर्म्मे विरक्तता॥
अनवेक्षा स्वराष्ट्रस्य ब्राह्मणानामनादरः।
अमात्यानामसम्मानं तेषां कर्म्मानवेक्षणम्॥
भृत्यानाञ्च परीहासो निषिद्धः चात्रजन्मनाम्॥
वैश्यानां धनलोभेन मिथ्यामूल्यप्रकाशनम्।
अपालनं पशूनाञ्च अनिष्ट्या विभवे सति॥
शूद्राणाञ्च महाराज! ह्यथैव धनसञ्चयः।
शुश्रूषोः कृतकार्य्यस्य कृतसन्तानकर्म्मणः॥
अभ्यनुज्ञातराज्यस्य शूद्रस्य जगतीपते!।
अध्यात्मरतस्यापि दग्धधर्म्मगतस्य च॥
आश्रमा विहिताः सर्व्वे वर्ज्जयित्वा निराशिषम्॥"
इति पाद्मे स्वर्गखण्डे २७ अध्यायः॥

अपि च।
"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः शुचिः।
अभ्युत्थानं न कुर्व्वीत वर्षं तेनापि हिंसितः॥
यश्च कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः।
अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः॥
भार्य्यां प्रियसखीं ये तु साध्वीं हिंसन्ति निर्घृणाः।
न ते मृता प्राप्नुवन्ति हिंसका दुष्टयोनिजाः॥
ब्रह्मघ्नश्च कृतघ्नश्च गोघ्नश्च कृतपापकाः।
एतान् शिष्यान् विवर्ज्जेत उक्ता ये चान्यपातकाः॥
शाल्मपत्रे न भोक्तव्यं न छेत्तव्यं कदाचन।
अश्वत्थो वटवृक्षश्च न छेत्तव्यौ कदाचन॥
न छेत्तव्यो विल्ववृक्ष उडुम्बरश्च कदाचन।
कर्म्मण्याश्चैव ये वृक्षा न छेत्तव्याः कदाचन॥
यदीच्छेत् परमां सिद्धिं मोक्षधर्म्मं सनातनम्।
भक्ष्याभक्ष्यञ्च ते शिष्य वेदितव्यं तदन्तरे॥
करीरस्य वधः शस्तः फलान्यौडुम्बरस्य च।
सद्योभक्षी भवेत्तेन अभक्ष्याः पूतिवासिकाः॥
न भक्षणीयं वाराहं मांसं मत्स्यस्य सर्व्वशः।
अभक्ष्या ब्राह्मणैर्ह्येते दीक्षितर्हि न संशयः॥
परिवादं न कुर्व्वीत न हिंसां वा कदाचन।
पैशुन्यञ्च न कर्त्तव्यं स्तैन्यं वापि कदाचन॥
अतिथिञ्चागतं दृष्ट्वा दूराध्वानागमं क्वचित्।
सविभागस्तु कर्त्तव्यो येन केनापि पुत्रक!॥
गुरुपत्नी राजपत्नी ब्राह्मणी वा कदाचन।
मनसापि न गन्तव्या एवं विष्णुः प्रभाषते॥
कनकादीनि रत्नानि यौवनस्था च कामिनी।
तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते॥
दृष्ट्वा परस्य भाग्यानि आत्मनो व्यसनन्तथा।
तत्र मन्युर्न कर्त्तव्य एष धर्म्मः सनातनः॥"
इति वराहपुराणम्॥
(निवारितम्। यथा, देवीभागवते। २।६।६०।
"मा मा मा मेति बहुधानिषिद्धोऽपि तथाश्रमम्।
आलिलिङ्ग प्रियां दैवात् पपात धरणीतले॥")

निषेकः, पुं, (निषिच्यते प्रक्षिप्यते इति। नि+सिच्+घञ्।) गर्भाधानम्। इति निषेकादिकृत्शब्दटीकायां भरतः॥ * ॥
"निषेकाल्लभते पत्नी गुरुर्भर्त्ता शुभाशुभम्।
मन्त्रशिक्षमपत्यञ्च सर्व्वमेतत्र यत्नतः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३३ अध्यायः॥
(यथा, मनुः। २।१६।
"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्॥"
क्ली, रेतः। यथा, मनुः। ४।१५१।
"दूरादावसथान्मूत्रं दूरात् पादावसेचनम्।
उच्छिष्टान्न निषेकञ्च दूरादेव समाचरेत्॥"
"निषिच्यत इति निषेक रेतश्चोत्सृजेत्।"
इति तट्टीकायां कुल्लूकभट्टः॥ (क्षरणम्। यथा, रघुः। ८।३८।
"ननु तैलनिषेकविन्दुना
सह दीप्तार्च्चिरुपैति मेदिनीम्॥")

निषेकादिकृत्, पुं, (निषेकादिं गर्भाधानादिकं करोतीति। निषेकादि+कृ+क्विप्।) गर्भाधानादिकर्त्ता। आदिना सीमन्तोन्नयनादेर्मन्त्रविद्यादानादेश्च ग्रहणं तत्कर्त्ता पित्रादिर्गुरुः स्यात्। इत्यमरभरतौ॥

निषेधः, पुं, (नि+सिध्+घञ्।) प्रतिषेधः। निवृत्तिः। विधिविपरीतः। यथा,—
"तिथीनां पूज्यता नाम कर्म्मानुष्ठानतो मता।
निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते॥"
इति तिथितत्त्वम्॥

निषेवणं, क्ली, (नि+सेव+भावे ल्युट्।) सेवा। यथा, भागवते। १।२।१६।
"शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात्॥"

निषेव्यः, त्रि, (नि+सेव+भावे ण्यत्।) सेवनीयः। यथा, भागवते। १।१२।२२।
"मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव॥"

निष्क, क ङ माने। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) मूर्द्धन्यषमध्यः। क ङ, निष्कयते स्वर्णं वणिक्। इति दुर्गादासः॥

निष्कः, पुं क्ली, (निश्चयेन कायति शोभते इति। निस्+कै+आतश्चेति कः।) चत्वारः सुवर्णाः। चारि मोहर इति भाषा॥ यथा, मनुः। ८।१३७।
"धरणानि दश ज्ञेयः शतमानस्तु राजतः।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः॥"
साष्टशतसुवर्णम्। हेम। उरोभूषणम्। (यथा, रामायणे। १।६।११।
"नाम्रष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक्॥")
पलम्। दीनारः। इत्यमरः। ३।३।१४॥ अस्य टीका यथा। "शास्त्रीयषोडशमाषकपरिमितं स्वर्णं सुवर्णं तेषां सुवर्णानां अष्टाधिकशतम्। हेम स्वर्णमात्रम्। उरोभूषणं वक्षोऽलङ्कारः। पलं शास्त्रीयमानविशेषः। उरोभूषण पलञ्च हेम्न एवेति केचित्। दीनारः सम्यग्व्यवहारार्थमानवस्तु एव निष्कः। केचित्तु दीनार इति पल इत्यस्य विशेषणम्। दीनारे पले लौकिकमते न तु शास्त्रीये इत्याहुः॥ स्मार्त्तास्तु द्वात्रिंशद्रक्तिकापरिमितं काञ्चनं दीनारः। तथाहि।
'दीनारो रोपकैरष्टाविंशत्या परिकीर्त्तितः।
सुवर्णसप्ततितमो भागो रोपक उच्यते॥'
इति विष्णुगुप्तः॥
सुवर्णोऽशीतिरक्तिकापरिमितं काञ्चनं तस्य सप्ततितमो भागः सप्तमाषाधिकहेमरक्तिकाया रोपकः तदष्टाविंशत्या द्वात्रिंशद्रक्तिकापरिमितं हेम दीनार इति पर्य्यवसतीत्याहुः।" इति भरतः॥ * ॥ स्वर्णकर्षः। स्वर्णपलम्। इति हेमचन्द्रः॥ कण्ठभूषा। इति जटाधरः॥ माषकचतुष्टयम्। इति वैद्यकपरिभाषा॥ (यथा,
"स्याच्चतुर्म्माषकैः शाणः स निष्कष्टङ्क एव च॥"
इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम्॥)

षोडशद्रम्यः । षोल काहन इति भाषा ॥ (यथा, लीलावत्याम् । २ ।

"वराटकानां दशकद्वयं यत्
सा काकिनी ताश्च पणश्चतस्रः ।
ते षोड़शद्रम्य इहावगम्यो
द्रम्यैस्तथा षोड़शभिश्च निष्कः ॥")

निष्कण्ठ', पु, (निर्गतः कण्ठः स्कन्धो यस्य ।) वरुणवृक्षः । इति शब्दचन्द्रिका ॥

निष्कर्ष , पुं, (निर् वा निस्+कृष्+भावे घञ् ।) निश्चय. । यथा, अत्राय निष्कर्षं इत्याद्यापराह्णिकश्राद्धादिव्यवस्थायां स्मार्त्तेः ॥ (करार्थं प्रजापीडनम् । इति नीलकण्ठः ॥ यथा, महाभारते । २ । १३ । १३ ।

"अनुकर्षञ्च निष्कर्षं व्याधिपावकमूर्च्छनम् ।
सर्व्वमेव न तत्रासीद्धर्म्मनित्ये युधिष्ठिरे ॥")

निष्कल, त्रि, (निर्गता कला यस्मात् ।) कलाशून्यम् । (यथा, महाभारते । ३ । २०८ । ६ ।

"सयतात्मापि दृष्टाश्च मतिमन्तश्च मानवाः ।
दृश्यन्ते निष्कला सप्त प्रहीणा स्वककर्म्मभिः ॥")

नष्टवीर्य्यम् । इति मेदिनी । ले, १०३ ॥ ब्रह्म । यथा,—

"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना ॥"

इत्येकादशीतत्त्वे वामदग्नवचनम् ॥ आधारे, पु । इति शब्दचन्द्रिका ॥

निष्कला, स्त्री, (निर्गता कला यस्याः ।) विगतार्त्तवा । इति शब्दरत्नावली ॥ वृद्धा । इति राजनिर्घण्टः ॥

निष्कली, स्त्री, (निष्कल+ङीष् ।) ऋतुहीना । निष्पररजस्का । इति शब्दरत्नावली ॥

निष्कालक , पुं, (निष्कालयतीति । निर्+कालि +ण्वुल् ।) मुण्डितलोमा घृताभ्यक्तः प्रायश्चित्तार्थः । यथा । मुण्डितलोमकेशेन घृताभ्यक्तेन च कर्त्तव्यम् । निष्कालको घृताभ्यक्तस्तप्तां शूर्म्मी परिष्वज्य मरणात् पूतो भवतीति विज्ञायते । इति वशिष्ठस्मरणात् । इति मिताक्षरा ॥

निष्काश , पु, (नितरां काशते शोभते प्रासादादाविति । निर्+काश+अच् ।) प्रासादाद्युपस्थानम् । इति महाभारते राजधर्मः ॥ याला इति बारान्दा इति च भाषा ॥

निष्काशितः, त्रि, (निर् वा निस्+काश+णिच् +क्त ।) निष्कासित. । इत्यमरटीकायां भरत ॥

निष्कासितः त्रि, (निस्+कस+णिच्+क्तः ।) बहिष्कृतः । दूरीकृतः । तत्पर्य्यायः । अवकृष्टः २ । इत्यमरः । ३ । १ । ३६ ॥ निःसारितः ३ । इति जटाधरः ॥ निर्गमितः । आहितः । अधिकृतः । इति मेदिनी । ते, २०२ ॥

निष्कुट , पु, (कुटात् गृहात् निष्क्रान्तः ।) गृहसमीपोपवनम् । इत्यमरः ।२।३।९॥ (क्वचित् क्लीवेऽपि दृश्यते । यथा, महाभारते । १२ । ६६ । ५५ ।

"परिखाश्चैव कौरव्य । प्रतोलीर्निष्कुटानि च ।
नगात्यन्यः प्रवश्यैत गुह्यमेतद्युधिष्ठिर ।॥")

क्षेत्रम् । (यथा, महाभारते । २ । ५० । ६ ।
"इन्द्रकृष्टैर्वर्त्तयन्ति धान्यैर्ये च नदीमुखैः ।
समुद्रनिष्कुटे जाताः पारेसिन्धु च मानवाः ॥")

कपाटः । इति मेदिनी । टे, ४८ ॥ मनःपाट । इति हारावली ॥ जानानामहल इति पारस्यभाषा ॥

निष्कुटि., स्त्री, (कुट कौटिल्ये+"इगुपधात् कित् ।" उणां ४ । ११६ । इति इन् । निर्गता कुटिः कौटिल्यं यस्याः ।) एला । इत्यमरः । २ । ४ । १२५ ॥ (पर्य्यायोऽस्या यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

निष्कुटी, स्त्री, (निष्कुटि+कृदिकारादिति वा ङीष् ।) निष्कुटि. । इत्यमरटीकायां भरत. । २ । ४ । १२५ ॥

निष्कुम्भः, पुं, (निस्+कुम्भ+अच् ।) दन्तीवृक्ष. । इत्यमरटीकायां रायमुकुटः ॥ (निर्गतः कुम्भो यस्मात् ।) कुम्भशून्ये, त्रि ॥

निष्कुषित., त्रि, (निस्+कुष+क्तः ।) निष्कासित' । यथा,—

"काकैर्निष्कुषितं श्वभिः कवलितं वीचीभिरान्दोलितम् ॥"

इत्यादि वाल्मीकिकृतगङ्गाष्टकम् ॥

निष्कुह. पु, (नितरां कुहयते इति । कुह विस्मापने+पचाद्यच् ।) वृक्षकोटरम् । इत्यमरः । २ । ४ । १३ ॥

निष्कृति., स्त्री, (निर्+कृ+क्तिन् ।) निर्मुक्तिः । निस्तार । यथा,—

"ब्रह्मघ्ने चैव मित्रघ्ने सुरापे गुरुतल्पगे ।
सर्व्वत्र विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥"

इति प्रायश्चित्ततत्त्वम् ॥

(ऋषिविशेषे, पुं । यथा, महाभारते । ३ । २१८ । १४ ।

"व्याक्रोशतान्तु भूतानां यः करोतीह निष्कृतिम् ।
ऋषिः स निष्कृतिर्नाम शोभयन्नभिसेवित' ॥")

निष्क्रम., पुं, (निष्क्रम्यतेऽनेनेति । निस्+क्रम+ घञ् । "नोदात्तोपदेशस्येति ।" ७ । ३ । ३४ । इति न वृद्धिः ।) धीशक्ति' । इत्यमर' । ३ । २ । २५ ॥ निर्गम । (यथा, कथासरित्सागरे । २५ । ४३ ।

"कश्चित् कालं प्रतीक्षे च प्राणायामस्य निष्क्रमम् ।
तृतीयेऽह्नि गतेऽप्याद यान्त्येतस्य हि नाशव ॥")

दुष्कुलः । इति मेदिनी । मे, ४५ ॥ निष्क्रमण संस्कार' ।

"अहन्येकादशे नाम चतुर्थे मासि निष्क्रम ॥"

इति याज्ञवल्क्य । १ । १२ ॥

(क्रमरहिते, त्रि । यथा, पद्मपुराणे पातालखण्डे ।

"निष्कलं निष्क्रमं शान्तं सच्चिदानन्दविग्रहम् ॥")

निष्क्रमणं, स्त्री, (निस्+क्रम+भावे ल्युट ।) दशसंस्कारान्तर्गतसंस्कारविशेषः । तदनुष्ठानं यथा, जाते कुमारे जन्मवासराद्वा तृतीयः शुक्लपक्षस्तस्य तृतीयायां तिथौ प्रातः कुमारं स्नापयित्वा सायं सन्ध्यायामतीतायां चन्द्राभिमुख. कृताञ्जलिः पिता तिष्ठेत् । अथ माता शुचिना वस्त्रेण कुमारमाच्छाद्य दक्षिणस्यां दिशि भर्त्तुर्वामपार्श्वे पश्चिमाभिमुखीभूय उत्तरशिरसं कुमारं पित्रे समर्पयति । ततो माता भर्त्तुः पृष्ठदेशेन उत्तरस्यां दिशि गत्वा चन्द्राभिमुखीभूय भर्त्तुर्दक्षिणपार्श्वे तिष्ठति । अथ पिता जपति प्रजापतिऋषिरनुष्टुप् छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोग' । ॐ यत्ते सुसीमे हृदयं हितमन्त' प्रजापतौ वेदाहं मन्ये तद्ब्रह्ममाहं पौत्रमघं निगाम् । ततः प्रजापतिऋषिरनुष्टुप् छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोग । ॐ यत् पृथिव्या अनामृत दिवि चन्द्रमसि श्रित वेदमृतस्याहं नाममाह पौत्रमघं रुषम् । तत' प्रजापतिऋषिरनुष्टुप्छन्द इन्द्राग्नी देवते कुमारस्य चन्द्रदर्शने विनियोग. । ॐ इन्द्राग्नी शर्म्म यच्छतं प्रजायै मे प्रजापती यथाय न प्रमीयेत पुत्रो जनित्र्या अधि । इति मन्त्रत्रयं जप्त्वा कुमारं चन्द्रं दर्शयति । पिता चन्द्राय अर्घ्यं ददाति च । ततः पिता तथाभूतमेव कुमारमुत्तरशिरसं मात्रे दत्त्वा वामदेव्यगानान्तं कर्म्म कृत्वाच्छिद्रमवधार्य गृहं प्रविशेदिति । अत ऊर्द्ध्वमपरशुक्लपक्षत्रयेऽपि तृतीयायां तिथौ सायंसन्ध्यामतिक्रम्य चन्द्राभिमुखं पिता जलाञ्जलिं गृहीत्वा प्रजापतिऋषिरनुष्टुप्छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोग' । ॐ यददश्चन्द्रमसि कृष्णं पृथिव्या हृदयं श्रितं तदहं विद्वांस्तत् पश्यन्माहं पौत्रमघं रुदमिति पठित्वा जलाञ्जलिं क्षिपेत । वारद्वयं तूष्णीम् । ततो वामदेव्य गीत्वाच्छिद्रमवधार्य गृहं प्रविशेदिति । एतच्च निष्क्रमणकर्म्माङ्गभूतमदीयं कर्म्म यत्नो पुत्त्रोपादानविरहात् प्रवासिनापि कर्त्तव्यमेव । इति निष्क्रमणम् ॥ इति भवदेवभट्टः ॥*॥ तच्च विहितदिने यथा । रिक्तातिरिक्तास्तिथयः । शनिभौमबुधवासरेतरे वाराः । आर्द्राश्लेषाकृत्तिकाभरणीमघाविशाखापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदश्रुतभिषाभिन्नानि नक्षत्राणि । कन्यातुलाकुम्भसिंहमकरानि लग्नानि । बालकस्य चतुर्थे मासि तृतीये वा चन्द्रादिशोभने कर्त्तव्यम् । इति ज्योतिषम् ॥

निष्क्रय',पु,(निष्क्रीयते विनिमीयतेऽनेनेति । निर्+ क्री+"एरच् ।"३।३।५६ । इति करणे अच ।) भृति । वेतनम् । इति हेमचन्द्र । ६ । २६ ॥

बुद्धियोगः । सामर्थ्यम् । निर्गतिः । इति माघटीकायां मल्लिनाथः ॥ प्रत्युपकारः । विनिमयः । यथा, माघे । १ । ५० ।

"समतृप्तिपिन् यः पृथिवीभृतामरं
वरप्रदानस्य चकार शूलिनः ।
त्रसत्तुषाराद्रिसुतासससम्भ्रम-
स्वयंग्रहाश्लेषसुखेन निष्क्रयम् ॥"

(विक्रयः । यथा, मनुः । ६ । ४६ ।
"न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते ॥")

निष्क्रान्तः, त्रि, (निर् + क्रम + क्तः ।) निर्गतः । यथा, मार्कण्डेये । ८७ । ५ ।
"भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥"
(यथाच, महाभारते । १३ । २ । ४५ ।
"निष्क्रान्ते मयि कल्याणि तथा सन्निहितेऽनघे ।
नातिथिस्तेऽवमन्तव्यः प्रमाणं यद्यहं तव ॥")

निष्क्रियं, क्ली, (निर्गता क्रिया यस्य ।) ब्रह्म । यथा, वेदान्तसूत्रभाष्यम् ।
"निष्क्रियं निर्गुणं शान्तं निरपेक्षं निरञ्जनम् ॥"
क्रियाशून्ये, त्रि । यथाह कश्चित् ।
"बन्धनानि यदि सन्ति बहूनि
प्रेमरज्जुकृतबन्धनमन्यत् ।
दारुभेदनिपुणोऽपि षडङ्घ्रि-
र्निष्क्रियो भवति पङ्कजबद्धः ॥"

निष्क्वाथः, पुं, (निःसृतः क्वाथो यत्र ।) मांसादिक्वाथः । झोल इति भाषा । तत्पर्य्यायः । रसकः २ । इति हेमचन्द्रः । ३ । ७७ ॥

निष्ट्यः, पु, (वर्णाश्रमादिभ्यो निर्गतः । निस् + "अव्ययात् त्यप् ।" ४ । २ । १०४ । इत्यस्य "निसो गते ।" इति वार्त्तिकोक्त्या त्यप् । "ह्रस्वात्तादौ तद्धिते ।" ८ । ३ । १०१ । इति षत्वम् ।) म्लेच्छजातिविशेषः । इति हेमचन्द्रः । ५ । ५६८ ॥ (पुल्कसादिः । इति महीधरः । यथा, वाजसनेयसंहितायाम् । ५ । २३ ।
"य मे निष्ट्यो यममात्यो निचखान ॥"
"ष्टै स्त्यै शब्दसङ्घातयोः । नितरां स्त्यायति सङ्घातरूपेण सह वर्त्तत इति निष्ट्यः । यद्वा, निर्गत्य शरीरात् स्त्यायति विस्तीर्णो भवतीति निष्ट्यः पुत्रादि । यद्वा, निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः । निसो गते इति वार्त्तिकेन निस उपसर्गाद्गतार्थे त्यप् इति काशिकायाम् ।" इति तत्र वेददीपः ॥)

निष्ठ, त्रि, (नितरां तिष्ठतीति । नि + स्था + कः ।) स्थितः । नितिष्ठतीति स्थाधातोर्डप्रत्यय निष्पन्नः ॥

निष्ठा, स्त्री, (नितरां तिष्ठतीति । नि + स्था + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । "उपसर्गादिति ।" ८ । ३ । ६५ । इति षत्वम् ततष्टाप् ।) निष्पत्तिः । नाशः । (यथा, भागवते । ५ । १२ । ८ ।
"यदा चितायैव चराचरस्य
विदाम निष्ठां प्रभवञ्च नित्यम् ॥")

अन्तः । निर्वहणम् । इत्यमरः । ३ । ६ । ४० ॥ याच्ञा । इति मेदिनी । ठे, ६ ॥ क्तक्तवतू प्रत्ययौ । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥ (यथा, "क्तक्तवतू निष्ठा । १ । १ । २६ । एतौ निष्ठासंज्ञौ स्तः ।" इति सिद्धान्तकौमुदी ॥) धर्म्मादौ श्रद्धा । यथा,—
"निष्ठया हि प्रतिष्ठा स्यादनिष्ठस्य कुतः कुलम् ।
शक्नोति नैष्ठिकः स्वीयं धर्म्मं त्रातुं न चेतरः ॥
एकस्य देवस्य विहाय मन्त्र-
मेकं परस्मिन्नपि तस्य ।
तदा भवेन्मृत्युरनैष्ठिकत्वा-
न्निष्ठाविहीनस्य न कापि सिद्धिः ॥"
इति वैद्यकुलतत्त्वे भरतमल्लिकः ॥
प्राप्यम् । यथा,—
"भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः ।
तेषामशान्तकामानां का निष्ठा विजितात्मनाम् ॥")
इति श्रीभागवतैकादशस्कन्धपञ्चमाध्यायश्लोकटीकायामाख्याय श्रीधरस्वामी ॥ (नि + स्था + क्विप् । स्थितिः । यथा, ऋग्वेदे । ३ । ३१ । १० ।
"जाते निष्ठामदधुर्गोषु वीरान् ॥"
"निष्ठां पूर्व्वं यथास्थितिम् ।" इति सायनः ॥)

निष्ठान, क्ली, (नि + स्था + करणे ल्युट् ।) व्यञ्जनम् । इत्यमरः । ३ । ३ । ११५ ॥ (यथा, रामायणे । २ । ६१ । ६७ ।
"आनेत्रापि च वाराहैर्निष्ठानवरसञ्चयैः ।
फलनिर्य्यूहसंसिद्धैः सूपैर्गन्धरसान्वितैः ॥")

निष्ठित, त्रि, (नि + स्था + क्तः ।) नितरां स्थितम् । यथा, भागवते । २ । ७ । ३६ ।
"देवद्विषां निगमवर्त्मनि निष्ठितानां
पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं
वेषं विधाय बहुभाष्यत औपधर्म्म्यम् ॥"
"देवद्विषां दैत्यानां निष्ठितानां नितरां स्थितानाम् ।" इति श्रीधरस्वामी ॥ (निष्ठा जातास्येति । तारकादित्वादितच् ।) निष्ठाविशिष्टः । निश्चयेन स्थितश्च ॥ (सम्यक् ज्ञाता । यथा, रामायणे । १ । १ । १४ ।
"रक्षिता स्वस्य धर्म्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्व्वेदे च निष्ठितः ॥")

निष्ठीवः, पु, (नि + ष्ठिव + भावे घञ् । पृषोदरादित्वात् दीर्घः ।) निष्ठीवनम् । इति द्विरूपकोषः ॥ (यथाह वाभटः ।
"निष्ठीवः पार्श्वतो यायादेकस्मादक्ष्णो निमीलनम् ॥")

निष्ठीवन, क्ली, (नि + ष्ठिव + भावे ल्युट् । ष्ठिवुसिवोर्ल्युटि दीर्घो वेति स्वामी । पृषोदरादित्वादिति मुकुटः ।) श्लेष्मादीनां मुखेन वमनम् । छेप इति थुथु इति च भाषा ॥ तत्पर्य्यायः । निष्ठेवः २ निष्ठ्यूतिः ३ निष्ठेवनम् ४ । इत्यमरः । ३ । २ । ३८ ॥ निष्ठेवा ५ । निष्ठेवम् ६ । इति तट्टीका ॥ (यथा, मार्कण्डेयपुराणे । ३४ । ७० ।

"क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु ।
कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् ॥")

निष्ठुरं, त्रि, (नि + स्था + मद्गुरादयश्चेति उरच् ।) परुषम् । कठिनम् । इत्यमरः । ३ । १ । ७६ ॥ (यथा, माघे । ५ । ४६ ।
"जघ्ने जनैर्मुकुलिताक्षमनाददाने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ॥")

निष्ठ्यूत, त्रि,(नि + ष्ठिव + क्तः । "च्छ्वोः शूडिति ।" ६ । ४ । १९ । इत्यूठ् ।) क्षिपम् । इत्यमरः । ३ । १ । ८७ ॥

निष्ठ्यूतिः, स्त्री, (नि + ष्ठिव + क्तिन् । "च्छ्वोः शूडिति ।" ६ । ४ । १९ । इत्यूठ् ।) निष्ठीवनम् । इत्यमरः । ३ । २ । ३८ ॥

निष्ठेवः, त्रि, (नि + ष्ठिव + घञ् ।) निष्ठीवनम् । इत्यमरः । ३ । २ । ३८ ॥

निष्ठेवनं, क्ली, (नि + ष्ठिव + भावे ल्युट् ।) निष्ठीवनम् । इत्यमरः । ३ । २ । ३८ ॥

निष्णात, त्रि, (नितरां स्नाति स्मेति । नि + स्ना + क्तः । "निनदीभ्यां स्नातेः कौशले ।" ८ । ३ । ८९ । इति षत्वम् ।) विज्ञः । निपुणः । इत्यमरः ।३ । १ । ४ ॥ (यथा, सुश्रुते सूत्रस्थाने तृतीयेऽध्याये ।
"यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधञ्चार्हति राजतः ॥")
पारं गतः । यथा, भागवते १ । ४ । २१ ।
"वैशम्पायन एवैको निष्णातो यजुषामुत ॥"

निष्पक्वं, त्रि, (नितरां पक्वम् ।) अतिपक्वव्यञ्जनदशमूलादि । इति भरतः ॥ तत्पर्य्यायः । क्वथितम् २ । इत्यमरः । ३ । १ । ६५ ॥ पक्वताशून्यञ्च ॥

निष्पताकध्वज', पु स्त्री, राज्ञां पताकाशून्यदण्डविशेषः । इति युक्तिकल्पतरुः ॥ तद्विवरणं ध्वजशब्दे द्रष्टव्यम् ॥

निष्पत्ति, स्त्री (निर् + पद + क्तिन् ।) समाप्तिः । सिद्धिः । यथा,—
"क्रियाया परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥"
इति रामतर्कवागीशधृतकारिका ॥
(नादस्यावस्थाविशेषः । यथा, हठयोगप्रदीपिकायाम् । ४ । ६९ ।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥"
तथा, तत्रैव । ४ । ७६ ।
"रुद्रग्रन्थिं यदा भित्त्वा सर्व्वपीठगतोऽनिलः ।
निष्पत्तौ वैणव शब्दः क्वणद्वीणाक्वणो भवेत् ॥")

निष्पनाकृति, स्त्री, (निष्पत्र + कृ + भावे क्तिन् + डाच् ।) सपत्राकृतिः । अत्यन्तपीडा । इति हेमचन्द्रः । ६ । ८ ॥

निष्पत्रिका, स्त्री, (निष्पत्रमस्याः अस्तीति । ठन् ।) करीरवृक्षः । इति राजनिर्घण्टः ॥

निष्पदयानं, क्ली, (निष्पद पदरहितं यानम् ।) पदरहितवाहनम् । तच्च नौकादिकम् । इति

युक्तिकल्पतरु ॥ तत्तत्सयादि नौकाशब्दे द्रष्टव्यम् ॥

निष्पन्न, त्रि, (निर्+पद्+क्तः ।) निष्पत्तिविशिष्टः । सम्पन्नः । तत्पर्य्यायः । सिद्धः २ निर्वृत्तः ३ । इत्यमरः । ३ । १ । १०० ॥ (यथा, देवीभागवते । ३ । ८ । २२ ।
"निष्पापत्वं फलं विद्धि तीर्थस्य मुनिसत्तम । ।
कृषेः फलं यथा लोके निष्पन्नान्नस्य भक्षणम् ॥")

निष्पादन, क्ली, (निर्+पद्+णिच्+ल्युट् ।) निष्पत्तिः । निष्पत्तिनियुक्तिः । यथा, शालयर्यता-वच्छेदकफलनिष्पादकतया दुरखेत्यनुमितिप्रकाशनेन कर्त्तुरिच्छासुतपाद्य दाननिष्पादनेन वेति कारकचक्रे भवानन्दसिद्धान्तवागीशः ॥

निष्पादना, स्त्री, (निर्+पद+णिच्+युच् । स्त्रियां टाप् ।) निष्पत्तिप्रेरणम् । यथा,—
"यदा निष्पादनायत्तधुस्तदा चैत्र कटं करोति ।
यदा निष्पत्त्यर्थस्तदा क्रियते कटः स्वयमेवेति ।"
इति रामतर्कवागीशः ॥

निष्पादित, त्रि, (निर्+पद+णिच्+क्तः ।) कृतनिष्पादनम् । यथा,—
"निष्पादितं देवकृत्यमवशेषं प्रतीक्षते ॥"
इति भागवते । ५ । १३ । ५० ॥

निष्पाद्य, त्रि, (निर् निश्चयेन पाद्यते समाप्यते इति । निर्+पद्+णिच्+यत् ।) निष्पादनीयम् । (यथा राजतरङ्गिण्याम् । २ । १५८ ।
"कार्य्ये वस्तूनि निष्पाद्ये श्रमात् कौसीद्यमाश्रयन् ।
प्रायश्चीवाध्वगो दिष्टा मोक्षितोऽस्मि न निद्रया ॥")
साध्यम् । यथा, चेष्टायापारेण छेदनादेर्निष्पाद्यत्वात् साधनत्वमिति रामतर्कवागीशः ॥

निष्पाव, पुं, (निष्पूयते तुषाद्यपनयनेन शोध्यते इति । निर्+पू+णिच्+घञ् ।) धान्यादीनां निस्तुषीकरणम् । बहुलीकरणम् । तत्पर्य्यायः । पवनम् २ पवः ३ । इत्यमरः । ३ । २ । २४ ॥ पूतीकरणम् ४ । यथा,—
"धान्यादिनिस्तुषीकार्य्यबहुलीकरणादिषु ।
तथा च पूतीकरणे निष्पावः पवनं पवः ॥"
इति शब्दरत्नावली ॥
राजशिम्बीवीजम् । भटवासु इति भटवांसु इति वा हिन्दीभाषा ॥ तत्पर्य्यायगुणाः ।
"निष्पावो राजशिम्बी स्याद्वल्लकः श्वेतशिम्बिकः ।
निष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः ।
कषायस्तन्यपित्तास्रमूत्रवातविबन्धकृत् ।
विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः ॥"
इति भावप्रकाशः ॥
(निष्पूयतेऽनेनेति । करणे घञ् ।) सूर्पवायुः । राजमाषः । (यथा, मार्कण्डेयपुराणे । १५ । २४ ।
"मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ।
चोरयित्वा तु निष्पावान् जायते गृहगोलकः ॥")
कडङ्गरः । समीरणः । शिम्बिका । निर्विकल्पे, त्रि । इति मेदिनी । वे, ३८ ॥ श्वेतशिम्बी । इति रत्नमाला ॥ (यथा,—
"क्षारातितीक्ष्णोष्णविदाहितैल-
निष्पावपिण्याककुलत्थयूषैः ॥"
इति माधवकृतरुग्विनिश्चये शूलाधिकारे ॥)

निष्पावक, पुं, (निष्पाव एव । स्वार्थे कन् ।) श्वेतशिम्बी । अस्य भक्ष्यफलगुणः । मलबन्धकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (अस्य गुणा यथा,—
"निष्पावको वैषवलासशोफ-
शुक्रान्तको रूक्षगुणो विदाही ।
कषायकः स्यान्मधुरो गुरुश्च
स्तन्यास्रपित्तञ्च करोति वातम् ॥"
इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)

निष्पावी, स्त्री, (निष्पाव+स्त्रियां ङीष् ।) शिम्बीविशेषः । वोड़ा इति भाषा ॥ सा द्विधा । तत्र हरिद्वर्णायाः पर्य्यायः । श्यामला २ फलिनी ३ नखपूर्व्विका ४ सक्षमी ५ फलिका ६ शिम्बी ७ गुच्छफला ८ विशालफलिका ९ निष्पावि १० चिपिटा ११ ॥ शुभ्रायाः पर्य्यायः । चक्रुलिफला १ नखनिष्पाविका २ दृष्टनिष्पाविका ३ याम्या ४ नखपुङ्खफला ५ यशना ६ । एतयोर्गुणाः । कषायत्वम् । मधुररसत्वम् । कण्ठशुद्धिकरत्वम् । मेध्यत्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

निष्प्रतिभ, त्रि, (निर्नास्ति प्रतिभा बुद्धिर्यस्य ।) घस्रः । जड़ः । इति जटाधरः ॥ (निर्गता प्रतिभा दीप्तिरस्येति । दीप्तिशून्यः । यथा, हरिवंशे । ८२ । ३४ ।
"क्षीणाकारासु तारासु सुप्तनिष्प्रतिभासु च ।
नैशमन्तर्द्दधे रूपमुदगाच्च दिवाकरः ॥")

निष्प्रत्यूह, त्रि, (निर्गतः प्रत्यूहो बाधा अस्येति ।) निर्व्विघ्नः । यथा,—
"निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः ॥"
इति मुरारिः ॥
(स्त्री, गङ्गा । यथा, काशीखण्डे । २९ । १०३ ।
"निष्प्रत्यूहा नाकनदी निरयार्णवदीर्घनौः ॥")

निष्प्रभ, त्रि (निर्गता प्रभा अस्येति ।) प्रभाशून्यः । दीप्तिरहितः । तत्पर्य्यायः । विगतः २ अरोकः ३ । इत्यमरः । ३ । १ । १०० ॥ (यथा, रघुवंशे । ११ । ८१ ।
"निष्प्रभश्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः ॥")

निष्प्रयोजन, त्रि, (निर्नास्ति प्रयोजनं यस्मिन्निति ।) प्रयोजनरहितम् ।
"अन्यथा हि महावाद्ये लघूनामुपदेशतः ।
गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा, हरिवंशे । ६४ । १५ ।
"निरानन्दं निरास्वादं निष्प्रयोजनमारुतम् ॥")

निष्प्रवाण, त्रि, (नितरां प्रकर्षेण ऊयते इति । निर्+प्र+वे+करणे ल्युट् ।) तन्त्रविमुक्तवासः । नूतनवस्त्रम् । इति हारावली । ९९ ॥

निष्प्रवाणि, त्रि, (निर्गता प्रवाणी तन्तुवायशलाका यस्मादस्य वा । "निष्प्रवाणिश्च ।" ५ । ४ । १६० । इति कपोऽभावो निपात्यते ।) नूतनवस्त्रम् । तत्पर्य्यायः । अनाहतम् २ तन्त्रकम् ३ नवाम्बरम् ४ । इत्यमरः । २ । ६ । ११२ ॥ आहतम् ५ अहतम् ६ नववस्त्रम् ७ । इति शब्दरत्नावली ॥

निष्फल, त्रि, (निर्गतं फलं यस्मात् ।) फलशून्यः । यथा, "फलालोऽस्त्री स निष्फलः ।" इत्यमरः । २ । ८ । २२ ॥ (यथा, देवीभागवते । ३ । ८ । २५
"कृते तीर्थे यदेतानि देहान्न निर्गतानि चेत् ।
निष्फलः श्रम एवैकः कर्षकस्य यथा तथा ॥")

निष्फला, स्त्री, (निष्क्रान्तं फलं यस्या इति ।) षष्पञ्चाशद्वर्षोद्ध्वं गतरजस्का । इत्यमरः ॥ तत्पर्य्यायः । निष्फली २ निष्कली ३ निष्कला ४ विकली ५ विकला ६ ऋतुहीना ७ । इति शब्दरत्नावली ॥ विरजाः ८ विगतार्त्तवा ९ । इति जटाधरः ॥

निष्फली, स्त्री, (निष्क्रान्तं फलं यस्याः । ङीष् ।) निष्फला । इति शब्दरत्नावली ॥

निसम्पात, पुं, (निष्क्रान्तः सम्पातो यत्र ।) निशीथः । निःसम्पातः । इति शब्दरत्नावली ॥

निसर्ग, पुं, (नि+सृज्+घञ् ।) स्वभावः । इत्यमरः । १ । ७ । ३८ ॥ (यथा, किरातार्ज्जुनीये । १ । ६ ।
"निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ॥")
स्वरूपम् । सर्गः । इति मेदिनी । गे, ४० ॥ (यथा, महाभारते । १३ । ८५ । १२३ ।
"निसर्गादृब्रह्मणश्चापि वरुणो यादसां पतिः ॥")
दानम् । । यथा, मनुः । ८ । १४३ ।
"न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् ।
न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ॥")

निसिन्धु, पुं वृक्षविशेषः । निसिन्धा इति भाषा । तत्पर्य्यायः । सिन्धुकः २ सिन्धुः ३ सापिष्टः ४ शुक्लपुष्पकः ५ सिन्धुवारः ६ इन्द्रसुरिषः ७ निर्गुण्डी ८ इन्द्राणिका ९ । इति शब्दचन्द्रिका ॥

निसूदन, क्ली, (नि+सूद्+भावे ल्युट् ।) निर्हिंसनम् । वधः । इत्यमरः । २ । ८ । ११३ ॥ (यथा, "प्रवासनं निसूदनं निर्हिंसनमिति वधपर्य्याय प्रवासनशब्दं पठन्त्यभिधानिकाः ।" इति । ८ । २८२ मनुश्लोकटीकायां कुल्लूकभट्टः ॥ त्रि, नि+सूद+ल्युः । विनाशकः । यथा, रघुवंशे । ९ । ३ ।
"उभयमेव वदन्ति मनीषिणः
समयवर्षितया कृतकर्म्मणाम् ।
बलनिसूदनमर्थपतिञ्च तं
श्रमनुदं मनुदण्डधरान्वयम् ॥")

निसृता, स्त्री, (नितरां सृता । नि+सृ+क्तः ।) त्रिवृता । इति रत्नमाला । तेउड़ि इति भाषा ॥ (त्रिवृताशब्देऽस्या गुणादयो ज्ञातव्याः ।)

निसृष्ट, त्रि, (नि+सृज्+क्त ।) न्यस्तम् । इत्यमरः । ३ । १ । ८८ ॥ (यथा, मनुः । ८ । ४१६ ।

"न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते ।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ॥")
मध्यस्थम् । इति त्रिकाण्डशेषः ॥

निसृष्टार्थः, पु, (निसृष्टो न्यस्तोऽर्थः प्रयोजनं यस्मिन्निति ।) दूतविशेषः । यथा,—
"निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।
कार्य्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथा त्रिधा ॥"
तल्लक्षणं यथा,—
"उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्य्यं निसृष्टार्थस्तु स स्मृतः ॥"
इति साहित्यदर्पणे ३ परिच्छेदः ॥
धनायव्ययपालनादौ नियुक्तः । यथा बृहस्पतिः ।
"यः स्वामिना नियुक्तोऽपि धनायव्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥
पुरुषविशेषः । तस्य लक्षणं यथा,—
"धीरः स्थिरमतिः शूरः स्वामिकार्य्यविधायकः ।
स्वपौरुषप्रकाशी च निसृष्टार्थः स उच्यते ॥"
इति सङ्गीतदामोदरः ॥

निस्तनी, स्त्री, (नितरां स्तनवदाकारोऽस्त्यस्या इति । अच् । गौरादित्वात् ङीष् ।) वटिका । इति शब्दचन्द्रिका ॥ वड़ि इति भाषा ॥ (निर्गतौ स्तनौ यस्या इति ।) स्तनहीना च ॥

निस्तरणं, क्ली, (निस्तीर्य्यतेऽनेनेति । निर् + तॄ + करणे ल्युट् ।) उपायः । निस्तारः । तरणम् । इति मेदिनी । णे, ६६ ॥ निर्गमः । इति विश्वः ॥

निस्तर्हणं, क्ली, (निर् + तृह् हिंसायाम् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११४ ॥

निस्तलं, त्रि, (निरस्तं तलं स्वरूपमस्येति ।) वर्त्तुलम् । इत्यमरः । ३ । १ । ६९ ॥ (यथा, कुमारसम्भवे । १ । ४२ ।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य ॥")
चलम् । इति मेदिनी । ले, १०३ ॥ (नितरां तलम् ।) तलम् । इति हेमचन्द्रः ॥

निस्तारः, पु, (निर् + तॄ + घञ् ।) निस्तरणम् । उद्धारः । (यथा, शृङ्गारशतके । ७१ ।
"संसार तव निस्तारपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणा ॥")

निस्तारबीजं, क्ली, (निस्तारस्य संसारसमुद्रसमुत्तरणस्य बीजम् ।) संसारतरणकारणम् । तद्यथा,—
"स्मरणं कीर्त्तनं विष्णोरर्च्चनं पादसेवनम् ।
वन्दनं स्तवनं नित्यं भक्त्या नैवेद्यभक्षणम् ॥
चरणोदकपानञ्च तन्मन्त्रजपनं तथा ।
इदं निस्तारबीजञ्च सर्व्वेषामीप्सितं भवेत् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ॥
(अपि च । महानिर्व्वाणतन्त्रे ।
"कलौ पापयुगे घोरे तपोहीनेऽति दुस्तरे ।
निस्तारबीजमेतावद् ब्रह्ममन्त्रस्य साधनम् ॥
साधनानि बहूक्तानि नानातन्त्रागमादिषु ।
कलौ दुर्ब्बलजीवानामसाध्यानि महेश्वरि ! ॥"
उद्धारकारणमात्रम् । यथा,—
"जीर्णा तरिः सरिदतीवगभीरनीरा
बाला वयं सकलमित्थमनर्थहेतुः ।
निस्तारबीजमिदमेव कृशोदरीणां
यन्माधव त्वमसि सम्प्रति कर्णधारः ॥"
इत्युद्भटः ॥)

निस्तितीर्षत्, त्रि, (निर् + तॄ + सन् + शतृ ।) निस्तरितुमिच्छत् । यथा,—
"तम्नः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम् ॥"
इति श्रीभागवते । १ । १ । २२ ॥

निस्तुषक्षीरः, पुं, (निस्तुषं परिष्कृतं क्षीरं यस्येति ।) गोधूमः । इति राजनिर्घण्टः ॥

निस्तुषरत्नं, क्ली, (निस्तुषं निर्म्मलं रत्नम् ।) स्फाटिकः । इति राजनिर्घण्टः ॥

निस्तुषितं, त्रि, (निस्तुष + कृतौ णिच् + क्तः ।) त्वग्विहीनम् । त्यक्तम् । लघूकृतम् । इति मेदिनी । ते, २०२ ॥

निस्तेजाः, [स्] त्रि, (निर्गतं तेजो यस्मादिति ।) तेजोरहितः । यथा,—
"इदं कवचमज्ञात्वा कवचान्यं पठेत्तु यः ।
सर्व्वं तस्य वृथा देवि ! निस्तेजो न च सिद्धिदम् ॥"
इति ब्रह्मनामलीयगायत्रीकवचधृतम् ॥
(यथा च देवीभागवते । २ । ८ । ११ ।
"हृष्यपत्रस्तदा मार्गे चौराभीरैश्च लुण्ठिता ।
धनं सर्व्वं गृहीतञ्च निस्तेजाश्चार्ज्जुनोऽभवत् ॥")

निस्त्रिंशः, पु, (निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्य इति । निरादय इति समासः । "सङ्ख्यायास्तत्पुरुषस्य डज्वाच्यः ।" ५।४।११३ । इत्यस्य वार्त्तिकोक्त्या डच् ।) खड्गः । इत्यमरः । २ । ८ । ८९ ॥ (यथा, महाभारते । ४ । ४१ । २४ ।
"नकुलस्यैष निस्त्रिंशो गुरुभारसहो दृढः ॥")
निर्दये, त्रि । इति मेदिनी । शे, २१ ॥ (यथा, अमरुशतके । ५ ।
"दत्तोऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम् ।
मन्युर्दुःसह एष यात्युपशमं नो शान्तवादैः स्फुटम् ।
हे निस्त्रिंश ! विमुक्तकण्ठकरुणं तावत् सखी रोदितु ॥")
त्रिंशत्शून्यः । इति व्याकरणम् ॥

निस्त्रिंशधारी, [न्] त्रि, (निस्त्रिंशं धरतीति । निस्त्रिंश + धृ + णिनि ।) खड्गधारी । तल्लक्षणं यथा, मात्स्ये १८९ अध्यायः ।
"सुरूपस्तरुणः प्रांशुर्दृढभक्तिः कुलोचितः ।
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्त्तितः ॥"

निस्त्रिंशपत्रिका, स्त्री, (निस्त्रिंशः खड्ग इव पत्रमस्या अस्तीति । ठन् ।) स्नुहीवृक्षः । इति राजनिर्घण्टः ॥

निस्त्रैणपुष्पिकः, पु, राजधत्तूरकः । इति राजनिर्घण्टः ॥

निस्नेहफला, स्त्री, (निस्नेहं तैलविहीनं फलं यस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

निस्पन्दः, पु, (नि + स्पन्द + भावे घञ् ।) स्पन्दनम् । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १२ । ३३५ । ९ ।
"मेरोः सहस्रैः स हि योजनानां
द्वात्रिंशतोर्द्ध्वं कविभिर्निरुक्तः ।
अनिन्द्रियाश्चानशनाश्च तत्र
निस्पन्दहीनाः सुसुगन्धिनस्ते ॥")

निस्पन्दः, त्रि, (निरस्तः स्पन्दश्चक्षुपलकादिस्पन्दनं यस्मात् ।) स्पन्दरहितः । ईषत्कम्पशून्यः । यथा,
"कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्टः
कार्णाटीचीनपीनस्तनवसनदशान्दोलनिस्पन्दमन्दः ॥"
इति विक्रमादित्यराजसभायां राक्षसपद्यम् ॥

निस्पन्दतरं, त्रि, (निस्पन्द + तरप् ।) एकान्तस्पन्दरहितम् । यथा, नैषधे । ८ । १३ ।
"स्वप्ने घने नैषधकेशपाशे
निपत्य निस्पन्दतरी भवद्भ्याम् ।
तस्याशुमन्धं न विमोच्य गन्तुमपारि तल्लोचनखञ्जनाभ्याम् ॥"

निस्पृहः, त्रि, (निर्गता स्पृहा दृष्टादृष्टविषयवासना यस्येति ।) स्पृहाशून्यः । यथा,—
"निस्पृहः सर्व्वकामेभ्यो युक्त इत्युच्यते तदा ॥"
इति श्रीभगवद्गीतायाम् । ६ । १८ ॥

निस्पृहा, स्त्री, अग्निशिखावृक्षः । यथा,—
"अम्लाना निस्पृहा चापि मालिनी विष्णुवल्लभा ॥"
इति शब्दचन्द्रिका ॥
स्पृहाया अभावश्च ॥ (अव्ययीभावः ॥)

निस्(ष्य)न्दः, पुं, (नि + स्यन्दू ङ क्षरणे + भावे घञ् । "अनुविपर्य्यभिनिभ्यः स्यन्दतेरप्राणिषु ।" ८ । ३ । ७२ । इति वा षत्वम् ।) स्यन्दनम् । क्षरणम् । यथा,—
"माकन्दरसनिस्यन्दसुन्दरोङ्कारकारिणौ ।
श्रवणानन्दिनावेतौ वन्दिनाविव राजतः ॥"
इति प्रसन्नराघवनाटके महाधरमिश्रः ॥
(यथा च रामायणे । २ । ९४ । १३ ।
"जलप्रपातैरुद्भेदैर्निष्यन्दैश्च क्वचित् क्वचित् ।
स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः ॥"
निस्यन्दते इति कर्त्तरि अच् । क्षरणशीले, त्रि । यथा, रघुः । ३ । ४१ ।
"तदङ्गनिस्यन्दजलेन लोचने
प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥")

निस्रावः, पु, (निस्राव्यते इति । नि + स्रु + णिच् + घञ् ।) भक्तसमुद्भवमण्डम् । फेन इति माड इति च भाषा । तत्पर्य्यायः । मासरः २ आचामः ३ । इत्यमरः । २।९।४९॥ (नि + स्रु + घञ् । स्रवः । यथा, हरिवंशे । ६६ । ९ ।
"धातुनिस्रावदिग्धाङ्गं सानुमत्सवभूषितम् ॥")

निस्वनः, पुं, (नि+स्वन+"नौ गदनदपठस्वनः ।" ३ । ३ । ६४ । इति अप् ।) शब्दः । इत्यमरः । १।६।२३ ॥ (यथा, महाभारते । ७ । २६ । ३ ।
"यथा प्राग्ज्योतिषो राजा गजेन मधुसूदन ।
त्वरमाणोऽभिनिष्क्रान्तो ध्रुवं तस्यैव निस्वनः ॥")
निस्वानः, पुं, (नि+स्वन+पक्षे घञ् ।) शब्दः । इत्यमरः । १ । ६ । २३ ॥
निहननं, क्ली, (नि+हन+ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११४ ॥
निहन्ता, [ऋ] त्रि, (नि+हन+तृच् ।) हननकर्त्ता । यथा भट्टिः ।
"निहन्ता वैरकाराणां सतां बहुकरः सदा ।
पारम्बधिकरामस्य शक्तेरन्तकरो रणे ॥"
(महादेवे, पुं । यथा, महाभारते । १३ । १७ । ७५ ।
"भगहारी निहन्ता च कालो ब्रह्मा पितामहः ॥")
निहाका, स्त्री, (नियतं जहाति भुवमिति । नि+हा त्यागे+"नौ हः ।" उणां ३ । ४४ । इति कन् ।) गोधिका । इत्यमरः । २।१०।२२ ॥ (यथा, ऋग्वेदे । १० । ९७ । १३ ।
"साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥")
निहारः, पुं, (नितरां ह्रियन्ते पदार्था येन । नि+हृ+घञ् ।) नीहारः । इति शब्दरत्नावली ॥
निहितं, त्रि, (नि+धा+क्त । "दधातेर्हिः ।" ७ । ४ । ४२ । इति हि ।) स्थापितम् । इति हलायुधः ॥ यथा, महाभारते । ३।३१२।११२ ।
"धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्था ॥"
निंहिसनं, क्ली, (नि+हिन्स+भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११३ ॥
निहीनः, त्रि, (नितरां हीनः । कुगतीति समासः ।) नीचः । पामरः । इत्यमरः । २।१०।१६ ॥ (यथा, महाभारते । ३ । १२ । ११९ ।
"त इमे सिंहविक्रान्ता वीर्य्येणाभ्यधिकाः परैः ।
निहीनैः परिक्लिश्यन्तीं समुपेक्षन्ति मां कथम् ॥")
निह्नवः, पुं, (निह्नूयते सत्यवाक्यमनेनेति । नि+ह्नु+"ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) अपलापः । येन वचनं निह्नूयते सः । यथा, धारयन्नेव न धारयामीति । इत्यमरभरतौ ॥ तत्पर्य्यायः । निह्नुतिः २ अपह्नुतिः ३ अपह्नवः ४ । इति शब्दरत्नावली ॥ (यथा, याज्ञवल्क्ये । २।११ ।
"निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम् ॥")
निकृतिः । अविश्वासः । इति मेदिनी । वे, ३८ ॥ (यथा, महाभारते । ५ । ३७ । ३० ।
"न निह्नवं मन्त्रगतस्य गच्छेत्
संसृष्टमन्त्रस्य कुसङ्गतस्य ॥")
गुप्तः । इति शब्दरत्नावली ॥ (शुद्धिः । यथा, मनुः । ९ । २१ ।
"ध्यायत्यनिष्टं यत् किञ्चित् पाणिग्राहस्य चेतसा ।
तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते ॥")
निह्नुतिः, स्त्री, (नि+ह्नु+क्तिन् ।) निह्नवः । इति शब्दरत्नावली ॥

निह्रादः, पुं, (नि+ह्राद अव्यक्तशब्दे+घञ् ।) शब्दः । इत्यमरः । १।६।२३ ॥ (यथा, रघुः । १।४१ ।
"सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥")
निक्षणं, क्ली, (निक्ष चुम्बने+भावे ल्युट् ।) चुम्बनम् ॥
निक्षा, स्त्री, (निक्षति चुम्बतीव मस्तकमिति । निक्ष+अच्+टाप् ।) लिक्षा । यूकः । इत्युणादिकोषः ॥ निकी इति भाषा ॥
निक्षिप्तं, त्रि, (निक्षिप्यते स्मेति । नि+क्षिप+क्त ।) त्यक्तम् । तत्पर्य्यायः । परिक्षिप्तम् २ निवृतम् ३ परीतम् ४ परिवेष्टितम् ५ न्यस्तम् ६ निसृष्टम् ७ । इति जटाधरः ॥ स्थापितधनादि । यथा,—
"निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च ।
राजा विनिर्णयं कुर्य्यादक्षिण्वन्न्यासधारिणम् ॥"
इति मनुः । ८ । १९६ ॥
निक्षेपः, पुं, (नि+क्षिप्+घञ् ।) क्षेपणम् । त्यागः । समर्पितवस्तु । गच्छितद्रव्य इति भाषा । तत्पर्य्यायः । उपनिधिः २ न्यासः ३ । इति हेमचन्द्रः ॥ यथा,—
"स्वद्रव्यं यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः ।
निक्षेपो नाम तत् प्रोक्तं व्यवहारपदं बुधैः ॥
असंख्यातमविज्ञातं समुद्रं यन्निधीयते ।
तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥
निक्षेपं वृद्धिशेषञ्च क्रयं विक्रयमेव च ।
याच्यमानो न चेद्दद्याद्वर्द्धते पञ्चकं शतम् ॥"
इति मिताक्षरायां नारदः ॥ * ॥
"कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि ।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः ॥
आधिः सीमा बालधनं निक्षेपोपनिधी स्त्रियः ।
राजस्वं श्रोत्रियस्वञ्च न भोगेन प्रणश्यति ॥
स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे ।
न स राज्ञाभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ॥"
इति मनुः । ८ अध्याये ॥
नीकः, पुं, (नीयते इति । नी प्रापणे+"अजियुधूनीभ्यो दीर्घश्च ।" उणां ३ । १७ । इति कन् ।) वृक्षविशेषः । इत्युणादिकोषः ॥
नीकारः, पुं, (नि+कृ+घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति उपसर्गस्य दीर्घः ।) न्यकारः । इति शब्दरत्नावली ॥
नीकाशः, त्रि, (नितरां काशते इति । नि+काश+अच् । "इकः काशे ।" ६ । ३ । १२३ । इति उपसर्गस्य दीर्घः ।) तुल्यः । उपमा । इत्यमरः । २ । १० । ३८ ॥ (यथा, महाभारते । ३ । १८२ । १३ ।
"आकाशनीकाशतटां तीरवानीरसङ्कुलाम् ।
बभूव चरतां हर्षः पुण्यतीर्थां सरस्वतीम् ॥")
निश्चये, पुं । इति मेदिनी । शे, २३ ॥
नीचः, त्रि, (निकृष्टामीं लक्ष्मीं शोभां चिनोतीति । चि+"अन्येभ्योऽपि दृश्यते ।" इति डः ।) हीनजातिकर्म्मा । वर्व्वरः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । विवर्णः २ पामरः ३ प्राकृतः ४ पृथग्जनः ५ निहीनः ६ अपसदः ७ जाल्मः ८ क्षुल्लकः ९ इतरः १० । इत्यमरः । २।१०।१६ ॥ अपशदः ११ खुल्लकः १२ । इति भरतः ॥ हीनः १३ क्षुम्नः १४ क्षुद्रः १५ चेतकः १६ । इति शब्दरत्नावली ॥ नीचसङ्गदोषो यथा,—
"न प्राप्नोति सुखं किञ्चिन्नीचसङ्गान्महानपि ।
प्रेतसङ्गान्महादेवो नग्नो भस्मविभूषितः ॥
प्रविश्य निलयं नीचः स्त्रीधनादिकमिच्छति ।
स्वयं नेतुं न शक्नोति तदा नाशयति ध्रुवम् ॥
स्थिते गुणेऽपि नीचस्तु यत्नाद्दोषं प्रपद्यते ।
किञ्चित्तु सङ्गमासाद्य तदुक्तं स्यात् सनातनम् ॥
सतां श्रुत्वा गुणं नीचः शोकमायाति बन्धुवत् ।
ततः समयमासाद्य प्रकाशयति तद्व्यसन् ॥
मनस्येकं वचस्येकं कर्म्मण्येकं महात्मनाम् ।
मनस्यन्यद्वचस्यन्यत् कर्म्मण्यन्यद्दुरात्मनाम् ॥"
इति पाद्मे क्रियायोगसारे ५ अध्यायः ॥
अपि च ।
"बुद्धिश्च हीयते पुंसां नीचैः सह समागमात् ।
मध्यमे मध्यतां याति श्रेष्ठतां याति विसमे ॥"
इति शान्तिपर्व्व ॥ * ॥
अनुच्चः । तत्पर्य्यायः । वामनः २ न्यङ् ३ खर्व्वः ४ ह्रस्वः ५ । इत्यमरः । ३।१।७० ॥ (यथा,—
"नीचरोमनखश्मश्रुर्निर्म्मलाङ्घ्रिमलायनः ।
स्नानशीलः सुसुरभिः सुवेषोऽनुल्वणोज्ज्वलः ।
धारयेत् सततं रत्नसिद्धमन्त्रमहौषधीः ॥"
इति वाभटे सूत्रस्थाने द्वितीयेऽध्याये ॥)
निम्नः । यथा,—
"शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः स्पर्शेन यस्यापरे ।
किञ्चान्यत् कथयामि ते स्तुतिपदं त्वं जीविनां जीवनं
त्वञ्चेन्नीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं क्षमः ॥"
इति लक्ष्मणसेनः ॥ * ॥
चोरकनामगन्धद्रव्ये, पुं । इति राजनिर्घण्टः ॥
नीचकः, त्रि, (नीच एव । नीच+स्वार्थे कन् ।) वामनः । खर्व्वः । इति शब्दरत्नावली ॥
नीचका, स्त्री, (निकृष्टामीं शोभां चकति प्रतिहन्तीति । चक प्रतिघाते+अच् । टाप् ।) नैचिकी । उत्तमगवी । इत्यमरटीकायां भरतः ॥
नीचकी, [न्] पुं, उच्चः । उपरिभागः । इति हलायुधः ॥ उत्तमगवीमांसः ॥
नीचकैः, [स्] अव्य, (नीचैस्+"अव्ययसर्व्वनाम्नामकच् प्राक् टेः ।" ५ । ३ । ७१ । इति टेः प्रागकच् ।) नीचैः । नीचैः शब्दस्य टेः पूर्व्वकृतेनाका निष्पन्नः । यथा, उच्चकैरित्यादि ॥
नीचगं, क्ली, (नीचं निम्नदेशं गच्छतीति । गम+डः ।) जलम् । इति कोषान्तरम् ॥ पामरे, त्रि ॥

यथा भूतडामरतन्त्रे ।
"नीचगामङ्गनां प्राप्य चन्दनैर्मण्डलं लिखेत् ॥"
(निम्नगे च । यथा, वृहत्संहितायाम् ।१८।२२।
"अरुणपटुमयूखो नीचगोऽन्यैर्जितो वा
न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः ॥")

नीचगा, स्त्री, (नीचं निम्नं गच्छतीति । गम + ड । टाप् ।) निम्नगा । नदी । यथा,—
"नीचगा तु नदी नीची नीचगो नीचगं जले ।"
इति कोषः ॥
अपि च ।
"सङ्गमयति विद्येव नीचगापि नरं सरित् ।
समुद्रमिव दुर्द्धर्षं नृपं भाग्यमतः परम् ॥"
इति हितोपदेशः ॥

नीचभोज्यः, पुं, (नीचैर्यवनादिभिर्भोज्यः ।) पलाण्डुः । इति शब्दचन्द्रिका ॥ पामरभक्ष्ये, त्रि ॥

नीचवज्रं, क्ली, (नीचमनुत्कृष्टं वज्रम् ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

नीचिकी, स्त्री, नैचिकी । इत्यमरटीकायां भरतः ॥

नीचैः, [स्] व्य, (नि + चि + "नौ दीर्घश्च ।" उणा । ५ । १३ । इति डैस्, निशब्दस्य दीर्घश्च ।) अल्पम् । अनुच्चम् । इत्यमरः ॥ (यथा, मेघदूते । १०८ ।
"नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥")

नीडः, पुं क्ली, (नितरां ईड्यते स्तूयते सुखस्थलादिति । नि + ईड स्तुतौ + घञ् ।) पक्षिवासस्थानम् । पाखीरवासा इति भाषा ॥ तत्पर्यायः । कुलाय २ । इत्यमरः । २ । ५ । ३७ ॥ (यथा, भागवते । ३ । ५ । ३६ ।
"मार्गन्ति यत्ते मुखपद्मनीडै-
श्छन्दःसुपर्णैरृषयो विविक्ते ॥")
स्थानम् । इति मेदिनी । डे, १७ ॥ (रथ्याधिष्ठानस्थानम् । यथा, रामायणे ।५। ४८ । ३२ ।
"स भग्ननीडः परिवृत्तकूवरः
पपात भूमौ हतवाजिरम्बरात् ॥")

नीडजः, पुं, (नीडे जायते इति । जन + डः ।) पक्षी । इति हेमचन्द्रः । ४ । ३८३ ॥

नीडजेन्द्र, पुं, (नीडजानां पक्षिणामिन्द्रः ।) गरुडः । यथा,—
"अगदुहि जितनीडजेन्द्रवेगे
क्षतनिविडासनसुब्भताघपीडे ।
सरभसनतडितकडारदृष्टि
श्टहसुदुराडिव शोभिचण्डमीडे ॥"
इति प्राचीनशिवस्तुतिः ॥

नीडोद्भवः, पुं, (नीडे कुलाये उद्भव उत्पत्तिर्यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥

नीत, त्रि, (नी + क्तः ।) प्राप्तम् । नेओया इति भाषा ॥ यथा,—
"नीत यदि नवनीतं नीत नीत किमेतेन ।
आतपतापितभूमौ माधव । मा धाव मा धाव ॥"
इत्युद्भटः ॥

नीतिः, स्त्री, (नीयन्ते संलभ्यन्ते उपायादय ऐहिकामुष्मिकार्था वास्यामनया वा । नी + अधिकरणे करणे वा क्तिन् ।) नयः । (नी + भावे क्तिन् ।) प्रापणम् । इति मेदिनी । ते, ३० ॥ अथ नीतिशास्त्रं लिख्यते ।
"नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः ।
विनयो हीन्द्रियजयस्तद्युक्तःशास्त्रमिच्छति ॥
आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।
ततोऽमात्यान् ततो भृत्यांस्ततः पुत्त्रांस्ततः प्रजाः ॥
सदानुरक्तप्रकृतिः प्रजापालनतत्परः ।
विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते ॥
एकदाकरणसामर्थ्यात् संयम्यात्मानमात्मना ।
नयानयनविद्राजा कुर्व्वीत हितमात्मनः ॥
जितेन्द्रियस्य नृपतेर्नीतिशास्त्रानुसारिणः ।
भवन्त्युज्ज्वलिता लक्ष्म्यः कीर्त्तयश्च नभस्पृशः ॥"
इति नीतिमयूखद्वितीयप्रयोगः ॥
सगर उवाच ।
"यया नीत्या प्रयोक्तव्यः सुत आत्मा प्रिया तथा ।
तेषां विशेषैः सहितं सदाचारं वदस्व मे ॥"
और्व्व उवाच ।
क्रमेण शृणु राजेन्द्र । यया नीत्या नियुज्यते ।
आत्मा सुतो वा भार्य्या वा तद्विशेष शृणुष्व मे ॥
ज्ञानवृद्धांस्तपोवृद्धान् वयोवृद्धान् सुदक्षिणान् ।
सेवेत प्रथमं विप्रानसूयापरिवर्ज्जितान् ॥
तेभ्यश्च शृणुयान्नित्यं वेदशास्त्रविनिर्णयम् ।
यदूचुस्ते च तत् कार्य्यं प्राज्ञश्चैतन्नृपश्चरेत् ॥
पञ्चेन्द्रियाणि पञ्चाश्वाः शरीरं रथ उच्यते ।
आत्मा रथी कशा ज्ञानं सारथिर्म्मन उच्यते ॥
अश्वान् सुदान्तान् कुर्व्वीत सारथिं चात्मनो वशम् ।
कशा भूप । दृढा कार्य्या शरीरस्थिरता तथा ॥
अदान्तास्तु समारुह्य सैन्धवान् स्यन्दनी यथा ।
अश्वानामिच्छया गच्छन्नुत्पथं प्रतिपद्यते ॥
यत्रावशः सारथिस्तु स्वेच्छया प्रेरयन् हयान् ।
नयेत् परवशं सम्यक् प्रथितं वीरमच्युत ॥
यथेन्द्रियाणि नृपतिर्व्विषयाणां परिग्रहे ।
स्ववश्यानि प्रकुर्व्वीत मनोज्ञानं दृढं तथा ॥
ज्ञाने दृढे कशायां वा दृढायां नृपसत्तम ।
सारथिः स्ववशो दान्तोऽनीशः प्रेरयितुं हयान् ॥
अतो नृपः स्वेन्द्रियाणि वशे कृत्वा मनस्तथा ।
ज्ञानमार्गमधिष्ठाय प्रकुर्व्वीतात्मनो हितम् ॥
भोक्तव्यं स्वेच्छया भूपो न कुर्य्यादुत्पथे रतिम् ।
द्रष्टव्यमिति द्रष्टव्यं न द्रष्टव्यञ्च स्वेच्छया ॥
श्रोतव्यमिति श्रोतव्यं नाधिकं श्रवणे चरेत् ।
शास्त्रतत्त्वरते धीरः श्रुतिवश्यो भवेन्नहि ॥
एवं प्राणं त्वचं वापि वशीकृत्येच्छया नृपः ।
स्वेच्छयैवोपभुञ्जीत नोद्दाम विषयं व्रजेत् ॥
एवं यदि भवेद्राजा तदा स स्याज्जितेन्द्रियः ।
जितेन्द्रियत्वे हेतुश्च शास्त्रवृद्धोपसेवनम् ॥
अवृद्धसेवशास्त्रज्ञो नृपः शत्रुवशो भवेत् ।
तस्माच्छास्त्रमधिष्ठाय भवेद्राजा जितेन्द्रियः ॥
धृतिः प्रागल्भ्यमुत्साहो वाक्पटुत्वं विवेचनम् ।
दक्षत्वं धारयिष्णुत्वं दानं मैत्री कृतज्ञता ॥
दृढशासनता सत्यं शौचं मतिविनिश्चयः ।
पराभिप्रायवेदित्वं चारित्वं धैर्य्यमापदि ॥
क्लेशधारणशक्तिश्च गुरुदेवद्विजार्च्चनम् ।
अनसूया ह्यक्रोधित्वं गुणानेतान्नृपोऽभ्यसेत् ॥
कार्य्याकार्य्यविभागञ्च धर्म्मार्थौ काममेव च ।
दानस्य विषये सामयोगमेवोपजायते ॥
सततं प्रतिबुध्येत कुर्य्यादवसरेऽपि तत् ।
साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम् ॥
ज्ञात्वोपायांस्तु तत्स्थाने तानुपायान् प्रयोजयेत् ।
साम्नस्तु विषये भेदो मध्यमः परिकीर्त्तितः ॥
दानस्य विषये दण्डो ह्यधमः परिकीर्त्तितः ।
दण्डस्य विषये दानं तदप्यधममुच्यते ॥
साम्नस्तु गोचरे दण्डो ह्यधमादधमः स्मृतः ।
सौजन्यं सततं ज्ञेयं भूभृतो भेददण्डयोः ॥
साम्नो दानस्य च तथा सौजन्यं याति गोचरे ॥
कामः क्रोधश्च लोभश्च हर्षो मानमदौ तथा ।
एतानतिशयान् राजा शत्रूनिव विघातयेत् ॥
सेव्याः कालेषु मुख्येते लोभगर्व्वौ विवर्ज्जयेत् ।
तेज एव नृपाणान्तु तीव्रं सूर्य्यस्य वै यथा ॥
तत्र गर्व्वं रोगयुक्तकायवत्तत्तु सन्त्यजेत् ।
आखेटकाद्यौ स्त्रीसेवा पानञ्चैवात्मदूषणम् ॥
वाग्दण्डयोश्च पारुष्यं सप्तैतानि विवर्ज्जयेत् ।
परस्त्रीषु विरक्तासु सेवामेकान्ततस्त्यजेत् ॥
सतीषु निजनारीषु प्रेमणा कुर्य्याच्च सेवनम् ।
रतिपुत्त्रफला दारास्तांस्तु नैकान्ततस्त्यजेत् ॥
तयोः सिद्ध्यै स्त्रियः सेव्या वर्ज्जयित्वातिसक्तताम् ।
मृगयायान्तु प्रमादानां स्थानं नित्यं विवर्ज्जयेत् ॥
अर्थांस्तथा न कुर्व्वीत सन्कार्य्यासक्तिनाशनान् ।
अन्यैः कृतं कदाचित्तु सेवेत नात्मनाचरेत् ॥
अकार्य्यकरणे वीजं कृत्यानाञ्च विवर्ज्जनम् ।
वर्जयेत् सततं पानं शौचमाङ्गल्यनाशनम् ।
अर्थक्षयकरं नित्यं त्यजेच्चैवात्मदूषणम् ॥
अभिशस्तेषु चौरेषु घातकेष्वाततायिषु ।
सततं पृथिवीपालो दण्डपारुष्यमाचरेत् ॥
नान्यत्र दण्डपारुष्यं कुर्य्यान्नृपतिसत्तमः ।
वाक्पारुष्यन्तु सर्व्वत्र नैव कुर्य्यात् कदाचन ॥
रक्षणीयं सदा सत्यं सत्यमेकं परायणम् ।
क्षमा तेजस्विताञ्चैव प्रस्तावान्नृप आचरेत् ॥
यानासनाश्रयद्वैधसन्धयो विग्रहस्तथा ।
अभ्यसेत् षड्गुणानेतान् तेषां स्थानञ्च शाश्वतम् ॥
यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोषे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥
कोषे जनपदे दण्डे चैकैकत्र त्रयं त्रयम् ।
प्रस्तावाद्विनियुञ्जीत रक्षेन्नैकान्ततस्त्रिमान् ॥
मित्रे शत्रावुदासीने प्रभावं त्रिष्वपीरयेत् ।
उत्साहो विजिगीषाया धर्म्मसत्येऽष्टवर्गके ॥
शरीरयात्रानिर्व्वाहे क्रियेत सततं नृपे ।
मन्त्रनिश्चयसम्भूतां बुद्धिं सर्व्वत्र योजयेत् ॥
अमात्ये शात्रवे राज्ये पुत्त्रेष्वन्तःपुरेषु च ॥ * ॥
कृषिर्दुर्गञ्च वाणिज्यं खल्याना करसाधनम् ।
आदानं सैन्यकरयोर्बन्धनं गजवाजिनोः ॥
शून्यसद्मसुखानाञ्च योजनं सततं जनैः ।
प्रपाणागारसेतूनां रचनञ्चेति चाष्टमम् ॥

एतदष्टासु वर्गेषु चारान् सम्यक् प्रयोजयेत् ॥
कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम् ।
अष्टौ चारान्नियुञ्जीयादष्टवर्गेषु पार्थिवः ॥
दशस्वन्येषु युञ्जीत क्रमतः शृणु तानि मे ।
स्वामिसचिवराष्ट्राणि मित्रं कोषो बलन्तथा ॥
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम् ।
दुर्गयुक्तञ्चाष्टवर्गं चारं नात्मनि योजयेत् ॥
तस्मादिमानि शेषाणि पञ्च चारपदानि तु ।
शुद्धान्तेष्वेव पुत्त्रेषु सकूपाद्रौ महानसे ॥
शत्रूदासीनयोश्चैव बलाबलविनिश्चये ।
आदौ दशसु चैतेषु चाराणां प्रयोजयेत् ॥
न यत् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत् ।
निरूप्य तत्प्रतीकारमवश्यं छिद्रतश्चरेत् ॥
यथा नियोगमेतेषां यो यो यत्रान्यथाचरेत् ।
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत् ॥
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये सुस्थितो नृपः ।
प्रदोषसमये पृच्छेत्तदानीमेव साधयेत् ॥
स्वपुत्त्रे चाथ शुद्धान्ते ये तु चारा महानसे ।
नियुक्तास्तान् मध्यरात्रौ पृच्छेद्द्वयस्यापि मन्त्रिणि ॥
एतान् चारान् स्वयं पश्येन्नृपतिर्मन्त्रिणा विना ।
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम् ॥
नैकवेशधरश्चारो नैको नोत्साहवर्ज्जितः ।
संस्तुतो नहि सर्व्वत्र नातिदीर्घो न वामनः ॥
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान् ।
न वित्तविभवैर्हीनो न भार्य्यापुत्त्रवर्ज्जितः ॥
कार्य्यश्चारो नृपतिना गुह्यतत्त्वविनिर्णये ।
अनेकवेशग्रहणक्षमं भार्य्यासुतैर्य्युतम् ॥
बहुदेशवचोऽभिज्ञं पराभिप्रायवेदकम् ।
दृढभक्तं प्रकुर्व्वीत चारं शक्तमसाध्वसम् ॥
अधितिष्ठेत् स्वयं राजा कृषिमात्मसमैस्तथा ।
वणिक्पथे च दुर्गादौ तेषु शक्तान्नियोजयेत् ॥
अन्तःपुरे पितुस्तुल्यान् धीमान् वृद्धान्नियोजयेत् ।
षण्ढान् पण्डांस्तथा वृद्धान् स्त्रियो या बुद्धितत्-
परा ॥ * ॥
शुद्धान्तद्वारि युञ्जीयात् स्त्रियो वृद्धा मनीषिणी ।
नैकः स्वपेत् कदाचित्तु नैको भुञ्जीत पार्थिवः ॥
नैकाकिनीन्तु महिषीं प्रजेम्मैत्राय नैककः ।
अमात्यानुपधाशुद्धान् भार्य्याः पुत्त्रांस्तथैव च ॥
प्रकुर्य्यात् सततं भूपः स्वप्रसाद समाचरन् ।
धर्म्मार्थकाममोक्षैश्च प्रत्येकमपरिशोधनैः ॥
उपेत्य धीयते यस्मादुपधा परिकीर्त्तिता ।
अथ कामोपधाभ्यान्तु भार्य्याः पुत्त्रांस्तु शोधयेत् ॥
धर्म्मोपधाभिर्विप्रांस्तु सर्व्वाभिः सचिवान् पुनः ।
एभिर्यत्नैस्तथा दानैरिष्टैव नृपता भवेत् ॥ * ॥
तस्माद्वयांस्तु राज्यार्थी धर्म्ममेवं समाचरेत् ।
अनेनैवाभिचारेण यज्ञैर्वा पार्थिवो ह्ययम् ।
प्राणांस्त्यक्ष्यति राजा त्वं भविष्यसि न संशयः ॥
इति धर्म्मो नृपस्यैव अश्वमेधादिकञ्च यत् ।
स्वयं न कुरुते भूपस्तस्मात्त्वं कुरु सत्तम ॥
एवं मन्त्रैर्मन्त्रयित्वा नृपः कार्त्तान्तिकान् द्विजान् ।
तैरध्वाताम् स्वयं ज्ञात्वा गृह्णीयात्तस्य तैर्म्मन ॥
यदि राज्याभिलाषेण सचिवो धर्म्ममाचरेत् ।
नृपतौ वाधिकं कुर्य्याद्धर्म्मं तं हीनतां नयेत् ॥
आभिचारिकमत्यर्थं कुर्व्वाणन्तु विघातयेत् ।
प्रवासयेद्ब्राह्मणन्तु पार्थिवो ह्याभिचारिकम् ॥
एषां धर्म्मोपधा ज्ञेया तैरमात्यान् सदा चरेत् ।
एतादृशीं तथैवान्यासुपधां धर्म्मतश्चरेत् ॥ * ॥
कोषाध्यक्षान् समामन्त्र्य राजामात्यान् प्रती-
रयेत् ।
पुत्त्रानन्यान् प्रति तथामन्त्र्य संवरणक्षमान् ॥
अयं हि प्रचुरः कोषो सदायत्तो नरोत्तम ।
आनये तव सम्मत्या तद्दृयदि त्वं प्रतीच्छसि ॥
तवाप्रलब्धादस्माकं जीवनञ्च भविष्यति ।
त्वञ्चापि प्रचुरे कोषे किं किं नो वा करिष्यसि ।
एवमन्यैः कोषगतैरुपायैर्नृपसत्तम ॥
पुत्त्रामात्यादिकान् सर्व्वान् सततं परिशोधयेत् ।
कोषदोषकरान् हन्याद्धसंमिच्छून्निवारयेत् ॥
द्वैधचिन्तान् विमन्त्र्येत कुर्य्याद्वै कोषरक्षणम् ॥ * ॥
दासीश्च शिल्पिनीर्वृद्धा मेधाधृतिमतीः स्त्रियः ॥
अमर्त्त्यहिंस्रा या याम्नि विदिता सचिवादिभिः ।
ता राजा रहसि स्थित्वा भार्य्यादिभिरलक्षितः ॥
अभिमन्त्र्याथ संमन्त्र्य प्रेरयेत् सचिवान् प्रति ।
ता गत्वा हृदयं बुद्ध्वा स्त्रियो वै ज्ञानतत्पराः ॥
महिषीप्रमुखा राज्ञस्त्वां वै कामयते शुभाः ।
तस्माद्ध योजयिष्यामि यदि ते वर्त्तते स्पृहा ॥
सचिवस्त्वां कामयते त्वद्योग्यो वरवर्णिनि ।
स सङ्गमयितुं शक्ता यदि श्रद्धा तवास्त्यहम् ॥
इत्यनेन प्रकारेण नानोपायैस्तथेतरैः ।
भार्य्याः पुत्त्रीर्दुहितृश्च स्नुषाश्च प्रसूस्तथा ॥
शोधयेत् सचिवान् पुत्त्रान् पौत्त्रादीन् सेवकां-
स्तथा ।
कामोपधाविशुद्धांस्तु घातयेदविचारयन् ॥
स्त्रियश्च दण्ड्या योग्येन ब्राह्मणांस्तु प्रवासयेत् ।
मोक्षमार्गावसक्तन्तु हिंसापैशुन्यवर्ज्जितम् ।
चरमैकसारं नृपतिः सचिवं परिवर्ज्जयेत् ॥
मोक्षमार्गावसक्तांस्तु दण्ड्यानपि न दण्डयेत् ।
समबुद्धिस्तु सर्व्वत्र तस्मात्तं परिवर्ज्जयेत् ॥ * ॥
इति स्वत्र चोपधानासुपधां बहुधा पुनः ।
विवेचिता चोशनसा तच्छास्त्रे तत्र बोधयेत् ॥
विग्रहं सततं राजा परैर्न सम्यगाचरेत् ।
भूवित्तमित्रलाभेषु निश्चितेष्वेव विग्रहः ॥
सप्ताङ्गेष्वप्रमादश्च सदा कार्य्यो नृपोत्तमैः ।
कोषस्य सञ्चयं रक्षां सततं सम्यगाचरेत् ॥ * ॥
मन्त्रिणस्तु नृपः कुर्य्याद्विप्रान् विद्याविशारदान् ।
विनयज्ञान् कुलीनांश्च धर्म्मार्थकुशलानृजून् ॥
मन्त्रयेत्तैः समं काले नात्यर्थं बहुभिश्चरेत् ।
एकैकेनैव कर्त्तव्यं मन्त्रस्य तु विनिश्चयम् ॥
व्यस्तेष्वेव समस्तेषु धान्यस्य व्यपदेशतः ।
सुसंवृतं मन्त्रगृहं स्थलमारुह्य मन्त्रयेत् ॥
अरण्ये निःशलाके वा न यामिन्यां कदाचन ।
शिशून् शाखामृगान् षण्ढान् शुकान् वै शारि-
कास्तथा ॥
वर्ज्जयेन्मन्त्रगेहेषु मनुष्यान्गुह्यतांस्तथा ।
दूषणं मन्त्रभेदेषु नृपाणां यत्र जायते ॥
न तच्छक्यं समाधातुं शतैर्नृपशतैरपि ।
दण्ड्यांस्तु दण्डयेद्दण्डैरदण्ड्यान् दण्डयेन्नहि ॥
अदण्डयन्नृपो दण्ड्यानदण्ड्यांश्चापि दण्डयन् ।
नृपतिर्वाच्यतां प्राप्य चौरकिल्बिषमाप्नुयात् ॥ * ॥
दुर्गन्तु सततं कुर्य्यात् प्राकाराट्टालतोरणैः ।
दूषिताम्नगराद्राजा दूरे दुर्गाश्रयं चरेत् ॥
दुर्गं बलं नृपाणान्तु नित्यं दुर्गं प्रशस्यते ।
शतमेको योधयति दुर्गस्थो यो धनुर्धरः ॥
शतं दशसहस्राणि तस्माद्दुर्गं प्रशस्यते ॥
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च ।
अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम् ।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः ॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात्त्रिकोणं धनुराकृति ।
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत् ॥
मृदङ्गाकृतिदुर्गञ्च सततं कुलनाशनम् ।
यथा राक्षसराजस्य लङ्का दुर्गा जिता पुरा ॥
बलेः पुरं शोणिताख्यं तेजो दुर्गं प्रतिष्ठितम् ।
यतस्तद्राजनाकारमतो भ्रष्टः श्रिया बलिः ॥
सौभाख्यं शाल्वराजस्य नगरं पञ्चकोणकम् ।
दिवि यद्भ्रमते राजस्तच्च भ्रष्टं भविष्यति ॥
यथायोध्याह्वयं भूप । पुरमिक्ष्वाकुभूभुजाम् ।
धनुराकृति तच्चापि ततो भूरिजयप्रदम् ॥
दुर्गभूमौ यजेद्दुर्गां दिक्पालांश्चैव द्वारतः ।
पूजयित्वा विधानेन जयं भूपः समाप्नुयात् ।
ततो दुर्गं नृपः कुर्य्यात् सततं जयवृद्धये ॥ * ॥
न ब्राह्मणान् सदा राजा कदाचिदवमन्यते ।
अवमत्य नृपो विप्रान् प्रेत्येह दुःखभाग्भवेत् ॥
न विरोधस्तु तैः कार्य्यः स्वानि तेषां न चाददेत् ।
कृत्यकालेषु सततं तानेव परिपूजयेत् ।
नैषां निन्दां प्रकुर्व्वीत नाभ्यसूयां तथाचरेत् ॥
एवं नृपो महाबुद्धिर्भूमण्डलसयतः ।
अप्रमादी चारचक्षुर्गुणवान् सुप्रियवदः ॥
प्रेत्येह महतीं सिद्धिं प्राप्नोति सुखभोगवान् ।
यैर्गुणैर्योजितश्चात्मा तैः पुत्त्रानपि योजयेत् ॥
नृपस्य च स्वतन्त्रत्वं सततं स्व विनाशयेत् ।
स्वतन्त्रा भूपतनयो विकारं याति निश्चयम् ॥
निर्व्विकाराय सततं तत्सुखैः परिपूजयेत् ।
भोजने शयने पाने पुरुषाणाञ्च वीक्षणे ॥
नियोजयेत् सदाचारान् भूपः कामविचेष्टने ।
अस्वतन्त्राः स्त्रियो नित्यं ज्ञानये सम्भवन्ति हि ॥
तस्मात् कुमारं महिषीसुपधाभिर्म्मनोहरैः ।
शोधयित्वा नियुञ्जीत यौवराज्यावरोधयोः ।
अन्तःपुरप्रवेशे तु स्वतन्त्रत्वं निषेधयेत् ॥
भूपपुत्त्रस्य भार्य्याया बहिःसारे तथैव च ।
अयं विशेषः सचेपान्नृपधर्म्मो मयोदितः ॥
पुत्त्राणां गुणविन्यासो भार्य्याणामपि भूपते ।
उशना राजनीतीनां तन्त्राणि च बृहस्पतिः ॥
चकाराभ्यान् विशेषांस्तु तयोस्तन्त्रेषु शोधयेत् ।
एवं राजा महाभागो राजनीतौ विशेषताम् ।
कुर्व्वन्न सीदति सदा भूयसीं श्रियमश्नुते ॥”
इति कालिकापुराणे राजनीतिविशेषे ८५
अध्यायः ॥ * ॥

अन्यत्तु औशनसबार्हस्पत्यकामन्दकपञ्चतन्त्रनीति-मयूखहितोपदेशचाणक्यभारतीय-राजधर्म्मादौ द्रष्टव्यम् ॥

नीतिघोषः, पुं, (नीतिरेव नीत्यात्मको वा घोषो रवो यस्येति ।) वृहस्पतिरथः । इति त्रिकाण्ड-शेषः ॥ (नीतेर्नयस्य घोषः ।) नयध्वनिश्च ॥

नीतिसारः, पुं, (नीतिरेव सारो यस्येति ।) इन्द्रं प्रति वृहस्पत्युक्तनीतिशास्त्रविशेषः । अयं चाणक्यसंग्रहमूलम् । गरुडपुराणे अष्टाध्यायेष्वस्ति । बाहुल्यभिया तत् समुदायं न लिखित्वा अष्टानामध्यायानां प्राथमिकाष्टश्लोका लिख्यन्ते । यथा,—

"सद्भिः सङ्गं प्रकुर्व्वीत सिद्धिकामः सदा नरः ।
नासद्भिरिह लोकाय परलोकाय वा हितम् ॥१॥
आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ २ ॥
यो ध्रुवाणि परित्यज्य अध्रुवाणि च सेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ ३ ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥४॥
भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्थेषु त्रिविधेष्वेव कर्म्मसु ॥ ५ ॥
गुणवन्तं नियुञ्जीत गुणहीनं विवर्ज्जयेत् ।
पण्डिते च गुणाः सर्व्वे मूर्खे दोषाश्च केवलम् ॥६॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥७॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत् ॥"८॥
इति गारुडे ॥

नीथः, पुं (नयति प्रापयतीति । नी+"हनि-कुषिनीरमिकाशिभ्यः क्थन् ।" उणां २ । २ । इति क्थन् ।) नियन्ता । प्रापयिता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (नी+भावे क्थन् । नयनम् । इति उज्ज्वलदत्तः ॥ यथा, ऋग्वेदे । १ । १०० । १२ ।

"सहस्रचेताः शतनीथ ऋभ्वा ॥"

स्तोत्रम् । यथा, ऋग्वेदे । ३ । १२ । ५ ।

"नीथाविदो जरितारः ॥"

"नीथाविदः स्तोत्राभिज्ञाः ।" इति तद्भाष्ये सायनः ॥)

जले, स्त्री । इति संक्षिप्तसारोणादिवृत्तिः ॥ (नीयतेऽनेनेति । करणे+क्थन् । प्रापणहेतु-भूते, त्रि । यथा, ऋग्वेदे । १ । १०४ । ५ ।

"प्रति यत् स्या नीथादर्शि ॥"

"यद्यदा नीथा नयनहेतुभूता स्या सा पदवी प्रत्यदर्शि ।" इति तद्भाष्ये सायनः ॥)

नीध्रं, क्ली, (नितरां ध्रियत इति । नि+धृ+मूल-विभुजादित्वात् कः ।) वल्मीकम् । वनम् । नेमिः । चन्द्रः । रेवतीनक्षत्रम् । इति हेम-चन्द्रः ॥ नीव्रमपि पाठः ॥

नीपः, पुं, (नी+"पानीविषिभ्यः पः ।" उणां ३ । २३ । इति पः । बाहुलकात् गुणाभावः ।) कदम्बवृक्षः । इत्यमरः । २ । ४ । ४२ ॥ (यथा, ऋतुसंहारे । ३ । १९ ।

"त्यक्ता कदम्बकुटजार्ज्जुनसर्ज्जनीपान् सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥"

क्वचित् क्ली । यथा,—

"नीपं सभाङ्गकं पीलु तृणशून्यं विकङ्कतम् ।
प्राचीनामलकञ्चैव दोषघ्नं गरहारि च ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
"गरदोषहरं नीपं प्राचीनामलकन्तथा ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

धाराकदम्बः । इति राजनिर्घण्टः ॥ बन्धूक-वृक्षः । नीलाशोकवृक्षः । इति मेदिनी । पे, ८ ॥

नीयमानं, त्रि, (नीयते इति । नी+कर्म्मणि शानच् ।) प्राप्यमाणम् । यथा, कालिकापुराणे ।

"नीयमानो न गच्छेच्चेन्महिषीमरणं तदा ॥"

नीरं, क्ली, (नयति प्रापयति स्थानात् स्थानान्तर-मिति । नी प्रापणे+"स्फायितञ्चीति ।" उणां २ । १३ । इति रक् । यद्वा, "अम्भीरापः ।" इति श्रुतेः निर्गतं रादग्नेरिति, "अग्नेोऽपि भक्षयाः चत्तम् ।" इति स्मृतेः निर्गतो रोऽग्नि-र्यस्मादिति वा । "ढ्रलोपे पूर्व्वस्य दीर्घोऽणः ।" ६ । ३।१११। इति रलोपे पूर्व्वदीर्घः ।) जलम् । इत्यमरः ।१।१०।४॥ (यथा, गीतगोविन्दे ।१।६।

"छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप
जय जगदीश हरे ॥")

रसः । इत्युणादिकोषः ॥ नीरे अपेयानि यथा, गरुड़पुराणे ।

"निष्ठीवाद्दकशक्लन्मूत्रविषाण्यप्सु न संक्षिपेत् ॥"

(अस्य पानविधेयता विधीयते यथा,—

"वाप्युद्भवन्तत् प्रवदन्ति धीरा
नीरं समासेन निगद्यतेऽत्र ।
यत् श्रीमताश्चैव महायतीनां
बलप्रदं पथ्यतरं प्रदिष्टम् ॥"
"विण्मूत्रे तृणनीलिका विषयुतं तप्तं घनं फेनिलं
दन्तग्राह्यमनार्त्तवं हि सलिलं दुर्गन्धि यै
गर्हितम् ।
नानाजीवविमिश्रितं गुरुतरं पर्णौघपङ्काविलं
चन्द्रार्कांशुसुगोपितं न च पिबेन्नीरं सुदोषा-
न्वितम् ॥"
इति हारीते प्रथमस्थाने सप्तमेऽध्याये ॥)

नीरजं, क्ली, (नीरे जले जायते इति । जन+डः ।) कुष्ठौषधिः । (यथा, सुश्रुते चिकित्सित स्थाने । २५ ।

"फलत्रयं लौहरजोऽञ्जनञ्च
यष्ट्याह्वयं नीरजसारिवे च ॥")

पद्मम् । इति मेदिनी । जे, २४ ॥ (यथा, अमरु-शतके । ४ ।

"नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया ॥")

मुक्ता । इति राजनिर्घण्टः ॥ जलजाते, त्रि ॥

नीरजः, पुं, (नीरे जायते इति । जन+डः ।) उद्रजन्तुः । इति शब्दरत्नावली ॥ उशीरो । इति राजनिर्घण्टः ॥ (महादेवः । यथा, महा-भारते । १३ । १७ । १४६ ।

"उद्भित्त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ॥")

नीरजः, [स्] त्रि, (निर्नास्ति रजो धूलिः कुसुमपरागादिर्वा यत्र ।) निर्धूलिदेशपुष्पादि । (यथा, महाभारते । १३ । ८१ । २० ।

"सर्व्वा मणिमयी भूमिः सर्व्वकाञ्चनवालुका ।
सर्व्वस्पर्शसुखसंस्पर्शा निष्पङ्का नीरजाः शुभा ॥")

अरजस्कायाम् स्त्री ॥

नीरतः, त्रि, (निर्गतं रतं रमणं यस्मात् ।) विरतः । रमणाभाववान् । यथा,—

"दिशि दिशि नीरतरङ्गो नीरतरङ्गो ममापि
हृदयेशः ।
आयाताः सखि वर्षा वर्षादपि यासु वासरो
दीर्घः ॥"
इत्युद्भटदग्धपद्यम् ॥

नीरदः, पुं, (नीरं जलं ददातीति । नीर+दा+कः ।) मेघः । यथाह घटकर्परः ।

"निचितं खमुपेत्य नीरदैः प्रियहीना हृदयाव-
नीरदैः ।"

मुस्तकम् । इति राजनिर्घण्टः ॥ (निर्नास्ति रदो दन्तो यस्य ।) रदशून्ये, त्रि ॥ यथा,—

"आस्वाद्य निरवशेषं विरहिमधूनां मृदूनि
मांसानि ।
करकामिषेण मन्ये निष्ठीवति नीरदोऽस्थीनि ॥"
इत्युद्भटः ॥

नीरधिः, पुं, (नीराणि धीयन्तेऽस्मिन्निति । नीर+धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । इति शब्दरत्नावली ॥

नीरनिधिः, पुं, (नीराणि निधीयन्तेऽत्रेति । नीर+नि+धा+किः ।) समुद्रः । इति शब्द रत्नावली ॥ (यथा, माघे । ३ । ७० ।

"पारे जलं नीरनिधेरपश्य-
न्मुरारिरानीलपलाशराशीः ॥")

नीरन्ध्रं, त्रि, (निर्नास्ति रन्ध्रं छिद्रं यस्मिन् ।) घनम् । इति हेमचन्द्रः । ६ । ८३ ॥ (यथा माघे । ८ । ३ ।

"नीरन्ध्रद्रुमशिशिरां भुवं व्रजन्तीः
साशङ्कं मुहुरिव कौतुकात् करैस्ताः ।
पस्पर्श व्रणमलिनाकुलीकृतानां
शाखानामनुहिनरश्मिरन्तरालैः ॥")

छिद्ररहितम् । यथा,—

"श्रीमन्नाथ तवार्जितोर्जितयशःसंशुद्धमुक्तावली-
मादायैव विधिर्व्विधित्सुरमलं हारं त्वदीये-
र्गुणैः ।
नीरन्ध्रामवलोक्य तामपि ततो नान्तं गुणाना-
महो
उन्नेतुमुर्गगनान्तरे समकिरत्ताः स्वतः
स्तारकाः ॥"
इति कालिदासः ॥

नीरस, पुं, (निसरां रसो यत्र ।) दाड़िमः । इति हारावली ॥ (निर्गतो रसो यस्य ।) रसशून्ये, त्रि । यथा,—
"ब्रह्मचारी पिबेत् कापि. कार्ये नास्तं रसमयं जगत् ।
स एव वेदब्रह्मचारी नीरसं धर्ममेव सन् ॥"
इति माघः ॥

नीराखु, पुं, (नीरस्य आखुः ।) उद्र. । उद्बिड़ाल इति भाषा ॥ तत्पर्य्यायः । जलनकुलः २ जलबिडालः ३ जलभ्रम ४ । इति हारावली । ७१ । उद्रः ५ जलाखुः ६ नीराखु, ७ नकुलः ८ । इति शब्दरत्नावली ॥

नीराजन, क्ली, } (राज दीप्तौ + ल्युट् ।
नीराजना, स्त्री, } निसरां राजनं यत्र ॥ निर् + राज् + णिच् + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति भावे युच् ।) यात्राशुभादेर्नि.मित्तेन राजा यत्र सा नीराजना । नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा । इत्यमरटीकायां भरतः ॥ * ॥

तद्विधान यथा,—
"शरत्काले महानम्यां दुर्गायाः परिपूजनम् ।
नीराजनं दशम्यान्तु कुर्य्याद्वै बलवृद्धये ॥
विधिं नीराजनस्य त्वं शृणु पार्थिवसत्तम ।।
कृतेन येन चाश्वानां गजानामपि चेष्टनम् ॥
आश्विने शुक्लपक्षे या तृतीया स्वातियोगिनी ।
ऐशान्यां स्वपुरस्यैव गृह्णीयात् स्थानमुत्तमम् ॥
नीराजनं ततः कुर्य्यात् समाप्ते दिवसेऽष्टमे ।
नीराजनस्य कालस्तु पूर्व्वमुक्तस्तु ते मया ॥
विधानमत्र शृणु मे कृतकृत्यो भविष्यसि ।
रक्तं ध्वजं महाशालं सुमनोहरमेव वा ॥
पूजयेत् सप्तदिवसान् गन्धपुष्पादिकैः शुभैः ।
तृतीयादौ पूजयित्वा नयेत्तं यज्ञमण्डपम् ॥
चेष्टां निरूपयंस्तस्य जानीयाच्च शुभाशुभम् ।
परराष्ट्रविमर्द्दः स्यादश्वो यदि पलायते ॥
म्रियते राजपुत्त्रस्तु यदि चाश्रूणि मुञ्चति ।
नीयमानो न गच्छेच्चेत्तथैवमरणं सदा ॥
तथैव सुखनामाचिशब्दं कुर्य्याद्धयो यदि ।
यत्काष्ठाभिमुखः कुर्य्यात्तत्काष्ठाया जयेद्रिपून् ॥
उत्क्षिप्य दक्षिणाग्रन्तु पदमश्वो भवेत् पुरा ।
तदा जयेत् समस्तांश्च नृपतिर्म्विजयेद्रिपून् ॥
प्रातर्नीराजनं कुर्य्याद्दशम्यां नृपसत्तम ।।
तदप्राप्तौ तु द्वादश्यां तस्यामेव समाचरेत् ॥
कार्त्तिके पञ्चदश्यां वा तत्राभावे तु पार्थिव. ।
ऐशान्यां स्वपुरस्योर्व्व्यां समानेन योऽस्य ॥
दशहस्तन्तु विपुलं कुर्य्याद्वै तत्र तोरणम् ।
दारित्रिशल्लसमायन्तु हस्तमेकं प्रविस्तृतम् ॥
यज्ञार्थं मण्डपं कुर्य्यात् मध्ये वेदिं विनिर्म्मयेत् ।
वेद्याश्चोत्तरतश्चाश्ववेदिं कुर्य्याद्दशसमाम् ॥
यत्र संस्थाप्य चाश्वञ्च पूजितव्यः पुरोहितैः ।
सर्व्वौषधिमनःशाखानामर्व्वानस्यायथा नृप ॥
मनुष्यशकाङ्कितैश्चक्रैर्ध्वजैश्चापि विभूषयेत् ।
तोरणं कनकै रत्नैस्तथा नानाविधैर्म्मते ॥
भल्लातकं शालिकुष्ठं सिद्धार्थं सैन्धवं तु ।
कण्ठदेशे निबध्नीयात् पुष्टिशान्त्यर्थमेव च ॥
ऐशान्यं मण्डलं कृत्वा दिक्पालांश्च नवग्रहान् ।
विश्वेदेवांस्तु सर्व्वांश्च विष्णुमुख्यान् प्रपूजयेत् ॥
आग्नेय्यांदिशि च पुर्य्यैव निर्म्मितं पुरोहितः ।
देवेभ्यस्तु वरुणस्यैव प्रत्येकस्य तथैव च ॥
पुरस्कृत्य विष्णोश्च होमं समाचरेत् ।
एकैकस्य शतं वा अष्टोत्तरशतस्य वा ॥
कुर्य्यात्तु प्रथमं होमं चतुर्भ्भिर्गैरस्य सिद्धये ।
समिधश्चापि होतव्याः मन्त्रार्थं खदिर तथा ॥
घृतेष्टवरञ्च कामसम्यमस्त्यथ पुरोहितः ।
शोभनान् रजतान् वापि मार्त्तिकान् वा यथेच्छया ॥
कुर्य्यात्तु कलशानष्टौ पल्लवाग्रयोर्ष्विताम् ।
विन्यसेत्तु घटेष्वेव समन्त्रं हरितालकम् ॥
चन्दनञ्च तथा कुष्ठं प्रियङ्गुञ्च मनःशिलाम् ।
अञ्जनञ्च हरिद्राञ्च भेदां दर्व्वी तथैव च ॥
भल्लातकं पूर्य्यकोषं सहदेवीं शमावरीम् ।
वचां नागकुसुमां सोमराजीं स्वगुप्तिकाम् ॥
तुल्यञ्च करवीरञ्च तुलसीदलमेव च ।
एतानि निःक्षिपेत् सर्व्वाणि कलशानां पुरोहितः ॥
कनकैर्मणुनेर्व्व्यञ्जदारुभिः सुकुसुमैः तथा ।
कर्त्तव्यो शान्तिकामेन नीराजनविधौ नृप ॥
एवं सप्ताहपर्य्यन्तं पूजाभिर्व्वयमेतथा ।
पूर्व्वोक्तान् पूजयित्वा तु नृपः सप्ताहमाचरेत् ॥
यावन्नीराजनं कुर्य्यात्तावद्दात्रा मरीद्दये ।
रात्रौ न यज्ञभूमौ तु निवसेत्कान्तिमिष्टकः ॥
नारोहयेत् तुरगं गजं वा तत्र पार्थिव ।
यावत् सप्ताहपर्य्यन्तं यानेनाप्यैव वै व्रजेत् ॥
भक्ष्यैर्नानाविधैश्चैव मधुपायसपायकैः ।
मोदकैश्च बलिं कुर्य्याच्चामिषञ्जनसम्भवं ॥
पूर्व्वोक्तानाञ्च देवानां सप्ताहं यावदुत्तमम् ।
सप्तमेऽह्नि तु रेमन्तं पूजयेत्तोरणान्तरे ॥
सर्व्यपुष्प महाबाहु द्विगुणं कवचोज्ज्वलम् ।
ज्वलन्तं शुक्लवर्णञ्च श्वेताश्वदयञ्च वाससा ॥
कशां वामकरे बिभ्रद्दक्षिणेन करं पुनः ।
सव्येन न्यस्य वल्गायां सितसैन्धवसंस्थितम् ॥
एवंविधन्तु रेमन्तं प्रतिमायां घटेऽपि वा ।
सम्यक्पूजाविधानेन पूजयेत्तोरणान्तरे ॥ * ॥
पूजयित्वा तु रेमन्तं द्विरदं तुरगन्तथा ।
आहतान्वरसंवीतं सक्चन्दनसमन्वितम् ॥
सुवर्णाबद्धनिःश्रेय विचित्रकवचादिभिः ।
युक्तन्तु होमकुण्डस्य ऐशान्यामश्ववेदिकाम् ॥
पूर्व्वं कृत्वा नयेदश्वगजपालः पृथक् पृथक् ।
नीयमाने गजे चाश्वे पूर्व्वोक्तञ्च निमित्तकम् ।
यत्नाद्दर्शीत नृपतिः फलं चैवावधारयेत् ।
होमकुण्डस्योत्तरस्यां वेद्यामग्नेः पश्चिमे स्थितः ॥
दैवविदा चाश्वविदा सहितो वीक्ष्य सैन्धवम् ।
नीताय तुरगायाशु भक्तपिण्डीं सुगन्धिनीम् ॥
दद्यात् पुरोहितस्तञ्च समन्ताच्छान्तिमन्त्रकैः ।
तत्पिण्डाद्यदि जिघ्रेत्तदश्नीयाद्वा हयः स च ॥
तदा स्यात् सर्व्वकल्याणं विपरीतमतोऽन्यथा ॥
शाखामौदुम्बरीमाम्रीं सक्तुमाञ्च घटोदके ।
आप्राव्याप्राव्य तुरगान् गजान् भूपञ्च सैनिकान् ।
रथांश्च शम्भुपीठश्चैव. शान्तिकैः पौष्टिकैस्तथा ॥
ऐन्द्रघन्मन्तरैर्व्विप्रैश्चगुरुञ्च पुरोहितः ।
दिक्पालानां ग्रहाणाञ्च मन्त्रैश्चैव यथोदितैः ॥
बहुधा चाभिषिच्याथ ततः सौपर्णदर्पणम् ।
दर्शयित्वा नृपश्चाग्निं ततो मल्लिमेव च ॥
राजपुत्त्रांस्तथामात्यानमात्यानपि च सैन्धवान् ।
कल्पयेत् द्विजशार्दूल सम्मानेन तु दर्शयेत् ॥ * ॥
चतुरङ्गबलस्यापि कर्त्तव्यं शान्तिपौष्टिकम् ।
मृण्मयं शत्रुं कृत्वा ह्यभिचारकमन्त्रकैः ॥
शूले शरेण विद्धा तु शिर खड्गेन छेदयेत् ॥
आचार्य्यः कारिकां पश्चादभिमन्त्र्य धयाय वै ॥
ऐन्द्रे प्राभाकरैर्म्मन्त्रैर्दद्यादर्के स्वयं पुनः ।
तमेव तु मार्गेण समारुह्य नृपस्ततः ॥
गच्छेदुत्तरपूर्व्वान्तु दिशं सबलसैनिकः ।
पत्निकपुरोहिताचार्य्यां सर्व्वं एव नृपस्तथा ॥
अनुगच्छेद्गुरवम्यो निमित्तानि विलोकयन् ।
वादित्रघोषैस्तु ततो नीराजनमन्त्रैस्ततस्तथा ॥
गजाश्वनीराजने राजा दारयन्निव मेदिनीम् ।
मणिविद्रुममुक्तादग्रलैरवैरलङ्कृतः ।
क्रोशमात्रं ततो गत्वा पूर्व्वद्वारेण पार्थिवः ॥
कर्पूरं प्रविशेद्विप्रैश्च यायात् पुरोहितः ।
तत्र गत्वा दक्षिणान्तु हिरण्यं गां तथा तिलम् ।
दत्त्वा पश्चाद्द्विजेभ्यस्तु दद्याद्दानानि शक्तितः ॥
एवं नीराजनं कृत्वा बलानाञ्च महीक्षितः ।
प्रेक्षितं च स्थिता लक्ष्मीं नृपतिं प्राप्नुयात्तथा ॥
त्वमश्वात्मजतमजात नागरोद्धव सैन्यत्र ।
येन सत्येन वहसे शक्रं तेनेह मां वह ॥
येन सत्येन रेमन्तं येन सत्येन भास्करम् ।
वहसे तेन सत्येन विजयाय वहस्व माम् ॥
आभ्यान्तु नृपमन्त्राभ्यामश्वारोहणमाचरेत् ।
आरुह्याश्वे महिष्यास्तु मुहूर्त्ते समयेत्तत ॥
महिषी च ततो भूपं पर्य्यङ्कोपरिसंस्थितम् ।
दूर्व्वाक्षत सिद्धार्थैः स्त्रीभिः सह समर्च्चयेत् ॥
कृते तु भूमिपश्चैव तृतीयायां नीराजने ।
सूतकं यदि जायेत तत्र दुष्यति केवलम् ॥
सूतके मृतके वापि पार्थिवस्तु यथा तथा ।
बलं नीराजनं कुर्य्यात्तत्काशञ्च विशेषतः ॥
सद्य एव भवेद्राज्ञो यवद्वारविलोकने ।
तथा विचारिते यत्ने परराष्ट्रविमर्द्दने ।
अयमुक्तः कथितो राजनीराजनक्रमो मया ॥"
इति कालिकापुराणे ८६ अध्यायः ॥ * ॥

(निर् + राज + भावे ल्युट् ।) निर्मञ्छनम् । आरति इति भाषा ॥ तत्र पञ्चनीराजनं यथा,
"पञ्चनीराजनं कुर्य्यात् प्रथमं दीपमालया ।
द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥
चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम् ।
पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि ॥"
इति कालोत्तरतन्त्रम् ॥

तस्य वर्त्तिकादिप्रमाणं यथा,—
"कुङ्कुमागुरुकर्पूरघृतचन्दननिर्म्मिताः ।
वर्त्तिका. सप्त वा पञ्च कृत्वा वन्दापनीयकम् ॥

कुर्य्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः ।
हरेः सप्तप्रदीपेन वह्निर्मो भक्तितत्परः ॥”
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥*॥
अथ नीराजनमाहात्म्यम् ।
स्कान्दे ब्रह्मनारदसंवादे ।
“बहुवर्त्तिसमायुक्तं ज्वलन्तं केशवोपरि ।
कुर्य्यादारात्रिकं यस्तु कल्पकोटिं वसेद्दिवि ॥
कर्पूरेण तु यः कुर्य्याद्भक्त्या केशवमूर्द्धनि ।
आरात्रिकं मुनिश्रेष्ठ । प्रविशेद्विष्णुमव्ययम् ॥”
तत्रैवान्यत्र ।
“दीपमन्त्रं सकर्पूरं करोत्यारात्रिकं नृप ! ।
कृष्णस्य वसते लोके सप्तकल्पानि मानवः ॥”
तत्रैव शिवोमासंवादे ।
“मन्त्रहीनं क्रियाहीनं यत् कृतं पूजनं हरेः ।
सर्व्वं सम्पूर्णतामेति कृते नीराजने शिवे ! ॥”
हरिभक्तिसुधोदये ।
“कृत्वा नीराजनं विष्णोर्दीपावल्या सुदृश्यया ।
तमोविकारं जयति जिते तस्मिंश्च को भवः ॥”
अन्यच्च ।
“कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
दहत्यालोकमात्रेण विष्णोः सारात्रिकं मुखम् ॥
यच्च दीपस्य माहात्म्यं पूर्व्वं लिखितमस्ति तत् ।
द्रष्टव्यं सर्व्वमत्रापि प्रायेणाभेदतोऽनयोः ॥
अतः सादरमुत्थाय महानीराजनन्त्विदम् ।
द्रष्टव्यं दीपवत् सर्व्वैरन्यमारात्रिकञ्च यत् ॥”
तदुक्तं श्रीपुलस्त्येन विष्णुधर्म्मे ।
“धूपं चारात्रिकं पश्येत् कराभ्याञ्च प्रवन्दते ।
कुलकोटिं समुद्धृत्य याति विष्णोः परं पदम् ॥”
मूलागमे च ।
“नीराजनञ्च यः पश्येत् देवदेवस्य चक्रिणः ।
सप्तजन्मानि विप्रः स्यादन्ते च परमं पदम् ॥”
इति हरिभक्तिविलासः ॥
अवशिष्टं आरात्रिकशब्दे द्रष्टव्यम् ॥

नीरिन्दुः, पु, (नि + ईर् कम्पने + भावे क्विप् । नीरा नितरां कम्पनेन इन्दति सुभगेन शोभते इति । इदि परमैश्वर्य्ये + उन् ।) अश्वशाखोटवृक्षः । इति शब्दचन्द्रिका ॥ आश्वेओड़ा इति भाषा ॥

नीरुक्, [ज्] पुं स्त्री, (निर् + रुज + भावे क्विप् ।) रोगाभावः । तत्पर्य्यायः । स्वास्थ्यम् २ वार्त्तम् ३ अनामयम् ४ आरोग्यम् ५ । (रुज् + भावे क्विप् । निर्नास्ति रुक् रोगो यस्य ।) रोगशून्ये, त्रि । तत्पर्य्यायः । पटुः २ उल्लाघः ३ वार्त्तः ४ कल्यः ५ । इति हेमचन्द्रः ।३।१३८॥ (यथा, सुश्रुते चिकित्सितस्थाने २५ अध्याये ।
“एतेन माल्यो वर्द्धन्ते नीरुजो निरुपद्रवाः ॥”)

नीरुजा, स्त्री, (निर्गता रुजा रोगो यस्मात् ।) कुष्ठौषधिः । इति जटाधरः ॥

नीरुजः, त्रि, (निर्गता रुजा रोगो यस्य ।) रोगाभाववान् । यथा, शाम्बपुराणे ।
“शाम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् ।
पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ॥”

नीरूपं, त्रि, (निर्नास्ति रूपमस्येति ।) रूपाभावविशिष्टम् । यथा । नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वाभ्युपगमेनेति वेदान्तपरिभाषा ॥

नीरेणुकः, त्रि, (निर्गतो रेणुः पांशुर्यस्मात् । कप् ।) धूलिशून्यभूम्यादिः । यथा । नीरेणुकभूरभूदिति सत्पथरत्नाकरः ॥

नीलं, क्ली, (नीलतीति । नील + अच् ।) नीली । इति मेदिनी । ले, ३३ ॥ काचलवणम् । तालीशपत्रम् । विषम् । सौवीराञ्जनम् । (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
“सुवीरकं पार्व्वतेयं सौवीरं नीलमञ्जनम् ॥”)
तुत्थम् । इति राजनिर्घण्टः ॥ नृत्याङ्गाष्टोत्तरशतकरणान्तर्गतकरणविशेषः । इति सङ्गीतदामोदरः ॥

नीलः, पुं, पर्व्वतविशेषः । स तु इलावृतस्योत्तरतो रम्यकवर्षस्य सीमापर्व्वतः । प्रागायत उभयतः क्षीरोदावधि द्विसहस्रयोजनपृथुः । अयुतयोजनोत्सेधः । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥ (तथाच विष्णुपुराणे ।२।२।१० ।
“नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वताः ।
लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे ॥”
“लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधनीलौ । यद्यपि जम्बुद्वीपस्य मण्डलाकारस्य लक्षयोजनप्रमाणत्वात् तन्मध्ये रेखायामेव मुख्यलक्षप्रमाणत्वं निषधनीलौ तु तन्मध्यरेखातो दक्षिणश्चोत्तरश्च सलक्षयोजनसहस्रान्तरितत्वादीषन्न्यूनौ तथापि स्थूलदृष्ट्या लक्षप्रमाणाविव्युक्तम् ॥” इति तट्टीकायां स्वामी ॥ * ॥
(नीलासनवृक्षः । तत्पर्य्यायो यथा,—
“नीलः स्यान्नीलपत्रिका ॥”
इति वैद्यकरत्नमालायाम् ॥)
मणिविशेषः । नीलम् इति पारस्यभाषा ॥ अस्याधिष्ठातृदेवता शनिः । यथा,—
“माणिक्यमुक्ताफलविद्रुमाणि
गारुत्मतं पुष्पकवज्रनीलम् ।
गोमेदवैदूर्य्यकमर्कतः स्यू
रत्नान्यथोऽज्ञस्य मुदे सुवर्णम् ॥”
इति मुहूर्त्तचिन्तामणिः ॥
तत्पर्य्यायः । सौरिरत्नम् २ नीलाश्मा ३ नीलोत्पलः ४ तृणग्राही ५ महानीलः ६ सुनीलकः ७ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कफपित्तानिलापहत्वम् । शरीरे धृते सौरिर्म्मङ्गलदो भवति । इति राजनिर्घण्टः ॥ * ॥ अथ इन्द्रनीलमणेरुत्पत्तिपरीक्षादि यथा,—
“तत्रैव सिंहलवधूकरपल्लवाग्र-
व्यालूनबालवनकुसुमप्रवाले ।
देशे पपात दितिजस्य नितान्तकान्तं
प्रोत्फुल्लनीरजसमद्युतिनेत्रयुग्मम् ॥
तत्प्रत्ययादुभयशोभनवीचिभासा
विस्तारिणी जलनिधेरुपकच्छभूमिः ।
प्रोद्भिन्नकेतकवनप्रतिबद्धलेखा
सान्द्रेन्द्रनीलमणिरत्नवती विभाति ॥
तत्रासिताब्जहलभृद्वसनासिभृङ्ग-
शार्ङ्गायुधाभहरकण्ठकलायपुष्पैः ।
शुक्लेतरैश्च कुसुमैर्गिरिकर्णिकाया-
स्तस्मिन् भवन्ति मणयः सदृशावभासाः ॥
अन्ये प्रसन्नपयसः पयसां निधातु-
रम्बुत्विषः शिखिगलप्रतिमास्तथान्ये ।
नीलीरसप्रभवबुद्बुदभाश्च केचित्
केचित्तथा समदकोकिलकण्ठभासः ॥
एकप्रकारा विमलाश्च वर्णशोभावभाविनः ।
जायन्ते मणयस्तस्मिन् इन्द्रनीला महागुणाः ॥
मृत्पाषाणशिलावज्रकर्कराभाससंयुताः ।
अभ्रिकापटलच्छायावर्णदोषैश्च दूषिताः ॥
तत एव हि जायन्ते मणयस्तत्र भूरयः ।
शास्त्रसंबोधितधियस्तान् प्रशंसन्ति सूरयः ॥
धार्य्यमाणस्य ये दृष्टाः पद्मरागमणेर्गुणाः ।
धारणादिन्द्रनीलस्य तानेवाप्नोति मानवः ॥
यथा च पद्मरागाणां जातुकर्णभयं भवेत् ।
इन्द्रनीलेष्वपि तथा द्रष्टव्यमविशेषतः ॥
परीक्षाप्रत्ययैर्यैश्च पद्मरागः परीक्ष्यते ।
त एव प्रत्यया दृष्टा इन्द्रनीलमणेरपि ॥
यावन्तश्च क्रमेदर्घि पद्मरागः पयोगतः ।
इन्द्रनीलमणिस्तस्मात् क्रमेत सुमहत्तरम् ॥
तथापि न परीक्षार्थं गुणानामतिवृद्धये ।
मणिरग्नौ समाधेयः कथञ्चिदपि कश्चन ॥
अग्निमात्रापरिज्ञाने दाहदोषैश्च दूषितः ।
सोऽनर्थाय भवेद्भर्त्तुः कर्त्तुः कारयितुस्तथा ॥
काचोत्पलकरवीरस्फटिकाद्या इह बुधैः सवैदूर्य्याः ।
कथिता विजातय इमे सदृशा मणिनेन्द्रनीलेन ॥
गुरुभावकठिनभावावेतेषां नित्यमेव विज्ञेयौ ।
काचाद्यथावदुत्तरविवर्द्धमानौ विशेषेण ॥
इन्द्रनीलो यदा कश्चित् विभर्त्त्यात्मताम्रवर्णताम् ।
रक्षणीयौ तथा ताम्रौ करवीरोत्पलावुभौ ।
यस्य मध्यगता भाति नीलस्येन्द्रायुधप्रभा ॥
तदिन्द्रनीलमित्याहुर्म्महार्घं भुवि दुर्लभम् ॥
यस्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः ।
नीलतां तन्नयेत् सर्व्वं महानीलः स उच्यते ॥
यत् पद्मरागस्य महागुणस्य
मूल्यं भवेन्माससमुत्थितस्य ।
तदिन्द्रनीलस्य महागुणस्य
सुवर्णसंख्यातुलितस्य मूल्यम् ॥”
इति गरुडपुराणे इन्द्रनीलपरीक्षा ॥ * ॥
वानरान्तरः । इति मेदिनी । ले, २८ ॥ नीलवर्णः । नीलौषधिः । निधिविशेषः । लाञ्छनम् । इति हेमचन्द्रः ॥ मञ्जुघोषः । इति त्रिकाण्डशेषः ॥ वटवृक्षः । इति राजनिर्घण्टः ॥ नीलवर्णयुक्ते, त्रि । इत्यमरः ॥ (यथा, देवीभागवते । ५ । ८ । ३८ ।
“नील सत्त्वगुणोपेतं प्रादुरास महाद्युति ॥”)
नीलवर्णवस्तूनि यथा । शुकः १ शैवालम् २ दूर्व्वा ३ वासन्तम् ४ बुधः ५ वंशाङ्कुरः ६ मरकतः ७ इन्द्रनीलमणिः ८ सूर्य्याश्वादीनि ॥

इति कविकल्पलता ॥ अजमीढस्य राज्ञः नीलिन्यां पत्न्यां जातः पुत्त्रः । यथा । “अजमीढस्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञः पुत्त्रोऽभवत् ।” इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (माहिष्मतीवासी नृपतिविशेषः । अग्निस्तु अस्य दुहितरमुपसंगृह्य वरेण छन्दयामास परनृपादभयञ्चास्मै दत्तवान् । गच्छति काले पाण्डवः सहदेवस्तु दिग्विजयक्रमेण अस्य नगरमवरोध्य वैश्वानरात् महद्भयमवाप्तवान् । ततो हुतवाहनं स्तुत्वा शान्तिमलभत । एतद्विवरणं महाभारते । २ । ३१ । अध्याये विस्तरतो द्रष्टव्यम् ॥ * ॥ नागविशेषः । यथा, महाभारते । १ । ३५ । ७ ।

“नीलानीलौ तथा नागौ कल्माषशवलौ तथा ॥”

नीलक, क्ली, (नीलमेव । स्वार्थे कन् ।) काचलवणम् । वर्त्तलोहम् । असनवृक्षे, पुं । इति राजनिर्घण्टः ॥

नीलकण्ठः, पुं, (नीलः नीलवर्णः कण्ठो यस्य ।) शिवः । (यथा, महाभारते । ३।१८।४३—४४।

“त्रैलोक्य मोहितं यस्य गन्धमाघ्राय तद्विषम् ।
प्राशयल्लोकरक्षार्थं ब्रह्मणो वचनाच्छिवः ॥
दधार भगवान् कण्ठे मन्त्रमूर्त्तिर्महेश्वरः ।
तदा प्रभृति देवस्तु नीलकण्ठ इति श्रुतः ॥”)

मयूरः । इत्यमरः । ३ । ३ । ३९ ॥ (यथा, मेघदूते । ७९ ।

“यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥”)

पीतसारः । दात्यूहः । ग्रामचटकः । खञ्जरीटः । इति हेमचन्द्रः ॥ मूलके, क्ली । इति राजनिर्घण्टः ॥ * ॥ विजयदशम्यां नीलकण्ठदर्शनविधिर्यथा,—

“कृत्वा नीराजनं राजा बलवृद्ध्यै यथाबलम् ।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ ॥”

दर्शनानन्तरं नमस्कारमन्त्रो यथा,—

“नीलग्रीव शुभग्रीव सर्व्वकामफलप्रद ।
पृथिव्यामवतीर्णोऽसि खञ्जरीट । नमोऽस्तु ते ॥
त्वं योगयुक्तो मुनिपुत्त्रकल्प-
मदृश्यतामेषि शिखोद्गमेन ।
त्वं दृश्यसे प्रावृषि निर्गतायां
त्वं खञ्जनाश्चर्य्यमयो नमस्ते ॥”

द्रव्यविशेषोपरिस्थितस्य तस्य दर्शनफलं यथा,—

“अब्जेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः कुशलदः शुचिशाद्वलेषु ।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति बहुशः खलु खञ्जरीटः ॥”

दिग्विशेषे फलं यथा,—

“वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥”

अशुभखञ्जनदर्शनप्रायश्चित्तं यथा,—

“अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम् ।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः ॥”
इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥

(पीतशालवृक्षः । अस्य पर्य्यायो यथा,—

“नीलकण्ठः पीतशालः पीतकः प्रियकोऽसनः ॥”
इति वैद्यकरत्नमालायाम् ॥)

नीलकण्ठाक्षं, क्ली, (नीलकण्ठो महादेवस्तत्प्रियोऽक्षो यत्र ।) रुद्राक्षम् । इति राजनिर्घण्टः ॥ (नीलकण्ठः खञ्जनस्तस्य अक्षिणीव अक्षिणी यस्य । षच् समासे ।) खञ्जनाक्षे, त्रि ॥

नीलकन्दः, पुं, (नीलः कन्दो मूलं यस्य ।) महिषकन्दभेदः । तत्पर्य्यायः । सर्पाक्षः २ वनवासी ३ विषकन्दः ४ महिषीकन्दः ५ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयमुखजाड्यनाशित्वम् । रुच्यत्वम् । सितस्य तस्य महासिद्धिकरत्वञ्च । इति राजनिर्घण्टः ॥ नीलवर्णमूलञ्च ॥

नीलकमल, क्ली, (नीलं कमलं पद्मम् ।) नीलवर्णपद्मम् । तत्पर्य्यायः । उत्पलम् २ नीलपङ्कजम् ३ नीलपद्मम् ४ नीलाब्जम् ५ । अस्य गुणाः । शीतलत्वम् । स्वादुत्वम् । सुगन्धित्वम् । पित्तनाशित्वम् । रुच्यत्वम् । रसायने श्रेष्ठत्वम् । देहदार्ढ्यकेशप्रदत्वञ्च । इति राजनिर्घण्टः ॥ नीलवर्णजलञ्च ॥

नीलकुन्तला, स्त्री, (नीला नीलवर्णाः कुन्तला यस्याः ।) गौर्य्याः सखीविशेषः । यथा,—

“सखी रत्नसुखी नाम जयादेवं शुचिस्मिता ।
ता निवार्य्यापरा प्राह सखी सा नीलकुन्तला ॥”
इति बृहद्धर्म्मपुराणे ३४ अध्यायः ॥

नीलकुरण्टकः, पुं, (नीलः कुरण्टकः ।) नीलझिण्टी । इति रत्नमाला ॥ (विवृतिरस्य नीलझिण्टीशब्दे ज्ञातव्या ॥)

नीलक्रान्ता, स्त्री, (नीलेन नीलवर्णेन क्रान्ता ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

नीलक्रौञ्चः, पुं, (नीलः क्रौञ्चः ।) नीलवकः । तत्पर्य्यायः । नीलाङ्गः २ दीर्घग्रीवः ३ अतिजागरः ४ । इति राजनिर्घण्टः ॥

नीलगणेशः, पुं, (नीलो नीलवर्णो गणेशः ।) नीलवर्णगणपतिः । इति भूतडामरः ॥ अपि च ।

“लीलागललुलल्लोलकालव्यालविलासिने ।
गणेशाय नमो नीलकमलामलकान्तये ॥”
इति लीलावती ॥

नीलग्रीवः, पुं, (नीला नीलवर्णा ग्रीवा यस्य ।) महादेवः । इति हलायुधः ॥ (यथा, महाभारते । ३ । ३९ । ७४ ।

“देवदेव महादेव नीलग्रीव जटाधर ॥”)

नीलवर्णग्रीवायुक्ते, त्रि ॥

नीलङ्गुः, पुं, (निलङ्गति गच्छतीति । नि + लगि गतौ + “खरुशङ्कुपीयुनीलङ्गुलिगु ।” उणां । १ । ३७ । इति कुप्रत्ययेन निपातनात् पूर्व्वदीर्घे साधुः ।) असितुन्दजन्तुमात्रम् । इत्यमरटीकायां भरतः ॥ क्रिमिभेदः । शृगालः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (भ्रमराली । प्रसूनम् । इति विश्वः । गे, ५० ॥)

नीलचर्म्म, [न्] क्ली, (नीलं चर्म्म फलत्वग् यस्य ।) परूषकम् । इति राजनिर्घण्टः ॥ (नीलञ्च तत् चर्म्म चेति ।) नीलवर्णाजिनञ्च ॥ (नीलचर्म्मविशिष्टे, त्रि ॥)

नीलजं, क्ली, (नीलात् जायते इति । जन + डः ।) वर्त्तलोहम् । इति राजनिर्घण्टः ॥ नीलजाते, त्रि ॥ (स्त्री, नीलात् नीलपर्व्वतात् जायते इति । वितस्ता नदी । यथा, राजतरङ्गिण्याम् । ५ । ६६ ।

“पाषाणसेतुबन्धेन सुय्येनाद्भुतकर्म्मणा ।
सप्ताहमभवद्बद्धा निखिला नीलजा सरित् ॥”)

नीलझिण्टी, स्त्री, (नीला नीलवर्णा झिण्टी ।) नीलवर्णझिण्टीपुष्पवृक्षः । तत्पर्य्यायः । नीलकुरण्टः २ नीलकुसुमा ३ वाला ४ वाणा ५ दासी ६ कण्टार्त्तगला ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयशूलवातकफकासत्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलतरुः, पुं, (नीलस्तरुः ।) नारिकेलः । इति राजनिर्घण्टः ॥

नीलतालः, पुं, (नीलस्तालः ।) हिन्तालः । तमालः । इति राजनिर्घण्टः ॥

नीलदूर्व्वा, स्त्री, (नीला दूर्व्वा ।) हरितदूर्व्वा । तत्पर्य्यायः । हरिता २ शाम्भवी ३ श्यामा ४ शीता ५ शतपर्व्विका ६ अमृता ७ पूता ८ शतग्रन्थिः ९ अनुष्णवल्लिका १० शिवा ११ शिवेष्टा १२ मङ्गला १३ जया १४ सुभगा १५ भूतहन्त्री १६ शतमूला १७ महौषधी १८ विजया १९ गौरी २० शान्ता २१ ॥ (यथा निघण्टौ धन्वन्तरिः ।

“नीलदूर्व्वा रुहा शस्यं शाड्वलं हरितं तथा ।
शतपर्व्वा शीतकुम्भी शीतला वामनी तथा ॥”)

तस्या गुणाः । हिमत्वम् । तिक्तत्वम् । मधुरत्वम् । तुवरत्वम् । लघुत्वम् । रक्तपित्तातिसारकफवान्तिज्वरनाशित्वञ्च । पुस्तकान्तरे रोचनत्वम् । वातापहत्वञ्च । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायान्तरं गुणान्तरञ्च यथा,—

“नीलदूर्व्वा रुहानन्ता भार्गवी शतपर्व्विका ।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता ॥
नीलदूर्व्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नीलध्वजः, पुं, (नीलः नीलवर्णः ध्वज इव ।) तमालवृक्षः । इति राजनिर्घण्टः ॥ (नीलो ध्वजो यस्य ।) राजविशेषः । अस्य पुरी माहिष्मती । भार्य्या ज्वाला । कन्या स्वाहा लक्ष्मीशापाज्जाता ।

“अर्ज्जुनस्य हयो राजन् । पुरीं माहिष्मतीं ययौ ।
नीलध्वजेन वीरेण रक्षितां दुर्गमण्डिताम् ॥
नीलध्वजस्य महिषी ज्वालानाम्नी सुमध्यमा ।
स्वाहां कन्यां प्रसूता सा सुन्दरीं धर्म्मतत्परा ॥”

इति जैमिनिभारते आश्वमेधिके पर्व्वणि १५ अध्यायः ॥ नीलध्वजाविशिष्टे, त्रि ॥

नीलनिर्गुण्डी, स्त्री, (नीला निर्गुण्डी ।) नीलसिन्धुवारः । इति राजनिर्घण्टः ॥

नीलनिर्य्यासकः, पुं, (नीलः निर्य्यासो यस्य । कप् ।) नीलासनवृक्षः । इति राजनिर्घण्टः ॥ कृष्णवर्णनिर्य्यासश्च ॥

नीलपङ्क, क्ली, (नीलं पङ्कमिव ।) अन्धकारः । इति त्रिकाण्डशेषः ॥ कृष्णवर्णकर्द्दमश्च ॥

नीलपत्त्रं, क्ली, (नीलं पत्त्रं पुष्पदलं यस्य ।) इन्दीवरम् । इति शब्दचन्द्रिका ॥ नीलवर्णपत्त्रयुक्ते, त्रि ॥

नीलपत्त्रः, पुं, (नीलानि पत्त्राणि यस्य ।) गुण्डतृणम् । अश्मन्तकवृक्षः । नीलासनवृक्षः । दाडिमः । इति राजनिर्घण्टः ॥

नीलपद्मं, क्ली, (नीलं पद्मम् ।) नीलकमलम् । इति शब्दचन्द्रिका ॥ (नीलकमलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

नीलपिङ्गला, स्त्री (नीला पिङ्गला चेति कर्म्मधारयः ।) गोजातिविशेषः । यथा,—

"गवां जातिन्तु वक्ष्यामि शृणुष्वैकमना द्विज ।।
प्रथमा गौरकपिला द्वितीया गौरपिङ्गला ॥
तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला ।
पञ्चमी शुक्लपिङ्गाक्षी षष्ठी तु शुक्लपिङ्गला ॥
सप्तमी चित्रपिङ्गाक्षी अष्टमी बभ्रुरोहिणी ।
नवमी श्वेतपिङ्गाक्षी दशमी श्वेतपिङ्गला ॥
तादृशास्तेऽप्यनड्वाहः कपिलास्तु प्रकीर्त्तिताः ॥"

इति वृहद्धर्म्मपुराणे उत्तरखण्डे १५ अध्यायः ॥

नीलपिच्छः, पु, (नील पिच्छं यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ॥

नीलपुनर्नवा, स्त्री, (नीला पुनर्नवा ।) कृष्णवर्णपुनर्नवाशाकम् । नीलगदपडोया इति हिन्दी भाषा ॥ तत्पर्य्यायः । नीला२ श्यामा३ कृष्णाख्या ४ नीलवर्षाभूः ५ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रसायनत्वम् । हृद्रोगपाण्डुश्वयथुश्वासवातकफनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलपुष्पं, क्ली, (नील पुष्पमस्य ।) ग्रन्थिपर्णम् । इति भावप्रकाशः ॥ (नीलञ्च तत् पुष्पञ्चेति ।) नीलवर्णकुसुमञ्च ॥

नीलपुष्पः, पुं, (नीलं पुष्पं यस्य ।) नीलभृङ्गराजः । नीलाम्लानः । इति राजनिर्घण्टः ॥

नीलपुष्पा, स्त्री, (नील पुष्पं यस्याः ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

नीलपुष्पिका, स्त्री, (नीलं पुष्पं यस्याः । कप्, कापि अत इत्वम् ।) अतसी । इति राजनिर्घण्टः ॥ नीली । इति रत्नमाला ॥

नीलपुष्पी, स्त्री, (नील पुष्पं यस्याः । ङीष् ।) नीलबुह्ना । इति रत्नमाला ॥ (शेफालिका । तत्पर्य्यायो यथा,—

"नीलपुष्पी तु निर्गुण्डी शेफाली सुवहा च सा ॥"

अतसी । तस्याः पर्य्यायो यथा,—

"अतसी नीलपुष्पी च पार्व्वती स्यादुमाक्षमा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नीलफला, स्त्री, (नीलं फलं यस्याः ।) जम्बूः । इति राजनिर्घण्टः ॥

नीलभृङ्गराजः, पु, (नीलो भृङ्गराजः ।) नीलवर्णभृङ्गराजः । नीलकेशरिया इति नीलभेगरिया इति च भाषा । तत्पर्य्यायः । महाभृङ्गः २ महानीलः ३ सुनीलकः ४ नीलपुष्पः ५ श्यामलः ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामश्वित्रनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

नीलमणिः, पु, (नीलो मणिः ।) स्वनामख्यातमणिः । तत्पर्य्यायः । मसारः २ । इति हारावली ।१४५॥ अस्य विवरणं नीलशब्दे द्रष्टव्यम् ॥

नीलमाधवः, पु, (नीलो नीलवर्णो माधवः । नीलपर्व्वतस्थो माधवो वा ।) विष्णुः । जगन्नाथः । यथा,—

"प्रेषितोऽहं हरिं द्रष्टुमक्षयं नीलमाधवम् ।
दृष्ट्वा यावत् समायात वार्त्तां नेष्यामि सोऽप्ययम् ॥"

इत्युत्कलखण्डे ७ अध्यायः ॥

नीलमासः, पु, (नीलो नीलवर्णो मासः ।) राजमाषः । इति राजनिर्घण्टः ॥

नीलमीलिकः, पु, (नीलमीलं नीलवर्णनिमीलनमस्त्यस्येति । नीलमील+ठन् ।) खद्योतः । इति शब्दमाला ॥

नीलमृत्तिका, स्त्री, (नीला नीलवर्णा मृत्तिकेव ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ कृष्णवर्णमृच्च ॥

नीललोहं, क्ली, (नीलं नीलवर्णं लोहम् ।) वर्त्तलोहम् ।) इति राजनिर्घण्टः ॥

नीललोहितः, पु, (नीलश्चासौ लोहितश्चेति । "वर्णो वर्णेन ।" २ । १ । ६९ । इति समासः । नीलः कण्ठे लोहितश्च केशेष्विति स्वामी ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, कुमारे । २ । ५७ ।

"सयुगे सांयुगीनं तमुद्यन्तं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥")

चैत्रे मासि तस्य व्रतविधानं यथा,—

"चैत्रे शिवोत्सवं कुर्य्यान्नृत्यगीतमहोत्सवैः ।
स्नात्वा त्रिसन्ध्यं रात्रौ च हविष्याशी जितेन्द्रियः ॥
किमलभ्यं भगवति प्रसन्ने नीललोहिते ।
उपोष्य हुत्वा सङ्क्रान्त्यां व्रतमेतत् समर्पयेत् ॥"

इति मासकृत्ये वृहद्धर्म्मपुराणम् ॥

कल्पविशेषः । इति महाभारतम् ॥ अस्य विवरणं कल्पशब्दे द्रष्टव्यम् ॥) नीलरक्तमिश्रितवर्णश्च ॥

नीललोहिता, स्त्री, (नीला लोहिता च ।) भूमिजम्बुः । इति शब्दचन्द्रिका । शिवा च ॥

नीलवर्षाभूः, स्त्री, (नीला नीलवर्णा वर्षाभूः ।) नीलपुनर्नवा । इति राजनिर्घण्टः ॥ कृष्णभेके, पु ॥

नीलवल्ली, स्त्री, (नीला नीलवर्णा वल्ली ।) वन्दाकम् । इति रत्नमाला ॥

नीलवसनः, पु, (नीलं वसनं वस्त्रं यस्य ।) शनैश्चरः । इति हारावली । १२ ॥ (बलरामः । परिधेयनीलवस्त्रत्वादस्य तथात्वम् ।) नीलवस्त्रयुक्ते, त्रि ॥

नीलवस्त्रः, पुं, (नीलं वस्त्रं यस्य ।) बलरामः । इति हेमचन्द्रः । २ । १३९ ॥ (नीलं वस्त्रम् ।) नीलवर्णवसने, क्ली । यथा,—

"स्त्रीक्रीडाशयनीयादौ नीलवस्त्रं न दुष्यति ।
नीलीवस्त्रं न स्पृशेच्च नीलीमनिरयं व्रजेत् ॥"

इति गारुडे प्रायश्चित्ताध्यायः ॥

तस्य धारणप्रायश्चित्तादि यथा । यत्र भविष्यपुराणम् ।

"शृणुष्वेति महाबाहो । नीलीरक्तस्य धारणात् ।
वाससो गणशार्दूल । गदतो मम तत्त्वतः ॥
पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥
नीलीरक्तेन वस्त्रेण यत् कर्म्म कुरुते द्विजः ।
स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥
वृथा तस्य महायज्ञो नीलीवस्त्रस्य धारणात् ।
नीलीरक्तं यदा वस्त्रं कश्चिद्विप्रस्तु धारयेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥

इदमज्ञाने । ज्ञाने तु द्विगुणम् । अत्रापवादः । नीलीत्यनुवृत्तावापस्तम्बः ।

स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति ॥

इति प्रायश्चित्तविवेकः ॥

नीलवासाः, पु, (नीलं वासो वस्त्रं यस्य ।) शनिग्रहः । इति त्रिकाण्डशेषः ॥ (नीलवस्त्रयुक्ते त्रि । यथा, हरिवंशे । ८२ । ४३ ।

"श्रीमत्स्वस्तिकमूर्द्धानं प्रणमिष्यामि भोगिनम् ।
सहस्रशिरसं देवमनन्तं नीलवाससम् ॥")

नीलबुह्ना, स्त्री, (नीला नीलवर्णा बुह्ना ।) नीलदूभा । नीलवर्णबोना इति भाषा ॥ तत्पर्य्यायः । अजान्त्री २ नीलपुष्पी ३ अतिलोमशा ४ । इति रत्नमाला ॥ (यथा,—

"नीलबुह्नारसस्तैलसिन्धुकाञ्जिकसंयुतः ।
कटुष्णं पूरणात् कर्णे निःशेषक्रिमिपातनः ॥"

इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारे ॥)

नीलवृक्षः, पुं, (नीलो वृक्षः ।) वृक्षप्रभेदः । तत्पर्य्यायः । नील २ वातारिः ३ शोफनाशनः ४ नरनामा ५ नखवृक्षः ६ नखालुः ७ नरप्रियः ८ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । वातामयनाशश्वयथुनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलवृन्तक, क्ली, (नीलवर्णं वृन्तं यस्य । कप् ।) तूलम् । इति राजनिर्घण्टः ॥

नीलवृषः, पु, कृष्णवर्णवृषः । वृषविशेषः । तस्य लक्षणं यथा,—

"लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥"

इति शुद्धितत्त्वम् ॥

अपि च ।
"लोहितो यस्तु वर्णेन शङ्खवर्णः खुरो वृषः ।
लाङ्गूलशिरसोश्चैव स वै नीलवृष स्मृत ॥"
तस्योत्सर्गे गयाश्राद्धादितुल्यफलं यथा,—
"जायेरन् बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत् ।
यजेद्वा अश्वमेधेन नील वा वृषमुत्सृजेत् ॥"
इति देवीपुराणम् ॥

नीलवृषा, स्त्री, (नीलं नीलवर्णं पुष्पफलादिक वर्षति प्रसूते इति । वृष+इगुपधेति कः । ततष्टाप् ।) वार्त्ताकी । इति राजनिर्घण्ट ॥ (वार्त्ताकीशब्देऽस्या गुणाः पर्य्यायाश्च ज्ञेयाः ॥)

नीलव्रतं, क्ली, व्रतविशेष । यथा,—
"यस्तु नीलोत्पल हैमं शर्करापात्रसंयुतम् ।
एकान्तरितनक्ताशी समान्ते वृषभ युतम् ।
वैष्णव स पदं याति नीलव्रतमिद स्मृतम् ॥"
इति मात्स्ये ८३ अध्याय ॥
नीललोहितव्रतञ्च ॥

नीलशिग्रु, पु, (नीलः शिग्रु ।) शोभाञ्जनः । इति राजनिर्घण्ट ॥

नीलसार, पु, (नील सारो ऽस्य ।) तिन्दुकवृक्ष । इति राजनिर्घण्टः ॥

नीलसिन्दुवार, पुं, (नील सिन्दुवारः ।) कृष्णवर्णसिन्दुवारवृक्ष । नीलसिन्दुयार इति भाषा । तत्पर्य्याय । शीतसहा २ निर्गुण्डी ३ नीलसिन्दुक ४ सिन्दुक ५ कपिका ६ भूतकेशी ७ इन्द्राणी ८ नीलिका ९ नीलनिर्गुण्डी १० । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । रूक्षत्वम् । कासश्लेष्मशोफसमीरणार्त्तिप्रदराध्माननाशित्वञ्च । इति राजनिर्घण्ट ॥

नीला, स्त्री,(नीलो नीलवर्णोऽस्त्यस्या इति । अच् । ततष्टाप ।) नीलवर्णमक्षिका । इत्यमर । २ । ५ । २६ ॥ नीलपुनर्नवा । नीली । इति राजनिर्घण्ट ॥ (कुब्जक । तत्पर्य्यायो यथा,—
"कुब्जको भद्रतरणिर्वृहत्पुष्पोऽतिकेसर. ।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"नीलानामौषधिस्तु नीलक्षीरा नीलपुष्पीलता प्रतानवहुला ।" इति चरके चिकित्सितस्थाने । १ अध्याय ॥ नदीविशेष । यथा,—
"वेणा इरावती नीला उत्तरात् पूर्व्ववाहिनी ॥"
इति हारीते प्रथमस्थाने सप्तमेऽध्याये ॥
यथा च महाभारते ।६।९।३१।
"नीला धृतिकरीञ्चैव पर्णासाञ्च महानदीम् ॥")
मल्लाररागस्य स्त्री । इति वृहद्धर्म्मपुराणे ४४ अ. ॥

नीलाङ्ग, पु, (नीलमङ्गं यस्य ।) सारसपक्षी । चासपक्षी । इति राजनिर्घण्टः ॥

नीलाङ्गु, पु, (नितरां लिङ्गतीति । नि+लिगि गतौ+कु । केचित् धातूपसर्गयोर्दीर्घमाहु । इत्युज्ज्वलदत्तोक्त्या . धातूपसर्गयोर्दीर्घत्वम् ।) कृमि. । इत्यमरः । २ । ५ । १३ ॥ भ्रमराल्यां स्त्री । इति मेदिनी । गे, ४० ॥ शुषिरम् । इति त्रि . ॥

नीलाञ्जनं, क्ली, (नीलमञ्जनम् ।) सौवीराञ्जनम् । (यथा, नवग्रहस्तोत्रे शनैश्चरप्रणाममन्त्रम् ।
"नीलाञ्जनचयप्रख्यं रविसूनु महाग्रहम् ।
छायाया गर्भसम्भूत वन्दे भक्त्या शनैश्चरम् ॥")
तत्तु उपधातुविशेष. । तस्य गुणाः । कटुत्वम् । श्लेष्मखरोगनेत्ररोगव्रणदाहनाशित्वम् । उष्णत्वम् । रसायनत्वम् । तिक्तत्वम् । भेदकत्वञ्च । इति राजवल्लभः ॥ (अस्य शोधनविधिर्यथा,—
"नीलाञ्जन चूर्णयित्वा जम्बीरद्रवभावितम् ।
दिनैकमातपे शुद्ध भवेत् कार्य्येषु योजयेत् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) तुत्थम् । इति राजनिर्घण्टः ॥

नीलाञ्जना, स्त्री, (नील मेघ व्यञ्जयतीति । अञ्ज+णिच्+ल्यु. ।) विद्युत् । इति जटाधरः ॥

नीलाञ्जनी, स्त्री, (नीलवत् अञ्ज्यतेऽनयेति । अञ्ज+करणे ल्युट् । ततो ङीष् ।) कालाञ्जनीक्षुप. । इति राजनिर्घण्टः ॥

नीलाञ्जसा, स्त्री, अप्सरोभेदः । नदीविशेषः । विद्युत् । इति मेदिनी । से, ५७ ॥

नीलापराजिता, स्त्री, (नीला अपराजिता ।) नीलवर्णापराजितालता । तत्पर्य्यायः । नीलपुष्पी २ महानीली ३ नीलगिरिकर्णिका ४ गवादनी ५ व्यक्तगन्धा ६ नीलस्यन्दा ७ नीलाद्रिकर्णी ८ । अस्या गुणाः । शिशिरत्वम् । तिक्तत्वम् । रक्तातिसारज्वरदाहच्छर्द्युन्मादमदभ्रमार्त्तिश्वासातिकासामयनाशित्वञ्च । इति राजनिर्घण्ट. ॥

नीलाब्ज, क्ली, (नीलमब्जमिति कर्म्मधारय ।) नीलोत्पलम् । इति रत्नमाला ॥ (नीलोत्पलशब्देऽस्य विशेषो ज्ञेय ॥)

नीलाम्बर, क्ली, (नीलमम्बरमिव । नीलमम्बतीति वा । अवि+अरण् ।) तालीशपत्रम् । इति राजनिर्घण्ट ॥ (नीलञ्च तदम्बरञ्चेति । नीलवस्त्रञ्च ॥)

नीलाम्बर, पु (नीलमम्बर यस्येति ।) बलदेव । राक्षस । शनैश्चर । इति मेदिनी । रे, २७४ ॥ नीलवस्त्रयुक्ते, त्रि ॥

नीलाम्बुजन्म, [न्] क्ली, (अम्बुनि जन्मास्य । तत नीलवर्णं अम्बुजन्मेति ।) नीलोत्पलम् । इत्यमर । १ । १० । ३७ ॥

नीलाम्लान, पु, (आम्लायति यथाकालमिति । आ+म्लै+ल्यु । नीलो नीलवर्ण आम्लान ।) पुष्पवृक्षभेद । काला कोराटा इति हिन्दी भाषा ॥ तत्पर्य्याय । दासी २ छादन ३ बाला ४ आर्त्तगला ५ नीलपुष्प ६ । अस्य गुणा. । कटुत्वम् । तिक्तत्वम् । कफमारुतशूलकण्डूकुष्ठव्रणशोफत्वग्दोषनाशित्वञ्च । इति राजनिर्घण्ट ॥

नीलाम्ली, स्त्री, (नीला अम्ली ।) क्षुपभेद । नक्षपुलगुड इति हिन्दी भाषा ॥ तत्पर्य्याय । नीलपिष्टोड़ी २ श्यामाम्ली ३ दीर्घशाखिका ४ । अस्या गुणा । मधुरत्वम् । रूक्षत्वम् । कफवातहरत्वञ्च । इति राजनिर्घण्ट ॥

नीलालु, पु, (नीलवर्ण आलुरिति कर्म्मधारयः ।) कन्दभेदः । तत्पर्य्यायः । असितालुः २ श्यामलालुकः ३ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् पित्तदाहश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलाश्मा, [न्] पुं, (नीलवर्णः अश्मा प्रस्तरभेद. ।) नीलमणिः । इति राजनिर्घण्टः ॥

नीलासन, पु, (नीलवर्णः असनो वृक्षभेदः ।) असनवृक्षविशेषः । पियाशालप्रभेदः । तत्पर्य्यायः । नीलपीतः २ नीलपत्रः ३ सुनीलक ४ नीलद्रुमः ५ नीलसार ६ नीलनिर्य्यासक. ७ । अस्य गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । कुष्ठकण्डूदद्रुनाशित्वम् । सारकत्वम् । तत्र सितस्य श्रेष्ठत्वञ्च । इति राजनिर्घण्टः ॥ रतिबन्धविशेषः । यथा,—
"लिङ्गोपरिस्थिता नारी शय्यां त्यक्त्वा पदद्वयम् ।
हृदये दत्तहस्ता च बन्धो नीलासनो मतः ॥"
इति सारदीपिका ॥

नीलिका, स्त्री, (नीलक+टाप् । कापि अत इत्वम् । नीलीव इवार्थे कन् टाप् पूर्व्वह्रस्व. । इति केचित् ।) नीलसिन्दुवारः । इति राजनिर्घण्ट ॥ नीलिनी । (पर्य्यायोऽस्या यथा,—
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) शेफालिका । इति मेदिनी । के, १११ ॥ नेत्ररोगविशेषः । यथा,—
"दोषे दृष्ट्याश्रिते तिर्य्यगेकं वै मन्यते द्विधा ।
तिमिराख्यः स वै दोषश्चतुर्थपटल गतः ॥
रुणद्धि सर्व्वतो दृष्टि लिङ्गनाशमतः परम् ।
अस्मिन्नपि तमोभूते नातिरूढ़े महागदे ॥
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युत ।
निर्म्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञित. ॥"
क्षुद्ररोगभेद. । यथा,—
"क्रोधायासप्रकुपितो वायु पित्तेन संयुत ।
मुखमागत्य सहसा मण्डल विसृजत्यत ॥
नीरुज तनुक श्याव त व्यङ्गमिति निर्द्दिशेत् ।
कृष्णमेवं गुण गात्रे मुखे वा नीलिकां विदु ॥"
इति माधवकरः ॥
ज्वलस्य ज्वरः । यथा, "भूमेरूषरा वृक्षस्य कोटर. जलस्य नीलिका इत्यादि ।"
इति ज्वरप्रकरणे विजयरक्षितः ॥
क्षुद्ररोगविशेष. । तल्लक्षण यथा,—
"कृष्णमेवं गुणं वक्त्रे गात्रे वा नीलिकां विदुः ।"
एव गुण नीरुज तनुक मण्डलम् ॥
तच्चिकित्सा यथा,—
"शिरावेधै प्रलेपैश्च तथाभ्यङ्गैरुपाचरेत् ।
व्यङ्गञ्च नीलिकां वापि न्यच्छञ्च तिलकालकम् ॥
वटाङ्कुरा मसूराश्च प्रलेपाद्व्यङ्गनाशना ।
व्यङ्गे मञ्जिष्ठया लेप. प्रशस्तो मधुयुक्तया ॥

अथवा लेपनं शस्तं शशस्य रुधिरेण च ।
यष्ट्याह्वदरुत्वलक् स्यादजाक्षीरेण पेषिता ॥
जातीफलस्य लेपस्तु हरेद्वाङ्गञ्च नीलिकाम् ।
अर्कक्षीरहरिद्राभ्यां मर्द्दयित्वा प्रलेपनात् ॥
मुखकार्ष्ण्यं समं याति चिरकालोद्भवं ध्रुवम् ।
मसूरैः क्षीरसंपिष्टैर्लिप्तमास्यं घृतान्वितैः ॥
सप्तरात्रात् भवेत् सत्यं पुण्डरीकदलोपमम् ।
वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम् ॥
कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत् ॥
युवानपिड़कानान्तु व्यङ्गानाञ्च विनाशनम् ।
स्यादेतेन सुखञ्चापि वर्णितं नीलिकादिभिः ॥
कालीयक कलम्बक इति लोके । युवानपिड़का
युवानन तत्र पिड़का पृषोदरादित्वान्नकारलोप. ।
कुङ्कुमं चन्दनं लोध्रं पत्तङ्गं रक्तचन्दनम् ।
कालीयकमुशीरञ्च मञ्जिष्ठा मधुयष्टिका ॥
पत्रकं पद्मकं कुष्ठं मद्मं गोरोचना निशा ।
लाक्षा दारुहरिद्रा च गैरिकं नागकेशरम् ॥
पलाशकुसुमञ्चापि प्रियङ्गुञ्च वटाङ्कुराः ।
मालती च मधूच्छिष्टं सर्षपाः सुरभिर्वचा ॥
चतुर्गुणपयःपिष्टैरेतैरक्षमितैः पृथक् ।
मन्देऽग्निना वैद्यस्तैलं प्रस्थद्वयोन्मितम् ॥
वदनाभ्यञ्जनादेतदाङ्गं नीलिकया सह ।
तिलकं माषकं न्यच्छं नाशयेन्मुखदूषिकाम् ॥
पद्मिनीकण्टकं चापि हरेच्चतुर्मार्गं तथा ।
विदध्याद्वदनं पूर्णचन्द्रमण्डलसुन्दरम् ॥
पत्तङ्गं वकम् इति लोके । कालीयकं कलम्ब इति
लोके । सुरभिर्वचा महाभरी इति लोके ।
कुङ्कुमाद्यं तैलम् ।” इति भावप्रकाशः ॥

नीलिनी, स्त्री, (नीलः प्रशस्ततयास्त्यस्या इति । इनिः । ततो ङीप् ।) नीलीवृक्षः । इत्यमरः । २ । ४ । ९५ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
“नीलिनीच्छगलान्त्री स्यादन्तःकोटरपुष्प्यपि ।
अजाणी नीलवृन्ता स्यान्नीलपुष्प्यतिलोमशा ॥”
यथा च ।
“नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ।
नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा ॥
उष्णा हन्त्युदरप्लीहवातरक्तकफानिलान् ।
आमवातमुदावर्त्तं मन्दञ्च विषमुद्धृतम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्यामत्रिपुटा । इति शब्दरत्नावली ॥
अजमीढ़स्य पत्नी । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (तथा च हरिवंशे । ३२ । ४५ ।
“अजमीढ़स्य पत्न्यस्तु तिस्रो रूपसमन्विताः ।
नलिनी केशिनी चैव धूमिनी च वराङ्गना ॥”)

नीली, स्त्री, (नीलो निष्पाद्यत्वेनास्त्यस्याः इति । नील+अच् ततो ङीप् ।) वृक्षभेदः । नीलेर गाछ इति भाषा ॥ तत्पर्य्यायः । काला २ क्लीतकिका ३ ग्रामीणा ४ मधुपर्णिका ५ रञ्जनी ६ श्रीफली ७ तुत्था ८ तूणी ९ दोला १० नीलिनी ११ । इत्यमरः । २ । ४ । ९४ ॥ नीला १२ तूली १३ द्रोणी १४ मेला १५ । इति भरत. ॥ नीलपत्री १६ राज्ञी १७ नीलिका १८ नीलपुष्पी १९ काली २० श्यामा २१ शोधनी २२ श्रीफला २३ ग्राम्या २४ भद्रा २५ भारवाही २६ मोचा २७ छाया २८ अञ्जनकेशी २९ महाफला ३० असिता ३१ क्लीतनी ३२ केशी ३३ चारटिका ३४ गन्धपुष्पा ३५ श्यामलिका ३६ रङ्गपत्री ३७ महावला ३८ स्थिररङ्गा ३९ रङ्गपुष्पी ४० दूली ४१ दूलिका ४२ द्रोणिका ४३ । इति शब्दरत्नावली ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । केश्यत्वम् । कासकफमरुद्विषोदरव्याधिगुल्मजन्तुज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ नीलिकारोगः । इति मेदिनी । ले, ३९ ॥

नीलीराग, पु, स्थिरप्रेमपुरुषः । तत्पर्य्यायः । स्थिरसौहृदः २ । इति हेमचन्द्रः । ३ । १४० ॥ (नीलीसङ्काशो रागः ।) नीलवर्णः । इति नीलशब्दस्य नानार्थे शब्दरत्नावली ॥ नायकनायिकयोः पूर्व्वरागविशेषः । यथा,—
“नीलीकुसुम्भमञ्जिष्ठाः पूर्व्वरागोऽपि च त्रिधा ।”
तन्मध्ये नीलीरागोदाहरणे ।
“न चातिशोभते यन्नापैति प्रेम मनोगतम् ।
नीलीरागः स विज्ञेयो यथा श्रीरामसीतयोः ॥”
इति साहित्यदर्पणम् ॥

नीलोत्पलं, क्ली, (नीलं नीलवर्णमुत्पलमिति ।) नीलवर्णोत्पलम् । नीलशाँपला इति भाषा । तत्पर्य्यायः । उत्पलकम् २ कुवलयम् ३ इन्दीवरम् ४ कन्दोत्थम् ५ सौगन्धिकम् ६ सुगन्धम् ७ कुड्मलकम् ८ असितोत्पलम् ९ । (यथा, भागवते । ५ । २४ । १० ।
“भयकुलोक्षद्वनन्तुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषु ॥”)
अस्य गुणाः । अतिस्वादुत्वम् । शीतलत्वम् । सुरभित्वम् । सौख्यकारित्वम् । पाके अत्यन्ततिक्तत्वम् । रक्तपित्तहरत्वञ्च । इति राजनिर्घण्टः ॥

नीलोत्पली, [न्] पु, (नीलोत्पलं नीलोत्पलचीर्णं मनोहरशिक्षनाय धार्य्यत्वेनास्त्यस्य इति इनिः ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

नीवर, पु, (नयत्यात्मानं यत्र कुत्रचित् देहयात्रानिष्पादनायेति । नी+“छित्वरच्छत्वरेति ।” उणां ३ । १ । इति ष्वरच्प्रत्ययेन निपातनात् गुणाभावात् साधुः ।) भिक्षुः । इत्युणादिकोषः ॥ वणिजकम् । वासयम् । इति मेदिनी । रे, १७५ ॥ परिव्राट् । पङ्कः । जले, क्ली । इति सङ्क्षिप्तसारोणादिवृत्तिः ॥

नीवाकः, पुं, (निरन्तरं नियतं वा उच्यते इति । नि+वच्+घञ् कुत्वं उपसर्गस्य दीर्घत्वं च ।) महार्घहेतोर्धान्यादिषु जनानामादरातिशयः । तुलाधरणाधिक्यम् । क्रमाक्रमादर । मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम् । इति भरतः ॥ तत्पर्य्याय. । प्रयाम. २ । इत्यमरः । ३।२।२३॥

नीवारः, पु, (नि+वृ+घञ् उपसर्गस्य दीर्घत्वं च ।) तृणधान्यभेदः । इत्यमरः । २ । ९ । २५ ॥ उड़ीधान इति वङ्गभाषा । तीनी इति हिन्दीभाषा । तत्पर्य्यायः । अरण्यधान्यम् २ मुनिधान्यम् ३ तृणोद्भवम् ४ अरण्यशालिः ५ । (यथा, शाकुन्तले । १ अङ्के ।
“नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरूणामधः ॥”)
अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । पवित्रत्वम् । पथ्यत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
“प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम् ।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥”
इति भावप्रकाशः ॥

नीविः, } स्त्री, (नियच्छति निवीयते वा । नि+
नीवी, } येञ् +“नौ व्यो यलोपः पूर्व्वस्य च दीर्घः ।” उणां । ४ । १३५ । इति इञ् यलोप. निशब्दस्य दीर्घत्वञ्च । ततः कृदिकारादिति वा ङीष् ।) परिपणम् । वणिजां मूलधनम् । राजपुत्रादेर्बन्धकः । इति सुभूतिः ॥ स्त्रीकटीवस्त्रवन्धः । कोँचड़ी इति भाषा । (यथा, महाभारते । २ । ६३ । १९ ।
“एकवस्त्रा लधोनीवी रोदमाना रजस्वला ॥”)
स्त्रीपुंसलक्षणं पुंस्कटीवस्त्रवन्धेऽपि । इत्यमरटीकायां भरत. । तथा च । “नीवीं विसंस्य परिहितवस्त्रस्य वामाङ्गस्पर्शं मोचयित्वा आचमनमाह वौधायनः ।” इति यजुर्व्वेदिश्राद्धतत्त्वम् ॥ शूद्रस्य पित्रादिश्राद्धे मोटकवन्धनम् । इति मधुरेशः ॥

नीवृत्, पु, (नियतं वर्त्तते वसत्यत्र जनसमूह इति । नि+वृत्+अधिकरणे क्विप् । “नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।” ६।३।११६ । इति पूर्व्वपदस्य दीर्घः ।) जनपदः । इत्यमरः ।२।१।८॥ “हे अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मण्डलेन ख्याते ग्रामसमूहे ।” इति भरतः ॥

नीध्रं, क्ली, (नितरां ध्रियते इति । नि+धृ+वाहुलकात् कप्रत्ययेन साधुः ।) छदिप्रान्तभागः । छाँचि इति भाषा । तत्पर्य्यायः । वलीकम् २ पटलप्रान्तम् ३ । इत्यमरः ॥ नीध्रम् । इति भरत ॥ नेमिः । चन्द्रः । रेवतीनक्षत्रम् । वनम् । इति मेदिनी । रे, ५३ ॥

नीशारः, पु, (निःशेषेण नितरां वा शीर्य्यन्ते हिमवाय्वादयोऽनेन अस्मादृत वा । शॄ+घञ् । उपसर्गस्य दीर्घत्वञ्च ।) हिमानिलनिवारणप्रावरणम् । इत्यमरः । २ । ६ । ११८ ॥ हिमानिलप्रावरण घन महद्वस्त्रम् । इति रमानाथः ॥ काण्डार । इति नयनानन्दः ॥ मशारि इति कश्चित् । काण्डपटः । कानात् इति कश्चित् । इति भरत. ॥ (यथा,—
“गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ॥”
इति सिद्धान्तकौमुद्याम् । ३ । ३ । २१ ।
इत्यस्य वृत्तौ ॥)

नीहारः, पुं (निह्रियते इति। नि+हृ+घञ्। उपसर्गस्य घञीति दीर्घत्वम्।) घनीभूतशिशिरम्। तत्पर्य्यायः। अवश्याय २ तुषारः ३ तुहिनम् ४ हिमम् ५ प्रालेयम् ६ महिका ७। इत्यमरः। १। ३। १८॥ खजलम् ८ निशाजलम् ९। इति त्रिकाण्डशेषः॥ निहारः १० मिहिका ११। इति शब्दरत्नावली॥ (यथा, महाभारते। १। २२८। २।

"खाण्डवस्य वनं सर्व्वं पाण्डवो वहुभिः शरैः।
प्राच्छादयदमेयात्मा नीहारेणेव चन्द्रमाः॥")

अस्य गुणः। कफवायुवर्द्धकत्वम्। इति राजवल्लभः॥

नु, अ, (नौति नुदति वा। नु नुद वा+यथायथ कर्त्तर्य्यादिषु मितद्र्वादित्वात् डुः।) वितर्कः। (यथा, शाकुन्तले। १।

"निष्कम्पचामरशिखाश्च्युतकर्णभङ्गाः
धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते॥")

अपमानः। विकल्पः। (यथा, महाभारते। ५। १७५। ३।

"किं नु गर्हाम्यथात्मानमथ भीष्मं दुरासदम्॥")

अनुनयः। अतीतः। प्रश्नः। (यथा, महाभारते। ३। ६३। १२।

"कथं नु राजंस्तृषितः क्षुधितः श्रमकर्षितः॥")

हेतुः। अपदेशः। इति मेदिनी। अव्यये, ४१॥

नु, पुं, अनुस्वारः। इति वोपदेवः। यथा,—

"नुवौ पूर्व्वेण सम्बद्धौ नुन्यौ तु परगामिनौ।"

इति दुर्गादासः॥

नुड, शि वधे। इति कविकल्पद्रुमः॥ (तुदां-कुटांपर-सक-सेट्।) शि, नुडति अनुडीत् नुनोड। इति दुर्गादासः॥

नुत, त्रि, (नु ल स्तुतौ+क्तः।) स्तुतम्। यथा,—

"तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं
चर्म्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रम्।
कृष्णत्विषं कनकपिङ्गजटाकलापं
व्यासं नमामि शिरसा तिलकं मुनीनाम्॥"

इति पुराणम्॥

नुति, स्त्री, (नु+भावे क्तिन्।) स्तुतिः। इत्यमरः। १। ६। ११॥ (यथा, भर्तृहरिः।

"परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः॥")

पूजा। इति शब्दरत्नावली॥

नुत्त, त्रि, (नुद+क्तः। "नुदविदेति।" ८। २। ५६। इति पाक्षिको नत्वाभावः।) क्षिप्तः। प्रेरितः। इत्यमरः। ३। १। ८७॥

नुन्नः, त्रि, (नुद+क्तः। निष्ठातस्य पूर्व्वदस्य च नत्वम्।) नुत्तः। इत्यमरः। ३। १। ८७॥ (यथा, माघे। १। २७।

"प्रसह्य तेजोभिरसह्यतां गतै-
रदस्त्वया नुन्नमनुत्तमं तमः॥")

नूतः, त्रि, नू शि स्तवने+कर्म्मणि क्तप्रत्ययः। स्तुतः। इति व्याकरणम्॥

नूतन, त्रि, (नव एव। "नवस्य नूरादेशो त्नप्तनप्खाश्च प्रत्यया वक्तव्याः।" ५।४।२५। इत्यस्य वार्त्तिकोक्त्या तनप् नवस्य नूरादेशश्च।) अपुरातनम्। तत्पर्य्यायः। प्रत्यग्रः २ अभिनवः ३ नव्यः ४ नवीनः ५ नवः ६ नूत्नः ७। इत्यमरः। ३। १। ७७॥ सद्यस्कः ८ अणीयः ९। इति हेमचन्द्रः। ६। ८४॥ अभ्यग्रः १० प्रतिनवः ११। इति जटाधरः॥ (यथा, रघौ। ८। १५।

"प्रशमस्थितपूर्व्वपार्थिवं
कुलमभ्युद्यतनूतनेश्वरम्॥")

नूत्न, त्रि, (नव एव। नव+त्नप् नूरादेशश्च।) नूतनः। इत्यमरः। ३। १। ७८॥ (यथा, ऋग्वेदे। ७। १८। २०।

"न त इन्द्र सुमतयो न रायः
सञ्चक्षे पूर्व्वा उषसो न नूत्नाः॥"

"न नूत्ना नूतनाश्च।" इति सायनभाष्यम्॥")

नूदः, पुं, (नुदति रोगाद्यनिष्टमिति। नुद+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः। पृषोदरादित्वाद्दीर्घः।) ब्रह्मदारुवृक्षः। इत्यमरः। २। ४। ४२॥ (ब्रह्मदारुशब्देऽस्य विशेषोऽस्य ज्ञातव्यः॥)

नून, अ, (नु ऊनयतीति। ऊन परिहाणे+अम्।) तर्कः। ऊहः। यथा, ओजसापि खलु नूनमनूनम्। अर्थनिश्चयः। (यथा, देवीभागवते। १। १०। ३६।

"स्वर्गदश्च तथा प्रोक्तः ज्ञानिनां मोक्षदं तथा।
न भविष्यति तन्नूनमनया देवकन्यया॥")

अवधारणम्। यथा, नूनं हन्ति स रावणम्। इत्यमरभरतौ॥ स्मरणम्। वाक्यपूरणम्। इति मेदिनी॥

नूपुरं, पुं, क्ली, (नू+क्विप्। नुवि पुरति इति। पुर अग्रगमने+"इगुपधेति।" ३। १। १३५। इति कः।) स्वनामख्यातपादभूषणम्। नेपुर इति भाषा। तत्पर्य्यायः। पादाङ्गदम् २ तुलाकोटिः ३ मञ्जीरः ४ हंसकः ५ पादकटकः ६। इत्यमरः॥ पदाङ्गदम् ७। इति शब्दरत्नावली॥ (यथा मार्कण्डेये। ८२। २५।

"नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम्॥"

"गुणवानपि मौखर्य्यात् पादे लुठति नूपुरः।
हारस्तु मूकभावेन कण्ठवल्लभतां गतः॥"

इत्युद्भटः॥)

नृकेशरी, [न्] पुं, (केशरः प्राचुर्य्येणास्त्यस्येति इनिः। ना चासौ केशरी चेति।) नरसिंहावतारः। इति पुराणम्॥ (ना केशरीवेति उपमितिसमासे कृते "सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः।" इत्यमरोक्तेः। पुरुषश्रेष्ठः॥)

नृगः, पुं, राजविशेषः। यथा, श्रीभागवते।

"नृगो नाम नरेन्द्रोऽहमिक्ष्वाकुतनयः प्रभो॥"

(अस्य राजप्रवरस्य कदाचिद्गोदानप्रमादजनितपापात् कृकलासत्वप्राप्तिर्वृष्णिकुमारगणानुरुद्धेन पुनर्भगवता वासुदेवेनोद्धारादिकथा च महाभारते। १३। ७०। अध्यायस्य प्रथमश्लोकादासमाप्तिर्द्रष्टव्या॥ नॄन् जीवान् गच्छति प्राप्नोति जानाति वेति व्युत्पत्त्या परमात्मा॥)

नृचक्षाः, [स्] पुं, (नॄन् चष्टे भक्ष्यत्वेन पश्यतीति। चक्ष इ दर्शने+"सर्व्वधातुभ्योऽसुन्" उणा ४। १८८। इत्यसुन्। यद्वा, "चक्षेर्बहुलं शिच्च।" उणा। ४। २३२। इत्यसिः। असनयोश्चेति न ख्याञादेशः।) राक्षसः। इति हेमचन्द्रः। २। १०१॥ (नॄन् चष्टे पश्यतीति नॄन् शुभाशुभकर्म्मणः चष्टे पश्यति जानातीत्यर्थः। देवः। यथा, ऋग्वेदे। १०। १०७। ४।

"शतधारं वायुमर्कं स्वर्विदं
नृचक्षसस्ते अभिचक्षते हविः॥"

"नृचक्षसः नॄणां द्रष्टॄन्यानिन्द्रादीन् देवांश्च।" इति भाष्ये तत्सायनः॥ नॄणां कर्म्मनेतॄणां मर्त्त्यादीनामुपद्रष्टा। यथा, ऋग्वेदे। ३।५३।९।

"अस्तभ्नात् सिन्धुमर्णवं नृचक्षाः॥")

नृचक्षुः, [स्] पुं, (नॄणां प्रजाजनानां चक्षुरिव।) सुनीथराजपुत्रः। इति महाभारतम्॥ (यथा, भागवते। ९। २२। ४१।

"सुनीथस्तस्य भविता नृचक्षुर्यत् सुखीनलः॥"

विष्णुपुराणे तु। ४। २१। ३।

"तस्मादपि सुनीथः सुनीथाच्च नृचक्षुः॥")

नृत, य नर्त्ते। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) य, नृत्यति नर्त्तकः। इति दुर्गादासः॥

नृति, स्त्री, (नृत् नर्त्तने+"इगुपधात् कित्।" उणा ४। ११९। इति इन् स च कित्।) नर्त्तनम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०। १८। ३।

"प्राञ्चो अगाम नृतये हसाय
द्राघीय आयुः प्रतरं दधानाः॥")

नृतुः पुं, (नृत्यतीति। नृत्+बाहुलकात् कुः।) नर्त्तकः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ८। २४। ९।

"इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः॥"

नृत्यत्यत्रेति। अधिकरणे कुः।) भूमिः। दीर्घः। क्रिमिः। इति संक्षिप्तसारोणादिवृत्तिः॥

नृत्तं, क्ली, (नृत्+भावे क्तः।) नृत्यम्। इत्यमरटीकायां भरतः॥ (यथा, वृहत्संहितायाम्। ५। ७३।

"नृत्तज्ञशस्यप्रवराङ्गनानां
धनुष्करघ्नक्षतपक्षिणाञ्च॥")

नृत्यं, क्ली, (नृत्+"ऋदुपधाच्चाक्लृपिचृतेः।" ३। १। ११०। इति क्यप्।) तालमानरसाश्रयसविलासाङ्गविक्षेपः। नाच इति भाषा। तत्पर्य्यायः। ताण्डवम् २ नटनम् ३ नाट्यम् ४ लास्यम् ५ नर्त्तनम् ६। इत्यमरः। १। ७। १०॥ नृत्तम् ७। उद्धतं नृत्यं ताण्डवम्। सुकुमारन्तु लास्यम्। भावाश्रयं नृत्तम्। तालतयाश्रयं नृत्यमिति भेदोऽत्र नादृतः। इति भरतः॥ नाटः ८ लासः ९ लास्यकम् १० नृतिः ११ इति शब्दरत्नावली॥ * ॥ तस्य लक्षणादि यथा,—

"देशरुच्या प्रतीतो यस्तालमानरसाश्रयः।
सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः॥ * ॥

ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते ।
पेवलिर्बहुरूपश्च ताण्डवं द्विविधं मतम् ॥
अङ्गविक्षेपबाहुल्यं तथाभिनयशून्यता ।
यत्र सा पेवलिस्संज्ञा. सङ्गादेश्चीति लोकत: ॥
छेदनं भेदनं यत्र बहुरूपा सुखावली ।
ताण्डवं बहुरूपन्तद्दारुणागलमुद्धतम् ॥ * ॥
छुरितं यौवतञ्चेति लास्यं द्विविधमुच्यते ।
यत्राभिनयादीर्भावे रसैराश्लेषचुम्बने. ॥
नायिकानायकौ रङ्गे नृत्यतस्तुरितं हि तत् ॥
मधुरं बह्वलीलाभिर्नटीभिर्यत्र नृत्यते ।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम् ॥*॥
गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लय: ।
लयतालसमारब्धं ततो नृत्यं प्रवर्त्तते ॥"
इति सङ्गीतदामोदर: ॥

अरूपस्य नृत्यं यथा,—
"नृत्येनालमरूपेण सिद्धिर्नास्त्यस्य रूपत: ।
पार्श्वेधिष्ठानवन्नृत्यं नृत्यमन्यद्विडम्बना ॥"
इति मार्कण्डेयपुराणम् ॥

विष्णुगृहे नृत्यफलं यथा,—
"नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मनुजा येन गच्छन्ति छित्वा संसारसागरम् ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य मोदते वै यदृच्छया ॥
पुष्कराच्च परिभ्रष्ट: स्वच्छन्दगमनालय: ।
फलं प्राप्नोति सुश्रोणि । मम कर्म्मपरायण: ॥
रूपवान् गुणवान् शूर: शीलवान् सुपथे
स्थित: ।
मद्भक्तश्चैव जायेत संसारपरिमोचित ॥"
इति वाराहे शौकरमाहात्म्यम् ॥
"दृष्ट्वा संपूजितं देवं नृत्यमानोऽनुमोदयेत् ।
असंशयमति: शुद्ध: परं ब्रह्म स गच्छति ॥"
इत्यग्निपुराणम् ॥
अपि च । द्वारकामाहात्म्ये श्रीभागवते ।
"यो नृत्यति प्रहृष्टात्मा भावैर्बहुसुभक्तित. ।
स निर्द्दहति पापानि जन्मान्तरशतेष्वपि ॥"
हरिभक्तिसुधोदये ।
"बहुधोत्सार्य्यते हर्षाद्विष्णुभक्तस्य नृत्यत: ।
पद्भ्यां भूमेर्दिशोऽक्ष्णिभ्या दोर्भ्यांश्चामङ्गलं दिव: ॥"
विष्णुधर्म्मोत्तरे ।
"नृत्यं दत्त्वा तथाप्नोति रुद्रलोकमसंशयम् ।
स्वयं नृत्येन संपूज्य तस्यैवानुचरो भवेत् ॥"
अन्यत्र च नारदोक्तौ ।
"नृत्यतां श्रीपतेरग्रे तालिकावादनैर्भृशम् ।
उड्डीयन्ते शरीरस्था: सर्व्वे पातकपक्षिण: ॥"
इति हरिभक्तिविलास: ॥

नृदेव:, पु, (नृषु नरेषु मध्ये देव. । ना देव इव इत्युपमितसमासो वा ।) राजा । यथा, नैषधे । १० । ३३ ।
"अम्लानमालाविपुलातपत्रै-
र्द्दैवा नृदेवाश्च भिदां न भेजु: ॥"

नृधर्म्मा, [न्] पु, (नुर्नरस्य इव धर्म्मो यस्य । "धर्म्मादनिच् केवलात् ।" ५ । ४ । १२४ । इति अनिच् ।) कुवेर: । इति हेमचन्द्र: । २।१०३॥
नरधर्म्मयुक्ते, त्रि ॥

नृप:, पु, (नॄन् नरान् पाति रक्षतीति । नृ+पा रक्षणे+"आतोऽनुपसर्गे क: ।" ३ । २ । ३ । इति क: ।) नरपति: । इत्यमर: । २ । ८ ।१।
तस्य लक्षणं यथा,—
"चतुर्योजनपर्य्यन्तमधिकारी नृपस्य च ।
यो राजा तच्छतगुण: स एव मण्डलेश्वर: ।
तत्सहस्रगुणो राजा राजेन्द्र: परिकीर्त्तित: ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अ: ॥
तत्प्रमाणं यथा,—
"अपुत्त्रस्य नृप. पुत्त्रो निर्धनस्य धनं नृप: ।
अमातुर्जननी राजा अतातस्य पिता नृप: ॥
अनाथस्य नृपो नाथो ह्यभर्त्तु: पार्थिव: पति. ।
अभृत्यस्य नृपो भृत्यो नृप एव नृणां सखा ॥
सर्व्वदेवमयो राजा तस्मात्स्वामर्षये नृप । ॥"
इति कालिकापुराणे ५० अध्याय' ॥
नृपदर्शनदिनं यथा । तत्र तिथय: शुभा: । वारा: शनिमङ्गलभिन्ना' । नक्षत्राणि उत्तर-फल्गुन्युत्तराषाढोत्तरभाद्रपद्रोहिणीपुष्याश्विनी हस्ताचित्रानुराधामृगशिरोरेवतीज्येष्ठाश्रवणा: । लग्नानि मिथुनकन्याधनुर्मीनवृषभसिंहस्थ-कानि । तत्र चन्द्र: शोभन: । इति ज्योतिषम् ॥

नृपकन्द:, पु, (नृपप्रिय. कन्द: । कन्दानां नृप: श्रेष्ठो वा । राजदन्तादिवत् समास: ।) राज पलाण्डु: । इति राजनिर्घण्ट. ॥

नृपति., पुं, (नॄन् पातीति । पा रक्षणे+डति: । यद्वा, नृणां पति. ।) राजा । (यथा, मनु: । ७ । ३४ ।
"अतस्तु विपरीतस्य नृपतेरजितात्मन' ।
संक्षिप्यते यशो लोके घृतविन्दुरिवाम्भसि ॥")
कुवेर: । इति शब्दरत्नावली ॥

नृपतिवल्लभ', पुं, (नृपतीनां वल्लभ: प्रिय ।) औषधविशेष: । नृपवल्लभ इति ख्यात: । यथा,
"जातीफलं लवङ्गाब्दत्वगेलाटङ्करामठम् ।
जीरकञ्च यमानी च विश्वसैन्धवपत्रकम् ॥
लौहमभ्रं रसं गन्धं ताम्रं प्रत्येकश: पलम् ।
मरिचं त्रिपलं दत्त्वा छागीदुग्धेन पेषयेत् ॥
धात्रीरसेन वा पिष्ट्वा वटिकां कुरु यत्नत: ।
श्रीमद्गहननाथेन विचिन्त्य परिनिर्म्मित: ॥
सूर्य्यवत्तेजसा चायं रसो नृपतिवल्लभ: ।
अष्टादशवटीं खादेत् पवित्र: सूर्य्यदर्शक: ॥
हन्ति मन्दानलं सर्व्वमामदोषं विसूचिकाम् ।
प्लीहगुल्मोदराष्ठीलायकृतमाण्डुहलीमकम् ॥
हृत्शूलं कण्ठशूलञ्च चक्षु.शूलञ्च कामलाम् ।
शिर:शूलं कटीशूलमानाहमोऽष्ठशूलकम् ॥
कासश्वासामवातञ्च श्लीपदं शोथमर्व्वुदम् ।
गलगण्डं गण्डमालामम्लपित्तञ्च गर्द्दभीम् ॥
क्रिमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम् ।
उपदंशमतीसारं ग्रहणर्य्यां.प्रमेहकम् ॥
अश्मरी मूत्रकृच्छ्रञ्च मूत्राघातमसृग्दरम् ।
ज्वरं जीर्णज्वरं कण्डु तन्द्रालस्य वमिं भ्रमिम् ॥
दाहविद्रधिहिक्काश्च जडगद्गदमूकता: ।
वाधिर्य्यं स्वरभेदञ्च दृष्टहृद्विविसर्पकान् ॥
ऊरुस्तम्भं रक्तपित्तं गुदभ्रंशमरुचिं त्वचाम् ।
कर्णनासानुशोथांश्च दन्तरोगञ्च पीनसम् ॥
स्थौल्यञ्च शीतपित्तञ्च स्थावराणि विषाणि च ।
वातपित्तकफोत्थांश्च द्वन्द्वजान् सान्निपाति-
कान् ॥
सर्व्वरोगचयान् हन्ति चण्डांशुरिव पापहा ।
वलवर्णकरो ह्येष आयुष्यो वीर्य्यवर्द्धन: ॥
परं वाजीकर: श्रेष्ठ: पटुनामन्त्रच्छिद: ।
अरोगीदीर्घजीवी स्यात् रोगी रोगं विमुञ्चति ।
एतस्यास्य प्रसादेन सुवुद्धिर्जायते नर: ॥"
इति रत्नावली ॥

नृपद्रुम', पुं, (नृपप्रियो द्रुमो वृक्ष: ।) आरग्वध: । राजादनीवृक्ष. । इति राजनिर्घण्ट. ॥

नृपप्रिय:, पु, (नृपाणां प्रिय: ।) वेणुवंश: । इति शब्दचन्द्रिका । वेड/वाँश इति भाषा ॥ राज-पलाण्डु: । रामशर: । शालिधान्यम् । आम्रम् । इति राजनिर्घण्ट: ॥

नृपप्रियफला, स्त्री, (नृपप्रियं फलं यस्या: ।) वार्त्ताकी । इति राजनिर्घण्ट: ॥

नृपप्रिया, स्त्री, (नृपाणां प्रिया ।) केतकी । राज-खर्ज्जूरी । इति राजनिर्घण्ट: ॥

नृपवदर:, पु, (नृपप्रियो वदर: ।) राजवदर-वृक्ष. । तनफले स्त्री । इति राजनिर्घण्ट: ॥

नृपमन्दिर, स्त्री, (नृपस्य मन्दिरम् ।) राजसद-नम् । तत्पर्य्याय' । सौधम् २ । इति हेम-चन्द्र: । ४ । ५२ ॥

नृपमाङ्गल्यकं, स्त्री, (नृपस्य माङ्गल्यं मङ्गलं यस्मा-दिति । कप ।) आहुल्यवृक्ष: । इति राज-निर्घण्ट: ॥

नृपलक्ष्म, [न्] स्त्री, (नृपस्य लक्ष्म चिह्नम् ।) राजच्छत्रम् । इत्यमर. । २ । ८ । ३२ ॥ राज-चिह्नञ्च ॥

नृपलिङ्गधर', पु, (धरतीति । धृ+अच् । नृप-लिङ्गस्य धर: ।) राजवेशधारी । यथा,—
"निजगाहौजसा वीर' कलिं दिग्विजये क्वचित् ।
नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥"
इति श्रीभागवते । १ । १५ ॥

नृपवल्लभ , पुं, (नृपाणां वल्लभ. प्रिय ।) राजाम्र' । इति राजनिर्घण्ट: ॥ राजप्रिये, त्रि ॥

नृपवल्लभा, स्त्री, (नृपस्य वल्लभा ।) केविका-पुष्पम् । इति राजनिर्घण्ट' ॥ राजमहिषी च ॥

नृपसभ, स्त्री, (नृपाणां सभा । "सभा राजा-मनुष्यपूर्व्वा ।" २ । ४ । २३ । इति क्लीवत्वम् ।) नृपाणां शाला सहतिर्व्वा । इत्यमरभरतौ ॥

नृपात्मजा, स्त्री, (नृपस्य आत्मजेव । सुदृश्यत्वात् तथात्वम् ।) कटुतुम्बी । इति रत्नमाला ॥ (नृपस्य आत्मजा कन्या ।) राजकन्या । यथा,
"स्वयम्वरे भीमनृपात्मजाया
दिशां पतिर्न प्रविवेश शेष. ॥"
इति नैषधे १० सर्ग. ॥

नृपाध्वरः, पु, (नृपाणामध्वरो यज्ञः ।) राजसूययज्ञः । इति त्रिकाण्डशेषः ॥

नृपान्न, क्ली, (नृपप्रियं अन्नम् ।) राजान्ननामधान्यम् । इति राजनिर्घण्टः ॥ राज्ञ ओदनश्च ॥

नृपाभीर, क्ली, (अभीरयति ख्यापयति भोजनकालमिति । अभि + ईर् + कः । नृपस्य अभीरं भोजनकालख्यापकवाद्यविशेषः ।) भक्ततूर्य्यम् । राजभोजनकालीनवाद्यविशेषः । इति त्रिकाण्डशेषः ॥

नृपामय, पु, (आमयानां नृपः । राजदन्तादिवत् पूर्व्वनिपातः ।) राजयक्ष्मा । क्षयरोगः । इति राजनिर्घण्टः ॥ (नृपस्य आमयो व्याधिः ।) राज्ञो रोगश्च ॥

नृपावर्त्त, क्ली, (नृप इव आवर्त्तते इति । आ + वृत् + अच् ।) राजावर्त्तरत्नम् । इति राजनिर्घण्टः ॥

नृपासन, क्ली, (नृपस्य आसनम् ।) राजासनम् । तत्पर्य्यायः । भद्रासनम् २ सिंहासनम् ३ । इत्यमरः । २ । ८ । ३१ ॥ (यथा, भागवते । ३ । १ । २८ ।

"यमभ्यषिञ्चच्छतपत्रनेत्रो
नृपासनाश्रां परिहृत्य दूरात् ॥")

नृपाह्वय, पु, (नृपं आह्वयते गन्धेनेति । आ + ह्वे + अच् ।) राजपलाण्डुः । इति राजनिर्घण्टः ॥ नृपनामा च ॥

नृपोचित, पु, (नृपाणामुचितो योग्यः ।) राजमाषः । इति राजनिर्घण्टः । राजयोग्ये, त्रि ॥

नृयज्ञः, पु, (ना मनुष्यस्तदर्थो यो यज्ञः ।) अतिथिसेवा । यथा मनुः । ३ । ७० ।

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

नृवराह, पुं, (ना चासौ वराहश्चेति ।) वराहरूपधृग्भगवदवतारः । यथा,—

"नृवराहस्य वसतिर्महर्लोके प्रतिष्ठिता ।
नृसिंहस्य तथा प्रोक्ता जनलोके महात्मनः ॥"

स एव वर्वेहारी । यथा,—

"शौकरं रूपमास्थाय ह्यस्य च दुरात्मनः ।
भविष्यामि न सन्देहो मम शक्रः शरान्वितः ॥"

इति पाद्मे सृष्टिखण्डे २८ अध्यायः ॥

अपि च ।

"दैत्यस्ततोऽसौ नृवराहमाहवे
निपातयामास रुषा ज्वलन्तीम् ।
शक्तिं यथा विद्युतमाशु कुञ्जे
प्रवर्षमाणोऽपि गिरिं सुमेघः ॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं नृवराहमूर्त्तिः ।
प्रजापतेः सेतुमिमं निहत्य
प्रजेश कः स्वस्ति यथासुरेन्द्र ॥"

इत्यग्निपुराणम् ॥

नृशंसः, त्रि, (नॄन् नरान् शंसति हिनस्तीति । नृ + शन्स हिंसायाम् + "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) क्रूरः । परद्रोही । इत्यमरः । ३ । १ । ४७ ॥ (यथा, मत्स्यपुराणे । ३ । १४२ ।

"ये नृशंसा दुरात्मानः प्राणिनां प्राणनाशकाः ।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते ॥")

नृसिंह, पुं, (ना चासौ सिंहश्चेति । नरसिंहमूर्त्तिधरत्वादेवास्य तथात्वम् ।) विष्णुः । इति त्रिकाण्डशेषः ॥ विष्णोर्दशावतारायां मध्ये चतुर्थः पूर्णावतारः । तस्य रूपं यथा,—

"सिंहस्य कृत्वा वदनं मुरारिः
सदा करालञ्च सुरक्तनेत्रम् ।
अर्द्धं वपुर्व्वै मनुजस्य कृत्वा
ययौ सभां दैत्यपतेः पुरस्तात् ॥"

इत्यग्निपुराणम् ॥

महाविष्णुः । तन्मन्त्रादि यथा,—

अथ नृसिंहमन्त्राः । निबन्धे ।

"उग्रं वीरं वदेत् पूर्व्वं महाविष्णुमनन्तरम् ।
ज्वलन्तं पदमाभाष्य सर्व्वतोमुखमीरयेत् ॥
नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्ततः ।
नमाम्यहमिति प्रोक्तो मन्त्रराजस्त्वरद्मः ॥"
अयं मन्त्रो मायापुटितोऽपि भवति तदा सर्व्वफलप्रदः । तथा च निबन्धे ।

"हृल्लेखापुटितश्चेत् स्यात् सर्व्वकामफलप्रदः ।"
अस्य पूजा प्रातःकृत्यादिवैष्णवोक्तपीठमन्वन्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखेऽनुष्टुप्छन्दसे नमः । हृदि नृसिंहाय देवतायै नमः । ततः कराङ्गन्यासौ ।

"चतुर्भिर्हृदयं वर्णैः शिरस्त्वष्टभिरक्षरैः ।
शिखाष्टाभिः समुदिष्टा षड्भिः कवचमीरितम् ॥
तावद्भिर्नेत्रं प्रोक्तं अस्त्रं स्यात् करणाक्षरैः ॥"
ततो मन्त्रन्यासः ।

"शिरोलल टनेत्रेषु मुखबाह्वङ्घ्रिसन्धिषु ।
साग्रेषु कुक्षौ हृदये गले पार्श्वद्वये पुनः ॥
अपराङ्गे च ककुदि न्यसेद्वर्णान् यथाक्रमम् ॥"
ध्यानन्तु ।

"माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं
जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम् ।
बाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्-
ज्वालाजिह्वमुदारकेशरचयं वन्दे नृसिंहं विभुम् ॥"
एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कृत्वा वैष्णवोक्तपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च अङ्गानि पूजयेत् । यथा उग्रं वीरं हृदयाय नमः । महाविष्णुं शिरसे स्वाहा । ज्वलन्तं सर्व्वतोमुखं शिखायै वषट् । नृसिंहं भीषणं कवचाय हुं । भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट् । नमाम्यहं अस्त्राय फट् । ततः पूर्व्वादिदलेषु गरुडं शङ्करं शेषं ब्रह्माणञ्च प्रपूजयेत् । विदिग्दलेषु श्रियं ह्रियं धृतिं पुष्टिञ्च प्रणवादिनमोऽन्तेन पूजयेत् । तद्बहिः इन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः । तथा च ।

"द्वात्रिंशल्लक्षं जपेन्मन्त्रं तत्सहस्रं घृतप्लुतैः ।
पायसान्नैः प्रजुहुयाद्विधिवत् पूजितेऽनले ॥"
मन्त्रान्तरं यथा —

"पाशः शक्तिर्नरहरिरङ्कुशो वर्म्मफट् मनुः ।
षडक्षरो नरहरेः कथितः सर्व्वकामदः ॥"
अस्य पूजा प्रातःकृत्यादिवैष्णवोक्तपीठन्यासान्तं पीठमन्वन्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखे पङ्क्तिश्छन्दसे नमः । हृदि नृसिंहाय देवतायै नमः । ततः कराङ्गन्यासौ । आं अङ्गुष्ठाभ्यां नमः । ह्रीं तर्ज्जनीभ्यां स्वाहा । क्ष्रौं मध्यमाभ्यां वषट् । क्रों अनामिकाभ्यां हुम् । हूं कनिष्ठाभ्यां वौषट् । फट् करतलपृष्ठाभ्यां फट् । एवं हृदयादिषु । ततो ध्यानम् ।

"कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्य्याग्निनेत्रं
पादादानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येन्द्रगात्रम् ।
शङ्खं चक्राहिपाशाङ्कुशकुलिशगदादारुणान्युद्वहन्तं
भीमं तीक्ष्णोग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् ॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा वैष्णवोक्तपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च आं हृदयाय नमः । इत्यादिना षडङ्गानि पूजयेत् । ततः पत्रेषु पूर्व्वादिषु शङ्खं चक्रं पाशं अङ्कुशं वज्रं गदां खड्गं खेटकञ्च प्रणवादिनमोऽन्तेन पूजयेत् । तथा च निबन्धे ।

"अङ्गान्यादौ यजेच्छङ्खं चक्रं पाशाङ्कुशौ पुनः ।
वज्रं कौमोदकीं खड्गखेटौ पत्रेषु पूजयेत् ॥"
ततः इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् ॥ अस्य पुरश्चरणं षड्लक्षजपः । तथा च ।

"ऋतुलक्षं जपेन्मन्त्रं घृतेन जुहुयात्ततः ।
तत्सहस्रं समिद्भिर्वा तोषयेद्दक्षिणा गुरुम् ॥"
मन्त्रान्तरं यथा,—

"क्षकारो वह्निमारूढो मनुबिन्दुसमन्वितः ।
एकाक्षरो मनुः प्रोक्तः सर्व्वकामफलप्रदः ॥"
अस्य पूजा प्रातःकृत्यादिवैष्णवोक्तध्यानार्च्चनादिकं सर्व्वं मन्त्रराजवत् । विशेषस्तु अत्रिरृषिः त्रिगायत्री छन्दो नृसिंहो देवता क्षकारो बीजं औकारः शक्तिः षड्दीर्घभाजा बीजेनाङ्गकल्पना । अस्य पुरश्चरणमष्टलक्षजपः । तथा च । अष्टलक्षं जपेन्मन्त्रमित्यादि ॥ * ॥

मन्त्रान्तरं यथा । कल्पे ।

"जयद्वयं समुच्चार्य्य श्रीपूर्व्वो नृसिंहेत्यपि ।
अष्टाक्षरो मनुः प्रोक्तो भजतां कामदो मणिः ॥"
अस्य ब्रह्मा ऋषिर्गायत्री छन्दो नृसिंहो देवता षड्दीर्घयुक्तबीजेनाङ्गकल्पना । ध्यानार्च्चनं मन्त्रराजवत् । अस्य पुरश्चरणमष्टलक्षजपः ।

वसुलक्षं जपेन्मन्त्रमित्यादिवचनात् ।” इति तन्त्रसारः ॥ * ॥ षोडशरतिबन्धान्तर्गतनवमबन्धः । तस्य लक्षणं यथा, रतिमञ्जर्य्याम् ।
“पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम् ।
हस्तयोर्वेष्टयेन्नात्रं बन्धो नृसिंहसंज्ञकः ॥”
(स्वनामख्यातनृपविशेषः । यथा, सह्याद्रिखण्डे । ३१ । ४० ।
“नागात् नृसिंहभूपालस्तत्सुतो गाढ़भाषणः ॥”
ना सिंह इव इत्युपमितसमासः ।) नरश्रेष्ठः ॥ (यथा, महाभारते । ६ । ५३ । २४ ।
“इष्ट्वा महार्हैः क्रतुभिर्नृसिंहाः
सन्त्यज्य देहान् सुगतिं प्रपन्नाः ॥”)

नृसिंहचतुर्द्दशी, स्त्री, (नृसिंहप्रिया नृसिंहव्रतोपलक्षिता वा चतुर्द्दशी ।) वैशाखशुक्लचतुर्द्दशी । तत्र व्रतविधिर्यथा,—
“वैशाखस्य चतुर्द्दश्यां शुक्लायां श्रीनृकेशरी ।
जातस्तदस्यां तत्पूजोत्सवं कुर्व्वीत सव्रतम् ॥”
अथ श्रीनृसिंहचतुर्द्दशीव्रतनित्यता । हृन्नारसिंहपुराणे श्रीभगवन्नृसिंहप्रह्लादसंवादे व्रतविधिकथने ।
“वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारणम् ।
महागुह्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः ॥”
किञ्च ।
“विज्ञाय मद्दिनं यस्तु लङ्घयेत् स तु पापभाक् ।
एवं ज्ञात्वा प्रकर्त्तव्यं मद्दिने व्रतमुत्तमम् ।
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ ॥” * ॥
तत्राधिकारिनिर्णयः । तत्रैव ।
“सर्व्वेषामेव लोकानामधिकारोऽस्ति मद्व्रते ।
मद्भक्तैस्तु विशेषेण प्रणेय मत्परायणैः ॥” * ॥
अथ तन्माहात्म्यम् । तत्रैव ।
श्रीप्रह्लाद उवाच ।
“नमस्ते भगवन् विष्णो नृसिंहवपुषे नमः ।
त्वद्भक्तोऽहं सुरेशेकं त्वां पृच्छामि च तत्त्वतः ॥
स्वामिंस्त्वयि ममोत्पन्ना भक्तिर्बहुविधा कथम् ।
कथं ते सुप्रियो जातः कारणं वद मे प्रभो ॥
श्रीनृसिंह उवाच ।
कथयामि महाप्राज्ञ शृणुष्वैकाग्रमानसः ।
भक्तेर्थत् कारणं वत्स ! प्रियत्वस्य च तत् पुनः ॥
पुराकल्पे ह्यभूर्व्विप्रः किञ्चित्त्वं नाप्यधीतवान् ।
नाम्ना च वसुदेवो हि वेश्यायां तत्परो ह्यभूः ॥
तस्मिन् जन्मनि नैव त्वं चकर्थ सुकृतं कियत् ।
सुक्ता तु मद्व्रतं चैकं वेश्यासङ्गतिलालसः ॥
मद्व्रतस्य प्रभावेण भक्तिर्ज्जाता तवेदृशी ।
श्रीप्रह्लाद उवाच ।
श्रीनृसिंहाच्युत स्वामिन् कस्य पुत्त्रेण किं कृतम् ।
वेश्यायां वर्त्तमानेन कथं तद्धि कृतं मया ॥
व्याख्यानं विस्तरेणेदं वक्तुमर्हसि साम्प्रतम् ।
श्रीनृसिंह उवाच ।
पुराऽवन्तीपुरे ह्यासीद्ब्राह्मणो वेदपारगः ।
तन्नाम वसुशर्म्मेति सर्व्वलोकेषु विश्रुतम् ॥
नित्यं होमक्रियामेष करोति द्विजसत्तम ।
मन्त्रक्रियासु सततं सर्व्वासु किल तत्परः ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टाः सर्व्वे सुरोत्तमाः ।
तेनापि विद्यमानेन न कृतं दुष्कृतं कियत् ॥
तस्य भार्य्या सुशीलाभूद्विख्याता भुवनत्रये ।
पतिव्रता सदाचारा पतिभक्तिपरायणा ॥
जज्ञिरे च सुताः पञ्च तस्यां द्विजवरात्ततः ।
सदाचाराः सुविद्वांसः पितृभक्तिपरायणाः ॥
तेषां मध्ये कनिष्ठस्त्वं वेश्यायां तत्परः सदा ।
तां सन्निवेशमानेन सुरापानं कृतं त्वया ॥
सदा पापरतस्त्वं हि नाध्ययाध्ययनं भृशम् ।
विलासिनीगृहे नित्यं वसतिस्त्वंभवत्तव ॥
एकदा तद्गृहे ह्यासीत्तया सह महान् कलिः ।
ततः कलहभावेन भोजनं न कृतं त्वया ॥
अज्ञानान्मद्व्रतं चक्रे व्रतानामुत्तमं व्रतम् ।
तया सह विवादेन रात्रौ जागरणं कृतम् ॥
वेश्याया अपि तत् सर्व्वं प्रजातं तु त्वया समम् ।
रात्रौ जागरणे तस्याः सञ्जातं कायशोधनम् ॥
युवयोर्म्मद्व्रतं जातमज्ञानाद्बहुपुण्यदम् ।
येन चीर्णव्रतेनाद्य मोदन्ते दिवि देवताः ॥
सृष्ट्यर्थन्तु ततो ब्रह्मा चक्रे मद्व्रतमुत्तमम् ।
मद्व्रतस्य प्रभावेण निर्म्मितं सचराचरम् ॥
ईश्वरेणापि तच्चीर्णं वधार्थं त्रिपुरस्य च ।
मद्दिनेव व्रतस्यास्य त्रिपुरं संनिपातितम् ॥
अन्यैश्च बहुभिर्देवैरृषिभिश्च पुरातनैः ।
राजभिश्च महाप्राज्ञैर्व्विहितं व्रतमुत्तमम् ॥
एतद्व्रतप्रभावेण सर्व्वे सिद्धिमुपागताः ॥
वेश्यापि मत्प्रिया जाता त्रैलोक्ये सुखचारिणी ।
ईदृशं मद्व्रतं वत्स । त्रैलोक्ये चैव विश्रुतम् ॥
धूर्त्तायाश्च विलासिन्या व्रतमेतदुपस्थितम् ।
प्रह्लाद ! तेन ते भक्तिर्म्मयि जाता ह्यनुत्तमा ।
सा वेश्या त्वप्सरा जाता दिवि भोगाननेकशः ।
सुक्ता कामं विलीना तु त्वं प्रह्लाद विविश माम् ॥
कार्य्यार्थमवतारस्ते मच्छरीरात् पृथक् त्वसौ ।
विधाय सर्व्वकार्य्याणि शीघ्रं मयि गमिष्यसि ॥
य इदं व्रतमग्र्यन्तु प्रविधास्यन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
अपुत्त्रो लभते पुत्त्रान्मद्भक्तांश्च सुवर्च्चसः ।
दरिद्रो लभते लक्ष्मीं धनदस्य च यादृशी ॥
तेजस्कामो लभेत्तेजो राज्येप्सू राज्यमुत्तमम् ।
आयुस्कामो लभेच्चायुर्यादृशन्तु शिवस्य च ॥
स्त्रीणां व्रतमिदं साधु पुत्त्रदं भाग्यदं तथा ।
अवैधव्यकरं तासां पुत्त्रशोकविनाशनम् ॥
धनधान्यफलञ्चैव पतिप्रियकरं सुखम् ।
सार्व्वभौमसुखं तासां दिव्यसौख्यं भवेत्ततः ॥
स्त्रियो वा पुरुषा वापि कुर्व्वन्ति व्रतमुत्तमम् ।
तेभ्यो ददाम्यहं सौख्यं भुक्तिमुक्तिफलं तथा ॥
बहुनोक्तेन किं वत्स । व्रतस्यास्य फलस्य हि ।
यद्व्रतस्य फलं वक्तुं नाहं शक्तो न शङ्करः ।
ब्रह्मा चतुर्भिर्व्वक्त्रैश्च नालं स्याज्जीवितावधि ॥”
किञ्च तत्रैव व्रतविधिकथने ।
“यथा यथा प्रवृत्तिः स्यात् पातकस्य कलौ युगे ।
तथा तथा विधास्यन्ति मद्व्रतं विरला जनाः ॥
मद्व्रतस्य विधाने च मतिर्न स्यात् दुरात्मनाम् ।
सदा पापरतानान्तु पुरुषाणां विकर्म्मिणाम् ॥
विचार्य्यैवं प्रकर्त्तव्यं माधवे मासि मद्व्रतम् ।
प्राप्ते भूतदिने वत्स । सर्व्वकल्मषनाशनम् ॥
येनैव क्रियमाणेन सहस्रद्वादशीफलम् ।
जायते न मृषा वच्मि मानुषाणां महात्मनाम् ॥”
तदन्ते च ।
“य इदं शृणुयाद्भक्त्या व्रतं पापप्रणाशनम् ।
तस्य श्रवणमात्रेण ब्रह्महत्यां व्यपोहति ॥
पवित्रं परमं गुह्यं कीर्त्तयेत् यस्तु मानवः ।
सर्व्वान् कामानवाप्नोति व्रतस्यास्य फलं लभेत् ॥”
अथ तद्व्रतदिननिर्णयः । आगमे ।
“वैशाखे शुक्लपक्षे च चतुर्द्दश्यां महातिथौ ।
सायं प्रह्लादधिक्कारमसहिष्णुः परो हरिः ॥
सद्यः कटकटाशब्दविस्रापितसभाजनः ।
लीलया स्तम्भगर्भान्तादुद्भूतः शब्दभीषणः ॥
नृहरेरवतारात्ता यत्नतः समुपोषयेत् ।
महापुण्यतमायाञ्च सायं विष्णुं प्रपूजयेत् ॥”
हृन्नारसिंहे ।
“वैशाखशुक्लपक्षस्य चतुर्द्दश्यां समाचरेत् ।
मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् ॥”
किञ्च ।
“स्वातीनक्षत्रयोगे तु शनिवारे हि मद्व्रतम् ।
सिद्धयोगस्य योगे च लभ्यते दैवयोगतः ॥
सर्व्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम् ।
केवलञ्च प्रकर्त्तव्यं मद्दिनं फलकाङ्क्षिभिः ।
वैष्णवैर्न तु कर्त्तव्या सा विद्धा चतुर्द्दशी ॥”
अथ तद्व्रतविधिः । तत्रैव ।
“प्रातरुत्थाय कुर्व्वीत नियमं मनसा स्मरन् ।
मामेव मद्दिने वत्स । दन्तधावनपूर्व्वकम् ॥”
नियममन्त्रम् ।
“श्रीनृसिंह महोग्रस्त्वं दयां कुरु ममोपरि ।
अद्याहं ते विधास्यामि व्रतं निर्व्विघ्नतां नयेति ॥
व्रतस्थेन न वक्तव्यं मद्दिने पापिभिः सह ।
मिथ्यालापो न कर्त्तव्यः समग्रफलकाङ्क्षिभिः ॥
स्त्रियं दूरं विहायोच्चैर्व्रतस्थेन महात्मना ।
स्मर्त्तव्यं मम रूपञ्च मद्दिने सकले शुभे ॥
ततो मध्याह्नवेलायां नद्यादौ विमले जले ।
गृहे वा देवखाते वा तडागे वातिशोभने ॥
वैदिकेन च मन्त्रेण स्नानं कुर्य्याद्विचक्षणः ।
मृत्तिकागोमयेनैव तथा धात्रीफलेन वा ॥
तिलैर्व्वा सर्व्वपापघ्नैः स्नानं कृत्वा महात्मभिः ।
परिधाय शुचिर्व्वस्त्रे नित्यकर्म्म समाचरेत् ॥
ततो गृहं समागत्य स्मरन् मां भक्तियोगतः ।
गोमयेन विलिप्याथ कुर्य्यादष्टदलाम्बुजम् ॥
कलसं तत्र संस्थाप्य ताम्ररत्नसमन्वितम् ।
तस्योपरि न्यसेत् पात्रं तण्डुलैः परिपूरितम् ॥
हैमी मूर्त्तिस्तु तत्रैव स्थाप्या लक्ष्मीस्तथैव च ।
पलेन च तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥
यथाशक्ति तथा कार्य्ये वित्तशाठ्यविवर्ज्जिते ।
पञ्चामृतेन ते स्नाप्य पूजनन्तु समाचरेत् ॥
ततो ब्राह्मणमाहूय समाचार्य्यमलोलुपम् ।
कुर्य्याच्छास्त्रसमायुक्तं शान्तं दान्तं जितेन्द्रियम् ॥

तेनैव कारयेत् पूजां दृष्ट्वा शास्त्रानुसारतः ।
आचार्य्यवचनाद्धीमान् पूजां कुर्य्याच्चरन् व्रतम् ॥”
तत्राग्रे प्रह्लादः पूजनीयः । तथा चागमे ।
“प्रह्लादक्लेशनाशाय या हि पुण्या चतुर्द्दशी ।
पूजयेत्तत्र यत्नेन हरेः प्रह्लादमग्रतः ॥”
इति सारसिद्धे ।
“मण्डपं कारयेत्तत्र पुष्पस्तवकशोभितम् ।
ऋतुकालोद्भवैः पुष्पैः पूज्योऽयं यथाविधि ॥
उपचारैः षोडशभिर्म्मन्त्रैर्नामभिस्तथा ।
ततः पौराणिकैर्म्मन्त्रैः पूजनीयो विशेषतः ॥”
तत्र चन्दनमन्त्रः ।
“चन्दनं शीतलं दिव्यं चन्द्रकुङ्कुममिश्रितम् ।
ददामि ते प्रतुष्ट्यर्थं नृसिंह परमेश्वरेति ॥”
पुष्पमन्त्रः ।
“कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो ।
पूजयामि नृसिंहेश । लक्ष्म्या सह नमोऽस्तु ते ॥”
धूपमन्त्रः ।
“कालागुरुमयं धूपं सर्व्वदेवसुवल्लभम् ।
करोमि ते महाविष्णो । सर्व्वकामसमृद्धये ॥”
दीपमन्त्रः ।
“दीपः पापहरः प्रोक्तस्तमसां राशिनाशनः ।
दीपेन लभते तेजस्तस्माद्दीपं ददामि ते ॥”
नैवेद्यमन्त्रः ।
“नैवेद्यं सौख्यदं चास्तु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्व्वपापक्षयं कुरु ॥”
अर्घमन्त्रः ।
“नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः स्युर्म्मनोरथाः ॥”
पूजामन्त्रः ।
“पीताम्बर महाविष्णो प्रह्लादभयनाशकृत् ।
यथा भूतार्च्चने नाथ यथोक्तफलदो भवेति ॥
रात्रौ जागरणं कुर्य्यात् गीतवादित्रनर्त्तनैः ।
पुराणपठनं श्रव्यं श्रोतव्यं मत्कथानकम् ॥
ततः प्रभातसमये स्नानं कृत्वा ह्यतन्द्रितः ।
पूर्व्वोक्तेन विधानेन पूजयेन्मां प्रयत्नतः ॥”
किञ्च ।
“मद्वंशे ये नरा जाता ये जनिष्यन्ति मत्पुरः ।
तांस्त्वमुद्धर देवेश । दुःसहात् भवसागरात् ॥
पातकार्णवमग्नस्य व्याधिदुःखाम्बुराशिभिः ।
तीव्रैस्तु परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीराम्बुधिनिवास त्वं प्रीयमाणो जनार्द्दन ।
व्रतेनानेन मे देव भुक्तिमुक्तिप्रदो भव ॥
एवं प्रार्थ्य ततो देवं विसर्ज्ज्य च यथाविधि ।
उपहारादिकं सर्व्वमाचार्य्याय निवेदयेत् ॥
दक्षिणाभिः समभ्यर्च्य ब्राह्मणांश्च विसर्ज्जयेत् ।
मम ध्यानसमासक्तो भुञ्जीत सह बन्धुभिरिति ॥”
इति श्रीहरिभक्तिविलासे १४ विलासः ॥

नृसेनं, क्ली स्त्री, (नृणां सेना । “विभाषा सेनेति ।” २ । ४ । २५ । इति पाक्षिकं क्लीवत्वम् ।) नृणां सेना । इत्यमरः । ३ । ५ । ४० ॥

नृसोमः, पुं, (ना सोमश्चन्द्र इव । इत्युपमिति-समासः ।) नरश्रेष्ठः । यथा, रघौ । ५ । ५६ ।
“तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सरितो नृसोमः ।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं
जग्राह तस्मान्निगृहीतशापात् ॥”

नृहरिः, पुं, (ना चासौ हरिश्चेति ।) नृसिंहावतारः । यथाह वोपदेवः ।
“शेते स चित्तशयने मम मीनकूर्म्म-
कोलोऽभवन्नृहरिवामनयामदग्न्यः ।
योऽभूद्बभूव भरताग्रजकृष्णबुद्धः
कल्की सतां च भविता प्रहरिष्यतेऽरीन् ॥”
(यथा च भागवते । ७ । ८ । २७ ।
“तं मन्यमानो निजवीर्य्यशङ्कितं
यदप्रमत्तो नृहरिं महासुरः ॥”)

नृ गि नीतौ । कविकल्पद्रुमः ॥ (क्र्यां-पां-परं-सकं-सेट् ।) गि, नृणाति नीर्य्यं नीर्णिः । नीतिः प्रापणा । इति दुर्गादासः ॥

नृ, म नीतौ । इति कविकल्पद्रुमः ॥ (भ्वां-मित्-घटां-सकं-सेट् ।) म, नरयति । नीतिः प्रापणा । इति दुर्गादासः ॥

नेजकः, पुं, (निज शुद्धौ + ण्वुल् ।) निर्णेजकः । रजकः । (यथा, मनौ । ८ । ३९६ ।
“शाल्मले फलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥”)
(शोधके, त्रि ॥)

नेता, [ऋ] पुं, (नयतीति । नी + तृच् ।) प्रभुः । इत्यमरः । ३ । १ । १० ॥ (यथा, रघौ । ४ । ७५ ।
“आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥”)
निम्बवृक्षः । इति राजनिर्घण्टः ॥ प्रापके, त्रि । (यथा महाभारते । ३ । ६६ । ६ ।
“तिष्ठ त्वं स्थावर इव यावदेव नलः क्वचित् ।
इतो नेता हि तत्र त्वं शापान्मोक्ष्यसि यत्-
कृतात् ॥”)

नेत्रं, क्ली, (नीयते नयति वानेनेति । “दाम्नी-शसेति ।” ३ । २ । १८२ । इति करणे ष्ट्रन् ।) चक्षुः । (यथा, मनुः । ४ । ४४ ।
“नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ।
न पश्येत् प्रसवन्तीञ्च तेजस्कामो द्विजोत्तमः ॥”)
जटा । वस्त्रकम् । इत्यमरः । २ । ६ । ९३, ३ । ३ । १७९ ॥ मन्थगुणः । (यथा, महाभारते । १ । १८ । १३ ।
“मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ।
देवा मथितुमारब्धाः समुद्रं निधिमम्भ-
साम् ॥”)
वृक्षमूलम् । रथः । नेतरि, त्रि । इति मेदिनी । रे, ५४ ॥ (यथा, महाभारते । २ । ६० । ४ ।
“नावं समुद्र इव बालनेत्रा-
मारुह्य घोरे व्यसने निमज्जेत् ॥”)
नाड़ी । इति विश्वः ॥ वस्तिशलाका । इति राजनिर्घण्टः ॥

नेत्रच्छदः, पुं, (नेत्रे छाद्यतेऽनेनेति । छद + णिच् + कः । ततो ह्रस्वः ।) नेत्रपिधायकचर्म्म-पुटः । चक्षुर पाता इति भाषा । इति पर्य्याय-शब्दस्य नानार्थे अमरः । ३ । ३ । १२१ ॥

नेत्रपर्य्यन्तः, पुं, (नेत्रयोः पर्य्यन्तः अन्तः ।) अपाङ्गः । इति राजनिर्घण्टः ॥ नयनावधिके, त्रि ॥

नेत्रपिण्डः, पुं, (नेत्रे नेत्रं वा पिण्ड इवास्य इति ।) विड़ालः । इति हारावली । ८६ ॥ चक्षुर्गोल-कश्च ॥

नेत्रपुष्करा, स्त्री, (नेत्रयोः पुष्करं जलं यस्याः यत्सेवनादित्यर्थः ।) रुद्रजटा । इति राजनिर्घण्टः ॥

नेत्रमीना, स्त्री, (नेत्रयोर्म्मिला मेलनं सुदृशं यस्याः । ततः पृषोदरादित्वात् लस्य नत्वम् । क्वचित् नेत्रमिला इति वा पाठः ।) यवतिक्ता-लता । इति राजनिर्घण्टः ॥

नेत्रयोनिः, पुं (नेत्राणि योनिभिर्ज्जातानि यस्य । सहस्रयोनय एव सहस्रनेत्राणि जातानि अत-स्तन्नाम्ना विश्रुतः । नेत्राणि योनय इवास्येति वा ।) इन्द्रः । इति शब्दमाला । (नेत्रं अत्रि-लोचनं योनिरुत्पत्तिकारणं यस्य ।) अत्रि-नेत्रोद्भवत्वात् चन्द्रः ॥

नेत्ररञ्जनं, क्ली, (रज्यतेऽनेनेति । रन्ज + करणे ल्युट् । नेत्रस्य रञ्जनम् ।) कज्जलम् । यथा,—
“एष ते कथितो धूपः शृणुतां नेत्ररञ्जनम् ।
येन तुष्यति कामाख्या त्रिपुरा वैष्णवी तथा ॥
सौवीरं जाम्बलं तुत्थं मयूरग्रीवकं तथा ।
दर्व्विका मेघनीलञ्च अञ्जनानि भवन्ति षट् ॥
समुद्रफेनं सौवीरं जाम्बलं प्रस्तरं तथा ।
मयूरग्रीवकं रक्तं मेघनीलन्तु तैजसम् ॥
घृष्ट्वा निगाल्य पेषाणि शिलायां तैजसेऽथवा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ॥
घृततैलादियोगेन ताम्रादौ दीपवह्निना ।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥
सर्व्वाभावे तु तद्दद्याद्देवेभ्यो दर्व्विकाञ्जनम् ।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा ॥
आप्नुवन्ति महातोषं षड्भिरेभिः सदाञ्जनैः ।
विधवा नाञ्जनं कुर्य्यान्महामायार्थमुत्तमम् ॥
नादत्ते त्वञ्जनं देवी वैष्णवी विधवाकृतम् ।
न स्वतपात्रे योजयेत्तु साधको नेत्ररञ्जनम् ॥
न पूजाफलमाप्नोति स्वतपात्रविहिताञ्जने ॥
चतुर्व्वर्गप्रदो धूपः कामदं नेत्ररञ्जनम् ।
तस्माद्द्वयमिदं दद्याद्देवेभ्यो भक्तितो नरः ॥
इति ते कथितो धूपस्तथोक्तं नेत्ररञ्जनम् ॥”
इति कालिकापुराणे ६८ अध्यायः ॥

नेत्ररोगः, पुं, (नेत्रस्य चक्षुषो रोगः ।) चक्षू रोगः । तस्य निदानं यथा,—
“उष्णाभितप्तस्य जलप्रवेशाद्-
दूरेक्षणात् स्वप्नविपर्य्ययाच्च ।
स्वेदाद्रजोधूमनिषेवणाच्च
छर्द्देर्व्विघातादृमनातियोगात् ॥
द्रवात्तथान्नान्निशि सेविताच्च
विण्मूत्रवातक्रमनिग्रहाच्च ।

प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ॥
तथा ऋतूनाञ्च विपर्य्ययेण
क्लेशाभिघातादतिमैथुनाच्च ।
वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः ॥
वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः ।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥"
तस्य सम्प्राप्तिर्यथा,—
"निस्तोदनस्तम्भनरोमहर्ष-
संघर्षपारुष्यशिरोऽभितापाः ।
विशुष्कभावः शिशिराश्रुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च ।
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताक्षिशोथः
कण्डूपदेहावतिशीतता च ।
स्रावो मुहुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
ताम्राश्रुता लोहितनेत्रता च
राज्यः समन्तादतिलोहितश्च ।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति ॥"
इति माधवकरः ॥
(अस्य निदानादिपूर्व्वकं लक्षणं चिकित्सा च यथा,—
"उष्णातिक्षारकटुकैरभिघातेन वा पुनः ।
रूक्षवक्त्रीक्षणेनापि दोषाः कुर्व्वन्ति नेत्रजाः ॥
सहजा ये परा ज्ञेया वक्ष्यामि शृणु लक्षणम् ।
रूक्षः कण्डूश्च तोदश्च शुष्कशीतास्रसन्ततिः ।
वातिकं तं विजानीयात् पैत्तिकं शृणुतः परम् ॥
सरक्तदाहे नेत्रे च उष्णास्रावश्च पैत्तिके ।
शोफकण्डूः सन्निपाते शीतलाश्च कफात्मके ॥
इदानीं मिश्रलिङ्गैश्च सर्व्वैस्तैः सान्निपातिकः ।
एतद्धि लक्षणं ज्ञात्वा चोपचारं शृणुष्व मे ॥
शुण्ठी सुराह्वसुरसा सह काञ्जिकेन
चोष्णेन धावनमिदं सहपैत्तिके च ।
श्लेष्मोद्भवे त्रिफलकल्कमिदं समूत्र-
मन्यैस्तथा कथितमत्र भिषग्वरैस्तत् ॥
शुण्ठी शटी च रजनी त्रिफला सनिम्बा
पत्राणि सैन्धवयुतानि तुषाम्बुकेन ।
शस्तं वदन्ति नयने च ससन्निपाते
रक्तोद्भवे च सरुजे च तथा प्रशस्तम् ॥
फलत्रिक दारु निशाश्च धूमो
वचाश्च वर्षाभवसैन्धवेन ।
प्रलेपनं श्लेष्मभवे विकारे
सवातिके वा हितमेव शस्तम् ॥
शुण्ठी सैन्धवतक्रेण ताम्रभाण्डे विघर्षितम् ।
अपामार्गस्य मूलं वा मलं धूर्त्तूरकस्य वा ॥
घृष्टञ्च दत्तं तेषां वातनेत्रामयापहम् ॥
दुग्धोत्पन्नं नवनीतं यष्टीनिम्बशिलाश्च
संयोज्याः ।
त्रिफला गुडसंयुक्ता लेपनं कफनेत्ररोगघ्नम् ॥
शुण्ठी सैन्धवतुल्यं मागधिका ताम्रभाजने घृष्टम् ।
दध्ना घृतेनाञ्जनकं निहन्ति सर्व्वांश्च नेत्रगदान् ॥
वातपित्तकफदोषसम्भवान्
नेत्रयोर्बहुपीडनं क्षणात् ।
एक एव हरति प्रयोजितः
शिशुपल्लवरसः समाक्षिकः ॥"
इति हारीते चिकित्सितस्थाने ४४ अध्यायः ॥)

नेत्ररोगहा [न्] पु,(नेत्ररोगं हन्तीति । हन्+क्विप् ।) वृश्चिकालीवृक्षः । इति राजनिर्घण्टः ॥ चक्षूरोगनाशके, त्रि ॥

नेत्रामयः, पुं, (नेत्रस्य आमयो रोगः ।) चक्षूरोगः । तस्य निदानं यथा,—
"वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः ।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥"
इति माधवकरः ॥
(अस्य लक्षणं यथा,—
"अल्पाश्रुरागोऽनुपदेहता च
प्रसक्ततोदातिरुजश्च वातात् ।
पित्तात्तु दाहार्त्ति रुजोऽतिरागाः
पीतोऽतिदेहः सुभृशोष्णमस्रु ॥
शुक्लोपदेहो बहुपिच्छिलास्रु
नेत्रं कफात् स्यात् गुरुता सकण्डूः ।
सर्व्वाणि रूपाणि तु सन्निपाता
नेत्रामयाः षण्णवतिस्तु भेदात् ॥
तेषामभिव्यक्तिरभिप्रदिष्टा
शालाक्यतन्त्रेषु चिकित्सितञ्च ।
पराधिकारे तु न विस्तरोक्तिः
शस्तेति तेनात्र न नः प्रयासः ॥"
इति चिकित्सितस्थाने षड्विंशतितमेऽध्याये चरकेनोक्तम् ॥)

नेत्राम्बु, क्ली, (नेत्रस्य अम्बु जलम् ।) अश्रु । इत्यमरः । २ । ६ । ६३ ॥

नेत्रारिः, पु, (नेत्रस्य अरिः शत्रुः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥

नेत्री, स्त्री, (नीयतेऽनयेति । नी+"दाम्नी-शसेति ।" ३ । २ । १८२ । इति करणे ष्ट्रन् । षित्वात् ङीष् ।) लक्ष्मीः । नाडी । इति शब्द-रत्नावली ॥ नदी । इति मेदिनी । रे ५४ ॥ (नयतीति । नी+तृच्+ङीप् ।) प्रापण-कर्त्री ॥ (शिक्षयित्री । इति नीलकण्ठः ॥ यथा, महाभारते । ५ । १३६ । १३ ।
"यस्य मे भवती नेत्री भविष्यद्भूतदर्शिनी ॥"))

नेत्रोपमफलः, पु, (नेत्रोपमं नयनतुल्यं फलं यस्य ।) वातादः । इति भावप्रकाशः ॥ बादाम इति भाषा ॥

नेत्रौषधं, क्ली, (नेत्रस्य औषधम् ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ चक्षूरोगौषधमात्रञ्च ॥

नेत्रौषधी, स्त्री, (नेत्रस्य औषधी ।) अजशृङ्गी । इति रत्नमाला ॥ कोंगा इति भाषा ॥

नेदिष्ठं, त्रि, (अयमेषामतिशयेनान्तिकः । अन्तिक+"अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "अन्तिकबाढयोर्नेदसाधौ ।" ५ । ३ । ६३ । इति नेदादेशः ।) अन्तिकतमम् । अतिनिकटम् । इत्यमरः । ३ । १ । ६८ ॥ (यथा, ऋग्वेदे । ४ । १ । ५ ।
"स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या
उषसो व्युष्टौ ॥"
यथाच, उद्भवसन्देशे । ३ ।
"सोत्कण्ठोऽभूदभिमतकथां संश्रितुं कंसभेदी
नेदिष्ठाय प्रणयलहरी बद्धवागुद्धवाय ॥")
निपुणम् । इति राजनिर्घण्टः ॥ अङ्कोटवृक्षे, पुं । इति जटाधरः ॥

नेदीयान्, [स्] त्रि, (अयमनयोरतिशयेनान्तिकः । अन्तिक+ईयसुन् । नेदादेशः ।) नेदिष्ठः । अत्यन्तसमीपः । इति जटाधरः ॥ (यथा, सर्व्व-दर्शनसंग्रहे आर्हतदर्शने ।
"न चेदमिष्टापादनमेष्टव्यं दवीयान् महीधरो नेदीयान् दीर्घो बाहुरिति व्यवहारस्य निरा-बाधं जागरूकत्वात् ॥")

नेपः, पु, (नयति प्रापयति शुभमिति । नी+"पानीविषिभ्यः पः ।" उणां । ३ । २३ । इति पः ।) पुरोहितः । उदकम् । इति संक्षिप्त-सारोणादिवृत्तिः ॥

नेपथ्यं, क्ली, (नी+विच्+गुणः । नेः नेता तस्य पथ्यम् ।) वेशः । इत्यमरः । २ । ६ । ९९ ॥ (यथा, रघु । १४ । ९ ।
"राजेन्द्रनेपथ्यविधानशोभा
तस्योदितासीत् पुनरुक्तदोषा ॥")
अलङ्कारः । रङ्गभूमिः । इति मेदिनी । ये, ८८ ॥ (यथाह भरतः ।
"वाक्यस्यार्थतया यत्र पात्रं नैव प्रवेक्ष्यति ।
नेपथ्यमिति प्राकाश्ये प्रयोज्यं तत्र नाटके ॥")

नेपालः, पु, स्वनामप्रसिद्धदेशः । इति जटाधरः ॥ (यथा, शक्तिसङ्गमतन्त्रे ।
"जटेश्वरं समारभ्य योगेशान्तं महेश्वरि ।
नेपालदेशो देवेशि । साधकानां सुसिद्धिदः ॥")

नेपालनिम्बः, पुं, (नेपालोद्भवो निम्बः ।) नेपाल-देशोद्भवनिम्बः । तत्पर्य्यायः । नेपालः २ ज्वरा-न्तकः ३ ज्वरान्तकः ४ नाडीतिक्तः ५ निद्रारिः ६ सन्निपातरिपुः ७ । अस्य गुणाः । शीतलत्वम् । उष्णत्वम् । योगवाहित्वम् । लघुत्वम् । तिक्त-त्वम् । अतिकफपित्तास्रशोफतृष्णाज्वरापह-त्वञ्च । इति राजनिर्घण्टः ॥

नेपालिका, स्त्री, (नेपाल उत्पत्तिस्थानत्वेना-स्त्यस्या इति । नेपाल+ठन्+टाप् ।) मनः-शिला । इति राजनिर्घण्टः ॥

नेमः, पु, (नयतीति । नी+"अर्त्तिस्तुसुहुसृ इति ।" उणां । १ । १३९ । इति मन् ।) कालः । अवधिः । खण्डम् । प्राकारः । कैतवम् । इति मेदिनी । मे, १८ ॥ अर्द्धम् । गर्त्तः । इति हेम-चन्द्रः । ६ । ७० ॥ नाम्नादिः । अन्यः । इति

शब्दरत्नावली ॥ सायंकाल: । मूलम् । कर्द्दमम् । इति सम्प्रसारणाद्यादिष्टि: ॥

नेमि:, स्त्री, (नयति चक्रमिति । नी+"नियो मि: ।" उणा० । ४ । ४३ । इति मि: ।) चक्रपरिधि: । रथचक्रस्य भूमिस्पर्शिभाग: । तत्पर्य्याय: । प्रधि: २ । इत्यमर: । २ । ८ । ५६ ॥ नेमी ३ । इति भरत: ॥ (यथा, रघु: । १ । ३९ ।
"मनोऽभिरामा: शृण्वन्तौ रथनेमिस्वनोन्मुखै: ।
षड्जसंवादिनी: केका द्विधा भिन्ना: शिखण्डिभि: ॥")
कूपोपरिस्थमट्टप्रान्तभाग: । इति भरत: ॥ (प्रान्तभाग: । यथा, रघु: । ९ । १० ।
"अजयदेकरथेन स मेदिनी-
मुदधिनेमिमधिज्यशरासन: ॥")
भूमिस्थकूपपट्ट: । इत्यन्ये । कूपस्य समीपे रज्जुधारणार्थं त्रिदारुयन्त्रम् । इति स्वामी ॥ तत्पर्य्याय: । त्रिका २ । इत्यमर: । १ । १० । २७ ॥ कूपनिकटसमानस्थानम् । यथा,—
"नेमिर्नेमीत्रिका च स्यात् कूपान्तिकसमस्थले ॥"
इति शब्दरत्नावली ॥

नेमि:, पु, जिनविशेष: । इति हेमचन्द्र: । १ । २८ ॥ तिनिशवृक्ष: । इत्यमर: । २ । ४ । २६ ॥ मधुरादौ तिनाश इति ख्यात: ॥ (दैत्यविशेष: । यथा, भागवते । ८ । २१ । १६ ।
"हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वच: ।
मा युध्यत निवर्त्तध्वं न न: कालोऽयमर्थकृत् ॥"
नयति शत्रून् विनाशमिति । नी+"नियो मि: ।" उणा० ४ । ४३ । इति मि । वज्र: । इति निघण्टु: । २ । २० ॥)

नेमिचक्र:, पु, परीक्षिद्वंशज: असीमकृष्णस्य पुत्त्र: । स हस्तिनानगरे नद्या हृते कौशाम्ब्यां पुर्य्यां राजासीत् । इति श्रीभागवते । ९ । २२ । ३९ ॥ (अस्यैव राज्यशासनसमयनिर्णयो यथा, राजावल्याम् १ परिच्छेदे ।
"गजाह्वये हृते नद्या कौशाम्ब्यां निवसन् सदा ।
षट्सप्ततिमितान् वर्षान् तथा मासत्रयाधिकान् ।
भुक्त्वा भोगान् गत: स्वर्गं सुतं राज्येऽभिषिच्य च ॥")

नेमी, [न्] पु, (नेम: कर्द्दमस्यास्तीति । नेम+इनि: ।) तिनिशवृक्ष: । इत्यमरटीकायां भरत: ॥

नेमी स्त्री, (नेमि+वा ङीष् ।) नेमि: । इत्यमरटीकायां भरत: ॥ (तिनिशवृक्ष: । पर्य्यायोऽस्य यथा,—
"स्यन्दनस्तिनिशो नेमी ———॥"
इति वैद्यकरत्नमालायाम् ॥)

नेष्टृ, [ऋ] पुं, (नयति शुभमिति । नी+"नप्तृनेष्टृत्वष्टृ ।" उणा० २ । ९६ । इति तृन्प्रत्ययेन साधु: ।) ऋत्विक् । इति सम्प्रसारोणाद्यादिष्टिर्भूरिप्रयोगश्च ॥ (त्वष्टृदेव: । इति सायन: ॥ यथा ऋग्वेदे । १ । १५ । ३ ।
"अभियज्ञं गृणीहि नो ग्नावो नेष्ट: पिब ऋतुना ॥")

नैकटिक:, त्रि, (निकट+"निकटे वसति ।" ४ । ४ । ७३ । इति ठक् ।) निकटवर्त्ती । यथा,—
"प्रातीपथात्सदीप्राक्ष: सुखन: परिपूजयन् ।
पर्य्येटन्नाश्रमान्मेराटनैकटिकाश्रमान् ॥"
इति भट्टि: । ४ । १२ ॥

नैकट्यं, क्ली, निकटस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । निकटत्वम् ॥ (यथा, कथासरित्सागरे । १५ । १२५ ।
"बाधते तव नैकट्यात् सर्व्वं स मगधेश्वर: ।
ततस्त्र रक्षाहेतोश्च विनोदाय च गम्यताम् ॥")
निकटभवे, त्रि ॥

नैकभेद:, त्रि, (न एको भेदोऽत्रेति ।) उच्चावचम् । अनेकप्रकार: । इत्यमर: । ३ । १ । ८३ ॥

नैकषेय:, पु (निकषाया अपत्यमिति । निकषा+ढक् ।) निकषापुत्त्र: । राक्षस: । इति हलायुध: ॥

नैगम, पुं, (निगम एव । स्वार्थे अण् ।) उपनिषत् । वणिक् । (यथा, रामायणे । १ । ७७ । २३ ।
"एव दशरथ: प्रीतो ब्राह्मणा नैगमास्तथा ॥"
"नैगमा वणिज: ।" इति तट्टीकायां रामानुज: ॥)
नागर: । इति मेदिनीशब्दरत्नावल्यौ ॥ नय: । (यथा, महाभारते । १२ । १०० । ४ ।
"तेषां प्रतिविघातार्थं प्रवक्ष्याम्यथ नैगमम् ॥")
ऋति: । इति हेमचन्द्र: । ३ । ५३१ ॥ त्रि निगमसम्बन्धिनि ॥ (निगमशास्त्रवेत्तरि । यथा, महाभारते । १३ । १९७ । ४ ।
"द्विजेभ्यो वणमुख्येभ्यो नैगमेभ्यश्च नित्यश: ॥")

नैचिकं, क्ली, (नीच+ठक् ।) गो शिरोदेश: । इति हेमचन्द्र: । ४ । ३३६ ॥

नैचिकी, स्त्री, (नीचैश्चरतीति ठक । यद्वा निचिकर्णशिरोदेश: । तत: स्वार्थे कन् । प्रशस्त निचिकमस्या: । ततो ज्योत्स्नादिभ्य इत्यण् ततो ङीप् ।) उत्तमा गौ: । इत्यमर: । २ । ९ । ७१ ॥

नैजं, त्रि, (निजस्येदमिति । निज+अण् ।) निजसम्बन्धि । स्वीयम् । यथा,—
"अच्छास्त्रस्य च ब्रह्मास्त्र वायव्यस्य च पार्व्वतम् ।
आग्नेयस्य च पार्ज्जन्यं नैजं पाशुपतस्य च ॥"
इति श्रीभागवते १० स्कन्धे बाणयुद्धे ॥
(यथा च हरिवंशे भविष्ये । ३३ । ६ ।
"स ददौ दर्शनं नैजं व्याघ्रचर्म्माम्बरो हर ॥")

नैत्य, क्ली, नित्यत्वम् । नित्यस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (नित्यसम्बन्धि । नित्यकरणीय वा ॥)

नैपाल:, पुं, (नेपाले नेपालाख्यदेशे भव: अण् ।) नेपालनिम्ब: । इति राजनिर्घण्ट: ॥ नेपालदेशसम्बन्धिनि, त्रि ॥ (भूनिम्बविशेष: । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।
"किरातकोऽन्यो नैपाल: सोऽर्द्धतिक्तो ज्वरान्तक: ॥"
इक्षुजातिभेद: । यथा तत्रैव २ भागे । अथ स्वचीपत्र नेपालीदीर्घपत्रनीलपोराणां गुणा ॥
"स्वचीपत्रो नीलपोरी नैपाली दीर्घपत्रक: ।
वातला: कफपित्तघ्ना: सकषाया विदाहिन: ॥")

नैपालिकं, क्ली, (नेपाले नेपालाख्यदेशे भवम् । इति ठक् ।) ताम्रम् । इति राजनिर्घण्ट: ॥ (ताम्रशब्देऽस्य गुणादिक व्याख्यातम् ॥)

नैपाली, स्त्री, (नेपाले भवा इत्यण् ङीप् च ।) नवमल्लिका । (नेवारि इति लोके । यथास्या: पर्य्याय: ।
"नैपाली कथिता सप्तभि: सप्तला नवमल्लिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मन:शिला । (अस्या: पर्य्यायो यथा,—
"मन:शिला मनोगुप्ता मनोज्ञा नागजिह्विका ।
नैपाली कुनटी गोला शिलादिव्यौषधि: स्मृता ॥"
इति भावप्रकाश: । १ । १ ॥)
शेफालिका । इति मेदिनी । ले, १०४ ॥ नीली । इति शब्दरत्नावली ॥

नैपुणं, क्ली, (निपुणस्य भाव: कर्म्म वा इति । "हायनान्तयुवादिभ्योऽण् ।" ५ । १ । १३० । इत्यण् ।) नैपुण्यम् । यथा, माघे । १६ सर्ग: ।
"प्रकटान्यपि नैपुणं महत्
परवाच्यानि चिराय गोपितुम् ।
विपरीतमथात्मनो गुणान्
भृशमाकौशलमार्य्यचेतसा ॥"
(यथा, महाभारते । १३ । १८ । ८१ ।
"वैश्यो लाभ प्राप्नुयान्नैपुणञ्च
शूद्रो गतिं प्रेत्य तथा सुखञ्च ॥")

नैपुण्यं, क्ली, (निपुणस्य भाव: कर्म्म वा । "गुणवचनब्राह्मणादिभ्य: कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) निपुणता । निपुणस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । यथा,—
"अशक्य: सहसा राजन् भावो बोद्धुं परस्य वै ।
अन्त: स्वभावैर्गीतैस्तैर्नैपुण्यं पश्यता भृशम् ॥"
इति रामायणे लङ्काकाण्डे १७ सर्ग ॥

नैमित्तिक, त्रि, (निमित्तादागत निमित्तभव वा । इति ठक् ।) निमित्तजन्यम् । यथा,—
"नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ।
तथा तथैव कार्य्याणि नात्र कालं विचारयेत् ॥"
इति ग्रहयागतत्त्वम् ॥
मासवत्सरादिविशेष नियम-शून्यावश्यकर्त्तव्य कादाचित्कनिमित्तोत्पन्न पुत्त्रजन्मादिनिमित्तकश्राद्धादि । यथा,—
"नित्यनैमित्तिके कुर्य्यात् प्रयत: सन् मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥"
इति मलमासतत्त्वम् ॥
(निमित्तं वेत्ति निमित्तबोधकग्रन्थमधीते वा इति ठक् । निमित्तशास्त्राभिज्ञे तदध्ययनकर्त्तरि च ॥)

नैमित्तिकक्रिया, स्त्री, (नैमित्तिकी चासौ क्रिया चेति निमित्तजन्या क्रियेत्यर्थ: ।) निमित्तनिश्चयवदधिकारिकर्त्तव्यकर्म्म । यथा,—
"नित्यां नैमित्तिकीं काम्यां क्रियां पुंसामशेषत: ।
समाख्याहि द्विजश्रेष्ठ सर्व्वशो त्वयि मे मत: ॥
और्व्व उवाच ।
यदेतदुक्तं भवता नित्यनैमित्तिकाश्रितम् ।
तदहं कथयिष्यामि शृणुष्वैकमना मम ॥

जातस्य जातकर्म्मादि क्रियाकाण्डमशेषतः ।
पुत्त्रस्य कुर्व्वीत पिता श्राद्धञ्चाभ्युदयात्मकम् ॥”
इति विष्णुपुराणे ३ अंशे ९ अध्यायः ॥
(यथा, मार्कण्डेये । ३० । १ ।
“नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा ।
गृहस्थस्य तु यत् कर्म्म तन्निशामय पुत्त्रक । ॥”)

नैमित्तिकदानं, क्ली, (निमित्तमाश्रित्य दीयते इति दा+भावे ल्युट् । अस्य निरुक्तिर्यथा ।) निमित्तनिश्चयवदधिकारिकर्त्तृकदानम् । यथा,—
“यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥”
इति गरुडपुराणम् ॥

नैमित्तिकलयः, पुं, (नैमित्तिकः ब्रह्मणो दिवावसाननिमित्तवशात् यो लयः ।) प्रलयविशेषः । यथा,—
“चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः ।
अनावृष्टिश्च कल्पान्ते जायते शतवार्षिकी ॥
उत्तिष्ठन्ति तदा रौद्रा दिवि सप्त दिवाकराः ।
ते तु पीत्वा जलं सर्व्वं शोषयन्ति जगत्त्रयम् ॥
भूर्भुवःस्वर्म्महर्लोकसस्था यान्ति जनं जनाः ।
रुद्रो भूत्वा त्वसौ विष्णुः पातालानि दहत्यध ॥
विष्णुर्देहेस्त्रिलोकञ्च सुखाम्भोधान् सृजत्यलम् ।
वर्षन्ते च वर्षशतं नानावर्णा महाघनाः ॥
विष्णुास्यजः शतं वाति वर्षाणां वायुरूर्ज्जितः ॥
विष्णुरेकार्णवे पीत्वा सर्व्वं ब्रह्मस्वरूपधृक् ।
शेतेऽनन्तासने विष्णुर्नष्टे स्थावरजङ्गमे ।
सुप्त्वा युगसहस्रं स जगद्भूयोऽसृजद्धरिः ॥”
इति गरुडपुराणम् ॥
(तथा च भागवते । ८ । २४ । ७ ।
“आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥”)

नैमित्तिकस्नानं, क्ली, (नैमित्तिकञ्च तत् स्नानञ्चेति । निमित्तवशात् निमित्तमाश्रित्य विधेयं स्नानमित्येके ।) निमित्तनिश्चयवदधिकारिकर्त्तृकस्नानम् । यथा,—
“चाण्डालशवपूयादि स्पृष्ट्वा स्नातां रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥”
इति गरुडपुराणम् ॥

नैमिषारण्यं, क्ली, (निमिषान्तरमात्रेण निहतं आसुरं बलं यत्र ततस्तत् नैमिषं अरण्यमिति ।) अरण्यविशेषः । तस्योत्पत्तिर्यथा,—
“तेन चक्रेण तत्सैन्यमासुरं दौर्ज्जयं बलात् ।
निमिषान्तरमात्रेण भस्मवद्बहुधा कृतम् ॥
एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ।
उवाच निमिषेणेदं निहतं दानवं बलम् ॥
अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञकम् ।
भविष्यति यथार्थं वै ब्राह्मणानां विशेषतः ॥”
इति वराहपुराणे गौरमुखं प्रति भगवद्वाक्यम् ॥ अपि च ।
“देशं वः संप्रवक्ष्यामि यस्मिन्देशे चरिष्यथ ।
उक्त्वा मनोमयं चक्रं स सृष्ट्वा तानुवाच ह ॥
क्षिप्तमेतन्मया चक्रमनुव्रजत माचिरम् ।
यत्रास्य नेमिः शीर्य्येत स देशः पुरुषर्षभ ॥
ततो मुमोच तच्चक्रं ते च तत् समनुव्रजन् ।
तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्य्यत ॥
नैमिषं तत् स्मृतं नाम्ना पुण्यं सर्व्वत्र पूजितम् ।
सिद्धचारणसङ्कीर्णं यक्षगन्धर्व्वसेवितम् ॥
स्थानं भगवतः शम्भोरेतन्नैमिषमुत्तमम् ।
अत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ।
तपस्तप्त्वा पुरा देवा लेभिरे प्रवरान् वरान् ॥”
इति कौर्म्मे ४० अध्याये षट्कुलीयान् प्रति ब्राह्मणवाक्यम् ॥ (क्वचित्तालव्यशान्तोऽपि पाठो दृश्यते तत्र तु ब्रह्मणा विसृष्टस्य मनोमयचक्रस्य नेमिः शीर्य्यते यत्रेति व्युत्पत्त्या नेमिशं नेमिशमेव नैमिशं तदाख्यमरण्यमिति बोध्यम् । तथा च वायवीये ।
“एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ।
यत्रास्य शीर्य्यते नेमिः स देशः तपसः शुभः ॥
इत्युक्त्वा सूर्य्यसङ्काशं चक्रं सृष्ट्वा मनोमयम् ।
प्रणिपत्य महादेवं विससर्ज्ज पितामहः ॥
तेऽपि हृष्टतमा विप्राः प्रणम्य जगतां प्रभुम् ।
प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्य्यत ॥
तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम् ॥”
तथा च देवीभागवते । १ । २ । २८-३२ ।
“कलिकालविभीताः स्मो नैमिशारण्यवासिनः ।
ब्रह्मणाथ समादिष्टाश्चक्रं दत्त्वा मनोमयम् ॥
कथितं तेन नः सर्व्वान् गच्छध्वमेतस्य पृष्ठतः ।
नेमिः संशीर्य्यते यत्र स देशः पावनः स्मृतः ॥
कलेस्तत्र प्रवेशो न कदाचित् संभविष्यति ।
तावत् तिष्ठन्तु तत्रैव यावत् सत्ययुगं पुनः ॥
तच्छ्रुत्वा वचनं तस्य गृहीत्वा तत्कथानकम् ।
चालयन्निर्गतस्तूर्णं सर्व्वदेशदिदृक्षया ॥
प्रेक्षतां चालयंश्चक्रं नेमिः शीर्णोऽत्र पश्यतः ।
तेनेदं नैमिशं प्रोक्तं क्षेत्रं परमपावनम् ॥”)

नैमेयः, पुं, (मि+मेङ् प्रणिदाने+अचो यत् इति यत् । ततः स्वार्थे प्रज्ञाद्यण् । मिधातुना निष्पन्नमिति केचित् ।) परिवर्त्तः । विनिमयः । इत्यमरः । २ । ९ । ८० ॥

नैयग्रोधं, क्ली, (न्यग्रोधस्य विकारः तत् “प्लक्षादिभ्योऽण् ।” ४ । ३ । १६४ । इत्यण् । तस्य विधानसामर्थ्यात् फले न लुक् । “न्यग्रोधस्य च केवलस्य ।” ७ । ३ । ५ । इति न वृद्धिरैजागमश्च ।) न्यग्रोधफलम् । इत्यमरः । २ । ४ । १८ ॥ न्यग्रोधजातचमसादि । इति वोपदेवरामतर्कवागीशौ ॥

नैयङ्कवं, त्रि, (न्यङ्कोर्विकार इति । “प्राणिरजतादिभ्योऽञ् ।” ४ । ३ । १५४ । इति विकारेऽञ् ।) न्यङ्कुमृगजातवस्त्रचर्म्मादि । इति वोपदेवरामतर्कवागीशौ ॥

नैयत्यं, क्ली, (नियतस्येदं इति । नियत+ष्यञ् ।) नियतत्वम् । नियतस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैयायिकः, पुं, (न्यायं गोतमादिप्रणीतं तर्कशास्त्रविशेषं अधीते वेत्ति वा । न्याय+“क्रतूक्थादिसूत्रान्ताट्ठक् ।” ४।२।६०। इति ठक् ।) न्यायवेत्ता । न्यायाध्येता । तत्पर्य्यायः । आक्षपादः २ सांख्यादिकः ३ आर्ह्वितः ४ । इति जटाधरः ॥
(यथा, महाभारते । १ । २ । १६८
“नैयायिकानां मुख्येन वरुणस्यात्मजेन च ।
पराजितो यत्र वन्दी विवादेन महात्मना ॥”)

नैरन्तर्य्यं, क्ली, (निरन्तरस्य भाव इति । निरन्तर+ष्यञ् ।) निरन्तरत्वम् । निरन्तरस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (यथा मनौ । ८ । २७१ श्लोकस्य टीकायां कुल्लूकभट्टः ।
“ये च ददति तानपि नैरन्तर्य्याद्यपराधगोचरापेक्षया घातयेत् ॥”)

नैराश्यं, क्ली, (निराशस्य निरभिलाषस्य भावः इति । निराश+ष्यञ् ।) आशाया अभावः । यथा,—
“आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
आशया पिङ्गला वेश्या कृत्वा जन्म निरर्थकम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६७ अः ।
(यथा, महाभारते । १ । २२५ । १ ।
“स तु नैराश्यमापन्नः सदा ग्लानिसमन्वितः ।
पितामहमुपागच्छत् संक्रुद्धो हव्यवाहनः ॥”)

नैरुक्त, त्रि, (निरुक्तस्येदं निरुक्तौ भवं वा । “ऋगयनादिभ्यः ।” ४ । ३ । ७३ । इति अण् ।) निरुक्तसम्बन्धि । यथा, “मठेत्यत्र एभिष्टेति यस्य ठः न ढः इति नैरुक्तम् ॥” इति रामतर्कवागीशः ॥
(निरुक्तं ग्रन्थविशेषं वेत्ति अधीते वा । निरुक्तवेत्ता । यथा, मनुः । १२ । १११ ।
“त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ॥”)

नैर्ऋतः, पुं, (निर्ऋतेरपत्यम् । इत्यण् ।) राक्षसः ।
(यथा, महाभारते । १ । ६६ । ५५ ।
“तस्यापि निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः ॥”)
पश्चिमदक्षिणकोणाधिपतिः । इत्यमरः । १ । १ । ६३, १ । ३ । २ ॥ ज्योतिषमते तत्कोणाधिपती राहुः । यथा,—
“सूर्य्यः शुक्रः क्षमापुत्त्रः सैंहिकेयः शनिः शशी ।
सौम्यस्त्रिदशमन्त्री च प्रागादिदिगधीश्वराः ॥”
इति ज्योतिस्तत्त्वम् ॥

नैर्ऋती, स्त्री, (निर्ऋतेरियमिति । निर्ऋतोऽधिष्ठाता यस्या वा । अण् ङीप् च ।) अवाचीप्रतीच्योर्मध्या दिक् । नैर्ऋतकोणः । इति राजनिर्घण्टः जटाधरश्च ॥ (यथा, मनुः । ११ । १०५ ।
“स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ ।
नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मगः ॥”)

नैर्गुण्य, क्ली, (निर्गुणस्य भावः कर्म्म वा । निर्गुण+ष्यञ् ।) निर्गुणत्वम् । यथा, श्रीभागवते । २ । १ । ९ ।
“परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥”
(यथा, महाभारते । २ । १६ । १५ ।

"गुणाभिः संश्रयाद्दाक्षन् नैर्गुण्यं मन्यसे कथम् ॥
न सन्ति प्रकृतेः सत्त्वादि गुणा यत्र ज्ञानयोगे ।
सत्त्वज्ञानयोगः । यथा, भागवते । ३ । ३२।३० ।
"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ॥")

नैर्म्मल्य, क्ली, (निर्म्मलस्य भावः । इति ष्यञ् ।) निर्म्मलत्वम् । (यथा च हारीतेनोक्तम् ।
"निशाखेदं जनयति सदा नैशनैर्म्मल्यकारी ॥")
विषयवैराग्यम् । यथा,—
"विषयेष्वतिसंरागो मानसो मल उच्यते ।
तेष्वेव हि विरागस्तु नैर्म्मल्यं समुदाहृतम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

नैल्यं क्ली, (नीलस्य भावः । ष्यञ् ।) नीलिमा ।
इति मुग्धबोधटीकायां रामतर्कवागीशः ॥

नैविड्यं, क्ली, वंशपुत्रकारगुणविशेषः । यथा —
"नैविड्यं प्रौढ़ता चापि सम्भरत्वञ्च प्रोथता ।
माधुर्य्यमिति पञ्चामी पुत्रकेषु गुणाः स्मृताः ॥"
इति सङ्गीतदामोदरः ॥
(निविडस्य भावः । निविड + ष्यञ् ।) निबिडता च ॥

नैवेद्य, क्ली (निवेद निवेदनमर्हतीति । निवेद + ष्यञ् ।) देवाय निवेदनीयद्रव्यम् । तस्य निरुक्तिर्यथा,—
"चतुर्विधं कुलेशानि द्रव्यं ते षड्रसान्वितम् ।
निवेदनाद्भवेत्तृप्तिर्नैवेद्यं तदुदाहृतम् ॥"
इति कुलार्णवे १७ उल्लासः ॥
तद्द्रव्याणि यथा,—
"सर्पिषा सुमृदुना पायसेन समर्पिता ।
सितोदनं सकदलिदध्याद्यैश्च निवेदयेत् ॥"
इति प्रपञ्चसारः ॥
तत् पञ्चविधम् । यथा,—
"निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा ।
तद्भक्ष्यादि पञ्चविधं नैवेद्यमिति कथ्यते ॥
भक्ष्यं भोज्यञ्च लेह्यञ्च पेयं चूष्यञ्च पञ्चमम् ।
सर्व्वत्र चैतन्नैवेद्यमाराध्यस्य निवेदयेत् ॥" * ॥
तत् पात्रं यथा,—
"तैजसेषु च पात्रेषु सौवर्णे राजते तथा ।
ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः ॥
यज्ञदारुमये वापि नैवेद्यं स्थापयेद्बुधः ।
सर्व्वाभावे च माहेये स्वहस्तघटिते यदि ॥"
इति तन्त्रसारः ॥ * ॥
तद्दानफलं यथा,—
"नैवेद्येन भवेत् स्वर्गो नैवेद्येनाक्षतं भवेत् ।
धर्म्मार्थकाममोक्षाश्च नैवेद्येषु प्रतिष्ठिताः ॥
सर्व्वयज्ञफलं नित्यं नैवेद्यं सर्व्वतुष्टिदम् ।
ज्ञानदं मानदं पुण्यं सर्व्वभोग्यमयं तथा ॥
मनसापि महादेव्यै नैवेद्यं दातुमिच्छति ।
यो नरो भक्तियुक्तः सन् दीर्घायुः स सुखी भवेत् ॥
महामायां कदा देवीमर्च्चयिष्यामि भक्तितः ।
नानाविधैस्तु नैवेद्यैरिति चिन्ताकुलस्तु यः ।
स सर्व्वकामान् सम्प्राप्य मम लोके महीयते ॥"
इति कालिकापुराणे । ६९।७० । अध्यायः ॥
तत्काले यथा,—
"अस्माकं विसर्ज्जनादूर्द्ध्वं नैवेद्यं सर्व्वमुच्यते ।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति क्षणात् ॥
पञ्चरात्रविदो मुख्या नैवेद्यं भुञ्जते सुखम् ॥"
इति गरुड़पुराणम् ॥
तस्य स्थापनक्रमो यथा,—गौतमीये ।
"नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः ॥
दक्षिणभागस्तु देवताया एव न तु साधकस्य ।
भक्ष्यञ्च देवतावामे वामाङ्गस्यैव दक्षिणे ॥
पुरश्चरणचन्द्रिकायाम् ।
दक्षिणाङ्गं परित्यज्य वामे चैव निधापयेत् ।
अभोज्यं तद्भवेदन्नं पानीयञ्च सुरोपमम् ॥"
इति तन्त्रसारः ॥
तन्मुद्रा यथा,—
"नैवेद्यमुद्रामङ्गुष्ठकनिष्ठाभ्यां प्रदर्शयेत् ।
कनिष्ठानामिकाङ्गुष्ठैर्मुद्रा प्राणस्य कीर्त्तिता ॥
तर्ज्जनीमध्यमाङ्गुष्ठैरपानस्य तु मुद्रिका ।
अनामामध्यमाङ्गुष्ठैर्व्यानस्य तु सा स्मृता ॥
तर्ज्जन्यनामामध्याभिः साङ्गुष्ठाभिश्चतुर्थिका ।
सर्व्वाभिः सा समानस्य प्राणाद्यग्रे योजिता ॥
तारपूर्व्वा पञ्चमुद्राः प्राणादीनां प्रदर्शयेत् ॥"
इति यामलः ॥
ब्राह्मणाय तदर्पणं यथा,—
"साक्षात् स्वादति नैवेद्यं विप्ररूपी जनार्द्दनः ।
ब्राह्मणे परितुष्टे च सन्तुष्टाः सर्व्वदेवताः ॥
देवाय दत्त्वा नैवेद्यं द्विजाय न प्रयच्छति ।
भस्मीभूतञ्च नैवेद्यं पूजनं निष्फलं भवेत् ॥
देवदत्तं न भोक्तव्यं नैवेद्यञ्च विना हरेः ।
प्रशस्तं सर्व्वदेवेषु विष्णोर्नैवेद्यभोजनम् ॥"
शूद्रस्य तद्भक्षणविधिर्यथा,—
"शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः ।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति ॥"
इति श्रीकृष्णजन्मखण्डे २१ अध्यायः ॥ * ॥
विष्णुनैवेद्यभोजनफलादि स्कान्दे ।
"कृत्वा चैवोपवासन्तु भोक्तव्यं द्वादशीदिने ।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥
पाद्मे ।
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः ॥
स्कान्दे ।
अग्निष्टोमसहस्रैश्च वाजपेयशतैस्तथा ।
तुल्यं फलं भवेद्देवि ! विष्णोर्नैवेद्यभक्षणात् ॥
पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः ।
महाप्रसाद इत्युक्ता ग्राह्यं विष्णोः प्रयत्नतः ॥
बृहन्नारदीयपरिशिष्टे ।
पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतम् ।
अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणञ्चरेत् ॥
स्वदत्तमिति विशेषणीयम् ॥ स्मृतौ ।
ब्रह्मचारिगृहस्थैश्च वनस्थयतिभिस्तथा ।
भोक्तव्यं विष्णुनैवेद्यं नात्र कार्य्या विचारणा ॥"
इत्येकादशीतत्त्वम् ॥
अपि च ।
"विष्णोर्निवेदितं पुण्यं नैवेद्यं वा फलं जलम् ।
प्राशिमात्रेण भोक्तव्यं त्यागेन ब्रह्महा जनः ॥
अश्रद्धेयबुद्धिश्च भक्ष्याणो भवेन्नरः ।
यस्त्वनिवेद्य नैवेद्यं भाग्येनोपमितं शुभम् ॥
प्राशिमात्रेण यो भुङ्क्ते भक्त्या विष्णुनिवेदितम् ।
पुंसां शतं समुद्धृत्य जीवन्मुक्तः स्वयं भवेत् ॥
विष्णुनैवेद्यभोगी यो नित्यं वा प्रणमेद्धरिम् ।
पूजयेत् स्तौति वा भक्त्या स विष्णुसदृशो भवेत् ॥
पुंश्चल्यन्नमवीरान्नं शूद्रश्राद्धान्नमेव च ।
यद्दत्तमनिवेद्यञ्च वृथामांसमभक्ष्यम् ॥
शिवलिङ्गप्रदत्तान्नं यदन्नं शूद्रयाजिनाम् ।
चिकित्सकद्विजान्नञ्च देवलान्नं तथैव च ॥
कन्याविक्रयिणामन्नं यदन्नं योनिजीविनाम् ।
उच्छिष्टान्नं पर्य्युषितं सर्व्वभक्षावशेषकम् ॥
शूद्रापतिद्विजान्नञ्च वृषवाहद्विजान्नकम् ।
अदीक्षितद्विजान्नञ्च यदन्नं शवदाहिनाम् ॥
अगम्यागामिनाञ्चैव द्विजानामन्नमेव च ।
मित्रद्रुहां कृतघ्नानामन्नं विश्वासघातिनाम् ॥
मिथ्यासाक्ष्यप्रदानाञ्च ब्राह्मणानामथैव च ।
एतत् सर्व्वं विशुध्येत विष्णोर्नैवेद्यभक्षणात् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३० अध्यायः ॥ * ॥
"विष्णोर्निवेदितान्नेन यष्टव्यं सर्व्वदेवताः ।
पितरोऽपि तथैवमिति वेदेषु विश्रुतम् ॥
अमृतं सर्व्ववस्तूनां सिद्धसारं सुदुर्लभम् ।
विष्णोर्निवेदितान्नस्य कलां नार्हन्ति षोडशीम् ॥
यदृच्छया तन्नैवेद्यं यो भुङ्क्ते साधुसत्तम ।
षष्टिवर्षसहस्राणां प्राप्नोति तपसां फलम् ॥
यो निवेद्य हरिं भुङ्क्ते भक्त्या भुक्तश्च नित्यशः ।
किं वा तपस्या सुतरां स हरेस्तेजसा समः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः ॥
शिवनैवेद्ये विशेषो यथा, बृहन्नारदीयपरिशिष्टे ।
"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम् ॥
शालग्रामशिलायां शिवपूजने तद्ग्राह्यम् ।
इत्याह्निकतत्त्वम् ॥" कालिकापुराणे ।
"यो यद्देवार्च्चनरतः स तन्नैवेद्यभक्षकः ।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत् ॥"
वैष्णवपदमन्यदेवोपासकपरम् ।
'समानत्त्वन्यनैवेद्यं भक्षयेदन्यदैवतः ।'
एतदन्योत्सृष्टपरम् । नन्दिकेश्वरपुराणे ।
'दत्त्वा नैवेद्यवस्त्रादि नाददीत कथञ्चन ।
त्यक्तञ्च शिवमुद्दिश्य तदादाने न तत्फलम् ॥
इति शिवदत्ते विशेषः ।' इत्येकादशीतत्त्वम् ॥
स्वदत्तशिवनैवेद्यस्यापि भक्त्या भक्ष्यत्वमुक्तं यथा,
"रोगं हरति निर्म्माल्यं शोकन्तु चरणोदकम् ।
अशेषं पातकं हन्ति शम्भोर्नैवेद्यभक्षणम् ॥"
इति शाक्तानन्दतरङ्गिणी ॥
शिवनैवेद्यस्याग्राह्यत्वकारणं यथा,—
राधिकोवाच ।
"एवम्भूतस्य च विभो ! सर्व्वेशस्य महात्मनः ।
न शस्तं कथमुच्छिष्टं ब्रूहि सन्देहभञ्जन ! ॥
श्रीकृष्ण उवाच ।
शृणु देवि ! प्रवक्ष्येऽहमितिहासं पुरातनम् ।

पापेन्धनानां दहने ज्वलदग्निशिखोपमम् ॥
सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ।
ददर्श भुक्तवन्तञ्च नाथं नारायणं द्विजः ॥
तुष्टाव गूढैः स्तोत्रैश्च प्रणम्य भक्तितो मुदा ।
अवशेषं ददौ तस्मै सन्तुष्टो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव भुक्तं तेनैव किञ्चन ।
किञ्चिद्धरञ्च बन्धूनां भक्षणाय च दुर्लभम् ॥
सिद्धाश्रमे च तद्दत्तं गुरवे शूलपाणिने ।
भक्त्युद्रेकाच्च तत् सर्व्वं भुक्तञ्च प्राप्तिमात्रतः ॥
भुक्त्वा सुदुर्लभं वस्तु ननर्त्त प्रेमविह्वलः ।
पुलकाञ्चितसर्व्वाङ्गः साश्रुनेत्रो मुदान्वितः ॥
गायन्नस्म गुणं भक्त्या सुकण्ठः पञ्चवक्त्रतः ।
रागभेदैकतानेन तालमानेन सुन्दरम् ॥
पपात डमरुर्हस्तात् शूलञ्च व्याघ्रचर्म्म च ।
स्वयं निपत्य पश्चाच्च ददन्मूर्च्छामवाप च ॥
अतीवकमनीयैतद्रूपध्यानैकमानसः ।
सहस्रदलमध्यस्थं मां पश्यन् हृत्सरोरुहे ॥
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ।
मुदा जगाम शीघ्रं तत् प्रसन्नवदनेक्षणा ॥
रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वार्त्तां पप्रच्छ कुमारं शूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः सम्पुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
तां प्रसुदयितां देवीमुत्थाय च त्रिलोचनः ।
बोधयामास विविधं तुष्टाव संपुटाञ्जलिः ॥
श्रुत्वा मनोहरं स्तोत्रं न प्रशशाम शिव शिवा ।
दुष्टचक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥

पार्व्वत्युवाच ।

सुचिरञ्च तपस्तप्त्वा मया लब्धस्त्वमीश्वरः ।
त्वया विष्णोः प्रसादेन वञ्चिताह कथं विभो ॥
यतो न दत्तमैवेद्यं विष्णोर्मह्यं त्वयाधुना ।
अतो मत्तो गृहाणैतत् फलमेव महेश्वर । ॥
अद्यप्रभृति ये लोका नैवेद्यं भुञ्जते तव ।
ते जन्मैक सारमेया भविष्यन्त्येव भारते ॥
इत्युक्त्वा पार्व्वती मानाद्रुरोद पुरतो विभोः ।
दृष्टिः पपात तत्कण्ठे नीलकण्ठो बभूव सः ॥
तदा शिवः शिवां भक्त्या कृत्वा वक्षसि सादरम् ।
तन्मानभङ्गं स्तोत्रेण विनयेन चकार ह ॥
करेण चक्षुषोर्नीरं संमृज्य च पुनः पुनः ।
बोधयामास विविधैर्नीतिवाक्यैर्मनोहरैः ॥
परितुष्टा च सा देवी भर्त्तारं समुवाच ह ।
कलेवरञ्च त्यक्ष्यामि नैवेद्येन विना हरेः ॥
निर्म्मितं देह सततं तव सौभाग्यवर्द्धितम् ।
कथं वहामि सौभाग्यरहितञ्च कलेवरम् ॥
अपूर्व्वं तव नैवेद्यं जन्ममृत्युजराहरम् ।
कृतं दुष्टं यतस्तस्मात् पश्च देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तदेवाग्राह्यमीश्वर ! ।
सुपवित्रं भवेत्तत्र विष्णोर्नैवेद्यमिश्रितम् ॥
इत्येवमुक्त्वा सा देवी देहं त्यक्तुं समुद्यता ।
नत्वो हरस्तत्पुरतः स्तुत्वा च स्तोत्रकार ह ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६७ अः ॥
तत्कारणान्तर यथा,—

श्रीदेव्युवाच ।

“दुर्लभं तव निर्म्माल्यं ब्रह्मादीनां कृपानिधे ! ।
तत् कथं परमेशान । निर्म्माल्यं तव दूषितम् ॥

ईश्वर उवाच ।

माभैर्माभैर्महादेवि । ज्ञानसारं शृणु प्रिये ।
एतज्ज्ञानं महादेवि ! सारात्सारं परात्परम् ॥
पञ्चभूतात्मकं देवि मुखं मे परिकीर्त्तितम् ।
मध्यस्थानं स्थितं तत्तु तन्मुखं परमेश्वरि । ॥
श्यामल तत्तु ईशानं सदा ऊर्द्ध्वं सुचिस्मिते । ।
कालाग्निरूपिणं तत्तु सर्व्वशक्तिमयं सदा ।
तेजोमय महेशानि मुखमूर्द्ध्वं वरानने । ॥
क्षीरोदमन्थने देवि उत्थितं गरलं विषम् ।
उत्थितं गरलं यत्तु ब्रह्माण्डनाशकारकम् ॥
तदेव गरलं देवि हस्ते कृत्वा तु तद्विषम् ।
कृष्णाञ्जननिभं दिव्यं गरलं जलवत्तदा ॥
मम हस्ते महेशानि ह्याविरासीत् शुचिस्मिते ।
ततः करतलीकृत्य तद्विषं परमेश्वरि ॥
निपीय तद्विषं सूक्ष्मं तीक्ष्णं ब्रह्माण्डनाशकम् ।
ततः श्याममुखे देवि न पीत्वा तद्विषं प्रिये ॥
तद्विषं कण्ठदेशे तु स्थितं हि सर्व्वदा मम ।
ततःप्रभृति देवेशि मुखं ज्वालायते सदा ॥
कण्ठे तु कलुषं भूत्वा सदा तिष्ठति कामिनि ।
ततःप्रभृति देवेशि नीलकण्ठत्वमाप्नुयाम् ॥
ईशानं मन्मुखं देवि परं ब्रह्म वरानने ।
प्रत्यङ्गिरामय देवि मन्मुखं कमलानने ॥
साक्षात् ज्योतिर्म्मयी देवी सदा मे मुखसंस्थिता ।
पत्रं वा यदि वा पुष्पं जलं वा वरवर्णिनि ॥
अन्यं हि परमेशानि उपचारं मनोहरम् ।
यो दद्यात् परमेशानि मन्मुखोपरि पार्व्वति ॥
अग्राह्यं तत्तु निर्म्माल्यं साक्षाद्ब्रह्ममयं ततः ।
एतत्तु परमेशानि निर्म्माल्यं यस्तु धारयेत् ॥
स भ्रष्टो जायते देवि निष्कृतिर्नास्ति तत्र वै ।
अग्राह्यं मम निर्म्माल्य अतएव वरानने ॥
यद्दत्तं मन्मुखे देवि पुष्पं वा पत्रमुत्तमम् ।
तन्निर्म्माल्यं महेशानि । गृह्णीयात् शिरसा सदा ॥
स ब्रह्मतेजसा तस्य समता याति सुन्दरि । ।
न दद्याद्यदि देवेशि । उपचारं शुचिस्मिते । ॥
लिङ्गोपरि वरारोहे । यश्च तस्य शुचिस्मिते ।
निगदामि शृणु प्रौढे वचनं मम कामिनि ॥
स एव नारकी भूत्वा नरकं सर्व्वदाप्नुयात् ।
अशेषनरकं भुक्त्वा अशेषयोनिमाव्रजेत् ॥
अशेषस्थावरं देवि जङ्गमञ्च तथा प्रिये ।
भुक्त्वा तु सर्व्वपापान् स अशेषक्रिमिता व्रजेत् ॥
शृणु देवि प्रवक्ष्यामि उच्छिष्टं मम पार्व्वति ।
उपचारं स्थापयित्वा पूतं पात्रान्तरे प्रिये ॥
कृत्वा तु मन्त्रपूतं हि उपचारं निवेदयेत् ।
वामदेवादि देवेशि मुखेषु वरवर्णिनि ॥
भक्षणं मम देवेशि ब्रह्माण्डस्पृष्टिकारकम् ।
एतद्धि परमेशानि । ब्रह्मादीनां सुदुर्लभम् ॥
अशुचिर्व्वा शुचिर्व्वापि उच्छिष्टं भक्षयेद्यदि ।
स एव परमाराध्यः साक्षाद्ब्रह्म शुचिस्मिते ॥
उच्छिष्टभक्षणे कामी स एव श्रीसदाशिवः ।
निर्म्माल्यं दृढभक्तित्वाद्गृह्णीयाद्यस्तु पार्व्वति ॥
प्रथमं विष्णवे दत्त्वा विष्णुमन्त्रेण सुन्दरि ।
निर्म्माल्यं मम देवेशि विष्णोर्ग्राह्यं वरानने ॥
देवासुरमनुष्याश्च गन्धर्व्वाः किन्नरादयः ।
ते सर्व्वे परमेशानि वराकाः क्षुद्रबुद्धयः ॥
निर्म्माल्येषु च देवेशि । अधिकारी कथं भवेत् ॥”
इति लिङ्गार्च्चनतन्त्रे । १३ । १४ । पटलः ॥

नैवेशिकं, क्ली, (निवेशाय गार्हस्थाय हितम् । निवेश + ठक् ।) न्विवेशनार्थं गार्हस्थाय यत् कन्या दीयते तत् । इति मिताक्षरा ॥ यथा, याज्ञवल्क्यः । १ । २१० ।
“भूदीपांश्चान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।
नैवेशिकं स्वर्णधुर्य्यं दत्त्वा स्वर्गे महीयते ॥
निवेशसम्बन्धिनि, त्रि ॥

नैशं, त्रि, (निशाया इदम् । निशा + “तस्येदम् ।” ४ । ३ । १२० । इति अण् ।) निशासम्बन्धि । (यथा, वृहत्संहितायाम् । ४ । २ ।
“सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् ।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ॥” * ॥
निशायां भवम् । निशा + “निशाप्रदोषाभ्याञ्च ।” ४ । ३ । १४ । इति पक्षे अण् ।) निशाभवम् । इति सिद्धान्तकौमुदी ॥ (यथा, मनुः ।२।१०२।
“पूर्व्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति ।
पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम् ॥”)

नैशिकं, त्रि, (निशायां भवम् । निशा + “निशाप्रदोषाभ्याञ्च ।” ४ । ३ । १४ । इति ठञ् ।) निशाभवम् । इति सिद्धान्तकौमुदी ॥ (निशाव्यापकम् ॥ स्त्रियां ङीप् । यथा, मनुः । ५ । ६७ ।
“नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता ॥”)

नैश्चित्यं, त्रि, निश्चितत्वम् । निश्चितस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैषधः, पु, (निषधानां राजा । निषध + अण् ।) नलराजा । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ५३ । १६ ।
“तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ॥”
निषधदेशाधिपतिः । यथा, रघुः । १८ । १ ।
“स नैषधस्यार्थपतेः सुतायामुत्पादयामास निषिद्धशत्रुः ॥”
वर्षविशेषः । जम्बुद्वीपेश्वरोऽग्नीध्रस्तु स्वपुत्राय हरिवर्षाय वर्षमेतद्दत्तवान् । यथा, विष्णुपुराणे । २ । १ । २० ।
“तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ॥”
नैषधं नलमधिकृत्य कृतो ग्रन्थः । नैषध + अण् । स्वनामख्यातो हर्षदेवविरचितो द्वाविंशसर्गात्मकः काव्यग्रन्थविशेषः । यथा,—
“उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥”* ॥
निषधानामयमिति । “तस्येदम् ।” ४।३।१२०। इत्यण् ।) निषधसम्बन्धिनि, त्रि ॥

नैष्किकः, पुं, (निष्के सर्णे दीनारे सद्भारे वा नियुक्तः । निष्क+"तत्र नियुक्तः ।" ४ । ४ । ६८ । इति ठक् ।) टङ्काध्यक्षः । इत्यमरः ।२ । ८ । ७ ॥ टङ्ककपतिः । मुद्रकाख्यादिरूपं गठितं रजतं यस्य तस्याध्यक्षः । इति भरतः ॥ (त्रि, निष्केण क्रीतं निष्कस्य विकारो वा । "क्रीतवत् परिमाणात् ।" ४ । १ । १५६ । इत्यभिदेशात् "असमासे निष्कादिभ्यः ।" ५ ।१ । २० । इति ठक् । निष्कक्रीते । निष्कविकारे ॥)

नैष्ठिकः, त्रि, (निष्ठा विद्यतेऽस्येति । निष्ठा+मत्वर्थीयठक् ।) ब्रह्मचर्य्यं कृत्वा यावज्जीवं "गुरुकुले यो वसति सः । यथा,—
"नैष्ठिको ब्रह्मचारी च वसेदाचार्य्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥
अनेन विधिना देहं साधयेद्विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥"
इति गरुडपुराणम् ॥
(यथा, महाभारते । ३ । २८२ । २७ ।
"ब्रह्मयोगगवित्तार न शक्ता, सर्व्वचारा ।
क्रान्त्वा तोयनिधिं धीरा नैषा यो नैष्ठिकी मतिः ॥")

नैसर्गिकः, त्रि, (निसर्गादागतः । निसर्ग+ठक् ।) स्वाभाविकः । (यथा, रघुः । ५ । ३७ ।
"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम् ॥")
यथा च कल्किपुराणे २६ अध्याये ।
"एकामस्वामिव भक्तिः क लब्धा परमात्मनः ।
कस्य वा शिक्षिता राजन् किंवा नैसर्गिकी तव ॥"

नैस्त्रिंशिकः, त्रि, (निस्त्रिंशः खड्गः प्रहरणमस्य । निस्त्रिंश+"प्रहरणम् ।"४ । ४ । ५७ । इति ठक् ।) खड्गधारी । निस्त्रिंशेन प्रहरति यः । तत्पर्य्यायः । असिहेतिः २ । इत्यमरः । २ । ८ । ७० ॥ आसिहेतिकः ३ । इति शब्दरत्नावली ॥

नो, व्य, (नह+डो ।) नहि । अभावः । इत्यमरः । ३ । ४ । ११ ॥ (यथा, अपराधभञ्जनस्तोत्रे । ७ ।
"नो शक्यं स्मार्त्तकर्म्म प्रतिदिनगहनं प्रत्यवाया-कुलाख्यम् ॥")

नोधा, [स्] पुं, (नूयते स्तूयते इति । नु+"नुवो धट् च ।" उणां ४ । २२५ । इति असि, धुट् च । यद्वा, नवं दधातीति । नव+धा+असुन् । नवशब्दस्य नोभावश्च । इति यास्कः ।) ऋषिभेदः । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे । १ । ६१ । १४ ।
"उपो वेनस्य जोगुवान ओणिं
सद्यो भुवद्वीर्य्याय नोधाः ॥")

नोपस्थाता, [तृ] त्रि, (न उप समीपे तिष्ठतीति । स्था+तृच् ।) दूरस्थः । न उप समीपे तिष्ठति यः सः ॥ हीनार्थिविशेषः । यथा,—
"अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥"
इति मिताक्षरायां व्यवहारमातृका ॥

नौः, स्त्री, (नुदतीरेनयेति । नुद प्रेरणे+"ग्लानुदिभ्यां डौः ।" उणां २ । ६४ । इति डौः ।) नौका । इत्यमरः । १ । १० । १० ॥ यथा, महाभारते । १ । १५० । ४—५ ।
"ततः स प्रेषितो विद्वान् विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनोमारुतगामिनीम् ॥
सर्व्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
शिवे भागीरथीतीरे नरैर्विस्रम्भिभिः कृताम् ॥"
एतेन यन्त्रयानादिना नौका प्रतीयते । कलेर नौका इति इष्टिमोट इति च यस्या प्रसिद्धिः ॥

नौका, स्त्री, (नौरेव । नौ+स्वार्थे कन् ।) नद्यादि सन्तरणार्थकाष्ठादिनिर्म्मितयानविशेषः । चारित्रम् । इति त्रिकाण्डशेषः । तत्पर्य्यायः । नौः २ तरिका ३ तरणिः ४ तरणी ५ तरिः ६ तरी ७ तरण्टी ८ तरन्धः ९ पादालिन्दा १० उडुपः ११ प्लवः १२ भावः १३ मार्गः १४ वहित्रम् १५ पोतः १६ । इति शब्दरत्नावली ॥ वहनम् १७ । इति जटाधरः ॥ * ॥
अथ निष्पद्यायोगनिर्देशः ।
"नौकाद्य निष्पदं यानं तस्य लक्षणमुच्यते ।
अश्वादिकन्तु यद्यानं स्थले सर्व्वं प्रतिष्ठितम् ॥
जले नौकैव यानं स्यादतस्तां यत्नतो वदेत् ॥"
अथ कालः ।
"गुरुशुक्रवेलातिथिचन्द्रयोगे
चरे विलग्ने मकरादिषट्के ।
अन्त्यपूर्व्वेतरसम्यक्तिरेकलोऽर्म्मे
वदन्ति नौकाघटनादि कर्म्म ॥ * ॥
अश्विन्यनुराधासुधानिधिपूर्व्वा-
मित्रधनाद्युत्तमे शुभलग्ने ।
तारकयोगतिथौ शुभविशुद्धौ
नौगमनं शुभदं शुभवारे ॥" * ॥
"वृक्षायुर्व्वेदविदिता वृक्षजातिश्चतुर्व्विधा ।
समासेनैव गदिता तेषां काष्ठं चतुर्व्विधम् ॥"
तद्यथा,—
"लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् ।
दृढाङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत् ॥
कोमलं गुरु यत् काष्ठं वैश्यजाति तदुच्यते ।
दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते ॥
लक्षणद्वययोगेन द्विजातिः काष्ठसङ्ग्रहः ॥
क्षत्रियकाष्ठैर्घटिता भोजमते सुखसम्पदं नौका ।
अन्ये लघुभिः सुदृढैर्विदधति जलदुष्पदे नौकाम् ॥
विभिन्नजातिद्वयकाष्ठजाता
न श्रेयसे नापि सुखाय नौका ।
नैषा चिरं तिष्ठति पच्यते च
विभिद्यते वारिणि मज्जते च ॥
न सिन्धुगाद्यार्हति लौहबन्धं
तल्लोहकान्तैर्ह्रियते हि लौहम् ।
विपद्यते तेन जलेषु नौका
गुणेन बन्धं निजगाद भोजः ॥"
अथ लक्षणानि ।
"सामान्यञ्च विशेषश्च नौकाया लक्षणद्वयम् ॥"

अथ सामान्यम् ।
"राजहस्तमितायामा तत्पादपरिणाहिनी ।
तावदेवोन्नता नौका क्षुद्रेति गदिता बुधैः ॥
अतः सार्द्धमितायामा तदर्द्धपरिणाहिनी ।
त्रिभागेनोन्नता नौका मध्यमेति प्रचक्षते ॥
क्षुद्राथ मध्यमा भीमा चपला पटलाभया ।
दीर्घा पत्रपुटा चैव गर्भरा मन्थरा तथा ॥
नौकादशकमित्युक्तं राजहस्तैरनुक्रमम् ।
एकैकवृद्धैः सार्द्धैश्च विजानीयाद्द्वयं द्वयम् ॥
उन्नतिश्च प्रवीणा च दृढादर्द्धाद्यमिता ।
अत्र भीमाभया चैव गर्भरा चाशुभप्रदा ॥
मन्थरापरतो यास्तु तासामेवासुधी गतिः ।
तासां गुणस्तु सङ्क्षेपात् दृढता च प्रकीर्त्तिता ॥"
अथ विशेषः ।
"दीर्घा चैवोन्नता चेति विशेषे द्विविधा भिदा ॥"
तत्र दीर्घा यथा,—
"राजहस्तद्वयायामा अष्टांशपरिणाहिनी ।
नौकेयं दीर्घिका नाम दशांशेनोन्नतापि च ॥
दीर्घिका तरणिर्लोला गत्वरा गामिनी तरिः ।
जङ्घाला प्लाविनी चैव धारिणी वेगिनी तथा ॥
राजहस्तैकैकवृद्धा नौकानामानि वै दश ।
उन्नतिः परिणाहश्च दशाष्टांशमितौ क्रमात् ॥
अत्र लोला गामिनी च प्लाविनी दुःखदा भवेत् ।
लोलायाः सामारभ्य यावदुन्नतिः गत्वरा ॥
लोलायाः फलमाधत्ते एवं सर्व्वासु निर्णयः ।
वेगिन्याः परतो या तु सा ज्ञेयायोत्तरा यथा ॥"
भोजोऽपि ।
"नौकादीर्घे यथोक्तं स्यात् सप्ततानि विवर्ज्जयेत् ।
एकादशैषा परित्याज्या वसुवेदगणोत्तरे ॥
षट्सप्ततिमिता नौका कुलं हन्ति बलं धनम् ।
नवतेरुत्तरे यापि या चत्वारिंशते पराः ॥
एतेन चत्वारिंशतिपष्टिनवतिसङ्ख्या ततपरतो-ऽपि ।
यावदपरदशक तावदेव तत्फलमिति ।"
इति दीर्घा ।
अथोन्नता ।
"राजहस्तद्वयमिता तावत् प्रचुरयोन्नता ।
इयमूर्द्धाभिधा नौका क्षेमाय पृथिवीभुजाम् ॥
ऊर्द्धानूर्द्धा स्वर्णमुखी गर्भिणी मन्थरा तथा ।
राजहस्तैकैकवृद्धा नाम पञ्चकं भवेत् ॥
अत्रानूर्द्धा गर्भिणी च निन्दिते नामयुग्मकम् ।
मन्थराया परा यास्तु ता शुभाय यथोद्भवम् ॥"
भोजोऽपि ।
"वायाम्बुधरतो मानं नौकानामशुभं वहेत् ।
पश्चाद्दृष्टार्द्धुल्लासं धननाशं भयोदितः ॥"
इत्युन्नता ॥ * ॥
"धात्वादीनामतो वक्ष्ये निर्णयं तरिसंश्रयम् ।
कनकं रजतं ताम्रं त्रितयं वा यथाक्रमम् ॥
ब्रह्मादिभिः परिन्यस्य नौकाचित्रयकर्म्मणि ।
चतुःशृङ्गा त्रिशृङ्गाभा द्विशृङ्गा चैकशृङ्गिणी ॥
सितरक्तापीतनीलवर्णान्दद्याद्यथाक्रमम् ।
केशरी महिषो नागो द्विरदो व्याघ्र एव च ॥

पक्षी भेकः मनुष्यश्च एतेषां वदनाकृकम् ।
नावां मुखे परिन्यस्य आदित्यादिदशा शुभाम् ॥
कलसो दर्पणश्चन्द्रश्चेदशानां महीभुजाम् ।
हंसः केकी शुकः सिंहो गजोऽहिर्व्याघ्रषट्-
पदौ ॥
आदित्यादिदशानामासनौकोपरि परिन्यसेत् ॥ * ॥
नौकासु मणिविन्यासो विज्ञेयो नवदण्डवत् ।
मुक्तास्वर्णैर्युता नौका स्यात् सर्व्वतो भद्रा ।
ततसंख्या चैव रसवेदद्वयसम्मिता क्रमशः ॥
कनकादीनां माला जयमालेति गद्यते सद्भिः ।
मणयस्ते द्वितये एकैके वैश्यशूद्रयोनी ॥ * ॥
निर्गृहं सगृहं चाथ तत् सर्व्वं द्विविधं भवेत् ।
निर्गृहं पूर्व्वमुद्दिष्टं सगृहाणि यथा शृणु ॥
सगृहा त्रिविधा प्रोक्ता सर्व्वमध्याग्रमन्दिरा ।
सर्व्वतो मन्दिरं यत्र सा ज्ञेया सर्व्वमन्दिरा ॥
राज्ञां कोशाश्वनारीणां यानमत्र प्रशस्यते ।
मध्यतो मन्दिरं यत्र सा ज्ञेया मध्यमन्दिरा ॥
राज्ञां विलासयात्रादि वर्षासु च प्रशस्यते ।
अग्रतो मन्दिरं यत्र सा ज्ञेया त्वग्रमन्दिरा ॥
चिरप्रवासयात्रायां रणे काले घनात्यये ॥
मन्दिरमानं नौकाप्रसरत एवार्द्धभागतो न्यूनम् ।
भोजस्तु ।

दीर्घसप्तवसुषट्दिवाकरा-
नेकदिङ्नवमिता यथाक्रमम् ।
राजपक्षसुजसम्मितोन्नति-
मन्दिरे हरिगते महीभुजाम् ॥

भास्करादिकदशा भुवां पुनर्धातुनिर्णयनमत्र नवदण्डवत् ॥
काष्ठजं धातुजञ्चेति मन्दिरं द्विविधं भवेत् ।
काष्ठजं सुखसम्पत्त्यै विलासे धातुजं मतम् ॥
अत्र शय्यासनादीनां मन्थरोल्लोचयोरपि ।
अन्येषाञ्चैव मुनिभिर्निर्णयः पूर्व्ववन्मतः ॥
दिङ्मात्रमिदमुद्दिष्टं नौकालक्षणमग्रजम् ।
प्रधानेष्वेव नियमः अप्रधाने न निर्णयः ॥
लघुता दृढता चैव गामिताच्छिद्रता तथा ।
समतेति गुणोद्देशो नौकानां समुदाहृतः ॥
एवं विचिन्त्य यो राजा नौकायानं करोति च ।
स चिरं सुखमाप्नोति विजयं समरे श्रियम् ॥
योऽज्ञानादन्यथा यानं नौकायां कुरुते नृपः ।
तस्यैतानि विनश्यन्ति यशो वीर्य्यं बलं धनम् ॥”
इति निष्पदयानोद्देशे नौकायानम् ॥ * ॥
अपन्नत्रयानानि यथा,—
“नौकाश्वतो जले यान जघन्यमिति गद्यते ।
तद्देशा मद्रवस्ते तु पाश्चात्यानां प्रकीर्त्तिताः ॥
द्रोणीरूपन्तु यद्यानं द्रोणीयानन्तदुच्यते ।
टीभिर्वटितां यानं घटीनौकेति गद्यते ॥
तुम्बाद्यैस्तु फलैर्यानं फलयानं प्रचक्ष्यते ।
चर्म्मभिस्तूलपूर्णैर्यच्चर्म्मयानं तदुच्यते ॥
यान पक्षसुभिर्वृक्षपर्वपयानन्तदुच्यते ।
जन्तुभिः सलिले यानं जन्तुयानं प्रचक्ष्यते ॥
बाहुभ्यां सन्तरेद्वारि जघन्येषु न निर्णयः ॥”
इति युक्तिकल्पतरौ निष्पदयानोद्देशः ॥

नौकादण्डः, पुं, (नौकायाः परिचालनार्थं यो दण्डः ।) क्षेपणी । इत्यमरः ।१।१०।१३॥ चाइड इति भाषा इति नगी इति च भाषा ॥

नौतार्य्यं, त्रि, (नावा नौकया तार्य्यं तरणीयम् ।) नाव्यम् । नौकागम्यदेशादि । इत्यमरः ।१।१०।१०।

न्यक्कारका, स्त्री, (न्यक् क्रियतेऽसौ पृषोदरात् कलोपे साधुः । शकृत्कीटः । विष्ठाक्रिमिः । इति हारावली । १६३ ॥ (क्वचित्तु अन्यकारका इति पाठः ॥)

न्यक्कारः, पुं, (न्यक् क्रियते इति । कृ+घञ् ।) न्यक्करणम् । तत्पर्य्यायः । अवज्ञा २ परीहारः ३ परिहारः ४ पराभवः ५ अपमानम् ६ परिभवः ७ तिरस्कारः ८ तिरस्क्रिया ९ अवहेला १० हेला ११ अवहेलनम् १२ हेलनम् १३ अनादरः १४ अभिभवः १५ रूक्षणं १६ रूर्षणम् १७ रीढ़ा १८ अभिभूतिः १९ निकृतिः २० असूक्षणम् २१ अस्मर्षणम् २२ नीकारः २३ अवहेलम् २४ अमाननम् २५ क्षेपः २६ निकारः २७ धिक्कारः २८ । इति शब्दरत्नावली ॥ विमानना । इति कालिदासः ॥ (यथा, महानाटके । ६ । १४ ।
“न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो
रावणः ॥”)

न्यच्चं, क्ली, कार्त्स्न्यम् । ह्रस्वम् । निकृष्टे, त्रि । इति मेदिनी । चे, १६ ॥

न्यच्चः, पुं, (नीयते अक्षियों यस्य । षच् समासे ।) महिषः । इति मेदिनी । चे, १६ ॥ जामदग्न्यः ॥ इति हेमचन्द्रः ॥

न्यग्रोधः, पुं, (न्यक् रुणद्धि इति । रुध+अच् ।) वटवृक्षः । (यथा, भागवते । ४ । ६ । १६ ।
“पनसोडुम्बराश्वत्थप्लक्षन्यग्रोधहिङ्गुभिः ॥”)
व्यामपरिमाणम् । इत्यमरः । २ । ४ । ३२, ३।३।९५ ॥ शमीवृक्षः । इति मेदिनी । धे, ४२ ॥ विषपर्णी । मोहनाख्यौषधि । इति विश्वः ॥ (उग्रसेननृपपुत्राणामन्यतमः । यथा, हरिवंशे । ३७ । ३० ।
“नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्व्वजः ।
न्यग्रोधश्च सुनामा च कङ्कः शङ्कः सुभूमिपः ॥”)

न्यग्रोधपरिमण्डलः, पुं, (न्यग्रोधः व्यामः परिमण्डलं परिणाहो यस्य ।) व्यामपरिमितोच्छ्रयपरीणाहः पुरुषः । एतादृशाः पुरुषास्त्रेतायुगे चक्रवर्त्तिन आसन् । यथा, मात्स्ये ११८ अः ।
“महाधनुर्द्धराश्चैव त्रेतायां चक्रवर्त्तिनः ।
सर्व्वलक्षणसम्पन्ना न्यग्रोधपरिमण्डलाः ॥
न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्यग्रोध उच्यते ।
व्यामेन उच्छ्रयो यस्य अध ऊर्द्ध्वञ्च देहिनः ।
समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः ॥”
(अपिच । भट्टिटीकायां भरतमल्लिकधृताभिपुराणवचनम् ।
“प्रसारितभुजस्येह मध्यभागद्वयान्तरम् ।
उच्छ्रायेण समं यस्य न्यग्रोधपरिमण्डलः ॥”)

न्यग्रोधपरिमण्डला, स्त्री, (न्यक् रुणद्धि इति न्यग्रोधं अधःप्रसृतं परितो मण्डलं नितम्बमण्डलं यस्याः । यद्वा न्यग्रोधस्य वटस्य इव परिमण्डलं परिणाहो नितम्बभागे यस्याः ।) अङ्गनाविशेषः । यथा,—
“स्तनौ सुकठिनौ यस्या नितम्बे च विशालता ।
मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डला ॥”
इति शब्दमाला ॥
(तथाच भट्टिः । ४ । १८ ।
“योषिद्वृन्दारिका तस्य दयिता हंसगादिनी ।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥”)

न्यग्रोधा, स्त्री, (न्यक् रुणद्धीति । रुध्+अच् । टाप् ।) न्यग्रोधी । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्या यथा,—
“दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः ।
द्रवन्ती नामतश्चित्रा न्यग्रोधा मूषिकाह्वया ॥”
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

न्यग्रोधी, स्त्री, (न्यक् रुणद्धीति । रुध्+अच् । गौरादित्वात् ङीष् इति प्राञ्चः ।) उन्दुरुकर्णी । इत्यमरभरतौ ॥ इन्दुरकानी इति भाषा । घुलकुँड़ी इति केचित् ।

न्यङ्, [च्] त्रि, (नितरामञ्चतीति । अञ्चु+क्विप् ।) नीचः । खर्व्वः इत्यमरः । ३ । १ । १० ॥ निम्नः । इति मेदिनी । चे, ५६ ॥ कार्त्स्न्यम् । इति विश्वः ॥

न्यङ्कुः, पुं, (नितरां अञ्चति गच्छतीति । अञ्चु गतौ+“नावञ्चेः ।” उणां । १ । १८ । इति उः । “न्यङ्क्वादीनाञ्च ।” ७ । ३ । ५३ । इति कुत्वम् ।) मृगभेदः । इत्यमरः । २ । ५ । १० ॥ (यथा, हरिवंशे । १२१ । ४१ ।
“न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितम् ॥”) मुनिविशेषः । इति मेदिनी । के, २७ ॥

न्यङ्कुभूरुहः, पुं, (न्यङ्कुरिव भूरुहः ।) श्योणाकवृक्षः । इति त्रिकाण्डशेषः ॥ (श्योणाकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

न्यच्छं, क्ली, (नितरामच्छम् ।) क्षुद्ररोगविशेषः । मेचेता इति भाषा ॥ तल्लक्षणं यथा,—
“मण्डलं महदल्पं वा श्याव वा यदि वा सितम् ।
सहजं नीरुजं गात्रे न्यच्छं तदभिधीयते ॥”
तच्चिकित्सा यथा,—
“शिरावेधैः प्रलेपैश्च तथाभ्यङ्गैरुपाचरेत् ।
न्यच्छं लिम्पेत् पयःपिष्टैः कल्कैः क्षीरितरूद्भवैः ॥
त्रिभुवनविजयापत्रं मूलं स्थविरस्य शिंशपा
चैभिः ।
उद्वर्त्तनं विरचितं न्यच्छव्यङ्गापहं सिद्धम् ॥
स्थविरस्य वृद्धदारोः ।” इति भावप्रकाशः ॥

न्यञ्चितं, त्रि (नि+अञ्च+णिच्+क्तः ।) अधःक्षिप्तम् । इति जटाधरः ॥

न्ययः, पुं, (नि+इ+“एरच् ।” ३ । ३ । ५६ इत्यच् ।) अपचयः । इति केचित् ॥

न्यस्तं, त्रि, (नि+अस+क्त ।) निहितम् । स्थापितम् । तत्पर्य्यायः । निसृष्टम् २ । इत्य-

मरः। ३। १। ८८। अस्य पर्य्यायान्तरं निष्पाप्रभृत्ये द्रष्टव्यम् ॥

न्यस्तशस्त्र, पुं, (न्यस्तं शस्त्रं येन। युद्धादिविरतत्वात् तथात्वम्।) पितृलोकः। इति त्रिकाण्डशेषः ॥ (यथा, मनुः। ३। १९२।
"अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।
न्यस्तशस्त्रा महाभागाः पितरः पूर्व्वदेवताः॥")
त्यक्तशस्त्रे, त्रि। यथा,—
"न्यस्तशस्त्रं दिलीपञ्च तञ्च शुश्रुवुषां प्रभुम्।
राजासहत्तसनाराचे हृदि शल्यमिवार्पितम् ॥"
इति रघुः ॥

न्याक्ष्यं, क्ली, (नितरामक्ष्यते इति। नि+अक+यत्।) भृष्टतण्डुलम्। मुड़ी इति भाषा॥ तत्पर्य्यायः। भृष्टान्नम् २ कुल्वम् ३। इति शब्दचन्द्रिका ॥

न्याद, पुं, (न्यदनमिति। नि+अद भक्षणे+"नौ ण च।" ३। ३। ६०। इति णः।) आहारः। इत्यमरः। २। ६। ५६॥

न्याय, पुं विष्णुः। यथा,
"अपवीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः।"
इति तस्य सहस्रनाममध्ये गणितः॥ *॥
(नियमेन ईयते इति। नि+इण्+"परिन्योर्नीणोर्द्यूताभ्रेषयोः।" ३।३।३७। इति घञ्।) उचित। तत्पर्य्यायः। अभ्रेषः २ कल्पः ३ देशरूपम् ४ समञ्जसम् ५। इत्यमरः। २।८।२४॥ *॥ (नीयन्ते प्राप्यन्ते विवक्षितार्था येनेति। नी+"अध्यायन्यायोद्यावसंहाराश्च।" ३। ३। १२२। इति घञ्प्रत्ययेन निपातनात् साधुः। नीति। उपायः। भोगः। युक्तिः। इति चिन्तामणिः॥) प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकपञ्चावयववाक्यम्। तल्लक्षणं यथा। अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वम्। इति चिन्तामणिः॥ उचितानुपूर्व्विकप्रतिज्ञादिपञ्चकसमुदायत्वम्। इति शिरोमणिः॥ तद्रूपं यथा। पर्व्वतो वह्निमान् धूमात् यो यो धूमवान् स वह्निमान् यथा महानसं वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमान्। इति जगदीशः॥ *॥ (पञ्चाङ्गमधिकरणम्। यथा, महाभारते। २। ५। ३।
"न्यायविद्धर्मतत्त्वज्ञः षडङ्गविदनुत्तमः।"
"न्यायः पञ्चाङ्गमधिकरणम्। यथा,—
'विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरः।
सन्देहश्चैव शास्त्रेऽधिकरणं विदुः॥'
अत्र, यूपस्य स्वरं करोति इति वाक्यं विषयः। तत्र षष्ठी यूपकर्म्मकर्म्मत्वता कल्पनार्थी उत यूपावयवलक्षणार्था इति सन्देहो विषयः। एतावेव पूर्व्वोत्तरपक्षौ ज्ञेयौ। कल्पना लाघवानुग्रहादुत्तरः पक्षः सिद्धान्तः। फल अनुष्ठानभेदः। पूर्व्वपक्षे तक्षणादावौ करणादिना काष्ठान्तरं यूपसदृशं निर्म्मातव्यम्। सिद्धान्ते एकदेशस्य पृथक् करणमात्रमिति। इदमेव पञ्चकं मोक्षधर्म्मेषूक्तम्।
'सूक्ष्मं सांख्यक्रमौ चोभौ निर्णयः सप्रयोजनः।
पञ्चैतान्यर्थजातानि वाक्यमित्युच्यते बुधैः॥"
सूक्ष्मं शब्दार्थसाङ्कर्य्यम्। सांख्यः एवमेव नेति विचारः। क्रमः अतिक्रमः सिद्धान्तस्य पूर्व्वपक्ष इत्यर्थः। निर्णयः सिद्धान्तः। प्रयोजनं फलम्। इति वाक्यं वाक्यार्थनिर्णयोपायः एवं पूर्व्वोत्तरमीमांसाधिकरणानि न्यायस्तज्ज्ञः॥"
इति तट्टीकायां नीलकण्ठः॥ *॥)
षड्दर्शनान्तर्गतदर्शनविशेषः। तत्पर्य्यायः। तर्कविद्या २ आन्वीक्षिकी ३। इत्यमरभरतौ॥ एतद्दर्शनमते नित्यज्ञानाश्रयतिमत्तिसहित, परमात्मा ईश्वरः स तु ब्रह्मपदार्थो जीवातिरिक्तः। एतच्छास्त्रप्रयोजनं चार्व्वाकादिमतनिराकरणपूर्व्वकं जगत्कारणतया ईश्वरस्थापनं अप्रयादिनिरूपणेन वेदार्थनिर्णयश्च। न्यायदर्शनकारो गोतमः। तत्सूत्रे प्रमाणादिषोडशपदार्थनिरूपणम्। तेषां तत्त्वज्ञानान्निःश्रेयसम्। तस्य भाष्यकारो वात्स्यायनः। तद्वार्त्तिककारः कात्यायनः। तट्टीकाकारो वाचस्पतिमिश्रः। तच्छास्त्र उदयनाचार्य्यःकुसुमाञ्जलिप्रभृतिग्रन्थकारः। कुसुमाञ्जलिटीकाकारौ हरिदासरामभद्रौ। गङ्गेशोपाध्यायः प्रत्यक्षानुमानोपमानशब्दाख्यखण्डचतुष्टयात्मकचिन्तामणिकारः। तत्सुतो वर्द्धमानोपाध्यायस्तयोश्छात्रौ मणिमिश्रयज्ञपत्युपाध्यायौ मणिप्रभाकरौ। यज्ञपत्युपाध्यायच्छात्रः पक्षधरमिश्रश्चिन्तामण्यालोककारः। पक्षधरमिश्रच्छात्रो रघुनाथशिरोमणिश्चिन्तामणेर्दीधितिकारः। तच्छात्रो मथुरानाथतर्कवागीशश्चिन्तामणिदीधितिटीकाकारः। तच्छात्रो भवानन्दसिद्धान्तवागीशो दीधितिटीकाकारः। तच्छात्रौ जगदीशतर्कालङ्कारगदाधरभट्टाचार्य्यौ दीधितिटीकाकारौ। एतद्व्यतिरिक्ता वादार्थकारा बहवः पण्डिता आसन्॥ तर्कशास्त्रम्। यथा, शब्दरत्नावल्याम्।
"न्यायवैशेषिकादिः स्यात् तर्कविद्या प्रतिष्ठिता।
तस्यामान्वीक्षिकी ज्ञेया तस्मात्तज्ज्ञानमभ्यसेत्॥"
अथ न्यायप्रथमसूत्रं लिख्यते प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। एषां लक्षणानि यथा। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।१। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्।२। समानानेकधर्म्मोपपत्तेर्व्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।३। यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम्। ४। लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः।५। तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः। ६। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः। ७। अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः।८। विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः। ९। प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। १०। यथोक्तोपपन्नश्छलजातिनिग्रहस्थानोपालम्भो जल्पः ११। सतुप्रतिपक्षस्थापनाहीनो वितण्डा। १२। सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालात्ययापदिष्टा हेत्वाभासाः। १३। वचनविघातोऽर्थविकल्पोपपत्त्या छलम्। १४। साधर्म्म्यवैधर्म्म्याभ्यां प्रत्यवस्थानं जातिः। १५। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्। १६। इति गोतमसूत्रम्॥ *॥ न्यायशास्त्रञ्च पञ्चाध्यायात्मकम्। तत्र प्रत्यध्यायस्याह्निकद्वयम्। तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गौतमेन प्रमाणादिपदार्थनवकलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणम्। १। द्वितीयस्य तु प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च। द्वितीये अर्थापत्त्यादेरन्तर्भावनिरूपणम्। २। तृतीयस्य प्रथमे आत्मशरीरेन्द्रियार्थपरीक्षणम्। द्वितीये बुद्धिमनःपरीक्षणम्। ३। चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणम्। द्वितीये दोषनिमित्तकत्वनिरूपणं अवयवादिनिरूपणञ्च। ४। पञ्चमस्य प्रथमे जातिभेदनिरूपणम्। द्वितीये निग्रहस्थानभेदनिरूपणम्। ५। इति सर्व्वदर्शनसंग्रहः॥ *॥ युक्तिमूलकदृष्टान्तविशेषः। स च बहुविधः। तेषां मध्ये प्रसिद्धानां नामलक्षणप्रमाणानि लिख्यन्ते॥

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
अन्धगोलाङ्गूलन्यायः १।	कश्चिद्दुष्टात्मा महारण्यमार्गे पतितमन्धं स्वबन्धुनगर जिगमिषुं वभाषे किमत्रायुष्मता दुःखितेन स्थीयत इति स चान्धः सुखवाणीमाकर्ण्य तमाप्तं मत्वोवाच अहो महाभाग्येयं बदमभवान् दीनं मां स्वामीष्टनगर प्रापयितुमर्हं भावत इति स च विप्रलिप्सुर्दुष्टो गोयुवानमानीय तदीय	हेत्वाभासमथुरानाथटीकादयः १।

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
	लाङ्गूलमस्य ग्राहयामास उपदिदेश चैनमन्धमेष गोयुवा त्वां नगरं नेष्यति मा त्यज लाङ्गूलमिति स चान्धः श्रद्धालुतया तदत्यजन् स्वाभीष्टमप्राप्यानर्थपरम्पराम्प्राप्तः । १ ।	
अन्धपङ्गुन्यायः २ ।	अन्धस्कन्धारूढः पङ्गुर्यथा अन्धस्य पद्भ्यां अध्वातिक्रमसमर्थस्तथा स चान्धः पङ्गोर्दृग्भ्यां चक्षुष्मानिव भवति । २ ।	काव्यप्रकाशे चण्डीदासटीका २ ।
अन्धहस्तिन्यायः ३ ।	बहवोऽन्धा हस्तिनिरूपणार्थं प्रवृत्ताः केनचित् चरणं स्पृष्ट्वा स्तम्भाकारत्वेन केनापि लाङ्गूलं स्पृष्ट्वा रज्ज्वाकारत्वेन परेण श्रोत्रं स्पृष्ट्वा शूर्पाकारत्वेनापरेण शुण्डं स्पृष्ट्वा सर्पाकारत्वेन गजो निर्णीतः । ३ ।	भागवतादयः ३ ।
अशोकवनिकान्यायः ४ ।	तुल्यगुणादिशालिनामशोकादिनानावनानामशोकवनगमने सत्यन्यवनगमनापेक्षा न । अपि च । तुल्यगुणशालिनि वने सत्यपि रावणेनाशोकवने सीता स्थापिता तत्र वनान्तरे स्थापनानपेक्षा । ४ ।	भाष्यसप्तमसूत्रव्याख्या ४ ।
उष्ट्रकण्टकभोजनन्यायः ५ ।	उष्ट्रस्य शमीकण्टकचर्वणजन्यमुखदुःखसहनपूर्व्वकं किञ्चित्सुखजनकसपत्रशमीकण्टकभक्षणम् । ५ ।	वेदान्तशङ्करभाष्यटीका ५ ।
कदम्बगोलकन्यायः ६ ।	कदम्बगोलकस्य सर्व्वावयवेषु युगपदेव पुष्पाणामुत्पत्तिः । ६ ।	भाषापरिच्छेदादयः ६ ।
करकङ्कणन्यायः ७ ।	कङ्कणशब्देनैव करभूषणविशेषबोधसम्भवेऽपि करशब्दपूर्व्वककङ्कणशब्दः करसंलग्नकङ्कणबोधार्थकः । ७ ।	काव्यप्रकाशटीकादयः ७ ।
काकाक्षिगोलकन्यायः ८ ।	एकमेव चक्षुर्गोलकमुभयचक्षुःसम्बन्धिसदुभयचक्षुःकार्य्यकारकम् । ८ ।	अमरकोषटीकादयः ८ ।
कूर्म्माङ्गन्यायः ९ ।	कूर्म्मः स्वेच्छया अङ्गानि प्रसारयति संकोचयति तद्वत् । ९ ।	पञ्चदशीटीका ९ ।
कैमुतिकन्यायः १० ।	यद्भारवहनं दुर्ब्बलस्यापि साध्यं तद्भारवहनं सुतरां सबलस्य साध्यम् । १० ।	अधिकरणधर्म्मावच्छिन्नाभावजगदीशटीका १० ।
खलेकपोतन्यायः ११ ।	वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति । तथैव सर्व्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति । ११ ।	सामान्यलक्षणाजगदीशटीका ११ ।
गुडजिह्विकान्यायः १२ ।	गुड़जिह्वासम्बन्धे रसास्वादनमेव फलम् । १२ ।	भाष्यरत्नप्रभा १२ ।
गोबलीवर्द्दन्यायः १३ ।	बलीवर्द्दशब्देन महोक्षबोधसम्भवेऽपि गोशब्दपूर्व्वकबलीवर्द्दशब्दो झटिति बोधार्थकः । १३ ।	साहित्यदर्पणादयः १३ ।
चालनीन्यायः १४ ।	चालनीभ्रामणेन तण्डुलादेः स्थानान्तरपतनं तद्वत् । १४ ।	व्याप्तिपञ्चके जगदीशः १४ ।
तृणारणिमणिन्यायः १५ ।	तृणारणिमणीनामेकमात्रजन्यवह्नौ व्यभिचारभिया नैकधर्म्मावच्छिन्नं प्रति कारणत्वं किन्तु वह्निनिष्ठकार्य्यतावच्छेदकत्रयमवलम्ब्य कार्य्यकारणभावत्रयम् । १५ ।	बाधग्रन्थटीका १५ ।
दग्धपत्रन्यायः १६ ।	पत्राणां दग्धानामपि पूर्व्वाकारेणावस्थानज्ञानमात्रं न तु वस्तुतः पत्रत्वम् । १६ ।	वेदान्तभाष्यटीका १६ ।
दण्डचक्रादिन्यायः १७ ।	घटत्वाद्येकधर्म्मावच्छिन्नं प्रति दण्डचक्रादीनां कारणत्वम् । १७ ।	परामर्शमथुरानाथटीका १७ ।
दण्डापूपन्यायः १८ ।	आखुभक्षितैकदेशं दण्डं पश्यतस्तदेकदेशसंलग्नपिष्टकभक्षणबुद्धिः । १८ ।	दायभागादयः १८ ।
पङ्कप्रक्षालनन्यायः १९ ।	पङ्कलेपनपूर्व्वकक्षालनमपेक्ष्य पङ्कस्यालेपनं श्रेयः । १९ ।	अवयवस्य गादाधरी टीका १९ ।
मणिमन्त्रादिन्यायः २० ।	दाहं प्रति जलस्य प्रतिबन्धकत्वं वह्निनाशकतया यौक्तिकं मणिमन्त्रादीनान्तु तद्विलक्षणप्रतिबन्धकत्वं स्वातन्त्र्येण । २० ।	पक्षताजगदीशटीका २० ।
राजपुरप्रवेशन्यायः २१ ।	विशृङ्खलगमनभावद्विगुणचक्रसङ्कुले राजपुरे जनानां श्रेणीरूपेण प्रवेशः । २१ ।	न्यायशब्दखण्डमथुरानाथटीका२१
लूतातन्तुन्यायः २२ ।	लूता स्वतन्तुमुत्पाद्य जालं रचयति संहरति च तद्वत् । २२ ।	वेदान्तसारटीका २२ ।
विशेष्यविशेषणन्यायः २३ ।	भूतले आदौ केवलघटो विशेषणं ततस्तत्र घटे जलं विशेषणं न तु जलविशिष्टघट एवादौ विशेषणम् । २३ ।	सामान्यलक्षणामथुरानाथटीका २३ ।
वीचीतरङ्गन्यायः २४ ।	वीचीजनितस्तरङ्गस्तज्जनितोऽपि तरङ्ग इति क्रमेण तरङ्गोत्पत्तिः ।२४।	भाषापरिच्छेदः २४ ।
बीजाङ्कुरन्यायः २५ ।	आदौ बीजं ततोऽङ्कुरः किमादावङ्कुरस्ततो बीजमित्यनिर्णयेन बीजाङ्कुरप्रवाहोऽनादिः । २५ ।	कुसुमाञ्जलिटीकादयः २५ ।
शङ्खवेलान्यायः २६ ।	कस्यचित् शङ्खशब्देनैव वेलाविशेषनिर्णयः । २६ ।	मलमासतत्त्वादयः २६ ।
शतपत्रभेदन्यायः २७ ।	उपर्य्युपरिस्थितशतसंख्यकपत्राणां सूच्या युगपद्भेदभ्रमविषयाणामपि वस्तुत एकभेदानन्तरमपरभेदः । २७ ।	प्रत्यक्षखण्डमथुरानाथटीका २७ ।
शृङ्गग्राहिकान्यायः २८ ।	दुर्वृत्तवृषभादेः प्रथमतः कौशलेनैकशृङ्गग्रहणं पश्चादपरशृङ्गग्रहणम् । २८ ।	अवच्छेदकत्वनिरुक्तिजागदीशी टीका २८ ।

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
सन्दंशप्रापितन्यायः २९ ।	सन्दंशः सँडाशी यस्य प्रसिद्धिः । यथा तेनोभयपार्श्वधारणेन वस्तुप्राप्तिस्तथा । तथा हि । अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिका" ॥ इत्यत्र काञ्च्याः पुरत्रयपाठानन्तरं पुरत्रयपाठपूर्व्वञ्च पठितत्वेन तदितरषट्पुराणि काञ्चीप्रापकाणि । २९ ।	काशीखण्डटीका २९ ।
सर्व्वापेक्षान्यायः ३० ।	बहुषु निमन्त्रितेषु एकस्मिन्नागतेऽपि भोज्यं न दीयते सर्व्वानपेक्षते तद्वत् । ३० ।	न्यायरत्नप्रभा ३० ।
सूचीकटाहन्यायः ३१ ।	स्वल्पश्रमसाध्यसूचीनिर्म्माणानन्तरं बहुश्रमसाध्यकटाहनिर्म्माणम् । ३१ ।	कलापव्याकरणानन्दलहरीटीकादयः ३१ ।
स्थविरलगुडन्यायः । ३२ ।	दृष्टहस्तस्य यष्टिः सहसा लक्ष्यस्थाने क्वचित् पतति क्वचिन्न पतति तद्वत् । ३२ ।	कलापटीका । ३२ ।

(यदि च न्यायवेदान्तसांख्यपातञ्जलप्रभृत्यास्तिकदर्शनानां साक्षात्पारम्पर्य्येणैकमात्रानन्तविश्वब्रह्माण्डस्योदयस्थितिलयकारणं एकोऽद्वितीयः सर्व्वपुमार्थस्वरूपः सनातनपुरुषः सर्व्वशक्तिमान् परमेश्वर परमात्मैव प्रतिपाद्यः तथापि चार्व्वाकादिविपक्षमतनिराकरणेन जगत्कारणत्वेनेश्वरस्य संस्थापनात् न्यायदर्शनस्यैव सर्व्वप्राधान्यसिद्धिः । आत्मतत्त्वज्ञानोत्पादनाय साक्षादुपयोगितया समस्तश्रुतिमीमांसिततया च पुराणादिशास्त्रेषु वेदान्तस्य भूयसीप्रशंसादर्शनाच्च तस्यैव दर्शनस्य मुख्यत्वमायातीति चेत् न अतीवसूक्ष्मातममप्रतत्त्वनिरूपकजगत्पूज्यवेदान्तशास्त्रे कदापि कस्यापि विषयभोगकलुषितबुद्धिपरिमार्ज्जकन्यायदर्शनबोधादृते प्रवेशानधिकारात् । अतो नितरामेव सर्व्वेभ्योऽस्यैव गौरवमभ्युपजग्मिरे तार्किकाः । वस्तुतस्तु सर्व्वेष्वास्तिकदर्शनेषु न्यायदर्शनमेव सर्व्वोत्कृष्टसिंहासनमारोढुमर्हतीति सर्व्वेषां प्रेक्षावतां परामर्शः । विशेषतः चार्व्वाकादिदुष्टमतखण्डनपूर्व्वकमोक्षस्वरूपस्थापनायेश्वरसत्तासंस्थापनाय चैकमात्रन्यायदर्शनमेवालं नतन्यत् । एतच्च सत्यं नवेति प्रतिपादनाय श्रीमन्माधवाचार्य्यसङ्कलितसर्व्वदर्शनसारसंग्रहग्रन्थान्तर्गताक्षपाददर्शनशास्त्रादेव समुद्धृत्य दर्शयिष्यामः । तत्र प्रथमत ईश्वरसंस्थापनं यथा,—

"नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्व्याप्तिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा । आद्ये अपसिद्धान्तापातः द्वितीये परस्पराश्रयापातः । उपमानादिकमशक्यशङ्कं नियतविषयत्वात् । तस्मादीश्वरः शशविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति । विवादास्पदं नगसागरादिकं सकर्तृकं कार्य्यत्वात् कुम्भवत् । न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधनत्वात् । ननु किमिदं सावयवत्वं अवयवसंयोगित्वं अवयवसमवायित्वं वा नाद्यं गगनादौ व्यभिचारात् न द्वितीयः तन्तुत्वादावनैकान्त्यात् । तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात् । अवान्तरमहत्त्वेन वा कार्य्यत्वानुमानस्य सुकरत्वात् । नापि विरुद्धो हेतुः साध्यविपर्य्ययव्याप्तेरभावात् नाप्यनैकान्तिकः पक्षादन्यत्र वृत्तेरदर्शनात् नापि कालात्ययोपदिष्टः बाधकानुपलम्भात् नापि सत्प्रतिपक्षः प्रतिभटादर्शनात् । ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षममीक्ष्यते नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात् । तर्ह्यजन्यत्वमेव साधनमिति चेन्नासिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवी अनुकूलतर्कसम्भवात् यद्ययमकर्तृकं स्यात् कार्य्यमपि न स्यादिह जगति नास्त्येव तत्कार्य्यं नाम यत्कारकचक्रमवधीर्य्यात्मानमासादयेदित्येतदविवादम् । तच्च सर्व्वं कर्तृविशेषोपहितमर्य्यादं कर्तृत्वञ्चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम् । एवञ्च कर्तृव्यावृत्तेस्तदुपहितसमस्तकारकव्यावृत्तावकारणककार्य्योत्पादप्रसङ्ग इति स्थूलः प्रमादः । तथा निरटङ्कि शङ्करकिङ्करेण ।

"अनुकूलेन तर्केण सनाथे सति साधने ।
साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव" इति ।

यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात् । तदुदितमुदयनेन ।

"आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धतेति ॥"

न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात् । तदेतत् परमेश्वरस्य जगन्निर्म्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः । द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत । अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कश्चित्तं प्रत्याचक्षीत तर्हि सर्व्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखशबलान् करुणाविरोधात् स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्ज्जनं न युज्यते । तदुक्तं भट्टाचार्य्यैः—

"प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते ।
जगच्चासृजतस्तस्य किं नाम न कृतं भवेदिति ।"

नास्तिकशिरोमणे ! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणयाप्रवृत्तिरस्त्येव न च निसर्गतः सुखमयसर्गप्रसङ्गः सृज्यप्राणिसुकृतदुष्कृतपरिपाकविशेषाद्वैषम्योपपत्तेः न च स्वातन्त्र्यभङ्गः शङ्कनीयः स्वाङ्गं स्वव्यवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्व्वाहात् एक एव रुद्रो न द्वितीयाय तस्थे इत्यादिरागमस्तत्र प्रमाणम् । यद्येवं तर्हि परस्पराश्रयबाधव्याधिसमाधत्स्वेति चेत् तस्याप्यनुत्थानात् किमुत्पत्तौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा । नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽवगमात् नापि तदनित्यत्वपक्षे आगमानित्यत्वस्य तीव्रादिधर्म्मोपेतत्वादिना सुगमत्वात् ।"

द्वितीये मोक्षस्वरूपसंस्थापनं यथा,—

"ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदद्यापि कफोणिगुडायितं वर्त्तते तत्कथं सिद्धवत्कृत्य व्यवह्रियत इति चेत् उच्यते सर्व्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्व्वतन्त्रसिद्धान्तसिद्धतया घण्टापथत्वात् न ह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते तथा हि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽस्तीत्येतावत्तावदविवा-

ष्टम्। अथ मन्येथा, शरीरादिवदात्मापि दुःखहेतुत्वादुच्छेद्य इति तन्न सङ्गच्छते विकल्पानुपपत्तेः किमात्मा ज्ञानसन्तानो विवक्षितः तदतिरिक्तो वा प्रथमे न विप्रतिपत्तिः कः खल्वनुकूलमाचरति प्रतिकूलमाचरेत् द्वितीये तस्य नित्यत्वे निवृत्तिरशक्यविधानैव प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं न खलु कश्चित् प्रेक्षावानात्मनस्तु कामाय सर्व्वं प्रियं भवतीति सर्व्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रयतते सर्व्वो हि प्राणी मुक्त इति व्यवहरति। ननु धर्म्मिनिवृत्तौ निर्म्मलज्ञानोदयो महोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च भावनाचतुष्टयं हि तस्य कारणमभीष्टं तच्च क्षणभङ्गपक्षे स्थिरैकाधारासम्भवात् लङ्घनाभ्यासादिवदनासादितप्रकर्षं न स्फुटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्गच्छते। आवरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निर्गतो निरर्गलः अङ्ग भवान् पृष्टो व्याचष्टां किमावरणं धर्म्माधर्म्मभ्रान्तय इति चेत् इष्टमेव। अथ देहमेवावरणं तथाच तन्निवृत्तौ पञ्जरान्मुक्तस्य शुकस्येवात्मनः सततोर्द्ध्वगमनं मुक्तिरिति चेत्तदा वक्तव्य किमयमात्मा मूर्त्तोऽमूर्त्तो वा। प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्त्तः परमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्म्मवदात्मधर्म्माणामतीन्द्रियत्वं प्रसज्येत्। सावयवत्वे यत् सावयव तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसरेताम्। अमूर्त्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्त्तप्रतिबन्धात् पारतन्त्र्य बन्धः स्वातन्त्र्य मोक्ष इति चार्व्वाकपक्षेऽपि स्वातन्त्र्य दुःखनिवृत्तिश्चेदविवाद ऐश्वर्य्यं चेत् सातिशयतया सदृक्षतया च प्रेक्षावतां नाभिमतम्। प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति साङ्ख्याख्यातेऽपि पक्षे दुःखोच्छेदोऽभ्युपेयते विवेकज्ञानं पुरुषाश्रयं वेति एतावदवशिष्यते तत्र पुरुषाश्रयमिति न श्लिष्यते पुरुषस्य कौटस्थ्यात् स्थाननिरोधापातात्नापि प्रकृत्याश्रय, अचेतनत्वात् तस्याः। किञ्च प्रकृतिः प्रवृत्तिस्वभावा निवृत्तिस्वभावा वा ...निर्मोक्षः स्वभावस्यानपायात् द्वितीये ...न संसारोऽस्तमियात्। नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्व्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुख न प्रमाणपद्धतिमध्यास्ते। श्रुतिस्तत्र प्रमाणमिति चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा ग्रावप्लवेपि तथा भावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकग्रस्तस्य सौवीररुचिमनुभवतीति चेत्तदेतन्नाटकपक्षपतितं त्वदच्च इत्युपेक्ष्यते। सुखस्य सातिशयतया प्रत्यक्षतया बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विषानुषक्तमधुवत् दुःखपक्षनिक्षेपात्। नन्वेकमनुसन्धित्सतोऽपरं प्रच्यवते इति न्यायेन दुःखवत् सुखमप्युच्छिद्यत इति अकाम्योऽयं पक्ष इति चेन्मैवं मंस्थाः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गिनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्त्तमानेन साम्यापातात् तथा हि न्यायोपार्ज्जितेषु विषयेषु कियन्तः सुखखद्योता, कियन्ति दुःखदुर्दिनानि अन्यायोपार्ज्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तो विदाङ्कुर्व्वन्तु विद्वांवरा भवन्तः। तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यमिति ॥ * ॥

न्यायदर्शनन्तु पूर्व्वोत्तरविभागभेदेन द्विविधम्। पूर्व्वभागो भगवता महर्षिगौतमेन प्रणीत उत्तरभागस्तु भगवता महर्षिकणभुजैव प्रणीतः पूर्व्वभागे भगवान् गौतमः जीवनिःश्रेयसाधिगमाय षोडशपदार्थान् निरूपितवान् तेषां षोडशपदार्थानां तत्त्वज्ञानादेव निःश्रेयसाधिगम इत्युपदिदेशेति। परभागे तु भगवान् कणादः द्रव्यादिषण्णां पदार्थानां तत्त्वज्ञानादेव निःश्रेयसं स्यादित्युपदिष्टवान्। तद्यथा, "धर्म्मविशेषप्रसूताद् द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां साधर्म्म्यवैधर्म्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमिति।" पर एष्वेव षट्पदार्थेषु भगवता गौतमेनोपदिष्टाः षोडशपदार्थाः सर्व्व एवान्तर्निवेशिता भगवता कणभुजा। इह पुनर्विशेषपदार्थस्वीकरणात् लोके वैशेषिकमित्याख्यान्तरेणैव प्रसिद्धमेतद्दर्शनमिति बोध्यम्॥

व्यतिरिक्तन्यायनामानि यथा,—

१ अश्मगातपनन्याय। २ अजाकृपाणीयन्यायः। ३ अजातपुत्त्रनामकरणन्यायः। ४ अर्द्धकुक्कुटीन्यायः। ५ अत्यन्त बलवन्तोऽपि पौरजानपदा जना इतिन्यायः। ६ अदग्धदहनन्यायः। ७ अध्यारोपापवादन्यायः। ८ अनधीते महाभाष्ये इतिन्यायः। ९ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेतिन्यायः। १० अन्ते या मतिः सा गतिरितिन्यायः। ११ अन्तरङ्गाविवाहस्वेदादावेव कृतो न स इतिन्यायः। १२ अन्धगजन्यायः। १३ अन्धचटकन्यायः। १४ अन्धदर्पणन्यायः। १५ अन्धस्यैवान्धलग्नस्य विनिपातः पदे पदे इतिन्यायः। १६ अन्धभुक्तन्यायः। १७ अपराह्णच्छायान्यायः। १८ अपसारितान्गिभूतलन्यायः। १९ अपस्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति इतिन्याय। २० अबुभक्षकन्यायः। २१ अभाग्यलाभन्यायः। २२ अरण्यरोदनन्यायः। २३ अर्के चेन्मधु विन्देत किमर्थं पर्व्वतं व्रजेदितिन्यायः। २४ अर्द्धजरतीन्यायः। २५ अर्द्धं त्यजति पण्डितन्यायः। २६ अर्द्धवैशसन्याय। २७ अवश्यापेक्षितानपेक्षितयोरितिन्यायः। २८ अश्मलोष्ट्रन्यायः। २९ अश्वतरीगर्भन्यायः। ३० अश्वभृत्यन्यायः। ३१ अस्नेहदीपन्यायः। ३२ अहिकुण्डलन्यायः। ३३ अहिर्विपुत्त्र इतिन्यायः। ३४ अहिनकुलन्यायः। ३५ अहिसुकैवर्त्तन्यायः। ३६ आकाशापरिच्छिन्नत्वन्यायः। ३७ आदावन्ते वेतिन्यायः। ३८ आभाणकन्यायः। ३९ आयुर्घृतमितिन्यायः। ४० आषाढ़वातन्यायः। ४१ इक्षुरसन्यायः। ४२ इक्षुविकारन्यायः। ४३ इच्छेष्यमाणयोः समभिव्याहारे इष्यमाणस्यैव प्राधान्यमितिन्यायः। ४४ इषुवेगक्षयन्यायः। ४५ उत्पाटितदन्तनागन्यायः। ४६ उदकनिमज्जनन्यायः। ४७ उपजनिष्यमाणनिमित्तोऽप्यपवादो जातनिमित्तमप्युत्सर्गं बाधते इतिन्यायः। ४८ उपजीव्योपजीवकन्यायः। ४९ उपपन्नधर्म्मो विकरोति हि धर्म्मिणमितिन्यायः। ५० उपवासाद्वरं भिक्षेतिन्यायः। ५१ उभयतः पाशरज्जुन्यायः। ५२ उषरवृष्टिन्यायः। ५३ उष्ट्रलगुडन्यायः। ५४ ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोग इतिन्यायः। ५५ एकत्र निर्णीत, शास्त्रार्थः अन्यत्रापि तथेतिन्याय। ५६ एकदेशविकृतमनन्यवदितिन्यायः। ५७ एकसन्धित्सतोऽपरं प्रच्यवते इतिन्यायः। ५८ एकाकिनी प्रतिज्ञेतिन्यायः। ५९ एकामसिद्धिं परिहरतो द्वितीया आपद्यते इतिन्यायः। ६० कण्टकन्यायः। ६१ कण्ठचामीकरन्याय। ६२ कदम्बकुसुमन्यायः। ६३ करस्थबिल्वन्याय। ६४ करिबृंहितन्यायः। ६५ कांस्यभोजिन्यायः। ६६ काकतालीयन्यायः। ६७ काकदन्तिघातकन्यायः। ६८ काकदन्तपरीक्षान्यायः। ६९ काकाक्षिन्यायः। ७० कामनागोचरत्वेन शब्दबोध एव शब्दसाधनतान्वय इतिन्यायः। ७१ कारणगुणक्रमन्याय। ७२ कार्य्येण कारणसंप्रत्यय इतिन्यायः। ७३ कारणनाशे कार्य्यनाशन्याय। ७४ किमज्ञानस्य दुष्करमितिन्याय। ७५ कीटभृङ्गन्यायः। ७६ कुक्कुटध्वनिन्याय। ७७ कुम्भीधान्यन्याय। ७८ कुशकाशावलम्बनन्यायः। ७९ कूपखानकन्यायः। ८० कूपन्यायः। ८१ कूपमण्डूकन्यायः। ८२ कृताकृतप्रसङ्गो यो विधिः स नित्य इतिन्याय। ८३ कृते कार्य्ये किं मुहूर्त्तप्रश्नेन इतिन्यायः। ८४ कृदभिहितो भावो द्रव्यवत् प्रकाशते इतिन्याय। ८५ कोषपानन्यायः। ८६ कौण्डिन्यन्यायः। ८७ कौन्तेयराधेयन्याय। ८८ क्रिया हि विकल्प्यते न वस्त्विति न्यायः। ८९ खलमैत्रीन्याय। ९० खादकघातकन्यायः। ९१ गजघटान्यायः। ९२ गजभुक्तकपित्थन्याय। ९३ गड्डलिकाप्रवाहन्याय। ९४ गणपतिन्याय। ९५ गर्द्दभारामगणनान्याय। ९६ गले पादुकान्यायः।

९७ गुणोपसंहारन्यायः। ९८ गलेचौरं भस्मतेऽर्थमितिन्यायः। ९९ गोबलीवर्दन्यायः। १०० गोमयपायसन्यायः। १०१ गोमहिष्यादिन्यायः। १०२ घट्टकुटीप्रभातन्यायः। १०३ घटप्रदीपन्यायः। १०४ घुणाक्षरन्यायः। १०५ चक्रभ्रमणन्यायः। १०६ चतुर्वेदविन्न्यायः। १०७ चम्पकपटवासन्यायः। १०८ चर्मैतन्तौ महिषी हन्तीतिन्याय.। १०९ चितासन्ततन्यायः। ११० चित्रपटन्यायः। १११ चित्राङ्गनान्यायः। ११२ चित्रानलन्यायः। ११३ चिन्तामणिं परित्यज्य काचमणिग्रहणन्यायः। ११४ चौरापराधात् माण्डव्यनिग्रहन्यायः। ११५ जलतुम्बिकान्यायः। ११६ जलमन्थनन्यायः। ११७ जलानयनन्यायः। ११८ जलौकान्यायः। ११९ जामात्रर्थं श्रपितस्य सूपादेरतिथ्युपकारकत्वमिति न्याय। १२० ज्ञानधर्म्मिण्यभ्रान्तप्रकारे तु विपर्य्यय इति न्यायः। १२१ ज्ञानादेर्निष्कर्षवद्गुणकर्मणोऽप्यङ्गीकार्य्य इतिन्याय.। १२२ ज्योतिर्न्यायः। १२३ तण्डुलन्यायः। १२४ तत्तादृगवगम्यते इतिन्यायः। १२५ तदभिन्नत्वमितिन्यायः। १२६ तदागमेऽपि दृश्यते इतिन्यायः। १२७ तप्तमाषकोद्धरणन्यायः। १२८ तमःप्रकाशन्यायः। १२९ तरतमभावापन्नमितिन्याय.। १३० तामस परिवर्ज्जयेदितिन्यायः। १३१ तालसर्पन्यायः। १३२ तिर्य्यगधिकरणन्यायः। १३३ तुलोन्नमनन्याय.। १३४ तुष्यतु दुर्ज्जन इतिन्याय.। १३५ त्यजेदेकं कुलस्यार्थे इतिन्याय। १३६ त्वण्या दुस्तटिनोतिन्याय.। १३७ दग्धरसनान्यायः। १३८ दग्धेन्धनवह्निन्याय.। १३९ दण्डसर्पमारणन्यायः। १४० दधिपयसि प्रत्यक्षो ज्वर इतिन्याय.। १४१ दन्तपरीक्षान्याय। १४२ दानशालकटन्यायः। १४३ दारुकशाल्मन्यायः। १४४ दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैरितिन्याय। १४५ देवताधिकरणन्याय। १४६ देवदत्तहन्तृहतन्यायः। १४७ देवदत्तापुत्रन्याय। १४८ देहलीदीपन्यायः। १४९ देवाधोसुखलन्याय.। १५० धटारोहणन्यायः। १५१ धर्म्मिकल्पनान्याय। १५२ धर्म्माधर्म्मन्यायः। १५३ धर्म्मिकल्पनान्याय.। १५४ धान्यपलालन्याय। १५५ नष्टाश्वदग्धरथन्याय.। १५६ न हि करकङ्कणदर्शनाय आदर्शापेक्षेतिन्यायः। १५७ न हि दृष्टे अनुपपन्नं नामेतिन्यायः। १५८ न हि निन्दा निन्दितु प्रवर्त्तते अपि तु विधेयं स्तोतुमितिन्याय.। १५९ न हि प्रत्यभिज्ञामात्रेण अर्थसिद्धिरितिन्यायः। १६० न हि भिक्षुको भिक्षुकमितिन्याय.। १६१ न हि विवाहानन्तरं वरपरीक्षा क्रियते इतिन्यायः। १६२ न हि शब्दमशब्देनान्वेतीतिन्याय। १६३ न हि सुतीक्ष्णाप्यसिधारा स्वयमेव छेत्तुमाहितव्यापारा भवतीतिन्यायः। १६४ नागोष्ट्रयतिन्याय.। १६५ नाज्ञातविशेषणा विशिष्टबुद्धिः विशेष्यं संक्रामतीतिन्यायः। १६६ नारिकेलफलाम्बुन्यायः। १६७ निम्नगाप्रवाहन्याय.।

१६८ नीरक्षीरन्यायः। १६९ नीलेन्दीवरन्यायः। १७० नृपनापितपुत्रन्यायः। १७१ नौनाविकन्यायः। १७२ पङ्कप्रक्षालनन्यायः। १७३ पटन्यायः। १७४ पटे पचिन्यायः। १७५ पतन्तमनुधावतो बद्धोऽपि मत इतिन्यायः। १७६ पदमध्यधिकाभावात् स्मारकात् न विशिष्यत इति न्यायः। १७७ परशुग्रहणन्यायः। १७८ परिघन्याय.। १७९ पर्व्वताधित्यकान्यायः। १८० पर्व्वतोपत्यकान्यायः। १८१ पाषाणेष्टिकान्यायः। १८२ पिञ्जरमुक्तपक्षिन्यायः। १८३ पिण्डं हित्वा करं लेढीतिन्यायः। १८४ पिष्टपेषणन्यायः। १८५ पुत्रलिप्सया दैवं भजन्त्या भर्त्ताऽपि नष्ट इतिन्यायः। १८६ पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नेतरानितिन्यायः। १८७ पुष्टलगुडन्यायः। १८८ पूर्व्वमपवादा निविशन्ते पश्चादुत्सर्गा इतिन्यायः। १८९ पूर्व्वात् परबलीयस्त्वन्यायः। १९० प्रकल्प्यापवादविषयं पश्चादुत्सर्गोऽभिनिविशते इतिन्यायः। १९१ प्रकाशाश्रयन्याय.। १९२ प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमितिन्यायः। १९३ प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनमितिन्यायः। १९४ प्रदीपन्यायः। १९५ प्रधानमल्लनिबर्हणन्याय.। १९६ प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपीतिन्यायः। १९७ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते इतिन्यायः। १९८ प्रसङ्गपठितन्यायः। १९९ प्रासादवासिन्यायः। २०० फलवत्सहकारन्यायः। २०१ बध्यघातकन्यायः। २०२ बहुच्छिद्रघटप्रदीपन्यायः। २०३ बहुवृकाकष्टन्यायः। २०४ बहुराजकपुरन्यायः। २०५ बहूनामनुग्रहो न्याय्य इतिन्यायः। २०६ ब्राह्मणपरिव्राजकन्यायः। २०७ ब्राह्मणवसिष्ठन्यायः। २०८ ब्राह्मणश्रमणन्याय.। २०९ भक्षितेऽपि लशुने न शान्तो व्याधिरितिन्यायः। २१० भक्षकुन्यायः। २११ भामतीन्यायः। २१२ भावप्रधानमाख्यातमितिन्याय। २१३ भ्वादिन्याय.। २१४ भिक्षुपादप्रसारणन्यायः। २१५ भूलिङ्गपक्षिन्याय.। २१६ भूयोव्योषणन्यायः। २१७ भैरवन्यायः। २१८ भ्रमरन्यायः। २१९ मक्षिकान्यायः। २२० मज्जनोन्मज्जनन्यायः। २२१ मण्डूकप्लुतिन्यायः। २२२ मत्स्यकण्टकन्याय। २२३ मरणाद्वरो व्याधिरितिन्यायः। २२४ मल्लग्रामन्यायः। २२५ महिषीप्रसवोन्मुखीतिन्यायः। २२६ मात्स्यन्यायः। २२७ मुञ्जादिषीकान्यायः। २२८ मूषकभयेन कथात्यागन्यायः। २२९ मूर्खसेवकन्यायः। २३० मृषाशिक्षितास्त्रन्यायः। २३१ मृगभयेन प्रस्थानाश्रयणन्याय.। २३२ मृगवागुरान्याय। २३३ मृतमारणन्यायः। २३४ यः कारयति स करोत्येवेतिन्याय.। २३५ यः कुरुते स भुङ्क्ते इतिन्याय। २३६ यत् कृतकं तदनित्यमितिन्यायः। २३७ यत्परः शब्दः स शब्दार्थ इतिन्यायः। २३८ यत्प्रायः श्रूयते यादृक् तत्तादृगवगम्यते इतिन्यायः।

२३९ यत्रोभयोः समो दोष इतिन्यायः। २४० यथासंख्यन्यायः। २४१ यदर्था प्रवृत्तिः तदर्थः प्रतिषेध इतिन्यायः। २४२ यद्विवाहगीतगानमितिन्यायः। २४३ यादृशं मुखं तादृश चपेटमितिन्यायः। २४४ यादृशो यक्षस्तादृशो बलिरितिन्यायः। २४५ यस्याज्ञानं भ्रमस्तस्य भावः सम्यक् स वेद स इतिन्यायः। २४६ यावत्किञ्चित्तावत्क्रियार्थेतिन्यायः। २४७ येन उत्क्रम्यते येन च उपसंह्रियते स वाक्यार्थ इतिन्यायः। २४८ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इतिन्याय। २४९ योजनप्राप्यायां कावेर्यां मलबन्धनन्यायः। २५० रक्तपटन्यायः। २५१ रज्जुसर्पन्याय.। २५२ रथवडवान्यायः। २५३ रसिकत्वादिन्याय.। २५४ राजपुत्रव्याधन्यायः। २५५ राजसं तामसञ्चेतिन्यायः। २५६ रासभरटितन्यायः। २५७ रूढिर्योगमपहरतीतिन्यायः। २५८ रेखागवयन्यायः। २५९ रोगिन्याय.। २६० लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरितिन्यायः। २६१ लाङ्गलजीवनमितिन्याय। २६२ लोहचुम्बकन्यायः। २६३ लोहाग्निन्याय.। २६४ वकबन्धनन्यायः। २६५ वरगोष्ठीन्यायः। २६६ वरघाताय कन्यावरणमितिन्याय। २६७ वस्तूनि मानान्यपेक्ष्य प्रयोजनानीतिन्यायः। २६८ वह्निधूमन्यायः। २६९ वह्निन्यायः। २७० वाजिमन्दुरान्यायः। २७१ वातादिन्याय। २७२ वायुभक्षकन्यायः। २७३ वायुशैत्यौष्ण्यन्याय। २७४ विधिनिषेधौ सति विशेषबाधे विशेषणमुपसंक्रामेत इतिन्याय। २७५ विधेय हि स्तूयते वस्त्वितिन्याय। २७६ विपरीत बलाबलमितिन्यायः। २७७ विश्वखल्वाटन्यायः। २७८ विवाह प्रष्टसम्बलन्यायः। २७९ विशिष्ट वृत्तेरितिन्यायः। २८० विशिष्टस्य वैशिष्ट्यमितिन्याय.। २८१ विषं मृत्युरितिन्यायः। २८२ विषभक्षणन्यायः। २८३ विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतमितिन्यायः। २८४ वृषमकम्पनन्याय.। २८५ वृद्धकुमारीवाक्यन्याय। २८६ वृद्धिमिष्टवतो मूलं विनष्टमितिन्यायः। २८७ वृश्चिकीगर्भन्यायः। २८८ वैशेष्यात्तु तद्वाद इतिन्यायः। २८९ व्यञ्जकव्यङ्गन्याय.। २९० वापीचौरन्यायः। २९१ मलशोधनाय शस्त्रग्रहणमितिन्याय.। व्रीहिवीजन्याय । २९३ शाखा. च न्यायः। २९४ शवोद्वर्त्तनन्यायः। २९५ ~ चक्रन्यायः। २९६ शालिसमृद्धौ कोद्रवनाशनन्यायः। २९७ शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्य्यतेतिन्यायः। २९८ शिरोवेष्टनेन नासिकास्पर्श इतिन्यायः। २९९ शैलुषीन्यायः। ३०० श्यालशुनकन्याय.। ३०१ श्वः कर्त्तव्यमद्य कुर्व्वितिन्याय.। ३०२ श्वपुच्छोन्नामनन्यायः। ३०३ सच्छिद्रघटाम्बुन्यायः। ३०४ सति बोधे न जानातीतिन्यायः। ३०५ सन्दिग्धस्य सन्दिग्धं

प्रयोजनं चेत् विचारमर्हतीतिन्यायः। ३०६ समुद्रवृष्टिन्यायः। ३०७ सम्भवदेकवाक्यत्वे वाक्यभेदो न चेष्यते इतिन्यायः। ३०८ सर्व्वं वाक्यं सावधारणमितिन्यायः। ३०९ सर्व्वं कार्य्यं सकारणकमितिन्यायः। ३१० सर्व्वविशेषणं साधारणमितिन्यायः। ३११ सर्व्वश्राव्याप्रत्ययमेक कर्म्मेतिन्यायः। ३१२ साधनात् प्रकृतमितिन्यायः। ३१३ साधुमैत्रीन्यायः। ३१४ सार्व्वजनीनतुल्यायव्ययन्यायः। ३१५ सावकाशनिरवकाशयोर्निरवकाशो बलीयानितिन्यायः। ३१६ सिंहव्याघ्रन्यायः। ३१७ सिंहावलोकन्याय.। ३१८ सुतजनिव्यतिन्याय.। ३१९ सुभगाभिक्षुकन्याय.। ३२० सुन्दोपसुन्दन्यायः। ३२१ सूत्रशाटिकान्यायः। ३२२ सोपानारोहणन्यायः। ३२३ स्तनन्धयन्यायः। ३२४ स्थालीपुलाकन्याय.। ३२५ स्थावरजङ्गमविषन्यायः। ३२६ स्थूणानिखनन्यायः। ३२७ स्थूलारुन्धतीन्यायः। ३२८ स्फटिकलौहित्यन्यायः। ३२९ स्वकरकङ्कणन्यायः। ३३० स्वयमघ्नानिकर्त्तृत्वात् स्वकुलाङ्गारतां गत इतिन्यायः। ३३१ स्वप्नन्याय। ३३२ स्वशिशुमपि चुम्बन्तमिति न्यायः। ३३३ स्वामिभृत्यन्यायः। ३३४ हस्तामलकन्यायः। इति श्रीरामदयालुशिष्यरघुनाथेन विरचितो लौकिकन्यायसंग्रहः ॥)

न्यायसारिणी, स्त्री, (न्याय सरतीति। सृ+णिनि+ङीप्।) युक्तिपूर्व्वककर्म्मकारिणी तत्पर्यायः। कुण्ठी २। इति त्रिकाण्डशेषः ॥

न्यायी, [न्] त्रि, (न्यायोऽस्यास्तीति। न्याय+इनिः।) न्यायवान्। न्यायोऽस्यास्तीत्यर्थे इन्प्रत्ययनिष्पन्नः ॥

न्याय्यं, त्रि, (न्यायादनपेतम्। न्याय+"धर्म्मपथ्यर्थन्यायादनपेते।" ४।४।९२। इति यत्।) न्यायादनपेतम्। (न्याये भवः। न्यायादागतो वा। "दिगादिभ्यो यत्।" ४।३।५४। इति यत्।) न्यायागतधनादिः। इति भरतः ॥ तत्पर्य्यायः। युक्तम् २ औपयिकम् ३ लभ्यम् ४ भजमानम् ५ अभिनीतम् ६। इत्यमरः। २।८।२५॥ क्रमोचितम् ७। इति शब्दरत्नावली ॥ (यथा, मनुः। २।१५२।
"देवाश्चैतान् समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥")

न्यासः, पु, (न्यस्यत इति। नि+अस+घञ्।) उपनिधिः। स्थाप्यद्रव्यम्। इत्यमरः। २।९।८१॥ अस्य विवरणं निक्षेपशब्दे द्रष्टव्यम् ॥ ॥ विन्यासः। अर्पणम्। यदाह कालिदासः।
'पदन्यासैरासीत् कमलपरिपूर्णा वसुमती
दृगान्दोलैरिन्दीवरमयमभूदम्बरतलम्।
इदं याचे किञ्चिद्विरचय वचः क्षीरमधुरं
धरायामस्यास्तां विधुसखि। सुधाया. परिचय. ॥"
त्यागः। यथा, श्रीभगवद्गीताया १८ अध्याये।
"काम्यानां कर्म्मणां न्यास सन्न्यासं कवयो विदुः।
सर्व्वकर्म्मफलत्याग प्राहुस्त्याग विचक्षणा. ॥"

काशिकाख्यपाणिनिसूत्रव्याख्यानग्रन्थविशेषः। यथा, माघे। २।११२।
"अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥"
सन्न्यासः। यथा,—
"न्यासो विविदिषान्यासं विद्वन्न्यासश्च भेदतः।
हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात् ॥"
इति जीवन्मुक्तिप्रथमविवेकः ॥ ॥

पूजाजपादेः प्राग्विहिताशुमन्त्रविहिताधर्थ देहान्तर्बहिर्व्वर्णादिविन्यासः। तत्र न्यासकालो यथा,
"प्रातःकालेऽथवा पूजासमये होमकर्म्मणि।
जपकालेऽपि वा तेषां विनियोगः पृथक् पृथक्।
पूजाकाले समस्तं वा कुर्य्यात् साधकसत्तमः ॥"
इति योगिनीहृदयम् ॥ ॥

अथ मातृकान्यासः। अस्य मातृकामन्त्रस्य ब्रह्मऋषिर्गायत्री छन्दो मातृकासरस्वती देवता हलो बीजानि स्वराः शक्तयो लिपिन्यासे विनियोगः। शिरसि ॐ ब्रह्मणे ऋषये नमः। मुखे ॐ गायत्र्यैच्छन्दसे नमः। हृदि ॐ मातृकासरस्वत्यै देवतायै नमः। गुह्ये ॐ व्यञ्जनेभ्यो बीजेभ्यो नमः। पादयोः स्वरेभ्यः शक्तिभ्यो नमः। तथा च ज्ञानार्णवे।
मातृकां शृणु देवेशि। न्यसेत् पापनिकृन्तनीम्।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ॥
देवता मातृकादेवी बीजं व्यञ्जनसञ्चयम्।
शक्तयस्तु स्वरा देवि। षडङ्गन्यासमाचरेत् ॥
ततः षडङ्गन्यासौ।
अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः।
इं चं छं जं झं ञं ईं तर्ज्जनीभ्यां स्वाहा।
उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट्।
एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम्।
ओं पं फं बं भं मं औं कनिष्ठाभ्यां वौषट्।
अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। अं कं खं गं घं ङं आं हृदयाय नमः। इत्यादि।
तथा च ज्ञानार्णवे।
अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम् ॥
ओं औं मध्ये पवर्गन्तु बिन्दुयुक्तं न्यसेत् प्रिये।
अनुस्वारविसर्गान्तर्यशवर्गौ सलक्षकौ ॥
हृदयन्तु शिरो देवि। शिखा कवचकं तथा।
नेत्रमस्त्रं न्यसेत् देवि नमःस्वाहा क्रमेण तु ॥
वषट् हुं वौषडन्तञ्च फडन्तं योजयेत् प्रिये।
षडङ्गोऽयं मातृकायाः सर्व्वपापहरः स्मृतः ॥
अथान्तर्मातृकान्यासः।
अकारादिषोडशस्वरान् सबिन्दून् षोडशदलकमले कण्ठमूले न्यसेत्। ककारादिद्वादशवर्णान् सबिन्दून् द्वादशदलकमले हृदये न्यसेत्। डकारादिदशवर्णान् सबिन्दून् दशदलकमले नाभौ न्यसेत्। बकारादिषड् वर्णान् सबिन्दून् षड्दलकमले लिङ्गमूले न्यसेत्। वकारादिचतुरो वर्णान् सबिन्दून् चतुर्द्दलकमले मूलाधारे न्यसेत्।

हक्षवर्णद्वयं सबिन्दुं द्विदलकमले भ्रूमध्ये न्यसेत्।
तथा च ज्ञानार्णवे।
"षोडशपत्राम्बुजे कण्ठे स्वरान् षोडश विन्यसेत्।
द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत् ॥
दशपत्राम्बुजे नाभौ डकारादीन्न्यसेद्दश।
षट्पत्रमध्ये लिङ्गस्थे बकारादीन्न्यसेच्च षट् ॥
आधारे चतुरो वर्णान् न्यसेद्वादीन् चतुर्द्दले।
हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये ॥"
अगस्त्यसंहितायाम्।
"एकैकवर्णमेकैकपत्रान्ते विन्यसेत् प्रिये।
एवमन्तः प्रविन्यस्य मनसातो बहिर्न्यसेत् ॥"
वैष्णवे तु।
"एकैकवर्णमुच्चार्य्य मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः ॥
अथान्तर्मातृकान्यासो मूलाधारे चतुर्द्दले।
सुवर्णाभे वशषसचतुर्व्वर्णवि[illegible]ते ॥
षड्दले वैद्युतनिभे स्वाधिष्ठानेऽमलत्विषि।
बभमैर्यरलैर्युक्ते वर्णैः षड्भिश्च सुव्रते।
मणिपूरे दशदले नीलजीमूतसन्निभे।
डादिफान्तदलैर्युक्ते बिन्दुनादविभूषिते ॥
अनाहते द्वादशारे प्रवालरुचिसन्निभे।
कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे ॥
विशुद्धे षोडशदले धूम्राभे स्वरभूषिते।
आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाञ्छिते ॥
सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादित्रिरेखाब्जहलक्षत्रयभूषिते ॥
तन्मध्ये परबिन्दुञ्च सृष्टिस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेन्न्यासोऽयमान्तरः ॥" ॥
अथ बाह्यमातृकान्यासः।
अस्या ध्यानं यथा,—
"पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥"
एवं ध्यात्वा न्यसेत्। तत्राङ्गुलिनियमस्तन्त्रे।
"ललाटे नासिकामध्ये विन्यसेन्मुखपङ्कजे।
तर्ज्जनी मध्यमानामा वृद्धानामे च नेत्रयोः ॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः।
मध्यास्तिस्रो गण्डयोश्च मध्यमाथोष्ठयोर्न्यसेत् ॥
अनामां दन्तयोर्न्यस्य मध्यमास्तसमाङ्गके।
मुखेऽनामां मध्यमाञ्च हस्तपादेषु पार्श्वयोः ॥
कनिष्ठानामिकामध्यास्तास्तु पृष्ठे च विन्यसेत्।
ता. साङ्गुष्ठा नाभिदेशे सर्व्वाः कुक्षौ च विन्यसेत् ॥
हृदये च तलं सर्व्वमंसयोश्च ककुत्स्थले।
हृत्पूर्व्वं हस्तपत्कुक्षिमुखेषु तलमेव च ॥
एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः।
अज्ञात्वा विन्यसेद्यस्तु न्यास. स्यात्तस्य निष्फलः ॥"
गौतमीये।
"ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्ये दोःपत्सन्ध्यग्रकेषु च ॥"

पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेऽंशके ।
ककुदंशे च हृत्पूर्व्वं पाणिपादयुगे तथा ॥
जठराननयोर्न्यसेन्मातृकार्णान् यथाक्रमात् ॥”
तद्यथा । अं नमो ललाटे । आं नमो मुखे । इं ईं चक्षुषोः । उं ऊं कर्णयोः । ऋं ॠं नसोः । ऌं ॡं गण्डयोः । एं ओष्ठे । ऐं अधरे । ओं ऊर्द्ध्वदन्ते । औं अधोदन्ते । अं ब्रह्मरन्ध्रे । अः मुखे । कं दक्षबाहुमूले । खं कूर्परे । गं मणिबन्धे । घं अङ्गुलिमूले । ङं अङ्गुल्यग्रे । एवं चं ५ वामबाहुमूलसन्ध्यग्रकेषु । एवं टं ५ दक्षिणपादमूलसन्ध्यग्रकेषु । एवं तं ५ वामपादमूलसन्ध्यग्रकेषु । पं दक्षिणपार्श्वे । फं वामपार्श्वे । बं पृष्ठे । भं नाभौ । मं उदरे । यं हृदि । रं दक्षबाहुमूले । लं ककुदि । वं वामबाहुमूले । शं हृदादिदक्षहस्ते । षं हृदादिवामहस्ते । सं हृदादिदक्षपादे । हं हृदादिवामपादे । ळं हृदाद्युदरे । क्षं हृदादिमुखे । सर्व्वत्र नमोऽन्तेन न्यसेत् । तथा च ।
“ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्विन्दुवर्ज्जितः ।
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः ॥”
इति भट्टः ॥

अथ संहारमातृकान्यासः ।

तस्या ध्यानं यथा,—
“अक्षस्रजं हरिणपोतमुदग्रटङ्क-
विद्याः करैरविरतं दधतीं त्रिनेत्राम् ।
अर्द्धेन्दुमौलिमरुणामरविन्दरामां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ॥”
न्यासस्तु क्षकाराद्यकारान्तः । यथा । क्षं नमो हृदादिमुखे इत्यादि ॥ * ॥
अपरञ्च ।
“चतुर्धा मातृका प्रोक्ता केवला बिन्दुसंयुता ।
सविसर्गा सोभया च रहस्यं शृणु कथ्यते ॥
विद्याकरी केवला च सोभया भुक्तिदायिनी ।
पुत्त्रदा सविसर्गा तु सबिन्दुर्वित्तदायिनी ॥”
विशुद्धेश्वरे ।
“वाग्भवाद्या च वाक्सिद्ध्यै रमाद्या श्रीप्रसिद्धये ।
शक्तिबाद्या सर्व्वसिद्ध्यै कामाद्या लोकवश्यदा ॥
श्रीकण्ठाद्यानिमान् न्यस्येत् सर्व्वमन्त्रः प्रसीदति ॥”
श्रीविद्याविषये नवरत्नेश्वरे ।
“वाग्भवाद्या नमोऽन्ताश्च न्यस्तव्या मातृकाक्षराः ।
श्रीविद्याविषये मन्त्री वाग्भवाद्यर्थसिद्धये ॥”
यामले ।
“भूतशुद्धिलिपिन्यासौ विना यस्तु प्रपूजयेत् ।
विपरीतफलं दद्यादभक्त्या पूजनं यथा ॥”
सामान्यन्यासे अङ्गुलिनियमो गौतमीये ।
“मनसा विन्यसेन्न्यासान् पुष्पेणैवाथवा मुने ।
अङ्गुष्ठानामिकाभ्यां वा चान्यथा विफलं भवेत् ॥”
विशेषन्यासे तु नायं नियमः ॥ * ॥

अथ पीठन्यासः ।

ॐ आधारशक्तये नमः ॐ प्रकृतये नमः ॐ कूर्म्माय नमः ॐ अनन्ताय नमः ॐ पृथिव्यै नमः ॐ क्षीरसमुद्राय नमः ॐ श्वेतद्वीपाय नमः एवं मणिमण्डपाय कल्पवृक्षाय मणिवेदिकायै रत्नसिंहासनाय एतत् सर्व्वमु हृदि । ततो दक्षिणस्कन्धे ॐ धर्म्माय नमः । वामस्कन्धे ॐ ज्ञानाय नमः । एवं वामोरौ वैराग्याय । दक्षिणोरौ ऐश्वर्य्याय । मुखे अधर्म्माय । वामपार्श्वे अज्ञानाय । नाभौ अवैराग्याय । दक्षिणपार्श्वे अनैश्वर्य्याय । सर्व्वत्र प्रणवादिनमोऽन्तेन न्यसेत् । तथा च शारदायाम् ।
“अंसोरुयुग्मयोर्व्विद्वान् प्रादक्षिण्येन साधकः ।
धर्म्मं ज्ञानञ्च वैराग्यमैश्वर्य्यं क्रमशः सुधीः ॥
मुखपार्श्वनाभिपार्श्वेष्वधर्म्मादीन् प्रकल्पयेत् ॥”
पुनर्हृदि । ॐ अनन्ताय नमः । एवं पद्माय नमः । अं सूर्य्यमण्डलाय द्वादशकलात्मने नमः । उं सोममण्डलाय षोडशकलात्मने नमः । मं वह्निमण्डलाय दशकलात्मने नमः । सं सत्त्वाय नमः । रं रजसे नमः । तं तमसे नमः । आं आत्मने नमः । अं अन्तरात्मने नमः । पं परमात्मने नमः । ह्रीं ज्ञानात्मने नमः । इत्यन्तं विन्यस्य हृत्पद्मस्य पूर्व्वादिकेशरेषु तत्तत्कल्पोक्तपीठशक्तीर्मध्ये पीठमनुञ्च न्यसेत् । यथा शारदायाम् ।
“अनन्तं हृदये पद्मं तस्मिन् सूर्य्येन्दुपावकान् ।
एषु स्वस्वकला न्यस्य वामाद्यक्षरपूर्व्वकः ॥
सत्त्वादीन् त्रिगुणान् न्यस्य तथैवात्र गुरूत्तम ।
“आत्मानमन्तरात्मानं परमात्मानमेव च ।
ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुं ततः ॥”

अथ ऋष्यादिन्यासः ।

ऋषिस्तु ।
“महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम् ।
संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः ॥
गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्त्तितः ।
सर्व्वेषां मन्त्रतत्त्वानां छादनाच्छन्द उच्यते ॥
अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम् ।
सर्व्वेषामेव जन्तूनां भावनात् प्रेरणात्तथा ॥
हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत् ।
ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रफलभाग्भवेत् ॥
दौर्ब्बल्यं याति मन्त्राणां विनियोगमजानताम् ॥”
तन्त्रान्तरे ।
“ऋषिं न्यसेन्मूर्द्धि देशे छन्दस्तु मुखपङ्कजे ।
देवतां हृदये चैव बीजन्तु गुह्यदेशके ॥
शक्तिञ्च पादयोश्चैव सर्व्वाङ्गे कीलकं न्यसेत् ॥”

अथाङ्गन्यासः । तत्राङ्गुलिनियमः ।
त्रिद्व्येकदशकद्वित्रिसंख्यया शैवसम्भवे ।
अङ्गुलीनामिति वचनादिति सर्व्वसाधारणम् ॥
यामले ।
“हृदयं मध्यमानामातर्ज्जनीभिः स्मृतं शिरः ।
मध्यमातर्ज्जनीभ्यां स्यादङ्गुष्ठेन शिखा स्मृता ॥
दशभिः कवचं प्रोक्तं तिसृभिर्नेत्रमीरितम् ।
प्रोक्ताङ्गुलीभ्यामस्त्रं स्यादङ्गकल्पिरियं मता ॥
तिसृभिस्तर्ज्जनीमध्यमानामाभिः ॥
तर्ज्जनीमध्यमानामा प्रोक्ता नेत्रत्रये क्रमात् ।
यदि नेत्रद्वयं प्रोक्तं तदा तर्ज्जनिमध्यमे ॥”
इति भट्टधृतवचनात् ।
“हृदयादिषु विन्यस्येदङ्गमन्त्रांस्ततः सुधीः ।
हृदयाय नमः पूर्व्वं शिरसे वह्निवल्लभा ॥
शिखायै वषडित्युक्तं कवचाय हुमीरितम् ।
नेत्रत्रयाय वौषट् स्यादस्त्राय फडितिक्रमात् ॥
पञ्चाङ्गमन्त्रानित्युक्तान् षडङ्गेषु नियोजयेत् ।
पञ्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत् ॥”
इति शारदावचनम् ॥
वैष्णवे तु ।
“अनङ्गुष्ठा ऋजवो हस्तशाखा
भवेन्मुद्रा हृदये शीर्षके च ।
अधोऽङ्गुष्ठा खलु मुष्टिः शिखायां
करद्वन्द्वाङ्गुलयो वर्म्मणि स्युः ॥
नाराचमुष्ट्युद्धृतबाहुयुग्म-
काङ्गुष्ठतर्ज्जन्युदितो ध्वनिस्तु ।
विष्वग्विशक्ता कथितास्त्रमुद्रा
नेत्राक्षिणी तर्ज्जनिमध्यमे च ॥”
शारदायाम् ।
“न्यासक्रमेण देहेषु धर्म्मादीन् पूजयेत्ततः ।
पुष्पाद्यैः पीठमन्त्रान्त तस्मिंश्च परदेवताम् ॥”
इति दर्शनात् शरीरे पीठपूजा ।
“अङ्गहीनस्य मन्त्रस्य स्वेनैवाङ्गानि कल्पयेत् ॥”
तथा प्रपञ्चयामले ।
“स्वनामाद्यक्षरं बीजं सर्व्वेषामभिधीयते ॥”

अथ व्यापकन्यासः ।

नवधा सप्तधा वापि मूलेन पञ्चधा त्रिधेति भैरवतन्त्रवचनात् । नवधाकरणे शिरस्तः पादान्तं पादतः शिरोऽन्तम् । एवं चतुर्धा । सप्तधाकरणे तादृशं त्रिधा । पञ्चधाकरणे तादृशं द्विधा । त्रिधाकरणेऽपि तादृशमेकधा । हृदादिमुखान्तञ्च शेषे एकधा सर्व्वत्रैव । शतधाकरणे तु तादृशं पञ्चाशद्वारं हृदादिमुखान्तं नास्तीति व्यापकन्यासः । इत्यागमतत्त्वविलासः ॥ * ॥ नित्यं न्यासकरणफलं यथा,—
“आगमोक्तेन विधिना नित्यं न्यासं करोति यः ।
देवताभावमाप्नोति मन्त्रसिद्धिः प्रजायते ॥
यो न्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये ।
विघ्ना दृष्ट्वा पलायन्ते सिंहं दृष्ट्वा यथा गजाः ॥”
न्यासाकरणे दोषो यथा,—
“अकृत्वा न्यासजालं यो मूढ़त्वात् प्रजपेन्मनुम् ।
सर्व्वविघ्नैः स बाध्यः स्याद्व्याघ्रैर्मृगशिशुर्यथा ॥”
इति तन्त्रसारः ॥ * ॥
एते न्यासाः सामान्यपूजाप्रकरणोक्ताः । अन्ये च देवताविशेषे बहवः सन्ति बाहुल्यभिया तेषां प्रमाणादिकमलिखित्वा केवलं तत्र विष्णुविषये केशवकीर्त्त्यादि १ मूर्त्तिपञ्जर २ तत्त्व ३ भूतिपञ्जर ४ दशाङ्ग ५ पञ्चाङ्ग ६ न्यासाः । शिवविषये श्रीकण्ठादि १ ईशानादिपञ्चमूर्त्ति २ मन्त्र ३ मूर्त्ति ४ गोलक ५ सुमनादि ६ भूषण ७ न्यासाः । अन्नपूर्णाविषये

पदन्यासः १। श्रीविद्याविषये वश्चिन्यादि १ नवयोन्यात्मक २ पीठ ३ तत्त्व ४ पञ्चदशी ५ षोडशी ६ संहार ७ स्थिति ८ सृष्टि ९ नाद १० षोढ़ा ११ गणेश १२ ग्रह १३ नक्षत्र १४ योगिनी १५ राशि १६ त्रिपुरा १७ षोडशनित्या १८ कामरति १९ सृष्टिस्थिति २० प्रकटयोगिनी २१ आयुध २२ न्यासाः। तारादिषये रुद्र १ ग्रह २ लोकपाल ३ न्यासाः। एतेषां प्रमाणानि तन्त्रसारादौ द्रष्टव्यानि॥

न्युङ्खः, पु, (न्युङ्ख्यते इति। नि+उङ्ख गतौ+घञ्।) सामवेदे नियतप्रणवषट्कम्। दीर्घवानयमिति नयनानन्दः। इत्यमरभरतौ॥ सम्यक्। मनोज्ञः। इति मेदिनी। खे, ॥

न्युब्जं, क्ली, (न्युब्जति अधोमुखीभवतीति। नि+उब्ज+अच्।) कर्म्मरङ्गफलम्। इति मेदिनी। जे, १२॥ श्राद्धादिपात्रभेदः। इति शब्दरत्नावली॥ तथा च गोभिलः। प्रथमे पात्रे संस्रवान् समवनीय पात्रं न्युब्जं कुर्य्यात् पितृभ्यः स्थानमसीति। प्रथमे पात्रे पितृपात्रे। संस्रवान् पितामहादिपश्चार्घपात्रस्थशेषजलानि। समवनीय क्रमेण स्थापयित्वा तत्पात्रस्य प्रपितामहपात्रेणाच्छादनमाह शौनकः। प्रपितामहपात्रेण पिधाय प्रतिष्ठापयतीति। याज्ञवल्क्येनापि तत्पात्रस्याधःस्थत्वाभिधानात् पात्रान्तरेण पिधानमाक्षिप्तम्। तथा च याज्ञवल्क्यः।

"दत्त्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः।
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥"

विधानतः यथापूर्व्वं स्थापितं क्रमेण। तेन प्रपितामहपात्रेणाधःकृतं पितृपात्रं ऊर्द्ध्वमुखमवस्थितं न्युब्जं करोति। तन्न्यासश्च। पितृपात्रे निधायाथ न्युब्जमुत्तरतो न्यसेत्। इति मत्स्यपुराणवचने न्यसेदित्यत्राख्यातोपस्थापितकर्त्तुर्व्वामपार्श्वे कर्त्तव्यः। इति श्राद्धतत्त्वम्॥

न्युब्जः, पु, (नि+उब्ज+अच्।) दर्भमयस्रुक्। इति मेदिनी। जे, ११॥ (यथा,—

"शयनासनयानानामुत्तानानान्तु दर्शनम्।
न्युब्जानामितरेषाञ्च पात्रादीनामशोभनम्॥"

इति वाभटे शारीरस्थाने। ६। २३॥) कुशः। स्रुक्। इति हेमचन्द्रः॥

न्युब्जः, त्रि, (न्युब्जति अधोमुखीभवतीति। नि+उब्ज+अच्।) कुब्जः। अधोमुखः। इति मेदिनी। जे, १२॥ (यथा, हरिवंशे। ६१। ६।

"स तत्रैकेन पादेन शकटं पर्य्यवर्त्तयत्।
न्युब्जं पयोधराकाङ्क्षी चकार च रुरोद च॥")

रुजा भुग्नः। इत्यमरः। २। ६। ६१॥ रोगेण वक्रीकृतपृष्ठाधोमुखपुरुषादिः। इति भरतः॥

न्युब्जखड्गः, पु, (न्युब्जः खड्गः।) कुब्जखड्गः। बाँका तरवार इति भाषा॥ तत्पर्य्यायः। कटीतलः २। इति त्रिकाण्डशेषः॥

न्यूनं, त्रि, (न्यूनयति। नि+ऊन परिहाणे+अच्।) गर्ह्यम्। (यथा, महाभारते। १३। १४३। ४६।

"एतैः कर्म्मफलैर्द्देवि। न्यूनजातिकुलोद्भवः।
शूद्रोऽप्यागमसम्पन्नो द्विजो भवति संस्कृतः॥")

ऊनम्। इत्यमरः। ३। ३। १२७॥ (यथा, मनुः। ८। २०३।

"नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरे न तिरोहितम्॥")

न्यूनपञ्चाशद्भावः, पु, (न्यूनपञ्चाशतः ऊनपञ्चाशद्वायूनां भावो यत्र।) ऊनपञ्चाशद्भावः। पागल इत्यर्थ.। यथा,—

"उदीरितेन्द्रियो धाता वीक्षाञ्चक्रे यदात्मजाम्।
तदैव न्यूनपञ्चाशद्भावा जाताः शरीरतः॥"

इति कालिकापुराणे द्वितीयाध्यायः॥

नृस्थिमाली, [न्] पु, (नृणामस्थिमाला नृस्थिमाला सा अस्त्यस्येति। इनिः।) शिवः। इति त्रिकाण्डशेषः॥ नरास्थिमालाविशिष्टे, त्रि॥